CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीमद्भागवतमाहात्म्यं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति
तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ १ ॥ नैमिशे सूतमासीनमभिवाद्य महामतिम् ॥ कथामृतरसास्वादकुशलः
शौनकोऽब्रवीत् ॥ २ ॥ ॥ शौनक उवाच ॥ अज्ञानध्वान्तविध्वंस कोटिसूर्यसमप्रभ ॥ सूताऽऽख्याहि कथासारं मम कर्णरसायनम् ॥ ३ ॥
भक्तिज्ञानविरागाप्तविवेको वर्धते कथम् ॥ मायामोहनिरासश्च वैष्णवैः क्रियते कथम् ॥ ४ ॥ इह घोरे कलौ प्राप्ते जीवश्चासुरतां गतः ॥ क्लेशक्रा-
न्तस्य तस्यैव शोधने किं परायणम् ॥ ५ ॥ श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनम् ॥ कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधुना ॥ ६ ॥ चिन्ता-
मणिर्लोकसुखं सुरेन्द्रः स्वर्गसम्पदम् ॥ प्रयच्छति गुरुः प्रीतो वैकुण्ठं योगिदुर्लभम् ॥ ७ ॥ ॥ सूत उवाच ॥ प्रीतिः शौनक चित्ते ते यतो वच्मि
विचार्य च ॥ सर्वसिद्धान्तनिष्पन्नं संसारभयनाशनम् ॥ ८ ॥ भक्त्योघवर्धनं यच्च कृष्णसन्तोषहेतुकम् ॥ तदहं तेऽभिधास्यामि सावधानतया
शृणु ॥ ९ ॥ कालव्यालमुखग्रासत्रासनिर्णाशहेतवे ॥ श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥ १० ॥ एतस्मादपरं किञ्चिन्मनःशुद्ध्यै न
विद्यते ॥ जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत् ॥ ११ ॥ परीक्षिते कथां वक्तुं सभायां संस्थिते शुके ॥ सुधाकुम्भं गृहीत्वैव देवास्तत्र
समागमन् ॥ १२ ॥ शुकं नत्वाऽवदन् सर्वे स्वकार्यकुशलाः सुराः ॥ कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम् ॥ १३ ॥ एवं विनिमये जाते
सुधा राज्ञा प्रपीयताम् ॥ प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ॥ १४ ॥ क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् ॥ ब्रह्मरातो
विचार्यैति तदा देवाञ्जहास ह ॥ १५ ॥ अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतम् ॥ श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा ॥ १६ ॥
राज्ञो मोक्षं तथा वीक्ष्य पुरा धाताऽपि विस्मितः ॥ सत्यलोके तुलां बद्ध्वाऽतोलयत्साधनान्यदः ॥ १७ ॥ लघून्यन्यानि जातानि गौरवेण इदं
महत् ॥ तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः ॥ १८ ॥ मेनिरे भगवद्रूपं शास्त्रं भागवतं क्षितौ ॥ पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम्
॥ १९ ॥ सप्ताहश्रवणेनैव सर्वथा मुक्तिदायकम् ॥ सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः ॥ २० ॥ यद्यपि ब्रह्मसंबन्धाच्छ्रुतमेतत्सुरर्षिणा ॥
सप्ताहश्रवणविधिः कुमारैस्तस्य भाषितः ॥ २१ ॥ ॥ शौनक उवाच ॥ लोकविग्रहयुक्तस्य नारदस्यास्थिरस्य च ॥ विधिश्रवे कुतः प्रीतिः
संयोगः कुत्र तैः सह ॥ २२ ॥ ॥ सूत उवाच ॥ अत्र ते कीर्तयिष्यामि भक्तिपुष्टं कथानकम् ॥ शुकेन मम यत्प्रोक्तं रहः शिष्यं विचार्य
च ॥ २३ ॥ एकदा तु विशालायां चत्वार ऋषयोऽमलाः ॥ सत्सङ्गार्थं समायाता ददृशुस्तत्र नारदम् ॥ २४ ॥ ॥ कुमारा ऊचुः ॥ कथं ब्रह्मन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीनमुखः कुतश्चिन्तापरो भवान् ॥ त्वरितं गम्यते कुत्र कुतश्चागमनं तव ॥ २५ ॥ इदानीं शून्यचित्तोऽसि गतवित्तो यथा जनः ॥ तवेदं मुक्तसङ्गस्य नोचितं वद कारणम् ॥२६॥ ॥ नारद उवाच ॥ अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति ॥ पुष्करं च प्रयागं च काशीं गोदावरीं तथा ॥ २७ ॥ हरिक्षेत्रं कुरुक्षेत्रं श्रीरङ्गं सेतुबन्धनम्॥ एवमादिषु तीर्थेषु भ्रममाण इतस्ततः ॥ २८॥ नापश्यं कुत्रचिच्छर्म मनःसन्तोषकारकम् ॥ कलिनाऽधर्ममित्रेण धरेयं बाधिताऽधुना ॥ २९ ॥ सत्यं नास्ति तपः शौचं दया दानं न विद्यते ॥ उदरम्भरयो जीवा वराकाः कूटभाषिणः ॥ ३० ॥ मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥ पाखण्डनिरताः सन्तो विरक्ताः सपरिग्रहाः ॥ ३१ ॥ तरुणीप्रभुता गेहे शालको बुद्धिदायकः ॥ कन्याया विक्रयो लोभाद्दम्पतीनां च कल्कनम् ॥ ३२ ॥ आश्रमा यवनै रुद्धास्तीर्थानि सरितस्तथा ॥ देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ॥ ३३ ॥ न योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः ॥ कलिदावानलेनाद्य साधनं भस्मतां गतम् ॥ ३४ ॥ अट्टशूला[1] जनपदाः शिवशूला द्विजातयः ॥ कामिन्यः केशशूलिन्यः संभवन्ति कलाविह ॥ ३५ ॥ एवं पश्यन्कलेर्दोषान्पर्यटन्नवनीमहम् ॥ यामुनं तटमापन्नो यत्र लीला हरेरभूत् ॥ ३६ ॥ तत्राश्चर्यं मया दृष्टं श्रूयतां तन्मुनीश्वराः ॥ एका तु तरुणी तत्र निषण्णा खिन्नमानसा ॥ ३७ ॥ द्वौ वृद्धौ पतितौ पार्श्वे निःश्वसन्तावचेतनौ ॥ शुश्रूषन्ती प्रबोधन्ती रुदन्ती च तयोः पुरः ॥ ३८ ॥ दशदिक्षु निरीक्षन्ती रक्षितारं निजं वपुः ॥ वीज्यमाना शतस्त्रीभिर्बोध्यमाना मुहुर्मुहुः ॥ ३९ ॥ दृष्ट्वा दूराद्गतः सोऽहं कौतुकेन तदन्तिकम् ॥ मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ॥ ४० ॥ ॥ बालोवाच ॥ भो भोः साधो क्षणं तिष्ठ मच्चिन्तामपि नाशय ॥ दर्शनं तव लोकस्य सर्वथाऽघहरं परम् ॥ ४१ ॥ बहुधा तव वाक्येन दुःखशान्तिर्भविष्यति ॥ यदा भाग्यं भवेद्भूरि भवतो दर्शनं तदा ॥ ४२ ॥ ॥ नारद उवाच ॥ काऽसि त्वं काविमौ चेमा नार्यः काः पद्मलोचनाः ॥ वद देवि सविस्तारं स्वस्य दुःखस्य कारणम् ॥४३॥ ॥बालोवाच ॥ अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ ॥ ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ॥ ४४ ॥ गङ्गाद्याः सरितश्चेमा मत्सेवार्थं समागताः ॥ तथापि न च मे श्रेयः सेवितायाः सुरैरपि ॥ ४५ ॥ इदानीं शृणु मद्वार्तां सचिन्तस्त्वं तपोधन ॥ वार्ता मे विततास्प्यस्ति तां श्रुत्वा सुखमावह ॥ ४६ ॥ उत्पन्ना द्रविडे साऽहं वृद्धिं कर्णाटके गता ॥ क्वचित्क्वचिन्महाराष्ट्रे गुर्जरे जीर्णतां गता ॥ ४७ ॥ तत्र घोरकलेर्योगात्पाखण्डैः खण्डिताङ्गका ॥ दुर्बलाहं चिरं जाता पुत्राभ्यां सह मन्दताम्

१ अट्टमन्नं शिवो वेदः शूलो विक्रय उच्यते । केशो भगमिति प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ४८ ॥ वृन्दावनं पुनः प्राप्य नवीनेव सुरूपिणी ॥ जाताऽहं युवती सम्यक्प्रेष्ठरूपा तु साम्प्रतम् ॥४९॥ इमौ तु शयितावत्र सुतौ मे क्लिश्यतः
श्रमात् ॥ इदं स्थानं परित्यज्य विदेशं गम्यते मया ॥५०॥ जरठत्वं समायातौ तेन दुःखेन दुःखिता ॥ साऽहं तु तरुणी कस्मात्सुतौ वृद्धाविमौ
कुतः ॥ ५१ ॥ त्रयाणां सहचारित्वाद्वैपरीत्यं कुतः स्थितम् ॥ घटते जरठा माता तरुणौ तनयाविति ॥ ५२ ॥ अतः शोचामि चात्मानं विस्म-
याविष्टमानसा ॥ वद योगनिधे धीमन् कारणं चात्र किं भवेत् ॥ ५३ ॥ ॥ नारद उवाच ॥ ज्ञानेनात्मनि पश्यामि सर्वमेतत्तवानघे ॥ न विषा-
दस्त्वया कार्यो हरिः शं ते करिष्यति ॥ ५४ ॥ ॥ सूत उवाच ॥ क्षणमात्रेण तज्ज्ञात्वा वाक्यमूचे मुनीश्वरः ॥ ॥ नारद उवाच ॥ शृणुष्वाऽ-
वहिता बाले युगोऽयं दारुणः कलिः ॥ ५५ ॥ तेन लुप्तः सदाचारो योगमार्गस्तपांसि च ॥ जना अघासुरायन्ते शाठ्यदुष्कर्मकारिणः ॥५६॥ इह
सन्तो विषीदन्ति प्रहृष्यन्ति ह्यसाधवः ॥ धत्ते धैर्यं तु यो धीमान् स धीरः पण्डितोऽथ वा ॥ ५७ ॥ अस्पृश्याऽनवलोक्येयं शेषभारकरी धरा ॥
वर्षे वर्षे क्रमाज्जाता मङ्गलं नापि दृश्यते ॥ ५८ ॥ न त्वामपि सुतैः साकं कोऽपि पश्यति साम्प्रतम् ॥ उपेक्षिताऽनुरागान्धैर्जर्जरत्वेन संस्थिता
॥ ५९ ॥ वृन्दावनस्य संयोगात्पुनस्त्वं तरुणी नवा ॥ धन्यं वृन्दावनं तेन भक्तिर्नृत्यति यत्र च ॥ ६० ॥ अत्रेमौ ग्राहकाभावान्न जरामपि
मुञ्चतः ॥ किंचिदात्मसुखेनेह प्रसुप्तिर्मन्यतेऽनयोः ॥ ६१ ॥ ॥ श्रीभक्तिरुवाच ॥ कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः ॥ प्रवृत्ते
तु कलौ सर्वसारः कुत्र गतो महान् ॥ ६२ ॥ करुणापरेण हरिणाप्यधर्मः कथमीक्ष्यते ॥ इमं मे संशयं छिन्धि त्वद्वाचा सुखिताऽस्म्यहम् ॥६३॥
॥ नारद उवाच ॥ यदि पृष्टस्त्वया बाले प्रेमतः श्रवणं कुरु ॥ सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति ॥ ६४ ॥ यदा मुकुन्दो भगवान् क्ष्मां
त्यक्त्वा स्वपदं गतः॥ तद्दिनात्कलिरायातः सर्वसाधनबाधकः ॥ ६५ ॥ दृष्टो दिग्विजये राज्ञा दीनवच्छरणं गतः ॥ न मया मारणीयोऽयं
सारङ्ग इव सारभुक् ॥ ६६ ॥ यत्फलं नास्ति तपसा न योगेन समाधिना ॥ तत्फलं लभते सम्यक्कलौ केशवकीर्तनात् ॥ ६७ ॥ एकाकारं कलिं
दृष्ट्वा सारवत्सारनीरसम् ॥ विष्णुरातः स्थापितवान् कलिजानां सुखाय च ॥ ६८ ॥ कुकर्माचरणात्सारः सर्वतो निर्गतोऽधुना ॥ पदार्थाः
संस्थिता भूमौ बीजहीनास्तुषा यथा ॥ ६९ ॥ विप्रैर्भागवती वार्ता गेहे गेहे जने जने ॥ कारिता कणलोभेन कथासारस्ततो गतः ॥ ७० ॥
अत्युग्रभूरिकर्माणो नास्तिका रौरवा जनाः ॥ तेऽपि तिष्ठन्ति तीर्थेषु तीर्थसारस्ततो गतः ॥ ७१ ॥ कामक्रोधमहालोभतृष्णाव्याकुलचेतसः ॥
तेऽपि तिष्ठन्ति तपसि तपःसारस्ततो गतः ॥ ७२ ॥ मनसश्चाजयाल्लोभाद्दम्भात्पाखण्डसंश्रयात् ॥ शास्त्रानभ्यसनाच्चैव ध्यानयोगफलं गतम्

CC-0. In Public Domain. Digitization by eGangotri

॥७३॥ पण्डितास्तु कलत्रेण रमन्ते महिषा इव ॥ पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने ॥७४॥ न हि वैष्णवता कुत्र सम्प्रदायपुरःसरा ॥ एवं प्रलयतां प्राप्तो वस्तुसारः स्थले स्थले ॥७५॥ अयं तु युगधर्मो हि वर्तते कस्य दूषणम् ॥ अतस्तु पुण्डरीकाक्षः सहते निकटे स्थितः ॥ ७६ ॥ ॥ सूत उवाच ॥ इति तद्वचनं श्रुत्वा विस्मयं परमं गता ॥ भक्तिरूचे वचो भूयः श्रूयतां तच्च शौनक ॥७७॥ ॥ श्रीभक्तिरुवाच ॥ सुरर्षे त्वं च धन्योऽसि मद्भाग्येन समागतः ॥ साधूनां दर्शनं लोके सर्वसिद्धिकरं परम् ॥७८॥ जयति जयति मायां यस्य कायाधवस्ते वचनरचनमेकं केवलं चाकलय्य॥ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयं सकलकुशलपात्रं ब्रह्मपुत्रं नताऽस्मि ॥७९॥इति श्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमाहात्म्ये भक्तिनारदसमागमो नाम प्रथमोऽध्यायः ॥ १ ॥ छ ॥ नारद उवाच ॥ वृथा खेदायसे बाले अहो चिन्तातुरा कथम् ॥ श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ॥ १ ॥ द्रौपदी च परित्राता येन कौरवकश्मलात् ॥ पालिता गोपसुन्दर्यः स कृष्णः क्वापि नो गतः ॥ २ ॥ त्वं तु भक्ते प्रिया तस्य सततं प्राणतोऽधिका ॥ त्वयाहूतस्तु भगवान् याति नीचगृहेष्वपि ॥ ३ ॥ सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ ॥ कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ॥ ४ ॥ इति निश्चित्य चिद्रूपः सरूपां त्वां ससर्ज ह ॥ परमानन्दचिन्मूर्तिः सुन्दरीं कृष्णवल्लभाम् ॥ ५ ॥ बद्धाञ्जलिं त्वया पृष्टं किं करोमीति चैकदा ॥ त्वां तदाज्ञापयत्कृष्णो मद्भक्तान् पोषयेति च ॥ ६ ॥ अङ्गीकृतं त्वया तद्वै प्रसन्नोऽभूद्धरिस्तदा ॥ मुक्तिं दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ ॥ ७ ॥ पोषणं स्वेन रूपेण वैकुण्ठे त्वं करोषि च ॥ भूमौ भक्तिविपोषाय छायारूपं त्वया कृतम् ॥ ॥ ८ ॥ मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा गता भुवि ॥ कृतादिद्वापरस्यान्तं महानन्देन संस्थिता ॥ ९ ॥ कलौ मुक्तिः क्षयं प्राप्ता पाखण्डामय-पीडिता ॥ त्वदाज्ञया गता शीघ्रं वैकुण्ठं पुनरेव सा ॥१०॥ स्मृता त्वयापि चात्रैव मुक्तिरायाति याति च ॥ पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव रक्षितौ ॥ ११ ॥ उपेक्षातः कलौ मन्दौ वृद्धौ जातौ सुतौ तव ॥ तथापि चिन्तां मुञ्च त्वमुपायं चिन्तयाम्यहम् ॥ १२ ॥ कलिना सदृशः कोऽपि युगो नास्ति वरानने ॥ तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने ॥ १३ ॥ अन्यधर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान् ॥ तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये ॥१४॥ तदन्विताश्च ये जीवा भविष्यन्ति कलाविह ॥ पापिनोऽपि गमिष्यन्ति निर्भयाः कृष्णमन्दिरम्॥१५॥ येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी ॥ न ते पश्यन्ति कीनाशं स्वप्नेऽप्यमलमूर्तयः ॥ १६ ॥ न प्रेतो न पिशाचो वा राक्षसो वाऽसुरोऽपि वा ॥ भक्तियुक्तमनस्कानां स्पर्शनेन प्रभुर्भवेत् ॥ १७ ॥ न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा ॥ हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तिद्रोहकरा ये च ते
काः ॥ १८ ॥ नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते ॥ कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः ॥ १९ ॥ भक्तिद्रोहकरा ये च ते
सीदन्ति जगत्रये ॥ दुर्वासा दुःखमापन्नः पुरा भक्तिविनिन्दकः ॥ २० ॥ अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः ॥ अलं ज्ञानकथालापैर्भक्तिरेकैव
मुक्तिदा ॥ २१ ॥ ॥ सूत उवाच ॥ इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा ॥ सर्वाङ्गपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् ॥ २२ ॥
॥ श्रीभक्तिरुवाच ॥ अहो नारद धन्योऽसि प्रीतिस्ते मयि निश्चला ॥ न कदाचिद्विमुञ्चामि चित्ते स्थास्यामि सर्वदा ॥ २३ ॥ कृपालुना त्वया
साधो मद्बाधा ध्वंसिता क्षणात् ॥ पुत्रयोश्चेतना नास्ति ततो बोधय बोधय ॥ २४ ॥ ॥ सूत उवाच ॥ तस्या वचः समाकर्ण्य कारुण्यं नारदो
गतः ॥ तयोर्बोधनमारेभे कराग्रेण विमर्दयन् ॥ २५ ॥ मुखं संयोज्य कर्णान्ते शब्दमुच्चैः समुच्चरन् ॥ ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यताम्
॥ २६ ॥ वेदवेदान्तघोषैश्च गीतापाठैर्मुहुर्मुहुः ॥ बोध्यमानौ तदा तेन कथंचिच्चोत्थितौ बलात् ॥ २७ ॥ नेत्रैरनवलोकन्तौ जृम्भन्तौ सालसा-
वुभौ ॥ बकवत्पलितौ प्रायः शुष्ककाष्ठसमाङ्गकौ ॥ २८ ॥ क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ ॥ ऋषिश्चिन्तापरो जातः किं विधेयं
मयेति च ॥ २९ ॥ अहो निद्रा कथं याति वृद्धत्वं च महत्तरम् ॥ चिन्तयन्निति गोविन्दं स्मारयामास भार्गव ॥ ३० ॥ व्योमवाणी तदैवाभून्मा
ऋषे खिद्यतामिति ॥ उद्यमः सफलस्ते तु भविष्यति न संशयः ॥ ३१ ॥ एतदर्थं तु सत्कर्म सुरर्षे त्वं समाचर ॥ तत्ते कर्माभिधास्यन्ति
साधवः साधुभूषणाः ॥ ३२ ॥ सत्कर्मणि कृते तस्मिन् सनिद्रा वृद्धताऽनयोः ॥ गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति ॥ ३३ ॥ इत्याका-
शवचः स्पष्टं तत्सर्वैरपि विश्रुतम् ॥ नारदो विस्मयं लेभे नेदं ज्ञानमिति ब्रुवन् ॥ ३४ ॥ ॥ नारद उवाच ॥ अनयाऽऽकाशवाण्याऽपि गोप्य-
त्वेन निरूपितम् ॥ किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः ॥ ३५ ॥ क्व भविष्यन्ति सन्तस्ते कथं दास्यन्ति साधनम् ॥ मयात्र किं प्रक-
र्तव्यं यदुक्तं व्योमभाषया ॥ ३६ ॥ ॥ सूत उवाच ॥ तत्र तावपि संस्थाप्य निर्गतो नारदो मुनिः ॥ तीर्थं तीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्व-
रान् ॥ ३७ ॥ वृत्तान्तः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते ॥ असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे ॥ ३८ ॥ मूकीभूतास्तथाऽन्ये तु किय-
न्तस्तु पलायिताः ॥ हाहाकारो महानासीत्त्रैलोक्ये विस्मयावहः ॥ ३९ ॥ वेदवेदान्तघोषैश्च गीतापाठैर्विबोधितम् ॥ भक्तिज्ञानविरागाणां नोद-
तिष्ठत्त्रिकं यदा ॥ ४० ॥ उपायो नापरोऽस्तीति कर्णे कर्णेऽजपञ्जनाः ॥ योगिना नारदेनापि स्वयं न ज्ञायते तु यत् ॥ ४१ ॥ तत्कथं शक्यते
वक्तुमितरैरिह मानुषैः ॥ एवं ऋषिगणैः पृष्टं निर्णीयोक्तं दुरासदम् ॥ ४२ ॥ ततश्चिन्तातुरः सोऽथ बदरीवनमागतः ॥ तपश्चरामि चात्रेति तदर्थं

CC-0. In Public Domain. Digitization by eGangotri

भा. मा. कृतनिश्चयः ॥ ४३ ॥ तावद्ददर्श पुरतः सनकादीन् मुनीश्वरान् ॥ कोटिसूर्यसमाभासानुवाच मुनिसत्तमः ॥ ४४ ॥ ॥ नारद उवाच ॥ इदानीं अ० २
॥ ४ ॥ भूरिभाग्येन भवद्भिः सङ्गमः स्थितः ॥ कुमारा उच्यतां शीघ्रं कृपां कृत्वा ममोपरि ॥४५॥ भवन्तो योगिनः सर्वे बुद्धिमन्तो बहुश्रुताः ॥ पञ्च-
हायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ॥ ४६ ॥ सदा वैकुण्ठनिलया हरिकीर्तनतत्पराः ॥ लीलामृतरसोन्मत्ताः कथामात्रैकजीविनः ॥ ४७ ॥ हरिः
शरणमेवं हि नित्यं येषां मुखे वचः ॥ अतः कालसमादिष्टा जरा युष्मान्न बाधते ॥ ४८ ॥ येषां भ्रूभङ्गमात्रेण द्वारपालौ हरेः पुरा ॥ भूमौ निप-
तितौ सद्यो यत्कृपातः परं गतौ ॥ ४९ ॥ अहो भाग्यस्य योगेन दर्शनं भवतामिह ॥ अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः ॥ ५० ॥ अश-
रीरिगिरोक्तं यत्तत्किं साधनमुच्यताम् ॥ अनुष्ठेयं कथं तावत्प्रब्रुवन्तु सविस्तरम् ॥ ५१ ॥ भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथम् ॥ स्थापनं
सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ॥ ५२ ॥ ॥ कुमारा ऊचुः ॥ मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह ॥ उपायः सुखसाध्योऽत्र वर्तते पूर्व एव
हि ॥ ५३ ॥ अहो नारद धन्योऽसि विरक्तानां शिरोमणिः ॥ सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः ॥ ५४ ॥ त्वयि चित्रं न मन्तव्यं भक्त्य-
र्थमनुवर्तिनि ॥ घटते कृष्णदासस्य भक्तेः स्थापकता सदा ॥ ५५ ॥ ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः ॥ श्रमसाध्याश्च ते सर्वे प्रायः
स्वर्गफलप्रदाः ॥ ५६ ॥ वैकुण्ठसाधकः पन्थाः स तु गोप्यो हि वर्तते ॥ तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ॥ ५७ ॥ सत्कर्म तव निर्दिष्टं
व्योमवाचा तु यत्पुरा ॥ तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधीः ॥ ५८ ॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ॥ स्वाध्यायज्ञानयज्ञाश्च
ते तु कर्मविसूचकाः ॥ ५९ ॥ सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः ॥ श्रीमद्भागवतालापः स तु गीतः शुकादिभिः ॥ ६० ॥ भक्ति-
ज्ञानविरागाणां तद्घोषेण बलं महत् ॥ व्रजिष्यति द्वयोः कष्टं सुखं भक्तेर्भविष्यति ॥ ६१ ॥ प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः ॥ कलि-
दोषा इमे सर्वे सिंहशब्दाद्वृका इव ॥ ६२ ॥ ज्ञानवैराग्यसंयुक्ता भक्तिः प्रेमरसावहा ॥ प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति ॥ ६३ ॥
॥ नारद उवाच ॥ वेदवेदान्तघोषैश्च गीतापाठैः प्रबोधितम् ॥ भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा ॥ ६४ ॥ श्रीमद्भागवतालापात्तत्कथं ॥ ४ ॥
बोधमेष्यति ॥ तत्कथासु तु वेदार्थः श्लोके श्लोके पदे पदे ॥ ६५ ॥ छिन्दन्तु संशयं ह्येनं भवन्तोऽमोघदर्शनाः ॥ विलम्बो नात्र कर्तव्यः शर-
णागतवत्सलाः ॥ ६६ ॥ ॥ कुमारा ऊचुः ॥ वेदोपनिषदां साराज्जाता भागवती कथा ॥ अत्युत्तमा ततो भाति पृथग्भूता फलोन्नतिः ॥६७॥
आमूलाग्रं रसस्तिष्ठन्नास्ते न स्वदते यथा ॥ संभूय स पृथग्भूतः फले विश्वमनोहरः ॥ ६८ ॥ यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथग्भूतं हि तद्दिव्यं देवानां रसवर्धनम् ॥ ६९ ॥ इक्षूणामपि मध्यान्तं शर्करा व्याप्य तिष्ठति ॥ पृथग्भूता च सा मिष्टा तथा भागवती
कथा ॥ ७० ॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥ ७१ ॥ वेदान्तवेदसुस्नाते
गीताया अपि कर्तरि ॥ परितापवति व्यासे मुह्यत्यज्ञानसागरे ॥ ७२ ॥ तदा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितम् ॥ तदीयश्रवणात्सद्यो
निर्बाधो बादरायणः ॥ ७३ ॥ तत्र ते विस्मयः केन यतः प्रश्नकरो भवान् ॥ श्रीमद्भागवतश्रावे शोकदुःखविनाशनम् ॥ ७४ ॥ ॥ नारद
उवाच ॥ यद्दर्शनं च विनिहन्त्यशुभानि सद्यः श्रेयस्तनोति भवदुःखदवार्दितानाम् ॥ निःशेषशेषमुखगीतकथैकपानाः प्रेमप्रकाशकृतये शरणं
गतोऽस्मि ॥ ७५ ॥ भाग्योदयेन बहुजन्मसमार्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै ॥ अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदो-
दयते विवेकः ॥ ७६ ॥ इति श्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमा० कुमारनारदसंवादो नाम द्वितीयोऽध्यायः ॥ २ ॥ छ ॥ नारद उवाच ॥
ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्ज्वलम् ॥ भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः ॥ १ ॥ यत्र कार्यो महायज्ञः स्थलं तद्वाच्यतामिह ॥
महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः ॥२॥ कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा ॥ को विधिस्तत्र कर्तव्यो ममेदं कथ्यतामितः ॥३॥
॥ कुमारा ऊचुः ॥ शृणु नारद वक्ष्यामो विनम्राय विवेकिने ॥ गङ्गाद्वारसमीपे तु तटमानन्दनामकम् ॥ ४ ॥ नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवि-
तम् ॥ नानातरुलताकीर्णं नवकोमलवालुकम् ॥५॥ रम्यमेकान्तदेशस्थं हैमपद्मसुशोभितम् ॥ यत्समीपस्थजीवानां वैरं चेतसि न स्थितम् ॥६॥
ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः ॥ अपूर्वा रसरूपा च कथा तत्र भविष्यति ॥ ७ ॥ पुरःस्थं निर्बलं चैव जराजीर्णकलेवरम् ॥ तद्द्वयं च
पुरस्कृत्य भक्तिस्तत्र गमिष्यति ॥ ८ ॥ यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत् ॥ कथाशब्दं समाकर्ण्य तत्रिकं करुणायते ॥ ९ ॥ ॥सूत
उवाच ॥ एवमुक्त्वा कुमारास्ते नारदेन समन्ततः ॥ गङ्गातटं समाजग्मुः कथापानाय सत्वराः ॥ १० ॥ यदा यातास्तटं ते तु तदा कोलाह-
लोऽप्यभूत् ॥ भूर्लोके देवलोके च ब्रह्मलोके तथैव च ॥ ११ ॥ श्रीभागवतपीयूषपानाय रसलम्पटाः ॥ धावन्तोऽप्याययुः सर्वे प्रथमं ये च वैष्ण-
वाः ॥ १२ ॥ भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवलदेवरातौ ॥ रामस्तथा गाधिसुतश्च शाकलो मृकण्डपुत्रोऽत्रिजपिप्पलादाः ॥ १३ ॥
योगेश्वरौ व्यासपराशरौ च छायाशुको जाजलिजह्नुमुख्याः ॥ सर्वेऽप्यमी मुनिगणाः सहपुत्रशिष्याः स्वस्त्रीभिराययुरतिप्रणयेन युक्ताः ॥ १४ ॥
वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राः समूर्तयः ॥ दश सप्त पुराणानि षट् शास्त्राणि तथाऽऽययुः ॥ १५ ॥ गङ्गाद्याः सरितस्तत्र पुष्करादिसरां-

CC-0. In Public Domain. Digitization by eGangotri

सि च ॥ क्षेत्राणि च दिशः सर्वा दण्डकादिवनानि च ॥१६॥ नगादयो ययुस्तत्र देवगन्धर्वकिन्नराः ॥ गुरुत्वात्तत्र नायातान् भृगुः संबोध्य चान-
यत् ॥ १७ ॥ दीक्षिता नारदेनाथ दत्तमासनमुत्तमम् ॥ कुमारा वन्दिताः सर्वैर्निषेदुः कृष्णतत्पराः ॥ १८ ॥ वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्म-
चारिणः ॥ मुख्यभागे स्थितास्ते च तदग्रे नारदः स्थितः ॥ १९ ॥ एकभागे ऋषिगणास्तदन्यत्र दिवौकसः ॥ वेदोपनिषदोऽन्यत्र तीर्थान्यत्र
स्त्रियोऽन्यतः ॥ २०॥ जयशब्दो नमःशब्दः शङ्खशब्दस्तथैव च ॥ चूर्णलाजाप्रसूनानां निक्षेपः सुमहानभूत् ॥२१॥ विमानानि समारुह्य किय-
न्तो देवनायकाः ॥ कल्पवृक्षप्रसूनानि सर्वास्तत्र समाकिरन् ॥२२॥ ॥ सूत उवाच ॥ एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च ॥ माहात्म्यमूचिरे
स्पष्टं नारदाय महात्मने ॥२३॥ ॥कुमारा ऊचुः॥अथ ते संप्रवक्ष्यामो महिमा शुकशास्त्रजः ॥ यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता॥२४॥
सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा ॥ यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् ॥ २५ ॥ ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसंमितः ॥
परीक्षिच्छुकसंवादः शृणु भागवतं च तत् ॥२६॥ तावत्संसारचक्रेऽस्मिन् भ्रमतेऽज्ञानतः पुमान् ॥ यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणम्
॥ २७ ॥ किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः ॥ एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ॥ २८ ॥ कथा भागवतस्यापि नित्यं भवति
यद्गृहे ॥ तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ॥ २९ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ शुकशास्त्रकथायाश्च कलां नार्हन्ति षोड-
शीम् ॥ ३० ॥ तावत्पापानि देहेऽस्मिन्निवसन्ति तपोधनाः ॥ यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ॥ ३१ ॥ न गङ्गा न गया काशी पुष्करं
न प्रयागकम् ॥ शुकशास्त्रकथायाश्च फलेन समतां नयेत् ॥ ३२ ॥ श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् ॥ पठस्व स्वमुखेनैव यदीच्छसि
परां गतिम् ॥ ३३ ॥ वेदादिर्वेदमाता च पौरुषं सूक्तमेव च ॥ त्रयी भागवतं चैव द्वादशाक्षर एव च ॥ ३४ ॥ द्वादशात्मा प्रयागश्च कालः संव-
त्सरात्मकः ॥ ब्राह्मणाश्चाग्निहोत्रं च सुरभिर्द्वादशी तथा ॥ ३५ ॥ तुलसी च वसन्तश्च पुरुषोत्तम एव च ॥ एतेषां तत्त्वतः प्राज्ञैर्न पृथग्भाव ॥ ५ ॥
इष्यते ॥३६॥ यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम् ॥ जन्मकोटिकृतं पापं नश्यते नात्र संशयः ॥३७॥ श्लोकार्धं श्लोकपादं पा पठेद्भागवतं
च यः ॥ नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ॥ ३८ ॥ उक्तं भागवतं नित्यं कृतं च हरिचिन्तनम् ॥ तुलसीपोषणं चैव धेनूनां सेवनं समम्
॥ ३९ ॥ अन्तकाले तु येनैव श्रूयते शुकशास्त्रवाक् ॥ प्रीत्या तस्यैव वैकुण्ठं गोविन्दोऽपि प्रयच्छति ॥ ४० ॥ हेमसिंहयुतं चैतद्वैष्णवाय ददाति
च ॥ कृष्णेन सह सायुज्यं स पुमाँल्लभते ध्रुवम् ॥ ४१ ॥ आजन्ममात्रमपि येन शठेन किंचिच्चित्तं विधाय शुकशास्त्रकथा न पीता ॥ चाण्डाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्च खरवद्धत तेन नीतं मिथ्या स्वजन्म जननीजनिदुःखभाजा ॥ ४२ ॥ जीवच्छवो निगदितः स तु पापकर्मा येन श्रुतं शुककथावचनं न किंचित् ॥ धिक्तं नरं पशुसमं भुवि भाररूपमेवं वदन्ति दिवि देवसरोजमुख्यः ॥ ४३ ॥ दुर्लभैव कथा लोके श्रीमद्भागवतोद्भवा ॥ कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ॥ ४४ ॥ तेन योगनिधे धीमञ्छ्रोतव्या सा प्रयत्नतः ॥ दिनानां नियमो नास्ति सर्वदा श्रवणं मतम् ॥ ४५ ॥ सत्येन ब्रह्मचर्येण सर्वदा श्रवणं मतम् ॥ अशक्यत्वात्कलौ बोध्यो विशेषोऽत्र शुकाज्ञया ॥ ४६ ॥ मनोवृत्तिजयश्चैव नियमाचरणं तथा ॥ दीक्षां कर्तुमशक्यत्वात्सप्ताहश्रवणं मतम् ॥ ४७ ॥ श्रद्धातः श्रवणे नित्यं माघे तावद्धि यत्फलम् ॥ तत्फलं शुकदेवेन सप्ताहश्रवणे कृतम् ॥ ४८ ॥ मनसश्चाऽजयाद्रोगात्पुंसां चैवायुषः क्षयात् ॥ कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतम् ॥ ४९ ॥ यत्फलं नास्ति तपसा न योगेन समाधिना ॥ अनायासेन तत्सर्वं सप्ताहश्रवणाल्लभेत् ॥ ५० ॥ यज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् ॥ तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति ॥ ५१ ॥ योगाद्गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति॥ किं ब्रूमो गर्जनं तस्य रे रे गर्जति गर्जति ॥५२॥ ॥ शौनक उवाच ॥ साश्चर्यमेतत्कथितं कथानकं ज्ञानादिधर्मान्विगणय्य सांप्रतम् ॥ निःश्रेयसे भागवतं पुराणं जातं कुतो योगविदादिसूचकम् ॥ ५३ ॥ सूत उवाच ॥ यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः ॥ एकादशं परिश्रुत्वाऽप्युद्धवो वाक्यमब्रवीत् ॥ ५४ ॥ ॥ उद्धव उवाच ॥ त्वं तु यास्यसि गोविन्द भक्तकार्यं विधाय च ॥ मच्चित्ते महती चिन्ता तां श्रुत्वा सुखमावह ॥ ५५ ॥ आगतोऽयं कलिर्घोरो भविष्यन्ति पुनः खलाः ॥ तत्सङ्गेनैव सन्तोऽपि गमिष्यन्त्युग्रतां यदा ॥ ५६ ॥ तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् ॥ अन्यो न दृश्यते त्राता त्वत्तः कमललोचन ॥ ५७ ॥ अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज ॥ भक्तार्थं सगुणो जातो निराकारोऽपि चिन्मयः ॥ ५८ ॥ त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले ॥ निर्गुणोपासने कष्टमतः किंचिद्विचारय ॥ ५९ ॥ इत्युद्धववचः श्रुत्वा प्रभासेऽचिन्तयद्धरिः ॥ भक्तावलम्बनार्थाय किं विधेयं मयेति च ॥ ६० ॥ स्वकीयं यद्भवेत्तेजस्तच्च भागवतेऽदधात् ॥ तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम् ॥ ६१ ॥ तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः ॥ सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी ॥ ६२ ॥ सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृतम् ॥ साधनानि तिरस्कृत्य कलौ धर्मोऽयमीरितः ॥ ६३ ॥ दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च ॥ कामक्रोधजयार्थं हि कलौ धर्मोऽयमीरितः ॥६४॥ अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा ॥ कथं त्याज्या भवेत्पुंभिः सप्ताहोऽतः प्रकीर्तितः ॥६५॥ ॥ सूत उवाच ॥ एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः सभायाम्॥आश्चर्यमेकं समभूत्तदानीं

CC-0. In Public Domain. Digitization by eGangotri

तदुच्यते संशृणु शौनक त्वम् ॥ ६६ ॥ भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाऽऽविरासीत् ॥ श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ॥ ६७ ॥ तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः ॥ कथं प्रविष्टा कथमागतेयं मध्यं मुनीनामिति तर्कयन्तः ॥ ६८ ॥ ऊचुः कुमारा वचनं तदानीं कथार्थतो निष्पतिताऽधुनेयम् ॥ एवं गिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा ॥ ६९॥ भक्तिरुवाच ॥ भवद्भिरद्यैव कृताऽस्मि पुष्टा कलिप्रनष्टाऽपि कथारसेन ॥ क्वाहं तु तिष्ठाम्यधुना ब्रुवन्तु ब्राह्मा इदं तां गिरमूचिरे ते ॥ ७० ॥ भक्तेषु गोविन्दसुरूपधर्त्री प्रेमैककर्त्री भवरोगहन्त्री ॥ सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरन्तरं वैष्णवमानसानि ॥७१॥ ततोऽपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोऽपि लोके ॥ एवं तदाज्ञाऽवसरेऽपि भक्तिस्तदा निषण्णा हरिदासचित्ते ॥ ७२ ॥ सकलभुवनमध्ये निर्धनास्तेऽपि धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका ॥ हरिरपि निजलोकं सर्वथाऽतो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥ ७३ ॥ ब्रूमोऽद्य ते किमधिकं महिमानमेवं ब्रह्मात्मकस्य भुवि भागवताभिधस्य ॥ यत्संश्रयान्निगदिते लभते सुवक्ता श्रोताऽपि कृष्णसमतामलमन्यधर्मैः ॥७४॥ इति श्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमा० भक्तिकष्टनिवर्तनं नाम तृतीयोऽध्यायः ॥ ३ ॥ ७॥ ॥ सूत उवाच ॥ अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम् ॥ निजलोकं परित्यज्य भगवान् भक्तवत्सलः ॥१॥ वनमाली घनश्यामः पीतवासा मनोहरः ॥ काञ्चीकलापरुचिरो लसन्मुकुटकुण्डलः ॥ २ ॥ त्रिभङ्गललितश्चारुकौस्तुभेन विराजितः ॥ कोटिमन्मथलावण्यो हरिचन्दनचर्चितः ॥ ३ ॥ परमानन्दचिन्मूर्तिर्मधुरो मुरलीधरः ॥ आविवेश स्वभक्तानां हृदयान्यमलानि च ॥ ४ ॥ वैकुण्ठवासिनो ये च वैष्णवा उद्धवादयः ॥ तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः ॥ ५ ॥ तदा जयजयारावो रसपुष्टिरलौकिकी ॥ चूर्णप्रसूनवृष्टिश्च मुहुः शङ्खरवोऽप्यभूत् ॥ ६ ॥ तत्सभासंस्थितानां च देहगेहात्मविस्मृतिः ॥ दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् ॥ ७ ॥ अलौकिकोऽयं महिमा मुनीश्वराः सप्ताहजन्योऽद्य विलोकितो मया ॥ मूढाः शठा ये पशुपक्षिणोऽत्र सर्वेऽपि निष्पापतमा भवन्ति ॥ ८ ॥ अतो नृलोके ननु नास्ति किंचिच्चित्तस्य शोधाय कलौ पवित्रम् ॥ अघौघविध्वंसकरं तथैव कथासमानं भुवि नास्ति चान्यत् ॥९॥ के के विशुध्यन्ति वदन्तु मह्यं सप्ताहयज्ञेन कथामयेन ॥ कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोऽपि नवीनमार्गः ॥१०॥ ॥ कुमारा ऊचुः॥ये मानवाः पापकृतस्तु सर्वदा सदा दुराचाररता विमार्गगाः ॥ क्रोधाग्निदग्धाः कुटिलाश्च कामिनः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ ११ ॥ सत्येन हीनाः पितृमातृदूषकास्तृष्णाकुलाश्चाश्रमधर्मवर्जिताः ॥ ये दाम्भिका मत्सरिणोऽपि हिंसकाः सप्ताह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञेन कलौ पुनन्ति ते ॥ १२ ॥ पश्चोग्रपापाइछ्लछद्मकारिणः क्रूराः पिशाचा इव निर्दयाश्च ये ॥ ब्रह्मस्वपुष्टा व्यभिचारकारिणः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १३ ॥ कायेन वाचा मनसाऽपि पातकं नित्यं प्रकुर्वन्ति शठा हठेन ये ॥ परस्वपुष्टा मलिना दुराशयाः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १४ ॥ अत्र ते कीर्तयिष्यामि इतिहासं पुरातनम् ॥ यस्य श्रवणमात्रेण पापहानिः प्रजायते ॥ १५ ॥ तुङ्गभद्रातटे पूर्वमभूत्पत्तनमुत्तमम् ॥ यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः ॥१६॥ आत्मदेवः पुरे तस्मिन् सर्ववेदविशारदः ॥ श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः ॥ १७ ॥ भिक्षुको वित्तवाँल्लोके तत्प्रिया धुन्धुली स्मृता ॥ स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा ॥ १८ ॥ लोकवार्तारता क्रूरा प्रायशो बहुजल्पिका ॥ शूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥ १९ ॥ एवं निवसतोः प्रेम्णा दम्पत्यो रममाणयोः ॥ अर्थाः कामास्तयोरासन्न सुखाय गृहादिकम् ॥ २० ॥ पश्चाद्धर्माः समारब्धास्ताभ्यां सन्तानहेतवे ॥ गोभूहिरण्यवासांसि दीनेभ्यो यच्छतः सदा ॥ २१ ॥ धनार्थं धर्ममात्रेण ताभ्यां नीतं तथाऽपि च ॥ न पुत्रो नापि वा पुत्री ततश्चिन्तातुरो भृशम् ॥ २२ ॥ एकदा स द्विजो दुःखाद्गृहं त्यक्त्वा वनं गतः ॥ मध्याह्ने तृषितो जातस्तडागं समुपेयिवान् ॥ २३ ॥ पीत्वा जलं विषण्णस्तु प्रजादुःखेन कर्शितः ॥ मुहूर्तादपि तत्रैव संन्यासी कश्चिदागतः ॥ २४ ॥ दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदन्तिकम् ॥ नत्वा च पादयोस्तस्य निःश्वसन् संस्थितः पुरः ॥२५॥ ॥ यतिरुवाच ॥ कथं रोदिषि विप्र त्वं का ते चिन्ता बलीयसी ॥ वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणम् ॥ २६ ॥ ॥ ब्राह्मण उवाच ॥ किं ब्रवीमि ऋषे दुःखं पूर्वपापेन सञ्चितम् ॥ मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते ॥ २७ ॥ मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजातयः ॥ प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः ॥ २८ ॥ धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना ॥ धिक् धनं चानपत्यस्य धिक्कुलं सन्ततिं विना ॥ २९ ॥ पाल्यते या मया धेनुः सा वन्ध्या सर्वथा भवेत् ॥ यो मया रोपितो वृक्षः सोऽपि वन्ध्यत्वमाश्रयेत् ॥३०॥ यत्फलं मद्गृहायातं शीघ्रं तच्च विशुष्यति॥ निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे ॥ ३१ ॥ इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः ॥ तदा तस्य यतेश्चित्ते करुणाऽभूद्गरीयसी ॥ ३२ ॥ तद्भालाक्षरमालां च वाचयामास योगवान् ॥ सर्वं ज्ञात्वा यतिः पश्चाद्विप्रमूचे सविस्तरम् ॥३३॥ ॥ यतिरुवाच ॥ मुञ्चाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः ॥ विवेकं तु समासाद्य त्यज संसारवासनाम् ॥ ३४ ॥ शृणु विप्र मया तेऽद्य प्रारब्धं तु विलोकितम् ॥ सप्तजन्मावधि तव पुत्रो नैव च नैव च ॥ ३५ ॥ सन्ततेः सगरो दुःखमवापाङ्गः पुरा तथा ॥ रे मुञ्चाद्य कुटुम्बाशां संन्यासे सर्वथा सुखम् ॥३६॥ ॥ब्राह्मण उवाच॥

CC-0. In Public Domain. Digitization by eGangotri

विवेकेन भवेत्किं मे पुत्रं देहि बलादपि ॥ नो चेत्त्यजाम्यहं प्राणांस्त्वदग्रे शोकमूर्छितः ॥ ३७ ॥ पुत्रादिसुखहीनोऽयं संन्यासः शुष्क एव
हि ॥ गृहस्थः सरसो लोके पुत्रपौत्रसमन्वितः ॥ ३८ ॥ इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः ॥ चित्रकेतुर्गतः कष्टं विधिलेखाविमार्जनात्
॥ ३९ ॥ न यास्यसि सुखं पुत्राद्यथा दैवहतोद्यमः ॥ अतो हठेन युक्तोऽसि ह्यर्थिनं किं वदाम्यहम् ॥ ४० ॥ तस्याग्रहं समालोक्य फलमेकं स
दत्तवान् ॥ इदं भक्षय पत्न्या त्वं ततः पुत्रो भविष्यति ॥ ४१ ॥ सत्यं शौचं दया दानमेकभक्तं तु भोजनम् ॥ वर्षावधि स्त्रिया कार्यं तेन पुत्रोऽ-
तिनिर्मलः ॥ ४२ ॥ एवमुक्त्वा ययौ योगी विप्रस्तु गृहमागतः ॥ पत्न्याः पाणौ फलं दत्त्वा स्वयं यातस्तु कुत्रचित् ॥ ४३ ॥ तरुणी कुटिला
तस्य सख्यग्रे च रुरोद ह ॥ अहो चिन्ता ममोत्पन्ना फलं चाहं न भक्षये ॥ ४४ ॥ फलभक्षेण गर्भः स्याद्गर्भेणोदरवृद्धिता ॥ स्वल्पं भक्ष्यं ततोऽ-
शक्तिर्गृहकार्यं कथं भवेत् ॥ ४५ ॥ दैवाद्धाटी व्रजेद् ग्रामे पलायेद्गर्भिणी कथम् ॥ शुकवन्निवसेद्गर्भस्तं कुक्षेः कथमुत्सृजेत् ॥४६॥ तिर्यक् चेदा-
गतो गर्भस्तदा मे मरणं भवेत् ॥ प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे ॥ ४७ ॥ मन्दायां मयि सर्वस्वं ननान्दा संहरेत्तदा ॥ सत्यशौचादिनि-
यमो दुराराध्यः स दृश्यते ॥४८॥ लालने पालने दुःखं प्रसूतायाश्च वर्तते ॥ वन्ध्या वा विधवा नारी सुखिनी चेति मे मतिः ॥४९॥ एवं कुतर्क-
योगेन तत्फलं नैव भक्षितम् ॥ पत्या पृष्टं फलं भुक्तं भुक्तं चेति तयेरितम् ॥५०॥ एकदा भगिनी तस्यास्तद्गृहे स्वेच्छयाऽगता ॥ तदग्रे कथितं
सर्वं चिन्तेयं महती हि मे ॥ ५१ ॥ दुर्बला तेन दुःखेन ह्यनुजे करवाणि किम् ॥ साऽब्रवीन्मम गर्भोऽस्ति तं दास्यामि प्रसूतितः ॥ ५२ ॥
तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखम् ॥ वित्तं त्वं मत्पतेर्यच्छ स ते दास्यति बालकम् ॥ ५३ ॥ षाण्मासिको मृतो बाल इति लोको वदि-
ष्यति ॥ तं बालं पोषयिष्यामि नित्यमागत्य ते गृहे ॥ ५४ ॥ फलमर्पय धेन्वै त्वं परीक्षार्थं तु साम्प्रतम् ॥ तत्तदाचरितं सर्वं तथैव स्त्रीस्वभावतः
॥ ५५ ॥ अथ कालेन सा नारी प्रसूता बालकं तदा ॥ आनीय जनको बालं रहस्ये धुन्धलीं ददौ ॥ ५६ ॥ तया च कथितं भर्त्रे प्रसूतः सुख-
मर्भकः ॥ लोकस्य सुखमुत्पन्नमात्मदेवप्रजोदयात् ॥ ५७ ॥ ददौ दानं द्विजातिभ्यो जातकर्म विधाय च ॥ गीतवादित्रघोषोऽभूत्तद्द्वारे मङ्गलं
बहु ॥ ५८ ॥ भर्तुरग्रेऽब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम ॥ अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकम् ॥ ५९ ॥ मत्स्वसुश्च प्रसूताया
मृतो बालस्तु वर्तते ॥ तामाकार्य गृहे रक्ष सा तेऽर्भं पोषयिष्यति ॥ ६० ॥ पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे ॥ पुत्रस्य धुन्धुकारीति नाम
मात्रा प्रतिष्ठितम् ॥ ६१ ॥ त्रिमासे निर्गते चाथ सा धेनुः सुषुवेऽर्भकम् ॥ सर्वाङ्गसुन्दरं दिव्यं निर्मलं कनकप्रभम् ॥ ६२ ॥ दृष्ट्वा प्रसन्नो विप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तु संस्कारान् स्वयमादधे ॥ मत्वाश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः ॥ ६३ ॥ भाग्योदयोऽधुना जात आत्मदेवस्य पश्यत ॥ धेन्वा बालः
प्रसूतस्तु देवरूपीति कौतुकम् ॥ ६४ ॥ न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः ॥ गोकर्णं च सुतं दृष्ट्वा गोकर्णं नाम चाकरोत् ॥ ६५ ॥
कियत्कालेन तौ जातौ तरुणौ तनयावुभौ ॥ गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महाखलः ॥६६॥ स्नानशौचक्रियाहीनो दुर्भक्षी क्रोधसंयुतः ॥
दुष्परिग्रहकर्त्ता च शवहस्तेन भोजनः ॥ ६७ ॥ चौरः सर्वजनद्वेषी परवेश्मप्रदीपकः ॥ लालनायार्भकान् धृत्वा सद्यः कूपे न्यपातयत् ॥ ६८ ॥
हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः ॥ चाण्डालाभिरतो नित्यं पाशहस्तश्च सङ्गतः ॥ ६९ ॥ तेन वेश्या कुसङ्गेन पित्र्यं वित्तं तु नाशि-
तम् ॥ एकदा पितरौ ताड्य पात्राणि स्वयमाहरत् ॥७०॥ तत्पिता कृपणः प्रोच्चैर्धनहीनो रुरोद ह ॥ वन्ध्यत्वं तु समीचीनं कुपुत्रो दुःखदायकः
॥ ७१ ॥ क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत् ॥ प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितम् ॥ ७२ ॥ तदानीं तु समागत्य
गोकर्णो ज्ञानसंयुतः ॥ बोधयामास जनकं वैराग्यं परिदर्शयन् ॥ ७३ ॥ असारः खलु संसारो दुःखरूपी विमोहकः ॥ सुतः कस्य धनं कस्य
स्नेहवाञ्ज्वलतेऽनिशम् ॥७४॥ न चेन्द्रस्य सुखं किंचिन्न सुखं चक्रवर्तिनः ॥ सुखमस्ति विरक्तस्य मुनेरेकान्तजीविनः ॥७५॥ मुञ्चाज्ञानं प्रजा-
रूपं मोहतो नरके गतिः ॥ निपतिष्यति देहोऽयं सर्वं त्यक्त्वा वनं व्रज ॥ ७६ ॥ तद्वाक्यं तु समाकर्ण्य गन्तुकामः पिताऽब्रवीत् ॥ किं कर्तव्यं
वने तात तत्त्वं वद सविस्तरम् ॥७७॥ अन्धकूपे स्नेहपाशैर्बद्धः पङ्गुरहं शठः ॥ कर्मणा पतितो नूनं मामुद्धर दयानिधे ॥७८॥ ॥ गोकर्ण उवाच॥
देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च ॥ पश्याऽनिशं जगदिदं क्षणभङ्गनिष्ठं वैराग्यरागरसिको भव भक्ति-
निष्ठः ॥ ७९॥ धर्मं भजस्व सततं त्यज लोकधर्मान् सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् ॥ अन्यस्य दोषगुणचिन्तनमाशु मुक्त्वा सेवाकथारस-
महो नितरां पिब त्वम् ॥ ८० ॥ एवं सुतोक्तिवशतोऽपि गृहं विहाय यातो वनं स्थिरमतिर्गतषष्टिवर्षः ॥ युक्तो हरेरनुदिनं परिचर्ययाऽसौ
श्रीकृष्णमाप नियतं दशमस्य पाठात् ॥ ८१ ॥ इति श्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमाहात्म्ये विप्रमोक्षो नाम चतुर्थोऽध्यायः ॥ ४ ॥ छ॥
॥ सूत उवाच ॥ पितर्युपरते तेन जननी ताडिता भृशम् ॥ क्व वित्तं तिष्ठते ब्रूहि हनिष्ये लत्तया न चेत् ॥ १ ॥ इति तद्वाक्यसन्त्रासाज्जनन्या
पुत्रदुःखतः ॥ कूपे पातः कृतो रात्रौ तेन सा निधनं गता ॥ २ ॥ गोकर्णस्तीर्थयात्रार्थं निर्गतो योगसंस्थितः ॥ न दुःखं न सुखं तस्य न वैरी
नापि बान्धवः ॥३॥ धुन्धुकारी गृहेऽतिष्ठत्पञ्चपण्यवधूवृतः ॥ अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः ॥ ४ ॥ एकदा कुलटास्तास्तु भूषणान्य-

CC-0. In Public Domain. Digitization by eGangotri

भिलिप्सवः ॥ तदर्थं निर्गतो गेहात्कामान्धो मृत्युमस्मरन् ॥ ५ ॥ यतस्ततश्च संहृत्य वित्तं वेश्म पुनर्गतः ॥ ताभ्योऽयच्छत्सुवस्त्राणि भूषणानि
कियन्ति च ॥ ६ ॥ बहुवित्तचयं दृष्ट्वा रात्रौ नार्योऽविचारयन् ॥ चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति ॥ ७ ॥ वित्तं हृत्वा पुनश्चैनं मार-
यिष्यति निश्चितम् ॥ अतोऽर्थगुप्तये गूढमस्माभिः किं न हन्यते ॥ ८॥ निहत्यैनं गृहीत्वाऽर्थं यास्यामो यत्र कुत्रचित् ॥ इति ता निश्चयं कृत्वा
सुप्तं संबध्य रश्मिभिः ॥ ९ ॥ पाशं कण्ठे निधायास्य तन्मृत्युमुपचक्रमुः ॥ त्वरितं न ममारासौ चिन्तायुक्तास्तदाऽभवन् ॥ १० ॥ तप्ताङ्गार-
समूहांश्च तन्मुखे हि विचिक्षिपुः ॥ अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः ॥ ११ ॥ तं देहं मुमुचुर्गर्ते प्रायः साहसिकाः स्त्रियः ॥ न ज्ञातं
तद्रहस्यं तु केनापीदं तथैव च ॥१२ ॥ लोकैः पृष्टा वदन्ति स्म दूरं यातः प्रियो हि नः ॥ आगमिष्यति वर्षेऽस्मिन् वित्तलोभविकर्षितः॥१३॥
स्त्रीणां नैव तु विश्वासं दुष्टानां कारयेद्बुधः ॥ विश्वासे यः स्थितो मूढः स दुःखैः परिभूयते ॥ १४ ॥ सुधामयं वचो यासां कामिनां रसवर्धनम्॥
हृदयं क्षुरधाराभं प्रियः को नाम योषिताम् ॥ १५ ॥ संहृत्य वित्तं ता याताः कुलटा बहुभर्तृकाः ॥ धुन्धुकारी बभूवाऽथ महान् प्रेतः कुकर्मतः
॥ १६ ॥ वात्यारूपधरो नित्यं धावन् दश दिशोऽन्तरम् ॥ शीतातपपरिक्लिष्टो निराहारः पिपासितः ॥१७॥ न लेभे शरणं कुत्र हा दैवेति मुहु-
र्वदन् ॥ कियत्कालेन गोकर्णो मृतं लोकादबुध्यत ॥ १८॥ अनाथं तं विदित्वैव गयाश्राद्धमचीकरत् ॥ यस्मिंस्तीर्थे तु संयाति तत्र श्राद्धं प्रवर्त-
यन् ॥ १९ ॥ एवं भ्रमन् स गोकर्णः स्वपुरं समुपेयिवान् ॥ रात्रौ गृहाङ्गणे स्वप्तुमागतोऽलक्षितः परैः ॥ २० ॥ तत्र सुप्तं स विज्ञाय धुन्धुकारी
स्वबान्धवम् ॥ निशीथे दर्शयामास महारौद्रतरं वपुः ॥ २१ ॥ सकृन्मेषः सकृद्धस्ती सकृच्च महिषोऽभवत् ॥ सकृदिन्द्रः सकृच्चाग्निः पुनश्च
पुरुषोऽभवत् ॥२२॥ वैपरीत्यमिदं दृष्ट्वा गोकर्णो धैर्यसंयुतः॥अयं दुर्गतिकः कोऽपि निश्चित्याथ तमब्रवीत् ॥२३॥ ॥गोकर्ण उवाच ॥ कस्त्व-
मुग्रतरो रात्रौ कुतो यातो दशामिमाम् ॥ किं वा प्रेतः पिशाचो वा राक्षसोऽसीति शंस नः ॥२४॥ ॥सूत उवाच ॥ एवं पृष्टस्तदा तेन रुरोदोच्चैः
पुनः पुनः ॥ अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह ॥ २५ ॥ ततोऽञ्जलौ जलं कृत्वा गोकर्णस्तमुदीरयन् ॥ तत्सेकाद्गतपापोऽसौ प्रवक्तुमुपच-
क्रमे ॥ २६॥ ॥प्रेत उवाच ॥ अहं भ्राता त्वदीयोऽस्मि धुन्धुकारीति नामतः ॥ स्वकीयेनैव दोषेण ब्रह्मत्वं नाशितं मया ॥२७॥ कर्मणो नास्ति
सङ्ख्या मे महाऽज्ञाने विवर्तिनः ॥ लोकानां हिंसकः सोऽहं स्त्रीभिर्दुःखेन मारितः ॥ २८ ॥ अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहम् ॥ वाता-
हारेण जीवामि दैवाधीनफलोदयात् ॥२९॥ अहो बन्धो कृपासिन्धो भ्रातर्मामाशु मोचय ॥ गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथाऽब्रवीत्॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ गोकर्ण उवाच ॥ त्वदर्थं तु गयापिण्डो मया दत्तो विधानतः ॥ तत्कथं नैव मुक्तोऽसि ममाश्चर्यमिदं महत् ॥ ३१ ॥ गयाश्राद्धान्न मुक्तिश्चेदु-
पायो नापरस्त्विह ॥ किं विधेयं मया प्रेत तत्त्वं वद सविस्तरम् ॥३२॥ ॥ प्रेत उवाच ॥ गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति ॥ उपायमपरं
किंचित्तद्विचारय सांप्रतम् ॥ ३३ ॥ इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः ॥ शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव ॥ ३४ ॥ इदानीं
तु निजस्थानमातिष्ठ प्रेत निर्भयः ॥ त्वन्मुक्तिसाधकं किंचिदाचरिष्ये विचार्य च ॥ ३५ ॥ धुन्धुकारी निजस्थानं तेनादिष्टस्ततो गतः ॥ गोक-
र्णश्चिन्तयामास तां रात्रिं न तदध्यगात् ॥ ३६ ॥ प्रातस्तमागतं दृष्ट्वा लोकाः प्रीत्या समागताः ॥ तत्सर्वं कथितं तेन यज्जातं च यथा निशि
॥ ३७ ॥ विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः ॥ तन्मुक्तिं नैव पश्यन्ति पश्यन्तः शास्त्रसञ्चयान् ॥ ३८ ॥ ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ
स्थापितं परम् ॥ गोकर्णः स्तम्भनं चक्रे सूर्यवेगस्य वै तदा ॥ ३९ ॥ तुभ्यं नमो जगत्साक्षिन् ब्रूहि मे मुक्तिहेतुकम् ॥ ४० ॥ तच्छ्रुत्वा दूरतः
सूर्यः स्फुटमप्यभ्यभाषत ॥ श्रीमद्भागवतान्मुक्तिः सप्ताहे वाचनं कुरु ॥ ४१ ॥ इति सूर्यवचः सर्वैर्धर्मरूपं तु विश्रुतम् ॥ सर्वेऽब्रुवन् प्रयत्नेन
कर्तव्यं सुकरं त्विदम् ॥ ४२॥ गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्तितः ॥ तत्र संश्रवणार्थाय देशग्रामाज्जना ययुः ॥४३॥ पङ्ग्वन्धवृद्धमन्दाश्च
तेऽपि पापक्षयाय वै ॥ समाजस्तु महाञ्जातो देवविस्मयकारकः ॥ ४४॥ यदैवासनमास्थाय गोकर्णोऽकथयत्कथाम् ॥ स प्रेतोऽपि तदाऽऽयातः
स्थानं पश्यन्नितस्ततः ॥ ४५ ॥ सप्तग्रन्थियुतं तत्रापश्यत्कीचकमुच्छ्रितम् ॥ तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ ॥ ४६ ॥ वातरूपी
स्थितिं कर्तुमशक्तो वंशमाविशत् ॥ वैष्णवं ब्राह्मणं मुख्यंश्रोतारं परिकल्प्य सः ॥ ४७ ॥ प्रथमस्कन्धतः स्पष्टमाऽऽख्यानं धेनुजोऽकरोत् ॥
दिनान्ते रक्षिता गाथा तदा चित्रं बभूव ह ॥ ४८ ॥ वंशैकग्रन्थिभेदोऽभूत्सशब्दं पश्यतां सताम् ॥ द्वितीयेऽह्नि तथा सायं द्वितीयग्रन्थिभेदनम्
॥ ४९ ॥ तृतीयेऽह्नि तथा सायं तृतीयग्रन्थिभेदनम् ॥ एवं सप्तदिनैर्वंशसप्तग्रन्थिविभेदनम् ॥ ५० ॥ कृत्वाऽपि द्वादशस्कन्धश्रवणात्प्रेततां
जहौ ॥ दिव्यरूपधरो जातस्तुलसीदाममण्डितः ॥ ५१ ॥ पीतवासा घनश्यामो मुकुटी कुण्डलान्वितः ॥ ननाम भ्रातरं सद्यो गोकर्णमिति चाब्र-
वीत् ॥ ५२ ॥ त्वयाऽहं मोचितो बन्धात्कृपया प्रेतकश्मलात् ॥ धन्या भागवती वार्ता प्रेतपीडाविनाशिनी ॥ ५३ ॥ सप्ताहोऽपि तथा धन्यः
कृष्णलोकफलप्रदः ॥ कम्पन्ते सर्वपापानि सप्ताहश्रवणे स्थिते ॥ ५४ ॥ अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति ॥ आर्द्रं शुष्कं लघु स्थूलं
वाङ्मनःकर्मभिः कृतम् ॥ ५५ ॥ श्रवणं विदहेत्पापं पावकः समिधो यथा ॥ अस्मिन्वै भारते वर्षे सूरिभिर्देवसंसदि ॥ ५६ ॥ अकथाश्र-

CC-0. In Public Domain. Digitization by eGangotri

विणां पुंसां निष्फलं जन्म कीर्तितम् ॥ किं मोहतो रक्षितेन सुपुष्टेन बलीयसा ॥ ५७ ॥ अश्रवेण शरीरेण शुकशास्त्रकथां विना ॥ अस्थिस्तम्भं
स्नायुबद्धं मांसशोणितलेपितम् ॥ ५८ ॥ चर्मावनद्धं दुर्गन्धं पात्रं मूत्रपुरीषयोः ॥ जराशोकविपाकार्तं रोगमन्दिरमातुरम् ॥ ५९ ॥ दुष्पूरं दुर्धरं
दुष्टं सदोषं क्षणभङ्गुरम् ॥ कृमिविड्भस्मसंज्ञान्तं शरीरमिति वर्णितम् ॥ ६० ॥ अस्थिरेण स्थिरं कर्म कुतोऽयं साधयेन्नहि ॥ यत्प्रातः संस्कृतं
चान्नं सायं तच्च विनश्यति ॥६१॥ तदीयरससंपुष्टे काये का नाम नित्यता ॥ सप्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः॥६२॥ अतो दोषनिवृत्त्यर्थ-
मेतदेव हि साधनम् ॥ बुद्बुदा इव तोयेषु मशका इव जन्तुषु ॥ जायन्ते मरणायैव कथाश्रवणवर्जिताः ॥ ६३ ॥ जडस्य शुष्कवंशस्य यत्र ग्रन्थि-
विभेदनम् ॥ चित्रं किमु तदा चित्तग्रन्थिभेदः कथाश्रवात् ॥ ६४ ॥ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि सप्ता-
हश्रवणे कृते ॥ ६५ ॥ संसारकर्दमालेपप्रक्षालनपटीयसी ॥ कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता ॥६६॥ एवं ब्रुवति वै तस्मिन् विमान-
मगमत्तदा ॥ वैकुण्ठवासिभिर्युक्तं प्रस्फुरद्दीप्तिमण्डलम् ॥६७॥ सर्वेषां पश्यतां भेजे विमानं धुन्धुलीसुतः ॥ विमाने वैष्णवान्वीक्ष्य गोकर्णो वा-
क्यमब्रवीत् ॥६८॥ ॥ गोकर्ण उवाच ॥ अत्रैव बहवः सन्ति श्रोतारो मम निर्मलाः ॥ आनीतानि विमानानि न तेषां युगपत्कुतः ॥६९॥ श्रवणं
समभागेन सर्वेषामिह दृश्यते ॥ फलभेदः कुतो जातः प्रब्रुवन्तु हरिप्रियाः॥७०॥ ॥हरिदासा ऊचुः॥ श्रवणस्य विभेदेन फलभेदोऽपि संस्थितः॥
श्रवणं तु कृतं सर्वैर्न तथा मननं कृतम् ॥७१ ॥ फलभेदस्ततो जातो भजनादपि मानद ॥ सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतम् ॥७२॥ मननादि
तथा तेन स्थिरचित्ते कृतं भृशम् ॥ अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम् ॥ ७३ ॥ संदिग्धो हि हतो मन्त्रो व्यग्रचित्तो हतो जपः ॥ अवैष्णवो
हतो देशो हतं श्राद्धमपात्रकम् ॥७४॥ हतमश्रोत्रिये दानमनाचारहतं कुलम् ॥ विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना ॥७५॥ मनोदोषज-
यश्चैव कथायां निश्चला मतिः ॥ एवमादि कृतं चेत्स्यात्तदा वै श्रवणे फलम् ॥ ७६ ॥ पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम् ॥ गोकर्ण तव
गोविन्दो गोलोकं दास्यति स्वयम् ॥ ७७ ॥ एवमुक्त्वा ययुः सर्वे वैकुण्ठं हरिकीर्तनाः ॥ श्रावणे मासि गोकर्णः कथामूचे तथा पुनः ॥ ७८ ॥
सप्तरात्रवतीं भूयः श्रवणं तैः कृतं पुनः ॥ कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद ॥ ७९ ॥ विमानैः सह भक्तैश्च हरिराविर्बभूव ह ॥ जयशब्दा
नमःशब्दास्तत्रासन् बहवस्तदा ॥८०॥ पाञ्चजन्यध्वनिं चक्रे हर्षात्तत्र स्वयं हरिः॥ गोकर्णं तु समालिङ्ग्याकरोत्स्वसदृशं हरिः॥८१॥ श्रोतॄनन्या-
न् घनश्यामान् पीतकौशेयवाससः ॥ किरीटिनः कुण्डलिनस्तथा चक्रे हरिः क्षणात् ॥ ८२ ॥ तद्ग्रामे ये स्थिता जीवा आश्वचाण्डालजातयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमाने स्थापितास्तेऽपि गोकर्णकृपया तदा ॥ ८३ ॥ प्रेषिता हरिलोके ते यत्र गच्छन्ति योगिनः ॥ गोकर्णेन स गोपालो गोलोकं गोपवल्लभम्
॥८४॥ कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः ॥ अयोध्यावासिनः पूर्वं यथा रामेण सङ्गताः ॥ ८५ ॥ तथा कृष्णेन ते नीता गोलोकं योगि-
दुर्लभम् ॥ यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा ॥ तं लोकं हि गतास्ते तु श्रीमद्भागतश्रवात् ॥ ८६ ॥ ब्रूमोऽद्य ते किं फलवृन्दमु-
ज्ज्वलं सप्ताहयज्ञेन कथासु संचितम् ॥ कर्णेन गोकर्णकथाक्षरं यैः पीतं च ते गर्भगता न भूयः ॥ ८७ ॥ तथाम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रै-
श्चिरकालसंचितैः ॥ योगैश्च संयान्ति न तां गतिं वै सप्ताहगाथाश्रवणेन यान्ति याम् ॥ ८८ ॥ इतिहासमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः ॥
पठते चित्रकूटस्थो ब्रह्मानन्दपरिप्लुतः ॥ ८९ ॥ आख्यानमेतत्परमं पवित्रं श्रुतं सकृद्वै विदहेदघौघम् ॥ श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपा-
ठादपुनर्भवं च ॥ ९० ॥ इति श्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमाहात्म्ये गोकर्णवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ कुमारा ऊचुः ॥
अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिम् ॥ सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः ॥ १ ॥ दैवज्ञं तु समाहूय मुहूर्तं पृच्छ्य यत्नतः ॥
विवाहे यादृशं वित्तं तादृशं परिकल्पयेत् ॥ २ ॥ नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः ॥ एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः
॥३॥ मासानां विग्रहे यानि तानि त्याज्यानि सर्वथा ॥ सहायाश्चेतरे चात्र कर्तव्याः सोद्यमाश्च ये ॥४॥ देशे देशे तथा सेयं वार्ता प्रेष्या प्रय-
त्नतः ॥ भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः ॥५॥ दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयो ये च तेषां बोधो
यतो भवेत् ॥ ६ ॥ देशे देशे विरक्ता ये वैष्णवा कीर्तनोत्सुकाः ॥ तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितम् ॥ ७ ॥ सतां समाजो भविता
सप्तरात्रं सुदुर्लभः ॥ अपूर्वरसरूपेव कथा चात्र भविष्यति ॥ ८ ॥ श्रीभागवतपीयूषपानाय रसलम्पटाः ॥ भवन्तश्च तथा
शीघ्रमायान्तु प्रेमतत्पराः ॥ ९ ॥ नावकाशः कदाचिच्चेद्दिनमात्रं तथापि तु ॥ सर्वथागमनं कार्यं क्षणोऽत्रैव सुदुर्लभः ॥ १० ॥ एवमाकारणं
तेषां कर्तव्यं विनयेन च ॥ आगन्तुकानां सर्वेषां वासस्थानानि कल्पयेत् ॥ ११ ॥ तीर्थे वाऽपि वने वाऽपि गृहे वा श्रवणं मतम् ॥ विशाला
वसुधा यत्र कर्तव्यं तत्कथास्थलम् ॥ १२ ॥ शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम् ॥ गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत् ॥ १३ ॥ अर्वा-
क्पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत् ॥ कर्तव्यो मण्डपः प्रोच्चैः कदलीखण्डमण्डितः ॥ १४ ॥ फलपुष्पदलैर्विष्वग्वितानेन विराजितः ॥
चतुर्दिक्षु ध्वजारोपो बहुसंपद्विराजितः ॥ १५ ॥ ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सविस्तरम् ॥ तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम् ॥ वक्तुश्चापि तदा दिव्यमासनं परिकल्पयेत् ॥ १७॥ उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मु-
खस्तदा ॥ प्राङ्मुखश्चेद्भवेद्वक्ता श्रोता चोदङ्मुखस्तदा ॥ १८ ॥ अथवा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः ॥ श्रोतॄणामागमे प्रोक्ता देशकालादि-
कोविदैः ॥ १९ ॥ विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् ॥ दृष्टान्तकुशलो धीरो वक्ता कार्योऽतिनिःस्पृहः ॥ २० ॥ अनेकधर्मविभ्रान्ता
स्त्रैणाः पाखण्डवादिनः ॥ शुभशास्त्रकथोचारे त्याज्यास्ते यदि पण्डिताः ॥ २१ ॥ वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः ॥ पण्डितः सं-
शयच्छेत्ता लोकबोधनतत्परः ॥ २२ ॥ वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाग्व्रताप्तये ॥ अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् ॥२३॥ नित्यं
सङ्क्षेपतः कृत्वा सन्ध्याद्यं संप्रयत्नतः ॥ कथाविघ्नविघाताय गणनाथं प्रपूजयेत् ॥ २४ ॥ पितॄन्संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ॥ मण्डलं
च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा ॥ २५ ॥ कृष्णमुद्दिश्य मन्त्रेण चरेत्पूजाविधिं क्रमात् ॥ प्रदक्षिणानमस्कारान् पूजान्ते स्तुतिमाचरेत्
॥ २६ ॥ संसारसागरे मग्नं दीनं मां करुणानिधे ॥ कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ॥ २७ ॥ श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः ॥
कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥ २८ ॥ ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् ॥ स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तदा
॥ २९ ॥ श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ॥ स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥ ३० ॥ मनोरथो मदीयोऽयं सफलः
सर्वथा त्वया ॥ निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥ ३१ ॥ एवं दीनवचः प्रोक्त्वा वक्तारं चाथ पूजयेत् ॥ संभूष्य वस्त्रभूषाभिः पूजान्ते तं
च संस्तवेत् ॥ ३२ ॥ शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद ॥ एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥ ३३ ॥ तदग्रे नियमः पश्चात्कर्तव्यः
श्रेयसे मुदा ॥ सप्तरात्रं यथाशक्त्या धारणीयः स एव हि ॥ ३४ ॥ वरणं पञ्चविप्राणां कथाभङ्गनिवृत्तये ॥ कर्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षरविद्यया
॥ ३५ ॥ ब्राह्मणान् वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः ॥ नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥ ३६ ॥ लोकवित्तधनागारपुत्रचिन्तां
व्युदस्य च ॥ कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमम् ॥ ३७ ॥ आसूर्योदयमारभ्य सार्धत्रिप्रहरान्तिकम् ॥ वाचनीया कथा सम्यग्धीरकण्ठं
सुधीमता ॥ ३८ ॥ कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयम् ॥ तत्कथामनु कार्यं वै कीर्तनं वैष्णवैस्तदा ॥ ३९ ॥ मलमूत्रजयार्थं हि लघ्वा-
हारः सुखावहः ॥ हविष्यान्नेन कर्तव्यो ह्येकवारं कथार्थिना ॥ ४० ॥ उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा ॥ घृतपानं पयःपानं कृत्वा वै
शृणुयात्सुखम् ॥ ४१ ॥ फलाहारेण वा श्राव्यमेकभक्तेन वा पुनः ॥ सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत् ॥ ४२ ॥ भोजनं तु वरं मन्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथाश्रवणकारणम् ॥ नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि ॥ ४३ ॥ सप्ताहव्रतिना पुंसां नियमाञ्छृणु नारद ॥ विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥ ४४ ॥ ब्रह्मचर्यमधः सुप्तिः पत्रावल्यां च भोजनम् ॥ कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ॥ ४५ ॥ द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च ॥ भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥ ४६ ॥ कामं क्रोधं मदं मानं मत्सरं लोभमेव च ॥ दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥ ४७ ॥ वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा ॥ स्त्रीराजमहतां निन्दां वर्जयेद्यः कथाव्रती ॥ ४८ ॥ रजस्वलान्त्यजम्लेच्छपतितव्रात्यकैस्तथा ॥ द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती ॥४९॥ सत्यं शौचं दया मौनमार्जवं विनयं तथा ॥ उदारमानसं तद्वदेवं कुर्यात्कथाव्रती ॥ ५० ॥ दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान् ॥ अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम् ॥ ५१ ॥ अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका ॥ स्रवद्गर्भा च या नारी तया श्राव्यः प्रयत्नतः ॥ ५२ ॥ एतेषु विधिना श्रावे तदक्षय्यतरं भवेत् ॥ अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ॥ ५३ ॥ एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत् ॥ जन्माष्टमीव्रतमिव कर्तव्यं फलकाङ्क्षिभिः ॥ ५४ ॥ अकिञ्चनेषु भक्तेषु प्रायो नोद्यापनाग्रहः ॥ श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ॥ ५५ ॥ एवं नगाहयज्ञेऽस्मिन् समाप्ते श्रोतृभिस्तदा ॥ पुस्तकस्य च वक्तुश्च पूजा कार्यातिभक्तितः ॥ ५६ ॥ प्रसादतुलसीमालाः श्रोतृभ्यश्चाथ दीयताम् ॥ मृदङ्गतालललितं कर्तव्यं कीर्तनं ततः ॥ ५७ ॥ जयशब्दं नमःशब्दं शङ्खशब्दं च कारयेत् ॥ विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दीयताम् ॥ ५८ ॥ विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽहनि ॥ गृहस्थश्चेत्तदा होमः कर्तव्यः कर्मशान्तये ॥ ५९ ॥ प्रतिश्लोकं च जुहुयाद्विधिना दशमस्य च ॥ पायसं मधु सर्पिश्च तिलान्नादिकसंयुतम् ॥६०॥ अथवा हवनं कुर्याद्गायत्र्या सुसमाहितः ॥ तन्मयत्वात्पुराणस्य परमस्य च तत्त्वतः ॥ ६१ ॥ होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये ॥ नानाच्छिद्रनिरोधार्थं न्यूनताधिकताख्ययोः ॥ ६२ ॥ दोषयोः प्रशमार्थं च पठेन्नामसहस्रकम् ॥ तेन स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः ॥ ६३ ॥ द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः ॥ दद्यात्सुवर्णं धेनुं च व्रतपूर्णत्वहेतवे ॥ ६४ ॥ शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ॥ तत्रास्य पुस्तकं स्थाप्यं लिखितं ललिताक्षरम् ॥६५॥ संपूज्य वाहनाद्यैस्तदुपचारैः सदक्षिणम् ॥ वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥६६॥ आचार्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ॥ एवं कृते विधाने च सर्वपापनिवारणे ॥ ६७ ॥ फलदं स्यात्पुराणं तु श्रीमद्भागवतं शुभम् ॥ धर्मकामार्थमोक्षाणां साधनं स्यान्न संशयः ॥ ६८ ॥ ॥ कुमारा ऊचुः ॥ इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ श्रीमद्भागवतेनैव भुक्तिमुक्ती

CC-0. In Public Domain. Digitization by eGangotri

करे स्थिते ॥६९॥ ॥ सूत उवाच ॥ इत्युक्त्वा ते महात्मनः प्रोचुर्भागवतीं कथाम् ॥ सर्वपापहरां पुण्या भुक्तिमुक्तिप्रदायिनीम् ॥७०॥ शृण्वतां सर्वभूतानां सप्ताहं नियतात्मनाम् ॥ यथाविधि ततो देवं तुष्टुवुः पुरुषोत्तमम् ॥ ७१ ॥ तदन्ते ज्ञानवैराग्यभक्तीनां पुष्टता परा ॥ तारुण्यं परमं चाभूत्सर्वभूतमनोहरम् ॥ ७२॥ नारदश्च कृतार्थोऽभूत्सिद्धे स्वीये मनोरथे ॥ पुलकीकृतसर्वाङ्गः परमानन्दसंभृतः ॥ ७३ ॥ एवं कथां समाकर्ण्य नारदो भगवत्प्रियः ॥ प्रेमगद्गदया वाचा तानुवाच कृताञ्जलिः ॥ ७४ ॥ ॥ नारद उवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिः करुणापरैः ॥ अद्य मे भगवाल्लँब्धः सर्वपापहरो हरिः ॥ ७५ ॥ श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः ॥ वैकुण्ठस्थो यतः कृष्णः श्रवणाद्यस्य लभ्यते ॥ ७६॥ ॥ सूत उवाच ॥ एवं ब्रुवति वै तत्र नारदे वैष्णवोत्तमे ॥ परिभ्रमन् समायात शुको योगेश्वरस्तदा ॥७७॥ तत्रायययौ षोडशवार्षिकस्तदा व्यासात्मजो ज्ञानमहाब्धिचन्द्रमाः ॥ कथावसाने निजलाभपूर्णः प्रेम्णा पठन्भागवतं शनैः शनैः ॥ ७८ ॥ दृष्ट्वा सदस्याः परमोरुतेजसं सद्यः समुत्थाय ददुर्महासनम् ॥ प्रीत्या सुरर्षिस्तमपूजयत्सुखं स्थितोऽवदत्संशृणुतामलां गिरम् ॥७९॥ ॥ श्रीशुक उवाच ॥ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ८० ॥ धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥ श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ ८१ ॥ श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन्पारमहंस्यमेकममलज्ञानं परं गीयते ॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्प्रपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥ ८२ ॥ स्वर्गे सत्ये च कैलासे वैकुण्ठे नास्त्ययं रसः ॥ अतः पिबन्तु सद्भाग्या मा मा मुञ्चत कर्हिचित् ॥ ८३ ॥ ॥ सूत उवाच ॥ एवं ब्रुवाणे सति बादरायणे मध्ये सभायां हरिराविरासीत् ॥ प्रह्लादबल्युद्धवफाल्गुनादिभिर्वृतः सुरर्षिस्तमपूजयच्च तान् ॥ ८४ ॥ दृष्ट्वा प्रसन्नं महदासने हरिं ते चक्रिरे कीर्तनमग्रतस्तदा ॥ भवो भवान्या कमलासनस्तु तत्रागमत्कीर्तनदर्शनाय ॥ ८५ ॥ प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांस्यधारी वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्ताऽर्जुनोऽभूत् ॥ इन्द्रोऽवादीन्मृदङ्गं जयजयसुकराः कीर्तने ते कुमारा यत्राग्रे भाववक्ता रसविरचनया व्यासपुत्रो बभूव ॥ ८६ ॥ ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसाम् ॥ अलौकिकं कीर्तनमेतदीक्ष्य हरिः प्रसन्नोऽपि वचोऽब्रवीत्तत् ॥ ८७ ॥ मत्तो वरं भागवता वृणुध्वं प्रीतः कथाकीर्तनतोऽस्मि सांप्रतम् ॥ श्रुत्वेति तद्वाक्यमतिप्रसन्नाः प्रेमार्द्रचित्ता हरिमूचिरे ते ॥ ८८ ॥ नगाहगाथासु च सर्वभक्तैरेभिस्त्वया भाव्यम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिप्रयत्नात् ॥ मनोरथोऽयं परिपूरणीयस्तथेति चोक्त्वान्तरधीयताच्युतः ॥ ८९ ॥ ततोऽनमत्तच्चरणेषु नारदस्तथा शुकादीनपि तापसांश्च ॥ अथ प्रहृष्टाः परिनष्टमोहाः सर्वे ययुः पीतकथामृतास्ते ॥ ९० ॥ भक्तिः सुताभ्यां सह रक्षिता सा शास्त्रे स्वकीयेऽपि तदा शुकेन ॥ अतो हरिर्भागवतस्य सेवनाच्चित्तं समायाति हि वैष्णवानाम् ॥ ९१ ॥ दारिद्र्यदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानाम् ॥ संसारसिन्धौ परिपातितानां क्षेमाय वै भागवतं प्रगर्जति ॥ ९२ ॥ ॥ शौनक उवाच ॥ शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः ॥ सुरर्षये कदा ब्राह्मैश्छिन्धि मे संशयं त्विमम् ॥ ९३ ॥ ॥ सूत उवाच ॥ आकृष्णनिर्गमात्त्रिंशद्वर्षाधिकगते कलौ ॥ नवमीतो नभस्ये च कथारंभं शुकोऽकरोत् ॥ ९४ ॥ परीक्षिच्छ्रवणान्ते च कलौ वर्षशतद्वये ॥ शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्कथाम् ॥ ९५ ॥ तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षगते सति ॥ ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः ॥ ९६ ॥ इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयाऽनघ ॥ कलौ भागवती वार्ता भवरोगविनाशिनी ॥९७॥ कृष्णप्रियं सकलकश्मलनाशनं च मुक्त्येकहेतुमिह भक्तिविलासकारि ॥ सन्तः कथानकमिदं पिबतादरेण लोके हितार्थपरिशीलनसेवया किम् ॥ ९८ ॥ स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ॥ परिहर भगवत्कथासु मत्तान्प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ ९९ ॥ असारे संसारे विषयविषसङ्गाकुलधियः क्षणार्धं क्षेमार्थं पिबत शुकगाथाऽतुलसुधाम् ॥ किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने ॥१००॥ रहः प्रवाहसंस्थेन श्रीशुकेनेरिता कथा ॥ कण्ठे संबध्यते येन स वैकुण्ठप्रभुर्भवेत् ॥१०१॥ इति च परमगुह्यं सर्वसिद्धान्तसिद्धं सपदि निगदितं ते शास्त्रपुञ्जं विलोक्य ॥ जगति शुककथातो निर्मलं नास्ति किंचित्पिब परसुखहेतोर्द्वादशस्कन्धसारम् ॥ १०२ ॥ एतां यो नियततया शृणोति भक्त्या यश्चैनां कथयति शुद्धवैष्णवाग्रे ॥ तौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्यान्नहि भुवने किमप्यसाध्यम् ॥ १०३ ॥ ॥ इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये श्रवणविधिकथनं नाम षष्ठोऽध्यायः ॥६॥

॥ श्रीकृष्णार्पणमस्तु ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वकीये
"लक्ष्मीवेङ्कटेश्वर" यन्त्रालयेऽङ्कित्वा प्रकाशितम्।

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीमद्भागवतमाहात्म्यं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्गङ्गासहायकृतान्वितार्थप्रकाशिकायां पण्डितानामभिप्रायाः।

अयि सहृदयाः! अस्तु वो विदितमतीव संतोषकरमेतद्वृत्तम्। यद्यपि श्रीमद्भागवतार्थामृतपानार्थं सुगमा अनेकाष्टीकाः पात्रभूताः सन्ति तथापि सहृदयहृदयाह्लादिनी नूतनेयं बून्दीवास्तव्यपण्डितवरश्रीगङ्गासहायकृताऽन्वितार्थप्रकाशिकानाम्नी टीका गाम्भीर्यात् अद्भुततरार्थप्रकाशकत्वात्सरलतया चेमं जनमतावि प्रह्वत्वं सम्पादयतीति॥

संस्कृतपाठशालाध्यापको निशापतिशास्त्री लष्कर.

स्वस्तिश्रीयुतवेङ्कटेशकरुणासिध्यत्पुमर्थव्रजान् गीर्वाणोक्तिनिबद्धपुस्तकगणप्राचुर्यवद्धोद्यमान्॥ विद्वद्वृन्दमिलिन्दनिर्जरतरून् श्रीकृष्णदासात्मजान् गङ्गाविष्णुसमाह्वयान् बुधवराना शीःशतैर्वर्धयन्॥ १॥ श्रीमत्प्रेषितपुस्तकावलिचिरालोकप्रहृष्यन्मनास्तत्सौन्दर्यसुबोधतासरसताप्रौढिप्रसन्नाशयः॥ सानन्दं प्रकटीकरोति हि निजाभिप्रायमव्याजतः संक्षिप्तैरुचितैः पदैः शिवपुरीवास्यव्य गङ्गाधरः॥ २॥ विष्णोर्नामसहस्रमुत्तमतमं व्याख्यात्रयोद्भासितं व्युत्पित्सूनुपकुर्वदादरपदं धीपारगानामपि॥ वीक्ष्यादृष्टचरं नितान्तविशदस्थूलाक्षरैर्मुद्रितं मन्ये धन्यतमं भवन्तमवनौ सौजन्यवारां निधे॥ ३॥ श्रीबून्दीपुरुहूतमान्यमतिमद्गङ्गासहायाभिधैर्व्याख्या भागवतेऽन्वितार्थविवृतिप्रौढिप्रकर्षं गता॥ व्याख्यानान्तरनैरपेक्ष्यविधये कल्पेत यत्नात् कृता को माध्वीकमपास्य पुष्पनिवहे धावेद्रसार्थी जनः॥ ४॥ शास्त्रीया विषया इह स्फुटतया सर्वेऽपि निर्धारिताः। कोशव्याकरणप्रदर्शनदिशा सौलभ्यमापादितम्॥ तात्पर्यं विवृतं दुरूहमखिलाष्टीका इहोट्टङ्किता। व्याख्यैषा निखिलाङ्गसुन्दरतरेत्यव्याजतो ब्रूमहे॥ ५॥ ऋषीषुनन्दावनिविक्रमाब्दे भाद्रोज्ज्वलार्कान्वितपौर्णमास्याम्। सानन्दमेषोऽभिदधे किलार्थः काशीस्थगङ्गाधरशास्त्रिणा शम्॥ ६॥

काशीस्थमहामहोपाध्यायश्रीयुतगङ्गाधरशास्त्रिणः

पण्डितवरश्रीगङ्गासहायमहाशयप्रणीतान्वितार्थप्रकाशिकाभिधानश्रीमद्भागवतव्याख्यायास्सम्यगवलोकनेन तदीयचमत्कारसुखानुभवापेक्षितसमयन्तु नानाविधविक्षेपव्यग्रचित्ततया न प्राप्नोमि तथापि कदाचिदनुकूलदैववशाच्चक्षुःपथम्प्राप्तासु कतिपयासु पङ्क्तिषु कामप्येतादृशीं पङ्क्तिं नोपलभे या स्वकर्त्तुर्बुद्धेर्विषयमर्म्मग्राहिणित्वं चमत्कारशालिनीत्वं च न प्रकाशयति परितृप्त इवाहं भवामी- मां व्याख्यामवलोक्य यदेतादृशसंस्कृतविद्यादुरवस्थानसमयेपि संस्कृतशास्त्रमात्राभ्यासिनामेवंविधलोकोत्तरवृद्धिकौशलस्य निदर्शनं क्वचिद्वसुन्धरामण्डलेऽस्तीति।

सद्दृष्टिवित्ततमबुन्द्यधिनाथदत्ताभ्युत्थानसत्कृतिविभूषणवैभवस्य। गङ्गासहायविदुषो विदुषां मनांसि व्याख्या स्वमूलमिव रञ्जयति प्रकामम्॥ १॥

इति सानन्दमभिनन्दन्ति काशीस्थमहामहोपाध्यायपण्डितशिवकुमारशास्त्रिणः। श्रीगङ्गाविष्णुपालितायाशीः

वैश्वानरे हाटकसंपरीक्षा विद्यावतां भागवते परीक्षा।

इत्याभाणकोक्तिर्यथार्थमेवार्थमनुवर्त्तते सन्त्यन्यान्यपि पुराणानि तत्तदर्थनिरूपणपराणि परन्तु भगवतो

बादरायणस्य ब्रह्मसूत्राचार्यस्याप्यन्तस्तापापहारकं पुराणरत्नं श्रीमद्भागवतमिति किमिह निरूपणीयम्, यत्र सर्वशास्त्रार्थसारं न केवलं सञ्जग्राह संचिक्षेप चाचार्यः। इदं हि विद्वन्मतीनामपि दुरवगाहं पुराणं बहुभिर्बहुधा च व्याख्यातं तावताऽपि तानि व्याख्यानानि स्थलविशेषे मिथ्यार्थनिरूपणदूषितानि, आग्रहैकविजृम्भिततया कठिनानि च। इयं त्वन्वितार्थप्रकाशिकाख्या व्याख्या तादृशदोषैरसंस्पृष्टा पुराणाचार्यतात्पर्याख्यानपरा, सरला, सर्वोपकारिका, व्याख्येयार्थेषु सविस्तरा, चेत्येनां निर्मिमाणेन ग्रन्थकृता महानुपकारः कृतो लोकस्य प्रकाशिता च स्वीया सर्वशास्त्रेष्वसाधारणी शक्तिः। अस्त्येष श्री५ मान् गङ्गासहायनामा टीकाकारोऽपरो माधवाचार्यो यस्यान्वीक्षिक्यां त्रयीवार्तासु दण्डनीतौ च समानैव शक्तिरालक्ष्यते। यः प्रधानामात्यकार्यमनुष्ठायाधुना प्रधानविद्वत्कार्येषु प्राधान्यं लभते। आशासे च यद्येष ग्रन्थः श्रीमतो महामहिम्नो विद्यावर्द्धनशीलस्य विदुषां सन्तोषप्रदस्य भारतमहाधिकारिणो लार्ड कर्जन महाशयस्य चक्षुर्गोचरतामुपेयात्। समुपेयादेव मानवृद्धये ग्रन्थितुरिति।

काशीस्थमहामहोपाध्यायसत्सम्प्रदायाचार्यपं० स्वामि

राममिश्रशास्त्री.

बुन्दीश्रीमन्नृपाभीष्टविदुषां या शुभा कृतिः। गङ्गासहायश्रीमद्भिरन्वितार्थप्रकाशिका ॥ १ ॥ श्रीभागवतटीका सा श्रुतिर्गीते समीक्षिता। अन्वर्थता यथा नैवं टीकास्वन्यासु दृश्यते ॥ २ ॥ आनन्ददा पण्डितानां शब्दार्थानुगमार्थिनाम्। क्वचिद्यौगिकमादाय रूढं चार्थं क्वचित्ततः ॥ ३ ॥ नान्तरीयकवाच्यैश्च शुभार्थालङ्कृतिवर्द्धिनी। ध्वन्यर्थमुख्या निर्दोषा तत्त्वमस्यादिवाक्यवत् ॥ ३ ॥ दुर्बोधानां पदार्थानां सौलभ्येन प्रकाशिनी। यद्गोपिता दुर्लभेयं मुद्रणात्सुलभा कृता ॥ ४ ॥ श्रीकृष्णदासपुत्रेण श्रीगङ्गाविष्णुसाद्विशा। श्रीमल्लक्ष्मीवेङ्कटेशस्तस्मै तुष्टस्सुसन्ततीः ॥ ५॥ आयुरारोग्यमैश्वर्यं दद्यान्नित्यमकल्मषम् ॥ ५ ॥ एवं विद्वद्वरिष्ठानामाशिषः स्युः सुभाजनम् ॥ ६ ॥ इति श्रीकाशिशेषाद्रिवेङ्कटाचलसूरिणः। मैसूरुश्रीमहाराजपण्डितस्यात्र सम्मतिः ॥ ७ ॥

इह खल्वेकदा तत्र भवता श्रीसुदर्शनाचार्येण श्रीमद्भागवतप्रथमस्कन्धोऽन्वितार्थप्रकाशिकाख्यनवीनव्याख्योपेत आलोकनार्थं प्रहितः। तत्र तावत्प्रथमश्लोकः सर्वार्थकल्पद्रुमो भिन्नमतपरतया तथा व्याख्यातो यथा सर्वैरपि बुभुत्सुभिः सरलतयैव बोध्येत। सर्वत्र च न तथा शब्दप्रयोगो दृष्टो येन विचिकित्साऽपाद्येत। अत्र च सर्वत्रात्युपयुक्तविषयपरव्याख्यासाहित्येन प्रथमवृत्तिमतामतीवोपयोगिनीति प्रतीयते यद्यपि परःशतास्वपि व्याख्यासु श्रीधर्येव गूढभावार्थप्रकाशिका तथापि साऽऽलोडितवेदान्तसाराणामेव बहूपयोगिनी इयं त्वनालोडितवेदान्तानामपि श्रेयःसाधिका इति अधिकश्रेयस्करत्वमस्याः स्फुटार्थत्वात्। अस्याश्चाकलयिता पण्डितवरो गङ्गासहायाख्यो मङ्गलाचरणत एवानुगम्यते अस्य चायं परमोपयोगिप्रयत्नः सर्वसंशयोच्छेदकः सर्वार्थसिद्धिदोऽस्तीति नातिशयोक्तिः। अस्याश्च दण्डान्वयमुखेनैव स्फुटार्था व्याख्याऽकारि अन्यत्राव्याख्या अपि सुकुमारमत्याऽनादेयाः श्लोका व्याख्याताः। परिस्फुटार्थाश्च केचन परिहृताः। अत्र पुनः वैदिकप्रयोगाणां साधनि-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काप्रकारोऽपि दर्शितोऽस्ति छन्दसां लक्षणं च एभिः कारणैः इयं सर्वोपयोगिनीति प्रचारयोग्या इति मन्मतिपरिगृहीतं भवति इति शम् ।

रीवास्थहाईस्कूलसंस्कृताऽध्यापक—

श्रीजगन्नाथाचार्यशास्त्री.

किमुत वर्णयेऽहो सहृदयाह्लादजननीमन्वर्थनाम्नीं श्रीमद्भागवतस्य बूंदीनगरवास्तव्यपण्डितगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यामिमाम् आधुनिककविवररचनातोऽभ्यधिकतरत्वेन संप्रतिभाति भविष्यत्यवश्यमस्याः सुरगिरामृतवासनावासितहृदयानां हृद्वीथीप्रचुरचारुतरप्रचारः इत्याशास्महे श्रीमदभिमतार्तिक्षपणकृतक्षणाद्भगवत इत्यहो दैवं श्रीमद्भागवतार्थजिघृक्षूणाम् ।संमन्यते स्म कुरुक्षेत्रकमलापुरस्थश्रीवेंकटेशमुद्रणालयाश्रितलक्ष्मीचन्द्रशर्मशास्त्रिणेति शम् ।

गङ्गासहायाङ्गसृताऽन्वितार्थप्रकाशिका राजतु सर्वतश्च ॥ शं तन्वती शंतनुसुन्दरीव बुधान्समुद्रान्हि मुदा प्रयान्ती ॥ १ ॥ हरेः पुरोऽभ्यर्थय इत्यजस्रं श्रीवेङ्कटाधीशपदे प्रपन्नः ॥ मुकुन्दसेवी किल नन्दलालः संदर्शने चास्य समुत्सुकोऽहम् ॥ २ ॥

गङ्गासहायेन कृता नवीना टीका मया भागवतस्य दृष्टा । मन्येऽहमन्यास्वियमेव धन्या टीकासु टीका सरला सुरम्या ॥ ३ ॥

काळे इत्युपनामक—काशीनाथात्मजगणेशशर्मा.

श्रीमद्गुणगणवरिष्ठवैश्यवंशावतंसश्रीकृष्णदासतनयश्रीगङ्गाविष्णुश्रेष्ठिवर्येण मुम्बयीसमीपवर्तिकल्याणनगरस्थनिज "लक्ष्मीवेङ्कटेश्वर" मुद्रणालये मुद्रिता बुन्दीनिवासिपण्डितगङ्गासहायकृताऽन्वितार्थप्रकाशिकाख्या व्याख्या परमादरपुरस्कारेण मह्यं दत्ता । सा च मया साद्यन्तं पठिता । सर्वाङ्गसुन्दर्यास्तस्या वाचनेन वाङ्मनःपदव्यतिशाय्यानन्दः समजनि । तत्सकलगुणप्रशंसां कर्तुमशक्तोऽपि वारिधिसिकतान्यायेन तद्गतान् कतिपयान् गुणान्निजाल्पमत्या प्रकटनपदवीमानयामि । इयमन्वितार्थप्रकाशिकाऽन्वर्थनाम्नी बुन्दीनिवासिपण्डितगङ्गासहायमहाशयानां व्याकरणाद्यखिलशास्त्रपचेलिममतित्वं तथा निखिलपुराणावगततत्त्ववत्त्वं द्योतयतीति नास्ति कस्यापि विकल्पकल्पः।श्रीमद्भिः पण्डितगङ्गासहायमहाशयैर्व्याख्यायां पदवाक्यप्रमाणपारावारीणमल्लिनाथकविश्रेष्ठादृतसरण्यादृता । तेनेयं विद्यार्थिनां नवशिक्षितानां श्रीमद्भागवताम्बुधिमधिजिगमिषूणां तरणिरिवोपकरिष्यति तथा चेयं सरलतासरसतादिगुणैरन्याः श्रीमद्भागवतटीका अतिक्रामति । आशासे च भगवतो यत्पण्डितगङ्गासहायमहाशयस्य यशश्चन्द्रमा आकल्पं दिगन्तान्विशदयतु । तथा च श्रेष्ठिकुलकमलदिवाकरस्य गङ्गाविष्णुश्रेष्ठिनो मतिरेवमेवानुपमग्रन्थप्रकाशने सादरं बोभूयात् तथा चायमाचन्द्रतारकं स्वयशोविमलचन्द्रमसा विमलयतु सकललोकगणानलमतिपल्लवितेनेति शम्।

खान्देशीयपारोलेग्रामवासी त्र्यम्बकशास्त्रितनूभवः—श्रीधर शर्मा.

सतीष्वपि विविधविबुधव्याख्यातृविहितास्वप्रतिहतलब्धप्रचारास्वनेकविधमतमतान्तरीयभेदभिन्नास्वर्वाचीनप्राचीनश्रीमद्भागवतमहापुराणव्याख्यासु यथेदम् बूंदीनगरनिवासिश्रीमद्गङ्गासहायसंज्ञकबुधवरस्य व्याख्यानं मूलार्थमन्वयार्थं भावार्थं च बोधयदन्वर्थसंज्ञां

CC-0. In Public Domain. Digitization by eGangotri

लभते नैवमेवान्यदिति सम्यक् समालोचयति श्रीवेंकटेश्वरमुद्रणालयाश्रितमनोहरलालशास्त्री.

भवत्सहिता बून्दीस्थश्रीयुतगङ्गासहायपण्डितैः प्रणीताऽन्वितार्थप्रकाशिका श्रीमद्भागवतटीका यथाज्ञानमवलोकिता मया। तत्र व्याकरणादिविविधशास्त्रसम्यक्परिचयपचेलिमप्रज्ञस्य टीकाकर्त्तुः पूर्वसिद्धानेकव्याख्यानपर्य्यालोचनेन मूलग्रन्थहृदयाकलनमतीव समञ्जसतया निष्पन्नमिति प्रतीमः। टीकालेखशैली च सरसा सरला सुप्रसन्ना निरवकराऽग्राम्या चेति श्रीभागवतार्थरसिकानां विदुषां बुभुत्सूनां च प्रायेण सर्वेषामनुकूलैव स्यात्। अथ च ग्रन्थकर्त्तुर्भगवति भागवते च यादृशोऽनुरागो यावांश्च श्लोकसङ्ख्यापूर्तिप्रभृतिषु तत्तदर्थेष्वन्वेषणपरीक्षणादिप्रयासो गुरुतरस्तदेतत्सर्वमतिरोहितमेव गुणगृह्यानां मर्मविदां महताम् ॥

भट्टपुरुषोत्तमः ग्वालियर.

अयि श्रीमद्भागवतामृतपानलोलुपजनाः! श्रीमद्बुन्दीमहाराजाश्रितामात्योपाधिधारिविद्वद्वरश्रीगंगासहायपण्डितैः कृतामन्वितार्थप्रकाशिकाख्यां टीकां दृष्ट्वा मम चेतोऽतीव प्रसन्नमभूत्। मया चाल्पमतिना प्रथमस्कन्धो दशमस्कन्धश्च सम्यक्तया साग्रोऽवलोकितः। अन्यतोषणीसारबालप्रबोधिनीश्रीधरीरामानुजीत्यादिटीकाभ्योऽपीयं टीका सरला सरसा सुगमा वर्तते। अस्या अवलोकनेनोक्तटीकानामाशयो मनसि प्रादुर्भूतो भवेदेव। व्याख्यातृभिरपि योग्यस्थले प्रकटीकृतश्च। तथापि सर्वमतसंमतेयं टीका। अपरं चास्यां टीकायां व्याख्यातृभिर्व्याकरणन्यायादिविषयाः समुचितस्थलेषु सम्यक्तया प्रतिपादिताः। अतोऽन्वितार्थप्रकाशिकेत्यन्वर्थसंज्ञिकेयं टीका श्रीमद्भागवतार्थसंलापनेच्छूनां जनानां छात्राणां चातीवोपयोगिनी भवेदित्यलंकरोमि स्वाभिप्रायम् ॥

कोंकणप्रान्तान्तर्गतरत्नागिरीनगरसमीपवर्तिमालगुंड्यामनिवासिकेळकरोपाह्वलक्ष्मणात्मजशिवरामशास्त्री

बूंदीसंस्थानस्थितगङ्गासहायपण्डितैर्बहुयत्नेन श्रीमद्भागवतस्य या अन्वितार्थप्रकाशिकाख्या टीका निर्मिता सा यद्यप्यन्या बह्वयष्टीकाः सन्ति तास्वियं मीमांसाधर्मशास्त्रन्यायव्याकरणनिपुणानां बालानामतावि सुलभा जातेत्यलंकरोमि स्वाभिप्रायम् ॥

कल्याणस्थदीक्षितपशुचातुर्मास्ययाज्यग्निष्टोमसोमयाजी बालकृष्णभट्टः

बून्दीराज्येऽस्ति मतिमान्काव्यालंकारशास्त्रगः ॥ सभायां शोभते गङ्गासहायः सूर्यसन्निभः ॥ १ ॥ तेन भागवते टीका अन्वितार्थप्रकाशिका ॥ बालानां सुखबोधाय कृता हि करुणात्मना ॥ २ ॥ अस्यास्तु दर्शनादेव विदुषां मतिरुज्ज्वला ॥ जायते नात्र शङ्का हि भास्करस्य प्रभा यथा ॥ ३ ॥ याः कृताः पण्डितैष्टीका अस्यां ता विशदीकृताः ॥ इयं पौराणिकानां तु सुलभार्थप्रकाशिका ॥ ४ ॥ प्रथमस्य मया टीका बुद्धिपूर्वं विचारिता ॥ तदा मे सरला मान्या संग्राह्या बुद्धिमत्तरैः ॥ ५ ॥ टीकाकर्तुश्च कल्याणं वेंकटेशः करोतु वै ॥ स लक्ष्मीवेंकटेशो हि हृदयेऽस्त्विति मे मतिः ॥ ६ ॥ भारद्वाजकुलोत्पन्नो रानडेत्युपनामकः ॥ दामोदरात्समंभूतो राधिकागर्भसंभवः ॥ नाम्ना सदाशिवोऽहं वै स्थिती राजापुरे सदा ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बून्दीस्थपण्डितश्रीयुतगङ्गासहायेन कृता श्रीमद्भागवतस्यान्वितार्थप्रकाशिकाख्या टीकाऽतीव सरला सुबोधा जाता अतः सर्वैरवश्यं संग्राह्येत्यलम् ।

पुण्यपत्तनवासी जोशीत्युपाह्वकेशवसूनुवासुदेवशर्मा.

श्रीयुत सेठ गंगाविष्णु श्रीकृष्णदासजी समीपे महाशय ! आपने श्रीमद्भागवत प्रथमस्कंधकी नवीन अन्वितार्थप्रकाशिका टीका पण्डित गंगासहायकृत समालोचनार्थ भेजी. अनवकाशित होनेसे देखनेमें विलम्ब भया क्षमा कीजिये अब उत्तर भेजता हूं. इस टीकामें जितने गुण है यदि पूरी समालोचना की जाय तो अतीव लेख बढ जायगा. ग्रंथ बन जायगा यद्यपि श्रीमद्भागवतकी अनेक टीका हैं पर ऐसी सर्वोपयोगि कोईभी नहीं देखनेमें आई है पाठकोंको अतीव सुगमता अर्थबोधमें होगई है भागवतकी क्लिष्टार्थता अब नहीं है अन्वयार्थ होनेसे साधारण शब्दबोधी पंडितभी अर्थ समझलेगा ग्रंथकर्ताकी शास्त्रज्ञता, स्मरणशक्ति, बोधशक्ति, भगवद्भक्ति सराहनीय है मैं इस उपकारी काम देखनेसे ग्रन्थकर्त्ताको धन्यवाद देता हूं--आप इस ग्रन्थको शीघ्र पूरा छापें और मुजको शेष ११ स्कंध भेजने. शुभम्.

आपका हितेछु पं० महीधरशर्मा.

धर्माधिकारी राजधानी टीहरी जिला गढवाल.

श्रीमद्बूंदीराजाश्रितगङ्गासहायैर्विद्याविनयसंपद्भिरवलोकनार्थं प्रेरिता दशमस्कन्धान्तर्गतश्रुतिगीतिस्य स्वयमेव कृता अन्वितार्थप्रकाशिकाख्या टीका दृष्टा सा अतीव समीचीना बह्वर्था सुगमा अपि दुर्गमा भवतामतीव श्रमस्य इयमेव सिद्धिः एतादृशं टीकासमेतं श्रीकृष्णलीलारूपं भागवतं पंडितवर्यैः झटित्येव ग्राह्यम् । अन्यच्च । अस्य मूल्यं भवद्भिः द्वादशरूप्यात्मकं स्थापितं तदेव समीचीनम् । परं च दशरूप्यात्मकं यदि स्यात्तर्हि अतीव समीचीनं भविष्यति । इत्यलं स्वभिप्रायः पारोळेग्रामस्थराघवात्मजबाळकृष्णशास्त्रिणः ।

कल्याणनगरवर्तिलक्ष्मीवेंकटेश्वरयन्त्रालये मुद्रितं श्रीगङ्गासहायपण्डितकृतटीकासमेतं श्रुतिगीतं पठितं मया प्रसादयति मानसं सारल्यगुण एतस्य । अधुना अन्यभाषाकृष्टान्तःकरणा विद्वांसः सनातने भागवते प्रायः प्रवेशं न लभन्ते । यतो न च तेषां वेदान्तादिशास्त्रेषु पारीणत्वं विद्यते । तथापि श्रीपण्डितगङ्गासहायकृतव्याख्यायां सर्वशास्त्राणां सरलतया प्रतिपादनात् उक्तपुराणस्य सर्वेषां बोधः स्यात् । भागवतप्रेमिणामुपकाराय लक्ष्मीवेंकटेश्वरयन्त्रालयाध्यक्षस्य गङ्गाविष्णुमहाशयस्य प्रयासः प्रशंसनीयः सङ्ग्रहणमस्या अवश्यं विधेयमिति शिवम् ।

पाराशरग्रामनिवासीपण्डित मोहनीराजशर्मा.

अन्वितार्थप्रकाशिकाख्यव्याख्यायुतमेतच्छ्रुतिगीतपुस्तकमत्यादरेण दर्शं दर्शमस्माकमत्याह्लादः समजनि परं च इदं पुस्तकं बालानां विदुषां च समुपकारकमदृष्टचरमनन्यादृशमस्ति अस्य संदर्शनेन सेर्ष्या एतद्भावावेदिन एव नानुमोदन्ते—इति वयं मन्यामहे—पुस्तकप्रणेतृणां कृतार्थता सर्वदा कियद्वर्णयामः ।

(भीमाचार्य वैयाकरण हरपनहल्ली तालूका जिल्हा बल्लारी एतैः संमतिर्विचारपूर्वकमदायि ।

अहो वेदान्तार्थरसिकाः बूंदीनिवासिश्रीमत्पण्डितवरगङ्गासहायनिर्मितान्वितार्थप्रकाशिका कलिकल्मषना-

CC-0. In Public Domain. Digitization by eGangotri

शकस्याभीष्टार्थकल्पद्रुमस्य श्रीमद्भागवताख्यश्रीनाराय-
णवेदमूर्तेष्टीका सर्वटीकाभ्योऽधिकरत्वेनाद्वैतादितत्त्वसि-
द्धान्तप्रतिपादकतया संप्रतिभात्यस्माकमिति सम्मतिः ।

कुरुक्षेत्रान्तर्गतकमलापुरस्थपंडितरामनारायणशर्माणः

गोब्राह्मणप्रतिपालकश्रेष्ठिश्रीगङ्गाविष्णुविभूतये मुंब-
ईस्थपण्डितनानुरामदत्ता आशिषः समुल्लसन्तु शमुभयत्र
वृत्तमत्र विलोकितं भवद्भिर्मुद्र्यमाणं श्रीयुतपण्डितगङ्गास-
हायनिर्मितान्वितार्थप्रकाशिकाख्यव्याख्यायुतं श्रीमद्भा-
गवतस्थश्रुतिगीतम् । इयं व्याख्या विद्वज्जनश्लाघनीयोप-
क्रमोपसंहाराद्यर्थनिर्णायकसाधनोपेता पूर्वोत्तराविरुद्धा
साम्प्रदायिकपाठादिसंसूचिका सर्वजनोपकारिणी सुसं-
स्कृता सुयंत्रणनियमान्वितेति दृष्ट्वा तां हर्षान्वितोऽभ्य-
र्थये जगदीशमेतादृशान् देवनरान् दीर्घायुषः करो-
त्विति शम् ।

मुम्बईस्थ—एल्फिन्स्तन कॉलेज संस्कृताध्यापक
पण्डितचन्द्रभानुतनूभवनानुरामशास्त्री.

अथ श्रीमद्भागवतस्यान्वयार्थप्रकाशिकाख्येयं टीका
बून्दीनिवासिपण्डितगङ्गासहायनिर्मिता सर्वटीकातोऽधि-
कतरा उल्लसति नामसदृशीयं टीका अस्याः सम्मतिः ।

"अळवणि" इत्युपाह्वविष्णवात्मजदामोदरशास्त्रिणः

भवत्प्रेषिता श्रीमद्बून्दीनगरमहाराजाश्रितविद्वद्वरगङ्गा-
सहायपण्डितैर्विरचिताऽन्वितार्थप्रकाशिका श्रीमद्भागवत-
टीकाऽवलोकिता । प्रथमस्कन्धो दशमस्कन्धश्च सम्यक्तया
विचारितः । टीकालेखशैली सरला सरसा मनोरमा धन्या
विद्यार्थिनामतीवोपयोगिनी चास्ति । एतां खल्ववलोक-
मानानां प्रमोमोदीति नश्चेतः । अत्र हि सुगममिति समु-
पन्यस्य नैकमपि परित्यक्तम् । नाप्यनुपन्यस्यापेक्षितं
प्रमाणं किमपि व्याख्यातम् । तत्र तत्र शंकितस्थलाना-
मपि सम्यक्तया व्याख्यानं कृतम् । तेन चान्वितार्थप्रका-
शिकेयं नूतना बालबोधिनी संवृत्ता । पश्यन्तः खल्वेतां
स्मरामो वयं मल्लिनाथीयां व्याख्याम् । नव्यपण्डितश्रणी-
तेयमिति त्वमन्दमेव विन्दाम आनन्दम् । विरला ह्यस्मि-
न्काले मृतप्रायायास्तपस्विन्याः संस्कृतभाषायाः पुनरु-
ज्जीवयितारः । नूनं पिपठिषूणां विदुषामप्युपकारिणी
संवृत्तेयं व्याख्या लक्ष्मीवेंकटेश्वरमुद्रालये मुद्रितायाः
खल्वस्या मुद्रणसौष्ठवप्रशंसापौनरुक्त्यैव । सकलजनम-
नोहारिणी चेयमवश्यं संग्राह्या विद्वद्भिरिति शम् ।

मुरादाबादवास्तव्यः ज्वालाप्रसादमिश्रः.

श्रीमत्कल्याणनिवासिश्रीकृष्णदासात्मजगंगाविष्णु-
नाऽत्यादरेणार्पितोऽन्वितार्थप्रकाशिकाख्यव्याख्यायुतोऽ-
यं ग्रन्थः बुन्दीनगरनिवासिश्रीमन्महापण्डितगंगासहायेन
मल्लीनाथकृतटीकासदृशो रचितः अयं मयातीव प्रीत्याऽ-
वलोकितः अत्र मूलोक्तसरलकठिनश्लोकानां सुलभार्था
दर्शिता व्याख्याकारेण । अपेक्षिताः सर्वे विषयाः संक्षे-
पेण कथिताः श्रीधरीटीकापेक्षया अस्या दर्शनेन विदु-
षामन्तःकरणमत्यानंदपरिपूरितं भवेत् पौराणिकानामप्य-
त्यन्तं सुलभेयं किं विशेषेण सर्वगुणयुतेयं सर्वांगानवद्या
सर्वैरपि संग्राह्या इत्यलंकरोमि स्वाभिप्रायम् ।

जनस्थानवासिपटवर्धनेत्युपनामककेशवसू-
नुधुण्डिराजशर्मा ।

श्रीबून्दीमहाराजसम्राडलङ्कारभूतैश्चुलकीकृतसकल-
शास्त्रजलधिभिः श्रीगङ्गासहायविद्वल्ललामैः संरचिता
श्रीमद्भागवतस्यान्वितार्थप्रकाशिकानामधेया टीका श्रुति-
गीतोपरि स्वप्रतिभानुसारेण समालोच्य तन्माधुर्यं चानु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूय प्राचीनतिलककाराणामनुरूपेयं कृतिः पठतां मनसि झटिति चमत्कृतिं विदधाति निमज्जयत्यन्तःकरणमानन्दरसाम्बुधौ नवीनाऽपि प्राचीनायते निखिलदर्शनमयित्वाद्दतिसरलत्वाच्च विदुषामविदुषामतीवोपयोगित्वेन सर्वैः सर्वदैव ग्राह्येति निवेदयति ।

श्रीरतलामनिकायपौराणिकश्रीमद्गोविन्दरामाख्यतनयकिशोरीलालशर्म्मा ।

अयि सर्ववेदेतिहाससारभूतस्य ब्रह्मसूत्रार्थरूपस्य श्रीमद्भागवतमहापुराणस्यार्थजिज्ञासवो विमत्सरा विद्वांसः ! श्रीमद्विशिष्टाद्वैतसिद्धान्तानुयायिरङ्गेशभक्तश्रीमद्बून्दीनरेशाश्रितामात्योपाधिविशिष्टाद्वैतमतावलम्बिपण्डितवर्यगङ्गासहायपंडितैर्याऽन्वयमुखेन व्याकरणन्यायादिविषयगर्भिताऽन्वितार्थप्रकाशिकानाम्नी टीका विरचिता तस्याः श्रीवेंकटेशकृपापात्राधिकारिश्रीगङ्गाविष्णुश्रेष्ठिप्रेषितश्रुतिगीतावलोकनेनैवास्माकं परमानन्दः समजनि सा चेयं विचित्रतरार्थप्रकाशकत्वेन सरलतया च पठनपाठनकर्तृसंकलजनमनोहारिणी ततोऽवश्यं ग्राह्येति निजाभिप्रायमलंकरोमि—

मालवप्रान्तान्तर्गतरत्नललामनगरनिवासी—**ओङ्कारदासशर्म्मा ।**

समुपजोषमद्य श्री५मद्बून्दीश्वरलब्धमहावैदुष्यपदमलङ्कुर्वतां तत्रभवतां मानमहतां पण्डितवरश्रीयुतगङ्गासहायशर्मणामनुपमां कृतिं श्रीमद्भागवतस्यान्वयमुखेन निगूढार्थप्रकाशिकाया व्याख्यायाः कियन्तं भागं मुम्बापुरीजनपदान्तर्गतकल्याणनिवासिश्रेष्ठिश्रीकृष्णदासात्मजगङ्गाविष्णुमहोदयैर्निजमुद्रणालये मुद्राप्य प्रकाशितमालोच्य नितान्तं समुल्लसितस्वान्तोऽभूवम्, । समन्ततश्चैनामाकलय्य सर्वथाऽत्र सरलसरसानतिविस्तृतलेखमर्य्यादैकशरणानां मल्लिनाथादिव्याख्यातृमहाकवीनां शैली परिशीलिताऽस्तीति परमनुकूलेयमिदानीन्तनानां पुराणमर्मबुभुत्सूनां स्नेहपूर्त्याद्युपबृंहितदीपिकादिसङ्क्षिप्ताक्षरटीकार्थविमर्शाक्षमधिषणानां भक्तजनानामपि भविष्यतीति विश्वसिमि बाढं सम्वर्द्धयामि शुभाशीर्भिः प्रकाशकं यदनेन भवतो गरीयसाऽयासेन स्वामिपादचतुर्धरादिमहानुभावजन्व्याख्यास्वारस्यमनुसन्दधतीमेनामाकलयतां भागवतभावार्थभावुकानाँच्यथोपयोगो भवेन्न तथा प्राचीनानेकटीकाः कथञ्चित्सम्पाद्यापि तन्निगूढार्थावधारणकदर्थनाभूरीकृत्यापीति बुभुत्सूनामतिरोहितमेवेति ।

विमृशति सुप्रसिद्धमुरादाबादनगरनिवासी सनातनधर्मपताकासम्पादक ऋषिकुमारः पण्डितो **रामस्वरूपशर्म्मा त्रिवेदी.**

श्री ५ बून्दीश्वरसत्कृतेन विदुषा गङ्गासहायेन या
व्याख्याऽकारि मनोहराऽतिसरला प्राचीनटीकान्तरात् ।
श्रीमद्भागवतस्य तां श्रुतिसुखां वेदस्तुतेस्तर्कयत्स्वान्तं
निर्वृतिमेति जीवतु चिरं मुद्राप्य तद्द्योतकः ॥ १ ॥

इति निगदति ॥

मुरादाबादस्थजवाहरसंस्कृतपाठशालाया मुख्याध्यापकः झोपाख्यः **श्रीमुकुन्दशर्म्मा मैथिलः**

श्रीमदनन्तकोटिब्रह्माण्डाधीश्वररमारमणरङ्गेशचरणशरणबून्दीनरेशाश्रितविद्वद्वर्य्यगङ्गासहायेन विरचिता, श्रीमद्वेङ्कटरमणचरणशरणश्रेष्ठिवरगङ्गाविष्णुना प्रकाश्यमानेयमन्वितार्थप्रकाशिकाख्या शास्त्ररूपभगवदवतारश्रीमद्भागवतव्याख्या कुत्र कुत्रचिट्टीकान्तरमनुसृत्याप्यवसाने श्रीधरीमेवानुसरति तामेव विशदीकरोतीवातोऽद्वैत-

CC-0. In Public Domain. Digitization by eGangotri

मतादलम्बिनां त्वतीवोपयोगिन्यप्यवश्यं संग्राह्या कोविदकौशलावलोकनकुतूहलैरखिलैस्सुधीभिरिति निवेदयामि ।

मालवमण्डलान्तर्गतकुन्तनपुर (आमझरा) निवासी—रङ्गाचार्य्यः ।

श्रीमद्दयासा[1]गरपंडिताग्रणीर्गङ्गासहायोऽल्पधियां कृतेऽर्थी ॥ श्रीमन्महाभागवतस्य काव्यान् स्वालंकरोत् ब्रजपदाप्तये नृणाम् ॥ १॥ यः सौम्यया गुणविलासधिया महत्या सद्व्याख्यया प्रकटभावरसाढ्यया ज्ञः । विद्यावतामुपरि सत्कृपया कलाज्ञः जीयात् सदा रसिकभावुकसज्जनाढ्यः ॥ २ ॥ तद्ग्रन्थमध्यदशमस्य समन्वितार्थ[2]प्रकाशिकविलसर्थचिदैकनिष्ठः । शिष्टाङ्घ्रिपङ्कजनताज्ञसरस्वतीनन्दोऽहं स्तुवेऽनिशमिमामृषिकुल्यवाचम् ३॥ याः श्रीधरीप्रभृतयोऽर्थपदज्ञटीकाः संपादयन्ति ललितार्थगभीररस्याः । ता ब्रह्मजीवसमबद्धपराः प्रमाण्यः काठिन्यभावकृतितः पृथुविद्यसाध्याः ॥ ४ ॥ सेयं वृतिस्तु लघुबोधसुशिष्यमान्या विद्यार्थिगम्यसकलार्थमनोहराऽन्या । टीकाऽनया न हि समाऽखिलयोगिरम्या काम्या सदैव तपसि स्थितमंत्रविद्भिः ॥ ५ ॥

१ युग्मम् । २ स्वार्थेऽण् ।

श्रीनर्मदाबिल्वकेश्वरसरस्वतीष्टकरीस्थब्रह्मचारिश्रीकृष्णानंदपूज्यपादशिष्यसरस्वतीनन्दनैष्ठिकः ॥

सर्व भागवत रसानुरागी महानुभावोंको सूचना पूर्वक मैं निवेदन करूं हूं कि बुंदीस्थ पंडितवर्य गंगासहायजीने जो श्रीमद्भागवत पर अन्वितार्थप्रकाशिका नामक टीका बनाई. वह अतीवोत्तम देखी गई और विशेषकर नवशिक्षित विद्यार्थियोंके लिये तो यह अलभ्य लाभही है कि जो पहले विद्यार्थियोंके स्वप्नमेंभी दुर्लभ थी वह आधुनिकोंके वास्ते सुलभ पथ हुवा चला जाता है हमारे देखते देखते चूर्णिका जब छपी थी तब ग्राहक गणोंने कैसी अभिरुचि दिखलाई ।

परंतु इस अन्वयार्थ टीकाके सामने तो यही कहा जायगा कि (काचः काचो मणिर्मणिः) चूर्णिकामें अनेक त्रुटियां रह गई उन सबकी पूर्त्तीकेही वास्ते मानो यह अन्वितार्थप्रकाशिका नामक टीकाका आविर्भाव हुआ है धन्य परमात्माको कि जिसने हमको ऐसे सुअवसरमें प्रगट करा कि यथेच्छित सर्व वस्तुएं स्वयं दृष्टिगोचर होती जाती हैं. “ विद्यावतां भागवते परीक्षा ” यह असंभवोक्ति अब इस टीकाके देखनेसेही अनिश्चित होने लगी श्रीविज्ञवर गङ्गासहायजीके अपूर्व साहसको देख यही कहेंगे कि आप सरीखे सदयहृदय महानुभावोंसेही इस भारतवर्ष भूमिका सौभाग्य है. परमात्मा आपको शतायु करे । भागवतके पठनपाठनकर्त्ता दोनोंसेही प्रार्थना करनेमें आती है कि श्रीटीकाकर्ता पंडितजी तथा इसके मुद्रणकर्ता सेठजी गंगाविष्णुजीके उद्योगको एक एक प्रति लेकर स्वार्थ और परार्थको सार्थक करेंगे ।

मथुरानिवासी आयुर्वेदोद्धारसंपादक

पं० दत्तरामचतुर्वेदी.

यद्यपि आजतक श्रीमद्भागवतकी बहुतसी टीकायें रची गई हैं, परंतु उनमें किसी न किसी प्रकारकी त्रुटि पाईही जाती है जैसे कि श्रीधरी टीका मूलसे भी कठिन है; एवं सचूर्णिका व सुबोधिनी आदि सरलभी हैं परञ्च पूर्णरस तथा ललितवाणीयुक्त न होनेके कारण बूंदीन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरस्थ पं० गङ्गासहायजीने "अन्वितार्थप्रकाशिका" नाम टीका रचित की है जो कि "लक्ष्मीवेंकटेश्वर" मुद्रणागार–कल्याणमें मुद्रित हुई है. इस टीकामें सुवर्णोसहित अन्वयादि ऐसे किये गये हैं कि, भागवतके कठिन २ स्थलोंका अर्थ सरलहीमें ज्ञात होता है. अब हम अंतमें पंडितजीको अनेकानेक धन्यवाद देते हैं कि उपरोक्त श्रीमद्भागवतकी टीका बहुतही उत्तम तथा लोकोपकारी हुई है.

कवित्त.

अम्बुजको उदित करैया है पतंग जैसे, पाप काटिवेको जैसे गंगाजूकी धार है ॥ कहे पन्नालाल चंद्र निशि तम नाशै जैसे, आनंद देवैया जैसे नंदको कुमार है ॥ कलिहूके जालको हरैया हरिनाम जैसे, ज्ञानकी सधैया जैसे गीताही आधार है तैसे भागवतके सुअर्थको प्रकाशक यो, 'अन्वितार्थप्रकाशिका' टीका सरदार है ॥

पं० **शिवशंकरलाल–उपनाम (पन्नालाल.)**

अयि सहृदयाः । श्रेष्ठिवर्यगङ्गाविष्णुप्रहितमन्विता-र्थप्रकाशिकाख्यव्याख्यायुतं श्रुतिगीतं सादरमालोच्य कलय्य तद्गुणानानयामि स्फुटत्वपदवीं तद्गतान्कतिपयान् । टीकेयमन्वर्थनाम्नी प्रकाशयन्ती सरलसरसान् भागवतश्लोकार्थान् वरीवर्ति परःशतास्वपि पूर्वतनश्रीधर्यादिटीकासु । विशेषतोऽकृतशास्त्रपरिश्रमान्पौराणिकान् भागवताम्बुधिमधिजिगमिषुं छात्रगणं चोपकरिष्यति नौरिवेयम् । अस्या अवलोकनेनैवास्याः प्रणेतॄणां पण्डितगङ्गासहायशास्त्रिणां व्याकरणाद्यखिलशास्त्रपारङ्गमत्वं विद्वज्जनसुदृष्टिपथमायास्यत्येवेत्यलं करोमि स्वाभिप्रायम्.

इन्द्रपुरीस्थपाठकोपाह्वत्र्यम्बकात्मजरघुनाथशास्त्री.

अयि विद्वद्वराः ! पीयूषमहोदधेः श्रीमद्भागवतस्य नैसर्गिकानन्दजनकत्वेऽपि किमतो यदस्योपरि हर्षनिःसीम्नि सुखेनानुजिज्ञासकानां टीका कृता बून्दीनगरमधिवसद्भिः पण्डितवर्य्यैः सा चेयमत्युत्तमा सकलजनमनोहारिणी चेयमवश्यं ग्राह्या ॥ पं० **रामगोपाल वैष्णव.**

विलोक्य विष्वगविसंवादिनीमाविष्कृततत्त्वामपि गूढभावां भवत्प्रहितां श्रीमद्भागवतटीकामतिवेलमानन्दसिन्धौ संप्लुतोऽस्मि । व्याख्यातुश्च लेखशैली निर्वर्तितसमुचितसम्बन्धप्रबन्धविधिस्त्वाधुनिकपद्धतिरनुसृतकविराजमार्गा विस्मारयितुमलं प्राचीनवचांसि । मन्ये भगवदेकप्रवणतां भागवतस्य बोधयितुमितरव्याख्याविलक्षणा चैषैव प्रभुरिति श्लाघ्यतमत्वप्रतिपत्तयेऽनुष्ठीयमान एष व्यापारोऽतीव श्रेयानिति निवेदयति ॥

रघुपतिशास्त्री लष्कर.

श्रीमद्बुन्दीनगरमहाराजाश्रितविद्वद्वरगङ्गासहायपण्डितैः कृताम् अन्वितार्थप्रकाशिकानाम्नीं श्रीमद्वेदव्यासविरचितश्रीमद्भागवतस्य टीकां दृष्ट्वा अध्यायत्रयपर्यन्तं सम्यक्तया विचार्य संतुष्टोऽस्मि । टीकेयमाधुनिकानां विद्यार्थिनामल्पाध्ययनेनैव पुराणं कथयितुमुत्सुकानामतीवोपयोगिनी भवेत् । न हि श्रीधरकृतटीकायाः तेषामुपयोगो भवितुमर्हति यतस्तत्रातीव काठिन्यं श्रीधरपण्डितैः संस्थापितम् । तत इयं टीका अतीवोपयोगिनी तोषिण्यादिटीकाशयद्योतिनी अवश्यं जनमनस्तोषिणी भविष्यति इत्यलंकरोमि स्वाभिप्रायम् ॥

श्रीमद्भागवतार्थदर्शनविधौ गङ्गासहायेन या
विद्वन्मान्यतमेन निर्मितकृतिष्टीका सुबोधा तथा ।

CC-0. In Public Domain. Digitization by eGangotri

सन्तोषं जनयिष्यति प्रियतमा विद्वज्जनानां हृदि। व्यर्थोऽभूच्च सु यत्न एष इति नो मन्तव्यमेवं बुधाः ॥ १ ॥

श्रीक्षेत्रनासिकस्थसंस्कृतपाठशालाध्यापकवैद्योपनामकवासुदेवशास्त्री.

स्वस्ति श्रीमद्वेङ्कटेशकृपापात्राय श्रीमच्छ्रेष्ठिवर्य्याय श्रीगङ्गाविष्णवे सत्याः सन्त्वाशिष उपेन्द्रस्वामिनः। श्रीमद्बून्दीराजसम्मानितास्मद्देशीयास्मदीयश्रीगङ्गासहायविद्वद्वर्यैः प्रणीतान्वितार्थप्रकाशिका श्रीमद्भागवतटीकेतरटीकाभ्योऽतीव समीचीना प्रतिभाति चान्वर्था ॥

लष्करस्थ उपेन्द्रस्वामी.

श्रीमदस्मद्गुरुवराः सहर्षं पुस्तकप्राप्तिबोधनाय मामेव प्रेरितवन्तः कथितवन्तश्चेयं भागवतटीका यथाऽपेक्षितलेखचातुर्यमनुवहन्ती विदुषां मनस्तोषमकुर्वन्त्यपि बालसौकर्यायालं भवेदेवेति। आशासे च भवतां व्यापारवृद्धिं निजचरणकमलराधनैकतानतां च विदधातु माधव इति शम्।

दत्तात्रेयशर्मा.

श्रीमत्प्रेषितं श्रीमद्भागवतान्तर्गतश्रुतिगीतमन्वितार्थप्रकाशिकाख्यव्याख्यायुतं लब्धमनुभवे चानन्दस्य परां कोटिम्। श्रीमद्बुन्दीस्थविद्वद्वरगङ्गासहायपण्डितकृतेयं व्याख्या नवीनाऽपि प्राचीनव्याख्यातृशैलीमारुरुक्षन्ती कस्य मनो नाह्लादयेत्. विशेषत इयं पौराणिकानां विद्यार्थिनां श्रीमद्भागवतमर्मजिज्ञासूनामतीवोपकारिणी। अनया ज्ञायते प्रणेतॄणां सकलशास्त्रपारंगतत्वमिति शम्।

वाफगांवकरेत्युपनामकः शङ्करशास्त्री.

दृष्टेमां चिरस्मरणीयां भागवतस्यान्वितार्थप्रकाशिकां व्याख्यां तर्कये सन्त्यस्मिन्भूमण्डले मृतप्रायायास्तपस्विन्या गीर्वाणभाषाया उज्जीवयितारो ग्रन्थप्रणेतारः सकलशास्त्रपारीणाः। इयं व्याख्या पूर्वतनाखिलव्याख्याभ्यः सुलभतरा व्याख्यातसर्वश्लोका चास्ति। विशेषतोऽन्वयादिनाऽस्मादृशामतीवोपकारिणी पौराणिकानां सुलभतयाऽर्थजिज्ञासूनामिति शुभम्.

खेडकरेत्युनामकबाळंभट्टशास्त्री.

भवद्भिः समालुलोचयिषया समर्पितं श्रीमद्भागवतान्तःप्रस्तुतश्रुतिगीतं श्रीमद्द्विजवर्यगङ्गासहायपण्डितसंकलिताऽन्वितार्थप्रकाशिकाभिधव्याख्यया समुपेतं समवेक्ष्य समाह्लादितचेता अस्मि—संप्रतीयं व्याख्या श्रीधरीबालबोधिनीचूर्णिकासन्दर्शिनीप्रभृतिषु सम्यक् सरलतयाऽर्थज्ञापकत्वेनाधिजिगांसुभिरधिजिगापयिषुभिश्च विद्वद्वरैः समादरिष्यते—यतस्तासां च कासुचिन्मूलापेक्षया काठिन्यं कतिपयासु च स्वसंप्रदायाभिमतपक्षावलम्बनं कासुचित्कतिपयश्लोकानां व्याख्या केषांचिन्नैवेत्यादिदूषणमप्यस्ति—तच्चास्यां नोपलभामहे—विशेषतश्चाधिक्यमेतच्छ्रीधरीबालबोधिनीत्यादीनां व्याख्यासारांशोऽस्यां समुपगतोऽनेकसुमनसां रसो माक्षिकमधुनीवेत्यलम्।

श्रीमद्भागवते कृता बहुविधा व्याख्या महद्भिर्बुधै-
स्तासां संप्रति राजतेऽर्थसरला गङ्गासहायैः कृता ॥
यस्यां मूलगतैः समन्वितपदैः संयोजितार्थप्रभा
सेयं सर्वविधा भविष्यति कलौ विद्वद्धृदाह्लादिनी ॥ १ ॥

ढाढौलीग्रामस्थपण्डितकाशीरामपाठकः।

भवता प्रहितं श्रीमद्भागवतदशमस्कन्धपुस्तकमन्वितार्थप्रकाशिकाव्याख्यासमेतमवलोक्य आनन्दसागरनिमग्नोऽभूवम्। सेयमन्वितार्थप्रकाशिका अतीव लोकोपकारिका विदुषामन्येषां सर्वेषां च तोषमावहति ममाप्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्या मुद्रणविषये अतीव सम्मतिरिति त्वरयैवास्याः समग्रग्रन्थमुद्रणप्रारम्भः कारयितव्य इति ।

श्रीकाञ्चीनगरनिवासी श्रीमद्वेदमार्गप्रतिष्ठापनाचार्येत्यादिसमस्तबिरुदावलिविभूषित तिरुमलै अनन्दाम्पुलै विद्वद्वरकुन्नपाकं—श्रीनिवासाचार्यस्वामिनः ।

श्रीबुन्दीमहाराजाश्रितपण्डितवर्य्यगङ्गासहायरचिता श्रीमद्भागवतस्य अन्वितार्थप्रकाशिका अतिप्रशंसनीयेयं टीका एतां दृष्ट्वा मन्दा अपि श्रीमद्भागवतार्थप्रवचनसमर्थाः स्युः एतावत्कालपर्यन्तं न केनापि एतादृशी टीका प्रकाशिता इति बहुलमादरेण परिलिखामि ।

इति अवन्तिकाक्षेत्रस्थकृष्णशङ्करस्य लेखः ।

स्वस्ति सानुरागं साशीर्वादं चावेदकः । प्रियवराः ! अधिगतपूर्वमेव मया श्रीमद्भिरुपहारीकृतं नव्यव्याख्यासमुल्लसितं पुस्तकं श्रीमन्महाभागवतीयप्रथमस्कन्धस्य । इमां किल व्याख्यामवलोकमानस्य प्रसीदतितमां मे चेतः । अशेषवेदान्तसारभूतं श्रीमद्भागवतं, निखिलविद्वन्मण्डलीमण्डनायमानस्तत्रभवान् गङ्गासहायो व्याख्याता, निसर्गोदारैरनेकप्रमाणानुगतैः सुसरलैरखिलभावावबोधनपटुभिर्वचनविलासैः समुल्लसितान्वितार्थप्रकाशिकाख्या व्याख्या, सुगृहीतनामा श्रीगङ्गाविष्णुश्रेष्ठिप्रवरः प्रकाशयिता, श्रीलक्ष्मीवेङ्कटेश्वरयन्त्रालये च मुद्रणमित्येकैकमप्यत्र प्रशंसास्पदं किमुतैषां साकल्यम् । तदतिमनोरमेयं व्याख्येति प्रशंसनीयं चास्या मुद्रणसौष्ठवं चेत्यादिवचनजातमस्माकं पौनरुक्त्यायैव ।

अस्यां किल यथास्थानमुचितप्रमाणविन्यासपुरःसरं तत्त्वानि पदानि व्याख्यातानि । विशदीकृताश्च निगूढतमास्ते ते विषयाः । श्रीधरीयव्याख्यादाविव नास्यां सुगममित्याकलय्य किंचिदपि न व्याख्यातम् । तेन किल व्याख्येयं जिज्ञासूनामतीवोपकारिणी संवृत्ता । उपोद्धातश्चास्या अतिमात्रं हृदयङ्गमोऽन्यत्रादृष्टचरश्चेति यत्सत्यं सन्तुष्यतितमां मे चेतः । अस्मिंश्चोपोद्घाते छान्दसप्रयोगाणां सप्रमाणमुपपादनं छन्दोविचारः श्रीमद्भागवतीयपद्यानां सङ्ख्योपपादनं चेत्येवंविधा विषयाः केषां वा मनो नानन्दसागरतरङ्गैस्तरलीकर्तुं भवेयुः । सर्वथा संग्राह्येयं सर्वाङ्गहृदयङ्गमाऽन्वितार्थप्रकाशिकाख्याऽभिनवव्याख्या विद्वद्भिरवश्यमादेया च जिज्ञासुभिः श्रीमद्भागवततत्त्वार्थमित्यभिशंसामि ॥

विद्यावाचस्पतिः श्रीअप्पाशर्मा ।

संस्कृतचन्द्रिकाख्यसंस्कृतमासिकपत्रिकायाः सहकारिसम्पादकः । कोल्हापुरम् ।

श्रीमद्वेदवेदान्तादिसाङ्गविद्यास्संमुद्योद्धारयित्रा तथा लक्षाधिकपुस्तकवितरणशीलेन विशां श्रेष्ठेन गङ्गाविष्णुना प्रहितां श्रीबुन्दीराजाश्रितेन तदमात्यगङ्गासहायपण्डितवरेण रचितां श्रीमद्भागवतस्याऽन्वयार्थप्रकाशिकां टीकां भूयो भूयोऽनुभूयेत्थं प्रतिपत्स्यामहे यद्यपि स्वाभिमतसिद्धान्तार्थे संघटनक्लेशमन्तरा न कोऽपि व्याख्यातुं शक्नुयात् तथादि अन्वयक्लेशनिवारणपूर्वकं सर्वालंकारगम्भीरा अतएव व्याख्यानान्तरातिशायिनीयं टीका कस्य वा मोदाय न भवेदिति ।

श्रीमद्वादवाद्रि-ति-अ-भाष्याचार्याः ।

वाणीविलासस्थलायमानभावत्कलक्ष्मीवेंकटेश्वराख्यमुद्रणालयमुद्रापितान्वितार्थप्रकाशिकाख्यव्याख्यासहितश्रुतिगीतं नाम ग्रन्थं दृष्ट्वाऽनन्दतुन्दिलमना अस्मि ।

CC-0. In Public Domain. Digitization by eGangotri

एतादृग्व्याख्याऽभूतपूर्वा तु सुष्टुशब्दतया च वर्तते इति ॥

काञ्चीमण्डलान्तर्गतकान्तिग्रामनिवासिश्रीमान्

नाट अप्पन वेङ्कटाचार्यः ।

श्लोकार्द्धं श्लोकपादं वा यो वै भागवतं पठेत् ॥
प्रत्यक्षरं भवेत्तस्य कपिलादानजं फलम् ॥ १ ॥
श्रीमद्भागवताभिधस्य च पदं व्याख्यातृसर्वार्थदम् ॥
येनेयं श्रुतिगीतिकेति विवृतिष्टीका सतां सम्मता ॥
कीर्तिः पल्लवितेव तस्य विदुषो गङ्गासहायस्य वै ॥
धन्यो मां प्रति प्रेषणेन विनयात् श्रीकृष्णदासात्मजः॥ २॥

श्रीमद्भगवदुक्तसर्वशास्त्रार्थसारभूतभक्तिज्ञानवैराग्यप्रतिपादकस्य भगवत्यन्तर्हिते प्रचुरपाखण्डागतविविधवादान्धकारपतितकलियुगजनोद्धारायोदितदिवाकरश्रीभागवतस्य यदि साद्यन्तमेवंभूतं व्याख्यानं चेत्तदाऽऽशासे श्रीमद्भागवतार्थग्राहकसामग्रीहीनानां तदर्थप्रतिपत्सूनां विद्यार्थिनां परमोपकाराय भविष्यतीति शम् ॥

वृन्दावननिवासि पं० नारायणदास शास्त्रिणः ॥

अयि साधुवरास्सहृदयाः भवत्प्रेषितान्वितार्थप्रकाशिकाख्यव्याख्यासमेतश्रीमद्भागवतश्रुतिगीतमादरतोऽवलोकितं मया । अन्वभूवममन्दानन्दञ्च । एषा च व्याख्या अन्वितार्थप्रकाशिकेत्यन्वर्थैव विजयते सतीष्वपि व्याख्यासु प्राचीनासु । सरससरलतादिसुगुणैरधुनातनविदुषामियमेव व्याख्या विशेषतः कौतुकं कन्दलयतीति मन्ये । श्रीगङ्गासहायपण्डितवराणामतिशयितं ज्ञानञ्चास्माकमतीवामोदञ्जनयति । विरलाः खल्वेतादृशोपकारनिरता भवादृशास्साधवः । इतोऽपि पण्डितवरश्रीगङ्गासहाययशश्शीतांशुस्सर्वानानन्दयन्नाकल्पं समन्ततो विशदयतु । श्रेष्ठिकुलवरिष्ठश्रीकृष्णदासात्मजश्रीगङ्गाविष्णुश्रेष्ठिवर्योऽप्येवमेव सद्ग्रन्थप्रकाशनप्रवृत्तश्चिरं जीयादिति श्रीयदुगिरिनाथश्रीसम्पत्कुमारस्वामिसन्निधावाशासे ।

श्रीयादवगिरिनिवासी गीर्वाणशास्त्रशालापण्डितः

तिरुनारायणाचार्यः मेलकोटा.

श्रीमता श्रेष्ठिकुलतिलकेन श्रीकृष्णदासात्मजगङ्गाविष्णुमहाशयेन सबहुमानं प्रेषितं पंडितवरश्रीगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितं श्रुतिगीतमादितोऽवलोकयतो मम मानसमेवमभिप्रैति । श्रीमतो भागवतस्य भूयसीषु व्याख्यासु सतीष्वपि, इयमभिनवा स्वाख्यां सार्थयन्ती व्याख्या प्रायशस्तत्सर्वसारास्वादिनी कलशोदधिनिर्मथनसमुद्धृतममृतमिव विबुधामोदमुदञ्चयत्यतितरामित्यत्र नैव संदेह्मि अपि चेयं प्रकरणोपयुक्तान् शास्त्रीयान् यावद्विषयान् न विजहाति । प्रकाशयति च दुरूहार्थपदसमुदायजटिलस्यापि श्रीमतो भागवतस्य सुव्यक्तमाशयान् व्यपोहति च विषयान् इति नात्युक्तिमवगाहते । नेतरमतदूषणमनुमनुते,न काठिन्यमालम्बते, अस्याश्च सरसमृदुलमधुरपदपुञ्जगुम्फगम्भीरधोरणी विदग्धजनमनोहारिणी प्रचाकाशीति । एतादृशान् ग्रन्थान् दुर्लभानपि सुलभानमूल्यानपि समूल्यानपूर्वानप्यशेषजनगोचरानारचयन् अयं श्रीकृष्णदासात्मजो गङ्गाविष्णुश्रेष्ठी भगवद्भागवतजनमनःप्रीतिपात्रमेवेति तस्मै श्रेष्ठिन आशासे धन्यवादानसङ्ख्यान् ॥

व्याकरणविद्वान् अघलयविद्याविलासपाठशालाध्यक्षः

यादवाद्रि कंदाडै, श्रीनिवासराघवाचार्यः

कृष्णराजवेटे, जिला मैसूर.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्गोदोत्तुङ्गतरङ्गसङ्गमङ्गलगन्धवहान्दोलनातिपवित्रितश्रीक्षेत्रनासिकवासिगर्गहरिशास्त्रिदेशपाण्डेश्रीधरशास्त्रिदीक्षितसखारामशास्त्रिकृतानन्ताशीर्वादवल्लयः समुल्लसन्तुतराम्। विशेषस्तु श्रीमद्भिः अन्वितार्थप्रकाशिकाख्यश्रीमद्भागवतटीकायाः अङ्कनमारब्धं तन्मध्यस्थश्रुतिस्तुतिव्याख्या दृष्टा सा अतीव आल्हाददायिनी यथार्थतत्त्वप्रकाशिका चार्वाकादिकुतर्कमहीधरकुलिशायमानसूत्रकृदाकूतप्रकाशनज्यौत्स्न्यव्याख्यास्तीति तां दृष्ट्वा आल्हादार्णवे मग्ना अभूवन् । एतादृक् सत्कर्मविषये श्रीमतां मतिः शुक्लपक्षप्रतिपद्भवविधुवत् वर्धतां इत्याशास्महे इति शम् । श्रीक्षेत्रनासिकपञ्चवटीनिवासिनः

गर्गगोत्रोद्भव हरिशास्त्रिणः ।

महादेवात्मज सखारामशास्त्रिणः

वामनात्मज श्रीधरशास्त्रिणः ।

वेदस्तुतौ अन्वितार्थप्रकाशिकाख्यटीका तु बालानां सम्यक्बोधनार्थमुपयुक्ता वर्त्तते अत एव उत्तमोत्तमास्ति इति विनायकशास्त्रिणामभिप्रायः ।

भवत्प्रेषिता श्रीमद्बुन्दीस्थगङ्गासहायसुधीवरविनिर्म्मिताऽन्वितार्थप्रकाशिकाख्यया व्याख्यया समन्विता श्रीमद्भागवतदशमस्कन्धोत्तरार्द्धान्तर्गता वेदस्तुतिस्सादरं स्वीकृता यथाशेमुष्यवलोकिता चात्रायमाशयोऽस्माकम् नूत्नेयं श्रीमद्भागवस्यान्वितार्थप्रकाशिकाख्या व्याख्याऽन्वर्थेतरप्रत्नप्रत्यग्रव्याख्याभ्योऽतीव रम्या श्लाघ्या सकलग्राह्या सन्मान्या च । यतोऽस्या निःशेषश्लोकानां सरलतया सान्वयार्थो भावार्थश्च प्रदर्शितोऽस्त्यथ च शब्दानुशासनादिषडङ्गज्ञस्य षड्दर्शनाभिज्ञस्य टीकाकर्तुः कवेर्भावुकस्य भगवति भागवते च भूरि भक्तिभावत्वाद्भगवद्भक्ताग्रगण्योऽयं धन्यो महर्षिवर्य्यः ।

शिष्टधर्म्मप्रतिपादकः श्रीमद्दाधीचपण्डितो ज्ञारसरामशर्म्मा कामठीस्थः ॥

इह खलु भारतीये विपुलावलये पुरा वेदशास्त्राद्यखिलगीर्वाणविद्यापारावारपारीणाः धरणिगीर्वाणधुरीणाः भूयांसो विद्वांसः सम्बभूवुः । अथ प्रकृतप्रबलकलिकाललीलावशात् आपतितेन शास्त्रादिविद्यापठनपाठनसंप्रदायस्य अतिकार्श्येन सलिलसेकादिसहकारिकारणविरहेणोद्यानभूमिमहीरूहा इव ताः शास्त्रादिविद्याः अतिजीर्णतामावहन्ति । इदानीं क्षुधार्तस्य षड्रसपाकदानमिव श्रीमद्भागवतस्य श्रीबुंदीमहाराजाश्रितगङ्गासहायैर्निर्मिता अन्वयार्थप्रकाशिका विद्यार्थिनां महोपकारिकाऽभूत् तदन्तर्गतश्रेष्ठिगङ्गाविष्णुप्रहितश्रुतिगीतावलोकनेन अस्य सर्वज्ञत्वमनुमीयते । मालवदेशान्तर्गतराजाश्रितअवन्तिस्थ वासुदेवशास्त्री ।

यदियमन्वितार्थप्रकाशिकाख्या श्रीमद्भागवतव्याख्या सुप्रसिद्धविद्वद्वर्यसम्मानितशब्दार्थसौष्टवा भवत्विति मनीषया तदेकदेशश्रुतिगीतव्याख्यानमस्मदन्तिकमपि प्रहितं तदस्याः तदुभयसौष्टवं किमिह निरूपयामो यदवलोकनमात्रतोऽवधानपुरःसरं व्युत्पित्सूनां दुरूहश्लोकार्थोऽपि झटिति स्फुटतया निर्विचिकित्सं बुद्धिमारोहतीति परमेतन्निर्म्मातुर्बुधवरस्य श्रीगङ्गासाहायस्याशेषदर्शनबुद्धिकौशलवैभवंतु सविस्मयं स्तुमहे । इति । तद्यथा ।

व्याख्यां के सुवते न नाम सुधियः स्वस्वानुरूपोदयं
स्वातन्त्र्येण परन्तु संवितनुते गङ्गासहायो बुधः । भास्वद्भेश्वरवह्निविद्युदुडवो भान्त्येव विश्वोदरे गाङ्गी भास्तु समस्तभासनपटुः सर्वोपरि भाजते ॥ १ ॥ इति शम् ।

आचार्य्य वासुदेवशास्त्री.

CC-0. In Public Domain. Digitization by eGangotri

इयं किल वेदस्तुतिः श्रीभागवतदशमस्कन्धे सप्ताशीतितमाध्याये पठ्यते । " सर्वे वेदा यत्पदमामनन्ति " इत्यादिभिर्ब्रह्मणस्सर्ववेदवेद्यत्वावगमात् ' सत्यं ज्ञानमनन्तं ब्रह्म ' इत्यादीनां ब्रह्मपरत्वसम्भवेपि ' सर्वं खल्विदं ब्रह्म ' इत्यादिषु ब्रह्मसमानाधिकरणतया प्रयुक्तया ब्रह्मवाचकत्वेनाभिमतानां जगद्वाचिनां सर्वादिशब्दनां ब्रह्मप्रतिपादनपरत्वं कथमिति प्रश्नसमाधानार्थमुपाक्षिते नारदनारायणसंवादरूपेतिहासे घटकीभूता श्रुतिगीतिरियम्। इयं च बहुभिर्व्याख्यातृभिस्तत्तदभिमतमतानुसारेण व्याख्याता । प्रकृतव्याख्यानकर्ता चायमद्वैतमतानुयायीति व्याख्याशैल्यैवावगम्यते । अत एव च व्याख्यानमपीदं तन्मतानुसार्यर्थगर्भितमिति पुनरुक्तम् । श्रीधरीयाद्वन्यव्याख्यापेक्षया चात्र सन्ति बहवो विषया अधिकाः प्राकरणिकाः । व्याख्यानं चेदं नातिविस्तृतं सरलशब्दघटितं चेति नूनमनधिगतबहुशास्त्रतत्त्वानां मृदुलमतीनामप्युपकरिष्यतीति विश्वसिमः । अतश्च सारार्थसंग्रहरसिका इदमपि संगृह्य प्रकाशकस्योत्साहं बहूकरिष्यन्तीति मन्यामहे । पुस्तकं चेदं बोम्बाय्विभागान्तर्गतकल्याणनगरे श्रीलक्ष्मींवेंकटेश्वरमुद्रालयाधिपतेः श्रीकृष्णदासात्मजस्य गंगाविष्णुश्रेष्ठिनस्सकाशाल्लभ्यते ।

काञ्चीवरंनिवासि संस्कृतपण्डित.

पि० बि० अनन्ताचार्याः ॥

अयि स्वरूपोज्जीवनपर्वत्रयमुखोल्लासैकोद्यमा श्रेष्ठिनः श्रीगङ्गाविष्णुमहाशयाश्चिरं जीवन्तु भवन्तः । प्रैषिषुश्च यत्समालुलोकयिषया श्रीमद्भागवतान्तःपाति श्रुतिगीतं पण्डितवर्य्यश्रीगङ्गासहायनिर्म्मितान्वितार्थप्रकाशिकाभिधव्याख्ययाऽलंकृतं तन्निरीक्ष्यैतदीयविषयाननुभवितुमङ्कुरितोत्साहोऽपि न मस्तोत्साहः यत्प्रत्यैक्षिषि बलादापतितानेकविधनित्याराधनोपयुक्तकार्य्याकुलीभवन्मनसो निराकुलत्वं तथापि यदृच्छातः केचनैतदीयविषयाः समैषिषुर्मे दृष्टिपथं तावन्मात्रेणावगतप्रस्तुतव्याख्यातृनिपुणव्युत्पत्तिपरिपाकः साधु समर्थये तल्लेखपरिपाटीं सादरं सशिरःकम्पञ्च यत्सरलसरसशब्दैरन्वितार्थाभिधानेन तत्त्वार्थबुभुत्सूनां महानुपकारः कृत इति तदेतन्मुद्रणे बद्धोद्यमानां भवतामपि सन्ततं धन्यवादवितरणेनोपरमामि चेति शम् ।

कुरुक्षेत्रान्तःपातिफत्तेपुरलब्धजनिर्भिवानीवास्तव्यः

आचार्य्य महावनशास्त्री.

श्रीगङ्गाविष्णुश्रेष्ठिवरसम्प्रेषितान्वयार्थप्रकाशिकाख्यश्रीमद्भागवतव्याख्याभागसमालोकनसमयसञ्जातामन्दानन्दपरवशं चेतो मदीयमीदृशातिस्वरसतरसरलसुन्दरार्थसन्दर्भगम्भीरसरणिपरिशोभितव्याख्याप्रख्यापयितुः श्रेष्ठिवरस्य जन्मान्तरार्चितसुकृतजातं किमपि समुल्लसतीति परं मन्यते प्रत्यहमनुभूयते च सहस्रनामभाष्यपारायणसमये तदीयमुद्राशालाक्षरावलीसौन्दर्यं नयनानन्दं करोति किंबहुना व्याख्यातुः श्रीगङ्गासहायविदुषः सकलशास्त्रप्रावीण्येन सार्वजनीनोपकारा चेयं जयति व्याख्या । मैसूर संस्थानविराजमानयादवाद्रिगीर्वाणविद्याशालापण्डितेन ।

अ० रामानुजाचार्येण कृतमुपलालनम् ।

भवत्प्रेषितेयं श्रीमद्भागवतान्तर्गतश्रुतिगीतव्याख्याऽन्वितार्थप्रकाशिकाभिख्या परिशीलिता विदितार्था च, प्रायेण श्रीधरीयटीकानुसारिण्यपि श्लोकानामन्वयक्रमेणार्थप्रतिपादकतया व्युत्पित्सूनामत्यन्तोपकारिणीति प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाति । स्थानी ककुण्यण्णय्यंगार श्रीनिवासाचार्यः संस्कृतकालेज् अध्यक्षः मेलकोटा.

अहह सम्प्रति महच्छर्मापारपारावारे निमग्नाः स्मः । यल्लेखवागवनतिसमयेऽपि कश्चिदखिलवाङ्गदमर्दकास्मदीयगौरवाभिमतिसम्पोषकभारतीनिष्णातः पंडितगङ्गासहाय आविर्भूतः । येन पौराणिकानां सुखाय विदुषामपि हर्षाय विनोदाय च सकलकलिकल्मषरुग्विध्वंसनधुरीणश्रीशुकास्यगलितश्रीमद्भागवतरसपानं यदनेकपुण्यपुञ्जफलप्राप्यम् अन्वितार्थप्रकाशिकाख्यटीकारूपवेध (?) मुख्ययालंकृत्य सुलभं कृतम् । यद्यपि पूर्वैः पूर्वतरैश्चापि बह्वयष्टीकाः संघटितास्तथापि काभिः केवलं विद्वांसः काभिश्चूर्णिकादिभिः केवलं साधारणाः स्वार्थं साधयन्ति । अनया तु द्वयोरेव प्रीतिरुत्पाद्यते । यद्यपि नावलोकिता मयाऽखिला टीका तथापि श्रीकृष्णदासात्मजश्रीगङ्गाविष्णुना प्रेषितं श्रुतिगीतं नयनगोचरीकृतम् तेनैव स्थालीपुलाकन्यायेन सर्वावलोकनवदात्तम् ।

पं. गणेशदत्त व्यासः चूरू.

अवलोकितमन्वितार्थप्रकाशिकाख्यव्याख्यायुतं श्रुतिगीतं टीकासौष्टवेन सन्तुष्यातितमां मे चेतः । इयं सरला सरसा चास्ति तथा साधरणानां विदुषां चोपयुक्ता सकलार्थगभीरत्वेनेति संमनुते—

कराडकर—वैद्योपनामक वासुदेवशास्त्री ।

श्रीगोकर्णनगरवास्तव्यशाण्डिल्यान्वयश्रीश्रीनिवासतनूभवनृसिंहाचार्येण अन्वितार्थप्रकाशिकाख्या व्याख्या सम्यगवलोकिता एतत्पठनशीलानां सर्वेषां शिष्याणां पठितुं पाठयितुं च सुलभतरेण अवकाशं दातुं अद्वितीयत्वेन जेजीयते मम तु परमानन्दो जायते इति—

मैसूरदेश हासनजिला गोकर्णपुरीनिवासी नृसिंहाचार्यः ।

स्वति समस्तकल्याणगुणविराजमानेन न्यायोपार्जितार्थस्य पात्रविनियोगेन तत्साफल्यकारिणा श्रीमता श्रेष्ठिवर्येण श्रीकृष्णदासात्मजश्रीगङ्गाविष्णुश्रेष्ठिना प्रहिता श्रीमद्बून्दीनगरविराजमानमहाराजाश्रितविद्वच्चूडामणिगङ्गासहायविरचिता श्रीमद्भागवतान्तर्गतश्रुतिगीतव्याख्या अन्वितार्थप्रकाशिकाख्या आगता अवलोकिता च मया सोत्कण्ठं सानन्दं व्याख्यया मधुरिमाणं गाम्भीर्यादिंश्च वर्णयितुं सहस्ररसनायुतोऽपि न शक्नुयादिति मन्ये । सेयं व्याख्या पद्मरागरत्नस्य कनकबन्धनमिव अधिकद्युतियुता च वर्तते ।

मैसूरदेशान्तर्गतश्रवणवेलुगुळग्रामवासी गीर्वाणभाषोज्जीवनी पाठशालाध्यक्षः दोर्बलिजिनदासशास्त्री.

कल्याणनगरस्थलक्ष्मीवेंकटेश्वरालये मुद्रिता अन्वितार्थप्रकाशिकाख्या व्याख्या जा—लक्ष्मीनृसिंहाचार्येण मह्यं परमादरपुरस्कारेण दत्ता सा च मया साद्यन्तं पठिता महान् आमोदस्समजनि परं च इयं व्याख्या विद्यार्थिनां नवशिक्षितानां विदुषामपि मनोऽनुकूला भवतीत्यलं विस्तरेण । शरपुरग्रामनिवासी—

पं. गोपालाचार्यस्वामी

भवद्भिः श्रीमतां लक्ष्मीनृसिंहाचार्याणां सन्निधौ प्रेषिता अन्वितार्थप्रकाशिकाख्या व्याख्या तैर्मह्यम् अदात् सा च मया सम्यक्परिशीलिता इयं वक्तुं वाचयितुं च अतीव ललिततया विलसति अतः मम अत्यानंदस्समजनि । ग्राहकाः बहवो भूयासुरित्यलं विस्तरेण ।

शरपूरग्रामवास्तव्य नृसिंहार्यतनूभव—

श्रीनिवासदेशिकाचार्यः

CC-0. In Public Domain. Digitization by eGangotri

श्रीसर्ववसुमतीमण्डलमण्डनायमानाधिगतयाथातथ्य-पदवाक्यप्रमाणपारावारपारीणदयादानदमानियमतपस्तत्परैरनुष्ठीयमानो वर्णिनामाश्रमिणां चैहिकामुष्मिकश्रेयस्कर-श्रीपुरुषोत्तमसचिदानन्दानुरागस्तस्य श्रीमद्भागवतव्याख्याव्याजेन प्रबोधकर्त्र्यै पुंभावदेवतायै भद्रं ब्रुवाणाः **श्रीहरिनामशर्म्माणो** संमन्वते इमामन्वितार्थप्रकाशिकाख्यव्याख्याम् ।

इयं भागवते व्याख्याह्यन्वितार्थप्रकाशिका । कृता गङ्गासहायेन विदुषाऽतिप्रयत्नतः ॥ भ्रामरीं वृत्तिमाश्रित्य कृतोऽर्थमधुसंग्रहः । तेन इन्दूरसंस्थाने गणेशो हर्षितोऽभवत् ॥

श्रीमन्महाराजहोलकरीयवेदशास्त्रशालाध्यक्षस्य भागवतोपाह्वस्य **गणेशशास्त्रिणः** संमतिरस्यां व्याख्यायाम्।

अस्तु स्वस्ति श्रीगङ्गाविष्णवे श्रीकृष्णदासपुत्राय श्रीपण्डितगङ्गासहायकृता भवत्प्रेषिता । लक्ष्मीनृसिंहवर्येण दत्ता दृष्टा यथामति । व्याख्या श्रीश्रुतिगीताया अस्मद्धृदयचन्द्रिका ॥ रामानुजेन कन्दाडकुलजेनात्मशर्मणा श्रुत्यन्तगुरुदैवेन श्रुत्यन्तन्यासकर्मणा ॥ सोऽयं मुद्रणचातुर्यभर्ता भागवतं शुभम् । दशमं व्याख्यया साकं पूरयेदिति निश्चितम् । यडतोरेताल्लूक–**हंपापुर. रामानुजाचार्यः ।**

श्रीमद्भावतोपरि विराजन्ते टीकाः बह्व्यः ताभिश्च स्थूलसूक्ष्मप्रज्ञानां साधरण्येन श्रीमद्भागवतीयसकलावयवार्थावबोधो नोदेतीतिलोकोपकारानिरतबुधवरपण्डितगङ्गासहायसहायिता टीका सर्वजनीनतया कल्प्यते इति ॥

सम्मतिरेषा श्रीअयोध्यानिवासित्रिपाठ्युपनामक **श्रीभैरवप्रसादशर्म्मणः ॥**

श्रीमद्बून्दीमहाराजाश्रितविद्वद्वरगङ्गासहायविरचिताया अन्वितार्थप्रकाशिकाया श्रीमद्भागवतव्याख्यायाः कियन्तं भागं दृष्ट्वा स्वाभिप्रायं प्रकटयामि तावत् । इयं हि निखिलाङ्गोपाङ्गोपेता सर्वाङ्गसुन्दरा अनतिव्युत्पन्नानामपि मूलार्थविशदीकरणे निरुपमं साहाय्यं विरचयेदिति संक्षेपः ॥ **प्रभाकरशास्त्री.**

श्रीमद्गङ्गासहायकोविदैर्विरचिता वेदस्तुतेर्व्याख्या मया दृष्टा पूर्वाचार्य्यविरचितव्याख्यानतोऽधिकतरं विराजतेतरामेतां व्याख्यां पश्यतो मम परमानन्दस्समजनि श्रीमत्स्वामीन्द्रदत्ताख्यं गरीयांसमुपेयुषो विज्ञातिरियगाभाति ॥ **जगन्मोहनशर्म्मणः ।**

सायन्तनकुवलयमदहरणचयस्निग्धमुग्धदिव्याङ्गम् ॥
ध्यायन्ति यं मुनीन्द्राः वन्देऽहं यादवाद्रिनिलयं तम् ॥ १ ॥
नमस्तस्मै भगवते व्यासायामिततेजसे ॥
यस्य प्रसादात्सर्वेऽपि विलङ्घन्ते भवार्णवम् ॥ २ ॥
स जयति गङ्गाविष्णुर्वैश्यकुलाग्रेसरः श्रीमान् ॥
यस्य च मुद्रणशाला बुधजनसन्तोषकारिणी जयति॥ ३॥
गङ्गासहायलिखिता अन्वितार्थप्रकाशिका ॥
श्रुतिगीताविवरिणी चिरं भूयात्सतां मुदे ॥ ४ ॥

इह खलु परमकारुणिको भगवान्बादरायणः जगदेव दुःखपंकनिमग्नमुद्दिधीर्षुः अष्टादशपुराणानि प्रकटीचकार तेषु च सात्विककथापरत्वेन उद्धुष्यमाणं श्रीभागवतं निखिलपुराणसारभूतं श्रवणपठनादिना संसारोत्तारकमिति आपामरपंडितमुररीकृतम् । सर्वजनीनतया चास्मिन्विषये नास्माभिर्वक्तव्यमस्ति । अस्य च पुराणरत्नस्य द्वैताद्वैतविशिष्टाद्वैतादिमतभेदेन नानाविधानि व्याख्यानानि सन्ति । एवं स्थिते मुम्बापुरीनिकटवर्तिकल्याण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगरवास्तव्येन श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वीयलक्ष्मीवेंकटेश्वरमुद्रालयमुद्रितं श्रीबूंदीमहाराजाश्रितपंडितवर्यश्रीगङ्गासहायविरचितमन्वितार्थप्रकाशिकाभिधानं श्रीमद्भागवतान्तर्गतश्रुतिगीतिविवरणं सादरं मह्यं प्रेषितं तदेतत्सर्वं मया व्यलोकि एतद्विवरणं ग्रन्थकर्तुः श्रीमतो गङ्गासहायविदुषः न्यायशास्त्रनिष्णातत्वं व्याकरणशास्त्रपारीणत्वं निखिलपुराणेतिहासपारंगतत्वं पदवाक्यप्रमाणपारावारपारीणतां च निश्शङ्कं प्रकटीकरोति । श्रीमद्भिः प्राचीनपण्डितवर्यैर्विरचितानि व्याख्यानानि विदुषामेवोपयुक्तानि । इयं च व्याख्या व्युत्पित्सूनामपि सरलतया श्रुतिगीतार्थं बोधयति अनेन सकलजनोपयोगिव्याख्याकरणेन श्रीभागवतप्रतिपाद्यो भगवान्वासुदेवः पण्डितगङ्गासहायवर्यान् परेण श्रेयसा योजयत्विति भगवन्तं प्रार्थयामहे सेयं व्याख्या अमुं जनं पीता सुधेव निरतिशयानन्दभाजनं विदधातीत्यलंकरोमि स्वाभिप्रायम् ।

श्रीमन्महीशूरमहाराष्ट्रीयश्रवणबेळ्गुळस्थराजकीयसंस्कृतशालाध्यापकः ।

कछभुजं श्रीनिवासाचार्यः

सुखेन बालानामप्यन्वयबोधौपयिकतया सुगमं प्रायशोऽनुकूलमेव च वर्तत इदं व्याख्यानमिति इयदेव विलिखितुं शक्यम् ।

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्यश्रीवेङ्कटाद्रिश्रीमदनन्तपूरुषाचार्यदिव्यसिंहासनासीनश्रीमद्रङ्गाचार्यस्वामिनः ।

मधुरिपुगुणश्रेणीमाणिक्यमञ्जुलभूषणी
भवदतुलगीर्वाणीभावीप्रकाशनकारिणी ॥
सुरुचिरपदश्रेणी क्षोणीव देवतरङ्गिणी-
सहचरसुधीवाणी क्षीणीकृतेतरधोरिणी ॥ १ ॥
गङ्गासहायसुधिया याऽन्वितार्थप्रकाशिका ।
श्रीमद्भागवतव्याख्यासन्दोहानतिशायिनी ॥ २ ॥
सर्वशास्त्रार्थमधुरा मधुरार्थप्रकाशिनी ॥
कल्पते कल्पवल्लीव सुमैः सुमनसां मुदे ॥ ३ ॥

बून्दीमहाराजाश्रितपण्डितगङ्गासहायसमाह्वयप्रणीता श्रीमद्भागवतव्याख्या व्याख्यानान्तरापेक्षया सुललितपदविन्यासमहिम्ना सुदृशां मनोहारिणी सकलशास्त्रार्थसंवेदिनी सुगमसुभगभावा श्रीमच्छुकमुनिमनोऽनुसारिणी च वाभाति । एतद्व्याख्यानावलोकनेन श्रीभागवतश्लोकार्थाः अनुपदमेव मनोधिरूढा भवेयुरिति मन्ये । सर्ववेदान्तानुसारिणी चेति तामतीव बहु मन्ये श्रुतिगीतव्याख्या परमवलोकिता । स्थालीपुलाकन्यायेन सर्वाऽप्येवमेव स्यादिति च विभावये । इति ।

मैसूरदेशान्तर्गतश्रीयादवाद्रिनिवासिनां श्रीद्राविडाम्नायाचार्य **श्रीनारायणाचार्य**–स्वामिनां संमतिः।

गाढः प्रेमा जातो दर्शं दर्शं कृतां व्याख्याम् ॥ श्रीमद्भागवतेऽस्मिन् बुधवरगङ्गासहायेन ॥ १ ॥ अतिक्रम्य टीकाशतं तेऽद्य टीका वरीवर्ति विद्वन् नरीनर्ति भावः ॥ समग्रोऽत्र वैयासकेरन्तरस्थो बुधोऽल्पो मोमुदीतीह सम्यक् ॥ २ ॥ अयोध्यापाठशाला प्र०अध्यापक.

पं० चन्द्रभूषणशर्म्मा

इयमन्वयार्थप्रकाशिका सुकुमारमतीनमृतपयःपिपासूननायासैः पायनेन तोषयति प्रकाशयति च श्रीमत्पराशरसूनुनिर्मितसरोरुहरसास्वादिनामन्तःकरणानि सरोरुहकाशनेन । अतोऽस्या निर्माता प्रकाशकश्च सुयशोभाग् श्रीजगदीशकृपाभाक् च ।

पं० निरीक्षणपतिशर्म्मबहादुरत्रिपाठी.

CC-0. In Public Domain. Digitization by eGangotri

श्रुतिस्तुतेर्याऽभिनवाऽन्वितार्थप्रकाशिका मेऽन्ति सुधा-दिताद्भुता। नेत्रातिथिस्सा विहिता परां मुदं टीका तनो-त्यात्तसमस्तटीका ॥ १ ॥ मनोरमोमार्द्धशरीरकल्पा स्व-ल्पाक्षरा श्रीधरसूक्तिरेषा। वेदान्तनिष्णातबुधैकगम्या रम्यापि नालं निखिलार्णपेषा॥ २ ॥ ततो न तोषाय नु तादृशानां नयादृशानां मनसां बुधानाम् ॥ विद्यावतां भागवते परीक्षा जागर्त्यतस्तत्कठिनत्वशिक्षा ॥ ३ ॥ चिराय काव्येषु विलोकयन्मुहुः श्रीमल्लिनाथीमनुशब्द-टीकाम् ॥ कृतार्थतायै विदुषां कथं नु सा नात्राप्यभू-रसहृदये विषादः ॥ ४ ॥ तदूनतादोषनिवारणाय श्रीम-ल्लिनाथस्सुहृदां सुखाय॥ धृतावतारो कलयन्नितान्तमिमां विचित्रामिति भाति मेऽन्तः ॥ ५ ॥ भीष्मोक्तिमालोक्य तथापरामिमां भीष्मप्रसूरस्य सहायभूता। सोऽयं बहु-व्रीहिसमासतः किं षष्ठीसमासादथवा हरिर्हरः ॥ ६ ॥

प्रतापगढदेशवर्तिकैथौलाराज्यान्तर्गतराजातारााग्राम-निवासिसहगौरमिश्रपाण्डिमहामहोपाध्यायश्रीसत्यनारायण-कृष्णशर्मात्मज—छत्रपालकृष्ण—शर्मणाम् ॥

श्रीमत्प्रहितं वेदस्तुतिपुस्तकं लब्धम्। इयमन्वि-तार्थप्रकाशिकाख्या व्याख्याऽतीव सरला श्रेष्ठगुणवती चास्ति। किंच अन्वितार्थप्रकाशकत्वेन गूढार्थस्य सुग-मतया ज्ञापनेन विद्यार्थिनां पण्डितानां चातीवोपयोगि-नीयम्। शतशो धन्यवादाः श्रीमद्भागवते येनास्मासु पं. गङ्गासहायसदृशाः प्रज्ञागरिष्ठाः सृज्यन्ते। नायं पं. गङ्गासहायः केवलं पण्डितः किन्तु आचार्यपदवी-मप्यतिशेते। अलमतिविस्तरेण ॥

चूरुनिवासी पं. **धारानन्दशर्म्मा।**

श्रीमद्भागवतस्य सन्तु शतशष्टीकान्तराणि ब्रुवे। मर्म्मस्पृक् त्वियमेव मर्म्मविदुषा गङ्गासहायेन या ॥ टीकाशेषनिगूढतत्त्वविवृतिप्रौढिं गता निर्मिता ॥ सा चेयं यदि मुद्रिताऽपि कतमो लोकोपकारस्त्वितः ॥ १ ॥

श्रीअयोध्यास्थभागवतविद्यालयप्रधानाध्यापक

पं० **रामाज्ञात्रिपाठी.**

गङ्गासहायविदुषा विदुषां वरेण व्याख्यानमद्भुत-महोऽरचि यद्विचित्रम्। वेदस्तुतेरसमवलोक्य मनो मदीयं नित्यं तदीयमभिनन्दति बुद्धिमत्त्वम् ॥ १ ॥

श्रीमदयोध्यानिवासिपण्डित—**इन्द्रदत्तशर्म्मा.**

उद्यद्भास्करकर इव टीका स्फीता प्रकाशयत्यर्थान् ॥ गङ्गासाहायसुकृतिरन्वितार्थप्रकाशिकानामा ॥ १ ॥ श्रीमद्भागवतस्य व्याख्या लोके जयन्ति शतशोऽपि ॥ मन्ये धन्यामेनां या हि सुखार्थाभिधायिनी जयति ॥२॥

इत्याशास्ते टीकाऽभ्युदयं साकेतानुश्रविकभागवत-विद्यालयाधिवासी मिश्रोपाह्व—**चन्द्रशेखरशर्मा.**

श्रीगङ्गासाहायकृता अन्वितार्थप्रकाशिकाख्या व्याख्या विदुषां नित्यं मोदं तनुते श्रीगङ्गासहायपण्डितैः श्रीविद्वद्वरहृदये श्रीमद्भागवतगूढरचनातत्त्वार्थबोधाय विरचितां सारार्थसन्दर्शिनीमानन्ददामन्वितार्थप्रकाशिका-ख्यव्याख्यां दृष्ट्वा मन्मनसि महानानन्दः समजनि तारासु चन्द्रज्योत्स्नेव विद्यमानासु बह्वीषु टीकासु मनोरमत्वेन सारार्थप्रदर्शकत्वेनेयमेवान्वितार्थप्रकाशिका वरीवर्ति।

श्रीअयोध्याभागवतविद्यालयस्थछात्रवरपाण्डेयोप-

नामक—**रामचन्द्रशर्म्मा.**

सम्प्राप्तं श्रीमत्प्रहितं श्रुतिगीतम्। समवलोक्य अन्वितार्थप्रकाशिकाख्यव्याख्यां प्रमोदते नश्चेतः। यत इयं व्याख्या नवीनाप्यनवीना पुरातनव्याख्यातृव्याख्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदाक्षिण्यातिशायित्वात् । किंच दृष्टायामेवास्यां पाण्डितगङ्गासहायानामखिलशास्त्रपचेलिममतित्वं मनस्यारोहति । किंच पौराणिकानां सुखभावार्थद्योतनादियं महोपकारिकेति संमनुते । आमलकग्रामनिवासी भिषगुपनामा

नारायणसुनुः दामोदरशर्मा अमळनेर.

बून्दीराजसमाश्रितो हि मतिमान्मान्यो वदान्योऽनघो ।
राधाकृष्णपदारविन्दरसिको गङ्गासाहायः सुधीः ॥
तेनासौ विशदीकृता च सरला टीका श्रुतीनां तु या ।
सेयं नोऽभिमतं ददातु सततं सर्वैः सदा गृह्यताम् ॥ १ ॥
टीकाः सन्तु कवीश्वरैर्विरचिता यद्यप्यनेका वराः
तासां सारविचारपारकुशला टीका त्वियं दृश्यते ।
यस्याः सुन्दरतां समीक्ष्य सुधियश्चेतो ममामोदते ।
तस्याः पूर्तिरलंकरिष्यति यदा ग्राह्या भवद्भिस्तदा ॥ २॥

लक्ष्मणपतने मुन्शीनवलकिशोरमुद्रणालयस्थपण्डित

शक्तिधरशर्मणां सम्मतिः

सर्वेषां भूतलनिवासिनां श्रीमद्भागवतामृतरसलोलपानां श्रीमद्भागवतस्येयमन्वितार्थप्रकाशिकाख्यव्याख्या श्रीमद्भिर्बून्दीस्थपण्डितवरैः गङ्गासहायैः कृता नवीना सुसरला चास्ति । सकलशास्त्रपारगामिभिः श्रीधरादिभिर्दुस्तरभागवताम्बुधेः सन्तारायाद्यावधि रचितासु व्याख्यासु एतादृशी श्रुतिस्मृतिव्याकरणादिशास्त्रप्रमाणैः साहिता अल्पज्ञसुखदायिनी विद्वज्जनानन्ददायिनी सनातनधर्मवर्द्धिनी परमोपकारिणी केनापि न निर्मिता सा चेयं श्रीमद्गङ्गाविष्णुश्रेष्ठिभिः अवश्यमेव मुद्रिणीयेति ममाप्यत्र सम्मतिः ।

पं. कोटानिवासि पांडे आनन्दवल्लभशर्मणः ।

विद्वद्वृन्दैः सुमान्या सुवचनरचनैः गद्यपद्यात्मिका या ।
गंगाविष्णोस्सुकीर्तिः परिसरति दिशं कृष्णदासेन सार्धम् ॥
याम्यां मुद्रापिता सा बुधजनसुखदा चान्वितार्थप्रकाशा ।
यां श्रीगंगासहायोऽकृत निजमतिना धन्यवादोऽस्ति तस्य १

पंडित हीरालालजीशास्त्री मु. आसाखेडा जि० उन्नाव.

बून्दीसंस्थाननिवासिना पण्डितवर्येण गङ्गासहायेन कृतेयं श्रीमद्भागवतस्य अन्वितार्थप्रकाशिकाख्या व्याख्या सादरं विलोकिता अस्य श्रीमद्भागवतस्य व्याख्यान्तरसत्वेऽपि अस्याः व्याख्यायाः विशेषार्थप्रकाशकतया विदुषां सुखबोधनद्वारा अतीव सन्तोषजनकत्वम् अन्वितार्थप्रकाशिकाह्वयव्याख्याकरणेन प्रीतः श्रीलक्ष्मीवेङ्कटेश्वरः अस्य श्रीपण्डितवर्यस्य ग्रन्थान्तरव्याख्याकरणेऽपि बुद्धिप्रतिभादिकारणकलापं दत्वा रक्षत्विति भगवन्तं सविनयं पार्थये ॥ यादवगिरिनिवासी नीलातंपल्लीतिर

नारायण अयंगारयः ।

श्रीराजलक्ष्मीविलासवत्यां बूंदीकोटा इति प्रसिद्धिं गतायां राजधान्यां राजाश्रितसकलपण्डितानां मध्येऽग्रेसरेण गङ्गासहायनाम्ना पण्डितेन स्वकल्पनया श्रीमहाभागवतस्य अन्वितार्थप्रकाशिका टीका कृता । सकलपण्डितैः सम्मानिता चित्तानन्दकारिणी चास्ति इत्यभिप्रायो मयाऽपि दीयते। इयं टीका गङ्गाविष्णुना श्रेष्ठिवरेण स्वकीयमुद्रणालये मुद्रिता । उभावपि चिरञ्जीवताम् ।

बदलापूरनिवासी दिवेकरकुलोत्पन्नः

पुरुषोत्तमात्मजः सदाशिवः ।

श्रीगङ्गासहायविदुषा विरचितेयं श्रीमद्भागवते व्याख्या सर्वप्रमाणानुरोधिनी परमरमणीया पौराणिकानामुपकारिणीति ॥ श्रीमद्वृन्दावने श्रीरङ्गनाथमन्दिरे निवासिना

योगिरामानुजार्येण कृता संमतिः ।

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

श्रीब्रह्मतंत्र परकाल श्रीमठ

हयग्रीव लक्ष्मीनारायण

मङ्गलदेवतयाऽनिशसङ्गतशुभतनुरभंगुरैश्वर्यः ।
मङ्गलतरङ्गदानान्तरङ्गदृग् वस्तुरङ्गवदनोऽव्यात् १॥
शुभगुणमणिपारायणमानतजनतापरायणं ब्रह्म ।
अर्च्यन्तुरायणाद्यैर्लक्ष्मीनारायणं सदाऽर्चयत ॥२॥
श्रीभगवद्रामानुजयतिवर्योपज्ञसम्प्रदायार्चा ।
चिरकालसुकृतसुलभा जीयात्परकालगुरुमणीमाला॥
श्रीमदनवद्यवैदिकपद्यैकस्थापकार्याणाम् ।
श्रीपरमहंससंज्ञिततुर्यपरिव्राजकार्याणाम् ॥
विश्रुतविष्वक्तन्त्रस्वातन्त्र्यागमशिरोयुगगुरूणाम् ।
कविकथकसिंहगुरुपदपद्मयुगीन्यस्तनैजभाराणाम् ४
रामानुजनिर्धारितसिद्धान्तोद्धारसार्वभौमानाम् ।
महिशूरजनपदाधिपनरपतिकुलदेशिकाग्र्याणाम् ॥
श्रीब्रह्मतंत्रकलिजिद्विख्याताचार्यवर्याणाम् ।
आस्थान्यामभिषिक्तैः श्रीकृष्णब्रह्मतंत्रपरकालैः ॥५॥
अनुगृह्यते यतीन्द्रैः श्रीमुखपत्रं प्रियाय भक्ताय ।
श्रीकृष्णदासतनुजश्रीगङ्गाविष्णुनैगमेन्द्राय ॥ ६ ॥
श्रेष्टिवर तावकीना भगवद्भागवतभक्तिमुखसुगुणाः ।
यदुगिर्यभिजनरामानुजार्यमुखतः श्रुता हिताः श्रुत्योः ॥
विष्णुपदाग्रप्रोद्गतगङ्गा यन्मूर्ध्नि तस्य तव युक्तम् ।
आर्याभिनन्दनीया गङ्गाविष्णोरमी समेधन्ते ॥ ८ ॥
किंच
श्रीभागवतव्याख्या त्वयाऽन्वितार्थप्रकाशिकाख्या या ।
प्रैष्यत विमर्शनार्थं सैषा समलोकि तत्तदंशेषु ॥ ९ ॥
प्रतिपदविवरणमधुरा शब्दे चार्थे च दोषगणविधुरा ।
विदुषां मनःसु हर्षं तदियं पुष्णाति कृष्णभक्तिमताम् १०
यद्यप्यद्वैतमतानुरोधिनी तत्त्ववर्णने सेयम् ।
तदपि च तदितरविषयेष्वविरोधात् सर्वहृद्यतां धत्ते॥११॥
अपिच साद्भिः सहस्रनामस्तुतिं सभाष्यामदा यदामुष्य ।
भागवतायुतनामस्तुतिभाक् समधिकसमृद्धिरसि तत्त्वम् ॥
दृढविशदमसृणपत्रेष्वतिसुषमैरक्षरैर्निपुणम् ।
संमुद्रिताः प्रबन्धाः आसेचनका हि नस्त्वया प्रहिताः १३
ईदृक्प्राक्तननूतननिबन्धमुद्राप्रचारणादिरतेः ।
हयमुखपदभक्तिस्तेऽभिवर्धतां सन्ततिः श्रीश्च ॥१४॥
श्रीमहिशूरपुरेश्वरकृष्णक्षितिपालकुलगुरुभिरेवम् ।
श्रीमुखमन्वग्राहि श्रीकृष्णब्रह्मतंत्रपरकालैः ॥ १५ ॥
प्लुवसंवत्सरे ज्येष्ठ शुक्ल५म्याम् ।इति नारायणस्मृतिः।

गङ्गासहायविदुषा रचिताऽन्वितार्थप्राकाशिकाख्य-
विवृतिर्ललिता च मुग्धा । श्रीवासुदेवचरणाम्बुजसक्तनृ-
णामत्यन्तमावहति मोदमियं नवीना ॥ १ ॥

पुरातना बहुक्षुण्णा गहनाः सन्तु साम्प्रतम् ।
नवीनां रसवर्णार्थी सेवन्तु रसिका इमाम् ॥ २ ॥

श्रीमद्भागवतस्य सन्ति बहुला व्याख्याः पुराण्यश्च याः ।
क्लेशं तासु विमृश्य वै बुधवरो गंगासहायाभिधः ॥
व्याख्यां यामकरोच्च या सुललितैः सीसाक्षरैर्मुद्रिता ।
गङ्गाविष्णुवणिग्वरेण महतां मोदाय सा कल्प्यताम्॥ ३॥

व्याख्याने प्रथमं प्रयोजनमिदं प्राहुर्बुधास्तद्विदः ।
तत्तद्वाक्यपदार्थयोरवगमस्तत्वावबोधोऽपरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दश्चापि कवेस्तृतीयमिदमित्यत्राखिलं शोभते ।
किन्त्वद्वैतविवेचने परमतस्तुष्यन्तु तत्पक्षिणः ॥४॥
श्रीयादवाद्रिनिलयश्रीमदनन्तार्यवंशजातेन ।
रामानुजार्यकृतिना सादरमोदनमिदं दत्तम् ॥ ५ ॥

विरलाः खलु क्ष्मावलयाभरणभूताः सहृदयाः यैरनिशमच्युतचरितचिन्तने दत्तचित्तैर्भूयतेऽनुभूय चाशेषविद्याविचारचातुरीमभिभूय चारिषड्वर्गमनारतमात्मविवेचनपरिशीलनशालिभिर्विबोध्य चान्तश्शान्तिदशावलम्बिनः संपाद्यन्ते भवदावाग्निनिष्टप्ताः पामराः। यैश्वास्यां कर्मभुवि जनुरासाद्य परोपकृतिरेव जनुषः परमप्रयोजनमित्यभिमन्यमानैः स्वप्राणव्ययायेऽपि पराङ्मुखैर्न भूयते समर्हणीयाः खलु ते महोत्साहाः! किंच यैरस्मिन्निखिललोकनिरालोकविधायके पिधायके च जनताज्ञानचक्षुषामतिनिष्ठुरे तिष्येपि युगे सात्वतशास्त्रमवतंसयद्भिः परमप्रवीणैः श्रीमद्विद्वद्वरैर्गङ्गासहायपण्डितैः विनिर्मिता श्रीमद्भागवतस्यान्वितार्थप्रकाशिनी टीका सा च श्रीमद्वेंकटमहीध्राधीश्वरानुकम्पापाङ्गैकभाजनैः श्रीमच्छ्रेष्ठिवर्यैः गंगाविष्णिवत्यभिधैः श्रीमल्लक्ष्मीवेंकटमुद्रणालये मुद्रयित्वा विकस्वरतां नीता विभाव्य चैतदुद्योगं समुत्कण्ठते मे चेतः परःसहस्रान् धन्यवादानुद्भावयितुं संभविष्यन्ति चैतदुद्योजनेन भूयांसो जनाः श्रीमद्भागवतार्थाभिज्ञा इति महती प्रत्याशा सन्तु चेमे चिरायुषो हृदयालव इति शम् ।

खाचरोदवास्तव्य **श्रीबापूशास्त्री ।**

श्रीमत्सु नमस्कारपुरस्सरेयमनुमतिः समर्प्यते भवद्भिर्निर्मितेयं श्रीमद्भागवतीयदशमस्कन्धान्तरगतश्रुतिस्तुतेरन्वितार्थप्रकाशिका यथार्थतोऽन्वितार्थप्रकाशिकास्ति यतो यामेकवारमप्यवलोक्याल्पविद्योऽपि पुमान् श्रीमद्भागवताभिप्रायविज्ञानसमर्थोऽवश्यमेव भविष्यतीत्यहं मन्ये । ईदृग्ग्रन्थस्य सम्प्रत्यावश्यकताऽपि वर्त्ततेऽतः श्रीमद्भिरेतदतीव सुकृतं कृतम् । आशासेऽहमीश्वरतः समग्रग्रन्थदर्शनसमयं सदैवेत्यलम् ।

पूर्णग्रन्थदिदृक्षुः त्रिवेदि **रामेश्वरशर्म्मा ।**
संस्कृताध्यापक क्वीन्सऐंग्लो संस्कृतहाईस्कूल **लखनऊ.**

श्रीयुतपण्डितगङ्गासहायैः बुन्दीमहाराजाश्रितैः प्रणीतां सुललितपदवतीमन्वितार्थप्रकाशिकां श्रीमद्भागवतव्याख्यां दृष्ट्वा संमोदते चेतः । व्याख्येयं श्रीमच्छुकमुनिमनोऽभिप्रायानुसारिणी अवनातिमामन्नां गीर्वाणवाणीमुज्जीवयितुं प्रभवेत् । तेनातिसमीचीनेयं सर्वश्लोकानां सुलभार्थप्रकाशकत्वात् इति ।

मालवदेशान्तर्गतमंदोसर निवासी **ॐकारशर्मा ।**

कल्याणनगरस्थापितश्रीलक्ष्मीवेङ्कटेश्वराह्वयमुद्राशालायामतिस्फुटैर्विरलविरलैर्मुक्ताफलायमानैर्नागराक्षरैर्मुद्रितस्तदधिपतिना आस्तिकाग्रगण्येन लेखनप्रमादप्रमुषितान् प्राचीनान् अतएव सुदुर्लभान् वेदवेदान्तेतिहासपुराणादिपुस्तकान् प्रयासेन सम्पाद्य बहुकालान्मुद्रापयित्वा यथासमयं पण्डितवर्याणां पुस्तकप्रदानेन विद्याभिवृद्धौ महोपकृतिं कुर्वता श्रेष्ठिवर्यगङ्गाविष्णुना प्रहितोऽन्वितार्थप्रकाशिकाख्यव्याख्यान्वितः श्रीमद्भागवतदशमस्कन्धः सुचिरं मया व्यलोकि । बुन्दीनगरनिवासिना गङ्गासहायपण्डितवर्येण विरचितेयं टीका तस्य पण्डितवर्यस्य विविधशास्त्रज्ञतां निरुपमां च भगवद्भक्तिं सूचयति किंच भागवतार्थपीयूषास्वादे अल्पधियामपि सरसतोऽर्थप्रकाशनेन महोपकारिणीति सन्तुष्यामहे ॥ लक्ष्म्याख्यायुतवेङ्कटेशपदभाक् मुद्रालयं वर्धतां तन्मु-

CC-0. In Public Domain. Digitization by eGangotri

द्रालयमुद्रिता च सुचिरं ग्रन्थावलिर्वर्धताम् । गङ्गाविष्णुसमाह्वयस्य वणिजां धुर्यस्य वृद्धिं परां वाणिज्यस्य ददातु वेङ्कटपतिर्वात्सल्यवारां निधिः ॥ १ ॥

श्रीयादवाद्रिनिवासि पं. आ—मन्नाथाचार्याः

अथेह जंबूद्वीपस्थनवखंडान्यतमभारतवर्षीयमध्यदेशांतर्गतबूंदीनगरनिवासिभिः गंगासहायशर्मभिः श्रीमद्भागवताभिधकल्पद्रुमस्य दशमस्कंधांतर्गतवेदस्तुतौ अन्वितार्थप्रकाशिकेति व्याख्यानं सर्वमतसाधारणसुगमसरलहृद्यत्वादिसद्गुणालंकृतं चमत्कृतिजनकतावच्छेदकमतिविलासं परातिमात्रं यत्कृतं तच्छ्रेष्ठिवरेण श्रीकृष्णदासात्मजगंगाविष्णुगुप्तेन कल्याणस्थस्वकीयलक्ष्मीवेंकटेश्वराभिधमुद्रणालये महता प्रयासेन विद्वद्भ्यः संमत्यादानपूर्वकं संशोध्य मुद्रयित्वा प्रकाशितम् । यदि चेदृग्विधं कृष्णस्य श्रीमद्भागवताभिधसुरतरोः व्याख्यानं कृतं तल्लोकोपकारकत्वात् सुकृतं यतो रसज्ञाः वैष्णवाः मुमुक्षवः श्रीमद्भागवतार्थामृतपानं श्रोत्रांजलिभिरंजसा करिष्यंति । अतोऽन्वितार्थप्रकाशिकायाः निर्माणाङ्कनाभ्यामखिलोपकर्तृत्वेन धन्यावुभावपीत्यलम् ॥

नोलगडनिवासी मिश्ररामर्षिशर्म्मा

My dear sir.

I thank you for the sample pages you sent me of your edition of *Shri-Bhagavat* From what I have seen of it, I have no doubt that the excellent Commentary of Anvitarthaprakasika by Pandit Gangasahay will be appreciated even by the non-Adwaitic readers as it is written in easy Sanskrit and contains a fair annotation of almost all words in the original. The get-up of the book is excellent, although I myself am not a great admirer of the oblong size. It is free from mistakes which generally disfigure the best of Indian books. I wish you success in your enterprize.

With best wishes
Yours faithfully
S. S. Setlur.
High court Advocate.

श्रीमत्सकलैश्वर्ययुतराजश्रीविराजमानबुन्दिमहाराजसदोलब्धामात्याद्यनेकपदवीकैः गङ्गासहायपण्डितैः श्रीमद्भागवतस्यान्वितार्थप्रकाशिकाख्या व्याख्याऽकारीति विज्ञातमेव सहृदयैः समीचीनतमैषा मयापि स्थालीपुलाकन्यायेन यथामत्यलोचि । इयं सार्थाभिधानत्वाद्व्याख्यान्तरतोऽनधिगतव्याकरणन्यायवेदान्तानां पौराणिकानामपि श्रीमद्भागवतार्थस्य झटित्युद्बोधनेन पण्डितर्षभाणामेषामधिगतानेकशास्त्रयाथातथ्यतां परहितकरणानुरागं च प्रकटयति । एनां मोहमयीसमीपवर्तिकल्याणनगरस्थलक्ष्मीवेङ्कटेश्वराख्यमुद्रणालयाधिकारी श्रेष्ठिकुलावतंसः श्रीकृष्णदासात्मजो गङ्गाविष्णुनामा स्वकीयमुद्रणयन्त्रालये विद्वद्भिः शोधयित्वा मुद्रापयति । श्लाघ्यतमेनैतेन कर्मणा भगवाँल्लक्ष्मीजानिः उभयोरपि शं प्रयच्छत्वित्याशासे इत्यलं बहुविस्तरेण ॥ सम्मतिरियं जनस्थानसमीपवर्तिपञ्चवटीनिवासिनः "शौचे" इत्युपाह्वस्य लक्ष्मणतनुजनुषो नारायणशास्त्रिणः ।

स्वस्ति श्रीमद्गङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितं श्रीमद्भागवतश्रुतिस्तुतिपुस्तकं व्याक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणादिसारज्ञैः प्रभाकरशास्त्रिभिर्मह्यं दत्तं मया हरीपुरनिवासिना चिन्तामणिना यथामत्यालोचितं तत्तु समीचीनं वर्तत इत्यलं पल्लवितेन शिवम् ।

चिन्तामण शास्त्री तेलंग हरिपुरकर.

श्रीबुन्दीश्वरमन्त्रिणा विरचिता गङ्गासहायेन या ।
लक्ष्मीवेंकटमुद्रणे सुमहता यत्नेन या मुद्रिता ॥
व्याख्या भागवतस्य याश्च विविधाः प्रोद्घाटिताः पूर्वजैः।
ताभ्यश्चान्वितवाच्यबोधनकरी टीका समुद्राजते ॥ १ ॥
अन्वर्थद्युमणिस्सुखप्रसरणी सत्काव्यगाथाग्रणीः ।
श्रीमत्काव्यविकाशशीलनवतां हृत्पद्मकोशारुणीः ॥
श्रीमद्भागवताब्धिशब्दपयसां तारङ्गसन्तारिणी ।
भक्तान्तःकरणाघनाशनकरी टीकासु चूडामणिः ॥ २ ॥

श्रीमद्गुणसङ्गरिष्ठविद्वद्वरान्वयावतंसश्रीमद्गङ्गासहायनिर्मितान्वितार्थप्रकाशिकाख्यव्याख्या श्रीमद्भागवताब्धिशब्दरत्ननिकरार्थदिदृक्षावतां परमोपकारिणी श्रीमद्विधभारतीकृतनिवासविलासदक्षैः सर्वथैव संग्राह्या ॥

कुरुक्षेत्रान्तर्गतराजौंधस्थ जीयाराम चिकित्सकः ॥

श्रीबुन्दीस्थपण्डितगंगासहायनिर्मिता अन्वितार्थप्रकाशिका नातिगहना नातिसरला अत इयं सर्वोपयोगिनी । दुजोदनिवासी पं० नाथुराम शास्त्री ।

श्रीमता श्रेष्ठिकुलार्णवचन्द्रायमानेन श्रीकृष्णदासात्मजगङ्गाविष्णुनोपदकृतां विद्वज्जनमुकुटायमानगङ्गासहायमुखगलितपदमधुमाधुरितां श्रुतिगीताऽन्वितार्थप्रकाशिकाख्यां व्याख्याम् आहिताग्निज्योतिर्विद्वोविन्दजो यज्ञेश्वरः मह्यं प्रायच्छत् । तां च स्थालीपुलाकन्यायेन दृष्ट्वाऽतीव हृत्कमलं पुफुल्ल । तस्मादस्याः मुद्रणमध्येतॄणां कर्तुः प्रकाशयितुश्च द्राक् शुभाय भूयादित्याशासे इति शम् ॥ गोदोत्तरतटभ्राजमानपंचवटीस्थकपालेश्वरनिकटवर्तिगोपालाऽऽत्मजदादाशास्त्री यज्ञेश्वरशास्त्री च ।

श्रीमद्विद्वद्वरिष्ठबुन्दीनिवासिपण्डितगङ्गासहायेन कृतां टीकां पर्यालोचनेन विद्वन्मनसि अधिकाह्लादोदयं कुर्वन्तीं गुणगणान्वितामन्वितार्थप्रकाशिकाख्यां गम्भीरार्थभागवतपारावारपारं नेतुं नावमिव सहायिनीं दृष्ट्वा ममाप्यनया स्वीयनाम्नः सार्थकत्वाचातितरां हार्दमजनि ।

य आत्मारामजश्चोपनाम्ना तु पणशीकरः ॥
स्वयं दत्ताभिधानश्च तस्येयं संमतिः श्रुतौ ॥

श्रीमद्बुन्दीनगरमहाराजास्थानभूषणश्रीयुत गङ्गासहायविद्वन्मणिविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासमलंकृतं श्रुतिगीतिमामूलचूडमवलोक्य परिमुदितान्तरङ्गा भवामः । व्याख्येयं सरलसरसा मतान्तरदूषणादिपराङ्मुखी यथार्थनाम्नी यावदर्थप्रकाशिका च विरचयितुः पण्डितवर्यश्रीगङ्गासहायस्य गभीरमुदारमाशयमसाधारणीं वैदुषीञ्च प्रकाशयति । अनयैव सुबोधया सरण्या श्रीभागवतमहापुराणावशिष्टभागस्यापि निगूढाशयमखिलं प्रकाशयन्तीयं व्याख्या बुभुत्सुजनानां महोपकाराय कल्पत इति दृढतरं प्रतीमः । श्रीलक्ष्मीवेंकटेश्वरमुद्रालयमुद्रितायाः किलैतस्या मुद्रणसौष्ठवादिप्रशंसनं तु दिगन्तविश्रान्तया तत्प्रसिद्ध्यैव सिद्धमिति पौनरुक्त्यायैव ॥ १ विश्वेश्वरशास्त्री,
२ ग. वै. कृष्णाचार्यः, ३ जयराम वेंकटाचार्यः
४ तिरुनारायणयज्ञार्यः,
5 Mis. Narsinhacharyar.
कल्याणपुर (बेङ्गलूर.) वर्तिराजविद्या प्रधानपाठशाला
सेण्ट्रल कालेज्.

CC-0. In Public Domain. Digitization by eGangotri

गङ्गासहायविदुषा रचितां टीकामिमां समालोच्य ॥
विज्ञः श्रीधरटीकातुल्येति गुणैस्ततो विशिष्टेति ॥ १ ॥
सदर्थबोधिका सेयमन्वितार्थप्रकाशिका ॥
तत्वं जिज्ञासतां दत्ते संशयच्छेदनान्मुदम् ॥ २ ॥

विद्वान् नुग्गीपल्ली तिरुमलाचार्यः

कमलाकुचनवरत्नं कलिकलुषतमोविनाशनं जगताम् ॥ कमलनयनाभिधानं कलयतु तव शर्म किमपि कमनीयम् ॥ १ ॥ अद्राक्षं विहितादरेण भवता संप्रेषितां संप्रति स्फीतार्थां श्रुतिगीतरत्नविवृत्तिं तृप्तोऽभवं हर्षतः ॥ भ्रातर्नूनमियं दधाति नितरामद्वैतशोभाविधौ शैलीं कामपि तादृशीं मधुसुधानिस्यन्दधारासखीम् ॥ २ ॥ एषोऽद्वैतविचारधारणपटुर्वाचामयं जान्हवीवीचीसोदरताजुषां फणिपतिप्रत्यर्थिताजग्मुषाम् । गुम्फः कोऽपि विकासयन्सहृदयान्तत्वार्थमुजृम्भयन्धन्यो जह्नुसुतासहायसुधियो जीयात्सहस्रं समाः ॥ ३ ॥ गङ्गासहायरचिता श्रुतिगीताविवेचिनी । अन्वर्थनाम लभतामन्वितार्थप्रकाशिका ॥ ॥ ४ ॥ प्लवकटकधवलसप्तमदिनोदये शुद्धसत्वघनसूरिः। व्यलिखच्छ्रुतिनुतिविवृत्तेः संमतिपत्रं सुतुष्टये विदुषाम् ॥

इह जगति सुप्रसिद्धं श्रीभागवतं पुराणरत्नमिदम् ।
अतिगम्भीरनिगूहितभावमतो मन्दधिषणदुर्बोधम् ॥ १ ॥
अस्य पुराणमणेरिह रहस्यसर्वस्ववेदनसमर्था ।
प्रतिपदमर्थविवरणात्पण्डितगङ्गासहायसुव्याख्या ॥ २ ॥
व्युत्पित्सुप्रमदार्था बालिशजनताप्रबोधनार्था च ॥
व्याख्येयमन्वितार्थप्रकाशिका विजयतां सुचिरम् ॥ ३ ॥
रघुवंशादिकृतीनां व्याख्या श्रीमल्लिनाथकलितेव ।
ललिता भागवतस्याप्येषा गङ्गासहायबुधरचिता ॥ ४ ॥
अनपेक्षिते न विपुलामपेक्षितेऽर्थे तु नातिसंकुचिताम् ।
दृष्ट्वैवमन्वितार्थप्रकाशिकां मोमुदीति नश्चेतः ॥ ५ ॥
इति महिशूरनिवासी कविरत्नंसाहिती बुधोपाधिः ।
अनुमोमुदीति टीकां भाग्यपुरीश्रीनिवासार्यः ॥ ६ ॥
श्रीमद्भागवतव्याख्यामन्वितार्थप्रकाशिकाम् ।
निशाम्य तस्याः साद्गुण्यं ख्यापयामि कुतूहलात् ॥ १ ॥

येयं पण्डित शेखरैर्विरचिता गङ्गासहायाभिधैर्गङ्गाविष्णुमहाधनी सुचरितो यन्मुद्रणे कौतुकी । टीका भागवतस्य बोद्धुमखिलानर्थानिहाभ्यर्थिनां सा स्याद्वाञ्छितपूरणीति संततं नत्वाऽभिनन्दामहे ॥ २ ॥

शास्त्रार्थैर्बहुला न न प्रातिपदव्याख्यानमात्राऽथ वा युक्ता वा नच निष्प्रयोजनपदैः नो वाऽतिगूढार्थवाक् । साध्वर्थान्प्रतिबोधयत्यपि मनःक्लेशं मनाक् तन्वती बालस्यापि सुधीन्द्रतां वितनुयान्निःशंकमेषाऽञ्जसा ॥ ३ ॥

उत्पत्तेरुत टीकयानधिगमं तात्पर्यमस्येति यल्लोके भागवतस्य रूढमयशः कालाच्चिरेणानया । तद्दूरेऽकृत टीकया विशदया यो विद्वदग्रेसरो नेष्टे तस्य फणीश्वरोऽपि गदितुं पाण्डित्यमत्यद्भुतम् ॥ ४ ॥ यस्याः सर्वकलाधरो रचयिता गङ्गासहायः सुधीः गङ्गाविष्ण्वभिधो विशां कुलपतिर्यन्मुद्रणायोद्यतः । श्रीमद्भागवतं पुराणतिलकं व्याख्येयमेवं यया तस्या वर्णयितुं वरिष्ठतरतां को वा समर्थः कृतेः ॥ ५ ॥ श्रीबुन्दीपतिराप कीर्तिममुना विद्वद्वरेणाश्रितः टीकां भागवतस्य सोऽपि सुकविः कृत्वातिपुण्योऽभवत् । साप्यासत्सुमनोमनःप्रणयिनी संमुद्रिता श्रीमता गङ्गाविष्णुवरेण कृष्णतनयश्रेष्ठेन सच्छ्रेष्ठिना ॥ ७ ॥ इत्यावेदयति स्वं भावं वैशाखपुरवासी । छन्दःशाखाध्यायी श्रीपरवस्त्वन्वयोद्भूतः ॥ ८ ॥ श्रीवासजगन्नाथ स्वाम्यार्यवरगुरुतनूजाततत्पादसेवनागतधीर्वैङ्कटभट्टनाथस्वामी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपश्याम बहूनि स्वस्वमतराद्धान्तानुगुणभावप्रकाशकानि श्रीमद्भागवतस्य व्याख्यानानि अथापि प्रतिपद-पदार्थविवरणपूर्वकश्रीमद्भागवततत्त्वार्थविवरणविषये गङ्गासहायपण्डितवरेण बुन्दीसंस्थानवास्तव्येन विरचितान्वितार्थप्रकाशिकेव न कापि टीका सुमनोमनो रंजयति अत एवं मनुते भगवान् बादरायणिस्तत्ततो वा लोकानुग्रहचिकीर्षया गङ्गासहायपण्डितात्मना प्रादुर्भूय अन्वितार्थप्रकाशिकाख्यया व्याख्यया स्वाशयं प्रकाशयतीति।

महीशूरपुरास्थानसरस्वतीभाण्डागारीयः तदास्थान-
लब्धव्याकरणविद्वानितिविरुदांकितः
यज्ञं लक्ष्मी नृसिंहाचार्यः ।

अयि अन्वितार्थप्रकाशिके !

सहस्रवक्त्रो यदि वाचकः स्यात्सहस्रबाहुर्यदि लेखकः स्यात् ॥ सहस्रनेत्रो यदि वीक्षकः स्यात्स्थाने तवानर्घगुणप्रकर्षाः ॥ १ ॥ चिररात्राय संप्राप्तं चक्षुष्मत्ताफलं बुधैः। यद्वीक्षन्तेऽनवद्याङ्गि त्वामन्वर्थप्रकाशिकाम्॥२॥

किंबहुना

जिह्वा जिहेतितरामस्मदीया । यदियं जिह्वासहस्रद्वयमण्डलमण्डितवदनारविन्दस्य भगवतोऽनन्तस्याप्यशक्यगुणवर्णनायाः तव गुणगणस्य स्मारं स्मारं स्तोतुं त्वामवितर्क्यैव प्रवृत्ता पश्चात्किमपि वक्तुमपारयन्ती समुपाप्नोति जोषंभावम् । युक्तं चैतत् । यतः "यतो वाचो निवर्तन्ते" इत्यादिवचसामपि त्वमेव विषयीभूतेत्येवं जानन्ति कोविदाः । सुधारसेनैव नितान्ततृप्ताः देवास्तमद्यावधि नाधिजग्मुः। यः स्वादुभावस्तव वीक्षकाणां चेतोहरः सर्वरसातिलङ्घी ॥ १ ॥ पीयूषस्य तवापि सारमधिकं वेत्तुं स पद्मोद्भवः। स्वर्भूमिं च घटं सुमेरूमपि तद्दण्डं प्रकल्प्यादरात् ॥ तत्रारोप्य युवामतोलयदतस्त्वं भूमिमासेदुषी । तन्मन्येऽतिलघुत्वतोऽमृतमपि द्यामद्य नैवोज्झति ॥२॥ अलं चन्द्रग्रहणाय बाहुप्रसारणेनेति—

इति गुणगृह्यो विदुषां वक्तिपरिज्ञातधर्मशास्त्रार्थः ।
महिशूरनगरवासी रामानुजसूरिरत्र निर्व्याजम् ॥३॥

महिशूरमहाराजास्थानलब्धधर्मशास्त्रविद्वानिति-
विरुदांकित **देवशिखामणी रामानुजाचार्यः**

भो भो निखिलभूमण्डलाखण्डलायमाना निजशेमुषीमुषितलोकाज्ञानाः स्वपण्डाखण्डितप्रचण्डवितण्डाः पण्डिता विदितमस्त्वेतत्तत्रभवताम् । यत्किल सकलकविकुलमान्यानां विद्यावदान्यानां निजौदार्याद्यनल्पगुणकल्पबन्दीकृतामितपण्डितबुन्दीनगरविराजमानमहाराजप्रियसहायिनां गङ्गासहायानामपूर्वविद्यावैभवसमर्थयाऽन्वितार्थप्रकाशिकाख्यटीकया समलंकृतं श्रीमद्वेदव्यासमुखपङ्कजविनिःसृतमहाभागवतदशमस्कन्धान्तर्गतश्रुतिस्तुतिपुस्तकमङ्कितं मोहमयीपुरादवूरवर्तिकल्याणपुरसमुल्लासिनः श्रीमल्लक्ष्मीवेङ्कटेशकरुणाकटाक्षशालिनः लक्ष्मीवेङ्कटेश्वरमुद्रणयंत्रालयात्साक्षात्सरस्वतीमन्दिरादिवास्मत्सकाशमाजगाम । कार्यान्तरव्यग्रतयाऽपि यथाकथंचिल्लब्धावकाशं विवेचिते तस्मिन्नस्मिन्मनो निश्चिकाय । एषा गूढार्थप्रकाशिका टीका रसिकजनमनस्तोषिणी सहृदयहृदयाह्लादकारिणी गभीराऽपि सरला व्याख्यातानेकशास्त्रापि सुबोधा सतीष्वप्यनेकासु टीकासु विद्यार्थिनामियमेवातीव सतीव सहायिनी बोभूयात् एतदनुभवस्तु नानुभूयेत केनापि पुंसा स्वीकरणं विनास्याः मौल्यस्याप्यत्यल्पत्वाद् ग्राहकाणां बह्वेव सहायं स्यात् । अनया गूढार्थप्रकाशिकाख्यचन्द्रिकया तत्रभवद्गङ्गासहायकीर्ती-

CC-0. In Public Domain. Digitization by eGangotri

न्दुरिन्दुरिव द्वितीयो विद्वन्मनश्चकोरदृक्पथमुपागतोऽभूत्।
गोमान्तकदेशान्तवर्तिमहाशैलग्रामस्थस्य धूपकारा-
भिधेस्यानन्ततनूजन्मनः **श्रीवासुदेवशास्त्रिणः** ॥

श्रीमद्व्यासमुनीश्वरास्यकमलात्स्रस्तं पुराणोत्तमम्
नन्दानन्दनकीर्तिकीर्तनचणं संसारकूलंकषम् ।
नानादोषविभेदनं प्रपठतां मुक्तिप्रदं पावनम्
श्रीमद्भागवतं क्षितौ जयति तन्निःसीमसंवैभवम् ॥ १ ॥

भागवतस्य व्याख्या बह्व्यः सन्तीति विश्रुतं जगति ।
आधुनिकेयं व्याख्या हृद्या तास्विति वदन्ति विद्वांसः ॥ २

बुन्दीपत्तनसार्वभौममहितो गङ्गासहायाभिधो
विद्वद्वृन्दकरीन्द्रपञ्चवदनो दर्भीयपत्राग्रधीः ।
काव्यालङ्कृतिपारगः सुललितां टीकां व्यतानीत्कृपा-
भूम्ना भागवतस्य भाग्यविभवादस्मादृशां पङ्क्तिमात्॥ ३

अनितरसदृशं गङ्गासहायविद्वद्वरस्य कौशल्यम् ॥
विद्वद्भिर्विनुतं तद्व्यक्तं वक्तुं न पार्यतेऽस्माभिः ॥ ४ ॥

गङ्गासहायरचितां टीकां हृद्यां विलोक्य निरवद्याम् ।
मोदाम्बुधौ मग्ना वेलां वयमद्य मृगयामः ॥ ५ ॥

सरला लेखनशैली मन्दानाममितबुद्धिजनयित्री ।
गङ्गासहायविदुषो विदुषां मोदं समातनोतीयम् ॥ ६ ॥

यस्माद्वाचां पूरैरुज्जीवयसि प्रजा भवात्रस्ताः ।
तस्मात्त्वत्सदृशोऽन्यो धन्यो नास्तीति जानीमः ॥ ७ ॥

दयया कमलाकमितुर्दीर्घायुष्यं शुभं च संभूयात् ।
गङ्गासहायविदुषामाशिषमाशास्महे वयमभीक्ष्णम् ॥ ८ ॥

प्रौढाभीरकुरंगशावनयनावक्षोजकुम्भस्फुरत्पाटीरांङ्कित-
वज्रनिष्ठुरशुभोरस्कः स नन्दात्मजः । अश्रान्तं तनुतां
विरिञ्चितरुणीधम्मिल्लसंफुल्लसन्मल्लीसूनमरन्दसिक्तचरणः
श्रेयांसि भूयांसि वः ॥ ९ ॥

इति मेलवालयाख्यग्रामाभिजनेन **शेषविबुधेन** ।
गङ्गासहायविदुषे दत्तं पत्रं प्रशंसायाः ॥ १० ॥

महाविदुषां ज्योतिषकगोपालाचार्याणामनुजस्य

शेषाचार्यस्य संमति.

भो भो अन्वितार्थप्रकाशिकाख्यव्याख्याप्रणे-तारो लोकसुहृदश्च! सशिरोऽञ्जलिपुटं मदर्पितमस्तु वः । सम्मिलितमुत्तरं यदसंस्तुतमपि मां पात्रभूतमाकलय्य स्वप्रणीतमत्युपयुक्तविषयोपबृंहितं पुस्तकं श्रीमद्भिः प्राहीयत । तत्प्रीतिमता मया कृतज्ञतापूर्वकं शिरसा संमान्य संगृहीतम् । अवलोकितं च भूयोभूयः समग्र-मक्षरशः । अयं च ग्रन्थः व्युत्पित्सूनां व्युत्पन्नानां च नितरामुपयोगजनकः। अत्यन्तदुरवगाहान् श्रुत्याद्यर्थान् सुललितेन निर्दुष्टेन च मार्गेण प्रकाशितवन्तो वेदमूर्ति--बुन्दीनगरनिवासिपण्डितगङ्गासहायशर्माणः सकललो-कोपकारिण इति निश्चित्य सुतरां मोदामहे ।७।८।०१

कानकानपल्ली **नरसिंहशास्त्री.**
मैसूरमहाराजासंस्कृतपाठशालास्थः ।

भक्तिरसमयस्तत्र प्रदेशेषु च ज्ञानवैराग्यादिविविध-मोक्षमार्गनिरूपणपरः सर्वरसपूर्णोऽपि शान्तरसप्रधानो नास्ति श्रीमद्भागवतादपरो निबन्धो विद्वद्वृन्दारकाणा-मुभयलोकहितङ्करतया पुराणाग्रेसरत्वेन सम्मतः ।

अस्मिंश्च निबन्धे तत्र २ प्रकरणवशात् साङ्ख्ययो-गमीमांसादिनिखिलशास्त्रसिद्धान्तनिरूपणान्निबन्धकाठि-न्यं साधारणजनदुर्बोधत्वं च पद्यभावानां विद्यमाना-स्वपि श्रीधरादिकृतटीकासु सर्वैरनुभूयत एव । अथ च चक्रवर्तिप्रभृतिकृतटीकास्तु प्रौढपाण्डित्यसापेक्षतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवनागराक्षरैरमुद्रिततया च नैव सकलविद्यार्थिजनोपकाराय सम्पद्यन्ते ।

इयं तावन्मल्लिनाथादिसुप्रसिद्धटीकाकारप्रदर्शितसुगमान्वयमुखेन विद्वद्वरश्रीगङ्गासहायेन रचिता अन्वितार्थप्रकाशिका टीका छात्रजातस्यासाधारणमुपकारमातनिष्यत इति निःसंशयं ब्रूमः ।

अस्यां टीकायां पद्यगतसकलपदानामन्वयक्रमस्तेषामेव च पदानां प्रसिद्धार्थकपर्यायशब्दैर्व्याख्या अन्ते च सरलसंस्कृतेन पद्यगतभावार्थप्रदर्शनं च कृतमस्ति । इति. सम्मतिरियं करोलीराजधानीस्थराजकीयपाठशालाप्रधान संस्कृताध्यापक पं० रघुनाथप्रसादशास्त्रिणः

इह खलु सुखमेव मे स्याद्दुःखं मनागपि मा भूदिति निखिलापेक्षितमोक्षोपायमविदुषां सांप्रदयिकोपदेशविकलतया तत्वाकलनविकलानां संसाराकूपारपारं जिगमिषतां सतामधिकारिणां परमपुरुषार्थसाधनज्ञानजननी श्रीमद्भागवतसंहिता परमकारुणिकेन पाराशर्येण भगवता बादरायणेन अकारि । तया च तत्वं परं प्राकाशि । सा चातिगंभीरेति महात्मभिः प्राक्तनैर्बहुभिरटीकि। तासामपि गहनतया ज्ञातव्यास्सर्वेऽप्यर्था न मन्दैः सुखेन बोद्धुं शक्यत इति तेषु कृपापारवश्येन श्रीमत्पण्डितगङ्गासहायप्रणीतां प्राक्तनीभ्यष्टीकाभ्योऽप्यतिशयितलालित्यशालिनीं श्रीमद्भागवताशेषसारार्थसुबोधिनीमतएवागतार्थामन्विनार्थप्रकशिकाख्यामिभनवामिमां व्याख्यां सावधानमहमालोके. आबालमापण्डितं च सहृदयाह्लाददोऽयमविरुद्धोऽस्पृष्टदोषलेशः प्रबन्धः प्राचीनैरर्वाचीनैः सर्वैरपि सूरिभिर्मान्यतम इत्यहं सुदृढं मन्ये ॥ श्रीमन्महीशूरपुरवराधीश श्रीमन्महाराजाधिराजश्रीकृष्णराजेंद्रास्थानपण्डितः महाविद्वान् नामगुण्डलश्यामाचार्य ॥

23/8/01 Champa Galli. BOMBAY.

Dear sir,

It is indeed impossible to enumerate within the small compass of a letter the merits of your recent publication—the *Bhagawata* with its new commentary the *Anwitartha-prakashika*–which you have been kind enough to send me for my opinion. I went over several of its parts, particularly the "Vedastuti" the knottiest episode of the work. Its lucid explanations, complete paraphrase of each and every word of the original generally taken for granted by other commentators assuming too much knowledge on the part of the readers, and what is more, the clear construction in the beginning of each verse, remind one of the celebrated commentaries of Mallinath. Another feature of the commentary seems to be that while it aims at giving the Adwaita interpretation of the text, which is perhaps the most natural one, it endorses at the same time the views of the various schools claiming the name and rank of *Vedanta*. The commentator, much to his credit, has carefully avoided all futile disenssions on the various fundamental differences in the peculiar tenets of the schools, and yet he has most ingeniously managed to give first place to the Adwaita explanation which in itself is a sufficient indication of the spirit of Bhagawata and its eminent commentator. At any rate, the work is simply indispensable to a student of *Vedanta* in its myriad aspects. You have really rendered a very valuable service to the cause of Sanskrit literature and particularly to its ethical side by putting within an easy reach of the literary public one of the masterly works on the practical side of our religion on which you can hardly be sufficiently congratulated. I wish you sure & speedy success which the Almighty cannot but ensure when the motive is so noble and the work so useful. With best respects

Yours

Hiralal Brajabhukhandass Shroff, B. A.

CC-0. In Public Domain. Digitization by eGangotri

जाहिरात.

संपूर्ण विद्वज्जन विद्यानुरागि महाशयों संसारमें ऐसा कोई पढा लिखा पुरुष होगा कि जो श्रीमद्व्यासमुनिप्रणीत साक्षाद्भगवन्मुखोद्गत भगद्गीताको न जानता हो । क्योंकि वह अखिल पुरुषार्थ प्राप्तिका एकही साधन जान महामहिमशाली जगद्गुरु शंकराचार्यजी रामानुजाचार्यजी प्रभृति अनेक महानुभावोंनें व्याख्याएं बनाई हैं. महाशय ! आज उसी श्रीमद्भगवद्गीताके मुद्रणमें हम उद्यत हुए हैं. एकही पुस्तकके खरीदनेंसे महाशयोंको सब व्याख्याओंका लाभ होनेकेलिये शांकरभाष्य, रामानुजभाष्य, श्रीधरीटीका, और यामुनाचार्यप्रणीत गीतार्थसंग्रह इन चार व्याख्यानों सहित एक जिल्द और एक एक लेनेवाले महाशयोंके सौकर्यार्थ शांकरभाष्यसहित अलग जिल्द रामानुजभाष्यसहित अलग जिल्द और श्रीधरी टीका तथा यामुनाचार्यप्रणीत गीतार्थसंग्रह व्याख्या सहित अलग जिल्दभी छपाते है. महाशय ! शांकरभाष्य, रामानुजभाष्य, और श्रीधरीटीका इनका परिचय देनेकी तो कोई अवश्यकताही नहीं क्योंकि उनकी व्याख्यान शैलीसे सब पंडित अनुभूतही हैं. वैसीही गीतार्थसंग्रह यह व्याख्या अन्वयबद्ध और सुलभ अर्थकी प्रकाशिनी होनेसे लोगोंको गीतार्थका ज्ञान होनेके लिये केवल दर्पणही है.

श्रीमद्वाल्मीकीयरामायण.

महाशयो ! देखो इस अपूर्व भूषणटीकाकी पांडित्यशैली, सुगमता, विचारचातुर्य आदि सब अद्भुत गुण कैसे चमकते हैं. देखो 'भूषण' यह नामभी कैसा अन्वर्थ रक्खा गया है जिसके श्रवणमात्रसेही कल्पना होती है कि रामायणरूपी भगवान् रामचंद्रजीकी मूर्तिको टीकारूपी अलंकारोंसे अलंकृत किया है और ऐसीही टीकाकारने कल्पना कर रचना की है, देखो-कि उक्त भगवान्के बालकांडरूपी पादको टीकारूपी मणिमंजीर (पायजेब), अयोध्याकांडरूपी जघनको पीतांबर, आरण्यकांडरूपी कटिको रत्नमेखला (कौंदनी), किष्किंधाकांडरूपी हृदय और कंठको मुक्ताहार (मोतियोंका कंठा), सुंदरकांडरूपी ललाटको श्रृंगारतिलक, युद्धकांडरूपी शिरको रत्नकिरीट और उत्तरकांडरूपी ऊपरके भागको मणिमुकुट इस तरह ये गहने अर्पण कर रामायणरूपी भगवान्को सजाया है. तौ इस व्याख्यामें क्या कम है कुछ नहीं फिर लेनेमें क्या हरज है झट लीजिये और इसका पाठ कर अपना जन्म कृतार्थ कीजिये. यह २५ रुपये कीमतका पुस्तक लेनेवालोंको भगवद्गुणदर्पणभाष्य आदि व्याख्यात्रयसमेत विष्णुसहस्रनाम भेंट मिलेगा.

श्रीमद्भागवत-मूल गुटका दो प्रकारका छपके तैयार है. १ खुलापत्रा कीमत ३॥ रु० । २ जिल्द बंधेला दो भाग की० ४ रु० । इसी टाईपमें छपा है. श्रीमद्भागवत-सचूर्णिका टीकासहित सुवाच्य टाईपमें छपके तैयार है. और श्रीमद्भागवत-श्रीधरीटीकासहितभी छपके तैयार है. योग्य मूलसे मिलेगा. श्रीमद्भागवत-वीरराघवी टीकेसहित छापनेका सुरु है. नमूना मंगाईये.

षडङ्ग (रुद्राष्टाध्यायी) भाषाटीका ।

जो व्यक्ति हिन्दु होनेका अभिमान रखते हैं वे रुद्रीको भलीभांती जानते हैं इसमें वैदिक मन्त्रोंसे भगवान् भूतनाथकी पूजा और उपासना लिखी गई है। इसका केवल पाठ मात्र करनेसे मनुष्यको किसी वस्तुकी कमी नहीं रहती, हमने सर्व साधारणके उपकारार्थ मुरादाबादके पण्डित व्रजरत्न भट्टाचार्यजीसे अत्यन्त कमनीय और सरल भाषाटीका बनवाकर खूब बडे २ सुवाच्य अक्षरोंमें मूल और भाषानुवाद छापके प्रसिद्ध किया है प्रत्येक मन्त्रके नीचे स्वरोंके चिन्ह ऐसी सरलतासे लिखे जिन्हें सब कोई समझ सक्ते हैं । मूल्य १० आना ।

पुस्तक मिलनेका ठिकाना-गंगाविष्णु श्रीकृष्णदास, "लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतं नास्त्यत्र काचित् क्षतिः पूर्वं यत्समभूत्तदेव हि पुनर्जायेत तज्जायताम् ॥ यद्वा स्यादधिकं च सोऽपि सुमहाल्लाभोऽस्तु मे तादृशः स्वामिन्दासजनस्तवायमधिकं स्वैरेण दूरीभवेत् ॥ १२ ॥ सोऽहं क्षुद्रतया जुगुप्सिततमं दुष्कर्म नित्यं स्मरन् कुर्वन्काममशुद्धरीतिरभवं श्रीरङ्ग पृथ्वीपते ॥ एतत्ते महतो विशुद्धमनसा स्मर्तुं न युक्तं खलु क्षान्त्या विस्मर तत्ततोऽहमसुखान्मुक्तो भवेयं सुखी ॥ १३ ॥ तत्तत्कर्मफलानुरूपमखिलो लोकस्त्वया सृज्यते तस्मात्कर्मवशंवदत्वमधिकं वक्तुं तवापि क्षमम् ॥ श्रीरङ्गेश्वर तत्प्रशान्तिविधये क्षान्त्या निराकृत्य मे सर्वं पातकमाशु दर्शय भवत्स्वातन्त्र्यमत्युज्ज्वलम् ॥ १४ ॥ श्रीरङ्गेश वचो मदीयमधुना व्यक्तं त्वया श्रूयतां पुण्यं तत्फलसंगमात्रविरहाद्भूयो न मां प्राप्नुयात् ॥ पापं नैव तथा फलं वितनुते शक्यं न तद्वारणं तत्क्षान्त्या तव शक्यमेव तदिदं सद्यस्त्वया कल्प्यताम् ॥ १५ ॥ श्रीरङ्गेश्वर पुण्यपापफलयोः स्वाधीनतां कुर्वतोः सर्वेषां सुखदुःखयोः स्वयमहं मग्नाशयो मामपि ॥ स्मर्तुं न प्रभवामि किं पुनरहं त्वामन्तरन्तः स्थितं तत्ते त्वं क्षमया निरस्य कुरु मे त्वद्ध्यानयोग्यां दशाम् ॥ १६ ॥ अल्पं चेदनपेक्षणीयसरणावारोप्यतां मत्कृतं किञ्चिद्भूरि भवेदिदं यदि गुरून् सम्प्रेक्ष्य मे त्यज्यताम् ॥ यद्वानन्तमनन्तवैभवजुषो रङ्गक्षमावल्लभ त्वत्क्षान्त्याः खलु लक्ष्यतामनुगुणा मानीयतां तत्त्वया ॥ १७ ॥ श्रीमान्कूरान्ववाये कलशजलनिधौ कौस्तुभाभोऽवतीर्णः श्रीवेदव्यासभट्टारकतनयवरो रङ्गराजस्य हृद्यः ॥ वेदाचार्य्याग्र्यनामा विहितगुणगणो रङ्गिणः स्तोत्रमेतच्चक्रे नित्याभिजप्यं सकलतनुभृतां सर्वपापापनुत्त्यै ॥ १८ ॥ संत्यक्तसर्वविहितक्रियमर्थकामश्रद्धालुमन्वहमनुष्ठितनिन्द्यकृत्यम् ॥ अत्यन्तनास्तिकमनात्मगुणोपपन्नं मां रङ्गराज कृपया परया क्षमस्व ॥ १९ ॥ इति श्रीक्षमाषोडशीस्तोत्रं सम्पूर्णम् ॥ ॥ ॥ ७ ॥ ॥

गंगाविष्णु श्रीकृष्णदास, "लक्ष्मीवेङ्कटेश्वर" छापाखाना, कल्याण—मुंबई समीप.

Gangavishnu Shrikrishnadas. Laxmi-Venkateshwar Press.

KALYAN G. I. P. RY. JUNCTION. BOMBAY PRESIDENCY

CC-0. In Public Domain. Digitization by eGangotri

जाहि-

॥ ४ ॥

अन्वितार्थप्रकाशिकाख्यव्याख्यासहित-

श्रीमद्भागवत.

(व्याख्याग्रन्थसंख्या ७००००)

यह टीका बूंदी महाराजाश्रित पं० गंगासहायजीने बनाई है. इसमें मल्लिनाथके ढंगपर अन्वयक्रमसे सरल और कठिन सब श्लोकोंका अर्थ सुगम रूपसे लिखा है और टीकामें जिन जिन बातोंका लिखना आवश्यक है वे सब संक्षेप और सुगमतासे लिख दी हैं इसमें श्रीधरजीकी टीकाकी तो प्रायः सब बात आगई और बहुतसी बातें तोषिणीसारार्थसंदर्शिनी आदिसेभी लीगई है और सुगमता अन्वयक्रम और संक्षेपपर पूरी दृष्टि रक्खी गई है इस टीकाके शेषमें भागवतोपयोगी वेदांत सांख्यादिक कितनेक मत सुगम रीतिसे लिख दिये हैं. इसमें किसी मतका पक्षपात अथवा खंडन नहीं किया गया है। सब मतोंके आचार्योंका आदरपूर्वक स्मरण किया गया है. और भागवतके स्कंध और प्रकरणोंका अभिप्राय और श्लोकोंके छन्द तथा अध्यायोंके श्लोकोंकी गणना लिख दी है औरभी बहुत बातें हैं. इसका मूल्य अत्यल्प केवल १२ रुपये. देखनेसे मालूम होगा. पुस्तक समग्र छप चुका. नमूना मंगालो. काशिआदि ठिकानेके विद्वानोंकी शेंकडो सम्मति आई हैं.

श्रीमद्भागवत-मूल गुटका दो प्रकारका छपके तैयार है. १ खुलापत्रा कीमत ३ रु०। २ जिल्द बंधेला दो भाग की० ३॥ रु०। इसी टाईपमें छपा है. श्रीमद्भागवत-सच्चूर्णिका टीकासहित ऐसेही टाईपमें (श्रीधरीसरीखे) छपके तैयार है. योग्य मूलसे मिलेगा. श्रीमद्भागवत-वीरराघवी टीकेसहित छापनेका सुरु है. नमूना मंगाईये.

श्रीमद्वाल्मीकीयरामायण.

महाशयो ! देखो इस अपूर्व भूषणटीकाकी पांडित्यशैली, सुगमता, विचारचातुर्य आदि सब अद्भुत गुण कैसे चमकते हैं. देखो 'भूषण' यह नामभी कैसा अन्वर्थ रक्खा गया है जिसके श्रवणमात्रसेही कल्पना होती है कि रामायणरूपी भगवान् रामचंद्रजीकी मूर्तिको टीकारूपी अलंकारोंसे अलंकृत किया है और ऐसीही टीकाकारने कल्पना कर रचना की है, देखो-कि उक्त भगवान्के बालकांडरूपी पादको टीकारूपी मणिमंजीर (पायजेब), अयोध्याकांडरूपी जघनको पीतांबर, आरण्यकांडरूपी कटिको रत्नमेखला (कौंदनी), किष्किंधाकांडरूपी हृदय और कंठको मुक्ताहार (मोतियोंका कंठा), सुंदरकांडरूपी ललाटको शृंगारतिलक, युद्धकांडरूपी शिरको रत्नकिरीट और उत्तरकांडरूपी ऊपरके भागको मणिमुकुट इस तरह ये गहने अर्पण कर रामायणरूपी भगवान्को सजाया है. तौ इस व्याख्यामें क्या कम है कुछ नहीं फिर लेनेमें क्या हरज है झट लीजिये और इसका पाठ कर अपना जन्म कृतार्थ कीजिये. यह २५ रुपये कीमतका पुस्तक लेनेवालोंको भगवद्गुणदर्पणभाष्य आदि व्याख्यात्रयसमेत विष्णुसहस्रनाम भेंट मिलेगा.

रात.

॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममाहात्म्यम् ।

श्रीराम राम रामेति ये जपन्ति च सर्वदा ॥
तेषां भुक्तिश्च मुक्तिश्च भवत्येव न संशयः ॥ १ ॥

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥
राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥
हनूमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ३ ॥

न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ।
शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ ४ ॥
अर्दयित्वा पुरीं लंकामभिवाद्य च मैथिलीम् ।
समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥ ५ ॥

राम रामेति रामेति रमे रामे मनोरमे ॥
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ ६ ॥
चैत्रमासे सिते पक्षे नवम्यां च पुनर्वसौ ॥
मध्याह्ने कर्कटे लग्ने जातो रामः स्वयं हरिः ॥ ७ ॥
रामनाम जपतां कुतो भयं सर्वतापशमनैकभेषजम् ॥
यस्य तात मम गात्रसन्निधौ पावकोऽपि सलिलायतेऽधुना ॥ ८ ॥

हरिमाहात्म्यम् ।

नित्योत्सवो भवत्येषां नित्यं नित्यं च मंगलम् ॥
येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥ १ ॥

कृष्णाय वासुदेवाय देवकीनंदनाय च ॥
नंदगोपकुमाराय गोविन्दाय नमो नमः ॥ २ ॥
सिंहमासेऽसिते पक्षे रोहिण्यामष्टमीतिथौ ॥
चरमार्थप्रदातारं कृष्णं वन्दे जगद्गुरुम् ॥ ३ ॥

विपरीतेषु कालेषु परिक्षीणेषु बन्धुषु ॥
त्राहि मां कृपया कृष्ण शरणागतवत्सल ॥ ४ ॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ ५ ॥

कृष्णे रताः कृष्णमनुस्मरन्ति रात्रौ च कृष्णं पुनरुत्थिता ये ॥
ते भिन्नदेहाः प्रविशन्ति कृष्णे हविर्यथा मन्त्रहुतं हुताशे ॥ ६ ॥
एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधाऽवभृथेन तुल्यः ॥
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ ७ ॥
जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः ॥
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥२॥ व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ॥ पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥ ३ ॥व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ॥ नमो वै ब्रह्मविधये वासिष्ठाय नमो नमः ॥४॥ अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ॥ अफाललोचनः शम्भुर्भगवान् बादरायणः॥५॥

अथ कलिसन्तारणोपनिषत् ।

हरि ॐ द्वापरांते नारदो ब्रह्माणं जगाम । कथं भगवन् गां पर्यटन् कलिंसंतरेयमिति ॥

स होवाच ब्रह्मा साधुपृष्टोस्मि सर्वश्रुतिरहस्यं गोप्यं तच्छृणु ॥ येन कलिसंसारं तरिष्यसि ॥ भगवत आदिपुरुषस्य नारायणस्य नामोच्चारणमात्रेण निर्धूतकलिर्भवति ॥ नारदः पुनः प्रपच्छ । तन्नाम किमिति । स होवाच हिरण्यगर्भः

हरे राम हरे राम राम राम हरे हरे ॥
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥ १ ॥

इति षोडशकं नाम्नां कलिकल्मषनाशनम् ।

नातः परतरोपायस्सर्ववेदेषु दृश्यत इति षोडशकलावृतस्य पुरुषस्य आवरणविनाशनम् ॥ ततः प्रकाशते परं ब्रह्म मेघापाये रविरश्मिमंडलीवेति ॥ पुनर्नारदः प्रपच्छ भगवन्कोस्य विधिरिति ॥ तं होवाच नास्य विधिरिति । सर्वदा शुचिरशुचिर्वा पठन् ब्रह्मणस्सलोकतां समीपतां सरूपतां सायुज्यतामेति ॥ ४ ॥ यदास्य षोडशकस्य सार्धत्रिकोटिर्जपति । तदा ब्रह्महत्यास्तरति । स्वर्णस्तेयात्पूतो भवति । वृषलीगमनात्पूतो भवति । सर्वधर्मपरित्यागपापात्सद्यः शुचितामाप्नुयात् । सद्योमुच्यते सद्योमुच्यतइत्युपनिषत् ॥ हरिः ॐ–सहनाववत्विति शान्तिः ॥ हरिः ॐम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिवंश भाषाटीका.

हमारे पाठकोंमें बहुत कम ऐसे महाशय होंगे जिन्होंने उपरोक्त पुराणका नाम नहीं सुना हो यद्यपि यह पुराण महाभारतके अन्तर्गत है तथापि इसकी गणना पृथक्‌ की जाती है। इस विराट् ग्रन्थमें किन २ पवित्र कथाओंका वर्णन है इस बातकी मीमांसा करनेका हमको अवसर नहीं, परन्तु इतना अवश्य कहेंगे कि, इसके पाठसे धर्म,अर्थ,काम, मोक्ष ये चारों पदार्थ हस्तगत हो जाते हैं। ब्रह्महत्यादिक महापातकोंका नाश हो जाता है। भक्ति श्रद्धापूर्वक इसका पाठ करनेसे निःसन्देह संतानकी प्राप्ति होती है।इस बातको हमारे पाठक भली भांति जानते होंगे कि, जिन मन्दभागियोंके भागमें विधाताने सन्तान होनेके अक्षर नहीं लिखे उनके एक बार सच्चे चित्तसे इसका अवश्यमेव पाठ करनेसे सन्तान होती है विशेष क्या कहें जिस कामनासे इसका पाठ किया जाय अवश्यही उसकी पूर्ति होती है। यह तीन प्रकारसे छपके तय्यार १-संस्कृत टीकासह की० ५ रु०। २-पं० ज्वालाप्रसादजीकृत भाषाटीकासह की० १० रु०। ३-केवल भाषा। अध्यायके आदि अन्तको श्लोक लिखकर शेष श्लोकोंकी मूलांकसहित सुन्दर भाषा लिखी गई है। भाषा ऐसी कमनीय और मधुर बनी है कि, एकवार थोडासाभी पाठ करनेसे विना परिपूर्ण किये छोडनेको चित्त नहीं चाहता। विलायती कपडेकी सुनहरी जिल्द बंधी मूल्य ५ रु०। चाहिये वैसा नमुना मंगालो.

रामस्तवराज सटीक.

इस कलिकालमें जन्म पाकर मनुष्यको केवल संसारहीमें निमग्न न रहना चाहिये किन्तु कुछ मुक्तिकाभी साधन करना चाहिये। इस युगमें रामनामसंकीर्तनके अतिरिक्त और कोईभी मुक्तिका साधन नहिं हो सकता। क्यों कि कृतादि युगोंमें ध्यानधारणा यज्ञ इत्यादिकोंसे मुक्ति होती थी। परन्तु कलियुगमें केवल भगवत्कीर्तनेसही मुक्ति प्राप्त होती है। यह बात श्रीमद्भागवत द्वादशस्कंधमें भलीभांति वर्णित है। महाशय यदि रामनामसंकीर्तनद्वारा मुक्तिकी इच्छा रखते हो तो हमारे यहां छपे हुए रामस्तवराज ग्रन्थका संग्रह करिये तिसके नामसेही अंतर्गत गुणोंका ज्ञान हो जायगा और विशेषता यह है कि यह ग्रन्थ संस्कृतटीकासे विभूषित है। व्याख्याकारने श्रुतिस्मृतिप्रमाण सहित वेदान्तादि विषयोंको भलीभांति प्रदर्शित किया है। ग्राहक महाशय! विशेष कहनेकी आवश्यकता नहिं है एकवार पुस्तक मंगाकर अपने उपरोक्त हेतूको सिद्ध करिये। और आप लोगोंके सुभीताके लिये मूल्यभी केवल ६ आनाही रखा है।

पुस्तक मिलनेका ठिकाना-गंगाविष्णु श्रीकृष्णदास, "लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण-मुम्बई.

CC-0. In Public Domain. Digitization by eGangotri

विष्णुसहस्रनाम.

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १ ॥

श्रीकृष्णभक्तिमें तत्पर और श्रीकृष्णका आश्रय करनेवाला पुरुष सब पातकोंसे मुक्त हो सनातन ब्रह्मपदको प्राप्त होता है.

प्रियवर महाशय! अपने यंत्रालयमें विष्णुसहस्रनामकग्रन्थ भगवद्गुणदर्पणाख्य भाष्य, निर्वचन और निरुक्ति इन तीन व्याख्याओंसे सहित छपके तैयार है । इसमें प्रथम व्यासोक्तक्रमसे प्रथमान्तनाम अनन्तर "नमः" पद सहित चतुर्थ्यन्त नाम लिखा है जिससे कि महाशय विना श्रम सहस्र नमस्कार कर सकते हैं । अनन्तर भगवद्गुणदर्पणाख्य भाष्य और नीचे निर्वचन और निरुक्ति ऐसा क्रम रक्खा है । इन तीनों व्याख्याओंका वर्णन करनेकी कुछ आवश्यकता नहीं है। क्योंकि सुज्ञ महाशय व्याख्याओंके नामसेही भलीभांति समझ सकते हैं । परन्तु इतना कहना अवश्य है कि यह ग्रंथ वयाकरणोंके लिये केवल आदर्शही बना है । क्योंकि सब नाम प्रकृति प्रत्ययोंसे सिद्ध किये हैं । और लक्ष्मीवेंकटेश्वर यंत्रालयमें छपे हुए कौमुदीके अनुसार धात्वादिकोंके पृष्ठांक लिखे गये हैं। पुस्तक ग्लेज कागद और सुवाच्य अक्षरोंमें छपा है जिससे वृद्ध पुरुष भी पठन कर सकते हैं । सुज्ञ महाशय इससे अनुपम लाभ उठावें और अपने आत्माको ईश्वर गुणानुवादसे कृतार्थ करे इसलिये हमने इसका मूल्य केवल५ रुपया रक्खा है । सुज्ञ महाशय ऐसी अमूल्य संधि न गमावें । त्वरा करिये पुस्तक संग्रहणीय है । ग्रन्थ संख्या १२००० है ।

व्युत्पत्तिसहित शङ्कराचार्यभाष्यके अनुकूल हिन्दी भाषामें विष्णुसहस्रनामकी चन्द्रिका टीका छपके तैयार है मूल्य १२आ.
व्युत्पत्तिसहित भगवद्गुणदर्पणाख्यभाष्यके अनुकूल विष्णुसहस्रनामकी दीपिका नामक भाषाटीका छपके तैयार मू. १२आ.

स्मृतिरत्नाकर.

इसमें केवल आह्निक प्रकरणही नहीं, द्विजातिमात्रके नित्य पालनीय आचार वर्णित हैं। शौचाशौच, वृत्ति, भक्षाभक्ष विचार आदिका सम्पूर्ण वर्णन है। इसमें अनेक श्रुति, स्मृति, पुराण आदिसे संग्रह करके अनेक सदाचार दर्शाया गया है। अनेक इतिहास-ग्रन्थोंसे बहु मन्त्र आदिका विस्तृत निरूपण है । ग्रन्थ वैष्णवोंके लिये विशेष उपकारी है । साथही यहभी जान लेना उचित है, कि केवल वैष्णवधर्म्मही इस पुस्तकका लक्ष्य नहीं है । इसमें किसी विशेष सम्प्रदायका पक्ष नहीं और दूसरे उपासकोंकी निन्दा नहीं । एक इस गुणसे भारतवर्षके स्मार्त्तमात्रको उपकारी है । द्विजगण इसे सादर ग्रहण करें । ग्रन्थ संस्कृतमें है। जिल्द समेत पूरे २२५पृष्ठोंकी पोथी है। क़ी० २रु.

षडङ्ग (रुद्राष्टाध्यायी) भाषाटीका ।

जो व्यक्ति हिन्दु होनेका अभिमान रखते हैं वे रुद्रीको भलीभांती जानते हैं इसमें वैदिक मन्त्रोंसे भगवान् भूतनाथकी पूजा और उपासना लिखी गई है। इसका केवल पाठ मात्र करनेसे मनुष्यको किसी वस्तुकी कमी नहीं रहती, हमने सर्व साधारणके उपकारार्थ मुरादाबादके पण्डित ब्रजरत्न भट्टाचार्यजीसे अत्यन्त कमनीय और सरल भाषाटीका बनवाकर खूब बडे २ सुवाच्य अक्षरोंमें मूल और भाषानुवाद छापके प्रसिद्ध किया है प्रत्येक मन्त्रके नीचे स्वरोंके चिन्ह ऐसी सरलतासे लिखे जिन्हें सब कोई समझ सक्ते हैं । मूल्य १० आना ।

पुस्तक मिलनेका ठिकाना-गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण-मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्भागवतकथासूचीपत्रम् ।

अध्यायाः विषयाः

प्रथमः स्कन्धः ।

१ दुष्टकलेरागमनं ज्ञात्वा तत्तरणोपायं शौनकादयः सूतं पप्रच्छुः ।
२ एकाग्रमनसा भगवत्कथाश्रवणकीर्तनमेव कलेर्निस्तरणोपाय इति निर्णीतम् ।
३ भगवतः पुरुषाद्यवतारस्तच्चरितं च संक्षेपेण दर्शितं भागवतार्कोदयश्च।
४ आम्नायविभागसदर्थप्रकाशनाय भारतादिग्रन्थकरणेनाऽपि व्यासस्यापरितोषः । [कारणमुपदिष्टं तेन ।
५ नारदं प्रति व्यासेन चित्तापरितोषकारणे पृष्टे भगवद्गुणवर्णनाप्राचुर्यं
६ व्यासप्रत्ययार्थमात्मनः पूर्वजन्मचरितं कृष्णकथोद्भवं नारदेन दर्शितम् । [चौरकृत्यं कथितम् ।
७ भागवतश्रोतुः परीक्षिज्जन्मप्रस्तावे अश्वत्थाम्नः सुप्तद्रौपदीपुत्रवधादि-
८ अश्वत्थाम्नोऽस्त्रात्परीक्षिद्रक्षणं कृष्णेन । कुन्त्या कृता तत्स्तुतिश्च ।
९ धर्मस्य शोके तच्छान्त्यर्थं भीष्मसंनिधिगमनं तेन तच्छोकापनोदस्तन्निर्याणं च ।
१० युधिष्ठिरस्य राज्याभिषेकानन्तरं भगवतो द्वारकागमनम् ।

अध्यायाः विषयाः

११ भगवतो द्वारकाप्रवेशस्तदैश्वर्यकथनम् ! [वर्ण्यते ।
१२ द्रौण्यस्त्राद्रक्षितस्य परीक्षितो जन्म तज्जातकर्म च युधिष्ठिरेण कृतं
१३ सस्त्रीकस्य धृतराष्ट्रस्य विदुरोपदेशेन निर्याणं परीक्षिद्राज्याभिषेकः ।
१४ उत्पातदर्शनेन युधिष्ठिरस्यार्जुनाऽनागमचिन्तायां तदागमनम् ।
१५ अर्जुनाद्भगवन्निर्याणं श्रुत्वा प्रव्रजितानां पाण्डवानां स्वर्गारोहणम् ।
१६ कलिखिन्नभूमिधर्मसंवादे परीक्षिदागमनम् ।
१७ उभयोः संवादात्कलिं ज्ञात्वा तन्निग्रहः परीक्षिता कृतः । [त्सर्जनम् ।
१८ मृतसर्पकलेवरं शमीककण्ठे राज्ञा क्षिप्तं निशम्य तत्पुत्रेण शृङ्गिणा शापो-
१९ गङ्गायां प्रायोपविष्टे परीक्षिति ऋषीणामागमनं शुकप्राप्तिश्च ।

द्वितीयः स्कन्धः ।

१ राज्ञा पृष्टः शुकः सूक्ष्मे ब्रह्मणि चित्तस्थैर्यार्थमादौ स्थूलविराड्रूपोपासनमुपादिशत् ।
२ स्थूलधारणाजितस्य मनसोऽतिसूक्ष्मे ब्रह्मणि चित्तलयोपदेशः ।

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः

३ विष्णुभक्तिश्रैष्ठ्यश्रवणेन तत्साधनभूतासु भगवत्कथासु परीक्षित आदरो दर्शितः ।
४ हरिलीलाप्रश्ने परीक्षिता कृते शुकेन नारदब्रह्मसंवादप्रस्तावो वर्णितः ।
५ ब्रह्मणा नारदाय विराड्रूपसृष्टिरुक्ता ।
६ पुरुषसूक्तार्थेन भगवतो विराड्देहवर्णनम् ।
७वराहावतारादारभ्य आकृष्णावतारमवतारास्तच्चरितानि चोपवर्णितानि।
८ जीवपरमात्मसंबन्धाक्षेपपूर्वकं पुराणार्थप्रश्नाः । [मुपदिष्टम् ।
९ शुकेन परीक्षित्प्रश्नोत्तरे भगवता ब्रह्मणे प्रोक्तं चतुःश्लोकं भागवत-
१० राज्ञः परीक्षितः प्रश्नोत्तरद्वारा पुराणलक्षणादिवर्णनम् ।

तृतीयः स्कन्धः ।

१ गतायुषो यदूंस्त्यक्त्वा गतस्योद्धवस्य विदुरेण सह संभाषणम् ।
२ कृष्णविरहदुःखित उद्धवः कृष्णचरितानि संक्षेपेण क्षत्रेऽकथयत् ।
३ मथुराया आगतस्य भगवतो द्वारकाक्रीडादिवर्णनम् ।
४ भगवदादेशादुद्धवज्ञापितो विदुरो मैत्रेयमगमत् ।
५ विदुरसंदेहे मैत्रेयेण तन्निरासार्थं महदादीनां स्थूलानां सृष्टिवर्णनम् ।
६ ईशशक्तिप्रवेशेन स्थूलभूतानां जगन्निर्माणशक्तित्वम् । [दुरप्रश्नाः ।
७ स्वतो निर्गुणस्य भगवतो गुणमय्या मायायाः कथं सङ्ग इत्यादिवि-

अध्यायाः विषयाः

८ नाभिकमलोद्भूतस्य भीतस्य ब्रह्मणो भगवत्स्तुतिः ।
९ ततस्तपस्तुष्टस्य भगवतो वरदानेन ब्रह्मणः सृष्टिप्रवृत्तिः ।
१० प्रथमं कालोत्पत्तिर्विसर्गसृष्टिश्च वर्णिता ।
११ कल्पयुगादिकालमानवर्णनम् । [शतरूपायाश्चोत्पत्तिः ।
१२ ब्रह्मणः सनत्कुमारादिमानससृष्टेरनन्तरं द्विधा देहभेदेन स्वायंभुवस्य
१३ ब्रह्मणो नासिकोद्भूतस्य यज्ञरूपवराहस्य स्तुतिः ।
१४ दितिप्रार्थनया कश्यपात्तस्यां गर्भसंभूतिः ।
१५ सनत्कुमाराद्वैकुण्ठस्थितयोर्जयविजययोः शापवर्णनम् । [वर्ण्यते ।
१६ कुपितानां कुमाराणां भगवता सान्त्वनं द्वास्थयोरनुग्रहश्च कृत इति
१७ हिरण्याक्षहिरण्यकशिप्वोर्जन्मन्युत्पातकथनं ताभ्यां दिशां विजयश्च ।
१८ धरोद्धारे हिरण्याक्षवराहयोर्महाभयमायोधनम् ।
१९ ब्रह्मप्रार्थनाङ्गीकारेण हिरण्याक्षवधः ।
२० सर्वस्थिरचरसर्गानन्तरं स्वायंभुवमनोर्वंशवर्णनम् ।
२१ कर्दमतपस्तुष्टेन भगवता तस्य सृष्ट्यर्थविवाहोपदेशः ।
२२ स्वायंभुवमनुना स्वयंप्रत्तया देवहूत्या सह कर्दमर्षेर्विवाहः ।
२३ पत्न्यां प्रसन्नेन कर्दमेन तपःसिद्धिनिर्मिते विमाने तयोर्गार्हस्थ्यवर्णनम् ।
२४ भगवतः कपिलस्य जन्मानन्तरं कर्दमस्य प्रव्रज्योक्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः

२५ मात्रा पृष्टः कपिलो जीवस्य बन्धविमोक्षणं भक्तियोगमाह ।
२६ पुंप्रकृत्योर्विवेकाय सर्वसूक्ष्मभावानां जन्मलक्षणम् ।
२७ पुंप्रकृत्योर्विवेके मोक्षप्राप्तिर्दर्शिता कपिलेन ।
२८ सगुणस्य भगवतो ध्यानयोग उक्तः ।
२९ मायाध्यासेन कालकृता जीवस्य जन्मादिर्घोरा संसृतिरुपदिष्टा ।
३० देहाध्यासेन जीवानां पापादधोगतिरुदीरिता ।
३१ पुण्यपापयोः साम्यान्मानुषी गतिः कथ्यते ।
३२ सात्त्विकैः कर्मभिरूर्ध्वगतिः । ज्ञानविहीनस्य पुनरावृत्तिर्वर्णिता ।
३३ मातरमुपदिश्य कपिलो ययौ मातुर्मुक्तिश्चाभूत ।

चतुर्थः स्कन्धः ।

१ स्वायंभुवमनोर्वंशकीर्तनं ब्रह्मपुत्रादत्रेर्दत्तावतारः ।
२ विश्वसृजां सत्रे दक्षशिवयोर्वैरकारणं परस्परशापविसर्जनं च । [कृतः ।
३ दाक्षायण्याः सत्याः पितृयज्ञादिदृक्षया जिगमिषन्त्याः शिवेन निषेधः
४ शिवं विहाय गतायाः सत्याः पितृकृतावमानाद् योगेन देहन्यासः ।
५ नारदात् पत्नीनाशश्रवणेन कुपितः शिवो वीरभद्रं निर्माय तेन दक्षयज्ञविध्वंसनं दक्षवधं च कारयामास ।
६ सदेवो विधिः कैलासं गत्वा यज्ञसंधानार्थं दक्षजीवितार्थं शिवं तुष्टाव ।

अध्यायाः विषयाः

७ पुनर्दक्षयज्ञसंधानार्थमुद्भूतस्य विष्णोः सर्वदेवैः स्तुतिः कृता ।
८ मातुः सपत्न्या गिरा विद्धः कोपादरण्यं गत्वा नारदोपदेशेन ध्रुवो हरिमतोषयत् ।
९ ध्रुवोऽभीष्टवरान् हरेर्लब्ध्वा पित्रा समर्पितं राज्यमकरोत् ।
१० पुण्यजनात् भ्रातृवधं श्रुत्वा ध्रुवः पुण्यजनानलकां गत्वाऽवधीत् ।
११ पुण्यजनक्षयं दृष्ट्वाऽऽगतेन स्वायंभुवेन ध्रुवस्य सान्त्वनं युद्धात्परावर्तनं च ।
१२ कुबेरेणाभिनन्दितो ध्रुवः प्रजापालनं कृत्वा यज्ञैरिष्ट्वा हरेः स्थानमारुरोह ।
१३ ध्रुवान्वयोत्पन्नस्याङ्गस्य पुत्रवेनक्रौर्याददर्शनगमनम् । [ऋषिभिर्वधः ।
१४ अङ्गगमनादूर्ध्वं तत्पुत्रवेनस्य राज्याभिषेके कृते तस्याधर्मवर्तित्वात्
१५ अराजके वेनदक्षिणबाहुमथनं कृत्वा ऋषिभिरुत्पादितस्य पृथोर्जन्म ।
१६ ऋषिप्रेरितैर्मागधबन्दिभिस्तत्स्तुतिः कृतेति वर्ण्यते ।
१७ क्षुत्पीडितानां शरणं प्राप्तानां प्रजानामन्नदानार्थं ग्रस्तबीजां महीं हन्तुमुद्यतस्य पृथोस्तया कृता स्तुतिः ।
१८ महीवचनाद्वत्सपात्रादिकल्पनया सर्वैर्महीदोहनम् ।
१९ तस्याश्वमेधे हयापहरणादिन्द्रवधोद्यतस्य पृथोर्ब्रह्मणा निवारणम् ।
२० तद्यज्ञोद्भूतस्य विष्णोर्वरप्रदानमुभयप्रीतिसंबन्धश्च ।
२१ स्वप्रजाभ्यः पृथुना भगवद्धर्मशासनं कृतम् ।

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः
२२ भगवदाज्ञयाऽऽगतेन सनत्कुमारेण पृथवे ज्ञानोपदेशः कृतः।
२३ ध्यानयोगेन त्यक्तदेहस्य सभार्यस्य पृथोर्विमानेन वैकुण्ठप्राप्तिः।
२४ पृथोः प्रपौत्रात्प्राचीनबर्हिषो दशानां प्रचेतसां जन्म रुद्रगीतं च।
२५ तपस्यत्सु प्रचेतस्सु तत्पित्रे नारदोऽध्यात्मपारोक्ष्यमुपादिशत्।
२६ पुरञ्जनापदेशस्य जीवस्य संमृद्धित्यागात् सस्मृतिरुदीर्यते।
२७ प्रियापुत्रापदेशेन्द्रियासक्त्या जीवस्य स्वरूपप्रच्युत्या कालक्रमेण जरारोगाद्यागमः।
२८ स्त्रीसङ्गात् स्त्रीत्वं प्राप्तस्य पुरञ्जनस्य परमात्मज्ञानोपदेशान्मुक्तिः।
२९ परोक्षार्थव्याख्यानेन स्त्रीसङ्गाद्भव ईशसङ्गान्मुक्तिरितीरितम्।
३० ईशाल्लब्धवराः प्राचीनबर्हिषो वार्क्षीं कन्यां परिणीय राज्यमकुर्वन्।
३१ स्वसुते दक्षे राज्यधुरं न्यस्य वनं गतानां प्रचेतसां नारदोपदेशान्मुक्तिः।

पञ्चमः स्कन्धः।

१ प्रियव्रतस्य विरक्तत्वेऽपि ब्रह्मणो मनोधारणार्थं राज्यकर्तृत्वं तदनु नारदोपदेशात्परमपदप्राप्तिः।
२ आग्नीध्रस्य स्त्रैणत्वं गन्धर्वलोकावाप्तिश्च तस्मान्नाभे राज्ञ उत्पत्तिः।

अध्यायाः विषयाः
३ पुत्रार्थं यजतो नाभेर्यज्ञे भगवताविर्भूय तत्प्रार्थनयात्मसदृशपुत्रदानम्।
ऋषभावतारः। [प्रजानां परमनिर्वृतिश्चाख्याता।
४ इन्द्रेण वृष्टिप्रतिबन्धे स्वयोगमाययर्षभस्य वर्षणादिचारंत तद्राज्ये
५ भरतादीनामुपदेश आत्मनश्च पारमहंस्यधर्माचरणम्।
६ देहाभिमानत्यागान्निरभिमानत्वेन भुवं चरतस्तस्याग्निप्रवेशः।
७ भरतेन यज्ञेश्वरस्य भगवतः स्तुतिः पश्चात्तस्य प्रव्रजनं तपश्च कथितम्।
८ विष्णुं भजतस्तस्यैणसङ्गादेणत्वं वर्णितम्। [ल्या मोक्षः।
९ तस्य तृतीयविप्रजन्मनि जडत्वेन गृहीतस्य चौरैर्बलिप्रदानाद्भद्रका-
१० रहूगणेनाक्षिप्तस्यापि तथैव शिबिकावहनं तद्वाक्यं च कथितम्।
११ सिन्धुसौवीरपतिना पृष्टः स योगी तस्मै ज्ञानमाचष्ट।
१२ तत्संशयापाकरणेनाज्ञाननिवृत्त्या तज्ज्ञानप्राप्तिश्च।
१३ अविरक्ताय ज्ञानं व्यर्थमिति प्रदर्शनार्थं भवाटव्युपदेशः।
१४ भवाटवीरूपकस्य वास्तवार्थकथनम्।
१५ भरतवंशस्य सुमत्यन्तस्य वर्णनं समाप्तिश्च।
१६ मेरोः सर्वतो विस्तरस्य वर्णनं योजनप्रमाणादि।
१७ तस्माच्चतुर्दिक्षु गङ्गावतरणमिलावृते रुद्रेण संकर्षणस्तुतिः।
१८ मेरोः पूर्वदिक्क्रमतः खण्डत्रयवर्णनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः
१९	किंपुरुषभरतखण्डवर्णनं भरतखण्डश्रैष्ठ्यं च दर्शितम् । [कथितः ।
२०	प्लक्षादिषड्द्वीपवर्णनं षण्णां सागराणामन्ते लोकालोकमर्यादाविस्तारः
२१	कालचक्रेण भ्रमतो रवेरन्वहं गतिमानं तद्रथवर्णनं च ।
२२	सोमशुक्रादिग्रहाणामूर्ध्वस्थितिमानं तद्गतिश्च ।
२३	ध्रुवपदादारभ्य ज्योतिश्चक्ररूपेण भगवतो विराड्देहकल्पनम् ।
२४	सूर्याधस्ताद्राहोरारभ्य पातालादीनां भूविवराणां मानं लक्षणतः ।
२५	शेषसंस्थितिस्तन्मुखज्वालादिभ्यः प्रलयप्रवर्तनम् ।
२६	पापिनां यथायथं या नारक्यो गतयस्तासां कथनम् ।

षष्ठः स्कन्धः ।

अध्यायाः	विषयाः
१	भगवन्नाममाहात्म्यनिरूपणार्थमजामिलकथायां विष्णुयमदूतसंवादः ।
२	विष्णुदूतैर्नाममाहात्म्यं याम्यान् श्रावयित्वा सोऽजामिलो मोचितः ।
३	यमेनापि वैष्णवोत्कर्षवर्णनैः स्वदूताः सान्त्विताः । [स्तुतिश्च ।
४	प्रजासिसृक्षया दक्षेण कृतस्य तपसोऽन्ते भगवदाविर्भावः हंसगुह्य-
५	दक्षसुतानां नारदोपदेशादपुनरावर्तने नारदाय दक्षेण शापदानम् ।
६	दक्षस्य षष्टिकन्याप्रसवः । तद्वंशे विश्वरूपजन्म ।
७	बृहस्पतित्यक्तैर्देवैर्विश्वरूपः पौरोहित्याय वृतः ।
८	विश्वरूपेणेन्द्राय नारायणवर्मदानम् । [स्तुतिः ।
९	इन्द्रेण हते विश्वरूपे तत्पित्रा वृत्र इन्द्रनाशार्थमुत्पादिते भीतैर्देवैर्भगव-
१०	भगवदुपदेशेन दधीचास्थिभिर्निर्मितं वज्रमात्तवतेन्द्रेण वृत्रस्य युद्धम् ।
११	वृत्रयुद्धे तस्य भक्तिज्ञानवैराग्यजुष्टा वाचो वर्णिताः ।
१२	विषण्णोत्साहितेनेन्द्रेण वृत्रवधः । [यजनं च ।
१३	वृत्रवधोत्पन्नया ब्रह्महत्यया नष्टस्य इन्द्रस्य पुनरागमनमश्वमेधेन
१४	वृत्रस्येदृग्भक्तिकारणप्रश्ने तत्पूर्वचित्रकेतुजन्मकथनं तस्य कृच्छ्रल-ब्धसुते नष्टेऽतिशोकः ।
१५	चित्रकेतोर्नारदोङ्गिरोभ्यां शोकापनोदः । [उपदिष्टा ।
१६	मृतपुत्रोक्तिभिस्तन्मायामपहाय नारदेन शेषतोषिणी विद्या तस्मा
१७	शेषवरदानेन ऋद्ध्युन्मत्तस्येशहसनं चित्रकेतोः पार्वतीशापाद्दैत्यत्वम् ।
१८	चतुर्थादित्यान्वयवर्णने दितिगर्भच्छेदनादिना मरुतामुत्पत्तिः ।
१९	कश्यपेन दित्या इन्द्रहन्तृपुत्रोत्पादनसमर्थव्रतोपदेशः ।

सप्तमः स्कन्धः ।

अध्यायाः	विषयाः
१	हिरण्यकशिपोर्ब्रह्मशापेन विष्णुभक्ते विरोधः । [शिपुना ।
२	भ्रातृवधसंतप्तानां बन्धूनां कपोताद्याख्यानेन सान्त्वनं हिरण्यक-
३	हिरण्यकशिपोस्तपसा तप्तानां देवानां प्रार्थनया ब्रह्मणा तस्मै वरदानम् ।

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः

४ लब्धवरो दैत्यस्त्रैलोक्यं विजित्य विष्णुवरेण देवानपीडयत् ।

५ गुरुशिक्षितमगृह्णानं भगवत्स्तुतौ रतं प्रह्लादं पितुर्विषसर्पाद्यैर्घातयितुं यत्नः।

६ गुरौ गृहकर्मणि व्यग्रे प्रह्लादो दैत्यसुतान् विष्णुभक्तिधर्मानुपादिशत् ।

७ वनं प्रस्थिते पितरि स्वभ्रातरं हन्तुं प्रवृत्त इन्द्रे नारदोपदेशेन गर्भस्थ एव तदुपदिष्टं ज्ञानमहमगृह्णामिति दैत्यसुतानादिशत् ।

८ पिता सुतं निघ्नन् हरिणा नृहर्यवतारं कृत्वा स्तम्भादाविर्भूय हतः । ब्रह्मादिभिः स्तुतः ।

९ तत्स्वरूपभीतेन ब्रह्मणा प्रणोदितः प्रह्लादो हरिमस्तौत् ।

१० एनमनुगृह्यान्तर्हिते भगवति प्रसङ्गेन शिवात् त्रिपुरवध ईरितः ।

११ युधिष्ठिरेण पृष्टो नारदो नृणां तथा स्त्रीणां साधारणं धर्ममुपादिशत् ।

१२ ब्रह्मचारिवानप्रस्थयोर्धर्मप्राधान्येन चतुर्णामाश्रमाणां साधारणा धर्मा उपदिष्टाः । [वर्णिता ।

१३ साधकस्य यतेर्धर्मस्तथा सिद्धस्यावधूतेतिहासेन धर्माः सिद्धावस्था च

१४ देशकालादिविशेषेण गृहस्थस्य श्रेयस्कृद्धर्म उपदिष्टः । [नारदः ।

१५ सर्वेषां मोक्षधर्माणां सर्ववर्णाश्रमनिबन्धनं सारसंग्रहं धर्ममाचष्ट

अष्टमः स्कन्धः ।

१ यज्ञावतारस्य स्वायंभुवस्वारोचिषादीनां चतुर्णां मन्वन्तराणां च वर्णनम्।

अध्यायाः विषयाः

२ तुर्यमन्वन्तरोक्तगजेन्द्रमोक्षश्रवणोत्सुकस्य राज्ञस्तत्कथाप्रस्तावः ।

३ शमलं प्राप्तेन गजेन्द्रेण स्तुतस्तन्मन्वन्तरावतारो हरिर्ग्राहग्रस्तं गजेन्द्रं देवलशापतश्च ग्राहं मोचयामास । [पदमनयत् ।

४ ग्राहस्य गन्धर्वतां दत्त्वा गजेन्द्रं स्वपार्षदं कृत्वा तौ हरिर्निजं

५ पञ्चषष्ठमन्वन्तरवर्णनं प्रसङ्गाद्दुर्वासःशापान्निःश्रीकैर्देवैर्हरिः स्तुत इति कथ्यते । [सुधोत्पादनार्थं समुद्रमन्थनोद्योगः ।

६ भगवदाविर्भावानन्तरं तदुपदेशतो देवैर्दैत्यानां सन्धिमभिधाय

७ मन्थनोद्भूतविषभयेन भीतैर्देवैः स्तुतो रुद्रस्तद्विषं पपौ ।

८ तदुद्भूतेषु चतुर्दशसु रत्नेषूत्पन्नया लक्ष्म्या हरिर्वृतः । धन्वन्तरेरमृते दैत्यैर्हृते भगवतो मोहिनीरूपाविर्भावः । [स्वं रूपं हरिर्जगृहे ।

९ तन्मोहितैर्दैत्यैरर्पितेऽमृतभाजने तान् वञ्चयित्वा सुरानमृतं पाययित्वा

१० एतत्कारणादेव दैत्यैरारब्धे युद्धे दैत्यपराजितैर्देवैः स्तुतो हरिराविर्बभौ ।

११ नारदो ब्रह्मणो वाक्याद्दैत्यवधाद्देवान्न्यषेधत् ते च शुक्रेण संजीविन्या जीविताः पातालं विविशुः । [त्याजयित्वा तं सान्त्वितवान् ।

१२ मोहिनीरूपदर्शनोत्सुकेन हरेण हरिरात्मनो मोहिनीरूपदर्शनेन धैर्यं

१३ अवशिष्टानि सप्त मन्वन्तराणि क्रमादवर्णयत् ।

१४ प्रतिमन्वन्तरमाविर्भूतस्यावतारादिषट्कस्य प्रत्येकस्य कर्म वर्ण्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः

१५ शुक्रो बलिं विश्वजिताऽयाजयत् तद्भयेन स्वर्गान्नष्टा देवा निलिल्यिरे ।
१६ पुत्रनाशसंतप्तयाऽदित्या स्तुतः कश्यपः पयोव्रतमुपादिशत् ।
१७ तत्कृतेन व्रतेन तुष्टो भगवानाविर्भूय पुत्रत्वस्वीकरणेन तामनन्दयत् ।
१८ वामनावतारं गृहीत्वाऽखिलैः संभावितो बलेर्यज्ञं गतस्तं तुष्टाव तेन च वराय नियुक्तः ।
१९ पदत्रये भूमेर्याचिते प्रतिश्रुतदानो बलिः शुक्रेण निषिद्धः ।
२० अनृताद्भीतो बलिर्गुरुणा शप्तोऽपि कपटं ज्ञात्वाऽपि पदत्रयं ददौ । अनन्तरं हरिरवर्द्धत ।
२१ तद्धर्मनिष्ठां प्रथयितुं तं नागपाशैर्बबन्ध ।
२२ प्रसन्नो हरिः सुतले तं प्रस्थाप्य वरान् दत्त्वा तद्द्वारपोऽभवत् ।
२३ याते बलावुपेन्द्र इन्द्रेण सह स्वर्गं गत्वा सर्वान् देवाननन्दयत् ।
२४ प्रसङ्गान्मत्स्यावतारेण प्रलये मनोरक्षणम् ।

नवमः स्कन्धः ।

१ सूर्यसुतान्वये सोमवंशोद्भवार्थं मनुपुत्रसुद्युम्नस्त्रीत्वं तस्मात्पुरूरवस उत्पत्तिस्तद्राज्यप्रतिष्ठा नाभागचरितं च । [वंशानाह ।
२ मनोर्दशपुत्राणां मध्ये पञ्चानां पृषध्र-कवि-करूष-धृष्ट-नृगानां
३ शर्यातेः कन्यायाः सुकन्यायाश्च्यवनपारिणयः । रैवतकस्याख्यानं तेन बलाय कन्यादानम् । (पलायनं तत्पृष्ठतश्चक्रगमनम् ।
४ नभगपुत्रस्याम्बरीषस्य चरिते दुर्वासःकृत्यानाशः सुदर्शनेन दुर्वासः-

अध्यायाः विषयाः

५ विष्णुचक्रसंतप्तं दुर्वाससमम्बरीषस्तत्स्तुत्या त्रासान्मोचितवान् मोचितस्तं संस्तूय दुर्वासा गतः ।
६ इक्ष्वाकुवंशस्य शशादस्य चरितं तत्पुत्रककुत्स्थचरितं तदन्वये यौवनाश्वस्य मांधातुस्तत्पञ्चाशत्कन्यकाभिर्वृतस्य सौभरेश्चाख्यानम् ।
७ तद्वंश्यहरिश्चन्द्रस्याख्यानं तद्यज्ञे विश्वामित्रकृपया शुनःशेपमोक्षश्च ।
८ तदन्वयोत्पन्नसगरयज्ञ इन्द्रेण हरिताश्वानयनार्थं प्रवृत्तान् सगरसुतान् कपिलो ददाह तत्पौत्रेणांशुमता स्तुतः कपिलोऽश्वं तस्मै दत्त्वा पितॄणामुद्धरणार्थं गङ्गावतरणमादिशत् ।
९ तत्पौत्रो भगीरथो गङ्गामानीय स्वपितॄनुददीधरत् तदन्वय ऋतुपर्णोत्पत्तिः सौदासाख्यानं तथा खट्वाङ्गो मुहूर्तात् ब्रह्मलोकमगमदितीर्यते ।
१० तदन्वये दशरथाद्रामावतारः संक्षेपेण तच्चरितं च ।
११ रामराज्यवर्णनं तदाज्ञाः शत्रुघ्नेन लवणासुरं हत्वा मथुरानिर्माणम् ।
१२ कुशादारभ्य सुमित्रान्तो मनोर्वंशः कथितः । [परस्परं देहत्यागः ।
१३ ऐक्ष्वाकस्य निमेर्वंशे जनकादीनां राज्ञां वर्णनं वसिष्ठस्य निमिशापेन
१४ इन्दुना गुरुपत्न्यङ्गीकारे देवदैत्ययोर्युद्धोद्योगे ब्रह्मणा सान्त्वितायास्ताराया बुधजन्म तस्मात्पुरूरवस उर्वश्याख्यानं तस्याः सकाशादायुरादीनां षण्णां पुरूरवसः पुत्राणां जन्म । [सहस्रार्जुनवधः ।
१५ पुरूरवसो वंशे जह्नोरुत्पत्तिः । गाधेर्विश्वामित्राख्याने परशुरामजन्म

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः
१६	सहस्रार्जुनसुतैर्जमदग्नेर्वधे तद्रोषादेकविंशतिवारं परशुरामेण निःक्षत्रीकरणं [जन्म पितृजराग्रहणम् ।
१७	पुरूरवसश्चतुर्णां सुतानां वंशवर्णनम् ।
१८	नाहुषस्य ययातेर्देवयान्या सह विवाहः शर्मिष्ठायां च द्रुह्यवादीनां
१९	ययातेर्वैराग्यं पूरो राज्याभिषेकानन्तरं तस्य वनाश्रयणं च कथितम् ।
२०	पितृप्रसादादाप्तराज्यस्य पूरोर्वंशे दुष्यन्तशकुन्तलयोर्विवाहोत्तरं तत्पुत्रस्य भरतस्याख्यानं तद्वंशे नष्टे यज्ञतुष्टैर्भरद्वाजपुत्रार्पणम् । [न्दोत्पत्तिः ।
२१	रन्तिदेवाजमीढादेश्चरितं दिवोदासोत्पत्तिरहल्याख्यानं तस्याः शतान-
२२	दिवोदासवंशवर्णनमृक्षवंशे जरासन्धपार्थदुर्योधनादीनामुत्पत्तिः ।
२३	द्रुह्युतुर्वसुयदूनां यावज्ज्यामघसंभवम् । वंशाः कथिताः । [वर्णिताः ।
२४	यादवान्वयोत्पन्नस्य विदर्भस्य नानामुखा वंशा रामकृष्णावतारावधि

दशमः स्कन्धः ।

अध्यायाः	विषयाः
१	देवकीविवाहे कंसः स्वमृत्युं तत्सुताद्विज्ञाय तत्षड्गर्भानवधीत् ।
२	कंसादिघाताय विधिप्रार्थितो देवकीगर्भे हरिरभूत् गर्भस्तुतिश्च ।
३	देवक्यां निजरूपेणोत्पन्नो देवकीवसुदेवस्तुतो हरिः पित्रा गोकुलं नीतः ।
४	कन्यकावाक्यादतिभयाकुलः कंसो दुष्टदैत्यैः सर्वबालवधमाज्ञापयत् ।
५	नन्दः पुत्रानन्दनिर्वृतो महोत्सवं कृत्वा मथुरां गत्वा वसुदेवसंगममकरोत् । [विस्मितोऽभूत् ।
६	वसुदेववाक्याद् गोकुलेऽनर्थागमशङ्कितो नन्दः पूतनावधादिकं श्रुत्वा
७	शकटासुरवधस्तृणावर्तवधः । मातुः स्वमुखे विश्वरूपदर्शनम् । [नम् ।
८	गर्गेण कृष्णजन्मकर्मादिजातककथनं मृद्भक्षणव्याजेन विश्वरूपदर्श-
९	पयस्युत्सिक्ते यशोदा भाण्डभङ्गादि दृष्ट्वोलूखले कृष्णं बबन्ध ।
१०	सहोलूखलेन रिङ्गन् कृष्णो यमलार्जुनौ बभञ्ज नलकूबराभ्यां स्तुतः ।
११	वत्सान् पालयता कृष्णेन वत्सासुरबकासुरौ हतौ ।
१२	महासर्पवपुर्धरमघासुरं वत्सगोपालगलं कृष्णो गले प्रविश्याहन् ।
१३	ब्रह्मणा वत्सगोपालहरणे तावद्रूपो हरिर्भूत्वा पूर्ववद् गोकुले चिक्रीड ।
१४	कृष्णं परं ब्रह्म विदित्वा कृता ब्रह्मस्तुतिर्वर्ण्यते ।
१५	तालवने धेनुकार्दनं कालियविषमृतान् वत्सबालकानजीवयत् ।
१६	यमुनाह्रदे कालियनिग्रहः । तत्पत्न्यभिष्टुतस्तमनुजग्राह ।
१७	कालियं रमणके निवास्य सुप्तान् गोपान् दावाग्नितो ररक्ष ।
१८	वसन्तगुणलक्षिते ग्रीष्मे बलेन प्रलम्बासुरमपातयत् ।
१९	मुञ्जारण्ये दावाग्नितो गोगोपानरक्षत् इतीरितम् ।
२०	बलरामकृष्णयोर्वर्षाशरदृतुक्रीडा वर्ण्यते ।
२१	शरदि भगवतो वेणुनादं श्रुत्वा गोपीभिः कृतं वेणुगीतं वर्ण्यते ।
२२	कात्यायनीव्रतं कुर्वाणानां गोपकन्यानां परिहासेन वस्त्रार्पणं यज्ञपत्नीभ्यो गोपप्रेषणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः

२३ अन्नयाच्ञामिषेण यज्ञपत्नीरनुगृह्य तत्पतीनन्वतापयत् ।

२४ इन्द्रमखाद् गोपान्निवार्य गोवर्धनमहोत्सवमकारयत्कृष्ण इत्युदीर्यते ।

२५ कुपितेन्द्रे व्रजनाशाय वर्षति गोवर्धनमुद्धृत्य कृष्णो गोपानरक्षत् ।

२६ नन्दः कृष्णपराक्रमशङ्कितगोपान् गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत् ।

२७ कृष्णैश्वर्यप्रबोधित इन्द्रस्तुष्टाव कामधेन्वेन्द्रेण च गोराज्येऽभिषिक्तः कृष्ण इतीर्यते । [गोपानां वैकुण्ठदर्शनम् ।

२८ वरुणलोकगतं नन्दं भगवांस्तल्लोकं गत्वा तेन स्तुतः पितरमानयत् ।

२९ रासार्थमानीताभिर्गोपीभिर्हरेः संवादानन्तरं रासे भगवदन्तर्धानम् ।

३० विरहतप्ताभिर्गोपीभिर्मार्गणं तद्भावभावाकृतयश्च तासां वर्ण्यन्ते ।

३१ यमुनापुलिनमागताभिः कृतं गोपीगीतं वर्ण्यते ।

३२ तद्भक्त्याकृष्टो हरिराविर्भूय ता अरीरमत् ।

३३ ताभिः सह कृष्णो जलस्थलवनक्रीडा अकरोत् । [शङ्खचूडमवधीत् ।

३४ अङ्गिरसः शापजातेन सर्परूपेण गन्धर्वेण ग्रस्तं नन्दममूमुचद्।धनदानुगं

३५ वनं याते कृष्णे युग्मगीतेन गोप्यो वासरमनयन् ।

३६ अरिष्टासुरवधे नारदोपदेशेन वसुदेवसुतौ रामकृष्णौ ज्ञात्वा कंसस्तावानेतुमक्रूरं प्रैषयत् । [व्योमासुरमवधीत् ।

३७ केशिदैत्ये हते नारदो भाविकर्मभिर्भगवन्तमस्तौत् कृष्णः क्रीडन्

अध्यायाः विषयाः

३८ अक्रूरो भगवन्तं ध्यायन् गोकुलं गतो रामकृष्णाभ्यां सत्कृत्य गृहं नीत इतीर्यते । [विष्णुलोकदर्शनम् ।

३९ मथुरां गच्छति कृष्णे गोपिकोक्तयः । अथ कालिन्द्यामक्रूरस्य

४० अक्रूरः कृष्णमीश्वरेश्वरं मत्वा सगुणागुणभेदैस्तमस्तावीत् ।

४१ मथुरां प्रविशन् रजकं हत्वा मालाकारेण सुदाम्नाऽलङ्कृतस्तस्मै वरमददात् । [काञ्चधान ।

४२ कुब्जाचन्दनालङ्कृतस्तामृजूकृत्य धनुर्भङ्गं विधाय तद्रक्षिणः कंससेव-

४३ कुवलयापीडं हत्वा रङ्गं प्रविष्टयो रामकृष्णयोर्नवरसाविर्भावश्चाणूरमुष्टिकादिभाषणं च ।

४४ चाणूरवधानन्तरं कंसवधः तस्य स्त्रीणामाश्वासनम् ।

४५ श्रीकृष्णेन नन्दादीनां सान्त्वनम् । उग्रसेनस्य राज्याभिषेकः । भगवतो गुरुकुलवासे वरार्थं तत्पुत्रं जीवन्तं समर्प्य पुनर्मथुरागमनम् ।

४६ गोकुल उद्धवं प्रेष्य गोपीसान्त्वनम् । यशोदानन्दशोकापनोदनं च ।

४७ उद्धवः कृष्णादेशेन गोपीर्ज्ञानमुपदिश्य पुनः पुरीमगमत् । [प्रैषयत् ।

४८ कुब्जां रमयित्वाऽक्रूरगृहमागत्य तं पाण्डवानां क्षेमज्ञानार्थं हस्तिनापुरं

४९ गजाह्वयमक्रूरो गत्वा पाण्डवेषु विषमशीलं धृतराष्ट्रं बुध्वा पुनरागमत् ।

५० जरासन्धं विजित्य तद्भिया द्वारकां निर्माय तत्र स्वजनं रात्रावारोपयत् ।

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः

५१ मुचुकुन्ददृशा कालयवनं दग्ध्वा तेन स्तुतस्तमनुजग्राह ।
५२ भयाद्धावन्निव द्वारकामागतो द्विजमुखाद्रुक्मिण्याः संदेशमशृणोत् ।
५३ भगवान् विदर्भान् गत्वा जरासन्धादीनां मिषतां रुक्मिणीं बलादहरत्।
५४ शिशुपालपक्षगान् राज्ञो जित्वा रुक्मिणं विरूप्य पुरे भैष्म्याः पाणिमग्रहीत् । [द्वारकामागमत् ।
५५ रुक्मिण्यामुत्पन्नः प्रद्युम्नः शम्बरेण हृतोऽपि तं हत्वा सस्त्रीको
५६ स्यमन्तकस्यात्मनि मिथ्यारोपं परिहरन् हरिर्जाम्बवतो जाम्बवतीं प्राप सत्राजितः सत्यभामां च प्रत्यपद्यत ।
५७ पुनः शतधन्वनो वधात् प्राप्तं दुर्यशः परिमार्ष्टुमक्रूरान्माणिमाजहार ।
५८ कालिन्दीमित्रविन्दासत्याभद्रालक्ष्मणानां पञ्चानां पाणीनग्रहीत् ।
५९ भौमं हत्वा तदाहृतषोडशसहस्रकन्यावरणं पारिजातहरणं च ।
६० परिहासेन रुक्मिणीं कोपयित्वा कलहे तामसान्त्वयत् । [वधः ।
६१ भगवतः पुत्रपौत्रादिसन्ततेर्वर्णनम् । अनिरुद्धविवाहे रामतो रुक्मिणो
६२ उषया सह रममाणस्यानिरुद्धस्य रोधनं बाणासुरेण कृतम् ।
६३ बाणयादवसङ्गरे माहेश्वरेण ज्वरेण भगवत्स्तुतिः कृता बाणासुरस्य बाहुच्छेदने रुद्रेण स्तुतिः हरिस्तमनुजग्राहोषयाऽनिरुद्धविवाहश्च ।
६४ नृगं शापान्मुक्त्वा दृप्तानां राज्ञां ब्रह्मस्वहरणे दोषमदर्शयत् ।

अध्यायाः विषयाः

६५ गोकुलमागतो रामो गोपी रमयन् यमुनां चकर्ष ।
६६ कृष्ण आत्मरूपधरं पौण्ड्रकं जित्वा तन्मित्रेण सुदक्षिणेन काशिपतिना कृतां कृत्यां तत्पुरीं काशिकां च सुदर्शनेनादहत् ।
६७ रैवतके पर्वते स्त्रीभिः सह रममाणो रामो द्विरदं वानरमहन् ।
६८ युधि पराजित्य साम्बमोक्षार्थमागतेन रामेण हस्तिनापुरकर्षणम् ।
६९ प्रत्येकस्त्रीगृहे भगवतो गार्हस्थ्यं दृष्ट्वा तुष्टो नारदो विस्मयं जगाम ।
७० कृष्णस्याह्निकं जरासन्धनिगृहीतानां राज्ञां दूतप्रेषणं युधिष्ठिरनिमन्त्रणे कार्यमन्त्रविचारणम् ।
७१ उद्धवमन्त्रनिर्णयेनेन्द्रप्रस्थं गतो भगवान् पाण्डवानानन्दयत् ।
७२ युधिष्ठिरेण कर्तव्ये राजसूये निवेदिते जरासन्धं भगवान् भीमेनाघातयत्।
७३ जरासन्धनिगृहीतान् राज्ञो मुक्त्वा तान् स्वं स्वं राज्यं प्रैषयत् ।
७४ धर्मराजस्य राजसूयवर्णनं तथाऽग्रपूजाप्रसङ्गेन भगवन्निन्दया चैद्यवधः।
७५ यज्ञावभृथसम्भ्रमे सुयोधनस्याक्षान्त्या मानभङ्गकथनम् ।
७६ शाल्ववृष्णिरणे द्युमत्सेनगदया रणात्प्रद्युम्ननिर्गमः ।
७७ नानामायाविनं शाल्वं हत्वा कृष्णस्तद्विमानमचूर्णयत् ।
७८ विदूरथदन्तवक्त्रौ कृष्णो हत्वा पुरे रेमे । प्रसङ्गेन रामः सूतमवधीत्।
७९ द्विजतुष्टये रामो बल्वलं हत्वा सूतहत्यापापशान्त्यर्थं यात्रामकरोत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः विषयाः

८० कृष्णः गृहागतं श्रीदामानं संपूज्य गुरुकुलवासकथा अकरोत् ।
८१ तत्पृथुकान् भक्षयित्वा तस्य स्वतुल्यां श्रियमददात् ।
८२ कृष्णस्य ग्रहणयात्रायां कुरुक्षेत्रगमनं तत्र यदुभिः सह राजानः कृष्ण-कथामकुर्वन्।कृष्णः गोपनन्दगोपीः संमान्य तेषामात्मज्ञानमुपादिशत्।
८३ द्रौपद्या सह जल्पन्तीभिः कृष्णस्त्रीभिः स्वस्वकरग्रहाः प्रोक्ताः ।
८४ वसुदेवनारदसंवादानन्तरं यज्ञमहोत्सवं वर्णयित्वा भगवान् आगतान् स्वगृहं प्रैषयत् । [च्छताम् ।
८५ पित्रा संप्रार्थितौ रामकृष्णौ तस्मै ज्ञानमुपदिश्य मात्रे मृतपुत्रानय-
८६ सुभद्रामर्जुनोऽहरत्।भगवान्मिथिलां गत्वा स्वभक्तौ नृपविप्रावनन्दयत्।
८७ नारायणनारदसंवादप्रस्तावाद्वेदैर्गुणालंबान्निर्गुणावधिः स्तुतिः कृता ।
८८ विष्णुभक्तः कैवल्यपदभागर्वाग्देवताराधकस्तु संपदं प्राप्नोति ।
८९ को महान् देव इति निर्णये भृगुर्विष्णोरुत्कर्षमृषिभ्यः समकथयत् ।
९० कृष्णकथाः संक्षेपेणोक्त्वा यादवानां कुलानन्त्यं कीर्तितम् ।

एकादशः स्कन्धः ।

१ सांवादिप्रतारिता ऋषयो मौसलापदेशेन यदुकुलक्षयं कृष्णेच्छयाऽभिदधुः
२ नारदो वसुदेवाय निमिजायन्तेयसंवादेन भागवतान्धर्मानुपादिशत् ।
३ निमिना माया तत्तरणं ब्रह्म कर्मेति चतुर्षु प्रश्नेषु कृतेष्वार्षभैस्तन्निर्णयः।

अध्यायाः विषयाः

४ अवतारकथाप्रश्ने राज्ञा कृते द्रुमिलो जायन्तेयोऽवतारानकथयत् ।
५ भक्तिहीनानां का निष्ठेति प्रश्ने तेषां संसारपातः युगेषु भगवदुपासनं च ।
६ ब्रह्मादिभिः स्तुतो हरिः पदं यास्यन्नुद्धवेन स्वधामनयनार्थं प्रार्थितः ।
७ उद्धवस्यात्मज्ञानसिद्ध्या अवधूतेतिहासेऽष्टौ गुरून् हरिरवर्णयत् ।
८ नवभ्यो गुरुभ्य उद्धवस्य विवेकाय शिक्षितमुपादिशत् ।
९ कुररादिभ्यः शिक्षितमवधूताच्छ्रुत्वा यदुः कृतार्थोऽभूत् ।
१० देहसम्बन्धादात्मनः संसृतिः स्वतो नेति मतान्तरनिरासतोऽकथयत् ।
११ बद्धमुक्तानां साधूनां च तथा भक्तेर्लक्षणमुद्धवाय भगवानादिदेश ।
१२ सत्सङ्गमहिमानमादिश्य कर्मानुष्ठातारस्तत्त्यागाधिकारिणो दर्शिताः ।
१३ सत्त्वगुणसेवया ज्ञानोदयो हंसेतिहासेन चित्तगुणविश्लेषवर्णनम् ।
१४ भक्तियोगः परं श्रेयो नान्यत् । इति साधनैः ध्यानयोगः कथ्यते ।
१५ अणिमाद्याः सिद्धयः ससाधना विष्णुपदप्राप्तिविघ्नभूताः कथिताः ।
१६ अभिव्यक्तभगवदंशरूपा विभूतय उक्ता उपासनार्थम् ।
१७ स्वधर्मे भक्तिलक्षणे पृष्टे ब्रह्मचारिगृहस्थयोर्हंसोक्तं धर्ममाह ।
१८ सविशेषं वानप्रस्थयतिधर्ममधिकारिविशेषेणाकथयत् ।
१९ ज्ञानमार्गवर्णनं । यमनियमशमादिस्वरूपवर्णनं च ।
२० अधिकारिभेदेन भक्तिज्ञानक्रियात्मकं योगमुपादिशत् ।

CC-0. In Public Domain. Digitization by eGangotri

अध्यायाः	विषयाः
२१	पूर्वोक्तयोगत्रयानधिकारिणां कामिनां द्रव्यदेशादीनां गुणदोषा दर्शिताः।
२२	तत्त्वानां मतान्तरेणाविरोधः पुंप्रकृत्योर्विवेको जन्ममृत्युविधा चोच्यते।
२३	कदर्याख्यानेन तिरस्कारसहनं भिक्षुगीतेन धिया मनसः संयम उदीर्यते।
२४	आत्मनः भावानामागमापायचिन्तया सांख्ययोगेन मोहो निवार्यते।
२५	आत्मनैर्गुण्यज्ञानलाभाय चित्तसत्त्वादिवृत्तीरनेकधाऽकथयत्।
२६	दुष्टसङ्गेन योगनिष्ठाविघातः साधुसङ्गेन तत्प्राप्तिरित्यैलगीतेन वर्ण्यते।
२७	सद्यश्चित्तप्रसादकः सर्वकामाप्तिहेतुश्च क्रियायोगः साङ्गः प्रोक्तः।
२८	पूर्वं विस्तरेणोक्तो ज्ञानयोग एव सौकर्यार्थं पुनः संक्षेपेण निगद्यते।
२९	पूर्वं विस्तरेण प्रोक्तं भक्तियोगं संक्षेपेण स्वभक्ताय हरिरकथयत्।
३०	स्वधाम गन्तुमिच्छन् हरिर्मौसलापदेशेन स्वकुलं संजहार।
३१	स्वधाम्नि प्रविष्टे हरौ तमनु वसुदेवादयो देहान् जहुरिति वर्णितम्।

द्वादशः स्कन्धः।

अध्यायाः	विषयाः
१	मागधान्वये कलिना मलीमसान्तःकरणा भाविनो राजानो निर्दिष्टाः।
२	कलिदोषवृद्धौ भगवता कल्क्यवतारेणाधार्मिकाणां नाशे पुनः कृतयुगागमः। [निर्दिश्यते।
३	राज्ञां मोहादिवर्णनं तथा दोषभूयिष्ठे कलौ दोषहन्त्री हरेः स्तुति-
४	नैमित्तिकः प्राकृत आत्यन्तिको नित्य इति चतुरः प्रलयान् प्रदर्श्य तन्निस्तारे भगवत्कथेति सिद्धान्तितम्।
५	परीक्षितः परब्रह्मोपदेशेन तक्षकसन्दंशाद्भयनिवारणम्।
६	परीक्षितो मोक्षस्तत्पुत्रस्य सर्पसत्रं तथा व्यासेन वेदविभागश्च तथा गुर्ववज्ञया याज्ञवल्क्यः सूर्यमाराध्य वेदं लेभे।
७	अथर्ववेदविस्तारस्तथा पुराणलक्षणादि भागवतश्रवणफलं च निगद्यते।
८	तपसि तिष्ठतो मार्कण्डेयस्य कामादिभिरसंमोहः। तथा तत्प्रसादार्थमागतयोर्नरनारायणयोः स्तुतिः।
९	भगवन्मायादिदृक्षोर्मुनेर्मिथ्याप्रलयदर्शनेन प्रलयाब्धौ वटपत्रस्थस्य शिशुभूतस्य भगवतो मुखे प्रवेशनिर्गमौ च कथितौ।
१०	शिव आगत्य मार्कण्डेयाय वरमददात् तेन सह प्रीतिमकरोत्।
११	उपासनासिद्ध्यै महापुरुषवर्णनं तथा रवेः प्रतिमासं व्यूहकथनम्।
१२	भागवतोक्तार्थानां यथाक्रमं संक्षेपेण कथनम्।
१३	पुराणप्रतिपाद्यं देवं नमस्यन्नष्टादशपुराणग्रंथसंख्यां चाकथयत्।

इति श्रीमहाभागवतसूचीपत्रं समाप्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्वेंकटशैलवर्यशिखरे रत्नप्रदीपो महांस्त्रैलोक्यांधतमिस्रचूषणकृते यो जाज्वलीति स्फुटम् ॥ कल्याणव्रजरोध्यनादिसुदृढाघध्वांतविध्वंसन
कुर्वन्मंगलमातनोतु नितरामात्मानुरूपं स नः ॥ १ ॥ महामोहमय्यां भवाब्ध्यंतरीपे महाधन्वमह्यां मदीयं चरंतम् ॥ मृगं स्वांतनामानमार्तं
परीतं महांहोमृगेंद्रै रमेशाशु रक्ष ॥ २ ॥ प्रभो वेंकटेश प्रभा भूयसी ते तमः संछिनत्ति प्रदेशे ह्यशेषे ॥ अहो मे हृदद्रेर्गुहागूढमंधं तमो नैति
नाशं किमेतन्निदानम् ॥ ३ ॥ अथावैमि वैतन्निदानं हृदाहं सदा त्वत्सपर्याविपर्यासहेतौ ॥ कुमार्गे महामोहमार्गे सनिष्ठः सुनिष्ठातृभावं प्रभो
यद्वहामि ॥ ४ ॥ जनं तावकीनं किमेनं सुदीनं वृथाजातमेवं वृथोपेक्षसे त्वम् ॥ रमेशैवमेनं वृथोपेक्षसे चेत् क्षमायाः प्रकाशो मदन्येन केन ॥५ ॥
मदन्यः क्व विप्रेषु वैश्येषु राजस्वथो शूद्रजातिष्वथो संकरेषु ॥ निकृष्टः क्व दृष्टः क्व वा ते क्षमायाः प्रकाशो रमेश ध्रुवं स्यात्प्रहीणः ॥ ६ ॥
रमा सा क्व याता क्षमोद्बोधिनी ते ममातुल्यमाता तवोरस्थलस्था ॥ ममाभाग्यजातात्तवाभोग्यभूता रमापि प्रभो किं प्रमोदावहा ते ॥ ७ ॥
क्षमा यातु गुप्ता रमाया विधेय क्व वात्सल्यभूमा यतो दोषिवृन्दम् ॥ महानंदमेति ह्यहो मत्प्रवर्जे प्रवृत्तिः किमस्य प्रभो वेंकटेश ॥ ८ ॥
दया सा क्व याता यया दुःखिबंधो परेषां विषादो वृषाद्रीश नाश्यः ॥ ममामंददुःखप्रणाशे प्रकाशं न सा यातुमर्हा किमस्या व्रतं किम्
॥ ९ ॥ परित्यज्य भोगं परव्योमनि स्वं महानंदधामन्यपीहाहिशैले ॥ यदर्थं समायास्तदर्थं विचिंत्य प्रभो वेंकटेश द्रुतं मां सुरक्ष ॥ १० ॥
पुरा कस्यचिद्द्रो महापापदाहादभूत्तेऽभिधा श्रीगिरेर्वेङ्कटेति ॥ ममातुल्यपापप्रदाहात्तवाद्याभिधा स्यान्नवीना रमेशाखिलेड्या ॥ ११ ॥
ममामंदपापप्रवृत्तेर्निवृत्तिं यदीक्षेत भो भो भवान् रक्षितुं माम् ॥ तदाऽमंदकल्लोलजालाकुलेऽब्धौ भवान्स्नातुमिच्छेद्गिरामं निरीक्ष्य ॥ १२ ॥
क्व तच्चक्रमास्ते निकृत्तारिचक्रं भवद्भक्तचक्रे शुभं येन चक्रे ॥ हरे चक्रमेतत्तवैतज्जनस्य प्रभूताघचक्रं न किं छेत्तुमीष्टे ॥ १३ ॥
नियुज्य स्वचक्रं ममाघौघचक्रं न चेच्छेत्स्यसि त्वं तदा कस्य हानिः ॥ तवैवेति सत्यं यदेतज्जगत्यां वशं कोऽपि यायादितीक्षा कृतेयम् ॥ १४ ॥
निकृष्टोत्तमं मां विशुद्धं विधायाऽनुकंपां विदध्या यदि त्वं रमेश ॥ तदैतत्समीक्ष्येह वश्या भवेयुस्तवानेकलोका निकृष्टाश्च शिष्टाः ॥ १५ ॥
ममोत्तुंगचेतस्तुरंगोधिरोहोचितस्तेऽधिरूढो मनोजाधिराजा ॥ निरस्याशु तं भोः समारोह तं किं वृथोपेक्षसे त्वं त्वदीयं तुरंगम् ॥ १६ ॥
मदीये त्वदीयालयेनादिसिद्धे हृदीश त्वदन्ये परीवारयुक्ताः ॥ कदाचित्समागत्य तिष्ठंति तान्नो निरस्येर्यदि स्यात्तदीयं गृहं तत ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

महादुष्टकामप्रभृत्यंत्यवर्णोपिते स्वांतसद्मन्यशुद्धे मदीये ॥ निरस्याशु तं ते पदांभोजयुग्मप्रवेशेन शुद्धं गृहं तद्विधेहि ॥ १८ ॥ भवद्दिव्यदेहप्रभादीपजालप्रभाभिर्विधुन्वन् प्रकृष्टं तमिस्रम् ॥ त्वदीयैः सह त्वं कुटुंबै रमेश वसास्मिन्गृहे मे सुखी स्वांतनाम्नि ॥ १९ ॥ अविद्यार्कवृक्षं हृदावालरूढं ममानादिमूलं विभिन्दन् विमूलम् ॥ समावाप्य बीजं त्वदीयांघ्रिभक्तिप्रकृष्टाम्रबीजं रमेशेह रक्ष ॥ २० ॥ त्वदाज्ञावशेनादधानोऽपि किंचित् स्वतंत्रोऽहमेवं करोमीत्यहंयुः ॥ मुधाभावमेनं वृथा भावय त्वं त्वदाधीन्यभावं सदा भावयेश ॥२१॥ बहिर्भावयामि स्ववाचाखिलानि त्वदीयान्यमूनीति भो वेंकटेश ॥ हृदि त्वध्यवस्ये ममैवोपभोग्यान्यमूनीति नित्यं जहीदं रमेश ॥ २२ ॥ परस्वस्पृहा मे सदा वोभवीति प्रथीयस्यमुष्याशुभेनैमि मोदम् ॥ परस्याशु नाशे तदीयं मदीयं भवेदित्यहो मे दुराशां जहीश ॥२३॥ परालाभलब्धप्रणाशाववेक्ष्य प्रपद्ये महालाभयुग्मप्रमोदम् ॥ धनाप्तौ परस्य स्वकीयस्य नाशं भजामीत्यसूयां जहि श्रीनिवास ॥ २४ ॥ परस्वापहारे मम स्वापहारः परानर्थदृष्टौ ममानर्थलाभः ॥ परानंदलाभे ममानंदलाभो महानित्यमूं मे मनीषां विधत्स्व ॥ २५ ॥ महाकंटकारिं महासंकटं भोस्त्वदंघ्रिप्रफुल्लारविंदार्पणेन ॥ इमं देशमाधा मुदं संदधानं भवद्भक्तसंघे महांतं रमेश ॥ २६ ॥ अकल्याणमेतं सकल्याणमाधाः किमत्रादिमूलं न जाने रमेश ॥ अथावैमि हेतुं तवाव्याजभूयःकृपापारसिंधोः परीवाहमेव ॥ २७ ॥ सकृत्ते पदाब्जप्रचारेण नालं विहायान्यदेशे निवासं निकामम् ॥ इहैवावस त्वं ममत्वं वह त्वं किमर्थं तवार्थं त्वदन्यः प्रपश्येत् ॥ २८ ॥ अथैकोऽपि को वा त्वदर्थं त्वदन्यः समालक्षितुं वा समारक्षितुं वा ॥ समर्थोऽस्ति लक्ष्मीपते वेंकटाद्रेः पते तत्र किं वाधिकं नेह किं वा ॥ २९ ॥ यदप्यस्ति तत्र त्वदावासभूम्ना तदत्रापि च स्यात्त्वदीयागमश्चेत् ॥ ममामंदपापप्रवृत्तिं निरीक्ष्यागमश्चेन्न ते स्यात्तदा कस्य हानिः ॥ ३० ॥ अथाल्पस्य हेतोर्विहातुं बहु स्यात् तवेदं न युक्तं प्रभो वेंकटेश ॥ अथानल्पपापप्रवृत्तिर्मदीया निवर्त्या न किं तेऽखिलाघौघनाशिन् ॥३१॥ मृगपतिपदं श्वारूढश्चेन्निबद्धसटाजटोऽप्यनलमिभराट्कुंभाभेदिप्रभूतरवे यथा ॥ प्रथमगुरुभिर्गीतं नैच्यं विडंबयता मया शुनकसदृशं हास्यं प्राप्यं तथा नियतं त्विदम् ॥ ३२ ॥ इत्थं श्रीवेङ्कटाद्रिप्रभुपदयुगलीभक्तवर्यस्य गङ्गाविष्णोर्यांच्ञाविशेषाद् व्यरचि कृतिरियं वेंकटेशक्षमायाः ॥ श्रीशैलानन्तवर्यान्वयसमुदयिना वेङ्कटार्येण भक्त्या निक्षिप्ता तत्पदाब्जे मुदमतितनुतां तन्वतां स्वान्तदेशे ॥३३॥ इति श्रीमदनन्तार्यवंशीयवेङ्कटाचार्यविरचितं श्रीवेङ्कटेशक्षमात्रयस्त्रिंशच्छ्लोकीस्तोत्रं सम्पूर्णम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घुष्यते यत्र नगरे रङ्गयात्रा दिने दिने ॥ तमहं शिरसा वन्दे राजानं कुलशेखरम्॥श्रीवल्लभेति वरदेति दयापरेति भक्तप्रियेति भवलुण्ठनकोविदेति ॥ नाथेति नागशयनेति जगन्निवासेत्यालापनं प्रतिपदं कुरुवे मुकुन्द ॥ १ ॥ जयतु जयतु देवो देवकीनन्दनोऽयं जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ॥ जयतु जयतु मेघश्यामलः कोमलाङ्गो जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ २ ॥ मुकुन्द मूर्ध्ना प्रणिपत्य याचे भवन्तमेकान्तमियन्तमर्थम् ॥ अविस्मृतिस्त्वच्चरणारविन्दे भवे भवे मेऽस्तु भवत्प्रसादात् ॥ ३ ॥ नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम् ॥ रम्या रामा मृदुतनुलता नन्दने नाऽभिरन्तुं भावे भावे हृदयभवने भावयेयं भवन्तम् ॥ ४ ॥ नास्था धर्मे न वसुनिचये नैव कामोपभोगे यद्यद्भव्यं भवतु भगवन्पूर्वकर्मानुरूपम् ॥ एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु ॥५॥ दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम् ॥ अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥६॥ कृष्ण त्वदीयपदपङ्कजपञ्जरान्तमद्यैव मे विशतु मानसराजहंसः ॥ प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ७ ॥ चिन्तयामि हरिमेव सन्ततं मन्दमन्दहसिताननाम्बुजम् ॥ नन्दगोपतनयं परात्परं नारदादिमुनिवृन्दवन्दितम् ॥ ८ ॥ करचरणसरोजे कान्तिमन्नेत्रमीने श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे ॥ हरिसरसि विगाह्याऽऽपीय तेजोजलौघं भवमरुपरिखिन्नः खेदमद्य त्यजामि ॥९॥ सरसिजनयने सशङ्खचक्रे मुरभिदि मा विरमस्व चित्त रन्तुम् ॥ सुखतरमपरं न जातु जाने हरिचरणस्मरणाऽमृतेन तुल्यम् ॥ १० ॥ मा भीर्मन्द मनो विचिन्त्य बहुधा यामीश्चिरं यातना नामी नः प्रभवन्ति पापरिपवः स्वामी ननु श्रीधरः ॥ आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥ ११ ॥ भवजलधिगतानां द्वन्द्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् ॥ विषमविषयतोये मज्जतामप्लवानां भवतु शरणमेको विष्णुपोतो नराणाम् ॥ १२ ॥ भवजलधिमगाधं दुस्तरं निस्तरेयं कथमहमिति चेतो मा स्म गाः कातरत्वम् ॥ सरसिजदृशि देवे तावकी भक्तिरेका नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥ १३ ॥ तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले दारावर्ते तनयसहजग्राहसङ्घाकुले च ॥ संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन् पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ १४ ॥ मा द्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान् पदाब्जे मा श्रौषं श्राव्यबन्धं तव चरितमपास्यान्यदाख्यानजातम् ॥ मा स्मार्षं माधव त्वामपि

CC-0. In Public Domain. Digitization by eGangotri

भुवनपते चेतसाऽपह्नुवानान् मा भूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मान्तरेऽपि ॥१५॥ जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं पाणि-
द्वन्द्व समर्चयाऽच्युतकथां श्रोत्रद्वय त्वं शृणु ॥ कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्द्धन्नमाऽधोक्षजम् ॥
॥ १६ ॥ हे लोकाः शृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमां योगज्ञाः समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः ॥ अन्तर्ज्योतिरमेयमेकममृतं
कृष्णाख्यमापीयतां तत्पीतं परमौषधं वितनुते निर्वाणमात्यन्तिकम् ॥ १७ ॥ हे मर्त्याः परमं हितं शृणुत वो वक्ष्यामि संक्षेपतः संसारार्णवमाप-
दूर्मिबहुलं सम्यक्प्रविश्य स्थिताः ॥ नानाज्ञानमपास्य चेतसि नमो नारायणायेत्यमुं मन्त्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ॥ १८ ॥ पृथ्वी
रेणुरणुः पयांसि कणिकाः फल्गुस्फुलिङ्गो लघुस्तेजो निःश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ॥ क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः
सुरा दृष्टो यत्र स तावको विजयते भूमाऽवधूतावधिः ॥ १९ ॥ बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः कण्ठेन स्वरगद्गदेन नयनेनोद्गीर्ण-
बाष्पाम्बुना ॥ नित्यं त्वच्चरणारविन्दयुगलध्यानामृतास्वादिनामस्माकं सरसीरुहाक्ष सततं सम्पद्यतां जीवितम् ॥ २० ॥ हे गोपालक हे कृपा-
जलनिधे हे सिन्धुकन्यापते हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव ॥ हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां हे गोपीजननाथ
पालय परं जानामि न त्वां विना ॥ २१ ॥ भक्तापायभुजङ्गगारुडमणिस्त्रैलोक्यरक्षामणिर्गोपीलोचनचातकाम्बुदमणिः सौन्दर्यमुद्रामणिः ॥ यः
कान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ २२ ॥ शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्य-
सम्पूज्यमन्त्रं संसारोच्छेदमन्त्रं समुचिततमः संघनिर्याणमन्त्रम् ॥ सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसन्दष्टसन्त्राणमन्त्रं जिह्वे श्रीकृष्णमन्त्रं जप जप
सततं जन्मसाफल्यमन्त्रम् ॥ २३ ॥ व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं दैत्येन्द्रार्तिकरौषधं त्रिभुवने संजीवनैकौषधम् ॥ भक्तात्यन्त-
हितौषधं भवभयप्रध्वंसनैकौषधं श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥ २४ ॥ आम्नायाऽभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं
मेदश्छेदफलानि पूर्तविधयः सर्वे हुतं भस्मनि ॥ तीर्थानामवगाहनानि च गजस्नानं विना यत्पदद्वन्द्वाम्भोरुहसंस्मृतिं विजयते देवः स नारायणः
॥२५॥ श्रीमन्नाम प्रोच्य नारायणाख्यं के न प्रापुर्वाञ्छितं पापिनोऽपि ॥ हा नः पूर्वं वाक्प्रवृत्ता न तस्मिंस्तेन प्राप्तं गर्भवासादिदुःखम् ॥२६॥
मज्जन्मनः फलमिदं मधुकैटभारे मत्प्रार्थनीय मदनुग्रह एष एव ॥ त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ॥ यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं सेवायै मृगयामहे नरमहो मूका वराका वयम् ॥ २८ ॥ मदन परिहर स्थितिं मदीये मनसि मुकुन्दपदारविन्दधाम्नि ॥ हरनयनकृशानुना कृशोऽसि स्मरसि न चक्रपराक्रमं मुरारेः॥२९॥ तत्त्वं ब्रुवाणानि परं परस्मान्मधु क्षरन्तीव सतां फलानि ॥ प्रावर्तय प्राञ्जलिरस्मि जिह्वे नामानि नारायणगोचराणि ॥ ३० ॥ इदं शरीरं शतसन्धि जर्जरं पतत्यवश्यं परिणामपेशलम् ॥ किमौषधं पृच्छसि मूढ दुर्मते निरामयं कृष्णरसायनं पिब ॥३१॥ दारा वाराकरवरसुता ते तनूजो विरिञ्चिः स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः ॥ मुक्तिर्माया जगदविकलं तावकी देवकी ते माता मित्रं बलरिपुसुतस्तत्त्वदन्यं न जाने ॥ ३२ ॥ कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ॥ कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं कृष्णे तिष्ठति सर्वमेतदखिलं हे कृष्ण रक्षस्व माम् ॥ ३३ ॥ तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे विष्णो कृपां परमकारुणिकः खलु त्वम् ॥ संसारसागरनिमग्नमनन्त दीनमुद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि ॥ ३४ ॥ नमामि नारायणपादपङ्कजं करोमि नारायणपूजनं सदा ॥ वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम् ॥ ३५ ॥ श्रीनाथ नारायण वासुदेव श्रीकृष्ण भक्तप्रिय चक्रपाणे ॥ श्रीपद्मनाभाच्युत कैटभारे श्रीराम पद्माक्ष हरे मुरारे ॥३६ ॥ अनंत वैकुण्ठ मुकुन्द कृष्ण गोविन्द दामोदर माधवेति ॥ वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनाभिमुख्यम् ॥३७॥ ध्यायन्ति ये विष्णुमनन्तमव्ययं हृत्पद्ममध्ये सततं व्यवस्थितम् ॥ समाहितानां सतताभयप्रदं ते यान्ति सिद्धिं परमां तु वैष्णवीम् ॥ ३८ ॥ क्षीरसागरतरङ्गशीकरासारतारकितचारुमूर्तये ॥ भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ ३९ ॥ यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ मित्रे द्विजन्मवरपद्मशराव भूताम् ॥ तेनाम्बुजाक्षचरणाम्बुजषट्पदेन राज्ञा कृता कृतिरियं कुलशेखरेण ॥ ४० ॥ इति श्रीकुलशेखरकृतं मुकुन्दमालास्तोत्रं सम्पूर्णम् ॥

कृष्णे रताः कृष्णमनुस्मरन्ति रात्रौ च कृष्णं पुनरुत्थिता ये ॥ ते भिन्नदेहाः प्रविशन्ति कृष्णे हविर्यथा मन्त्रहुतं हुताशे ॥ १ ॥

एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधाऽवभृथेन तुल्यः ॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

यश्चक्रे रङ्गिणः स्तोत्रं क्षमाषोडशिनामकम् ॥ वेदव्यासस्य तनयं वेदाचार्यं तमाश्रये ॥ १ ॥

श्रीमते रामानुजाय नमः ॥ ॥ श्रीपराशरभट्टार्य्यः श्रीरङ्गेशपुरोहितः ॥ श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥ १ ॥ श्रीरङ्गेश यया करोषि जगतां सृष्टिप्रतिष्ठाक्षयानत्रामुत्र च भोगमक्षयसुखं मोक्षं च तत्तत्कृपाम् ॥ त्वत्स्वातन्त्र्यमपास्य कलिपतजगत्क्षेमातिहृद्या स्वतः क्षान्तिस्ते करुणासखी विजयतां क्षेमाय सर्वात्मनाम् ॥ २ ॥ पापानां प्रथमोऽस्म्यहं भवति चेच्छास्त्रं प्रमाणं परं श्रीरङ्गेश न विद्यतेऽत्र विशयः सन्त्येव ते साक्षिणः ॥ पृष्ट्वा तानधुना मयोदितमिदं सत्येन गृह्येत चेत् सत्यं ह्युक्तमिति क्षमस्व भगवन् सर्वं तदस्मत्कृतम् ॥ ३ ॥ त्वत्क्षान्तिः खलु रङ्गराज महती तस्याः पुनस्तोषणे पर्य्याप्तं न समस्तचेतनकृतं पापं ततो मामकम् ॥ लक्ष्यं नेति न मोक्तुमर्हसि यतः कुत्रापि तुल्यो मया नान्यः सिद्ध्यति पापकृत्तदधुना लब्धं तु नोपेक्ष्यताम् ॥ ४ ॥ पुण्यं पापमिति द्वयं खलु तयोः पूर्वेण यत्साध्यते तत्त्वद्विस्मृतिकारकं तनुभृतां रङ्गेश संजायते ॥ पाश्चात्यस्य तु यत् फलं तदिह ते दुःखच्छिदः स्मारकं तेनानेन कृतं तदेव शिशुनेत्यस्मत्कृतं क्षम्यताम् ॥ ५ ॥ पुण्यं यत्तव पूजनं भवति चेत्तत्कर्तुरिष्टे कृते तत्स्याद्रङ्गपते कृतप्रतिकृतं सर्वेऽपि तत्कुर्वते ॥ पापं चेदपराध एव भवतस्तत्कर्तृसंरक्षणे क्षान्तिस्ते निरुपाधका निरुपमा लक्ष्येत तत्क्षम्यताम् ॥ ६ ॥ न द्वित्राणि कृतान्यनेन निरयैर्नालं पुनः कल्पितैः पापानामिति मत्कृते तदधिकान् कर्त्तुं प्रवृत्ते त्वयि ॥ तेभ्योऽप्यभ्यधिकानि तान्यहमपि क्षुद्रः करोमि क्षणात्तद्यत्नस्तव निष्फलः खलु भवेत्तत्तत्क्षमैव क्षमा ॥ ७ ॥ संभूयाखिलपातकै-र्बहुविधं स्वं स्वं फलं दीयतां सर्वं सह्यमिदं मयि त्वयि हरे जाग्रत्यपि त्रातरि ॥ दुःखाक्रान्तमवेक्ष्य मामिह जनो दुष्टाशयस्त्वद्गुणान् क्षान्त्यादीन् प्रति दुर्वचो यदि वदेत्सोढुं न तच्छक्यते ॥ ८ ॥ क्षान्तिर्नाम वरो गुणस्तव महान् श्रीरङ्ग पृथ्वीपते सोऽयं सन्नपि सापराधनिवहाभावे न विद्योतते ॥ तस्मान्नैकविधापराधकरणे निष्ठावता नित्यशः प्राप्नोत्येष मया प्रकाशमतुलं प्राप्स्याम्यहं च प्रथाम् ॥ ९ ॥ मत्पापक्षपणाय योजयसि चेत् घोरेण दण्डेन मां रङ्गाधीश्वर केवलाघकरणाद्दुःखं मम स्यान्महत् ॥ तद्द्रष्टुर्भवतोऽपि दुःखमतुलं घोरं दयालोर्भवेत् तस्मात्तेऽपि सुखाय मत्कृतमिदं सर्वं त्वया क्षम्यताम् ॥ १० ॥ देव त्वां शरणं प्रपन्नमपि मां दुःखान्यनन्याश्रयं बाधन्ते यदि सर्वपापनिवहात्त्वां मोक्षयिष्याम्यहम् ॥ इत्युक्तं तव वाक्यमर्थविधुरं जायेत यद्वा भवांस्तत्राशक्त इति प्रथेत हि ततो मां रक्षतु त्वत्क्षमा ॥ ११ ॥ न त्वं क्षाम्यसि चेदिदं मम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ आनन्दधा[2]मनि चिदेकरसेऽद्वितीये तस्मिन्पदेऽस्तु मम चित्तमगोचरेपि ॥ य[1]त्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ नानाविधान्यपि मतानि परःशतानि यत्रैकभावमुपयान्ति विहाय वादम् ॥ तच्चिन्मयं परतरं सकलावलम्बं वन्दे महः किमपि भागवतैकवेद्यम् ॥ २ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोपि शिशुरञ्जनपुञ्जमञ्जुः ॥ ३ ॥ स[3]द्गद्यपद्यमघहारि[4]पदं मनोज्ञस्क[5]न्धं सुद[6]र्शनकरं निजनँ[7]दकं च ॥ श्रु[8]त्यादिभिर्बुधजनैरवबोध्यतत्त्वं नारायणं भजत भागवताभिधानम् ॥ ४ ॥ नो[9]त्पादिता न च मनागपि पालिताः स्मः क्षान्तन्न नः किमपि नाम भवद्भिरागः ॥ तद्वोऽहह श्रमशतेन मुधैव देवाः सेवामहे प्रणमनानि च कुर्महे वा ॥५॥ लोका वृथा भ्रमथ पङ्क[10]कलङ्कितेषु तीर्थभ्रमाद्बहुविधेषु ज[11]लेष्वभीक्ष्णम् ॥ निःशेषतापदुरितापनयाय मातापित्रोः सुखेन चरणं शरणं व्रजेत ॥ ६ ॥ श्रीरामसिंह इति बुन्दिनृपेषु रत्नमासीदसौ जयति संप्रति कीर्तिमूर्तिः ॥ यं स्वर्गभाजमतिसादरमीक्षमाणा देवाः पुरेव न सुरेश्वरमाद्रियन्ते ॥ ७ ॥ देवो[12]त्तमोऽस्य तनयो रघुवीरसिंहो यं मेघ[13]वाहन उदश्चितधीरुपास्ते ॥ कोऽनेन साम्यमुपयास्यति लो[14]कपालो यो मेघवाहनपदे प्रणतिं विधत्ते ॥ ॥ ८ ॥ कारुण्यवारिनिधिबुन्दधिनाथदत्ताभ्युत्थानसत्कृतियुतस्थिरजीविकोस्मि ॥ धन्योस्मि को नु सदृशोस्ति मयेति जानन् हा निर्गतं न गणयामि वयो मदान्धः ॥ ९ ॥ षष्टिः समाः कुचरितैर्गमिता वृथैव नाद्यापि कापि हतचेतसि हन्त चिन्ता ॥ आसीदति प्रतिदिनं ननु वैतरण्यास्तीरं महाभयमवारमदृश्यपारम् ॥ १० ॥ गङ्गासहायजरठोहमपास्तधर्माचारोवशेषवयसि व्यथितो रुजाभिः ॥ ऋज्वीभिरन्वितपदाभिरनायताभिर्वाग्भिः परं श[15]रणयामि पुराणराजम् ॥ ११ ॥ व्याख्याय भागवतमन्वयवर्त्मनादौ वक्ष्ये पुनः स्फुटतदाशयबोधनाय ॥ नानामतानि विषयानपि तद्व्यवस्थां पर्यङ्कनाम्नि विवृतेरवशेषभागे ॥ १२ ॥ ये गूढतामुपगता बत नैव सू[16]र्यालोकेप्यभासिषत भागवतस्य भावाः ॥

---

१ निराकारपक्षे सतां ज्ञानिनां व्रजस्य समूहस्य स्थितिं ब्रह्मचिन्तनादिकां जुषन्ते तेषां सुष्ठुहृदयानां सनत्कुमारादीनां गोचरतां चित्तवृत्तिविषयतामुपैति । श्रीकृष्णपक्षे सद्रूपं यत्कृष्णाख्यं व्रजस्थितिजुषां व्रजवासिनां मित्राणां गोपकुमारादीनां दृग्गोचरतामुपैति । गोषु चरति तादृशतां वा सर्वमतानुकूलोयं श्लोकः । २ अत्राद्वैतपक्षे धामशब्दो देहवाची "गृहदेहत्विट्प्रभावा धामानि" इत्यमरः । तथा चानन्दस्वरूपे इति पर्यवसितोर्थः । ३ सद्भिर्गद्या कथनीया पद्या भक्तिमार्गो यस्य । सन्ति श्रेष्ठानि गद्यानि पद्यानि च यस्येति च । ४ पदं चरणं पदानि सुप्तिङन्तानि । ५ स्कन्धावंसौ स्कन्धा ग्रन्थावयवाश्च । ६ सुदर्शनचक्रहस्तं श्रेष्ठज्ञानकरं च । ७ निजः स्वीयो नन्दकः खड्गो यस्य तं निजानां श्रोतॄणां हर्षकं च । ८ बुधजनैः कर्तृभिः श्रुत्यादिभिर्वेदपुराणादिभिः श्रवणचिन्तनादिभिश्चावबोध्यं तत्त्वं स्वरूपमभिप्रायश्च यस्य । ९ नोतपादिता इत्यत्र देवोपालम्भमुखेन मातापित्रोः स्तुतिः तथा च याभ्यामुत्पादिताः पालिता अपराधाश्च सोढास्तयोः सेवाप्रणामादि कार्यम् । १० पङ्कः कर्दमः पापं च । ११ नीरेषु जडेषु च । १२ देवेषु राजसु सुरेषु चोत्तम इति विष्णुत्वं व्यङ्ग्यम् । १३ मेघवाहनस्तन्नामाऽमात्य इन्द्रश्च अग्रेप्येवम् । १४ लोकपालो नृपः वरुणादिश्च । १५ शरणशब्दात्तत्करोतीति णिच् । १६ सूरीणामालोचने सूर्यप्रकाशे च ।

CC-0. In Public Domain. Digitization by eGangotri

यैस्तेप्यदर्शिषत दीपिकयैव[1] ते मे श्रीश्रीधरा जडमतेः परमोवलम्बः ॥१३॥ प्राचां सुवर्णरचनां[2] परिगृह्य भिक्षां भक्त्या तयार्चितवतः परमेशितारम् ॥ क्षीणस्य विप्लुतमतेर्जरठस्य विज्ञाश्चौर्यं न कल्पयत काञ्चनमार्गणां[3] मे ॥ १४ ॥ ये दोषमेव गणयन्ति गुणे परेषां ते प्रार्थिता अपि कुतो जहति स्वशीलम् ॥ दोषेपि ये गुणधियः करुणाप्रधानास्तेऽप्रार्थिता अपि कुतो जहति स्वशीलम् ॥ १५ ॥ ननु पूर्वैः कृतासु बह्वीषु श्रीमद्भागवतटीकासु सतीषु किं तव टीकया दीप्यमानासु तरणिश्रेणिषु खद्योतपोतिकयेवेति चेत्सत्यम् । मया हि अन्वयक्रमेण प्रायः सर्वश्लोकार्थप्रदर्शिका नातिविस्तरा भागवतोपयोगिबहुविषययुक्ता अतिसुगमा च टीका स्वबोधायैवापेक्षिता। तादृशीमन्यां टीकामलभमानेन प्रायः पूर्वटीकाभ्यः किंचित्किंचिद्भिक्षित्वा इयमन्वितार्थप्रकाशिका नाम्नी टीका निर्मिता श्रीहरेश्चरणयोरर्पिता चेति । सा च विद्वत्प्रसादनायाऽक्षमापि भगवन्निवेदितवस्तुसेविभिस्तद्भक्तैरवश्यमङ्गीकरिष्यत एवेति तावतैव संतुष्टोस्मीति भैक्षरूपत्वान्न चौर्यद्रव्यं प्रायः कल्पितत्वाभावान्नाप्रामाण्यशङ्का । यत्तु क्वचन मयापि स्वचापलं प्रकटितं तदपि मणिश्रेणौ काचशकलमिव हास्यहेतुत्वेन सतां विनोदावहमेवेति सर्वमनवद्यम् । व्याख्यानं चात्र प्रायः सर्वेषां श्लोकानां लिखितम् । ननु टीकान्तरेष्विव बहवः श्लोकास्त्यक्ताः । येषु श्लोकेषु नामगणनामात्रं स्यात् ये वा बालैरपि सुगमाः त एवात्र केचित् त्यक्ताः । अन्वयश्चात्र एकान्वयदण्डान्वयाद्यपरपर्यायो मल्लिनाथादिभिर्बहुभिरादृतः पिण्डान्वय एव नतु खण्डान्वयः । तत्र व्याख्यायमानानां मूलपदानामर्थादि परित्यज्य टीकाधृतक्रमेण योजने पृथगप्यन्वयो भवेत् । सर्वत्र विशेषणानन्तरं विशेष्यम् उद्देश्यविधेयभावे विशेष्यं पूर्वम् अन्वयेर्थलभ्या यत्तत्तथादयोपि यथोचितमत्र लिखिता ग्राह्याः । उपमाविषये प्राय एकवाक्यमेव भवति । तत्र स्पष्टप्रतिपत्तये उपमानार्थः क्वचित्पृथक् क्वचिदेकत्र वाक्ये एव व्याख्यातः । क्वचित्कठिनश्लोकेन्वयः पृथगादौ लिखितः । अत्र प्रायः एकैकस्य श्लोकस्यैव पृथगन्वयः । तदन्यस्थले तु अर्द्धं सार्द्धद्वयमित्यादिस्फुटं लेखः । अनेकेषां श्लोकानामेकान्वयस्थलेपि सति संभवे प्रायः पृथगन्वय एव सुगमतायै करिष्यते । पञ्चमस्कन्धगद्यानां प्रायोन्वितत्वात्तत्र क्वापि मूलपदानि त्यक्तानि । यद्यपि कस्यापि मतस्य पक्षपातो विरोधश्च नास्माकमभीष्टस्तथापि अत्रान्वयोर्थश्च सर्वत्र बहुप्रसिद्धत्वात् प्रायः श्रीधरस्वामिपादानुसारेणैव लिखितः। क्वचिदन्यथापि क्वापि मतान्तरेणार्थान्तरमपि लिखितम् । टीकान्तरेष्वन्वयक्रमे विशेषणादीनां हेतुहेतुमद्भावप्रदर्शनं शङ्कासमाधानरीत्या पदानां सार्थकतासमर्थनं तदनुरोधात्पाठक्रमानादरश्च बहुषु स्थलेषु क्रियते । अत्र तु विस्तरभयादनावश्यकत्वादनैयत्यात्प्रायःशब्दमर्यादया तदलाभाच्च न तथा नियम इति बोध्यम् । आहेत्यस्याग्रे भूतकालद्योतनाय स्मशब्दलेखः । वै इत्यादीनां पादपूरणार्थानामव्ययानां प्रायोन्वये त्यागः । यत्रैकत्रार्थेन्विता बहवः पदार्थाः समुचितास्तत्र तेषां प्रायः प्रथमशब्दादग्रे आदिशब्दस्य लेखः । अग्रे च तत्र ये व्याख्येयास्तेषामेव लेखो न सर्वेषाम् । यथा " ऋषयो मनवो देवा मनुपुत्रा महौजसः " इत्यत्र ऋष्यादय इत्येव लेखः । मनुदेवमनुपुत्राणां न लेखः ।

१ दीपिकाख्यटीकया ह्रस्वदीपेन च । २ सुष्ठु वर्णानां रचनां हाटकरचनां च । ३ कामपि भिक्षावृत्तिं सुवर्णयाचनं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" चक्रशङ्खासिचर्मेषुधनुःशूलगदाधरः । " इत्यत्र चक्राद्यष्टायुधधर इत्येव लेख इत्याद्यन्यदपि ज्ञेयम् । अत्र पुराणानां वेदसधर्मतया श्रीभागवतेपि लौकिकेष्वप्रयुक्ताः आर्षपदाभिलाप्या वैदिका बहवः प्रयोगाः सन्ति तत्संस्कारे बहूपयोगि सामान्यरूपं किंचिल्लिख्यते । उदाहरणानि चात्र पाठान्तरव्याख्यान्तरस्थान्यपि । तत्र " षष्ठीयुक्तश्छन्दसि वा " इत्यत्र वा इति योगं विभज्य छन्दसीत्यनुवर्त्तनीयम् । तेन " सर्वे विधयश्छन्दसि विकल्प्यन्ते " इति परिभाषा संपद्यते तेन " स्वर्धुन्यापोनुसेवया" अत्र समासान्तविकल्पात्तदभावपक्षः । एवं दुर्मेधान् इत्यादौ सर्वत्र समासान्ताभावस्थले बोध्यम् । एवं रिरक्षुः विवित्सामीत्यादौ सेटामनिट्त्वे इडभावपक्षः । "व्रजतीर्विरेजुः" इत्यादौ नुमभावपक्षः विकल्पश्चायं बाहुलकरूप एव । अत एवाहुः " बहुलं छन्दसि " इत्यादिरस्या एव प्रपञ्च इति । तेन क्वचित् सूत्रोक्तनिमित्तेषु कस्यचिदभावेपि कार्यम् । यथा "ध्येयः पूज्यश्च नित्यदा" इत्यादौ दाप्रत्ययः, "वर्णाश्रमविभागशः" इत्यादौ बहुषु स्थलेषु शस् प्रत्ययः। "धान्वन्तरं द्वादशमम्" इत्यादौ संख्यादेरपि मट् । "अल्पमेधस" इत्यादौ नञ्दुःसुभ्यो विनापि असिच् । "दुहन्तीं निशि गाम्" इत्यादौ आत्परं विनापि नुम् इत्यादि बोध्यम्। "व्यत्ययो बहुलम्" विकरणानां बहुलं व्यत्ययः स्याच्छन्दसि। "स्तुन्वन्ति दिव्यैः स्तवैः" अत्रादादेः श्नुः भाष्येन्येषामपि व्यत्यय उक्तः । " सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च । व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिद्ध्यति बाहुलकेन ॥" अत्र श्रीभागवते प्रायः उपग्रहाख्यपरस्मैपदात्मनेपदव्यत्ययोस्ति । यथा "धीमहि" इत्यादौ परस्मैपदव्यत्ययः। "त्राह्यात्मयोनेऽजिततेजसो माम्, आक्रीड बालवद्देव" इत्यादौ आत्मनेपदव्यत्ययः। अन्येपि केपि व्यत्ययाः सन्ति तत्र लिङ्गव्यत्ययो यथा "त्रयी न श्रुतिगोचरा कीदृशी मम गोचरा" पुरुषस्य यथा "नाहं न यूयं यद्दतां गतिं विदुः । " कालस्य यथा " स्वधामनि ब्रह्माणि रंस्यते " इति वर्त्तमानेपि लृट् । " तदैव ते परं ज्ञानं ददामि गृहमागतः" अत्र भूते लट् । अचो यथा "इत्यभिष्टूय पुरुषम्" अत्र ह्रस्वस्य दीर्घः ततस्तुगभावः सिद्धः । यङ्शब्देन यकारमारभ्य " लिङ्याशिष्यङ् " इति ङकारेण प्रत्याहारो गृह्यते तेन स्यतासिशबादयो विकरणाः च्लेरादेशाः। आम्-यङ्णिच्यक्णिङ्आयुईयङ्चेति तेन "मा मा शुचः स्वतनयम्" इत्यत्र च्लेरङ् । "ईडिरे रामकृष्णौ च" इत्यादौ नाऽऽम् अनयोर्विकल्पव्यत्यययोरेव प्रायः प्रपञ्चभूता वैदिकी प्रक्रिया । अथान्यान्यपि कानिचिद्विशेषसूत्राणि श्रीमद्भागवतोपयोगीनि लिख्यन्ते । " अयस्मयादीनि च्छन्दसि " एतानि छन्दसि साधूनि भपदसंज्ञाधिकाराद्यथायोग्यं संज्ञाद्वयं बोध्यम् । तथाच वार्तिकम् " उभयसंज्ञान्यपीति वक्तव्यम् " मुसलं खल्वयस्मयम् । "षष्ठीयुक्तश्छन्दसि वा" षष्ठ्यन्तेन युक्तः पतिशब्दो घिसंज्ञो वा । सात्वतां पतये नमः । " व्यवहिताश्च " प्रादयो धातुभ्यो व्यवहिता अपि स्युः । तव परि ये चरन्त्यखिलसत्त्वनिकेततया । " तृतीया च होश्छन्दसि " जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च । समिद्भिरजुहोद्द्विजः, जुहावैतच्छिरः शत्रोः । " बहुलं छन्दसि, अदिप्रभृतिभ्यः शपः " बहुलं लुक् स्यात् । करस्थेनाहनत्प्रभुः । अत्र शपो न लुक् । " अदादिभिन्नेपि

१ "लपिदभिभ्यां च" इति ण्यत् ।

CC-0. In Public Domain. Digitization by eGangotri

कचित् लुक् " त्राह्यात्मयोनेऽजिततेजसो माम्, त्रायते त्राति विश्वात्मा । " क्रमृदृरुहिभ्यश्छन्दसि ॥ " ३ । १ । ६९ ॥ च्लेरङ् वा । इत्युक्त्वाथारुहत्स्वर्गम् । " हृग्रहोर्भ-श्छन्दसि " गृभीतगुणाम् । " मंत्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ॥ २ । ४ । ८० ॥ " लिरिति च्लेः प्राचां संज्ञा एभ्यो लेर्लुक् स्यान्मन्त्रे । भौमप्रयुक्ता निरगन् धृतायुधाः । अत्र तिङ्व्यत्ययेन झेस्तिपि च्लेर्लुकि इलोपे हल्ङ्याबिति तलोपे " मो नो धातोः, छन्दस्युभयथा " धात्वधिकार उक्तः प्रत्ययः सार्वधातुकार्द्धधातुको-भयसंज्ञः स्यात् तेन धीमहीत्यत्र सार्वधातुकत्वात्सीयुटः सलोपः आर्द्धधातुकत्वाच्छबभावः । " तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः " न शक्नुमस्तत्प्रतिहर्त्तवे ते । " छन्दसि च " दन्तस्य दतृ स्यात् बहुव्रीहौ । मृगान् कृष्णान् शुक्लदतः । " ऋतश्छन्दसि " ऋदन्ताद्बहुव्रीहेर्न कप् । इत्येवमुत्तरामातः । " शीर्षंश्छन्दसि " शिरःशब्दस्य शीर्षन् स्यात् । न्यासः शीर्षणि संस्थितः । " वा छन्दसि " दीर्घाज्जसीचि च पूर्वसवर्णदीर्घो वा स्यात् । व्रजतीर्विरेजुः । "बहुलं छन्दसि" अमाङ्योगेपि अडाटौ न स्तः । दुग्धेमामोषधीर्विप्राः । "युष्मदस्मदोः सादृश्ये वतुब्वाच्यः " यदूनां त्वावतां प्रभो । " तन्वादीनां छन्दसि बहुलं यण् इयङुवङौ च " तत्याज व्रीडितस्तन्वम्, सत्वेन नो वरदया तनुवा निरस्य । " श्रुशृणुपॄकृवृभ्यश्छन्दसि " हेर्धिः । शन्नः कृधीश भगवन्नासि दीननाथः। "मंत्रेष्वाङ्यादेरात्मनः" आत्मन्शब्दस्यादेर्लोपः स्यादाङि । सह चक्रेत्मनात्मने, शेषेत्मना निजसुखानुभवो निरीहः। "ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि" माध्वीर्लोकमलापहाः। "क्त्वापि च्छन्दसि" समासेऽनञ्-पूर्वे । संरोहयित्वा भवभावनो हरिः, प्रेक्षयित्वा भुवो गोलम् । "सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः" आत्मन् भावयसे तानि कालगत्या दुरत्यया । "गतिशब्दात्सो-र्यादेशः, छन्दस्यपि दृश्यते, अस्थ्यादीनामनङ् " धियाक्षभिर्मनसा वोत यस्य । " अनो नुट् " अन्नन्तान्मतोर्नुट् । अक्षण्वतां फलमिदं न परं विदामः । " दाश्वान् साह्वान् मीढ्वांश्च " ऐते क्वस्वन्ता निपात्यन्ते । व्यवस्थितानामनुमृग्यदाशुषे, ततो मीढ्वांसमामन्त्र्य । " बहुलं छन्दसि " सिचोऽस्तेश्चापृक्तहलो बहुलम् ईट् अतोत्र नेट् । ब्रह्मात्म-तत्वमवितुं प्रथमं त्वमस्राक्, मा भैरित्यायायुर्द्रुतम् । अत्रेदं बोध्यम् । ये प्रयोगा अत्र टीकायां टीकान्तरेषु च आर्षत्वेन लिखितास्तेषु यद्यपि केचित् "समासान्तो विधिरनि-त्यः, आगमशास्त्रमनित्यम् " इत्यादिप्रकारेण समाधातुं शक्यन्ते तथापि सरलया रीत्या न सिद्ध्यन्ति । प्रसिद्धेषु मान्येषु च महाकाव्यादिषु च ये नोपलभ्यन्ते तान् प्रयोग-कुशलाः साधुतया न मन्यन्तेऽतस्तानप्रयोज्यान् मत्वा इहार्षत्वेन व्यलिखमिति ॥ अथ छन्दसां विचारः ॥ तत्र श्रीभागवते प्रायोऽनुष्टुप् छन्दः । तदपेक्षया न्यूनानि इन्द्रवज्रो-पेन्द्रवज्रावंशस्थेन्द्रवंशोपजातिवसंततिलकाख्यानि एतानि च लोकेतिप्रसिद्धानि अतः एतेषां नामानि प्रतिपद्यं न लेखिष्यन्ते । शेषाणां छन्दसां नामानि लेखिष्यन्ते। लक्षणादिकं तु बालबोधाय अत्रैव लिख्यते । तत्र छन्दसां बोधो गुरुलघुवर्णबोधाधीनः । तत्र दीर्घो गुरुः संयोगविसर्गानुस्वारेभ्यः पूर्वो ह्रस्वोपि गुरुः । संयोगादिरहितः केवलो ह्रस्वो लघुः । गुरुर्द्विमात्रो लघुरेकमात्रः । तत्र गुरुर्यथा । काशीकीरकूलकेलिकैरवकोपकौरवकल्ककिष्कुकुत्रकःकुःकंसकृष्णादिषु ककारोत्तर ईकारादिः । लघुर्यथा । करकिलकुलकृतादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ककारोत्तरोऽकारादिः । लघुर्कजूर्ध्वरेखारूपो लिख्यते । गुरुर्वक्ररेखारूपः गुरुर्गः लघुर्लः कथ्यते । गुरुलघुयोगात्त्रिवर्णात्मका गणा भवन्ति । तत्र त्रिगुरुर्मः SSS, त्रिलघुर्नः।।।, आदिगुरुर्भः।।, आदिलघुर्यः।SS, मध्यगुरुर्जः।S।, मध्यलघू रःS।S, अन्त्यगुरुः सः ॥S, अन्त्यलघुस्तःSS।, छन्दांसि त्रिधा । वर्णच्छन्दांसि मात्राच्छन्दांसि उभयच्छन्दांसि च।एवं वर्णच्छन्दांसि समार्धसमविषमाणि । यस्य चतुर्षु चरणेषु समं लक्षणं तत्समम् । यत्र प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च समं लक्षणं तदर्द्धसमम् । यस्य चतुर्षु पादेषु भिन्नं लक्षणं तद्विषमम् । अत्र श्रीभागवते विषमाणि छन्दांसि न सन्ति । छन्दसां जातयो भेदाश्च छन्दःशास्त्रे ज्ञेयाः । अत्र केवलं लक्षणानि उदाहरणानि च लिख्यन्ते । तत्रादौ भागवतेऽन्यत्र चातिप्रसिद्धानि अनुष्टुबादीनि सप्त छन्दांसि लिख्यन्ते । वक्त्रन्नाद्यान्नसौ स्यातामब्धेर्योनुष्टुभि ख्यातम् । युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्त्तितम्। यथा नैमिषे निमिषक्षेत्रे इत्यध्यायसमाप्त्यन्तम् । " स्यादिन्द्रवज्रा यदि तौ जगौ गः " तन्नः परं पुण्यमसंवृतार्थमित्यादि । " उपेन्द्रवज्रा जतजास्ततो गौ " स वै भवान्वेद समस्त-गुह्यम् इत्यादि । " जतौ तु वंशस्थमुदीरितं जरौ " नमन्ति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रव इत्यादि । " स्यादिन्द्रवंशा ततजैरसंयुतैः " नामान्यनन्तस्य हतत्रपः पठन्नित्यादि । " अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । एवं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥" इन्द्रवज्रोपेन्द्रवज्रयोर्यथा । स वा इदं विश्वममोघलील इत्यादि । वंशस्थेन्द्रवंशयोर्यथा । शिवाय लोकस्य भवाय भूतये इत्यादि । इन्द्रवज्रावंशस्थयोर्यथा । त्वं पर्यटन्नर्क इव त्रिलोकीमित्यादि । इन्द्रवज्रोपेन्द्रवज्रेन्द्रवंशानां यथा । तदा शुचस्ते प्रमृजामि भद्रे इत्यादि । " उक्ता वसन्ततिलका तभजा जगौ गः " यं प्रव्रजन्तमनुपेतमपेतकृत्यमित्यादि । अथ शेषच्छन्दांसि " प्रमाणिका जरौ लगौ " हरे तवाङ्घ्रिपङ्कजमित्यादि । " शालिन्युक्ता म्तौ तगौ गोब्धिलोकैः " एवं राजा विदुरेणानुजेन इत्यादि । " वातोर्मीयं गदिता म्भौ तगौ गः " दृष्टः किन्नो दृग्भिरसद्ग्रहैस्त्वमिति । अत्र शालिनीपादोपि "राजहंसी नरौ रो ल्गौ यतिः स्याद्दतुसायकैः।" अन्यच्च। "नरला गुरू राजहंसिका"केचिदिमं ललितमाहुः। जयति तेऽधिकं जन्मना व्रज इत्यादि । " स्वागतेति रनभाद्गुरुयुग्मम् " वामबाहुकृतवामकपोल इत्यादि । " द्रुतविलम्बितमाह नभौ भरौ " निगमकल्पतरोर्गलितं फलमित्यादि । " भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः " अयं त्वत्कथामृष्टपीयूषनद्यामित्यादि । " रैश्चतुर्भिर्युता स्रग्विणी सम्मता " स्वागतन्ते प्रसीदेश तुभ्यं नमः इत्यादि । " चतुर्ग्रहैरिह रुचिरा जभस्जगाः " पिबन्ति ये भगवत आत्मनः सतामित्यादि । " म्नौ ज्रौ गस्त्रिदश यतिः प्रहर्षिणीयम् " यज्ञोयं तव यजनाय केन सृष्ट इत्यादि । " सजसा जगौ भवति मञ्जुभाषिणी " जगदुद्भवस्थितिलयेषु दैवतः इत्यादि । " वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् " अंशांशास्ते देवमरीच्यादय एते इत्यादि । " ननमयययुतेयं मालिनी भोगिलोकैः " तव वरद वराङ्घ्रावाशिषे हाखिलार्थ इत्यादि । " मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् " उत्पत्त्यध्वन्यशरणउरुक्लेशदुर्गान्तकोग्रेत्यादि । " रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी " पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतमित्यादि । " यदि भवतो नजौ भजजला गुरु नर्कुटकम् " जय जय जह्यजामजित दोषगृभीतगुणामित्यादि ।

CC-0. In Public Domain. Digitization by eGangotri

" सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम् " जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराडित्यादि । " म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम् " गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः इत्यादि ॥ अथार्द्धसमच्छन्दः ॥ " षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः । न समात्र पराश्रिता कला वैतालीयेन्ते रलौ गुरुः ॥" प्रिय रावपदानि भाषसेमृतसञ्जीविकयानया गिरा इत्यादि ।"पर्यन्तेयौं तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् ।"इदमप्यच्युत विश्वभावनं वपुरानन्दकरं मनोदृशामित्यादि । वस्तुतस्त्वयं त्रिष्टुब्भेद एव । " अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा । " इति मतिरुपकल्पिता वितृष्णा भगवति सात्त्वतपुङ्गवे विभूम्नि इत्यादि ॥ अथ मात्राछन्दः ॥ " यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥"इदं स्थूलं लक्षणमपि न घटते नितरां सूक्ष्मं तच्चार्षत्वात्सोढव्यम् । अजितजितः सममतिभिः इत्यादि । अन्यत्रापि बहुस्थलेषु छन्दोभङ्गः सोढव्यः ॥ अथ भागवतश्लोकसंख्याविचारः ॥ तत्र यद्यपि गद्यपद्यानां संख्यामात्रगणनया सर्वेषां द्वात्रिंशदक्षरमानगणनया वा तत्तत्पुराणोक्ता संख्या तत्र तत्र क्वापि न सम्यक् संगच्छते तथापि श्रीमद्भागवते उवाचान्तवाक्यानां संख्या तथा अन्येषां गद्यपद्यानामध्यायसमाप्तिवाक्यानां च द्वात्रिंशदक्षरात्मकानुष्टुम्मानगणनया या संख्या भवति सा च योजिता अष्टादशसहस्रसंख्या भवति । तथा चातिप्रसिद्धस्य सर्वसाधारणस्य एतट्टीकामूलतया स्वीकृतस्य पुस्तकस्य यथाशक्ति सावधानतया वारत्रयं गणना कृता तत्र अनुष्टुम्मितौ श्लोकेभ्योवशिष्टान्यक्षराणि अष्टाक्षरपादकल्पनया गणितानि कुत्रचिच्छ्लोकेष्वधिकान्य ऊनान्यवशिष्टाक्षराणि श्लोकान्तरावशिष्टेषु संयोज्य अध्यायावशिष्टानि चाध्यायान्तरावशिष्टेषु संयोज्य पादकल्पना कृतातः पादप्रमाणादूनाधिकान्यक्षराणि न लिखितानि । एवं कृते गद्यपद्यसंख्या चतुःषष्ट्यधिका शतद्वयी चतुर्दशसहस्राणि च (१४२६४) तेषां द्वात्रिंशदक्षरानुष्टुम्मितिः । पादोनषष्ट्यधिका शतद्वयी षोडशसहस्राणि च (१६२५९।।।) अध्यायसमाप्तिवाक्यानां च पुस्तकभेदेनैकविध्याभावात् एकैकं वाक्यम् इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां प्रथमस्कन्धे शौनकादिप्रश्नवर्णनं प्रथमोध्यायः इत्याद्यात्मकं साधारण्येन सपादानुष्टुम्मितं प्रकल्प्य सर्वे श्लोकाः पादोना एकोनविंशत्यधिकचतुःशतीमिताः(४१८।।।) कल्पिताः । उवाचान्तानि वाक्यानि च विंशत्यधिका शतत्रयी एकं सहस्रं चेति । तथा चानुष्टुम्मित्या सहाध्यायसमाप्तिवाक्यश्लोकसंख्या उवाचसंख्या च योजिता सती सार्द्धश्लोकोना अष्टादशसहस्रसंख्या (१७९९८॥) संपन्ना अत्र वारत्रयगणनेपि सार्द्धश्लोकन्यूनता पुस्तकपाठभेदात् । गणनायां क्वचिदेकद्व्यक्षरत्यागात्प्रमादाद्वा जाता पुनर्गणनेपि पाठभेदादिभिः किञ्चिदत्यल्पमन्तरं भवेदेवेति सन्तः क्षमन्ताम् । वस्तुतोऽल्पिष्ठं न किञ्चिदिदमन्तरं दोषायेति । विजयध्वजसंमतः पाठस्तु अधिकोपि बहुटीकाविरोधात् उपेक्षितः । काशीनाथोपाध्यायेन चण्डीसप्तशतीमन्त्रविभागरीत्यापि अष्टादशसहस्रसंख्या परिगणिता इति तद्व्याख्याने स्पष्टम् । अथ भागवतस्कन्धश्लोकादिसंख्या श्लोकैरुच्यते । त्रिभूमिनागा (८१३) रसनन्दरामाः (३९६) सार्द्धा नृपेन्द्राः (१४१६॥) भुजबाणशक्राः (१४५२) ॥ सार्द्धाङ्गरामाद्रि (७३६॥) मिता गजेषुनागो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मिताः (८५८) सार्द्धखतर्कशैलाः (७६०॥) ॥ १ ॥ गजाग्निनन्दा (९३८) श्चतुरद्रिगाव (९७४) स्त्र्यग्न्यङ्करामा (३९७३) नगशैलविश्वे (१३७७) ॥ सार्द्धाङ्कषट् पञ्च च (५६९॥) गद्यपद्यसंख्या क्रमात्स्कन्धगताऽवगम्या ॥ २ ॥ समुद्रषड्द्व्यङ्मनवो (१४२६४) खिलैक्यमेषामनुष्टुम्मितयस्तु वेद्याः ॥ रामाभ्रनन्दा (९०३) अथ सार्द्धचक्षुःशैलाब्धयः (४७२॥) सार्द्धषडभ्रभूपाः (१६०६॥) ॥ ३ ॥ पादोनखद्वन्द्वनृपा (१६१९।।।) स्त्रिनागसूर्या (१२८३) विपादाभ्रशराङ्कसंख्या (९४९।।।) ॥ सार्द्धाद्रिवेदाष्ट (८४७॥) च साङ्घ्रिचन्द्रपञ्चाभ्रभूम्यो (१०५१।) मनुदिङ्मिताश्च (१०१४) ॥ ४ ॥ तत्वाब्धिवेदा (४४२५) अथ साङ्घ्रिवेदाद्रीन्द्राः (१४७४।) सपादा गुणचन्द्रतर्काः (६१३।) ॥ सर्वैक्यमङ्घ्र्यूनखषड्द्विभूपा (१६२५९।।।) उवाचवाचो गजषड् (६८) जिना (२४) श्च ॥ ५ ॥ खेन्द्राश्च (१४०) सप्ताङ्गभुवः (१६७) कुबाणाः (५१) भूताभ्रभूम्यो (१०५)ऽब्धिगजाः (८४) कुकाष्ठाः (१०१) ॥ नवेषव (५९) स्त्रीषुगुणा (३५३) नवेशा (११९) गोम्बूनि (४९) चैक्यं तु खद्व्यग्गुणाक्ष्माः (१३२०) ॥ ६ ॥ प्रायेण पादान्वितपद्यमानमत्रैकमध्यायसमाप्तिगद्यम् ॥ पादोननन्देन्दुचतु (४१८।।।) र्मितानि पद्यानि तेषामिति कल्पितानि ॥ ७ ॥ जातानि सर्वस्य युतौ सहस्राण्यष्टादशाध्यर्द्धमिहोनमेकम् ॥ तत्पाठभेदान्मम वा प्रमादादत्यन्तमल्पं नहि दोषपात्रम् ॥ ८ ॥ अथ तत्तदध्यायादौ वक्ष्यमाणाप्यध्यायश्लोकसंख्या झटिति बोधाय चक्रेणात्रापि लिख्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रथमस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	२३॥	२६॥।	१
२	३४	३६।	२
३	४५	४७	१
४	३३॥	३५।	३
५	४०	५१।	४
६	३९	४०	४
७	५८	६०॥	१०
८	५२	५६	५
९	४९	५६॥।	४
१०	३६	४२॥	२
११	३९॥	४५।	१
१२	३४॥	३४॥	४
१३	६०॥	६१॥	५
१४	४४॥	४५॥	३
१५	५१॥	६४॥	२
१६	३७	४४॥	४
१७	४५	४६॥	७
१८	५०॥	५६।	३
१९	४०	५२।	३

द्वितीयस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	३९॥	४४॥।	३
२	३७	५०॥।	१
३	२५	२८	२
४	२५॥	३१॥	४
५	४३	४३	२
६	४६	४९॥।	१
७	५३	८९॥।	१
८	२९॥	२९॥	२
९	४५॥	५३॥	५
१०	५२	५२	३

तृतीयस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	४५	६०	४
२	३४	३९	२
३	२८	३१।	१
४	३६	४१॥	८
५	५०॥	६१।	५
६	३९	३९॥	१
७	४२॥	४३।	६
८	३३	४५॥	१
९	४४	६२॥।	४
१०	२९॥	२९॥	५
११	४१॥	४२।	३
१२	५६॥	५६॥	४
१३	५०॥	६२	९
१४	५०	५३॥।	११
१५	५०	७५॥	६
१६	३७	४८।	६
१७	३१	३५॥	१
१८	२८	३४॥।	४
१९	३८	४४	४
२०	५३॥	५४॥।	४
२१	५६॥	६१	६
२२	३९॥	४१॥।	४
२३	५७	६३	५
२४	४७	४८	७
२५	४४	४८॥	९
२६	७३	७३	३
२७	३०	३०।	३
२८	४४	५७॥	१
२९	४५॥	४६	३
३०	३४	३४॥	१
३१	४८॥	५६॥	३
३२	४३	४४॥	१
३३	३७	४१।	५

चतुर्थस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	६६	६९	७
२	३५॥	३६।	४
३	२५	३४	४
४	३४	४९॥	३
५	२६	३२।	१
६	५३	५९।	२
७	६१॥	७९॥	२७
८	८२	८८।	१३
९	६८	८१	९
१०	३०	३२।	२
११	३५	४०।	२
१२	५२	६०॥।	७
१३	४९	५१	७
१४	४६॥	४७॥	४
१५	२६	२७	४
१६	२७	३१॥	१
१७	३६	४१	७
१८	३२	३२	१
१९	४२	४४।	२
२०	३८	४६	६
२१	५२	६०॥	६
२२	६३॥	७१	७
२३	४०	४३॥	३
२४	८०	८५॥।	६
२५	६२	६४॥	५
२६	२६॥	२९॥	४
२७	३०	३१	१
२८	६५	६५	२
२९	८६॥	९४॥	६
३०	५१	५६।	६
३१	३१	३५॥।	८

पञ्चमस्कन्धः ।

अध्या०	गद्यपद्य. संख्या	अनु-ष्टुभः	उवाच संख्या
१	४०	७९॥	४
२	२३	४४	२
३	२१	३८॥	५
४	१९	३४।	१
५	३५	६३।	२
६	१९	३५॥।	२
७	१४	३०।	१
८	३२	५९॥।	१
९	२२	५२॥	१
१०	२६	४६॥।	३
११	१७॥	२४	१
१२	१६	२२	२
१३	२६	४०	४
१४	४६	८१	१
१५	१४	२७।	१
१६	३०	५१॥।	२
१७	२५	५०	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पञ्चमस्कन्धः ।

अध्या०	गद्यपद्य. संख्या	अनु-ष्टुभः	उवाच संख्या
१८	३९	६५॥	२
१९	३१	५६॥	२
२०	६९	८४॥	२
२१	२२	३१॥	१
२२	१९	३६।	२
२३	९	२७॥	१
२४	५१	७३।	१
२५	१७	३२॥	१
२६	५४	९५	४

षष्ठस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	६८	६९॥	७
२	४९	५१	४
३	३५	४६	५

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
४	५४॥	५९॥	७
५	४४	४४	४
६	४५॥	४५॥	१
७	४१	४२।	८
८	४३	४८।	४
९	५५॥	८१॥।	६
१०	३३	३५॥	४
११	२७	३५	२
१२	३५॥	३९।	४
१३	२३	२५॥।	६
१४	६०॥	६७	७
१५	२८	२८॥।	५
१६	६५॥	७४॥	९
१७	४१	४३	९
१८	७८	७८॥	११
१९	३१	३४॥।	२

सप्तमस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	४८॥	४९॥।	८
२	६२॥	६८	५
३	३९	४१	४
४	४७॥	५०	४
५	५७॥	६१॥	१०
६	३०	३५।	२
७	५५	५८॥।	४
८	५७	७८।	२०
९	५५	८८।	४
१०	७१	७४॥	११
११	३६	३६॥	३
१२	३१॥	३१॥	१
१३	४६॥	४६॥।	४
१४	४२॥	४२॥	२
१५	८१	८५	२

अष्टमस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	३३	३४॥	६
२	३३	३९॥।	१
३	३३	४३॥	३
४	२६	२८॥	४
५	५०	५८॥।	६
६	३९॥	४३	५
७	४७	५८	५
८	४६॥	५१॥	१
९	२९	३२॥	३
१०	५७	६१॥।	१
११	४८॥	५१।	५
१२	४७	५६	८
१३	३६	३६	१
१४	११	११	२
१५	३७	४०॥	३
१६	६२॥	६३	५
१७	२८॥	३३॥।	६

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१८	३२॥	३९	२
१९	४३॥	४५।	६
२०	३४	४१॥।	३
२१	३४॥	३७	२
२२	३६॥	४३॥	८
२३	३१	३४॥	८
२४	६१॥	६७	७

नवमस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	४२	४२	५
२	३६	३६॥	१
३	३६॥	३७॥	१
४	७१॥	७७॥	६
५	२७	३०।	५
६	५५॥	५८।	१
७	२७॥	२७॥	१

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
८	३१	३३॥	४
९	५०	५०॥	४
१०	५७	७२।	२
११	३६॥	३८॥	३
१२	१६	१६	१
१३	२७	२७	२
१४	५०	५०	४
१५	४१॥	४४॥	३
१६	३७॥	३७॥	१
१७	१८॥	१८॥	१
१८	५१॥	५१॥	६
१९	२९॥	२९॥।	१
२०	३९॥	३९॥	३
२१	३६॥	३७।	१
२२	४९॥	४९॥	१
२३	३९॥	३९॥	१
२४	६७	६९।	१

दशमस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१	६९	७४।	८
२	४२॥	५२।	२
३	५३॥	६३।	६
४	४७	४७॥	४
५	३२	३२॥।	४
६	४४	५०	२
७	३८	४४	२
८	५२॥	६०॥।	७
९	२३	२७॥	१
१०	४३	४५।	७
११	५८॥	६१	२
१२	४४	५४॥।	४
१३	६४	७५।	१
१४	६१	८१	४
१५	५२	५८॥।	३
१६	६८	८५॥	७
१७	२५	२६	२

CC-0. In Public Domain. Digitization by eGangotri

दशमस्कन्धः ।

अध्या०	पद्य-संख्या	अनुष्टुभः	उवाच संख्या
१८	३२	३५॥	१
१९	१६	१६॥।	२
२०	४९	४९	१
२१	२०	३१॥	२
२२	३८॥	४०	३
२३	५२	५५॥	५
२४	३८	३८	५
२५	३३	३४	२
२६	२५॥	२६॥।	२
२७	२८	३१॥	६
२८	१७॥	१७॥	३
२९	४८	६०॥	७
३०	४४	४८॥	१
३१	१९	२६॥	१
३२	२२	२४॥।	३
३३	४१	४८॥	३
३४	३२॥	३३	२
३५	२६	३५	३
३६	४१	४२	३
३७	३३	३८	२
३८	४३	५२॥	२
३९	५७॥	६४॥	५
४०	३०	३३॥।	१
४१	५२	५६॥।	५
४२	३८	४०॥।	२
४३	४०॥	४३	२
४४	५१	५५॥	२
४५	५०॥	५१॥	५
४६	४९	५२	४
४७	६९॥	८४।	९
४८	३६॥	४३॥।	२
४९	३१	३१॥।	५
५०	५८॥	६३॥	३
५१	६५	७१॥।	८
५२	४४	४९।	५
५३	५८	६२	३
५४	६०॥	६२	३
५५	४०॥	४१॥।	२
५६	४५॥	४६।	४
५७	४२॥	४३।	१
५८	५८	६०।	६
५९	४६॥	५६॥।	४
६०	५९	७५।	८
६१	४२	४५॥	३
६२	३६	३८॥	४
६३	५३	५७॥	५
६४	४४	४७	३
६५	३३	३३॥	१
६६	४३	४५।	२
६७	२८	२८	२
६८	५४	५६।	३
६९	४५	५२।	४
७०	४७॥	५५	६
७१	४६॥	५५	३
७२	४९	५२॥।	६
७३	३५	३६॥	५
७४	५४॥	५५।	३
७५	४०॥	४५॥।	२
७६	३३	३३	२
७७	३८	४१॥	२
७८	४०	४०	५
७९	३४॥	३४॥	१
८०	४५॥	४६॥।	५
८१	४१॥	४४	२
८२	४९	५३॥।	७
८३	४३	५०।	१२
८४	७२	७६॥।	१०
८५	५९	६४	९
८६	५९	६२	८
८७	५०॥	८३॥	८
८८	४०॥	४२	७
८९	६७	७२	७
९०	५०	६२॥	२

एकादशस्कन्धः ।

अध्या०	पद्य-संख्या	अनुष्टुभः	उवाच संख्या
१	२४	२७॥।	३
२	५५	६१।	८
३	५५॥	६०॥	८
४	२३	३४।	२
५	५२॥	५८	६
६	५१	६०।	१०
७	७४	७६॥	७
८	४४	४५॥	३
९	३३॥	३८	२
१०	३७	३७॥	२
११	४९	५०	३
१२	२४	२८।	३
१३	४२	४६॥	७
१४	४७	४९	४
१५	३६	३६	३
१६	४४॥	४४॥।	२
१७	५८	५८॥	३
१८	४८॥	४८॥	१
१९	४५॥	४७।	५
२०	३७॥	३८	२
२१	४३॥	४३॥	१
२२	६१॥	६३।	७
२३	६२	६८॥।	५
२४	२९	२९	१
२५	३६॥	३६॥	१
२६	३५॥	३५॥।	३
२७	५५	५५	२
२८	४४॥	५२।	३
२९	४९॥	५७॥।	७
३०	५०	५५	४
३१	२८॥	३१।	१

द्वादशस्कन्धः ।

अध्या०	पद्य-संख्या	अनुष्टुभः	उवाच संख्या
१	४३॥	४३॥	२
२	४४॥	४४॥	१
३	५२	५४।	३
४	४३	४६॥।	१
५	१३॥	१३॥	१
६	८०	८८॥।	८
७	२५॥	२५॥	१
८	४९	५७॥	३
९	३४	३९॥	३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशस्कन्धः ।

अध्या०	पद्य-संख्या	अनु-ष्टुभः	उवाच संख्या
१०	४२	४२॥	११
११	५०॥	५२।	४
१२	६९	७६।	१०
१३	२३	२८॥	१

स्कन्धश्लोकादियोगः ।

स्कन्धः	पद्यगद्य संख्या.	अनुष्टुभः	उवाच संख्या
१	८१३	९०३	६८
२	३९६	४७२॥	२४
३	१४१६॥	१६०६॥	१४०
४	१४५२	१६१९॥।	१६७
५	७३६॥	१२८३	५१
६	८५८	९४९॥।	१०५
७	७६०॥	८४७॥	८४
८	९३८	१०५१।	१०१
९	९७४	१०१४	५९
१०	३९७३	४४२५	३५३
११	१३७७	१४७४।	११९
१२	५६९॥	६१३।	४९
सर्वयोगः	१४२६४	१६२५९॥।	१३२०

अत्र प्रकरणार्थः स्कन्धार्थः वेदादिनानाप्रमाणसंग्रहः तत्प्रामाण्यतारतम्यव्यवस्था श्रीमद्भागवतदेवीभागवतविवादः श्रीभागवतोपयोगिनानामतवर्णनमित्यादिर्बहुविधो विषयष्टीकायाः शेषभागे श्रीमद्भागवतपर्यङ्काख्ये भविष्यतीति मङ्गलम् ॥
नीत्वा दुष्कृतपूरितैः स्वचरितैः षष्टिं समानां वृथालस्याद्धर्म्ममनाचरन्परिमृषन्नामुष्मिकीर्यातनाः ॥ हित्वान्यान् परमेश्वरं शरणयन्नल्पेन शेषायुषा श्रीमद्भागवतार्थलेखनविधौ व्यापारये लेखनीम् ॥ १ ॥ नो वैदुषी न बहुपुस्तकसंग्रहोपि नीरोगतापि न न कोपि सहायभूतः ॥ वारान्निधिं भुजयुगेन हठात्तितीर्षोः श्रीश्रीधरादिगिर एव ममावलम्बः ॥ २ ॥ अनन्यचेता जरठो जडोयं कृताञ्जलिः प्रार्थयते सदैन्यम् ॥ तुच्छामपीमां कृपयाऽन्वितार्थप्रकाशिकां स्वीकुरुतान्मुकुन्दः ॥ ३ ॥
इति संक्षिप्त उपोद्घातः ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ इति उपोद्घातः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

॥ * ॥ श्रीमद्भागवते प्रथमस्कन्धः ॥ * ॥

प्रारभ्यते।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीपरमात्मने नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेस्तु मम चित्तमगोचरेपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्ज-युगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयाय कुरुते प्रथमे प्रयत्नम् ॥ ३ ॥ प्रथमस्यादिमे सर्वशास्त्रसारादिबुद्धये ॥ षट् प्रश्नाः शौनकादीनां श्लोकाः सार्द्धत्रिबाहवः[२३॥] ॥ अनुष्टुभो व्यंघ्रिऋक्षाण्[२६॥]युवाचेत्येकमीरितम् ॥ १ ॥ इह खलु भगवति श्रीकृष्णाख्ये भास्वति यथासमयमात्मानं प्रकाश्यान्तर्हिते नानाशास्त्रपुराणेतिहासादीनां सर्वजननिकायत्रायकत्वरूपेष्वर्थेषु यामिकेष्विव कालेन दैवाद्वैगुण्योदयादालस्येनेव केषुचित्प्रसुप्तेषु तेष्वेव मध्ये कैश्चित्कैश्चित्प्रत्युत " जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः । " इत्यादितोऽवगतैरर्थाकारैरनर्थैश्चौरैरिवोद्भूय तत्तत्प्रणेतृपर्य्यन्तानां सर्वेषां चित्त-प्रसादरूपेषु महाधनेष्वपहृतेषु " यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ " इति, " परित्राणाय साधूनां विनाशाय च दुष्कृताम् । " इति श्रीगीतोक्तनिमित्तलब्धलक्षणतया यादोमृगपक्षिमनुष्यदेवेषु मत्स्यवराहहंसरामवामनरूप इव " कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह । कलौ नष्ट-दृशामेष पुराणार्कोऽधुनोदितः ॥ " इति वचनव्यंजितश्रीकृष्णप्रतिमूर्तिताकत्वेन ममाहमेवाभिरूपः कैवल्यादिति निरस्ततद्भिनान्यसादृश्यतया श्रीशुकपरीक्षिद्भ्यां श्रीकृष्ण

॥ श्रीगणेशाय नमः ॥ जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ॥
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

एव पुराणेषु श्रीमद्भागवताख्यशास्त्रचूडामणिरूपोऽवततार । तत्प्रणेता प्रथमत एवाचार्यचूडामणिः श्रीकृष्णद्वैपायनः स्वाभीष्टदैवतध्यानलक्षणं मङ्गलमाचरति—जन्माद्यस्येति ॥ अत्र सर्वमपि भागवतं बहुभिष्टीकाकारैः स्वस्वमतानुसारेण बहुधा व्याख्यातम् । तत्रापि प्रथमश्लोकस्तु चिन्तामणिरिवानंतार्थदः स्वस्वमतिकौशलेन प्रकृतानुपयुक्तबहुवि-षयपरत्वेनापि कैश्चिद्व्याख्यातः । तत्र भारतं कर्ममीमांसोपबृंहकं भागवतं तु ब्रह्ममीमांसोपबृंहकमिति मन्यमानैः अस्माभिस्तु श्रीभागवतप्रतिपाद्या मुख्या विषयाः निराका-रसाकारब्रह्मणी । तत्प्राप्त्युपायभूतौ भक्तियोगज्ञानयोगौ तदुपकारकः कर्मयोगश्चेति तत्परतया यथाशक्ति सर्वमताविरोधेन व्याख्यायते । अर्थेषु अन्वयात् अकार्येभ्यश्च इतरतो हेतोः यतः परमेश्वरात् अस्य जन्मादि भवति । यश्च अभिज्ञः स्वराट् च यश्च हृदा आदिकवये ब्रह्म तेने । यत् यत्र सूरयोपि मुह्यन्ति । यथा तेजोवारिमृदां विनिमयो भासते तथा यत्र त्रिसर्गः अमृषा भासते तं स्वेन धाम्ना सदा निरस्तकुहकं परं सत्यं धीमहीत्यन्वयः । अर्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयादकार्येभ्यश्च खपुष्पादिभ्य इतरतः

---

१ किंचित्त्यक्त्वा चक्रवर्त्तितो भिक्षितेयमतिरमणीयाऽवतरणिका ।

Nepal Sanskrit University, Balmeeki Campus, ...

CC-0. In Public Domain. Digitization by eGangotri

तद्व्यतिरेकाद्धेतोः यतः परमेश्वरात् अस्य विश्वस्य जन्मादि जन्मस्थितिभङ्गं भवति यद्वा अन्वयशब्देनानुवृत्तिरितरशब्देन व्यावृत्तिः । अनुवृत्तत्वात्सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत् । व्यावृत्तत्वाद्विश्वं कार्यं घटकुण्डलादिवत् इत्यर्थः । यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां निर्णीतं यदस्य जन्मादि तद्यतो भवति इति संबन्धः । यद्वा अन्वयादुपादानकारणात् इतरश्च निमित्तकारणादुपादाननिमित्तोभयरूपाद्यतोऽस्य जन्मादि भवति । यश्च अभिज्ञः चैतन्यात्मा यद्वा अर्थेषु सृज्यवस्तुषु अभिज्ञः इत्यन्वयः । यः स्वराट् स्वेनैव राजते स्वतः सिद्धज्ञान इत्यर्थः । यः हृदा मनसैव आदिकवये ब्रह्म वेदं स्वतत्त्वं वा तेने प्रकाशितवान् । यत् यस्मिन् ब्रह्माणि सूरयोपि मुह्यन्ति । मुह्यन्तीत्यादिपरमेश्वरविशेषणं वा । यथा तेजोवारिमृदां विनिमयः अन्यस्मिन्नन्यावभासः अधिष्ठानसत्तया सद्वत्प्रतीयते तथा यत्र यस्मिन् त्रिसर्गः त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूतेन्द्रियदेवतारूपः मृषा सन् अमृषा सत्यः यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते । तत्र तेजसि किरणे वारिबुद्धिर्मृगतृष्णायाम् । मृदि जलबुद्धिः काचादौ । मृदि तेजोबुद्धी रत्नादौ । इत्याद्यन्यदपि ज्ञेयम् इत्यध्यारोपः । अथापवादः । स्वेन स्वस्वरूपेणैव धाम्ना तेजसा सदा निरस्तं कुहकं मायारूपं कपटं यस्मिन् तं परं प्रकृष्टं सत्यं कालत्रयेप्यबाध्यं परमेश्वरं शिष्यसहिता वयं धीमहि ध्यायेम । ध्यायतेर्लिङि छान्दसम् । "व्यत्ययो बहुलम्" इति व्यत्ययादात्मनेपदम् । "छन्दस्युभयथा" इति उभयसंज्ञतया आर्द्धधातुकत्वाच्छबभावः । सार्वधातुकत्वात्सीयुटः सलोपः । " ध्यायतेः संप्रसारणं च " इति क्विपि विहितमपि बाहुलकात् लिङ्यपि संप्रसारणम् । पूर्वरूपम् "हल" इति दीर्घः । अत्र गायत्र्या च समारम्भ इति लक्षणोक्तेः । गायत्र्यर्थोपि दर्शितः । सर्वगायत्रीमन्त्राऽव्यभिचारि धीमहिपदं च प्रयुक्तम् । अत्यन्तगोप्यायाः गायत्र्याः प्रकाशरूपेण पठनानर्हतया गायत्र्यर्थेन प्रारम्भः । तत्र जन्माद्यस्य यत इत्यनेन सवितुरित्यस्यार्थ उक्तः । यतः सूते इति सविता अत्र स्थितिप्रलयावप्युपलक्षणीयौ । परमित्यनेन वरेण्यपदस्यार्थ उक्तः । उभयोरपि श्रेष्ठवाचकत्वात् । सत्यमित्यनेन भर्गपदस्यार्थ उक्तः । यतो ब्रह्मैव सदन्यदसत्यं तत्पदार्थस्तु विशेषणतया न स्वतन्त्रः । यद्वा तत्प्रसिद्धं स्वराडित्यनेन देवपदस्यार्थ उक्तः । यतो दीव्यति स्वतः प्रकाशते इति देवः । स्वेनात्मनैव राजते इति स्वराट् । प्रकाशोऽत्र ज्ञानं तस्य द्योतनात्मकत्वात् । यदुक्तं " ज्योतिर्वज्ज्ञानानि भवन्ति " इति । तेन स्वतः सिद्धज्ञानः स्वप्रकाशः । अन्येषां तु तदधीनप्रकाशतया न स्वप्रकाशता । तेने ब्रह्मेत्यादिपदपञ्चकेन धियो यो नः प्रचोदयात् इति वाक्यस्यार्थ उक्तः । यो हि ब्रह्मणोऽपि वेदप्रदानेन प्रज्ञां प्रावर्तयत् स एव सर्वेषामस्माकं जीवानां बुद्धिवृत्तीः प्रवर्त्तयति न त्वन्य इति वाक्यार्थः । धीमहीति तुल्यमेव । अत्र श्लोके सर्गादीनि दशलक्षणान्यपि दर्शितानि । तथाहि जन्माद्यस्य यत इत्यनेन सर्गविसर्गस्थानानि तृतीयचतुर्थपञ्चमस्कन्धव्युत्पाद्यानि सूचितानि । तेने ब्रह्म हृदा य आदिकवय इत्यनेन भक्तानुग्रहलक्षणं पोषणं षष्ठस्कन्धव्युत्पाद्यं सूचितम् । मुह्यन्ति यत् सूरय इत्यनेन कर्मवासनारूपा ऊतिः सप्तमस्कन्धव्युत्पाद्या सूचिता । मन्वन्तरेशानुकथे अष्टमनवमस्कन्धप्रमेये स्थानमध्ये एवान्तर्भूते तेजोवारिमृदां विनिमय इत्यनेन निरोधो दशमस्कन्धार्थो दर्शितः । धाम्ना स्वेन सदा निरस्तकुहकमित्यनेन मुक्तिरेका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशस्कन्धार्थो दर्शितः । सत्यं परमित्यनेनाश्रयो द्वादशस्कन्धार्थो दर्शितः । धीमहीत्यात्मनेपदोत्तमपुरुषप्रयोगादधिकारी प्रथमस्कन्धार्थः । तेनैव ध्यानोपलक्षितसाधनानुष्ठानरूपो द्वितीयस्कन्धस्यार्थः । इति कृत्स्नभागवतार्थसूचनम् । धीमहीति तत्पदार्थत्वंपदार्थतदैक्यकथनद्वारेण शास्त्रस्य विषयो दर्शितः । तत्र श्रवणं मननं च कृतवतस्तृतीयं निदिध्यासनमिह प्रतिपाद्यते । मननवतो विजातीयप्रत्ययनिवारणस्य मनोनिग्रहद्वारा व्युत्पाद्यमानत्वात् चतुर्लक्षणमीमांसारूपत्वं चास्य सूचितम् । तथाहि पूर्वार्द्धेन जन्माद्यस्य[१] यत इति न्यायः साक्षादेव दर्शितः । अन्वयादित्यनेन तत्तु[२] समन्वयादिति । अर्थेष्वभिज्ञ इत्यनेन ईक्षतेर्ना[३]शब्दमिति । तेने ब्रह्म हृदेत्यादिना शास्त्रयोनित्वादिति[४] । मुह्यन्ति यत् सूरय इत्यनेन एतेन[५] सर्वे व्याख्याता इत्यन्तो न्यायकलापः सूचित इति समन्वयाध्यायो व्याख्यातः । तेजोवारिमृदामित्यादिना तदनन्यत्व[६]मारम्भणशब्दादिभ्य इत्यादिन्यायसूचनादविरोधाध्यायार्थः । धीमहीत्यनेन सहकार्यन्तरविधिः[७] पक्षेण तृतीयं तद्वतो विध्यादिवदित्यादिन्यायसूचनात् साधनाध्यायार्थः । धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परमिति फलाध्यायार्थः । अविद्या तत्कार्यनिवृत्त्युपलक्षितपरमानन्दरूपावशेषात् एवं सति पारमहंसी संहितेति समाख्योपपद्यते । परमहंसानां वेदान्तवाक्यार्थनिदिध्यासनपरत्वात् अत्रत्योपाख्यानानां तत्तात्पर्य्यकत्वात् । अत्र स्वरूपतटस्थलक्षणादिकं टीकावशेषभागे स्फुटयिष्यत इति प्रथमोऽर्थः। अत्र सात्वतास्तु वर्णयन्ति। पञ्चीकृतपञ्चमहाभूतोपहितं शुद्धचैतन्यं तदभिमानिचिदाभासविराड्जीवान्तर्य्यामिरूपम् ओत इत्यनिरुद्ध इति चाख्यायते । एवमपञ्चीकृतपञ्चमहाभूतोपहितं शुद्धचैतन्यं तदभिमानिचिदाभासहिरण्यगर्भान्तर्यामिरूपम् । अनुज्ञात इति प्रद्युम्न इति चाख्यायते । एवं स्थूलसूक्ष्मभूतकारणीभूतं यन्मायात्मकम् अव्याकृतं तदुपहितं शुद्धचैतन्यं तन्निष्ठचिदाभासोपलक्षितम् अनुज्ञात इति संकर्षण इति चाख्यायते । अनुपहितं तु चैतन्यं सर्वानुस्यूतसन्मात्रं सर्वसाक्षिपरमानन्दघनम् अविकल्प इति वासुदेव इति चाख्यायते । संकर्षणप्रद्युम्नानिरुद्धानामपि वासुदेवत्वं वर्तत एव । उपाधिकृतः केवलं नामविशेषः । अत्र वासुदेवः परमात्मा संकर्षणो जीवः प्रद्युम्नो मनः अनिरुद्धोहंकार

जन्माद्यस्येत्यादीनि ब्रह्ममीमांसासूत्राणि संक्षेपतो व्याख्यायन्ते । १ यतोऽस्य जन्मादि जन्मस्थितिभङ्गं भवति तद्ब्रह्म । २ तद्ब्रह्म वेदान्तशास्त्रादवगम्यते । कुतः समन्वयात् सम्यगन्वयात् उपक्रमादिषड्विधतात्पर्यलिङ्गात् । ३ साङ्ख्यकल्पितं प्रधानं जगत्कारणं न भवति यतस्तदशब्दं वेदाप्रतिपाद्यम् । अशब्दत्वं कुतः ईक्षतेः वेदे ‘ तदैक्षत बहुस्याम् ’ इति ईक्षितृत्वश्रवणात् । ४ शास्त्रस्य वेदस्य योनिः कारणं ब्रह्म तस्मात् सर्वज्ञं ब्रह्म । यद्वा शास्त्रं योनिः प्रमाणं यत्र तादृशत्वाज्जगत्कारणं ब्रह्म । ५ एतेन प्रधानकारणवादनिराकरणेन सर्वे परमाणुकारणवादादयः प्रतिषिद्धतया व्याख्याताः । ६ कार्यस्य तस्मात् कारणात् अनन्यत्वम् अभेदो ज्ञेयः । कुतः आरम्भणशब्दादिभ्यः वाचारम्भणं विकारो नामधेयम् ‘ ऐतदात्म्यमिदं सर्वम् ’ इत्यादिप्रामाण्यात् । ७ बृहदारण्यके पाण्डित्यशब्दवाच्यं श्रवणं बाल्यशब्दवाच्यं मननं च विधाय मौनाख्यं निदिध्यासनं श्रूयते । तत्र सूत्रम् । पाण्डित्यबाल्यापेक्षया तृतीयं यन्मौनं तस्य सहकार्यन्तरस्य मौनस्य विधिरेवाश्रवणीयः कुतः तद्वतः विद्यावतः संन्यासिनः मौनाधिकारात् । तच्च पक्षेण । यस्मिन् पक्षे भेददर्शनप्राबल्यान्न प्राप्नोति तस्मिन्नेष विधिः विध्यादिवत् । यथा ‘ दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत ’ इत्यादौ यथा अग्न्याधानादिकं विधीयते तद्वत् ।

CC-0. In Public Domain. Digitization by eGangotri

इति प्रक्रिया तु नादरणीया तद्वचनविरोधात् श्रुतिविरोधाच्चेत्याद्युत्पत्त्यसंभवादित्यधिकरणे व्याख्यातम् । एवंस्थिते श्लोकयोजना । अन्वयात् कार्यमात्रेऽन्वितात् इतरतः पृथगपि स्थितात् । यतः अस्य ब्रह्माण्डस्य जन्मादि भवति यश्चार्थेष्वभिज्ञः सर्वज्ञः यश्च प्रोतसंज्ञः अनिरुद्धाख्यः स्वराट् ब्रह्माण्डावच्छिन्नचिदाभासो हिं विराड् जीवः अयं तु तद्बिंबभूतस्तदन्तर्यामी स्वयमेव राजत इति स्वराट् बिम्बभूतत्वेन अन्यानपेक्षत्वात् । यश्च अनुज्ञातसंज्ञः प्रद्युम्नाख्यः । आदिकवये सूक्ष्मभूतावच्छिन्न-चिदाभासाय हिरण्यगर्भसूत्रादिसंज्ञकाय जीवाय ब्रह्म वेदं तदन्तर्य्यामिरूपेण बिम्बभूतो यस्तन्मनसैव तेने इति हिरण्यगर्भवैलक्षण्यं स्पष्टमेवोक्तम् । यत् यत्र त्रिगुणात्मकमा-याप्रतिबिम्बस्य जगत्कारणस्य बिम्बभूते सर्वान्तर्यामिणि संकर्षणाख्ये सूरयोऽपि मुह्यन्ति भ्राम्यन्ति । स्थूलसूक्ष्मप्रपञ्चद्वयं भ्रान्त्या कल्पयन्ति प्रधानपरमाण्वादिरूपेण वा भ्राम्यन्ति यत्र च वासुदेवाख्ये तेजोवारिमृदां यथा विनिमयः तथा । त्रिविधः सर्गः त्रिसर्गः आध्यात्मिक आधिभौतिक आधिदैविकश्चेति स यत्र मृषा सर्वथा असन्नेवेत्यर्थः । अपह्नववचनो मृषाशब्दः त्रयाणामनिरुद्धप्रद्युम्नसंकर्षणोपाधीनां सर्गः संसर्गो यत्र मृषेति वा तदेवमनुपहितत्वेन स्वेन धाम्ना सदा निरस्तं कुहकं निवृत्ता विद्या तत्कार्यं बिम्बभूतत्वेनोपाधितद्धर्मै रसंस्पृष्टम् । अतएव परं सत्यं वासुदेवाख्यं ध्यायेमेति निर्गलितोर्थः । अत्रानिरुद्धपुरुषावतारो नारायणः प्रलयोदकशायी भुवनकमलमूलभूत इति । अथ सविशेषब्रह्मपक्षः तत्त्वं च अप्राकृतसत्वादिगुणवत्त्वं । अनन्तकल्याणगुणपूर्णत्वं च तत्र पूर्वार्द्धे समानमेव । उत्तरार्द्धे तु ननु ध्यानविषयत्वेन साकारताभिप्रेता आकाराणां च त्रिगुणसृष्टत्वेनानित्यत्वप्रसक्तिरित्यत आह तेज इति । यथा अज्ञानाम् तेजसि वारीदमिति वारिणि स्थलमिति मृदि काचादौ च वारीदमिति बुद्धिः तथैव यत्र पूर्णचिन्मयाकारे त्रिसर्गः त्रिगुणसर्गोयमिति बुद्धिर्मृषैवेत्यर्थः । सच्चिदानन्दविग्रहत्वेन साकारत्वेप्यनित्यत्वाभावात् । ननु तत्रापि केचिद्विवदन्ते इत्यत आह धाम्ना स्वरूपशक्त्या निरस्ताः कुहकाः कुतर्काः येन तम् । " अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । " इति वचनात् । अयमर्थः सर्वेषां वैष्णवानामनुकूलः । अथवा सविशेषं ब्रह्म श्रीकृष्णाख्यं श्रीभागवते तस्य मुख्यतया प्रतिपादनात् अतस्तत्परतयाऽपि व्याख्यायते । अस्य श्रीभगवतो यतो यत्र वसुदेवगृहे जन्मादि आदिशब्देन ऐश्वर्यप्रकटनपूर्ववृत्तकथनादिकं ततः इतरतश्च इतरत्र नन्दगृहे स एवायं भगवान् अनु अयात् अगच्छत् । यश्च भगवान् अर्थेषु कंसवञ्च-नव्रजवात्सल्यादिषु अभिज्ञः । स्वराट् स्वतन्त्रः यश्च आदिकवये ब्रह्मणे हृदा संकल्पमात्रेणैव ब्रह्म ब्रह्मात्मकं वत्सबालकादि तेने प्रकाशयामास । यत् यत्र योगमायावैभवे सूरयोभवनारदादयोऽपि मुह्यन्ति । यथा लौकिकदेहेषु तेजोवारिमृदां तेजोजलभूमिरूपाणां तेजोबन्नाख्यानां दृश्यभूतानाम् उपलक्षणतया वाय्वाकाशयोरपि च विनिमयः पर-स्परमेलनम् । यथा यथावत् सत्यरूपोस्ति तथा यत्र भगवति त्रिसर्गः त्रिवृत्करणेन देहसर्गः त्रिभिर्गुणैः सर्गो वा अनभिज्ञैः मृषैवोच्यते । भगवद्विग्रहस्य चिदेकरूपस्य भूत-सृष्टत्वाभावात् । भगवद्विग्रहस्य दृश्यत्वं तु भगवदिच्छयैव अतएव भागवतामृतधृतनारायणाध्यात्मवचनं " नित्याव्यक्तोपि भगवानीक्ष्यते निजशक्तितः । तामृते परमानन्दं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कः पश्येतामितं प्रभुम् ॥" इति तत्रत्या कारिका च ततः स्वयंप्रकाशत्वशक्त्या स्वेच्छाप्रकाशया सोऽभिव्यक्तो भवेन्नेत्रे न नेत्रविषयत्वतः इति । स्वेन धाम्ना श्रीमथुराख्येन सर्वत्र तदानीं कृपया दर्शितेन श्रीविग्रहेण च सदा निरस्तं कुहकं जीवानामविद्या येन तं परं सत्यं सद्भ्यो हितं श्रीकृष्णं धीमहीति । अथ भक्तियोगपक्षः । यतो भक्तियोगात् आद्यस्य भगवतो जन्म भक्तकर्तृकदर्शनार्थं प्रादुर्भावः तथा इतरतः इतरेष्वर्थेषु निष्कामकर्मयोगज्ञानयोगेष्वन्वयात् यत्साहित्याच्च आद्यस्य जन्म उपासकेषु परात्मत्वेन ब्रह्मत्वेन च साक्षात्कारो भवेत् इत्यन्वयः । यतोऽयं भक्तियोगः ज्ञानयोगादिषु अपि अभितः सर्वभावेन ज्ञायते इत्यभिज्ञः । "घञर्थे कविधानम्" इति स्थादिभिन्नेष्वपि दर्शनात् कर्मणि कः । अभितो ज्ञा ज्ञानं यस्य इति वा आर्षो वा प्रयोगः । ज्ञानयोगादेर्भक्तियोगं विना अकिञ्चित्करत्वात् "नैष्कर्म्यमप्यच्युतभाववर्जितम्" इत्याद्युक्तेः । भक्तियोगस्तु स्वराट् स्वतन्त्रः तत्र भगवत्कृपया स्वयमेवापरोक्षज्ञानोदयात् । "अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥" इति विधिवाक्यात् । तथा "यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ॥" इत्यादिवाक्याच्च यश्च भक्तियोगः ब्रह्म हृदि यस्य ब्रह्मणि हृद्यस्येति वा । तेन ब्रह्महृदा नारदेन आदिकवये व्यासाय तेने कृपया प्रकाशितः । यत् यत्र सूरयो वसिष्ठादयोऽपि मुह्यन्ति । यत्र त्रिसर्गः सत्वादिगुणभेदात्त्रैविध्यं मृषा अवास्तवः । वस्तुतः भक्तेर्गुणातीतत्वात् यथा दुग्धादौ तेजोवारिमृदां विनिमयो मेलनं निस्तेजोपि निर्जलमपि निर्धूलिकमपि दुग्धं तप्तमिति जलवदिति मलिनमिति तत्तन्मेलनाद्भवति तथैव त्रिगुणातीतो भक्तियोगः पुरुषवर्तिसत्वादिगुणयोगात् सात्विको राजसस्तामसश्चोच्यते । न चात्र प्रमाणाभाव इति शंक्यम् । स्वेन धाम्ना स्वस्वरूपेणालौकिकमाधुर्य्यमयेन भक्तानामनुभवगोचरीभूतेनैव निरस्ताः कुहकाः कुतर्कवन्तो येन तं न ह्यनुभूयमानेऽर्थे प्रमाणापेक्षेति भावः । तं सत्यं सतां हितं परमुत्कृष्टं निर्गुणं भक्तियोगं धीमहि । अथ ज्ञानयोगपक्षः । तत्र वस्तुतो ज्ञानं परमात्मैव तत्परतया त्वादिपक्षो व्याख्यात एव । परंत्वत्र ज्ञानयोगः साधनरूपः साधनचतुष्टयसंपन्नेरारभ्य वेदान्तश्रवणमनननिदिध्यासनादिरात्मसाक्षात्कारपर्य्यन्तो व्यापारः यतो यत्र ज्ञानयोगे आदौ अन्वयात् अध्यारोपात् इतरतः अपवादाच्च हेतोः अस्य जगतो जन्मादि वर्ण्यते अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपंच्यत इत्युक्तेः । अग्रे च यः सर्वेष्वर्थेष्वभिज्ञः कारणरूपपरब्रह्मज्ञानेन कार्यमात्रस्य वेदयिता । यथा सोम्यैकेन मृत्पिण्डेन ज्ञातेन सर्वं मृन्मयं विज्ञातं स्यादित्यादिश्रुतेस्तथाप्रतिपादकः । अन्तर्भावितण्यर्थोऽत्र जानाति यश्च स्वराट् कर्माद्यनवेक्षः मुख्यो वा यश्च ब्रह्महृदा ब्रह्मणा आदिकवये नारदाय तेने प्रकाशितः । यद्वा छान्दोग्यसप्तमप्रपाठके सनत्कुमारेण नारदाय प्रकाशितः । यद्वा कठवल्लीषु यमेन नचिकेतसे प्रकाशितः आत्मसाक्षात्कारे जाते तु यथा तेजोवारिमृदां तेजोजलभूमिरूपाणां भूतानां विनिमयो मेलनं त्रिवृत्करणं शास्त्रे वर्णितमपि वास्तवाभावान्मृषा तथा यत्र त्रयाणां श्रवणमनननिदिध्यासनानां सर्गः आत्मसाक्षात्कारे मुख्योपकारकोपि वस्तुतो मृषैव । स्वेन धाम्ना स्वरूपसाक्षात्कारेण सदा निरस्तं कुहकं माया तत्कार्यं च येन तम् सत्यं सद्भ्यो मुमुक्षुभ्यो हितं परं प्रकृष्टं साधनं ज्ञानयोगं

CC-0. In Public Domain. Digitization by eGangotri

धीमहि । अथ निष्कामकर्मयोगपक्षः । यतो निष्कामकर्मणः अन्वयादितरतश्चान्वयव्यतिरेकाभ्याम् अर्थेषु चतुर्षु पुरुषार्थेषु आद्यस्य प्रथमपुरुषार्थस्य धर्माख्यस्य जन्म भवति यश्च अभिज्ञः अभिलाषिणो ज्ञा विद्वांसो यस्मिन् सः " प्रादिभ्यो धातुजस्येति " बहुव्रीहिः । तथा यः स्वराट् मुख्यपुरुषार्थमोक्षोपकारकत्वात् प्रथमत्वाच्चेति यश्च ब्रह्मह्दा जैमिनिना आदिकवये मुख्यधीमते स्वशिष्याय तेने । यत् यत्र च सूरयोपि मुह्यन्ति यत्र च कर्मयोगे होमादिषु तेजोऽग्निः वारि जलं मृच्छब्देन पार्थिवं हविरादि तेषां यथा यथावत् मंत्रादिपूर्वकं विनिमयः उपयोगो भवति । यत्र च नित्यनैमित्तिकरूपे द्विविधे तृतीयस्य काम्यस्य सर्गः करणं त्रिसर्गः मृषैव अनुचित एव नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति मोक्षे द्विविधस्यैवोपयोगात् । संख्याशब्दानां वृत्तौ त्र्यंशादौ पूरणपरत्वम् । स्वेन धाम्ना धर्माख्यापूर्वेण निरस्तं कुहकं कामनारूपं येन तं परं सत्यं निष्कामकर्मयोगं धीमहीति । श्लोकद्वये शार्दूलविक्रीडितं छन्दः ॥ १ ॥ एवं परमेश्वरमनुस्मृत्याविर्बिभावयिषितस्य श्रीभागवतस्य सर्वशास्त्रेभ्यः श्रैष्ठ्यमनुबन्धचतुष्कदर्शनमुखेन दर्शयति—धर्म इति ॥ महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः चतुःश्लोकीरूपेण ततो विस्तरेण च कृते प्रकाशिते अत्र अस्मिन् श्रीमति परमसुंदरे भागवते प्रोज्झितं प्रकर्षेण उज्झितं कैतवं कपटं फलाभिसंधिरूपं यस्मिन् सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः । निर्मत्सराणां परोत्कर्षासहनं मत्सरस्त-

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥

द्रहितानां सतां शिष्टानां परमः ईश्वराराधनलक्षणः धर्मः निरूप्यते । अत्र शिष्टा अपि काम्ये कर्मणि प्रवर्त्तमानाः क्वचिन्मत्सरमवलम्बन्ते तद्व्यावृत्त्यर्थं निर्मत्सराणामिति । तथा अत्र शिवदं परमसुखप्रदं तापत्रयस्य आध्यात्मिकादिकस्य उन्मूलनं नाशकं वास्तवं परमार्थभूतं वस्तु वेद्यं यद्वा वास्तवशब्देन वस्तुनोंशो जीवो वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यम् । त्रयस्तापाश्च आध्यात्मिक आधिभौतिक आधिदैविकश्च । तत्राध्यात्मिको द्वेधा शारीरो मानसश्च । आद्यो ज्वरादिजः द्वितीयः शोकादिजः । आधिभौतिको मानुषपश्वादिजः आधिदैविको यक्षभूतादिजः । परैः शास्त्रैः तदुक्तसाधनैर्वा ईश्वरो हृदि किंवा सद्य एवावरुद्ध्यते स्थिरीक्रियते । वाशब्दः कटाक्षे । किंतु विलम्बेन कथंचिदेव । अत्र तु कृतिभिः पुण्यशालिभिः शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुद्ध्यते । यद्वा अत्र ईश्वरः कृतिभिः शुश्रूषुभिः सद्यस्तत्क्षणादेव हृद्यवरुध्यते अतः परैः शास्त्रैः किं वा साध्यमिति । अत्र महामुनिकृते इति कर्तृतः श्रैष्ठ्यम् । धर्मः प्रोज्झितकैतव इति कर्मकाण्डेभ्यः निर्मत्सराणामित्यधिकारितः वेद्यं वास्तवमित्यादिना ज्ञानकाण्डशास्त्रेभ्यः चतुर्थपादेन देवकाण्डशास्त्रेभ्यः श्रैष्ठ्यं दर्शितम् । अत्र परमात्मरूपं वस्तु विषयः । तापत्रयोन्मूलनं प्रयोजनं सन्तोधिकारिणः विषयप्रयोजनयोः प्रतिपाद्यपादकभावः सम्बन्धः । इत्यनुबन्धा दर्शिताः । अन्यत्र शास्त्रे ईश्वरे मनो निरुध्यत इत्येव पुरुषार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र तु ईश्वरो हृद्यवरुद्ध्यते अतो निर्गन्तुं न शक्नोति तच्चावरोधनं सद्य एव विनापि श्रद्धयेति कापि श्रीकृष्णाकर्षिणीयं महाविद्येति सूच्यते । अत्रेतिपदस्य त्रिरु-क्तिरवधारणार्था । अत्रैवेश्वरोवरुद्ध्यते अत्रैव वास्तवं वस्तु वेद्यम् अत्रैव प्रोज्झितकैतवो धर्मो निरूप्यत इति ॥ २ ॥ निगमेति ॥ हे रसिकाः हे भावुकाः रसविशेषभा-वनाचतुराः अहो आश्चर्यं शुको मुनिः पक्षिविशेषश्च तस्य मुखात् भुवि गलितं नारायणब्रह्म नारदव्यासाख्यशाखापरम्परया शुकेन प्राप्तं नतूच्चपातात्स्फुटितं शुकमुखस्पृष्टं फलममृतस्वादु भवति इति प्रसिद्धेः । अमृतं परमानन्दः स एव द्रवो रसः तेन संयुतं रसं रसस्वरूपमेव त्वगस्थ्यादिहेयांशरहितमित्यर्थः । अत्र रसतादात्म्यविवक्षणात् रसं फलमिति सामानाधिकरण्यम् । अतो मत्वर्थस्याविवक्षणान्न मतुप् । निगमो वेद एव कल्पतरुः तस्य फलम् इदं भागवतम् आलयं लयो मोक्षस्तमभिव्याप्य मुहुः पिबत अतो मोक्षेपीदं न त्याज्यम् । अत्र रसमात्रोक्तौ गलितस्य रसस्य पातुमशक्यत्वम् । फलमात्रोक्तौ पानासंभवो हेयांशप्रसक्तिश्चेत्युभयमुक्तम् । द्रुतविलम्बितं छन्दः ॥ ३ ॥ नैमिष इति ॥ अस्य श्लोकस्यादौ ओमिति पठ्यते स मङ्गलार्थः । अनिमिषो विष्णुरलुप्तदृष्टित्वात् तस्य क्षेत्रे नैमिषे नैमिषाख्ये । अयं शब्दः तालव्योपधो मूर्द्ध-

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥ नैमिषेऽनिमि-षक्षेत्रे ऋषयः शौनकादयः ॥ सत्त्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥ त एकदा तु मुनयः प्रातर्हुतहुताग्नयः ॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥ ऋषय ऊचुः ॥ त्वया खलु पुराणानि सेतिहासानि चानघ ॥ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ॥ ६ ॥ यानि वेद विदां श्रेष्ठो भगवान्बादरायणः ॥ अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥

न्योपधो वा तन्नामकारणं टीकान्तरे द्रष्टव्यम् । शौनकादयः ऋषयः स्वः स्वर्गे गीयत इति स्वर्गायो हरिः । कर्मणि घञ् । स एव लोकः भक्तानां निवासस्थानं तस्मै तत्प्राप्तय इत्यर्थः । सहस्रं समाः संवत्सराः अनुष्ठानकालो यस्य तत् सत्रं सत्रसंज्ञकं कर्मोद्दिश्य आसत उपविविशुः । यद्वा आसत अकुर्वतेत्यर्थः । अत्र यथा पशोरालभन-मालभते पाणिग्रहणमुपयन्तीत्यादिषु धात्वर्थस्य कर्मणैवोक्तत्वादविवक्षया कृञर्थमात्रविवक्षा एवमत्र धात्वर्थस्योपवेशनस्यानुपयुक्तस्याविवक्षणेन प्रत्ययोच्चारणमात्रार्थतया सामान्यकृञर्थ एवाऽऽसधातुः ॥ ४ ॥ त इति ॥ तुः पादपूर्त्तौ प्रातःकाले नित्यकर्मणि हुता एव पुनर्नैमित्तिककर्मणि हुता अग्नयो यैः ते मुनयः एकदा आसीनं सत्कृतं सूतम् आदरात् इदं वक्ष्यमाणं पप्रच्छुः ॥ ५ ॥ त्वयेति ॥ हे अनघ सूत त्वया सेतिहासानि इतिहासो भारतादिस्तत्सहितानि पुराणानि उत समुच्चये यानि धर्मशास्त्राणि तान्यपि त्वया खलु निश्चितम् अधीतानि आख्यातानि व्याख्यातान्यपि ॥ ६ ॥ किंच—यानीति ॥ हे सूत यानि पुराणादीनि विदां विदुषां श्रेष्ठो भगवान् बादरायणः व्यासः वेद जानाति तथा परावरे निर्गुणसगुणे ब्रह्मणी परं ब्रह्म अवरं प्रकृत्यादि इति वा विदन्तीति ते अन्ये मुनयश्च यानि विदुः ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

वेत्थेति ॥ हे सौम्य साधो तेषां व्यासादीनामनुग्रहात् त्वं तत्सर्वं पुराणादिकं तत्वतः वेत्थ जानासि । यतः गुरवः स्निग्धस्य शिष्यस्य गुह्यं रहस्यमपि ब्रूयुः उत ब्रूयुरेव अतस्तैः तुभ्यं रहस्यमपि कथितमित्यर्थः ॥ ८ ॥ तत्रेति ॥ हे आयुष्मन् तत्र पुराणादिषु यत्पुंसाम् अञ्जसा शीघ्रं ग्रन्थार्जवेन वा एकान्ततः श्रेयः अव्यभिचारि श्रेयः साधनं भवता विनिश्चितं तत् नः अस्मान् शंसितुमर्हसि ॥ ९ ॥ ननु बहुशास्त्रश्रवणेन ते निश्चिन्वन्तु इत्याशङ्क्याहुः—प्रायेणेति ॥ हे सभ्य साधो अस्मिन्कलौ युगे जनाः प्रायेण अल्पायुषः केपि दीर्घायुषश्चेत् मन्दा अलसाः केपि अमन्दाश्चेन्मन्दमतयः केपि सुमतयश्चेन्मन्दभाग्याः केपि सभाग्याश्चेदुपद्रुताः रोगादिभिः पीडिताः । यद्वा अल्पायुषस्तत्रापि मन्दा इत्यादि ॥ १० ॥ भूरीणीति सार्द्धम् ॥ भूरीणि कर्माणि अनुष्ठेयानि येषु तानि श्रोतव्यानि शास्त्राणि तदुक्तसाधनानि वा विभागशः अनुष्ठानप्रकारभेदैः शस् आर्षः । भूरीणि बहूनि सन्ति । अतः हे साधो अत्र एतेषु श्रोतव्येषु यत्सारं येन च आत्मा बुद्धिः संप्रसीदति सम्यगुपशाम्यति तत् श्रद्दधानानां नोऽस्माकं ब्रूहि । तच्च श्रवणकी-

वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ तत्र तत्राञ्जसाऽऽयुष्मन्भवता यद्वि-
निश्चितम् ॥ पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः ॥ मन्दाः सुमन्दमतयो
मन्दभाग्या ह्युपद्रुताः ॥ १० ॥ भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः ॥ अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ॥ ब्रूहि नः
श्रद्दधानानां येनाऽऽत्मा संप्रसीदति ॥ ११ ॥ सूत जानासि भद्रं ते भगवान्सात्वतांपतिः ॥ देवक्यां वसुदेवस्य जातो यस्य चिकी-
र्षया ॥ तन्नः शुश्रूषमाणानामर्हस्यङ्गाऽनुवर्णितुम् ॥ १२ ॥ यस्याऽवतारो भूतानां क्षेमाय च भवाय च ॥ १३ ॥

र्तनादिकमित्यग्रे ज्ञास्यते ॥ ११ ॥ सूतेति सार्द्धम् ॥ हे सूत ते तव भद्रमस्तु इत्यौत्सुक्येन आशीर्वादः । वस्तुतस्तु भद्रं ते भद्रं व इतीदृशं वाक्यालङ्कार इव बहुस्थलेषूपलभ्यते । तस्य प्रकृतार्थे त्वल्प एवोपयोग इति शैलीविशेष एवायं वात्सल्यादिद्योतकः । सच्छब्दवाच्यो भगवानस्त्येषां ते सत्वन्तो भक्ताः । त एव सात्वन्तः स्वार्थेण् तस्याश्रवणमार्षं तेषां सात्वताम् । यद्वा सत्वन्तो भक्ताः सन्त्यस्य सत्वान् विष्णुः स भजनीयो येषां ते सात्वताः । भक्तिरिति सूत्रेणाण् तेषां सात्वतां नुडभाव आर्षः । यद्वा सातिः सुखार्थः सौत्रो धातुः । ततः क्विपि सात् विष्णुः सोस्ति येषां ते सात्वन्तः तेषां सात्वतां भक्तानां पतिः भगवान् वसुदेवस्य भार्यायां देवक्यां यस्य कार्यस्य चिकीर्षया जातः तत् कार्यं त्वं जानासि । अतः अङ्ग हे सूत तत् कार्यं शुश्रूषमाणानां नोऽस्माकम् अनुवर्णितुं वर्णयितुम् अर्हसि । वर्णयतेरदन्तपाठसामर्थ्याण्णिज्विकल्पे तदभावपक्ष इदम् ॥ १२ ॥ यस्येति अर्द्धम् ॥ यस्य हरेः अवतारोपि भूतानां क्षेमाय पालनाय भवाय समृद्धये च भवति किं पुनः साक्षात्स एव ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आपन्न इति ॥ घोरां संसृतिं संसरणम् आपन्नः । विवशो मरणकाले मृत्युवशगोपि यस्य नाम गृणन् जनः अजामिलतुल्योपि ततः संसृतेः सद्यो विमुच्येत यत् यतो भगवन्नाम्नोभयमपि अविद्यालक्षणं तमः भयमूलं महाकालो वा स्वयमेव बिभेति ॥ १४ ॥ यदिति ॥ हे सूत यस्य पादः संश्रयो येषाम् अत एव प्रशमोऽयनं वर्त्माश्रयो वा येषां ते मुनयः उपस्पृष्टाः सन्निधिमात्रेण सेविताः सद्यः पुनन्ति । स्वर्धुनी गंगा तस्या आपस्तु तत्पादान्निःसृताः नतु तत्रैव तिष्ठन्ति । अतस्तत्सम्बन्धेनैव पुनन्त्योपि अनुसेवया पुनन्ति नतु सद्यः इति मुनीनामुत्कर्षः । स्वर्धुन्याप इत्यत्र पदद्वयं चेत्सन्धिरार्षः । ऐकपद्ये समासान्ताभाव आर्षः ॥ १५ ॥ को वेति ॥ शुद्धिः आत्मप्रसादः तत्कामः को वा जनः पुण्यः श्लोको यशो येषां तैः मनुव्यासादिभिरीड्यानि स्तुत्यानि कर्माणि यस्य तस्य भगवतः कलिमलापहं यशः न शृणुयात् । अपि तु सर्व एव ॥ १६ ॥ तस्येति ॥ लीलया कलाः ब्रह्मरुद्रादिमूर्त्तीः दधतस्तस्य भगवतः उदाराणि महान्ति विश्वसृष्ट्यादीनि सूरिभिः नारदादिभिः परिगीतानि कर्माणि श्रद्दधानानां

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ॥ ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥ १४ ॥ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः ॥ सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥ १५ ॥ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः ॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥ १६ ॥ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥ १७ ॥ अथाऽऽख्याहि हरेर्धीमन्नवतारकथाः शुभाः ॥ लीला विदधतः स्वैरमीश्वरस्याऽऽत्ममायया ॥१८॥ वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥१९॥ कृतवान्किल वीर्याणि सह रामेण केशवः ॥ अतिमर्त्यानि भगवान्गूढः कपटमानुषः ॥२०॥

नोऽस्माकं ब्रूहि ॥ १७ ॥ अथेति ॥ अथ हे धीमन् स्वैरं यथेच्छम् आत्ममायया लीलाः असुरवधाद्याः विदधतः कुर्वतः ईश्वरस्य हरेः शुभाः अवताराणां मत्स्यादीनां कथाः आख्याहि पूर्वत्रात्र च दधतः इति विदधत इति च । वर्त्तमानकालप्रयोगादवताराणां लीलानां च नित्यत्वमुक्तम् । श्रीकृष्णावतारप्रश्नेन तच्चरितप्रश्नोपि जात एवेति ज्ञेयम् ॥ १८ ॥ वयमिति ॥ यदित्यादि सामान्ये नपुंसकं यो विक्रमः शृण्वतां रसज्ञानं पदे पदे प्रतिक्षणं स्वादुतोपि स्वादु भवति तस्मिन्नुत्तमश्लोकस्य भगवतो विक्रमे अन्ये तृप्यन्तु नाम वयं तु न वितृप्यामः अलमिति न मन्यामहे अयमर्थः । त्रेधा ह्यलं बुद्धिर्भवति उदरादिभरणेन वा रसाज्ञानेन वा स्वादुविशेषाभावाद्वा तत्र शृण्वतामित्यनेन श्रोत्रस्याकाशत्वाद्विक्रमस्य चामूर्तत्वादभरणम् । रसज्ञानामित्यनेन चाज्ञानतः पशुवत्तृप्तिर्निराकृता । पदे पदे स्वादु इत्यनेन इक्षुभक्षणवद्रसान्तरालाभे तृप्तिर्निराकृता । तेन यागादिषु तु तृप्ताः स्म इति सूच्यते ॥ १९ ॥ कृतवानिति ॥ किलेति एतिह्ये गूढः कपटमानुषः मायामनुष्यः भगवान् केशवः रामेण सह

CC-0. In Public Domain. Digitization by eGangotri

अतिमर्त्यानि मर्त्यानतिक्रान्तानि गोवर्द्धनोद्धरणादीनि वीर्याणि कृतवान् तान्वदेति शेषः। पूर्वप्रश्नेषु गतार्थोपि उत्कण्ठावशात् पुनः प्रश्नः ॥ २० ॥ कलिमिति ॥ कलिम् आगतम् आज्ञाय ज्ञात्वा तद्भिया विष्णुपदं गन्तुकामाः दीर्घसत्रेण निमित्तेन हरेः कथायां सक्षणाः प्राप्तावसरा वयम् अस्मिन्वैष्णवे क्षेत्रे नैमिषे आसीनाः स्मः ॥ २१ ॥ त्वमिति ॥ पुंसां सत्वहरं दुस्तरं कलिं निस्तितीर्षतान्नोऽस्माकम् अर्णवं निस्तितीर्षतां कर्णधारो नाविक इव धात्रा त्वं दर्शितः ॥ २२ ॥ ब्रूहीति ॥ योगेश्वरे ब्रह्मण्ये धर्मस्य वर्मणि कवचवद्रक्षके कृष्णे स्वां काष्ठां मर्यादां स्वरूपं प्रापञ्चिकजनदृष्ट्यविषयतां वा उपेते सति अधुना धर्मः कं शरणं गत इति ब्रूहि। अत्र पुंसामेकान्ततः श्रेय इति प्रथमः प्रश्नः। अतः साधोत्रेति सर्वशास्त्रसारविषयः द्वितीयः। सूत जानासीति देवक्यां भगवान् किमर्थं जात इति तृतीयः। तस्य कर्माण्युदाराणीति लीलाविषयस्तुर्यः। अथाख्याहि हरेरिति अवतारविषयः पञ्चमः। ब्रूहि योगेश्वरे कृष्ण इति षष्ठः। तत्प्रत्युत्तराण्येव सप्रसङ्गानि सर्वं श्रीमद्भागवतमिति ज्ञेयम्। संक्षेपतस्तु स वै पुंसामित्यादिक-

कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयम् ॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥ २१ ॥ त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षताम् ॥ कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवम् ॥ २२ ॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥ इति श्रीभागवते प्रथमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥ १ ॥ सूत उवाच ॥ यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥

माद्यद्वितीययोरुत्तरम्। तृतीयस्य सामान्यतः भावयत्येष सत्त्वेनेति। तुर्यस्य स एवेदं ससर्जाग्रे इत्यादि। पञ्चमस्य प्रश्नस्य तृतीयोध्यायः। षष्ठप्रश्नस्य चोत्तरं कृष्णे स्वधामोपगते इत्यादिः श्लोको भविष्यति ॥ २३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिका। प्रथमस्यादिमेऽध्याये निर्मिता कृपया सताम् ॥ १ ॥ द्वितीयेऽध्याये तु सूतः प्रश्नानामुत्तराणि च ॥ केषांचिदुक्तवांस्तत्र श्लोकास्तु श्रुतिवह्नयः ॥ उवाचयुग्मं षट्त्रिंशत्पादयुक्ता अनुष्टुभः ॥ २ ॥ इतीति ॥ विप्राणामिति एवंभूतैः संप्रश्नैः सम्यक् हृष्टो रोमहर्षणस्य पुत्र उग्रश्रवास्तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे प्रारम्भं कृतवान् ॥ १ ॥ अत्र मुनिभिः प्रथमं सर्वशास्त्रसाररूपः आत्मप्रसादकश्च विषयः पृष्टस्तत्रैतदुत्तराय शुकं शरणं व्रजामि स एव सर्वशास्त्रसारज्ञ एषामात्मप्रसादं कर्तुं शक्तश्चेति विचार्य सूतः श्रीशुकं शरणीकरोति—यमिति ॥ प्रव्रजन्तं संन्यस्य गच्छन्तम् ॥ ५ ॥
अनुपेतम् उपनयनार्थमनुपसन्नम् एकाकिनं वा निकटमप्राप्तं वा अपेतकृत्यं कृत्यशून्यं नैष्ठिकत्वात् कर्ममार्गे अप्रवर्त्तमानं यं विरहात्कातरो भीरुः द्वैपायनो व्यासः हे पुत्र आगच्छ इति आजुहाव आहूतवान्। अत्र ह्रस्वदीर्घान्तर्भूतलघुगुरुमात्रन्यासयोग्ये पद्ये प्लुतासंभवात् न प्लुतः। पुत्रशब्दस्य वाक्यान्तवर्तित्वाभावस्यापि सुवचत्वात् सर्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्लुतविकल्पाच्च । तदा तन्मयतया शुकरूपतया तरवः अभिनेदुः प्रतिध्वनिमिषेण हे पुत्रेति प्रत्युत्तरं ददुः । यदि तवाहं पुत्रस्तदा कचित्त्वमपि मे पुत्रः अतः पितापुत्रभावो मिथ्येति व्यञ्जयामासुः । पितुः स्नेहानुबन्धपरिहाराय यो वृक्षरूपेणोत्तरं दत्तवान् इत्यर्थः । तं सर्वभूतानां हृन्मनः अयते योगबलेन प्रविशति तं मुनिं श्रीशुकं प्रति आनतः प्रणतोस्मि । सर्वभूतहृत्प्राप्तत्वात्स एव ममाप्यन्तः प्रविश्य मन्मुखेन भागवतं वदतु अन्योपि कथाकरणे एवं ध्यायेदिति विधिश्च सूचितः ॥ २ ॥ य इति ॥ यः श्रीशुकः अन्धं गाढं तमः संसाराख्यम् अतिशयेन सुखेनैव तितीर्षतां तरितुमिच्छतां संसारिणां करुणया एतेन परीक्षिदादयः सर्वे संसारिणोनेन तारणीया न केवलः परीक्षित् इत्युक्तम् । स्वः निजः असाधारणः अनुभावः प्रभावो यस्य तत् । अखिलानां श्रुतीनां सारम् एकम् अनुपमम् आत्मानं कार्यकारणसंघातमधिकृत्य प्रवर्त्तमानम् अध्यात्ममात्मतत्त्वं तस्य दीपं प्रकाशकं पुराणेषु गुह्यं रहस्यं श्रीभागवतम् आह स्म । तं मुनीनां गुरुं व्याससूनुं श्रीशुकमुपयामि शरणं व्रजामि ॥ ३ ॥ नारायणमिति ॥ नारायणादीन्नमस्कृत्य ततः जयत्यनेन संसारमिति जयं शास्त्रमुदीरयेत् । "अष्टादश पुराणानि रामस्य चरितं तथा। जयेति नाम चैतेषां प्रवदन्ति मनीषिणः ॥" इत्युक्तेः। यद्वा अत्र नरनारायणौ अधिष्ठा-

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ॥ संसारिणां करुणयाऽऽह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥ ३ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥ मुनयः साधु पृष्टोहं भवद्भिर्लोकमङ्गलम् ॥ यत्कृतः कृष्णसंप्रश्नो येनाऽऽत्मा संप्रसीदति ॥ ५ ॥ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययाऽऽत्मा संप्रसीदति ॥ ६ ॥

तृदेवते नरोत्तममिति पुरुषोत्तमः श्रीकृष्णो देवता सरस्वती देवी शक्तिः चकाराद्व्यासऋषिः । व्यासमिति पाठे स्पष्टमेव । बीजं तु प्रणवो ज्ञेयः छन्दो गायत्री तान्नमस्कृत्य ततो जयं जयेति लोडन्तं क्रियापदम् उदीरयेत् । अत्र हे श्रीकृष्णेति संबोधनमाक्षेपलभ्यम् । उदीरयेदिति स्वयं तथोदीरयन्नन्यान्पौराणिकानुपशिक्षयति ॥४॥ मुनय इति ॥ हे मुनयः लोकानां मङ्गलं यथा स्यात्तथा भवद्भिः अहं साधु सम्यक् पृष्टः पृष्टोस्मि यत् यतो हेतोः येन संप्रश्न प्रश्नमात्रेण आत्मा सुष्ठु प्रसीदति स कृष्णविषयः संप्रश्नः कृतः सर्वशास्त्रसारोद्धारप्रश्नस्यापि कृष्णे पर्यवसानात् ॥ ५ ॥ आदौ प्रथम प्रश्नमुत्तरयति—स इति ॥ यया भक्त्या आत्मा सम्यक् प्रसीदति सा अहैतुकी । हेतुः फलाभिसंधानं तद्रहिता हेतुं विनैवोत्पद्यमाना वा अप्रतिहता विघ्नैरनभिभूता च अधोक्षजे भक्तिः यतो धर्मात् भवति स वै स एव निष्कामकर्मरूपः पुंसां पर उत्कृष्टो धर्मः स एवैकान्तिकं श्रेयः । अन्यस्तु प्रवृत्तिलक्षणो धर्मः । अपर इति । अत्र पुंसां पुंमात्राणामेव धर्मः परः परमः श्रीहरिश्रवणकीर्तनादिरूपः यतः अहैतुकी निर्गुणा प्रेमलक्षणा भक्तिर्भवेत् । अतो हरिकीर्त्तनादिरूपा साधनभक्तिः प्रेमलक्षणा तु साध्या भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुमित्यादिवचनादिति भागवताः ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

यत्तु शास्त्रे धर्मस्य ज्ञानाङ्गत्वं प्रसिद्धं तदपि भक्तिद्वारेत्याह—वासुदेव इति ॥ भगवति वासुदेवे प्रकर्षेण योजितः भक्तियोगः आशु शीघ्रं वैराग्यं जनयति तथा यत् अहैतुकं शुष्कतर्काद्यगोचरं तत् ज्ञानमपि जनयति। अत्र भागवताः ज्ञानशब्देन भगवद्रूपगुणमाधुर्यानुभवमेव गृह्णन्ति ॥ ७ ॥ धर्म इति ॥ यो धर्म इति प्रसिद्धः स यदि पुंसां विष्वक्सेनस्य कथासु रतिं नोत्पादयेत् तर्हि स्वनुष्ठितोपि सन्नयं हि केवलं श्रम एव ज्ञेयः। क्षयिष्णुस्वर्गादितुच्छफलदत्वेन निष्फलप्रायत्वात् ॥ ८ ॥ हरिभक्तिद्वारा तदितरवैराग्यादात्मज्ञानपर्यन्तः परो धर्म इत्युक्तं तत्र धर्मादर्थश्च कामश्चेत्यादिमतं निराकरोति—धर्मस्येति ॥ अपवर्गो मोक्ष एव आपवर्गः स्वार्थेण्। स प्रयोजनमस्य सः आपवर्ग्यः। " स्वर्गादिभ्यो यत् " इति यत् तस्य मोक्षप्रयोजनकस्य धर्मस्य अर्थाय फलत्वाय अर्थः धनं नोपकल्पते योग्यो न भवति। धर्मस्य मोक्षं फलं नत्वर्थ इत्यर्थः। धर्म एव एकान्तं नियतं फलं यस्य तस्य अर्थस्य कामो लाभाय न हि स्मृतः। धनस्य कामो न फलं किन्तु धर्म इत्यर्थः ॥ ९ ॥ कामस्येति ॥ कामस्य विषयभोगस्येन्द्रियप्रीतिर्लाभः फलं न भवति किंतु यावता जीवेत तङ्गर्षः। तावानेव कामस्य लाभो जीवनपर्याप्त एव कामः सेव्य इत्यर्थः। जीवस्य जीवनस्य कर्मभिः कर्मानुष्ठानद्वारा य इह प्रसिद्धः स्वर्गादिः सोर्थो न भवति किंतु तत्वजिज्ञासैवेति ॥ १० ॥ तत्त्वजिज्ञासा जीवनस्य फलमुक्तं तच्च तत्वम् मतभेदान्नानाविधं तत्र परमार्थतत्वमाह—वदन्तीति ॥ यत् अद्वयं द्वैतरहितं ज्ञानं यच्च औपनिषदैर्ब्रह्मेति शब्द्यते कथ्यते, हैरण्यगर्भैः परमात्मेति शब्द्यते, सात्वतैर्भगवानिति शब्द्यते, तदेव कर्मभूतं तत्वविदः तत्वं वदन्ति ॥ ११ ॥ तत्तत्वमपि भक्त्यैवाप्यते इत्याह—तदिति ॥ श्रद्दधाना मुनयः ज्ञानवैराग्याभ्यां युक्तया श्रुतेन शास्त्रश्रवणेन गृहीतया भक्त्या आत्मनि आत्मानमात्मभूतं तत् तत्वं पश्यन्ति तत्र औपनिषदाः क्षेत्रज्ञो परमेश्वरं पश्यन्ति हैरण्यगर्भाः हृदये अन्तर्यामिणं पश्यन्ति सात्वताः मनसि स्फुरन्तं भगवन्तं पश्यन्ति ॥ १२ ॥ अत इति ॥ हे द्विजश्रेष्ठाः अतः उक्तहेतोः पुंभिः वर्णाश्रमविभागशः वर्णाश्रमविभागानुसारेण। शस् आर्षः। स्वनुष्ठितस्य सम्यक्कृतस्य धर्मस्य हरितोषणमेव संसिद्धिः फलं नान्यत् ॥ १३ ॥

वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥ ७ ॥ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ॥
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥ ८ ॥ धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ॥ नार्थस्य धर्मैकान्तस्य कामो लाभाय हि
स्मृतः ॥ ९ ॥ कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १० ॥ वदन्ति तत्तत्त्ववि-
दस्तत्त्वं यज्ज्ञानमद्वयम् ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ॥ पश्यन्त्यात्मनि
चात्मानं भक्त्या श्रुतगृहीतया ॥ १२ ॥ अतः पुम्भिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति॥ तस्मादेकेन एकाग्रेण मनसा सात्वतां पतिर्भगवान् नित्यदा श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यशब्दाद्दा आर्षः॥ १४॥ यदिति॥ यस्य भगवतोऽनुध्या अनुध्यानं सैव असिः खड्गः तेन युक्ता विवेकिनः ग्रन्थिमहङ्कारं स्वहेतुत्वेन निबध्नाति यत् कर्म तच्छिन्दन्ति भगवत्कृपयाहङ्कारनाशेन तन्मूलककर्मणो नाशात् तस्य कथायां रतिं को न कुर्यात् । अत्र कर्म त्रिविधं प्रारब्धं संचितमागामि च । तत्र प्रारब्धस्य भोगादेव नाश आगामिसंचितयोरत्र नाशः । यद्वा यथा स्वसंचितधनेभ्यः पृथक्कृत्य कचिदेकदिनभोग्यं धनं ग्रन्थौ निबध्नन्ति जनास्तथैव ग्रन्थिनिबन्धनं वर्त्तमानजन्मभोग्यं प्रारब्धं कर्मापि छिन्दन्तीति प्रारब्धस्याप्यत्र भर्जनेन कार्याक्षमता॥ १५॥ शुश्रूषोरिति ॥ हे विप्राः महतां सेवया श्रद्दधानस्य जातश्रद्धस्य पुंसः पुण्यतीर्थं सद्गुरुस्तस्य निषेवणं स्यात्तस्माच्च शुश्रूषोर्जातश्रवणेच्छस्य तस्य वासुदेवकथासु रुचिः स्यादित्यन्वयः । " निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ ।" इत्यमरः । पुण्यतीर्थनिषेवणादिभिर्निष्पापस्य महत्सेवा तया च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिरिति स्वामिपादाः ॥ १६ ॥ शृण्वतामि-

तस्मादेकेन मनसा भगवान्सात्वतां पतिः ॥ श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ १४ ॥ यदनुध्याऽसिना युक्ताः कर्मग्रन्थि-
निबन्धनम् ॥ छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम् ॥ १५ ॥ शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ॥ स्यान्महत्सेवया विप्राः
पुण्यतीर्थनिषेवणात् ॥ १६ ॥ शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः ॥ हृद्यन्तस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥ १७ ॥
नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ १८ ॥ तदा रजस्तमोभावाः कामलोभादयश्च ये ॥
चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥ १९ ॥ एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्वविज्ञानं मुक्तसङ्गस्य जायते ॥ २० ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ २१ ॥

ति ॥ पुण्ये श्रवणकीर्त्तने यस्य सः सतां सुहृत् हितकारी कृष्णः स्वकथां शृण्वताम् अन्तःस्थः हृदयस्थः सन् हृदि यानि अभद्राणि कामादिवासनाः ताः विधुनोति नाशयति ॥ १७ ॥ नष्टेति ॥ नित्यं भागवतानां भागवतशास्त्रस्य वा सेवया अभद्रेषु पापेषु नष्टप्रायेषु सत्सु उत्तमश्लोके भगवति नैष्ठिकी निश्चला भक्तिर्भवति । सर्वाभद्रनाशस्य ज्ञानोत्तरकालत्वात्प्रायग्रहणम् ॥ १८ ॥ तदेति ॥ तदा भक्तिप्रादुर्भावे रजस्तमश्च तथा ये कामलोभादयो भावाश्च आदिना क्रोधादयः एतैः रजआदिभिः अनाविद्धम् अनभिभूतं सत्वे सत्वगुणे सत्वमूर्त्तौ भगवति वा स्थितं चेतः प्रसीदति उपशाम्यति रजस्तमोभ्यां भावो येषामिति कामादिविशेषणं वा ॥ १९ ॥ एवमिति ॥ एवं भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तसङ्गस्य अन्यत्र विरक्तस्य पुंसः भगवत्तत्वविज्ञानमात्मसाक्षात्कारः भगवद्रूपगुणमाधुर्याद्यनुभवो वा जायते ॥ २० ॥ भिद्यत इति ॥ आत्मनि स्वरूपभूत ईश्वरे दृष्टे साक्षात्कृत एव तदनन्तरमेवेत्यर्थः । हृदयमेव ग्रन्थिः चिज्जडग्रथनरूपोहङ्कारः भिद्यते । ततः सर्वे संशयाः असंभावनाद्याः छिद्यन्ते ततश्च अस्य पुंसः

CC-0. In Public Domain. Digitization by eGangotri

कर्माणि अनारब्धफलानि क्षीयन्ते । सर्वत्र कर्मकर्त्तरि लट् । भक्तास्त्वाहुः आत्मन्येव मनस्येवेश्वरे दृष्टे किं पुनः साक्षाद्दृष्टे इति स्फूर्त्तिसाक्षात्कारावुक्तौ । तथा च "सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः। भजनेषु स्पृहा भक्तिरनर्थापगमस्ततः॥निष्ठा रुचिरथासक्ती रतिः प्रेमार्थदर्शनम्। हरेर्माधुर्यानुभव इत्यर्थाः स्युश्चतुर्दश॥"इति॥ २१ ॥अत इति ॥ अत एव कवयः नित्यं परमया मुदा अनेन साधनदशायामपि कष्टाभाव उक्तः । आत्मप्रसादिनीं मनःशोधिनीं वासुदेवे भगवति भक्तिं कुर्वन्ति ॥ २२ ॥ तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मकत्वेपि वासुदेवस्याधिक्यमाह—सत्त्वमिति ॥ इह यद्यपि सत्त्वं रजस्तम इति प्रकृतेर्गुणाः इह तैस्तैर्युक्तः एक एव परः पुरुषः अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं हरिविरिञ्चिहरा इति संज्ञाः । सुविति योगविभागात्समासः । कले नलेति नामेति नैषधीये दर्शनात् । धत्ते तत्र तेषां मध्ये नृणां श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः । अत्र भगवतोवतारा द्विधा । चिच्छक्त्या मायाशक्त्या च । चिच्छक्त्या मत्स्यकूर्माद्या भजनीया एव । मायाशक्त्या च रजआदिभिर्ब्रह्मविष्णुरुद्रास्तेषु

अतो वै कवयो नित्यं भक्तिं परमया मुदा ॥ वासुदेवे भगवति कुर्वन्त्याऽऽत्मप्रसादिनीम् ॥ २२ ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहाऽस्य धत्ते ॥ स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ २३ ॥ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ॥ तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनम् ॥ २४ ॥ भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम् ॥ सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह ॥ २५ ॥ मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ ॥ नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥ २६ ॥ रजस्तमःप्रकृतयः समशीला भजन्ति वै ॥ पितृभूतप्रजेशादीञ्छ्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥

विष्णुरेव सेव्यः । विष्णोरपि मायासत्वारब्धशरीरकत्वं नास्ति इत्याहुः ॥ २३ ॥ पार्थिवादिति ॥ यथा पार्थिवात् पृथिवीविकारात् स्वतःप्रवृत्तिप्रकाशरहितात् दारुणः काष्ठाद्धूमः प्रवृत्तिस्वभावः श्रेष्ठः तस्माच्च त्रयीमयः वेदोक्तकर्मप्रचुरः अग्निः प्रकाशस्वभावः श्रेष्ठः तथा तमसः लयात्मकात् रजः विक्षेपकं श्रेष्ठं तस्माच्च सत्त्वं श्रेष्ठं यत् यतस्तत् साक्षाद्ब्रह्मदर्शनं ब्रह्मणः प्रकाशकम् अतस्तद्गुणोपाधीनां ब्रह्मादीनां यथोत्तरं वैशिष्ट्यम् ॥ २४ ॥ भेजिर इति ॥ अथ अतो हेतोः अग्रे पुरा मुनयः विशुद्धं सत्त्वं विशुद्धसत्त्वमूर्तिं भगवन्तमधोक्षजं हरिं भेजिरे अतो ये तान्मुनीन् अनु अनुवर्त्तन्ते ते इह संसारे क्षेमाय कल्पन्ते ॥ २५ ॥ मुमुक्षव इति ॥ अथ अतः मुमुक्षवो मोक्षमिच्छवस्तु घोररूपान् भूतपतीन् उपलक्षणतया पितृप्रजेशादीनपि हित्वा शान्ताः अनसूयवः देवतान्तरनिन्दारहिताश्च सन्तः नारायणस्य कलाः मूर्तीः भजन्ति ॥२६॥ रज इति ॥ रजस्तमसी प्रकृती स्वभावौ येषां ते अत एव पितृभूतादिभिः समं शीलं येषां ते तु श्रिया सह ऐश्वर्यं प्रजां चेप्सन्ति । तादृशाः सन्तः पितृभूतप्रजेशादीन् भजन्ति॥२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासुदेवेति ॥ अत्र वेदादीनि सर्वाणि वासुदेवपराणीति द्वयोः पिण्डार्थः । अन्वयः स्पष्ट एव । तत्र वेदाः वासुदेवः परस्तात्पर्यगोचरो येषां तादृशाः सन्ति नतु मखपराः । एवं मखा यज्ञा अपि वासुदेवाराधनार्थाः । योगाः योगशास्त्राणि अपि वासुदेवप्राप्त्युपायाः । न त्वासनप्राणायामादिपराः । एवमग्रेपि क्रियाः कर्माणि ॥ २८ ॥ वासुदेवेति ॥ ज्ञानं ज्ञानशास्त्रं तपः ज्ञानं धर्मः धर्मशास्त्रं दानं व्रतादिविषयं गतिः स्वर्गादिफलम् ॥ २९ ॥ स इति ॥ स एव विभुर्भगवान् अगुणः स्वतो निर्गुणोपि सन् अग्रे पुरा सदसद्रूपया कार्यकारणात्मिकया गुणमय्या आत्ममायया इदं विश्वं ससर्ज । एतदपि चतुर्भिः श्लोकैः तस्य कर्माण्युदाराणि इति तुर्यप्रश्नस्योत्तरम् ॥ ३० ॥ तयेति ॥ विज्ञानेन चिच्छक्त्या विजृम्भितः अत्यूर्जितोपि भगवान् तया मायया विलसितेषु उद्भूतेषु एषु गुणेषु आकाशादिषु अन्तःप्रविष्टः सन् गुणवानिव मदधीना एते इत्यभिमानवा-

वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥ वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ २९ ॥ स एवेदं ससर्जाग्रे भगवानात्ममायया ॥ सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥ ३० ॥ तया विलसितेष्वेषु गुणेषु गुणवानिव ॥ अन्तः प्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥ ३१ ॥ यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु ॥ नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ ३२ ॥ असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः ॥ स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥ ३३ ॥ भावयत्येष सत्त्वेन लोकान्वै लोकभावनः ॥ लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥ ३४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

निव आभाति नतु वस्तुतः ॥ ३१ ॥ यथेति ॥ यथा वह्नित्वेन एकोपि वह्निः स्वयोनिषु स्वाभिव्यञ्जकेषु दारुषु अवहितः स्थितः सन् नानेव भाति तथा विश्वात्मा पुमान् परमेश्वरः भूतेषु प्राणिषु स्थितो नानेव भाति । अन्तर्यामिणोपि प्रतियोनिभेदात् नानात्वमुच्यते क्षेत्रज्ञरूपेण वा ॥ ३२ ॥ असाविति ॥ असौ भगवान् भूतसूक्ष्माणि इन्द्रियाणि च आत्मा मनश्च तैर्गुणमयैर्भावैः स्वनिर्मितेषु भूतेषु देवनरतिर्यगादिषु निर्विष्टः प्रविष्टः सन् तद्गुणान् तत्तदनुरूपान् विषयान् अनुभवति । भोजयतीति अन्तर्भावितणिजर्थो वा ॥ ३३ ॥ सूत जानासीति प्रश्नस्य साधारणमुत्तरमाह—भावयतीति ॥ देवतिर्यङ्नरादिषु ये लीलावतारास्तेषु अनुरतः लोकभावनः लोकस्य कर्ता पालको वा एष हरिः सत्त्वेन लोकान् भावयति पालयति । कृष्णावतारस्य विशेषतः प्रयोजनं तु कुन्तीस्तुतौ वक्ष्यते ॥ ३४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीये प्रथमस्य व्यधादिमाम् ॥ २ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CC-0. In Public Domain. Digitization by eGangotri

तृतीयेऽध्यायेऽवताराः कथिताः पूरुषादयः ॥ तेषां कर्माणि चोक्तानि श्लोका मार्गणसिन्धवः ॥ अनुष्टुभः सप्तवेदाँ उवाचेत्येकमेव तु ॥ ३ ॥ अथाख्याहि हरेर्धीमन्नित्यस्योत्तरमारभते—जगृह इति ॥ भगवान् आदौ लोकानां सिसृक्षया महदादिभिः महदहङ्कारपञ्चतन्मात्रैः संभूतं सुनिष्पन्नम् एकादशेन्द्रियाणि पञ्चमहाभूतानीति षोडश कला अंशा यस्मिन् तत् पौरुषं रूपं जगृहे । यद्यपि भगवद्विग्रहो नैवंभूतः तथापि विराड् जीवान्तर्यामिणो भगवतो विराड्रूपेणोपासनार्थमेवमुक्तम् इति श्रीस्वामिपादाः । भागवतास्तु भगवान् महदादिभिः लोकानां सिसृक्षया सम्यग्भूतं परमार्थसत्यं " युक्तेक्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु । " इत्यमरः । षोडशकलं राकाचन्द्रवत्पूर्णं पौरुषं पुरुषसंज्ञं रूपमवतारं जगृहे इत्यर्थमाहुः ॥ १ ॥ कोऽसौ भगवानित्यपेक्षायां भगवन्तं पुरुषरूपग्रहीतारं विशिनष्टि—यस्येति ॥ योगः समाधिस्तद्रूपां निद्रां वितन्वतो विस्तारयतः अम्भसि एकार्णवे शयानस्य यस्य नाभिरेव ह्रदस्तस्मिन् यदम्बुजं तस्माद्विश्वसृजां दक्षमरीच्यादीनां पतिः ब्रह्मा पाद्मे कल्पे आसीत् स भगवान् पौरुषं रूपं जगृहे

॥ सूत उवाच ॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः ॥ संभूतं षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥ यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ॥ नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजां पतिः ॥ २ ॥ यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ॥ तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ॥ ३ ॥ पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम् ॥ सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ॥ ४ ॥ एतन्नानावताराणां निधानं बीजमव्ययम् ॥ यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥ ५ ॥ स एव प्रथमं देवः कौमारं सर्गमास्थितः ॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखण्डितम् ॥ ६ ॥

इति पूर्वत्रैव संवन्धः॥२॥ कीदृशं रूपं जगृहे तदाह—यस्येति ॥ यस्य गृहीतस्य पौरुषरूपस्य अवयवानां पादादीनां संस्थानैः लोकानां पातालादीनां विस्तरः विस्तारः अशब्देपि घञभाव आर्षः । कल्पितः तत्पौरुषं रूपं जगृहे । यो भगवानम्भसि शेते स्म तस्य भगवतो वास्तवं रूपं तु यत् विशुद्धं रजः आद्यसंभिन्नम् अतएवोर्जितं निरतिशयं सत्त्वं तद्वै तदेव ॥३॥ एतच्च योगिनां प्रत्यक्षमित्याह—पश्यन्तीति ॥ सहस्रं पादाः ऊरवः भुजाः आननानि च तैरद्भुतम् । सहस्रं मूर्द्धानः अक्षीणि नासिकाश्च यस्मिन् तत् । सहस्रं मौलयः अम्बराणि कुण्डलानि च तैरुल्लसच्छोभमानम् अदः रूपं योगिनः अदभ्रमनल्पं ज्ञानात्मकं यच्चक्षुः तेन पश्यन्ति । सर्वत्र सहस्रशब्दोपरिमितवाची ॥ ४ ॥ एतदिति ॥ एतदादिनारायणरूपं नानावताराणां निधानं कार्यावसाने प्रवेशस्थानं बीजमुद्गमस्थानं नच बीजवद्विकारि किंतु अव्ययं च नत्वन्यावतारवदाविर्भावतिरोभावशालि । तथा यस्य अंशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन देवतिर्यङ्नरादयः सृज्यन्ते अतः सर्वप्राणिनां बीजं निधानं च॥ ५ ॥ स इति॥ यः पौरुषं रूपं जगृहे स एव देवः पद्मनाभ इत्येके । कौमारार्षभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जापत्यमानवादिसर्गेषु प्रथमं कौमाराख्यं सर्गमास्थितः सन् ब्रह्मा ब्राह्मणः सनत्कुमारादिरूपो भूत्वा अखण्डितं ब्रह्मचर्यं चचार। प्रथमद्वितीयादिशब्दा निर्देशमात्रापेक्षया नतु क्रमापेक्षया ॥६॥ द्वितीयमिति ॥ यज्ञेशो भगवान् अस्य विश्वस्य भवाय क्षेमाय रसातलगतां महीम् उद्धरिष्यन् द्वितीयमवतारं सौकरं सूकराकारं वपुः उपादत्त गृहीतवान्। उद्धरिष्यन्निति कर्मोक्तिः एवमग्रेपि ॥ ७ ॥ तृतीयमिति ॥ सः भगवान् ऋषिषु सर्गं प्रादुर्भावम् उपेत्य तत्र च तृतीयमवतारं देवर्षित्वं नारदरूपम् उपेत्य यतस्तन्त्रात् भगवद्धर्मरूपाणां कर्मणां नैष्कर्म्यं कर्मबन्धमोचकत्वं भवति तत् सात्वतं वैष्णवं तन्त्रं पाञ्चरात्रागमम् आचष्ट उक्तवान् ॥ ८ ॥ तुर्य इति ॥ धर्मस्य या कला अंशः भार्या मूर्तिनाम्नी तस्यां सर्गे प्रादुर्भावे तुर्ये चतुर्थे अवतारे नरनारायणाख्यौ ऋषी भूत्वा आत्मनो मनसो यः शमः निग्रहः तेन उपेतं दुश्चरं तपः अकरोत्। द्वयोरेकावतारत्वम् ॥ ९ ॥ पञ्चम इति ॥ पञ्चमोवतारः सिद्धेशः कपिलो नाम प्रसिद्धः। भगवान् कालेन विप्लुतं नष्टं तत्त्वानां ग्रामस्य समूहस्य निर्णयो यस्मिन् तत् सांख्यं नाम शास्त्रम्।

द्वितीयं तु भवायास्य रसातलगतां महीम् ॥ उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥ ७ ॥ तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ॥ तन्त्रं सात्वतमाचष्टे नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥ तुर्ये धर्मकलासर्गे नरनारायणावृषी ॥ भूत्वाऽऽत्मोपशमोपेतमकरोद्दुश्चरं तपः ॥ ९ ॥ पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ॥ प्रोवाचाऽऽसुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥ १० ॥ षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ॥ आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥ ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवान्तरम् ॥ १२ ॥ अष्टमे मरुदेव्यां तु नाभेर्जात उरुक्रमः ॥ दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतम् ॥ १३ ॥ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः ॥ दुग्धेमामौषधीर्विप्रास्तेनायं स उशत्तमः ॥ १४ ॥

आसुरये तन्नाम्ने ब्राह्मणाय प्रोवाच ॥ १० ॥ षष्ठ इति ॥ षष्ठेऽवतारे अनसूयया अत्रिपत्न्या वृतः प्रार्थितः सन् "अनसूयाब्रवीद्देवान्नत्वा ब्रह्मेशकेशवान्। यूयं यदि प्रसन्ना मे वरार्हा यदि वाप्यहम् ॥ प्रसादाभिमुखाः सर्वे मम पुत्रत्वमेष्यथ।" इति ब्रह्माण्डोक्तेः। वक्ष्यमाणरीत्या अत्रिणा च वृत इति शेषः। अत्रेः अपत्यत्वं प्राप्तः दत्तात्रेय इति प्रसिद्धः। भगवान् अलर्काय प्रह्लादादिभ्यः आदिशब्दात् यदुहैहयादिभ्यश्च आन्वीक्षिकीम् आत्मविद्याम् ऊचिवान्। षष्ठे अत्रेति असन्धिः संहिताया अविवक्षणात् ॥ ११ ॥ तत इति ॥ ततः सप्तमेवतारे रुचेः सकाशात् आकूत्यां यज्ञो नामाभ्यजायत स यामाद्यैः स्वपुत्रैः सुरगणैः सह स्वायम्भुवमनोरनन्तरम् अपात् लङ्। तत्र स्वयमिन्द्रोभूदित्यर्थः ॥ १२ ॥ अष्टम इति ॥ अष्टमेऽवतारे तु उरुक्रमो भगवान् सर्वाश्रमैर्नमस्कृतं वर्त्म धीराणां धीरान् दर्शयन् सम्बन्धविवक्षया कर्मणि षष्ठी। धीराणां वर्त्मेत्यन्वयो वा। नाभेः सकाशात् मेरुदेव्यामृषभाख्यो जातः ॥ १३ ॥ ऋषिभिरिति ॥ हे विप्राः उशत्तमः अतिशयेन प्रजापालनं वाञ्छन्

Nepal Sanskrit University ... Digitized by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

वेष्टेः शत्रन्तात्तमप् । सोऽयं भगवानृषिभिः याचितः प्रार्थितः सन् नवमं पार्थिवं वपुः पृथुरूपं राजदेहं पाठान्तरे पृथोरिदं पार्थवं भेजे तेनावतारेण इमां भूमिम् ओषधीः उपलक्षणतया सर्वाणि वस्तूनि दुग्ध अदुग्ध । “ बहुलं छन्दस्यमाङ्योगेऽपि” इति अडभावः । दुहिर्द्विकर्मकः । अत्र तेन पृथ्वीदोहनेन सोऽयमवतारः । उशत्तमः कमनीयतम इति भिन्नं वाक्यं स्वामिपादा व्याचख्युः । तत्र यद्यपि कर्मणि शता प्रतीयते तथापि प्रशस्तमात्रे तात्पर्यं नतु कर्मणि शतृप्रत्यये एवमग्रेऽप्युशत्तमशब्दे ॥ १४ ॥ रूपमिति ॥ स भगवान् मात्स्यं रूपं जगृहे तत्र च चाक्षुषमन्वन्तरे य उदधीनां संप्लवः संश्लेषस्तस्मिन्मही एव महीमयी चिन्मयं ब्रह्मेतिवत्स्वार्थे मयट् । तस्यां नावि नौकारूपायां मह्यामित्यर्थः । वैवस्वतं मनुम् अपात् लङ् । मन्वन्तरावसाने प्रलयासंभवात्सत्यव्रतायेयं माया दर्शितेति स्वामिपादाः । विष्णुधर्मोत्तरे मन्वन्तरावसानेऽपि प्रलय उक्तः । भागवतामृतेऽप्येवम् । केचित्तु मन्वन्तराणां क्रमनियमाभावात्तत्र कल्पे चाक्षुष एवान्ते मनुरभूदिति तत्र प्रलयो युक्त एवेत्याहुः । वैवस्वतमिति भाविनी संज्ञा ॥ १५ ॥ सुरेति ॥ विभुर्भगवान् अमृतोत्पादनाय उदधिं मथ्नतां सुरासुराणां कार्याय एकादशेऽवतारे कमठः कच्छपस्तद्रूपेण पृष्ठे मन्दराचलं दध्रे ॥ १६ ॥ धान्वन्तरमिति ॥ धान्वन्तरं

रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे ॥ नाव्याऽऽरोप्य महीमय्यामपाद्वैवस्वतं मनुम् ॥ १५ ॥ सुरासुराणामुदधिं मथ्नतां मन्दराचलम् ॥
दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥ १६ ॥ धान्वन्तरं द्वादशमं त्रयोदशममेव च ॥ अपाययत् सुरानन्यान्मोहिन्या मोहयन्स्त्रिया ॥ १७ ॥
चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितम् ॥ ददार करजैर्वक्षस्येरकां कटकृद्यथा ॥ १८ ॥ पञ्चदशं वामनकं कृत्वाऽगादध्वरं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम् ॥ १९ ॥ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् ॥ त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥ २० ॥

धन्वन्तरिरूपं द्वादशमं द्वादशमभूत् मडार्षः । अमृतानयनमस्य कर्म ज्ञेयं एवमग्रेऽपि । मोहिन्या विमोहिनीरूपया स्त्रिया त्रयोदशमं त्रयोदशं रूपं मडार्षः । धृत्वा अन्यान् असुरान् मोहयन् सन् सुरान् अपाययत् । अमृतमिति शेषः ॥ १७ ॥ चतुर्दशमिति ॥ चतुर्दशं नारसिंहं रूपं बिभ्रत् सन् ऊर्जितं बलैश्वर्याद्यैः प्रवृद्धं दैत्येन्द्रं हिरण्यकशिपुं कटकृत् कटस्य निर्माता एरकां कटप्रकृतिभूतं निर्ग्रन्थितृणं यथा दृणाति तथा करजैर्नखैर्वक्षसि ददार ॥ १८ ॥ पञ्चदशमिति ॥ पञ्चदशं वामनकं रूपं कृत्वा ह्रस्वाऽर्थे कन् । पदत्रयं याचमानः हेतौ शानच् । पदत्रययाचनेन त्रिविष्टपं स्वर्गलोकं प्रत्यादित्सुः बलिसकाशाद् ग्रहीतुमिच्छुरित्यर्थः । बलेः अध्वरम् अगात् ॥ १९ ॥ अवतारे इति ॥ षोडशमे षोडशेऽवतारे मडार्षः । नृपान् ब्रह्मद्रुहः ब्राह्मणद्रोहिणः पश्यन् कुपितः महीं त्रिः त्रिगुणान् सप्तकृत्वः सप्तवारान् एकविंशतिवारान् इत्यर्थः । अत्र सप्तकृत्व इति कृत्वसुचाभिहिताया अभ्यावृत्तिक्रियायाः पुनरभ्यावृत्तिगणने त्रिरित्यत्र सुच् । निःक्षत्रां क्षत्रियरहिताम् अकरोत् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततः षोडशादग्रे सप्तदशेऽवतारे पराशरात् सत्यवत्यां जातः स भगवान् पुंसो जनान् अल्पमेधसः मन्दबुद्धीन् दृष्ट्वा "नित्यमसिच्" इत्यत्र नित्यग्रहणान्नञ्दुःसुभ्यो-न्यत्रापि असिच् इति काशिका । आर्षो वा प्रयोगः । वेदतरोः शाखाः चक्रे ॥२१॥ नरदेवत्वमिति ॥ अतः सप्तदशात् परमष्टादशे सुराणां कार्यस्य रावणवधादेः चिकीर्षया नरदेवत्वं राजत्वं श्रीरामरूपं प्राप्तः सन् समुद्रनिग्रहादीनि वीर्याणि चक्रे ॥ २२ ॥ एकोनेति ॥ एकोनविंशे विंशतिमे विंशतितमे चावतारे तलोपश्छन्दोनुरोधेन वृष्णिषु रामकृष्णौ इति नामभ्यां प्रसिद्धे जन्मनी प्रादुर्भावौ प्राप्य भगवान् भुवो भारम् अहरत् ॥ २३ ॥ तत इति ॥ ततः एकविंशेऽवतारे कलौ संप्रवृत्ते सति सुरद्विषां सम्मो-हाय वेदमार्गच्यावनाय कीकटेषु गयाप्रदेशे अजनस्य सुतः जिनसुत इति पाठे जिनोऽपि अजन एव नाम्ना बुद्धो भविष्यति ॥ २४ ॥ अथेति ॥ अथ द्वाविंशे असौ जगत्पतिः युगस्य कलेः सन्ध्यायां भविष्यत्सन्धौ कलेरन्ते राजसु दस्युप्रायेषु प्रसह्यहारकतुल्येषु सत्सु विष्णुयशसः तन्नामकब्राह्मणस्य सकाशात् नाम्ना कल्किरिति

ततः सप्तदशे जातः सत्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २१ ॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ॥
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् ॥ २२ ॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भ-रम् ॥ २३ ॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् ॥ बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ॥ २४ ॥ अथासौ युगसन्ध्यायां दस्यु-प्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥ २५ ॥ अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ॥ यथाऽविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ ऋषयो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥ एते चांश-कलाः पुंसः कृष्णस्तु भगवान्स्वयम् ॥ इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥ २८ ॥

ख्यातः जनिता जनिष्यते ॥ २५ ॥ अवतारा इति ॥ हे द्विजाः यथा अविदासिनः उपक्षयशून्यात् "दसु, उपक्षये" इत्यस्मात् णिनिः । सरसः सहस्रशः कुल्याः सार-णीति प्रसिद्धाः क्षुद्रप्रवाहाः स्युः । तथा अनन्तशुद्धसत्वनिधेः हरेः अवताराः असंख्येयाः संख्यातुमशक्याः । असंख्याता इति वा पाठः । हयग्रीवहंसादेरनेन संग्रहः । अथ क्रमममनादृत्योक्तानुक्तावतारसंग्रहपद्यम् । "मत्स्यः कूर्मो वराहो नृहरिवटुरश्वायुधा रामकृष्णौ बुद्धः कल्की कुमारर्षभमनुपृथवो मोहिनी व्यासयज्ञौ । दत्तो देवर्षि-नारायणकपिलहयग्रीववैव्येशहंसा विष्णोरंशा जयन्ति ध्रुववरदगजत्राणकृद्भ्यां सहेते ॥ " इति ॥ २६ ॥ विभूतीराह—ऋषय इति ॥ सप्रजापतयः प्रजापतिभिः सहिता ऋष्यादयः तथा तद्वत् अन्येपि महौजसो महासामर्थ्या एते सर्वे हरेरेव कलाः विभूतयः ॥ २७ ॥ तत्र विशेषमाह—एत इति ॥ एते च प्रागुक्ताः चशब्दादनुक्ताश्च पुंसः प्रथमनिर्दिष्टस्य पुरुषस्य अंशकलाः केचिदंशाः मत्स्यकूर्मवराहाद्याः केचित्कलाः कुमारनारदादय आवेशाः तत्र कुमारनारदादिषु ज्ञानभक्तिशक्त्यंशावेशः पृथ्वादिषु क्रिया-

CC-0. In Public Domain. Digitization by eGangotri

शक्त्यंशावेशः ते चावेशा महाशक्त्या अल्पशक्त्या चेति द्विविधाः । प्रथमाः कुमारनारदाद्या अवतारशब्देनोच्यन्ते । द्वितीया मरीचिमन्वाद्याः विभूतिशब्देनेति भेदो ज्ञेयः । तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणम् । कुमारनारदादिष्वाधिकारिकेषु यथोपयोगमंशकलावेशः । तत्र नृसिंहपरशुरामकल्किपुरुषेष्वैश्वर्यस्य नारदव्यासवराहबुद्धेषु धर्मस्य रामधन्वन्तरियज्ञपृथुषु यशसः बलमोहिनीवामनेषु श्रियः दत्तात्रेयमत्स्यकुमारकपिलेषु ज्ञानस्य नरनारायणकूर्मऋषभेषु वैराग्यस्याविष्कारः । श्रीकृष्णे तु सर्वेषामेवेति । इह यो विंशतितमत्वेन गणितः श्रीकृष्णाख्यस्तु स्वयं भगवान् साक्षान्नारायण एवाविर्भूतः । एते सर्वेपि युगे युगे तत्तत्समये इन्द्रारिभिर्दैत्यैः व्याकुलं लोकं मृडयन्ति सुखयन्ति । अत्र भागवताः । जगृहे इत्याद्यश्लोके योयं भगवान् पुरुषरूपं जगृहे स परव्योमाधिनाथः वासुदेवाख्यः स एव श्रीकृष्णः तेन गृहीतं यत्षोडशकलं रूपं स महाविष्णुः प्रकृतीक्षणकर्त्ता संकर्षणांशः कारणार्णवशायी महत्तत्त्वस्रष्टा प्रथमः पुरुषः तस्यैवांशा अवताराः मत्स्याद्याः यस्याम्भसीत्युक्तः पद्मनाभः प्रद्युम्नांशो गर्भोदशायी द्वितीयः यस्तु पूर्वाध्याये हरिविरिञ्चिहरेतिसंज्ञा इत्यत्र हरिरिति पठितः स क्षीरोदशायी अनिरुद्धांशस्तृतीयः पुरुषो ज्ञेय इति पुरुषत्रयम् । एते त्रयोपि वासुदेवांशाः । अत्र प्रथमः प्रकृतेरन्तर्यामी द्वितीयः समष्टिविराजः तृतीयो व्यष्टीनामिति त्रय एवांशेनान्तर्यामिणः । तदुक्तम् । "एकं तु महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् । तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥" इति । कृष्णस्तु भगवान् नत्वंशः न चांशी पुरुषः किं तु यः पुरुषस्यावतारी परव्योमाधिनाथो वासुदेवो भगवान् स एवेत्यर्थः । ननु भागवते "तत्रांशेनावतीर्णस्य" इत्यादौ बहुषु स्थलेषु कृष्णस्यांशत्वमुक्तं ततोनेनैकेनैव वाक्येन कृष्णस्य पूर्णत्वं कथं व्यवतिष्ठताम् अत्रोच्यते । श्रीभागवतशास्त्रारम्भे जन्मगुह्याध्यायोयं सर्वभगवदवतारवाक्यानां सूचकत्वात् । सूत्रं तत्र च "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।" इति परिभाषासूत्रम् । यत्र यत्रावताराः श्रूयन्ते तत्रान्यान् पुरुषांशत्वेन जानीयात् । कृष्णं तु स्वयं भगवत्त्वेनेति प्रतिज्ञारूपमिदं सर्वत्रोपतिष्ठते । परिभाषा ह्येकदेशस्था सकलं शास्त्रमभिप्रकाशयति यथा वेश्मप्रदीप इति प्राञ्चः । सा च शास्त्रे सकृदेव पठ्यते नत्वभ्यासेनेति अनेनैकेनापि सर्वाणि वाक्यानि व्यवस्थाप्यन्ते । तेषां वाक्यानां प्राकरणिकत्वेन लैङ्गिकत्वेन वा दुर्बलत्वात् । अस्य च श्रुतिरूपत्वेन प्राबल्यात् । "[1]श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवायेपारदौर्बल्यमर्थविप्र-

---

१ श्रुतिलिङ्गेत्यादिसूत्रं श्रुत्यादिषु पूर्वस्य बलवत्त्वं प्रतिपादयति तस्यार्थः । श्रुत्यादीनां समवाय एकत्रोपनिपाते तेषां मध्ये यदपेक्षया यत्परं तदपेक्षया तद्दुर्बलं कुतः अर्थविप्रकर्षात् । पूर्वापेक्षया विलम्बेनार्थप्रत्यायकत्वात् तत्र निरपेक्षो रवः श्रुतिः शब्दसामर्थ्यं लिंगम् एकत्रार्थे पर्यवसितानि पदानि वाक्यम् उभयाकांक्षाप्रकरणम् । क्रमः स्थानं समाख्या यौगिकः शब्दः । अत्र " कदाचनस्तरीरसिनेन्द्रदाशुषे " इत्यादिका इन्द्रप्रतिपादिका ऋक् । तत्र " ऐन्द्र्या गार्हपत्यमुपतिष्ठते " इति श्रुत्या गार्हपत्योपस्थानेऽस्या विनियोगः स्फुटं विधीयते तथा इन्द्रप्रकाशनसामर्थ्यरूपाल्लिङ्गादिन्द्रोपस्थाने विनियोगः प्रतिभाति तदत्र श्रुतिलिङ्गयोर्विरोधः । तत्र लिङ्गेन इन्द्र ईदृगित्येव प्रतिपाद्यते न त्वनयर्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्षात्" इति न्यायात्। श्रीधरस्वामिपादैरपि तत्र तत्रैवमेव समाहितम् इति प्राहुः ॥२८॥ जन्मेति ॥ यः नरः प्रयतः शुचिः सन् एतत् गुह्यं रहस्यं भगवतो जन्म सायं प्रातश्च भक्त्या गृणन् कीर्तयन् भवेत् स दुःखग्रामात् संसारात् विमुच्यते ॥ २९ ॥ विमुच्यते इत्युक्तं तत्र श्रवणादिजनितविद्यया अविद्यानिवृत्तौ जीवस्य देहद्वयसंबन्धनिवृत्तौ मुक्तिर्भवति इत्याह—एतदिति पञ्चभिः ॥ अरूपस्य चिदात्मनः चिद्रूपस्य आत्मनो जीवस्य आत्मनि आत्मस्थाने एतत्स्थूलं रूपं शरीरं भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितम् आत्मस्थाने शरीरं कृतम् ॥३०॥ यथेति ॥ यथा वाय्वाश्रितो मेघौघः अबुद्धिभिः अज्ञैर्नभसि आरोपितः यथा वा पार्थिवो रेणुस्तद्गतं धूसरत्वाद्यनिले एवं द्रष्टरि आत्मनि दृश्यत्वं दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः ॥ ३१ ॥ अत इति ॥ अतः स्थूलशरीरात् परमन्यत् यत् अदृष्टं चाश्रुतं च यद्वस्तु

जन्म गुह्यं भगवतो य एतत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ॥
मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥ यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ॥ एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥३१॥
अतः परं यदव्यक्तमव्यूढगुणव्यूहितम् ॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥ ३२ ॥ यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ॥
अविद्ययाऽऽत्मनि कृते इति तद्ब्रह्मदर्शनम् ॥ ३३ ॥

तस्य भावात् अदृष्टत्वादश्रुतत्वाच्च हेतोरित्यर्थः। अव्यूढाः करचरणादिपरिणामरहिता ये गुणाः पृथिव्यादयः तैर्व्यूहितं रचितम् आकारविशेषरहितमित्यर्थः। बृंहितमित्यपि पाठः। यच्चाकारविशेषवद्वस्तु तदस्मदादिवत् दृश्यते श्रूयते वा इन्द्रादिवत्। इदं तु न तथा अत एवाव्यक्तं सूक्ष्मम्। यत् यतः सूक्ष्मात् पुनर्भवः पुनर्जन्म संभवति स च जीवः उत्क्रान्तिगत्या गतिभिर्हेतुभिर्जीवोपाधित्वेन कल्पितः अन्यथा उत्क्रान्त्यादीनां तेन विना असंभवः अतः कल्पितः जीवो जीवेन निर्मुक्त इत्यादौ लिङ्गदेहेपि जीवशब्दः प्रयुज्यते तदपि रूपमात्मन्यारोपितमित्यनुषङ्गः ॥ ३२ ॥ यत्रेति ॥ यत्र यदा इमे सदसद्रूपे स्थूलसूक्ष्मरूपे अविद्यया आत्मनि कृते कल्पिते इति रूपया

इन्द्र उपस्थातव्य इति तत्र यावल्लिङ्गम् अनयेन्द्र उपस्थातव्य इति श्रुतिकल्पनाय प्रक्रान्तव्यापारं तावत् "ऐन्द्र्या गार्हपत्यमुपतिष्ठत" इति श्रुत्या गार्हपत्योपस्थाने विनियोगः सिद्ध एवेति निराकांक्षे प्रकरणे श्रुतिर्न कल्पनीयेति लिङ्गाच्छ्रुतेर्बलवत्त्वम्। तथा च ऐश्वर्ययोगाद्गार्हपत्यपर एव इन्द्रशब्दो व्याख्येयः। प्रकृते च एते चांशकलाः पुंस इति कृष्णस्य पूर्णत्वमन्येषामपूर्णत्वं स्फुटं प्रतिपादयति। तत्रांशेनावतीर्णस्य इत्यादिकं तु प्रकरणबलात् भगवदवतारत्वमात्रं प्रतिपादयति। ननु तत्र लिङ्गेनांशत्वादिकमप्यधिकं विवक्षितं वाक्यभेदप्रसङ्गात्। अतएव क्वचिदंशत्वेन क्वचित् कलात्वेन कथनम्। विवक्षाकल्पनायामपि यावदंशादिवाक्यं लिङ्गवशात् कृष्णो भगवतोंशो ज्ञेयो न पूर्ण इति व्यवस्थाकल्पनायां प्रक्रान्तव्यापारं तावत् एते चांशकलाः पुंस इत्यनेन स्फुटतया व्यवस्थाया जातत्वादंशकलादिवाक्यं निराकांक्षतया न किमपि व्यवस्थापयितुमीष्टे। अतएव दुर्बलतया तत्रांशादिप्रतीत्यभिप्रायेण बलदेवाद्यभिप्रायेण वा योज्यमिति ॥

Nepal Sanskrit University, Dang

CC-0. In Public Domain. Digitization by eGangotri

स्वसंविदा स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः तत् दर्शनं ज्ञानैकरूपं ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः ॥ ३३ ॥ ननु संसृतिकारणरूपमायाया विद्यमानत्वात् कथं ब्रह्मता तत्राह—यदीति ॥ यदि यदा वैशारदी विशारदः सर्वज्ञ ईश्वरस्तदीया एषा देवी अविद्यारूपेण आवरणविक्षेपौ कुर्वत्येव संसारचक्रेण क्रीडन्ती माया उपरता निवृत्ता सती मतिः विद्यारूपेण परिणता भवति तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिन्धनाग्निवत्स्वयमेवोपरमेत् तदा पुरुषः सम्पन्नः ब्रह्मस्वरूपं प्राप्त एवेति तत्त्वज्ञाः विदुः । तदा स्वे महिम्नि परमानन्दरूपे महीयते पूज्यते विराजत इति ॥३४॥ यथा जीवस्य जन्मादिमाया तथेश्वरस्य जन्मादिमायेत्याह—एवमिति ॥ यथा जीवस्य जन्मादि एवं वेदगुह्यानि वेदे रहस्यभूतानि हृत्पतेरन्तर्यामिणो भगवतोपि अजनस्य जन्मरहितस्यापि सतः जन्मानि अकर्त्तुरपि सतः कर्माणि कवयो वर्णयन्ति । सारार्थसंदर्शिन्यां तु एतद्रूपं भगवत इत्यादिषट्श्लोकी एवं व्याख्याता । ननु पातालादिविग्रहो विराडप्युपास्यत्वेनोक्तः स कथमवतारेषु न गण्यते इत्यत आह । एतत्समष्टिव्यष्टिविराडात्मकं जगत् चिदात्मनः प्राकृतरूपरहितस्य भगवतो रूपं स्थूलं शरीरं मायाया गुणैर्महत्तत्त्वादिभिः पृथिव्यन्तैस्तत्त्वैर्विरचितम् आत्मनि स्वस्मिन्नेतदन्तर्यामिण्यधिष्ठाने स्थितमित्यर्थः । अतो विशुद्धसत्त्वरूपमत्स्यकूर्माद्यवतारमध्ये मायिकरूपी विराडेष न पठित इति भावः। कस्मिन् किमिवेत्यत आह। यथा नभसि आकाशे मेघसमूहः अनिले च पृथ्वीविकारो रेणुस्तथैव

यद्येषोपरता देवी माया वैशारदी मतिः ॥ संपन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥
एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ॥ वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥

आत्मनि एतद्विराड्रूपमिति पूर्वेणैवान्वयः । तेन मञ्चस्थः पुरुषो यथा मञ्च उच्यते तथा भगवति स्थितो विराडपि भगवानुच्यत इत्यर्थः । एवमेवाधिष्ठितधर्मो दृश्यत्वमपि द्रष्टरि भगवत्यदृश्येपि आरोपितमित्यर्थः । अबुद्धिभिरल्पबुद्धिभिः ततश्च भगवानयं विराट् दृश्यः प्रथमदशास्थैर्योगिभिराराध्य इत्युपपन्नम् । एवं सूक्ष्मं रूपं योगिभिरुपास्यत्वेनोक्तमपि मायिकमेवेत्याह अत इति । व्याख्यानं प्राग्वत् । तेन च समष्टिव्यष्टिविराजां जीवत्वात्तत् स्थूलसूक्ष्मयो रूपयोर्मायिकत्वात् तत्र चेश्वरत्वमारोपितमेव नतु साहजिकमिति भावः । यदुक्तं "विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत्त्रिभिर्हीनं तुरीयं तत् प्रचक्षते॥" इति अत्रापि वक्ष्यते । "अमुनी भगवद्रूपे मया ते अनुवर्णिते । उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः॥"इति । यत्रेति । यत्र भगवति इमे सदसद्रूपे उक्तलक्षणे मायिकस्थूलसूक्ष्मरूपे प्रतिषिद्धे भवतः तेनामायिकं तु रूपं तस्य न प्रतिषिद्धमिति भावः । केन स्वेषां भक्तानां संविदा अनुभवेन ते कथं भगवति न स्त इत्यत आह । अविद्यया आत्मनि जीवे एव कृते अध्यस्ते नत्वीश्वरे ततश्च तस्य ब्रह्मणो दर्शनं साक्षात्कारः स्यात् । यद्येषा माया देवी उपरता स्यात् तथा वैशारदी भगवद्विषयिणी मतिः पुरुषस्य स्यात् संपन्न एव तन्मतिमानेव पुरुषः संपन्नोऽन्यस्तु दरिद्र इत्यर्थः। विदुस्तत्त्वज्ञाः स्वे महिम्नि स्वीये माहात्म्ये वर्तमानः स महीयते पूज्यते । एवमिति । एवमुक्तशरीरद्वयप्रतिषेधेन अजनस्य जन्मानि अकर्त्तुः कर्माणि च भगवतः सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवस्य तु मायासम्बन्धेन जातान्यतो हेयानि । भगवतस्तु मायाप्रतिषेधेन उपादेयानीत्याह । वेदेषु वेदैर्वा गुह्यानि रहस्यत्वेन परमोपादेयत्वेन च संवृत्य स्थापितानि तात्त्विकानि अतो विराड्रूपस्यैवंभूतत्वाभावादवतारमध्ये तस्य न गणनेति प्रकरणार्थः॥३५॥जीवादीश्वरस्य स्वातन्त्र्यमेव विशेष इत्याह—स इति ॥ अमोघलीलः आत्मतन्त्रः षड्गुणेशः षडिन्द्रियनियन्ता स ईश्वरः इदं विश्वं सृजति अवति अत्ति संहरति भूतेषु च अन्तर्हितः सन् षाड्वर्गिकमिन्द्रियषड्वर्गविषयं जिघ्रति दूरादेव गन्धवद्गृह्णाति ननु अस्मिन् षाड्वर्गिके सज्जत इत्यर्थः ॥ ३६ ॥ नेति ॥ कश्चिदपि कुमनीषः अल्पबुद्धिर्जन्तुः मनोवचोभिर्मनसा रूपाणि वचसा नामानि च संतन्वतः विस्तारयतः वचोभिरिति बहुत्वं श्रुत्यभिप्रायेण । मनोवचोभिः सहेति वा अस्य धातुर्भगवतः ऊतीर्लीलाः अज्ञो जनः नटस्य चर्या कौशलतत्वमिव निपुणेन तर्कादिकौशलेनापि न अवैति न जानाति । भक्तिरसिकास्तु कुमनीषः जन्तुः केवलं ज्ञानी नामरूपे मिथ्येति ब्रुवाणो भगवतो लीलास्वादं नानुभवति । प्रेम भक्त एवानुभवति यथा नटस्य अभिनेतुः चर्यामभिनयास्वाद-

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ॥ भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥ ३६ ॥ न चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः ॥ नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाऽज्ञः ॥ ३७ ॥ स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः ॥ यो मायया संततयाऽनुवृत्त्या भजेत तत्पादसरोजगन्धम् ॥ ३८ ॥ अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे ॥ कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ॥ ३९ ॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ उत्तमश्लोकचरितं चकार भगवानृषिः ॥ निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ॥ ४० ॥ तदिदं ग्राहयामास सुतमात्मवतां वरम् ॥ सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ॥ ४१ ॥

मज्ञो रसवासनाहीनो नावैति सहृदय एवानुभवति तथेत्यभिप्रायेण व्याचक्षते ॥३७॥ स इति ॥ यः अमायया कौटिल्यराहित्येन सन्ततया निरन्तरया अनुवृत्त्या आनुकूल्येन तस्य भगवतः पादसरोजयोर्गन्धं भजेत स एव धातुः परस्य दुरन्तवीर्यस्य रथाङ्गपाणेर्हरेः पदवीं स्वरूपं लीलातत्वास्वादं वा वेद ॥३८॥ अथेति ॥ यतो भगवत्तत्त्वं सर्व एव न जानन्ति अथ अतः भगवन्तः सर्वज्ञाः भवन्तो धन्याः कृतार्थाः कुतः यद्यस्मादित्थं प्रश्नैर्वा अखिललोकनाथे वासुदेवे सर्वात्मकमैकान्तिकम् आत्मभावं मनोवृत्तिं कुर्वन्ति । यत्र यस्मिन् भावे सति भूयः उग्रः परिवर्त्तो जन्ममरणावावर्त्तो न भवति ॥३९॥ इदमिति सार्द्धम् ॥ भगवान् ऋषिर्व्यासः लोकस्य निःश्रेयसाय ब्रह्मसम्मितं सर्ववेदतुल्यम् उत्तमश्लोकस्य चरितं यस्मिन् तत् धन्यं प्रशस्यं स्वस्त्ययनं कल्याणकरं महत् इदं भागवतं तन्नाम पुराणं चकार ॥ ४० ॥ तदिदमिति ॥ व्यासेन दधिमथनादुद्धृतं नवनीत-

CC-0. In Public Domain. Digitization by eGangotri

मिव यत् सर्ववेदेतिहासानां सारं सारं सम्यगुद्धृतं तदेवेदं भागवतं कर्मभूतं व्यास एव आत्मवतां वरं सूतं शुकं ग्राहयामास अध्यापयामास ॥४१॥ स इति ॥ स शुकस्तु गङ्गायां प्रायेण मृत्युपर्यन्ताऽनशनसंकल्पेन उपविष्टं परमर्षिभिः परीतं महाराजं परीक्षितं संश्रावयामास ॥४२॥ कृष्ण इति ॥ धर्मज्ञानादिभिः षड्भिरैश्वर्यैः सहैव श्रीकृष्णसूर्ये स्वधाम उपगते अन्तर्हिते सति परे तु स्वधाम्नो द्वारकातः उप समीपं प्रभासं गते इत्यर्थमाहुः । तथाच कृष्णः सूर्यः मथुरा उदयशैलः प्रभासोऽस्ताचलः शिष्टाः कोकाः दुष्टा नीहाराः पापानि तमांसीति एकदेशविवर्त्तिरूपकेण सूचितं प्रकाशकाभावात् नष्टदृशां नृणां प्रकाशोद्गमाय अधुना एष भागवताख्यः पुराणरूपोऽर्कः उदितः सूर्येऽस्तंगते सूर्य एवोदेति सूर्यस्य प्रतिमूर्तिः सूर्य एवेति धर्मः कं शरणं गत इत्यस्योत्तरमिदम् ॥४३॥ तत्रेति सार्द्धम् ॥ हे विप्राः तत्र सभायां भागवतं कीर्त्तयतः भूरितेजसः विप्रर्षेः श्रीशुकात् तस्य शुकस्यानुग्रहात् तत्र सभायां निविष्टः अहं तद्भागवतमध्यगमं ज्ञातवानस्मि । सोहं यथाधीतं यथामति च वो युष्मान् श्रावयिष्यामि । अन्वयभेदात्तत्र पदावृत्तिरदोषः ॥४४॥

स तु संश्रावयामास महाराजं परीक्षितम् ॥ प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः ॥ ४२ ॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥ कलौ नष्टदृशामेष पुराणाऽर्कोऽधुनोदितः ॥ ४३ ॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् ॥ सोऽहं वः श्रावयिष्यामि यथाऽधीतं यथामति ॥ ४४ ॥ इति श्रीभागवते प्रथमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ व्यास उवाच ॥ इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम् ॥ वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ॥ १ ॥ शौनक उवाच ॥ सूत सूत महाभाग वद नो वदतां वर ॥ कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ॥ २ ॥ कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना ॥ कुतः संचोदितः कृष्णः कृतवान्संहितां मुनिः ॥ ३ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात् प्रथमस्य तृतीयके ॥३॥ चतुर्थे भारतादीनां शास्त्राणामपि गुम्फने ॥ व्यासस्यापरितोषोक्तिः श्लोकाः सार्द्धात्रिवह्नयः ॥ उवाचत्रयमङ्घ्र्याढ्याः पञ्चत्रिंशदनुष्टुभः ॥४॥ इतीति ॥ इति एवं प्रसन्नतया श्रावयिष्यामीति ब्रुवाणं सूतं संस्तूय स्तुत्वा दैर्घ्यमार्षम् । ततस्तुगभावः सिद्धः । दीर्घसत्रिणां मुनीनां मध्ये वृद्धः कुलपतिर्गणमुख्यः बह्वृच ऋग्वेदी अत एतद्गुणविशिष्टत्वात्तैः प्रष्टृत्वेन व्यवस्थापितः शौनकः अब्रवीत्॥१॥ सूतेति ॥ हे सूत सूत महाभाग वदतां वर यत् यां कथां भगवान् शुक आह स्म तां पुण्यां भागवतीं कथां नोऽस्मभ्यं वद ॥ २ ॥ कस्मिन्निति ॥ इयं कथा कस्मिन् युगे प्रवृत्ता कस्मिन् वा स्थाने प्रवृत्ता केन हेतुना वा प्रवृत्ता भारतादिकृतवतो व्यासस्यैतन्निर्माणप्रवृत्तौ किं कारणमित्यर्थः । कुत इति सार्वविभक्तिकस्तसिः । केन संचोदितः प्रेरितः कृष्णः मुनिर्व्यासः संहितां कृतवान् चक्रे ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति ॥ तस्य व्यासस्य पुत्रः शुकस्तु महायोगी समदृक् समं ब्रह्म पश्यति अतो निर्विकल्पकः निरस्तभेदः किंच एकस्मिन्नेवान्तः समाप्तिर्यस्याः तथाभूता मतिर्यस्य सः यतः उन्निद्रः निद्रा अविद्या तत उद्गतः अविद्याशयनादुद्बुद्धः " या निशा सर्वभूतानां तस्यां जागर्ति संयमी । " इत्युक्तेः । अतएव गूढः अप्रकटः मूढ इव ईयते प्रतीयते ॥ ४ ॥ दृष्ट्वेति ॥ आत्मजं शुकं प्रव्रजन्तम् अनुयान्तम् अनुगच्छन्तम् ऋषिं व्यासम् अनग्नमपि दृष्ट्वा जले क्रीडन्त्यो देव्यः अप्सरसः ह्रिया लज्जया स्ववस्त्राणि परिदधुः नग्नस्य सुतस्य शुकस्य दर्शने तु लज्जाभावात् न परिदधुः । तच्चित्रं वीक्ष्य मुनौ व्यासे पृच्छति सति देव्यः व्यासं जगदुः तव वृद्धस्यापि स्त्रीपुंभिदा अयं पुमानियं स्त्री इति भेदः अस्ति विविक्तदृष्टेः निर्विकारदृष्टेः सुतस्य शुकस्य तु यूनोपि स्त्रीपुंभिदा नास्ति । वयं कलाभिज्ञाः स्त्रीपुंसयोर्नयनदर्शनेनैव तदन्तस्तत्वं जानीम इति भावः ॥५॥ कथमिति ॥ कुरवो जाङ्गलाश्च देशविशेषाः तान् संप्राप्तः ततो गजसाह्वये गजेन सहित आह्वयो नाम यस्य तस्मिन् हस्तिनापुरे हस्ती नाम राजा तेन निर्मितत्वात् उन्मत्तमूकजडवत्

तस्य पुत्रो महायोगी समदृङ् निर्विकल्पकः ॥ एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥ दृष्ट्वाऽनुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम् ॥ तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ॥ ५ ॥ कथमालक्षितः पौरैः संप्राप्तः कुरुजाङ्गलान् ॥ उन्मत्तमूकजडवद्विचरन्गजसाह्वये ॥ ६ ॥ कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह ॥ संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः ॥ ७ ॥ स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् ॥ अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ॥ ८ ॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् ॥ तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ९ ॥ स सम्राट् कस्य वा हेतोः पाण्डूनां मानवर्धनः ॥ प्रायोपविष्टो गङ्गायामनादृत्याऽधिराट्श्रियम् ॥ १० ॥

विचरन् स शुकः पौरैः शुकत्वेन कथमालक्षितः ज्ञातः ॥६॥ कथमिति ॥ हे तात यत्र संवादे एषा सात्वती भागवती श्रुतिः संहिता प्रवृत्तासीत् स पाण्डवेयस्य राजर्षेः परीक्षित तादृशेन मुनिना सह संवादः कथं वा समभूत् ॥ ७ ॥ स इति ॥ हि यतः स महाभागः शुकः गृहमेधिनां गृहेषु तदाश्रमं तेषां गृहमेधिनामाश्रमं तीर्थीकुर्वन् पवित्रीकुर्वन् पवित्रीकरणायैव नतु भिक्षार्थमित्यर्थः । अर्जयन् वसतीतिवत् प्रयोजने शता गोदोहनमात्रं यावता गौर्दुह्यते तावन्मात्रं कालमवेक्षते प्रतीक्षते । भागवतव्याख्यानं तु बहुकालापेक्षम् ॥८॥ वक्तुरद्भुतत्वमुक्त्वा श्रोतुरप्याह—अभिमन्युसुतमिति ॥ हे सूत अभिमन्योः सुतं परीक्षितं भागवतेषु उत्तमं प्राहुः अतस्तस्य महाश्चर्यरूपं जन्म यत्र ब्रह्मास्त्रस्यापि प्रतिघातः तथा कर्माणि च कलिनिग्रहादीनि नोऽस्मभ्यं गृणीहि कथय ॥ ९ ॥ स इति ॥ पाण्डूनां पाण्डवानां मानवर्द्धनः सम्राट् चक्रवर्ती सः परीक्षित् कस्य वा हेतोः अधिराट्श्रियम् अधिराजां सम्पदम् अनादृत्य गङ्गायां प्रायेण मरणपर्यन्तमनशनसंकल्पेन उपविष्टोऽभूत् ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

नमन्तीति ॥ अङ्ग हे सूत ह स्फुटं शत्रवोपि आत्मनः शिवाय धनानि आनीयार्पयित्वा यस्य पादनिकेतं चरणपीठं नमन्ति अहो स वीरः युवा एव सन् दुस्त्यजां श्रियं राज्यसम्पदम् असुभिः प्राणैः सहैव उत्स्रष्टुं कथम् ऐषत ऐच्छत् आर्षस्तङ् छत्वाभावश्च । "एष्टृ गतौ" इत्यस्य वा ॥११॥ शिवायेति ॥ ये जनाः उत्तमश्लोकपरायणा भवन्ति ते लोकस्य शिवाय सुखाय भवाय समृद्ध्यै यद्वा भवनिवृत्त्यै मशकार्थो धूम इतिवत् भवं संहर्तुं वा " क्रियार्थ० " इत्यादिना चतुर्थी । भूतये ऐश्वर्याय च जीवन्ति न त्वात्मार्थम् । एवं सत्यसौ राजा निर्विद्य विरज्यापि परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच नहि परोपजीवनं स्वयं त्यक्तुमुचितमित्यर्थः ॥ १२ ॥ तदिति ॥ इह यत्किंचन पृष्टोऽसि तत्सर्वं नोऽस्मभ्यं समाचक्ष्व । यद्यस्मात् त्वां वाचां विषये गिरां गोचरेर्थे छान्दसादन्यत्र अत्रैवर्णिकतया वैदिकव्यतिरेकेण स्नातं पारगं मन्ये । इदं तु वेदपुराणयो-र्भेदव्यवस्थयोक्तं तत्वं तु टीकायाः शेषभागे ज्ञेयम् ॥ १३ ॥ द्वापरे इति ॥ युगानां वैवस्वतमन्वन्तरीयसत्यादीनां सप्तविंशतिसंख्यानां पर्ययोऽतिक्रमो यस्मिन् तस्मिन् द्वापरे

नमन्ति यत्पादनिकेतमात्मनः शिवाय ह्याऽऽनीय धनानि शत्रवः ॥ कथं स वीरः श्रियमङ्ग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ॥ ११ ॥
शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ॥ जीवन्ति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम् ॥ १२ ॥
तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन ॥ मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् ॥ १३ ॥ सूत उवाच ॥ द्वापरे समनुप्राप्ते
तृतीये युगपर्यये ॥ जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १४ ॥ स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः ॥ विविक्तदेश
आसीन उदिते रविमण्डले ॥ १५ ॥ परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥ १६ ॥ भौति-
कानां च भावानां शक्तिह्रासं च तत्कृतम् ॥ अश्रद्दधानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः ॥ १७ ॥ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन
चक्षुषा ॥ सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥ १८ ॥

सति " पर्ययोऽतिक्रमस्तस्मिन् " इत्यमरः । यः अष्टाविंशः द्वापरः श्रीकृष्णावतारसम्बन्ध्येव ज्ञेयः । तत्र तृतीये सन्ध्याख्ययुगाख्यसन्ध्यांशाख्येषु भागेषु तृतीये सन्ध्यांशाख्ये भागे द्वापरान्ते समनुप्राप्ते सति यद्वा कृतयुगापेक्षया तृतीये द्वापरे युगे युगस्य द्वापरस्य पर्ययेऽवसाने सति हरेः कलया पराशरात् वासव्याम् उपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः ॥ १४ ॥ स इति ॥ स व्यासः कदाचित्काले शुचि शुद्धं सरस्वत्या नद्या जलम् उपस्पृश्य आचम्य उपलक्षणतया स्नानसन्ध्यादि च कृत्वा ततः रविमण्डले उदिते सति विविक्तदेशे चित्तैकाग्र्यार्थम् एकान्ते स्थाने आसीनो बभूवेति शेषः । अनेनैव बदरिकाश्रमः सूचितः ॥ १५ ॥ परावरेति त्रिकम् ॥ मुनिर्मननशीलः अमोघदृक् अप्रतिहतज्ञानः परावरज्ञः भूतभविष्यज्ज्ञः स ऋषिः व्यासः अव्यक्तं रंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं नाशं वा प्राप्तं दिव्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्षुषा वीक्ष्य तथा भुवि युगे युगे तत्कृतं कालकृतं भौतिकानां पञ्चभूतकार्याणां भावानां शरीरादीनां शक्तिह्रासं च वीक्ष्य तथा जनान् अश्रद्दधानान् निःसत्वान् धैर्यशून्यान् रजस्तमोमयान् वा दुर्मेधान् मन्दमतीन् असिजभाव आर्षः। ह्रसितायुषः अल्पायुषः दुर्भगान् दुर्भाग्यांश्च वीक्ष्य सर्वेषां वर्णानामाश्रमाणां च यत् हितं तत् दध्यौ दिव्येन चक्षुषेत्यस्य दध्यावित्यनेन वा सम्बन्धः ॥ १६ ॥ १७ ॥ १८ ॥ चातुर्होत्रमिति ॥ चत्वारो होतारो होत्रध्वर्यूद्गातृब्रह्माणस्तैर्निर्वृत्तं वैदिकं कर्म चातुर्होत्रं प्रजानां कर्माधिकृतानां शुद्धं शुद्धिकरं शुद्धशब्दात् " तत्करोति० " इति णिजन्तात् अच्। वीक्ष्य विचार्य यज्ञानां सन्तत्यै अविच्छेदाय एकमविभक्तं वेदम् ऋगादिभेदेन चतुर्विधं व्यदधात् ॥ १९ ॥ ऋगिति ॥ व्यासेन एकस्मादेव वेदात् ऋग्यजुःसामाथर्वाख्याश्चत्वारो वेदा उद्धृताः। इतिहासाः भारताद्याः पुराणानि ब्राह्मादीनि चेति समाहारद्वन्द्वः। तच्च वेदार्थस्य बृंहकत्वात् पञ्चमो वेदः उच्यते ॥ २० ॥ तत्रेति ॥ तत्र पैलऋषिः ऋग्वेदधरः अभूत् कविः क्रान्तदर्शी जैमिनिः सामगः अभूत् उत तथा एको वैशम्पायन एव यजुषां विषये निष्णातः कुशलोऽभूत् ॥ २१ ॥ अथर्वेति ॥ दारुणः अभिचारकर्मप्रवृत्त्या क्रूरः सुमन्तुर्मुनिः अथर्वाङ्गिरसामथर्वणां विषये निष्णातः

चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम् ॥ व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधम् ॥ १९ ॥ ऋग्यजुःसामाऽथर्वाख्या वेदाश्चत्वार उद्धृताः ॥ इतिहासपुराणं च पञ्चमो वेद उच्यते ॥ २० ॥ तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ॥ वैशम्पायन एवैको निष्णातो यजुषामुत ॥ २१ ॥ अथर्वाङ्गिरसामासीत्सुमन्तुर्दारुणो मुनिः ॥ इतिहासपुराणानां पिता मे रोमहर्षणः ॥ २२ ॥ त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा ॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥ २३ ॥ त एव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा ॥ एवं चकार भगवान्व्यासः कृपणवत्सलः ॥ २४ ॥ स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥ इति भारतमाख्यानं कृपया मुनिना कृतम् ॥ २५ ॥

आसीत् मे मम पिता रोमहर्षणः इतिहासपुराणानां विषये निष्णातः आसीत् ॥ २२ ॥ त इति ॥ ते पूर्वोक्ता एते ऋषयः पैलादयः स्वं स्वं वेदमनेकधा व्यस्यन् विभक्तवन्तः " बहुलं छन्दस्यमाङ्योगेपि " इति आडभाव आर्षः। स्यतेर्वा रूपम्। ततश्च ते वेदाः शिष्यैः प्रशिष्यैः शिष्यशिष्यैः तच्छिष्यैः प्रशिष्यशिष्यैः शाखिनः तत्तन्नामपूर्वशाखावन्तोऽभवन् ॥ २३ ॥ त एवेति ॥ ये पूर्वमतिमेधाविभिर्धार्यन्ते स्म त एव वेदाः यथा दुर्मेधैः दुर्मेधोभिः पुरुषैर्धार्यन्ते असिजभाव आर्षः। एवंप्रकारेण कृपणवत्सलः दीनेषु स्निग्धः भगवान् व्यासः वेदविभागं चकार ॥ २४ ॥ स्त्रीति सार्द्धम् ॥ कर्मरूपे श्रेयसि श्रेयःसाधने मूढानामनधिकारिणां स्त्रीणां शूद्राणां द्विजबन्धूनां त्रैवर्णिकेषु हीनानां च त्रयी श्रुतिगोचरा अनधिकारित्वात् श्रवणविषयो नास्ति अतस्तेषाम् एवमनेन करिष्यमाणभारतप्रकारेण इह लोके श्रेयः भवेत् इति हेतोः मुनिना व्यासेन कृपया भारतं नामाख्यानं कृतम्। गोचरशब्दस्य नियतपुंस्त्वेन गोचर इति वा पाठः ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमिति द्वयम् ॥ हे द्विजाः एवं सदा भूतानां श्रेयसि प्रवृत्तस्यापि व्यासस्य यदा सर्वात्मकेन अनेकोद्देशवतापि कर्मणा यद्वा स्वार्थे कः । सर्वात्मना सर्वप्रकारेणापि हृदयं नातुष्यत् कृतार्थमात्मानं नामन्यत । ततः न अतिप्रसीदत् हृदयं यस्य स धर्मवित् शुचौ सरस्वत्यास्तटे विविक्ते एकान्ते स्थितः चित्ताप्रसत्तिहेतुं वितर्कयन् स्वगतमिदं प्रोवाच ॥ २६ ॥ २७ ॥ धृतेति ॥ धृतव्रतेन मया हि निर्व्यलीकेन निष्कपटेन चेतसा छन्दांसि गुरवः अग्नयश्च मानिताः पूजिताः तेषामनुशासनं च गृहीतम् ॥ २८ ॥ भारतेति ॥ यत्र भारते स्त्रीशूद्रादिभिरपि उतशब्दात्त्रैवर्णिकैश्च धर्मादिः चतुर्वर्गः दृश्यते । तस्य भारतस्य व्यपदेशेन मिषेण आम्नायार्थो वेदार्थश्च दर्शितः ॥ २९ ॥ अथेति ॥ अथापि तथापि बताश्चर्ये मे दैह्यः देहे भव आत्मा जीवः आत्मना स्वरूपेण विभुस्तपोज्ञानादिभिः परिपूर्णोपि असम्पन्न इव अपूर्ण इव तादात्म्यमप्राप्त इवाभाति न केवलमसम्पन्न इव । किंतु ब्रह्मवर्चसं वेदश्रवणाध्ययनाध्यापनोत्कर्षजं तेजस्तद्वान् ब्रह्मवर्चसी अपि असत्तम इवाभाति । यद्वा ब्रह्मवर्चसे साधवो ब्रह्मवर्चस्याः तेषु सत्तमोपि

एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ॥ सर्वात्मकेनापि यदा नाऽतुष्यद्धृदयं ततः ॥ २६ ॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥
वितर्कयन्विविक्तस्थ इदं प्रोवाच धर्मवित् ॥ २७ ॥ धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः ॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनम्
॥ २८ ॥ भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥ २९ ॥ अथापि बत मे दैह्यो ह्यात्मा
चैवात्मनाविभुः ॥ असंपन्न इवाभाति ब्रह्मवर्चस्यसत्तमः ॥ ३० ॥ किं वा भागवता धर्मा न प्रायेण निरूपिताः ॥ प्रियाः परमहंसानां त
एव ह्यच्युतप्रियाः ॥ ३१ ॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ॥ ३२ ॥

उशत्तम इति वा पाठः । समासान्ताभावे आर्षे विन्प्रत्ययान्तपाठे ब्रह्मवर्चस्वी अपीत्यर्थः ॥ ३० ॥ किं वेति ॥ किंवा अथवा परमहंसानां प्रियाः भागवता धर्माः प्रायेण भूयस्त्वेन न निरूपिताः । हि यतः ते एव भागवतधर्माः परमहंसा वा अच्युतस्य प्रियाः अत एवात्मा असम्पन्न इवाभाति । अत्र भक्तिरसिकाः प्राहुः । भागवतधर्मशब्देनात्र भक्तिरेव व्याख्यातुं शक्या नतु ज्ञानम् । नारदेनाग्रे भगवद्यशोवर्णनस्यैवोपदेशात् । अतः परमहंसा अपि भक्ता एव अतः पारमहंसी संहितेयमिति ज्ञानिभिरत्र स्वत्वं नारोपणीयमिति ॥ ३१ ॥ तस्येति ॥ एवम् आत्मानं खिलं न्यूनं मन्यमानस्य खिद्यतः खेदं प्राप्नुवतः परस्मैपदमार्षम् । तस्य कृष्णस्य व्यासस्य प्रागुदाहृतं सरस्वतीतीरस्थमाश्रमं नारदः अभ्यागात् । अत्र भगवदवतारत्वादसंभावितावप्यसर्वज्ञताचित्ताप्रसादौ व्यासस्य श्रीकृष्णेनैव सर्वशास्त्रशिरोमणेर्भागवतस्य प्रादुर्भावार्थमेव बलादुपपादितौ । ततो नारदोपदेशात् भागवते प्रादुर्भूते सर्वज्ञताचित्तप्रसादावुद्भावितौ ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ मुनिर्व्यासः सुरपूजितं तन्नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामास । विधिं ब्राह्मणमिव विधिवत् वच्छब्दः इवार्थस्तेन समास इत्यप्याहुः ॥ ३३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे प्रथमस्य व्यधादिमाम् ॥ ४ ॥ पञ्चमे सर्वधर्मेभ्यो हरिकीर्त्तनगौरवम् ॥ व्यासाय नारदः स्माह श्लोकास्तत्र खर्वांर्धयः ॥ चत्वांर्युवाचेति साङ्घ्रिचन्द्रैर्वीणा अनुष्टुभः ॥ ५ ॥ अथ तमिति ॥ अथ सुखम् आसीनः बृहच्छ्रवाः महायशाः वीणापाणिः मुखप्रसत्त्या स्मयन्निव यद्वा अहो महानपि मुह्यतीति विस्मयमानः इव शता आर्षः । देवर्षिः उप समीपे आसीनम् आतिथ्येऽर्घपाद्यादिभिरुपासनां कुर्वन्तमेवेति वा तं विप्रर्षिं व्यासं प्राह स्म ॥ १ ॥ पाराशर्येति ॥ हे पाराशर्य हे महाभाग भवतः शारीरः शरीराभिमानी आत्मा तेन आत्मना शरीरेण कच्चित्परितुष्यति तथा मानसः आत्मा मनोभिमानी तेन आत्मना मनसा कच्चित्परितुष्यति नो एव वा भङ्गिभेदेन व्याध्याधिराहित्यप्रश्नः ॥ २ ॥ जिज्ञासितमिति ॥ यः त्वं सर्वैरर्थैः धर्मादिभिः परिबृंहितं पूर्णं भारतं कृतवान् अतस्तस्य ते

तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजितम् ॥ ३३ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥ सूत उवाच ॥ अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः ॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥ नारद उवाच ॥ ॥ पाराशर्य महाभाग भवतः कच्चिदात्मना ॥ परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥ जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम् ॥ कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥ ३ ॥ जिज्ञासितमधीतं च यत्तद्ब्रह्म सनातनम् ॥ अथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ व्यास उवाच ॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥ ५ ॥

महत्सर्वोपकारकम् अद्भुतमपूर्वम् अपि जिज्ञासितं ज्ञातुमिष्टं धर्मादि यत्तत् सर्वं सुसम्पन्नम् एव । अपिशब्दादनुष्ठितं च । अयीति पाठे संबोधनम् । य इत्यत्र यदिति पाठे यत इत्यर्थः ॥ ३ ॥ जिज्ञासितमिति ॥ हे प्रभो यत्सनातनं नित्यं परं ब्रह्म तदपि त्वया जिज्ञासितं वेदान्तसूत्रकरणेन विचारितम् । अत्र इच्छार्थता न विवक्षिता । अन्यत्रापि क्वचित् अजिज्ञासितमद्धर्म इत्यादौ अधीतम् अधिगतमनुभवगोचरीकृतमित्यर्थः । अथापि त्वम् अकृतार्थ इव आत्मानं शोचसि तत्किमर्थमिति शेषः ॥ ४ ॥ अस्तीति ॥ त्वया उक्तम् इदं सर्वं भारतनिर्माणादि मे मम अस्ति एव तथापि मे आत्मा शारीरो मानसश्च न परितुष्यते तङर्षः । अतः वयम् अगाधो गम्भीरो बोधो यस्य तम् आत्मभवो ब्रह्मा तस्य आत्मनः देहात् भूतं जातं त्वा त्वाम् अव्यक्तमस्फुटं तस्य अपरितोषस्य मूलं पृच्छामहे तङर्षः । हे इति भिन्नं पदं वा ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

अगाधबोधतां प्रपञ्चयन्नाह—स वा इति ॥ यः गुणैः असङ्गः अनभिभूत एव सन् मनसा संकल्पमात्रेण एव विश्वं सृजति गुणैर्विश्वं सृजतीति वा अवति अत्ति च सः परावरेशः कार्यकारणयोर्नियन्ता पुराणः पुरुषः भगवान् यत् यस्माद्धेतोर्भवता उपासितः अतो वै निश्चितं भवान् समस्तं गुह्यं वेद ॥ ६ ॥ त्वमिति ॥ त्वं त्रिलोकीं पर्यटन् अर्क इव सर्वदर्शी योगबलेन प्राणवायुरिव सर्वप्राणिनामन्तश्चरः सन्नात्मसाक्षी बुद्धिवृत्तिज्ञः अतः परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य परे ब्रह्मणि धर्मतो योगेन निष्णातस्य "अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्।" इति याज्ञवल्क्यः। अवरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैर्निष्णातस्य मे अलमत्यर्थं यत् न्यूनं तद्विचक्ष्व वितर्कय ॥ ७ ॥ भवतेति ॥ भवता भगवतः अमलं यशः अनुदितप्रायं प्रायेणानुक्तमेवास्ति येनैव भगवद्यशोरहितेन केवलेन धर्मादिज्ञानेन शुष्कवेदान्तदर्शनेन वा असौ भगवान् न तुष्येत तङ्गार्षः। अहं तद्दर्शनं शास्त्रं ज्ञानं च खिलं न्यूनं मन्ये तद्दर्शनकर्त्तुस्तवापि चित्ताऽप्रसादश्चेदन्येषां का वार्त्ता ॥ ८ ॥ यथेति ॥ हे मुनिवर्य हि

स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसङ्गः ॥ ६ ॥ त्वं पर्यटन्नर्क इव त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी ॥ परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥ ७ ॥ नारद उवाच ॥ भवतानुदितप्रायं यशो भगवतोऽमलम् ॥ येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ॥ ८ ॥ यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ ९ ॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः ॥ १० ॥

यस्मात् यथा त्वया भगवन्महिमतो निकृष्टा अपि धर्मादयः अर्थाः प्राधान्येन अनुकीर्त्तिताः चकारात्तत्साधनानि च कीर्त्तितानि तथा प्राधान्येन वासुदेवस्य महिमा न अनुवर्णितः अतो भगवद्यशोऽनुदितप्रायम् ॥ ९ ॥ नेति ॥ चित्रपदं ललितपदयुक्तं विचित्रान्नादिस्थानं चापि यद्वचःकथाप्रसङ्गः कर्तृ जगदपि पवित्रयति तत् जगत्पवित्रं हरेर्यशः कर्म न प्रगृणीत अत एव यत्र उशिक् कमनीयं ब्रह्म पद्मखण्डं च क्षयो निवासो येषां ते मानसाः सत्वप्रधाने मनसि मानसाख्ये सरसि च वर्त्तमाना हंसा यतयः मरालाश्च कर्हिचित् अपि न निरमन्ति नितरां न रमन्ते तङ्भाव आर्षः। बुधाः तद्वचः वायसं तीर्थम् उच्छिष्टान्नादिपूर्णं गर्तमिव काकतुल्यानां कामिनां रतिस्थानम् उशन्ति मन्यन्ते
अत्र वचःशब्देन अग्रपद्ये वाग्विसर्गशब्देन च कथाप्रसङ्ग एवोच्यते नतु वाक्यमात्रम्। तथा सति नाभागो नभगापत्यमित्यादीनां हरिगुणरहितानां वायसतीर्थत्वं स्यात्। एवं चात्रत्याः सर्वे कथाप्रसङ्गा हरियशोङ्किताः पुराणान्तरेषु च बहवो हरियशोरहिता एवेति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वागिति ॥ अबद्धवत्यपि अपशब्दादियुक्तेपि गाढादिबन्धरहितेऽपि वा यत्र सम्यग्बन्धोपि नास्ति कुतो रसालङ्कारादिरित्यर्थः । यस्मिन् वाग्विसर्गे प्रतिश्लोकम् अनन्तस्य यशोभिरङ्कितानि नामानि भवन्ति अतएव च यत् यं वा ग्विसर्गं यानि नामानि वा साधवः शृण्वन्ति गायन्ति गृणन्ति च स चासौ वाग्विसर्गः कथाप्रसङ्गः जनानां समूहो जनता तस्या अघानां विप्लवो नाशको भवति विप्लवतेरन्तर्भावितण्यर्थादच् । अघानां विप्लवो यस्मादिति व्यधिकरणे बहुव्रीहिर्वा ॥ ११ ॥ नैष्कर्म्यमिति ॥ कर्मनिवृत्तिप्राप्यत्वान्निष्कर्मब्रह्म तदेकाकारत्वारूपत्वान्नैष्कर्म्यं निष्कर्मतारूपं निरञ्जनम् । अज्यतेऽनेन तदञ्जनमुपाधिस्तन्निवर्त्तकमपि ज्ञानमच्युते भावो भक्तिस्तद्वर्जितं चेत् अलमत्यर्थं न शोभते सम्यगपरोक्ष्याय न कल्पते तदा यत्पुनः शश्वदभद्रं साधनकाले फलकाले च दुःखरूपं काम्यं कर्म यदप्यकारणमकाम्यं तच्च तदपि कर्म ईश्वरे नार्पितं चेत् कुतः शोभेत बहिर्मुखतया सत्वशोधकत्वाभावात् । प्रेमभक्तास्तु अलमतिशयेन निरञ्जनमुपाधिरहितमपरोक्षमपि ज्ञानम् अच्युते यो भावश्चिदानन्दविग्रहत्वभावना तद्रहितं चेत् न शोभते मायाशबलतालक्षणापकर्षभावनया भक्तिसत्त्वेपि मोक्षसाधकं न भवतीत्यर्थः । भगवतोऽचिन्त्यशक्त्या नष्टस्याप्युपाधेः पुनः पुनः प्ररोहात् "जीवन्मुक्ताः प्रपद्यन्ते

तद्वाग्विसर्गो जनताऽघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः
॥ ११ ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ॥ कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्
॥ १२ ॥ अथो महाभाग भवानमोघदृक्छुचिश्रवाः सत्यरतो धृतव्रतः ॥ उरुक्रमस्याखिलबन्धमुक्तये समाधिनाऽनुस्मर तद्विचेष्टितम्
॥१३॥ ततोऽन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः ॥ न कुत्रचित्क्वापि च दुस्थिता मतिर्लभेत वाताहतनौरिवास्पदम्॥१४॥

कश्चित्संसारवासनाम् । " इत्युक्तेरिति व्याचख्युः ॥ १२ ॥ अथो इति ॥ यतो भक्तिरहितानि ज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थान्येव । अथो अतः कारणात् हे महाभाग भवान् अमोघा यथार्था दृक् धीर्यस्य शुचि शुद्धं श्रवो यशो यस्य सत्ये रतः धृतानि व्रतानि येन तादृशश्चासि अतः त्वम् अखिलस्य लोकस्य बन्धमुक्तये तव सर्वजनप्रियम् उरुक्रमस्य विचेष्टितं विविधां लीलां समाधिना चित्तैकाग्र्येण अनुस्मर स्मृत्वा वर्णयेत्यर्थः । वाक्यभेदान्मध्यमपुरुषो नानुपपन्नः ॥१३॥ तत इति ॥ तत उरुक्रमचेष्टितात् पृथक् वस्तुनि विषयादौ दृग् यस्य अत एव उरुक्रमचेष्टितात् अन्यथाऽन्यप्रकारेण यत् किंचन अर्थान्तरं विवक्षतः वक्तुमिच्छतो जनस्य तया विवक्षया कृतैः स्फुरितैर्वक्तव्यत्वेनोपस्थितैः रूपैर्नामभिश्च दुःस्थिताऽनवस्थिता सती मतिः कुत्रचित् कदाचित्क्वापि विषये वातेन आहता आघूर्णिता नौरिव आस्पदं स्थानं न लभेत तादृशवाक्यस्य विवक्षाप्यनर्थावहा किं पुनर्वचनं तदनुष्ठानं वेति भावः ॥ १४ ॥

CC-0. In Public Domain. Digitization by eGangotri

हरियशो विना भारतादिषु कृतं धर्मवर्णनमपि प्रत्युत विरुद्धं जातमित्याह—जुगुप्सितमिति॥ धर्मकृते मुनिर्विवक्षुर्भगवद्गुणानामिति विदुरोक्तरीत्या हरिधर्मग्रहणार्थमेव जुगुप्सितं निन्द्यं काम्यकर्मादिकम् अनुशासतः उपदिशतस्त्वत्तः सकाशादेव स्वभावरक्तस्य विषयेषूत्पत्तित एव रागिणो लोकस्य महान् व्यतिक्रम उपप्लवो जातः यतः यस्य तव वेदव्यासस्य वाक्यतो " देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्। " इत्यादिविधावेव धर्म इति स्थितः। आग्रहवान् इतरः प्राकृतो जनः तस्य धर्मस्य निवारणं "न कर्मणा न प्रजया" इत्यादि " सर्वधर्मान् परित्यज्य " इत्यादि वा न मन्यते गार्हस्थ्यानधिकारिविषयमेतदिति कल्पयति । तथा च तेषां वचः " तत्रैवं शक्यते वक्तुं येऽन्धपङ्ग्वादयो नराः। गृहस्थत्वं न शक्ष्यन्ति कर्त्तुं तेषामयं विधिः॥ "इत्यादि ॥१५॥ विचक्षण इति॥ विचक्षणः निपुणः कश्चिदेव निवृत्तितः सर्वक्रियानिवृत्त्या अनन्तपारस्य न अन्तः कालतः पारं च देशतः यस्य तस्य अस्य विभोः सुखं निर्विकल्पसुखात्मकं स्वरूपं वेदितुं ज्ञातुमर्हति नतु अविचक्षणः अतो हेतोः ततो भवान् प्रशस्यः "इतराभ्योपि" इति प्रथमान्तात्तसिः। त्वमिति शेषः अतोमध्यमपुरुषः। भवन्निति पाठे संबोधनम् । अनात्मनो देहाद्यभिमानिनः अतएव गुणैः सत्त्वादिभिः प्रवर्त्तमानस्य जनस्य श्रेयसे विभोश्चेष्टितं दर्शय १६

जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान्व्यतिक्रमः ॥ यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥
विचक्षणोऽस्यार्हति वेदितुं विभोरनन्तपारस्य निवृत्तितः सुखम् ॥ प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान्दर्शय चेष्टितं विभोः ॥ १६ ॥
त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ॥ यत्र क्व वा भद्रमभूदमुष्य किं को वाऽर्थ आप्तोऽभजतां स्वधर्मतः ॥१७॥
तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ॥ तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥ १८ ॥ न वै
जनो जातु कथंचनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् ॥ स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः ॥ १९ ॥

त्यक्त्वेति ॥ " सर्वधर्मान् परित्यज्य " इति वचनात् स्वधर्मं त्यक्त्वापि हरेश्चरणाम्बुजं भजन् जनः यदि अपक्व एव ततो भजनात्कथंचित्पतेत् भ्रश्येत् म्रियेत वा तदा यत्र क्व वा नीचयोनावपि अमुष्य भक्तिरसिकस्याभद्रमभूत्किं नाभूदेवेत्यर्थः। भक्तिवासनासद्भावादिति अभजताम् अभजद्भिस्तु संबन्धमात्रविवक्षया षष्ठी । केवलं स्वधर्मतः को वा अर्थः आप्तः प्राप्तः॥ १७॥तस्यैवेति॥ यत् उपरि ब्रह्मपर्यन्तम् अधः स्थावरपर्यन्तं च भ्रमताम् भ्रमद्भिर्जीवैर्न लभ्यते षष्ठी तु पूर्ववत्। कोविदो विवेकी जनस्तस्यैव भगवद्भक्तियोगस्य हेतोः प्रयतेत तत् विषयजं सुखं तु गभीररंहसा कर्मोद्बोधनसमर्थेन कालेन उद्बोधितात् अन्यतः प्राचीनकर्मण एव सर्वत्र नरकादावपि दुःखवत् लभ्यत एव। यथा दुःखं प्रयत्नं विनापि लभ्यते तद्वत् अतो विषयसुखलाभाय यत्नमकृत्वा भक्त्यै यत्नः कार्यः॥१८॥ न वै इति॥ अङ्ग हे मुने मुकुन्दसेवी जनो जातु कदाचित्कथंचन कुयोनिगतोपि अन्यवत् केवलकर्मठो यथा संसृतिमाव्रजति तथा संसृतिं न वै आव्रजेत् नैवाविशेत्। यतः असौ जनः रसग्रहः भक्तिरसग्राही अतः मुकुन्दाङ्घ्रेरुपगूहनमालिङ्गनं पुनः पुनः स्मरन् विहातुं नेच्छेत् १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमिति ॥ इदं विश्वं हि भगवानिव इव एवार्थे भगवानेवेत्यर्थः । यतो निर्विकाराद् भगवतो जगतः स्थाननिरोधसंभवाः स्थितिलयोत्पादा भवन्ति स भगवांस्तु तस्मादितरः अधिकदेशवृत्तित्वात् ईश्वरात्प्रपञ्चो न पृथक् ईश्वरस्तु प्रपञ्चात् पृथगित्यर्थः । यद्वा इदं विश्वं भगवान् इतर इव यः सजीवोपि भगवान् तद्व्यतिरिक्तश्चेतनाचेतनः प्रपञ्चो नास्ति भक्तास्तु इदं विश्वं भगवानिव सदिव चेतनमिवेति नतु भगवानेवेत्यर्थ इत्याहुः तद्धि भवान् स्वयमेव वेद तथापि वै निश्चितं भवतस्तव प्रादेशमात्रमेकदेशमात्रम् "आचार्यवान्पुरुषो वेदे इत्यादिश्रुत्यर्थसंपादनाय प्रदर्शितम् ॥ २० ॥ त्वमिति ॥ हे अमोघदृक् त्वम् आत्मानं परस्य पुंसः परमात्मनः कलामंशभूतम् अजमपि जगतः शिवाय प्रजातम् आत्मना स्वयमेवावेहि तत्तस्मात् महानुभावस्य हरेरभ्युदयः पराक्रमः अधि अधिकं गण्यतां निरूप्यताम् ॥ २१ ॥ इदं हीति ॥ यत् उत्तमश्लोकस्य हरेर्गुणानामनुवर्णनं तत् इदमेव हि पुंसः तपसः श्रुतस्य शास्त्रश्रवणस्य वा स्विष्टस्य सम्यक्यजनस्य सूक्तस्य सद्वचनस्य बुद्धिदत्तयोः ज्ञानदानयोः अविच्युतः नित्योर्थः फलं कविभिर्निरूपितः

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः ॥ तद्धि स्वयं वेद भवांस्तथाऽपि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥ २० ॥ त्वमात्मनात्मानमवेह्यमोघदृक्परस्य पुंसः परमात्मनः कलाम् ॥ अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोऽधिगण्यताम् ॥ २१ ॥ इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ॥ अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥ २२ ॥ अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् ॥ निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥ २३ ॥ ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि ॥ चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥ २४ ॥ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुञ्जे तदपास्तकिल्बिषः ॥ एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ॥ २५ ॥

नान्यत् श्रुतादौ भावे निष्ठा । सर्वशास्त्रवाक्यानां भगवत्येव तात्पर्यात् ॥ २२ ॥ अहमिति ॥ हे मुने अहं पुरा पूर्वकल्पे अतीतभवे पूर्वजन्मनि वेदवादिनां कस्याश्चन दास्याः सकाशात् अभवं जात आसं तथा बालक एवाहं प्रावृषि वर्षोपलक्षिते चातुर्मास्ये निर्विविक्षतां निर्वेशमेकत्र वासं कर्त्तुमिच्छतां योगिनां शुश्रूषणे निरूपितः नियुक्तः ॥ २३ ॥ ते इति ॥ यद्यपि ते मुनयो योगिनः तुल्यदर्शनाः शुश्रूषकेषु अशुश्रूषकेषु च समदृष्टयस्तथापि अपेतान्यखिलानि चापलानि यस्मात्तस्मिन् दान्ते नियतेन्द्रिये अधृतक्रीडनके त्यक्तक्रीडासाधने अनुवर्तिनि अनुकूले अल्पभाषिणि शुश्रूषमाणे अर्भके बाले मयि स्वाभाविककृपालुतया कृपां चक्रुः ॥ २४ ॥ उच्छिष्टेति ॥ तैर्वेदवादिभिर्द्विजैः अनुमोदितोऽनुज्ञातोहम् उच्छिष्टस्य लेपान् पात्रलग्नान् सकृत् भुञ्जे स्म तेषां नित्यमेकवारभोजित्वात् अहमपि नित्यं सकृत् भुक्तवान् तेन भोजनेनापास्तकिल्बिषो जातः । एवं प्रवृत्तस्य विशुद्धचेतसो मे तेषां धर्मे परमेश्वरभजने एवात्मनो मनसो रुचिः प्रजायते स्मेत्यनुषङ्गः । यद्वा अन्यस्यापि एवंप्रवृत्तस्य तद्धर्म एवात्मरुचिः प्रजायते ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति ॥ अंग हे मुने तत्रान्वहं प्रतिदिनं मनोहराः कृष्णकथाः प्रगायतां तेषाम् अनुग्रहेण ताः कथाः आसमन्तात् अशृणवं श्रुतवानस्मि । श्रद्धया ताः कथाः विशृण्वतः मे अनुपदं प्रतिक्षणं मम प्रियं श्रवो यस्य तस्मिन् हरौ रुचिरभवत् । अतो ममेत्यस्य न पौनरुक्त्यम् । मे श्रद्धया ममैव स्वतःसिद्धया नतु बलाज्जनितया इति वान्वयः ॥ २६ ॥ तस्मिन्निति ॥ हे महामुने तदा तस्मिन् प्रियश्रवसि भगवति लब्धरुचेर्ममास्खलिता अप्रतिहता मतिरभवदित्यनुषङ्गः । यया मत्या अहं परे प्रपञ्चातीते ब्रह्मरूपे मयि सदसत् स्थूलं सूक्ष्मं चैतच्छरीरं स्वमायया स्वाविद्यया कल्पितं नतु वस्तुतोऽस्तीति तत्क्षणमेव अपश्ये अपश्यमिति तङ्गार्षः । प्रेमभक्तास्तु यया मत्या स्वमायया हेतुना वर्त्तमानं यदेतत् सदसत् स्थूलं सूक्ष्मं चशरीरं तद्ब्रह्मणि श्रीकृष्णविषय एव कल्पितमपश्यम् । स्थूलं शरीरं भगवत्प्रणत्यादौ सूक्ष्मं श्रवणदर्शनादिषु इति व्याचख्युः ॥ २७ ॥ एवं शुद्धे त्वंपदार्थे ज्ञाते देहादिकृतविक्षेपनिवृत्तये तत्कारणभूतरजस्तमोनिवर्त्तिका दृढा भक्तिर्जातेत्याह—इत्थमिति ॥ इत्थं महात्मभिर्मुनिभिर्योगिभिः संकीर्त्यमानम् अमलं

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ॥ ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभवद्रुचिः ॥ २६ ॥
तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमाययाऽपश्ये मयि ब्रह्मणि कल्पितं परे ॥ २७ ॥
इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलम् ॥ संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ताऽऽत्मरजस्तमोपहा ॥ २८ ॥
तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः ॥ श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च ॥ २९ ॥ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदि-
तम् ॥ अन्ववोचन्गमिष्यन्तः कृपया दीनवत्सलाः ॥ ३० ॥ येनैवाहं भगवतो वासुदेवस्य वेधसः ॥ मायानुभावमविदं येन गच्छ-
न्ति तत्पदम् ॥ ३१ ॥

हरेर्यशः अनुसवं त्रिकालं शरत्प्रावृषिकौ द्वौ ऋतू व्याप्य विशृण्वतो मे मम आत्मनां जीवानां रजस्तमसी अपहन्तीति सा भक्तिः प्रवृत्ताऽभूत् ॥ २८ ॥ तस्येति द्वयम् ॥ दीनवत्सलाः चातुर्मास्यानन्तरं गमिष्यन्तस्ते योगिनः एवमुक्तप्रकारेण भगवत्यनुरक्तस्य प्रश्रितस्य नम्रस्य हतैनसः नष्टपापस्य श्रद्दधानस्य दान्तस्य जितेन्द्रियस्य अनुचरस्य शुश्रूषमाणस्य तस्य शुद्धत्वंपदार्थस्य बालस्य मे ममोपरि कृपया यत्साक्षात् भगवता ब्रह्मणे उदितं गुह्यतमं ज्ञानं भागवताख्यं शास्त्रं तत् अन्ववोचन् उपदिष्टवन्तः । साधनभूतधर्मतत्त्वज्ञानं गुह्यं तत्साध्यं विविक्तात्मज्ञानं गुह्यतरं तत्प्राप्येश्वरज्ञानं गुह्यतमम् ॥ २९ ॥ ३० ॥ येनेति ॥ येन ज्ञानेन एव अहं वेधसः जगत्कर्त्तुः भगवतो वासुदेवस्य मायाया अनुभावम् अविदं लब्धवान् ज्ञातवान् "विद्लृ, लाभे" येन च तस्य भगवतः पदं स्वरूपं वैकुण्ठाख्यं वा गच्छन्ति तदन्ववोचन्निति ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदिति ॥ हे ब्रह्मन् यत् ईश्वरे सर्वनियन्तरि ब्रह्मणि अप्रच्युतपूर्णरूपे भगवति कर्म भावितं समर्पितं तदेतत् तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्त्तकं सत्वशोधकं संसूचितम् ॥३२॥ संसारहेतोरपि कर्मणस्तापत्रयनिवर्त्तकत्वं सामग्रीभेदेन सदृष्टान्तमाह—आमय इति ॥ हे सुव्रत यथा भूतानां यः आमयो रोगः येन घृतादिना जायते तदेव केवलमामयं रोगकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्त्तयतीत्यर्थः। किंतु चिकित्सितं द्रव्यान्तरैर्भावितं सत्पुनात्येव पुनातिरत्र निवर्त्तनार्थः। यद्वा य आमयो येन घृतादिना जायते तदेव घृतादि द्रव्यं चिकित्सितम् औषधान्तरभावनया चिकित्सारूपतां नीतं सत् आमयं न पुनाति न रक्षति नाशयतीत्यर्थः। पुनातिरत्र रक्षणार्थे। चिकित्सितमिति चिकित्साशब्दात्तत्करोतीति णिच् ततः क्तः ॥ ३३ ॥ दार्ष्टान्तिके योजयति—एवमिति ॥ एवमेव सर्वे नित्याः काम्या नैमित्तिकाश्च क्रियायोगाः स्वतः नृणां संसृतेर्हेतवः अपि ते एव परे परमेश्वरे कल्पिताः समर्पिताः सन्तः आत्मविनाशाय कर्मनिवृत्तये कल्पन्ते समर्था भवन्ति । अत्र च प्रथमं महत्सेवा ततश्च तत्कृपा ततः तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं ततो भगवति रतिः तया च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिः ततो भगवत्तत्त्वज्ञानं ततस्तत्कृपया सर्वज्ञत्वादिभगवद्गुणाविर्भाव इति क्रमो दर्शितः इति

एतत्संसूचितं ब्रह्मं स्तापत्रयचिकित्सितम् ॥ यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् ॥ ३२ ॥ आमयो यश्च भूतानां जायते येन सुव्रत ॥ तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ॥ ३३ ॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ॥ त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥ ३४ ॥ यदत्र क्रियते कर्म भगवत्परितोषणम् ॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥ ३५ ॥ कुर्वाणा यत्र कर्माणि भगवच्छिक्षयाऽसकृत् ॥ गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च ॥ ३६ ॥ ॐ नमो भगवते तुभ्यं वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ ३७ ॥

स्वामिचरणाः । सारार्थसन्दर्शिन्यां तु "सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः । भजनेषु स्पृहा भक्तिरनर्थापगमस्ततः ॥ स्यान्निष्ठा रुचिरासक्ती रतिः प्रेमा ततः परम् ॥" इति द्वादश भूमिकाः अत्रोक्ताः । ततो दर्शनसाक्षान्माधुर्य्यानुभवौ उत्तराध्याये वक्ष्येते इत्युक्तम् ॥ ३४ ॥ यदिति ॥ हि यस्मात् हेतोः अत्र कर्मभूमौ भगवदर्पितत्वाद्भगवत्परितोषणं निष्कामं यत् कर्म क्रियते यत् भक्तियोगसमन्वितं ज्ञानं तत् तस्य भगवत्परितोषणकर्मण एवाधीनम् । भगवदर्पितकर्मणाऽन्तःकरणशुद्धिस्ततो भक्तिस्ततो वासनानिवर्त्तकं ज्ञानमिति क्रमः ॥ ३५ ॥ कुर्वाणा इति ॥ यत्र यदा भगवतः शिक्षया "यत्करोषि यदश्नासि" इत्यादिरूपया कर्माणि कुर्वाणा भवन्ति तदा श्रीकृष्णस्य गुणनामानि असकृत् मुहुर्मुहुर्गृणन्ति श्रीकृष्णमनुस्मरन्ति च । अतो भगवदर्पितं कर्म भक्तियुक्तं ज्ञानं जनयतीति भावः ॥ ३६ ॥ नम इति ॥ वयं भगवते वासुदेवाय तुभ्यं नमः नमनं धीमहि मनसा कुर्वीमहि आर्षः प्रयोगः । तथा प्रद्युम्नाय अनिरुद्धाय संकर्षणाय च नमः धीमहि इत्यनुषङ्गः । प्रणवादिस्त्रयस्त्रिंशदक्षरात्मको मन्त्रः इति सारार्थसन्दर्शिनी । मान्त्रिकास्तु वासुदेवादिभिः ककारादीनां ग्रहणात् क्लीमिति कामबीजरूपो मन्त्रो बोध्यते इत्याहुः ॥ ३७ ॥

Nepal Sanskrit University. Digitized by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इति मन्त्रमूर्त्तिं मन्त्रध्यानोक्तमूर्त्तिं वस्तुतस्तु अमूर्त्तिकं यज्ञपुरुषं भगवन्तं यः मूर्त्तीनां वासुदेवादीनाम् अभिधानेन नामचतुष्टयेन यजते पञ्चरात्रोक्तविधिना वासुदेवाय नमः प्रद्युम्नाय नमः इत्येवं षोडशोपचारैर्यः पूजयेत् स पुमान् सम्यग्दर्शनः सम्यज्ज्ञानवान् भवति। अमूर्त्तिकमित्यस्य मन्त्रोक्तव्यतिरिक्तमूर्त्तिशून्यमिति स्वामिचरणाः। प्राकृतमूर्त्तिरहितमिति भक्ताः ॥ ३८ ॥ इममिति ॥ हे ब्रह्मन् केशवः इमं पूर्वोक्तं स्वस्य निगममुपदेशं मयाऽनुष्ठितम् अवेत्य ज्ञात्वा मे मह्यं ज्ञानं स्वानुभवम् ऐश्वर्यमणिमादिकं स्वस्मिन् भावं प्रेम भक्तिं चादात् ॥ ३९ ॥ त्वमपीति ॥ अदभ्रमनल्पं श्रुतं यस्य हे अदभ्रश्रुत येन विश्रुतेन बुद्धेन विदां विदुषां बुभुत्सितं बोद्धुमिच्छा समाप्यते पुनर्जिज्ञासा न भवेत् तत् विभोर्भगवतः विश्रुतं यशः त्वमपि आख्याहि कथय । अन्यथा प्रकारान्तरेण तु दुःखैर्मुहुः अर्दितात्मनां पीडितमनसां जीवानां संक्लेशस्य निर्वाणं शान्तिं विवेकिनः न उशन्ति न मन्यन्ते ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्याध्याये पञ्चमे व्यधात् ॥ ५ ॥ षष्ठे तु

इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकम् ॥ यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥ ३८ ॥ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम् ॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः ॥ ३९ ॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम् ॥ आख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा ॥ ४० ॥ इति श्रीभागवते प्रथमस्कन्धे व्यासनारदसंवादे पञ्चमोऽध्यायः ॥ ५ ॥ सूत उवाच ॥ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च ॥ भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः ॥ १ ॥ व्यास उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ॥ वर्तमानो वयस्याऽऽद्ये ततः किमकरोद्भवान् ॥ २ ॥ स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः ॥ कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरम् ॥ ३ ॥

नारदः स्माह हरिकीर्त्तनजं स्वकम् ॥ सद्भाग्यं पूर्वजन्मोत्थं पद्यान्यत्राङ्कवह्नयः ॥ अनुष्टुभस्त्वभवेर्दां उवाचेति चतुष्टयम् ॥ ६ ॥ एवमिति ॥ हे ब्रह्मन् ! शौनक सत्यवतीसुतो भगवान् व्यासः देवर्षेर्जन्म कर्म च एवं निशम्य भूयः पुनरपि तं नारदं पप्रच्छ ॥ १ ॥ भिक्षुभिरिति ॥ तव विज्ञानस्य आदेष्टृभिः उपदेशकैः भिक्षुभिः विप्रवसिते विप्रोषिते दूरदेशगमने कृते सति भावे क्तः सम्प्रसारणाभाव आर्षः । आद्ये बाल्ये वयसि वर्त्तमानः भवान् ततोऽनन्तरं किम् अकरोत् त्वच्छिष्योहमपि तथा चिकीर्षामीति भावः ॥ २ ॥ स्वायम्भुवेति ॥ हे स्वायम्भुव स्वयंभुवः ब्रह्मणः पुत्र ते तव परं बाल्यादुत्तरं वयः आयुः कया वृत्त्या वर्त्तितं व्यतीतं रामो राज्यमचीकरदित्यादाविव स्वार्थे णिच् ततः क्तः । ते त्वया परं वयः कथं नीतमिति स्वामिचरणाः । तत्र त्वयेत्यर्थे ते इति सुबन्तप्रतिरूपकमव्ययम् । मरणकाले प्राप्ते इदं दासीपुत्रभूतं कलेवरं शरीरं च कथम् उदस्राक्षीः त्यक्तवानसि ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक्कल्पेति ॥ हे सुरसत्तम एष कल्पपर्यन्तः कालः ते तव प्राक्कल्पः पूर्वकल्पः विषयो यस्याः तामेतां जन्मवृत्तान्तानुसन्धानरूपां स्मृतिं कथं न व्यवधात् व्यवधाय न खण्डितवान् अडागमाभाव आर्षः। हि यस्मात् एष कालः सर्वेषां निराकृतिर्नाशो यस्मात् ईदृशोऽस्ति वाक्यभेदान्न एष इत्यस्य पौनरुक्त्यदोषः। न ह्येवेति क्वचित् पाठः। तत्रैकवाक्यतैव ॥ ४ ॥ भिक्षुभिरिति ॥ द्वितीयश्लोकव्याख्यया व्याख्यातप्रायः अकारषम् अकार्षम्। रषयोर्विश्लेषश्छन्दोनुरोधेन ॥ ५ ॥ एकात्मजेति ॥ एक एवाहमात्मजो यस्याः सा योषित् मूढा किंकरी च मे जननी न अन्या गतिः पालनहेतुर्यस्य तस्मिन् आत्मजे मयि स्नेहस्यानुबन्धनमनुवृत्तिं चक्रे ॥ ६ ॥ सा इति ॥ मम योगक्षेमम् अप्राप्तप्राप्तिर्योगः प्राप्तस्य रक्षा क्षेमं पालनसाधनमित्यर्थः। इच्छती अपि सा अस्वतन्त्रा पराधीना अतो योगक्षेमे न कल्पा न समर्था आसीत्। हि यस्मात् लोकः यथा दारुमयी योषा स्त्री पुत्तिका यन्त्रयितुर्वशे तिष्ठति तथा ईशस्य वशे तिष्ठति ॥ ७ ॥ अहमिति ॥ दिग्देशकालेषु अव्युत्पन्नः अनभिज्ञः पञ्चहायनः पञ्चवर्षः बालकः अहं

प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम ॥ न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥ ४ ॥ नारद उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम ॥ वर्तमानो वयस्याऽऽद्ये तत एतदकारषम् ॥५॥ एकात्मजा मे जननी योषिन्मूढा च किंकरी ॥ मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबन्धनम् ॥ ६ ॥ साऽस्वतन्त्रा न कल्पाऽऽसीद्योगक्षेमं ममेच्छती ॥ ईशस्य हि वशे लोको योषा दारुमयी यथा ॥ ७ ॥ अहं च तद्ब्रह्मकुल ऊषिवांस्तदवेक्षया ॥ दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः ॥ ८ ॥ एकदा निर्गतां गेहाद्दुहन्तीं निशि गां पथि ॥ सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ॥ ९ ॥ तदा तदहमीशस्य भक्तानां शमभीप्सतः ॥ अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तराम् ॥ १० ॥ स्फीताञ्जनपदांस्तत्र पुरग्रामव्रजाकरान् ॥ खेटखर्वटवाटीश्च वनान्युपवनानि च ॥ ११ ॥

च तदवेक्षया मातृकर्तृका या ममाऽवेक्षा तया सा मां नाऽत्यजदत इत्यर्थः। तस्या मातुः स्नेहानुबन्धस्यावेक्षया कदा विरमेदिति प्रतीक्षयेत्यर्थः इति स्वामिचरणाः। तस्मिन् ब्रह्मकुले ऊषिवान् वासं कृतवान् ॥ ८ ॥ एकदेति ॥ एकदा निशि गां दुहन्तीं दुहतीं दोग्धुमित्यर्थः। नुमार्षः हेतौ शतृप्रत्ययः। गेहान्निर्गतां कृपणां दीनां तां पथि मार्गे पदा पादेन आस्पृष्टः ईषदाक्रान्तः कालेन मृत्युना चोदितः कश्चित् सर्पः अदशत् ॥ ९ ॥ तदेति ॥ तदा तत् मातुर्मरणं भक्तानां शं कल्याणम् अभीप्सतः ईशस्य अनुग्रहं मन्यमानः अहम् उत्तरां दिशं प्रातिष्ठं प्रस्थितवानस्मि। तङभावआर्षः ॥ १० ॥ स्फीतानिति चतुष्कम् ॥ एकः असहाय एवाहं स्फीतान् समृद्धान् जनपदान् देशान् तत्र जनपदेषु पुरग्रामव्रजाकरान् तत्र पुराणि राजधान्यः ग्रामाः विप्रशूद्रादिनिवासाः व्रजा गोकुलानि आकरा रत्नाद्युत्पत्तिस्थानानि तान् खेटाः कर्षकग्रामाः खर्वटा गिरितटग्रामाः नदीशैलाश्रितग्राममिलितनगराणि वा वाट्यः पूगपुष्पादीनां वाटिकास्ताः वनानि स्वतःसिद्धवृक्षाणां समूहाः उपवनानि रोपितवृक्षाणां समूहाः तानि

CC-0. In Public Domain. Digitization by eGangotri

च इभैर्गजैर्भग्ना भुजाः शाखा येषां तादृशा द्रुमा येषु तान् चित्रैर्धातुभिः स्वर्णरजताद्यैः विचित्रानद्रींश्च शिवानि भद्राणि जलानि येषां तान् जलाशयान् तडागादीन् सुरैः सेविताः चित्राः स्वनाः येषां तैः पत्ररथैः पक्षिभिः तन्नादप्रबुद्धैरित्यर्थः । विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः नलिनीः सरसीः अतियातः अतीत्य गतः सन् नानागुणदोषयुक्तेषु समदृष्टिः सन्निति तात्पर्यम् । नलवेणुशराणां स्तम्बैर्गुच्छैः कुशैः कीचकैः गह्वरं दुर्गमं वेणुजातय एव विपुलान्तरालगर्भाः कीचकाः घोरं दुःसहं प्रतिभयाकारं भयंकररूपं व्यालाः सर्पाः दुष्टगजा वा उलूकाः शिवाश्च तासामजिरं क्रीडास्थानं महद्विपिनं वनमद्राक्षम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ परिश्रान्तेति ॥ तृषा परीतः व्याप्तः बुभुक्षितश्च अत एव परितः श्रान्तानि इन्द्रियाणि आत्मा देहश्च यस्य तादृशोहं नद्या ह्रदे उपस्पृष्टः आचान्तः स्नात्वा जलं पीत्वा गतश्रमः अभूवम् ॥ १५ ॥ तस्मिन्निति ॥ निर्मनुजे तस्मिन् अरण्ये पिप्पलोपस्थे अश्वत्थमूले आस्थितः उपविष्टः अहम् आत्मना बुद्ध्या विषयव्यावृत्तमनसा वा आत्मस्थं हृदिस्थम् आत्मानं

चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् ॥ जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः ॥ १२ ॥ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥
नलवेणुशरस्तम्बकुशकीचकगह्वरम् ॥ १३ ॥ एक एवातियातोऽहमद्राक्षं विपिनं महत् ॥ घोरं प्रतिभयाकारं व्यालोलूकशिवाऽजिरम् ॥
॥ १४ ॥ परिश्रान्तेन्द्रियात्माऽहं तृट्परीतो बुभुक्षितः ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ १५ ॥ तस्मिन्निर्मनुजेऽरण्ये
पिप्पलोपस्थ आस्थितः ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिन्तयम् ॥ १६ ॥ ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा ॥ औत्कण्ठ्या-
श्रुकलाक्षस्य हृद्या सीन्मे शनैर्हरिः ॥ १७ ॥ प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः ॥ आनन्दसंप्लवे लीनो नापश्यमुभयं मुने ॥ १८ ॥
रूपं भगवतो यत्तन्मनः कान्तं शुचाऽपहम् ॥ अपश्यन् सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥ १९ ॥

परमात्मानं यथाश्रुतं मन्त्रोपदिष्टध्यानमनतिक्रम्य अचिन्तयम् ॥ १६ ॥ ध्यायत इति ॥ भावः प्रेमभक्तिस्तया निर्जितं वशीकृतं यच्चेतः तेन चरणाम्भोजमारभ्य श्रीमुखारविन्दपर्यन्तं ध्यायतः औत्कण्ठ्येन प्रेमवैवश्येन यान्यश्रूणि तेषां कलाभिर्बिन्दुभिर्युक्ते अक्षिणी यस्य तस्य मे मम हृदि हरिः शनैः क्रमेण आसीत् आविर्बभूव ॥ १७ ॥ प्रेमेति ॥ हे मुने प्रेम्णः अतिभरेणातिशयेन निर्भिन्नानि उद्भूतानि पुलकानि येषु तादृशान्यङ्गानि यस्य अतिशयेन निर्वृतः सुखी अतः आनन्दानां संप्लवे महापूरे परमानन्दे लीनो मग्नोहम् उभयमात्मानं परं च न अपश्यम् ॥ १८ ॥ रूपमिति ॥ मनसः कान्तमभीष्टं शुचा शोकस्तामपहन्तीति शुचापहं यत् भगवतो रूपमद्राक्षं तत्सहसा अपश्यन् अहं दुर्मना इव प्राप्तच्युतनिधिर्दुःखितमना जन इव वैक्लव्यात् भगवददर्शनजात् खेदात् हेतोः उत्तस्थे व्युत्थितो भग्नसमाधिरभूवमित्यर्थः । अत्रोर्ध्वकर्मरूपोत्थानाभावादनूर्ध्वकर्मणीत्यस्याप्राप्त्या आत्मनेपदम् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिदृक्षुरिति ॥ भूयः पुनरपि तद्रूपं दिदृक्षुरहं हृदि मनः प्रणिधाय स्थिरीकृत्य वीक्षमाणो ध्यायन्नपि नापश्यम् । ततश्च अवितृप्तोऽहम् आतुर इवाऽभवम् । यद्वा आतुरो रोगी वाऽवितृप्तः असंतुष्टः वीक्षमाणोप्यहं नापश्यम् ॥ २० ॥ एवमिति ॥ गिरां वाचामगोचरः संवेदनस्याविषयोपि भगवान् गम्भीरया श्लक्ष्णया मधुरया च वाचा शुचः शोकान् प्रशमयन्निव एवं विजने द्रष्टुं यतन्तम् । शतार्षः । मामाह स्म ॥ २१ ॥ हन्तेति ॥ हन्तेति सानुकम्पसंबोधनम् । भवान् अस्मिन् जन्मनि मा मां द्रष्टुं नार्हति यतः न विपक्वाः दग्धाः कषायाः मलाः कामादयो येषां तेषां कुयोगिनामनिष्पन्नयोगानाम् ईषदर्थे कुः । अहम् इह लोके दुर्दर्शः द्रष्टुमशक्यः कुयोगिनामिति शेषे षष्ठी तेन " न लोका० " इति न निषेधः ॥ २२ ॥ सकृदिति ॥ हे अनघ यत् मया सकृत् एकवारं रूपं दर्शितम् एतत् सकृद्दर्शनं तु ते तव कामाय मय्यनुरागं वर्द्धयितुमेव " क्रियार्थ० " इत्यादिना चतुर्थी । यतः मयि काम इच्छामात्रं दर्शनालाभेपि यस्य स मत्कामः साधुः शनकैः शनैः सर्वान् हृच्छयान् हृदि शेरते इति तान्

दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥ २० ॥ एवं यतन्तं विजने मामाहाऽगोचरो गिराम् ॥
गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २१ ॥ हन्ताऽस्मिञ्जन्मनि भवान्न मा द्रष्टुमिहार्हति ॥ अविपक्वकषायाणां दुर्दर्शोऽहं
कुयोगिनाम् ॥ २२ ॥ सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ ॥ मत्कामः शनकैः साधुः सर्वान्मुञ्चति हृच्छयान् ॥ २३ ॥ सत्सेवया
दीर्घया ते जाता मयि दृढा मतिः ॥ हित्वाऽवद्यमिमं लोकं गन्ता मज्जनतामसि ॥ २४ ॥ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् ॥
प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात् ॥ २५ ॥ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिङ्गमलिङ्गमीश्वरम् ॥ अहं च तस्मै महतां मही-
यसे शीर्ष्णाऽवनामं विदधेऽनुकम्पितः ॥ २६ ॥

विषयवासनाख्यान् कामान् मुञ्चति ॥ २३ ॥ सत्सेवयेति ॥ अदीर्घयापि सतां सेवया मयि ते तव मतिर्दृढा जाता अतः अवद्यं निन्द्यं शूद्रयोनिरूपम् इमं लोकं देहं हित्वा मज्जनतां मत्पार्षदरूपतां गन्तासि ॥ २४ ॥ मतिरिति ॥ ममानुग्रहात् प्रसादात् मयि निबद्धा इयं मतिः कर्हिचित् कदाचिदपि न विपद्येत न नश्येत् तथा मदनुग्रहादेव प्रजानां सर्गे सृष्टौ निरोधे संहारेपि प्रजासर्गस्य निरोध इति वा स्मृतिः प्राग्जन्मस्मृतिशक्तिश्च न विपद्येत ॥ २५ ॥ एतावदिति ॥ एतावत् वचनम् उक्त्वा नभसि लिङ्गं मूर्तिर्यस्य तन्नभोलिङ्गं सन्निहितमपि न लिङ्ग्यते न ज्ञायते इति अलिङ्गम् ईश्वरं सर्वनियन्तृ तत् शास्त्रप्रसिद्धं महद्भूतं परमात्मरूपं कर्तृ उपरराम तूष्णींबभूव । एतस्य महतो भूतस्य निश्वसितमित्यादि वेदे महद्भूतमिति परमात्मनि प्रयुज्यते तेन अनुकम्पितः अहं च महतां महीयसे महत्तमाय तस्मै अदृष्टाय शीर्ष्णा अवनामं प्रणामं विदधे कृतवान् बहूनामप्येकस्यातिशये ईयसुन् प्रयुज्यते । " मुहुर्महिम्ना महसां महीयसाम् इति माघः । आर्षः शीर्षन्शब्दः ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

नामानीति ॥ अनन्तरं चाहं हतत्रपः त्यक्तलज्जः अनन्तस्य नामानि पठन् अनवरतं गृणन् नामपाठोपस्थापितानि गुह्यानि भद्राणि च कृतानि भगवच्चरितानि स्मरन् तुष्टमनाः गतस्पृहः नानादेशे ईक्षणेच्छारहित एव यदृच्छया गां भूमिं पर्यटन् कालं "गन्ता मज्जनतामसि" इति भगवदुक्तं प्रतीक्षन् आर्षः शता। विमदः अहं पार्षदो भविष्यामीति मदरहितः विमत्सरः मत्सदृशोऽन्यो माभूदिति मत्सररहितश्चाभूवमिति ॥ २७ ॥ एवमिति ॥ हे ब्रह्मन् एवं कृष्णे मतिर्यस्य तस्य असक्तस्य आसक्तिरहितस्य अमलात्मनः निर्मलचित्तस्य मम काले स्वावसरे यथा विद्युत् विशेषेण द्योतमाना सौदामनी तडित् प्रादुर्भवति तथा सहसा कालो मृत्युः प्रादुरभूत् ॥ २८ ॥ प्रयुज्यमान इति ॥ "गन्ता मज्जनतामसि इति या भागवती भगवत्पार्षदरूपा शुद्धा सत्त्वमयी तनुः प्रतिश्रुता तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने सति आरब्धं यत्कर्म तन्निर्वाणं समाप्तं यस्य स पाञ्चभौतिकः पञ्चभूतनिर्मितः देहः न्यपतत् भगवत्पार्षदताप्राप्तिकाले भौतिको देहोऽपतदित्यर्थः। तेन पार्षददेहस्य शुद्धत्वनित्यत्वादिकं ज्ञापितम्। प्रेमभक्तानां प्रारब्धकर्मापि साधनदशायामेव नश्यतीति भक्ताः ॥ २९ ॥ कल्पान्त इति ॥ कल्पस्य ब्रह्मदिनस्यान्ते इदं त्रैलोक्यमादाय उपसंहृत्य उदन्वत एकार्णवस्य अम्भसि

नामान्यनन्तस्य हतत्रपः पठन्गुह्यानि भद्राणि कृतानि च स्मरन् ॥ गां पर्यटंस्तुष्टमनागतस्पृहः कालं प्रतीक्षन्विमदो विमत्सरः ॥ २७ ॥
एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः ॥ कालः प्रादुरभूत्काले विद्युत्सौदामनी यथा ॥ २८ ॥ प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् ॥
आरब्धकर्मनिर्वाणो न्यपतत्पाञ्चभौतिकः ॥ २९ ॥ कल्पान्त इदमादाय शयानेऽम्भस्युदन्वतः ॥ शिशयिषोरनुप्राणं विविशेऽन्तरहं विभोः
॥ ३० ॥ सहस्रयुगपर्यन्त उत्थायेदं सिसृक्षतः ॥ मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे ॥ ३१ ॥ अन्तर्बहिश्च लोकांस्त्रीन्पर्येम्यस्कन्दितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥ ३२ ॥

शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोर्विभोर्ब्रह्मणः अन्तः मध्यम् अनु प्राणं निश्वासेन सह अहं विविशे प्रविवेश तदुक्तं। "ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः। अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुना ॥" इति कौर्मोक्तेः। स्वायनेम्भसीति पाठे स्वस्यायने अम्भसि शिशयिषोर्ब्रह्मण इति श्रीनारायणेनाऽभेदविवक्षयोक्तमित्यवगन्तव्यम् ॥ ३० ॥ सहस्रेति ॥ सहस्रयुगपरिमितब्रह्मनिशायाः पर्यन्ते समाप्तौ पूर्वकल्पान्ते एतत्कल्पस्यादावित्यर्थः। उत्थाय इदं जगत् सिसृक्षतः ब्रह्मणः प्राणेभ्यः इन्द्रियेभ्यः मरीचिर्मिश्रः मुख्यो येषां ते मरीच्याद्या इत्यर्थः। ऋषयः अहं नारदश्च जज्ञिरे परत्वादुत्तमपुरुषे जज्ञिमह इति वक्तव्ये जज्ञिर इत्यार्षम् ॥ ३१ ॥
अन्तरिति ॥ कर्मिणस्त्रिलोक्या बहिर्न यान्ति तपआदिना ब्रह्मलोकं गतास्त्वन्तर्न यान्ति कर्मबन्धभयात्। अहं तु महाविष्णोः अनुग्रहात् अस्कन्दितमस्खलितं ब्रह्मचर्यादिरूपं व्रतं यस्य सः क्वचिदपि न विघातो यस्यास्तथाविधा गतिर्यस्य तथाविधश्च सन्नन्तर्बहिश्च त्रीन् लोकान् पर्येमि पर्यटामि ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवदत्तामिति ॥ देवेन भगवता स्वयं दत्तां स्वराः निषादर्षभगान्धारषड्जमध्यमधैवतपञ्चमाख्याः सप्त त एव ब्रह्मानन्दाभिव्यञ्जकत्वाद् ब्रह्म तेन विभूषितामिमां मत्पाणिस्थां वीणां मूर्च्छयित्वा स्वराणां मूर्च्छना संगीतशास्त्रप्रसिद्धा तां प्रापय्य हरिकथां गायमानोऽहं चरामि शानजार्षः चानश् वा ॥ ३३ ॥ प्रगायत इति ॥ स्ववीर्याणि प्रकर्षेण गायतो मे चेतसि प्रियश्रवाः प्रियं श्रवो यशो यस्य सः तीर्थपादः तीर्थानि पादे यस्य सः भगवान् आहूत इव शीघ्रं मे मम चेतसि दर्शनं याति दृष्टो भवति ॥ ३४ ॥ एतद्धीति ॥ हीति अवधारणे । एतत् हरेः चर्याणां लीलानामनुवर्णनं महद्भिः कृतं यत् तत् मात्राः शब्दादयो विषयास्तेषां स्पर्शाः भोगास्तेषामिच्छया मुहुः आतुराणि चित्तानि येषां तेषां जनानां भवसिन्धोः संसारसमुद्रस्य प्लवः पोतः दृष्टः न केवलं श्रुतिप्रामाण्येन स्वीकृतः किन्त्वन्वयव्यतिरेकाभ्यां दृष्ट एवेत्यर्थः ॥ ३५ ॥ यमादिभिरिति ॥ मुहुः कामलोभाभ्यां हतो मलिनीकृत आत्मा मनः यद्वत् यथा मुकुन्दसेवया अद्धा अप्रयासेन शाम्यति कामक्रोधादिसंतापरहितो भवति तथा योगस्य पथिभिर्मार्गैर्यमादिभिर्न शाम्यति कथंचिन्मुकुन्दसेवामात्रेण शाम्यति किं पुनस्तद्गुणवर्णनेनेति भावः । इह भक्तिरसिका आहुः । भवतानुदितप्रायमित्यादिना तथात्माद्धा न शाम्यतीत्यन्तेन ग्रन्थेन भक्तेरेव निस्तारोपायत्वेनोक्तत्वेपि तस्यास्त्रैविध्यं दृश्यते केवलत्वं प्राधान्यं गुणभावश्च त्यक्त्वा स्वधर्ममित्यादिषु अहं पुरातीतभव इत्यादिषु च केवलत्वम् "कुर्वाणा यत्र

देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम् ॥ मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम् ॥ ३३ ॥ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः ॥ आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥ ३४ ॥ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ॥ भवसिन्धुप्लवो दृष्टो हरिचर्यानुवर्णनम् ॥ ३५ ॥ यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुन्दसेवया यद्वत्तथात्माऽद्धा न शाम्यति ॥ ३६ ॥

कर्माणि भगवच्छिक्षयासकृत् । गृणन्ति गुणनामानि कृष्णस्यानुस्मरंति च ॥" इत्यत्र प्राधान्यम् । "यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥" इत्यत्र गुणभावः । तत्र केवलत्वे निष्कामाधिकारिणो भक्तिरनन्या शुद्धा निर्गुणा उत्तमा अकिंचनेत्यादिनाम्नी प्रेमफला भवति । प्राधान्ये कर्ममिश्रा ज्ञानमिश्रा योगमिश्रेत्यादिनाम्नी भक्तिः शान्ताधिकारिणो रतिफला कस्यचिन्मोक्षफलापि भवति दास्यादिभावात् साधुसङ्गवशात् कस्यचिद्दास्याद्यभिलाषिणो भक्तेरतिप्राधान्ये सत्यैश्वर्यप्रधानदास्यादिभावप्रदा प्रेमफलापि भवति । गुणभावे तु स्वीयं नामफलं चाप्रकाशयन्ती कर्मज्ञानयोगादीनां तया विना स्वफलं सम्यक् साधयितुमसमर्थानां तत्र साहाय्यमात्रं कुर्वती स्वयं तटस्थेव भवति । ततश्च भक्तिमिश्रं कर्म ज्ञानं योगश्च मोक्षं साधयतीत्यतोत्र शास्त्रे भक्तिर्द्विविधैव केवला प्रधानीभूता चेत्येतत् सर्वं नारदेनोपदिष्टो व्यासो द्वादशसु स्कन्धेषु प्रपञ्चयिष्यतीति ज्ञेयम् । पूर्वं भक्तेराविर्भावप्रकारो वृद्धिः फलं तद्वतो जनस्य चेष्टा प्रारब्धकर्म नाशः साधकदेहत्यागप्रकारोऽकर्मारब्धचिन्मयदेहप्राप्तिश्चेति रहस्यं वेदान्तदर्शिभिरप्यगम्यम् ॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्वमिति ॥ हे अनघ मे मम जन्मकर्मणो रहस्यं भवतः आत्मनोन्तःकरणस्य तोषणं तच्च यत्त्वयाऽहं पृष्टस्तदिदं सर्वं मयाऽऽख्यातम् ॥ ३७ ॥ एवमिति ॥ यदृच्छया चरति यादृच्छिकः हेतुशून्यगमनादिक्रियः भगवान् नारदो मुनिः वासव्या उपरिचरवसुवीर्यजातायाः सत्यवत्याः सुतं व्यासमेवं पूर्वोक्तं सर्वं सम्भाष्य कथयित्वा आमन्त्र्य गच्छामीति पृष्ट्वा वीणां रणयन् ययौ । अत्र भक्तिर्यादृच्छिकी भक्तोपि यादृच्छिकस्तत्सङ्गोपि व्यासस्य यादृच्छिक इति भक्तिमात्रस्य यादृच्छिकत्रयी जीवातुः ॥ ३८ ॥ अहो इति ॥ अयं देवर्षिर्धन्यः कृतार्थ एव यत् यतः शार्ङ्गधन्वनो भगवतः कीर्तिं गायन् माद्यन् स्वयं हृष्यन् तापत्रयेण आतुरं व्याकुलं सर्वमिदं जगदपि तन्त्र्या वीणया रमयति सुखयति ॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वयार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमषष्ठेऽध्याये व्यधादिमाम् ॥ ६ ॥ सप्तमे सुप्तबालानां वधात्क्रुद्धेन जिष्णुना ॥ दण्डनं द्रोणपुत्रस्य श्लोकास्तत्राष्टमार्गणाः ॥ अनुष्टुभः सार्द्धषष्टिरुवाचदशकं तथा ॥ ७ ॥ निर्गत इति ॥ हे सूत स्वाश्रमान्नारदे निर्गते सति तस्याभिप्रेतं भग-

सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयाऽनघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम् ॥ ३७ ॥ सूत उवाच ॥ एवं संभाष्य भगवान्नारदो वासवीसुतम् ॥ आमन्त्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ॥ ३८ ॥ अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत् ॥ ३९ ॥ इति श्रीभागवते प्रथमस्कन्धे व्यासनारदसंवादे षष्ठोऽध्यायः ॥ ६ ॥ शौनक उवाच ॥ निर्गते नारदे सूत भगवान्बादरायणः ॥ श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥ १ ॥ सूत उवाच ॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे ॥ शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः ॥ २ ॥ तस्मिन् स्वआश्रमे व्यासो बदरीखण्डमण्डिते ॥ आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयम् ॥ ३ ॥ भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले ॥ अपश्यत्पुरुषं पूर्वं मायां च तदपाश्रयाम् ॥ ४ ॥

वल्लीलाप्रतिपादकग्रन्थकरणं श्रुतवान् स विभुः भगवान् बादरायणः व्यासस्ततस्तदनन्तरं किमकरोत् ॥ १ ॥ ब्रह्मनद्यामिति ॥ ब्रह्मदेवत्यायां नद्यां ब्रह्मणां वेदब्राह्मणादीनां वा नद्यां ब्राह्मणैराश्रितायां वा नद्यां सरस्वत्यां सप्तमी षष्ठ्यर्था । तस्याः पश्चिमे तटे ऋषीणां सत्राणि कर्माणि वर्द्धयतीति तथाभूतः शम्या युगकीलाः प्रास्यन्ते परिध्यर्थे क्षिप्यन्तेऽस्मिन्निति शम्याप्रास इति प्रोक्तः प्रसिद्धो व्यासस्याश्रमोऽस्तीति शेषः ॥ २ ॥ तस्मिन्निति ॥ बदरीणां खण्डेन समूहेन मण्डिते शोभमाने तस्मिन् स्वे स्वकीये आश्रमे अप उपस्पृश्य आचमनं कृत्वाऽऽसीनः व्यासः " समाधिनानुस्मर तद्विचेष्टितम् " इति नारदोपदेशात् स्वयमवधानेन मनः प्रणिदध्यौ स्थिरीकृतवान् ॥ ३ ॥ भक्तियो-गेनेति ॥ भक्तियोगेन अमले निर्मले अत एव सम्यक् प्रणिहिते निश्चले मनसि पूर्णं पूर्वमिति वा पाठः । पुरुषमीश्वरम् अपश्यत् तदपाश्रयां तदधीनां मायां चापश्यत् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशमायाकृतां च जीवानां संसृतिमपश्यदित्याह—ययेति ॥ यया मायया संमोहितः स्वरूपावरणेन विक्षिप्तो जीवः परोऽपि वस्तुतो मायागुणत्रयाद्व्यतिरिक्तोपि आत्मानं त्रिगुणात्मकं मनुते तत्कृतं गुणत्रयाभिमानकृतमनर्थं कर्तृत्वादिकं चाभिपद्यते प्राप्नोति ॥ ५ ॥ अनर्थेति ॥ अनर्थस्योपशमं निवर्तकं च अधोक्षजे साक्षाद्भक्तियोगमपश्यत् । एतत्सर्वं दृष्ट्वाऽतः स्वयं विद्वान् जानन् एतदजानतो लोकस्योपकाराय सात्वतसंहितां श्रीभागवताख्यां चक्रे । अनेन श्लोकत्रयेण संक्षेपतो भागवतार्थो दर्शितः । तथा हि विद्याशक्त्या मायानियन्ता नित्याविर्भूतपरानन्दस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः तन्मायया सम्मोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा जीवः तस्य चेश्वरभक्त्या लब्धज्ञानेन मोक्षः इति तदुक्तं विष्णुस्वामिना "ल्हादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः । स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः ॥ स ईशो यद्वशे माया स जीवो यस्तयार्दितः । स्वाविर्भूतपरानन्दः स्वाविर्भूतसुदुःखभूः ॥ स्वादृगुत्थविपर्यासभवभेदजभीशुचः । यन्मायया जुषन्नास्ते तमिमं नृहरिं स्तुमः ॥" इत्यादि ॥ ६ ॥ यस्यामिति ॥ यस्यां भागवतसंहितायां श्रूयमाणायामेव किं पुनः श्रुतायां किन्तरां कीर्त्यमानायां किन्तमां कीर्तितायां पुंसां वर्णाश्रमादिहीनानामपि परमपूरुषे कृष्णे

यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ ५ ॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥ ६ ॥ यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ॥ भक्तिरुत्पद्यते पुंसः शोकमोहजरापहा ॥ ७ ॥ स संहितां भागवतीं कृत्वाऽनुक्रम्य चात्मजम् ॥ शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥ ८ ॥ शौनक उवाच ॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः ॥ कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ॥ ९ ॥ सूत उवाच ॥ आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ॥ कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥ १० ॥

शोकमोहजरापहा भक्तिः उत्पद्यते ॥ ७ ॥ स इति ॥ स मुनिः व्यासो भागवतीं संहितां संक्षेपेण कृत्वा ततो नारदोपदेशादनुक्रमेण भगवद्भक्तिप्रधानतयाऽनुक्रम्य संशोध्य स च नारदोपदेशः श्रीकृष्णान्तर्धानानन्तरं परीक्षित्कर्तृककलिनिग्रहात्पूर्वं ज्ञेयः ततः निवृत्तिनिरतम् आत्मजं शुकम् अध्यापयामास । अत्र पूर्वनिर्मितस्यैव श्रीभागवतस्यानुक्रमणं यदुक्तम् " कृष्णे स्वधामोपगते " इत्यत्र " पुराणार्कोऽधुनोदित " इति । अत एवेदं श्रीमद्भागवतं भारतानन्तरं यदत्र श्रूयते यच्चान्यत्र अष्टादशपुराणानन्तरं भारतमिति तद्द्वयमपि संगतं स्यात् इति चक्रवर्त्ती । विस्तरस्तु टीकावशेषभागे द्रष्टव्यः ॥ ८ ॥ स इति ॥ वै इत्यवधारणे सः निवृत्तावेव नितरां रतः आत्मारामः सर्वत्र अध्ययनाध्यापनादावप्युपेक्षकः मुनिः शुकः कस्य वा हेतोः एतां ग्रन्थतोऽर्थतश्च बृहतीं संहितां समभ्यसत् अधीतवान् ॥ ९ ॥ आत्मारामा इति ॥ आत्मारामा अतो निर्ग्रन्थाः ग्रन्थेभ्यः शास्त्रेभ्योपि निर्गताः फलप्राप्तौ उपायत्यागात् । तदुक्तं गीतासु "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥" इति । यद्वा ग्रन्थिरेव

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

ग्रन्थः निवृत्तो ग्रन्थो येषां ते निर्गताहङ्कारग्रन्थयः विधिनिषेधग्रन्थातीता वा अपि मुनयो उरुक्रमे भगवति अहैतुकीं प्रयोजनानुसंधानरहितां भक्तिं कुर्वन्ति हरिः इत्थंभूता आत्मारामाणामप्याकर्षणशीला गुणा यस्य स तथाभूतः अस्ति ॥१०॥ हरेरिति ॥ नित्यं सर्वदा विष्णुजनाः प्रिया यस्य सः व्याख्यानादिप्रसङ्गेन तत्संगतिकामः इति भावः। भगवान् बादरायणिः शुकः यतो हरेर्गुणैराक्षिप्ता आकृष्टा मतिर्बुद्धिर्यस्य सः तथाभूतः अतः महदप्येतदाख्यानमध्यगात् अधीतवान् एतेन शुकस्य एतदाख्याने प्रवृत्तिः कथमित्यस्योत्तरमुक्तम्। अत्र व्यास एव भगवद्गुणाभिव्यञ्जकान् श्रीभागवतीयान् कांश्चन श्लोकान् लोकद्वारा विविक्तारण्ये सदा समाधिस्थमपि शुकं श्रावयामास। ततस्तच्छ्रुत्वैव भग्नसमाधिः तन्माधुर्याकृष्टचित्तः तादृशं समाधिमप्याक्षिप्य सर्वज्ञतया तान् श्लोकान् भागवतीयान् ज्ञात्वा तत्प्रकाशकं च स्वपितरं ज्ञात्वा तदन्तिकमागत्य श्रीभागवतमध्यैष्टेति ब्रह्मवैवर्त्तम् ॥ ११ ॥ परीक्षित इति ॥ अथ तच्छ्रोतुः राजर्षेः राजत्वेप्यृषिवद्वर्त्तमानस्य परीक्षितो जन्मकर्माणि च विलापनं मोक्षं च यद्वा लपेर्ण्यन्ताल्ल्युट् श्रीभागवतकथावाचनमित्यर्थः। तेषां समाहारस्तथा तदुपोद्घातरूपं पाण्डुपुत्राणां युधिष्ठिरादीनां संस्थां वृत्तान्तं महाप्रस्थानं च कृष्णस्य भगवतः कथाया उदयः अनुप्रसक्ति-

हरेर्गुणाऽऽक्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥ ११ ॥ परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनम् ॥
संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयम् ॥१२॥ यदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरु-
दण्डे धृतराष्ट्रपुत्रे ॥१३॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन्कृष्णासुतानां स्वपतां शिरांसि ॥ उपाहरद्विप्रियमेव तस्य तज्जुगुप्सितं कर्म विग-
र्हयन्ति ॥ १४ ॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना ॥ तदाऽरुदद्बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥१५॥

र्यथा स्यात्तथा वक्ष्ये ॥ १२ ॥ यदेति द्वयम् ॥ कौरवाणां सृञ्जयानां च मृधे युद्धे सृञ्जयवंशजस्य धृष्टद्युम्नस्य पाण्डवसेनापतित्वात्सृञ्जयानामिति लक्षणया पाण्डवानामित्येवार्थः। वीरेषु वीराणां गतिं स्वर्गं गतेषु सत्सु धृतराष्ट्रपुत्रे दुर्योधने वृकोदरेण भीमेन आविद्धायाः आक्षिप्तायाः गदाया अभिमर्शेन आघातेन भग्नौ ऊरू एव दण्डौ यस्य तथाभूते सति अथो मम भर्त्तुर्दुर्योधनस्य प्रियमित्येवं स्यादिति स्म पश्यन् आलोचयन् द्रौणिरश्वत्थामा यदा स्वपतां कृष्णाया द्रौपद्याः सुतानां शिरांसि उपाहरत् छित्त्वाऽऽनीतवान् तत्तस्य कर्म दुर्योधनस्य सर्वलोकस्य च विप्रियमेव जातम्। प्रथमं शत्रुवधश्रवणेन हर्षोदयात् पश्चाच्च भीमादीनां शत्रूणामवधज्ञानात् बालवधेन वंशनाशज्ञानाच्च विषादोत्पत्तेः हर्षविषादाभ्यां च तन्मृत्युप्राप्तेरित्याहुः तत्र हेतुः यतो जुगुप्सितं कर्म सर्वेपि विगर्हयन्ति निन्दन्ति॥ १३ ॥ १४ ॥ मातेति ॥ तदा माता द्रौपदी सुतानां तत्रापि शिशूनां बालानां घोरं दुःसहं निधनं मरणं निशम्य दृष्ट्वा परितप्यमाना अत एव बाष्पकलाभिः अश्रुबिन्दुभिराकुले अक्षिणी यस्यास्तथाभूता सती अरुदत् तां सान्त्वयन् किरीटमाली किरीटस्य तदग्राणां मालाऽस्यास्ति सः अर्जुनः आह स्म ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेति ॥ हे भद्रे यत् यदा गाण्डीवमुक्तैर्विशिखैर्बाणैः ब्रह्मबन्धोः ब्राह्मणाधमस्य आततायिनः शस्त्रपाणेः पुत्रहन्तुः अश्वत्थाम्नः शिरः त्वा त्वां प्रति उपाहरे त्वत्समीपमानयामि यच्च शिर आक्रम्य आसनं विधाय दग्धपुत्रा मृतपुत्रा त्वं स्नास्यसि तदा ते तव शुचः शोकाश्रूणि प्रमृजामि परिमार्जयामि विकरण आर्षः । "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥" ॥ १६ ॥ इतीति ॥ अच्युतः श्रीकृष्ण एव मित्रं सूतः सारथिश्च यस्य सः उग्रं धनुर्यस्यः सः कपिध्वजः अर्जुनः इत्येवं वल्गुऽभिर्मनोहरैर्विचित्रैश्च जल्पैः भाषणैः प्रियां द्रौपदीं सान्त्वयित्वा दंशितो बद्धकवचश्च सन् रथेन साधनेन गुरुपुत्रमश्वत्थामानमन्वाद्रवत् अन्वधावत् ॥ १७ ॥ तमिति ॥ तमर्जुनमापतन्तमनुधावन्तं दूराद्विलक्ष्य दृष्ट्वा उद्विग्नं मनो यस्य सः प्राणपरीप्सुः जिजीविषुः कुमारहा बालघाती सोऽश्वत्थामा यावद्गमं यावद्गन्तुं शक्यं तावत् उर्व्यां रथेन यथा कः ब्रह्मा मृगो भूत्वा सुतां यब्धुमुद्यतः सन् रुद्रस्य भयाद्यथा पलायते स्म तथा पराद्रवत् । अर्क इति पाठे तु वामनपुराणकथा सूचिता । तथा

> तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबन्धोः शिर आततायिनः ॥ गाण्डीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत्स्नास्यसि दग्धपुत्रा ॥ १६ ॥
> इति प्रियां वल्गुविचित्रजल्पैः स सान्त्वयित्वाऽच्युतमित्रसूतः ॥ अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन ॥ १७ ॥ तमापतन्तं स
> विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन ॥ पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः ॥ १८ ॥ यदाऽशरणमात्मानमैक्षत श्रान्तवा-
> जिनम् ॥ अस्त्रं ब्रह्मशिरो मेन आत्मत्राणं द्विजात्मजः ॥ १९ ॥ अथोपस्पृश्य सलिलं संदधे तत्समाहितः ॥ अजानन्नुपसंहारं प्राणकृच्छ्र
> उपस्थिते ॥ २० ॥ ततः प्रादुष्कृतं तेजः प्रचण्डं सर्वतोदिशम् ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥ २१ ॥

हि विद्युन्माली नाम कश्चिद्राक्षसो रुद्रभक्तस्तस्मै तेन सौवर्णं विमानं दत्तं ततोसावर्कस्य पृष्ठतो भ्राम्यन् विमानदीप्त्या रात्रिं विलोपितवान् । ततोऽर्केण निजतेजोभिर्द्रावयित्वा तद्विमानं पातितम् तच्छ्रुत्वा कुपिते आयाते रुद्रे भयादर्कः पर्याद्रवत् । ततो रुद्रस्य क्रूरदृष्ट्या दह्यमानः पतन् वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जातः ॥ १८ ॥ यदेति ॥ द्विजात्मजः इत्यदीर्घदर्शित्वमुक्तम् । यदाऽऽत्मानमशरणं रक्षकहीनं श्रान्तवाजिनं श्रान्ता वाजिनो यस्य तं पलायनेप्यक्षममित्यर्थः । तादृशमैक्षत पर्यालोचितवांस्तदा आत्मत्राणं स्वरक्षणोपायं ब्रह्मशिरोनामकमस्त्रं ब्रह्मास्त्रं मेने तेन अर्जुनं हन्तुमध्यवसितवान् ॥ १९ ॥ अथेति ॥ अथ प्राणकृच्छ्रे उपस्थिते प्राप्ते सति सलिलमुपस्पृश्य आचम्य समाहितः एकाग्रमनाः उपसंहारमजानन्नपि तद्ब्रह्मास्त्रं सन्दधे युयोज ॥ २० ॥ तत इति ॥ ततो ब्रह्मास्त्रात्सर्वतो दिशं सर्वदिक्षु प्रादुष्कृतं प्रादुर्भूतं प्रचण्डं तेजोभिप्रेक्ष्य दृष्ट्वा अत एव प्राणापदमभिप्रेक्ष्य जिष्णुरर्जुनो विष्णुं श्रीकृष्णम् उवाच ह ॥ २१ ॥

कृष्णेति ॥ हे कृष्ण कृष्ण भयाद्विरुक्तिः हे महाभाग हे भक्तानामभयंकर संसृतेर्जन्ममरणादिरूपाया हेतोर्दह्यमानानां प्राणिनाम् अपवर्गो मोक्षस्वरूपस्त्वमेक एवासि ॥ २२ ॥ त्वमिति ॥ त्वमाद्यः सर्वकारणं साक्षात् ईश्वरः प्रकृतेः परः पुरुषः चिच्छक्त्या मायामविद्यां व्युदस्य तिरस्कृत्य कैवल्यरूप आत्मनि स्वस्वरूप एव स्थितः ॥२३॥ स एवेति ॥ सः उक्तविध ईश्वर एव त्वं मायया अविद्यया मोहितं चेतो यस्य तस्य जीवलोकस्य प्राणिजातस्य स्वेन वीर्येण प्रभावेण तत्तत्कर्मानुगुण्येन धर्मादिलक्षणं धर्मार्थकाममोक्षरूपं श्रेयः पुरुषार्थं विधत्से प्रयच्छसि ॥२४॥ तथेति ॥ तथा अयं च ते तवावतारः भुवो भारभूतानां दुराचाराणां जिहीर्षया संहारेच्छया तथा स्वानां स्वकीयानाम् अनन्यभावानामेकान्तभक्तानामसकृन्निरन्तरमनुध्यानाय च जातः ॥ २५ ॥ किमिति ॥ हे देवदेव यत्परमदारुणं तेजः सर्वतोमुखमायाति तदिदं किंस्वित् परमार्थतः किं रूपं कुतो वा हेतोरायातीति अहं न वेद्मि त्वं वद इति शेषः ॥ २६ ॥ वेत्थेति ॥ इदं द्रोणपुत्रस्य ब्राह्ममस्त्रमस्ति तेन च प्राणबाध उपस्थिते प्राप्ते सति प्रदर्शितं केवलं प्रयुक्तं नतु तत्प्र-

अर्जुन उवाच ॥ कृष्ण कृष्ण महाभाग भक्तानामभयंकर ॥ त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥ २२ ॥ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ॥ मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ २३ ॥ स एव जीवलोकस्य मायामोहितचेतसः ॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥ २४ ॥ तथाऽयं चावतारस्ते भुवो भारजिहीर्षया ॥ स्वानां चानन्यभावानामनुध्यानाय चासकृत् ॥ २५ ॥ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहम् ॥ सर्वतोमुखमायाति तेजः परमदारुणम् ॥ २६ ॥ श्रीभगवानुवाच ॥ वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितम् ॥ नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥ २७ ॥ न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्शनम् ॥ जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा ॥ २८ ॥ सूत उवाच ॥ श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा ॥ स्पृष्ट्वाऽपस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे ॥ २९ ॥ संहृत्याऽन्योऽन्यमुभयोस्तेजसी शरसंवृते ॥ आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत् ॥ ३० ॥

योगे कुशलः यतोऽसावुपसंहारं नैव वेद त्वं तु वेत्थ ॥२७॥ न हीति ॥ हि यस्मादस्य ब्रह्मास्त्रस्य प्रत्यवकर्शनं कृशत्वापादकं प्रतिभटमस्त्रं प्रत्यवकर्षणमिति वा पाठः ततोऽन्यतममपरं किंचिदपि नास्त्यत उन्नद्धमुद्रिक्तमपि ब्रह्मास्त्रतेजः स्वप्रयुक्तब्रह्मास्त्रतेजसा जहि उपसंहर हि यस्मात्त्वम् अस्त्रज्ञो ब्रह्मास्त्रप्रयोगोपसंहाराभिज्ञोऽसि ॥२८॥ श्रुत्वेति ॥ भगवता प्रोक्तम् अश्वत्थामप्रयुक्तास्त्रसंहारोपायं श्रुत्वा परेषां शत्रूणां वीरान् योधान् हन्ति सः परवीरहा फाल्गुनः अर्जुनोऽपः स्पृष्ट्वाऽऽचमनं कृत्वा कार्यसिद्ध्यर्थं सर्वदेवदेवं मङ्गलरूपं तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्राह्मास्त्रमुपसंहर्त्तुं ब्राह्ममस्त्रं संदधे प्रयुयोज ॥२९॥ संहृत्येति ॥ ततस्तयोरुभयोरस्त्रयोस्तेजसी शरैः संवृते व्याप्ते अन्योन्यं संहत्य संगत्य रोदसी द्यावापृथिव्यौ खमन्तरिक्षं चावृत्य आवेष्टय अर्कवह्निवत् प्रलये यथाऽधः संकर्षणमुखाग्निरुपरिस्थितोर्कश्च संहत्य वर्द्धेते तथा ववृधाते सन्धिरार्षः ॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वेति ॥ ततस्त्रीन् लोकान् प्रदहत् महत् तयोर्द्रौण्यर्जुनयोरस्त्रतेजो दृष्ट्वा तेन च दह्यमानाः सर्वाः प्रजाः सांवर्तकं प्रलयाग्निम् अमंसतामन्यन्त ॥ ३१ ॥ प्रजेति ॥ लोकव्यतिकरं भूरादिलोकोपमर्दनं तमेव प्रजोपप्लवं प्रजानामुपध्वंसमालक्ष्य वासुदेवस्य कृष्णस्य मतमभिप्रायं चालक्ष्य अर्जुनो ब्रह्मास्त्रद्वयं संजहार उपसंहृतवान् ॥३२॥ तत इति ॥ ततस्तेन उपसंहारानन्तरम् अमर्षेण कोपेन ताम्रे रक्ते अक्षिणी यस्य सोऽर्जुनः तरसा वेगेन दारुणं गौतमी गोतमवंशजा कृपी तस्याः सुतमश्वत्थामानमासाद्य याज्ञिकः पुरुषो रशनया रज्ज्वा यथा पशुं बध्नाति तथा बबन्ध । निष्कृपत्वे दृष्टान्तः पशुं यथेति । तस्य बन्धनं धर्म इत्यत्र दृष्टान्तः यथा याज्ञिकः पशुमिति ॥ ३३ ॥ शिबिरायेति ॥ दाम्ना रज्ज्वा रिपुं बलाद्बध्वा शिबिराय सेनानिवेशस्थानाय निनीषन्तं नेतुमिच्छन्तमर्जुनं प्रकुपितः इव अम्बुजेक्षणः एतेन अन्तःकोपाभावमाह भगवान् अर्जुनस्य धर्मनिष्ठाख्यापनाय प्राह स्म ॥ ३४ ॥ मेति ॥ हे पार्थ एनं ब्रह्मबन्धुं त्रातुं मैवार्हसि किंत्विमं जहि मा जहि किन्तु त्रातुमर्हसीति वस्तुतोर्थः । योऽसावनागसः

दृष्ट्वाऽस्त्रतेजस्तु तयोस्त्रीँल्लोकान्प्रदहन्महत् ॥ दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत ॥ ३१ ॥ प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तम् ॥ मतं च वासुदेवस्य संजहाराऽर्जुनो द्वयम् ॥ ३२ ॥ तत आसाद्य तरसा दारुणं गौतमीसुतम् ॥ बबन्धाऽमर्षताम्राक्षः पशुं रशनया यथा ॥ ३३ ॥ शिबिराय निनीषन्तं दाम्ना बध्वा रिपुं बलात् ॥ प्राहार्जुनं प्रकुपितो भगवानम्बुजेक्षणः ॥ ३४ ॥ मैनं पार्थाऽर्हसि त्रातुं ब्रह्मबन्धुमिमं जहि ॥ योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥ ३५ ॥ मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् ॥ प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित् ॥ ३६ ॥ स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खलः ॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ॥ ३७ ॥ प्रतिश्रुतं च भवता पाञ्चाल्यै शृण्वतो मम ॥ आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥ ३८ ॥

निरपराधान्निशि सुप्तान्बालकानवधीत् ॥ ३५ ॥ मत्तमिति ॥ धर्मवित् मत्तं मद्यादिना विवशं प्रमत्तं कार्यान्तरासक्त्यानवहितम् उन्मत्तं पिशाचादिभिरुपद्रुतं सुप्तं बालं स्त्रियं जडं स्वभावतो मूर्खं प्रपन्नं शरणागतं तवास्मीतिवादिनं विरथं भग्नरथं भीतं च रिपुमपि न हन्ति बालवधकत्वाद्वध्योऽसावित्यापातार्थः । विरथो भीतश्चाप्यवध्य इति वस्तुतोर्थः ॥ ३६ ॥ स्वप्राणानिति ॥ यः अघृणः दयारहितः खलः परेषां प्राणैः प्राणहिंसनैः स्वप्राणान् प्रपुष्णाति तस्य वधो दण्डरूपत्वात्तस्य हि तस्यैव श्रेयः पुरुषार्थसाधकं न तु हन्तुरिति वस्तुतोर्थः । यत् यस्मात् दोषात्पापात्स पापी पुमानधो नरकं याति । " राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । विधूतकल्मषा यान्ति सन्तः सुकृतिनो यथा ॥ " इति स्मृतेः । दण्डे कृते तु नरकं न याति ॥ ३७ ॥ प्रतिश्रुतमिति ॥ हे मानिनि यस्ते पुत्रहा पुत्रान् हतवान् तस्य शिरस्ते तुभ्यमहमाहरिष्ये आनेष्यामि इति मम शृण्वत एव सतो भवता पाञ्चाल्यै द्रौपद्यै प्रतिश्रुतं प्रतिज्ञातम् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ हे वीर यस्मादाततायी शस्त्रधारी आत्मनस्तव बन्धुहा कुमारघाती स्वभर्तुर्दुर्योधनस्यापि विप्रियमेव कृतवान् तत् तस्मात् कुलं पंसयति नाशयति कुलपांसनः“पसि नाशने ल्युः पृषोदरादित्वाद्दीर्घः यद्वा कुलं पांसुं धूलिमिव करोति “ तत्करोति” इति णिजन्ताल्ल्युः । असौ पापः पापात्मा वध्यतां हन्यतामित्यापातार्थः । नियम्यतामिति वस्तुतोऽर्थः ॥ ३९ ॥ एवमिति ॥ एवं धर्मं परीक्षता शता आर्षः । अत एव पूर्वं कृष्णवचो द्विधा व्याख्यातम् । यद्यपि कृष्णेन चोदितः तथापि महान् धर्मज्ञः पार्थः आत्महनं स्वपुत्रहंतारम् अपि गुरुसुतम् अश्वत्थामानं हन्तुं नैच्छत् ॥ ४० ॥ अथेति ॥ अथानन्तरं गोविन्दः प्रियः सारथिश्च यस्य सोऽर्जुनः स्वस्य शिबिरं सेनास्थानम् उपेत्य आगत्य हतानात्मजान् शोचन्त्यै प्रियायै द्रौपद्यै तं द्रौणिं न्यवेदयत् अयं ते पुत्रहन्ता आनीत इत्युक्तवान् ॥ ४१ ॥ तथेति ॥ तथाऽपमानेनाहृतमानीतं पशुवत्पाशेन बद्धं बालवधरूपकर्मणो जुगुप्सितेन निन्दनेन लोकैः कृतेन भावे क्तः । अवाङ्मुखं लज्जया अधोमुखमपकृतं कृतापकारमपि किबन्तमिदम् । गुरोः सुतमश्वत्थामानं वामस्वभावा

तदसौ वध्यतां पाप आतताय्यात्मबन्धुहा ॥ भर्तुश्च विप्रियं वीर कृतवान्कुलपांसनः ॥ ३९ ॥ एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः ॥
नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान् ॥ ४० ॥ अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः ॥ न्यवेदयत्तं प्रियायै शोचन्त्या आत्मजान्ह-
तान् ॥ ४१ ॥ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन ॥ निरीक्ष्य कृष्णाऽपकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च
॥ ४२ ॥ उवाच चाऽसहन्त्यस्य बन्धनानयनं सती ॥ मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥ सरहस्यो धनुर्वेदः सविसर्गोपसं-
यमः ॥ अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥ ४४ ॥ स एष भगवान्द्रोणः प्रजारूपेण वर्तते ॥ तस्यात्मनोऽर्धं पत्न्याऽऽस्ते नान्वगाद्वी-
रसूः कृपी ॥ ४५ ॥ तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलम् ॥ वृजिनं नार्हति प्राप्तुं पूज्यं वन्द्यमभीक्ष्णशः ॥ ४६ ॥

मनोहरशीला सा कृष्णा द्रौपदी कृपया निरीक्ष्य ननाम च ॥ ४२ ॥ उवाचेति ॥ अस्य गुरुपुत्रस्य बन्धनेनानयनमसहन्ती सती “ सह, मर्षणे ” आधृषीयः । अर्जुनं प्रत्युवाच ननाम च उवाच चेति चकाराभ्यां सम्भ्रमः सूचितः । एषः मुच्यतां मुच्यतां यतः ब्राह्मणः नितरामतिशयेन गुरुर्भवति ॥ ४३ ॥ सरहस्य इति ॥ रहस्यो गोप्यमन्त्रस्तत्सहितो धनुर्वेदः विसर्गोऽस्त्रप्रयोगः उपसंयम उपसंहारस्ताभ्यां सहितः अस्त्राणां ग्रामः समूहश्च भवता यस्य द्रोणस्यानुग्रहाच्छिक्षितः ॥ ४४ ॥ स इति ॥ स भगवान् द्रोण एवैष प्रजारूपेण वर्तते । “ आत्मा वै पुत्रनामासि ” इति श्रुतेः । अत एव वीरसूः पुत्रवती तस्य द्रोणस्यात्मा देहस्तस्यार्द्धं पत्नी कृपी आस्ते सा भर्त्तारं न अन्वगात् अनुमरणं न कृतवती ॥ ४५ ॥ तदिति ॥ हे धर्मज्ञ हे महाभाग तत्तस्मादनुचितत्वात् गौरवं गुरोः सवन्धि कुलं कर्तृ भवद्भिर्हेतुभिर्वृजिनं दुःखं प्राप्तुं नार्हति किंतु अभीक्ष्णशः पूज्यं वन्द्यं च ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा रोदीदिति ॥ मृताः वत्साः पुत्रा यस्याः सा अत एव आर्त्ता अश्रुमुख्यहं यथा मुहुर्मुहुः रोदिमि तथाऽस्याश्वत्थाम्नो जननी पतिदेवता गौतमी कृपी मा रोदीत् मा रोदितु ॥ ४७ ॥ यैरिति ॥ अकृतः कामक्रोधादिपरवश आत्मा मनो येषां तैर्यैं राजन्यैः ब्रह्मकुलं कोपितं तत्कुलं कर्तृ शुचा शोकेनार्पितं व्याप्तं सत् तेषां राजन्यानां कुलं कर्मभूतं सानुबन्धं भृत्यामात्यादिसहितम् आशु शीघ्रमेव प्रदहति ॥ ४८ ॥ धर्म्यमिति ॥ अत्र धर्म्यमित्यादयः षड्वचसो गुणाः पूर्वश्लोकेषु ज्ञेयाः । धर्म्यं धर्मादनपेतं मुच्यतां मुच्यतामिति न्याय्यं न्यायान्नीतेरनपेतं सरहस्यो धनुर्वेद इति सकरुणं तस्यात्मनोर्द्धमिति निर्व्यलीकम् अनृताऽप्रियरहितं तद्धर्मज्ञेति समं पक्षपातशून्यं मा रोदीदिति दुःखसाम्योक्तेः । महत् हितं यैः कोपितमिति राज्ञ्याः द्रौपद्याः वचो धर्मसुतः राजा युधिष्ठिरः प्रत्यनन्दत् प्रशशंस । द्विजाश्च प्रत्यनन्दन् द्विजा इति संबोधनं वा ॥ ४९ ॥ नकुल इति ॥ नकुलादयः अन्ये च योषितः स्त्रियश्च प्रत्यनन्दन् युयुधानः सात्यकिः स्पष्टमन्यत् ॥ ५० ॥ तत्रेति ॥ तत्र एवं द्रौपदीवचने सर्वैः अभिनन्दिते सति अमर्षितः

मा रोदीदस्य जननी गौतमी पतिदेवता ॥ यथाऽहं मृतवत्साऽऽर्ता रोदिम्यश्रुमुखी मुहुः ॥ ४७ ॥ यैः कोपितं ब्रह्मकुलं राजन्यैरकृतात्मभिः ॥ तत्कुलं प्रदहत्याशु सानुबन्धं शुचाऽर्पितम् ॥ ४८ ॥ सूत उवाच ॥ धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् ॥ राजा धर्मसुतो राज्ञ्याः प्रत्यनन्दद्वचो द्विजाः ॥ ४९ ॥ नकुलः सहदेवश्च युयुधानो धनंजयः ॥ भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥ ५० ॥ तत्राहाऽमर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः ॥ न भर्तुर्नात्मनश्चार्थे योऽहन्सुप्ताञ्छिशून्वृथा ॥ ५१ ॥ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः ॥ आलोक्य वदनं सख्युरिदमाह हसन्निव ॥ ५२ ॥ श्रीभगवानुवाच ॥ ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः ॥ मयैवोभयमाम्नातं परिपाह्यनुशासनम् ॥ ५३ ॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सान्त्वयता प्रियाम् ॥ प्रियं च भीमसेनस्य पाञ्चाल्या मह्यमेव च ॥ ५४ ॥

तदसहमानो भीमः आह स्म यः सुप्तान् शिशून् न भर्तुर्दुर्योधनस्यार्थे न चात्मनः स्वस्यार्थे किन्तु वृथैवाहन् जघान तस्य वध एव श्रेयान् प्रशस्यः स्मृतः ॥ ५१ ॥ निशम्येति ॥ भीमस्य द्रौपद्याश्च गदितं वचनं निशम्य श्रुत्वा चतुर्भुजो भीमे हन्तुं प्रवृत्ते द्रौपद्यां तद्वारणे प्रवृत्तायामुभयवारणायाविष्कृतभुजचतुष्कः श्रीकृष्णः संदिहानस्य सख्युरर्जुनस्य वदनमालोक्य हसन्निवेदं वक्ष्यमाणमाह स्म ॥ ५२ ॥ ब्रह्मबन्धुरिति ॥ ब्रह्मबन्धुः अधमोपि ब्राह्मणो न हन्तव्यः आततायी शस्त्रधारी वधार्हणः ब्राह्मणो न हन्तव्यः । " आततायिनमायान्तमपि वेदान्तपारगम् । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ " इति शास्त्रवचसा मयैवोभयमाम्नातं कथितं तदुभयमप्यनुशासनं परिपाहि ॥ ५३ ॥ कुर्विति ॥ प्रियां द्रौपदीं सान्त्वयता त्वया यत् " आहरिष्ये शिरस्तस्य " इति प्रतिश्रुतं प्रतिज्ञातं तदपि सत्यं यथार्थं कुरु भीमसेनस्य च द्रौपद्याः मह्यं मम च प्रियमेव कुरु तत्र वधे भीमसेनस्य प्रियम् अवधे द्रौपद्याः द्वये श्रीकृष्णस्य ॥ ५४ ॥

CC-0. In Public Domain. Digitization by eGangotri

अर्जुन इति ॥ हरेर्हार्दमभिप्रायमर्जुनः सहसा आज्ञाय न ह्यशक्यमुभयं विदध्यात् अतोऽस्यायमभिप्राय इति ज्ञात्वा अथ अनन्तरमेव असिना खड्गेन मूर्द्धन्यं मूर्द्धनि भवं सहमूर्द्धजं केशैः सहितं द्विजस्य तस्य मणिं जहार च्छित्त्वा हृतवान् तेन शिरस्थवस्तुच्छेदात् शिरश्छेदः कृतः वस्तुतस्तदभावान्नापि कृत इत्यश्वत्थाम्नो वधोऽवधश्चेत्युभयमपि कृतम् ॥ ५५ ॥ विमुच्येति ॥ रशनया बद्धं बालानां हत्यया हता प्रभा शोभा यस्य तं तेजसा अध्ययनमन्त्रजपादिजनितेन तथा मणिना च हीनं तं विमुच्य शिबिरात् स्वकटकस्थानात् निरयापयत् बहिर्निःसारयामास ॥ ५६ ॥ वपनमिति ॥ वपनं मुण्डनं द्रविणादानं धनापहरणं तथा निवासस्थानान्निर्यापणं निःसारणं चेत्येष एव ब्रह्मबन्धूनां ब्राह्मणाधमानामपि वधः इतोन्यो दैहिकः शिरश्छेदादिरूपो वधो नास्ति ॥ ५७ ॥ पुत्रेति ॥ कृष्णया द्रौपद्या सह पुत्रशोकेनातुराः पीडिताः सर्वे पाण्डवाः मृतानां स्वानां बन्धूनां यन्निर्हरणादिकं दाहार्थं नयनादिकं कृत्यं कर्तव्यं तच्चक्रुः ॥५८॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम्॥गंगासहायः प्रथमस्याध्याये सप्तमे व्यधात्

सूत उवाच ॥ अर्जुनः सहसाऽऽज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम् ॥५५॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभम् ॥ तेजसा मणिना हीनं शिबिरान्निरयापयत् ॥ ५६ ॥ वपनं द्रविणादानं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥ ५७ ॥ पुत्रशोकातुराः सर्वे पाण्डवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम् ॥ ५८ ॥ इति श्रीभागवते प्रथमस्कन्धे द्रौणिनिग्रहो नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिच्छताम् ॥ दातुं सकृष्णा गङ्गायां पुरस्कृत्य ययुः स्त्रियः ॥ १ ॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥ २ ॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम् ॥ गान्धारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥ ३ ॥ सान्त्वयामास मुनिभिर्हतबन्धूञ्छुचार्पितान् ॥ भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियाम् ॥ ४ ॥

॥ ७ ॥ परीक्षिद्रक्षा द्रौण्यस्त्रात्कुन्तीस्तोत्रं तथाष्टमे ॥ युधिष्ठिरस्य शोकोऽत्र श्लोका नयनमार्गणाः ॥ अनुष्टुभः षट्पञ्चाशदुवाचेति तु पञ्चकम् ॥ ८ ॥ अथेति ॥ अथ संपरेतानां मृतानाम् अत एवोदकं तिलोदकमिच्छतां स्वानां बान्धवानां शेषे षष्ठी तेभ्यः गङ्गायाम् उदकं दातुं सकृष्णाः कृष्णेन सहितास्ते पाण्डवाः स्त्रियः स्त्रीः पुरस्कृत्य-अग्रतः कृत्वा ययुः तत्र कार्ये स्त्रीपुरःसरत्वविधानात् ॥ १ ॥ त इति ॥ ते सर्वे पाण्डवादयः उदकं निनीय दत्त्वा भृशमत्यन्तं विलप्य चकारादन्यदपि कर्त्तव्यं कृत्वा हरेः कृष्णस्य पादाब्जयो रजसा पूते सरितः गङ्गायाः जले पुनरपि आप्लुताः स्नाताः पुनर्ग्रहणादादावपि स्नाता इति गम्यते ॥ २ ॥ तत्रेति द्वयम् ॥ तत्र गङ्गातीरे आसीनं धृतराष्ट्रं सहानुजं भीमादिभिः सहितं कुरुपतिं युधिष्ठिरं पुत्रशोकेनार्तामिति तिसृणां विशेषणम् । गान्धारीं कृष्णां द्रौपदीं पृथां कुन्तीं च हता बन्धवः पुत्रादयो येषां तान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुचा शोकेनार्पितान् व्यामानेतान् युधिष्ठिरादीन् मुनिभिः सहितः माधवः श्रीकृष्णः भूतेषु भूतकार्येषु देहादिषु अप्रतिक्रियां निवर्तकोपायरहितां कालस्य गतिमुत्पत्तिविनाशनिमित्तभूतां प्रवृत्तिं दर्शयन् सन् सान्त्वयामास ॥ ३ ॥ ४ ॥ साधयित्वेति द्वयम् ॥ माधवः अजातशत्रोः युधिष्ठिरस्य कितवैर्वञ्चकैर्दुर्योधनादिभिः हृतं स्वराज्यं साधयित्वा तद्वशे कृत्वा राज्याः द्रौपद्याः कचस्पर्शेन केशाकर्षणेनैव क्षतं क्षीणमायुर्येषां तान् । राज्ञ इति पाठे असतो विशेष्यम् । असतो दुष्टान् दुःशासनादीन् भीमार्जुनादिभिर्घातयित्वा उत्तमकल्पकैः मुख्यकल्पैः अन्यूनमन्त्रदक्षिणैस्त्रिभिरश्वमेधैस्तं युधिष्ठिरं याजयित्वा पावनं तस्य यशः शतमन्योः इन्द्रस्य यश इव दशसु दिक्षु अतनोत् विस्तारयामास। याजयित्वेत्यादि भाविकथासंक्षेपः ॥ ५ ॥ ६ ॥ आमन्त्र्येति द्वयम् ॥ हे ब्रह्मन् पाण्डुपुत्रान् च शब्दादन्यांश्च अनायं पृष्ट्वा शैनेयः शिनेर्नप्ता सात्यकिस्तेनोद्धवेन च संयुतः सहितः आत्मना पूजितैः द्वैपायनादिभिर्विप्रैः प्रतिपूजितः द्वारकां प्रति गन्तुं कृता मतिर्येन स रथमास्थितः अधिष्ठितः सन् हरिः भयेन विह्वलां

साधयित्वाऽजातशत्रोः स्वं राज्यं कितवैर्हृतम् ॥ घातयित्वाऽसतो राज्ञः कचस्पर्शक्षतायुषः ॥ ५ ॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥ ६ ॥ आमन्त्र्य पाण्डुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥ ७ ॥ गन्तुं कृतमतिर्ब्रह्मन्द्वारकां रथमास्थितः ॥ उपलेभेऽभिधावन्तीमुत्तरां भयविह्वलाम् ॥ ८ ॥ पाहि पाहि महायोगिन्देवदेव जगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥ ९ ॥ अभिद्रवति मामीश शरस्तप्तायसो विभो ॥ कामं दहतु मां नाथ मा मे गर्भो निपात्यताम् ॥ १० ॥ सूत उवाच ॥ उपधार्य वचस्तस्या भगवान्भक्तवत्सलः ॥ अपाण्डवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥ ११ ॥ तर्ह्येवाऽथ मुनिश्रेष्ठ पाण्डवाः पञ्च सायकान् ॥ आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः ॥ १२ ॥

व्याकुलाम् अभिधावन्तीं सम्मुखमागच्छन्तीम् उत्तरां परीक्षिन्मातरम् उपलेभे ददर्श ॥ ७ ॥ ८ ॥ उत्तरा श्रीकृष्णं प्रार्थयते—पाहि पाहीति ॥ हे महायोगिन् हे देवदेव हे जगत्पते त्वं मां पाहि पाहि व्याकुलत्वाद्विरुक्तिः । यत्र लोके परस्परमपि मृत्युर्भवति एकस्य मृत्युरन्यस्तस्य मृत्युरपरस्तस्याप्यन्य इत्येवमिति । तत्र त्वत् त्वत्तः अन्यम् अभयं भयरहितं भयनिवर्तकं च न पश्ये तङ्गार्षः ॥ ९ ॥ अभिद्रवतीति ॥ हे ईश हे विभो हे नाथ तप्तश्चासावायसः अयसो विकारश्च तप्तमायसं लोहमयं शल्यं यस्येति वा तथाभूतः शरो मामभिद्रवति मदभिमुखमागच्छति सतु कामं यथेच्छं मां दहतु मे मम गर्भस्तु अनेन मा निपात्यतां यथा न पतेत् तथाऽनुगृहाण ॥ १० ॥ उपधार्येति ॥ भक्तवत्सलः भगवान् तस्या उत्तराया वचः उपधार्य श्रुत्वा इदं विश्वमपाण्डवं पाण्डवशून्यं कर्तुं प्रवृत्तस्य कुपितस्य द्रौणेरस्त्रं ब्रह्मास्त्रम् अबुध्यत ॥ ११ ॥ तर्हीति ॥ अथ हे मुनिश्रेष्ठ तर्ह्येव पाण्डवाः आत्मनोऽभिमुखान् संमुखमागच्छतो दीप्तान् पञ्चसायकान् आलक्ष्य दृष्ट्वा स्वयमप्यस्त्राणि उपाददुः जगृहुः । तङ्भाव आर्षः ॥ १२ ॥

Nepal Sanskrit University, Baidyanath Cultural Research Library

CC-0. In Public Domain. Digitization by eGangotri

व्यसनमिति ॥ विभुः श्रीकृष्णः स्वानां स्वभक्तानाम् अनन्यो विषयो यस्य तादृक् आत्मा मनः येषां तेषां स्वैकनिष्ठानां पाण्डवानां ब्रह्मास्त्रस्यास्त्रान्तरैरनिव-र्त्यत्वात् तदुष्परिहरं व्यसनं दुःखं वीक्ष्य स्वास्त्रेण सुदर्शनेन रक्षां व्यधात् अकरोत् ॥ १३ ॥ अन्तःस्थ इति ॥ योगेश्वरः गर्भं प्रवेष्टुं शक्तः सर्वभूतानामन्तःस्थः आत्मा-न्तर्यामी हरिः कुरूणां कुरुवंशजानां पाण्डवानां तन्तवे वंशविस्तारार्थं स्वमायया शक्त्या सूक्ष्मरूपेण वैराट्या उत्तरायाः कुक्षिं प्रविष्टो गर्भं बालमावृणोत् ॥ १४ ॥ यद्य-पीति ॥ यद्यपि ब्रह्मशिरोनामकमस्त्रमप्रतिक्रियं केनाप्यनिवार्यमतएवामोघं च तथापि हे भृगूद्वह वैष्णवं विष्णोः संबन्धि तेजः सुदर्शनमासाद्य सम्यगशाम्यत् शान्तमासीत् ॥ १५ ॥ मेति ॥ सर्वाश्चर्यमये अच्युते श्रीकृष्णे एतत् सुदर्शनेन ब्रह्मास्त्रशमनम् आश्चर्यं मा मंस्थाः न मन्यस्व । यः अजः देव्या अलौकिक्या मायया इदं विश्वं सृजति अवति हन्ति च ॥ १६ ॥ ब्रह्मेति ॥ ब्रह्मतेजसा ब्रह्मास्त्रेण विनिर्मुक्तैरात्मजैर्युधिष्ठिरादिभिः सह कृष्णया द्रौपद्या च सह सती पृथा कुन्ती प्रयाणाभिमुखं कृष्णम् इदं

व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनाम् ॥ सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥ १३ ॥ अन्तःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ॥ स्वमाययाऽऽवृणोद्गर्भं वैराट्याः कुरुतन्तवे ॥ १४ ॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम् ॥ वैष्णवं तेज आसाद्य समशाम्य-द्भृगूद्वह ॥ १५ ॥ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते ॥ य इदं मायया देव्या सृजत्यवति हन्त्यजः ॥ १६ ॥ ब्रह्मतेजोविनिर्मुक्तै-रात्मजैः सह कृष्णया ॥ प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥ १७ ॥ कुन्त्युवाच ॥ नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम् ॥ अलक्ष्यं सर्वभूतानामन्तर्बहिरवस्थितम् ॥ १८ ॥ मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् ॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥ १९ ॥ तथा परमहंसानां मुनीनाममलात्मनाम् ॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥ २० ॥

वक्ष्यमाणमाह स्म ॥ १७ ॥ नमस्य इति द्वयम् ॥ आद्यं पुरुषम् ईश्वरं प्रकृतेः परं सर्वभूतानामन्तर्बहिश्चावस्थितं तथापि सर्वेषामलक्ष्यं यतः मायैव जवनिका तिरस्करणी तया आच्छन्नं तिरोहितस्वरूपम् अधः स्थितम् अक्षजम् इन्द्रियजं ज्ञानं यस्मात्तम् अव्ययम् अविकारं त्वाम् अज्ञा मूर्खा अहं नमस्ये केवलं नमस्करोमि नतु तत्त्वतो जानामि तद्भावः । तत्र हेतुः नाट्यधरो नटो यथा मूढदृशा नाट्यशास्त्रानभिज्ञेन जनेन न लक्ष्यते अयं कुशलोऽकुशलो वेति न बुध्यते तथा मूढदृशा अज्ञेन पुंसा त्वं तत्त्वतो न लक्ष्यसे तथेति अग्रिमश्लोकस्थमत्रान्वेतीति चक्रवर्ती ॥ १८ ॥ १९ ॥ तथेति ॥ परमहंसानां मुनीनाम् अमलात्मनामपि सर्वत्र तृतीयार्थे षष्ठी । तथा तेन निजमहिम्ना न लक्ष्यसे अतो भक्तियोगविधानार्थमवतीर्णं त्वां स्त्रियो वयं कथं पश्येम यद्वा परमहंसादीनामपि आत्मारामाश्च मुनयः इति रीत्या भक्तियोगविधानमर्थो यस्य तादृशं त्वां यद्वा यथा मूढदृशा न लक्ष्यसे तथा परमहंसादिभिरपि इति भक्तियोगविधानार्थमवतीर्णं त्वाम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णायेति ॥ स्पष्टम् ॥ २१ ॥ नम इति ॥ पङ्कजानां मालास्त्यस्य पङ्कजैर्मालिने मालावते इति वा पङ्कजे इवाङ्घ्री यस्य स्पष्टमन्यत् ॥ २२ ॥ मातृतोप्यधिका तव मयि प्रीतिरित्याह—यथेति ॥ हे हृषीकेश हे विभो खलेन दुर्जनेन कंसेन अतिचिरं रुद्धा शुचा पुत्रशोकेनार्पिता व्याप्ता देवकी त्वया यथा विमोचिता तथाहमपि मुहुर्वारंवारं विपद्गणात्सहात्मजा त्वयैव नाथेन मोचिता चकारान्महान्विशेषः सूचितःतथाहि सातिचिरं रुद्धा सती तस्मादेव सकृद्विमोचिता तथा शुचार्पिता च सती न च तस्याः पुत्रा रक्षिताः । अस्ति चान्यो वसुदेवस्तस्या नाथः अहं तु विपद्गणात् मुहुः शीघ्रं च सात्मजा त्वयैव नाथेनेति ॥ २३ ॥ विषादिति ॥ हे हरे विषात् भीमस्य विषदानात् महाग्नेर्लाक्षागृहदाहात् पुरुषादा हिडिम्बादयो राक्षसास्तेषां दर्शनात् तज्जन्यभयात् असत्सभायाः द्यूतस्थानात् वनवासे यद्दुर्वासःप्रभृति जनितं कृच्छ्रं तस्मात् मृधे मृधे प्रतियुद्धं येऽनेके महारथा भीष्मादयस्तेषामस्त्रेभ्यः द्रौणेर्ब्रह्मास्त्रतश्च अभि सर्वतो रक्षिता आस्म अभवाम अस्तेर्लङ् ॥ २४ ॥ विपद इति ॥ हे जगद्गुरो तत्र तत्र

कृष्णाय वासुदेवाय देवकीनन्दनाय च ॥ नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥ २१ ॥ नमः पङ्कजनाभाय नमः पङ्कजमालिने ॥ नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ २२ ॥ यथा हृषीकेश खलेन देवकी कंसेन रुद्धाऽतिचिरं शुचार्पिता ॥ विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥ २३ ॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः ॥ मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥ २४ ॥ विपदः सन्तु नः शश्वत्तत्र तत्र जगद्गुरो ॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥ २५ ॥ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् ॥ नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरम् ॥२६॥ नमोऽकिंचनवित्ताय निवृत्तगुणवृत्तये ॥ आत्मारामाय शान्ताय कैवल्यपतये नमः ॥ २७ ॥ मन्ये त्वां कालमीशानमनादिनिधनं विभुम् ॥ समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ॥ २८ ॥

देशे काले च सर्वदा चेत्यर्थः । शश्वन्मुहुः नोऽस्माकं विपद एव सन्तु यत् यस्माद्धेतोः तासु विपत्सु नास्ति पुनर्भवस्य जन्मादिलक्षणसंसारस्य दर्शनं यस्मात्तत् भवतो दर्शनं स्यात् ॥ २५ ॥ जन्मेति ॥ जन्म च ऐश्वर्यं च श्रुतं विद्या च तेषां श्रीभिः समृद्धिभिरेधमानो मदो यस्य सः पुमान् नास्ति त्वद्व्यतिरिक्तं किंचनापि इष्टवस्तु येषां ते अकिंचनास्तेषां गोचरं विषयभूतं त्वामभिधातुं रामकृष्णगोविन्देति तव नामोच्चारयितुमपि नैवार्हतीति ॥ २६ ॥ नम इति ॥ अकिंचनानां भक्तानां न्यासिनां च वित्तवत्प्रियाय अकिंचना एव वित्तं यस्येति वा तस्मै निवृत्ता गुणानां वृत्तिर्वर्त्तनं यस्मात्तस्मै आत्मनि एव आरामः रमणं यस्य तस्मै शान्ताय रागादिरहिताय कैवल्यपतये कैवल्यं दातुं शक्ताय नम इति ॥ २७ ॥ मन्ये इति ॥ यत् यस्मात् कालरूपात्त्वत्तो भूतानां मिथः परस्परमेव कलिः कलहो भवति नतु त्वयि वैषम्यं तं त्वाम् ईशानं नियन्तारम् अनादिनिधनमाद्यन्तरहितं विभुं प्रभुं सर्वत्र समं चरन्तं कालमहं मन्ये नतु देवकीपुत्रम् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus Collection

CC-0. In Public Domain. Digitization by eGangotri

न वेदेति ॥ हे भगवन् यस्य तव कर्हिचित् कदाचिदपि कश्चिदपि दयितः प्रियो नास्ति द्वेष्यः शत्रुश्च नास्ति यस्मिंस्त्वयि नृणां विषमा अयं पाण्डवमित्रं धार्त्तराष्ट्रशत्रुरित्याद्याकारा निग्रहानुग्रहरूपा मतिः भ्रान्तिर्भवति तस्य नृणां विडम्बनमनुकरणमीहमानस्य कुर्वतस्तव चिकीर्षितं कर्त्तुमिष्टं कश्चिदपि न वेद ॥ २९ ॥ जन्मेति ॥ हे विश्वात्मन् तिर्यक्षु वराहादिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरूपेण यादस्सु मत्स्यादिरूपेण यत् आत्मनः परमात्मनः तव अजस्य जन्म अकर्त्तुः कर्म च तदत्यन्तं विडम्बनमनुकरणमात्रम् । भक्तास्तु अजत्वाकर्तृत्वयोरेव सत्यत्वे "जन्म कर्म च मे दिव्यम्" इति दिव्यत्वेनोक्तजन्मकर्मलीलाया मिथ्यात्वापत्तिं पश्यन्तः अजस्य जन्म अकर्त्तुः कर्म तत्रापि तिर्यगादिषु तच्च सर्वोत्कृष्टस्य तवात्यन्तविडम्बनं तत्तज्जात्यनुकरणत्वेनात्यन्तन्यूनत्वमतस्तव तत्त्वं कोपि न वेद। एवं पूर्वश्लोके नृणां विडम्बनं स्वषाड्गुण्यादिभिर्न्यूनीभावमीहमानस्येति व्याचक्षते ॥ ३० ॥ गोपीति ॥ यद्यस्मात्त्वत्तो भीरपि बिभेति तस्मिंस्त्वयि कृतागसि दधिभाण्डस्फोटनरूपापराधं कृतवति सति गोपी यशोदा त्वद्बन्ध-

न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडम्बनम् ॥ न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणाम्
॥ २९ ॥ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषु यादस्सु तदत्यन्तविडम्बनम् ॥ ३० ॥ गोप्याऽऽददे त्वयि कृतागसि दाम तावद्या ते दशाऽश्रुकलिलाञ्जनसंभ्रमाक्षम् ॥ वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ॥ ३१ ॥
केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये ॥ यदोः प्रियस्याऽन्ववाये मलयस्येव चन्दनम् ॥ ३२ ॥ अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् ॥ अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥ ३३ ॥ भारावतारणायाऽन्ये भुवो नाव इवोदधौ ॥ सीदन्त्या भूरिभारेण जातो ह्यात्मभुवाऽर्थितः ॥ ३४ ॥

नार्थं दाम रज्जुमाददे जग्राह तावत्तदा अश्रुभिः कलिलं व्यामिश्रमञ्जनं ययोस्ते च ते संभ्रमेण व्याकुले च अक्षिणी यस्मिंस्तद्वक्त्रं निनीय अधः कृत्वा मां ताडयिष्यतीति भयस्य भावनया स्थितस्य ते तव या दशा अवस्था सा मां विमोहयति ॥ ३१ ॥ केचिदिति ॥ मलयस्य मलयाचलस्य कीर्त्तये चन्दनमिव जातं तथा प्रियस्य पुण्यश्लोकस्य युधिष्ठिरस्य कीर्त्तये यदोरेव कीर्त्तये इति वा यदोरन्ववाये वंशे अजं जन्मशून्यमेव त्वां जातं प्रादुर्भूतं केचिदाहुः ॥ ३२ ॥ अपरे इति ॥ अपरे तु वसुदेवस्य भार्यायां देवक्यां ताभ्यामेव पूर्वं सुतपःपृश्निरूपाभ्यां याचितः सन् अस्य विश्वस्य क्षेमाय स्वस्त्यर्थं सुरद्विषां दैत्यानां वधाय च अजः एव त्वं पुत्रत्वमभ्यगात् स्वीकृतवानसीत्याहुः । ॥ २७ ॥
प्रथमपुरुषस्त्वार्षः । अजस्त्वमित्यत्र अर्भत्वमिति पाठः सुगमः । भवानिति शेषः ॥ ३३ ॥ भारेति ॥ अन्ये तु आत्मभुवा ब्रह्मणा अर्थितः प्रार्थितः सन् उदधौ नाव इव दैत्यानां भूरिभारेण सीदन्त्या क्लिश्यन्त्या भुवो भारावतारणाय जात इत्याहुः । इतः प्राक् सर्वं मतान्तरम् ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धान्तमाह—भव इति ॥ केचन विरलास्तत्वविदस्तु अस्मिन्भवे संसारे अविद्या परमानन्दस्वरूपाज्ञानं ततो देहाभिमानात्कामः ततः कर्माणि तैः क्लिश्यमानानां जनानां क्लेश-निवृत्त्यर्थं श्रवणस्मरणार्हाणि कर्माणि करिष्यञातः इत्याहुः ॥ ३५ ॥ शृण्वन्तीति ॥ ये जनाः अभीक्ष्णशः निरन्तरं तव ईहितं चरितं शृण्वन्ति गायन्ति गृणन्ति कीर्त्त-यन्ति स्मरन्ति कीर्त्यमानमभिनन्दन्ति त एव अचिरेणैव शीघ्रमेव भवप्रवाहं जन्ममरणादिपरम्परारूपमुपरमयति निवर्त्तयतीति तथाभूतं तावकं त्वदीयं पदाम्बुजं पश्यन्त्येव नान्ये। अचिरेणैवेति सर्वत्रावधारणम् ॥ ३६ ॥ अपीति ॥ हे प्रभो अद्य स्वानां भक्तानां कृतमीहितमपेक्षितं येन स त्वं निर्विसर्गपाठे संबोधनम्। राज्याद्यपहरणेन राजसु योजितमंहो दुःखं यैस्तेषां येषामस्माकं भवतः पदाम्बुजादन्यत्परायणमाश्रयो नैवास्ति तान् सुहृदः भक्तान् अनुजीविनश्च नोऽस्मान् अपिस्वित् किंस्वित् द्वारका गमनेच्छया जिहाससि त्यक्तुमिच्छसि स्विदिति त्यागस्यानुचितत्वं सूचयति ॥ ३७ ॥ के वयमिति ॥ हृषीकाणामिन्द्रियाणामीशितुः प्राणस्येव यथा प्राणस्यादर्शने

भवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः ॥ श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥ ३५ ॥ शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः ॥ त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥ ३६ ॥ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोऽनुजीविनः ॥ येषां न चान्यद्भवतः पदाम्बुजात्परायणं राजसु योजितांहसाम् ॥ ३७॥ के वयं नामरूपाभ्यां यदुभिः सह पाण्डवाः ॥ भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ३८ ॥ नेयं शोभिष्यते तत्र यथेदानीं गदाधर ॥ त्वत्पदैरङ्किता भाति स्वल-क्षणविलक्षितैः ॥ ३९ ॥ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः ॥ वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षितैः ॥ ४० ॥ अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे ॥ स्नेहपाशमिमं छिन्धि दृढं पाण्डुषु वृष्णिषु ॥ ४१ ॥

इन्द्रियाणां नाम रूपं च न किंचित् तथा यत् यर्हि भवतोऽदर्शनं स्यात् यदा त्वमस्मान्न पश्यसि न द्रक्ष्यसि वा तदा नाम्ना विख्यात्या रूपेण समृद्ध्या च यदुभिः सह सहिताः पाण्डवाः वयं के नाम न केपि अतितुच्छा इत्यर्थः ॥ ३८ ॥ नेयमिति ॥ हे गदाधर इयमस्मत्पाल्या भूमिरपि यथेदानीं स्वैरसाधारणैर्वज्राङ्कुशादिभिर्लक्षणैर्विल-क्षितैश्चिह्नितैस्त्वत्पदैरङ्किता सती भाति शोभते तथा तत्र तदा त्वन्निर्गमनानन्तरं न शोभिष्यते ॥ ३९ ॥ इम इति ॥ स्वृद्धाः सुसमृद्धाः सुष्ठु पक्वा ओषधयो व्रीह्यादयो वीरुधो द्राक्षादयश्च येषु ते तथा इमे जनपदाः देशाः तथा वनानि अद्रयः नद्यः उदन्वन्तः समुद्राश्च तव वीक्षितैरेव एधन्ते वर्द्धन्ते ॥ ४० ॥ अथेति ॥ हे विश्वेश हे विश्वस्यात्मन् हे विश्वमूर्त्ते स्वकेषु पाण्डुषु वृष्णिषु च दृढमिमं मे मम स्नेहरूपं पाशं त्वं छिन्धि ॥ ४१ ॥

CC-0. In Public Domain. Digitization by eGangotri

त्वयीति ॥ हे मधुपते यादवेश उदन्वति समुद्रे गङ्गा ओघं जलपूरमिव यथा गंगा समुद्रे ओघमुद्वहति प्रतिबन्धं च न गणयति तथा अनन्यविषया मे मम मतिस्त्वयि असकृत् निरन्तरम् अद्धा साक्षात् रतिं प्रीतिमुद्वहतात् प्रकर्षेण वर्द्धमानां करोतु विघ्नांश्च मा गणयतु ॥४२॥ श्रीकृष्णेति ॥ हे श्रीकृष्ण कृष्णसख अर्जुनमित्र हे वृष्णीनामृषभ श्रेष्ठ अवन्यै भूम्यै द्रुह्यन्ति ये राजन्यास्तेषां वंशा एव वंशावेणवस्तेषां दहनेतिश्लिष्टपरम्परितरूपकम् हे अनपवर्गवीर्य अक्षीणप्रभाव हे गोविन्द गोद्विजसुराणामार्तिहरोवतारो यस्य तत्सम्बोधनम् । हे योगेश्वर हे अखिलगुरो भगवन् ते तुभ्यं नमः ॥ ४३ ॥ पृथयेति ॥ कलानि मधुराणि पदानि येषु तैर्वाक्यैः पृथयेत्थं पूर्वोक्तप्रकारेण परिणूतः संस्तुतोऽखिल उदयो महिमा यस्य सः "णूस्तुतौ" इति दीर्घान्तात् तुदादेः क्तः । वैकुण्ठो भगवांस्तां मायया मोहयन्निव मन्दं जहास । हासो जनोन्मादकरी च मायेत्युक्तेर्हास एव माया ॥ ४४ ॥ तामिति ॥ तां त्वयि मेनन्यविषया इति कुन्तीप्रार्थनां बाढमित्यङ्गीकृत्य ततो रथस्थानाद्गजसाह्वयं हस्तिनापुरं प्रविश्य ततस्तामन्याश्च

त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ॥ रतिमुद्वहतादद्धा गङ्गेवौघमुदन्वति ॥ ४२ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभाऽवनिध्रुग्राजन्यवंशदहनाऽनपवर्गवीर्य ॥ गोविन्द गोद्विजसुरार्तिहरावतार योगेश्वराऽखिलगुरो भगवन्नमस्ते ॥ ४३ ॥ सूत उवाच ॥ पृथयेत्थं कलपदैः परिणूताखिलोदयः ॥ मन्दं जहास वैकुण्ठो मोहयन्निव मायया ॥ ४४ ॥ तां बाढमित्युपामन्त्र्य प्रविश्य गजसाह्वयम् ॥ स्त्रियश्च स्वपुरं यास्यन्प्रेम्णा राज्ञा निवारितः ॥ ४५ ॥ व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा ॥ प्रबोधितोऽपीतिहासैर्नाऽबुध्यत शुचार्पितः ॥ ४६ ॥ आह राजा धर्मसुतश्चिन्तयन्सुहृदां वधम् ॥ प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः ॥ ४७ ॥ अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः ॥ पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः ॥ ४८ ॥

सुभद्राप्रमुखाः स्त्रिय उपामन्त्र्यानुज्ञाप्य स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णा अत्रैव कंचित् कालं निवसेति संप्रार्थ्य गमनान्निवारितः ॥४५॥ व्यासाद्यैरिति ॥ ईश्वरेहाऽज्ञैः ईश्वरस्य श्रीकृष्णस्येहा इच्छा भीष्ममुखेनैव राजा बोधनीयो भीष्मस्य तत्त्वज्ञत्वं च लोके ख्यापनीयमितिरूपा तामजानद्भिः व्यासाद्यैर्मुनिभिः अद्भुतकर्मणा कृष्णेन चेतिहासैः पूर्ववृत्तकथनैः प्रबोधितोपि शुचार्पितः शोकव्याप्तः राजा युधिष्ठिरो नाबुध्यत विवेकं नैव प्राप । इदमत्राद्भुतकर्मत्वं कृष्णस्य यत्स्वयं बोधयन्नपि पूर्वोक्ताशयसाफल्यार्थमबोधमेवादृढयत् । यथा सन्ध्यार्थं गतोपि यथोचितं वदन्नपि विग्रहमेवादृढयत् ॥ ४६ ॥ अबोधमेव प्रपञ्चयति—आहेति ॥ हे विप्राः प्राकृतेनाविवेकव्याप्तेन आत्मना मनसा सुहृदां मित्रबान्धवादीनां वधं चिन्तयंस्तेषु यः स्नेहस्तत्प्रयुक्तो यो मोहः कर्त्तव्याकर्त्तव्याननुसंधानं तस्य वशं गतः सन् धर्मसुतः राजा आह स्म ॥४७॥ अहो इति ॥ अहो अनुचितमेतद्दुरात्मनः दुष्टचित्तस्य मे हृदि रूढमज्ञानं पश्यत यतः पारक्यस्य श्वसृगालाद्याहारस्यैव देहस्यार्थे मे मया मे इति मयेत्यर्थेऽव्ययम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बह्वयः अक्षौहिणीः अक्षौहिण्यः हताः पूर्वसवर्णदीर्घ आर्षः। " अक्षौहिण्यां नागा (२१८७०) रथाश्च खनगाष्टभूद्वशो (२१८७०) ज्ञेयाः। खकुषट्शरषट् चाश्वाः (६५६१०) नराः खपञ्चाग्निगोकाष्टाः (१०९३५०)॥ " ४८ ॥ बालेति ॥ बालादीनां द्रोहकर्त्तुर्घातकस्य मे वर्षाणामयुतायुतैरपि निरयान्नरकान्मोक्षो निस्तारो नैव स्यात् सुहृदः संबन्धिनः मित्राणि सखायः पितरः पितृव्याः ॥ ४९ ॥ नैन इति ॥ धर्मयुद्धे द्विषां वधो राज्ञ एनः पापं न भवतीति यच्छासनं शिक्षारूपं वचस्तन्मे बोधाय संतोषाय नतु कल्पते समर्थं नैव भवति। यतस्तद्वचः धर्मयुद्धे प्रजाभर्त्तुरेव स्वप्रजानामन्येन बाधे प्रसक्ते तद्वधो नीतिशास्त्रेनुज्ञातः दुर्योधनेन तु प्रजायां रक्ष्यमाणायामेव मया केवलं राज्यलोभेनैव हतत्वात्ततो मम पापमेव जातमिति भावः ॥ ५० ॥ स्त्रीणामिति ॥ युद्धे पुंसां वधो मा नाम कथंचित् भवतु पापं तथापि मया हता बन्धवो यासां तासां स्त्रीणां योऽसाविहेदानीं द्रोहो दुःखमननुज्ञात एवोत्थितस्तज्जं पापं तु गृहमेधीयैर्गृहाश्रमविहितैः हिंसाप्रायैः कर्मभिर्व्यपोहितुं दूरीकर्त्तुमहं न कल्पो न समर्थः ॥ ५१ ॥ यज्ञैरपि मम पापं न मार्ज्यमिति हेतुवादमाश्रित्याह—यथेति ॥ पटादिलग्नं पङ्काभो यथा घनपङ्केन न मृज्यते यथा वा सुरालेशकृ-

बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ॥ ४९ ॥ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषाम् ॥ इति मे न तु बोधाय कल्पते शासनं वचः ॥ ५० ॥ स्त्रीणां मद्धतबन्धूनां द्रोहो योऽसाविहोत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुम् ॥ ५१ ॥ यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् ॥ भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥ ५२ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥ सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ॥ ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् ॥ १ ॥ तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः ॥ अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तथा ॥ २ ॥

तमपावित्र्यं बह्व्या सुरया न मृज्यते तथैवैकां प्रमादतो जातां भूतहत्यां बुद्धिपूर्वकहिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं दूरीकर्त्तुं कोपि नार्हति ॥ ५२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्याष्टमे निरमादिमाम् ॥ ८ ॥ नवमे भीष्मेण सर्वधर्मवर्णनमीर्यते ॥ कृष्णस्तुतिर्मृत्युकाले श्लोकास्तत्राङ्कसिन्धवः ॥ चत्वार्युवाचेति सप्तेषवोङ्कैर्यूना अनुष्टुभः ॥ ९ ॥ यद्ययं तवाविवेको नापयाति तदा सर्वधर्मतत्त्वज्ञं भीष्ममपि पृच्छेति कृष्णाद्यैरुक्ते भीष्मसमीपं ययावित्याह—इतीति ॥ इत्येवं प्रजानां द्रोहात् विनाशजनितात् पापात् भीतो युधिष्ठिरः सर्वेषां धर्माणां विवित्सया भीष्ममुखाद्वेदितुमिच्छया इडभाव आर्षः। विन्दतेर्वा रूपम्। ततो हस्तिनापुरात् यत्र देवव्रतो भीष्मः अपतत् तत् विनशनं कुरुक्षेत्रं प्रागात् ॥ १ ॥ तदेति ॥ तदा ते भीमादयो भ्रातरोऽपि सर्वे सन्तः श्रेष्ठाः अश्वा येषु तैः स्वर्णेन भूषितैः रथैस्तमन्वगच्छन् तथा व्यासधौम्यादयो विप्रा अपि रथैस्तमन्वगच्छन् ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

भगवानिति ॥ हे विप्रर्षे सधनञ्जयः अर्जुनेन सहितो भगवानपि रथेन तमन्वगच्छत् स नृपो युधिष्ठिरस्तैर्भ्रात्रादिभिः गुह्यकैः कुबेर इव व्यरोचत ॥ ३ ॥ दृष्ट्वेति ॥ दिवः स्वर्गात् च्युतं पतितममरमिव भूमौ निपतितं भीष्मं दृष्ट्वा सानुगा भृत्यादिसहिताः चक्रिणा कृष्णेन सह पाण्डवास्तं प्रणेमुः ॥ ४ ॥ तत्रेति ॥ हे सत्तम तत्र तदा तत्र स्थाने भरतपुङ्गवं भीष्मं द्रष्टुं ब्रह्मर्षयो भृग्वादयो देवर्षयो नारदादयः राजर्षयो राजानश्च सर्वे आसन् तत्क्षणमेवागताः ॥ ५ ॥ तानाह—पर्वत इति ॥ पर्वतादय आसन् इत्यनुषङ्गः । भगवान् बादरायणः व्यासः शिष्यैः सहितः रेणुकासुतः परशुरामः ॥ ६ ॥ वसिष्ठ इति ॥ वसिष्ठादयश्चासन् कौशिको विश्वामित्रः ॥ ७ ॥ अन्ये चेति ॥ हे ब्रह्मन् अन्ये च अमलाः ब्रह्मरातादयः शुकादयः कश्यपाङ्गिरसादयः कश्यपबृहस्पत्यादयो मुनयः शिष्यैः उपेताः आजग्मुः ॥ ८ ॥ तानिति ॥ धर्मज्ञः युद्धादिदेशे मरणादिकाले च यदुचितं तद्विभागवित्स वसूत्तमो भीष्मः महाभागान् तान् ऋषीन् समेतान् उपलभ्य दृष्ट्वा स्तुतिनमस्कारादिभिः पूजयामास ॥ ९ ॥ कृष्णमिति ॥ जगदीश्वरं

भगवानपि विप्रर्षे रथेन सधनंजयः ॥ स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ॥ ३ ॥ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरम् ॥ प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणा ॥ ४ ॥ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ॥ राजर्षयश्च तत्रासन्द्रष्टुं भरतपुङ्गवम् ॥ ५ ॥ पर्वतो नारदो धौम्यो भगवान्बादरायणः ॥ बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६ ॥ वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः ॥ कक्षीवान् गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥ ७ ॥ अन्ये च बहवो ब्रह्मन्ब्रह्मरातादयोऽमलाः ॥ शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः ॥८॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः ॥ पूजयामास धर्मज्ञो देशकालविभागवित् ॥ ९ ॥ कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम् ॥ हृदिस्थं पूजयामास माययोपात्तविग्रहम् ॥ १० ॥ पाण्डुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् ॥ अभ्याचष्टाऽनुरागास्रैरन्धीभूतेन चक्षुषा ॥ ॥ ११ ॥ अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनन्दनाः ॥ जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥ १२ ॥

माययोपात्तः स्वीकृतो विग्रहो मनुष्यदेहो येन तं कृष्णं हृदिस्थं सन्तं पुरतश्च आसीनं तत्प्रभावज्ञः भीष्मः पूजयामास ॥ १० ॥ पाण्डुपुत्रानिति ॥ भीष्मः उप समीपे आसीनान् प्रश्रयः विनयः प्रेमा स्नेहस्ताभ्यां सङ्गतान् उपसन्नान् सन्नतानिति पाठेऽवनतान् पाण्डुपुत्रान् अनुरागास्रैः स्नेहाश्रुभिरन्धीभूतेन व्याप्तेन चक्षुषा अभ्याचष्ट ददर्श । यद्वा तादृशेन चक्षुषा उपलक्षितो भीष्मः तान् अभ्यभाषत ॥ ११ ॥ अहो इति ॥ नन्दयन्ति इति नन्दनाः धर्मेण धर्मस्य वा नन्दनाः हे धर्मनन्दनाः यत् यतः विप्राः धर्मः अच्युतः श्रीकृष्णश्च आश्रयो येषां ते यूयं क्लिष्टं दुःखं यथा भवति तथा जीवितुं नार्हथ अपि तु सुखं जीवितुमर्हथ तथापि यत् क्लिष्टं जीवथ तत् अहो कष्टम् अहो अन्याय्यं सन्धिरार्षः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्थित इति ॥ अतिरथे अमितैः सह युद्धकर्तरि पाण्डौ संस्थिते मृते सति बालाः प्रजाः पुत्रा यस्याः तोकवती पुत्रवती वधूश्चेति दैन्यं दर्शितम् पृथा युष्मत्कृते मुहुः वारंवारं युष्माभिः सह बहून् क्लेशान् प्राप्ता ॥ १३ ॥ सर्वमिति ॥ भवतां च धर्मात्मनामपि यत् अप्रियं तत्सर्वं कालकृतं मन्ये वायोर्वशे घनावलिर्मेघपंक्तिरिव सपालः इन्द्रादिलोकपालसहितः सर्वोपि लोको यस्य कालस्य वशे वर्तते ॥ १४ ॥ यत्रेति ॥ यत्र यस्मिन् पक्षे धर्मसुतो युधिष्ठिरो राजा गदापाणिर्वृकोदरश्च कृष्णः अर्जुनः अस्त्री धन्वी गाण्डिवं चापं धनुः कृष्णः सुहृत् मित्रं ततः तत्रापि पुण्यशरीरबलास्त्रनैपुणशस्त्रदेवसंपत्तावपीत्यर्थः । विपत् इत्याश्चर्यम् ॥ १५ ॥ न हीति ॥ हे राजन् अस्य हि परमेश्वरस्य विधित्सितं कर्तुमिष्टं कर्हिचित् कोपि पुमान् न वेद यस्य विधित्सितस्य विजिज्ञासया युक्ताः कवयो ब्रह्मरुद्रादयोऽपि हि मुह्यन्ति ॥ १६ ॥ तस्मादिति ॥ हे भरतर्षभ हे नाथ हे प्रभो तस्मात् इदं सुखदुःखादिकं सर्वं दैवतन्त्रं परमेश्वराधीनं व्यवस्य निश्चित्य आर्ष आलोपः । व्यवसायेति भाव्यम् यद्वा व्यवस्य निश्चिनु लोट् । तस्ये-

संस्थितेऽतिरथे पाण्डौ पृथा बालप्रजा वधूः ॥ युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः ॥ १३ ॥ सर्वं कालकृतं मन्ये भवतां च यद-
प्रियम् ॥ सपालो यद्वशे लोको वायोरिव घनावलिः ॥ १४ ॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥ कृष्णोऽस्त्री गाण्डिवं चापं सुहृ-
त्कृष्णस्ततो विपत् ॥ १५ ॥ न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम् ॥ यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि ॥ १६ ॥ तस्मा-
दिदं दैवतन्त्रं व्यवस्य भरतर्षभ ॥ तस्यानुविहितोऽनाथा नाथ पाहि प्रजाः प्रभो ॥ १७ ॥ एष वै भगवान्साक्षादाद्यो नारायणः पुमान् ॥
मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥ १८ ॥ अस्यानुभावं भगवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥ १९ ॥
यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम् ॥ अकरोः सचिवं दूतं सौहृदादथ सारथिम् ॥ २० ॥ सर्वात्मनः समदृशो ह्यद्वयस्याऽनहंकृतेः ॥
तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥

श्वरस्यानुविहितः अनुगतः सन् " हि, गतौ; गत्यर्थ० " इति कर्त्तरि क्तः । तस्येति शेषे षष्ठी । अनाथाः प्रजाः पाहि ॥ १७ ॥ एष इति ॥ एष वै एष एव आद्यः पुमान् साक्षात् नारायणः भगवान् मायया लोकं जनं मोहयन् गूढ आच्छादितैश्वर्यो वृष्णिषु चरति विहरति ॥ १८ ॥ अस्येति ॥ हे नृप अस्य श्रीकृष्णस्य गुह्यतमम् अनुभावं प्रभावं साक्षात् भगवान् शिवः देवर्षिः नारदः कपिलश्च वेद जानाति ॥ १९ ॥ यमिति ॥ त्वं त्वऽज्ञानात् यं मातुलेयं वसुदेवपुत्रं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्तारं सुहृत्तमम् उपकारानपेक्षोपकारकं च मन्यसे तथा सौहृदात् विश्वासात् सचिवं मन्त्रिणं दूतम् अथ सारथिं च अकरोः कृतवानसि ॥ २० ॥ सर्वात्मन इति ॥ सर्वात्मनः समदृशः अद्वयस्य अनहंकृतेः निरवद्यस्य रागादिदोषरहितस्य अस्य तत्कृतं नीचोच्चकर्मकृतं ममेदं योग्यमयोग्यं वेति मतिवैषम्यं क्वचित् न अस्ति ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापीति ॥ हे भूप तथापि समत्वेपि एकान्तभक्तेषु तस्य अनुकम्पितं कृपां पश्य यद् यस्मात् असून् प्राणान् त्यजतः मे मम कृष्णः साक्षाद्दर्शनमागतः ॥ २२ ॥ भक्त्येति ॥ यस्मिन् श्रीकृष्णे भक्त्या मन आवेश्य वाचा च यस्य नाम कीर्तयन् कलेवरं त्यजन् योगी कामैर्वासनाभिः कर्मभिश्च मुच्यते ॥ २३ ॥ स इति ॥ अहं यावदिदं कलेवरं हिनोमि तावत् प्रसन्नहासेन अरुणलोचनाभ्यां च उल्लसत् रुचिरं मुखाम्बुजं यस्य सः चतुर्भुजः ध्यानस्य पन्था विषयः यो मया अन्यैश्च केवलं चिन्त्यते स देवदेवो भगवान् अग्रतः स्थित एव मां प्रतीक्षताम् ॥ २४ ॥ युधिष्ठिर इति ॥ तत् सानुकम्पं वाक्यम् आकर्ण्य युधिष्ठिरः शरपञ्जरे शयानं भीष्मम् ऋषीणां च अनुशृण्वतां विविधान् धर्मान् अपृच्छत् ॥ २५ ॥ पुरुषेति त्रयम् ॥ हे मुने तत्त्ववित् भीष्मः पुरुषस्य स्वभावेन विहितान् नरजातिसाधारणान् सत्यदयादीन् यथावर्णं वर्णयोग्यधर्मान् योग्यतारूपे यथार्थेऽव्ययीभावः । यथाश्रममाश्रमधर्मान् वैराग्यरागावेवोपाधी ताभ्यां क्रमेणाम्नातम् उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् तथा दानधर्मान्

तथाप्येकान्तभक्तेषु पश्य भूपाऽनुकम्पितम् ॥ यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥ २२ ॥ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ २३ ॥ स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम् ॥ प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥ २४ ॥ सूत उवाच ॥ युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे ॥ अपृच्छद्विविधान्धर्मानृषीणामनुशृण्वताम् ॥ २५ ॥ पुरुषस्वभावविहितान्यथावर्णं यथाऽऽश्रमम् ॥ वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥ दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः ॥ स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः ॥ २७ ॥ धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः ॥ यो योगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः ॥ ॥ २९ ॥ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसङ्गं मन आदिपूरुषे ॥ कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थिते मीलितदृग्व्यधारयत् ॥ ३० ॥

तुलापुरुषादीन् राजधर्मान् प्रजापालनादीन् मोक्षधर्मान् शमदमादीन् स्त्रीधर्मान् पातिव्रत्यादीन् भगवद्धर्मान् हरितोषकानेकादश्यादिव्रतनियमान् सहोपायान् साधनसहितान् धर्मार्थकाममोक्षान् विभागशः अवान्तरभेदभिन्नान् समासव्यासौ संक्षेपविस्तरौ तावेव योगौ उपायौ ताभ्यां समासव्यासयोर्योगेन युक्ततया इति वा । नानाख्यानेषु ये इतिहासाः तेषु यथा यथावत् वर्णयामास ॥ २६ ॥ २७ ॥ २८ ॥ धर्ममिति ॥ धर्मं प्रवदतस्तस्य भीष्मस्य स उत्तरायणरूपः कालः प्रत्युपस्थितः यः छन्देन स्वेच्छया मृत्युर्यस्य तस्य योगिनः वाञ्छितः ॥ २९ ॥ तदेति ॥ तदा सहस्रणीः सहस्रं रथिनो नयति पालयति वशं नयति वा । सहस्रगीरिति पाठे सहस्रार्थवत्यो गिरो यस्य स भीष्मः गिरः उपसंहृत्य अमीलितदृक् एव पुरः स्थिते लसन्तौ पीतौ पटौ यस्य तस्मिन् चतुर्भुजे आदिपुरुषे कृष्णे विमुक्तसङ्गं विषयान्तरतो विरक्तं मनो व्यधारयत् तद्दर्शनैकप्रवणमकरोत् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशुद्धयेति ॥ विशुद्धया धारणया चित्तस्यैकत्र देशे बन्धनरूपया हतमशुभं पापं यस्य सः तस्य भगवत ईक्षयैव कृपादृष्ट्यैव आशु गता निवृत्ता आयुधानां व्यथा पीडा यस्य सः गतायुधश्रम इत्यपि पाठः । निवृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमः विषयान्तरेषु भ्रमणं यस्य स भीष्मो जन्यं देहं मायिकप्रपञ्चं वा विसृजन् त्यक्ष्यन् जनार्दनं श्रीकृष्णं तुष्टाव ॥ ३१ ॥ इतीति ॥ इति आयुःसमाप्तौ नानाधर्माद्युपायैर्वा सात्वतपुङ्गवे विशिष्टः सर्वाधिको भूमा महत्त्वं यस्य तस्मिन् विभून्नि स्वसुखं स्वरूपभूतं परमानन्दम् उपगते प्राप्तवत्येव च यत् यतः प्रकृतेः भवप्रवाहः सृष्टिपरम्परा भवति तां प्रकृतिं योगमायां क्वचित्सृष्ट्यादिषु विहर्तुम् उपेयुषि स्वीकृतवति नतु स्वरूपतिरोधानेन जीववत्परतन्त्रे इत्यर्थः भगवति वितृष्णा फलसंकल्परहिता अवितृष्णेति वा छेदः अतृप्तेत्यर्थः । मतिः मया उपायनत्वेन उपकल्पिता । अत्र स्तोत्रे प्रत्यक्षेपि भगवति युष्मत्पदप्रयोगाभावः आस्वादितचरवीररसावेशात् बहुपर्वसु वीरत्वस्य वर्णनाच्च पुष्पिताग्रा एकादश ॥ ३२ ॥ त्रिभुवनेति ॥ त्रिषु भुवनेषु कमनं सुन्दरं तमालस्येव नीलो वर्णो यस्य तत् रवेः करा इव

विशुद्धया धारणया हताशुभस्तदीक्षयैवाऽऽशु गतायुधव्यथः ॥ निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनम् ॥ ३१ ॥ भीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभून्नि ॥ स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥ त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ॥ वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥ ३३ ॥ युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ॥ मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥ ३४ ॥ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ॥ स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥ ३५ ॥

गौरे पीते वरे श्रेष्ठे युद्धसमये रविकरैः गौरवरे अतिगौरीकृते वा अम्बरे वस्त्रे यस्मिंस्तत् अलककुलैः कुन्तलसमूहैरुपर्यावृतमाननाब्जं यस्मिन् तत् वपुः दधाने विजयसखे अर्जुनसारथौ श्रीकृष्णे मे मम अनवद्या अहैतुकी रतिरनुरागोऽस्तु ॥ ३३ ॥ युधीति ॥ युधि युद्धे यत्तुरगाणां खुररजस्तेन विधूम्राः धूसरास्ते च विश्वञ्चः इतस्ततश्चलन्तः कचाः कुन्तलास्तैर्लुलितं विकीर्णं यत् श्रमवारि स्वेदबिन्दुरूपं तेन वात्सल्यद्योतकेनालंकृतमास्यं यस्य तस्मिन् मम निशितैः तीक्ष्णैः शरैर्विभिद्यमाना त्वक् यस्य तस्मिन् विलसच्छोभमानं त्रुट्यद्वा कवचं यस्य तस्मिन्कृष्णे आत्मा मनोऽस्तु रमतामित्यर्थः ॥ ३४ ॥ सपदीति ॥ सख्युरर्जुनस्य वचः " सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत । " इति वचनं निशम्य सपदि शीघ्रं निजपरयोर्बलयोः पाण्डवकौरवसेनयोर्मध्ये रथं निवेश्य स्थापयित्वा स्थितवति परसैनिकायुः दुर्योधनसैनिकानामायुः अक्ष्णा कालदृष्ट्या हृतवति असौ भीष्मः असौ कर्ण इत्यादिप्रदर्शनव्याजेन तेषामायुराकृष्यार्जुनजयं कृतवति पार्थसखे अर्जुनसारथौ मम रतिरस्तु ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

व्यवहितेति ॥ व्यवहिता किंचिद्दूरे स्थिता या पृतना कौरवसेना तस्या मुखमिव मुखमग्रे स्थितान् भीष्मद्रोणादीन्निरीक्ष्य दोषबुद्ध्या पापभयेन स्वजनानां भीष्मादीनां वधाद्विमुखस्यार्जुनस्य कुमतिम् अहं हन्तेत्यादिकुबुद्धिम् आत्मविद्यया गीताशास्त्रोपदेशेन योऽहरत्तस्य परमस्य पुरुषोत्तमस्य चरणरतिर्मे ममास्तु ॥ ३६ ॥ स्वनिगममिति ॥ स्वनिगमम् अशस्त्र एवाहं साहाय्यमात्रं करिष्यामीति प्रतिज्ञामपहाय त्यक्त्वा श्रीकृष्णं शस्त्रं ग्राहयिष्यामीति मत्प्रतिज्ञाम् ऋतं सत्यं यथा स्यात्तथा अधि अधिकां कर्तुं यो रथस्थः सन्नवप्लुतः सहसैवावतीर्णः धृतो रथचरणश्चक्रं येन सः निजभारेण चलन्ती गौः पृथ्वी यस्मात् गतं संरम्भेण पतितमुत्तरीयं यस्य सः यः इभं गजं हन्तुं सिंह इव अभ्ययात् अभिमुखमधावत् तस्य चरणरतिर्मेस्तु इत्युनुषङ्गः । अत्र कृष्णेन स्वभक्तवात्सल्यगुणस्य दुस्त्यजत्वादर्जुनस्य युद्धासामर्थ्ये स्वप्रतिज्ञामपि त्यक्त्वा स्वयमेवार्जुनस्य रक्षार्थं योत्स्यते एव अतः क्षणमर्जुनं पराभूयास्य युद्धं भक्तवात्सल्यद्योतकं द्रक्ष्यामीति भीष्मस्य स्वमनोरथसिद्ध्यर्थैव प्रतिज्ञा इत्यतः स्वप्रतिज्ञाभङ्गेनार्जुने स्वप्रमाणं दर्शयित्वा भीष्मं प्रमोद्य तस्योत्कर्षं च लोके स्यापयामासेति तत्त्वम् ॥ ३७ ॥ शितेति ॥ यदाभ्ययात्तदा आततायिनो धन्विनो मे शितैस्तीक्ष्णैर्विशिखैर्बाणैः हतः विशीर्णदंशः विशीर्णकवचः क्षत-

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या ॥ कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥ ३६ ॥
स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ॥ धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ॥ ३७ ॥ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ॥ प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुन्दः ॥ ३८ ॥ विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ॥ भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपम् ॥ ३९ ॥ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ॥ कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन्किल यस्य गोपवध्वः ॥ ४० ॥

जेन रुधिरेण परिप्लुतो व्याप्तः सन् मद्वधार्थं प्रसभं वारयन्तमर्जुनमप्यतिक्रम्य अभिससार अभिमुखमाजगाम । एवं योर्जुनपक्षपातीव लक्षितः वस्तुतो मद्वचःपालनेन ममैवानुग्रहं कृतवान् स भगवान्मुकुन्दो मे गतिर्भवतु ॥ ३८ ॥ विजयेति ॥ विजयरथ एव कुटुम्बवदकृत्यैरपि रक्षणीयो यस्य तस्मिन् आत्तं गृहीतं तोत्रं प्रतोदः येन तस्मिन् धृताश्च ते हयानां रश्मयः प्रग्रहाश्च ते सन्ति हस्ते यस्य तस्मिन् आर्ष इनिः । सामान्ये नपुंसकं वा । व्रीह्यादित्वं वा कल्प्यम् । तच्छ्रिया वामहस्तेश्वधारणरज्जुर्दक्षिणे प्रतोदः मुखे हुंहुमिति तन्नोदनप्रोत्साहनशब्द इति सारथ्यशोभया ईक्षणीये भगवति श्रीकृष्णे मुमूर्षोः मर्तुमुद्यतस्य मे रतिरस्तु । यं हरिं निरीक्ष्य इह रणे ये हतास्ते तस्य स्वरूपं गताः प्राप्ताः इति दिव्यदृष्ट्या पश्यन्नाह स्म ॥ ३९ ॥ ललितेति ॥ ललिता गतिश्च विलासश्च रासादिः वल्गुर्मनोहरो हासः प्रणयः स्नेहस्तत्पूर्वकं निरीक्षणं च तैस्तैः कल्पितः उरुर्मानो यासां ताः कृतं पूतनास्तनपानबकवधादिकम् अनुकृतवत्यः उन्मदान्धाः गोपवध्वः यस्य प्रकृतिं स्वरूपम् अगन् अगमन् मलोप आर्ष इति स्वामिपादाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपोद्घातोक्तच्छिलुगादिना वा साध्यम् । तस्मिन्मे रतिरस्तु ॥४०॥ मुनिगणेति ॥ युधिष्ठिरस्य राजसूये मुनिगणैर्नृपवर्यैश्च संकुले व्याप्तेन्तःसदसि सभामध्ये एषां मुनिगणादीना-महोरूपमहो महिमेत्येवमीक्षणीयः सन् यः अर्हणमग्रपूजाम् उपपेदे प्राप स एव आत्मान्तर्यामी मम दृशि गोचरो दृष्टिविषयः सन्नाविः प्रकटो वर्त्तते अहो मम भाग्यम् इति भावः ॥४१॥ तमिति ॥ तमात्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि प्रतिहृदयं धिष्ठितम् अधिष्ठितम् अलोप आर्षः अन्तर्यामिणम् अर्कमिव जलाशयेषु एकमपि प्रतिदृशं दृशं दृशं प्रति टाबन्तेन वीप्सार्थेऽव्ययीभावः । नैकधा अनेकविधम् इव प्रतीतम् अजम् इमं श्रीकृष्णं विधूतो निवृत्तो भेदप्रयुक्तो मोहो यस्य सोऽहं समधिगतः प्राप्तः अस्मि ॥४२॥ कृष्ण इति ॥ एवमात्मनि परमात्मनि भगवति श्रीकृष्णे मनोवाग्दृष्टीनां वृत्तिभिः सह आत्मानं प्रत्यगात्मानमावेश्यैकीकृत्य ज्ञानित्वात् अन्तरेऽवलीनः

मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूय एषाम् ॥ अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥ ४१ ॥ तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम् ॥ प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ॥ ४२ ॥ सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्य सोन्तः श्वास उपारमत् ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ४४ ॥ तत्र दुन्दुभयो नेदुर्देवमानववादिताः ॥ शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव ॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥ ४६ ॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ४७ ॥ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् ॥ पितरं सान्त्वयामास गान्धारीं च तपस्विनीम् ॥ ४८ ॥

श्वासो यस्य सः भीष्मः उपारमत् देहादिकं तत्याज ॥ ४३ ॥ संपद्यमानमिति ॥ भीष्मं निष्कले शुद्धे ब्रह्मणि सम्पद्यमानं प्राप्तमाज्ञायते सर्वे दिनात्यये रात्रौ वयांसि पक्षिण इव तूष्णीं बभूवुः ॥ ४४ ॥ तत्रेति ॥ तत्र तदा देवैर्मानवैश्च वादिताः दुन्दुभयः नेदुः ये राज्ञां मध्ये साधवः अनसूयवः ते शशंसुः तुष्टुवुः देवैः कृताः पुष्पवृष्टयः खादाकाशात्पेतुः ॥४५॥ तस्येति ॥ हे भार्गव शौनक संपरेतस्य मुक्तस्यापि तस्य भीष्मस्य निर्हरणादीनि दाहादीनि कर्माणि कारयित्वा युधिष्ठिरः मुहूर्त्तं मुहूर्तपर्यन्तं दुःखितोऽभवत् ॥ ४६ ॥ तुष्टुवुरिति ॥ ततश्च हृष्टाः मुनयः कृष्णं तस्य गुह्यनामभिः अद्भुतकृत्यादिसूचकैः तुष्टुवुः ततः पुनः कृष्णो हृदये येषां ते मुनयः स्वाश्रमान्प्रययुः ॥ ४७ ॥ तत इति ॥ ततः सहकृष्णः कृष्णेन सहितो युधिष्ठिरो गजाह्वयं हस्तिनापुरं गत्वा पितरं धृतराष्ट्रं तपस्विनीं पुत्रमरणेन संतापवतीं गान्धारीं च सान्त्वयामास ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

पित्रेति ॥ पित्रा धृतराष्ट्रेणानुमतोऽनुज्ञातो वासुदेवेन कृष्णेन अनुमोदितः विभुः राजा युधिष्ठिरः पितृपैतामहं पित्रादिपरम्पराप्राप्तं राज्यं धर्मेण चकार ॥४९॥ इतिश्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्याऽध्याये नवमे व्यधात् ॥ ९ ॥ दशमे स्तवनं विष्णोः कृतं स्त्रीभिर्गजाह्वये ॥ द्वारकागमनं तस्य श्लोकाः षट्त्रिंशदीरिताः ॥ उवाचयुगलं सार्द्धा द्विवेदाः सन्त्यनुष्टुभः ॥ १० ॥ हत्वेति ॥ अनुजैः सह सहितो धर्मभृतां वरिष्ठः प्रत्यवरुद्धभोजनः स्वजनवधशोकेन संकुचितभोगः राज्यलाभेन प्राप्तभोगो वा युधिष्ठिरः स्वरिक्थस्पृहः स्वदायलिप्सून् स्वरिक्थस्पृध इति पाठे तु रिक्थं धनं स्वरिक्थार्थं स्पृत् संग्रामो येषां तान् इति स्वाम्यादयः । तत्र स्पृहधातोर्हस्य धः स्पर्धधातोः स्पृधादेशो वा आर्षः । युद्धार्थो लक्षणयेति तात्पर्यं प्रतीयते । आततायिनो दुर्योधनादीन् हत्वा राज्ये कथं प्रवृत्तः ततश्च किमकारषीत् किमकार्षीत् अकाराधिक्यमार्षम् ॥ १ ॥ भगवदिच्छयैव तस्य राज्यादिप्रवृत्तिरित्याह—वंशमिति ॥ यथा वेणुवनसंघर्षणजाग्निना वनं दग्धं भवति तथा कुरुवंश एव दवो वनं तस्मादुद्भूतो यः क्रोधरूपोऽग्निस्तेन निर्हृतं

पित्रा चानुमतो राजा वासुदेवानुमोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ४९ ॥ इति श्रीभागवते प्रथमस्कन्धे युधिष्ठिरराज्यप्रलम्भनो नाम नवमोऽध्यायः ॥ ९ ॥ ॥ शौनक उवाच ॥ ॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः ॥ १ ॥ सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः ॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥ २ ॥ निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशास गामिन्द्र इवाऽजिताश्रयः परिध्युपान्तामनुजानुवर्तितः ॥ ३ ॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ॥ सिषिचुः स्म व्रजान्गावः पयसोधस्वतीर्मुदा ॥ ४ ॥

दग्धमुपसंहृतं कुरोर्वंशं संरोहयित्वा परीक्षिद्रक्षणेनाङ्कुरितं कृत्वा "क्त्वापि च छन्दसि" इति ल्यबभावः । एवं निवेशयित्वेत्यत्रापि युधिष्ठिरं च निजे तदीये राज्ये निवेशयित्वा भवभावनः लोकरक्षकः ईश्वरो हरिः ह स्फुटं कृतकृत्यत्वात् प्रीतमना बभूव ॥ २॥ निशम्येति ॥ अथ भीष्मोक्तमच्युतोक्तं च निशम्य प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्न स्वतन्त्रमित्येवंभूतं तेन विधूतो निवृत्तो विभ्रमोऽहङ्कृतैते मदीया इति मोहो यस्य सः युधिष्ठिरः अजितः श्रीकृष्ण उपेन्द्रश्चाश्रयो यस्य अनुजैः अनुजेनोपेन्द्रेण च अनुवर्तितः अनुवृत्तिं प्रापितः सन् इन्द्र इव परिधयः समुद्रा ऊर्ध्वं दिङ्मण्डलं च तदुपान्तां तत्पर्यन्तां गां पृथ्वीं स्वर्गं च शशास पालयामास । श्लेष उपमाया अङ्गम् ॥ ३॥
काममिति ॥ अजातशत्रौ युधिष्ठिरे राज्ञि सति पर्जन्यः कामं यथेष्टं ववर्ष मही च सर्वान् कामान् दोग्धि प्रपूरयतीति तथाभूताऽभूत् । ऊधस्वतीः ऊधः क्षीराशयः तन्महदस्ति यासामिति अतिशायने मतुप् पूर्वसवर्णदीर्घ आर्षः । गावो मुदा हर्षेण युक्ताः पयसा दुग्धेन व्रजान् गोष्ठानि सिषिचुः अभ्यषिञ्चन् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्य इति ॥ तस्य युधिष्ठिरस्य नद्यः समुद्रा गिरयः वनस्पतिभिर्वटोदुम्बरादिभिर्वीरुद्भिर्द्राक्षादिभिश्च सहिताः सर्वा ओषधयो यवव्रीह्यादयः अन्वृतु ऋतौ ऋतौ कामं यथेष्ट फलन्ति समृद्धिं नयन्ति स्म ॥ ५ ॥ नाधय इति ॥ अजातशत्रौ युधिष्ठिरे राज्ञि सति दैवं च भूतानि च आत्मा देहश्च हेतुर्येषामधिदैविकादीनां ते आधयो मनोव्यथाः व्याधयो रोगाः क्लेशाः शीतोष्णादिकृताः जन्तूनां प्राणिनां कर्हिचिदपि नाभवन् ॥ ६ ॥ उषित्वेति द्वयम् ॥ सुहृदां युधिष्ठिरादीनां विशोकाय विनोदनाय स्वसुः सुभद्रायाः प्रियकाम्यया च हास्तिनपुरे कतिपयान्मासानुषित्वा अवस्थाय तं युधिष्ठिरमामन्त्य पृष्ट्वा तेनाभ्यनुज्ञातस्तं परिष्वज्याभिवाद्य कैश्चिदधिकवयस्कैः परिष्वक्त आलिङ्गितो न्यूनवयस्कैरभिवादितश्च हरिः कृष्णो रथमारुरोह ॥ ७ ॥ ८ ॥ सुभद्रेति द्वयम् ॥ तदा सुभद्राद्याः धृतराष्ट्राद्याश्च मत्स्यसुता सत्यवती तदादयोऽन्याश्च स्त्रियः विमुह्यन्तो मोहं गताः । "पुमान् स्त्रिया" इत्येकशेषः । शार्ङ्गधन्वनः कृष्णस्य विरहं न सेहिरे विराटतनया उत्तरा युयुत्सुः धृतराष्ट्रद्वैयाश्यां जातः गौतमः कृपः यमौ नकुलसहदेवौ

नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः ॥ फलन्त्योषधयः सर्वाः काममन्वृतु तस्य वै ॥ ५ ॥ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः ॥ अजातशत्रावभवञ्जन्तूनां राज्ञि कर्हिचित् ॥ ६ ॥ उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः ॥ सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥ ७ ॥ आमन्त्र्य चाऽभ्यनुज्ञातः परिष्वज्याऽभिवाद्य तम् ॥ आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥ ८ ॥ सुभद्रा द्रौपदी कुन्ती विराटतनया तथा ॥ गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥ ९ ॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः ॥ न सेहिरे विमुह्यन्तो विरहं शार्ङ्गधन्वनः ॥ १० ॥ सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः ॥ कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥ ११ ॥ तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं कथम् ॥ दर्शनस्पर्शसंलापशयनासनभोजनैः ॥ १२ ॥ सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः ॥ वीक्षन्तः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह ॥ १३ ॥ न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद्देवकीसुते ॥ निर्यात्यगारान्नो भद्रमिति स्याद्बान्धवस्त्रियः ॥ १४ ॥

॥ ९ ॥ १० ॥ सत्सङ्गादिति द्वयम् ॥ सतां सङ्गाद्धेतोर्मुक्तस्त्यक्तः दुःसङ्गो धनपुत्राद्यासक्तिरूपो येन स बुधः धीमान् सद्भिः कीर्त्यमानं रोचनं रुचिकरं यस्य श्रीकृष्णस्य यशोपि सकृदेकवारमप्याकर्ण्य सत्सङ्गं हातुं त्यक्तुं नोत्सहते न शक्नोति तस्मिन् श्रीकृष्णे दर्शनस्पर्शनादिभिर्न्यस्ता धीर्येषां ते पार्थाः साक्षात्तस्यैव विरहं कथं सहेरन् ॥ ११ ॥ १२ ॥ सर्वे इति ॥ यतश्च स्नेहेन संबद्धा अतः सर्वे ते तमेवानुद्रुतानि अनुगतानि चेतांसि येषां तथाभूतास्ततोऽनिमिषैर्निमेषरहितैरक्षैर्नेत्रैस्तमेव वीक्षन्तो वीक्षमाणाः सन्तः शता आर्षः । स यत्र यत्र चलति स्म तत्र तत्र विचेलुः । यद्वा तमेव वीक्षमाणास्तत्र तत्राहर्णाद्यानयनार्थं चलन्ति स्म ॥ १३ ॥ न्यरुन्धन्निति ॥ तदा च बान्धवानां स्त्रियः कुन्तीप्रभृतयः अगाराद् स्वगृहाद्देवकीसुते निर्याति निर्गच्छति सति अभद्रमपशकुनं न स्यात् मा भूदिति बुद्ध्या औत्कण्ठ्यात्प्रेमपूर्वकानुध्यानादुद्गलत्

CC-0. In Public Domain. Digitization by eGangotri

स्रवदपि बाष्पमश्रु न्यरुन्धन् नेत्रेष्वेव स्तम्भितवत्यः अत्र अश्रूणि सन्त्युरेव केवलममङ्गलभिया पटाञ्चलेन गोपितवत्यः इति उदुपसर्गेण शत्रा च द्योतितम् ॥ १४ ॥ मृदङ्गेति ॥ तदा मृदङ्गादयो वाद्यभेदाः नेदुः ॥ १५ ॥ प्रासादेति ॥ प्रेमव्रीडास्मितपूर्वकमीक्षणं यासां ताः कुरूणां नार्यः कृष्णदिदृक्षया प्रासादशिखरारूढाः सत्यः कृष्णे कुसुमैः कुसुमानि कर्मणः करणत्वविवक्षा ववृषुः विकीर्णवत्यः ॥ १६ ॥ सितेति ॥ प्रियतमस्य भगवतः प्रियः गुडाका निद्रा तस्या ईशो जितनिद्रोऽर्जुनः मुक्तानां दामभिर्विभूषितम् रत्नमयो दंडो यस्य तत् सितातपत्रं श्वेतछत्रं जग्राह ॥ १७ ॥ उद्धव इति ॥ उद्धवः सात्यकिश्चोभौ परमाद्भुते व्यजने जगृहतुः । पथि मार्गे कुसुमैर्विकीर्यमाण आच्छाद्यमानो मधुपतिः श्रीकृष्णो रेजे ॥ १८ ॥ अश्रूयन्तेति ॥ तत्र तत्र मार्गे द्विजैरीरिताः प्रयुक्ताः सत्याः सुखादीनां श्रीकृष्णे व्यभिचाराभावात् किंतु निर्गुणस्य तस्य सुखी भवेत्यादयो नानुरूपाः गुणात्मनोऽङ्गीकृतमानुष्यनाट्यस्यानुरूपाश्च सन्धिरार्षः । आशिषः अश्रूयन्त श्रुताः ॥ १९ ॥ अन्योन्यमिति ॥ उत्तमश्लोके

मृदङ्गशंखभेर्यश्च वीणापणवगोमुखाः ॥ धुन्धुर्यानकघण्टाद्या नेदुर्दुन्दुभयस्तथा ॥ १५ ॥ प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ॥ ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥ १६ ॥ सितातपत्रं जग्राह मुक्तादामविभूषितम् ॥ रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह ॥ १७ ॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ॥ विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि ॥ १८ ॥ अश्रूयन्ताऽऽशिषः सत्यास्तत्र तत्र द्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥ १९ ॥ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम् ॥ कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २० ॥ स्त्रिय ऊचुः ॥ स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ॥ अग्रे गुणेभ्यो जगदात्मनीश्वरे निर्मीलितात्मन्निशि सुप्तशक्तिषु ॥ २१ ॥

श्रीकृष्णे चेतो यासां तासां कौरवेन्द्रो युधिष्ठिरस्तत्पुरस्य स्त्रीणां सर्वेषां श्रुतीः कर्णान् मनांसि च हरति तादृशः सर्वासां श्रुतीनां मनस्तात्पर्य्यं संगृह्णातीति वा सर्वासां श्रुतीनां मनोहरः उपनिषदोपि मूर्तिमत्यः तं संजल्पमभ्यनन्दन्निति श्रीस्वामिपादाः । अन्योन्यं संजल्पः संवादः आसीत् ॥ २० ॥ स वै इति ॥ गुणेभ्योऽग्रे गुणक्षोभात्सृष्टेः पूर्वं यः एकः अद्वितीयः पुरातनः पुरुषः अविशेषे सत्त्वादिगुणविशेषरहिते निष्प्रपञ्चे आत्मनि निजरूप एव आसीत् तथा निशि प्रलये च सुप्तशक्तिषु शक्तिषु लीनासु सतीषु तदा च जगतामात्मनि जीवे जातावेकवचनम् । ईश्वरे निर्मीलितात्मनि लीनस्वरूपे सति जीवेषु ईश्वरे लीनरूपेषु सत्सु इत्यर्थः । ङिलुक् छान्दसः यः एकः अविशेषे आत्मन्येव स्थास्यति स वै स एव किलायं श्रीकृष्णः इति तर्जनीभिर्दर्शयामासुः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं सृष्टेः पूर्वं प्रलयस्यानन्तरं च निष्प्रपञ्चावस्थोक्ता तन्मध्ये सप्रपञ्चावस्थामाह– स एवेति ॥ अनामरूपात्मनि नामरूपरहिते जीवे रूपनामनी विधित्समानो विधातुमिच्छन् देहाद्युपाधिसृष्ट्या जीवानां भोगार्थमित्यर्थः । शास्त्रकृत् कर्माणि विधातुं वेदकारकः सः अप्रच्युतस्वरूपे आत्मनि स्थित एव भूयः पुनः सृष्टिप्रवाहस्यानादित्वात् निजवीर्येण स्वशक्तिरूपेण कालेन चोदितां प्रेरितां क्षुभितगुणां स्वजीवमायां स्वांशभूतजीवमोहिनीं सिसृक्षतीं स्रष्टुमिच्छतीं विश्वसर्जनोन्मुखीं प्रकृतिमनुससार तदनुकूलतया अधिष्ठितवान् ॥ २२ ॥ स वा इति ॥ यस्य पदं स्वरूपं चरणं वा अत्र संसारे निर्जितो मातरिश्वा प्राणो यैस्ते ह्रस्वत्वमार्षम् । यद्वा निर्जितात् मातरिश्वनः प्राणाद्धेतोरित्यर्थः । जितेन्द्रियाः सर्वेन्द्रियाणां प्राणाधीनवृत्तित्वात्प्राणजयादेवनिर्जितेन्द्रिया इत्यर्थः । सूरयो विवेकिनः भक्त्या उत्कलितः उत्कण्ठितः अमलः रागादिशून्यो य आत्मा बुद्धिस्तेन पश्यन्ति स वै स एवायं श्रीकृष्णः बुद्धिवैमल्येप्ययमेव हेतुरित्याहुः । ननु हे सखि एष एव सत्वमन्तःकरणं परिमार्ष्टुं शोधयितुमर्हतीत्यर्थः । ननु योगादयः ॥ २३ ॥ स वा इति ॥ हे सखि वेदेषु गुह्येषु वेदानुसारिरहस्यागमेषु च गुह्यवादिभी रहस्यनिरूपकैर्ऋष्यादिभिरन्वनुगीताः सत्यः यथार्थाः कथा यस्य यश्चेश एक एव सन् आत्मनः स्वस्य लीलया जगत्सृजति अवति अत्ति संहरति च परन्तु तत्र न सज्जते अहं ममेत्यभिमानं न करोति स वै स एवायं श्रीकृष्णः ॥ २४ ॥ यदा हीति ॥ तमोव्याप्ता धीर्येषां ते नृपाः यदा हि अधर्मेण जीवन्ति केवलं स्वप्राणान् पुष्णन्ति तत्र तदा एष हि एष एव भगवान् भवाय स्थित्यै सत्वतो विशुद्धेन सत्वगुणेन नानारूपाणि दधत् युगे युगे प्रतियुगं तत्तदवसरे भगमैश्वर्यं सत्यं सत्यप्रतिज्ञत्वम् ऋतं यथार्थोपदेशकत्वं दयां भक्तकृपां यशोद्भुतकर्मत्वं च धत्ते तादृशगुणपूर्णं आविर्भवति ॥ २५ ॥ अहो इति ॥ अहो यत् यस्मादेष पुंसामृषभः पुरुषोत्तमः श्रियः प्रियः पतिः क्वचित्पतिरित्येव पाठः स्वजन्मना यदोः कुलमञ्चति पूजयति सत्करोति अतः तत् अलमत्यर्थं श्लाघ्यतमं तं मबर्थस्याप्यत्यन्तातिशयेऽलमिति तत्राप्याश्चर्य्ये अहो इति । यच्च अहो एष भगवान् चङ्क्रमणेन बालक्रीडार्थपरिभ्रमणेन चकाराज्जन्मना च मधोर्वनं मथुरामण्डलं सत्करोति अतस्तत् अलं पुण्यतमम् ॥ २६ ॥

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् ॥ अनामरूपात्मनि रूपनामनी विधित्समानोनुससार शास्त्रकृत् ॥ २२ ॥
स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः ॥ पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥ २३ ॥
स वा अयं सख्यऽनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ॥ य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ॥ २४ ॥
यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल ॥ धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे ॥ २५ ॥
अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनम् ॥ यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चङ्क्रमणेन चाञ्चति ॥२६॥

CC-0. In Public Domain. Digitization by eGangotri

अहो बतेति ॥ अहो बत अत्याश्चर्यमेतत् । यत् कुशस्थली द्वारका स्वर्गे उत्कृष्ट इति यत् स्वः स्वर्गस्य यशस्तस्य तिरस्करी परिभवकर्त्री भुवश्च पुण्ययशस्करी धन्येयं भूमिर्यत्रेदृशी द्वारका वर्त्तत इति सत्कीर्तिकर्त्री भवति । यत् यस्मात् यत्प्रजाः यत्रत्याः सर्वाः प्रजाः स्वानुग्रहेण ईषितं प्रेषितम् ईषेर्दीर्घोपधात् कः इष्यतेर्वा कः । यद्वा अनुग्रहार्थमिषितमिष्टम् अत्रेडार्षः । यत्स्मितं तत्पूर्वकोऽवलोको यस्य तम् अनुग्रहोषितमिति पाठे तु स्वानुग्रहार्थमुषितं कृतनिवासं स्वपतिं श्रीकृष्णं नित्यं पश्यन्ति स्म नैतत्स्वर्गेऽस्तीति भावः स्म पादपूरणे नतु भूते ॥२७॥ नूनमिति ॥ हे सखि परमप्रेमवत्यो व्रजस्त्रियः यस्मिन्नधरामृत आशयो मनो यासां तथाभूताः सत्यो व्रजाद्भगवत आगमनानन्तरं केवलं संमुमुहुरेव न तत्प्रापुः । तत् कृष्णस्याधरामृतं याः स्त्रियः मुहुः पिबन्ति नूनं निश्चितमेतत् अस्य गृहीतेत्यत्र अस्येति कर्त्तरि शेषे षष्ठी । अनेन श्रीकृष्णेन गृहीताः पाणयो यासां ताभिः स्त्रीभिः व्रतस्नानहुतादिनाऽयमेवेश्वरः समर्चितः जन्मान्तरेष्वाराधितः ॥२८॥ या इति द्वयम् ॥ प्रद्युम्नश्च साम्बश्चाम्बश्च सुताः यासां रुक्मिणी-

अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः ॥ पश्यन्ति नित्यं यदनुग्रहेषितस्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥२७॥
नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः ॥ पिबन्ति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः ॥ २८ ॥ या
वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान्हि शुष्मिणः ॥ प्रद्युम्नसाम्बाम्बसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः ॥ २९॥ एताः
परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ॥ यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥ ३० ॥ एवंविधा गदन्तीनां स गिरः पुरयोषिताम् ॥ निरीक्षणेनाभिनन्दन्सस्मितेन ययौ हरिः ॥ ३१ ॥ अजातशत्रुः पृतनां गोपीथाय मधुद्विषः ॥
परेभ्यः शङ्कितः स्नेहात्प्रायुङ्क्त चतुरङ्गिणीम् ॥ ३२ ॥

जाम्बवतीनाग्नजितीनां ता आदयो यासां सत्यभामादीनां ताः याः स्त्रियः वीर्यं प्रभाव एव शुल्कं विवाहे उपायनतया देयं द्रव्यं तेन स्वयंवरे शुष्मिणो बलिष्ठान् चैद्यप्रमुखान् शिशुपालप्रभृतीन् राज्ञः प्रमथ्य विनिर्जित्य हृताः तथा अपरा अन्याश्च याः स्त्रियो भौमस्य नरकासुरस्य वधे जाते सति सहस्रशः एकशताधिकषोडशसहस्रसंख्याकाः आहृताः तथा आहृतिभिः पारिजातादिप्रियवस्त्वाहरणैर्हृदि स्पृशन् आनन्दयन् पुष्करलोचनः कमलनयनः पतिः कृष्णो यासां गृहात् जातु कदाचिदपि नापैति न निर्गच्छति सदैव तत्र तिष्ठति एता एव परं केवलम् अपास्तं निर्गतं पेशलं भद्रं स्वातन्त्र्यं यस्मात् निरस्तं शौचं शुचित्वं यस्मात्तथाभूतमपि स्त्रीत्वं साधु शोभनमत्युत्कृष्टं कुर्वते कुर्वन्ति ॥ २९ ॥ ३० ॥ एवमिति ॥ गदन्तीनां जल्पन्तीनां पुरयोषितामेवंविधा गिरः उक्तीः सस्मितेन निरीक्षणेनाभिनन्दन् सत्यमुक्तमिति सूचयन्स हरिः स्वपुरं ययौ ॥ ३१ ॥ अजातशत्रुरिति ॥ तदा अजातशत्रुः युधिष्ठिरः परेभ्यो रिपुभ्यः शङ्कितः सन् मधुद्विषः श्रीकृष्णस्य गोपीथाय संरक्षणाय स्नेहात् चतुरङ्गिणीं हस्त्यश्वरथ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादाताख्यचतुरङ्गयुक्तां पृतनां सेनां प्रायुङ्क्त प्रस्थापयामास ॥३२॥ अथेति ॥ अथ शौरिः श्रीकृष्णः दूरपर्यन्तं प्रापयितुं सहागतान् विरहेणातुरान् दृढं स्निग्धान् अनुरक्तान् कौरवान् कुरुवंशजान् पाण्डवान् युधिष्ठिरादीन् सम्यक् सान्त्वनेन निवर्त्य प्रियैरुद्धवादिभिः सह स्वनगरीं द्वारकां प्रायात् प्रययौ ॥ ३३ ॥ कुरुजाङ्गलेति द्वयम् ॥ हे भार्गव शौनक कुरुजाङ्गलादीन् धन्वान्तान्देशान् अतिक्रम्य ततः सौवीरः सुराष्ट्रदेशः आभीरः कुन्तीपुरदेशः तयोः परान्पश्चादवस्थितान् आनर्त्तान् द्वारकाप्रदेशान् मनाक् ईषत् श्रान्ता वाहा अश्वा यस्य सः विभुः कृष्ण उपागात् सयामुनान् यमुनातीरस्थदेशैः सहितान् शूरसेनान् मरुमल्पोदकं देशं धन्वानन्निरुदकं देशं धन्वनोऽदन्तत्वमदृष्टचरं कुरुक्षेत्रं कुरुदेशान्तर्गतमेव क्रमोत्र न विवक्षितः॥३४॥३५॥ ननु हस्तिनापुरात् द्वारकामार्गे नैते देशाः सन्तीति कथं तदतिक्रमणं संभवतीत्याशङ्क्याह—तत्र तत्रेति ॥ हीति हेतौ तत्रत्यैस्तत्तद्देशभवैर्भक्तैस्तत्र तत्र तत्तद्द्वारकामार्गे आगत्य स्वदेशानयनार्थं प्रत्युद्यतानि निवेदितानि अर्हणानि उपायनानि यस्मै सः हरिः तथा च तत्तद्भक्तमनोरथपूरणार्थं तत्तद्देशं गत्वैव पुनर्वर्त्मानुससारेति भावः । ततश्च सायमपराह्णे पश्चाद्दिशं द्वारकाप्रदेशं भेजे प्राप्तस्तदा च गवि किरणे तिष्ठतीति गविष्ठः सूर्यो गां गतः “ अद्भ्यो वा

अथ दूरागताञ्छौरिः कौरवान्विरहातुरान् ॥ सन्निवर्त्य दृढं स्निग्धान्प्रायात्स्वनगरीं प्रियैः ॥ ३३ ॥ कुरुजाङ्गलपाञ्चालाञ्छूरसेनान्सयामुनान् ॥ ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ ३४ ॥ मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ॥ आनर्तान्भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ॥ ३५ ॥ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ॥ सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ३६ ॥ इति श्रीभागवते प्रथमस्कन्धे दशमोऽध्यायः ॥ १० ॥ ॥ सूत उवाच ॥ आनर्तान्स उपव्रज्य स्वृद्धाञ्जनपदान्स्वकान् ॥ दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥ स उच्चकाशे धवलोदरो दरोऽप्युरुक्रमस्याऽधरशोणशोणिमा ॥ दाध्मायमानः करकञ्जसंपुटे यथाब्जखण्डे कलहंस उत्स्वनः ॥२॥

एष प्रातरुदेत्यपः सायं प्रविशति ” इति श्रुतेः । पश्चिमसमुद्रजलं प्रविष्टः अस्तंगत इत्यर्थः । यद्वा तदा सायंकाले जाते रथादवतीर्य गविष्ठो भूमौ स्थितः ततो गां जलाशयं गतः पश्चाद्दिशं सन्ध्यां भेजे उपासितवान् ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गंगासहायः प्रथमस्याध्याये दशमे व्यधात् ॥ १० ॥ अथैकादश आनर्तैः स्तुतो निर्विश्य बन्धुभिः ॥ पुर्यां रेमे हरिस्तत्र श्लोकाः सार्द्धा नवाग्नयः ॥ उवाचेत्येकं सपादाः पञ्चवेदाः अनुष्टुभः॥११॥ आनर्त्तान् इति ॥ स भगवान् स्वृद्धान् सुसमृद्धान् स्वकानानर्तान् जनपदान् देशानुपव्रज्य तेषां तत्रत्यानां जनानां विषादं स्वविश्लेषजं शमयन्निवर्त्तयन्निव इव एवार्थे । साक्षाद्दर्शनं विना सम्यग्विषादशान्त्यनुदयाद्वा । दरवरं शङ्खश्रेष्ठं पाञ्चजन्यनामकं दध्मौ वादितवान् ॥ १ ॥ स इति ॥ तदा स दाध्मायमानः मुखवायुना अतिशयेनाऽऽपूर्यमाणः । ध्माधातोर्यङ्लुगन्तात्कर्मणि शानच् । यकारद्वययुक्पाठे यङन्तस्य रूपम् । दरः शङ्खः स्वतो धवलमुदरं यस्य तथाभूतोपि उरुक्रमस्य भगवतः क्वापि दामोदरस्येति पाठः । अधरशोणेन अधरस्थरक्तगुणेन शोणिमा रक्तगुणो यस्य

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाभूतः सन् भगवत्करकञ्जसम्पुटे चतुर्भिः करैर्धृतत्वात् इति चक्रवर्ती । अब्जखण्डे कमलसमूहे उत्स्वनः उच्चैः स्वनो यस्य सः कलहंसो यथा शोभते तथा उच्चकाशेऽतिशुशुभे ॥२॥ तमिति ॥ जगतो यद्भयं भयाभिमानिनी देवता तस्यापि भयावहं तं निनदमुपश्रुत्य भर्तुः भगवतो दर्शने लालसा औत्सुक्यं यासां ताः सर्वाः प्रजाः तं प्रत्युद्ययुः प्रत्युज्जग्मुः ॥३॥ तत्रेति द्वयम्॥स्वार्थं दीपमनपेक्षमाणस्यापि रवेर्दीपमुपनीय रविपूजका इव तत्र तस्मिन् श्रीकृष्ण उपनीताः समर्पिता बलय उपायनानि याभिस्ताः तथा प्रीत्या उत्फुल्लानि मुखाम्बुजानि यासां ताः आदृताः भक्तियुक्ताः प्रजाः आत्मारामं निजपरमानन्दस्वरूपलाभेनैव नित्यदा सदा दाप्रत्यय आर्षः । पूर्णकामम् अवितारं रक्षकं सर्वेषां सुहृदं तं भगवन्तं पितरमागतमर्भका इव हर्षेण गद्गदया गिरा तं प्रोचुः अत्र दीपमिति द्वितीयासमर्थनार्थं क्लेशः स्वीकृतः ॥४॥५॥ नता इति॥ हे नाथ विरिञ्चो ब्रह्मा वैरिञ्च्याः सनकादयः सुराणामिन्द्रश्च तैर्वन्दितम् । इह संसारे परं क्षेममिच्छतां परायणं परमं शरणम् यत्र यस्मिन् अङ्घ्रिपङ्कजे आश्रिते सति परेषां ब्रह्मादीनामपि प्रभुर्नियन्ता कालो न

तमुपश्रुत्य निनदं जगद्भयभयावहम् ॥ प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥ ३ ॥ तत्रोपनीतबलयो रवेर्दीपमिवाऽऽदृताः ॥ आत्मा-
रामं पूर्णकामं निजलाभेन नित्यदा ॥ ४ ॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ॥ पितरं सर्वसुहृदमवितारमिवार्भकाः ॥ ५ ॥ नताः
स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चिवैरिञ्च्यसुरेन्द्रवन्दितम् ॥ परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ॥ ६ ॥ भवाय
नस्त्वं भव विश्वभावन त्वमेव माताऽथ सुहृत्पतिः पिता ॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥ ७ ॥ अहो सना-
था भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनम् ॥ प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम् ॥ ८ ॥ यर्ह्यम्बुजाक्षाऽप-
ससार भो भवान्कुरून्मधून्वाऽथ सुहृद्दिदृक्षया ॥ तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाऽच्युत ॥ ९ ॥

प्रभवेन्न समर्थो भवेत् तत् ते तवाङ्घ्रिपङ्कजं वयं नताः स्म ॥६॥ भवायेति ॥ हे विश्वस्य भावन पालक त्वं नोऽस्माकं भवाय क्षेमाय भव यस्मान्नोऽस्माकं माता सुहृत् मित्रं पतिः पिता च त्वमेवासि त्वं सद्गुरुः परमं दैवतं चासि यस्य तवानुवृत्त्या सेवयैव वयं कृतिनः कृतार्थाः बभूविम जाताः स्मः ॥७॥ अहो इति ॥ भवता त्वया वयमहो सनाथाः स्म सलोप आर्षः यत् यतो हेतोः त्रैविष्टपानां देवानामपि दूरे दर्शनं यस्य तथाभूतं प्रेमपूर्वकं स्मितं स्निग्धे सानुरागे निरीक्षणे नेत्रे च यस्मिंस्तथाभूतमाननं यस्मिंस्तत् सर्वेष्वङ्गेषु सौभगं सौन्दर्यं यस्मिन् तत् तव रूपं पश्येम पश्यामः ॥ ८ ॥ यर्हीति ॥ भो अम्बुजाक्ष नो भवानिति पाठे अस्मान् त्यक्त्वेति शेषः । हे अच्युत यर्हि भवान् सुहृदां युधिष्ठिरादीनां नन्दादीनां च दिदृक्षया कुरून् हस्तिनापुरादीन् अथवा मधून् मथुरामण्डलस्थान् व्रजादीन् अपससार अस्मान् अपहाय जगाम तत्र तदा त्वामपश्यतां तव नस्त्वदीयानामस्माकं क्षणः अपि रविं विनाक्ष्णोरिव यथा रविं विनान्ध्यादक्ष्णोः क्षणोऽप्यब्दकोटितुल्यो भवति तथा अब्दकोटिप्रतिमः संवत्सरकोटितुल्योऽभवत् । अत्र मधुशब्देन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्देशान्तर्गतो व्रजो गृह्यते नतु मथुरा तदानीं तस्यां सुहृदामभावात् "तत्र योगप्रभावेण नीत्वा सर्वजनं हरिः" इत्यत्र सर्वशब्दात् तेन आयास्य इति दौत्यकैः" ज्ञातीन् वो द्रष्टुमेष्याम" इत्यादि भगवता व्रजं प्रत्यागमनं प्रतिश्रुतं तत्पाद्मादिपुराणेषु स्पष्टं श्रीभागवते त्वत्रैव सूचितम् ॥९॥ इति चेति ॥ भक्तवत्सलः श्रीकृष्णः इत्येवंभूताः चकारादन्याश्च उदीरिताः कथिताः प्रजानां वाचः शृण्वानः शृण्वन् शानजार्षः। दृष्ट्या तेष्वनुग्रहं वितन्वन् प्रकुर्वन् पुरीं द्वारकां प्राविशत् इदं च पञ्चस्वपि श्लोकेष्वन्वेति ॥१०॥ पञ्चभिः पुरीं वर्णयति—मध्विति॥ आत्मनः श्रीकृष्णस्य तुल्यं बलं येषां तैः मधुभोजादिभिर्यादवभेदैः नागैर्भोगवतीमिव नागानां पुरी यथा नागैः काद्रवेयादिभिः रक्षितास्ति तथा गुप्ताम् ॥११॥ सर्वेति॥ सर्वेषु ऋतुषु सर्वे विभवाः पुष्पफलादिसंपदो येषां ते पुण्याः पुण्यजनका वृक्षाः लताश्रमा लतामण्डपाश्च येषु तैः उद्यानैः फलप्रधानैः उपवनैः पुष्पप्रधानैः आरामैः क्रीडास्थानैर्वृता ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यां ताम् ॥१२॥ गोपुरेति॥ गोपुरं पुरद्वारं द्वारं गृहद्वारं मार्गाः प्रसिद्धाः तेषु कृतानि कौतुकेनोत्सवेन तोरणानि

इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥ शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीम् ॥ १० ॥ मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ ११ ॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियम्॥१२॥ गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् ॥ चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपाम् ॥ १३ ॥ संमार्जितमहामार्गरथ्यापणकचत्वराम् ॥ सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥ १४ ॥ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ॥ अलंकृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः ॥१५॥ निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥ १६ ॥ प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ॥ प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥ १७ ॥ वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः स सुमङ्गलैः ॥ शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ १८ ॥

यस्यां ताम्। ध्वजा महान्तः पताका ह्रस्वाः चित्राणां ध्वजपताकानामग्रैरन्तःप्रतिहतः आतपो यस्यां ताम्॥१३॥सम्मार्जितेति॥ सम्मार्जितानि निःसारितरजस्कानि महामार्गाः राजमार्गाः रथ्या इतरमार्गाः आपणकाः पण्यवीथयः चत्वराणि अङ्गणानि च यस्यां ताम् पूर्वोक्तमहामार्गादिषु गन्धजलैः सिक्तां मङ्गलार्थं फलपुष्पाक्षताङ्कुरैः उप्ताम् अवकीर्णाम् ॥१४॥ द्वारीति ॥ गृहाणां द्वारि द्वारि दध्यादिभिः जलपूर्णकुम्भैर्बलिभिः नैवेद्यद्रव्यैर्धूपदीपकैश्चालंकृताम् ॥१५॥ निशम्येति सार्द्धत्रयम् ॥ प्रेष्ठं प्रियतमं श्रीकृष्णमायान्तं निशम्य महामनाः वसुदेवः अक्रूरादयः साम्बपर्यन्ताश्च प्रहर्षवेगेणोच्छ्वसितानि उल्लङ्घितानि त्यक्तानि शयनादीनि यैः उच्छ्वशितेति "शश, प्लुतगतौ" इति धातोरिति स्वामिपादाश्चक्रवर्त्ती च। तेन वकारदन्त्यसकाररहितः पाठः प्रतीयते दृश्यते तु "श्वस, प्राणने" इत्यस्यैव प्रायो लिखितपुस्तकेषु। आदृताः सादराः हृष्टाश्च प्रणयेन स्नेहेन आगतं

CC-0. In Public Domain. Digitization by eGangotri

साध्वसं सम्भ्रमो येषां तादृशास्ते मङ्गलार्थं वारणेन्द्रं हस्तिश्रेष्ठं पुरस्कृत्य पुरतः कृत्वा ससुमङ्गलैः सुमङ्गलपुष्पादियुक्तपाणिभिर्ब्राह्मणैः शङ्खादिनादेन ब्रह्मघोषेण मन्त्रपाठेन च सह रथैः प्रत्युज्जग्मुः ॥१६॥१७॥॥१८॥ वारमुख्या इति ॥ तस्य भगवतो दर्शने उत्सुकाः शतशोऽगणिताः लसत्कुण्डलैर्निर्मितानि यानि कपोलानि तैर्वदनेषु श्रीर्यासां ताः वारमुख्या वेश्याः यानैः गन्त्र्यादिभिः प्रत्युज्जग्मुः ॥१९॥ नटेति ॥ नटा नवरसाभिनयचतुराः तालाद्यनुसारेण नृत्यन्तो नर्त्तकाः गन्धर्वा गायकाः सूताः पौराणिकाः मागधाः वंशशंसकाः बन्दिनः प्रस्तावयोग्योक्तयः ते सर्वे प्रत्युद्गम्य अद्भुतानि उत्तमश्लोकस्य भगवतः चरितानि गायन्ति च अगायंश्च ॥२०॥ भगवानिति ॥ भगवांस्तत्र तत्र यथाविधि यैः सह यथोचितं तैस्तथोपसंगम्य बन्धूनां च पौराणां च अनुवर्त्तिनां सेवकानां च सर्वेषां मानं सत्कारमादधे कृतवान् ॥२१॥ तदाह—प्रह्वेति ॥ प्रभुर्भगवान् प्रह्वं प्रह्वत्वं शिरसा नतिः अभिवादनं वाचा नतिः आश्लेषः आलिङ्गनं करस्पर्शः स्मितपूर्वकमीक्षणं च तैराश्वास्य अभयं दत्त्वा आश्वपाकेभ्यः श्वपाकं चाण्डालमभिव्याप्य अभिमतैः वरैरभीष्टपदार्थ-

वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥ लसत्कुण्डलनिर्भातकपोलवदनश्रियः ॥ १९ ॥ नटनर्तकगन्धर्वाः सूतमागधबन्दिनः ॥
गायन्ति चोत्तमश्लोकचरितान्यद्भुतानि च ॥ २० ॥ भगवांस्तत्र बन्धूनां पौराणामनुवर्तिनाम् ॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे
॥ २१ ॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥ आश्वास्य चाऽऽश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥ २२ ॥ स्वयं च गुरुभिर्विप्रैः सदारैः
स्थविरैरपि ॥ आशीर्भिर्युज्यमानोऽन्यैर्बन्दिभिश्चाऽविशत्पुरम् ॥ २३ ॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥ हर्म्याण्याऽऽरुरु-
हुर्विप्र तदीक्षणमहोत्सवाः ॥ २४ ॥ नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम् ॥ न वितृप्यन्ति हि दृशः श्रियो धामाङ्गमच्युतम् ॥२५॥
श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् ॥ बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् ॥ २६ ॥

दानैश्च मानं कृतवान् ॥२२॥ स्वयमिति ॥ स्वयं च सदारैरिति सर्वत्रान्वेति । गुरुभिः पित्रादिभिः विप्रैः ब्राह्मणैः स्थविरैर्वृद्धैः अन्यैश्च पौरैर्बन्दिभिश्चाशीर्भिर्युज्यमानः पुरं द्वारकामविशत् ॥२३॥ राजमार्गमिति ॥ हे विप्राः द्वारकायाः राजमार्गं कृष्णे गते सति तस्येक्षणे महान् उत्सवो यासां ताः कुलस्त्रियः हर्म्याणि सौधान्यारुरुहुः॥२४॥नित्य-मिति ॥ यत् यस्मात् द्वारका ओकः स्थानं येषां तेषां जनानां श्रियः शोभाया धाम स्थानमङ्गं यस्य तम् अच्युतं नित्यं निरीक्षमाणानामपि दृशो नेत्राणि न वितृप्यन्ति । हि तस्मात्तद्दर्शनार्थं हर्म्याण्यारुरुहुः ॥ २५ ॥ न चैतदाश्चर्यमित्याह—श्रिय इति ॥ यस्य भगवत उरः श्रियो लक्ष्म्याः निवासः अस्ति पानपात्रं सौन्दर्यामृतपूर्णं यस्य मुखं सर्वलोकानां दृशां निवासः । यद्वा यस्य मुखं सर्वप्राणिनां दृशां सौन्दर्यामृतपानाय पात्रं यस्य बाहवो लोकपालानां निवासः हरिबाहुबलमाश्रित्यैवासुरेभ्यो निर्भयाः लोकपालाः सुखं शेरते यस्य पदाम्बुजं सारङ्गा भ्रमरा इव परमविवेकिनो भक्तास्तेषां निवासः तं नित्यं निरीक्षमाणानामपि दृशः कुतस्तृप्येयुरित्याशयः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सितातपत्रेति ॥ सितमातपत्रं छत्रं व्यजने च तैर्वनमालया च उपस्कृतो मण्डितः प्रसूनवर्षैश्चाभिवर्षितः पिशङ्गे पीते वाससी यस्य स भगवान् अर्कश्च उडुपो नक्षत्रसहितश्चन्द्रश्च चापमिन्द्रधनुश्च वैद्युतं विद्युत्तेजश्च तैर्युगपत्समुदितैर्यथा घनो मेघः शोभते तथा पथि मार्गे बभौ शुशुभे । अर्कश्छत्रस्योपमानं नक्षत्राणि पुष्पवृष्टेः चन्द्रः परिभ्रमत्कृतमण्डलाकारयोश्चामरव्यजनयोः चापं वनमालायाः विद्युत्तेजः पिशङ्गवाससोः अभूतोपमेयम् । यदि घनस्योपरि सूर्यः उभयतश्चन्द्रौ सर्वतस्ताराः मध्ये चापद्वयं स्थिरं विद्युत्तेजश्च भवेत्तदा घनो यथा भायात् तथा हरिर्बभौ ॥ २७ ॥ प्रविष्ट इति ॥ ततस्तु पित्रोर्देवकीवसुदेवयोर्गृहं प्रविष्टो भगवान् स्वमातृभिर्देवकीरोहिण्यादिभिः परिष्वक्त आलिङ्गितः सन् देवकीप्रमुखाः सप्त मातृर्मुदा हर्षेण शिरसा ववन्दे । सप्तेति तु मातृसौदर्यादादरविशेषार्थः । अष्टादशापि मातरो नमस्कृता एव ॥ २८ ॥ ता इति ॥ स्नेहेन स्नुतौ पयोधरौ यासां ता हर्षेण विह्वलित आत्मा यासां ता देवक्यादयः पुत्रं श्रीकृष्णमङ्कमारोप्य नेत्रजैर्जलैरानन्दबाष्पैः सिषिचुः ॥ २९ ॥ अथेति ॥ अथानन्तरं

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ॥ पिशङ्गवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥ २७ ॥ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ॥ ववन्दे शिरसा सप्त देवकीप्रमुखा मुदा ॥ २८ ॥ ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः ॥ हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥ २९ ॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमम् ॥ प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३० ॥ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः ॥ उत्तस्थुराराात्सहसाऽऽसनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ॥ ३१ ॥

सर्वे कामाः काम्यमाना भोगा यस्मिंस्तत् यत्र भवने षोडशसहस्राणि चकारादष्टोत्तरशताधिकानि पत्नीनां प्रासादाः सन्ति अत एवानुत्तमं नास्त्यन्यदुत्तमं यस्मात्तथाभूतं स्वभवनम् अविशत् ॥ ३० ॥ पत्न्य इति ॥ प्रोष्य देशान्तर उषित्वा गृहानुपागतं पतिमारात् दूरादेव विलोक्य सञ्जातो मनसि महानुत्सवो हर्षो यासां ताः व्रीडितानि लोचनानि आननानि च यासां ताः अपाङ्गैरेव वीक्षणात् व्रीडितलोचनाः अवनतमुखत्वाद्व्रीडिताननाः पत्न्यो रुक्मिण्यादयः व्रतैः प्रोषितभर्तृकानुष्ठेयैः साकमेव आसनादाशयाच्च सहसा झटित्येवोत्तस्थुः । व्रतानि च " क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥ " एतानि व्रतान्यपि त्याज्यत्वादुत्तस्थुरिवेति सहोक्तिः। आदौ देहेन परिरब्धुम् आसनादुत्तस्थुः ततो लज्जाकृतं विघ्नमालक्ष्य लज्जोत्पत्तिस्थानमन्तःकरणं परित्यज्य आत्मनैव परिरेभिरे आशयत्यागाच्च परमानन्दमूर्च्छिता बभूवुरिति तत्त्वम् । श्रीकृष्णेनात्मनः संश्लेषेन्तःकरणस्यापि व्यवधानं नासहन्तेति चाशयः युगपदेव पत्नीसमसंख्यैः प्रकाशैः सर्वासां पत्नीनां गृहेषु प्रविष्ट इति द्योतितम् ॥ ३१ ॥

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ हे भृगुवर्य शौनक दुरन्तः अनन्तो भावः स्नेहो यासां तास्तथा तमायान्तं पतिं दर्शनात्पूर्वमन्तरात्मना मनसा तदनन्तरं दृष्टिभिस्ततः समीपमागतमात्मजैः पुत्रद्वारा च परिरेभिरे आलिङ्गितवत्यः । यद्वा आत्मजैः दर्शनेनोद्दीपितैर्मदनैर्हेतुभिः प्रथमं दृष्टिभिस्ततः अन्तरन्तःशरीरैः तत आत्मना बाह्यशरीरेणेति तदा च विलज्जतीनां शतार्षः । तासामपशकुनभिया नेत्रयोर्निरुद्धमप्यम्बु बाष्पं वैक्लवाद् वैवश्यादास्रवत् ईषत् सुस्राव ॥ ३२ ॥ यद्यपीति ॥ यद्यप्यसौ श्रीकृष्णः पार्श्वगतः समीपस्थः तत्रापि रहोगतः तथापि तस्याङ्घ्रियुगं पदे पदे प्रतिक्षणं नवं नवमेव भवति अतस्तस्य पदाच्चरणारविन्दात्का विरमेत विश्लिष्यावस्थातुमुत्सहेत परस्मैपदाभाव आर्षः । यच्चरणकमलं चला चञ्चलस्वभावापि श्रीर्लक्ष्मीः कर्हिचिदपि न जहाति ॥ ३३ ॥ एवमिति ॥ क्षितेर्भाराय जन्म येषां तेषाम् अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः प्रसृतं तेजः प्रभावो येषां तेषां नृपाणामेवं मिथो वैरं विधाय श्वसनो वायुर्यथा वेणूनामन्योन्यसंघर्षेणानलं संविधाय मिथस्तद्दाहेन स्वयं निवृत्तव्यापारो भवति

तमात्मजैर्दृष्टिभिरन्तरात्मना दुरन्तभावाः परिरेभिरे पतिम् ॥ निरुद्धमप्यास्रवदम्बु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ॥३२॥ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्याङ्घ्रियुगं नवं नवम् ॥ पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥३३॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसाम् ॥ विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥ ३४ ॥ स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया ॥ रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ॥ ३५ ॥ उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासाम् ॥ संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः ॥ ३६ ॥

तथा निरायुधस्त्यक्तायुधः सन् स्वयं तेषां वधेन पञ्चम्यर्थे तृतीया। वधादुपरतो निवृत्तो जातः ॥ ३४ ॥ स एष इति ॥ स एष भगवान् स्वमायया अस्मिन्नरलोकेऽवतीर्णः सन् स्त्रिय एव रत्नानि तेषां कूटे समुदाये स्थितो यथा प्राकृतः स्त्रीवश्यस्तथा रेमे ॥ ३५ ॥ उद्दामेति ॥ यासामुद्दामा गम्भीरो यो भावोऽभिप्रायः प्रेमा वा तस्य पिशुनः सूचकः अमलः निष्कपटः वल्गुः मनोहरो हासो व्रीडापूर्वकावलोकश्च ताभ्यां निहतः अमदनः शिवोऽपि सम्मुह्य लज्जया चापमजहात् । स्त्रीणां प्रभावमात्रे तात्पर्यं न शिवधनुस्त्यागे। यद्वा भगवतो मोहिनीरूपेण महेशोऽपि मोहितः । यद्वा निहतः विस्मितो मदनः जगद्विमोहनार्थं प्रवृत्तः कामः संमुह्य मत्कर्त्तव्यमेताः स्वयम् एव करिष्यन्तीति संभाव्य स्वचापमजहात् तत्याज ता एवं प्रभावाः प्रमदोत्तमाः यस्य भगवतः श्रीकृष्णस्येन्द्रियं मनः कुहकैः पुरुषवञ्चनोपायैः सहासकटाक्षादिभिर्विमथितुं क्षोभयितुं न शेकुः समर्था न जाताः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमयमिति ॥ तं श्रीकृष्णं व्यापृण्वानं मनुष्यचेष्टां प्रकुर्वन्तं शानजार्षः चानश् वा। "पृ, प्रीतौ" स्वादिः। धातूनामनेकार्थता । पृङो वा रूपं तत्र श्नुरार्षः। वस्तुतोऽसङ्गं स्त्रीपुत्रादि विषयेष्वनासक्तमप्ययं प्राकृतो लोकः आत्मौपम्येन स्वदृष्टांतेन सङ्गिनं स्त्र्यादिविषयेष्वासक्तं मनुजं मन्यते यतोऽबुधः तत्त्वानभिज्ञः ॥३७॥ एतदिति ॥ ईशस्य ईशनमीश्वरत्वं नामैतदेव यत् यथा आत्मस्थैः आनन्दादिभिः तदाश्रया आत्माश्रया बुद्धिर्न युज्यते तथा प्रकृतिस्थोऽपि ईशः तस्याः प्रकृतेर्गुणैः रागलोभमोहादिभिः सुखदुःखादिभिश्च सदैव कदाचिदपि नैव युज्यते वैधर्म्ये वा दृष्टान्तः । आत्मस्थैः सत्ताप्रकाशादिभिर्यथा बुद्धिर्युज्यते यद्वा असदात्मा देहः तत्रस्थैर्गुणैस्तदाश्रया बुद्धिस्तदुपाधिर्जीवो यथा युज्यते एवं प्रकृतिस्थोपि न युज्यते ॥३८॥ तमिति ॥ यथा मतयः शास्त्रिणां बुद्धिवृत्तयः ईश्वरं यथा जगदुपादानं निमित्तमात्रं सगुणं निर्गुणं कर्तारमकर्त्तारं च यथारुचि मन्यन्ते । यद्वा ईश्वरं क्षेत्रज्ञं मतयः अहंवृत्तयः स्वाधीनस्वधर्मयोगिनं मन्यन्ते तथा भर्तुः श्रीकृष्णस्य अप्रमाणविदः तत्त्वानभिज्ञाः मूढाः अबलाः तत्पत्न्यः तं श्रीकृष्णं स्त्रैणं स्त्रीष्वासक्तं

तमयं मन्यते लोको ह्यसङ्गमपि सङ्गिनम् ॥ आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥३७॥ एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः॥ न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ३८ ॥ तं मेनिरेऽबला मूढाः स्त्रैणं चाऽनुव्रतं रहः ॥ अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ ॥ ३९ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥ शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतो गर्भ ईशेनाऽजीवितः पुनः ॥ १ ॥ यस्य जन्म महाबुद्धेः कर्माणि च महात्मनः ॥ निधनं च यथैवासीत्स प्रेत्य गतवान्यथा ॥ ॥ २ ॥ तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे ॥ ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥ ३ ॥

रहः एकान्ते अनुव्रतं स्ववशवर्तिनं च मेनिरे॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्कन्धस्यैकादशे व्यधात् ॥ ११ ॥ द्वादशे त्वौत्तरेयस्य जन्म तस्य फलं द्विजैः ॥ वर्णितं भूपाय तस्य श्लोकाः सार्द्धाः कृतांत्रयः ॥ अनुष्टुभोपि तावंत्यं उवाचेति चतुष्टयम् ॥१२॥ परीक्षितोथ राजर्षेरित्यादिना सूतेन प्रतिज्ञातमपि परीक्षिज्जन्मकथनं कथान्तरव्यवधानाच्छौनकः स्मारयति—अश्वत्थाम्नेति ॥ अश्वत्थाम्ना उपसृष्टेन निक्षिप्तेन उरुतेजसा महाप्रभावेण ब्रह्मशीर्ष्णाऽस्त्रेण उत्तराया गर्भो हतः पुनरीशेन श्रीकृष्णेन आजीवित इति त्वत्तः श्रुतम् ॥१॥ यस्येति द्वयम् ॥ यस्य यस्मै परीक्षिते शेषे षष्ठी। श्रीशुकः ज्ञानमदात् इति चरितश्रवणेच्छायां हेतुः। महाबुद्धेः महात्मनः मनस्विनः तस्य परीक्षितः जन्म यथाऽऽसीत् कर्माणि च यथाऽऽसन् निधनं मरणं च यथैवासीत् स प्रेत्य देहं त्यक्त्वा यथा गतवान् यां गतिं प्राप्तवांस्तदिदं सर्वं श्रोतुमिच्छामि अतः गदितुं कथयितुं यदि त्वं मन्यसे तर्हि श्रद्दधानानान्नोऽस्माकं ब्रूहि । महात्मन इत्यत्र गृणीहि न इति पाठे भिन्नान्वयता ॥ २ ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

तादृशभगवद्भक्तपौत्रप्राप्तौ राज्ञः कृष्णसेवैव कारणमाह—अपीपलदिति ॥ कृष्णपादाब्जसेवया हेतुना सर्वकामेभ्यो निस्पृहः धर्मराजः युधिष्ठिरः प्रजाः रञ्जयन् पितृवदपीपलत्पालयामास ॥ ४ ॥ सम्पद इति द्वयम् ॥ हे विप्राः हे द्विजाः प्रशंसार्थं द्विरुक्तिः । यद्वा सम्पदादिषु धर्मोपदेशका विप्राः धौम्यादयः सम्पदः क्रतवः तदुपार्जिताः लोकाः स्वर्गादयः प्रजा वा महिषी द्रौपदी भ्रातरो भीमाद्याः शूराः मही निष्कण्टका पृथ्वी जम्बूद्वीपस्याधिपत्यं त्रिदिवपर्यन्तं गतं व्याप्तं यशश्च स्पृहा एव स्पार्हं स्पृहाणां समूहो वा स्पार्हं स्वार्थे समूहे वाण् । सुराणामपि स्पार्हं येषु ते सुरस्पार्हाः ते संपदाद्याः पूर्वश्लोकोक्ताः कामा विषयाः मुकुन्दे श्रीकृष्ण एव मनो यस्य तस्य राज्ञः युधिष्ठिरस्य क्षुधितस्य अन्नैकमनसो यथा तदितरे स्रक्चन्दनादयो मुदं नैव कुर्वन्ति तथा किं मुदं प्रीतिमधिजह्रुः कृतवन्तः न कृतवन्त इत्यर्थः ॥ ५ ॥ ६ ॥ मातुरिति सार्द्धचतुष्कम् ॥ हे भृगुनन्दन शौनक यदा स वीरः अस्त्रतेजोभयरहितः परीक्षित् मातुर्गर्भगतस्तदा ब्रह्मास्त्रतेजसा दह्यमानः सन् अङ्गुष्ठमात्रपरिमाणम् आत्मनः सर्वतो दिशम्

सूत उवाच ॥ अपीपलद्धर्मराजः पितृवद्रञ्जयन्प्रजाः ॥ निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥ ४ ॥ संपदः क्रतवो विप्रा महिषी भ्रातरो मही ॥ जम्बूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम् ॥ ५ ॥ किं ते कामाः सुरस्पार्हा मुकुन्दमनसो द्विजाः ॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥ ६ ॥ मातुर्गर्भगतो वीरः स तदा भृगुनन्दन ॥ ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ॥७॥ अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम् ॥ अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ॥ ८ ॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम् ॥ क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम्॥ परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ॥९॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥ विधमन्तं संनिकर्षे पर्यैक्षत क इत्यसौ ॥१०॥

गर्भेऽङ्गुष्ठमात्रस्यैवावकाशात् तथोक्तिः । वस्तुतः तावत्यपि देशे भगवानचिन्त्यशक्तिः पूर्णपुरुषरूपेणैवादृश्यत अन्यथा "गर्भदृष्टमनुध्यायन् परीक्षेत नरेष्विह" इत्युपरिष्टादुक्तेर्नरलोके परीक्षणानुपपत्तेः । अमलं स्फुरन् यः पुरटस्य सुवर्णस्य मौलिः किरीटं सोऽस्यास्तीति तथा तम् । व्रीह्यादित्वकल्पनादिनिः । अपीच्यमतिसुन्दरं दर्शनं रूपं यस्य श्यामं तडिदिव वाससी यस्य तम् अत्र विशेषणद्वयेन विद्युद्युक्तमेघोपमा सूचिता । अच्युतं श्रीमन्तः दीर्घाश्चत्वारो बाहवो यस्य तं तप्तं तापेन निर्मलीकृतं यत्काञ्चनं तन्मये कुण्डले यस्य तं क्षतजवद्रक्तोपान्ते अक्षिणी यस्य तम् अहो मद्भक्तस्याप्यस्त्रपीडेति क्रोधादिति भावः। गदापाणिम् आत्मनः स्वस्य रक्षार्थं सर्वतोदिशं परिभ्रमन्तम् उल्काभां गदां मुहुर्भ्रामयंतं भित्त्वेपि ह्रस्वाभाव आर्षः । गोपतिः नीहारमिव यथा गोपतिः सूर्यो नीहारं हिमं नाशयति तथा स्वगदया ब्रह्मास्त्रतेजो विधमन्तं नाशयन्तम् एवंभूतं कंचिदलौकिकं पुरुषं सन्निकर्षे ददर्श । दृष्ट्वा चासौ क इति पर्यैक्षत पर्यालोचितवान् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधूयेति ॥ अमेयात्मा अचिन्त्यरूपः भक्तवात्सल्यरूपस्वधर्मस्य गुप् रक्षकः विभुर्व्यापको भगवान् हरिः तद्ब्रह्मास्त्रतेजो विधूय निरस्य दशमास्यस्य दशमासपरिच्छेद्यस्य तस्य बालस्य मिषतः पश्यत एव यत्र दृष्टस्तत्रैवान्तर्दधे नत्वन्यत्र गतः विभुत्वात् ॥ ११ ॥ तत इति ॥ ततः सर्वे गुणा एवोदर्का उत्तरफलानि यत्र तस्मिन् अनुकूलैरन्यैर्ग्रहैः सहिते उदये लग्ने ओजसा सामर्थ्येन भूयो जातः पाण्डुरिव पाण्डोर्वंशधरः वंशप्रवर्तकः परीक्षिज्जज्ञे जातः ॥ १२ ॥ तस्येति ॥ प्रीतमना राजा युधिष्ठिरः धौम्यकृपादिभिर्विप्रैः मङ्गलं पुण्याहं वाचयित्वा तस्य जातस्य जातकं जातकर्म कारयामास ॥ १३ ॥ हिरण्यमिति ॥ प्रजातीर्थे पुत्रोत्पत्तियुक्ते पुण्यकाले " पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम् । " इति स्मृतेः । नालच्छेदात्पूर्वं तीर्थवित् दानकालज्ञः नृपतिः हिरण्यं गां महीं ग्रामान् वरान् श्रेष्ठान् हस्त्यश्वान् यद्वा वरान् अन्यांश्चाभिलषितपदार्थान्

विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः ॥ मिषतो दशमास्यस्य तत्रैवान्तर्दधे हरिः ॥११॥ ततः सर्वगुणोदर्के सानुकूलग्रहोदये ॥ जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा ॥ १२ ॥ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः ॥ जातकं कारयामास वाचयित्वा च मङ्गलम् ॥ १३ ॥ हिरण्यं गां महीं ग्रामान्हस्त्यश्वान्नृपतिर्वरान् ॥ प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥ १४ ॥ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयानतम् ॥ १५ ॥ एष ह्यस्मिन्प्रजातन्तौ कुरूणां पौरवर्षभ ॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ॥ रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥ १६ ॥ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः ॥ भविष्यति न संदेहो महाभागवतो महान् ॥ १७ ॥ युधिष्ठिर उवाच ॥ अप्येष वंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः ॥ अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥१८॥ ब्राह्मणा ऊचुः ॥ पार्थ प्रजाऽविता साक्षादिक्ष्वाकुरिव मानवः ॥ ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥ १९ ॥

स्वन्नं श्रेष्ठमन्नं च विप्रेभ्यः प्रादात् ॥१४॥ तमूचुरिति अर्द्धम् ॥ हिरण्यादिभिस्तुष्टा ब्राह्मणास्तं प्रश्रयेण विनयेन आनतं नम्रम् अन्वितमिति वा पाठः राजानमूचुः ॥ १५ ॥ एष इति सार्द्धद्वयम् ॥ हे पौरवर्षभ पुरूणां पुरुवंश्यानामस्मिन् शुक्ले शुद्धे प्रजातन्तौ संतानेऽप्रतिघातेन प्रतिहतिरहितेन दैवेन दुरदृष्टेन संस्थामुपेयुषि नाशं प्राप्ते सति हि यस्मात् वो युष्माकमनुग्रहार्थाय प्रभविष्णुना सर्वशक्तिसम्पन्नेन विष्णुना एष शिशूरातो दत्तस्तस्मान्नाम्ना वाचकेन शब्देन विष्णुरात इति लोके प्रसिद्धो भविष्यति तथा बृहच्छ्रवाः विपुलकीर्तिः गुणैर्महान् महाभागवतः परमवैष्णवश्च भविष्यति अत्र संदेहो नास्ति ॥ १६ ॥ १७ ॥ अपीति ॥ अपिस्विदिति प्रश्ने हे सत्तमाः एषः शिशुः साधुर्वादो गुणकीर्तनं यस्मिंस्तेन यशसा महात्मनः सज्जनान् पुण्यश्लोकान् पवित्रयशसो वंश्यान् राजर्षीन् किमनुवर्त्तिता अनुवर्त्तिष्यते न वा इति ॥ १८ ॥ पार्थेति ॥ हे पार्थ साक्षात् मानवः मनोः पुत्र इक्ष्वाकुरिव प्रजानामविता रक्षको भविष्यति [illegible] सत्यसन्धः सत्यप्रतिज्ञश्च यथा दाशरथिः श्रीरामस्तथा भविष्यति ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

एष इति ॥ एष दाता शरणं रक्षणमर्हतीति शरण्यश्च यथा हि औशीनरः उशीनरदेशाधिपतिः शिबिस्तथा भविष्यति तेन हि स्वमांसं श्येनाय दत्त्वा शरणागतः कपोतो रक्षितः स्वानां यज्वनां यष्टॄणां च यशो वितनिता यशसो विस्तारयिता दौष्यन्तिः दुष्यन्तपुत्रो भरत इव भविष्यति ॥ २० ॥ धन्विनामिति ॥ एष द्वयोः कार्त्तवीर्यपार्थयोरर्जुनयोस्ताभ्यां तुल्यो धन्विनामग्रणीः हुताश इव दुर्धर्षः अभिभवितुमशक्यः समुद्र इव दुस्तरोऽनुल्लंघितशासनो भविष्यति इति सर्वत्रान्वितम् ॥ २१ ॥ मृगेन्द्र इति ॥ असौ शिशुः मृगेन्द्रः इव विक्रान्तः पराक्रमी हिमवानिव निषेव्यो देवादीनामप्युपजीव्यः वसुधा भूमिरिव अनन्यगतिकत्वेन तितिक्षुः अपराधसहनः पितरौ मातापितराविव प्रीत्या सहिष्णुः दुर्वागादिसहनोऽपि भविष्यति नापि तत्प्रतिकर्त्ता ॥ २२ ॥ पितामहेति ॥ साम्ये सर्वभूतसमत्वे पितामहेन ब्रह्मणा युधिष्ठिरेण वा समः प्रसादेऽनुग्रहे गिरिशोपमः

एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः ॥ यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम् ॥ २० ॥ धन्विनामग्रणीरेष तुल्यश्चाऽर्जुनयोर्द्वयोः ॥ हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥ २१ ॥ मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव ॥ तितिक्षुर्वसुधेवाऽसौ सहिष्णुः पितराविव ॥ २२ ॥ पितामहसमः साम्ये प्रसादे गिरिशोपमः ॥ आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥ २३ ॥ सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः ॥ रन्तिदेव इवोदारो ययातिरिव धार्मिकः ॥ २४ ॥ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः ॥ आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥ २५ ॥ राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम् ॥ निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ॥ २६ ॥ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् ॥ प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ॥ २७ ॥

रमाश्रयः श्रीनिवासो देवो विष्णुः पालकत्वाद्यथा सर्वभूतानामाश्रयः आश्रयितुं योग्यस्तथाऽयमपि सर्वभूतानामाश्रयो भविष्यति ॥ २३ ॥ सर्वसद्गुणेति ॥ सर्वैः सद्गुणैः यन्माहात्म्यं तस्मिन् एषः कृष्णम् अनुव्रतः कृष्णतुल्यः रन्तिदेव इवोदारः परोपकारैकजीवनः ययातिरिव धार्मिकः भविष्यति ॥ २४ ॥ धृत्येति ॥ धृत्या धैर्येण बलिना विरोचनसुतेन समः प्रह्लाद इव कृष्णे सन् ग्रहः अभिनिवेशो यस्य तथाभूतश्च एषोऽश्वमेधानामाहर्ताऽनुष्ठाता च ज्ञानवृद्धानां पर्युपासकः सेवकश्च भविष्यति ॥ २५ ॥ राजर्षीणामिति ॥ राजर्षीणां जनमेजयादीनां जनयिता च उत्पथगामिनां स्वधर्मत्यागिनां शास्ता शासिता दण्डयिता भुवः पृथ्व्याः धर्मस्य च कारणान्निमित्तादेष कलेर्निग्रहीता च भविष्यति ॥ २६ ॥ तक्षकादिति ॥ द्विजपुत्रेणोपसर्ज्जिताच्छापद्वारा नियोजितात्तक्षकादात्मनः स्वस्य मृत्युमुपश्रुत्य मुक्तो देहतदनुबन्धिषु संगो येन तथाभूतो हरेः पदं प्रपत्स्यते ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिज्ञासितेति ॥ हे नृप मुनेः व्याससुतात् श्रीशुकात् जिज्ञासितं विचारितं निर्णीतं चात्मनो याथात्म्यं स्वरूपं येन तथाभूतः सन्नसौ इदं शरीरं गङ्गायां हित्वा त्यक्त्वा अद्धा साक्षात् दिव्यस्वरूपेण नास्ति कुतोऽपि भयं यस्य तं भगवन्तं यास्यति ॥ २८ ॥ इतीति ॥ लब्धा उपचितिः पूजा यैस्ते जातके ज्योतिःशास्त्रे कोविदाः निपुणाः सर्वे विप्रा इत्येवं राज्ञे युधिष्ठिराय उपदिश्य स्वकान् गृहान् प्रति जग्मुः ॥ २९ ॥ स एष इति ॥ स एष विष्णुरातनाम्ना कथितः प्रभू राजा यत् यस्मात् पूर्वदृष्टं गर्भेऽनुभूतं पुरुषमनुध्यायन्निह लोके नरेषु सोऽयं भवेन्नो वेति परीक्षेत परीक्षितवान् तस्मात् परीक्षिदिति नामान्तरेणापि लोके विख्यातो जातः गर्भदृष्टमित्यपि पाठः ॥ ३० ॥ स इति ॥ स पूर्वोक्तो राजपुत्रः पितृभिर्युधिष्ठिरादिभिर्भोगैश्चतुष्षष्टिकलाभिश्चापूर्यमाणोन्वहं प्रतिदिनम् उडुप इव यथा उडुपश्चन्द्रः शुक्ले शुक्लपक्षे काष्ठाभिः कला-

जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ ॥ हित्वेदं नृप गङ्गायां यास्यत्यद्धाऽकुतोभयम् ॥ २८ ॥ इति राज्ञ उपादिश्य विप्रा जातककोविदाः ॥ लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान्गृहान् ॥ २९ ॥ स एष लोकविख्यातः परीक्षिदिति यत्प्रभुः ॥ पूर्वदृष्टमनुध्यायन्परीक्षेत नरेष्विह ॥ ३० ॥ स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ॥ आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ॥ ३१ ॥ यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया ॥ राजाऽलब्धधनो दध्यावन्यत्र करदण्डयोः ॥ ३२ ॥ तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः ॥ धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥ ३३ ॥ तेन संभृतसंभारो लब्धकामो युधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिम् ॥ (आहूतो भगवान्राज्ञा याजयित्वा द्विजैर्नृपम् ॥ उवास कतिचिन्मासान्सुहृदां प्रियकाम्यया ॥ १ ॥ ततो राज्ञाऽभ्यनुज्ञातः कृष्णया सह बन्धुभिः ॥ ययौ द्वारवतीं ब्रह्मन्सानुगैर्यदुभिर्वृतः ॥ २ ॥) ॥ ३४ ॥

भिरापूर्यमाणः अन्वहं वर्धते तथा आशु शीघ्रं ववृधे ॥ ३१ ॥ यक्ष्यमाण इति ॥ ज्ञातिद्रोहस्य ज्ञातिवधपापस्य जिहासया जिहीर्षया अश्वमेधेन यज्ञेन यक्ष्यमाणः यष्टुमिच्छन् करो राजभागः दण्डश्च तयोरन्यत्र विषये न लब्धं धनं येन तादृशो राजा युधिष्ठिरो धनार्थं दध्यौ चिन्तयामास करदण्डलब्धधनस्य प्रजापरिजनपालन उपक्षीणत्वात् ॥ ३२ ॥ तदभिप्रेतमिति ॥ तस्य युधिष्ठिरस्याभिप्रेतं यज्ञानुष्ठानार्थं धनार्जनसंकल्पमालक्ष्य ज्ञात्वा अच्युतेन चोदिता भ्रातरो भीमादयः उदीच्यां दिशि भूरिशः प्रहीणं मरुत्तस्य राज्ञो यज्ञे दक्षिणादिभिः परिपूर्णैर्विप्रैर्भाजनं कृत्वा परित्यक्तं धनं सुवर्णपात्रादिकमाजह्रुरानीतवन्तः श्रीकृष्णस्य प्रेरणं च मरुत्तस्य राज्ञः कीर्तये युधिष्ठिरस्याभिमानानुदयाय च ॥ ३३ ॥ तेनेति ॥ तेनानीतेन धनेन संभृता [illegible] संभाराः [illegible] साधनानि येन स ज्ञातिद्रोहपापात् भीतः धर्मपुत्रो युधिष्ठिरः त्रिभिः वाजिमे-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

धैर्यज्ञैः हरिं समयजत् पूजितवान् पूव याजायरवाम्वमधस्तामत्या[illegible]देवेदं यज्ञत्रय[illegible]। अतः परम् " आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम् । उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया ॥ ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बन्धुभिः । ययौ द्वारवतीं ब्रह्मन्सार्जुनो यदुभिर्वृतः ॥ " इति श्लोकद्वयं क्वापि पुस्तक उपलभ्यते तत्प्रक्षिप्तम् ॥ ३४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्कन्धस्य द्वादशे व्यधात् ॥ १२ ॥ त्रयोदशे धृतराष्ट्रे गतेऽशोचद्युधिष्ठिरः ॥ नारदो सान्त्वयत्तत्र श्लोकानां षष्टिरर्द्धयुक् ॥ अनुष्टुभां त्वेकषष्टिः सार्द्धाथोवाचपञ्चकम् ॥ १३ ॥ विदुर इति ॥ क एनमत्रेत्यादितृतीयस्कन्धोक्तया वाचा दुर्योधनेन तिरस्कृतो विदुरस्तीर्थयात्रार्थं निर्गतस्तत्र मैत्रेयादृषेरात्मनो गतिं तत्त्वं ज्ञात्वा तया गत्या तत्वज्ञानेन अवाप्तं लब्धं विवित्सितं लब्धुमिष्टं येन स "विद्लृ, लाभे" तादृशः सन् पुनर्हास्तिनपुरं प्रत्यगात् ॥ १ ॥ यावत इति ॥ कुषारोः पुत्रः कौषारवो मैत्रेयस्तस्याग्रतः क्षत्ता विदुरो यावतः कर्मयोगव्रतादिविषयान् प्रश्नान्कृतवांस्तेषु कतिपयप्रश्नानामुत्तरैरेव गोविन्दे

इति श्रीभागवते प्रथमस्कन्धे परीक्षिज्जन्माद्युत्कर्षो नाम द्वादशोऽध्यायः ॥ १२ ॥ सूत उवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् ॥ ज्ञात्वाऽगाद्धास्तिनपुरं तयाऽवाप्तविवित्सितः ॥ १ ॥ यावतः कृतवान्प्रश्नान्क्षत्ता कौषारवाग्रतः ॥ जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ॥ २ ॥ तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः ॥ धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥ ३ ॥ गान्धारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी ॥ अन्याश्च जामयः पाण्डोर्ज्ञातयः ससुताः स्त्रियः ॥ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम् ॥ ४ ॥ अभिसंगम्य विधिवत्परिष्वङ्गाभिवादनैः ॥ मुमुचुः प्रेमबाष्पौघं विरहौत्कण्ठ्यकातराः ॥ ५ ॥ राजा तमर्हयांचक्रे कृतासनपरिग्रहम् ॥ ६ ॥

जाता एका अव्यभिचारिणी भक्तिर्यस्य तथाभूतः संस्तेभ्योऽवशिष्टप्रश्नेभ्य उपरराम अवशिष्टप्रश्नानामुत्तराणि श्रोतुं नैच्छत् भक्तिरूपोपायलाभे उपायस्याकिंचित्करत्वात् ॥ २ ॥ तं बन्धुमिति सार्द्धद्वयम् ॥ हे ब्रह्मन् तमागतं बन्धुं विदुरं दृष्ट्वा सहानुजः भीमार्जुनादिभिः सहितो धर्मपुत्रो युधिष्ठिरः धृतराष्ट्रादयश्च तत्र युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातः सूतः सञ्जयः शारद्वतः कृपः कृपी द्रोणभार्या पाण्डोर्जामयः ज्ञातिभार्या जामिशब्दश्च वर्गादिरन्तस्थादिश्च कोशेषु प्रसिद्धः। ससुता ज्ञातयः पुरुषाः अन्याश्च स्त्रियः प्राणमागतं तन्व इव यथा मूर्च्छादिना प्राणे सन्ने करादयो निश्चेष्टा भवन्ति आविर्भूते च चेष्टन्ते तद्वत् प्रहर्षेण प्रत्युज्जग्मुः अभिमुखं ययुः ॥ ३ ॥ ४ ॥ अभिसंगम्येति ॥ परिष्वङ्गाभिवादनैर्विधिवत् यथोचितं तमभिसंगम्य मिलित्वा विरहप्रयुक्तौत्कण्ठ्येन कातरा विवशाः प्रेम्णा बाष्पौघमानन्दाश्रुप्रवाहं मुमुचुः ॥ ५ ॥ राजेत्यर्द्धम् ॥ कृतः आसनस्य परिग्रहः स्वीकारो येन तं विदुरं राजा युधिष्ठिरोऽर्हयांचक्रे ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ भुक्तवन्तं विश्रान्तं गतमार्गश्रममासने सुखमासीनं तं विदुरं तेषां स्वकीयानां शृण्वतां सतां प्रश्रयेणावनतः सन् राजा प्राह स्म ॥७॥ अपीति ॥ पक्षिणां यथापत्यान्यतिस्नेहेन पक्षच्छायायां वर्द्धन्ते तद्वत् युष्माकं पक्षपातच्छायया समेधितान्नोऽस्मान् अपि किं स्मरथ यद्यस्मात् विषाग्न्यादेर्विपद्गणात्समातृकाः वयं युष्माभिर्मोचिताः स्मः ॥ ८ ॥ कयेति ॥ क्षितिमण्डलं चरद्भिर्वो युष्माभिः कया वृत्त्या जीविकया वर्त्तितं देहनिर्वाहः कृतः इह भूतले कानि तीर्थानि क्षेत्रमुख्यानि च युष्माभिः सेवितानि व इति युष्माभिरित्यर्थेऽव्ययम् ॥ ९ ॥ भवद्विधा इति ॥ हे विभो भवद्विधाः भागवताः स्वयमेव तीर्थीभूताः ते च स्वान्तः मनसि स्थितेन गदाभृता हरिणा हेतुना पापिजनसंसर्गेण पापवन्ति तीर्थान्यपि तीर्थीकुर्वन्ति स्वसङ्गादेव पुनः पापहरणसमर्थानि कुर्वन्ति ॥ १० ॥ अपि इति ॥ अपीति प्रश्ने । हे तात नोऽस्माकं सुहृदो हितचिन्तकाः बान्धवाः कृष्ण एव देवता येषां ते यदवः दृष्टाः अथवा स्वपुर्यां द्वारकायां सुखमासत इति श्रुताः किम् ॥ ११ ॥ इत्युक्त इति ॥ इत्येवं धर्मराजेनोक्तो

तं भुक्तवन्तमासीनं विश्रान्तं सुखमासने ॥ प्रश्रयावनतो राजा प्राह तेषां च शृण्वताम् ॥ ७ ॥ युधिष्ठिर उवाच ॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ॥ विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥ ८ ॥ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमण्डलम् ॥ तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥ ९ ॥ भवद्विधा भागवतास्तीर्थीभूताः स्वयं विभो ॥ तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ॥ १० ॥ अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः ॥ दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ॥ ११ ॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् ॥ यथानुभूतं क्रमशो विना यदुकुलक्षयम् ॥ १२ ॥ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितम् ॥ नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १३ ॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखम् ॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥ १४ ॥ अबिभ्रदर्यमा दण्डं यथावदघकारिषु ॥ यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १५ ॥

विदुरो यदुकुलक्षयं विनान्यद्यथानुभूतं दृष्टं श्रुतं च तत्सर्वं क्रमशः समवर्णयत् ॥ १२ ॥ यदुकुलनाशाकथने हेतुमाह—नन्विति ॥ ननु निश्चये नृणां स्वयं प्रारब्धवशादुपस्थितं दुर्विषहं सोढुमशक्यमप्रियं स्वयं दुःखितान् द्रष्टुमक्षमः सकरुणः दयावान् न आवेदयेत् ॥ १३ ॥ कंचिदिति ॥ अथानन्तरं स्वकैर्देववदीश्वरवत्सत्कृतो बहुमतः सर्वेषां युधिष्ठिरादीनां प्रीतिमावहन् ज्येष्ठस्य भ्रातुर्धृतराष्ट्रस्य श्रेयस्कृत् ज्ञानवैराग्योपदेशेन श्रेयस्कर्तुं कंचित्कालं तत्रैवावात्सीत् देववत्सुखमित्यपि पाठः ॥ १४ ॥ नच कनिष्ठोयं कथमुपदिदेशेति शङ्क्यम् अस्य यमावतारत्वादित्याह—अबिभ्रदिति ॥ शापान्माण्डव्यस्यर्षेः शापाद्धेतोर्यमो यावद्वर्षशतपर्यन्तं शूद्रत्वं विदुररूपं दधार तावदघकारिषु पापिष्वर्यमा पितृराजो यथावद्यथोचितं दण्डमबिभ्रत् कारयामास । अबिभरिति वाच्ये अबिभ्रदित्यार्षः । अत्रेयमाख्यायिका । क्वचिच्चौराननुधावन्तो राजभटा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माण्डव्यस्य तपश्चरतः समीपे तान्संप्राप्य तेन सह निबध्याऽऽनीय राज्ञे निवेद्य तदाज्ञया सर्वानेव शूलमारोपयामासुः। ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास। ततो मुनिर्यमं प्रति गत्वा कुपित उवाच कस्मादहं शूलमारोपित इति तेनोक्तं त्वं बाल्ये कुशाग्रेण शलभमाविध्य क्रीडितवानिति। तच्छ्रुत्वा माण्डव्यस्तं शशाप। बाल्येऽजानतो मे यतो महान्तं दण्डं कारितवानतस्त्वं शूद्रो भवेति ॥ १५ ॥ युधिष्ठिर इति ॥ लब्धं राज्यं येन स युधिष्ठिरः कुलंधरं कुलनिर्वाहिकम् असंज्ञायां खजार्षः ॥ पौत्रं परीक्षितं दृष्ट्वा इन्द्रादिलोकपालाभैस्तत्सदृशैर्भ्रातृभिः परया श्रिया च मुमुदे ॥ १६ ॥ एवमिति ॥ एवमुक्तप्रकारेण गृहेषु सक्तानां तदीहया गृहचेष्टया प्रमत्तानां विस्मृतकर्त्तव्यानां परमदुस्तरः कालः अविज्ञात एवात्यक्रामत् अतिक्रान्तवान्। गृहेषु सक्तानामित्यादिः युधिष्ठिरादिभ्योऽन्येषामेव निन्दा तेषां तु किं ते कामा इत्यादिना अनासक्तेरुक्तत्वात् ॥ १७ ॥ विदुर इति ॥ तत् तं कालातिक्रममभिप्रेत्य ज्ञात्वा विदुरो धृतराष्ट्रमभाषत। हे राजन् इतः शीघ्रं त्वया निर्गम्यताम् आगतमुप-

युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरम् ॥ भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १६ ॥ एवं गृहेषु सक्तानां प्रमत्तानां तदीहया ॥ अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥ १७ ॥ विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत ॥ राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ॥ १८ ॥ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो ॥ स एष भगवान् कालः सर्वेषां नः समागतः ॥ १९ ॥ येन चैवाऽभिपन्नोऽयं प्राणैः प्रियतमैरपि ॥ जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥ २० ॥ पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः ॥ आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥ २१ ॥ अहो महीयसी जन्तोर्जीविताशा यया भवान् ॥ भीमेनावर्जितं पिण्डमादत्ते गृहपालवत् ॥ २२ ॥ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥ २३ ॥

स्थितमिदं भयं पश्य आलोचय ॥ १८ ॥ प्रतिक्रियेति ॥ हे प्रभो इति इह संसारे कुतश्चित् ब्रह्मादिभ्योपि कर्हिचिदपि यस्य प्रतिक्रिया निरासो नास्ति स एव भगवान् समर्थः कालः विनाशकालो नोऽस्माकं सर्वेषां यैः प्रतिक्रिया कार्या तेषामपि समागतः ॥ १९ ॥ येनेति ॥ येन कालेनाभिपन्नो ग्रस्तोऽयं दृश्यमानो जनः प्रियतमैरपि प्राणैः सद्यो वियुज्येत अन्यैः प्राणानुबन्धिभिर्धनादिभिर्वियुज्येतेति किमुत वक्तव्यम् ॥ २० ॥ पितृभ्रात्रिति ॥ तव पितृभ्रातृसुहृत्पुत्राः हताः वयो यौवनं च विगतमात्मा देहश्च जरया ग्रस्तः यद्यप्येवं तथापि परेषां शत्रूणामिव गेहं जीवनार्थमुपाससे। शब्लुगभाव आर्षः ॥ २१ ॥ अहो इति ॥ जन्तोर्जीवस्य जीविताशा अहो महीयसी अतिशयेन महती यया जीविताशया भवान् भीमेन पुत्रशत्रुणाऽऽवर्जितं परिभूय दत्तं पिण्डं कवलं गृहपालः श्वा तद्वत् आदत्ते स्वीकरोति अत्ति ॥ २२ ॥ अग्निरिति ॥ येषां भीमादीनां प्रदहनार्थं लाक्षागृहे अग्निर्निसृष्टः येषां गरो विषं दत्तः येषां दाराः पत्नी द्रौपदी दूषिता कचग्रहणादिभिरवमताः येषां धनं क्षेत्रं भूमी राज्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च हृतं त्वयेति शेषः । तैर्भीमादिभिर्दत्तैरन्नादिभिः संरक्षितैरसुभिः प्राणैर्जीवनेन कियत् किं फलं न किंचित् ॥ २३ ॥ तस्यापीति ॥ तस्यैवं दैन्यमनुभवतः कृपणस्य देहासक्तस्य अत एव जिजीविषोः देहत्यागमनिच्छतोऽपि तवायं देहो जरया जीर्णः सन् वाससी इव अन्तरीयोत्तरीयवस्त्रे इव परैति क्षीयते । वाससी इति द्विवचनोपमया उपमेयेपि स्थूलसूक्ष्मभेदेन देहद्वैविध्यं पलितादि बाधिर्यादि च जीर्णत्वलक्षणं ज्ञेयम् ॥ २४ ॥ गतस्वार्थमिति ॥ गतः स्वार्थः धर्मादिर्यस्मात्तमिमं मनुष्यदेहं सर्वतो विरक्तः अत एव मुक्तबन्धनः त्यक्ताभिमानः क्व गत इत्यविज्ञाता गतिर्यस्य तथाभूतश्च सन् यो जह्यात् त्यजेत्स वै स एव धीर इत्युदाहृतः ॥ २५ ॥ प्रागेव कृतप्रयत्नस्तु नरोत्तम इत्याह—य इति ॥ यस्तु वार्द्धकात्प्रागेव स्वकात्स्वत एव परतोऽन्योपदेशाद्वा इह संसारे धनपुत्रादौ जातो निर्वेदो वैराग्यं यस्य सः आत्मवान् विवेकी हरिं हृदि कृत्वा गेहात्प्रव्रजेन्निर्गच्छेत्स तु नरेषूत्तमः अत्रातुरसंन्यासी धीरः भक्तिविवेकी नरोत्तमः इति भक्ताः ॥ २६ ॥ त्वं नरोत्तमो नाभूरतो धीरो भवेत्याह—

तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः ॥ परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥ २४ ॥ गतस्वार्थमिमं देहं विरक्तो मुक्तबन्धनः ॥ अविज्ञातगतिर्जह्यात्सवै धीर उदाहृतः ॥ २५ ॥ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् ॥ हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः ॥ २६ ॥ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् ॥ इतोऽर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः ॥ २७ ॥ एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो ह्याजमीढः ॥ छित्त्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा ॥ २८ ॥ पतिं प्रयान्तं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी ॥ हिमालयं न्यस्तदण्डप्रहर्षं मनस्विनामिव सत्संप्रहारः ॥ २९ ॥

अथेति ॥ स्वैर्ज्ञातिभिरज्ञाता गतिर्यस्य तथाभूतो भवान् अथानन्तरं शीघ्रमेव उदीचीम् उत्तरां दिशं यातु इतोऽर्वागर्वाचीनः एष्यन्नित्यर्थः । कालः प्रायशः पुंसां गुणानां विवेकधैर्यादीनां विकर्षणः विनाशक एष्यतीति ॥ २७ ॥ एवमिति ॥ एवमनुजेन विदुरेण बोधितः प्रज्ञैव चक्षुर्यस्य सः अन्धः आजमीढः अजमीढवंशजः राजा धृतराष्ट्रः द्रढिम्नः चित्तदार्ढ्याद् हेतोः भ्रात्रा विदुरेण संदर्शितः अध्वा मार्गो यस्मै तादृशः सन् स्वेषु पुत्रादिषु स्नेहरूपान् पाशान् छित्त्वा गृहान्निश्चक्राम ॥ २८ ॥ पतिमिति ॥ पतिव्रता साध्वी सुशीला च सुबलस्य पुत्री गान्धारी न्यस्तः त्यक्तो दण्डो भूतद्रोहो यैस्तेषां प्रहर्षो यत्र तादृशं हिमालयं प्रयान्तं पतिमनुजगाम । दुःखदस्यापि हर्षहेतुत्वे दृष्टान्तः । मनस्विनां सतसम्प्रहार इव मनस्विनां शूराणां युद्धे सन् तीव्रः संप्रहारो यथा संप्रहर्षकः तथेति सत्संप्रहारमिति पाठे क्लैब्यमार्षम् । बहुव्रीहिं कृत्वा युद्धमित्यध्याहारो वा ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजातशत्रुरिति ॥ कृतं मैत्रं मित्रदेवत्यं कर्म सन्ध्यावंदनं येन सः हुता अग्नयः आहवनीयादयो येन सः अजातशत्रुर्युधिष्ठिरस्तिलगोभूमिरुक्मैः विप्रान्नत्वा प्रविश पिण्डीमितिवत् तेषां दानेन सत्कृत्य इत्याक्षेपलभ्यं गुरूणां पूज्यानां धृतराष्ट्रादीनां वन्दनाय धृतराष्ट्रस्य गृहं प्रविष्टः संस्तत्र पितरौ धृतराष्ट्रविदुरौ सौबलीं गान्धारीं च नापश्यत् रात्रावेव धृतराष्ट्रस्य निर्गमात् ॥ ३० ॥ तत्रेति सार्द्धम् ॥ तत्र धृतराष्ट्रगृहे आसीनमुपविष्टं सञ्जयनामानं सूतम् उद्विग्नमानसो युधिष्ठिरः पप्रच्छ हे गावल्गणे गवल्गणस्य सूतस्य पुत्र सञ्जय नेत्रयोः नेत्राभ्यां हीनः शेषे षष्ठी। वृद्धश्च नोऽस्माकं तातः धृतराष्ट्रः क्व गतः मया हताः पुत्रा यस्याः साऽत एवाऽऽर्त्ता दुःखिता अम्बा गान्धारी वा क्व गता तथा सुहृत् पितृव्यो विदुरश्च क्व गतः ॥ ३१ ॥ अपीति ॥ मया हता बन्धवः पुत्रादयो यस्य सः स्वभार्यया सह दुःखितो धृतराष्ट्रः अकृतप्रज्ञे विवेकहीने मयि शमलमपराधं युधिष्ठिरेण सर्वे पुत्रा हता अतः किं तदाश्रितेन जीवनेनेति आशंसमानो निर्वेदेन चिन्तयन् यद्वा कुलहन्तुरस्य मद्वधात्मकमपि पापमस्तु इतीच्छन् अपि

अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः ॥ गृहं प्रविष्टो गुरुवन्दनाय न चापश्यत्पितरौ सौबलीं च ॥ ३० ॥ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ॥ अम्बा च हतपुत्राऽऽर्ता पितृव्यः क्व गतः सुहृत् ॥ ३१ ॥ अपि मय्यकृतप्रज्ञे हतबन्धुः स्वभार्यया ॥ आशंसमानः शमलं गङ्गायां दुःखितोऽपतत् ॥ ३२ ॥ पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून् ॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥ ३३ ॥ सूत उवाच ॥ कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः ॥ आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥ ३४ ॥ विमृज्याऽश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥ ३५ ॥ संजय उवाच ॥ नाहं वेद व्यवसितं पित्रोर्वः कुलनन्दन ॥ गान्धार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ॥ ३६ ॥

किं गङ्गायामपतत् ॥ ३२ ॥ पितरीति ॥ पितरि पाण्डावुपरते मृते सति सर्वान्नोऽस्मान् सुहृदः पुत्रान् शिशून् व्यसनत आपद्भ्यो यावरक्षतां तौ पितृव्यौ धृतराष्ट्रविदुरावितः स्थानात् क्व गतौ ॥ ३३ ॥ कृपयेति ॥ आत्मनः स्वस्येश्वरं स्वामिनं धृतराष्ट्रमचक्षाणः अपश्यंस्तद्विरहेण कर्शितः कृशीकृतः कृपया हा वृद्धयोः का गतिर्भविष्यतीत्यालोचनेन स्नेहेन च यद्वैक्लव्यं व्याकुलत्वं तस्माच्चातिपीडितः सूतः सञ्जयो न प्रत्याह स्म शीघ्रं प्रत्युत्तरं न ददौ ॥ ३४ ॥ विमृज्येति ॥ पाणिभ्यामश्रूणि विमृज्य आत्मना बुद्ध्या आत्मानं मनः विष्टभ्य स्थिरीकृत्य प्रभोः धृतराष्ट्रस्य पादावनुस्मरन् संजयः अजातशत्रुं प्रत्यूचे ॥ ३५ ॥ नाहमिति ॥ हे कुलनन्दन हे महाबाहो युष्माकं पित्रोर्विदुरधृतराष्ट्रयोर्गान्धार्या वा व्यवसितं निश्चितमहं न वेद यतस्त्वमिवाऽहमपि महात्मभिर्महाबुद्धिभिस्तैर्मुषितो वञ्चितोऽस्मि मम निद्रासमये ते गता इत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ एवं कंचित्कालं शोचति तस्मिन् अथ तुम्बुरुणा सहितो भगवान् नारदस्तत्राजगाम । तमवलोक्य सानुजो युधिष्ठिरः प्रत्युत्थायाभिवाद्याभ्यर्चयन्निवाह । शोकवेगात्सम्यगर्चनाभावादिवशब्दः । यद्वा इव एवार्थे शोकावेगादभ्यर्चयन्नेवाह नतु अभ्यर्चनानन्तरम् । अत्र शोकवेगादभ्यर्चयन्निवाह न त्वभ्यार्चयत् इति स्वामिपादाः ॥३७॥ नाहमिति सार्द्धम् ॥ हे भगवन् पित्रोर्धृतराष्ट्रविदुरयोर्गतिं पदवीमहं न वेद तावितः क्व गतौ तथा हतपुत्रा अत एव आर्ता तपस्विनी संतापवती अम्बा गान्धारी च क्व गता तदप्यहं न जाने अतस्तत्त्वं वदेति शेषः । यतः अपारे समुद्रे निमग्नानां पारदर्शकः कर्णधार इव गतिप्रदर्शको भगवान् सर्वज्ञस्त्वमागतोसि ॥ ३८ ॥ अथेति ॥ अथ मुनिषु सत्तमः भगवान् नारदः आवभाषे । हे राजन् कंचनापि जनं मा शुचः मा शोचीरित्यर्थः । च्लेरङार्षः । " शुचिर्, पूतीभावे " इत्यस्य वा शोकार्थता कल्प्या । यद्यस्मात् सर्वमपि जगत् ईश्वरवशम् अस्ति ॥ ३९ ॥ लोका इति ॥ सपाला इन्द्रादिसहिता इमे लोका जना यस्येशितुः परमेश्वरस्य बलिं वहन्ति सादरमाज्ञां

अथाजगाम भगवान्नारदः सहतुम्बुरुः ॥ प्रत्युत्थायाभिवाद्याऽऽह सानुजोभ्यर्चयन्निव ॥ ३७ ॥ युधिष्ठिर उवाच ॥ नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः ॥ अम्बा वा हतपुत्राऽऽर्ता क्व गता च तपस्विनी ॥ कर्णधार इवापारे भगवान्पारदर्शकः ॥३८॥ अथाबभाषे भगवान्नारदो मुनिसत्तमः ॥ मा कंचन शुचो राजन्यदीश्वरवशं जगत् ॥३९॥ लोकाः सपाला यस्येमे वहन्ति बलिमीशितुः ॥ स संयुनक्ति भूतानि स एव वियुनक्ति च ॥ ४० ॥ यथा गावो नसि प्रोतास्तन्त्यां बद्धाः स्वदामभिः ॥ वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितुः ॥४१॥ यथा क्रीडोपस्कराणां संयोगविगमाविह ॥ इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम् ॥४२॥ यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयम् ॥ सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥ ४३ ॥

पालयन्ति स भूतानि प्राणिनः संयुनक्ति स एव वियुनक्ति च ॥४०॥ यथेति ॥ नसि नासिकायां प्रोताः संयुक्तरज्जवो गावो बलीवर्दास्तन्त्यां तिरश्चीनायां महत्यां रज्ज्वां स्वदामभिः स्वस्वासाधारणप्रग्रहैर्बद्धा यथा वशे तिष्ठन्ति तथा वाक् कर्त्तव्याकर्त्तव्यविधायको वेद एव तन्तिस्तस्यां नामभिः ब्राह्मणः ब्रह्मचारीत्यादिभिर्वर्णाश्रमलक्षणैर्बद्धा जीवा ईशितुः बलिं वहन्ति स्वस्वाधिकारकर्माणि कुर्वन्तस्तदाज्ञां पालयन्तीत्यर्थः ॥ ४१ ॥ प्रवृत्तौ पारतन्त्र्यमुक्त्वा संयोगवियोगयोरप्याह—यथेति ॥ इह लोके यथा कस्यचित् क्रीडितुः पुंसः इच्छया क्रीडोपस्कराणां संयोगविगमौ भवतस्तथैवेशस्य इच्छया नृणामपि संयोगविगमौ स्याताम् ॥ ४२ ॥ यदिति ॥ यत् यदि त्वं लोकं जीवरूपेण ध्रुवं मन्यसे यदि वा देहरूपेण अध्रुवं मन्यसे यदि वा न चोभयं शुद्धब्रह्मरूपेण अनिर्वाच्यरूपेण वा न ध्रुवं नाप्यध्रुवं मन्यसे वाशब्दात् उभयं वा चिज्जडांशतः ध्रुवाध्रुवं मन्यसे सर्वथापि चतुर्ष्वपि पक्षेषु मोहजादज्ञानजात्स्नेहादन्यत्र विषये ते धृतराष्ट्रादयो न शोच्याः आद्ये ध्रुवत्वादेव शोको व्यर्थः । द्वितीये ध्रुवत्वसम्पादनस्याशक्यत्वात् तृतीये चतुर्थे च अशोच्यत्वादेव सर्वत्र शोके स्नेह एव हेतुः सतु मोहजत्वात्त्याज्यः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ अङ्ग हे राजन् यस्मान्निरर्थक एव शोकस्तस्मान्मां विना वनमाश्रिताः अनाथाः कृपणा दीनाः कथं नु वर्त्तेरन् जीवेयुरित्यात्मकमज्ञानकृतमात्मनो मनसो वैक्लव्यं जहि त्यज ॥ ४४ ॥ तेषां रक्षकं स्वमात्मानं तु मा मंस्था इत्याह—कालेति ॥ कालो गुणक्षोभकः कर्म जन्मनिमित्तं गुणः मूलकारणं तदधीनः पाञ्चभौतिको जडस्तद्विभागे नाशवांश्चायं देहो यथा स्वयं सर्पेणाजगरेण ग्रस्तो गिलितो जनोऽपरं तथाविधं न रक्षितुं शक्नोति तथा अन्यान् देहान् कथं गोपायेत् रक्षेत् न कथमपीत्यर्थः । कोपि कमपि कथमपि रक्षितुं न समर्थ इति तात्पर्यम् ॥ ४५ ॥ सर्वेषां जीविकापीश्वरेण कृतेत्याह—अहस्तानि इति ॥ अहस्तानि मत्स्यफलादीनि सहस्तानां मनुष्यादीनां जीवनम् उपलक्षणतया अहस्तानामजगरादीनां सहस्ता मनुष्यादयो जीवनमित्यादि ज्ञेयम् । अपदानि तृणादीनि चतुष्पदां गवादीनां जीवनं तत्र तेष्वहस्तादिष्वपि फल्गूनि अल्पानि महतां जीवनमेवं जीव एव जीवस्य जीवनं जीविका तेन पत्रपुष्पफलादिषु सत्सु धृतराष्ट्रजीवनार्थं किं विषीदसि ॥४६॥ ननु देहादिः का-

तस्माज्जह्यङ्ग वैक्लव्यमज्ञानकृतमात्मनः ॥ कथं त्वनाथाः कृपणा वर्तेरन्वनमाश्रिताः ॥ ४४ ॥ कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः ॥ कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परम् ॥ ४५ ॥ अहस्तानि सहस्तानामपदानि चतुष्पदाम् ॥ फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥ ४६ ॥ तदिदं भगवान्राजन्नेक आत्माऽऽत्मनां स्वदृक् ॥ अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा ॥ ४७ ॥ सोयमद्य महाराज भगवान्भूतभावनः ॥ कालरूपोऽवतीर्णोऽस्यामभवाय सुरद्विषाम् ॥ ४८ ॥ निष्पादितं देवकृत्यमवशेषं प्रतीक्षते ॥ तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ॥ ४९ ॥ धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया ॥ दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ॥ ५० ॥

लकर्मगुणाधीनश्चेत् ईश्वराधीन इति प्राक्कथमुक्तमिति चेत्तत्र कालादिरूप ईश्वर एवेत्याह—तदिदमिति ॥ हे राजन् तत् इदम् अहस्तादिरूपं जगत् एकः आत्मनां जीवानामात्मा स्वरूपमेव अतो न सजातीयभेदः । स्वदृक् स्वप्रकाशः अन्तरो भोक्तृरूपोऽनन्तरो बहिर्भोग्यरूपश्च भगवानेव भाति अतो न विजातीयभेदोऽपि तमेकमेव मायया उरुधा नानाविधं जातं पश्येति । धा आर्षः ॥ ४७ ॥ स इति ॥ हे महाराज भूतानां भावनः पालकोऽपि स भगवानद्य अस्यां भूमौ सुरद्विषां दैत्यानामभवाय नाशाय कालरूपः दैत्यैरेव कालरूपत्वेनानुभूयमानः स्वयं तु परमानन्दरूपः अयं श्रीकृष्ण एवावतीर्णः ॥४८॥ निष्पादितमिति ॥ देवानां कृत्यं तेन निष्पादितमवशेषं यदुकुलस्य अन्तर्द्धापनरूपं प्रतीक्षते । तच्च भूतमपि विदुरवदेव नावर्णयत् स ईश्वरो यावदिह भूमौ भवेत् वर्त्तते तावद्यूयमप्यवेक्षध्वं तदनन्तरमितो निर्गच्छत ॥ ४९ ॥ धृतराष्ट्र इति ॥ भ्रात्रा विदुरेण स्वभार्यया गान्धार्या च सह धृतराष्ट्रो हिमवतो दक्षिणेन दक्षिणस्यां दिशि एनबन्तमव्ययम् । ऋषीणामाश्रमं गतः ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रोतोभिरिति ॥ या वै प्रसिद्धा स्वर्धुनी गङ्गा सा नाना पृथक् सप्तभिः स्रोतोभिः प्रवाहैः सप्तानामृषीणां प्रीतये यत्रात्मानं सप्तधा व्यधात् अत एव यत्तीर्थं सप्तस्रोत एव मरीचिगङ्गा अत्रिगङ्गेत्यादिनाम्ना प्रचक्षते वदन्ति तमगादित्यर्थः ॥ ५१ ॥ तस्य योगसाधनमाह—स्नात्वेति ॥ तस्मिन्नाश्रमेऽनुसवनं त्रिकालं स्नात्वा यथाविधि अग्नीन् गार्हपत्यादीन् हुत्वा च अप एव भक्षयतीत्यब्भक्षः इति नियमा उक्ताः उपशान्तात्मा क्रोधादिरहितचित्तः विगता एषणा सुतादीच्छा यस्य स आस्ते इति यमा उक्ताः ॥ ५२ ॥ जितासन इति त्रयम् ॥ जितमासनं येन दृढासन इत्यर्थः । जिताः श्वासाः प्राणा येन प्रत्याहृतानि शब्दादिविषयेभ्यो व्यावर्त्तितानि षट् इन्द्रियाणि येन हरिभावनया ध्वस्ता रजःसत्त्वतमोरूपा मला यस्य इति आसनप्राणायामप्रत्याहारधारणाध्यानान्युक्तानि ॥ ५३ ॥ समाधिमाह—विज्ञानेति ॥ आत्मानमहङ्कारास्पदं स्थूलदेहाद्वियोज्य विज्ञानात्मनि बुद्धौ संयोज्य एकीभूतं विभाव्य तं विज्ञानात्मानं दृश्यांशाद्वियोज्य क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्रज्ञं द्रष्टृंशाद्वियोज्य यथा घटाम्बरं घटोपाधेर्वियोज्य

स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात् ॥ सप्तानां प्रीतये नाम्ना सप्तस्रोतः प्रचक्षते ॥ ५१ ॥ स्नात्वाऽनुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधि ॥ अब्भक्ष उपशान्तात्मा स आस्ते विगतैषणः ॥ ५२ ॥ जितासनो जितश्वासः प्रत्याहृतषडिन्द्रियः ॥ हरिभावनया ध्वस्तरजःसत्त्वतमोमलः ॥ ५३ ॥ विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् ॥ ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥ ५४ ॥ ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः ॥ निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः ॥ ५५ ॥ तस्यान्तरायो मैवाभूः संन्यस्ताखिलकर्मणः ॥ ५६ ॥ स वा अद्यतनाद्राजन्परतः पञ्चमेऽहनि ॥ कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति ॥ ५७ ॥ दह्यमानेऽग्निभिर्देहे पत्युः पत्नीसहोटजे ॥ बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥ ५८ ॥

महाकाशे प्रविलाप्यते तथा आधार आश्रयसंज्ञे ब्रह्मणि प्रविलाप्य अयं भावः । देहोऽहमित्यहङ्कारं त्यक्त्वा क्षेत्रज्ञोऽहमिति भावितवान् ततस्तं त्यक्त्वा प्रत्यगात्माहमिति भावितवान् ततस्तमपि त्यक्त्वा ब्रह्माहमिति भावयित्वा ध्वस्तो मायागुणानामुदर्कः उत्तरफलं वासना यस्य सः निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य सः अत एव निवर्त्तितोऽखिल आहार इन्द्रियैर्विषयाहरणं येन सः स्थाणुरिव अचलः निश्चल आस्ते । ध्वस्तेत्यादिना व्युत्थानाभाव उक्तः । यतोऽन्तर्गुणक्षोभाद्बहिरिन्द्रियविक्षेपाद्वा व्युत्थानं भवेत् तदुभयं तस्य नास्ति ॥ ५४ ॥ ५५ ॥ तस्येत्यर्द्धम् ॥ संन्यस्तानि अखिलान्यपि कर्माणि येन तस्य धृतराष्ट्रस्यान्तरायो विघ्नभूतस्त्वं मैवाभूरित्यडागमश्छान्दसः ॥ ५६ ॥ तेषां दर्शनादिकमपि तव दुर्लभमित्याह—स वै इति ॥ हे राजन् स धृतराष्ट्रोऽद्यतनाद्वर्त्तमानदिनादारभ्य परतः पञ्चमेऽहनि स्वं कलेवरं हास्यति वै त्यक्ष्यति तच्च कलेवरं योगाग्निनैव भस्मीभविष्यति ॥ ५७ ॥ दह्यमान इति ॥ सहोटजे पर्णशालासहिते पत्युर्देहे अग्निभिर्योगाग्निना सह गार्हपत्यादिभिर्दह्यमाने सति साध्वी पतिव्रता तस्य पत्नी गान्धारी बहिःस्थिता सती तं पतिमनु अग्निं वेक्ष्यति प्रवेक्ष्यति ॥ ५८ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

विदुर इति ॥ हे कुरुनन्दन तत् धृतराष्ट्रस्य शीघ्रं विमुक्तिरूपमाश्चर्यं निशाम्य दृष्ट्वा भ्रातुर्विमुक्त्या हर्षस्तद्वियोगेन शोकश्च ताभ्यां युतस्तीर्थनिषेवकः तीर्थानि सेवितुं "तुमुन्ण्वुलौ" इति भविष्यति ण्वुल् । विदुरस्तस्मात्स्थानात् गन्ता गमिष्यति ॥ ५९ ॥ इत्युक्त्वेति ॥ इत्येवमुक्त्वाथानन्तरं सहतुम्बुरुः तुम्बुरुणा सहितो नारदः स्वर्गमारुहत् "कृमृदृरुहिभ्यश्छन्दसि" इति च्लेरङ् । युधिष्ठिरस्तु तस्य नारदस्य वचो हृदि कृत्वा शुचः शोकानजहात् तत्याज ॥ ६० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्प्रथमस्य त्रयोदशे ॥ १३ ॥ चतुर्दशे महोत्पातै राज्ञश्चिन्ताथ फाल्गुनः ॥ आगतो द्वारकातोऽत्र श्लोकाः सार्द्धाः ऋतेन्द्वयः उवाचत्रितयं सार्द्धाः पञ्चवेदा अनुष्टुभः ॥ १४ ॥ संप्रस्थित इति द्वयम् ॥ द्वारकायां बन्धूनां दिदृक्षया पुण्यश्लोकस्य श्रीकृष्णस्य विचेष्टितं चकारादभिप्रायं च ज्ञातुं जिष्णा-

विदुरस्तु तदाश्चर्यं निशाम्य कुरुनन्दन ॥ हर्षशोकयुतस्तस्माद्गन्ता तीर्थनिषेवकः ॥ ५९ ॥ इत्युक्त्वाऽथारुहत्स्वर्गं नारदः सहतुम्बुरुः ॥ युधिष्ठिरो वचस्तस्य हृदि कृत्वाऽजहाच्छुचः ॥ ६० ॥ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे विदुरोक्त्या धृतराष्ट्रमोक्षवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ सूत उवाच ॥ संप्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥ १ ॥ व्यतीताः कतिचिन्मासास्तदानाऽयात्ततोऽर्जुनः ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वह ॥ २ ॥ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनाम् ॥ ३ ॥ जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम् ॥ पितृमातृसुहृद्भ्रातृदम्पतीनां च कल्कनम् ॥ ४ ॥ निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम् ॥ लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥ ५ ॥

वर्जुने संप्रस्थिते गते सति कतिचित् सप्त मासा व्यतीताः ततोऽपि द्वारकायाः सकाशादर्जुनो न आयात् तदा कुरूद्वहः युधिष्ठिरो घोररूपाणि निमित्तान्युत्पातान् ददर्श ॥ १ ॥ ॥ २ ॥ कालस्येति त्रयम् ॥ विपर्यस्ता विपरीता ऋतूनां वसन्तादीनां धर्माः फलपुष्पादयः शीतोष्णादयश्च विद्यन्ते यस्य तस्य कालस्य रौद्रां भयंकरां गतिं दृष्ट्वा क्रोधलोभानृतैर्युक्त आत्मा मनो येषां तेषां नृणां वार्तां जीविकां पापीयसीं हिंसाबहुलां दृष्ट्वा जिह्मप्रायं कौटिल्यप्रचुरं व्यवहृतं व्यवहारं दृष्ट्वा शाठ्यं वञ्चनं तेन मिश्रं च सौहृदं मैत्र्यं दृष्ट्वा पितृमातृसुहृद्भ्रातृदम्पतीनां च पितृपुत्रयोः सुहृदोर्भ्रात्रोर्दम्पत्योश्चेत्यर्थः । कल्कनं मिथः कलहं दृष्ट्वा काले अनुगते सर्वदोषानुकूले सति निमित्तान्युत्पातान् अत्यरिष्टानि अत्यन्तमशुभानि तथा नृणां लोभाद्यधर्मेषु प्रकृतिं स्वभावं च दृष्ट्वा नृपो युधिष्ठिरोऽनुजं भीममुवाच ॥ ३ ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रेषित इति द्वयम् ॥ द्वारकायां ये बन्धवस्तेषां दिदृक्षया पुण्यश्लोकस्य कृष्णस्य विचेष्टितं ज्ञातुं च जिष्णुः अर्जुनः संप्रेषितः तस्य सप्त मासा गताः हे भीमसेन अधुनापि तवानुजोऽर्जुनः कस्य वा हेतोर्नायाति तदिदमनागमनकारणमहमञ्जसा तत्त्वेन न वेद ॥ ६ ॥ ७ ॥ अपीति ॥ अपि किं यत् यस्मिन् काले भगवान् श्रीकृष्ण आत्मनः स्वस्य आक्रीडं क्रीडासाधनमङ्गं मनुष्यनाट्यमुत्सिसृक्षति उत्स्रष्टुमिच्छति स देवर्षिणा नारदेनादिष्टः तावद्यूयमवेक्षध्वमिति य उक्तः स कालोऽयमेवोपस्थितः प्राप्तः ॥ ८ ॥ यस्मादिति ॥ यस्माद्धेतोः यस्य हरेरनुग्रहात् नोऽस्माकं सम्पदो राज्यं दाराः दाररक्षा प्राणाः कुलं कुलरक्षा प्रजा सपत्नानां विजयः लोकाः यज्ञफलभूताः आसन् स भगवानङ्गमुत्सिसृक्षति किम् इत्यनुषङ्गः ॥ ९ ॥ पश्येति ॥ हे नरव्याघ्र दिव्यान् दिविभवान् भौमान् दैहिकान् दारुणान् अदूरात् समनन्तरकालमेव नोऽस्माकं बुद्धिं मोहयतीति तथाभूतं भयं शंसतः सूचयतः उत्पातान् पश्य ॥ १० ॥ दैहिकानाह—ऊर्वीति ॥ अङ्ग हे भीम मह्यं मां खेदयितुं "क्रियार्थोपपदस्य०"

युधिष्ठिर उवाच ॥ संप्रेषितो द्वारकायां जिष्णुर्बन्धुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥ ६ ॥ गताः सप्ताऽधुना मासा भीमसेन तवानुजः ॥ नायाति कस्य वा हेतोर्नाहं वेदेदमञ्जसा ॥ ७ ॥ अपि देवर्षिणाऽऽदिष्टः स कालोयमुपस्थितः ॥ यदात्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ॥ ८ ॥ यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः ॥ आसन्सपत्नविजयो लोकाश्च यदनुग्रहात् ॥ ९ ॥ पश्योत्पाता-न्नरव्याघ्र दिव्यान्भौमान्सदैहिकान् ॥ दारुणाञ्छंसतो दूराद्भयं नो बुद्धिमोहनम् ॥ १० ॥ ऊर्वक्षिबाहवो मह्यं स्फुरन्त्यङ्ग पुनः पुनः ॥ वेपथु-श्चापि हृदये आराद्दास्यन्ति विप्रियम् ॥ ११ ॥ शिवैषोद्यन्तमादित्यमभिरौत्यनलानना ॥ मामङ्ग सारमेयोऽयमभिरौति ह्यभीरुवत् ॥ १२ ॥ शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे ॥ वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ १३ ॥ मृत्युदूतः कपोतोऽयमुलूकः कम्पयन्मनः ॥ प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः ॥ १४ ॥

इति चतुर्थी । ऊरुः अक्षि बाहुश्च एतानि वामानि पुनः पुनः स्फुरन्ति हृदये वेपथुः कम्पश्च भवति अत एते उत्पाता आरात् निकटमेव मह्यं विप्रियं दुःखं दास्यन्ति ॥ ११ ॥ भौमानाह—शिवेति ॥ अङ्ग हे भीम अनलवज्ज्वलदाननं यस्याः अग्निं मुखेन वमन्ती सैषा शिवा शृगालविशेषः उद्यन्तमादित्यमभि अभिलक्ष्य रौति आक्रोशति । अयं सारमेयः श्वा मामभिलक्ष्य अभीरुवत् निःशङ्कं रौति प्लुतं भषति ॥ १२ ॥ शस्ता इति ॥ शस्ताः गवादयः पशवो मां सव्यं वामं कुर्वन्ति अपरे गर्दभाद्या दक्षिणं कुर्वन्ति । हे पुरुषव्याघ्र मम वाहान् अश्वान् रुदतो लक्षये ॥ १३ ॥ मृत्युदूत इति ॥ अयं कपोतः मृत्युदूतः मृत्युसूचकः भाति कुह्वानैः कुत्सितशब्दैर्मनः कम्पयन् उलूको घूकः प्रत्युलूकः तत्प्रतिपक्षो वूकः काको वा अनिद्रौ सन्तौ विश्वं शून्यमिच्छतः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

धूम्रा इति ॥ दिशः धूम्रा धूसराः परिधयः सूर्यचन्द्रपरिमण्डलानि च दृश्यन्त इति शेषः । अद्रिभिः सह भूः पृथ्वी च कम्पते । दिव्यानाह स्तनयित्नुभिः लक्षणया निरभ्र-गर्जनैः साकं महान् निर्घातो निरभ्रवज्रपात आसीत् ॥ १५ ॥ वायुरिति ॥ खरः परुषः स्पर्शो यस्य तथाभूतो वायुः रजसा तमः विसृजन् वाति जलदाः सर्वतः असृग्रु-धिरं वर्षन्ति अतः सर्वतः सर्वत्र बीभत्सं निन्द्यमेव जातम् । इव एवार्थे ॥ १६ ॥ सूर्यमिति ॥ दिवि अन्तरिक्षे हता प्रभा यस्य तथाभूतं सूर्यं पश्य मिथः ग्रहाणां भौमादीनां मर्दं युद्धं पश्य कुसुतादीनां युद्धं निगद्यतेऽन्योन्ययुक्तानामिति ज्योतिषम् । ससंकुलैः प्राण्यन्तरसहितैः भूतगणैः भूतपिशाचादिसमूहैः रोदसी द्यावापृथिव्यौ ज्वलिते प्रदीप्ते इव पश्य ॥ १७ ॥ पुनर्भौमानाह—नद्य इति ॥ नद्यः नदाश्च क्षुभिताः सरांसि मनांसि च क्षुभितानि अग्निराहवनीयादिः आज्येन घृतेनापि न ज्वलति अतोऽयं विपरीतधर्मा कालः किं दुःखं विधास्यतीत्यहं न वेद्मि ॥ १८ ॥ न पिबन्तीति ॥ वत्साः क्षुधिता अपि स्तनं स्तन्यं दुग्धं न पिबन्ति पशुमनुष्यादीनां मातरश्च न

धूम्रा दिशः परिधयः कम्पते भूः सहाद्रिभिः ॥ निर्घातश्च महानासीत्साकं च स्तनयित्नुभिः ॥ १५ ॥ वायुर्वाति खरस्पर्शो रजसा विसृजं-स्तमः ॥ असृग्वर्षन्ति जलदा बीभत्समिव सर्वतः ॥ १६ ॥ सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ॥ ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी॥ ॥ १७ ॥ नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च ॥ न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥ १८ ॥ न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः ॥ रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे ॥ १९ ॥ दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च ॥ २० ॥ इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः ॥ भ्रष्टश्रियो निरानन्दाः किमघं दर्शयन्ति नः ॥ २१ ॥ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः ॥ अनन्यपुरुषश्री-भिर्हीनाभूर्हतसौभगा ॥ २२ ॥ इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा ॥ राज्ञः प्रत्यागमद् ब्रह्मन्यदुपुर्याः कपिध्वजः ॥ २३ ॥

दुह्यन्ति न प्रस्नुवन्ति कर्मकर्त्तरि दुहो लट् यकूपरस्मैपदे आर्षे । गावश्च अश्रुमुखाः सत्यो रुदन्ति व्रजे ऋषभा वृषभाश्च न हृष्यन्ति हर्षनादं न कुर्वन्ति ॥ १९ ॥ दैवतानीत्यर्द्धम् दैवतानि देवप्रतिमाः रुदन्तीव स्विद्यन्ति गात्रप्रस्वेदं कुर्वन्ति च उच्चलन्ति उत्प्लुत्य चलन्ति ॥ २० ॥ इमे इति ॥ भ्रष्टा श्रीः शोभा येषां तथा निर्गत आनन्दो येभ्यस्ते इमे जनपदाः ग्रामाः पुराणि उद्यानानि आकरा आश्रमाश्च नोऽस्माकं किमघं दुःखं दर्शयन्ति दर्शयिष्यन्ति वयं न जानीमः ॥ २१ ॥ मन्य इति ॥ एतैर्महोत्पातैर्नूनं हतं सौभगं सौभाग्यं यस्याः सा भूः न विद्यते अन्येषु पुरुषेषु श्रीर्वज्राङ्कुशादिशोभा येषां तैर्भगवतः पदैर्हीना जाता इत्यहं मन्ये ॥ २२ ॥ इतीति ॥ हे ब्रह्मन् शौनक इत्येवं दृष्टानि ज्ञातान्यरिष्टानि येन तेन चेतसा चिन्तयतः तस्य राज्ञो युधिष्ठिरस्य पुरः यदुपुर्याः सकाशात्कपिध्वजः अर्जुनः प्रत्यागमत् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति द्वयम् ॥ अयथापूर्वमिति पूर्वं कदापि यथा न भवति तथा किंचिदनुक्त्वैव पादयोर्निपतितमित्यर्थः । अधो वदनं यस्य तं नयनाब्जयोरब्बिन्दून् अश्रूणि मुञ्चन्तं विच्छायं विगतकान्तिं तमागतमनुजमर्जुनमातुरं विलोक्य स्वयमप्युद्विग्नहृदयः सन् सुहृदां मध्ये स्थितो नृपो युधिष्ठिरस्तावद्ब्रूयमवेक्षध्वमिति नारदेनेरितमुक्तं वचनं संस्मरन् पृच्छति स्म ॥ २४ ॥ २५ ॥ कच्चिदिति ॥ कच्चिदिष्टप्रश्ने मधुभोजादयः यादवविशेषाः नोऽस्माकं स्वजना बन्धवः आनर्त्तपुर्यां द्वारकायां सुखं यथा भवति तथा कच्चिदासते ॥ २६ ॥ शूर इति ॥ वाऽप्यर्थे मारिषः मान्योऽस्माकं मातामहः शूरोपि कच्चित्स्वस्ति सुखमास्ते अथ सानुजः अनुजैर्देवभागादिभिः सहितोऽस्माकं मातुल आनकदुन्दुभिर्वसुदेवः कुशली कच्चिदास्ते ॥२७॥ सप्तेति ॥ तस्य वसुदेवस्य पत्न्योऽस्मन्मातुलान्यः सप्तसंख्याः स्वसारः परस्परं भगिन्यः देवकीप्रमुखाः नवमस्क-

तं पादयोर्निपतितमयथापूर्वमातुरम् ॥ अधोवदनमब्बिन्दून्मुञ्चन्तं नयनाब्जयोः ॥ २४ ॥ विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ॥ पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितम् ॥ २५ ॥ युधिष्ठिर उवाच ॥ कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते ॥ मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः ॥ २६ ॥ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाऽथ मारिषः ॥ मातुलः सानुजः कच्चित्कुशल्यानकदुन्दुभिः ॥ २७ ॥ सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः ॥ आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयम् ॥ २८ ॥ कच्चिद्राजाऽऽहुको जीवत्यसत्पुत्रोऽस्य चानुजः ॥ हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः ॥ २९ ॥ आसते कुशलं कच्चिद्ये च शत्रुजिदादयः ॥ कच्चिदास्ते सुखं रामो भगवान्सात्वतां प्रभुः ॥ ३० ॥ प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः ॥ गम्भीररयोऽनिरुद्धो वर्धते भगवानुत ॥ ३१ ॥ सुषेणश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ॥ अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ॥ ३२ ॥ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः ॥ सुनन्दनन्दशीर्षण्या ये चान्ये सात्वतर्षभाः ॥ ३३ ॥ अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः ॥ अपि स्मरन्ति कुशलमस्माकं बद्धसौहृदाः ॥ ३४ ॥

न्धोक्ताः आत्मजैः कृष्णादिभिः सहिताः सस्नुषाः स्नुषाभिः रुक्मिण्यादिभिः सहिताश्च कच्चित्स्वयं क्षेमं यथा भवति तथा आसते ॥ २८ ॥ कच्चिदिति ॥ असन् पुत्रो यस्य स राजा आहुकः उग्रसेनः कच्चिज्जीवति दुष्पुत्रत्वाज्जीवनमात्रमेव पृष्टम् । अस्य राज्ञोऽनुजः देवकश्च तथा सुतेन कृतवर्मणा सहितः हृदीकः तथा अक्रूरो जयन्तादयः कृष्णभ्रातरः कुशलमासते इत्युत्तरादपकर्षः ॥ २९ ॥ आसत इति ॥ तथा ये च शत्रुजिदादयः ते सर्वे कच्चित्कुशलमासते सात्वतां प्रभुः भगवान् रामः कच्चित्सुखमास्ते ॥ ३० ॥ प्रद्युम्न इति ॥ सर्ववृष्णीनां मध्ये महारथः प्रद्युम्नः कच्चित्सुखमास्ते उत तथा युद्धे गम्भीरो महान् रयो वेगो यस्य स भगवान् अनिरुद्धो वर्द्धते मोदते किम् ॥ ३१ ॥ सुषेण इति त्रयम् ॥ सुषेणः चारुदेष्णश्च जाम्बवतीसुतः साम्बः अन्ये च ऋषभादयः कार्ष्णिप्रवराः श्रीकृष्णपुत्रश्रेष्ठाः सपुत्राः तथैव शौरेः श्रीकृष्णस्यानुचराः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेवकाः श्रुतदेवोद्धवादयोऽन्ये च ये सुनन्दनन्दौ शीर्षण्यौ मुख्यौ येषां ते सात्वतर्षभाः रामकृष्णयोर्भुजावेवाश्रयो येषां ते सर्वेऽपि किं स्वस्त्यासते अपि किं तेऽस्माकं कुशलं स्मरन्ति वाञ्छन्ति यतोऽस्मासु बद्धं सौहृदं यैस्ते तादृशाः सन्ति ॥ ३२ ॥ ३३ ॥ ३४ ॥ भगवानिति ॥ सुहृद्भिर्मित्रैर्वृतः ब्रह्मण्यः भक्तवत्सलः भगवान् गोविन्दोपि पुरे द्वारकायां तत्रापि सुधर्मायां सभायां कच्चित्सुखमास्ते ॥ ३५ ॥ यद्यपि भगवति सुखप्रश्नो नावश्यकस्तथापि भगवतो द्वारकावस्थाने हि लोकानां मङ्गलमित्याशयेनाह—मङ्गलायेति ॥ लोकानां मङ्गलाय क्षेमाय लब्धपालनाय भवाय समृद्धये चानन्तसखः बलभद्रसहचारी आद्यः पुमान् श्रीकृष्णो यदुकुलरूपेम्भोधौ समुद्रे कच्चिदास्ते ॥ ३६ ॥ यद्बाह्विति ॥ यस्य श्रीकृष्णस्य बाहुदण्डैर्गुप्तायां संरक्षितायां स्वपुर्यां द्वारकायामर्चिताः बहुमताः महापौरुषिकाः भगवत्पार्षदा इव यदवः परमानन्दं यथा भवति तथा क्रीडन्ति ॥ ३७ ॥ यदिति ॥ यस्य श्रीकृष्णस्य पादयोः शुश्रूषणं परिचरणमेव मुख्यं यत्कर्म तेन हेतुना सत्यभामादयो व्द्यष्टसहस्र-

भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः॥ कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ॥३५॥ मङ्गलाय च लोकानां क्षेमाय च भवाय च॥आस्ते यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान् ॥ ३६ ॥ यद्बाहुदण्डगुप्तायां स्वपुर्यां यदवोऽर्चिताः ॥ क्रीडन्ति परमानन्दं महापौरुषिका इव ॥ ३७ ॥ यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ॥ निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरन्ति वज्रायुधवल्लभोचिताः ॥ ३८ ॥ यद्बाहुदण्डा भ्युदयाऽनुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः ॥ अधिक्रमन्त्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचिताम् ॥३९॥ कच्चित्तेऽनामयं तात भ्रष्टतेजा विभासि मे ॥ अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः ॥ ४० ॥ कच्चिन्नाभिहतो भावैः शब्दादिभिरमङ्गलैः ॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतम् ॥ ४१ ॥

योषितो भगवद्भार्याः संख्ये युद्धे त्रिदशान् देवान्निर्जित्य कृष्णबलेनैवेत्यर्थः । वज्रायुधस्येन्द्रस्य वल्लभा शची तस्या उचिताः तदाशिषस्तेषां देवानां भोग्यान् पारिजातादीन् हरन्ति भगवता हृताभुञ्जत इत्यर्थः ॥ ३८ ॥ यद्बाह्विति ॥ यस्य हरेर्बाहुदण्डयोरभ्युदयः प्रभावस्तदनुजीविनो यदुप्रवीरा न विद्यते कुतोऽपि भयं येषां तथाभूताः सन्तः सुरसत्तमानामिन्द्रादीनामुचितामत एव बलात् स्वप्रभावेणैवं भगवताऽऽहृतां सुधर्माख्यां सभामङ्घ्रिभिर्मुहुर्मुहुरधिक्रमन्ति क्रमेर्दीर्घाभाव आर्षः । स गोविन्दः कच्चित्सुखमास्ते ॥ ३९ ॥ कच्चिदिति ॥ हे तात ते तव कच्चित् अनामयमारोग्यमस्ति यतो मे मम त्वं भ्रष्टं तेजो यस्य तथाभूतो विभासीति । हे तात वाऽथवा यतस्त्वं तत्र चिरोषितः बहुकालं स्थितः अतः न लब्धो मानः येन तथाभूतः सन् प्रत्युत तैरेवावज्ञातः तिरस्कृतः किम् ॥ ४० ॥ कच्चिदिति ॥ न विद्यते भावः प्रेमा येषां तैः अभावैः प्रेमशून्यैः पुरुषैरमङ्गलैः कुत्सितैः शब्दादिभिः साधनैर्नाभिहतो न ताडितोऽसि कच्चित् । यद्वा आशया सह यथा आशा भवति तथा यदर्थिभ्यो याचमानेभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिश्रुतं दास्यामीति प्रतिज्ञातं तत्तेभ्यो न दत्तं किम् । यद्वा तेभ्यो दास्यामीति नोक्तम् ॥ ४१ ॥ कच्चित्त्वमिति ॥ ब्राह्मणबालादीन् अन्यं वा शरणोपसृतं शरणागतं सत्त्वं प्राणिमात्रं शरणप्रदस्त्वं नात्याक्षीः न त्यक्तवानसि किम् ॥ ४२ ॥ कच्चित्त्वमिति ॥ कच्चित् अगम्यां स्त्रियं त्वं नागमः न गतवानसि असत्कृतां मलिनवस्त्रादिनागम्यां वा स्त्रियं नागमः किम् अथवा भवान् नोत्तमैः अनुत्तमैः समैः असमैरधमैर्वा जनैः पथि न पराजितोऽस्ति ॥ ४३ ॥ अपि स्विदिति ॥ संभोज्यान् प्रथमं भोजनार्हान् वृद्धान् बालकांश्च त्वम् अपिस्वित् किंस्वित्पर्यभुङ्क्थाः परित्यज्य एकः स्वयं भुक्तवानसि अक्षमं कर्तुमयोग्यं यत्तत्किञ्चिज्जुगुप्सितं निन्दितं कर्म तु न कृतवानसि किम् ॥ ४४ ॥ कच्चिदिति ॥ अथवा नित्यं सर्वदा प्रेष्ठतमेन आत्मबन्धुना श्रीकृष्णेन रहितोऽत एव हृदयेन शून्यो निश्चेतनोऽस्मीति कच्चिन्मन्यसे । अन्यथा एतद्विना ते तव महाधीरस्य रुक् मनःपीडा न संभवतीत्यर्थः ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गंगासहायो निरमात्प्रथमस्य चतुर्दशे ॥ १४ ॥

कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियम् ॥ शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ॥ ४२ ॥ कच्चित्त्वं नागमोऽगम्यां गम्यां वाऽसत्कृतां स्त्रियम् ॥ पराजितो वाऽथ भवान्नोत्तमैर्नाऽसमैः पथि ॥ ४३ ॥ अपि स्वित्पर्यभुङ्क्थास्त्वं संभोज्यान्वृद्धबालकान् ॥ जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमम् ॥ ४४ ॥ कच्चित्प्रेष्ठतमेनाऽथ हृदयेनात्मबन्धुना ॥ शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक् ॥ ४५ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्दे युधिष्ठिरवितर्कै द्वारकाया अर्जुनस्यागमनवर्णनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ सूत उवाच ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥ नानाशङ्काऽऽस्पदं रूपं कृष्णाविश्लेषकर्शितः ॥ १ ॥ शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः ॥ विभुं तमेवाऽनुध्यायन्नाऽशक्नोत्प्रतिभाषितुम् ॥ २ ॥ कृच्छ्रेण संस्तभ्य शुचः पाणिनाऽऽमृज्य नेत्रयोः ॥ परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकातरः ॥ ३ ॥ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् ॥ नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥ ४ ॥

॥ अनुष्टुभां चतुःषष्टिः सार्द्धा चोवाचयुग्मकम् ॥ १५ ॥ एवमिति द्वयम् ॥ भ्रात्रा कलिं दृष्ट्वा पञ्चदशे दत्त्वा राज्यं परीक्षिते ॥ नृपः स्वर्गं ययावत्र श्लोकाः सार्द्धाः कुमार्गणाः ॥ राज्ञा युधिष्ठिरेणैवं नानाशङ्कानामास्पदं निमित्तभूतं स्वकीयं रूपं आ विकल्पित इति च्छेदः । आलक्ष्य विकल्पितो विकल्पेन एवंभूतो वा त्वमेवंभूतो वेत्यात्मकेन पृष्टोऽपि कृष्णस्य यो विश्लेषो वियोगस्तेन कर्शितः कृशीकृतः शोकेन हेतुना शुष्यन्ती वदनं च हृच्च ते एव सरोजे यस्य अत एव हतप्रभः निस्तेजाः स कृष्णस्य सखा कृष्णोऽर्जुनः तमेव विभुं श्रीकृष्णमनुध्यायन् प्रतिभाषितुं नाशक्नोत् ॥ १ ॥ २ ॥ कृच्छ्रेणेति द्वयम् ॥ कृच्छ्रेण नेत्रयोः शुचः शोकाश्रूणि संस्तभ्य यान्यश्रूणि उद्गच्छन्ति तानि नेत्रयोरेव संस्तभ्य रोदनवेगं रुद्ध्वेत्यर्थः । गलितान्यश्रूणि पाणिनाऽऽमृज्य परोक्षेण दर्शनागोचरेण कृष्णेन हेतुना समुन्नद्धमाधिकं यत्प्रणयौत्कण्ठ्यं प्रेमोत्कर्षः तेन कातरो

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

व्याकुलः सख्यं हितैषितां मैत्रीमुपकारं सौहृदं बन्धुकृत्यं चकारात्संबन्धितां च सारथ्यादिषु कर्मसु यद्भगवता कृतं तत्संस्मरन् अत एव बाष्पेण कण्ठरोधात् गद्गदया कुण्ठीभूतया गिरा नृपमग्रजं युधिष्ठिरं प्रतीति वक्ष्यमाणमाह स्म ॥ ३ ॥ ४ ॥ वञ्चित इति ॥ हे महाराज देवानामपि विस्मापनमाश्चर्यकरं यन्महन्मे मम तेजस्तद्येनापहृतं तेन मातुलपुत्रबन्धुरूपिणा हरिणाऽहं वञ्चितस्त्यक्तोऽस्मि ॥ ५ ॥ यस्येति ॥ यस्य हरेः क्षणमात्रवियोगेनैवाऽयं सर्वोऽपि लोको नास्ति प्रियं दर्शनं यस्य तथाभूतो जातः प्रियस्याप्रियत्वे दृष्टान्तः यथा हि उक्थेन प्राणेन रहित एष पित्रादिर्मृतकः प्रोच्यते तद्वत् यच्छब्दानां तेनाहं वञ्चित इत्यनेन संबन्धः ॥ ६ ॥ यत्संश्रयादिति ॥ खलु एवार्थे यस्य हरेः संश्रयाद्बलाद्धेतोर्द्रौपद्याः स्वयंवरस्य मुखे प्रारम्भे स्मरेण कामेन दुर्मदानां द्रुपदगेहमुपागतानां राज्ञां धनुर्ग्रहणेनैव तेजो मया हृतं ततः सज्जीकृतेन आरोपितज्याबाणकेन धनुषा मत्स्यो यन्त्रोपरि भ्रमन् यद्वा मत्स्याकारो यन्त्रविशेषः मयाऽभिहतः विद्धः कृष्णा द्रौपदी चाधिगता लब्धेति तेनाहं वञ्चितः ॥ ७ ॥ यत्सन्निधाविति ॥

अर्जुन उवाच ॥ वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा ॥ येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥ ५ ॥ यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः ॥ उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥ ६ ॥ यत्संश्रयाद् द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम् ॥ तेजो हृतं खलु मयाऽभिहतश्च मत्स्यः सज्जीकृतेन धनुषाऽधिगता च कृष्णा ॥ ७ ॥ यत्संनिधावहमु खाण्डवमग्नयेऽदामिन्द्रं च साऽमरगणं तरसा विजित्य ॥ लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहरन् नृपतयो बलिमध्वरे ते ॥ ८ ॥ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थे आर्योऽनुजस्तव गजायुतसत्त्ववीर्यः ॥ तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन्बलिमध्वरे ते ॥ ९ ॥

उ विस्मये यस्य सन्निधौ हेतुभूते सति तरसा वेगेन सामरगणम् अमरगणैः सहितमिन्द्रमहं विजित्य खाण्डवाख्यं तस्य वनमग्नये अदां दत्तवानस्मि तत्र खाण्डवदाहे रक्षितेन मयेन कृता निर्मिता अद्भुतानि शिल्पानि प्रतिमादीनि माया च जलादौ स्थलादिभानहेतुर्यस्यां सा सभा मया लब्धा तथा यत्सन्निधौ ते तवाध्वरे राजसूये दिग्भ्यो नृपतयो बलिमहरन् आनयन् ॥ ८ ॥ यत्तेजसेति ॥ यस्य हरेः तेजसा युक्तः अत एव गजानामयुतस्य सत्त्वमुत्साहो वीर्यं बलं च यस्य स तवानुजो ममार्यः पूज्यो भीमो नृपाणां शिरःस्वङ्घ्रिर्यस्य तं महाप्रतापं जरासन्धं मखार्थे तव राजसूययज्ञार्थमहन् तन्निर्जयं विना राजसूयमखानुपपत्तेः । तं च हत्वा प्रमथनाथो महाभैरवस्तस्य मखाय ये दिग्विजये नम्रतां न गता भूपास्तेन बलादाहृता निरुद्धाश्च ते च यद्यस्मात्तद्वधाद्विमोचितास्तत्तस्मात्ते तवाध्वरे राजसूये बलिं तत्साधनभूतं द्रव्यमनयन् आनयन् अयं श्लोको विगीत इति स्वामिपादाः ॥ ९ ॥ ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्न्या इति ॥ यत्स्मरणात्तदानीमेवागतस्य श्रीकृष्णस्य नमने पदयोः पतितान्यश्रूणि मुखे यस्यास्तस्याः पदशब्दसापेक्षस्यापि पतितशब्दस्याश्रुशब्देन समासो नित्यसापेक्षत्वात् । यद्वा पदयोः पतिता चासौ अश्रुमुखी च तस्याः तव पत्न्याः द्रौपद्या अधिमखं राजसूयमखे क्लृप्तो विरचितो यो महाभिषेकस्तेन श्लाघिष्ठमत्यन्तश्लाघ्यं चारु सुन्दरं कबरं धम्मिल्लं सभायां विकीर्य विक्षिप्य यैः कितवैर्धूर्तैर्दुःशासनादिभिः स्पृष्टमाकृष्टं तेषां स्त्रियः स्त्रीः हता ईशाः पतयो यासां ताश्च विमुक्ताः केशा यासां ताश्च तथाभूताः यो भगवान् कृष्णः अकृत कृतवान् ॥१०॥ यो न इति ॥ यः शिष्याणामयुतस्याग्रे अग्रपङ्क्तौ भुङ्क्ते तस्माद्दुर्वाससो हेतोः अरिणा दुर्योधनेन विहितात् रचिताद्दुरन्तकृच्छ्रादपारसङ्कटाच्छापरूपान्नोऽस्मान् वनमेत्य आगत्य स्थालीलग्नं शाकमेवान्नं तस्मिन्नेव पात्रे शिष्टमुपयुज्य जग्ध्वा भुज्येत्यपि पाठः । यो भगवान् जुगोप रक्षितवान् । तत्र हेतुः यतः शाकान्नभोजनात् हेतोः स्नानार्थं सलिले विनिमग्नो मुनीनां संघः त्रिलोकीं तृप्ताम् अमंस्त अमन्यत । एवं हि भारते कथा । कदाचित् दुर्वाससो दुर्योधनेनातिथ्यं कृतं तेन च परितुष्टेन वरं वृणीष्वेत्युक्ते दुर्वाससः शापात् पाण्डवा नश्येयुरिति मनसि विधाय दुर्योधनेनोक्तम् । युधिष्ठिरोऽस्मत्कुलमुख्यः अतस्तस्यापि भवतैवं शिष्या-

पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायाम् ॥ स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यैस्तत्स्त्रियोऽकृत हतेशविमुक्तकेशाः ॥ १० ॥ यो नो जुगोप वनमेत्य दुरन्तकृच्छ्राद्दुर्वाससोऽरिविहितादयुताग्रभुग्यः ॥ शाकान्नशिष्टमुपभुज्य यतस्त्रिलोकीं तृप्तामममंस्त सलिले विनिमग्नसंघः ॥ ११ ॥ यत्तेजसाऽथ भगवान्युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ॥ अन्येऽपि चाहममुनैव कलेवरेण प्राप्तो महेन्द्रभवने महदासनार्धम् ॥ १२ ॥

युतसहितेनातिथिना भवितव्यं किंतु द्रौपदी यथा क्षुधा न सीदेत्तथा तस्यां भुक्तवत्यां तद्गृहं गन्तव्यमिति । ततश्च तथैव दुर्वाससि प्राप्ते परमादरेण युधिष्ठिरेण माध्याह्निकं कृत्वा आगम्यतामिति ज्ञापितो मुनिसंघोऽघमर्षणाय जले निममज्ज । तत्र चिन्तातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णस्तत्क्षण एव भक्तवत्सल आगतस्तया चावेदिते वृत्तान्ते भगवतोक्तं द्रौपद्यहं बुभुक्षितोऽस्मि प्रथमं मां भोजय तया चातिलज्जयोक्तं स्वामिन्मद्भोजनपर्यन्तमक्षयमन्नं सूर्यदत्तस्थाल्यां तिष्ठति । मया च सर्वान् भोजयित्वा भुक्तमतो नास्त्यन्नमिति तथाप्यतिनिर्बन्धेन भगवता पाकस्थालीमानाय्य तत्कण्ठलग्नं शाकान्नं प्राश्योक्तम् अनेन विश्वात्मा भगवान् प्रीयताम् । इति । अथ भगवान् भोक्तुं मुनिसंघमाहूयेति भीमं प्रहितवान् स च मुनिसङ्घः भगवत्तर्पितत्वात् अतितृप्तः वृथा पाकभयात् पलायित इति ॥ ११ ॥ यत्तेजसेति ॥ यस्य तेजसा सगिरिजः पार्वतीयुक्तः स भगवान् शूलपाणिः शिवो मया युधि विस्मापितः सन्निजं पाशुपताख्यमस्त्रं मे मह्यमदात् । तथा अन्येऽपि शक्रादयो लोकपालाः विस्मापिता निजान्यस्त्राणि ददुः यस्य तेजसाहममुनैव कलेवरेण मनुष्यदेहेन महेन्द्रभवने महतो महेन्द्रस्यासनार्धं प्राप्तः ॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रैवेति ॥ तत्रैवेन्द्रभवने विहरतो मे येन भगवतानुभावितं प्रभावयुक्तं कृतं गाण्डीवलक्षणं गाण्डीवेन सह लक्ष्यत इति तथाभूतं गाण्डीवं लक्षणं चिह्नं यस्य वा गाण्डी-वज्याघातलक्षणं वा भुजदण्डयोर्युग्मं सेन्द्रा देवा अरातिवधाय कालकेयनिवातकवचाद्यसुरवधार्थं श्रिताः सहायत्वेनाश्रिताः हे आजमीढ हे राजन् तेन भूम्ना परिपूर्णतमेन पुरुषेण श्रीकृष्णेनाहमद्य मुषितोऽस्मि वञ्चितोऽस्मि स मां विहाय स्वलोकं जगामेत्यर्थः । भूम्ना अतिशयेन मुषित इति वा ॥ १३ ॥ यद्बान्धव इति ॥ यो भगवान् बान्धवः सहायभूतो यस्य सोऽहमेक एव नास्त्यन्तो गाम्भीर्येण पारं च देशतो यस्य तम् अतीर्याणि दुस्तराणि सत्त्वानि भीष्मादिरूपाणि तिमिङ्गिलादीनि यस्मिंस्तम् अतीर्ये-त्यत्र अतार्येति वाच्ये इड्भाव आर्षः । कुरूणां बलाब्धिं सेनासमुद्रं पोतेनेव रथेन ततरे तीर्णवान् । ततरेहमित्यार्षं तताराहमित्युचितम् । किंच यद्बान्धवेन मया उत्तरगोग्रहे भीष्मादीन्निर्जित्य तैर्नीतं बहुधनं गोगणरूपं प्रत्याहृतं शत्रूणां शिरोभ्यः सकाशात्तेजस्पदं प्रभावस्य व्यञ्जकं सत्त्वं कस्कादित्वकल्पनया तेजास्पदमिति पाठे आस्पदमिति

तत्रैव मे विहरतो भुजदण्डयुग्मं गाण्डीवलक्षणमरातिवधाय देवाः ॥ सेन्द्राः श्रिता यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥१३॥
यद्बान्धवः कुरुबलाब्धिमनन्तपारमेको रथेन ततरेऽहमतीर्यसत्त्वम् ॥ प्रत्याहृतं बहुधनं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः
॥ १४ ॥ यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमण्डलमण्डितासु ॥ अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज
आर्च्छत् ॥ १५ ॥ यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्तशलसैन्धवबाह्लिकाद्यैः ॥ अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुः
नृहरिदासमिवाऽऽसुराणि ॥ १६ ॥ सौत्ये वृतः कुमतिनाऽऽत्मद ईश्वरो मे यत्पादपद्ममभवाय भजन्ति भव्याः ॥ मां श्रान्तवाहमरयो रथिनो
भुविष्ठं न प्राहरन्यदनुभावनिरस्तचित्ताः ॥ १७ ॥

पदेन सन्धिरार्षः । मणिमयं मुकुटोष्णीषादिरूपं च मोहनास्त्रेण मोहयित्वा हृतम् ॥ १४ ॥ यो भीष्मेति ॥ हे विभो अदभ्राणां बहूनां राजन्येषु वर्याणां श्रेष्ठानां रथानां मण्डलैः समूहैर्मण्डितासु भीष्मकर्णादिचमूषु यो भगवान् सारथिरूपेण ममाग्रेचरः अवस्थितः सन् दृशा दृष्टिमात्रेणैव तेषां रथयूथपानाम् आयुः मनांसि उत्साहादिशक्तीः सहो बलम् ओजः अस्त्रादिकौशलं च आर्च्छत् हृतवान् ॥ १५ ॥ यद्दोःष्विति ॥ यस्य दोःषु भुजेषु मध्ये प्रणिहितं तेनैव कृपया स्थापितं मा माम् अमोघः महिमा येषां तान्यपि गुरुर्द्रोणः भीष्मः कर्णः द्रौणिरश्वत्थामा त्रिगर्तः तद्देशाधिपतिः सुशर्मा शलः शल्यः सैन्धवो जयद्रथः बाह्लिकः शन्तनोः भ्राता एतदाद्यैः निरूपितानि प्रयु-क्तान्यमोघमहिमानि अप्रतिहतप्रभावाणि अस्त्राणि नृहरिदासं प्रह्लादं यथा आसुराणि असुरैः प्रयुक्तान्यस्त्राणि न स्पृशन्ति स्मेति प्रतीकाराकरणेप्यस्पर्शे दृष्टान्तः । तथा नोपस्पृशुः न स्पृशन्ति स्म ॥ १६ ॥ सौत्ये इति ॥ भव्याः श्रेष्ठाः अभवाय मोक्षाय यस्य पादपद्मं भजन्ति स आत्मदः भक्तेभ्य आत्मानमपि ददाति स ईश्वरोपि कुमतिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे मया सौत्ये सारथ्ये वृतः स्थापितः यमन्ये भजन्ति तमभव्योऽहं भजनमकारयमित्यर्थः। तत्रापि तस्य दयां शृण्वित्याह। श्रान्ता वाहा यस्य तं जयद्रथवधे हि जलपानं विना अश्वाः श्रान्ताः ततो रथादवतीर्य बाणैर्भुवं भित्त्वा मया जलं सम्पादितं तदा भुविष्ठं भूमौ स्थितमपि मां यस्यानुभावेन निरस्तं चित्तम् अयं मारणीय इति ज्ञानं येषां ते तथाभूताः सन्तोऽरयो रथिनोऽपि न प्राहरन् न प्रहृतवन्तः ॥ १७ ॥ नर्माणीति ॥ हे नरदेव उदारं श्रेष्ठं रुचिरं सुन्दरं च यत् स्मितं तेन शोभितानि अत एव हृदिस्पृशानि मनोज्ञानि माधवस्य नर्माणि परिहासवाक्यानि तथा हे पार्थ हे अर्जुन हे सखे हे कुरुनन्दनेति संजल्पितानि मधुरवाक्यानि इदानीं स्मर्तुर्मम हृदयं लुठन्ति लोठयन्ति क्षोभयन्ति णिजभाव आर्षः चुरादेरनित्यो णिज् वा। अन्तर्भावितण्यर्थता वा हृदये इति सप्तम्यन्तोऽपि पाठः ॥ १८ ॥ शय्येति ॥ शय्या आसनम् अटनं भ्रमणं विकत्थनं स्वश्लाघा भोजनं च एतदादिषु ऐक्यात् अव्यतिरेकाद्धेतोः कदाचिद्व्यभिचारं दृष्ट्वा हे वयस्य ऋतवान् सत्ययुक्तस्त्वमिति वक्रोक्त्या विप्रलब्धस्तिरस्कृतोऽपि ऋतमानिति पाठे वत्त्वाभाव आर्षः। ऋभुमानिति पाठे ऋभवो देवाः सेवका अस्य सन्तीति यतोऽसौ महानतो महितया स्वमहत्त्वेन महामहितया इति पाठे अतिमहत्त्वेन सख्युरघं

नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति ॥ संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठन्ति हृदयं मम माधवस्य ॥ १८ ॥ शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः ॥ सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे ॥ १९ ॥ सोऽहं नृपेन्द्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः ॥ अध्वन्युरुक्रमपरिग्रहमङ्ग रक्षन्गोपैरसद्भिरबलेव विनिर्जितोऽस्मि ॥ २० ॥

यथा सखा सहते तथा तनयस्य अघं यथा पिता सहते तद्वत् कुमतेः मे मम सर्वमघमपराधं सेहे ॥ १९ ॥ पराजितो वाथ भवानिति त्वया तर्कितमपि सत्यमित्याह—सोऽहमिति ॥ अङ्ग हे नृपेन्द्र स हरेः सखाहं प्रियेण सख्या सुहृदा हितैषिणा पुरुषोत्तमेन हरिणा रहितः अत एव हृदयेन शून्यः उरुक्रमस्य हरेः परिग्रहं षोडशसहस्रस्त्रीरूपं रक्षन्नध्वनि मार्गे असद्भिर्नीचैरतितुच्छैश्च गोपैरबलेव स्त्री इव विनिर्जितोऽस्मि भगवत्पत्नीनां नीचहस्तगमनं च शापवशात् एता हि देवाङ्गनाः स्नानं कुर्वन्तमष्टावक्रमृषिं स्तुत्वा ततो विष्णुर्वः पतिर्भविष्यतीति वरं प्राप्य तस्य जलाद्बहिर्निःसरणे तदङ्गवक्रिमदर्शनजादुपहासाद्दस्युहस्तगता भविष्यथेति शापं च प्रापुः किंच गोपदस्युरूपमपि शापपालनार्थं भगवानेव दधार। "न वयं साध्वि साम्राज्यम्" इत्यादिना भगवत्प्रियाभिर्व्रजस्त्रीत्वं काङ्क्षितं तदेव रूपान्तरेण ताभिः प्राप्तं तदेवेदं भगवता प्रापितम्। अन्यथा नीचस्पर्शे तासां सद्य एवान्तर्द्धानं स्यात् अतः प्रकाशान्तरेण तासां व्रजस्त्रीत्वप्राप्तिरित्यपि ज्ञेयम्। अत एव गोपैः भूम्यादिपालकैः असद्भिः न विद्यन्ते सन्तो येभ्य

CC-0. In Public Domain. Digitization by eGangotri

इति वास्तवोर्थः ॥ २० ॥ तद्वै इति ॥ यतः धनुरादेः नृपतयो माम् आनमन्ति प्रणमन्ति तद्वै तदेव धनुरस्ति त एव इषवो बाणाः स एव रथः त एव हया अश्वाः स एवाहं रथी च तथापि यथा भस्मन् भस्मनि विधानेनापि हुतं ङिलुक् छान्दसः । यथा वा कुहकात् अतिप्रीतादपि मायाविनः सकाशाद्राद्धं लब्धं वस्तु यथा वा ऊष्याम् ऊषरभूमौ ङीष् त्वार्षः। उप्तं बीजं निष्फलं भवति तथा ईशरिक्तं श्रीकृष्णरहितं तद्धनुरादिकं सर्वं क्षणेनासत्प्रायं कार्याक्षममभूत्॥ २१॥ राजन्निति द्वयम् ॥ हे राजन् सुहृत्पुरे द्वारकायां त्वयाभिपृष्टानां विप्रशापविमूढानां वारुणीं पैष्टीं मदिरां पीत्वा मदेनोन्मथितं चेतो येषाम् अन्योन्यम् अजानतामिव मिथः मुष्टिभिर्निघ्नतां नोऽस्माकं सुहृदां बन्धूनां मध्ये चत्वारः पञ्च वा इति चतुष्पञ्चाः डच् । वशेषिताः “ वष्टिभागुरिः० ” इत्यल्लोपः ॥ २२ ॥ २३ ॥ प्रायेणेति ॥ एतत् यादवकुलोपसंहाररूपं प्रायेण भगवत ईश्वरस्य कृष्णस्यैव विचेष्टितं लीला कुतो यत् यस्मादीश्वरादेव भूतानि व्याघ्रमनुष्यादीनि पितृपुत्रादीनि च मिथो निघ्नन्ति मिथो भावयन्ति पालयन्ति च ॥२४॥

तद्वै धनुस्त इषवः स रथो हयास्ते सोऽहं रथी नृपतयो यत आनमन्ति॥सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूष्याम्॥२१॥ राजंस्त्वयाऽनुपृष्टानां सुहृदां नः सुहृत्पुरे ॥ विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥ २२ ॥ वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम् ॥ अजानतामिवान्योन्यं चतुष्पञ्चा वशेषिताः ॥ २३ ॥ प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितम् ॥ मिथो निघ्नन्ति भूतानि भावयन्ति च यन्मिथः ॥ २४ ॥ जलौकसां जले यद्वन्महान्तोऽदन्त्यणीयसः ॥ दुर्बलान्बलिनो राजन्महान्तो बलिनो मिथः ॥ २५ ॥ एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः ॥ यदून्यदुभिरन्योन्यं भूभारान्संजहार ह ॥ २६ ॥ देशकालार्थयुक्तानि हृत्तापोपशमानि च ॥ हरन्ति स्मरतश्चित्तं गोविन्दाभिहितानि मे ॥ २७ ॥ एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम् ॥ सौहार्देनातिगाढेन शान्ताऽऽसीद्विमला मतिः ॥ २८ ॥

जलौकसामिति द्वयम् ॥ हे राजन् जले जलौकसां मत्स्यादीनां मध्ये यद्वत् यथा अणीयसः सूक्ष्मान्महान्तोऽदन्ति भक्षयन्ति यथा च दुर्बलान् बलिनो घ्नन्ति यथा च महान्तो बलिनश्च मिथो घ्नन्ति एवं विभुः हरिः बलिष्ठैर्महद्भिश्च पाण्डवैः इतरान् दुर्योधनजरासन्धादीन्निहत्य तादृशैः यदुभिरितरान् दुर्बलान् दुष्टान् संजहार । यदूंस्तु यदुभिरन्योन्यं संजहार एवं भूभारान् संजहार ॥ २५ ॥ २६ ॥ अतः परं वक्तुं न शक्नोमीत्याह–देशेति ॥ यस्मिन्देशे यस्मिन्काले यस्मिन्वार्थे यानि युक्तानि समुचितानि ॥ ४९ ॥
तानि अत एव हृदि ये तापाः तान् उपशमयन्ति तादृशानि गोविन्दस्याभिहितानि भाषणानि गीतादिरूपाणि स्मरतो मे मम चित्तं हरन्ति ॥ २७ ॥ एवमिति ॥ सूतोक्तिः एवमतिगाढेनापारेण सौहार्देन प्रेम्णा श्रीकृष्णस्य पादसरोरुहं चिन्तयतो जिष्णोरर्जुनस्य मतिर्विमला रागादिरहिता अत एव शान्ता विशोकाऽऽसीत् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासुदेवेति द्वयम् ॥ वासुदेवस्याङ्घ्र्योरनुध्यानेन परिबृंहितं रंहो वेगो यस्यास्तया भक्त्या निर्मथिताः उन्मूलिताः अशेषाः कषायाः कामादयो यस्याः सा धिषणा बुद्धिर्यस्य तथाभूतो विभुरर्जुनः संग्राममूर्द्धनि युद्धसमारम्भे यद् भगवता गीतं गीतामुखेनोपदिष्टं ज्ञानं तन्महता कालेन कर्मणा तमसा भोगाभिनिवेशेन च रुद्धं तिरोहितमपि पुनरध्यगमत् ॥ २९ ॥ ३० ॥ विशोक इति ॥ शोकस्य हि हेतुर्द्वैतभ्रमः तस्य स्थूलदेहः तस्य लिङ्गदेहः तस्य सत्त्वादयो गुणाः तेषामविद्या इति शास्त्रप्रक्रिया । तत्र ब्रह्मसम्पत्त्या सर्वं खल्विदं ब्रह्म ब्रह्मास्मीति ब्रह्मात्मज्ञानेन लीना प्रकृतिरविद्या यस्मिंस्तन्नैर्गुण्यं भवति नतु सुषुप्तिप्रलययोरिवाविद्याशेषम् । तस्मान्नैर्गुण्याद्गुणकार्यलिङ्गनाशः अलिङ्गत्वाच्चासंभवः सम्यग्भोगाय पुनः पुनर्भवतीति संभवः स्थूलशरीरं तदभिमानरहितः ततश्च तत्परिच्छेदाभावात् संछिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य सोऽर्जुनो विशोको जातः ॥ ३१ ॥ निशम्येति ॥ भगवतो मार्गं वैकुण्ठगमनं यदुकुलस्य संस्थां विनाशं च निशम्य निभृतात्मा निश्चलचित्तः युधिष्ठिरः स्वः पथाय परलोकमार्गं गन्तुं मतिं चक्रे ॥३२॥

वासुदेवाङ्घ्र्यनुध्यानपरिबृंहितरंहसा ॥ भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥ २९ ॥ गीतं भगवता ज्ञानं यत्तत्संग्राममूर्धनि ॥ कालकर्मतमोरुद्धं पुनरभ्यगमद्विभुः ॥ ३० ॥ विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः ॥ लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसंभवः ॥ ३१ ॥ निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च ॥ स्वः पथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः॥३२॥पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च ताम् ॥ एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥ ३३ ॥ ययाऽहरद्भुवो भारं तां तनुं विजहावजः ॥ कण्टकं कण्टकेनेव द्वयं चापीशितुः समम् ॥ ३४ ॥ यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः ॥ भूभारः क्षपितो येन जहौ तच्च कलेवरम् ॥ ३५ ॥

पृथेति ॥ पृथापि धनञ्जयेनोदितमुक्तं यदूनां नाशं तां "सौदामिन्या यथाकाशे" इत्यादिना एकादशे दुर्लक्ष्यत्वेन वक्ष्यमाणां भगवतो गतिं च अनुश्रुत्य निशम्य अधोक्षजे भगवति एकान्तभक्त्या निवेशित आत्मा मनो यया सा तथाभूता सती संसृतेरुपरराम जीवन्मुक्ता बभूव । देहं जहाविति वा ॥ ३३ ॥ तदेवमुक्तमपि यादवेभ्यो भगवतो वैलक्षण्यमबुध्वा तत्साम्यं वदतो मन्दमतीन् प्रति स्पष्टयति—ययेति॥ अजः श्रीकृष्णः यया यादवसमूहादिरूपया तन्वा भुवो भारमहरत्तां तनुं कण्टकं कण्टकेनेव यथा कण्टकं गृहीत्वा तेन पादौ प्रविष्टं कण्टकमुद्धृत्य पुनः कण्टकद्वयं दूरादेव विसृज्यते तथा विजहौ । यतः द्वयं भूभारभूततनुस्तद्धृतनुश्चेति द्वयमीशितुरीश्वरस्य संहार्यत्वेन सममेव ॥३४॥ श्रीकृष्णमूर्त्तेर्विशेषमाह—यथेति॥ नटो यथा निजरूपेण स्थित एव मत्स्यादिरूपाणि धत्ते यथा च पुनस्तानि जह्यात् जहाति तथा भगवानपि निजरूपे स्थित एव भूभारावतारार्थं मनुष्यकलेवरं धृत्वा येन भूभारः क्षपितोऽवतारितस्तदपि कलेवरं जहावन्तर्द्धानं कृतवान् । भगवद्विग्रहस्य सच्चिदानन्दरूपत्वेन भौतिकविग्रहवत्त्यागासंभवात् । तथा

Nepal Sanskrit University, Balmiki

CC-0. In Public Domain. Digitization by eGangotri

च वाक्यं "यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः । स सर्वस्माद्बहिष्कार्यः श्रौतस्मार्तविधानतः" ॥ ३५ ॥ यदेति ॥ श्रवणीया श्रवणार्हा सती कथा यस्य सः मुकुन्दो भगवान् यदा स्वतन्वा इमां महीं जहौ सतनोरेव वैकुण्ठारोहात् तदा तस्मिन्नेव अहः अहनि सतम्या लुगार्षः । अप्रतिबुद्धचेतसामविवेकिनामधर्महेतुः विवेकिनां तु न प्रभुरित्यर्थः । कलिरन्ववर्त्तत ततः पूर्वमंशेन प्रविष्टोऽपि तदा सर्वतः प्रसृतवान् ॥ ३६ ॥ युधिष्ठिर इति ॥ तदा बुधः धीमान् युधिष्ठिरः पुरे राष्ट्रे देशे गृहे च आत्मनि मनसि लोभः अनृतं जिह्मं कौटिल्यं हिंसनं परपीडा इत्यादीनामधर्माणां चक्रं यत्र तत् तस्य कलेः परिसर्पणं प्रसरणं विभाव्य पर्यालोच्य गमनाय पर्यधात्तदुचितं परिधानं कर्त्तव्यं कृतवान् ॥ ३७ ॥ स्वराडिति ॥ स्वराट् राजा युधिष्ठिरः विनयिनं शिक्षितं गुणैरौदार्यादिभिरात्मनः सुसममतिसदृशं स्वपौत्रं परीक्षितं तोयं समुद्रोदकमेव नीविः परिधानविशेषो यस्यास्तस्याः भूमेः पतिं पतित्वेन गजाह्वये हस्तिनापुरेऽभ्यषिञ्चत् ॥ ३८ ॥ मथुरायामिति ॥ मथुरायां वज्रनामकमनिरुद्धस्य पुत्रं शूरसेनदेशस्य पतिं पतित्वेनाभ्यषिञ्चत्

यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ॥ तदाहरेवाऽप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्तत ॥३६॥ युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तदात्मनि ॥ विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥ ३७॥ स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः ॥ तोयनीव्याः पतिं भूमेरभ्यषिञ्चद्गजाह्वये ॥ ३८ ॥ मथुरायां तथा वज्रं शूरसेनपतिं ततः ॥ प्राजापत्यां निरूप्येष्टिमग्नीनपिवदीश्वरः ॥ ३९ ॥ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकम् ॥ निर्ममो निरहंकारः संछिन्नाशेषबन्धनः ॥ ४० ॥ वाचं जुहाव मनसि तत्प्राण इतरे च तम् ॥ मृत्यावपानं सोत्सर्गं तं पञ्चत्वे ह्यजोहवीत् ॥ ४१ ॥ त्रित्वे हुत्वाथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः ॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥ ४२ ॥

। ततः ईश्वरः राजा युधिष्ठिरः प्राजापत्यां प्रजापतिदेवताकामिष्टिं निरूप्य कृत्वा अग्नीन् गार्हपत्यादीनपिबत् आत्मन्यारोपयामास ॥ ३९ ॥ विसृज्येति द्वयम् ॥ निर्ममः निरहंकारश्च सम्यक् छिन्नमशेषबन्धनमविद्याख्यं यस्य सः युधिष्ठिरः तत्र गृह एव तद्राजोचितं दुकूलवलयादिकं सर्वं विसृज्य मनसि वाचं जुहाव वाचमित्युपलक्षणं सर्वाणीन्द्रियाणि मनसि जुहाव मनोधीनवृत्तित्वात्तदभेदं भावयामासेत्यर्थः । तन्मनः प्राणे प्राणाधीनवृत्तित्वात् तं प्राणं च इतरेऽपाने स्मिन्नभाव आर्षः । अपानेन प्राणाकर्षणात् उत्सर्गो नामापानव्यापाररूपस्तेन सहितमपानं मृत्यौ तदभिमानिदेवतायां जुहाव अनेनैव वागादीन्द्रियेष्वपि तत्तत्कर्मसाहित्यं ज्ञेयम् । तं च मृत्युं पञ्चत्वे पञ्चमहाभूतानामैक्यरूपे देहेऽजोहवीत् देहस्यैव मृत्युर्नात्मन इति भावितवान् । यङ्लुगन्ताल्लङ् ॥ ४० ॥ ४१ ॥ त्रित्वे इति ॥ अथ पञ्चत्वं पृथिव्यादिभूतपञ्चकं त्रित्वे गुणत्रये हुत्वा तच्च त्रित्वमेकत्वे अविद्यायां मुनिः मननशीलो युधिष्ठिरोऽजुहोत् । तच्च सर्वं सर्वारोपकारणमविद्यामात्मनि जीवेऽजुहोत् । तं च शोधितमात्मानम् अव्यये अविकारे ब्रह्मणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजुहवीत् अजोहवीत् न तस्यान्यत्र लय इत्यर्थः । गुणाभाव आर्षः ॥४२॥ चीरेति सार्द्धम् ॥ चीरवासाः निराहारः बद्धवाक् मौनी मुक्तमूर्द्धजः लोकसंबन्धनिवृत्त्यर्थं जडः शून्यहृदयः उन्मत्तपिशाचौ स्फुटौ । तद्वत् आत्मनः रूपं दर्शयन् अनवेक्षमाणोऽनुजभार्यादिप्रतीक्षामकुर्वन् यथा बधिरस्तथा केषामपि वचनमश्रृण्वन् गृहान्निरगात् ॥ ४३ ॥ उदीचीमिति ॥ हृदि परं ब्रह्म ध्यायन् यतः यां दिशं गतो जनः संसारे नावर्तेत तां महात्मभिः मुनिभिर्गतपूर्वां पूर्वसेविताम् उदीचीमुत्तरामाशां दिशं प्रविवेश ॥ ॥ ४४ ॥ सर्वे इति ॥ भुवि याः प्रजास्ताः अधर्मस्य मित्रेण कलिना स्पृष्टाः व्याप्ताः दृष्ट्वा कृतो निश्चयो गृहत्यागादिरूपो यैस्ते सर्वे भ्रातरो भीमादयः तं युधिष्ठिरमनु निर्जग्मुः ॥४५॥ ते इति ॥ साधु सम्यक् कृताः सर्वेऽर्था यज्ञादिसाधनानि यैस्ते युधिष्ठिरादयःवैकुण्ठस्य श्रीकृष्णस्य चरणाम्बुजम् आत्मन आत्यन्तिकं मुख्यं शरणं ज्ञात्वा तदेव मनसा धारयामासुः ॥ ४६ ॥ तद्ध्यानेति द्वयम् ॥ तस्य हरेर्ध्यानेनोद्रिक्तया वृद्धया भक्त्या विशुद्धा धिषणा बुद्धिर्येषां ते तस्मिन् शास्त्रप्रसिद्धे परे श्रेष्ठे नारायणस्य पदे चरण

चीरवासा निराहारो बद्धवाङ् मुक्तमूर्धजः ॥ दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥ अनवेक्षमाणो निरगादश्रृण्वन्बधिरो यथा ॥ ४३ ॥
उदीचीं प्रविवेशाऽऽशां गतपूर्वां महात्मभिः ॥ हृदि ब्रह्म परं ध्यायन्नाऽऽवर्तेत यतो गतः ॥ ४४ ॥ सर्वे तमनु निर्जग्मुर्भ्रातरः
कृतनिश्चयाः ॥ कलिनाऽधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥ ४५ ॥ ते साधुकृतसर्वार्था ज्ञात्वाऽऽत्यन्तिकमात्मनः ॥ मनसा
धारयामासुर्वैकुण्ठचरणाम्बुजम् ॥ ४६ ॥ तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे ॥ तस्मिन्नारायणपदे एकान्तमतयो गतिम् ॥ ४७ ॥
अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः ॥ विधूतकल्मषाः स्थानं विरजेनात्मनैव हि ॥ ४८ ॥ विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान् ॥
कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥४९॥ द्रौपदी च तदाऽऽज्ञाय पतीनामनपेक्षताम् ॥ वासुदेवे भगवति ह्येकान्तमतिराप तम्॥५०॥

एवैकान्ता निश्चला मतिर्येषां ते तथाभूताः विरजेन शुद्धेन आत्मना एव विधूतं कल्मषं येषां ते युधिष्ठिरादयः विषयेष्वेव आत्मा मनो येषां तैः असद्भिः दुरवापाम् अप्राप्यां स्थानं भगवत्स्थानरूपां गतिम् अवापुः । विरजेन शुद्धेनात्मना नतु लिङ्गशरीरेण तस्मिन् परे नाराणपद एकान्तमतयस्ते विधूतकल्मषाणामास्थानभूतां गतिमवापुरिति वान्वयः । अत्र कल्मषा इति निर्विसर्गः पाठः । "खर्परे०" इति विसर्गलोपः॥४७॥४८॥विदुरोऽपीति ॥ आत्मवान् वशीकृतचित्तः कृष्णस्यावेशेन स्वान्तः प्रवेशेन हेतुना तस्मिन्नेव चित्तं यस्य तथाभूतः विदुरोऽपि प्रभासे तीर्थे देहं परित्यज्य तदानीमानेतुमागतैः पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ । "यावदधिकारमवस्थितिरधिकारिणाम्" इति न्यायाद्यमाधिकारसमाप्तेरर्वाक् भगवत्प्राप्तिस्तु नाभूदित्यर्थः ॥ ४९ ॥ द्रौपदीति ॥ तदा द्रौपदी च पतीनामनपेक्षतां स्वापेक्षाराहित्यमाज्ञाय ज्ञात्वा वासुदेवे भगवति एकान्ता अनन्या मतिर्यस्याः सा तथाभूता सती तं भगवन्तमाप प्राप ॥ ५० ॥

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ भगवत्प्रियाणां पाण्डोः सुतानाम् इत्येवंप्रकारकम् एतत् अलं स्वस्त्ययनम् अतिशुभावहं पवित्रं च संप्रयाणं गृहान्निर्गमनं यः प्राणी श्रद्धया शृणोति सोऽपि हरौ भक्तिं लब्ध्वा सिद्धिं भगवत्प्राप्तिम् उपैति प्राप्नोति ॥ ५१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्यामूं पञ्चदशे व्यधात् ॥ १५ ॥ संवादः षोडशे भूमिधर्मयोः कलिखिन्नयोः ॥ परीक्षित्याप तत्रात्र श्लोकास्त्रिंशच्च सैंत च ॥ चर्वार्युवाचेति सार्द्धाः सिंधुर्वेर्दा" अनुष्टुभः ॥ १६ ॥ तत इति ॥ हे विप्र शौनक सूत्यां जन्मदिनेऽभिजातकोविदाः जातककर्मनिपुणाः ब्राह्मणाः यथा हि समादिशन् पार्थप्रजाविता साक्षादिक्ष्वाकुरिव मानव इत्यादिनोक्तवन्तस्तथैव महान्तो गुणा यस्मिन् सः आत्वाभाव आर्षः । महाभागवतः परीक्षित् द्विजवर्याणां ब्राह्मणानां शिक्षया महीं शशास पालयामास ॥ १ ॥ स इति ॥ स परीक्षित् उत्तरस्य स्वमातुलस्य तनयामिरावतीम् उपयेमे उद्‌वाह तस्यां चेरावत्यां जनमेजयादींश्चतुरः सुतानुत्पादयत् अडभाव आर्षः । अक्षराधिक्यं छान्दसम् उत्पादयन्निति पाठे

यः श्रद्धयैतद्भगवत्प्रियाणां पाण्डोः सुतानामिति संप्रयाणम् ॥ शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम् ॥ ५१ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे पाण्डवस्वर्गारोहणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ सूत उवाच ॥ ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह ॥ यथा हि सूत्यामभिजातकोविदाः समादिशन्विप्र महद्गुणस्तथा ॥ १ ॥ स उत्तरस्य तनयामुपयेम इरावतीम् ॥ जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् ॥ २ ॥ आजहाराश्वमेधांस्त्रीन् गङ्गायां भूरिदक्षिणान् ॥ शारद्वतं गुरुं कृत्वा देवा यत्राक्षगोचराः ॥ ३ ॥ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् ॥ नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥ ४ ॥ शौनक उवाच ॥ कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ॥ नृदेवचिह्नधृक्छूद्रः कोऽसौ गां यः पदाऽहनत् ॥ ५ ॥

हेतौ शता । सुतान् उत्पादयितुमिरावतीम् उपयेमे इति योजना ॥२॥ आजहारेति ॥ शारद्वतं कृपं गुरुं कृत्वा वृत्वा गङ्गायां गंगातीरे भूरिदक्षिणान् त्रीनश्वमेधान् आजहार कृतवान् । यत्र येषु अश्वमेधेषु देवा इन्द्रादयः अक्षगोचराः प्रत्यक्षा बभूवुः ॥ ३ ॥ निजग्राहेति ॥ वीरः परीक्षित् दिग्विजये निमित्ते विचरन् क्वचिद्देशे ओजसा बलात्कारेण कर्मणा रूपेण च शूद्रमपि नृपलिङ्गधरं पदा पादेन गोमिथुनं स्त्रीपुंसयोर्गवोः युग्मं घ्नन्तं कलिं निजग्राह स्ववशीकृतवान् ॥४॥ कस्येति ॥ नृपः परीक्षिद्दिग्विजये कलिं वधयोग्यमपि कस्माद्धेतोः केवलं निजग्राह नतु हतवान् यो गां पदा पादेन अहनत् अहन् । शपो लुगभावश्छान्दसः । यतः असौ कलिर्नृदेवचिह्नधृक् सः शूद्रकः निन्दायां कन् । शूद्रेष्वप्यतिकुत्सितः अतो वधयोग्य एव शूद्रः क इति पृथक्पदपाठे योऽसौ गां पदाहन् धृजेः क्विप् शूद्रः कलिः कः कीदृग्दोषवान् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिति॥ हे महाभाग तत् कलिनिग्रहादिकं यदि कृष्णकथा आश्रयो यस्य तादृग् भवेत् अथवा अस्य कृष्णस्य पदाम्भोजस्य मकरन्दं रसं लिहन्ति तेषां सतां कृष्णभक्तानां कथाश्रयं भवेत्तर्हि कथ्यतामन्यथा तु न कथनीयम् ॥ ६ ॥ किमिति ॥ अङ्ग हे सूत ऋतं सत्यं मोक्षम् इच्छतां तत्प्राप्तिं कामयमानानां क्षुद्रायुषां मर्त्यानां मरणधर्मवतां नृणामस्माकं यत् येभ्य आयुषः असद्व्ययः निरर्थकः क्षयो भवति तैरन्यैः कृष्णतद्भक्तकथाश्रयव्यतिरिक्तैरसद्भिर्नरकहेतुभिरालापैर्वर्णितैः श्रुतैर्वा किं प्रयोजनं न किंचित् ॥ ७ ॥ इहेति ॥ इह नैमिशे क्षेत्रे सत्रयागे वा शमितुरिदं कर्म शामित्रं यज्ञे पशुमारणं तत्र कर्मणि यज्ञांगपशुमारणे कार्ये भगवान् मृत्युः उपहूतः आकारितोऽस्ति स चान्तको यावदिहास्ते तावदत्र कश्चिदपि न म्रियते ॥ ८ ॥ एतदिति ॥ हि निश्चये । अहो अत्याश्चर्यभूतं हरिलीला एवामृतं यत्र तत् वचो नृलोके जनैः पीयेत कर्मणि लिङ् । "पीङ्, पाने" इत्यस्य कर्त्तरि वा एतदर्थमेव भगवान्मृत्युः परमर्षिभिरत्राहूतः ॥ ९ ॥ भगवद्यशःश्रवणाभावे तु आयुर्व्यर्थमित्याह—मन्दस्येति ॥ मन्दस्य-

तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ॥ अथवास्य पदाम्भोजमकरन्दलिहां सताम् ॥ ६ ॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥ क्षुद्रायुषां नृणामङ्ग मर्त्यानामृतमिच्छताम् ॥ ७ ॥ इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥ न कश्चिन्म्रियते तावद्यावदास्त इहान्तकः॥ ८ ॥ एतदर्थं हि भगवानाहूतः परमर्षिभिः ॥ अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ ९ ॥ मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै ॥ निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ १० ॥ सूत उवाच ॥ यदा परीक्षित्कुरुजाङ्गले वसन्कलिं प्रविष्टं निजचक्रवर्तिते ॥ निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगशौण्डिराददे ॥ ११ ॥ स्वलंकृतं श्यामतुरङ्गयोजितं रथं मृगेन्द्रध्वजमास्थितः पुरात् ॥ वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥ १२ ॥

अलसस्य मन्दभाग्यस्य वा मन्दप्रज्ञस्य तुच्छबुद्धेः मन्दायुषश्च वै निश्चये हरिलीलामशृण्वतो नक्तं रात्रौ यद्वयस्तन्निद्रया ह्रियते ह्रस्यते दिवा अहनि च यद्वयस्तत्तु व्यर्थैः कर्मभिर्ह्रियते ॥ १० ॥ यदेति ॥ यदा कुरुजाङ्गले हस्तिनापुरे वसन् संयुगे युद्धे शौण्डिः शूरः पाठान्तरे शौरिः कृष्णस्तत्तुल्य इत्यर्थः । परीक्षित् निजचक्रवर्त्तिते स्वसेनया पालिते कुरुजाङ्गले देशे कलिं प्रविष्टं शुश्राव । ततः तदा तमेवानतिप्रियां वार्त्ताम् अत्र प्रविष्टः कलिरेवानतिप्रिया वार्त्तेत्यनुवादविधेयभावो विवक्षितः । अतिशब्दाद्युद्धकौतुकसम्पत्त्या कलिजिघांसया च प्रियां च निशम्य दुष्टग्रहाय शरासनं धनुराददे ॥ ११ ॥ स्वलमिति ॥ तदा सुष्ठु अलंकृतं श्यामैः तुरङ्गैर्योजितं मृगेन्द्रः सिंहस्तेनाङ्कितो ध्वजो यस्मिंस्तं रथमास्थितो भूत्वा रथाश्वद्विपपत्तिभिर्युक्तया स्वसेनया वृतश्च दिग्विजयाय स्वपुरान्निर्गतः ॥ १२ ॥

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

भद्राश्वमिति ॥ भद्राश्वादीन् पञ्चमस्कन्धे प्रसिद्धान् वर्षविशेषान् किंपुरुषादीनि वर्षाणि च विजित्य बलिं करं जगृहे ॥ १३ ॥ तत्रेति त्रयम् ॥ तत्र तत्र देशे प्रगीयमाण "कृत्यचः" इति णत्वम् । नकारपाठस्त्वार्षः । स्वपूर्वेषां युधिष्ठिरादीनां तथा महात्मनामन्येषां च कृष्णमाहात्म्यसूचकं यश उपशृण्वानः शृण्वन् शानजार्षः । चानश् वा अश्वत्थाम्नो ब्रह्मास्त्रतेजसः सकाशादात्मानं कृष्णेन परित्रातं परिपालितं शृण्वन् वृष्णीनां यादवानां पार्थानां च परस्परं स्नेहं च शृण्वन् तेषां यादवपाण्डवानां केशवे भक्तिं च शृण्वन् परमसंतुष्टः प्रीत्या उज्जृम्भिते प्रफुल्ले लोचने यस्य स महामना उदारचित्तः राजा तेभ्यः पूर्वोक्तयशआदि श्रावयितृभ्यो महाधनानि बहुमूल्यद्रव्याणि वासांसि मुक्तादिहारांश्च ददौ ॥ १४ ॥ १५ ॥ १६ ॥ सारथ्येति ॥ स्निग्धेषु पाण्डुषु पाण्डुपुत्रेषु विष्णोः सारथ्यं सूतकर्म पारिषदं सभापतित्वं पारषदमिति पाठस्त्वार्षः । सेवनं चित्तानुवृत्तिः सख्यं दौत्यं च वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणम् अनुगमनं पश्चाच्चलनं स्तवनं प्रणामश्चेत्यादीनि कर्माणि तानि शृण्वन् तथा विष्णोर्जग-

भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून् ॥ किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिम्॥१३॥तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् ॥ प्रगीयमाणं च यशः कृष्णमाहात्म्यसूचकम् ॥ १४ ॥ आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः ॥ स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे ॥ १५ ॥ तेभ्यः परमसन्तुष्टः प्रीत्युज्जृम्भितलोचनः ॥ महाधनानि वासांसि ददौ हारान्महामनाः ॥ १६ ॥ सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामम् ॥ स्निग्धेषु पाण्डुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविन्दे ॥ १७ ॥ तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमन्वहम् ॥ नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे ॥ १८ ॥ धर्मः पदैकेन चरन्विच्छायामुपलभ्य गाम् ॥ पृच्छति स्माऽश्रुवदनां विवत्सामिव मातरम् ॥ १९ ॥ धर्म उवाच ॥ कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायाऽसिम्लायतेषन्मुखेन ॥ आलक्षये भवतीमन्तराधिं दूरे बन्धुं शोचसि कंचनाम्ब ॥ २० ॥

त्कर्तृकां प्रणतिं च शृण्वन् नृपतिः परीक्षित् विष्णोश्चरणारविन्दे भक्तिं करोति स्म ॥ १७ ॥ तस्येति ॥ तस्य परीक्षित एवं पूर्वेषां युधिष्ठिरादीनां वृत्तिमन्वहं वर्तमानस्य सतो नातिदूरे समीपमेव शीघ्रमेव वा किल यदाश्चर्यमासीत्तन्मे मत्तः कथयतः निबोध ॥ १८ ॥ धर्म इति ॥ युगारम्भक्षणत एव धर्मपृथिवीकलयस्तथाभूता भवन्तो लोकैरदृश्या अपि दिदृक्षणीयत्वात् अनुध्यायता परीक्षिता योगदृशा दृष्टा इति ज्ञेयम् । तथा च धर्मः धर्माधिदेवो वृषरूपधर एकेन पदा पादेन चरन् विच्छायां निस्तेजस्कां विवत्सां मृतवत्सां मातरमिव अश्रुवदनां पुत्ररहिता माता यथा रोदिति तथा रुदतीं गां गोरूपधरां पृथिवीम् उपलभ्य दृष्ट्वा । पृच्छति स्म ॥ १९ ॥ कच्चिदिति ॥ हे भद्रे ते तवात्मनो देहस्यानामयमारोग्यं कच्चिदस्ति यतः बहिरामयदर्शनाभावेपि ईषत् म्लायता हर्षक्षयमुपगतेन मुखेन विच्छाया निस्तेजस्कासि अतोऽहं भवतीं त्वामन्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदये आधिः क्लेशो यस्यास्तथाभूतामालक्षये तर्कयामि । हे अम्ब दूरे स्थितं कञ्चन बन्धुं किं शोचसि शालिनीछन्दोभङ्गः ॥ २० ॥ पादैरिति ॥ किं वा पादैस्त्रिभिर्न्यूनमत एवैकः पादो यस्य तं मा मां शोचसि अथवा वृषलैः शूद्रप्रायैराजभिर्भोक्ष्यमाणं पुंस्त्वमात्मविशेषणतया आत्मानं शोचसि । अहो अथवा हृतो विनष्टो यज्ञियो हविर्भागो येषां तान् सुरादीन् देवादीन् शोचसि । उत स्वित् अथवा मघवतीन्द्रे अवर्षति सति दुर्भिक्षपीडिताः प्रजाः शोचसि शालिनीछन्दोभङ्गः ॥ २१ ॥ अरक्ष्यमाणा इति ॥ हे उर्वि पृथ्वि पतिपुत्रादिभिररक्ष्यमाणाः स्त्रियः स्त्रीः शोचसि अथवा पित्रादीभिररक्ष्यमाणान् बालान् । प्रत्युत पुरुषादा राक्षसास्तत्तुल्यैः तैरेवार्त्तान् पीडितान् तान् शोचसि अथवा कुत्सितं कर्म यस्यास्मिन् ब्रह्मकुले ब्राह्मणकुले स्थितां देवीं वाचं वेदलक्षणां पाण्डित्यलक्षणां वा सरस्वतीं शोचसि । अथवा अब्रह्मण्ये ब्राह्मणभक्तिहीने राजकुले लोभवशात्सेवकत्वेन स्थितान् कुलाग्र्यान् ब्राह्मणोत्तमान् शोचसि ॥ २२ ॥ किमिति ॥ कलिना उपसृष्टान् व्याप्तान् क्षत्रबन्धून् राजाधमान् किं वा शोचसि तैः

पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणम् ॥ अथो सुरादीन्हृतयज्ञभागान्प्रजा उतस्विन्मघवत्यवर्षति ॥ २१ ॥ अरक्ष्यमाणाः स्त्रिय उर्वि बालाञ्छोचस्यथो पुरुषादैरिवार्तान् ॥ वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥ २२ ॥ किं क्षत्त्रबन्धून्कलिनोपसृष्टान्राष्ट्राणि वा तैरवरोपितानि ॥ इतस्ततो वाऽशनपानवासःस्नानव्यवायोन्मुखजीवलोकम् ॥ २३ ॥ यद्वाऽम्ब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ॥ अन्तर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलम्बितानि ॥ २४ ॥ इदं ममाऽऽचक्ष्व तवाऽऽधिमूलं वसुन्धरे येन विकर्शितासि ॥ काले न वा ते बलिनां बलीयसा सुरार्चितं किं हृतमद्य सौभगम् ॥२५॥ धरण्युवाच ॥ भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥ २६ ॥

क्षत्रबन्धुभिरवरोपितानि उद्वासितानि राष्ट्राणि देशान्वा शोचसि किं वाऽथवा इतस्ततो निषेधानादरेण सर्वतः अशनं भोजनं पानं प्रसिद्धं वासो वस्त्रं विसर्गरहितपाठे वासःस्थानं स्नानं प्रसिद्धं व्यवायो मैथुनं तेषु उन्मुखम् अभिलाषयुक्तं जीवलोकं शोचसि ॥ २३ ॥ यद्वेति ॥ हे अम्ब हे धरित्रि यद्वा ते तव यो भूरिर्भारस्तस्यावताराय कृतोऽवतारो येन तस्येदानीमन्तर्हितस्य हरेः निर्वाणं मोक्षस्तद्विलम्बितमाश्रितं येषु तानि पाठान्तरे निर्वाणं विडम्बितम् उपहसितं यैः तानि मोक्षादप्यधिकसुखानि हरेः कर्माणि स्मरती सती नुमभाव आर्षः । हरिणा विसृष्टा त्यक्ता त्वं शोचसि ॥ २४ ॥ इदमिति ॥ हे वसुन्धरे सर्वेषामपि बलिनां बलीयसा कालेन ते तव यत्सुरार्चितं देवैरपि बहुमतं सौभगमद्य हृतं तद्वा किं शोचसि अतो येनाधिना विकर्शितासि कृशत्वं नीतासि तस्य तवाधेर्मनःपीडाया इदं मूलं कारणं ममाचक्ष्व मह्यं कथय ॥ २५ ॥ भवानिति षट्कम् ॥ हि निश्चये हे भगवन् धर्म यन्ममाधिकारणं त्वं मामनुपृच्छसि तत्सर्वं भवान् वेद हि जानात्येव । येन हेतुभूतेन भगवता त्वं सर्वलोकसुखावहैश्चतुर्भिः पादैः

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

वर्त्तसे अवर्त्तथाः । वर्त्तमानसामीप्ये भूते लट् । यत्र च सत्यादयो महागुणा न वियन्ति तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः । सत्यं यथार्थभाषणं शौचं शुद्धत्वं दया परदुःखपरिहारेच्छा क्षान्तिः क्रोधोत्पत्तौ चित्तसंयमः त्यागः अर्थिषु मुक्तहस्तता संतोषः अलं बुद्धिः आर्जवमवक्रता शमो मनोनैश्चल्यं दमो बाह्येन्द्रियनैश्चल्यं तपः स्वधर्मः साम्यमरिमित्रादिबुद्ध्यभावः तितिक्षा परापराधसहनम् उपरतिर्विषयलाभेपि तत्रौदासीन्यं श्रुतं शास्त्रार्थविचारः ज्ञानं सर्वज्ञत्वम् आत्मज्ञानं वा विरक्तिः विषयेषु निस्पृहत्वम् ऐश्वर्यं नियन्तृत्वं शौर्यं संग्रामोत्साहः तेजः प्रभावः बलं शरीरसामर्थ्यं दक्षत्वं च स्मृतिः कर्त्तव्यार्थानुसन्धानं स्वातन्त्र्यमपराधीनत्वं कौशलं क्रियानैपुण्यं कान्तिः सौन्दर्यं धैर्यमव्याकुलता मार्दवं मृदुस्वभावः प्रागल्भ्यं प्रतिभातिशयः प्रश्रयो महत्सु विनयः शीलं सद्वृत्तिः सहः ओजो बलानि मनसः ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च सामर्थ्यं भगो भोगास्पदत्वं गाम्भीर्यं दुरवगाहाभिप्रायत्वमक्षोभ्यत्वं च स्थैर्यं निमित्ते सत्यपि क्रोधादिविकाररहित्यम् आस्तिक्यं शास्त्रार्थविश्वासः कीर्तिः

सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् ॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ २७ ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ॥ स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च ॥ २८ ॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ॥ गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः ॥ २९ ॥ एते चान्ये च भगवन्नित्या यत्र महागुणाः ॥ प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥ ३० ॥ तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम् ॥ शोचामि रहितं लोकं पाप्मना कलिनेक्षितम् ॥ ३१ ॥ आत्मानं चानुशोचामि भवन्तं चाऽमरोत्तमम् ॥ देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाऽश्रमान् ॥ ३२ ॥ ब्रह्मादयो बहुतिथं यदपाङ्गमोक्षकामास्तपः समचरन्भगवत्प्रपन्नाः ॥ सा श्रीः स्ववासमरविन्दवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ॥ ३३ ॥

सुयशः मानः पूज्यत्वम् अनहंकृतिः कार्ये कृतेऽपि गर्वाभावः । एते च पूर्वोक्ता एकोनचत्वारिंशत् अन्ये च ब्रह्मण्यत्वशरण्यत्वभक्तवत्सलत्वादयो महत्त्वमिच्छद्भिः प्रार्थ्याः । नित्याः स्वाभाविकाः महागुणा अप्राकृताश्चिन्मयाः स्वरूपभूताः यत्र कर्हिचिदपि महाप्रलयेऽपि न वियन्ति न क्षीयन्ते स्म । तेन गुणानां पात्रेण श्रीनिवासेन हरिणा साम्प्रतं रहितं पाप्मना पापहेतुना कलिना ईक्षितम् आविष्टं लोकं जनसमूहं शोचामि ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ आत्मानमिति ॥ आत्मानं चानुशोचामि वृषलैर्भोक्ष्यमाणत्वात् अमरोत्तमं भगवन्तं च शोचामि न्यूनपदत्वात् देवान् पितॄन् ऋषींश्च शोचामि । लोकैस्तत्तोषहेतुयज्ञतर्पणाध्ययनाकरणात् साधून् शोचामि दुर्जनपीडितत्वात् तथा सर्वान् ब्राह्मणादिवर्णान् शोचामि ब्रह्मचर्याद्याश्रमांश्च शोचामि नष्टधर्मत्वात् ॥ ३२ ॥ ब्रह्मादय इति ॥ यस्याः श्रियः अपाङ्गमोक्षः स्वस्मिन्कृपादृष्टिपातस्तत्कामाः सन्तो ब्रह्मादयो बहुतिथं बहुकालं तपः समचरन् । सा भगवद्भिरुत्तमैः प्रपन्ना आश्रितापि श्रीर्लक्ष्मीः स्ववासं "पुनश्च पद्मादुद्भूता । आदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्योभूद्यदा हरिः" इति विष्णुपुराणवचनात्स्वजन्मस्थानमप्यरविन्दवनं विहायालमत्यर्थमनुरक्ता सती यस्य हरेः पादसौभगं चरणसौन्दर्यं भजतेऽनुभवति । प्रपन्नाः इति बहुवचनपाठे भगवन्तं प्रपन्ना अपीति ब्रह्मादिविशेषणम् ॥ ३३ ॥ तस्येति ॥ तस्य भगवतः अब्जं कमलं कुलिशं वज्रम् अङ्कुशः केतुर्ध्वजः तेषां चिह्नानां केतैराश्रयैः श्रीमद्भिः पदैः सम्यगलंकृतान्यङ्गानि यस्याः साहं ततो भगवतः सकाशाद्विभूतिं सर्वसमृद्धिमुपलभ्य प्राप्य त्रीन् लोकान् अत्यरोचे अतिक्रम्य शोभितवत्यस्मि । स भगवान् उत्स्मयन्तीं मत्सदृशः स्वर्गादिः कोऽपि लोको नास्तीति गर्वं कुर्वतीं शता तत्र नुमभावश्च आर्षः। मां तदन्ते तस्य गर्वस्यान्ते विनाशे विनाशार्थमित्यर्थः । यद्वा तस्या विभूतेरन्ते नाशकाले प्राप्स्यमाने उत्स्मयन्तीं व्यसृजत् त्यक्तवान् ॥ ३४ ॥ यो वै इति ॥ आत्मतन्त्रः स्वतन्त्रः यो वै भगवान् ममातीवभाररूपम् आसुरवंशे असुरसम्पद्युक्ते वंशे जातानां राज्ञां टजभाव आर्षः। अक्षौहिणीनां शतमपानुदत् अपनीतवान् । तथा ऊनपदं पादत्रयहीनमत एव दुःस्थं त्वामात्मनि स्वस्मिन् यत्पौरुषं सामर्थ्यं

तस्याऽहमब्जकुलिशाङ्कुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृताङ्गी ॥ त्रीनत्यरोच उपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदन्ते ॥ ३४ ॥ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतन्त्रः ॥ त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबिभ्रदङ्गम् ॥ ३५ ॥ का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ॥ स्थैर्यं समानमहरन्मधुमाधवीनां रोमोत्सवो मम यदंघ्रिविटङ्किताया: ॥ ३६ ॥ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा ॥ परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीम् ॥ ३७ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे पृथिवीधर्मसंवादो नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

तेन सम्पादयन् सम्पादयितुं पादचतुष्टयसम्पन्नं कर्तुं "लक्षणहेत्वोः" इति हेतौ शता । यदुषु रम्यं रमणीयमङ्गं मूर्तिमबिभ्रत् अबिभः धृतवान् आर्षः प्रयोगः ॥ ३५ ॥ केति ॥ यश्च प्रेमपूर्वकावलोकनेन रुचिरेण मनोहरेण स्मितेन वल्गुभिर्मनोहरैर्जल्पैर्भाषणैश्च मधुमानिनीनां मधुकुलस्त्रीणां सत्यभामादीनां समानं गर्वसहितं स्थैर्यं स्तब्धत्वमितरानधीनत्वमहरत् हृतवान् । यस्य चाङ्घ्रिभ्यां रजस्युद्भूतचिह्नाभ्यां विटंकिताया अलंकृताया मम रोमोत्सवः सस्यादिमिषेण रोमोद्गमो बभूव । तस्य पुरुषोत्तमस्य विरहं का वा सहेत न कापीति ॥ ३६ ॥ तयोरिति ॥ तयोः पृथिवीधर्मयोरेवं कथयतोः सतोः तदा परीक्षिन्नाम राजर्षिः प्राचीं पूर्ववाहिनीं कुरुक्षेत्रस्थां सरस्वतीं तयोः संवादप्रदेशं प्राप्त आगतः ॥ ३७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्याध्याये षोडशे व्यधात् ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

परीक्षिता सप्तदशे कलेर्निग्रह उच्यते ॥ तस्मै स्थानानि दत्तानि तत्र श्लोकाः शरार्णवाः ॥ सूतोवाचेति षट्चत्वारिंशत् सार्द्धा अनुष्टुभः॥१७॥तत्रेति ॥ तत्र तस्मिन् देशे राजा परीक्षित् अनाथवत् वृषलेन हन्यमानं ताड्यमानं गोमिथुनं गावोर्युग्मं नृपस्येव लांछनानि चिह्नानि यस्य सत्यत्रेतादिमर्यादाभङ्गेन स्वातन्त्र्यात् तथा दण्डो हस्ते यस्य तं गोमिथुनहन्तारं वृषलं शूद्रं च ददृशे ददर्श तङ्गार्षः ॥ १ ॥ वृषमिति ॥ मृणालं पद्मकन्दस्तद्वत् धवलं मेहन्तं मूत्रयन्तमिव बिभ्यतम् एतेन पादावशिष्टोऽपि धर्मः प्रतिक्षणं क्षरन्निवास्त इत्युत्प्रेक्षया विनश्यदवस्था सूच्यते । तं वेपमानं नानाविघ्नैः कलिनाऽनिष्पन्नत्वकरणात् सीदन्तं शूद्रेण ताडितम् एकेन पदोपलक्षितं वृषं वृषरूपधरं धर्मं च ददर्श ॥२॥ गामिति ॥ धर्मदुघां यज्ञादिसामग्रीसम्पादकत्वेन धर्महेतुभूतां दीनां भृशं शूद्रस्य पदा हतां विवत्सां सस्यादिप्रसवक्षयात् वत्सरहितामिव अतोश्रुवदनां यज्ञाभावात् क्षामां दुर्बलां यवसं तृणं पृथ्वीपक्षे तु यज्ञभागमिच्छतीं गां गोरूपधरां पृथ्वीं ददर्श ॥ ३ ॥ पप्रच्छेति ॥ कार्तस्वराः स्वर्णमयाः परिच्छदाः परिकरा यस्मिन् तं रथमारूढः

सूत उवाच ॥ तत्र गोमिथुनं राजा हन्यमानमनाथवत् ॥ दण्डहस्तं च वृषलं ददृशे नृपलाञ्छनम् ॥ १ ॥ वृषं मृणालधवलं मेहन्तमिव बिभ्यतम् ॥ वेपमानं पदैकेन सीदन्तं शूद्रताडितम् ॥ २ ॥ गां च धर्मदुघां दीनां भृशं शूद्रपदाहताम्॥ विवत्सामश्रुवदनां क्षामां यवसमिच्छतीम् ॥ ३ ॥ पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदम् ॥ मेघगम्भीरया वाचा समारोपितकार्मुकः ॥ ४ ॥ कस्त्वं मच्छरणे लोके बलाद्धंस्यऽबलान्बली ॥ नरदेवोऽसि वेषेण नटवत्कर्मणाऽद्विजः ॥ ५ ॥ कस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना ॥ शोच्योऽस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ॥ ६ ॥ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् ॥ वृषरूपेण किं कश्चिद्देवो नः परिखेदयन् ॥ ७ ॥ न जातु कौरवेन्द्राणां दोर्दण्डपरिरम्भिते ॥ भूतले नु पतन्त्यस्मिन्विना ते प्राणिनां शुचः ॥ ८ ॥

समारोपितं कलेः पलायनाशंङ्कया सज्जीकृतं कार्मुकं धनुर्येन स परीक्षित् मेघतुल्यगम्भीरया वाचा पप्रच्छ ॥ ४ ॥ क इति ॥ अहमेव शरणं रक्षिता यस्य तस्मिन् लोके बली सन् अबलान् दुर्बलान् बलाद्धंसि सः त्वं कः नटवद्वेषमात्रेण नरदेवोऽसि कर्मणा गोताडनरूपेण तु अद्विजः शूद्रोऽसि ॥ ५ ॥ क इति ॥ गाण्डीवधन्वना अर्जुनेन सह कृष्णे दूरं गते स्वलोकं प्राप्ते सति रहसि एकान्ते अशोच्यान् निरपराधान् प्रहरन् अस्माभिः शोच्यः वध्यत्वेन चिन्त्यः त्वं वस्तुतः कोऽसि तथापि सर्वथा त्वं वधमर्हसि॥ ६ ॥ त्वमिति ॥ मृणालमिव धवलः पादैस्त्रिभिर्न्यूनः एकेन पदा चरन् त्वं कः वृषरूपेण नः अस्मान् परिखेदयन् कश्चिद्देवोऽसि किम् ॥ ७ ॥ नेति ॥ नु वितर्के कौरवेन्द्राणां दोर्दण्डैः परिरम्भिते परिरम्भो जातो यस्य तद्वत् पालितेऽस्मिन् भूतले ते तव शुचोऽश्रूणि विना अन्येषां प्राणिनाम् अश्रूणि न पतन्ति इति खेदहेतुत्वं दर्शितम् ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेति ॥ हे सौरभेय सुरभेः पुत्र मा नु शुचः मा शोचीः आर्षः श्लेरङ् शुचिर्धातोर्वा अनेकार्थत्वात् । वृषलात् शूद्रात् ते तव भयं व्येतु अपयातु । हे अम्ब ते तव भद्रं सुखमस्तु । खलानां शास्तारि दण्डधरे मयि विद्यमाने सति त्वं मा रोदीः ॥९॥ एतद्धनने ममापि हितमित्याह यस्येति ॥ हे साध्वि यस्य राज्ञो राष्ट्रे देशे असाधुभिर्दुष्टैः सर्वाः याः काश्चिदपि प्रजाः त्रस्यन्ते पीड्यन्ते तस्य मत्तस्य स्वकर्त्तव्यशून्यस्य कीर्तिर्यशः आयुः भगो भाग्यं गतिः पुण्यलोकप्राप्तिः एते नश्यन्ति ॥१०॥ एष इति ॥ हि यस्मात् एष आर्त्तानां आर्त्तिनिग्रहो राज्ञां परः धर्मोऽतो भूतद्रुहमत एव असत्तममेनं वधिष्यामि ॥११॥ क इति॥ हे सौरभेय चतुष्पदः तव त्रीन् पादान् कोऽवृश्चत् अच्छिनत् । कृष्णानुवर्तिनां राज्ञामस्माकं राष्ट्रे देशे त्वादृशा दुःखिताः जनाः मा भूवन् ॥१२॥ आख्याहीति ॥ हे वृष साधूनाम् अकृतागसां वः भद्रं भवतु । आत्मनस्तव पादच्छेदेन वैरूप्यकर्त्तारं

मा सौरभेयाऽत्रशुचो व्येतु ते वृषलाद्भयम् ॥ मा रोदीरम्ब भद्रं ते खलानां मयि शास्तारि ॥९॥ यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यन्ते साध्व्यसाधुभिः ॥ तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः ॥ १० ॥ एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः ॥ अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ॥ ११ ॥ कोऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पदः ॥ मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनाम् ॥१२॥ आख्याहि वृष भद्रं वः साधूनामकृतागसाम् ॥ आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणम् ॥ १३ ॥ जनेऽनागस्यऽघं युञ्जन्सर्वतोऽस्य च मद्भयम् ॥ साधूनां भद्रमेव स्यादसाधुदमने कृते ॥ १४ ॥ अनागःस्विह भूतेषु य आगस्कृन्निरङ्कुशः ॥ आहर्तास्मि भुजं साक्षादमर्त्यस्यापि साङ्गदम् ॥१५॥ राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनम् ॥ शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह ॥ १६ ॥ धर्म उवाच ॥ एतद्वः पाण्डवेयानां युक्तमार्ताभयं वचः ॥ येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृतः ॥ १७ ॥

पार्थानामस्माकं कीर्त्तिं दूषयति यः तमाख्याहि ॥१३॥ जन इति ॥ योऽनागसि निरपराधे जने अघं दुःखं युञ्जन् कुर्वन् भवति अस्यैवंभूतस्य मत् मत्तः सकाशात् सर्वतः सर्वस्मिन्नेतत्काले देशे च भयं स्यात्तथा चासाधूनां दमने कृते साधूनां युष्माकं भद्रमेव स्यात् । उत्तरार्द्धं क्वचिन्नाप्युपलभ्यते ॥१४॥ अनागस्स्विति ॥ य इह लोके निरङ्कुशो निर्भयः सन् अनागःसु निरपराधेषु भूतेषु आगस्कृद्द्रोहकृत् भवति तस्य साक्षादमर्त्यस्य देवस्यापि साङ्गदम् अङ्गदसहितं मूलत एव भुजमाहर्त्तास्मि ॥ १५ ॥ राज्ञ इति ॥ अनापदि अपि उत्पथान् धर्ममार्गत्यागिनः अन्यान् असाधून् यथाशास्त्रं शासतो दण्डयतो राज्ञ इह स्वधर्मस्थानामनु निरन्तरं पालनमेव परमो धर्मः अनापदीत्युक्त्या आपदि दोषाल्पत्वमाह ॥१६॥ एतदिति ॥ पाण्डवेयानां पाण्डुवंशजानां वो युष्माकम् एतत् आर्त्तानामभयं यस्मात्तद्वचो युक्तमुचितमेव । येषां गुणगणैः कृष्णो भगवान् दौत्यादौ कर्मणि कृतः स्थापितः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केन त्वं क्लेशितोऽसीति प्रश्नस्योत्तरमाह—नेति ॥ हे पुरुषर्षभ यतो यस्मात् पुरुषात् क्लेशस्य बीजानि पादच्छेदादीनि स्युस्तं पुरुषं क्लेशकारणं वादिनां वाक्यभेदैर्नानावि-
धवाक्यैर्विमोहिता वयं न विजानीमः अयं भावः । यद्यप्ययं क्लेशदायी दृश्यते एव परं त्वयं ममैव क्लेशदो नान्यस्येति हेतोः क्लेशबीजंमप्येव किंचिदस्ति ततश्च यतः
क्लेशबीजानि स्युस्तं न विद्मः ॥ १८ ॥ वाक्यभेदानाह—केचिदिति ॥ क्लेशकारणवादिनां मध्ये केचित् विकल्पं भेदं वसते आच्छादयन्ति ये योगिनस्ते आत्मानमेवा-
त्मनः प्रभुं सुखदुःखप्रदमाहुः । यद्वा विकल्पैः कुतर्कैः प्रवृत्ता नास्तिकाः आत्मानमेव स्वतन्त्रं प्रभुमाहुः । यद्वा केचित्तार्किकाः आत्मनः सुखदुःखबीजमात्मानमेवाहुः ।
अन्ये ज्योतिर्विदो दैवं ग्रहादिकं प्रभुमाहुः । अपरे मीमांसकाः कर्मैवाहुः । अपरे लोकायतिकाः स्वभावमेवाहुः ॥ १९ ॥ अप्रतर्क्यादिति ॥ मनसा अप्रतर्क्यात् अनि-
र्देश्याद्वचनागोचरात् परमेश्वरादेव स्वतन्त्रात्कर्मणां फलदातुः सुखदुःखादिकं भवति इति अपि केषुचिद्भगवद्भक्तेषु निश्चयः केष्वपीति दुर्लभत्वम् निश्चय इति सिद्धान्तत्वं

न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ॥ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥ १८ ॥ केचिद्विकल्पवसना आहुरात्मानमात्मनः ॥
दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ॥ १९ ॥ अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः ॥ अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥ २० ॥
एवं धर्मे प्रवदति स सम्राट् द्विजसत्तम ॥ समाहितेन मनसा विखेदः पर्यचष्ट तम् ॥ २१ ॥ राजोवाच ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृष-
रूपधृक् ॥ यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ॥ २२ ॥ अथवा देवमायाया नूनं गतिरगोचरा ॥ चेतसो वचसश्चापि भूतानामिति
निश्चयः ॥ २३ ॥ तपः शौचं दया सत्यमिति पादाः प्रकीर्तिताः ॥ अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥ २४ ॥

चोक्तम् । हे राजन् अत्र विषये अनुरूपं योग्यं पक्षं स्वमनीषया विमृश विचारय ॥ २० ॥ एवमिति ॥ हे द्विजसत्तम शौनक धर्मे एवं प्रवदति सति स प्रसिद्धः
सम्राट् परीक्षित् विखेदः गतभ्रमः सन् समाहितेन सावधानेन मनसा तं धर्मं पर्यचष्ट प्रत्यभाषत ॥ २१ ॥ धर्ममिति ॥ हे धर्मज्ञ यतो निर्धारितमिव ब्रुवन् घातकं जानन्नपि
न सूचयेदित्येवंरूपं धर्ममेव त्वं ब्रवीषि अतः वृषरूपधृक् धर्मोऽसि । धृजेः क्विप् । यत् अधर्मकृतः पापकर्तुः स्थानं नरकादि भवति तत् सूचकस्य अपि भवेत् किं पुनः
साक्षादभिधायकस्य ॥ २२ ॥ अथ वेति ॥ अथवा अप्रतर्क्यादनिर्देश्यादिति त्वया सिद्धान्त उक्त एवेत्यर्थः । तदेवाह । देवस्य भगवतो मायायाः गतिः प्रवृत्तिर्नूनं ॥ ५५ ॥
भूतानां प्राणिनां चेतसो वचसश्चागोचराविषयो न भवति इति एष एव निश्चयः सिद्धान्तः ॥ २३ ॥ तप इति ॥ धर्माधिदेवस्य तव तपः शौचं दया सत्यं चेति चत्वारः
पादाः प्रकीर्तिताः तेषु च स्मयो बुद्धिविमोहः सङ्गः स्त्रीसङ्गः मदो गर्वः तैः अधर्मांशैः क्रमेण त्रिभिरंशैर्भग्नाः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमिति ॥ इदानीं कलौ हे धर्म ते पादश्चतुर्थांशः अस्ति तत्रापि सत्यमेवास्ति यतः सत्यात् भवानात्मानं निर्वर्तयेत् कथंचिद्धारयेत् । यद्वा पुरुषस्त्वां साधयेत् तमपि
पादम् अनृतेनैधितः संवर्द्धितः कलिरूपोऽयमधर्मो जिघृक्षति ग्रहीतुमिच्छति । यद्यपि सत्यमस्तीत्युक्तं तथापीयं द्वादशस्कन्धदृष्ट्या व्यवस्था बोध्या । कृतयुगे प्रथमं
संपूर्णश्चतुष्पाद्धर्मः त्रेतायां तु चतुर्णामपि पादानां मध्ये स्मयेन तपः सङ्गेन शौचं मदेन दया अनृतेन सत्यमित्येवं प्रत्येकं चतुर्थांशो हीयते । द्वापरे त्वर्द्धांशः कलौ चतु-
र्थांशोऽवशिष्यते सोप्यन्ते विनङ्क्ष्यति ॥ २५ ॥ इयमिति द्वयम् ॥ इयं च साध्वी परोपकारैकपरा गौर्भूः पृथ्वी भगवता श्रीकृष्णेन न्यासितोऽपनीतः उरुर्भरो यस्याः
सा तथा श्रीमद्भिरब्जादिशोभायुक्तैः तस्य भगवतः पदन्यासैः सर्वतः कृतं कौतुकं मङ्गलं यस्यास्तथाभूता च सती अधुना तेनोज्झिता त्यक्ता अतः अश्रूणि कलयति
मुञ्चतीति तथा सती अब्रह्मण्या ब्राह्मणभक्तिहीनाः नृपव्याजाः नृपवेषधारिणः शूद्रा मां भोक्ष्यन्ति । तङ्भाव आर्षः । इति दुर्भगा भाग्यहीनेव शोचति ॥ २६ ॥ २७ ॥

इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः ॥ तं जिघृक्षत्यऽधर्मोऽयमनृतेनैधितः कलिः ॥ २५ ॥ इयं च भूर्भगवता न्यासितोरुभरा सती ॥ श्रीम-
द्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥ २६ ॥ शोचत्यऽश्रुकला साध्वी दुर्भगेवोज्झिताऽधुना ॥ अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यन्ति मामिति ॥
॥ २७ ॥ इति धर्मं महीं चैव सान्त्वयित्वा महारथः ॥ निशातमाददे खड्गं कलयेऽधर्महेतवे ॥ २८ ॥ तं जिघांसुमभिप्रेत्य विहाय नृपलाञ्छनम् ॥
तत्पादमूलं शिरसा समगाद्भयविह्वलः ॥ २९ ॥ पतितं पादयोर्वीक्ष्य कृपया दीनवत्सलः ॥ शरण्यो नाऽवधीच्छ्लोक्य आह चेदं हसन्निव ॥ ३० ॥
राजोवाच ॥ न ते गुडाकेशयशोधराणां बद्धाञ्जलेर्वै भयमस्ति किञ्चित् ॥ न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबन्धुः ॥ ३१ ॥

इतीति ॥ महारथः परीक्षित् इत्येवं धर्मं महीं च सान्त्वयित्वा अधर्महेतवे कलये कलिं हन्तुं निशातं तीक्ष्णं खड्गमाददे गृहीतवान् ॥ २८ ॥ तमिति ॥ तं परीक्षितं
जिघांसुं हन्तुमिच्छुमभिप्रेत्य आलक्ष्य नृपलाञ्छनं किरीटादि विहाय भयेन विह्वलः सन् शिरसा तस्य पादयोर्मूलं समगात् ॥ २९ ॥ पतितमिति ॥ पादयोः पतितं कलिं
वीक्ष्य दीनवत्सलः शरण्यः आश्रयार्हः श्लोक्यः प्रशंसायोग्यः परीक्षित् कृपया नावधीत् राज्ञोऽयमभिप्रायः । वध्योऽप्ययं शरणमागतो वध्येत चेच्छरणागतवधजन्यमधर्म-
मालम्ब्य मय्येवासौ प्रवेक्ष्यति नतु मरिष्यतीति नावधीत् । हसन्निव च इदं वक्ष्यमाणमाह स्म । इवशब्देन दुष्टे तस्मिन् कोपो नापगतः परंतु शरणागतिरूपेण कवचेनैव
रक्षित इति कलेश्चातुर्यमेवोपहसति स्मेति । वीक्ष्येत्यत्र वीर इति वा पाठः ॥ ३० ॥ नेति ॥ गुडाकेशोऽर्जुनस्तस्य यशोधराणां कीर्तिवर्द्धनानामस्माकमग्रे बद्धोञ्जलिर्येन
तस्य तव किंचिदपि भयं नैवास्ति परन्तु मदीये क्षेत्रे मत्पालिते देशे कथंचनापि केनाप्यंशेन भवता न वर्तितव्यम् । यतः त्वमधर्मस्य बन्धुः अनुबन्धी असि ॥ ३१ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

त्वामिति ॥ नरदेवाः ब्राह्मणा राजानो वा तेषां देहेषु वर्तमानं त्वामनुसृत्य लोभः परधनाऽभिलाषः अनृतं चौर्यम् अनार्यं दौर्जन्यमंहः पापाचरणं ज्येष्ठा अलक्ष्मीः दारिद्र्यं माया कपटं कलहो विरोधः दंभो वञ्चनादि अयम् अधर्मस्य पूगः समुदायः प्रवृत्तः ॥३२॥ नेति ॥ हे अधर्मबन्धो यत्र यज्ञवितानविज्ञाः यज्ञानुष्ठानकोविदा जनाः यज्ञैर्यज्ञेश्वरं भगवन्तं यजन्ति तत्र धर्मेण सत्येन च वर्तितव्ये धर्मग्रहणेन सिद्धेऽपि सत्यस्य प्राधान्यात्पृथगुक्तिः । सत्येन निष्कपटेन धर्मेणेति वा । मदीये देशे ब्रह्मावर्ते सरस्वती-दृषद्वत्योर्देवनद्योरन्तर्वर्तिनि देशे त्वया न वर्तितव्यम् ॥ ३३ ॥ यस्मिन्निति ॥ यस्मिंश्च ब्रह्मावर्ते इज्या यज्ञो मूर्तिर्यस्य इज्यात्ममूर्तिरिति पाठे इज्याः पूज्या इन्द्रादयो देवा आत्मनः स्वस्य मूर्तयो यस्य स एष स्थिरजङ्गमानामात्मा तथापि अन्तर्बहिश्च व्याप्य वायुरिव स्थितः । यथा वायुः प्राणरूपेणान्तःस्थितोऽपि बहिरप्यस्ति तथा सर्वान्तर्यामीश्वरोऽपि जीववन्न परिच्छिन्नः सर्वात्मा भगवान् हरिर्विष्णुरिज्यमानः यज्ञैः संपूज्यमानो यजतां निष्कामानां शमात्मसुखं मोक्षं सकामानां तु अमोघान् उत्तमान्कामान्

त्वां वर्तमानं नरदेवदेहेष्वऽनुप्रवृत्तोऽयमधर्मपूगः ॥ लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दम्भः ॥ ३२ ॥ न वर्तितव्यं तद्-धर्मबन्धो धर्मेण सत्येन च वर्तितव्ये ॥ ब्रह्मावर्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥ ३३ ॥ यस्मिन्हरिर्भगवानिज्यमान इज्यामूर्ति-र्यजतां शं तनोति ॥ कामानमोघान्स्थिरजङ्गमानामन्तर्बहिर्वायुरिवैष आत्मा ॥ ३४॥ सूत उवाच ॥ परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ॥ तमुद्यतासिमाहेदं दण्डपाणिमिवोद्यतम् ॥ ३५ ॥ यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया ॥ लक्षये तत्र तत्रापि त्वामात्तेषुशरासनम् ॥ ३६ ॥ तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ॥ यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम् ॥ ३७ ॥ सूत उवाच ॥ अभ्यर्थितस्तदा तस्मै स्था-नानि कलये ददौ ॥ द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ॥ ३८ ॥

विषयांश्च तनोति प्रयच्छति तत्र न वर्तितव्यमित्यनुषङ्गः ॥ ३४ ॥ परीक्षितेति ॥ एवं परीक्षिता आदिष्टः जातवेपथुः स कलिः दण्डपाणिं यममिव स्ववधार्थम् उद्यतं उद्यत उच्चीकृतोऽसिः येन तम् इदं वक्ष्यमाणमाह स्म ॥३५॥ यत्रेति ॥ हे सार्वभौम सर्वस्या भूमेरीश्वर तवाज्ञया ब्रह्मावर्त्तं विहाय यत्र क्वचनापि वत्स्यामि तत्र तत्रापि आत्तो गृहीत इषुर्बाणः शरासनं धनुश्च येन तथाभूतं त्वामेव लक्षये बुद्ध्या पश्यामि ॥ ३६ ॥ तदिति ॥ तत्तस्मात् हे धर्मभृतां श्रेष्ठ तत्तवानुशासनमातिष्ठन् पालयन् यत्रैव नियतो निश्चलो निर्भयः वत्स्ये तन्मे स्थानं मे निर्देष्टुं नामग्रहणेन कथयितुं त्वमर्हसि ॥ ३७ ॥ अभ्यर्थित इति ॥ एवमभ्यर्थितः संप्रार्थितो राजा तदा तस्मै कलये यत्र चतुर्विधोऽधर्मः भवति द्यूतं पानं मद्यादेः स्त्रियः अविवाहितस्त्रीसङ्गः सूना हिंसा इति स्थानानि ददौ । यत्र द्यूतादिषु चतुर्विधः क्रमेणानृतस्मयाशौचक्रौर्यरूपः सत्यतपः-शौचदयानाशकः अधर्मः भवति । पूर्वं मदो दयानाशकत्वेनोक्तः अत्र तु गर्वद्वारा तपोनाशकत्वेन यद्यपि सर्वं सर्वत्र संभवति यथा हिंसायां सर्वः समुदित एवाधर्मश्चतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधोऽपि तिष्ठति नहि प्राणिहिंसकेषु तपः शौचं दया सत्यं वा सम्भवति तथापि प्राधान्येनानृतादीनां द्यूतादिषु यथासंख्यं ज्ञेयम् । द्वादशस्कन्धे सत्यं दया तपो दान-मित्यत्र दानशब्देन शौचमेवोक्तम् । "दैप्, शोधने" इति धातोः मनःशुद्धिरूपत्वाद्भूताभयदानस्य "अधर्मपादैरनृतं हिंसासन्तोषविग्रहैः" इत्यत्र च असंतोषशब्देन तद्धेतुर्गर्वो लक्ष्यते विग्रहशब्देन च तद्धेतुः स्त्रीसङ्ग इत्यविरोधः । वस्तुतस्तु अधर्महेतूनां कामक्रोधलोभादीनां यत्र यत्र विषये यस्य यस्य यदा यदा प्राधान्यविवक्षा तत्र तत्र तदा तदा तस्य तस्य पादत्वोक्तिर्न विरुध्यते । एवं धर्महेतुषु तपःसत्यादिष्विति ॥ ३८ ॥ पुनरिति ॥ लोकैर्दुस्त्यजं चतुर्विधस्याप्येकं स्थानं देहीति पुनर्याचमानाय कलये स प्रभुः परीक्षित् जातरूपं सुवर्णमदात् उपलक्षणतया द्रव्यमेवादात् । ततः सुवर्णदानात् अनृतं मदं कामं स्त्रीसङ्गं रजः रजोमूलां हिंसां पञ्चमं वैरं चार्थादेवादात् एषां सुवर्णोपलक्षितधनमूलकत्वात् ॥ ३९ ॥ अमूनीति ॥ अधर्मः प्रभवत्यस्मात् इति तथाभूतः कलिः तस्य परीक्षितो निदेशकृत् आज्ञानुवर्त्ती सन् औत्तरेयेण परीक्षिता दत्तानि अमूनि पूर्वो-

पुनश्च याचमानाय जातरूपमदात्प्रभुः ॥ ततोऽनृतं मदं कामं रजो वैरं च पञ्चमम् ॥ ३९ ॥ अमूनि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः ॥ औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ॥ ४० ॥ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ॥ विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥ ४१ ॥ वृषस्य नष्टांस्त्रीन्पादांस्तपः शौचं दयामिति ॥ प्रतिसंदध आश्वास्य महीं च समवर्धयत् ॥ ४२ ॥ स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम् ॥ पितामहेनोपन्यस्तं राज्ञाऽरण्यं विविक्षता ॥ ४३ ॥ आस्तेऽधुना स राजर्षिः कौरवेन्द्रः श्रियोल्लसन् ॥ गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥ ४४ ॥

क्तानि पञ्चस्थानानि सप्तम्यर्थे द्वितीया । अकर्मकधातुयोगेन देशादेः कर्मत्वं वा । न्यवसत् नितरामवसत् ॥ ४० ॥ अथेति ॥ अथ तस्माद्बुभूषुः स्वक्षेममिच्छुः पुरुषः क्वचित् कस्मिन्नपि काले देशे च वा एतानि द्यूतादीनि न सेवेत । स्त्रीसुवर्णयोरसेवनं च तत्रानासक्तिं विशेषतो धर्म एव शीलं वृत्तं यस्य सः लोकानां पतिः गुरुश्च राजा न सेवेत ॥ ४१ ॥ वृषस्येति ॥ वृषरूपस्य धर्मस्य नष्टान् तपः शौचं दयामिति त्रीन् पादान् परीक्षित् पुनः प्रतिसंदधे योजयामास । तप आदीनि प्रवर्त्तितवानित्यर्थः । तथा महीं चाश्वास्य सान्त्वयित्वा सम्यग् धर्ममार्गप्रवर्त्तनेन कृष्यादिना चावर्धयत् ॥ ४२ ॥ स इति ॥ स उक्तविधप्रभावः एष परीक्षित् एतर्हि अधुनापि अरण्यं वनं विविक्षता प्रवेष्टुमिच्छता पितामहेन राज्ञा युधिष्ठिरेण उपन्यस्तं प्रदत्तं पार्थिवस्य सार्वभौमस्योचितम् आसनं सिंहासनमध्यास्ते ॥ ४३ ॥ आस्त इति ॥ चक्रं भूमण्डलं वर्त्तयति पालयति चक्रवर्ती बृहच्छ्रवाः विपुलकीर्तिः महाभागः स राजर्षिः परीक्षित्कौरवेन्द्राणां युधिष्ठिरादीनां श्रियोल्लसन् कौरवेन्द्र इति पृथक् पदपाठे कर्त्तृविशेषणम् । गजाह्वये हस्तिनापुरेऽधुनास्ते ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमिति ॥ अयमभिमन्युसुतो नृपः परीक्षित् इत्थंभूतानुभावः यस्य क्षोणीं पृथ्वीं पालयतः सतः यूयमपि सत्राय दीक्षिताः प्रवृत्ताः अत्र प्रकरणे आस्ते पालयत इत्यादिषु वर्त्तमानसामीप्ये वर्त्तमानवन्निर्देशः स्मेत्यध्याहारो वा । सत्रमिदं बलदेवदृष्टादन्यदेव ज्ञेयम् ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्यामूं सप्तदशे व्यधात् ॥ १७ ॥ अष्टादशे पितुः कण्ठे मृतसर्पनिधानतः ॥ राज्ञे मुनिशिशोः शापोऽत्र श्लोकाः सार्द्धखेषवः ॥ त्रीण्युवाचेति पादाढ्याः षट्पञ्चाशदनुष्टुभः ॥ १८ ॥ य इति ॥ यो वै परीक्षित् मातुरुदर एव द्रौणेः ब्रह्मास्त्रेण विप्लुष्टो निर्दग्धोऽपि अद्भुतकर्मणो भगवतः कृष्णस्य अनुग्रहात् न मृतः ॥ १ ॥ ब्रह्मेति ॥ भगवत्यर्पित आशयोन्तःकरणं येन सः यस्तु राजा ब्रह्मकोपेन ब्राह्मणशापेन उत्थितात्प्रेरितात्तक्षकात् प्राणानां विप्लवो नाशः तस्मात् यत् उरु भयं तस्मान्न संमुमोह ॥२॥ उत्सृज्येति ॥ सर्वतः सर्वत्र देहपुत्रादिषु च सङ्गम् आसक्तिम् उत्सृज्य विज्ञाता अजितस्य भगवतः संस्थितिस्तत्वं येन स वैयासकेः शुकस्य शिष्यः परीक्षित् गङ्गायां स्वं कलेवरं

इत्थंभूतानुभावोऽयमभिमन्युसुतो नृपः ॥ यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः ॥ ४५ ॥ इति श्रीभागवते महापुराणे प्रथमस्कन्धे कलिनिग्रहो नाम सप्तदशोऽध्यायः ॥ १७ ॥ सूत उवाच ॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ॥ १ ॥ ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात् ॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥२॥ उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः॥ वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम् ॥ ३ ॥ नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् ॥ स्यात्संभ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम् ॥४॥ तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः ॥ यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥ ५ ॥ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम् ॥ तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः ॥६॥ नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ॥ कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत् ॥७॥

जहौ ॥ ३ ॥ नेति ॥ उत्तमश्लोकस्य भगवत एव वार्त्ता येषां तस्य उत्तमश्लोकस्यैव कथामृतं जुषतां सेवमानानां शतार्षः । तस्य पदाम्बुजं स्मरतां च अन्तकालेऽपि संभ्रमो मोहो न स्यात् ॥ ४ ॥ तावदिति ॥ एकराट् चक्रवर्ती महान् आभिमन्यवः अभिमन्युसुतो यावदुर्व्यामीशो बभूव तावदिह भारतवर्षे सर्वतः प्रविष्टोऽपि कलिर्न प्रभवेत् दम्भादिदोषं न प्रकटीकृतवान्। लङो लिङर्थः ॥५॥ यस्मिन्निति ॥ यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे भगवान् श्रीकृष्णो गां भूमिम् उत्ससर्ज तत्याज तदा तस्मिन्नेवाहनि क्षणे च अधर्मस्य प्रभवो यस्मिन्सोऽसौ कलिरिह भूमावनुवृत्तः प्रविष्टः ॥६॥ ननु कलिं सर्वथा किन्न हतवानित्याशङ्क्याह—नेति॥ सारङ्ग इव भ्रमर इव सारभुक् सारग्राही सम्राट् सार्वभौमः परीक्षित् कलिं नानुद्वेष्टि स्म । सारमाह। यत् यस्मिन् कलौ कृतानि कुशलानि पुण्यकर्माणि आशु सिद्ध्यन्ति शीघ्रं फलन्ति इतराणि पापानि तु शीघ्रं न सिद्ध्यन्ति इतरयुगेषु नायं गुणः । यद्वा कुशलानि अकृतान्यपि आशु संकल्पमात्रेण सिद्ध्यन्ति।इतराणि पापानि आशु न सिद्ध्यन्ति किन्तु कृतान्येव सिद्ध्यन्ति नतु संकल्पमात्रेण॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमिति ॥ बालेष्वविवेकिषु शूरेण धीरेण विवेकिषु भीरुणा कलिना किं नु अनिष्टं स्यान्न किमपि । यः कलिः प्रमत्तेष्वेव नृषु अप्रमत्तः सावधानः सन् मेषीषु वृक इव वर्त्तते ॥ ८ ॥ उपवर्णितमिति ॥ यद्यूयं मामपृच्छत पृष्टवन्तः तदेतत्पारीक्षितं परीक्षित्संबन्धि पुण्यं वदतां शृण्वतां च वासुदेवकथोपेतमाख्यानं मया वो युष्माकमुपवर्णितम् ॥ ९ ॥ या इति ॥ कथनीयानि उरूणि कर्माणि यस्य तस्य भगवतो गुणा वात्सल्यादयः कर्माणि सृष्ट्यादीनि च आश्रयो यासां तया याः कथाः सन्ति ताः बुभूषुभिः क्षेममिच्छद्भिः पुम्भिः संसेव्याः ॥१०॥ सूतेति ॥ हे सूत हे सौम्य त्वं शाश्वतीः समाः अनन्तान्संवत्सरान् जीव । अत्यन्तसंयोगे द्वितीया । यस्त्वं नोऽस्माकं मर्त्यानां मरणधर्माणाम् अमृतम् मरणनिवर्त्तकं विशदं कृष्णस्य यशः शंससि कथयसि ॥११॥ कर्मणीति ॥ अनाश्वासे वैगुण्यबाहुल्येन अनिश्चितफलेऽस्मिन् सत्राख्ये कर्मणि संलग्नानामत एव धूमेन धूम्रा विवर्णा आत्मानो येषां तेषामस्माकं कर्मणि शेषे षष्ठी । भवान् गोविन्दस्य पादपद्मयोरासवं मकरन्दमासवमिव दुःखविस्मारकं मधु मधु इव

किं नु बालेषु शूरेण कलिना धीरभीरुणा ॥ अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥ ८॥ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ॥ वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥ ९ ॥ या याः कथा भगवतः कथनीयोरुकर्मणः ॥ गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः ॥ १० ॥ ऋषय ऊचुः ॥ सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ॥ यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥ ११ ॥ कर्मण्यऽस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ॥ आपाययति गोविन्दपादपद्मासवं मधु ॥१२॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ॥ भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥१३॥ को नाम तृप्येद्रसवित्कथायां महत्तमैकान्तपरायणस्य ॥ नाऽन्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥१४॥

स्वादु यशः आपाययति श्रावयति ॥ १२ ॥ तुलयाम इति ॥ भगवत्सङ्गिनां यः सङ्गस्तस्य यो लवः स्वल्पः कालस्तेनापि स्वर्गं कर्मफलमपुनर्भवं मोक्षं ज्ञानफलं च वयं न तुलयाम समं न पश्याम संभावनायां लोट् । तत्संभावनामपि न कुर्मः । मर्त्यानां मनुष्याणाम् आशिषो राज्याद्याः न तुलयामेति किमुत वक्तव्यम् । तत्र भक्तेः साधनस्यापि साधुसङ्गस्य लवेनापि कर्मज्ञानादेः संपूर्णमपि फलं न तुलयाम किमुत बहुकालव्यापिना साधुसङ्गेन किमुततरां तत्फलभूतया भक्त्या किमुततमां भक्तिफलेन प्रेम्णा इति कैमुत्यातिशयो द्योत्यः । अत्र न तथास्य भवेत् क्लेश इत्यादिना यथा योषित्सङ्गादपि तत्सङ्गिसङ्गो निन्द्यस्तथा भगवत्सङ्गादपि भगवत्सङ्गिसङ्गः प्रशस्य इत्याशयः ॥ १३ ॥ क इति ॥ महत्तमानां परमविवेकिनामेकान्तेनाव्यभिचारेण परमुत्कृष्टमयनमाश्रयो यस्तस्य भगवतः कथायां रसवित् रसज्ञः को नाम तृप्येत् न कोऽपीत्यर्थः । भवः शिवः पाद्मो ब्रह्मा च मुख्यौ येषां ते ये योगेश्वराः तेऽपि अगुणस्य प्राकृतगुणरहितस्य हरेः कल्याणगुणानामन्तं न जग्मुः एतावन्त इति परिगणयितुं न शेकुः ॥१४॥

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ तत् तस्मात् हे विद्वन् नोऽस्माकं मध्ये भगवानेव प्रधानं यस्य सः भवान् महत्तमैकान्तपरायणस्य हरेः उदारं श्रेष्ठं विशुद्धम् आचरितं शुश्रूषतां श्रोतुमिच्छताम् आर्षः शता। नोऽस्माकं वितनोतु विस्तरतः कथयतु ॥ १५ ॥ स इति ॥ वै प्रसिद्धः महाभागवतः अदभ्रा अनल्पा बुद्धिर्यस्य सः परीक्षित् येन वैयासकिशब्दितेन शुकोपदिष्टेन ज्ञानेन ज्ञानसाधनेनाख्यानेन अपवर्गो मोक्ष इत्याख्या यस्य तत् खगेन्द्रध्वजो गरुडध्वजो भगवांस्तस्य पादमूलं भेजे प्राप। अत्र भगवद्भक्तानां भगवत्पदप्राप्तिरेवापवर्गशब्द-वाच्या इत्याशयः॥ १६ ॥ तदिति ॥ परं पुण्यं पुण्यावहम् अत्यद्भुतयोगे ज्ञानयोगे निष्ठा परिसमाप्तिर्यस्य तत् असंवृतः स्पष्टोऽर्थो यस्य तत् अनन्तस्य भगवत आचरितेनो-पपन्नं संयुक्तं भागवतानामभिराममानन्दकरं पारीक्षितं परीक्षिते कथितम् आख्यानं श्रीभागवतन्नोऽस्मभ्यमाख्याहि एतैर्विशेषणैः कर्मज्ञानभक्तियोगप्रकाशकत्वं दर्शितम्॥ १७॥ अहो इति ॥ अहो अस्मद्भाग्यं वयं विलोमजाताः ब्राह्मण्यां क्षत्रियाज्जाताः वर्णसङ्करा अपि वृद्धानां शुकादीनाम् अनुवृत्त्या सेवया अद्याधुना जन्मभृतः सफलजन्मानः

तन्नो भवान्वै भगवत्प्रधानो महत्तमैकान्तपरायणस्य ॥ हरेरुदाराचरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ॥ १५ ॥ स वै महाभागवतः परीक्षिद्येनाऽपवर्गाख्यमदभ्रबुद्धिः ॥ ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम् ॥ १६ ॥ तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठम् ॥ आख्याह्यनन्ताचरितोपपन्नं पारीक्षितं भागवताभिरामम् ॥ १७ ॥ सूत उवाच ॥ अहो वयं जन्मभृतोऽद्य ह्यास्म वृद्धानुवृत्त्याऽपि विलोमजाताः ॥ दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥ १८ ॥ कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य ॥ योऽनन्तशक्तिर्भगवाननन्तो महद्गुणत्वाद्यमनन्तमाहुः ॥ १९ ॥ एतावताऽलं ननु सूचितेन गुणैरसाम्यानतिशायनस्य ॥ हित्वेतरान्प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः ॥ २० ॥

आस्म जाताः। हेति हर्षे महत्तमानां त्वादृशानामभिधानयोगः लौकिकोऽपि संभाषणसंबन्धः दौष्कुल्यं दुष्कुलत्वम् आधिं तन्निमित्तां मनःपीडां च शीघ्रं विधुनोत्यपनयति १८॥ कुत इति ॥ योऽसौ भगवान् अनन्तशक्तिः यश्च स्वयमप्यनन्तः महान्तो गुणा यस्य तस्य भावो महद्गुणत्वं तस्मात् आत्याभाव आर्षः यं गुणतोप्यनन्तमाहुः तस्य महत्तमै-कान्तपरायणस्य नाम गृणतः कीर्त्तयतः पुंसः कुतः पुनर्दौष्कुल्याधीः। यद्वा गृणतः पुंसः नामकर्तृदौष्कुल्यमाधिं च धुनोतीति कुतः पुनर्वक्तव्यम् ॥१९॥ एतावतेति ॥ गुणैर्न विद्यते साम्यं यस्य न विद्यतेऽतिशायनमतिशयश्च यस्मात् गुणैस्तत्साम्यं तदाधिक्यं चान्यस्य नास्तीति तस्य पूर्णगुणस्य भगवतः सूचितेन दिङ्मात्रप्रदर्शितेनैतावता महिम्नालं पर्याप्तं कस्तद्विस्तरतो वक्तुं शक्नोति तदेवाह। विभूतिर्लक्ष्मीः प्रार्थयतोऽपि इतरान् ब्रह्मादीन् हित्वा विहायानभीप्सोरकामयमानस्यापि यस्याङ्घ्रिरेणुं जुषते सेवते ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ यतो विरिञ्चेन ब्रह्मणोपहृतं समर्पितमर्हणाम्भोऽर्घ्यजलं गङ्गात्मकं यस्य मुकुन्दस्य पादनखावसृष्टमर्वाक् प्रसृतं सत् ईशेन शिवेन सहितं जगत्पुनाति । एतेन विरिञ्चेशयोरपि सेवकत्वमुक्तम् । अथ तस्मादपि हेतोर्मुकुन्दाद् वासुदेवादन्यतमोऽन्यो लोके भगवत्पदस्यार्थो वाच्यः को नाम अतो मुकुन्द एव भगवत्पदस्यार्थः मुकुन्द एव सर्वेश्वर इत्यर्थः ॥ २१ ॥ यत्रेति ॥ सहसैव भाग्योदयेन यत्र यस्मिन्ननुरक्ताः धीराः जितेन्द्रियाः सन्तो देहादिषु चोढं रूढमूलं सङ्गमासक्तिं व्यपोह्य त्यक्त्वा तत्प्रापकमन्त्यं परमकाष्ठापन्नं पारमहंस्यमाश्रमं व्रजन्ति । यस्मिन् आश्रमे अहिंसा उपशमश्च स्वः स्वाभाविको धर्मः ॥ २२ ॥ अहमिति ॥ हे अर्यमणः सूर्यतुल्याः त्रयीमूर्त्तयः भवद्भिः पृष्टोप्यहमत्र भगवन्महिम्नि आत्मनो मम बुद्धेः अवगमः प्रसरः यावानस्ति तावन्तं महिमानमाचक्षे वर्णयामि । यथा पतत्रिणो गरुडादयः आत्मसमं स्वशक्त्यनुरूपमेव नभः पतन्ति । उद्गच्छन्ति न तदन्तं लभन्ते तथा विपश्चितो ज्ञानिनोऽपि समं स्वबुद्धिशक्त्यनुरूपमेव विष्णुगतिं भगवन्महिमानं पतन्ति विषयीकुर्वन्ति वर्णयन्ति च न तु तदन्तं ल-

अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः ॥ सेशं पुनात्यऽन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थः ॥ २१ ॥ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु सङ्गमूढम् ॥ व्रजन्ति तत्पारमहंस्यमन्त्यं यस्मिन्नहिंसोपशमः स्वधर्मः ॥ २२ ॥ अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् ॥ नभः पतन्त्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः ॥ २३ ॥ एकदा धनुरुद्यम्य विचरन्मृगयां वने ॥ मृगाननुगतः श्रान्तः क्षुधितस्तृषितो भृशम् ॥ २४ ॥ जलाशयमचक्षाणः प्रविवेश तमाश्रमम् ॥ ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥ २५ ॥ प्रतिरुद्धेन्द्रियप्राणमनोबुद्धिमुपारतम् ॥ स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥ २६ ॥ विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च ॥ विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥ २७ ॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः ॥ अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥२८॥

भन्ते ॥ २३ ॥ एकदेति ॥ एकदा परीक्षित् धनुरुद्यम्य वने मृगयां विचरन् मृगाननुगतः भृशमत्यन्तं श्रान्तः क्षुधितश्च तृषितश्च जातः ॥ २४ ॥ जलाशयमिति ॥ क्वचिदपि जलाशयमचक्षाणः अपश्यंस्तं प्रसिद्धं शमीकाश्रमं प्रविवेश । तत्र आसीनं बद्धासनं शान्तं रागादिरहितं मीलिते लोचने येन तं मुनिं शमीकं ददर्श ॥२५॥ प्रतिरुद्धेति द्वयम् ॥ प्रतिरुद्धानि प्रत्याहृतानि इन्द्रियाणि प्राणाः मनः बुद्धिश्च येन तम् उपारतं बाह्यव्यापारादुपरतं स्थानत्रयाज्जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयात्परं तुरीयं समाधिं प्राप्तम् अतो ब्रह्मवित्त्वात् "ब्रह्मविद् ब्रह्मैव भवति" इति श्रुतेर्ब्रह्मभूतम् अविक्रियं विकाररहितं विप्रकीर्णाभिर्विक्षिप्ताभिः जटाभिराच्छन्नमावृतं रौरवेण रुरोर्मृगस्य संबन्धिना अजिनेन चर्मणा आच्छन्नं ददर्श । तथाभूतं मुनिं विशुष्यत्तालु यस्य सः परीक्षित् उदकं जलमयाचत ॥ २६॥ २७॥ अलब्धेति ॥ न लब्धं तृणं तृणासनं भूमिरुपवेशनस्थानमादिना आस्तरणादि च येन न संप्राप्तः अर्घः पूजा सूनृतं मधुरवचनं च येन सः राजा आत्मानम् अवज्ञातमनादृतमिव मन्यमानः ममातिथ्यमनेन किमपि न कृतमिति चुकोप ह

CC-0. In Public Domain. Digitization by eGangotri

॥ २८ ॥ अभूतेति ॥ हे ब्रह्मन् शौनक क्षुत्तृड्भ्यामर्दितः पीडितः आत्मा यस्य तस्य राज्ञः ब्राह्मणं मुनिं शमीकं प्रति सहसा झटिति पूर्वं कदापि यो न भूतः अभूतपूर्वः एवंभूतो मन्युः क्रोधो मत्सरः तदुत्कर्षासहनं च अभूत् ॥ २९ ॥ स इति ॥ सतु राजा ततो विनिर्गच्छन् रुषा धनुषः कोट्यग्रेण तस्य ब्रह्मऋषेरंसे स्कन्धे गतासुं मृतमुरगं सर्पं निधाय भो ब्रह्मन् यथाहमतिथिस्त्वया साधु सत्कृतस्तथा त्वामहमप्यनया मालया सत्करोमीति वदन्निति भावः । स्वपुरम् आगमत् ॥ ३० ॥ पुरागमनसमये राजा विमृशति—एष इति ॥ किमेष मुनिः निभृताशेषकरणः नियमितसकलेन्द्रियः सन् मीलितेक्षणो मुद्रितनयनो यथार्थसमाधिः अहोस्विदागतैः क्षत्रबन्धुभिरस्माकं किं नु प्रयोजनं स्यादिति बुद्ध्या मृषा वृथैव समाधिर्यस्य तथाभूत एवमास्ते अत्रायं राज्ञो महात्मनोऽपि बुद्धिविप्लवे तं शीघ्रं स्वपार्श्वे नेतुं विप्रशापद्वारा विरक्तं विधाय शुकेन संमेल्य श्रीभागवतरूपेण स्वयमाविर्भूय कलौ जनिष्यमाणानपि कांश्चिद्भक्तान् स्वलीलां श्रावयितुं हरेरेवायं मनोरथः ॥ ३१ ॥ तस्येति ॥ तस्य मुनेः बालकोऽप्यतितेजस्वी शृङ्गिनामा

अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ॥ ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ॥ २९ ॥ स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा ॥ विनिर्ग-
च्छन्धनुष्कोट्या निधाय पुरमागमत् ॥ ३० ॥ एष किं निभृताशेषकरणो मीलितेक्षणः ॥ मृषासमाधिराहोस्वित्किं नु स्यात्क्षत्रबन्धुभिः ॥३१॥
तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः ॥ राज्ञाऽघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥ ३२ ॥ अहो अधर्मः पालानां पीव्नां बलिभुजा-
मिव ॥ स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ॥ ३३ ॥ ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः ॥ स कथं तद्गृहे द्वाःस्थः सभाण्डं
भोक्तुमर्हति ॥ ३४ ॥ कृष्णे गते भगवति शास्तर्युत्पथगामिनाम् ॥ तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ॥ ३५ ॥ इत्युक्त्वा रोषताम्राक्षो
वयस्यानृषिबालकान् ॥ कौशिक्याऽप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३६ ॥

पुत्रः अर्भकैः सह विहरन् तातं पितरं राज्ञा अघं सर्पनिधानेन दुःखं प्रापितं श्रुत्वा तत्र बालानां मध्य एवेदं वक्ष्यमाणमब्रवीत् ॥ ३२ ॥ अहो इति ॥ पीव्नां पुष्टानां पालानां राज्ञामहो अधर्मः स्वामिनि ब्राह्मणे यद्दासानां क्षत्रियाणामघम् अपराधाचरणं तद्बलिभुजां काकानामिव द्वारपानां शुनामिव चेति॥३३॥ दासत्वं दर्शयन् दृष्टान्तं विवृणोति—ब्राह्मणैरिति ॥ क्षत्रबन्धुर्हि ब्राह्मणैः श्वेव द्वारपालत्वेन निरूपितः स्वरक्षार्थमेव राज्येऽभिषिक्त इत्यर्थः । स क्षत्रबन्धुर्द्वाःस्थः द्वारि स्थातुं योग्यः सन् उच्छिष्टभोजनयोग्यः तेषां ब्राह्मणानां गृहे सभाण्डं पात्रे एव स्थितं वस्तु कथं भोक्तुमर्हति । तेन राज्ञा मुनीनां सहसाश्रमप्रवेशे तत्र जलादिप्रार्थने च का योग्यतेतिभावः॥३४॥कृष्ण इति ॥ उत्पथगामिनां शास्तरि दण्डयितरि श्रीकृष्णे स्वलोकं प्रति गते सति तत् तदनन्तरं भिन्नसेतून् मर्यादाभेदकर्तॄन् अद्याहं शास्मि दण्डयामि मे बलं पश्यत ॥ ३५ ॥ इतीति ॥ वयस्यान् ऋषिबालकान्प्रतीत्येवमुक्त्वा रोषेण ताम्रे रक्ते अक्षिणी यस्य स ऋषिबालकः कौशिक्याः नद्या अपः संधिरार्षः।उपस्पृश्य आचम्य वाग्वज्रं शापं विससर्ज ॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं सर्पनिधानेन लङ्घिता मर्यादा येन तं मे मम ततद्रुहं पितृद्रुहं कुलाङ्गारं स्वकुलनाशकं शापयोग्यं राजानं मे मया चोदितस्तक्षकः इतः सप्तमेऽहनि दङ्क्ष्यति दंशेन हनिष्यति । मत्पितुर्गले मृतः सर्पो निक्षिप्तोऽतो जीवन्नेव सर्पो दङ्क्ष्यतीति भावः । धक्ष्यतीति पाठे भस्मीकरिष्यति । स्मेति पादपूरणे । ततेति छान्दसम् ॥ ३७ ॥ तत इति ॥ ततः शापं दत्वा पितुराश्रममभ्येत्यागत्य गले कण्ठे सर्पो यस्य तत् कलेवरं यस्य तं "समासे अमूर्द्धे०" इति सप्तम्या अलुक् । स्वपितरं वीक्ष्य दुःखार्त्तः बालो मुक्तकण्ठः उच्चैः स्वरयुक्तो रुरोद ॥ ३८ ॥ स वा इति द्वयम् ॥ ततश्च हे ब्रह्मन् स वै आङ्गिरसः अङ्गिरोगोत्रोत्पन्नः शमीकः स्वसुतस्य विलापनं रोदनं श्रुत्वा शनकैर्नेत्रे उन्मील्य स्वांसे मृतमुरगं दृष्ट्वा तं विसृज्य प्रक्षिप्य पुत्रं पप्रच्छ हे वत्स कस्मात् रोदिषि केन वा ते तव प्रतिकृतम् अपकारः कृतः इत्युक्तः स बालकः सर्वं वृत्तं न्यवेदयत् कथयामास ॥ ३९ ॥ ४० ॥ निशम्येति ॥ अतदर्हं शापानर्हं नरेन्द्रं शप्तं निशम्य स ब्राह्मणः शमीक आत्मजं पुत्रं शृङ्गिनामानं नाभ्यनन्दत् किंतु निन्दितवान् । अहो बत हे

इति लङ्घितमर्यादं तक्षकः सप्तमेऽहनि ॥ दङ्क्ष्यति स्म कुलाङ्गारं चोदितो मे ततद्रुहम् ॥ ३७ ॥ ततोऽभ्येत्याऽऽश्रमं बालो गलेसर्पकलेवरम् ॥ पितरं वीक्ष्य दुःखार्तो मुक्तकण्ठो रुरोद ह ॥ ३८ ॥ स वा आङ्गिरसो ब्रह्मञ्छ्रुत्वा सुतविलापनम् ॥ उन्मील्य शनकैर्नेत्रे दृष्ट्वा स्वांसे मृतोरगम् ॥ ३९ ॥ विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि ॥ केन वा ते प्रतिकृतमित्युक्तः स न्यवेदयत् ॥ ४० ॥ निशम्य शप्तमतदर्हं नरेन्द्रं स ब्राह्मणो नाऽऽत्मजमभ्यनन्दत् ॥ अहो बतांहो महदद्य ते कृतं स्वल्पीयसि द्रोह उरुर्दमो धृतः ॥ ४१ ॥ न वै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यविपक्वबुद्धे ॥ यत्तेजसा दुर्विषहेण गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः ॥ ४२ ॥ अलक्ष्यमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ॥ तदा हि चौरप्रचुरो विनङ्क्ष्यत्यरक्षमाणोऽविवरूथवत्क्षणात् ॥ ४३ ॥ तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुम्पकात् ॥ परस्परं घ्नन्ति शपन्ति वृञ्जते पशून्स्त्रियोऽर्थान्पुरुदस्यवो जनाः ॥ ४४ ॥

अद्य ते त्वया महदंहः पापं कृतम् अल्पीयसि अतितुच्छे द्रोहेऽपकारे उरुर्महान् दमो दण्डः धृतः कृतः ॥ ४१ ॥ नेति ॥ हे अविपक्वबुद्धे नृभिः साधारणनरैः परो विष्णुरित्याख्या यस्य तं नरदेवं राजानं संमातुं समं द्रष्टुमेव नार्हसि । यस्य दुर्विषहेण चोरादिदुष्टैः सोढुमशक्येन तेजसा गुप्ताः सुरक्षिता न कुतश्चित् भयं यासां ताः प्रजाः भद्राणि सुखानि विन्दन्ति लभन्ते ॥ ४२ ॥ अलक्ष्यमाण इति ॥ अङ्ग हे बालक यदा राज्ञो मरणं स्यात् तदा नरदेवनाम्नि रथाङ्गपाणौ विष्णावलक्ष्यमाणे सत्ययं लोकोऽरक्ष्यमाणः अत एव चौरप्रचुरः अविवरूथवत् यथा अरक्षितो मेषसङ्घो वृकादिभ्यः आशु विनश्यति तथा क्षणात् विनङ्क्ष्यति ॥ ४३ ॥ तदिति ॥ नष्टो नाथो रक्षको यस्य तस्य लोकस्य वसोर्वसुनो धनस्य पुंस्त्वमार्षम् । विलुम्पकादपहर्तुश्चौराद्धेतोर्यत्पापं भविष्यति तत् अनन्वयमस्मत्संबन्धशून्यमपि अस्मत्कृतशापनिमित्तत्वान्नोऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मान् अद्य शीघ्रमेव उपैति उपैष्यति । यतः पुरवो बहुला दस्यवो येषु ते जनाः परस्परं घ्नन्ति शपन्ति परुषं वदन्ति । पशून् स्त्रियोऽर्थांश्च वृञ्जते अपहरान्ति च । " वृजि, वर्जने " अदादिः अत्रापहारे वृत्तिः ॥ ४४ ॥ तदेति ॥ तदा रक्षकाभावकाले वर्णाश्रमाचारयुतः त्रयीमयः वेदप्रतिपादितो नृणामार्यधर्मः सन् मार्गश्च विलीयते विनङ्क्ष्यति ततश्च धर्मविनाशात् अर्थकामयोरभिनिवेशित आत्मा मनो येषां तेषां शुनामिव कपीनामिव च वर्णानां संकरो भविष्यति ॥ ४५ ॥ राजमात्रं शापानर्हमुक्त्वा परीक्षिति विशेषमाह—धर्मपाल इति सार्द्धम् ॥ अतः सः धर्मपालः सम्राट् बृहच्छ्रवाः विपुलकीर्तिः साक्षात् निष्कपटः महाभागवतो राजर्षिः राजसु ऋषितुल्यः हयमेधेन यजतीति हयमेधयाट् ण्विश्छान्दसः । दीनः स्वागतप्रश्नाद्यभावेन तिरस्कृतः क्षुत्तृट्श्रमयुतो नरपतिः अस्मच्छापं नैव अर्हति ॥ ४६ ॥ परीक्षित् कर्मकानादरणपापप्रायश्चित्ताय भगवन्तं प्रार्थयते—अपापेष्विति ॥ अपापेषु निरपराधेषु स्वभृत्येषु अपक्वबुद्धिना बालेन यच्छापदानलक्षणं पापं कृतं तत् सर्वात्मा भगवान् क्षन्तुमर्हति पापं निवर्तयितुमर्हति ॥ ४७ ॥ यदि राजा प्रतिशपेत्तदा निष्कृतिः स्यादपि साप्यत्र नास्तीत्याह—तिरस्कृता इति ॥ तिरस्कृताः परिभूताः विप्रलब्धाः प्रतारिताः शप्ताः क्षिप्ताः निन्दिता हतास्ताडिता अपि तस्य भगवतो भक्ताः प्रतिकर्तुं प्रभवोऽपि समर्था अपि अस्य तिरस्कारादिकर्तुं तत् तिरस्कारादिकं न प्रतिकुर्वन्ति ॥ ४८ ॥ इतीति ॥ सः शमीकः महामुनिः एवं पुत्रकृतेन अघेनापराधेनानुतप्तः स्वयं च राज्ञा सर्पप्रक्षेपेण विप्रकृतोऽपि तस्याघं नैवाचिन्तयत् ॥ ४९ ॥ प्रायश इति ॥ ये लोके साधवस्ते परैः शत्रुमित्रादिभिः द्वन्द्वेषु सुखदुःखादिषु योजिता अपि न व्यथन्ति तङ्भाव आर्षः । न हृष्यन्ति यतस्तेषामात्मान्तःकरणं क्षमासन्तोषादिगुणानामाश्रयः । यद्वा अगुणाश्रयः गुणकार्यरागद्वेषादीनामनाश्रयः । यद्वा यतः आत्मा गुणानां सुखदुःखादीनामाश्रयो न भवति ॥ ५० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमस्कन्धस्याष्टादशे व्यधात् ॥ १८ ॥

तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ॥ ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः ॥ ४५ ॥ धर्मपालो नरपतिः स तु सम्राट बृहच्छ्रवाः ॥ साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् ॥ क्षुत्तृट्श्रमयुतो दीनो नैवाऽस्मच्छापमर्हति ॥ ४६ ॥ अपापेषु स्वभृत्येषु बालेनाऽपक्वबुद्धिना ॥ पापं कृतं तद्भगवन्सर्वात्मा क्षन्तुमर्हति ॥ ४७ ॥ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि ॥ नास्य तत्प्रतिकुर्वन्ति तद्भक्ताः प्रभवोऽपि हि ॥ ४८ ॥ इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः ॥ स्वयं विप्रकृतो राज्ञा नैवाऽघं तदचिन्तयत् ॥ ४९ ॥ प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः ॥ न व्यथन्ति न हृष्यन्ति यत आत्माऽगुणाश्रयः ॥ ५० ॥

इति श्रीभागवते महापुराणे प्रथमस्कन्धे विप्रशापोपलम्भनं नामाऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उनविंशे तु गङ्गायां राज्ञः प्रायोपवेशनम् ॥ श्रीशुकस्यागमश्चात्र श्लोका दृष्टाः खर्वांर्द्धयः ॥ उवाचत्रितयं साङ्घ्रिर्द्विपश्चाशदनुष्टुभः ॥ १९ ॥ महीपतिरिति ॥ अथ स्वगृहागमनसमय एव महीपतिः परीक्षिदात्मकृतं तन्मुनिस्कन्धे सर्पनिधानरूपं गर्ह्यं निन्द्यं कर्म विचन्तयन् सुदुर्मनाः अतिखिन्नमना अभूत् । अहो मया अनार्यवत् मूर्खवत् निरागसि निरपराधे गूढमनभिव्यक्तं तेजः सामर्थ्यं यस्य तस्मिन् ब्रह्मणि ब्राह्मणे विषये नीचं पापं कृतम् अमीवमिति पाठेऽप्ययमेवार्थः ॥ १ ॥ ध्रुवमिति ॥ ततः कृतात् देवस्य भगवतो हेलनादवज्ञारूपात् मे मम नातिदीर्घात् शीघ्रमेव दुरत्ययमतिवर्त्तितुमशक्यं व्यसनं दुःखं ध्रुवं निश्चितमेव भविष्यति तद् व्यसनं तु मेऽघस्य निष्कृताय पापविनाशाय कामम् असंकोचेनाऽद्धा साक्षादेवास्तु नतु पुत्रादिद्वारेणेति । यद्वा कृतदेवहेलनात् मे व्यसनं ध्रुवमेव भविष्यति तत्तु नातिदीर्घात्कालात् शीघ्रमेवास्तु तत्राप्यद्धा साक्षादेवास्तु यथा पुनरेवंविधं पापमहं न कुर्यामेव ॥ २ ॥ अद्येति ॥ प्रकोपितं कोपं प्रापितं यद् ब्रह्मकुलं तदेवानलोऽद्यैव मे राज्यं बलं च सैन्यमृद्धं प्रभूतधनं

सूत उवाच ॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्नात्मकृतं सुदुर्मनाः ॥ अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि-
॥ १ ॥ ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्यसनं नातिदीर्घात् ॥ तदस्तु कामं त्वघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥ २ ॥
अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ॥ दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः ॥३॥ स चिन्तयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ॥ स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणम् ॥ ४ ॥ अथो विहायेममसुं च लोकं विमर्शितौ हेयतया पुरस्तात् ॥ कृष्णाङ्घ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्याम् ॥ ५ ॥ या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री ॥ पुनाति लोकानुभयत्र सेशान्कस्तां न सेवेत मरिष्यमाणः ॥ ६ ॥

कोशं च दहतु । ततश्च अभद्रस्य दुष्टस्य मे पुनर्द्विजेभ्यो देवेभ्यो गोभ्यश्चैवंविधा पापीयसी अपचिकीर्षायुक्ता धीर्न अभूत् न भवेदिति लिङर्थे लुङार्षः ॥ ३ ॥ स इति ॥ स राजा इत्थं चिन्तयन्नथानन्तरमेव यथा येन प्रकारेण सप्तमेऽहनि तक्षकाख्यो निर्ऋतिर्मृत्युः मुनेः सुतेनोक्तः तथा शमीकप्रेषितशिष्यादशृणोत् श्रुत्वाऽपि शापमोक्षाय अनुनयमपि नाकरोत् किन्तु स राजा तक्षकस्य विषानलं साधु मेने । यतो विषयेषु प्रसक्तस्य नचिरेण शीघ्रमेव विरक्तिकारणमिति ॥ ४ ॥ अथो इति ॥ अथो तच्छ्रवणानन्तरमेव पुरस्ताच्छापात्पूर्वमेव राज्यावस्थायामेव हेयतया विमर्शितौ विचारेण निश्चितौ अमुम् इमं च लोकं विहाय तत्र सुखस्पृहां त्यक्त्वा कृष्णस्यांघ्र्योः सेवामेव अधि लोकद्वयादधिकां मन्यमानः सन् प्रायमनशनं यथा भवति तथा तत्संकल्पेनामर्त्यनद्यां गङ्गायां तत्तीरे उपाविशत् ॥ ५ ॥ या वै इति ॥ या वै स्फुटं लसन्ती श्रीर्यस्यास्तया तुलस्या विमिश्राः ये कृष्णाङ्घ्रिरेणवस्तैरभ्यधिकं सर्वोत्कृष्टं यदम्बु तस्य नेत्री तद्वाहिनी या गङ्गा सेशान् ईशैर्लोकपालादिभिः सहितान् लोकान् जनानुभयत्र

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

ऊर्द्ध्वार्धः अन्तर्बहिश्च पुनाति तां मरिष्यमाणः आसन्नमरणः आर्षः शानच् । को वा न सेवेत मरणकालस्यानिश्चितत्वात्सर्वोऽपि लोकः मरिष्यमाण एव अतः सा सर्वदा सेव्या ॥ ६ ॥ इतीति ॥ स पाण्डवेयः परीक्षित् इति हेतोर्विष्णुपद्यां गङ्गायां प्रायोपवेशं प्रतिव्यवच्छिद्य निश्चित्य मुक्तः समस्तेषु देहादिषु सङ्गो येन सः मुनीनां व्रतं नियमो यस्य सः उपशान्तः न विद्यतेऽन्यस्मिन्भावो भावना यस्य स मुकुन्दस्याङ्घ्रिं दध्यौ ॥ ७ ॥ तत्रेति ॥ तत्र गङ्गातीरे राज्ञ उपकारार्थं नतु तीर्थस्नानार्थं कृतार्थत्वात् भुवनं पुनानाः महानुभावाः सशिष्याः मुनयः उपजग्मुरागताः प्रायेण सन्तस्तीर्थाभिगमापदेशैस्तीर्थयात्राव्याजैः स्वयमेव तीर्थानि लोकमलमलिनानि पुनन्ति शोधयन्ति न तेषांकश्चित्स्वार्थः ॥ ८ ॥ अत्रिरिति त्रयम् ॥ अत्रिः वसिष्ठः इत्याद्याः आगताः तत्र गाधिसुतः विश्वामित्रः रामः परशुरामः कुम्भयोनिः अगस्त्यः अरुणादयश्चर्षयः काण्ड-

इति व्यवच्छिद्य स पाण्डवेयः प्रायोपवेशं प्रति विष्णुपद्याम् ॥ दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसङ्गः ॥ ७ ॥ तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ॥ प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥ ८ ॥ अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च ॥ पराशरो गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ ॥९॥ मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः ॥ मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च ॥१०॥ अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च ॥ नानार्षेयप्रवरान्समेतानभ्यर्च्य राजा शिरसा ववन्दे ॥११॥ सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् ॥ विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥ १२ ॥ परीक्षिदुवाच ॥ अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः ॥ राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यकर्म ॥ १३ ॥

र्षित्वविशेषेण पृथङ्निर्दिष्टाः नाना यान्यार्षेयाणि ऋषीणां गोत्राणि तेषु ये प्रवराः श्रेष्ठाः तान् समेतान् प्राप्तान् राजाभ्यर्च्य शिरसा भुवं स्पृशन् ववन्दे ॥ ९ ॥ १० ॥ ११ ॥ सुखेति ॥ अथ तेषु सुखं यथा तथोपविष्टेषु सत्सु भूयोऽपि विज्ञापनार्थं कृतः प्रणामो येन स उपस्थितस्तेषां समीपे तिष्ठन्नग्रेऽभिगृहीतपाणिः संयोजिताञ्जलिः विविक्तचेताः शुद्धचित्तः राजा यत्स्वचिकीर्षितं प्रायोपवेशनादि तद्युक्तमयुक्तं वेति विज्ञापयामास ॥ १२ ॥ स्वस्मिन्मुनीनामनुग्रहमालक्ष्यात्मानं श्लाघते—अहो इति ॥ अहो नृपाणां मध्ये वयं धन्यतमाः यतो महत्तमैर्युष्माभिरनुग्रहणीयं शीलं वृत्तं येषां तथाभूताः । " दूरादुच्छिष्टविण्मूत्रपादाम्भांसि समुत्सृजेत् । " इत्युक्तेः पादशौचजलं दूरे क्षिप्यते राज्ञां कुलं तु बत यस्माद्धेतोः गर्ह्यं निन्द्यं कर्म यस्य तादृशमस्ति अतः ब्राह्मणानां यत्पादशौचं पादक्षालनजलं ततोऽपि दूराद्विसृष्टं ततोऽपि दूरे स्थितियोग्यमित्यर्थः । गर्ह्यकर्मेति आत्मानमुद्दिश्योक्तम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शापोऽप्यनुग्रह एवेत्याह—तस्यैवेति ॥ अभीक्ष्णं गृहादिषु विशेषेणासक्तं चित्तं यस्य तस्यैव गर्ह्यकर्मण एव अघस्य पापात्मनः अपि मेऽनुग्रहार्थं निर्वेदो वैराग्यमेव मूलं प्राप्तिकारणं यस्मिन्स द्विजशापरूपः परावरेशो भगवानेव प्रादुर्बभूव । यत्र यस्मिन् शापे सति प्रसक्तो गृहाद्यासक्तो जनः आशु भयं धत्ते निर्विण्णो भवति । स्वस्य वैराग्यप्राप्यत्वात् तस्य च भयमूलत्वात् तदर्थं द्विजशापं कारितवान् इत्यर्थः। यद्वा निर्वेदस्य मूलं कारणमिति परावरेशविशेषणं पुंस्त्वमार्षम् । यत्र परावरेशे आसक्तो जनः आशु शीघ्रमभयं भयाभावं धत्ते ॥ १४ ॥ तमिति ॥ हे विप्राः भवन्तः तमुक्तविधम् ईशे धृतचित्तं मा माम् उपयातं शरणागतं प्रतियन्तु जानन्तु । तथा गङ्गा च देवी देवतारूपा मां शरणागतं जानातु । विष्णोः गाथाः कथाः गायत द्विजेनोपसृष्टः प्रेरितः कुहको वेषान्तरभाक् तक्षको वा अलं यथेष्टं मां दशतु ॥ १५॥ पुनश्चेति ॥ भूयोऽपि कदाचित् यां यां सृष्टिं योनिमुपयामि तत्रानन्ते भगवति रतिस्तदाश्रयेषु महत्सु प्रसङ्गः प्रकृष्टः सङ्गश्च भूयात् सर्वत्र सर्वजनेषु मैत्री च भवदनुग्रहेणास्तु। ब्राह्मणानादरजातानुताप आह । द्विजेभ्यो भवद्भ्यो नमोऽस्तु

तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम् ॥ निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते ॥१४॥ तं मोपयातं प्रतियन्तु विप्रा गङ्गा च देवी धृतचित्तमीशे ॥ द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः ॥ १५ ॥ पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु ॥ महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥ १६ ॥ इति स्मराजाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ॥ उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः ॥ १७ ॥ एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः ॥ प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुन्दुभयश्च नेदुः ॥ १८ ॥ महर्षयो वै समुपागता ये प्रशस्य साध्वित्यऽनुमोदमानाः ॥ ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपम् ॥१९॥न वै इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ॥ येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः२०॥

॥ १६ ॥ इति स्मेति ॥ इत्येवमध्यवसायो निश्चयस्तद्युक्तो धीरः स्वसुते जनमेजये न्यस्तो राज्यभारो येन स राजा समुद्रपत्न्याः गङ्गाया दक्षिणकूले तीरे प्राचीनानि पूर्वदिक्-स्थितानि मूलानि लक्षणया अग्राणि येषां तेषु प्रागग्रेषु प्रागग्राणामेवासने विधानात् कुशेषु उदङ्मुख आस्ते स्म उपविष्टवान् ॥ १७ ॥ एवं चेति ॥ एवं हि नरदेवानां राज्ञां देवे पूज्ये तस्मिन् परीक्षिति प्रायोपविष्टे सति दिवि वर्त्तमाना देवसङ्घास्तं भूमौ स्थितं प्रशस्य मुदा मुहुः प्रसूनैः कुसुमैर्व्यकिरन् वृष्टिमकुर्वन् देवैर्वादिता दुन्दुभयश्च नेदुः ॥१८॥ महर्षय इति ॥ प्रजासु जनेषु योऽनुग्रहस्तस्मिन् शीलं सारो बलं च येषां ते ये च महर्षयस्तत्र समुपागतास्ते साधु साध्वित्यनुमोदमानास्तं राजानं प्रशस्य उत्तमश्लोकस्य हरेर्गुणैरभिरूपं योग्यं यद्वचनं तदूचुः ॥१९॥ न वै इति ॥ हे राजर्षिवर्य ये भवन्तो भगवत्पार्श्वं प्राप्तुकामाः सन्तो राजकिरीटैर्जुष्टं सेवितमध्यासनं सार्वभौमसिंहासनं सद्यो जहुस्तत्यजुरिति युधिष्ठिराद्यभिप्रायेण तेषु कृष्णं समनुव्रतेषु श्रीकृष्णसेवकेषु भवत्सु इदं भगवत्कथाप्रार्थनं चित्रमाश्चर्यं नैव भवति ॥ २० ॥

CC-0. In Public Domain. Digitization by eGangotri

अथ ते परस्परं संमन्त्रयन्ते—सर्वे इति ॥ भागवतेषु प्रधानः असौ राजा यावत्कलेवरं विहाय विरजस्कं शुद्धं विशोकं परमुत्कृष्टं लोकं यास्यति तावद्वयं सर्वे अद्येहैवास्महे ॥ २१ ॥ आश्रुत्येति ॥ समं पक्षपातशून्यं मधुच्युत् अमृतस्रावि गुरु गम्भीरार्थमव्यलीकं यथार्थं तत्पूर्वोक्तऋषिगणानां वचः परीक्षित् आश्रुत्य विष्णोश्चरितानि शुश्रूषमाणः श्रोतुकामः युक्तः सावधानः सन्नेतानृषीनभिवन्द्याभाषत छन्दोभङ्गः ॥२२॥ समागता इति ॥ त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके यथा मूर्तिधरा वेदाः सन्ति तद्वद्व भासमानाः यूयं सर्वे सर्वतः सर्वाभ्यो दिग्भ्य एवेह मदनुग्रहार्थं समागता न स्वार्थं येषां भवताम् आत्मशीलं स्वतःसिद्धस्वभावरूपं परेषु मादृशेषु दीनेष्वनुग्रहम् ऋते विनेह लोकेऽथवामुत्र च स्वर्गादिलोके कश्चनाप्यर्थः प्रयोजनं नास्ति ॥२३॥ ततश्चेति ॥ हे विप्राः विश्रभ्य भवद्विश्वासं कृत्वा इत्येवंकर्त्तव्यमित्यस्य भाव इतिकृत्यता तस्यां विषये

सर्वे वयं तावदिहास्महेद्य कलेवरं यावदसौ विहाय ॥ लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥२१॥ आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकम् ॥ अभाषतैतानभिवन्द्य युक्तं शुश्रूषमाणश्चरितानि विष्णोः ॥ २२ ॥ समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे ॥ नेहाथ वाऽमुत्र च कश्चनाऽर्थं ऋते परानुग्रहमात्मशीलम् ॥ २३ ॥ ततश्च वः प्रच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इतिकृत्यतायाम् ॥ सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥२४॥ तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः॥ अलक्ष्यलिङ्गो निजलाभतुष्टो वृतः स्त्रिबालैरवधूतवेषः ॥२५॥ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ॥ चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कम्बुसुजातकण्ठम् ॥ २६ ॥ निगूढजत्रुं पृथुतुङ्गवक्षसमावर्तनाभिं वलिवल्गूदरं च ॥ दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम् ॥ ॥२७॥ श्यामं सदाऽपीच्यवयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ॥ प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥२८॥

इमं प्रच्छ्यं प्रष्टव्यं वो युष्मान् अहं विपृच्छे विशेषतः पृच्छामि तङार्षः चानश् वा । तत्र अभियुक्ताः सर्वज्ञा एकमतयो वा यूयं म्रियमाणैः यत् सर्वात्मना शुद्धं कृत्यं तत् आमृशत विचारयत ॥ २४ ॥ तत्रेति ॥ तत्रैवं पृच्छतो राज्ञः सन्निधाने यद्वा तत्र तेषु यागयोगतपोभिर्विवदमानेषु सत्सु गां भुवं यदृच्छया पर्यटमानः आर्षः शानच् चानश् वा । अनपेक्षः विरक्तः निजलाभेनैव तुष्टः अलक्ष्याणि लिङ्गानि महापुरुषचिह्नानि यस्य अवधूतानां लोके त्यक्तानामिव असंस्कृतशरीरजडानामिव वा वेषो यस्य स्त्रीभिः बालैश्च वृतः ह्रस्वमार्षम् । भगवान् व्यासपुत्रः शुकः अभवदागतः ॥२५॥ तमिति त्रयम् ॥ द्विगुणान्यष्टौ वर्षाणि यस्य तं षोडशवर्षवयस्कमिव स्थितं सुकुमारौ पादौ करौ ऊरू बाहू अंसौ कपोलौ च यस्मिंस्तद् गात्रं यस्य तं चारुणी आयते दीर्घे अक्षिणी यस्मिन् उन्नता नासिका यस्मिन् लम्बह्रस्वादिवैषम्यं विना तुल्यौ कर्णौ यस्मिन् शोभने भ्रुवौ यस्मिन् एवंभूतमाननं यस्य तं कम्बुवद्रेखात्रयान्वितः सुष्ठु जातः कण्ठो यस्य तं कण्ठस्याधोभागयोः स्थिते अस्थिनी जत्रुणी मांसेन निगूढे जत्रुणी यस्य तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथु विस्तीर्णं तुङ्गमुन्नतं च वक्षो यस्य तम् आवर्त्त इव वर्तुला विविक्तरन्ध्रा च नाभिर्यस्य तं बलिभिस्तिर्यग्भिन्नरेखाभिर्वल्गु रम्यमुदरं यस्य तं दिगम्बरं नग्नं वक्रा विकीर्णाः केशा यस्य तं प्रलम्बबाहुं स्वमरेषु श्रेष्ठेषु देवेषु उत्तमो हरिस्तद्वदाभा यस्य तं श्यामं सदा अपीच्यमतिकमनीयं यद्वयो यौवनं तेन या अङ्गलक्ष्मीर्देहकान्तिस्तया रुचिरेण स्मितेन च स्त्रीणां मनोज्ञं स्पृहणीयं गूढं मषीसंवृतमणिवत्तिरोहितं वर्चस्तेजो यस्य तथाभूतमपि तं दृष्ट्वा तल्लक्षणज्ञास्ते मुनयः स्वासनेभ्यः प्रत्युत्थिताः ॥ २६ ॥ ॥ २७ ॥ २८ ॥ स इति ॥ अथ स विष्णुरातः परीक्षित् आगताय अतिथये तस्मै शुकाय शिरसा सपर्यामाजहार प्रणामेनैव तत्पूजां कृतवान् आत्मानं समर्पितवान्वा। ततो हि अबुधाः स्त्रियः अर्भकाश्च ये तेन सहागतास्ते निवृत्ताः। स च शुकः राज्ञा पूजितो महति आसने राज्ञा समर्पित उपविवेश सोपविवेशेति "सोचि लोपे चेत्" इति सुलोपः । यद्वा पूजित इत्यत्र पूजा यथोचितसत्कारः तत्सभास्थितव्यासादिकृताशीरादिस्तदितरकृतप्रणामादिश्च संजाता यस्य सः एतेन तत्र सभायां व्यासनारदादीनामपि

स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाऽऽजहार ॥ ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः ॥२९॥ स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः॥ व्यरोचताऽलं भगवान्यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः ॥ ३० ॥ प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ॥ प्रणम्य मूर्ध्नाऽवहितः कृताञ्जलिर्नत्वा गिरा सूनृतयाऽन्वपृच्छत् ॥३१॥ अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबन्धवः ॥ कृपयाऽतिथिरूपेण भवद्भिस्तीर्थकाः कृताः ॥ ३२ ॥ येषां संस्मरणात्पुंसां सद्यः शुध्यन्ति वै गृहाः ॥ किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥ ३३ ॥

सत्वात्तेभ्यः प्रणामादिकमपि शुकश्चकार महासनोपवेशनं तु तेषामाज्ञयैवेति ज्ञेयम् । अत्रावतारभूतेभ्योऽपि नारदपरशुरामव्यासादिभ्यः शुकोत्कर्षो भक्त्युत्कर्षेणैवेति ॥२९॥ स इति ॥ तत्रासन उपविष्टो महीयसामपि महान् ब्रह्मर्षिराजर्षिदेवर्षीणां सङ्घैः संवृतः स भगवान् शुकः ग्रहा भौमाद्याः ऋक्षाणि अश्विन्यादीनि तदुभयेतरास्ताराः तेषां निकरैः परीतः परिवृतो यथेन्दुः रोचते तथा अलमतिशयेन व्यरोचत ॥ ३० ॥ प्रशान्तमिति ॥ प्रशान्तं कोपादिदोषरहितम् अकुण्ठा अप्रतिहता मेधा यस्य असिजार्षः। तमासीनं सुखमुपविष्टं मुनिं भागवतो नृपः परीक्षिदभ्युपेत्य मूर्ध्ना प्रणम्य कृताञ्जलिरवहितः सावधानश्च सन् प्रश्नार्थं पुनर्नत्वा सूनृतया मधुरया गिरा अन्वपृच्छत् ॥३१॥ अहो इति ॥ हे ब्रह्मन् वयं क्षत्रबन्धवोऽपि अहो अद्य सतां सेव्या आदरणीयाः जाताः यतो भवद्भिरतिथिरूपेण कृपयैव तीर्थकाः कृताः पवित्रीकृताः क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति तीर्थकानां पुंस्त्वम् ॥३२॥ येषामिति ॥ येषां संस्मरणात् यत्कर्तृकाद्यत्कर्मकाद्वा पुंसां सकुटुम्बा गृहाः सद्य एव शुद्ध्यन्ति तेषां दर्शनस्पर्शनादिभिः वयं विशुद्धा जाता इति किं पुनर्वक्तव्यम् ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

साम्निध्यादिति ॥ अतः हे महायोगिन् यथा विष्णोः सान्निध्यात्सुरेतरा दैत्यराक्षसादयो नश्यन्ति तथा ते तव सान्निध्यादेव हेतोः पुंसां महान्त्यपि पातकानि सद्य एव नश्यन्ति ॥३४॥ अपीति ॥ अपि संभावनायाम् । पाण्डुसुतानां प्रियः अतः पैतृष्वस्रेयाणां पाण्डवानां प्रीत्यर्थं तेषां युधिष्ठिरादीनां गोत्रस्यापि मे मदर्थमात्तं स्वीकृतं बान्धवं बन्धुकृत्यं येन स भगवान् कृष्णः मे ममोपरि प्रीतः प्रसन्नो जातः॥३५॥ अन्यथेति ॥ अन्यथा श्रीकृष्णप्रसादं विना अव्यक्ता गतिर्यस्य तस्य संसिद्धस्य आप्तकामस्य वनीयसः वनयिता याचयिता वनयितृतरो वनीयान् ईयसुन् "तुरिष्ठेमेयस्सु" इति तृशब्दस्य लोपः तत इट्निवृत्तौ णिच्लोपे सुप्कार्ये वनीयानिति सिद्ध्यति । तस्य अत्युदारतया मां याचस्वेति प्रवर्त्तकस्येत्यर्थः । ते तव दर्शनं नृणां कथं स्यात् म्रियमाणानाम् आसन्नमृत्यूनां नोऽस्माकं तु नितरां कथं स्यात् ॥ ३६ ॥ अत इति ॥ अतः योगिनां परमं गुरुं त्वां संसिद्धिं मोक्षोपायं पृच्छामि । इह संसिद्धौ म्रियमाणस्य पुरुषस्य सर्वथा यत्कार्यं कर्त्तुं योग्यं साधनं तच्च पृच्छामि ॥ ३७ ॥ यदिति ॥ हे प्रभो नृभिः यच्छ्रोतव्यमथो यच्च जाप्यं जपितव्यं जप्यशब्दात्स्वार्थेण् यच्च नृभिरवश्यं कर्तव्यं स्मर्त्तव्यं भजनीयमाराध्यं च । यद्वा यच्च विपर्ययमकार्यमश्रोतव्यमजाप्यमकर्त्तव्यमस्मर्त्तव्यमभजनीयं च तत्सर्वं ब्रूहि ॥ ३८ ॥ तव दर्शनं दुर्लभमतः शीघ्रं कथयेत्याह—नूनमिति ॥ हे ब्रह्मन् नूनं गृहमेधिनां गृहेषु भगवतस्तवावस्थानं गोदोहनं यावता कालेन गौर्दुह्यते तावत्कालमात्रमपि क्वचिदपि न लक्ष्यते न दृश्यते ॥ ३९ ॥ एवमिति ॥ एवं श्लक्ष्णया मधुरया गिरा राज्ञा आभाषितोऽभिमुखीकृतः पृष्टश्च सः धर्मज्ञो भगवान् बादरायणिः शुकः प्रत्यभाषत उत्तरं दत्तवान् ॥ ४० ॥ यत्किंचिदस्ति विगुणं विरसं विरूपं तद्वस्तु भोः कृतधियः स्वदतां भवद्भ्यः ॥ लोकोत्तराखिलगुणं मधुरालयं यत्तस्मिन्नितान्तरुचिरे रुचिरस्तिरस्तु ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्प्रथमस्योनविंशके ॥ १९ ॥

सान्निध्यात्ते महायोगिन्पातकानि महान्त्यपि ॥ सद्यो नश्यन्ति वै पुंसां विष्णोरिव सुरेतराः ॥ ३४ ॥ अपि मे भगवान्प्रीतः कृष्णः पाण्डुसुतप्रियः ॥ पैतृष्वस्रेयप्रीत्यर्थं तद्गोत्रस्यात्तबान्धवः ॥ ३५ ॥ अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम् ॥ नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥ ३६ ॥ अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् ॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥ ३७ ॥ यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो ॥ स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥ ३८ ॥ नूनं भगवतो ब्रह्मन्गृहेषु गृहमेधिनाम् ॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ ३९ ॥ सूत उवाच ॥ एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा ॥ प्रत्यभाषत धर्मज्ञो भगवान्बादरायणिः ॥ ४० ॥

इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां पारमहंस्यां संहितायां प्रथमस्कन्धे शुकागमनं नाम एकोनविंशोऽध्यायः ॥ १९ ॥

अयं श्रीमद्भागवतस्य प्रथमस्कन्धः बूंदीनिवासिपण्डितगङ्गासहायकृतान्वितार्थप्रकाशिकाख्यव्याख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितः । मा. शु. ११ शकाब्दा. १८२१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

॥ * ॥ श्रीमद्भागवते प्रथमस्कन्धः ॥ * ॥

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते द्वितीयस्कन्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीपरमेश्वराय नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन्पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्ज-युगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेन्वयाय विदधाति मतिं द्वितीये ॥ ३ ॥ प्रथमे तु हरे रूपे स्थविष्ठे कीर्तनादिभिः ॥ मनसो धारणा तत्र श्लोकाः सार्द्धा [३॥] नवांघ्रयः ॥ त्रीण्युवाचेति पादोनाः [४॥] पञ्चवेदा अनुष्टुभः ॥ १ ॥ आदौ राज्ञः प्रश्नमभिनन्दति—वरीयानिति ॥ हे नृप "यच्छ्रोतव्यमथो जाप्यम्" इत्यादिर्यस्ते त्वया प्रश्नः कृतः एष वरीयान् श्रेष्ठः । यतो लोकानां हितं भवति यश्च आत्मविदां मुक्तानामेषां सभ्यानां संमतः यश्च पुंसां श्रोतव्यादिषु परः श्रेष्ठः प्रश्नोऽपि श्रेष्ठः किं पुनस्तस्योत्तरम् ॥ १ ॥ हरिरेव श्रोतव्य इत्याद्युत्तरं वदिष्यन् ब्रूहि यद्वा विपर्य्ययमित्यस्योत्तरमाह—श्रोतव्यादीनीति ॥ हे राजेन्द्र आत्मतत्वमपश्यतां गृहेषु स्थितानामत एव गृहमेधिनां गृहगतपञ्चसूनापराणां " मेधृ हिंसायाम् " नृणां गार्हस्थ्यनिर्वाहार्थं श्रोतव्यादीनि सहस्रशः सन्ति ॥ २ ॥ निद्रयेति ॥ हे राजन् नक्तं रात्रौ

ॐ नमो भगवते वासुदेवाय ॥ श्रीशुक उवाच ॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ॥ आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः ॥ १ ॥ श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः ॥ अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥ २ ॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ॥ दिवा चार्थेहया राजन् कुटुम्बभरणेन वा ॥ ३ ॥ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥ ४ ॥ तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ ५ ॥ एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥ ६ ॥

यद्वय आयुस्तन्निद्रया व्यवायेन स्त्रिया सह रत्या मैथुनेन वा ह्रियते दिवा अहनि यद्वयस्तदर्थेहयाऽर्थार्थमुद्यमेन सिद्धे चार्थे कुटुम्बस्य भरणेन पोषणेन वा ह्रियते । चकारौ नानाव्यापारसमुच्चयार्थौ ॥ ३ ॥ देहेति ॥ असत्सु असमर्थेषु दुष्टेष्वपि च देहापत्यादिषु आत्मनः सैन्येषु परिकरेषु कालेन सह योद्धुमिव सेनातुल्येषु प्रमत्तः आसक्तस्तेषां निधनं पश्यन्नपि न पश्यति । पित्रादिदृष्टान्तेन विनाशं जानन्नपि नानुसंधत्ते ॥ ४ ॥ तस्मादिति ॥ हे भारत तस्मात् अभयं मोक्षमिच्छता पुरुषेण सर्वात्मा भगवान् ईश्वरः हरिः श्रोतव्यः कीर्तितव्यः स्मर्तव्यश्च । उपलक्षणमेतदर्चनादीनाम् ॥ ५ ॥ एतावानिति ॥ साङ्ख्यं तत्वविवेकः योगोऽष्टाङ्गः ताभ्यां तथा स्वधर्मे या परिनिष्ठा स्थितिः तया चेति त्रिभिरपि साधनैर्या नारायणस्मृतिर्भवति एतावानेव पुंसां जन्मनः लाभः फलम् । अन्ते तु नारायणस्मृतिः परो जन्मलाभ इति साङ्ख्यादित्रयस्य स्वातन्त्र्येण लाभं वारयति । यद्वा । साङ्ख्ययोगधर्मैरेतावानेव परो जन्मलाभः या अन्ते प्रत्यासत्तिन्यायेन साङ्ख्ययोगधर्माणामन्ते नारायणस्य स्मृतिः ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रायेणेति ॥ हे राजन् नैर्गुण्ये त्रिगुणातीते ब्रह्मणि स्थिता अत एव विधिषेधतः विधिनिषेधात्मकवेदान्निवृत्तास्तदुक्तपुण्यपापसंबन्धरहिता अपि मुनयः प्रायेण हरेर्गुणानां लीलानामनुकथने रमन्ते स्म ॥ ७ ॥ इदमिति ॥ अहं ब्रह्मसम्मितं वेदतुल्यम् इदं वक्ष्यमाणं भगवत्प्रोक्तं भगवन्तमधिकृत्य प्रवृत्तं वा अतः भागवतं नाम पुराणं द्वापरादौ द्वापर आदिर्यस्य कालस्य तस्मिन् काले द्वापरान्त इत्यर्थः । शन्तनुसमकाले व्यासावतारप्रसिद्धेः । द्वैपायनाद्वेदव्यासात्स्वपितुः सकाशादधीतवान् ॥ ८ ॥ परिनिष्ठित इति द्वयम् ॥ हे राजर्षे नैर्गुण्ये निर्गुणब्रह्ममार्गे परिनिष्ठितः स्थिरान्तःकरणोऽप्यहम् उत्तमश्लोकस्य हरेः लीलया गृहीतचेताः आकृष्टचित्तो यदिदमाख्यानं श्रीभागवताख्यमधीतवानस्मि । यस्य च कथायां श्रद्दधतां जनानाम् आशु शीघ्रं मुकुन्दे सती श्रेष्ठा मतिः स्यात् तदहं ते तुभ्यमभिधास्यामि कथयिष्यामि । यतः भवान् महापौरुषिकः पुरुषेण हरिणा चरति पौरुषिकः चरतीति ठक् महांश्चासौ पौरुषिकश्चेति ॥ ९॥१०॥ एतदिति ॥ हे नृप निर्विद्यमानानां विरज्यमानानाम् अकुतोभयं मोक्षमिच्छतां योगिनां हेतोः

प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः ॥ नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ॥७॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ अधी-
तवान्द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥ परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया ॥ गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥९॥
तदहं तेऽभिधास्यामि महापौरुषिको भवान् ॥ यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः सती ॥ १० ॥ एतन्निर्विद्यमानानामिच्छताम-
कुतोभयम् ॥ योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥ ११ ॥ किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ॥ वरं मुहूर्तं विदितं घटेत श्रेयसे
यतः ॥ १२ ॥ खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः ॥ मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम् ॥ १३ ॥ तवाप्येतर्हि कौरव्य सप्ताहं
जीवितावधिः ॥ उपकल्पय तत्सर्वं तावद्यत्सांपरायिकम् ॥ १४ ॥

एतद्धरेर्नामानुकीर्तनमेव वृद्धैर्निर्णीतम् । यद्वा । निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनत्वेन इच्छतां कामिनां च कामसाधनत्वेन योगिनां ज्ञानिनां फलत्वेन चाकुतोभयमिदं हरेर्नामानुकीर्तनमेव निर्णीतम् ॥ ११ ॥ अल्पिष्ठेनायुषा किं कर्तुं शक्यमिति तु मा शोचीरित्याह—किमिति ॥ प्रमत्तस्य गृहाद्यासक्तस्य परोक्षैरज्ञाततया गतैर्बहुभिरपि हायनैः संवत्सरैरिह मनुष्यजन्मनि किं किं प्रयोजनं सिद्ध्यति न किञ्चिदपीत्यर्थः । विदितं वृथैव यातीति ज्ञातं तु मुहूर्तमपि वरं श्रेष्ठं यतो येन मुहूर्तेन श्रेयसे मोक्षाय घटेत यत्नं कुर्यात् ॥१२॥ खट्वाङ्ग इति॥ खट्वाङ्गो नाम राजा देवपक्षे स्थित्वा दैत्यानजयत् । ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते मम शेषमायुः कियदिति ऊचे । ततो देवैर्मुहूर्तमात्रमित्युक्ते स खट्वाङ्गो नाम राजर्षिः इह आयुषः इयत्तां मुहूर्तमात्रं प्रमाणं ज्ञात्वा भूमिमागत्य सर्वं कुटुम्बादिकमुत्सृज्य अभयं भयनिवर्तकं हरिं मुहूर्तात् मुहूर्तमात्रकालेन गतवान् ॥ १३ ॥ तवेति ॥ हे कौरव्य अपिस्त्वर्थे । तव त्वेतर्हीदानीमपि जीवितस्यावधिः सप्ताहपर्य्यन्तमस्ति इति हेतोर्यत्साम्परायिकं परलोकसाधनं तत् सर्वं तावत् तावता काले-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोपकल्पय सम्पादय ॥ १४ ॥ तदेवाह—अन्तकाल इति ॥ अन्तकाल आगत आसन्ने सति तु पुरुषो गतसाध्वसो मरणभयरहितः सन् असङ्गः अनासक्तिस्तद्रूपेण शस्त्रेण देहे स्पृहां सुखेच्छां तं देहमनुसृत्य ये वर्तमानाः कलत्रापत्यादयस्तेषु च स्पृहां भोगेच्छां छिन्द्यादित्यर्थः । इति वैराग्यमुपदिष्टम् ॥ १५॥ गृहादिति द्वयम् ॥ धीरो जितेन्द्रियः इति ब्रह्मचर्यादियमोपलक्षणम् । गृहात्प्रव्रजितो निर्गतः पुण्यतीर्थानां जलेषु आप्लुतः स्नातः इति नियमोपलक्षणम् । शुचौ पवित्रे विविक्त एकान्ते देशे विधिवच्चैलाजिनकुशोत्तरमिति रीत्या कल्पित आसने आसीनः सन् इति योगस्याष्टस्वङ्गेषु यमनियमासनसूचनम् । त्रिवृत्त्रयाणामकारोकारमकाराणां वृद्वर्तनं यस्मिन् तदकारादित्रयग्रथितं शुद्धं परं मन्त्रान्तरेभ्यः श्रेष्ठं ब्रह्माक्षरं प्रणवं मनसाऽभ्यसेत् जपेत् । जितश्वासः सन् ब्रह्मबीजं प्रणवमविस्मरन् स्मरन्नेव मनो यच्छेद्वशीकुर्यात् इति प्राणायामः ॥१६॥१७॥ नियच्छेदिति ॥ बुद्धिः सारथिः सहायो यस्य सः मुमुक्षुर्मनसा विषयेभ्यः शब्दादिभ्योऽक्षान् श्रोत्रादीनीन्द्रियाणि पुंस्त्वमार्षम् । नियच्छेत्परावर्तेत इति प्रत्याहारः । कर्मभिर्वा-

अन्तकाले तु पुरुष आगते गतसाध्वसः ॥ छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥ १५ ॥ गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ॥ शुचौ विविक्त आसीनो विधिवत्कल्पितासने ॥ १६ ॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम् ॥ मनो यच्छेजितश्वासो ब्रह्मबीजमविस्मरन् ॥ १७॥ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ॥ मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥१८॥ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ॥ मनो निर्विषयं युङ्क्त्वा ततः किंचन न स्मरेत् ॥ १९ ॥ पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ॥ यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलम् ॥ २० ॥ यतः संधार्यमाणायां योगिनो भक्तिलक्षणः ॥ आशु संपद्यते योग आश्रयं भद्रमीक्षतः ॥ २१ ॥

सनाभिराक्षिप्तमाकृष्टं यद्वा कर्मभिः प्रत्याहाररूपैराक्षिप्तमा सर्वतो विषयेभ्यो दूरीकृतं विशुद्धं मनः शुभार्थे शुभाश्रये भगवद्रूपे धिया निश्चयात्मिकया बुद्ध्या धारयेत् स्थिरं कुर्यात् इति धारणा॥१८॥तत्रेति॥तत्र भगवत्स्वरूपेऽव्युच्छिन्नेन समग्ररूपादवियुक्तेन चेतसैकमेकं पादाद्यवयवं ध्यायेत् इति ध्यानम् । आश्रयविशेषे सामान्यतश्चित्तस्थिरीकरणं धारणा । अवयवविभावनया तद्दार्ढ्यं ध्यानमिति भेदः । मनो निर्विषयं युङ्क्त्वा परमानन्दमात्राकारं कृत्वा ङकारवान् पाठ आर्षः। ततस्तदनन्तरं किंचनाऽप्यन्यन्न स्मरेत् इति समाधिः ॥१९॥ पदमिति अर्द्धम् ॥ यत्र स्थितं मनः प्रसीदति उपशाम्यति तत् परमं श्रेष्ठं भगवतो विष्णोः पदं स्वरूपमेव च नान्यत् । गुणवशात्पुनरपि क्षोभे धारणामेव स्थिरीकुर्य्यादित्याह रज इति ॥ यदात्मनः स्वस्य मनो रजसाऽऽक्षिप्तं तमसा विमूढं वा स्यात्तदा धीरः सन् धारणया तद् यच्छेद्वशीकुर्यात् । या धारणा तत्कृतं रजस्तमोभ्यां कृतं मलं विक्षेपमोहरूपं दोषं हन्ति निवर्तयति ॥२०॥ यत इति॥ यतो यस्यां धारणायां संधार्यमाणायां सम्यक्क्रियमाणायां भद्रं मङ्गलरूपमाश्रयं विषयं भगवत्स्वरूपमीक्षतो

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

ध्यातुर्योगिनः शता आर्षः भक्तिलक्षणो भगवति परमप्रेमरूपो योगस्तत्प्राप्त्युपायरूपश्च आशु सम्पद्यते सैव धारणानुष्ठेया इति शेषः ॥ २१ ॥ यथेति ॥ हे ब्रह्मन् धारणा यथा सन्धार्यते यत्र च स्वरूपे धारणा संमताऽभिप्रेता यादृशी वा धारणाऽऽशु शीघ्रं पुरुषस्य योगिनो मनोमलं विक्षेपादिकं हरेदिति धारणाप्रकारादि वक्तव्यम् ॥ २२ ॥ जितासन इति ॥ जितासनः अभ्यासबलेन आसनकृतायासरहितः जितश्वासः प्रणायामेन वशीकृतश्वासः जितसङ्गोऽपत्यादावासक्तिरहितः जितेन्द्रियश्च सन् धिया निश्चयात्मिकया बुद्ध्या स्थूले भगवतो रूपे मनः सम्यग्धारयेत् ॥ २३ ॥ स्थूलरूपमाह—विशेष इति ॥ विशेषः अयमपरोक्षो ब्रह्माण्डात्मकः समष्टिविराड् देहो विशेषशब्दवाच्यस्तस्य भगवतो देहः स्थवीयसां स्थूलतराणामपि मध्ये स्थविष्ठः स्थूलतमः यत्र भगवद्देह इदं भूतं भव्यं भवच्च सत् समष्टिव्यष्ट्यात्मकं कार्यमात्रं विश्वं दृश्यते। अत्र विराड्देहतज्जीवतदन्तर्यामिणामभेदमारोप्योपासनं कर्तव्यमित्याशयेनोक्तम् ॥ २४ ॥ अस्य चोपलक्षणत्वेन विषयत्वम् । वस्तुतस्तु विराड् जीवनियन्ता भगवानेव धारणाविषय इत्याह—आण्डेति ॥ अण्डको-

॥ राजोवाच ॥ यथा संधार्यते ब्रह्मन्धारणा यत्र संमता ॥ यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥ २२ ॥ श्रीशुक उवाच ॥ जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः ॥ स्थूले भगवतो रूपे मनः संधारयेद्धिया ॥ २३ ॥ विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् ॥ यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ॥ २४ ॥ आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते ॥ वैराजः पुरुषो योऽसौ भगवान्धारणाश्रयः ॥ २५ ॥ पातालमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम् ॥ महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे ॥ २६ ॥ द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च ॥ महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणन्ति ॥ २७ ॥ उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ॥ तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८ ॥

शान्तर्वर्तिकटाह एव पृथिव्यावरणं ततोऽप्तेजोवाय्वाकाशाहंकारमहत्तत्वानि दशगुणोत्तराधिकानि सप्तावरणानि तैः संयुतेऽस्मिन्नाण्डकोशाख्ये शरीरे योऽसौ शरीरी वैराजाख्यः हिरण्यगर्भदेहः तज्जीवान्तर्यामी भगवान्पुरुषो धारणाया आश्रयः ॥ २५ ॥ विराड्देहतज्जीवतदन्तर्यामिणमभेदमारोप्योपासनं कार्यमित्याह—पातालमिति ॥ पातालम् एतस्य वैराजपुरुषस्य पादमूलं पादस्याधोभागं पठन्ति वेदज्ञाः पातालं पादतलत्वेनोपास्यमिति । एवं पातालादीननूद्य भगवतः पादमूलत्वादिना उपास्यत्वं विधीयते। रसातलं तु पार्ष्णिः पादपश्चाद्भागः प्रपदं पादाग्रभागस्तदुभयं पठन्ति । अथ तथा महातलम् अस्य विश्वसृजः पुरुषस्य भगवतो गुल्फौ पठन्ति । तलातलं द्वे अपि जङ्घे पठन्ति ॥ २६ ॥ द्वे इति ॥ हे महीपते सुतलं विश्वमूर्तेर्भगवतो द्वे जानुनी गृणन्ति । वितलं चातलं च तस्योरुद्वयं गृणन्ति । वितलम् ऊरोरधोभागोऽतलमुत्तरभाग इति ज्ञेयम् । महीतलं भूलोकं तस्य जघनं कट्याः पुरोभागं गृणन्ति । नभस्तलं भुवर्लोकं नाभिरेव सरस्तद् गृणन्ति॥२७॥उरःस्थलमिति ॥ ज्योतिरनीकं ज्योतिषां समूहं स्वर्लोकम् अस्य वैराजस्योरःस्थलमुरः- ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदेशं गृणन्ति । महर्लोकं ग्रीवेति गृणन्ति । जनो जनलोकोऽस्य वदनमिति गृणन्ति । तपोलोकम् अस्यादिपुंसो रराटीं ललाटं विदुर्जानन्ति । सत्यं सत्यलोकं तु अस्य सहस्रशीर्ष्णं सहस्रशिरसः शीर्षाणि शिरांसि विदुः ॥२८॥ इन्द्रादय इति ॥ इन्द्रादय उस्रास्तेजोमयशरीराः " किरणोस्रमयूखांo " इत्यमरः । देवाः अमुष्य वैराजस्य बाहव इत्याहुः । दिशोऽस्मदादिश्रोत्राधिष्ठात्र्यो देवताः अस्य कर्णौ श्रोत्रेन्द्रियस्याधिष्ठानम् आहुः । अस्मदादिश्रोत्रविषयः शब्दस्तु तस्य श्रोत्रेन्द्रियम् । एवमग्रे नासिकादिष्वपि द्रष्टव्यम् । अत्र व्यष्टिसमष्टिविराजोर्यद्यपि तुल्यमेवाध्यात्मादिविभागस्तथापि समष्टिविराड्हिरण्यगर्भोपासकैर्योगिभिः परमेश्वरत्वेनोपास्यः परमेश्वरस्य चेन्द्रियेभ्य एव व्यष्टिविराजो विषयाः भवन्ति । तदिन्द्रियाधिष्ठानेभ्यस्त्विन्द्रियाणि इन्द्रियाधिष्ठात्र्यो देवताश्च स्युरिति कार्यकारणयोरभेदोपचारादैक्येन दिक्शब्दादिभिः समष्टिविराजः कर्णश्रोत्रादिकल्पना ज्ञेयेति । नासत्यदस्रौ अश्विनौ परमस्य वैराजस्य नासे नासिकापुटे । गन्धोऽस्य घ्राणेन्द्रियम् । इद्धः प्रदीप्तोऽग्निर्मुखम् ॥ २९ ॥ द्यौरिति ॥ द्यौर्द्युलोकस्तत्रत्यः सूर्यो वा अक्षिणी नेत्रगोलके । पतङ्गः सूर्यस्तैजसं रूपं वा विष्णोर्व्यापकस्य वैराजस्य चक्षुरिन्द्रियमभूत् । दिवः सूर्यस्य चाक्षिणीति च वक्ष्यमाणात् उभे अहनी अहोरात्रं

इन्द्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥ नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गन्धो मुखमग्निरिद्धः ॥ २९ ॥ द्यौरक्षिणी चक्षुरभूत्पतङ्गः पक्ष्माणि विष्णोरहनी उभे च ॥ तद् भ्रूविजृम्भः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा ॥३०॥ छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि ॥ हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः ॥ ३१ ॥ व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः ॥ कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसङ्घाः ॥ ३२ ॥ नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र ॥ अनन्तवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्मगुणप्रवाहः ॥ ३३ ॥

तस्य विष्णोः पक्ष्माणि । परमेष्ठिनः चतुर्मुखस्य धिष्ण्यं स्थानं तस्य भ्रूविजृम्भो भ्रूविलासः आपस्तदभिमानी वरुणः अस्य तालु । रसः अस्य जिह्वा इन्द्रियम् ॥३०॥ छन्दांसि इति ॥ छन्दांसि गायत्र्यादीनि अनन्तस्य वैराजस्य शिरः गृणन्ति अत्र । शिरःशब्देन तदुपरिभागो ब्रह्मरन्ध्रं पूर्वं सत्यं तु शीर्षाणीत्युक्तत्वात् । यशो गृणन्तीति पाठान्तरम् । यमः दंष्ट्रा पुत्रादिस्नेहस्य कलालेशा द्विजानि दन्ताः षण्ढत्वमार्षम् । जनानामुन्मादकरी माया तस्य हासः । यत् योऽयं दुरन्तोऽपारः सर्गः स तस्यापाङ्गमोक्षः कटाक्षः तेनैव सृष्टिप्रवृत्तेः ॥ ३१ ॥ व्रीडेति ॥ व्रीडा लज्जा अस्य उत्तरोष्ठ उपरितनोष्ठः लोभ एवाधरोऽधरोष्ठः धर्मः स्तनोऽपथोऽधर्ममार्गः अस्यपृष्ठभागः कः प्रजापतिः तस्य मेढ्रं मित्रौ मित्रावरुणौ तस्य वृषणौ समुद्राः कुक्षिरुदरं गिरयोऽस्थिसङ्घाः ॥ ३२ ॥ नद्य इति ॥ हे नृपेन्द्र नद्यो गङ्गादयोऽस्य नाड्योऽथ तथा महीरुहः वृक्षा विश्वतनोर्वैराजस्य तनूरुहाणि रोमाणि मातरिश्वा वायुः अनन्तवीर्यस्य भगवतः श्वसितं प्राणः पृथक्पदपाठे मातरिश्वनो विशेषणम् । वयः कालः गतिर्गमनं गुणानां सत्वरजस्तमसां प्रवाहः

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

देवतिर्यङ्मनुष्यादिसृष्टिपरम्परा तस्य कर्म क्रीडा ॥ ३३ ॥ ईशस्येति ॥ हे कुरुवर्य अम्बुवाहान् मेघान् ईशस्य तस्य वैराजस्य भगवतः केशान्विदुः । सायंप्रातरुभे सन्ध्ये तु भूम्नो महतोऽस्य भगवतो वासो वस्त्रम् । अव्यक्तं प्रधानं तु तस्य हृदयमाहुः । स प्रसिद्धः सर्वविकारकोशः सर्वौषध्यादिविकारहेतुभूतश्चन्द्रमास्तदीयं मनः ॥ ३४ ॥ विज्ञानेति ॥ महिं महत्तत्वं तस्य सर्वात्मनः विज्ञानशक्तिं चित्तमामनन्ति कथयन्ति । गिरित्रं श्रीरुद्रमन्तःकरणमहङ्कारमामनन्ति । अश्वा अश्वतर्यः रासभाद्वडवायामुत्पन्नाः उष्ट्राः गजाश्चेत्याद्यास्तस्य नखानि । सर्वे मृगा हरिणादयः पशवश्च गवादयस्तस्य श्रोणिदेश उपास्या इत्यर्थः ॥ ३५ ॥ वयांसीति ॥ वयांसि विचित्ररूपाः पक्षिणः विचित्रं तत्तस्य व्याकरणं नामरूपे व्याकरवाणीति श्रुत्युक्तं शिल्पनैपुण्यम् । मनुः स्वायम्भुवादिः मनीषा बुद्धिः मनुजो मनुष्यवर्गो निवासः स्थानं "पुरुषत्वे चाविस्तरामात्मा" इति श्रुतेः । गन्धर्वा विद्याधराः चारणाः अप्सरसश्चेत्येषां समाहारद्वन्द्वः । स्वरः भगवत्कर्तृकः षड्जादिरागविशेषः असुरानीकवर्यः असुरसमूहश्रेष्ठः प्रह्लादस्तस्य स्मृतिः स्मृतीरिति पाठे स्मृतय इत्यर्थः । पूर्वसवर्णदीर्घ आर्षः । स्वरस्मृतीरसुरानीकवीर्य इति पाठे तु गन्धर्वादयस्तस्य स्वरजातय इत्यर्थः । असुरानीकं वीर्यं प्रभावो यस्य स इति समास एवोद्देश्यविधे-

ईशस्य केशान्विदुरम्बुवाहान्वासस्तु संध्ये कुरुवर्य भूम्नः ॥ अव्यक्तमाहुर्हृदयं मनश्च स चन्द्रमाः सर्वविकारकोशः ॥ ३४ ॥ विज्ञानशक्तिं महिमामनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रम् ॥ अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगा पशवः श्रोणिदेशे ॥ ३५ ॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः ॥ गन्धर्वविद्याधरचारणाप्सरःस्वरस्मृतीरसुरानीकवीर्यः ॥ ३६ ॥ ब्रह्माऽऽननं क्षत्रभुजो महात्मा विड्रूरुरङ्घ्रिश्रितकृष्णवर्णः ॥ नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्मवितानयोगः ॥ ३७ ॥ इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ॥ संधार्यतेऽस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किंचित् ॥ ३८ ॥

यभावः ॥ ३६ ॥ ब्रह्मेति ॥ ब्रह्म ब्राह्मणस्तस्याननं भगवतो मुखद्वयं ब्राह्मणोऽग्निश्च तत्राग्निः पूर्वमेव मुखमग्निरिद्ध इत्युक्तः । क्षत्रं क्षत्रियो रक्षकत्वाद् भुजो यस्य सः विड् वैश्यः व्यवहारनिर्वाहकत्वादूरू यस्य सः अङ्घ्रिश्रितः कृष्णवर्णः सेवाधर्मकः शूद्रो यस्य स एवंविधो महात्मा सर्वात्मा वैराजः नानाभिधा नानानामका ये अभीज्या यष्टव्या वसुरुद्रादयो देवास्तेषां गणैरुपपन्नो युक्तो यो द्रव्यात्मको हविः साध्यो वितानयोगो यज्ञादिप्रयोगः स तस्य कर्म आवश्यकतयाभिप्रेतम् ॥ ३७ ॥ इयानिति ॥ इयानेतावा- ॥ ३ ॥
नसावीश्वरविग्रहस्य यः संनिवेशोऽवयवसंस्थानरूपः स मया ते तुभ्यं कथितः। अस्मिन्स्थविष्ठे वपुषि योगिभिः स्वबुद्ध्या मनः सन्धार्यते यतो यस्मादीश्वरविग्रहाद्व्यतिरिक्तं वस्तु किंचिदपि नास्तीति अयमर्थः । मनो हि स्वचाञ्चल्यवशाद्यत्र यत्र भ्रमति तत्र तत्र भगवतोऽमुकमङ्गमिति स्वबुद्ध्या विचारयेदेवं च मनसः स्वाभाविकाः सर्व एव विषया भगवदङ्गान्येवेति सर्वमपि चिन्तनं भगवच्चिन्तनमेवेति पर्यवस्येत्तदा स्पर्द्धावज्ञादयो नैवोत्पद्येरन् । तद्विषयाणां मनुष्यगर्दभादीनामपि भगवदङ्गभूतत्वेन ध्येयत्वादिति ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं मनसश्चाञ्चल्यनिवृत्तये सर्वत्र भगवदङ्गताभावनया स्पर्द्धाविज्ञादिदोषनिवृत्तये च विराड्देहजीवेश्वराणामभेदेन स्थूलधारणोक्ता । चित्ते स्थिरे तु देहजीवौ भगवति विलाप्य भगवानेव ध्येय इत्याह—स इति ॥ सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स तथाभूत इत्यर्थः । यथा स्वप्ने कल्पितानां जनानामिन्द्रियैः ईक्षिता एक एवात्मा जीवस्तथा भगवानपीत्यर्थः । अतः सत्यम् आनन्दनिधिं च तं भजेत । अन्यत्र देहापत्यादौ धारणाफलभूतसिद्धिषु च न सज्जेत् । यतो यस्मादासङ्गादात्मनः स्वस्य संसारमध्ये पात एव भवति ॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमे द्वितीयस्य व्यधादिमाम् ॥१॥ द्वितीये स्थूले जितस्य मनसः सर्वसाक्षिणि ॥ सर्वेशे धारणा विष्णौ तत्र श्लोका नगाग्नयः ॥ उवाचेत्येकमङ्कचूनाः शशिवर्णा अनुष्टुभः ॥ २ ॥ एवमिति ॥ एवं या धारणोक्ता तया तुष्टाद्धरेः सकाशात् पुरा प्रलयसमये नष्टां सृष्टिस्मृतिं प्रत्यवरुद्ध्य लब्ध्वा व्यवसायात्मिका एवमेवेदं स्रष्टव्यमिति निश्चयरूपा बुद्धिर्यस्य तथाभूतः सन् अत एव तया धारणया विश्वसृष्टिसामर्थ्यात् अमोघा दृष्टिर्यस्य स आत्मयो-

स सर्वधी वृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः ॥ तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे पा॰सं॰ द्वितीयस्कन्धे महापुरुषसंस्थानवर्णनं विराड्रूपकथनं नाम प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ एवं पुरा धारणयाऽऽत्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ॥ तथा ससर्जेदममोघदृष्टिर्यथाप्ययात्प्राग्व्यवसायबुद्धिः ॥ १ ॥ शाब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः ॥ परिभ्रमंस्तत्र न विन्दतेऽर्थान्मायामये वासनया शयानः ॥ २ ॥ अतः कविर्नामसु याव-दर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ॥ सिद्धेऽन्यथाऽर्थे न यतेत भूयः परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥

निः ब्रह्मा अप्ययात्प्रलयात् प्रागिदं विश्वं यथा आसीत्तथा ससर्ज ॥ १ ॥ सर्वत्र विरक्तस्य शुद्धधारणायामधिकारोऽतो वैराग्यार्थं सर्वं निन्दति—शाब्दस्येति ॥ शाब्दं शब्दमयं ब्रह्म वेदस्तस्यैष पन्थाः कर्मफलबोधनप्रकारः यत् अपार्थैः अपगतार्थैरेव "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिनामभिरक्षय्यत्वबोधकशब्दैः साधकस्य धीर्बुद्धिर्ध्यायति तत्तत्फलेच्छां करोति इति तत्र स्वर्गादौ मायामये पथि सुखमिति वासनया शयानः स्वप्नान्पश्यन्निव परिभ्रमन् अर्थान् न विन्दते तत्तल्लोकं प्राप्तोऽपि क्षयिष्णु-त्वात् निरतिशयसुखं न लभते ॥ २ ॥ सर्वकर्मफलत्यागे देहपातमाशङ्क्याह—अत इति ॥ अतः स्वर्गादावपि यथेष्टसुखाभावात् व्यवसायबुद्धिः नेदं सुखमिति निश्चयात्मकबु-द्धिः कविर्धीमान् नामसु नाममात्रेषु भोग्यवस्तुषु यावता वस्तुना अर्थी देहनिर्वाहो यस्य तथाभूतः स्यात् तथा अप्रमत्तः तावन्मात्रेऽपि अनासक्तः स्यात् तत्रापि अन्यथैव यत्नं विनैव अर्थे देहनिर्वाहादौ प्रयोजने सिद्धे सति तत्र यत्ने परिश्रममेव फलं समीक्षमाणः तत्र भूयस्ततोधिकलाभार्थं न यतेत ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

अन्यथासिद्धिमाह—सत्यामिति ॥ क्षितौ सत्यां कशिपोः शय्यायाः प्रयासैः किं प्रयोजनम् । बाहौ स्वतः सिद्धे सति उपबर्हणैः उच्छीर्षकैः किम् । अञ्जलौ सति पुरुधा बहुधा अन्नपात्र्या बहुप्रकारान्नभोजनपात्रेण किम् । धाप्रत्यय आर्षः । दिशः पूर्वाद्या वल्कलं वृक्षत्वक् तदादौ सति दुकूलैः पट्टवस्त्रैः किं प्रयोजनम् ॥ ४ ॥ चीराणीति ॥ चीराणि जीर्णवस्त्रखण्डानि पथि मार्गे पतितानि किन्न सन्ति । परान् बिभ्रति फलादिभिः पुष्णन्ति ते परभृतोऽङ्घ्रिपाः वृक्षाः किं भिक्षां स्वफलपत्रादिरूपान्नैव दिशन्ति । जलार्थं सरितो नद्यः अपि अशुष्यन् किं तथा निवासार्थं गुहाः पर्वतबिलानि किम् । रुद्धाः । सर्वेषामप्यलाभे भगवानेव योगक्षेमं विधास्यतीति विश्वसनीयमित्याह । अजितो भगवान् उपसन्नान् शरणागतान् किं नावति न रक्षति अतः कवयो विवेकिनः धनदुर्मदेनान्धान् कस्माद्धेतोर्भजन्ति अपि तु न भजन्त्येव ॥ ५ ॥ एवमिति ॥ एवं देहादिनिर्वाहे सति य आत्मा प्रियः अर्थः सत्यः अनन्तः भगवान् स्वचित्तेन्तःकरणे स्वत एव सिद्धः अन्तर्यामितया स्थितः अस्ति । यत्र च भगवति संसारहेतोरविद्याया उपरमो निवृत्तिर्भवति

सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ॥ सत्यञ्जलौ किं पुरुधाऽन्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥ ४ ॥
चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोप्यशुष्यन् ॥ रुद्धा गुहाः किमजितोऽवति नोपसन्नान्कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ॥ ५ ॥ एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोर्थो भगवाननन्तः॥तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥
कस्तां त्वनादृत्य परानु चिन्तामृते पशूनसतीं नाम युञ्ज्यात् ॥ पश्यञ्जनं पतितं वैतरण्यां स्वकर्मजान्परितापाञ्जुषाणम् ॥ ७ ॥ केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ॥ चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥ ८ ॥ प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम् ॥ लसन्महारत्नहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम् ॥ ९ ॥

तं भगवन्तं निर्वृतः भजनानन्दनिमग्नः नियतो निश्चितोऽर्थो भगवद्रूपो येन तादृशः सन् नित्यं भजेत ॥ ६ ॥ क इति ॥ यमराजद्वारि यातनानदी वैतरणी तस्यां तत्तुल्यायां संसृतौ पतितं तत्र च स्वकर्मजान् परितापान् जुषाणं भुञ्जानं मुगभाव आर्षः। जनं पश्यन्नपि को नाम जनः तां पूर्वोक्तां परस्य भगवतः अनु चिन्ता मनादृत्य पशून् ऋते विना असतीं विषयचिन्तां युञ्ज्यात् कुर्यात् । यस्तां चिन्तां कुर्यात् स तु पशुरेवेत्यर्थः ॥ ७ ॥ केचिदिति ॥ केचित्तु स्वदेहस्यान्तर्मध्ये यो हृदयावकाशस्तत्र वसन्तं प्रादेशस्तर्जन्यङ्गुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति हृदयप्रमाणं तत्रोपचर्यते चतुर्भुजं कञ्जरथाङ्गादिकं धरति तं पुरुषं धारणया स्मरन्ति ॥ ८ ॥ प्रसन्नेति ॥ प्रसन्नमनुग्रहोन्मुखं वक्त्रं मुखं यस्य तं नलिने इव तापहरे आयते दीर्घे ईक्षणे नेत्रे यस्य तं कदम्बकुसुमस्य यः किञ्जल्कः केशरस्ते इव पिशङ्गे पीते वाससी यस्य तं लसन्ति महारत्नानि येषु तानि हिरण्मयान्यङ्गदानि यस्य तं स्फुरन्ति यानि महारत्नानि तन्मयानि किरीटकुण्डलानि यस्य तं स्मरन्तत्यिनुषङ्गोऽग्रेऽपि ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं प्राणं हृदि अनाहतचक्रेऽधिरोप्य तस्माच्चक्रादुदानस्य वायोर्गत्या तत्सञ्चारप्रकारेण उरसि कण्ठादधोदेशस्थिते विशुद्धिचक्रे नयेत् । ततोऽनन्तरं मनस्वी जितचित्तः ततः स्थानाद्बहुधा गमनसंभवाद्धिया स्वबुद्ध्यानुसन्धाय विचार्य शनकैः स्वतालुमूलं पूर्वचक्रस्यैवाग्रप्रदेशं प्राणं नयेत् प्रापयेत् ॥ २० ॥ तस्मादिति ॥ तस्मादपि स्वतालुमूलाद्बहुधा गमनसंभवात् निरुद्धानि श्रोत्रे नेत्रे नासे आस्यमिति सप्ताऽसूनामयनानि प्राणमार्गा येन तथाभूतः सन् सप्तायतन इत्यपि पाठः । भ्रुवोरन्तरं भ्रूमध्यस्थमाज्ञाचक्रं प्रति प्राणमुन्नयेत् । अनपेक्षः परमेष्ठ्यादिपदनिरपेक्षश्चेत् अकुण्ठा अखण्डा दृष्टिः यस्य तादृशः सन् मुहूर्तार्द्धं तथैव स्थित्वा परं परमात्मानं गतः अनुसन्दधन्मूर्द्धन् मूर्द्धानं निर्भिद्य देहमिन्द्रियाणि च विसृजेत् मूर्द्धन्नित्यार्षम् ॥ २१ ॥ सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह—यदीति ॥ हे नृप यदि पारमेष्ठ्यं ब्रह्मपदं प्रयास्यन्भवति अष्टौ आधिपत्यानि अणिमाद्यैश्वर्याणि यस्मिंस्तद्वैहायसानां विमानेन आकाशे विचरतां सिद्धानां यद्विहारं क्रीडास्थानं वा यदि प्रयास्यन्भवति किं बहुना गुणसंनिवाये गुणसमुदायरूपे ब्रह्माण्डे यत्र कुत्र वा यदि प्रयास्यन्भवति तर्हि देहत्यागावसरे मन इन्द्रियाणि च न विसृजेत्किंतु मनसेन्द्रियैश्च चकारात्प्राणैश्च सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥ २२ ॥ योगेश्वराणामिति ॥ पवन-

तस्माद्भ्रुवोरन्तरमुन्नयेत निरुद्धसप्ताऽयतनोऽनपेक्षः ॥ स्थित्वा मुहूर्तार्धमकुण्ठदृष्टिर्निर्भिद्य मूर्धन्विसृजेत्परं गतः ॥ २१ ॥ यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम् ॥ अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥ २२ ॥ योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम् ॥ न कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥ २३ ॥ वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा ॥ विधूतकल्कोऽथ हरेरुदस्तात्प्रयाति चक्रं नृप शैशुमारम् ॥ २४ ॥ तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥ नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते ॥ २५ ॥

स्यान्तः आत्मा लिङ्गशरीरं येषां तेषां विद्या उपासना तपः भगवद्धर्मः योगः अष्टाङ्गः समाधिः ज्ञानं तानि ये भजन्ति तेषां योगेश्वराणां त्रिलोक्याः अन्तः पातालादिमध्ये ततो बहिर्महर्लोकादिषु च गतिं गमनसामर्थ्यमाहुः तां गतिं कर्मिणः कर्मभिर्नाप्नुवन्ति॥२३॥तां गतिमाह—वैश्वानरमिति॥हे नृप प्रथमं ब्रह्मपथेन ब्रह्मप्राप्तिमार्गेण शोचिषा तेजोमय्या सुषुम्णया नाड्या शरीराद्बहिरपि स्थिततया विहायसा आकाशमार्गेण गतः सन् वैश्वानरम् अग्न्यभिमानिनीं देवतां याति । अथ तदनन्तरं विधूतकल्कः निरस्तमलः क्वाप्यसज्जमान इत्यर्थः । उदस्तादुपरिष्टाद्वर्तमानं हरेः संबन्धि तारारूपं नारायणाधिष्ठितं शैशुमारं पञ्चमस्कन्धे वक्ष्यमाणं शिशुमाराश्रयं ज्योतिश्चक्रं प्रयाति । चक्रस्थानान्यादित्याद्धिध्रुवान्तानि पदानि प्रयाति इत्यर्थः । उदस्तादित्यार्षम् ॥ २४ ॥ तदिति ॥ तज्ज्योतिश्चक्रं विश्वनाभिं सूर्याद्याश्रयं विश्वात्मकपुरुषस्य नाभिस्थानीयं वा अजहल्लिङ्गत्वान्नाभिशब्दस्य चक्रविशेषणत्वेऽपि न क्लैब्यम् । अतिवर्त्य अतिक्रम्य परतः स्वर्गिणां गत्यभावादेक एव विरजेन निर्मलेन अणीयसा अतिसूक्ष्मेण आत्मना

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गदेहेन ब्रह्मविदां स्थानं स्वर्गादिस्थैर्नमस्कृतं महर्लोकमुपैति । यत् यस्मिन् महाकल्पपर्यन्तमायुर्येषां ते विशेषेण बुधाः भृग्वादयः रमन्ते स्वसुखेन वर्तन्ते ॥ २५ ॥ अथो इति ॥ अथो अनन्तरं यदि कल्पपर्यन्तं कौतुकवशात्तत्रैव स्थातुमिच्छति तदा स योगी कल्पान्ते अनन्तस्य शेषस्य मुखानलेन विश्वं त्रैलोक्यं दंदह्यमानं गर्हितं दह्यमानं निरीक्ष्य तत्राप्यूष्मप्राप्तेः यत् द्वैपरार्ध्यं द्विपरार्द्धस्थायि सिद्धेश्वरैर्जुष्टानि सेवितानि धिष्ण्यानि विमानानि यस्मिंस्तत् उ इति श्रैष्ठ्यं सूचितम् । पारमेष्ठ्यं ब्रह्मपदं प्रति निर्याति ॥ २६ ॥ न यत्रेति ॥ अनिदंविदाम् इदं भगवतो ध्यानमजानतां प्राणिनां दुरन्तं दुःखं यस्मिंस्तथाभूतो यः प्रभवो जन्म तस्यान्वनुदर्शनात् तेषां कृपया यच्चित्ततोदो मनःपीडा भवति तमृते तं विना यत्र सत्यलोके कुतश्चिदपि हेतोः शोको नास्ति न च जरा न मृत्युः न च आर्त्तिः न च उद्वेगो भयं केवलमन्यलोके स्थितान् प्राणिनो दुःखितान् दृष्ट्वा कृपयैव खेदो भवति नान्यत्तत्र दुःखम् ॥ २७ ॥ ब्रह्मलोकगतानां तु त्रिविधा गतिः ये पुण्योत्कर्षेण गतास्ते कल्पान्तरे पुण्यतारतम्येनाऽऽधिकारिकाः भवन्ति ये तु हिरण्यगर्भाद्युपासनाबलेन तत्र गतास्ते ब्रह्मणा सह मुच्यन्ते । भगवदुपासकास्तु यदि ब्रह्मलोकं गतास्तत्रैव स्थातुमिच्छन्ति तदा महाकल्पान्ते ब्रह्मणा सह मुच्यन्ते । यदि तदन्तरेव मोक्षमिच्छन्ति तदा स्वेच्छया पृथिव्यादिकावरणभेदनक्रमेण ब्रह्माण्डं भित्त्वा वैष्णवं पदमारोहन्ति तत्र तेषां पृथिव्याद्यावरणभेदप्रकारमाह । तत्रेयं प्रक्रिया। ईश्वराधिष्ठितायाः

अथो अनन्तस्य मुखानलेन दन्दह्यमानं स निरीक्ष्य विश्वम् ॥ निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद् द्वैपराध्यं तदु पारमेष्ठ्यम् ॥ २६ ॥
न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् ॥ यच्चित्ततोदः कृपयाऽनिदंविदां दुरन्तदुःखप्रभवानुदर्शनात् ॥ २७ ॥
ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनाऽपोनलमूर्तिरत्वरन् ॥ ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम् ॥ २८ ॥

प्रकृतेः केनचिदंशेन महत्तत्वं तदंशेनाहङ्कारः तदंशेन शब्दतन्मात्रद्वारा नभः एवं तदंशेनैव स्पर्शरूपरसगन्धतन्मात्रद्वारा क्रमेण वायुतेजोजलभूमयः तैश्चतुर्दशभुवनात्मकं विराट्शरीरं तस्य पञ्चाशत्कोटिकोटियोजनस्य पृथिव्येवाण्डकटाहविशेषशब्दवाच्या । तत्र कोटियोजनविशालं प्रथमावरणं पञ्चाशत्कोटियोजनविशालमित्येके । ततश्चाबादीनां ये परिणता अंशास्तान्येवोत्तरोत्तरं दशगुणान्यावरणानि । अष्टमं तु प्रकृत्यावरणं व्यापकमेव आवरणभेदश्च पूर्वं पूर्वं कार्यावरणतादात्म्यप्राप्त्यनन्तरमुत्तरोत्तरं कारणे कार्यविलापनपूर्वकं कारणतादात्म्यापत्तिस्तथा च लिङ्गशरीरेण पृथिव्यात्मतां प्राप्य तया सह जलं गच्छेत्तत्र भूमिं विलाप्य जलात्मतां प्राप्य तेन सह तेजः गच्छेत् । तत्र जलं प्रविलाप्येत्यादि। अथ श्लोकव्याख्या—तत इति ॥ ततः सत्यलोकभोगानन्तरं निर्भयः कथं यास्यामीति शङ्काशून्यः सन् योगी अत्वरन् तत्तदात्मत्वेन क्लेददाहादिशङ्काभावाद्यथेष्टं भोगान् भुञ्जानः शतार्षः। विशेषं प्रतिपद्य लिङ्गदेहेन पृथिव्यात्मतां प्राप्य ततः तेनात्मना पृथ्वीरूपेण प्रागुक्तरीत्या अपः जलानि प्राप्य अबात्मतां प्रतिपद्य एवमग्रेऽपि द्रष्टव्यम् । ततोऽनलमूर्तिः तेजआवरणं प्राप्य ज्योतिर्मयः सन् काले भोगावसाने वायुमुपेत्य वाय्वात्मना बृहत आत्मनः ब्रह्मणः लिङ्गं मूर्त्तित्वेनोपास्यं खमाकाशमुपैति ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उन्निद्रेति ॥ उन्निद्रं विकसितं यत् हृत्पङ्कजं तस्य कर्णिकैव आलयः स्थानं तस्मिन् योगेश्वरैरास्थापितौ पादपल्लवौ यस्य तं श्रीर्लक्ष्मीरेव लक्ष्मणं चिन्हं वामस्तनोर्ध्वं लक्ष्मीरेखायुक्तं यस्य तं कौस्तुभं रत्नं कन्धरायां कन्धरासन्नवक्षसि यस्य तम् । यद्वा । कौस्तुभरत्नं तद्ग्रथनहिरण्मयसूत्रं कन्धरायां यस्य अम्लानाः लक्ष्म्यः शोभा यस्यास्तया एकवचनान्तस्यैव लक्ष्मीशब्दस्योरःप्रभृतिषु पाठादत्र बहुत्वान्न कप् । वनमालया आचितं व्याप्तम् ॥ १० ॥ विभूषितमिति ॥ मेखलया कटिसूत्रेण महाधनैरमूल्यरत्नादियुक्तैरङ्गुलीयकैर्नूपुरकङ्कणादिभिश्च विभूषितं स्निग्धानि अमलानि आकुञ्चितानि नीलानि च यानि कुन्तलानि तैर्विरोचमाने आनने यो हासस्तेन पेशलं सुन्दरम् ॥ ११ ॥ अदीनेति ॥ अदीनम् अत्युदारं यल्लीलाहसितं तेन युक्तं यदीक्षणं तेनोल्लसन्तो भ्रूभङ्गाः भ्रूविक्षेपास्तैः संसूचितो भूर्यनुग्रहो येन तं चिन्तामयं चिन्तयैवाविर्भवन्तमेनमीश्वरं यावद्धारणया मनोऽवतिष्ठते निश्चलं भवति तावदीक्षेत ॥ १२ ॥ एकैकश इति ॥ गदाभृतः हरेः पादादि पादप्रभृति यावद्धसितं मन्दस्मितावधि एकैकशः प्रत्येकमङ्गानि धियानुभावयेत् चिन्तयेत् । यथा यथा ध्यानेन धीः शुध्यति तस्मिन्निश्चला भवति तथा तथा जितं जितमनायासेन स्फुरितं स्थानं पादगुल्फाद्यवयवमपोह्य त्यक्त्वा परं परं

उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ॥ श्रीलक्ष्मणं कौस्तुभरत्नकन्धरमम्लानलक्ष्म्या वनमालयाऽऽचितम् ॥ १० ॥
विभूषितं मेखलयाङ्गुलीयकैर्महाधनैर्नूपुरकङ्कणादिभिः ॥ स्निग्धामलाकुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥ ११ ॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ॥ ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयाऽवतिष्ठते ॥ १२ ॥ एकैकशोऽङ्गानि धियाऽनुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितं जितं स्थानमपोह्य धारयेत्परं परं शुध्यति धीर्यथा यथा ॥ १३ ॥ यावन्न जायेत परावरेऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १४ ॥

जङ्घाजान्वाद्यवयवं धारयेत् ध्यायेत् ॥ १३ ॥ पूर्वोक्तवैराजधारणाया एतद्धारणाङ्गत्वमाह—यावदिति ॥ परे ब्रह्मादयः अवरे यस्मात्तस्मिन् विश्वस्येश्वरे द्रष्टरि अस्मिंश्चैतन्यघनविग्रहे अशुद्धबुद्धित्वाद्यावद् भक्तियोगः परमप्रेमलक्षणो न जायेत तावच्चित्तशुद्ध्यर्थमग्निहोत्राद्यावश्यकीः क्रियाः कुर्वंस्तदवसाने तत्समाप्तौ सावकाशसमये एतेन कर्मापि भक्तियोगपर्यन्तमेवेत्युक्तम् । प्रयतः प्रयत्नवान् सन् पुरुषस्य भगवतः स्थवीयः स्थूलतरं पूर्वोक्तं रूपं स्मरेत ध्यायेत् तङ्गार्षः । अत्र भागवताः । धारणायां चतुर्विधा योगिनः संभवन्ति । तत्र ये भगवद्रूपमनालम्बमानाः प्राणमनोधारणावन्तस्ते तु विगीता एव । एके पूर्वोक्तवैराजधारणया शुद्धचित्ता मृणालगौरायतेत्यादितृतीयस्कन्धोक्तदन्तर्यामिधारणावन्तः अन्ये वैराजधारणानन्तरं व्यष्टिविराडन्तर्यामिचतुर्भुजरूपधारणावन्तः । परे तु स्वत एव शुद्धचित्ताः प्रथमत एव व्यष्ट्यन्तर्यामिचतुर्भुजधारणावन्तस्त एवात्र केचित्स्वदेहेत्यत्रोक्ताः ॥ १४ ॥

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

एवमासन्नमृत्योः कृत्यमुक्तम् इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह–स्थिरमिति ॥ अङ्ग हे राजन् यतिर्योगाभ्यासी यदा इमं लोकं देहं जिहासुः स्यात् त्यक्तुमिच्छेत्तदा देशे पुण्यक्षेत्रे काले चोत्तरायणादौ मनो न सज्जयेत् देशकालौ न सिद्धिहेतू किंतु भगवानेवेति दृढनिश्चयो भवेत् । ततः जितासुः वशीकृतप्राणः स्थिरं सुखकरं चासनमाश्रितो मनसा प्राणानिन्द्रियाणि यच्छेत् अनन्यपराणि कुर्यात् । प्राणमित्यपि पाठः ॥ १५ ॥ मन इति ॥ धीरो मुमुक्षुः अमलया स्वबुद्ध्या मनो नियम्य बुद्धिव्यापारमात्ररतं कृत्वा एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निनयेत् नियच्छेत् तं क्षेत्रज्ञमात्मनि शुद्धे तं च शुद्धमात्मानमात्मैवाहमित्यात्मनिशुद्धब्रह्मणि अवरुद्ध्य एकीकृत्य तेन लब्धा उपशान्तिः आत्मानन्दो येन तथाभूतः सन् कृत्यात्प्रयत्नाद्विरमेत ततः परं प्राप्याभावात् तङार्षः ॥१६॥ न यत्रेति॥ यत्रात्मस्वरूपे अनिमिषां देवानां मिषतेः क्विप् । परो नियन्ता कालो न प्रभुः किमपि कर्तुं न समर्थः । तत्र ये देवा जगताम् ईशिरे ईशा अभूवन् आमभाव आर्षः । अधीगर्थेति कर्मणि षष्ठी । ते कालेन नियम्या देवाः

स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममङ्ग लोकम् ॥ काले च देशे च मनो न सज्जयेत्प्राणं नियच्छेन्मनसो जितासुः ॥ १५ ॥
मनः स्वबुद्ध्याऽमलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि ॥ आत्मानआत्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात् ॥ १६ ॥ न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ॥ न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान्प्रधानम् ॥ १७ ॥ परं पदं वैष्णवमामनन्ति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्याऽर्हपदं पदे पदे ॥ १८ ॥ इत्थं मुनिस्तूपरमेव्द्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः ॥ स्वपार्ष्णिनाऽऽपीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥१९॥ नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः ॥ ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत ॥ २० ॥

कुतो नु प्रभवः स्युः यत्र सत्वं न प्रभुः रजस्तमश्च न प्रभू न वै विकारोऽङ्कारः न च महान् महत्तत्वं न च प्रधानं प्रकृतिः प्रभुः ॥ १७ ॥ परमिति ॥ यत् यस्मात् न तत् अतत् आत्मव्यतिरिक्तं नेति नेतीत्येवं सर्वमुत्सिसृक्षवः उत्स्रष्टुं त्यक्तुमिच्छवः परमविवेकिनः दौरात्म्यं देहादिष्वात्मभावं विसृज्य अर्हस्य पूज्यस्य भगवतः पदं चरणारविन्दं पदे पदे क्षणे क्षणे हृदा हृदयेन उपगुह्य आश्लिष्य अनन्यसौहृदाः न ततोऽन्यस्मिन् सौहृदं येषां तथाभूतास्तत्पूर्वोक्तं वैष्णवं विष्णुसंबन्धि परं सर्वत उत्कृष्टं पदम् आमनन्ति निरूपयन्ति ॥ १८ ॥ इत्थमिति ॥ इत्थं ब्रह्मत्वेन व्यवस्थितः विज्ञानं शास्त्रं तेन जाता या दृक् ज्ञानं विज्ञानमनुभव एव दृगिति वा तस्य वीर्येण सुरन्धिता विनाशिताः आशयाः विषयवासना यस्य स मुनिर्योगी तु कृत्यादुपरमेत् ।तुशब्देन यदि प्रयास्यन्निति वक्ष्यमाणात्सकाशाद्विशेष उक्तः। देहत्यागकाले तु जितः क्लमो येन तादृक् सन् स्वपार्ष्णिना गुदं मूलाधारमापीड्य निरुद्ध्य ततोऽनिलं प्राणं षट्सु नाभ्यादिषु वक्ष्यमाणेषु स्थानेषु उन्नमयेदूर्ध्वं नयेत्॥१९॥ नाभ्यामिति ॥ मुनिर्योगी नाभ्यां मणिपूरकचक्रे स्थितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घ्राणेनेति ॥ घ्राणेन्द्रियेणाधिष्ठितेन गन्धमुपेत्य रसनेनैवेन्द्रियेण रसमुपेत्य तथा दृष्ट्या नेत्रेण तु रूपमुपेत्य त्वचैव श्वसनं स्पर्शनमुपेत्य श्रोत्रेण च नभोगुणत्वं शब्दात्मतामुपेत्य प्राणेन तत्कर्मेन्द्रियेण चाकूतिं तत्तत्क्रियां योग्युपैति प्राप्नोति । एतेनेन्द्रियार्थानां भूतसूक्ष्माणां चातिक्रम उक्तः । अत्र पृथिव्याद्यावरणेष्वेव गन्धादयः सन्ति तेषामतिक्रमं पूर्वमनुक्तं संप्रत्याहेति ज्ञेयम् ॥ २९ ॥ स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहङ्कारप्राप्त्या महदादिप्राप्तिमाह—स इति ॥ तत्र भूतसूक्ष्माणामिन्द्रियाणां च संनिकर्ष लयस्थानं तामसं राजसं चाहङ्कारं संसाद्य तत्राहङ्कारस्त्रिधा तत्र तामसाद् भूतसूक्ष्माणि जायन्ते । राजसाद्बहिर्मुखानि दशेन्द्रियाणि सात्विकान्मन इन्द्रियदेवताश्च तेषां लयश्च तत्तदहङ्कारे तथा च तामसाहङ्कारे भूतसूक्ष्माणि राजसाहङ्कारे इन्द्रियाणि प्रविलाप्येत्यर्थः । ततश्च मनोमयं देवमयं च सात्विकं विकार्यमहङ्कारं संसाद्य प्राप्य सात्विकाहङ्कारे मनो देवताश्च प्रविलाप्येत्यर्थः । ततश्चावशिष्टेन तेनाहङ्कारेण सह गत्या गमनेन स योगी विज्ञानतत्वं महत्तत्वं याति । अहङ्कारं महत्तत्त्वे प्रविलापयति इत्यर्थः । ततश्च तेन महत्तत्त्वेन गुणानां सन्निरोधो लयो यस्मिंस्तत्प्रधानं प्रयाति महत्तत्त्वं प्रधाने प्रविलापयतीत्यर्थः ॥ ३० ॥ तेनात्मनेति ॥ अङ्ग हे राजन् तेनात्मना प्रधानरूपेण

घ्राणेन गन्धं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव ॥ श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥ २९ ॥
स भूतसूक्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्यम् ॥ संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधम् ॥ ३० ॥
तेनाऽऽत्मनात्मानमुपैति शान्तमानन्दमानन्दमयोऽवसाने ॥ एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग ॥ ३१ ॥
एते सृती ते नृप वेदगीते त्वयाऽभिपृष्टे ह सनातने च ॥ ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ॥ ३२ ॥
न ह्यतोन्यः शिवः पन्था विशतः संसृताविह ॥ वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ३३ ॥

वर्त्तमानोऽपि तस्याप्यवसाने लये सति स्वयमानन्दमयः शान्तमविकृतमानन्दविग्रहमात्मानं परमात्मानमुपैति प्राप्नोति । एतां भागवतीं भगवत्संबन्धिनीं गतिं यो गतः स पुनरिह संसारे नैव विषज्जते नैवावर्त्तते ॥३१॥ एते इति ॥ हे नृप एते ह सृती त्वया म्रियमाणैः किं कार्यमिति सामान्यकुक्षिगतत्वेन पृष्टे वेदे न गीते न तु स्वोत्प्रेक्षिते सनातने च ये च सृती पुरा ब्रह्मणाराधितोऽतः प्रत्यक्षः संस्तेन पृष्टो भगवान्वासुदेवो ब्रह्मणे आह स्म । ते एते सृती मोक्षमार्गौ ज्ञेये । तत्र अनपेक्षो निर्भिद्य मूर्द्धन्‌ विसृजेत्परं गत इति या सद्योमुक्तिः सैका सृतिः । यदि प्रयास्यन्नित्यादिना क्रममुक्तिश्च द्वितीया सृतिः । यद्वा । अर्चिरादिमार्गो धूमादिमार्गश्चेति सृती ज्ञेये ते अपि वक्ष्येते वेदे च । "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति सद्योमुक्तिः । तेर्चिरभिसंभवन्ति इत्यादिना क्रममुक्तिश्चोक्ता ॥ ३२ ॥ न हीति ॥ इह संसृतौ संसारे विशतः पुंसः यतः साधनात् वासुदेवे भगवति भक्तियोगो भवेत् अतोऽन्यः शिवः सुखकरः पन्था नास्ति ॥ ३३ ॥

२

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

भगवानिति ॥ भगवान् ब्रह्मा कूटस्थो निर्विकार एकाग्रचित्तः सन् स्वमनीषया त्रिः त्रीन् वारान् कात्स्न्र्येन साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य यतः साधनादात्मनि हरौ रतिर्भक्तिर्भवेत्तदेव साधनं समीचीनमार्गतयाऽध्यवस्यत् निश्चितवान् । "बहुलं छन्दस्यमाङ्योगेऽपि" इत्यडभावः ॥३४॥ नन्वननुभूते हरौ कथं रतिर्भवेत्तत्राह—भगवानिति ॥ द्रष्टा भगवान् हरिः सर्वभूतेषु स्वात्मना जीवान्तर्यामितया लक्षितस्तथा दृश्यैर्बुद्ध्यादिभिर्लक्षणैः स्वप्रकाशान्तर्यामिकलक्षकैः लक्षितः तथा अनुमापकैरनुमानजनकैर्दृश्यैर्बुद्ध्यादिभिर्हेतुभिर्लक्षितः अनुभूतः जीवाः प्रयोजककर्तृस्वामिका अस्वातन्त्र्यात् तक्षादिवत् इति जीवान्तर्यामितयानुमानम् । तथा दृश्यानां जडानां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिमुखेन बुद्ध्यादीनि स्वप्रकाशमन्तर्यामिणं लक्षयन्ति तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति व्याप्तिमुखेन स्वतन्त्रं कर्त्तारमनुमापयन्ति ॥ ३५ ॥ तस्मादिति ॥ हे राजन् तस्माद्धेतोः सर्वात्मना एकाग्रेण मनसा सर्वत्र देशे सर्वदा काले च हरिर्भगवान् नृणां श्रोतव्यः कीर्तितव्यः स्मर्तव्यश्च ॥ ३६ ॥ पिबन्ती-

भगवान्ब्रह्म कात्स्न्र्येन त्रिरन्वीक्ष्य मनीषया ॥ तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥ ३४ ॥ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ ३५ ॥ तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ ३६ ॥ पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतम् ॥ पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥ ३७ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे पुरुषसंस्थानुवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ एवमेतन्निगदितं पृष्टवान्यद्भवान्मम ॥ नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥ १ ॥ ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम् ॥ इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥

ति ॥ सतां भक्तानां श्रवणरूपेषु पुटेषु संभृतं सर्वात्मनो भगवतः कथारूपममृतं ये पिबन्ति आदरेण शृण्वन्ति श्रवणपुटेषु संभृतं सतामात्मनो भगवतः कथामृतमिति वान्वयः । ते विषयवासनाभिर्विशेषेण दूषितमाशयं स्वान्तःकरणं पुनन्ति शोधयन्ति तस्य भगवतश्चरणसरोरुहस्यान्तिकं समीपं व्रजन्ति च ॥ ३७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीये द्वितीयस्य व्यधादिमाम् ॥ २ ॥ तृतीये विविधैः कामैः प्रोक्तं नानासुरार्चनम् ॥ हरिभक्तेः प्रशंसात्र श्लोकानां पञ्चविंशतिः ॥ उवाचेति द्वयं चाष्टाविंशतिः स्यादनुष्टुभाम् ॥ ३ ॥ अथान्यदेवताभजनस्य तुच्छफलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति—एवमिति ॥ मनुष्येषु ये मनीषिणस्तेषां म्रियमाणानाम् आसन्नमृत्यूनां नृणां यत् कृत्यं तद्यद् भवान् मम मां पृष्टवांस्तदेवमेतद्धरिकथाश्रवणादिकं निगदितं शास्त्रेषु विहितम् ॥ १ ॥ किं वा भजनीयमिति पृष्टं तत्र मन्दधियां भजनीयानाह—ब्रह्मवर्चसेति ॥ वेदाध्ययनादिजनितं तेजो ब्रह्मवर्चसं तत्कामः ब्रह्मणस्पतिं वेदस्य पतिं ब्रह्माणं यजेत । "षष्ठ्याः पतिपुत्र०" इत्यादिना छान्दसं विसर्गस्य सत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रियसामर्थ्यकामस्तु इन्द्रं यजेतेत्यग्रेऽप्यनुषङ्गः ।प्रजाकामः पुत्रकामः प्रजापतीन् दक्षादीन् यजेत॥२॥देवीमिति ॥ श्रीः सम्पत्तिस्तत्कामः देवीं मायां दुर्गां यजेत।तेजस्कामः विभावसुमग्निं यजेत । वसुकामो धनमात्रार्थी द्रोणादीन् वसून् यजेत । वीर्यं प्रभावस्तत्कामो रुद्रान् यजेत । ततश्च वीर्यवान् भवतीति शेषः । यद्वा । वीर्यवान् बलवान्पुरुषो वीर्यकामः बहुस्त्रीसंभोगार्थकशुक्रकामश्चेत् रुद्रान् यजेत् ॥ ३ ॥ अन्नेति ॥ अन्नं भोज्यम् आद्यं भक्ष्यं च तत्कामस्त्वदितिं यजेत। स्वर्गकामः अदितेः सुतान् द्वादशादित्यान्यजेत । राज्यं राज्ञः कर्म तत्कामो विश्वान् देवान् यजेत । अग्रे तु राज्यं राजत्वमिति भेदः । विशां देशस्थप्रजानां संसाधकः स्वाधीनतामिच्छन् साध्यान् यजेत । यद्वा । विशां वैश्यवृत्तीनां कृषिवाणिज्यादीनां साधने प्रवृत्तः साध्यान् यजेत ॥ ४ ॥ आयुरिति ॥ आयुर्वृद्धिकामः अश्विनौ देवौ देववैद्यौ यजेत । पुष्टिकामः इलां भूम्यभिमानिनीं देवतां यजेत् । प्रतिष्ठास्थानादप्रच्युतिर्लोकसम्माननं वा तत्कामः पुरुषो लोकमातरौ प्राण्याधारभूतौ रोदसी द्यावापृथिव्यौ यजेत ॥ ५ ॥ रूपेति ॥ रूपाभिकामः गन्धर्वान्

देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुम् ॥ वसुकामो वसून्रुद्रान्वीर्यकामोऽथ वीर्यवान् ॥ ३ ॥ अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान् ॥ विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशाम् ॥ ४ ॥ आयुःकामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत् ॥ प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥५॥ रूपाभिकामो गन्धर्वान्स्त्रीकामोऽप्सर उर्वशीम् ॥ आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम् ॥ ६ ॥ यज्ञं यजेद्यशःकामः कोशकामः प्रचेतसम् ॥ विद्याकामस्तु गिरिशं दाम्पत्यार्थ उमां सतीम् ॥ ७ ॥ धर्मार्थं उत्तमश्लोकं तन्तुं तन्वन्पितॄन्यजेत् ॥ रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥८॥ राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन्यजेत् ॥ कामकामो यजेत्सोममकामः पुरुषं परम् ॥ ९ ॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥

यजेत । स्त्रीकामः सुन्दरस्त्रीप्राप्तिकामः अप्सराश्चासावुर्वशी च तां यजेत । सर्वेषाम् आधिपत्यकामः परमेष्ठिनं ब्रह्माणं यजेत ॥ ६ ॥ यज्ञमिति ॥ यशस्कामः यज्ञं यज्ञोपाधिं विष्णुं यज्ञसंज्ञमिन्द्रं वा यजेत् । कोशो धनसंचयस्तत्कामः प्रचेतसं वरुणं यजेत । वसुकाम इत्यत्र धनमात्रमिति भेदः।ब्रह्मविद्याकामस्तु गिरिशं यजेत । दाम्पत्यं दम्पत्योरन्योन्यप्रीतिस्तदेवार्थो यस्य स उमां सतीं यजेत ॥ ७ ॥ धर्मार्थ इति ॥ धर्मार्थः धर्मकामः उत्तमश्लोकोपाधिं विष्णुं धर्मं वा यजेत।तन्तुं तन्वन् सन्ततिवृद्धिमिच्छन् पितॄन् अग्निष्वात्तादीन् यजेत ।रक्षा बाधानिवृत्तिस्तत्कामः पुण्यजनान् यक्षान् यजेत। ओजस्कामो बलकामो मरुद्गणान् यजेत् ॥ ८ ॥ राज्येति ॥ राज्यकामः राजत्वकामः मनून् मन्वन्तरपालान् देवान् यजेत । पूर्वं राज्यं राज्ञः कर्म अत्र राजत्वम् इति भेदः । अभिचरन् शत्रुमरणमिच्छंस्तु निर्ऋतिं राक्षसं यजेत । कामकामः कामभोगेच्छुः सोमं चन्द्रं यजेत । अकामो वैराग्यकामः परं पुरुषं प्रकृतिव्यतिरेकोपाधिमीश्वरं यजेत ॥ ९ ॥ मन्दधियां कृत्यमुक्त्वा उदारधियां कृत्यमाह—अकाम इति ॥ अकामः एकान्तभक्तः

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

कामनाक्षयकामो वा उक्तानुक्तसर्वकामो मोक्षकामो वा उदारधीर्जनः तीव्रेणाऽविच्छिन्नेन भक्तियोगेन परं पुरुषं पूर्णन्निरुपाधिं यजेत। मोक्षकामस्यापि सकामत्वसूचनार्थम का-मात्पृथगुपादानम् ॥ १० ॥ अन्यदेवतायजनस्यापि भगवद्भक्तिरेव मुख्यं फलमित्याह—एतावानिति ॥ इह लोके यजतामिन्द्रादीन् भजतामपि यत् भागवतानां सङ्गतो भगवत्यचलो भावः निश्चला भक्तिर्भवति तत् एतावानेव निःश्रेयसस्योदयो लाभः अन्यत्सर्वं तुच्छमित्यर्थः। देवतान्तरभजने भगवद्भक्तसङ्गः ततो भगवद्भक्तिरित्यर्थः ॥ ११ ॥ ज्ञानमिति ॥ यत् यासु हरिकथासु आ सर्वतः प्रतिनिवृत्तमुपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तथाभूतं भवति। उत अपि आत्मप्रसादश्चित्तनैर्मल्यमपि यतो भवति यत्र आत्मप्रसादे सति गुणेषु विषयेष्वसङ्गो वैराग्यं च भवति। उभयत्रेति पाठान्तरे तु इहामुत्र च गुणेष्वसङ्गो भवति। अथ कैवल्ये मोक्षे यः संमतः कैवल्यमित्येव संमतो वा यः पन्थाः स तादृशो भक्तियोगश्च भवति तासु हरिकथासु को नाम निर्वृतः श्रवणसुखानुभववान् रतिं न कुर्यात् ॥ १२ ॥ इतीति ॥ इत्येवं पूर्वोक्तं शुकेनाभि-

एतावानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसङ्गतः ॥ ११ ॥ ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसङ्गः ॥ कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ १२ ॥ शौनक उवाच ॥ इत्यभि-व्याहृतं राजा निशम्य भरतर्षभः ॥ किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कविम् ॥१३॥ एतच्छुश्रूषतां विद्वन्सूत नोऽर्हसि भाषितुम् ॥ कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम् ॥ १४ ॥ स वै भागवतो राजा पाण्डवेयो महारथः ॥ बालक्रीडनकैः क्रीडन्कृष्णक्रीडां य आददे ॥ १५ ॥ वैयासकिश्च भगवान्वासुदेवपरायणः ॥ उरुगायगुणोदाराः सतां स्युर्हि समागमे ॥ १६ ॥ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ॥ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ॥ १७ ॥

व्याहृतं कथितं निशम्य भरतर्षभः राजा परीक्षित् ऋषिं परब्रह्मनिष्ठं कविं शब्दब्रह्मणि निष्णातं वैयासकिं शुकं भूयः अन्यत्किं पृष्टवान् ॥ १३ ॥ एतदिति ॥ हे सूत हे विद्वन् एतच्छुकपरीक्षित्संवादरूपं शुश्रूषतां श्रोतुमिच्छतां शता आर्षः। नोऽस्माकं त्वं भाषितुमर्हसि। ध्रुवं यतः हरिकथैवोदर्क उत्तरफलं यासु तथाभूताः कथाः सतां भागवतानां सदसि स्युरिति नात्र संदेहः। एतेन विश्वसर्गविसर्गमन्वन्तरादिकथानामपि हरिकथोदर्कत्वमेव ज्ञेयम् ॥१४॥ स वै इति ॥ स वै पाण्डवेयः महारथः राजा भागवत एव यो राजा बाल्ये बालक्रीडनकैः क्रीडन् कृष्णक्रीडां कृष्णक्रीडाकरणम्। यद्वा। कृष्णपूजारूपां क्रीडामादावेव आददे स्वीकृतवान् ॥ १५ ॥ वैयासकिरिति ॥ भगवान् वैयासकिः शुकश्च वासुदेवपरायणः तत्रागता अन्येऽपि भागवता एव अतस्तेषां सतां समागमे उरुगायो भगवांस्तस्य गुणैरुदाराः श्रेष्ठाः कथाः स्युः ॥ १६ ॥ नात्र विलम्बः कार्य इत्याह—आयुरिति॥ असौ सूर्यः उद्यन्नुदयं प्राप्नुवन् अस्तप्रदर्शनं च यन् गच्छन् इणः शता। यत् येन जनेन उत्तमश्लोकस्य वार्त्तया क्षणो नीतस्तस्य आयुः ऋते वर्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यित्वा पुंसामायुर्वृथैव हरति। हरिकथाक्षणस्तु वृथा न याति तत्क्षणसाफल्यमात्रात्सर्वायुःसाफल्यमत्रोच्यते। एकस्यां शाखायां फलितायां वृक्षः फलित इतिवत् ॥ १७॥ जीवनमात्रं त्वायुषः फलं न वाच्यमित्याह–तरव इति ॥ तरवः किन्न जीवन्ति भस्त्राश्चर्मकोशा उत अपि किन्न श्वसन्ति। अपरे ग्रामपशवः किं न खादन्ति नाश्नन्ति न मेहन्ति रेतःसेकं मैथुनं न कुर्वन्ति किम् ॥ १८ ॥ तदेवाह–श्वविडिति ॥ गदाग्रजो हरिः नाम जातु कदाचिदपि यत् कर्णपथो पेतो यस्य श्रवणविषयतां गतो न भवति स पुरुषः पुरुषाकारः पशुः श्वविड्वराहोष्ट्रखरैः संस्तुतः तत्र श्वभिः कुक्कुरैः अवज्ञास्पदत्वात् विड्वराहैर्ग्रामसूकरैः कश्मलवद्विषयासक्तत्वात् उष्ट्रैः कण्टकसमदुःखभाक्त्वात् खरैर्भारवाहित्वात् सदृशतया कल्पितः पृथग्धर्माणामेकेनैव धारणात् स्तुतो वा ॥ १९ ॥ तस्याङ्गानि च वृथेत्याह–बिले इति ॥ हे सूत बत खेदे उरुक्रमस्य विक्रमान् न शृण्वतः अशृण्वतो नरस्य ये कर्णपुटे ते सर्पबिले इव वृथारन्ध्रे उरुगायस्य हरेः गाथाः पुरुषो न चेदुपगायति तदा तस्य जिह्वा दार्दुरिका मण्डूकजिह्वेव वृथा कटुभाषिणी

तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत ॥ न खादन्ति न मेहन्ति किं ग्रामपशवोऽपरे ॥ १८ ॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ॥ न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ १९ ॥ बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य ॥ जिह्वाऽसती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ॥ २० ॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ॥ शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥२१॥ बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ॥ पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २२ ॥ जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ॥ श्रीविष्णुपद्यामनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धम् ॥ २३ ॥ तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ॥ न विक्रियेताऽथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥

असती च ॥ २० ॥ भार इति ॥ पट्टेन पट्टवस्त्रोष्णीषेण किरीटेन च जुष्टमप्युत्तमाङ्गं शिरो यदि मुकुन्दं न नमेत् तदा परं केवलं भार एव। लसन्ती काञ्चनकङ्कणे ययोस्तथाभूतावपि करौ वाशब्दोऽप्यर्थे यदि हरेः सपर्यां नो कुरुतस्तदा शावौ शवो मृतकस्तत्संबन्धिनाविवाशुद्धावेव ॥ २१ ॥ बर्हायिते इति ॥ नराणां ये नयने विष्णोर्लिङ्गानि मूर्तीर्न निरीक्षतो न निरीक्षेते तङभाव आर्षः। ते बर्हायिते मयूरपिच्छगतनेत्रतुल्ये। नृणां यौ पादौ हरेः क्षेत्राणि तीर्थादीनि नानुव्रजतस्तौ द्रुमवज्जन्म भजत इति तथा वृक्षमूलतुल्यौ ॥ २२ ॥ एकैकानि अङ्गानि निन्दित्वा सर्वाणि निन्दति–जीवन्निति ॥ यस्तु मर्त्यो भागवतानामङ्घ्रिरेणुं जातु कदाचिदपि नाभिलभेत अभितो न स्पृशेत् सर्वाङ्गेषु न धारयेत् स जीवन्नपि शवो मृततुल्यः। प्रेतविशेष इव चेष्टमानः साधून् भीषयते। यस्तु श्रीविष्णुपद्याः विष्णुपदलग्नत्वेन विष्णुपदीत्यभिधानायास्तुलस्याः सुगन्धं न वेद अवघ्राय नाभिनन्देत् सोऽपि मनुजः श्वसन् जीवन्नपि शवो मृततुल्य एवेत्यर्थः ॥ २३ ॥ बाह्यमङ्गं निन्दित्वाऽन्तरङ्गमपि निन्दति–तदिति ॥ बत खेदे। हरि-

CC-0. In Public Domain. Digitization by eGangotri

नामधेयैः हरिवाचकशब्दैः स्वयमन्येन वा गृह्यमाणैर्यद्धृदयं न विक्रियेत तदिदमश्मसारमश्मन इव सारं काठिन्यं यस्य तथाभूतम्। अथेति नामश्रवणानन्तरमेव। यद्वा। नेत्रे जलमानन्दाश्रुगात्ररुहेषु हर्षः रोमाञ्चश्च भवति तदा ताभ्यां तद्विकारो भक्तिलक्षणः ज्ञायेतेति शेषः ॥ २४ ॥ अथेति ॥ अङ्ग हे सूत अथ तस्मात् साधु सम्यक् पृष्टः सन् आत्मविद्यायां विशारदो विपुणः वैयासकिः नृपतिं प्रति यदाह तदस्माकम् अभिधेहि। यतो भागवतेषु प्रधानस्त्वमस्माकं मनोनुकूलं हर्षकरं प्रभाषसे ॥ २५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥गङ्गासहायस्तृतीये द्वितीयस्य व्यधादिमाम् ॥३॥ चतुर्थे सृष्ट्यादिप्रश्नप्रसङ्गान्नारदाजयोः॥संवादो वर्ण्यते तत्र श्लोकाः सार्द्धपूर्वाहवः ॥ चत्वार्युवाचेति सार्द्धा एकत्रिंशदनुष्टुभः ॥ ४ ॥ वैयासकेरिति ॥ वैयासकेः शुकस्य भगवान् सर्वभूतेषु लक्षित इत्येवंभूतमात्मनो भगवतस्तत्त्वस्य निश्चयो यस्मात्तद्वैयासकेः शुकस्य वच उपधार्याऽऽकलय्य औत्तरेयः परीक्षित् श्रीकृष्णे सतीं विद्यमानामेव श्रेष्ठां मतिं भक्तिं व्यधात् विशेषेण अकरोत् ॥१॥ आत्मजायेति ॥ आत्मा देहः जायासुतौ

अथाभिधेह्यङ्ग मनोनुकूलं प्रभाषसे भागवतप्रधानः ॥ यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधुपृष्टः ॥ २५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ सूत उवाच ॥ वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ॥ उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥ आत्मजायासुतागारपशुद्रविणबन्धुषु ॥ राज्ये चाविकले नित्यं निरूढां ममतां जहौ ॥ २ ॥ पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् ॥ वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥ राजोवाच ॥ समीचीनं वचो ब्रह्मन्सर्वज्ञस्य तवाऽनघ ॥ तमो विशीर्यते मह्यं हरेः कथयतः कथाम् ॥ ५ ॥ भूय एव विवित्सामि भगवानात्ममायया ॥ यथेदं सृजते विश्वं दुर्विभाव्यमनीश्वरैः ॥ यथा गोपायति विश्वं यथा संयच्छते पुनः ॥ ६ ॥

च अगारं गृहं पशवः द्रविणं धनं बन्धवश्च तेषु अविकले निरुपद्रवे राज्ये च नित्यं सर्वदा निरूढां ममतां स्वकीयत्वाभिमानं जहौ तत्याज ॥ २ ॥ पप्रच्छेति द्वयम् ॥ हे सत्तमाः कृष्णानुभावश्रवणे श्रद्दधानः महामनाः भगवति वासुदेवे दृढम् आत्मभावं परप्रेम्णा भगवदात्मत्वं गतः स राजा संस्थां मृत्युं विज्ञाय यत् त्रैवर्गिकं धर्मार्थकामसाधनं कर्म तत्संन्यस्य त्यक्त्वा यूयं यत् यं मां पृच्छथ तमिममेवार्थं हरिलीलालक्षणं पप्रच्छ च ॥ ३ ॥ ४ ॥ समीचीनमिति ॥ हे ब्रह्मन् हे अनघ सर्वज्ञस्य तव वचः समीचीनं यतस्तव हरेः कथाः कथयतः सतो मह्यं मम तमोऽज्ञानं विशीर्यते विनश्यति कर्मकर्त्तरि लट् ॥ ५ ॥ भूय इति सार्द्धम् ॥ अधीश्वरैरपि दुर्विभाव्यमप्रतर्क्यमिदं विश्वं भगवानात्ममायया यथा सृजते तङार्षः यथा च गोपायति रक्षति यथा च पुनः संयच्छते संहरति तङार्षः। तथा भूय एव विवित्सामि वेदितुमिच्छामि इडभाव आर्षः। पुनरित्यनेन सृष्ट्यादेः प्रवाहो दर्शितः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यां यामिति ॥ पुरुशक्तिरनन्तशक्तिः परः पुमान् यां यां शक्तिमुपाश्रित्याक्रीडन्नात्मानं ब्रह्मादिरूपिणं करोति तद्रूपिणं चात्मानं क्रीडयन् विविधं करोति ॥ ७ ॥ नूनमिति ॥ हे ब्रह्मन् नूनम् अद्भुतकर्मणः भगवतः हरेश्चेष्टितं लीला कविभिरपि दुर्विभाव्यमिवाभाति ॥ ८ ॥ यथेति ॥ स्वयं पुरुषरूपेण त्वेको जन्मभिरवतारैर्भूरिशः कर्माणि कुर्वन् प्रकृतेर्गुणान्युगपत् क्रमशोऽपि वा यथा बिभर्ति गृह्णाति ॥ ९ ॥ विचिकित्सितमिति ॥ एतत्पूर्वोक्तं सर्वं मे मम विचिकित्सितं संदिग्धमतो भगवान् भवान् यथा यथावत् ब्रवीतु खलु यस्माद्धेतोः भवान् त्वं शाब्दे ब्रह्मणि वेदाख्ये विचारेण निष्णातः परस्मिन् ब्रह्मणि चानुभवेन निष्णात इति ॥ १० ॥ इतीति ॥ इत्येवं हरेर्गुणानुकथने राज्ञोपामन्त्रितः शुकः हृषीकेशं स्वेष्टदेवम् उपलक्षणतया गुरुं व्यासं चानुस्मृत्य प्रतिवक्तुम् उत्तरं दातुं प्रचक्रमे आरम्भं कृतवान् ॥ ११ ॥ तत्र हृषीकेशानुस्मरणमाह—नम इति ॥ भूयसे महामहिम्ने सतः प्रपञ्चस्य उद्भव उत्पत्तिः स्थानं पालनं निरोधः संहार एतत्त्रितयरूपा या लीला तया निमित्तभूतया गृहीतं ब्रह्मविष्णुरुद्ररूपेण रजःसत्वतमोरूपं शक्तित्रितयं

यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥ आत्मानं क्रीडयन्क्रीडन्करोति विकरोति च ॥ ७ ॥ नूनं भगवतो ब्रह्मन्हरेरद्भु-
तकर्मणः ॥ दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥ ८ ॥ यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा ॥ बिभर्ति भूरिशस्त्वेकः
कुर्वन्कर्माणि जन्मभिः ॥ ९ ॥ विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा ॥ शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु ॥ १० ॥
॥ सूत उवाच ॥ इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः ॥ हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥ ॥ श्रीशुक उवाच ॥ नमः
परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ॥ गृहीतशक्तित्रितयाय देहिनामन्तर्भवायानुपलक्ष्यवर्त्मने ॥ १२ ॥ भूयो नमः सद्वृ-
जिनच्छिदेऽसतामसंभवायाऽखिलसत्त्वमूर्तये ॥ पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥ नमो नमस्तेऽ-
स्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ॥ निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥ १४ ॥

येन तस्मै देहिनान्तर्भवाय अन्तर्यामिणे अतः सर्वान्तरत्वात् अनुपलक्ष्यं दुर्ज्ञानं वर्त्म यस्य तस्मै परस्मै सर्वोत्तमाय पुरुषाय नमः ॥ १२ ॥ भूय इति ॥ सतां धर्मवर्तिनां वृजिनच्छिदे दुःखहारिणे असतां दुष्टानामसंभवाय अनुद्भवहेतवे अखिलानि सत्वानि प्राणिन एव मूर्तिर्यस्य सर्वरूपाय परमहंसानां विवेकिनां कर्म पारमहंस्यं प्रत्यग् निष्ठारूपं तत्र य आश्रमः संन्यासाश्रमस्तत्र व्यवस्थितानां पुंसां पुनः पुनर्यदनुमृग्यमन्वेषणीयं यदात्मतत्वं तस्य दाशुषे दात्रे । "दाश्वान्साह्वान्" इति क्वस्वन्तश्छान्दसः । भगवते भूयः पुनरपि नमः ॥ १३ ॥ नम इति ॥ सात्वतां यादवानामृषभाय श्रेष्ठाय भक्तानां पालकाय वा ते तुभ्यं नमो नमोऽस्तु । मुहुः पुनः पुनर्निरन्तरं कुयोगिनां भक्तिरहितानां विदूरा काष्ठा दिगपि यस्य तस्मै दुर्ज्ञेयाय निरस्तं साम्यमतिशय आधिक्यं च यस्मात् यदपेक्षयान्यस्य साम्यमतिशयश्च नास्ति तेन राधसा तेजसा ऐश्वर्येण स्वधामनि निजस्व-

CC-0. In Public Domain. Digitization by eGangotri

रूपे ब्रह्मणि रंस्यते रममाणाय नमः शता वर्तमाने लृद्वार्षः ॥ १४ ॥ यदिति ॥ यस्य कीर्तनादिकं लोकस्य कीर्तनादिकर्तुः पुरुषस्य कल्मषं पापं सद्यो विधुनोति विनाशयति तस्मै सुभद्रं मङ्गलरूपं श्रवो यशो यस्य तस्मै नमो नमः ॥ १५ ॥ विचक्षणा इति ॥ विचक्षणाः निपुणबुद्धयो यस्य चरणयोरुपसादनाद्भजनात् यच्चरणशरणागमनादुभयत इहामुत्र च अन्तरात्मनो मनसः सङ्गं भोगाभिलाषं व्युदस्य त्यक्त्वाऽत एव कारणाभावात् गतक्लमाः निवृत्तश्रयासाः सन्तः ब्रह्मगतिं भगवन्तं विन्दन्ति प्राप्नुवन्ति तस्मै सुभद्रश्रवसे नमो नमः॥ १६ ॥तपस्विन इति॥तपस्विनः कृच्छ्रचान्द्रायणादितपोनिष्ठाः दानपराःयशस्विनः कूपारामादिनिर्मातारः मनस्विनो मनआदीन्द्रियनिग्रहपराःमन्त्रविदो मन्त्रजपपराः मन्त्रज्ञानाद्यज्ञादिकर्मानुष्ठानपरा वा सुमङ्गलाः अन्ये च स्वाचारपराः एते सर्वेऽपि स्वानुष्ठिततप आदेर्यस्मिन्नर्पणं विना क्षेमं तपआदेः परमं फलं न विन्दन्ति नैव लभन्ते तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ ॥ किरातेति ॥ किराताः हूणाः इत्यादयो जातितो दुष्टाः अन्ये च ये कर्मतः पापाः येषां प्रायश्चित्तैरपि न विशुद्धिस्ते यदपाश्रयाश्रया यो

यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम् ॥ लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥ १५ ॥
विचक्षणा यच्चरणोपसादनात्सङ्गं व्युदस्योभयतोऽन्तरात्मनः ॥ विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥ १६ ॥
तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ॥ क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ ॥
किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाः खसादयः ॥ येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः॥१८॥
स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः ॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिङ्गो भगवान्प्रसीदताम् ॥ १९ ॥
श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ॥ पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतां पतिः ॥२०॥
यदङ्घ्र्यनुध्यानसमाधिधौतया धियाऽनुपश्यन्ति हि तत्त्वमात्मनः ॥ वदन्ति चैतत्कवयो यथारुचं स मे मुकुन्दो भगवान्प्रसीदताम् ॥ २१ ॥

भगवान् अपाश्रयः उपाश्रयो येषां ते भगवद्भक्ताः यदपाश्रयास्ते आश्रयो येषां तथाभूताः सन्तः शुद्ध्यन्ति तस्मै प्रभविष्णवे पापादिशोधने प्रभवनशीलाय नमः ॥ १८ ॥ स इति ॥ आत्मवतां धीराणाम् आत्मदर्शिनामेव आत्मा आत्मत्वेनोपास्यः अधीश्वरः त्रयीमयो वेदरूपः धर्ममयः तपोमयश्च त्रयीधर्मतपोमार्गैरुपास्यः इत्यर्थः । गतं व्यलीकं विप्रलिप्सादिदोषो येषां तैः अजशङ्करादिभिरपि वितर्क्यमत्याश्चर्येण वीक्षणीयं लिङ्गं स्वरूपं यस्य स एष पतिर्भगवान्मे प्रसीदतां प्रसन्नो भवतु तद्भार्षः ॥ १९ ॥ श्रिय इति ॥ पूर्वार्द्धं स्पष्टम् । अन्धकवृष्णिसात्वतां पतिः स्वामी गतिः प्राप्यं सर्वापत्सु रक्षकश्च स सतां पतिर्भगवान्मे मह्यं प्रसीदताम् तद्भार्षः ॥२०॥ यदिति ॥ यस्याङ्घ्र्योरनुध्यानमेव समाधिस्तेन धौतया शोधितया धिया आत्मनः तत्वं याथात्म्यं योगिनः अनुपश्यन्ति साक्षात्कुर्वन्ति । अन्ये तु अधौतधीत्वात् कवयोऽतिनिपुणा अपि एतत् तत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथारुचं यथामति यद्वा स्वरुच्यनुसारेणैव सगुणं निर्गुणमित्यादि वदन्ति तद्याथार्थ्यं नैव जानन्ति स मुकुन्दः भगवान् मे प्रसीदताम्। तङ्गार्षः ॥ २१ ॥ प्रचोदितेति ॥ पुरा कल्पादौ अजस्य ब्रह्मणो हृदि सतीं सृष्टिविषयां स्मृतिं वितन्वता विस्तारयता येनान्तर्यामिणा प्रचोदिता प्रेरिता स्वलक्षणा स्वानि असाधारणानि लक्षणानि शिक्षाद्युक्तानि यस्याः सा सरस्वती वेदरूपा आस्यतो ब्रह्मणो मुखतः प्रादुरभूत्सः ऋषीणां ज्ञानप्रदानामृषभः श्रेष्ठो मे प्रसीदताम् । तङ्गार्षः ॥ २२ ॥ भूतैरिति ॥ यत् यस्माद् यः विभुः समर्थः पूर्षु शयनात्पुरुषश्च यः । अतः आकाशादिभिर्महद्भिर्भूतैरिमाः सर्वत्र परिदृश्यमानाः पुरः शरीराणि निर्माय अमूषु आसु पूर्षु यः शेते अन्तर्यामितया निवसति अतः पुरुषसमाख्या उपपन्ना एकादशेन्द्रियाणि पञ्चभूतानीत्येषां षोडशानामात्मा चेतयिता स्वार्थे कन् । यः षोडश पूर्वोक्तान् गुणान् प्रकाशयति साक्षितयाऽनुभवति यद्वा पञ्च शब्दादिरूपान् विषयान् पञ्च वागादिव्यापारान् पञ्च प्राणादिवायुवृत्तीरेकं संकल्पादिरूपमित्येवं तान् षोडशगुणान् भुङ्क्ते नात्र जीवो विवक्षितः प्रार्थनाविरोधात् । स भगवान् मे वचांसि अलं कृषीष्ट माधुर्यादिगुणविशिष्टानि करोतु ॥ २३ ॥ श्रीगुरुं व्यासं प्रणमति—नम इति ॥ ज्ञानमयं यन्मुखाम्बुरुहे य आसवो मकरन्दस्तं सौम्याः शान्त्यादि-

प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि ॥ स्वलक्षणा प्रादुरभूत्किलाऽऽस्यतः स मे ऋषीणामृषभः प्रसीदताम् ॥ २२ ॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ॥ भुङ्क्ते गुणान्षोडश षोडशात्मकः सोऽलं कृषीष्ट भगवान्वचांसि मे ॥२३॥ नमस्तस्मै भगवते वासुदेवाय वेधसे॥ पपुर्ज्ञानमयं सौम्या यन्मुखाम्बुरुहासवम् ॥२४॥ एतदेवात्मभू राजन्नारदाय विपृच्छते ॥ वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः ॥ २५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ नारद उवाच ॥ देवदेव नमस्तेऽस्तु भूतभावन पूर्वज ॥ तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥ १ ॥

गुणविशिष्टा वैशम्पायनादयस्तच्छिष्याः पपुः तस्मै वेधसे वेदादिसृष्टिप्रवर्त्तकाय भगवते वासुदेवाय वासुदेवावताराय श्रीव्यासाय नमः । व्यासायामिततेजसे इत्यपि पाठः ॥२४॥ एतदेवेति ॥ हे राजन् यत्तव प्रश्नस्योत्तरतया मया वक्तव्यम् एतदेव विपृच्छते नारदाय उत्पत्तिसमय एव वेदा गर्भे यस्य सः आत्मभूः ब्रह्मा यत्साक्षाद्धरिरेव आत्मने आत्मानं ब्रह्माणं प्रति आह स्म तदेवाभ्यधात् ॥२५॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे द्वितीयस्य व्यधादिमाम् ॥ ४ ॥ पञ्चमे तु हरेर्लीला सृष्ट्याख्या ब्रह्मणोच्यते ॥ कालादिभिर्विराट्सृष्टिस्तत्र श्लोकास्त्रिवार्द्धयः ॥ अनुष्टुभोऽपि तावत्य उवाचेति द्वयं तथा ॥ ५ ॥ देवदेवेति ॥ हे देवानां देव पूज्य हे भूतानां भावन उत्पादक हे पूर्वेषां पूर्वज अनादे ते तुभ्यं नमोऽस्तु । यत् आत्मतत्वस्य निदर्शनं नितरां दर्शनं येन तत् यत् ज्ञानं ज्ञायतेऽनेनेति ज्ञानं शास्त्रं साधनं वा विस्तरतः तद्विशेषेण जानीहि विशेषेण ज्ञापयेत्यर्थः । अन्तर्भावितण्यर्थः ॥ १ ॥

Nepal Sanskrit University, Balmeeku Campus, Kathmandu

यद्रूपमिति ॥ हे प्रभो इदं विश्वं यद्रूपं येन रूप्यते प्रकाश्यते यदस्य लक्षणमिति वा यदधिष्ठानं यदाधारं यतः येन सृष्टं यस्मिन्संस्था लयो यस्य तत् यत्परं यदधीनं यच्च यदात्मकं स्वतः सत्कारणतो वेत्यर्थः । तस्यैतस्य तत्वं तत्वतो यथार्थतो वद । अस्य विश्वस्य प्रकाशकं लक्षणं स्रष्टृलयस्थानमीशितृ च किमिति ॥२॥ सर्वमिति ॥ यन्मया पृष्टमेतत्सर्वं भवान् वेद जानात्येव । हि यस्मात् भूतं पूर्वजातं भव्यं जनिष्यमाणं भवज्जायमानं तेषां प्रभुः त्वमेवातः करे आमलकवत् अमलंकं जलं तद्वद्वा सर्वमपि विश्वं तव विशिष्टेन ज्ञानेनावसितं निश्चितम् ॥३ ॥ यद्विज्ञान इति अर्द्धम् ॥ एवं यतो विज्ञानं यस्य स यद्विज्ञानस्तव विज्ञानदः क इत्यर्थः । य आधारो यस्य स यदाधारो यस्तवाधारः स क इत्यर्थः । यः परः स्वामी यस्य स यत्परस्तव स्वामी क इत्यर्थः।य आत्मा यस्य स यदात्मकः यस्तवात्मा तं वदेति शेषः ॥४॥ मम तु त्वमेव स्वतन्त्र इति बुद्धिरित्याह– एक इति सार्द्धम् ॥ एकोऽसहाय एव त्वमात्ममायया सृष्टैर्भूतैः पृथिव्यादिभिः पञ्चमहाभूतैः भूतानि देवतिर्यङ्मनुष्यादिरूपाणि सृजसि ऊर्णनाभिः कीटविशेषः स यथा आत्मशक्तिमवष्टभ्याक्लम आयासरहित एव तन्तून् सृजत्यवति च तद्वत् तथा त्वं स्वयमात्मानन्नपराभावयन् अन्यतः पराभवमप्रापयन् आत्मन् आत्मनि स्थितानि

यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्वतः॥२॥सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः ॥ करामलकवद्विश्वं विज्ञानावसितं तव॥३॥यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः॥४॥एकः सृजसि भूतानि भूतैरेवात्ममायया॥ आत्मन्भावयसे तानि न पराभावयन्स्वयम् ॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः॥५॥नाहं वेद परं ह्यस्मिन्नापरं न समं विभो॥नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः॥६॥स भवानचरद् घोरं यत्तपः सुसमाहितः ॥ तेन खेदयसे नस्त्वं पराशङ्कां प्रयच्छसि॥७॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ॥ विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदं तव वत्स चिकित्सितम् ॥ यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥९॥

ङ्लिुगार्षः । तानि स्वसृष्टानि भूतानि भावयसे पालयसि ॥ ५ ॥ नाहमिति ॥ तस्मादहं तु अस्मिन् विश्वस्मिन् किंचिदपि परमुत्तममन्यतो न वेद एवमपरमधमं न वेद तथा समं मध्यमं न वेद । तत्रापि नाम देवमनुष्यादिरूपं द्विपदत्वादिगुणाः शुक्लादयः तैर्भाव्यं साध्यं तत्रापि सदसत्स्थूलं सूक्ष्मं च यद्वस्तु यत्किंचिदप्यन्यतो न वेद किंतु सर्वं त्वत्त एव भवतीति मन्ये ॥ ६ ॥ स इति ॥ स एवंविधोऽपि भवान् यत् यतः सुसमाहितो तिसावधानः सन् घोरमन्यैर्दुश्चरं तपोऽचरत् तेन तपश्चरणेन त्वं नोऽस्मान् पुत्रान् खेदयसे मोहयसि यतः पराशङ्कामीश्वरान्तरस्याशङ्कां प्रयच्छसि । ईश्वरान्तराभावे कस्य प्रसादनार्थं तपश्चर्येति तर्कमुत्पादयतीत्यर्थः ॥ ७ ॥ एतदिति ॥ हे सर्वज्ञ हे सकलेश्वर त्वयानुशासितोऽनुशिक्षितोऽहं शास्तेः स्वार्थे णिच् क्तः । अहमिदं भवतोपदेक्ष्यमाणं यथैव बुध्ये जानीयां तथैतत् सर्वं पृच्छतो मे मम विजानीहि विशेषेण ज्ञापय । अन्तर्भावितण्यर्थः ॥ ८ ॥ सम्यगिति ॥ हे वत्स ते तवेदं विचिकित्सितं संदेहः तत्पूर्वकः प्रश्नोऽयं सम्यगित्यर्थः । यतः कारुणिकस्य दयावतस्तवायं प्रश्नः यत् यस्मादहं ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवतो वीर्यदर्शने माहात्म्यवर्णने धर्मे परधर्मप्रदर्शने इति पाठेऽपि स एवार्थः । त्वया चोदितः प्रवर्तितोऽस्मीति अतो जिज्ञासुरपि त्वं कृपामेव कृतवान् ॥ ९ ॥ नानृतमिति ॥ भो वत्स एकः सृजसि भूतानीत्यादिना मां प्रति यथा प्रब्रवीषि तच्चापि तव वचनमत्यन्तमनृतं न भवति । हि यस्मात् यतः परमेश्वरान्मे ममैतावत्त्वम् एतावतः महिम्नो भावः एतावत्त्वम् । एतावत्परिमाणो महिमास्ति तं मत्तः परं परमेश्वरमविज्ञाय तथा प्रब्रवीषि अतः सादृश्यात्तवेयं भ्रान्तिः नतु बुद्धिपूर्वमनृतमित्यर्थः । यतः ईश्वरान्मम एतावत्त्वं तमविज्ञायेति वा ॥ १० ॥ येनेति ॥ यथा अर्कः अग्निश्च तथा यथा वा ऋक्षाणि ग्रहास्तारकाश्च भगवत्तेजसा प्रकाशितमेव विश्वं प्रकाशयन्ति तथा येन भगवता स्वरोचिषा स्वचैतन्यप्रकाशेन रोचितं प्रकाशितमेव विश्वमहं रोचयामि प्रकाशयामि स्रष्टाभिव्यक्तं करोति । "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ " इति श्रुतेः ॥ ११ ॥ तस्मै इति ॥ दुर्जयया यस्य मायया विमोहिता युष्मदादयो मां जगद्गुरुं जगत्कारणं वदन्ति तस्मै भगवते वासुदेवाय नमो धीमहि नमस्कुर्महे च्छान्दसम् ॥ १२ ॥ विलज्जमानयेति ॥ मत्कपटमसौ जानातीति मत्वा यस्य भगवतः ईक्षापथे दृष्टिपथे स्थातुमपि विलज्जमानया इव तस्मिन् स्वकार्यमकुर्वत्या अमुया मायया विमोहिता अस्मदादयो दुर्धियः अविद्यावृतज्ञाना एव केवलं ममाहमिति विकत्थन्ते श्लाघन्ते । इदं च यद्रूपमित्यस्योत्तरम् ॥ १३ ॥ द्रव्यमिति ॥ हे ब्रह्मन् द्रव्यं महाभूतानि उपादानरूपाणि कर्म जन्मनिमित्तं कालो गुणकर्मादिक्षोभकः स्वभावस्तत्तत्परिणामहेतुः जीवो भोक्ता अन्यश्चानुक्तः सर्वोऽपि पदार्थः तत्त्वतः परमार्थतः वासुदेवात्परो भिन्नो नास्त्येव। कार्यस्य कारणाव्यतिरेकात् एतेन यदधिष्ठानमित्यादिप्रश्नोत्तरमुक्तम् । वासुदेव एव सर्वस्याधिष्ठानादि इत्याशयः ॥ १४ ॥ तत्प्रपञ्चयति—नारायणेति ॥ वेदाः नारायणः परं तात्पर्यविषयः कारणं प्रवर्तकं नियामकं वा येषामिति यथोचितं विग्रहः । तत्र वेदाः नारायणप्रतिपादकाः देवाश्च नारायणस्याङ्गाज्जाताः अतो न तद्व्यतिरिक्ताः लोकाः स्वर्गादयो नारायणपरास्तदानन्दांशा इत्यर्थः । मखाः यज्ञाः नारायणपराः स्वर्गादिसाधनत्वेन वेदद्वारा ते नारायणेनैव प्रवर्त्तिताः ॥ १५ ॥ नारायणेति ॥ योगोऽष्टाङ्गः नारायणपरः तेनैव प्रवर्तितः तपश्चान्द्रायणादिकं नारायणपरं तेन प्रवर्तितम् । ज्ञानमपि नारायणपरं

नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः ॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥ येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ॥ यथाऽर्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥ ११ ॥ तस्मै नमो भगवते वसुदेवाय धीमहि ॥ यन्मायया दुर्जयया मां ब्रुवन्ति जगद्गुरुम् ॥ १२ ॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ॥ विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ १३ ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ॥ १४ ॥ नारायणपरा वेदा देवा नारायणाङ्गजाः ॥ नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥ नारायणपरो योगो नारायणपरं तपः ॥ नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki ...

CC-0. In Public Domain. Digitization by eGangotri

तदधीनं गतिः तत्तल्लोकगमनं भगवत्प्राप्तिश्च नारायणपरा तदधीना ॥ १६ ॥ तर्हि त्वं किं करोषि तत्राह—तस्यापीति ॥ सृष्ट्यर्थं तेन सृष्ट उत्पादितः ईक्षया संकल्पमात्रेण अभिचोदितश्चाहमपि द्रष्टुः साक्षिणः ईशस्य कूटस्थस्य निर्विकारस्य अखिलानामात्मनः तस्यैव सृज्यं सृजामि सृष्टिकरणे प्रवर्तितस्तत्करणेन तदाज्ञां पालयामि ॥ १७ ॥ कुतोऽयं जीवेश्वरविभागो यतस्त्वं प्रेर्यः स प्रेरकः स्यादित्यपेक्षायां जीवेश्वरविभागहेतुमाह—सत्वमिति ॥ विभोः समर्थस्य निर्गुणस्यापि विभोरस्य भगवतो वशीभूताः सत्वं रजस्तम इति त्रयो गुणाः सन्ति ते च स्थितिसर्गनिरोधेषु स्थित्याद्यर्थं मायया तेनैव स्वेच्छया गृहीताः सन्ति ॥ १८ ॥ कार्येति ॥ द्रव्यं महाभूतानि ज्ञानशब्देन देवताः क्रियाशब्देनेन्द्रियाणि तेषामाश्रयाः कारणतया आश्रयभूताः ते गुणाः वस्तुतः नित्यदा मुक्तमपि बन्धरहितमपि दा आर्षः । मायिनं मायाविषयं पुरुषं जीवं कार्यकारणकर्तृत्वे कार्यमधिभूतं देहः कारणमध्यात्ममिन्द्रियाणि कर्ता अधिदैवतं देवताः तेषां भावस्तत्वं तस्मिन् नित्यदा सर्वदा बध्नन्ति स्वस्वकार्ये तत्तदभिमानेन बध्नन्ति ॥ १९ ॥

तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ॥ सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ १७ ॥ सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ॥ स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥ बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥ स एष भगवाँल्लिङ्गैस्त्रिभिरेभिरधोक्षजः ॥ स्वलक्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः ॥ २० ॥ कालं कर्म स्वभावं च मायेशो मायया स्वया ॥ आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥ कालाद्गुणव्यतिकरः परिणामः स्वभावतः ॥ कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २२ ॥ महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् ॥ तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥ २३ ॥ सोऽहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा ॥ वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥ २४ ॥

स इति ॥ हे ब्रह्मन् स पूर्वोक्तः एष वशीकृतमायोऽधोक्षजः एभिस्त्रिभिः सत्वादिभिर्गुणैर्लिङ्गैर्जीवानामावरकैरुपाधिभिः सुष्ठु अलक्षिता गतिस्तत्त्वं यस्य । यद्वा । एभिर्लिङ्गैर्ज्ञापकैः स्वैः ज्ञानिभक्तैरेव लक्षिता अनुमिता गतिर्यस्य स भगवान् सर्वेषां स्थावरजङ्गमानां मम चकारात्तव चेश्वरो नियन्ता ॥ २० ॥ यतः सृष्टमिदमित्यस्योत्तरमाह—कालमिति ॥ मायेशो भगवान् स्वया मायया द्वारभूतया विबुभूषुः विविधं यथा तथा भवितुमिच्छुः सन् यदृच्छयात्मनि प्राप्तं लीनं कालं गुणवैषम्यहेतुं कर्मजीवादृष्टं स्वभावं परिणामहेतुं कारणतया उपाददे स्वीकृतवान् स्वकार्योन्मुख्यमापादितवान् ॥ २१ ॥ कालादिति ॥ पुरुषः परमेश्वरस्तदधिष्ठितात्प्रेरितादिति सर्वेषां पञ्चम्यन्तानां विशेषणं कालाद्गुणानां सत्वादीनां व्यतिकरः क्षोभः स चेह साम्यावस्थात्यागः परस्परमेलनं चाभूत् । स्वभावतो गुणानां परिणामो रूपान्तरापत्तिरभूत् । कर्मणः निमित्तभूतात् साधारणाज्जीवानामदृष्टात् महतो महत्तत्वस्य जन्माभूत् ॥ २२ ॥ महतस्त्विति सार्द्धद्वयम् ॥ हे प्रभो पुरुषाधिष्ठितात् अत एव विकुर्वाणात् रूपान्तरं प्राप्नुवतः अत एव रजःसत्वाभ्यामुपबृंहितात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्द्धितात् रजःसत्वप्रधानादपि महतो द्रव्याणि पृथिव्यादिमहाभूतानि ज्ञानं मनोदेवताश्च क्रिया इन्द्रियाणि च तदात्मकः तेषां कारणभूतस्तमःप्रधानस्तु यः पदार्थोऽभवत्सोहंकार इति प्रोक्तः। सोऽपि विकुर्वन् रूपान्तरं गच्छन् त्रिधा समभूत् । तत्र वैकारिकः सात्विकः तैजसः राजसः तामसश्चेति यद्भिदा एवं यस्याहंकारस्य भेदोऽस्ति तेषु च द्रव्यं महाभूतानि तदुत्पादने शक्तिः सामर्थ्यं यस्य स तामसः एवं क्रिया दशेन्द्रियाणि तदुत्पादनशक्तिः राजसः ज्ञानमन्तःकरणं देवताश्च तदुत्पादनशक्तिर्यः स सात्विक इति प्रातिलोम्येन योज्यम् । अत्र साम्यावस्थगुणत्रयं प्रधानं महत्तत्वस्य त्रिगुणत्वेऽपि रजःसत्वाभ्यामुपबृंहितत्वं तत्र सत्त्वांशस्योद्रेकात् महत्तत्वं रजोंशोद्रेको महत्तत्वभेदः सूत्रतत्त्वम् अहंकारस्य त्वावरकत्वात्तमःप्रधानत्वम् अत एवाहंकारकार्येषु तामसमाकाशादिकं बहु राजसं सात्विकं चाल्पम् एवं तदुपाधिकेषु जीवेष्वपि तथैव तामसाधिक्यम् ॥ २३ ॥ २४ ॥ तामसादिति ॥ भूतानामाकाशादीनामादिः कारणं भूतादिस्तस्मात्तामसादपि विक्रियमाणान्नभ आकाशोऽभूत्। ननु नभसः प्राक् शब्द उत्पद्यत इति प्रसिद्धमिति चेत् स शब्दस्तु तस्याकाशस्य मात्रा सूक्ष्मं रूपं गुण असाधारणो व्यावर्तको धर्मश्च शब्दद्वारा आकाश उदपद्यतेत्यर्थः। एवमेव स्पर्शादिष्वपि द्रष्टव्यम्। यच्छब्दाख्यं

तामसादपि भूतादेर्विकुर्वाणादभून्नभः ॥ तस्य मात्रा गुणः शब्दो लिङ्गं यद्द्रष्टृदृश्ययोः॥२५॥ नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः ॥ परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ॥ २६ ॥ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ॥२७॥ तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम् ॥ रूपवत्स्पर्शवच्चाम्भो घोषवच्च परान्वयात् ॥२८॥ विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥२९॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥ ३० ॥

द्रष्टृदृश्ययोर्लिङ्गं कुड्यान्तरितेनापि केनचिद्गजो गज इत्युच्चैरुक्ते यो गजद्रष्टा यश्च तेन दृश्यो गजस्तयोर्यल्लिङ्गं बोधकमिति लिङ्गशब्दविशेषणत्वाद्यच्छब्दस्य क्लीबत्वम् ॥२५॥ नभस इति ॥ अथानन्तरं विकुर्वाणाद्रूपान्तरं गच्छतः नभसः स्पर्शतन्मात्रद्वारा स्पर्शगुणवान् अनिलो वायुरभूत् । स च वायुः परस्य स्वकारणस्याकाशस्यान्वयात् अनुवृत्तेः शब्दवांश्चाभूत् । तस्यैव लक्षणं प्राणो देहधारणम् ओज इन्द्रियाणां शक्तिः सहोन्तःकरणशक्तिः बलं देहसामर्थ्यं तेषां हेतुरित्यर्थः ॥ २६ ॥ वायोरिति ॥ कालकर्मस्वभावत इत्यपि यत्र नोक्तं तत्र सर्वत्र द्रष्टव्यम् । कालादितो विक्रियमाणाद्वायोरपि रूपतन्मात्रद्वारा स्वतो रूपवत् कारणभूतयोर्वाय्वाकाशयोरन्वयात्स्पर्शशब्दवच्च तेज उदपद्यत॥२७॥ तेजस इति ॥ विक्रियमाणात् रसतन्मात्रद्वारा रसात्मकं रसवत् परान्वयाच्च रूपवत् स्पर्शवत् घोषः शब्दः तद्वच्च अम्भो जलमासीत् ॥ २८ ॥ विशेष इति ॥ अम्भसस्तु विकुर्वाणात् गन्धतन्मात्रद्वारा गन्धवान् परान्वयाच्च रसस्पर्शशब्दरूपगुणान्वितो विशेषः पृथिव्यभूत् ॥ २९ ॥ वैकारिकादिति ॥ वैकारिकात् सात्विकाहङ्कारान्मनो जज्ञे मनःशब्देनैवात्र तदधिष्ठाता चन्द्रोऽपि ज्ञेयः । तथा दश देवा अपि वैकारिकाः सात्विकाहङ्काराज्जाताः ते च दिग्वातादयो ज्ञेयाः । कः प्रजापतिः एते क्रमात् श्रोत्रत्वक्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थानामधिष्ठातारः ॥ ३० ॥ तैजसादिति सार्द्धम् ॥ विक्रियमाणात्तैजसाद्राजसाहाङ्कारात् दशेन्द्रियाण्यभवन् तानि च श्रोत्रत्वगादिकानि ज्ञेयानि। दोर्भुजः मेढ्रमुपस्थः क्रमस्त्वत्र न विवक्षितः यतः ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तौ तैजसौ राजसाहङ्कारकार्यौ अतो ज्ञानक्रियाविशेषरूपाणीन्द्रियाण्युभयविधान्यपि राजसाहङ्कारकार्याणि तथा चायमर्थः। पञ्चज्ञानशक्तिर्बुद्धिः पञ्चक्रियाशक्तिः प्राणः बुद्धिप्राणौ तैजसौ अतः पञ्च श्रोत्रादयो बुद्धिविशेषाः पञ्च वागादयः प्राणविशेषा इत्यर्थः। अत्र तामसाहङ्कारकार्योऽनिल एव प्राणरूपेण तैजसाहङ्कारकार्यो भवतीति ज्ञेयम्॥३१॥कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह—यदेति द्वयम् ॥ हे ब्रह्मवित्तम यदैते भूतेन्द्रियमनोरूपाः गुणाः गुणकार्यरूपा भावाः पदार्थाः पृथग्विरुद्धस्वभावत्वादसङ्गता अमिलिता आसन् अत एव च यदा आयतनस्य समष्टिव्यष्ट्यात्मकस्य शरीरस्य निर्माणे न शेकुः तदा तेष्वेव प्रविष्टस्य भगवतः शक्त्या संहननकारिण्या चोदिताः योजिताः सन्तः सदसत्त्वं प्रधानगुणभावमुपादायाङ्गीकृत्यान्योन्यं संहत्य पञ्चीकरणोक्तप्रकारेण मिलित्वा चोभयं हि प्रसिद्धसमष्टिव्यष्ट्यात्मकमदः ब्रह्माण्डाख्यं शरीरं ससृजुः ॥ ३२ ॥ ३३ ॥ वर्षेति ॥ तत्पूर्वोक्तम् अण्डं ब्रह्माण्डाख्यं शरीरमजीवं चेतनार-

तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ ॥ श्रोत्रत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्राङ्घ्रिपायवः ॥ ३१ ॥ यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः ॥ यदाऽऽयतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ ३२ ॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ॥ ३३ ॥ वर्षपूगसहस्रान्ते तदण्डमुदकेशयम् ॥ कालकर्मस्वभावस्थो जीवो जीवमजीवयत् ॥ ३४ ॥ स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ॥ सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान् ॥ ३५ ॥ यस्येहावयवैर्लोकान्कल्पयन्ति मनीषिणः ॥ कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥ ३६ ॥

हितमत एवोदकेशयं वर्षपूगानां सहस्रस्यान्ते कालकर्मस्वभावस्थः कालादीनां नियन्ता जीवयतीति जीवो भगवान् अजीवयत् सजीवं चेतनासहितमकरोत्। अयं हिरण्यगर्भान्तर्यामी विष्णोर्द्वितीयं रूपमिति भागवताः ॥ ३४ ॥ स एवेति ॥ स एव विराट् पुरुषोऽण्डं निर्भिद्य तस्मान्निर्गतः अण्डभावं परित्यज्य पुरुषस्वरूपेण पृथक् स्थितः सच सहस्रमूरवः अङ्घ्रयः बाहवः अक्षीणि च यस्य सः सहस्रमाननानि शीर्षाणि च तद्वान् अभूत्। अन्ये तु हिरण्यगर्भान्तर्यामी अण्डं निर्भिद्य निर्गतः बहिः स्थितः तस्य कारणार्णवस्थं निर्गुणं रूपमाह सहस्रेति। तादृशः सन्निर्गतः इत्यर्थः इत्याहुः ॥ ३५ ॥ यस्येति ॥ इह लोके मनीषिणः कट्यादिभिः कटचूरुजानुजङ्घागुल्फप्रपदपादमूलैरवयवैरतलवितलसुतलतलातलमहातलरसातलपातालसंज्ञानधःस्थितान् सप्तलोकान् कल्पयन्ति तथा जघनादिभिर्जघननाभ्युरोग्रीवावदनललाटशिरोभिर्भूर्भुवःस्वर्महर्जनतपःसत्याख्यानूर्ध्वं स्थितान् सप्तलोकान् कल्पयन्ति। ऊरुमूलयोः पश्चाद्भागः कटिः पुरोभागो जघनम् ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुषस्येति ॥ पुरुषस्य मुखं ब्रह्म इति कार्यकारणयोरभेदविवक्षया मुखाद् ब्राह्मणो जात इत्यर्थः । क्षत्रं क्षत्रियः एतस्य बाहवो बाहुभ्यो जात इत्यर्थः । ऊर्वोः ऊरुभ्यां वैश्यो जातः भगवतः पद्भ्यां शूद्रोऽभ्यजायत ॥ ३७ ॥ अथोपासनार्थं लोककल्पनाभेदान् दर्शयन्सप्तलोकपक्षमाह—भूर्लोक इति ॥ पातालमारभ्य भूर्लोकः पद्भ्यां कटिपर्यन्ताभ्यां कल्पितः तथास्य महात्मनः स्थूलतरस्य पुरुषस्य नाभितो भुवर्लोको हृदा स्वर्लोक उरसा महर्लोकश्च कल्पितः ॥ ३८ ॥ ग्रीवायामिति ॥ अस्य ग्रीवायां च जनलोकः स्तनद्वयात्तपोलोकः उपासनार्थत्वादूर्ध्वाधोभाववैपरीत्यं न दोषः। यद्वा । स्तनत् शब्दं कुर्वत् यदोष्ठद्वयं तस्मात्तपोलोकः मूर्द्धभिः सत्यलोकश्च कल्पितः । ब्रह्मणो भगवतो लोको वैकुण्ठाख्यस्तु सनातनो न तु सृज्यान्तरवर्ती नित्यत्वात् ॥ ३९ ॥ अथ चतुर्दशलोकपक्षः तत्र जघनादिभिः भूरादयः सप्त प्रागुक्ता एव शेषानाह—तत्कट्यामिति ॥ तस्य विभोः कट्यामतलं क्लृप्तम् । ऊरुभ्यां वितलं क्लृप्तं जानुभ्यां भगवद्भक्तबलिनिवासाच्छुद्धं सुतलं क्लृप्तम् । जङ्घाभ्यां तु तलातलं क्लृप्तम् ॥ ४० ॥ महातल-

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ॥ ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ॥ ३७ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥ ३८ ॥ ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात् ॥ मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ॥ ३९ ॥ तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः ॥ जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम् ॥ ४० ॥ महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् ॥ पातालं पादतलत इति लोकमयः पुमान् ॥ ४१ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥ ४२ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ ब्रह्मोवाच ॥ वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः ॥ हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥

मिति ॥ गुल्फाभ्यां महातलं क्लृप्तम् । प्रपदाभ्यां पादाग्राभ्यां रसातलं क्लृप्तम् । पादतलतः पातालं क्लृप्तम् इत्येवं पुमान् विराट्पुरुषो लोकमयो लोकमयत्वेन ध्येयः ॥ ४१ ॥ त्रिलोकपक्षमाह—भूर्लोक इति ॥ अस्य पुरुषस्य पद्भ्यां कटिपर्यन्ताभ्यां पातालादिसहितो भूर्लोकः कल्पितो नाभितश्च भुवर्लोकः कल्पितः । मूर्ध्ना तु ब्रह्मलोकपर्यन्तः स्वर्लोकः कल्पित इति वा लोककल्पना ज्ञेया ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीयस्याध्याये पञ्चमे व्यधात् ॥ ५ ॥ षष्ठे विराजोऽध्यात्मादिभेदादुक्ता विभूतयः ॥ पौरुषं सूक्तं ततोऽत्र श्लोकाः स्युस्तदर्थार्थयः ॥ उवाचेत्येकमङ्घ्र्यूनाः पञ्चाशत्स्युरनुष्टुभः ॥ ६ ॥ वाचामिति ॥ अस्मदादिवाचां वागिन्द्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य भगवतो वैराजस्य मुखं गोलकं क्षेत्रमुत्पत्तिस्थानम् अत्र सर्वत्र षष्ठ्यन्तानां प्रथमान्तं क्षेत्रम् । प्रथमान्ताच्च षष्ठ्यन्ता बभूवुरिति तद्विवरणं ज्ञेयम् । किं च अत्र क्वचिद्गोलकमिन्द्रियं चैकीकृत्य निर्देशः यथा जिह्वायाः क्वचित्पृथक् यथा नासाघ्राणयोः वैराजस्येन्द्रियेभ्योऽस्मदादेर्विषयाः तद्गोलकेभ्योऽस्मदिन्द्रियाणि

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

अधिष्ठात्र्यो देवताश्चेति प्रागुक्तमनुसन्धेयम् । तदनुसारेणैवात्र व्याख्यानम् । छन्दसां गायत्र्यादीनां सप्तानां तस्य सप्तधातवः त्वगादयः क्षेत्रम् । हव्यं देवानामन्नं कव्यं पितॄणामन्नममृतं तदुभयशेषो मनुष्याणामन्नमेषामन्नानां सर्वस्य मधुरादेः रसस्य चकारादस्मदादिरसनेन्द्रियस्य तदधिष्ठातुर्वरुणस्य च तस्य जिह्वा रसनेन्द्रियगोलकं क्षेत्रम् । एवं सर्वत्रानुक्तमप्युन्नेयम् ॥ १॥ सर्वेति॥ सर्वासूनामस्मदादिप्राणानां तदधिष्ठातुर्वायोश्च अश्विनोः औषधीनां यवादीनां च तस्य नासे नासारन्ध्रे परमायने उत्तमक्षेत्रे मोदप्रमोदयोः सामान्यविशेषगन्धयोश्च तस्य घ्राणो घ्राणेन्द्रियं परमायनम् । पुंस्त्वमार्षम् ॥ २ ॥ रूपाणामिति ॥ रूपाणां शुक्लादीनां तेजसां रूपप्रकाशकानां तस्य चक्षुरिन्द्रियं क्षेत्रम्।दिवः स्वर्गस्य सूर्यस्य च तस्याक्षिणी नेत्रगोलके क्षेत्रे।दिशां तीर्थानां गङ्गादीनां च तस्य कर्णौ श्रोत्राधिष्ठाने कर्णबिले स्थानम् । आकाशशब्दयोस्तु तस्य श्रोत्रमिन्द्रियं स्थानम् ॥३॥ तद्गात्रमिति अर्द्धम् ॥ वस्तुनो ये सारभूताः सुवर्णादयस्तेषां सौभगस्य सौन्दर्यस्य च तस्य गात्रं शरीरं भाजनं स्थानम् । त्वगिति । स्पर्शस्य वायोश्च "सर्वो द्वन्द्वो विभाषयैकवद्भवति" इत्येकत्वम् वाय्वोरित्यस्य वलोप आर्षो वा । सर्वमेधस्य समस्तयज्ञस्य च अस्य त्वक् स्थानम् । यैस्तु यज्ञः संभृतः सम्पादितो भवति तेषामुद्भिज्जजातीनां

सर्वासूनां च वायोश्च तन्नासे परमायने ॥ अश्विनोरौषधीनां च घ्राणो मोदप्रमोदयोः ॥ २ ॥ रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी ॥ कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ ३ ॥ तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ॥ त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ॥ रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः ॥४ ॥ केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ॥ बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ॥ ५ ॥ विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ॥ सर्वकामवरस्यापि हरेश्चरण आस्पदम् ॥ ६ ॥ अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ॥ पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः ॥ ७ ॥

वृक्षाणां तस्य रोमाणि स्थानम्। यज्ञियानां प्रशंसार्थमिदम् । अयज्ञियानामपि तत एवोत्पत्तेः ॥ ४॥ केशेति ॥ शिलालोहाभ्रविद्युतामस्य केशश्मश्रुनखानि स्थानम् । तत्र केशा अभ्राणां श्मश्रूणि विद्युतां नखानि शिलालोहानामिति केशश्मश्रूणि मेघानां शिलालोहादीनां विद्युतां द्युतिमतां नखानीत्येके । प्रायशः क्षेमकर्मणां पालनकर्तॄणां लोकपालानामिन्द्रादीनां तस्य बाहवः स्थानम् ॥ ५ ॥ विक्रम इति ॥ भूः भुवः स्वरित्यव्ययत्वात् षष्ठ्या लुक् । भूरादीनां त्रयाणां लोकानां विक्रमस्तस्य त्रिधा पादविन्यासः स्थानम् । क्षेमस्य प्राप्तरक्षणस्य शरणस्यानिष्टनिवारणस्य सर्वेषां कामानां काम्यमानानां पदार्थानां वरस्य वरणस्यापि हरेश्चरण आस्पदमाश्रयः ॥ ६ ॥ अपामिति ॥ अपां वीर्यस्य शुक्रस्य सर्गस्य सृष्टेः पर्जन्यस्य वृष्ट्यभिमानिदेवस्य वृष्यमाणजलस्य वा प्रजापतेश्च पुंसो हरेः शिश्न उपस्थेन्द्रियाधिष्ठानं स्थानम् । प्रजात्यानन्दः संतानार्थं संभोगस्तेन निर्वृतिस्तापहानिस्तस्यास्तदुपस्थेन्द्रियमाश्रयः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पायुरिति ॥ हे नारद यमस्य मित्रस्य परिमोक्षस्य मलत्यागस्य च तस्य पाय्विन्द्रियं स्थानम् । हिंसायाः प्राणिपडिायाः निर्ऋतेरलक्ष्म्याः निर्ऋतिनामराक्षसस्य वा मृत्योः पाय्विन्द्रियाधिष्ठातुः निरयस्य नरकस्य च स्थानतया तस्य गुदः पायुगोलकं स्मृतः । यद्यपि वह्नीन्द्रोपेन्द्रमित्रकाः इति क्रमप्राप्तेर्मित्रस्यैवाधिष्ठातृदेवतात्वं प्रतीयते तथापि गुदं मृत्युरपानेनेति वक्ष्यमाणेन मृत्युरेवाधिष्ठाता विवक्षितः । पायुर्यमस्य मित्रस्येति मित्रस्योपकारकमात्रत्वमभिप्रेतम् । अतः अधिष्ठातुर्मित्रस्य पायुरिन्द्रियं क्षेत्रमिति व्याख्यानमुपेक्षितम् ॥ ८ ॥ पराभूतेरिति ॥ पराभूतेर्दारिद्र्यस्य पराजयस्य च अधर्मस्य पापस्य तमसः अज्ञानस्य चापि पश्चिमस्तस्य पृष्ठभागः स्थानम् । नदानां नदीनां च तस्य नाड्यः स्थानम् । गोत्राणां पर्वतानां तस्यास्थिसंहतिः अस्थिसमूहः स्थानम् ॥ ९ ॥ अव्यक्तेति ॥ अव्यक्तं प्रधानं रसोन्नादिसारः सिन्धवः समुद्राः भूतानां सर्वेषां प्राणिनां निधनस्यान्ते लयस्य च पुंसः भगवतः उदरं स्थानतया विदितम् । मनसः अस्मदादिलिङ्गशरीरस्य तस्य हृदयं पदं स्थानम् ॥१०॥ धर्मस्येति ॥ धर्मस्य मम चतुर्मु-

पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ॥ हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ ८ ॥ पराभूतेरधर्मस्य तपसश्चापि पश्चिमः ॥
नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥ अव्यक्तरससिन्धूनां भूतानां निधनस्य च ॥ उदरं विदितं पुंसो हृदयं मनसः पदम्
॥ १० ॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ॥ विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणम् ॥ ११ ॥ अहं भवान्भवश्चैव त इमे
मुनयोऽग्रजाः ॥ सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥१२॥ गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः ॥ पशवः पितरः सिद्धा विद्याध्रा-
श्चारणा द्रुमाः ॥ १३ ॥ अन्ये च विविधा जीवा जलस्थलनभौकसः ॥ ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥ सर्वं पुरुष एवेदं भूतं
भव्यं भवच्च यत् ॥ १४ ॥ तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥ १५ ॥

खस्य तुभ्यं तव नारदस्य कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य च विज्ञानस्य बुद्धेः सत्वस्य चित्तस्य तत्त्वस्येति पाठे तु महत्तत्त्वस्य परस्य परमेश्वरस्यात्मा चित्तं परायणमुत्तमं स्थानम् ॥ ११ ॥ एवं ब्रह्मणो जातं जगत्ततो न पृथक् ब्रह्म च सर्वनियन्तृ इत्याद्यर्थादुक्तं । तत्पुरुषसूक्तार्थकथनेन द्रढयति । तत्र सहस्रशीर्षेत्यर्धर्चस्य " ब्राह्मणोऽस्य मुखमासीद्" इत्यादेश्च ऋक्त्रयस्यार्थः पूर्वाध्याय एव दर्शितः । इदानीं तु पुरुष एवेदं सर्वमित्यस्यार्थं दर्शयति—अहमित्यादिसार्धैस्त्रिभिः ॥ अहं ब्रह्मा भवान्नारदः भवश्च ये इमे ते तवाग्रजाः मुनयः सनकादयश्च सरीसृपाः वृश्चिकादयः जलं स्थलं नभश्च ओकांसि स्थानानि येषां तथाभूता अन्ये च विविधप्रकारा जीवाः सन्धिरार्षः। शेषाः स्पष्टाः । किंबहुनोक्तेन यच्चेदं भूतं भव्यं भवच्च कालत्रयवर्तिवस्तुजातं तत्सर्वं पुरुष एव न ततो भिन्नं किंचित् ॥ १२ ॥ १३ ॥ १४ ॥ स भूमिमित्यस्यार्थमाह—तेनेति अर्द्धम् ॥ तेन पुरुषेणेदं विश्वमावृतं व्याप्तम् । स च विश्वस्मात् वितस्तिं वितस्तिप्रमाणं देशम् अधि अधिकं व्याप्य तिष्ठतीत्याधिक्यमात्रं विवक्षितं न प्रमाणमनुपयोगाद-

CC-0. In Public Domain. Digitization by eGangotri

परिच्छिन्नत्वाच । अत्र भूमिमित्यस्य विश्वमित्यर्थः । दशाङ्गुलमित्यस्य वितस्तिमिति अत्यतिष्ठदित्यस्य अधितिष्ठतीति ॥ १५ ॥ एतत्सदृष्टान्तमाह—स्वेति ॥ असौ प्राणः "असौ वा आदित्यः प्राणः" इति श्रुतेरादित्यो यथा स्वधिष्ण्यं मण्डलं प्रतपन् प्रकाशयन् बहिश्च सर्वमपि प्रतपति प्रकाशयति एवमेव पुमान् वैराजः पुरुषो विराजं विराड्देहं प्रतपन्प्रकाशयन्नपि ब्रह्माण्डमन्तर्बहिश्च तपति प्रकाशयति । अत्र प्राणः प्राणवायुः स्वधिष्ण्यं देहान्तः प्रतपन् श्वासेन प्रतापयुक्तं कुर्वन् बहिश्च प्रतपति । प्रभवतीति चक्रवर्तिना व्याख्यातम् ॥ १६ ॥ उतामृतत्वस्येत्यस्य एतावानस्य महिमेत्यस्य चार्थमाह—स इति ॥ स परमेश्वरः अभयस्य भयरहितस्य अमृतस्य मोक्षस्य निजानन्दस्य वा ईशः भोक्ता भोजयिता दाता च । यत् यस्मात् मर्त्यं मरणधर्मकं विनाशि अन्नं कर्मफलमत्यगात् अतिक्रान्तवान् । एवं च उतामृतत्वस्येति स्वार्थे त्वश्छान्दसः । अभयस्येति मन्त्रगतामृतपदव्याख्या । अन्नमित्यर्थे अन्नेनेति पदं तृतीयाछान्दसी । अतिरोहति इत्यस्य अत्यगात् हे ब्रह्मन् ततो हेतोः पुरुषस्य परमेश्वरस्य एष महिमा दुरत्ययः अपारः ॥ १७॥ पादोऽस्य विश्वाभूतानीत्यस्यार्थमाह—पादेष्विति अर्द्धम् ॥ तिष्ठन्ति जीवा अत्रेति स्थितयो भूरादिलोकास्ते पादा इव पादाः अवयवत्वेनोक्ता यस्य स स्थितिपात्तस्य पुंसः पादेषु अवयवभूतेषु लोकेषु सर्वभूतानि सर्वान् जीवान् स्थितान् मन्त्रज्ञा विदुः । मन्त्रे तु पादोऽस्य विश्वाभूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया

स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतपत्यसौ ॥ एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान् ॥ १६ ॥ सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ॥
महिमैष ततो ब्रह्मन्पुरुषस्य दुरत्ययः ॥ १७ ॥ पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ॥ अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ॥ १८ ॥

पाद इत्येकवचनं च सामान्याभिप्रायेण । त्रिपादस्येत्यस्यार्थमाह अमृतमिति अर्द्धम् । अस्येश्वरस्य संबन्धि त्रिपादमृतं नित्यसुखं दिवि ऊर्ध्वलोकेषु वर्तते न त्रिलोक्यामिति हि मन्त्रार्थः । तदेव त्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह । त्रयाणां भूरादिलोकानां मूर्द्धा महर्लोकस्तस्य मूर्द्धानस्तदुपरितना लोकास्तेषु यथाक्रमममृतं क्षेममभयमिति त्रयमधायि भगवता निहितं तत्र त्रिलोक्यां नश्वरमेव सुखं महर्लोकेऽपि कल्पान्ते त्रिलोकदाहोष्मपीडितानां तत्रत्यानां स्थानत्यागात्नाविनाशि सुखं जनलोके त्वमृतमविनाशि सुखमस्ति यावज्जीवं स्वस्थानापरित्यागात् । परं तु महर्लोकवासिनां त्रिलोकदाहोष्मपीडया तदा तत्र गमनादक्षेमदर्शनमस्ति । तपोलोके तु तस्याप्यभावात् क्षेममेव । वक्ष्यति हि "त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना । यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ॥" इति सत्यलोके त्वभयं सुखं मोक्षप्रत्यासन्नत्वात् । भक्तास्तु व्याचक्षते । अथ तस्य मायिकीरमायिकीश्च विभूतीर्विभज्य दर्शयति द्वाभ्याम् । स्थितिः सर्वलोकपालनं पादाच्चरणारविन्दाद्यस्य स स्थितिपात् तस्य पुंसः पादेषु अंशभूतेषु मायिकामायिकदेशेषु सर्वभूतानि बद्धमुक्तजीवान् विदुः । तत्र च त्रिमूर्ध्नः त्रिगुणमयस्थानानां मूर्द्धा इव उपरिस्थो भागो यत्प्रकृत्यावरणं तस्य मूर्द्धसु उपरितनस्थानेषु परमव्योमस्वित्यर्थः । अमृतं मरणाभावः क्षेमं रोगाद्यभावः अभयं परस्परहेतुकस्य भगवदपराधहेतुकस्य च भयस्याभावः कालहेतुकभयस्यामृतशब्देनैव वारणं ज्ञेयम् । अधायि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापितं तेन त्रिगुणमयस्थानेषु तद्विपरीतं मृतमक्षेमं भयं च निहितमिति त्रिगुणप्रपञ्चस्यानित्यत्वं त्रिगुणातीतस्य परव्योम्नो नित्यत्वं बोधितम् । वक्ष्यते चाग्रे तद्धामवर्णने नच कालविक्रमः न यत्र मायेत्यादि । एवं च पादोऽस्येति मन्त्रार्थो विवृतः । तत्र त्रिपादस्यामृतं दिवीत्यस्य दिवि सर्वोर्द्ध्वे प्रदेशे अमृतम् अस्य त्रिपात् त्रिपाद्विभूतिस्थमित्यर्थः ॥ १८ ॥ त्रिपादूर्द्ध्व इत्यस्यार्थमाह—पादा इति ॥ ये पूर्वोक्तास्त्रयः पादाः जनतपःसत्यलोकाः त्रिलोक्या बहिरासन् ये अप्रजानां पुत्रादिरूपेण न प्रजायन्ते तेषां नैष्ठिकब्रह्मचारिवानप्रस्थयतीनाम् असिजभाव आर्षः । तेषामाश्रयाः स्थानानि गृहमेधो गृहस्थस्तु अन्तस्त्रिलोक्याः मध्य एव तिष्ठतीति शेषः । यतः सः अपरस्तेभ्यो हीनः अबृहद्व्रतः ब्रह्मचर्यादिव्रतरहितश्च । भक्तास्तु व्याचक्षते पादेषु सर्वभूतानीत्यस्यार्थं विशिष्य विवृणोति। बहिस्त्रिमूर्द्धशब्दोक्तात् प्रकृत्यावरणात् परत्र त्रयः पादाः परमव्योमशब्देनाभिधीयमाना आसन् । चकारात् क्वचित् क्वचित्प्रपञ्चमध्यवर्त्तिनोऽपि मथुरायोध्यादिनामानः ये पादाः अप्रजानां संसारमुक्तानां जीवानाम् आश्रमाः स्थानानीति आश्रमाणामाश्रमस्थानां च तेषां नित्यत्वं बोधितम् । अमृतं क्षेममधायीति पूर्वोक्तेः । त्रिलोक्याः त्रिगुणलोकमय्याः प्रकृतेरन्तस्तु अपरः चतुर्थः पाद इत्यर्थः । यत्र गृहमेधः कर्मिजन इत्यर्थः । कीदृशः अबृहद्व्रतः भगवद्व्रतरहितो भगवदभक्त इत्यर्थः । तेन स चापि यदि कदाचिद् भक्तः स्यात्तदा तस्यापि त्रिपाद्विभूतिरेव स्थानमिति भावः । एवं च

पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ॥ अन्तस्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रतः ॥ विप्रक्षत्रियवैश्यानां गृहे मुक्तिः
सदा भवेत् ॥ १९ ॥ सृती विचक्रमे विष्वक् साशनानशने उभे ॥ यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥ २० ॥

"त्रिपादूर्द्ध उदैत्पुरुषः पादोस्येहाभवत्पुनः" इति श्रुत्यर्थो विवृतः । स्मृतिश्च "त्रिपाद्विभूतेर्लोकास्तु असङ्ख्याः परिकीर्तिताः । शुद्धसत्वमयाः सर्वे ब्रह्मानन्दसुखाह्वयाः ॥ सर्वे नित्या निर्विकारा हेयरागविवर्जिताः ।" इति । तत्र त्रिपाद्विभूतिशब्देन प्रपञ्चातीतलोकोऽभिधीयते । पादविभूतिशब्देन तु प्रपञ्च इति यथोक्तं तत्रैव "त्रिपाद्व्याप्तिः परं धाम्नि पादोऽस्येहाभवत् पुनः । त्रिपाद्विभूतिर्नित्यं स्यादनित्यं पादमैश्वरम् ॥" इति संदर्भधृतं पाद्मोत्तरखण्डम् ॥१९॥ ततो विश्वङ्ङित्यस्यार्थमाह—सृती इति ॥ विविधं सुष्ठु अञ्चति गच्छतीति विष्वङ् पुरुषः क्षेत्रज्ञः साशनानशने एका साशना अशनेन कर्मफलभोगेन सहिता दक्षिणमार्ग इत्यर्थः । अपरा त्वनशना कर्मफलभोगरहिता उत्तरमार्गस्ते उभे सृती मार्गौ विचक्रमे चलति स्म । यत् यस्मात् अविद्याकर्मरूपैका सृतिः विद्या च तत्साधनोपासनारूपान्या सृतिः पुरुषो जीवस्तूभयाश्रयः साधनद्वयनिष्ठः । भक्तास्तु व्याचक्षते । उक्तलक्षणे एकपादत्रिपाद्विभूती जीव एव प्राप्नोतीत्याह । विषु सर्वतोऽञ्चतीति विश्वङ् जीवः सृती एकपादत्रिपाद्विभूत्योः पन्थानौ विचक्रमे चलति लडर्थे लिट् । सृती कीदृश्यौ साशनानशने भोगापवर्गप्राप्तिसाधनभूते । तत्र योग्यतामाह । यत् यस्य जीवस्यैव अविद्या च विद्या च अविद्यादशायाम् एकपाद्विभूतिं विद्यादशायां त्रिपाद्विभूतिं प्राप्नोति किंतु विद्याया उपरामे लब्धया एकया भक्त्यैव "भक्त्याहमेकया ग्राह्यः" इति भगवदुक्तेः । पुरुषः परमेश्वरस्तु उभयस्य अविद्याविद्यावृत्तिकमायाया आश्रय

Nepal Sanskrit University, Balmeeki Campus, Kath...

CC-0. In Public Domain. Digitization by eGangotri

इति सृतिद्वयं तत्स्वामिकत्वात्तदधीनमेवेति भावः । एवं च ततो विश्वङ् व्यक्रामत्साशनानशने अभीत्यस्यार्थो विवृतः ॥२०॥ तस्माद्विराडजायत इत्यस्यार्थमाह—यस्मादिति॥ यस्मादण्डं जज्ञे तत्र च भूतेन्द्रियगुणात्मकः विराड् जज्ञे । स ईश्वरस्तत्र प्रविष्टोऽपि गोभिः सूर्य इव तद्विश्वं विराट्शरीरं द्रव्यमण्डं चात्यगात् अतिक्रम्य बहिरपि व्याप्तवान् । गोभिरिति पूर्वोक्त एव दृष्टान्तः। सूर्यो यथा गोभिः किरणैः स्वमण्डलम् आतपन् बहिरपि प्रकाशयति तथा परमेश्वरोऽपि विराजं प्रतपन् बहिरपि प्रकाशयति।भक्तास्त्वाहुः तत्र त्रिपाद्विभूतिरन्तरङ्गायाश्चिच्छक्तेर्विलास इति चिन्मय्यां तस्यामासक्त एव । पादविभूतिस्तु बहिरङ्गा या माया शक्तेर्विलास इति मायामय्यां तस्यामनासक्त एव परमेश्वरस्तं केवलम् उपकरोतीत्याह। यस्मात् पुरुषादण्डं विराड् जज्ञे कीदृशः भूतेन्द्रियगुणात्मकः स पुरुष ईश्वरः तदण्डं द्रव्यं विराट्शरीरं च अत्यगात्तत्प्रविशन् प्रकाशयन्नपि तत्राना-सक्तत्वादतिक्रम्यागात् । गत्वा च स्वान्तरङ्गस्थाने त्रिपाद्विभूतावेव सदा स्थित इति भावः । तत्रानुरूपो दृष्टान्तः । गोभिः किरणैर्विश्वम् आतपन् सूर्य इव स्वमण्डले स्थित इति ॥ २१ ॥ ननु पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां च अपृथक्त्वाद्यज्ञैः पुरुषाराधनं न सिद्ध्येदित्याशङ्क्य तत्परिहाराय यत्पुरुषेणेत्यस्यार्थं संगृह्णाति—

> यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः ॥ तद् द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन्॥२१॥ यदाऽस्य नाभ्यान्नलिनादहमासं महात्मनः॥ नाविदं यज्ञसंभारान्पुरुषावयवादृते ॥ २२ ॥ तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः ॥ इदं च देवयजनं कालश्चोरुगुणान्वितः॥२३॥ वस्तून्यो-षधयः स्नेहा रसलोहमृदो जलम् ॥ ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम ॥२४॥ नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च॥ देवतानुक्रमः कल्पः संकल्पस्तन्त्रमेव च ॥ २५ ॥ यतयो मतयश्चैव प्रायश्चित्तं समर्पणम् ॥ पुरुषावयवैरेते संभाराः संभृता मया ॥ २६ ॥

यदेति ॥ अस्य महात्मनः विराडन्तर्यामिणः तस्यैव प्रकृतत्वात् नाभ्यात् नाभौ भवात् नलिनात् पद्मात् यदाहमासम् अभूवम् तदा भगवन्तं यियक्षुरहं पुरुषस्य यज्ञपु-रुषस्य अवयवादृते अवयवादभिन्नान् यज्ञस्य संभारान् साधनानि नाविदं न ज्ञातवान् ॥ २२ ॥ तेष्विति चतुष्कम् ॥ हे सत्तम तेषु यज्ञस्य संभारेषु सम्पाद्येषु पशवः अजादयो वनस्पतयो यूपाद्यर्थाः खदिरादयस्तत्सहिताः कुशाश्च देवयजनं यज्ञभूमिः इदं चेति निर्देशात्तत्रैवोपविष्टः कथयतीति गम्यते । उरुभिर्बहुभिर्गुणैरन्वितो वसन्तादिः कालश्च वस्तूनि पात्रादीनि ओषधयो व्रीहियवादयः स्नेहा घृतादयः रसा मधुरादयः लोहाः स्वधित्यादयः मृदः कपालादीनि जलं च ऋचो यजूंषि सामानीति वेदत्रयोक्ता मन्त्राः चातुर्होत्रं होत्रादिभिश्चतुर्भिरनुष्ठेयं कर्म नामधेयानि ज्योतिष्टोमादीनि ऋगादीनामुक्तत्वान्मन्त्राः स्वाहाकारादयः दक्षिणा गवादयः व्रतानि पयोभक्षणादीनि देवताना-मनुक्रमः आनुपूर्व्योद्देशः कल्पः बौधायनादिकृतकर्मपद्धतिग्रन्थः अनेनैतदर्थमहं यक्ष्य इति संकल्पश्च । तन्त्रमनुष्ठानप्रकारः गतयो विष्णुक्रमाद्याः मतयो देवताध्यानानि प्रायश्चित्तं विघ्नसमाधनं कृतस्य भगवति समर्पणं च इत्येते संभारा मया पुरुषस्यावयवैरेव संभृताः सम्पादिताः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं पुरुषावयवैरेव संभृताः सम्पादिताः संभाराः यज्ञसाधनानि येन सः तथाभूतोऽहं तेनैव सम्पादितसंभारेण यज्ञेन तमेव यज्ञात्मकं पुरुषमीश्वरमयजमिष्टवान् । एवं च यज्ञेन यज्ञमितिमन्त्रार्थः सूचितः । तत्र पशुवृक्षादीनां भगवदूरुलोमादिभवत्वादवयवभवत्वं स्पष्टम् ॥ २७ ॥ तेन देवा इत्यस्यार्थमाह—तत इति ॥ ततोऽनन्तरमिमे ते तव भ्रातरो मरीच्यादयो नव प्रजानां पतयः सुसमाहिताः समाहितचित्ताः सन्तः प्रजासंवृद्ध्यर्थं तासु यज्ञप्रचारार्थं च इन्द्रादिरूपेण व्यक्तं स्वतश्चाव्यक्तं पुरुषं भगवन्तमयजन् । एतेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः ॥ २८ ॥ ततश्चेति ॥ ततोऽनन्तरं काले स्वेऽवसरे मनवः अपरे ऋषयश्चेत्याद्याः क्रतुभिर्यज्ञैर्विभुं सर्वेश्वरं तमीजिरे ॥ २९ ॥ यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति—नारायण इति ॥ यो भगवान् स्वतः अगुणोऽपि सर्गादौ सृष्ट्याद्यर्थं गृहीता मायाया उरवः गुणाः सत्वादयो येन तादृशो भवति तस्मिन् भगवति नारायणे तत् पूर्वोक्तमिदं दृश्यमानं विश्वमाहितमवस्थितम् ॥ ३० ॥ यत्परस्त्वमित्येतत्प्रश्नोत्तरं यदुक्तं स एष भगवान् सर्वेषां मम चेश्वर इति तदुपसंहरति—सृजामी-

इति संभृतसंभारः पुरुषावयवैरहम् ॥ तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥ २७ ॥ ततस्ते भ्रातर इमे प्रजानां पतयो नव ॥ अयजन्व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥ २८ ॥ ततश्च मनवः काले ईजिरे ऋषयोऽपरे ॥ पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम् ॥ २९ ॥ नारायणे भगवति तदिदं विश्वमाहितम् ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥ ३० ॥ सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ३१ ॥ इति तेऽभिहितं तात यथेदमनुपृच्छसि ॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम् ॥ ३२ ॥ न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ॥ न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठ्यवता धृतो हरिः ॥ ३३ ॥ सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवन्दितः पतिः ॥ आस्थाय योगं निपुणं समाहितस्तन्नाध्यगच्छं यत आत्मसंभवः ॥ ३४ ॥

ति॥ तन्नियुक्तोऽहं विश्वं सृजामि तद्वश एव हरो विश्वं हरति त्रिशक्तिं मायां धर्जति त्रिशक्तिधृक् "धृज गतौ" भगवान् पुरुषरूपेण विष्णुरूपेण विश्वं स्वयमेव परिपाति ॥ ३१ ॥ यच्चेदं विश्वं यदात्मकश्च त्वमित्यादिसर्वप्रश्नानां सामान्योत्तरं यदुक्तं "वासुदेवात्परो ब्रह्मन्" इत्यादि "पुरुष एवेदं सर्वम्" इति श्रुत्या च यद्दृढीकृतं तदुपसंहरति—इतीति ॥ हे तात यथा त्वमिदं पूर्वोक्तमनुपृच्छसि तथा तस्योत्तरमित्युक्तप्रकारेण ते तुभ्यं मयाभिहितम् अतः सदसदात्मकं कार्यकारणात्मकं भाव्यं सृज्यं किंचिदपि वस्तु भगवतः सकाशादन्यन्नास्तीति ॥ ३२ ॥ न भारतीति ॥ अङ्ग हे नारद यत् यस्मात् मे मया औत्कण्ठ्यं प्रेमोद्रेकस्तद्वता हृदा हरिर्धृतो ध्यातस्तस्मान्मे भारती वाणी क्वचिदपि विषये मृषा नोपलक्ष्यते न दृश्यते । मे मनसो गतिः संकल्पोऽपि क्वचिद्विषये मृषा न वै नैव भवति । मे हृषीकाणि इन्द्रियाणि क्वचिदप्यसत्पथे नैव पतन्ति एतेन मम वाङ्मनसेन्द्रियाणां वृत्तयो हरेः प्रभावादेव सत्यार्थाः नतु मत्प्रभावात् इत्युक्तम् ॥ ३३ ॥ सोऽहमिति ॥ सोऽहं समाम्नायमयः वेदाभ्यासपरः तपोमयो निरन्तरं तपोनिष्ठः

CC-0. In Public Domain. Digitization by eGangotri

प्रजापतीनां पतिः अत एव सर्वैरभिवन्दितः एवं सर्वोत्कृष्टोऽपि निपुणं साङ्गं योगमास्थायाश्रित्य समाहितः सावधानोऽप्यहं यत आत्मनो मम संभवो जन्म तमेव नाध्यगच्छं न ज्ञातवान् कुतोऽन्यस्य वार्त्ता। एतच्च तृतीयस्कन्धे पद्मोद्भवे वक्ष्यते ॥ ३४ ॥ नतोऽस्मीति ॥ समीयुषां शरणागतानां भवच्छिदं जन्मादिनिवर्त्तकं स्वस्त्ययनं कल्याणकरं सुमङ्गलं पुण्यप्रदं तस्य भगवतः चरणमहं नतोऽस्मि ततोऽचिन्त्यमहिमत्वेन ज्ञातवानस्मीति कैमुत्येनाह। यथा नभः कर्तृ स्वस्यान्तं न प्राप्नोति तथा यो भगवान् स्वयमपि आत्ममायायाः विभवं विस्तारं पर्यगात् परिशब्दोऽत्र निषेधेनागात् एतावानिति न ज्ञातवान्। अथ तदा अपरे अस्मदादयस्तु कुतो जानीयुः। अन्तस्याभावादेव तदज्ञानं न सर्वज्ञत्वं हन्ति ॥ ३५॥ नाहमिति ॥ यस्य ऋतां सत्यरूपां गतिं स्वरूपम् अहं ब्रह्मा न वेद यूयं नारदसनकादयः न वित्थ वामदेवो महादेवश्च न वेद यद्येते वयं महत्त्वेन ज्ञानित्वेन च प्रसिद्धा अपि यस्य ऋतां यथार्थरूपां गतिं स्वरूपं न विदुः न जानीमः आर्षः प्रथमपुरुषः। तर्ह्यपरेऽस्मदपेक्षया हीनाः सुरा अन्यदेवा न जानन्तीति किमुत वक्तव्यम्। आदौ विदुरिति बहुवचनक्रियावयवभूतवेदेत्यादिक्रियाऽध्याहारेणान्वयस्ततो नकाराध्याहारेण युगपत् विदुरित्यनेनान्वयः। "नेमं विरञ्चो न भवः" इति दशमस्कन्धवत्।

नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमङ्गलम् ॥ यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः स्वान्तमथापरे कुतः॥३५॥ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुताऽपरे सुराः ॥ तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ॥ ३६ ॥ यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः ॥ न यं विदन्ति तत्त्वेन तस्मै भगवते नमः ॥३७॥ स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः॥आत्माऽऽत्मन्यात्मनाऽत्मानं संयच्छति च पाति च॥३८॥ विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् ॥ सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम्॥ ३९ ॥

किं बहुना तस्य मायया मोहिता बुद्धिर्येषां तथाभूता वयं तद्विनिर्मितम् इदं जगदप्यात्मसमं स्वबुद्ध्यनुरूपमेव विचक्ष्महे जानीमो न परमार्थतः। चोप्यर्थे ॥ ३६ ॥ यस्येति ॥ यस्यावतारांस्तत्कर्माणि चास्मदादयो गायन्ति यं च तत्त्वेन न विदन्ति तस्मै भगवते नमः॥ ३७ ॥ अवतारकर्माणि संक्षेपतो दर्शयति—स एष इति ॥ स एष पूर्वोक्तः अजः आद्यः पुरुषावतारो भगवान् आत्मना स्वस्वरूपेणैव साधनभूतेन आत्मन्येवाधिकरण आत्मा स्वयमेव कर्ता सन्नात्मानमेव कर्मभूतं जगदाकारेण कल्पे कल्पे सृजति जगदाकारं पाति च संयच्छति अन्ते संहरति च। पुरुषोवतारः सृष्ट्यादीनि कर्माणि इति संक्षेपोक्तिः ॥ ३८ ॥ न यं विदन्ति तत्वेनेत्युक्तं तत्तत्त्वमाह—विशुद्धमिति ॥ ज्ञानमेव केवलं सत्यं तत्वं तच्च विशुद्धं विषयाकारशून्यं प्रत्यक् सर्वान्तरं सम्यक् सन्देहादिरहितम् अवस्थितं स्थिरम् अतः पूर्णम् अपरिच्छिन्नम् अनाद्यन्तं जन्मनाशरहितं निर्गुणं गुणकार्यं हि गुणक्षोभाच्चञ्चलं भवति अद्वयं च घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थं विशेषणानि। यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेव न चाञ्चल्यादिदोषयुक्तं तथापि वृत्तिदोषैस्तथा तथा भवतीति व्यवच्छिद्यते। एभिरेव विशेषणैः सत्यत्वमपि समर्थितम् ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषे इति ॥ हे ऋषे मुनयोऽपि प्रशान्तात्मेन्द्रियाशयाः प्रसन्नदेहेन्द्रियमनसो यदा भवन्ति तदा विदन्ति । यदा तु तदेव तत्वमसतां वेदविरुद्धैः कुतर्कैः विप्लुतं व्याप्तं भवति तदा तिरोधीयेत तिरोहितं भवति न प्रकाशते ॥ ४० ॥ कल्पे कल्पे आत्मानं सृजति इत्युक्तं तत्र के ते सृज्यमाना अवतारास्तत्राह–आद्य इति ॥ परस्य भूम्नो ब्रह्मणः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योऽवतारः । वक्ष्यति च भूतैर्यदा पञ्चभिरित्युपक्रम्य पुरुषाभिधानमवाप नारायण आदिदेवः इति तथा कालश्च स्वभावश्च सदसदिति कार्यकारणात्मिका प्रकृतिश्च मनश्च महत्तत्वं द्रव्यं महाभूतानि क्रमोऽत्र न विवक्षितः । विकारोऽहंकारः गुणः सत्वादिः इन्द्रियाणि विराड्ब्रह्माण्डात्मकसमष्टिदेहः स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जङ्गमं व्यष्टिशरीरम् ॥ ४१ ॥ अहमिति ॥ अहं ब्रह्मा भवो महादेवः यज्ञो विष्णुः दक्षादयो य इमे प्रजेशाः भवानादिर्येषां ते भवदादयो भक्ताश्च खगलोकपाला गरुडादयः स्पष्टाः शेषाः । एतेऽपि भगवतोऽवताराः ॥ ४२ ॥ गन्धर्वेति सार्द्धम् ॥ गन्धर्वादीनामीशाः यक्षादीनां

ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः ॥ यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम् ॥ ४० ॥ आद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ॥ द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥४१॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ॥ स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः ॥ ४२ ॥ गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ॥ ये वा ऋषीणामृषभाः पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः ॥ अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः ॥ ४३ ॥ यत्किं च लोके भगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपम् ॥ ४४ ॥

नाथाः रक्षोरगेति संधिरार्षः । ये च ऋषीणां पितॄणां च ऋषभाः श्रेष्ठाः स्पष्टाः शेषाः ॥ ४३ ॥ यदिति ॥ किंबहुना लोके यत् किं च यत् किंचित् भगवज्ज्ञानैश्वर्यादियुक्तं महस्वत्तेजोयुक्तम् ओजःसहसी इन्द्रियमनःशक्ती तद्युक्तं बलं शरीरशक्तिस्तद्वत् तद्युक्तं क्षमावत् श्रीः शोभा ह्रीरकर्मजुगुप्सा विभूतिः सम्पत्तिः आत्मा यथार्थबुद्धिस्तद्वत्तद्युक्तम् अर्णो वर्णः अद्भुतार्णमाश्चर्यवर्णं विद्युदादि । यद्वा । अर्णशब्दोऽक्षरवाची नवार्णो मन्त्र इतिवत् । अद्भुतान्यपौरुषेयत्वादलौकिकान्यर्णानि वर्णा यत्र तत् वेदरूपं वस्तु रूपवत् मूर्तम् अस्वरूपम् अमूर्तं तत्सर्वं परमेव तत्त्वं ज्ञेयम् । अत्र कालस्वभावप्रकृतयः शक्तयः मनआदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतयः अन्ये केचित् ज्ञानियोगिप्रभृतयः स्थावरजङ्गमान्ताः पुरुषावतारस्य सृष्ट्यादिर्लीलापरिकरा ज्ञेयाः ॥ ४४ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

प्राधान्यत इति ॥ एवं मायाशक्तिप्राधान्येन पुरुषावतारमुक्त्वा चिच्छक्तिमयान् वराहयज्ञादीन्वक्तुमाहेति भक्तैरवतार्यते। शुद्धसत्वावतारान् वक्तुमाहेति श्रीस्वामिपादैः। हे ऋषे भूम्नः पुरुषस्य यान् लीलावतारान् प्राधान्यतो विज्ञाः आमनन्ति कथयन्ति तथा असत्कथाश्रवणेन ये कर्णयोः कषायाः तान् शोषयन्ति तान् सुपेशान् सुन्दरान् लकारलोप आर्षः। तानिमान्सम बुद्धावुपस्थितानहं ते तुभ्यमनुक्रमिष्ये अनुक्रमेण कथयिष्यामि तङार्षः। एवं चेडप्यार्षः। तदनुक्रमणं त्वया पीयतां पानवत्स्वान्तःकरणे स्थाप्यताम्। यद्वा। आपीयतामिति शत्रन्तमार्षम्। आपिबतां कर्णकषायशोषान्।यद्वा आपीयतां "पीङ् पाने" दिवादिः।भवान् आपिबतु॥४५॥इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम्॥ गङ्गासहायो द्वितीयषष्ठेऽध्याये व्यधादिमाम् ॥६॥सप्तमे वर्णिताः कर्मप्रयोजनगुणैः सह ॥ अवतारा हरेस्तत्र श्लोका दहनमार्गणाः ॥ उवाचेत्येकं विपादा नवतिः स्यादनुष्टुभाम् ॥ ७ ॥ यत्रेति ॥ अनन्तो भगवान् यत्र यदा क्षितितलोद्धरणाय सकलयज्ञमयीं क्रौडीं वाराहीं तनुं बिभ्रदुद्यतः उद्योगं कृतवांस्तदा अन्तर्महार्णवे महार्णवमध्य उपागतं

प्राधान्यतो यान्नृष आमनन्ति लीलावतारान्पुरुषस्य भूम्नः॥ आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान् ॥४५॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे विराड्विभूतिपुरुषसूक्तार्थवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ ब्रह्मोवाच ॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्क्रौडीं तनुं सकलयज्ञमयीमनन्तः ॥ अन्तर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाऽद्रिमिव वज्रधरो ददार ॥१॥ जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम् ॥ लोकत्रयस्य महतीमहरद्यदाऽऽर्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥ जज्ञे च कर्दमगृहे द्विजदेवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ॥ ऊचे ययाऽऽत्मशमलं गुणसङ्गपङ्कमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ॥३॥ अत्रेरपत्यमभिकाङ्क्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः ॥ यत्पादपङ्कजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥ ४ ॥

तं सुप्रसिद्धमादिदैत्यं हिरण्याक्षं वज्रधर इन्द्रः अद्रिमिव दंष्ट्रया ददार विदारितवान् करेण कर्णमूलेऽहन्निति वक्ष्यमाणकरप्रहारानन्तरं दंष्ट्रया ददारेति न विरोधः ॥ १ ॥ जात इति ॥ रुचेः प्रजापतेः सकाशाद्भार्याया आकूतेः सूनुः सुतः सुयज्ञो नाम जातः। अथ च स्वभार्यायां दक्षिणायां सुयमान् अमरान् देवान् अजनयत् स एव यदा इन्द्रः सन्दैत्यवधादिना लोकत्रयस्य महतीमार्तिं पीडामहरत्तदा पूर्वं सुयज्ञ इत्युक्तोऽपि अनु पश्चात् स्वायंभुवेन मनुना मातामहेन हरिरित्युक्तः। एतेन देवोत्पादनं लोकत्रयार्त्तिहरणं च कर्म दर्शितम् एवमग्रेऽपि ॥२॥ जज्ञ इति ॥ हे द्विज नारदकर्दमस्य प्रजापतेर्गृहे च तद्भार्यायां देवहूत्यां नवभिः स्त्रीभिर्भगिनीभिः समं सह जज्ञे। स च स्वमात्रे आत्मगतिं ब्रह्मविद्यामूचे उक्तवान्। यया आत्मगत्या सा माता आत्मनः शमलं मलिनीकरणं गुणसङ्गरूपं पङ्कमस्मिन्नेव जन्मनि विधूय दूरीकृत्य कपिलस्य गतिं कपिलोक्तमात्मतत्वं प्रपेदे प्राप्तवती ॥ ३ ॥ अत्रेरिति ॥ अपत्यं पुत्रमभिकाङ्क्षतः अत्रेस्तुष्टः सन्मयाहमेव तुभ्यं दत्त इति यत् यस्मादाह स्म तस्मात्स भगवान् दत्त इति नाम्ना जातः। यस्य दत्तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादपङ्कजयोर्यः परागस्तेन पवित्रा देहा येषां ते यदुहैहयाद्याः यदुः प्रसिद्धः हैहयः सहस्रार्जुनः तत्प्रभृतय उभयींमैहिकीमणिमाद्यैश्वर्यरूपामामुष्मिकीं मुक्तिरूपां च योगर्द्धिमापुः । तेषां मध्ये हैहयं तु प्राप्तयोगर्द्धिकमपि महदपराधाद्धेतोः कुप्यन्परशुरामो जघान इति ज्ञेयम् ॥ ४ ॥ तप्तमिति ॥ विविधलोकस्य सिसृक्षया स्रष्टुमिच्छया आदौ कल्पादौ यन्मे मया तपस्तप्तं तस्य स्वतपसः सनात् दानात् तस्मिन् समर्पणात् "षणु दाने" स हरिश्चतुःसनोऽभूत् सनत्कुमारः सनकः सनन्दनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य तथाविधो जातः । यद्वा । यन्मया तपस्तप्तं तस्मात्स्वतपसो हेतोः सनादिति नाम्ना चतुःसनोऽभूत् । "सनात्सनातनतमः" इति श्रीविष्णुसहस्रनामस्तोत्रात् सनशब्दमतति व्याप्नोतीति सनात् स च प्राक् कल्पस्य संप्लवे प्रलये विनष्टमुच्छिन्नसम्प्रदायमात्मतत्त्वमिह अस्मिन्कल्पे सम्यक् जगाद । यद् गदितमात्रमेवात्मतत्त्वं मुनयः आत्मन् स्वस्मिन्नेवाचक्षत साक्षादपश्यन् ङ्लुगार्षः ॥५॥ धर्मस्येति ॥ धर्मस्य भार्यायां दक्षस्य दुहितरि मूर्त्यां मूर्तिसंज्ञायां स्वः असाधारणः तपःप्रभावो यस्य तथाभूतः नारायणो नर इति च स्वरूपद्वयेन अजनिष्ट । अनङ्गस्य पृतनाः सेनारूपाः देव्यः अप्सरसः भगवन्तं मोहयितुं प्रवृत्ता अपि आत्मनः इति जात्यैकत्वम् आत्मभ्यो

तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥ ५ ॥ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः ॥ दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनङ्गपृतना घटितुं न शेकुः ॥ ६ ॥ कामं दहन्ति कृतिनो ननु रोषदृष्ट्या रोषं दहन्तमुत ते न दहन्त्यसह्यम् ॥ सोऽयं यदन्तरमलं प्रविशन्बिभेति कामः कथं नु पुनरस्य मनः श्रयेत ॥ ७ ॥ विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि ॥ तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात् ॥ ८ ॥

हेतुभ्यो भगवतो नियमस्य अवलोपं व्रतभङ्गाभावं दृष्ट्वा घटितुं चेष्टितुं न शेकुः शापभयात्स्तब्धा बभूवुः । वष्टिभागुरिरित्यवस्याकारलोपे नञ्समासेऽवलोप इति सिद्धम् । यद्वा । भगवतः सकाशात् आत्मनः इति द्वितीयान्तम् । स्वप्रतिरूपा उर्वश्याद्याः स्त्रीर्दृष्ट्वा नियमावलोपं व्रतभङ्गाभावं च दृष्ट्वा घटितुं न शेकुर्विस्मयेन स्तब्धा बभूवुः । यद्वा । उर्वश्याद्याः स्त्रीर्दृष्ट्वा भगवतो नियमावलोपं व्रतभङ्गं घटितुं कर्तुं न शेकुः ॥६॥ यत्र कामजयी क्रोधोऽपि बिभेति तत्र का वार्त्ता कामस्येत्याह—काममिति॥ ननु कृतिनो रुद्रादयो रोषयुक्तया दृष्ट्या कामं दहन्ति रोषं तु असह्यमत एव आत्मानं दहन्तमुत अपि ते न दहन्ति तद्दाहे समर्था नैव भवन्ति किंतु क्रोधेनैवाभिभूयन्ते सोयं रोषः अमलं निर्मलं यस्य अन्तः मनः निविशन् आर्षः शता । प्रविशान्निति वा पाठः । स्वनाशशङ्कया बिभेति तर्हि पुनः कामोऽस्य मनः कथं नु श्रयेत प्रविशेत्॥७॥ विद्ध इति ॥ राज्ञः उत्तानपदः अन्ति समीप एव मातुः सपत्न्याः सुरुचेः उदितानि वाक्यान्येव पतत्रिणो बाणास्तैर्विद्धो बालोऽपि सन् यो ध्रुवस्तपसे तपः कर्तुं वनान्युपगतस्तस्मै गृणते स्तुवते प्रसन्नः सन् ध्रुवगतिं स्थादि-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

स्थलविशेषमदात् । यत् यां ध्रुवगतिं दिव्याः दिविभवाः मुनयः उपरिस्थिता भृग्वादयः अधस्ताच्च स्थिताः सप्तर्षयः स्तुवन्ति प्रशंसन्ति अयं पृश्निगर्भावतार इति भागवतामृते दशमस्कन्धे पृश्निगर्भस्य कर्माकथनादत्र नामाकथनात्परस्परसापेक्षत्वेन सङ्गतेरौचित्यात् तथा चोक्तम् । अस्यात्र चरितानुक्त्या नामानुक्त्या च तत्र वै परस्परमपेक्षित्वाद्युक्त्या चैकत्र सङ्गतिरिति ॥८॥ यदिति ॥ यद् यदा ऋषिभिरर्थितः प्रार्थितस्तदा द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं संदग्धं पौरुषं भगं सौभाग्यं च यस्य उत्पथं गतम् अतो निरये पतन्तं वेनं त्रात्वा अन्वर्थं तत्पुत्र इति पदं नाम लेभे । पुतः नरकात्त्रायते इति पुत्र इति व्युत्पत्तेः । " पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥ " इति वचनात् श्रीपृथुः स्वपितुर्नरकभोगानन्तरं कुष्ठिम्लेच्छत्वप्राप्तिं श्रुत्वा तमानीय पृथूदकारण्ये कुरुक्षेत्रे तीर्थे स्नपनादिना तं यातनाभोगादुद्धधारेति वामनपुराणकथात्रानुसन्धेया । यथा येन पृथुना जगति सर्वप्राणिनिमित्तं सकलानि वसूनि अन्नादिवस्तूनि वसुधा पृथ्वी दुग्धा अदुह्यत दुहिर्द्विकर्मकः ॥ ९ ॥ नाभेरिति ॥ असौ हरिर्नाभेराग्नीध्रपुत्रात्सुदेव्याः मेरुदेवीत्यपरनाम्न्याः सूनुः ऋषभाख्य आस दिदीपे । " अस गतिदीप्त्यादानेषु " समदृक् स्वस्थः स्वानन्दनिष्ठः प्रशान्तकरणः परितो

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतन्तम् ॥ त्रात्वाऽर्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन ॥९॥ नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग् जडयोगचर्याम् ॥ यत्पारमहंस्यमृषयः पदमामनन्ति स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः ॥ १० ॥ सत्रे ममास भगवान्हयशीरषाऽथो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः ॥ छन्दोमयो मखमयोऽखिलदेवतात्मा वाचो बभूव रुशतीः श्वसतोऽस्य नस्तः ॥११॥ मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ॥ विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥ १२ ॥

मुक्तसङ्गः यो वै ऋषभो लोकसंग्रहार्थं जडवद्योगेन नित्यसमाधिना चर्यां चचार यत् यां योगचर्यामृषयः पारमहंस्यं परमहंससंबन्धि पदमामनन्ति कथयन्ति। यद्वा । यस्य पारमहंस्यं पदं चिह्नं ऋषयः आनमन्ति अभ्यस्यन्ति ॥१०॥ सत्र इति ॥ स एव साक्षाद्भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्षा शीर्षन्नार्षः अकाराधिक्यं च । आस आविर्बभूव । स च यज्ञपुरुषः यज्ञैराराध्यः तपनीयवर्णः सुवर्ण्यतुल्यवर्णः छन्दोमयः वेदमयः मखमयः छन्दोविधेया ये मखास्तन्मयः मखैर्यजनीया अखिला देवतास्तदात्मा एतेन श्रुतीनां कर्मकाण्डदेवकाण्डसंबन्धित्वं गम्यते । मखमय इत्यत्र अमृतमय इति वा पाठः । अस्य हयग्रीवस्य श्वसतः श्वासान् विमुञ्चतो नस्तो नासिकातः उशतीः उशत्यः कमनीयाः " वा छन्दसि " इति जस्यपि पूर्वसवर्णदीर्घः । वेदलक्षणा वाचो बभूवुः ॥ ११ ॥ मत्स्य इति ॥ मत्स्यरूपो भगवान् युगान्तसमये मनुना भाविना वैवस्वतेन पूर्वजन्मनि सत्यव्रतसंज्ञकेन उपलब्धो दृष्टः क्षोणीमयः पृथिवीप्रधानः पृथिव्या आश्रय इत्यर्थः। अत एव निखिलानां जीवानां निकायस्य समूहस्य केत आश्रयः स च मे मम मुखाद्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रंसितान् विगलितान् हयग्रीवनामकेन दानवेनापहृतान् वेदमार्गान् वेदान् तं हत्वा तत आदाय मह्यं समर्प्येति पुराणान्तराज्ज्ञेयं सत्यव्रतं चोपदिशंस्तत्र उरुभये युगान्तसलिले विजहार ह ॥१२॥ क्षीरेति ॥ अमरदानवयूथपानाममृतस्य लब्धये क्षीरोदधिमुन्मथ्नतां सतां निद्रायां क्षण उत्सवो यस्य स अद्रेः परिवर्त्तः परिभ्रमणं तेन कषाणा कष्यमाणा अपनीयमाना कण्डूर्यस्य "कष हिंसायाम्" यगभाव आर्षः । यद्वा । अद्रिपरिवर्त्त एव कषाणं कषणमपनयनसाधनं यस्याः सा कण्डूर्यस्य सः आर्षः कवभावः आकारश्च। आदिदेवो भगवान् क्षीरोदधौ कच्छपवपुः धृतकूर्मतनुः पृष्ठेन गोत्रं कृतमन्थानरूपं मन्दराचलं विशेषेण हर्षेण दधार ॥ १३ ॥ त्रैविष्टपेति ॥ त्रिविष्टपे स्वर्गे भवास्त्रैविष्टपा देवास्तेषामुरुभयं हन्ति स भगवान् भ्रमन्त्यो भ्रुकुट्यौ दंष्ट्राश्च यस्मिंस्तथाभूतं करालं वक्त्रं यस्मिंस्तथाभूतं नृसिंहयोर्मिश्रं रूपं कृत्वा धृत्वा आरात् स्वसमीपे गदया सहाभिपतन्तं संमुखमागच्छन्तं दैत्येन्द्रं हिरण्यकशिपुं स्वस्योरौ निपात्य स्फुरन्तमितस्ततश्चेष्टमानं तं नखैराशु विददार ॥ १४ ॥ हरिसंज्ञकावतारमाह—अन्तरिति ॥ गजयूथस्य

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः ॥ पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्तकषाणकण्डूः ॥१३॥ त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ॥ दैत्येन्द्रमाशु गदयाऽभिपतन्तमारादूरौ निपात्य विददार नखैः स्फुरन्तम् ॥१४॥ अन्तःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्तः ॥ आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमङ्गलनामधेय ॥ १५ ॥ श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ॥ चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान्कृपयोज्जहार ॥ १६ ॥ ज्यायान्गुणैरवरजोऽप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः ॥ क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञामृते पथि चरन्प्रभुभिर्न चाल्यः ॥ १७ ॥

पतिः अन्तः सरसि सरोमध्ये उरुबलेन ग्राहेण पदे गृहीतः अत एव आर्तः पीडितः सन् ततो विमुक्त्यर्थं हे आदिपुरुष हे अखिललोकनाथ हे तीर्थं पापनाशकं श्रवो यशो यस्य हे श्रवणयोर्मङ्गलरूपनामधेय इति संबोधनचतुष्कमाह स्म ॥ १५ ॥ श्रुत्वेति ॥ तदा अप्रमेयः अतिबलः भगवान् हरिः तच्छ्रुत्वा कृपया चक्रायुधः गृहीतचक्रः पतगराजस्य गरुडस्य भुजौ स्कन्धावधिरूढः सन् तत्रागत्य अरणार्थिनं शरणार्थिनं गजं हस्ते शुण्डायां प्रगृह्य चक्रेण नक्रस्य वदनं विनिपाट्य च्छित्त्वा तस्माद् ग्राहवदनादुज्जहार उद्धृतवान् ॥ १६ ॥ ज्यायानिति ॥ अदितेः सुतानां द्वादशादित्यानां मध्ये अवरजः कनीयानपि गुणैर्ज्यायान् ज्येष्ठः अधियज्ञः यज्ञाधिपतिर्विष्णुः यत् यतो हेतोः अथ बलिवचनानन्तरमेवेमान् त्रींल्लोकान् विचक्रमे पादविन्यासैः क्रान्तवान् अतः त्रिपदच्छलेन वामनेन रूपेण क्ष्मां सर्वामेव भूमिं जगृहे। नन्वीश्वरस्तथा दुर्बलवत्किमिति चकार तत्राह । यतः याच्ञामृते विना पथि चरन् सन्मार्गे प्रवर्तमानः प्रभुभिः समर्थैः स्वामिभिर्न चाल्यः ऐश्वर्यान्न भ्रंशनीयः अतः याच्ञामेव चक्रे ॥ १७ ॥

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

ननु तर्हि याच्ञयापि चालनमनुचितमेवेत्याशङ्क्य बलेस्तु देवाधिपत्यं नापेक्षितं यतस्तद्गृहीत्वा ततोऽधिकं स्वसालोक्यादि दास्यामीत्याशयेन हृतवानित्याह–नार्थ इति ॥ अङ्ग हे नारद उरुक्रमस्य वामनस्य पादशौचं चरणक्षालनरूपाः आ अप इति च्छेदः अपः जलानि आ आदरेण शिखाः शिखासु मूर्ध्नीत्यर्थः सप्तम्यर्थे द्वितीया । सानुस्वारोऽपि पाठः । धृतवतः बलेः यदिदानीं तेन बलात्प्राप्तमग्रे च तत्संतोषार्थं भगवता दीयमानं विबुधानामाधिपत्यं राज्यं तदयमर्थः पुरुषार्थः न भवति यो वै महादानित्वेन प्रसिद्धो बलिर्गुरुणा शुक्रेण वारितः शप्तोऽपि प्रतिश्रुतमृते प्रतिज्ञातार्थं विनान्यन्न चिकीर्षत् कर्तुं नैच्छत् । " बहुलं छन्दस्यमाङ्योगेऽपि " इत्यडभावः । किंतु तृतीयपादपूरणार्थं शिरसा अत्यादरेण हरये आत्मानमभिमेने समर्पितवान् । अतः सदेहं त्रैलोक्यं श्रद्धया ददतो बलेर्विबुधापत्यमर्थो न भवतीति भावः ॥ १८ ॥ तुभ्यमिति ॥ हे नारद भृशमत्यन्तं विवृद्धेन भावेन स्नेहेन साधु सम्यक् परितुष्टः स भगवांस्तुभ्यं च योगं भक्तियोगम् आत्मनः तत्वेन याथार्थ्येन सह स तत्वं यथार्थं स्वरूपं सत्त्वशब्द एव वा यथार्थस्वरूपवाची । तथा च हैमः । " स्याद्रूपं लक्षणं भावश्चात्मप्रकृतिरीतयः । सहजो रूपतत्त्वं च धर्मः सर्गो निसर्गवत् ॥ शीलं ससत्त्वं संसिद्धिः " इति तस्य दीपं प्रकाशकं

नार्थो बलेरयमुरुक्रमपादशौचमापः शिखां धृतवतो विबुधाधिपत्यम् ॥ यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमङ्ग शिरसा हरयेऽभिमेने ॥ १८ ॥ तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधु परितुष्ट उवाच योगम् ॥ ज्ञानं च भागवतमात्मसतत्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव ॥ १९ ॥ चक्रं च दिक्ष्वऽविहतं दशसु स्वतेजो मन्वन्तरेषु मनुवंशधरो बिभर्ति ॥ दुष्टेषु राजसु दमं व्यदधात्स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥ २० ॥ धन्वन्तरिश्च भगवान्स्वयमेव कीर्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हन्ति ॥ यज्ञे च भागममृतायुरवाप रुद्धमायुश्च वेदमनुशास्त्यवतीर्य लोके ॥ २१ ॥

ज्ञानं ज्ञानसाधनं भागवतं च हंसरूपेणोवाच । यदा त्वं सनकादिभ्य इत्यत्रैकादशस्कन्ध आदिशब्देन नारदस्यापि ग्रहणात् विष्णुधर्मोत्तरे तस्य स्पष्टत्वाच्च । यद्धंसोक्तमभिज्ञानादिकं वासुदेवशरणा भगवद्भक्ता एवाञ्जसा सुखेन विदुर्जानन्ति नान्ये । अत्रैकादशोक्तो हंसावतारो भिन्न एवेति केचिदाहुः । अत्र तुभ्यं चेति चकारेण नारदावतारोऽप्युक्त इत्यप्याहुः ॥ १९ ॥ चक्रमिति ॥ मनुवंशस्य धरः पालकः सन्भगवान्मन्वन्तरेष्ववतीर्य विविधैश्चरित्रैस्त्रयाणां लोकानां पृष्ठे उपरि वर्तमाने सत्ये सत्यलोके तत्पर्यन्तामुशतीं मनोहरां स्वकीर्तिं प्रथयन् विस्तारयन् दशसु दिक्ष्वविहतमप्रतिहतं चक्रं सुदर्शनचक्रमिव स्वतेजो बिभर्ति तेन च दुष्टेषु राजसु दमं दण्डं व्यदधात् ॥ २० ॥ धन्वन्तरिश्चेति ॥ भगवान्धन्वन्तरिरूपेण लोकेऽवतीर्य स्वयमेव कीर्तिः कीर्तिरूपः सन् पुरुरुजां महारोगिणां नृणां रुजो रोगान्स्वनाम्नैव आशु शीघ्रं हन्ति आयुर्विषयकं वेदं वैद्यशास्त्रं चानुशास्ति प्रवर्त्तयति अत एवामृतं मरणरहितमायुर्यस्मात्तथाभूतः सन् रुद्धं पूर्वं प्रतिषिद्धमपि यज्ञे स्वभागमवाप । अवावरुन्धे इति पाठे अव अवसन्नं स्वभागम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवरुन्धे स्म लभते स्म ॥ २१ ॥ क्षत्रमिति ॥ असौ महात्मा भगवान् उग्रवीर्यः परशुरामरूपेणावतीर्णः सन् क्षयाय मृत्यवे विधिना तत्प्रारब्धेनोपभृतं समर्पितं ब्रह्मध्रुक् उज्झितपथं त्यक्तवेदमार्गं नरकाणामार्त्तिं लिप्सुर्लब्धुमिच्छु इव अवनेः कण्टकवद्व्यथकं क्षत्रं क्षत्रियजातिमात्रम् उरुधारपरश्वधेन दीर्घतीक्ष्णधारेण परशुना त्रिःसप्तकृत्वः एकविंशतिवारान् उद्धन्ति उत्पाटयति॥ २२ ॥ अस्मदिति ॥ अस्माकं ब्रह्मादीनां प्रसादे कार्ये अस्मासु यः प्रसादस्तेन वा सुमुख उद्युक्तः कलाया मायाया ईशः यद्वा कलानामैश्वर्यादीनामीशः नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितमिति वाक्यादैश्वर्यादिगुणपरिपूर्णो भगवान् कलया भरतादिरूपया सहेक्ष्वाकुवंशेऽवतीर्य वंश अवतीर्येति पूर्वरूपाभाव आर्षः । गुरोर्दशरथस्य निदेश आज्ञायां तिष्ठन् स दयितानुजः सीतालक्ष्मणाभ्यां सहितो वनमाविवेश । यस्मिन् श्रीरामे विरुध्य विरोधं कृत्वा दशकन्धरो रावणः आर्तिं दुःखं नाशमार्च्छत् प्राप्तः ॥२३॥ यस्मा इति ॥ ऊढं प्राप्तं यद् भयं तेनाङ्गे वेपः कम्पो यस्य तथा दूरे लङ्कायां वर्तमाना या सुहृत् सीता तया निमित्तभूतया मथितः क्षुभितो यो रोषस्तेन सुशोणा आरक्ता या श्रीरामस्य दृष्टिस्तया अत्यन्तं तप्यमानं मकराणामुरगाणां नक्राणां च चक्रं समूहो यस्मिन्स उदधिः समुद्रः हरवत् त्रिपुरदाहे

क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सुः ॥ उद्धन्त्यसाववनिकण्टकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन ॥ २२ ॥
अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे॥तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकन्धर आर्तिमार्च्छत् ॥२३॥यस्मा अदादुदधिरूढभयाङ्गवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः॥दूरे सुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः ॥२४॥
वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितककुब्जुष ऊढहासम्॥ सद्योऽसुभिः सह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥२५॥
भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः॥जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबन्धनानि॥२६॥

हरस्येव सपदि शीघ्रमेव अरिपुरं लङ्कां दिधक्षोर्दग्धुमिच्छोः दग्धुमिच्छवे चतुर्थीविशेषणे षष्ठी आर्षी । यस्मै श्रीरामाय मार्गमदात् । यद्वा । अरिपुरं दिधक्षो रामस्य या दूरे सुहृन्मथितरोषसुशोणा दृष्टिस्तया तातप्यमानमकरादिचक्र उदधिर्यस्मै रामाय मार्गमदादिति । यद्वा । दिधक्षोरिति पञ्चमी दिधक्षो रामाद्भयमिति ॥२४॥ वक्ष इति ॥ अधिसैन्ये अधिके स्वपरसैन्यमध्ये उच्चरत उत्कर्षेण विचरतो दारहर्तू रावणस्य इन्द्रेण सह युद्धे रावणवक्षःस्थलस्य स्पर्शेन रुग्णा भग्ना ये महेन्द्रवाहस्य ऐरावतस्य दन्तास्तैर्विडम्बिताः स्वधवलिम्ना धवलीकृतास्तत्तद्दिक्षु पतितैः प्रकाशिताः ककुभो दिशस्तासां जयेन रूढो हासो मम समः कोऽन्योऽस्तीति सञ्जातो यो महागर्वस्तमसुभिस्तत्प्राणैः सह सद्यः शीघ्रमेव धनुषो विस्फूर्जितैष्टङ्कारघोषैरेव नेष्यति अपनेष्यति । ककुब्जुष ऊढहासमिति पाठे तु ककुभो जुषते सेवते विजित्य भुङ्क्त इति तथा तस्य ऊढं प्राप्तं हासमित्यर्थः ॥ २५ ॥ भूमेरिति ॥ सुरेतरा असुरांशभूता राजानस्तेषां वरूथैः सैन्यैर्विमर्दिताया भारेण पीडितायाः भूमेः क्लेशस्य व्ययाय नाशाय सिताः बद्धाः “ षिञ् बन्धने ” कृष्णाः

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

केशा येन सः उद्युक्त इत्यर्थः । कार्यारम्भसमये परिकर इव केशा अपि बध्यन्ते ॥ भगवान् कलया संकर्षणप्रद्युम्नानिरुद्धरूपया सह जातो जनैरनुपलक्ष्यो न ज्ञातो मार्गः भगवानेवायमिति गतिर्यस्य तथाभूतश्च सन् आत्मनः स्वस्य महिमा उपनिबध्यते अभिव्यज्यते येषु तानि कर्माणि करिष्यति । यत्तु विष्णुपुराणे भारते च विष्णुना स्वीयौ श्वेतकृष्णौ केशौ उद्धृतौ ततो रामकृष्णाववतीर्णावित्युक्तं तत्तु न केशमात्रावताराभिप्रायकं किंतु भूभारावतारणरूपं कार्यं कियदेतन्मम केशावेव तत्कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च कल्पान्तरविषयकावतारपरं वेति गम्यते । अन्यथा विष्णुपुराण एव पूर्वापरविरोधापत्तेः । कृष्णस्तु भगवान् स्वयमित्यादिविरोधाच्चेति संक्षेपः ॥२६॥ तोकेनेति ॥ यत्तोकेन बालेनैव सता उलूकिकायाः उलूकवन्निशाचर्याः पूतनाया जीवहरणं यच्च त्रैमासिकस्य त्रिमासवयस्कस्यातिकोमलेन पदा पादेन शकटः अपवृत्तः विपर्यस्ततया पतितः यच्च रिङ्खता जानुभ्यां गच्छतारिंगतेति च पाठः । अन्तरगतेन मध्यं प्राप्तेन दिविस्पृशोर्वै अत्युच्चयोरपि अर्जुनवृक्षयोरुन्मूलनमुत्पाटनं तदेतत्त्रितयमितरथा तस्यानीश्वरत्वे सति न भाव्यमवश्यं नोपपन्नं भवति अतोऽतिमानुषकर्मकरणं तस्येश्वरत्वे दृढं प्रमाणम्॥२७॥यद्वै इति॥यद्वै व्रजे व्रजपशून् पालान् बालकांश्च विषमिश्रतोयस्य

तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ॥ यद्रिङ्खतान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथाऽर्जुनयोर्न भाव्यम् ॥ २७ ॥ यद्वै व्रजे व्रजपशून्विषतोयपीथान्पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ॥ तच्छुद्धयेऽतिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन्ह्रदिन्याम् ॥ २८ ॥ तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने ॥ उन्नेष्यति व्रजमतोऽवसितान्तकालं नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः ॥ २९ ॥ गृह्णीत यद्यदुपबन्धममुष्य माता शुल्बं सुतस्य नतु तत्तदमुष्य माति ॥ यज्जृम्भतोऽस्य वदने भुवनानि गोपी संवीक्ष्य शङ्कितमनाः प्रतिबोधिताऽऽसीत् ॥ ३० ॥

जलस्य पीथं पानं येषां तान् मृतान् अनुग्रहदृष्टिरूपसुधावृष्ट्या अजीवयत् । यच्च ह्रदिन्यां यमुनायां विहरन् तस्या यमुनायाः शुद्धये निर्विषत्वाय अतिविषवीर्येण विलोला चञ्चला जिह्वा यस्य तमुरगं कालियाख्यं सर्पमुच्चाटयिष्यत् ततो निष्कासयिष्यति इकारलोपश्छान्दसः । तदपीतरथा न भाव्यमित्यनुषङ्गः ॥ २८ ॥ तत्कर्मेति ॥ अनधिगम्यं दुर्गमं वीर्यं यस्य सः सबलः बलदेवयुतः श्रीकृष्णः यत् कालियदमनानन्तरं यमुनातीरे निशि रात्र्यां व्रजमुन्नेष्यंति उद्धरिष्यति अग्नितो रक्षिष्यति इत्येकदारचरितम् । तथा शुचिर्ग्रीष्मस्तत्संबन्धिनि शुष्के वने मुञ्जाटव्यां दावाग्निना परितो दह्यमाने सति निःशयानम् अतो दावाग्नेर्हेतोरवसितो निश्चितोऽन्तकालो मरणसमयो यस्य तं व्रजं गोगोपालादिरूपव्रजवासिनः नेत्रे पिधाप्य पिहिते कारयित्वा पुक्स्थले युगार्षः। अग्निं पीत्वा तत उन्नेष्यति इति द्वितीयवारम्। तदुभयमपि कर्म दिव्यमिव इव एवार्थे अलौकिकमेवेति वारद्वयमग्नितो रक्षणमुक्तम्॥२९॥ गृह्णीतेति ॥ यच्च अमुष्य कृष्णस्य माता यशोदाऽस्य बन्धनार्थं यद्यदुपबन्धमुपबध्यतेऽनेनेत्युपबन्धं शुल्बं रज्जुं गृह्णीत गृह्णाति तत्तदमुष्य सुतस्य नतु माति स्म । बन्धनसांमितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न भवति। यच्च जृम्भतोऽस्य कृष्णस्य शता आर्षः। वदने चतुर्दशभुवनानि संवीक्ष्य दृष्ट्वा गोपी यशोदा आदौ किं स्वप्नमेतदुत देवमायेत्येवं शङ्कितमनाः सती पुनरनेनैव अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति निजैश्वर्यज्ञापनेन प्रतिबोधितासीत्तच्च कर्म दिव्यमेव ॥३०॥ नन्दं चेति ॥ भयात् सुदर्शनसर्पग्रासरूपात् तथा वरुणस्य पाशाच्च वरुणस्य पाशाद्वद्धयं तस्मादिति वा नन्दं स्वपितरं मोक्ष्यति मयसूनुना व्योमनाम्नाऽसुरेण गोपान् विक्रीडतो गोपबालांश्च बिलेषु गुहायां पिहितान् विमोक्ष्यति अह्नि दिवसे आपूतं कृतव्यापारमत एवातिश्रमेण त्रस्तं निशि शयानमिति सर्वथा वैकुण्ठगमनसाधनहीनमपि गोकुलं गोकुलवासिजनं विकुण्ठे नित्ये लोके उपनेष्यति प्रापयिष्यति स्मेत्याश्चर्यं। तदपि कर्म दिव्यमेव ॥ ३१ ॥ गोपैरिति ॥ गोपैर्मखे इन्द्रयागे प्रतिहते सति व्रजस्य विप्लवाय देवे इन्द्रे अभिवर्षति सति कृपया पशून् उपलक्षणेन व्रजवासिजनांश्च रिरक्षुः रिरक्षिषुः इडभाव आर्षः। सप्तवर्षः सप्तवर्षवयस्को बालोऽपि अनघे श्रमरहित एकस्मिन्नेव करे अनघेति संबोधनं वा। सलीलं वेणुवादनहासादिलीला-

नन्दं च मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान्बिलेषु पिहितान्मयसूनुना च॥ अह्न्यापृतं निशि शयानमतिश्रमेण लोके विकुण्ठ उपनेष्यति गोकुलं स्म ॥३१॥ गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून्कृपया रिरक्षुः॥ धर्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम्॥३२॥ क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन॥ उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य॥३३॥ ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः॥ अन्ये च शाल्वकपिबल्वलदन्तवक्त्रसप्तोक्षशम्बरविदूरथरुक्मिमुख्याः॥३४॥ ये वा मृधे समितिशालिन आत्तचापाः काम्बोजमत्स्यकुरुकैकयसृञ्जयाद्याः॥ यास्यन्त्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयम्॥३५॥

सहितं यथा भवति तथा सप्त दिनानि सप्तदिनपर्यन्तं महीध्रं गोवर्धनाख्यमचलमुच्छिलीन्ध्रमिव उद्गतछत्राकमिव धर्त्ता धारयिष्यति तदपि दिव्यं कर्म ॥ ३२ ॥ क्रीडन्निति ॥ निशाकरस्य रश्मिभिर्गौर्यां धवलायां निशि वने क्रीडन् रासोन्मुखो नृत्यार्थमुद्यतः कलानि मधुराणि पदानि यस्मिंस्तदायतं दीर्घं मूर्छितं मूर्छनालापविशेषयुक्तं यद् गीतं तेन उद्दीपितस्मर एव रुक् रोगो यासां तासां व्रजभृतो गोपास्तेषां वधूनां गोपीनां हर्त्तुश्चोरस्य धनदानुगस्य कुबेरभृत्यस्य शङ्खचूडाख्यस्य शिरो हरिष्यति दिनान्तरभवमपि शङ्खचूडहननं राससान्निध्यादुक्तम् । यद्वा। तस्यां रात्रौ शङ्खचूडवधानन्तरमर्द्धरात्रे रासं च पुनः करिष्यति रासोन्मुख इत्युक्तेः ॥ ३३ ॥ ये चेति द्वयम् ॥ ये च प्रलम्बादयः तत्र खरो धेनुकः दर्दुरो बकः जलवाससाम्यात् इभः कुवलयापीडः कुजो नरकासुरः आदिना काशिराजादयः अन्ये च शाल्वादयः तत्र कपिर्द्विविदः ये वा मृधे आत्तचापाः समितौ सङ्ग्रामे शालन्ते श्लाघन्ते इति समितिशालिनः काम्बोजादिदेशाधिपतयः एतदादयः बलो भीमः पार्थ इत्यादयो व्याजाह्वयाः कपटनामानि यस्य तेन ब-

Nepal Sanskrit University, Balmiki

CC-0. In Public Domain. Digitization by eGangotri

लभीमादिनामकेन हरिणैव हता एतेन प्रलम्बादयो बलेन हताः केचिद्भीमादिभिर्हता नतु हरिणेति न शङ्क्यमित्यर्थः । तत्र केचिदलमदर्शनं लयं केचित्तु तदीयं निलयं वैकुण्ठं यास्यन्ति तच्च दिव्यं कर्मेति । यद्वा । न दर्शनं यस्य तादृशं निलयमिति ॥ ३४ ॥ ३५ ॥ कालेनेति ॥ कालेन मीलितधियां संकुचितबुद्धीनां स्तोकायुषामल्पायुषां नृणां स्वनिगमः स्वकृतो वेदराशिर्बत दूरपारः अतिदुर्गम इत्यवमृश्य विचार्य सत्यवत्यामाविर्हितः आविर्भूतः सन्स एव हरिः अनुयुगं युगानुरूपं यथा भवति तथा वेदद्रुमं विटपशः शाखाभेदेन विभजिष्यति स्म इडार्षः ॥ ३६ ॥ देवेति ॥ निगमवर्त्मनि वैदिकमार्गे निष्ठितानां नितरां स्थितानां मयेन दानवशिल्पिना विहिताभिः रचिताभिरदृश्यतूर्भिः सपत्नैरलक्षितवेगाभिः त्वरतेः क्विप् ज्वरत्वरेत्यूठ् । पूर्भिः पुरीभिर्लोकान् घ्नतां देवद्विषां दैत्यानां मतेर्विमोहो वेदमार्गत्यागः मतेः प्रलोभो विरुद्धमार्गस्वीकारश्च यस्मात्तथाभूतं पाखण्डं वेषं विधाय तेन औपधर्म्यम् उपधर्मं पाखण्डधर्मं स्वार्थे ष्यञ् । बहु अधिकं भाष्यते भाषिष्यते षिलोपश्छान्दसः ॥३७॥ यर्हीति ॥ यर्हि सतामप्यालयेषु हरेः कथाः न स्युः द्विजजनास्त्रैवर्णिकाः पाखण्डिनः स्युः । नृदेवा राजानश्च वृषलाः स्युः तथा यत्र यदा त्रैवर्णिकालयेष्वपि स्वाहा स्वधा वषडिति गिरो न स्युः । देवपित्र्याध्वरकर्माभावात्

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः ॥ आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ॥ ३६ ॥ देवद्विषां निगमवर्त्मनि धिष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ॥ लोकान्घ्नतां मतिविमोहमतिप्रलोभं वेषं विधाय बहुभाष्यत औपधर्म्यम् ॥३७॥ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाखण्डिनो द्विजजना वृषला नृदेवाः ॥ स्वाहास्वधावषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥ ३८ ॥ सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः ॥ अन्ते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः ॥ ३९ ॥

तदा कलियुगान्ते भगवान् कलेः शास्ता कल्किरूपो भविष्यति अत्र च वराहादयो ब्रह्मनारदसंवादात्पूर्वभाविनः मन्वन्तरावतारास्तु भूता भाविनश्च धन्वन्तरिपरशुरामौ तदा वर्त्तेते श्रीरामादयश्च भाविन एव तत्र । क्वचिद् भूतादिनिर्देश आर्ष इति द्रष्टव्यम् । अत्रेदं बोध्यम् । भगवतोवतारा द्विविधाः अनुप्रवेशावताराः स्वरूपेणावताराश्च । अकर्महेतुत्वाविशेषादुभयत्राप्यवतारशब्दप्रयोगः । तत्रानुप्रवेशावतारो नाम जीवेषु स्वस्यानुप्रवेशेन स्वीयज्ञानशक्त्यादीनामाविष्करणं स एवांशावतार इत्यपि कथ्यते । ते चावतारा पृथुपरशुरामादयः नृसिंहरामकृष्णादयस्तु साक्षादवताराः ॥३८॥ सर्गेति ॥ पुरुशक्तिभाजः अनन्तशक्तिमतो भगवतः सर्गे तपः अहं ब्रह्मा । न वर्षयो मरीच्यादयः अन्ये च ये प्रजेशाः दक्षादयः इमा मायया रचिता विभूतयः स्थाने पालने च धर्मश्च मखो विष्णुश्च मनवश्च अमरा देवाश्च अवनीशा राजानश्चेमा मायाविभूतयः अन्ते जगत्संहारे तु अधर्मश्च हरो रुद्रश्च मन्युवशाः सर्पाश्च असुराश्च आद्यपदेन भूतप्रेतपिशाचादयः क्रूरस्वभावाश्च इमा मायाविभूतयः इति संक्षेपेणोक्तम् ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्तरेण तु कोऽपि न शक्त इत्याह—विष्णोरिति ॥ इह संसारे यः कविर्बुद्धिमान्पुरुषः पार्थिवानि पृथिवीसंबन्धीनि रजांसि परमाणूनपि विममे गणितवांस्तादृशोऽपि विष्णोर्वीर्याणां पराक्रमाणां गणनां कर्तुं कतमोऽन्वर्हति न कोऽपि यस्माद्धेतोः त्रैविक्रमे अस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमावरणं प्रकृत्यावरणं तस्मादारभ्य उरु अधिकं कम्पयानं कम्पेन यानं पतनं यस्य तादृशं सर्वमभूत् । तस्मात्कारणाद्यो विष्णुरात्रिपृष्ठं सत्यलोकमभिव्याप्य त्रयाणां लोकानां पृष्ठं सत्यलोकमण्डकटाहं वा सर्वं चस्कम्भ रुरोध रुध्वा स्थिरीचकार । तथा च मन्त्रः । "विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि । यो अस्कम्भायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥" इति । अस्यार्थः य उरुगायो विपुलकीर्तिस्त्रेधा त्रिप्रकारेण विचक्रमाणः पादविन्यासं कुर्वाणः सहस्य सधादेशः तिष्ठन्तीति स्था देवादयः सधस्थं तत्रत्यैर्देवादिभिः सह वर्तमानमुत्तरं सत्यलोकमस्कम्भायत् अवष्टब्धवांस्तस्य विष्णोर्नु वीर्याणि यः पार्थिवानि रजांस्यपि विममे स तादृशोऽपि बुद्धिमान् कं प्रवोचं कः प्रावोचत् ॥ ४० ॥

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ॥ चस्कम्भ यः स्वरंहसाऽस्खलता त्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकम्पयानम् ॥ ४० ॥ नान्तं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये ॥ गायन्गुणान्दशशतानन आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥ ४१ ॥ येषां स एव भगवान्दययेदनन्तः सर्वात्मना श्रितपदो यदि निर्व्यलीकम् ॥ ते दुस्तरामतितरन्त्यथ देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥ ४२ ॥ वेदाऽहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ॥ पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च ॥ ४३ ॥ इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः ॥ मांधात्रलर्कशतधन्वनुरन्तिदेवा देवव्रतो बलिरमूर्तरयो दिलीपः ॥ ४४ ॥ सौभर्युतङ्कशिबिदेवलपिप्पलादसारस्वतोद्धवपराशरभूरिषेणाः ॥ येऽन्ये विभीषणहनूमदुपेन्द्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ॥ ४५ ॥

नान्तमिति ॥ पुरुषस्य भगवतस्तन्मायाबलस्य चान्तमहं न विदामि न वेद्मि आर्षः । तथा अमी ते अग्रजा मुनयः सनकादयो न विदन्ति किं बहुना दशशतान्याननानि यस्य स तैर्द्विजिह्वैस्तावदद्भिराननैरादित एव तद्गुणान् गायन् अधुनापि अस्य भगवतो । गुणानां पारमन्तं न समवस्यति न प्राप्नोति अपरेऽस्मदाद्यपेक्षयार्वाचीनाः कुतस्तत्प्राप्नुयुरिति ॥ ४१ ॥ येषामिति ॥ यदि निर्व्यलीकं निष्कपटं निष्कामं यथा भवति तथा सर्वात्मना एकाग्रेण मनसा श्रितं पदं यस्य सः अनन्तः भगवानेव येषामुपरि दययेत् दयां कुर्यात् । दयाशब्दात्तत्करोतीति णिजन्ताल्लिङ् दयधातोर्णिचि तु दाययेदिति स्यात् । ते भक्ताः अन्यैर्दुस्तरां देवस्य भगवतः मायामतितरन्ति निःशेषं तरन्ति मायावैभवं विदन्ति च । अथेति पाठान्तरम् । यतः श्वशृगालादीनां भक्षणयोग्ये कलेवर एषां ममाहमिति धीर्न भवति ॥ ४२ ॥ अन्तर्ज्ञानाभावेऽपि मायेयमिति ज्ञानं तत्कृपया बहूनामस्ति इत्याह—वेदाहमिति त्रिकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अङ्ग हे नारद परमस्य हि योगमायामहं वेद जानामि यूयमिति सनकाद्यभिप्रायेण बहुवचनम् । भगवान्भवश्चेत्यादयोऽपि विदन्ति । दैत्यवर्यः प्रह्लादः मनोः पत्नी शतरूपा स च स्वायंभुवो मनुश्च तदात्मजाः प्रियव्रतोत्तानपादौ पुत्रौ देवहूतिः कन्या च प्राचीनबर्हिषो रकारकभोर्क्ककारेण संश्लिष्टः । तदभावपाठे तल्लोप आर्षः । आद्यशब्देन यदुप्रभृतयः शतधनुः शतधन्वा अनुश्चेति सन्धिरार्षः । रन्तिदेवाः इति पाठः सुगमः । ऐकपद्ये तु एतैः सहितो देवव्रतो भीष्म इत्यर्थः । उपेन्द्रदत्तः शुकः एते बिभीषणाद्या वर्या मुख्या येषां ते विदन्ति ॥ ४३ ॥ ४४ ॥ ४५ ॥ किं बहुना सत्सङ्गेन सर्वेऽपि विदन्तीत्याह—ते वा इति ॥ अद्भुताः क्रमाः पादन्यासलीला यस्य सोद्भुतक्रमो हरिः तत्परायणा-स्तद्भक्ताः तेषां शीलस्य शिक्षा येषां ते तथाभूता यदि भवन्ति भक्तानां शिष्या भूत्वा यदि तेषां शीलं भगवच्चिन्तनं शिक्षन्ते तर्हि ये स्त्रीशूद्रादयो ये वा पापजीवाः पापयोनयः शबरादयः ये वा तिर्यग्जना गजर्क्षवानरादयस्तेऽपि देवस्य मायां विदन्त्यतितरन्ति च । यद्येवं तर्हि शुभस्य वेदार्थस्य धारणमधिकारो येषां ते ब्राह्मणादयः शुभे भगवद्रूपे धारणं मनोनियमनं येषां ते वा मायां विदन्त्यतितरन्तीति किमु वक्तव्यमित्यर्थः । श्रुतधारणा इति पाठान्तरेऽप्ययमेवार्थः ॥ ४६ ॥ शश्वदिति द्वयम् ॥ शश्वत्सदैव प्रशान्तम्

ते वै विदन्त्यतितरन्ति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ॥ यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥ शश्वत्प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्वम् ॥ शब्दो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥४७॥ तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकम् ॥ सध्र्यङ् नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः ॥ ४८ ॥

अभयं प्रतिबोधमात्रं ज्ञानैकरसं शुद्धं निर्मलं समं सदसतः स्थूलसूक्ष्मात् परम् आत्मनो ज्ञातुः तत्वं स्वरूपभूतम् अजस्रसुखं सदानन्दस्वरूपं विशोकं यन्मुनयो ब्रह्मेति विदुः तद्वै भगवतः पदं स्वरूपं यत्र शब्दोऽपि न प्रवर्त्तते । आरोपितनिवृत्तावेवशब्दस्य व्यापारो न तद्बोधे इत्यर्थः । तथा बहुकारकवान् तत्साध्यः क्रियार्थः उत्पाद्याप्यविकार्यसं-स्कार्यरूपं चतुर्विधं क्रियाफलं च नास्ति । यद्वा । यत्र क्रियार्थः यागादिप्रतिपादकः पुरुकारकवान् कर्त्रादिषट्कारकवानपि शब्दो न प्रवर्त्तते यं न प्रतिपादयति तथा मत्कपट-मसौ जानातीति यस्याभिमुखे स्थातुं विलज्जमानेव माया यस्मात्परैति दूरतोऽपसर्पति सहाश्चति सध्र्यक् सहचरं मनो यं प्रति नियम्य यस्मिन् स्थिरीकृत्य यतयो यत्नशीलाः ॥ २३ ॥ कर्त्तौ भेदः " कृती छेदने " घञ् तन्निरासोऽकर्त्तस्तत्र हेतिं साधनं जह्युः त्यजेयुः । अनुपयोगात्तन्नाद्रियन्ते उपयोगाभावे साधनानादरे दृष्टान्तः । निपीयतेऽस्मिन्निति निपानं कूपादि तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण विराजमानः इन्द्रो नादत्ते तद्वदिति । यद्वा । स्वेनैव राजते इति स्वराट् दरिद्रः स यथा इन्द्रः समृद्धः सन्कर्म-कारकदशायां गृहीतं निपानखनित्रं जहाति तद्वत् ॥ ४७ ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ भावानां महदादीनां स्वभावेन परिणामेन विहितस्य जातस्यास्य सतः कार्यमात्रस्य यतः प्रसिद्धिरुत्पत्तिः यद्वा भावानां ब्राह्मणादीनां स्वभावैः शमदमाद्यैः विहितस्य सतः शुभस्य कर्मणः यतः प्रसिद्धिः स एव भगवान् श्रेयसां धर्मादीनामपि विभुः दातुं समर्थः स्वारम्भकाणां धातूनां भूतानां विगमे वियोगे सति देहे तदनु पश्चाद्विशीर्यमाणेऽपि अजः जन्मादिहीनः तत्रस्थः पुरुषः व्योमेव न विशीर्यते न नश्यति कर्मकर्त्तरि लट् ॥ ४९ ॥ अध्यायत्रयार्थमुपसंहरति—सोयमिति ॥ हे तात नारद सोऽयं बुद्धिस्थो विश्वस्य भावनः भगवान् समासेन संक्षेपेण ते तुभ्यं अभिहितः कथितः यत्किंचित् सदसत्स्थूलसूक्ष्मं चिदचित्कार्यकारणात्मकं तत्सर्वं यत् यस्मात् कार्यव्यतिरिक्ताद्धरेरन्यन्न भवति हरिस्तु कारणभूतस्ततः व्यतिरिक्त इति तत्सर्वं हरेरेव भवति नान्यस्मादतस्ततोऽन्यन्न भवतीति वा हरेर्नान्यदन्यत्स्यादिति तु पाठान्तरम् । भकास्त्वत्र सत्कार्यं जगत् असत्कारणं जीवो माया च तद्धरेरन्यन्न भवन्ति । जीवमाययोः शक्तित्वात् शक्तिशक्तिमतोरभेदात् शक्तिकार्यस्य शक्त्यनन्यत्वात् । कीदृशाद्धरेः सदसद्भ्यामन्यस्मात् तयोः

स श्रेयसामपि विभुर्भगवान्यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धिः॥ देहे स्वधातुविगमेऽनुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥ ४९ ॥ सोऽयं तेभिहितस्तात भगवान्विश्वभावनः ॥ समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ॥ ५० ॥ इदं भागवतं नाम यन्मे भगवतोदितम् ॥ संग्रहोऽयं विभूतीनां त्वमेतद्विपुलीकुरु ॥ ५१ ॥ यथा हरौ भगवति नृणां भक्तिर्भविष्यति ॥ सर्वात्मन्यखिलाधार इति संकल्प्य वर्णय ॥ ५२ ॥ मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ॥ शृण्वतः श्रद्धया नित्यं माययाऽऽत्मा न मुह्यति ॥ ५३ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे ब्रह्मनारदसंवादे चतुर्विंशत्यवतारचरित्रवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥

शक्त्योस्तटस्थत्वबहिरङ्गत्वाभ्यामनासक्तेस्तद्दोषसम्बन्धाभाव इति भावः । भागवते इदमेवाद्वैतमित्याहुः ॥ ५० ॥ इदमिति ॥ यदिदं मे मत्वं भगवता उदितं कथितम् अयं भगवद्विभूतीनां सङ्ग्रहः तदिदं शास्त्रं भागवतं नामास्ति त्वमन्येषामर्थे एतद्विपुलीकुरु विस्तरेण वर्णय ॥ ५१ ॥ यथेति ॥ यथा वर्णनेन नृणां भगवति सर्वात्मनि अखिलाधारे हरौ भक्तिर्भविष्यति भवेत् इति तथा संकल्प्य संचिन्त्य विस्तरेण तल्लीलाप्राधान्येन भागवतं वर्णय नतु भक्तिरसविघातेन केवलं तत्वमित्यर्थः ॥ ५२ ॥ अतः परं "नृजन्मनि न तुष्येत कृतेन भगवान्यदि।धर्मार्थकामैः किं तर्हि कार्यं सिध्यति नश्वरैः॥कृष्णेन चोत्तमश्लोके चेद् भक्तिरनपायिनी।किं स्याद्वर्णाश्रमाचारदानहोमादिभिः कृतैः॥"इति श्लोकद्वयं वीरराघवैर्व्याख्यातमपि क्वाचित्कतया न व्याख्यातम् । मायामिति ॥ अमुष्येश्वरस्य श्रद्धया नित्यं मायां लीलां वर्णयतः शृण्वतः श्रुत्वानुमोदतश्च आर्षः शता।पूरुषस्यात्मान्तःकरणंमायया न मुह्यति ॥ ५३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीयस्याध्याये सप्तमे व्यधात् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अष्टमे देहसंबन्धमाक्षिपन्नीशजीवयोः ॥ राजापृच्छद्बहून्प्रश्नान् श्लोकास्तत्रार्द्धगोदृशैः ॥ तावंत्योनुष्टुभोऽप्यत्रोवाचवाचोर्द्वयं तथा ॥ ८ ॥ ब्रह्मणेति सार्द्धम् ॥ हे ब्रह्मन् हे वेदविदां वर अगुणस्य गुणातीतस्यापि भगवतो गुणानामाख्याने ब्रह्मणा चोदितः देववद्दर्शनं यस्य स नारदो यस्मै यस्मै प्रच्छकायाधिकारिभेदेन यथा यथा प्राह स्म एतत् तत्त्वम् अहं वेदितुमिच्छामि ॥ १ ॥ हरेरिति सार्द्धम् ॥ अतः हे महाभाग लोकानां सर्वेषां सुमङ्गलाः अद्भुतवीर्यस्य हरेः कथाः कथयस्वेति । यथाहंममतास्पदानि राज्यादीनि त्यक्तवानेव तथा निस्सङ्गं मनः अखिलात्मनि कृष्णे निवेश्य अहंतास्पदं कलेवरं त्यक्ष्ये त्यक्ष्यामि तङ्गार्थः । इति स्वप्रयत्नो दर्शितः ॥ २ ॥ ३ ॥ शृण्वत इति ॥ भगवान् स्वचेष्टितं श्रद्धया नित्यं शृण्वतो गृणतो वर्णयतश्च पुरुषस्य हृदि स्वप्रयत्नं विनापि नातिदीर्घेण स्वल्पेनैव कालेन स्वयमेव विशते तङ्गार्थः ॥ ४ ॥ प्रविष्ट इति ॥ कथाश्रवणद्वारा कर्णरन्ध्रेण स्वानां भक्तानां भावसरोरुहं हृदयकमलं प्रविष्टः कृष्णस्तत्रत्यं शमलं पापं यथा सलिलस्य निःशेषं मलं शरद्धरति तथा धुनोति निरस्यति

॥ राजोवाच ॥ ब्रह्मणा चोदितो ब्रह्मन्गुणाख्यानेऽगुणस्य च ॥ यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ॥ एतद्वेदितुमिच्छामि तत्त्वं वेदविदां वर ॥ १ ॥ हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः ॥ २ ॥ कथयस्व महाभाग यथाहमखिलात्मनि ॥ कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम् ॥ ३ ॥ शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम् ॥ कालेन नातिदीर्घेण भगवान्विशते हृदि ॥४॥ प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्॥ धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥ ५ ॥ धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चति ॥ मुक्तसर्वपरिक्लेशः पान्थः स्वशरणं यथा ॥६ ॥ यदधातुमतो ब्रह्मन् देहारम्भोस्य धातुभिः ॥ यदृच्छया हेतुना वा भवन्तो जानते यथा ॥ ७ ॥ आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणम् ॥ यावानयं वै पुरुष इयत्ताऽवयवैः पृथक् ॥ तावानसाविति प्रोक्तः संस्थाऽवयववानिव ॥ ८ ॥

अयं भावः । कतकादिना कुम्भस्थे जले शोधिते तदेव केवलं शुद्ध्यति नतु तडागादिगतं स च मलः कुम्भस्यान्तस्तिष्ठत्येव किंचिच्चलने क्षुभ्यति च । एवं तपोदानादिकं न सर्वथा सर्वेषां सर्वं पापं धुनोति किन्तु सावशेषं कस्यचित्किञ्चिदेव । श्रीकृष्णस्तु हृदि प्रविष्टमात्रः सर्वेषां सर्वं पापं निश्शेषं हरतीति शरद्दृष्टान्तेनोक्तम् ॥ ५ ॥ धौतात्मेति ॥ धौतात्मा निष्पापः मुक्तास्त्यक्ताः सर्वे परिक्लेशाः अविद्यास्मितादयो धनार्जनाद्याश्च येन सः पुरुषः पान्थः प्रवासादागतः स्वशरणं गृहं यथा न त्यजति तथा कृष्णपादमूलं न मुञ्चति ॥ ६ ॥ यदिति ॥ हे ब्रह्मन् अधातुमतः धातवः पृथिव्यादयः तत्संबन्धशून्यस्यास्य लौकिकस्य आत्मनः जीवस्य धातुभिर्देहारम्भ इति यत् तत्किं यदृच्छया निर्निमित्तमेव केनापि हेतुना वा भवति इति भवन्तो यथा यथावत् जानते जानन्ति अतः कथयन्तु इति शेषः ॥ ७ ॥ आसीदिति सार्द्धम् ॥ लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत्पद्मं यस्योदरादासीत् असावीश्वरः इयत्तायुक्तैः परिमितैरवयवैः करचरणादिभिरयं प्राकृतः पुरुषो यावान् यावत्सङ्ख्याकावयवयुक्तः तावान् प्रोक्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा संस्थावानवयववानिव च प्रोक्तः अतः को विशेषस्तस्य इवशब्देन ईश्वरस्य करचरणादयः स्वरूपातिरिक्ता न सन्तीति ॥ ८ ॥ अवश्यं च विशेषो वाच्य इत्याह—अज इति ॥ भूतानां व्यष्ट्युपाधीनामात्मा नियन्ता समष्ट्युपाधित्वात् अजो ब्रह्मा यस्य नाभिपद्मात्समुद्भूतः सन् येनानुगृह्णता तस्य रूपं ददृशे दृष्टवान् तङार्षः । एतच्च तस्यापि द्रष्टुरीशस्येति श्लोकोक्तमनूद्यते अग्रे च स्पष्टीभविष्यति । ततश्च यस्यानुग्रहादेव भूतानि व्यष्ट्युपाधिप्राणिनः सृजति तं कथय ॥ ९ ॥ स चापीति ॥ विश्वस्य स्थितिः उद्भवः अप्ययश्च यस्मात्सः मायाया ईशः सर्वगुहाशयः अन्तर्यामी स पुरुषोऽपि आत्ममायां मुक्त्वा त्यक्त्वा यत्र शेते येन रूपेणावतिष्ठते सृष्ट्यादिलीलात उपरतो भवति तत्कथय ॥ १० ॥ पुरुषेति ॥ पुरुषावयवैः सपालाः लोकाः पूर्वं कल्पिता इति । " यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः । " इति ब्रह्मणोक्तं तदपि त्वत्तः शुश्रुम । सपालैर्लोकैरमुष्यावयवाः कल्पिता इत्यपि " पातालमेतस्य हि पादमूलम् । " इति वदतस्त्वत्त एव शुश्रुम श्रुतवन्तो वयं तत्रान्यो विशेषश्चेत्तमपि कथय । इति श्रीस्वामिपादानुसारेण यदधातुमत इत्यादीनामाशयः। अत्र भक्ताः । यदधातुमत इति जीवविषयकः प्रश्नः आसीद्यदुदरात्पद्ममित्यण्डसंस्थितेश्वरप्रश्नः स चापि यत्र पुरुष इति महत्स्रष्टृपुरुषप्रश्नः । शेते

अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ॥ ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥९॥ स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः ॥ मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः ॥१०॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥११॥ यावान्कल्पो विकल्पो वा यथा कालोऽनुमीयते ॥ भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः ॥ १२ ॥ कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि ॥ यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम ॥ १३ ॥ यस्मिन्कर्मसमावायो यथा येनोपगृह्यते ॥ गुणानां गुणिनां चैव परिणाममभीप्सताम् ॥ १४ ॥

सर्वगुहाशय इति सर्वभूतस्थेश्वरप्रश्नः । " विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते । " इत्युक्तेः । पुरुषावयवैरिति समष्टिजीवप्रश्नः । इति प्रश्नपञ्चकं शान्तभक्तौ पर्यवस्यति इत्याहुः ॥ ११ ॥ यावानिति ॥ कल्पो महाकल्पः अवान्तरकल्पो वा यावान् यावत्परिमाणकः कल्पितः भूतभव्यभवच्छब्दवाच्यः कालो यथानुमीयते सतः कार्यस्य देवपितृमनुष्यादिदेहस्यायुषः मानं प्रमाणं च यदस्ति तत्कथय ॥ १२ ॥ कालस्येति ॥ हे द्विजसत्तम अण्वी सूक्ष्मा निमेषादिरूपा बृहती संवत्सरादिरूपापि च या कालस्यानुगतिः प्रवृत्तिर्लक्ष्यते निमेषमात्रेण गतः महता कालेन गत इत्यादिव्यवहारे प्रतीयते । तथा कर्मगतयः कर्मभिः प्राप्यानि स्थानानि यावत्यो यावत्सङ्ख्याकाः यादृशीर्यादृश्यो यत्प्रकारकाश्च आर्षः प्रयोगः ताः कथय ॥ १३ ॥ यस्मिन्निति ॥ गुणानां सत्वादीनां परिणामं देवादिरूपमभीप्सतामिच्छतां गुणिनां जीवानां मध्ये येनाधिकारिणा यस्मिन्देवादिरूपे निमित्ते यो वा कर्मणां पुण्यपापानां समवायः समुदायो यथा येन प्रकारेणोपगृह्यते अनुष्ठीयते केन कर्मसमुदायेन कथं कृतेन कोऽधिकारी देवादिभावं प्राप्नोतीति तत्कथय ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूपातालेति ॥ यथा भूपातालादीनां सम्भवः भूभृतः पर्वताः यथा च एतानि भूपातालादीनि ओकांसि येषां प्राणिनां तेषां च संभवः कथ्यताम् ॥ १५ ॥ प्रमाणमिति ॥ बाह्याभ्यन्तरभेदतः बाह्ये अभ्यन्तरे च कियत्प्रमाण इत्थमण्डकोशस्य प्रमाणं महतां भागवतानामनुचरितं च वर्णानामाश्रमाणां च विनिश्चयः तत्तत्स्वभावेन निर्द्धारः तत् कथ्यताम् ॥ १६ ॥ अवतारेति ॥ यत् आश्चर्यतमं हरेः अवताराणाम् अनुचरितं युगानि कानि कियन्ति च तेषां युगानां मानं परिमाणं च युगे युगे प्रतियुगं च यो धर्मः तत्कथय ॥ १७ ॥ नृणामिति ॥ सविशेषः वर्णाश्रमनिबन्धनरूपविशेषसहितो यादृशो नृणां साधारणो मनुष्यमात्रेणानुष्ठेयो धर्मः श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहार-नियमलक्षणो धर्मः राजर्षीणां राजोत्तमानां प्रजापालनाधिकारिणां यो धर्मः तथा कृच्छ्रेषु आपत्सु जीवतां यो धर्मः तं कथय ॥ १८ ॥ तत्वानामिति ॥ तत्वानां प्रकृतिमहदादीनां परिसङ्ख्यानं गणना तेषामेव लक्षणम् असाधारणो धर्मः हेतुलक्षणं तत्कार्यहेतुत्वेन च लक्षणं पुरुषाराधनविधिः भगवत्सेवाप्रकारः योगस्याष्टाङ्गस्य विधिः आध्यात्मिकस्य

भूपातालककुब्व्योमग्रहनक्षत्रभूभृताम् ॥ सरित्समुद्रद्वीपानां संभवश्चैतदोकसाम् ॥१५॥ प्रमाणमण्डकोशस्य बाह्याभ्यन्तरभेदतः ॥ महतां चानुचरितं वर्णाश्रमविनिश्चयः ॥ १६ ॥ अवतारानुचरितं यदाश्चर्यतमं हरेः ॥ युगानि युगमानं च धर्मो यश्च युगे युगे ॥ १७ ॥ नृणां साधारणो धर्मः सविशेषश्च यादृशः ॥ श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् ॥ १८ ॥ तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम् ॥ पुरुषाराधनविधिर्योगस्याऽऽध्यात्मिकस्य च ॥ १९ ॥ योगेश्वरैश्वर्यगतिर्लिङ्गभङ्गस्तु योगिनाम् ॥ वेदोपवेदधर्माणामितिहासपुराणयोः ॥ २० ॥ संप्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः ॥ इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः ॥ २१ ॥ यश्चानुशायिनां सर्गः पाखण्डस्य च संभवः ॥ आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः ॥ २२ ॥

प्रकृतिविविक्तात्मविषयस्य च प्रकारः तं कथय ॥१९॥ योगेति ॥ योगेश्वराणामैश्वर्याणि अणिमादीनि तेषां गतिः स्वरूपं योगेश्वराणामैश्वर्येण या गतिरर्चिरादिरिति वा योगिनां लिङ्गशरीरस्य भङ्गः प्रलयः वेदा ऋग्वेदादयः उपवेदा आयुर्वेदादयः धर्माः धर्मशास्त्राणि तेषामितिहासपुराणयोश्च गतिः स्वरूपं तान् कथय ॥ २० ॥ संप्लव इति ॥ सर्वभूतानां संप्लवः अवान्तरप्रलयः यद्वा सम्यक् प्लवनमुत्पत्तिः विक्रमः स्थितिः प्रतिसंक्रमः महाप्रलय इष्टं वैदिकं कर्म पूर्तं " वापीकूपतडागादिदेवतायतनानि च । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते॥" इति स्मृत्युक्तं स्मार्त्तं कर्म तयोर्द्वन्द्वैक्यं तस्य तथा काम्यानां तत्तत्कामनयानुष्ठेयानां कर्मणां तथा धर्मार्थकामरूपत्रिवर्गस्य च यो विधिः अविरोधप्रकारः सः कथ्यताम् ॥२१॥ यश्चेति ॥ यश्चानुशायिनां महाप्रलये ईश्वरे लीनोपाधीनां जीवानां सर्ग उत्पत्तिप्रकारः पाखण्डस्य वेदविरुद्धमार्गस्य च संभवः प्रवृत्तिः आत्मनो जीवस्य बन्धमोक्षौ च मुक्तिदशायां स्वरूपतो व्यवस्थानं तत्कथ्यताम् ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ आत्मतन्त्रः स्वतन्त्रः विभुर्भगवानात्मनः मायया यथा विक्रीडति यथा वा प्रलये मायां विसृज्य साक्षिवदुदास्ते उदासीन आस्ते तं प्रकारं कथय ॥ २३ ॥ सर्वमिति ॥ हे भगवन् हे महामुने एतत् यन्मया पृष्टं तत्सर्वं चकारादपृष्टमपि तत्वतोऽनुपूर्वशः प्रस्तावक्रमेण प्रपन्नाय पृच्छते मे मह्यम् उदाहर्तुं निरूपयितुमर्हसि ॥ २४ ॥ अत्रेति ॥ अत्र हि पृष्टेषु पदार्थेषु सभायां वा यथा आत्मभूः परमेष्ठी ब्रह्मा सर्वज्ञः तथा भवानेव प्रमाणं सम्यक् ज्ञाता यतस्तव ब्रह्मनारदव्यासक्रमेण संप्रदायोऽस्तीति सामान्यन्यायेनाहपरे चेति । इह सभायां वर्तमानाः परेऽपि पूर्वेषां पूर्वजैः कृतमेव दृष्ट्वा श्रुत्वा वानुतिष्ठन्ति नतु कपोलकल्पितं वदन्ति । यद्वा । त्वदन्ये गतानुगतिका एव नतु स्वयं सर्वज्ञाः ॥ २५ ॥ न मे इति ॥ हे ब्रह्मन् अच्युतस्य पीयूषं कथामृतं पिबतो मे मम कुपिताद् द्विजाद्धेतोर्यन्मरणं ततोन्यत्र तद्विना अमी असवः प्राणाः अनशनान्न परायन्ति नापगच्छन्ति न व्याकुलीभवन्ति । द्विजशापादेव मरणं भवतु अनशनेन तु नाहं म्रियै ॥ २६ ॥ स इति द्वयम् ॥ इत्येवं सतां पत्युः भगवतः कथायां विष्णुरातेन

यथात्मतन्त्रो भगवान्विक्रीडत्याऽऽत्ममायया ॥ विसृज्य वा यथा मायामुदास्ते साक्षिवद्विभुः ॥२३॥ सर्वमेतच्च भगवन्पृच्छते मेऽनुपूर्वशः ॥ तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥२४॥ अत्र प्रमाणं हि भवान्परमेष्ठी यथात्मभूः ॥ परे चेहानुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम् ॥२५॥ न मेऽसवः परायन्ति ब्रह्मन्ननशनादमी ॥ पिबतोऽच्युतपीयूषमन्यत्र कुपिताद्द्विजात् ॥ २६ ॥ सूत उवाच ॥ स उपामन्त्रितो राज्ञा कथायामिति सत्पतेः ॥ ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥२७॥ प्राह भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥ २८ ॥ यद्यत्परीक्षिदृषभः पाण्डूनामनुपृच्छति ॥ आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥ २९ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे राजकृतप्रश्नविधिर्नामाऽष्टमोऽध्यायः ॥ ८ ॥ ॥ श्रीशुक उवाच ॥ आत्ममायामृते राजन्परस्यानुभवात्मनः ॥ न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा ॥१॥

परीक्षिता राज्ञा उपामन्त्रितः प्रार्थितः ब्रह्मरातः शुकः भृशं प्रीतः सन् संसदि तत्सभायां ब्रह्मकल्पे सर्वादिमे सृष्ट्युपक्रमकल्पे उपागते सति ब्रह्मणे भगवता प्रोक्तं ब्रह्मसम्मितं वेदतुल्यं भागवतं नाम पुराणं प्राह स्म ॥ २७ ॥ २८ ॥ यद्यदिति ॥ पाण्डूनां वंश ऋषभः श्रेष्ठः परीक्षिद्यद्यदनुपृच्छति अन्वपृच्छत् तत्सर्वमानुपूर्व्येण प्रस्तावक्रमेण नतु प्रश्नक्रमेण आख्यातुं भागवताख्यानेनैव तदुत्तरं वक्तुमुपचक्रमे उपक्रान्तवान् ॥ २९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीयस्याष्टमे निरमादिमाम् ॥ ८ ॥ नवमे यत्प्राह चतुःश्लोकीभागवतं हरिः ॥ राज्ञे शुकस्तत्प्राहात्र श्लोकाः सार्द्धाः शैरॉब्धयः ॥ अनुष्टुभः सार्द्धवह्नीषेवाँथोवाचपञ्चकम् ॥ ९ ॥ तत्र यदधातुमत इत्यत्रोत्तरमाह—आत्ममायामिति ॥ हे राजन् आत्मनो भगवतो मायाम् ऋते विना परस्य देहादिव्यतिरिक्तस्य अनुभवरूपस्यात्मनः जीवस्य अर्थेन दृश्येन देहादिनाञ्जसा तत्वतः संबन्धो न घटते न संगच्छते स्वप्नद्रष्टुरिव यथा मोहं विना स्वामिकदेहादिसंबन्धो न घटते तद्वत् ॥ १ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

संसारोऽपि मयैवेत्याह—बहुरूप इति ॥ बहुरूपया देवमनुष्यबालयुवादिरूपैः परिणतया मायया तत्र प्रविष्टो जीवोऽपि बहुरूप इवाभाति । अस्या मायाया गुणेषु देहादिषु रममाणस्तान्ममेति देहमहमिति च मन्यते ॥२॥ यर्हीति ॥ वावेत्येवार्थे । यर्ह्येव कालमाययोः पुरुषप्रकृत्योः परस्मिन्स्वे एव महिम्नि परमार्थस्वरूपे रमेत तदा मायानिवृत्त्या गतसंमोहः सन् ममाहमित्युभयं त्यक्त्वा उदास्ते पूर्णरूपेणावतिष्ठते ॥ ३ ॥ आत्मेति ॥ अव्यलीकं निष्कपटं यद्व्रतं तेन आदृतः आराधितः भगवान् ऋतं सत्यं रूपं दर्शयन् आत्मतत्वस्य विशुद्ध्यर्थं ज्ञानार्थं दशमस्य विशुद्ध्यर्थमितिवत् ब्रह्मणे यत्साधनं तपआदिना भजनं चतुःश्लोकीभागवतं वा आह स्म तदहं वक्ष्यामि इति शेषः । परे त्वाहुः । ननु कालमाययोः परं किं यत्र रमेत तत्राह आत्मेति । आत्मतत्वविशुद्ध्यर्थं यत् ऋतं चिद्घनं रूपं दर्शयन् ब्रह्मणे आह चतुःश्लोकीभागवतमुपदिदेश । अत्र यद्भगवता रूपं दर्शितं यच्च उपदिष्टं तदेव परमिति । श्रीस्वामिपादास्तु यच्च आसीद्यदुदरात्पद्ममित्यादिना जीवेश्वरयोः को विशेषो यदीश्वरभक्त्या जीवस्य मोक्षः स्यादित्युक्तं तत्राह यत्तप आदिना । भजनं भगवान् ब्रह्मणे आह स्म तत् आत्मनो जीवस्य तत्त्वज्ञानार्थं भवत्येवेति किं कुर्वन्नाह ऋतं सत्यं चिद्घनं रूपं दर्शयन् अयं भावः । जीवस्याविद्यया मिथ्या-

बहुरूप इवाभाति मायया बहुरूपया ॥ रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥ यर्हि वाव महिम्नि स्वे परस्मिन्कालमाययोः ॥
रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयम् ॥ ३ ॥ आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् ॥ ब्रह्मणे दर्शयन्रूपमव्यलीकव्रतादृतः ॥ ४ ॥ स
आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ॥ तां नाध्यगच्छद्दृशमत्र संमतां प्रपञ्चनिर्माणविधिर्यया भवेत् ॥ ५ ॥ स चिन्तयन्
द्व्यक्षरमेकदाऽम्भस्युपाशृणोद्द्विर्गदितं वचो विभुः ॥ स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः ॥ ६ ॥

रूपदेहसंबन्धः ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशेषः । अतस्तद्भजनान्मोक्षोपपत्तिरिति प्राहुः ॥ ४ ॥ ब्रह्मणोऽपि तत्त्वज्ञानं भगवत्प्रसादादेवेति दर्शयितुमाह—स इति ॥ जगतामादिदेवः परो गुरुः भक्तिरहस्योपवेष्टा स ब्रह्मा स्वाधिष्ठानान्वेषणार्थं पूर्वं जले निमग्नस्तत्र तदप्राप्य ततः परावृत्त्य स्वधिष्ण्यं पद्मरूपं स्वस्थानमास्थाय तत्र स्थित्वा सिसृक्षया जगत्स्रष्टुमिच्छया ऐक्षत कथं स्रष्टव्यमित्यालोचितवान् । एवं समीक्षमाणोऽपि यया प्रपञ्चनिर्माणविधिर्जगद्रचनाप्रकारो ज्ञातो भवेत् तामत्र सृष्टिविषये संमतां योग्यामव्यभिचारिणीं दृशं प्रज्ञां नाध्यगच्छन्न प्राप्तवानित्यर्थः ॥५॥ स चिन्तयन्निति ॥ हे नृप स विभुर्ब्रह्मा प्रज्ञाप्राप्त्युपायं चिन्तयन्नेकदा द्विर्गदितं द्विरुक्तं द्व्यक्षरं वचः अम्भसि मन्त्रमिव उपाशृणोत् समीपे श्रुतवान् तच्च स्पर्शेषु कादिषु मान्तेषु यत् षोडशं तकारः यच्चैकविंशं पकारः तच्च द्विर्गदितं तप तपेति लोटः सिपि रूपम् । आदरे वीप्सा त्वं तपश्चरेत्यर्थः । अकिञ्चनानां तपस्विनां यद्धनं लोका विदुः येन तपोधना इति ते प्रसिद्धाः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्येति ॥ तप तपेति वचो निशम्य तस्य वचसो यो वक्ता तस्य दिदृक्षया द्रष्टुमिच्छया ततः प्रचलितः सन्सर्वा दिशो विलोक्य तत्र दिक्ष्वन्यद्वस्त्वन्तरमपश्यमानः आर्षः शानच् । पुनः स्वधिष्ण्यमास्थाय उपादिष्ट इव केनचित् प्रत्यक्षं नियुक्त इव तत्तपआचरणमात्मनो हितं कार्यसाधकं विमृश्य मत्वा तपसि मन आदधे धृतवान् ॥ ७ ॥ दिव्यमिति ॥ तप तपेति वचोर्थे अमोघं दर्शनं ज्ञानं यस्य सः जितः अनिलः आत्मा मनश्च येन सः तथा विजितानि ज्ञानकर्महेतुभूतान्युभयेन्द्रियाणि येन तपतां तपश्चरतां मध्ये तपीयान् अतिशयेन तपस्वी तपस्विन्शब्दादीयसुन् विन्मतोर्लुक् । समाहितः एकाग्रमनाः सन् दिव्यं देवमानभवं सहस्राब्दपर्यन्तम् अखिललोकानां तापनं प्रकाशकम् आविर्भावकारणमित्यर्थः । तपः अतप्यत स्मेति पादपूर्त्तौ तपस्तपः कर्मकस्येति कर्मवद्भावः ॥ ८ ॥ तस्मै इति ॥ एवं सभाजितस्तपसा आराधितो भगवांस्तस्मै ब्रह्मणे व्यपेता निरस्ताः संक्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चमोहो भ्रमः साध्वसं भयं च यत्र तं सुष्ठु अदृष्टं पुण्यं तद्वद्भिर्विबुधैर्देवैः यद्वा स्वस्य दृष्टं दर्शनं ज्ञानं येषां तै-

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्राऽन्यदपश्यमानः ॥ स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवाऽऽदधे मनः ॥ ७ ॥ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः ॥ अतप्यत स्माऽखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥ ८ ॥ तस्मै स्वलोकं भगवान्सभाजितः संदर्शयामास परं नयत्परम् ॥ व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥ ९ ॥ प्रवर्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः ॥ न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥ १० ॥ श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः ॥ सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ॥ प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुण्डलमौलिमालिनः ॥ ११ ॥ भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम् ॥ विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः ॥ १२ ॥

रात्मविद्भिः विबुधैरभितः स्तुतं परं श्रेष्ठं यद्यस्मात्परं उत्कृष्टं नास्ति तं स्वलोकं वैकुण्ठाख्यं संदर्शयामास ॥ ९ ॥ प्रवर्तत इति ॥ यत्र वैकुण्ठे रजस्तमश्च न प्रवर्त्तते तयोस्ताभ्यां मिश्रं सत्वं च न प्रवर्त्तते अपि तु शुद्धमेव कालस्य विक्रमो विनाशकत्वं न प्रवर्तते । यत्र कारणभूता मायापि न प्रवर्तते तत्रापरे तत्कार्यभूता रागलोभादयः न प्रवर्तन्त इति किमुत वक्तव्यम् । यत्र सुरैरिन्द्राद्यैः असुरैः प्रह्लादाद्यैरर्चिताः सत्कृता हरेरनुव्रताः पार्षदा भक्ताश्च विहरन्ति ॥ १० ॥ श्यामेति सार्द्धम् ॥ श्यामाश्च ते अवदाताः स्वच्छाश्च श्यामावदाताः शतपत्रलोचनाः पद्मदलायतेक्षणाः पिशङ्गवस्त्राः पीताम्बरधराः सुरुचः अतिकमनीयाः सुपेशसः अतिसुकुमाराः सर्वे चतुर्बाहवः उन्मिषन्त इव प्रभावन्तो मणिप्रवेका मण्युत्तमाः येषु तानि निष्काणि पदकानि अन्यानि चाभरणानि येषां ते सुवर्चसः अतितेजस्विनः न सर्वे श्यामा एव किंतु प्रवालवैदूर्यमृणालवत् वर्चो वर्णो येषां तेऽपि सन्ति परिस्फुरन्ति कुण्डलानि मौलयो मुकुटानि मालाश्च सन्ति येषां ते ॥ ११ ॥ भ्राजिष्णुभिरिति ॥ यो लोकः भ्राजिष्णुभिर्देदीप्यमानाभिर्महात्मनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तानां लसन्ति प्रकाशमानानि यानि विमानानि तेषामावालिभिस्तथा प्रमदोत्तमानां द्युभिः कान्तिभिश्च "द्यु क्लीबमह्नि गगने च ना ज्वलन" इति मेदिनी। कान्तौ तु लक्षणा। विद्योतमानः परितः विराजते यथा विद्युद्भिः सह वर्तमानाः सविद्युतः अभ्राणां मेघानामावलयः पङ्क्तयस्ताभिर्नभो विराजते तद्वत् विद्युत इव स्त्रियः अभ्रपङ्क्तय इव विमानानि नभ इव लोकः ॥ १२ ॥ श्रीरिति ॥ यत्र च रूपिणी मूर्तिमती श्रीः सम्पत् अतिसौन्दर्यवती लक्ष्मीर्वा विभूतिभिः स्वसखीभिः सह नानाविभवैर्वा उरुगायस्य हरेः पादयोः बहुधा मानं पूजां करोति या च लक्ष्मीः प्रेङ्खमान्दोलं श्रिता कुसुमाकरो वसन्तस्तदनुगाः शुककोकिलभृङ्गादयस्तैः स्वयं विविधं गीयमानापि प्रियस्य भगवतः कर्म गायती भवति नुमभाव आर्षः ॥ १३ ॥ ददर्शेति ॥ तत्र लोके ब्रह्मा अखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिं सुनन्दनन्दप्रबलार्हणादिभिः द्वारपालैरन्यैश्च स्वपार्षदमुख्यैः परितः सेवितं विभुं ददर्श ॥ १४ ॥ भृत्येति ॥ भृत्यानां प्रसादेऽभिमुखं दृग्दृष्टिरेवासवः आसववन्मदकरी हर्षकरी च यस्य तम् । यद्वा । दृशां नेत्राणामासव इव मादको यस्तं प्रसादपूर्वको हासः अरुणे लोचने च यस्मिंस्तदाननं यस्य तं किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि वक्षोवामभागे स्थितया श्रिया स्वर्णरेखाकारया

श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ॥ प्रेङ्खं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥ १३ ॥ ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ॥ सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम् ॥ १४ ॥ भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम् ॥ किरीटिनं कुण्डलिनं चतुर्भुजं पीताम्बरं वक्षसि लक्षितं श्रिया ॥ १५ ॥ अध्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपञ्चशक्तिभिः ॥ युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन्रममाणमीश्वरम् ॥ १६ ॥ तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः ॥ ननाम पादाम्बुजमस्य विश्वसृग्यत्पारमहंस्येन पथाऽधिगम्यते ॥ १७ ॥

लक्षितमलंकृतम् ॥ १५ ॥ अधीति ॥ परमुत्कृष्टम् अध्यर्हणीयमतिपूजनीयमासनमास्थितमधिष्ठितं चतस्रः प्रकृतिपुरुषमहदहङ्काररूपाः षोडश एकादशेन्द्रियाणि पञ्चमहाभूताख्याः पञ्चतन्मात्रारूपा याः शक्तयस्ताभिर्मूर्तिमतीभिर्वृतं सेवितम् । यद्वा । चतस्रः शक्तयो धर्मज्ञानबलैश्वर्यरूपा ऋगादिवेदरूपाश्च षोडश शक्तयः चण्डप्रचण्डभद्रसुभद्रजयविजयधातृविधात्राख्याः प्रागादौ दिशो द्वारपालाः मुकुदकुमुदाक्षपुण्डरीकवामनशङ्कुकर्णसर्वनेत्रसुमुखसुप्रतिष्ठिता दिक्पालाः। पञ्च शक्तयः कूर्मनागराजगरुडच्छन्दोमन्त्राख्याः ताभिर्वृतं स्वैः स्वाभाविकैः इतरत्र ब्रह्मादिषु अध्रुवैः नित्यैर्भगैः ऐश्वर्यवीर्यादिभिर्युक्तं स्वे स्वकीये धामन् धामनि ङिलुगार्षः। स्वरूपे एव रममाणम् ईश्वरं ददर्श। पूर्वं मायानिषेधो मोहाद्यजनकतया अत्र विधानं सेवकतयेति न विरोधः ॥ १६ ॥ तद्दर्शनेति ॥ तस्य हरेर्दर्शनेन य आह्लादः तेन परिप्लुतं व्याप्तमन्तरमन्तःकरणं यस्य हृष्यन्ती रोमाञ्चिता तनुर्यस्य सः प्रेम्णो भरेण अश्रूणि लोचने यस्य सः विश्वसृक् ब्रह्मास्य भगवतः पादाम्बुजं ननाम । परमहंसानां ज्ञानिनां विवेकिनां भक्तानां वा कर्म पारमहंस्यं तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा ज्ञानमार्गेण भक्तिमार्गेण वा यत्पदाम्बुजमधिगम्यते प्राप्यते ॥ १७ ॥ तमिति ॥ तदा प्रीतमनाः ब्रह्मणः प्रियो हरिः समुपस्थितं समीपस्थं प्रीयमाणं स्वस्मिन् प्रीतियुक्तं प्रजाविसर्गरूपे कार्ये निजशासनार्हणं स्वनियोगयोग्यं प्रजाविसर्गे समुपस्थितमिति वाऽन्वयः तं ब्रह्माणं करे स्पृशन् तत्करग्रहणेन तस्मिन् क्रियाशक्तिं सञ्चारयन् इति भावः। ईषत्स्मितेन मन्दहासेन शोचिर्दीप्तिः शोभा यस्यास्तया गिरा तस्य प्रियं यथा स्यात्तथा बभाषे ॥ १८ ॥ त्वयेति ॥ हे वेदगर्भ कूटं छलं कामना तेन युक्तानां योगिनां शेषे षष्ठी। दुस्तोषः तोषयितुमशक्यः अहं त्वया सिसृक्षया हेतुना चिरं भृतेन अनुष्ठितेन तपसा साधनभूतेन सध्यक् सम्यक् तोषितः ॥ १९ ॥ वरमिति ॥ हे ब्रह्मन् वरेशं वरदातारं मा मां प्रति अभिवाञ्छितं वरं वरय याचस्व तेन ते तव भद्रं भविष्यति। पुंसां श्रेयसां फलानां प्राप्तये यः परिश्रामः परिश्रमः " नोदात्तोपदेश"इति वृद्धिनिषेधाभाव आर्षः। स मद्दर्शनमेवावधिर्यस्य तथाभूतो भवति ॥२०॥ मनीषितेति सार्द्धम् ॥ यन्मम लोकस्य वैकुण्ठस्थावलोकनं त्वया कृतं सोऽप्ययं मम मनीषितस्यायं लोकं पश्यत्विति संकल्प-

तं प्रीयमानं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणम् ॥ बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥ श्रीभगवानुवाच॥त्वयाऽहं तोषितः सम्यग्वेदगर्भ सिसृक्षया॥चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम्॥१९॥ वरं वरय भद्रं ते वरेशं माऽभिवाञ्छितम्॥ ब्रह्मञ्छ्रेयः परिश्रामः पुंसो मद्दर्शनावधिः ॥२०॥ मनीषितानुभावोऽयं मम लोकावलोकनम् ॥ यदुपश्रुत्य रहसि चकर्थ परमं तपः॥ प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते ॥ २१ ॥ तपो मे हृदयं साक्षादात्माऽहं तपसोऽनघ ॥ २२ ॥ सृजामि तपसैवेदं ग्रसामि तपसा पुनः ॥ बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥ २३ ॥ ब्रह्मोवाच ॥ भगवन्सर्वभूतानामध्यक्षोऽवस्थितो गुहाम् ॥ वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥ २४ ॥ तथापि नाथमानस्य नाथ नाथय नाथितम् ॥ परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥ २५ ॥

स्यैवानुभावः। न च तत्र तव तपोहेतुः तत्प्रवृत्तेरपि मत्कृतत्वादित्याह यत् यतो रहसि तप तपेति वच उपश्रुत्य यत्परमं तपश्चकर्थ कृतवानसि तदपि त्वयि जगन्निर्माणरूपे कर्म्मणि विमोहिते सति तत्र तदा मयैव प्रत्यादिष्टं त्वां प्रत्युपदिष्टम् ॥ २१ ॥ तप इति सार्द्धम् ॥ हे अनघ यतस्तपो मे साक्षाद्धृदयमतरङ्गा शक्तिः तथा " यस्य ज्ञानमयं तपः " इत्यादिश्रुतेर्ज्ञानचिदादिनाम्नः तपसोऽहं साक्षादात्मा स्वरूपमेव किं बहुना ज्ञानात्मकेन तपसैवाहमिदं विश्वं पुनः पुनः सृजामि बिभर्मि पालयामि ग्रसामि संहरामि च तङभाव आर्षः। अतः दुश्चरं तप एव मे वीर्यं शक्तिः ॥ २२ ॥ २३ ॥ भगवन्निति ॥ हे भगवन् यद्यपि भवान् सर्वेषां गुहां गुहायां बुद्धाववस्थितः सप्तम्यर्थे द्वितीया। अतः अध्यक्षः तद्द्रष्टा च अत एवाप्रतिरुद्धेन प्रकृष्टज्ञानेन सर्वेषां मम च चिकीर्षितं कर्तुमिष्टं वेद जानात्येव न तत्कथनमावश्यकम् ॥ २४ ॥ तथापीति ॥ तथापि हे नाथ नाथमानस्य आत्मनि सृष्टिकर्तृत्वं याचमानस्य तदर्थमुपतप्यमानस्येति वा। " नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु " मम नाथितं याचितं नाथय आशंसय देहि। अहम् अरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पिणः ते परं सूक्ष्ममवरं स्थूलमेते द्वे अपि रूपे यथा यथावत् जानीयाम् एतन्मम नाथितम् ॥ २५ ॥ यथेति द्वयम् ॥ हे माधव यथा ऊर्णनाभिः ऊर्णुते असहाय एव
 तन्तुभिरात्मानमाच्छादयति तन्तुसन्तानं करोति वा एवम् अमोघसंकल्पः त्वं यथा आत्ममायारूपेण योगेन आत्मना एवात्मानं ब्रह्मादिरूपं गृह्णन् अनुगृह्णन्निति स्वामिपादाः ।
नानापञ्चविंशतितत्वात्मिकाभिः शक्तिभिरुपबृंहितं विश्वं विसृजन् उत्पादयन् बिभ्रत् पालयन् विलुम्पन् संहरन् क्रीडसि तथा तद्विषयां मनीषां यथार्थबुद्धिं मयि धेहि । अहं
मायां तत्कार्यं च सर्वं जानीयामित्यर्थः ॥ २६ ॥ २७ ॥ भगवदिति ॥ भगवता त्वया शिक्षितमनुशिष्टं प्रजासर्गमहमतन्द्रितः अनलसः सन् करवाणि हि करिष्याम्येव । तथापि
यत् यथा तवानुग्रहात् प्रजासर्गमीहमानः कुर्वन्नप्यहङ्कारादिभिर्न वध्येयं बद्धो न भवेयम् । कर्मकर्त्तरि तङ्भाव आर्षः । तथा ज्ञानं प्रार्थये ॥२८॥ यावदिति ॥ भो ईश ते
त्वया लौकिकस्य सख्युः सखेवाहंकृतः करस्पर्शनादिना सत्कृतः प्रजाविसर्गरूपे ते परिकर्मणि सेवायां स्थितोऽपि अविक्लवः अव्याकुल एव यावत् जनं विभजामि उत्तमादि-
भेदेन सृजामि तावत् अजः स्वतन्त्र इति मानिनो मे मदः मासमुन्नद्ध उद्रिक्तो न भवेत् लुङ् । यद्वा । विसर्गरूपेते परिकर्मणि स्थितोऽहं प्रजाः विभजामि तथा तासां भोजनं

यथाऽऽत्ममायायोगेन नानाशक्त्युपबृंहितम् ॥ विलुम्पन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना ॥ २६ ॥ क्रीडस्यऽमोघसंकल्प ऊर्णनाभिर्यथोर्णु-
ते ॥ तथा तद्विषयां धेहि मनीषां मयि माधव ॥ २७ ॥ भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः ॥ नेहमानः प्रजासर्गं वध्येयं यदनुग्रहात्
॥ २८ ॥ यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनम् ॥ अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमा-
निनः ॥ २९ ॥ श्रीभगवानुवाच ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ॥ सरहस्यं तदङ्गं च गृहाण गदितं मया ॥ ३० ॥

भोग्यं च विभजामि तावत् स्वाधिकारपर्यन्तमविक्लवो भवेयं समुन्नद्धो मदश्च माभूत् ॥ २९ ॥ आदौ भगवान्वररूपामाशिषं ददाति—ज्ञानमिति ॥ यत्परमं गुह्यं मे मम
ज्ञानं शास्त्रोत्थं ज्ञानं विज्ञानमनुभवः तत्समन्वितं रहस्यं भक्तिः सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात् तत्सहितं तस्य ज्ञानस्याङ्गं साधनं च मया गदितम् उपदिष्टं
त्वं सावधानतया गृहाण । प्रेमप्रधाना भागवतास्तु अत्र परावरे यथारूपे जानीयामित्यनेन तव अप्राकृतं रूपं प्राकृतं च रूपं कीदृशमिति यथात्ममायायोगेने-
त्यनेन तव माया योगमाया च कीदृशीति यथा क्रीडसीति मायाधिकृतेषु योगमायाधिकृतेषु च लोकेषु तव केन प्रकारेण क्रीडेति भगवच्छिक्षितमहं करवाणि।
ह्यतन्द्रित इत्यनेन मदभीष्टसिद्ध्यर्थं त्वच्छिक्षितं किं मम कर्त्तव्यमिति ब्रह्मणा क्रमेण पृष्टस्य वस्तुचतुष्टयस्य चतुःश्लोक्या क्रमेणैवोत्तरं दातुम् अथ परमभा-
गवताय ब्रह्मणे श्रीभागवताख्यं शास्त्रमुपदेष्टुं तत्प्रतिपाद्यतमं वस्तुचतुष्टयं वा भगवान् प्रतिजानीते । ज्ञानमिति एतदेव भगवदुक्तोत्तरचतुष्टयात्मकमेव श्रीभागवतं शास्त्रं
श्रीभगवत्प्रोक्तत्वेन प्रसिद्धमित्याहुः । न केवलं मद्रूपस्य ज्ञानमेव तुभ्यं ददाम्यपि तु विज्ञानेनानुभवेन समन्वितं यत्तदपि किंच परमगुह्यं निर्विशेषब्रह्मज्ञानादपि श्रेष्ठत्वादिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावः । किं च रहस्यं प्रेमभक्तिं च सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात्तस्य रहस्यत्वं ज्ञेयम् । तस्य रहस्यस्याङ्गं साधनं भक्तियोगस्तं चेति त्वया अपृष्टमप्येतत्रयं कृपयैव वक्ष्यामि इति व्याचक्षते ॥ ३० ॥ यावानिति ॥ अहं यावान् यत्परिमाणकः यथाभावो यादृक् सत्तावान् यानि रूपाणि गुणाः कर्माणि च यस्य सः यद्रूपगुणकर्मकः तथैव तत्वविज्ञानं ते तव मदनुग्रहादेवास्तु । प्रेमभक्तास्तु किंच ज्ञानं शाब्दं परोक्षं शुद्धचित्तानां संभवेदपि विज्ञानं यत् स्वरूपस्य याथार्थ्येन साक्षात्कारः स च मत्प्रेमभक्तिसाधनभक्तिभ्यां विना नैव भवतीति बोध्यं स्तदर्थमाशिषं ददाति । यावान् यत्प्रमाणाकारः यादृशस्थौल्यकार्श्यदैर्घ्यतुङ्गतावृत्ततावौचित्यसन्निवेशविशिष्टावयव इत्यर्थः । यथाभावो यादृशाभिप्रायः यानि रूपाणि श्यामत्वचतुर्भुजत्वद्विभुजत्वकृष्णत्वरामत्वनृसिंहत्वादीनि गुणा भक्तवात्सल्याद्याः कर्माणि लक्ष्मीपरिग्रहगोवर्द्धनोद्धरणादीनि यस्य सः तथैवेति येन येन प्रकारेण मम परिमाणाभिप्रायरूपगुणकर्माण्याविर्भवन्ति तेनैव प्रकारेण तस्य विज्ञानं तेषां याथार्थ्यानुभवोऽस्तु इति व्याचक्रुः॥ ३१ ॥एवमाशिषं दत्वा चतुःश्लोक्या उपदिशन्नादौ यावानित्यस्यार्थं स्फुटयति—अहमिति॥ अग्रे सृष्टेः पूर्वं अहमेव आसं यत् सत् स्थूलम् असत्सूक्ष्मं परं तयोः कारणं प्रधानम् अन्यच्च किंचित् तन्नाभूत् । अन्यस्य प्रधानस्यान्तर्मुखतया तदा मय्येव लीनत्वात् । अहं च तदा आसमेव न चान्यदकरवं पश्चात्सृष्टेरनन्तरमप्यहमेवाहमस्मि यदेतद्विश्वं तदप्यहमस्मि प्रलये योऽवशि-

यावानहं यथाभावो यद्रूपगुणकर्मकः ॥ तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ३१ ॥
अहमेवाऽऽसमेवाऽग्रे नान्यद्यत्सदसत्परम् ॥ पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३२ ॥

ष्येत सोऽप्यहमेव । अनेन चानाद्यनन्तत्वादद्वितीयत्वाच्च परिपूर्णोहमित्युक्तं भवति सोऽप्यहमेव । प्रेमभक्तास्तु अथ प्रकृतमनुसरन् परावरे यथारूपे जानीयामिति प्रश्नस्योत्तरमाह । अहमेवाग्रे सृष्टेः पूर्वमासम् इति तर्जन्या स्ववक्षः स्पृशति एवकारेण मद्विजातीयं प्राकृतं वस्तु किमपि नासीदिति लभ्यते । यः सम्प्रति त्वदग्रे प्रादुर्भूतः सोऽहमेवाग्रे महाप्रलयकालेऽप्यासमेव । अत्र वैकुण्ठतत्पार्षदादीनामपि तदुपाङ्गत्वादहंपदेनैवग्रहणं राजासौ प्रयातीतिवत् । अतस्तेषां च तद्वदेव स्थितिर्बोध्यते एतेन स्वान्तरङ्गलीलानामपि तथैव करणं बोध्यते । जगद्व्यापारस्यैव निषेधात् ननु क्वचिन्निर्विशेषमेव ब्रह्मासीदिति श्रूयते तत्राह सत्कार्यम् असत्कारणं ताभ्यां परं यद्ब्रह्म तन्न मत्तोऽन्यत् क्वचिदधिकारिणि शास्त्रे वा स्वरूपभूतनानाविशेषव्युत्पत्त्यसमर्थे सोऽयमहमेव निर्विशेषब्रह्मतया प्रतिभामीत्यर्थः । ननु सृष्टेरनन्तरं जगदेव ननु त्वमुपलभ्यसे तत्राह । पश्चात् सृष्टेरनन्तरमप्यहमेवास्म्येव वैकुण्ठेषु भगवदाद्याकारेण प्रपञ्चेष्वन्तर्यामिरूपेण यथासमयं मत्स्याद्यवताररूपेण च । ननु तर्हि पृथिव्यादिकं देवतिर्यगादिकं च त्वं न भवसीति तवापूर्णत्वप्रसक्तिस्तत्राह । यदेतच्च व्यष्टिसमष्टिविराण्मयं विश्वं तदप्यहमेव मच्छक्तिजन्यत्वान्ममैव प्राकृतं रूपं परावरे यथारूपे जानीयामिति त्वया यदवरं रूपं पृष्टं तदेवेदं त्वं जानीहीत्यर्थः । तथा योवशिष्येत भवानेकः शिष्यते शेषसंज्ञ इत्याद्युक्तः परमेश्वरः सोऽहमस्मि । अत्राहमित्यस्य त्रिरावृत्त्या निर्द्धारसूचितत्वात् एतद्रूपगुणादिविशिष्टस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम त्रैकालिकनित्यस्थित्यापररूपत्वं सृष्टिसंहारयोर्मध्य एव दृश्यमिदं मायिकप्रपञ्चजातमवरं रूपमिति परावररूपयोर्ज्ञानमुक्तम् विज्ञानं तु पररूपस्य प्रथमस्यैव इति व्याचक्षते ॥ ३२ ॥ मायां निरूपयति—ऋते इति ॥ अर्थमृतेऽपि वास्तवमर्थं विनापि यद्यतः किमपि आत्मनि अधिष्ठाने प्रतीयेत तथा यतः सदपि न प्रतीयेत तत् आत्मनो मम मायां विद्यात् माययैव हि आत्मनि असदपि कृशत्वदुःखित्वादि प्रतीयते सदपि आनन्दादि न प्रतीयते।यथा आभासो द्विचन्द्रादिरविद्यमानोऽपि प्रतीयते तथेति अविद्यमानस्य प्रतीतौ दृष्टान्तः । यथा च तमो राहुः ग्रहमण्डले स्थितेऽपि न दृश्यते इति सतो प्रतीतौ दृष्टान्तः । प्रेमभक्तास्तु किंच जीवस्य परमात्मविज्ञानं प्रति माया खल्वंशेनानुकूला प्रतिकूला च भवति विज्ञाते च परमात्मनि मयि योगमाययैवाधिकरोति सा त्वनुकूलैवेति । ते द्वे अप्यत्र द्वितीयप्रश्नोत्तरत्वेन निरूपयति ऋतेर्थमिति । यद्यतः अर्थं सत्यं वस्तु विना न प्रतीयेत किं त्वर्थः सत्यं वस्त्वेव प्रतीयेत इत्यर्थः । तथा यतः अर्थं विना प्रतीयेत अर्थो न प्रतीयेत किं त्वनर्थः तत् ताम् आत्मनि स्वस्मिन् मुक्तो बद्धश्च जीव आत्मनो मम मायां क्रमेण विद्या अविद्येति वृत्तिद्वयां मायाख्यां शक्तिं विद्यात् जानीयात् । विद्यायां दृष्टान्तः यथा भासो दीपादिप्रकाशः दीपादिप्रकाशात् यथा गृहे विद्यमानो घटपटादिरर्थ एव प्रतीयते नतु दीपानयनात् पूर्वं संभावितो घटपटाद्यभावस्तथा सर्पवृश्चिकादिरागन्तुकश्च भयकारणमनर्थः प्रतीयते। एवमेव विद्याया हेतोर्मुक्तेन जीवेन स्वस्मिन्नित्यसंबद्धं ज्ञानानन्दादिकमेव प्रतीयते न त्वविद्यादशायामिव तदभावः । नापि स्वस्मिन्नसंबद्धो देहदैहिकशोकमोहादिश्च प्रतीयते । अविद्यायां दृष्टान्तः । यथा तमोन्धकारः

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ॥ तद्विद्यादात्मनो मायां यथा भासो यथा तमः ॥ ३३ ॥

अन्धकाराद्यथा स्वगृहे विद्यमानो घटपटादिरर्थो न प्रतीयेत किंतु अविद्यमानोऽपि संभाव्यमानः सर्पचौरादिको भयकारणमनर्थः प्रतीयते । एतदविद्याया हेतोरेव बद्धेन जीवेन स्वस्मिन्नित्यसंबन्धितया वर्त्तमानमपि ज्ञानानन्दादिकं न प्रतीयते किंतु स्वस्मिन्नसन्नपि स्वसंबन्धित्वेन वर्तमानो देहदैहिकशोकमोहादिरेव प्रतीयते । तेन कुसुमशृङ्गादीनासत्यत्वेऽपि आकाशशशादीनां तत्संबन्धाभावादेव आकाशकुसुममलीकं शशशृङ्गमलीकमिति यथोच्यते तथैव देहादयो मिथ्याभूता इति शास्त्रेषूच्यते । जीवस्य मिथ्याभूतोऽपि देहसंबन्धः खल्वविद्यया कल्प्यते विद्यया लुप्यते इति विद्याविद्ययोर्दृष्टान्तावाभासतमसी इत्यत्र " छायातपौ यत्र न गृध्रपक्षौ " इत्यष्टमस्कन्ध एव प्रमाणं विज्ञेयम् । एवं जीवे सार्वदिकविद्यमानवस्त्वप्रत्यायनमविद्यमानवस्तुप्रत्यायनं चेत्यविद्याया धर्मावावरणविक्षेपशब्दाभ्यामुच्येते । एवं च विद्यया त्वंपदार्थस्य जीवात्मनोऽनुभवो भवति नतु तत्पदार्थस्य परमात्मनः तस्य निर्गुणत्वान्निर्गुणया भक्त्यैवापरोक्षानुभवः संभवेत् । "भक्त्याहमेकया ग्राह्यः" इति भगवदुक्तेः।किंच "कैवल्यं सात्विकं ज्ञानम्" इति भगवदुक्तेर्देहादिव्यतिरिक्तात्मज्ञानरूपेयं विद्या तस्याः सत्वगुणत्वादनया गुणातीतस्य परमात्मनो नैवानुभवः प्रत्युतास्या अप्यपाय एव । यदुक्तम् " द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः । श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥ ये नेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः । भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥ " इति । ननु तर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तजीवेन परमात्मनोऽपरोक्षानुभवार्थं भक्तिः कुतो लभ्यते उच्यते। ज्ञानाधिकारिणः साङ्ख्ययोगतपआदिभिर्भक्तिमिश्रैरेव जनितया विद्यया अविद्यानिवर्तिकया प्रथमं त्वंपदार्थानुभवः ततस्तस्याविद्यातो विमुक्तस्य निरिन्धनाग्निन्यायेन विद्याया अप्युपरमतारतम्येन पूर्वसिद्धभक्तिचन्द्रकलायास्तदुपरागविच्युतायास्तदुद्गमतारतम्यं तयैव भक्त्या पुनः पुनरभ्यस्तया तत्पदार्थस्य परमात्मनोऽनुभवतारतम्यम् । यदुक्तं भगवता गीतासु । “ ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्” ॥ इति। परां पौर्वकालिकगुणीभावराहित्यात् श्रेष्ठां केवलां वा ततश्च “भक्त्या मामभिजानाति यावान् यश्चास्मि तत्वतः।” इत्युक्तेर्जातिप्रमाणाभ्यामल्पीयस्या तया भक्त्या निर्विशेषब्रह्मण एवानुभवः नत्वनन्तचिंद्विशेषब्रह्मणो भगवतः । यथा अल्पतेजस्विचक्षुष्केण जनेन मणिमयी मूर्तिः सामान्यतस्तेजोमय्येव दृश्यते नतु मुखनासिकानेत्रकर्णादिविशेषमयी ततश्च विद्यायाः सामस्त्येनैवोपरामे सत्युद्भूतनैर्गुण्यस्य तस्य तयैव भक्त्या ब्रह्मानुभवस्यापि पूर्णत्वम् एतदेव निर्वाणशब्दवाच्यं जीवब्रह्मैक्यम्। यदुक्तं तत्रैव “ततो मां तत्वतो ज्ञात्वा विशते तदनन्तरम्।” इति।या तु चिच्छक्तिवृत्तीनां सारभूता रूपाविलासरूपा परमोत्तमा शुद्धा भक्तिर्जातिप्रमाणाभ्यामत्यधिका सा प्रबला परमस्वतन्त्रा गुणदोषादिकमप्यगणयन्ती बद्धेऽपि जीवे राक्षसपुलिन्दपुल्कसादौ दुराचारेऽपि यदृच्छयैवोदयते । विप्रे संन्यासिनि मुक्तेऽपि नोदयते तयैवाविद्यापर्य्यन्तसमस्तक्लेशध्वंसः । यदुक्तम् “जरयत्याशु या कोशं निगीर्णमनलो यथा । ” इति । तथैवानन्तचिद्विशेषस्य भगवतोऽप्यपरोक्षानुभवो भवेत् । यथा बहुतरतेजस्विचक्षुष्केण जनेन सामान्यतस्तेजोमयी विशेषतश्च मुखनासिकानेत्रकर्णादिसौन्दर्य्यमयी च मूर्तिः तन्त्रेणैव दृश्यते इति । तदेवं भक्तिर्द्विविधा निर्गुणा गुणमयी च । तत्राद्यया पाकदशायां प्रेमभक्तिसंज्ञया भगवद्वशीकारः सच्चिदानन्दमयभगवद्रूपगुणलीलामाधुर्य्यानुभवश्च । द्वितीयया सात्विक्या सत्वगुणाद्विच्युतयैव निर्विशेषब्रह्मसुखानुभवमात्रमिति। तस्माद् ब्रह्मसुखानुभवदशातः पूर्वास्वेव दशासु जीवेषु मायाया अधिकार इति सिद्धं सत्यमेव प्रतीतं स्याद्यतोऽसत्यं तथा यतः तद्विद्यादात्मनो मायां यथा भासो यथा तमः । इत्यनुक्तेरितोऽन्यस्मिन्नर्थेऽप्याशय ईक्ष्यते ऋतेऽर्थशब्दौ परिवृत्य सहार्वार्पितौ यतः स चार्थो यथा ब्रह्मानुभववत्स्वपि जनेषु नानाविधेषु या स्पष्टम् अधिकरोति भगवदिच्छावशात्तदीयस्वरूपगुणलीलाप्रकाशानावरणधुरन्धरा स्वरूपभूता शक्तिस्तस्या योगमायाया अपि लक्षणं तन्त्रेणैवाह ऋते इति । आत्मनि परमात्मनि मयि ऋते ज्ञाते सति अर्तेर्गत्यर्थत्वेन ज्ञानार्थत्वात् साक्षादनुभूते सतीत्यर्थः । यदिति “ इण् गतौ ” शत्रन्तं तत्पदेनैव यत् पदस्याक्षेपात् । यतः अर्थं यत् प्रयोजनं प्राप्नुवद्वस्तु अप्राकृतं प्राकृतं च प्रतीयेत यया प्रकाशितं सत्प्रयोजनं वस्तु परमात्मसाक्षात्कारवता जनेन साक्षादनुभूयेतेत्यर्थः । यतः सकाशात् न प्रतीयेत च यया आवृतं तदैव वा समयान्तरे वा न प्रतीयेतेत्यर्थः । ताम् आत्मनो भगवतो मम मायां योगमायाख्यामन्तरङ्गां शक्तिं विद्यात् जानीयात् । मायया प्रयोजनं विनैवाव्रियते। योगमायया तु प्रयोजनमुद्दिश्यैवेति विवेचनीयम् । “यथा भासो यथा तमः ” इति आभासेन दीपादिना प्रकाशितं घटपटादिकं यथा प्रतीयेत तमसा आवृतं तन्नानुभूयेत च तथैव सा मदिच्छावशादाभासतमोधर्मवती योगमायेत्यर्थः । उदाहरणं तु यथा

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

ऐश्वर्यदर्शनेऽपि प्रेमसंकोचाभावज्ञापनार्थं भगवत्कुक्षौ यथा प्रकाशितं गोकुलं यशोदाकृष्णादिस्वरूपं च यया मोहिता श्रीयशोदा साक्षादनुबभूव । क्षणान्तरे च यया आवरणान्नानुबभूव । यथा चैश्वर्यानुभूत्या प्रेमसंकोचज्ञापनार्थं यया प्रकाशितं विश्वरूपं परमात्मस्वरूपं चार्जुनः साक्षादनुबभूव तत्रैव वर्तमानमपि कृष्णस्वरूपं ययाऽऽवरणान्नानुबभूव । समयान्तरे च यया छादितं विश्वरूपादिकं च नानुबभूव द्विभुजश्रीकृष्णमेवानुबभूव । अत्रैकदैव एकस्व स्वरूपस्य प्रकाशनमन्यस्यावरणमिति पूर्वतो विशेषः । यथा च एकदैव ब्रह्मणे मञ्जुमहिमदर्शने दामबन्धनलीलायां श्रुतदेवबहुलाश्वातिथ्ये रुक्मिणीसत्यभामादिगृहेषु युगपत्स्थितौ सा खलु योगमायैव नतु माया तया मोहितानामपि तेषां परमात्मसाक्षात्कारदर्शनात् । सच परमात्मसाक्षात्कारो भक्तिमिश्रज्ञानवतामविद्याविद्ययोरुपरामे सति तथैवावतारसमये कृष्णं प्रीत्या पश्यतां तत्कृपाविषयीभूतत्वादप्रेमवतामपि साक्षात्कारः । अन्यदा तु प्रेमवतामेव कृष्णरामादिसाक्षात्कारो भागवतमतेनोच्यते । तेषु योगमायैवाधिकरोति नतु माया । कृष्णं तदिच्छया पश्यतामपि कंसादीनां द्वेषलक्षणान्तःकरणदोषादेव न परमात्मसाक्षात्कारो यथा मत्स्यण्डिकां भुञ्जानानामपि पित्तदूषितरसनानां न मत्स्यण्डिकास्वादानुभवस्तेषु मायैवाधिकरोति नतु योगमाया । मायाशक्तिश्च योगमायोत्था तस्या विभूतिरेव । यदुक्तं नारदपञ्चरात्रे श्रुतिविद्यासंवादे । "अस्या आवरिका शक्तिर्महामायाखिलेश्वरी । यया मुग्धं जगत्सर्वं सर्वे देहाभिमानिनः ॥" इति भगवता स्वस्वरूपत्वेनाभिमन्यमाना स्वस्वरूपात् पृथग्भूता सती मायाशक्तिर्जडैव । यथा सर्पस्य स्वरूपभूतापि त्वक् तेन त्यक्ता चेत्ततः पृथग्भूतं कञ्चुकं जडं स्यात् ।

यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ॥ प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥ ३४ ॥

तथा चोक्तम् " श्रुतिभिस्त्वमुत जहासि तामहिरिव त्वचमात्तभगः " इति । सा च माया त्रिविधा प्रधानमविद्या विद्या च । प्रधानेनोपाधयः सृज्यन्ते ते च सत्या । एव अविद्यया जीवेषु तदध्यासः सृष्टः स चासत्य एव । विद्यया तदध्यासध्वंस इति तिसृणां शक्तीनां कार्यं तत्तन्मयं जगदिदमंशेन सत्यमंशेनासत्यम् । तथा जीवानां नित्यत्वात् भगवन्निकेतनादिभक्त्युपकरणानां निर्गुणत्वाच्चांशेन नित्यमपि वादिभिर्यथास्वमतं नानारूपतया निरूपितम् । " कार्यं प्राधानिकं सत्यं कार्यमाविद्यकं मृषा । नित्यं तद्भक्तिसंबद्धमिदं तत्रितयात्मकम् ॥ प्राधानिकाः स्युर्देहास्तद्धर्मा आविद्यकाः पुनः । जीवेषु तत्तत्संबन्धो भक्तिश्चेन्निर्गुणाश्च ते ॥ चिज्जीवमाया नित्याः स्युस्तिस्रः कृष्णस्य शक्तयः । तद्वृत्तयश्च ताभिः स भात्येकः परमेश्वरः ॥ कार्यकारणयोरैक्यात् शक्तिशक्तिमतोरपि । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ भक्तानामेव सिद्धान्तश्चतुश्लोकीयमीरिता । शीलिता भगवद्भक्तैस्तैरेव न किलापरैः ॥ " इति व्याचक्षते ॥ ३३ ॥ यथा भाव इत्येतत्स्फुटयति—यथेति ॥ यथा महान्ति भूतानि उच्चावचेषु स्थूलास्थूलेषु भूतेषु भूतविकारेषु अनु सृष्टेरनन्तरं प्रविष्टानि तेषूपलभ्यमानत्वात् अप्रविष्टानि च प्रागेव कारणतया तेषु विद्यमानत्वात् पृथगपि विद्यमानत्वाच्च । तथा तेषु भूतभौतिकेषु अहं प्रविष्टः न च तेष्वहं प्रविष्टः एवंभूता मम सत्ता । प्रेमभक्तास्तु एवं मायां योगमायां च तन्त्रेणैव लक्षयित्वा ताभ्यामभिकृतेषु सगुणनिर्गुणलोकेषु ब्रह्मणा पृष्टं स्वक्रीडाप्रकारं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्त्रेणैवाह । यथा महान्ति भूतान्याकाशादीनि भूतेषु देवमनुष्यतिर्यगादिषु अनुप्रविष्टानि तेषूपलभ्यमानत्वात् अप्रविष्टानि च पृथग्विद्यमानत्वात् तथा तेषु भूतभौतिकेष्वहं प्रविष्टः सन्नपि पृथक् शुद्धसत्वात्मकस्वधामनि वर्त्तमानत्वादप्रविष्टश्चास्मि किंतु महाभूतानामचेतनत्वादेव भूतेषु प्रवेश आसङ्गरहितः। मम तु चेतनत्वेऽपि आकाशवदसौ स्वगृहेष्वलिप्त एव वसतीतिवत् तेषु सर्वेषु प्रवेशनियमनपालनादीत्यासङ्गरहितानीत्येवंभूता भूतेषु मायिकेष्वासङ्गरहितैव क्रीडेति भावः। तथा तेषु प्रसिद्धेषु नतेषु प्रणतभक्तजनेषु प्रविष्टोन्तःकरणेषु दर्शनं दातुं तथा अप्रविष्टः बहिः स्थितश्च तेषां नयनेषु स्वसौन्दर्यमर्पयितुं नासासु स्वसौरभ्यं प्रवेशयितुं तैः सहोक्तिप्रत्युक्तीकुर्वंस्तेषां कर्णेषु स्वसौस्वर्य्यामृतं पूरयितुं स्पर्शालिङ्गनादिदानैस्तेषामङ्गेषु स्वीयसौकुमार्यमाधुर्य्यादिकं चानुभावयितुमिति तेषु गुणातीतभक्तेष्वन्तर्बहिर्मया त्यक्तुमशक्येष्वासङ्गसहितैव मम क्रीडेति भावः इति व्याचक्षते ॥ ३४॥ साधनमाह—एतावदिति ॥ आत्मनस्तत्वं जिज्ञासुना एतावदेव जिज्ञास्यं विचार्यम् अन्वयः कार्येषु कारणत्वेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः। तथा जाग्रदाद्यवस्थासु तत्तत्साक्षितयान्वयः व्यतिरेकश्च समाध्यादौ एवमन्वयव्यतिरेकाभ्यां यत्सर्वत्र सर्वदा च स्यात्तदेवात्मेति। प्रेमभक्तास्तू अथ भगवच्छिक्षितमहं करवाणि ह्यतन्द्रित इति ब्रह्मणा प्रार्थितं स्वप्राप्तिसाधनम् अतिरहस्यत्वाद्बहिरङ्गानामगम्यतयैवाह—एतावदेवेति ॥ अत्र बहुतरशास्त्रानुसन्धानमपि नापेक्षितव्यमिति भावः। तत्वजिज्ञासुना आत्मनः स्वस्य श्रेयःसाधनं तत्वं ज्ञातुमिच्छुना जनेन जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयामित्यर्थः। त्वया तु मदनुग्रहादवगम्यते एवेति भावः। किं तत् यत्

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ ३५ ॥

श्रेयःसाधनेषु कर्मज्ञानयोगभक्त्यादिषु मध्ये अन्वयव्यतिरेकाभ्यां स्यात् सिद्ध्यति स्थिरीभवतीत्यर्थः । तत्र तावत् स्वर्गापवर्गादेः कर्मज्ञानयोगादिभिः केवलैरसिद्धेः भक्त्या तैर्विनापि सिद्धेः कर्मज्ञानयोगादयोऽन्वयव्यतिरेकाभ्यां नैव साधनानि स्युः। भक्त्या तु केवलयैव सर्वाणि श्रेयांसि सिद्ध्यन्ति तया विना तु नैव सिद्ध्यन्ति इत्यन्वयव्यतिरेकाभ्यां भक्तिरेव सर्वश्रेयःसाधनत्वेन स्थिरीभवति। तथा हि अन्वयेन यथा। "अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥" इति भक्तियोगस्य केवलस्यैव तीव्रत्वं निरभ्रसूर्यस्येवेति ज्ञेयम्। यथा वा "यत्कर्मभिर्यत्तपसा" इत्यादिव्यतिरेकेण। यथा "मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह। चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम्। न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥" इति। यथा वा "तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः। क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥" इति। तत्र देशकालविशेषाभावमाह सर्वत्र सर्वदेशेषु सर्वाधिकारिषु च सर्वदा सर्वेष्वेव कालेषु यत्स्यात् तथा हि "शुचावेव देशेषु शुचिः तत् कालजीवी कर्म कुर्यात् शुद्धान्तःकरणात् विज्ञानं लभेत, शुचौ देशे प्रतिष्ठाप्य सुखमासनमात्मनः। योगी योगं युञ्जीत" इति कर्मज्ञानादीनां न सार्वत्रिकता। तथा यत् कर्म तत् संन्यासभोगप्राप्त्यवधिः योगः सिद्ध्यवधिः साङ्ख्यमात्मज्ञानावधि ज्ञानं मोक्षावधीति नापि सार्वदिकता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तेस्तु सार्वत्रिकतासार्वदिकते अतिप्रसिद्धे एव । " न देशनियमस्तत्र न कालनियमस्तथा । नोच्छिष्टादौ निषेधोऽस्ति श्रीहरेर्नाम्नि लुब्धक ॥ " इति । " तस्मात् सर्वात्मना राजन्हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ " इति। कर्मिज्ञानिप्रभृतिषु सर्वेष्वधिकारिषु भक्तेर्व्याप्तिरुक्तैव । किरातहूणान्ध्रपुलिन्दपुल्कसा इत्यादिना जातिचाण्डालकर्मचाण्डालादिष्वपि दृष्टा । तथा सर्वावस्थास्वपि गर्भे प्रह्लादादेर्बाल्ये ध्रुवादेः यौवनेऽम्बरीषादेः वार्द्धके ययात्यादेः मरणे अजामिलादेः नारकितायामपि मुच्येत यन्नाम्न्युदिते नारकोपीत्युक्तेः । " यथा यथा हरेर्नाम कीर्तयन्ति च नारकाः । तथा तथा हरौ भक्तिमुद्वहन्तो दिवं ययुः ॥ " इति नृसिंहपुराणोक्तेश्चेति भक्तेरेव साधनत्वं निर्धारितम् । अथ प्रेमभक्तिरूपं रहस्यमपि तन्त्रेणैवाह–एतावदिति ॥ तत्वजिज्ञासुना पुंसा एतावदेव श्रेयःसु स्वर्गापवर्गप्रेमसु मध्ये जिज्ञास्यं किं तत् यत् श्रेयः आत्मनः स्वस्यैव अन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात् तत्र न तावत्स्वर्गापवर्गौ स्वान्वयव्यतिरेकाभ्यां सिद्ध्यतः । प्रेमा तु स्वस्यैवान्वयव्यतिरेकाभ्यां सिद्ध्यति । प्रेम्णोऽपि भक्तिशब्दवाच्यत्वात् साधनभक्त्यैव साध्यभक्तेः प्रेम्णः सिद्धिदर्शनात् प्रेम्णः स्वेनैव सिद्धिः । यदुक्तं "भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् । " इत्यतो रहस्यतदङ्गशब्दाभ्यामुच्यमाने प्रेमभक्तिसाधनभक्ती तन्त्रेणैवोक्ते । ततश्च प्रेमभक्तिसाधत्वेनैव भक्तिः कर्तव्या नतु स्वर्गापवर्गादिसाधनत्वेनेति भगवतः शिक्षा व्यञ्जिता। भगवच्छिक्षितमहं करवाणि इति ब्रह्मणा प्रार्थितत्वात् शुद्धसाधनभक्तिसिद्ध्या प्रेमभक्त्यैव मद्रूपगुणादिमाधुर्य्यरसानुभवस्तस्य प्रेमभक्त्यनुभावरूपत्वादिति विज्ञानं स्वत एव लब्धमतो रहस्य-

एतन्मतं समातिष्ठ परमेण समाधिना ॥ भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ३६ ॥

तदङ्गविज्ञानानि श्लोकेनानेनैवोक्तानि । किंच " रसो वै सः " इत्यनन्तरं "सैषानन्दस्य मीमांसा भवति" इति श्रुतेः । सर्वश्रेयोऽवधिरूपो रस एव रङ्गभूमौ मल्लानामशनिरित्याद्याकार एव दर्शितस्तस्य च विज्ञानमत्रैव श्लोके तन्त्रेणैवोक्तम् यथा जिज्ञास्येषु मध्ये एतावदेव जिज्ञास्यमनुबुभूषणीयं किं तत् अन्वयव्यतिरेकाभ्यां योगायोगाभ्यां संभोगविप्रलम्भाभ्यां यत् स्यात् सर्वत्र सर्वब्रह्माण्डवर्तिनि श्रीवृन्दावनादौ दाससखिगुरुप्रेयसीषु सर्वदा नित्यमेव महाप्रलयसमयेऽपीति दास्यसख्यवात्सल्यशृङ्गाररसानाम् आस्वादनं व्यञ्जितम् । एवमतिरहस्यप्रेमभक्तिरसव्यञ्जकः श्लोकोऽयं ज्ञानरूपार्थान्तरेण भगवतैवाच्छादितश्चिन्तामणिरिव कनकसम्पुटेन बहिरङ्गजनाशक्त्योद्घाटनेन तथा च श्रुतिः "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥ " इति । तच्च ज्ञानरूपमर्थान्तरं यथात्मनस्तत्वजिज्ञासुना ॥ ३१ ॥
एतादेव जिज्ञास्यं किं तत् यत् अन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात्तदेवात्मा । तथा ह्यात्मनः कारणत्वेन जगत्यन्वयः जगतस्त्वात्मनि व्यतिरेकः । यथा च जाग्रदाद्यवस्थासु तत्साक्षितया आत्मनोऽन्वयः आत्मनि तु जाग्रदाद्यवस्थाव्यतिरेक इति व्याचक्षते ॥ ३५ ॥ नेहमानः प्रजा स्वर्गमित्यादि प्रार्थितं प्रसादीकरोति–एतदिति ॥ परमेण समाधिना चित्तैकाग्र्येणैतन्मतं सम्यगनुतिष्ठ निरन्तरमनुचिन्तय एवं चेत् कल्पे ये विकल्पा विविधाः सृष्टयः अवान्तरकल्पा वा तेषु भवान्कर्हिंचिदपि न विमुह्यति कर्तृत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिनिवेशं न यास्यति श्रीकृष्णावतारे ब्रह्ममोहनं तु तत्कृपाविलसितमेवेति ज्ञेयम् ॥ ३६ ॥ संप्रदिश्येति ॥ अजनो हरिः जनानां परमेष्ठिनं ब्रह्माणं प्रत्येवं संप्रदिश्य तस्य ब्रह्मणः पश्यत एव सतः तद् आत्मनः रूपं न्यरुणत् तिरोभावयामास ॥ ३७ ॥ अन्तर्हितेति ॥ अन्तर्हितस्तिरोधापित इन्द्रियार्थः चक्षुरिन्द्रियविषयः स्वरूपं येन तस्मै हरये विहितोऽञ्जलिर्येन सर्वभूतमयः समष्टिरूपः स ब्रह्मा पूर्ववत् पूर्वकल्पवदिदं विश्वं ससर्ज ॥ ३८ ॥ तदनन्तरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्तः इत्याह–प्रजापतिरिति ॥ एकदा धर्म्मपतिः प्रजापतिः ब्रह्मा प्रजानां भद्रं कल्याणमन्विच्छन् सन् प्रजा यमनियमाननुतिष्ठत्विति या स्वार्थकाम्यतया नियमान् शौचादीन् यमान् अहिंसादींश्चातिष्ठत् अनुष्ठितवान्॥३९॥ तामिति द्वयम् ॥ हे राजन् रिक्थादानां पुत्राणां मध्ये प्रियतमः अनुव्रतः अनुवर्ती महामतिः महाभागवतश्च नारदः मायाया ईशस्य विष्णोर्मायां विविदिषन् ज्ञातुमिच्छन् शुश्रूषमाणः तं नियमादीननुतिष्ठन्तं पितरं ब्रह्माणं शीलेन प्रश्रयेण दमेन च पर्यतोषयत् ॥४०॥४१॥ तुष्टमिति ॥ लोकानां प्रपितामहं स्वपितरं ब्रह्माणं तुष्टं निशम्य ज्ञात्वा

॥ श्रीशुक उवाच ॥ संप्रदिश्यैवमजनो जानानां परमेष्ठिनम् ॥ पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ॥ ३७ ॥ अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः ॥ सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥ ३८ ॥ प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् ॥ भद्रं प्रजानामन्विच्छन्नातिष्ठत्स्वार्थकाम्यया ॥ ३९ ॥ तं नारदः प्रियतमो रिक्थादानामनुव्रतः ॥ शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥ ४० ॥ मायां विविदिषन्विष्णोर्मायेशस्य महामुनिः ॥ महाभागवतो राजन्पितरं पर्यतोषयत् ॥ ४१ ॥ तुष्टं निशम्य पितरं लोकानां प्रपितामहम् ॥ देवर्षिः परिपप्रच्छ भवान्यन्माऽनुपृच्छति ॥ ४२ ॥ तस्मा इदं भागवतं पुराणं दशलक्षणम् ॥ प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥४३॥ नारदः प्राह मुनये सरस्वत्यास्तटे नृप ॥ ध्यायते ब्रह्म परमं व्यासायाऽमिततेजसे ॥ ४४ ॥ यदुताऽहं त्वया पृष्टो वैराजात्पुरुषादिदम् ॥ यथाऽऽसीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे नवमोऽध्यायः ॥ ९ ॥

देवर्षिर्नारदो भवान्मां प्रति यदनुपृच्छति तदेव परिपप्रच्छ ॥ ४२ ॥ तस्मा इति ॥ तस्मै पृष्टवते पुत्राय नारदाय प्रीतः सन् भूतकृत् ब्रह्मा इदं यत् संक्षेपेण चतुःश्लोक्या भगवता प्रोक्तं तत् दशलक्षणानि लक्षणीया अर्था यस्मिंस्तद्विस्तृतं भागवतं नाम पुराणं प्राह स्म ॥ ४३ ॥ नारद इति ॥ हे नृप स च नारदः सरस्वत्यास्तटे परमं ब्रह्म ध्यायते अमिततेजसे व्यासाय मुनये प्राह स्म । व्यासादहमधीतवानिति प्रागुक्तम् ॥ ४४ ॥ यदिति ॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिता इत्यादिना वैराजात्पुरुषाद्यथेदं विश्वमासीदिति यदुत यदपि त्वयाहं पृष्टस्तद्यथावदुपाख्यास्यामि अन्यांश्च कृत्स्नशस्तव प्रश्नान्भागवतव्याख्यानेनैवोपाख्यास्यामि । एवं नारायणो ब्रह्मणे ब्रह्मा नारदाय नारदो व्यासाय व्यासो मह्यमहं तुभ्यमिति षट्संवादीयं भागवतम् ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीयस्याध्याये नवमे व्यधात् ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्त्ये सर्गविसर्गादिदशानां लक्षणं ततः ॥ संक्षेपाल्लोकसृष्टिश्च तत्र श्लोका द्विमार्गणाः ॥ अनुष्टुभोऽपि तावत्य उवाचेति त्रयं तथा ॥ १० ॥ प्राक्सूचितानि दश लक्षणान्याह—अत्रेति ॥ अत्र श्रीभागवते सर्गविसर्गादयो दशार्था निरूप्यन्ते । मन्वन्तराणि च ईशकथाश्चेति द्वन्द्वः ॥ १ ॥ न चार्थभेदाच्छास्त्रभेद इत्याह—दशमस्येति ॥ अञ्जसा सुखेन दशमस्याश्रयस्य परब्रह्मणो विशुद्ध्यर्थं विविक्तप्रतिपत्त्यर्थं नवानां सर्गादीनां लक्षणमिह पुराणे महात्मानो विवेकिनः श्रुतेन अर्थेन च वर्णयन्ति । तत्र स्तुत्यादिस्थानेषु श्रवणेन कण्ठतः साक्षादेव तद्वाचकशब्देनाश्रयं वर्णयन्ति।तत्तदाख्यानेषु तु अर्थेन तात्पर्यवृत्त्या वर्णयन्ति अत आश्रय एवास्य ग्रन्थस्य विषयः।सर्गादिनवकं चात्रेश्वरहेतुकं जीवविषयकमेव ॥ २ ॥ सर्गादीनां लक्षणान्याह—भूतेति ॥ ब्रह्मणः परमात्मनः प्रयोजकात् गुणानां सत्त्वरजस्तमसां वैषम्यात्परिणामाद्धेतोर्यद्भूतमात्रेन्द्रियधियां जन्मस्वरूपतो विराड्रूपेण च उत्पत्तिः स सर्ग उदाहृतः । तत्र भूतान्याकाशादीनि पञ्चमात्राणि शब्दादीनि पञ्च इन्द्रियाणि चक्षुरादीनि दश । धीशब्देन महदहङ्कारौ अन्तःकरणमप्यत्रैव । पुरुषो वैराजो ब्रह्मा तत्कृतः पौरुषः चराचरसर्गो विसर्गः स्मृत इत्यर्थः ॥ ३ ॥ स्थितिरिति ॥ वैकुण्ठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः ब्रह्मादिदेवापेक्षयाऽऽधिक्यम्। वैकुण्ठकर्तृको जीवदुःखाभिभवो वा "जि अभिभवे" स्थितिः स्थानं स्वभक्तेषु तस्यानुग्रहः पोषणं सतां तदनुगृहीतानां मन्वन्तराधिपतीनां धर्मो मन्वन्तराणि छन्दोनुरोधात् ऊतेः प्राक्निर्देशः कर्मणां वासनाः " वेञ् तन्तुसंताने " ऊयन्ते कर्मभिः संतन्यन्त इत्यूतयः ॥ ४ ॥ अवतारेति ॥ हरेरवतारानुचरितमस्य हरेरनुवर्तिनां पुंसां च नानाख्यानोपबृंहिताः कथा ईशकथाः प्रोक्ताः ॥ ५ ॥ निरोध इति ॥ अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चात् शक्तिभिरिन्द्रियाद्युपाधिभिः सह शयनं भगवति लयः निरोधः भगवदेकपरतया संसारविस्मृतिश्चापि निरोधो ज्ञेयः । निरोधनिरूपके दशमस्कन्धे तथैव प्रतीतेरित्यप्याहुः । अन्यथा रूपम् अविद्ययाध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः अत्रेदं बोध्यम् । सर्गादिनवसु आदौ भूतमात्रेन्द्रियादीनां स्वरूपेण विराड्रूपेण च जन्म ततो जीवानां भुक्तिमुक्तिसाधनबुद्धीन्द्रियादिप्राप्तिरूपा सृष्टिः तदनन्तरं जीवानां स्थितिः स्थितावेव केषुचिज्जीवेषु साधकभक्तेषु दैवाद्विकर्मपरेष्वपि तस्यानुग्रहः पोषणं स्थितावेवोत्कृष्टापकृष्टजीवानां स्वभावो वासनानुसारी ऊतावुक्तः स्थितावेव मन्वन्तराधिपत्यादीनां केषांचित्कर्मिणां धर्मः स्थितावेव केषांचिद्भक्तानां श्रवणकीर्तनादीनि भक्त्यङ्गानि ईशकथायामिति स्थितावेव पञ्च लक्षणानि । स्थित्यनन्तरं महाप्रलये

॥ श्रीशुक उवाच ॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥ दशमस्य विशुद्ध्यर्थं नवानामिह
लक्षणम् ॥ वर्णयन्ति महात्मानः श्रुतेनाऽर्थेन चाञ्जसा॥२॥भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः॥ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः॥३॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ॥ मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ॥४॥ अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ॥ पुंसामीशकथाः
प्रोक्ता नानाख्यानोपबृंहिताः ॥ ५ ॥ निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ॥ मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवानां परमेश्वरे लयो निरोधस्ततोऽन्यथारूपं हित्वा स्वरूपेणावस्थितिर्मुक्तिः ॥ ६ ॥ सर्गादिनवलक्षणैरेव तद्विषयान् जीवान् लक्षयित्वाऽऽश्रयलक्षणेन परमेश्वरं लक्षयति—आभास इति ॥ यतः आभासः सृष्टिः चकारात् स्थितिपोषणादयः निरोधो लयश्च भवति चान्मुक्तिश्च । यतश्च अध्यवसयिते प्रकाशते यश्च परं ब्रह्मेति परमात्मा इति च प्रसिद्धः स आश्रयः शब्दयते कथ्यते ॥ ७ ॥ य इति ॥ योऽयमध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवासावाधिदैविकः पुरुषः सूर्यादिः अत्र पुरुषस्य जीवस्योपाधित्वात् इन्द्रियादौ पुरुषशब्दप्रयोगः " स वा एष पुरुषोऽन्नरसमयः" इत्यादिश्रुतेः । अतोऽयं वास्तवोऽर्थः । यदिदमध्यात्मं चक्षुरादिकरणं सर्वत्र विनयादित्वात्स्वार्थे ठक् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । स एवासावाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः पुरुषः स्मृतः । इन्द्रियतदधिष्ठानयोरपि सूर्याद्यंशत्वेनैकरूप्यात् । यस्तु तत्रैकस्मिन्नेवोभयोः आध्यात्मिकाधिदैवरूपयोर्विच्छेदो भेदो यस्मात्तथाविधश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः स ह्याधिभौतिकः पुरुषः स्मृतः । अभिन्नयोरपि करणतदधिष्ठात्रोर्गोलक एव भेदो बुद्ध्यते अन्यत्र करणस्थित्यभावेन भेदबोधाभावात् । यद्वा । उभयः गोलकरूपः शब्दस्पर्शादिरूपश्च विच्छेदो यस्य स ह्याधिभौतिकः पुरुषः स्मृतः । एवं च इन्द्रियमध्या-

आभासश्च निरोधश्च यतश्चाऽध्यवसीयते ॥ स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ ७ ॥ योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ॥८॥ एकमेकतराभावे यदा नोपलभामहे ॥ त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥ पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः ॥ आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥

त्मिकं देवता आधिदैविकं गोलकमाधिभौतिकं विषयोप्याधिभौतिक इति ॥ ८ ॥ एकमेकतराभाव इत्येतेषामन्योन्यसापेक्षसिद्धत्वे नानात्मत्वं सूचयति तथा हि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिद्ध्यति नापि द्रष्टा न च तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना करणं प्रवर्तते न च तद्विना दृश्यमित्येवं यदैकतरस्याभाव एकमपि नोपलभामहे न पश्यामस्तत्र तदा तत् आध्यात्मिकादित्रितयमालोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स आत्मैव स्वाश्रयाश्रयः स्वाश्रयः अनन्याश्रयः स चासावन्येषामाश्रयश्चेति अयमेवार्थः एकादशे । "दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिद्ध्यति यः स्वतः स्वे ।" इत्यादिना वक्ष्यते । अन्येषां सिद्धिः अन्यसापेक्षा आत्मनः सिद्धिर्नान्यापेक्षा अत एव व्यभिचारित्वात्तेषां मायामयत्वम् । अत एव पुरुषावयवैर्लोकाः लोकैरमुष्यावयवा इति विरोधोऽपि परिहृतः ॥ ९ ॥ यदुताहं त्वया पृष्ट इति प्रतिज्ञातमर्थं वक्तुं कथां प्रस्तौति—पुरुष इति ॥ स पुरुषो वैराजः अण्डं विनिर्भिद्य पृथक्कृत्य यदा आदौ सृष्टेः पूर्वं विनिर्गतः पृथक् स्थितस्तदा आत्मनः स्वस्य अयनं स्थानमन्विच्छन् विमृशन् यतः स्वयं शुचिः शुद्धः अतः शुचीः फेनतरङ्गादिराहित्येन शुद्धाः अपो गर्भोदकसंज्ञाः अस्राक्षीत् ससर्ज ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तास्विति ॥ स पुरुषः स्वसृष्टासु तास्वप्सु सहस्रं परिवत्सरान् संवत्सरान् अवात्सीत् उवास । तेनाप्सु वासेन नारायण इति नामाभूत् । यत् यस्मात् पुरुषो नरस्तस्मादुद्भवो यासां ता नाराः आपः अयनमस्येति नारायण इत्यर्थः । "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥" इत्युक्तेः ॥ ११ ॥ द्रव्यमिति ॥ द्रव्यमुपादानं महदादिपृथिव्यन्तो भूतवर्गः कर्मजीवादृष्टं कालो गुणवैषम्यहेतुः स्वभावः परिणामहेतुः जीवो भोक्ता चकारादन्यदपि यत्किंचित् एते सर्वे यस्यानुग्रहतः सन्ति सत्तां लभन्ते कार्यक्षमाश्च भवन्ति यस्योपेक्षया च न सन्ति सत्तामेव न लभन्ते कुतः कार्यक्षमताम् । स नारायणः ॥१२॥ एक इति युग्मम् ॥ प्रभुर्देवः एकः अविभक्तनामरूपः आत्मनो देवमनुष्यादिरूपेण नानात्वमन्विच्छन् योगरूपात्तल्पात् समुत्थितः सन् हिरण्मयं प्रकाशबहुलं रमणीयं वीर्यं गर्भरूपं देहं मायया अधिदेवम् आध्यात्ममधिभूतमिति त्रिधा व्यसृजत् विभक्तवान् । अथ एकं पौरुषं वीर्यं यथा त्रिधा भिद्यत तथा शृणु । अत्र भागवताः । प्रलये स्वांशान् जीवानात्मनि प्रविलाप्य स्थितः तदनु सृष्टिकाले जीवान् स्वात्मनः पृथक्कुर्वन् रात्रिस्थानीयमहाप्रलयावसाने मायया स्वशक्त्या महदादीनि सृष्ट्वा तैर्हिरण्मयं वीर्यं ब्रह्माण्डं सावरणमसृजदिति म-

तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान् ॥ तेन नारायणो नाम यदापः पुरुषोद्भवाः॥११॥द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥ १२ ॥ एको नानात्वमन्विच्छन्योगतल्पात्समुत्थितः ॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥ १३ ॥ अधिदैवमथाऽध्यात्ममधिभूतमिति प्रभुः ॥ यथैकं पौरुषं वीर्यं त्रिधाऽभिद्यत तच्छृणु ॥ १४ ॥ अन्तः शरीर आकाशात्पुरुषस्य विचेष्टतः ॥ ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥ १५ ॥ अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु ॥ अपानन्तमपानन्ति नरदेवमिवानुगाः ॥१६॥

हासमष्टिसृष्टिस्ततस्तेषामेव महदादीनामंशैः परस्परमिलितैः समष्टिविराट्पञ्चाशत्कोटियोजनपरिमिताण्डकटाहमध्यगतः सृष्टोऽभूत्तदैव आदिपुरुषस्तदेवाण्डकटाहं प्रविश्य तदर्द्धं स्वसृष्टजलेनापूर्य तत्रस्थं समष्टिविराजं स्वोदरमध्ये कृत्वा सहस्रं समास्तस्मिन् गर्भोद एव सुष्वाप तदन्ते योगतल्पादुत्थितो हिरण्मयं समष्टिविराजम् अधिदैवादिभिदा त्रिधा व्यभजत् । एष एव समष्टिस्तस्य नाभिद्वारा कमलनालात्मको भावी । स एव पुनश्चतुर्दशलोकात्मको वैराजाख्यः स्थूलो भावी । सूक्ष्मस्तु हिरण्यगर्भः समष्टिजीवः वैराज एव विसर्गार्थं चतुर्मुखो भावीति ब्रह्मा त्रिधा इत्याहुः ॥ १३ ॥ १४ ॥ अन्तरिति ॥ विचेष्टतः क्रियाशक्त्या विविधं चेष्टमानस्य पुरुषस्य समष्टिविराजः आर्षः शता । अन्तःशरीरे य आकाशस्तस्मात् ओजः इन्द्रियशक्तिः सहो मनःशक्तिः बलं देहशक्तिः ततः शक्त्यात्मकात्सूक्ष्माद्रूपात् प्राणः सूत्रात्मा महान् मुख्यः असुः सर्वेषां प्राणस्वरूपः जज्ञे ॥ १५ ॥ सूत्रात्मनो महत्त्वं दर्शयति—अनुप्राणन्तीति ॥ सर्वजन्तुषु सर्वप्राणिषु प्राणा इन्द्रियाणि प्राणन्तं चेष्टां कुर्वन्तं यं प्राणम् अनु पश्चात्प्राणन्ति चेष्टां कुर्वन्ति अपानन्तं चेष्टां त्यजन्तं तम् अनु अपानन्ति चेष्टां त्यजन्ति नरदेवमनुगा इव । यथा अनुगा भृत्याः नरदेवं राजानं गच्छन्तम् अनुगच्छन्ति तं तिष्ठन्तमनुतिष्ठन्ति च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा ॥ १६ ॥ प्राणेनेति ॥ प्रभोर्वैराजस्यान्तरा उदरमध्ये क्षिपता व्याप्रियमाणेन निमित्तेन क्षुत्तृट् च आजायते स्म ततः पिपासतः पातुमिच्छतः जक्षतः भक्षयितुमिच्छतश्च प्राक् प्रथमं मुखं निरभिद्यत विभक्तमभूत् । प्रभोरिति विराड्जीवाभेदेनोपासनार्थम् एवमग्रेऽपि भूम्न इत्यादौ ॥ १७ ॥ पूर्वमुपक्रान्तमधिदैवादि त्रैविध्यं विवृणोति—मुखत इति ॥ मुखतो मुखोत्पत्त्यनन्तरं मुखे विवरात्मके तालु इन्द्रियाधिष्ठानं निर्भिन्नमुत्पन्नम् । तत्र तालुनि जिह्वाइन्द्रियमध्यात्ममुपजायते स्म । ततस्तदनन्तरं नाना मधुरादिभेदः रसः विषयोऽधिभूतं जज्ञे । यो रसो जिह्वयाधिगम्यते । वरुणदेवतारूपमधिदैवमनुक्तमपि ज्ञेयमेवं सर्वत्राधिष्ठानमिन्द्रियं देवताविषयश्चेत्येतच्चतुष्टयमनुक्तमप्यूह्यम् । त्रैविध्ये च विषयोऽधिष्ठानं च अधिभूतमध्ये गण्येते । इन्द्रियमध्यात्मं देवता अधिदैवतमिति ॥१८॥ विवक्षोरिति अर्द्धम् ॥ भूम्नो व्यापकस्य विवक्षोर्वक्तुमिच्छोर्मुखतो मुख एवाधिष्ठाने वह्निर्देवता वागिन्द्रियं तयोरिन्द्रियतदभिमानिदेवतयोः अधीनं कर्मरूपं व्याहृतं भाषणं विषयाख्यं चाभूत् ॥१९॥ जल इति सार्द्धम् ॥ यदा जले चरतस्तस्य सुचिरं वायोर्निरोधः समजायत जले इत्यत्र गल इति पाठान्तरम् । तदा नभस्वति प्राणवायौ दोधूयति अत्यन्तं प्रचलति सति आर्षः शता । श्वासप्रचलनं विना न निर्वाह इति श्वासमार्ग-

प्राणेन क्षिपता क्षुत्तृडन्तरा जायते प्रभोः ॥ पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ॥ १७ ॥ मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ॥ ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ॥१८॥ विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः ॥१९॥ जले वै तस्य सुचिरं निरोधः समजायत ॥ नासिके निरभिद्येतां दोधूयति नभस्वति ॥ तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः ॥२०॥ यदात्मनि निरालोकमात्मानं च दिदृक्षतः ॥ निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः ॥२१॥ बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः ॥ कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः॥२२॥वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीतताम् ॥ जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोममहीरुहाः ॥ तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणो वृतः ॥ २३ ॥

तया अधिष्ठानभूते नासिके निरभिद्येताम् । ततश्च जिघृक्षतः गन्धं ग्रहीतुमिच्छोस्तस्य नसि नासिकायां गन्धं वहतीति तथाभूतो वायुर्देवता अभूत् । अनेनैव गन्धो विषय इति सूचितं घ्राणइन्द्रियं चाभूत् ॥ २० ॥ यदेति ॥ यदा आत्मनि देहे निरालोकं प्रकाशशून्यमासीदिति शेषः । निर्मक्षिकमितिवदव्ययीभावः । यदा प्रकाशाभाव आसीदित्यर्थः । तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतो द्रष्टुमिच्छतस्तस्य आर्षः शता । अक्षिणी अधिष्ठानभूते निर्भिन्ने उत्पन्ने । तत्र ज्योतिरादित्यो देवताभूत् चक्षुरिन्द्रियं ततश्च गुणस्य रूपस्य ग्रहः ग्रहणं भवति अनेनैव रूपं विषयो दर्शितः ॥ २१ ॥ बोध्यमानस्येति ॥ ऋषिभिर्वेदैर्बोध्यमानस्य तदात्मनः प्रबोधनं जिघृक्षतः ग्रहीतुमिच्छतः कर्णौ अधिष्ठानभूतौ निरभिद्येताम् । तत्र दिशो देवता अभूवन् । श्रोत्रं चेन्द्रियमभूत् ततश्च गुणस्य शब्दस्य ग्रहो ग्रहणं भवति । अनेन शब्दो विषयो दर्शितः ॥ २२ ॥ वस्तुन इति सार्द्धम् ॥ वस्तुनो द्रव्यस्य मृदुत्वं काठिन्यं च लघुत्वं च गुरुत्वं च औष्णत्वम् उष्णत्वम् आङ् पादपूरणे । गुर्वुष्णेति पाठे सवर्णदीर्घप्राप्तौ यणादेश

Nepal Sanskrit University, Balmeeki Campus ...

CC-0. In Public Domain. Digitization by eGangotri

आर्षः। पादपूरणार्थमेव अन्ये तु आङीषदर्थे उष्णस्य जिघृक्षाभावादाङ्प्रयोग इत्याहुः। शीततां च जिघृक्षतस्त्वक् निर्भिन्ना त्वगिन्द्रियाधिष्ठानं चर्म जातमित्यर्थः। तस्यां त्वचि रोमाणि इन्द्रियं जातं महीरुहाः वृक्षाभिमानिनो देवताः जाताः। वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकाः। तत्र त्वचि अन्तर्बहिश्च त्वचा लब्धो गुणः स्पर्शो येन सः वायुर्वृतः आवृत्य स्थितः कर्तरि निष्ठा अयमर्थः त्वगिन्द्रियमेव बहिः कण्डूतिसहितं स्पर्शं गृह्णन् लोमशब्देनोच्यते। तत्र च महीरुहाणां देवत्वम् अन्तर्बहिश्च स्पर्शं गृह्णत्तदेव त्वक्शब्देनोच्यते तत्र वायुर्देवता। तथा च तृतीये वक्ष्यते। "त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमौषधीः। अंशेन लोमभिः कण्डूं यैरसौ प्रतिपद्यते॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत्। प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते॥" इति। तत्र चर्माणीति चर्मोपलक्षिता त्वगित्यर्थः। प्राणेनांशेनेति प्राणवायुव्याप्तेन त्वगिन्द्रियेणेत्यर्थः। अत्र त्वचि इन्द्रियद्वयं स्थितम् एकत्र स्पर्शो विषयोऽन्यत्र कण्डूः। बह्वृचश्रुतौ "त्वेक एवांशो निर्दिष्टः त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयः" इति॥ २३॥ हस्ताविति॥ आदानप्रक्षेपादि नानाकर्मचिकीर्षया कर्तुमिच्छतः तस्य हस्तौ अधिष्ठानभूतौ रुरुहतुः

हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया॥ तयोस्तु बलमिन्द्रश्च आदानमुभयाश्रयम्॥ २४॥ गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम्॥ पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः॥ २५॥ निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः॥ उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयम्॥ २६॥ उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम्॥ ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः॥ २७॥ आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः॥ तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम्॥ २८॥

तयोर्हस्तयोर्बलमिन्द्रियम् इन्द्रः देवता च प्रविवेश। बलवानिति पाठे बलसहित इन्द्र इत्यर्थः। आदानं कर्म च उभयाश्रयमिन्द्रियदेवताधीनम्॥ २४॥ गतिमिति॥ जिगीषत इति धात्वर्थो न विवक्षितः किन्तु सन्नर्थइच्छैव। तथा च अभिकामिकामभीष्टां गतिमिच्छतस्तस्य पादौ रुरुहाते सन्धिरार्षः। पद्भ्यां पादयोर्यज्ञो विष्णुः स्वयमेव गत्याख्येनेन्द्रियेण सह तदधिष्ठातृरूपेण स्थितः नृभिः कर्तृभिः कर्मभिः हव्यं क्रियते गमनागमनादिभिर्यज्ञार्थं द्रव्यरूपविषयः संपाद्यत इत्यर्थः। कर्मभिरिति गत्याख्या कर्मशक्तिरिन्द्रियमुक्तम्। प्राप्यं द्रव्यं विषयः नृभिरिति व्यष्टिजीवेष्वपि इयमेव रीतिरिति दर्शयन् यज्ञादीनां नराधिकारिकत्वं दर्शयति॥ २५॥ निरभिद्यतेति॥ प्रजा अपत्यमानन्दः स्त्रीसंभोगसुखममृतं स्वर्गादिः तदर्थिनः शिश्नोऽधिष्ठानं निरभिद्यत। तत्रोपस्थः इन्द्रियमासीत् प्रजापतिश्च देवता ज्ञेया। कामानां संबन्धि यत् प्रियं स्त्रीसंभोगसुखं तदुभयाश्रयमिन्द्रियदेवताधीनम्॥ २६॥ उत्सिसृक्षोरिति॥ धातुमलं भुक्तान्नादीनामसारांशम् उत्सिसृक्षोः त्यक्तुमिच्छोस्तस्य गुदमधिष्ठानं निरभिद्यत। ततस्तत्र पायुरिन्द्रियमासीत्। ततस्तस्य मित्रो देवतासीत्। उत्सर्गो मलत्यागरूपो विषयः उभयाश्रयः देवतेन्द्रियाधीनः॥ २७॥ आसिसृप्सोरिति॥ पुर्या देहात् पुरो देहान्तराणि आसिसृप्सोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वतो गन्तुमिच्छोस्तस्याऽपानतः अपानमार्गेण उपलक्षणमेतत्प्राणमार्गेण च प्राणापानविश्लेषो मृत्युरिति प्रसिद्धेः । नाभिरूपं द्वारं निरभिद्यत तत्रापानः इन्द्रियमासीद् । ततस्तस्याधिष्ठाता मृत्युर्देवतासीत् पृथक्त्वं प्राणापानविश्लेषरूपं मरणं विषयः । उभयाश्रयमिन्द्रियदेवताधीनम् ॥ २८ ॥ आदित्सोरिति ॥ अन्नपानानां शेषे कर्मणि षष्ठी । आदित्सोः संग्रहेच्छोः कुक्षिरधिष्ठानम् अन्त्राणि नाड्यश्चेन्द्रियं तयोर्नाडचन्त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरुदरभरणं पुष्टिस्तु रसपरिणामतः स्थौल्यं च विषयौ तदाश्रये तदुभयनिमित्ते तत्रान्नसंग्रहेच्छोः कुक्ष्यन्त्रसमुद्रतुष्टय इति अधिष्ठानादिचतुष्टयम् । पेयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति चतुष्टयमिति विवेकः ॥ २९ ॥ निदिध्यासोरिति ॥ आत्मनो मायां मायिकं वस्तुमात्रं निदिध्यासोर्नितरां चिन्तयितुमिच्छोर्हृदयं कमलाकारमधिष्ठानं निरभिद्यत ततस्तत्र मनइन्द्रियं जातम् । तस्य चन्द्रोऽधिष्ठाता देवता ततश्च विषयभूतः संकल्पस्तत्तत्पदार्थचिन्तनं तत एव कामस्तद्विषयाभिलाषश्च भवति । अत्र हृदय एवाधिष्ठाने चित्ताहंकारबुद्धय इन्द्रियाणि तद्देवताश्च वासुदेवरुद्रब्रह्माणस्तृतीयस्कन्धोक्ता ज्ञेयाः । तदेवमष्टादशेन्द्रियान्युक्तानि । प्रसिद्धानि तु एकादशैव ज्ञेयानि । तथा चात्र क्रमाज्जिह्वावाग्घ्राणचक्षुःश्रोत्ररोमत्वग्बलगत्युपस्थपाय्वपाना-

आदित्सोरन्नपानानामासन्कुक्ष्यऽन्त्रनाडयः ॥ नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥ २९ ॥ निदिध्यासोरात्ममायां हृदयं निरभिद्यत ॥ ततो मनस्ततश्चन्द्रः संकल्पः काम एव च ॥ ३० ॥ त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ॥ भूम्यप्तेजोमयाः सप्त प्राणो व्योमाऽम्बुवायुभिः ॥ ३१ ॥ गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः ॥ मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥ ३२ ॥ एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥ ३३ ॥

न्त्रनाडिमनश्चित्ताहङ्कारबुद्धयोऽष्टादशेन्द्रियाण्युक्तानि ॥ ३० ॥ तदेवमधिदैवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह—त्वगिति ॥ त्वगुपरितनं सूक्ष्मं चर्म चर्म तन्दन्तः स्थूलचर्म मांसं रुधिरं मेदः मज्जा अस्थि चेति समाहारद्वन्द्वः । शुक्रमप्युपलक्षणीयम् । एते सप्त धातवः भूम्यप्तेजोमयास्तेषां कार्यभूताः तेषां पाञ्चभौतिकत्वेऽपि वाय्वाकाशयोराहारादिरूपेण संवर्द्धकत्वाभावाद् भूम्यादित्रितयकार्यत्वमुक्तम् । प्राणस्तु व्योमाम्बुवायुभिरारब्ध इति शेषः । अत्र व्योमाम्बुनोः पोषकत्वम् ॥ ३१ ॥ गुणात्मकानीति ॥ इन्द्रियाणि गुणात्मकानि गुणेषु शब्दादिषु आत्मा येषां तानि विषयाभिमुखस्वभावानीत्यर्थः । गुणाः शब्दाद्यास्तु भूतादिरहंकारस्ततः प्रकर्षेण भवन्ति इति अहङ्कारकल्पितशोभनस्वभावा नतु वस्तुतः यतो मनः सर्वविकाराणामात्मा स्वरूपं बुद्धिस्तु तथाभूतार्थविज्ञानस्वरूपिणी नतु परमार्थग्राहिणीति वैराग्यार्थमुक्तम् । यद्वा । इन्द्रियाणि गुणात्मकानि रजोगुणकार्याणि गुणास्तु भूतादेरहङ्कारस्य प्रभवो येभ्यस्तथाभूताः अहङ्कारद्वारा गुणकार्यत्वं तेषामिति भावः । मनोऽपि कामक्रोधसर्वविकाराणामात्मा स्वरूपमेव बुद्धिरपि विविधज्ञानरूपिणीति ॥ ३२ ॥ एतदिति ॥ मह्यादिभिः पृथिव्यप्तेजोवाय्वाकाशाहङ्कारमहदव्यक्तरूपैर्दशगुणोत्तरवृद्धैरष्टभिरावरणैर्बहिरावृतमेतद् ब्रह्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्डात्मकं भगवतः स्थूलं रूपं मया ते तुभ्यं व्याहृतं कथितम् । अत्र स्थूलं समष्टिसंज्ञम् । महदादिभिरिति महासमष्टिसंज्ञं महास्थूलमित्याहुः ॥ ३३ ॥ अतः परमिति ॥ अतः स्थूलात् रूपात्परमन्यदस्य कारणभूतं सूक्ष्मतममतीन्द्रियम् । यतोऽव्यक्तं निर्विशेषं सर्वव्यावर्त्तकधर्मरहितम् अनादिमध्यनिधनम् उत्पत्तिस्थितिलयशून्यं नित्यं सदैकरूपमपक्षयादिशून्यं वाक् च मनश्च "न दधिपय आदीनि" इति निषेधाद्द्वित्वाभावः समासान्ताभावश्चार्षौ । तस्मात् परं तद गोचरं सर्वव्यवहारातीतं समष्टिलिङ्गशरीराख्यं भगवतो रूपमस्ति । अत्र सूक्ष्मतममित्यनेन सूक्ष्मम तिसूक्ष्मं चेति द्वयं लभ्यते । तत्र सूक्ष्मं समष्टिलिङ्गशरीरमतिसूक्ष्मं मायारूपं निर्विशेषणादिविशेषणचतुष्टयोक्तमित्याहुः ॥ ३४ ॥ अमुनी इति ॥ अमुनी स्थूलसूक्ष्मे भगवतो रूपे उपासनार्थं मया ते तुभ्यमनुवर्णिते । उभे अपि विपश्चितो विवेकिनो न गृह्णन्ति परमार्थतो न स्वीकुर्वन्ति । कुतो हि यस्मात् मायासृष्टे अमू इति वक्तव्ये अमुनी इत्यार्षम् । अमुनी इति द्विवचनं स्थूलयोः सूक्ष्मयोश्चैक्यादित्याहुः ॥ ३५ ॥ "यद्रूपगुणकर्मकः" इत्युक्तं तत्प्रपञ्चयितुमाह—स इति ॥

अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् ॥ अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् ॥ ३४ ॥ अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते ॥ उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः ॥ ३५ ॥ स वाच्यवाचकतया भगवान्ब्रह्मरूपधृक् ॥ नामरूपक्रिया धत्ते सकर्माऽकर्मकः परः ॥ ३६ ॥ प्रजापतीन्मनून्देवानृषीन्पितृगणान्पृथक् ॥ सिद्धचारणगन्धर्वान्विद्याध्रासुरगुह्यकान् ॥ ३७ ॥ किन्नराप्सरसो नागान्सर्पान्किंपुरुषोरगान् ॥ मातृरक्षःपिशाचांश्च प्रेतभूतविनायकान् ॥ ३८ ॥ कूष्माण्डोन्मादवेतालान्यातुधानान्ग्रहानपि ॥ खगान्मृगान्पशून्वृक्षान्गिरीन्नृप सरीसृपान् ॥ ३९ ॥ द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः ॥ कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ॥ ४० ॥ सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः ॥ तत्राप्येकैकशो राजन्भिद्यन्ते गतयस्त्रिधा ॥ यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते ॥ ४१ ॥

स परः भगवान् वस्तुतः अकर्मकः सर्वव्यापाररहितोऽपि ब्रह्मा वेधास्तद्रूपधृक् अतः सकर्मा सव्यापारश्च सन् प्राणिनां वाचकतया देवमनुष्यादिनामानि तद्वाच्यतया देवादिरूपाणि तत्तदधिकारेण तत्तत्फलहेतुभूताः क्रियाश्च धत्ते सृजति ॥ ३६ ॥ एतदेव प्रपञ्चयति—प्रजापतीनिति सार्द्धत्रयम् ॥ प्रजापत्यादीन् सरीसृपान्तान् पृथक् तदवान्तरभेदेन धत्त इत्यनुषङ्गेणान्वयः । तत्र प्रजापत्यादीनि नामानि तद्वाच्यानि रूपाणि तत्तत्कर्माणि च ज्ञेयानि । पृथक् तदवान्तरभेदेन अत्र गिरीनित्यनन्तरं नृपेति संबुद्धिः ॥ ३७ ॥ ३८ ॥ ३९ ॥ द्विविधा इति॥ ये चोक्तेभ्योऽन्ये द्विविधाः स्थावरजङ्गमरूपेण भेदेन चतुर्विधा जरायुजाण्डजस्वेदजोद्भिज्जरूपेण जलस्थलनभांस्योकांसि स्थानानि येषां तानपि विधत्ते सन्धिरार्षः । एतेषु इमाः प्रजापत्याद्याः कुशलाः पुण्यफलरूपाः सर्पपिशाचाद्याः अकुशलाः पापफलरूपाः नरादयः मिश्रास्तदुभयरूपाः कर्मणां गतयः फलानि भवन्ति। एतच्च यावत्यः कर्मगतयः इति प्रश्नस्योत्तरम् ॥ ४० ॥ सत्वमिति सार्द्धम् ॥ इतिशब्दो हेतौ सत्वं रजस्तम एभ्यो हेतुभ्यः पुण्यादिद्वारा सुराः नरा नारकाश्चेति तिस्रो गतयो भवन्ति। सुरादिशब्दा ऋष्यादी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामप्युपलक्षणार्थाः । हे राजन् यदैकतरः सात्विकादिस्वभावोऽन्याभ्यामवशिष्टाभ्यां स्वभावाभ्यामुपहन्यते अभिभूयते अनुविध्यते वा तत्र तदा एकैकशोऽपि गतयस्त्रिधा भिद्यन्ते नवसङ्ख्या भवन्ति । यथा रजःस्वभावोऽपि नरः सत्वमिश्रणाधिक्याद्ब्राह्मणः तमोमिश्रणाच्छूद्र इत्यादि त्रिधेति । स्थूलतया गुणतारम्येनानन्तभेदसम्भवात् ॥ ४१ ॥ स एवेति ॥ स एव जगत्कर्ता भगवान् धर्मरूपधृक् धर्मरक्षकत्वाद्धर्मो विष्णुस्तद्रूपधृक् स्वस्य मर्यादायां स्थापयन् तिर्यगाद्यात्मभिरवतारैः इदं विश्वं पुष्णाति पालयति तत्र तिर्यगवतारा वराहमीनकच्छपहंसादयः नरावतारा रामकृष्णपरशुरामादयः सुरावतारा वामनसुयज्ञादयः ॥ ४२ ॥ तत इति ॥ कालः प्रलयकालस्तत्साधकोऽग्निः संकर्षणमुखानलस्तत्र रुद्रात्मा रुद्ररूपेणाविर्भूतो यदात्मनः स्वस्मादेवोपादानभूतात्स्वेनैव सृष्टमिदं विश्वं तत्कालेनैव करणभूतेन घनानीकं मेघसमूहम् अनिल इव संनियच्छति संहरति ॥ ४३ ॥ कर्तृत्वाद्यपवादेन दशमस्य शुद्धिमाह—इत्थंभावेनेति ॥ इत्थंभावेन स्रष्टृत्वादिरूपेण भगवत्तमः परिपूर्णैश्वर्यः भगवान् कथितः । हि हेत्वर्थे परंतु सूरयो विवेकिनः इत्थंभावेनैव द्रष्टुं नार्हन्ति किंतु निष्क्रियमित्यादि शुद्धं पश्यन्ति ॥ ४४ ॥ कुतस्तथा द्रष्टुं नार्हन्तीत्यपेक्षायामाह—नेति ॥ अस्य विश्वस्य जन्मादिरूपे कर्मणि परस्य

स एवेदं जगद्धाता भगवान्धर्मरूपधृक् ॥ पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ॥ ४२ ॥ ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः ॥
संनियच्छति कालेन घनानीकमिवानिलः ॥४३॥ इत्थंभावेन कथितो भगवान्भगवत्तमः ॥ नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ॥४४॥ नास्य
कर्मणि जन्मादौ परस्यानुविधीयते ॥ कर्तृत्वप्रतिषेधार्थं मायया ऽऽरोपितं हि तत् ॥४५॥ अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः ॥ विधिः
साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥४६॥ परिमाणं च कालस्य कल्पलक्षणविग्रहम् ॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ॥४७॥

परमेश्वरस्य इत्थंभावः कर्तृत्वं नास्ति श्रुत्यापि तात्पर्येण न प्रतिपाद्यते किंतु कर्तृत्वप्रतिषेधार्थमनुविधीयते केवलमनुवर्ण्यते । हि यस्मात्तत् गुणगतं कर्तृत्वादि तत्र मायया भ्रान्त्या आरोपितमिति । तथा च श्रुतिः । "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । इन्द्रो मायाभिः पुरुरूप ईयते " इत्यादि॥४५॥ अयं त्विति ॥ पुरुषोऽण्डं विनिर्भिद्येत्यादिनोक्तः अयं तु ब्रह्मणः संबन्धी महान् कल्पः संवत्सरशतात्मकः ब्रह्मपरमायूरूपः विकल्पः अवान्तरब्रह्मदिनरूपस्तत्सहितः उदाहृतः उदाहरणतया संक्षेपतः उक्तः । यत्र महाकल्पे प्राकृताः महदादिपृथिव्यन्ताः सर्गाः वैकृताः पृथिव्यादिविकारारब्धाः स्थावरादिसर्गा इत्ययं विधिः प्रकारः अन्यैर्महाकल्पैः साधारणः समानः अस्ति ॥ ४६ ॥ परिमाणमिति ॥ कालस्य परिमाणं स्थूलं सूक्ष्मं च स्वरूपं कल्पस्य लक्षणम् इयानेवंरूप इति तद्विग्रहमवान्तरकल्पमन्वन्तरादिरूपं विभागं च यथास्ति तथा कल्पानां लक्षणमेव विग्रहो वपुर्यस्य तत्कालस्य परिमाणमिति वा पुरस्तात् तृतीयस्कन्धे यथा यथावद्विस्तरेण व्याख्यास्ये तङ्गर्षेः । एष सर्वोऽपि विशेषः पाद्मे कल्पेऽस्ति । अथो तस्मात्पाद्मं कल्पं प्रथमपरार्द्धान्तिमभवं त्वं शृणु । कल्पगणना तु स्कान्दप्रभासखण्डात् ज्ञेया । यथा " प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः । वामदेवस्तृतीयस्तु ततो गा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थान्तरोऽपरः ॥ रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः । सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥ सद्योऽथ नवमः प्रोक्त ईशानो दशमः स्मृतः । ध्यान एकादशः प्रो-
क्तस्तथा सारस्वतोऽपरः ॥ त्रयोदश उदानस्तु गरुडोऽथ चतुर्दशः । कौर्मः पञ्चदशो ज्ञेयः पौर्णमासी प्रजापतेः ॥ षोडशो नारसिंहस्तु समाधिस्तु ततोऽपरः । आग्नेयो विष्णुजो
वंशः सोमवंशस्ततोऽपरः ॥ द्वाविंशो भावनः प्रोक्तः स पुमानिति चापरः । वैकुण्ठश्चार्चिषस्तद्वद्वल्लीकल्पस्ततोऽपरः ॥ सप्तविंशोऽथ वैराजो गौरीकल्पस्तथापरः । माहेश्वरस्तथा
प्रोक्तस्त्रिपुरो यत्र पातितः ॥ पितृकल्पस्तथान्ते च यः कुहूर्ब्रह्मणः स्मृतः । त्रिंशत्कल्पाः समाख्याता ब्रह्मणो दिवसैः सदा ॥ अतीताश्च भविष्याश्च वाराहो वर्ततेऽधुना ।
प्रतिपद् ब्रह्मणा प्रोक्ता द्वितीयार्द्धस्य साम्प्रतम् ॥ " इति । तत्र श्वेतः श्वेतवाराहः अयमेव ब्रह्मोत्पत्तिसमये ब्राह्म उच्यते । एवं पितृकल्प एव प्रथमपरार्द्धान्ते पद्मनिर्मितलो-
कत्वात् पाद्म उच्यते इति च ॥ ४७ ॥ यदाहेति युग्मम् ॥ हे सूत भागवतेषूत्तमः क्षत्ता विदुरो दुस्त्यजानपि बन्धूंस्त्यक्त्वा भुवस्तीर्थानि चचार । यद्वा । तीर्थानि तथा

॥ शौनक उवाच ॥ यदाह नो भवान्सूत क्षत्ता भागवतोत्तमः ॥ चचार तीर्थानि भुवस्त्यक्त्वा बन्धून्सुदुस्त्यजान् ॥ ४८ ॥ कुत्र कौषारवे-
स्तस्य संवादोऽध्यात्मसंश्रितः ॥ यद्वा स भगवांस्तस्मै पृष्टस्तत्वमुवाच ह ॥ ४९ ॥ ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम् ॥ बन्धु-
त्यागनिमित्तं च तथैवागतवान्पुनः ॥५०॥ सूत उवाच ॥ राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः ॥ तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्ना-
नुसारतः ॥५१॥ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे पुरुषसंस्थानुवर्णनं नाम दशमोऽध्यायः ॥१०॥ समाप्तोऽयं द्वितीयः स्कन्धः ॥ २ ॥

भुवो भगवत्क्षेत्राणि च चचार । तत्र अध्यात्मज्ञानसंश्रितः कौषारवेर्मैत्रेयस्य तथा तस्य विदुरस्य च संवादोऽभूदिति नोऽस्मान् यद्भवानाह स संवादः कुत्र जातः । यद्वा ।
यत्रैव स्थाने विदुरेण पृष्टः स भगवान् मैत्रेयः तत्त्वं परमार्थं तस्मै विदुराय ह स्फुटम् उवाच ॥ ४८ ॥ ४९ ॥ ब्रूहीति ॥ हे सौम्य तदिदं विदुरस्य विचेष्टितं तद्बन्धुत्याग-
स्य निमित्तं स्वगृहान्निर्गतः पुनर्यथा येन प्रकारेणागतवांस्तथा तं प्रकारं च नोऽस्मभ्यं ब्रूहि ॥ ५० ॥ राज्ञेति ॥ यद्विदुरमैत्रेयसंवादात्मकं वृत्तं यूयं मां पृच्छथ तदेव राज्ञा
परीक्षितापि पृष्टो महामुनिः श्रीशुकः राज्ञः प्रश्नानुसारतः प्रश्नक्रमेण यदुत्तरमवोचत्तद्वो युष्मानहमभिधास्ये कथयिष्यामि । यूयं सावधानतया शृणुत ॥ ५१ ॥ प्रीतिस्तवास्ति
मधुपेषु विटेषु चौरेष्वद्यापि हन्त यदि दुर्जन नो जहासि ॥ गोपीविटे च मधुपे नवनीतचौरे तां क्वापि धामनि बधान धृतावधानः ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रका-
शिकाम् ॥ गङ्गासहायो द्वितीयस्याऽध्याये दशमे व्यधात् ॥ १० ॥

अयं श्रीमद्भागवतस्य द्वितीयस्कन्धो वून्दीनगरवासिपण्डितगङ्गासहायकृतान्वितार्थप्रकाशिकाख्यव्याख्यासमेतः कल्याणनगर्यां श्रीकृष्णदासात्मजेन
गङ्गाविष्णुना स्वकीये " लक्ष्मीवेंकटेश्वर " मुद्रणागारे मुद्रयित्वा प्रकाशितः । संवत् १९५७ शकाब्दाः १८२२ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते द्वितीयस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते तृतीयस्कन्धः

प्रारभ्यंते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन्पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्ज-युगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयाय विदधाति मतिं तृतीये ॥ ३ ॥ आद्ये बन्धून् परित्यज्य गतस्य क्षत्तुरु-च्यते ॥ संवाद उद्धवेनात्र श्लोका मार्गणसिन्धवः ॥ अनुष्टुभां तत्र षष्टिरुवाचेति चतुष्टयम् ॥ १ ॥ एवमिति ॥ यथा भवान्मां परिपृष्टवान् एवमेवैतत् किल पुरा पूर्वमृद्धिमत् समृद्धिभिः पूर्णं त्यागानर्हमपि स्वगृहं त्यक्त्वा वनं प्रविष्टेन क्षत्त्रा विदुरेण भगवान् मैत्रेयः पृष्टः ॥ १ ॥ त्यागानर्हत्वसूचनाय पुनर्गृहं विशिनष्टि—यद्वा इति ॥ अखिलेश्वरो भग-वान् वो युष्माकं पाण्डवानां मन्त्रकृत् दौत्यादिकर्त्ता अयं बुद्धौ सन्निहितः श्रीकृष्णः पौरवेन्द्रो दुर्योधनस्तस्य गृहं हित्वा आत्मसात्कृतम् आत्मीयत्वेन स्वीकृतं यद्वै विदुरस्य गृहम् आत्मीयतयाऽनाहूत एव प्रविवेश तद्गृहं हित्वेत्यनुषङ्गः ॥ २ ॥ कुत्रेति ॥ भगवता मैत्रेयेण सह क्षत्तुर्विदुरस्य सङ्गमः सङ्गतिः कुत्र प्रदेशे आस बभूव ।

ॐ नमो भगवते वासुदेवाय ॥ श्रीशुक उवाच ॥ एवमेतत् पुरा पृष्टो मैत्रेयो भगवान् किल ॥ क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥ १ ॥ यद्वा अयं मन्त्रकृद्वो भगवानखिलेश्वरः ॥ पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥ २ ॥ राजोवाच ॥ कुत्र क्षत्तुर्भगवता मैत्रेयेणाऽऽ-स संगमः ॥ कदा वा सहसंवाद एतद्वर्णय नः प्रभो ॥ ३ ॥ न ह्यल्पार्थोदयस्तस्य विदुरस्याऽमलात्मनः ॥ तस्मिन् वरीयसि प्रश्नः साधुवादो-पबृंहितः ॥ ४ ॥ सूत उवाच ॥ स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं सुबहुवित् प्रीतात्मा श्रूयतामिति ॥ ५ ॥ श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून् पुष्णन्नधर्मेण विनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्य सुतान् विबन्धून् प्रवेश्य लाक्षाभवने ददाह ॥ ६ ॥

अव्ययमिदं कदा कस्मिन् काले वा तेन सह संवादोऽभूत् । हे प्रभो एतन्नोऽस्मभ्यं वर्णय ॥ ३ ॥ न हीति ॥ हि यस्मात् वरीयसि गुणैरुत्कृष्टे तस्मिन् मैत्रेये अमलात्मनः तस्य विदुरस्य अल्पार्थस्योदयो यस्मात्तादृशः प्रश्नो न सम्भवति किंतु साधूनां सतां वादेन चरित्ररूपेणोपबृंहितः विस्तृतः प्रश्नः सम्भवति ॥ ४ ॥ स इति ॥ एवं राज्ञा परीक्षिता पृष्टः सुबहुवित् स ऋषिवर्योऽयं शुकः प्रीतात्मा सन् तं राजानं प्रति श्रूयतामिति आह स्म ॥ ५ ॥ त्यागानर्हस्यापि गृहस्य त्यागे कौरवापराधान् हेतूनाह—यदेति ॥ यदा तु विनष्टा दृष्टिर्धर्मविषयकं ज्ञानं चक्षुश्च यस्य सः राजा धृतराष्ट्रः असाधून् स्वसुतान् अधर्मेण पुष्णन् सन् यविष्ठस्य कनीयसो भ्रातुः पाण्डोः विबन्धून् पितृहीनान् सुतान् युधिष्ठिरादीन् लाक्षाभवने जतुगृहे प्रवेश्य ददाह तदा क्षत्ता अयादित्येकादशेन संबन्धः । एवमग्रेऽपि । अत्र जतुगृहदाहादौ धृतराष्ट्रपरोक्षत्वेऽपि पुत्रपक्षपातित्वात्पुत्रदोषाणां पितर्यारोपात्तथोक्तिः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ यदा च नृपो धृतराष्ट्रः सभायां कुरुदेवस्य युधिष्ठिरस्य देव्याः पत्न्याः स्वास्रैः स्वकुचकुङ्कुमानि शत्रुस्त्रीणां वा तद्भर्तृवधेन कुचकुङ्कुमानि हरन्त्याः आत्मनः स्नुषायाः द्रौपद्याः केशानामभिमर्शमाकर्षणरूपं गर्ह्यं निन्दितं स्वसुतस्य दुर्योधनस्य कर्म न वारयामास ॥ ७ ॥ द्यूत इति ॥ यत् यदा द्यूते अधर्मेण जितस्य सत्यावलम्बस्य सत्याश्रयस्य साधोः वनादागतस्य समयेन पूर्वकृतसंकेतेन दायं स्वभागं याचतः अजातशत्रोः युधिष्ठिरस्य दायं तमो मोहं तमःस्वभावं पुत्रं वा जुषाणः सेवमानः मुग्धभाव आर्षः । धृतराष्ट्रो नादात् न ददौ ॥ ८ ॥ यदेति ॥ यदा पार्थेन युधिष्ठिरेण प्रहितः प्रेषितो जगतां गुरुः कृष्णः यानि पुंसां भीष्मादीनाममृतायनानि अमृतस्रावीणि वचांसि जगाद तानि क्षतः पुण्यलेशो यस्य सः राजा धृतराष्ट्रो दुर्योधनो वा उरु बहु न मेने सुखकीर्त्यादिकरं पुण्यं तस्य नासीदेव । राज्यमात्रप्रापकः पुण्यस्य लेशोऽभूत् । तस्यापि नष्टत्वादनादृतवानिति ॥ ९ ॥ यदेति ॥ यदा पूर्वजेन धृतराष्ट्रेण मन्त्राय उपहूतः भवनं प्रविष्टः तत्र च मन्त्रं पृष्टः मन्त्रदृशां मन्त्रविदां वरीयान् विदुरः तत् आह स्म ।

यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यम् ॥ न वारयामास नृपः स्नुषायाः स्वास्रैर्हरन्त्याः कुचकुङ्कुमानि ॥ ७ ॥ द्यूते त्वधर्मेण जितस्य साधोः सत्यावलम्बस्य वनागतस्य ॥ न याचतोऽदात् समयेन दायं तमोजुषाणो यदजातशत्रोः ॥ ८ ॥ यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ॥ न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः ॥ ९ ॥ यदोपहूतो भवनं प्रविष्टो मन्त्राय पृष्टः किल पूर्वजेन ॥ अथाह तन्मन्त्रदृशां वरीयान् यन्मन्त्रिणो वैदुरिकं वदन्ति ॥ १० ॥ अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवाऽऽगः ॥ सहानुजो यत्र वृकोदराहिः श्वसन् रुषा यत् त्वमलं बिभेषि ॥ ११ ॥ पार्थांस्तु देवो भगवान् मुकुन्दो गृहीतवान् स क्षितिदेवदेवः ॥ आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥ १२ ॥

यत् मन्त्रिणो वैदुरिकं वदन्ति विदुरवाक्यमिति श्लाघां कुर्वन्ति ॥ १० ॥ अजातशत्रोरिति ॥ दुर्विषहं सोढुमशक्यं तवागः अपराधं तितिक्षतः सहमानस्य शतार्षः । अजातशत्रोः दायं भागं प्रतियच्छ देहि । यत्र सहानुजः अनुजैः अर्जुनादिभिः सहितः रुषा श्वसन् वृकोदरो भीम एवाहिर्वर्त्तते । यत् यस्मात् भीमात् त्वमलमतिशयेन बिभेषि ॥ ११ ॥ पार्थानिति ॥ पार्थान् पाण्डवान् तु क्षितिदेवैर्ब्राह्मणैर्देवैश्चेन्द्रादिभिः सहितो भगवान् मुकुन्दः श्रीकृष्णः स्वकीयत्वेन गृहीतवान् । यदुदेवाः सात्यकिप्रभृतयस्तेषामपि देवः प्रभुः नृदेवेषु मण्डलेश्वरेषु दीव्यन्ति प्रकाशन्त इति नृदेवदेवाः महाराजाः विनिर्जिताः अशेषाः देवदेवा येन सः भगवान् देवः स्वपुर्यां द्वारकायामास्ते अयं भावः । यत्र हरिस्तत्रैव विप्रा देवा राजानो यादवाश्च । हरिरपि स्वपुर्यामेवास्ते न दूरमित्यतो भागं देहीति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ यं दुर्योधनं त्वम् अपत्यमत्या पुष्णासि नत्वयमपत्यम् । न पतत्यनेनेति व्युत्पत्तेः । अयं तु नरकपातहेतुरिति भावः । यः कृष्णाद्विमुखोऽतो गतश्रीश्च स एव दुर्योधनः पुरुषद्विट् कृष्णद्वेषी अतः मूर्तिमान् दोष एव गृहान् बाह्यान् आभ्यन्तरान् मनआदींश्च प्रविष्ट आस्ते अतः अशैवम् अमङ्गलरूपमेनं कुलस्य कौशलाय कुशलाय आशु त्यज । "त्यजेदेकं कुलस्यार्थे" इति न्यायात् । अन्यथा सर्वं कुलं नङ्क्ष्यतीति भावः । शैवकौशलशब्दौ स्वार्थाणन्तौ ॥ १३ ॥ इतीति ॥ यदा क्षत्ता विदुर इत्येवमूचिवान् उक्तवान् तत्र तदा सद्भिः स्पृहणीयं शीलं यस्य सः विदुरः प्रवृद्धो यः कोपस्तेन स्फुरितश्चञ्चलः अधरो यस्य तेन स कर्णानुजसौबलेन कर्णदुःशासनशकुनिभिः सहितेन सुयोधनेन दुर्योधनेन असत्कृतः तिरस्कृतः ॥ १४ ॥ क इति ॥ अत्र मन्त्रप्रसङ्गे जिह्मं कुटिलं दास्याः सुतम् । "षष्ठ्या आक्रोशे" इत्यलुक् । एनं विदुरं कः उपजुहाव आहूतवान् । यद्बलिना यस्यान्नेनैव पुष्टः तस्मिन् स्वामिनि प्रतीपः प्रतिकूलः सन् परेषां पाण्डवानां कृत्ये आस्ते । श्वसानः श्वसन् आर्षः

स एष दोषः पुरुषद्विडास्ते गृहान् प्रविष्टोऽयमपत्यमत्या ॥ पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय ॥ १३ ॥ इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण ॥ असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन ॥ १४ ॥ क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः ॥ तस्मिन् प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः ॥ १५ ॥ स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि ॥ स्वयं धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः ॥ १६ ॥ स निर्गतः कौरवपुण्यलब्धो गजाह्वयात् तीर्थपदः पदानि ॥ अन्वाक्रमत् पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः ॥ १७ ॥

शानच् । जीवनमात्रावशिष्टोऽयम् आशु पुरान्निर्वास्यतां निष्कास्यताम् । अन्यथा शत्रुपक्षपातित्वादस्मन्नाशार्थं यतिष्यते । पाठान्तरे श्मशानवदमङ्गलः अत्र तिष्ठन्नयं पुरमपि श्मशानं करिष्यति ॥ १५ ॥ स इति ॥ भ्रातुर्धृतराष्ट्रस्य विदुरतिरस्कारेऽपि तूष्णीं स्थितस्य पुरोऽग्रे स विदुरः इत्थम् अत्युल्बणैः दुःसहैः कर्णयोर्बाणवत्प्रविशद्भिर्वाक्यैः मर्मसु हृदयादिषु ताडितोऽपि गतव्यथः मायां भगवन्मायाम् उरु बहु मानयानः मन्यमानः मुगभाव आर्षः । क्षयहेतुभगवन्मायया मोहिता एते हितं न श्रृण्वन्तीति मन्यमानः धनुः द्वारि निधाय स्वयम् अयात् तन्निःसारणात्पूर्वमेव अगच्छत् । भीमादिभिः सङ्गत्य योत्स्यत इति मा शङ्कीति धनुर्विधानम् ॥ १६ ॥ स इति ॥ कौरवाणां पुण्येन लब्धः स विदुरः गजाह्वयाद् हस्तिनापुरात् निर्गतः सन् विदुरगमनच्छलाद्धार्त्तराष्ट्राणां पुण्यजं भाग्यमेव निर्गतमित्याशयः । सहस्रमूर्तिर्ब्रह्मरुद्राद्यनन्तमूर्तिर्भगवान् उर्व्यां भूमौ यानि स्वधिष्ठितः सम्यगधिष्ठाय स्थितः तानि तीर्थपदः तीर्थं पादौ यस्य तस्य भगवतः पदानि क्षेत्राणि पुण्यचिकीर्षया अन्वाक्रमत् जगाम । क्रमेर्दीर्घाभाव आर्षः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरेष्विति ॥ पुरेषु पुण्यानि उपवनानि च अद्रयश्च कुञ्जानि लतापिहितस्थलानि च तेषु अपङ्कानि निर्मलानि तोयानि येषु तेषु सरित्सरःसु सरित्सु यमुनादिषु सरःसु पुष्करादिषु च अनन्तलिङ्गैः भगवन्मूर्तिभिः समलंकृतेषु शोभमानेषु तीर्थानामायतनेषु स्थानेषु अनन्य एकाकी चचार ॥ १८ ॥ गामिति ॥ गां पृथ्वीं पर्यटन् मेध्ये पवित्रे विविक्ते एकान्तदेशे वृत्तिः स्थितिर्यस्य मेध्या विविक्ता असङ्कीर्णा च वृत्तिर्जीविका यस्येति वा सदा प्रतितीर्थम् आप्लुतः स्नातः अधः शयनं यस्य सः अवधूतः असंस्कृतदेहः स्वैः स्वकीयैर्ज्ञात्यादिभिः । अलक्षितः अवधूतवेषो वल्कलादिधारी स विदुरः हरितोषणानि दयादीनि व्रतानि चेरे आचरत् । तङार्षः ॥ १९ ॥ इत्थमिति ॥ इत्थं पूर्वोक्तनियमपूर्वकं भारतमेकवर्षं व्रजन् यावत् यावता कालेन प्रभासं तीर्थं गतवान् तावत् तावता कालेन एकस्यैव चक्रं सैन्यमाज्ञा वा यस्यां ताम् एकमेवासाधारणमातपत्रं राजचिह्नं यस्यां तथाभूतां क्षितिम् अजितेन श्रीकृष्णेन सहायभूतेन पार्थः शशास ॥ २० ॥ तत्रेति ॥ अथ तत्र प्रभासे संस्पर्द्धया निमित्तभूतया सुहृदां कौरवादीनां विनष्टिं

पुरेषु पुण्योपवनाद्रिकुञ्जेष्वपङ्कतोयेषु सरित्सरस्सु ॥ अनन्तलिङ्गैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ॥ १८ ॥ गां पर्यटन् मेध्यविविक्तवृत्तिः सदाप्लुतोऽधःशयनोऽवधूतः ॥ अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि ॥ १९ ॥ इत्थं व्रजन् भारतमेव वर्षं कालेन यावद् गतवान् प्रभासम् ॥ तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥ २० ॥ तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयम् ॥ संस्पर्धया दग्धमथानुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीम् ॥ २१ ॥ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः ॥ तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे ॥ २२ ॥ अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः ॥ प्रत्यङ्गमुख्याङ्कितमन्दिराणि यद्दर्शनात् कृष्णमनुस्मरन्ति ॥ २३ ॥ ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान् कुरुजाङ्गलांश्च ॥ कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श ॥ २४ ॥

विनाशं शुश्राव अशृणोत् । दुर्योधनादिषु सौहार्दाभावादविलम्बेनोद्धवमेलाच्च सुहृदां यादवानामिति केऽपि व्याचक्षते । यथा वेणुजं वह्निं संश्रयते यद्वनं तद्यथा दग्धं भवति तद्वत् अथ नाशश्रवणानन्तरम् अनुशोचन् तूष्णीं प्रत्यक् पश्चिमाभिमुखीम् उद्गमाभिमुखीमिति स्वामिपादाः । सरस्वतीमियाय गतवान् ॥ २१ ॥ तस्यामिति ॥ तस्यां सरस्वत्यां त्रितादीनामेकादशतीर्थानि त्रिततीर्थादिनाम्ना प्रसिद्धानि स विदुरः आसिषेवे ॥ २२ ॥ अन्यानीति ॥ इह भूलोके यान्यन्यानि च द्विजदेवैर्ऋषिभिः देवैश्च कृतानि येषां चक्राङ्कितमन्दिरवतां दर्शनात्कृष्णमनुस्मरन्ति लोकाः अङ्गमङ्गं प्रति वर्तन्त इति प्रत्यङ्गानि आयुधानि तेषु मुख्यं चक्रं तेनाङ्कितानि मूर्द्धन्यहेमकुम्भेषु चक्रचिह्नितानि मन्दिराणि येषु तानि विष्णेरायतनानि क्षेत्राणि तीर्थानि च आसिषेवे ॥ २३ ॥ तत इति ॥ ततस्तु ऋद्धं सुराष्ट्रं सौवीरमत्स्यान् कुरुजाङ्गलांश्च देशान् अतिव्रज्य आतिक्रम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावदुद्धवः प्राप्तस्तावत्स्वयमपि यमुनामुपेत्य । परे तु तावद्वाक्यालङ्कारे संभ्रमे वा इत्याहुः । विदुरः तत्र भागवतमुद्धवं ददर्श ॥२४॥ स इति ॥ स विदुरः वासुदेवस्यानुचरं प्रशान्तं बृहस्पतेः प्राक् पूर्वं तनयं नीतिशास्त्रे शिष्यं पाठान्तरे प्राप्तो नयो नीतिशास्त्रं येन तं प्रतीतं ख्यातमुद्धवं प्रणयेन प्रेम्णा गाढम् आलिङ्गय भगवत्प्रजानां स्वानां ज्ञातीनां भद्रमपृच्छत् । उद्धवकर्तृकप्रणामाभावः प्रेममूर्च्छयेत्याहुः । सख्योर्मिथ आलिङ्गनमेव वा सखे इत्यग्रे सम्बोधनात्॥२५॥कच्चिदिति ॥ कच्चिदिति प्रश्ने । स्वनाभौ भवःस्वनाभ्यः स चासौ पाद्मः पद्मसम्भवो ब्रह्मा तस्यानुवृत्त्या प्रार्थनया इह भूलोकेऽवतीर्णौ पुराणौ पुरुषौ रामकृष्णौ उर्व्याः भारापाकरणेन कुशलं विधाय कृतक्षणौ दत्तविश्रामावसरौ दत्तोत्सवौ वा शूरगेहे वसुदेवगृहे कुशलं सुखं यथा भवति तथा कच्चिदासाते नित्यकुशलिनोरपि कुशलप्रश्नः प्रेम्णैव । सन्धिरार्षः ॥ २६ ॥ कच्चिदिति ॥ अङ्ग हे उद्धव नोऽस्माकं कुरूणां परमः सुहृत् भामः भगिनी भर्त्ता वसुदेवभार्यायाः पौरव्याः विदुरादीनां भगिनीत्वात् पूज्यो वा । स प्रसिद्धः शौरिर्वसुदेवः कच्चित्सुखमास्ते । यो वै वदान्योऽत्युदारः

स वासुदेवानुचरं प्रशान्तं बृहस्पतेः प्राक्तनयं प्रतीतम् ॥ आलिङ्ग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानाम् ॥ २५ ॥ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलाऽवतीर्णौ ॥ आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥ २६ ॥ कच्चित् कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमङ्ग शौरिः ॥ यो वै स्वसॄणां पितृवद् ददाति वरान् वदान्यो वरतर्पणेन ॥ २७ ॥ कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमङ्ग वीरः ॥ यं रुक्मिणी भगवतोऽभिलेभे आराध्य विप्रान् स्मरमादिसर्गे ॥ २८ ॥ कच्चित् सुखं सात्त्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ॥ यमभ्यषिञ्चच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् ॥ २९ ॥ कच्चिद् हरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी रथिनां साधु साम्बः ॥ असूत यं जाम्बवती व्रताढ्या देवं गुहं योऽम्बिकया धृतोऽग्रे ॥ ३० ॥

स्वसॄणां भगिनीनां कुन्त्यादीनां वराणां तत्पतीनां तर्पणेन सन्तोषणेन सह वरान् अभीष्टान् अर्थान् पितृवद्ददाति ॥२७॥ कच्चिदिति ॥ अङ्ग हे उद्धव यदूनां वरूथाधिपतिः सेनापतिः वीरः प्रद्युम्नः कच्चित्सुखमास्ते । आदिसर्गे पूर्वजन्मनि स्मरं कामदेवं सन्तं यं विप्रानाराध्य भगवतः सकाशात् रुक्मिणी अभिलेभे लब्धवती । प्रद्युम्नादीनां नित्यविभूतित्वेऽपि नरनाट्यद्योतनाय व्रतादिकथनम् ॥ २८ ॥ कच्चिदिति ॥ स प्रसिद्धः सात्वतादीनां यादवभेदानामधिपतिः उग्रसेनः कच्चित्सुखमास्ते । यं शतपत्रनेत्रः श्रीकृष्णः दूरात् नृपासनस्याशामिच्छां परिहृत्य त्यक्त्वा नृपासनाशां परिहृत्य दूरात् स्थितमित्युग्रसेनविशेषणं वा राजासनेऽभ्यषिञ्चत् ॥ २९ ॥ कच्चिदिति ॥ हे सौम्य रथिनामग्रणीः श्रेष्ठः हरेः सुतः सदृक्षः तत्सदृशः साम्बः कच्चित्साधु सुखमास्ते । यः अग्रे पूर्वजन्मन्यम्बिकया पार्वत्या गर्भे धृतस्तं यं देवं देवसेनापतिं गुहं कार्त्तिकेयं व्रतेनाढ्या युक्ता सती जाम्बवती असूत ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेममिति ॥ स प्रसिद्धो युयुधानः सात्यकिः कच्चित् क्षेमं सुखमास्ते । यः फाल्गुनादर्जुनाल्लब्धं धनुषो रहस्यं येन तथाभूतः यतिभिरपि दुरापां तदीयामधोक्षजसंबन्धिनीं गतिम् अधोक्षजस्य श्रीकृष्णस्य सेवयाञ्जसा अनायासेनैव लेभे ॥ ३१ ॥ कच्चिदिति ॥ अनमीवः निर्दोषः बुधो भगवन्तं प्रपन्नः श्वफल्कपुत्रोऽक्रूरः कच्चित्स्वस्ति कुशलमास्ते । यः श्रीकृष्णपादाङ्कितमार्गपांसुषु प्रेम्णा विभिन्नं निर्गतं धैर्यं लज्जादिकारणं यस्य तथाभूतः सन् अचेष्टत् व्यलुठत् ॥ ३२ ॥ कच्चिदिति ॥ विष्णुः श्रीकृष्णः प्रजा अपत्यं यस्यास्तस्याः देवमातुः वामनरूपविष्णोर्मातुरिव देवकनामा यो भोजस्तस्य पुत्र्याः देवक्याः कच्चित् शिवं कुशलमस्ति । या वै यथा त्रयी वेदत्रयी यज्ञवितानरूपमर्थं तत्प्रका-शकतया धारयति तथा देवं भगवन्तं स्वगर्भेण दधार ॥ ३३ ॥ अपिस्विदिति ॥ यो वः युष्माकं सात्वतामुपासकानां कामदुघः अभीष्टप्रपूरकः स भगवान् अनिरुद्धः अपिस्वित्कच्चित्सुखमास्ते । यमनिरुद्धं मनोमयं मनसः प्रवर्तकं सत्वस्यान्तःकरणस्य चतुर्विधस्य तुरीयं चतुर्थमधिदैवं शब्दस्य शास्त्रस्य योनिं कारणं वेदाः आमनन्ति

क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः ॥ लेभेऽञ्जसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम् ॥ ३१ ॥ कच्चिद् बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्णपादाङ्कितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥ ३२ ॥ कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः ॥ या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थम् ॥ ३३ ॥ अपिस्विदास्ते भगवान् सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः ॥ यमामनन्ति स्म ह शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम् ॥ ३४ ॥ अपिस्विदन्ये च निजात्मदै-वमनन्यवृत्त्या समनुव्रता ये ॥ हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरन्ति सौम्य ॥ ३५ ॥ अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुम् ॥ दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्त्या ॥ ३६ ॥

कथयन्ति चित्ताहङ्कारबुद्धिमनसां वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धा अधिष्ठातारः मनसश्च शब्दयोनित्वं प्रसिद्धम् । " मनः पूर्वरूपं वागुत्तररूपम् " इति श्रुतेः। शिक्षायां च " आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । " इत्यादि ॥ ३४ ॥ अपिस्विदिति ॥ हे सौम्य निजस्य देहाद्यतिरिक्तस्यात्मनो दैवं श्रीकृष्णम् अनन्यवृत्त्या एकान्तभक्त्या सम्य-गनुव्रताः ये ये हृदीकसत्यभामात्मजचारुदेष्णगदादयः ते अपिस्वित् कच्चित्स्वस्ति कुशलं चरन्ति ॥ ३५ ॥ अपीति ॥ स्वदोर्भ्यां स्वभुजवद् वर्तमानाभ्यां विजयाच्युताभ्यामर्जु-नकृष्णाभ्यां सह धर्मः धर्मपुत्रो युधिष्ठिरो धर्मेण धर्ममार्गेण सेतुं धर्ममर्यादामपि कच्चित्परिपाति । यस्य युधिष्ठिरस्य सभायां विजयस्यानुवृत्त्या परम्परया अर्जुनकर्तृकसेवया वा हेतुभूतया साम्राज्यलक्ष्म्या च विजयस्योत्कर्षस्यानुवृत्तिर्यस्यामिति तया वा साम्राज्यलक्ष्म्या दुर्योधनोऽतप्यत तापं प्राप । एवंभूतं यस्यैश्वर्यमित्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमिति ॥ अहिवदत्यमर्षी भीमः कृताधेषु कृतापराधेषु कौरवेषु दीर्घतमं बहुकालानुचिन्तितं स्वकर्तृकम् अघं लक्षणया दण्डं किंवा कच्चित् व्यमुञ्चत् नो वा।
गदायाः विचित्रं मार्गं चरतः विचित्रं गदां भ्रमयतः यस्याङ्घ्रिपातं पदाघातं रणभूर्न सेहे ॥ ३७ ॥ कच्चिदिति ॥ रथयूथपानां मध्ये यशोधाः कीर्तिधारकः स्वीयानां यशः-
प्रदो वा गाण्डीवधन्वा अर्जुनः उपरता अरयो यस्मात्तथाभूतः सन् कच्चिदास्ते । यस्यार्जुनस्य शरकूटेन बाणसमूहेन गूढः संवृतो मायाकिरातोऽलक्षितो गिरिशो रुद्रस्तुतोष
॥ ३८ ॥ यमाविति ॥ पार्थैर्युधिष्ठिरभीमार्जुनैः पक्ष्मभिरक्षिणीव वशब्द इवार्थे । वृतौ सुरक्षितौ माद्रीतनयत्वेऽपि पृथायां समर्पणात् पृथायास्तनयौ यमौ युगपज्जातौ नकु-
लसहदेवौ उत अपि मृधे युद्धे शत्रुं विजित्य वज्रिवक्त्रात्सुपर्णाविव परात् शत्रोः सकाशात् स्वरिक्थं स्वधनमुद्दाय आच्छिद्य उतस्वित् कच्चिद्रेमाते रमेते सन्धिरार्षः । यदि द्वौ
सुपर्णौ वज्रिवक्त्रात् इन्द्रमुखात् स्वरिक्थममृतमानयेतां तद्वदित्यर्थः ॥३९॥ कुन्त्यास्तु पाण्डुं विना प्राणधारणमप्याश्चर्यमतः किं कुशलं पृच्छेयमित्याह—अहो इति ॥ तेना-

किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद् दीर्घतमं व्यमुञ्चत् ॥ यस्याङ्घ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रम् ॥ ३७ ॥ कच्चिद्
यशोधा रथयूथपानां गाण्डीवधन्वोपरतारिरास्ते ॥ अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ॥ ३८ ॥ यमावुत स्वित्
तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव ॥ रेमात उद्दाय मृधे स्वरिक्थं परात् सुपर्णाविव वज्रिवक्त्रात् ॥ ३९ ॥ अहो पृथाऽपि ध्रियते-
ऽर्भकार्थे राजर्षिवर्येण विनाऽपि तेन ॥ यस्त्वेकवीरोऽधिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ॥ ४० ॥ सौम्यानुशोचे तमधः पतन्तं
भ्रात्रे परेताय विदुद्रुहे यः ॥ निर्यापितो येन सुहृत् स्वपुर्या अहं स्वपुत्रान् समनुव्रतेन ॥ ४१ ॥ सोऽहं हरेर्मर्त्यविडम्बनेन दृशो नृणां
चालयतो विधातुः ॥ नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन् गतविस्मयोऽत्र ॥ ४२ ॥

तिरथतया प्रसिद्धेन राजर्षिवर्येण पाण्डुना विनाऽपि अर्भकार्थे बालानां पोषणार्थं नतु सुखार्थं पृथा कुन्ती ध्रियते अवतिष्ठते जीवति । आश्चर्यम्।यस्त्वधिरथः पाण्डुः एकवीरो-
ऽसहाय एव धनुरेव द्वितीयं सहायो यस्य स चतस्रः ककुभो दिशो विजिग्ये जितवान् ॥ ४० ॥ सौम्येति ॥ हे सौम्य परेताय मृताय भ्रात्रे पाण्डवेयो विदुद्रुहे। तङार्षः । द्रुह
उपसृष्टत्वेऽपि भ्रातुः सम्प्रदानत्वमार्षम् । तत्पुत्रद्रोहकरणेन तस्यैव द्रोहं कृतवान्।जीवन्तं भ्रातरं मामपि स विदुद्रोहेत्याह । येन च स्वपुत्रान् दुर्योधनादीन् सम्यगनुव्रतेन स्वपु-
त्रवशेन सुहृत् हितोपदेष्टाऽहं भ्राता स्वपुर्याः सकाशान्निर्यापितः निष्कासितः तमेवमधो नरके पतन्तं धृतराष्ट्रमनुशोचे । तङार्षः ॥ ४१ ॥ सोऽहमिति ॥ स तेन निर्यापितोऽहं
मर्त्यविडम्बनेन ऐश्वर्याच्छादकमर्त्यानुकरणेन नृणां दृशः दृष्टीः चित्तवृत्तीश्च चालयतो भ्रमयतो विधातुः हरेः प्रसादात्तस्य पदवीं माहात्म्यं पश्यन् गतविस्मयोऽत्र भूतले नान्यो-
पलक्ष्यः प्रच्छन्नः सन् सुखं विचरामि । अत्र चक्रवर्ती आह । पदवीं चरणविन्यासवर्त्मचरणौ च पश्यन् क्वाप्येतद्रहस्यानुद्घाटनादनन्योपलक्ष्यः सन् अत्र तीर्थेष्वेव विच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामि । अत्र दुर्योधननिस्सारितस्य खिन्नस्य विदुरस्य प्रत्यक्षीभूय भगवान् नित्यं स्वदर्शनरूपं वरं ददावित्यनुमीयते । अत एव दुर्योधनवधानन्तरमपि हरिदर्शनानन्दमग्नो विदुरो युधिष्ठिरसमीपं नागच्छत् । मौसललीलान्ते च हरिर्विदुरनेत्रादप्यन्तर्दधौ अत एव तदनन्तरमुद्धवदर्शनपर्यन्तं विदुरस्य वैकल्यमिति ॥४२॥ नूनमिति ॥ नूनं निश्चितमेतत्त्रिभि-र्विद्याधनाभिजनजैर्मदैरुत्पथानामुद्वृत्तानां चमूभिर्महीं मुहुः पुनः पुनश्चालयतां नृपाणां वधाद्धेतोः प्रपन्नानामार्तेः जिहीर्षया ईशोऽपि अघसमय एव हन्तुं समर्थोऽपि भगवान् कुरूणामघमपराधम् उपैक्षत । इदानीमेव कुरूणां वधे सर्वदुष्टराजवधो न स्यादित्याशयेनेत्यर्थः ॥ ४३ ॥ अजस्येति ॥ अजस्यापि भगवतो यज्जन्म तत् उत्पथानां सन्मार्गच्छिदां नाशनाय तथा अकर्तुरपि कर्माणि पुंसां ग्रहणाय कर्मसु प्रवृत्तये चेति नु अन्यथा न चेदेवं तर्हि गुणानां परो गुणातीतोऽन्यो जीवोऽपि देहयोगम् उत तथा कर्मतन्त्रं कर्मविस्तारं वा कोऽर्हति किंपुनः साक्षाद्धरिः न त्वन्यथेति पाठे पूर्वार्द्धोक्तप्रयोजनायैव हरेर्जन्मकर्माणि चेति न त्वन्यथा । यतः गुणानां परोऽन्योऽपि को नाम देहयो-

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ॥ वधात् प्रपन्नार्तिजिहीर्षयेशो व्युपैक्षताघं भगवान् कुरूणाम् ॥ ४३ ॥ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम् ॥ नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतन्त्रम् ॥ ४४ ॥ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥ ४५ ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ इति भागवतः पृष्टः क्षत्त्रा वार्तां प्रियाश्रयाम् ॥ प्रतिवक्तुं न चोत्सेह औत्कण्ठ्यात् स्मारितेश्वरः ॥ १ ॥ यः पञ्चहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छद्रचयन् यस्य सपर्यां बाललीलया ॥ २ ॥ स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्तां प्रतिब्रूयात् भर्तुः पादावनुस्मरन् ॥ ३ ॥

गमर्हति ॥ ४४ ॥ तस्येति ॥ हे सखे प्रपन्नानामखिललोकपानां ब्रह्मादीनां तथान्येषां स्वे स्वीये वेदरूपेऽनुशासनेऽवस्थितानामर्थाय दैत्यादिवधायाचारशिक्षणाय च यदुषु जातस्य तीर्थरूपा कीर्तिर्यस्य तस्याजस्य श्रीकृष्णस्य वार्तां कथां कीर्तय ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमे तृतीयस्य व्यधादिमाम् ॥ १ ॥ द्वितीय उद्धवः क्षत्त्रे बालस्य चरितं हरेः ॥ शोचन्नवर्णयत्तत्र श्लोकास्त्रिंशच्चतुर्युताः ॥ उवाचद्वयमेकोनचत्वारिंशदनुष्टुभः॥२॥इतीति ॥ इत्येवं क्षत्त्रा प्रियः कृष्ण एवाश्रयो यस्यास्तां वार्तां पृष्टः अतः औत्कण्ठ्यात्स्मारित ईश्वरः श्रीकृष्णो यस्य स भागवत उद्धवः प्रतिवक्तुमुत्तरं दातुं च नोत्सेहे न समर्थोऽभूत् ॥ १ ॥ य इति ॥ पञ्चहायनः य उद्धवो बाललीलया यस्य श्रीकृष्णस्य सपर्यां रचयन् कश्चित् मूर्त्यादिकं श्रीकृष्णं परिकल्प्य कल्पितैरेव साधनैः पूजां कुर्वन्मात्रा जनन्या प्रातराशाय प्रातर्भोजनार्थं याचितः प्रार्थितोऽपि तद्भोजनं नैच्छत् ॥ २ ॥ स इति ॥ एवं बालप्रभृति तस्य भगवतः सेवया कालेन जरसं जरां गतः प्राप्तः । परे तु कालेऽपि जरसं न गतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र प्रवयसोऽप्यासन् । " युवानोऽतिबलौजसः " इत्युक्तेरित्याहुः । एतद्वाक्यसामञ्जस्याय जरसं जराविकारपलितादियोग्यतां प्राप्त इति योग्यम् । स उद्धवः वार्तां पृष्टो
भर्तुस्तस्य पादावनुस्मरन् कथं प्रतिब्रूयात् उत्तरं दद्यात् ॥३॥ स इति ॥ स उद्धवः कृष्णाङ्घ्रिस्मरणजनितया सुधया परमानन्देन साधु सम्यक् निर्वृत आनन्दितः तीव्रेण विव-
शत्वापादकेन भक्तियोगेन तत्र भृशं निमग्नश्च सन्मुहूर्त्तमात्रकालं तूष्णीं निर्व्यापारोऽभूत् ॥ ४ ॥ पुलकेति ॥ पुलकैरुद्भिन्नानि अङ्कुरितानि सर्वाण्यङ्गानि यस्य सः मीलन्त्या
दृशा शुचः अश्रूणि मुञ्चन् तस्य भगवति यः स्नेहस्तस्य प्रसरः पूरः तस्मिन् संप्लुतो निमग्न उद्धवस्तेन विदुरेण पूर्णार्थः कृतार्थो लक्षितो दृष्टः ॥ ५ ॥ शनकैरिति ॥ एवं भ-
गवानेव लोकस्तं प्राप्य पुनस्तस्माच्छनकैः नृलोकं मनुष्यलोकानुसन्धानमागतः सन्नुद्धवो नेत्रे विमृज्योत्स्मयन् यदुकुलसंहारादि भगवच्चातुर्यस्मरणेन विस्मयं प्राप्नुवन् आर्षः
शता । विदुरं प्रत्याह स्म ॥ ६ ॥ कृष्णेति ॥ कृष्ण एव द्युमणिः सूर्यस्तस्य निम्लोचे अस्तमये सति अजगरेण कालरूपेण शोकरूपेण वा महासर्पेण नोऽस्माकं गृहेषु
गीर्णेषु ग्रस्तेषु अत एव गतश्रीषु नष्टसमृद्धिषु सत्सु त्वत्पृष्टानां कुशलमहं किं नु ब्रूयाम् ॥ ७ ॥ दुर्भग इति ॥ बत खेदे । अयं लोकः सर्वोऽपि जनो दुर्भगो भाग्यहीनः

स मुहूर्तमभूत् तूष्णीं कृष्णाङ्घ्रिसुधया भृशम् ॥ तीव्रेण भक्तियोगेन निमग्नः साधु निर्वृतः ॥ ४ ॥ पुलकोद्भिन्नसर्वाङ्गो मुञ्चन् मीलद् दृशा शुचः ॥
पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥ ५ ॥ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ॥ ६ ॥ उद्धव
उवाच ॥ कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह ॥ किं पुनः कुशलं ब्रूयां गतश्रीषु गृहेष्वहम् ॥ ७ ॥ दुर्भगो बत लोकोऽयं यदवो नितरामपि ॥
ये संवसन्तो न विदुर्हरिं मीना इवोडुपम् ॥ ८ ॥ इङ्गितज्ञाः पुरुप्रौढा एकारामाश्च सात्त्वताः ॥ सात्त्वतामृषभं सर्वे भूतावासममंसत ॥ ९ ॥
देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः ॥ भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ ॥ १० ॥

यदवस्तु सुतरामपि दुर्भगाः ये यदवः संवसन्तः सम्यक् हरिणा सह वसन्तोऽपि हरिरयमिति न विदुः । यथा क्षीरसमुद्रे जातं जले प्रतिबिम्बितं वा उडुपं चन्द्रं तत्रत्या
मीनाः अमृतमयोऽयमिति न विदुः स्म किं तु कश्चिज्जलचर इत्येवं विदुः ॥ ८ ॥ दुर्भगत्वादेव न विदुः नतु ज्ञानसामग्र्यभावादित्याह—इङ्गितज्ञा इति ॥ पुरुप्रौढा अति-
निपुणाः अतः इङ्गितं परचित्तस्थं जानन्तीति तथाभूताः स्थाने एकस्मिन् स्थाने एवाऽऽरमन्ति तादृशाश्च सर्वेऽपि सात्त्वताः यादवाः भूतावासं सर्वान्तर्यामिणं श्रीकृष्णं
सात्वतामृषभं यादवानां श्रेष्ठमेवामंसत अमन्यन्त ॥ ९ ॥ केऽपीङ्गितादिना तमीश्वरतया जानन्तो भाग्यवन्तोप्यतद्विदां प्रवृत्त्या मुह्येयुस्तेषां किं भाग्यवत्तयापीत्यत आह—दे-
वस्येति ॥ ये देवस्य भगवतः मायया स्पृष्टाः व्याप्ता यादवोऽयमिति वदन्ति ये च शिशुपालादयः असदेवान्यद्वैरमाश्रिताः निन्दन्ति तद्वाक्यैस्तेषां यादवोऽयमित्यादिवाक्यैः
आत्मनि हरौ उप्तात्मनः समर्पितमनसो मादृशस्य धीर्न भ्राम्यते मोहं न प्राप्यते । मित्त्वेऽपि ह्रस्वाभाव आर्षः । तङ् वा आर्षः अन्ये तु मूढा एवेत्यर्थः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदर्श्येति ॥ यस्तु भगवान् लोकानां लोचनतुल्यं स्वबिम्बं स्वमूर्तिं न तप्तं तपो यैः तेषां दुर्भाग्यानां नृणां प्रदर्श्य तेषां पश्यतां न वितृप्ता दृशो नेत्राणि येषां तथाभूतानामेव सतां स्वबिम्बमादायान्तरदधात् । अन्यस्य तादृशस्य दर्शनीयस्याभावात् । एतेन कृष्णशरीरत्यागवादिनः परास्ताः ॥ ११ ॥ बिम्बं वर्णयति—यदिति ॥ यद्बिम्बं मर्त्यलीलौपयिकं मनुष्यलीलासु योग्यं स्वस्य योगमायाया बलं दर्शयता हरिणा गृहीतं स्वस्य हरेरपि विस्मापनमाश्चर्यकरं यतः सौभगर्द्धेः सौन्दर्यसमृद्धेः परं पदं सीमाभूतं भूषणानामपि भूषणान्यङ्गानि यस्य तादृशमभूत् ॥ १२ ॥ यदिति ॥ बतेत्याश्चर्ये । धर्मसूनोर्युधिष्ठिरस्य राजसूये यागे त्रिलोकः त्रिभुवनस्थो जनो दृशां स्वस्त्ययनं परमानन्दकरं यद्वपुर्निरीक्ष्य विधातुर्ब्रह्मणः अर्वाक्सृतौ अर्वाचीनमनुष्यसृष्टौ यत्कौशलं नैपुण्यं तत्कार्त्स्न्येन साकल्येन इह वपुषि अद्येदानीं गतमुपक्षीणं नातः परं तस्य कौशलमस्तीत्येवममन्यत मेने । तन्मूर्तेर्विधातृसृज्यत्वाभावेऽपि लोकदृष्टिरियमुक्ता ॥ १३ ॥ यस्येति ॥ यस्य भगवतः अनुरागेण प्लुतो व्याप्तो हासो हसनं रासो विनोदश्च लीलयावलोकश्च तैः साधनैः प्रतिलब्धः स्वकृतहासादिसम्मानान्तरं लब्धो मान आदरो याभिस्ताः व्रजस्त्रियो दृग्भिः सहानुप्रवृत्ताः गच्छन्तं श्रीकृष्णमेवानुगता धियो यासां ताः

प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् ॥ आदायान्तरधाद् यस्तु स्वबिम्बं लोकलोचनम् ॥११॥ यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम्॥विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम्॥१२॥यद् धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः॥कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक् सृतौ कौशलमित्यमन्यत॥१३॥ यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः॥ व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः॥१४॥ स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा॥ परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान् यथाग्निः॥ १५ ॥ मां खेदयत्येतदजस्य जन्मविडम्बनं यद् वसुदेवगेहे ॥ व्रजे च वासोऽरिभयादिव स्वयं पुराद्व्यवात्सीद् यदनन्तवीर्यः ॥ १६ ॥

कृत्ये मार्जनलेपनादिगृहकार्ये शेषो यासां तथाभूताः साकल्येन तत्कर्तुमशक्ता एवावतस्थुः किल । तङभाव आर्षः ॥ १४ ॥ स्वशान्तेति ॥ सर्वात्मकस्य सर्वाण्येव रूपाणि तत्र शान्तरूपेषु इतरस्वरूपैरशान्तैर्घोरैर्मूढैश्च दैत्यादिभिरर्दितोऽर्द्यमानेषु सत्सु तेष्वनुकम्पितः कृपायुक्तः आत्मा चित्तं यस्य सः परावरेशः परे ब्रह्मादयः अवरेऽस्मदादयस्तेषामीशो भगवान् अजोऽपि महतां देवादीनामंशाः यदुष्ववतीर्णाः तैर्युक्तः । महत्तत्वमंशो यस्य तेनाव्यक्तेन युक्त इति स्वामिपादाः । तत्र महत आत्त्वाभाव आर्षः । ॥ ५ ॥
अग्निर्महाभूतरूपो नित्यसिद्धोऽपि यथा काष्ठादिष्वाविर्भवति तथा जातः आविर्भूतः ॥ १५ ॥ मामिति ॥ अजस्यापि यद्वसुदेवगेहे बन्धनागारे प्राकृतवज्जन्मनो विडम्बनमनुकरणं नतु नृसिंहादिवदकस्मादेवाविर्भावः । अरेः कंसस्य भयादिव निलीय व्रजे वासश्च यच्च स्वयमनन्तवीर्योऽपि कालयवनाद्यरिभयादिव पुरान्मथुरायाः सकाशाद्व्यवात्सीत् पलायत एतत्सर्वं मां खेदयति ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुनोतीति ॥ कंसं हत्वा पित्रोर्देवकीवसुदेवयोः पादावभिवन्द्य तात हे पितः अम्ब हे मातः कंसात् उरु अधिकं शङ्कितानामत एव अकृतनिष्कृतीनामकृतशुश्रूषाणां नोऽस्माकं बहुत्वं रामाद्यभिप्रायकम् । युवां प्रसीदतम् अपराधं क्षान्त्वा प्रसादं कुरुतमिति यदाह स्म तदेतत्कर्तृ स्मरतो मम चेतः चित्तं कर्मभूतं दुनोति उपतापयति ॥ १७ ॥ ननु तर्ह्यनीश्वर एवायं कुतो न स्यात्तत्राह—को वा इति ॥ अमुष्य श्रीकृष्णस्याङ्घ्रिसरोजयो रेणुस्तमपि विजिघ्रन् सेवमानः को वै पुमांस्तं विस्मर्तुमीशीत शक्नुयात् यः कृष्णो विस्फुरन् प्रचलन् भ्रूविटपः भ्रूलता स एव कृतान्तः कालस्तेन भूमेः भारं तिरश्चकार नाशितवान् ॥ १८ ॥ दृष्टेति ॥ ननु यां सिद्धिं सम्यगनुष्ठितेन भक्तियोगेन योगिनः संस्पृहयन्ति युधिष्ठिरस्य राजसूये यज्ञे कृष्णं द्विषतोऽपि चैद्यस्य सा सिद्धिस्तत्प्राप्तिरूपा मुक्तिर्भवद्भिर्दृष्टैव । तस्य वात्सल्यनिधेर्विरहं कः सहेत ॥ १९॥ तथैवेति ॥ अन्ये च सर्वथा संबन्धरहिताः अपि ये नरलोकवीरा आहवे युद्धे नयनयोरभिराममानन्दकरं कृष्णमुखारविन्दं नेत्रैः पिबन्तस्तत्सौन्दर्यमनुभवन्तः पार्थस्यास्त्रैः पूताः नि-

दुनोति चेतः स्मरतो ममैतद् यदाह पादावभिवन्द्य पित्रोः ॥ ताताम्ब कंसादुरुशङ्कितानां प्रसीदतं नोऽकृतनिष्कृतीनाम् ॥१७॥ को वा अमुष्या-
ङ्घ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान् विजिघ्रन् ॥ यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतान्तेन तिरश्चकार ॥ १८ ॥ दृष्टा भवद्भिर्ननु राजसूये
चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः ॥ यां योगिनः संस्पृहयन्ति सम्यग् योगेन कस्तद्विरहं सहेत ॥१९॥ तथैव चान्ये नरलोकवीरा य आहवे कृष्ण-
मुखारविन्दम् ॥ नेत्रैः पिबन्तो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥२०॥ स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः॥
बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः ॥ २१ ॥ तत् तस्य कैङ्कर्यमलं भृतान् नो विग्लापयत्यङ्ग यदुग्रसेनम् ॥ तिष्ठन्
निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद् देव निधारयेति ॥ २२ ॥

ष्पापाः । सन्तो मृतास्तेऽपि तथैव शिशुपालवदस्य भगवतः पदं स्थानं स्वरूपं चरणं वा आपुः प्रापुः ॥ २० ॥ स्वयमिति ॥ स्वयं तु भगवान् न साम्यातिशयौ यस्य यमपेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः । त्र्यधीशः त्रयाणां लोकानां गुणानां वाऽधीशः अत एव स्वाराज्यलक्ष्म्या निजानन्दस्वरूपसम्पत्त्यैव आप्ताः समस्ताः कामा भोगा यस्य सः बलिं करमर्हणं वा हरद्भिः समर्पयद्भिश्चिरकालीनैर्लोकपालैः किरीटानां कोटिभिः अग्रभागैः ईडितः स्तुतः पादपीठो यस्य सः प्रणमतां किरीटसङ्घट्टनध्व-निरेव स्तुतित्वेनोत्प्रेक्ष्यते ॥ २१ ॥ तत्तस्येति ॥ अङ्ग हे विदुर यः स्वयं परमेश्वरः तस्य तत्कैङ्कर्यं भगवत्कर्तृकं कैङ्कर्यं भृतान् भृत्यान्नोऽस्मान् अलं विग्लापयति ग्लानिं प्रापयति स्वाम्यपकर्षेण सेवकानां ग्लानिर्भवत्येव । परमेष्ठिधिष्ण्ये महाराजसिंहासने निषण्णमासीनम् उग्रसेनं स्वयं तत्तले तिष्ठन् हे देव निधारय अस्य निवेदनमवधारयेति कस्यचित्साहाय्यमाचरन्नुग्रसेनं न्यबोधयत् विज्ञापितवान् ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो इति ॥ बकी पूतना जिघांसया हन्तुमिच्छया स्तनकालकूटं स्तनयोः संभृतं कालकूटाख्यं विषं यं हरिमपाययत् अत एवासाध्वी दुष्टा नरकपातनयोग्याऽपि वेषेण स्तनदानक्रियया च तुल्यत्वात् धात्र्या यशोदाया उचितां तद्धामप्राप्तिरूपां गतिं लेभे प्राप्तवती। एवमपराधवत्या अपि यो मुक्तिं दत्तवांस्ततोऽन्यः को वा दयालुरस्ति यं वयं भक्ताः शरणं व्रजेम ॥ २३ ॥ मन्ये इति ॥ ये असुरा संयुगे युद्धे प्राणान् त्यक्ष्यन्तः अंसे सुनाभायुधश्चक्रायुधो भगवान्यस्य तथाभूतम्। "अमूर्द्धमस्तकात्" इत्यलुक्। आपतन्तमागच्छन्तं तृक्षस्य मरीचेरपत्यं तार्क्ष्यः तस्य कश्यपस्य पुत्रं गरुडमचक्षत। अपश्यन् तान् अधीशे भगवति संरम्भः क्रोधावेशस्तेन मार्गेणाभिनिविष्टं चित्तं येषां तान् असुरान् भागवतानेव मन्ये। यतो भागवता इव तेऽपि भगवद्ध्यानाभिनिवेशेन भगवन्तमपरोक्षं पश्यन्ति ॥ २४ ॥ वसुदेवस्येति ॥ अजेन ब्रह्मणाऽभियाचितः प्रार्थितः अतः अस्याः भूमेः शं भारावतारणेन सुखं चिकीर्षुः भगवान् भोजेन्द्रस्य कंसस्य बन्धनागारे वसुदेवस्य भार्यायां देवक्यां जातः ॥ २५ ॥ तत इति ॥ ततः कंसात्

अहो बकी यं स्तनकालकूटं जिघांसयाऽपाययदप्यसाध्वी ॥ लेभे गतिं धात्र्युचितां ततोन्यं कं वा दयालुं शरणं व्रजेम ॥ २३ ॥ मन्येऽसुरान् भागवतांस्त्र्यधीशे संरम्भमार्गाभिनिविष्टचित्तान् ॥ यं संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतन्तम् ॥ २४ ॥ वसुदेवस्य देवक्यां जातो भोजेन्द्रबन्धने ॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥ २५ ॥ ततो नन्दव्रजमितः पित्रा कंसाद्विबिभ्यता ॥ एकादश समास्तत्र गूढार्चिः सबलोऽवसत् ॥ २६ ॥ परीतो वत्सपैर्वत्सांश्चारयन् व्याहरद् विभुः ॥ यमुनोपवने कूजद्द्विजसंकुलिताङ्घ्रिपे ॥ २७ ॥ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम् ॥ रुदन्निव हसन् मुग्धबालसिंहावलोकनः ॥ २८ ॥ स एव गोधनं लक्ष्म्या निकेतं सितगोवृषम् ॥ चारयन्ननुगान् गोपान् रणद्वेणुररीरमत् ॥ २९ ॥ प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः ॥ लीलया व्यनुदत् तांस्तान् बालः क्रीडनकानिव ॥ ३० ॥

विबिभ्यता विशेषतो भीतेन पित्रा वसुदेवेन निमित्तभूतेन नन्दस्य व्रजम् इतः गतस्तत्र गूढार्चिर्गुप्ततेजाः सबलः बलरामेण सहित एकादश समाः संवत्सरान् अवसत् ॥ २६ ॥ परीत इति युग्मम् ॥ वत्सपैः बालकैः परीतः व्रजौकसां प्रेक्षणीयां कौमारीं चेष्टां दर्शयन् अदेयवस्तुलाभाय रुदन्निव तत्प्राप्तौ हसन्निव च भीषणदैत्याद्यागमे तु मुग्धः सुन्दरो यो बालसिंहस्तस्येवावलोकनं यस्य सः विभुः कूजद्भिर्द्विजैः संकुलिता व्याप्ताः अङ्घ्रिपा यस्मिंस्तस्मिन् यमुनाया उपवने वत्सांश्चारयन्व्याहरत् अक्रीडत् ॥ २७ ॥ २८ ॥ ॥ ६ ॥
स एवेति ॥ स एव कृष्णः अधिकं वयः प्राप्तः सन् लक्ष्म्याः शोभादिसम्पदो निकेतमाश्रयं सिताः श्वेताः गोवृषाः यस्मिन्नानावर्णे गोसङ्घे तत् गोधनं चारयन् रणन् शब्दं कुर्वन् वेणुर्यस्य सः तादृशः सन् अनुगान् स्वानुसारिणः गोपान् अरीरमत् रमयामास ॥ २९ ॥ प्रयुक्तानिति ॥ भोजराजेन कंसेन प्रयुक्तान् मायिनः कामरूपिणश्च तांस्तान् पूतनादीन् क्रीडनकान् क्रीडार्थं मृदादिनिर्मितान् व्याघ्रादीन् यथा बालो निहन्ति तद्वत् लीलया व्यनुदत् जघान ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विपन्नानिति ॥ विषयुक्तजलपानेन विपन्नान् मृतान् बालान् गावो गाश्च प्रथमा आर्षी । अमृतदृष्ट्या उत्थाप्य जीवयित्वा भुजगाधिपं कालियं निगृह्य ततो निःसार्य प्रकृतिस्थितं निर्विषीकृतं तत्तोयं तान् गोपान् गाश्चापाययत् ॥ ३१ ॥ अयाजयदिति ॥ उरुभारस्यातिसमृद्धस्य वित्तस्य सद्व्ययं चकारादिन्द्रमानभङ्गं च चिकीर्षन् द्विजोत्तमैः सहितः विभुर्भगवान् इन्द्रमानभङ्गेन कृता गवां पूजैव गोसवस्तेन गोपराजं नन्दमयाजयत् ॥ ३२ ॥ वर्षतीति ॥ हे भद्र भग्नो मानो यस्य तथाभूते इन्द्रे कोपाद्व्रजनाशाय वर्षति सति अतिविह्वलो व्रजः अनुगृह्णता कृष्णेन गोत्रो गोवर्द्धनपर्वत एव लीलार्थमातपत्रं तेन त्रातः रक्षितः ॥ ३३ ॥ शरदिति ॥ शरदि यः शशी तस्य करैर्मृष्टमुज्ज्वलं रजनीमुखं प्रदोषं मानयन् अभिनन्दन् स्त्रीणां गोपीनां मण्डलं मण्डयति भूषयतीति तथाभूतः कलानि मधुराणि पदान्यक्षराणि यस्मिंस्तद्यथा भवति तथा गायन् रेमे । अत्र यथा रजनीनायिकायाः मुखं शशिना नायकेन करैः स्वेदापनयनेन मृष्टं तथाहं करिष्यामीति वदन्निति ध्वन्यते ॥ ३४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥

विपन्नान् विषपानेन निगृह्य भुजगाधिपम् ॥ उत्थाप्यापाययद् गावस्तत्तोयं प्रकृतिस्थितम् ॥ ३१ ॥ अयाजयद् गोसवेन गोपराजं द्विजोत्तमैः ॥ वित्तस्य चोरुभारस्य चिकीर्षन् सद्व्ययं विभुः ॥ ३२ ॥ वर्षतीन्द्रे व्रजः कोपात् भग्नमानेऽतिविह्वलः ॥ गोत्रलीलातपत्त्रेण त्रातो भद्रानुगृह्णता ॥ ३३ ॥ शरच्छशिकरैर्मृष्टं मानयन् रजनीमुखम् ॥ गायन् कलपदं रेमे स्त्रीणां मण्डलमण्डनः ॥ ३४ ॥ इति श्रीभागवते तृतीयस्कन्धे श्रीकृष्णचरितवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ उद्धव उवाच ॥ ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः ॥ निपात्य तुङ्गाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्याम् ॥ १ ॥ सान्दीपनेः सकृत् प्रोक्तं ब्रह्माधीत्य सविस्तरम् ॥ तस्मै प्रादाद् वरं पुत्रं मृतं पञ्चजनोदरात् ॥ २॥ समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषाम् ॥ गान्धर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत् सुपर्णः ॥ ३ ॥

गङ्गासहायो द्वितीये तृतीयस्य व्यधादिमाम् ॥ २ ॥ तृतीये मथुरायां यत् द्वारवत्यां च यत्कृतम् ॥ उद्धवस्तज्जगादात्र श्लोका विंशतिरेष्टयुक् ॥ उवाचेत्येकं सपादा ऐकत्रिंशदनुष्टुभः ॥ ३ ॥ तत इति ॥ स्वपित्रोर्देवकीवसुदेवयोः शमित्यव्ययम् । सुखस्य चिकीर्षया बलदेवसंयुतः स कृष्णस्ततो व्रजात् पुरं मथुरामागत्य रिपुयूथनाथं कंसं तुङ्गात् राजमञ्चान्निपात्य हतं व्यसुं गतप्राणमप्युर्व्यां भूम्यामोजसा बलेन व्यकर्षत् । पित्रोः संतोषार्थं कंसमरणमसम्भावयतां मूर्छितत्वभाननिरासार्थं च ॥ १ ॥ सान्दीपनेरिति ॥ सान्दीपनेरुपाध्यायात् सकाशात्तेन सकृत्योक्तं सविस्तरं षडङ्गाद्युपेतं ब्रह्म वेदमधीत्य तस्मै सान्दीपनये मृतं पुत्रं मृतपुत्रप्रदानरूपं वरं पञ्चजनोदरात् पञ्चजनोदरं विदार्येति ल्यब्लोपे पञ्चमी । यमलोकादानीय प्रादात् ॥ २ ॥ समाहुता इति ॥ श्रियो लक्ष्म्याः सवर्णेन समानेन रूपेण साधनभूतेन भीष्मककन्यया रुक्मिण्या ये शिशुपालजरासन्धादयो राजानः समाहुताः समाहूताः ह्रस्वत्वमार्षम् । समाहृता इति पाठे आकृष्टा इत्यर्थः । यद्यपि तया कृष्ण एवाहूतस्तथापि तल्लावण्याकर्षणेनागताः अन्येऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयाहूता इत्युच्यन्ते। एषां समागतानां राज्ञां मिषतां पश्यतामेव सताम् अनादरे षष्ठी। मूर्ध्नि पदं दधत् तया सह गान्धर्ववृत्त्या परस्परसमयरूपया बुभूषया भवितुमिच्छया स्वभागं लक्ष्म्यंशभूतां रुक्मिणीं सुपर्णो गरुडः सुधामि वेति शेषः। जह्ने जहार। यद्वा श्रियो लक्ष्म्यंशभूतायाः रुक्मिण्याः सवर्णेन भ्रात्रा रुक्मिणा यद्वा समानं वर्णद्वयं वाचकं यस्य सः श्रियः सवर्णो रुक्मी तेन भीष्मककन्यया सह तेषां बुभूषया विभूतिर्भवत्विती च्छया ये समाहुता इति। तत्र शिशुपालस्याह्वानं वरत्वेन बुभूषया जरासन्धादीनां तु तद्विवाहसाधनार्थमुत्सवार्थं चेति ज्ञेयम्। शेषं समानम् ॥ ३ ॥ ककुद्मत इति ॥ अविद्धनसः अच्छिद्रनासिकान् ककुद्मतः वृषान् दमित्वा विद्धनासिकान् कृत्वा अविद्धनस एव दमित्वा वा नग्नजितो राज्ञः कन्यां सत्यां स्वयंवर उवाह तद्भग्नमानान् तैर्वृषभैस्तद्दमनेन वा भग्नो मानो येषां तथाभूतानपि गृध्यतः कन्यां ग्रहीतुं कामयमानान् अज्ञान् मूर्खान् शस्त्रभृतः नृपान् स्वयं तच्छस्त्रैरक्षत एव स्वशस्त्रैर्जघ्ने जघान। तद्गार्षः ॥ ४ ॥ प्रियमिति ॥ यदा अदित्याः कुण्डले दातुं स्वर्गं गतस्तदा स्वयं प्रभुः स्वतन्त्रोऽपि ग्राम्यः स्त्रीपरतन्त्र इव प्रियायाः सत्यभामायाः प्रियं विधित्सुः कर्तुमिच्छुः द्युतरुं पारिजातमार्च्छत् हृतवान्। यस्य पारिजातस्यार्थे निमित्ते सगणो मरुद्गणसहितो

ककुद्मतोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह ॥ तद्भग्नमानानपि गृध्यतोऽज्ञान् जघ्नेऽक्षतः शस्त्रभृतः स्वशस्त्रैः ॥ ४ ॥
प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्च्छत् द्युतरुं यदर्थे ॥ वज्र्याऽऽद्रवत् तं सगणो रुषाऽन्धः क्रीडामृगो नूनमयं वधूनाम् ॥ ५ ॥
सुतं मृधे खं वपुषा ग्रसन्तं दृष्ट्वा सुनाभोन्मथितं धरित्र्या ॥ आमन्त्रितस्तत्तनयाय शेषं दत्त्वा तदन्तः पुरमाविवेश ॥६॥ तत्राहृतास्ता
नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबन्धुम् ॥ उत्थाय सद्यो जगृहुः प्रहर्षव्रीडाऽनुरागप्रहितावलोकैः ॥ ७ ॥ आसां मुहूर्त एकस्मिन्
नानागारेषु योषिताम् ॥ सविधं जगृहे पाणीननुरूपः स्वमायया ॥ ८ ॥

रुषान्धः स्त्रीप्रेरितः वज्री इन्द्रस्तं भगवन्तं प्रत्याद्रवत् योद्धुमभिमुखमाजगाम। नूनं निश्चितम् अयं वज्री वधूनां स्त्रीणां क्रीडामृगः क्रीडार्थं सम्पादितो मृगो वानर इव वशवर्त्ती श्रीकृष्णकृतोपकारान् विस्मृत्य स्त्रीप्रेरणया तेन सह युद्धकरणात् ॥ ५ ॥ सुतमिति ॥ मृधे वपुषा खमाकाशं ग्रसन्तमिव स्थितमतिमहान्तं शतार्षः। सुनाभेन चक्रेण उन्मथितं खण्डितं मृतं स्वसुतं नरकं दृष्ट्वा धरित्र्या मात्रा भूम्या आमन्त्रितः प्रार्थितः संस्तस्य नरकस्य तनयाय भगदत्ताय शेषं स्वपरिगृहीतावशिष्टं कोशराज्यादिकं दत्त्वा तस्य नरकस्यान्तःपुरमाविवेश ॥ ६ ॥ तत्रेति ॥ तत्रान्तःपुरे कुजेन नरकेण आहृताः नरदेवानां राज्ञां कन्याः आर्त्तानां बन्धुं हितकर्तारं हरिं दृष्ट्वा सद्यस्तदैवोत्थाय प्रहर्षश्च व्रीडा च अनुरागश्च तैः प्रहिताः प्रेरिता येऽवलोकास्तैः स्वामित्वेन जगृहुः ॥ ७ ॥ आसामिति ॥ नानागारेषु प्रतियोषितं भिन्नतया कल्पितेषु गृहेषु स्वमायया स्वयमपि तत्तदनुरूपः बहुरूपः सन्सविधं विधाभिः सहितं विवाहोचितप्रकारसहितं यथा स्यात्तथा एकस्मिन्नेव मुहूर्त्ते आसां स्वीकृतवतीनां योषितां पाणीन् जगृहे ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तास्विति ॥ तासु गृहीतपाणिषु स्त्रीष्वेकैकस्यां भार्यायां सर्वशः सर्वैर्गुणैरात्मना तुल्यानि दश दशापत्यानि प्रकृतेर्मायायाः [विभुभूषया विविधं भवनं विस्तारस्तदिच्छया यद्वा प्रकृतेर्हेतोर्विविधं भवितुमिच्छया अजनयत् ॥ ९ ॥ कालेति ॥ अनीकैः सैन्यैः पुरीं रुन्धतः कालः कालयवनः मागधः शाल्वश्च तदादीन् स्वयमजीवनत् घातितवान् । तेनं च स्वपुंसां भीमार्जुनादीनां दिव्यं स्वीयमेव तेजः प्रभावं कीर्तिं वा आदिशत् दत्तवान् ॥ १० ॥ शम्बरमिति ॥ शम्बरादीन् तथा अन्यानपि कांश्च कांश्चित् प्रद्युम्न-रामादिभिर्घातयत् घतितवान् अडभाव आर्षः । घातयन्निति वा पाठः । दन्तवक्रादीन् स्वयमेवावधीत् ॥ ११ ॥ अथेति ॥ अथानन्तरं ते तव भ्रात्रोः पाण्डुधृतराष्ट्रयोर्ये पुत्राः युधिष्ठिरदुर्योधनादयस्तेषां पक्षयोः पतितान् प्राप्तान् नृपान् अघातयदित्यनुषज्ज्यते । येषां कुरुक्षेत्रमापततामागच्छतां बलैः सैन्यैः सर्वा भूश्चचाल चकम्पे ॥ १२ ॥ स इति ॥ स भगवान् कर्णः दुःशासनः सौबलः शकुनिः एतेषां कुत्सितमन्त्रास्य पाकेन तदुद्भूतपापेन हता श्रीः सम्पत् आयुश्च यस्य तम् अत एव भग्नावूरू यस्य तं

तास्वऽपत्यान्यजनयदात्मतुल्यानि सर्वतः ॥ एकैकस्यां दश दश प्रकृतेर्विबुभूषया ॥ ९ ॥ कालमागधशाल्वादीननीकै रुन्धतः परम् ॥
अजीघनत् स्वयं दिव्यं स्वपुंसां तेज आदिशत् ॥ १० ॥ शम्बरं द्विविदं बाणं मुरं बल्वलमेव च ॥ अन्यांश्च दन्तवक्त्रादीनवधीत् कांश्च
घातयत् ॥११॥ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान् नृपान् ॥ चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥ १२ ॥ स कर्णदुःशासनसौ-
बलानां कुमन्त्रपाकेन हतश्रियायुषम् ॥ सुयोधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननन्द पश्यन् ॥१३॥ कियान् भुवोऽयं क्षपितोरुभारो
यद्द्रोणभीष्मार्जुनभीममूलैः ॥ अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम् ॥ १४ ॥ मिथो यदैषां भविता विवादो मध्वामदा-
ताम्रविलोचनानाम् ॥ नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेऽन्तर्दधते स्वयं स्म ॥ १५ ॥

सानुचरमुर्व्यां भूम्यां शयानं सुयोधनं पश्यन्नपि न ननन्द संतोषं न प्राप ॥ १३ ॥ कियानिति ॥ द्रोणभीष्मार्जुनभीमरूपैर्मूलैः कारणभूतैः यत् योऽष्टादशाक्षौहिणीसं-ख्यायुक्तो भुवः लोकदृष्ट्या क्षपितो निरस्तो य उरुर्महान् भारः सोऽयं कियान् अत्यल्प इत्यर्थः । अत्र समासव्याख्यायां विधेयांशाविमर्शं दोषं पश्यन्तः भुवो भार उरु यथा स्यात्तथा क्षपितः अयं कियान् सन्धिरार्ष इति व्याचख्युः । अक्षौहिणिक इति ह्रस्वत्वमार्षम् । यस्मान्मदंशैः प्रद्युम्नादिभिर्हेतुभूतैर्दुर्विषहं भूम्या सोढुमशक्यं यदूनां बलं सैन्यमास्ते तिष्ठति ॥ १४ ॥ मिथ इति ॥ मधुना सुरया आ सर्वतो मदादाताम्राणि सर्वतो रक्तवर्णानि विलोचनानि नेत्राणि येषां तेषामेषां यदूनां यदा मिथः परस्परं विवादो भविता तदैव नाशो भविता अतः इयान् परस्परविवाद एवैषां वधोपायः । अतोऽन्य उपायो नास्ति । मय्यन्तर्यामिण्युद्यते कृतप्रयत्ने सति एकात्मानोऽपि विवादेन स्वयमेवान्तर्दधते अन्तर्दधीरन् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवमुक्तप्रकारेण भगवान् संचिन्त्य धर्मजं धर्मपुत्रं युधिष्ठिरं स्वराज्ये तस्यैव परम्परागते राज्ये स्थाप्य स्थापयित्वा ल्यबार्षः । साधूनां धार्मिकाणां वर्त्म सदाचारं दर्शयन् सुहृदो मित्राणि नन्दयामास ॥ १६ ॥ उत्तरायामिति ॥ अभिमन्युना उत्तरायां स्वभार्यायां पूरोर्वंशः सन्ततिबीजभूतः परीक्षित् साधु सम्यक् मर्यादया धृतः उत्पादितः स वै गर्भस्थ एव द्रौणेर्ब्रह्मास्त्रेण सञ्छिन्नः पुनर्भगवता श्रीकृष्णेन धृतः संरक्षणेन जीवितः ॥ १७ ॥ अयाजयदिति ॥ ततश्च विभुः त्रिभिरश्वमेधैर्धर्मसुतं युधिष्ठिरमयाजयत् सोऽपि युधिष्ठिरोऽपि कृष्णमनुव्रतः भूमिपालनेन तत्प्रीतिमालक्ष्यानुजैर्भीमादिभिः सह क्ष्मां रक्षन् रेमे ॥ १८ ॥ भगवानिति ॥ विश्वस्य आत्मा जनसङ्ग्रहार्थं लोकवेदयोः पन्थानमनुगच्छति सः असक्तः आसक्तिरहितः साङ्ख्यमात्मनात्मविवेकमास्थितः अनुसन्दधानः भगवानपि द्वारवत्यां स्थितः कामान् सिषेवे ॥ १९ ॥ स्निग्धेति द्वयम् ॥ स्निग्धः कृपायुक्तो यः स्मितपूर्वकोऽवलोकस्तेन पीयूषममृतं तत्कल्पया तत्तुल्यया वाचा अनवद्येन पापनिवर्त्तकेन चरित्रेण च श्रियो लक्ष्म्या निकेतेन

एवं संचिन्त्य भगवान् स्वराज्ये स्थाप्य धर्मजम् ॥ नन्दयामास सुहृदः साधूनां वर्त्म दर्शयन् ॥ १६ ॥ उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना ॥ स वै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः ॥ १७ ॥ अयाजयद् धर्मसुतमश्वमेधैस्त्रिभिर्विभुः ॥ सोऽपि क्ष्मामनुजै रक्षन् रेमे कृष्णमनुव्रतः ॥ १८ ॥ भगवानपि विश्वात्मा लोकवेदपथानुगः ॥ कामान् सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः ॥ १९ ॥ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया ॥ चरित्रेणाऽनवद्येन श्रीनिकेतेन चात्मना ॥ २० ॥ इमं लोकममुं चैव रमयन् सुतरां यदून् ॥ रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः ॥ २१ ॥ तस्यैवं रममाणस्य संवत्सरगणान् बहून् ॥ गृहमेधेषु योगेषु विरागः समजायत ॥ २२ ॥ दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् ॥ को विस्रम्भेत योगेन योगेश्वरमनुव्रतः ॥ २३ ॥ पुर्यां कदाचित् क्रीडद्भिर्यदुभोजकुमारकैः ॥ कोपिता मुनयः शेपुर्भगवन्मतकोविदाः ॥ २४ ॥

आश्रयेण आत्मना देहेन च इमं लोकं भूलोकस्थं जनममुं च उपरिलोकस्थं जनं च यदूंश्च सुतरामेव रमयन् क्षणदया रात्र्या दत्तः क्षणः अवसरः उत्सवो वा यासां स्त्रीणां तासु क्षणं सौहृदं प्रेम यस्य सः अनासक्त एव स्वयमपि रेमे ॥ २० ॥ २१ ॥ तस्येति ॥ एवमनासक्त्या बहून्संवत्सरगणान् रममाणस्य तस्य भगवतः गृहमेधेषु गृहे मेधा बुद्धिर्यैस्तेषु गृहधर्मेषु योगेषु कामभोगोपायेषु च विरागः समजायत भगवता पूर्वं गृहेष्वासक्तिर्दर्शिता अधुना औदासीन्यं प्रकटितमिति भावः ॥ २२ ॥ दैवेति ॥ यदा स्वतन्त्रो भगवान् स्वाधीनेष्वपि कामेषु विरक्तस्तदा स्वयं दैवाधीनः योगेन भक्तियोगेन योगेश्वरं हरिमनुव्रतः तन्मार्गनिष्ठश्चेत् दैवाधीनेषु कामेषु विषयेषु नाम पुमान् विश्रम्भेत विश्वासं कुर्यात् ॥ २३ ॥ पुर्यामिति ॥ पुर्यां द्वारकायां कदाचित् काले क्रीडद्भिः यदुभोजकुमारकैः कोपिताः भगवतो मते कुलसंहारेच्छारूपे कोविदाः अभिज्ञाः मुनयः शेपुः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततः कतिपयैर्मासैः संहृष्टाः दैवेन विमोहिताः वृष्णिभोजान्धकादयः यादवाः रथैः प्रभासं ययुः ॥ २५ ॥ तत्रेति ॥ तत्र प्रभासे स्नात्वा तस्याम्भसा पित्रादीं-स्तर्पयित्वा अथ पयः शीलादि बहुगुणोपेताः गावो गाः विप्रेभ्यो ददुः । गाव इति आर्षी प्रथमा ॥ २६ ॥ हिरण्यमिति युग्मम् ॥ हिरण्यं रजतादिकं च वृत्तिकरीं जीविकापर्याप्तां धरां भूमिमपि भगवत्यर्पणं यथा भवति तथा उरुरसं बहुरसयुक्तमन्नं च तेभ्यो विप्रेभ्यो दत्त्वा शूराः दानवीराः गोविप्रार्थाः सर्वस्वदानेनावशिष्टाः असवः प्राणा येषां तथाभूताः सन्तस्तान् मूर्द्धभिर्भुवि प्रणेमुः ॥ २७ ॥ २८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये तृतीयस्य व्यधादिमाम् ॥ ३ ॥ तुर्ये बन्धुमृतिं श्रुत्वा क्षत्तात्मज्ञानलब्धये ॥ मुनिं मैत्रेयमगमत् श्लोकास्तत्राङ्गवर्ह्नयः ॥ उवाचेत्यष्ट सार्द्धैकचत्वारिंशदनुष्टुभः ॥ ४ ॥ अथेति ॥ अथ ते यादवा-स्तैर्विप्रैस्तेन कृष्णेन वाऽनुज्ञाता अन्नं भुक्त्वा वारुणीं पैष्टीं मदिरां च पीत्वा तया विभ्रंशितं ज्ञानं युक्तायुक्तविवेको येषां तथाभूताः सन्तो दुरुक्तैर्मर्म पस्पृशुः परस्परं

ततः कतिपयैर्मासैर्वृष्णिभोजान्धकादयः ॥ ययुः प्रभासं संहृष्टा रथैर्दैवविमोहिताः ॥ २५ ॥ तत्र स्नात्वा पितॄन् देवानृषींश्चैव तदम्भसा ॥ तर्प-यित्वाऽथ विप्रेभ्यो गावो बहुगुणा ददुः ॥ २६ ॥ हिरण्यं रजतं शय्या वासांस्यऽजिनकम्बलान् ॥ यानं रथानिभान् कन्या धरां वृत्तिकरीमपि ॥ २७ ॥ अन्नं चोरुरसं तेभ्यो दत्त्वा भगवदर्पणम् ॥ गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः ॥ २८ ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे प्रभासक्षेत्रगमनं नाम तृतीयोऽध्यायः ॥ ३ ॥ उद्धव उवाच ॥ अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीम् ॥ तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ॥ १ ॥ तेषां मैरेयदोषेण विषमीकृतचेतसाम् ॥ निम्लोचति रवावासीद्वेणूनामिव मर्दनम् ॥ २ ॥ भगवान् स्वात्ममायाया गतिं तामवलोक्य सः ॥ सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥३॥ अहं प्रोक्तो भगवता प्रपन्नार्तिहरेण ह ॥ बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥ ४ ॥ अथाऽपि तदभिप्रेतं जानन्नहमरिन्दम ॥ पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥

दुरुक्तान्यूचुः ॥ १ ॥ तेषामिति ॥ मैरेयस्य मदिरायाः दोषेण मदेन विषमीकृतानि क्षोभितानि चेतांसि येषां तेषां यादवानां रवौ निम्लोचति अस्तं गच्छति सति वेणूना-मिव मर्दनं मिथः संघर्षेण विनाश आसीत् । अत्र भागवताः । नित्यभूताः लीलापरिकराः प्रद्युम्नादयो यादवाः द्वारकायामेव स्थितास्तत्प्रविष्टचरा देवास्तु तत्तदङ्गेभ्यः पृथक् कृतास्तत्तद्रूपेण प्रभासमानीताः भुक्त्वा पीत्वा च लब्धानुज्ञाः सुखेन दिवं ययुरित्याहुः ॥ २ ॥ भगवानिति ॥ स भगवानपि स्वात्मनः मायायास्तां स्वकुलसंहाररूपां गतिमवलोक्य सरस्वतीमुपस्पृश्य सरस्वत्यां स्नानाचमनादिकं कृत्वा अश्वत्थवृक्षस्य मूलमुपाविशत् ॥ ३ ॥ अहमिति द्वयम् ॥ हे अरिन्दम यद्यपि स्वकुलं संजिहीर्षुणा संहर्तुमिच्छता प्रपन्नानामार्त्तिहरेण भगवता अहं पूर्वं द्वारकायामेव त्वं बदरीं बदरिकाश्रमं प्रति प्रयाहि गच्छेत्युक्तः तथापि तस्य अभिप्रेतं स्वकुलसंहारादिकं जानन्नपि भर्तुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वामिनः पादयोर्विश्लेषणे अक्षमः सन् पृष्ठतस्तमन्वगमम् ॥ ४ ॥ ५ ॥ अद्राक्षमिति त्रयम् ॥ अहं च विचिन्वन् सन् सरस्वत्यां स्वरस्वतीतीरे कृतकेतं कृतनिवासमेकमासीनं दयितं श्रियो निकेतम् आश्रयम् अकेतनं सर्वाधारत्वादनाश्रयम् । श्यामश्चासाववदातः स्वच्छश्च तं विरजं विरजसं सलोप आर्षः । प्रशान्ते प्रसन्ने अरुणे लोचने यस्य तम् । चतुर्भिर्दोर्भिः पीतं यत् कौशं कौशेयं तेनाम्बरेण च विदितं वामे ऊरौ दक्षिणाङ्घ्रिसरोरुहम् अधिश्रित्य स्थापयित्वा अपाश्रितः पृष्ठतोऽवष्टब्धः अर्भको बालः कोमलोऽश्वत्थो येन तं त्यक्तपिप्पलं त्यक्तविषयसुखम् अत एवाकृशमानन्दपूर्णं पतिं भगवन्तमद्राक्षम् ॥ ६ ॥ ७ ॥ ८ ॥ तस्मिन्निति ॥ तस्मिन् देशे तदा महाभागवतः सिद्धः कृतकृत्यः द्वैपायनस्य सुहृत् हितैषी चासौ सखा च स्वगुरुपुत्रत्वात् पराशरशिष्यो मैत्रेयो लोकान् अनुचरन् यदृच्छया अकस्मादेव आससाद ॥९॥ तस्येति ॥ अनुरक्तस्य तथा प्रमोदस्य भारेणानता कन्धरा यस्य प्रमोदभावेऽति पाठान्तरम् । तदा प्रमोदेन भावेन चानता कन्धरा यस्य तस्य मुनेर्मैत्रेयस्य आशृण्वत एव सतः अनुरागहासान्वितया

अद्राक्षमेकमासीनं विचिन्वन् दयितं पतिम् ॥ श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् ॥ ६ ॥ श्यामावदातं विरजं प्रशान्तारुणलोचनम् ॥ दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च ॥ ७ ॥ वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहम् ॥ अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलम् ॥ ८ ॥ तस्मिन् महाभागवतो द्वैपायनसुहृत्सखः ॥ लोकाननुचरन् सिद्ध आससाद यदृच्छया ॥ ९ ॥ तस्यानुरक्तस्य मुनेर्मुकुन्दः प्रमोदभावाऽऽनतकन्धरस्य ॥ आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥ १० ॥ श्रीभगवानुवाच ॥ वेदाऽहमन्तर्मनसीप्सितं ते ददामि यत् तद्दुरवापमन्यैः ॥ सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः ॥ ११ ॥ स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत् ॥ यन्मां नृलोकान् रह उत्सृजन्तं दिष्ट्या ददृश्वान् विशदानुवृत्त्या ॥ १२ ॥

सम्यगीक्षया मां विश्रमयन् विगतश्रमं कुर्वन् मुकुन्द उवाच ॥ १० ॥ वेदेति ॥ हे वसो पूर्वजन्मनि वसुरूप पुरा पूर्वजन्मनि विश्वसृजां वसूनां च मिलितानां सत्रसंज्ञके यागे यतो मत्सिद्धिर्मत्प्राप्तिस्तत्कामेन त्वया अहमिष्टः सम्यगाराधितः अतस्ते तव मनसि यदीप्सितं तत् अन्तः स्थितोऽहं वेद जानाम्येव । तदन्यैर्मत्पराङ्मुखैर्दुष्प्रापमपि तुभ्यं ददामि दास्यामि ॥ ११ ॥ स एष इति ॥ हे साधो ते तव भवानां जन्मनां स एष भवः चरमः अन्तिमः अस्ति पुनर्जन्माभावात् । साधो इत्यत्र भाव इत्यपि पाठः । यत् यस्मात्ते त्वयास्मिन् जन्मनि मदनुग्रहः आसादितः लब्धः यद्यतः नृलोकान् उत्सृजन्तं नृलोकं त्यक्त्वा वैकुण्ठं गच्छन्तं मां विशदानुवृत्त्या एकान्तभक्त्या रहः एकान्ते यद्ददृश्वान् दृष्टवानसि दृशः क्वसुः तदेतद् दिष्ट्या भद्रमेव जातम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरेति ॥ आदिसर्गे सर्गोपक्रमे पुरा पाद्मे कल्पे मम नाभ्ये नाभिभवे पद्मे निषण्णाय अजाय ब्रह्मणे मम महिमावभास्यते अनेनेति यत्परं ज्ञानं मया प्रोक्तं यच्चेदानीमपि सूरयो भागवतं चतुःश्लोकीरूपं वदन्ति तद्वदामि ॥ १३ ॥ इतीति ॥ इत्येवं परमस्य पुंसः हरेः प्रतीक्षणं कृपावलोकनमनुग्रहश्च तयोर्भाजनः । यद्वा । तत्समये मम प्रतीक्षणं मदागमनप्रतिपालनं तद्रूपस्यानुग्रहस्य भाजनभूतस्तेन आदृतश्चासौ वेदाहमित्यादिनोक्तश्च तथाभूतोऽहं प्रतिक्षणेति ह्रस्वपाठे क्षणे क्षणेऽनुग्रहभाजनोहं स्नेहेन उत्थानि रोमाणि यस्य सः अत एव स्खलिताक्षरो गद्गदवाक् शुचः आनन्दाश्रूणि मुञ्चन् प्राञ्जलिश्च संस्तं भगवन्तं प्रीत्या बभाषे उक्तवान् ॥ १४ ॥ को न्विति ॥ ईश हे भूमन् अतस्ते तव पादसरोजभाजां पुंसामिह लोके चतुर्ष्वप्यर्थेषु धर्मादिषु को नु पुरुषार्थो दुर्लभो न कोऽपि तथापि भवतः पदाम्भोजयोर्नितरां सेवने उत्सुकः अहं तान्न प्रवृणोमि ॥ १५ ॥ कर्माणीति ॥ वस्तुतोऽनीहस्य निष्क्रियस्य निःस्पृहस्य वा कर्माणि अभवस्य अजन्मनो भवो जन्म कालात्मनः तवाऽरिभयात् द्वारकाख्यदुर्गस्याश्रयणं

पुरा मया प्रोक्तमजाय नाभ्ये पाद्मे निषण्णाय ममादिसर्गे ॥ ज्ञानं परं मन्महिमावभासं यत् सूरयो भागवतं वदन्ति ॥ १३ ॥ इत्यादृतोक्तः परमस्य पुंसः प्रतिक्षणानुग्रहभाजनोऽहम् ॥ स्नेहोत्थरोमास्खलिताक्षरस्तं मुञ्चन् शुचः प्राञ्जलिराबभाषे ॥ १४ ॥ को न्वीश ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह ॥ तथापि नाहं प्रवृणोमि भूमन् भवत्पदाम्भोजनिषेवणोत्सुकः ॥ १५ ॥ कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात् पलायनम् ॥ कालात्मनो यत् प्रमदायुताश्रयः स्वात्मन् रतेः खिद्यति धीर्विदामिह ॥ १६ ॥ मन्त्रेषु मां वा उपहूय यत् त्वमकुण्ठिताखण्डसदात्मबोधः ॥ पृच्छेः प्रभो मुग्ध इवाऽप्रमत्तस्तन्नो मनो मोहयतीव देव ॥ १७ ॥ ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान् समग्रम् ॥ अपि क्षमं नो ग्रहणाय भर्तर्वदाऽञ्जसा यद् वृजिनं तरेम ॥ १८ ॥

पलायनं च स्वात्मन् स्वात्मनि रतिर्यस्य तस्य नलोपाभाव आर्षः । प्रमदानामयुतेन बह्वीभिः प्रमदाभिः सहाश्रयः गृहाश्रम इति यत् इह एतस्मिन् विषये विदां विदुषामपि धीः खिद्यति मुह्यति तङभाव आर्षः । किमुत मादृशाम् ॥१६॥ मन्त्रेष्विति ॥ हे प्रभो हे देव अकुण्ठितः आवरणरहितः अखण्डः सन्ततः सदात्मा संशयादिरहितो बोधो यस्य तथाभूतोऽपि त्वं यत् मन्त्रेषु प्रस्तुतेषु सत्सु ममेवोपहूय मुग्ध इव अज्ञवत् अप्रमत्तः सावधानः सन् पृच्छेः पृष्टवानसि तन्नोऽस्माकं मनो मोहयत्येव ववै इवेत्येवार्थौ ॥ १७ ॥ ज्ञानमिति ॥ स्वात्मनस्तव रहः रहस्यतत्वं तस्य प्रकाशकं परं समग्रं साङ्गोपाङ्गं यज्ज्ञानं भगवान् कस्मै ब्रह्मणे सर्वनामत्वमार्षम् । प्रोवाच । यद्वा । कस्मै प्रोवाच न कस्मैचिदपीत्यर्थः । हे भर्त्तः तज्ज्ञानं यदि नोऽस्माकमपि ग्रहणाय ग्रहीतुं क्षमं योग्यं तर्हि वद । यत् यस्माज्ज्ञानादञ्जसा अनायासेनैव वृजिनं पूर्वोक्तं मोहं तरेम ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवमावेदितं प्रकाशितं हार्दं हृदि गतोऽभिप्रायो येन तस्मै मह्यम् अरविन्दाक्षः परः भगवान् आत्मनः स्वस्य परमां स्थितिं याथात्म्यज्ञानमादिदेश ॥ १९ ॥ स इति ॥ आराधितपादो भगवान् स एव तीर्थं गुरुस्तस्माद् एव अधीतः अधिगतः तत्वात्मविबोधस्य यथार्थात्मज्ञानस्य मार्गो येन सोऽहं तस्य पादौ प्रणम्य तमेव देवं परिवृत्य प्रदक्षिणीकृत्य तद्विरहेणातुरो व्याकुल आत्मान्तःकरणं यस्य तादृशः सन् इहागतोऽस्मि ॥ २० ॥ सोऽहमिति ॥ स बदरीं त्वं प्रयाहीत्याज्ञप्तोऽहं तस्य भगवतो दर्शनेन यः आह्लादो वियोगेनार्तिः पीडा च ताभ्यां युतः संस्तस्य प्रभोः दयितं प्रियं बदर्याश्रममण्डलं गमिष्ये। तङ्गार्षः ॥२१॥ यत्रेति ॥ यत्राश्रमे लोकभावनौ लोकपालकौ देवो भगवान् ऋषिर्नारायणो नरश्चेत्येतौ मृदु जनोपद्रवशून्यं तीव्रं दुश्चरं दीर्घमाकल्पान्तं तपः समाधिलक्षणं तेपाते ॥ २२ ॥ इतीति ॥ बुधः क्षत्ता विदुरः इत्येवं दुःसहं सुहृदां ज्ञातीनां मित्रादीनां च वधं विनाशम् उद्धवात् उपाकर्ण्य उत्पन्नम् पतितेः कः। शोकं ज्ञानेन विवेकेन अशमयत् ॥ २३ ॥ स तमिति ॥ कौरवर्षभः स विदुरः

इत्यावेदितहार्दाय मह्यं स भगवान् परः ॥ आदिदेशाऽरविन्दाक्ष आत्मनः परमां स्थितिम् ॥ १९ ॥ स एवमाराधितपादतीर्थादधी-
तत्त्वात्मविबोधमार्गः ॥ प्रणम्य पादौ परिवृत्त्य देवमिहागतोऽहं विरहातुरात्मा ॥ २० ॥ सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभो ॥
गमिष्ये दयितं तस्य बदर्याश्रममण्डलम् ॥ २१ ॥ यत्र नारायणो देवो नरश्च भगवानृषिः ॥ मृदु तीव्रं तपो दीर्घं तेपाते लोकभा-
वनौ ॥ २२ ॥ श्रीशुक उवाच ॥ इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधम् ॥ ज्ञानेनाऽशमयत् क्षत्ता शोकमुत्पतितं बुधः ॥ २३ ॥ स तं
महाभागवतं व्रजन्तं कौरवर्षभः ॥ विश्रम्भादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे ॥ २४ ॥ विदुर उवाच ॥ ज्ञानं परं स्वात्मरहः प्रकाशं यदाह
योगेश्वर ईश्वरस्ते ॥ वक्तुं भवान् नोर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरन्ति ॥ २५ ॥ उद्धव उवाच ॥ ननु ते तत्त्वसंराध्य ऋषिः
कौषारवोऽन्तिमे ॥ साक्षात् भगवताऽऽदिष्टो मर्त्यलोकं जिहासता ॥ २६ ॥

कृष्णस्य परिग्रहे सेवकवर्गे मुख्यं महाभागवतं तं बदर्याश्रमं प्रति व्रजन्तं व्रजिष्यन्तमुद्धवं प्रति विस्रम्भात् विश्वासात् इदं वक्ष्यमाणमभ्यधत्त उक्तवान् ॥ २४ ॥ ज्ञानमिति ॥ स्वात्मनः रहःप्रकाशं तत्वप्रकाशकं परं यज्ज्ञानं योगस्येश्वरः ईश्वरो भगवान् ते तुभ्यमाह स्म तद्भवान्नोऽस्मभ्यं वक्तुमर्हसि। हि यद्यस्मात् विष्णोर्भृत्याः भक्ताः स्वभृत्यार्थकृतः स्वभक्तप्रयोजनकारिणः सन्त एव चरन्ति न हि तेषां स्वार्थः कश्चिदस्ति ॥ २५ ॥ नन्विति ॥ ननु ते तव तत्वज्ञानाय संराध्य ऋषिः कौषारवो मैत्रेय एव यतो मे अन्ति समीपे त्वदुपदेशाय मर्त्यलोकं जिहासता त्यक्तुमिच्छता साक्षाद्भगवतैवादिष्टः तीर्थान्यटित्वा भवन्तमुपसन्नाय विदुरायैतदुपदेष्टव्यमित्याज्ञप्तः अयं भावः। भगवतैव स्मरणमात्रेण तत्वमुपदिष्टप्रायं केवलमसंभावनादिनिवृत्तये कश्चिज्ज्ञानी आराध्यः स च भगवतैव मैत्रेय आज्ञप्तः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं विदुरेण सह विश्वमूर्तेर्हरेः सुधया अमृततुल्यया गुणानां कथया प्लावितः अपनीतः उरुर्महांस्तापो यस्य सः उपगोर्गोत्रापत्यमौपगवस्तस्यानन्तरापत्यम् औपगविः उद्धवः यमस्वसुः यमुनायाः पुलिने तीरे तां निशां क्षणमिव सम्यक् उषितः सन् प्रातःकाले ततो यमुनातीरात् बदरिकाश्रमं प्रत्यगात् ॥ २७ ॥ निधनमिति ॥ वृष्णिभोजेषु ब्रह्मशापेन निधनमुपगतेषु सत्सु अधिरथानां यूथं पान्तीत्यधिरथयूथपास्तेषामपि ये यूथपास्तेष्वपि मुख्यः स तूद्धव एकः कथमवशिष्टः । यद्यस्मात् शापात् अधीशो हरिरपि आकृतिं मनुष्यनाट्यं तत्यजे तत्याज काऽन्यस्य कथा । तङार्षः ॥ २८ ॥ ब्रह्मशापेति ॥ ब्रह्मशापस्यापदेशेन मिषेण नात्र शापः प्रभुः अपि तु भगवदिच्छैवेत्यर्थः । कालेन स्वशक्तिरूपेण स्वकुलं संहृत्य स्वदेहमपि त्यक्ष्यन् अमोघवाञ्छितः सत्यसङ्कल्पः भगवान् नूनम् इदं वक्ष्यमाणमचिन्तयत् ॥ २९ ॥ अस्मादिति ॥ अस्मान्मर्त्यलोकान्मय्युपरते अन्तर्हिते सति मदाश्रयं मदधीनं ज्ञानं संप्रतीदानीम् आत्मवतां जितमनस्कानां वरः उद्धव एव अद्धा साक्षात् अर्हति ॥ ३० ॥ नोद्धव इति ॥

श्रीशुक उवाच ॥ इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः ॥ क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोऽगात् ॥ २७ ॥ राजोवाच ॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः ॥ स तु कथमवशिष्ट उद्धवो यद् हरिरपि तत्यज आकृतिं त्र्यधीशः ॥ २८ ॥ श्रीशुक उवाच ॥ ब्रह्मशापापदेशेन कालेनाऽऽमोघवाञ्छितः ॥ संहृत्य स्वकुलं नूनं त्यक्ष्यन् देहमचिन्तयत् ॥ २९ ॥ अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयम् ॥ अर्हत्युद्धव एवाऽद्धा संप्रत्यात्मवतां वरः ॥ ३० ॥ नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः ॥ अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ॥ ३१ ॥ एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना ॥ बदर्याश्रममासाद्य हरिमीजे समाधिना ॥ ३२ ॥ विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः ॥ क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ॥ ३३ ॥ देहन्यासं च तस्यैवं धीराणां धैर्यवर्धनम् ॥ अन्येषां दुष्करतरं पशूनां विक्लवात्मनाम् ॥ ३४ ॥ आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितम् ॥ ध्यायन् गते भागवते रुरोद प्रेमविह्वलः ॥ ३५ ॥

उद्धवः अण्वपि अणुमात्रमपि तत् मत्तो न्यूनो न भवति यतः प्रभुर्जितेन्द्रियः गुणैः विषयैः नार्दितो न विक्षोभित इत्यर्थः । अतो मत्तुल्यत्वात् मद्वयुनं मद्विषयं ज्ञानं लोकं ग्राहयन् लोकं बोधयन् इह मर्त्यलोके तिष्ठतु ॥ ३१ ॥ एवमिति ॥ एवं सञ्चिन्त्य त्रिलोकगुरुणा शब्दयोनिना वेदप्रवर्तकेन भगवता सन्दिष्टस्तत्त्वोपदेशपूर्वकं बदरीं प्रयाहीत्यादिष्टः अतस्तद्वियोगमनिच्छन्नपि तदाज्ञया बदर्याश्रममासाद्य समाधिना हरिमीजे ॥ ३२ ॥ विदुर इति त्रयम् ॥ हे कुरुश्रेष्ठ विदुरोऽपि उद्धवात् क्रीडया क्रीडार्थम् उपात्तः स्वीकृतो देहो मनुष्यनाट्यं येन तस्य परमात्मनः श्रीकृष्णस्य श्लाघितानि कर्माणि चकाराज्जन्मादि च श्रुत्वा एवमुक्तप्रकारेण धीराणां धैर्यवर्द्धनं विक्लवात्मनामधीरचित्तानामत एव पशूनां पशुवद्विषयैषिणां त्वन्येषां दुष्करतरं तस्य कृष्णस्य देहन्यासं च श्रुत्वा आत्मानं स्वात्मानं कृष्णेन मनसा ईक्षितं चिन्तितं च श्रुत्वा तं भगवन्तमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यायंस्तत्प्रेम्णा विह्वलो व्याकुलश्च सन् भागवते उद्धवेऽपि ततो गते सति रुरोद ॥ ३३ ॥ ३४ ॥ ३५ ॥ कालिन्द्या इति ॥ ततश्च भरतर्षभः विदुरः कालिन्द्याः यमुनायाः सकाशात् कतिभिरहोभिः कर्तृभिः सिद्धे निष्पन्ने सति भावे क्तः । कतिषु अहस्सु वृत्तेष्वित्यर्थः । सिद्ध एव विदुर इति श्रीस्वामिपादाः । स्वःसरितं गङ्गां प्रापवत प्राप्तः । यत्र गङ्गातीरे हरिद्वारे मित्रासुतो मुनिः मैत्रेय आस्ते ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे तृतीयस्य व्यधादिमाम् ॥ ४ ॥ पञ्चमे महदादीनां सृष्टिं मैत्रेय ऊचिवान् ॥ तैश्च विष्णोः स्तुतिं तत्र श्लोकाः सार्द्धाः खर्मार्गणाः ॥ अनुष्टुभां सपादैकैर्षष्टिश्चोवाचपञ्चैकम् ॥ ५ ॥ द्वारीति ॥ द्युनद्याः गङ्गायाः द्वारि हरिद्वारे आसीनं नतु कर्मव्यग्रम् अगाधः अपरिच्छिन्नः बोधो यस्य तं मैत्रेयमुपसृत्य तस्य सौशील्यमार्जवादिगुणाः करुणादयस्तैरभितृप्तः द्वितीयान्तपाठे क्षत्तुः सौशील्यादिभिरभितृप्तं मैत्रेयम् अच्युते हरौ यो भावस्तेन शुद्धः कुरूणाम् ऋषभः विदुरः पप्रच्छ ॥ १ ॥ सुखायेति ॥ लोको जनः सर्वोऽपि सुखाय चकारात्

कालिन्द्याः कतिभिः सिद्ध अहोभिर्भरतर्षभः ॥ प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ॥३६॥ इति श्रीभागवते तृतीयस्कन्धे विदुरोद्धवसंवादे संपूर्णवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम् ॥ क्षत्तोपसृत्याऽच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः ॥ १ ॥ विदुर उवाच ॥ सुखाय कर्माणि करोति लोको न तैः सुखं वाऽन्यदुपारमं वा ॥ विन्देत भूयस्तत एव दुःखं यदत्र युक्तं भगवान् वदेन्नः ॥ २ ॥ जनस्य कृष्णाद् विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ॥ अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य ॥ ३ ॥ तत् साधुवर्याऽऽदिश वर्त्म शं नः संराधितो भगवान् येन पुंसाम् ॥ हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणम् ॥ ४ ॥ करोति कर्माणि कृतावतारो यान्यात्मतन्त्रो भगवांस्त्र्यधीशः ॥ यथा ससर्जाऽग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ॥ ५ ॥

दुःखनिवृत्तये च कर्माणि वाणिज्यादीनि यज्ञादीनि च करोति तैः कर्मभिः सुखम् अन्यत् दुःखनाशनं तथा उपारमं वैराग्यं वा न विन्दति किंतु ततस्तैरेव कर्मभिर्भूयः पुनः पुनः दुःखमेव विन्देत विन्दते । आयासवैगुण्यादिबाहुल्यात् अतोऽत्र लोके नोऽस्माकं यद्युक्तं कर्तुं योग्यं तत् भगवान् सर्वज्ञो भवान् वदेत् प्रार्थनायां लिङ् ॥ २ ॥ जनस्येति ॥ नूनं यतः जनार्दनस्य भव्यानि मङ्गलरूपाणि भूतानि भक्ता भवन्तः कृष्णाद्विमुखस्य दैवात् पूर्वपापवशादधर्मशीलस्य अतः सुदुःखितस्य मादृशस्य जनस्यानुग्रहायैव इह लोके चरन्ति अतो मत्पृष्टमुपायं वद ॥ ३ ॥ तदिति ॥ हे साधुवर्य येन वर्त्मना संराधितः भगवान् भक्तियोगेन पूते पवित्रिते पुंसां हृदि स्थितः सन् तत्तत्त्वाधिगमः आत्मापारोक्ष्यं तत्सहितं पुराणमनादिवेदप्रमाणकं ज्ञानं प्रयच्छति तत् शं सुखरूपं वर्त्म मार्गमादिश ॥ ४ ॥ करोतीति ॥ त्र्यधीशः त्रिगुणमायानियन्ता आत्मतन्त्रः स्वाधीनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवान् कृतब्रह्माद्यवतारः सन् यानि कर्माणि करोति अग्रे सृष्टेः पूर्वं निरीहः निष्क्रियो निःस्पृहो वापि स्वयं यथा इदं विश्वं ससर्ज ततश्च संस्थाप्य स्थितिं रक्षां च कृत्वाऽस्य जगतो वृत्तिं जीविकां विधत्ते सम्पादयति पालयतीत्यर्थः । एतत्सर्वं वर्णयेत्यग्रेतनेनान्वयः ॥ ५ ॥ यथेति ॥ यथा पुनः स्वे स्वकीये खे हृदयाकाशे उदरे यथा इदं विश्वं निवेश्य स्वयं निवृत्ता वृत्तिः सृष्ट्यादिव्यापारो यस्य तादृक् सन् गुहायां योगमायायां शेते एवमेक एव सन् योगेश्वराधीश्वरो भगवान् तत् जगदनुप्रविष्टः पुनर्देवमनुष्यादिरूपेण बहुधा यथा आसीत् तद्वर्णय ॥ ६ ॥ क्रीडन्निति ॥ द्विजगोसुराणां क्षेमाय मत्स्याद्यवतारभेदैः स्वयं क्रीडन्नेव यानि कर्माणि विधित्ते तानि वर्णय । यतः सुश्लोकाः पुण्यकीर्तयः तेषां मौलेरिव प्रधानस्य हरेश्चरितामृतानि शृण्वतामपि नोऽस्माकं मनो न तृप्यति ॥ ७ ॥ यैरिति ॥ अधिलोकनाथो लोकनाथाधिपतिर्भगवान् यैस्तत्त्वभेदैर्महदादिभिः लोकपालैः सहितान् लोकान् पातालादीन् अलोकान् लोकालोकपर्वताद्बहिर्भागान् अचीक्लृपत् कल्पयामास तद्वर्णय । यत्र येषु लोकादिषु सर्वेषां

यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः ॥ योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथाऽसीत् ॥६॥ क्रीडन् विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः ॥ मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ॥ ७ ॥ यैस्तत्त्वभेदैरधिलोकनाथो लोकानलोकान् सहलोकपालान् ॥ अचीक्लृपद् यत्र हि सर्वसत्त्वनिकायभेदोऽधिकृतः प्रतीतः ॥ ८ ॥ येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त ॥ नारायणो विश्वसृगात्मयोनिरेतच्च नो वर्णय विप्रवर्य ॥ ९ ॥ परावरेषां भगवन् व्रतानि श्रुतानि मे व्याससुखादभीक्ष्णम् ॥ अतृप्नुम क्षुल्लसुखावहानां तेषामृते कृष्णकथाऽमृतौघात् ॥ १० ॥ कस्तृप्नुयात् तीर्थपदोऽभिधानात् सत्रेषु वः सूरिभिरीड्यमानात् ॥ यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ॥ ११ ॥

सत्त्वानां प्राणिनां निकायाः समूहास्तेषां भेदः अधिकृतः तत्तत्कर्माधिकारी तत्तद्भोगाधिकारी च प्रतीतः प्रसिद्ध एव ॥ ८ ॥ येनेति ॥ हे विप्रवर्य उत अपि येनापि प्रकारेण विश्वसृक् कुत्वमार्षम् । आत्मयोनिः स्वतः सिद्धः नारायणः प्रजानां प्राणिनामात्मा स्वभावः तत्कृतानि कर्माणि पुण्यादीनि तत्कृतानि रूपाणि देवमनुष्यादीनि तत्कृताः अभिधाः नामानि तासां भिदां भेदं चकारान्मृत्पाषाणादिभेदं च व्यधत्त अकरोत् । तदेतत् यत्पृष्टंचकारादपृष्टमपि श्रवणार्हं नोऽस्मभ्यं वर्णय ॥ ९ ॥ परावरेषामिति ॥ हे भगवन् परे त्रैवर्णिकाः अवरे स्त्रीशूद्रादयस्तेषां व्रतानि धर्माः मया व्याससुखात् अभीक्ष्णं श्रुतानि परंतु यस्तत्र कृष्णकथामृतस्य ओघः पूरः सूचितस्तस्माद्दते तं विना तत्र त्वलंबुद्धिर्नास्ति अतः क्षुल्लमल्पमात्रं सुखमावहन्ति यानि तेषां व्रतानां श्रवणेन अतृप्नुम तृप्ता अभूम तत्रारुचिर्जातेत्यर्थः ॥ १० ॥ क इति ॥ वो युष्माकं सत्रेषु समाजेषु सूरिभिर्नारदादिभिः ईड्यमानात् तीर्थपदः तीर्थं गङ्गा पादे यस्य तस्य हरेः अभिधानात् कथामृतात् कः पुरुषस्तृप्नुयात् यस्तीर्थपात् स्वचरितं शृण्वतः पुरुषस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्णस्य नाडीं विवरं तद् द्वारेण हृदयं यातो गतः सन् भवप्रदां जन्मादिहेतुं गेहरतिं गेहाद्यासक्तिं छिनत्ति ॥ ११ ॥ व्यासस्यापि भगवत्कथायामेव तात्पर्यमित्याह—मुनि-रिति ॥ ते तव सखा मुनिः कृष्णो व्यासोऽपि भगवद्गुणानां विवक्षुः मोक्षधर्मान्ते नारायणीयाख्याने वक्तुमिच्छुः सन्नेव षष्ठी । शेषे भारतमाह । यस्मिन् भारते ग्राम्यसुखानुवा-दैर्द्वारभूतैरनु पश्चात् नु निश्चितं वा हरेः कथायां बुद्ध्यवतारार्थमेवभारते ग्राम्यसुखानुवादः कृतः अन्यथा कामिनस्तत्समीपमपि नायास्यन् नहि तावता तत्रैव तात्पर्यमिति वक्तुं युक्तम् । तदुक्तमितिहाससमुच्चये । " कामिनो वर्णयन् कामं लोभं लुब्धस्य वर्णयन् । नरः किं फलमाप्नोति कूपेऽन्धमिव पातयन् ॥ लोकचित्तावतारार्थं वर्णयित्वात्र तेन तौ । इतिहासैः पवित्रार्थैः पुनरप्यत्र निन्दितौ ॥ अन्यथा घोरसंसारबन्धहेतू जनस्य तौ । वर्णयेत् स कथं विद्वान्महाकारुणिको मुनिः ॥ " इति ॥ १२ ॥ सेति ॥ श्रद्दधानस्य पुंसः सा हरिकथा तद्रतिर्वा विवर्द्धमाना अन्यत्र ग्राम्यसुखे विरक्तिं करोति ततश्च हरेः पादयोरनुस्मृत्या निर्वृतस्य लब्धपरमानन्दस्य समस्तदुःखानामत्ययं

मुनिर्विवक्षुर्भगवद्गुणानां सखाऽपि ते भारतमाह कृष्णः ॥ यस्मिन् नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायाम् ॥ १२ ॥ सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः ॥ हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु धत्ते ॥ १३ ॥ तान् शोच्यशो-च्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन ॥ क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनाम् ॥ १४ ॥ तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारम् ॥ उद्धृत्य पुष्पेभ्य इवाऽऽर्तबन्धो शिवाय नः कीर्तय तीर्थकीर्तेः ॥ १५ ॥ स विश्वजन्मस्थितिसं-यमार्थे कृतावतारः प्रगृहीतशक्तिः ॥ चकार कर्माण्यतिपूरुषाणि यानीश्वरः कीर्तय तानि मह्यम् ॥ १६ ॥ श्रीशुक उवाच ॥ स एवं भगवान् पृष्टः क्षत्त्रा कौषारविर्मुनिः ॥ पुंसां निःश्रेयसार्थेन तमाह बहु मानयन् ॥ १७ ॥

विनाशमाशु धत्ते ॥ १३ ॥ तानिति ॥ अघेन पापेन हेतुना हरेः कथायां विमुखान् अत एव शोच्याः पश्वादयः ततोऽपि शोच्यान् अविदो मूर्खान् तान् भारततात्पर्यान-भिज्ञान् अनुशोचे शोचामि तङार्षः । अनिमिषः कालात्मा देवः सूर्यः वृथैव वादगतिस्मृतयो वाग्देहमनोव्यापारा येषां तादृशानां येषाम् आयुस्तु क्षिणोति निष्फलत्वेन नाशयति ॥ १४ ॥ तदिति ॥ तत्तस्माद्धेतोः हे कौषारव मैत्रेय सर्वकथासु सारं सारभूतां शर्मणः सुखस्य दातुः तीर्थं कीर्तिर्यस्य तस्य हरेः कथामेव पुष्पेभ्य इव उद्धृत्य नोऽस्माकं शिवाय कीर्तय कथय । मधुकरो यथा पुष्पेभ्यो मधूद्धरति तथेति ॥ १५ ॥ विशेषात्कृष्णकथां कीर्त्तयेत्याह—स इति ॥ य ईश्वरः विश्वस्य जन्मस्थितिसंयमार्थे पूर्वं प्रगृहीतसत्वादिगुणशक्तिः स एव पुरुषेषु कृतावतारः सन् यानि अतिपूरुषाणि पुरुषान्तरैः कर्तुमशक्यानि कर्माणि चकार तानि मह्यं कीर्त्तय ॥ १६ ॥ स इति ॥ पुंसां निःश्रेयसमेवार्थः प्रयोजनं यस्य चतुर्थ्यन्तपाठो वा । क्षत्त्रा विदुरेण एवं पृष्टः स मुनिर्भगवान् कौषारविः कुशारवपुत्रो मैत्रेयस्तं विदुरं बहु मानयन्नाह स्म ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्विति ॥ हे साधो लोकान् साधु सम्यगनुगृह्णता अतः अधोक्षजे आत्मा मनो यस्य तस्य आत्मनः स्वस्यापि कीर्तिं च प्रसङ्गात् लोके वितन्वता त्वया साधु पृष्टम् ॥ १८॥ नैतदिति ॥ हे क्षत्तः यत्त्वया अनन्यभावेन एकान्तभक्त्या ईश्वरः हरिश्चित्ते गृहीतस्तदेतत् बादरायणवीर्यजे त्वयि चित्रं न भवति ॥ १९ ॥ माण्डव्येति ॥ प्रजानां संयमनः दण्डयिता भगवान् यम एव माण्डव्यस्य शापात् भ्रातुः विचित्रवीर्यस्य क्षेत्रे क्षेत्रत्वेन गृहीतायां भुजिष्यायां दास्यां सत्यवतीसुतात् व्यासात्त्वं जातोऽसि ॥ २० ॥ भवानिति ॥ सानुगस्य भक्तैः सहितस्य भगवतः हरेः भवान्नित्यं सम्मतः प्रीतिविषयः । यतः वैकुण्ठं व्रजन् भगवान् यस्य तव ज्ञानोपदेशाय मामादिशत् ॥२१॥ अथेति॥ अथ योगमायया उपबृंहिताः संवर्द्धिताः विश्वस्य स्थितिरुद्भवः अन्तश्च अर्थः स्वरूपं यासां ताः भगवल्लीलास्ते तुभ्यम् अनुपूर्वशः सृष्ट्यादिलीलाक्रमेण वर्णयामि ॥२२॥ भगवानिति ॥ यः सृष्टौ नानामतिभिरुपलक्ष्यते स यद्वा । अनानामत्युपलक्षणः नानामतिभिर्द्रष्टृदृश्यादिमतिभिर्नोपलक्ष्यते स आत्मनां जीवानामात्मा स्वरूपभूतः विभुः स्वामी

मैत्रेय उवाच ॥ साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता ॥ कीर्तिं वितन्वता लोक आत्मनोऽधोक्षजात्मनः ॥ १८ ॥ नैतच्चित्रं त्वयि क्षत्तर्बादरायणवीर्यजे ॥ गृहीतोऽनन्यभावेन यत् त्वया हरिरीश्वरः॥१९॥माण्डव्यशापाद्भगवान्प्रजासंयमनो यमः ॥ भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतात् ॥ २० ॥ भवान्भगवतो नित्यं संमतः सानुगस्य च ॥ यस्य ज्ञानोपदेशाय माऽऽदिशद्भगवान् व्रजन् ॥ २१ ॥ अथ ते भगवल्लीला योगमायोपबृंहिताः ॥ विश्वस्थित्युद्भवान्तार्था वर्णयाम्यऽनुपूर्वशः ॥ २२ ॥ भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः ॥ आत्मेच्छानुगतावाऽऽत्मा नानामत्युपलक्षणः ॥ २३ ॥ स वा एष तदा द्रष्टा नापश्यद् दृश्यमेकराट् ॥ मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक् ॥२४॥ सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ॥ माया नाम महाभाग ययेदं निर्ममे विभुः ॥२५॥ कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ॥ पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥ २६ ॥

च भगवान् अग्रे सृष्टेः पूर्वम् आत्मेच्छा माया तस्या अनुगतौ लये सति यद्वा आत्मन एकाकित्वेन अवस्थानेच्छायामनुवृत्तायाम् एक एवासीत् अन्यद् दृष्टदृश्यादि किंचिदपि नासीत् । कारणात्मना सत्वेऽपि पृथक् प्रतीत्यभावात् ॥ २३ ॥ स वा इति ॥ वै अवधारणे । स एष एकराट् एक एव राजमानः भगवान् तदा द्रष्टा सन्नपि दृश्यं वस्तु नैवापश्यत् अतः सुप्ता विलीना मायादयः शक्तयो यस्य तथा न सुप्ता दृक् चिच्छक्तिर्यस्य भगवान् दृश्याभावे द्रष्टृत्वाभावातसन्तमप्यात्मानमसन्तमिव मेने न त्वसन्तमेव मेने अलुप्तदृक्त्वात् ॥ २४ ॥ सा वै इति ॥ हे महाभाग यया शक्त्या विभुर्भगवानिदं विश्वं निर्ममे सा वै सैव द्रष्टृदृश्यानुसन्धानरूपा सदसदात्मिका कार्यकारणरूपा एतस्य संद्रष्टुर्माया नाम शक्तिः ॥ २५ ॥ कालेति ॥ कालरूपया वृत्त्या शक्त्या तु गुणमय्यां क्षुभितगुणायां मायायामधोक्षजः अतीन्द्रियः वीर्यवान् चिच्छक्तिमान् परमात्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मभूतेन स्वांशेन पुरुषेण प्रकृत्यधिष्ठातृरूपेण वीर्यं चिदाभासमाधत्त स्थापितवान् ॥ २६ ॥ तत इति ॥ ततः कालेन चोदितात् प्रेरितादव्यक्तात् मायातः विज्ञानात्मा सत्वप्रधानत्वाद्विशिष्टज्ञानरूपः सर्वदेहेषु चित्तरूपेणांशेन यो वर्त्तत इति तमोऽज्ञानं नुदति निरस्यति तादृशः प्रलयगताज्ञानध्वंसकः आत्मनः स्वस्य देहस्थं विश्वमुच्छूनवीजगतमङ्कुरादिरूपं वृक्षमिव व्यञ्जन् व्यञ्जयन् प्रकाशयन् महत्तत्त्वमभवत् । तत्वपदं परित्यज्य महतो विशेषणानां पुंस्त्वम् । ततो रजोंशप्राधान्ये क्रियाशक्त्या महत्तत्त्वभेदः सूत्रतत्वमभूदित्यपि ज्ञेयम् ॥ २७ ॥ सोऽपीति ॥ स महानपि अंशश्चिदाभासो निमित्तं गुणाः सत्त्वादयः उपादानं कालो गुणक्षोभकः तदधीन आत्मा यस्य सः अतोऽस्य विश्वस्यात्मा कारणभूतः भगवतो दृष्टिः संकल्परूपं ज्ञानं तद्गोचरः सन्नस्य विश्वस्य सिसृक्षया अहङ्कारादिद्वारा स्रष्टुमिच्छया स्वात्मानं व्यकरोत् रूपान्तरमनयत् ॥ २८ ॥ महदिति ॥ विकुर्वाणात् विक्रियमाणात् महत्तत्वात् कार्यमधिभूतं कारणमाध्यात्मिकमिन्द्रियं कर्तृ अधिदैवं तेषामात्मा आश्रयः अतो भूतेन्द्रियमनोमय इति मन इति देवानामुपलक्षणं भूतादीनां कारणभूतः अहङ्कारो व्यजायत उत्पन्नोऽभूत् ॥ २९ ॥ वैकारिक इति अर्द्धम् ॥ वैकारिकः सात्विकः तैजसो राजसः तामसश्चेत्येवमहङ्कारस्त्रिधा

ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् ॥ विज्ञानात्माऽऽत्मदेहस्थं विश्वं व्यञ्जंस्तमोनुदः ॥२७॥ सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः ॥
आत्मानं व्यकरोदात्मा विश्वस्याऽस्य सिसृक्षया ॥ २८ ॥ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत ॥ कार्यकारणकर्त्रात्मा भूतेन्द्रियमनोमयः
॥ २९ ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ३० ॥ अहंतत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ॥ वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं
यतः ॥ ३१ ॥ तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च ॥ तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः ॥ ३२ ॥ कालमायांशयोगेन भगवद्वी-
क्षितं नभः ॥ नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ॥ ३३ ॥

त्रिविधः ॥ ३० ॥ अहंतत्वादिति ॥ विकुर्वाणात् वैकारिकात्सात्विकादहंतत्वान्मनः अभूत् ये इन्द्रियाधिष्ठातारो देवास्तेऽपि वैकारिकाः सात्विकाहङ्कारकार्यभूताः यतो येभ्यो देवेभ्यः अर्थानां शब्दस्पर्शादीनामभिव्यञ्जनमुपलम्भो भवति ॥ ३१ ॥ तैजसानीति ॥ ज्ञानमयानि कर्ममयानि चोभयविधान्यपीन्द्रियाणि तैजसानि राजसाहङ्कारकार्याण्येव ज्ञानमयानां ज्ञानेन्द्रियाणां सात्विकत्वशङ्का माभूदित्येवकारः । तामसोऽहङ्कारः भूतसूक्ष्मस्य शब्दतन्मात्रस्यादिः कारणम् । यतः शब्दात् आत्मनो ब्रह्मणो लिङ्गं स्वकार्यशब्दद्वारा हृदयाकाशतया वा प्रमापकं खमाकाशमभूत् । यद्वा लिङ्गं शरीरम् " आकाशशरीरं ब्रह्म " इति श्रुतेः ॥ ३२ ॥ कालेति ॥ कालो माया अंशश्चिदाभासस्तेषां योगेन सहितं नभो यदा भगवद्वीक्षितमितोग्रे सृष्टिर्भवत्विति भगवत्संकल्पविषयोऽभूत्तदा नभसः सकाशात्स्पर्शमनुसृतमुद्भूतं क्लैब्यमार्षम् । तदपि विकुर्वत् विक्रियमाणं सत् अनिलं पवनं निर्ममे । एवं सर्वत्र तन्मात्रद्वाराभिभूतोत्पत्तिर्ज्ञेया ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनिल इति ॥ नभसा सहान्वितः स्वयं चोरुबलान्वितश्च अनिलोऽपि यदा विकुर्वाणो विक्रियमाणो जातस्तदा रूपतन्मात्रं रूपं तन्मात्रा सूक्ष्मावस्था यस्य तत् रूपतन्मात्रद्वारेत्यर्थः । लोकस्य लोचनं प्रकाशकं ज्योतिस्तेजः ससर्ज ॥ ३४ ॥ अनिलेनेति ॥ नभआदीनामप्युपलक्षणमेवमग्रेऽपि नभोनिलाभ्यां तद्गुणाभ्यां शब्दस्पर्शाभ्यां स्वगुणेन रूपेण चान्वितं ज्योतिर्भगवद्वीक्षितं भगवता सङ्कल्पेन प्रेरितं सत् कालादियोगतश्च हेतुतो विकुर्वच्च सत् रसमयं रसतन्मात्रकमम्भो जलमाधत्त असृजदित्यन्वयः । भगवद्वीक्षणकालमायांशयोगाः यत्र नोक्तास्तत्रापि सर्वत्रान्वेतव्याः ॥ ३५ ॥ ज्योतिषेति ॥ ज्योतिषेत्युपलक्षणम् । नभआदिभिस्तद्गुणैः शब्दादिभिः स्वगुणेन रसेन चानुसंसृष्टमन्वितं ब्रह्मणा भगवता वीक्षितं कालादियोगतश्च हेतुतो विकुर्वत् अम्भो गन्धगुणां महीमाधात् गन्धतन्मात्रद्वारा भूमिम् असृजत् ॥ ३६ ॥ भूतानामिति ॥ हे भव्य मङ्गलात्मन् विदुर भाव्येति पाठे भाव्यं कार्यं यत् अवरावरमिति समस्तं बोध्यम् । नभआदीनां भूतानां मध्ये यद्यदवरमवरं कार्यं तेषां परानुसंसर्गात् कारणान्वयात् यथासङ्ख्यं या या सङ्ख्या तथा गुणान् विदुरिति वीप्सायामव्ययीभावः । उत्तरोत्तरमधिकान् गुणान्विदुः । तथा हि खे शब्द एक एव गुणः अन्यान्वयाभावात् । वायौ तु शब्द

अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः ॥ ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ॥३४॥ अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम् ॥ आधत्ताऽम्भो रसमयं कालमायांशयोगतः ॥ ३५ ॥ ज्योतिषाऽम्भोऽनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितम् ॥ महीं गन्धगुणामाधात् कालमायांशयोगतः ॥ ३६ ॥ भूतानां नभ आदीनां यद्यद्भव्यावरावरम् ॥ तेषां परानुसंसर्गान्यथासंख्यं गुणान्विदुः ॥ ३७ ॥ एते देवाः कला विष्णोः कालमायांशलिङ्गिनः ॥ नानात्वात्स्वक्रियाऽनीशाः प्रोचुः प्राञ्जलयो विभुम् ॥ ३८ ॥ देवा ऊचुः ॥ नमाम ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम् ॥ यन्मूलकेता यतयोऽञ्जसोरु संसारदुःखं बहिरुत्क्षिपन्ति ॥ ३९ ॥

आकाशस्यान्वयात् । स्वस्य स्पर्शश्च तेजसि खवाय्वोः शब्दस्पर्शौ स्वस्य रूपम् अम्भसि खवायुतेजसां शब्दस्पर्शरूपाणि । स्वस्य रसः भूमौ खवायुतेजोम्भसां शब्दस्पर्शरूपरसाः स्वस्य गन्ध इति ॥ ३७ ॥ एते इति ॥ विष्णोः कलाः अंशभूताः काललिङ्गं विकृतिः मायालिङ्गं विक्षेपः भगवदंशाचिदाभासलिङ्गं चेतना तानि विद्यन्ते येषु ते तथा एते महदाद्यभिमानिनो देवाः नानात्वात् समत्वेन परस्परमसंबन्धात् स्वोचितक्रियायां ब्रह्माण्डरचनायामनीशा असमर्थाः अतः सामर्थ्यलाभाय प्राञ्जलयः सन्तो विभुं भगवन्तं प्रोचुस्तुष्टुवुः ॥ ३८ ॥ नमामेति ॥ हे देव प्रपन्नानां ये तापाः तेषामुपशमे निरासे आतपत्रं छत्रमिव वर्त्तमानं ते तव पदारविन्दं नमाम प्रार्थने लोट् । यस्य पदारविन्दस्य मूलं तलमेव केत आश्रयो येषां ते यतयः अञ्जसा एव उरु अधिकमपि संसारस्य दुःखं बहिर्दूरत एव उत्क्षिपन्ति त्यजन्ति । ब्रह्माण्डोत्पत्तेः प्राक् दुःखस्याभावेऽपि धाता यथा पूर्वमकल्पयत् इति सिद्धान्तानुसारेणोक्तिः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धातरिति ॥ हे धातः ईश हे भगवन् यत् यस्मात् अस्मिन् भवे संसारे तापत्रयेणाभिहताः जीवाः आत्मन् आत्मनि ङिलुक् छान्दसः सम्बोधनं वा । शर्म सुखं न लभन्ते अतो हेतोर्वयं सविद्यां ज्ञानयुक्तां ज्ञानप्रदामिति यावत् । तवाङ्घ्रिच्छायाम् आश्रयेम । ऋते यदस्मिन्निति पाठे यत् ऋते यत् पदाम्बुजं विना तापत्रयेणाभिहता इति ॥ ४० ॥ मार्गन्ति इति ॥ विविक्ते एकान्ते स्थिता ऋषयो मन्त्रद्रष्टारः ते तव मुखपद्मम् एव नीडं स्थानं येषां तैः त्वन्मुखनिवासैः छन्दःसुपर्णैः वेदपक्षिभिर्यस्य शास्त्रप्रसिद्धस्य तव यत्पदं मार्गन्ति अन्वेषयन्ति । यथा निरास्पदे देशे विश्रामार्थं वृक्षतलान्वेषिणो जना इतस्ततश्चरतां पक्षिणामनुपदं धावन्तः स्वनीडं प्रविशतां तेषामास्पदस्य वृक्षस्य तलं प्राप्नुवन्ति तथा त्वन्मुखादुद्गतानां पुनस्त्वय्येव पर्यवसितानां वेदानां तात्पर्यमवधार्य तेनैव त्वां भजन्तस्त्वां प्राप्नुवन्ति तत् तीर्थानि पादे यस्य तस्य तीर्थपदः तव अघमर्षं पापनाशकमुदमुदकं यासां सरितां तासु वरायाः श्रेष्ठायाः गङ्गायाः पदमुद्गमस्थानं पदं चरणं वयं प्रपन्नाः शरणमागताः । ऐतेनाघमर्षेत्यादिविशेषणेन गङ्गामनुसेवमाना अपि

धातर्यदस्मिन् भव ईश जीवास्तापत्रयेणोपहता न शर्म ॥ आत्मँल्लभन्ते भगवंस्तवाङ्घ्रिच्छायां सविद्यामत आश्रयेम ॥ ४० ॥ मार्गन्ति यत् ते मुखपद्मनीडैश्छन्दः सुपर्णैर्ऋषयो विविक्ते ॥ यस्याऽघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः ॥ ४१ ॥ यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधाय ॥ ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत् तेऽङ्घ्रिसरोजपीठम् ॥ ४२ ॥ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदाम्बुजं ते ॥ व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यऽभयं स्वपुंसाम् ॥ ४३ ॥ यत् सानुबन्धेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ॥ पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जम् ॥ ४४ ॥ तान्वा असद्वृत्तिभिरक्षिभिर्ये पराहृतान्तर्मनसः परेश ॥ अथो न पश्यन्त्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ४५ ॥

तदुद्गमस्थानं त्वत्पदं प्राप्नुवन्तीत्युक्तम् ॥ ४१ ॥ यदिति ॥ श्रद्धया श्रुतवत्या श्रवणपूर्विकया भक्त्या संमृज्यमाने संशोध्यमाने हृदये यत् पदाम्बुजमवधाय ध्यात्वा वैराग्यं बलं यस्य तेन ज्ञानेन स्वानुभवेन धीराः स्वस्था भवन्ति तत्ते तवाङ्घ्रिसरोजरूपं पीठमाश्रयं व्रजेम ॥ ४२ ॥ विश्वस्येति ॥ हे ईश विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य ते तव पदाम्बुजं स्मृतं सत् स्वपुंसां स्वभक्तानामभयं सर्वभयरहितमात्मानमेव प्रयच्छति ददाति तत्पदाम्बुजं वयं सर्वे शरणं व्रजेम ॥ ४३ ॥ यदिति ॥ हे भगवन् सानुबन्धे पुत्रदारादिशय्याद्युपकरणयुते असति दुष्टे देहगेहे मनुष्याः अहंममेदमित्याव्यूढो निरूढो दुराग्रहो दुरभिमानो येषां तेषां पुंसां पुर्यां हृदि अन्तर्यामितया नित्यं वसतोऽपि तव यच्चरणारविन्दं सुदूरमिव भवति तत् ते पदाब्जं भजेम ॥ ४४ ॥ तानिति ॥ हे परेश हे उरुगाय अथो ये असद्वृत्तिभिः बहिर्मुखैरक्षिभिरिन्द्रियैः पराहृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूरमाकृष्टमन्तर्मनो येषां ते तथाभूताः भवन्ति तान् ये ते तव पदयोर्न्यासः गमनं तस्य यो विलासः प्रभावस्तेन या लक्ष्मीर्ज्ञानादिसम्पत्तस्याः संबन्धिन इति शेषः । ते नूनं न पश्यन्ति लक्ष्यानिति पाठे ये असद्वृत्तिराक्षिभिः पराहृतान्तर्मनसः ते तव पदन्यासविलासो लक्ष्यो येषां तान् भक्तान्न पश्यन्ति इत्यन्वयः । अथो इत्यत्र पथ इति लक्ष्म्या इत्यत्र लक्ष्यानिति च पाठे त्वत्पदन्यासविलासो लक्ष्यो येषां तान् पथः मार्गभूतान् साधून् श्रवणादीन्वा न पश्यन्ति ॥ ४५ ॥ पानेनेति द्वयम् ॥ हे देव ते तव कथारूपायाः सुधायाः पानेन श्रद्धयान्तःस्थापनेन प्रवृद्धया भक्त्या ये विशदाशयास्ते वैराग्ये सारं बलं यस्य तं बोधं ज्ञानं प्रतिलभ्य यथा अञ्जसा सुखेनैव अकुण्ठधिष्ण्यं कालादिप्रतिहतिरहितस्थानं त्वां वैकुण्ठं वा अन्वीयुः प्रापुः । तथापरे च अन्येऽपि धीरा जितेन्द्रिया आत्मनोऽन्तःकरणस्य समाधिः स्थैर्यं स एव योग उपायस्तद्बलेन बलिष्ठामपि प्रकृतिं मायां जित्वा पुरुषं त्वामेव विशन्ति परंतु तेषां श्रमः स्यात् । ते तव सेवया सेवादिभक्तिमार्गेण तु श्रमो न भवति ॥ ४६ ॥ ४७ ॥ तत्ते इति ॥ तत्तस्मात्ते त्वदीयाः सेवका वयं त्वयैव लोकसिसृक्षयाऽद्य त्रिभिरात्मभिः सत्वादिभिः स्वभावैः सृष्टाः स्मेति अतस्त्रिगुणसृष्टत्वेन विरुद्धस्वभावत्वात्सर्वे वियुक्ताः परस्परममिलिताः सन्तो

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ॥ वैराग्यसारं प्रतिलभ्य बोधं यथाञ्जसान्वीयुरकुण्ठधिष्ण्यम् ॥ ४६ ॥
तथाऽपरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ॥ त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते ॥ ४७ ॥ तत्
ते वयं लोकसिसृक्षयाऽऽद्य त्वयाऽनुसृष्टास्त्रिभिरात्मभिः स्म ॥ सर्वे वियुक्ताः स्वविहारतन्त्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥४८॥ यावद्बलिं
तेऽज हराम काले यथा वयं चान्नमदाम यत्र ॥ यथोभयेषां त इमे हि लोका बलिं हरन्तोऽन्नमदन्त्यनूहाः ॥ ४९ ॥ त्वं नः सुराणामसि
सान्वयानां कुटस्थ आद्यः पुरुषः पुराणः ॥ त्वं देवशक्त्या गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ॥ ५० ॥

यदर्थं सृष्टास्तत्स्वविहारतन्त्रं त्वत्क्रीडोपकरणं ब्रह्माण्डं ते तुभ्यं प्रतिहर्त्तवे प्रतिहर्तुं समर्पयितुं न शक्नुमः अतः स्वचक्षुः परिदेहि इति तुर्येण संबन्धः । प्रतिहर्त्तवे इति तुमर्थे तवेप्रत्ययश्छान्दसः ॥४८॥ यावदिति ॥ हे अज यथा वयं काले तत्तदवसरे ते तुभ्यं बलिं भोगं यावत्साकल्येन हराम समष्टिव्यष्टयात्मकं ब्रह्माण्डं निर्माय समर्पयाम । यथा येन प्रकारेण च वयमप्यन्नमदाम भक्षयाम कर्मकराणामिवान्नमात्रमस्माकमैश्वर्येण भोगस्तु तवैवेत्युक्तम् । यथा यत्र च स्थितास्त इमे उत्पद्यमानाः लोकाः प्राणिन उभयेषां तव चास्माकं च बलिं हरन्तः समर्पयन्तः आराधयन्तः स्वयमप्यनूहा निर्विघ्नाः भगवानन्नं दास्यति न वेति तर्कशून्याः संशयशून्या वा । अन्नं कर्मफलमदन्ति भक्षयेयुस्तथा नः स्वचक्षुः परिदेहि ॥ ४९ ॥ त्वमिति ॥ हे देव सान्वयानां सकार्याणां सकारणानां वा सुराणां नोऽस्माकं त्वमेवाद्यः कारणभूतः कूटस्थः निर्विकारः अजः पुराणः पुरुषः अधिष्ठाता चाऽसि यतः त्वमेव गुणानां सत्वादीनां कर्मणां जन्मादीनां च योनौ कारणभूतायां शक्त्यां मायायां कविं विज्ञं महत्तत्वरूपं रेतो गर्भमादधे निहितवानसि । अतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वचक्षुः परिदेहि ॥ ५० ॥ तत इति ॥ हे आत्मन् हे देव तस्मात् सत्प्रमुखा महदादयो वयं यदर्थं बभूविम जातास्तत् किं ते कार्यं करवाम अतः क्रियार्थे ब्रह्माण्डरचनार्थं यस्मात्त्वत्त एवानुग्रहो येषां तेषामस्माकम् । यद्वा । क्रियार्थे इयान् एतावानेवानुग्रहो येषामस्माकमित्येकपदं वा तेषां नोऽस्माकं शक्त्या सह स्वचक्षुर्ज्ञानं परिदेहि प्रयच्छ । त्वदीयज्ञानक्रियाशक्तिभ्यामेव वयं सृष्टौ क्षमा नान्यथेत्यर्थः ॥ ५१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्याध्याये पञ्चमे व्यधात् ॥ ५ ॥ षष्ठे तु महदाद्यैश्च सृष्टिमाह विराट्तनोः ॥ अधिदैवाधिभेदं च तत्र श्लोका नवाग्रेयः ॥ उवाचेत्येकमर्द्धाढ्या नवैरामा अनुष्टुभः ॥६॥ इतीति द्वयम् ॥ उरुक्रमः अनन्तलीलः स ईश्वरः एवम् असमेत्य अमिलित्वा सतीनां वर्तमानानां प्रसुप्तानि लोकतन्त्राणि विश्वरचना जीवोपकरणानि वा यासां तासां स्वशक्तीनां महदादीनां गतिं दशामसामर्थ्यं निशाम्य दृष्ट्वा तदा कालेन संज्ञा उद्बोधो यस्याः कालयति क्षोभयति स्वकार्याणि वा कालसंज्ञाप्रकृतिः तां देवीं देवस्य स्वस्य संबन्धिनीं शक्तिं बिभ्रत् धारयंस्त्रयोविंशतितत्वानां

ततो वयं सत्प्रमुखा यदर्थे बभूविमाऽऽत्मन्करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणाम् ॥ ५१ ॥
इति श्रीभागवते महापुराणे तृतीयस्कन्धे महदादिसर्गे सर्वदेवकृतस्तोत्रवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥ ऋषिरुवाच ॥ इति तासां
स्वशक्तीनां सतीनामसमेत्य सः ॥ प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥ १ ॥ कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ॥ त्रयो-
विंशतितत्त्वानां गणं युगपदाविशत् ॥ २ ॥ सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् ॥ भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥३॥
प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः ॥ प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपूरुषम् ॥ ४ ॥ परेण विशता स्वस्मिन् मात्रया विश्वसृ-
ग्गणः ॥ चुक्षोभान्योन्यमासाद्य यस्मिँल्लोकाश्चराचराः ॥ ५ ॥

महदहङ्कारपञ्चमहाभूतपञ्चतन्मात्रैकादशेन्द्रियरूपाणां गणं समूहं युगपत् एकदैवाविशत् अन्तर्यामितया अनुप्रविष्टोऽभूत् ॥ १ ॥ २ ॥ स इति ॥ स भगवांस्तत्रानुप्रविष्टः सन् चेष्टारूपेण कालाख्येन क्रियाशक्त्या वा सुप्तं वासनात्मकेन स्थितं प्राणिकर्म प्रबोधयन् फलोन्मुखीकुर्वन् भिन्नं स्थितं तं गणं संयोजयामास । यथोचितं परस्परं मिलितं चकार ॥ ३ ॥ प्रबुद्धेति ॥ प्रबुद्धं कर्म प्राण्यदृष्टं स्वक्रियाशक्तिर्वा यस्य स त्रयोविंशतिको गणः दैवेन ईश्वरेण प्रेरितः सन् स्वाभिर्मात्राभिः अवयवैः पुरुषं विराड्देहम् अजनयत् ॥ ४ ॥ विराड्जननप्रकारं दर्शयति—परेणेति ॥ मात्रया अंशेन स्वस्मिन् विशता अनुप्रविष्टेन परेण भगवता हेतुना यस्मिंश्चराचराः स्थावरजङ्गमात्मका लोकाः व्यष्टिविराडात्मकाः कार्यत्वेनावस्थिताः स विश्वसृजां त्रयोविंशतितत्वानां गणः अन्योन्यं परस्परमासाद्य प्रधानगुणभावं प्राप्य मात्रया स्वांशेन नतु सर्वात्मना चुक्षोभ ब्रह्माण्डरूपगर्भात्मना परिणतः अभूत् । समष्टिविराडेव बालकोऽभूत् तद्भाव आर्षः । बालोमातृकुक्षेर्निर्गत्य बाल्यपौगण्डाद्या अवस्थाः प्राप्तोऽपि ब्रह्माण्डबालस्तु मायाकुक्षावेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्टिकशालिरिव तिष्ठन् बाल्याद्याः मरणान्ता दशाः प्राप्नोति ॥ ५ ॥ हिरण्मय इति ॥ अप्सु गर्भोदकेषु वर्त्तमाने आण्डकोशे ब्रह्माण्डे हिरण्मयः प्रकाशबहुलः सप्रसिद्धः समष्टिपुरुषोऽधिपुरुष इत्युक्तः सर्वैर्देवतिर्यगादिभिः सत्त्वैरनुशायिभिः प्राणिभिरुपबृंहितः सहितः सहस्रपरिवत्सरान् बहुवर्षकालपर्यन्तमुवास अत्राप्सूवासेत्यनेनाण्डकोशोत्पत्तेः। पूर्वमपां स्थित्यवगमात् उदाप्लुतं विश्वमिदं तदासीदिति वक्ष्यमाणत्वाच्चावरणजलसृष्टिरण्डोत्पत्तेः पूर्वमवगन्तव्या ॥ ६ ॥ व्यष्टिशरीरोत्पत्तिमारभते—स वै इति ॥ देवकर्मात्मशक्तिमान् देवशक्तिर्भगवदंशश्चिच्छक्तिः कर्मशक्तिः क्रियाशक्तिः आत्मशक्तिः जीवरूपा भोक्तृशक्तिस्तद्वान्स वै प्रसिद्धः विश्वसृजां गर्भः कार्यरूपो विराट् आत्मना स्वयमेवात्मानमेकधा दशधा त्रिधा वक्ष्यमाणरीत्या विबभाज विभक्तं कृतवान् तत्र देवशक्तिर्हृदयावच्छिन्नचैतन्यरूपेणैकधा क्रियाशक्तिः प्राणरूपेण दशधा आत्मशक्तिरध्यात्मादिभेदेन त्रिधा ॥ ७ ॥ एष इति ॥ हि यस्मादेष विराट् अशेषसत्वानां सर्वव्यष्टिजीवानामात्मा समष्टिरूपत्वात् परमात्मनोंशः जीवः तथा परमात्मनः आद्योऽवतारः अवतारत्वोक्तिः नारायणाविर्भावाभिप्रायेण । यत्र विराड्विग्रहेऽसौ भूतग्रामः स्थावरजङ्गमात्मकं विश्वं विभाव्यते दृश्यते ॥ ८ ॥ एकधा दशधा त्रिधेत्युक्तमेव शरी रविभागं

हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् ॥ आण्डकोश उवासाऽप्सु सर्वसत्वोपबृंहितः ॥६॥ स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् ॥ विबभाजात्मनात्मानमेकधा दशधा त्रिधा ॥ ७ ॥ एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः ॥ आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥ ८ ॥ साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा ॥ विराट्प्राणो दशविध एकधा हृदयेन च ॥९॥ स्मरन्विश्वसृजामीशो विज्ञापितमधोक्षजः ॥ विराजमतपत्स्वेन तेजसैषां विवृत्तये ॥ १० ॥ अथ तस्याभितप्तस्य कति चायतनानि ह ॥ निरभिद्यन्त देवानां तानि मे गदतः शृणु ॥ ११ ॥

दर्शयति—साध्यात्म इति ॥ आत्मानमधिकृत्य वर्त्तन्त इत्यध्यात्मानीन्द्रियाणि तत्सहितः साध्यात्मः विराडिति सर्वत्र भूतान्यधिकृत्य वर्त्तन्त इत्यधिभूता व्यष्टिदेहास्तत्सहितः साधिभूतः देवानामादित्यादीनां समूहोऽधिदैवं तत्सहितः साधिदैव एवं विराट् त्रिधा जातः । "प्राणोऽपानः समानश्च उदानो व्यान एव च । नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः ॥" इति वृत्तिभेदेन विराट्प्राणो दशविधः । तत्र प्राणः प्राक्क्रमणो नासाग्रवर्ती । अपानोऽवाक्क्रमणः पाय्वादिस्थानवर्त्ती । समानो भुक्तपीतान्नादिसमीकरणः शरीरमध्यवर्त्ती । उदानः ऊर्ध्वोत्क्रमणः कण्ठवर्ती । मृत्युहेतुः व्यानो विष्वक्क्रमणः सकलशरीरवर्ती । हस्तपादाद्याकुञ्चनप्रसारणादिहेतुः । "उद्गारे नाग आख्यातः कूर्म उन्मीलने स्थितः । कृकरः शोषणे ज्ञेयो देवदत्तो विजृम्भणे॥न जहाति मृतं चापि सर्वव्यापी धनञ्जयः ।" इति प्राणादीनां स्थानं कार्यं च ज्ञेयम् । हृदयेन हृदयावच्छिन्नचैतन्यरूपेण चैकधा ॥९॥ स्मरन्निति ॥ अधोक्षजः इन्द्रियागोचरः ईशः विश्वसृजां महदादीनां यावद्बलिं तेज हरामेत्यादिना विज्ञापितं स्मरन्नेषां विवृत्तये विविधवृत्तिलाभाय स्वेन तेजसा चिच्छक्त्या विराजमतपत् एवं करिष्यामीत्यालोचितवानित्यर्थः । "यस्य ज्ञानमयं तपः" इति श्रुतेः ॥ १० ॥ अथेति ॥ अथालोचनानन्तरमभितप्तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवतालोचितस्य विराजः शरीरे आदित्यादिदेवानां कति चायतनानि स्थानानि निरभिद्यन्त पृथगभूवन् तानि गदतो मे मत्तस्त्वं शृणु ॥ ११ ॥ तस्येति ॥ तस्य समष्टिजीवस्य निर्भिन्नं विभक्तमास्यं पदं मुखरूपं स्थानं स्वांशेन स्वाधिष्ठेयभूतेन वाचा वागिन्द्रियेण सह लोकपालः अग्निराविशत् । यया वाचाऽसौ जीवो वक्तव्यं प्रतिपद्यते शब्दमुच्चारयतीत्यर्थः । एवं सर्वत्र यन्निर्भिन्नं द्वितीयान्तं तदधिभूतमधिष्ठानं यदग्न्यादिप्रथमान्तं तदधिदैवम् । यद्वागादितृतीयान्तं तदध्यात्म्यम् । यत्पुनर्द्वितीयान्तं क्वचिच्च षष्ठ्यन्तं प्रतिपत्तव्यं तदप्यधिभूतं विषयः ॥ १२ ॥ निर्भिन्नमिति ॥ हरेः हरितयोपास्यस्य विराजः निर्भिन्नं पृथग्विभक्तं तालुस्थानं लोकपालः वरुणः अंशेन स्वाधिष्ठेयेन जिह्वया इंद्रियेण सहाविशत् यया जिह्वयाऽसौ जीवः मधुरादिरसं प्रतिपद्यते अनुभवति॥१३॥ निर्भिन्ने इति ॥ विष्णोर्विराजो नासे अधिष्ठानभूते निर्भिन्ने तत्पदं स्वस्थानमंशेन स्वाधिष्ठेयेन घ्राणेनेन्द्रियेण सहाश्विनावाविशतां यतो येन घ्राणेन गन्धस्य सुगन्धदुर्गन्धादेः प्रतिपत्तिर्ज्ञानं भवेत् ॥ १४ ॥ निर्भिन्ने इति ॥ विभोर्विराजः आक्षिणी स्थाने निर्भि-

तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत्पदम् ॥ वाचा स्वांशेन वक्तव्यंययाऽसौ प्रतिपद्यते ॥ १२ ॥ निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः ॥ जिह्वयांशेन च रसं ययाऽसौ प्रतिपद्यते ॥ १३ ॥ निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम् ॥ घ्राणेनांऽशेन गन्धस्य प्रतिपत्तिर्यतो भवेत् ॥ १४ ॥ निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशद्विभोः॥ चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् ॥ १५ ॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् ॥ प्राणेनांशेन संस्पर्शं येनाऽसौ प्रतिपद्यते ॥ १६ ॥ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः ॥ श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते ॥१७॥ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः ॥ अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते॥१८॥

न्ने लोकपालः त्वष्टा आदित्यः अंशेन स्वाधिष्ठेयेन चक्षुषेन्द्रियेण सहाविशत् । यतो येन चक्षुरिन्द्रियेण नीलपीतादिरूपाणां प्रतिपत्तिर्ज्ञानं भवेत् ॥ १५ ॥ निर्भिन्नानीति ॥ अस्य विराजो निर्भिन्नानि चर्माणि लोकपालोऽनिलः पवनः स्वांशेन प्राणेन प्राणवत्कृत्स्नदेहव्यापिना त्वगिन्द्रियेण सहाविशत् । येन त्वगिन्द्रियेणासौ जीवः संस्पर्शं मृदुत्वकठिनत्वशैत्योष्णत्वादिज्ञानं प्रतिपद्यते ॥ १६ ॥ कर्णाविति ॥ अस्य विराजः कर्णौ निर्भिन्नौ तत्स्वं धिष्ण्यं स्वस्थानं स्वांशेन श्रोत्रेन्द्रियेण सह दिशो देवताः विविशुः । येन श्रोत्रेण शब्दस्य सिद्धिं ज्ञानं प्रपद्यते प्राप्नोति ॥ १७ ॥ त्वचमिति ॥ अस्य विराजो निर्भिन्नां त्वचं धिष्ण्यमाश्रयमंशेनेन्द्रियेण रोमभिः सह ओषधीः ओषधयः पूर्वसवर्णदीर्घ आर्षः विविशुः । यैः रोमभिरिन्द्रियैरसौ जीवः कण्डूं प्रतिपद्यते जानाति । त्वच्यधिष्ठाने इन्द्रियद्वयं तत्र त्वगिन्द्रिये अनिलो देवता स्पर्शो विषयः रोमेन्द्रिये ओषध्यो देवता विषयस्तु कण्डूः । तत्र चायं नामभेदो देवताभेदश्च द्वितीयस्कन्ध एव व्याख्यातः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेढ्रमिति ॥ तस्य विराजो विनिर्भिन्नं मेढ्रं स्वधिष्ण्यं स्वस्थानं कः प्रजापतिर्देवता स्वांशेन रेतसा रेतउपलक्षितोपस्थेन्द्रियेण सहोपाविशत् येनोपस्थेन्द्रियेणासौ जीव आनन्दं रतिसुखं प्रतिपद्यते प्राप्नोति ॥ १९ ॥ गुदमिति ॥ पुंसो विराजो विनिर्भिन्नं गुदं स्थानमंशेन पायुना इन्द्रियेण सह लोकेशो मित्र आविशत् । येन पायुनाऽसौ जीवः विसर्गं पुरीषत्यागं प्रतिपद्यते करोति ॥ २० ॥ हस्ताविति ॥ अस्य विनिर्भिन्नौ हस्तौ स्वर्पतिः स्वर्गपतिरिन्द्रः वार्तया क्रयविक्रयादिशक्त्या अंशेनेन्द्रियेण सहाविशत् । यया शक्त्या पुरुषो जीवो वृत्तिं प्रपद्यते जीविकां सम्पादयति ॥ २१ ॥ पादाविति ॥ अस्य विनिर्भिन्नौ पादौ स्वांशेन गत्या गत्याख्यपादेन्द्रियेण सह लोकेशो विष्णुराविशत् । यया गत्याख्यया शक्त्या पुरुषः प्राप्यं देशान्तरं प्रपद्यते ॥ २२ ॥ बुद्धिमिति ॥ क्वाचित्कः श्लोकः अत एव सत्त्वं चास्येति श्लोके बुद्धिचित्तयोरभेदेन निर्देश इति स्वामिपादाः । अस्य विराजश्च विनिर्भिन्नां बुद्धिं बुध्यास्पदं गोलकं हृदयैकदेशम् । धिष्ण्यं स्थानं बोधेन निश्चयात्मकज्ञानजननसामर्थ्येन सह वागीशो ब्रह्माविशत् । यतो येन

मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत् ॥ रेतसांशेन येनासावानन्दं प्रतिपद्यते ॥ १९ ॥ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् ॥ पायुनांशेन येनाऽसौ विसर्गं प्रतिपद्यते ॥ २० ॥ हस्तावस्य विनिर्भिन्नाविन्द्रः स्वर्पतिराविशत् ॥ वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते ॥ २१ ॥ पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥ गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते ॥ २२ ॥ बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् ॥ बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो भवेत् ॥ २३ ॥ हृदयं चास्य निर्भिन्नं चन्द्रमा धिष्ण्यमाविशत् ॥ मनसांशेन येनासौ विक्रियां प्रतिपद्यते ॥ २४ ॥ आत्मानं चास्य निर्भिन्नमभिमानोऽविशत्पदम् ॥ कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते ॥ २५ ॥ सत्त्वं चास्य विनिर्भिन्नं महान्धिष्ण्यमुपाविशत् ॥ चित्तेनांशेन येनाऽसौ विज्ञानं प्रतिपद्यते ॥ २६ ॥ शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत ॥ गुणानां वृत्तयो येषु प्रतीयन्ते सुरादयः ॥ २७ ॥

बोधेन बोद्धव्यस्य निश्चेतव्यस्य प्रतिपत्तिर्निश्चयात्मकं ज्ञानं भवेत् ॥ २३ ॥ हृदयमिति ॥ अस्य हृदयं कमलाकारं निर्भिन्नं तद्धिष्ण्यं स्थानं मनसा अंशेनेन्द्रियेण सह चन्द्रमा आविशत् । येन मनसा असौ जीवः विक्रियां सङ्कल्पादिरूपां प्रतिपद्यते प्राप्नोति ॥ २४ ॥ आत्मानमिति ॥ अस्य विराजः निर्भिन्नमात्मानमहंकारास्पदं गोलकं हृदयैकदेशस्थानं कर्मणां देहाद्यहंवृत्त्या सह अभिमानः अभिमन्यतेऽनेनेत्यभिमानो रुद्र आविशत् । येन कर्मणाऽसौ जीवः कर्तव्यमभिमानविषयं देहादि प्रतिपद्यते अहमिति मत्वा नानाविधं कर्म करोति ॥ २५ ॥ सत्वमिति ॥ बुद्धिचित्तयोरभेदेन निर्देशः । अस्य विराजः सत्वं बुद्धिः चित्तं च निर्भिन्नं धिष्ण्यं स्थानं चित्तेनांशेन चेतनया सह महान् चैत्यः ब्रह्मा विष्णुर्वा उपाविशत् । येन चित्तेनांशेनासौ जीवः विज्ञानं चेतनां स्मरणं च प्रतिपद्यते लभते ॥ २६ ॥ शीर्ष्ण इति ॥ अस्य विराजः शीर्ष्णः सकाशात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यौरुदपद्यत । एवं पद्भ्यां धरा नाभेः सकाशात् खमन्तरिक्षलोकः उदपद्यत । येषु द्युधराखेषु लोकेषु गुणानां सत्त्वरजस्तमसां वृत्तयः परिणामरूपाः वृत्तिमन्तो वा सुरादयः देवमनुष्यादयः प्रतीयन्ते उत्पद्यन्ते ॥ २७ ॥ एतदेव प्रपञ्चयति—आत्यन्तिकेनेति द्वाभ्याम् ॥ आत्यन्तिकेन ऊर्जितेन औत्पत्तिकेनेति पाठे नैसर्गिकेणेत्यर्थः । सत्वेन स्वभावेन हेतुना देवाः दिवं स्वर्गं प्रपेदिरे प्राप्ताः । पणन्ते व्यवहरन्ति इति पणयो मनुष्याः ये चताननुसृत्य वर्त्तन्ते तदुपकरणभूताः गवादयस्ते च सर्वे रजःस्वभावेन हेतुना धरां प्रपेदिरे ॥ २८ ॥ तार्त्तीयेनेति ॥ तार्त्तीयेन तृतीयं तमस्तदीयेन तामसेन स्वभावेन उभयोर्द्यावापृथिव्योरन्तरं मध्यस्थं व्योम तदेव भगवतो विराजो नाभिस्तां ये रुद्रस्य पार्षदानां भूतप्रेतादीनां गणास्त आश्रिताः स्थिताः ॥ २९ ॥ मुखत इति ॥ हे कुरूद्वह ब्रह्म वेदः अध्यापनयाजनादिना ब्राह्मणस्य वृत्तिः पुरुषस्य विराजो मुखतोऽवर्त्तत प्रवृत्तम् । यस्तु उन्मुखत्वान्मुखोद्भवत्वात् वर्णानां मध्ये मुख्यः गुरुः सन्मार्गोपदेष्टा च ब्राह्मणः सोऽपि मुखतोऽभूत् । स्ववृत्त्या सह ब्राह्मणो मुखाज्जात इत्यर्थः । एवमग्रे-

आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे ॥ धरां रजःस्वभावेन पणयो ये च तानन्नु ॥ २८ ॥ तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः॥ उभयो-
रन्तरं व्योम ये रुद्रपार्षदां गणाः ॥ २९ ॥ मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह ॥ यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः ॥ ३० ॥
बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः ॥ यो जातस्त्रायते वर्णान्पौरुषः कण्टकक्षतात् ॥ ३१ ॥ विशोऽवर्तन्त तस्योर्वोर्लोकवृत्तिकरीर्विभोः ॥
वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत् ॥ ३२ ॥ पद्भ्यां भगवतो जज्ञे शुश्रूषाधर्मसिद्धये ॥ तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः
॥ ३३ ॥ एते वर्णाः स्वधर्मेण यजन्ति स्वगुरुं हरिम् ॥ श्रद्धयाऽऽत्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिः ॥ ३४ ॥

ऽपि ॥ ३० ॥ बाहुभ्य इति ॥ क्षत्रं क्षत्रियधर्मः पालनरूपा वृत्तिस्तस्य विराजः बाहुभ्योऽवर्त्तत । क्षत्रियश्च तदनुव्रतस्तत् क्षत्रं वृत्तिमनुसृतः यद्वा तद्बाहुभ्यो जातः यः पौरुषः पुरुषस्य हरेः जातः सन् कण्टकाश्चोरादयस्तेभ्यो जातं यत् क्षतमुपद्रवस्तस्मात्सर्ववर्णान् त्रायते ॥ ३१ ॥ विश इति ॥ तस्य विभोर्विराजः ऊर्वोः उरुभ्यां विशः कृष्यादि-व्यवसायाः लोकस्य वृत्तिकरीः जीविकाहेतवः पूर्वसवर्णदीर्घ आर्षः । अवर्तन्त प्रवृत्ताः । वैश्यश्च तदुद्भवऊरुभ्यां जातः । यो वैश्यः सर्वेषां नृणां वार्तां जीविकां स्ववृत्त्या समवर्तयत् सम्पादितवान् ॥ ३२ ॥ पद्भ्यामिति ॥ भगवतो विराजः पद्भ्यां शुश्रूषा सेवा जज्ञे । तस्यां निमित्तभूतायां सेवायां सत्यां धर्मस्य सिद्धये शूद्रकृतसेवया अन्येषां शूद्रस्य च धर्मनिर्वाहार्थं पुरा पूर्वमेव शूद्रोऽपि पद्भ्यामेव जातः सेवया यद्वृत्त्या हरिस्तुष्यते। तङार्षः ॥ ३३ ॥ एत इति ॥ यतः यस्मात् हरेः सकाशात् वृत्तिभिः जीविकाभिः सह जाताः अत एते ब्राह्मणादयश्चत्वारो वर्णाः स्वधर्मेण श्रद्धया आत्मनोऽन्तःकरणस्य विशुद्ध्यर्थं स्वगुरुं परमपूज्यं हरिं यजन्ति आराधयन्ति ॥ ३४ ॥ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदिति ॥ हे क्षत्तः दैवं कालः कर्म अदृष्टम् आत्मा स्वभावः दैवादिरूपाणि शक्तितयाऽस्य सन्तीति दैवकर्मात्मरूपी तस्य भगवतो योगमायाया बलस्य सृष्ट्यादिसामर्थ्यस्य उदयः प्राकट्यं यस्मिंस्तदेतद्भगवच्चरितं विराड्रूपं वा उपाकर्तुं साकल्येन वर्णयितुं कः श्रद्दध्यात् इच्छेत् । "श्रद्धास्तिक्येऽभिलाषे च" इति हैमः । वर्णनेच्छाप्यशक्या वर्णनं तु दूरापास्तम् ॥ ३५ ॥ अथापीति ॥ अङ्ग हे विदुर अथापि तथापि अन्यस्य हरिव्यतिरिक्तस्याभिधा अभिधानं तया असतीं दूषितां स्वां गिरं वाचं सत्कर्तुं पवित्रीकर्तुं यथाश्रुतं यथा गुरुमुखाच्छ्रुतं तत्रापि यथामति स्वबुद्ध्यनुसारेण हरेः कीर्तिं कीर्त्तयामि ॥ ३६ ॥ एकान्तेति ॥ सुश्लोकाः उत्तमयशसस्तेषां मौलिभूतस्य हरेः गुणवादं गुणकथनमेव पुंसां वचसः एकान्तलाभं मुख्यं फलं विज्ञा आहुः । तथा विद्वद्भिरुपाकृतायामुपवर्णितायां तत्कथासुधायामुपसंप्रयोगं संनिधौ समर्पणेन तच्छ्रवणमेव श्रुतेः श्रोत्रेन्द्रियस्य एकान्तलाभं परमं फलमाहुः ॥ ३७ ॥ आत्मन इति ॥ हे वत्स आत्मनो हरेर्महिमा योगेन विपक्वया धियापि संवत्सरसहस्रान्तेऽपि आदिना

एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः ॥ कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयम् ॥ ३५ ॥ अथाऽपि कीर्तयाम्यङ्ग यथामति यथाश्रुतम् ॥ कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीम् ॥ ३६ ॥ एकान्तलाभं वचसोऽनु पुंसां सुश्लोकमौलेर्गुणवादमाहुः ॥ श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगम् ॥ ३७ ॥ आत्मनोऽवसितो वत्स महिमा कविनाऽऽदिना ॥ संवत्सरसहस्रान्ते धिया योगविपक्वया ॥ ३८ ॥ अतो भगवतो माया मायिनामपि मोहिनी ॥ यत्स्वयं चात्मवर्त्मात्मा न वेद किमुताऽपरे ॥ ३९ ॥ यतोऽप्राप्य निवर्तन्ते वाचश्च मनसा सह ॥ अहं चान्य इमे देवास्तस्मै भगवते नमः ॥ ४० ॥ इति श्रीभागवते तृतीयस्कन्धे विराड्देहे ईश्वरप्रवेशवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ॥ प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥ १ ॥

कविना ब्रह्मणापि किमवसितः किं ज्ञातः इति काक्वा एतावानिति न ज्ञात एवेति । यद्वा । अवसित इत्यत्र अवेत्यस्याकारस्य वष्टिभागुरिरिति लोपे नञा अवासित इति न ज्ञात इत्यर्थः ॥ ३८ ॥ अत इति ॥ अतो भगवतो माया मायिनां ब्रह्मादीनामपि मोहिनी । यत् यस्मात् आत्मा परमात्मा स्वयमपि आत्मवर्त्म स्वमायाविस्तारं न वेद । अपरे ब्रह्मादयो न विदुरित्यत्र तु किमु वक्तव्यम् । न चैवं सर्वज्ञत्वहानिः शङ्क्या अनन्तवस्तुनः अन्ताभावात्तदज्ञानस्य सर्वज्ञताहान्यप्रयोजकत्वात् ॥ ३९ ॥ यत इति ॥ यतः यस्य ज्ञानाय प्रवृत्ता वाचोऽपि मनसा सह तमप्राप्यैव निवर्त्तन्ते तथा अहम् अहङ्काराधिष्ठाता रुद्रोऽपि इमे देवा इन्द्रियाधिष्ठातारः अन्ये च सर्वे तमज्ञात्वा निवर्त्तन्ते तस्मै भगवते नमः ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयषष्ठेऽध्याये व्यधादिमाम् ॥ ६ ॥ सप्तमे संशयच्छेदि स्तुत्वा क्षत्ता मुनेर्वचः ॥ प्रश्नान्नानाकरोत्तत्र श्लोकाः सार्द्धा द्विसिन्धवः ॥ षड्वाचेति पादाढ्या वह्निवेदा अनुष्टुभः ॥ ७ ॥ एवमिति ॥ एवं मायागुणैर्भगवान्सृष्ट्यादिकं करोतीत्यादिकं ब्रुवाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मैत्रेयं भारत्या प्रार्थनारूपया गिरा प्रीणयन् इव तर्पयन्नेव बुधः द्वैपायनसुतः विदुरः प्रत्यभाषत ॥ १ ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् चिन्मात्रस्य भगवतः निर्गुणस्य गुणा अवि-कारिणः क्रियाः सृष्ट्यादयश्च लीलयाऽपि कथं युज्येरन् विरोधात् लीलयेत्युक्तिस्तु प्रयोजनाभावशङ्कां समाधातुं शक्नोति नतु वस्तुविरोधमिति भावः ॥ २ ॥ अर्भकवल्ली-लापि न युज्यते वैषम्यादित्याह—क्रीडायामिति ॥ अर्भस्य बालस्य क्रीडायामुद्यमयति प्रवर्तयतीत्युद्यमः प्रवृत्तिहेतुः कामोऽस्ति अन्यतो वस्त्वन्तरेण बालान्तरप्रवर्त्तनेन वा तस्य चिक्रीडिषा क्रीडेच्छा च भवति । ईश्वरस्य तु स्वतस्तृप्तस्य कथं कामः अन्यतः सदा निवृत्तस्य असङ्गाद्वितीयस्य अन्यतश्चिक्रीडिषा च कथम् अतः कथं क्रीडा संभवेत् ॥३॥ “ स्मरन् विश्वसृजामीश” इत्याद्युक्तमप्याक्षेप्तुमनुवदति—अस्राक्षीदिति ॥ गुणमय्या आत्मनो जीवस्य कर्तृभोक्तृत्वादिमोहात्पादिका मायया भगवान् विश्वम-स्राक्षीत् तयैवैतद्विश्वं संस्थापयति पालयति तयैव भूयः पुनः प्रत्यपिधास्यति प्रातिलोम्येन तिरोहितं करिष्यति । प्रत्यभिधास्यतीति पाठे प्रातिलोम्येनात्मनि धारयिष्यतीति च भवता प्रोक्तम् ॥ ४ ॥ एतत्सर्वं जीवस्याविद्याश्रयत्वे घटेत तदेव तु न संभवतीत्याह—देशत इति ॥ योऽसौ देशकालादेः अविलुप्तावबोधः आत्मा जीवः ब्रह्मस्वरूपत्वात्

विदुर उवाच ॥ ब्रह्मन्कथं भगवतश्चिन्मात्रस्याऽविकारिणः ॥ लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः ॥ २ ॥ क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः ॥ स्वतस्तृप्तस्य च कथं निवृत्तस्य सदाऽन्यतः ॥ ३ ॥ अस्राक्षीद्भगवान्विश्वं गुणमय्याऽऽत्ममायया ॥ तया संस्थापयत्येतद्भूयः प्रत्यभिधास्यति ॥ ४ ॥ देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः ॥ अविलुप्तावबोधात्मा स युज्येताऽजया कथम् ॥ ५ ॥ भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः ॥ अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ ६ ॥ एतस्मिन्मे मनो विद्वन्खिद्यते ज्ञानसंकटे ॥ तन्नः पराणुद विभो कश्मलं मानसं महत् ॥७॥ श्रीशुक उवाच ॥ स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः ॥ प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ॥८॥

अजया अविद्यया कथं युज्येत तत्र दीपप्रभाया इव देशतो लोपो नास्ति सर्वगतत्वात् विद्युत इव न कालतो नित्यत्वात् स्मृतिवन्नावस्थातः अविक्रियत्वात् स्वप्नवन्न स्वतः सत्यत्वात् घटादिवन्नान्यतः अद्वितीयत्वात् । अजा चात्राविद्यैव नतु माया तस्या अवबोधेन विरोधाभावात् ॥ ५ ॥ ब्रह्मरूपत्वादेव जीवस्य संसारोऽपि न घटत इत्याह—भगवानिति ॥ सर्वेषु क्षेत्रेषु शरीरेष्ववस्थित एष भोक्ताऽपि वस्तुतः एको भगवानेव चिद्रूपेण तद्व्यतिरेकाभावात् एवं सत्यमुष्य जीवस्य दुर्भगत्वमानन्दादिभ्रंशः कर्मभिर्हेतुभूतैः क्लेशो वा कुतः तस्य कर्मसंबन्धासम्भवात् । अन्यथा ईश्वरस्यापि तत्प्रसङ्गः स्यात् ॥ ६ ॥ एतस्मिन्निति ॥ हे विभो हे विद्वन् एतस्मिन्नज्ञानरूपे सङ्कटे दुर्गे मम मनः खिद्यते अतः नोऽस्माकं तन्महत् मानसं कश्मलं खेदं त्वं पराणुद अपाकुरु । “ अस्मदो द्वयोश्च ” इति बहुवचनम् ॥ ७ ॥ स इत्थमिति ॥ स मुनिर्मैत्रेयः इत्थं तत्वजिज्ञासुना क्षत्त्रा चोदितः पृष्टः स्मयन्निव प्रौढिमाविष्कुर्वन्निव शता आर्षः । वस्तुतः भगवच्चित्तः अत एव गतस्मयः आश्चर्यरहित एव प्रत्याह स्म ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेयमिति ॥ ईश्वरस्य कथं कार्पण्यमैश्वर्यभ्रंशाद्दैन्यम् । नित्यं विमुक्तस्य च कथं बन्धनमित्यादि नयेन त्वदुक्ततर्केण यद्विरुध्यते सेयमेव भगवतोऽचिन्त्यशक्तेर्माया ॥९॥ दृष्टान्तमाह—यदिति ॥ यत् यथा अर्थेन स्वशिरश्छेदादिना विनाऽपि उपद्रष्टुः स्वप्नदर्शिनो ममेदं शिरश्छिन्नमित्यात्मविपर्ययः केवलं मृषैव प्रतीयते तद्वदमुष्य पुंसो जीवस्याप्यन्तःकरणदेहेन्द्रियादिगताः सुखदुःखादयो धर्मास्तत्तदध्यासेन स्वस्मिन् प्रतीयन्ते ॥ १० ॥ ईश्वरस्य तु न तथेत्याह—यथेति ॥ यथा जले प्रतिबिम्बितस्यैव चन्द्रमसस्तत्कृतो जलोपाधिकृतः कम्पादिर्गुणः धर्मो दृश्यते न त्वाकाशे स्थितस्य चन्द्रस्य तथा अनात्मनो देहेन्द्रियादेर्गुणः सुखदुःखादिधर्म आत्मन्यसन्न विद्यमानोऽपि द्रष्टुरात्मनः देहाद्यभिमानिनो जीवस्यैव भवितुमर्हति नतु भगवतः ॥ ११ ॥ स वै इति ॥ सः अनात्मनो गुणः निवृत्तिधर्मेण जातया वासुदेवस्य अनुकम्पया तया च जातेन भगवतो भक्तियोगेन शनैः इहैव जन्मनि तिरोधत्ते शनैरिति साधनानुसारेणेत्युक्तम् ॥ १२ ॥ तर्हि सर्वानर्थनिवृत्तिः कदेत्यत आह—यदेति ॥ यदा द्रष्टुर्जीवस्यात्मनि परे हरौ अन्तर्यामिणि इन्द्रि-

मैत्रेय उवाच ॥ सेयं भगवतो माया यन्नयेन विरुध्यते ॥ ईश्वरस्य विमुक्तस्य कार्पण्यमुत बन्धनम् ॥ ९ ॥ यदर्थेन विनाऽमुष्य पुंस आत्मविपर्ययः ॥ प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः ॥ १० ॥ यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः ॥ दृश्यतेऽसन्नपि द्रष्टुरात्मनो नात्मनो गुणः ॥११॥ स वै निवृत्तिधर्मेण वासुदेवाऽनुकम्पया ॥ भगवद्भक्तियोगेन तिरोधत्ते शनैरिह ॥ १२ ॥ यदेन्द्रियोपरामोऽथ द्रष्ट्रात्मनि परे हरौ ॥ विलीयन्ते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः ॥ १३ ॥ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः ॥ कुतः पुनस्तच्चरणारविन्दपरागसेवारतिरात्मलब्धा ॥ १४ ॥ विदुर उवाच ॥ संछिन्नः संशयो मह्यं तव सूक्तासिना विभो ॥ उभयत्राऽपि भगवन्मनो मे संप्रधावति ॥ १५ ॥ साध्वेतद्व्याहृतं विद्वन्नात्ममायाऽयनं हरेः ॥ आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः ॥ १६ ॥

याणामुपरामो नैश्चल्यं भवति अथानन्तरमेव तदा संसुप्तस्येव कृत्स्नशः सर्वे क्लेशाः विलीयन्ते परंतु संसुप्तस्य पुनरुत्थाने क्लेशा भवन्ति । भक्तस्य तु पुनः कदापि ते न भवन्तीति विशेषः ॥ १३ ॥ अशेषेति ॥ मुरारेर्गुणानामनुवादः कीर्त्तनं श्रवणं चेत्येतदुभयमेवाशेषसंक्लेशानां शमं विधत्ते तर्हि आत्मनि अन्तःकरणे लब्धा जाता तस्य भगवतश्चरणारविन्दयोः परागस्तस्य सेवायां रतिः प्रीतिरशेषसंक्लेशशमं विधत्त इति कुतः पुनर्वक्तव्यम् ॥ १४ ॥ संछिन्न इति ॥ हे विभो हे भगवन् चिद्रूपत्वाविशेषेऽपि कथमीश्वरस्य जगत्स्रष्टृत्वादि कथं वा जीवस्य संसारः अविकारिणः कथं क्रियाः निर्गुणस्य कथं गुणसंबन्ध इत्यादिः यो मह्यं मां मोहयितुं संशय आसीत् स तव सूक्तं सोपपत्तिकं वाक्यमेवासिः खड्गस्तेन संछिन्नः अत इदानीं मे मन उभयत्रापि भगवतः स्वातन्त्र्ये जीवस्य पारतन्त्र्ये च संप्रधावति सम्यक् निःसंदिग्धं प्रवर्तते । यद्वा । अविलुप्तबोधस्य कथमविद्यासङ्गः कुतो वा तन्निवृत्तिरिति संशयः । उभयत्र बन्धे मोक्षे च ॥ १५ ॥ साध्विति ॥ हे विद्वन् हरेः शक्तिर्या आत्मनो जीवस्य व्यामोहिका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माया अविद्या तदयनं तदाश्रितमत एव निर्मूलं देहाद्यात्माध्यासमूलम् अत एवापार्थमवस्तुभूतमेवैतत् सुखदुःखादिकमाभाति । यत् यस्मात् विश्वस्य मूलं कारणं स्वाज्ञानं विना बहिर्विचारमार्गे नास्ति इत्येतद्भवता व्याहृतं तत्साधु सम्यक् ॥१६॥ अल्पज्ञत्वात्पूर्वं मम संशयो जात इत्याह—यश्चेति ॥ लोके संसारे यश्च जनो मूढतमो देहाद्यासक्तः यश्च बुद्धेः प्रकृतेः परं भगवन्तं गतः प्राप्तस्तौ उभावपि सुखं यथा भवति तथा एधेते जीवत इत्यर्थः । संशयक्लेशाभावात् यस्त्वन्तरितस्तन्मध्यस्थः अल्पज्ञः दुःखानुसन्धानेन प्रपञ्चं जिहासति स्वानन्दानुभवाभावाद्धातुं च न शक्नोति स नानाविधसंशयेन क्लिश्यति ॥ १७ ॥ अर्थेति ॥ बाधितस्यापि संस्कारादनुवृत्त्या आत्मनि प्रतीतस्यापि नात्मनः अनात्मप्रपञ्चस्य अर्थाभावं सत्यत्वाभावं नास्त्यत्रार्थः किन्तु प्रतीतिमात्रमिति निश्चित्य युष्मच्चरणसेवया तां प्रतीतिं चाप्यहं पराणुदे अपनेष्यामि ॥ १८ ॥ यत्सेवयेति ॥ येषां युष्माकं सेवया कूटस्थस्य निर्विकारस्य मधुद्विषो भगवतः पादयोः तीव्रः विघ्नानुपहतः व्यसनार्दनः तापत्रयनिवर्त्तकः रतिरासः प्रेमोल्लासो भवेत् ॥ १९ ॥ दुरापेति ॥ हि प्रसिद्धौ । अल्पं तपो यस्य तस्य पुंसो वैकुण्ठस्य भगवतः वर्त्मसु मार्गभूतेषु भवत्सु सेवा दुरापा । यत्र येषु भवत्सु देवदेवो जनार्दनः भगवान् नित्यं निरन्तरमु-

यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ॥ तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥१७॥ अर्थाऽभावं विनिश्चित्य प्रतीतस्यापि नात्मनः ॥
तां चापि युष्मच्चरणसेवयाऽहं पराणुदे ॥ १८ ॥ यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ॥ रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः ॥ १९ ॥
दुरापा ह्यल्पतपसः सेवा वैकुण्ठवर्त्मसु ॥ यत्रोपगीयते नित्यं देवदेवो जनार्दनः ॥ २० ॥ सृष्ट्वाऽग्रे महदादीनि सविकाराण्यनुक्रमात् ॥ तेभ्यो
विराजमुद्धृत्य तमनुप्राविशद्विभुः ॥ २१ ॥ यमाहुराद्यं पुरुषं सहस्राङ्घ्र्यूरुबाहुकम् ॥ यत्र विश्व इमे लोकाः सविकाशं समासते ॥ २२ ॥
यस्मिन्दशविधः प्राणः सेन्द्रियार्थेन्द्रियस्त्रिवृत् ॥ त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः ॥ २३ ॥

पगीयते महत्सेवया हरिकथाश्रवणं ततो हरौ प्रेम तेन च देहानुसन्धानमपि निवर्त्तत इति तात्पर्यम् ॥ २० ॥ सृष्ट्वेति ॥ विभुर्भगवान् विकारैरिन्द्रियादिभिः सहितानीति सविकाराणि महदादीनि अग्रे सृष्टेः पूर्वमनुक्रमात् सृष्ट्वा तेभ्यो महदादिभ्यो विराजमुद्धृत्य तदंशैः उत्पाद्य तं विराजमनुप्राविशत् ॥ २१ ॥ यमिति ॥ यं प्रविष्टमाद्यं सर्वकारणकारणं पुरुषं सहस्राङ्घ्र्यूरुबाहुकं श्रुतय आहुः । यत्र च विराजि इमे दृश्यमानाः विश्वे सर्वे चतुर्दश लोकाः सजीवाः सविकाशमसंकोचेन समासते यथासुखं तिष्ठन्ति ॥ २२ ॥ यस्मिन्निति ॥ यस्मिन्विराजि प्राणादयः पञ्च नागादयश्च पञ्चेत्येवं दशविधः प्राणः इन्द्रियाणि च अर्थाश्च शब्दादयो विषयाः इन्द्रियाणि चेति पुनरुक्तिस्तद्देवतोपलक्षणार्था । यद्वा । इन्द्रियार्था विषया इन्द्रियाणि च उपलक्षणतया देवता अपि तत्सहितस्त्रिवृत् त्रिगुणात्मकः सर्वोऽपि प्रपञ्चस्त्वयेरितो वर्णितः । तथा यत एव वर्णा ब्राह्मणादयो जाता इति त्वयेरितं तस्य वैराजस्य विभूतीर्विसर्गशब्दवाच्याः ब्रह्मादिरूपाः नोऽस्मभ्यं वदस्व यत्नेन वर्णय । भासनेति तङ् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रेति ॥ यत्र यासु विभूतिषु पुत्रैः पौत्रैर्नप्तृभिः दौहित्रैः गोत्रजैश्च सह विचित्राकृतयः नानाविधदेहाः प्रजा आसन् याभिरिदं विश्वं ततं व्याप्तं ताः वदेति ॥ २४ ॥ द्वितीयस्कन्धे परीक्षिता पृष्टानेवार्थानेकजातीयहृदयतया विदुरोऽपि पृच्छति—प्रजापतीनामिति सार्द्धम्॥ स प्रसिद्धः प्रजापतीनां पतिर्ब्रह्माकान् प्रजापतीन् चक्लृपे कल्पितवान् । एवं सर्गान् प्राकृतसर्गान्नवविधान् अनुसर्गांस्तद्भेदान् मनून्स्वायंभुवादीन् मन्वन्तराधिपान् तत्तन्मन्वन्तरपालकान् राज्ञश्च यान् चक्लृपे तान् वर्णयेत्यपकर्षः । तेषां मन्वन्तराधिपानामपिये वंशास्तांश्च वंश्यानामनुचरितानि च वर्णयेति ॥ २५ ॥ उपरीति ॥ हे मित्राया आत्मज भूमेरुपरिष्टात् अधस्ताच्च ये लोका आसते तांश्च तेषां लोकानां संस्थामवयवविन्यासं प्रमाणं परिमाणं भूर्लोकस्य संस्थां परिमाणं च वर्णय ॥ २६ ॥ तिर्यगिति ॥ तिरश्चां पश्वादीनां मानुषाणां देवानां सरीसृपाणां सर्पादीनां पतत्रिणां पक्षिणां गार्भा जरायुजाः स्वेदाच्च द्वाभ्यां च जाताः स्वेदद्विजाः तत्र स्वेदजाः यूकामत्कुणादयः द्विजाः पक्षिणः उद्भिदस्तरुगुल्माद्यास्तेषां सर्गसंव्यूहं सर्गविभागं नोऽस्मभ्यं

यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः ॥ प्रजा विचित्राकृतय आसन्याभिरिदं ततम् ॥ २४ ॥ प्रजापतीनां स पतिश्चक्लृपे कान्प्रजापतीन् ॥ सर्गांश्चैवानुसर्गांश्च मनून् मन्वन्तराधिपान् ॥ एतेषामपि वंशांश्च वंश्यानुचरितानि च ॥ २५ ॥ उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते ॥ तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय ॥ २६ ॥ तिर्यङ्मानुषदेवानां सरीसृपपतत्त्रिणाम् ॥ वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदाम् ॥ २७ ॥ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम् ॥ सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमम् ॥ २८ ॥ वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ॥ ऋषीणां जन्मकर्मादि वेदस्य च विकर्षणम् ॥ २९ ॥ यज्ञस्य च वितानानि योगस्य च पथः प्रभो ॥ नैष्कर्म्यस्य च साङ्ख्यस्य तन्त्रं वा भगवत्स्मृतम् ॥ ३० ॥ पाखण्डपथवैषम्यं प्रतिलोमनिवेशनम् ॥ जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ॥ ३१ ॥

वद ॥२७॥ गुणेति ॥ रजआदिगुणावतारैर्ब्रह्मविष्णुरुद्रादिस्वरूपैर्विश्वस्य सर्गस्थित्यप्ययान् तेषामाश्रयमाधारं च सृजतः श्रीनिवासस्य हरेः उदारं श्रेष्ठं विक्रमं व्याचक्ष्ववर्णय ॥ २८ ॥ वर्णेति ॥ रूपं लिङ्गं शीलमाचारः स्वभावः शमादिः ततः तैर्वर्णानामाश्रमाणां च विभागान् आख्याहीति सप्तमेनान्वयः । ऋषीणां जन्मकर्मादिकं वेदस्य विकर्षणं विभागं च आख्याहि ॥ २९ ॥ यज्ञस्येति ॥ हे प्रभो यज्ञस्य वितानानि विस्तारान् योगस्याष्टाङ्गस्य च पथो मार्गान् नैष्कर्म्यस्य ज्ञानस्य तदुपायस्य च साङ्ख्यशास्त्रस्य च मार्गान् वाकारश्चकारार्थकः । भगवता स्मृतं तन्त्रं पाञ्चरात्रोक्तमर्थं च आख्याहि ॥ ३० ॥ पाखण्डेति ॥ पाखण्डानां पन्थाः प्रवृत्तिस्तदेव वैषम्यं पाखण्डमार्गाद्वैषम्यं वा प्रतिलोमानां चण्डालादीनां निवेशनं वर्णेषु उत्पत्तिः जीवस्य सत्त्वादिगुणप्रयुक्तकर्मजा गतयः कर्मफलानि यावतीः यावत्सङ्ख्याकाः याश्च यादृश्यश्च ताः आख्याहि । यावतीरिति पूर्वसवर्णदीर्घ आर्षः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मेति ॥ अविरोधतः परस्परमविरोधेन धर्मार्थकाममोक्षाणां निमित्तानि उपायान् वार्तायाः कृष्यादिव्यापारस्य दण्डनीतेः अर्थशास्त्रस्य श्रुतस्य वेदविहितस्य कर्मणः पृथक् पृथक् विधिं प्रकारम् आख्याहि ॥३२॥ श्राद्धस्येति ॥ हे ब्रह्मन् श्राद्धस्य च विधिं पितॄणामर्यमादीनां च सर्गं ग्रहाः सूर्यादयो नव नक्षत्राणि आश्विन्यादीनि सप्तविंशतिः तारास्तदितरताराः तेषां कालावयवे ज्योतिश्चक्रे संस्थितिम् आख्याहि ॥३३॥ दानस्येति ॥ दानस्य तपसः कृच्छ्रादेश्च इष्टं यज्ञादि पूर्त्तं वापीकूपादि तयोश्च यत्फलं प्रवासस्थस्य देशान्तरगतस्य योऽनुष्ठेयो धर्मः उत अपि यश्चापि पुंसः आपदि विपद्यनुष्ठेयो धर्मः तमाख्याहि ॥ ३४ ॥ मुख्यं प्रश्नमाह—येनेति ॥ वाशब्दः अन्येषां प्रश्नानां गौणत्वार्थः । हे अनघ येन वा धर्मेण धर्मस्य योनिः प्रवर्त्तकः जनार्दनः भगवान् तुष्येत् येषां यादृशानां वा भगवान् प्रसीदति एतत्सर्वं मे मह्यमाख्याहि ॥ ३५ ॥ अथ वा मम श्रेयस्करमपृष्टमपि भवतैव कथ्यतामित्याह—अनुव्रतानामिति ॥ हे द्विजोत्तम दीनवत्सलाः गुरवः पितरश्च अनुव्रतानां शिष्याणां पुत्राणां चेति चतुर्थ्यर्थे षष्ठ्यः । अनापृष्टमपि ब्रूयुः

धर्मार्थकाममोक्षाणां निमित्तान्यऽविरोधतः ॥ वार्ताया दण्डनीतेश्च श्रुतस्य च विधिं पृथक् ॥ ३२ ॥ श्राद्धस्य च विधिं ब्रह्मन्पितॄणां सर्गमेव च ॥
ग्रहनक्षत्रताराणां कालावयवसंस्थितिम् ॥३३॥ दानस्य तपसो वाऽपि यच्चेष्टापूर्तयोः फलम्॥ प्रवासस्थस्य यो धर्मो यश्च पुंस उताऽपदि॥३४॥
येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः ॥ संप्रसीदति वा येषामेतदाख्याहि चाऽनघ ॥३५॥ अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम ॥ अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ॥३६॥ तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः ॥ तत्रेमं क उपासीरन्क उ स्विदनुशेरते ॥ ३७॥ पुरुषस्य
च संस्थानं स्वरूपं वा परस्य च ॥ ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनम् ॥ ३८ ॥ निमित्तानि च तस्येह प्रोक्तान्यनघ सूरिभिः ॥ स्वतो
ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा ॥ ३९ ॥ एतान्मे पृच्छतः प्रश्नान्हरेः कर्मविवित्सया ॥ ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः ॥ ४० ॥

॥ ३६ ॥ तत्वानामिति ॥ हे भगवन् तेषां तत्वानां पृथिव्यादीनां प्रतिसंक्रमः प्रलयः कतिधा भवति । तत्र प्रलये एनं भगवन्तं क उपासिरन् । अनुपसंहृताः सन्तश्चामरव्यजनादिना प्रसुप्तं राजानमिव सेवन्ते के । उ स्वित् के वाप्यनुशेरते शयानं भगवन्तमनुस्वपन्ति तेन भगवत्पार्षदादीनां तद्भक्तेस्तल्लोकस्य च नित्यत्वमभिप्रेतम् । " न च्यवन्ते च यद्भक्ता महत्यां प्रलयापदि । " इति प्रसिद्धं काशीखण्डवचनम् ॥ ३७ ॥ पुरुषस्येति ॥ पुरुषस्य जीवस्य संस्थानं तत्त्वं परस्य परमेश्वरस्य वा स्वरूपं यत्प्रसिद्धं गुरुशिष्ययोः प्रयोजनं नैगममौपनिषदं ज्ञानं तच्च वद ॥ ३८ ॥ निमित्तानीति ॥ हे अनघ सूरिशब्देन समासो वा । तस्य ज्ञानस्य च यानि निमित्तानि साधनानि सूरिभिर्विद्वद्भिः प्रोक्तानि तानि च वद । गुरुं विना एतन्न भवतीत्याह स्वत इति । स्वतो गुरूपदेशमन्तरेण पुंसां ज्ञानं भगवद्भक्तिर्विषयवैराग्यं च कुतः स्यात् ॥ ३९ ॥ एतानिति ॥ हरेः कर्मणां विवित्सया ज्ञानलाभेच्छया " विद्लृ लाभे " पृच्छतः अजया अविद्यया नष्टचक्षुषः अतः अज्ञस्य मे मम एतान् प्रश्नान् मे मह्यं मामुद्धर्तुं मित्रत्वाद्धितकृत्त्वाद् ब्रू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि । विभक्तिभेदान्मेशब्दस्य न पौनरुक्त्यम् ॥ ४० ॥ तवाप्येतेन पुण्यं भविष्यतीत्याह—सर्वे इति ॥ हे अनघ सर्वे वेदादयः तत्वोपदेशेन जीवाभयप्रदानस्य कलां लेशतुल्य-फलतामपि न कुर्वीरन् ॥ ४१ ॥ स इति ॥ पुराणे कल्पते प्रकाशत इति पुराणकल्पो बुभुत्सितोऽर्थः आपृष्टः पुराणकल्पोऽयम् । यद्वा । पुराणेषु कल्पते समर्थो भवति सः आपृष्टश्चासौ पुराणकल्पश्चेति सः मुनिप्रधानो मैत्रेयः इत्थं कुरुप्रधानेन विदुरेण भगवत्कथायां संचोदितः अत एव प्रवृद्धो हर्षो यस्य सः अत एव प्रहसन्निवेति वस्तुतो हर्षो-त्थस्मितं कुर्वन् तं विदुरं प्रत्याह स्म ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयसप्तमे निरमादिमाम् ॥७॥ अष्टमे तु हरेर्नाभेर्जातो ब्रह्मा न तं विदन् ॥ तपसातोषयत्तत्र श्लोका दहनवह्नयः ॥ उवाचेत्येकं च सार्द्धा पञ्चवेदा अनुष्टुभः ॥ ८ ॥ सत्सेवनीय इति ॥ बत हर्षे पूरुवंशः सत्सेवनीयः सद्भिरुत्तमैरपि सेवितुं योग्यः । यत् यस्मात् इह पूरुवंशे भगवानेव प्रधानो यस्य तथाभूतः लोकपालः यमस्त्वं बभूविथ जातोऽसि । यद्वा यद् यस्मिन् वंशे इह भगवत्प्रधानेष्वपि यस्त्वम् अजि-

सर्वे वेदाश्च यज्ञाश्च तपोदानानि चानघ ॥ जीवाभयप्रदानस्य न कुर्वीरन्कलामपि ॥ ४१ ॥ श्रीशुक उवाच ॥ स इत्थमापृष्टपुराणकल्पः कुरुप्र-धानेन मुनिप्रधानः ॥ प्रवृद्धहर्षो भगवत्कथायां संचोदितस्तं प्रहसन्निवाह ॥ ४२ ॥ ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे विदुरोक्तप्रश्न-विधिवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ मैत्रेय उवाच ॥ सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ॥ बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णम् ॥ १ ॥ सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य ॥ प्रवर्तये भागवतं पुराणं यदाऽऽह साक्षाद्भगवानृषि-भ्यः ॥ २ ॥ आसीनमुर्व्यां भगवन्तमाद्यं संकर्षणं देवमकुण्ठसत्त्वम् ॥ विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ॥३॥ स्वमेव धिष्ण्यं बहु मानयन्तं यं वासुदेवाभिधमामनन्ति ॥ प्रत्यग्धृताक्ष्यम्बुजकोशमीषदुन्मीलयन्तं विबुधोदयाय ॥ ४ ॥

तस्य हरेः कीर्तीनां मालां पङ्क्तिं पदे पदे क्षणे क्षणे अभीक्ष्णं पुनः पुनर्नूतनयसि प्रश्नेन नवीनां करोषीत्यर्थः ॥ १ ॥ त्वत्प्रश्नोत्तराणि श्रीभागवत एव लभ्यन्तेऽतस्तद्भागवि-शेषमेव श्रावयामीत्याह—सोऽहमिति ॥ स त्वया पृष्टोऽहं क्षुल्लसुखाय अल्पसुखार्थं महत् दुःखं गतानां प्राप्तानां नृणां तस्य दुःखस्य विरमाय निवृत्तये भागवतं पुराणं प्रवर्त्तये वर्णयामि । यत्पुराणं साक्षादेव भगवानृषिभ्य आह स्म । एतेन सुखाय कर्माणीत्यादिप्रश्नस्यापीदमेव युक्तमुत्तरमित्युक्तम् ॥२॥ आसीनमिति ॥ आद्यम् अकुण्ठसत्त्वम् अप्र-हतज्ञानम् उर्व्यां पातालभूमौ आसीनमुपविष्टं भगवन्तं संकर्षणं देवम् अतः संकर्षणात्परस्य वासुदेवस्य तत्त्वं याथात्म्यं विवित्सवो लब्धुमिच्छवः "विद्लृ लाभे" कुमारमुख्याः सनत्कुमाराद्या मुनयोऽन्वपृच्छन् ॥३॥ संकर्षणं विशिनष्टि—स्वमिति ॥ यं वासुदेवाभिधमामनन्ति ऋषयो वर्णयन्ति तं स्वधिष्ण्यमाश्रयं भगवन्तं वासुदेवमेव बहु मानयन्तं ध्या-नेऽनुभूयमानं बहुपूजयन्तं प्रत्यगात्मनि वासुदेवे धृतम् अन्तर्मुखीकृतम् अक्ष्यम्बुजकोशं नेत्राम्बुजमुकुलं कृपावलोकनेन विबुधानां सनत्कुमारादीनामुदयाय अभ्युदयार्थम् ईषत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचिदुन्मीलयन्तं तमन्वपृच्छन्नित्यनुषङ्गः ॥ ४ ॥ मुनीन् विशिनष्टि—स्वर्द्धुनीति सार्द्धेन ॥ वरार्थाः पतिकामाः सत्योऽहिराजकन्याः सप्रेम यथा भवति तथा नानाविधैर्बलिभिः यत्पद्ममर्चन्ति तत् संकर्षणस्य चरणौ उपधीयेते यस्मिंस्तच्चरणोपधानं पद्मं स्वर्द्धुन्याः गङ्गाया उदैरुदकैरार्द्रैः स्वजटाकलापैः जटासमूहैः उपस्पृशन्तः नमस्कुर्वन्तः तानि संकर्षणकर्माणि जानन्ति तज्ज्ञाः अतः अस्य संकर्षणस्य कृतानि कर्माणि अनुरागेण प्रेमातिशयेन स्खलन्ति पदानि यस्मिंस्तेन वचसा मुहुः पुनः पुनर्गृणन्तो गायन्तः अन्वपृच्छन् स्वर्द्धुन्युदार्द्रैरिति श्रीभागवतश्रवणार्थं सत्यलोकात्पातालमवतरन्तो गङ्गामध्यत एवातीर्णाः इति भावः ॥ ५ ॥ पुनः संकर्षणं विशिनष्टि—किरीटेत्यर्द्धेन ॥ किरीटानां सहस्रमेव साहस्रं तस्मिन् मणिप्रवेकाः मण्युत्तमास्तैः प्रद्योतितमुद्दाममुत्तमं फणानां सहस्रं यस्य तं संकर्षणमपृच्छन् । सेयं चतुःश्लोकी संकीर्णतया एकान्वयापि क्लेशभयात्त्रैवैः पृथग्वाक्यैर्व्याख्याता । यद्वा । आसीनमिति पद्ये अन्वपृच्छन् भगवतो ध्यानावस्थामवीक्ष्यैव जिज्ञासौत्कण्ठ्यात्प्रणम्यैवानु पश्चात् भगवन् भवतः परं तत्वं कथ्यतामित्यपृच्छन् । ततः स्वमेवेति ध्यानावस्थितं स्वागमनादुन्मीलिताक्षं च दृष्ट्वा फणोन्नमनेन श्रवणोन्मुखं च ज्ञात्वा मूर्ध्ना चरणोपधानपद्मं स्पृशन्तः गृणन्तश्च भगवद्वचनं प्रतीक्षमाणा-

स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशन्तश्चरणोपधानम् ॥ पद्मं यदर्चन्त्यहिराजकन्याः सप्रेमनानाबलिभिर्वरार्थाः ॥ मुहुर्गृणन्तो वचसाऽनुरागस्खलत्पदेनाऽस्य कृतानि तज्ज्ञाः ॥ ५ ॥ किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रम् ॥ ६ ॥ प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन ॥ सनत्कुमाराय स चाह पृष्टः सांख्यायनायाऽङ्ग धृतव्रताय ॥ ७ ॥ सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः ॥जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाऽथ बृहस्पतेश्च ॥ ८ ॥ प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम् ॥ सोहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ॥ ९ ॥

स्तस्थुरिति वाक्यद्वयात्मना व्याख्येयम् ॥ ६ ॥ प्रोक्तमिति ॥ अङ्ग हे विदुर एतत् श्रीभागवतं किल तेन भगवत्तमेन स्वार्थे तमप् । यद्वा । भगवत्सु ज्ञानिषु श्रेष्ठेन संकर्षणेन निवृत्तिधर्माभिरताय सनत्कुमाराय प्रोक्तम् एकवचनं संघातार्थम् । पूर्वं बहुत्वोक्तेः स च सनत्कुमारः पृष्टः सन् धृतव्रताय सांख्यायनाय आह स्म ॥ ७ ॥ साङ्ख्यायन इति ॥ पारमहंस्ये धर्मे मुख्यः साङ्ख्यायनो भगवद्विभूतीर्विवक्षमाणः वक्तुमिच्छुः ब्रूञादेशस्य वचेरुभयपदित्वात्सन्नन्ताच्छानच् । अन्विताय अनुगताय अस्मद्गुरवे पराशराय बृहस्पतेः बृहस्पतये चैतज्जगाद ॥ ८ ॥ प्रोवाचेति ॥ पुलस्त्येनोक्तो दत्तवरः दयालुः स मुनिः पराशरः आद्यं मुख्यमेतत्पुराणं मह्यं प्रोवाच । हे वत्स स उपदिष्टपुराणोऽहं श्रद्धालवे नित्यमनुव्रताय तव तुभ्यम् एतत्पुराणं कथयामि तवेति षष्ठ्यन्तस्य चतुर्थ्यन्ते विशेषणे आर्षे । सोऽहन्त एतदिति वा पाठो भवेत् । पुलस्त्यवरकथा त्वेवम् । शक्तिनामानं स्वपितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तो वसिष्ठवचनान्निवृत्तस्ततः पुलस्त्येन स्वसंततिरक्षणात्तुष्टेन वरो दत्तः पुराणप्रवक्ता भविष्यसीति ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं पाताले संकर्षणात् भूमौ पराशरात् स्वर्गे बृहस्पतेः तदुपरि सनत्कुमारादिभ्यः सर्वत्र श्रीभागवतसंप्रदायवृत्तिं प्रदर्श्य विभूतिकथनाय पद्मोद्भवं वक्तुमाह—उदाप्लुतमिति ॥ यत् यदा नैमित्तिकप्रलये अमीलितदृक् अतिरोहितचिच्छक्तिरेव अहीन्द्रतल्पे शेषशय्यायामेकः गर्भोदकेऽधिशयानो नारायणः तल्पे इत्यार्षम् । "अधिशीङ्" इति कर्मत्वात् । यद्वा "अधिपरी अनर्थकौ" इत्यनेनोपसर्गत्वबाधात् शीङ योगाभावात् न कर्मत्वम् । स्वात्मरतौ मायाविनोदं परित्यज्य स्वरूपानन्दरमणे कृतक्षणः संपादितावसरः अत एव निरीहः त्यक्तसृष्ट्यादिविनोदः सन् योगनिद्रया नेत्रे न्यमीलयत् निमीलितवांस्तदा इदं विश्वमुदाप्लुतमेकार्णवोदके निमग्नमासीत् ॥ १० ॥ सोऽन्तरिति ॥ स श्रीनारायणः कालात्मिकां स्वशक्तिमुदीरयाणः प्रेरयन् मुगभाव आर्षः । तेन च सर्वस्थूलशरीरनाशात् अन्तःशरीरे शरीरमध्य एव अर्पितानि निहितानि भूतसूक्ष्माणि त्रैलोक्यगतदेवमनुष्यादिसूक्ष्मशरीराणि येन तादृशः सन् यथा दारुणि काष्ठे रुद्धवीर्यः निरुद्धदाहशक्तिः अनलोऽग्निर्वसति तथा स्वे स्वकीये पदे स्थाने तस्मिन् सलिले स्वेच्छया निरुद्धसृष्ट्यादिसामर्थ्य एव सन् जलस्तम्भनशक्त्या उवास । कालशक्तेः प्रेरणं पुनः सृष्टिसमये प्रबोधार्थमिति श्रीस्वामिपादाः । तदपि अग्रिमश्लोकानुकूलम् । भगवच्छरीरान्तर्गत-

उदाप्लुतं विश्वमिदं तदाऽऽसीद्यन्निद्रयाऽमीलितदृग् न्यमीलयत् ॥ अहीन्द्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः ॥१०॥
सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः ॥ उवास तस्मिन्सलिले पदे स्वे यथाऽनलो दारुणि रुद्धवीर्यः ॥ ११ ॥
चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या ॥ कालाख्ययासादितकर्मतन्त्रो लोकानपीतान्ददृशे स्वदेहे ॥१२॥ तस्याऽर्थ-
सूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् ॥ गुणेन कालानुगतेन विद्धः सूष्यंस्तदाऽभिद्यत नाभिदेशात् ॥१३॥ स पद्मकोशः
सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन ॥ स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ॥ १४ ॥

लिङ्गशरीरसमूह एव समष्टिलिङ्गशरीरम् ॥ ११ ॥ चतुर्युगानामिति ॥ एवं चतुर्युगानां समास आर्षः । सहस्रं ब्रह्मणो निशापर्यन्तं स्वया चिच्छक्त्या सहाप्सु जाग्रदपि योगमायाशक्त्या स्वपन् ततश्च पूर्वमेव प्रबोधनार्थम् उदीरितया स्वेन प्रेरितया कालाख्यया स्वशक्त्या आसादितम् उद्बोधितं कर्मतन्त्रं जीवभोगप्रदः क्रियाकलापः येन तादृक् सन् स्वदेहे एवापीतान् सूक्ष्मरूपेण लीनान् लोकान् प्राणिसहितान् स्वशरीरान्निष्क्रमयितुं ददृशे ददर्श । तङार्षः ॥१२॥ तस्येति ॥ लोकसृष्ट्यर्थमर्थसूक्ष्मेषु सर्वजीवलिङ्गदेहेषु अभिनिविष्टा निष्कासनेच्छया प्रविष्टा दृष्टिर्यस्य तस्य नारायणस्य अन्तर्गतस्तनीयान् सूक्ष्मतरः अर्थः प्राकृतपदार्थविशेषः कालानुगतेन कालवशादुद्बुद्धेन रजसा गुणेन विद्धः संक्षोभितस्तदा सूष्यन् प्रसवं प्राप्नुवन् गुणाभावः शता चार्षः इडभावस्तु वेङ्क्त्वात् । तस्य नाभिदेशात् अभिद्यत नाभिं भित्त्वा निर्गतः॥१३॥स इति ॥ सः आत्मा परमात्मा श्रीनारायणः योनिः कारणं यस्य तथाभूतः सः अर्थसूक्ष्मः पद्मकोशरूपः सन् स्वरोचिषा तत्प्रलयकालिकं विशालं सलिलमर्क इव विद्योतयन् कर्म जीवादृष्टं प्रतिबोध्यते येनेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाभूतेन कालेन सहसा झटित्येव उदतिष्ठत् प्रलयमहार्णवजलादप्युपरि तस्थौ ॥ १४ ॥ तदिति ॥ उ विस्मये । सर्वान् गुणान् जीवभोग्यान् स्वर्गनरकादीन् अवभासयतीति तथाभूतं तल्लोकात्मकं पद्मं स एव विष्णुः प्रावीविशत् स्वार्थे णिच् । अयं भावः । प्रलयारम्भे यस्योदरमेव वैराजः सूक्ष्मरूपेण प्राविशत् प्रलयान्ते च ततः पद्मरूपेणाविर्भूतं वैराजं गर्भोदशायी स एव विष्णुः प्रकर्षेणालुप्तशक्तिरेव अन्तर्यामितया प्रविष्टोऽभूत् । तस्मिन्भगवत्प्रविष्टे पद्मे स्वयं वेदमयः स्वत एव नत्वध्यापनाद्वेदप्रचुरो विधाता ब्रह्माभूत् । तं विशिनष्टि । अदृष्टपितृत्वेन यं स्वयंभुवं लोका वदन्ति स्म । स इति यः प्राक्कल्पान्ते नारायणेन सह निद्रयैकीभूत आसीत् तस्मिंश्च प्रबुद्धे तत एव पाद्मे कल्पे पद्मद्वारेणाभिव्यक्तिं प्राप्तः अत्र स्थूलो वैराजः सूक्ष्मो हिरण्यगर्भः सृष्ट्यादिकर्ता चतुर्मुख इति ब्रह्मण एव त्रैरूप्यं ज्ञेयम् ॥ १५ ॥ तस्यामिति ॥ स च स्वयंभूः तस्यामम्भोरुहकर्णिकायामवस्थित एव लोकमपश्यमानः शानजार्षः । तद्दर्शनार्थं युगपदेव दिक्चतुष्टये व्योम्नि निर्जनत्वादाकाशमात्रे विवृत्तनेत्रः प्रक्षिप्तदृष्टिः परिक्रमन् चतसृषु दिक्षु ग्रीवां चालयन् क्रमेर्दीर्घाभाव आर्षः । अनुदिशं चतुर्षु दिक्षु चत्वारि मुखानि लेभे ॥ १६ ॥ श्रीनारायणप्राप्तशक्तेरेव तस्य सृष्टृत्वादिकं न स्वत इति वक्तुं ब्रह्मणो विमोहमाह—तस्मादिति ॥

तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् ॥ तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदन्ति सोऽभूत् ॥ १५ ॥ तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः ॥ परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥ १६ ॥ तस्माद्युगान्तश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढम् ॥ उपाश्रितः कञ्जमु लोकतत्त्वं नात्मानमद्धाऽविददादिदेवः ॥ १७ ॥ क एष योऽसावहमब्जपृष्ठ एतत्कुतो वाऽब्जमनन्यदप्सु ॥ अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता नु भाव्यम् ॥ १८ ॥ स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरन्तर्जलमाविवेश ॥ नार्वाग्गतस्तत्खरनालनालनाभिं विचिन्वंस्तदविन्दताऽजः ॥ १९ ॥

युगान्ते प्रलये यः श्वसनो वायुस्तेनावघूर्णितं प्रकम्पितं यज्जलं ततः उत्पन्ना ये ऊर्मयस्तेषां चक्रं समूहो यस्मिंस्तादृशात् सलिलाद्विशेषेण रूढं कञ्जं कमलमुपाश्रितः अधिष्ठित आदिदेवोऽपि ब्रह्मा लोकतत्त्वं लोकात्मकपद्मतत्त्वमात्मानं चाद्धा तत्त्वेन नाविदन्न ज्ञातवान् शबलुगभाव आर्षः । विन्दतेर्वा कल्प्यम् ॥ १७ ॥ अविदुषस्तस्य वितर्कमाह—क इति ॥ अब्जपृष्ठे स्थितो योऽसावहमित्येषः कः अनन्यत् अद्वितीयमेतदब्जमप्सु कुतो वा जातमतो यत्राधिष्ठाने एतत्पद्ममधिष्ठितं तदधिष्ठानभूतं किंचन वस्तु अधस्तादस्ति । हि यस्मात् तेन सता नु विद्यमानेनैवाधिष्ठानेन भाव्यमवश्यं भवितव्यम् आवश्यके ण्यत् अन्यथाधिष्ठेयस्यासंभवादित्यर्थः । तथा च श्रुतिः । "सोऽपश्यत् पुष्करपर्णे तिष्ठन् सोऽमन्यत अस्ति वैतद्यस्मिन्निदमधितिष्ठति" इति ॥ १८ ॥ बहिर्मुखप्रवृत्त्या तदप्राप्तिमाह—स इति ॥ सः अजो ब्रह्मा इत्थमुद्वीक्ष्य विचार्य तस्याब्जस्य नालनाडीभिर्नालच्छिद्रैरन्तर्जलं जलस्य मध्ये आविवेश । एवं खरनालस्य कमलस्य यन्नालं तस्य नाभिमधिष्ठानं श्रीनारायणनाभिपद्मं विचिन्वन् अर्वाग्गतस्तन्निकटगतोऽपि नावि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्दत न लेभे ॥१९॥ तमसीति ॥ हे विदुर अपारे तमसि अन्धकारे आत्मसर्गम् आत्मस्रष्टारं विचिन्वतस्तस्य ब्रह्मणः महान् त्रिनेमिः तिस्रः त्रीणि चातुर्मास्यानि नेमयो यस्य सकालोऽभूत् अजस्य भगवतो हेतिः जगद्विनाशे शस्त्रविशेषः सुदर्शनांशरूपो वा यः कालः भयमीरयाण उत्पादयन् मुगभाव आर्षः। देहभाजां प्राणिनामायुः परिक्षिणोति क्षयं नयति । तेन संवत्सरशतमतिक्रान्तमित्याशयः ॥२०॥ अन्तर्मुखतया तु दृष्टवानित्याह–तत इति ॥ स देवो ब्रह्मा अप्रतिलब्धकामः अप्राप्ताधिष्ठानदर्शनरूपमनोरथ एव ततोऽन्वेषणात् निवृत्तः पुनः स्वधिष्ण्यं कमलकर्णिकारूपस्थानमासाद्य शनैः जिताः ये श्वासाः प्राणाः तैः निवृत्तं विषयविमुखीकृतं चित्तं येन सः आरूढ आश्रितः समाधिपर्यन्तो योगो येन तथाभूतः सन्यषीदत् उपविवेश ॥ २१॥ कालेनेति ॥ पुरुषायुषा संवत्सरशतात्मकेन कालेन अभिप्रवृत्तः सुनिष्पन्नो योगस्तेन विरूढ उत्पन्नो बोधो दिव्यज्ञानं यस्य सोऽजो ब्रह्मा यत्पूर्वं विचिन्वन्नपि नापश्यत तत्स्वकारणं भगवत्स्वरूपं स्वयमेवान्तर्हृदयेऽवभातमपश्यत । उभयत्र तङार्षः ॥२२॥ तद्वर्णयति–मृणालेति ॥ फणा एवातपत्राणि तैरायुताः सर्वतो युक्ताः ये मूर्द्धानस्तेषां रत्नानि किरीटस्थानि तेषां द्युभिः प्रभाभिर्हतं निरस्तं ध्वान्तमन्धकारं यस्मिंस्तस्मिन् युगान्ततोये स्थिते मृणालं पद्मतन्तुरुतदिव

तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत्सुमहांस्त्रिणेमिः ॥ यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः ॥ २० ॥ ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः॥ शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ॥ २१ ॥ कालेन सोजः पुरुषायुषाऽभिप्रवृत्तयोगेन विरूढबोधः ॥ स्वयं तदन्तर्हृदयेऽवभातमपश्यताऽपश्यत यन्न पूर्वम् ॥ २२ ॥ मृणालगौरायतशेषभोगपर्यङ्क एकं पुरुषं शयानम् ॥ फणातपत्रायुतमूर्द्धरत्नद्युभिर्हतध्वान्तयुगान्ततोये ॥ २३ ॥ प्रेक्षां क्षिपन्तं हरितोपलाद्रेः सन्ध्याभ्रनीवेरुरुरुक्ममूर्ध्नः ॥ रत्नोदधारौषधिसौमनस्यवनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः ॥ २४ ॥

गौरश्वासावायतश्च यः शेषस्य भोगो देहः स एव पर्यङ्कः तस्मिन् शयानमेकं पुरुषमपश्यत् ॥ २३ ॥ प्रेक्षामिति ॥ सन्ध्याभ्रं नीविः परिधानं यस्य उरुरुक्ममूर्ध्नः भूयिष्ठकनकशृङ्गस्य रत्नानामुदकधाराणामोषधीनां सौमनस्यानां पुष्पसमूहानां च वन्यानां स्रजो माला यस्येति तथा उपरिस्थिताः वेणव एव भुजा अधःस्थिताः अङ्घ्रिपा वृक्षा एव अङ्घ्रयः पादा यस्य तस्य हरितोपलाद्रेः मरकतशिलामयपर्वतस्य प्रेक्षां शोभां क्षिपन्तं मरकतपर्वततुल्यतया शोभमानमित्यर्थः । अत्र शब्दमर्यादया सर्वाणि हरितोपलाद्रेर्विशेषणानि स्वगतसन्ध्याभ्रावैः सादृश्याय पीताम्बरादीन्याक्षिपन्ति । तत्र सन्ध्याभ्रमिव पीताम्बरं कनकशृङ्गाणीव किरीटानि रत्नपङ्क्तिरिव रत्नमाला उदकधारा इव मुक्तामाला ओषधीपङ्क्तिः इव तुलसीमाला पुष्पपङ्क्तिरिव वनमाला वेणव इव भुजाः वृक्षा इव चरणाः इति तेन पीताम्बरेण सन्ध्याभ्रस्य किरीटैः कनकशृङ्गाणां शोभां क्षिपन्तमित्यादिकमर्थादायाति । अत्र रत्नोदधारौषधिसौमनस्या वन्यस्रजो वनमाला यस्येति स्वीयरत्नमुक्तापुष्पतुलसिमालाभिः वनस्रक्शब्देन मालामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रोक्तिः । यद्वा । रत्नादिर्वनस्रक् यस्येत्युभयत्र एकैव वनमाला व्याख्येया । "पत्रपुष्पमयी माला वनमाला पदावधिः ।" इति । अत्र रत्नपदं नवरत्नपरम् "तुलसीपुष्परचिता नवरत्नैर्विराजिता । आपादलम्बिनी माला वनमाला प्रकीर्तिता ॥" इत्युक्तेः ॥ २४ ॥ आयामत इति ॥ लोकत्रयं सावकाशं संगृह्यतेऽस्मिन् तथाभूतेन विचित्राणि दिव्यानि च यान्याभरणानि अंशुकानि वस्त्राणि च तेषां कृता श्रीः शोभा येन।आयामो दैर्घ्यं विस्तारो विशालता ताभ्यां स्वमानेन स्वानुरूपप्रमाणेन शोभनश्वासावमानो निरुपमः अपरिच्छिन्नो वा तेनेति वा देहेनोपलक्षितं स्वतो रम्यत्वेऽपि अपाश्रितवेषः स्वीकृतालङ्कारो देहो यस्य तम् । यद्वा । अपाश्रितं चिन्तितं वेषं ददातीत्यपाश्रितवेषदा ईहा इच्छा यस्य तम् अपश्यत् ॥ २५ ॥ पुंसामिति ॥ नखा एवेन्दवस्तेषां मयूखा रश्मयस्तैर्भिन्नाः संभिन्नाश्छुरिता अङ्गुलय एव चारूणि पत्राणि यस्य तत् स्वकामाय स्वाभिलषितफलाय विविक्तः शुद्धैर्वेदोक्तमार्गैरभ्यर्चतां पुंसां कामदुघमङ्घ्रिपद्मं कृपया किंचिदुन्नमय्य प्रदर्शयन्तम् अपश्यत् ॥ २६ ॥ मुखेनेति ॥ लोकानामार्तिहरं स्मितं यस्मिंस्तेन परिस्फुरद्भ्यां कुण्डलाभ्यां मण्डितेन अधरबिम्बस्य बिम्बस्येवातिरक्तस्याधरस्य भासा दीप्त्या शोणायितेन रक्तवदाचरितेनेत्यर्थः । सुनसेन शोभननासायुक्तेन सुभ्रुवा

आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण ॥ विचित्रदिव्याभरणांशुकानां कृतश्रियापाश्रितवेषदेहम् ॥ २५ ॥ पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चतां कामदुघाङ्घ्रिपद्मम् ॥ प्रदर्शयन्तं कृपया नखेन्दुमयूखभिन्नाङ्गुलिचारुपत्रम् ॥२६॥ मुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुण्डलमण्डितेन ॥ शोणायितेनाधरबिम्बभासा प्रत्यर्हयन्तं सुनसेन सुभ्र्वा ॥२७॥ कदम्बकिञ्जल्कपिशङ्गवाससा स्वलंकृतं मेखलया नितम्बे ॥ हारेण चानन्तधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन ॥ २८ ॥ परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दण्डसहस्रशाखम् ॥ अव्यक्तमूलं भवनाङ्घ्रिपेन्द्रमहीन्द्रभोगैरधिवीतवल्शम् ॥ २९ ॥

शोभने भ्रुवौ यस्मिंस्तेन स्वमुखेन प्रत्यर्हयन्तं पूजकान् प्रति संमानयन्तं भक्तैर्भोगाद्यनङ्गीकारात्स्वमुखदर्शनानन्ददानेनैव तत्सेवाऋणं परिशोधयन्तमित्याशयः । तं हरिमपश्यत् । सुभ्रुवा सुभ्रुणा इति वा वक्तव्ये सुभ्र्वा इत्यार्षः क्वचित्तथा पाठः ॥ २७ ॥ कदम्बेति ॥ हे वत्स विदुर कदम्बस्य किञ्जल्काः केसरास्तत्तुल्यपिशङ्गवर्णेन वाससा पीताम्बरेण मेखलया रत्नसुवर्णमयेन कटिसूत्रेण च नितम्बे सुष्ठु अलंकृतं श्रीवत्सो नाम दक्षिणावर्तरोमरेखाविशेषस्तद्युक्तं यद्वक्षःस्थलं तस्य वल्लभेन प्रियेण तत्सङ्गतेन अनन्तधनेन बहुमूल्येन हारेण च स्वलंकृतमपश्यत् ॥ २८ ॥ परार्ध्येति ॥ परार्ध्या अमूल्याः केयूरेषु अङ्गदेषु मणिप्रवेका मण्युत्तमास्तैः पर्यस्ता व्याप्ताः दोर्दण्डाः भुजदण्डा एव सहस्रमनन्ताः शाखा यस्य तं चन्दनवृक्षोऽपि मण्यादितुल्यैः फलपुष्पादिभिर्व्याप्तशाखो भवति । अव्यक्तं प्रधानं मूलमधोभागो यस्य । यद्वा । अव्यक्तं ब्रह्म मूलं यस्य ब्रह्माभिव्यक्तिरूपत्वात् । यद्वा । अनादित्वादव्यक्तमूलम् । वृक्षस्यापि मूलमव्यक्तं भवति अहीन्द्रस्य शेषस्य भोगैर्देहावयवैः फणैर्वा अधिवीताः संवेष्टिताः वल्शाः स्कन्धाः यस्य तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" वनस्पतिः शतवल्श " इति श्रुतेर्वल्शशब्दः स्कन्धवाची । चन्दनवृक्षोऽपि सर्पैः संवेष्टितो भवति । लोकत्रयसंग्रहेणेत्युक्तत्वात् । एवंभूतं त्रिभुवनात्मकमङ्घ्रिपेन्द्रं वृक्षश्रेष्ठं भगवन्तमपश्यत् ॥ २९ ॥ पुनः पर्वतरूपेण भगवन्तं वर्णयति—चराचरेति ॥ चराचराणामोकः स्थानं पर्वतोऽपि तथा भवति अहीन्द्रस्य शेषस्य बन्धुं मित्रं पर्वतोऽप्यहीन्द्राणां बन्धुर्भवति सलिलेनोपगूढमावृतं पर्वतोऽपि मैनाकादिस्तथा किरीटानां साहस्रमेव हिरण्यशृङ्गाणि यस्य तं पर्वतोऽपि मेर्वादिस्तथा आविर्भवत्स्पष्टं दृश्यमानं कौस्तुभरत्नं गर्भे मूर्त्तिमध्ये यस्य तं पर्वतस्यापि हि गर्भे क्वचिद्रत्नमाविर्भवति भगवानेव महीध्रः पर्वतस्तमपश्यत् ॥ ३० ॥ निवीतमिति ॥ आम्नाया वेदास्त एव मधुव्रता भ्रमरास्तैः श्रीर्यस्यास्तया स्वकीर्त्तिमय्या स्वकीर्तितुल्यया स्वकीर्त्तिं गायद्भिर्वेदरूपैः भ्रमरैराहितशोभया वनमालया प्रेक्षां क्षिपन्तमित्यत्रोक्तलक्षणया निवीतं कण्ठलम्बिन्या व्याप्तं तथा सूर्यादिभिरगममगम्यं स्वव्यापारैराकलयितुमशक्यं त्रिषु लोकेष्वपि धाम स्फूर्तिर्येषां तैः परिक्रमद्भिः रक्षार्थं परितो धावद्भिः दीर्घाभाव आर्षः प्राधनिकैः प्रधनं सङ्ग्रामस्त-

चराचरौको भगवन् महीध्रमहीन्द्रबन्धुं सलिलोपगूढम् ॥ किरीटसाहस्रहिरण्यशृङ्गमाविर्भवत्कौस्तुभरत्नगर्भम् ॥३०॥ निवीतमाम्नाय-
मधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिम् ॥ सूर्येन्दुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत् प्राधनिकैर्दुरासदम् ॥ ३१ ॥ तर्ह्येव तन्ना-
भिसरःसरोजमात्मानमम्भः श्वसनं वियच्च ॥ ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ॥ ३२ ॥ स कर्मबीजं रजसोपरक्तः
प्रजाः सिसृक्षन्नियदेव दृष्ट्वा ॥ अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ॥ ३३ ॥ इति श्रीभागवते महापुराणे तृतीय-
स्कन्धे ब्रह्मणा सर्वोत्कृष्टश्रीमन्नारायणस्वरूपवर्णनं नाम अष्टमोऽध्यायः ॥ ८ ॥

त्प्रयोजनकैः सुदर्शनादिभिः शस्त्रैर्हेतुभूतैर्दुरासदं दुष्प्रापं हरिमपश्यत् । पर्वतादिसरूपं पश्यन् हरिरसाविति ज्ञातवानित्यर्थः ॥ ३१ ॥ तर्हीति ॥ लोकानां विसर्गे सर्जने दृष्टिः संकल्पो यस्य स जगतो विधाता स देवो ब्रह्मा यदैव भगवन्तमपश्यत्तर्ह्येव तदैव तस्य भगवतो नाभिसरसि सरोजं कमलं तत्रात्मानम् आत्मनश्चतुर्षु दिक्षु अम्भो जलं श्वसनं प्रलयवायुं वियत् आकाशं चेति पश्चापि ददर्श । अतः पञ्चभ्यः परमन्यत् किमपि वस्तु न ददर्श ॥ ३२ ॥ स इति ॥ रजसा रजोगुणेन उपरक्तो व्याप्तः विसर्गे सृष्टौ अभिमुखः दत्तचित्तः अव्यक्तं वर्त्म मार्गो यस्य तस्मिन्भगवत्येवाभिवेशितः स्थिरीकृत आत्मा येन तथाभूतः स ब्रह्मा प्रजाः सिसृक्षन् स्रष्टुमिच्छन्नियदेव नाभिसरोजादिपञ्चकं भगवन्तं च दृष्ट्वा कर्मबीजं क्रियत इति कर्म जगत्तस्य बीजं कारणम् ईड्यं स्तुत्यं तं भगवन्तम् अस्तौत् ॥ ३३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्याष्टमे निरमादिमाम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

नवमे तपसा तुष्टं हरिं ब्रह्मा विलोक्य च ॥ सिसृक्षया तमस्तौषीत्तत्र श्लोकाः कर्ता[४४]ऽध्ययः ॥ चत्वा[४८]र्युवाचेति पादोना त्रिषं[६२]ष्टिरनुष्टुभः ॥९॥ ज्ञात इति ॥ हे भगवन् सुचिरात्
बहुकालोपार्जिततपसः मे मया अद्य इदानीं त्वं ज्ञातोऽसि दृष्टोऽसि नन्विति निश्चये भगवतस्तव गतिस्तत्वं न ज्ञायत इति देहभाजां प्राणिनामवद्यं महान्दोषः यतः त्वत्
त्वत्तः अन्यत् किमपि वस्तु न नास्ति यदपि त्वद्भिन्नं किंचित् अस्तीति प्रतीयते तदपि शुद्धं सत्वं न भवति। यत् यस्मात् मायायाः गुणानां व्यतिकरात् क्षोभात् त्वमेवो-
रुर्बहुरूपो विभासि प्रकाशसे ॥ १ ॥ ननु त्वया दृष्टं रूपं गुणात्मकमेव सत्यं तु ब्रह्मैव अतस्त्वमपि तन्न जानासीत्याशङ्क्य तव निर्गुणं रूपमपि अस्माद्रूपाद्भिन्नं नास्तीत्याह—
रूपमिति द्वयम् ॥ हे परम हे आत्मन् यस्य तव नाभिपद्मभवनात् अहम् आविरासं प्रकटोऽभूवं तस्य अवबोधरसोदयेन चिच्छक्त्याविर्भावेन शश्वत् सर्वदा निवृत्तं
तमः अविद्या यस्मात्तस्य तव यदेतत् अवताराणां शतस्य शुद्धसत्वात्मकस्य एकं बीजं मूलं सतामनुग्रहाय आदौ सर्गादौ गृहीतं त्वयैव स्वातन्त्र्येणाविष्कृतं रूपम् अस्ति अहं

॥ ब्रह्मोवाच ॥ ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यम् ॥ नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुण-
व्यतिकराद्यदुरुर्विभासि ॥ १ ॥ रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय ॥ आदौ गृहीतमवतारशतैकबीजं यन्नाभि-
पद्मभवनादहमाविरासम् ॥२॥ नातः परं परम यद्भवतः स्वरूपमानन्दमात्रमविकल्पमविद्धवर्चः ॥ पश्यामि विश्वसृजमेकमविश्वमात्मन्
भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि ॥ ३ ॥ तद्वा इदं भुवनमङ्गल मङ्गलाय ध्याने स्म नो दर्शितं त उपासकानाम् ॥ तस्मै नमो
भगवतेऽनुविधेम तुभ्यं यो नादृतो नरकभाग्भिरसत्प्रसङ्गैः ॥ ४ ॥ ये तु त्वदीयचरणाम्बुजकोशगन्धं जिघ्रन्ति कर्णविवरैः श्रुतिवात-
नीतम् ॥ भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयाम्बुरुहात्स्वपुंसाम् ॥ ५ ॥

आनन्दमात्रम् अविकल्पं निर्भेदम् अविद्धवर्चः अनावृतप्रकाशं यद् भवतः स्वरूपं तत् अतो रूपात्परं भिन्नं न पश्यामि किन्तु इदमेव तत् अतो हेतोः विश्वस्य सृजम्
इगुपधेति कः अतो नपुंसकविशेषणत्वम्। एकमुपास्येषु मुख्यम् अविश्वं विश्वस्मादन्यत् भूतेन्द्रियाणामात्मानं कारणं ते तव अदः रूपम् उपाश्रितोऽस्मि स्वाश्रयतया गृही-
तवानस्मि ॥ २ ॥ ३ ॥ नन्वेवमपि सोपाधिकमेतदर्वाचीनमेव तत्राह—तद्वा इति ॥ हे भुवनमङ्गल यतस्ते त्वया उपासकानां नोऽस्माकं मङ्गलाय तद्वै तव सच्चिदानन्दात्मक- ॥ २४ ॥
मिदं रूपं ध्याने दर्शितं स्म न ह्यव्यक्तवर्त्मनिविष्टचित्तानामस्माकं त्वया सोपाधिकदर्शनं युक्तमिति भावः। इति हेतोस्तस्मै भगवते तुभ्यं नमोऽनुविधेम अनुवृत्त्या नमस्कुर्याम।
आर्षः प्रयोगः। यो भवान् असत् सुप्रसङ्गो येषां तैर्नरकभाग्भिः नरकयोग्यैः जनैर्न आदृतोऽस्ति ॥ ४ ॥ ये त्विति ॥ हे नाथ श्रुतिर्वेदः स एव वातस्तेन नीतं प्रापितं त्वदी-
यचरणाम्बुजकोषस्य गन्धं प्रभावं ये तु कर्णविवरैर्जिघ्रन्ति आदरेण शृण्वन्ति तेषां स्वपुंसां परया श्रवणेन प्रवृद्धया भक्त्या गृहीतचरणस्त्वं तेषां हृदयाम्बुरुहात् नापैषि नाप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गच्छसि तत्र नित्यं प्रकाशसे॥५॥तावदिति ॥ लोकः प्राणी यावत् अभयं ते तव अङ्घ्रिं न प्रवृणीत नाश्रयेत् तावदेव द्रविणं धनं गेहं प्रसिद्धं देहेति पाठान्तरम् । सुहृदः स्त्रीपुत्रमित्रादयस्तन्निमित्तं तेषां विनाशचिन्तया भयं भवति गते शोकः पुनः स्पृहा ततस्तत्साधने प्रवृत्तौ परेभ्यः परिभवः यथाकथंचित्प्राप्तावपि पुनर्विपुलो महान् लोभः भवति । तथा तावदेव पुनरार्त्तिमूलं भयादिदुःखकारणं ममेत्यसद्भ्रान्तिरूपः अवग्रहः अभिनिवेशो भवति तवाङ्घ्रि प्रवरणे तु सर्वे निवर्त्तन्ते किं पुनस्तत्प्रकाशे सतीति भावः ॥ ६ ॥ दैवेनेति ॥ सर्वाणामशुभानामुपशमनात् भवतस्तव प्रसङ्गात् श्रवणकीर्त्तनादिरूपाद्विमुखानीन्द्रियाणि येषां तथा दीनाः विषयेषु लम्पटाः लोभेनाभिभूतं मनो येषां ते तादृशाः संतो ये कामसुखानां लेशस्तस्यापि लवः स्वल्पो भागस्तदर्थं शश्वत् निरन्तरमकुशलानि काम्यकर्माणि पापानि च कुर्वन्ति ते दैवेन दुरदृष्टेन हता धीर्येषां ते तथा मन्दमतय एवेति ॥ ७ ॥ क्षुदिति ॥ हे उरुक्रम क्षुत् तृट् च त्रिधातवश्च वातपित्तश्लेष्माणस्तथा शीतादिभिः इतरेतरात् भार्यापुत्रादिसंबान्धिषु परस्पराच्च काम एव दुष्पूरत्वेनाग्निस्तेन

तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः॥तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेऽङ्घ्रिमभयं प्रवृणीत लोकः
॥ ६ ॥ दैवेन ते हतधियो भवतः प्रसङ्गात्सर्वाशुभोपशमनाद्विमुखेन्द्रिया ये ॥ कुर्वन्ति कामसुखलेशलवाय दीना लोभाभिभूतमनसोऽकुशलानि शश्वत् ॥ ७ ॥ क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च ॥ कामाग्निनाऽच्युत रुषा सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे ॥ ८ ॥ यावत्पृथक्त्वमिदमात्मन इन्द्रियार्थमायाबलं भगवतो जन ईश पश्येत् ॥ तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थाऽपि दुःखनिवहं वहति क्रियार्था ॥ ९ ॥ अह्न्यापृतार्त्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः ॥ दैवाहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसङ्गविमुखा इह संसरन्ति ॥ १० ॥

दुर्भरेण दुःसहेन अच्युतया रुषा चानवच्छिन्नक्रोधेन च मुहुरर्द्यमानाः प्रजाः संपश्यतो मे मनः सीदते क्लिश्यतीत्यर्थः । तङ्गार्षः ॥ ८ ॥ यावदिति ॥ हे ईश भगवतस्तव इन्द्रियाणि अर्थाः विषयाश्च तद्रूपा या माया तस्या बलमाधिक्यं यस्मिंस्तदिदमात्मनः पृथक्त्वं देहेन्द्रियादिभावं त्वदिदमिति पाठे इदं देहादि आत्मनः त्वत् त्वत्तः पृथक् स्वस्य यावज्जनः पश्येत्तावत् व्यर्था मिथ्याध्यस्ताप्यसौ क्रियार्था क्रियाणामर्थः फलं यस्यां सा संसृतिर्जन्ममरणादिलक्षणा न प्रतिसंक्रमेत न निवर्त्तते । तङ्गार्षः । किन्तु दुःखनिवहं वहती प्रापयन्ती सत्येवं तिष्ठति । नुमभाव आर्षः । ह्रस्वपाठः सुगम एव ॥ ९ ॥ अह्नीति ॥ हे देव अह्नि दिने आपृतानि व्यापृतानि अत एव आर्त्तानि करणानि इन्द्रियाणि येषां ते निशि रात्रौ निःशयाना अपि नानामनोरथविषयिण्या धिया स्वप्नदर्शनेन क्षणे क्षणे भग्ना निद्रा येषां तथा दैवेन आहताः सर्वतः प्रतिहता अर्थरचना अर्थार्थोद्यमा येषाम् ईदृशाः । युष्मत्प्रसङ्गात् श्रवणकीर्त्तनादेर्विमुखा ऋषयो ज्ञानिनोऽपि इह जगति संसरन्ति जन्ममरणादिकमनुभवन्ति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति ॥ हे नाथ हे उरुगाय श्रुतेन श्रवणेनेक्षितो ज्ञातः पन्थाः यस्य स त्वं ननु पुंसां भावो भक्तिरेव योग उपायस्तेन परिभाविते संशोधिते हृत्सरोजे आस्से तिष्ठसि श्रवणं विनापि ते त्वद्भक्ता यद्यद्वपुर्धिया विभावयन्ति ध्यायन्ति सतां तेषामनुग्रहाय त्वं तत्तदेव वपुः प्रणयसे प्रकटयसि ॥ ११ ॥ नेति ॥ एक एव नानाजनेषु अवहितः प्रविष्टः सुहृत् अन्तरात्मा च भवान् यत् यथा असतामलभ्यया सर्वभूतेषु दयया अतिप्रसीदति तथा हृदि बद्धकामैः सुरगणैः कर्तृभिः उपचितैः पुष्कलैरुपचारैः पुष्पोपहारादिसाधनै-राराधितोन प्रसीदति ॥ १२ ॥ पुंसामिति ॥ यतः सकामानां भवान्नातिप्रसीदत्यतोऽध्वराद्यैर्यज्ञादिभिर्विविधैः कर्मभिर्दानेन चोग्रतपसा व्रतचर्यया च भगवतस्तवाराधनमेव पुंसः सत्क्रियार्थः संश्चासौ क्रियार्थश्च उत्तमं फलं भवति । यत्र यस्मिंस्त्वयि अर्पितः धर्मः कर्हिचिदपि न ह्रियते न विनश्यति मोक्षपर्यवसायी भवति । कामनयानुष्ठितस्तु फलं दत्त्वा नश्यति इत्यर्थः ॥ १३ ॥ शश्वदिति ॥ शश्वत् स्फुरता स्वरूपमहसा स्वरूपचैतन्येनैव नितरां पीतौ निरस्तौ भेदमोहौ यस्य बोधश्चैतन्यमेव धिषणा विद्याशक्तिर्यस्य ।

त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् ॥ यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥ ११ ॥ नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः ॥ यत्सर्वभूतदययाऽसदलभ्ययैको नानाजनेष्ववहितः सुहृदन्तरात्मा ॥ १२ ॥ पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च ॥ आराधनं भगवतस्तव सत्क्रियाऽर्थो धर्मोऽर्पितः कर्हिं चिद् ध्रियते न यत्र ॥ १३ ॥ शश्वत् स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै ॥ विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते नम इदं चकृमेश्वराय ॥ १४ ॥ यस्यावतारगुणकर्मविडम्बनानि नामानि येऽसुविगमे विवशा गृणन्ति ॥ तेऽनेकजन्मशमलं सहसैव हित्वा संयान्त्यऽपावृतमृतं तमजं प्रपद्ये ॥ १५ ॥ यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलम् ॥ भित्त्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय ॥ १६ ॥

यद्वा । बोध एव धिषणमाश्रयः तस्मै परस्मै पुरुषाय नमः । तथा विश्वस्योद्भवस्थितिलयेषु निमित्तं या माया तस्या लीलाविलासस्तद्रूपेण परिणामस्तया रासः क्रीडा यस्य तस्मै ईश्वराय इदं नमः नमनं चकृम कुर्मः । कृतवन्त इति वा ॥ १४ ॥ यस्येति ॥ यस्य अवतारगुणकर्मणां विडम्बनमनुकरणमस्ति येषु तानि नामानि देवकीनन्दनसर्वज्ञगोवर्द्धनोद्धरणादीनि असुविगमे प्राणोत्क्रमणसमये अत एव विवशाः अपि ये गृणन्ति केवलमुच्चारयन्ति तेऽनेकजन्मोपार्जितं शमलं पापं सहसा एव हित्वा अपावृतं निरस्तावरणमृतं सत्यं भगवन्तं यान्ति तम् अजं प्रपद्ये ॥ १५ ॥ यो वै इति ॥ यः प्रथममेक एव ततः आत्मा स्वयमेव मूलमधिष्ठानं यस्य तत्प्रधानं भित्त्वा गुणत्रयरूपेण विभज्य अहं ब्रह्मा च गिरिशश्च स्वयं विभुः विष्णुश्च एते स्थित्युद्भवप्रलयहेतवः त्रयः पादाः स्कन्धा यस्य स त्रिपाद् भूत्वा तत उरवो बहवः प्ररोहाः शाखोपशाखा मरीच्यादिमन्वादिरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्श्व यस्य सः उरुप्ररोहः सन् ववृधे तस्मै भगवते भुवनाकाराय द्रुमाय नमः ॥ १६ ॥ लोक इति ॥ अयं लोकः प्राणिमात्रं विकर्मणि पापे निरतः कुशले सुखहेतुभूते हिते स्वे स्वकीये त्वया साक्षादुदिते यत्करोषि यदश्नासीत्यादिना प्रोक्ते भवदर्चनरूपे कर्मणि प्रमत्तः अनवहितो यावद् वर्त्तते तावदेव यो बलवान् इहास्मिन्नेव जन्मनि सद्य एव अस्य लोकस्य जीवितस्य आशामपि छिनत्ति भोगसुखवार्त्ता तु दूरतस्तस्मै अनिमिषाय कालरूपाय नमोऽस्तु ॥ १७ ॥ यस्मादिति ॥ आस्तां लोकस्य कथा सकलैर्लोकैर्नमस्कृतं यद् द्विपरार्द्धावस्थायि धिष्ण्यं स्थानं तदध्यासितः आरूढोऽप्यहं यस्मात्कालरूपात्त्वत्तो बिभेमि भीतश्च संस्त्वामेवावरुरुत्समानः प्राप्तुमिच्छन् बहवः सवा यागाः संवत्सरा वा यस्य तादृशो भूत्वा बहून् यागान् कृत्वेत्यर्थः । बहून् संवत्सरान् वा तपः तेपे कृतवान् तस्मै तुभ्यम् अधिमखाय यज्ञाधिष्ठात्रे नमः ॥ १८ ॥ तिर्यगिति ॥ यस्तु स्वरूपानुभवेनैव निरस्ता रतिर्विषयसुखापेक्षा येन तादृशोऽपि आत्मना स्वेन कृताः सेतवो मर्यादास्तत्परीप्सया पालनेच्छया आत्मनः स्वस्येच्छयैव जीवयो-

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥ १७ ॥ यस्माद्बिभेम्यहमपि द्विपरार्ध्यधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत् ॥ तेपे तपो बहुसवोऽवरुरुत्समानस्तस्मै नमो भगवते पुरुषोत्तमाय ॥१८॥ तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयाऽऽत्मकृतसेतुपरीप्सया यः ॥ रेमे निरस्तरतिरप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय ॥ १९ ॥ योऽविद्ययानुपहतोऽपि दशार्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः ॥ अन्तर्जले हि कशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् ॥ २० ॥ यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण ॥ तस्मै नमस्त उदरस्थभवाय योगनिद्राऽवसानविकसन्नलिनेक्षणाय ॥ २१ ॥

निषु तिर्यङ्मनुष्यविबुधादिषु अवरुद्धदेहः स्वीकृतमत्स्यादिरामादिवामनादिमूर्त्तिः सन् रेमे तस्मै पुरुषोत्तमाय भगवते नमः ॥ १९ ॥ य इति ॥ यः दशार्द्धाः पञ्चतामिस्रान्धतामिस्रमोहमहामोहतमोरूपाः पञ्च वृत्तयो यस्यास्तया अविद्यया निद्राहेतुभूतया अनुपहतोऽनभिभूतोऽपि जठरीकृता उदरे प्रविलापिता लोकयात्राः सर्वलोका येन सः जनस्य निद्राणस्याविवेकिनः सुखं विवृण्वन् निद्रासुखमीदृगिति दर्शयन्नुपहसन्नित्यर्थः । यद्वा । पूर्वकल्पे श्रान्तस्य विश्रामसुखं स्फोरयन् भीमानामूर्मीणां माला विद्यन्ते यस्मिंस्तस्मिन्नन्तर्जले जलमध्ये अहिरेव कशिपुः शय्या तस्याः स्पर्शोऽनुकूलो यस्यास्तां निद्रामुवाह निद्रितानुकरणं कृतवान् तस्मै ते नम इत्यपकर्षः ॥ २० ॥ यदिति ॥ हे ईड्य यस्य नाभिपद्ममेव भवनं तस्मात् लोकत्रयमुपकरणं भोगसाधनं यस्य यद्वा लोकत्रयस्य सृष्ट्यादिद्वारोपकारकोऽहं यदनुग्रहेण आसम् उदरे स्थितो भवः प्रपञ्चो यस्य योगरूपनिद्रायाः अवसाने अन्ते सृष्ट्यारम्भसमये विकसन्नलिनवत् कृपापूर्णतया संतापहरमीक्षणं यस्य तस्मै ते तुभ्यं नमः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽयमिति ॥ समस्तजगतां सुहृत् एक आत्मा सोऽयं भगवान् यत् येन सत्त्वेन सत्वकार्येण ज्ञानेन भगेन ऐश्वर्यादिगुणेन च जगन्मृडयते सुखयति तेनैव ज्ञानैश्वर्यादिना मे मम दृशं प्रज्ञामनुस्पृशतात् योजयतु । यथा ज्ञानादिना इदं विश्वं पूर्ववत् पूर्वकल्पवत् अहं स्रक्ष्यामि स्रष्टुं क्षमो भविष्यामि यतोऽसौ भगवान् प्रणताः प्रिया यस्य तथाविधः अहं च प्रणतः अतस्तत्करिष्यतीति भावः ॥ २२ ॥ एष इति ॥ प्रपन्नानां वरदः आत्मशक्त्या रमया लक्ष्म्या सह गृहीताः सर्वज्ञत्वादिगुणसहिताः अवतारा येन सः भगवान् यद्यत् कर्म करिष्यति तस्मिन्कर्मणि स्वस्य तस्यैव भगवतो विक्रमः प्रभावो यस्मिंस्तथाभूतमिदं विश्वं सृजतोऽपि मे चेतः चित्तम् एष भगवानेव युञ्जीत प्रवर्त्तयतु । यथा येनाहं कर्म कर्मासक्तिं तत्कृतं शमलं वैषम्यादिकृतं पापं च विजह्यां त्यक्ष्यामि ॥ २३ ॥ नाभीति ॥ इह अस्मिन्नम्भसि सतः शयानस्य अनन्तशक्तेर्यस्य पुंसो नाभिहृदात् कमलद्वारा विज्ञाने शक्तिर्यस्य स महत्तत्वात्मकस्य चित्तस्याभिमानी अहम् आसम् अतस्तस्य अस्य इदं विचित्रं विश्वात्मकं रूपं विवृण्वतो विस्तारयतो मे मम निगमस्य

सोयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान्भगेन ॥ तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ ॥२२॥ एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः ॥ तस्मिन्स्वविक्रममिदं सृजतोऽपि चेतो युञ्जीत कर्मशमलं च यथा विजह्याम् ॥२३॥ नाभिह्रदादिह सतोम्भसि यस्य पुंसो विज्ञानशक्तिरहमासमनन्तशक्तेः ॥ रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः ॥२४॥ सोऽसावदभ्रकरुणो भगवान् विवृद्धप्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् ॥ उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिराऽपनयतात्पुरुषः पुराणः ॥२५॥ मैत्रेय उवाच ॥ स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः ॥ यावन्मनोवचः स्तुत्वा विरराम स खिन्नवत् ॥ २६ ॥

वेदस्यावयवभूतानां गिरां विसर्ग उच्चारणं मा रीरिषीष्ट अतिशयेन मा लुप्यतां मा विस्मृतो भवतु । “ रिष हिंसायां ” यङ्लुगन्तं लिङि कर्मकर्त्तरि रूपं छान्दसम् ॥ २४ ॥ सोऽसाविति ॥ अदभ्रकरुणः बहुदयः पुराणः पुरुषः सोऽसौ मत्कारणभूतो भगवान्विवृद्धः प्रेमा यस्मिंस्तथाभूतेन स्मितेन नयनाम्बुरुहं विजृम्भन् उल्लासयन् आर्षः शता विकासयन्निति यावत् । विश्वस्य विजयाय उद्भवाय चकारादस्मदनुग्रहाय च उत्थाय माध्व्या मधुरया गिरा नोऽस्माकं विषादं वैचित्यमपनयतात् निराकुर्यात् माध्वीति “ऋत्व्यवास्त्व्ये” ति सूत्रेण मधुशब्दस्याणि स्त्रियां यण् छन्दसि निपात्यते॥२५॥स्वसंभवमिति ॥ स्वस्य संभवो यस्मात्तं भगवन्तं तपः शरीरं विद्या उपासना समाधिः ऐकाग्र्यं तैरेवं निशाम्य दृष्ट्वा यावन्मनोवचः स्वमनोवचनशक्त्यनुसारेण स्तुत्वा च स ब्रह्मा खिन्नवत् यथा कार्यावसानमप्राप्य श्रान्तः खिन्नो भवति तथा विरराम तूर्णीं बभूव ॥२६॥ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति द्वयम् ॥ मधुसूदनः आत्मनः स्वस्य हेतोर्लोकसंस्थानं लोकरचना तद्विज्ञानविषये परिखिद्यतस्तदलभमानस्य शता आर्षः ब्रह्मणोऽभिप्रेतमभिप्रायमन्वीक्ष्य ज्ञात्वा अथ तस्य कश्मलं विषादं शमयन्निव इव एवार्थे तेन भयङ्करतया प्रसिद्धेन कल्पं व्यतिकरोति विनाशयतीति कल्पव्यतिकरं तच्च तदम्भश्च तेन विषण्णं चेतो यस्य तं ब्रह्माणम् अगाधया गम्भीरार्थया वाचा आह स्म ॥ २७ ॥ २८ ॥ मेति ॥ हे वेदगर्भ तन्द्रीं विषादकृतमालस्यं मा गाः मा प्राप्नुहि किन्तु सर्गे सृष्टौ उद्यममावह कुरु तेनैव मे दृशमनुस्पृशतादित्यादिकं यद्भवान् मां प्रार्थयते तद्धि मयाग्रे पूर्वमेवापादितं सम्पादितम् ॥ २९ ॥ तर्हि कथमहं न जानामि तत्राह—भूय इति ॥ हे ब्रह्मन् तपः आलोचनं मदाश्रयां मद्विषयां विद्यामुपासनां चैव त्वं भूयः पुनरातिष्ठ कुरु । ताभ्यां तपोविद्याभ्यामन्तर्हृदि हृदयमध्ये अपावृतान् आवरणशून्यान् लोकान् देवमनुष्यादिसहितान् भूरादीन् द्रक्ष्यसि ॥ ३० ॥ तत इति ॥ हे ब्रह्मन् ततः त्वं मद्भक्तियुक्तः समाहितः एकाग्रचित्तश्च सन् आत्मनि स्वस्मिल्लोके च चेतनाचेतनात्मके जगति ततं व्याप्तं मां द्रष्टासि द्रक्ष्यसि मयि

अथाऽभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः ॥ विषण्णचेतसं तेन कल्पव्यतिकराम्भसा॥२७॥लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः॥
तमाहाऽगाधया वाचा कश्मलं शमयन्निव ॥ २८ ॥ श्रीभगवानुवाच ॥ मा वेदगर्भ गास्तन्द्रीं सर्गे उद्यममावह ॥ तन्मयाऽऽपादितं ह्यग्रे
यन्मां प्रार्थयते भवान् ॥ २९ ॥ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम् ॥ ताभ्यामन्तर्हृदि ब्रह्मँल्लोकान्द्रक्ष्यस्यपावृतान् ॥ ३० ॥
तत आत्मनि लोके च भक्तियुक्तः समाहितः ॥ द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनः ॥ ३१ ॥ यदा तु सर्वभूतेषु दारुष्वग्निमिव
स्थितम् ॥ प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलम् ॥ ३२ ॥ यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः ॥ स्वरूपेण मयोपेतं पश्यन्स्वाराज्यमृच्छति ॥ ३३ ॥ नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ॥ नात्माऽवसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ॥ ३४ ॥ ऋषिमाद्यं
न बध्नाति पापीयांस्त्वां रजोगुणः ॥ यन्मनो मयि निर्बद्धं प्रजाः संसृजतोऽपि ते ॥ ३५ ॥

च लोकान् आत्मनो जीवांश्च द्रक्ष्यसि ॥ ३१ ॥ यदा त्विति ॥ लोको जनः यदा तु यदैव दारुषु अग्निमिव सर्वभूतेषु अवस्थितं मां प्रतिचक्षीत परिपश्येत्तर्ह्येव कश्मलं पापं जह्यात् त्यजेत् ॥ ३२ ॥ यदेति ॥ भूतानि इन्द्रियाणि च आशयोन्तःकरणं च एतैर्विरहितमात्मानं जीवं शुद्धत्वंपदार्थं स्वरूपेण स्वस्यात्मभूतेन मया तत्पदार्थेन उपेतमेकीभूतं यदा पश्यन्भवति तदा स्वाराज्यं मोक्षमृच्छति प्राप्नोति ॥ ३३ ॥ नानाकर्मेति ॥ नानाकर्मणां जीवसंबन्धनादिपुण्यपापानां वितानेन विस्तारेण वासनानुसारेण बह्वीः प्रजाः सिसृक्षतः स्रष्टुमिच्छतः व्यासङ्गान्तरासक्तचित्तस्यापि ते तव आत्मा चित्तमस्मिन्समयेऽपि यन्नावसीदति मोहं न प्राप्नोति स एष वर्षीयान् महत्तरो मदनुग्रहः ॥ ३४ ॥ ऋषिमिति ॥ आद्यं प्रथमम् ऋषिं वेदद्रष्टारं त्वां पापीयान् विक्षेपकारोऽपि रजोगुणो न बध्नाति विक्षेपादिकं कर्त्तुं न शक्ष्यति । यत् यस्मात् प्रजाः संसृजतोऽपि ते तव मनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयि निर्बद्धमत्यासक्तम् । दशमस्कन्धे तु अस्य विक्षेपो न रजसा किन्तु मञ्जुमहिमदर्शनसौभाग्यादृष्टादेवेति ॥ ३५ ॥ ज्ञात इति ॥ हि यस्मादहं देहिनां दुर्विज्ञेयोऽपि भवता त्वद्य ज्ञातोऽस्मि यत् यस्मात् त्वं मां भूतैरिन्द्रियैर्गुणैः सत्वादिभिरात्मनाहंकारेण च अयुक्तं मन्यसे ॥ ३६ ॥ तुभ्यमिति ॥ नालेन मार्गेण पुष्करस्य मूलमधिष्ठानं सलिले विचिन्वतः अन्वेषयतस्तवेति शेषः । मद्विचिकित्सायां भवितव्यमस्याश्रयेण न च तद्दृश्यते ततोऽस्ति नास्तीति मद्विषये संदेहे सति मे मया तुभ्यं त्वां कृतार्थयितुं " क्रियार्थोपपदस्य " इति क्रियाग्रहणमपि कर्तव्यमिति वा चतुर्थी । आत्मा स्वरूपमबहिरन्तर्हृदि दर्शितः ॥ ३७ ॥ यदिति ॥ अङ्ग हे ब्रह्मन् मत्कथायामभ्युदयः प्रभावस्तेनाङ्कितं मत्स्तोत्रं यच्चकर्थ कृतवानसि । यद्वा । यच्च ते तव तपसि निष्ठा स्थितिर्जाता स एष सर्वोऽपि मदनुग्रहः ॥ ३८ ॥ प्रीत इति ॥ ते तव भद्रमस्तु यद्यस्मात् लोकानां विजयस्य पालनस्येच्छया गुणमयं गुणमयत्वेन प्रतीयमानमपि मां निर्गुणमेव वर्णयन् त्वं माम् अस्तौषीः स्तुतवानसि इडभाव आर्षः । अतोऽहं त्वयि प्रीतोऽस्मि ॥ ३९ ॥ य इति ॥ एतेन

ज्ञातोहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम् ॥ यन्मां त्वं मन्यसेऽयुक्तं भूतेन्द्रियगुणात्मभिः ॥ ३६ ॥ तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः ॥ नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥ ३७ ॥ यच्चकर्थाऽङ्ग मत्स्तोत्रं मत्कथाऽभ्युदयाङ्कितम् ॥ यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ॥ ३८ ॥ प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया ॥ यदस्तौषीर्गुणमयं निर्गुणं माऽनुवर्णयन् ॥ ३९ ॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् ॥ तस्याऽऽशु संप्रसीदेयं सर्वकामवरेश्वरः ॥ ४० ॥ पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना ॥ राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ॥ ४१ ॥ अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि ॥ अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ॥ ४२ ॥ सर्ववेदमयेनेदमात्मनाऽऽत्मात्मयोनिना ॥ प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ॥ ४३ ॥

भवत्कृतेन स्तोत्रेण यः पुमान्नित्यं मां स्तुत्वा भजेत् तस्यापि सर्वकामवराणामीश्वरोऽहम् आशु शीघ्रं प्रसीदेयं तव प्रीत इति किमु वक्तव्यम् ॥ ४० ॥ पूर्तेनेति ॥ पूर्तेन कूपारामादिना तपसा यज्ञैर्दानैर्योगसमाधिना च राद्धं सिद्धं यत्पुंसां निःश्रेयसं फलं तन्मत्प्रीतिरेवेति तत्वविदां मतम् ॥ ४१ ॥ अहमिति ॥ हे धातः अहम् आत्मनां सर्वजीवानाम् आत्मा प्रेयसामपि मध्ये प्रेष्ठः प्रियतमः सन् स्थितः यत् कृते यदर्थं देहादिः प्रियो भवति स आत्माहम् अतः मयि रतिं कुर्यात् ॥ ४२ ॥ सर्वेति ॥ आत्मा त्वम् आत्मयोनिना आत्मा अहं योनिः कारणं यस्य तेन सर्ववेदमयेन सर्ववेदाभ्यासशालिना आत्मना अन्यनिरपेक्षेण यथा पूर्वं पूर्वकल्पे यथावस्थितं तथेदं त्रैलोक्यं याश्च मय्यनुशेरते उपसंहृतास्तिष्ठन्ति ताः प्रजाश्च सृज । यद्वा । अयं चासावात्मा च तेन इदमात्मना इत्येकं पदम् । अन्यनिरपेक्षेणेत्यर्थः । मयि स्थितानामपि व्यक्तिमात्रं कर्तव्यमित्यनायास उक्तः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मै इति ॥ प्रधानपुरुषयोरीश्वरः कञ्जनाभः भगवान् जगत्स्रष्ट्रे तस्मै ब्रह्मणे एवम् इदं जगन्निर्माणप्रकारादिकं व्यज्य ज्ञापयित्वा स्वेन प्रदर्शितेन नारायणरूपेण तिरोदधे अदृश्योऽभूत् ॥४४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायस्तृतीयस्याध्याये नवमे व्यधात् ॥ ९ ॥ दशमे दशधा सर्गः प्राकृतादिभिदोच्यते ॥ श्लोकास्तु सार्द्धा एकोनत्रिंशद्वोवाचपञ्चकम् ॥ अनुष्टुभोऽप्यर्द्धयुता एकोनत्रिंशदीरिताः॥१०॥अन्तर्हित इति ॥ भगवत्यन्तर्हिते सति लोकपितामहः विभुः ब्रह्मा दैहिकीर्देहजाः मानसीः संकल्पजाश्च प्रजाः कतिधा ससर्ज॥१॥ ये चेति ॥ हे भगवन् हे बहुवित्तम त्वयि त्वदग्रे ये च मे मयार्थाः संशयविषयाः पदार्थाः पृष्टास्तान् प्रश्नान् आनुपूर्व्येण एकैकशः वदस्व भाषयस्व यत्नेन वद वा ।"भासनोपसंभाषा"इति तङ् । तेन नोऽस्माकं सर्वसंशयान् छिन्धि॥२॥एवमिति॥हे भार्गव तेन क्षत्रा विदुरेणैवं संचोदित उत्तरदाने प्रवर्त्तितः कौषारवो

मैत्रेय उवाच ॥ तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः ॥ व्यज्येदं स्वेन रूपेण कञ्जनाभस्तिरोदधे ॥ ४४ ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे भगवद्ब्रह्मसंवादे भगवदन्तर्धानवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ ॥ विदुर उवाच ॥ अन्तर्हिते भगवति ब्रह्मा लोकपितामहः ॥ प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः ॥ १ ॥ ये च मे भगवन्पृष्टास्त्वय्यार्था बहुवित्तम ॥ तान्वदस्वाऽऽनुपूर्व्येण च्छिन्धि नः सर्वसंशयान्॥ २ ॥ सूत उवाच ॥ एवं संचोदितस्तेन क्षत्रा कौषारवो मुनिः ॥ प्रीतः प्रत्याह तान्प्रश्नान् हृदिस्थानथ भार्गवः ॥ ३ ॥ मैत्रेय उवाच॥ विरिञ्चोऽपि तथा चक्रे दिव्यं वर्षशतं तपः ॥ आत्मन्यात्मानमावेश्य यदाऽऽह भगवानजः ॥ ४ ॥ तद्विलोक्याऽब्जसंभूतो वायुना यदधिष्ठितः ॥ पद्ममम्भश्च तत्कालकृतवीर्येण कम्पितम् ॥ ५ ॥ तपसा ह्येधमानेन विद्यया चात्मसंस्थया ॥ विवृद्धविज्ञानबलो न्यपाद्वायुं सहाम्भसा ॥ ६ ॥ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितम् ॥ अनेन लोकान्प्राग्लीनान्कल्पिताऽस्मीत्यचिन्तयत् ॥ ७ ॥

मैत्रेयः मुनिः प्रीतः सन् हृदिस्थान् नतु विस्मृतान् तान् विदुरकृतान् प्रश्नान् प्रत्याह स्म तदुत्तरं दत्तवान्॥३॥विरिञ्च इति ॥ यत् यथा भगवान् अजः आह स्म ।" भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम् । " इत्युक्तवान् । विरिञ्चो ब्रह्मापि तथैवात्मनि परमात्मनि तस्मिन्नात्मानं मन आवेश्य दिव्यं वर्षशतं तपश्चक्रे ॥४॥ तद्विलोक्येति द्वयम् ॥ एधमानेन प्रवृद्धेन तपसा आत्मसंस्थया परमात्मविषयया विद्यया उपासनया च विवृद्धं विज्ञानमेव बलं यस्य सः अब्जसंभूतो ब्रह्मा यदधिष्ठितः यत् पद्ममधिष्ठाय स्थितः कर्त्तरि क्तः । तत्पद्ममम्भश्च तत्कालेन प्रलयकालेन कृतं वीर्यं बलं यस्य तेन वायुना कम्पितं विलोक्य अम्भसा सह वायुं न्यपात् पीतवान् नाशयामासेति ॥५॥६॥ तदिति ॥ यदधिष्ठितस्तद्वियद्व्यापि अत्युन्नतं पुष्करं कमलं विलोक्यानेन कमलेन प्राक् पूर्वकल्पान्ते लीनान् लोकान् कल्पितास्मि स्रक्ष्यामीत्यचिन्तयत् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मकोशमिति ॥ भगवता स्वयं करणीये कर्मणि चोदितः प्रवर्तितः ब्रह्मा द्विसप्तधा चतुर्दशलोकरूपेण उरुधा ततोऽपि बहुप्रकारेण भाव्यं भावयितुं योग्यम् अतिविस्तृतं तत् पद्मकोशमाविश्य तदेकमेव त्रिधा लोकत्रयरूपेण व्यभाङ्क्षीत् विभक्तं कृतवान् ङकाररहितः पाठः ङकारवान् पाठश्चेच्छनक्के रूपम् । धातूनामनेकार्थता । यद्वा । भाव्यं वै राजोपासकैर्ध्येयं तत्कमलं प्रथमं त्रिधा ततश्चतुर्दशधा ततः सूर्यचन्द्रादिलोकभेदेन उरुधा व्यभाङ्क्षीत् ॥८॥ एतावानिति ॥ जीवलोकस्य व्यष्टिविराट्समूहस्य सृज्यस्य संस्थाभेदो रचनाविशेषः एतावान् त्रिलोकीरूप एव समाहितः शास्त्रे कथितः । ननु ब्रह्मणोऽपि जीवत्वात्तल्लोकस्यापि किमिति प्रत्यहं सृष्टिर्न भवति तत्राह । धर्मस्येति । हि यस्माद‌निमित्तस्य निष्कामस्य धर्मस्य दशशताश्वमेधस्य शतजन्मसाधितस्य विपाकः फलरूपोऽसौ परमेष्ठी ब्रह्मा स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरञ्चितामेतीति चतुर्थोक्तेः । उपलक्षणमेतत् सत्यलोकस्य महःप्रभृतिलोकानां तद्वासिनां च त्रैलोक्यस्य काम्यकर्मफलत्वात् प्रतिकल्पमुत्पत्तिविनाशौ भवतः महःप्रभृतीनां तूपासनासमुचितनिष्कामकर्मफलत्वात् द्विपरार्द्धपर्यन्तं न नाशः त्रिलोक्यां दह्यमानायामित्यादिना चैतत्स्फुटीभविष्यति । तत्रस्थानां च "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानं प्रविशन्ति परं पदम् ॥" इति वाक्यात्ततः परं प्रायेण मुक्तिरेवेति ज्ञेयम् । यद्वा । योऽयं जीवलोकस्य एतावान् त्रिधा चतुर्दशधा बहुधा चेति संस्थाया रचनाया भेदः ब्रह्मणा कृतः स समाहृतः संक्षेपतः कथितः । ननु एकेन ब्रह्मणा कथमिदं शक्यं तत्राह असौ परमेष्ठी अनिमित्तस्य शतजन्मसाधितस्य विपाकः फलरूपः अत एतत्सामर्थ्यम् ॥ ९ ॥ कालभेदेन लोकसृष्टिभेदं श्रुत्वा कालं पृच्छति—यदात्थेति ॥ हे ब्रह्मन् हे प्रभो बहुरूपस्य अद्भुतकर्मणश्च हरेः यत् कालाख्यं लक्षणं स्वरूपं तत्र तत्र त्वमात्थ अब्रवीस्तत् नोऽस्मान्प्रति कथं कालः कल्प्यते किंवा तस्य सूक्ष्मं स्थूलं च रूपमिति यथा यथावद्वर्णय ॥ १० ॥ गुणेति ॥ गुणानां सत्वादीनां व्यतिकरात् वैषम्यात् महदादिपरिणामात् आकारः स्वरूपज्ञानं यस्य स गुणवैषम्यरूपकार्यानुमेयः स्वतस्तु निर्विशेषः अत एवाप्रतिष्ठितः प्रतिष्ठापर्यवसानं तद्रहितः आद्यन्तशून्यः काल इति सामान्यतः स्वरूपोक्तिः विशेषेण तूत्तराध्याये उपादीयते निमित्ततया स्वीक्रियत इत्युपादानं सकाल उपादानं निमित्तं यस्मिंस्तथाभूतमात्मानमेव पुरुष ईश्वरः विश्वरूपेणासृजत् लीलया स्वव्यतिरेकेण सृज्यस्याभावात् एतच्च वस्तुकथनमात्रं कालेन निमित्तेन चासृजदित्येतावदेव विवक्षितम् ॥ ११ ॥ स्वभिन्नसृज्याभावं दर्शयन् कालस्य निमित्ततामाह—विश्वमिति ॥ प्रलये विष्णुमायया संस्थितं संहृतमतो ब्रह्मतन्मात्रमेव सद्वि-

पद्मकोशं तदाऽऽविश्य भगवत्कर्मचोदितः ॥ एकं व्यभाङ्क्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ॥ ८ ॥ एतावाञ्जीवलोकस्य संस्थाभेदः समाहृतः ॥ धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ ॥ ९ ॥ विदुर उवाच ॥ यदाऽऽत्थ बहुरूपस्य हरेरद्भुतकर्मणः ॥ कालाख्यं लक्षणं ब्रह्मन्यथा वर्णय नः प्रभो ॥ १० ॥ मैत्रेय उवाच ॥ गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः ॥ पुरुषस्तदुपादनमात्मानं लीलयाऽसृजत् ॥ ११ ॥ विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ॥ ईश्वरेण परिच्छिन्नं कालेनाऽव्यक्तमूर्तिना ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वम् अव्यक्ता मूर्तिर्यस्य तेनेश्वरेण कर्त्रा कालेन निमित्तेन परिच्छिन्नं पृथक् प्रकाशितम् ॥ १२ ॥ विश्वप्रवाहस्यानवच्छेदमाह—यथेति अर्द्धम् ॥ एतद्विश्वं यथेदानीं दृश्यते अग्रे प्रलयात्पूर्वमपि तथैवासीत् पश्चाद्भाविप्रलयानन्तरमपीदृशमेव भविष्यति । सर्ग इति ॥ प्राकृतः षड्विधः वैकृतश्च त्रिविध एवं सर्गो नवविधः यस्तु प्राकृतो वैकृतश्च स उभयात्मको दशम इत्यर्थाद्बोध्यम् । अस्य प्रपञ्चस्य प्रतिसंक्रमः प्रलयः कालद्रव्यगुणैस्त्रिविधः । कालेन नित्यप्रलयः द्रव्येण संकर्षणाग्न्यादिना नैमित्तिकः प्रलयः गुणैः स्वं स्वं कार्यं ग्रसमानैः प्राकृतिकः प्रलयः॥१३॥आद्य इति ॥ आत्मनः परमात्मनः सकाशाद्गुणवैषम्यं वैषम्यापन्नगुणत्रयात्मकः प्रकृतिविकारविशेषो यो महत्तत्वं तस्य महतो यः सर्गः स आद्यः । गुणवैषम्यमिति महतो लक्षणम् । यत्र यस्मात् द्रव्याणि पृथ्व्यादीनि ज्ञानानि ज्ञानेन्द्रियाणि देवता मनश्च क्रियाः कर्मेन्द्रियाणि च तेषामुदय उत्पत्तिर्यस्मात् सः अहङ्कारः तस्य अहङ्कारस्य सर्गो द्वितीयः द्रव्येत्यादिअहमो लक्षणम् ॥ १४ ॥ भूतसर्ग इति ॥ द्रव्यशक्तिमान् महाभूतोत्पादकः तन्मात्रः शब्दादिपञ्चतन्मात्रारूपो भूतसर्गः भूतसूक्ष्मसर्गः स तु तृतीयः । यस्तु ज्ञानक्रियात्मकः ज्ञानकर्महेतुभूत ऐन्द्रियः इन्द्रियाणां सर्गः स चतुर्थः ॥१५ ॥ वैकारिक इति ॥ यः वैकारिकः सात्विकाहङ्का-

यथेदानीं तथाऽग्रे च पश्चादप्येतदीदृशम् ॥ सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः ॥ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः ॥ १३ ॥ आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः ॥ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः ॥ १४ ॥ भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् ॥ चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः ॥ १५ ॥ वैकारिको देवसर्गः पञ्चमो यन्मयं मनः ॥ षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभो ॥ १६ ॥ षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु ॥ रजोभाजो भगवतो लीलेयं हरिमेधसः ॥ १७ ॥ सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥ वनस्पत्यौषधिलतात्वक्सारा वीरुधो द्रुमाः ॥ १८ ॥

रकार्यभूतो देवसर्गः इन्द्रियाभिमानिदेवानां दिग्वातादीनां यः सर्गः स पञ्चमः सर्गः । मनश्च यन्मयं यस्य सात्विकाहङ्कारस्य कार्यं सोऽपि सर्गः पञ्चमः इत्यर्थः । हे प्रभो अबुद्धिर्जीवानामावरणं विक्षेपश्च तां करोतीत्यबुद्धिकृत्तस्य तमसः तामिस्रादिपञ्चपर्वाविद्याया यस्तु सर्गः स तु षष्ठः ॥ १६ ॥ षडिति ॥ इमे षट् प्राकृताः प्रकृतित एवोत्पन्नाः सर्गा वर्णिता इति शेषः । वैकृतान् विकृतिः समष्ट्यात्मको ब्रह्मा तत्कृतानपि सर्गान्मे मत्तस्त्वं शृणु । रजोभाजः गृहीतरजोगुणस्य हरति दुःखं हरिः तादृशी मेधा तद्विषया मतिर्यस्य हरिमेधास्तस्य आर्षः असिच् । भगवतः इयं सर्गरूपा लीलेत्यर्थः । यद्वा । हरिर्मेधायां यस्य तस्य रजोभाजो ब्रह्मरूपस्य अत्र पक्षे अबुद्धिकृत इति प्रथमान्तम् । अनवधानकृत इत्यर्थः ॥१७॥ सप्तम इति ॥ तस्थुषां स्थावराणां यो मुख्यसर्गः स सप्तमः । मुखमिव प्रथमकृतत्वान्मुख्य इत्युच्यते शाखादिभ्यो यत् । स च वनस्पत्यादिकः षड्विधः । ये पुष्पं विनापि फलन्ति ते वनस्पतयः वटपिप्पलादयः । फलपाकान्ता ओषधयः यवव्रीह्यादयः । आरोहणापेक्षा लताः कूष्माण्डादयः । त्वक्साराः कठिनत्वचो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेण्वादयः । लता एव काठिन्येनारोहणानपेक्षा वीरुधः । ये पुष्पैः फलन्ति ते द्रुमा आम्रादयः ॥ १८ ॥ उत्स्रोतस इति अर्द्धम् ॥ ते च वनस्पत्यादयः ऊर्ध्वं स्रोत आहारसञ्चारो येषां ते तथा तमःप्रायाः अव्यक्तचैतन्या अन्तःस्पर्शाः स्पर्शमेवान्तर्जानन्ति न तु वक्तुं शक्नुवन्ति । विशेषिणः अनेकभेदवन्तः । तिरश्चामिति ॥ तिरश्चां तिर्यग्गच्छतां यः सर्गः सोऽष्टमः । स च पुनरष्टाविंशद्विधो मतः सम्मतः । विंशतिशब्दस्य तान्तत्वमार्षम् । अष्टाविंशतिधा मत इत्यपि पाठः । ते तिर्यञ्चश्च अविदः ह्यस्तनज्ञानशून्याः भूरितमसः अज्ञानबहुलाः क्रोधाधिकाः केवलाहारनिद्रामैथुनभयादिमात्रनिष्ठाश्चेति घ्राणज्ञाः घ्राणेनैवेष्टमर्थं जानन्तीत्यर्थः । हृदि मनसि अवेदिनः सुखदुःखादिदीर्घानुसन्धानरहिताः ॥ १९ ॥ भेदानाह—गौरिति ॥ हे सत्तम गौः अजः इत्याद्या इमे नव पशवः द्विशफाः द्विखुराः ॥ २० ॥ खर इति ॥ हे क्षत्तः खरादयः चमर्यन्ताः एते षट् एकशफा भवन्ति । अश्वतरः गर्दभादश्वायामुत्पन्नः पञ्चनखान् पशून् शृणु ॥ २१ ॥ श्वा इति ॥ चतुरक्षरोनः श्लोकः । श्वादयो गोधान्ताः पञ्चनखाः इति द्वादश । एते सर्वे मिलिताः

उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः ॥ तिरश्चामष्टमः सर्गः सोऽष्टाविंशतिधा मतः ॥ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥१९॥ गौरजो महिषः कृष्णः सूकरो गवयो रुरुः ॥ द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥२०॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ॥ एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ॥ २१ ॥ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ ॥ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ॥२२॥ कङ्कगृध्रवटश्येनभासभल्लुकबर्हिणः ॥ हंससारसचक्राह्वकाकोलूकादयः खगाः ॥२३॥ अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम् ॥ रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः ॥ २४ ॥ वैकृतास्त्रय एवैते देवसर्गश्च सत्तम ॥ वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः ॥ २५ ॥

भूचराः सप्तविंशतिः मकरादयः इत्यग्रेन्वेति ॥ २२ ॥ कङ्केति ॥ मकरादयो जलचराः कङ्कादयः खगाः पक्षिणः ते च अभूचरत्वेनैकीकृत्य गृहीताः एवमष्टाविंशतिः भेदा भवन्ति । तत्र चादिशब्दो ज्ञेयः । इयत्तायां तात्पर्याभावात् ॥ २३ ॥ अर्वागिति ॥ हे क्षत्तः अर्वाक् अधःस्रोतः आहारसंचारो यस्य सोऽर्वाक्स्रोताः ह्रस्वमार्षम् । इदं च नृणां लक्षणम् इति योऽयमेकविधो नृणां सर्गः स तु नवमः । ते च रजोगुणोऽधिको येषु ते कर्मपराः निरन्तरं कर्म कुर्वन्त एव तिष्ठन्ति । दुःखे च सुखमानिनः चकारात्सुखे दुःखसाधनत्वाभिमानवन्त इति ज्ञेयम् ॥ २४ ॥ वैकृता इति ॥ हे सत्तम एते स्थावरतिर्यङ्मनुष्याख्यास्त्रयः सर्गाः वैकृता एव नतूभयात्मकाः तथा देवसर्गश्च वैकृतः । यस्तु वैकारिको देवसर्गः सतु प्राकृतेषु पूर्वमेव प्रोक्तः । अयं तु ततो न्यूनत्वाद्वैकृतः देवसर्गत्वाचदन्तर्भूतश्च कौमारः सनत्कुमारादीनां सर्गस्तु उभयात्मकः । देवत्वेन प्राकृतो मनुष्यत्वेन वैकृत इत्यर्थः । यद्वा “ भगवद्ध्यानपूतेन मनसान्यांस्ततोऽसृजत् । ” इत्यग्रिमोक्तेः भगवद्ध्यानजन्यत्वेन भगवज्जन्यत्वाद्ब्रह्मजन्यत्वाच्च प्राकृतो वैकृतश्चेति ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेति सार्द्धम् ॥ देवसर्गो दशमः स चाष्टविधः एकं सुबन्तमेकः प्रकारः । तथा च विबुधाः पितरः असुराः इति त्रयः । गन्धर्वाप्सरस एकः सिद्धा एकः यक्षरक्षांस्येकः चारणाः एकः भूतप्रेतपिशाचा एकः किन्नरादय एकः आदिशब्दात्किंपुरुषादयः एतद्विंशेऽध्याये स्पष्टं भविष्यति ॥ २६ ॥ दशेति ॥ हे विदुर विश्वसृजा भगवता ब्रह्मणा च कृता एते दशविधाः सर्गास्ते तुभ्यं मया आख्याताः वर्णिताः । अतः परं वंशान्मन्वन्तराणि च प्रवक्ष्यामि । कालवर्णनं तु प्रक्रान्तत्वात् वंशेभ्यः पूर्वमेव ॥ २७ ॥ एवमिति ॥ एवममोघसङ्कल्पः हरिरेव रजःप्लुतः स्वेच्छया स्वीकृतरजोगुणः कल्पादौ आत्मभूः चतुर्मुखरूपः स्रष्टा सन्नात्मा स्वयमेव आत्मना स्वरूपभूतेन कालप्रधानपुरुषादिरूपसाधनेन आत्मानमेवोपादानभूतं विश्वरूपेण सृजति । आदिपदेन स्थितिसंहारयोर्ग्रहणम् । सत्वेन विष्णुरूपः सन् पाति तमसा रुद्ररूपः सन् संहरति च ॥ २८ ॥ इतः परं काचित्कं श्लोकद्वयम् । " गुणव्यत्यय एतस्मिन् मायावित्त्वादधीशितुः । न पौर्वापर्यमिच्छन्ति नद्यां भ्राम्यद्भ्रमेरिव॥ देवासुरादयः क्षत्तः कल्पेऽस्मिन् यत्र कीर्तिताः ।

देवसर्गश्चाष्टविधो विबुधाः पितरो सुराः ॥ गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ॥ भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः॥२६॥
दशैते विदुराऽऽख्याताः सर्गास्ते विश्वसृक्कृताः ॥ अतः परं प्रवक्ष्यामि वंशान्मन्वन्तराणि च ॥२७॥ एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः ॥ सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना ॥ २८ ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे दशविधसर्गवर्णनं नाम दशमोऽध्यायः ॥ १० ॥ ॥ मैत्रेय उवाच ॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ॥ परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥
सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानविशेषो निरन्तरः ॥ २ ॥

त एव नामरूपाभ्यामासन् मन्वन्तरान्तरे ॥ " इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्याध्याये दशमे व्यधात् ॥ १० ॥ एकादशे पराण्वादिर्द्विपरार्धावधिर्महान् ॥ कालो निरूपितस्तत्र श्लोकाः सार्द्धाः [४१॥]कुंसिन्धवः ॥ त्रीण्युवाचेति द्विवेदा[४२।]ः पादयुक्ता अनुष्टुभः ॥ ११ ॥ कालस्य विशेषं वक्तुं तत्परिच्छेद्यं सूक्ष्मं स्थूलं च वस्तु लक्षयति—चरम इति॥ सतः कार्यमात्रस्य विशेषाणामंशानां यश्चरमः अन्त्यः यस्यांशो नास्ति अनेकः कार्यावस्थामप्राप्तः असंयुतः समुदायावस्थांच न प्राप्तः अत एव सदाकार्यसमुदायावस्थयोरपगमेऽपि यो वर्त्तते स परमाणुर्विज्ञेयः । यतो येभ्यः समुदितेभ्यो नृणां व्यवहर्तॄणामैक्यभ्रमः अवयविबुद्धिर्भवति । तथा च पञ्चमेऽवयविनिराकरणे वक्ष्यति येषां समूहेन कृतो विशेष इति ॥ १ ॥ स्थूलमाह—सत एवेति ॥ यस्य चरमोंशः परमाणुस्तस्यैव सतः सर्वकार्यमात्रस्य स्वरूपावस्थितस्य प्रलयमप्राप्तस्य यत्कैवल्यमैक्यं यस्य सः अविशेषः विशेषविवक्षारहितः निरन्तरः भेदविवक्षारहितश्च सर्वोऽपि प्रपञ्चः परममहान् इत्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ हे सत्तम यथा सूक्ष्मः स्थूलश्चायं पदार्थो निरूपित एवं संस्थानं परमाण्वाद्यवस्था तस्य भुक्तिर्व्याप्तिस्तया सौक्ष्म्ये स्थौल्ये च कालोऽप्यनुमितो भवति चकारान्मध्यमावस्था गृह्यते । अनुमितत्वे हेतुः यतोऽयं कालः अव्यक्तः अप्रत्यक्षः व्यक्तभुक् अद्य घटः भविष्यति इत्यादिप्रसिद्धत्वाद्व्यक्तं विश्वं भुङ्क्ते व्याप्नोत्युत्पत्तिविनाशादिहेतुतया परिच्छिनत्ति तथा विभुः समर्थः भगवान् भगवच्छक्तिविशेषः अस्ति ॥ ३ ॥ स काल इति ॥ सतः प्रपञ्चस्य परमाणुतां परमाण्ववस्थां यो भुङ्क्ते सः कालः परमाणुकालः । यस्तु सतो विशेषं साकल्यं भुङ्क्ते स परममहान् तत्संज्ञकः कालः अत्रायमर्थः । ग्रहर्क्षताराचक्रस्थ इत्यादिना सूर्यगत्यैव कालादिविभागस्य वक्ष्यमाणत्वात्सूर्यो यावता परमाणुदेशमतिक्रामति तावान् कालः परमाणुकालः । यावता च द्वादशराश्यात्मकं सर्वं भुवनकोशमतिक्रामति स कालः परमो महान् संवत्सरात्मकः तस्यैवावृत्त्या तु युगमन्वन्तरादिक्रमेण द्विपरार्द्धान्तत्वमिति । यद्वा । सृष्टिमारभ्य संहारपर्यन्तं यावान् कालः स परममहानिति ॥४॥ अथ मध्यमकालावस्थामाह—अणुरिति ॥ द्वौ परमाणू अणुः स्यात् द्वाभ्यां परमाणुभ्यामेकः अणुः स्यात् तं यावता सूर्योऽतिक्रामति सोऽणुः कालः स्यादित्यर्थः । त्रयोऽणव एकस्त्रसरेणुः स्मृतः वृद्धैः कथितः । त्रिभि-

एवं कालोप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥ ३ ॥ स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम् ॥ सतोऽविशेषभुग्यस्तु स कालः परमो महान् ॥ ४ ॥ अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृताः ॥ जालार्करश्म्यवगतः खमेवानुपतन्न गाम् ॥ ५ ॥ त्रसरेणुत्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः ॥ शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः ॥ ६ ॥ निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः ॥ क्षणान् पञ्च विदुः काष्ठां लघु ता दश पञ्च च ॥ ७ ॥ लघूनि वै समाम्नाता दश पञ्च च नाडिका ॥ ते द्वे मुहूर्तः प्रहरः षड्‌ यामः सप्त वा नृणाम् ॥ ८ ॥

रणुभिरेकस्त्रसरेणुर्भवति तं यावता सूर्योऽतिक्रामति स त्रसरेणुः कालः स्मृत इत्यर्थः । स तु प्रत्यक्ष इत्याह । स त्रसरेणुः गवाक्षगतजालरन्ध्रप्रविष्टेष्वर्करश्मिषु सूर्यकिरणेष्ववगतो दृष्टः सन् योऽसावतिलघुत्वेन खमाकाशमेवानुपतन् अगात् गतो भवति स त्रसरेणुरित्यर्थः । नगामिति पाठे तु खमेवानुपतन्नावगतो भवति । गां पृथ्वीं पतंस्तु नावगतो भवति एवं च परमाणोः षड्गुणस्त्रसरेणुः ॥ ५ ॥ त्रसरेणुरिति ॥ त्रसरेणुत्रिकं यः भुङ्क्ते यावता सूर्योऽतिक्रामति स कालः त्रुटिः स्मृतः । शतं भागाः त्रुटिरूपा यस्मिन्स तथाभूतः त्रुटीनां शतेन एको वेधाख्यः कालः स्यादित्यर्थः । त्रिभिस्तैर्वेधैस्त्वेको लवः स्मृतः ॥ ६ ॥ निमेष इति ॥ त्रिलवो निमेषो ज्ञेयः ते निमेषास्त्रयः क्षण इत्याम्नातः । पञ्च क्षणान् काष्ठां विदुः ताश्च काष्ठाः दश पंच च पञ्चदश च एकं लघु भवति ॥७॥ लघूनीति ॥ पञ्चदशलघूनि चैका नाडिका समाम्नाता । द्वे ते नाडिके एको मुहूर्त्तो भवति । षट् सप्त वा नाडिकाः नृणां मनुष्याणां प्रहरो भवति । स एव यामो दिनस्य रात्रेश्च चतुर्थो भागः । ह्रासे षट् मध्ये सप्त वृद्धौ अष्ट तत्राप्यनियमार्थो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाशब्दः।देशादिभेदेन तद्भेदानां गणयितुमशक्यत्वात्॥८॥द्वादशार्द्धेति॥त्रियवा गुञ्जा।पञ्चगुञ्जापरिमितो माषः । षोडशमाषपरिमित एकः सुवर्णः।चत्वारः सुवर्णा एकं पलम् । षोडशभिः पलैः प्रस्थः । द्वादशार्द्धं षट् उन्मीयतेऽनेनेत्युन्मानं पात्रम् । षट्पलताम्रविनिर्मितं प्रस्थप्रमितजलपूर्तियोग्यं पात्रं चतुर्भिः स्वर्णमाषैश्चतुरङ्गुलायामशलाकारूपेण रचितैः कृतमूलच्छिद्रं तेन च्छिद्रेण यावत्प्रस्थपरिमितं जलं प्रविशति तेन च प्लुतं जले निमग्नं भवति तावान् कालो नाडिका । अत्र पलच्छिद्रयोराधिक्ये शीघ्रं निमज्जेत् अल्पत्वे च विलम्बेन निमज्जेदिति । पलशलाकयोर्नियमस्तत्रापि रजतादिशलाकया च्छिद्रपुष्टिः स्यादिति सुवर्णस्य नियमो बोध्यः । इदं च स्थूलरीत्या वस्तुतो ज्योतिःशास्त्रानुसारियन्त्रैः स्फुटता ॥ ९ ॥ यामा इति ॥ हे मानद चत्वारश्चत्वारः अष्टौ यामाः मर्त्यानां मनुष्याणामहनी अहोरात्रश्चत्वारो यामाः अहः चत्वारश्च यामाः रात्रिरित्युभे भवतः । उभयं मिलित्वैकमहस्तानि पञ्चदशाहानि पक्षो भवति । स द्विविधः शुक्लः कृष्णश्चेति । तत्र यस्मिन् चन्द्रकलावृद्धिः स शुक्लः यत्र च चन्द्रकलाह्रासः स कृष्ण इति ॥१०॥ तयोरिति सार्द्धम् ॥ तयोः शुक्लकृष्णयोः पक्षयोः समुच्चयः समुदाय एको मासो नृणामित्यनुषङ्गः । तत्पूर्वोक्तोमासः पितॄणामहर्निशमहोरात्रः । तत्र कृष्णपक्षः अहः

द्वादशाऽर्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः ॥ स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतम् ॥ ९ ॥ यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे ॥ पक्षः पञ्चदशाहानि शुक्लः कृष्णश्च मानद ॥ १० ॥ तयोः समुच्चयो मासः पितॄणां तदहर्निशम् ॥ द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥ अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः ॥ ११ ॥ संवत्सरशतं नृणां परमायुर्निरूपितम् ॥ १२ ॥ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् ॥ संवत्सरावसानेन पर्येत्यऽनिमिषो विभुः ॥ १३ ॥ संवत्सरः परिवत्सर इडावत्सर एव च ॥ अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥ १४ ॥

शुक्लपक्षो रात्रिः । तौ पूर्वोक्तौ द्वौ मासौ नृणामृतुः । षण्मासा अयनं तच्च द्विविधं दक्षिणमुत्तरं च । दिवि स्वर्गे तु अयने दक्षिणोत्तरायणे अहनी देवानामहर्निशं प्राहुरित्यर्थः । उत्तरायणमहः दक्षिणायनं रात्रिः । ज्यौतिषिकास्तु मेषादिषट्के सूर्ये दिनं तुलादिषट्के रात्रिरित्याहुः । द्वादशमासा नृणां वत्सरः स्मृतः ॥ ११ ॥ संवत्सरेति अर्द्धम् ॥ नृणामिति पितृदेवादीनामप्युपलक्षणं स्वस्वमानेन संवत्सरशतं परमुत्कृष्टं संपूर्णमायुर्निरूपितं पापादिनायुःक्षयान्मध्येऽपि मरणं तपआदिनाऽधिकमप्यायुरिति ॥ १२ ॥ ग्रहर्क्षेति ॥ ग्रहर्क्षतारोपलक्षितं यत् कालचक्रं तत्र स्थितः अनिमिषः कालव्यवस्थापकः विभुः सूर्यः परमाणुः सूक्ष्मकाल आदिर्यस्य तेन संवत्सरः अवसानं यस्य तेन कालेन जगत् द्वादशराश्यात्मकं भुवनकोषं पर्येति परिक्रामति ॥ १३ ॥ संवत्सर इति ॥ हे विदुर संवत्सरादिभेदैः पञ्चधा अब्दः प्रभाष्यते कथ्यते संवत्सरादिभेदश्च यावता कालेन रविर्द्वादशराशीन्पर्येति तावान्कालः सौरोब्दः संवत्सरः । यावता मध्यममानेन गुरुरेकं राशिं भुङ्क्ते तावान् बार्हस्पत्योऽब्दः परिवत्सरः । षष्ट्युत्तरशतत्रयमिताहोरात्रैः सावनोऽब्दः इडावत्सरः ।शुक्लादिदर्शान्तैः द्वादशभिः क्वापि त्रयोदशभिर्वा मासैश्चान्द्रोऽब्दः अनुवत्सरः । यावता चन्द्रः सप्तविंशतिर्नक्षत्राणि द्वादशकृत्वो भुङ्क्ते तावान् नाक्षत्रो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽब्दः वत्सरः । अन्ये पुनरेवमाहुः । यदा शुक्लपक्षप्रतिपदि रविसंक्रान्तिर्भवति तदा सौरचान्द्रमासयोर्युगपत् उपक्रमो भवति स संवत्सरः । ततः सौरमानेन वर्षे षट् दिनानि वर्द्धन्ते चान्द्रमानेन च वर्षे षट् दिनानि ह्रसन्तीति किंचिदूनद्वादशदिनव्यवधानादुभयोश्चन्द्रसूर्ययोरग्रपश्चाद्भावो भवति एवं व्यवधानतारतम्येन पञ्चवर्षाणि यथाक्रमेणोक्तनामानि गच्छन्ति तन्मध्ये च द्वौ मलमासौ भवतस्ततः पुनः षष्ठः संवत्सराख्यो भवति इति ॥१४॥ य इति ॥ यः भूतभेदः महाभूतविशेषः तेजोमण्डलरूपः सूर्यः कालाख्यया स्वशक्त्या सृज्यमङ्कुरादितद्विषयां बीजादिशक्तिम् उरुधा बहुधा उरुशब्दाद्धा आर्षः । उच्छ्वसयन् कार्याभिमुखीं कुर्वन् उच्छ्वसितीत्युच्छ्वसः अच् । ततः तत्करोतीति णिजन्ताच्छता पुंसः अभ्रमाय भ्रमनिवृत्तये आयुरादिव्ययेन विषयासक्तिं निवर्तयन् इत्यर्थः । स कामानां तु गुणमयं स्वर्गादिफलं क्रतुभिर्वितन्वन् दिवि आकाशे धावति तस्मै वत्सरपञ्चकाय संवत्सरादिपञ्चविधवर्षप्रवर्त्तकाय सूर्याय बलिं हरत पूजां कुरुत ॥ १५ ॥ पितृदेवेति ॥ इदं स्वस्वमानेन वर्षशतं पित्रादीनां परमायुः स्मृतम् त्वया कथितं प्रत्यहं कल्पते सृज्यत इति कल्पस्त्रैलोक्यं तस्माद्बहिर्वर्तमाना ये विदो ज्ञानिनः स्युः सन्ति तेषां परेषामुत्कृष्टानां गतिमायुर्मानमाचक्ष्व कथय ॥ १६ ॥ भगवानिति ॥

यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥ कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपञ्चकाय ॥१५॥ विदुर उवाच ॥ पितृदेवमनुष्याणामायुः परमिदं स्मृतम् ॥ परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः ॥ १६ ॥ भगवान् वेद कालस्य गतिं भगवतो ननु ॥ विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा॥१७॥ मैत्रेय उवाच ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम् ॥१८॥ चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥१९॥

भगवान् भवान् भगवतः कालस्य गतिं ननु निश्चितं वेद । यतः धीराः योगिनः योगराद्धेन योगसिद्धेन चक्षुषा विश्वं सर्वमतीन्द्रियमपि वस्तु विचक्षते पश्यन्ति ॥ १७ ॥ कृतमिति ॥ अवधीयते व्यवधीयतेनेनेत्यवधानं सन्ध्या अंशश्च तत्सहितं कृतं त्रेता द्वापरश्च कलिश्चेति चतुर्युगं दिव्यैर्देवमानामितैर्द्वादशभिर्द्वादशसहस्रैर्वर्षैर्निरूपितम् । सहस्रैरित्युत्तरश्लोकसामर्थ्यात्॥१८॥चत्वारीति ॥ तत्र कृतादियुगेषु यथाक्रमं चत्वारि त्रीणि द्वे चैकं सहस्राणि तथा ततो द्विगुणानि शतानि च संख्यातानि । तत्र कृतयुगे चत्वारि सहस्राणि सन्ध्यांशयोश्चत्वारि चत्वारि शतानि इत्यष्टौ शतानि च । त्रेतायां त्रीणि सहस्राणि सन्ध्यांशयोस्त्रीणि त्रीणि शतानीति षट्शतानि। द्वापरे द्वे सहस्रे सन्ध्यांशयोर्द्वे द्वे शते इति चत्वारि शतानि कलियुगे।एकं सहस्रं सन्ध्यांशयोश्चैकैकं शतमिति द्वे शते चेति ज्ञेयम्।इदं च देवमानेन एतान्येव षष्ट्युत्तरशतत्रयगुणितानि नरमानेन भवन्ति। तत्रादौ षट्त्रिंशत्सहस्राणि वर्षाणि सन्ध्या ततः सार्द्धत्रीणि लक्षाणि कलियुगम् । ततोऽन्ते षट्त्रिंशत्सहस्राणि सन्ध्यांशः ततः चत्वारि लक्षाणि द्वात्रिंशत्सहस्राणि कलिः । कलेर्द्विगुणं द्वापरं त्रिगुणा त्रेता चतुर्गुणं कृतम् । सन्ध्यासन्ध्यांशवर्षाण्यपि द्वित्रिचतुर्गुणानि कार्याणि । एवं च मनुष्याणां षष्ट्यधिकैःशतत्रयवर्षमितं देवानां वर्षम् । एवं मनुष्याणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशति [४३२००००] सहस्राधिकत्रयश्चत्वारिंशल्लक्षैर्वर्षैश्चतुर्युगं शास्त्रेषु युगशब्देनोच्यते । तत्र अष्टाविंशतिसहस्राधिकैः [१७२८०००] सप्तदशभिर्लक्षैः कृतम् । षण्णवतिसहस्राधिकैर्द्वा [१२९६०००] दशभिर्लक्षैस्त्रेता । चतुःषष्टि [८६४०००] सहस्राधिकैरष्टभिर्लक्षैर्द्वापरः । द्वात्रिंशत् [४३२०००] सहस्राधिकैः चतुर्भिर्लक्षैः कलिः ॥१९॥ सन्ध्यांशयोरिति ॥ शतसङ्ख्ययोः उक्तानि शतानि सङ्ख्या ययोस्तयोः युगस्यादौ सन्ध्या अन्तेंशस्तयोरन्तरेण मध्ये यः कालस्तमेव कालं तज्ज्ञा युगलक्षणाभिज्ञा युगं प्राहुः अन्तरेणेत्यव्ययम् शेषे षष्ठी । यत्र युगे गवालम्भादिरूपो विशेषधर्मो विधीयते । सामान्यधर्मः श्रवणकीर्त्तनादिरूपस्तु सन्ध्यांशयोरप्यस्त्येवेति यस्य युगस्य यो धर्मः स एव तत्सन्ध्यासन्ध्यांशयोरपि प्रधानीभूतः । परन्तु सन्ध्यायां पूर्वयुगस्य सन्ध्यांशे उत्तरयुगस्य धर्माणां मिश्रणं भवति॥ २० ॥धर्म इति॥कृते कृतयुगे चतुष्पात् संपूर्णो धर्मो मनुजान् समनुवर्त्तते स एव धर्मः अन्येषु त्रेतादिष्वेकैकेन पादेन वर्धता वर्धमानेन शता आर्षः।अधर्मेण अधर्म हेतुना व्येति एकैकपादेन ह्रसतीत्यर्थः । एतच्च वैराग्यार्थं धर्मप्रयत्नाधिक्यार्थं वा स्वरूपकथनमात्रं नतु धर्मसंकोचार्थम् ॥२१॥ त्रिलोक्या इति॥हे तात त्रिलोक्या बहिः स्थितानां महर्लोकप्रभृतीनाम् आब्रह्मणः ब्रह्मलोकपर्यन्तानां युगसाहस्रं चतुर्युगानां सहस्रसङ्ख्यासमुदाय एकदिनं भवति तावती चतुर्युगसहस्रपरिमितैव तेषां रात्रिर्भवति ।

सन्ध्यांशयोरन्तरेण यः कालः शतसंख्ययोः ॥ तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ॥ २० ॥ धर्मश्चतुष्पान्मनुजान् कृते समनुवर्तते ॥
स एवान्येष्वधर्मेण व्येति पादेन वर्धता ॥ २१ ॥ त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनम् ॥ तावत्येव निशा तात यन्निमीलति विश्वसृक् ॥ २२ ॥ निशाऽवसान आरब्धो लोककल्पोऽनुवर्तते ॥ यावद्दिनं भगवतो मनून्भुञ्जंश्चतुर्दश ॥ स्वं स्वं कालं मनुर्भुङ्क्ते साधिकां ह्येकसप्ततिम् ॥ २३ ॥ मन्वन्तरेषु मनवस्तद्वंश्या ऋषयः सुराः ॥ सप्तर्षयस्तु गन्धर्वाः क्रमेणैव भवन्ति ते ॥ भवन्ति चैव युगपत्सुरेशाश्चानु ये च तान् ॥ २४ ॥ एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः ॥ तिर्यङ्नृपितृदेवानां सम्भवो यत्र कर्मभिः ॥ २५ ॥

यत् यस्यां रात्रौ विश्वसृक् ब्रह्मा निमीलति तदैव स्वपन्तं गर्भोदशायिनमनुस्वपिति तदा च प्रलयो भवति।एवं युगसहस्रद्वयं ब्रह्मणोऽहोरात्रः । तत्र मनुष्याणां चतुःषष्टिकोट्यधिकाष्टपद्म [८६४००००००००] वर्षाणि भवन्ति ॥२२॥ निशेति ॥ पुनश्च निशाया अवसाने अन्ते सति आरब्धो लोकस्य कल्पः सर्गश्चतुर्दशमनून्भुञ्जन्पारिच्छिन्दन्व्याप्नुवन् यावद्भगवतो ब्रह्मणो दिनं तावदनुवर्त्तते । स्वं स्वमिति अर्द्धम्॥ साधिकां किंचिदधिकां चतुर्युगानामेकसप्ततिं स्वं स्वं कालं मनुर्भुङ्क्ते अनुभवति तावत्कालं राज्यं करोति तत्र देवमानेन द्विपञ्चाशत् [८५२०००] सहस्राधिकान्यष्टलक्षाणि वर्षाणि भवन्ति । मनुष्यमानेन तु त्रिंशत्कोट्यः सप्तषष्टिर्लक्षाणि विंशतिः सहस्राणि इति॥ २३ ॥मन्वन्तरेषु इति॥ मन्वन्तरेषु साधिकैकसप्ततिचतुर्युगमितेषु एकैकमनुकालेषु मनवः स्वायंभुवादयः तद्वंश्याः पृथिवीपालका राजानः सप्तर्षयः सुरा देवाः सुरेशा इन्द्राः तानिन्द्रान् येऽनुवर्तन्ते ते च गन्धर्वादयः चकाराद् भगवदंशावताराश्च तत्र राजानोऽवताराश्च क्रमेण भवन्ति । सप्तर्षिमन्वादयस्तु युगपत्समकालमेव भवन्ति ॥२४॥ एष इति ॥ ब्राह्मः ब्रह्मणा कृतः दैनंदिनः दिनं दिनं क्रियमाणो यः सर्गः स एष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैलोक्यवर्त्तनः त्रैलोक्यस्य वर्त्तनमुत्पत्तिर्यस्मिंस्तथाभूतो ज्ञेयः । यत्र यस्मिन् दैनंदिने सर्गे तिरश्चां नृणां पितॄणां देवानां च कर्मभिः पुण्यपापैस्तदनुरूपः संभवः भवति ॥ २५ ॥ मन्वन्तरेष्विति ॥ मन्वन्तरेषु स्वमूर्तिभिः सत्वं शुद्धसत्वं बिभ्रत् शुद्धसत्वमयमूर्तिं बिभ्राणो भगवान् उदितपौरुषः आविष्कृतपुरुषकारः स मन्वादिभिः सहेदं विश्वमवति ॥ २६ ॥ तमोमात्रामिति ॥ त्रैलोक्यमात्रनाशार्थं तमसो मात्रां लेशमुपादाय स्वीकृत्योद्रिक्ततमस्कः अत एव प्रतिसंरुद्धः निवृत्तो विक्रमो व्यापारो यद्वा प्रतिसंरुद्धो वह्न्यादिभिरावृतः विक्रमो भूरादिलोकत्रयं येन " विक्रमो भूर्भुवः स्वश्च " इत्युक्तेः । स कालेनानुगतमनुप्रविष्टमशेषं त्रैलोक्यस्य जीववृन्दं यस्मिन् स विभुः दिनात्यये तूष्णीं त्यक्तमायाविनोदः आस्ते ॥ २७ ॥ तमेवेति ॥ निर्मुक्तः निवृत्तः शशी भास्करश्च यत्र यथा भवति तथा निशायामनुवृत्तायां सत्यां तमेवानु तत्कालानन्तरमेव भूर्भुवस्वरात्मकास्त्रयो लोका अपि धीयन्ते कर्मकर्त्तरि स्वयमेव लीयन्ते ॥ २८ ॥ त्रिलोक्यामिति ॥ शक्त्या भगवच्छक्तिरूपो यः संकर्षणमुखोद्भूतरुद्रगणाग्निस्तेन त्रिलोक्यां

मन्वन्तरेषु भगवान् बिभ्रत्सत्त्वं स्वमूर्तिभिः ॥ मन्वादिभिरिदं विश्वमवत्युदितपौरुषः ॥ २६ ॥ तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ॥ कालेनाऽनुगताऽशेष आस्ते तूष्णीं दिनात्यये ॥ २७ ॥ तमेवान्वपिधीयन्ते लोका भूरादयस्त्रयः ॥ निशायामनुवृत्तायां निर्मुक्तशशिभास्करम् ॥ २८ ॥ त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना ॥ यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ॥ २९ ॥ तावत्त्रिभुवनं सद्यः कल्पान्तैधितसिन्धवः ॥ प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्मयः ॥ ३० ॥ अन्तः स तस्मिन् सलिल आस्तेऽनन्तासनो हरिः ॥ योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ॥ ३१ ॥ एवंविधैरहोरात्रैः कालगत्योपलक्षितैः ॥ अपक्षितमिवास्याऽपि परमायुर्वयःशतम् ॥ ३२ ॥ यदर्धमायुषस्तस्य परार्धमभिधीयते ॥ पूर्वः परार्धोऽपक्रान्तो ह्यपरोऽद्य प्रवर्तते ॥ ३३ ॥

दह्यमानायां सत्यां तस्याग्नेरूष्मणा अर्दिताः पीडिता महर्लोकवासिनो भृग्वादयस्तस्माल्लोकाज्जनलोकं यान्ति ॥ २९ ॥ तावदिति ॥ उत्कटः आटोपः क्षोभो येषां ते च ते चण्डवातेन ईरितोर्मयश्च तथाभूताः कल्पान्तेन कालेन एधिताः प्रवृद्धाः सिन्धवस्तावत्तदा सङ्कर्षणाग्निना दग्धं त्रिभुवनं सद्यः त्रिलोक्यां दग्धायामविलम्बेन प्लावयन्ति। दाहस्तु शतवर्षपर्यन्तो ज्ञेयः ॥३०॥ अन्तरिति॥तस्मिन् सलिले अन्तः मध्ये अनन्तः शेष एव आसनं शय्या यस्य सः प्रसिद्धो हरिः योगः एव निद्रा योगाख्या विमलादीनां चिच्छक्तिवृत्तीनां पञ्चमी सैव तदानीं निद्रारूपा इति वा तया निमीलिते मीलिते अक्षिणी यस्य सः जनालयैः जनलोकवासिभिर्महर्लोकागतैरन्यैश्च स्तूयमान आस्ते शयनमनुकरोति ॥ ३१ ॥ एवमिति ॥ कालस्य गत्या परमा एवादिरूपया उपलक्षितैः एवंविधैश्चतुर्युगद्विसहस्रपरिमितैरहोरात्रैर्वयःशतं वर्षशतं परं प्राण्यन्तरायुरपेक्षयात्यधिकमप्यस्य ब्रह्मण आयुरपक्षितमुपक्षीणमिव गतप्रायमिवेति वैराग्यार्थम् ॥ ३२ ॥ यदिति ॥ तस्य ब्रह्मण आयुषो यदर्द्धं तत्परार्द्धमित्यभिधीयते । तत्रास्यायुषः पूर्वः परार्द्धोऽपक्रान्तः अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पगतः अपरः परार्द्धो हि अद्य प्रवर्तते ॥ ३३ ॥ ब्रह्मण आयुषि बहवः कल्पा भवन्ति तेषां मध्ये कांश्चिदाह—पूर्वस्येति ॥ पूर्वस्य परार्द्धस्यादौ ब्राह्मो नाम महान्कल्पः अभूत् । यत्र कल्पे ब्रह्मा अभवत् उत्पन्न इत्यर्थः । यं ब्रह्माणं शब्दब्रह्मेति विदुः।प्रभासखण्डोक्तैः श्वेतवाराहादिभिः पितृकल्पान्तैस्त्रिंशद्भिः कल्पैरेव शुक्लप्रतिपदाद्यमावस्यान्तानि त्रिंशद्दिनानि ब्रह्मणो मासः । एवं कल्पानां द्वादशभिरावृत्तिभिः द्वादशमासाः वर्षं पञ्चाशता वर्षैरेकः परार्द्धः । तत्र पूर्वस्य परार्द्धस्यादौ श्वेतवराहकल्प एव ब्रह्मजन्मतिथित्वाद् ब्राह्मशब्देनोच्यते । सा तिथिश्च ज्योतिःशास्त्ररीत्या चैत्रशुक्लप्रतिपदेव ॥ ३४ ॥ तस्यैवेति ॥ तस्यैव पूर्वपरार्द्धस्य चान्ते यं पितृकल्पमेव पाद्ममभिचक्षते मनीषिणः कथयन्ति स कल्पोऽभूत् । पाद्मत्वे हेतुमाह । यदिति । यत् यत्र कल्पे हरेर्भगवतो नारायणस्य नाभिरेव सरस्तस्मात् लोकसरोरुहं त्रिभुवनात्मकं कमलमासीत् उदपद्यत । तेन सर्वेष्वेव कल्पेषु लोकात्मकं पद्मं न भवति किन्तु क्वचिदेवेत्युक्तम्॥३५॥अयमिति॥हे भारत अयं तु वाराह इति विख्यातः कल्पो द्वितीयस्यापि परार्द्धस्या-

पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् ॥ कल्पो यत्राऽभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ॥३४॥ तस्यैव चान्ते कल्पोऽभूद्यं पाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहम् ॥ ३५ ॥ अयं ते कथितः कल्पो द्वितीयस्यापि भारत ॥ वाराह इति विख्यातो यत्रासीत् सूकरो हरिः ॥ ३६ ॥ कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते ॥ अव्याकृतस्याऽनन्तस्य अनादेर्जगदात्मनः ॥ ३७ ॥ कालोऽयं परमाण्वादिर्द्विपरार्धान्त ईश्वरः ॥ नैवेशितुं प्रभुर्भूम्न ईश्वरो धाम मानिनाम् ॥३८॥ विकारैः सहितो युक्तैर्विशेषादिभिरावृतः ॥ आण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥ ३९ ॥ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ॥ लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥४०॥ तदाहुरक्षरं ब्रह्म सर्वकारणकारणम्॥विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः॥४१॥इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां तृतीयस्कन्धे विदुरमैत्रेयसंवादे कल्पमानादिवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥

दौ एकपञ्चाशत्तमवर्षस्य प्रथमदिवसे कथितः । यत्रास्मिन् कल्पे हरिः स्वयमेव सूकर आसीत् ॥३६॥ कालपरिच्छेद्यानामायुरुक्त्वा कालापरिच्छेद्यं तत्वमाह—काल इति ॥ द्विपरार्द्धाख्योऽयं कालः अनन्तस्य अव्याकृतस्य कार्योपाधिशून्यस्य अक्षरब्रह्मणः अनादेश्च जगदात्मनः जगत्कारणस्य निमेष उपचर्यते केवलं न त्वनेनापि क्रमेण तस्यायुर्गणनमिति ॥ ३७ ॥ कालोऽयमिति ॥ परमाण्वादिर्द्विपरार्द्धान्तोऽयं कालः ईश्वरोऽतिसमर्थोऽपि भूम्नः परिपूर्णस्य ब्रह्मणः ईशितुं नियन्तुं नैव प्रभुर्नैव शक्नोति । यतो धाममानिनां देहगेहाद्यभिमानवतामेवेश्वरो विनाशे समर्थः नतु ब्रह्मणः॥३८॥भूम्न इत्युक्तं प्रपञ्चयन्नाह—विकारैरिति त्रयम् ॥ विकारैः भूतेन्द्रियरूपैः षोडशभिर्युक्तैः प्रकृतिमहदहङ्कारतन्मात्ररूपाष्टप्रकृतिमिलितैः सहितः आरब्धः अन्तः पञ्चाशत्कोटियोजनविस्तृतः बहिश्च विशेषादिभिः पृथ्व्यादिभिर्दशगुणोत्तरोत्तराधिकैः सप्तभिरावृतः अयम् आण्डकोशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्र प्रविष्टः परमाणुवत् लक्ष्यते एवंविधाश्चान्येऽपि कोटिशोऽण्डराशयो यत्र अन्तर्गताः प्रविष्टाः परमाणुवद्दृश्यन्ते तत्सर्वेषां कारणानां प्रधानादीनामपि कारणमक्षरं ब्रह्म महात्मनः पुरुषस्य विष्णोः परं सर्वत उत्कृष्टं धाम स्वरूपम् आहुः । विष्णोः कारणार्णवशायिनः देह इति भक्ताः ॥ ३९ ॥ ४० ॥ ४१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्कन्धस्यैकादशे व्यधात् ॥ ११ ॥ द्वादशे तु कुमारादिमनुसर्गविवर्द्धने ॥ यौनोऽभून्मनुसर्गोऽत्र श्लोकाः सार्द्धा रसैर्षवैः ॥ तावत्योऽनुष्टुभस्तत्रोवाचवाचां चतुष्टयम् ॥ १२ ॥ इतीति ॥ हे क्षत्तः परमात्मनः कालाख्यो महिमा प्रभावविशेषस्ते तुभ्यमिति वर्णितः । अथ वेदगर्भो ब्रह्मा यथा प्रजा अस्राक्षीत्तत्प्रकारं कथ्यमानं मत्तस्त्वं निबोध शृणु ॥ १ ॥ ससर्जेति ॥ आदिकृत्प्रजास्रष्टा ब्रह्मा अग्रे स्वसृष्टौ प्रथमम् अन्धतामिस्रादीनि पञ्च ससर्ज । ताश्च अज्ञानस्य वृत्तयः पूर्वसिद्धा एव सृष्ट्यारम्भे ब्रह्मणः सकाशात् प्रादुर्भूताः तत्र तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबुद्धिः महामोहो भोगेच्छा तामिस्रं तत्प्रतिघाते क्रोधः अन्धतामिस्रं विषयविनाशेऽहमेव मृत इति बुद्धिः पातञ्जलेप्येता एवोक्ता अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशा इति श्रीविष्णुस्वामिप्रोक्ता वा अज्ञानविपर्यासभेदभयशोकाः॥ २॥दृष्ट्वेति ॥ अज्ञानवृत्तीनां पापीयसीं

॥ मैत्रेय उवाच ॥ इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः ॥ महिमा वेदगर्भोऽथ यथाऽस्राक्षीन्निबोध मे ॥१॥ ससर्जाग्रेऽन्धतामिस्रमथ ता-
मिस्रमादिकृत् ॥ महामोहं च मोहं च तमश्चाऽज्ञानवृत्तयः ॥२॥ दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत ॥ भगवद्ध्यानपूतेन मनसाऽन्यां ततो-
ऽसृजत् ॥३॥ सनकं च सनन्दं च सनातनमथात्मभूः ॥ सनत्कुमारं च मुनीन् निष्क्रियानूर्ध्वरेतसः ॥४॥ तान् बभाषे स्वभूः पुत्रात् प्रजाः सृजत
पुत्रकाः ॥ ते नैच्छत् मोक्षधर्माणो वासुदेवपरायणाः ॥५॥ सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः ॥ क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे ॥६॥

सृष्टिं दृष्ट्वा तत्स्रष्टारमात्मानं बहुसचीमीनं नामन्यत ततस्तदनन्तरं स्वदोषनिवृत्त्यर्थं कृतं यद्भगवतो ध्यानं तेन पूतेन विशुद्धेन मनसा अन्यां सृष्टिमसृजत् ॥३॥ अविद्यानिवर्तिका विद्यैवेति ज्ञापयितुं विद्यावृत्तयोऽपि सनकाद्या आविर्बभूवुरित्याह–सनकं चेति ॥ आत्मभूर्ब्रह्मा अथ सनकादींश्चतुरः निष्क्रियान् ऊर्ध्वरेतसः जितेन्द्रियान् मुनीन् असृजत् प्रतिकल्पं मुख्यसर्गादय एव भवन्ति सनकादयस्तु ब्राह्माख्ये प्रथमे कल्पे सृष्टा एवानुवर्त्तन्ते । ब्राह्मसर्गत्वादिह तत्सृष्टिरुक्ता । अत्र सारार्थसंदर्शिन्यां महाकल्पायुषां जीवतामेव प्रथमपरार्द्धान्ते परमेश्वरे प्रवेशात् पाद्मे कल्पे ब्रह्मा यथा पद्माद्उत्पन्नस्तथा ब्रह्मापि सनकादीनुदपादयत् । एते च सनकाद्या विद्यावृत्तयः साङ्ख्ययोगवैराग्यतपांसि एषु भक्तिर्गुणीभूता तिष्ठति । मुख्यभक्तेराविर्भावस्तु नारदरूपेण वक्ष्यते इत्युक्तम् ॥४॥ तानिति ॥ स्वभूर्ब्रह्मा तान् स्वपुत्रान् बभाषे । हे पुत्रकाः यूयं प्रजाः सृजतेति । ते च मोक्षधर्माणः निवृत्तिधर्मनिष्ठाः वासुदेवपरायणाश्चातः तत् पित्राज्ञप्तं प्रजासर्जनं नैच्छन् । ज्ञानयोगः खल्वाविद्यककर्मयोगनिरासक एवेति ॥५॥ स इति ॥ स ब्रह्मा प्रत्याख्यातमनङ्गीकृतमनुशासनमाज्ञा यैस्तैः सुतैरेवं सृष्ट्याज्ञाप्रत्याख्यानेन अवध्यातः अवज्ञातः अत एव दुर्विषहं सोढुमशक्यं जातं क्रोधं नियन्तुं निग्रहीतुमुपचक्रमे प्रयत्नं कृतवान् ॥६॥ ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यापि कचिदविद्यया निवर्त्तते इति दर्शयितुं विद्यावति ब्रह्मणि अविद्यावृत्तिमुख्यस्य तामिस्रस्य क्रोधस्य रुद्ररूपेणाविर्भावमाह—धियेति ॥ धिया बुद्ध्या निगृह्यमाणो विष्टभ्यमानोऽपि सद्यः तस्य ब्रह्मणो मन्युः क्रोधः तन्मन्युः स चासौ मन्युश्चेति वा प्रजापतेः ब्रह्मणो भ्रुवोर्मध्यान्नीललोहितवर्णः कुमारः सन्नजायत । अयं चाविद्यावृत्तिमुख्यस्य तामिस्रस्य रुद्ररूपेणाविर्भावः॥७॥स वै इति॥ स वै देवानां पूर्वजः भगवान् भवः रुरोद रोदनपूर्वकमुवाच । हे धातः हे जगद्गुरो मे मम नामानि स्थानानि च कुरु॥८॥ इतीति ॥ तस्य रुद्रस्येत्येवंभूतं वचः परिपालयन् भगवान् पाद्मो ब्रह्मा भद्रया मधुरया वाचा अभ्यधात् उक्तवान् मा रोदीः ते तव तत् उक्तं करोमीति ॥ ९ ॥ यदिति ॥ हे सुरश्रेष्ठ सोद्वेगः भयसहितो बालक इव यत् यस्मात्त्वमरोदीः ततस्तस्मात् रुद्र इति नाम्ना प्रजास्त्वामभिधास्यन्ति ॥ १० ॥ हृदादीनामहङ्कारकार्यत्वात् तदधिष्ठातृ रुद्रस्य तत्स्थानत्वात् क्रोधपक्षे हृत्तस्य जन्मस्थानं प्रवृद्धः सनेत्रपाणिपादेन्द्रियेषु प्रसरति असुषु प्राणेषु श्वासाधिक्यसूचयः आकाशे सिंहादिघोरशब्दैः वाय्वग्निजलानां शोषकत्वदाहकत्व-

धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात् प्रजापतेः ॥ सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ॥७॥ स वै रुरोद देवानां पूर्वजो भगवान् भवः ॥ नामानि कुरु मे धातः स्थानानि च जगद्गुरो ॥८॥ इति तस्य वचः पाद्मो भगवान् परिपालयन्॥ अभ्यधाद् भद्रया वाचा मा रोदीस्तत् करोमि ते ॥ ९ ॥ यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ॥ ततस्त्वामभिधास्यन्ति नाम्ना रुद्र इति प्रजाः ॥ १० ॥ हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही ॥ सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रे कृतानि मे ॥ ११ ॥ मन्युर्मनुर्महिनसो महाञ्छिवः ऋतुध्वजः ॥ उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥ १२ ॥ धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलाम्बिका ॥ इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः ॥ १३ ॥ गृहाणैतानि नामानि स्थानानि च सयोषणः ॥ एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः ॥ १४ ॥ इत्यादिष्टः स गुरुणा भगवान्नीललोहितः ॥ सत्त्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः ॥ १५ ॥ रुद्राणां रुद्रसृष्टानां समन्ताद्ग्रसतां जगत् ॥ निशम्याऽसंख्यशो यूथान् प्रजापतिरशङ्कत ॥ १६ ॥

प्लावकत्वैः मह्याः विकारैः शब्दाद्यैः सिंहादिदेहैः सूर्यचन्द्रयोस्तापहिमाभ्यां मारकत्वमस्तीति तपस्विनामपि क्रोधदर्शनात्तपोऽपि क्रोधस्थानमित्यभिप्रेत्याह—हृदिति॥हृदिन्द्रियादीनि एकादश ते तव स्थानानि अग्रे त्वत्प्रार्थनातः पूर्वमेव मया कृतानि ॥ ११ ॥ मन्युरिति ॥ मन्युर्मनुः इत्याद्येकादश नामानि ॥ १२ ॥ धीरिति ॥ हे रुद्र धीर्वृत्तिरित्यादय एकादश ते तव स्त्रियः भविष्यन्ति ॥ १३ ॥ गृहाणेति ॥ सयोषणः सस्त्रीकः सन् एतानि नामानि स्थानानि च गृहाण । एभिः स्थानैर्नामभिश्च युक्तस्त्वं बह्वीः प्रजाः सृज । यत् यस्मात् त्वं प्रजानां पतिरसि प्रजासृष्टावधिकृतोऽसि ॥ १४ ॥ इतीति ॥ गुरुणा पित्रा ब्रह्मणा स भगवान् नीललोहितो रुद्र इति उक्तः सन् सत्त्वं बलमाकृतिः नीललोहितता स्वभावस्तीव्रता च तेन आत्मसमाः स्वेन समानाः प्रजाः ससर्ज ॥ १५ ॥ रुद्राणामिति ॥ रुद्रेण सृष्टानां रुद्राणां भयङ्करस्वरूपाणामत एव समन्तात् जगत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रसताम् शता आर्षः । असंख्यशः असंख्यातान् यूथान् निशाम्य दृष्ट्वा प्रजापतिर्ब्रह्मा अशङ्कत । एते त्वन्यसृष्टा अपि प्रजा ग्रसिष्यन्त इति शङ्कामवाप्योवाच ॥ १६ ॥
अलमिति ॥ हे सुरोत्तम उल्बणैः क्रूरैश्चक्षुर्भिर्मया सह दश दिशो दहन्तीभिः ईदृशीभिः सृष्टाभिः प्रजाभिरलम् । ईदृश्यः प्रजा न स्रष्टव्या इत्यर्थः ॥१७॥ तप इति ॥ ते तव भद्रं भवतु त्वं सर्वभूतानां सुखावहं तपः आतिष्ठ आचर । यतः इदं विश्वं यथापूर्वं पूर्ववत् तपसैव भवान् स्रष्टा स्रक्ष्यति स्थितिसमये रुद्रर्लीला न भद्रायेति तपसि प्रवर्त्तना । अत्र यथापूर्वं स्रष्टेति विपरीतलक्षणया यथा पूर्वकल्पान्ते प्रजा समहरस्तथा एतत्कल्पान्ते संहरिष्यसि इत्यर्थः । क्वचित्कल्पे ब्रह्मेव शिवोऽपि सृजतीत्याशयात्तथोक्तिरित्यपरे ॥ १८ ॥ तपसेति ॥ पुमान् तपसा एव अञ्जसा साक्षात् परं ज्योतिः सर्वभूतानां गुहासु अन्तःकरणेषु आवसति तथा तम् अधोक्षजं भगवन्तं विन्दते प्राप्नोति ॥ १९ ॥ एवमिति ॥ आत्मभुवा एवम् आदिष्टो रुद्रो गिरांपतिं ब्रह्माणं परिक्रम्य प्रदक्षिणीकृत्य अमुं ब्रह्माणं बाढमित्यामन्त्य भवदाज्ञामङ्गीकृत्य तथैव करोमीत्युक्त्वा तपसे तपः कर्तुं

अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम ॥ मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्बणैः ॥ १७ ॥ तप आतिष्ठ भद्रं ते सर्वभूतसुखावहम् ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥ १८ ॥ तपसैव परं ज्योतिर्भगवन्तमधोक्षजम् ॥ सर्वभूतगुहावासमञ्जसा विन्दते पुमान् ॥ १९ ॥ मैत्रेय उवाच ॥ एवमात्मभुवाऽऽदिष्टः परिक्रम्य गिरां पतिम् ॥ बाढमित्यमुमामन्त्र्य विवेश तपसे वनम् ॥ २० ॥ अथाभिध्यायतः सर्गं दशपुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य लोकसन्तानहेतवः ॥ २१ ॥ मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥ २२ ॥ उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात् स्वयंभुवः ॥ प्राणाद्वसिष्ठः सञ्जातो भृगुस्त्वचि करात्क्रतुः ॥ २३ ॥ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोर्ऋषिः ॥ अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् ॥ २४ ॥ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयम् ॥ अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः ॥ २५ ॥

वनं विवेश ॥ २० ॥ अथेति ॥ अथ पुनः सर्गं ध्यायतः सर्गः कथं वर्द्धेतेति चिन्तयतो भगवतो या स्वशक्तिः लोकरचनासामर्थ्यरूपा दत्ता तद्युक्तस्य ब्रह्मणो लोकसन्तानहेतवः लोकसृष्टिप्रवृत्तिहेतुभूताः दश पुत्राः प्रजज्ञिरे ॥ २१ ॥ मरीचिरिति ॥ मरीचिः अत्रिरित्यादयः तत्र तेषु दशमो नारदः ॥ २२ ॥ उत्सङ्गादिति ॥ स्वयंभुवः उत्सङ्गात् नारदः जज्ञे अङ्गुष्ठात् दक्षः जज्ञे प्राणाद्वसिष्ठः सञ्जातः त्वचि त्वचः सकाशात् भृगुः सञ्जातः पञ्चम्यर्थे सप्तमी । करात् क्रतुः सञ्जातः ॥ २३ ॥ पुलह इति ॥ पुलहः नाभितः जज्ञे पुलस्त्यः ऋषिः कर्णयोः जज्ञे । पञ्चम्यर्थे सप्तमी । अङ्गिरा मुखतः अत्रिः अक्ष्णः नेत्रात् जज्ञे मरीचिर्मनसोऽभवत् ॥ २४ ॥ धर्म इति ॥ दक्षिणतः स्तनात् धर्मो जातः । यत्र यस्माद्धर्मात् स्वयं श्रीनारायणो जातः । पृष्ठतस्त्वधर्मो जातः यस्मात् अधर्मात् लोकभयङ्करो मृत्युर्जातः ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदीति ॥ हृदि हृदयात् कामः जज्ञ इति सर्वत्र संबन्धः । भ्रुवोर्भ्रूभ्यां क्रोधः अधरदच्छदात् अधरोष्ठात् लोभः आस्यात् मुखात् वाक् वागधिष्ठात्री देवता मेढ्रात् उपस्थात् सिन्धवः पायोर्गुदात् अघाश्रयः पापप्रवर्त्तकः निर्ऋतिः राक्षसः ॥२६॥ छायाया इति ॥ देहच्छायायाः कान्तेर्वा सकाशात् प्रभुः देवहूत्याः कपिलमातुः पतिः कर्दमो जज्ञे । एवं विश्वकृतो ब्रह्मणो मनसो देहतश्चेदं जगज्जज्ञे ॥ २७ ॥ अतिविवेकिनामपि कामजयो दुष्करोऽतो दुहित्रादिभिः सह रहसि न वसेदिति ज्ञापयितुमाह—वाचमिति ॥ हे क्षत्तः स्वयंभूर्ब्रह्मा सकामः सन् मनः हरतीं नुमभाव आर्षः । तन्वीं सुन्दरीं स्वदुहितरं वाचमकामामकामयमानामपि चकमे कामितवानिति नोऽस्माभिः श्रुतं न इत्यव्ययम् । श्रुतमित्यनेनैतद्वक्तुमनर्हमपि त्वज्ज्ञानार्थमपराधाद्बिभ्यददोषदृगेव ब्रवीमीति द्योतितम् । दोषदृष्टौ तु मरीचिपुत्राणामिवाधःपातः स्यात् ॥ २८ ॥ तमिति ॥ अधर्मे कृता मतिर्येन तं पितरं विलोक्य सुताः ब्रह्मपुत्रा मरीचिमुख्यास्तत्प्रभृतयो मुनयः विश्रम्भात् पितृत्वादस्मदुक्तं श्रोष्यति करिष्यति चेति विश्वासात् न तु कोपात्प्रत्यबोधयन् ॥ २९ ॥

हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् ॥ आस्याद्वाक् सिन्धवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः ॥ २६ ॥ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः ॥ मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् ॥ २७ ॥ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः ॥ अकामां चकमे क्षत्तः सकाम इति नः श्रुतम् ॥ २८ ॥ तमधर्मे कृतमतिं विलोक्य पितरं सुताः ॥ मरीचिमुख्या मुनयो विश्रम्भात्प्रत्यबोधयन् ॥ २९ ॥ नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे ॥ यत्त्वं दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः ॥ ३० ॥ तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ॥ यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ॥ ३१ ॥ तस्मै नमो भगवते य इदं स्वेन रोचिषा ॥ आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति ॥ ३२ ॥ स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन् ॥ प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा ॥ ३३ ॥

नैतदिति ॥ हे प्रभो त्वत् त्वत्तो ये पूर्वे ब्रह्मादयस्तैरेतन्न कृतं ये चापरे अग्रे भाविनस्ते तन्न करिष्यन्ति यत् प्रभुः कामनिग्रहसमर्थोऽपि अङ्गजं काममनिगृह्य तद्वशीभूतस्त्वं स्वां दुहितरं गच्छेः ॥ ३० ॥ तेजीयसामिति ॥ हे जगद्गुरो तेजीयसां पापसंश्लेषाभावात् अतितेजस्विनामपि युष्माकं तेजस्विशब्दादीयसुन् विन्लुक् । एतत् दुहितृगमनं सुश्लोक्यं सत्कीर्त्तिकरं न भवति येषां युष्माकं वृत्तमाचारमनुतिष्ठन् लोकः प्राणिमात्रं क्षेमाय कल्पते समर्थो भवति । "यद्यदाचरति श्रेष्ठ" इत्याद्युक्तेः ॥३१॥ तस्मै इति॥ य आत्मस्थमात्मनि स्थितमविभक्तनामरूपमिदं विश्वं स्वेन रोचिषा स्वकीयेन सङ्कल्पात्मकज्ञानेन व्यञ्जयामास स धर्मं पातुमधर्मान्निवर्त्तनेन रक्षितुमर्हति तस्मै भगवते केवलं नमः ॥ ३२ ॥ स इत्थमिति ॥ इत्थमुक्तप्रकारेण पुरः अग्रे गृणतः भाषमाणान् स्वपुत्रान् प्रजापतीन् दृष्ट्वा प्रजापतिर्ब्रह्मा व्रीडितः संस्तदा तन्वं तनुं तत्याज । तन्वादीनां बहुलं छन्दसीति वार्तिकात् यण् । तनुत्यागश्च तद्भावत्याग एव। सर्वत्र प्रलयादर्वाक् ब्रह्मशरीरत्यागायोगात् महापातकस्य शरीरत्यागः प्रायश्चित्तमिति बोधयितुं तथा कथनम्॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामित्यर्द्धम् ॥ घोरां निन्द्यां तां त्यक्तां तनुं दिशो जगृहुः । यत् यां त्यक्तां तनुमेव नीहारं धूमिकां तम इति च विदुः व्यवहरन्ते अद्यापि तास्तमसा आव्रियन्ते ॥ ३४ ॥ कदाचिदिति ॥ समवेतान् सुसङ्गतान् लोकान् यथा पुरा पूर्वकल्पवदहं कथं स्रक्ष्यामीति कदाचित् ध्यायतः स्रष्टुर्ब्रह्मणश्चतुस्संख्यायुक्तान्मुखात् ऋगादयश्चत्वारो वेदा आसन् आविर्भूताः ॥ ३५ ॥ चातुर्होत्रमिति ॥ होता उद्गाता अध्वर्युर्ब्रह्मेति चतुर्णां होतॄणां कर्म चातुर्होत्रं कर्मतन्त्रं यज्ञादिविस्तारः उपवेदाः आयुर्वेदादयः नयः नीत्यादिशास्त्राणि तैः सह धर्मस्य चत्वारः सत्यं तपो दया दानमित्युक्ताः पादाः आश्रमाणां ब्रह्मचर्यादीनां चतस्रो वृत्तयश्च तथैव चतुर्मुखादासन् इत्यनुषङ्गः ॥३६॥ स वा इति ॥ हे तपोधन विश्वसृजामीशः स वै वेदादीन्मुखतः मुखेभ्यः असृजत् इति सामान्यतः श्रुतम् । तत्रापि विशेषतः स देवो येन यद्यदसृजत्तन्मे मह्यं ब्रूहि ॥ ३७ ॥ ऋगिति ॥ पूर्वादिभिर्मुखैः ऋग्यजुःसामाथर्वाख्यान् वेदान् क्रमाद्व्यधात् । चातुर्होत्रसृष्टिमाह शस्त्रमप्रगीतमन्त्रस्तोत्रं होतुः कर्म इज्यामध्वर्योः कर्मस्तुतिः संप्रगीतं स्तोमं स्तुत्यर्थमृक्समु-

तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ॥ ३४ ॥ कदाचिद् ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा ॥३५॥ चातुर्होत्रं कर्मतन्त्रमुपवेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाऽऽश्रमवृत्तयः ॥३६॥ विदुर उवाच ॥ स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥३७॥ मैत्रेय उवाच ॥ ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः ॥ शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥ ३८ ॥ आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः ॥ स्थापत्यं चासृजद् वेदं क्रमात्पूर्वादिभिर्मुखैः ॥ ३९ ॥ इतिहासपुराणानि पञ्चमं वेदमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ ४० ॥ षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम् ॥ ४१ ॥ विद्या दानं तपः सत्यं धर्मस्येति पदानि च ॥ आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ॥ ४२ ॥

दायं स्तुतये स्तोममिति समासः । त्रिवृत् स्तोमो भवतीत्यादिविहितमुद्गातृप्रयोज्यं कर्म प्रायश्चित्तं ब्रह्मणा प्रयोज्यं कर्म एतान्यपि चत्वारि क्रमात् पूर्वादिभिर्मुखैः व्यधात् ॥ ३८ ॥ उपवेदसृष्टिमाह—आयुर्वेदमिति ॥ आयुर्वेदं वैद्यशास्त्रं धनुर्वेदं युद्धशास्त्रं गान्धर्वं वेदं गानशास्त्रं स्थापत्यं स्थपतेः कर्म वेदं विश्वकर्मशास्त्रमेवं चतुरो वेदान् उपवेदाख्यान् क्रमात् आत्मनः पूर्वादिभिर्मुखैरसृजत् ॥ ३९ ॥ इतिहासेति ॥ ईश्वरः सर्वदर्शनश्च ब्रह्मा इतिहासाः पुराणानि चेत्युभयात्मकं पञ्चमं वेदं सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्ववेदविवृत्तिरूपत्वात् ॥ ४० ॥ कर्मतन्त्रसृष्टिमाह—षोडशीति ॥ षोडश्युक्थौ पूर्वमुखात् पुरीषीचयनमग्निष्टुत् अग्निष्टोमः तौ दक्षिणमुखात् आप्तोर्यामश्चातिरात्रश्च तौ पश्चिममुखात् गोसवेन सहितं गोसवं वाजपेयमुत्तरमुखादसृजत् ॥ ४१ ॥ विद्येति ॥ विद्या शौचं "क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ।" इत्युक्तेः । दानं दयाभूताभयप्रदानस्य "कलान्नार्हन्ति षोडशीम्" इत्युक्तेः । एवं च "तपः शौचं दया सत्यम्" इति प्रथमस्कन्धोक्तेरविरोधः । वस्तुतो यस्य गुणस्य यदा प्राधान्यविवक्षा तदा तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मपादत्वमिति यथा श्रुतेऽप्यदोषः । तपः सत्यं चेति धर्मस्य पदानि आश्रमांश्चतुरो ब्रह्मचर्यादीन् यथासंख्यं वृत्तिभिः सह पूर्वादिभ्यो मुखेभ्योऽसृजत् ॥४२॥ सावित्रमिति॥ सावित्रमुपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रं प्राजापत्यं व्रतान्याचरतः संवत्सरान्तं ब्राह्मं वेदग्रहणान्तं अथ च तथा बृहत् नैष्ठिकं मरणपर्यन्तं इति ब्रह्मचर्ये वार्ता अनिषिद्धा कृष्यादिवृत्तिः सञ्चयो याजनादिना वृत्तिः शालीनमयाचितवृत्तिः शिलोञ्छः पतितकणिशकणादानम् "ऊकालोज्झस्वदीर्घप्लुतः" इतिवदेकत्वं पुंस्त्वं च । गृहे एता गृहाश्रमवृत्तय इत्यर्थः ॥ ४३ ॥ वैखानसा इति ॥ वैखानसाः अकृष्टपच्याशिनः वालखिल्या लब्धे नवेऽन्नाद्ये पुराणत्यागिनः औदुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतैः फलादिभिर्जीवन्तः फेनपाः स्वयं पतितैः फलादिभिर्जीवन्तः वने एवंविधा वनवासिनो भवन्ति । न्यासे संन्यासे पूर्वं कुटीचकः स्वाश्रमधर्मप्रधानः कुटीचर इति पाठान्तरम् । बह्वोदः कर्मोपसर्जनीकृत्यज्ञानप्रधानः हंसो ज्ञानाभ्यासनिष्ठः निष्क्रियः परमहंसः प्राप्ततत्वः एते यथोत्तरं श्रेष्ठाः ॥४४॥ न्यायादेरुत्पत्तिमाह—आन्वीक्षिकीति ॥ आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिरिति क्रमान्मोक्षधर्मकामार्थविद्याः तथैव चेति पूर्ववत्पूर्वादिमुखैरेवोत्पन्ना इत्यर्थः । एवं यत्र क्रमो नोक्तः तत्राप्ययं क्रमो ज्ञेयश्चतुःसंख्यासाम्यात् ।

सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ॥ वार्तासञ्चयशालीनशिलोञ्छ इति वै गृहे ॥ ४३ ॥ वैखानसा वालखिल्यौ दुम्बराः फेनपा वने ॥ न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ ॥ ४४ ॥ आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च ॥ एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः ॥४५॥ तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ॥ त्रिष्टुब् मांसात्स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः ॥४६॥ मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत् ॥ स्पर्शस्तस्याऽभवज्जीवः स्वरो देह उदाहृतः ॥४७॥ऊष्माणमिन्द्रियाण्याहुरन्तःस्था बलमात्मनः ॥ स्वराः सप्त विहारेण भवन्ति स्म प्रजापतेः ॥ ४८ ॥

एवं पूर्वादिमुखक्रमेणैव चतस्रो व्याहृतयश्चासन्नित्यर्थः । भूर्भुवः सुवरिति व्यस्तास्तिस्रो व्याहृतयः समस्ताः चतुर्थी व्याहृतिः हि प्रसिद्धः । प्रणवोऽस्य ब्रह्मणो दह्रतः हृदयाकाशादासेति हृत्वत इति वा पाठः ॥४५॥ तस्येति ॥ तस्य विभोः ब्रह्मणो लोमभ्योऽष्टाविंशत्यक्षरमुष्णिगाख्यं च्छन्दोविशेष आसीत् । त्वचः सकाशात् चतुर्विंशत्यक्षरं गायत्र्याख्यमासीत् । मांसात् चतुश्चत्वारिंशदक्षरं त्रिष्टुबाख्यं मासीत् स्नुतः स्नायोः द्वात्रिंशदक्षरमनुष्टुबाख्यम् आसीत् । प्रजापतेः अस्थ्नः अष्टाचत्वारिंशदक्षरं जगत्याख्यम् आसीत् ॥ ४६ ॥ मज्जाया इति ॥ मज्जायाः चत्वारिंशदक्षरा पंक्तिरुत्पन्ना । प्राणतः षट्त्रिंशदक्षरं बृहत्याख्यमभवत् । महाकल्पे ब्रह्मीशब्दरूपोऽभवदित्युक्तं तदेव दर्शयन् वर्णानामुत्पत्तिक्रममाह । स्पर्शइति । स्पर्शः कादिमान्तवर्णसंघः तस्य ब्रह्मणः जीवः जीवकार्यमभवत् । कार्यकारणयोरभेदविवक्षया सामानाधिकरण्यम् । स्वरः अकारादिः देहः देहाज्जातः उदाहृतः कथितः॥४७॥ऊष्माणमिति॥ ऊष्माणं शषसहाख्यं वर्णचतुष्कम्। आत्मनः ब्रह्मण इन्द्रियाणि इन्द्रियेभ्यो जातम् आहुः। ये अन्तस्थाः यरलवाः तान् बलं बलकार्यमाहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा प्रजापतेः ब्रह्मणो विहारेण क्रीडया षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाख्या सप्त स्वरा भवन्ति स्म । अभवन्नित्यर्थः ॥ ४८ ॥ शब्देति ॥ हे तात व्यक्ता वैखरी अव्यक्ता परापश्यन्तीमध्यमाः अव्यक्तः प्रणवो वा आत्मा स्वरूपं यस्य तस्य शब्दात्मकं ब्रह्म आत्म स्वरूपं यस्य तस्य ब्रह्मणः चित्ते ब्रह्म निर्गुणमक्षरं नानाशक्तिभिरुपबृंहितः पूर्णः सगुणश्चेति द्विविधोऽपि विततः पूर्णः परः परमेश्वरोऽवभाति प्रकाशते ॥ ४९ ॥ तत इति अर्द्धम् ॥ ततः वेदादिसर्गानन्तरं स ब्रह्मा या पूर्वं विसृष्टा सती नीहारतमोरूपाऽभवत् ततः अपरां तनुमनिषिद्धकामासक्तामुपादाय सर्गाय मनो दधे ॥ ५० ॥ ऋषीणामिति ॥ हे कौरव विदुर भूरि वीर्यं प्रजननसामर्थ्यं येषां तथाभूतानामपि ऋषीणां मरीच्यादीनां सर्गमविस्तृतं ज्ञात्वा तस्य सर्गस्य वृद्धये भूयश्चिन्तयामास॥५१॥अहो इति ॥ नित्यदा सर्वदा व्यापृतस्य प्रजावृद्धये व्यापारं कुर्वतोऽपि मे मम प्रजा न ह्येधन्ते न वर्द्धन्ते एतदहो अद्भुतमत्याश्चर्यम् । अतो नूनं निश्चितमत्र प्रजावृद्धौ दैवं प्रारब्धं दुरदृष्टमेव विघातकं प्रतिबन्धकम् अस्ति ॥ ५२ ॥ एवमिति ॥ एवं युक्तकृतः उचितं प्रयत्नं

शब्दब्रह्मात्मनस्तात व्यक्ताव्यक्तात्मनः परः ॥ ब्रह्माऽवभाति विततो नानाशक्त्युपबृंहितः ॥ ४९ ॥ ततो परामुपादाय स सर्गाय मनो दधे ॥ ५० ॥ ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतम् ॥ ज्ञात्वा तद्वृद्धये भूयश्चिन्तयामास कौरव ॥ ५१ ॥ अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ॥ न ह्येधन्ते प्रजा नूनं दैवमत्र विघातकम् ॥ ५२ ॥ एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा ॥ कस्य रूपमभूद्द्वेधा यत् कायमभिचक्षते ॥ ५३ ॥ ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥ यस्तु तत्र पुमान् सोऽभून्मनुः स्वायंभुवः स्वराट् ॥ ५४ ॥ स्त्री याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः ॥ तदा मिथुनधर्मेण प्रजा ह्येधाम्बभूविरे ॥ ५५ ॥ स चापि शतरूपायां पञ्चाऽपत्यान्यजीजनत् ॥ प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम॥ ५६ ॥

कुर्वतो दैवं दुरदृष्टनिवर्त्तकं भगवदनुग्रहं चावेक्षतः शता आर्षः । कस्य ब्रह्मणः रूपं द्वेधा । एकं श्मश्रुयुक्तमपरं कुचद्वययुतम् इति द्विविधमभूत् । यत् उभयमपि कस्य ब्रह्मणो जातत्वात् कायम् अभिचक्षते कथयन्ति । कस्यापत्यमित्यर्थे नडादित्वात् फक् नलोपश्छान्दसः।यद्वा। सास्य देवता इत्यर्थविवक्षणेऽण् । "कस्येत्" इतीत्वृद्धिरिति॥५३॥ ताभ्यामिति ॥ ताभ्यां रूपविभागाभ्यां विभक्ताभ्यां रूपाभ्यां मिथुनं स्त्रीपुरुषात्मकं द्वन्द्वं समपद्यत अभूत् । तत्र मिथुने यस्तु पुमान् स स्वायंभुवाख्यः स्वराट् सार्वभौमो मनुरभूत्॥५४॥स्त्रीति ॥ या च स्त्री शतरूपाख्यास्य महात्मनः महाबुद्धेः स्वायंभुवमनोर्महिषी भार्या आसीत्तदाप्रभृति मिथुनधर्मेण प्रजाः एधांबभूविरे अवर्द्धन्त । भुवस्तङार्षः ॥५५॥ स चापीति सार्द्धम् ॥ हे भारत हे सत्तम स्वायंभुवो मनुरपि शतरूपायां पञ्चापत्यानि अजीजनत् । प्रियव्रतोत्तानपादौ द्वौ पुत्रौ आकूत्याद्याः तिस्रः कन्याश्च ॥५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकूतिमिति ॥ आकूतिं रुचये प्रादात् । मध्यमां देवहूतिं तु कर्दमाय प्रादात् । प्रसूतिं च दक्षाय प्रादात् । यतः यासां संस्रुतिभिः कृत्स्नं जगदापूरितम् ॥ ५७ ॥ इति श्रीकृष्णसेवार्थमन्विताऽर्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्कन्धस्य द्वादशे व्यधात् ॥ १२ ॥ त्रयोदशे क्रोडमूर्त्तिरुज्जहार हरिर्धराम् ॥ हिरण्याक्षमहंस्तत्र श्लोकाः सार्द्धाः खेमांगणाः ॥ अनुष्टुभां तु द्वौषष्टिरुवाचनवकं तथा ॥ १३ ॥ निशम्येति ॥ हे नृप एवं वदतो मुनेः मैत्रेयस्य पुण्यतमां वाचं निशम्य वासुदेवकथायामादृतः आदरवान् दृङोभावक्तान्तान्मत्वर्थीयोऽच् । कौरव्यो विदुरो भूयः पप्रच्छ ॥ १ ॥ स वै इति ॥ हे मुने स्वयंभुवः ब्रह्मणः प्रियः पुत्रः सम्राट् सार्वभौमः स प्रसिद्धः स्वायंभुवो मनुः प्रियां पत्नीं शतरूपां प्रतिलभ्य लब्ध्वा ततः किं चकार ॥ २ ॥ चरितमिति ॥ हे सत्तम राजर्षेस्तस्य आदिराजस्य चरितं श्रद्धधानाय मे मह्यं ब्रूहि । हि यस्मात् असौ मनुः विष्वक्सेनो भगवानाश्रयो यस्य तथाभूतोऽस्ति ॥ ३ ॥ श्रुतस्येति ॥ येषां हृदयेषु मुकुन्दस्य पादारविन्दं वर्त्तते तेषां तत्तद्गुणानामनुश्रवणं यत् तत् सुचिरं बहुकालं

आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमाम् ॥ दक्षायाऽदात्प्रसूतिं च यत आपूरितं जगत् ॥ ५७ ॥ इति श्रीभागवते तृतीयस्कन्धे मनुसर्गवर्णनं नाम द्वादशोऽध्यायः ॥ ॥ १२ ॥ श्रीशुक उवाच ॥ निशम्य वाचं वदतो मुनेः पुण्यतमां नृप ॥ भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥ विदुर उवाच ॥ स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः ॥ प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने ॥२॥ चरितं तस्य राजर्षेरादिराजस्य सत्तम ॥ ब्रूहि मे श्रद्धधानाय विष्वक्सेनाश्रयो ह्यसौ॥३॥ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वञ्जसा सूरिभिरीडितोऽर्थः ॥ यत्तद्गुणानुश्रवणं मुकुन्दपादारविन्दं हृदयेषु येषाम् ॥ ४ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानम् ॥ प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥५॥ मैत्रेय उवाच ॥ यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः ॥ प्राञ्जलिः प्रणतश्चेदं वेदगर्भमभाषत ॥ ६ ॥ त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता ॥ अथाऽपि नः प्रजानां ते शुश्रूषा केन वा भवेत् ॥ ७ ॥

श्रमो यस्मिंस्तस्य पुंसां श्रुतस्य अध्ययनादेरर्थः प्रयोजनं फलमञ्जसा मुख्यतया ननु अयमेव सूरिभिर्विद्वद्भिरीडितः स्तुतिपूर्वकं प्रतिपादितः ॥ ४ ॥ इतीति ॥ इत्येवं ब्रुवाणं पृच्छन्तं विनीतं सहस्रशीर्ष्णः हरेः चरणावुपधीयेते यस्मिंस्तं श्रीकृष्णः कृपया यस्योत्सङ्गे चरणौ प्रसारयति तमित्यर्थः । महाभारते विदुरगृहभोजने भगवांस्तदुत्सङ्गे चरणौ निधाय सुष्वापेति प्रसिद्धेः । विदुरं प्रति प्रहृष्टानि उदञ्चितानि रोमाणि यस्य स तथोक्तः विदुरेण भगवत्कथायां प्रणीयमानः प्रवर्त्यमानः मुनिर्मैत्रेयः अभ्यचष्ट अभ्यभाषत ॥ ५ ॥ यदेति ॥ यदा स्वभार्यया शतरूपया साकं सह स्वायंभुवो मनुर्जातस्तदा वेदगर्भं ब्रह्माणं प्रणतः प्राञ्जलिश्च सन्निदं वक्ष्यमाणमभाषत ॥ ६ ॥ त्वमिति ॥ यतः सर्वभूतानां त्वमेक एव पिता यतः जन्मकृत् उत्पादकः वृत्तिदः पोषकश्च अतो यद्यपि तवान्यापेक्षा नास्ति अथापि तथापि नोऽस्माकं प्रजानां ते तव शुश्रूषा परिचर्या केन वा कर्मणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेत् ॥ ७ ॥ तदिति ॥ हे ईड्य तुभ्यं नमोऽस्तु आत्मनः शक्तिर्येषु तेषु अस्मच्छक्येषु कर्मसु यत्कर्म कृत्वा स्थितस्य ममेति शेषः । इह अस्मिँल्लोके विष्वक् सर्वतो यशो भवेत् तथा अमुत्र परलोकेऽपि सुगतिर्भवेत् तद्विधेहि । इदं कर्त्तव्यमिति कथय ॥ ८ ॥ प्रीत इति ॥ हे तात हे क्षितीश्वर यत् यस्मात् निर्व्यलीकेन निष्कपटेन हृदा मां शाधि शिक्षयेति आत्मना स्वयमेव त्वयार्पितं निवेदितं तस्मात् तुभ्यमहं प्रीतः पत्ये शेते इतिवत्संप्रदानम् । अतो वां युवाभ्यां स्त्रीपुरुषाभ्यां स्वस्ति स्तात् कल्याणं भूयात् ॥ ९ ॥ एतावतीति ॥ हे वीर अप्रमत्तैः सावधानैः सनकादयो न कुर्वन्ति वयं किमिति कुर्यामेति गतो मत्सरो येषां तैः स्वशक्त्या स्वशक्त्यनुसारेण गुरोराज्ञा सादरं यथा स्यात्तथा गृह्येतेति गुरौ जनकादौ पूज्ये आत्मजैः पुत्रादिभिरेतावत्येवापचितिः पूजा सेवा कार्येति ॥ १० ॥ स इति ॥ स मदाज्ञापेक्षकस्त्वमस्यां स्वभार्यायामात्मनस्तव गुणैः सदृशानि अपत्यानि उत्पाद्य धर्मेण गां भूमिं भूमिस्थां प्रजां शास शाधि पालय । "बहुलं छन्दसि"इति शपो न लुक् । अतो हि लुक्।यज्ञैः यज्ञादिभिः पुरुषं हरिं यज॥११॥

तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु ॥ यत् कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥८॥ ब्रह्मोवाच ॥ प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर ॥ यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितम् ॥ ९ ॥ एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ ॥ शक्त्याऽप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ॥ १० ॥ स त्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः ॥ उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ॥ ११ ॥ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप ॥ भगवांस्ते प्रजाभर्तुर्हृषीकेशोऽनुतुष्यति ॥ १२ ॥ येषां न तुष्टो भगवान् यज्ञलिङ्गो जनार्दनः ॥ तेषां श्रमो ह्यपार्थाय यदात्मानादृतः स्वयम् ॥ १३ ॥ मनुरुवाच ॥ आदेशेऽहं भगवतो वर्तेयाऽमीवसूदन ॥ स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो ॥ १४ ॥ यदोकः सर्वसत्त्वानां मही मग्ना महाम्भसि ॥ अस्या उद्धरणे यत्नो देव देव्या विधीयताम् ॥ १५ ॥ मैत्रेय उवाच ॥ परमेष्ठी त्वपां मध्ये तथाऽऽसन्नामवेक्ष्य गाम् ॥ कथमेनां समुन्नेष्य इति दध्यौ धिया चिरम् ॥ १६ ॥

परमिति ॥ हे नृप एवं प्रजारक्षया मह्यं ममापि षष्ठयर्थे चतुर्थी । परं शुश्रूषणं स्यात् । प्रजाभर्तुः प्रजारक्षकस्य ते तव हृषीकेशो भगवानप्यनुतुष्यति तुष्टो भविष्यति ॥१२॥ येषामिति ॥ येषां यज्ञलिङ्गो यज्ञमूर्त्तिः जनार्दनो भगवान् न तुष्टस्तेषां सर्वोऽपि कर्मादौ श्रमः अपगतोऽर्थो यस्मात्तस्मै अपार्थाय निष्फलत्वायैव भवति । यत् यतः तैः स्वयमात्मैव नादृतः भगवत्यतुष्टे स्वार्थस्यैवासिद्धेः सर्वात्मत्वात्तस्य ॥१३॥ आदेश इति ॥ हे प्रभो हे अमीवसूदन पापनाशन भगवतस्तव आदेशेऽहं वर्त्तेय वर्त्तिष्ये परं त्विह अस्मिन् कार्ये स्थानमपेक्षितं तत्तु न दृश्यते अतः प्रजानां मम च निवासस्थानमनुजानीहि परामृश ॥ १४॥ यदिति ॥ हे देव सर्वसत्त्वानां सर्वप्राणिनां यत् ओको निवासस्थानं मही सा तु महाम्भसि महति जले निमग्नास्ति अतोऽस्या देव्या भूमेरुद्धरणे यत्नो विधीयताम् ॥ १५ ॥ परमेष्ठीति ॥ परमेष्ठी तु ब्रह्मापि यथा मनुनोक्तं तथा पूर्वमपां पाने कृतेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरुद्भूतानामपां मध्ये सन्नां निमग्नां गामवेक्ष्य एनां भूमिमहं कथं समुन्नेष्ये उद्धरिष्यामीति धिया चिरं दध्यौ ॥१६॥ सृजत इति॥ मे मम प्रजाः सृजतोऽपि सतः वार्भिर्जलैः प्लाव्यमाना निमज्ज्यमाना क्षितिः रसांगता रसातलोपलक्षितं गर्भोदं गतेत्यर्थः। रसातलस्य भूविवरतया तत्र भुवो मज्जनासंभवात्। अथानन्तरमत्र काले सर्गे नियोजितैरस्माभिः किमनुष्ठेयं किं कर्त्तव्यम् ॥ १७ ॥ यस्येति अर्द्धम् ॥ यस्य हृदयादहं पुत्रतया जातोऽस्मि स एवेशः यन्मया कर्त्तव्यं तद्विदधातु ॥ १८ ॥ इतीति ॥ हे अनघ इत्येवमभिध्यायतो ब्रह्मणो नासाविवराद् अङ्गुष्ठशिरोमात्रप्रमाणको वराहतोकः सूक्ष्मो वराहः सहसा निरगात् ॥ १९ ॥ तस्येति ॥ हे भारत तस्य ब्रह्मणः अभिपश्यत एव सतः खस्थः आकाशे स्थित एव सूक्ष्मो वराहः क्षणेनैव गजमात्रः प्रववृधे गजपरिमाणो जातः। तद् वर्द्धनं महद्अद्भुतमभूत् ॥ २० ॥ मरीचीति ॥ मरीचिप्रमुखैर्विप्रैः कुमारैः सनकादिभिर्मनुना च सह ब्रह्मा तत्सौकरं वाराहं रूपं दृष्ट्वा चित्रधा बहुधा चित्रशब्दाद्धा आर्षः। तर्कयामास ॥ २१ ॥ किमिति ॥ दिव्यमलौकिकं सौकरं सूकररूपं

सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता ॥ अथाऽत्र किमनुष्ठेयमस्माभिः सर्गयोजितैः ॥ १७ ॥ यस्याऽहं हृदयादासं स ईशो विदधातु मे ॥ १८ ॥ इत्यभिध्यायतो नासाविवरात्सहसाऽनघ ॥ वराहतोको निरगादङ्गुष्ठपरिमाणकः ॥ १९ ॥ तस्याभिपश्यतः खस्थः क्षणेन किल भारत ॥ गजमात्रः प्रववृधे तदद्भुतमभून्महत् ॥२०॥ मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह ॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा ॥२१॥ किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितम् ॥ अहो बताश्चर्यमिदं नासाया मे विनिःसृतम् ॥ २२ ॥ दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद्गण्डशिलासमः ॥ अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः ॥ २३ ॥ इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः ॥ भगवान्यज्ञपुरुषो जगर्जाऽगेन्द्रसंनिभः ॥ २४ ॥ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् ॥ स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः ॥ २५ ॥ निशम्य ते घुर्घुरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म ॥ २६ ॥

व्याजश्छद्म वेषो यस्य तदेतत्सत्वं प्राणि किं ममाग्रेऽवस्थितम् अहो बताश्चर्यमिदं यत् मे मम नासायाः सकाशाद्विनिःसृतम् ॥ २२ ॥ दृष्ट इति ॥ अङ्गुष्ठस्य शिरः ऊर्ध्वपर्वतदेवमात्राप्रमाणं यस्य तथाभूतः प्रथमं दृष्टः पश्चात् क्षणेन गण्डशिलासमः स्थूलपाषाणसदृशो जातः। अपिस्विदिति संभावनायाम्। एष वराहमूर्त्तिर्यज्ञो विष्णुरेव मे मम मतः खेदयन् स्वरूपतिरोधानेन मोहयन् वर्त्तते ॥२३॥ इतीति॥इत्येवं सूनुभिः सह तस्य ब्रह्मणो मीमांसतस्तर्कयतः सतः आर्षः शता।अगेन्द्रसन्निभः गिरीन्द्रतुल्यः यज्ञपुरुषो भगवान् जगर्ज अगर्जत् ॥ २४ ॥ ब्रह्माणमिति ॥ विभुः विष्णुः ककुभः दिशः प्रतिस्वनयता प्रतिध्वनयता स्वगर्जितेन ब्रह्माणं तान्मरीच्यादीन् द्विजोत्तमांश्च हर्षयामास ॥ २५ ॥ निशम्येति ॥ मायामयसूकरस्य भगवतः अनिश्चयेन भूमज्जनेन वा यः स्वखेदः तं क्षयिष्णु क्षपणशीलं घुर्घुरितं सूकरजातिशब्दानुकरणं निशम्य ते पूर्वोक्ताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मादयो ये चान्ये जनस्तपःसत्यलोकनिवासिनस्ते च मुनयस्तं भगवन्तं पवित्रैस्त्रिभिः ऋग्यजुःसामसूक्तैः अगृणन् स्म अस्तुवन् । जनस्तप इत्यत्र सकार आर्षः ॥ २६ ॥ तेषामिति ॥ गजेन्द्रवत् लीला यस्य स वेदानां वितानो मूर्तिर्यस्य स वेदा हि भगवन्निश्वासाः भगवन्निश्वास एव ब्रह्मनासां प्रविष्टः स एव शूकरो भगवान् तेषां सतां मुनीनामात्मगुणानुवादं मुनिकर्तृकभगवद्गुणकथनमेव तद्ब्रह्म वेदमवधार्य श्रुत्वा विबुधानां ब्रह्मादीनामुदयाय श्रेयोलाभाय भूयः पुनर्विनद्य नादं कृत्वा जलमाविवेश ॥ २७ ॥ उत्क्षिप्तेति ॥ उच्चैः क्षिप्तः वालः पुच्छं येन सः खचर आकाशचारी कठोरः कठिनाङ्गः सटाः कन्धरास्थाः केशास्तान् विधुन्वन् कम्पयन् खराणि कर्कशानि रोमाणि यस्यां सा त्वक् यस्य सः खुरैराहतानि इतस्ततश्चालितानि अभ्राणि येन सः सिते अतिशुक्ले दंष्ट्रे यस्य सः ईक्षा निरीक्षणमेव ज्योतिरालोको यस्य सः प्रकाशमाननेत्र इत्यर्थः । एवंभूतो महीध्रः पृथिव्या उद्धर्ता शैलतुल्यो वा भगवान् बभासे अशोभत ॥ २८ ॥ घ्राणेनेति ॥ क्रोडापदेशः छद्मवराहवपुः वस्तुतस्तु स्वयमध्वराङ्गः यज्ञमूर्तिः कराले भयंकरे दंष्ट्रे यस्य तथाभूतोऽप्यकरालाभ्यां कृपायुक्ताभ्यां दृग्भ्यां गृणतः स्तोतॄन् विप्रान् उद्वीक्ष्य सम्यग्दृष्ट्वा घ्राणेन गन्धवत्याः पृथ्व्याः पदवीं विजिघ्रन् अन्वेषयन् कं जलमविशत् ॥ २९ ॥ स इति ॥ वज्रकूटो वज्रमयः पर्वतस्तद्वदङ्गं यस्य तस्य भगवतो निपातवेगेन विशीर्णा कुक्षिर्यस्य सः भगवत्प्रवेशस्थानभूत उदन्वान् समुद्रः स्वप्राणत्यागशङ्कया आर्त्त इव स्तनयन् शब्दं कुर्वन् उत्सृष्टाः प्रसारिताः दीर्घा ऊर्मय एव भुजास्तैः क्रन्दनं सूचयन् भो यज्ञेश्वर मा मां पाहि रक्षेति चुक्रोश ॥ ३० ॥ खुरैरिति ॥ त्रीणि परूंषि सवनात्मकानि पर्वाणि यस्य सः त्रिपरुर्यज्ञमूर्तिर्भगवान् क्षुरप्रैः क्षुरमा आयताग्राः क्षुरास्तत्सदृशैरपो जलानि उत्पाराणां पारशून्यानामप्यपां पारमवसानं यथा भवति तथा दरयन् विदारयन् तदा तत्र रसायां रसातलोपलक्षिते पातालतले गर्भोद इत्यर्थः । अतलादीनां सप्तानामेव भूविवरत्वेन पृथिवीत्वात् रसातले तस्याः स्थित्यसंभवात् । यदुक्तं विष्णुधर्मे । "पातालमूलेश्वरभोगसंहितौ विन्यस्य पादौ पृथिवीं च बिभ्रतः । यस्योपमानं न बभूव सोऽच्युतो ममास्तु माङ्गल्यविवृद्धये हरिः ॥ " इति अत्रापि सलिले स्वखुराक्रान्त इति वक्ष्यति । गां पृथ्वीं ददर्श । अग्रे दैनंदिने प्रलयसमये तत्र तास्वप्सु सुषुप्सुः शिशयिषुः सन् जीवधानीं सर्वजीवाधारभूतां यां भूमिं स्वयमभ्यधत्त जठरे धृत-

तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्याऽऽत्मगुणानुवादम् ॥ विनद्य भूयो विबुधोदयाय गजेन्द्रलीलो जलमाविवेश ॥ २७ ॥ उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन् खररोमशत्वक् ॥ खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः ॥ २८ ॥ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रोडापदेशः स्वयमध्वराङ्गः ॥ करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्गृणतोऽविशत्कम् ॥ २९ ॥ स वज्रकूटाङ्गनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति ॥ ३० ॥ खुरैः क्षुरप्रैर्दरयंस्तदाऽप उत्पारपारं त्रिपरू रसायाम् ॥ ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वान् वेदरूपेणोक्तवान्वा ॥ ३१ ॥ स्वदंष्ट्रयेति अर्द्धम् ॥ जले निमग्नां महीं स्वदंष्ट्रयोद्धृत्य रसायाः रसातलात् उत्थितः उर्ध्वमागच्छन् स भगवान् संरुरुचे अत्यशोभत । रसाया इत्यनेन भूतलादिषड्भूखण्डाः भग्नाः जले निमग्नाश्च तत उद्धृत्य भगवता स्वस्वस्थाने स्थापिताश्चेत्यर्थाज्ज्ञेयम् ॥ ३२ ॥ तत्रेति सार्द्धम् ॥ तत्राम्भसि गदया आपतन्तं गदामुद्यम्य आगच्छन्तं रुन्धानं चतुर्षु दिक्षु प्रतिभ्रमणेन प्रतिबध्नन्तम् असह्यविक्रममादिदैत्यं हिरण्याक्षं सुनाभेन चक्रेण संदीपितः मयि विद्यमाने किमिति परिभवं सहस इत्युक्त्या प्रकटितः तीव्रो मन्युः क्रोधो यस्य स भगवान् लीलया इभं मृगराट् सिंह इव जघान।तेन च गजेन्द्रो जगतीं पर्वतप्रान्तभूमिं विभिन्दन् क्रीडया विदारयन् गैरिकया यथा अरुणगण्डतुण्डो भवति तथा तस्य रक्तमेव पङ्कस्तेनाङ्कितौ गण्डौ तुण्डं मुखं च यस्य तथाभूतो भगवान् जातः । अत्र श्वेतवाराहकल्पे स्वायंभुवमन्वन्तरारम्भे ब्रह्मनासात एव श्वेतवराह आविर्भूय केवलं पृथ्वीमुद्धृत्यैवान्तरधात्ततः षष्ठे चाक्षुषमन्वन्तरे पुनराकस्मिके प्रलये जलादेवाविर्भूय नीलो वराहः पृथ्वीमुद्धरन् हिरण्याक्षं जघानेति वराहद्वयलीलामेकीकृत्यैवात्र मैत्रेयः प्राह स्मेति श्रीभागवतामृतकारिकाभ्योऽवगन्तव्यम् । ताश्च यथा " द्विराविरासीत् कल्पेऽस्मिन्नाद्ये स्वायम्भुवान्तरे । घ्राणाद्विधेर्धरोद्धृत्यै

स्वदंष्ट्रयोद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः ॥ ३२ ॥ तत्रादिदैत्यं गदया पतन्तं सुनाभसंदीपिततीव्रमन्युः ॥ जघान
रुन्धानमसह्यविक्रमं स लीलयेभं मृगराडिवाम्भसि ॥ तद्रक्तपङ्काङ्कितगण्डतुण्डो यथा गजेन्द्रो जगतीं विभिन्दन् ॥ ३३ ॥ तमालनीलं
सितदन्तकोट्या क्ष्मामुत्क्षिपन्तं गजलीलयाङ्ग ॥ प्राज्ञाय बद्धाञ्जलयोऽनुवाकैर्विरिञ्चिमुख्या उपतस्थुरीशम् ॥ ३४ ॥ ऋषय ऊचुः ॥
जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः ॥ यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ॥ ३५ ॥

चाक्षुषी ये तु नीरतः ॥ हिरण्याक्षं धरोद्धारे निहन्तुं दंष्ट्रिपुङ्गवः । चतुष्पात् श्रीवराहोऽसौ नृवराहः क्वचिन्मतः ॥ कदाचिज्जलदश्यामः कदाचिचन्द्रपाण्डरः । यज्ञमूर्त्तिः स्थविष्ठोऽयं वर्णद्वययुतः स्मृतः ॥ दक्षात् प्राचेतसात् सृष्टिः श्रूयते चाक्षुषान्तरे । अतस्तत्रैव जन्मास्य हिरण्याक्षस्य युज्यते ॥ उत्तानपादवंश्यानां तनयस्य प्रचेतसाम् । दक्षस्यैव दितिः पुत्री हिरण्याक्षो दितेः सुतः ॥ कल्पारम्भे तदा नास्ति सुतोत्पत्तिर्मनोरपि । क्वाऽसौ प्राचेतसो दक्षः क्व दितिः क्व दितेः सुतः॥अतः कालद्वयोद्भूतं श्रीवराहस्य चेष्टितम् । एकत्रैवाह मैत्रेयः क्षत्तुः प्रश्नानुसारतः ॥ मध्ये मन्वन्तरस्यैव मुनेः शापान्मनुं प्रति । प्रलयोऽसौ बभूवेति पुराणे क्वचिदीर्य्यते ॥ अयमाकस्मिको जातश्चाक्षुषेप्यन्तरे मनोः । प्रलयः पद्मनाभस्य लीलयेति तु कुत्रचित् ॥ ३३ ॥ तमालेति ॥ अङ्ग हे विदुर तमालमिव नीलं गजस्येव लीलयाऽनायासेनैव सितया दन्तकोट्या दंष्ट्राग्रेण क्ष्मां महीमुत्क्षिपन्तमुद्धरन्तमीशं प्राज्ञाय आलक्ष्य विरिञ्चिमुख्याः ब्रह्मादय ऋषयो बद्धाञ्जलयः सन्तः अनुवाको वैदिकं सूक्तं तत्सदृशैर्वाक्यैरुपतस्थुः तुष्टुवुः । तङ्भाव आर्षः ॥ ३४ ॥ जितं जितमिति ॥ हे अजित हे यज्ञानां भावन पालक सम्पादक वा ते त्वया जितं जितम् उत्कर्ष आविष्कृतः । भावे क्तः । सम्भ्रमे वीप्सा । त्रयीमृगादिवेदत्रयरूपां स्वां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वकीयां तनुं परिधुन्वते सर्वतः कम्पयते तुभ्यं नमः। यस्य रोमगर्त्तेषु अध्वराः यज्ञाः निलिल्युः लीना बभूवुस्तस्मै कारणं भूम्युद्धारः तदर्थं सूकराय ते तुभ्यं नमः ॥३५॥ रूपमिति ॥ हे देव यदध्वरात्मकं तवैतद्रूपं तद्दुष्कृतात्मनां दुर्दर्शनं दर्शनायोग्यं यस्य त्वचि छन्दांसि गायत्र्यादीनि आसन्। यस्य रोमसु बर्हिः वर्हिषः कुशा आसन्।जाता- वेकत्वम्। रेफलोपेऽपि दीर्घाभाव आर्षः। यस्य दृशि नेत्रे आज्यं घृतमासीत्। यस्याङ्घ्रिषु चरणेषु चातुर्होत्रं चतुर्होतृवर्गः होत्रादिकर्मचतुष्टयं वा आसीत् ॥ ३६ ॥ स्रुगिति ॥ हे ईश हे भगवन् स्रुक् जुहूः तुण्डे मुखाग्रे आसवि इत्यग्रेऽपि। स्रुवः नासयोः इडा हविर्भक्षणपात्रमुदरे चमसाः सोमपात्राणि कर्णरन्ध्रे आसन्। प्राशित्रं ब्रह्मभाग- पात्रमास्ये ग्रहाः सोमपात्राणि ते तव ग्रसने ग्रस्यतेऽनेनेति ग्रसनं मुखान्तर्वर्त्ति च्छिद्रं तस्मिन् यदग्निहोत्रं तत्ते तव चर्वणं भक्षणम् ॥ ३७ ॥ दीक्षेति ॥ दीक्षा दीक्षणीयेष्टि- स्तवानुजन्म वारंवारमभिव्यक्तिः उपसदः उपसदाख्यास्तिस्र इष्टयस्तव शिरोधरं ग्रीवा प्रायणीया दीक्षानन्तरेष्टिः उदयनीया अवसानेष्टिः ते तव दंष्ट्रे यस्य तथाभूतस्त्वं प्रवर्ग्यो महावीरः यः प्रत्युपसदः पूर्वं क्रियते सः तव जिह्वा सभ्यो होमरहितोऽग्निः आवसथ्यः औपासनाग्निस्तयोर्द्वन्द्वैक्यं तत् क्रतोः क्रतुरूपस्य ते एव शीर्षकं शिरः। चितयः

रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकम् ॥ छन्दांसि यस्य त्वचि बर्हिरोमस्वाऽऽज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम् ॥ ३६ ॥
स्रुक्तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे ॥ प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ॥ ३७ ॥
दीक्षाऽनुजन्मोपसदः शिरोधरं त्वं प्रायणीयो दयनीयदंष्ट्रः ॥ जिह्वाप्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते ॥ ३८ ॥
सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः ॥ सत्राणि सर्वाणि शरीरसन्धिस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः ॥ ३९ ॥
नमो नमस्तेऽखिलमन्त्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्यात्मजयाऽनुभावितज्ञानाय विद्यागुरवे नमो नमः ॥ ४० ॥

इष्टकाचयनानि ते तव असवः पञ्च प्राणाः ॥३८॥ सोम इति ॥ हे देव सोमः ओषधिविशेषस्तु तव रेतः सवनानि प्रातःसवनादीनि तव अवस्थितिः अवस्थानं बाल्याद्यवस्था वा जाग्रदाद्यवस्था वा संस्थाविभेदाः।अग्निष्टोमोत्यग्निष्टोम उक्थः षोडशी वाजपेयोतिरात्र आप्तोर्याम इति सप्त इति संस्थाविभेदास्तव धातवः त्वङ्मांसाद्याः सप्त धातवः।सर्वाणि सत्राणि द्वादशाहादीनि बहुयागसंघातरूपाणि तव शरीरस्य सन्धिः सन्धयः। त्वं सर्वयज्ञक्रतुरिति असोमाः यज्ञाः ससोमाः क्रतवस्तद्रूपस्त्वमित्यर्थः। इष्टिर्यजनमनुष्ठानं बन्धनं च यस्य तथाभूतस्त्वम् ॥ ३९ ॥ नम इति ॥ मन्त्राः द्रव्यदेवताप्रकाशकानि वेदवाक्यानि देवता उद्देश्य विशेषा इन्द्रादयः द्रव्याणि आज्यदधिपयःसोमादीनि अखिलानि मन्त्रादीनि यस्मिंस्तस्मै सर्वक्रतवे अतः क्रियात्मने यज्ञादिव्यापाररूपाय ते तुभ्यं नमो नमः। वैराग्येण युक्तया भक्त्या आत्मजयोन्तःकरणस्थैर्यं तेनानुभावितं साक्षात्कृतं यत् ज्ञानं तस्मै विद्यागुरवे ज्ञानप्रदाय नमो नमः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंष्ट्रेति ॥ हे भूधर हे भगवन् यथा वनात् जलात् निस्सरतो निर्गच्छतो मतङ्गजेन्द्रस्य गजश्रेष्ठस्य दता दन्तेन धृता पत्रयुक्ता पद्मिनी विराजते तथा दंष्ट्राग्रकोट्या साधनेन त्वया कर्त्रा सभूधरा भूधरैः पर्वतैः सहिता भूर्मही धृता सती विराजते । सपत्रेत्यनेन तस्याः पत्रकोरकादिभिरुच्चनीचाः पर्वता उपमिताः ॥४१॥ त्वया भूर्विराजते इत्युक्तं त्वं च भुवा विराजस इत्याह–त्रयीमयमिति ॥ अथ दता दन्तेन धृतेन भूमण्डलेन त्रयीमयं ते तवेदं सौकरं रूपं भूयसा अतिमहता शृङ्गोढघनेन शृङ्गे शिखरे ऊढः धृतो यो घनो मेघस्तेन कुलाचलेन्द्रस्य पर्वतश्रेष्ठस्य यथैव विभ्रमो विलासः शोभातिशयस्तथा चकास्ति शोभते ॥४२॥ संस्थापयेति ॥ सतस्थुषां स्थावरसहितानां जगतां जङ्गमानां लोकानां निवासस्थानार्थं तव पत्नीं जगतां मातरमेनां भूमिं संस्थापय यतस्त्वं जगतां पिताऽसि । तथा च सति तत्र स्थिताः सन्तो वयं त्वया सह स्थितायै अस्यै मात्रे नमसा विधेम विदध्याम नमनं कुर्याम । नमस्कारेण परिचरेमेति वा । विधेमेत्यार्षम् । याज्ञिकाः अरणीकाष्ठे यथा मन्त्रतोऽग्निं धारयन्ति तथा यस्यां भूमौ त्वं स्वतेजः धारणा-

दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथा वनान्निःसरतो दता धृता मतङ्गजेन्द्रस्य सपत्रपद्मिनी ॥ ४१ ॥ त्रयीमयं रूपमिदं च सौकरं भूमण्डले नाथ दता धृतेन ते ॥ चकास्ति शृङ्गोढघनेन भूयसा कुलाचलेन्द्रस्य यथैव विभ्रमः ॥ ४२ ॥ संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ॥ विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥ ४३ ॥ कः श्रद्दधीताऽन्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणम् ॥ न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयम् ॥ ४४ ॥ विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयम् ॥ सटाशिखोद्धूतशिवाम्बुबिन्दुभिर्विमृज्यमाना भृशमीश पाविताः ॥ ४५ ॥ स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः ॥ यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शम् ॥ ४६ ॥

शक्तिरूपं गर्भमधाः निहितवानसि एतेन पत्नीत्वं दर्शितम् ॥४३॥ क इति ॥ हे प्रभो तव त्वया कृतं रसां रसातलं गतायाः भुवः उद्विबर्हणमुद्धरणमन्यतमस्त्वत्तो व्यतिरिक्तः कः श्रद्दधीत कर्तुं स्पृहां कुर्यादित्यर्थः । यद्वा । अन्यतमः त्वद्विवेकिनो भिन्नः कः श्रद्दधीत श्रुत्वापि विश्वासं कः कुर्यादित्यर्थः । परन्त्वसौ भूम्युद्धारः विश्वे सर्वे विस्मया यस्मिंस्तस्मिंस्त्वयि विस्मयः आश्चर्यजनको न भवति यो भवान् मायया अचिन्त्यशक्त्या अतिविस्मयमिदं रेतोरूपबीजसाम्येऽपि ततो नानाविधपशुपक्षिमनुष्यादि विश्वं ससृजे तदर्थः ॥ ४४ ॥ विधुन्वतेति ॥ हे ईश वेदमयं निजं वपुः विधुन्वता कम्पयता त्वया सटानां स्कन्धबालानां शिखाभिरग्रैरुद्भूता उच्छूलिता ये शिवाः पवित्राः अम्बुबिन्दवस्तैर्विमृज्यमाना अभिषिच्यमानाः जनस्तपःसत्यनिवासिनः सुडार्षः । वयमद्य भृशमत्यन्तं पाविताः पवित्रीकृताः । उद्भूताः उद्धूता इति वा पाठः ॥ ४५ ॥ स वा इति ॥ हे भगवन् यो जनः अपारकर्मणस्तव कर्मणां पारमवधिमेष ते जानामीत्यभिमन्यते ज्ञातुमिच्छति वा । "एष्ट्ट गतौ" भौवादिकः । स वै बत भ्रष्टमतिः यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव योगमायागुणैः सह योगेन संबन्धेन समस्तमेव विश्वं मोहितं भवति अतोऽस्माकं शं सुखं विधेहि कुरु ॥ ४६ ॥ इतीति ॥ तैः ब्रह्मवादिभिर्मुनिभिरित्येवम् उपस्थीयमानः स्तूयमानः अविता रक्षिता भगवान् स्वखुरैराक्रान्ते सलिले अवनिं भूमिमुपाधत्त स्थापयामास इति जलेऽपि धारणशक्त्याधानं दर्शयति ॥४७॥ स इति ॥ भगवान् विष्वक्सेनः प्रजापतिर्हरिः इत्थं रसायाः रसातलात् लीलया उन्नीतामुद्धृतामुर्वीमप्सु न्यस्य प्रतिष्ठाप्य ययौ अन्तर्दधे ॥४८ ॥ य इति ॥ य एवंप्रकारां सुभद्राम् उशतीं कमनीयां एतां हरिमेधसः हरति दुःखं यद्विषया मेधा तस्य हरिमेधसः असिजार्षः । कथनीयाः मायाः लीलाः अस्य सन्तीति कथनीयमायी तस्य हरेः कथां भक्त्या शृण्वीत शृणुयात् तङार्षः । श्रवयेत वा श्रावयेद्वा ह्रस्वमार्षम् । तस्यास्य श्रोतुः हृदिस्थो जनार्दनः आशु प्रसीदति हृदि मनसि प्रसीदति इति वा ॥४९॥ तस्मिन्निति ॥ सकलाशिषां सर्वपुरुषार्थानां प्रभौ स्वामिनि तस्मिन् भगवति प्रसन्ने सति किं दुर्लभं न किमपि । लवात्मभिस्तुच्छाभिस्ताभिराशीर्भिरलं न साध्यं यतः गुहाशयोऽन्तःकरणस्थः परः परमेश्वरः अन-

मैत्रेय उवाच ॥ इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः ॥ सलिले स्वखुराक्रान्त उपाधत्ताऽविताऽवनिम् ॥४७॥ स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः ॥ रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ॥ ४८ ॥ य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः ॥ शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याऽऽशु हृदि प्रसीदति ॥ ४९ ॥ तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः ॥ अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पराम् ॥ ५० ॥ को नाम लोके पुरुषार्थसारवित्पुरा कथानां भगवत्कथासुधाम् ॥ आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम् ॥ ५१ ॥ इति श्रीभागवते तृतीयस्कन्धे श्रीव० प्रादु० व० त्रयोदशोऽध्यायः ॥ १३ ॥ श्रीशुक उवाच ॥ निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः ॥ पुनः स पप्रच्छ तमुद्यताञ्जलिर्न चातितृप्तो विदुरो धृतव्रतः ॥ १ ॥

न्यदृष्ट्या अभेदभावेन फलराहित्येन भजतां वा जनानां प्रार्थनां विनापि स्वयमेव परां सर्वोत्तमां स्वगतिं स्वप्राप्तिं विधत्ते ॥ ५० ॥ को नामेति ॥ पुरा कथानां मध्ये भवापहां जन्ममरणहरां भगवत्कथारूपां सुधां कर्णाववाञ्जलयस्तैरापीय आ सर्वतस्तन्माधुर्यादिगुणाननुभूय नरेतरं पशुं विना लोके पुरुषार्थसारं भगवत्प्रसाद इति यो वेत्ति सः को नाम विरज्येत ॥ ५१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्तृतीयस्य त्रयोदशे ॥ १३ ॥ चतुर्दशे तु सन्ध्यायां दितेः कामाग्रहादभूत् ॥ गर्भः कश्यपजस्तत्रोवाचेत्येकादशेरिताः ॥ श्लोकाः खर्वांणास्त्रिंशैरा त्रिपादी चाप्यनुष्टुभः ॥ १४ ॥ निशम्येति ॥ कौषारविणा मैत्रेयेणोपवर्णितां कारणसूकरात्मनः जगत्कारणभूतवराहावतारस्य हरेः कथां निशम्य श्रुत्वा न चातितृप्तः चकार एवार्थः अतः धृतं कथाश्रवणव्रतं येन सः उद्यताञ्जलिः सः विदुरः पुनस्तं मैत्रेयं पप्रच्छ ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनेति ॥ हे मुनिश्रेष्ठ येन स्वायम्भुवे भूमिरुद्धृता तेनैव यज्ञवराहरूपेण हरिणा चाक्षुषे आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुमत्वत्त एव श्रुतवन्तो वयम् ॥ २ ॥ तस्येति ॥ हे ब्रह्मन् स्वदंष्ट्राग्रेण क्षोणीं भूमिं लीलया उद्धरतस्तस्य वराहस्य दैत्यराजस्य हिरण्याक्षस्य च मृधः युद्धं कस्माद्धेतोरभूत् ॥ ३ ॥ साध्विति ॥ हे वीर त्वया साधु सम्यक् पृष्टं यत् यस्मात् एतत्प्रश्नमिषेण मर्त्यानां मृत्युपाशं विशातयति मोचयति तां हरेरवतारयोः वराहनृसिंहयोः कथां त्वं पृच्छसि ॥४॥ ययेति ॥ मुनिना नारदेन गीतया यया हरिकथया अर्भको बाल एव उत्तानपदः पुत्रो ध्रुवः मृत्योर्मूर्ध्नि अङ्घ्रिं कृत्वैव हरेः पदं स्थानमारुरोह । यदा ध्रुवाय सुनन्दादिभिर्विमानमानीतं तदास्य देहत्यागो ऽपेक्षितः स्यात् इति मत्वा मृत्यावासन्नेऽपि देहं न तत्याज किन्तु सोपान इव तस्य मूर्ध्नि पदं दत्त्वा विमानमारुह्य विष्णुपदमारूढः।वक्ष्यति हि । "परीत्याभ्यर्च्य धिष्ण्याग्र्यम्" इत्यादिना ॥ ५ ॥ अथेति ॥ प्रश्नोत्तरारम्भे अत्रापि त्वया पृष्टेऽर्थेऽपि देवानामनुपृच्छतां सतां देवदेवेन ब्रह्मणा पुरा पूर्वकाले वर्णितः इतिहासः मे मया श्रुतोऽस्ति ॥ ६ ॥ दितिरिति द्वयम् ॥ हृच्छयः कामस्तेनार्दिता पीडिता अपत्यकामा च दाक्षायणी प्राचेतसस्य दक्षस्य पुत्री दितिः यजुषां यज्ञानां पतिं फलदातारमग्निर्जिह्वा मुखं यस्य तं पुरुषं

विदुर उवाच ॥ तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना ॥ आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम ॥२॥ तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राग्रेण लीलया ॥ दैत्यराजस्य च ब्रह्मन्कस्माद्धेतोरभून्मृधः ॥ ३ ॥ मैत्रेय उवाच ॥ साधु वीर त्वया पृष्टमवतारकथां हरेः ॥ यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीम् ॥ ४ ॥ ययोत्तानपदः पुत्रो मुनिना गीतयाऽर्भकः ॥ मृत्योः कृत्वैव मूर्ध्न्यङ्घ्रिमारुरोह हरेः पदम् ॥ ५ ॥ अथात्रापीतिहासोऽयं श्रुतो मे वर्णितः पुरा ॥ ब्रह्मणा देवदेवेन देवानामनुपृच्छताम् ॥६॥ दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिम् ॥ अपत्यकामा चकमे सन्ध्यायां हृच्छयार्दिता ॥ ७ ॥ इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिम् ॥ निम्लोचत्यर्क आसीनमग्न्यागारे समाहितम् ॥ ८ ॥ दितिरुवाच ॥ एष मां त्वत्कृते विद्वन्काम आत्तशरासनः ॥ दुनोति दीनां विक्रम्य रम्भामिव मतङ्गजः ॥ ९ ॥ तद्भवान्दह्यमानायां सपत्नीनां समृद्धिभिः ॥ प्रजावतीनां भद्रं ते मय्याऽऽयुङ्क्तामनुग्रहम् ॥ १० ॥

भगवन्तं पयसेष्ट्वा पयोहोमेन पूजयित्वा अर्के सूर्ये निम्लोचति अस्तं गच्छति सति अग्न्यागारे अग्निहोत्रशालायामासीनं समाहितं कृतसमाधिं मारीचं मरीचेः पुत्रं स्वपतिं कश्यपं सन्ध्यायामेव चकमे।तत्रापि अग्निहोत्रशालायां तत्रापि समाहितं सन्ध्यायामपि सूर्यास्तकाल एवेत्यादिदेशकालाद्ययोग्यता दर्शिता। कामार्दितत्वादेवानुचितमपि स्ववाचा संभोगप्रार्थनं कृतवती ॥ ७ ॥ ८ ॥ एष इति ॥ हे विद्वन् आत्तं गृहीतं शरासनं धनुर्येन स एषः प्रसिद्धः कामः त्वत्कृते त्वया सह सङ्गत्यर्थं दीनां कृपणां मां विक्रम्य स्वशौर्यमाविर्भाव्य रम्भां कदलीं मतङ्गज इव दुनोति पीडयति ॥ ९ ॥ तदिति ॥ तत्तस्मादिति दीनत्वात् प्रजावतीनां सपत्नीनां समृद्धिभिर्विभवैर्दह्यमानायां मयि भवान् अनुग्रहमायुङ्क्तां सर्वतो युनक्तु सम्यक् करोतु । एवं चेत्ते तवापि भद्रमेव भविष्यति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्त्तरीति ॥ ननु भवद्विधो गुणवान् पतिर्यासां मादृशीनां स्त्रीणां प्रजया प्रजारूपेण जायते । " तज्जाया जाया भवति यदस्यां जायते पुनः । " इति श्रुतेः ।तासां भर्त्तरि भर्त्तृविषये भर्त्तृचित्ते वा आप्त उरुर्मानो याभिस्तासां स्त्रीणां यशः लोकान्प्रत्याविशते सर्वेषु लोकेषु प्रसृतं भवति । तङार्षः ॥ ११ ॥ विवाहात्पूर्वमप्यहं त्वय्येवानुरक्तत्वादप्रत्याख्येयेत्याह–पुरेति ॥ पुरा विवाहात्पूर्वकाले दुहितृषु वत्सलः भगवान् नोऽस्माकं पिता दक्षः हे वत्सा इति प्रथमं सर्वाः युगपत् संबोध्य ततः भवती कं वरं पतिं वृणीतेति नोऽस्मान् पृथक् पृथगपृच्छत । तङार्षः । यद्वा वृणीतेत्येकत्वमार्षम् । तत्र पृथक् इत्यस्यैकान्त इत्यर्थः ॥१२॥ स इति ॥ सन्तानभावनः सन्तानहितेप्सुः दक्षः आत्मजानां नोऽस्माकं भावमाभिप्रायं विदित्वा साक्षान्नामाग्रहणेऽपि इङ्गितेन जनान्तरद्वारा वा विदित्वा तासामात्मजानां मध्ये यास्ते तव शीलमनुव्रताः अनुसृतास्ता अस्मान् त्रयोदश तुभ्यमददात्।तथा च त्रयोदशानामस्माकं त्वयि भावसाम्ये विषमाचरणमयुक्तमिति भावः ॥१३॥अथेति॥हे कल्याण हे कञ्जविलोचन हे भूमन् महत्तम हि यस्मात् महीयसि

भर्तर्याऽऽप्तोरुमानानां लोकानाविशते यशः ॥ पतिर्भवद्विधो यासां प्रजया ननु जायते॥११॥ पुरा पिता नो भगवान्दक्षो दुहितृवत्सलः॥ कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् ॥ १२ ॥ स विदित्वाऽऽत्मजानां नो भावं सन्तानभावनः॥ त्रयोदशाऽददत्तासां यास्ते शीलमनुव्रताः ॥ १३ ॥ अथ मे कुरु कल्याण कामं कञ्जविलोचन ॥ आर्तोपसर्पणं भूमन्न मोघं हि महीयसि ॥ १४॥ इति तां वीर मारीचः कृपणां बहुभाषिणीम् ॥ प्रत्याहाऽनुनयन्वाचा प्रवृद्धानङ्गकश्मलाम् ॥ १५ ॥ एष तेऽहं विधास्यामि प्रियं भीरु यदिच्छसि ॥ तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः ॥१६॥ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान्॥व्यसनार्णवमत्येति जलयानैर्यथार्णवम् ॥ १७ ॥ यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि ॥ यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः ॥ १८ ॥

त्वादृशे महत्तमे पुरुषे आर्तानां मादृशामुपसर्पणं समीपमागत्य याचनं मोघं वृथा न भवति। अथ तस्मान्मे काममभिलषितं कुरु सम्पादय॥१४॥इतीति ॥ हे वीर मारीचः कश्यपः इत्युक्तप्रकारेण बहुभाषिणीं कृपणां दीनां प्रवृद्धो योऽनङ्गः कामस्तेन कश्मलं मोहो यस्याः तां वाचानुनयन्सान्त्वयन् प्रत्याह स्म।अत्र एष मां त्वत्कृते इति द्वाभ्यां कार्पण्यं भर्त्तर्यातित्यादिबहुभाषित्वम् ॥ १५ ॥ अथ सन्ध्याकालवञ्चनाय भार्यां प्रशंसति–एष त इति ॥ हे भीरु त्वं यदिच्छसि तत्ते प्रियम् एषः त्वया प्रार्थितोऽहं विधास्यामि करिष्यामि ।यतः यस्याः भार्यायाः सकाशात्त्रैवर्गिकी धर्मार्थकामरूपा सिद्धिः फलं भवति तस्या भार्यायाः काममभिलषितं को न कुर्यात्सर्वोऽपि कुर्यादेव ॥ १६ ॥ सर्वेति ॥ यथा नाविको जलयानैर्नौभिः अन्यानप्यादाय स्वयं समुद्रं तरति तथा कलत्रवान् पुरुषः स्वाश्रमेण गृहस्थाश्रमेण सर्वाश्रमानितरानपि त्रीनाश्रमान् उपादाय अन्नादिप्रदानेन तेषामपि निर्वाहं कृत्वा स्वयमपि व्यसनार्णवं क्षुत्पिपासादिदुःखसमुद्रमत्येति उत्तरति ॥१७॥ यामिति ॥ हे मानिनि स्वर्गापवर्गाख्यश्रेयस्कामस्य पुरुषस्यात्मनो देहस्यार्द्धं यां पत्नीं श्रुतय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहुः । दम्पत्योः कर्मसु सहाधिकारात् यच्छब्दानां तामिति तृतीयश्लोकेन संबन्धः । यस्यां पत्न्यां स्वस्य धुरं दृष्टाऽदृष्टकर्मभारमध्यस्य निक्षिप्य विज्वरो निश्चिन्तः पुमान् चरति ॥ १८ ॥ यामिति ॥ दुर्गपतिर्यथा दस्यून् जयति तथा यां पत्नीमाश्रित्य इतराश्रमैर्ब्रह्मचर्याद्याश्रमैः दुर्जयान् जेतुमशक्यानपि इन्द्रियाण्येवारातयः शत्रवस्तान् हेलाभिरेव वयं गृहस्था जयेम सभार्यस्येन्द्रियाणि न क्षुभ्यन्ति अतः वयं तैर्न बाध्यामह इति दुर्गमत्र विषयभोग एव । स हि तत्र पतितान् ब्रह्मचार्यादीन् भ्रंशयति नतु गृहस्थान्। तेषां विषयभोगस्य विहितत्वेन भ्रंशकत्वाभावात् ॥ १९ ॥ नेति ॥ हे गृहेश्वरि तां पूर्वोक्तोपकारकर्त्रीं त्वामनुकर्त्तुं स्वकृतोपकारैस्त्वत्सदृशीभवितुं कात्स्न्येनापि युक्तं यदायुस्तेन संपूर्णेनाप्यायुषा वाशब्दाज्जन्मान्तरैरपि वयं न प्रभवो न समर्थाः। कात्स्न्येनेति अनुकर्त्तुमित्यत्र वा योज्यम् । एवमन्ये च ये गुणगृध्नवो गुणग्राहकास्तेऽपि न प्रभवः ॥ २० ॥ अथापीति ॥ अथापि त्वदुपकारानुरूपेणोपकर्त्तुमशक्यत्वेऽपि ते तव प्रजात्यै पुत्रोत्पत्त्यै एतं कामं मनोरथमलं पूर्णं करवाणि परंतु यथा लोकाः मां नातिवोचन्ति न निन्देयुस्तथा मुहूर्त्तं सन्ध्याकालं प्रतिपालय प्रतीक्षस्व। अङ विनापि वच उमार्षः । किन्न वोचस्यसद्वृत्त इत्यत्रेऽप्येवम् वोचधातुरेव वा कल्प्यः ॥ २१ ॥

यामाश्रित्येन्द्रियारातीन्दुर्जयानितराश्रमैः ॥ वयं जयेम हेलाभिर्दस्यून् दुर्गपतिर्यथा ॥ १९ ॥ न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि ॥
अप्यायुषा वा कात्स्न्येन ये चान्ये गुणगृध्नवः ॥ २० ॥ अथापि काममेतं ते प्रजात्यै करवाण्यऽलम् ॥ यथा मां नातिवोचन्ति मुहूर्तं
प्रतिपालय ॥ २१ ॥ एषा घोरतमा वेला घोराणां घोरदर्शना ॥ चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥ २२ ॥ एतस्यां साध्वि
सन्ध्यायां भगवान्भूतभावनः ॥ परीतो भूतपर्षद्भिर्वृषेणाऽटति भूतराट् ॥२३॥ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ॥
भस्मावगुण्ठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते ॥ २४ ॥

स्वनिन्दामगणयन्तीं भीषयमाणः प्राह—एषेति ॥ एषा सन्ध्या घोरतमा अतिभयङ्करी घोरं दर्शनं यस्याः सा घोराणां वेला च अतो न रतियोग्या यस्यां सन्ध्यायां भूतेशो रुद्रस्तस्यानुचराणि भूतानि भूतप्रेतपिशाचादीनि चरन्ति सर्वत्र पर्यटन्ति ॥ २२ ॥ एतस्यामिति ॥ हे साध्वि एतस्यां सन्ध्यायां भूतभावनः सर्वजनपालकः भगवान् भूतराट् भूतानां राजा रुद्रः भूतानां प्रमथादीनां परिषदः सभाः समूहास्तैः परीतः परिवेष्टितो वृषेण स्ववाहनेनाटति ॥ २३ ॥ श्मशानेति ॥ श्मशानेषु यश्चक्रानिलो वातमण्डली तस्मिन्या धूलिस्तया धूम्रा विकीर्णा विक्षिप्ताः विद्योताः विद्योतिताश्च या जटास्तासां कलापो रचना यस्य सः भस्मना अवगुण्ठः प्रावृतः अमलः रुक्ममिव देहो यस्य स ते देवरः मम पितृव्यश्च देवो महादेवस्त्रिभिः सोमसूर्याग्निनेत्रैः पश्यति । सत्या दक्षकन्यात्वेन दितिभगिनीत्वात् एकस्य जामातरः परस्परं भ्रातरो व्यवह्रियन्ते अतो मम भ्रातासौ तव देवर इति लज्जार्थमुक्तम् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु स स्वजनेष्वस्मासु क्षंस्यत इति चेत्तत्राह–नेति ॥ लोके संसारे यस्य महादेवस्य स्वजनः स्वकीयो जनो नास्ति तथापरः अस्वजनो वा नास्ति तथात्याद्दत अति आदरः स्नेहस्तद्विषयोऽपि नास्ति तथा विगर्ह्यः द्वेषविषयत्वेन निन्द्यो वा कश्चिन्नोत नास्त्येव । वयं संसारिणो जीवा यस्येश्वरस्य श्रीमहादेवस्य चरणाभ्यामपविद्धां निर्माल्यवद् दूरतः परित्यक्तां भुक्तो भोगो यस्यास्तां दृष्टदोषाम् अजां मायामयीं विभूतिं व्रतैर्नानाविधसाधनैस्तमाराध्य तत आशास्महे प्रार्थयामहे ॥२५॥ अनिषिद्धसुखत्यागादुपहासो न कार्य इत्याह–यस्येति ॥ अविद्याकृतं यत्पटलमात्मावरणं तद्विभित्सवो भेत्तुमिच्छवः मनीषिणो यस्य श्रीमहादेवस्य अनवद्यं सर्वदोषनिवर्त्तकमाचरितं गृणन्ति गृह्णन्ति इत्यपि पाठः । निरस्तं साम्यमतिशयश्च यस्मात्तथाभूतोऽपि सतां गतिर्गुरुर्यत् यः स्वयं स्वतन्त्रः भोगवैमुख्याय पिशाचचर्यामिचरत् ॥ २६ ॥ हसन्तीति ॥ स्वात्मन् स्वात्मनि ङिलुगार्षः । रतस्य तस्य समीहितमभिप्रायं परशिक्षार्थत्वमविदुषः अविद्वांस इति द्वितीया प्रथमार्थे आर्षी । यद्वा । न विद्वान् यस्मात्तस्याविदुषः सर्वज्ञस्येति शिवविशेषणम् ।

न यस्य लोके स्वजनः परो वा नात्याद्दतो नोत कश्चिद्विगर्ह्यः ॥ वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां बत भुक्तभोगाम् ॥ २५ ॥
यस्याऽनवद्याचरितं मनीषिणो गृणन्त्यविद्यापटलं बिभित्सवः ॥ निरस्तसाम्यातिशयोऽपि यत्स्वयं पिशाचचर्यामचरद्गतिः सताम्
॥ २६ ॥ हसन्ति यस्याचरितं हि दुर्भगाः स्वात्मन् रतस्याऽविदुषः समीहितम् ॥ यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयो-
पलालितम् ॥ २७ ॥ ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया ॥ आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं
विडम्बनम् ॥२८॥ मैत्रेय उवाच ॥ सैवं संविदिते भर्त्रा मन्मथोन्मथितेन्द्रिया ॥ जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा॥२९॥स विदित्वाऽथ
भार्यायास्तं निर्बन्धं विकर्मणि ॥ नत्वा दिष्टाय रहसि तयाऽथोपविवेश ह ॥ ३० ॥

समीहितमभिप्रेतं लोकशिक्षारूपमित्याचरितविशेषणम् । यस्याचरितं भोगवैमुख्याय कृतं दुर्भगाः मन्दभाग्या एव हसन्ति यैर्दुर्भगैः पुरुषैः कर्त्तृभिः वस्त्रमाल्याभरणानुलेपनैः करणैः श्वभोजनं शुनां भोज्यं शरीरं स्वात्मतया अयमेवात्मेति बुद्ध्या उपलालितं ते भ्रान्तास्तं हसन्तीत्याशयः ॥ २७ ॥ ब्रह्मादय इति ॥ सर्वोत्कृष्टा हि ब्रह्मादयस्तेऽपि येन श्रीरुद्रेण कृताः सेतवो मर्यादास्तत्पालकास्तदाज्ञानुसारिण इत्यर्थः । इदं विश्वं यत्कारणं यो रुद्रः कारणं यस्य तथाभूतेन येन कृतमित्यर्थः । ब्रह्मादिसर्वजनमोहिनी माया च यस्याज्ञाकरी । अहो आश्चर्यं तस्य विभूम्नः महत्तमस्य पिशाचचर्या दृश्यते अतः पिशाचवदिदमाचरितं विडम्बनमनुकरणमात्रमेव अतर्क्यमित्यर्थः ॥ २८ ॥ सेति ॥ भर्त्रा कश्यपेन कर्त्रा एवमुक्तप्रकारेण संविदिते ज्ञापने कृतेऽपि सति भावे क्तः । मन्मथेन उन्मथितमिन्द्रियं मनो यस्याः सा दितिः वृषलीव वेश्येव गतत्रपा निर्लज्जा सती ब्रह्मर्षेः कश्यपस्य वासो वस्त्रं जग्राह विचकर्ष ॥ २९ ॥ स इति ॥ कश्यपो भार्याया दितेस्तं विकर्मणि सन्ध्यायां प्रतिषिद्धे रतिकर्मणि निर्बन्धं हठं ज्ञात्वा अथानन्तरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिष्टाय दैवरूपाय सर्वप्रवर्तकाय परमेश्वराय तं प्रसादयितुं नत्वा अथानन्तरं रहसि अग्निशालां परित्यज्यान्यत्रैकान्तस्थले तया भार्यया सह उपविवेशेति मैथुनं लक्ष्यते॥३०॥ अथेति ॥ अथ सलिलमुपस्पृश्य सलिले स्नात्वा प्राणानायम्य प्राणायामं कृत्वा वाग्यतः धृतमौनः भर्गशब्दवाच्यं विरजं निर्विकारं सलोप आर्षः अदन्तोऽप्ययमस्तीति परे । ज्योतिर्ज्ञानरूपं सनातनं नित्यं ब्रह्म ध्यायन् तद्वाचकं प्रणवं गायत्रीं वा जजाप ॥३१॥ दितिस्त्विति ॥ हे भारत तेन स्वकृतेन कर्मावद्येन कर्मदोषेण व्रीडिता सती अत एवाधोमुखी सती दितिर्विप्रर्षिं कश्यपमुपसङ्गम्य समीपं गत्वा अभ्यभाषत ॥३२॥ न मे इति ॥ हे ब्रह्मन् अहं यस्य श्रीशिवस्य अंहसम् अपराधं पुंस्त्वमार्षम् । अकरवं कृतवती स भूतानां प्रमथादीनामृषभः स्वामी भूतानां पतिः पालकः रुद्रः इमं मे गर्भं मावधीत् मा हन्तु । न मे इति पाठे लुङार्षः । अवधीदिति च्छेदः ॥ ३३ ॥ नम इति ॥ सतां महते देवाय असताम् उग्राय भयङ्कराय सतां मीढुषे कामवर्षणाय न्यस्तदण्डाय च असतां तु धृतदण्डाय मन्यवे च रुद्राय शिवाय नमः । अत्र स्त्रीत्वान्मयि कृपां कुर्यात् किंवा

अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः ॥ ध्यायञ्जजाप विरजं ब्रह्म ज्योतिः सनातनम् ॥३१॥ दितिस्तु व्रीडिता तेन कर्मावद्येन भारत ॥ उपसंगम्य विप्रर्षिमधोमुख्यऽभ्यभाषत ॥ ३२ ॥ दितिरुवाच ॥ न मे गर्भमिमं ब्रह्मन्भूतानामृषभोऽवधीत् ॥ रुद्रः पतिर्हि भूतानां यस्याऽकरवमंहसम् ॥ ३३ ॥ नमो रुद्राय महते देवायोग्राय मीढुषे ॥ शिवाय न्यस्तदण्डाय धृतदण्डाय मन्यवे ॥ ३४॥ स नः प्रसीदतां भामो भगवानुर्वनुग्रहः ॥ व्याधस्याप्यनुकम्प्यानां स्त्रीणां देवः सतीपतिः ॥ ३५ ॥ मैत्रेय उवाच ॥ स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीम् ॥ निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ॥ ३६ ॥ कश्यप उवाच ॥ अप्रायत्यादात्मनस्ते दोषान्मौहूर्तिकादुत ॥ मन्निदेशातिचारेण देवानां चातिहेलनात् ॥ ३७ ॥ भविष्यतस्तवाभद्रावभद्रे जाठराधमौ ॥ लोकान्सपालांस्त्रींश्चण्डि मुहुराक्रन्दयिष्यतः ॥ ३८ ॥

मम दोषात् दण्डयेदित्युभयविधानि विशेषणानि मीढुषे इति "दाश्वान्साह्वान्" इति छान्दसो निपातः ॥३४॥ स इति ॥ भामो भगिनीभर्ता ब्रह्मपुत्रस्यैव दक्षस्य प्रचेतसः पुनरुत्पन्नत्वेन ब्रह्मपुत्रदक्षकन्यापि सती भगिन्येवेति रुद्रस्य भामत्वम् । भगवान् उरुर्महाननुग्रहो यस्य सतीपतिः देवः स रुद्रः व्याधस्यातिक्रूरस्याप्यनुकनुकम्प्यानामनुकम्पितुं योग्यानां स्त्रीणां नोऽस्माकं प्रसीदताम् । तङार्षः । सतीपतिरित्यनेन स स्त्रीणां स्वभावं वेत्तीति दर्शयति । सत्या अनुरोधाद्वा तद्भगिनीं मामनुकम्पताम् ॥ ३५ ॥ स्वेति ॥ स्वसर्गस्य स्वगर्भस्य लोक्यां लोकद्वयार्हामाशिषं शुभमाशासानां प्रार्थयन्तीं रुद्रभयेन प्रवेपतीं कम्पमानाम् आर्षः शता । भार्यां निवृत्तः सन्ध्यानियमो जपादिरूपो यस्य सः प्रजापतिः कश्यपः प्राह स्म ॥ ३६ ॥ अप्रायत्यादिति द्वयम् ॥ हे अभद्रे अशुभे हे चण्डि कोपने ते तवात्मजश्चित्तस्याप्रायत्यात् अशुचित्वात् मौहूर्त्तिकात् सन्ध्यामुहूर्तसंबन्धिनो दोषात् उत अपि मन्निदेशातिचारेण ममाज्ञोल्लङ्घनेन देवानां महादेवानुचराणां हेलनादवज्ञानाच्च अभद्रौ तव जाठराधमौ पुत्राधमौ भविष्यतः तौ च सपालान् लोकपालैः सहितान् त्रीन् लोकान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुहुः पुनः पुनः आक्रन्दयिष्यतः रोदयिष्यतः ॥ ३७ ॥ ३८ ॥ प्राणिनामिति द्वयम् ॥ तदा ताभ्यां दीनानामकृतागसां निरपराधानां प्राणिनां हन्यमानानां सतां प्राणिषु हन्यमानेष्वित्यर्थः । स्त्रीणां च निगृह्यमाणानां पातिव्रत्यधर्माच्चाल्यमानानां सतीनामाचारमर्यादाभङ्गेन महात्मसु कोपितेषु सत्सु असौ प्रसिद्धः विश्वेश्वरः लोकस्य भावनः पालकः भगवान् क्रुद्धः सन्नवतीर्य वराहनरसिंहरूपाभ्यामाविर्भूय यथा शतपर्वधृक् वज्रधर इन्द्रः धृजेः क्विप् । अद्रीन् नाशितवान् तथा तौ त्वत्पुत्रौ हनिष्यति ॥३९॥४०॥ वधमिति ॥ हे प्रभो सुनाभं सुदर्शनचक्रं तेन उदारो भूषितो बाहुर्यस्य तेन भगवता साक्षान्मह्यं मम पुत्रयोर्वधमाशासे अनुमन्ये । क्रुद्धात् ब्राह्मणात्तु वधो माभूत् ॥ ४१ ॥ नेति ॥ ब्रह्मदण्डो ब्राह्मणशापस्तेन दग्धस्य मृतस्य भूतानां प्राणिनां भयं ददातीति भूतभयदस्तस्य च उभयत्र शेषे षष्ठी । नारकाश्च नरकवासिनोऽपि नानुगृह्णन्ति अनुग्रहं न कुर्वन्ति तथा यां यां योनिमसौ ब्रह्मदण्डदग्धो लोकभयदश्च गतो भवति तत्रस्था अपि नानुगृह्णन्ति ॥४२॥ कृतेति द्वयम् ॥ कृतं यद् दुष्कर्म तेन यः शोकः ततो योऽनुतापः

प्राणिनां हन्यमानानां दीनानामकृतागसाम् ॥ स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ॥३९॥ तदा विश्वेश्वरः क्रुद्धो भगवान् लोकभावनः ॥ हनिष्यत्यवतीर्याऽसौ यथाऽद्रीञ्छतपर्वधृक् ॥ ४० ॥ दितिरुवाच ॥ वधं भगवता साक्षात्सुनाभोदारबाहुना ॥ आशासे पुत्रयोर्मह्यं मा क्रुद्धाद् ब्राह्मणाद्विभो ॥ ४१ ॥ न ब्रह्मदण्डदग्धस्य न भूतभयदस्य च ॥ नारकाश्चानुगृह्णन्ति यां यां योनिमसौ गतः ॥४२॥ कश्यप उवाच ॥ कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् ॥ भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥ ४३ ॥ पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः ॥ गास्यन्ति यद्यशः शुद्धं भगवद्यशसा समम् ॥ ४४ ॥ योगैर्हेमेव दुर्वर्णं भावयिष्यन्ति साधवः ॥ निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुम् ॥ ४५ ॥ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकम् ॥ स स्वदृक् भगवान्यस्य तोष्यतेऽनन्यया दृशा ॥ ४६ ॥ स वै महाभागवतो महात्मा महाऽनुभावो महतां महिष्ठः ॥ प्रवृद्धभक्त्या ह्यनुभाविताशये निवेश्य वैकुण्ठमिमं विहास्यति ॥ ४७ ॥

पश्चात्तापस्तेन सद्यः प्रत्यवमर्शनात् युक्तायुक्तविचारेणापराधक्षमापनात् भगवति उरुमानाच्च भवे श्रीरुद्रे मयि अपि आदराच्च हेतोः तव पुत्रस्य हिरण्यकशिपोः पुत्राणां चतुर्णां तु मध्ये एक एव प्रह्लादः सतां मतः प्रमाणत्वेन संमतो भविता भविष्यति । यस्य तव पौत्रस्य शुद्धं यशो भगवद्यशसा समं सह सदृशं वा गास्यन्ति ॥४३॥४४॥ योगैरिति ॥ योगैर्दाहाद्युपायैर्दुर्वर्णं हीनवर्णं हेम स्वर्णमिव तद्यथा शोध्यते तथा यस्य शीलमनुवर्तितुं निर्वैरादिभिर्गुणैरात्मानमन्तःकरणं साधवः भावयिष्यन्ति शोधयिष्यन्ति ॥४५॥ यदिति ॥ यस्य भगवतः प्रसादात् अनुग्रहाद्यदात्मकं भगवदात्मकमिदं विश्वमपि प्रसीदति अनुग्रहं करोति स स्वदृक् सर्वसाक्षी भगवान् यस्य तव पौत्रस्य अनन्यया दृशा एकान्तया भक्त्या तोष्यते तोक्ष्यति तोषं प्राप्स्यति तङ्क्षलोपाभावार्षौ ॥४६ ॥ सं इति ॥ स वै महाभागवतो महात्मा निर्मलचित्तः महाननुभावः अभ्याद्यैरण्यदाह्यत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिरूपः प्रभावो यस्य महतामपि महिष्ठः अतिशयेन महान्सः त्वत्पौत्रः प्रवृद्धया भक्त्या अनुभाविते संशोधिते आशये चित्ते भगवन्तं वैकुण्ठं निवेश्य अवस्थाप्य इमं देहाद्यभिमानं विहास्यति त्यक्ष्यति ॥४७॥ अलम्पट इति ॥ तव पौत्रः अलम्पटः । जितेन्द्रिय इत्यर्थः । शीलधरः सुस्वभावः शीलधन इति पाठान्तरम् । गुणानां सत्यप्रतिज्ञत्वधैर्यादीनामाकरः जन्मभूमिः परेषां समृद्ध्या हृष्टः परेषु दुःखितेषु सत्सु स्वयमपि तद्दुःखेन व्यथितो दुःखितः न भूतो न जातः शत्रुर्यस्य सः अभूतशत्रुः शत्रुदृष्टिरहितः निदाघो ग्रीष्मः तत्र भवं नैदाघिकं तापं यथा उडुराजश्चन्द्रो हरति तथा जगतः सर्वलोकस्य शोकहर्त्ता भविष्यति॥४८॥ अन्तरिति ॥ तव पौत्रः अमलम् अब्जनेत्रं स्वपूरुषाणां स्वभक्तानामिच्छानुरूपं गृहीतं रूपं येन तं श्रीर्लक्ष्मीर्या ललना स्त्री तस्या ललामं भूषणभूतं पतिं स्फुरन्ती ये कुण्डले ताभ्यां मण्डितमाननं यस्य तं भगवन्तम् अन्तः स्वहृदये बहिश्च सर्वत्र द्रष्टा द्रक्ष्यतीत्यपरिच्छिन्नदृष्टित्वमुक्तम् ॥ ४९ ॥ श्रुत्वेति ॥ जनिष्यमाणं पौत्रं भागवतं श्रुत्वा अहो मम पापमपि सत्फलमिति संचिन्त्य दितिर्भृशमत्यन्तममोदत जहर्ष । तथा

अलम्पटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु ॥ अभूतशत्रुर्जगतःशोकहर्ता नैदाघिकं तापमिवोडुराजः ॥४८॥ अन्तर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छाऽनुगृहीतरूपम् ॥ पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुण्डलमण्डिताननम् ॥ ४९ ॥ मैत्रेय उवाच ॥ श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशम् ॥ पुत्रयोश्च वधं कृष्णाद्विदित्वाऽऽसीन्महामनाः ॥ ५० ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे दितिकश्यपसंवादवर्णनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ मैत्रेय उवाच ॥ प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः ॥ दधार वर्षाणि शतं शङ्कमाना सुरार्दनात् ॥ १ ॥ लोके तेन हतालोके लोकपाला हतौजसः ॥ न्यवेदयन्विश्वसृजे ध्वान्तव्यतिकरं दिशाम् ॥ २ ॥ देवा ऊचुः ॥ तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशम् ॥ न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ॥ ३ ॥

कृष्णाद्भगवतः स्वपुत्रयोर्वधं विदित्वा महामना उत्साहयुक्तमना आसीत् ॥५०॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्तृतीयस्य चतुर्दशे ॥१४॥ पञ्चदशे तु वैकुण्ठवर्णनं द्वारपालयोः ॥ शापो मुनीनां च तत्र पञ्चाशच्छ्लोकसंमितिः ॥ षडुवाचेति सार्द्धास्तु पञ्चशैला अनुष्टुभः ॥ १५ ॥ प्राजापत्यमिति ॥ गर्भस्थमेव परेषां देवादीनां तेजो हन्तीति पचाद्यच् तत् प्राजापत्यं प्रजापतिना कश्यपेन धृतं तत्तु तेजो वीर्यं गर्भं दितिः ताभ्यां सुराणां यदर्दनं पीडा भविष्यति तस्माच्छङ्कमाना असुरार्दनात् विष्णोः सकाशाच्छङ्कमाना वा सती शतं वर्षाणि उदरे दधार ॥ १ ॥ लोक इति ॥ तेन गर्भस्थतेजसा लोके हतः निरस्त आलोकः सूर्यादिप्रकाशो यस्मिंस्तथाभूते सति लोकपाला इन्द्रादयश्च हतौजसः हतपौरुषाः सन्तो ध्वान्तेन तमसा दिशां व्यतिकरं संकरमियं पूर्वा दिगियं पश्चिमा दिगिति विवेकाभावं विश्वसृजे ब्रह्मणे न्यवेदयन् ॥ २ ॥ तम इति ॥ हे विभो यत् यस्मात् वयं भृशं संविग्नाः भीताः स्म एतत्तमः त्वं वेत्थ एव । हि यस्मात् कालेनास्पृष्टमनभिभूतं वर्त्म ज्ञानमार्गो यस्य तस्य भगवतस्तव अव्यक्तम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातं किंचिन्नास्त्येव ॥३॥ देवदेवेति ॥ हे देवानां देव हे जगतां धातः स्रष्टः लोकनाथानामपि शिखामणे आदरणीय त्वं परेषां पूर्वेषामुत्कृष्टानां वा अपरेषामर्वाचीनानां निकृष्टानां वा सर्वेषां भूतानां भाववित् अभिप्रायज्ञोऽसि । अतः केनाभिप्रायेण दितिगर्भो वर्द्धत इत्यपि त्वं जानास्येवेति भावः ॥ ४ ॥ नम इति ॥ विज्ञानं चिच्छक्तिरेव वीर्यं बलं यस्य तस्मै गृहीतो गुणभेदो रजोगुणो येन मायया इदं ब्रह्म देहम् उपेयुषे गृहीतवते व्यक्तस्य प्रपञ्चस्य योनये कारणाय यद्वा न व्यक्ता केनापि प्रमाणेन विज्ञाता योनिर्यस्य तस्मै ते नम इति ॥ ५ ॥ य इति द्वयम् ॥ ये आत्मनां जीवानां भावनं पालकं स्वात्मन्येव प्रोतानि ग्रथितानि भुवनानि येन तं परं सदसदात्मकं कार्यकारणरूपं त्वा त्वामनन्येन भावेन निष्कामभक्त्या भावयन्ति ध्यायन्ति । सुपक्वयोगानां जितानि श्वासाः इन्द्रियाणि आत्मा मनश्च यैः लब्धो युष्माकं प्रसादो यैस्तेषां कुतश्चिदपि हेतोः पराभवो न भवति ॥ ६ ॥ ७ ॥ यस्येति ॥ यस्य तव वाचा वेदरूपया सर्वाः प्रजाः गावः वृषाः तन्त्या दामन्या इव यन्त्रिताः स्वस्वाधिकारे प्रयोजिताः आयत्ताः अधीनाः

देवदेव जगद्धातर्लोकनाथशिखामणे ॥ परेषामपरेषां त्वं भूतानामसि भाववित् ॥ ४ ॥ नमो विज्ञानवीर्याय माययेदमुपेयुषे ॥ गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ॥ ५ ॥ ये त्वाऽनन्येन भावेन भावयन्त्यात्मभावनम् ॥ आत्मनि प्रोतभुवनं परं सदसदात्मकम् ॥६॥ तेषां सुपक्वयोगानां जितश्वासेन्द्रियात्मनाम् ॥ लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ॥ ७ ॥ यस्य वाचा प्रजाः सर्वा गावस्तन्त्येव यन्त्रिताः ॥ हरन्ति बलिमायत्तास्तस्मै मुख्याय ते नमः ॥ ८ ॥ स त्वं विधत्स्व शं भूमंस्तमसा लुप्तकर्मणाम् ॥ अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुम् ॥ ९ ॥ एष देव दितेर्गर्भ ओजः काश्यपमर्पितम् ॥ दिशस्तिमिरयन्सर्वा वर्धतेऽग्निरिवैधसि ॥ १० ॥ मैत्रेय उवाच ॥ स प्रहस्य महाबाहो भगवाञ्छब्दगोचरः ॥ प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरया गिरा ॥ ११ ॥

सावधाना वा सत्यो बलिं हरन्ति स्वाधिकारानुरूपाणि कर्माणि कुर्वन्तीत्यर्थः । तस्मै मुख्याय नियन्त्रे प्राणरूपाय वा तुभ्यं नमः ॥ ८ ॥ स त्वमिति ॥ हे भूमन् सः त्वं तमसा अन्धकारेण अहोरात्रभागाभावेन लुप्तानि कर्माणि येषां तेषामस्माकं शं सुखं विधत्स्व कुरु । अदभ्रा अनल्पा दया यस्यां तया दृष्ट्या आपन्नान् शरणागतान् आपद्गतान्वाऽस्मान् ईक्षितुमर्हसि ॥ ९ ॥ एष इति ॥ हे देव काश्यपं कश्यपसम्बन्धि ओजो वीर्यं तेनैव दित्यामर्पितं स्थापितं तदेव एष दितेर्गर्भः सर्वाः दिशस्तिमिरयंस्तमो व्याप्ताः कुर्वन् एधसि शुष्के काष्ठेऽग्निरिव वर्द्धते ॥ १० ॥ स इति ॥ हे महाबाहो स शब्दगोचरः देवादीनां ये शब्दाः विज्ञप्तिवाक्यानि तेषां गोचरो विषयभूतः भगवान् आत्मभूर्ब्रह्मा दितेः कुचेष्टितं स्मृत्वा प्रहस्य रुचिरया मधुरया गिरा देवान् प्रीणन् सन्तोषयन् प्रत्याचष्ट प्रत्यभाषत ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानसा इति॥युष्मदपेक्षया पूर्वं जाताः मानसाः सनकादयो मे मम सुताः लोकेषु जनेषु विगतस्पृहाः प्रयोजनरहिता एव विहायसा आकाशमार्गेण सर्वान् लोकांश्चेरुः ॥१२॥ त इति॥ते एकदा सर्वलोकनमस्कृतम् अमलात्मनः भगवतः वैकुण्ठस्य विष्णोर्वैकुण्ठाख्यं निलयं स्थानं ययुः ॥१३॥ वसन्तीति॥अनिमित्तं स्वप्रयोजनाभावः निमित्तं प्रवर्तकं यस्मिंस्तेन निष्कामेण धर्मेण ये हरिमाराधयन् ते वैकुण्ठस्य भगवत इव मूर्तिर्येषां तथाभूता एव सर्वे पुरुषा यत्र वसन्ति॥१४॥यत्रेति॥ यत्र च श्रीवैकुण्ठे आद्यः कारणरूपः पुमान् परमपुरुषः शब्दगोचरः शास्त्रैकप्रमाणकः वृषो धर्ममूर्त्तिः कामवर्षणो वा भगवान् विरजं रजोगुणेनाननुविद्धं सलोप आर्षः अदन्तोऽव्ययमिति परे । सत्वं विष्टभ्य शुद्धसत्वमयीं मूर्त्तिं धृत्वा स्वानां नः स्वकीयान् भक्तानस्मान् शेषे षष्ठी । मृडयन्सुखयन्नास्ते ॥ १५ ॥ यत्रेति ॥ यत्र च सर्वर्तुश्रीभिः सर्वेषु ऋतुषु श्रीः पुष्पफलादिसंपद्येषां तैः कामदुघैः अभीष्टानि वर्षद्भिर्द्रुमैः मूर्तिमत् कैवल्यं मोक्ष इव विशेषेण भ्राजत् शोभमानं शता आर्षः । नैःश्रेयसं नाम वनमस्ति ॥ १६ ॥ वैमानिका इति ॥ यत्र वैकुण्ठे

ब्रह्मोवाच ॥ मानसा मे सुता युष्मत्पूर्वजाः सनकादयः ॥ चेरुर्विहायसा लोकाँल्लोकेषु विगतस्पृहाः ॥ १२ ॥ त एकदा भगवतो वैकुण्ठस्यामलात्मनः ॥ ययुर्वैकुण्ठनिलयं सर्वलोकनमस्कृतम् ॥ १३ ॥ वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठमूर्तयः ॥ येऽनिमित्तनिमित्तेन धर्मेणाऽऽराधयन्हरिम् ॥ १४ ॥ यत्र चाऽऽद्यः पुमानास्ते भगवाञ्छब्दगोचरः ॥ सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन्वृषः ॥ १५ ॥ यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः ॥ सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् ॥ १६ ॥ वैमानिकाः सललनाश्चरितानि यत्र गायन्ति लोकशमलक्षपणानि भर्तुः ॥ अन्तर्जलेऽनुविकसन्मधुमाधवीनां गन्धेन खण्डितधियोऽप्यनिलं क्षिपन्तः ॥ १७ ॥ पारावताऽन्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः ॥ कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृङ्गाधिपे हरिकथामिव गायमाने ॥ १८ ॥

वने वा सललनाः सस्त्रीकाः वैमानिकाः विमानचारिणो जनाः अन्तर्जले जलमध्ये अनुविकसन्मधवः प्रसरन्मकरन्दाः याः माधव्यः वासन्त्यो लताः अनुविकसन्त्यश्च ताः मधुयुक्ताः माधव्यो वा तासां गन्धेन खण्डिता विघ्निता धीर्येषां तथाभूता अपि तद्गन्धप्रापकमनिलं क्षिपन्तः भगवल्लीलामाधुर्यतिरस्कृतं तम् अगणयन्तः लोकानां शमलानि कामादिदोषान् क्षपयन्ति निराकुर्वन्ति तादृशानि भर्तुः स्वामिनो भगवतश्चरितानि गायन्त्येव नतु माधवीगन्धलोभेन विरमन्ति तेषां नित्यप्राप्तविषयसुखानामपि भगवत्सेवानन्दासक्तिर्दर्शिता ॥ १७ ॥ पारावतेति ॥ यत्र पारावतादीनां पक्षिणां यः कोलाहलः सभृङ्गाधिपे भगवद्वनमालाधिकारिणि भृङ्गश्रेष्ठे हरिहरि इत्याकारकस्वपक्षशब्देन हरिकथामिवोच्चैर्गायमाने सति शानजार्षः चानश् वा । अचिरमात्रं क्षणमात्रं विरमते समाप्तो भवति । तङार्षः । अन्यभृतः कोकिलाः दात्यूहाश्चातकाः पक्षिणः कूजन्तो भृङ्गध्वनिमाकर्ण्य हरिकथागानं मत्वा स्वकोलाहलं त्यक्त्वा भृङ्गध्वनिं शृण्वन्ति तत्र पक्षिणामपि । हरिकथाश्रवणानन्दः तेषां गुणग्राहित्वं निर्मत्सरत्वं च सूचितम् ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्दारेति ॥ यस्मिन् वैकुण्ठे मन्दारपारिजातौ सुरतरुविशेषौ कुरवस्तिलकवृक्षः अर्णः पुष्पविशेषः नागो नागकेसरः मन्दारकुन्दादयोऽतिसुगन्धाः सुमनसः पुष्पजातयोऽपि तुलसिकाभरणेन भगवता तस्यास्तुलस्याः गन्धे अर्चिते संमानिते सति तस्यास्तुलस्यास्तपो बहु मानयन्ति नत्वसूयन्ति तेषां गुणग्राहित्वं निर्मत्सरत्वं चेति सुमनस्त्वं सूचितम् ॥ १९ ॥ यत्सङ्कुलमिति ॥ यद्वैकुण्ठं हरेः पदयोर्या आनतिर्नमस्कारस्तन्मात्रेण दृष्टैः भगवद्भक्तानां वैदूर्यमारकतहेममयैस्तन्निर्मितैः विमानैः सङ्कुलं व्याप्तमस्ति । बृहन्ति कटितटानि यासां ताः स्मितेन शोभीनि मुखानि यासां ताः अपि स्त्रियः उत्स्मयाद्यैः परिहासादिभिः येषां कृष्णात्मनां कृष्णचेतसां मनसि रजः रजोगुणसमुद्भवं कामं न आदधुः न जनयामासुः ॥ २० ॥ श्रीरूपिणीति ॥ रूपिणी अतिसुरूपा चरणारविन्दं क्वणयती मन्दगत्या नूपुरेण शब्दयन्ती । मित्त्वाभावाद्ध्रस्वो नुमभावश्चार्षौ । श्रीर्लक्ष्मीः हरेः सद्मनि स्फटिककुड्ये स्फटिकमयभित्तौ उपेतहेम्नि मध्ये शोभार्थं संयुक्तसुवर्णे मुक्तदोषा प्रसारितभुजेन लीलाम्बुजेन च उपलक्षिता पाणिधृतेन संमार्जतीव स्वच्छभूभित्तौ

मन्दारकुन्दकुरवोत्पलचम्पकार्णपुन्नागनागबकुलाम्बुजपारिजाताः ॥ गन्धेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयन्ति ॥ १९ ॥ यत् संकुलं हरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहेममयैर्विमानैः ॥ येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः ॥ २० ॥ श्रीरूपिणी क्वणयती चरणारविन्दं लीलाम्बुजेन हरिसद्मनि मुक्तदोषा ॥ संलक्ष्यते स्फटिककुड्य उपेतहेम्नि संमार्जतीव यदनुग्रहणेऽन्ययत्नः ॥ २१ ॥ वापीषु विद्रुमतटास्वऽमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशम् ॥ अभ्यर्चती स्वलकमुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यमताऽङ्ग यच्छ्रीः ॥२२॥ यन्न व्रजन्त्यघभिदो रचनाऽनुवादाच्छृण्वन्ति येऽन्यविषयाः कुकथा मतिघ्नीः ॥ यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपन्त्यशरणेषु तमस्सु हन्त ॥ २३ ॥

प्रतिबिम्बिता शोधन्या संमार्जनं कुर्वतीव संलक्ष्यते लीलाम्बुजमत्र मार्जनीस्थानीयम् । यद्वा । संमार्जतीव संमार्जनकारिणी अन्या दासीव मुक्तदोषा निर्दोषा अयं भावः । यद्यपि तत्र रजो नास्त्येव तथापि भित्तिप्रतिबिम्बिता सती विनयभक्तिभ्यां तथा लक्ष्यते । यस्याः श्रियः अनुग्रहणे श्रीरस्यास्त्वनुग्रहं करोतीत्येतदर्थमन्येषां ब्रह्मादीनां यत्नः साधनप्रयासो भवति॥ २१॥ वापीष्विति ॥ अङ्ग हे देवाः यत् यस्मिन् लोके प्रेष्याभिः स्वपरिचारिकाभिरन्विता श्रीर्लक्ष्मीर्निजवने स्वविहारवाटिकायां तुलसीभिरीशं भगवन्तमभ्यर्चती सती नुमभाव आर्षः । विद्रुममणिमयानि तटानि यासां तासु अमलाः स्वच्छाः अमृततुल्या आपो यासां तासु वापीषु सनासान्ताभाव आर्षः । स्वलकं शोभनकेशम् उन्नसमुन्नतनासिकं स्ववक्त्रं मुखमीक्ष्य ल्यबार्षः । भगवता उच्छेषितं चुम्बितमित्यमत अमन्यत । तत्र जलप्रतिबिम्बितनीलोत्पलमेलनात् भगवता मन्मुखं चुम्बितमिति तस्या भावो जातः । अनेन लक्ष्म्या अपि सौभाग्यसुखं भगवदनुग्रहेणैवेति द्योतितम् ॥ २२ ॥ यदिति ॥ ये जनाः अघभिदो हरेः रचना सृष्ट्यादिलीला तस्या अनुवादात् वर्णनादन्यविषयाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थकामादिविषया मतिघ्नीः कुकथाः शृण्वन्ति ते यत् वैकुण्ठं न व्रजन्ति । हन्त खेदे । याः आत्तसाराः गृहीतसारा निःसारा इत्यर्थः । यद्वा । आत्तः सारः श्रोतृजनपुण्यं याभिस्ताः कुकथाः हतभगैर्नष्टभाग्यैर्नृभिः श्रुताः सत्यस्तांस्तान् श्रोतॄन् अशरणेषु निराश्रयेषु तमस्सु नरकेषु क्षिपन्ति अतः हतभाग्यानामेव कुकथासु प्रवृत्तिः ॥ २३ ॥ य इति ॥ यत्र यस्यां नृगतौ सहधर्म धर्मेण सहितं तत्वविषयं ज्ञानं भवति तां नोऽस्माकं ब्रह्मादीनामप्यर्थितां याचितां नृगतिं मनुष्यजातिं प्रपन्नाः प्राप्ताः सन्तोऽपि ये भगवत आराधनं न वितरन्ति न कुर्वन्ति ते अमुष्य भगवतो विततया विस्तृतया मायया संमोहिता एव । बतेति खेदेऽवधारणे वा ॥२४॥ यच्चेति ॥ अनिमिषां देवानां किंवन्तस्य मिषते रूपम् । ऋषभो हरिस्तस्यानुवृत्त्या दूरे यमो येषां यद्वा दूरीकृतयमनियमाः दूरेहम इति पाठे दूरीकृताहङ्काराः अलुगार्षः । नोऽस्माकमप्युपरिभूताः अधिकाः यतोऽस्माभिः स्पृहणीयमेव नतु प्राप्यं शीलं येषां ते भर्तुर्हरेर्यत्सुयशस्तस्य मिथः परस्परं कथने योऽनुरागस्तेन वैक्लव्यं वैवश्यं तेन बाष्पकला अश्रुबिन्दुस्तया सह पुलकीकृतं

> येऽभ्यार्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र ॥ नाराधनं भगवतो वितरन्त्यऽमुष्य संमोहिता विततया बत मायया ते ॥ २४ ॥ यच्च व्रजन्त्यऽनिमिषामृषभानुवृत्त्या दूरे यमा ह्युपरि नः स्पृहणीयशीलाः ॥ भर्तुर्मिथः सुयशसः कथनानुरागवैक्लव्यबाष्पकलया पुलकीकृताङ्गाः ॥ २५ ॥ तद्विश्वगुर्वधिकृतं भुवनैकवन्द्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥ आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुण्ठम् ॥ २६ ॥ तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायाम् ॥ देवावचक्षत गृहीतगदौ परार्ध्यकेयूरकुण्डलकिरीटविटङ्कवेषौ ॥ २७ ॥

रोमाञ्चितमङ्गं येषां ते यद्वैकुण्ठं व्रजन्ति ॥ २५ ॥ तदिति ॥ विश्वगुरुणा हरिणा अधिकृतम् अधिष्ठितं भुवनेषु एकं मुख्यं वन्द्यं दिव्यमप्राकृतं विचित्राणि यानि विबुधाग्र्याणां विमानानि तेषां शोचिर्दीप्तिर्यस्मिंस्तत् अपूर्वमदृष्टपूर्वं तत् उक्तविधं वैकुण्ठं मुनयः सनकाद्याः अष्टाङ्गयोगमायाबलेन उपेत्य भगवति तु योगमायाचिच्छक्तिविलास इति ज्ञेयम् । भगवतो योगमायाबलेन वा उपेत्य अन्यथा तेषां प्रवेशासम्भवात् अथो परां मुदं प्रापुः । अपूर्वमिति क्रियाविशेषणं वा ॥ २६ ॥ तस्मिन्निति ॥ तस्मिन् वैकुण्ठे षट् कक्षाः प्राकारद्वाराणि अतीत्य अतिक्रम्य असज्जमानाः भगवद्दर्शनौत्कण्ठ्यात्तत्तदद्भुतदर्शने क्वाप्यासक्तिमकुर्वाणास्ते मुनयः सनकादयः अथानन्तरं सप्तमायां कक्षायां ङीबभाव आर्षः । समानं वयो ययोस्तौ तत्र कालविक्रमाभावात् गृहीते गदे याभ्यां तौ द्वारपालत्वात् परार्ध्यैः श्रेष्ठैः केयूरादिभिर्विटङ्को रुचिरो वेषो ययोस्तौ देवौ द्वारपालावचक्षत अपश्यन् ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्तेति॥असितं नीलं यद्बाहुचतुष्टयं तस्य मध्ये विन्यस्तया मत्ता द्विरेफा भ्रमरा यस्यां तया वनमालया निवीतौ कण्ठलम्बिन्या अलङ्कृतौ कुटिलया भ्रुवा स्फटौ उत्फुल्लौ यौ निर्गमौ श्वासमार्गौ नासापुटे ताभ्यां च स्फुटनिर्गमाभ्यामित्यस्य नासाश्वासाभ्यामिति विशेषणपदं वाध्याहार्यम् । रक्तेक्षणेन रक्तनेत्रेण च मनाक् ईषत् रभसं किंचित् कोपक्षुभितं यथा भवति तथा वक्त्रं दधानौ देवौ अचक्षतेत्यनुषङ्गः ॥२८॥ द्वारीति ॥ एतयोः पार्षदयोर्मिषतोः पश्यतोः सतोस्तावनादृत्यापृष्ट्वा गन्तव्यं वेति प्रश्नमकृत्वैव याः पूर्वाः षट् द्वारः पुरटालङ्कृतवज्रमय्यः कपाटिका यासु ता यथा विविशुस्तथास्यां सप्तम्यामपि द्वारि ते मुनयः निविविशुः । तङ्भाव आर्षः । यतः ये अविहताः क्वापि न निवारिताः अविषमया उत्कृष्टापकृष्टस्त्रीपुंस्त्वादिवैषम्यरहितया स्वदृष्ट्या विगताभिशङ्काः शङ्काशून्याः सन्तः सर्वत्र देशे काले च विश्वं चरन्ति ॥२९॥ तानिति ॥ वातः पवन एव रशना तदुपलक्षितं वस्त्रं येषां तान् नग्नानित्यर्थः । ब्राह्मे कल्पे जातत्वेन वृद्धानपि दशार्द्धवयसः पञ्चवर्षबालकवत्प्रतीयमानान् विदितमात्मतत्वं यैस्तान् अतदर्हणान् तत् स्खलनं नार्ह-

मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तया सितचतुष्टयबाहुमध्ये ॥ वक्त्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां रक्तेक्षणेन च मनाग् रभसं दधानौ ॥ २८ ॥ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिकायाः ॥ सर्वत्र तेऽविषमया मुनयः स्वदृष्ट्या विश्वं चरन्त्यविहता विगता-भिशङ्काः ॥ २९ ॥ तान्वीक्ष्य वातरशनांश्चतुरः कुमारान्वृद्धान्दशार्धवयसो विदितात्मतत्त्वान् ॥ वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ॥ ३० ॥ ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्याम् ॥ ऊचुः सुहृत्तमदिदृक्षित-भङ्ग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः॥ ३१ ॥ मुनय ऊचुः ॥ को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः ॥ तस्मिन् प्रशान्तपुरुषे गतविग्रहे वां को वात्मवत्कुहकयोः परिशङ्कनीयः ॥ ३२ ॥

न्ति तान् चतुरः कुमारान् सनत्कुमारादीन्वीक्ष्य तेषां तेजः प्रभावमहो अत्रापि धाष्टर्यमित्येवं विहस्य भगवतः ब्रह्मण्यदेवस्य प्रतिकूलं शीलं ययोस्तौ पार्षदौ वेत्रेण तिर्यग्वेत्रधारणेन चकारान्मा विशतमिति वचनेन च अस्खलयतां निवारितवन्तौ ॥३०॥ ताभ्यामिति ॥ एवं ताभ्यां हरेः प्रतिहारपाभ्यां द्वारपाभ्यामनिमिषेषु अन्येषु देवेषु मिषत्सु पश्यत्सु सत्सु स्वर्हत्तमाः भगवत्समीपमतिशयेन गन्तुमर्हा अपि हि यतो निषिद्ध्यमानाः अतः सुहृत्तमो भगवांस्तस्य दिदृक्षितं दर्शनेच्छा तस्य भङ्गे प्रतिरोधे सति य ईषत् कामानुजः स्वल्पः क्रोधस्तेन सहसा झटिति उपप्लुतानि व्याप्तानि अक्षीणि येषां तथाभूताः सन्तस्त ऊचुः ॥ ३१ ॥ को वामिति ॥ उच्चैर्महत्या जन्मान्तरेष्वनेकेषु कृतया भगवत्परिचर्यया इमं लोकमेत्य इह निवसतां तद्धर्मिणां तस्य भगवतो धर्मा ब्रह्मण्यत्वं समदर्शित्वादयस्तद्वतां मध्ये वां युवयोरेव कोऽयं विषमः स्वभावः कैश्चित्प्रवेष्टव्यं कैश्चिन्नेति विषमा बुद्धिः प्रशान्तपुरुषे गतविग्रहे च तस्मिन् भगवति कुहकयोः कुटिलचित्तयोः वां युवयोः आत्मवत्स्वदृष्टान्तेन यथा आवां कुटिलौ तथान्योऽपि कश्चित्कुटिलः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवेक्ष्यत्येवं को वान्यः परिशङ्कनीयः अतो भक्तिं विनात्रागमनासंभवाद्भगवति विरोधासंभवादत्र निषेधकौ भवन्तावेव कुटिलौ ॥ ३२ ॥ न हीति ॥ इह वैकुण्ठे समस्तमेव विश्वं कुक्षौ यस्य तस्मिन् यत्र भगवति आत्मनि परमात्मनि आत्मानं सर्वमेव जीवात्मानं धीरा ज्ञानिनः नभसि महाकाशे नभः घटाकाशमिव अन्तरं भिन्नं न पश्यति। तस्यास्य परमेश्वरस्य सुरलिङ्गिनोः देवचिह्नयोः वस्तुतस्त्वसुरयोरेव युवयोः शेषे षष्ठी। युवाभ्यामित्यर्थः। यथान्यस्य राजादेर्भयं भवति तथा उदरभेदि देहभेदप्रयुक्तं भयं यद्वा कश्चिच्छत्रुः कपटेनागत्य हरेरुदरं भेत्स्यतीति भयं यतः कारणात् व्युत्पादितं विशेषेण शङ्कितं तत्किं नाम कारणम् इति ब्रूतम् ॥ ३३ ॥ तदिति ॥ यस्माद्वृथैव भगवति भयमारोप्य वयं निवारितास्तत्तस्मादमुष्य परमस्य विकुण्ठभर्तुः वैकुण्ठनाथस्य भृत्याभ्यां मन्दधीभ्यामपि वां युवाभ्यां भद्रशब्दार्थकप्रकृष्टशब्दयोजे चतुर्थ्यन्तपदमिदं प्रकृष्टं भद्रमेव कर्तुमिहास्मिन्नपराधे धीमहि चिन्तयेम आर्षम्। अतः अन्तरस्य भेदस्य भावः सत्ता तद्दृष्ट्या भेददर्शनेन दोषेणेतो वैकुण्ठलोकात् व्रजतं यत्र येषु लोकेषु कामः क्रोधस्तथा लोभ इमे त्रयोऽस्य पापीयसः भेदद्रष्टू रिपवः सन्ति ॥ ३४ ॥ तेषामिति ॥ अस्त्रपूगैरपि अनिवारणम् अनिवार्यं तेषां मुनीनामित्युक्तप्रकारम् ईरितं भा-

न ह्यन्तरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः ॥ पश्यन्ति यत्र युवयोः सुरलिङ्गिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य ॥ ३३ ॥ तद्वाममुष्य परमस्य विकुण्ठभर्तुः कर्तुं प्रकृष्टमिह धीमहि मन्दधीभ्याम् ॥ लोकानितो व्रजतमन्तरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र ॥ ३४ ॥ तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदण्डमनिवारणमस्त्रपूगैः ॥ सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ॥३५॥ भूयादघोनि भगवद्भिरकारि दण्डो यो नौ हरेत सुरहेलनमप्यशेषम् ॥ मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः ॥ ३६ ॥

षितरूपं तं घोरं ब्रह्मदण्डमवधार्य श्रुत्वा सद्य एव उभावपि हरेरनुचरौ उरु अधिकं बिभ्यतः बिभ्यतौ सन्तौ बहुत्वमार्षम्। केचित्तु बिभ्यतः बिभ्यतुरित्यर्थः। उकारस्याकार आर्षः इत्याहुः मुनिभ्यो द्वारपालापेक्षयापि उरु बिभ्यतः भयं भावयत इति हरिविशेषणतया स्वामिपादा व्याचख्युः। अतिकातरेणातिभयेन सद्य एव तेषां पादग्रहौ पदग्रहणं कुर्वन्तौ सन्तौ दण्डवदपतताम् ॥ ३५ ॥ भूयादिति ॥ अघोनि इत्यार्षम्। अघवति सापराधे य उचितो दण्डः भगवद्भिः भवद्भिः अकारि कृतः स भूयात्। यो दण्डः नौ आवयोः अशेषं सुराणां देवानां भवतां हेलनमपराधजनितपापमपि हरेत किन्तु वो युष्माकं योऽनुतापः प्रवेशनिषेधजस्तापस्तस्य कलया लेशेन तज्जन्यदोषेण अधोऽधो मूढां योनिं व्रजतोर्नौ आवयोः भगवत्स्मृतिघ्नो मोहो मा भवेत्। यद्वा। वः युष्माकं यः कृपानिमित्तोऽनुतापः वृथाशप्तावितिपश्चात्तापस्तस्य कलया लेशेन अधोऽधो व्रजतोर्नौ आवयोर्यः मोहः स इह मूढयोनावपि भगवत्स्मृतिघ्नो मा भवेत् किन्तु मोहोऽपि स्मृतिमेव प्रवहतादिति प्रार्थना ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं पूर्वरीत्या स्वानां भृत्यानां सदतिक्रमं स्वभृत्यकर्तृकं सतां सनकादीनामपराधं तदैव विबुध्य आर्याणां हृद्यः मनोज्ञः सहश्रीः लक्ष्मीसहितोऽरविन्दनाभो भगवान् परमहंसा ये महामुनयः तेषाम् अन्वेषणीयौ ध्येयौ चरणौ चलयन् मुनिकोपशमनाय त्वराव्याजेन पद्भ्यामेवेत्यर्थः । तस्मिन्देशे ययौ आययौ । यद्वा । मच्चरणदर्शनप्रतिवातजं क्रोधं तौ दर्शयन् । शमयिष्यामीत्याशयेन पद्भ्यामेवाययौ ॥ ३७ ॥ तमिति ॥ ते मुनयः स्वपुंभिः स्वभृत्यैः प्रतिहृतं मार्ग एवानीय समर्पितमौपयिकं छत्रचामरव्यजनपादुकादिगमनसाधनजातं यस्य तं स्वसमाधेरपि मूर्तिमद् भाग्यम् । अधुना तु अक्ष्णोः विषयं प्रत्यक्षं हंसयोरिव श्रीः शोभा ययोस्तयोरुभयतश्चलतोर्व्यजनयोश्चामरयोर्यः शिवः सुखकरः शीतलमन्दसुगन्धो वायुस्तेन लोलन्तश्चलन्तः शुभ्रातपत्रशशिकेसराः शुभ्रं यदातपत्रं छत्रं तदेव शशिसादृश्याच्छशी तस्य केसराः मुक्तादामविलम्बास्तेभ्यो गलन्ति शीकराम्बूनि अम्बुकणा यस्मिंस्तमागतं भगवन्तमचक्षत अपश्यन् । अत्रातिशयोक्त्या मुक्ताविलम्बानां केसरत्वेन छत्रस्याधोमुखकमलाकारत्वमारो-

एवं तदैव भगवानरविन्दनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः ॥ तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः ॥३७॥ तं त्वागतं प्रतिहृतौपयिकं स्वपुंभिस्तेऽचक्षताऽक्षविषयं स्वसमाधिभाग्यम् ॥ हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकराम्बुम् ॥ ३८ ॥ कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशन्तम् ॥ श्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुभगयन्तमिवात्मधिष्ण्यम् ॥ ३९॥ पीतांशुके पृथुनितम्बिनि विस्फुरन्त्या काञ्च्याऽलिभिर्विरुतया वनमालया च ॥ वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जम् ॥ ४० ॥

पितं तेन छत्रस्य सौगन्ध्यमार्दवादीनि व्यञ्जितानि । शीकराम्बूनां शशिसंबन्धित्वेनामृतत्वम् ॥ ३८ ॥ कृत्स्नेति ॥ कृत्स्नस्य द्वारपालमुनिवृन्दस्य प्रसादेऽनुग्रहे सुमुखं तेषु अनुग्रहं कुर्वन्तमित्यर्थः । स्पृहणीयानां कान्तिसौकुमार्यादिगुणानां धाम आश्रयं स्नेहपूर्वको योऽवलोको भगवत्कृतस्तस्य कलया प्रसरेण हृदि संस्पृशन्तं प्रविशन्तं श्यामे पृथौ विशाले च उरसि शोभितया श्रिया लक्ष्म्या स्वर्लोकस्य त्रैलोक्यविवक्षापक्षे सत्यलोकपर्यन्तः स्वर्गस्तस्य चूडामणिवत् स्थितमात्मधिष्ण्यं स्वस्थानं वैकुण्ठं सुभगयन्तं शोभयन्तम् अचक्षत ॥ ३९ ॥ पीतेति ॥ पृथुर्विस्तृतो नितम्ब आश्रयत्वेन विद्यतेऽस्येति पृथुनितम्बि तस्मिन् पीतांशुके पीताम्बरे विस्फुरन्त्या काञ्च्या मेखलया अलिभिर्भ्रमरैर्विरुतया नादितया वनमालया च उपलक्षितमित्यध्याहारः । सुभगयन्तमिति पूर्वेण संबन्धो वा । वल्गुषु सुन्दरेषु प्रकोष्ठेषु वलयानि यस्य तं विनतासुतो गरुडस्तस्यांसे स्कन्धे विन्यस्तो निहितो वामहस्तो येन तमितरेण दक्षिणेन हस्तेन अब्जं सनालं कमलं धुनानं लीलया भ्रमयन्तं विन्यस्येति पाठे तु वल्गु इत्यादि हस्तविशेषणम् ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्युदिति ॥ स्वकान्त्या विद्युतः तडितः क्षिपती तिरस्कुर्वती ये मकराकृतिनी कुण्डले ताभ्यां यन्मण्डनमलंकरणं तस्मिन्नर्हे गण्डस्थले यस्मिंस्तच्च तदुन्नसं च उदग्रनासिकं च मुखं यस्य तं मणिमत् मणियुक्तं किरीटं यस्य तं दोर्दण्डानां भुजदण्डानां यः षण्डः समूहः तस्य विवरे मध्ये स्थितेन हरता विहरता मनोहरेण मुनीनां चित्तं चोरयता वा पराद्ध्र्येन उत्कृष्टेन मुक्तादिहारेण कन्धरगतेन कन्धरावलम्बिस्वर्णसूत्रद्वारा वक्षोदेशं गतेन कौस्तुभेन मणिना च शोभमानम् ॥ ४१ ॥ अत्रेति ॥ इन्दिरायाः लक्ष्म्याः उत्स्मितं सौन्दर्यगर्वः अत्र भगवति उपसृष्टमस्तंगतमिति स्वानां भक्तानां धिया विरचितं भक्तैरित्येवं मनसि तर्कितमित्यर्थः । यद्वा । अत्र भगवति सर्वसौन्दर्यादिगुणकदम्बमुपसृष्टमिति हेतोः इन्दिरायाः सर्वोत्तमकान्तलाभहृष्टाया उत्कृष्टं स्मितं यत्र तत् स्वानां भक्तानां धिया विरचितमिति स्वभक्तैर्ध्यानार्थं यथाभूतं तर्कितं तथारूपेणैवाविर्भूतम् मह्यमिति चतुर्थी षष्ठ्यर्थे । मम भवस्य रुद्रस्य भवतां चकारादन्येषां च सर्वेषामुपासनार्थं बहुसौष्ठवेन सौन्दर्येण आढ्यं युक्तमङ्गं मूर्तिं भजन्तं प्रकटयन्तम् । यद्वा । भवस्य भवतां च मह्यं पूज्यमङ्गमिति महधातोरदन्तात्वत् । निरीक्ष्य च न विशेषतस्तृप्ता दृशो येषां ते मुदा हर्षेण पूर्णाः कैः शिरोभिर्नेमुर्नमश्चक्रुः ॥ ४२ ॥ तस्येति ॥ तस्यारवि-

विद्युत्क्षिपन्मकरकुण्डलमण्डनार्हगण्डस्थलोन्नसमुखं मणिमत्किरीटम् ॥ दोर्दण्डखण्डविवरे हरता पराध्र्यहारेण कन्धरगतेन च कौस्तुभेन ॥ ४१ ॥ अत्रोपसृष्टमिति चोत्स्मितमिन्दिरायाः स्वानां धिया विरचितं बहुसौष्टवाढ्यम् ॥ मह्यं भवस्य भवतां च भजन्तमङ्गं नेमुर्निरीक्ष्य न वितृप्तदृशो मुदा कैः ॥ ४२ ॥ तस्यारविन्दनयनस्य पदारविन्दकिञ्जल्कमिश्रतुलसीमकरन्दवायुः ॥ अन्तर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥ ४३ ॥ ते वै अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुन्दरतराधरकुन्दहासम् ॥ लब्धाशिषः पुनरवेक्ष्य तदीयमङ्घ्रिद्वन्द्वं नखारुणमणिश्रयणं निदध्युः ॥ ४४ ॥

न्दनयनस्य भगवतः पदारविन्दयोर्ये किञ्जल्काः केसरतुल्या अङ्गुलयस्तैर्मिश्रः संबद्धो यस्तुलसीमकरन्दस्तस्य वायुः स्वविवरेण नासारन्ध्रेण अन्तर्गतः प्रविष्टः सन् अक्षरं ब्रह्म तज्जुषां ब्रह्मानन्दसेविनामपि तेषां मुनीनां चित्ततन्वोः संक्षोभं चित्ते आनन्दपारवश्यं तनौ रोमाञ्चं चकार ॥ ४३ ॥ ते वै इति ॥ ते मुनयः सुन्दरतरे अरुणे अधरोष्ठे कुन्दपुष्पवद्धासो यस्मिंस्तमित्यर्थः । हासे प्रकाशमानाः कुन्दसदृशाः दन्ता एवोपचाराद्धासशब्देनोच्यन्ते । अमुष्य भगवतो वदनमेव संतापहारकत्वादसितपद्मस्य कोशस्तमुद्वीक्ष्य सम्यग् वीक्ष्य तेनैव लब्धाशिषः प्राप्तमनोरथाः सन्तः पुनः नखा एवारुणमणयश्चिन्तामणिवत्प्रकाशमाना अभीष्टपूरकाश्च तेषां श्रयणमाश्रयणं तदीयमङ्घ्रिद्वन्द्वं चरणद्वयम् अव अधःप्रदेशे एक्ष्य किंचिदीक्षित्वा ओमाङोश्च इति पररूपम् निदध्युः पुनः पुनर्मुखं ददृशुः। " निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् । " इत्यमरः । स्वामिपादास्तु युगपत्सर्वाङ्गलावण्यग्रहणाशक्तेः पश्चान्निदध्युर्ध्यातवन्तः इत्याहुः ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुंसामिति ॥ योगमार्गैः गतिं मोक्षादिकं मृगयतामभिकाङ्क्षतां शतार्षः । निवृत्तप्रेषणाण्णिच्च् वा । पुंसां ध्यानस्यास्पदं विषयभूतं नयनयोरभिरामं बहुमतमत्यादृतं पौंस्नं पौरुषं वपुः दर्शयानं दर्शयमानं मुगभाव आर्षः । अनन्यसिद्धैरन्येष्वसिद्धैरसाधारणैः औत्पत्तिकैः स्वाभाविकैः अष्टभोगैः अणिमाद्यष्टविभूतिभिर्युतं भगवन्तं ते मुनयः समगृणन् सम्य-गस्तुवन् ॥ ४५ ॥ य इति ॥ हे अनन्त यस्त्वं दुरात्मनां हृदि गतोऽप्यन्तर्हितो न स्फुरसि इत्यर्थः । स नोऽस्माकमन्तर्हितो न भवसि परं नयनमूलं नयनविषयतां त्वमद्यैव राद्धः प्राप्तोऽसि यर्हि यदैव भवदुद्भवेन भवत उत्पन्नेन नोऽस्माकं पित्रा ब्रह्मणानुवर्णितरहाः उपदिष्टरहस्यः भवान् अभूत्तर्ह्येवास्मत्कर्णविवरेणास्मद्गुहामन्तःकरणं गतः प्रविष्टः यद्वा यो दुरात्मनां हृदिगतोऽपि अन्तर्हितः स त्वमस्माकं नयनमूलं केवलमद्यैव न राद्धः किन्तु यर्ह्येव पित्रानुवर्णितरहाः कर्णविवरेण नः गुहां गतोऽभूः तदैव नयनमूलं राद्धः ॥४६॥ तमिति ॥ हे भगवन् सत्वेन शुद्धसत्वमूर्त्या एषां स्वभक्तानां संप्रति सम्यक् प्रतिक्षणं रतिं प्रीतिं रचयन्तं तं शास्त्रप्रसिद्धं त्वामेव परमुत्कृष्टमात्मत्वं विदाम विद्मः प्रत्य-

पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नयनाभिरामम् ॥ पौंस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ॥ ४५ ॥
कुमारा ऊचुः ॥ ॥ योऽन्तर्हितो हृदि गतोऽपि दुरात्मनां त्वं सोऽद्यैव नो नयनमूलमनन्तराद्धः ॥ यर्ह्येव कर्णविवरेण गुहां गतो नः पित्राऽनुवर्णितरहा भवदुद्भवेन ॥४६॥ तं त्वा विदाम भगवन् परमात्मतत्त्वं सत्त्वेन संप्रति रतिं रचयन्तमेषाम् ॥ यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रन्थयो हृदि विदुर्मुनयो विरागाः ॥ ४७ ॥ नात्यन्तिकं विगणयन्त्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ॥ येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ४८ ॥ कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद्यदि नु ते पदयो रमेत ॥ वाचश्च नस्तुलसिवद्यदि तेऽङ्घ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥ ४९ ॥

भिजानीमः आर्षम् । आत्मतत्त्वमेवपरं तं त्वां विदाम इति वा । यत्तत्वम् उद्ग्रन्थयो निरहंमानाः अत एव विरागाः मुनयः तेऽनुतापः कृपा तेन विदितैर्ज्ञातैर्दृढैर्भक्तियोगैः हृद्येव विदुः ॥ ४७ ॥ नेति ॥ अङ्ग हे हरे ये त्वदङ्घ्रिरेव शरणं येषां ते कीर्तनमर्हति कीर्तन्यं तदर्हतीति यत् । तच्च तत्तीर्थं पवित्रं यशो यस्य तस्य भगवतः कथायाः रसज्ञाः कुशलाश्च ते जनाः ते तव प्रसादभूतमात्यन्तिकं मोक्षमपि न गणयन्ति नाद्रियन्ते ते तव भ्रुवः उन्नयैरुज्जृम्भणैरर्पितं भयं यस्मिन् तादृशमन्यत् इन्द्रादिपदं न गणयन्तीति किमु वक्तव्यम्॥४८॥काममिति॥हे भगवन् इतः पूर्वमस्माकं वृजिनं नाभवत् । इदानीं तु सर्वाण्यपि जातानि अतस्त्वद्भक्तौ शप्तौ अतस्तैः स्ववृजिनैः स्वकृतैः पापैर्निरयेषु नीचयो-निषु नोऽस्माकं कामं यथेष्टं भवो जन्म स्तात् । यदि तु नश्चेतः अलिवत्ते पदयो रमेत अलिर्यथा कण्टकैर्विध्यमानोऽपि पुष्पेषु रमते तद्वद्विघ्नानविगणय्य रमेत । अङ्घ्रिभ्यां शोभा यासां ता नः वाचो यदि तुलसिवत् शोभेरन् । यथा तुलसी गुणनैरपेक्ष्येण हरिसंबन्धितयैव शोभते तथा यदि नो वाचः शोभेरन् यदि च कर्णरन्ध्रः ते गुणगणैः पूर्येत

CC-0. In Public Domain. Digitization by eGangotri

यद्यपि रन्ध्रशब्दाद्याचकरीत्याऽल्पमेव याचन प्रतीयते तथापि वस्तुतः रध्रस्य शब्दैः पूरणासंभवान्नित्यं श्रवणं याचितम् ॥ ४९ ॥ प्रादुरिति ॥ हे ईश हे पुरुहूत विपुलकीर्ते यदिदमलौकिकं सर्वसौष्ठवाढ्यं रूपं विग्रहं प्रादुश्चकर्थ प्रदर्शितवानसि तेन तद्दर्शनेन नोऽस्माकं दृशो नेत्राणि अलम् अतिशयेन निर्वृतिं सुखमवापुः प्रापुः । अनात्मनाम् अवशीभूतमनसां दुरुदयः दुरवगमोऽपि यो भवान् इत् इत्थं प्रत्यक्षतया प्रतीतः अस्माभिर्दृष्टस्तस्मै भगवते इदं केवलं नमो विधेम नमनं कुर्मः । इदन्नम इति मूर्द्धसु धृतानञ्जलीन् दर्शयन्ति । यद्वा । इत् इति नम इत्यस्य विशेषणम् । भगवच्चरणं प्रतिगच्छदिति विधेमेत्यार्षम् ॥ ५० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये टीकां पञ्चदशे व्यधात् ॥ १५ ॥ षोडशेऽसान्त्वयद्विष्णुर्मुनीन्द्वारपयोस्तदा ॥ शापोऽप्यनुग्रहस्तत्र श्लोकास्त्रिंशच्च सैत च ॥ उवाचैँषट्क सपादा अँष्टवेदा अनुष्टुभः ॥ १६ ॥ इतीति ॥ विकुण्ठः निलयो यस्य स विभुर्हरिः इत्युक्तप्रकारेण गृणतां स्तुवतां तेषां सनकादीनां तद् भाषितं प्रतिनन्द्य इदं जगाद शापमङ्गीकृत्य तदनुग्रहं प्रार्थितवान् ॥ १ ॥ एताविति ॥

प्रादुश्चकर्थ यदिदं पुरुहूतरूपं तेनेश निर्वृतिमवापुरलं दृशो नः ॥ तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां दुरुदयो भगवान् प्रतीतः ॥ ५० ॥ इति श्रीभागवते तृतीयस्कन्धे श्रीवैकुण्ठवर्णनं विप्रशापवर्णनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम् ॥ प्रतिनन्द्य जगादेदं विकुण्ठनिलयो विभुः ॥ १ ॥ श्रीभगवानुवाच ॥ ॥ एतौ तौ पार्षदौ मह्यं जयो विजय एव च ॥ कदर्थीकृत्य मां यद्वो बह्वक्रान्तामतिक्रमम् ॥ २ ॥ यस्त्वेतयोर्धृतो दण्डो भवद्भिर्मामनुव्रतैः ॥ स एवानुमतोऽस्माभिर्मुनयो देवहेलनात् ॥ ३ ॥ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे ॥ तद्धीत्यात्मकृतं मन्ये यत्स्वपुम्भिरसत्कृताः ॥ ४ ॥ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि ॥ सोऽसाधुवादस्तत्कीर्तिं हन्ति त्वचमिवामयः ॥ ५ ॥ यस्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुण्ठः ॥ सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ॥ ६ ॥

जयो विजयश्चेत्येतौ यौ मह्यं मम पार्षदौ वो युष्माकं बहु यथा स्यात्तथा यदतिक्रममपराधमक्रान्तां कृतवन्तौ मां कदर्थीकृत्य अवज्ञाय एव तत्कृतवन्तौ न तत्र ममापि संमतिरस्ति । अकार्ष्टमिति वाच्ये अक्रान्तामित्यार्षम् ॥ २ ॥ तदित्विति ॥ हे मुनयः मामनुव्रतैः मदाशयानुसारिभिः भवद्भिः देवानां युष्माकं हेलनादवज्ञानात् हेतोः यस्त्वेतयोर्दण्डो धृतः स एव दण्डोऽस्माभिरनुमतोऽङ्गीकृतः ॥ ३ ॥ तदिति ॥ यस्माद् ब्रह्म ब्राह्मणा मे मम परं दैवतं तस्माद्वो युष्मान् अद्य प्रसादयामि । स्वपुंभिर्मदीयैर्भृत्यैरसत्कृता अवज्ञाता इति यत्तदवज्ञानमात्मकृतमेव मन्ये ॥ ४ ॥ यन्नामानीति ॥ भृत्ये कृतागसि कृतापराधे सति लोको जनो यस्य स्वामिनो नामानि गृह्णाति अनेनैव स्वामिना भृत्यद्वारैवमसाधु कर्म कृतमतोऽयं दुरात्मेति निन्दति सोऽसाधुवादो निन्दावचनम् आमयः कुष्ठरोगः त्वचं त्वचः सौन्दर्यमिव तस्य स्वामिनः कीर्तिं हन्ति ॥ ५ ॥ यस्येति ॥ यस्य अमृतवदाह्लादके अमले यशसि यः श्रवणेन अवगाहः प्रवेशः सः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्वपचात् श्वपचं चाण्डालमभिव्याप्य सर्वमपि जगत्सद्य एव पूनाति सोऽहं विकुण्ठः अप्रतिहतः भवद्भ्यो ब्राह्मणेभ्य एव उपलब्धा प्राप्ता सुशोभना तीर्थभूता कीर्त्तिर्येन सः
वः युष्माकं प्रतिकूला वृत्तिर्यस्य तथाभूतं चेत्स्वाङ्गभूतं बाहुमपि छिन्द्यां बाहुस्थानीयं लोकेश्वरमपि हन्यां वा। भृत्यादीनां पादस्थानीयानां तु का वार्ता॥६॥यदिति॥यस्याः
लक्ष्म्याः प्रेक्षालवार्थमवलोकलेशार्थम् इतरे ब्रह्मादयो नियमान् वहन्ति तपोव्रतादीनि कुर्वन्ति सा चञ्चलत्वेन प्रसिद्धापि श्रीः लक्ष्मीः येषां ब्राह्मणानां सेवया चरणपद्मात्
लग्नः पवित्रो रेणुर्यस्मिंस्तम् अत एव सद्यः क्षतो निरस्तोऽखिलो मलो दोषो यस्य तं यद्वा चरणपद्मयोः स्थितः पवित्रो रेणुर्यस्य अतः सद्यः क्षतोऽखिललोकस्य मलो
येन तं ब्राह्मणसेवयैव मच्चरणरेणवो जगत्पवित्रयन्ति इत्यादिरर्थः। प्रतिलब्धं प्राप्तं शीलं सुस्वभावो येन तं ततः श्रिया विरक्तमपि मां श्रीः न विजहाति तेषां वः प्रतिकूलवृत्तिं
स्वबाहुमपि च्छिन्द्यामिति पूर्वेणान्वयः॥ ७॥ नाहमिति॥ यत् यथा श्च्योतता क्षरता घृतेन प्लुतं विलोडितं पायसादि अनुघासं प्रतिग्रासं रसास्वादपूर्वकं चरतो भुञ्जानस्य
मयि अवहितैः समर्पितैर्निजकर्मणां पाकैः फलैस्तुष्टस्य निष्कामस्य ज्ञानिनो ब्राह्मणस्य मुखतोऽश्नामि तथा विताने यज्ञे श्च्योतद्घृतप्लुतं यजमानस्य हविश्चरुपुरोडाशादिकं

यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलम्॥ न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थ इतरे नियमा-
न्वहन्ति॥७॥ नाहं तथाऽद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन॥ यद् ब्राह्मणस्य मुखतश्चरतोऽनुघासं तुष्टस्य
मय्यवहितैर्निजकर्मपाकैः॥८॥ येषां बिभर्म्यहमखण्डविकुण्ठयोगमायाविभूतिरमलाङ्घ्रिरजः किरीटैः॥ विप्रांस्तु को न विषहेत
यदर्हणाम्भः सद्यः पुनाति सह चन्द्रललामलोकान्॥९॥ ये मे तनूर्द्विजवरान् दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या॥
द्रक्ष्यन्त्यघक्षतदृशो ह्यहिमन्यवस्तान् गृध्रा रुषा मम कुषन्त्यधिदण्डनेतुः॥ १०॥

हुतभुगग्निस्तेन मुखेन अदन् अश्नन् अपि तथा नाश्नामि। तथा च ब्राह्मण एव मम श्रेष्ठं मुखमतस्तदपमानेन एतैर्मम मुखतिरस्कार एव कृतः॥ ८॥ येषामिति॥ अखण्डा
अनवच्छिन्ना विकुण्ठा अप्रतिहता च योगमाया विलासभूता विभूतिर्यस्य सः तथा यस्य चार्हणाम्भः पादोदकं गङ्गा चन्द्रो ललामं चिह्नं यस्य तेन श्रीमहादेवेन सहितान्
सर्वान् लोकान् सद्यः पुनाति। एवंभूतः परमेश्वरः परमपावनोऽपि सन्नहं येषाममलं पवित्रमङ्घ्रिरजः किरीटैर्बिभर्मि तान् विप्रान् अपकुर्वतोऽपि कोऽन्यो न विषहेत न
क्षाम्येत्॥ ९॥ य इति॥ ये अघेन पापेन क्षता दृशो येषाम् अहेरिव मन्युर्येषां ते द्विजवरान् मदीयाः दुहतीः दोग्ध्रीः गा इत्यर्थः। दुहितॄरिति पाठेऽपि मदीया दुहितॄः
सूर्यरूपस्य मम सुता गा इत्यर्थः। सूर्यसुताश्च गाव इति श्रुतेः। अलब्धशरणानि रक्षकहीनानि भूतानि चेति त्रीणि मम तनूः शरीराणि मत्तो भेदबुद्ध्या द्रक्ष्यन्ति पश्यन्ति
तान् मम मदीयोऽधिकृतो दण्डनेता यो यमस्तस्य गृध्राकाराः दूताः रुषा क्रोधेन कुषन्ति चञ्चुभिश्छिन्दन्ति॥ १०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ ये तु क्षिपतस्तिरस्कुर्वतोऽपि ब्राह्मणान्मयि धिया मदात्मकत्वबुद्ध्या अर्चयन्तः तुष्यद्धृदः सन्तुष्टचित्ताः स्मितं हासस्तदेव सुधा तयोक्षितं सिक्तं पद्ममिव वक्त्रं येषां ते अनुरागेण कलया मधुरया वाण्या अहमिव अहं यथा भृगुं युष्मान्वा सन्तोषयामि तथा आत्मवत् कुपितं पुत्रं स्निग्धः पितेव कुपितं पितरं सत् पुत्र इव वा गृणन्तः स्तुवन्तः संबोधयन्ति सन्तोषयन्ति तैरहमुपाहृतो वशीकृतो भवामि ॥ ११ ॥ तन्मे इति ॥ तत्तस्मान्मम पूर्वोक्ताभिप्रायबलात् स्वभर्तुः स्वयोः स्वामिनो मम अवसायं निश्चयमलक्षमाणावजानन्तावेतौ युष्मासु यः कृतो व्यतिक्रमोऽपराधस्तस्य गतिं फलं प्रतिपद्य प्राप्य सद्यः आशु भूयः पुनः ममान्तिकं समीपमितां प्राप्नुतां तत् स एव युष्मत्कृतो मे मय्यनुग्रहः यत् भृतयोः भृत्ययोर्विवासः दूरनिवासः वियोगः अचिरतः शीघ्रं कल्पतां समाप्यतामिति सोऽयमनुग्रहः । यद्वा । जयविजययोरुपरि ममानुग्रहः ॥ १२ ॥ अथेति ॥ अथ उशतीं कमनीयां सुरसां च देवीं मुनीनां बुद्ध्या विविधवितर्कादिमय्या सह क्रीडन्तीं पूज्यां च ऋषिकुलाय हितां ऋषीणां कुल्यां जलाशयरूपां च ऋषयो मन्त्रास्तत्प्रवाहरूपां वा तस्य हरेः सरस्वतीं वाणीं नदीं च आस्वाद्य तन्माधुर्यमनुभूय मन्युना सर्पतुल्येन दष्टानामपि क्रोधविषव्याप्तानां हि मनोरसानुभवाभावात्

ये ब्राह्मणान् मयि धिया क्षिपतोऽर्चयन्तस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः॥वाण्याऽनुरागकलयाऽऽत्मजवद्गृणन्तः संबोधयन्त्यहमिवाहमुपाहृतस्तैः ॥ ११ ॥ तन्मे स्वभर्तुरवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः ॥ भूयो ममान्तिकमितां तदनुग्रहो मे यत् कल्पतामचिरतो भृतयोर्विवासः ॥ १२ ॥ ब्रह्मोवाच ॥ ॥ अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीम् ॥ नास्वाद्यमन्युदष्टानां तेषामात्माऽप्यतृप्यत ॥ १३ ॥ सतीं व्यादाय शृण्वन्तो लघ्वीं गुर्वर्थगह्वराम् ॥ विगाह्याऽगाधगम्भीरां न विदुस्तच्चिकीर्षितम् ॥ १४ ॥

प्रियभाषणमपि न सहते तेषां तु आत्मापि बुद्धिरपि मनोऽपि नातृप्यत अलमिति नामन्यत प्रत्युत तत्पानेच्छाऽवर्द्धत ॥ १३ ॥ सतीमिति ॥ व्यादाय कर्णौ प्रसार्य सतीं श्रेष्ठां लघ्वीमल्पाक्षरां गुरुभिरर्थैर्गह्वरां दुष्प्रवेशाम् अभिप्रायेण अगाधाम् अर्थतो गम्भीरां च वाणीं शृण्वन्तो मुनयः विगाह्य विचार्यापि तस्य चिकीर्षितं किमस्मानभिनन्दति निन्दति वा अस्मत्कृतं दण्डं संकोचयति व्यवस्थापयति वा निरस्यति वा अस्मान्वापराधेन योजयति भृत्यौ प्रसादाधिक्येनेति वा न विदुः । तत्राभिनन्दनपक्षः शक्तिवृत्त्यात्मको व्याख्यात एव। निन्दनपक्ष आर्थव्यञ्जनागम्यो वक्तृबोद्धव्यवैशिष्ट्यलेशोद्भावितो भगवदनभिमतोऽपि विद्वद्भिर्मुनिभिः स्वतः सम्भविसञ्ज्ञकभेदेषु आत्मनैव संभावितः। "अस्मासु वा य उचितो ध्रियतां स दण्डः ।" इत्यग्रिमोक्तेः।अतः संक्षेपेण सोऽपि व्याख्यायते । तथाहि एतौ तौ पार्षदौ मद्यामिति सर्वज्ञानपि मुनीन् यत्परिचाययति स्म तेन मत्पार्षदावप्यभिशपथ एतावदपि बलं धद्ध्व इति व्यञ्जितं कदर्थीकृत्य मां यद्वो बह्वकान्तामतिक्रममित्यत्र सनकाद्यतिक्रमात् पूर्वं भगवत्कदर्थनाभावादियं तेषु भगवतो वक्रोक्तिः कोपव्यञ्जिका । स एवानुमतोऽस्माभिरिति अस्मदननुमतिर्यद्यभविष्यत्तदायुष्मत्कृतदण्डोऽपि नासेत्स्यत् ब्रह्मतेजःसमार्थोऽपि हन्तुं नेच्छेम तं तु मे इत्यग्रिमोक्तेः । तद्धीत्यात्मकृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मन्य इति जयविजययोरात्मत्वेन स्वीकारात् प्रेमाधिक्यं सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्त्तिरिति मुनिष्वादरमात्रं छिन्द्यां स्वबाहुमपीति पुनरपि तयोः प्रेमास्पदता। यत्से-वयेति मुनिषु पुनरप्यादरः सोऽपि बाह्य एव। ब्राह्मणसेवयैव किं तस्य चरणरेणुः पवित्रोऽभूत् तयैव किं तस्याखिला मलाः क्षताः तयैव किं लक्ष्मीस्तं न त्यजतीति हेत्वसत्वा-दिति नाहं तथाश्नीत्यादौ यूयं ब्राह्मणा भोजनप्रियाः केवलं भोजनीया एवेति ब्राह्मणमुखेनाहं भुञ्जे इति ख्यातिर्लोकेषु विस्तारिता। घासं चरत इति श्लेषेण ब्राह्मणः खलु गौरिवादरणीयश्चारणीयः पशुबुद्धित्वादेव मद्दत्तेन गौरवेण हृष्यति ननु युष्माभिर्मत् सुखतात्पर्य्यका काचिन्मदीयपरिचर्या संभवेदिति येषां बिभर्मीति किरीटेषु ब्राह्मणपा-दरजोधारणादेव मम योगमायैश्वर्यवत्त्वं तथा तस्मादेव हेतोर्मच्चरणोदकं सर्वजगत्पावनी गङ्गेति गौरवमुपहास एव फलितं दुहतीर्मदीया इति गोब्राह्मणयोर्भेदो नास्ति। द्वयोरेव मत्तनुत्वादिति पुनरपि हास एव। ये ब्राह्मणानिति ब्राह्मणानां खलु क्रोध औत्पत्तिक एव धर्मस्तं चाहं मद्भक्ताश्च सहामह एवेति सहिष्णुतासुधा मद्भक्तेभ्य एव मया दत्तेति तयैवाहं वशीकृतः स्यामिति। जयविजययोस्तु सहिष्णुतायाः संभवत्यनुदयान्मम तत्रौदासीन्यं जातमतः शापोऽपि वः प्राभवदन्यथा तु नैव प्राभविष्यदत एवाम्बरीषे ममौ-

ते योगमाययारब्धपारमेष्ठ्यमहोदयम् ॥ प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः क्षुभितत्वचः ॥ १५ ॥ ऋषय ऊचुः ॥ न वयं भगवन् विद्मस्तव देव चिकीर्षितम् ॥ कृतो मेऽनुग्रहश्चेति यदध्यक्षः प्रभाषसे ॥ १६ ॥ ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो ॥ विप्राणां देवदेवानां भगवाना-त्मदैवतम् ॥ १७ ॥ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव ॥ धर्मस्य परमो गुह्यो निर्विकल्पो भवान्मतः ॥ १८ ॥ तरन्ति ह्यञ्जसा मृत्युं निवृत्ता यदनुग्रहात् ॥ योगिनः स भवान्किं स्विदनुगृह्येत यत् परैः ॥ १९ ॥

दासीन्याभावात् दुर्वाससः कोपोत्क्षिप्तजटाया अपि वैफल्यं प्रत्युत मत्स्वरूपचक्रकृतः संतापः ॥ १४ ॥ ते इति ॥ योगमायया आरब्धः आविष्कृतः पारमेष्ठ्यस्य परमै-श्वर्यस्य महोदयः परमोत्कर्षो येन तं तद्दर्शनेन प्रहृष्टा अत एव क्षुभिता रोमाञ्चिता त्वक् येषां ते कुपितत्वच इति पाठेऽपि सञ्जातरोमकूपोक्त्या रोमाञ्चितत्वमेवोक्तं ते विप्राः अधिराजत्वमाविष्कृत्य राजशिक्षार्थं ब्राह्मणान् मानयतीति ज्ञात्वा हृष्टाः प्राञ्जलयः सन्तः प्रोचुः ॥ १५ ॥ अभिनन्दनपक्षं ज्ञात्वापि श्रीमुखादेव श्रोतुमाहुः—न वयमिति ॥ हे भगवन् हे देव स्वयमध्यक्षः सन् तद्वीत्यात्मकृतं मन्य इत्युक्त्या मयापराधः कृत इति तथा तदनुग्रहो मम इत्यादिना ममानुग्रहः कृतः स्यादिति यत्प्रभाषसे तेन यत्तव चिकीर्षितं तद्वयं न विद्मः ॥ १६ ॥ ब्रह्मण्यस्येति ॥ ब्रह्मण्यस्य ब्राह्मणानां हितस्य ते ब्राह्मणाः किल परं दैवं तत्तल्लोकशिक्षार्थमेवेति शेषः। वस्तुतस्तु हे प्रभो देवदेवानां विप्राणां भगवानेव आत्मा दैवतमाराध्यश्च ॥ १७ ॥ त्वत्त इति ॥ सनातनः धर्मस्त्वत्त एव प्रवर्त्तते तवैव तनुभिरवतारैः रक्ष्यते च धर्मस्य परमः फलभूतः गुह्यः सर्ववे-दरहस्यं निर्विकल्पः निर्विशेषश्च भवानेव मतः ॥ १८ ॥ तरन्तीति ॥ निवृत्ताः निवृत्तिधर्मनिष्ठाः योगिनो यस्य तवानुग्रहात् अञ्जसा अनायासेनैव मृत्युं जन्ममरणादिदुःखं

CC-0. In Public Domain. Digitization by eGangotri

तरन्ति स भवान् परैरनुगृह्येतेति यत्तत् किंस्वित् न किंचिदित्यर्थः॥ १९॥ यमिति द्वयम्॥ अर्थ ऐश्वर्यादि तदर्थिभिर्देवाद्यैः स्वशिरसा धृतः पादरेणुर्यस्याः सा धन्यैः पुण्यवद्भिरर्पितमङ्घ्रौ यत्तुलस्या नवदाम माला तद्धाम स्थानं यस्य तस्य मधुव्रतपतेः भ्रमरमुख्यस्य लोकं स्थानं त्वच्चरणं कामयमानेव इवशब्दः एवकारार्थः।ईदृशी विभूतिर्लक्ष्मीः अनुवेलमवसरेऽवसर उपयाति सेवते। अयं हि तस्या आशयः। अयं हि सारग्राही मधुव्रतोऽतिचञ्चलस्वभावोऽप्यङ्घ्रिगतायां तुलस्यां सपरिवारो निश्चलः सन् रमते। अतोऽङ्घ्रिलावण्यमत्यधिकं स्यात्। ततोऽहं वक्षसि स्थितापि बहुसेवकसंघर्षमङ्गीकृत्यापि तुलस्या सह सापत्न्येऽपि चरणावेव सेविष्य इति परमभागवतेषु प्रसङ्गः परमासक्तिर्यस्य ईदृशो यस्त्वं विविक्तचरितैर्विशुद्धैः परिचरणैरनुवर्तमानां सेवमानामपि तां लक्ष्मीं नात्याद्रियत नातीवादृतवान्। तङ्भाव आर्षः। स त्वं किं द्विजानाम् अनुपथं पथि लग्नं यत्पुण्यरजस्तेन पुनीतः पूतः सन् श्रीवत्सलक्ष्मलक्ष्मीनिवासत्वमित्याशयः। अगाः प्राप्तवानसि तत एव हेतोश्च किं त्वं भगभाजनः ऐश्वर्यपात्रमसि नैवेत्यर्थः । पुनीत इत्यत्र क्तप्रत्यये श्ना आर्षः। "तथा पुनीता तनुभिः पदैस्तव" इत्यष्टमस्कन्धश्लोकवत्। यद्वा। यस्तां नाद्रियत् तं त्वां किं द्विजानुपथपुण्यरजः श्रीवत्सलक्ष्म च पुनीतः पवित्री-

यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः ॥ धन्यार्पिताङ्घ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना ॥ २० ॥ यस्तां विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतप्रसङ्गः ॥ स त्वं द्विजानुपथपुण्यरजःपुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वम् ॥ २१ ॥ धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थम् ॥ नूनं भृतं तदभिघातिरजस्तमश्च सत्त्वेन नो वरदया तनुवा निरस्य ॥ २२ ॥ न त्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृषः स्वर्हणेन स सूनृतेन ॥ तर्ह्येव नङ्क्ष्यति शिवस्तव देव पन्था लोकोऽग्रहीष्यदृषभस्य हि तत् प्रमाणम् ॥ २३ ॥

कुरुतः स त्वं किमर्थं ते उभे अगाः स्वीकृतवानसि ताभ्यामाधिक्याभावादित्यर्थः। अतो यत्सेवया चरणपद्मेत्यादिवचनं लोकसङ्ग्रहार्थमेव ॥ २० ॥ २१ ॥ धर्मस्येति ॥ त्रिष्वेव कृतादियुगेषु दृश्यते इति हे त्रियुग नोऽस्माकं भक्तानां वरदया अभीष्टप्रदया सत्त्वेन सत्त्वमय्या भगवतस्ते तव तनुवा मूर्त्या तत्तदवतारेण "तन्वादीनां छन्दसि बहुलम्" इत्युवङ्। तदभिघाति तेषां धर्मपादानामभिघातकं यद्रजस्तमश्च तन्निरस्य दूरीकृत्य स्वैः असाधारणैस्त्रिभिस्तपोदानदयात्मकैर्धर्मस्य तव पद्भिर्द्विजानां देवतानां च प्रयोजनाय इदं चराचरात्मकं विश्वं नूनं भृतं पालितम्। निरस्येति लोडन्तं वा। दूरीकुरु इत्यर्थः ॥ २२ ॥ न त्वमिति ॥ आत्मनः त्वयैव गोपो रक्षा यस्य तत् द्विजोत्तमानां कुलं स सूनृतेन प्रियवाक्यसहितेन सुसम्यगर्हणेन पूजनेन वृषः श्रेष्ठस्त्वं यदि गोप्ता रक्षणशीलो नाभविष्यः तृन्नन्तत्वान्न कर्मणि षष्ठी । क्रियातिपत्तेरेवोचितत्वाल्लुङन्ततया व्याख्यातुं न युज्यते। तर्ह्येव तदैव हे देव तव त्वया प्रवर्तितः शिवः पन्थाः धर्ममार्गः नङ्क्ष्यति अनङ्क्ष्यत्। हि यस्मात् ऋषभस्य श्रेष्ठस्य तव यदाचरितं तदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकः प्रमाणत्वेनाग्रहीष्यत् अतो यत्सेवयेति वचो लोकः शिक्षार्थमेव । " यद्यदाचरति श्रेष्ठः " इत्यादिगीतोक्तेः ॥२३॥ तत्त इति ॥ सत्वस्य निधेः जनाय क्षेमं विधित्सोः कर्त्तुमिच्छोः जनायेति क्रियया संप्रदाने क्षेमशब्दयोगे षष्ठयर्थे वा चतुर्थी । निजशक्तिभिः उद्धृताः निर्मूलिताः अरयो धर्मविरोधिनो येन तादृशस्य ते तव तद्र् धर्ममार्गविनाशनम् अनभीष्टमिव अनभिप्रेतमेव इव एवार्थे एतावता तु त्र्यधिपतेः त्रिगुणनियन्तुः विश्वभर्तुः अपि धर्मत्राणाय अवनतस्य नमनं कृतवतस्तव तेजः प्रभावो न क्षतं विहतं न भवति । यतः स नमनादिश्च ते तव विनोदो लीलामात्रम् ॥ २४ ॥ यं वेति ॥ हे अधीश अनयोः स्वभृत्ययोः यं दममस्माभिर्विहितमन्यं वा दण्डं वृत्तिं नु वा विशेषतोऽधिकां जीविकां वा भवान् विधत्ते । यद्वा । द्वाःस्थयोरपूर्वजनप्रवेशनिवारणस्योचितत्वादनागसौ निरपराधावेतौ ये वयं किल्बिषेण दुःखहेतुशापेनायुङ्क्ष्महि योजितवन्तस्तेष्वस्मासु य उचितः स्वापराधानुरूपो दण्डः स ध्रियतां विधीयताम् । तदेतद्भवत्कृतं सर्वं निर्व्यलीकं श्रद्धापूर्वकमनुमन्महि वयमनुमन्यामहे ॥ २५ ॥ एताविति ॥ हे

तत्तेऽनभीष्टमिव सत्त्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः ॥ नैतावता त्र्यधिपतेर्बत विश्वभर्तुस्तेजः क्षतं त्ववनतस्य स ते विनोदः ॥ २४ ॥ यं वाऽनयोर्दममधीश भवान्विधत्ते वृत्तिं नु वा तदनु मन्महि निर्व्यलीकम् ॥ अस्मासु वा य उचितो ध्रियतां स दण्डो येऽनागसौ वयमयुङ्क्ष्महि किल्बिषेण ॥ २५ ॥ श्रीभगवानुवाच ॥ एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरम्भसंभृतसमाध्यनुबद्धयोगौ ॥ भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव निमितस्तदवैत विप्राः ॥ २६ ॥ ब्रह्मोवाच ॥ अथ ते मुनयो दृष्ट्वा नयनानन्दभाजनम् ॥ वैकुण्ठं तदधिष्ठानं विकुण्ठं च स्वयंप्रभम् ॥ २७ ॥ भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च ॥ प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम् ॥२८॥ भगवाननुगावाह यातं मा भैष्टमस्तु शम् ॥ ब्रह्मतेजः समर्थोऽपि हन्तुं नेच्छे मतं तु मे ॥ २९ ॥

विप्राः एतौ मत्पार्षदौ सुरेतरगतिमासुरयोनिं प्रतिपद्य प्राप्य सद्यः जन्मप्रभृति मयि यः संरम्भः क्रोधावेशस्तेन सम्भृतः संवृद्धो यः समाधिः चित्तैकाग्रता तेनानुबद्धो दृढीकृतो योगो ययोस्तादृशौ सन्तौ आशु शीघ्रमेव भूयः पुनः मत्सकाशं मत्समीपमुपयास्यतः आगमिष्यतः वो युष्माकं यः शापः स मयैव निमितः युष्मन्मुखेन मयैव निर्मित इति तत् अवैत जानीत ॥ २६ ॥ अथेति द्वयम् ॥ एवं भगवता प्रोक्तास्ते मुनयः सनकादयो जन्मत्रयेण शापमुक्तिरूपमनुग्रहं कृत्वा अथ नयनयोर्य आनन्दस्तस्य भाजनं पात्रं स्वयंप्रभं चैतं विकुण्ठं भगवन्तं दृष्ट्वा तादृशमेव स्वयंप्रभं तदधिष्ठानं स्थानं वैकुण्ठं लोकं च दृष्ट्वा प्रकाशान्तरानपेक्षत्वात्सत्वपरिणामत्वाच्चेति । अथ भगवन्तं परिक्रम्य प्रणिपत्य अनुमान्य अनुज्ञाप्य च वैष्णवीं श्रियं सम्पदं शंसन्तो मुदिता हृष्टाः प्रतिजग्मुः ॥ २७ ॥ २८ ॥ भगवानिति ॥ एवं मुनिगमनानन्तरं भगवान् अनुगौ भृत्यौ जयविजयौ प्रत्याह स्म यातं मनुष्यलोकं गच्छतं माभैष्टं भयं मा कुरुतम् । तत्रापि शं सुखमस्तु ब्रह्मतेजः ब्राह्मणशापं हन्तुं निरसितुं समर्थोऽपि नेच्छे तन्निरासेच्छां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न करोमि। तङार्षः। हि यतः तन्मे मम मतं सम्मतं हीत्यत्र तु इति वा पाठः। अत्र स्वामिपादा आहुः। यद्यपि सनकादीनां क्रोधो न संभवति ब्रह्मदर्शित्वात् न च जयविजययोर्ब्राह्मणप्रातिकूल्यं भगवदनुसारित्वात्। न च भगवतः स्वभक्तकोपेक्षा भक्तवत्सलत्वात्। न च वैकुण्ठगतानां पुनर्जन्म "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते।" इति वाक्यविरोधात्। तथापि भगवतः सिसृक्षादिवत्कदाचिद्युयुत्सा समजनि तदान्येषामल्पबलत्वात्स्वपार्षदानां तुल्यबलत्वेऽपि प्रतिपक्षत्वाभावेन युद्धानुपपत्तेरित्येतावेव ब्राह्मणनिवारणे प्रवर्त्य तेषु च क्रोधमुद्दीप्य तच्छापव्याजेन प्रतिपक्षौ विधाय युद्धकौतुकं सम्पादनीयमिति भगवतैव व्यवसितमतः सर्वं संगच्छते। अत्र शिवपुराणवचोऽपि केप्युदाजह्रुः। लक्ष्म्याः पत्युः समुत्पन्ना योद्धुमिच्छा मुनीश्वराः एकस्मिन्दिवसे विष्णुर्विचारतत्परोऽभवत्। "केन युद्धं प्रकर्तव्यं मया चैवं विचार्य च। जयश्च विजयश्चैव कुमारैः शापितौ तदा॥" इति। अत एवात्राप्युक्तं शापो मयैव निमित इति हन्तुं नेच्छेम तं तु मे इति च। परे तु जयविजययोरेव प्रेमविजृम्भिता काचिद्युद्धेच्छा ततश्च भक्तमनोरथपूरकस्य भगवतोऽपि कापीच्छाजनि इत्याचाचक्षते। यत्तु "एतत्पुरैव निर्दिष्टं रमया क्रुद्धया यदा। पुरापवारिता द्वारि विशन्ती मय्युपारते॥" इति पद्यमस्मात्पद्यादग्रे

मयि संरम्भयोगेन निस्तीर्य ब्रह्महेलनम्॥ प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥ ३०॥ द्वास्थावादिश्य भगवान् विमानश्रेणिभूषणम्॥ सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत्॥ ३१॥ तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः॥ हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ॥ ३२॥ तदा विकुण्ठधिषणात्तयोर्निपतमानयोः॥ हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥ ३३॥

दृश्यते तदसाम्प्रदायिकम्॥ २९॥ मयीति॥ मयि यः संरम्भः क्रोधस्तस्य योगः अनवरतसंबन्धस्तेन ब्रह्महेलनं ब्राह्मणतिरस्कारजं पापं निस्तीर्य निरवशेषमपोह्य अल्पीयसैव कालेन पुनर्मे निकाशं समीपं प्रत्येष्यतं प्रत्यागमिष्यथः आर्षमेतत्। प्रत्याङ्पूर्वस्य इष्यतेर्लोटि वा रूपम्। अत्र ब्रह्मशापरक्षार्थं भगवानेकव्यक्त्या जयविजयौ भूमिं प्रास्थापयत्। व्यक्त्यन्तरेण चापुनरावृत्तिनियमरक्षार्थं वैकुण्ठ एवास्थापयत्। यथा गरुडो वज्रस्यामोघत्वरक्षार्थं पक्षमेकं तत्याजेति। अत एव वामनचरिते "तानभिद्रवतो दृष्ट्वा" इत्यादिप्रकरणे जयविजययोरुल्लेखः सङ्गच्छते॥ ३०॥ द्वास्थाविति॥ भगवानेवं द्वास्थावादिश्य आज्ञाप्य विमानश्रेणय एव भूषणं यस्य तत् सर्वातिशयया सर्वत उत्कृष्टया लक्ष्म्या सम्पदा जुष्टं पूर्णं स्वं धिष्ण्यं स्वकीयं स्थानमाविशत्॥ ३१॥ ताविति॥ तौ तु गीर्वाणऋषभौ देवश्रेष्ठौ पार्षदौ दुस्तराद्ब्रह्मशापाद्धरिलोकतः पतन्तौ हतश्रियौ नष्टतेजसौ अत एव विगतस्मयौ विगतगर्वौ चाभूताम्॥ ३२॥ तदेति॥ हे पुत्रकाः देवाः तदैव विकुण्ठस्य भगवतो धिषणात् स्थानात्तयोर्निपतमानयोः सतोः आर्षः शानच् चानश् वा विमानाग्र्येषु वसतां महान् उच्चैः हाहाकार आसीत्॥ ३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावेवेति ॥ तावेव हरेः पार्षदप्रवरावधुना दितेर्जठरे निर्विष्टमुल्बणं सन्ध्याकाले धृतत्वाद्भयङ्करं काश्यपं तेजः वीर्यं प्राप्तौ स्वदेहत्वेनाङ्गीकृतवन्तौ ॥ ३४ ॥ तयोरिति ॥ तयोर्यमयोः सहैव गर्भं प्रविश्य सहैवोत्पत्स्यमानयोः श्लेषेणान्तकतुल्ययोश्च असुरयोस्तेजसा अद्य वः युष्माकं तेज आक्षिप्तमभिभूतम् । एतर्हि इदानीं भगवानेव तत् लोकोपद्रवणं विधित्सति विधातुमिच्छति अतः अधुनैव तत्प्रशमो न शक्यः ॥ ३५ ॥ विश्वस्येति ॥ यो भगवान् विश्वस्य स्थितिलयोद्भवहेतुः आद्यः योगेश्वरैरप्यस्मदादिभिर्दुरत्ययाऽनुल्लङ्घ्या योगमाया यस्य सः स एव त्र्यधीशः त्रिलोकेशः भगवान् नोऽस्माकं क्षेमं विधास्यति । तत्रैवं सति इहास्मिन् सङ्कटे अस्मदीयेन विमृशेन विचारेण कियानर्थः सिद्ध्यति ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्याध्याये षोडशे व्यधात् ॥१६ ॥ जन्म सप्तदशे त्वादिदैत्ययोर्लोकभीतिदम् ॥ हिरण्याक्षप्रभावश्च तत्र श्लोकाः कुवह्नयः ॥ अनुष्टुभः सार्द्धपञ्चत्रिंशदेकमुवाच च ॥ १७ ॥ निशम्येति ॥ आत्मभुवा ब्रह्मणा गीतं वर्णितं देवतेजस्तिरस्कारकारणं तच्छान्तिकारणं

तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः ॥ दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणम् ॥ ३४ ॥ तयोरसुरयोरद्य तेजसा यमयोर्हि वः ॥ आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ॥ ३५ ॥ विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमायः ॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः ॥ ३६ ॥ इति श्रीभा०तृतीय०वैकुण्ठनाथेन वैकुण्ठे ब्राह्मणमाहात्म्यवर्णनं नाम षोडशोऽध्यायः॥१६॥
मैत्रेय उवाच ॥ निशम्यात्मभुवा गीतं कारणं शङ्कयोज्झिताः॥ततः सर्वे न्यवर्तन्त त्रिदिवाय दिवौकसः ॥ १ ॥ दितिस्तु भर्तुरादेशादपत्यपरिशङ्किनी ॥ पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥ २ ॥ उत्पाता बहवस्तत्र निपेतुर्जायमानयोः ॥ दिवि भुव्यन्तरिक्षे च लोकस्योरुभयावहाः ॥३॥ सहाचला भुवश्चेलुर्दिशः सर्वाः प्रजज्वलुः ॥ सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः ॥ ४ ॥

च क्षेमं विधास्यतीत्यादि च निशम्य श्रुत्वा शङ्कया सन्देहेन उज्झितास्त्यक्ताः रहिताः सन्तः सर्वे दिवौकसो देवास्ततो ब्रह्मस्थानात् त्रिदिवाय स्वर्गं प्राप्तुं न्यवर्तन्त आजग्मुः ॥ १ ॥ दितिरिति ॥ साध्वी दितिस्तु भर्तुः कश्यपस्य आदेशात् लोकानाक्रन्दयिष्यत इति तद्वाक्यात्स्वापत्याभ्यां परिशङ्किनी लोकोपद्रवं शङ्कमाना सती विष्णुहस्ततो वधाद्वा शङ्कमाना मनुष्यमानेन वर्षशते पूर्णे सति यमौ सह गर्भं प्रविष्टौ पुत्रौ प्रसुषुवे प्रसूतवती ॥ २ ॥ उत्पाता इति ॥ तयोर्जायमानयोः सतोः तत्र तदा दिवि भुवि अन्तरिक्षे च लोकस्योरुभयमासमन्ताद्वहन्ति ते बहव उत्पाता निपेतुरुद्बभूवुः ॥ ३ ॥ सहेति ॥ अचलाः पर्वतास्तत्सहिता भुवः भूखण्डाः चेलुश्चलितवत्यः सर्वा दिशः प्रजज्वलुः वह्निज्वालायुक्ता जाताः । सोल्काः साङ्गारा अशनयश्च पेतुः । आर्तिहेतवः लोकपीडासूचकाः केतवो धूमकेत्वादयश्च उदयं चक्रुरिति शेषः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ववौ इति ॥ सुदुःस्पर्शः कठिनस्पर्शः फूत्कारानिति तीव्रवायुशब्दानुकरणं तान्मुहुः ईरयन् ध्वनयन् नगपतीन्महावृक्षान् उन्मूलयन् मूलत उत्पाटयन् वात्याश्चक्रवायवः एव अनीकं सेना यस्य रज एव गगनपर्यन्तोत्थितो ध्वजो यस्य । वात्यानीतरजोध्वज इति पाठे वात्याभिरानीतं रज एव ध्वजो यस्य एवंविधो वायुर्ववौ ॥ ५ ॥ उद्धसदिति ॥ उच्चैर्हसन्त्य इव तडितो येषु तेषामम्भोदानां मेघानां घटया समूहेन नष्टो भागणः सूर्यादिप्रभासमूहो यस्मिंस्तस्मिन्व्योम्नि प्रविष्टं यत्तमः अन्धकारस्तेन पदं तत्तत्स्थानं न व्यादृश्यते स्म ईषदपि नादृश्यत ॥६॥ चुक्रोशेति ॥ उद्गतोर्मिभिः उत्थिततरङ्गैः क्षुभितमुदरं तत्स्था मकरादयो यस्य सः । उदूर्मिरिति पृथक्पदपाठे बहुव्रीहिः । वार्द्धिः समुद्रः विमना दुःखितचित्त इव चुक्रोश । शुष्कानि पङ्कजानि यासु ता उदपाना उदकानि पिबन्ति येष्विति वापीकूपतटाकादयस्तैः सहिताः सरितो नद्यश्चुक्षुभुः ॥ ७ ॥ मुहुरिति ॥ स राह्वोः राहुग्रस्तयोः शशिसूर्ययोर्मुहुः पुनः पुनः परिधयः परिवेषा अभूवन् निर्घाता निरभ्रगर्जितानि रथनिर्ह्रादाः रथध्वनितुल्यध्वनयो विवरेभ्यो गिरिगुहाभ्यः प्रजज्ञिरे

ववौ वायुः सुदुःस्पर्शः फूत्कारानीरयन्मुहुः ॥ उन्मूलयन्नगपतीन्वात्याऽनीको रजोध्वजः ॥ ५ ॥ उद्धसत्तडिदम्भोदघटया नष्टभागणे ॥ व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदम् ॥ ६ ॥ चुक्रोश विमना वार्धिरुदूर्मिः क्षुभितोदरः ॥ सोदपानाश्च सरितश्चुक्षुभुः शुष्कपङ्कजाः ॥ ७ ॥ मुहुः परिधयोऽभूवन्सराह्वोः शशिसूर्ययोः ॥ निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे॥८॥अन्तर्ग्रामेषु मुखतो वमन्तो वह्निमुल्बणम् ॥ सृगालोलूकटङ्कारैः प्रणेदुरशिवं शिवाः ॥ ९ ॥ संगीतवद्रोदनवदुन्नमय्य शिरोधराम् ॥ व्यमुञ्चन्विविधा वाचो ग्रामसिंहास्ततस्ततः ॥ १० ॥ खराश्च कर्कशैः क्षत्तः खुरैर्घ्नन्तो धरातलम् ॥ खार्काररभसा मत्ताः पर्यधावन्वरूथशः ॥ ११ ॥ रुदन्तो रासभत्रस्ता नीडादुदपतन्खगाः ॥ घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत ॥ १२ ॥ गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः ॥ व्यरुदन्देवलिङ्गानि द्रुमाः पेतुर्विनाऽनिलम् ॥ १३ ॥

जाताः ॥ ८ ॥ अन्तरिति ॥ अन्तर्ग्रामेषु ग्राममध्येषु मुखत उल्बणं भयसूचकं वह्निं वमन्त्य उद्गिरन्त्यः शिवाः सृगाल्यः सृगालानामुलूकानां च टङ्कारैर्ध्वनिभिः सह अशिवमपशकुनं यथा भवति तथा प्रणेदुः ध्वनितवत्यः ॥ ९ ॥ सङ्गीतवदिति ॥ ग्रामसिंहाः श्वानः शिरोधरां कन्धरामुन्नमय्य उद्धृत्य सङ्गीतवद्रोदनवच्च विविधा वाचो भाषणानि ततस्ततस्तत्र तत्र व्यमुञ्चन्नकुर्वन् ॥ १० ॥ खरा इति ॥ हे क्षत्तः खरा गर्दभाश्च कर्कशैस्तीक्ष्णैः खुरैर्धरातलं पृथ्वीं घ्नन्तः खार्कारो गर्दभजातिशब्दः तस्मिन् रभसः संभ्रमो हर्षो वा येषां ते मत्ताः सन्तो वरूथशः संघशः पर्यधावन् ॥ ११ ॥ रुदन्त इति ॥ रासभात् रासभशब्दात् त्रस्ताः खगाः रुदन्तः क्रोशन्तो नीडात् कुलायात् उदपतन् उपरि उड्डीयाधो निपेतुरित्यर्थः । घोषे आभीरपल्ल्यामरण्ये च ये पशवस्ते शकृत् पुरीषं मूत्रं च अकुर्वत उत्ससृजुः ॥ १२ ॥ गाव इति ॥ गावः अत्रसन् त्रस्ता अभूवन् असृग्दोहाः रक्तं दुहत्यश्च बभूवुः । तोयदा मेघाः पूयवर्षिणः कश्मलवर्षिणो जाताः । देवलिङ्गानि देवताप्रतिमाः व्यरुदन् तासामश्रुस्रावोऽभूत् । अनिलं वायुं विनापि द्रुमाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेतुः ॥ १३ ॥ ग्रहानिति ॥ पुण्यतमान् शुभकरान् ग्रहान् बुधगुर्वादीन् भगणान् अन्यानि बहूनि नक्षत्राणि च अन्ये क्रूरग्रहाः शन्यङ्गारकादयोऽतिदीपिताः अतिदीप्तिमन्तः सन्तोऽतिचेरुः अतिक्रम्य जग्मुरित्यर्थः । वक्रगत्यावृत्य परस्परं युयुधुश्च । तङभाव आर्षः ग्रहाणाम् अतिचारवक्रत्वे युद्धं च ज्योतिःशास्त्रे प्रसिद्धानि ॥ १४ ॥ दृष्ट्वेति ॥ उक्तान् ततोऽन्यांश्च महोत्पातान् दृष्ट्वा ब्रह्मपुत्रान् स्वशापाद्यभिज्ञान् सनकादीन् ऋते विना अतत्त्वविदः शापादिकारणानभिज्ञाः अतो भीताः प्रजाः विश्वस्य संप्लवं प्रलयमागतं मेनिरे॥ १५॥ब्रह्मशापेऽपि भगवद्भक्तानामकृतैरपि सुकृतैः सर्वाधिकप्रभावादिसम्पत्तिं बहुभिः कृतैरपि पापैर्नरकादिगन्धस्याप्यभावं च व्यक्तमाह–ताविति ॥ तौ जातावादिदैत्यौ सहसा आशु व्यज्यमानमात्मपौरुषं पूर्वसिद्धं स्वपौरुषं ययोस्तौ अश्मसारेण अयस्तुल्येन कायेनाद्रिपती इव पर्वतश्रेष्ठाविव ववृधाते सन्धिरार्षः ॥१६॥ दिवीति ॥ हेमकिरीटकोटिभिः स्वर्णमयमुकुटाग्रैर्दिविस्पृशौ दिवं स्पृशन्तौ निरुद्धाः व्याप्ताः काष्ठा दिशो याभ्यां तौ स्फुरन्त्यङ्गदानि यासु ता भुजा ययोस्तौ अङ्गदेति पुंवद्भावाभाव आर्षः । भुजाशब्दस्त्रियामप्यस्ति । चरणैः पदे पदे प्रतिपदविन्यासं गां भूमिं कम्पयन्तौ सुशोभना काञ्ची मेखला यस्यां तया कट्या प्रकाशेनोच्चत्वेन चार्कं सूर्यमतीत्य अतिक्रम्य

ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः ॥ अतिचेरुर्वक्रगत्या युयुधुश्च परस्परम् ॥ १४ ॥ दृष्ट्वाऽन्यांश्च महोत्पातानतत्त्वविदः प्रजाः ॥ ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवम् ॥ १५ ॥ तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ ॥ ववृधातेऽश्मसारेण कायेनाद्रिपती इव ॥ १६ ॥ दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदङ्गदाभुजौ ॥ गां कम्पयन्तौ चरणैः पदे पदे कट्या सुकाञ्च्याऽर्कमतीत्य तस्थतुः ॥ १७ ॥ प्रजापतिर्नाम तयोरकार्षीद्यः प्राक् स्वदेहाद्यमयोरजायत ॥ तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः ॥ १८ ॥ चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च ॥ वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः ॥ १९ ॥

तस्थतुः । इयं प्रौढिः पञ्चषदिनवयस्कयोरेवेत्याहुः ॥ १७ ॥ प्रजापतिरिति ॥ तयोर्यमयोर्मध्ये यः कश्यपस्य स्वदेहात्प्राक् प्रथममजायत तं हिरण्यकशिपुं यथा ज्येष्ठतया प्रजाः विदुः सा दितिर्यमग्रतः प्रथममसूत तं हिरण्याक्षं यथा कनिष्ठतया प्रजाः विदुस्तथा प्रजापतिः कश्यपः तयोर्नाम नामकरणाख्यं संस्कारम् अकार्षीत् । प्रथमं हिरण्यकशिपोस्ततो हिरण्याक्षस्येति क्रमेण कृतवानित्यर्थः । तत्रायं भावः । यदा हि गर्भाधानसमये योनिपुष्पं प्रविशद्वीर्यं द्विधा विभक्तं सत् आदिपश्चाद्भावेन प्रविशति तदा यमौ भवतः । तयोश्च पितृतः प्रवेशक्रमविपर्ययेण मातृतः प्रसूतिः अत एव कश्यपात्पूर्वजातत्वाद्दितेः पश्चाज्जातोऽपि हिरण्यकशिपुरेव ज्येष्ठः हिरण्याक्षः कनिष्ठः ॥ १८ ॥ चक्रे इति ॥ स्वदोर्भ्यां स्वभुजबलेन उद्धतः अनम्रः ब्रह्मणो वरेण चाऽकुतोमृत्युः सर्वतो मृत्युरहितो हिरण्यकशिपुः सपालान् त्रीन् लोकान् स्ववशे चक्रे । यद्वा । उद्धतः अकुतोमृत्युश्च हिरण्यकशिपुः स्वदोर्बलेनैव लोकान् वशे चक्रे । ब्रह्मवरेण चेति चकाराद्ब्रह्मवरोऽपि तत्र सहायमात्रमभूत् इति भावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिरण्याक्ष इति ॥ हिरण्याक्षस्तस्यानुजः अत एव तस्य प्रियः अतः स्वयमपि तत्प्रीतिकृत् अतस्तत्प्रीतये युयुत्सुर्गदापाणिश्च सन्नन्वहं रणं युद्धं मृगयन्कदाचिद्दिवं स्वर्गं यातः आर्षः शता । निवृत्तप्रेषणान्मृगयतेर्ण्यन्ताण्णिज्वा ॥ २० ॥ तमिति ॥ दुःसहः जवो वेगो यस्य तं रणन्ती ध्वनन्ती काञ्चनमये नूपुरे यस्य तं पुष्पपल्लवादिनिर्मिता वैजयन्ती तया स्रजा जुष्टमलङ्कृतम् अंसे स्कन्धे न्यस्ता महती गदा येन तम् । मनसा शौर्येण वीर्येण बलेन ब्रह्मवरेण च उत्सिक्तं गर्वितम् असृण्यम् अंकुशानर्हम् अर्हार्थे यत् । अकुतोभयं सर्वतो निर्भयं तं हिरण्याक्षं वीक्ष्य देवाः भीताः सन्तो ताक्ष्यात् गरुडात् त्रस्ता अहयः सर्पा यथा तथा निलिल्यिरे अन्तर्हिताः बभूवुः ॥ २१ ॥ २२ ॥ स इति ॥ स च दैत्यराट् हिरण्याक्षः सेन्द्रान् देवगणानपश्यन् युद्धं विनैव स्वेन हिरण्याक्षसंबन्धिना महसा तेजसैव तिरोहितान् अत एव क्षीबान् प्रमत्तान् क्लीबानिति पाठे पौरुषहीनांश्च दृष्ट्वा ज्ञात्वा भृशमतीव व्यनदत् अगर्जत् ॥ २३ ॥ तत इति ॥ ततः स्वर्गान्निवृत्तः महासत्वः महाबलः हिरण्याक्षः क्रीडिष्यन् मत्तो द्विप इव गम्भीरं

हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहम् ॥ गदापाणिर्दिवं यातो युयुत्सुर्मृगयन्रणम् ॥ २० ॥ तं वीक्ष्य दुःसहजवं रणत्काञ्चननूपुरम् ॥ वैजयन्त्या स्रजा जुष्टमंसन्यस्तमहागदम् ॥ २१ ॥ मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयम् ॥ भीता निलिल्यिरे देवास्ताक्ष्यत्रस्ता इवाहयः ॥ २२ ॥ स वै तिरोहितान्दृष्ट्वा महसा स्वेन दैत्यराट् ॥ सेन्द्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशम् ॥ २३ ॥ ततो निवृत्तः क्रीडिष्यन्गम्भीरं भीमनिस्वनम् ॥ विजगाहे महासत्त्वो वार्धिं मत्त इव द्विपः ॥ २४ ॥ तस्मिन्प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः ॥ अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः ॥ २५ ॥ स वर्षपूगानुदधौ महाबलश्चरन्महोर्मीन् श्वसनेरितान्मुहुः ॥ मौर्व्याऽभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः ॥ २६ ॥

भीमो निःस्वनस्तरङ्गजन्यो ध्वनिर्यस्मिंस्तं वार्धिं समुद्रं विजगाहे विलोडितवान् । समुद्रे कश्चित्प्रतियोद्धा चेत्तेन युद्धयेयेत्याशयेनेति भावः ॥ २४ ॥ तस्मिन्निति ॥ तस्मिन् हिरण्याक्षे तत्र प्रविष्टे सति सन्नधियः विशीर्णबुद्धयः ससाध्वसाः भीताः वरुणस्य सैनिकाः यादोगणाः ग्राहाद्याः जलजन्तवः तेन अहन्यमाना अपि तस्य हिरण्याक्षस्य वर्चसा तेजसा प्रधर्षिता अभिभूताः सन्तो दूरतरं प्रदुद्रुवुः ॥ २५ ॥ स इति ॥ हे तात महाबलः स वर्षपूगान् बहून् संवत्सरान् उदधौ समुद्रे चरन् विहरन् श्वसनेन स्वश्वासेन ईरितान् उत्थितान् महोर्मीनुच्चैस्तरङ्गान् मौर्व्या मुरुर्लोहविशेषस्तद्रचितया मूर्वातृणविशेषस्तन्मयरज्ज्वा दृढं निबद्धया वा गदया मुहुर्मुहुरभिजघ्ने प्रजहार । तङार्षः । ततश्च विभावरीं नाम प्रचेतसो वरुणस्य पुरीमासेदिवान् प्राप्तवान् । अत्र वर्षपूगानित्यनेन पाद्मकल्प उत्पन्नावेव हिरण्यकशिपुहिरण्याक्षौ वाराहकल्पे भगवता निहताविति सूचितम् इत्याहुः । शेषं तत्रादिदैत्यं गदया पतन्तमित्यत्र प्रागुक्तम् ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति ॥ तत्र पुर्याम् असुरलोकानां पालकं यादोगणानामृषभं स्वामिनं प्रचेतसं वरुणमुपलभ्य दृष्ट्वा स्मयन् हसन् शता आर्षः । प्रलब्धुं वाञ्छयितुमुपहसितुं वा नीचवत्प्र-
णिपत्य हे अधिराज मे मह्यं संयुगं युद्धं देहीति जगाद । मया सह युध्यस्वेति प्रार्थितवान् ॥२७॥त्वमिति ॥ प्रभो हे समर्थ त्वं लोकपालानामप्यधिपतिः लोकपालोऽधिपतिरि-
त्यपि पाठः । अत एव दुर्मदेन य आत्मानं वीरं मन्यन्ते तेषां वीर्यापहः अत एव बृहच्छ्रवाः महायशाः असि । यत् यतः भवान् पुरा काले लोके अखिलान् दैत्यान् दानवांश्च
विजित्य राजसूयेनायजत् इष्टवान् । वाक्यभेदान्न प्रथमपुरुषदोषः अयज इत्यपि क्वापि पाठः। विजित्येति विपरीतलक्षणा तेन तदानीं दैत्याभावात्तदा सर्वैं राजसूयः कर्तुं शक्यः
ते न शक्तिश्चेत् संप्रति मां जित्वा राजसूयं कुरु । कुतोऽपि राजसूयस्ते तदैव सिद्ध्येत् यदि मां जयेरिति ॥२८ ॥ स इति ॥ सः भगवान् अपां पतिर्वरुणः उत्सिक्तो वृद्धो
मदो यस्य तेन विद्विषा शत्रुणा तेनैवं दृढं यथा स्यात्तथा प्रलब्ध उपहसितः अतः समुत्थमपि रोषं स्वया धिया विचारात्मिकया बुद्ध्या शमयन् व्यवोचत् तं प्रत्युवाच ।

तत्रोपलभ्यासुरलोकपालको यादोगणानामृषभं प्रचेतसम् ॥ स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगम् ॥ २७ ॥ त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनाम् ॥ विजित्य लोकेऽखिलदैत्यदानवान् यद्राजसूयेन पुराऽजयत्प्रभो ॥२८॥ स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपाम्पतिः ॥ रोषं समुत्थं शमयन्स्वया धिया व्यवोचदङ्गोपशमं गता वयम् ॥ २९ ॥ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदम् ॥ आराधयिष्यत्यसुरर्षभेहितं मनस्विनो यं गृणते भवादृशाः ॥ ३० ॥ तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः ॥ यस्त्वद्विधानामसतां प्रशान्तये रूपाणि धत्ते सदनुग्रहेच्छया ॥ ३१ ॥
इति श्रीभागवते तृतीयस्कन्धे हिरण्याक्षदिग्विजये सप्तदशोऽध्यायः ॥ १७ ॥

अङ्ग हे दैत्यराज वयम् उपशमं युद्धादिकौतुकादुपरमं गता इति ॥ २९ ॥ पश्यामीति ॥ हे असुरर्षभ रणमार्गेषु कोविदं निपुणं त्वां संयुगे युद्धे यः आराधयिष्यति स्वनै-
पुण्येन संतोषयिष्यति तं पुरातनात्पुरुषादन्यं न पश्यामि । अतस्तमिहि गच्छ यतः भवादृशा मनस्विनः शूराः युद्धे पराजिता यं गृणते श्लाघन्ते इत्यर्थः । तङ्गार्षः ॥ ३० ॥
तमिति ॥ तं वीरमारात् शीघ्रमेवाभिपद्य प्राप्य विस्मयः विगतगर्वस्त्वं वीरशये रणभूमौ श्वभिर्वृतो मृतः सन् शयिष्यसे अधुना तु गर्वरोगरणकण्डूभ्यां तव निद्रा नास्ति तदा
तु त्वं योग्यशय्यायां श्वभिः परिचारकैः परिचर्यमाणः शयिष्यस इति भावः । यो भगवान् सतां स्वभक्तानामनुग्रहेच्छया त्वद्विधानामसतां दुष्टानां प्रशान्तये विनाशाय
रूपाणि अवतारान् धत्ते अतस्त्वामपि केनचिद्रूपेण हनिष्यति ॥ ३१ ॥ इति श्रीकृष्णसेवार्थसन्विततार्थप्रकाशिकायाम् ॥ गङ्गासहायस्तृतीये व्याख्यां सप्तदशे व्यधात् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशे तु रक्षोभिर्हिरण्याक्षवराहयोः ॥ महायुद्धमभूत्तत्र श्लोका नागैर्दशः स्मृताः ॥ चत्वार्युवाचेत्यङ्घ्रूनाः पञ्चरामा अनुष्टुभः ॥ १८॥ तदिति ॥ अङ्ग हे विदुर एवं तत्था-गुक्तं जलेशेन वरुणेन भाषितं प्रतियोद्धारं हरिं श्रुत्वा महामनाः हृष्टचित्तः निर्भयचित्तो वा दुर्मदः स हिरण्याक्षः शयिष्यसे वीरशये इति तत् वरुणवचनं विगणय्य अनादृत्य नारदात् हरेर्गतिं स्थितिं स्थानं विदित्वा ज्ञात्वा त्वरान्वितः हरेः अन्यत्र गमनशङ्कया शीघ्रमेव रसातलं गर्भोदमेव निर्विविशे । निर्विवेश तङार्षः ॥ १ ॥ पूर्वं वराहचरिते युद्धलीला संक्षेपादुक्ता तां किंचिद्विस्तरेण वक्तुमाह–ददर्शेति ॥ तत्र रसातले धराधरं पर्वताकारम् अग्रदंष्ट्रया दंष्ट्राग्रेण प्रकर्षेण ऊर्ध्वं नीयमाना अवनिर्येन तम् । अरुणश्रिया युक्तेन अक्ष्णा नेत्रेण स्वरुचः हिरण्याक्षतेजांसि मुष्णन्तं हरन्तम् अभितो जयतीत्यभिजित् तं वराहमूर्तिं भगवन्तं ददर्श।दृष्ट्वा चाहो आश्चर्यं वनगोचरो वारिचरो मृगः वराहोऽस्ति । यद्वा । मया तु प्रतियोद्धान्विष्यते । अयं तु वनगोचरो वनवासी मृगः इत्युक्त्वा जहास च । निन्दायां प्रयुक्तापि भारती हरिं स्तौत्येव । वनगोचरो जलशायी मुनिभिर्मृग्यत इति मृगः ॥२॥ आहेति ॥ तत एनं भगवन्तं स आह स्म । हे अज्ञ एहि युद्धार्थमागच्छ महीं विमुञ्च । यतः विश्वसृजा ब्रह्मणा रसौकसां रसातलवासिनां नोऽस्माकं शेषे षष्ठी । इयमर्पिता दत्ता अन्यथाऽस्या पातालावतरणं न घटते । हे सुरेष्वधम हे आसादितसूकराकृते ममेक्षतः पश्यतः सतः आर्षः शता । अनया भूम्या सह स्वस्ति मङ्गलं यथा

मैत्रेय उवाच ॥ तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः ॥ हरेर्विदित्वा गतिमङ्ग नारदाद्रसातलं निर्विविशे त्वरान्वितः ॥ १ ॥
ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया ॥ मुष्णन्तमक्ष्णा स्वरुचोऽरुणश्रिया जहास चाहो वनगोचरो मृगः ॥ २ ॥ आहैनमेह्यज्ञ
महीं विमुञ्च नो रसौकसां विश्वसृजे यमर्पिता ॥ न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ॥ ३ ॥ त्वं नः सपत्नैरभवाय किं
भृतो यो मायया हन्त्यसुरान्परोक्षजित् ॥ त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे सुहृच्छुचः ॥ ४ ॥

स्यात् तथा न यास्यसि । स्तुतौ तु हे विश्वसृज इगुपधेति कः । अज्ञ नास्ति ज्ञो यस्मात् हे सुरोत्तम सुरा अधमा यस्मात् इयं मही तुभ्यम् अर्पिता ममेक्षमाणस्यापि सतो मामनादृत्यापि त्वमनया सह वर्तमानो नोऽस्मदीयं स्वस्ति समस्तं मङ्गलं राज्यं न यास्यसि न प्राप्स्यसि किम् । यास्यस्येवेति नात्र सन्देहस्तथाप्यस्मत्कृपया विमुञ्चेत्यर्थः। आसादिता लीलया स्वीकृता सूकराकृतिर्येन ॥ ३ ॥ त्वमिति ॥ हे मूढ त्वं किन्नोऽस्माकं सपत्नैः शत्रुभिर्देवैः अभवाय अस्मद्विनाशाय भृतो धृत आश्रितः पुष्टो वा यो भवान्मायया वाराहादिवेषान्तरधारणलक्षणकपटेन तत्रापि परोक्षजित् अस्मत्परोक्षे असंमुखे जयतीति तथाभूतः सन् असुरान् हंसि । इदानीं तु योगमाया लोकव्यामोहिकैव बलं यस्य तम् अत एवाल्पं पौरुषं बलं यस्य तं त्वां संस्थाप्य हत्वा सुहृदां त्वद्धतबन्धूनां रुदतां शुचः अश्रूणि प्रमृजे । तङार्षः।स्तुतौ तु अभवाय मोक्षाय धृत आश्रितः यो बलनिरपेक्षया मायया युक्त्या कृपया संकल्पमात्रेण वा हन्ति हत्वा सद्गतिं करोति अत एव परोक्षे दूरत एव जयति । अल्पं पौरुषं यस्मात् तं त्वां सम्यक् स्थापयित्वा भक्त्या हृदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिरीकृत्येत्यर्थः । हे मूढ प्रमूढान्प्रात्याप्याययतीति तथा प्रा पूर्ताविति धातोः कः । सुहृदां शुचः संसारदुःखानि मृजे नाशयामि । यतस्त्वं स्मर्तुर्बान्धवानपि मोचयसीति भावः॥४॥त्वयीति ॥ अस्मद्भुजच्युतया अस्मद्भुजविसृष्टया गदया शीर्णं भिन्नं शिरो यस्य तस्मिंस्त्वयि संस्थिते मृते सति ये च देवा ऋषयो ये चान्येऽपि भक्ताः मनुष्यादयस्तुभ्यं बलिं हरन्ति ते सर्वे स्वयमेव मत्प्रयत्नमन्तरेणैव अमूलास्त्वद्रूपाश्रयनाशादनाश्रयाः सन्तो न भविष्यन्ति नङ्क्ष्यन्त्येवेत्यर्थः । यद्वा । त्वन्नाशे स्वयमेवामूला न भविष्यन्ति किमिति काका भविष्यन्त्येवेति । स्तुतौ तु अस्मद्भुजच्युतयापि गदया न शीर्णं शीर्षं यस्य तथाभूते त्वयि सुखं स्थिते सति ये तुभ्यमधुना बलिं हरन्ति नवीनाः भक्ताः ये च पूर्वे भक्ता ऋषयो देवाश्च ते सर्वे स्वमेवोद्यमं विनैव अमूला न भविष्यन्ति किंतु दृढमूला एव भविष्यन्ति॥५॥स इति॥सः भगवान् अरेर्हिरण्याक्षस्य दुरुक्तान्येव तोमराः शस्त्रविशेषास्तैस्तुद्यमानो व्यथ्यमानोऽपि दंष्ट्राग्रे गतां गां पृथ्वीं भीतामुपलक्ष्य दृष्ट्वेति यथा ग्राहेण मकरेणाहतो जले व्यथितः सकरेणुः हस्तिनीभिः सहित इभो गजो जलान्निःसरेत्तथा तोदं मृषन् सहमान एवाम्बुमध्याद्बहिर्निरगात् वस्तुतः अरेर्हिरण्याक्षस्य दुरुक्ततः दुर्वचनात् अमरैर्निमित्तभूतैः तुद्यमानः तद्दुःखं दृष्ट्वाऽनुकम्पया पीड्यमानः तोदं पाक्षिकदुरुक्तव्यथां

त्वयि संस्थिते गदया शीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यम् ॥ बलिं हरन्त्यृषयो ये च देवाः स्वयं सर्वे न भविष्यन्त्यमूलाः ॥ ५ ॥ स तुद्यमानोरिदुरुक्ततोमरैर्दंष्ट्राग्रगां गामुपलक्ष्य भीताम् ॥ तोदं मृषन्निरगादम्बुमध्याद्ग्राहाहतः सकरेणुर्यथेभः ॥ ६ ॥ तं निःसरन्तं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः ॥ करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद्गतह्रियां किं न्वसतां विगर्हितम् ॥ ७॥ स गामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वम् ॥ अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोऽरेः ॥ ८ ॥ परानुषक्तं तपनीयोपकल्पं महागदं काञ्चनचित्रदंशम् ॥ मर्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तैः प्रचण्डमन्युः प्रहसंस्तं बभाषे ॥ ९ ॥

पाक्षिकसूक्तसुखप्राप्त्या मृषन् ग्राहेण न हत इत्यादि ॥ ६ ॥ तमिति ॥ झषो मकरो द्विरदं गजं यथा अनुद्रवति तथा तं भगवन्तं सलिलान्निः सरन्तमनुद्रुतोऽनुधावन् करालदंष्ट्रः अशनिवत् निस्वनो यस्य स हिरण्यवत् कपिशाः केशा यस्य स हिरण्याक्षः अब्रवीत् । गतह्रियां त्यक्तलज्जानामसतामवीराणां युष्माकं किंनु विगर्हितमस्ति । निन्दाभयाभावात्पलायनं नायुक्तमित्यर्थः । स्तुतौ तु गतह्रियाम् असतामस्माकं धरोद्धारविघ्नकरणादिकं किं विगर्हितमतो धिगस्मान् ॥ ७ ॥ स इति ॥ अरेर्हिरण्याक्षस्य पश्यत एव सतो विश्वसृजा ब्रह्मणा विबुधैर्देवैश्चाभिष्टुतः प्रसूनैः पुष्पैरापूर्यमाणश्च पाठान्तरे विश्वसृजां शेषे षष्ठी । विश्वसृड्भिः प्रजापतिभिः विबुधैश्चेति स भगवान् सलिलस्य उदस्तात् उपरि उच्छब्दादस्तात्यन्तं छान्दसमव्ययम् । गोचरे व्यवहारयोग्यप्रदेशे गां भूमिं विन्यस्य निधाय तस्यां भूमौ स्वसत्वं त्वसामर्थ्यमाधारशक्तिमधात् निहितवान् । यथा सा पुनर्न निमज्जेत् ॥ ८ ॥ परेति ॥ परा पराक् पृष्ठतः अनुषक्तमनु लग्नं तपनीयोपकल्पं सुवर्णमयभूषणं महती गुर्वी गदा यस्य तं काञ्चनमयः चित्रो दंशः कवचो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य तं दुरुक्तैर्दुर्वचनैरभीक्ष्णं पुनः पुनर्मर्माणि मनआदीनि प्रतुदन्तं व्यथयन्तं तं हिरण्याक्षं प्रति दुरुक्तश्रवणेन प्रचण्डमन्युः अतिक्रुद्धः सूक्तश्रवणेन प्रहसन् भगवान् बभाषे। अत्र प्रचण्डमन्युत्वादिकं देवभयनिवृत्तयेऽनुकरणमात्रम् ॥ ९ ॥ सत्यमिति ॥ भो अभद्र असुर वयं वनगोचरा जलनिवासिनो मृगा इति यत्त्वया उक्तं तत्सत्यमथापि युष्मद्विधान् ग्रामसिंहान् शुनो मृगये अन्वेषयामि। यत्तु ममेक्षतो न स्वस्ति यास्यसीत्युक्तं तत् मृत्युपाशैः प्रतिमुक्तस्य बद्धस्य तव विकत्थनं स्वश्लाघावचनं मादृशाः धीराः न गृह्णन्ति ॥ १० ॥ एते इति ॥ रसौकसां रसातलवासिनां युष्माकमेते वयं न्यासहराः प्रजापतिदत्तपृथ्वीहराः अत एव ते तव गदया द्राविताः पलायनं कारिताः अत एव गतह्रियो निर्लज्जा अथापि आजौ युद्धे कथंचित्तिष्ठामहे। तङार्षः। हे इति पृथक् पदं वा। यद्वा। बलं प्रकाशयामः "प्रकाशनस्थेयाख्ययोश्च" इति तङ्। यतोऽस्माभिरपि स्थेयम्। यतः बलिना त्वया सह वैरमुत्पाद्य क्व यामः पलायनेऽपि गन्तव्यदेशाभावात् ॥ ११ ॥ त्वमिति ॥ त्वं किल प्रसिद्धः पदौ पादावेव रथो येषां तेषां पद्रथानां

श्रीभगवानुवाच ॥ ॥ सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान् मृगये ग्रामसिंहान् ॥ न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णन्त्यभद्र ॥१०॥ एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविताास्ते ॥ तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरम् ॥११॥ त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः ॥ संस्थाप्य चास्मान् प्रमृजाऽश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः ॥१२॥ मैत्रेय उवाच ॥ सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशम् ॥ आजहारोल्बणं क्रोधं क्रीडयमानोऽहिराडिव ॥१३॥ सृजन्नमर्षितः श्वासान् मन्युप्रचलितेन्द्रियः ॥ आसाद्य तरसा दैत्यो गदयाऽभ्यहनद्धरिम् ॥ १४ ॥ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि ॥ अवञ्चयत् तिरश्चीनो योगारूढ इवान्तकम् ॥ १५ ॥

पादचारिणां ये यूथपास्तेषामधिपः अतः अनूहः निःशङ्कः सन्नेव नोऽस्माकमस्वस्तये परिभावाय आशु शीघ्रं घटस्व प्रयतस्व। अस्मान् संस्थाप्य हत्वा स्वकानाम् अश्रु तुदादित्वमार्षम्। प्रमृज यः पुमान्स्वां स्वीयां प्रतिज्ञां नातिपिपर्त्ति न सम्यक् पूरयति सः असभ्यः सभायोग्यो न भवति ॥ १२ ॥ स इति ॥ रुषा क्रोधेन भगवता भृशमत्यन्तम् अधिक्षिप्तः सत्यं वयमित्यादिना तिरस्कृतः प्रलब्धः एते वयमित्यादिना उपहसितश्च स हिरण्याक्षः क्रीड्यमानः क्रीडां कार्यमाणः क्रीडतेर्ण्यन्तात्कर्मणि शानच्। अहिराट् महासर्पो यथा क्रुध्यति तथा उल्बणमधिकं क्रोधमाजहार आनीतवान् ॥ १३ ॥ सृजन्निति ॥ अमर्षितः क्रुद्धः अत एव श्वासान् विसृजन् विमुञ्चन् अत एव मन्युना प्रचलितानि क्षुभितानीन्द्रियाणि यस्य स दैत्यः आसाद्य समीपमागत्य तरसा वेगेन गदया हरिमभ्यहनत्। शब्लुगभाव आर्षः ॥ १४ ॥ भगवानिति ॥ भगवांस्तु रिपुणा शत्रुणा उरसि निसृष्टं प्रक्षिप्तं गदावेगं तिरश्चीनः सन् योगारूढो यथान्तकं मृत्युं वञ्चयति तथा अवञ्चयत् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरिति ॥ पुनः स्वां गदामादाय अभीक्ष्णशः पुनः पुनर्भ्रामयन्तमसुरं मित्त्वे ह्रस्वाभाव आर्षः व्यवस्थितविभाषया वा । हन्तुं क्रुद्धः अतः संरम्भात् क्रोधात् दष्टो दच्छदो दन्ताच्छादक ओष्ठो येन तथाभूतो हरिरभ्यधावत् धावनं कृत्वा तत्समीपं जगाम ॥ १६ ॥ तत इति ॥ हे सौम्य ततस्तदनन्तरं प्रभुः समर्थो भगवान् स्वगदया अरातिं शत्रुं दक्षिणस्यां भ्रुवि आजघ्ने पराङ्गकर्मकत्वे तङार्षः । सोऽसुरोऽपि कोविदः गदायुद्धे कुशलः अतस्तां हरिणा प्रयुक्तामप्राप्तामेव गदां स्वगदया अभ्यहनत् । शब्लुगभाव आर्षः ॥ १७ ॥ एवमिति ॥ हरिणी हरितवर्णे अक्षिणी यस्य सः हिरण्याक्षो हरिश्च उभावेव सुसंरब्धौ अतिक्रुद्धौ अन्योन्यं जिगीषया जेतुमिच्छया गुर्वीभ्यां गदाभ्यामन्योन्यं परस्परमेवमुक्तप्रकारेणाभिजघ्नतुः ॥ १८ ॥ तयोरिति ॥ तयोर्हरिहर्यक्षयोः स्पृधोः स्पर्द्धमानयोः स्पर्द्धतेः स्पृध आर्षः । तिग्माभ्यां तीक्ष्णधाराभ्यां गदाभ्यामाहतानि ताडितान्यङ्गानि ययोः अत एव क्षतादास्रवतीति क्षतास्रवं रुधिरं तस्य घ्राणमवघ्राणं तेन विवृद्धो मन्युः क्रोधो ययोः इलायां भूम्यां निमित्तभूतायां भूम्यर्थं परस्परं

पुनर्गदां स्वामादाय भ्रामयन्तमभीक्ष्णशः ॥ अभ्यधावद्धरिः क्रुद्धः संरम्भाद्दष्टदच्छदम् ॥१६॥ ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः ॥ आजघ्ने स तु तां सौम्य गदया कोविदोऽहनत् ॥१७॥ एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च ॥ जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः ॥१८॥ तयोः स्पृधोस्तिग्मगदाहताङ्गयोः क्षतास्रवघ्राणविवृद्धमन्य्वोः ॥ विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः ॥१९॥ दैत्यस्य यज्ञावयवस्य मायया गृहीतवाराहतनोर्महात्मनः ॥ कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥ २० ॥ आसन्नशौण्डीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम् ॥ विलक्ष्य दैत्यं भगवान् सहस्रणीर्जगाद नारायणमादिसूकरम् ॥२१॥ ब्रह्मोवाच ॥ एष ते देवदेवानामङ्घ्रिमूलमुपेयुषाम् ॥ विप्राणां सौरभेयीणां भूतानामप्यनागसाम् ॥२२॥ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः ॥ अन्वेषन्नप्रतिरथो लोकानटति कण्टकः ॥२३॥

जिगीषया जेतुमिच्छया विचित्रमार्गान् गदायुद्धभ्रमणभेदान् चरतोः कुर्वतोर्मृधः सङ्ग्रामः इला गौस्तदर्थं शुष्मिणोर्मत्तवृषभयोः सङ्ग्राम इव व्यभात् बभौ ॥ १९ ॥ दैत्यस्येति ॥ हे कौरव्य विदुर दैत्यस्य यज्ञा अवयवा यस्य तस्य यज्ञावतारस्य मायया गृहीता वाराहतनुर्येन तस्य महात्मनो भगवतश्चेति मह्यां निमित्तभूतायां द्विषतोर्युध्यमानयोस्तयोर्विमर्दनं युद्धं दिदृक्षुर्द्रष्टुमिच्छुः ऋषिभिर्मरीच्यादिभिर्वृतः सहितः स्वराट् ब्रह्मा आगात् ॥ २० ॥ आसन्नेति ॥ सहस्रणीः ऋषिसहस्राणां नेता भगवान् ब्रह्मा आसन्नं प्राप्तं शौण्डीरं साहसोत्साहो येन तम् अपेतसाध्वसं निर्भयं कृतः प्रतीकारः प्रहारप्रतिक्रिया येन तम् अहार्यः अप्रतिकार्योऽसह्यो वा विक्रमो यस्य तमेवंभूतं दैत्यं विलक्ष्य आदिशूकरं नारायणं हरिं जगाद ॥ २१ ॥ एष इति द्वयम् ॥ हे देव यतः एषोऽसुरस्ते तवाङ्घ्रिमूलमुपेयुषां शरणागतानां विप्राणां सौरभेयीणां गवाम् अनागसां निरपराधानां भूतानाम् आगस्कृत् अपराधारोपकः तत्परिहारप्रवृत्तौ भयकृत् भीतं ज्ञात्वा दुष्कृत् प्राणादिहर्त्ता अस्मत्तो राद्धो लब्धो वरो येन सः अत एव स्वयमप्रतिरथः प्रतिपक्षर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः कण्टकः सन्मार्गप्रतिरोधकः प्रतिरथमन्वेषन् अन्वेषयन् आङ्पूर्वादीष उञ्छे इत्यतः शता उपसर्गवशादन्वेषार्थे वृत्तिः । लोकानटति ॥ २२ ॥२३॥ मैनमिति ॥ हे देव मायाविनं दृप्तं गर्वितं निरङ्कुशमसत्तमम् अतिदुष्टम् एवं बालवत् बालो यथा उत्थितम् उत्थितमस्तकमाशीविषं सर्पं पुच्छाकर्षणादिना क्रीडयति तथा मा आक्रीड आक्रीडय आर्षस्तङभावः । यद्वा । आशीविषं यथा सर्पमिवैनं बालोऽज्ञः स इव मा आक्रीड । यद्वा । बालवन्मा क्रीड अहमेनमुत्थितमाशीविषं मन्ये इति शेषः ॥ २४ ॥ नेति ॥ हे देव हे अच्युत स्वभावत एव दारुणोप्येषः यावत्स्वां स्वबलकरीमासुरीं वेलां प्राप्य न वर्द्धेत तावदेव स्वां मायामचिन्त्यशक्तिमास्थाय आविष्कृत्य अघं दोषरूपमेनं जहि । अत्र सर्वज्ञस्यापि ब्रह्मणः प्रेमवशादनिष्टाशङ्कित्वम् ॥ २५ ॥ वेलामेवाह—एषेति ॥ हे प्रभो हे सर्वात्मन् छम्बडित्यव्ययं विनाशवाचकम् । लोकानां विनाशकरी सन्ध्यायोमव प्रलयप्रसिद्धेः । अत एव घोरतमा अतिभयंकरी एषा सन्ध्या उपसर्पति आश्वायास्यति ततः पूर्वमेव सुराणां जयमावह सम्पादय ॥ २६ ॥ अधुनेति ॥

मैनं मायाविनं दृप्तं निरङ्कुशमसत्तमम् ॥ आक्रीड बालवद्देव यथाऽऽशीविषमुत्थितम् ॥ २४ ॥ न यावदेष वर्धेत स्वां वेलां प्राप्य दारुणः ॥ स्वां देव मायामास्थाय तावज्जह्यघमच्युत ॥ २५ ॥ एषा घोरतमा सन्ध्या लोकच्छम्बट्करी प्रभो ॥ उपसर्पति सर्वात्मन् सुराणां जयमावह ॥ २६ ॥ अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात् ॥ शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम् ॥ २७ ॥ दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयम् ॥ विक्रम्यैनं मृधे हत्वा लोकानाऽधेहि शर्मणि ॥ २८ ॥ इति श्रीभागवते तृतीयस्कन्धे हिरण्याक्षश्रीवराहयुद्धवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ मैत्रेय उवाच ॥ ॥ अवधार्य विरिञ्चस्य निर्व्यलीकामृतं वचः ॥ प्रहस्य प्रेमगर्भेण तदपाङ्गेन सोऽग्रहीत् ॥ १ ॥

अधुना एषः अभिजिन्नाम मौहूर्तिको योगो मध्याह्ने घटीद्वयमितः कालः अगात् गतप्रायः अतो यावन्मुहूर्त्तशेषोऽस्ति तावदेव सुहृदां त्वद्भक्तानां नोऽस्माकं शिवाय सुखार्थं दुस्तरं दुर्जयमेनमाशु निस्तर जहि ॥ २७ ॥ दिष्टचेति ॥ विहितं शापानुग्रहसमये एतौ सुरेतरगतिं प्रतिपद्य सद्य इत्यादिना त्वयैव निर्मितम् । यद्वा । तदा विश्वेश्वरः क्रुद्धोऽवतीर्य हनिष्यतीति कश्यपेनैव विहितं मृत्युरूपं त्वामयं स्वयमेवासादितः प्राप्तस्तद्दिष्ट्या सर्वेषां भाग्येनैवातो मृधे युद्ध एनं विक्रम्य पराक्रमं कृत्वा हत्वा लोकान् शर्मणि सुखे आधेहि स्थापय सुखोत्तरान् कुरु ॥ २८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्कन्धस्याष्टादशे व्यधात् ॥ १८ ॥ ऊनविंशे प्रार्थितेन ब्रह्माद्यैर्हरिणा मृधे ॥ हिरण्याक्षो हतस्तत्र श्लोका अष्टार्ग्नयः स्मृताः ॥ अनुष्टुभर्श्चतुर्वेदा उवाचेति चतुष्टयम् ॥ १९ ॥ अवधार्येति ॥ विरिञ्चस्य ब्रह्मणो निर्व्यलीकं निष्कपटं प्रीतिकरत्वादमृतं च निर्व्यलीकमृतमिति पाठे ऋतं सत्यं च वचोऽवधार्य श्रुत्वा महानपि भयाविष्टतया कालात्मनोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम मुहूर्त्तबलमुपदिशतीति विहस्य स भगवान् प्रेमगर्भेण प्रेमसहितेन अपाङ्गेन कटाक्षेण तद्ब्रह्मवचनमग्रहीत् अनुमोदनेन स्वीकृतवान् । इमं शीघ्रमेव किंचिद्युयुत्सासुखपूरणे सत्यद्य रात्रावेव हन्मीति ॥ १ ॥ तत इति ॥ ततः अक्षजो ब्रह्मणो घ्राणेन्द्रियात्प्रादुर्भूतो भगवान् उत्पत्य अकुतोभयं सर्वतो भयरहितमत एव मुखतः अभिमुखं विचरन्तं सपत्नं शत्रुमसुरं गदया हनौ कपोलस्याधोदेशे जघान ॥ २ ॥ सेति ॥ सा भगवत्प्रयुक्ता गदा तद्धनुमप्राप्तैव तेनाऽसुरेण स्वगदया हता भगवत्कराद्विहता विच्युता विघूर्णिता च सती भूमावपतत् । ततो रेजे तद्भगवत्करात्पतनं तत्रत्यानां पश्यतामाश्चर्यमिवाभवत् । यद्वा । तदित्यस्यावृत्त्या रेजे इत्यनेनापि संबन्धः । तद्दैत्यपौरुषं रेजे गदापतनं च युद्ध-लीलायां स्वपार्षदस्य बलातिशयद्योतनार्थम् ॥ ३ ॥ स इति ॥ सोऽसुरस्तदा लब्धतीर्थो लब्धप्रहारावकाशोऽपि निरायुधमपि भगवन्तं न बबाधे न प्राहरत् किंतु सः मृधे युद्धे निरायुधो न हन्तव्य इति धर्मं मानयन् विष्वक्सेनं भगवन्तं प्रकोपयंश्च बभूवेत्यन्वयभेदात् स इत्यस्य न पौनरुक्त्यम् ॥ ४ ॥ गदायामिति ॥ गदायामपविद्धायां भगवतो

ततः सपत्नं मुखतश्चरन्तमकुतोभयम् ॥ जघानोत्पत्य गदया हनावसुरमक्षजः ॥ २ ॥ सा हता तेन गदया विहता भगवत्करात् ॥ विघूर्णिताऽ-
पतद् रेजे तदद्भुतमिवाऽभवत् ॥ ३ ॥ स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम् ॥ मानयन् स मृधे धर्मं विष्वक्सेनं प्रकोपयन् ॥ ४ ॥
गदायामपविद्धायां हाहाकारे विनिर्गते ॥ मानयामास तद्धर्मं सुनाभं चास्मरद्विभुः ॥ ५ ॥ तं व्यग्रचक्रं दितिपुत्राधमेन स्वपार्षदमुख्येन विष-
ज्जमानम् ॥ चित्रा वाचोऽतद्विदां खेचराणां तत्र स्माऽसन् स्वस्ति तेऽमुं जहीति ॥ ६॥ स तन्निशाम्यात्तरथाङ्गमग्रतो व्यवस्थितं पद्मपलाशलो-
चनम् ॥ विलोक्य चामर्षपरिप्लुतेन्द्रियो रुषा स्वदन्तच्छदमादशच्छ्वसन् ॥ ७ ॥

हस्ताद्विच्युतायां सत्यां पश्यतां ब्रह्मादीनां मुखात् भयेन हाहाकारे विनिर्गते सति विभुः भगवान् तद्धर्मं तस्य दैत्यस्य निरायुधाबाधनरूपं धर्मं मानयामास बहुमन्यत । सुनाभं सुदर्शनचक्रं चास्मरत् स्मरणेनागतं स्वहस्तस्थितमकरोत् । चकाराद्गदामपि पूर्वं सस्मारैवेति गम्यते ॥ ५ ॥ तमिति ॥ दैत्यवधार्थं व्यग्रं त्वरयाऽऽकुलं चक्रं यस्य तं तथापि चक्राय दैत्यमारणाज्ञामदत्त्वा स्वपार्षदमुख्येन दितिपुत्राधमेन सह विषज्जमानं विशेषेण सङ्गं प्राप्नुवन्तं क्रीडन्तं तं भगवन्तं प्रति तत्र देशे काले वा खेचराणाम् आकाशे स्थित्वा युद्धं पश्यताम् अतद्विदाम् तत्प्रभावमजानतां देवादीनां ते तुभ्यं स्वस्त्यस्तु । अमुमसुरं जहीत्येवमादिकाश्चित्रा विविधप्रकारिकाः वाचः आसन् स्म । अत्र दितिपुत्राधमेन दितिपुत्राभिधेन दितिजाभिधेनेति पाठत्रयम् । छन्दोभङ्गः ॥ ६ ॥ स इति ॥ स हिरण्याक्षः तं हरिमात्तरथाङ्गं गृहीतचक्रं निशाम्य दृष्ट्वा युद्धेऽपि श्रमाभावेन पद्मपलाशवत्प्र-सन्नं लोचनं यस्य तथाभूतमग्रतो व्यवस्थितं च विलोक्य अमर्षेण परिप्लुतानि व्याप्तानि मनश्चक्षुरादीनीन्द्रियाणि यस्य तथाभूतः अत एव रुषा श्वसन् श्वासान् विमुञ्चन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्य दन्तच्छदमोष्ठमासमन्तादृदशत् ॥ ७ ॥ करालेति ॥ कराला भयङ्करा दंष्ट्रा यस्य सोऽसुरः क्रोधयुक्ताभ्यां चक्षुर्भ्यां दहन्निव संचक्षाणः पश्यन् इदानीं हतोऽसीति वदन् वस्तुतः ज्ञातोऽसीति वदन् अभिप्लुत्य झटिति समीपमागत्य स्वगदया हरिमाहनत् शब्लुगभावः आर्षः॥ ८ ॥ पदेति॥हे साधो यज्ञसूकरः यज्ञावतारवराहमूर्तिर्भगवान् तत्प्रयुक्तां वातरंहसं वायुवेगां तामायान्तीमेव गदां शत्रोस्तस्य मिषतः पश्यत एव सतः सव्येन वामेन पदा लीलयानायासेनैव प्राहरत् भूमौ पातितवान् ॥९॥ आहेति ॥ तत आयुधमादत्स्व गृहाण घटस्व प्रयतस्व यतस्त्वं जिगीषसीत्याह स्म च । इत्येवं भगवतोक्तः सोऽसुरः तया पतितया पुनर्गृहीतया गदया भूयः पुनर्भगवन्तं ताडयन् भृशं व्यनदत्॥ १० ॥ तामिति ॥ तां तेन प्रयुक्तां गदामापततीमापतन्तीं नुमभाव आर्षः । वीक्ष्य स भगवान्सम्यक् संमुखमवस्थित एव प्राप्तां समीपमागतां पन्नगीं गरुत्मान् गरुड इव लीलयैव जग्राह ॥ ११ ॥ स्वेति ॥ एवं गदाग्रहणेन स्वपौरुषे स्वबले प्रतिहते सति हतः विगतः मानो गर्वो यस्य सः अत एव विगतप्रभः विनष्टतेजाः महासुरो हिरण्याक्षो हरिणा

करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव ॥ अभिप्लुत्य स्वगदया हतोऽसीत्याहनद्धरिम् ॥ ८ ॥ पदा सव्येन तां साधो भगवान् यज्ञसूकरः ॥
लीलया मिषतः शत्रोः प्राहरद्वातरंहसम् ॥ ९ ॥ आह चायुधमाधत्स्व घटस्व त्वं जिगीषसि ॥ इत्युक्तः स तदा भूयस्ताडयन्व्यनदद्भृशम्
॥ १० ॥ तां स आपततीं वीक्ष्य भगवान्समवस्थितः ॥ जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥ ११ ॥ स्वपौरुषे प्रतिहते हतमानो
महासुरः ॥ नैच्छद्गदां दीयमानां हरिणा विगतप्रभः ॥ १२ ॥ जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपम् ॥ यज्ञाय धृतरूपाय विप्रायाभिच-
रन्यथा ॥ १३ ॥ तदोजसा दैत्यमहाभटार्पितं चकासदन्तः ख उदीर्णदीधितम् ॥ चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झि-
तम् ॥ १४ ॥ वृक्णे स्वशूले बहुधाऽरिणा हरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत् ॥ प्रवृद्धरोषः स कठोरमुष्टिना नदन्प्रहृत्यान्तरधीयतासुरः॥१५॥

दीयमानामपि स्वगदां लज्जया नैच्छत् न जग्राह ॥ १२॥ जग्राहेति ॥ त्रिशिखं तिस्रः शिखा अग्रभागा यस्य तत् ज्वलन् यो ज्वलनोऽग्निस्तद्वल्लोलुपं स्वकार्यकरणव्यग्रं शूलं धृतवराहरूपाय यज्ञाय भगवते तं हन्तुं जग्राह प्राहिणोत् । यथा कश्चित् विप्राय विप्रं हन्तुम् अभिचरन् मरणफलकं यागं कुर्वन् भवति तथा॥ १३॥ तदिति ॥ दैत्यानां मध्ये महाभटेन महाशूरेण ओजसा बलेन अर्पितं प्रयुक्तम् अन्तः खे आकाशमध्ये चकासत् दीप्यमानम् उदीर्णा उद्गता दीधितिर्दीप्तिर्यस्य तत् त्रिशूलं हरिरिन्द्रो यथा तार्क्ष्यस्य गरुडस्य उज्झितं त्यक्तं पतत्रं पक्षं चिच्छेद तथा निशातनेमिना तीक्ष्णधारेण चक्रेण भगवान् चिच्छेद। पुरा खलु देवान्निर्जित्यामृतकलशं नयता गरुडेनेन्द्रप्रयुक्तस्य वज्रस्यामोघस्य मानं दातुं पतत्रमेकं त्यक्तं तच्चेन्द्रो वज्रेण चिच्छेदेतीतिहासोऽत्रानुसन्धेयः ॥ १४ ॥ वृक्णे इति ॥ अरिणा अराः सन्त्यस्येत्यारि चक्रं तेन स्वशूले बहुधा वृक्णे छिन्ने सति प्रवृद्धो रोषो यस्य सोऽसुरः नदन् प्रत्येत्याभिमुखमागत्य कठोरेण कठिनतरेण मुष्टिना विभूतिमत् लक्ष्म्याश्रयभूतं विस्तीर्णं हरेर्वाराहस्य उरः वक्षः प्रहृत्य प्रताड्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षाद्युद्धे स्वसामर्थ्याभावमवधार्य अन्तरधीयत अन्तर्हितवान् । " धीङ् धारणे " दिवादिः ॥ १५॥ तेनेति ॥ हे क्षत्तः तेनासुरेणेत्थं मुष्टिना आहतस्ताडितः आदिशूकररूपो भगवान् स्रजा पुष्पमालया हतो द्विपो गज इव मनाक् किंचिदपि नाकम्पत ॥ १६॥ अथेति ॥ अथान्तर्द्धानानन्तरं सोऽसुरः योगमायानामचिन्त्यशक्तीनामीश्वरे नियन्तरि हरौ उरुधा बहुधा धा आर्षः । मायामसृजत् । यां मायां विलोक्य त्रस्ताः प्रजाः अस्य विश्वस्य उपसंयमं प्रलयं मेनिरे ॥ १७ ॥ प्रववुरिति ॥ प्रचण्डाः प्रचण्डवेगाः दुस्पर्शाः वावः प्रववुः । पांसवं पांसुकृतं तमोन्धकारमैरयन् वायव एव प्रेरितवन्तः ग्रावाणः पाषाणाः क्षेपणैर्यन्त्रविशेषैः प्रहिताः प्रयुक्ता इव दिग्भ्यो निपेतुः ॥ १८ ॥ द्यौरिति ॥ पूयं केशान् असृक् विट् मूत्रं अस्थि चेत्यादीनि असकृत् पुनः पुनर्वर्षद्भिः सविद्युत्स्तनयित्नुभिः विद्युतस्तडितः स्तनयित्नवो गर्जितानि तत्सहितैर्मेघैर्नष्टो भगणो नक्षत्रगणो यस्यां तथाभूता द्यौरभूत् । अनेन दैत्यबलातिरेकाद्ब्रह्मदत्तमुहूर्त्तातिक्रमो गम्यते । अह्नि नक्षत्राणामसम्भवात् ॥ १९ ॥ गिरय इति ॥ हे अनघ गिरयः पर्वताः नानायुधमुचः नाना-

तेनेत्थमाहतः क्षत्तर्भगवानादिसूकरः ॥ नाकम्पत मनाक् क्वापि स्रजा हत इव द्विपः ॥ १६ ॥ अथोरुधा सृजन्मायां योगमायेश्वरे हरौ ॥ यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमम् ॥ १७ ॥ प्रववुर्वायवश्चण्डास्तमःपांसवमैरयन् ॥ दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव ॥ १८ ॥ द्यौर्नष्टभगणाऽभ्रौघैः सविद्युत्स्तनयित्नुभिः ॥ वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि चासकृत् ॥ १९ ॥ गिरयः प्रत्यदृश्यन्त नानायुधमुचोनघ ॥ दिग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्धजाः ॥ २० ॥ बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुञ्जरैः ॥ आततायिभिरुत्सृष्टा हिंस्रा वाचोऽतिवैशसाः ॥२१॥ प्रादुष्कृतानां मायानामासुरीणां विनाशयत् ॥ सुदर्शनास्त्रं भगवान् प्रायुङ्क्त दयितं त्रिपात् ॥ २२ ॥ तदा दितेः समभवत् सहसा हृदि वेपथुः ॥ स्मरन्त्या भर्तुरादेशं स्तनाच्चासृक् प्रसुस्रुवे ॥ २३ ॥

युधानि मुञ्चन्तः प्रत्यदृश्यन्त । दिग्वाससो नग्नाः शूलिन्यो मुक्तमूर्द्धजा यातुधान्यश्च प्रत्यदृश्यन्त ॥ २० ॥ बहुभिरिति ॥ आततायिभिः हिंसाशीलैर्बहुभिर्यक्षरक्षोभिः पत्तिभिश्च अश्वरथकुञ्जरैस्तदा रोहिभिश्च उत्सृष्टाः प्रयुक्ताः वैशसाः अत्युग्राः हिंस्राः क्रूराः छिन्धि भिन्धीत्येवंरूपा वाचः अश्रूयन्त ॥ २१ ॥ प्रादुष्कृतानामिति ॥ भगवान् त्रिपात् त्रीणि सवनानि पादा यस्येति त्रयोऽस्य पादा इति श्रुतेर्यज्ञमूर्तिः तपआदिपादयुक्तो धर्ममूर्त्तिर्वा । दैत्येन प्रादुष्कृतानामासुरीणां मायानां विनाशयत् विनाशयितुं शेषे षष्ठी हेतौ शता । विनाशनमिति पाठे चक्रविशेषणं दयितं स्वस्यातिप्रियं सुदर्शनास्त्रं प्रायुङ्क्त ॥ २२ ॥ तदेति ॥ भर्तुः कश्यपस्यादेशं त्वत्पुत्रं भगवानवतीर्य हनिष्यतीत्येवंभूतं स्मरन्त्या दितेर्हृदि सहसा अकस्मादेव वेपथुः प्रकम्पः समभवत् स्तनात् असृक् रुधिरं च प्रसुस्रुवे । तङार्षः । कर्मकर्त्तरि वा ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनष्टास्विति ॥ स्वमायासु विनष्टासु सतीषु स दैत्यः भूयः पुनराव्रज्य अभिमुखमागत्य रुषा केशवमुपगूहमानो बाह्वोरन्तरे निधाय संघट्टयन्नप्यमुं बहिर्बाहुमध्याद्बहिरवस्थितं ददृशे । तद्भर्षः॥२४॥ तमिति ॥ वज्रवत् सारं दार्ढ्यं येषां तैर्मुष्टिभिर्निघ्नन्तं तमधोक्षजो भगवान् करेण कर्णमूलेऽहन् । यथा मरुत्पतिरिन्द्रः त्वाष्ट्रं वृत्रं तथा॥२५॥ स इति॥ विश्वसृजा भगवता अवज्ञया उपेक्षयैव नतु बलेन हतः सन् परिभ्रमद्गात्रं यस्य उदस्ते बहिर्निर्गते लोचने यस्य विकीर्णाः विक्षिप्ताः बाह्वादयो यस्य स हिरण्याक्षःअपतत्। यथा नभस्वता वायुना लुलित उत्पाटितो नगेन्द्रो महाद्रुमः पतति तथा ॥२६॥ क्षिताविति॥ क्षितौ शयानं कराला दंष्ट्रा यस्य तं परितो दष्टो दच्छद ओष्ठो येन तं तथापिभगवत्स्पर्शा-दकुण्ठवर्चसमप्रतिहततेजस्कं तं तत्रागता अजादयः वीक्ष्याहो इमां संस्थितिं मृत्युं को नु लभेतेति शशंसुः॥२७॥ यमिति ॥ असतः आरोपिताल्लिङ्गात् लिङ्गशरीरात् मुमुक्षया आत्मानं मोक्तुमिच्छया योगसम्पन्नसमाधिना रहः एकान्ते यं भगवन्तं ध्यायन्ति तस्यैव पदा पादेन एष दैत्यऋषभः दैत्यश्रेष्ठो दैत्यापसद इति पाठे दैत्याधमः हतस्तस्य

विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवम् ॥ रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः ॥ २४ ॥ तं मुष्टिभिर्विनिघ्नन्तं वज्रसारैरधोक्षजः ॥ करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पतिः ॥ २५ ॥ स आहतो विश्वजिता ह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचनः ॥ विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतद् यथा नगेन्द्रो लुलितो नभस्वता ॥ २६ ॥ क्षितौ शयानं तमकुण्ठवर्चसं करालदंष्ट्रं परिदष्टदच्छदम् ॥ अजादयो वीक्ष्य शशंसुरागता अहो इमां को नु लभेत संस्थितिम् ॥ २७ ॥ यं योगिनो योगसमाधिना रहो ध्यायन्ति लिङ्गादसतो मुमुक्षया ॥ तस्यैष दैत्यापसदः पदाहतो मुखं प्रपश्यंस्तनुमु-त्ससर्ज ह ॥ २८ ॥ एतौ तौ पार्षदावस्य शापाद्यातावसद्गतिम् ॥ पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः ॥ २९ ॥ देवा ऊचुः ॥ नमो नमस्तेऽखिलयज्ञतन्तवे स्थितौ गृहीतामलसत्त्वमूर्तये ॥ दिष्ट्या हतोऽयं जगतामरुन्तुदस्त्वत्पादभक्त्या वयमीश निर्वृताः ॥ ३० ॥ मैत्रेय उवाच ॥ एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरिरादिसूकरः ॥ जगाम लोकं स्वमखण्डितोत्सवं समीडितः पुष्करविष्टरादिभिः ॥३१॥

मुखं प्रपश्यन् तनुं शरीरमुत्ससर्ज तत्याज । वराहस्य पूर्वपादयोरेव करत्वात् करेणाहन्निति पदाहत इति च न विरोधः ॥ २८ ॥ एताविति ॥ एतौ हिरण्याक्षहिरण्यकशिपू अस्य भगवतः तौ जयविजयाख्यौ पार्षदौ ब्राह्मणशापात् असद्गतिमसुरयोनिं यातौ पुनश्च कतिपयैर्जन्मभिः भगवतः स्थानं प्रपत्स्येते गमिष्यतः ॥ २९ ॥ नम इति ॥ अखिलयज्ञतन्तवे समस्तयज्ञप्रवर्त्तकाय स्थितौ जगद्रक्षणे निमित्ते गृहीता स्वेच्छोपात्ता अमला रजस्तमोभ्यामननुविद्धा सत्त्वमूर्तिर्येन तस्मै ते तुभ्यं नमो नमः। द्विरुक्तिरादरार्था। जगतां प्राणिनामरुंतुदः मर्मभेत्ता यमसुरो दिष्ट्या स्वदुष्टकर्मणा देवादिभाग्येन च हतः । हे ईश त्वत्पादयोर्भक्त्या सेवया वयं निर्वृताः शत्रुवधेन त्वया सुखिताः कृता इत्यर्थः ॥ ३० ॥ एवमिति ॥ असह्यविक्रमं दुर्धर्षपराक्रमं हिरण्याक्षं स आदिसूकरो भगवान् एवमुक्तप्रकारेण सादयित्वा निहत्य पुष्करविष्टरः कमलासनो ब्रह्मा तदादिभिर्देवैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समीडितः संस्तुतः सन् अखण्डितः अनन्त उत्सवो यस्मिंस्तं स्वं स्वीयं लोकं वैकुण्ठं जगाम ॥ ३१ ॥ मयेति ॥ हे सुमित्र यथा उदारविक्रमो महाबलपराक्रमो हिरण्याक्षो महामृधे हरिणा क्रीडनवत् मृद्रचितपुत्तिकावदनायासेन निराकृतो विनाशितस्तथा कृतावतारस्य धृतवराहरूपस्य हरेश्चेष्टितं चरितं यथानूक्तं गुरूक्तिमनतिक्रम्य मया ते तुभ्यमवादि कथितम् ॥ ३२ ॥ इतीति ॥ हे द्विज शौनक इत्युक्तप्रकारेण कौषारवेण मैत्रेयेण ख्यातां कथितां भगवतो वराहस्य कथां श्रुत्वा महाभागवतः क्षत्ता विदुरः परं महान्तमानन्दं लेभे ॥ ३३ ॥ अन्येषामिति ॥ पुण्यश्लोकानां पवित्रकीर्तीनामत एव उद्दामं सर्वतः प्रसृतं यशो येषां तेषामन्येषामपि सतां तद्भक्तानां कथामुपश्रुत्य मोद आनन्दो भवेत् श्रीवत्साङ्कस्य भगवतः कथामुपश्रुत्य मोदो भवेदिति किं पुनर्वक्तव्यम् ॥ ३४ ॥ य इति ॥ करेणूनां हस्तिनीनां क्रोशन्तीनां रुदतीनां सतीनां झषेण मकरेण ग्रस्तं चरणाम्बुजं ध्यायन्तं गजेन्द्रं कृच्छ्रतस्तद्व्यसनदुःखात् द्रुतं शीघ्रममोचयत् ॥ ३५ ॥ तमिति ॥ ऋजुभिर्निष्कपटैः अनन्यशरणैर्नृभिरेकान्तभक्तैः सुखाराध्यमपि

मया यथाऽनूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितम् ॥ यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः ॥ ३२ ॥ सूत उवाच ॥ इति कौषारवाख्यातामाश्रुत्य भगवत्कथाम् ॥ क्षत्तानन्दं परं लेभे महाभागवतो द्विज ॥ ३३ ॥ अन्येषां पुण्यश्लोकानामुद्दामयशसां सताम् ॥ उपश्रुत्य भवेन्मोदः श्रीवत्साङ्कस्य किं पुनः ॥ ३४ ॥ यो गजेन्द्रं झषग्रस्तं ध्यायन्तं चरणाम्बुजम् ॥ क्रोशन्तीनां करेणूनां कृच्छ्रतोऽमोचयद् द्रुतम् ॥३५॥ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः ॥ कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः॥३६॥यो वै हिरण्याक्षवधे महाऽद्भुतं विक्रीडितं कारणसूकरात्मनः ॥ शृणोति गायत्यनुमोदतेऽञ्जसा विमुच्यते ब्रह्मवधादपि द्विजाः ॥ ३७ ॥ एतन्महापुण्यमलं पवित्रं धन्यं यशस्यं पदमायुराशिषाम् ॥ प्राणेन्द्रियाणां युधि शौर्यवर्धनं नारायणोन्ते गतिरङ्ग शृण्वताम् ॥ ३८ ॥

इति श्रीभागवते तृतीयस्कन्धे हिरण्याक्षवधवर्णनं नाम एकोनविंशोऽध्यायः ॥ १९ ॥

असाधुभिः दुराराध्यं तं हरिं कृतज्ञः को न सेवेत ॥ ३६ ॥ यो वा इति ॥ हे द्विजाः कारणेन दैत्यवधादिहेतुना सूकरात्मनः धृतवराहरूपस्य भगवतो विक्रीडितं क्रीडारूपं हिरण्याक्षवधं यो वै य एव प्राणी शृणोति गायति कीर्तयति श्रुत्वानुमोदते च सः अञ्जसा प्रायश्चित्तान्तरप्रयासमन्तरेणैव ब्रह्मवधात् अपि विमुच्यते ॥ ३७ ॥ एतदिति ॥ अलं पवित्रं एतद्भगवच्चरितं शृण्वतामिति कीर्त्तनादि कुर्वतामप्युपलक्षणम् । महापुण्यं धन्यं धनकरं यशस्यं यशस्करमायुषः आशिषां सर्वमनोरथानां च पदं सम्पादकं युधि युद्धे प्राणेन्द्रियाणां शौर्यस्य सामर्थ्यस्य वर्द्धनमन्ते प्रारब्धसमाप्तौ नारायणो गतिः फलतया प्राप्तो भवति ॥ ३८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्तृतीयस्योनविंशके ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशे विद्यायक्षरक्षःसुरादेः सृष्टिरीर्यते ॥ वंशे वक्तुं मनोरत्र श्लोकाः सार्द्धास्त्रिमार्गणाः ॥ चत्वार्युवाचेत्यङ्घ्रूनाः पञ्चबाणा अनुष्टुभः ॥२०॥ महीमिति ॥ हे सौते सूतस्य रोमहर्षणस्य पुत्र स्वायंभुवो मनुः प्रतिष्ठां सर्वजनस्थानभूतां महीमध्यस्य प्राप्य अवरं सनकाद्यपेक्षयाऽर्वाचीनं जन्म येषां जीवानामीश्वरे लीनानां मार्गाय ततो निर्गमाय कानि द्वाराण्यन्वतिष्ठत् कृतवान् । अर्वाचीनान् प्राणिनः कैरुपायैः सृष्टवान् इत्यर्थः ॥१॥ क्षत्तेति त्रयम् ॥ श्रीकृष्णोक्तमन्त्रानङ्गीकारात्तद्भक्तपाण्डवप्रतिपक्षित्वाच्च श्रीकृष्णे अघवान् कृतापराध इति हेतोः सापत्यं दुर्योधनादिभिरपत्यैः सहितमग्रजं धृतराष्ट्रं यो विदुर यस्तत्याज स महाभागवतः कृष्णस्यैकान्तिकः परमस्नेहविषयः सुहृच्च महित्वे ज्ञानवैराग्यभक्त्यादिभिर्माहिम्नि द्वैपायनाद्वेदव्यासादनवरः अन्यूनः तस्य व्यासस्य देहजः पुत्रः सर्वात्मना सर्वभावेन श्रीकृष्णमेवाश्रितः तत्परान् श्रीकृष्णभक्तांश्चाप्यनुव्रतः सेवमानः तीर्थसेवया विरजाः निर्मलः क्षत्ता विदुरः कुशावर्ते गङ्गाद्वार आसीनं तत्त्ववित्तमं तत्वज्ञेष्वप्यतिश्रेष्ठं मैत्रेयमुपगम्य किमन्वपृच्छत् ॥ २ ॥ ३ ॥ ४ ॥ तयोरिति ॥ हे

शौनक उवाच ॥ महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः ॥ कान्यऽन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनाम् ॥ १ ॥ क्षत्ता महाभागवतः कृष्णस्यैकान्तिकः सुहृत् ॥ यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति ॥ २ ॥ द्वैपायनादनवरो महित्वे तस्य देहजः ॥ सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः ॥ ३ ॥ किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया ॥ उपगम्य कुशावर्त आसीनं तत्त्ववित्तमम् ॥ ४ ॥ तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः ॥ आपो गाङ्गा इवाघघ्नीर्हरेः पादाम्बुजाश्रयाः ॥ ५ ॥ ता नः कीर्तय भद्रं ते कीर्तन्योदारकर्मणः ॥ रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन् ॥ ६ ॥ एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिशायनैः ॥ भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ॥ ७ ॥ सूत उवाच ॥ हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात् ॥ लीलां हिरण्याक्षमवज्ञया हतं सञ्जातहर्षो मुनिमाह भारतः ॥ ८ ॥

सूत तयोर्विदुरमैत्रेययोः संवदतोः संवादं कुर्वतोः सतोर्हरेः पादाम्बुजाश्रयाः अत एव अमलाः सर्वदोषनिवर्तिका अघघ्नीः अघघ्न्यः पूर्वसवर्णदीर्घ आर्षः।गाङ्गाः गङ्गासम्बन्धिन्यः अणणन्ताट्टाप् आर्षः । आप इव अमलाः कथाः हि अवश्यं प्रवृत्ताः ॥ ५ ॥ ता इति ॥ हे सूत ते तव भद्रं भवतु कीर्त्तन्यानि कीर्त्तनार्हाणि उदाराणि महान्ति कर्माणि यस्य तस्य ताः कथाः नोऽस्मान्प्रति कीर्त्तय यतः रसज्ञो जनः हरिलीलामृतं पिबन् हरिलीलाः शृण्वन् को नु तृप्येत । तङार्षः ॥६ ॥ एवमिति ॥ व्यासोक्तिः भगवत्यर्पितमध्यात्मं मनो येन सः उग्रश्रवाः सूतः नैमिषमयनं तेषां तै ऋषिभिरेवं पृष्टस्तान् ऋषीन् प्रति भवत्पृष्टं कथयामि श्रूयतामित्याह स्म ॥७॥ हरेरिति ॥ स्वमायया धृता क्रोडतनुर्वाराहमूर्तिर्येन तस्य हरे रसातलाद्गोः पृथ्व्या उद्धरणम् । तथा अवज्ञया अनायासेनैव तेन हिरण्याक्षं हतं चेति तद्द्वयरूपां च लीलां निशम्य सञ्जातो हर्षो यस्य स भारतो विदुरो मुनिं मैत्रेयमाह स्म पुनः पप्रच्छ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजेति ॥ हे ब्रह्मन् मैत्रेय प्रजापतीनां पतिः ब्रह्मा प्रजासर्गे निमित्ते प्रजापतीन् मरीच्यादीन् सृष्ट्वा स्वयं किमारभत किं कृतवान् अव्यक्तस्य भगवतो मार्गं वेत्तीति तादृशः त्वं यद्वा इदं ब्रह्मणो विशेषणं तन्मे ब्रूहि ॥९॥ य इति ॥ ये मरीच्यादयो विप्राः यस्तु क्षत्रियः स्वायंभुवो मनुः ते वै तेऽपि ब्रह्मण आदेशात् आज्ञात एतत् जगत् कथमभावयन् उत्पादयामासुः ॥१०॥ सद्वितीया इति ॥ किं सद्वितीयाः सभार्याः इदं विश्वमसृजन् उत अथवा कर्मसु प्रजासर्गादिषु स्वतन्त्राः भार्यानिरपेक्षा एव जाताः आहोस्वित् अथ वा सर्वे संहता मिलिताः सन्त इदं समकल्पयन् स्म ॥ ११ ॥ ब्रह्मा किमारभतेति प्रश्नस्य यक्षादीन् सृष्टवान् इत्युत्तरं वक्तुं पूर्वोक्तां सृष्टिमनुस्मारयति—दैवेनेति ॥ मन्वादि-प्रश्नानां तूत्तराध्यायमारभ्योन्तरं भविष्यति दुर्वितर्क्येण दैवेन जीवादृष्टेन परेण प्रकृत्यधिष्ठात्रा महापुरुषेण अनिमिषेण सदा सावधानेन कालेन च जातः क्षोभः साम्यावस्था-त्यागलक्षणं वैषम्यं यस्य तथाभूतं यत् भगवतो गुणत्रयात्मकं प्रधानं तस्मात् महान् आसीत् जातः ॥ १२ ॥ रज इति ॥ स्वतः सत्त्वप्रधानस्यापि महतः कार्योत्पत्तिकाले

विदुर उवाच ॥ प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् ॥ किमारभत मे ब्रह्मंस्तद् ब्रूह्यऽव्यक्तमार्गवित् ॥ ९ ॥ ये मरीच्यादयो विप्रा यस्तु स्वायम्भुवो मनुः ॥ ते वै ब्रह्मण आदेशात्कथमेतदभावयन् ॥ १० ॥ सद्वितीयाः किमसृजन्स्वतन्त्रा उत कर्मसु ॥ आहोस्वित्संहताः सर्व इदं स्म समकल्पयन् ॥ ११ ॥ मैत्रेय उवाच ॥ दैवेन दुर्वितर्क्येण परेणाऽनिमिषेण च ॥ जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ॥ १२ ॥ रजः-प्रधानान्महतस्त्रिलिङ्गो दैवचोदितात् ॥ जातः ससर्ज भूतादिर्वियदादीनि पञ्चशः ॥ १३ ॥ तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकम् ॥ संहत्य दैवयोगेन हैममण्डमवासृजन् ॥ १४ ॥ सोऽशयिष्टाब्धिसलिले आण्डकोशो निरात्मकः ॥ साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः ॥ १५ ॥ तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति ॥ सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् ॥ १६ ॥

कार्यानुरूपं रजःप्रधानत्वं सूत्रात्मत्वं जातं तस्माद्दैवचोदिताद्भगवत्प्रेरितात्सूत्रात्मसंज्ञान्महतः त्रिलिङ्गस्त्रिगुणो भूतादिरहङ्कारो जातः । स च वियदादीनि पञ्चशः शब्दादितन्मा-त्राणि वियदादिमहाभूतानि चक्षुरादिज्ञानेन्द्रियाणि वागादिकर्मेन्द्रियाणि तत्तद्देवताश्चेत्येवं पञ्च पञ्च ससर्ज वीप्सायां शस् ॥ १३ ॥ तानीति ॥ तानि च वियदादीनि एकैकश-प्रत्येकं भौतिकं पञ्चमहाभूतानां मिलितानां कार्यमण्डं स्रष्टुमसमर्थानि सन्ति दैवयोगेन भगवदनुप्रवेशेन संहत्य मिलित्वा हैमं हेमकार्यवत्प्रकाशबहुलमण्डमवासृजन् ससृजुः ॥१४॥ स इति ॥ स आण्डकोशो निरात्मकः अचेतनस्तत्रत्यसमष्टिजीवस्यानुद्बोधात् साग्रं किंचिदधिकं साग्रशब्दः संपूर्णवाची वा । संपूर्णं वर्षसाहस्रमब्धिसलिले कारणार्णवोदकेऽशयिष्ट अवात्सीत् । अनु तदनन्तरं तमाण्डकोशमीश्वरो महत्स्रष्टा गर्भोदशायिरूपेणाऽवात्सीत् अधिष्ठितवान् ॥ १५ ॥ तस्येति ॥ तस्य नारायणस्य नाभेः सकाशात् सहस्रार्काणामिवोरुः अधिका दीधितिर्दीप्तिर्यस्य तत् तथा सर्वेषां जीवनिकायानां जीवसमूहानामोकः स्थानभूतं पद्ममभूत् । यत्र पद्मे स्वराट् ब्रह्मा स्वयमभूत् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ यः सलिलाशये सलिलं गर्भोदकमेवाशयो गृहं तस्मिन् शेते नारायणस्तेन भगवतानुविष्टः अधिष्ठितः प्रेरितः सन् स ब्रह्मा स्वया संस्थया नामरूपगुणादिव्यवस्थया यथा पूर्वं पूर्वकल्पे यथा आसीत्तथा लोकसंस्थां लोकरचनां निर्ममे कृतवान् ॥ १७ ॥ स्रष्टव्येषु यक्षादिषु जीवानामहङ्कारोऽविद्यया विना न संभवतीति प्रथममविद्यावृत्तीराह—ससर्जेति ॥ स ब्रह्मा अग्रतः प्रथमं छायया प्रभाप्रतियोगिन्या तमोरूपया अबुद्ध्या यस्त्वबुद्धिकृतः प्रभोरित्युक्तत्वात् देहच्छायया वा पञ्च पर्वाणि भेदाः यस्यास्तां पञ्चभेदामविद्यां ससर्ज । ते पञ्च भेदास्तु तामिस्रम् अन्धतामिस्रं तमः मोहः महातमः महामोह इति ज्ञेयाः इति शेषः । एत एव अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशा उच्यन्ते । एतेषां विवरणं द्वादशेऽध्याये ससर्जाग्रेन्धतामिस्रमित्यत्रोक्तम् ॥ १८ ॥ केनचिद्विशेषेणासाधारणां सृष्टिमाह—विससर्जेति ॥ येन कायेन छायाद्वारा अविद्यां सृष्टवान् तत्तमोमयम् आत्मनः कायं नाभिनन्दन् सृष्ट्यारम्भे तमसैवावृतोऽभूवमिति असन्तुष्यन् विससर्ज त्यक्तवान् । द्विपरार्द्धायुषस्तस्य देहत्यागो नाम तदभिमानत्यागः ग्रहणं च तत्तद्भावापत्तिरिति । यद्वा । तत्तत्सृष्ट्यर्थं योगिवच्छरीरत्यागे तद्ग्रहणे चापि भोगस्य तावद्विद्यमानत्वान्नानुपपत्तिरिति ज्ञेयम् । तद्विसृष्टः कायो

सोऽनुविष्टो भगवता यः शेते सलिलाशये ॥ लोकसंस्थां यथा पूर्वं निर्ममे संस्थया स्वया ॥ १७ ॥ ससर्ज च्छायायाऽविद्यां पञ्चपर्वाणमग्रतः ॥ तामिस्रमन्धतामिस्रं तमो मोहो महातमः ॥ १८ ॥ विससर्जात्मनः कायं नाभिनन्दंस्तमोमयम् ॥ जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवाम् ॥ १९ ॥ क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः ॥ मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ॥ २० ॥ देवस्तानाह संविग्नो मा मां जक्षत रक्षत ॥ अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ ॥ २१ ॥

रात्रिरभूत् तां च तद्विसृष्टां क्षुत्तृषोः समुद्भवो यस्यां तां रात्रिरूपां तनुं तत एव तदानीमेव जातानि यक्षरक्षांसि जगृहुः । एतेन अविद्याधर्मावावरणविक्षेपौ यक्षरक्षसामत्यधिकाविति विवक्षितम् । अत्र च या अस्य सा तनूरासीत्तामपाहत सा तमिस्राभवदित्यादिश्रुतिरनुसन्धेया ॥ १९ ॥ क्षुत्तृड्भ्यामिति ॥ ततश्च क्षुत्तृड्भ्यामुपसृष्टा अभिभूतास्ते यक्षा राक्षसाश्च तं ब्रह्माणं प्रजग्धुं भक्षयितुम् अभितो दुद्रुवुः ततश्च क्षुत्तृडर्दिताः ते अत एनं पितेति बुद्ध्या मा रक्षतेत्येके परस्परमूचुः। अन्ये तु जक्षध्वं भक्षयत इत्येवमूचुः। तङार्षः ॥ २० ॥ देव इति ॥ देवो ब्रह्मा संविग्नो भीतः सन् हे यक्षरक्षांसि यतो यूयं मे प्रजाः सुता बभूविथ अभूत एकत्वमार्षम् । अतो मां मा जक्षत मा जक्षित इडभावः शवलुक् चार्षः । किंतु रक्षतेति तान् प्रत्याह स्म । एवमुग्रस्वभावाः यक्षराक्षसाः ब्रह्मणस्तमःस्वभावाज्जाताः ये जक्षध्वमित्यूचुस्ते यक्षाः ये मा रक्षतेति ते राक्षसा इत्यूह्यम् । एतत्तिर्यगादितामससर्गस्याऽप्युपलक्षणम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामसीमुक्त्वा सात्विकीं सृष्टिमाह—देवता इति ॥ या याः देवताः द्युतिमत्यः सात्विक्यः सात्त्विक्या स्वप्रभयाऽदीव्यन् द्योतमानाः अभूवन् तास्ताः कर्मभूताः प्रमुखतः प्राधान्येनाऽसृजत् । यद्वा । स्वप्रभया दीव्यन् द्योतमानो ब्रह्मा या याः देवताः कर्माणि असृजत् ते देवाः देवयन्तः क्रीडयन्तः क्रीडयितुं हेतौ शता । तां ब्रह्मणा विसृष्टाम् अहः दिवसरूपां प्रभामहारिषुः अहार्षुर्जगृहुः आर्षः । अत्र ब्रह्मणो मनसि सत्वांशः प्रसाद आविरभूत् ततो देवा बभूवुः । स च प्रसादो दिनं बभूव तच्च ते जगृहुरित्येतावानाशयः ॥ २२ ॥ देवता इति स्त्रीत्वेन निर्दिष्टानामप्यर्थमात्रविवक्षया ते इति पुंस्त्वेन प्रतिनिर्देशः । एवं यक्षरक्षांसीत्यत्रापि ज्ञेयम् । ब्रह्मणो मनसि राजसः कामोऽभूत्ततः असुराः जाताः । स च कामः सन्ध्याभूत् तां चासुरा जगृहुरित्याह—देव इति ॥ देवो ब्रह्मा जघनतः कटिमारभ्य जानुपर्यन्तो जघनः तस्मात् अतिलोलुपान् कामप्रदेशजातत्वेन स्त्रीष्वतिलम्पटान् अदेवान् असुरान् सृजति स्म असृजत् । अतस्ते लोलुपतया एनं ब्रह्माणमेव मैथुनाय अभिपेदिरे प्राप्ताः ॥ २३ ॥ तत इति ॥ स भगवान्

देवताः प्रभया या या दीव्यन्प्रमुखतोऽसृजत् ॥ तेऽहारिषुर्देवयन्तो विसृष्टां तां प्रभामहः ॥ २२॥ देवोऽदेवाञ्जघनतः सृजति स्मातिलोलुपान् ॥
त एनं लोलुपतया मैथुनायाभिपेदिरे ॥२३॥ ततो हसन्स भगवानसुरैर्निरपत्रपैः ॥ अन्वीयमानस्तरसा क्रुद्धो भीतः पराऽपतत् ॥२४॥ स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिम् ॥ अनुग्रहाय भक्तानामनुरूपात्मदर्शनम् ॥ २५ ॥ पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः ॥ ता इमा यभितुं पापा उपाक्रामन्ति मां प्रभो ॥ २६ ॥ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः ॥ त्वमेकः क्लेशदस्तेषामनासन्नपदां तव ॥ २७ ॥ सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः ॥ विमुञ्चात्मतनुं घोरामित्युक्तो विमुमोच ह ॥ २८ ॥ तां क्वणच्चरणाम्भोजां मदविह्वललोचनाम् ॥ काञ्चीकलापविलसद्दुकूलच्छन्नरोधसम् ॥ २९ ॥

ब्रह्मा तेषां कामचेष्टां दृष्ट्वा हसन् जातः । ततश्च निरपत्रपैर्निर्लज्जैस्तैरसुरैरन्वीयमानः हठादनुगम्यमानस्तन्निवृत्त्यर्थं क्रुद्धो जातस्ततोऽपि निवृत्तिमदृष्ट्वा भीतः संस्तरसा वेगेन परापतत् पलायत ॥ २४ ॥ स इति ॥ स ब्रह्मा वरदं प्रपन्नानामार्तिहरं भक्तानामनुग्रहाय तदिच्छानुरूपमेवात्मानं दर्शयतीति तथा तं हरिम् उपव्रज्य गत्वा प्रार्थितवान् इति शेषः ॥ २५ ॥ पाहीति ॥ हे परमात्मन् हे प्रभो ते तव प्रेषणेन प्रेरणयाहं प्रजाः असृजं ता इमाः पापाः पापिष्ठाः प्रजाः मामेव यभितुं मैथुनेन धर्षयितुम् । इडार्षः । उपाक्रामन्ति अनुगच्छन्ति अतस्ताभ्यो मां पाहि ॥ २६ ॥ त्वामिति ॥ क्लिष्टानां लोकानां क्लेशनाशनस्त्वमेक एव तवानासन्नौ अनाश्रितौ पादौ यैस्तेषां त्वद्विमुखानां क्लेशदोऽपि किल त्वमेक एव ॥ २७ ॥ स इति ॥ विविक्तमसंदिग्धमध्यात्मदर्शनं परचित्तज्ञानं यस्य सः भगवान् अस्य ब्रह्मणः कार्पण्यं दैन्यमवधार्य निश्चित्य घोरां कामकश्मलामात्मनः स्वस्य तनुं विमुञ्चेत्युक्तवान् इत्येवमुक्तो ब्रह्मा तां तनुं विमुमोच ॥ २८ ॥ मत्वा मूढधियः स्त्रियमित्यग्रिमोक्तेः तां सन्ध्यामेव स्त्रियं कल्पयित्वा स्त्रीलम्पटा असुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुमुहुरित्याह–तामिति त्रयम् ॥ हे धर्म विदुर नूपुराभ्यां क्वणन्ती चरणाम्भोजे यस्यास्तां मदेन विह्वले लोचने यस्यास्तां काञ्चीकलापेन विलसत् यद्दुकूलं तेनाच्छन्नं रोधः कटितटं यस्यास्तां नभसि सशब्दमुड्डीनाः पक्षिण एव नूपुरकाञ्च्यादयः सन्ध्यारुण्यमेवारुणदुकूलम् अन्योन्याश्लेषया उपमर्देन हेतुना उत्तुङ्गौ निरन्तरौ अन्तरालरहितौ पयोधरौ यस्यास्तां श्लेषयेति भिदादिकल्पनयाङ् ततष्टाप् ङित्यपि गुण आर्षः। सुपां सुलुगिति टाप्रत्ययस्य यादेशो वा। अत्र तत्तदाकारा मेघखण्डा एव करचरणस्तनादयः सुष्ठु नासा यस्यास्तां सुद्विजां सुदतीं स्निग्धः स्नेहपूर्वको हासो लीलावलोकनं कटाक्षनिरीक्षणं च यस्यास्तां व्रीडया लज्जयात्मानं देहं गूहन्तीं वस्त्राञ्चलेनावृण्वानां नीलानामलकानां वरूथः स्तोमो विद्यते यस्यास्ताम् अन्तरा छिद्रोत्थौ यत्किंचित्सूर्यप्रकाशावेव हासावलोकने कदाचित्तत्तन्मेघखण्डान्तर्द्धानं लज्जया निगूहनम् ऊर्द्ध्वतस्तलपर्यन्तपतितदीर्घश्याममेघखण्डाः नीलालकाः ब्रह्मणा विसृष्टां तनुं स्त्रियं स्त्रीरूपामुपलभ्य दृष्ट्वा सर्वे सुराः सम्मुमुहुः ॥ २९ ॥ ३० ॥ ३१ ॥ अहो इति ॥ अस्याः स्त्रिय

अन्योऽन्याश्लेषयोत्तुङ्गनिरन्तरपयोधराम् ॥ सुनासां सुद्विजां स्निग्धहासलीलाऽवलोकनाम् ॥ ३० ॥ गूहन्तीं व्रीडयात्मानं नीलालकवरूथिनीम् ॥ उपलभ्यासुरा धर्म सर्वे संमुमुहुः स्त्रियम् ॥ ३१ ॥ अहो धैर्यमहो रूपमहो अस्या नवं वयः ॥ मध्ये कामयमानानामकामेव विसर्पति ॥ ३२ ॥ वितर्कयन्तो बहुधा तां संध्यां प्रमदाकृतिम् ॥ अभिसंभाव्य विश्रम्भात्पर्यपृच्छन्कुमेधसः ॥ ३३ ॥ कासि कस्यासि रम्भोरु को वाऽर्थस्तेऽत्र भामिनि ॥ रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ॥ ३४ ॥ या वा काचित्त्वमबले दिष्ट्या संदर्शनं तव ॥ उत्सुनोषीक्षमाणानां कन्दुकक्रीडया मनः ॥ ३५ ॥ नैकत्र ते जयति शालिनि पादपद्मं घ्नन्त्या मुहुः करतलेन पतत्पतङ्गम् ॥ मध्यं विषीदति बृहत्स्तनभारभीतं शान्तेव दृष्टिरमला सुशिखासमूहः ॥ ३६ ॥

अहो आश्चर्यं रूपं सौन्दर्यम् अहो नवं नवीनं वयः अहो धैर्यं यतः कामयमानानामस्माकं मध्य इयमकामेव विसर्पति विचरतीति स्त्रीत्वात्कामस्त्वस्ति इतीवशब्दः ॥ ३२ ॥ वितर्कयन्त इति ॥ विश्रम्भात् अस्मान् स्वीकरिष्यतीति विश्वासात् तां प्रमदाकृतिं सन्ध्यामभिसंभाव्य कुशलप्रश्नादिना सत्कृत्य बहुधा वितर्कयन्तः कुमेधसः असुराः पर्यपृच्छन्। असिजार्षः ॥ ३३ ॥ कासीति ॥ हे रम्भोरु हे भामिनि त्वं का किंजातीयासि कस्य भार्यादिः असि अत्रागमने ते तव को वाऽर्थः प्रयोजनं रूपमेव द्रविणमनर्घ्यं वस्तु तदेव पण्यं क्रयार्हं तेन तत्प्रदर्शनेन दुर्भगान् तन्मूल्यदाने असमर्थान् दरिद्रान्नोऽस्मान् विबाधसे कामोद्दीपनेन पीडयसि ॥ ३४ ॥ या वेति ॥ हे अबले किं जात्यादिप्रश्नेन या वा काचित्त्वं भव तव संदर्शनं तु दिष्ट्या अस्मद्भाग्येनैव जातं परंतु ईक्षमाणानामस्माकं मनः कन्दुकक्रीडया उत्सुनोषि कामोद्दीपनेन विमथ्नासि अस्तं गच्छन् चञ्चलः सूर्य एव कन्दुकः ॥ ३५ ॥ नैकत्रेति ॥ हे शालिनि शोभने पतत्पतङ्गमुच्चलन्तं कन्दुकं मुहुर्वारंवारं करतलेन घ्नन्त्याः नुमार्षः। ते तव पादपद्मम् एकत्र न जयति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न तिष्ठति । यद्वा । नैकत्र अनेकगतिविलासेषु जयति सर्वोत्कर्षेण वर्त्तते । बृहतोः स्तनयोर्भाराद्भीतं तव कृशं मध्यमुदरं विषीदति श्राम्यति । अमला क्रोधादिविकाररहिता तव दृष्टिः शान्ता मन्थरेव प्रसरति । सुशिखासमूहः शोभनः केशकलापश्चास्ते सुशिखाः समूहेति पाठे तु शोभनान् केशान् अवकीर्यमाणान् समूहवधानेत्यर्थः । मेघविच्छेदो मध्यविपादः तारकारूपा दृष्टिः तम एव केशा इत्याद्यूह्यम् ॥ ३६ ॥ इतीति ॥ इत्येवं वदन्तो मूढधियः भ्रान्तचित्ता असुराः प्रमदायतीं प्रमदावदाचरन्तीं क्यङन्ताच्छतानुमभावश्चार्षः । कामोद्दीपनेन प्रलोभयन्तीं सायन्तनीं सन्ध्यां स्त्रियं मत्वा जगृहुः ॥ ३७ ॥ ब्रह्मणो यदा सौन्दर्यं स्मृत्यारूढमभूत् तदा तस्माद्गन्धर्वादयोऽभूवन् सौन्दर्यं च ज्योत्स्नाभूतां च ते जगृहुरित्याह—प्रहस्येति ॥ भावेनाभिप्रायेण गम्भीरं दुरवगाहं यथा स्यात् तथा प्रहस्य आत्मना स्वयमेवात्मानं जिघ्रन्त्या कान्तिकान्तिमतोरैक्योपचारात् कान्त्या सौन्दर्येण भगवान् ब्रह्मा गन्धर्वाप्सरसां गणान् ससर्ज । प्रहसनमात्मावघ्राणं च सौन्दर्यानुभवचातुर्यविकारः ॥ ३८ ॥ विससर्जेति ॥ तां चैतामपि कान्तिमतीं सौन्दर्ययुक्तामत एव प्रियां तनुं विससर्ज त्यक्तवान् । तां च त्यक्तां ज्योत्स्नां चन्द्रिकाभूतां तनुं त एव विश्वावसुः पुरोगमो मुख्यो येषु ते गन्धर्वादयः

इति सायंतनीं संध्यामसुराः प्रमदायतीम् ॥ प्रलोभयन्तीं जगृहुर्मत्वा मूढधियस्त्रियम् ॥ ३७ ॥ प्रहस्य भावगम्भीरं जिघ्रन्त्यात्मानमात्मना ॥ कान्त्या ससर्ज भगवान् गन्धर्वाप्सरसां गणान् ॥३८॥ विससर्ज तनुं तां वै ज्योत्स्नां कान्तिमतीं प्रियाम् ॥ त एव चाददुः प्रीत्या विश्वावसुपुरोगमाः ॥३९॥ सृष्ट्वा भूतपिशाचांश्च भगवानात्मतन्द्रिणा ॥ दिग्वाससो मुक्तकेशान्वीक्ष्य चामीलयद् दृशौ ॥ ४० ॥ जगृहुस्तद्विसृष्टां तां जृम्भणाख्यां तनुं प्रभोः ॥ निद्रामिन्द्रियविक्लेदो यया भूतेषु दृश्यते ॥ येनोच्छिष्टान्धर्षयन्ति तमुन्मादं प्रचक्षते ॥ ४१ ॥ ऊर्जस्वन्तं मन्यमान आत्मानं भगवानजः ॥ साध्यान्गणान्पितृगणान्परोऽक्षेणाऽसृजत्प्रभुः ॥ ४२ ॥

प्रीत्या आददुः गृहीतवन्तः । तङ्भाव आर्षः ॥ ३९ ॥ कदाचिद्ब्रह्मण आलस्यमभूत् तस्माच्च भूतपिशाचाद्या बभूवुः तच्चालस्यं जृम्भादिरूपमभूत् तच्च त एव जगृहुरित्याह—सृष्ट्वेति ॥ आत्मनस्तन्द्रिणा आलस्येन पुंस्त्वमार्षम् । भगवान् ब्रह्मा भूतपिशाचांश्च सृष्ट्वा तान् दिग्वाससो नग्नान् मुक्तकेशांश्च वीक्ष्य दृशौ नेत्रे न्यमीलयत् ॥ ४० ॥ जगृहुरिति सार्द्धम् ॥ तां च तेन विसृष्टां प्रभोर्ब्रह्मणः जृम्भणाख्यां तनुं ततो जाता भूतप्रेतादयो जगृहुः । तस्या एव आलस्यं जृम्भणं निद्रा उन्माद इति चतुर्विधभेदो द्रष्टव्यः । यया इन्द्रियाणां विक्लेदो वैवश्यं भूतेषु दृश्यते तां निद्रां प्रचक्षते । येन दोषविशेषेण उच्छिष्टान् मलमूत्रादिसंयुक्तान् प्राणिनः भूतादयो धर्षयन्ति भ्रान्तान् कुर्वन्ति तं धर्षमुन्मादं प्रचक्षते अतः प्रेतादिधर्षिता उन्मत्ता उच्यन्ते ॥ ४१ ॥ कदाचिदात्मनो बलिष्ठत्वं पारोक्ष्यञ्च भावयामास ताभ्यां साध्याः पितरश्च बभूवुः ते च हव्यकव्ये बभूवतुरित्याह—ऊर्जस्वन्तमिति ॥ भगवान् प्रभुः अजः ब्रह्मा आत्मानमूर्जस्वन्तं बलवन्तं मन्यमानः परोक्षेण अदृश्यरूपेण साध्यान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गणान् पितृगणांश्चासृजत् ॥ ४२ ॥ त इति ॥ ते तु साध्याः पितरश्च आत्मनां सर्गो यस्मात्तं ब्रह्मणा सृष्टं कायं हव्यकव्यान्नरूपं प्रतिपेदिरे जगृहुः । यत् येन सम्प्रदानत्व-निमित्तेन कायेन कवयः कर्मकोविदाः साध्येभ्यः पितृभ्यश्च वितन्वते श्राद्धादिना हव्यं कव्यं च ददति ॥४३॥ अन्तर्द्धानं भावयामास तस्माच्च सिद्धविद्याधरा बभूवुरित्याह–सिद्धानिति ॥ स ब्रह्मा तिरोधानेन दृश्यत्वे सत्यप्यन्तर्द्धानशक्त्या सिद्धान् विद्याधरांश्च देवविशेषान् असृजत् । तेभ्यः सिद्धादिभ्योन्तर्द्धानाख्यमद्भुतमात्मानं शरीरमदात्॥४४॥ आत्मनः प्रतिबिम्बं भावयामास तस्माच्च किन्नरकिंपुरुषा बभूवुरित्याह–स किन्नरानिति ॥ प्रभुर्ब्रह्मा आत्माभासं प्रतिबिम्बं दर्पणं वा विलोकयन् प्रतिबिम्बसौन्दर्यदर्शनेन अहं सुन्दर इत्यात्मनैवात्मानं सुन्दरं मानयन् प्रत्यात्म्येन तेन प्रतिबिम्बेन सकिन्नरान् किंनरसहितान् किंपुरुषान् असृजत् । आत्मना आत्मनो माननं च सुन्दरस्य प्रतिबिम्बदर्शिनः शिरःकम्पादिचेष्टाः अत एव तत्सृष्टानां मिथः संमाननेन नित्यं मिथुनीभावः ॥ ४५ ॥ ते त्विति ॥ यत् प्रतिबिम्बात्मकं रूपं स्त्रीपुंसयोः पारस्परिकदर्शन-रूपमभूत् तत्तु परमेष्ठिना ब्रह्मणा त्यक्तं ते किंनराः जगृहुः अतस्ते उषसि प्रातःकाले कर्मभिः तत्पराक्रमानुवर्णनैस्तमेव मिथुनीभूय स्त्रीपुरुषौ मिलित्वा गायन्तो जाताः

त आत्मसर्गं तत्कायं पितरः प्रतिपेदिरे ॥ साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते ॥ ४३ ॥ सिद्धान्विद्याधरांश्चैव तिरोधानेन सोऽसृजत् ॥
तेभ्योऽददात्तमात्मानमन्तर्धानाख्यमद्भुतम् ॥४४॥ सकिन्नरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः ॥ मानयन्नात्मनाऽऽत्मानमात्माभासं विलोकयन्
॥ ४५ ॥ ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना ॥ मिथुनीभूय गायन्तस्तमेवोषसि कर्मभिः ॥ ४६ ॥ देहेन वै भोगवता शयानो बहुचिन्तया ॥
सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः ॥ ४७ ॥ ये हीयन्ताऽमुतः केशा अहयस्तेऽङ्ग जज्ञिरे ॥ सर्पाः प्रसर्पतः क्रूरा नागा भोगोरुकन्धराः
॥ ४८ ॥ स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः ॥ तदा मनून्ससर्जान्ते मनसा लोकभावनान् ॥ ४९ ॥

॥ ४६ ॥ मनसैव शयानं देहं तत्याज स चाहिसर्पादिरूपोऽभूदित्याह–देहेनेति ॥ सर्गे अनुपचिते वृद्धिमप्राप्ते सति कथं वृद्धिः स्यादिति बहुचिन्तया भोगवता भोग आभोगो विस्तारः पादादिप्रसारणं तद्वता देहेन शयानः मनोरथापूर्त्तौ क्रोधात् तत् भोगक्रोधयुक्तं वपुरुत्ससर्ज त्यक्तवान् ॥ ४७ ॥ य इति ॥ अङ्ग हे विदुर अमुतः अमुष्मात् देहात् ये केशा अहीयन्त प्रच्युता जातास्ते अहयो जज्ञिरे । प्रसर्पतः पादाद्याकुञ्चनादिना प्रचलतोऽमुष्मात् देहाद्ये हस्तपादाद्याः विच्युतास्ते सर्पाः । ये च मुण्डकन्धराद्यास्ते नागाः । अगा न भवन्तीति नागाः अतिवेगवन्तः भोगवतो जातत्वात् भोगेन फणेन उरुर्विस्तीर्णा कन्धरा येषां सर्वे चैते तत्क्रोधयोगात् क्रूराश्च तेषामवान्तरजातिभेदः सर्पसिद्धान्ते प्रसिद्धः ॥ ४८ ॥ सृष्टिर्मे पूर्णैव समपद्यतेति मिथुनं सिसृक्षतस्तस्य मनसि यदा आनन्दो बभूव तदा तस्मान्मनवोऽभूवन् । ते च सृष्टिपूर्तिमयीं पुरुषाकारतां जगृहुरित्याह–स इति ॥ सः आत्मभूर्ब्रह्मा यदात्मानं कृतकृत्यमिव मन्यमानोऽभूत्तदा अन्ते लोकभावनान् सर्वलोकपालान् मनून् मनसा ससर्ज । तेषु तदानीं स्वायंभुवो मनुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकटं सर्वैरदृश्यत । अन्ये च यथासमयं दृश्या इति ज्ञेयम् । अन्ते इत्युपादानान्मनुसर्गः सर्वान्तेऽभूदिति अतस्तदनन्तरं वक्ष्यमाणऋषिसर्ग एतत्पूर्वमेव ज्ञेय इत्याहुः ॥ ४९ ॥ तेभ्य इति ॥ आत्मवान् जीवानां स्वामी स ब्रह्मा तेभ्यो मनुष्यः स्वीयं पुरुषं पुरुषाकारं पुरं देहम् असृजत् ददौ । तान् मनून् दृष्ट्वा ये पुरा तेभ्यः पूर्वं सृष्टा देवादयस्ते तं प्रजापतिं प्रशशंसुः ॥ ५०॥ अहो इति ॥ हे जगत्स्रष्टः अहो बत एतन्मनुष्याकारनिर्माणं ते त्वया सुकृतं कृतं सुष्ठु कार्यं कृतं यस्मिन् पुरुषशरीरे क्रियाः स्वर्गादिसाधनभूताः प्रतिष्ठिताः सर्वाः क्रियाः पुरुषशरीरसाध्या इत्यर्थः । अतः साकं पुरुषशरीरेण सह यज्ञादिद्वारावयमप्यन्नं भोगजातमदामहे अनुभवेम । शब्लुगभावः तङ् चार्षः । हे इति संबोधनेऽव्ययं वा लोट् च । अत्र दशमद्वादशविंशाध्यायेषु क्वचित् क्रमेण क्वचित्क्रमातिक्रमेणाप्युक्तानां सर्गाणामयं क्रमो ज्ञेयः । आदौ पञ्चपर्वाविद्या १,ततो वनस्पतिवृक्षादयः २, ततः सर्पादयः ३, ततो गोमहिषादयः ४, ततो यक्षराक्षसासुरकिन्नरकिम्पुरुषादयः ५, ततः सनकादिमरीच्यादयः ६, ततो मनुमनुष्याः ७, ततः पूर्वसृष्टा अपि स्त्रीपुंसरूपेण वर्द्धन्ते स्म । अत्रर्षिसर्गः पश्चादुक्तोऽपि पूर्वमेव ज्ञेयः । सनकादिष्वन्तर्भूतश्च तदनन्तरं रुद्रोद्भवस्ततश्च मरीच्यादिसृष्टिर्द्वादशाध्याये ज्ञेया ॥ ५१ ॥ तपसेति ॥

तेभ्यः सोऽत्यसृजत्स्वीयं पुरं पुरुषमात्मवान् ॥ तान्दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम् ॥ ५० ॥ अहो एतज्जगत्स्रष्टः सुकृतं बत ते कृतम् ॥ प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदामहे ॥ ५१ ॥ तपसा विद्यया युक्तो योगेन सुसमाधिना ॥ ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ॥ ५२ ॥ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः ॥ यद्यत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ॥ ५३ ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे सर्गवर्णनं नाम विंशतितमोऽध्यायः ॥ २० ॥ विदुर उवाच ॥ स्वायम्भुवस्य च मनोर्वंशः परमसंमतः ॥ कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः ॥ १ ॥

तपसा ज्ञानेन विद्यया उपासनया सुष्ठु समाधिश्चित्तैकाग्र्यं यत्र तेन योगेन च युक्तः हृषीकेशः वशीकृतेन्द्रियश्च सन् ऋषिर्ब्रह्मा ऋषीन् ऋषिरूपाः अभिमताः सुकृतप्रधानत्वात् प्रियाः प्रजाः ससर्ज ॥ ५२ ॥ तेभ्य इति ॥ तत्पूर्वोक्तमृषीणामुत्पादकं समाधिपर्यन्तो योगश्च तज्जनिता ऋद्धयः अणिमादयः सिद्धयश्च तपो ज्ञानं च विद्या उपासना च विरक्तिश्च तद्वत् यच्छरीरं तस्य देहस्यैकैकशोंशं तेभ्य ऋषिभ्योऽदात् । एकस्मै एकस्मै यथाधिकारं भक्तिज्ञानयोगादिषु मध्ये एकमेकमदादित्यर्थः । अत एव केचिज्ज्ञानप्रधानाः केचिद्भक्तिप्रधानाः केचिद्योगप्रधाना दृश्यन्त इत्याशयः ॥ ५३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये विंशेऽध्याये,व्यधादिमाम् ॥ २० ॥ एकविंशे कर्दमस्य देवहूत्या सहाच्युतः ॥ विवाहयोगं प्राहात्र श्लोकाः सार्द्धा रसेषवः ॥ षड्वाचेति संपूर्णा एकषष्टिरनुष्टुभः ॥ २१ ॥ स्वायंभुवस्येति ॥ हे भगवन् चकारोऽप्यर्थे । प्रजापतिवंशस्तु त्वया कथितः । परमैः सद्भिः सम्मत आदृतः स्वायंभुवस्य मनोरपि वंशः कथ्यताम् । यत्र वंशे स्त्रीपुंसयोर्मैथुनेनं हेतुना प्रजा एधिरे ववृधिरे । आमभाव आर्षः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियव्रतेति ॥ स्वायंभुवस्य वै सुतौ प्रियव्रतोत्तानपादौ यथा येन प्रकारेण वर्णाश्रमप्रयुक्तं धर्मं सप्तद्वीपवतीं महीं च जुगुपतुः तच्च कथ्यताम् ॥ २ ॥ तस्येति ॥ हे अनघ हे ब्रह्मन् तस्य वै स्वायंभुवस्य एव दुहिता पुत्री देवहूतिरिति विश्रुता प्रसिद्धा देवहूतिरिति ह्रस्वान्तस्य इतिशब्देन सह सुपेति समासः । कर्दमस्य प्रजापतेः पत्नी त्वयोक्ता ॥ ३ ॥ तस्यामिति ॥ महायोगी सः कर्दमः योगलक्षणैर्यमादिभिर्युक्तायां तस्यां देवहूत्यां कतिधा कतिभिः प्रकारैः वीर्यं ससर्ज कत्यपत्यान्यसृजत् तत् शुश्रूषवे श्रोतुमिच्छवे मह्यं वद ॥ ४ ॥ रुचिरिति ॥ हे ब्रह्मन् यो भगवान् ब्रह्मणः सुतः स रुचिर्दक्षो वा दक्षश्च मानवीं मनुपुत्रीं यथाक्रममाकूतिं प्रसूतिं च भार्यां लब्ध्वा भूतानि अपत्यानि यथा ससर्ज तच्च वदेत्यनुषङ्गः ॥ ५ ॥ प्रजा इति ॥ ब्रह्मणा प्रजाः सृजेति उदितः उक्तो भगवान् कर्दमः सरस्वत्यां तत्तीरे सहस्राणां दश समा

प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै ॥ यथा धर्मं जुगुपतुः सप्तद्वीपवतीं महीम् ॥ २ ॥ तस्य वै दुहिता ब्रह्मन्देवहूतीति विश्रुता ॥ पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ॥ ३ ॥ तस्यां स वै महायोगी युक्तायां योगलक्षणैः ॥ ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ॥ ४ ॥ रुचिर्यो भगवान्ब्रह्मन् दक्षो वा ब्रह्मणः सुतः ॥ यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीम् ॥ ५ ॥ मैत्रेय उवाच ॥ प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः ॥ सरस्वत्यां तपस्तेपे सहस्राणां समा दश ॥ ६ ॥ ततः समाधियुक्तेन क्रियायोगेन कर्दमः ॥ संप्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषम् ॥ ७ ॥ तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे ॥ दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥ ८ ॥ स तं विरजमर्काभं सितपद्मोत्पलस्रजम् ॥ स्निग्धनीलालकव्रातवक्त्राब्जं विरजाम्बरम् ॥ ९ ॥ किरीटिनं कुण्डलिनं शङ्खचक्रगदाधरम् ॥ श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणम् ॥ १० ॥ विन्यस्तचरणाम्भोजमंसदेशे गरुत्मतः ॥ दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकन्धरम् ॥ ११ ॥ जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः ॥ गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृताञ्जलिः ॥ १२ ॥

दशसहस्रसंवत्सरान् तपस्तेपे चकार ॥ ६ ॥ तत इति ॥ ततस्तस्मिन् तपसि यद्वा ततस्तपश्चरणानन्तरं तावतापि तपसा दर्शनमप्राप्येत्यर्थः । कर्दमः समाधिश्चित्तैकाग्र्यं तद्युक्तेन क्रियायोगेन पूजाप्रकारेण प्रपन्नानां वरदाशुषं वरप्रदं "दाश्वान् साह्वान्" इति छान्दसो निपातः । हरिं भक्त्या संप्रपेदे सिषेवे ॥ ७ ॥ तावदिति ॥ यावत्संप्रपेदे तावत् पुष्कराक्षः भगवान् प्रसन्नः सन् कृते युगे शाब्दं वेदप्रतिपाद्यं यद् ब्रह्म सच्चिदानन्दात्मकं तन्मयं वपुर्दधत् सन् कर्दमं प्रत्यात्मानं दर्शयामास ॥ ८ ॥ स इति चतुष्कम् ॥ विरजं निर्मलम् अर्कस्येवाभा दीप्तिर्यस्य तं पद्मोत्पले दिनरात्रिविकासे सितानां पद्मानामुत्पलानां च स्रक् यस्य तं स्निग्धाः चिक्कणाश्च ते नीलाश्च ये अलकाः केशास्तेषां व्रातः समूहो वक्त्राब्जे यस्य तं विरजं निर्मलमम्बरं वस्त्रं यस्य तं किरीटधारिणं कुण्डलधारिणं त्रिभिर्हस्तैः शङ्खचक्रगदाधरं श्वेतोत्पलं क्रीडनकं क्रीडासाधनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य तमेकेन चतुर्थेन हस्तेन कमलं भ्रमयन्तमित्यर्थः । मनःस्पर्शं मनस्यानन्दजनकं स्मितमीक्षणं च यस्य तं गरुत्मतः गरुडस्य अंसदेशे स्कन्धप्रदेशे विन्यस्ते निहिते चरणाम्भोजे येन तम् आकाशे अवस्थितं वक्षसि श्रीर्लक्ष्मीर्यस्य तं कौस्तुभरत्नं कन्धरायां यस्य तं भगवन्तं दृष्ट्वा लब्धो मनोरथो यस्य सः अतो जातहर्षः प्रीतिस्वभाव आत्मा यस्य सः कर्दमः मूर्ध्ना क्षितावपतत् दण्डवत् प्रणतवान् । ततश्च कृताञ्जलिः सन् गीर्भिस्त्वभ्यगृणात् तुष्टाव ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ जुष्ट-मिति ॥ हे ईड्य अखिलसत्वराशेः सत्वकार्यज्ञानादिपूर्णस्य तव दर्शनान्नोऽस्माभिरक्ष्णोः सांसिद्ध्यं साफल्यं जुष्टं सेवितं प्राप्तमित्यर्थः । इतः पूर्वमक्षिणी विफले अभूता-मित्यर्थः । यस्य तव दर्शनं सद्भिः पुण्यप्रकर्षवद्भिर्जन्मभिः रूढयोगाः सिद्धयोगाः योगिनः आशासते प्रार्थयन्ते ॥ १३ ॥ य इति ॥ हे ईश ये तव मायया हतबुद्धयो भवन्ति ते भवसिन्धोः पोतं त्वत्पादारविन्दं कामानां लवाय तं प्राप्तुमुपासते त्वं तु तेभ्योऽपि कामान् रासि ददासि ये कामास्तैः प्रार्थ्यन्ते ते कामा निरये नरकतुल्यशूकरादि-योनिष्वपि स्युः ॥ १४ ॥ तथेति ॥ यः स कामान्निन्दामि सोऽहमपि तथा निन्दायोग्य एव यतः गृहमेधो गृहाश्रमस्तत्र धेनुं धर्मार्थकामरूपत्रिवर्गदोग्ध्रीं समानशीलां भार्यां प-

ऋषिरुवाच ॥ जुष्टं बताऽद्याऽखिलसत्वराशेः सांसिद्ध्यमक्ष्णोस्तव दर्शनान्नः ॥ यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो रूढयो-गाः ॥१३॥ ये मायया ते हतमेधसस्त्वत्पादारविन्दं भवसिन्धुपोतम् ॥ उपासते कामलवाय तेषां रासीश कामान्निरयेऽपि ये स्युः ॥१४ ॥ तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुम् ॥ उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघाङ्घ्रिपस्य ॥ १५ ॥ प्रजापतेस्ते वचसाऽधीश तन्त्या लोकः किलाऽयं कामहतोऽनुबद्धः ॥ अहं च लोकानुगतो वहामि बलिं च शुक्लाऽनिमिषाय तुभ्यम् ॥१६॥ लोकांश्च लोकानुगतान्पशूंश्च हित्वा श्रितास्ते चरणातपत्रम् ॥ परस्परं त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः ॥ १७ ॥

रिवोढुकामः परिणेतुमिच्छन्नेव दुराशयः कामासक्तचित्तोऽहम् अशेषस्य सर्वपुरुषार्थस्य मूलं कामदुघाङ्घ्रिपस्य भक्तप्रार्थितार्थप्रदकल्पवृक्षस्य तव मूलमङ्घ्रिमूलमुपेयिवान् उप-गतोऽस्मि ॥ १५ ॥ ननु मुक्तय एव किमिति न भजसि अनधिकारादित्याह—प्रजापतेरिति ॥ हे अधीश हे शुक्ल शुद्ध प्रजापतेः प्रजापालकस्य ते तव वचसा " जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते " इत्यादिवेदरूपेण तन्त्या दाम्ना अयं कामैर्हतः अभिभूतः सर्वोऽपि लोकः अनुबद्धः पशुवत्तत्तत्कर्मणि नियुक्तस्तत्तत्कर्म करोतीत्यर्थः । अहं च किल लोकानुगतः कामहत एव । अतोऽनिमिषाय कालात्मने तुभ्यं त्वां प्रसादयितुं बलिं हरामि कर्ममयीं त्वदाज्ञां पालयामि । अतस्तदर्थं भार्यां चेच्छामीति चकारस्यार्थः । ऋणत्रयापाकरणार्थमिति किलेत्युक्तम् ॥ १६ ॥ लोकानिति ॥ ये लोकान् कामाभिभूतान् जनान् ताननुगतान् अनुसृतान् पशून् अज्ञांश्च हित्वा अनादृत्य ये ते तव चरणरूपमातपत्रं नानाविधतापत्रयनिवर्तकं छत्रमाश्रितास्ते परस्परं यः त्वद्गुणानां वादः कथा तदेव सीधु मद्यं संसारविस्मारकत्वात् पीयूषममृतं रुचिकरत्वात् तेन निर्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिताः निरस्ता देहधर्माः क्षुत्पिपासादयो यैस्तादृशा भवन्ति ॥१७॥ न ते इति ॥ अजरं ब्रह्म तस्मिन् अक्षरूपे भ्रमिर्भ्रमणरूपम् अतिभ्रमणशीलत्वादुपचारेण भ्रमिरूपनिर्देशः । यद्वा । अजराक्षे भ्रमिर्भ्रमणं यस्य तत् पुंस्त्वमार्षम् । अधिकमासेन सह त्रयोदश मासाः अरा नेमिं नाभिं च प्रविष्टा यस्य तत् एकैकस्यारस्य त्रिंशत् त्रिंशत् एवं त्रिशतं त्रिगुणं शतं षष्टिश्चाहोरात्राः पर्वाणि ग्रन्थिविशेषा यस्य तत् शतशब्दे विभक्तेरलुगार्षः । षट् ऋतवो नेमयो यस्य तत् अनन्ताः क्षणलवादयश्छदाः पत्राणि पत्राकारा धाराः सन्ति यस्य तत् त्रीणि चातुर्मास्यानि नाभयश्चक्रमध्यस्थाः सच्छिद्रा वर्तुलाकारा अक्षाधारभूताः यस्य तत् करालस्रोतः तीव्रवेगं ते तव यत् वत्सरात्मकं कालचक्रं तत्सर्वं जगत् आच्छिद्य आकृष्य धावदपि वृथैव विनाशयदपि एषां त्वद्भक्तानामायुराच्छिद्य धावन्न भवति प्रतिक्षणं त्वद्भजनेन सफलत्वात् ॥ १८ ॥ एक इति ॥ प्रथमं भगवान् त्वमेक एव सन्नपि जगतः सिसृक्षया आत्मन् स्वात्मन्येव ङिलुक् छान्दसः । अधि अधिकतया अद्वितीयया स्वशक्तिभूतया योगमायया आविर्भूताभिः स्वशक्तिभिः रजः-सत्वतमोरूपाभिः अदो विश्वं सृजसि पासि पुनर्ग्रसिष्यसे चेति ऊर्णनाभिः कीटविशेषो यथा तथा ॥ १९ ॥ नेति ॥ हे अधीश नोऽस्माकं भक्तानामस्मदभिलाषानुरोधेन यत्

न तेजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व ॥ षण्नेम्यनन्तच्छदि यत्रिणाभि करालस्रोतो जगदाच्छिद्य धावत् ॥ १८॥ एकः स्वयं सञ्जगतः सिसृक्षया द्वितीययात्मन्नधियोगमायया ॥ सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवान्स्वशक्तिभिः ॥ १९ ॥ नैतद्व्रताऽधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मम् ॥ अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः ॥ २० ॥ तं त्वाऽनुभूत्यो-परतक्रियार्थं स्वमायया वर्तितलोकतन्त्रम् ॥ नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षम् ॥ २१ ॥

भूतसूक्ष्मरूपं पदं शब्दादिविषयसुखं मायया तनुषे विस्तारयसि ददासि तदेतद्यद्यपि तवेप्सितमिष्टं न भवति तथापि अस्मदनुग्रहायास्तु । ऋणत्रयापाकरणानन्तरमेव मोक्षायास्तु । तदपि कृपया देहीत्यर्थः । यर्हि यतः मायया परिच्छिन्न इव लसन्ती तुलसी यस्यां तथाभूतया कबभाव आर्षः । तनुवा तन्वा "तन्वादीनां छन्दसि बहुलम्" इत्युवङ् । विलक्षितो दृष्टोऽसि । एवंभूतस्य तव दर्शनं भुक्तिमुक्तिप्रदमित्यर्थः । यद्वा । एतत्पदं मत्काम्यमानं वस्तु भक्तहितेच्छोस्तव दातुमीप्सितं न भवति । न राति रोगिणे पथ्यमिति त्वदुक्तेः । यच्च नोऽस्मभ्यं भूतसूक्ष्मं शब्दादिविषयं तनुषे ददासि तत्खलु माययैव मदनुरोधेनैवेत्यर्थः । तथापि दीयमानमेतन्ममानुग्रहायास्तु त्वत्कृपाप्राप्त्यर्थमप्यस्तु । यतः यर्हि वरदानसमये लसत्तुलस्या तनुवा विशेषेण लक्षितो दृष्टोऽसि अतस्तव दर्शनदानमेव कृपायां लिङ्गम् ॥ २० ॥ तमिति ॥ अनुभूत्या आत्मज्ञानेनैव उपरतः अनपेक्षितः क्रियार्थः क्रियासाध्यं फलं यस्य तं स्वमायया आवर्तितं सम्पादितं लोकस्य तन्त्रमुपकरणं येन तम् अल्पीयसि अत्यल्पेऽप्याराधने सकामे भक्तेऽपि वा कामान् वर्षतीति तथा तम् अत एव नमनीयं वन्दनीयं पादसरोरुहं यस्य तमेवंभूतं भुक्तिमुक्तिप्रदं त्वा त्वामभीक्ष्णं पुनः पुनर्नमामि ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवम् अव्यलीकं निष्कपटं यथा तथा प्रणुतः स्तुतः सुपर्णस्य गरुडस्य पक्षयोरुपरि रोचमानः प्रेमस्मिताभ्यां सहितेनोद्वीक्षणेन विभ्रमन्ती भ्रूर्यस्य सः अब्जनाभः भगवान् अमृतेन अमृतवत्सुखकरेण वचसा तं कर्दमं प्रत्यावभाषे ॥ २२ ॥ विदित्वेति ॥ यदर्थं यस्य कन्यालाभस्यार्थमात्मनो नियमैः शमदमादिभिस्त्वयाहमेव समर्चितः सम्यक् पूजितस्तत् तव चैत्त्यं चित्तगमभिप्रायं दिगादियदन्तात्स्वार्थेऽण् विदित्वा ज्ञात्वा मे मया पुरा त्वद्विज्ञापनात्पूर्वमेव समयोजि सम्यक् सम्पादितम् ॥ २३ ॥ न वै इति ॥ हे प्रजाध्यक्ष मयि संगृभितः एकाग्रीकृत आत्मा चित्तं यैस्तेषां "हृग्रहोर्भ०" इति छान्दसो भकारः । ह्रस्वत्वमार्षम् । मदर्हणं मदाराधनं जातु कदाचिदपि मृषा निष्फलं नैव स्यात् । भवद्विधेषु तु सुतरां मदर्हणं निष्फलं न भवति ॥ २४ ॥ प्रजापतीति ॥ यो ब्रह्मावर्ताख्यं पुण्यक्षेत्रमधिवसन् सप्तार्णवां सप्तसमुद्रवतीं महीं शास्ति स सम्राट् प्रजापतेर्ब्रह्मणः सुतः विख्यातं मङ्गलं सदाचरणं यस्य स मनुः स्वायंभुवः अस्ति ॥ २५ ॥ स चेति ॥ हे विप्र राजर्षिः धर्मकोविदः स मनुश्च त्वां दिदृक्षुः द्रष्टु-

मैत्रेय उवाच ॥ इत्यव्यलीकं प्रणुतोऽब्जनाभस्तमावभाषे वचसाऽमृतेन ॥ सुपर्णपक्षोपरिरोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः ॥२२॥ श्रीभगवानुवाच ॥ विदित्वा तव चैत्त्यं मे पुरैव समयोजि तत् ॥ यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः ॥२३ ॥ न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणम् ॥ भवद्विधेष्वतितरां मयि संगृभितात्मनाम् ॥ २४ ॥ प्रजापतिसुतः सम्राड् मनुर्विख्यातमङ्गलः ॥ ब्रह्मावर्तं योऽधिवसञ्छास्ति सप्तार्णवां महीम् ॥ २५ ॥ स चेह विप्र राजर्षिर्महिष्या शतरूपया ॥ आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः ॥२६॥ आत्मजामसितापाङ्गीं वयःशीलगुणान्विताम् ॥ मृगयन्तीं पतिं दास्यत्यऽनुरूपाय ते प्रभो ॥ २७॥ समाहितं ते हृदयं यत्रेमान्परिवत्सरान् ॥ सा त्वां ब्रह्मन्नृपवधूः काममाशु भजिष्यति ॥ या त आत्मभृतं वीर्यं नवधा प्रसविष्यति ॥ २८ ॥ वीर्ये त्वदीये ऋषय आधास्यन्त्यऽञ्जसाऽऽत्मनः ॥ २९ ॥

मिच्छन् परश्वः इतोऽनागते द्वितीयेऽहनि शतरूपया महिष्या सह इह तव स्थाने आयास्यति ॥ २६ ॥ आत्मजामिति ॥ हे प्रभो असितापाङ्गीं नीलकटाक्षां वयसा शीलेन गुणैर्जितेन्द्रियत्वादिभिश्चान्वितां युक्तां पतिं स्वानुरूपं भर्तारं मृगयन्तीमभिकाङ्क्षन्तीम् आत्मजां स्वपुत्रीम् अनुरूपाय योग्याय ते तुभ्यं दास्यति ॥ २७ ॥ समाहितमिति सार्द्धम् ॥ इमान् परिवत्सरान् दशसहस्रसंवत्सरपर्यन्तं यत्र यस्यां भार्यायां ते हृदयं समाहितम् अभिसन्धानेन स्थितमस्ति । याचते त्वया आत्मनि स्वस्मिन् भृतं स्थापितं वीर्यं नवधा नवकन्यारूपेण प्रसविष्यति । सा नृपवधूः राजकन्या त्वामाशु शीघ्रमेव कामं यथेच्छं भजिष्यति । इडार्षः ॥ २८ ॥ वीर्य इति अर्द्धम् ॥ त्वदीये वीर्ये त्वद्वीर्यजातासु नवसु कन्यासु ऋषयो मरीच्यादयः अञ्जसा साक्षात् आत्मनः "आत्मा वै पुत्र नामासि" इति श्रुतेः । आत्मांशान् पुत्रान् आधास्यन्ति उत्पादयिष्यन्ति ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं चेति ॥ त्वं च मे मम निदेशं पुत्रोत्पादनाद्याज्ञां सम्यगनुष्ठाय संपाद्य अत एव उशत्तमः शुद्धसत्वः ऋणत्रयाद्विनिर्मुक्तो वा तीर्थं पात्रं तेन दानं लक्ष्यते मयि तिर्थीकृतः समर्पितः अशेषक्रियार्थः समस्तक्रियाफलं येन तथाभूतः सन्नन्ते मां प्रपत्स्यसे प्राप्स्यसि ॥ ३० ॥ कृत्वेति ॥ आत्मवान् जितेन्द्रियः त्वं सर्वजीवेषु गार्हस्थ्ये अन्नादिप्रदानेन दयां कृत्वा संन्यासे च मत्तः सर्वभूतेभ्योऽभयमस्त्विति सङ्कल्पेन अभयं दत्त्वा मयि सर्वाधारभूते आत्मानं जगच्च सहैव द्रक्ष्यसि तथात्मनि स्वस्मिन् अपि मां च द्रक्ष्यसि ॥ ३१ ॥ सहेति ॥ हे महामुने तव क्षेत्रे भार्यायां देवहूत्यां त्वद्वीर्येण त्वत्कन्यापत्यवृन्देन सह स्वांशकलयाहमवतीर्य तत्त्वानां प्रकृतिपुरुषेश्वराणां स्वरूपविवेचनीं संहितां साङ्ख्यशास्त्रं प्रणेष्ये कथयिष्यामि ॥ ३२ ॥ एवमिति ॥ प्रत्यक् भूतेषु प्रत्याहृतेषु अक्षेषु इन्द्रियेषु जायते आविर्भवतीति प्रत्यगक्षजो भगवान् तं कर्दमं प्रति एवमनुभाष्य अथानन्तरं सरस्वत्या नद्या परिश्रितात् परिवेष्टितात् बिन्दुसरसः बिन्दुसरोवरतीरस्थात्कर्दमाश्रमात् जगाम ॥ ३३ ॥ निरीक्षत इति ॥ तस्य कर्दमस्य निरीक्षतः भक्त्या

त्वं च सम्यगनुष्ठाय निदेशं म उशत्तमः ॥ मयि तीर्थीकृताशेषक्रियाऽर्थो मां प्रपत्स्यसे ॥ ३० ॥ कृत्वा दयां च जीवेषु दत्त्वा चाभयमात्मवान् ॥ मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि माम् ॥ ३१ ॥ सहाऽहं स्वांशकलया त्वद्वीर्येण महामुने ॥ तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहिताम् ॥ ३२ ॥ मैत्रेय उवाच ॥ एवं तमनुभाष्याऽथ भगवान्प्रत्यगक्षजः ॥ जगाम बिन्दुसरसः सरस्वत्या परिश्रितात् ॥३३॥ निरीक्षतस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः ॥ आकर्णयन्पत्ररथेन्द्रपक्षैरुच्चारितं स्तोमसुदीर्णसाम ॥ ३४ ॥ अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः ॥ आस्ते स्म बिन्दुसरसि तं कालं प्रतिपालयन् ॥ ३५ ॥ मनुः स्यन्दनमास्थाय शातकौम्भपरिच्छदम् ॥ आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीम् ॥ ३६ ॥ तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत् ॥ उपायादाश्रमपदं मुनेः शान्तव्रतस्य तत् ॥ ३७ ॥

पश्यत एव सतः आर्षः शता । अशेषैः सिद्धेश्वरैरभिष्टुतः सिद्धमार्गो वैकुण्ठमार्गो यस्य । यद्वा । अशेषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यत इति सिद्धमार्गश्च स भगवान् पत्ररथेन्द्रः पक्षिराजो गरुडस्तस्य पक्षैरुच्चारितमुदीर्णे अभिव्यक्ते सामनी बृहद्रथन्तरे यस्मिंस्तत्स्तोमं सामाधारभूतऋक्समुदायमाकर्णयन् ययौ । समस्तपाठे उच्चारितः स्तोमः स्तोत्रीयसमुदायो यस्य तत्सामाकर्णयन् बृहद्रथन्तरे पक्षौ स्तोम आत्मेति श्रुतेः ॥ ३४ ॥ अथेति ॥ शुक्ले शुद्धे भगवति संप्रस्थिते सम्यक् प्रयाते सति अथानन्तरं भगवान् कर्दमर्षिस्तं परश्च इति भगवता निर्दिष्टं कालं प्रतिपालयन् प्रतीक्षमाणो बिन्दुसरसि बिन्दुसरसस्तीरे स्वाश्रमे आस्ते स्म ॥३५॥ मनुरिति द्वयम् ॥ हे सुधन्वन् विदुर सभार्यः शतरूपासहितः मनुः स्वायंभुवः शातकौम्भाः सुवर्णमयाः परिच्छदाः अलङ्कारा यस्मिंस्तं स्यन्दनं रथमास्थाय आरुह्य तत्र स्वां दुहितरं कन्यामारोप्य दुहितुः पत्यन्वेषणार्थं महीं पर्यटन् सर्वतः संचरन्सन् भगवान् यदहः समादिशत् निर्दिष्टवान् तस्मिन्नहनि शान्तव्रतस्य उपशमशीलस्य मुनेस्तत्पूर्वोक्तमाश्रमपदं प्रति उपायात् आगतः ॥३६॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन्निति ॥ प्रपन्ने कर्दमे भृशमत्यन्तमर्पितया निहितया कृपया सम्परीतस्य सम्यक् व्याप्तस्य भगवतो नेत्रात् अश्रुबिन्दवः आनन्दाश्रूणि यस्मिन्सरसि न्यपतन् ॥ ३८ ॥ तदिति ॥ तत्सरः वै बिन्दुसर इति नाम्ना प्रसिद्धं सरस्वत्या नद्या परितः श्रितं वलयितं परिप्लुतमिति पाठान्तरम् । पुण्यमुपस्पर्शनादिभिः पुण्यजनकं पापनाशनं च शिवमारोग्यकरममृतं तद्वत्स्वादु च जलं यस्मिंस्तत् अत एव महर्षिगणैः सेवितम् ॥ ३९ ॥ पुण्येति ॥ कूजन्तः पुण्या मृगा द्विजाः पक्षिणश्च येषु तैः पुण्यानां द्रुमाणां लतानां च जालैः समूहैर्युक्तमिति शेषः । सर्वेषु ऋतुषु यानि फलानि पुष्पाणि च तैराढ्यं समृद्धं वनराजिः स्वत उत्पन्नवृक्षपङ्क्तिस्तस्याः श्रिया शोभया अन्वितम् ॥ ४० ॥ मत्तेति ॥ मत्तैर्द्विजगणैः पक्षिसमूहैर्घुष्टं नादितं मधुपानेन मत्ता ये भ्रमरास्तेषां विभ्रमो विलासो यस्मिंस्तत् मत्ता बर्हिणो मयूरा एव नटास्तेषामाटोपो नृत्यसम्भ्रमो यस्मिंस्तत् मिथ आह्वयन्तो मत्ताः कोकिला यत्र तत् ॥ ४१ ॥ कदम्बेति ॥ कदम्बचम्पकादिभिर्वृक्षैः चूतपोतैराम्रबालकैश्चालङ्कृतम् ॥ ४२ ॥ कारण्डवैरिति ॥ कारण्डवादिभिः पक्षि-

यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिन्दवः ॥ कृपया संपरीतस्य प्रपन्नेऽर्पितया भृशम् ॥ ३८ ॥ तद्वै बिन्दुसरो नाम सरस्वत्या परिप्लुतम् ॥ पुण्यं शिवामृतजलं महर्षिगणसेवितम् ॥ ३९ ॥ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः ॥ सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियाऽन्वितम् ॥ ४० ॥ मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमम् ॥ मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलम् ॥ ४१ ॥ कदम्बचम्पकाशोककरञ्जबकुलाशनैः ॥ कुन्दमन्दारकुटजैश्चूतपोतैरलंकृतम् ॥ ४२॥ कारण्डवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः ॥ सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥४३॥ तथैव हरिणैः क्रोडैः श्वाविद्गवयकुञ्जरैः ॥ गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम् ॥४४॥प्रविश्य तत्तीर्थवरमादिराजः सहात्मजः ॥ ददर्श मुनिमासीनं तस्मिन्हुतहुताशनम् ॥ ४५ ॥ विद्योतमानं वपुषा तपस्युग्रयुजा चिरम् ॥ नातिक्षामं भगवतः स्निग्धापाङ्गावलोकनात् ॥ तव्द्याहृतामृतकलापीयूषश्रवणेन च ॥ ४६ ॥

भिर्वल्गु मनोहरं यथा स्यात्तथा कूजितम् ॥ ४३ ॥ तथैवेति ॥ तथैव हरिणादिभिर्मृगैः गोपुच्छैर्गोलाङ्गूलाख्यैर्वानरभेदैर्हरिभिः सिंहैः मर्कैः मर्कटैः नकुलैः नाभिभिः कस्तूरीमृगैर्वृतम् ॥ ४४ ॥ प्रविश्येति ॥ सहानुगः अनुगैर्भृत्यादिभिः सहितः आदिराजो मनुस्तत्तीर्थवरं प्रविश्य तस्मिंस्तीर्थे हुतः हुताशनो ब्रह्मचारियोग्योऽग्निर्येन । तम् आसीनं मुनिं ददर्श ॥ ४५ ॥ विद्योतमानमिति सार्द्धम् ॥ तपसि चिरमुग्रा तीव्रा युक् योगो यस्य तेन वपुषा विद्योतमानं भगवतो यत्स्नेहयुक्तमपाङ्गेन कटाक्षेणावलोकनं तस्मात् तथा तस्य भगवतो व्याहृतम् भाषणमेवामृतकला अमृतमयस्य चन्द्रस्य कला तन्मयं यत् पीयूषममृतं तस्य श्रवणेन च यद्वा तव्द्याहृतमेवामृतकलस्य चन्द्रस्य आ सम्यक् पीयूषं तस्य श्रवणेन च नातिक्षामं नातिकृशं तपसा कृशं सन्तमपि भगवदवलोकनादिना पुनः किंचित् स्थूलत्वं प्राप्तमित्यर्थः । मुनिं ददर्शेत्यनुषङ्गः ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रांशुमिति ॥ प्रांशुमुन्नतमष्टवितस्तिमिततनुं पद्मपलाशवदक्षिणी यस्य तं जटिलं जटाधारिणं चीरं वासो यस्य तमसंस्कृतमनिर्णिक्तम् अर्ह्यन्तेऽनेनेत्यर्हणं महारत्नं यथा मलिनं भवति तथातितेजस्वित्वेऽपि मर्दनादिसंस्काराभावान्मलिनं तं मुनिं उपसंसृत्य समीपमागत्य ददर्शेत्यनुषङ्गः ॥ ४७ ॥ अथेति ॥ अथ उटजं पर्णशालामुपायातं प्राप्तं पुरः पादयोः समीपे प्रणतं नृदेवं मनुं प्रतिनन्द्य आशीर्भिरभिनन्द्यानुरूपया तद्योग्यया सपर्यया पूजया प्रत्यगृह्णात् सत्कृतवान् ॥४८॥ गृहीतेति ॥ गृहीतमर्हणमासनफलजलादिरूपं येन तम् आसीनमुपविष्टं संयतं स्ववाक्यश्रवणाय तूष्णीं स्थितं मनुं श्लक्ष्णया मधुरया गिरा प्रीणयन् भगवत आदेशं प्रागुक्तं स्मरन् मुनिः कर्दमः इति वक्ष्यमाणमाह स्म॥४९॥ नूनमिति ॥ हे देव राजन् नूनं ते तव चङ्क्रमणं पर्यटनं सतां संरक्षणाय असतां वधाय च । यत् यस्मात् हि त्वं हरेर्भगवतो विश्वपालिनी शक्तिरेव असि ॥ ५० ॥ मनुस्थं भगवन्तं प्रणमति—य इति ॥ स्थाने जगत्पालने निमित्ते सति स्थान इति युक्तमित्यर्थेऽव्ययं वा । यस्त्वम् अर्केन्द्रादीनां रूपाणि आधत्से बिभर्षि । तत्र प्रतापयशोऽधृष्यत्वै-

प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससम् ॥ उपसंसृत्य मलिनं यथाऽर्हणमसंस्कृतम् ॥ ४७ ॥ अथोटजमुपायान्तं नृदेवं प्रणतं पुरः ॥ सपर्यया प्रत्यगृह्णात्प्रतिनन्द्यानुरूपया ॥४८॥ गृहीतार्हणमासीनं संयतं प्रीणयन्मुनिः ॥ स्मरन्भगवदादेशमित्याह श्लक्ष्णया गिरा ॥ ४९ ॥ नूनं चंक्रमणं देव सतां संरक्षणाय ते ॥ वधाय चासतां यत्त्वं हरेः शक्तिर्हि पालिनी॥५०॥योऽर्केन्द्वग्नीन्द्रवायूनां यमधर्मप्रचेतसाम् ॥ रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः ॥५१॥ न यदा रथमास्थाय जैत्रं मणिगणार्पितम् ॥ विस्फूर्जच्चण्डकोदण्डो रथेन त्रासयन्नघान् ॥५२॥ स्वसैन्यचरणक्षुण्णं वेपयन्मण्डलं भुवः ॥ विकर्षन्बृहतीं सेनां पर्यटस्यंऽशुमानिव ॥ ५३ ॥ तदैव सेतवः सर्वे वर्णाश्रमनिबन्धनाः ॥ भगवद्रचिता राजन् भिद्येरन् बत दस्युभिः ॥ ५४ ॥ अधर्मश्च समेधेत लोलुपैर्व्यङ्कुशैर्नृभिः ॥ शयाने त्वयि लोकोऽयं दस्युग्रस्तो विनङ्क्ष्यति ॥ ५५ ॥

श्वर्यसर्वत्रप्रवेशदुष्टनिग्रहणशिष्टपालनगाम्भीर्यैरर्कादिरूपाणि ज्ञेयानि । तस्मै ते तुभ्यं शुक्लाय निर्मलाय भगवते नमः ॥ ५१ ॥ नेति त्रयम् ॥ हे राजन् यदा त्वं जैत्रं जयप्रदं मणिगणैरर्पितं खचितं मणिगणानामर्पितमर्पणं यत्रेति वा मणिगणा अर्पिता यत्र वा तं रथमास्थायाधिरुह्य विस्फूर्जन्नादं कुर्वत् चण्डं परेषां भयजनकं कोदण्डं धनुर्यस्य सः रथेन रथसान्निध्यमात्रेण अघान् दुराचारान् त्रासयन् स्वसैन्यानां चरणैः क्षुण्णं सङ्घट्टितं भुवो मण्डलं वेपयन् कम्पयन् बृहतीं महतीं सेनां विकर्षन् अंशुमान्सूर्य इव रथेन न पर्यटसि तदैव वर्णाश्रमाणां निबन्धनं यैः ते भगवता रचिताः प्रवर्तिताः सर्वे सेतवः धर्ममर्यादाः दस्युभिर्दुराचारैः भिद्येरन् ॥ ५२ ॥ ५३ ॥ ५४ ॥ अधर्म इति ॥ त्वयि दण्डधरे शयाने निश्चिन्ते सति व्यङ्कुशैः निष्प्रतिपक्षैः लोलुपैः केवलमर्थकामपरायणैर्नृभिर्निमित्तभूतैरधर्मश्च समेधेत वर्द्धेत । दस्युभिरुत्पथैर्ग्रस्तोऽयं सर्वोऽपि लोको विनङ्क्ष्यति ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथापीति॥यद्यपि मर्यादारक्षणायैव मुख्यं तव पर्यटनम् अथापि हे वीर यदर्थं त्वमिहास्मदाश्रमे आगतस्तत्प्रयोजनं पृच्छे ।तद्वयमिति । तत् त्वदागमनप्रयोजनं वयं निर्व्यलीकेन निष्कपटेन सहर्षेण वा हृदा चित्तेन प्रतिपद्यामहे अङ्गीकुर्महे॥५६॥इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्यैकविंशे व्यधादिमाम् ॥२१॥ द्वाविंशे तु सुतां दत्त्वा कर्दमाय मनुर्निजाम् ॥ स्वपुरं प्रययौ तत्र श्लोकाः सार्द्धा नवाग्रयः ॥ चैत्वार्युवाचेति पादोनद्विवेदाः अनुष्टुभः॥२२॥एवमिति ॥ एवमाविष्कृतो वर्णितः अशेषाणां गुणानां कर्मणां चोदय उत्कर्षो यस्य सः । सम्राट् मनुः सव्रीड इव स्वकीर्तिश्रवणात् प्रत्याख्यानशङ्कया वा सलज्ज इव सन् उपारतं वर्णयित्वा तूष्णीं स्थितं निवृत्तिनिरतमिति वा तं मुनिं प्रत्युवाच ॥ १ ॥ स्वकन्यापरिणयं वक्ष्यन् ब्रह्मक्षत्रसंबन्ध ईश्वरेणैव कृत इत्याह—ब्रह्मेति ॥ छन्दोमयो वेदरूपः ब्रह्मा ईश्वरः आत्मनः छन्दोमयस्य परीप्सया पर्याप्तुमिच्छया पर्याप्तिः पालनं वेदप्रवर्तनं तस्येच्छया तपोविद्यायोगयुक्तान् अलम्पटान् विषयासक्तिरहितान् वेदप्रवृत्तियोग्यगुणानिति भावः । युष्मान् ब्राह्मणान्

अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः ॥ तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ॥ ५६ ॥ इति श्रीभा० तृतीय० स्वपुत्रीस्वायंभुवमनुकर्दमसमागमवर्णनं नाम एकविंशतितमोऽध्यायः ॥ २१ ॥ मैत्रेय उवाच ॥ एवमाविष्कृताशेषगुणकर्मोदयो मुनिम् ॥ सव्रीड इव तं सम्राडुपारतमुवाच ह ॥ १ ॥ मनुरुवाच ॥ ब्रह्माऽसृजत् स्वमुखतो युष्मानात्मपरीप्सया ॥ छन्दोमयस्तपोविद्यायोगयुक्तानलम्पटान् ॥ २ ॥ तत्राणायासृजच्चास्मान् दोःसहस्रात् सहस्रपात् ॥ हृदयं तस्य हि ब्रह्म क्षत्त्रमङ्गं प्रचक्षते ॥ ३ ॥ अतो ह्यन्योऽन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः ॥ रक्षति स्माव्ययो देवः स यः सदसदात्मकः ॥ ४ ॥ तव संदर्शनादेव च्छिन्ना मे सर्वसंशयाः ॥ यत्स्वयं भगवान्प्रीत्या धर्ममाह रिरक्षिषोः ॥ ५ ॥ दिष्ट्या मे भगवान्दृष्टो दुर्दर्शो योऽकृतात्मनाम् ॥ दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवम् ॥ ६ ॥

स्वमुखतः असृजत् ॥ २ ॥ तत्राणायेति ॥ तेषां ब्राह्मणानां त्राणाय रक्षणायास्मान् क्षत्रियान् सहस्रपात् भगवान् दोःसहस्रात् भुजसहस्रात् असृजत् । अतो हि तस्य भगवतो ब्रह्म ब्राह्मणजातिं हृदयं क्षत्रं क्षत्रियं जातिं च अङ्गं भुजं प्रचक्षते वेदज्ञाः कथयन्ति ॥ ३ ॥ अत इति ॥ यत एकस्मादेवोभयोरुत्पत्तिः अतः ब्रह्म ब्राह्मणः क्षत्रं क्षत्रियश्च आत्मानमन्योन्यं रक्षतः ब्राह्मणः सन्मार्गप्रवृत्त्या क्षत्रियं क्षत्रियो जीविकादिना ब्राह्मणं रक्षतीति वस्तुतो यः सदसदात्मकः कार्यकारणरूपः तथापि अव्ययो निर्विकारः देवः ईश्वरः स एव सर्वान् रक्षति स्म पादपूर्तौ ॥४॥ तवेति ॥ तव संदर्शनादेव मम धर्मविषयाः सर्वे संशयाः छिन्नाः । यद्यस्मात् स्वयमपृष्ट एव भगवान् भवान् रिरक्षिषोः प्रजापालनेच्छोर्मम धर्ममाह स्म । न यदा रथमास्थायेत्यादिना उक्तवान् ॥५॥ दिष्ट्येति ॥ यः अकृतात्मनाम् अवशीकृतचित्तानां शेषे षष्ठी । दुर्दर्शः द्रष्टुमशक्यः स भगवान् भवान् मे मया दिष्ट्या भाग्येन दृष्टः भवतः शिवं मङ्गलकरं पादरजो मे मया दिष्ट्या स्वभाग्येनैव शीर्ष्णा शिरसा स्पृष्टं शिरसि धृतम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिष्टचेति ॥ दिष्टचा एवाहं त्वया अनुशिष्टः धर्मं शिक्षितः आतिथ्यादिना चास्मद्भाग्येनैव त्वया महाननुग्रहः अनुशासनादिरूपः कृतः । अपावृत्तैः आवरणरहितैः कर्णरन्ध्रैः उशतीः उशत्यः कमनीयाः पूर्वसवर्णदीर्घ आर्षः । ते गिरो दिष्टचा स्वभाग्येनैव जुष्टाः सेविताः श्रुताः ॥ ७ ॥ त्वद्दर्शनात्सर्वे क्लेशा निवृत्ताः एकः शेषोऽस्ति सोऽपि निवर्तनीय इत्याह—स इति ॥ हे मुने स भवान् दुहितुः स्नेहेन परिक्लिष्टः व्याकुलः आत्मा मनो यस्य तस्य अत एव दीनस्य मम श्रावितं विज्ञापनं कृपया श्रोतुमर्हसि । मध्यमपुरुष आर्षः ॥ ८ ॥ प्रियव्रतेति ॥ प्रियव्रतोत्तानपदोः स्वसा इदं च पुत्रिकाकरणशङ्कानिरासाय मम दुहिता इयं देवहूतिः वयःशीलगुणादिभिः युक्तं पतिमन्विच्छति ॥ ९ ॥ यदेति ॥ यदा तु नारदादेशा भवतः शीलं श्रुतं विद्यारूपं वयः गुणांश्च अशृणोत् तदाप्रभृति त्वय्येव कृतो निश्चयः अयमेव मम पतिः योग्य इत्येवंरूपो यथा तथाभूता आसीत् ॥ १० ॥ तदिति ॥ हे द्विजाग्र्य ततो हेतोः गृहमेधेषु गृहस्थोपयुक्तेषु कर्मसु सर्वात्मना सर्वप्रकारेण ते तवानुरूपामनुकूलां मया श्रद्धयोपसमीप आहृतामानीतामिमां

दिष्टचा त्वयाऽनुशिष्टोऽहं कृतश्चानुग्रहो महान् ॥ अपावृतैः कर्णरन्ध्रैर्जुष्टा दिष्टचोशतीर्गिरः ॥ ७ ॥ स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम ॥ श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ॥८॥ प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम ॥ अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः ॥ ९ ॥ यदा तु भवतः शीलश्रुतरूपवयोगुणान् ॥ अशृणोन्नारदादेषा त्वय्यासीत्कृतनिश्चया ॥ १० ॥ तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपाहृतां मया ॥ सर्वात्मनाऽनुरूपां ते गृहमेधिषु कर्मसु ॥ ११ ॥ उद्यतस्य हि कामस्य प्रतिवादो न शस्यते ॥ अपि निर्मुक्तसङ्गस्य कामरक्तस्य किं पुनः ॥ १२ ॥ य उद्यतमनादृत्य कीनाशमभियाचते ॥ क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥ १३ ॥ अहं त्वाऽशृणवं विद्वन्विवाहार्थं समुद्यतम् ॥ अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे ॥ १४ ॥

प्रतीच्छ प्रतिगृहाण ॥ ११ ॥ उद्यतस्येति ॥ उद्यतस्य उद्यमं विना स्वत एव प्राप्तस्य कामस्याभिलषितस्य विषयस्य प्रतिवादः प्रत्याख्यानं निर्मुक्तसङ्गस्य विरक्तस्यापि न हि शस्यते शोभनं नैव भवति । न शक्यत इति पाठान्तरम् । कामेषु विषयेषु रक्तस्यासक्तस्य प्रतिवादो न शस्यते इति किं पुनर्वक्तव्यम् तवान्तर्गतं कामं ज्ञात्वैवाहमागतोऽतो मयि नापलपनीयमिति भावः ॥ १२ ॥ य इति ॥ यः पुमानुद्यतं काममनादृत्य प्रतिष्ठानुरोधाल्लज्जया वा प्रत्याख्याय पश्चात् कीनाशं कृपणमदातारमपि जनमभियाचते तस्य निर्लोभत्वादिना स्फीतमुज्ज्वलमपि यशः क्षीयते याच्ञया नश्यति महत्त्वाभिमानश्चावज्ञयापमानेन हतो विनष्टो भवति । तेन परिणामदर्शिना वर्त्तमानं वैराग्यं भाविना कामेन ग्रसिष्यमाणमनुमाय प्रथममेव दैवाल्लब्धः अनिषिद्धो विषयः स्वीकार्यः ॥१३॥ अहमिति ॥ हे विद्वन् त्वा त्वां विवाहार्थं समुद्यतं प्रयतमानमहमशृणवं श्रुतवानस्मि । अत एव यस्य गार्हस्थ्यावधिकं ब्रह्मचर्यं स उपकुर्वाणस्तथाभूतस्त्वमतो मे मया प्रत्तां श्रद्धया दत्तां कन्यां प्रतिगृहाण ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाढमिति ॥ बाढं सत्यमहमुद्वोढुकामः परिणेतुकामः अस्मि । तवात्मजा पुत्री च अप्रत्ता कस्मैचिद्दातुमप्रतिश्रुता अतोऽसौ वैवाहिको विधिः आद्यः प्रथमः । ततः पूर्वं विवाहाभावात् मुख्यो वा आवयोर्वरकन्ययोरनुरूपो योग्य एव ॥१५॥ काम इति ॥ हे नरदेव अस्यास्ते पुत्र्याः कामः कामितः समाम्नायविधौ प्रतीतः " गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या " इत्यादिमन्त्रप्रसिद्धः स विवाहो भूयात् । स्वया एवाङ्गकान्त्या श्रियं भूषणादिकृतशोभां क्षिपतीं तिरस्कुर्वतीमिव स्थितां ते तव सार्वभौमस्य तनयां क एव नाद्रियेत आद्रियेतैवेत्यर्थः । स्वयैव कान्त्या इति वा पाठः ॥ १६ ॥ यामिति ॥ क्वणतोर्नूपुराभ्यां शब्दं कुर्वतोरङ्घ्र्योः पादयोः शोभा यस्याः क्वणद्भ्यामङ्घ्रिभ्यां शोभा यस्या इति वा ताम् । हर्म्यपृष्ठे प्रासादोपरि विक्रीडतीं नुमभाव आर्षः । कन्दुके संलग्ने विह्वले चञ्चले अक्षिणी यस्यास्तां यां विलोक्य संमोहेन विमूढं व्याकुलं चेतश्चित्तं यस्य सः विश्वावसुर्गन्धर्वः स्वाद्विमानाद्व्यपतत् ॥ १७ ॥ तामिति ॥ तां ललनानां ललामं भूषणभूताम् असेवितौ श्रियो लक्ष्म्याश्चरणौ यैस्तैरदृष्टां द्रष्टुमप्यशक्याम्

ऋषिरुवाच ॥ बाढमुद्वोढुकामोऽहमप्रत्ता च तवात्मजा ॥ आवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः ॥ १५ ॥ कामः स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः ॥ क एव ते तनयां नाद्रियेत स्वयैव कान्त्या क्षिपतीमिव श्रियम् ॥ १६ ॥ यां हर्म्यपृष्ठे क्वणदङ्घ्रिशोभां विक्रीडतीं कन्दुकविह्वलाक्षीम् ॥ विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः ॥ १७ ॥ तां प्रार्थयन्तीं ललनाललाममसेवितश्रीचरणैरदृष्टाम् ॥ वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियाताम् ॥ १८ ॥ अतो भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे ॥ अतो धर्मान्पारमहंस्यमुख्याञ्छुक्लप्रोक्तान्बहु मन्येऽविहिंस्रान् ॥ १९ ॥ यतोऽभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वाऽवतिष्ठते ॥ प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननन्तः ॥ २० ॥

अतो विश्वावसुनापि आकाशचारिणी तस्याः कान्तिरेव दृष्टा नतु साक्षात्सा इति सूचितमित्याहुः । मनोस्तव वत्सां पुत्रीमुच्चपदः उत्तानपदः स्वसारं भगिनीं स्वयमेवाभियातां प्राप्तां पत्यर्थं प्रार्थयन्तीं बुधः स्वार्थकुशलः को नानुमन्येत नाङ्गीकुर्यात् । प्रियव्रतस्य तदा विरज्य गतत्वान्नोल्लेखः ॥ १८ ॥ अत इति ॥ यावदपत्योत्पत्तिस्तावद्गार्हस्थ्यं ततः संन्यास इति भाषाबन्धः समयः तमाह । अतः मे मम आत्मनो देहात् च्युतं तेजो वीर्यं यावद्बिभृयात्तावदिति समयेन साध्वीमिमां भजिष्ये इडार्षः । अतोऽनन्तरं पारमहंस्य आश्रमे मुख्यान् प्राधान्येनोपादेयान् शुक्लेन भगवता प्रोक्तान् अविहिंस्रान् हिंसाशून्यान् शमादीन् धर्मान् बहु यथा स्यात्तथा अनुष्ठेयान् मन्ये अतः तान् अनुष्ठास्यामि तत एनां त्यक्ष्यामीत्याशयः ॥ १९ ॥ ननु ब्रह्मणा त्वं सृष्टावेवाज्ञप्तः नतु संन्यास इत्याशङ्क्याह—यत इति ॥ यतः निमित्तभूतादुपादानभूताच्चेदं दृश्यमानं देवादिभेदेन विचित्रं विश्वमभवत् उदपद्यत । यत्र यस्मिंश्च कारणभूते संस्थास्यते प्रलयं यास्यति । यत्र च यत्रैव अवतिष्ठते इदानीं वर्तते । एषः प्रजापतीनामपि पतिः भगवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनन्तः परं केवलं मह्यं मम प्रमाणं तेन तु " त्वं च सम्यगनुष्ठाय निदेशं मे " इत्यादिना ऋणत्रयापाकरणानन्तरं संन्यास एवाज्ञप्तः अतस्तमेव करिष्ये ॥ २० ॥ स इति ॥ हे उग्रधन्वन् विदुर स कर्दमः इयदेव एतावदेव आबभाषे उक्तवान् । ततश्च अरविन्दनाभं भगवन्तं धिया उपगूहन् चिन्तयन् तूष्णीं मौनेन आसीत् । स्मितेन मन्दहासेन शोभितं यन्मुखं तेन देवहूत्याश्चित्तं लुलुभे प्रलोभितवान् । तद्भार्षः । मुनेर्मुखेन कर्त्रा देवहूत्याश्चित्तं प्रलोभ्यते स्मेति वा देवहूत्या मुखेन मुनेश्चित्तं लुलुभे इति वा । एतेन विरक्ताय कन्या दत्तेति मनुशतरूपयोरनुतापो नाभूदिति व्यञ्जितम् ॥ २१ ॥ स इति ॥ अनु तदनन्तरं स मनुः महिष्याः स्वभार्यायाः अस्मै कन्या देयेति दुहितुः स्वकन्यायाः अयं मम पतिर्योग्य इति च व्यवसितं निश्चितं स्फुटं यथा भवति तथा ज्ञात्वा महिष्या वचसा दुहितुर्व्यवसितं ज्ञात्वेति वा गुणगणैराढ्याय युक्ताय तस्मै कर्दमाय तुल्यां गुणगणयुक्तां कन्यां स्वयमपि प्रहर्षितः सन् ददौ । प्रधर्षित इति पाठे तु गुणगणविवशः ॥ २२ ॥ शतरूपेति ॥ महाराज्ञी शतरूपा महाधनानमूल्यान् पारि-

मैत्रेय उवाच ॥ स उग्रधन्वन्नियदेवाबभाष आसीच्च तूष्णीमरविन्दनाभम् ॥ धियोपगृह्णन्स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः ॥ २१ ॥ सोऽनुज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटम् ॥ तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः ॥ २२ ॥ शतरूपा महाराज्ञी पारिबर्हान्महाधनान् ॥ दम्पत्योः पर्यदात्प्रीत्या भूषावासःपरिच्छदान् ॥ २३ ॥ प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः ॥ उपगुह्य च बाहुभ्यामौत्कण्ठ्योन्मथिताशयः ॥ २४ ॥ अशक्नुवंस्तद्विरहं मुञ्चन्बाष्पकला मुहुः ॥ आसिञ्चदेव वत्सेति नेत्रोदैर्दुहितुः शिखाः ॥ २५ ॥ आमन्त्र्य तं मुनिवरमनुज्ञातः सहानुगः ॥ प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः ॥ २६ ॥ उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः ॥ ऋषीणामुपशान्तानां पश्यन्नाश्रमसंपदः ॥ २७ ॥ तमायान्तमभिप्रेत्य ब्रह्मावर्तात् प्रजापतिम् ॥ गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः ॥ २८ ॥

बर्हान् विवाहोचितदेयान् भूषा भूषणानि वासांसि परिच्छदान् गृहोपकरणानि पात्रादीनि दम्पत्योर्दुहितृजामात्रोः प्रीत्या पर्यदात् ॥ २३ ॥ प्रत्तामिति द्वयम् ॥ गतव्यथः वरान्वेषणचिन्तारहितः औत्कण्ठ्येन उन्मथितः क्षुभित आशयो यस्य स सम्राड्मनुः सदृक्षाय सदृशाय वराय प्रत्तां दत्तां दुहितरं बाहुभ्यामुपगुह्यालिङ्ग्य तस्य विरहं सोढुमशक्नुवन् हे अम्ब मातः हे पितः हे वत्से इति परस्परं संबोधयन् मुहुः बाष्पकलाः नेत्राम्बुकणान् मुञ्चन् नेत्रोदकैर्दुहितुः शिखाः आसिञ्चत् । वत्सेति सन्धिरार्षः॥२४॥२५॥ आमन्त्र्येति द्वयम् ॥ मुनिवरं कर्दममामन्त्र्यानुज्ञाप्य तेन चानुज्ञातः सन् सभार्यो रथमारुह्य सहानुगो नृपो मनुः ऋषिकुल्यायाः ऋषिकुलहितायाः ऋषीणां नद्या वा सरस्वत्या उभयोः सुरोधसोः शोभनतटयोरुपशान्तानामृषीणामाश्रमस्य सम्पदः फलादिसम्पत्तीः पश्यन् स्वपुरं प्रति प्रतस्थे गमनं कृतवान् ॥२६॥२७॥ तमिति॥ तं स्वपतिं मनुमायान्तमभिप्रेत्य ज्ञात्वा प्रहर्षिताः प्रजाः गीतसंस्तुतिवादित्रैः सह ब्रह्मावर्तात् प्रत्युदीयुः समानेतुं सम्मुखं ययुरित्यर्थः । ब्रह्मावर्तादिति पाठे तु ब्रह्मावर्तान् प्रत्यायातमित्यन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजापतिमिति समस्तपाठे मनुविशेषणम् । ब्रह्मावर्तस्था जनाः प्रत्युदीयुरिति शेषेणान्वयः ॥ २८ ॥ ब्रह्मावर्तस्थलमाह—बर्हिष्मतीति ॥ यत्र ब्रह्मावर्ते सर्वसम्पत्समन्विता बर्हिष्मती नाम पुरी अस्ति । यत्र स्थाने अङ्गं विधुन्वतः कम्पयतो यज्ञस्य यज्ञवराहस्य रोमाणि न्यपतन् ॥ २९ ॥ बर्हिष्मतीनाम निर्वक्ति—कुशा इति ॥ त एवेति विधेय-लिङ्गम् । तानि पतितानि रोमाण्येव शश्वत् सदा हरितं वर्चः वर्णो येषां तथाभूताः कुशाः काशाश्च आसन् जाताः । ऋषयो यैः कुशैः काशैश्च यज्ञघ्नान् यज्ञविरोधिनो राक्षसान् पराभाव्य पराभवं नीत्वा यज्ञमीजिरे कृतवन्तः ॥ ३० ॥ कुशेति ॥ भगवान्मनुरपि कुशकाशमयं बर्हिरास्तरणविशेषमास्तीर्य यतो यज्ञात् धृतवराहावताराद् भुवं स्थानं लब्धवान् सन् तृप्तन्नं तमेव यज्ञपुरुषमयजत् अत एव सा पुरी बर्हिष्मतीति ख्याता स्वर्गादपि भूः श्रेष्ठा तत्रापि तत्स्थानं श्रेष्ठमित्याशयः ॥ ३१ ॥ बर्हिष्मतीमिति सार्द्धद्वयम् ॥ यां बर्हिष्मतीं नाम पुरीं पूर्वं समावसत् पूर्वं यस्यामुषितः तां निर्विश्य प्रविश्य तस्यां पुर्यामाध्यात्मिकादितापत्रयविनाशनं भवनं प्रविष्टः प्रत्यूषेषु प्रत्यूषस्सु

बर्हिष्मती नाम पुरी सर्वसंपत्समन्विता ॥ न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः ॥ २९ ॥ कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः ॥ ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे ॥ ३० ॥ कुशकाशमयं बर्हिरास्तीर्य भगवान् मनुः ॥ अयजद्यज्ञपुरुषं लब्ध्वा स्थानं यतो भुवम् ॥ ३१ ॥ बर्हिष्मतीं नाम विभुर्यां निर्विश्य समावसत् ॥ तस्यां प्रविष्टो भवनं तापत्रयविनाशनम् ॥ ३२ ॥ सभार्यः सप्रजः कामान् बुभुजेऽन्याविरोधतः ॥ संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः ॥ प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन्हरेः कथाः ॥ ३३ ॥ निष्णातं योगमायासु मुनिं स्वायंभुवं मनुम् ॥ यदा भ्रंशयितुं भोगा न शेकुर्भगवत्परम् ॥ ३४ ॥ अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः ॥ शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥ ३५ ॥

प्रातरारभ्येत्यर्थः । सस्त्रीभिः स्त्रीसहितैः कवभाव आर्षः । सुरगायकैः गन्धर्वादिभिः सम्यग्गीयमाना सती निर्मला कीर्तिर्यस्य तथाभूतोऽपि सभार्यः सप्रजः सपुत्रश्च विभुः समर्थो मनुः अनुबद्धेन प्रेमानुबद्धेन हृदा हरेः कथाः शृण्वन् । अन्याविरोधतः धर्मार्थमोक्षाणामविरोधेन तत्साधनानुष्ठानपूर्वकं कामान् विषयान् बुभुजे ॥ ३२ ॥ ३३ ॥ निष्णातमिति द्वयम् ॥ यत् यस्मात् योगमायासु ऐच्छिकभोगरचनासु निष्णातं कुशलमपि भगवत्परं मुनिं मुनितुल्यं स्वायंभुवं मनुं भोगाः आ ईषदपि भ्रंशयितुं चालयितुं न शेकुः अतः विष्णोः कथाः शृण्वतः तं ध्यायतः तत्सेवां कुर्वतः तन्नामादि ब्रुवतश्च तस्य मनोः स्वान्तरं मन्वन्तराख्यं कालं यापयन्तीति ते यामाः कालावयवाः प्रहरा अयातयामाः सफला आसन् । यातो गतो यामो यस्य पक्वान्नस्य तद् गतसारं यातयाममुच्यते । तथान्यदपि गतसारं निष्फलं यातयाममुच्यते । " जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् । " इत्यमरः ॥ ३४ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ वासुदेवप्रसङ्गेन परिभूतं गतित्रयं जाग्रदादिसात्विकादिआध्यात्मिकादितापत्रयं वा येन स मनुः एवं युगानामेकसप्ततिपरिमितं कालं निन्ये यापयामास ॥ ३६ ॥ शारीरा इति ॥ हे वैयासे व्यासपुत्र विदुर अकङ्भाव आर्षः। ये शारीराः ज्वराद्याः मानसाः शोकाद्याः आध्यात्मिकाः दिव्या अन्तरिक्षप्रभवाः अनावृष्ट्यादिजन्याः आधिदैविकाः ये च मानुषाः शत्रुजन्या अन्ये च भौतिका व्याघ्रसर्पादिप्रभवाश्च क्लेशाः हरिरेव संश्रयः आश्रयो यस्य तं मनुं कथं बाधन्ते बाधेरन् ॥ ३७ ॥ य इति ॥ यो मनुः सदा सर्वभूतहितः सन् मुनिभिरपि पृष्टो नृणां मनुष्याणां सर्वसाधारणान् तथा वर्णाश्रमाणां विशेषांश्च नानाविधान् शुभान् स्वर्गापवर्गसाधनभूतान् धर्मान् प्राह स्म ॥ ३८ ॥ एतदिति ॥ वर्णनीयस्य कथनीयकीर्तेरादिराजस्य मनोरद्भुतमेतच्चरितं ते तुभ्यं मया वर्णितम्। अथ तदपत्यस्य देवहूतेरुदयमुत्कर्षं मत्तः शृणु ॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायस्तृतीये द्वाविंशे निरमादिमाम् ॥ २२ ॥ त्रयोविंशे कामगमे विमाने विविधा रतिः ॥ देवहूत्या कर्दमस्य श्लोकास्तत्र

स एव स्वान्तरं निन्ये युगानामेकसप्ततिम् ॥ वासुदेवप्रसङ्गेन परिभूतगतित्रयः ॥ ३६ ॥ शारीरा मानसा दिव्या वैयासे ये च मानुषाः ॥ भौतिकाश्च कथं क्लेशा बाधन्ते हरिसंश्रयम् ॥ ३७ ॥ यः पृष्टो मुनिभिः प्राह धर्मान् नानाविधान् शुभान् ॥ नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ॥ ३८ ॥ एतत् त आदिराजस्य मनोश्चरितमद्भुतम् ॥ वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥३९॥ इति श्रीभा० तृती० सपात्निकस्वायंभुवमुनोः वर्हिष्मतीं प्रत्यागमनं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ मैत्रेय उवाच ॥ पितृभ्यां प्रस्थिते साध्वी पतिमिङ्गितकोविदा ॥ नित्यं पर्यचरत् प्रीत्या भवानीव भवं प्रभुम् ॥ १ ॥ विश्रम्भेणात्मशौचेन गौरवेण दमेन च ॥ शुश्रूषया सौहृदेन वाचा मधुरया च भोः ॥ २ ॥ विसृज्य कामं दम्भं च द्वेषं लोभमघं मदम् ॥ अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ॥ ३ ॥ स वै देवर्षिवर्यस्तां मानवीं समनुव्रताम् ॥ दैवाद्गरीयसः पत्युराशासानां महाशिषः ॥ ४ ॥ कालेन भूयसा क्षामां कर्षितां व्रतचर्यया ॥ प्रेमगद्गदया वाचा पीडितः कृपयाऽब्रवीत् ॥ ५ ॥

नँगषेवः ॥ अनुष्टुभोऽत्र त्रिषष्टिरुवाचेति तु पञ्चकम् ॥ २३ ॥ पितृभ्यामिति ॥ पितृभ्यां मनुशतरूपाभ्यां प्रस्थिते गमने कृते भावे क्तः। साध्वी पतिव्रता इङ्गितकोविदा पत्युश्चेष्टादिमात्रेणाभिप्रायज्ञा देवहूतिः प्रभुमीश्वरं भवं रुद्रं भवानी यथा परिचरति तथा पतिं कर्दमं नित्यं प्रीत्या पर्यचरत् सेवितवती ॥ १ ॥ विश्रम्भेणेति द्वयम् ॥ भो विदुर कामं दम्भं द्वेषं लोभम् अघं मदं च विसृज्य नित्यमप्रमत्ता सावधाना उद्यता प्रयत्नयुक्ता च देवहूतिः विश्रम्भेण विश्वासेन आत्मनोर्देहमनसोः शौचेन स्नानसंतोषादिजन्येन गौरवेण आदरेण दमेनेन्द्रियनिग्रहेण शुश्रूषया सौहृदेन प्रेम्णा मधुरया वाचा च तेजीयांसं तेजस्विनमपि। ईयसुन् विण्मतोर्लुक्। कर्दममतोषयत् ॥ २ ॥ ३ ॥ स इति द्वयम् ॥ स वै प्रसिद्धः देवर्षिषु वर्यः श्रेष्ठः कर्दमः मानवीं मनोः कन्यां समनुव्रतां दैवात् अपि गरीयसः दैवमप्यन्यथाकर्तुं शक्तात् पत्युः सकाशात् महाशिषः पुत्रादीन्मनो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रथान् आशासानामभिकाङ्क्षन्तीं व्रतचर्यया कर्शितां क्लिष्टां तत्रापि भूयसा कालेन व्रतपरतया क्षामामतिकृशां दृष्ट्वेति शेषः । कृपयातिपीडितः प्रेम्णा गद्गदया स्खलिताक्षरया वाचाब्रवीत् ॥ ४ ॥ ५ ॥ तुष्ट इति ॥ हे मानवि मानदायाः मम सम्मानं कुर्वत्यास्तव परमया शुश्रूषया सेवया परया भक्त्या चाप्यहं तुष्टः प्रीतोऽस्मि । यतः त्वया योऽयं समुचितः श्लाघ्यः देहिनामतीव सुहृत्प्रियतमो देहः स मदर्थे क्षपितुं क्षपयितुं नावेक्षित उपेक्षितः तिष्ठतु नश्यतु वेत्येवं न गणितः त्वं मत्सेवार्थं देहमप्यनादृतवतीत्यर्थः । यद्वा । परमपतिव्रतायास्तव देहः मदर्थे क्षपितुं समुचित एवेति ॥ ६ ॥ ये इति ॥ स्वधर्मनिरतस्य मे तपः समाधिर्ध्यानं विद्या उपासना तासु य आत्मयोगश्चित्तैकाग्र्यं तेन विजिताः प्राप्ताः ये भगवत्प्रसादाः दिव्याः भोगाः तानेव अभयान् नरकादिभयरहितान् अशोकान् नाशशङ्काशोकरहितान् ते त्वयापि मदनुसेवनया अवरुद्धान् वशीकृतान् त्वं प्रपश्य । अहं तुभ्यं दिव्यां दृष्टिं वितरामि ददामि । यया दृष्ट्या तान् द्रक्ष्यसि ॥ ७ ॥ अन्ये इति ॥ भगवतः उरुक्रमस्य हरेः भ्रुवः कालस्य उद्विजृम्भः वक्रीभावस्तेन विभ्रंशिता अर्थरचना मनोरथाः येषु ते अन्ये पुनर्भोगाः स्वर्गाद्याः किं न किमपि अतितुच्छा इत्यर्थः । अतः मत्सेवयैव त्वं सिद्धासि कृतार्थासि

कर्दम उवाच ॥ तुष्टोऽहमद्य तव मानवि मानदायाः शुश्रूषया परमया परया च भक्त्या॥यो देहिनामयमतीव सुहृत् स्वदेहो नावेक्षितः समुचितः क्षपितुं मदर्थे ॥ ६ ॥ ये मे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः ॥ तानेव ते मदनुसेवनयाऽवरुद्धान् दृष्टिं प्रपश्य वितराम्यभयानशोकान् ॥ ७ ॥ अन्ये पुनर्भगवतो भ्रुव उद्विजृम्भविभ्रंशितार्थरचनाः किमुरुक्रमस्य॥सिद्धाऽसि भुङ्क्ष्व विभवान्निजधर्मदोहान् दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ॥ ८ ॥ एवं ब्रुवाणमबलाऽखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत् ॥ संप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडाऽवलोकविलसद्धसिताननाह ॥ ९ ॥

तस्मात् निजधर्मेण पातिव्रत्येन दुह्यन्ते पूर्यन्ते तान् नरैः कर्तृभिः नृपविक्रियाभिः नृपा वयं भोगयोग्या इति या विक्रियाः अभिमानविशेषाः ताभिर्हेतुभिर्दुरधिगान् अलभ्यान् दिव्यान् अलौकिकान् विभवान् भोगान्भुंक्ष्व ॥ ८ ॥ एवमिति ॥ अखिलाः योगमायाः विचित्रपदार्थरचनाशक्तयः विद्याश्च तत्तदुपासनाः तासु विचक्षणं निपुणं कर्दममेवं पूर्वोक्तप्रकारेण ब्रुवाणमवेक्ष्य अबला देवहूतिः गताधिः विगतमनोव्यथा आसीत् । ततश्च संप्रश्रयः विनयः प्रणयः स्नेहस्ताभ्यां विह्वलया गद्गदाक्षरया गिरा वाचा तमाह स्म । परे त्वाहुः।संप्रश्रयप्रणयाभ्यामेव विह्वलं यथा स्यात्तथा यान्ती कर्दमं प्रति गच्छन्ती या गीस्तया विह्वलयेति विश्वपावत् । ईषद्व्रीडायुक्तोऽवलोक एव विलसद्धसितमाननं यस्याः सा आह स्म । अङ्गनामुकुटमणेस्तस्याः स्फुटं संभोगप्रार्थनाया रसाभासत्वात् तद्व्यञ्जनार्थं लज्जाहसितप्रक्षितमवलोकमेव मुखं चकार । तेन राद्धमित्यादिवक्ष्यमाणश्लोकाशयं मुनिः स्वयमूहितवान् । सा तु मुखेन किमपि नोवाच । देवहूतिरुवाचेत्यत्रापि इङ्गितेनेति शेषो ज्ञेय इति ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेतत्त्वदुक्तं सर्वं राद्धं सिद्धमस्ति तदह-
राद्धमिति ॥ हे द्विजवृष द्विजश्रेष्ठ हे विभो हे भर्तः अमोघाः सफलाः योगमायाः शक्तयस्तासामधिपे नियन्तरि त्वयि
मवैमि जानाम्येव । ते त्वया यः समयोऽभ्यधायि भाषाबन्धः कृतः सकृत् गर्भसंभवमात्रपर्यन्तोऽङ्गसङ्गः स भूयात् । तस्मात् गरीयसि श्रेष्ठे भर्तरि निमित्ते सति सतीनां
स्त्रीणां प्रसव एव गुणो महाँल्लाभः प्रसवाभावे तु वन्ध्येयमिति निन्दैवेति भावः। गुणप्रसव इति समस्तपाठे तु गुणानां प्रसव इति अपत्यमिषेण पत्युर्गुणा एव प्रसूयन्ते ताभिरिति
मम मत्तः सदपत्यानि भवन्तु इति गरीयसि पत्यौ सति सतीनां यतो गुणप्रसवः गुणविस्तारो भवति अतः पुत्रोत्पत्त्या मम गुणविस्तारे जाते पश्चात्त्वदुक्तं पारमहंस्यधर्मानुष्ठानं
भवतु इत्याशयः ॥१०॥ तत्रेति ॥ हे ईश तत्राङ्गसङ्गे यथोपदेशं कामशास्त्रोक्तानुसारेण इतिकृत्यं साधनकलापम् अनङ्गोद्दीपकम् अभ्यङ्गभोजनपानादि उपशिक्ष सम्पादय ।
येन साधनेन ते त्वया कृतः संक्षोभितो यो मनोभवः कामस्तेन धर्षितायाः पीडितायाः मे ममातिरिरंसया भृशं रन्तुमिच्छया कर्शितः अत एव दीनश्च एष
तङ्भाव आर्षः । ...

देवहूतिरुवाच ॥ राद्धं बत द्विजवृषैतदमोघयोगमायाऽधिपे त्वयि विभो तदवैमि भर्तः ॥ यस्तेऽभ्यधायि समयः सकृदङ्गसङ्गो भूया-
द्गरीयसि गुणः प्रसवः सतीनाम् ॥ १० ॥ तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्शितोऽतिरिरंसयात्मा ॥ सिध्येत ते कृतमनो-
भवधर्षिताया दीनस्तदीश भवनं सदृशं विचक्ष्व ॥ ११ ॥ मैत्रेय उवाच ॥ प्रियायाः प्रियमन्विच्छन्कर्दमो योगमास्थितः ॥ विमानं
कामगं क्षत्तस्तर्ह्येवाविरचीकरत् ॥ १२ ॥ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितम् ॥ सर्वर्द्ध्युपचयोदर्कं मणिस्तम्भैरुपस्कृतम् ॥ १३ ॥
दिव्योपकरणोपेतं सर्वकालसुखावहम् ॥ पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतम् ॥ १४ ॥ स्रग्भिर्विचित्रमाल्याभिर्मञ्जुसिञ्जत्षड-
ङ्घ्रिभिः ॥ दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् ॥ १५ ॥

... ॥ ११ ॥ प्रियाया इति ॥ हे क्षत्तः एवं
आत्मा देहः सिद्ध्येत कार्श्यदैन्यादिपरिहारेण रतिसमर्थो भवेत् । आर्षस्तङ् । ततश्च सदृशं भोगानुरूपं भवनं च विचक्ष्व विचारय ॥ ११ ॥ प्रियाया इति ॥ हे क्षत्तः एवं
ज्ञापितः कर्दमः प्रियायाः भार्यायाः प्रियं कर्तुमिच्छन् अनु अनन्तरमेव योगमचिन्त्यशक्तिमास्थितः सन् तर्हि तत्क्षणमेव कामं यथेच्छं गच्छतीति तथाभूतं विमानमा-
विरचीकरत् आविर्भावयामास ॥ १२ ॥ विमानं वर्णयति—सर्वेति ॥ सर्वकामदुघं सर्वाभिलषितपूरकं दिव्यमलौकिकं सर्वैं रत्नैः समन्वितं खचितं सर्वर्द्धीनां सर्वसम्पदामुप-
चयस्तस्योदर्क उत्तरोत्तराभिवृद्धिर्यस्मिंस्तत् मणिमयैः स्तम्भैरुपस्कृतं भूषितम् ॥ १३ ॥ दिव्येति ॥ दिव्यैरुपकरणैर्गार्हस्थ्यनिर्वाहकैः पात्रपीठकादिभिरुपेतं सम्पन्नं
सर्वेषु शीतोष्णादिकालेषु सुखावहमनुकूलं पट्टिकाः अल्पविस्ताराः पट्टवस्त्ररचिता ध्वजविशेषास्ताभिः पताका विस्तृता ध्वजास्ताभिश्च विचित्राभिरलङ्कृतम् ॥ १४ ॥
स्रग्भिरिति ॥ विचित्राणि नानावर्णानि माल्यानि मालानिर्माणयोग्यानि पुष्पाणि यासु ताभिः मञ्जु मधुरं यथा तथा सिञ्जन्तः ध्वनन्तः षडङ्घ्रयो भ्रमरा यासु

CC-0. In Public Domain. Digitization by eGangotri

ताभिः स्रग्भिः विराजितम् । दुकूलैः सूक्ष्मैः कार्पासैः क्षौमैरतसीतन्तुभवैः कौशेयैः कृमिकोशोत्थैश्च नानाविधवस्त्रैर्विराजितम् ॥ १५ ॥ उपरीति ॥ उपर्युपरि विन्यस्तेषु विरचितेषु निलयेषु गृहेषु पृथक् पृथक् विभक्तं क्षिप्तैः स्थितैः कशिपुभिः कान्तं कमनीयं पर्यङ्कैः व्यजनैः आसनैश्च कन्तम् ॥१६॥तत्रेति ॥ तत्र तत्र भित्त्यादिषु विनिक्षिप्तैर्विरचितैर्नानाविधैः शिल्पैरुपशोभितं महामरकतस्थल्या इन्द्रनीलमणिमयभूम्या जुष्टं युक्तं विद्रुमैः प्रवालै रचिताभिर्वेदिभिरुपवेशनस्थानविशेषैश्च जुष्टम्॥१७॥द्वास्स्विति॥ द्वाःसु द्वारेषु विद्रुममयदेहल्या उदुम्बरेण भातं शोभितं वज्रखचितकपाटयुक्तम् इन्द्रनीलमणिमयेषु शिखरेषु प्रासादाग्रेषु हेममयकुम्भैरधिश्रितमधिष्ठितम् ॥ १८ ॥ चक्षुष्मदिति ॥ वज्रभित्तिषु निर्मितैः खचितैः चक्षुष्मन्त इव ये पद्मरागाग्र्याः पद्मरागश्रेष्ठास्तैः।यद्वा । पद्मरागाग्र्यैश्चक्षुष्मदिव तथा विचित्रैर्वितानैर्वितानसमूहैः महार्हैरनर्घ्यैर्हेममयतोरणैर्वन्दमालेतिनख्यातैश्च जुष्टम् ॥ १९ ॥ हंसेति ॥ कृत्रिमानपि हंसादीन् स्वान् स्वजातीयान्मन्यमानैर्हंसानां पारावतानां च व्रातैः समूहैस्तत्र तत्राधिरुह्याधिरुह्य च निकूजितम् ॥ २० ॥

उपर्युपरि विन्यस्तनिलयेषु पृथक् पृथक् ॥ क्षिप्तैः कशिपुभिः कान्तं पर्यङ्कव्यजनासनैः ॥ १६ ॥ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितम् ॥ महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः ॥ १७ ॥ द्वास्सु विद्रुमदेहल्या भातं वज्रकपाटवत् ॥ शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिश्रितम् ॥ १८ ॥ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः ॥ जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः ॥ १९ ॥ हंसपारावतव्रातैस्तत्र तत्र निकूजितम् ॥ कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च ॥ २० ॥ विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः ॥ यथोपजोषं रचितैर्विस्मापनमिवात्मनः ॥ २१ ॥ ईदृग्गृहं तत्पश्यन्तीं नातिप्रीतेन चेतसा ॥ सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयम् ॥ २२ ॥ निमज्ज्यास्मिन्ह्रदे भीरु विमानमिदमारुह ॥ इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणाम् ॥ २३ ॥

विहारेति ॥ यथोपजोषं यथापेक्षितं रचितैः विहारस्थानं क्रीडास्थानं विश्रामः बाह्यत आगत्य श्रमापनोदनार्थमुपवेशस्थानं संवेशनं शयनगृहं प्राङ्गणं गृहाद्बहिः अजिरं प्राकाराद्बहिः एतैः आत्मनः स्वस्य कर्दमस्यापि विस्मापनं विस्मयजनकमिवेति स्वनिर्मितत्वेन स्वस्याश्चर्याभावादिवशब्दः ॥ २१ ॥ ईदृगिति ॥ ईदृगेवंविधं तद् गृहं विमानं नातिप्रीतेन देहादेर्मलिनत्वात्परिचारकाद्यभावाच्चाऽनतिसंतुष्टेन चेतसा पश्यन्तीं देवहूतिं योगबलेन सर्वभूतानामाशयमभिप्रायं जानातीति स कर्दमः स्वयमेव प्रावोचत् ॥ २२ ॥ निमज्ज्येति ॥ हे भीरु अस्मिन्बिन्दुसरआख्ये ह्रदे पूर्वं निमज्ज्य स्नात्वा तत इदं विमानमारुह अधिरोह गुणाभाव आर्षः । यतः इदं तीर्थं शुक्लेन भगवता आनन्दाश्रुनिपातनकृतमतो नृणामाशिषां वाञ्छितार्थानां यापकं प्रापकमस्ति ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेति द्वयम् ॥ सा कुवलयेक्षणा देवहूतिर्भर्तुर्वचः समादाय स्वीकृत्य सरजं मलिनं वासः वस्त्रं वेणीभूतान् जटिलान् केशान् मलपङ्केन संछन्नमत एव शबलौ विवर्णौ स्तनौ यस्मिंस्तथाभूतमङ्गं शरीरं च बिभ्रती सती शिवानां निर्मलानां सुखकराणां जलानामाशयमाश्रयं शिवा जलाशया जलचरा यत्रेति वा सरस्वत्या मध्यस्थं तत्सरः बिन्दुसर आविवेश प्रविष्टवती ॥ २४ ॥ २५ ॥ सान्तरिति ॥ सा अन्तःसरसि निमग्ना सती तत्र वेश्मस्था मन्दिरस्थाः दशशतानि कन्यका ददर्श । ताश्च सर्वाः किशोरवयसः उत्पलस्येव देहगन्धो यासां तादृश्य आसन् ॥ २६ ॥ तामिति ॥ तां देवहूतिं दृष्ट्वा ताः स्त्रियः सहसा आशु उत्थाय प्राञ्जलयः सत्यो वयं तुभ्यं त्वां परिचरितुं कर्मकरीः किङ्कर्यः पूर्वसवर्णदीर्घ आर्षः । अतः किं तव दास्यं करवाम तन्नः शाधि आज्ञापयेति प्रोचुः ॥ २७ ॥ स्नानेनेति द्वयम् ॥ एवमुक्त्वा च मानदाः सम्मानकर्त्र्यः स्त्रियो महार्हेण अतिश्रेष्ठेन स्नानेन स्नानसाधनेन सुगन्धितैलादिना तां मनस्विनीमुत्साहयुक्तां देवहूतिं स्नापयित्वास्यै देवहूत्यै निर्मले शुद्धे नूत्ने नवीने दुकूले सूक्ष्मे वस्त्रे परिधानो-

सा तद्भर्तुः समादाय वचः कुवलयेक्षणा ॥ सरजं बिभ्रती वासो वेणीभूतांश्च मूर्धजान् ॥ २४ ॥ अङ्गं च मलपङ्केन संछन्नं शबलस्त-
नम् ॥ आविवेश सरस्वत्याः सरः शिवजलाशयम् ॥ २५ ॥ साऽन्तः सरसि वेश्मस्थाः शतानि दश कन्यकाः ॥ सर्वाः किशो-
रवयसो ददर्शोत्पलगन्धयः ॥ २६ ॥ तां दृष्ट्वा सहसोत्थाय प्रोचुः प्राञ्जलयः स्त्रियः ॥ वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किम्
॥ २७ ॥ स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीम् ॥ दुकूले निर्मले नूत्ने ददुरस्यै च मानद ॥ २८ ॥ भूषणानि परार्ध्यानि वरीयांसि
द्युमन्ति च ॥ अन्नं सर्वगुणोपेतं पानं चैवामृतासवम् ॥ २९ ॥ अथादर्शे स्वमात्मानं स्रग्विणं विरजाम्बरम् ॥ विरजं कृतस्वस्त्ययनं
कन्याभिर्बहु मानितम् ॥ ३० ॥ स्नातं कृतशिरःस्नानं सर्वाभरणभूषितम् ॥ निष्कग्रीवं वलयिनं कूजत्काञ्चननूपुरम् ॥ ३१ ॥ श्रोण्यो-
रध्यस्तया काञ्च्या काञ्चन्या बहुरत्नया ॥ हारेण च महाऽर्हेण रुचकेन च भूषितम् ॥ ३२ ॥

त्तरीये तथा परार्ध्यानि अमूल्यानि वरीयांसि श्रेष्ठतमानि तत्प्रियाणि च द्युमन्ति दीप्तिमन्ति च भूषणानि सर्वगुणोपेतं षड्रसोपेतमन्नं च अमृतमिव स्वादु आसवं मादकं च पानं पेयं चास्यै ददुः ॥ २८ ॥ २९ ॥ अथेति ॥ अथ देवहूतिः आदर्शे दर्पणे स्वं स्वीयमात्मानं देहं स्रग्विणं स्रजं बिभ्रतं पुंस्त्वं सर्वत्रात्मशब्दसामानाधिकरण्यात् विरजं निर्मलमम्बरं वासो यस्य तं विरजं निर्मलं कृतं स्वस्त्ययनं मङ्गलं यस्य तं ताभिः कन्याभिर्बहु मानितं सेवितं ददर्शेति शेषः ॥ ३० ॥ स्नातमिति ॥ स्नातमुद्वर्त्य क्षालितं कृतं शिरः स्नानमभ्यङ्गो येन तं यथाश्रुतं वा सर्वाभरणभूषितं निष्कं पदकं ग्रीवायां यस्य तं वलयिनं कूजन्ती काञ्चननूपुरे यस्य तादृशम् ॥ ३१ ॥ श्रोण्योरिति ॥ श्रोण्योर्नितम्बयोरध्यस्तया धृतया काञ्चन्या काञ्चनमय्या बहूनि रत्नानि यस्यां तया काञ्च्या मेखलया महार्हेण श्रेष्ठेन हारेण रुचकेन कुङ्कुमादिमङ्गलद्रव्येण च भूषितं

CC-0. In Public Domain. Digitization by eGangotri

" रुचकं मङ्गलद्रव्ये ग्रीवाभरणदन्तयोः ।" इति विश्वः ॥ ३२ ॥ सुदतेति ॥ सुदता सुन्दरदन्तपङ्क्त्या सुभ्रुवा शोभनया भ्रुवा श्लक्ष्णो मनोहरः स्निग्धोऽपाङ्गो नेत्रप्रान्तो यस्य तेन अत एव पद्मकोशेन स्पर्द्धत इति पद्मकोशस्पृत् । स्पर्द्धतेः स्पृध आर्षः । तेन चक्षुषा नीलैरलकैश्च लसत् शोभमानं मुखं यस्य तं सुदता सुभ्रुवा चक्षुषेति च जातावेकवचनानि । ईदृशं स्वमात्मानम् ॥ ३३ ॥ यदेति ॥ एवंभूतं पत्यू रमणयोग्यमात्मानं दृष्ट्वा यदा ऋषीणामृषभं श्रेष्ठं दयितं प्रियं पतिं भर्तारं सस्मार तदा यत्र सः प्रजापतिः कर्दम आस्ते तत्र स्वयमपि स्त्रीभिः सह आस्ते स्म । तत्रात्मानं पत्युरेकासने आसीनमेव विवेद नतु जलहृदात् पद्व्या आयान्तमित्यद्भुतैव योगगतिः ॥ ३४ ॥ भर्तुरिति ॥ भर्तुः पुरस्तात् अग्रे स्त्रीसहस्रैर्वृतमात्मानं निशाम्य दृष्ट्वा तस्य भर्तुर्योगगतिं च दृष्ट्वा संशयं कथमेतदभूदिति विस्मयं प्रत्यपद्यत ॥ ३५ ॥ स इति द्वयम् ॥ हे अमित्रहन् जातभावः तद्दर्शनादुद्बुद्धकामः स मुनिः कृतं मलनिवर्तकं स्नानं यया अपूर्ववत् तपोदशातो नूतनवद्विभ्राजन्तीं शतार्षः । विवाहसमये यदात्मनो रूपं तदेव

सुदता सुभ्रुवा श्लक्ष्णस्निग्धापाङ्गेन चक्षुषा ॥ पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखम् ॥ ३३ ॥ यदा सस्मार ऋषभमृषीणां दयितं पतिम् ॥
तत्र चास्ते सह स्त्रीभिर्यत्रास्ते स प्रजापतिः ॥ ३४ ॥ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा ॥ निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत ॥३५॥
स तां कृतमलस्नानां विभ्राजन्तीमपूर्ववत् ॥ आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीम् ॥ ३६ ॥ विद्याधरीसहस्रेण सेव्यमानां सुवाससम् ॥
जातभावो विमानं तदारोहयदमित्रहन् ॥ ३७ ॥ तस्मिन्नलुप्तमहिमा प्रिययाऽनुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने ॥ बभ्राज उत्कचकुमुद्गण-
वानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ॥ ३८ ॥ तेनाष्टलोकपविहारकुलाचलेन्द्रद्रोणीष्वनङ्गसखमारुतसौभगासु ॥ सिद्धैर्नुतो द्युधुनिपात-
शिवस्वनासु रेमे चिरं धनदवल्ललनावरूथी ॥ ३९ ॥

पुनर्बिभ्रतीं संवीतौ कञ्चुक्यादिना वेष्टितौ रुचिरौ स्तनौ यस्यास्तां स्तनमिति पाठे रूपविशेषणम् । विद्याधरीसहस्रेण सेव्यमानां सुवाससं तां विलोक्य तद्विमानमारोहयत् ॥ ३६ ॥ ३७ ॥ तस्मिन्निति ॥ अलुप्तः महिमा प्रभावो यस्य सः प्रियया भार्यया सहानुरक्तः विद्याधरीभिरुपचीर्णं शुश्रूषितं वपुर्यस्य स मुनिस्तस्मिन् विमाने उत्कचकुमुद्गणवान् विकसत्कुमुदगणवान् अपीच्योऽतिसुन्दरः ताराभिरावृतो नभःस्थः उडुपतिः पूर्णचन्द्र इव बभ्राजे रराज । तत्र चन्द्र इव मुनिः नभ इव विमानं तारा इव स्त्रियः कुमुदानीव तासां नेत्राणीति ज्ञेयम् ॥ ३८ ॥ तेनेति ॥ अनङ्गस्य कामस्य सखा उद्दीपको मारुतः शीतसुगन्धमन्दानिलस्तेन सौभगं सौन्दर्यं यासां तासु तथा द्युधुनिर्गङ्गा तस्याः ऊर्द्ध्वतः पातेन शिवः सर्वपापनिवर्तकः स्वनो ध्वनिर्यासु तासु अष्टलोकपानां विहारो यस्मिन्स कुलाचलेन्द्रः पर्वतश्रेष्ठो मेरुस्तस्य द्रोणीषु दरीषु शिखराणामन्तर्विजनप्रदेशेषु वा ललनावरूथी स्त्रीरत्नसमूहवान् सिद्धैर्नुतः स्तुतः स मुनिस्तेन विमानेन चिरं धनदवत् रेमे ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वैश्रम्भके इति ॥ वैश्रम्भकादिषु पञ्चसु देवोद्यानेषु मानसे सरसि च रतः प्रीतः सन् स मुनिः रामया स्त्रिया सह रेमे ॥ ४०॥ भ्राजिष्णुनेति ॥ भ्राजिष्णुना प्रकाशमानेन महीयसा महत्तमेनातिश्रेष्ठेन कामगेन यथेष्टं गच्छता विमानेन अनिलवदप्रतिहतगतिर्लोकांश्चरन् वैमानिकान् विमानश्चैरतो देवादीन् अत्यशेत आतिक्रम्य स्थितः ॥ ४१ ॥ किमिति॥ यैः पुंभिस्तीर्थपदः भगवतः व्यसनात्ययः तापत्रयविनाशकश्चरण आश्रितस्तेषामुद्दामचेतसां सत्यसङ्कल्पानां धीराणां पुंसां किं दुरापादनं सम्पादयितुं किमशक्यं न किमपीत्यर्थः ॥४२॥ प्रेक्षयित्वेति॥ स्वसंस्थया द्वीपवर्षादिरचनया यावानस्ति तावन्तमत एव बहून्याश्चर्याणि यस्मिस्तं भुवो गोलं मण्डलं पत्न्यै भार्यायै प्रेक्षयित्वा दर्शयित्वा ल्यबभाव आर्षः । महायोगी कर्दमः स्वाश्रमाय न्यवर्तत स्वाश्रमं प्रत्यागतवान् ॥ ४३ ॥ विभज्येति ॥ आत्मानं नवधा विभज्य आत्मनो नव रूपाणिकृत्वा सुरते उत्सुकां मानवीं मनुकन्यां रामां स्वभार्यां विशेषेण रमयन् वर्षपूगान् संवत्सरगणान् मुहूर्तवत् रेमे ॥ ४४ ॥ तस्मिन्निति ॥ तस्मिन्नुत्कृष्टे विमाने उत्कृष्टां निरतिशयसुखकरीं रतिकरीं

वैश्रम्भके सुरसने नन्दने पुष्पभद्रके ॥ मानसे चैत्ररथ्ये च स रेमे रामया रतः ॥ ४० ॥ भ्राजिष्णुना विमानेन कामगेन महीयसा ॥ वैमानिकानत्यशेत चरँल्लोकान्यथाऽनिलः ॥ ४१ ॥ किं दुरापादनं तेषां पुंसामुद्दामचेतसाम् ॥ यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ॥ ४२ ॥ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया ॥ बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत ॥ ४३ ॥ विभज्य नवधाऽऽत्मानं मानवीं सुरतोत्सुकाम् ॥ रामां निरमयन् रेमे वर्षपूगान् मुहूर्तवत् ॥ ४४ ॥ तस्मिन् विमान उत्कृष्टां शय्यां रतिकरीं श्रिता ॥ नचाबुध्यत तं कालं पत्याऽपीच्येन संगता ॥ ४५ ॥ एवं योगानुभावेन दम्पत्यो रममाणयोः ॥ शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ॥ ४६ ॥ तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित् ॥ नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ॥ ४७ ॥

रतिवर्द्धिनीं शय्यां श्रिता अधिष्ठिता अपीच्येन अतिसुन्दरेण पत्या च सङ्गता संयुक्ता सती तमनेकवर्षसमूहात्मकं कालं नाबुध्यत एतावान् कालो गत इति न ज्ञातवती॥४५॥ एवमिति ॥ एवं यथेष्टं योगानुभावेन रममाणयोः कामलालसयोः दम्पत्योः शतं शरदः संवत्सरामनागीषत्काल इव व्यतीयुः अतिक्रान्ताः ॥ ४६ ॥ तस्यामिति ॥ आत्मवित् सर्वसंकल्पवित् पत्न्या बह्वपत्यसंकल्पं जानन् मरीच्यादिविवाहार्थं ब्रह्मणः सङ्कल्पं जानन् वा विभुः कर्दमः तां प्रियामात्मनो देहार्द्धेन भावयन् चिन्तयन् आधानकाले स्वीध्यानेन अपत्यं स्यादिति स्वं रूपं नोधा नवधा आर्षः प्रयोगः । विधाय तस्यां रेत आधत्त निहितवान् । आत्मवित्त्वेन तस्यामनासक्तत्वाद्वीर्यस्याल्पच्यवनात्कन्याप्रसवो जातः । " पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । " इति वचनात् ॥ ४७ ॥

CC-0. In Public Domain. Digitization by eGangotri

अत इति ॥ अतः पूर्वोक्तादेव हेतोः सा देवहूतिः चारूणि सर्वाण्यङ्गानि यासां तथा लोहितोत्पलस्य गन्ध इव गन्धो यासां तथाभूतास्ताः सर्वाः स्त्रियः स्त्रीरेव प्रजाः अपत्यानि सद्यस्तस्मिन्नेवाहनि सुषुवे प्रसूतवती ॥ ४८ ॥ पतिमिति द्वयम् ॥ समयस्य पूरितत्वाद्यदा अपत्योत्पत्त्यनन्तरमेव प्रव्रजिष्यन्तं सर्वं त्यक्त्वा गन्तुमिच्छन्तं पतिमालक्ष्य तच्चेष्टया ज्ञात्वा पतिदर्शनस्वाभाव्यात् बहिः स्मयमाना अन्तस्तु विक्लवेन व्याकुलेन विदूयता तप्यमानेन शतार्षः । हृदयेन उपलक्षिता अधोमुखी नखा एव मणयस्तेषां श्रीः शोभा यस्मिंस्तेन पदा भूमिं लिखन्ती उशती कमनीया सती पतिव्रता देवहूतिः अश्रुकलां निरुध्य ललितां मृद्वीं वाचमुवाच ॥ ४९ ॥ ५० ॥ सर्वमिति ॥ यद्यपि मह्यं मदर्थं भवता यत्प्रतिश्रुतं विवाहसमये प्रतिज्ञातं तद् भगवान् समर्थो भवान्सर्वमुपोवाह सम्पादितवान् अथापि प्रपन्नायाः शरणमागतायाः मे मम त्वमभयं दातुमर्हसि । भाविनो दैन्यात्संसाराच्च यद्भयं तन्निवर्त्तय ॥ ५१ ॥ तत्र दैन्यादाह—ब्रह्मन्निति ॥ हे ब्रह्मन् दुहितृभिः समाः वयःशीलादिभिस्तुल्यास्तत्पतयस्तुभ्यं त्वया विमृग्याः अवश्यमन्वेषणियाः संसारभयादाह तावत् त्वयि वनं प्रव्रजिते संन्यस्य गते सति मे मम विशोकाय संसारदुःखनिवृत्त्यर्थं कश्चित् ज्ञानी पुत्रोऽपि स्यात् अतः कंचित्कालं स्थित्वैतद्द्वयं संपादनीयम् ॥५२॥ एतावतेति ॥ हे प्रभो इन्द्रियाणामर्थेषु विषयेषु शब्दादिषु यः प्रकृष्टः सङ्गस्तेन परित्यक्तः अनुपासितः परात्मा भगवान्यया तस्याः मे मम व्यतीतेनातिक्रान्तेनैतावता शतवर्षपरिमितेन कालेनालम् एतावान् कालो वृथा गतः ॥ ५३ ॥ इन्द्रियेति ॥ इन्द्रियार्थेषु विषयेषु सज्जन्त्या आसक्तया अत एव परं भावं तत्वं ब्रह्मवित्त्वं महावैराग्यं च अजानत्या अननुसन्दधत्या मया नुम्वापाठस्त्वार्षः। यद्यपि त्वयि प्रकृष्टः सङ्गः कृतस्तथापि स मे ममाभयाय त्वत्प्रसादेन तत्त्वज्ञपुत्रलाभात्संसारभयनिवृत्तयेऽस्तु ॥ ५४ ॥ सङ्ग इति ॥ य एव सङ्गः अधिया अज्ञानेनापि इदमग्रेऽप्यन्वेति असत्सु विषयाविष्टचित्तेषु विहितः कृतः सन् संसृतेर्हेतुर्भवति स एव सङ्गः साधुषु भवादृशेषु अज्ञानेनापि कृतः सन् निःसङ्गत्वाय संसारनिवृत्तये कल्पते हेतुर्भवति ॥ ५५ ॥

अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः॥ सर्वास्ताश्चारुसर्वाङ्ग्यो लोहितोत्पलगन्धयः ॥४८॥ पतिं सा प्रव्रजिष्यन्तं तदालक्ष्योशती सती ॥ स्मयमाना विक्लवेन हृदयेन विदूयता ॥ ४९ ॥ लिखन्त्यधोमुखी भूमिं पदा नखमणिश्रिया ॥ उवाच ललितां वाचं निरुध्याश्रुकलां शनैः ॥५०॥ देवहूतिरुवाच ॥ सर्वं तद्भगवान् मह्यमुपोवाह प्रतिश्रुतम् ॥ अथापि मे प्रपन्नाया अभयं दातुमर्हसि ॥ ५१ ॥ ब्रह्मन् दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः ॥ कश्चित् स्यान्मे विशोकाय त्वयि प्रव्रजिते वनम् ॥ ५२ ॥ एतावताऽलं कालेन व्यतिक्रान्तेन मे प्रभो॥ इन्द्रियार्थप्रसङ्गेन परित्यक्तपरात्मनः ॥ ५३ ॥ इन्द्रियार्थेषु सज्जन्त्या प्रसङ्गस्त्वयि मे कृतः ॥ अजानन्त्या परं भावं तथाऽप्यस्त्वभयाय मे ॥ ५४ ॥ सङ्गो यः संसृतेर्हेतुरसत्सु विहितो धिया ॥ स एव साधुषु कृतो निःसङ्गत्वाय कल्पते ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ इह संसारे यस्य कर्मकायवाङ्मनोव्यापारो धर्माय पुण्योत्पत्तये न कल्पते समर्थो न भवति तद्द्वारा च विरागाय न कल्पते तद्द्वारा च तीर्थपदस्य भगवतः सेवायै आराधनार्थं न पर्यवस्यति स प्राणी जीवन्नपि मृततुल्य एव ॥ ५६ ॥ साहमिति ॥ या विमुक्तिदं त्वां प्राप्यापि संसारबन्धनान्न मुमुक्षेय मोक्षेच्छां न कृतवती साहं भगवतो मायया दृढं यथा स्यात्तथा वञ्चिता मोहिता ॥ ५७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयत्रयोविंशे व्यधादिमाम् ॥ २३ ॥ चतुर्विंशे देवहूत्यां कपिलाख्यहरेर्जनिः ॥ प्रव्रज्या कर्दमस्यात्र श्लोकाः शैलँपयोधयः ॥ अनुष्टुभस्त्वष्टवेदौ उवाचेति च सप्तँकम् ॥ २४ ॥ निर्वेदेति ॥ एवं निर्वेदवादिनीं वैराग्यं कथयन्तीं शालिनीं श्लाघ्यां मनोर्दुहितरं देवहूतिं प्रति दयालुः मुनिः कर्दमः शुक्लाभिव्याहृतमहं स्वांशकलयावतीर्येति भगवद्वाक्यं स्मरन्नाह स्म ॥ १ ॥ मा खिद इति ॥ हे राजपुत्रि हे अनिन्दिते इत्थमहं वञ्चिता भाग्यहीनेत्येवमात्मानं प्रति मा खिदः खेदं मा कार्षीः आर्षः । अक्षरो विनाशादिविकारशून्यो भगवानेव तवोद्धारार्थमदूरात् शीघ्रमेव ते गर्भं

नेह यत्कर्म धर्माय न विरागाय कल्पते ॥ न तीर्थपादसेवायै जीवन्नपि मृतो हि सः ॥ ५६॥ साहं भगवतो नूनं वञ्चिता मायया दृढम् ॥
यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बन्धनात् ॥ ५७ ॥ इति श्रीभा०तृ० कर्दमस्य नवकन्योत्पत्तिवर्णनं नाम त्रयोविंशतितमोऽध्यायः
॥ २३ ॥ मैत्रेय उवाच ॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ॥ दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥ १ ॥ ऋषिरुवाच ॥
मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिन्दिते ॥ भगवांस्तेऽक्षरो गर्भमदूरात् संप्रपत्स्यते ॥ २ ॥ धृतव्रतासि भद्रं ते दमेन नियमेन
च ॥ तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ॥ ३ ॥ स त्वयाराधितः शुक्लो वितन्वन् मामकं यशः ॥ छेत्ता ते हृदयग्रन्थिमौदर्यो ब्रह्म-
भावनः ॥ ४ ॥ मैत्रेय उवाच ॥ देवहूत्यपि संदेशं गौरवेण प्रजापतेः ॥ सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुम् ॥ ५ ॥ तस्यां बहुतिथे
काले भगवान् मधुसूदनः ॥ कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥ ६ ॥

संप्रपत्स्य ते तव पुत्रो भविष्यतीत्यर्थः ॥ २ ॥ धृतेति ॥ यद्यपि पूर्वमेवानेकजन्मसु धृतानि अनुष्ठितानि व्रतानि यया तथाभूतासि तथापीदानीमपि दमेन बाह्येन्द्रियनिग्रहेण नियमेन स्नानजपादिनियमेन कृच्छ्रचान्द्रायणादितपोभिर्द्रविणानां हिरण्यान्नादीनां दानैश्च श्रद्धया प्रेम्णा चेश्वरं भगवन्तं भज एवं ते तव भद्रं कल्याणं भविष्यति ॥ ३ ॥ स इति ॥ त्वया आराधितः स शुक्लः शुद्धो भगवान् मामकं मदीयं भगवानपि कर्दमस्य पुत्रो जात इति यशो वितन्वन् विस्तारयन् औदर्यः त्वत्पुत्रः सन् ब्रह्म भावयत्युपदिशतीति तथा च संस्ते तव हृदयग्रन्थिं चिज्जडात्मकमहंकारलक्षणं बन्धं छेत्ता छेत्स्यति ॥ ४ ॥ देवहूतीति ॥ देवहूतिः अपि दैर्घ्यमार्षं मन्ये । प्रजापतेः कर्दमस्य सन्देशं गौरवेण सम्यक् श्रद्धाय विश्वस्य कूटस्थं निर्विकारं गुरुं यः पुत्रो भूत्वा गुरुर्भविष्यति तं पुरुषं पुरुषोत्तमं भगवन्तमभजत् ॥ ५ ॥ तस्यामिति ॥ बहुतिथे बहूनां

CC-0. In Public Domain. Digitization by eGangotri

पूरणे बहुतरे इत्यर्थः । बहुशब्दाड्डटि बहुपूगगणेति तिथुक् । काले गते सति मधुसूदनः कार्दमं कर्दमसंबन्धिवीर्यं भक्तिप्रभावमापन्नस्तेन वशीकृतः सन् काष्ठे महाभूतरूपः स्थित एवाग्निर्यथाऽऽविर्भवति तथा तस्यां देवहूत्यां जज्ञे आविर्बभूव नतु शुक्रशोणितसंबन्धेन । एवमवतारान्तरेष्वपि ॥ ६ ॥ अवादयन्निति ॥ तदा घनाघनाः इत्येकं पदम् । वर्षन्तो घना इव देवाः व्योम्नि आकाशे वादित्राणि अवादयन् । तं हरिं गन्धर्वा गायन्ति स्म । मुदा अप्सरसो नृत्यन्ति स्म ॥ ७ ॥ पेतुरिति ॥ खेचरैर्देवैरपवर्जिताः विमुक्ताः दिव्याः सुमनसः पुष्पाणि पेतुः सर्वा दिशः अम्भांसि जलानि सर्वप्राणिनां मनांसि च प्रसेदुः प्रसन्नानि निर्मलानि अभूवन् ॥८॥ तदिति ॥ सरस्वत्या नद्या परिश्रितं परिवेष्टितं तद्बिन्दुसरःसंज्ञकं कर्दमस्याश्रमपदं स्थानं प्रति मरीच्यादिभिर्ऋषिभिः साकं सह स्वयंभूर्ब्रह्मा अभ्ययात् आगच्छत् ॥ ९ ॥ भगवन्तमिति द्वयम् ॥ हे शत्रुहन् सत्वेन सत्वगुणाङ्गीकारेण तत्त्वानां प्रकृत्यादीनां निरूपणं संख्यानं यस्मिंस्तस्य सांख्यशास्त्रस्य विशेषेण ज्ञप्त्यै ज्ञापनाय अंशेन जातं परं ब्रह्मरूपं भगवन्तं विद्वान् स्वरा-

अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः ॥ गायन्ति तं स्म गन्धर्वा नृत्यन्त्यप्सरसो मुदा ॥ ७ ॥ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः ॥ प्रसेदुश्च दिशः सर्वा अम्भांसि च मनांसि च ॥ ८ ॥ तत् कर्दमाश्रमपदं सरस्वत्या परिश्रितम् ॥ स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ॥ ९ ॥ भगवन्तं परब्रह्म सत्वेनांशेन शत्रुहन् ॥ तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ॥ १० ॥ सभाजयन् विशुद्धेन चेतसा तच्चिकीर्षितम् ॥ प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ॥ ११ ॥ ब्रह्मोवाच ॥ त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः ॥ यन्मे संजगृहे वाक्यं भवान् मानद मानयन् ॥ १२ ॥ एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः ॥ बाढमित्यनुमन्येत गौरवेण गुरोर्वचः ॥ १३ ॥ इमा दुहितरः सभ्य तव वत्स सुमध्यमाः ॥ सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यन्त्यनेकधा ॥ १४ ॥ अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि ॥ आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि ॥ १५ ॥

ट् स्वतः सिद्धज्ञानः अजः ब्रह्मा प्रहृष्यमाणैः आनन्दाश्रुप्रभृतिविकारयुक्तैरसुभिः इन्द्रियैरुपलक्षितः विशुद्धेन चेतसा तस्य भगवतश्चिकीर्षितं सभाजयन् संमानयन् अभिनन्दयन् कर्दमं चकाराद्देवहूतिं चेदं वक्ष्यमाणमभ्यधात् अभ्यभाषत॥१०॥११॥ त्वयेति॥हे तात हे मानद यत् मम वाक्यं भवान्मानयन्सन् जगृहे ततः त्वया मे मम अपचितिः पूजा निर्व्यलीकतः निष्कपटतया कल्पिता कृता । निर्व्यलीकत इत्यस्य जगृहे इत्यनेन वा संबन्धः ॥ १२ ॥ एतावतीति ॥ पुत्रकैः सत्पुत्रैः अनुकम्प्यायां कन् । पितरि एतावत्येव शुश्रूषा सेवा कार्या । यत् गुरोः पितुर्वचः वाक्यं गौरवेण हेतुना बाढमिति यथा ज्ञापयसि तथा करवाणीत्यनुमन्येत अङ्गीक्रियेत ॥ १३ ॥ इमा इति ॥ हे वत्स हे सभ्य सुमध्यमाः शोभनाङ्ग्यः इमास्तव दुहितरः स्वैः प्रभावैः वंशैरेतं सर्गमनेकधा अपत्यपरम्परया बृंहयिष्यन्ति वर्द्धयिष्यन्ति ॥ १४ ॥ अत इति ॥ अतः यथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीलं यथारुचि आसां शीलादिसादृश्येनेमाः स्वात्मजाः कन्यास्त्वमृषिमुख्येभ्यो मरीच्यादिभ्यः परिदेहि प्रयच्छ । तेनाद्य भुवि स्वयशो विस्तृणीहि वितनु ॥१५॥ वेदेति ॥ हे मुने भूतानां शेवधिं सर्वाभीष्टं निधिभूतं देहं बिभ्राणं कपिलम् आद्यं जगत्कारणभूतं पुरुषोत्तममेव त्वद्गृहे स्वमाययावतीर्णमहं वेद ॥१६॥ ज्ञानेति द्वयम् ॥ ज्ञानं साङ्ख्यशास्त्रोत्थं परोक्षं तत्त्वज्ञानं विज्ञानमपरोक्षं दर्शनं योगोऽष्टाङ्गस्तेन प्राणिकर्मणां जटाः मूलानि वासना उद्धरन् उत्पाटयिष्यन् हिरण्यवत्प्रकाशमानाः केशा यस्य सः पद्मे इवाक्षिणी यस्य सः पद्माकारा मुद्रारेखा तद्युक्तं पदाम्बुजं यस्य एष कैटभार्दनः कैटभाख्यदैत्यनिहन्ता भगवान् हे मानवि ते गर्भमुदरं प्रविष्टः अतस्तव अविद्यास्वरूपाज्ञानं संशयाः मिथ्याज्ञानानि तन्मयं तव ग्रन्थिं हृदयग्रन्थिं ज्ञानाद्युपदेशेन च्छित्त्वा गां भूमिं विचरिष्यति ॥ १७ ॥ १८ ॥ अयमिति ॥ अयं पुत्रो लोके कपिल इत्याख्यां नामधेयं गन्ता गमिष्यति प्राप्स्यति सिद्धगणानां योगिसमूहानाम् अधीशो नियन्ता सांख्यशास्त्राचार्यैः सुसंमतः सत्कृतः ते तव कीर्तिवर्द्धनश्च भविष्यति । अयमेव "ऋषिं प्रसूतं कपिलं महान्तम्" इति श्रुत्या मुक्तः अन्यो दर्शनकर्त्ता तु वेदविरुद्धानीश्वरवादान्नादर्त्तव्यः । तथैव हि श्रीशङ्कराचार्याद्यैरुक्तं पाद्मवच्चनं चात्राहुः। "कपिलो वासुदेवाख्यस्तत्वं सांख्यं

वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया ॥ भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने ॥१६॥ ज्ञानविज्ञानयोगेन कर्मणामुद्धरन् जटाः ॥ हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ॥ १७ ॥ एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः ॥ अविद्यासंशयग्रन्थिं छित्त्वा गां विचरिष्यति ॥ १८ ॥ अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः ॥ लोके कपिल इत्याख्यां गन्ता ते कीर्तिवर्धनः ॥ १९ ॥ मैत्रेय उवाच ॥ तावाश्वास्य जगत्स्रष्टा कुमारैः सहनारदः ॥ हंसो हंसेन यानेन त्रिधाम परमं ययौ ॥ २० ॥ गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः ॥ यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः ॥ २१ ॥ मरीचये कलां प्रादादनसूयामथात्रये ॥ श्रद्धामङ्गिरसेऽयच्छत् पुलस्त्याय हविर्भुवम् ॥ २२ ॥

जगाद ह । ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च॥ तथैवासुरये सर्ववेदार्थैरुपबृंहितम्।सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह ॥ सांख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितम् ।" इति ॥ १९ ॥ ताविति ॥ एवं तौ कर्दमं देवहूतिं चाश्वास्य सान्त्वयित्वा जगतः स्रष्टा हंसो ब्रह्मा मरीच्यादीन् विवाहार्थमवस्थाप्य कुमारैः सनत्कुमारादिभिश्चतुर्भिः सहेति शेषः । सहनारदः नारदसहितश्चेति नैष्ठिकैरेतैः पञ्चभिः सहितो हंसेन यानेन त्रिधाम तृतीयं धाम स्वर्गस्तस्य परमं परां काष्ठामापन्नं सत्यलोकं ययौ ॥ २० ॥ गत इति ॥ हे क्षत्तः शतधृतौ ब्रह्मणि गते सति तेन चोदित आज्ञप्तः कर्दमस्ततस्तदनन्तरं विश्वसृजां विश्वसृड्भ्यो मरीच्यादिभ्यः स्वदुहितॄर्यथोचितं शीलरुच्याद्यनुरूपं यथा स्यात्तथा प्रादात् प्रायच्छत् । यथोदितमिति पाठेऽपि ब्रह्मणा यथाशीलमित्युक्तत्वादयमेवार्थः ॥ २१ ॥ मरीचये इति ॥ मरीचये कलां प्रादात् । अथ अत्रये अनसूयां प्रादात् आङ्गिरसे श्रद्धामयच्छत् पुलस्त्याय हविर्भुवमयच्छत् ॥ २२ ॥

Nepal Sanskrit University / Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुलहायेति ॥ पुलहाय युक्तां शीलादिभिर्योग्यां गतिमयच्छत् । क्रतवे च सतीं साध्वीं क्रियामयच्छत् । भृगवे च ख्यातिमयच्छत् । वसिष्ठाय अपि अरुन्धतीमयच्छत् ॥ २३ ॥ अथर्वण इति ॥ यया यज्ञः वितन्यते समृद्धः क्रियते शान्त्यैव वितता यज्ञाः सफला भवन्ति तां शान्तिं शान्त्यधिष्ठात्रीं देवताम् अथर्वणे अददात् । कृतोद्वाहान् विप्रर्षभान् सदारान् समलालयत् प्रियवस्तुदानप्रियवचनादिभिः संतोषितवान् ॥ २४ ॥ तत इति ॥ हे क्षत्तः कृतदाराः ते ऋषयस्तं निमन्त्र्य गमनानुज्ञां संप्रार्थ्य नन्दिं हर्षमापन्नाः सन्तः स्वं स्वमाश्रममण्डलं प्रातिष्ठन् जग्मुः । तङभाव आर्षः ॥ २५ ॥ स चेति ॥ स च कर्दमः विबुधर्षभं देवश्रेष्ठं त्रियुगं युगत्रये दर्शनार्हम् । यद्वा । त्रीणि युगानि ज्ञानादयः षड्गुणा यस्य तं भगवन्तमाज्ञाय विविक्त एकान्ते तमुपसङ्गम्य समीपं गत्वा मूर्ध्ना प्रणम्य सम्यग् विनयपूर्वकमभाषत ॥ २६ ॥ अहो इति ॥ अहो स्वैः स्वीयैरमङ्गलैः दुष्कृतैरिह निरये नरकतुल्ये संसारे पापच्यमानानां भृशं दह्यमानानां मादृशानां भूयसा कालेन बहुकालयोगध्यानादिसाधनानुष्ठानेन देवताः

पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीम् ॥ ख्यातिं च भृगवेऽयच्छद्वसिष्ठायाप्यरुन्धतीम् ॥२३॥ अथर्वणेऽददाच्छान्तिं यया यज्ञो वितन्यते ॥ विप्रर्षभान् कृतोद्वाहान् सदारान् समलालयत् ॥२४॥ ततस्त ऋषयः क्षत्तः कृतदारा निमन्त्र्य तम् ॥ प्रातिष्ठन् नन्दिमापन्नाः स्वं स्वमाश्रममण्डलम्॥२५॥ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम्॥ विविक्त उपसंगम्य प्रणम्य समभाषत॥२६॥अहो पापच्यमानानां निरये स्वैरमङ्गलैः॥ कालेन भूयसा नूनं प्रसीदन्तीह देवताः ॥ २७ ॥ बहुजन्मविपक्वेन सम्यग्योगसमाधिना ॥ द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदम् ॥ २८ ॥ स एव भगवानद्य हेलनं न गणय्य नः ॥ गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः ॥२९॥ स्वीयं वाक्यमृतं कर्तुमवतीर्णोऽसि मे गृहे॥ चिकीर्षुर्भगवान् ज्ञानं भक्तानां मानवर्धनः ॥३०॥ तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ॥ यानि यानि च रोचन्ते स्वजनानामरूपिणः ॥३१॥

प्रसीदन्ति प्रसन्ना भवन्ति ॥ २७॥ बह्विति द्वयम् ॥ बहुषु जन्मसु विपक्वेन बह्वभ्यासपक्वेन सम्यक् योगो यत्र तेन समाधिना चित्तैकाग्र्येण यस्य तव पदं स्वरूपं शून्यागारेषु निर्जनस्थानेषु यतयः सर्वतो विरक्ताः संन्यासिनो द्रष्टुं यतन्ते । यश्च स्वानां पक्षस्य पोषणः स एव भगवान् हेलनं लोककृतावज्ञारूपं लाघवम् अस्मदपराधं नगणय्य अगणयित्वा नञ्भिन्नेन नशब्देन सुप्सुपेति समासः अतो ल्यप् । ग्राम्याणामविवेकिनां नोऽस्माकं गृहेषु जातः यः स्वानामिति स्वगृहे जन्मनि हेतुः ॥२८॥ २९ ॥ स्वीयमिति ॥ भक्तानां मानवर्द्धनः ज्ञानं ज्ञानसाधनं सांख्यशास्त्रं चिकीर्षुः कर्तुमिच्छुर्भगवान् भवान् अथाहं स्वांशकलयेति स्वीयं वाक्यमृतं सत्यं कर्तुं मे मम गृहेऽवतीर्णोऽसि ॥ ३० ॥ तानीति ॥ हे भगवन् अचिन्त्यशक्तिमन् यानि यानि च अलौकिकानि चतुर्भुजादीनि तव रूपाणि स्वजनानां स्वभक्तानां रोचन्ते रुचिकराणि भवन्ति तान्येव अरूपिणः प्राकृतरूपरहितस्य ते तव अभिरूपाणि योग्यानि न तैस्तव हीनता । यद्वा । यानि चतुर्भुजादीनि रूपाणि तान्येव तेऽभिरूपाणि यानि च मनुष्यसरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाण्यपि स्वजनानां रोचन्ते तान्यपि ते रोचन्ते ॥ ३१ ॥ तमिति ॥ सूरिभिर्विवेकिभिः तत्त्वबुभुत्सया तत्त्वानां प्रकृतिपुरुषादीनां याथात्म्यं बोद्धुमिच्छया अद्धा साक्षात् सदाभिवादार्हणं प्रणामयोग्यं पादपीठं यस्य तम् ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रियां भगशब्दवाच्यानाम् अत एव वीर्यशब्देन धर्मो ग्राह्यः । पूर्त्तं महातडागमिव तैः पूर्णं तं कपिलमहं प्रपद्ये ॥ ३२ ॥ परमिति ॥ परं प्रपञ्चातीतं प्रधानं प्रकृतिरूपं पुरुषं तदधिष्ठातारं महान्तं महत्तत्वरूपं कालं प्रकृत्यादिक्षोभकं कविं सर्वज्ञं प्रधानाद्याविर्भावलयसाक्षिणं त्रिवृतं त्रयाणां सत्वरजस्तमसां वृत् वर्तनं यस्मिन् तमहङ्काररूपं लोकपालमिन्द्रादिरूपम् आत्मनः स्वस्यानुभूत्या चिच्छक्त्या अनुगतः स्वस्मिन् लीनः प्रपञ्चो यस्य तम् अनुगतः अनुप्रविष्टः प्रपञ्चः कर्मभूतो येन कर्त्रा इति वा स्वच्छन्दाः स्वाधीनाः शक्तयो यस्य तं कपिलं प्रपद्ये ॥ ३३ ॥ आ स्मेति ॥ स्मभीति पादपूरणे । प्रजानां पतिं त्वाम् अद्य आपृच्छे संन्यासार्थमनुज्ञां प्रार्थये । "व्यवहिताश्च" इति व्यवहितेनाङ संबन्धात्तङ् । त्वया पुत्ररूपेणावतीर्णानि अपाकृतानि पित्रादीनामृणानि यस्य सः । यद्वा । अवतीर्णं निवृत्तं प्रजाः सृजेति पितुराज्ञारूपमृणं यस्य स इति उत अपि त्वयैवाप्तकामः पूर्णमनोरथोऽप्यहम् अतः परिव्रजतां संन्यासिनां पदवीं मार्गमास्थितस्त्वामेव

तं सूरिभिस्तत्त्वबुभुत्सयाऽद्धा सदाऽभिवादार्हणपादपीठम् ॥ ऐश्वर्यवैराग्ययशोऽवबोधवीर्यश्रिया पूर्त्तमहं प्रपद्ये ॥ ३२ ॥ परं प्रधानं पुरुषं महान्तं कालं कविं त्रिवृतं लोकपालम् ॥ आत्मानुभूत्याऽनुगतप्रपञ्चं स्वच्छन्दशक्तिं कपिलं प्रपद्ये ॥ ३३ ॥ आ स्माभिपृच्छेऽद्य पतिं प्रजानां त्वयाऽवतीर्णार्ण उताप्तकामः ॥ परिव्रजत्पदवीमास्थितोऽहं चरिष्ये त्वां हृदि युञ्जन् विशोकः ॥ ३४ ॥ श्रीभगवानुवाच ॥ मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके ॥ अथाजनि मया तुभ्यं यदवोचमृतं मुने ॥ ३५ ॥ एतन्मे जन्म लोकेऽस्मिन् मुमुक्षूणां दुराशयात् ॥ प्रसंख्यानाय तत्वानां संमतायात्मदर्शने ॥ ३६ ॥

हृदि युञ्जन् ध्यायन् अत एव विशोकश्च सन् विचरिष्ये । तङार्षः ॥ ३४ ॥ मयेति ॥ हे मुने हि यस्मात्सत्यलौकिके सत्ये वैदिके लौकिके च कृत्ये मया लोकस्य प्रमाणरूपं वचः प्रोक्तम् अथवा लौकिकत्रिवर्गविषये तु मन्वादिभिरपि प्रोक्तं प्रमाणं सति सत्यरूपे अलौकिके मत्प्राप्तिलक्षणे तु मया प्रोक्तमेव प्रमाणम् । यदुक्तम् । "ये वै भगवता प्रोक्ता उपायाः"इत्यादि । अथ तस्मात् तुभ्यं तव पुत्रो भविष्यामीति यदवोचमुक्तवांस्तत् ऋतं सत्यं यथा स्यात्तथा मया अजनि जन्म स्वीकृतम् ॥ ३५ ॥ मत्प्रसादात्तव गृहे स्थितस्यापि मुक्तिः सुलभैव । यदि तु गन्तव्यमेवेत्याग्रहस्तदा मामनुस्मरन् गच्छेत्याह–एतदिति ॥ अस्मिन् लोके मे ममैतज्जन्म दुराशयात् दुष्ट आशयोन्तःकरणं यस्मिन् तस्मादात्मत्वेनानुसंहितात् संसारबन्धहेतुभूताल्लिङ्गदेहात् मुमुक्षूणामात्मदर्शने संमताय उपयुक्ताय तत्त्वानां प्रकृतिपुरुषेश्वराणां प्रसंख्यानाय विविक्ततया कथनाय मया भूतं विद्धि इत्युत्तरेण संबन्धः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एष इति ॥ एष आत्मपथः परमात्मप्राप्तिमार्गः अव्यक्तः दुर्ज्ञेयः अतश्चिरन्तनोऽपि भूयसा कालेन नष्टः परिभ्रष्टः अतस्तमेव पुनः प्रवर्तयितुमिमं देहं मया भृतं धृतमिति त्वं विद्धि ॥ ३७ ॥ गच्छेति ॥ यथा त्वं गन्तुं मां पृच्छसि तथात्र व्यवस्थातुं मयापि आपृष्टस्त्वं यद्वा धातूनामनेकार्थत्वात् मया पृष्टः अनुज्ञातस्त्वं कामं यथेच्छं गच्छेत्यर्थः । मयि संन्यस्तेन समर्पितेन कर्मणा अविद्याशब्दवाच्येन सुदुर्जयं मृत्युं संसरणहेतुभूतं पापसमूहं जित्वा अमृतत्वाय मोक्षाय मां भज विद्याशब्दवाच्यंमदुपासनं कुरु । " अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते । " इति श्रुतेः ॥३८॥ मामिति ॥ आत्मानं स्वाभिन्नं सर्वेषां भूतानां गुहायामन्तःकरणे शेते साक्षितया तं स्वयं ज्योतिः स्वप्रकाशं माम् आत्मनि स्वस्मिन्नेवात्मना मनसा वीक्ष्य विशोकः सर्वसंतापरहितः सन् अभयं सर्वभयरहितं मोक्षरूपं मामृच्छसि प्राप्स्यसि ॥ ३९ ॥ मात्र इति ॥ यया च विद्ययाऽसौ संसारभयमतितरिष्यति चकारादभयं मां च प्राप्स्यति तां सर्वकर्मणां शमनीम् उन्मूलिनीमाध्यात्मिकीमात्मतत्त्वप्रकाशकरीं विद्यामस्यै स्वमात्रे वितरिष्ये

एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा ॥ तं प्रवर्तयितुं देहमिमं विद्धि मया भृतम् ॥३७॥ गच्छ कामं मयाऽऽपृष्टो मयि संन्यस्तकर्मणा ॥ जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ॥ ३८ ॥ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयम् ॥ आत्मन्येवात्मना वीक्ष्य विशोकोऽभयमृच्छसि ॥ ३९ ॥ मात्रे आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणाम् ॥ वितरिष्ये यया चासौ भयं चातितरिष्यति ॥ ४० ॥ मैत्रेय उवाच ॥ एवं समुदितस्तेन कपिलेन प्रजापतिः ॥ दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ॥ ४१ ॥ व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः ॥ निःसङ्गो व्यचरत्क्षोणीमनग्निरनिकेतनः ॥ ४२ ॥ मनो ब्रह्मणि युञ्जानो यत्तत्सदसतः परम् ॥ गुणावभासे विगुण एकभक्त्याऽनुभाविते ॥ ४३ ॥ निरहंकृतिर्निर्ममश्च निर्द्वन्द्वः समदृक् स्वदृक् ॥ प्रत्यक् प्रशान्तधीर्धीरः प्रशान्तोर्मिरिवोदधिः ॥ ४४ ॥ वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि ॥ परेण भक्तिभावेन लब्धात्मा मुक्तबन्धनः ॥ ४५ ॥ आत्मानं सर्वभूतेषु भगवन्तमवस्थितम् ॥ अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥ ४६ ॥

वक्ष्यामि । तद्गर्भः ॥ ४० ॥ एवमिति ॥ तेन कपिलेनैवं सम्यक् उदितोऽनुज्ञातः प्रजापतिः कर्दमः प्रीतः संस्तं प्रदक्षिणीकृत्य वनमेव जगाम ॥ ४१ ॥ व्रतमिति ॥ स कर्दमो मुनिः मौनं मुनीनां संबन्धि मौनाहिंसादिकं व्रतम् आस्थितः आश्रितः आत्मा एवैकः शरणमाश्रयो यस्य सः निःसङ्गः अनग्निः परित्यक्तगृहाश्रमत्वादाहवनीयाद्यग्निरहितः अनिकेतनः नियतावसथरहितः क्षोणीं भूमिं व्यचरत् ॥ ४२ ॥ मन इति चतुष्कम् ॥ यत् सदसतः कार्यकारणसङ्घातात् परं तत् तस्मिन् गुणानामवभासो यस्मात्तस्मिन् विगुणे एकया एकान्तया अव्यभिचारिण्या भक्त्या अनुभाविते अपरोक्षीकृते ब्रह्मणि मनो युञ्जान एकाग्रीकुर्वन् निरहङ्कृतिः देहादावभिमानरहितः निर्ममः तेषु स्वीयत्वबुद्धिरहितः निर्द्वन्द्वः शीतोष्णादिद्वन्द्वरहितः समदृक् भेदाग्राहकः किन्तु स्वदृक् स्वयमेव पश्यन् प्रशान्ता ऊर्मयो यस्य स उदधिः समुद्रो यथा तथा प्रत्यक् प्रवणा प्रशान्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्षेपरहिता धीर्यस्य स धीरः सर्वज्ञे प्रत्यङ् जीवस्तस्यात्मनि वासुदेवे भगवति परेण उत्कटेन भक्तिभावेन लब्धः स्थिरीकृत आत्मान्तःकरणं येन सः मुक्तं बन्धनमज्ञानं यस्य स कर्दमः आत्मानं भगवन्तं सर्वभूतेषु अवस्थितम् अपश्यत् सर्वभूतानि आत्मनि भगवति अवस्थितानि अपश्यत् ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ इच्छेति ॥ भगवद्भक्तियुक्तेन अत एवाविद्यानिवृत्त्या इच्छाद्वेषादिविहीनेन सर्वत्र समेन चेतसा हेतुभूतेन कर्दमेन भागवती भगवत्प्राप्तिलक्षणा गतिः प्राप्ता । प्राप्तो भागवतीं गतिमिति पाठान्तरम् ॥ ४७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयचतुर्विंशे व्यधादिमाम् ॥ २४ ॥ पञ्चविंशे तु कपिलो भक्तियोगस्य लक्षणम् ॥ देवहूत्यै प्राह तत्र श्लोका आम्नायसिन्धवः ॥ नैवोवाचेति सार्द्धाष्टचत्वारिंशदनुष्टुभः ॥ २५ ॥ कपिल इति ॥ अजः जन्मरहितः भगवान् एव आत्ममायया नृणामात्मतत्वस्य प्रज्ञप्तये ज्ञापनाय स्वयमेव साक्षात् तत्त्वानां संख्याता गणकः साङ्ख्यशास्त्रप्रवर्तकः कपिलो जातः ॥ १ ॥ न हीति ॥ हि यस्मात् पुंसां वर्ष्मणः श्रेष्ठस्य सर्वयोगिनां च

इच्छाद्वेषविहीनेन सर्वत्र समचेतसा ॥ भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ॥ ४७ ॥ इति श्रीभा० तृती० कापिलेये कपिलावतारवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ शौनक उवाच ॥ कपिलस्तत्त्वसंख्याता भगवानात्ममायया ॥ जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥ १ ॥ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनाम् ॥ विश्रुतौ श्रुतदेवस्य भूरि तृप्यन्ति मेऽसवः ॥ २ ॥ यद्यद्विधत्ते भगवान् स्वच्छन्दात्माऽऽत्ममायया ॥ तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय ॥ ३ ॥ सूत उवाच ॥ द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा ॥ प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः ॥ ४ ॥ मैत्रेय उवाच ॥ पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया ॥ तस्मिन्बिन्दुसरेऽवात्सीद्भगवान्कपिलः किल ॥ ५ ॥

वरिम्णः वरिष्ठस्यास्य कपिलस्य विश्रुतौ कीर्तौ कीर्तिश्रवणे अत्र वरिम्ण इत्यत्र भावे विहितोऽपीमनिच् । लक्षणया अतिशये वर्त्तते यद्वा हेतौ पञ्चमीयं वरत्वादित्यर्थः । यद्वा । अस्य वर्ष्मणः कपिलाकारस्य देहस्य यो वरिमा श्रेष्ठत्वं तस्य विश्रुतौ ख्यातौ श्रुतदेवस्य भूरिशः श्रुतो देवो येन तथाभूतस्यापि मे मम असव इन्द्रियाणि न तृप्यन्ति अलमिति न मन्यन्ते । श्रुतेन श्रवणेन दीव्यति द्योतते इति कपिलविशेषणं वा ॥ २ ॥ यद्यदिति ॥ तस्मात् स्वानां छन्देन इच्छया आत्मा देहाविर्भावो यस्य सः भगवान् कपिलः आत्ममायया यद्यत् यानि यानि चरितानि विधत्ते अकरोत् तानि कीर्तन्यानि कीर्तनार्हाणि चरितानि श्रद्दधानस्य मे ममानुकीर्त्तय ॥ ३ ॥ द्वैपायनेति ॥ यथा त्वं मां प्रचोदयसि एवं विदुरेणाप्यान्वीक्षिक्यां कपिलोक्तब्रह्मविद्यायां प्रचोदितो भवान् द्वैपायनस्य व्यासस्य सखा पराशरशिष्यः मैत्रेयोऽपि प्रीतः सन् तथा तत्प्रश्नानुसारेण विदुरं प्रतीदं वक्ष्यमाणं प्राह स्म । तच्छृणु इति शेषः ॥ ४ ॥ पितरीति ॥ पितरि कर्दमेऽरण्यं प्रति प्रस्थिते गते सति भगवान् कपिलो मातुर्देवहूत्याः प्रियं कर्तु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिच्छया तस्मिन्नेव बिन्दुसरे बिन्दुसरसस्तीरे अवात्सीत् । सरे इत्यार्षम् ॥ ५ ॥ तमिति ॥ धातुर्ब्रह्मण एष मानवि ते गर्भं प्रविष्ट इत्यादि वचः संस्मरती नुमभाव आर्षः । देवहूतिः आसीनम् अकर्माणं कर्ममार्गान्निवृत्तं तत्त्वज्ञानमार्गस्याग्रं पारं सिद्धान्तं दर्शयतीति तथा तं स्वसुतं कपिलम् आह स्म ॥ ६ ॥ निर्विण्णेति ॥ हे भूमन् हे प्रभो असतामिन्द्रियाणां तर्पणात् तर्षणादिति पाठे विषयाभिलाषादित्यर्थः । नितरां भृशमहं निर्विण्णा खिन्नाऽस्मि संभाव्यमानेन निरन्तरं क्रियमाणेन येनेन्द्रियतर्पणेनाहमन्धन्तमः महामोहं प्रपन्ना प्राप्तास्मीति ॥ ७ ॥ तस्येति ॥ तस्य दुष्पारस्य दुरन्तस्यान्धस्य गाढस्य तमसः पारं गमयतीति पारगस्तथाभूतं त्वमेव सत् श्रेष्ठं चक्षुः मे मया बहूनां जन्मनामन्ते भाव्ये सति त्वदनुग्रहादेव अद्य लब्धं न स्वसाधनबलात् ॥ ८ ॥ य इति ॥ यो वै पुंसामीश्वरः आद्यो भगवान् स एव भवान् तमसा अज्ञानेनान्धस्य लोकस्य चक्षुः प्रकाशकः सूर्य इव उदितः ॥ ९ ॥ अथेति ॥ अथ तस्मात् हे देव त्वं मे मम संमोहमपाकर्तुं दूरीकर्तुमर्हसि । यः संमोहः एतस्मिन् देहादौ अहं ममेती-

तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनम् ॥ स्वसुतं देवहूत्याह धातुः संस्मरती वचः ॥ ६ ॥ देवहूतिरुवाच ॥ निर्विण्णा नितरां भूमन्नसदि-न्द्रियतर्षणात् ॥ येन संभाव्यमानेन प्रपन्नाऽन्धं तमः प्रभो ॥ ७ ॥ तस्य त्वं तमसोऽन्धस्य दुष्पारस्याद्य पारगम् ॥ सच्चक्षुर्जन्मनामन्ते लब्धं मे त्वदनुग्रहात् ॥ ८ ॥ य आद्यो भगवान् पुंसामीश्वरो वै भवान्किल ॥ लोकस्य तमसाऽन्धस्य चक्षुः सूर्य इवोदितः ॥ ९ ॥ अथ मे देव संमोहमपाक्रष्टुं त्वमर्हसि ॥ योऽवग्रहोऽहंममेतीत्येतस्मिन्योजितस्त्वया ॥ १० ॥ तं त्वा गताऽहं शरणं शरण्यं स्वभृ-त्यसंसारतरोः कुठारम् ॥ जिज्ञासयाऽहं प्रकृतेः परस्य नमामि सद्धर्मविदां वरिष्ठम् ॥ ११ ॥ मैत्रेय उवाच ॥ इति स्वमातुर्निरवद्यमी-प्सितं निशम्य पुंसामपवर्गवर्धनम् ॥ धियाऽभिनन्द्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशोभिताननः ॥१२॥ श्रीभगवानुवाच ॥ योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे ॥ अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च ॥ १३ ॥

त्येवंप्रकारः अवग्रहः अभिमानस्त्वया योजितः। अत्र प्रथम इति शब्दोऽभिमानाभिनयद्योतकः। द्वितीयः प्रकारे तत्कार्यरागादिपरिग्रहार्थः॥ १० ॥ तमिति ॥ स्वभृत्यानां संसार एव तरुस्तस्य कुठारं मूलोच्छेदकं तं शरण्यं शरणयोग्यं त्वा त्वामहं शरणं गता स्मि । तथा प्रकृतेः पूरुषस्य च परस्येति पाठेऽपि स एवार्थः । तत्वजिज्ञासया सद्धर्मविदां मो-क्षोपायज्ञानां वरिष्ठं त्वामहं नमामि॥ ११ ॥इतीति ॥ पुंसामपवर्गवर्द्धनं मोक्षे रतिजनकमत एव निरवद्यं स्वमातुरीप्सितमित्येवं निशम्य धियाभिनन्द्य आत्मवतां जितमनसां सतां गतिः फलभूतो भगवान् कपिल ईषत् स्मितेन शोभितमाननं यस्य तादृक् सन् बभाषे ॥ १२ ॥ योग इति ॥ पुंसां निःश्रेयसाय मोक्षाय आध्यात्मिकः आत्मनिष्ठः योगो मे मम सम्मतः । यस्मिन् योगे निष्पन्ने सति दुःखस्य सुखस्य चात्यन्तम् उपरतिः निवृत्तिर्भवति ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ हे अनघे यमात्मयोगं श्रोतुकामानामृषीणां पुरा पूर्वकालेऽहमवोचमुक्तवान् तं सर्वैरङ्गैः शमदमादिभिर्नैपुणं यथा भवति तथेमं योगं ते तुभ्यं प्रवक्ष्यामि ॥ १४ ॥ चेत इति ॥ अस्यात्मनो जीवस्य चेतः खलु चेत एव बन्धाय मुक्तये च मतं कारणतया संमतं गुणेषु विषयेषु सक्तं चेतोऽस्य बन्धाय भवति । पुंसि भगवति रतमासक्तं तु मुक्तये भवति वाशब्दस्त्वर्थे ॥ १५ ॥ अहमिति त्रयम् ॥ यदा मनः देहेन्द्रियादावहमित्यभिमानः स्त्रीपुत्रादिषु ममेत्यभिमानस्ताभ्यामुत्थैः उत्पन्नैः कामलोभादीभिर्मलैर्दो-षैर्यदा वीतं रहितम् अदुःखम् असुखं समं शुद्धं भवति तदा ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन च आत्मना मनसा पुरुषः केवलं शुद्धं प्रकृतेः परं निरन्तरं निर्भेदं स्वयंज्योतिः अणिमानम् अतिसूक्ष्मम् अत्रापि लक्षणयातिशये इमनिच् अखण्डितमपरिच्छिन्नम् उदासीनम् आत्मानं स्वरूपं परिपश्यति प्रकृतिं च हतौजसं क्षीणबलां पश्यति ॥ १६ ॥

तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे॥ऋषीणां श्रोतुकामानां योगं सर्वाङ्गनैपुणम्॥१४॥चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम्॥ गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये॥ १५॥ अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः॥ वीतं यदा मनः शुद्धमदुःखमसुखं समम् ॥ १६॥ तदा पुरुष आत्मानं केवलं प्रकृतेः परम्॥ निरन्तरं स्वयंज्योतिरणिमानमखण्डितम्॥ १७॥ ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना॥ परिपश्यत्युदासीनं प्रकृतिं च हतौजसम् ॥ १८॥ न युज्यमानया भक्त्या भगवत्यखिलात्मनि॥ सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये॥ १९॥ प्रसङ्गमजरं पाशमात्मनः कवयो विदुः॥ स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥ २० ॥ तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्॥ अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥ २१ ॥ मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम्॥ मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः॥ २२॥

॥ १७ ॥ १८ ॥ नेति ॥ योगिनां मुमुक्षूणां ब्रह्मसिद्धये ब्रह्मत्वप्राप्तये अखिलात्मनि भगवति युज्यमानया क्रियमाणया भक्त्या सदृशः शिवः सुखरूपोऽन्यः पन्था नास्ति ॥ १९ ॥ प्रसङ्गमिति ॥ स्त्रीपुत्रमित्रादौ प्रसङ्गमासक्तिमात्मनो जीवस्याजरं दृढं पाशं कवयो विदुः स एव प्रसङ्गः साधुषु कृतस्तु वैराग्याद्युत्पादने। अपावृतं निरावरणं मुक्तिद्वारं भवति॥ २०॥ साधूनां लक्षणान्याह–तितिक्षव इति ॥ तितिक्षवः सहनशीलाः कारुणिकाः दयालवः सर्वदेहिनां सुहृदः अजातशत्रवः शान्ताः अनुग्राः साधवः शास्त्रानुवर्तिनः साधु सुशीलं भूषणं येषांते॥ २१॥ मयीति॥ ये च मयि अनन्येन अव्यभिचारेण भावेन मनसा दृढां भक्तिं कुर्वन्ति मत्कृते मदर्थे त्यक्तानि कर्माणि यैस्ते त्यक्ताः स्वजनाः मित्राणि बान्धवाश्च यैस्ते ॥ २२ ॥

Nepal Sanskrit University, Valmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

मदिति ॥ ये मदाश्रयाः मद्विषयाः मृष्टाः शुद्धाः कथाः शृण्वन्ति कथयन्ति च मद्गतचेतसः तान् एतान् विविधाः तापाः न तपन्ति ॥ २३ ॥ त इति ॥ हे साध्वि सर्व-सङ्गविवर्जितास्ते एते पूर्वोक्तगुणाः साधवः ज्ञेयाः । हि यस्मात् ते साधवः सङ्गदोषहराः दुःसङ्गजदोषनिवर्तकाः अथ तस्मात् ते त्वया तेषु सङ्गः प्रार्थ्यः ॥ २४ ॥ सतामिति ॥ सतां प्रसङ्गात् मम वीर्यस्य सम्यक् वित् वेदनं यासु तथाभूताः हृत्कर्णयोः रसायनाः सुखप्रदाः कथाः भवन्ति प्रवर्त्तन्ते तासां जोषणात् सेवनात् आशु शीघ्रमेव अपवर्गवर्त्मनि मोक्षप्रदे भगवति प्रथमं श्रद्धा विश्वासस्ततो रतिः प्रीतिस्ततो भक्तिः प्रेमातिशयश्चानुक्रमिष्यति अनुक्रमेण भविष्यति ॥ २५ ॥ भक्त्येति ॥ मम रचना सृष्ट्यादिलीला तस्या अनुचिन्तया या भक्तिस्तया दृष्टश्रुतात् ऐहिकामुष्मिकात् ऐन्द्रियात् ऐन्द्रियजन्यसुखात् जातविरागः सन् पुमान् यत्त आलस्यादिरहितः सावधानः योग-युक्तः योगमास्थितश्च सन् ऋजुभिर्भक्तिप्राधान्यादनायासैर्योगमार्गैः प्राणायामादिभिश्चित्तस्य ग्रहणे यतिष्यते यत्नं करिष्यति॥२६॥ असेवयेति ॥ प्रकृतेर्गुणानां विषयाणाम-

मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च॥तपन्ति विविधास्तापा नैतान्मद्गतचेतसः॥२३॥त एते साधवः साध्वि सर्वसङ्गविवर्जिताः॥
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते ॥ २४ ॥ सतां प्रसङ्गान्मम वीर्यसंविदो भवन्ति हृत्कर्णरसायनाः कथाः ॥ तज्जोषणादाश्वऽ-
पवर्गवर्त्मनि श्रद्धारतिर्भक्तिरनुक्रमिष्यति ॥ २५ ॥ भक्त्या पुमाञ्जातविराग ऐन्द्रियाद्दृष्टश्रुतान्मद्रचनाऽनुचिन्तया ॥ चित्तस्य यत्तो
ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः ॥ २६ ॥ असेवयाऽयं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृम्भितेन॥ योगेन मय्यर्पितया
च भक्त्या मां प्रत्यगात्मानमिहावरुन्धे ॥ २७ ॥ देवहूतिरुवाच ॥ काचित्त्वय्यच्युता भक्तिः कीदृशी मम गोचरा ॥ यया पदं ते
निर्वाणमञ्जसाऽन्वाश्नवा अहम् ॥ २८ ॥ यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः ॥ कीदृशः कति चाङ्गानि यतस्तत्त्वावबोधनम्
॥ २९ ॥ तदेतन्मे विजानीहि यथाहं मन्दधीर्हरे ॥ सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् ॥ ३० ॥

सेवया वैराग्येण विजृम्भितं युक्तं यज्ज्ञानं तेन योगेन मय्यर्पितया भक्त्या च अयं जीवः इहैव देहे प्रत्यगात्मानं मामवरुन्धे प्राप्नोति ॥ २७ ॥ काचिदिति ॥ उचितामुक्तिं साधयितुं योग्या त्वयि भक्तिः काचित् कास्वित् किंस्वरूपेत्यर्थः । तत्रापि मम स्त्रिया गोचरा स्त्रीत्वमार्षं भाति योग्या कीदृशी यया भक्त्याऽहं ते तव निर्वाणं मोक्षाख्यं पदं स्वरूपं च अञ्जसा सुखेन अन्वश्नवै प्राप्नवानि । "अशूङ् व्याप्तौ" अञ्जसा त्विति पाठे अहं त्विति संबन्धः ॥ २८ ॥ य इति ॥ हे निर्वाणात्मन् निरतिशयानन्दरूपभगवति बाणस्तत्र क्षिप्तः शर इव यस्तं लक्षीकरोति स योगस्त्वया उदित उक्तः । स कीदृशः तस्याङ्गानि च कति यतस्तत्त्वानामवबोधनं निर्विचिकित्सितं ज्ञानं भवति ॥ २९ ॥ तदिति ॥ हे हरे तदेतत्साङ्ख्यं दुर्बोधं दुःखेनापि बोद्धुमशक्यमपि भवतः अनुग्रहात् योषा अतो मन्दधीरप्यहं यथासुखमनायासेनैव बुध्येय तथा मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम विजानीहि विशेषेण ज्ञापय ॥ ३० ॥ विदित्वेति ॥ यत्र यस्यां मातरि तन्वा शरीरेण जातस्तस्यां मातरि जातस्नेहः कपिलः मातुर्देवहूत्याः इत्थमुक्तप्रकारकमर्थं भक्तियोगसाङ्ख्येति त्रिकश्रवणरूपं प्रयोजनं विदित्वा तत्त्वान्याम्नायन्ते निरूप्यन्ते यस्मिन् यच्च वृद्धाः सांख्यमिति प्रवदन्ति तत्सांख्यशास्त्रं तथा भक्तिवितानं भक्तिविस्तारं योगं चेत्येतत्तत्पृष्टं त्रयं प्रोवाच ॥ ३१ ॥ देवानामिति द्वयम् ॥ एकमेकरूपं शुद्धम् अविकृतं मनो यस्य तस्य पुंसः गुणाः शब्दादयो विषयाः लिङ्ग्यन्ते ज्ञायन्ते यैस्तेषां गुणलिङ्गानां गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वेदस्तद्विहितमानुश्रविकं तदेव कर्म येषां तेषां शास्त्रीयकर्मण्येव यज्ञादौ भगवत्सेवादौ च प्रवृत्तानां देवानामिन्द्रियाणां या सत्त्वे सत्त्वमूर्तौ हरावेव स्वाभाविकी अयत्नसिद्धा अनिमित्ता निष्कामा वृत्तिः प्रवृत्तिः सा भागवती भक्तिः सिद्धेर्मुक्तेरपि गरीयसी गुरुतरा । या भक्तिः निगीर्णं भुक्तमन्नमनलो जाठराग्निर्यथा प्रयत्नान्तरं विनैव जरयति तद्वत् कोशं लिङ्गशरीरमाशु शीघ्रमेव जरयति क्षपयति ॥ ३२ ॥ ३३ ॥ नेति ॥ ये मत्पादयोः सेवायामभिरताः आसक्ताः

मैत्रेय उवाच ॥ विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाऽभिजातः ॥ तत्त्वाम्नायं यत्प्रवदन्ति साङ्ख्यं प्रोवाच वै भक्तिवितानयोगम् ॥ ३१ ॥ श्रीभगवानुवाच ॥ ॥ देवानां गुणलिङ्गानामानुश्राविककर्मणाम् ॥ सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ ३२ ॥ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥ जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ ३३ ॥ नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाऽभिरता मदीहाः ॥ येऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि ॥ ३४ ॥ पश्यन्ति ते मे रुचिराण्यम्ब सन्तः प्रसन्नवक्त्रारुणलोचनानि ॥ रूपाणि दिव्यानि वरप्रदाने साकं वाचं स्पृहणीयां वदन्ति ॥ ३५ ॥ तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ॥ हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुङ्क्ते ॥ ३६ ॥

मदीहाः मदर्थमेवेहाः सर्वेन्द्रियचेष्टा येषां ते अन्योन्यतः परस्परं प्रसज्य मिलित्वा मम पौरुषाणि पराक्रमान् सभाजयन्ते श्लाघयन्ति ते केचित् भागवताः ममैकात्मतां ब्रह्मात्मैकत्वलक्षणं सायुज्यमपि न स्पृहयन्ति सालोक्यादेस्तु का वार्ता ॥ ३४ ॥ पश्यन्तीति ॥ हे अम्ब ते सन्तः रुचिराणि प्रसन्नानि वक्त्राणि अरुणानि च लोचनानि येषु तानि वरप्रदानि दिव्यानि अप्राकृतानि मे मम रूपाणि पश्यन्ति मया साकं सह स्पृहणीयां वाचं वदन्ति। नित्यं परमेश्वरानुभवसुखं भक्तावधिकमिति भावः॥३५॥ आत्मानन्दोऽप्यवश्यं भावीत्याह—तैरिति ॥ दर्शनीया अवयवा मम मुखनेत्रादयः तैः उदाराणि यानि विलासो लीला हासो मन्दहासः ईक्षितं दर्शनं वामसूक्तं मधुरभाषणं तैश्च । यद्वा। बहुव्रीहिणा अध्याहृतस्य मद्रूपैरित्यस्य द्वे विशेषणे । हृत आत्मा मनो येषां तान् तथा हृताः प्राणाः ज्ञानकर्मेन्द्रियाणि येषां तान् अतो मोक्षमनिच्छतोऽपि भक्तान् मद्भक्तिरेव अण्वीं सूक्ष्मां गतिं ब्रह्मात्मैकत्वलक्षणां मुक्तिं प्रयुङ्क्ते प्रापयति । प्रेमभक्तास्तु भगवतो विलासादिभिर्हृतचित्तादिकान् भक्तान् अण्वीं गतिं प्रयुङ्क्ते । भो भक्ताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मात्मैकत्वलक्षणां मुक्तिं गृह्णीतेति प्रयोगमात्रं करोति नतु दित्सत्यपि भक्तिमहारत्नप्राप्त्या कृतार्थानां रजतस्वर्णादितुल्यब्रह्मात्मैक्यदानानौचित्यादिति व्याचक्षते ॥ ३६ ॥ विभूत्यादिसुखं च तत्राधिकमित्याह—अथो इति ॥ अथो अविद्यानिवृत्त्यनन्तरं यद्यपि न एकान्तभक्ता मम मायाविनः मायाधिपतेस्तामतिश्रेष्ठत्वेन प्रसिद्धां विभूतिं सत्यलोकादिगतां भोगसम्पत्तिं तथा भक्तिमनु स्वत एव प्रवृत्तं प्राप्तमपि अणिमाद्यष्टाङ्गमैश्वर्यं भागवतीं च श्रियं वैकुण्ठस्थां भोगसम्पत्तिम् अस्पृहयन्ति । यद्यपि ते न स्पृहयन्ति नञर्थे अ इति पृथगप्यव्ययम् । “ अभावे अ न नो नहि ” इति हैमः । उदाहृतं च अविप्र इव भाषसे विप्र इव न भाषसे इत्यर्थः । तथापि परस्य परमेश्वरस्य मे मम लोके वैकुण्ठे भद्रां दुःखेनासंभिन्नां श्रियमश्नुवते प्राप्नुवन्त्येव तुशब्दोऽवधारणे ॥ ३७ ॥ नापि कचित्तदैश्वर्यनाश इत्याह—नेति ॥ शान्तं शुद्धं सत्वं तद्रूपे वैकुण्ठे मत्पराः अतो मया रक्ष्यमाणाः कर्हिचिदपि न नङ्क्ष्यन्ति स्वरूपतो भोग्यतो वा नाशं न प्राप्नुवन्ति । यतः अनिमिषः कालो मे हेतिः शस्त्रं तान्नो लेढि न ग्रसते । येषाम् अहं प्रियः निरतिशयप्रीतिविषयः आत्मा सुत इव स्नेहविषयः सखेव विश्वासास्पदं गुरुरिवादरणीयवचनः सुहृदो मित्राणि इव हितकारी इष्टं दैवमिव पूज्यः ॥ ३८ ॥ इममिति द्वयम् ॥

अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टाङ्गमनुप्रवृत्तम् ॥ श्रियं भागवतीं वाऽस्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते तु लोके ॥ ३७ ॥ न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढि हेतिः ॥ येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥ ३८ ॥ इमं लोकं तथैवामुमात्मानमुभयायिनम् ॥ आत्मानमनु ये चेह ये रायः पशवो गृहाः ॥ ३९ ॥ विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखम् ॥ भजन्त्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥ ४० ॥ नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् ॥ आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥ ४१ ॥ मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ॥ वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥ ४२ ॥

इमं लोकं तथैवामुं परलोकं च विसृज्य उभावपि लोकौ विसृज्य हेयतया निश्चित्य उभयायिनमुभयलोकगामिनम् इणस्ताच्छील्ये णिनिः । आत्मानं देहं विसृज्य तदभिमानं परित्यज्य इह जन्मनि ये आत्मानं देहमनुवर्त्तन्ते पुत्रकलत्रादयः ये च रायो धनानि पशवो गृहाश्च तान् अन्यांश्च सर्वान् विसृज्य तेषु ममतामपोह्य विश्वतोमुखं पुत्रादिरूपेण प्रकाशमानं सर्वत्र व्यापकं वा मामेवं पुत्रादिभावेनानन्यया फलानुसन्धानरहितया भक्त्या भजन्ति तान् मृत्योः जन्ममरणादिसंसारात् अतिपारये अत्यन्तं पारं नयामि पुनर्न संसारयामि ॥ ३९ ॥ ४० ॥ नेति ॥ सर्वभूतानामात्मनोऽन्तर्यामिणः प्रधानपुरुषयोरपीश्वरात् भगवतः मत् मत्तः अन्यत्र मद्भजनं विना तीव्रं दुःसहं संसारभयं न निवर्त्तते ॥ ४१ ॥ मद्भयादिति ॥ अयं वातः मद्भयात् वाति चलति । मद्भयात्सूर्यः तपति । मद्भयादेव इन्द्रो वर्षति । अग्निर्दहति मद्भयादेव मृत्युश्चरति । एते मत्तो भीता एव स्वस्वव्यापारे प्रवर्त्तन्ते ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानेति ॥ अत एव योगिनो ज्ञानवैराग्याभ्यां युक्तेन भक्तियोगेन क्षेमाय मोक्षलाभाय अकुतोभयं मे मम पादमूलं प्रविशन्ति भजनीयतया आश्रयन्ते ॥ ४३ ॥ एतावानिति ॥ तीव्रेण भक्तियोगेन मनो मयि अर्पितं सत् तत्रैव स्थिरं निश्चलं भवतीत्येतावानेवास्मिन् लोके पुंसां निःश्रेयस्योदय उत्कर्षः ॥४४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्॥ गङ्गासहायस्तृतीयपञ्चविंशे व्यधादिमाम् ॥ २५ ॥ षड्विंशे कथ्यते सर्वभावानां जन्मलक्षणम् ॥ पुंप्रकृत्योर्विवेकाय तत्र श्लोका गुणाद्रयः ॥ अनुष्टुभोऽपि तावत्य उवाचेति त्रिकं ततः ॥ २६ ॥ भक्त्यादित्रयप्रश्ने भक्तिमुक्त्वा साङ्ख्यमाह—अथेति ॥ अथेदानीं तत्त्वानां प्रकृतिपुरुषादीनां पृथक् लक्षणं स्वरूपोत्पत्त्यादिकं वक्ष्यामि यत् तत्त्वलक्षणं ज्ञात्वा मुमुक्षुः पुरुषः प्राकृतैः गुणैर्विमुच्येत ॥ १ ॥ ज्ञानमिति ॥ आत्मदर्शनरूपं हृदयग्रन्थेरहङ्कारस्य भेदनं यद् ज्ञानं पुरुषस्य निःश्रेयसाय मोक्षाय वेदान्ता आहुस्तत्ते तुभ्यं वर्णये ॥ २ ॥ तत्र पुरुषं लक्षयति—अनादिरिति ॥ आत्मैव पुरुषः स च अनादिः निर्गुणः प्रकृतेः परः अन्यः असङ्गः प्रत्यग्धामा अन्तःस्फूर्तिः ज्ञानरूपः स्वयंज्योतिः

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ॥ क्षेमाय पादमूलं मे प्रविशन्त्यकुतोभयम् ॥ ४३ ॥ एतावानेव लोकेऽस्मिन् पुंसां निःश्रेयसोदयः ॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥४४॥ इति श्रीभागवते तृतीयस्कन्धे कापिलेयोपाख्याने भक्तिलक्षणवर्णनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ श्रीभगवानुवाच ॥ ॥ अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ॥ यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ॥ १ ॥ ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम् ॥ यदाहुर्वर्णये तत्ते हृदयग्रन्थिभेदनम् ॥ २ ॥ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ॥ प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् ॥ ३ ॥ स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ॥ यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ४ ॥ गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ॥ विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥ ५ ॥

स्वयंप्रकाशः येन समन्वितं व्याप्तं सत् विश्वं प्रकाशत इति शेषः । विश्वप्रकाशक इत्यर्थः । प्रत्यग्धामेति लक्षणं विशेषणैश्च क्षणिकत्वसंसारित्वज्ञानादिगुणत्वसंसारित्वज्ञानविषयत्वादीनि व्यावर्त्यन्ते ॥ ३ ॥ स इति ॥ स एषः उक्तलक्षणो विभुः स्वतन्त्रः पुरुषः सूक्ष्मामविभक्तनामरूपां सत्वादिगुणमयीं दैवीं देवस्य भगवतः शक्तिरूपां यदृच्छयैवोपगतां प्राप्तां प्रकृतिं लीलया हेतुभूतया लीलार्थमभ्यपद्यत स्वीकृतवान् । अत्र आवरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विधा । तत्रावरणशक्त्या सैव जीवोपाधिरविद्या ।विक्षेपशक्त्या सैव परमेश्वरोपाधिर्माया। जीवेश्वरभेदेन पुरुषो द्विधा । तत्र यः प्रकृत्यविवेकेन संसरति स जीवः । यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स परमेश्वरः । अत एव लीलयाभ्यपद्यतेत्युक्तम् ॥ ४ ॥ इदानीं प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह—गुणैरिति ॥ चतुर्भिः गुणैः सत्त्वादिभिः सरूपाः स्वसमानरूपा अत एव विचित्राः देवमनुष्यतिर्यगादिरूपाः प्रजाः सृजतीं प्रकृतिं विलोक्य स जीवः इह संसारे निमित्ते ज्ञानं गूहति आवृणोतीति तथा तया प्रकृतेरेवाविद्याख्यवृत्त्या युक्तः सद्यः मुमुहे

CC-0. In Public Domain. Digitization by eGangotri

आत्मानं विस्मृतवान् ॥ ५ ॥ एवमिति ॥ एवं पराभिध्यानेन प्रकृतौ देहादिरूपेण परिणतायामात्माध्यासेन प्रकृतेर्गुणैः क्रियमाणेषु कर्मसु कर्तृत्वं पुमानात्मनि स्वस्मिन्मन्यते ॥ ६ ॥ तदिति ॥ तत्तस्मात् कर्तृत्वाभिमानादेव साक्षिणः अस्य पुरुषस्य वस्तुतोऽकर्तुरेव सतः कर्मभिर्बन्धः ईशस्य स्वतन्त्रस्यैव तत्कृतं कर्मबन्धकृतं भोगे पारतन्त्र्यं निर्वृतात्मन आनन्दस्वरूपस्यैव संसृतिः जन्ममरणादिप्रवाहश्च भवति ॥ ७ ॥ नन्वहं करोमीति चैतन्यसामानाधिकरण्येनैव कर्तृत्वादिप्रतीतेः पुरुष एव कर्त्तास्तु इति चेत्तत्राह— कार्येति ॥ यद्यप्यहङ्कारिगतमेव कर्तृत्वादिकं भोक्तृत्वं च प्रतीयते तथापि विकारस्य जडपर्यवसानत्वात् कूटस्थस्य स्वतो विकाराभावात् कार्यं शरीरं कारणमिन्द्रियं कर्ता-हङ्कारस्तदात्मतापत्तौ पुरुषस्य प्रकृतिमेव कारणं विदुः भोगस्य च जडे असम्भवाच्चैतन्यपर्यवसानत्वाच्च सुखदुःखानां भोक्तृत्वे प्रकृतेः परं विलक्षणं चेतनं पुरुषं कारणं विदुः । एषां च विकारस्योपाधिप्राधान्यं भोगस्योपहितप्राधान्यम् ॥ ८ ॥ प्रकृतेरिति ॥ हे पुरुषोत्तम सदसत् कार्यं कारणं स्थूलं सूक्ष्मं वा सर्वमपि विश्वं यदात्मकं तयोः अस्य

एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ॥ कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥ ६ ॥ तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम् ॥ भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥ ७ ॥ कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः ॥ भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् ॥ ८ ॥ देवहूतिरुवाच ॥ प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकम् ॥ ९ ॥ श्रीभगवानुवाच ॥ यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ १० ॥ पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ॥ एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥ ११ ॥ महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः ॥ तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे ॥ १२ ॥ इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः ॥ वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥ १३ ॥

विश्वस्य कारणयोः प्रकृतेः पुरुषस्य चेत्येतयोर्लक्षणं ब्रूहीति ॥ ९ ॥ यदिति ॥ यत् त्रिगुणमव्यक्तमतिसूक्ष्मं नित्यमुत्पत्तिविनाशरहितमविशेषं पृथ्व्यादिवदाकारविशेषरहितं विशेषवत् पृथिव्यादिनानाविशेषाश्रयभूतं सदसदात्मकं कार्यकारणं रूपम् एवंभूतं प्रधानं मुख्यं कारणं तदेव प्रकृतिं प्राहुः ॥ १० ॥ पञ्चभिरिति ॥ पञ्चभिः पञ्चभिः चतुर्भिस्तथा दशभिः एतच्चतुर्विंशतिकम् एतानि चतुर्विंशतिर्यस्मिन् गणे तं गणं प्राधानिकं प्रधानकार्यात्मकं विदुः ॥ ११ ॥ एतदेव विवृणोति—महाभूतानीति ॥ महाभूतानि भूः आपः इत्यादीनि पञ्चैव गन्धादीनि गन्धरसरूपस्पर्शशब्दाख्यानि तन्मात्राणि पृथिव्यादीनां सूक्ष्मावस्थाविशेषास्तावन्ति पञ्चैव मे मम मतानि ॥ १२ ॥ इन्द्रियाणीति ॥ श्रोत्रं त्वक् इत्यादीनि मेढ्रान्तानि नव दशमः पायुरुच्यत इति दश इन्द्रियाणि । तत्र श्रोत्रादीनि ज्ञानेन्द्रियाणि वागादीनि कर्मेन्द्रियाणि ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन इति॥ एकमेवान्तरात्मकमन्तःकरणं परं तु लक्षणरूपया चिह्नभूतया सङ्कल्पाध्यवसायाभिमानचिन्तारूपया वृत्त्या मनो बुद्धिरहङ्कारश्चित्तमित्येवं चतुर्धा तस्य भेदो लक्ष्यते ॥ १४ ॥ एतावानेवेति ॥ सगुणस्य ब्रह्मणः यावानयं सन्निवेशः अवस्थाविशेषो मया प्रोक्तः स एतावानेवान्यैरपि सङ्ख्यातः । काले मतभेदमाह । यस्तु कालः सतु पञ्चविंशकः अल्पार्थे कन् । प्रकृतेरेवावस्थाविशेषः । यद्वा पुरुष एव कालः ॥ १५ ॥ प्रभावमिति ॥ एके तु पौरुषं पुरुषस्य भगवतः प्रभावं विक्रममेव कालमाहुः । यतः कालात् प्रकृतिमविद्यामीयुषः प्राप्तस्य अत एव देहादावहङ्कारेण विमूढस्य भ्रान्तस्य कर्तुर्जीवस्य भयं भवति ॥ १६ ॥ स्वमतमाह—प्रकृतेरिति ॥ हे मानवि सत्वादिगुणत्रयसाम्यरूपस्य अत एव निर्विशेषस्य वस्तुनः प्रकृतेः सृष्टेः पूर्वं यतश्चेष्टासाम्यावस्थात्यागपरिणामान्तरप्राप्तिहेतुभूता भवति स भगवानेव कालयतीति काल इत्येवमुपलक्षितः व्यवहृतो भवति अतो न तत्वान्तरम् ॥ १७ ॥ एतत् स्फुटयति—अन्तरिति ॥ य एषः आत्ममायया सत्वानां सर्वप्राणिनामन्तः पुरुषरूपेणान्तर्यामिरूपेण बहिश्च काल-

मनो बुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् ॥ चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥१४॥ एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह ॥ सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः ॥ १५ ॥ प्रभावं पौरुषं प्राहुः कालमेके यतो भयम् ॥ अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥ १६ ॥ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ॥ चेष्टा यतः स भगवान्काल इत्युपलक्षितः ॥१७॥ अन्तः पुरुषरूपेण कालरूपेण यो बहिः ॥ समन्वेत्येष सत्त्वानां भगवानात्ममायया ॥ १८ ॥ दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ॥ आधत्त वीर्यं साऽसूत महत्तत्त्वं हिरण्मयम् ॥ १९ ॥ विश्वमात्मगतं व्यञ्जन्कूटस्थो जगदङ्कुरः ॥ स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः ॥२०॥ यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् ॥ यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥ २१ ॥

रूपेण सम्यक् तद्विकाररहित एवान्वेति अनुस्यूतो वर्तते स भगवानेवेत्यन्वयः । तदेवं प्रकृतेश्चतुर्विंशतिर्भेदाः गुणत्रयं तु प्रकृतिरेवेति न पृथक्त्वम् । जीवेश्वरयोश्चैक्यविवक्षया पञ्चविंशतिस्तत्त्वानि । तयोर्भेदविवक्षायां च षड्विंशतिः । कालस्य पृथक्त्वे सप्तविंशतिः । प्रकृतेरपि पृथक्त्वेऽष्टाविंशतिः ॥ १८ ॥ दैवादिति ॥ दैवात् कालात् जीवादृष्टसहकृतात् क्षुभिता वैषम्यं प्राप्ता धर्मा गुणाः यस्यास्तस्यां स्वकीयायां योनौ अभिव्यक्तिस्थाने प्रकृतौ परः पुमान् परमपुरुषो वीर्यं चिच्छक्तिमाधत्त सा प्रकृतिः हिरण्मयं प्रकाशबहुलं महत्तत्वमसूत ॥ १९ ॥ विश्वमिति ॥ कूटस्थः लयविक्षेपशून्यः जगतः अङ्कुरस्थानीयः महान् आत्मगतं स्वस्मिन्सूक्ष्मरूपेण स्थितं विश्वमहङ्कारादिप्रपञ्चं व्यञ्जन् व्यञ्जयन् हेतौ शता । व्यञ्जयितुमात्मप्रस्वापनमात्मानं प्रस्वापयतीति तथा यत्पूर्वं प्रलयसमये महान्तं प्रकृतौ लयं कृतवत्तत् तीव्रं तमः स्वतेजसाऽपिबत् नाशितवानित्यर्थः । पुंस्त्वं तु तत्वपदत्यागेन महानित्यस्यैव विवक्षया ॥ २० ॥ यत्तदिति ॥ यत् तत् सर्वागमप्रसिद्धं सत्वं सत्वगुणं स्वच्छं विशदं शान्तं भगवतः पदमुपलब्धि-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

स्थानमत एवाधिष्ठानाधिष्ठेयाभेदमभिप्रेत्य वासुदेवाख्यं चित्तं यदाहुस्तन्महदात्मकमेव विद्धि । अत्रायमर्थः।अधिभूतरूपेण तस्यैव महानिति संज्ञा । अध्यात्मरूपेण चित्तमिति । उपास्यरूपेण वासुदेव इति । अधिष्ठाता तु क्षेत्रज्ञः । एवमहङ्कारमनोबुद्धिषु सङ्कर्षणानिरुद्धप्रद्युम्ना उपास्याः रुद्रचन्द्रब्रह्माणोऽधिष्ठातारः ॥ २१ ॥ स्वच्छत्वमिति ॥ यथा परा भूसंसर्गात्प्राक्तनी अपां प्रकृतिः स्वतःसिद्धः स्वभावः फेनपङ्कतरङ्गादिरहिता मधुरा स्वच्छा च तथा स्वच्छत्वं निर्मलत्वमविकारित्वं लयविक्षेपराहित्यं शान्तत्वं रागादिशून्यत्वं चेत्येवंरूपाभिर्वृत्तिभिश्चेतसो लक्षणं प्रोक्तम् ॥ २२॥ महदिति द्वयम् ॥ भगवद्वीर्यं चिच्छक्तिस्तेन संभव उत्पत्तिर्यस्य तस्मात् विकुर्वाणात् महत्तत्वात् क्रियासु शक्तिर्यस्य सः तथाभूतः उपलक्षणतया ज्ञानद्रव्यशक्तिः अहङ्कारः वैकारिकः सात्विकः तैजसो राजसः तामसश्चेति त्रिविधः समपद्यत बभूव । यतः यस्मादहङ्कारात् मनसः इन्द्रियाणां च महतां भूतानाम् आकाशादीनाम् अपि भवः उत्पत्तिर्जाता ॥२३॥२४॥ सहस्रेति ॥ यमहङ्कारं साक्षात् सहस्रशिरसमनन्तं सङ्कर्षणाख्यं भूतेन्द्रियमनोमयं

स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ॥ वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा ॥ २२ ॥ महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् ॥
क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत ॥ २३ ॥ वैकारिकस्तैजसश्च तामसश्च यतो भवः ॥ मनसश्चेन्द्रियाणां च भूतानां महतामपि ॥ २४ ॥
सहस्रशिरसं साक्षाद्यमनन्तं प्रचक्षते ॥ संकर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् ॥ २५ ॥ कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणम् ॥ शान्तघोरविमूढत्वमिति वा स्यादहंकृतेः ॥ २६ ॥ वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ॥ यत्संकल्पविकल्पाभ्यां वर्तते कामसंभवः ॥ २७ ॥
यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् ॥ शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः ॥ २८ ॥ तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत्सति ॥
द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः ॥ २९ ॥

भूतेन्द्रियमनसां कारणं पुरुषं प्रचक्षते ॥ २५ ॥ कर्तृत्वमिति ॥ देवतादिरूपेण कर्तृत्वम् इन्द्रियरूपेण करणत्वं भूतादिरूपेण कार्यत्वमित्यहङ्कृतेरहङ्कारस्य लक्षणं स्यात् । एवं सात्विकत्वेन शान्तत्वं राजसत्वेन घोरत्वं तामसत्वेन मूढत्वमिति वाहंकृतेर्लक्षणं स्यात्॥२६॥ वैकारिकादिति ॥ वैकारिकात् सात्त्विकात् विकुर्वाणादहङ्कारान्मनस्तत्वमजायत । यत् यस्य मनसः सङ्कल्पविकल्पाभ्यां विषयचिन्तनविशेषचिन्तनाभ्यां कामस्य कामनारूपवृत्तेः सम्भव उत्पत्तिर्वर्त्तते भवति इति लक्षणम् ॥ २७ ॥ यदिति ॥ यत् यत्र मनसि स्थितं हृषीकाणामिन्द्रियाणामधीश्वरं शारदं शरत्कालिकं यदिन्दीवरं नीलोत्पलं तदिव श्यामं योगिभिः शनैराराध्यम् अनिरुद्धाख्यं विदुः ॥ २८ ॥ तैजसादिति ॥ हे सति विक्रियमाणात् तैजसात् राजसादहङ्काराद्बुद्धितत्त्वमभूत् । द्रव्यस्फुरणरूपं विज्ञानं बुद्धितत्त्वस्य वृत्तिरित्यर्थः । चित्तव्यावृत्त्यर्थं चेदम् । चेतनारूपं ज्ञानं तु चित्तधर्मः तथा घटपटादिसविकल्पकज्ञाने इन्द्रियाणामनुग्रहः अनुग्राहकत्वं बुद्धेर्लक्षणम् । यद्यपि चित्तादीन्यपि इन्द्रियानुग्राहकाणि तथापि बुद्ध्यैव तत्र विशेषः । तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि शब्दं शृणोमीत्यत्र चित्तेन चेतनामात्रं निधीयते बुद्ध्या शब्दोऽयमिति स्फुर्तिः मनसा शब्दे जिघृक्षा अहङ्कारेण स्वाभिमानार्पणम् ॥ २९ ॥ द्रव्यस्फुरणं प्रपञ्चयति–संशय
इति ॥ संशयः एकस्मिन्ननेकप्रकारं ज्ञानं स्थाणुर्वा पुरुषो वेति विपर्यासो मिथ्याज्ञानं पीतः शङ्खः शुक्तौ इदं रजतमिति निश्चयो यथार्थप्रमाणज्ञानं स्मृतिः स्मरणं स्वापो
निद्रा इत्येवं पृथक् असाङ्कर्येण वृत्तितः वृत्तिभिर्बुद्धेर्लक्षणमुच्यते । "प्रमाणविपर्ययविकल्पनिद्रास्मृतय" इति पातञ्जलोक्तेः ॥ ३० ॥ तैजसानीति ॥ क्रियाज्ञान-
विभागशः कर्मेन्द्रियज्ञानेन्द्रियविभागेनोभयविधान्यपीन्द्रियाणि तैजसानि राजसाहंकारादेव जातानि ज्ञानेन्द्रियाणां वैकारिकत्वशङ्कानिरासायैवकारः । हि यस्मात् प्राणस्य
क्रियाशक्तिः बुद्धेश्च विज्ञानशक्तिता अतः प्राणस्य तैजसत्वात्तत्क्रियाशक्तिमतामिन्द्रियाणामपि तैजसत्वम् । तथा बुद्धेरपि तैजसत्वात्तदीयज्ञानशक्तिमतामपीन्द्रियाणां
तैजसत्वम् ॥ ३१ ॥ तामसादिति ॥ भगवतो वीर्येण कालमायांशरूपेण चोदितात् प्रेरितात् अत एव विकुर्वाणात्तामसाहंकारात् शब्दरूपं मात्रं सूक्ष्मं द्रव्यमभूत्
तस्मान्नभ आकाशमभूत् । श्रोत्रं तु शब्दगमित्यादिभिर्विषयोत्पत्त्यनन्तरं तत्संबन्धमात्रं कथ्यते । नतूत्पत्तिस्तस्याः प्रागेव कथितत्वात् । शब्दं गच्छतीति तथा शब्दग्राहकम्

संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ॥ स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥ ३० ॥ तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः ॥
प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता॥३१॥तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् ॥ शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं च शब्दगम् ॥३२॥
अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च ॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥ ३३ ॥ भूतानां छिद्रदातृत्वं बहिरन्तरमेव च ॥ प्राणेन्द्रि-
यात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ॥३४॥ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः ॥ स्पर्शोऽभवत्ततो वायुस्त्वक्स्पर्शस्य च संग्रहः ॥३५॥
मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च ॥ एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ॥ ३६ ॥ चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ॥
सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् ॥ ३७ ॥

॥ ३२ ॥ अर्थेति ॥ अर्थाश्रयत्वमर्थप्रकाशकत्वं द्रष्टुर्लिङ्गत्वं कुड्याद्यन्तरितस्य गजो यातीति वदतो गजद्रष्टुः पुरुषस्य ज्ञापकत्वं लिङ्गं यद् द्रष्टृदृश्ययोरित्युक्तत्वात् नभ-
सस्तन्मात्रत्वं सूक्ष्मरूपत्वं च शब्दस्य लक्षणं कवयो विदुः ॥ ३३ ॥ भूतानामिति ॥ भूतानां छिद्रदातृत्वमवकाशदातृत्वं बहिरन्तर्व्यवहारास्पदत्वं च प्राणानामिन्द्रि-
याणामात्मनो मनसश्च धिष्ण्यत्वं नाड्यादिछिद्ररूपेण स्थानत्वं च नभसः वृत्तिः कार्यरूपमेव लक्षणमेवमुत्तरत्राप्येकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः । द्वितीयेन तन्मात्र-
लक्षणं तृतीयेन महाभूतलक्षणमित्यनुसन्धेयम् ॥ ३४ ॥ नभस इति ॥ शब्दस्तन्मात्रमसाधारणो गुणो यस्य तस्मात् कालगत्या विकुर्वतो नभसः सकाशात् स्पर्शः तन्मात्र-
मभवत् । ततः स्पर्शाद्वायुरभवत् । ततः स्पर्शस्य संग्रहः सम्यग्ग्रहणं यथा भवति सा त्वक् ॥ ३५ ॥ मृदुत्वमिति ॥ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वं च नभस्वतो वायो-
स्तन्मात्रत्वमसाधारणगुणत्वं च एतत्स्पर्शस्य स्पर्शत्वं लक्षणमित्यर्थः ॥ ३६ ॥ चालनमिति ॥ चालनं वृक्षशाखादीनां प्रकम्पनं व्यूहनं तृणादीनां संमेलनं प्राप्तिः सर्वत्राप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हतगतिः द्रव्यशब्दयोर्नेतृत्वं तत्र द्रव्यस्य गन्धवतो घ्राणं प्रति तथा शैत्यादिमतः स्पर्शनं प्रतिशब्दस्य दूरस्थस्य श्रोत्रं प्रतीत्यादि यथायोग्यमूह्यम् । सर्वेन्द्रियाणामात्मत्वमुपोद्बलकत्वं भुक्तान्नादिप्रापकत्वेन कार्यक्षमतासम्पादकत्वमिति यावत् । वायोरेतत्कर्मैवाभिलक्षणम् ॥ ३७ ॥ वायोरिति ॥ स्पर्शस्तन्मात्रं यस्य तस्माद्दैवेन कालेनेरितात् प्रेरितात् वायोः सकाशात् रूपमभूत् । ततो रूपात् तेजः समुत्थितमुत्पन्नमभूत् । तत्र चक्षुरिन्द्रियं रूपस्योपलम्भनं ग्राहकमित्यर्थः ॥ ३८ ॥ द्रव्येति ॥ हे साध्वि द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वं गुणता द्रव्योपसर्जनतया प्रतीतिः सैव संस्था संनिवेशः शब्दस्य स्वातन्त्र्येणैव प्रतीतिः अप्रत्यक्षद्रव्यस्पर्शादेरपि स्वातन्त्र्येणैव प्रतीतिः । रूपस्य तु नैवमिति तस्यायं विशेष उक्तः । व्यक्तिसंस्थात्वं द्रव्यस्य या संस्था संनिवेशः सैव संस्था यस्य तथात्वम् । द्रव्यस्य स्थूलसूक्ष्मतया ऋजुवक्रतया चास्यापि तथात्वेन प्रतीतिरित्यर्थः । तेजसस्तेजस्त्वमसाधारणधर्मत्वं च रूपमात्रस्य वृत्तयः लक्षणानि ॥ ३९ ॥ द्योतनमिति ॥ द्योतनं प्रकाशनं पचनं तण्डुलादेः क्षुत् तृट् च तद्द्वारेण

वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् ॥ समुत्थितं ततस्तेजश्चक्षू रूपोपलम्भनम् ॥ ३८ ॥ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ॥
तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ॥ ३९ ॥ द्योतनं पचनं पानमदनं हिममर्दनम् ॥ तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ॥ ४० ॥
रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात् ॥ रसमात्रमभूत्तस्मादम्भो जिह्वारसग्रहः ॥ ४१ ॥ कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा ॥ भौतिकानां
विकारेण रस एको विभिद्यते ॥ ४२ ॥ क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोदनम् ॥ तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः ॥ ४३ ॥ रसमात्राद्विकुर्वाणादम्भसो दैवचोदितात् ॥ गन्धमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गन्धगः ॥ ४४ ॥

पानमदनं च हिममर्दनं शैत्यनाशनं शोषणं च एताः तेजसो वृत्तयः कार्यभूतानि लक्षणानि ॥ ४० ॥ रूपेति ॥ दैवेन कालादिना चोदितात् प्रेरितात् विकुर्वाणात् रूपं मात्रा यस्य तस्मात्तेजसः रसमात्रमभूत् । तस्माद्रसात् अम्भः जलमभूत् । जिह्वा रसनेन्द्रियं ततः रसस्य ग्रहो ग्रहणं भवति ॥ ४१ ॥ कषाय इति ॥ स्वतः एको मधुर एव रसः भौतिकानां संसर्गिद्रव्याणां बीजादीनां विकारेण कषायः मधुर इत्यादिः नैकधा षड्धा विभिद्यते ॥ ४२ ॥ क्लेदनमिति ॥ क्लेदनमार्द्रीकरणं पिण्डनं मृदादेः पिण्डीकरणं तृप्तिः तृप्तिकरत्वं प्राणनं जीवनम् "आपोमयः प्राण" इति श्रुतेः । आप्यायनं तृड्वैक्लव्यनिवर्त्तनम् उन्दनं मृदूकरणम् ओदनमिति पाठेऽपि स एवार्थः । तापापनोदः सूर्यादिजनिततापनिवर्तनं भूयस्त्वं कूपादावुद्धृतस्यापि पुनः पुनरुद्गमः स्वसम्मेलनेन दुग्धादिद्रव्यान्तरस्य बहूकरणं वा इमाः क्लेदनादयः अम्भसः वृत्तयः कार्यभूतानि लक्षणानि ॥ ४३ ॥ रसेति ॥ दैवादिचोदितात् विकुर्वाणाद्रसतन्मात्रादम्भसो गन्धतन्मात्रमभूत् । तस्मात्पृथ्वी अभूत् । गन्धगः गन्धग्राहकस्तु घ्राणः ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करम्भ इति ॥ एक एव गन्धः संसर्गिद्रव्याणामवयववैषम्याद्विकारात् करम्भो मिश्रगन्धः यथा व्यञ्जनादीनां हिंग्वादिसंस्कारैः पूतिर्दुर्गन्धः सौरभ्यं कर्पूरादेः शान्तः शतपत्रादेः उदग्रो लशुनादेः इत्यादिभिर्भेदैः पृथक् विभिद्यते ॥ ४५ ॥ भावनमिति ॥ ब्रह्मणो भावनं प्रतिमादिरूपेण साकारतापादनम् । स्थानं जलादिविलक्षणतया तन्नैरपेक्ष्येण स्थितिः । धारणं जलाद्याधारत्वं सतामाकाशादीनां विशेषणमवच्छेदकत्वं घटाकाशः मलिनाकाशः धूम्रो वायुरित्यादिप्रतीतेः । सर्वेषां सत्वानां प्राणिनां तत्तद्गुणानां पुंस्त्वादीनामुद्भेदः परिणामविशेषैः प्रकटीकरणं पृथिव्या वृत्तिः कार्यमेव लक्षणम् ॥ ४६ ॥ श्रोत्रादीनां शब्दादिग्राहकत्वमेव लक्षणमित्याह—नभ इति ॥ नभस आकाशस्य गुणविशेषः शब्दः यस्य अर्थो ग्राह्यो विषयः तच्छ्रोत्रमुच्यते एवमग्रेऽपि ॥ ४७ ॥ ४८ ॥ भूमेरित्यर्द्धम् ॥ परस्येति ॥ परस्य कारणस्याकाशादेर्धर्मः शब्दादिः परस्मिन्कार्ये वाय्वादौ समन्वयात् आकाशादेरुपादानतयानुवृत्तत्वात् । हि यतो दृश्यते अतो हेतोर्भावानामाकाशादीनां सर्व एव विशेषः । शब्दादिगुणो भूमावुपलक्ष्यते दृश्यते तत्राकाशा-

सर्व-
करम्भपूतिसौरभ्यशान्तोदग्रादिभिः पृथक् ॥ द्रव्यावयववैषम्याद्गन्ध एको विभिद्यते ॥ ४५॥ भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम् ॥ सत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् ॥ ४६ ॥ नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते ॥ वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः ॥ ४७॥
तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते ॥ अम्भोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः ॥ ४८॥ भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते ॥ परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् ॥ अतो विशेषो भावानां भूमावेवोपलक्ष्यते ॥ ४९ ॥ एतान्यसंहत्य यदा महदादीनि सप्त वै ॥ कालकर्मगुणोपेतो जगदादिरुपाविशत् ॥ ५० ॥ ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् ॥ उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥ ५१ ॥
एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ॥ तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ॥ यत्र लोकवितानोऽयं रूपं भगवतो हरेः ॥ ५२ ॥

दिचतुर्णामन्वयात् जलादिषु यथान्वयमेव न सर्वः आकाशे त्वन्यान्वयाभावादेकः शब्द एव॥ ४९॥कारणोत्पत्तिमुक्त्वा कार्योत्पत्तिमाह—एतानीति ॥ यदा एतानि महदादीनि महदहङ्कारपञ्चमहाभूतानीति सप्त असंहत्य अमिलित्वा स्थितानि तथा भूतेभ्यः कार्योत्पत्त्य संभवात्तदा कालः क्षोभकः कर्म जीवादृष्टं गुणः सत्वादिः तैरुपेतः विशिष्टो जगदादिर्भगवान् उपाविशत् प्रथमं संहननकारिण्या शक्त्या सर्वतत्वसम्मेलनार्थमविशत् । ततो वर्षसहस्रान्तेऽन्तर्यामित्वेन प्राविशत् इति ज्ञेयम् ।तन्मात्राणि महाभूतेषु इन्द्रियाणि चाहङ्कारेन्तर्भाव्य सप्तेत्युक्तम् । अतः सर्वेष्वेव प्रवेशो बोध्यः॥५०॥तत इति ॥ ततः तेन भगवत्प्रवेशेन अनुविद्धेभ्यः क्षुभितेभ्यः अत एव युक्तेभ्यः परस्परं प्रधानगुणभावेन मिलितेभ्यस्तत्वेभ्यः अचेतनमधिष्ठातृचेतनरहितमण्डमुत्थितमुत्पन्नम् । यस्मादण्डादसौ विराट् समष्टिपुरुषः देहः उदतिष्ठत् प्रादुरभूत् ऊर्द्ध्वकर्मविवक्षया तङ्भावः ॥५१॥ एतदिति सार्द्धम् ॥ एतच्च विशेषाख्यमण्डं बहिः प्रधानेन व्यापकेनावृतैः क्रमवृद्धैः क्रमश उत्तरोत्तरमधिकैः दशोत्तरैः उत्तरोत्तरदशगुणाधिकैस्तोयादिभिः तोयतेजोवाय्वाका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाहङ्कारमहत्तत्त्वैः परिवृतम् । यत्राण्डे हरेर्भगवतः रूपं रूपभूतः अयं देवमनुष्यादिः लोकवितानः लोकविस्तारोऽस्ति हरेरिति पुरुषाभेदाभिप्रायेण ॥ ५२ ॥ तत्राध्यात्मादिविभागमाह—हिरण्मयादिति ॥ सलिलेशयात् जलेस्थितात् हिरण्मयात् प्रकाशबहुलादण्डकोशात् उत्थाय तत्रस्थ एवौदासीन्यं त्यक्त्वा तमाविश्य तमधिष्ठायैव महादेवो भगवान् खमिन्द्रियच्छिद्रं बहुधा निर्बिभेद पृथक् चकार ॥ ५३ ॥ निरभिद्यतेति ॥ अस्य विराजः प्रथमं मुखं निरभिद्यत ततस्तत्र मुखे वाणी वागिन्द्रियं तया वाण्या सह तदधिष्ठाता वह्निरभवत् प्राविशत् । अथो नासे नासिकाच्छिद्रे निरभिद्येतामेतयोर्नासाच्छिद्रयोरधिष्ठानभूतयोः प्राणोतः प्राणेन उतः स्यूतः विशिष्टः सन् घ्राण इन्द्रियमभवदित्यनुषङ्गः । प्राणोत इति विशेषणं सर्वेन्द्रियेष्वपि लिङ्गपरिणामेन द्रष्टव्यं प्राणाधीनस्थितिकत्वात् ॥ ५४ ॥ घ्राणादिति ॥ घ्राणादनन्तरं वायुश्च तद्देवताभवत् अविशत् । एवमग्रेऽपि पञ्चम्यन्तानां तदनन्तरमिति व्याख्या ज्ञेया । अन्यत्र प्राणाधिष्ठातृतयाश्विनीकुमारावुक्तावत्र तु वायुरिति विशेषः । अक्षिणी इन्द्रियाधिष्ठाने

हिरण्मयादण्डकोशादुत्थाय सलिलेशयात् ॥ तमाविश्य महादेवो बहुधा निर्बिभेद खम् ॥ ५३ ॥ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् ॥ वाण्या वह्निरथो नासे प्राणोऽतो घ्राण एतयोः ॥५४॥ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः ॥ तस्मात्सूर्यो न्यभिद्येतां कर्णौ श्रोत्रे ततो दिशः ॥ ५५ ॥ निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः ॥ तत औषधयश्चासञ्छिश्नं निर्बिभिदे ततः ॥५६॥ रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् ॥ गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ॥ ५७ ॥ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् ॥ पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ॥ ५८ ॥

अभिद्येतामेतयोश्चक्षुरिन्द्रियमभवत् । तस्मात्तदनन्तरं सूर्यो देवता प्राविशदिति शेषः । कर्णौ इन्द्रियाधिष्ठाने अनु अनन्तरमभिद्येताम् । ततः श्रोत्रमिन्द्रियं दिशश्च देवताः प्राविशन् न्यभिद्येतामन्वभिद्येतामित्येकार्थं पाठद्वयम् ॥५५॥ निर्बिभेदेति ॥ ततश्च विराजस्त्वक् अधिष्ठानं निर्बिभेद निर्भिन्ना ततस्तत्र रोमादय इन्द्रियस्थानापन्ना ज्ञेयाः । अत्र विशेषो द्वितीयस्कन्धे दशमेऽध्याये वस्तुनो मृदु इति श्लोके व्याख्यातो द्रष्टव्यः । आदिपदेन केशाः तत्र ओषधयश्च देवता आसन् प्राविशन् । ततश्च शिश्नमधिष्ठानं निर्बिभिदे भिन्नं जातम् ॥५६॥ रेत इति ॥ रेत इन्द्रियं तस्मात्तस्मिन्नापः देवता आसन् प्राविशन् । अग्रेऽपि देवतास्थले प्रवेशोऽर्थो ज्ञेयः । ततश्च गुदमधिष्ठानं निरभिद्यत गुदात् गुदोत्पत्तेरनन्तरं तत्र अपान इन्द्रियमासीत् । अपानादनन्तरं च सर्वलोकभयंकरो मृत्युस्तत्र देवता आसीत् ॥ ५७ ॥ हस्ताविति ॥ हस्तौ निरभिद्येतां ताभ्यां तयोर्बलमिन्द्रियमासीत् स्वराट् इन्द्रश्च तत्तस्य देवता आसीत् । पादौ च निरभिद्येतां ताभ्यां तयोर्गत्याख्यमिन्द्रियमासीत् । ततस्तत्र हरिरुपेन्द्रो देवतासीत् ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाड्य इति ॥ अस्य विराजः नाड्योऽधिष्ठानभूता निरभिद्यन्त ताभ्यस्तासु लोहितमिन्द्रियस्थानीयमाभृतं पूर्णं ततस्तस्य नद्यो देवताः समभवन् उदरमधिष्ठानं निरभिद्यत ॥ ५९ ॥ क्षुदिति ॥ ततस्तत्र क्षुत्पिपासे इन्द्रियस्थानीये स्याताम् एतयोर्देवता तु समुद्रोऽभूत् । अथ चास्य हृदयं कमलाकारं भिन्नं हृदयात् हृदये मन इन्द्रियमुत्थितं स्थितम् ॥ ६० ॥ मनस इति ॥ मनसश्चन्द्रमा देवता जातः बुद्ध्यादीनामपि हृदयमेवाधिष्ठानं बुद्धिरिन्द्रियं बुद्धेर्गिरां पतिः ब्रह्मा देवता अहङ्कार इन्द्रियं तत्र रुद्रः देवता चित्तमिन्द्रियं तत्र चैत्यः क्षेत्रज्ञो जीवोऽधिष्ठाताभूदिति स्वामिपादाः । परे तु चैत्यश्चित्ताधिष्ठाता वासुदेवः स एव चित्ते उपास्यः स एव समष्टिजीवस्य हिरण्यगर्भस्य प्रद्युम्नत्वेनान्तर्यामी स एव च व्यष्टिजीवानामनिरुद्धत्वेनान्तर्यामीति व्याचख्युः ॥ ६१ ॥ अत्र देहादिसंघाते क्षेत्रज्ञो मुख्य इति वक्तुमन्येषामसामर्थ्यमाह—एत इति ॥ पुनः-

नाड्योऽस्य निरभिद्यन्त ताभ्यो लोहितमाभृतम् ॥ नद्यस्ततः समभवन्नुदरं निरभिद्यत ॥ ५९ ॥ क्षुत्पिपासे ततः स्यातां समुद्रस्त्वे-तयोरभूत् ॥ अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ॥ ६० ॥ मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः ॥ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥ ६१ ॥ एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् ॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ॥ ६२ ॥ वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ॥ घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ॥ ६३ ॥ अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ॥ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट् ॥६४॥ त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ॥ रेतसा शिश्नमापस्तु नोदतिष्ठ-त्तदा विराट् ॥ ६५ ॥ गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ॥ हस्ताविन्द्रो बलेनैव नोदतिष्ठत्तदा विराट् ॥ ६६ ॥ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ॥ नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ॥ ६७ ॥ क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्तदा विराट् ॥ हृदयं मनसा चन्द्रो नोदतिष्ठत्तदा विराट् ॥ ६८ ॥ बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट् ॥ रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट् ॥६९॥ चित्तेन हृदयं चैत्त्यः क्षेत्रज्ञः प्राविशद्यदा ॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥ ७० ॥

शब्दस्तथापीत्यर्थे । अभ्युत्थिताः अहङ्काराज्जाता एते हि प्रसिद्धा देवास्तं विराजमुत्थापयितुं खानि स्वस्थानानि क्रमात् विविशुस्तथाप्यस्योत्थापने नैवाशकन् ॥ ६२ ॥ एतदेव स्पष्टयति—वह्निरित्यादिभिः सप्तभिः ॥ वह्निर्देवता वाचा इन्द्रियेण मुखं भेजे तदा विराट् नोदतिष्ठत् इत्यादि स्पष्टम् ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ॥ ६८ ॥ ६९ ॥ चित्तेनेति ॥ चैत्यश्चित्ताधिष्ठाता क्षेत्रज्ञो जीवः व्याख्यान्तरे वासुदेवः चित्तेन स्वशक्तिभूतेनेन्द्रियेण सह हृदयकमलं स्वाधिष्ठानं यदा प्राविशत् तदैव विराट् पुरुषः सलिलादुदतिष्ठत । इह ल्यब्लोपे पञ्चमी । सलिलमधिष्ठाय कार्यक्षमो जातः ॥ ७० ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ येन जीवेन विना प्राणादयो यथा प्रसुप्तं पुरुषं मनुष्यादिमोजसा स्वबलेनोत्थापयितुं न प्रभवन्ति तथा वह्न्यादयो देवा अपि क्षेत्रज्ञप्रवेशमन्तरेण विराजमुत्थापयितुं नाशक्नुवन् ॥ ७१ ॥ तमिति ॥ भक्त्या विरक्त्या ज्ञानेनेति प्रथममीश्वरे भक्तिः ततोऽन्यत्र विरक्तिः ततो योगेन प्रवृत्तया एकाग्रया धिया यद् ज्ञानं प्रकृतिपुरुषविवेकः तेनास्मिन् आत्मनि देह एव तं प्रत्यगात्मानं विविच्य चिन्तयेत् ॥ ७२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये षड्विंशे निरमादिमाम् ॥ २६ ॥ सप्तविंशे तु बहुभिः साधनैः पुंप्रधानयोः ॥ विवेकेन मोक्षरीतिस्त्रिंशत्पद्यानि तत्र तु ॥ उवाचेति त्रयं साङ्ख्रिरेकं त्रिंशदनुष्टुभः ॥ २७ ॥ प्रकृतीति ॥ पुरुषः प्रकृतिस्थोऽपि प्रकृतिकार्ये देवमनुष्यादिशरीरे स्थितोऽपि अविकारात् रागादिविकाराभावात् अकर्तृत्वात् निर्गुणत्वाच्च जलार्कवत् जले प्रतिबिम्बितसूर्य इव प्राकृतैर्गुणैः तत्कृतैः पुण्यपापादिभिः सुखदुःखादिभिश्च नाज्यते न लिप्यते । यथा जलगताः कम्पादयः प्रबिम्बितेऽर्के प्रतीयमाना अपि वस्तुतोऽर्कगता न भवन्ति तथाऽन्तःकरणगता

यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधियः ॥ प्रभवन्ति विना येन नोत्थापयितुमोजसा ॥ ७१ ॥ तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया ॥ भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत् ॥७२॥ इति श्री० तृ० कापिलेयोपाख्याने तत्त्वसमाम्नाये षड्विंशोऽध्यायः ॥२६॥ श्रीभगवानुवाच ॥ प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ॥१॥ स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते ॥ अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते ॥ २ ॥ तेन संसारपदवीमवशोऽभ्येत्य निर्वृतः ॥ प्रासङ्गिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ॥ ३ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ४ ॥

एव सुखादयोऽध्यासेनात्मनि प्रतीयन्ते नतु तत्र वस्तुतः सन्ति ॥ १ ॥ स इति ॥ स एष दोषरहितोऽप्यात्मा यर्हि यदा अहंक्रियादेहादावात्माभिमानस्तया विमूढः आत्मा यस्य सः तथाभूतः सन् प्रकृतेर्गुणेषु शब्दादिविषयेष्वभिविषज्जते आसक्तो भवति तदा देहेन्द्रियादिभिः क्रियमाणेष्वपि कर्मसु अहं कर्त्तास्मीत्यभिमन्यते अभिमानं करोमि ॥ २ ॥ तेनेति ॥ तेन कर्तृत्वाभिमानेन प्रासङ्गिकैः देहादिकृतैः कर्मदोषैः पुण्यपापात्मकैः अवशः तदधीनः अत एवानिर्वृतः सुखमलभमानः सदसन्मिश्रयोनिषु देवतिर्यङ्मनुष्यादियोनिषु संसारपदवीं जन्ममरणादिलक्षणामभ्येति ॥ ३ ॥ अर्थे इति ॥ यद्यपि देहानामेव जन्मादि नत्वात्मनः अतः अर्थे जन्ममरणादिरूपे अविद्यमानेऽपि । हि यस्मात् यथा स्वप्ने अविद्यमानस्याप्यनर्थस्य स्वशिरश्छेदादिरूपस्यागमः प्राप्तिर्जागरणमन्तरेण न निवर्तते तथा विषयान् ध्यायतोऽस्य जीवात्मनः संसृतिः मनुष्यादियोनिषु भ्रमणं तत्र सुखदुःखादिसाक्षात्कारश्च न निवर्त्तते ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एवेति ॥ अतस्तस्मादेव असतां दुष्टानामिन्द्रियाणां पथि मार्गे विषये प्रकर्षेण सक्तं चित्तं तीव्रेण भक्तियोगेन विरक्त्या च शनैर्बहुकालं विषयासक्तस्य झटिति वशागमनस्य दुर्घटत्वात्तत्रोद्वेगमकुर्वन् वशं नयेत् ॥ ५ ॥ भक्तिविरक्त्योस्तीव्रत्वे कारणानि वदन् ज्ञानेन मोक्षप्रकारमाह—यमादिभिरिति षट्कम् ॥ यमादिभिर्योगपथैर्योगमार्गैरभ्यसन् पुनः पुनश्चित्तमेकाग्रीकुर्वन् श्रद्धयान्वितः मयि भगवति सत्येन फलाभिसन्धिरहितेन भावेन प्रेम्णा मत्कथाश्रवणेन चकारात् कीर्तनस्मरणादिना सर्वभूतेषु समत्वेन समदृष्ट्या सर्वत्र निर्वैरेण वैरत्यागेन अप्रसङ्गतः सर्वत्रासक्तित्यागेन ब्रह्मचर्येणाष्टाङ्गेन मौनेन वृथालापवर्जनेन बलीयसा भगवत्प्रीत्यर्थमनुष्ठितेन स्ववर्णाश्रमविहितधर्मेण यदृच्छया प्रयत्नं विना उपलब्धेन प्राप्तेनान्नादिना संतुष्टः मितभुक् परिमितमेव भुञ्जानः मुनिः विविक्तशरण एकान्तवासी शान्तः रागादिहीनः मैत्रः सर्वेषां हितेच्छुः करुणः दयावान् आत्मवान् धैर्यवान् सानुबन्धे पुत्रकलत्राद्यनुबन्धसहितेऽस्मिन्देहे असदाग्रहमहंममाभिमानमकुर्वन् प्रकृतेः पुरुषस्य च दृष्टं तत्त्वं याथात्म्यं येन तेन ज्ञानेन निवृत्तानि

अत एव शनैश्चित्तं प्रसक्तमसतां पथि॥भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशम् ॥५॥ यमादिभिर्योगपथैरभ्यसञ्छ्रद्धयाऽन्वितः॥मयि भावेन सत्येन मत्कथाश्रवणेन च ॥ ६ ॥ सर्वभूतसमत्वेन निर्वैरेणाप्रसङ्गतः ॥ ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा ॥ ७ ॥ यदृच्छयोपलब्धेन संतुष्टो मितभुङ् मुनिः ॥ विविक्तशरणः शान्तो मैत्रः करुण आत्मवान् ॥ ८ ॥ सानुबन्धे च देहेऽस्मिन्नकुर्वन्नसदाग्रहम् ॥ ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ॥ ९ ॥ निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः ॥ उपलभ्यात्मनाऽऽत्मानं चक्षुषेवार्कमात्मदृक् ॥ १० ॥ मुक्तलिङ्गं सदाभासमसति प्रतिपद्यते ॥ सतो बन्धुमसच्चक्षुः सर्वानुस्यूतमद्वयम् ॥ ११ ॥ यथा जलस्थ आभासः स्थलस्थेनावदृश्यते ॥ स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः ॥ १२ ॥ एवं त्रिवृदहंकारो भूतेन्द्रियमनोमयैः ॥ स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक् ॥ १३ ॥

बुद्ध्यवस्थानानि जाग्रदादीनि यस्य सः अत एव दूरीभूतमन्यस्य भगवद्व्यतिरिक्तस्य दर्शनं यस्य सः आत्मदृक् मुक्तलिङ्गं देहाद्युपाधिविनिर्मुक्तम् असति मिथ्याभूतेऽहंकारे सदाभासं सद्रूपेणाभासमानं सतः परमार्थभूतस्य परमात्मनो बन्धुं तदभिन्नमित्यर्थः। यद्वा । सतः कारणस्य प्रधानस्य बन्धुमधिष्ठानम् असतः तुच्छस्य प्रपञ्चस्य चक्षुः चक्षुरिव प्रकाशकं सर्वेषु कार्यकारणेषु अनुस्यूतं व्याप्तम् अद्वयं सर्वात्मकं चक्षुषा चक्षुरवच्छिन्नेनार्केण गगनस्थमर्कमिव आत्मना अहंकारावच्छिन्नेन आत्मानं शुद्धम् उपलभ्य दृष्ट्वा प्रतिपद्यते जानाति एकस्यैवावच्छेदानवच्छेदाभ्यां करणकर्मत्वे चक्षुषे वेति दृष्टान्तः ॥६॥७॥८॥९॥१०॥ ११ ॥ अहंकारोपहितेन शुद्धब्रह्मप्रतिपत्तिं सदृष्टान्तमाह—यथेति द्वयम्॥यथा जले स्थित आभासः सूर्यप्रतिबिम्बो यदा गृहान्तर्वर्तिस्वच्छभित्तौ स्फुरति तदा गृहकोणस्थितैः पुरुषैः प्रथमं भित्त्यादौ स्थले स्थित आभासो दृश्यते ततश्च कुतोऽयं प्रकाश इति विमृशद्भिस्तैस्तेन भित्त्यादौ स्थले स्थितेन स्वाभासेन सूर्यप्रतिबिम्बेन यथा जलस्थ आभासोऽवदृश्यते । गगनस्थस्य सूर्यस्य गृहमध्ये प्रतिबिम्बायोगात् पुनश्चायमप्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भासः कुत इति तथैव जलस्थेनाभासेन दिवि स्थितः सूर्यो लक्ष्यते तथा अविवेकिभिः प्रथमं भूतेन्द्रियमनांसि चैतन्यप्रकाशवन्ति दृश्यन्ते ततश्च जडेष्वेषु प्रकाशः कुतस्त्यः इति भूतेन्द्रियमनोमयैः देहेन्द्रियमनोभिरवच्छिन्नैः स्वाभासैरात्मप्रतिबिम्बैस्त्रिवृत् त्रिगुणोऽहंकारः सतो ब्रह्मणः आभासो यस्मिंस्तेन रूपेण लक्षितो भवति । अहंकारस्थाभासं विना विषयाभासानुपपत्तेः । अनेन च सदाभासवताहंकारेण सत्यदृक् परमार्थज्ञप्तिरूप आत्मा लक्षितो भवति ॥ १२ ॥ १३ ॥ इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभवतो दर्शयति–भूतेति त्रिकम् ॥ इह निद्रावस्थायां भूतानि सूक्ष्माणि तन्मात्राणि इन्द्रियाणि मनो बुद्धिः आदिशब्देन अहंकारः तेषु असति असत्तुल्ये अव्याकृते निद्रया लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियश्च तिष्ठति यश्च तदा सुषुप्तौ भूतसूक्ष्मादेरहंकाराविषयस्य लीनत्वात् तद्विषयेऽहंकरणेऽहंकारेऽपि नष्टे सति स्वयमनष्टोऽपि नष्टवित्तो यथा स्वयमनष्टोऽप्यातुरो व्याकुलः सन्नष्टवद् भवति तथा मृषैवात्मानं नष्टवन्मन्यमानो भवति न तथा प्रकाशते । सुषुप्तौ विशेषरूपेणानुभवाभावेऽपि

भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया ॥ लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः ॥ १४ ॥ मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा ॥ नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः ॥ १५ ॥ एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते ॥ साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः ॥ १६ ॥ देवहूतिरुवाच ॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुञ्चति कर्हिचित् ॥ अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ॥ १७ ॥ यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः ॥ अपां रसस्य च यथा तथा बुद्धेः परस्य च ॥ १८ ॥ अकर्तुः कर्मबन्धोऽयं पुरुषस्य यदाश्रयः ॥ गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम् ॥ १९ ॥

तदन्ते सुखमहमस्वाप्सं न किंचिदवेदिषमिति केवलस्याऽत्मनः प्रतिसन्धानम् प्रतिसन्धाने च साहंकारप्रतीतावपि निरहंक्रियत्वमुपपादयति । साहंकारस्य अहंकारसहितस्य द्रव्यस्य कार्यकारणसंघातस्य योऽनुग्रहः प्रकाशकः अवस्थानमाश्रयश्च द्रव्यविशेषणतयाऽहंकारस्यापि दृश्यत्वाच तद्द्रष्टा आत्मा तद्व्यतिरिक्त इति तमात्मानं असौ विवेकिजन एवं प्रत्यवमृश्य विचारेण विविच्यात्मानं प्रतिपद्यते जानाति ॥ १४ ॥ १५ ॥ १६ ॥ पुरुषमिति ॥ हे ब्रह्मन् हे प्रभो पुरुषव्यतिरेकेण प्रकृतेः स्वरूपालाभात् प्रकृतिव्यतिरेकेण च पुरुषस्याभिव्यक्त्यभावादित्यन्योन्यापाश्रयत्वात् परस्परं दृढतरसम्बन्धादित्यर्थः । अनयोः प्रकृतिपुरुषयोरुभयोरपि नित्यत्वाच्च पुरुषं प्रकृतिः कर्हिचिदपि न विमुञ्चति ॥ १७ ॥ यथेति ॥ यथा भूमेर्गन्धस्य च यथा चापां रसस्य च व्यतिरेकतः विश्लेषतः पृथग्भावोऽवस्थानं न भवति तथा बुद्धेः प्रकृतेः परस्य पुरुषस्य च व्यतिरेकतो भावो न भवति ॥ १८ ॥ अकर्तुरिति ॥ स्वतः कर्तृत्वराहितस्यापि पुरुषस्य प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि मन्यते इत्युक्तत्वात् । अयं कर्मबन्धः जन्मादिलक्षणो यदाश्रयः ये गुणा आश्रयो यस्य स यदधीनः तेषु प्रकृतिगुणेषु सत्सु प्रकृतेर्नित्यत्वात्तदसाधारणगुणेषु सत्त्वादिष्वपि नित्यतया सर्वदैव वर्तमानेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्सु अतः संसारबन्धात् पुरुषस्य कैवल्यं मोक्षः कथं घटते ॥ १९ ॥ क्वचिदिति ॥ तत्त्वावमर्शेनात्मतत्त्वज्ञानेन क्वचित् पुरुषविशेषे अवस्थाविशेषे च निवृत्तम् अनुसन्धानाभावेन निवृत्तप्रायमपि उल्बणं संसारभयम् अनिवृत्तनिमित्तत्वात् निमित्तस्य प्रकृतिगुणस्य सत्वादेरनिवृत्तत्वात् पुनः प्रत्यवतिष्ठते उपस्थितं भवति ॥ २० ॥ न हि प्रकृतिसंबन्धमात्रं बन्धहेतुः किन्तु गुणबुद्ध्या तदासक्तिः तन्निवृत्तौ सत्यां मोक्षो घटते क्वचिदुद्भवस्तु साधनवैकल्यादित्यभिप्रेत्य साधनातिशयं कथयन् परिहरति— अनिमित्तेति त्रयम् ॥ निमित्तं फलं तदनिमित्तमप्रवर्तकं यस्मिंस्तेन फलाभिसन्धिरहितेन स्ववर्णाश्रमोचितधर्मेण अमलात्मना निर्मलेन मनसा चिरं श्रुतसम्भृतया मत्कथाश्रवणेन पुष्टया अत एव तीव्रया मयि भक्त्या दृष्टं तत्त्वं प्रकृतिपुरुषयोर्याथात्म्यं येन तेन ज्ञानेन बलीयसा वैराग्येण च तपसा युक्तेनाष्टाङ्गेन योगेन तीव्रेणात्मविषयकसमाधिना अहर्निशं दह्यमाना अभिभूयमाना पुरुषस्य मोहिका प्रकृतिरविद्या लिङ्गशरीरम् । यथा अग्नेर्योनिः आविर्भावहेतुः अरणिः काष्ठं स्वतः आविर्भूतेनाग्निना दह्यमानो

क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणम् ॥ अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते ॥२० ॥ श्रीभगवानुवाच ॥ अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना ॥ तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरम् ॥ २१ ॥ ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा ॥ तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना॥२२॥प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् ॥ तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥२३॥ भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः ॥ नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च ॥ २४ ॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥ २५ ॥ एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसम् ॥ युञ्जतो नापकुरुत आत्मारामस्य कर्हिचित् ॥ २६ ॥ यदैवमध्यात्मरतः कालेन बहुजन्मना ॥ सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः ॥ २७ ॥ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा ॥ निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम् ॥ २८ ॥ प्राप्नोतीहाञ्जसा धीरः स्वदृशा छिन्नसंशयः ॥ यज्ज्ञात्वा न निवर्तेत योगी लिङ्गाद्विनिर्गमे ॥ २९ ॥

विनश्यति तथा शनकैः साधनतारतम्यानुसारेणेहास्मिन्नेव जन्मनि तिरोहिता भवित्री ॥ २१ ॥ २२ ॥ २३ ॥ भुक्तेति ॥ भुक्तो भोगो यस्याः सा अत एव परित्यक्ता नित्यशः दृष्टो दोषो दुःखहेतुत्वं यस्याः सा ईश्वरस्य स्वतन्त्रस्य स्वे महिम्नि परमानन्दस्वरूपे स्थितस्यपुरुषस्याशुभं संसारभयं पुनर्नाधत्ते न सम्पादयतीत्यर्थः । सुषुप्तौ निद्रया लयोऽत्र तु साधनेनेति विशेषः ॥ २४ ॥ यथेति ॥ यथा हि अप्रतिबुद्धस्य निद्रामुपगतस्य पुंसः प्रस्वापः स्वप्नः बहूननर्थान् स्वशिरश्छेदादीन् बिभर्ति पुष्णातीति तथाभूतोऽपि स एव संस्कारवशेन स्फुरन्नपि प्रतिबुद्धस्य मोहाय नैव कल्पते समर्थो नैव भवति ॥ २५ ॥ एवमिति ॥ एवं रीत्या विदितं तत्त्वं येन तस्य अत एवात्मारामस्य मयि परमेश्वरे मानसं मनो युञ्जतः पुरुषस्य प्रकृतिः कर्हिंचिदपि नापकुरुते मोहं कर्तुं नैव शक्नोति ॥ २६ ॥ यदेति त्रयम् ॥ बहूनि जन्मानि यस्मिंस्तेन कालेन

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यदा अध्यात्मरतः स्वरूपनिष्ठः मुनिः विवेकी अत एव आब्रह्मभुवनात्सर्वत्र जातवैराग्यश्च मद्भक्तः प्रतिबुद्धः विज्ञातः अर्थः परमपुरुषार्थो येन स्वदृशा स्वरूपज्ञानेन च्छिन्नः संशयो यस्य सः धीरः तदा भूयसा महता मत्प्रसादेन निःश्रेयसं निरतिशयानन्दं कैवल्याख्यं मोक्षशब्दवाच्यं मदाश्रयं मत्स्वरूपं स्वसंस्थानं देहादिव्यतिरिक्तं स्वरूपमिहैव देहेऽञ्जसा साक्षात् प्राप्नोति लिङ्गाद्विनिर्गमे प्रारब्धावसाने लिङ्गशरीरभङ्गे सति यत् गत्वा प्राप्य योगी पुनः संसारं प्रति न निवर्तेत न निवर्तते ॥ २७ ॥ २८ ॥ २९ ॥ यदेति ॥ अङ्ग हे मातः अम्बेति पाठो वा । एवं मोक्षे त्वणिमादयः सिद्धयोन्तरायरूपा आयान्ति तासु योगेनोपचितासु सुसमृद्धासु अनन्यहेतुषु न योगादन्यो हेतुर्यासां तासु मायासु मोहिकासु यदा सिद्धस्य निष्पन्नयोगस्य चेतो न विषज्जते । अथ तदा आत्यन्तिकी परमपुरुषार्थरूपा मे मदीया मत्प्राप्तिलक्षणा गतिः स्यात् । यत्र यस्यां गतौ सत्यां मृत्योर्हासो गर्वो न भवति तासु विषक्तौ तु संसारानिवृत्तेः सिद्धोऽपि मया वशीकृत इति मृत्योर्हासो भवत्येव ॥ ३० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयसप्तविंशे व्यधादिमाम् ॥ २७ ॥ अष्टाविंशे ध्यानवता योगेन निरुपाधिकम् ॥ स्वरूपज्ञानमुक्तं तच्छ्लोका उक्ताः कृताब्धयः ॥ उवाचेत्ये-

यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेऽङ्ग ॥ अनन्यहेतुष्वथ मे गतिः स्यादात्यन्तिकी यत्र न मृत्युहासः ॥ ३० ॥ इति श्रीभा० तृती० कापिलेयोपाख्याने मोक्षरीतिवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ श्रीभगवानुवाच ॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ॥ मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥ १ ॥ स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम् ॥ दैवाल्लब्धेन संतोषो आत्मविच्चरणार्चनम् ॥ २ ॥ ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा ॥ मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ॥ ३ ॥

कमर्द्धाढ्याः सप्तवर्णा अनुष्टुभः ॥ २८ ॥ योगस्येति ॥ हे नृपात्मजे योगो हि द्विविधः सबीजो निर्बीजश्च । तत्र निर्बीजो निरालम्बनो यो गीतायामुक्तः "यतो यतो निश्चरति मनः" इत्यादि । सबीजस्तु सालम्बनस्तस्य योगस्य लक्षणं वक्ष्ये येनैव विधिना विहितेन योगेन मनः प्रसन्नं त्यक्तकामादिकालुष्यं विशुद्धं सत् सत्पथं सतो भगवतो मार्गं याति तत्रैव स्थिरं भवति ॥ १ ॥ तत्र योगाङ्गेषु यमादीनाह—स्वधर्मेति ॥ तत्र अहिंसासत्यास्तेयापरिग्रहब्रह्मचर्यमौनानि यमाः तदन्यानि नियमाः शक्त्या यथाशक्ति निष्कामं स्वधर्माचरणं विधर्मात् स्वधर्मबाधकान्निवर्तनं दैवात्प्रारब्धाल्लब्धेनान्नादिना संतोषः आत्मविदां चरणार्चनम् ॥ २ ॥ ग्राम्येति ॥ ग्राम्यधर्मः त्रैवर्गिकधर्मस्तस्मान्निवृत्तिः । मोक्षधर्माः श्रवणकीर्तनादयस्तेषु रतिः । मितं च तन्मेध्यं शुद्धं च तस्यादनं तत्र मितं नाम " द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् । मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत् ॥ इति स्मृतिप्रसिद्धम् । तत्राधिकादने आलस्यादि स्यात् अशुद्धादने च चित्तं दुष्येदिति द्वयमुक्तम् । शश्वन्नित्यमिति यथासंभवं सर्वेषामेव विशेषणं विविक्तमेकान्तं तत्रापि क्षेमं निर्बाधं तस्य स्थानस्य सेवनम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहिंसेति ॥ अहिंसा प्राणिमात्रद्रोहत्यागः सत्यम् अस्तेयं परस्वानाहरणं यावतार्थेनान्नादिना देहनिर्वाहस्तावतोऽर्थस्य परिग्रहः ब्रह्मचर्यं तपःशौचं विशुद्धिः सा च स्नानादिना देहविशुद्धिः सत्यादिना मनसो विशुद्धिः स्वाध्यायो वेदपाठादिः पुरुषस्य हरेरर्चनम् ॥ ४ ॥ मौनमिति ॥ अत्र स्वधर्मादयो मौनान्ताः यमनियमाः आसनादीन्यङ्गान्याह । सतः समीचीनस्य स्वस्तिकादेरासनस्य जयेन शरीरस्य स्थैर्यं शनैः प्राणजयः प्राणायामेन प्राणवायोर्वशीकरणम् इन्द्रियाणां मनसा विषयात् हृदि प्रत्याहारः प्रत्याहृत्यावस्थापनम् ॥ ५ ॥ स्वेति ॥ स्वधिष्ण्यानां प्राणस्थानानां मूलाधारादीनां मध्य एकस्मिन्देशे मनसा सह प्राणस्य धारणं वैकुण्ठस्य हरेर्लीलानामभिध्यानं तथा आत्मनः मनसः समाधानमात्माकारता ॥ ६ ॥ एतैरिति ॥ एतैः स्वधर्माचरणादिभिरन्यैश्च व्रतदानादिभिः पथिभिरुपायैः असत्पथमसतामिन्द्रियाणां पथि वर्तमानम् अत एव दुष्टं मनः जिताः प्राणाः येन तथाभूतोऽपि अतन्द्रितः अनलसः सन् शनकैः बुद्ध्या युञ्जीत ॥ ७ ॥ शुचाविति ॥ जितासनः चिरमुपविशन्नपि क्लमरहितः शुचौ

अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ॥ ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ॥ ४ ॥ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः ॥ प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि ॥ ५ ॥ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम् ॥ वैकुण्ठलीलाऽभिध्यानं समाधानं तथात्मनः ॥ ६ ॥ एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम् ॥ बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ॥ ७ ॥ शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम् ॥ तस्मिन् स्वस्ति समासीन ऋजुकायः समभ्यसेत् ॥ ८ ॥ प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ॥ प्रतिकूलेन वा चित्तं यथा स्थिरमचञ्चलम् ॥ ९ ॥ मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः ॥ वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम् ॥ १० ॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् ॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ११ ॥

देशे आसनं कुशाजिनचैलोत्तरमास्तरणं प्रतिष्ठाप्य तस्मिन् स्वस्तिकं स्वस्तिकासनेन ऋजुकायः समासीनः समभ्यसेत् प्राणजयाभ्यासं कुर्यात् । "ऊरू जङ्घान्तराधाय पादाग्रे जानुमध्यगे । योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः ॥ " इति हि स्वस्तिकासनम् ॥ ८ ॥ प्राणस्येति ॥ पूरककुम्भकरेचकैः प्राणायामैः प्राणस्य मार्गं नाड्यादि शोधयेत् । तत्र प्राणायामस्त्रिविधः तत्र बाह्यवायोरन्तःप्रवेशनं पूरकः । प्रवेशितस्य धारणं कुम्भकः । धृतस्य बहिर्निःसारणं रेचकः । तैः प्रतिकूलेन रेचककुम्भकपूरकैश्च वाकारश्चार्थे चित्तं स्थिरं सत्पुनरपि चञ्चलं यथा न स्यात्तथा शोधयेत् । प्राणे स्ववशे सति तद्वशवर्ति मनोऽपि वशे भवेत् ॥ ९ ॥ मन इति ॥ जितः श्वासः येन तस्य योगिनो मनोऽचिरात् आशु विरजं निर्मलं स्यात् । यथा वै वाय्वग्निभ्यां ध्मातं संतप्तं लोहं सुवर्णादिधातुः मलं त्यजति निर्मलं भवति तथेत्यर्थः ॥ १० ॥ प्राणायामैरिति ॥ प्राणायामैः दोषान् वातपित्तादीन् दहेत् । धारणाभिः किल्बिषान् पापानि दहेत् । प्रत्याहारेण संसर्गान् शब्दादिविषयसंबन्धान् दहेत् । ध्यानेनानीश्वरान् गुणान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागादीन् दहेत् । तत्र मनसो वायुना सह स्थिरीकरणं धारणा । तत्र स्थिरस्य वृत्तिसंततिर्ध्यानं । वृत्तिनिरोधः समाधिरिति भेदः ॥ ११ ॥ यदेति ॥ यदा स्वं मनः योगेन विरजं निर्मलं सुसमाहितं स्ववशवर्ति स्यात् तदा स्वनासाग्रेऽवलोकनं यस्य तत्र दत्तदृष्टिः सन् इत्यर्थः । भगवतः काष्ठां मूर्तिं ध्यायेत् इतस्ततो दृष्टिचालने मनसः विक्षेपः स्यात् । नेत्रमुद्रणे च निद्राख्यो लयः स्यादित्यत उक्तं नासाग्रावलोकनः ॥ १२ ॥ ध्येयं हरिमाह–प्रसन्नेति षट्कम् ॥ प्रसन्नवदनाम्भोजं पद्मगर्भे इवारुणे ईक्षणे यस्य तं नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम् अत्र तुर्यं पद्ममपि ज्ञेयम् ॥ १३ ॥ लसत्पङ्कजस्य किञ्जल्के इव पीते कौशेये वाससी यस्य तं श्रीवत्सो लाञ्छनं वक्षसि यस्य तं भ्राजत् कौस्तुभेन तदीयस्वर्णसूत्रेणामुक्ता संश्लिष्टा कन्धरा यस्य तम् ॥ १४ ॥ मत्तद्विरेफाणां कलो मधुरो ध्वनिर्यस्यां तया वनमालया परीतं व्याप्तं परार्द्ध्यानि अमूल्यानि हारवलयादीनि यस्य तम् ॥ १५ ॥ काञ्चीगुणेन मेखलासूत्रेणोल्लसन्ती श्रोणी कटिर्यस्य तं भक्तानां हृदयाम्भोजमेव विष्टरमासनं यस्य तं दर्शनीयतममतिसुन्दरं

यदा मनः स्वं विरजं योगेन सुसमाहितम् ॥ काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः ॥ १२॥ प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम् ॥ नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम् ॥ १३ ॥ लसत्पङ्कजकिञ्जल्कपीतकौशेयवाससम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ॥ १४ ॥ मत्तद्विरेफकलया परीतं वनमालया ॥ परार्ध्यहारवलयकिरीटाङ्गदनूपुरम् ॥१५॥ काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम् ॥ दर्शनीयतमं शान्तं मनोनयनवर्धनम् ॥ १६ ॥ अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतम् ॥ सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम् ॥ १७ ॥ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम् ॥ ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः ॥ १८ ॥ स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम् ॥ प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा ॥ १९ ॥ तस्मिँल्लँब्धपदं चित्तं सर्वावयवसंस्थितम् ॥ विलक्ष्यैकत्र संयुज्यादङ्गे भगवतो मुनिः ॥ २० ॥ संचिन्तयेद्भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ॥ उत्तुङ्गरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥ २१ ॥

शान्तं सुशीलम् अतो भक्तानां मनोनयनानि वर्द्धयति हर्षयतीति तथा तम् ॥ १६ ॥ अपीच्यमतिसुन्दरं दर्शनं यस्य तं शश्वत् सर्वैर्लोकैर्नमस्कृतं कैशोरे पञ्चदशवर्षे वयसि सन्तं स्थितं भृत्यानामनुग्रहे कातरं व्यग्रम् ॥ १७ ॥ कीर्तन्यं कीर्तनार्हं तीर्थं पुण्यं यशो यस्य तं पुण्यश्लोकानां बलिभीष्मादीनां यशस्करं यावत्समग्राङ्गान्मनो न च्यवते नापगच्छति तावत् समग्राण्यङ्गानि यस्मिंस्तमेवंभूतं भगवन्तं ध्यायेत् ॥ १८ ॥ स्थितमिति ॥ स्थितं व्रजन्तमासीनमुपविष्टं वा शयानं वा प्रेक्षणीयमीहितं लीला यस्य तं गुहाशयं हरिं शुद्धभावेन चेतसा ध्यायेत् ॥ १९ ॥ तस्मिन्निति ॥ तस्मिन् भगवद्विग्रहे लब्धं पदं स्थिरीभूतं तत्रापि सर्वावयवेषु संस्थितं प्रतिष्ठितं स्वचित्तं विलक्ष्य ज्ञात्वा मुनिः योगी भगवत एकत्रैकस्मिन्नङ्गे संयुञ्ज्यात् ॥ २० ॥ संचिन्तयेदिति ॥ रेखात्मकैः वज्राङ्कुशध्वजसरोरुहैर्लाञ्छनैः आढ्यम् उत्तुङ्गाश्च रक्ताश्च विलसन्तो ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये नखास्तेषां चक्रवालं मण्डलं तस्य ज्योत्स्नाभिराहतो महतां ध्यातॄणां हृदयान्धकारोऽविद्यालक्षणो येन महदित्यन्धकारसामानाधिकरण्ये आत्वापत्तिः तादृशविवक्षायां त्वार्षः प्रयोगः । तत् भगवतश्चरणारविन्दं संचितयेत् । अत्र सर्वं चरणादिविशेषणमपि ध्येयत्वेनैवोच्यते ॥२१॥ यच्छौचेति ॥ यस्य चरणारविन्दस्य शौचेन प्रक्षालनजलेन निःसृतायाः प्रवृत्तायाः सरित्प्रवराया गंगाया उदकेन तीर्थेन संसारतारकेण मूर्धनि अधिकृतेन धृतेन शिवः मङ्गलरूपो जगद्वन्द्यो महादेवोऽपि शिवोऽभूत् । आत्मानं कृतकृत्यममन्यत ध्यातुर्मनसि यः शमलशैलः पापपर्वतस्तस्मिन्निसृष्टं निक्षिप्तं वज्रं स्वलाञ्छनरूपं येन तत् भगवतश्चरणारविन्दं चिरं दीर्घकालं ध्यायेत् ॥ २२ ॥ जान्विति ॥ यत् जलजलोचनया कमलनेत्रया सुरैर्वन्दितया अखिलस्य जगतो विधातुः स्रष्टुर्ब्रह्मणो जनन्या लक्ष्म्या स्वस्या ऊर्वोर्निधाय करपल्लवरोचिषा प्रकाशमानकरपल्लवेन संलालितं स्पर्शचातुर्येण यत्संसेवितं तत् अभवस्य संसारनिवर्तकस्य विभोर्भगवतो जानुद्वयं तत्पर्यन्तं जङ्घाद्वयं हृदि कुर्यात् ध्यायेत् ॥ २३ ॥ ऊरू इति ॥ सुपर्णस्य गरुडस्य भुजयोः

यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ॥ ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविन्दम् ॥ २२ ॥ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याऽखिलस्य सुरवन्दितया विधातुः ॥ ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् ॥ २३ ॥ ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ ॥ व्यालम्बिपीतवरवाससि वर्तमानकाञ्चीकलापपरिरम्भि नितम्वविम्वम् ॥ २४ ॥ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मम् ॥ व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरम् ॥ २५ ॥ वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानम् ॥ कण्ठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य ॥ २६॥

स्कन्धयोरधि उपरि शोभमानौ ओजसो बलस्य निधी आश्रयौ अतसिकाकुसुमकान्तिवत् कान्त्या भासमानौ विभोरूरू हृदि कुर्यादित्यनुषङ्गः । तथा व्यालम्बि आगुल्फं लम्बमानं यत्पीतं वरं श्रेष्ठं वासस्तस्मिन्वर्तमानो यः काञ्चिकलापस्तेन परिरम्भः संश्लेषो विद्यते यस्य तद्विभोर्नितम्बबिम्बं हृदि कुर्यात् ॥ २४ ॥ नाभिह्रदमिति ॥ भुवनानां कोशस्य समूहस्य गुहा अधिष्ठानं यदुदरं तत्र स्थितं यत्र च नाभिह्रदे आत्मयोनेर्ब्रह्मणो धिषणं धिष्ण्यमाविर्भावस्थानमखिललोकात्मकं पद्मं व्यूढमुत्थितं तत् अमुष्य हरेर्नाभिह्रदं ध्यायेत् । तथा विशदानां स्वच्छानां हाराणां मयूखैर्गौरम् । हरिन्मणिवृषौ मरकतमणिश्रेष्ठाविव यौ स्तनौ तयोर्द्वयं ध्यायेत् । हरिन्मणिवर्णो वृषो धर्मो यत्र तयोः स्तनयोरिति वा तद्दक्षिणस्तनस्य धर्मत्वात् विशदहारमयूखगौरमित्यनेन दक्षिणस्तनोपरि दक्षिणावर्तश्रीवत्सरेखामपि हारकान्तिमिव ध्यायेदित्यपि सूचितम् ॥ २५ ॥ वक्ष इति ॥ महाविभूतेः लक्ष्म्या अधिवासं स्थानं पुंसां ध्यातॄणां मनोनयनयोर्निर्वृतिमानन्दमादधानम् अखिलैर्लोकैर्ब्रह्मादिभिर्नमस्कृतस्य ऋषभस्य श्रेष्ठस्य हरेः वक्षः तथा कौस्तुभमणिर्यो भूषणार्थं धृतः तस्याधिकं भूषणमर्थः प्रयोजनमस्य तत्

Nepal Sanskrit University, Balmeeki

CC-0. In Public Domain. Digitization by eGangotri

कौस्तुभमणिरपि येन भूषितस्तं कण्ठं च मनसि कुर्यात् ध्यायेत् ॥ २६ ॥ बाहूनिति ॥ मन्दरगिरेः परिवर्तनेन परिभ्रमणेन निर्णिक्तानि उज्ज्वलीकृतानि बाहुवलयान्यङ्गदानि येषु तान् समुद्रमथनार्थमधिश्रिताः लोकपाला येषु तान्भगवतो बाहून् संचिन्तयेत् तथा दशशतानि अनन्तानि अरा यस्य तत् असह्यं तेजो यस्य तत् सर्वतो भक्तरक्षकं सुदर्शनचक्रं तथा तस्य भगवतः करसरोरुहे राजहंसवच्छोभमानमपां तत्त्वं दैत्यहृदयप्रकम्पनध्वनिकं शङ्खं च संचिन्तयेत् ॥२७॥ कौमोदकीमिति ॥ अरातयः शत्रवः दैत्यादयस्ते एव भटा योद्धारस्तेषां शोणितमेव कर्दमस्तेन दिग्धां लिप्तामत एव प्रियां भगवतः कौमोदकीं कौमोदक्याख्यां गदां स्मरेत् तथास्य भगवतः कण्ठे मधुव्रतानां भृङ्गाणां वरूथस्य सङ्घस्य गिराशब्देनोपघुष्टां नादितां मालां वनमालाममलं विशुद्धं चैत्यस्य जीवस्य तत्त्वं मणिं च स्मरेत् । यद्यपि चैत्यशब्देन परमात्मा गृह्यते तथाप्यत्र जीव एव गृह्यते । " आत्मानमस्य जगतो निर्लेपमगुणालयम् । बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिः ॥ " इति वैष्णवोक्तेः । कौस्तुभस्यैवानन्ताः किरणा

बाहूंश्च मन्दरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् ॥ संचिन्तयेद्दशशतारमसह्यतेजः शङ्खं च तत्करसरोरुहराजहंसम्
॥ २७ ॥ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन ॥ मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं
मणिमस्य कण्ठे ॥ २८ ॥ भृत्यानुकम्पितधियेह गृहीतमूर्तेः संचिन्तयेद्भगवतो वदनारविन्दम् ॥ यद्विस्फुरन्मकरकुण्डलवल्गितेन विद्यो-
तितामलकपोलमुदारनासम् ॥ २९ ॥ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुन्तलवृन्दजुष्टम् ॥ मीनद्वयाश्रयम-
धिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रु ॥ ३० ॥ तस्यावलोकमधिकं कृपयाऽतिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः ॥
स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहायाम् ॥ ३१ ॥

जीवा इति भावः ॥ २८ ॥ भृत्येति ॥ यत् विस्फुरन्ती ये मकरकुण्डले तयोर्वल्गितेन प्रचलनेन विद्योतितौ अमलौ कपोलौ यस्मिंस्तत् उदारा परमानन्ददात्री नासा यस्मिंस्तत् भृत्येषु स्वभक्तेषु अनुकम्पिता सञ्जातानुकम्पा तारकादित्वादितच् । यद्वा । अनुकम्पितमनुकम्पा तद्वती भावे क्तान्तादर्श आद्यच् । या धीस्तया गृहीता मूर्तिर्येन तस्य भगवतो वदनारविन्दं संचिन्तयेत् ॥ २९ ॥ यदिति ॥ यत् वदनारविन्दं कर्तृ अलिभिः परिषेव्यमानं मीनद्वयाश्रयं च श्रीनिकेतं शोभाश्रयमरविन्दं कर्म स्वया विभूत्या शोभयाधिक्षिपत् तिरस्कुर्वद्वर्त्तते तत्र कुन्तलैरलीनामधिक्षेपः नेत्रद्वयेन मीनद्वयस्याधिक्षेपः तत्राप्यब्जपदेनोपमानान्तरं च ज्ञेयम् । यच्च कुटिलानां कुन्तलानां वृन्देन समूहेन जुष्टं युक्तमब्जे इव नेत्रे यस्मिंस्तत् उल्लसन्त्यौ भ्रुवौ यस्मिंस्तत् मनोमयं मनस्याविर्भवत् तद्वदनारविन्दम् अतन्द्रितः सावधानः सन् ध्यायेत् ॥ ३० ॥ तस्येति ॥ कृपयाऽधिकं भक्तानामाध्यात्मिकाद्यं घोरं दुःसहं यत्तापत्रयं तस्योपशमनाय विनाशाय तेन कृपयैव अक्ष्णोः अक्षिभ्यां निसृष्टं प्रवृत्तं विपुलः प्रसादः पुरुषार्थो यस्मात्तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्निग्धेन स्नेहयुक्तेन स्मितेनानुगुणितं द्विगुणत्रिगुणादिक्रमेण संवृद्धं तस्य भगवतः अवलोकं विपुलभावनया प्रेमातिशयेन गुहायां हृदि चिन्तयेत् ध्यायेत् ॥ ३१ ॥ हासमिति ॥ अवनताः शरणमागता ये अखिला लोकास्तेषां तीव्रशोकेन यान्यश्रूणि तेषां सागरं विशेषतो निर्मूलं यथा भवति तथा शोषयतीति तथाभूतम् । तथा अत्युदारं शोकसागराद्-द्धृत्यानन्दसागरे मज्जनं ददानं हरेर्हासं ध्यायेत् । तथा मुनिकृते मुनीनामुपकाराय मकरध्वजस्य कामस्य संमोहनाय निजमायया स्वेच्छया रचितं परिगृहीतं तस्य भ्रूमण्डलं ध्यायेत् । मुनीनप्ययमुद्वेजयतीति कोपेनेवेत्युत्प्रेक्षा ॥ ३२ ॥ ध्यानेति ॥ स्वस्य देहकुहरे हृदयाकाशे अवसितस्य प्रत्यक्षस्य विष्णोः ध्यानायनमतिसुन्दरतया प्रयत्नं विनैव ध्यानस्य विषयभूतं बहुलया अधिकया अधरोष्ठस्य भासा कान्त्या अत्यरुणीभूतास्तनवः सूक्ष्मा द्विजा एव कुन्दमुकुलानि तेषां पंक्तिः स्फुरति यस्मिंस्तत् प्रहसितमु-च्चैर्हसितं ध्यायेत्।आर्द्रया प्रेमरसपूरितया भक्त्या आदरातिशयेन तस्मिन्नेवार्पितमनाः सन् पृथक् ततो व्यतिरिक्तं न दिदृक्षेत् किमपि द्रष्टुं नेच्छेत्ततो मनो न विचालयेत् । तद्भाव आर्षः ॥ ३३ ॥ समाधिमाह—एवमिति ॥ तत्र सबीजो निर्बीजश्चेति द्विधा योगः । तत्र निर्बीजः "यतो यतो निश्चरति ।" इति गीतायामुक्तस्तत्र दुष्करः

हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम् ॥ संमोहनाय रचितं निजमाययाऽस्य भ्रूमण्डलं मुनिकृते मकरध्वजस्य
॥ ३२ ॥ ध्यानायनं प्रहसितं बहुलाधरोष्ठभासाऽरुणायिततनु द्विजकुन्दपङ्क्ति ॥ ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना
न पृथक् दिदृक्षेत् ॥ ३३ ॥ एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ॥ औत्कण्ठ्यबाष्पकलया मुहुरर्द्य-
मानस्तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते ॥ ३४ ॥ मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथाऽर्चिः ॥ आत्मानमत्र
पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ ३५ ॥

समाधिः । सबीजे तु परमानन्दमूर्तौ हरौ ध्यायमाने सुखेन चित्तोपरमः अतः स एवात्रोपक्षिप्तः । एवं पूर्वोक्तध्यानेन हरौ सर्वदुःखहर्त्तरि भगवति प्रतिलब्धो भावः प्रेमातिशयो येन सः अत एव तया भक्त्या द्रवत् शैथिल्यं प्राप्नुवत् हृदयमहङ्कारो यस्य सः प्रमोदात् प्रकृष्टात् हर्षात् उद्गतानि उत्थितानि पुलकानि रोमाणि यस्य सः औत्कण्ठ्येन हर्षातिशयात्कण्ठनिरोधेन प्रवृत्तया बाष्पकलया च मुहुरर्द्यमानः आनन्दसंप्लुवे निमज्ज्यमानः दुर्ग्रहस्य भगवतो ग्रहणे बडिशं मत्स्यवेधनमिवोपायभूतं चित्तमपि शनकैः ध्येयाद्वियुङ्क्ते तत्र तद्धारणेऽपि शिथिलप्रयत्नो भवति ॥ ३४ ॥ मुक्तेति ॥ यर्हि यदा एवं भगवदानन्दानुभवेन विषयेभ्यो विरक्तं स्वाश्रयाहङ्कारविलयात् मुक्ताश्रयमत एव ध्यातृध्येयानुसन्धानाभावान्निर्विषयं च सन्मनः अर्चिर्दीपज्वाला सा यथा तैलवर्ती अश्नती साश्रया सप्रकाशा सती तैलवर्त्त्यपगमे निराश्रया निष्प्रकाशा च सती स्वकारणमहाभूतज्योतीरूपेण परिणमति तद्वत् सहसा अनायासेन निर्वाणं लयमृच्छति । नानाविधवृत्तिरूपतां परित्यज्य परमकारणब्रह्माकारा भवति । अत्र अस्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशायां पुरुषः प्रतिनिवृत्तगुणप्रवाहः सन् अव्यवधानं ध्यातृध्येयविभागशून्यम् अत एव एकमखण्डम् । अनु अनुगतम् आत्मानमीक्षते ॥ ३५ ॥ सोऽपीति ॥ उपलब्धा प्रत्यक्षीकृता परस्य आत्मनः काष्ठा तत्वं येन सोऽपि स एव पुरुषः एतया योगाभ्यासलब्धया अत एव चरमया अविद्यारहितया इति सुषुप्तितो विशेषः। तत्र ह्यविद्या भवति मनसो निवृत्त्या तस्मिन् पुरुषार्थभूते सुखदुःखबाह्ये महिम्नि ब्रह्मस्वरूपे अवसितः अवसानं निष्ठां प्राप्तः यत् दुःखयोः सुखदुःखयोर्हेतुत्वं भोक्तृत्वं पूर्वं स्वात्मन्यपश्यत्तदपीदानीमसति अविद्याकृतत्वेन तुच्छे कर्तरि अहङ्कारे विधत्ते तन्निष्ठमेव मन्यते ॥ ३६ ॥ देहमिति ॥ चकारोऽप्यर्थे। चरमः चरमशरीरे वर्तमानः सिद्धो योगी यतः कारणात् आत्मनः स्वरूपमध्यगमत् अतः मदिरामदेनान्धो यथा परिकृतं कटितटे परिवेष्टितं वासस्तत्र स्थितं गतं वा नानुसन्धत्ते तद्वत् दैवात् प्रारब्धकर्मवशात् आसनादुत्थितमुत्थाय तत्रैव स्थितं वा ततोऽपेतमन्यत्र गतं ततः पुनरप्युपेतमागतं वा तमात्मसाक्षात्कारहेतुभूतं देहमपि न पश्यति न स्मरति सुखदुःखादेरनुसन्धानस्य का वार्ता ॥ ३७ ॥ देहोऽपीति ॥ दैववशगः प्रारब्धसंस्कारवशेन गच्छन् सासुरिन्द्रियप्राणादिसहितो देहोऽपि यावत्स्वारम्भकं प्रारब्धं कर्मास्ति तावत्तत्प्रति समीक्षते प्रारब्धवशाज्जीवत्येव ।

सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये ॥ हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः ॥ ३६ ॥ देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यगमत्स्वरूपम् ॥ दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः ॥ ३७ ॥ देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३८ ॥ यथा पुत्राच्च वित्ताच्च पृथङ् मर्त्यः प्रतीयते ॥ अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ॥ ३९ ॥ यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वाऽपि स्वसंभवात् ॥ अप्यात्मत्वेनाभिमतात्तदग्निः पृथगुल्मुकात् ॥ ४० ॥

अधिरूढः प्राप्तः समाधिपर्यन्तो योगो येन सः अत एव प्रतिबुद्धं वस्तु आत्मतत्त्वं येन सः सप्रपञ्चं धनपुत्रादिसहितं स्वाप्नं स्वप्नजमिव तं देहं पुनर्न भजते अहं ममेति नाभिमन्यते ॥ ३८ ॥ प्रतिबोधप्रकारमाह—यथेति ॥ अतिस्नेहवशादात्मत्वेनाभिमतादपि पुत्राच्च वित्ताच्च मर्त्यः मरणधर्मा पित्रादिदेहो यथा पृथक् प्रतीयते तथात्मत्वेनाभिमताद्देहेन्द्रियान्तःकरणात् अपि पुरुषस्तद्द्रष्टा पृथक् ॥ ३९ ॥ पृथगवस्थानाभावेऽपि भेदं सदृष्टान्तमाह—यथेति ॥ अत्रोल्मुकशब्दपौनरुक्त्यादादिम उल्मुकशब्दो ज्वलत्काष्ठवाची द्वितीयो ज्वालारहितवह्निव्याप्ताङ्गारवाची । तथा च यथा उल्मुकात् ज्वलतः काष्ठात् अग्निः पृथक् यथा च स्वसंभवात् अग्नेः संभूतात् धूमात् विस्फुलिङ्गाच्च अग्निः पृथक् तत्तस्मात् आत्मत्वेनाग्निस्वरूपत्वेनाभिमतादपि उल्मुकात् वह्निव्याप्ताङ्गारात् अपि तद्दाहकः प्रकाशकश्चाग्निर्यथा पृथगेव । यद्वा । यथा उल्मुकात् इति ल्यब्लोपे कर्मणि पञ्चमी । उल्मुकं विलोक्य संदेहविषयोऽग्निः स्वसम्भवात् विस्फुलिङ्गात् धूमाद्वापि पृथक् निश्चीयते तथा आत्मत्वेनाभिमतात् उल्मुकादपि अग्निः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथगेव । चक्रवर्ती तु उल्मुकयथाशब्दयोः पुनरुक्तिमेवं निवर्तयति उल्मुकाद्दह्यमानात्काष्ठात् यथाग्निः पृथक् यथा च उल्मुकात्पृथक् तथा विस्फुलिङ्गादपि पृथक् । यथा च विस्फुलिङ्गात् पृथक् । तथा स्वसंभवाद्धूमादपि पृथक् । कीदृशात् आत्मत्वेनाग्निस्वरूपत्वेनाभिमतात् । अज्ञो हि उल्मुकं धूमं विस्फुलिङ्गं चाग्निरयमिति मन्यते । यद्वा द्वितीययथाशब्दस्य यथावदित्यर्थः । द्वितीयमुल्मुकात् इति पदम् उल्मुकमत्तीति अग्निविशेषणम् इति व्याचख्यौ । एतन्मते च यथाग्निः पृथगुल्मुकादित्यन्तपादपाठः॥४०॥ दार्ष्टान्तिके योजयति—भूतेति ॥ तथा भूतेन्द्रियान्तःकरणात् धूमस्थानीयात् प्रधानात् उल्मुकस्थानीयात् जीवसंज्ञितात् विस्फुलिङ्गस्थानीयाच्च द्रष्टा सर्वसाक्षी आत्मा परमात्मा ब्रह्मसंज्ञितः भगवान् अग्निस्थानीयः पृथक् । स्वामिपादास्तु निष्कर्षार्थमाहुः । भूतादेर्द्रष्टा तेभ्यः पृथक् तस्मादपि जीवसंज्ञितात् ब्रह्मसंज्ञितः पृथक् तथा प्रधानादपि तत्प्रवर्तको भगवान् पृथक् ॥ ४१ ॥ सर्वभूतेष्विति ॥ भूतेषु भूतकार्येषु घटशरावादिषु यथा तदात्मतां पृथ्व्यादिमहाभूतात्मतां पश्यति तथा सर्वभूतेषु च स्थावरजङ्गमात्मकेषु तदुपादानतयात्मानमात्मनि च तत्कार्यतया सर्वभूतानि अनन्यभावेन अभेदेनेक्षेत ॥ ४२ ॥ स्वेति ॥ स्वयोनिषु स्वाभिव्यक्तिस्थानेषु तृणदार्वादिषु स्थितमे-

भूतेन्द्रियान्तःकरणात् प्रधानाज्जीवसंज्ञितात् ॥ आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसंज्ञितः ॥४१ ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ ईक्षेतानन्यभावेन भूतेष्विव तदात्मताम् ॥ ४२ ॥ स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते ॥ योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ॥ ४३ ॥ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकाम् ॥ दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ॥ ४४ ॥ इति श्रीभा॰ तृती॰ कापिलेयोपाख्याने अष्टाङ्गयोगे साधनानुष्ठानं नामाष्टाविंशतितमोऽध्यायः ॥ २८ ॥ देवहूतिरुवाच ॥ लक्षणं महदादीनां प्रकृतेः पुरुषस्य च ॥ स्वरूपं लक्ष्यतेऽमीषां येन तत् पारमार्थिकम् ॥ १ ॥ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते ॥ भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो ॥ २ ॥

कमेव ज्योतिरग्निर्योनीनां गुणवैषम्यात् ह्रस्वत्वदीर्घत्वकुटिलत्वर्जुत्वादिगुणवैषम्यादेव तथा तथा नाना यथा प्रतीयते तथा प्रकृतौ देहादिशरीरे स्थित आत्मापि देवादिदेहकृतभेदेन नाना प्रतीयते । वस्तुतस्तु सर्वत्र ज्ञानैकरूप एव ॥ ४३ ॥ पुरुषं प्रकृतिः कर्हिचिन्न विमुञ्चतीति कथं विमुक्तिरिति प्रश्नस्योत्तरमुपसंहरति—तस्मादिति ॥ पूर्वोक्तभक्त्यादिसाधनसमूहात् भगवद्भक्त इमां दृश्यमानां सदसदात्मिकां कार्यकारणात्मना परिणतां स्वां स्वस्य विमोहकरीं दुर्विभाव्यामाचिन्त्यमाहात्म्यां दैवीं देवस्य परमेश्वरस्य शक्तिरूपां प्रकृतिं पराभाव्य निवर्त्य स्वरूपेण ब्रह्मरूपेणावतिष्ठते न पुनः संसरति ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्याष्टविंशे व्यधादिमाम् ॥ २८ ॥ ऊनत्रिंशे तु बहुधा भक्तिः कालबलं तथा ॥ सृष्टिश्च बहुधा तत्र श्लोकाः सार्द्धाः शरार्ग्धयैः ॥ उवाचेति त्रैयं तत्र तर्कवेर्दौ अनुष्टुभः ॥ २९ ॥ लक्षणमिति द्वयम् ॥ हे प्रभो अमीषां महदादीनां लक्षणं यथा सांख्येषु कथितमस्ति येन च लक्षणेन तेषां महदादीनां पारमार्थिकपरस्परविभक्तं स्वरूपं लक्ष्यते ज्ञायते तत्

CC-0. In Public Domain. Digitization by eGangotri

महदादीनां प्रकृतेः पुरुषस्य च लक्षणं त्वया कथितं तत्प्रकृत्यादिस्वरूपज्ञानं यन्मूलं यस्य भक्तियोगस्य साधनं प्रचक्षते तस्य भक्तियोगस्य मार्गं भेदं मे मह्यं वि-
स्तरशो ब्रूहि ॥ १ ॥ २ ॥ विराग इति ॥ हे भगवन् येन संसृतिवर्णनेन मुमुक्षुः पुरुषः सर्वत्र इहामुत्र च विरागो विगतरागो भवेत् ता जीवलोकस्य विविधाः
संसृतीर्मम आचक्ष्व कथय ॥ ३ ॥ कालस्येति ॥ परेषां ब्रह्मादीनामपि परस्य नियन्तुस्ते त्वदात्मकस्य अत एवेश्वरस्य रूपमिव रूपं यस्य तस्यामितप्रभावस्य कालस्य स्व-
रूपमाचक्ष्व । यद्धेतोः यद्भयाद्धेतोर्जनाः कुशलं पुण्यं कुर्वन्ति ॥ ४ ॥ लोकस्येति ॥ देहादौ मिथ्याभिमतेः अचक्षुषः ज्ञानशून्यस्य अत एवानाश्रये अपारे तमसि अज्ञान-
कार्ये संसारे चिरं कालं प्रसुप्तस्य पतितस्य कर्मसु अनुबद्धया आसक्तया धिया श्रान्तस्य लोकस्य प्राणिजातस्य प्रबोधाय योगानां ज्ञानयोगादीनां भास्कर इव प्रदर्शकः त्वम्
आविरासीः ॥ ५ ॥ इतीति ॥ हे कुरुश्रेष्ठ इत्येवंविधं श्लक्ष्णं सरसं मातुर्वचः प्रतिनन्द्य सत्कृत्य महामुनिः कपिलः प्रीतो जातहर्षः करुणया चार्दितः परिप्लुतः संस्तां मात-

विरागो येन पुरुषो भगवन्सर्वतो भवेत् ॥ आचक्ष्व जीवलोकस्य विविधा लोकसंसृतीः ॥ ३ ॥ कालस्येश्वररूपस्य परेषां च परस्य ते ॥ स्वरूपं
बत कुर्वन्ति यद्धेतोः कुशलं जनाः ॥ ४ ॥ लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये ॥ श्रान्तस्य कर्मस्वऽनुविद्धया धिया
त्वमाविरासीः किल योगभास्करः ॥ ५ ॥ मैत्रेय उवाच ॥ इति मातुर्वचः श्लक्ष्णं प्रतिनन्द्य महामुनिः ॥ आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणाऽ-
र्दितः ॥ ६ ॥ श्रीभगवानुवाच ॥ भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते ॥ स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ॥ ७ ॥ अभि-
संधाय यद्धिंसां दम्भं मात्सर्यमेव वा ॥ संरम्भी भिन्नदृग् भावं मयि कुर्यात्स तामसः ॥ ८ ॥ विषयानभिसंधाय यश ऐश्वर्यमेव वा ॥ अर्चादाव-
र्चयेद्यो मां पृथग्भावः स राजसः ॥ ९ ॥ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणम् ॥ यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः ॥ १० ॥

रमाबभाषे ॥ ६ ॥ भक्तियोग इति ॥ हे भामिनि मातः भाविनि इति पाठे भावोऽभिप्रायस्तद्वति पुरुषे मार्गैः प्रकारविशेषैर्भक्तियोगो बहुविधो भाव्यते सम्पद्यते । यतः स्वभा-
वहेतुभूता ये तम आदयो गुणास्तेषां मार्गेण वृत्तिभेदेन पुंसां भावोऽभिप्रायो विभिद्यते भक्तिः स्वतो निर्गुणापि पुंसां स्वभावादिभिः तामसादिभेदव्यपदेशं लभते इति ॥ ७ ॥
अभीति ॥ यः पुरुषो हिंसां दम्भं मात्सर्यं च अभिसन्धाय संकल्प्य संरम्भी क्रोधी भिन्नदृक् आत्मपरात्मनोः भेददर्शी यः पुरुषो मयि परमेश्वरे भावं भक्तिं कुर्यात् स हिंसा-
दम्भमात्सर्यैस्त्रिविधोऽपि तामसः ॥८॥ विषयानिति॥विषयान् यशः सत्कीर्तिमैश्वर्यं धनादि एव वा अभिसन्धाय सङ्कल्प्य पृथग्भावः भेददर्शी यः अर्चादौ प्रतिमादौ आदिपदा-
त्सूर्यादिग्रहणं मामर्चयेत् स विषयकीर्त्यैश्वर्यैस्त्रिधापि राजसः ॥ ९ ॥ कर्मेति ॥ कर्मनिर्हारं पापक्षयमुद्दिश्य परस्मिन् परमेश्वरे वा तदर्पणं यथा स्यात्तथा भगवत्प्रीतिमुद्दिश्य
यष्टव्यमिति विधिसिद्धिमुद्दिश्य वा यः पृथग्भावो भेददर्शी मां यजेत पूजयेत्स कर्मनिर्हारभगवदर्पणविधिसिद्धिभेदात्त्रिधापि सात्विकः । भेददर्शनमर्चादावर्चनं च त्रिष्वपि समा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम् । अत्र भक्तियोगभेदप्रस्तावेऽपि भक्तभेदकथनं भक्तियोगभेदे पर्यवस्यति । कैश्चित् भक्तिपरत्वेनैव किंचित्क्लेशेन व्याख्यातम् ॥ १० ॥ तदेवं तामसादिभक्तिषु त्रयस्त्रयो भेदास्तासु यथोत्तरं श्रैष्ठ्यं तथा च श्रवणकीर्तनादयो नवापि तामसादिभेदेन प्रत्येकं नव नव भेदा भवन्ति अतः सगुणा भक्तिरेकाशीतिभेदेति सूचितं निर्गुणा भक्तिस्त्वेकविधैव । देवानां गुणलिङ्गानामित्यादि तल्लक्षणं पूर्वमुक्तमपि प्रसङ्गात्पुनराह–मदिति द्वयम् ॥ मद्गुणानां भक्तवात्सल्यादीनां श्रवणमात्रेण सर्वगुहाशये सर्वसाक्षिणि मयि पुरुषोत्तमे अविच्छिन्ना प्रत्ययान्तररहिता अहैतुकी हेतुः फलान्तराभिसन्धिः कारणं च तद्रहिता अव्यवहिता भेददर्शनरहिता यथा गङ्गाया अम्भसोम्बुधौ समुद्रे गतिर्भवति तथा मनोगतिरिति या भक्तिः प्रीतिः सा निर्गुणस्य भक्तियोगस्य लक्षणं स्वरूपमुदाहृतम् ॥ ११ ॥ १२ ॥ सालोक्येति ॥ जना निर्गुणभक्ताः मत्सेवनं विनान्यत् सालोक्यं मया सहैकस्मिन् लोके वासं सार्ष्टिं समानैश्वर्यं सामीप्यं निकटवर्तित्वं सारूप्यं समानरूपत्वं सायुज्यमेकत्वम् । अपि मया दीयमानमपि न गृह्णन्ति कुतस्तत्कामनेत्यर्थः ॥ १३ ॥

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ॥ मनोगतिरविच्छिन्ना यथा गङ्गाऽम्भसोऽम्बुधौ ॥ ११ ॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ १२ ॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥ १३ ॥ स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥ १४ ॥ निषेवितेनानिमित्तेन स्वधर्मेण महीयसा ॥ क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥ १५ ॥ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः ॥ भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च ॥ १६ ॥ महतां बहुमानेन दीनानामनुकम्पया ॥ मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ॥ १७ ॥

स एवेति ॥ अतः स उक्तलक्षण एव भक्तियोगाख्य आत्यन्तिकः अत्यन्ते सर्वान्ते भवः आत्यन्तिकः चरमकाष्ठामापन्नः उदाहृतः येन भक्तियोगेन पुरुषस्त्रिगुणं संसारमतिव्रज्य अतिक्रम्य मद्भावाय ब्रह्मत्वायोपपद्यते ॥ १४ ॥ एतादृश्या भक्तेः साधनान्याह–निषेवितेनेति ॥ नित्यशः नित्यं निषेवितेन स्वनुष्ठितेन अनिमित्तेन फलाभिसन्धिरहितेन चक्रवर्ती तु निषेवितानिमित्तेनेति समस्तपाठमभिप्रैति अतो न च्छन्दोभङ्गोऽपि महीयसा श्रद्धादियुक्तेन शस्तेन स्तुत्येन तत्रापि नातिहिंस्रेण तदङ्गपत्रपुष्पादित्रोटनरूपहिंसाया आवश्यकत्वादतिशब्दः । एतानि विशेषणानि यथोचितमग्रेऽपि योज्यानि स्वधर्मेण नित्यनैमित्तिकेन यज्ञादिक्रियायोगेन पाञ्चरात्रादिपूजाप्रकारेण वा मामेतीति शेषेण वाक्यपूर्तिः कार्या एवमग्रेऽपि ॥ १५ ॥ मदिति ॥ मद्धिष्ण्यं मत्प्रतिमातद्दर्शनस्पर्शपूजास्तुत्यभिवन्दनैः भूतेषु स्थावरजङ्गमात्मकेषु मद्रूपभावनया सत्वेन धैर्येण असङ्गमेन वैराग्येण च मामेति ॥ १६ ॥ महतामिति ॥ महतां बहुमानेन दीनानामनुकम्पया विषये षष्ठी गुणैरात्मतुल्येषु मैत्र्या चैव हिंसास्तेयानृतवर्जनादियमेन जपपाठादिनियमेन च मामेति ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आध्यात्मिकेति ॥ आध्यात्मिकस्य वेदान्तादिशास्त्रस्यानु नित्यं श्रवणात् मे मम नामसंकीर्तनाच्च आर्जवेन मनसो वचसश्चाकौटिल्येन आर्याणां सन्मार्गिणां सङ्गेन तथा निरहंक्रियया देहादावात्माभिमानराहित्येन मामेति ॥ १८ ॥ मदिति ॥ मद्धर्मणो मदर्थमेव धर्माद्यनुष्ठानं यस्य तस्य भगवद्धर्मानुष्ठातुः पुरुषस्यैतैः पूर्वोक्तगुणैः परिसंशुद्धो निर्मलः आशयो मनः श्रुतमात्रो गुणो यस्य तं मामञ्जसा अप्रयत्नेनैवाभ्येति मद्गुणश्रवणमात्रेण मय्यासक्तो भवति ॥ १९ ॥ यथेति ॥ वातः रथः प्रापको यस्य स गन्धः आशयात् स्वस्थानात् पुष्पादेः सकाशात् घ्राणमिन्द्रियं यथा स्वयमेव आवृङ्क्ते प्राप्नोति आत्मसात्करोति एवं योगरतमत एव अविकारि विशुद्धं च यच्चेतस्तदात्मानं परमात्मानं मामावृङ्क्ते आत्मसात्करोति ॥ २० ॥ अहमिति ॥ अहं सर्वेषु भूतेषु सदैवावस्थितः तेषां भूतानामात्मा च अस्मि तं मामवज्ञाय तत्र मम दृष्टिमकृत्वा मर्त्यः मरणधर्मकदेहात्मदर्शी योऽर्चायां मामर्चति स अर्चाविडम्बनं कुरुते । अत्र अहमित्यादिचतुर्भिः श्लोकैः क्रमेण अवज्ञोपेक्षाद्वेषनिन्दाः निषिध्यन्ते ॥ २१ ॥ य इति ॥ सर्वेषु भूतेषु

आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे ॥ आर्जवेनार्यसङ्गेन निरहंक्रियया तथा ॥ १८ ॥ मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः ॥ पुरुषस्याञ्जसाऽभ्येति श्रुतमात्रगुणं हि माम् ॥ १९ ॥ यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात् ॥ एवं योगरतं चेत आत्मानमविकारि यत् ॥ २० ॥ अहं सर्वेषु भूतेषु भूतात्माऽवस्थितः सदा ॥ तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनम् ॥ २१ ॥ यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् ॥ हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥ २२ ॥ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः ॥ भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति ॥ २३ ॥ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे ॥ नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥२४॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ॥ यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥ २५ ॥

आत्मानं प्रत्यगात्मानमीश्वरमन्तर्यामिणं चैवं रूपद्वयेन सन्तं विद्यमानं मां हित्वा उपेक्ष्य यो मौढ्यान्मौर्ख्यात् अर्चां प्रतिमां भजते सेवते स भस्मन्येव जुहोति तत्कृता सेवा भस्मनि होमवन्निष्फला भवतीत्यर्थः।अत्र स्वभक्तान् शिक्षयितुम् उपालम्भनिर्भोक्तिः । अधुनापि गुरवः प्रियमपि स्वशिष्यं स्वसेवारतमपि अन्यत्रापराधलेशमात्रदृष्ट्यैव मत्सेवां करोषि भस्म करोषि मां केवलं दुःखयस्येवेत्याक्षिपन्ति । वस्तुतस्तु प्रतिमापूजने निषेधो नास्त्येव । अर्चायामेव हरये इति अर्चादावर्चयेत्तावदित्यादि वचनात् ॥ २२ ॥ ॥ ९१ ॥
द्विषत इति ॥ परकाये स्थितं मां द्विषतः मानिनः देहाद्यात्ममानिनः भिन्नदर्शिनः भूतेषु बद्धवैरस्य पुरुषस्य मनः शान्तिं न ऋच्छति न प्राप्नोति ॥२३॥ अहमिति ॥ हे अनघे उच्चावचैर्द्रव्यैरुत्पन्नया सम्पादितया क्रियया सामग्र्यार्चायामर्चितोऽप्यहं भूतग्रामाणामवमानिनो निन्दकस्य जनस्य नैव तुष्ये तुष्टो नैव भवामि । तद्भार्षः॥२४॥ननु तर्ह्यर्चादावर्चनं व्यर्थमेव नेत्याह—अर्चादाविति ॥ यावत्सर्वभूतेष्ववस्थितमीश्वरं सर्वनियन्तारं मां स्वहृदि न वेद तावत् स्ववर्णाश्रमाचारप्राप्तं कर्मकृत् तत्कुर्वन् यथावकाशमर्चादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मामर्चयेत् अनेन कर्मनिष्ठाया अपि स एवावधिरित्युक्तम् ॥ २५ ॥ आत्मनश्चेति ॥ यः स्वात्मनः स्वस्य परस्यान्यस्य चापि अन्तरा अन्तरं भेदम् उत् अपि अरमल्पम् अल्पमपि भेदं करोति । यद्वा । अन्तरा मध्ये उदरमुदरोपलक्षितं शरीरं करोति शरीरप्रयुक्तं भेदं पश्यति । परे तु आत्मनः परस्यापि च उदरम् अन्तरा भिन्नं करोति मन्यते । स्वोदरपूरणमेव करोति नान्यस्मै भोजनादिकं ददाति इत्याहुः । तस्य भिन्नदृशोऽहं मृत्युरूपः सन् उल्बणं दुःसहं संसारभयं विदधे सम्पादयामि ॥ २६ ॥ अथेति ॥ अथ अतः सर्वभूतेषु कृतालयं कृतावासं भूतात्मानं सर्वभूतान्तर्यामिणं मां दानमानाभ्यां मैत्र्या अभिन्नेन चक्षुषा समदर्शनेन मदात्मकबुद्ध्या च अर्हयेत् ॥ २७ ॥ तत्रापि यथोत्तरं सम्मानाधिक्यं कार्यमित्याशयेन यथोत्तरं श्रेष्ठ्यमाह—जीवा इति ॥ हे शुभे अजीवानामिति पञ्चम्यर्थे षष्ठी । अचेतनेभ्यो मृत्पाषाणादिभ्यो जीवाः सचेतनाः वृक्षादयः श्रेष्ठास्ततः प्राणभृतः श्वासोच्छ्वासवन्तो जङ्गमाः श्रेष्ठास्ततः सचित्ताः ज्ञानवन्तः प्रवरास्ततश्चेन्द्रियाणां वृत्तयो येषु ते रूपरसादिज्ञानवन्तः श्रेष्ठाः । परे तु अजी-

आत्मनश्च परस्यापि यः करोत्यन्तरोदरम् ॥ तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥ २६ ॥ अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ॥ अर्हयेद्दानमानाभ्यां मैत्र्याऽभिन्नेन चक्षुषा ॥ २७ ॥ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ॥ ततः सचित्ताः प्रवरास्ततश्चेन्द्रियवृत्तयः ॥ २८ ॥ तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ॥ तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः ॥ २९ ॥ रूपभेदविदस्तत्र ततश्चोभयतोदतः ॥ तेषां बहुपदः श्रेष्ठाश्चतुष्पादस्ततो द्विपाद् ॥३०॥ ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ॥ ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ ३१ ॥

वेभ्यो जीर्णसस्यादिभ्यः जीवाः अजीर्णसस्यादयः श्रेष्ठाः ततः प्राणभृतः भूमिष्ठजलाकर्षणवमनादिलिङ्गेन प्राणवृत्तिभृतः जीवत्पाषाणादयः ततः सचित्ताः पूर्वमुड्डयनादिक्रियाः पश्चादिन्द्रेण स्तब्धा इति सञ्ज्ञानाः पर्वताः ततश्चेन्द्रियवृत्तयः वृक्षाद्याः श्रेष्ठा इन्द्रियवृत्तयो वृक्षाणामपि सूक्ष्माः सन्त्येव तस्मात्पश्यन्ति पादपाः तस्माज्जिघ्रन्ति पादपा इत्यादि भारतमोक्षधर्मेषु स्मरणात् । तरुषु प्रभूता तु स्पर्शवृत्तिरेवेत्याहुः ॥२८॥ तत्रेति ॥ अतः तत्र तेभ्यः स्पर्शवेदिभ्योऽपि रसवेदिनः मत्स्यादयः मृत्तिकादिषु स्वभोज्याभोज्यज्ञानिनो गण्डूपद्यादयो वा प्रवराः श्रेष्ठाः ततो गन्धविदो भ्रमरादयः बकुलादिपुष्पसूक्ष्मकीटा वा श्रेष्ठाः ततः शब्दविदः सर्पादयः शब्दश्रवणेन पलायनवन्तः केचित् जलकीटा वा वराः ॥ २९ ॥ रूपेति ॥ ततो रूपभेदविदः काकादयः श्रेष्ठास्तत उभयतोदतः ऊर्ध्वाधोदन्तवन्तः मर्कटादयः सर्पादयो वा श्रेष्ठाः । तेषां तेभ्यः अपादेभ्यो बहुपदाः भ्रमरादयः श्रेष्ठाः तेभ्यश्चतुष्पादाः श्रेष्ठाः तेभ्यो द्विपान्मनुष्यः श्रेष्ठः ॥ ३० ॥ तत इति ॥ ततस्तेषु चत्वारो वर्णा इत्यादि स्पष्टम् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थेति ॥ अर्थज्ञादपि संशयच्छेत्ता मीमांसकः श्रेयान् ततोऽपि केवलात्स्वकर्मकृत् श्रेयान् ततोऽपि यः आत्मनो धर्मम् अदोग्धा तत् फलेच्छारहितः स मुक्तसङ्गः निष्कामः श्रेयान् ॥ ३२ ॥ तस्मादिति अर्द्धम् ॥ तस्मादपि मय्यर्पिता अशेषाः क्रिया अर्थाः क्रियाफलानि आत्मा देहादिसङ्घातश्च येन सः अत एव निरंतरः मत्प्राप्त्यावन्तरायरहितः श्रेष्ठः ॥ ३३ ॥ मयीति ॥ मय्यर्पित आत्मा येन तस्मात् अत एव मयि संन्यस्तं कर्म क्रियाफलं येन तस्मात् अत एव समदर्शनात् सर्वत्र समं पश्यतः अत एवाकर्तुः कर्तृत्वाभिमानशून्यात् पुंसः सकाशात् परमुत्कृष्टं भूतं जीवं न पश्यामि ॥ ३४ ॥ मनसेति ॥ जीवकलया जीवरूपेण सर्वभूतेषु भगवान् ईश्वरः प्रविष्ट इति मनसा एतानि चराचरात्मकानि भूतानि बहुमानयन्प्रणमेत् ॥ ३५ ॥ भक्तियोगमुपसंहरति—भक्तीति ॥ हे मानवि भक्तियोगः योगः अष्टाङ्गयोगः साङ्ख्योक्तज्ञानयोगश्च मयोदीरितः ययोर्द्वयोर्मध्य एकतरेणैव पुरुषो मुमुक्षुः पुरुषं भगवन्तं व्रजेत् ॥ ३६ ॥ जीवस्य संसृतीः कालस्य स्वरूपं च पूर्वपृष्टमुत्तरयति—एतदिति सार्द्धम् ॥ प्रधानं प्रकृतिं पुरुषं तत्प्रवर्तकं

अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् ॥ मुक्तसङ्गस्ततो भूयानदोग्धा धर्ममात्मनः ॥ ३२ ॥ तस्मान्मय्यर्पिताशेषक्रियाऽर्थात्मा निरन्तरः ॥ ३३ ॥ मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ॥ न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥ ३४ ॥ मनसैतानि भूतानि प्रणमेद्बहु मानयन् ॥ ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥ ३५ ॥ भक्तियोगश्च योगश्च मया मानव्युदीरितः ॥ ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥ ३६ ॥ एतद्भगवतो रूपं ब्रह्मणः परमात्मनः ॥ परं प्रधानं पुरुषं दैवं कर्म विचेष्टितम् ॥ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते ॥३७॥ भूतानां महदादीनां यतो भिन्नदृशां भयम् ॥ योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ॥ स विष्णवाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः ॥ ३८ ॥ न चाऽस्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः ॥ आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत् ॥ ३९ ॥

परं तद्व्यतिरिक्तं च तथा कर्मणो विविधं चेष्टितं संसृतिलक्षणं यस्मात् एतदेव दैवमित्यभिधीयते । दैवप्रेरितकर्मकृताः संसृतयो विचित्रा इत्यर्थः । एतत्सर्वं परमात्मनो भगवतो ब्रह्मणो रूपं रूपभेदस्य वस्तूनामन्यथात्वस्य आस्पदमाश्रयः कारणं दिव्यमद्भुतप्रभावमेतदेव भगवतो रूपं काल इत्यभिधीयते । यद्वा । परं महत्तत्त्वं दैवमिन्द्रियाधिष्ठातृदेवतावर्गं कर्मसु विविधं चेष्टितं यस्य तमिन्द्रियवर्गं रूपभेदास्पदं स्वभावः यश्च काल इत्यभिधीयते तदेतद् भगवत एव रूपं न ततः पृथक् शेषं समम् ॥ ३७ ॥ भूतानामिति सार्द्धम् ॥ महदादीनां तत्तदभिमानिनां भिन्नदृशां भेददर्शिनां भूतानां प्राणिनां च यतः कालात् जन्ममरणादिभयं भवति । भयमेवाह यश्च भूतानामन्तः प्रविश्य भूतैः पञ्चमहाभूतविकारैरेव सर्वाणि भूतानि अत्ति संहरति असौ सः अखिलाश्रयः अधियज्ञः यज्ञादिफलदाता विष्णवाख्यः कालः कलयतां वशीकुर्वतां ब्रह्मादीनामपि प्रभुः वशीकर्त्ता ॥ ३८ ॥ न चेति ॥ अस्य कालात्मनो भगवतः कश्चिदपि दयितः प्रियो न चास्ति न च द्वेष्योऽस्ति न बान्धवोऽस्ति अतः असौ स्वयं सदा अप्रमत्तः सावधान एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तकृत् संहर्ता सन् प्रमत्तं विषयासक्त्या स्वोद्धारप्रयत्नशून्यं जनमाविशाति विनाशाय प्रविशति ॥ ३९ ॥ यद्भयादिति ॥ यस्य कालस्य भयात् वातः वायुर्वाति सर्वत्र प्रचरति सूर्यश्च तत्तत्कालानुरूपं यद्भयात्तपति यद्भयाद्देवः पर्जन्यो वर्षति । यद्भयाद् भगणो नक्षत्रसमूहो भाति ॥ ४० ॥ यदिति ॥ ओषधिभिः सह वनस्पतयो वृक्षा लताश्च यस्माद् भीताः स्वे स्वे काले पुष्पाणि फलानि च गृह्णन्ति प्रकटयन्ति ॥ ४१ ॥ स्रवन्तीति ॥ यस्माद् भीताः सरितः स्रवन्ति यतश्च भीत उदधिर्नोत्सर्पति स्वमर्यादामुल्लङ्घ्य पृथ्वीं न प्लावयति यद् भयादग्निरिन्धे दीप्यते यद्भयाद् गिरिभिः सहिता बहुभाराक्रान्ता भूर्जले न निमज्जति ॥ ४२ ॥ नभ इति ॥ यस्य नियमात् आज्ञावशात् अदः नभः श्वसतां प्राणिनां पदं स्थानमवकाशं ददाति यन्नियमात् महान् महत्तत्त्वं ब्रह्मा वा स्वदेहं जगदङ्कुरभूतं वैराजं सप्तभिः पृथिव्यप्तेजोवाय्वाकाशाहङ्कारमहत्तत्त्वैरावृतं लोकं तनुते ब्रह्माण्डरूपेण विस्तारयति ॥ ४३ ॥ गुणेति ॥ चराचरमेतद्विश्वं येषां वशेऽस्ति ते गुणाः रजःसत्त्वतमोरूपास्तदभिमानिनस्तन्नियन्तारो देवा

यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ यद्भयाद्वर्षते देवो भगणो भाति यद्भयात् ॥ ४० ॥ यद्वनस्पतयो भीता लताश्चौषधिभिः सह ॥
स्वे स्वे कालेऽभिगृह्णन्ति पुष्पाणि च फलानि च ॥ ४१ ॥ स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः ॥ अग्निरिन्धे सगिरिभिर्भूर्न मज्जति
यद्भयात् ॥ ४२ ॥ नभो ददाति श्वसतां पदं यन्नियमाददः ॥ लोकं स्वदेहं तनुते महान् सप्तभिरावृतम् ॥ ४३ ॥ गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात् ॥ वर्तन्तेऽनुयुगं येषां वश एतच्चराचरम् ॥ ४४ ॥ सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनान्तकम् ॥ ४५ ॥ इति श्रीभागवते तृतीयस्कन्धे बहुविधभक्तियोगवर्णनं नाम एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ कपिल उवाच ॥ तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमम् ॥ काल्यमानोऽपि बलिनो वायोरिव घनावलिः ॥ १ ॥

ब्रह्मविष्णुरुद्राः यद्भयात् अस्य विश्वस्य सर्गादिषु सर्गस्थितिप्रलयेषु अनुयुगं प्रतिकल्पं वारंवारं प्रवर्तन्ते ॥ ४४ ॥ स इति ॥ स कालो जनेन पित्रादिना जनं पुत्रादिं जनयन्नादिकृद् भवति मृत्युनान्तकं मारकमपि चौरव्याघ्रादिकं मारयन्नन्तकरो भवति स्वयं त्वनादिः जन्मरहितः अनन्तो मरणशून्यः अव्ययः अपक्षयादिविकारशून्यश्च ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयस्योनत्रिंशे व्यधादिमाम् ॥ २९ ॥ त्रिंशे कान्तादिसक्तानां कामिनां तामसी नृणाम् ॥ पापादधोगतिस्तत्र श्लोका वेदगुणा मताः ॥ उवाचेत्येकमर्द्धाब्ध्याश्चतूरामा अनुष्टुभः ॥ ३० ॥ तस्येति ॥ बलिना कालेन काल्यमानोऽपि इतस्ततो विचालनपूर्वकं पीड्यमानोऽपि बलिन इति पाठान्तरम् । अयं प्राणी इतस्ततो विचाल्यमानापि घनावलिर्मेघपङ्क्तिर्यथा वायोर्विक्रमं न वेद तथा तस्य पूर्वोक्तप्रभावस्यैतस्य कालस्य उरुमधिकं विक्रमं विनाशकत्वमयं जनः प्राणी नैव वेद नैव जानाति ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

विक्रममाह—यमिति ॥ अयं पुमान् दुःखेन प्रयासेन सुखहेतवे सुखार्थं यं यं धनपुत्रादिरूपमर्थमुपादत्ते सम्पादयति तं तमर्थं कालात्मको भगवान्धुनोति विनाशयति । यत्कृते यदर्थनिमित्तं पुमान् शोचति ॥ २ ॥ शोके हेतुः—यदिति ॥ यद्यस्मात् दुर्मतिः अयं जनः सानुबन्धस्य पुत्रकलत्रादिसहितस्य अध्रुवस्य नश्वरस्य देहस्य संबन्धीनि गृहक्षेत्रवसूनि मोहात् ध्रुवाणि नित्यानि मन्यते अतस्तद्विहतौ शोचति ॥ ३ ॥ जन्तुरिति ॥ वा एवार्थे । एतस्मिन्भवे संसारे अयं जन्तुः जीवो यां यां देवमनुष्यादियोनिमनुव्रजेत् प्राप्नुयात्तस्यां तस्यां योनौ स निर्वृतिं सुखं लभते अतो न विरज्यते विरक्तो नैव भवतीत्यर्थः ॥ ४ ॥ नरकस्थ इति ॥ देवस्य हरेर्मायया विमोहितः अयं पुमान् नरकस्थोऽपि नारक्यां नरकयोग्यविष्ठाहारादिभिर्जातायां निर्वृतौ प्रीतौ सत्यां तं नरककीटादिदेहं त्यक्तुं नैवेच्छति ॥५॥ आत्मेति ॥ आत्मा देहः जायासुतागारपशुद्रविणबन्धवश्च एतेषु निरूढमूलं प्रसृतमनोरथं हृदयं यस्य सः आत्मानं बहु मन्यते कृतार्थं मन्यन्ते ॥ ६ ॥ सन्दह्यमानेति ॥ एषामात्मादीनामुद्वहनाधिना पोषणचिन्तया संदह्य-

यं यमर्थमुपादत्ते दुःखेन सुखहेतवे ॥ तं तं धुनोति भगवान्पुमान् शोचति यत्कृते ॥ २ ॥ यदध्रुवस्य देहस्य सानुबन्धस्य दुर्मतिः ॥ ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ॥ ३ ॥ जन्तुर्वै भव एतस्मिन्यां यां योनिमनुव्रजेत् ॥ तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ॥ ४ ॥ नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति ॥ नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ॥ ५ ॥ आत्मजायासुतागारपशुद्रविणबन्धुषु ॥ निरूढमूलहृदय आत्मानं बहु मन्यते ॥ ६ ॥ संदह्यमानसर्वाङ्ग एषामुद्वहनाधिना ॥ करोत्यविरतं मूढो दुरितानि दुराशयः ॥ ७ ॥ आक्षिप्तात्मेन्द्रियः स्त्रीणामसतीनां च मायया ॥ रहो रचितयाऽऽलापैः शिशूनां कलभाषिणाम् ॥ ८ ॥ गृहेषु कूटधर्मेषु दुःखतन्त्रेष्वतन्द्रितः ॥ कुर्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ॥ ९ ॥ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् ॥ पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् ॥ १० ॥

मानानि परितप्तानि सर्वाणि अङ्गानि यस्य स मूढः दुराशयश्च जनः अविरतं निरन्तरं दुरितानि पापानि करोति ॥ ७ ॥ आक्षिप्तेति द्वयम् ॥ असतीनां पुंश्चलीनां स्त्रीणां रहसि रचितया मायया संभोगादिरूपया कलभाषिणां शिशूनामालापैश्च आक्षिप्तः आकृष्ट आत्मान्तःकरणमिन्द्रियाणि च यस्य सः गृही गृहाश्रमी कूटाः वित्तशाठ्यादिकपटप्रायाः धर्माः येषु तेषु दुःखतन्त्रेषु दुःखप्रधानेषु गृहेषु अतन्द्रितः आलस्यरहितः सन् दुःखस्य प्रतीकारं निवृत्त्युपायं कुर्वन्नपि सुखवन्मन्यते नतु सुखं लभते ॥ ८ ॥ ९ ॥ अर्थैरिति ॥ इतस्ततः शास्त्रमर्यादोल्लंघनेन सर्वतो गुर्व्या महत्या हिंसया पीडया आपादितैरर्थैर्धनादिभिः तान् पुत्रकलत्रादीन् पुष्णाति येषामेवं पोषेण स पुमान् शेषभुक् सर्वोपभुक्तावशिष्टं पापकर्म वा भुङ्क्ते तादृशः सन् भोगोऽपि तस्य दुर्लभ इत्यर्थः । स्वयमधो नरकं याति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विघ्नितायां सत्यां परार्थे परस्वे स्पृहां
वार्तायामिति ॥ लोभेन अभिभूतः हतविवेकः निःसत्वः अशक्तः स वार्तायां जीविकायां पुनः पुनरारब्धायां लुप्यमानायां दैवेन विघ्नितायां सत्यां परार्थे परस्वे स्पृहां कुरुते ॥ ११ ॥ कुटुम्बेति ॥ कुटुम्बस्य भरणे अकल्पः असमर्थः मन्दभाग्यः वृथोद्यमः निष्फलयत्नः श्रिया विहीनः कृपणः दीनः मूढधीश्च सः ध्यायन् किं कर्त-
व्यमित्यादि चिन्तयन् श्वसिति उच्चैः श्वासान् विमुञ्चति ॥ १२ ॥ एवमिति ॥ एवं पूर्वोक्तप्रकारेण स्वस्य भरणे पोषणे अकल्पमसमर्थं तस्य कलत्रादयः गोजरं वृद्धबली-
वर्दं कीनाशा दुष्टाः कृषीवला यथा नाद्रियन्ते तथा यथा पूर्वं स्वपोषणदशायामाद्रियन्ते स्म तथेदानीं नाद्रियन्ते भोजनाच्छादनादिकमपि न प्रयच्छन्ति ॥ १३ ॥ तत्रेति
द्वयम् ॥ तत्राप्येवमनादरदशायामप्यजातनिर्वेदः अनुत्पन्नवैराग्यः स्वयमात्मना पूर्वं भृतैः पुष्टैः भ्रियमाणः पोष्यमाणः जरया उपात्तं स्वीकृतं वैरूप्यं वलीपलितादि येन सः मरणाभिमुख आसन्नमृत्युः अवमत्या परिभवपूर्वकमुपन्यस्तमग्रे प्रक्षिप्तमन्नादिकं गृहपालः श्वा इवाहरन् भुञ्जानः आमयावी अजीर्णरोगवान् अतः अप्रदीप्ताग्निः अत

वार्तायां लुप्यमानायामारब्धायां पुनः पुनः ॥ लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहाम् ॥ ११ ॥ कुटुम्बभरणाकल्पो मन्दभाग्यो वृथोद्यमः ॥ श्रिया विहीनः कृपणो ध्यायन् श्वसिति मूढधीः ॥ १२ ॥ एवं स्वभरणाकल्पं तत्कलत्रादयस्तदा ॥ नाद्रियन्ते यथापूर्वं कीनाशा इव गोजरम् ॥ १३ ॥ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः ॥ जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे ॥ १४ ॥ आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन् ॥ आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः ॥१५॥ वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः ॥ कासश्वासकृतायासः कण्ठे घुरघुरायते ॥ १६ ॥ शयानः परिशोचद्भिः परिवीतः स्वबन्धुभिः ॥ वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः ॥ १७ ॥ एवं कुटुम्बभरणे व्यापृतात्माऽजितेन्द्रियः ॥ म्रियते रुदतां स्वानामुरुवेदनयाऽस्तधीः ॥ १८ ॥

एवाल्पाहारः अत एव चाल्पं चेष्टितं यस्य सः गृह एवास्ते ॥१४॥१५॥ वायुनेति ॥ उत्क्रमता ऊर्ध्वं गच्छता दीर्घाभाव आर्षः । प्राणवायुना उद्गते उद्वर्तिते तारे कनीनिके यस्य स कफेन श्लेष्मणा संरुद्धा नाड्यो यस्य सः अतः कासश्वासाभ्यां कृत आयासो यस्य सः कण्ठे घुरघुरायते घुरडघुरडशब्दवान् भवति । अव्यक्तानुकरणेति कृञादियोगं विनापि डाच् डाजन्तात्क्यष् विधानात् ज्ञापकात् “ लोहितादिडाज्भ्यः ” इति क्यष् । “ वा क्यषः ” इति पाक्षिकस्तङ् । नित्यमाम्रेडिते डाचीति डस्य पररूपं टिलोपः ॥ १६ ॥ शयान इति ॥ शयानः परिशोचद्भिः स्वबन्धुभिः परिवीतः परिवेष्टितः तैर्वाच्यमानः हे बन्धो हे तातेत्याहूयमानोऽपि न ब्रूते यतः कालस्य मृत्योः पाशस्य वशं गतः ॥ १७ ॥ एवमिति ॥ उक्तप्रकारेण कुटुम्बभरणे व्यापृत आत्मा चित्तं यस्य सः अजितेन्द्रियः उरुवेदनया महत्या पीडया अस्ता नष्टा धीर्यस्य सः स्वानां बन्धूनां रुदतां सतां म्रियते ॥ १८ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृतस्य पापपुण्याभ्यां द्वे गती । तत्र पापगतिमाह—यमेति ॥ तदा मरणसमये प्राप्तावात्मानमानेतुमागतौ भीमौ भयङ्करौ सरभसं सक्रोधमीक्षणं ययोस्तौ यमदूतौ दृष्ट्वा त्रस्तं हृदयं यस्य सः शकृन्मलं मूत्रं च विमुञ्चति ॥ १९ ॥ यातनेति ॥ तौ यमदूतौ मृतं यातनायोग्ये देहे आवृत्य निरुध्य गले कण्ठे बलात्पाशैर्बध्वा यथा दण्डयं दण्डार्हं जनं राजभटा बध्वा नयन्ति तथा दीर्घमध्वानं नयतः गमयतः॥२०॥तयोरिति द्वयम्॥तयोर्दूतयोस्तर्जनैश्छिन्धि भिन्धीत्यादिदुर्वचनैर्निर्भिन्नं व्याकुलं हृदयं यस्य सः अत एव जातः वेपथुः कम्पो यस्य सः पथि मार्गे श्वभिर्भक्ष्यमाणः दश्यमानशरीरः अतः आर्तः पीडितः स्वं स्वीयमघं पापमनुस्मरन् भवति ॥२१॥ क्षुदिति ॥ क्षुत्तृड्भ्यां परीतः व्याप्तः अर्कदवानलानिलैः सन्तप्यमानः कशया चर्ममय्या रज्ज्वा पृष्ठे च ताडितः सूर्यदवाग्निभ्यां तप्ता वालुका यस्मिंस्तस्मिन् पथि निराश्रमोदके निर्गतः आश्रमो विश्रामस्थानमुदकं च यस्मिंस्तस्मिन् पथि अशक्तः चलितुमसमर्थोऽपि कृच्छ्रेण कष्टेन चलति ॥ २२ ॥ तत्रेति ॥ यतः श्रान्तः अतो मूर्च्छितः संस्तत्र तत्र मार्गे पतन्

यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ ॥ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्चति ॥ १९ ॥ यातनादेह आवृत्य पाशैर्बध्वा गले बलात् ॥
नयतो दीर्घमध्वानं दण्डयं राजभटा यथा ॥ २० ॥ तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः ॥ पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन्॥२१॥
क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके ॥ कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रमोदके ॥ २२ ॥ तत्र
तत्र पतञ्छ्रान्तो मूर्च्छितः पुनरुत्थितः ॥ यथा पापीयसा नीतस्तमसा यमसादनम् ॥ २३ ॥ योजनानां सहस्राणि नवतिं नव चाध्वनः ॥
त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः ॥२४॥ आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः ॥ आत्ममांसादनं क्वापि स्वकृत्तं परतोऽपि वा
॥ २५ ॥ जीवतश्चान्त्राभ्युद्धारः श्वगृध्रैर्यमसादने ॥ सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसम् ॥२६॥कृन्तनं चावयवशो गजादिभ्यो भिदापनम् ॥
पातनं गिरिशृङ्गेभ्यो रोधनं चाम्बुगर्तयोः ॥ २७ ॥

पुनरुत्थितश्च सन् तमसा अन्धकारप्रचुरेण पापीयसा पापियोग्येन दुःखबहुलेन पथा मार्गेण यमस्य सादनं प्रति नीतो भवति ॥ २३ ॥ योजनानामिति॥ अध्वनः संबान्धिनां योजनानां नवतिं नव च सहस्राणि पापाल्पत्वे त्रिभिर्मुहूर्तैः पापाधिक्ये च द्वाभ्यां मुहूर्ताभ्यां नीतः अतिक्रामितः सन् यमस्थाने यातनाः प्राप्नोति ॥ २४ ॥ संक्षेपतो यातना दर्शयति—आदीपनमिति ॥ उल्मुकादिभिः ज्वलत्काष्ठादिभिर्वेष्टयित्वा स्वगात्राणामादीपनं प्रज्वालनं क्वापि स्वेन कृत्तं छिन्नं परतोऽपि वा अन्येन वा छिन्नं यदात्मनः स्वस्य मांसं तस्यादनं भक्षणं प्राप्नोति वृत्त्यन्तर्गतस्य मांसस्य कृत्तमिति विशेषणसंबन्ध आर्षः । एकतकारो वा पाठः तस्य स्वेनैव कृतं परतः कृतं वाऽऽत्ममांसस्यादनं प्राप्नोतीत्यर्थः ॥ २५ ॥ जीवत इति ॥ यमसादने यमपुरे श्वगृध्रैर्जीवत एव स्वस्यान्त्राणामभ्युद्धारः बहिर्निष्कासनं जीवत इत्यादीपनादिषु सर्वत्र द्रष्टव्यम् । मृतस्य पीडाऽसम्भवात् दशद्भिः सर्पादिभिः आत्मनो वैशसं पीडाम्॥२६॥कृन्तनमिति ॥ अवयवशः अङ्गानां कृन्तनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शस्त्रैश्छेदनं गजादिभ्यः भिदायाः अवयवानां विदारणस्य आपनं प्रापणं गिरिशृङ्गेभ्यः पातनम् अम्बुगर्तयोः रोधनं च ॥ २७॥ या इति ॥ एताः यातनाः प्रोक्ताः याश्च तामिस्रादयः पञ्चमे विस्तरेण वक्ष्यमाणा यातनाः मिथः परस्परं सङ्गेन आसक्त्या निर्मिताः पापाचारेण सम्पादितास्ता नरो वा नारी वा भुंक्ते अनुभवति ॥२८॥ न चैतदसंभावितं तादृशराजदण्डस्य वनितादिसुखस्य चात्र लोकेऽपि दृश्यमानत्वादित्याह—अत्रैवेति ॥ हे मातः स्वर्गो नरकश्चात्रैव लोके वर्तत इति प्रचक्षते विवेकिनो वदन्ति । यतः या एव यातना नारक्यो नरकसंबन्धिन्यस्ता इह लोकेऽपि कीटादावुपलक्षिताः प्रत्यक्षा एव ॥ २९ ॥ एवमिति ॥ कुटुम्बं बिभ्राणः कुटुम्बपोषणपर उदरंभरः स्वदेहपोषणमात्रपरो वा एवमुक्तप्रकारेण उभयं कुटुम्बं देहं चेहैव विसृज्य त्यक्त्वा प्रेत्य यमलोकं प्राप्य तस्य तत्पोषणार्थकृतस्य पापस्येदृशं फलं भुंक्ते ॥ ३० ॥ एक इति ॥ भूतद्रोहेण प्राणिपीडया यद् भृतं पुष्टं कृतं तदिदं स्वकलेवरं स्थूलशरीरं कुटुम्बं चेहैव हित्वा कुशलात् पुण्यादितरत् पापं तदेव पाथेयं पथि यममार्गे भोग्यं यस्य सः एकः स्वयमेव ध्वान्तं

यास्तामिस्रान्धतामिस्रा रौरवाद्याश्च यातनाः ॥ भुङ्क्ते नरो वा नारी वा मिथः सङ्गेन निर्मिताः ॥ २८ ॥ अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ॥ या यातना वै नारक्यस्ता इहाप्युपलक्षिताः ॥ २९ ॥ एवं कुटुम्बं बिभ्राण उदरंभर एव वा ॥ विसृज्येहोभयं प्रेत्य भुङ्क्ते तत्फलमीदृशम् ॥ ३० ॥ एकः प्रपद्यते ध्वान्तं हित्वेदं स्वकलेवरम् ॥ कुशलेतरपाथेयो भूतद्रोहेण यद्भृतम् ॥ ३१ ॥ दैवेनासादितं तस्य शमलं निरये पुमान् ॥ भुङ्क्ते कुटुम्बपोषस्य हृतवित्त इवातुरः ॥ ३२ ॥ केवलेन ह्यधर्मेण कुटुम्बभरणोत्सुकः ॥ याति जीवोन्धतामिस्रं चरमं तमसः पदम् ॥ ३३ ॥ अधस्तान्नरलोकस्य यावतीर्यातनादयः ॥ क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥ ३४ ॥ इति श्रीभा० तृती० कापिलेयोपाख्याने कामिनां नरकादिवर्णनं नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥

नरकं प्रतिपद्यते प्राप्नोति ॥ ३१ ॥ दैवेनेति ॥ हृतं वित्तं यस्य स आतुर इव यद्वा हृतं लोकस्य वित्तं येन स चोर इवातुरः पुमान् तस्य कुटुम्बपोषस्य शमलं पापं पापफलं दैवेन परमेश्वरेण आसादितं प्रापितं निरये नरके भुंक्ते ॥ ३२ ॥ केवलेनेति ॥ केवलेनाधर्मेण कुटुम्बभरणे उत्सुकः आसक्तो जीवस्तमसो नरकस्य चरममन्तिमं पदं स्थानमन्धतामिस्राख्यं याति ॥ ३३ ॥ अधस्तादिति ॥ नरलोकस्य मनुष्यदेहप्राप्तेरधस्तादर्वाक् यावतीर्यावत्यो यातनाः पूर्वसवर्णदीर्घ आर्षः । आदिपदेन श्वशूकरादियोनयश्च यास्ताः सर्वाः क्रमेण समनुक्रम्य संप्राप्य तत्र दुःखभोगेन पापक्षयाच्छुचिः सन्पुनरत्र नरत्वमाव्रजेत् प्राप्नोति ॥ ३४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयेऽध्याये त्रिंशत्तमे व्यधात् ॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

एकत्रिंशे तु मिश्रेण कर्मणा राजसी गतिः ॥ मानुषी वर्णते श्लोकास्तत्र सार्द्धा गजार्द्धयः ॥ उवाचेति त्रयं सार्द्धा षट्पञ्चाशदनुष्टुभः ॥ ३१ ॥ कर्मणेति ॥
पुनरत्रात्रजेदित्युक्तं तत्र जन्तुर्जीवो देहोपपत्तये देहलाभाय दैवमीश्वरस्तदेव नेत्रं नेतृप्रवर्तकं यस्य तेन कर्मणा कंचित्पुरुषं प्रविशति ततश्च तस्य रेतः कणाश्रयः रेतसः
कणमाश्रयो यस्य सः रेतोद्वारा स्त्रिया उदरं प्रविष्टो भवति ॥ १ ॥ कललमिति ॥ एकरात्रेण कललं शुक्रशोणितमिश्रं भवति पञ्चरात्रेण बुद्बुदं वर्तुलाकारं भवति द-
शाहेन च कर्कन्धूर्बदरीफलाकारं कठिनं भवति ततः परं पेशी मांसपिण्डाकारं जरायुप्रकृतिभूतं भवति । अण्डं वेति पक्ष्यादियोन्यन्तरापेक्षयोक्तम् ॥ २ ॥ मासेनेति ॥ ततो
मासेन शिरो भवति द्वाभ्यां मासाभ्यां बाह्वङ्घ्र्याद्यङ्गानां विग्रहो विभागो भवति ततस्त्रिभिर्मासैर्नखलोमास्थिचर्माणि भवन्ति पुंस्त्वादिश्च लिङ्गमिन्द्रियाच्छिद्राणि च तेषामुद्भवश्च
भवति ॥ ३ ॥ चतुर्भिरिति ॥ चतुर्भिर्मासैर्मांसादयः सप्त धातवो भवन्ति । पञ्चभिर्मासैः क्षुत्तृषोरुद्भवो भवति । षड्भिर्मासैर्जरायुणा चर्मविशेषेण वीतो वेष्टितः कुक्षौ दक्षिणे

श्रीभगवानुवाच ॥ कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये ॥ स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः ॥ १ ॥ कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बु-
दम् ॥ दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम् ॥ २ ॥ मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः ॥ नखलोमास्थिचर्माणि लिङ्ग-
च्छिद्रोद्भवस्त्रिभिः ॥ ३ ॥ चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृडुद्भवः ॥ षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ॥ ४ ॥ मातुर्जग्धान्नपाना-
द्यैरेधद्धातुरसंमते ॥ शेते विण्मूत्रयोर्गर्ते स जन्तुर्जन्तुसंभवे ॥ ५ ॥ कृमिभिः क्षतसर्वाङ्गः सौकुमार्यात् प्रतिक्षणम् ॥ मूर्छामाप्नोत्युरुक्लेशस्त-
त्रत्यैः क्षुधितैर्मुहुः ॥ ६ ॥ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः ॥ मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः ॥ ७ ॥ उल्बेन संवृतस्त-
स्मिन्नन्त्रैश्च बहिरावृतः ॥ आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥ अशक्तः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे ॥ ८ ॥

पार्श्वे भ्राम्यति दक्षिणे पुरुषमधिकृत्योक्तम् । पुंगर्भो दक्षिणे स्त्रीगर्भो वामे इति प्रसिद्धेः ॥४॥ मातुरिति ॥ मातुर्जग्धेन भक्षितेन अन्नेन पानेन आद्येन फलाद्यैश्च आप्यायनी-
नामकनाभिसंबद्धनाडीद्वारा प्राप्तैरेधन्तो वर्द्धमानाश्च धातवो यस्य एधदिति शता आर्षः । मार्कण्डेयपुराणे । “ नाडी चाप्यायनी नाम नाभ्यां तस्य निबध्यते । स्त्रीणां तथान्त्र-
सुषिरे सा निबद्धोपजायते ॥ क्रमन्ते भुक्तपीतानि स्त्रीणां गर्भोदरे तथा । तैराप्यायितदेहोऽसौ जन्तुर्वृद्धिमुपैति वै ॥ ” इति । जन्तूनां कीटादीनां संभवो यस्मिंस्तस्मिन् वि-
ण्मूत्रयोर्गर्त्ते अतः असम्मते अयोग्ये मातुदररूपे स्थाने जन्तुः शेते तिष्ठति ॥ ५ ॥ कृमिभिरिति ॥ तत्रत्यैः क्षुधितैः कृमिभिर्मुहुः पुनः पुनः क्षतानि खाद्यमानानि सर्वाण्य-
ङ्गानि यस्य सः सौकुमार्यात् कोमलत्वात् उरुः अधिकः क्लेशो यस्य सः जन्तुः प्रतिक्षणं मूर्छामाप्नोति॥६॥कट्विति द्वयम् ॥ उल्बणैर्दुःखदैर्मातृभुक्तैः कटुतीक्ष्णलवणरूक्षाम्ला-
दिभिरन्नैरुपस्पृष्टः अत एव सर्वेष्वङ्गेषूत्थिता वेदना यस्य सः उल्बेन जरायुणा संवृतः संवेष्टितः बहिश्च मातुः अन्त्रैरावृतः भुग्नं कुटलीभूतं पृष्ठं शिरोधरा ग्रीवा च यस्य सः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्जरे बद्धः शकुन्तः पक्षीव स्वाङ्गचेष्टायामप्यकल्पः असमर्थः तस्मिन् मातृकुक्षौ शिरः कृत्वा आस्ते ॥७॥८॥ तत्रेति ॥ तत्र गर्भे दैवात् पूर्वकर्मवशात् भगवदिच्छावशाद्वा लब्धा स्मृतिर्येन सः अतो जन्मशतोद्भवं बहुजन्मसंचितं कर्म स्मरन् दीर्घं बहुकालमनुच्छ्वासं यथा भवति तथा स्थितः सन् किं नाम शर्म सुखं विन्दते ॥९॥ आरभ्येति ॥ सप्तमात् मासादारभ्य लब्धबोधोऽपि संजातसुखदुःखादिज्ञानोऽपि सूतिहेतुभूतैर्वातैर्वेपित इतस्ततश्चालितः सन् विष्ठाभूः विष्ठाभवः कृमिरिव सोदरः विष्ठाकृमिभ्राता इव तत्सहोत्पन्नत्वात् एकत्र न आस्ते ॥१०॥ नाथमान इति ॥ नाथमानः भगवत्कृपा मे भूयादित्याशिषं कुर्वन् अतः शानच् ऋषिरात्मदर्शी पुनर्गर्भवासात् भीतश्च सप्त धातवो वध्रयो बन्धनभूता यस्य सः जीवः कृताञ्जलिः सन् येन भगवता उदरेऽर्पितः तं विक्लवया विह्वलया वाचा स्तुवीत गर्भे विध्यादेरसम्भवात् हेतुहेतुमतोर्लिङिति फले लिङ् । तेन यो भगवन्तं भजेत स स्तुवीतेत्यर्थः । अन्यस्तु न स्तुवीत तस्यैवाग्रे संसारो वर्ण्यते नतु भगवत्स्तोतुः शास्त्रविरोधात् कश्चिदेव पुण्यकृद्धरिं स्तौति न सर्वोऽपीति ॥११॥ तस्येति ॥

तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवम् ॥ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विन्दते ॥ ९ ॥ आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः ॥ नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः ॥१०॥ नाथमान ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः ॥ स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ॥११॥ जन्तुरुवाच ॥ तस्योपसन्नमवितुं जगदिच्छयाऽऽत्तनानातनोर्भुवि चलच्चरणारविन्दम् ॥ सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा ॥ १२ ॥ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायाम् ॥ आस्ते विशुद्धमविकारमखण्डबोधमातप्यमानहृदयेऽवसितं नमामि ॥ १३ ॥ यः पञ्चभूतरचिते रहितः शरीरे छन्नो यथेन्द्रियगुणार्थचिदात्मकोऽहम् ॥ तेनाऽविकुण्ठमहिमानमृषिं तमेनं वन्दे परं प्रकृतिपूरुषयोः पुमांसम् ॥ १४ ॥

येन भगवता असतो दुष्टस्य मे ममानुरूपा योग्या ईदृशी गर्भवासादिरूपा गतिः फलमदर्शि प्रदर्शिता उपसन्नं शरणागतमुपपन्नमिति वा पाठः । स्वेनैव निर्मितं यज्जगत् तदवितुं रक्षितुं स्वेच्छयैव आत्ता गृहीता नाना तनवः मूर्तयो येन तस्य भगवतः अकुतोभयं रामकृष्णाद्यवतारेषु भुवि चलच्चरणारविन्दं संसारतापसन्तप्तोऽहं शरणं व्रजामि ॥१२॥ य इति ॥ भूतेन्द्रियाशयमयीं देहेन्द्रियान्तःकरणाकारेण परिणतां मायां प्रकृतिमवलम्ब्यात्मत्वेन स्वीकृत्य तत्प्रयुक्तकर्मभिः पुण्यपापैरावृत आत्मा स्वरूपं यस्य स इव बद्ध इव च यः आस्ते सोहं यस्तु भगवान् अत्रैव मातुदरे आस्ते तम् आतप्यमाने हृदयेऽवसितं प्रतीतमपि विशुद्धम् अविकारम् अखण्डः अविद्यया अप्रतिबद्धः बोधो यस्य तं भगवन्तं नमामि ॥ १३ ॥ य इति ॥ पञ्चभूतरचिते शरीरे अयथा मिथ्यैव च्छन्नः न वस्तुतः यतस्तेन शरीरेण रहितः असङ्गः अत एव अयथैव इन्द्रियगुणार्थचिदात्मकः इन्द्रियाणि च गुणाः सत्वादिगुणपरिणामा देहान्तःकरणादयः अर्थाः शब्दादयः चित् चिदाभासः तदात्मकः सोऽहं तेन शरीरेणाविकुण्ठो महिमा यस्य तम् अवगु-

CC-0. In Public Domain. Digitization by eGangotri

ण्ठेति पाठे अवसन्नं गुण्ठमावरणं यस्य स महिमा यस्येत्यर्थः। तम् एनम् ऋषिमात्मदर्शिनं प्रकृतिपुरुषयोः परं नियन्तारं पुमांसमहं वन्दे ॥ १४ ॥ यदिति ॥ यस्य मायया नष्टस्मृतिः उरूणि सत्त्वादिगुणनिमित्तानि कर्माणि नितरां बन्धनानि यस्मिंस्तस्मिन् सांसारिके पथि प्रवृत्तिमार्गे अतस्तदभिश्रमेण तदुचितव्यापारव्याकुलत्वेन चरन्नयं जीवः यद्वा यन्मायया मोहितः सांसारिके पथि चरन् तदभिश्रमेण नष्टस्मृतिरयं जीवस्तस्य महतो भगवतोऽनुग्रहमन्तरेण कया युक्त्या केनोपायेन पुनः लोकं स्वरूपं प्रवृणीत जानीयात् अतस्तदेकशरणतया भजनमेव युक्तम् ॥ १५ ॥ ज्ञानमिति ॥ यदेतत् त्रैकालिकं कालत्रयसंबन्धिज्ञानं मम जातं तत्तं विना कतमो मय्यदधात् किन्तु स्थिरचरेषु स्थावरजङ्गमेषु अनुवर्तितोंशः अन्तर्यामिरूपो येन सदेव एव न्यदधात् अत एव जीवबन्धनभूतानां कर्मणां पदवीं मार्गमनुवर्तमानाः वयं कर्मानुसारेण प्राप्तं यदाध्यात्मिकादितापत्रयं तस्योपशमनाय निवृत्तये तमेव भजेम ॥ १६ ॥ देहीति ॥ हे भगवन् अन्यदेहविवरे मातुरुदरकुहरे यः असृग्विण्मूत्रकूपस्तस्मिन् पतितः अतस्तत्र जठराग्निना

यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण ॥ नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमन्तरेण ॥ १५ ॥ ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः ॥ तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम ॥१६॥ देह्यन्यदेहविवरे जठराग्निनाऽसृग्विण्मूत्रकूपपतितो भृशतप्तदेहः ॥ इच्छन्नितो विवसितुं गणयन् स्वमासान् निर्वास्यते कृपणधीर्भगवन् कदा नु ॥ १७ ॥ येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन ॥ स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनाऽञ्जलिमस्य कुर्यात् ॥ १८ ॥ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे ॥ यत्सृष्टया स तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतम् ॥ १९ ॥

भृशं तप्तो देहो यस्य सः अत एव कृपणा दीना धीर्यस्य सः इतो विवरात् विवसितुं निर्गन्तुमिच्छन्स्वमासान् गणयन्नसौ देही वर्तते स भवता कदा बहिर्निर्वास्यते निर्गमयिष्यते ॥१७॥ येनेति ॥ हे ईश भवादृशेन निरुपमेन पुरुदयेन निरतिशयदयावता येन भगवता दशमास्यः दशमासपरिमितस्तदयोग्योऽप्यसावहमीदृशीं दुर्लभां गतिं ज्ञानं पूर्वजन्मादिस्मरणं च सम्यग्ग्राहितः स दीनानां नाथः पालको भगवान्स्वेनैव कृतेनोपकारेण स्वयमेव तुष्यतु । अञ्जलिं नमस्कारं विना को नाम पुमान् अस्य तव तदुपकाररूपं प्रतिकुर्यात् प्रत्युपकारं कर्तुं शक्नुयात् । तत्प्रातिविधिं को नु कुर्यात् इति वा ॥ १८ ॥ पश्यतीति ॥ अयमपरः पश्वादिः सप्तवध्रिर्जीवः स्वेदेहे शारीरके शरीरभवे सुखदुःखे केवलं पश्यति अहं तु यत्सृष्टया धिषणया यद्दत्तेन विवेकज्ञानेन दमशरीरी इत्युपलक्षणं शमदमादियुक्तशरीरवान् आस अभवं तमेव च पुराणमनादिं सर्वकारणं पुरुषं सर्वत्र पूर्णं चैत्यमहङ्कारास्पदमिवापरोक्षतया बहिश्च हृदि च प्रतीतं पश्ये पश्यामि । तङार्षः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽहमिति ॥ हे विभो बहुभिर्दुःखैः सहवासो यथा स्यात्तथात्रैव वसन्नपि सत्वत् सम्पादितविवेकोऽहं गर्भाद्बहिर्न निर्जिगमिषे न निर्गन्तुमिच्छामि । तङ्गार्षः । तत्र हेतुमाह । यत्र गर्भाद्बहिरन्धकूपे अन्धकूपवद्विवेकतिरोधायके उपयातं प्राप्तं जनं देवस्य तव दुस्तरा माया उपसर्पति तया मोहितस्य मिथ्या मतिः देहपुत्रादावहंममाभिमानो भवति । यदनु यस्य पश्चादेतत्संसृतिचक्रं नानाविधकर्मतत्प्रयुक्तनानाविधगर्भवासदुःखानुभवादिपरम्परा भवति ॥२०॥ तस्मादिति ॥ तस्मात् बहिर्निःसरणप्रयुक्तदोषात् यथा भूयः पुनः अनेकरन्ध्रं नानागर्भवासादिरूपमेतद्व्यसनं दुःखं नवच्छिद्रस्थूलदेहलक्षणा विपत्तिर्वा मे माभविष्यत् न भविष्यति इलोप आर्षः । तथा अत्रैव स्थितो विगतविक्लवः दुःखबाहुल्ये-ऽपि धैर्यमालम्ब्याऽव्याकुलः सुहृदा आत्मना सारथिरूपया स्ववशवर्तिन्या बुद्ध्या उपसादितौ हृदयं प्रापितौ विष्णोः पादौ येन तथाभूतश्च सन्नहमाशु शीघ्रमेवात्मानं तमसः संसारदुःखादुद्धरिष्ये ॥ २१ ॥ एवमिति ॥ दशमास्यः दश मासाः परिच्छेदका यस्य स ऋषिर्जीवः एवमुक्तप्रकारेण कृता मतिर्येन तादृक् भवति ततश्च अवाचीनमवाङ्मुखं

सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरन्धकूपे ॥ यत्रोपयातमुपसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत् ॥२०॥ तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव ॥ भूयो यथा व्यसनमेतदनेकरन्ध्रं मा मे भविष्यदुपसादित-विष्णुपादः ॥ २१ ॥ कपिल उवाच ॥ एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः ॥ सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः ॥ २२ ॥ तेनावसृष्टः सहसा कृत्वाऽवाक् शिर आतुरः ॥ विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः ॥ २३ ॥ पतितो भुव्यसृङ्मूत्रे विष्ठाभू-रिव चेष्टते ॥ रोरूयति गते ज्ञाने विपरीतां गतिं गतः ॥ २४ ॥

तं प्रसूत्यै बहिर्निर्गमाय प्रसूतिहेतुर्मारुतः सद्यः तत्क्षणमेव क्षिपति प्रेरयति । यद्वा । यः दशमास्यः गर्भ एव एवं भगवन्तं स्तुवन् मोक्षे कृतमतिर्भवति स ऋषिर्मोक्षयोग्यो भवति । यस्तु अन्यः तं त्ववाचीनं प्रसूत्यै संसरणाय सूतिमारुतः सद्यः क्षिपति भगवत्स्तोता तु सूतिमारुतक्षेपं विनानायासेनैव गर्भान्निःसरतीति भावः ॥ २२ ॥ तेनेति ॥ तेन सूतिवातेन सहसा अवसृष्टः स्वस्थानात्प्रचालितः शिरः अवाक् अधः कृत्वा आतुर अवशः निरुच्छ्वासः मूर्च्छितः अत एव हता विनष्टा पूर्वोक्ता स्मृतिर्यस्य सः अति-कृच्छ्रेण विनिष्क्रामति ॥ २३ ॥ पतित इति ॥ भुवि यन्मातुरुदरादसृङ्मूत्रं पतितं तस्मिन् पतितः विष्ठाभूः कृमिरिव चेष्टते गर्भवासकालिके ज्ञाने गते विनष्टे सति तद्विपरीत गतिं गतः देहाद्यात्माभिमानं प्राप्तः सन् रोरूयतिरोरूयते भृशं रोदितीति । तङभाव आर्षः । एतेन यस्य गर्भे पूर्वोक्तं ज्ञानं जातं बाल्यपौगण्डावस्थायां तिरोहितं भवति तस्य सत्सङ्गादिभिः पुनरुदेति अन्यस्य नेति ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परच्छन्दमिति ॥ परस्य बालस्य छन्दमभिप्रायमविदुषा अजानता जनेन सः बालः पुष्यमाणः अत एवानभिप्रेतमनिष्टं क्षुधया स्तन्यार्थं रोदने उदरव्यथां परिकल्प्यौषधादिकमुदरव्यथया रोदने च क्षुधां परिकल्प्य दीयमानं स्तन्यादिकं चापन्नः प्राप्तो भवति तथापि प्रत्याख्यातुमनीश्वरः असमर्थः सन् रोरूयतीत्यनुषङ्गः ॥ २५ ॥ शायित इति ॥ जन्तुः शिशुः समासे तु जन्तवो मशकमक्षिकादयः स्वेदजाः मत्कुणादयश्च तैर्दूषिते दुःखप्रदे अशुचौ मलमूत्रादिलिप्ततया अशुद्धे पर्यङ्के शायितः शयनं कारितः अङ्गानां कण्डूयने संघर्षणे आसने उपवेशने उत्थाने चेष्टने च नेशः असमर्थः रोरूयति इत्यनुषङ्गः ॥ २६ ॥ तुदन्तीति ॥ आमा कोमला त्वग्यस्य तं विगतगर्भज्ञानं रुदन्तं तं शिशुं कृमिकं क्षुद्रं कृमिं यथा अन्ये कृपयो व्यथयन्ति तथा दंशा मशका मत्कुणादयस्तुदन्ति व्यथयन्ति ॥ २७ ॥ इतीति द्वयम् ॥ इत्येवं शैशवं पञ्चवर्षाणि तद्वत् पौगण्डं यौवनादर्वाग्भवमध्ययनादिजं च दुःखं भुक्त्वा यौवने च अज्ञानात् हेतोः न लब्धमभीप्सितं येन इद्धः प्रदीप्तो मन्युः क्रोधो यस्य सः शुचाऽर्पितः शोकेन व्याप्तः कामी

परच्छन्दं न विदुषा पुष्यमाणो जनेन सः ॥ अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः ॥ २५ ॥ शायितोऽशुचिपर्यङ्के जन्तुः स्वेदजदूषिते ॥ नेशः कण्डूयनेऽङ्गानामासनोत्थानचेष्टने ॥ २६ ॥ तुदन्त्यामत्वचं दंशा मशका मत्कुणादयः ॥ रुदन्तं विगतज्ञानं कृमयः कृमिकं यथा ॥ २७ ॥ इत्येवं शैशवं भुक्त्वा दुःखं पौगण्डमेव च ॥ अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचाऽर्पितः ॥ २८ ॥ सह देहेन मानेन वर्धमानेन मन्युना ॥ करोति विग्रहं कामी कामिष्वन्ताय चात्मनः ॥ २९ ॥ भूतैः पञ्चभिरारब्धे देहे देह्यबुधोऽसकृत् ॥ अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिम् ॥ ३० ॥ तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिम् ॥ योऽनुयाति ददत् क्लेशमविद्याकर्मबन्धनः ॥ ३१ ॥ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः ॥ आस्थितो रमते जन्तुस्तमो विशति पूर्ववत् ॥ ३२ ॥

देहेन सहैव वर्द्धमानेन मानेनाहङ्कारेण मन्युना च आत्मनोन्ताय विनाशाय कामिषु विग्रहं करोति ॥ २८ ॥ २९ ॥ भूतैरिति ॥ अबुधः असद्ग्राहः अन्यथाग्राही कुमतिश्च देही पञ्चभिर्भूतैरारब्धे देहे असकृत् मुहुः अहं ममेति मतिं करोति ॥ ३० ॥ तदर्थमिति ॥ योऽयम् अविद्यया देहाद्यात्माभिमानेन कृतं यत्कर्म तेन बद्ध्यते विरच्यते तादृशः देहः क्लेशं जन्ममरणजराव्याध्यादिदशायां दुःखमेव ददत् अनुयाति अनुवर्त्तते पुनः पुनरायाति वा तदर्थमेव देहार्थमेव जन्तुः कर्म कुरुते । येन कर्मणा बद्धः सन् स्वयं संसृतिं श्वसूकरादिनानायोनिं याति । यो देहः क्लेशं ददाति तमेव पापकर्मणापि पुष्यतीति मौढ्यम् ॥ ३१ ॥ यदीति ॥ यदि जन्तुर्जीवः शिश्नोदरार्थे कृत उद्यमः प्रयत्नो यैस्तैः असद्भिर्जुष्टे पथि मार्गे आस्थितः संस्तैः पुनः रमते । यद्वा । यद्यसद्भिः आस्थितः अधिष्ठितः सन् तेषां पथि रमते । यद्वा । पथि सन्मार्गे स्थितोऽपि यदि असद्भिः सह रमते तदा पुनः पूर्ववत् यातनादेह आवृत्त्येत्याद्युक्तप्रकारेण तमो नरकं विशति । अत्र व्यतिरेकेण यदि सद्भिर्हरिसेवाकृद्भिः सह रमते तदा हरिं प्राप्नोतीति लभ्यते॥ ३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यामीति द्वयम् ॥ येषां सङ्गात् सत्यशौचाद्याः भगान्ताः क्षयं यान्ति तेषु अशान्तेषु विषयवैतृष्ण्यरहितेषु अत एव मूढेषु विषयासक्तेषु अत एव खण्डितात्मसु देहात्मबुद्धिषु कामक्रोधादिभिर्विक्षिप्तचित्तेषु वा खण्डित आत्मा यैस्तेष्वात्मघातिष्विति वा योषितां क्रीडामृगवत् वानरवदधीनेषु अतो नरकादिदुःखावश्यकत्वात्साधुभिः शोच्येषु असाधुषु दुराचारेषु सङ्गं न कुर्यात् ॥ ३३ ॥ ३४ ॥ नेति ॥ अस्य पुंसो यथा योषितां सङ्गात् यथा च तासां योषितां सङ्गिनां सङ्गतो मोहो विषयासक्तिः तदुपयुक्तकर्मभिर्बन्धश्च भवेत्तथान्यस्यासतः प्रसङ्गतो मोहादिर्न भवेत् ॥ ३५ ॥ न च विवेकिनां धियं भ्रंशयितुं योषिन्न शक्नोतीति वाच्यमित्याह–प्रजापतिरिति ॥ प्रजापतिर्ब्रह्मा स्वां दुहितरं सरस्वतीं दृष्ट्वा तस्याः रूपेण सौन्दर्येण धर्षितः मोहितः तदा तद्गुरभिप्रायमालक्ष्य रोहिद्भूतां मृगीरूपेण पलायमानां सोऽपि ऋक्षरूपी सन् हतत्रपः गतलज्जो मरीच्यादीनां पश्यतामेवान्वधावत् ॥ ३६ ॥ तत्सृष्टेति ॥ यद्येवं तर्हि तेन ब्रह्मणा सृष्टाः मरीच्यादयस्तैः सृष्टाः कश्यपादयस्तैः सृष्टा ये देवमनुष्यादयस्तेषु मध्ये इह संसारे

सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा ॥ शमो दमो भगश्चेति यत्सङ्गाद्याति संक्षयम् ॥ ३३ ॥ तेष्वशान्तेषु मूढेषु खण्डितात्मस्वऽसाधुषु ॥ सङ्गं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥३४॥ न तथाऽस्य भवेन्मोहो बन्धश्चान्यप्रसङ्गतः ॥ योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥ ३५ ॥ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः ॥ रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ॥ ३६ ॥ तत्सृष्टसृष्टसृष्टेषु कोन्वऽखण्डितधीः पुमान् ॥ ऋषिं नारायणमृते योषिन्मय्येह मायया ॥ ३७ ॥ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् ॥ या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलम् ॥ ३८ ॥ सङ्गं न कुर्यात् प्रमदासु जातु योगस्य पारं परमारुरुक्षुः ॥ सत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य ॥ ३९ ॥ योपयाति शनैर्माया योषिद्देवविनिर्मिता ॥ तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतम् ॥ ४० ॥

नारायणमृषिमृते विना यद्वा नारायणं विना वर्त्तमानेषु नारायणमनुपासीनेष्वित्यर्थः । ततोऽन्यो योषिन्मय्या मायया न खण्डिता न मोहिता धीर्यस्य तथाभूतः पुमान् को नु न कोऽपीत्यर्थः ॥ ३७ ॥ बलमिति ॥ स्त्रीमय्या स्त्रीरूपायाः मे मम मायाया बलं मोहकत्वरूपं सामर्थ्यं पश्य । या स्त्री केवलं भ्रुवोर्विजृम्भेण विक्षेपेण दिशां जयिनः शूरानपि पदाक्रान्तान् स्वाधीनान् करोति । यद्वा । शूरानपि भ्रूविजृम्भमात्रेण पदाक्रान्तान् करोतीति केवलं निर्णीतम् । " निर्णीतं केवलम् " इत्यमरः ॥ ३८ ॥ सङ्गमिति ॥ अतः सत्सेवया सत्सङ्गेन प्रतिलब्धः आत्मरूपो लाभो येन सः आत्मभावः आत्मबोध इति चापि पाठद्वयम् । अत एव योगस्य परं पारं परमफलमारुरुक्षुः प्राप्तुमिच्छुः जनः जातु कदाचिदपि प्रमदासु स्त्रीषु सङ्गमासक्तिं न कुर्यात् । याः प्रमदा अस्य मुमुक्षोर्निरयस्य द्वारं वदन्ति तत्सङ्गान्नरके पतति ॥ ३९ ॥ या इति ॥ या देवेन भगवता निर्मिता योषिद्रूपा माया शनैः शुश्रूषादिव्याजेन उपयाति समीपमायाति तां योषितं तृणैरावृतं कूपमिव निपातहेतुम् आत्मनो मृत्युमनर्थकरीमीक्षेत ॥ ४० ॥

CC-0. In Public Domain. Digitization by eGangotri

मुमुक्षुस्त्रिया पुरुषप्रसङ्गो न कार्य इत्याह—यामिति ॥ पूर्वजन्मनि स्वयं पुमान् स्त्रीसङ्गतोऽन्तकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ऋषभायतीम् ऋषभायमाणां पुरुषवदाचरन्तीं शता आर्षः । यां मम मायां मोहाद्वित्तापत्यगृहप्रदं पतिं मन्यते ॥ ४१ ॥ तामिति ॥ तां मम मायां पत्यपत्यगृहात्मकं यथा मृगयोर्व्याधस्य गायनमनुकूलत्वेन प्रतीयमानमपि मृगस्य मृत्युः तथा दैवेन स्वप्रारब्धेनोपसादितं प्रापितमात्मनो मृत्युमेव विजानीयात् ॥ ४२ ॥ ननु व्यापकस्य नित्यस्याविकारिणः कथं पूर्वोक्ता संसृतिः लोकान्तरगमनं जन्ममरणं च भोगेन कर्मक्षये सति पुनः कुतः कर्मसम्भव इत्याशङ्क्याह—देहेनेति ॥ जीवभूतेन जीवोपाधिभूतेन लिङ्गदेहेन पुमान् जीवो लोकाल्लोकं देहाद्देहान्तरं चानुव्रजन् प्रारब्धकर्मफलं भुञ्जानोऽविरतं निरन्तरं देहान्तरप्राप्तिहेतुभूतानि कर्माणि करोत्येव एतेन कर्मणामसमाप्तिरुक्ता ॥ ४३ ॥ जीव इति ॥ जीवो जीवस्योपाधिर्लिङ्गदेहः तथा अस्यात्मनः अनुगतोऽनुवर्ती स च भूतेन्द्रियमनोमयः स्थूलभूतविकारो देहो भोगायतनं तस्योभयविधस्य देहस्य निरोधः कार्यायोग्यताऽस्य जीवस्य मरणमुच्यते तच्च स्थूलदेहविगमे स्थूलान्तरप्राक्काले भवेत् । सुषुप्त्यादौ तु स्वकार्याकारित्वेऽपि कार्यं प्रतियोग्यताऽस्त्येव । सुषुप्तिभङ्गे सद्य एव तद्योग्यतादर्शनात् स्थूलदेहस्याविर्भावस्त्वस्य

यां मन्यते पतिं मोहान्मन्मायामृषभायतीम् ॥ स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदम् ॥ ४१ ॥ तामात्मनो विजानीयात् पत्यपत्यगृहात्मकम् ॥ दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ॥ ४२ ॥ देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् ॥ भुञ्जान एव कर्माणि करोत्यविरतं पुमान् ॥ ४३ ॥ जीवस्यानुगतो देहो भूतेन्द्रियमनोमयः ॥ तन्निरोधस्तु मरणमाविर्भावस्तु संभवः ॥ ४४ ॥ द्रव्योपलब्धिस्थानस्य द्रव्येक्षाऽयोग्यता यदा ॥ तत्पञ्चत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनम् ॥ ४५ ॥ यथाऽक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा ॥ तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यताऽनयोः ॥ ४६ ॥

संभवो जन्म उच्यते स च भोगायतनदेहविगमे स्थूलान्तरप्राप्तौ गर्भान्निष्क्रमणसमये भवेत् ॥ ४४ ॥ द्रव्येति ॥ अत्र स्वामिपादानां मते द्रव्येत्येकमेव पद्यं दृष्टान्तभूतम् । तत्रार्थः द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेर्द्रव्येक्षायां रूपादिदर्शने काचादिदोषेण यदाऽयोग्यता भवति तदैव चक्षुरिन्द्रियस्याप्ययोग्यता । अनयोः स्थानचक्षुषोर्यदा अयोग्यता तदा एव द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता । एवं स्थूलदेहवैकल्ये लिङ्गस्य वैकल्यं तदेव जीवस्य मरणं न स्वत इत्यर्थः । एतावानेव पाठः सम्यग्भाति । यदि तु एतत्पद्यार्द्धादग्रे श्लोकमेकं पठित्वा एतदुत्तरार्द्धं पठ्यते तदा श्लोकद्वयस्येयं व्याख्या । मृत्युजन्मनोर्लक्षणं पुनः स्पष्टमाह । द्रव्येति । द्रव्याणां पृथिव्यादीनां सर्ववस्तूनामुपलब्धिस्थानस्य स्थूलदेहस्य नाशे द्रव्येक्षायां वस्तुसाक्षात्कारे यदा यत् अयोग्यता तदेव पञ्चत्वं स्थूलदेहनाशे सूक्ष्मदेहस्यापि द्रव्योपलब्ध्ययोग्यता तदेव जीवस्य मरणं न स्वत इत्यर्थः । यदा तु पुनराविर्भूतेन स्थूलदेहेन द्रव्याणां दर्शनं भवति तदा तत्राहंमानात् अयमेवाहमित्यात्माभिमानादुत्पत्तिर्जन्मेत्युच्यते । अत्र दृष्टान्तः । यथा अक्ष्णो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोलकयोर्यदा काचकामलादिदोषेण द्रव्यावयवस्य रूपादेर्दर्शने अयोग्यता भवति तदैव चक्षुष इन्द्रियस्यापि तद्दर्शने अयोग्यता भवति । यदा चानयोर्गोलकेन्द्रिययोरयोग्यता भवति तदैव द्रष्टुर्जीवस्यापि द्रष्टृत्वायोग्यता भवति। एवं स्थूलदेहवैकल्ये लिङ्गदेहस्यायोग्यता तयोर्देहयोरयोग्यत्वे जीवस्याप्ययोग्यत्वेन मरणव्यवहारो न तु वस्तुतस्तद्विनाशः ॥ ४५ ॥ ४६ ॥ तस्मादिति ॥ यस्मान्न वस्तुतो जीवस्य जन्ममरणादि तस्मात् मरणात्संत्रासो न कार्यः । जीवने च कार्पण्यं दैन्यं न कार्यं जीवनप्रयत्ने च संभ्रम आसक्तिर्न कार्यः । जीवस्य गतिम् अच्छेद्यादाह्यादितत्त्वं बुध्वा धीरो देहादौ मुक्तसङ्गः आसक्तिरहितश्च सन्निह संसारे चरेत् ॥ ४७ ॥ सम्यगिति ॥ मायाविरचिते लोके सम्यक् याथात्म्यस्य दर्शनं यस्यास्तया योगवैराग्याभ्यां युक्तया बुद्ध्या कलेवरं विन्यस्य इदमपि प्राकृतं नश्वरं मत्तो भिन्नमिति बुद्ध्या तदभिमानं त्यक्त्वा चरेत् ॥ ४८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीय एकत्रिंशे व्यधादिमाम् ॥ ३१ ॥ द्वात्रिंशे सात्विकैर्धर्मैरङ्गस्योर्ध्वगतिर्मता ॥ पुनरागमनं चैव तत्र श्लोकास्त्रि-

तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः॥ बुध्वा जीवगतिं धीरो मुक्तसङ्गश्चरेदिह ॥ ४७॥ सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया॥ मायाविरचिते लोके चरेन्न्यस्य कलेवरम् ॥ ४८ ॥ इति श्रीभागवते तृतीयस्कन्धे कापिलेयोपाख्याने पुण्यपापैर्जीवगतिवर्णनं नाम एकत्रिंशत्तमोऽध्यायः॥ ३१ ॥ कपिल उवाच ॥ ॥ अथ यो गृहमेधीयान् धर्मानेवावसन् गृहे ॥ काममर्थं च धर्मान् स्वान् दोग्धि भूयः पिपर्ति तान् ॥ १ ॥ स चापि भगवद्धर्मात् काममूढः पराङ्मुखः ॥ यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयाऽन्वितः ॥ २ ॥ तच्छ्रद्धयाऽऽक्रान्तमतिः पितृदेवव्रतः पुमान् ॥ गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥ ३ ॥ यदा चाहीन्द्रशय्यायां शेतेऽनन्तासनो हरिः ॥ तदा लोका लयं यान्ति त एते गृहमेधिनाम् ॥ ४ ॥

सिन्धवः ॥ अनुष्टुभश्चतुर्वेदाः सार्द्धा एकमुवाच च ॥ ३२ ॥ अथेति द्वयम् ॥ यो गृह एवावसन् गृहमेधो गृहाश्रमस्तदीयानेव धर्मानाचरन् तान् धर्ममर्थं च कामं च दोग्धि तत्फलमिच्छति ततः भूय एव तान् धर्मादीन् पिपर्ति पूरयति अनुतिष्ठति । यथा गाश्चारयित्वा दुग्धानि दोग्धि पुनर्दुग्धप्रत्याशया ताश्चारयति स चापि कामैर्मूढः भगवद्धर्मात्पराङ्मुखो विमुखः सन् श्रद्धयान्वितः क्रतुभिर्यज्ञैर्देवान् श्राद्धैः पितॄंश्च यजते पूजयति ॥ १ ॥ २ ॥ तदिति ॥ तेषु पितृदेवेषु या श्रद्धा तया आक्रान्ता मतिर्यस्य सः पितृदेवार्चन एव व्रतं यस्य सः स पुमान् सोमपाः सन् तत्र सोमममृतं पीत्वा पुनरिमं लोकमेष्यति आगमिष्यति ॥ ३ ॥ यदेति ॥ यदा च कल्पान्ते अनन्तः शेष आसनं यस्य सः हरिः अतः सः अहीन्द्र एव शय्या तस्यां शेते तदा ये एते गृहमेधिनां गृहस्थानां प्राप्याः भूर्भुवःस्वरात्मकाः लोकास्ते लयं विनाशं यान्ति ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये इति त्रयम् ॥ ये तु धीरा जितेन्द्रिया निःसङ्गाः भगवति न्यस्तानि कर्माणि यैः प्रशान्ताः क्रोधादिरहिताः शुद्धचेतसः निवृत्तिधर्मनिरताः निर्ममाः निरहङ्कृताः ये कामार्थयोः हेतवे प्रयोजनाय स्ववर्णाश्रमोचितत्वेनानुष्ठितान् धर्मान्न दुह्यन्ति न दुहन्ति धर्मफलरूपकामान्नेच्छन्ति श्यन् आर्षः । ते स्वधर्माख्येन सत्त्वेन निमित्तेन तत्त्वेनेति पाठेऽप्ययमेवार्थः । परिशुद्धं यत्तेन चेतसा हेतुना सूर्यद्वारेण विश्वतोमुखं सर्वतो व्याप्तं परे ब्रह्मादयः अवरेऽस्मदादयस्तेषामीशम् अस्य विश्वस्य प्रकृतिमुपादानकारणम् उत्पत्त्यन्तभावनं निमित्तकारणं च पुरुषं यान्ति ॥ ५ ॥ ६ ॥ ७ ॥ परमेश्वरत्वेन हिरण्यगर्भोपासकानामपि क्रमेण मुक्तिरित्याह—द्विपरार्द्धेति ॥ द्विपरार्द्धस्य हिरण्यगर्भायुःकालस्यावसाने अन्ते यो ब्रह्मणो हिरण्यगर्भस्य यः प्रलयः भगवति लयस्तावत्पर्यन्तं ये परस्य हिरण्यगर्भस्य पराचिन्तकाः परमेश्वरत्वेनोपासकास्ते तु ब्रह्मलोकमध्यासते सत्यलोके तिष्ठन्ति ॥ ८ ॥ क्ष्माम्भ इति द्वयम् ॥ पराख्यं द्विपरार्द्धलक्षणं कालमनुभूय तावत्कालं स्वाधिकारं निर्वाह्य क्ष्मादीनि पञ्चमहाभूतानि मनश्चेन्द्रियाणि चार्थाश्च शब्दादयः

ये स्वधर्मान्न दुह्यन्ति धीराः कामार्थहेतवे ॥ निःसङ्गा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ॥ ५ ॥ निवृत्तिधर्मनिरता निर्ममा निरहंकृताः ॥ स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ॥ ६ ॥ सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखम् ॥ परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् ॥ ७ ॥ द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते ॥ यावदध्यासते लोकं परस्य परचिन्तकाः ॥८॥ क्ष्माऽम्भोऽनलाऽनिलवियन्मनइन्द्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः ॥ अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयंभूः ॥ ९ ॥ एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः ॥ तेनैव साकममृतं पुरुषं पुराणं ब्रह्मप्रधानमुपयान्त्यगताभिमानाः ॥ १० ॥ अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयम् ॥ श्रुतानुभावं शरणं व्रज भावेन भामिनि ॥ ११ ॥

भूतादिश्चाहङ्कारः एवमादिभिः परिवृतं संयुक्तं ब्रह्माण्डं प्रतिसंजिहीर्षुः संहर्तुमिच्छुः सन् यर्हि गुणत्रयात्मा गुणत्रयात्मकप्रपञ्चाभिमानी परः इन्द्रादिभ्यः उत्कृष्टः स्वयंभूः हिरण्यगर्भः अव्याकृतं सर्वविकारशून्यं परमेश्वरं विशति मुक्तो भवति ॥ ९ ॥ तदा एवं हिरण्यगर्भोपासनया परेत्य दूरं गत्वा भगवन्तं हिरण्यगर्भमनुप्रविष्टा जितो वशीकृतो मरुत् प्राणो मनश्च यैस्ते विरागा ये योगिनः तेऽपि अमृतं परमानन्दरूपं पुराणं पुरुषं प्रधानमुत्कृष्टं ब्रह्म तेन ब्रह्मणा साकमेव उपयान्ति नतु पूर्वं यतस्तदा अगताभिमानाः तथा च स्मृतिः । " ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ " इति ॥ १० ॥ भगवदुपासकास्तु साक्षादेव तं प्राप्नुवन्तीत्यतस्तं भजेत्याह—अथेति ॥ अथ तस्मात् हे भामिनि मातः सर्वभूतानां हृत्पद्मेषु कृत आलयः निवासस्थानं येन तं सर्वान्तरात्मानं मत्तः श्रुतोऽनुभावो यस्य तं भगवन्तं भावेन परमप्रेम्णा शरणं व्रज ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवद्भक्ताः साक्षाद् भगवन्तं प्राप्नुवन्ति हिरण्यगर्भोपासकास्तु क्रमेणेत्युक्तं भेदेनोपासने तु ब्रह्मादयोऽप्यावर्त्तन्ते इत्याह—आद्य इति त्रयम् ॥ यः स्थिरचराणामाद्यः स्रष्टा वेदा गर्भे यस्य स ज्ञानाधिको ब्रह्मा स निःसङ्गेन निष्कामेण कर्मणा युक्तोऽपि भेददृष्ट्या देहाद्यात्माभिमानेन च दोषेण सगुणं ब्रह्मज्ञानैश्वर्यादिपूर्णं पुरुषर्षभं पुरुषोत्तमं पुरुषं श्रीनारायणं संसृत्य प्रलये तदेकीभूयापि पुनः सृष्टिकाले ईश्वरमूर्तिना कालेन गुणानां सत्त्वादीनां व्यतिकरे परिणामे जाते सति कर्तृत्वात् जगतः करणेऽधिकृतत्वात् यथा पूर्वं पूर्वकल्पवत् ऋषिभिर्मरीच्यादिभिः योगेश्वरैः सनत्कुमाराद्यैर्योगप्रवर्त्तकैर्योगसिद्धैरन्यैश्च सह प्रजायते न केवलं स एव ॥ १२ ॥ १३ ॥ १४ ॥ ऐश्वर्यमिति ॥ ये तु कर्मिणो ब्रह्मलोकं गतास्तेऽपि स्वधर्मविनिर्मितं तत्फलभूतं पारमेष्ठ्यं परमेष्ठिना संपादितमैश्वर्यं निषेव्य सुखं भुक्त्वा गुणव्यतिकरे सति भोगेन पुण्यात्मकसत्त्वगुणक्षये सति पुरुषं प्राप्य यथा पूर्वं स्वस्वाधिकारेण पुनरायान्ति । " आब्रह्मभुवनाँल्लोकाः पुनरावर्तिनः " इति वाक्यात् ॥ १५ ॥ ये त्विति त्रिकम् ॥ इह संसारे ये तु कर्मस्वासक्तमनसः

आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः ॥ योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥ १२ ॥ भेददृष्ट्याभिमानेन निःसङ्गेनापि कर्मणा ॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभः ॥ १३ ॥ स संसृत्य पुनः काले कालेनेश्वरमूर्तिना ॥ जाते गुणव्यतिकरे यथापूर्वं प्रजायते ॥ १४ ॥ ऐश्वर्यं पारमेष्ठ्यं च तेऽपि धर्मविनिर्मितम् ॥ निषेव्य पुनरायान्ति गुणव्यतिकरे सति ॥ १५ ॥ ये त्विहासक्तमनसः कर्मसु श्रद्धयाऽन्विताः ॥ कुर्वन्त्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः ॥ १६ ॥ रजसा कुण्ठमनसः कामात्मानोऽजितेन्द्रियाः ॥ पितॄन्यजन्त्यनुदिनं गृहेष्वभिरताशयाः ॥ १७ ॥ त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः ॥ कथायां कथनीयोरुविक्रमस्य मधुद्विषः ॥ १८ ॥ नूनं दैवेन विहता ये चाच्युतकथासुधाम् ॥ हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव विड्भुजः ॥ १९ ॥ दक्षिणेन पथाऽर्यम्णः पितृलोकं व्रजन्ति ते ॥ प्रजामनुप्रजायन्ते श्मशानान्तक्रियाकृतः ॥ २० ॥

रजसा गुणेन कुण्ठं कुण्ठितं विक्षिप्तं मनो येषां कामेषु आत्मा मनो येषां ते अजितेन्द्रियाः गृहेषु अभिरतः आशयो येषां ते ये श्रद्धया अन्विताः सन्तः अप्रतिषिद्धानि तत्तत्फलसाधकानि तथा नित्यान्यपि सन्ध्योपासनादीनि च कृत्स्नशः सर्वाणि कर्माणि कुर्वन्ति तथानुदिनं पितॄन् यजन्ति ते पुरुषाः त्रैवर्गिकाः त्रिवर्गमात्रनिष्ठाः अत एव हरिः संसारदुःखहर्त्री मेधा यस्य तस्य कथनीया उरवो विक्रमा यस्य तस्य मधुद्विषो हरेः कथायां विमुखाः भवन्ति ॥ १६ ॥ १७ ॥ ॥ १८ ॥ नूनमिति ॥ ये च अच्युतस्य कथासुधां हित्वा त्यक्त्वा विड्भुजः शूकराः पुरीषमिव असद्गाथाः कुकथाः शृण्वन्ति ते नूनं निश्चितं दैवेन स्वप्रारब्धेन विहताः नाशिताः ॥ १९ ॥ दक्षिणेनेति ॥ गर्भाधानमारभ्य श्मशानान्ताः क्रियाः कुर्वन्ति तादृशाः ते श्लोकचतुष्के कथिताः जनाः भगवन्तं न प्राप्नुवन्ति किं तु " धूमो रात्रिस्तथा

CC-0. In Public Domain. Digitization by eGangotri

कृष्णः" इत्युक्तेन दक्षिणेन पथा मार्गेण अर्यम्णः पितृराजस्य संबन्धिनं पितृलोकं व्रजन्ति। पितृलोकात् पुनः प्रजामनु स्वपुत्रादिषु प्रजायन्ते च ॥ २० ॥ ततः कथं प्रजायन्त इत्यपेक्ष्याह—तत इति ॥ हे सति ततः पितृलोकं प्राप्यानन्तरं तत्र भोगेन क्षीणं सुकृतं येषाम् अतो देवैस्तदधिष्ठातृभिः सद्यो विभ्रंशित उदयो भोगो येषां ते विवशाः सन्तः ततो लोकात् पुनरिमं लोकं प्रति पतन्ति ततः प्रजामनुप्रजायन्त इति भावः ॥२१॥ तस्मादिति ॥ तस्मात् त्वं सर्वभावेन परमप्रेम्णा तस्य गुणा भक्तवात्सल्यादयः एवाश्रयो विषयो यस्याः तया भक्त्यैव भजनीयं पदाम्बुजं यस्य तं परमेष्ठिनं परमेश्वरं भजस्व ॥ २२ ॥ वासुदेव इति ॥ वासुदेवे सर्वान्तर्यामिणि भगवति प्रयोजितः निरन्तरमनुष्ठितो भक्तियोगो ब्रह्म दृश्यते येन तथाभूतं यज्ज्ञानं तत् वैराग्यं सर्वत्र वैतृष्ण्यं चाशु शीघ्रमेव जनयति ॥२३॥ यदेति द्वयम् ॥ उतेत्यवधारणे। यदा अस्य भक्तस्य चित्तं भगवद्गुणानुरागेण तस्मिन्नेव निश्चलतया विशुद्धं सदिन्द्रियवृत्तिभिः समेष्वर्थेषु शब्दादिविषयेषु इदं प्रियमिदमप्रियमिति वैषम्यं नैव गृह्णाति । स तदैव आत्मना विशुद्धचित्तेन

ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति ॥ पतन्ति विवशा देवैः सद्यो विभ्रंशितोदयाः ॥ २१ ॥ तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनम् ॥ तद्गुणाश्रयया भक्त्या भजनीयपदाम्बुजम्॥२२॥ वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यद् ब्रह्मदर्शनम् ॥ २३ ॥ यदाऽस्य चित्तमर्थेषु समेष्विन्द्रियवृत्तिभिः ॥ न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत ॥२४॥ स तदैवाऽऽत्मनात्मानं निःसङ्गं समदर्शनम् ॥ हेयोपादेयरहितमारूढं पदमीक्षते ॥ २५ ॥ ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् ॥ दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥ २६ ॥ एतावानेव योगेन समग्रेणेह योगिनः ॥ युज्यतेऽभिमतो ह्यर्थो यदसङ्गस्तु कृत्स्नशः ॥ २७ ॥ ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ॥ अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा ॥ २८ ॥

निस्सङ्गं प्रत्यध्यासरहितं तत्र हेतुः समं च तद्दर्शनं प्रकाशरूपं च तम् अत एव हेयोपादेयविभागरहितम् आरूढं पदं स्वरूपभूतं परमात्मनैकीभूतमात्मानमीक्षते ॥ २४ ॥ ॥२५॥ समेष्वर्थेष्वित्युक्तं तदेव साम्यं दर्शयति—ज्ञानमात्रमिति ॥ ज्ञानमात्रमेक एव पदार्थः। उपनिषत्सु परं ब्रह्म योगशास्त्रे परमात्मा ईश्वरः सांख्ये पुमान् भक्तिशास्त्रे भगवानिति प्रसिद्धः ज्ञानमात्रत्वेन समेष्वर्थेषु दृश्यादिभिः दृश्यद्रष्टृकरणैः पृथग्भावैः ईयते प्रतीयते ॥ २६ ॥ ननु ज्ञानमात्ररूपं नित्यप्राप्तमेवेति किं साधनैराप्यते तत्राह—एतावानिति ॥ यत् यस्तु कृत्स्नशः साकल्येन सर्वत्रासङ्गः अनासक्तिः स एतावानेव योगिनः साधननिष्ठस्य समग्रेण योगेन साधनेन अभिमतः शास्त्रसम्मतोऽर्थः फलं युज्यते प्राप्यत इति प्रपञ्चसङ्गव्युदास एव योगफलमित्यर्थः ॥ २७ ॥ ज्ञानमिति ॥ पराचीनैः पराङ्मुखैरिन्द्रियैः शब्दादिधर्मिणाशब्दादिर्धर्मोऽस्ति यस्य तेन अर्थरूपेण घटपटादिरूपेण भ्रान्त्या एकं ज्ञानरूपं निर्गुणं ब्रह्मैवावभाति न त्वर्थः पृथगस्ति। प्रतीतिस्तु भ्रान्तिरेव तत्र भेददर्शनपूर्वकाहंममासक्तिर्बन्धनम् अतस्तन्निरासे यत्नो मुमुक्षुणा विधेय एव ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थरूपत्वमुदाहृत्य दर्शयति—यथेति ॥ यथा महान् महत्तत्वमेव अहंरूपः अहङ्काररूपः स च त्रिवृत् त्रिगुणात्मकः पुनश्चाकाशादिमहाभूतरूपेण पञ्चविधः मनइन्द्रियरूपेणै-कादशविधश्च स्वराट् समष्टिपुरुषः तस्येदं ब्रह्माण्डं वपुः । यतः समष्टिरूपात्सर्वमपि जगद्व्यष्टिरूपं भवति एवं च यथा महदादिरूपेण ब्रह्मैवावभाति तथा एकमेव ज्ञानमवभाति ॥ २९ ॥ एतदिति ॥ श्रद्धया भक्त्या विरक्त्या नित्यशः योगाभ्यासेन च समाहितात्मा अत एव निःसङ्गः पुरुष एतत्सर्वं ब्रह्मात्मकं परिपश्यति ॥ ३० ॥ इतीति ॥ हे गुर्वि मातः इत्युक्तरीत्या येन प्रकृतेः पुरुषस्य च तत्त्वं याथार्थ्यमनुबुध्यते तदेतद् ब्रह्मदर्शनं ज्ञानं कथितम् ॥ ३१ ॥ अनेनापि भक्तियोगेनेव भगवानेव प्राप्य इत्याह—ज्ञानयोग इति ॥ नैर्गुण्यो निर्गुणविषयो मन्निष्ठो ज्ञानयोगो भक्तिलक्षणो योगश्च तयोर्द्वयोरपि भगवच्छब्दो लक्षणं ज्ञापको वाचको यस्य सः एक एवार्थः फलम् ॥ ३२ ॥ ननु ज्ञानयोगस्यात्मलाभः फलं भक्तियोगस्य भजनीयेश्वरप्राप्तिरिति कुत एक एवार्थ इत्यत आह—यथेति ॥ यथा बहूनां रूपरसादिगुणानामाश्रयो गुडक्षीरादिरेक एव पदार्थः

यथा महानहंरूपस्त्रिवृत्पञ्चविधः स्वराट् ॥ एकादशविधस्तस्य वपुरण्डं जगद्यतः ॥ २९ ॥ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः ॥
समाहितात्मा निःसङ्गो विरक्त्या परिपश्यति ॥ ३० ॥ इत्येतत् कथितं गुर्वि ज्ञानं तद् ब्रह्मदर्शनम् ॥ येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च
॥ ३१ ॥ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ॥ द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥ ३२ ॥ यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः ॥
एको नानेयते तद्वद्भगवाञ्छास्त्रवर्त्मभिः ॥३३॥ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः ॥ आत्मेन्द्रियजयेनापि संन्यासेन च कर्मणाम् ॥३४॥
योगेन विविधाङ्गेन भक्तियोगेन चैव हि ॥ धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ॥ ३५ ॥

पृथग्द्वारैर्मार्गभेदप्रवृत्तैरिन्द्रियैर्नाना प्रतीयते चक्षुषा शुक्ल इति रसनेन मधुर इति घ्राणेन सुगन्धिरिति स्पर्शनेन शीत इति तद्वदेकोऽपि भगवान् शास्त्रवर्त्मभिर्नाना प्रतीयते ज्ञानमार्गे निर्गुण इति भक्त्यादिमार्गे सगुण इति ॥ ३३ ॥ शास्त्रवर्त्माणि प्रपञ्चयति—क्रिययेति ॥ अत्र क्रियादित्रयं गृहस्थस्येत्यादिकमाश्रमेषु यथोचितं योज्यम् । क्रियया पूर्तरूपया क्रतुभिर्यज्ञैः दानैः तपःकृच्छ्रादि स्वाध्यायः वेदाध्ययनं मर्शनं वेदविचारस्तैः आत्मनो मनस इन्द्रियाणां च जयेन निषिद्धवर्जनेन शमदमात्मकेन कर्मणां संन्यासेन भगवति समर्पणेनेति भगवानेवेयते ॥ ३४ ॥ योगेनेति ॥ विविधाङ्गेन योगेन भक्तियोगेन चेत्येवं सर्वत्र भक्तियोगमिश्रणं तं विना सर्वस्य व्यर्थत्वात् । एवहिशब्दाभ्यां भक्तियोगः केवलोऽपि क्रियादिसाध्यं वस्तु प्रापयतीति उभयचिह्नेन सकामनिष्कामलक्षणेन धर्मेण तमेवाह—य इति । यो धर्मः प्रवृत्तिनिवृत्तिमानिति तत्र सकामधर्मप्राप्यं स्वर्गाद्यपि भगवत एव सगुणरूपमिति भावः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मेति ॥ आत्मनस्तत्वस्य याथात्म्यस्यावबोधेन दृढेन स्थिरेण वैराग्येण च एभिः क्रियादिसाधनजातैः सगुणः कल्याणगुणपूर्णः निर्गुणश्च स्वदृक् स्वप्रकाशो भगवानेव यथाधिकारमीयते प्राप्यते ॥ ३६ ॥ प्रावोचमिति ॥ त्रिधा सगुणा एका निर्गुणा इति भेदेन चतुर्विधं भक्तियोगस्य स्वरूपं ते तुभ्यं प्रावोचमुक्तवानस्मि । तथा यो जन्तुषु प्राणिष्वन्तः प्रविश्य धावति उत्पत्तिनिधनादि करोति अत एवाव्यक्ता गतिश्चेष्टा यस्य तस्य कालस्य च रूपं ते प्रावोचम् ॥३७॥ जीवस्येति ॥ अङ्ग हे मातः यासु संसृतिषु प्रविशन् आत्मा जीवः आत्मनो गतिं स्वरूपं न वेद ताः अविद्यया यानि कृतानि कर्माणि तैर्निर्मिताः प्राप्ताः बह्वीर्देवमनुष्यनरकादिरूपा जीवस्य संसृतीश्च प्रावोचमित्य-नुषङ्गः ॥ ३८ ॥ नेति ॥ एतत् खलाय शाठ्येन पृच्छकाय न उपादिशेत् अविनीताय अनम्राय न च स्तब्धाय गर्विताय नापि च भिन्नाय दुराचाराय मतान्तरेण भेदं

आत्मतत्त्वावबोधेन वैराग्येण दृढेन च ॥ ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ॥ ३६ ॥ प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधम् ॥ कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जन्तुषु ॥ ३७ ॥ जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः ॥ यास्वङ्ग प्रविशन्नात्मा न वेद गतिमात्मनः ॥ ३८ ॥ नैतत् खलायोपदिशेन्नाविनीताय कर्हिचित् ॥ न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ॥ ३९ ॥ न लोलुपायोपदिशेन्न गृहारूढचेतसे ॥ नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ॥ ४० ॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे ॥ भूतेषु कृतमैत्राय शुश्रूषाऽभिरताय च ॥ ४१ ॥ बहिर्जातविरागाय शान्तचित्ताय दीयताम् ॥ निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ॥ ४२ ॥ य इदं शृणुयादम्ब श्रद्धया पुरुषः सकृत् ॥ यो वाऽभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ॥ ४३ ॥ इति श्रीभागवते महापुराणे तृतीयस्कन्धे कापिलेयोपाख्याने संपूर्णवर्णनं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ मैत्रेय उवाच ॥ ॥ एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ॥ विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयाङ्कितसिद्धिभूमिम् ॥ १ ॥

गताय वा । तथा धर्मध्वजाय दाम्भिकाय च कर्हिचिदपि नोपदिशेत् ॥३९॥ नेति ॥ लोलुपाय विषयभोगासक्ताय नोपदिशेत् नापि गृहारूढचेतसे नापि मे ममाभक्ताय तथा मद्भक्तद्विषां मद्भक्तद्वेषिभ्योऽपि जातु कदाचिदपि नोपदिशेत् ॥ ४० ॥ श्रद्दधानायेति द्वयम् ॥ श्रद्दधानायेत्यादिभ्यो दीयताम् । वस्तूनां मध्ये यस्याहमेव प्रियस्तस्मै एतत् दीयताम् उपदिश्यताम् ॥ ४१ ॥ ४२ ॥ य इति ॥ हे अम्ब यः पुरुषो मच्चित्तः सन् सकृत् श्रद्धया इदमाख्यानं शृणुयात् यश्च तथाभूतोऽभिधत्ते सोऽपि मत्पदवीमेति ॥ ४३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये द्वात्रिंशे निरमादिमाम् ॥ ३२ ॥ त्रयस्त्रिंशे देवहूत्या ज्ञानलाभेन वर्णिता ॥ जीवन्मु-क्तिस्तत्र सप्तत्रिंशँच्छ्लोका उदीरिताः ॥ उवाचपर्वकं चापि चन्द्रवेदौ अनुष्टुभः ॥ ३३ ॥ एवमिति ॥ कपिलस्य जनित्री माता जनिता मन्त्रे इति णिलोपश्छान्दसः । कर्दमस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयिता सा देवहूतिः एवं कपिलस्य वचो निशम्य विस्रस्तं निरस्तं मोहरूपं देहाद्यात्माध्यासरूपं पटलमात्मावरणं यस्यास्तादृशी सती तत्त्वानि प्रकृतिपुरुषेश्वरादीनि विषयो यस्य तेन ज्ञानेनाङ्किताः युक्ता ये सिद्धास्तेषां भूमिमाश्रयं गुरुं सिद्धीति पाठे तत्वान्येव विषयस्तेनाङ्किता सिद्धिः सांख्यज्ञानं तस्य भूमिं क्षेत्रं प्रवर्त्तकं तं कपिलमभिप्रणम्य तुष्टाव ॥ १ ॥ अथेति ॥ यस्य तव जठरे उदरे जातं यदब्जं कमलं तस्मात्साक्षाज्जातो योऽजो ब्रह्मा सोऽपि ते तव अन्तः सलिले सलिलमध्ये शयानं गर्भोदशायिरूपं भूतानि इन्द्रियाणि अर्थाः शब्दादयः आत्मानो जीवास्तन्मयं गुणानां प्रवाहो यस्मात् सत् व्यक्तम् अशेषस्य प्रपञ्चस्य बीजं कारणं ते वपुः केवलं दध्यौ ननु झटिति साक्षाद्दृष्टवान् ॥ २ ॥ स इति ॥ स एव गुणानां प्रवाहेण उन्मेषेण विभक्तं वीर्यं सृष्ट्यादिशक्तिर्येन शक्तिद्वारेण सृष्ट्यादिकर्त्ता न साक्षात् वस्तुतः अनीहः निष्क्रियः अवितथाभिसन्धिः सत्यसङ्कल्पः आत्मनां जीवानामीश्वरः अतर्क्याः सहस्रशः शक्तयो यस्य सः भवानेव विश्वस्य सर्गादि विधत्ते करोति ॥ ३ ॥ स त्वमिति ॥ हे नाथ युगान्ते प्रलयसमये यस्य

देवहूतिरुवाच ॥ ॥ अथाप्यजोऽन्तः सलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते ॥ गुणप्रवाहं यदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥ स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः ॥ सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ ३ ॥ स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् ॥ विश्वं युगान्ते वटपत्र एकः शेते स्म मायाशिशुरङ्घ्रिपानः ॥४॥ त्वं देहतन्त्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये ॥ यथावतारास्तव सूकरादयस्तथाऽयमप्यात्मपथोपलब्धये ॥ ५ ॥ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् ॥ श्वादोपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ॥ ६ ॥

तवोदरे एतद्विश्वमासीत् स त्वं मया जठरे कथं नु धृतः न कथमपीत्यर्थः । अतः तव मायैवेयम् । यथा मायया शिशुः अङ्घ्रिं पादाङ्गुष्ठं पिबतीति तथाभूतश्च सन्नेक एव वटपत्रे भवान् शेते स्म तथेदमपि शिशुत्वमित्यर्थः ॥ ४ ॥ त्वमिति ॥ अतो हे विभो न मया त्वमपत्यान्तरवज्जठरे धृतः किंतु पाप्मनां पापिष्ठानां प्रशमाय विनाशाय निदेशभाजामाज्ञानुवर्तिनां विभूतये समृद्धये च त्वं सदैव देहतन्त्रः स्वेच्छया स्वीकृतमूर्तिर्भवसीति । यथा तत्तत्कार्याय सूकरादयस्तवावतारास्तथात्मपथोपलब्धये ज्ञानमार्गप्रदर्शनायायमपि स्वेच्छयैव तवावतारः ॥ ५ ॥ यदिति ॥ क्वचित् कदाचिदपि यस्य तव नामधेयस्य श्रवणात् अनुकीर्तनाद्वा यस्य तव प्रह्वणात् प्रह्वाचरणात् प्रणामात् प्रह्वशब्दादाचारक्विबन्ताल्ल्युट् । यस्य स्मरणाच्च श्वादः श्वपचोऽपि सद्यस्तत्क्षणमेव सवनाय कल्पते सोमयाजिवदादरणीयो भवति एतेन दुर्जात्यारम्भप्रारब्धपापनाशो व्यञ्जितः। यद्येवं तर्हि हे भगवन् ते तव दर्शनादहं कृतार्था जातेति कुतः पुनः किं पुनर्वक्तव्यम् ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अहो बतेति ॥ यस्य जिह्वाग्रे तुभ्यं त्वां प्रीणयितुं तव नाम वर्तते स श्वपचोऽपि अतः त्वन्नामोच्चारणादेव हेतोः गरीयान् श्रेयान् अहो बताश्चर्यं त्वन्नाम-माहात्म्यं ये ते तव नाम गृणन्ति कीर्त्तयन्ति ते एवार्याः सर्वतः श्रेष्ठाः ते तपस्तेपुः कृतवन्तः जुहुवुर्होमं कृतवन्तः सस्नुः सर्वतीर्थेषु स्नानं कृतवन्तः ब्रह्म वेदमनूचुः वेदाध्ययनादि कृतवन्तः तव नामकीर्त्तने तप आद्यन्तर्भूतमतस्ते पुण्यतमाः । यद्वा । ते जन्मान्तरे तपस्तेपुरित्यादि त्वन्नामकीर्तनेन महाभाग्योदयादवगम्यते ॥ ७ ॥ तमिति ॥ परं ब्रह्मरूपं परं पुमांसं पुरुषोत्तमं प्रत्यक् स्रोतसि विषयेभ्यः प्रत्याहृते आत्मनि मनसि संविभाव्यं संचिन्त्यमिति स्वतेजसा स्वरूपप्रकाशेन ध्वस्तो निरस्तो गुणप्रवाहः संसारो येन तं विष्णुं वेदा गर्भे यस्य तं कपिलं त्वामहं वन्दे ॥ ८ ॥ ईडित इति ॥ कपिलाख्यः परः पुमान् परमपुरुषो भगवानेवं देवहूत्या ईडितः स्तुतः मातृवत्सलः तत्र प्रीतियुक्तः विक्लवया स्नेहेन गद्गदया अविप्लुवया गम्भीरया वाचा इति वक्ष्यमाणं मातरं प्रत्याह स्म ॥ ९ ॥ मार्गणेति ॥ हे मातः मे मया उदितेन

अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाऽग्रे वर्तते नाम तुभ्यम् ॥ तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ते ये ॥ ७ ॥ तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहं वन्दे विष्णुं कपिलं वेदगर्भम् ॥ ८ ॥ मैत्रेय उवाच ॥ ॥ ईडितो भगवानेवं कपिलाख्यः परः पुमान् ॥ वाचा विक्लवयेत्याह मातरं मातृवत्सलः ॥ ९ ॥ कपिल उवाच ॥ ॥ मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे ॥ आस्थितेन परां काष्ठामचिरादवरोत्स्यसि ॥ १० ॥ श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद् ब्रह्मवादिभिः ॥ येन मामभवं याया मृत्युमृच्छन्त्यतद्विदः ॥ ११ ॥ मैत्रेय उवाच ॥ ॥ इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिम् ॥ स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो ययौ ॥ १२ ॥ सा चापि तनयोक्तेन योगादेशेन योगयुक् ॥ तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता ॥ १३ ॥

उपदिष्टेन ते त्वया सुसेव्येन सुखमनुष्ठेयेन अत आस्थितेन अनुष्ठितेनानेन मार्गेणाचिरात् शीघ्रमेव त्वं परां काष्ठां परमफलरूपां मुक्तिमवरोत्स्यसि प्राप्स्यसि ॥ १० ॥ श्रद्धत्स्वेति ॥ एतत् मह्यं मम चतुर्थ्यार्षी । मम मतं त्वं श्रद्धत्स्व एतस्मिन् मते श्रद्धां कुर्वित्यर्थः । यद् ब्रह्मवादिभिः ब्रह्मोपदेष्टृभिः जुष्टं प्रीत्या सेवितं येन सेवितेनैतन्मतेन त्वमपि अभवं संसारनिवर्त्तकम् अभयमिति पाठे सर्वभयरहितं सर्वभयनिवर्त्तकं मां यायाः यास्यसि संभावनायां लिङ् । अतद्विदः एतन्मतानभिज्ञास्तु मृत्युमृच्छन्ति मृत्युग्रस्ते संसार एव पतन्ति ॥ ११ ॥ इतीति ॥ इत्येवं तां ब्रह्मवित्सेवितां सतीं श्रेष्ठाम् उशतीमिति पाठे कमनीयां सुकरामात्मनो गतिमात्मप्राप्तिमार्गमात्मतत्त्वं वा मात्रे प्रदर्श्य तया ब्रह्मवादिन्या ब्रह्मात्मतत्वाभिज्ञया स्वमात्रानुमतोऽनुज्ञातो भगवान् कपिलो ययौ ॥१२॥ सा चापीति ॥ सा चापि देवहूतिरपि तनयोक्तेन पुत्रोपदिष्टेन योगादेशेन योगयुक् सती सरस्वत्या आपीडे पुष्पमुकुटवदलङ्कारभूते तृतीयान्तपाठे मुकुटेनेव सरस्वत्या वेष्टिते तस्मिन् बिन्दुसरआख्ये आश्रमे समाहिता समाधिमती जाता ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तां विशिनष्टि—अभीक्ष्णेति ॥ अभीक्ष्णं योऽवगाहः स्नानं तेन कपिशान् पिशङ्गान् जटिलान् कुटिलान् अलकान् उग्रतपसा कृशं चीरिणं वल्कलादिधारिणम् आत्मानं बिभ्रतीम् ॥ १४ ॥ प्रजापतेरिति ॥ यत् प्रजापतेः कर्दमस्य तपोयोगाभ्यां विजृम्भितमतिशयितम् अतः अनौपम्यं वैमानिकैर्देवैरपि प्रार्थ्यं स्वगार्हस्थ्यमभूत् ॥ १५ ॥ पय इति ॥ यत्र पयःफेननिभाः पयःफेनसदृश्यः मृदुलाः शुभ्राः दान्ताः हस्तिदन्तेन निर्मिताः रुक्मपारिच्छदाः स्वर्णमयाः परिकराः यासु तथाभूताः शय्याः हैमानि सुवर्णरचितानि सुस्पर्शान्यास्तरणानि येषु तान्यासनानि च अभूवन् ॥ १६ ॥ स्वच्छेति ॥ यत्र च महान्त्यनर्घाणि मारकतानि इन्द्रनीलान्यलङ्कारार्थं संयुक्तानि येषु तेषु स्वच्छस्फटिकमयकुड्येषु रचिताः प्रतिबिम्बिता वा रत्नालङ्कारसंयुता ललनाः पद्मरागादिरत्नमयाः प्रदीपाश्च आभान्ति ॥ १७ ॥ गृहेति ॥ बहुभिरमरद्रुमैः पारिजातादिभिः

अभीक्ष्णावगाहकपिशान् जटिलान् कुटिलालकान् ॥ आत्मानं चोग्रतपसा बिभ्रतीं चीरिणं कृशम् ॥ १४ ॥ प्रजापतेः कर्दमस्य तपोयोगविजृम्भितम् ॥ स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि ॥ १५ ॥ पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः ॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च ॥१६॥ स्वच्छस्फटिककुड्येषु महामारकतेषु च ॥ रत्नप्रदीपा आभान्ति ललना रत्नसंयुताः ॥१७॥ गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः ॥ कूजद्विहङ्गमिथुनं गायन्मत्तमधुव्रतम् ॥ १८ ॥ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः ॥ वाप्यामुत्पलगन्धिन्यां कर्दमेनोपलालितम् ॥ १९ ॥ हित्वा तदीप्सिततममप्याखण्डलयोषिताम् ॥ किंचिच्चकार वदनं पुत्रविश्लेषणातुरा ॥ २० ॥ वनं प्रव्रजिते पत्यावपत्यविरहातुरा ॥ ज्ञाततत्त्वाऽप्यभून्नष्टे वत्से गौरिव वत्सला ॥ २१ ॥ तमेव ध्यायती देवमपत्यं कपिलं हरिम् ॥ बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे ॥ २२ ॥

कुसुमितै रम्यं कूजन्ति विहङ्गानां मिथुनानि यस्मिंस्तत् गायन्तो मत्ता मधुव्रता भ्रमरा यस्मिंस्तत् गृहोद्यानम् आभाति ॥ १८ ॥ यत्रेति ॥ यत्र गृहोद्याने स्थितायामुत्पलगन्धिन्यां वाप्यां प्रविष्टं कर्दमेनोपलालितमात्मानं देवहूतिं विबुधानामनुचराः किंनरगन्धर्वादयो जगुः ॥ १९ ॥ हित्वेति ॥ किं बहुना आखण्डलयोषितामिन्द्रस्त्रीणामपि ईप्सिततमं तत् स्वगार्हस्थ्यं हित्वा तत्राभिमानं त्यक्त्वा पुत्रभूतेश्वरविरहेणातुरा व्याकुला सती वदनं किंचिद्व्याकुलं चकार ॥ २० ॥ वनमिति ॥ ज्ञातं तत्त्वं यया तथाभूतापि पत्यौ कर्दमे वनं प्रति प्रव्रजिते संन्यस्य गते सति अपत्यस्य कपिलस्य विरहेणातुरा सा देवहूतिः वत्से नष्टे सति वत्सला गौर्यथातुरा भवति तथाभूत् ॥२१॥ तमेवेति ॥ हे वत्स विदुर तमेवापत्यरूपं कपिलं हरिं संसारहर्तारं देवं परमेश्वरं ध्यायती सती नुमभाव आर्षः । अचिरतोऽल्पेनैव कालेन तादृशे पूर्वोक्तप्रकारके गृहे निस्पृहा बभूव॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यायतीति पञ्चकम् ॥ भक्तेः प्रवाहो नैरन्तर्यं स एव योगस्तेन बलीयसा अप्रतिहतेन वैराग्येण युक्तानां यथोचितपूजाजपादीनाम् आहारशयनादीनां चानुष्ठानजातेन अनुष्ठानसमूहेन ब्रह्मात्मसाक्षात्कारहेतुना ब्रह्मत्वापादकेन च ज्ञानेनेति शुद्धिकारणैः विशुद्धेनात्मना मनसा स्वसुतः कपिलो ध्यानस्य गोचरं योग्यं प्रसन्नवदनं यद् भगवद्रूपमाह स्म तद्ध्यायती नुमभाव आर्षः । क्वापि नुमवान् पाठः । तदा चात्मानमपि स्वानुभूत्या स्वरूपप्रकाशेन तिरोभूतं मायागुणैः कृतं देहेन्द्रियान्तःकरणरूपं विशेषणं यस्मात्तं विश्वतोमुखं तदभिन्नतया सर्वगतं ध्यायती सती आत्मनां जीवानां संश्रये कारणे भगवति ब्रह्मणि अभेदेनावस्थिता मतिर्यस्याः सा अत एव निवृत्ता जीवस्यापत्तिरापद्रूपा अविद्या यस्याः । यद्वा । निवृत्ता जीवापत्तिर्जीवभावो यस्यास्तस्या भावस्तत्त्वं तस्मात् क्षीणाः क्लेशाः रागादयो यस्याः आप्ता निर्वृतिः परमानन्दो यया तथाभूता नित्या रूढो लब्धप्रतिष्ठः समाधिर्यस्यास्तस्या भावस्तत्त्वं तस्मात् परावृत्तः शान्तो गुणनिमित्तो भ्रमो देहाद्यात्माध्यासो यस्याः सा देवहूतिः तदा स्वप्ने दुःखादियुक्तं दृष्टमात्मानं यथा

ध्यायती भगवद्रूपं यदाह ध्यानगोचरम् ॥ सुतः प्रसन्नवदनं समस्तव्यस्तचिन्तया ॥ २३ ॥ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा॥ युक्तानुष्ठा-
नजातेन ज्ञानेन ब्रह्महेतुना ॥ २४ ॥ विशुद्धेन तदात्मानमात्मना विश्वतोमुखम् ॥ स्वानुभूत्या तिरोभूतमायागुणविशेषणम् ॥ २५ ॥ ब्रह्मण्यव-
स्थितमतिर्भगवत्यात्मसंश्रये ॥ निवृत्तजीवापत्तित्वात् क्षीणक्लेशाऽऽप्तनिर्वृतिः ॥ २६ ॥ नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा ॥ न सस्मार
तदात्मानं स्वप्ने दृष्टमिवोत्थितः ॥ २७ ॥ तद्देहः परतः पोषोऽप्यकृशश्चाध्यसंभवात् ॥ बभौ मलैरवच्छन्नः सधूम इव पावकः ॥ २८॥ स्वाङ्गं
तपोयोगमयं मुक्तकेशं गताम्बरम् ॥ दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥२९॥ एवं सा कपिलोक्तेन मार्गेणाचिरतः परम् ॥ आत्मानं ब्रह्मनिर्वाणं
भगवन्तमवाप ह ॥ ३० ॥ तद्वीराऽऽसीत् पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतम् ॥ नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥ ३१ ॥ तस्यास्तद्योगवि-
धुतमार्त्यं मर्त्यमभूत्सरित् ॥ स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ॥ ३२ ॥

उत्थितो दुःखादियुक्तं न स्मरति तथाऽऽत्मानं न सस्मार ॥२३॥२४॥२५॥२६॥२७॥ तद्देह इति ॥ तस्या देहः परतः पराभिः कर्दमसृष्टविद्याधरीभिः पोषो पोषणं यस्य तथाभूतोऽपि आधेर्मनोव्यथाया असंभवात् अकृशः मनोनिर्वृतिरतिस्थूलं करणीति वैद्यकात् अभ्यङ्गोद्वर्तनाद्यभावान्मलैरवच्छन्नोऽपि सधूमः पावक इव बभौ ॥ २८ ॥ स्वाङ्गमिति ॥ वासुदेवे प्रविष्टा धीर्यस्याः सा तपोयोगप्रचुरं मुक्ता विकीर्णाः केशा यस्मिंस्तत् गतमम्बरं वस्त्रं यस्मात्तत् दैवेन प्रारब्धेन गुप्तं रक्षितं स्वाङ्गमपि सा न बुबुधे न ज्ञातवती ॥ २९ ॥ एवमिति ॥ एवं कपिलोपदिष्टेन मार्गेण सा देवहूतिरचिरतः परम् आत्मानं ब्रह्मनिर्वाणं नित्यमुक्तं भगवन्तमवाप ॥ ३० ॥ तद्विति ॥ हे वीर यत्र सा संसिद्धिम् उपेयुषी मुक्तिमवाप तत् स्थानं नाम्ना सिद्धपदं त्रैलोक्ये विश्रुतं प्रसिद्धं पुण्यतमं क्षेत्रमासीत् ॥ ३१ ॥ तस्या इति ॥ हे सौम्य योगेन विधूता विलीना मार्त्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहिकाः धातुमला यस्य तत् तस्या देवहूत्यास्तन्मर्त्यं शरीरं सिद्धिदा सिद्धैः सेविता च स्रोतसां नदीनां प्रवरा श्रेष्ठा कपिला इति ख्याता सरिन्नदी अभूत् ॥ ३२ ॥ कपिलो ययाविति प्रागुक्तं प्रपञ्चयति—कपिल इति ॥ महायोगी भगवान् कपिलोऽपि मातरं समनुज्ञाप्य अनुज्ञां संप्रार्थ्य पितुराश्रमात् प्रागुदीचीमीशानीं दिशं ययौ । यद्वा । प्राक् प्रथममुदीचीं दिशं ययौ पश्चाच्च गङ्गासागर एव स्थिरतामवापेति ॥ ३३ ॥ सिद्धेति ॥ सिद्धचारणादिभिः स्तूयमानः समुद्रेण दत्तमर्हणमर्घ्यं निकेतनं निवासस्थानं च यस्मै सः साङ्ख्यशास्त्रस्य ये आचार्यास्तैरभिष्टुतः स्वयमपि समाहितः एकाग्रमनाः योगं समास्थाय त्रयाणामपि लोकानामुपशान्त्यै मोक्षाय आस्ते उपशान्त्यै समाहित आस्ते

कपिलोऽपि महायोगी भगवान्पितुराश्रमात् ॥ मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥ ३३ ॥ सिद्धचारणगन्धर्वैर्मुनिभिश्चाप्सरोगणैः ॥ स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ॥ ३४ ॥ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः ॥ त्रयाणामपि लोकानामुपशान्त्यै समाहितः ॥ ३५ ॥ एतन्निगदितं तात यत्पृष्टोऽहं त्वयानघ ॥ कपिलस्य च संवादो देवहूत्याश्च पावनः ॥ ३६ ॥ य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यम् ॥ भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविन्दम् ॥ ३७ ॥ इति श्रीभागवते अष्टादशसाहस्र्यां संहितायां तृतीयस्कन्धे कपिलान्तर्धानवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ समाप्तोऽयं तृतीयस्कन्धः ॥

इति वा ॥ ३४ ॥ ३५ ॥ एतदिति ॥ हे अनघ हे तात यन्मनुवंशादि तव त्वयाहं पृष्टस्तदेतत्तुभ्यं मया निगदितं कथितं प्रसङ्गात् कपिलस्य देवहूत्याश्च पावनः पापनाशकः संवादश्च कथितः ॥ ३६ ॥ य इति ॥ इदमात्मयोगं भगवद्ध्यानं गुह्यं सर्वशास्त्ररहस्यं कपिलमुनेर्मतं योऽनुदिनं केवलं शृणोति यश्च केवलमभिधत्ते वा श्रावयति स सुपर्णकेतौ गरुडध्वजे भगवति कृतधीः निष्पन्नभक्तियोगः सन्भगवत्पदारविन्दं लभते प्राप्नोति ॥ ३७ ॥ नित्यं सतां चरणसेवकतां गतोऽपि सद्भूसुरान्वयभवोऽपि जराङ्गतोऽपि ॥ हन्तातिमुग्धपशुपालसुताङ्कपालिव्यालीढबुद्धिरधुना विधुनामि धैर्यम् ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीयत्रयस्त्रिंशे व्यधादिमाम् ॥ ३३ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयं श्रीमद्भागवतस्य तृतीयस्कन्धः बून्दीनगरनिवासिपण्डितगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वीये "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितः । अश्विनशुक्ला ११ शकाब्दाः १८२२, संवत् १९५७ ॥

गंगाविष्णु श्रीकृष्णदास, "लक्ष्मीवेङ्कटेश्वर" छापाखाना, कल्याण.

Gangavishnu Shrikrishnadas Laxmi-Venkateshwar Press.

KALYAN. G. I. P. RY. JUNCTION.
BOMBAY PRESIDENCY.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते तृतीयस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते चतुर्थस्कन्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीपरमात्मने नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि निखिले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयाय विदधाति मतिं चतुर्थे ॥ ३ ॥ मनुकन्यान्वया आद्ये यत्र यज्ञादिमूर्तिभिः ॥ आविर्भावो हरेस्तत्र श्लोकाः षट्षष्टिरीरिताः[६६] ॥ अनुष्टुभोऽत्र नवषट्[६८] उवाचेति तु सप्तकम् ॥ १ ॥ तृतीयस्कन्धे सर्गं निरूप्य विसर्गमाह—मनोरिति ॥ मनोः सकाशाच्छतरूपायां पत्न्याम् आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ख्याताः तिस्रः कन्या जज्ञिरे। चकारात् प्रियव्रतोत्तानपादनामानौ द्वौ पुत्रौ चेति ज्ञेयम् ॥ १ ॥ आकूतिमिति ॥ नृपः स्वायम्भुवो मनुः भ्रातृमतीमप्याकूतिं शतरूपानुमोदितः पुत्रिकाधर्ममाश्रित्य रुचये तन्नाम्ने प्रजापतये प्रादात्। पुत्रिकाधर्मश्च "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥" भाषाबन्धेन कन्यादानम्। स च यद्यपि अभ्रातृकायां कन्यायां पुत्रार्थिन एवोचितस्तथापि शतरूपानुमोदनात्पुत्रबाहुल्येच्छया

॥ श्रीकृष्णाय नमः ॥ ॥ मैत्रेय उवाच ॥ मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥ १ ॥
आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः ॥ पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥ २ ॥ प्रजापतिः स भगवान्रुचिस्तस्यामजीजनत् ॥
मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना ॥ ३ ॥ यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक् ॥ या स्त्री सा दक्षिणा भूतेरंशभूताऽनपायिनी ॥ ४ ॥
आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम् ॥ स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम् ॥ ५ ॥

कृतः। यद्वा। न केवलं पुत्रबाहुल्यकाम एव किन्तु आकूतिसूनोरवतारत्वं सर्वज्ञतया ज्ञात्वा भगवान्मे दौहित्रोऽपि पुत्रो भूयादिति कामादिति भावः। यद्वा। मनुर्मनीषियुक्तेः मनोर्भगवन्मनीषारूपत्वात्तत्पत्न्याश्च इच्छाशक्तिरूपत्वेन आकूतेश्च बाह्यविक्रमतया तत्र यज्ञावतारो भविष्यतीति निश्चयात् प्रजापालनेऽधिकृतेन मनुना स्वसाहाय्यार्थं पत्न्या सह संमन्त्र्य तथा कृतमिति नात्र शास्त्रविरोधविचारः ॥ २ ॥ प्रजापतिरिति ॥ भगवान् ब्रह्मवर्चस्वी च रुचिः प्रजापतिः परमेण भगवद्विषयकेण तीव्रेण समाधिना ध्यानेन तस्यामाकूत्यां मिथुनं स्त्रीपुरुषयोर्युगलरूपमजीजनत् जनयामास। ब्रह्मवर्चस्वीति समासान्ताभाववत् आर्षात् ब्रह्मवर्चश्शब्दाद्विनिः ॥ ३ ॥ यस्तयोरिति ॥ तयोर्द्वयोर्मध्ये यः पुरुषः स यज्ञस्वरूपधृक् यज्ञनामकोऽवतारः साक्षात् विष्णुरेव द्वितीयस्कन्धेऽवतारवर्णने सुयज्ञ इत्यपि तस्य नाम। या स्त्री सा दक्षिणेति नाम्ना प्रसिद्धा भूतेर्लक्ष्म्या अंशभूता अवताररूपा अनपायिनी सर्वदा भगवत्सहचारिणी ॥ ४ ॥ आनिन्य इति ॥ विततरोचिषं प्रसृतदीप्तिं स्वपुत्र्याः पुत्रं नप्तारं स्वायम्भुवो मनुः स्वसंकल्पस्य सिद्धत्वान्मुदा युक्तः स्वगृहमानिन्ये अत्यादरेणानीतवान्। रुचिश्च दक्षिणां नाम कन्यां जग्राह ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामिति ॥ यजुषां यज्ञानां पतिः । यद्वा । यजुषामुपलक्षणतया सर्ववेदानां पतिर्भगवान् यज्ञः कामयानां कामयमानां ताम् उवाह।नुमभावः । आगमशास्त्रस्यानित्यत्वात् कामयानशब्दः सिद्धोऽनादिश्चेति वामनसूत्रम् । " कामयानसमस्थया तुलाम् " इति रघुवंशे प्रयोगश्च । लक्ष्म्यंशभूतायास्तस्या विष्णोरवतारभूतेन यज्ञेन सह विवाहे शास्त्रविरोधो नास्ति । ततश्च तुष्टायां तस्यां दक्षिणायां स्वयमपि तत्संबन्धात्तोषमापन्नः प्रसन्नः सन् द्वादश आत्मजान् अजनयत् ॥ ६ ॥ तोष इति ॥ तोषः प्रतोषः इत्याद्याः द्विषट् द्वादश पुत्राः ॥ ७ ॥ तुषिता इति ॥ " मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः । ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥ " इति वक्ष्यति । तत्र स्वायम्भुवेन्तरे तोषादयः तुषिता नाम प्रसिद्धाः देवा आसन् । मरीचिमिश्राः मरीच्याद्याः ऋषय आसन् । यज्ञः हरेरवतारः आसीत् । स एव स्वयं सुरगणेश्वर इन्द्रश्च जातः । तत्र काले इन्द्राधिकारयोग्यस्य कस्यचिदन्यस्याभावात् ॥८ ॥ प्रियव्रतेति ॥ महौजसौ महाबलौ प्रियव्रतोत्तानपादौ मनुपुत्रावास्ताम् । मनुश्च स्वायम्भुव उक्त एव । इति यज्ञस्य द्वैरूप्येण

तां कामयानां भगवानुवाह यजुषां पतिः ॥ तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥ ६ ॥ तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः ॥ इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ॥ ७ ॥ तुषिता नाम ते देवा आसन्स्वायंभुवान्तरे ॥ मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ ॥ तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदन्तरम् ॥ ९ ॥ देवहूतिमदात्तात कर्दमायात्मजां मनुः ॥ तत्संबन्धि श्रुतप्रायं भवता गदतो मम ॥१०॥ दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः ॥ प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान् ॥ ११ ॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः ॥ तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे ॥ १२ ॥ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा ॥ कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥ १३ ॥

षड्विधत्वमुक्तम् । तयोः प्रियव्रतोत्तानपदोः पुत्रपौत्रनप्तॄणां वंशैस्तदन्तरं तस्य स्वायंभुवस्य मन्वन्तरमनुवृत्तं व्याप्तं पालितमिति यावत् । यद्वा । अनुवृत्तम् अनुचरितं तन्मयमेव तदन्तरं स्वायम्भुवमन्वन्तरमित्यर्थः । मन्वन्तरशब्दो " मन्वन्तराणि सद्धर्मः" इति वचनात् धर्मसाधकक्षणानां समुदाये रूढस्तदुपलक्षितकालोऽप्युपचारान्मन्वन्तरमित्युच्यते ॥९॥ देवहूतिमिति ॥ हे तात विदुर मनुः देवहूतिनाम्नीमात्मजां कर्दमाय अदात् । तत्संबन्धिचरितनिरूपणं गदतो मम सकाशात् भवता श्रुतप्रायम् । तृतीयस्कन्धे ॥ १ ॥
देवहूतिकन्यान्वयस्यानुक्तत्वेनाश्रुतत्वात् प्रायग्रहणम् ॥ १० ॥ दक्षायेति ॥ भगवान् मनुः ब्रह्मणः पुत्राय दक्षाय प्रसूतिं कन्यां प्रायच्छत् । यया कृतः महान्सर्गः त्रिलोक्यां विततः विस्तृतो जातः ॥११॥ या इति॥ मरीच्यादिनवब्रह्मर्षीणां पत्नयः । आर्षी ह्रस्वता । क्षत्तर्ब्रह्मर्षीत्यपि पाठः । कलादयो या नव कर्दमसुताः मया प्रोक्तास्तासां प्रसूतिप्रसवं पुत्रपौत्रादिविस्तारं मे मया प्रोच्यमानं निबोध शृणु ॥ १२ ॥ पत्नीति ॥ कर्दमात्मजा कला मरीचेः पत्नी तु कश्यपं पूर्णिमानं च सुषुवे । ययोर्वंशविस्तारेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वं जगदापूरितम् ॥ १३ ॥ कश्यपस्य वंशं विस्तृतत्वात् षष्ठे वक्ष्यति पूर्णिम्न आह—पूर्णिमेति ॥ हे परन्तप पूर्णिमा विरजं विश्वगं चेति द्वौ पुत्रौ देवकुल्यां नाम्नीं कन्यां चासूत । या देवकुल्या हरेः पादशौचात् पादप्रक्षालनप्रभावाज्जन्मान्तरे दिवः सरिद्वरा गङ्गाभूत् ॥ १४ ॥ अत्रेरिति ॥ अत्रेः पत्नी अनसूया सुष्ठु यशो येषां तान् आत्मा श्रीविष्णुः ईशः शङ्करः ब्रह्मा च तेषामंशैः सम्भवः प्रादुर्भावो येषां तान् दत्तं दुर्वाससं सोममिति ख्यातान् त्रीन् सुतान् जज्ञे जनयामास । अन्तर्भावितण्यर्थः ॥ १५ ॥ अत्रेर्गृह इति ॥ हे गुरो अत्रेर्गृहे स्थित्युत्पत्त्यन्तहेतवः सुरश्रेष्ठाः किंचित् किंस्वित् चिकीर्षवः किं कर्तुमिच्छवः सन्तो जाताः एतत्कार्यं मे मह्यमाख्याहि ॥ १६ ॥ ब्रह्मणेति ॥ ब्रह्मणा सृष्टौ चोदितः ब्रह्मविदां वरः अत्रिः पत्न्या सह ऋक्षं नाम कुलाद्रिं ययौ । तत्र च तपसि स्थितोऽभूत् ॥ १७ ॥ तस्मिन्निति त्रयम् ॥ प्रसूनानां स्त-

पूर्णिमाऽसूत विरजं विश्वगं च परंतप ॥ देवकुल्यां हरेः पादशौचाद्याऽभूत्सरिद्दिवः ॥ १४ ॥ अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान् ॥ दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् ॥ १५ ॥ विदुर उवाच ॥ अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः ॥ किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो ॥ १६ ॥ मैत्रेय उवाच ॥ ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः ॥ सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥ १७ ॥ तस्मिन्प्रसूनस्तबकपलाशाशोककानने ॥ वार्भिः स्रवद्भिरुद्घुष्टे निर्विन्ध्यायाः समन्ततः ॥ १८ ॥ प्राणायामेन संयम्य मनो वर्षशतं मुनिः ॥ अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः ॥ १९ ॥ शरणं तं प्रपद्येऽहं य एको जगदीश्वरः ॥ प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् ॥ २० ॥ तप्यमानं त्रिभुवनं प्राणायामैधसाऽग्निना ॥ निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥ २१ ॥ अप्सरोमुनिगन्धर्वसिद्धविद्याधरोरगैः ॥ वितायमानयशसस्तदाश्रमपदं ययुः ॥ २२ ॥ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः ॥ उत्तिष्ठन्नेकपादेन ददृशे विबुधर्षभान् ॥ २३ ॥

बकाः येषु तेषां पलाशाशोकवृक्षाणां काननानि यत्रेति तथा तस्मिन् तथा निर्विन्ध्याया नद्याः स्रवद्भिर्वार्भिर्जलैः समन्ततः सर्वत उद्घुष्टे शब्दायमाने तस्मिन्नृक्षपर्वते प्राणायामेन मनः संयम्य य एको जगदीश्वरस्तमहं शरणं प्रपद्ये । स आत्मसमां प्रजां मह्यं प्रयच्छत्विति चिन्तयन् निर्द्वन्द्वोऽनिलभोजनोमु निरेकपादेन वर्षशतमतिष्ठत् । अत्र तिष्ठन्नेव प्राणायामांश्चकारेति ज्ञेयम् । संयम्येति क्त्वा तु नेत्रे सम्मील्य हसतीतिवत्तुल्यकाल एव ज्ञेयः ॥ १८ ॥ १९ ॥ २० ॥ तप्यमानमिति द्वयम् ॥ प्राणायाम एवैधः काष्ठं तद्वत्संदीपको यस्य तादृशेन मुनेः अत्रेर्मूर्ध्नो बहिर्निर्गतेनाग्निना त्रिभुवनं तप्यमानं वीक्ष्य सर्वज्ञत्वात्पूर्वस्थाने स्थिता एव ज्ञात्वा त्रयः प्रभवो ब्रह्मविष्णुरुद्राः अप्सरोमुनिगन्धर्वादिभिर्वितायमानं विस्तार्यमाणं यशो येषां ते तदाश्रमपदं ययुः ॥ २१ ॥ २२ ॥ तत्प्रादुर्भावेति ॥ तेषां ब्रह्मादीनां प्रादुर्भावः प्राकट्यं तस्य संयोगः सन्निधिस्तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्योतितं प्रकाशितं समाधेर्व्युत्थाय दर्शनार्थं प्रवृत्तं मनो यस्य तादृशो मुनिरत्रिः प्रत्यभ्युत्थानार्थमेकपादेनोत्तिष्ठन्नुत्कर्षेण तिष्ठन्नेव तान् विबुधर्षभान् ददृशे ददर्श । तङ्गार्षः ॥ २३ ॥ प्रणम्येति सार्द्धम् ॥ अर्हणं पूजनद्रव्यमञ्जलौ यस्य स मुनिः वृषहंससुपर्णेषु स्वस्ववाहनेषु स्थितान् स्वैः स्वैश्चिह्नैस्त्रिशूलकमण्डलुशङ्खादिभिश्चिह्नितान् कृपया योऽवलोकोऽवलोकनं तेन सह हसच्च तद्वचनं चेति तेन यद्वा हसत्प्रसीदद्वदनं यस्मात्तेन कृपावलोकेन उपलम्भितान् प्रसन्नत्वेन ज्ञापितान् विबुधर्षभान् भूमौ दण्डवत्प्रणम्य उपतस्थे अपूजयत् ॥ २४ ॥ तद्रोचिषेति ॥ संहताञ्जलिः रचिताञ्जलिः मुनिरत्रिः तेषां रोचिषा तेजसा प्रतिहते अक्षिणी पुनर्निमील्य ततः चेतस्तत्प्रवणं युञ्जन् तदेकनिष्ठं कुर्वन् सर्वलोकेषु गरीयसः पूज्यान् ब्रह्मविष्णुशिवान् श्लक्ष्णया मधुरया सूक्तया गम्भीरार्थया वाचा अस्तावीत् ॥ २५ ॥ २६ ॥ विश्वेति ॥ विश्वस्य उद्भवस्थितिलयेषु विभज्यमानैः व्यवस्थया स्थापितैर्मायागुणैः सत्वादिभिर्हेतुभिः अनुयुगं प्रतिकल्पं विशेषेण गृहीताः देहा यैस्ते शास्त्रप्रसिद्धाः ब्रह्मविष्णुगिरिशास्तान्वो युष्मानहं प्रणतोऽस्मि ।

प्रणम्य दण्डवद्भूमावुपतस्थेऽर्हणाञ्जलिः ॥ वृषहंससुपर्णस्थान्स्वैः स्वैश्चिह्नैश्च चिह्नितान् ॥ कृपाऽवलोकेन हसद्वदनेनोपलम्भितान्
॥ २४ ॥ तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी ॥ २५ ॥ चेतस्तत्प्रवणं युञ्जन्नस्तावीत्संहताञ्जलिः ॥ श्लक्ष्णया सूक्तया वाचा सर्वलो-
कगरीयसः ॥ २६ ॥ अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ॥ ते ब्रह्मविष्णुगिरिशाः प्रणतोऽ-
स्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः ॥ २७ ॥ एको मयेह भगवान्विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम् ॥ अत्राग-
तास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयो मे ॥ २८ ॥ मैत्रेय उवाच ॥ ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्ष-
भाः ॥ प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ॥ २९ ॥

तेभ्यः सकाशादेक एव मे मया इहोपहूत आकारितः शरणं तं प्रपद्य इत्येकस्यैव निर्दिष्टत्वात् स च भवतां मध्ये क इति युष्माभिः कथ्यतामिति शेषः । यद्यपि ब्रह्मादयः प्रथमकल्प एव प्रादुर्भवन्ति तथापि ब्रह्मरुद्रयोः प्रलये सूक्ष्मस्वरूपेण भगवति स्थितयोः पुनः कल्पादौ प्रादुर्भावः विष्णोरपि तत्तदवसरे " परित्राणाय साधूनाम् " इत्यादिवाक्यात् प्रादुर्भावो भवति इत्यनुयुगमित्यविरुद्धम्॥२७॥तूष्णीं स्थितान्पुनः स्पष्टीकृत्याह—एक इति ॥ विविधैः प्रधानैरुत्कृष्टैरुपचारैस्तपोभिर्वा पूजितः एक एव भगवान् प्रजननाय पुत्रत्वेन तस्य लाभाय मया इह अन्तःकरणे चित्तीकृतः चित्तेनैक्यं नीतः। चित्तस्थीकृत इति वा चिन्तित इत्यर्थः ।तत्र तनुभृतां देहधारिणां सर्वेषामपि मनसोऽपि दूरा अगोचराः यूयं त्रयोऽपि कथं नु अत्रागताः अत इह एकस्य चिन्तने त्रयाणामागमने मे मम महान् विस्मयः संशयोऽस्त्यतः अत्र कारणं ब्रूत । तथा मत्संदेहनिवृत्तये प्रसीदत । विबुधप्रधाना इति पाठे संबोधनं प्रधान इति पाठे एकदेव विशेषणम् ॥ २८ ॥ इतीति ॥ हे प्रभो विदुर इत्येवं तस्यात्रेर्वचः श्रुत्वा ते त्रयोऽपि विबुधेषु देवेषु ऋषभाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेष्ठाः प्रहस्य तमृषिं श्लक्ष्णया मधुरया वाचा प्रत्याहुः स्म ॥ २९ ॥ यथेति ॥ हे ब्रह्मन् सत्संकल्पस्य सत्यसंकल्पस्य ते शेषे षष्ठी यथा संकल्पः कृतस्तेन संकल्पेन तथैव अवश्यभाव्यं न त्वन्यथा । यतः यदेकं जगदीश्वराख्यं तत्त्वं भवान् ध्यायति ते वयं त्रयोऽपि एकमेव तत्त्वं नास्माकं भेदोऽस्तीत्यर्थः ॥ ३० ॥ अथेति ॥ अङ्ग हे मुने अथ तस्माद्धेतोः अस्मदंशसंभूताः लोके तत्तद्गुणैर्विश्रुताः प्रसिद्धास्ते आत्मजा भवितारो भविष्यन्ति । ते तव यशो लोके विस्रप्स्यन्ति विस्तारयिष्यन्ति । अन्तर्भूतणिजर्थस्य सृप्लृधातो रूपम् । ततस्ते भद्रं भविष्यति ॥ ३१ ॥ एवमिति ॥ एवं सभाजिताः पूजितास्ते सुरेश्वराः ताभ्यां दम्पतिभ्यां कामवरमभीष्टार्थं दत्त्वा दम्पत्योरुभयनसूययो- र्मिषतोः पश्यतोस्ततः स्थानात्स्वस्वधाम प्रतिजग्मुः ॥ ३२ ॥ सोम इति ॥ ब्रह्मणोंऽशेन सोमोऽभूत् विष्णोरंशेन तु योगवित् दत्तः अभूत् । शङ्करस्यांशो दुर्वासा अभूत् । अङ्गिरसः प्रजाः संतानानि निबोध शृणु ॥ ३३ ॥ श्रद्धेति ॥ अङ्गिरसः पत्नी श्रद्धा तु धर्मानुष्ठानकालाभिमानिनीर्देवतारूपाः सिनीवाली दृष्टेन्दुकला अमा कुहूर्नष्टेन्दुकला

देवा ऊचुः ॥ यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा ॥ सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयम् ॥३०॥ अथास्मदंशभूतास्त आत्मजा लोकविश्रुताः ॥ भवितारोऽङ्ग भद्रं ते विस्रप्स्यन्ति च ते यशः ॥ ३१ ॥ एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः ॥ सभाजितास्तयोः सम्यग् दम्पत्योर्मिषतोस्ततः ॥ ३२ ॥ सोमोऽभूद् ब्रह्मणोऽशेन दत्तो विष्णोस्तु योगवित् ॥ दुर्वासाः शंकरस्यांशो निबोधाङ्गिरसः प्रजाः ॥ ३३ ॥ श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः ॥ सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥ ३४ ॥ तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेऽन्तरे ॥ उतथ्यो भगवान्साक्षाद् ब्रह्मिष्ठश्च बृहस्पतिः ॥ ३५ ॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि ॥ सोऽन्यजन्मनि दह्रा- ग्निर्विश्रवाश्च महातपाः ॥ ३६ ॥ तस्य यक्षपतिर्देवः कुबेरस्त्विडविडासुतः ॥ रावणः कुम्भकर्णश्च तथाऽन्यस्यां बिभीषणः ॥ ३७ ॥

अमा राका संपूर्णे शशिनि पूर्णिमा तथा चतुर्थी अनुमतिः कलोने शशिनि पूर्णिमा इति चतस्रः कन्यकाः असूत । केचित्तु एताः क्रमेण कृष्णचतुर्दश्यमापूर्णिमाशुक्लचतुर्द- श्यभिमानिन्य इत्याहुः ॥ ३४ ॥ तत्पुत्राविति ॥ साक्षाद् भगवान् ब्रह्मिष्ठः ब्रह्मनिष्ठश्च उतथ्यो बृहस्पतिश्चेति तस्याङ्गिरसः पुत्रौ अपरौ ताभ्यः कन्याभ्यो भिन्नौ स्वारो- चिषेन्तरे ख्यातौ आस्ताम् । तथा च श्रद्धायां चतस्रः कन्या द्वौ पुत्रौ चेति ॥ ३५ ॥ पुलस्त्य इति ॥ पुलस्त्यो हविर्भुवि स्वपत्न्यामगस्त्यं पुत्रमजनयत् । सोऽगस्त्यो- ऽन्यस्मिन् जन्मनि दह्राग्निर्जाठराग्निर्जात इति तस्य स्तुतिः । महातपाः विश्रवाश्च पुलस्त्यस्य द्वितीयः पुत्र इति शेषः ॥ ३६ ॥ तस्येति ॥ तस्य विश्रवसो यक्षाणां पतिः इडविडायां विश्रवसः भार्यायां जातः सुतः कुबेरः अभूत् । स च देवः देवान्तःपाती अत एव रावणादिभिन्नस्वभावः तथाऽन्यस्यां केशिन्यां भार्यायां तस्य रावणः कुम्भकर्णो विभिषणश्चेति त्रयः पुत्रा जाता इति शेषः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुलहस्येति ॥ हे महामते विदुर पुलहस्य भार्या गतिः सती पतिव्रता कर्मश्रेष्ठं वरीयांसं सहिष्णुं चेति त्रीन् सुतान् असूत ॥ ३८ ॥ क्रतोरिति ॥ क्रतोरपि भार्या क्रिया षष्टिसहस्राणि वालखिल्यान् तापसविशेषान् ऋषीन्मन्त्रद्रष्टॄन् अत एव ब्रह्मतेजसा वेदाध्ययनादिजनितप्रभावेण ज्वलतः प्रकाशमानान् असूत॥३९॥ऊर्जायामिति॥ हे परन्तप विदुर वसिष्ठस्य ऊर्जायां तन्नाम्न्यां भार्यायाम् अरुन्धतीत्यस्या एव नामान्तरम् । ते प्रसिद्धाः अमलाः शुद्धमनसः चित्रकेतुः प्रधानो ज्येष्ठः श्रेष्ठो वा येषां ते जज्ञिरे जाताः । ते च तृतीयमन्वन्तरे सप्तर्षयो जाताः ॥४०॥ तानाह—चित्रकेतुरिति॥ चित्रकेतुः सुरोचिश्चेत्याद्याः द्युमदन्ताः सप्तर्षयः वसुभृद्यान इत्येकः । शक्त्यादयस्तु अपरे चित्रकेत्वादिभ्यो अन्ये ज्ञेयाः । अन्यस्यां भार्यायामिति श्रीस्वामिपादाः ॥ ४१ ॥ अथर्वा तृतीयस्कन्धे ब्रह्मपुत्रेष्वगणितोऽपि ब्रह्मपुत्र एव ज्ञेयः । स एव कर्दमजामातृषु सर्वान्ते निरूपितः अथात्रिमरीच्यादिभिस्तस्य समकक्षत्वं ज्ञापयितुमत्र तद्वंश मध्य एव निरूपयति—चित्तिरिति ॥ अथर्वणः पत्नी चित्तिनाम्नी तृतीयस्कन्धे चित्तिरेव शान्तिनाम्ना

पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान् ॥ कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत ॥
ऋषीन्षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा ॥ ३९ ॥ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप ॥ चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः ॥४०॥
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ॥ उल्बणो वसुभृद्यानो द्युमान् शक्त्यादयोऽपरे ॥ ४१ ॥ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृत-
व्रतम् ॥ दध्यञ्चमश्वशिरसं भृगोर्वंशं निबोध मे ॥४२॥ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत् ॥ धातारं च विधातारं श्रियं च भग-
वत्पराम् ॥ ४३ ॥ आयतिं नियतिं चैव सुते मेरुस्तयोरदात् ॥ ताभ्यां तयोरभवतां मृकण्डः प्राण एव च ॥ ४४ ॥ मार्कण्डेयो मृकण्डस्य
प्राणाद्वेदशिरा मुनिः ॥ कविश्च भार्गवो यस्य भगवानुशनाः सुतः ॥ ४५ ॥

निर्दिष्टा । धृतव्रतम् अश्वशिर इव शिरो यस्य तमश्वशिरसं दध्यञ्चं नाम पुत्रं लेभे । अथ मे मया निरूप्यमाणं भृगोर्वंशं निबोध शृणु ॥ ४२ ॥ भृगुरिति ॥ महाभागो भृगुः ख्यात्यां नाम पत्न्यां धातारं च विधातारं चेति पुत्रौ भगवत्परां श्रियं च पुत्रीमिति पुत्रान् अजीजनत् । पुत्रौ च पुत्री च पुत्राः तान् पुत्रान् । "पुमान् स्त्रिया" इत्येकशेषः ॥ ४३ ॥ आयतिमिति ॥ तयोर्धातृविधात्रोः शेषे षष्ठी ताभ्यामित्यर्थः । मेरुः सुमेरुपर्वताभिमानी देवः आयतिं नियतिं च द्वे कन्ये यथाक्रममदात् । ताभ्यां धातृविधातृभ्यां तयोरायतिनियत्योर्मृकण्डनामा प्राणनामा च द्वौ पुत्रावभवतां जातावित्यर्थः ॥ ४४ ॥ मार्कण्डेय इति ॥ मृकण्डस्य मार्कण्डेयनामा मुनिः प्राणाच्च वेदशिरोनामा मुनिरभवत् । कविश्चापि भार्गवः भृगोः पुत्रोऽभूत् । यस्य कवेः भगवान् उशनाः सुतोऽभवत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वे इति अर्द्धम् ॥ हे क्षत्तः विदुर ते सर्वे अत्र नवैते इति त एते इत्यपि पाठौ । मुनयः सर्गैः पुत्रपौत्रादिसंततिभिः त्रीन् लोकान् अभावयन् पूरितवन्तः । एष इति ॥ एष कर्दमस्य दौहित्रो दुहितृसंबन्धी संतानो वंशः तव तुभ्यं कथितः । स च शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः श्रेष्ठश्चेति ॥ ४६ ॥ प्रसूतिमिति ॥ प्रसूतिनाम्नीं मानवीं मनोस्तृतीयां पुत्रीमजात्मजः ब्रह्मणो देहाज्जातो न तु प्राचेतस इत्यर्थः । दक्षः उपयेमे परिणीतवान् । स दक्षस्तस्यां प्रसूत्याममललोचनाः षोडश दुहितॄः कन्याः ससर्ज । अत्रेदं बोध्यम् । धर्मसिद्धितः पूर्वं दक्षस्याभिमानप्राधान्यादभिमानस्य च मनोमूलकत्वात्तस्य च स्वाधिष्ठातृचन्द्राधीनत्वाच्चन्द्रस्य च प्रजापतिसंवत्सरात्मकस्य "स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदशकला ध्रुवैवास्य षोडशी कला" इति बृहदारण्यकश्रुतौ। पञ्चदशरात्रिशब्दवाच्यास्तिथिरूपाः एका स्वरूपभूता ध्रुवा नित्या कला एवं षोडशकलत्वेन प्रसिद्धत्वात्तदभेदविवक्षायामुपचारान्मनसोऽपि षोडशकलत्वमतः षोडश कन्या जाताः ॥ ४७ ॥ त्रयोदशेति ॥ विभुर्दक्षः तासु कन्यासु त्रयोदश धर्मायादात् दत्तवान् । अग्नये एकामदात् । युक्तेभ्यः प्रचेतोवदेकमत्येन मिलितेभ्यः पितृभ्यः एकामदात् । भवच्छिदे संसारनिवर्तकाय भवाय श्रीरुद्राय एकामदात् ॥ ४८ ॥ तासां नामान्याह—श्रद्धेति ॥ एताः श्रद्धामैत्रीदयाद्यास्तत्तत्सात्त्विकशक्तीनामधिष्ठात्र्यो देवता ज्ञेयाः । तदंशाश्च तदनुरूपाः मूर्त्तिः शुद्धसत्वरूपा बुद्धिः एताः धर्मस्य पत्नयः पत्न्यः ह्रस्वत्वमार्षम् ॥ ४९ ॥ श्रद्धेति ॥ श्रद्धा शुभं पुण्यं स्वदृष्टमसूत । अत्र श्रद्धायुक्तस्यैव श्रेष्ठं कर्मफलं भवतीत्यतः श्रद्धायाः शुभः पुत्र इत्यादि स्वयं कल्प्यम् । मैत्री प्रसादमसूत । एवमग्रेप्यसूतेत्यस्यानुषङ्गः । स्मयं धर्मेपूत्साहं स्पष्टमन्यत् ॥ ५० ॥ योगमिति ॥ उन्नतिः पुष्टिवत् दर्पं तपोयोगादिषु सामर्थ्यप्रख्यापनमसूत । प्रश्रयं विनयम् अन्यौ स्मयदर्पावधर्मांशौ ज्ञेयौ ॥ ५१ ॥ मूर्त्तिरित्यर्द्धम् ॥ सर्वेषां गुणानां ज्ञानैश्वर्यवैराग्यशमदमादीनामुत्पत्तिर्यया शुद्धसत्वात्मिकया बुद्ध्या सा तथाभूता सर्वगुणार्णवस्य भगवत उत्पत्तिर्यतः सेति वा मूर्तिर्नरनारायणावृषी असूतेति पूर्वस्यैवानुषङ्गः । साक्षात् क्रियानुक्तिस्तु लौकिकानां प्रसूतिधर्माणां तत्राभावेन तयोरवतारत्वं ज्ञापयितुम् । तत्र नारायणो भगवदवतारः नरस्तु तस्यांशावेशः। "नरो विष्णुसमाविष्टः स्वयं नारायणो हरिः।" ति वचनात्। मूर्त्तिश्च शुद्धसत्वस्वरूपा भगवत्प्रका-

सर्वे ते मुनयः क्षत्तर्लोकान् सर्गैरभावयन् ॥ एष कर्दमदौहित्रसंतानः कथितस्तव ॥ शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ॥ ४६ ॥ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः ॥ तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ॥ ४७ ॥ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः ॥ पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ॥ ४८ ॥ श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः ॥ बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ॥ ४९ ॥ श्रद्धाऽसूत शुभं मैत्री प्रसादमभयं दया ॥ शान्तिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ॥ ५० ॥ योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत ॥ मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ॥ ५१ ॥ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिका शक्तिः॥५२॥ययोरिति॥ययोः नरनारायणयोर्जन्मनि प्रादुर्भावकाले अदः विश्वं सुनिर्वृतमानन्देन व्याप्तं सत् अभ्यनन्दत्।मनांसि ककुभो दिशः वाताः सरितः अद्रयश्च प्रसेदुः । मनोदिग्वातसरिदद्रीणां प्रसादश्च क्रमात् क्रोधादिराहित्यं प्रकाशविशेषः स्पर्शसुखत्वं नैर्मल्यं मण्याद्याविष्कारश्चेति॥५३॥दिवीति ॥ दिवि तुर्याणि वाद्यान्यवाद्यन्त । देवैः कृताः कुसुमवृष्टयश्च धर्मसदने पेतुः।मुनयस्तुष्टाः सन्तः तुष्टुवुः स्तोत्रं चक्रुः।गन्धर्वकिन्नराः जगुः भगवद्यशसो गानं कृतवन्तः ॥ ५४ ॥ नृत्यन्तीति ॥ देव्यः देवानां संबन्धिन्यः स्त्रियोऽप्सरसो नृत्यन्ति स्म।एवं भूमौ दिवि च परमं मङ्गलम् आसीत् । ब्रह्माद्याः सर्वे देवाः धर्मसदन आगत्याभिष्टवैः स्तोत्रैर्भगवन्तम् उपतस्थुः स्तुतिं चक्रुः । तङभाव आर्षः ॥ ५५ ॥ य इति॥खे आकाशे घटाकाशमठाकाशादिरूपभेदमिव क्लैब्यमार्षम्।गन्धर्वनगरमिव वा मेघवृन्दमिव वा यस्मिन् आत्मनि अधिष्ठाने निजया मायया इदं विश्वं रचितं तस्यात्मनः प्रतिचक्षणाय उपदेशादिना प्रकाशनाय एतेन प्रत्यक्षेण ऋषिर्मूर्त्तिर्यस्मिन् तेन रूपेण प्रकृत्यादित्वात्तृतीयाय आत्मानमद्य धर्मसदने प्रादुश्चकार ।

ययोर्जन्मन्यदो विश्वमभ्यनन्दत्सुनिर्वृतम् ॥ मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः ॥ ५३ ॥ दिव्यवाद्यन्त तूर्याणि पेतुः कुसुमवृष्टयः ॥
मुनयस्तुष्टुवुस्तुष्टा जगुर्गन्धर्वकिन्नराः ॥ ५४ ॥ नृत्यन्ति स्म स्त्रियो देव्य आसीत्परममङ्गलम् ॥ देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः ॥ ५५ ॥
देवा ऊचुः ॥ यो मायया विरचितं निजयाऽऽत्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय ॥ एतेन धर्मसदने ऋषिमूर्तिनाऽद्य प्रादुश्चकार पुरुषाय
नमः परस्मै ॥ ५६ ॥ सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान् सत्त्वेन नः सुरगणाननुमेयतत्त्वः ॥ दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनि-
केतममलं क्षिपताऽरविन्दम् ॥५७॥ एवं सुरगणैस्तात भगवन्तावभिष्टुतौ॥ लब्धावलोकैर्ययतुरर्चितौ गन्धमादनम् ॥५८॥ ताविमौ वै भागवतो
हरेरंशाविहागतौ ॥ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ५९ ॥

यद्वा । य ऋषिमूर्तिना रूपेण प्रादुः प्रादुर्भावं चकार।तस्मै परस्मै पुरुषाय नमः॥५६॥सोऽयमिति ॥ सृष्ट्यादिकार्यलिङ्गेनानुमेयं न त्वस्माकमपरोक्षे तत्वं महिमा यस्य सोऽयमवतीर्णो भवान् स्थितिव्यतिकरोपशमाय स्थितेर्जगन्मर्यादायास्तत्तन्नियमस्य व्यतिकरः सङ्करः विघ्नैरन्यथाभावस्तस्योपशमाय निवृत्तये सत्त्वेन गुणेन सृष्टान् भगवतोत्पादितान्नोऽस्मान् सुरगणान् अदभ्रा अनल्पा करुणा कृपा यत्र तादृशेन श्रियो निकेतं यत् अमलं शुद्धम् अरविन्दं तत् क्षिपता स्वसौन्दर्येण तापहारकत्वेन च तिरस्कुर्वता अवलोकनेन नेत्रेण दृश्यात् पश्यतु ॥ ५७ ॥ एवमिति ॥ हे तात विदुर सुरगणैर्देवसमूहैः ब्रह्मादिभिरेवं पूर्वोक्तप्रकारेणाभिष्टुतौ स्तुतिपूर्वकं प्रार्थितौ तत्प्रार्थनानुसारेण कृपादृष्ट्या तानवलोक्य पुनश्च लब्धोऽवलोको यैस्तैः सुरगणैर्गन्धपुष्पादिभिरर्चितौ पूजितौ गन्धमादनं पर्वतं तपः सिद्धैः सेवितं तपश्चरितुं ययतुः जग्मतुः ॥ ५८ ॥ ताविति ॥ तौ हि प्रसिद्धाविमौ नरनारायणौ भगवतो हरेरंशौ अवताररूपौ कृष्णौ यदूनुद्वहति पालयतीति यदूद्वहः कृष्णः देवकीपुत्रः कुरून् उद्वहतीति कुरूद्वहः कृष्णः कुन्तीपुत्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति तौ उभौ कृष्णनामानौ भुवः भारव्ययाय इहास्मिन् भारते समागतौ तत्रार्जुनेंऽशमात्रं श्रीकृष्णस्तु स्वयं भगवानेव । अर्जुने तु नरावेशः "कृष्णो नारायणः स्वयम्" इति तन्त्रवचनात् । नरनारायणौ बदरिकाश्रमस्थौ अपि मूर्तिभेदेनात्रावतीर्णौ । यद्वा । ताविमौ हरेरंशौ नरनारायणौ कर्तारौ इह द्वापरान्ते यदूद्वहकुरूद्वहौ कृष्णौ कर्मभूतौ आगतौ प्राप्तौ । कृष्णार्जुनयोः स्वांशिनोस्तावंशौ प्रविष्टावित्यर्थः । तथैव भागवतामृतोक्ता कारिका । यथा "कर्तारौ तौ हरेरंशौ नरनारायणावृषी । द्वापरान्ते कर्मभूतावायातौ कृष्णफाल्गुनौ ॥" इति । तथा चात्र अंशाविति प्रथमान्तं कृष्णफाल्गुनाविति द्वितीयान्तम् ॥ ५९ ॥ स्वाहेति ॥ अभिमानिनः अङ्ग्यभिमानिदेवतारूपात् अग्नेः सकाशात् स्वाहा अग्निस्त्रीहुतभोजनमिति त्रयाणां विशेषणम् । पावकं पवमानं च शुचिं चेति त्रीन् आत्मजान् अजीजनत् । "निर्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः । यश्चासौ तपते सूर्यः शुचिरग्निस्त्वसौ स्मृतः ॥" इति कूर्मोक्तेस्तद्विशेषो ज्ञेयः । यद्वा । अभिमानिनः सर्वाग्नीनामभिमानिनो देवानित्यात्मजविशेषणम् ॥ ६० ॥ तेभ्य इति ॥ तेभ्यः पावकपवमानशुचिनामभ्यः पञ्चचत्वारिंशदग्नयः समभवन् जाताः । तत्र चत्वारिंशद्विकृतिसंबन्धिनः पञ्च प्रकृतिसंबन्धिनः त एव स्वपितृभिः पावकपवमानशुचिभि-

स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ॥ पावकं पवमानं च शुचिं च हुतभोजनम् ॥ ६० ॥ तेभ्योऽग्नयः समभवंश्चत्वारिंशच्च
पञ्च च ॥ त एवैकोनपञ्चाशत् साकं पितृपितामहैः ॥ ६१ ॥ वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः ॥ आग्नेय्य इष्टयो यज्ञे निरूप्यन्तेऽग्नयस्तु ते ॥ ६२ ॥ अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः ॥ साग्नयोऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ॥ ६३ ॥
तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा ॥ उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥६४॥ भवस्य पत्नी तु सती भवं देवमनुव्रता ॥
आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥ ६५ ॥

स्त्रिभिः स्वपितामहेन मूलपुरुषरूपेणैकेन चाग्निना सहैकोनपञ्चाशज्जाता इत्यर्थः ॥ ६१ ॥ वैतानिक इति ॥ वैतानिके वेदप्रतिपादिते यज्ञरूपे कर्मणि येषामग्नीनां नामभिः ब्रह्मवादिभिः कर्मकाण्डनिष्णातैराग्नेय्यः अग्निदेवताका इष्टयो निरूप्यन्ते क्रियन्ते निपूर्वस्य रूपधातोरिदं ह्रस्वपाठे तु निःपूर्वस्य वपतेरुपसर्गबलाल्लब्धदानार्थस्येति । ते एवैतेऽग्नयो न लौकिकाः अतो न बहूनां वैयर्थ्यम् इति भावः ॥ ६२ ॥ दक्षस्य स्वधाख्यकन्याया वंशमाह—अग्निष्वात्ता इति ॥ अग्नौ पक्वं पुरोडाशादि ये स्वदन्ते ते अग्निष्वात्ताः बर्हिषदो दैत्यादीनां पितरः सौम्याः सोमपास्तेऽग्निष्टोमादिकर्मदेवतारूपाः पितरः पुरोडाशादिभुजो दर्शपौर्णमासादिकर्मदेवताः आज्यपा आघाराज्यभागदेवताः एतेषु च येषामग्नौकरणमस्ति ते साग्नयः एतद्रहितास्तेऽनग्नयः तेषामेवं विभक्तानां दाक्षायणी दक्षकन्या स्वधानाम्नी पत्नी अभवत् ॥ ६३ ॥ तेभ्य इति ॥ सा हि स्वधा सर्वपितृशक्तिरूपा तेभ्यः पितृभ्यो वयुनां धारणीमिति नाम्न्यौ द्वे कन्ये गर्भे दधार । वयुनामित्यत्र मेनामिति वा पाठः । उभे ते कन्ये ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे चास्ताम् । अतस्तयोर्जीवन्मुक्तत्वात्सन्ततिर्न जातेति भावः ॥ ६४ ॥ भवस्येति ॥ सती हि

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

दक्षस्याभिमानांशाज्जाताऽतो ब्रह्मणाहङ्काराधिष्ठात्रे भवाय दापिता सा च तस्य पत्नी तं देवं पुत्रदाने समर्थमप्यनुव्रता तत्सेवातत्परापि गुणशीलाभ्यामात्मनः सदृशं योग्यं पुत्रं न लेभे न प्राप्तवती । गुणशीलतः आत्मनः सदृशं देवमनुव्रतापि सती पुत्रं न लेभे इति वान्वयः ॥ ६५ ॥ तत्र हेतुः—पितरीति ॥ स्वे पितरि दक्षे भवाय अनागसे निरपराधाय " क्रुधद्रुह० " इति सम्प्रदाने चतुर्थी।रुषा हेतुना अप्रतिरूपे प्रतिकूलाचारपरे सति अप्रौढैव सती आत्मना स्वयमेव न त्वन्येन प्रेरिता योगमास्थिता भवं भावयन्ती अग्निधारणामाश्रित्य आत्मानं देहमजहात् त्यक्तवती अतः पुत्रं न लेभे ॥ ६६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्यादिमे निरमादिमाम् ॥ १ ॥

द्वितीये विश्वसृग्यज्ञे विद्वेषो रुद्रदक्षयोः ॥ मिथस्तत्पक्षशापोऽत्र श्लोकाः सार्द्धाः शराग्नयः[३५] ॥ चत्वार्युवाचेति[४] साङ्घ्रिः षट्त्रिंशच्चाप्यनुष्टुभः[३६] ॥ २ ॥ भव इति ॥ दुहितृवत्सलोऽपि दक्षः आत्मजां सतीम् अनादृत्य शीलवतां श्रेष्ठेऽपि भवे श्रीरुद्रे कस्माद्विद्वेषमकरोत् । भवस्य सौशील्यात् दक्षस्य तत्प्रीत्यभावेऽपि दुहितृवात्सल्याद्भवद्वेषो न घटत इति

पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ॥ अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ॥ ६६ ॥ इति श्रीभागवते चतुर्थस्कन्धे मनुकन्यान्वये नरनारायणावतारवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ विदुर उवाच ॥ ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीम् ॥ १ ॥ कस्तं चराचरगुरुं निर्वैरं शान्तविग्रहम् ॥ आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥ २ ॥ एतदाख्याहि मे ब्रह्मञ्जामातुः श्वशुरस्य च ॥ विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती ॥ ३ ॥ मैत्रेय उवाच ॥ पुरा विश्वसृजां सत्रे समेताः परमर्षयः ॥ तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः ॥ ४ ॥ तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा ॥ भ्राजमानं वितिमिरं कुर्वन्तं तन्महत् सदः ॥ ५ ॥ उदतिष्ठन् सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः ॥ ऋते विरिञ्चं शर्वं च तद्भासाक्षिप्तचेतसः ॥ ६ ॥

भावः ॥ १ ॥ क इति ॥ कः प्रजापतिर्दक्षः चराचराणां गुरुं पूज्यं निर्वैरं शान्तं भावे क्तः । शान्तिरेव विग्रहो यस्य शान्तिरूपम् आत्मारामं जगतो महत् दैवतं तं श्रीशिवं कथं द्वेष्टि स्म । यद्वा । चराचरगुरुं जगतो दैवतं च को नाम द्वेष्टि निर्वैरं च कथं द्वेष्टीत्यन्वयः । गुरुर्हि वैरवानप्यशान्तदेहोऽपि बहिर्दर्श्यपि जगदनादृतोऽपि न द्वेषार्हः किमुत निर्वैरादिमान् ॥ २ ॥ एतदिति ॥ हे ब्रह्मन् यतः हेतोः जामातुः शिवस्य श्वशुरस्य दक्षस्य च विद्वेषः अभूत् । यतश्च सती दुस्त्यजानपि प्राणान् तत्यजे तत्याज । तदर्थः । एतत् मे मह्यमाख्याहि ॥ ३ ॥ पुरेति ॥ पुरा प्रथमकल्पे स्वायंभुवमन्वन्तरे विश्वसृजां मरीच्यादीनां सत्रे यत्र ऋत्विगादयो गुणप्रधानभावं त्यक्त्वाहमहमिकया कर्म कुर्वन्ति सर्वे चाविशेषेण फलभागिनो भवन्ति तत्सत्रसंज्ञको यागविशेषस्तत्र सानुगाः शिष्यादियुक्ताः परमर्षयो वसिष्ठनारदादयः प्रसिद्धा ऋषयस्तथामरगणा इन्द्रादयः साध्यादयश्च सर्वेऽपि मुनयोऽग्नयश्च पूर्वोक्ताः समेताः मिलिता आसन्निति शेषः ॥ ४ ॥ तत्रेति द्वयम् ॥ रोचिषा प्रकाशेन तन्महत्सदः तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महतीं सभां वितिमिरमन्धकाररहितं कुर्वन्तमर्कमिव भ्राजमानं प्रकाशमानं तत्र प्रविष्टं दक्षमिति शेषः । दृष्ट्वा विरिञ्चं ब्रह्माणं शर्वं शिवं च ऋते तस्य दक्षस्य भासाऽऽक्षिप्तमभिभूतं तेजो येषां ते सहाग्नयः अग्निभिः सहिताः सदस्या ऋषयश्च स्वधिष्ण्येभ्यः स्वासनेभ्य उदतिष्ठन् उत्थिताः ॥ ५ ॥ ६ ॥ सदस इति ॥ भगवान् दक्षः सदसस्पतिभिः सभ्यमुख्यैः साधु सम्यक् सत्कृतः सम्मानितो लोकगुरुं सर्वप्राणिश्रेष्ठं पूज्यमजं ब्रह्माणं नत्वा तस्याज्ञया निषसाद उपविवेश ॥ ७ ॥ प्रागिति ॥ स्वोपवेशनात् प्राक् पूर्वमेव निषण्णमासीनं मृडं शिवं दृष्ट्वा तेन शिवेन अनादृतः अभ्युत्थानाभावेन असत्कृतः सः दक्षः न अमृष्यत् शिवकृतावमानं नासहत ।ततश्च वामं वक्रं यथा स्यात्तथा अभिवीक्ष्य चक्षुर्भ्यां शिवं दहन्निव सदस्यान् प्रत्युवाच ॥ ८ ॥ श्रूयतामिति ॥ हे देवादिभिः सह वर्तमाना ब्रह्मर्षयः साधूनां वृत्तमाचारं ब्रुवतः अज्ञानात् भ्रमान्न ब्रुवतः मत्सरात्परोत्कर्षासहनाच्च न ब्रुवतः । मे मम वचनं भवद्भिः श्रूयताम् ॥ ९ ॥ अयमिति ॥ निरपत्रपः निर्लज्जः अयं शिवस्तु लोकपालानां यशोघ्नः तुल्यजातीनां सतामेकस्याप्रतिष्ठायां सर्वेषामेव दुर्यशो लोकैरुद्घुष्यतेऽतः लोकपालेषु सदाचारो नष्ट इति सामान्यप्रवादहेतुत्वात्तेषां यशोनाशको जातः । यतः येन स्तब्धेन सदाचाररहितेन ध्वस्तेनेति पाठे भ्रष्टेन सद्भिः

सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः ॥ अजं लोकगुरुं नत्वा निषसाद तदाज्ञया ॥ ७ ॥ प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः ॥ उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ॥८॥ श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः ॥ साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात्॥९॥अयं तु लोकपालानां यशोघ्नो निरपत्रपः ॥ सद्भिराचरितः पन्था येन स्तब्धेन दूषितः ॥ १० ॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् ॥ पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ॥ ११ ॥ गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः ॥ प्रत्युत्थानाभिवादार्हे वाचाऽप्यकृत नोचितम् ॥ १२ ॥

आचरितः पन्था मार्गो दूषितः दक्षेण निन्दायां प्रवर्तितापि भारती श्रीरुद्रं स्तौत्येव । तथाहि अमितयशःशालित्वात् लोकपालानां यशस्तिरस्कर्त्ता निरपत्रपः सर्वापेक्षया महत्त्वात् सर्वेभ्यो निःशङ्कः । यद्वा । निर्गता अपत्रा त्राणं भावेऽङ् येषां ते निरपत्रास्तान् अशरणान् पातीति निरपत्रपः अत एव "वृक्ष इव दिवि तिष्ठति" इति श्रुतेः । स्तब्धेन स्थितरूपेण येन सद्भिराचरितोऽपि अभ्युत्थानादिः पन्थाः दूषितः त्यक्तः सर्वेषामेतदपेक्षया कनिष्ठत्वात् ॥ १० ॥ एष इति ॥ यद्यस्मात् साधुवत् विप्राग्निमुखतः विप्राग्निसम्मुखे सावित्र्या इव पवित्राया मे दुहितुः पाणिमग्रहीत् अतः एष मे शिष्यतां प्राप्तः । स्तुतौ तु यद्यप्येष मे दुहितुः पाणिमग्रहीत् तथापि सर्वेषामीश्वर एष किं मे शिष्यतां प्राप्तः अपि तु नेत्यर्थः । साधुवत् साधोरिव वस्तुतस्त्वसाधोर्मम । यद्वा एषः मे अशिष्यतामशिष्टतां गुप्तामपि सर्वज्ञत्वात्स्वयं प्राप्तः ज्ञातवान् तथापि सावित्र्या इव सद्गुणशालिन्यास्तस्याः पाणिं गुणज्ञतयैवाग्रहीत् ॥ ११ ॥ गृहीत्वेति ॥ मर्कटस्य लोचने इव लोचने यस्य तादृगप्ययं मृगशावस्याक्षिणी इवाक्षिणी यस्यास्तस्या मत्पुत्र्याः पाणिं गृहीत्वा प्रत्युत्थानाभिवादार्हे मयि वाचापि उचितं प्रणामादि न अकृत नाकरोत् । स्तुतौ तु मर्कटेष्विव विषयलम्पटेष्वपि मादृशेषु लोचनं कृपादृष्टिर्यस्य सः अयोग्यस्यापि

CC-0. In Public Domain. Digitization by eGangotri

मम कन्यायाः कृपया पाणिं गृहीत्वा ममाभिमानातिशयं दृष्ट्वा कृपया तन्निवृत्तये प्रत्युत्थानाभिवादार्हे मयि वाचाप्युचितं न अकृत ॥ १२ ॥ लुप्तेति ॥ लुप्ताः क्रिया यस्य तस्मै अशुचये मानिने भिन्नसेतवे अमर्यादाय शिवाय शूद्राय उशतीं कमनीयां वेदलक्षणां गिरमिव बालां पुत्रीम् अनिच्छन्नपि अदां दत्तवानस्मि। स्तुतौ तु ब्रह्मत्वाल्लुप्तक्रियाय आ सर्वतः शुचये अमानिने अभिन्नसेतवे चास्मै परमेश्वराय स्वस्यायोग्यत्वमवेक्ष्यानिच्छन्नपि यथा ब्रह्मवेषधराः शूद्रा एव ब्राह्मणायापि लोभादिना वेदवाचं ददति अध्यापयन्ति तथा बालाम् अदाम् । शूद्रायेवेत्यत्र शूद्रा एवेति च्छेदः। "भोभगो" इत्यनेन कृतो यकारो लोपस्य वैकल्पिकत्वान्न लुप्तः॥ १३॥ प्रेतेति॥घोरेषु प्रेतानामावासेषु स्थानेषु प्रेतादिभिर्वृतः व्युप्तकेशः प्रकीर्णकेशः नग्नो दिगम्बरः उन्मत्तवद्धसन् रुदन्नटति । स्तुतावपि स्वातन्त्र्यबोधनम् । उन्मत्तवन्नतु उन्मत्तः ॥ १४ ॥ चितेति सार्द्धम् ॥ चिताभस्मना कृतं स्नानं येन स तथा प्रेतानां मुण्डकल्पिताः स्रजो मालाः यस्य स प्रेतस्रक् नृणामस्थीनि भूषणानि यस्य स नृस्थिभूषणः।प्रेतास्थिग्रन्थिभूषण इति पाठान्तरम् । शिव इत्यपदेशो नाममात्रं यस्य सः हीति वास्तवे।वस्तुतस्तु अशिवः अमङ्गलरूप एव यतः स्वयं मत्तो निषिद्धाचारः तथाभूता मत्ता एव जनाः प्रिया यस्य स तथाभूतश्चेति

लुप्तक्रियायाशुचये मानिने भिन्नसेतवे ॥ अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरम् ॥ १३ ॥ प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन् रुदन् ॥ १४ ॥ चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः ॥ शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः ॥ पतिः प्रमथभूतानां तमोमात्रात्मकात्मनाम् ॥ १५ ॥ तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे ॥ दत्ता बत मया साध्वी चोदिते परमेष्ठिना ॥ १६ ॥ मैत्रेय उवाच ॥ ॥ विनिन्द्यैवं स गिरिशमप्रतीपमवस्थितम् ॥ दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे ॥ १७ ॥ अयं तु देवयजन इन्द्रोपेन्द्रादिभिर्भवः ॥ सह भागं न लभतां देवैर्देवगणाऽधमः ॥ १८ ॥

तमोमात्रात्मकः केवलं तमोरूपः आत्मा स्वभावो येषां ते तथा तेषां प्रमथभूतानां पतिः स्वामी । स्तुतौ तु प्राप्तसिद्धिर्वैष्णवानां चिताभस्मेत्यादिपुराणान्तरे प्रसिद्धमिति चक्रवर्त्ती । शिवो मङ्गलरूपोपदेशो नामव्याहारो यस्य अतः नास्त्यन्यः शिवो यस्मात् अमत्तः अमत्तजनप्रियश्च तामसानामपि प्रमथादीनां पतिः कृपया पालकः ॥ १५ ॥ तस्मा इति ॥ बत खेदे । ममेच्छाभावेऽपि परमेष्ठिना ब्रह्मणा चोदिते प्रेरणे कृते सति मया उन्मादानां भूतविशेषाणां नाथाय नष्टशौचाय दुर्हृदे दुष्टचित्ताय तस्मै रुद्राय साध्वी सती दत्ता । स्तुतौ तु बत हर्षे । परमेष्ठिना चोदिते सति उन्मादान्नाथते उपतापयति तस्मै नष्टानामपि शौचं यस्मात् दुष्टेष्वपि हृत्सदयं मनो यस्य तस्मै मया साध्वी दत्ता ॥ १६ ॥ विनिन्द्येति ॥ क्रुद्धो दक्षः अप्रतीपमप्रतिकूलं यथा भवत्येवं स्थितमपि गिरिशं शिवमेवं पूर्वोक्तप्रकारेण दक्षो विनिन्द्य अथ तदनन्तरमप उपस्पृश्य हस्तपादादिक्षालनाचमनादि कृत्वा शप्तुं शापं दातुं प्रचक्रमे प्रारम्भं कृतवान् ॥ १७ ॥ अयमिति ॥ देवानां यजने यज्ञे देवगणेष्वधमः अयं भवः इन्द्रोपेन्द्रादिभिः देवैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सह स्वहविर्भागं न लभताम् । स्तुतौ तु देवगणा अधमा यस्मात्सः अयं भवः देवैः सह भागं न लभतां किंतु अग्रभोजित्वात्पूर्वमेव लभताम् । यद्वा । सर्वस्वामित्वात् तेषु भुक्तवत्सु सत्सु पश्चाल्लभताम् । अतः पुनर्यज्ञसन्धाने तथैव भविष्यतीति ज्ञेयम् ॥ १८॥ निषिध्यमान इति ॥ हे कौरव्य विदुर सदस्यमुख्यैर्ब्रह्मादिभिः शापदानं निन्दनं च मा कुर्विति निषिध्यमानोऽपि स दक्षो गिरित्राय शापं विसृज्य दत्वा सभ्यवचनानादरेण द्वेषोत्पादनात् विवृद्धमन्युः सन् तस्मात् स्थानाद्विनिष्क्रम्य निःसृत्य निजं निकेतनं स्वगृहं प्रति जगाम ॥ १९ ॥ विज्ञायेति ॥ एवं श्रुत्वापि शिवे तूष्णीं स्थिते गिरिशस्यानुगानां पार्षदानामग्रणीर्मुख्यः अत एव रोषकषायेण रोषदोषेण दूषितः देहप्रकम्परक्तनेत्रादिविकारं प्राप्तः नन्दीश्वरः दक्षाय तथा ये च तत्र द्विजाः तदवाच्यतां तस्य शिवस्यावाच्यतां निन्दामन्वमोदंस्तेभ्यश्च तङ्भाव आर्षः । दारुणं शापं विससर्ज दत्तवान् ॥ २० ॥ य इति ॥ अज्ञः पृथग्दृष्टिर्भेददर्शी यो दक्षः एतन्मर्त्यं मरणधर्मकं स्वशरीरमुद्दिश्य उत्कृष्टं मत्वा अप्रतिद्रुहि प्रतिद्रोहमकुर्वति भगवति शिवे द्रुह्यति अतः तत्वतः

निषिध्यमानः स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापम् ॥ तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनम् ॥ १९ ॥ विज्ञाय शापं गिरिशानुगाग्रणीर्नन्दीश्वरो रोषकषायदूषितः ॥ दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः ॥ २० ॥ य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥ २१ ॥ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ॥ कर्मतन्त्रं वितनुते वेदवादविपन्नधीः ॥ २२ ॥ बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ॥ स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ॥ २३ ॥ विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः ॥ संसरन्त्विह ये चामुमनु शर्वावमानिनम् ॥ २४ ॥ गिरः श्रुतायाः पुष्पिण्या मधुगन्धेन भूरिणा ॥ मथ्ना चोन्मथितात्मानः संमुह्यन्तु हरद्विषः ॥ २५ ॥

ज्ञानात् विमुखः प्रच्युतो भवेत्॥२१॥गृहेष्विति ॥ कूटाः कपटप्रधानाः धर्मा येषु तेषु गृहेषु अनिजभाव आर्षः । गृहेषु कूटा ये धर्माः तेष्विति वा ग्राम्यसुखेच्छया तुच्छविषयसुखलाभाय सक्तः वेदवादैः "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति"इत्याद्यर्थवादैः विपन्ना तत्वविचारासमर्था धीर्यस्य तादृक् सन् कर्मतन्त्रं कर्मकाण्डं वितनुतां वितनुतात् । वितनुते इति पाठः ॥ २२ ॥ बुद्ध्येति ॥ परो देहादिस्तमेवात्मत्वेनाभितो ध्यातुं शीलं यस्यास्तया बुद्ध्या विस्मृता आत्मनः स्वस्य गतिस्तत्वज्ञानं येन अत एव पशुः पशुतुल्यः स दक्षः अतितरां स्त्रीकामः अस्तु तथा अचिरादेव बस्तमुखः छागमुखः अस्तु ॥ २३ ॥ विद्येति ॥ असौ कर्ममय्यां कर्मात्मिकायामविद्यायां विद्येति बुद्धिर्यस्य अतोऽसौ जडः शापयोग्यश्च अज इति पाठे छागतुल्यः द्विजान् शपति शर्वं शिवमवमन्यते तं शर्वावमानिनममुं दक्षं ये अनु अनुवर्त्तन्ते ते सर्वे इह संसारे संसरन्तु जन्ममरणादिक्लेशमनुभवन्तु ॥ २४ ॥ गिर इति ॥ श्रुतायाः वेदरूपायाः पुष्पिण्याः पुष्पाणीवार्थवादा मनःक्षोभकत्वात् सन्ति यस्याः अर्थवादबहुलाया इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरः वाचः मधुगन्धतुल्येन प्ररोचनेन भूरिणा मध्वा मनःक्षोभकेनोन्मथित आत्मा मनो येषां ते हरद्विषः संमुह्यन्तु कर्मस्वासक्ता भवन्तु ॥ २५ ॥ सर्वेति ॥ जिह्वाधीनतया सर्वं भक्षयन्ति ते सर्वभक्षाः तथा वित्तेषु देहेन्द्रियेषु च अहंतया ममतया च आरमन्ति ते वित्तदेहेन्द्रियारामाः तथा वृत्त्यै जीविकार्थमेव धृतानि विद्यातपोव्रतानि यैस्ते याचका याचनस्वभावाः हरद्विषो द्विजा एवंभूताः सन्त इह संसारे विचरन्तु ॥२६॥ तस्येति ॥ तस्य नन्दिनः एवं द्विजकुलाय शापं ददतः वदत इति वा पाठः । शापं श्रुत्वा भृगुः ब्रह्मदण्डरूपं दुरत्ययं शापं प्रत्यसृजत् प्रतिकूलतया दत्तवान् ॥ २७ ॥ भवेति ॥ ये भवव्रतधराः ये च तान् व्रतधारिणः समनुव्रताः अनुसरन्ति ते सच्छास्त्रस्य वेदस्य परिपन्थिनो विरोधिनः भूत्वा पाखण्डिनः भवन्तु ॥ २८ ॥ नष्टेति ॥ नष्टं शौचं शुद्धत्वं येषां ते मूढाविवेकाऽकुशला धीर्येषां ते जटाभस्मास्थिधारिणः चेति ॥ यत् यस्मात् सन्तः शिवदीक्षायां विशन्तु । यत्र यस्यां शिवदीक्षायां सुरा गौडी पैष्टी माध्वी आसवस्तालादिसंभवमद्यविशेषस्तत्समाहारः सुरासवं तदेव दैवत्वेनादरणीयम् ॥ २९ ॥ ब्रह्म

सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः ॥ वित्तदेहेन्द्रियारामा याचका विचरन्त्विह ॥ २६ ॥ तस्यैवं ददतः शापं श्रुत्वा द्विजकुलाय वै ॥
भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययम् ॥ २७ ॥ भवव्रतधरा ये च ये च तान् समनुव्रताः ॥ पाखण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिनः
॥ २८ ॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः ॥ विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम् ॥ २९ ॥ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परि-
निन्दथ ॥ सेतुं विधारणं पुंसामतः पाखण्डमाश्रिताः ॥ ३० ॥ एष एव हि लोकानां शिवः पन्था सनातनः ॥ यं पूर्वे चानु संतस्थुर्यत्प्रमाणं
जनार्दनः ॥ ३१ ॥ तत् ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम् ॥ विगर्ह्य यात पाखण्डं दैवं वो यत्र भूतराट् ॥ ३२ ॥ मैत्रेय उवाच ॥ ॥
तस्यैवं ददतः शापं भृगोः स भगवान् भवः ॥ निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥ ३३ ॥

यूयं पुंसां पुरुषार्थेच्छूनां सेतुं मर्यादारूपं विधारणं धारकं च ब्रह्म वेदं तदर्थज्ञान् ब्राह्मणांश्च परिनिन्दथ अतः पाखण्डं वेदविरुद्धमार्गमेवाश्रिताः ॥३०॥ एष इति ॥ एष एव लोकानां वर्णाश्रमाचारनियामकः शिवः तत्तत्फलजनकत्वात् शुद्धः सनातनः पन्थाः मार्गः एतद्विरुद्धमार्गोऽकल्याणकर इत्याशयः । यं वेदमार्गं पूर्वे ब्रह्मादयोऽनुसंतस्थुः तदुक्तं धर्ममनुष्ठितवन्तः तङ्भाव आर्षः । यस्य प्रमाणं मूलं जनार्दनः ॥३१॥ तदिति ॥ तत्पूर्वोक्तं परमं तत्वं प्रमाणभूतं शुद्धं सतां सनातनं वर्त्म मार्गं तत् ब्रह्म वेदं विगर्ह्य विनिन्द्य पाखण्डं यात गच्छत । यत्र मार्गे वो युष्माकं दैवं भूतराट् भूतानां तामसानां राजा महाभैरवोऽस्ति । स्तुतौ तु भूतेषु प्राणिषु राजत इति ॥३२॥ तस्येति ॥ तस्य भृगोरेवं पूर्वोक्तप्रकारेण शापं ददत एव स प्रसिद्धो भगवान् भवः अन्योन्यशापादुभयोर्नाश इति किंचिद्विमना इव सानुगस्ततः स्थानान्निश्चक्राम । स्वगमनानन्तरं स्वीयः कश्चित्सत्रे विघ्नं कुर्यादित्यनुगान्गृहीत्वा जगामेति विमनस्त्वं च पाखण्डोत्पत्तिवशात् स्वस्य क्षत्यभावात् किंचिदित्युक्तम्। इवेत्यनेन किंचित्तदभिप्रेतमपि जातमिति सूचितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाखण्डशास्त्रस्य तत्प्रणीतत्वेन तत्प्रवृत्तिरपि तस्याभिप्रेता । तदुक्तं पाद्मोत्तरखण्डीयगुणत्रयविवरणाध्याये पार्वतीं प्रति शङ्करेणैव । "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् । येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥ प्रथमं हि मया प्रोक्तं शैवं पाशुपतादिकम् । मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् ॥" इति श्रीरुद्रस्य तादृक्च्छास्त्रप्रणयनं च सर्वमार्गभ्रष्टानां पतितानां सन्मार्गं नेतुं कथंचिदप्यशक्यानां प्रायश्चित्तानर्हाणां तत्राधिकारार्थं शापोऽपि वेदमार्गं परित्यज्य वामादिमार्गेण शिवमर्चतामेव । वस्तुतस्तु वामादिमार्गाणां सर्वैः प्रामाणिकैरप्रामाणिकत्वेन व्यवस्थापनात् तान् प्रति न शास्त्रव्यापारः अपि तु सामान्यतः कलिप्रभावात्स्वमतिकल्पितनानाविधपाखण्डमार्गैर्मद्यादिप्रधानैरुपचारैराराधनकर्तॄन् प्रत्येव । तेष्वेव च वामादिमार्गा अपीति वेदाद्युक्तमार्गेण शिवमर्चतां तु न कोऽपि दोषो नापि शापप्रसक्तिः ॥ ३३ ॥ तेऽपीति द्वयम् ॥ हे महेष्वास विदुर ते विश्वसृजो मरीच्यादयः यत्र यस्मिन् सत्रे ऋषभः सर्वदेवाधिदेवो हरिः भक्तानां दुःखहर्ता इज्यः पूज्यः तत्सहस्रपरिवत्सरान् सहस्रपरिवत्सरसाध्यं स्वसत्रं संविधाय समाप्य यत्र प्रयागे यमुनयाऽन्विता गङ्गाऽस्ति तत्र अवभृथं स्नानमाप्लुत्य कर्मसाङ्गतासिद्ध्यै कृत्वा विरजेनात्मना निर्मलान्तःकरणेन युक्ताः सर्वे ततः स्थानात् स्वं स्वं धाम

तेऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् ॥ संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ॥ ३४ ॥ आप्लुत्यावभृथं यत्र गङ्गा यमुनयान्विता ॥ विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ॥ ३५ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे दक्षशापवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ मैत्रेय उवाच ॥ ॥ सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः ॥ जामातुः श्वशुरस्यापि सुमहानतिचक्रमे ॥ १ ॥ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना ॥ प्रजापतीनां सर्वेषामाधिपत्ये स्म योऽभवत् ॥ २ ॥ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च ॥ बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥ ३ ॥

गृहं ययुः ॥ ३४ ॥ ३५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य द्वितीये निरमादिमाम् ॥२॥ तृतीये तु सतीं दक्षयज्ञं जिगमिषुं शिवः ॥ अवारयन्नीतिवाक्यैस्तत्र श्लोका मरुद्दृशः ॥ अनुष्टुभश्चतुस्त्रिंशदुवाचेति चतुष्टयम् ॥ ३ ॥ सदेति ॥ एवं सदा विद्विषतोरेव ध्रियमाणयोः धृङ् अवस्थान इति धातोरवतिष्ठमानयोर्जामातुः श्वशुरस्यापि भवदक्षयोः सुमहान् कालोऽतिचक्रमे व्यतीतः । केवलं दक्षस्यैव द्वेषकर्तृत्वेऽपि छत्रिन्यायेनोभयोर्द्वेषकर्तृत्वमुक्तम् ॥ १ ॥ यदेति ॥ यदा तु दक्षः सर्वेषां प्रजापतीनां मरीच्यादीनामाधिपत्ये मुख्यत्वेन नियामकत्वे ब्रह्मणा परमेष्ठिनाऽभिषिक्तस्तदा तस्य स्मयो गर्वोऽभवत् ॥२॥ इष्ट्वेति ॥ सोऽतिगर्वितो दक्षो ब्रह्मिष्ठान् भवं तत्पक्षीयांश्चाभिभूय भागदानामन्त्रणाद्यकरणेन तिरस्कृत्य वाजपेयसंज्ञकेन यागेनेष्ट्वा क्रतुषु उत्तमं बृहस्पतिसवं नामकं यागविशेषं कर्तुं समारेभे इति ब्राह्मणस्य बृहस्पतिसवो मुख्यस्तत्पूर्वाङ्गत्वेन वाजपेयानुष्ठानं "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इति श्रुतेः । यद्यपि रुद्ररहितो यागो नास्त्येव तथापि द्वेषगर्वाभ्यां दक्षो विधिमप्यतिचक्राम ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्निति ॥ तस्मिन् बृहस्पतिसवे सर्वे ब्रह्मर्षयः देवर्षयः पितरो देवताश्च सभर्तृकाः तेषां पत्न्यश्च कृतस्वस्त्ययनाः कृतमङ्गलाः आसन् । सभर्तृका इत्यनेन दक्षिणाभिः प्रथमपूजितानामपि पत्नीपूजनसमये पुनः पूजनं द्योतितम् ॥ ४ ॥ तदुपश्रुत्येति त्रयम् ॥ नभसि खेचराणां गन्धर्वादीनां प्रजल्पतां सतां तत्पितुर्यज्ञमहोत्सवं दाक्षायणी दक्षकन्या देवी देवस्य शिवस्य पत्नी सती उपश्रुत्य स्वनिलयस्याभ्याशे समीपे सर्वतो दिग्भ्यः व्रजतीः । नुमभाव आर्षः । विमानानि यानानि यासां ताः सप्रेष्ठाः प्रेष्ठैर्भर्तृभिः सहिताः निष्कानि पदकानि कण्ठे यासां ताः निष्ककण्ठीः सुवाससः लोलाक्षीश्चपलनेत्राः मृष्टानि उज्ज्वलानि कुण्डलानि यासां ताः उपदेवाः यक्षगन्धर्वादयस्तेषां वराः श्रेष्ठाः सुन्दर्यः स्त्रियः दृष्ट्वा औत्सुक्यात् भूतपतिं देवमीश्वरं पतिं श्रीशिवमभ्यभाषत ॥ ५ ॥ ६ ॥ ७ ॥ प्रजापतेरिति ॥ ते तव श्वशुरस्य प्रजापतेर्दक्षस्य साम्प्रतमिदानीं यज्ञमहोत्सवो निर्यापितः प्रवर्त्तितः । हे वाम प्रकृत्या चतुर ते तव यद्यर्थिता इच्छास्ति यद्वा यदि अर्थिता मम प्रार्थना स्वीकृता तदा वयं च सर्वे तत्राभिसराम गच्छाम

तस्मिन् ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः ॥ आसन् कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥ ४ ॥ तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम् ॥ सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ॥ ५ ॥ व्रजतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः ॥ विमानयानाः सप्रेष्ठा निष्ककण्ठीः सुवाससः ॥ ६ ॥ दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुण्डलाः ॥ पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ॥ ७ ॥ सत्युवाच ॥ ॥ प्रजापतेस्ते श्वशुरस्य साम्प्रतं निर्यापितो यज्ञमहोत्सवः किल ॥ वयं च तत्राभिसराम वाम ते यद्यर्थिताऽमी विबुधा व्रजन्ति हि ॥ ८ ॥ तस्मिन्भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यन्ति सुहृद्दिदृक्षवः ॥ अहं च तस्मिन्भवताभिकामये सहोपनीतं परिबर्हमर्हितुम् ॥ ९ ॥ तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरम् ॥ द्रक्ष्ये चिरोत्कण्ठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजम् ॥ १० ॥ त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकम् ॥ तथाऽप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिम् ॥ ११ ॥

लोट् । हि यस्मात् अमी विबुधा व्रजन्ति अद्यापि यागो न निर्वृत्त इति भावः ॥ ८ ॥ तस्मिन्निति ॥ तस्मिन् यज्ञमहोत्सवे ध्रुवं निश्चितं सुहृदां पित्रादीनां दिदृक्षवः मम भगिन्यः स्वकैर्भर्तृभिः सह ध्रुवं गमिष्यन्ति अहमपि तस्मिन् यज्ञे पितृभ्यामुपनीतं दत्तं परिबर्हमलङ्कारादि पारितोषिकं भवता सहार्हितुं स्वीकर्तुं कामये । अर्हितमिति पाठे सत्कृतं परिबर्हम् ॥ ९ ॥ तत्रेति ॥ हे मृड श्रीशिव तत्र यज्ञे चिरं बहुकालपर्यन्तमुत्कण्ठमुत्सुकं मनो यस्याः साहं ननु भर्तृसंमिताः पतिसहिता मे स्वसॄः भगिनीः द्रक्ष्ये तथा मातृष्वसॄः द्रक्ष्ये । क्लिन्ना स्नेहेन आर्द्रा धीर्यस्याः तां मातरं च द्रक्ष्ये । तथा महर्षिभिः भृग्वादिभिरुन्नीयमानं प्रवर्त्यमानमध्वरेषु यागेषु ध्वजवदुत्कृष्टं यागं यद्वा उत्क्षिप्यमाणं यज्ञे केतुं यूपं वा द्रक्ष्ये । तङार्षः ॥ १० ॥ त्वयीति ॥ हे अज हे भव एतद्गुणत्रयात्मकं विश्वमाश्चर्यं तर्कागोचरं त्वयि आत्मनस्तव मायया विनिर्मितं रचितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाति अतस्तव नाश्चर्यबुद्धिः अथाप्यहं योषित् तेन चातत्त्ववित् तत्त्वं यथार्थस्वरूपं न जानामि अत एव दीना कृपणा भवतानुकम्प्या अतो मे भवक्षितिं जन्मभूमिं पितृगेहोपलक्षितं तत्रत्यं सर्वं दिदृक्षे द्रष्टुमिच्छामि ॥ ११ ॥ पश्येति ॥ हे अभव जन्मादिरहित सुहृद्वियोगदुःखानज्ञेत्यर्थः । हे शितिकण्ठ अन्येषां संबन्धरहितानामपि योषितः कान्तसखाः भर्तृभिः सहिताः स्वलंकृताः वरूथशो यूथशः प्रयान्तीः दक्षयज्ञं गच्छन्तीस्त्वं पश्य । यासां योषितां कलहंसतुल्यपाण्डुभिः श्वेतैर्व्रजद्भिर्विमानैर्नभो मण्डितम् ॥ १२ ॥ कथमिति ॥ अन्ययोषितामपि यत्रोत्कण्ठा तत्र हे सुरवर्य सुताया मम देहः पितृगेहकौतुकं यज्ञमहोत्सवं निशम्य श्रुत्वा कथं नेङ्गते कथं तद्द्रष्टुं न प्रचलति । आह्वानाभावेऽपि गमने दोषो नेत्याह । सुहृत्संबन्धि सौहृदं मित्रगृहं तथा भर्तुः पत्युः राज्ञश्च गुरोश्च देहकृतः पितुश्च केतनं गृहमनाहुता अप्यभियन्ति गच्छन्ति । अनाहुता इति ह्रस्वत्वमार्षम् ॥ १३ ॥ तदिति ॥ तत्तस्मात् हे अमर्त्य हे ईश मे प्रसीद यतो भवान् कारुणिकः अतः मम वाञ्छितं दक्षयज्ञमहोत्सवे गमनं कर्तुमर्हत्येव । यथा अद-

पश्य प्रयान्तीरभवान्ययोषितोऽप्यलंकृताः कान्तसखा वरूथशः ॥ यासां व्रजद्भिः शितिकण्ठ मण्डितं नभो विमानैः कलहंसपाण्डुभिः
॥ १२ ॥ कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेङ्गते ॥ अनाहुता अप्यभियन्ति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनम्
॥ १३ ॥ तन्मे प्रसीदेदममर्त्य वाञ्छितं कर्तुं भवान्कारुणिको बतार्हति ॥ त्वयात्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता माऽनुगृहाण या-
चितः ॥ १४ ॥ ऋषिरुवाच ॥ एवं गिरित्रः प्रिययाऽभिभाषितः प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः ॥ संस्मारितो मर्मभिदः कुवागिषून्
यानाह को विश्वसृजां समक्षतः ॥ १५ ॥ श्रीभगवानुवाच ॥ त्वयोदितं शोभनमेव शोभने अनाहुता अप्यभियन्ति बन्धुषु ॥ ते यद्य-
नुत्पादितदोषदृष्टयो बलीयसाऽनात्म्यमदेन मन्युना ॥ १६ ॥

भ्रचक्षुषा अनल्पज्ञानेन सर्वज्ञेनापि त्वया कृपया आत्मनः स्वदेहस्यार्द्धेऽहं निरूपिता स्थापिता अर्द्धनारीश्वरत्वेन विख्यातत्वात् तथा याचितः सन् मामनुगृहाण ॥ १४ ॥ एवमिति ॥ सुहृदां श्रेष्ठमनसां प्रियः गिरित्रः शिवः एवं प्रियया सत्या अभिभाषितः प्रार्थितः ततश्च कः प्रजापतिर्दक्षः यान् कुवागिषून् कुत्सिता वाच एव इषवो बाणा अत एव मर्म हृदयं भिन्दन्तीति मर्मभिदस्तान् विश्वसृजां समक्षतः संमुखे सभामध्ये आह स्म।तान् सती प्रार्थनया संस्मारितः सन् तस्याः स्त्रीस्वभावादविवेकं दृष्ट्वा प्रहसन् उपहासं कुर्वन् अभ्यधत्त प्रत्युत्तरं दत्तवान्। यद्यपि आत्मारामस्य शिवस्य दक्षकुवाग्भिर्न मर्मभेदः तथापि स्वोपाधिभूतगुणस्वभावप्रदर्शनार्थं क्वचिच्छोकमोहादिप्रकटनम्।यथा हरेर्दैत्यहननादिके क्रोधः ॥ १५ ॥ त्वयेति ॥ हे शोभने अनाहुता अपि बन्धुषु मित्रादिगृहेषु जना अभियन्ति गच्छन्तीति यत् त्वयोदितमुक्तं तच्छोभनं युक्तमेव । परंतु ते सुहृदादयो यदि बलीयसा अप्रतिकार्येण अनात्म्यमदेन देहाद्यभिमाननिमित्तदर्पेण तज्जातेन मन्युना क्रोधेन च अनुत्पादितदोषदृष्टयः नास्ति उत्पादिते आरोपिते दोषे दृष्टिर्येषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते तथाभूता भवन्ति तदा तद्गृहगमने न कश्चिद्दोषः । अन्यथा तु तद्गृहगमने कल्याणं न भवेत् ॥ १६ ॥ विद्येति ॥ विद्या तपो वित्तं वपुः शरीरसौन्दर्यादि वयः यौवनं कुलं ब्राह्मणादिकुले जन्म तैः षड्भिः सतां विवेकहेतुत्वेन गुणभूतैरपि असतां ज्ञानादिनाशकत्वेन इतरैर्दोषभूतैस्तेषां स्मृतौ हतायां कर्तव्याकर्तव्यानुसन्धाने नष्टे सति तैरेव प्रत्युत भृतमानदुर्दृशः भृतः पुष्टो यो मानोऽहंविद्यावांस्तापसो धनीत्यादिगर्वस्तेन दुष्टा दृक् दृष्टिर्येषां ते स्तब्धा अनम्राः सन्तो भूयसां महत्तमानां धाम प्रभावं न पश्यन्ति सर्पमुखप्रविष्टदुग्धवत्तेषां गुणा दोषायैव भवन्ति ॥ १७ ॥ नेति ॥ स्वजनव्यपेक्षया एते स्वजना इति दृष्ट्या एतादृशानामनवस्थितात्मनामनवस्थितचित्तानां गृहान्न प्रतीयात् न गच्छेत् । ये वक्रधिया कुटिलबुद्ध्या युक्ताः अभ्यागतान् आह्वानं विनापि प्रीत्या स्वयमेवागतान् स्वजनान् आरोपिताभिर्भ्रूभिः अमर्षणं क्रोधस्तद्युक्तैरक्षिभिश्च अभिचक्षते सम्मुखं पश्यन्ति ॥१८॥ तथेति ॥ यः अरिभिः शत्रुभिः कर्तृभूतैः शिलीमुखैः शरैः करणैरर्दिताङ्गश्छिन्नाङ्गः रोगी शयने शेते सोऽपि पुरुषस्तथा न व्यथते। यद्वा । तथा न व्यथते यतः शेते यथा स्वानां वक्रधियां दुरुक्तिभिर्निन्दावचनैर्मर्मसु हृदयादिषु ताडितो दूयता तप्यमानेन शतार्षः। हृदयेन दिवानिशं तप्यति निद्रामपि न लभते ॥ १९ ॥

विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः ॥ स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यन्ति हि धाम भूयसाम् ॥ १७ ॥
नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनाम् ॥ येऽभ्यागतान् वक्रधियाऽभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥ १८ ॥
तथाऽरिभिर्न व्यथते शिलीमुखैः शेतेऽर्दिताङ्गो हृदयेन दूयता ॥ स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः ॥ १९ ॥
व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु संमता ॥ अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥ २० ॥
पापच्यमानेन हृदातुरेन्द्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम् ॥ अकल्प एषामधिरोढुमञ्जसा पदं परं द्वेष्टि यथाऽसुरा हरिम् ॥ २१ ॥

व्यक्तमिति ॥ हे सुभ्रु ह्रस्वत्वमपाणिनीयमपि बहुभिः प्रयुक्तम् । उत्कृष्टा गतिः स्थितिर्यस्य तस्य प्रजापतेर्दक्षस्यात्मजानां कन्यानां मध्ये त्वं सम्मता प्रियासि इति व्यक्तं मम निश्चितम् अथापि तथापि पितुः सकाशान्मानं सत्कारं न प्रपत्स्यसे न लप्स्यसे यतः मदाश्रयात् मम संबन्धात् कः प्रजापतिर्दक्षस्त्वय्यपि परितप्यते अतः मानं न लप्स्यसे ॥ २० ॥ पापच्यमानेनेति ॥ पूर्वकर्मजदुःस्वभावाग्निना पापच्यमानेनातिसंतप्यमानेन हृदा हृदयेन कृत्वा आतुराणि व्याकुलानि इन्द्रियाणि यस्य तथाभूतो दक्षः स्वकीयाभिर्लौकिकीभिः सत्कुलजन्माभिजनधनधान्यादिभिः समृद्धिभिरेषामस्मत्सदृशानां पूरुषबुद्धिसाक्षिणां जीवबुद्धिवृत्तिद्रष्टॄणां सर्वज्ञानां पदं परमोत्कृष्टमैच्छिकाऽणिमाद्यैश्वर्यमञ्जसा कष्टं विनानायासेनाधिरोढुं प्राप्तुमकल्पोऽसमर्थः सन् यथा असुराः हरेरैश्वर्यं प्राप्तुमशक्ताः केवलं हरिं द्विषन्ति तथा स परं केवलं द्वेष्टि न प्राप्तुं शक्नोतीत्यर्थः । यद्वा । तेषां महात्मनां समृद्धिभिरणिमादिभिः पुण्यकीर्त्यादिभिश्च पापच्यमानेन अन्यत्समानम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु सदाचारप्राप्तो दक्षस्य सत्कारो भवता कुतो न कृत इत्यत आह—प्रत्युद्गमेति ॥ हे सुमध्यमे प्रत्युद्गमः उत्थाय संमुखागमनं प्रश्रयणं स्नेहोचिता क्रिया अभिवादनं नमस्कारः एषां समाहारः तत् यत् जनैर्मिथः विधीयते तत्तु प्राज्ञैर्भागवतैः चेतसा परस्मै पुरुषाय गुहाशयाय अन्तर्यामिणे एव साधु सम्यक् विधीयते। परिपूर्णे तस्मिन् कायिकव्यापारायोगात् अतोन्तर्यामिदृष्ट्या मनसा मया सर्वं कृतमेव दक्षस्य देहाभिमानवत्त्वात् स्फुटतया तु न कृतः तदभिमाननिवृत्तयेऽनुग्रह एवायं मया कृत इति भावः ॥ २२ ॥ गुहाशयायैव प्रत्युद्गमादि विधीयते इति प्रतिपादयति—सत्वमिति ॥ विशुद्धं रजस्तमोभ्यामसंभिन्नं सत्वमन्तःकरणं सत्त्वगुणो वा तदेव पूर्वं गुहाशब्देनोक्तं तदेव वसुदेवशब्दितमवयववृत्त्या वसुदेवशब्देनोक्तं यत् यस्मात् तत्र विशुद्धे सत्वे पुमान् भगवान् वासुदेवः यः पूर्वं परपुरुषगुहाशयशब्दैरुक्तः सः अपावृतः अपगतमावृतमावरणं माया यस्मात् स तथाभूतः सन् ईयते प्रतीयते तस्मात्तद्वसुदेवशब्दितमित्यर्थः।अयमर्थः। वसुदेवे भव इति हि वासुदेवः परमेश्वरः प्रसिद्धः स च विशुद्धे सत्वे प्रतीयते अतः अण्प्रत्ययार्थेन प्रतीतिपर्यवसायिना भवतिना प्रसिद्धेन वसुदेवरूपः प्रकृत्यर्थो निर्द्धार्यते। ततश्च वसयति देवमिति वसत्यस्मिन् देव इति वा वसुः दीव्यति द्योतते इति देवः

प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे ॥ प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥ २२ ॥ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ॥ सत्त्वे च तस्मिन् भगवान्वासुदेवो ह्यधोऽक्षजो मे नमसा विधीयते ॥ २३ ॥ तत्ते निरीक्ष्यो न पिताऽपि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये ॥ यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाऽकरोत्तिरः ॥ २४ ॥ यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति ॥ संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते ॥ २५ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे उमारुद्रसंवादे तृतीयोऽध्यायः ॥ ३ ॥

वसुश्चासौ देवश्च वसुदेवः इति वसुदेवशब्दवाच्यं शुद्धं सत्वं वसुरिति वसधातोरदन्ताच्चुरादेर्वस इति भ्वादेर्वा औणादिक उः। यत्तु भावार्थदीपिकापुस्तकेषु वासयतीति दीर्घपाठो दृश्यते सतु लेखकप्रमादात् नच वसतेर्ण्यर्थान्तर्भावसूचनायेति वाच्यम्। व्याख्याग्रन्थेष्वेवं रीतेरदर्शनात्। ततश्च "तत्र भवः" इत्यणि वासुदेव इति सिद्धम्। अत्र प्रतीतिर्भवतेरर्थः तस्मिन्सत्वेऽन्तःकरणे च मे मया भगवान् अधोक्षजः वासुदेवः नमसा नमस्कारेणाऽनुविधीयते सेव्यते मनसा इति वा पाठः ॥ २३ ॥ तदिति ॥ तत् ततो हेतोः स दक्षस्तव देहकृत् पितापि मम द्विट् अतः ते तव न निरीक्ष्यो न द्रष्टव्यः ये च तदनुव्रताः दक्षानुवर्तिनः तेऽपि न निरीक्ष्याः। हे वरोरु यः दक्षः विश्वसृजां यज्ञे गतमनागसं निरपराधमपि मां दुर्वचसा ग्राम्याणामिवासभ्यवचसा तिरोऽकरोत् मम तिरस्कारं कृतवान् ॥ २४ ॥ यदीति ॥ यदि मद्वचः निषेधविषयमतिहाय उल्लङ्घ्य पितृगृहं त्वं व्रजिष्यसि तदा ततो गमनात् भवत्यास्तत्र भद्रं कल्याणं न भविष्यति। यतः संभावितस्य श्रेष्ठत्वेनाभिमतस्य सर्वदा सत्कृतस्य यदा कदाचित्स्वजनात्सदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्कारकर्तुः पराभवस्तिरस्कारो भवति तदा स तिरस्कारस्तस्य सद्यः मरणाय कल्पते मरणपर्यवसायी भवति॥२५॥इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य तृतीये निरमादिमाम् ॥३॥ तुर्ये गता पितुर्यज्ञं सती तेनावमानिता ॥ प्राणांस्तत्याज तत्र स्युः श्लोका जैलधिवह्नयः ॥ उवाचेति त्रयं सार्द्धा नैर्ववेदा अनुष्टुभः॥४॥ एतावदिति ॥ शङ्करः एतावत्पूर्वोक्तमुक्त्वा उभयत्र बलाद्वारणे तत्र गमने च पत्न्या अङ्गस्य नाशं चिन्तयन् विरराम । बलाद्वारणेन प्राणत्यागे स्वस्मिन् दुर्यशः स्यादिति मत्वा तूष्णीमास । सा च सती सुहृद्दिदृक्षुः भवात् परिशङ्किता चेत्यौत्सुक्यशङ्कयोस्तुल्यबलत्वात् औत्सुक्येन गृहान्निष्क्रामती नुमभाव आर्षः । शङ्कया निर्विशती चेति यामि न वा यामीति द्विधाविचारपरा आस बभूवार्थेऽव्ययम् । गता नाप्यगता इति द्विधासेति वा ॥ १ ॥ सुहृदिति ॥ सुहृदां दिदृक्षायाः यः प्रतिघातस्तेन दुर्मनाः अत एव पित्रादिस्नेहाद्रुदन्ती नुमार्षः । अत एव अश्रूणां कलाभिः बिन्दुभिः अतिविह्वला अश्रूणि कलयतीति अश्रुकलेति भिन्नं पदं वा । अतः जातवेपथुः भवानी सती नास्ति प्रतिपूरुषः तुल्यः पुरुषो यस्य तं भवं प्रधक्ष्यतीव भस्मीकरिष्यतीव ऐक्षत दृष्टवती ॥ २ ॥ तत इति ॥ ततः शोकेन पत्युराज्ञोल्लङ्घनजेन रोषेण गमननिषेधजेन च दूयता

मैत्रेय उवाच ॥ ॥ एतावदुक्त्वा विरराम शङ्करः पत्न्यङ्गनाशं ह्युभयत्र चिन्तयन् ॥ सुहृद्दिदृक्षुः परिशङ्किता भवान्निष्क्रामती निर्विशती द्विधाऽऽस सा ॥ १ ॥ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदन्त्यश्रुकलाऽतिविह्वला ॥ भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः ॥ २ ॥ ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा ॥ पित्रोरगात्स्त्रैणविमूढधीर्गृहान् प्रेम्णात्मनो योऽर्धमदात्सतांप्रियः ॥ ३ ॥ तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः ॥ सपार्षदयक्षा मणिमन्मदादयः पुरोवृषेन्द्रास्तरसा गतव्यथाः ॥ ४ ॥ तां सारिकाकन्दुकदर्पणाम्बुजश्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुन्दुभिशङ्खवेणुभिर्वृषेन्द्रमारोप्य विटङ्किता ययुः ॥ ५ ॥

उपतप्तेन शताऽऽर्षः । हृदा युक्ता स्त्रैणेन स्त्रीस्वभावेन विमूढा धीर्यस्याः सा सती विनिश्वस्य यः सतां प्रियः शिवः प्रेम्णा आत्मनः अर्द्धमदात् तं शिवं विहाय पित्रोर्गृहानगात् ॥ ३ ॥ तामिति ॥ आज्ञोल्लङ्घनभयात् द्रुतं शीघ्रं विक्रमः पद्भ्यामेव गमनं यस्याः तामेकां सतीं पार्षदैः सह वर्तमाना ये यक्षाः सपार्षदयक्षाः मणिमान् मदश्च आदिर्मुख्यो येषां ते पुरोऽग्रेसरो वृषेन्द्रो येषां ते गतव्यथा निर्भयाः आज्ञोल्लङ्घनादागतव्यथा इति वा अस्माकमीश्वरी एकाकिन्येव यातीति खेदादागतव्यथा वा सहस्रशः त्रिनेत्रस्यानुचराः तरसा वेगेन अन्वगच्छन् । त्रिनेत्रानुचरा इत्यनेन शिवस्यैव नेत्रान्तसूचिता अन्वगच्छन्निति भावः ॥४॥ तामिति ॥ तां सतीं वृषेन्द्रमारोप्य तस्मिन्नारूढां कृत्वा सारिका पठनकुशला पक्षिणी उपलक्षणेन शुकादयोऽपि कन्दुकः दर्पणः अम्बुजं श्वेतातपत्रं व्यजनं स्रक् च इत्यादिभिः सारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिः सह महाराजविभूतिभिः तथा गीतायनानि गीतसाधनानि वीणादीनि दुन्दुभिशङ्खवेणुभिश्च सह विटङ्किताः शोभिताः सन्तो ययुः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आब्रह्मेति ॥ आ समन्तात् यो ब्रह्मघोषो वैदिकमन्त्रध्वनिस्तेनोर्जितं शोभमानं यज्ञसंबन्धि वैशसं पशुहिंसनं यज्ञे विदुषां शास्त्रविचारस्पर्द्धारूपं वैशसं वा यत्र तत् विप्रर्षिभिः भृग्वादिभिः जुष्टं सर्वशः सर्वैर्विबुधैर्देवैश्च जुष्टं सेवितं मृदादिभिर्निसृष्टानि निर्मितानि भाण्डानि पात्राणि यत्र मृन्मयानि शरावादीनि पुरोडाशाद्यर्थानि दारुमयानि स्रुगादीनि होमाद्यर्थानि अयोमयानि स्वधित्यादीनि अवदानाद्यर्थानि काञ्चनान्याचमनीकलशादीनि दर्भमयानि वेदरशनादीनि चर्ममयानि घृतादिस्थापनार्थानि कुप्यादीनि एवंभूतं यजनं यज्ञस्थानं सती समाविशत् ॥ ६ ॥ तामिति ॥ तत्र दक्षयज्ञे आगतां विमानिताम् अकृतादरां तां सतीं स्वसॄः भगिनीः जननीं च ऋते विना कश्च कोऽपि जनः यज्ञकृतो दक्षस्य भयात् न आद्रियत् । तङ्भावः आर्षः । स्वसारः जननी चेत्येतास्तु अनादृतामपि तां सादराः प्रेमाश्रुरुद्धकण्ठयश्च सत्यः मुदा परिषस्वजुः आलिङ्गितवत्यः । तङ्भाव आर्षः ॥ ७ ॥ सौदर्येति ॥ पित्रा दक्षेण अप्रतिनन्दिता स्वागतादिना अकृतसत्कारा सा सती सौदर्येण समानोदरत्वेन भगिनीनां स्नेहाद्यः सम्यक् कुशलप्रश्नस्तत्र

आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ॥ मृद्दार्वयःकाञ्चनदर्भचर्मभिर्निसृष्टभाण्डं यजनं समाविशत् ॥ ६ ॥ तामागतां तत्र न कश्चनाऽऽद्रियद्विमानितां यज्ञकृतो भयाज्जनः ॥ ऋते स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकण्ठ्यः परिषस्वजुर्मुदा ॥ ७ ॥ सौदर्यसंप्रश्नसमर्थवार्त्तया मात्रा च मातृष्वसृभिश्च सादरम् ॥ दत्तां सपर्यां वरमासनं च सा नादत्त पित्राऽप्रतिनन्दिता सती ॥८॥ अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ ॥ अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ॥ ९ ॥ जगर्ह साऽमर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमःस्मयम् ॥ स्वतेजसा भूतगणान्समुत्थितान्निगृह्य देवी जगतोऽभिश्रृण्वतः ॥ १० ॥

समर्था योग्या या वार्ता तया सह मात्रा मातृस्वसृभिश्च सादरमादरपूर्वकं दत्तां सपर्यां पारितोषिकं देयविशेषं वरं श्रेष्ठमासनं च ताभिर्दत्तं नादत्त नाग्रहीत् । कुशलप्रश्नोत्तरं नादादासनं च न पस्पर्श ॥ ८ ॥ अरुद्रेति ॥ रुद्राहुतिमन्त्राश्रवणेन नास्ति रुद्रस्य भागो यस्मिंस्तमध्वरमवेक्ष्य तथा देवे महादेवे विभौ सर्वं कर्तुं समर्थे पित्रा कृतं हेलनं निमन्त्रणाद्यभावेनावज्ञालक्षणं चावेक्ष्य स्वयं च तेनानादृता इति दोषत्रयेण अधीश्वरी सती यज्ञस्य सदसि सभायां रुषा क्रोधेन लोकान् चतुर्दश भुवनानि धक्ष्यती भस्मीकरिष्यतीव भस्मीकर्तुमिवेति वा चुकोप ॥ ९ ॥ जगर्हेति ॥ स्वकोपं दृष्ट्वोपद्रवार्थं समुत्थितान् भूतगणान् शिवगणान् स्वतेजसा गौरवेण सूचनामात्रेण निगृह्य निवार्य देवी दीप्यमाना सा सती जगतो जनसमूहस्य अभि शृण्वतः सतो येन दक्षस्यानौचित्यं सर्वजगति प्रसिद्धं स्यात् अमर्षेण क्रोधेन विपन्नया अस्पष्टाक्षरया गिरा शिवद्विषं शिवद्वेषकर्तारं यतो धूमपथे कर्ममार्गे यः श्रमोऽभ्यासस्तेन स्मयो गर्वो यस्य तं सर्वथा निन्दायोग्यं जगर्ह निन्दितवती। तङ्भाव आर्षः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ लोके देहभृतां प्रियो य आत्मा तस्यात्मस्वरूपस्य यस्य यदपेक्षया अतिशायनः ऐश्वर्यादिना उत्कृष्टो नास्ति तथा यस्य प्रियोऽपि नास्ति । समस्तपाठे अतिशयानश्च प्रियश्चेति द्वन्द्वैक्यम्। "ऊकालोज्झ्स्वदीर्घप्लुतः" इतिवत् इतरेतरयोगेऽपि "सर्वो द्वन्द्वो विभाषयैकवद्भवति" इत्येकत्वम् । तथा यस्य अप्रियोऽपि च नास्ति । समस्तानामात्मनि कारणस्वरूपे वा मुक्तवैरके सर्वथा वैररहिते तस्मिन् शिवे भवन्तमृते विना कतमः प्रतीपयेत् प्रतिकूलमाचरेत् । "तत्करोति" इति णिजन्ताल्लिङ् । यद्वा । ऋते सत्यस्वरूपे तस्मिन्मुक्तवैरके सति भवन्तं कः प्रतीपयेत् दण्डयेत् अतः काले प्राप्ते रुद्रो वा तदीयो वा कश्चिद्दण्डयिष्यतीति । एते ऋत्विजस्तु त्वदपराधं जानन्तोऽपि न शक्ता दण्डने॥ ११॥ शिवप्रातिकूल्यकरणं द्वेधा महत्तमद्रोहेण साक्षात्तद्द्रोहेण च।तत्राद्यमाह—दोषानिति॥हे द्विजेत्यधिक्षेपः।भवादृशाः त्वद्विधाः असाधवः असूयकाः परेषां गुणेषु दोषानेव गृह्णन्ति नतु गुणान् ते अधमा उच्यन्ते । केचिन्मध्यस्था गुणेषु दोषान्न गृह्णन्ति किंतु यथास्थितान् गुणदोषान् विवेकेन गृह्णन्ति ते तु महान्त उच्यन्ते।साधवस्तु केवलं गुणानेव गृह्णन्ति न दोषांस्ते तु महत्तरा उच्यन्ते।महत्तमास्तु दोषान्न गृह्णन्त्येव प्रत्युत फल्गूंस्तुच्छानपि गुणान्बहुलीकुर्वन्तीति बहुलीकरिष्णवो भवन्ति। तेषु भवानघं द्रोहमविदद्लब्धवान् कल्पितवानित्यर्थः।तच्च ब्रह्मिष्ठानभिभूयेत्यनेन सूचितम्।यद्वा।असाधोस्तव सभायामेते खल्वसाधव एवेति वक्तुं साधूनसाधूंश्च लक्षयति।दोषान् इति ॥ अत्र व्याख्यायामसाधव

श्रीदेव्युवाच ॥ न यस्य लोकेऽस्त्यतिशायनः प्रियस्तथाऽप्रियो देहभृतां प्रियात्मनः ॥ तस्मिन्समस्तात्मनि मुक्तवैरके ऋते भवन्तं कतमः प्रतीपयेत् ॥११॥ दोषान्परेषां हि गुणेष्वसाधवो गृह्णन्ति केचिन्न भवादृशा द्विज ॥ गुणांश्च फल्गून्बहुलीकरिष्णवो महत्तमास्तेष्वविदद्भवानघम् ॥१२॥

इति पाठः । हे द्विज ये परेषां दोषानपि गुणेषु प्रकारविशेषेण गुणान्तःपातितयैव गृह्णन्ति यथा कठोरभाषित्वं यदप्यस्य दोषस्तदपि हितकारित्वादयं रोगनिवर्त्तको निम्बरस इव गुण एवेत्येवं ते साधवो महान्त एव ते केचिद् भवन्ति तत्र न भवादृशा इति। भवादृशास्तु गुणानपि दोषान्तःपातितयैव गृह्णन्ति।यथास्य यत् परोपकारित्वं तत् परद्रव्यजिघृक्षयैवेति दोष एवायमित्येवं ते खल्वसाधव एव।ये तु दोषान् अपश्यन्तो गुणानेव गृह्णन्ति।यथा वणिगयमातिथेयी विस्तीर्ण इत्येवं ते महत्तरास्तथैव ये दोषानेव गृह्णन्ति नतु गुणान् यथा भिक्षुरयमुदरपूरं स्निग्धान्नं यदत्ति तदयं कामी भ्रष्टो मन्तव्य इत्येवं ते असाधुतराः । ये तुफल्गून् तुच्छानपि गुणान् बहुलीकरिष्णवः बहुलीकरणशीलाः किमुताफल्गून् दोषांस्तु नैव पश्यन्ति।यथा शतार्त्तत्वादेव मदीयवस्त्रमपहरन्नपि शस्त्रपाणित्वेऽपि दयालुत्वादेव न हिनस्ति तदयं धन्य इत्येवं ते महत्तमास्तथैव ये तुच्छानपि दोषान् बहूकरिष्णवो गुणान्नैष गृह्णन्ति । यथा विरक्तोऽयं वनमपहाय यद्गृहस्थगृहेषु वसति तत्प्रचुरधनं चोरयितुकाम इत्येव तेऽसाधुतमाः।ये तु गुणाभावेऽपि परेषु गुणानेव पश्यन्ति। यथा जगत्यस्मिन् केऽपि दुष्टा न सन्ति सर्व एव साधव इति ते अतिमहत्तमास्तथैव दोषाभावे परेषां दोषानेव पश्यन्ति । यथा जगत्यस्मिन् केऽपि शिष्टा न सन्ति सर्व एव दुष्टा इति ते अत्यसाधुतमा इति।एवं सत्वतारतम्येन साधव इति महत्तमा इति साधूनां द्वैविध्येऽप्युक्ते तमप्प्रत्ययेन युक्तिसंभवेन च महतां चातुर्विध्यमायातम् तथैव तमस्ता- ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतम्येन भवादृशा इति अविदद्भवानघमित्याभ्याम् असाधूनामपि द्वैविध्येऽपि युक्त्या चातुर्विध्यं शुद्धसत्त्वस्वरूपकल्याणगुणमयभक्तियोगतारतम्येन पुनरप्येवं साधूनामपराधतारतम्येनासाधूनां च चातुर्विध्यं ज्ञेयम् । एवं च देहभृतां प्रियात्मनस्तस्मिन् समस्तात्मनि मुक्तवैरक इत्यादिना श्रीरुद्रस्य सर्वत्रापि प्रीतिमत्त्वेन सर्वत्र दोषादृष्ट्या च अतिमहत्तमत्वं तेष्वविदद्भवानघमित्यनेन तस्मिन् श्रीरुद्रे दोषमात्रदर्शनात् तस्य च सर्वात्मत्वात् सर्वजगत्येव दोषदृष्टिप्राप्त्या चोदिते परमेष्ठिनेत्यनेन ब्रह्मण्यपि दोषदृष्ट्या ब्रह्मिष्ठानभिभूय चेति महत्स्वप्यपराधेन च दक्षस्यात्यसत्तमत्वं ध्वनितम् ॥ १२ ॥ नाश्चर्यमिति ॥ कुणपं शववत् कुत्सितं जडं शरीरं तदेवात्मेति वदन्ति तच्छीलाः तेषु असत्सु असाधुषु यत् सेर्ष्यम् ईर्ष्यासहितं यथा स्यात्तथा सर्वदा महतां विनिन्दा निन्दनं तत् आश्चर्यं नास्ति । ततश्च महापुरुषाणां श्रीशिवादीनां पादपांसुभिश्चरणरजोभिर्निरस्तं तेजो येषाम् । यद्यपि महान्तः स्वनिन्दां सहन्ते तथापि तत्पादरेणव एव तेषां तेजो निरस्यन्ति तेषु असत्सु तत् महतां निन्दनमेव शोभनम्।दह्यमानाः सुतीव्रेण नीचाः परयशोऽग्निना अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते इति न्यायेन तन्निन्दनस्य महतां गुणप्रकाशकत्वात् असतां च असत्वद्योतकत्वात् महन्निन्दाभावे तेषां

नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिन्दा कुणपात्मवादिषु ॥ सेर्ष्यं महापूरुषपादपांसुभिर्निरस्ततेजस्सु तदेव शोभनम् ॥ १३ ॥ यद्द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत् ॥ पवित्रकीर्तिं तमलङ्घ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः ॥१४॥ यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः ॥ लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान्द्रुह्यति विश्वबन्धवे ॥ १५ ॥ किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने ॥ तन्माल्यभस्मनृकपाल्यऽवसत्पिशाचैर्ये मूर्धभिर्दधति तच्चरणावसृष्टम् ॥ १६ ॥

दण्डाभावेन कल्याणासंभवात् ॥ १३ ॥ महत्तमद्रोहमुक्त्वा तस्मिन्नेव कृतं द्रोहमाह–यदिति ॥ यत् यस्य तत् प्रसिद्धं द्व्यक्षरं शिव इति नाम सकृत् एकवारमपि प्रसङ्गात् संकेताद्यनुषङ्गादपि गिरैव नतु बुद्धिपूर्वमीरितमुच्चारितं विस्पष्टमस्पष्टं वा नृणां प्राणिनां सर्वेषां पापिनाम् अघं सर्वं पापमाशु शीघ्रमेव हन्ति।पवित्रा सर्वपापनिवर्त्तिका कीर्तिर्यस्य तमलङ्घ्यं शासनमाज्ञा यस्य तं शिवं शिवेतरः पापरूपः भवानहो द्वेष्टि ॥१४॥ यत्पादेति ॥ यस्य शिवस्य पादपद्मं ब्रह्मैव रसः परमानन्दः स एवासवः सर्वविस्मृतिपूर्वकतृप्तिकरं मधु तदर्थिभिर्महतां सर्वपूज्यानां सनकादीनां मनांस्येवालयस्तैर्नितरां सेवितं यश्च शिवोऽर्थिनो लोकस्याशिषस्तदर्थितास्तास्ता धर्मादिलक्षणा वर्षति अधिकार्यनधिकारिविचारं विनैवालं ददाति तस्मै विश्वबन्धवे जगतो हितकारिणे भवान् द्रुह्यति । अहो भवतो बुद्धिवैपरीत्यम् ॥ १५ ॥ शिवापदेशो ह्यशिवः " प्रेतावासेषु घोरेषु " इत्यादिदक्षोक्तमाक्षिपति–किं वेति ॥ त्वत्तोऽन्ये ये ब्रह्मादयस्तच्चरणारविन्दावसृष्टं जलादिकं स्वतः पवित्रतया स्वशुद्ध्यर्थं मूर्द्धभिर्दधति धारयन्ति ते सर्वज्ञाः सर्वोपदेष्टारोऽपि किं श्मशाने जटा अवकीर्य प्रसार्य तस्य श्मशानस्य माल्यानि भस्मानि नृकपालानि च भूषणत्वेन सन्ति यस्य स तथाभूतः शिवः पिशाचैः सहावसत् निवासं कृतवान् अतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवाख्योऽप्यशिव एवेति तं न विदुः न जानन्ति किम् । किंशब्दोऽधिक्षेपे । तथा च यदि ते तदाचरणं निन्द्यमिति विदुस्तदा कश्चित्तथा वदेयुरेव ननु तथोक्तवन्तः प्रत्युत आदृतवन्तः अतः " लुप्तक्रियायाशुचये " इत्यादि त्वयाऽनुचितमेवोक्तं तत्फलं भोक्ष्यस एव ॥ १६ ॥ कर्णाविति ॥ सभायामीशे कर्तुमकर्तुमन्यथाकर्तुं समर्थे धर्मावितारि धर्मरक्षके असृणिभिर्निरङ्कुशैर्नृभिरस्यमानेऽधिक्षिप्यमाणे सति यत् यदि अकल्पस्तेषां निन्दकानां दण्डने स्वप्राणत्यागे वा असमर्थस्तदा स्वस्मिन् दोषसंस्पर्शाभावार्थं यथा महन्निन्दा स्वकर्णपथे न प्रविशेत्तथा कर्णौ पिधाय ततः सभातो निरियात् निर्गच्छेदित्यर्थः । यदि तद्दण्डने प्रभुः समर्थस्तदा तु रुशतीमकल्याणवादिनीमत एवासतीं दुष्टां तेषां जिह्वां प्रसह्य बलात्कारेण छिन्द्यात् । यदि समर्थोऽपि लोकापवादादिभयेन जिह्वाच्छेदे प्रवृत्तिर्न भवेत् तदा ततो महन्निन्दाश्रवणादसूनपि विसृजेत् त्यजेत् । स एवं व्यवस्थया त्रिविधो धर्मः ॥ १७ ॥ अहं तु ऐश्वर्यबलात्त्वां हन्तुं शक्तापि स्वभार्याद्वारा शिव एव दक्षं जघानेति शिवयशोहानिभीत्या त्वां न हन्मि स्वप्रायश्चित्तं तु

कर्णौ पिधाय निरियाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने ॥ छिन्द्यात्प्रसह्य रुशतीमसतीं प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत्स धर्मः ॥१७॥ अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकण्ठगर्हिणः ॥ जग्धस्य मोहाद्धि विशुद्धिमन्धसो जुगुप्सितस्योद्धरणं प्रचक्षते ॥१८॥ न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः ॥ यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत्स्थितः ॥ १९ ॥ कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिङ्गमाश्रितम् ॥ विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्च्छति ॥ २० ॥

करिष्यामीत्याह—अत इति ॥ अतो हेतोः शितिकण्ठगर्हिणः परोपकाराय विषपानेन नीलकण्ठं शिवं गर्हते तच्छीलस्य तव देहादुत्पन्नम् इदं कलेवरमहं न धारयिष्ये । हि यस्मात् मोहात् प्रमादात् जग्धस्य भक्षितस्य जुगुप्सितस्य निषिद्धस्य अन्धसः अन्नस्य उद्धरणमुद्वमनमेव शुद्धिं शुद्धिकारणं प्रचक्षते अतः त्वत्संबन्धिदेहत्यागादेव मे शुद्धिर्नान्यथा ॥१८॥ "लुप्तक्रियायाशुचय" इत्यारोपितं दूषणं समाधत्ते—न वेदेति ॥ स्व एव लोके स्वात्मन्येव रमतः रममाणस्य । आर्षः शता । महामुनेः सम्यग्विरक्तस्य श्रीशिवादेः मतिः वेदवादान् विधिनिषेधरूपान् न अनुवर्त्तते नानुसरति निवृत्ताधिकारत्वात् । यथा देवमनुष्ययोर्गतिः पृथगेव देवानामाकाश एव मनुष्याणां भूमावेव अतः स्व एव धर्मे प्रवृत्तिलक्षणे निवृत्तिलक्षणे वा स्थितः सन् परमन्यं धर्मं पुरुषं वा न क्षिपेत् न निन्देत् । व्यवस्थिताधिकारत्वेनोभयोः सत्यत्वात् नैव क्षिपेदिति वान्वयः ॥ १९ ॥ तदेवोपपादयति—कर्मेति ॥ उभयं रागवैराग्यलक्षणं लिङ्गं चिह्नमधिकारिविशेषणं यस्मिंस्तत् प्रवृत्तमग्निहोत्रादि स्वर्गसाधनं तथा निवृत्तं शमदमादि मोक्षसाधनमिति द्विधापि कर्म ऋतं सत्यमेव यतः विविच्य रागिविरागिव्यवस्थया विभज्य वेदे आश्रितं विहितं नत्वविशेषेण युगपद्भावो यौगपदं ष्यञि कर्त्तव्येऽणार्षः । यौगपदेन एकस्मिन् कर्त्तरि यथा तत्कर्मद्वयं विरोधि भवति तथा ब्रह्मणि सदाशिवे किंचिदपि कर्म न ऋच्छति न प्राप्नोति । अतो यथा प्रवृत्तनिवृत्तयोरधिकारिणोः परस्परकर्माकरणेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न दोषः। तथा ईश्वरे तदुभयधर्माकरणेऽपि न दोषः ॥२०॥ "चिताभस्मकृतस्नानः" इत्याद्याक्षेपं परिहरति—मा व इति ॥ हे पितः अस्मदास्थिताः अस्माभिराश्रिताः पदव्यः ब्रह्मानन्दामृतारवादरूपा अणिमाद्यैश्वर्यसमृद्धयश्च वो युष्माकं कर्मठानां मा न सन्ति नापि भविष्यन्ति। यतस्ताः अस्मदास्थिताः पदव्यः यज्ञशालासु न सन्ति तथा तदन्नतृप्तै-स्तस्य यज्ञस्य संबन्धिनान्नेन तृप्तैः काकतुल्यैरसुभृद्भिः केवलं प्राणपोषकैरेव धूमवर्त्मभिः धूमो वर्त्म मार्गो येषां तैर्धूमादिमार्गगन्तृभिः न ईडिताः न स्तुताः। अत्र नेति पूर्वस्यानुषङ्गः। किंतु अव्यक्तं कर्मठैरगम्यं लिङ्गं साधनं यासां ताः अवधूतैः त्यक्तलोकेषणैः सनकादिभिः सेविताः। स्वामिपादास्तु यतो वः पदव्यो यज्ञशालास्वेव सन्ति ताश्च तदन्नेन तृप्तैरसुभृद्भिः केवलमीडिताः धूमवर्त्मभिश्च भुज्यन्ते। अस्मत्पदव्यस्तु अव्यक्तलिङ्गाः अवधूतैः सेविताश्चेति व्याचक्षते ॥ २१ ॥ नेति ॥ हरे कृतागसः कृतापराधस्य तव देहादुद्भवो यस्य तेन अत एव कुजन्मना कुत्सितजन्मना एतेन देहेन नालं न पूर्यते किम् अपि त्वलमेव। यद्वा। अलमत्यर्थं कुजन्मना एतेन देहेन अलं न किंचित् प्रयोजनम्। यद्वा। एतेन देहेन प्रयोजनं नास्ति अतः अलमलम्। कुजनस्य तव प्रसङ्गतः मम व्रीडा लज्जाभूत् अतो यस्त्वं महतां शिवादीनामवद्यकृत् अपराधकर्त्ता

मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः ॥ तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिङ्गा अवधूतसेविताः ॥ २१ ॥
नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना ॥ व्रीडा ममाभूत्कुजनप्रसङ्गतस्तज्जन्म धिग्यो महतामवद्यकृत् ॥ २२ ॥ गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ॥ व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदङ्गजम् ॥ २३ ॥ मैत्रेय उवाच ॥ ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन्क्षिताबुदीचीं निषसाद शान्तवाक् ॥ स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत् ॥ २४ ॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः ॥ शनैर्हृदि स्थाप्य धियोरसि स्थितं कण्ठाद्भ्रुवोर्मध्यमनिन्दिताऽनयत् ॥ २५ ॥

तत् तस्माद्यन्मम जन्म तद्धिक् तस्य तव जन्म धिगिति वा तथा चेमं देहं त्यक्ष्याम्येव ॥ २२ ॥ गोत्रमिति ॥ यदा कदाचित्परिहासादिषु वृषध्वजो धर्मधुरीणो भगवान् मां दाक्षायणीति संबोधयंस्त्वदीयं गोत्रं त्वत्संबन्धवाचकं नाम आह स्म तदाहं व्यपेतनर्म स्मितं यथा भवति तथा सुदुर्मनाः सुदुःखितचित्ता भवामि। तस्मात्त्वदङ्गजं तव देहादुत्पन्नमत एव निन्दितत्वात् कुणपं जीवदपि मृततुल्यमेतत्स्वशरीरमहमाशु शीघ्रमेव व्युत्स्रक्ष्ये त्यक्ष्यामि ॥२३॥ इतीति ॥ हे शत्रुहन् इत्येवम् अध्वरे यज्ञशालामध्य एव दक्षमनूद्य दक्षं प्रत्यनुवादं कृत्वा जलं स्पृष्ट्वा शुद्ध्यर्थमाचमनादि कृत्वा पीतेन दुकूलेन वस्त्रेण सौभाग्यसम्पादकेन संवृता आच्छन्ना शान्तवाक् गृहीतमौना सती उदीचीमुदीच्यां दिशि उदीचीति प्रथमान्तपाठे उदङ्मुखी क्षितौ पवित्रभूमौ निषसाद उपविवेश। ततश्च दृग् दृशौ विभक्तिलुगार्षः। निमील्य उपलक्षणतया इन्द्रियाणि प्रत्याहृत्य योगपथं समाविशत् ॥ २४ ॥ कृत्वेति ॥ जितमासनं यया सा अनिन्दिता सर्वथा शुद्धा सा सती अनिलौ प्राणापानावूर्ध्वाधोवृत्तिकौ निरोधेन समानावेकरूपौ नाभ्यां माणि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूरकचक्रे कृत्वा ततश्च नाभिचक्रत उदानमूर्ध्वमुत्थाप्य हृदि अनाहतचक्रे संस्थाप्य तत उरसि कण्ठादधोदेशे विशुद्धचक्रे स्थितं कृत्वा ततः कण्ठे तस्यैव चक्रस्याग्रदेशे संस्थाप्य ततो बहुधा गमनसंभवात् शनैर्बुद्ध्या विचार्य भ्रुवोर्मध्यमाज्ञाचक्रमानयत् ॥ २५ ॥ एवमिति ॥ एवं महतां सनकादीनां महीयसा पूज्यतमेन शिवेनादरात् मुहुरङ्कं समारोपितमपि स्वदेहं दक्षरुषा निमित्तेन जिहासती त्यक्तुमिच्छती नुमभाव आर्षः । मनस्विनी वशीकृतमना धीरा गात्रेषु अनिलाग्न्योर्द्धारणां दधार तेषु तयोश्चिन्तनं कृतवती ॥ २६ ॥ तत इति ॥ ततो जगद्गुरोः स्वभर्तुः श्रीशिवस्य चरणाम्बुजासवं चरणयोर्ध्यानेनोत्पन्नमानन्दलक्षणमासवं सर्वविस्मारकत्वान्मधु चिन्तयती आस्वादयन्ती सती नुमभाव आर्षः । अपरं तस्मादन्यं नैव ददर्श देहं च तत्याजेत्यर्थादुक्तम् । ततश्च तस्या देहो हतकल्मषः निवृत्तपितृनिन्दादिनिमित्तसर्वदोषः समाधिजनितेनाग्निना सद्यः प्रजज्वाल भस्मीभूतो जातः । यद्वा । समाधिजाग्निना हतं कल्मषं दक्षकन्यात्वाभिमानरूपं यत्र तथाभूतो देहः प्रजज्वाल दिदीपे विद्युदिव प्रदीप्यान्तरधात् ॥ २७ ॥

एवं स्वदेहं महतां महीयसा मुहुः समारोपितमङ्कमादरात् ॥ जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम् ॥ २६ ॥ ततः स्वभर्तुश्चरणाम्बुजासवं जगद्गुरोश्चिन्तयती न चापरम् ॥ ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना ॥ २७ ॥ तत्पश्यतां खे भुवि चाद्भुतं महद्धा हेति वादः सुमहानजायत ॥ हन्त प्रिया दैवतमस्य देवी जहावसून् केन सती प्रकोपिता ॥ २८ ॥ अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः ॥ जहावसून्यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ॥ २९ ॥ सोयं दुर्मर्षहृदयो ब्रह्मध्रुक्च लोकेऽपकीर्तिं महतीमवाप्स्यति ॥ यदङ्गजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेऽपराधतः ॥ ३० ॥

तदिति ॥ तत्सतीदेहत्यागरूपं महदद्भुतमत्याश्चर्यं पश्यतां खे आकाशे भुवि च स्थितानां हा हेति क्रन्दनपूर्वकः सुमहान् वादः अजायत । तमेवाह हन्त खेदे । दैवतमस्य सर्वदेवश्रेष्ठस्य शिवस्य प्रिया सती देवी सर्वपूज्या केन दक्षेण प्रकोपिता सती असून् प्राणान् जहाविति ॥ २८ ॥ अहो इति ॥ अहो आश्चर्यं यस्य चराचरं सर्वमपि प्रजाः सन्तानवद्रक्षणीयं तस्य अस्य प्रजापतेर्दक्षस्य महत् अनात्म्यं दौष्ट्यं पश्यत । वृद्ध्यभावः संज्ञापूर्वकत्वेनानित्यत्वात् आर्षत्वाद्वा । या मनस्विनी प्रशस्तचित्ता आत्मजा पुत्री सती अभीक्ष्णं मानं सत्कारमर्हति सापि यद्विमता येन दक्षेणावज्ञाता सती दुस्त्यजानप्यसून् प्राणान् जहौ ॥ २९ ॥ सोऽयमिति ॥ दुर्मर्षं दुष्टविचारयुक्तं हृदयं यस्य ब्रह्मध्रुक् ब्रह्मज्ञानां द्रोहकर्ता पुरुषद्विट् शिवद्वेषी सोऽयं दक्षो लोके महतीमपकीर्तिं चशब्दात्प्राणहान्याद्यनिष्टं चावाप्स्यति । यत् यस्मात्स्वापराधतः स्वकृतापमानान्मृतये मरणायोद्यतां प्रयतमानां स्वाङ्गजां न प्रत्यषेधत् न वारितवान् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदतीति ॥ सत्या अद्भुतमद्भुतप्रकारकमसुत्यागं दृष्ट्वा जने एवं पूर्वोक्तप्रकारेण वदति सति तस्य रुद्रस्य पार्षदा उदायुधा उद्यतायुधाः सन्तो दक्षं हन्तुमुदतिष्ठन् उद्युक्ता जाताः ॥ ३१ ॥ तेषामिति ॥ तेषां रुद्रपार्षदानां प्रमथयक्षभूतप्रेतादीनामापततां वेगं निशाम्य दृष्ट्वा भगवान् रक्षायां शक्तिमान् भृगुः यज्ञघ्ना यज्ञविध्वंसका दैत्यादयस्तान् हन्तीति यज्ञघ्नघ्नं तेन यजुषा "अपहतं रक्ष" इत्यादिमन्त्रेण दक्षिणाग्नौ जुहाव आभिचारिकेण विधिनाहुतिं दत्तवान् ॥ ३२ ॥ अध्वर्युणेति ॥ अध्वर्युणा आध्वर्यवं चरता भृगुणा हूयमाने सति ये पूर्वं तपसा सोमं चन्द्रं यज्ञे सोमभागं वा प्राप्तास्त ऋभवो नाम देवाः सहस्रशः ओजसा महता वेगेन उत्पेतुः आहुतिद्वाराविर्भूताः ॥ ३३ ॥ तैरिति ॥ अलाता ज्वलन्ति काष्ठानि ते आयुधानि येषां तैः ब्रह्मणां भृगूक्तमन्त्राणां तेजसा प्रभावेण उशद्भिः दीप्यमानैः ऋभुभिः देवैर्हन्यमानाः गुह्यकसहिताः प्रमथाः सर्वतः पलायनपरा जाताः ॥३४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायरतुर्यस्य चतुर्थे निरमादिमाम् ॥४॥ पञ्चमे तु सतीमृत्युं श्रुत्वा यज्ञमनाशयत् ॥

वदत्येवं जने सत्या दृष्ट्वाऽसुत्यागमद्भुतम् ॥ दक्षं तत्पार्षदा हन्तुमुदतिष्ठन्नुदायुधाः ॥ ३१ ॥ तेषामापततां वेगं निशम्य भगवान्भृगुः ॥ यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ॥३२॥ अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा ॥ ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः ॥३३॥ तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः ॥ हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा ॥ ३४ ॥ इति श्रीभागवते चतुर्थस्कन्धे सतीदेहोत्सर्गो० चतुर्थोऽध्यायः ॥ ४ ॥ मैत्रेय उवाच ॥ भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात् ॥ स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे ॥१॥ क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषम् ॥ उत्कृत्य रुद्रः सहसोत्थितो हसन्गम्भीरनादो विससर्ज तां भुवि ॥ २ ॥ ततोऽतिकायस्तनुवा स्पृशन्दिवं सहस्रबाहुर्घनरुक् ॥ त्रिसूर्यदृक् करालदंष्ट्रो ज्वलदग्निमूर्धजः कपालमाली विविधोद्यतायुधः ॥३॥

दक्षं चाघातयद्रुद्रस्तत्र श्लोकास्तु षड्दश ॥ अनुष्टुभः साङ्घ्रिदन्ता उवाचेत्येकमीर्यते ॥ ५ ॥ भव इति ॥ भवः श्रीरुद्रः प्रजापतेर्दक्षाद्धेतोः असत्कृतायाः अनादृताया भवान्या निधनं तथा तस्याध्वरे जाता ये ऋभवो नाम देवास्तैः स्वपार्षदसैन्यं च विद्रावितं नारदादवगम्य ज्ञात्वा अपारं दक्षनाशं विना अप्रशमं क्रोधमादधे स्वचिक्रे ॥ १ ॥ क्रुद्ध इति ॥ क्रुद्धः अत एव रुद्रो भयंकरः सुदष्ट ओष्ठपुटो येन स स प्रसिद्धः प्रलयकर्त्ता धूर्जटिः शिवः हसन् सन् तडितां वह्नीनां च सटा ज्वाला तद्वदुग्रं रोचिर्यस्यास्तां जटामुत्कृत्योत्पाट्य सहसोत्थितो गम्भीरनादश्च संस्तां भुवि विससर्ज ॥ २ ॥ तत इति ॥ ततः प्रक्षिप्तजटातोऽतिकायो बृहच्छरीरः तनुवा तन्वा तन्वादीनां "छन्दसि बहुलम्" इत्यवङ् । दिवं स्वर्गं स्पृशन् अत्युच्च इत्यर्थः । सहस्रबाहुः घनवत् रुक्कान्तिर्यस्य स श्यामवर्णः त्रयः सूर्या इव दृशो नेत्राणि यस्य करालास्तुङ्गा दंष्ट्रा यस्य सः ज्वलदग्निरिव मूर्द्धजाः केशा यस्य सः कपालानां मनुष्यशिरसां मालया युक्तः विविधानि उद्यतानि आयुधानि येन स वीरभद्राख्यो जातः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तं वीरभद्रं बद्धाञ्जलिं किं करोमि तदाज्ञापयेति गृणन्तं वदन्तं भगवान् भूतनाथो रुद्र आह स्म । हे रुद्र हे भट यद्वा रुद्रस्य मम भट योद्धः यद्वा । रुद्रो भयङ्करश्चासौ भटश्चेति संबुद्धिः । सयज्ञं दक्षं जहि नाशय । ब्रह्मतेजसोऽपि मा बिभीहीत्याह यतः त्वं मम भटानामग्रणीः श्रेष्ठः मे ममांशकश्च असि ॥ ४ ॥ आज्ञप्त इति ॥ हे तात कुपितेन मन्युना रुद्रेण एवमाज्ञप्तः सवीरभद्रः देवदेवं विभुं शिवं परिचक्रमे प्रदक्षिणीचकार । तद्गर्भः । आत्मानम् असङ्गमप्रतिहतं केनापि सह गन्तुमशक्यं वा यत् रंहः वेगः तेन असङ्गस्य शिवस्य रंहसा वा महीयसां महाबलानामपि सहः सहिष्णुं वेगं सोढुं क्षमं मेने ॥ ५ ॥ अन्वीयमान इति ॥ स वीरभद्रः घोषणानि शब्दशीलानि भूषणानि नूपुरादीनि ययोस्तावङ्घ्री यस्य स तथा भृशं नदद्भी रुद्रपार्षदैरन्वीयमानः अनुगम्यमानः स्वयमपि सुभैरवमतिभयंकरं यथा भवति तथा व्यनदत् नादं कृतवान् । ततश्च स जगदन्तको मृत्युस्तस्याप्यन्तकं मारकं शूलमुद्यम्य उत्थाप्य स प्राद्रवत् अतिवेगेन दक्षयज्ञवाटं जगाम ॥ ६ ॥ अथेति ॥ अथ

तं किं करोमीति गृणन्तमाह बद्धाञ्जलिं भगवान् भूतनाथः ॥ दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणी रुद्र भटांशको मे ॥ ४ ॥ आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुम् ॥ मेने तदात्मानमसङ्गरंहसा महीयसां तात सहः सहिष्णुम् ॥५॥ अन्वीयमानः स तु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम् ॥ उद्यम्य शूलं जगदन्तकान्तकं स प्राद्रवद्घोषणभूषणाङ्घ्रिः ॥ ६ ॥ अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम् ॥ तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजा द्विजपत्न्यश्च दध्युः ॥ ७ ॥ वाता न वान्ति न हि सन्ति दस्यवः प्राचीनबर्हिर्जीवति होग्रदण्डः ॥ गावो न काल्यन्त इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते ॥ ८ ॥ प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको वृजिनस्यैष तस्य ॥ यत्पश्यन्तीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागाम् ॥ ९ ॥

ऋत्विजो यज्ञप्रवर्त्तकाः यजमानो यज्ञे दीक्षितः सदस्याः सभास्थाने स्थित्वा युक्तायुक्तविवेचनपराः द्विजा अन्ये ब्राह्मणास्तत्पत्न्यश्च उदीच्यां ककुभि दिशि रुद्रभटानामागच्छतामुत्थितं रेणुं समीक्ष्य प्रथमं भीत्या तमः किमेतदिति वदन्तः पश्चात्तमो न भवति किंतु रज इति निश्चित्य रज एतत्कुतोऽभूदिति दध्युश्चिन्तयामासुः ॥ ७ ॥ वाता इति॥ रजःप्रवर्तकाः वाता न वान्ति दस्यवोऽपि न हि सन्ति । यतः इह देशे उग्रो दण्डो यस्य ईदृशः प्राचीनबर्हिः तन्नामा राजा जीवति । तद्राज्ये दस्यूनामसम्भवात् । जीवति इति ह्रस्वपाठे हेति स्फुटार्थः । गावोऽपि न काल्यन्ते बलान्न नीयन्ते अतः इदं रजः कुत उद्भूतं किं लोकः अधुनैव प्रलयाय कल्पते ॥ ८ ॥ प्रसूतीति ॥ उद्विग्नं चित्तं यासां ताः प्रसूतिर्मिश्रा मुख्या यासां ताः स्त्रियः ऊचुः । यत् प्रजेशो दक्षः दुहितॄणां पश्यन्तीनामपि इति दुःखाधिक्ये हेतुः । अनागाम् अनागसम् अदन्तत्वमार्षम् । स्वसुतां सतीम् अवदध्यावव्ज्ञातवान् तस्यैव वृजिनस्य पापस्य एष उपद्रवसूचको रजआदिर्विपाकः फलम् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्तु इति ॥ यस्तु शिवः अन्तकाले प्रलयकाले व्युप्तो विकीर्णो जटाकलापो यस्य सः किंच स्वशूलस्यासाधारणायुधस्य सूची अग्रभागस्तत्रार्पिताः स्वस्थानादुद्धृत्य प्रोता दिग्गजेन्द्रा येन सः उच्चः सर्वशब्दोपमर्दकः अट्टः कठोरो यो हासः स एव स्तनयित्नुर्वज्रनिर्घोषस्तेन भिन्ना विशीर्णा दिशो येन सः उदितानि उर्ध्वं धृतानि अस्त्राणि येषु तादृशा दोषो भुजास्त एव ध्वजास्तान् वितत्य विस्तृतान् कृत्वा नृत्यति ॥ १० ॥ अमर्षयित्वेति ॥ असह्यतेजसं मन्युप्लुतं क्रोधव्याप्तं भ्रुकुट्या कुटिलभ्रुवा दुर्विषहं भयंकरं करालाभिर्भयङ्कराभिर्दंष्ट्राभिरुदस्तो निरस्तो भागणो ज्योतिःसमूहो येन तं शिवम् अमर्षयित्वा अमर्षयुक्तं कृत्वा कोपयतो रोषमुत्पादयतो विधातुः प्रजापतेर्दक्षस्य किं स्वस्ति स्यादपि तु न स्यादेव । विधातुर्ब्रह्मणोऽपि किं स्वस्ति स्यादिति वा ॥ ११ ॥ बह्विति ॥ भयेनोद्विग्ना इतस्ततः प्रचलिता दृक् यस्य तेन जनेनैवं पूर्वोक्तप्रकारेण बहु यथा स्यात्तथोच्यमाने सति महात्मनोऽतिधीरस्यापि विपरीतलक्षणया दुरात्मन इति वा । दक्षस्य भयावहा दिवि ग्रहयुद्धादयो भूमौ श्वरोदनादयः पर्यक् सर्वतस्तत्रापि मुहुर्वारंवारं सहस्रशः उत्पाततमाः महोत्पाता उत्पेतुः जाताः ॥ १२ ॥ तावदिति ॥ हे विदुर यावद्यजमानादयोऽपि सावधाना भवेयुः तावत् ततः

यस्त्वन्तकाले व्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेन्द्रः ॥ वितत्य नृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् ॥ १० ॥ अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या ॥ करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः ॥ ११ ॥ बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मखे महात्मनः ॥ उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक् ॥ १२ ॥ तावत्स रुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः ॥ पिङ्गैः पिशङ्गैर्मकरोदराननैः पर्याद्रवद्भिर्विदुराऽन्वरुध्यत ॥ १३ ॥ केचिद्बभञ्जुः प्राग्वंशं पत्नीशालां तथापरे ॥ सद आग्नीध्रशालां च तद्विहारं महानसम् ॥ १४ ॥ रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् ॥ कुण्डेष्वमूत्रयन् केचिद्बिभिदुर्वेदिमेखलाः ॥ १५ ॥

पूर्वमेव कैश्चिद्वामनकैः ह्रस्वदेहैः कैश्चित् पिङ्गैः कपिलैः कैश्चित् पिशङ्गैः पीतवर्णैः कैश्चिन्मकरोदराननैः मकरस्येवोदरमाननं च येषां तैः नानाविधान्युद्यतान्यायुधानि येषां तैः परितः आद्रवद्भिराधावद्भिः रुद्रानुचरैः सोऽत्यूर्जितो महामखोऽन्वरुध्यत अवरुद्धो जातः ॥ १३ ॥ केचिदिति ॥ केचित्प्राग्वंशं यज्ञशालायाः पूर्वपश्चिमस्तम्भयोरर्पितं पूर्वपश्चिमायतं काष्ठं बभञ्जुः । तथापरे पत्नीशालां यज्ञशालातः पश्चिमतः शालां यत्र यजमानादिस्त्रिय उपविशन्ति तां बभञ्जुः । अपरे च सदः आदिकं बभञ्जुः । तत्र यज्ञशालायाः पुरतः सदोमण्डपं यत्र सभ्यास्तिष्ठन्ति ततः पुरतो हविर्धानं तस्योत्तर आग्नीध्रशाला तां तद्विहारं तस्य यजमानस्य गृहं महानसं पाकभोजनस्थानं बभञ्जुः ॥ १४ ॥ रुरुजुरिति ॥ केचिद्यज्ञपात्राणि चमसादीनि रुरुजुः बभञ्जुः । तथा एके अग्नीन् अनाशयन् । केचित् कुण्डेष्वमूत्रयन् । केचित् वेदिमेखला उत्तरवेद्याः सीमासूत्राणि बिभिदुः विदारयामासुः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अबाधंन्तेति ॥ अन्ये मुनीन् अवाधन्त दुर्वचनादिभिः पीडितवन्तः । एके पत्नीः अतर्जयन् भवतीर्विधवाः कुर्म इत्यादिवचनैः अभर्त्सयन् । अपरे तु प्रत्यासन्नान् समीपस्थानपि भयात् पलायितान् देवान् जगृहुः धृतवन्तः ॥ १६ ॥ भृगुमिति ॥ मणिमान्नामगणः भृगुं बबन्ध । वीरभद्रः प्रजापतिं दक्षं बबन्ध । चण्डीशः पूषणं देवमग्रहीत् । नन्दीश्वरः भगमग्रहीत् ॥१७॥ सर्व इति ॥ सर्व एव ऋत्विजः सदस्याः सदिवौकसः देवैः सहिताः भृगुबन्धनाद्युपद्रवं दृष्ट्वा स्वयं च ग्रावभिः पाषाणैर्भृशमर्द्यमानाः नैकधा अनेकधा सर्वतोऽद्रवन् ॥ १८ ॥ जुह्वत इति ॥ यो भृगुः सदसि विश्वसृक्सत्रे सभायां शापावसरे श्मश्रु दर्शयन्नहसत्तस्य जुह्वत एव स्रुवहस्तस्य भृगोः श्मश्रूणि भगवान् भवः वीरभद्रः लुलुञ्चे उत्पाटितवान् । तङार्षः । लुलुञ्च इति पाठो वा ॥१९॥ भगस्येति ॥ यो भगः सदस्थो विश्वसृक्सत्रसभायां स्थितो भवं शपन्तं दक्षमक्ष्णा अक्षिसंकोचेन असूसुचत् तस्य रुषा भुवि पातितस्य भगस्य नेत्रे भगवान् वीरभद्रः उज्जहार निस्सारितवान् ॥ २० ॥ पूष्ण इति ॥ गरिमणि गौरवमूर्त्तिभूते शिवे दक्षेण शप्यमाने सति यः

अवाधन्त मुनीनन्य एके पत्नीरतर्जयन् ॥ अपरे जगृहुर्देवान्प्रत्यासन्नान्पलायितान् ॥ १६ ॥ भृगुं बबन्ध मणिमान्वीरभद्रः प्रजापतिम् ॥ चण्डी-
शः पूषणं देवं भगं नन्दीश्वरोऽग्रहीत् ॥ १७ ॥ सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः ॥ तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाऽद्रवन् ॥ १८ ॥
जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः ॥ भृगोर्लुलुञ्चे सदसि योऽहसच्छमश्रु दर्शयन् ॥ १९ ॥ भगस्य नेत्रे भगवान्पातितस्य रुषा भुवि ॥
उज्जहार सदःस्थोऽक्ष्णा यः शपन्तमसूसुचत्॥२०॥पूष्णश्चापातयद्दन्तान्कालिङ्गस्य यथा बलः ॥ शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः ॥२१॥
आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥ छिन्दन्नपि तदुद्धर्तुं नाशक्नोत् त्र्यम्बकस्तदा ॥२२॥ शस्त्रैरस्त्रान्वितै रेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं
परमापन्नो दध्यौ पशुपतिश्चिरम् ॥ २३ ॥ दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे ॥ यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥

पूषा दतः दन्तान् दर्शयन् अहसत् तस्य पूष्णः दन्तान् कालिङ्गस्य कलिङ्गदेशराजस्य दन्तान् अनिरुद्धोद्वाहे बलो बलभद्रो यथा अपातयत्तथा अपातयत् । पूष्णोरिति पाठे द्विचनमैन्द्रापौष्णश्चरुर्भवतीत्यत्रान्यसहितस्यापि पूष्णो दन्तपातप्राप्त्यर्थम् । अत एव पूष्णोऽनुग्रहं द्वेधा वक्ष्यति । पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् केवलः पिष्टभुक् अन्यसहितश्चेद्यजमानस्य दद्भिर्जक्षतु इत्यर्थः ॥२१॥ आक्रम्येति ॥ दक्षस्योरसि आक्रम्य आरुह्य शितधारेणापि तीक्ष्णधारेणापि हेतिना खड्गेन तस्य शिरश्छिन्दन्नपि त्र्यम्बको वीरभद्रस्तच्छिरः उद्धर्तुं कायात् पृथक् कर्तुं तदा नाशक्नोत् न समर्थोऽभूत् ॥ २२ ॥ शस्त्रैरिति ॥ एवम् अस्त्रान्वितैर्मन्त्रयुक्तैः शस्त्रैरपि न निर्भिन्ना त्वगपि यस्य तथाभूतं तं दृष्ट्वेति शेषः । परं विस्मयमापन्नः पशूनां पतिर्हरो वीरभद्रश्चिरं दध्यौ तदुपायं चिन्तयामास ॥ २३ ॥ दृष्ट्वेति ॥ ततश्च ध्यानात् स पशूनां पतिर्वीरभद्रो मखे संज्ञपनं योगं कण्ठनिष्पीडनेन त्रोटनं प्राणवियोजकोपायं दृष्ट्वा " यजमानः पशुः " इति श्रुतेरनेनैवोपायेनास्य प्राणवियोगो भविष्यतीति ज्ञात्वा तेनैवोपायेन यजमान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपस्य पशोः कस्य दक्षस्य शिरः कायादहरत् पृथक् कृतवान् ॥ २४ ॥ साध्विति ॥ तदा तस्य वीरभद्रस्य तत् दक्षशिरश्छेदनरूपं कर्म शंसतां स्तुवतां भूतप्रेतपिशाचानां रुद्रानुचराणां तेषां साधुवादः अयं हत इति साधु सम्पन्नमिति वादः तदन्येषां दक्षपक्षीयाणां ब्राह्मणादीनां तु तद्विपर्ययः असाध्विदं जातमिति वादश्च जात इति शेषः ॥ २५ ॥ जुहावेति ॥ अमर्षितो दक्षकृतं शिवापमानमसहमानो वीरभद्र एतच्छिरस्तस्मिन् दक्षिणाग्नौ जुहाव । तद्देवयजनं मण्डपादिकमपि दग्ध्वा गुह्यकालयं कैलासं प्रातिष्ठत् जगाम । तङ्भाव आर्षः ॥ २६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्याध्याये पञ्चमे व्यधात् ॥ ५ ॥ षष्ठे ब्रह्मा सुरैः सार्द्धं शिवं गत्वा प्रसाद्य च ॥ अयाचद्दक्षादिजीवं तत्र श्लोकास्त्रिमार्गणाः ॥ उवाचेति द्वयं साङ्घ्रिर्नवबाणा अनुष्टुभः ॥ ६ ॥ अथेति युग्मम् ॥ रुद्रानीकैस्तदनुचरसैन्यैः पराजिताः शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः सञ्छिन्नानि त्रुटितानि भिन्नानि च सर्वाण्यङ्गानि येषां ते सह ऋत्विग्भिः सभ्यैश्च वर्तमाना भयेनाकुलाः सर्वे देवगणाः स्वयंभुवे स्वयंभुवमनुकूलयितुं नमस्कृत्य कार्त्स्न्येन साकल्येनैतत् रुद्रभागं निराकृत्य यागप्रवर्त्तनतन्नाशपर्यन्तं वृत्तं न्यवेदयन् विज्ञापितवन्तः ॥ १ ॥ २ ॥

साधुवादस्तदा तेषां कर्म तत्तस्य शंसताम् ॥ भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥ २५ ॥ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः ॥ तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयम् ॥ २६ ॥ इति श्रीभागवते चतुर्थस्कन्धे वीरभद्रेण दक्षयज्ञविध्वंसनो नाम पञ्चमोऽध्यायः ॥ ५ ॥ मैत्रेय उवाच ॥ अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥ सञ्छिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्या भयाकुलाः ॥ स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् ॥ २ ॥ उपलभ्य पुरैवैतद्भगवानब्जसंभवः ॥ नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ ३ ॥ तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि ॥ क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषताम् ॥ ४ ॥

उपलभ्येति ॥ यागनाशात्पुरैव भगवान् अब्जसम्भवो ब्रह्मा विश्वात्मा नारायणश्च एतत् रुद्रभागं विना प्रवृत्तस्य यज्ञस्य तत्कर्तुश्च नाशं तदनुमोदनपराणामुपद्रवं चोपलभ्य सर्वज्ञतया ज्ञात्वा कस्य दक्षस्याध्वरं नेयतुः नागतौ ॥ ३ ॥ तदिति ॥ तत् देवादिभिर्निवेदितं वृत्तमाकर्ण्य श्रुत्वा विभुः ब्रह्मा आह स्म । तेजीयसि अतितेजस्विनि कृतागसि कृतापराधेऽपि पुंसि तत्र स्वापराधं कृत्वा बुभूषतां स्वोद्भवमिच्छतां स्वयंकृतागस्कीभवितुमिच्छतां पुंसां सा तादृक् बुभूषा प्रायेण क्षेमाय तेषां कल्याणाय न भूयात् न भवेदेवेत्यर्थः । यूयं तु अकृतापराधे तस्मिन् स्वयं कृतापराधा अतः कथं क्षेमं स्यात् । यद्वा । तेजीयसि महात्मनि जने कृतागसि कृतम् आगो यस्य तादृशे सति क्षेमाय स्वकल्याणाय बुभूषतां जिजीविषतां तत्र क्षेमे विषये सा बुभूषा जिजीविषा मा भूयात् न भवतु । शिवापराधेऽपराधिनां दक्षादीनां स्वक्षेमाय जीवनेच्छा मा भवतु जीवित्वा पुनरपराधं करिष्यतां तेषां मरणमेव वरमिति भावः । भवतेः सत्तार्थत्वात् सत्तायाश्च जीवनरूपत्वात् जिजीविषाबुभूषे तुल्यार्थे ज्ञेये ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथापीति ॥ यद्यपि यूयं कृतकिल्बिषाः कृतापराधाः स्थ यतः ये यूयं बर्हिषो यज्ञस्य भागभाजं भवं पराडुः दूरादेव खण्डितवन्तः । तत्र दक्षपक्षपातित्वाद्यूयम-प्यपराधिनः अथापि तथापि यूयं यदि बुभूषथ तदा क्षिप्रप्रसादं शिवं तत्प्रसादो दुष्करो नास्तीत्याशयः । प्रगृहीतेे अङ्घ्रिपद्मे यत्र कर्मणि पादौ प्रगृह्येत्यर्थः । शिवविशेषणं वा । जसन्तपाठे कर्तृविशेषणम् । परिशुद्धचेतसा प्रसादयध्वम् ॥ ५ ॥ आशासाना इति ॥ यस्मिन् शिवे कुपिते सति सपालः लोकः न भवेत् नश्येत् इत्यर्थः । तं प्रियया विहीनं दुरुक्तैर्दक्षस्य दुर्वचनैर्हृदि विद्धं देवं शिवम् अध्वरस्य यज्ञस्य जीवितं पुनः सन्धानम् आशासानाः इच्छन्तो यूयम् आशु शीघ्रं क्षमापयध्वमिति क्षमामाप्नोति क्षमापः तादृशं कुरुत । "तत्करोति" इति णिच् ॥ ६ ॥ ननु त्वमेव कमप्युपायं विधत्स्वेति चेत्तत्राह—नाहमिति ॥ आत्मतन्त्रस्य स्वाधीनस्य यस्य शिवस्य तत्त्वं यथार्थस्वरूपं ब्रह्मत्वं बलवीर्ययोरित्युपलक्षणम् । ज्ञानादिगुणानां प्रमाणं परिमाणमियत्तां चाहं ब्रह्मा न वेद्मि । यज्ञ इदानीन्तन इन्द्रो न वेत्ति । यूयं याज्ञिका वेदविदो देवाद-

अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं पराडुः ॥ प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीताङ्घ्रिपद्मम् ॥ ५ ॥ आशासाना जीवितमध्वरस्य लोकः सपालः कुपिते न यस्मिन् ॥ तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥ ६ ॥ नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम् ॥ विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतन्त्रस्य क उपायं विधित्सेत् ॥ ७ ॥ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ॥ ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः ॥ ८ ॥ जन्मौषधितपोमन्त्रयोगसिद्धैर्नरेतरैः ॥ जुष्टं किन्नरगन्धर्वैरप्सरोभिर्वृतं सदा ॥ ९ ॥ नानामणिमयैः शृङ्गैर्नानाधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ १० ॥ नानामलप्रस्रवणैर्नानाकन्दरसानुभिः ॥ रमणं विहरन्तीनां रमणैः सिद्धयोषिताम् ॥ ११ ॥

यश्च न वित्थ । येऽन्ये देहभाजो देहिनो मुनयश्च ते न विदुः। अतस्तस्मिन् क्रुद्धे सति कोऽस्मदादिसदृशोऽज्ञो जनः कमुपायं विधित्सेद् विधानं कर्तुमिच्छेत् । क उ पापमिति पाठे पापमपराधम् अत्र पूर्वं नाहमित्यादिभिः सह विदुरिति क्रियावयवभूतैर्वेदेत्यादिभिरन्वयस्ततः समुदितैस्तैर्विदुरित्यनेन प्रथमपुरुषस्त्वार्ष एव । शेषं " नेमं विरिञ्च " इति दशमे द्रष्टव्यम् ॥ ७ ॥ स इति ॥ सः अजः ब्रह्मा सुरानित्येवमादिश्योपदेशं कृत्वा सप्रजेशैः प्रजापतियुक्तैः पितृभिः समन्वितः सन् स्वधिष्ण्यात् स्वस्थानात् पुरद्विषः प्रभोः महादेवस्य प्रियं निलयं स्थानमद्रिप्रवरं पर्वतश्रेष्ठं कैलासं ययौ ॥ ८ ॥ कैलासं वर्णयति—जन्मेति ॥ जन्मना सिद्धकुलोत्पत्त्या ओषधिभिः तपसा मन्त्रैर्योगैश्चेति पञ्चधा सिद्धास्तैः नरेतरैर्देवैः जुष्टं सेवितं तथा किन्नरैर्गन्धर्वैः अप्सरोभिः सदा वृतं रम्यत्वेन विहारार्थमागतैस्तैः सङ्कुलं कैलासं ययाविति सर्वत्रानुषङ्गः ॥ ९ ॥ नानेति युग्मम् ॥ नाना धातुभिर्विचित्रितैः नानाद्रुमलतागुल्माश्च येषु तैः नानामृगगणैरावृतैः नाना अमलानि प्रस्रवणानि येषु शृङ्गेषु तैः नाना कन्दराः सानवश्च येषु तैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानामणिमयैः श्रृङ्गैर्हेतुभिः रमणैः कान्तैः सह विहरन्तीनां सिद्धयोषितां रमणं रतिप्रदम् ॥ १० ॥ ११ ॥ मयूरेत्यर्द्धम् ॥ मयूराणां केकाभिः स्वनैः अभिरुतं नादितं मदान्धैरलिभिर्विमूर्छितं मूर्छना रागगतिविशेषः तद्व्याप्तं कृतम् । यद्वा । मयूरकेका एवाभिरुतानि गृहस्थसंलापा यत्र मदान्धानामलीनां गायकानामिव विमूर्छितानि रागस्वरालापमूर्छना यत्रेति । प्लावितैरिति ॥ रक्तकण्ठानां कोकिलानां प्लावितैः प्लुतत्वं नीतैः शब्दैःऽन्येषां च पतत्रिणां पक्षिणां कूजितैश्च कामदुघैःकामान् मनोविषयान् प्रपूरयद्भिः द्रुमैरुद्धस्तैः उत्क्षिप्तहस्तस्थानीयैर्द्विजान् पक्षिणो ब्राह्मणानतिथीनिव आह्वयन्तमिव स्थितम् । लोके हि हस्तमुत्क्षिप्योच्चैः स्वरेणार्थिनामाह्वानं कुर्वन्ति । अद्रिरप्युत्क्षिप्तहस्ताकारैर्द्रुमैस्तत्रत्यपक्षिस्वनैश्च तथा दृश्यत इत्यर्थः ॥ १२ ॥ व्रजन्तमित्यर्द्धम् ॥ व्रजद्भिर्मातङ्गैर्व्रजन्तमिव निर्झरध्वनिभिर्गृणन्तं भाषमाणमिव ॥ १३ ॥ मन्दा-

मयूरकेकाभिरुतं मदान्धालिविमूर्च्छितम् ॥ प्लाविते रक्तकण्ठानां कूजितैश्च पतत्रिणाम् ॥ आह्वयन्तमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः॥१२॥ व्रजन्तमिव मातङ्गैर्गृणन्तमिव निर्झरैः ॥ १३ ॥ मन्दारैः पारिजातैश्च सरलैश्चोपशोभितम् ॥ तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥१४॥ चूतैः कदम्बैर्नीपैश्च नागपुन्नागचम्पकैः ॥ पाटलाशोकबकुलैः कुन्दैः कुरबकैरपि ॥ १५ ॥ स्वर्णार्णशतपत्रैश्च वीरवेणुकजातिभिः ॥ कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मण्डितम् ॥ १६ ॥ पनसोदुम्बराश्वत्थप्लक्षन्यग्रोधहिङ्गुभिः ॥ भूर्जैरोषधिभिः पूगै राजपूगैश्च जम्बुभिः ॥ १७ ॥ खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेङ्गुदैः ॥ द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः ॥ १८ ॥ कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः ॥ नलिनीषु कलं कूजत्खगवृन्दोपशोभितम् ॥ १९ ॥ मृगैः शाखामृगैः क्रोडैर्मृगेन्द्रैर्ऋक्षशल्यकैः ॥ गवयैः शरभैर्व्याघ्रै रुरुभिर्महिषादिभिः ॥ २० ॥ कदलीखण्डसंरुद्धनलिनीपुलिनश्रियम् ॥ पर्यस्तं नन्दया सत्याः स्नानपुण्यतरोदया ॥ २१ ॥

रैरिति पञ्चकम्॥मन्दारपारिजातादिभिर्वृक्षैरुपशोभितं स्वर्णार्णैः सुवर्णवर्णैः शतपत्रैः पुष्पप्रधानगुल्मभेदैः वीरः करवीरः वेणुका एला जातिर्मालती।वररेणुकेति वा पाठः। अन्यैश्च द्रुमजातिभिः अवान्तरभेदसामान्यैः अन्यैरिति पुंस्त्वमार्षम् । चूताम्रयोर्नीपकदम्बयोरवान्तरजातिभेदः । वेणुकीचकयोश्च सरन्ध्रनीरन्ध्रत्वाभ्यां स्फुटमन्यत् ॥१४॥१५॥ ॥ १६ ॥ १७ ॥ १८ ॥ कुमुदेति ॥ कुमुदोत्पलादिसमृद्धिभिर्हेतुभिर्नलिनीषु सरस्सु कलं मधुरं यथा भवति तथा कूजन्ति यानि खगानां पक्षिणां वृन्दानि समूहास्तैरुपशोभितम् ॥ १९ ॥ मृगैरिति ॥ मृगादिभिर्निर्जुष्टं सेवितं पूर्वं मृगगणाः शृङ्गविशेषणत्वेनोक्ताः इदानीं स्वातन्त्र्येणेत्यपौनरुक्त्यम् ॥ २० ॥ कदलीति ॥ कदलीनां खण्डैः समूहैः संरुद्धानि आवृतानि नलिनीनां पुलिनानि तैः श्रीः शोभा यस्मिंस्तम् । सत्याः भवान्याः स्नानेन पुण्यतरं सर्वपापनिवर्तकम।तिसुगन्धं वा उदमुदकं यस्यास्तया नन्दया तन्नाम्न्या गङ्गया पर्यस्तं परिवृतम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलोक्येत्यर्द्धम् ॥ एवंभूतमतिशयशोभायुक्तं भूतानामीशस्य महादेवस्य गिरिं कैलासं विलोक्य दृष्ट्वा विबुधाः देवाः विस्मयं ययुः ॥ २२ ॥ ददृशुरिति ॥ तत्र कैलासे रम्यां मनोहरामलकां नाम प्रसिद्धां कुबेरस्य पुरीं सौगन्धिकं वनं च ते देवादयो ददृशुः । यत्र यस्मिन् वने तन्नाम सौगन्धिकं नाम पङ्कजं भवति । जातावेकत्वम् । ततस्तस्य वनस्यापि सौगन्धिकमिति नामेत्यर्थः ॥ २३ ॥ नन्देति ॥ तीर्थपादस्य भगवतः पदाम्भोजरजसातीव पावने लोकान् पुनत्यौ नन्दा चालकनन्दा च सरितौ पुरः पुर्या बाह्यतः स्तः ॥ २४ ॥ ययोरिति ॥ हे क्षत्तः रतिकर्षिताः सम्भोगश्रान्ताः सुरस्त्रियो देवाङ्गनाः श्रमव्यपोहनार्थं स्वपतिभिः सह स्वधिष्ण्यतः स्वस्थाना-देवलोकादवरुह्य ययोर्नन्दालकनन्दयोर्विगाह्य प्रविश्य पुंसः स्वपतीन् जलेन सिञ्चन्त्यः क्रीडन्ति ॥ २५ ॥ ययोरिति ॥ तासां सुरस्त्रीणां स्नानेन विभ्रष्टं निर्गलितं यन्नवं कुङ्कुमं तेन पिञ्जरं पीतवर्णं ययोर्नद्योरम्भो वितृषः तृड्विरहिता अपि गजाः गजीः हस्तिनीः पाययन्तः स्वयं पिबन्ति ॥ २६ ॥ तारेति ॥ तारं रूप्यं मुक्ता वा हेम सुवर्णं महार-

विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः ॥ २२ ॥ ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीम् ॥ वनं सौगन्धिकं चापि यत्र तन्नाम पङ्कजम् ॥ २३ ॥ नन्दा चालकनन्दा च सरितौ बाह्यतः पुरः ॥ तीर्थपादपदाम्भोजरजसाऽतीव पावने ॥ २४ ॥ ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः ॥ क्रीडन्ति पुंसः सिञ्चन्त्यो विगाह्य रतिकर्षिताः ॥ २५ ॥ ययोस्तत्स्नानविभ्रष्टनवकुङ्कुमपिञ्जरम् ॥ वितृषोऽपि पिबन्त्यम्भः पाययन्तो गजा गजीः ॥ २६ ॥ तारहेममहारत्नविमानशतसंकुलाम् ॥ जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनम् ॥ २७ ॥ हित्वा यक्षेश्वरपुरीं वनं सौगन्धिकं च तत् ॥ द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः ॥ २८ ॥ रक्तकण्ठखगानीकस्वरमण्डितषट्पदम् ॥ कलहंसकुलप्रेष्ठं खरदण्डजलाशयम् ॥ २९ ॥ वनकुञ्जरसंघृष्टहरिचन्दनवायुना ॥ अधिपुण्यजनस्त्रीणां मुहुरुन्मथयन्मनः ॥ ३० ॥

त्नानि माणिक्यादीनि तन्मयानां विमानानां शतैः सङ्कुलां व्याप्तां पुण्यजना यक्षास्तेषां स्त्रीभिर्जुष्टां निषेवितां यथा सतडिद्घनं तडिद्भिर्घनैश्च सहितं खं शोभते तथा शोभिताम् । तडिद्भिः स्त्रीणां घनैर्विमानानामाकाशेन पुर्याः सादृश्यं ज्ञेयम् ॥ २७ ॥ हित्वेति चतुष्कम् ॥ एवंभूतां यक्षेश्वरस्य कुबेरस्य पुरीं हित्वा अतिक्रम्य तदतिरम्यत्वेन प्रसिद्धं सौगन्धिकं वनं च दृष्ट्वा ते देवादय आरात् दूरात् वटं ददृशुरिति चतुर्थेनान्वयः । तद्वनं वर्णयति चित्राणि माल्यानि पुष्पाणि फलानि च्छदाः पर्णानि च येषु तैरत एव कामदुघैर्द्रुमैः हृद्यं मनोहरम् ॥२८॥ रक्तकण्ठखगानां कोकिलानामनीकस्य समूहस्य स्वरैर्मण्डिताः षट्पदा यस्मिन् कलहंसानां कुलस्य समूहस्य प्रेष्ठानि खरदण्डानि पद्मानि येषु ते जलाशयाः कासारादयो यत्र॥२९॥ वनकुञ्जरैः स्वकण्डूनिरासार्थं संघृष्टानां हरिचन्दनवृक्षाणां रजोगन्धविमिश्रेण वायुना अधि अधिकं यथा भवति तथा पुण्यजनस्त्रीणां मुहुर्वारंवारं मन उन्मथयत् क्षोभयत् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदूर्यैः वैदूर्यमणिभिः कृतानि रचितानि सोपानानि अवतरणसाधनानि यासु ताः उत्पलानां माला यासु विद्यन्ते ताः उत्पलमालिनीः वाप्यो वापीः दृष्ट्वा "वा छन्दसि" इति पूर्वसवर्णदीर्घाभावपक्षे यण् । किंपुरुषैर्विलासार्थं प्राप्तं वनं च दृष्ट्वा प्राप्ता इति पाठे वापीविशेषणम् आरात् वटं ददृशुः ॥ ३१ ॥ स इति ॥ स वटो योजनशतमुत्सेध उन्नतिर्यस्य स तथा योजनशतापेक्षया पादश्चतुर्थांशः पञ्चविंशति योजनानि तैरूनैः सर्वतः पञ्चसप्ततियोजनप्रमाणैर्विटपैः शाखाभिरायतो विस्तृतः अत एव पर्यङ्कृता अचलाच्छाया यस्य सूर्यादिचक्रे चलत्यपि तच्छाया न चलतीत्यलौकिकप्रभावः । निर्गतानि नीडानि पक्षिस्थानानि यस्मात्स तथा तेन निर्मलता निरुपद्रवता च दर्शिता । अचलच्छायत्वेनैव तापवर्जितः ॥ ३२ ॥ तस्मिन्निति ॥ सुराः महायोगमये अणिमादिसिद्धिप्रदे मुमुक्षूणां शरण आश्रयभूते तस्मिन् वटे सामीप्ये सप्तमी । वटस्याधोदेशे आसीनं त्यक्तामर्षमन्तकमिव शिवं ददृशुः ॥ ३३ ॥ शिवं विशिनष्टि—सनन्दाद्यैरिति पञ्चभिः ॥ संशान्तः षडूर्मिरहितः पूर्णानन्द एव विग्रहः स्वरूपं यस्य तमत एव शान्तैः रागा-

वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः ॥ प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटम् ॥ ३१ ॥ स योजनशतोत्सेधः पादोनविटपायतः ॥
पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ॥ ३२ ॥ तस्मिन्महायोगमये मुमुक्षुशरणं सुराः ॥ ददृशुः शिवमासीनं त्यक्तामर्षमिवान्तकम्
॥ ३३ ॥ सनन्दद्यैर्महासिद्धैः शान्तैः संशान्तविग्रहम् ॥ उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम् ॥ ३४ ॥ विद्यातपोयोगपथमा-
स्थितं तमधीश्वरम् ॥ चरन्तं विश्वसुहृदं वात्सल्याल्लोकमङ्गलम् ॥ ३५ ॥ लिङ्गं च तापसाभीष्टं भस्मदण्डजटाजिनम् ॥ अङ्गेन सं-
ध्याभ्ररुचा चन्द्रलेखां च बिभ्रतम् ॥ ३६ ॥ उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनम् ॥ नारदाय प्रवोचन्तं पृच्छते शृण्वतां सताम्
॥३७॥ कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि॥बाहुप्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया॥३८॥

दिरहितैः महासिद्धैः सनन्दाद्यैस्तथा गुह्यकानां यक्षाणां रक्षसां च भर्त्रा पालकेन स्वस्य सख्या कुबेरेण चोपास्यमानं ददृशुरित्यस्यैव क्रियापदस्य पञ्चस्वपि द्वितीयान्तैः संबन्धः ॥ ३४ ॥ विद्या उपासना तपश्चित्तैकाग्र्यं योगः अष्टाङ्गः तेषां पन्थानं मार्गमास्थितमनुतिष्ठन्तम् । तस्य लोकस्य अधीश्वरं तमिति वा पाठः । विश्वस्य सुहृदं वात्सल्यादिति कृपायुक्तस्नेहाल्लोकस्य मङ्गलभूतं विद्यादिकं चरन्तमनुतिष्ठन्तम् ॥ ३५ ॥ स्वतः शुक्लवर्णत्वेऽपि भस्मधारणेन सन्ध्याभ्रवद्रुक् कान्तिर्यस्य तेनाङ्गेन तापसानामभीष्टं भस्मदण्डजटाजिनरूपं लिङ्गं चिह्नं चन्द्रलेखां च बिभ्रतम् ॥ ३६ ॥ दर्भमय्यां बृस्यां व्रतियोग्ये आसन उपविष्टम् अन्येषां सतां सनन्दादीनां शृण्वतां मध्ये पृच्छते नारदाय सनातनं ब्रह्म वेदतत्वं प्रवोचन्तम् उपदिशन्तम् उमार्षः । " किन्न वोचस्यसद्वत्ते " इतिवत्कल्पितो वोचधातुर्वा । एतेन परमगुरुत्वं श्रीरुद्रस्य दर्शितम् ॥ ३७ ॥ दक्षिण ऊरौ सव्यं पादपद्मं कृत्वा विन्यस्य तथा सव्ये जानुनि च सव्यं बाहुं कृत्वा दक्षिणबाहुप्रकोष्ठे कराग्रे मणिबन्धस्थाने अक्षमालां कृत्वा दक्षिणहस्ते तया तर्कमुद्रया उपलक्षितमासीनमित्यन्वयः । अत्र वीरासनं प्रदर्शितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुक्तं योगशास्त्रे । "एकं पादमथैकस्मिन् विन्यसेदूरुसंस्थितम् । इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतम् ॥" तर्कमुद्रा च प्रदर्शिता । "तर्जन्यङ्गुष्ठयोरग्रे मिथः संयोज्य चाङ्गुलीः । प्रसार्य बन्धनं प्राहुस्तर्कमुद्रेति मान्त्रिकाः ॥" ॥ ३८ ॥ तमिति ॥ ब्रह्मनिर्वाणं ब्रह्मानन्दस्तत्र समाधिश्चित्तैकाग्र्यं तमाश्रितं तथा योगकक्षां योगपट्टिकां च जानुदृढीकरणार्थं विशेषेणोपाश्रितवन्तं मनूनां मननशीलानामाद्यं मुख्यं मनुं तं गिरिशं लोकपालैरिन्द्रादिभिः सहिताः मुनयः प्राञ्जलयः रचिताञ्जलिपुटाः सन्तः प्रणेमुः ॥ ३९ ॥ स इति ॥ सुरासुरेशैरभिवन्दितौ अङ्घ्री यस्य तादृशोऽपि स शिवः आत्मयोनिं ब्रह्माणमागतमुपलभ्य दृष्ट्वा यथार्हत्तमः पूज्यतमोऽपि विष्णुः श्रीवामनमूर्तिः कस्य प्रजापतेः कश्यपस्य अभिवन्दनं करोति तथा स्वासनादुत्थाय शिरसाभिवन्दनं चक्रे ॥ ४० ॥ तथेति ॥ तथा अपरे ये महर्षिभिः सहिताः सिद्धगणाः नीललोहितं भवमनुअनुवर्त्तिनस्तत्र समन्तात् सर्वतो वर्त्तन्ते तेऽपि तस्मै प्रणामं कृतवन्तः इति शेषः।एवं तैर्नमस्कृतः आत्मभूः ब्रह्मा देवादीनामपराधस्मरणेन तेषां लज्जोत्पादनार्थं प्रहसन्नुपहासमिव कुर्वन् देवैः कृतः प्रणामो यस्मै तं शशाङ्कशेखरं शिवं प्राह स्म ॥ ४१ ॥ तत्र शैवमतमाश्रित्याह—जाने इति ॥ शैवाः खलु भगवत्प्रकृतिपुरुषान् सदा-

तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षाम् ॥ सलोकपाला मुनयो मनूनामाद्यं मनुं प्राञ्जलयः प्रणेमुः ॥ ३९॥ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवन्दिताङ्घ्रिः ॥ उत्थाय चक्रे शिरसाऽभिवन्दनमर्हत्तमः कस्य यथैव विष्णुः ॥ ४० ॥ तथाऽपरे सिद्धगणा महर्षिभिर्ये वै समन्तादनु नीललोहितम् ॥ नमस्कृतः प्राह शशाङ्कशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ॥ ४१ ॥ ब्रह्मोवाच ॥ जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः ॥ शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरम् ॥४२॥ त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः ॥ विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥४३॥ त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरम् ॥ त्वयैव लोकेऽवसिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः॥४४॥

शिवशक्तिशिवरूपत्वेन मन्यन्ते ततश्चायमर्थः। त्वां विश्वस्य प्राकृताप्राकृतस्य सर्वस्य जगतः ईशं सदाशिवरूपं जाने।तथा शक्तेः शिवस्य चेत्यनयोः प्राकृतप्रपञ्चस्य योनिर्बीजभूतयोर्मातापितृस्थानीययोः परं जाने । तथा यत्तत्प्रसिद्धं निरन्तरं निर्भेदं ब्रह्म तदपि त्वामेवाहं जाने ॥ ४२ ॥ त्वमेवेति ॥ हे भगवन् स्वरूपयोः स्वांशभूतयोः सरूपयोरिति पाठे शिवस्य स्वांशत्वात् शक्तेस्त्वच्छायारूपत्वात्समानरूपयोः शिवशक्त्योरन्तःस्थितः क्रीडन् ऊर्णपटः ऊर्णनाभिः कीटो यथा सहायान्तरं विनैव ऊर्णां सृजति तत्र विहरति संहरति च तथा त्वमेवैतद्विश्वं सृजसि पासि अत्सि संहरसि ॥४३॥ त्वमेवेति ॥ धर्मम् अर्थं च दोग्ध्री या वेदत्रयी तस्या अभिपत्तये संरक्षणाय । यद्वा । हे धर्मार्थदुघ धर्माद्यभिपत्तये तत्प्राप्तये दक्षरूपेण सूत्रेण निमित्तभूतेन तन्तुवाय इव त्वमेवाध्वरं वस्त्रस्थानीयं ससर्जिथ प्रवर्तितवानसि । सर्वे सेतवो वर्णाश्रममर्यादाः त्वयैव लोकेऽवसिताः निबद्धाः यान् धृतव्रताः सन्तो ब्राह्मणाः श्रद्दधते श्रद्धयानुतिष्ठन्ति अतो दक्षवधे सति सम्प्रति धर्मप्रवर्तकस्यान्यस्याभावात् धर्मलोपे लोकस्य दुर्गतिः स्यात् ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति ॥ हे मङ्गल त्वमेव मङ्गलानां शुभानां कर्त्तुः कामिनः स्वः स्वर्गादिलोकं निष्कामस्य परं पदं सायुज्यादिमोक्षं वा तनुषे विस्तारयसि ददासीत्यर्थः । तथा अमङ्गलानां पापकर्मणां कर्तुश्चोल्बणं घोरं तमिस्रं नरकं तनुषे । केनचित् प्रबलेन निमित्तेन तदेव तस्मिन्नेव कर्मणि कस्यचित् फलविपर्ययोऽपि भवति । यथा दक्षस्य पुण्यकर्त्तुरपि तमिस्रम् अजामिलस्य पापकर्त्तुरपि अपवर्गः ॥४५ ॥ न वा इति ॥ सतां त्वच्चरणे अर्पितः स्थिरीकृत आत्मा मनो यैस्तेषां सर्वेषु भूतेषु स्थावरजङ्गमेषु तवात्मानमभितो व्यापकतया पश्यतां भूतानि चात्मनि त्वयि स्वस्मिन् वा अपृथग्दिदृक्षतां पश्यतां भेददर्शनरहितानामित्यर्थः । अत्रेच्छारूपः सन्प्रत्ययार्थो न विवक्षितः । यद्वा । द्रष्टुमिच्छतामेव किं पुनः पश्यतां शता चार्षः । एवंभूतानां सतां द्वितीयार्थे षष्ठी । यथा पशुं रोषोऽभिभवति इति वैधर्म्ये दृष्टान्तः तथा प्रायेण रोषो नैवाभिभवेत् स्वं वशीकृत्यानुचितं न कारयेत् ॥ ४६ ॥ पृथगिति ॥ पृथग्धियः भेददर्शिनः कर्मण्येव नतु भगवति दृक् बुद्धिर्येषां ते दुराशया मलिनचित्ताः परेषां समृद्धानाम् उदयेन समृ-

त्वं कर्मणां मङ्गल मङ्गलानां कर्तुः स्म लोके तनुषे स्वः परं वा ॥ अमङ्गलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ॥ ४५ ॥ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ॥ भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुम् ॥४६॥ पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम् ॥ परान् दुरुक्तैर्वितुदन्त्यरुन्तुदास्तान्माऽवधीद्दैववधान् भवद्विधः ॥ ४७ ॥ यस्मिन्यदा पुष्करनाभमायया दुरन्तया स्पृष्टधियः पृथग्दृशः ॥ कुर्वन्ति तत्र ह्यनुकम्पया कृपां न साधवो दैवबलात्कृते क्रमम् ॥ ४८ ॥ भवांस्तु पुंसः परमस्य मायया दुरन्तयाऽस्पृष्टमतिः समस्तदृक् ॥ तया हतात्मस्वनुकर्मचेतः स्वनुग्रहं कर्तुमिहार्हसि प्रभो ॥ ४९ ॥ कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयाऽसमाप्तस्य मनोः प्रजापतेः ॥ न यत्र भागं तव भागिनो ददुः कुयज्विनो येन मखो निनीयते ॥ ५० ॥

द्ध्या अनिशं सततम् अर्पिता हृदि रुक् पीडा येषां ते अरुन्तुदाः मर्मतोदिनः जनाः परान् अन्यान् दुरुक्तैः वितुदन्ति अतिव्यथयन्ति । अतो दैवेन स्वप्रारब्धकर्मणैव वधो येषां तान् भवद्विधो निरुपमः साधुः मावधीत् न हन्यात् समर्थोऽप्युपेक्षेत ॥ ४७ ॥ यस्मिन्निति ॥ दुरन्तया प्रबलया पुष्करनाभस्य भगवतो मायया स्पृष्टा व्याप्ता धीर्येषां ते जनाः यस्मिन् देशे यदा काले पृथग्दृशः भेददर्शिनो भवन्ति भेददृष्ट्या साधूनामपराधं कुर्वन्ति तत्र देशे काले च दैवबलात् प्रारब्धवशात् कृतेऽपराधरूपेऽर्थे ममैव दैवमेवंभूतं कोऽत्रापराधस्तेषामिति मन्यमानाः साधवः अनुकम्पया दयया कृपां क्षमापूर्वकमुपकारमेव कुर्वन्ति नतु क्रमं तन्नाशार्थं पराक्रमं कुर्वन्ति ॥ ४८ ॥ भवानिति ॥ हे प्रभो भवांस्तु परमस्य पुंसः भगवतो दुरन्तया अचिन्त्यप्रभावया मायया अस्पृष्टमतिः अमोहितचित्तः अत एव समस्तदृक् सर्वज्ञः अतस्तया मायया हतात्मसु मोहितचित्तेषु अत एव अनुकर्म कर्मस्वेवासक्तं चेतो येषां तेषु दक्षादिषु इह अपराधेन विनाशे जातेऽप्यनुग्रहं कर्त्तुमर्हसि ॥ ४९ ॥ कुर्विति ॥ भो मनो त्वया हतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरभद्रादिद्वारा विनाशितस्य अत एव मध्ये विनाशितत्वादसमाप्तस्य प्रजापतेर्दक्षस्याध्वरस्योद्धरणं सर्वाङ्गसम्पत्त्या प्रवर्तनेन समाप्तिं कुरु । यत्र यस्मिन् यज्ञे कुयज्वनः कुयज्वानः असूयादिदोषयुक्ता याज्ञिकाः दीर्घाभाव आर्षः । भागिनो भागार्हस्यापि तव भागं न ददुः । येन त्वया मखो निनीयते फलेन संयोज्यते तस्य फलदातुस्तव भागमिति संबन्धः ॥ ५० ॥ जीवतादिति ॥ यजमानोऽयं दक्षो जीवतात् भगः अक्षिणी नेत्रे प्रपद्येत प्राप्नोतु भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत् भवन्तु ॥ ५१ ॥ देवानामिति ॥ हे मन्यो आयुधाश्मभिः आयुधैः खड्गादिभिः पाषाणैश्च भग्नानि गात्राणि येषां तेषां देवानाम् ऋत्विजां च भवतानुगृहीतानामाशु शीघ्रमेवानातुरं यथापूर्वमवयवसम्पत्त्या स्वास्थ्यमस्तु ॥ ५२ ॥ एष इति ॥ हे रुद्र यदिति यावदर्थे । अध्वरस्य यदुच्छिष्टः यज्ञे असमाप्ते यावानवशिष्टः पदार्थस्तावान्सर्वोऽप्येष ते तव भागोऽस्तु । हे रुद्र हे यज्ञहन् ते तव भागेनाद्य शीघ्रमेव यज्ञः कल्पतां सम्पद्यताम्॥ ५३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायरतुर्यस्य षष्ठेऽध्याये व्यधादि-

जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः ॥ भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत् ॥ ५१ ॥ देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः ॥ भवतानुगृहीतानामाशु मन्योऽस्त्वनातुरम्॥५२॥एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै॥ यज्ञस्ते रुद्र भागेन कल्पतामद्य यज्ञहन् ॥ ५३ ॥ ॥ इति श्रीभागवते चतुर्थस्कन्धे रुद्रसान्त्वनं नाम षष्ठोऽध्यायः ॥ ६ ॥ मैत्रेय उवाच ॥ ॥ इत्यजेनानुनीतेन भवेन परितुष्यता ॥ अभ्यधायि महाबाहो प्रहस्य श्रूयतामिति ॥ १ ॥ श्रीमहादेव उवाच ॥ नाघं प्रजेश बालानां वर्णये नानुचिन्तये ॥ देवमायाऽभिभूतानां दण्डस्तत्र धृतो मया ॥ २ ॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः ॥ मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ॥ ३ ॥ पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् ॥ देवाः प्रकृतसर्वाङ्गा ये म उच्छेषणं ददुः ॥ ४ ॥

माम् ॥ ६ ॥ सप्तमे हरिरुद्भूतः स्तुतः सर्वैः पुनर्मखम् ॥ प्रावर्त्तयत्तत्र पद्यान्यर्द्धयुक्ता महीरसाः ॥ गोद्वयोऽनुष्टुभः सार्द्धा उवाचेत्यद्रिबाहवः ॥ ७ ॥ इतीति ॥ हे महाबाहो इत्येवमजेन ब्रह्मणानुनीतेनात एव परितुष्यता भवेन प्रहस्यैवं चेत्तर्हि श्रूयतामिति तं प्रत्यभ्यधायि कथितम् ॥ १ ॥ नाघमिति ॥ हे प्रजेश अहं देवस्य भगवतो माययाभिभूतानां मोहितानामेषां दक्षादीनां बालानामज्ञानामघमपराधं न वर्णये नाप्यनुचिन्तये । तत्र मर्यादारक्षणार्थमेव मया दण्डो धृतः ॥ २ ॥ प्रजापतेरिति ॥ दग्धं शिरो यस्य तस्य प्रजापतेः शिरः अजस्य छागस्य मुखं यस्मिंस्तथाभूतमस्तु । उद्धृतनेत्रो भगस्तु मित्रस्य मित्रनाम्नो देवस्य चक्षुषा बर्हिषो यज्ञस्य संबन्धिनं तं स्वं भागमीक्षेत ॥ ३ ॥ पूषेति ॥ पूषा तु अन्यसहितश्चेत् यजमानस्य दद्भिर्दन्तैः जक्षतु जक्षितु इटोऽकार आर्षः । केवलश्चेत् पिष्टभुक् भवतु । ये देवाः मे मह्यम् उच्छेषणं यज्ञावशिष्टं भागत्वेन ददुः ब्रह्मणो वचनात्तद्दानमङ्गीचक्रुः ते देवाः प्रकृतानि यथापूर्वं स्थितानि सर्वाण्यङ्गानि येषां ते तथा भवन्त्विति शेषः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहुभ्यामिति ॥ स्कन्धादङ्गुल्यन्तं यावद्बाहुः तस्यैकदेशो हस्तः ये चान्येऽध्वर्यव ऋत्विजस्तत्र ये केचन छिन्नबाहवस्तेऽश्विनोर्बाहुभ्यां कृतबाहवः कृतबाहुप्रयोजनाः भवन्तु। तथा ये केचन छिन्नहस्तास्ते पूष्णो हस्ताभ्यां कृतहस्ताः कृतहस्तप्रयोजना भवन्तु । तथा भृगुस्तु बस्तस्य छागस्य श्मश्रूण्येव श्मश्रूणि यस्य स तथाभूतो भवेत् ॥ ५ ॥ तदेति ॥ हे तात तदा प्रणतानामभीष्टं मेहन्ति सिञ्चन्ति वर्षन्ति "मिह सेचने" ते मीढ्वांसः "दाश्वान् साह्वान् मीढ्वांश्च " इति निपातः क्वस्वन्तस्तेषां मध्येऽतिशयेन मीढ्वान् मीढुष्टमः शिवः अयस्मयादित्वात् भत्वे संप्रसारणम् । तेनोदितमुक्तं श्रुत्वा अथानन्तरमेव परितुष्टात्मभिः संतुष्टैर्मनोभिर्युक्तानि सर्वाणि भूतानि कर्तॄणि भवदुक्तं साधु साध्वित्यब्रुवन् ॥ ६ ॥ तत इति ॥ ततो मीढ्वांसं महादेवमपि समामन्त्र्य त्वया तत्र गत्वैव सर्वं कार्यमिति संप्रार्थ्य अतस्तेन मीढुषा वेधसा ब्रह्मणा च सह वर्तमानाः समीढ्वद्वेधसः ऋषिभिश्च सहिताः शुनासीराः देवाः भूयः पुनः तस्य दक्षस्य देवयजनं यज्ञवाटं ययुः ॥ ७ ॥ विधायेति ॥ यत् भगवान् भव आह स्म । तत्सर्वं कार्त्स्न्येन

बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः ॥ भवन्त्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ॥ ५ ॥ मैत्रेय उवाच ॥ तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम् ॥ परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ॥ ६ ॥ ततो मीढ्वांसमामन्त्र्य शुनासीराः महर्षिभि ॥ भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ॥ ७ ॥ विधाय कार्त्स्न्येन च तद्यदाह भगवान्भवः ॥ संदधुः कस्य कायेन सवनीयपशोः शिरः ॥ ८ ॥ संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः ॥ सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम् ॥ ९ ॥ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः ॥ शिवावलोकादभवच्छरद्ध्रद इवामलः ॥१० ॥ भवस्तवाय कृतधीर्नाशक्नोदनुरागतः ॥ औत्कण्ठ्याद्बाष्पकलया संपरेतां सुतां स्मरन् ॥ ११ ॥ कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः ॥ शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥

विधाय सम्पाद्य भगादिभ्यश्चक्षुरादि दत्त्वा भवाज्ञया सवनीयपशोः शिरः कस्य दक्षस्य कायेन देहेन संदधुः योजितवन्तः ॥ ८ ॥ सन्धीयमान इति ॥ एवं देवैर्दक्षकायेन पशुशिरसि सन्धीयमाने सति रुद्रेणामृताभिवर्षिण्या कृपादृष्ट्याभिवीक्षितो दृष्टो दक्षः सद्यः शीघ्रमेव सुप्त इव यथा सुप्तः पुरुषः केनचिदुत्थापितः उत्तिष्ठति तथा उत्तस्थौ । अग्रतश्च मृडं शिवं स्थितं ददृशे । तङार्षः ॥ ९ ॥ तदेति ॥ वृषध्वजस्य द्वेषेण कलिलः मलिन आत्मा यस्य स तथाविधोऽपि प्रजापतिर्दक्षः शिवस्य कृपया अवलोकात् तदा तत्क्षण एव शरत्कालिकह्रद इवामलो निर्मलान्तःकरणोऽभवत् ॥ १० ॥ भवेति ॥ भवस्य स्तवाय कृता उद्युक्ता धीर्यस्य स तथाविधोऽपि सम्परेतां मृतां सुतामनुरागतः स्मरन् औत्कण्ठ्यात् जातया बाष्पकलया अश्रुधारया रुद्धकण्ठत्वात् स्तोतुं नाशक्नोत् ॥ ११ ॥ कृच्छ्रादिति ॥ एवं प्रेम्णा विह्वलितः व्याकुलोऽपि प्रजापतिर्दक्षो यतः सुधीः शुद्धबुद्धिरतः कृच्छ्रात् कष्टात् बलात् मनः संस्तभ्य स्वस्थं कृत्वा निर्व्यलीकेन भावेन निष्कपटेनाभिप्रायेण ईशं महादेवं शशंस स्वापराधनिवेदनपूर्वकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुत्या क्षमापितवान् ॥ १२ ॥ भूयानिति ॥ अहो हे भगवन् यदपि यद्यपि भवान् मया प्रलब्धः तिरस्कृतः तथापि यः शिरश्छेदादिना मयि त्वया दण्डो धृतः स ममोपरि भवता भूयान् महान् अनुग्रहः कृतः । दण्डस्य त्वदपराधजन्यपापनिवर्तकत्वात् ब्रह्मबन्धुषु ब्राह्मणाभासेषु ब्राह्मणयोग्यगुणरहितेष्वपि तुभ्यं तव हरेश्चेति वां युवयोरवज्ञा । एते स्वापराधेन नरकादौ पतन्त्वित्युपेक्षा नास्ति । एवं धृतव्रतेषु दीक्षितेषु मादृशेषु कुत एव उपेक्षा स्यात् ॥ १३ ॥ विद्येति ॥ हे परमश्रेष्ठ विभो त्वं ब्रह्म वेदम् आत्मतत्वं स्वज्ञानमार्गं च अवितुं रक्षितुं विद्यातपोव्रतधरान् विप्रान् प्रथमं क्षत्रियादेः सृष्टेः पूर्वं मुखतः त्वमस्राक् अस्राक्षीः । सृजेः लुङि " अस्तिसिचोऽपृक्ते " इति प्राप्ते " बहुलं छन्दसि " इति ईडभावपक्षे " हल्ङ्याब्भ्य " इति सिपोलोपेऽम्वृद्धिसलोपकुत्वानि । तत्तस्मात् प्रगृहीतो दण्डो येन स पालः पशूनिव यथा गर्तादिपतनमार्गेण गच्छतः पशूंस्तत्पालको दण्डेन कृत्वा ततो निवर्तयति तथा सर्वविपत्सु नरकादिपातहेतुषु पापेषु प्राप्तेषु सत्सु तेभ्यो ब्राह्मणान् पासि दण्डप्रदानेन मूलदोषनिवृत्त्या रक्षसि ॥ १४ ॥ य

दक्ष उवाच ॥ भूयाननुग्रह अहो भवता कृतो मे दण्डस्त्वया मयि धृतो यदपि प्रलब्धः ॥ न ब्रह्मबन्धुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥ १३ ॥ विद्यातपोव्रतधरान्मुखतः स्म विप्रान्ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक् ॥ तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदण्डः ॥ १४ ॥ योऽसौ मयाऽविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्माम् ॥ अर्वाक्पतन्तमर्हत्तमनिन्दयाऽपादृष्ट्याऽऽर्द्रया स भगवान् स्वकृतेन तुष्येत् ॥ १५ ॥ मैत्रेय उवाच ॥ क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमन्त्रितः ॥ कर्म संतानयामास सोपाध्यायर्त्विगग्निभिः ॥ १६ ॥ वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः ॥ पुरोडाशं निरवपन्वीरसंसर्गशुद्धये ॥ १७ ॥ अध्वर्युणाऽऽत्तहविषा यजमानो विशांपते ॥ धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः ॥ १८ ॥

इति ॥ योऽसौ भगवान् न विदितं भवतस्तत्वं यया तादृशी दृक् ज्ञानं यस्य तेन मया सभायां विश्वसृक्सत्रसभायां दुरुक्तिविशिखैः कुवचोबाणैः क्षिप्तः तिरस्कृतोऽपि तन्मत्कृतं क्षेपणं विगणय्य अगणय्येति त्वार्षः पाठः।अर्हत्तमस्य पूज्यतमस्य निन्दया अर्वाक् नरके पतन्तं माम् आर्द्रया कृपामृतपूर्णया दृशा अपात् रक्षितवान् स भगवान् भवान्स्वकृतेनैवानुग्रहेण तुष्येत् तुष्टो भवतु नतु मादृशैः प्रत्युपकर्त्तुं शक्यम् ॥ १५ ॥ क्षमाप्येति ॥ स दक्षः एवं मीढ्वांसं शिवं क्षमाप्य क्षमामाप्नोति तादृशं कृत्वा ल्यप् त्वार्षः । ब्रह्मणा
चानुमन्त्रितोऽनुज्ञातः उपाध्यायसहितैः ऋत्विग्भिरग्निभिश्च कर्म यज्ञं संतानयामास प्रवर्तयामास ॥ १६ ॥ वैष्णवमिति ॥ यज्ञस्य नष्टस्य सन्तत्यै साङ्गतासिद्ध्या प्रवृत्त्यर्थं वीराणां रुद्रगणेषु विद्यमानानां भूतप्रेतादीनां संसर्गेण जातस्य दोषस्य शुद्धये निवृत्त्यर्थं च द्विजोत्तमाः त्रिकपालं त्रिषु कपालेषु संस्कृतं वैष्णवं विष्णुदेवताकं पुरोडाशं तत्संज्ञकं हविर्विशेषं निरवपन् जुहुवुः ॥ १७ ॥ अध्वर्युणेति ॥ हे विशांपते विदुर आत्तं गृहीतं हविः येन तेनाध्वर्युणा सह यजमानो दक्षो विशुद्धया धिया यथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मां यद्ययम् अविद्यःविद्याहीनः लोकोऽपविद्धं सदाचारभ्रष्टं जपति जल्पति तदा त्वत्परानुग्रहेण तव यःपरो मयि अनुग्रहस्तेनाहं तज्जल्पनं न गणये। मालिनी छन्दः॥ २९ ॥ यदिति॥ गहनया दुस्तरया यन्मायया अपहृतः आच्छादितः आत्मबोधो येषां ते तमसि संसारान्धकारे स्वपन्तः ब्रह्मादयः तनुभृतः जीवाः आत्मन् आत्मनि स्वस्मिन् ङिलुगार्षः। श्रितं स्थितमपि तव भगवतस्तत्वमधुनापि अनन्तकोटिजन्मोपलक्षितकाले व्यतीतेऽपि न विदन्ति न जानन्ति । सोऽयं प्रणतानाम् आत्मा बन्धुः हितकृच्च भवान् ममापराधिनोऽपि प्रसीदतु ॥ ३० ॥ नैतदिति ॥ असौ पुरुषः पदार्थानां भेदान् गृह्णन्ति यानि तैरिन्द्रियैः यावद्वस्तुजातम् ईक्षेत् प्रत्यक्षीकुर्यात्। तङभाव आर्षः । तदेतत् दृश्यजातं भवतः स्वरूपं नास्ति यतः हेतोः त्वं ज्ञानस्य घटादिविषयकवृत्तेः अर्थस्य घटादेः गुणस्य तद्ग्राहकेन्द्रियस्य चेति त्रितयस्यापि आश्रयः अधिष्ठानम् अतः मायामयाद्वस्तुनः व्यतिरिक्तः असि दृश्यादिप्रपञ्चाधिष्ठानभूतस्त्वं भिन्न एवासि । उपजातिछन्दोभङ्ग- ॥ ३१ ॥ इदमपि इति ॥ हे अच्युत विश्वस्य भावनं पालकं मनोदृशाम् आनन्दकरं सुरविद्विषां दैत्यानां

भृगुरुवाच ॥ यन्मायया गहनयाऽपहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपन्तः ॥ नात्मञ्श्रितं तव विदन्त्यधुनाऽपि तत्त्वं सोयं प्रसीदतु भवान्प्रणतात्मबन्धुः ॥ ३० ॥ ब्रह्मोवाच ॥ नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत् ॥ ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वम् ॥ ३१ ॥ इन्द्र उवाच ॥ इदमप्यच्युत विश्वभावनं वपुरानन्दकरं मनोदृशाम् ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदण्डैरुपपन्नमष्टभिः ॥ ३२ ॥ पत्न्य ऊचुः ॥ यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाऽद्य दक्षकोपात् ॥ तं नस्त्वं शवशयनाभशान्तमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥ ३३ ॥ ऋषय ऊचुः ॥ अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि कर्म नाऽज्यसे ॥ विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्ततीं भवान् ॥ ३४ ॥

च क्षपणैः उदायुधैः उद्यतशस्त्रैः अष्टभिर्भुजदण्डैः उपलक्षितम् इदमस्मद्दृग्गोचरं तव वपुरपि उपपन्नमेव नतु प्रपञ्चवदनिर्वचनीयतयाऽनुपपन्नम् । यद्वा। भुजदण्डैरुपपन्नम् इदं वपुरपि मनोदृशामानन्दकरमिति शेषं तुल्यम्। वैतालीयंछन्दः ॥ ३२ ॥ यज्ञ इति ॥ हे यज्ञात्मन् अयं यज्ञस्तव यजनाय पूजनाय केन दक्षेण सृष्टः प्रवर्तितस्तत्र रुद्रभागनिरासेन सत्यपमानेन च दक्षकोपात्पशुपतिना रुद्रेण सोऽद्य विध्वस्तो नष्टः । शवाः शेरतेऽस्मिन्निति शवशयनं श्मशानं तद्वदाभा प्रतीतिर्यस्य स चासौ शान्तमेधश्च शान्त उपरतो मेधः " मेधृ हिंसायाम् " पशुहिंसाद्युपलक्षितं कर्म यत्र तं नोऽस्माकं यज्ञं त्वं नलिनस्येव रुक् कान्तिर्यस्यास्तया स्वदृशा नेत्रेण पुनीहि पवित्रं कुरु । पूर्णं सफलं च कुर्विति यावत् । यद्वा । शवं जलं तच्छयं कमलं नाभौ यस्य तत्संबुद्धिरिति । " शवः स्यात् कुणपे पुमान् । नपुंसकं तु पानीये " इति मेदिनी । प्रहर्षिणीछन्दः ॥ ३३ ॥ अनन्वितमिति ॥ हे भगवन् ते तव विचेष्टितमाचरणमनन्वितमद्भुतं लोकविलक्षणं यत् यस्मात् आत्मना स्वशरीरेण नानाविधं कर्म आचरसि करोषि परन्तु नाज्यसे तज्जनितपुण्यपापसुखदुःखादिना न लिप्यसे । यतश्चान्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंभूतये संपदे ईश्वरीं लक्ष्मीमुपसेदुः भेजुः । यद्वा । यतः इति सार्वविभक्तिकस्तसिः । यतः यामीश्वरीं विभूतये लोका उपसेदुस्तां स्वयमनुवर्त्तिनीं सेवमानामपि शता आर्षः । भवान् न मन्यते नाद्रियते अतो निरपेक्षत्वान्निर्लेपः । प्रथमे पादे वंशस्थं पादत्रये प्रभावती ॥ ३४ ॥ अयमिति ॥ अयमस्माकं मनोवारणः मन एव दुर्दमत्वाद्वारणः क्लेश एव तापकत्वाद्दावाग्निस्तेन दग्धः अतस्तृषार्तः सुखतृष्णया पीडितः सन् त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी नदी तस्यामवगाढः प्रविष्टः परमानन्दमनुभवन् दावं दावाग्नितुल्यं संसारक्लेशं न सस्मार तथा ब्रह्मसम्पन्नवत् ब्रह्मैक्यं प्राप्तम् इव ततः न निष्क्रामति न निस्सरति । भुजङ्गप्रयातं छन्दः ॥३५॥ स्वागतमिति ॥ हे ईश हे अधीश ते तव स्वागतं भद्रमागमनं त्वं प्रसीद तुभ्यं नमः । यथा शीर्षहीनः कबन्धः कायमात्रः पुरुषोऽङ्गैः करचरणाद्यवयवैः शोभनैरपि न शोभते तथा त्वामृते विना अङ्गैः प्रयानुजादिभिर्न शोभते अतः हे श्रीनिवास कान्तया स्वभार्यया श्रिया सह नोऽस्मान् त्राहि त्रायस्व । तङ् शब्लुक् चार्षः । स्रग्विणी छन्दः॥३६॥ दृष्ट इति ॥ हे भूमन् यः सर्वस्य प्रत्यगन्तःकरणैः

सिद्धा ऊचुः ॥ अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः ॥ तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ॥ ३५ ॥ यजमान्युवाच ॥ स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कान्तया त्राहि नः ॥ त्वामृतेऽधीश नाङ्गैर्मखः शोभते शीर्षहीनः कबन्धो यथा पूरुषः ॥ ३६ ॥ लोकपाला ऊचुः ॥ दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यम् ॥ माया ह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पञ्चभिर्भासि भूतैः ॥ ३७ ॥ योगेश्वरा ऊचुः ॥ प्रेयान् न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः ॥ अथापि भक्त्येश तथोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल ॥ ३८ ॥ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया ॥ रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ॥ ३९ ॥

स्थितः द्रष्टा अन्तर्बहिः सर्वसाक्षी येनानुग्राहकेणानुगृहीतैश्चेतनतां प्राप्तैरिन्द्रियैर्दृश्यं विश्वं दृश्यते स त्वं नोऽस्माभिरसद्ग्रहैः प्राकृतपदार्थग्राहकैर्दृग्भिरिन्द्रियैः स्त्रीलिङ्गस्य विशेषणे पुंस्त्वमार्षम् । यद्वा । असत्प्रकाशरूपाभिर्दृग्भिरित्यजहल्लिङ्गत्वान्न दोषः । यद्वा । न इति तृतीयान्ताव्ययत्वात्तद्विशेषणम् । असद्ग्रहैरिति किं दृष्टः न दृष्ट इत्यर्थः । यस्त्वं पञ्चभूतव्यतिरिक्तः षष्ठोऽपि पञ्चभिर्भूतैर्विशिष्ट इव भासि सैषा भवदीया मायैव शुद्धचित्तानां शुद्धसत्वमूर्तिर्भासि अस्माकं बहिर्मुखेन्द्रियाणां जीव इव भासि अतस्त्वमिन्द्रियगोचरो नासि । शालिनी छन्दोभङ्गः॥ ३७॥प्रेयानिति॥हे प्रभो यस्त्वयि विश्वात्मनि परब्रह्मणि आत्मनः स्वस्य पृथक् पृथक्त्वं नेक्षेत् । यद्वा। आत्मनो जीवान् पृथक् नेक्षेत् । तङभाव आर्षः । अमुतः अमुष्मादभेदद्रष्टुरन्यस्ते तव प्रेयान् प्रेष्ठो नास्ति । यद्यप्येवमथापि तथापि हे ईश हे वत्सल तथा शास्त्रेषु सर्वपुरुषार्थहेतुत्वेन प्रतिपादितया अनन्यवृत्त्या अव्यभिचारिण्या भक्त्या उपधावतां भजतोऽस्माननुगृहाण शेषे षष्ठी । उपधावतामस्माकमनन्यवृत्त्याऽनुगृहाणेति वाऽन्वयः ॥ ३८ ॥ जगदिति ॥ जगत उद्भव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवन्तं दध्यौ तथा तेनैव स्वरूपेण हरिः प्रादुरभूत् ॥ १८ ॥ तदेति ॥ यजमानेन ध्यातस्तदा दश दिशो द्योतयन्त्या स्वप्रभया दीप्त्या तेषां ब्रह्मादीनां सर्वेषां तेजो मुष्णन् तिरस्कुर्वन् स्तोत्रे बृहद्रथन्तरे वाजौ पक्षौ यस्य तेन ताक्ष्र्येण गरुडेन उपानीतः समीपं प्रापितः । "बृहद्रथन्तरे पक्षौ "इति श्रुतेः ॥१९॥ श्याम इति द्वयम् ॥ श्यामः हिरण्मयी रशना काञ्ची यस्य सः हिरण्यमिव रशना पीतं वस्त्रं यस्येति वा स हिरण्यरशनः अर्कवत् प्रकाशमानेन किरीटेन जुष्टः युक्तः नीलाश्च ते अलकाश्च नीलालकास्ते एव कुञ्चितत्वेन भ्रमरसदृशत्वात् भ्रमरास्ते च कुण्डले च नीलालकभ्रमरकुण्डलानि तैर्मण्डितमास्यं यस्य स तथा कम्बुः शङ्खः अब्जं चक्रं शराः चापं गदा असिश्चर्म च तद्युक्तैर्व्यग्रैः भृत्यरक्षार्थं प्रस्फुरद्भिरङ्गदादिभूषणविभूषितत्वाद्धिरण्मयैरष्टभिर्भुजैः पुष्पितः कर्णिकारवृक्ष इव शोभमानः वक्षस्यधिश्रिता वधूर्लक्ष्मीर्यस्य सः । कत्वभाव आर्षः। वनपुष्पाणां मालाऽस्यास्तीति वनमाली उदारोमाधुर्यवर्षी यो हासः अवलोकश्च तयोः कलया चातुर्येण विश्वमेव रमयन् किं पुनर्भक्तान्।पार्श्वे उभयतो भ्रमन्ती व्यजनचामरे

तदा स्वप्रभया तेषां द्योतयन्त्या दिशो दश ॥ मुष्णंस्तेज उपानीतस्ताक्ष्र्येण स्तोत्रवाजिना ॥ १९ ॥ श्यामो हिरण्यरशनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमण्डितकुण्डलास्यः ॥ कम्ब्वब्जचक्रशरचापगदाऽसिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः ॥ २० ॥ वक्षस्यऽधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वम् ॥ पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरिरज्यमानः ॥ २१ ॥ तमुपागतमालक्ष्य सर्वे सुरगणादयः ॥ प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥ २२ ॥ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः ॥ मूर्ध्ना धृताञ्जलिपुटा उपतस्थुरधोक्षजम् ॥ २३ ॥ अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः ॥ यथामति गृणन्ति स्म कृतानुग्रहविग्रहम् ॥ २४ ॥ दक्षो गृहीतार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुम् ॥ सुनन्दनन्दाद्यनुगैर्वृतं मुदा गृणन्प्रपेदे प्रयतः कृताञ्जलिः ॥ २५ ॥

एव राजहंससमशुभ्रत्वाद्राजहंसौ यस्य सः श्वेतमातपत्रं छत्रमेव तापहारकत्वेन शशी तेनोपरि रज्यमानः शोभातिशयं प्राप्यमाणः एवंभूतो भगवांस्ताक्ष्र्येणोपानीतः ॥ २० ॥ ॥ २१ ॥ तमिति ॥ तं भगवन्तमुपागतमालक्ष्य ब्रह्मा इन्द्रः त्र्यक्षो रुद्रः एते त्रयो नायकाः मुख्या येषां ते सर्वे सुरगणादयः आदिशब्देन ऋषिगन्धर्वादीनां तत्र स्थितानां सर्वेषां ग्रहणं सहसा झटिति उत्थाय प्रणेमुः ॥ २२ ॥ तत्तेजसेति ॥ तस्य प्रादुर्भूतस्य भगवतस्तेजसा हता तिरस्कृता रुक् प्रभा येषां ते तथा अत एव ससाध्वसाः ससंभ्रमाः तत्प्रभावेण भ्रमच्चित्ताः अत एव सन्नजिह्वाः सन्ना यथेष्टं वक्तुं न समर्था जिह्वा येषां ते मूर्ध्ना मूर्ध्नि धृतोऽञ्जलिपुटो यैस्ते अधोक्षजं भगवन्तमुपतस्थुः तुष्टुवुः। तङ्भाव आर्षः ॥ २३ ॥ अपीति ॥ आत्मभूः ब्रह्मा आदिर्मुख्यो येषां तेऽपि यद्यपि यस्य महि महिमानं प्रति तु अर्वागेव चित्तवृत्तिर्येषां ते तथापि कृतः प्रकटीकृतोऽनुग्रहेण विग्रहो येन तं भगवन्तं यथामति गृणन्ति स्म तुष्टुवुः॥२४॥दक्ष इति॥दक्षः प्रयतः वशीकृतचित्तः कृताञ्जलिश्च सन् गृहीतानि पूज्यतमत्वादनेकत्र स्वीकृतानि अर्हणानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादनोत्तमानि पात्रश्रेष्ठानि येन तं पूज्यतमे आगते पात्रसहितमेवार्हणं समर्प्यते गृहीत्वा इति पाठस्तु सुगमः विश्वसृजां ब्रह्मादीनामपि परं गुरुं पूज्यतमं यज्ञेश्वरं सुनन्दनन्दादिभिरनुगैः पार्षदैर्वृतं भगवन्तं मुदा गृणन् स्तुवन् मनसा प्रपेदे शरणं जगाम ॥२५॥ शुद्धमिति ॥ अत्र शुद्धमित्यादीनि क्लीबानि चिन्मात्रस्य विशेषणानि। पुल्लिङ्गानि तु भवतः। शुद्धमुपरता निवृत्ता अखिला बुद्ध्यवस्था जाग्रत्स्वप्नसुषुप्तिरूपा यस्मात्तत् एकम् अभयं चिन्मात्रं ब्रह्म तद्रूपो भवान् स्वधाम्नि स्वस्वरूपे तिष्ठन्नेव मायां प्रतिषिध्य अभिभूय आत्मतन्त्र एव सन् तया मायया पुरुषत्वं मनुष्यनाट्यमुपेत्य तस्यां मायायां तिष्ठन् अपरिशुद्ध इव रागादिमानिव आस्ते। रामकृष्णाद्यवतारेषु तथा प्रतीयते ॥२६॥ तत्त्वमिति ॥ हे अनञ्जन उपाधिमलशून्य भगवन् रुद्रस्य नन्दीश्वरस्य शापात् कर्मण्येव अवग्रह आग्रहो यस्याः सा तथाभूता धीर्बुद्धिर्येषां ते तथाभूता वयमतस्तव तत्त्वं ब्रह्मादिसर्वात्मत्वं न विदामः न विद्म इत्यर्थः। आर्षः प्रयोगः। किं त्विदं धर्म उपलक्ष्यतेऽनेन धर्मस्य जनकं त्रिवृत् वेदत्रयीप्रतिपाद्यमध्वराख्यमस्माभिर्ज्ञातम्। यदर्थं यस्याध्वरस्य सिद्धये अदः इन्द्राद्यधिदैवं रूपं व्यवस्थाः विशेषणात्रेयमेव देवतेति व्यवस्थापूर्वकमवस्थाः आस्थितवानसीत्यर्थः। तिष्ठतेर्लुङ्। अडागमाद्यभाव आर्षः। यद्वा । अदो

दक्ष उवाच ॥ शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम् ॥ तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इवात्मतन्त्रः ॥ २६ ॥ ऋत्विज ऊचुः ॥ तत्त्वं न ते वयमनञ्जन रुद्रशापात्कर्मण्यवग्रहधियो भगवन्विदामः ॥ धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदोव्यवस्थाः ॥ २७ ॥ सदस्या ऊचुः ॥ उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽन्तकोग्रव्यालान्विष्टे विषयमृगतृष्णात्मगेहोरुभारः ॥ द्वन्द्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौ कस्ते शरणद कदा याति कामोपसृष्टः ॥ २८ ॥ रुद्र उवाच ॥ तव वरद वराङ्घ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये ॥ यदि रचितधियं माऽविद्यलोकोऽपविद्धं जपति न गणये तत्त्वत्परानुग्रहेण ॥ २९ ॥

व्यवस्थाः अमूर्व्यवस्था भवन्ति समस्तं पदम् ॥ २७॥ उत्पत्तीति ॥ हे शरणद आश्रयप्रद अशरणे रक्षकरहिते उरवः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशा एव दुर्गाणि दुर्गमस्थानानि यस्मिंस्तस्मिन् अन्तकः काल एवोग्रो भक्षको व्यालस्तेनान्विष्टे लक्ष्यीकृते द्वन्द्वानि क्षुत्पिपासादीन्येव श्वभ्राणि गर्त्ताः यस्मिंस्तस्मिन् खला वञ्चका एव मृगा व्याघ्रादयस्तेभ्यो भयं यस्मिंस्तस्मिन् शोक एव तापकत्वाद्दावोऽग्निर्यस्मिंस्तस्मिन् उत्पत्त्यध्वनि जन्ममरणादिलक्षणसंसारमार्गे वर्त्तमानः विषया एव मृगतृष्णाजलं तदर्थमात्मा शरीरं गेहं गेहोपलक्षितं ममतास्पदं सर्वं च उरुर्भारो यस्य सः कामेन उपसृष्टोऽभिभूतः अज्ञानां जनानां सार्थः समूहस्ते तव पादौ कः त्वच्चरणारविन्दरूपं निर्भयनिवासस्थानं त्वत्कृपां विना कदा याति न कदापि मन्दाक्रान्ता छन्दः॥२८॥ तवेति॥हे वरद इह संसारे आशिषा तत्तत्कामनया हेतुना अखिलार्थे सर्वाभिलषितदातारि इत्यङ्घ्रिविशेषणम्। विषयेष्वसक्तैर्निष्कामैः यद्वा आशिषाऽखिलार्थे अपि असक्तैरिति मुनिभिः जीवन्मुक्तैरपि स्वभावत एवादरेणार्हणीये पूजनयोग्ये तव वराङ्घ्रौ रचितधियं स्थिरीकृतचित्तमपि ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितिलयेषु निमित्तेषु दैवतः प्राण्यदृष्टात् बहुधा भिद्यमाना रजआदयो गुणाः यस्यास्तया आत्मनः स्वस्य मायया रचिता आत्मनि स्वस्मिन् ब्रह्मादिभेदमतिर्येन तस्मै नमः। स्वसंस्थया स्वरूपावस्थानेन विशेषतः सर्वथा निवर्त्तितः भ्रमस्तद्धेतवो गुणाश्च आत्मनि येन तस्मै नमः। मञ्जुभाषिणी छन्दः ॥३९॥ ब्रह्मोवाचेति तत्रत्यो यज्ञप्रतिपादको वेदः शब्दब्रह्माख्यः वेदसमुदायो वा स्तौति—नम इति ॥ श्रितं स्वीकृतं सत्वं सत्त्वगुणो येन तस्मै नमः। अत एव धर्मार्थादीनां सूतये प्रसवित्रे दात्रे च नमः। निर्गुणाय च नमः यत् यस्य भगवतस्तव काष्ठां कथमेकस्य सगुणत्वं निर्गुणत्वं चेति तत्त्वमहं प्रमाणरूपो वेदोऽपि न वेद न वेद्मि। अपरे ब्रह्मादयोऽपि न विदुः ॥ ४० ॥ यज्ञकुण्डस्थोऽग्निराह—यत्तेजसेति ॥ यस्य तव तेजसा सुष्ठु समिद्धं दीप्तं तेजो यस्य सोऽहं स्वध्वरे प्रशस्ते अध्वरे आज्यसिक्तं घृतप्लुतं हव्यं हविर्वहे विभज्य तांस्तान् देवान् प्रापयामि तं यज्ञियं यज्ञोपहितं यज्ञपालकं यज्ञं यज्ञमूर्तिं विष्णुं "यज्ञो वै विष्णुः" इति श्रुतेः।पञ्चविधं " स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः"इत्यैतरेयोक्तलक्षणं पञ्चभिर्यजुर्भिः यजुर्वेदगतमन्त्रैः स्विष्टं पूजितं त्वां प्रणतोऽस्मि। पञ्च मन्त्राश्च श्रुतौ प्रदर्शिताः। आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह

ब्रह्मोवाच ॥ नमस्ते श्रितसत्त्वाय धर्मादीनां च सूतये ॥ निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥ ४० ॥ अग्निरुवाच ॥ यत्तेजसाऽहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तम् ॥ तं यज्ञियं पञ्चविधं च पञ्चभिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम् ॥ ४१ ॥ देवा ऊचुः ॥ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेन्द्राधिशयने ॥ पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः ॥ ४२ ॥ गन्धर्वा ऊचुः ॥ अंशांशास्ते देव मरीच्यादय एते ब्रह्मेन्द्राद्या देवगणा रुद्रपुरोगाः ॥ क्रीडाभाण्डं विश्वमिदं यस्य च भूमंस्तस्मै नित्यं नाथ नमस्ते करवाम ॥ ४३ ॥

इति पञ्चाक्षरं द्व्यक्षरो वषट्कार इति तदनुसारिणी स्मृतिश्च। "चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥" इति ॥ ४१ ॥ पुरेति ॥ पुरा पूर्वं कल्पस्य प्रपञ्चस्यापाये नाशे प्रलये स्वकृतं स्वेनैवोत्पादितं विकृतं विकारजातं सर्वप्रपञ्चमुदरीकृत्य स्वोदरे निधाय सिद्धैर्जनलोकादिवासिसनकादिभिः हृदि विमृशिता चिन्तिता अध्यात्मपदवी ज्ञानमार्गो यस्य सः। कवभाव आर्षः। त्वमेवाद्यः पुमान् श्रीनारायणः तस्मिन् सर्वविप्लवकारके सलिले उरगेन्द्रः शेष एवाधिक उत्कृष्टं शयनं शय्या तस्मिन् शेषे शयनं करोषि। स एव त्वमद्य इदानीं सृष्टिसमयेऽस्माकमक्ष्णोः पथि चरसि दृष्टिगोचरो भवसि नोऽस्मान्भृत्यानवसि रक्षसि। शिखरिणीछन्दः॥४२॥ अंशांशा इति ॥ हे विभूमन् हे देव ते मरीच्यादयः प्रजापतयः रुद्रः पुरोगः मुख्यत्वादग्रेसरो येषां ते ब्रह्मेन्द्राद्या देवगणास्ते तवांशानामप्यंशाः। इदं च विश्वं यस्य तव क्रीडायाः भाण्डमुपकरणम् अतो हे नाथ सर्वस्वामिन् तस्मै ते तुभ्यं नित्यं सर्वदा वयं नमः करवाम नमनं कुर्मः। मत्तमयूरं छन्दः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वन्माययेति ॥ अर्थं पुरुषार्थसाधनं शरीरमभिपद्य प्राप्यापि दुर्म्मतिः जनः उत्पथैः अन्यायवर्त्तिभिः स्वैः स्वकीयैः पुत्रादिभिः इन्द्रियादिभिर्वा क्षिप्तोऽभिभूतः तिरस्कृतोऽपि त्वन्मायया अस्मिन् कलेवरे ममाहमित्यभिमानं कृत्वा असत्सु मलिनेषु दुःखप्रदेषु विषयेषु लालसा तृष्णा यस्य स तथाविधो भवति युष्मत्कथामृतनिषेवकस्तु त्वद्भक्त एवंभूतमात्मनो मोहम् उत् उच्चैः दूरतो व्युदस्येत् त्यजेत् नान्यः ॥ ४४ ॥ त्वमिति ॥ त्वमेव क्रतुर्यज्ञस्वरूपः त्वं हविर्घृतादि त्वं हुताशः त्वं हि मन्त्रः समित्काष्ठं दर्भाः पात्राणि च त्वं सदस्याः सभ्याः ऋत्विजश्च दम्पती यजमानस्तत्पत्नी च देवता इन्द्रादिः अग्निहोत्रमग्नौ हवनं स्वधा पितृदानं सोमः सोमलता आज्यं घृतं पशुश्च स्रग्विणीद्वयम् ॥ ४५ ॥ त्वं पुरेति ॥ हे त्रयीगात्र वेदत्रयमूर्त्ते यज्ञः स यूपः क्रतुर्वियूपो यागविशेषस्तद्रूपी यज्ञसंकल्परूपो वा यज्ञः कर्म यस्येति वा त्वमेव महासूकरः सन् योगिभिः सनकादिभिः स्तूयमानः स्वयं च नदन् लीलया अनायासेनैव पुरा सृष्टिप्रारम्भसमये प्रथमे मन्वन्तरे प्रजानां स्थित्यर्थं रसायाः रसातलात् गां पृथ्वीं दंष्ट्रया पद्मिनीं कमलिनीं

विद्याधरा ऊचुः ॥ त्वन्माययाऽर्थमभिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः ॥ क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं युष्मत्कथाऽमृतनिषेवक उद्व्युदस्येत् ॥ ४४ ॥ ब्राह्मणा ऊचुः ॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मन्त्रः समिद्दर्भपात्राणि च ॥ त्वं सदस्यर्त्विजो दम्पती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥४५॥ त्वं पुरा गां रसाया महाशूकरो दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा ॥ स्तूयमानो नदल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्रयज्ञक्रतुः ॥ ४६ ॥ स प्रसीद त्वमस्माकमाकाङ्क्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम् ॥ कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यान्ति तस्मै नमः ॥ ४७ ॥ मैत्रेय उवाच ॥ इति दक्षः कविर्यज्ञं भद्ररुद्राभिमर्शितम् ॥ कीर्त्यमाने हृषीकेशे स निन्ये यज्ञभावने ॥ ४८ ॥ भगवान् स्वेन भावेन सर्वात्मा सर्वभागभुक् ॥ दक्षं बभाष आभाष्य प्रीयमाण इवानघ ॥ ४९ ॥ श्रीभगवानुवाच ॥ अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ॥ आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः ॥ ५० ॥

वारणेन्द्रो यथा व्युज्जहर्थ विशेषेणोद्धृतवानसि ॥ ४६ ॥ स इति ॥ हे यज्ञेश सदयामूर्त्तिस्त्वं परिभ्रष्टं सत्कर्म येषां तेषामपि ते तव दर्शनमाकाङ्क्षतां नोऽस्माकं प्रसीद ते तव नाम्नि नृभिः कीर्त्यमाने सति यज्ञविघ्नाः सर्वसत्कर्मविघ्नाः क्षयं यान्ति नश्यन्ति तस्मै सर्वोपकारिणे तुभ्यं नमः ॥४७॥ इतीति ॥ इति पूर्वप्रकारेण यज्ञस्य भावने पालके हृषीकेशे कीर्त्यमाने स्तूयमाने सति कविर्निर्मलान्तःकरणो दक्षः भद्राख्यो रुद्रो वीरभद्रः तेनावमर्शितं नाशितं यज्ञं संनिन्ये प्रवर्तयामास । भद्रेति संबोधनं वा ॥ ४८ ॥ भगवानिति ॥ हे अनघ विदुर सर्वात्मा अतः सर्वेषां देवानां भागभुगपि भगवान् स्वेन भागेन त्रिकपालेन पुरोडाशेन प्रीयमाण इव दक्षमाभाष्य संबोध्य बभाषे । निजानन्दतृप्तस्य पुरोडाशमात्रेण पूर्णप्रीतेरभावात् इवशब्दः ॥ ४९ ॥ अहमिति ॥ योऽहं जगतः परं कारणम् आत्मा ईश्वरः उपद्रष्टा साक्षी स्वयंदृक् स्वयंप्रकाशः अविशेषणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपाधिरहितश्चास्मि स एव ब्रह्मा च शर्वश्चेति ॥ ५० ॥ आत्मेति ॥ हे द्विज सः परमकारणभूतोऽहमेव रजआदिगुणमयीम् आत्ममायां समाविश्याधिष्ठाय विश्वं सृजन् रक्षन् हरंश्च क्रियोचितां सर्गादिकर्मयोग्यां संज्ञां स्रष्टा विश्वम्भरः हर इत्याख्यां दध्रे धारयामि ॥ ५१ ॥ तस्मिन्निति ॥ तस्मिन् अद्वितीये भेदरहिते केवले निरसङ्गे परमात्मनि ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च अज्ञ एव भेदेन अनुपश्यति ॥ ५२ ॥ यथेति ॥ यथा कश्चिदपि पुमान् शिरःपाण्यादिषु स्वाङ्गेषु क्वचिदपि देशकालावस्थादौ पारक्यबुद्धिं स्वभेदबुद्धिं न कुरुते एवं मत्परः विद्वान् सर्वभूतेषु भेदबुद्धिं न कुरुते ॥ ५३ ॥ त्रयाणामिति ॥ हे ब्रह्मन् एकभावानामेकस्वरूपाणां सर्वभूतान्यात्मा येषां तेषां त्रयाणां ब्रह्मविष्णुशिवानां यो भिदां भेदं न पश्यति सः शान्तिं मोक्षमधिगच्छति ॥ ५४ ॥ एवमिति सार्द्धम् ॥ एवं भगवता आदिष्टः उपदिष्टः प्रजापतीनां पतिर्दक्षः त्रिकपालेष्टया हरिमर्चित्वा तेन संशुद्धेन स्वेन पूर्वप्रवर्त्तितेन क्रतुना उभयतः अङ्गैः प्रधानेन च देवान् अयजत् अपूजयत् । तथा समाहितः भगवतः सकाशाच्छिवे भेदबु-

आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज ॥ सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम् ॥५१॥ तस्मिन् ब्रह्मण्यऽद्वितीये केवले परमात्मनि ॥ ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥ ५२ ॥ यथा पुमान्न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित् ॥ पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥ ५३ ॥ त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ॥ सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ॥ ५४ ॥ मैत्रेय उवाच ॥ एवं भगवतादिष्टः प्रजापतिपतिर्हरिम् ॥ अर्चित्वा क्रतुना स्वेन देवानुभयतोऽयजत् ॥ इन्द्रं च स्वेन भागेन ह्युपाधावत् समाहितः ॥ ५५ ॥ कर्मणोदवसानेन सोमपानितरानपि ॥ उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः ॥ ५६ ॥ तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ॥ धर्म एव मतिं दत्त्वा त्रिदशास्ते दिवं ययुः ॥ ५७ ॥

द्धिरहितः स्वेन हि यज्ञावशिष्टेन भागेन रुद्रं च उपाधावत् अपूजयत् ॥ ५५ ॥ कर्मणेति ॥ उदवस्यते समाप्यतेऽनेनेत्युदवसानं तेन कर्मणा समाप्तीष्टया इतरान् पूर्वोक्तदेवव्यतिरिक्तान् सोमपान् सोमभोगिनोऽपि उपाधावदित्यनुषङ्गः । ततश्च उदवस्य कर्म समाप्य आलोप आर्षः । उदवसायेति भाव्यम् । ऋत्विग्भिः सह अवभृथरूपं यथा भवति तथा सस्नौ । यद्वा । अवभृथो यज्ञान्तकर्म यज्ञान्तस्नानस्यावभृथे प्रविष्टत्वेन स्नाधातुः क्रियामात्रवाचकोऽतः अवभृथं कृतवानित्येवार्थः । अतः सकर्मकतापि ॥ ५६ ॥ तस्मा इति ॥ स्वेनैवानुभावेन भगवदाराधनप्रभावेणावाप्तराधसे प्राप्तधर्मसिद्धयेऽपि तस्मै दक्षाय ते यज्ञे संपूजिताः त्रिदशाः देवाः धर्म एव मतिं दत्त्वा धर्मे एव तव मतिर्भवत्विति वरं दत्त्वा दिवं स्वर्गं ययुः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं दाक्षायणी दक्षकन्या सती पूर्वकलेवरं हित्वा पुनर्हिमवतः पर्वताभिमानिदेवस्य क्षेत्रे भार्यायां मेनायां जज्ञे जातेति वयं शुश्रुम ॥ ५८ ॥ तमेवेति ॥ भूयः पुनश्च अम्बिका सती अनन्यभावानां स्वैकनिष्ठानाम् एको गतिः प्राप्यो यस्तं शिवमेव प्रियं पतिं प्रलयकाले सुप्ता शक्तिः पुनः सृष्टिप्रारम्भकाले पुरुषमीश्वरं यथा भजते तथा आवृङ्क्ते भजते स्म । वर्जनार्थो वृजिरदादिराङ्पूर्वो भजनार्थः आवर्जयतिरिव ॥ ५९ ॥ एतदिति ॥ दक्षाध्वरद्रुहः दक्षयज्ञनाशकस्य भगवतः शम्भोरेतत् कर्म चरितं मे मया भागवताद् भगवद्भक्तात् बृहस्पतेः शिष्यात् उद्धवात् श्रुतम् ॥ ६० ॥ इदमिति ॥ हे कौरव विदुर इदं परं पवित्रं यशस्यमायुष्यम् अघौघस्य मर्षणं नाशनम् ईशयोः विष्णुशिवयोः चेष्टितं यो नरो नित्यदा आकर्ण्यानुकीर्त्तयेत् शृणोति कीर्त्तयति वा स भक्तिभावतः अघं संसारदुःखं धुनोति नाशयति ॥ ६१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य सप्तमे निरमादिमाम् ॥ ७ ॥ अष्टमे खिन्नो विमातुर्वाचा गत्वा ध्रुवो हरिम् ॥ तपसा तोषयत्तत्र श्लोका नर्यनेहस्तिनः ॥ वि श्वेतू-

एवं दाक्षायणी हित्वा सती पूर्वकलेवरम् ॥ जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥ ५८ ॥ तमेव दयितं भूय आवृङ्क्ते पतिमम्बिका ॥ अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषम् ॥ ५९ ॥ एतद्भगवतः शम्भोः कर्म दक्षाध्वरद्रुहः ॥ श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ॥ ६० ॥ इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणम् ॥ यो नित्यदाऽऽकर्ण्य नरोऽनुकीर्तयेद्धुनोत्यघं कौरव भक्तिभावतः ॥ ६१ ॥ इति श्रीभागवते चतुर्थस्कन्धे दक्षयज्ञे सर्वदेवकृतस्तुतिवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ मैत्रेय उवाच ॥ सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ॥ नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥ १ ॥ मृषाऽधर्मस्य भार्यासीद्दम्भं मायां च शत्रुहन् ॥ असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः ॥ २ ॥ तयोः समभवल्लोभो निकृतिश्च महामते ॥ ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥ ३ ॥

वाचेति साङ्गिगजर्नागौ अनुष्टुभः ॥ ८ ॥ एवं तावन्मनुकन्यान्वयोक्त्यैव मरीच्यादीनां ब्रह्मपुत्राणां वंशा वर्णिताः तत्रावशिष्टं किंचिदाह—सनकाद्या इति ॥ सनकाद्याश्चत्वारः नारदश्च ऋभुः हंसः अरुणिर्यतिः एते ब्रह्मणः सुताः ऊर्ध्वरेतसः नैष्ठिकब्रह्मचारिणो जाताः अतः गृहान् नावसन् गार्हस्थ्यं नाङ्गीचक्रुः अत एव तेषां सर्गो न जातः॥ १ ॥ अधर्मोऽपि ब्रह्मपुत्रस्तस्य वंशमाह—मृषेति ॥ हे शत्रुहन् विदुर अधर्मस्य भार्या मृषा मिथ्याभाषणरूपासीत् सा दम्भं परप्रतारणात्मकं पुत्रं मायां च परप्रतारणोचितां चेष्टामित्येव मिथुनं युग्ममसूत तत्तु मिथुनं निर्ऋतिः राक्षसो यतोऽप्रजः सन्ततिरहित असिजभाव आर्षः । अतो जगृहे स्वगृहं नीतवान् ॥ २ ॥ तयोरिति ॥ हे महामते तयोर्दम्भमाययोः सोदरयोरप्यधर्मांशत्वाद्दांपत्यापन्नयोर्लोभः पुत्रः निकृतिः शठता कन्या च समभवत् ताभ्यां क्रोधश्च हिंसा चाभवताम् । यत् याभ्यां कलिः कलहः पुत्रस्तस्य स्वसा दुरुक्तिश्च समभवत् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुरुक्ताविति ॥ हे सत्तम दुरुक्तौ स्वभार्यायां कलिर्भियं कन्यां मृत्युं च पुत्रमाधत्त उत्पादितवान्।तथा तयोर्मृत्यु भियोरपि यातना कन्या निरयश्च पुत्र एवं मिथुनं जज्ञे जातम् ॥ ४ ॥ संग्रहेणेति ॥ हे अनघ निर्दोष विदुर तव मया प्रतिसर्गोऽनुसर्ग एव यद्वा प्रतिसर्गः प्रलयः अधर्मस्य प्रलयहेतुत्वात्तत्सर्गः प्रतिसर्गः अन्यसर्गहानिकरः अत एव बीभत्सत्वात् विस्तृतत्वेऽपि सङ्ग्रहेण संक्षेपेण आख्यातः कथितः । एतदधर्मवंशाख्यानं वर्जनद्वारा पुण्यहेतुत्वात् पुण्यं पुमान् प्राणी त्रिः श्रुत्वात्मनो मनसो मलं पापं मोहं वा विधुनोति नाशयति ॥ ५ ॥ अथेति ॥ हे कुरूद्वह अथ अतः पुण्यकीर्त्तिः तथा हरेरंशो ब्रह्मा तदंशाद्देहार्द्धाज्जन्म यस्य यद्वा हरेरंशानां कपिलदत्तयज्ञपृथुऋषभादीनां जन्म यतः तस्य स्वायम्भुवस्यापि मनोर्वंशं पुत्रपौत्रादिसन्ततिं कीर्त्तये ॥ ६ ॥ प्रियव्रतेति ॥ शतरूपापतेः स्वायम्भुवस्य मनोः प्रियव्रतोत्तानपादौ सुतौ वासुदेवस्य कलयावतीर्णाविति शेषः । जगतो रक्षायां पालने स्थितौ यद्यपि ज्येष्ठत्वात्प्रियव्रतस्य वंशः प्रथमं वक्तुमुचितस्तथापि स पूर्वं विरक्तस्त्यक्तव्यवहारोऽभूत् ततो ब्रह्माज्ञया

दुरुक्तौ कलिराधत्त भियं मृत्युं च सत्तम ॥ तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ॥ ४ ॥ संग्रहेण मयाऽऽख्यातः प्रतिसर्गस्तवानघ ॥ त्रिः श्रुत्वैतत् पुमान् पुण्यं विधुनोत्यात्मनो मलम् ॥ ५ ॥ अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह ॥ स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ॥ ६ ॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ ॥ वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥ ७ ॥ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः॥सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥ ८ ॥ एकदा सुरुचेः पुत्रमङ्कमारोप्य लालयन् ॥ उत्तमं नारुरुक्षन्तं ध्रुवं राजाऽभ्यनन्दत ॥ ९ ॥ तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम् ॥ सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता ॥ १० ॥ न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति ॥ न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ॥ ११ ॥ बालोऽसि बत नात्मानमन्यस्त्रीगर्भसंभृतम् ॥ नूनं वेद भवान् यस्य दुर्लभेऽर्थे मनोरथः ॥१२॥

राज्ये प्रवृत्तस्ततस्तद्वंशोऽपि पश्चाज्जातोऽतः प्रथमम् उत्तानपादवंशं वर्णयति । जाये इति ॥ सुनीतिः सुरुचिश्च द्वे उत्तानपादस्य जाये अभवताम् तयोर्द्वयोर्मध्ये पत्युः सुरुचिः प्रेयसी तत इतरा सुनीतिर्यस्याः सुतो ध्रुवः सा पत्युर्न प्रेयसी ॥ ७ ॥ ८ ॥ एकदेति ॥ एकदा सुरुचेः पुत्रमुत्तमसंज्ञमङ्कमारोप्य लालयन् राजा ध्रुवमङ्कमारुरुक्षन्तमारोढु-मिच्छन्तं नाभ्यनन्दत। तद्भावार्थः । सुरुचिप्रेमभङ्गभियांके नारोपितवान् ॥९॥ तथेति ॥ तथा अङ्कारोहणं चिकीर्षन्तं सपत्न्यास्तनयं ध्रुवम् अतिगर्विता सुरुचिः राज्ञः शृण्वत एव अनादरे षष्ठी । सेर्ष्यमीर्ष्या सहितं यथा स्यात्तथा आह स्म ॥ १० ॥ नेति ॥ हे वत्स भवान्नृपात्मजः राजपुत्रोऽपि नृपतेर्धिष्ण्यमासनमङ्कं वाऽऽरोढुं नार्हति यत् यस्मात्त्वं मया स्वकुक्षौ न गृहीतो न धृतः ॥ ११ ॥ बाल इति ॥ बत खेदे। त्वं बालः असि यस्य भवतो दुर्लभेऽर्थे राजोत्सङ्गारोहणे मनोरथोऽस्ति स भवान्नूनं निश्चितमे-तत् मत्तोऽन्यस्त्रीगर्भे सम्भृतमात्मानं न वेद न जानाति यद्येवं जानीयात्तदैवं मनोरथं न कुर्यादिति भावः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपसेति ॥ यदि त्वं नृपासनमिच्छसि तदा तपसा पुरुषं भगवन्तमाराध्य तस्यानुग्रहेण वरदानेनात्मानं स्वदेहं मे मम गर्भे साधय इयं भगवदाराधनं नोपदिशति किन्तु मद्गर्भ-प्राप्तिसाधनं तपः कृत्वा म्रियस्व येन त्वन्मातरं रुदतीं पश्येयमित्याशयेनास्याः वचः ॥ १३ ॥ मातुरिति ॥ दण्डेन हतः अहिः सर्पो यथा तथा मातुः सपत्न्याः सुदुरुक्तयः अत्यन्तासंबद्धवाक्यानि ताभिर्हृदि विद्धो ध्रुवः अत एव रुषा श्वसन् ऊर्ध्वश्वासान् विमुञ्चन् प्ररुदन् मिषन्तं सुरुचिचरितं पश्यन्तमपि तत्संकोचात्सन्नवाचं कुण्ठितवाचं तूष्णीं स्थितं पितरं हित्वा मातुः सुनीतेः सकाशं समीपं जगाम ॥ १४ ॥ तमिति ॥ निश्वसन्तं स्फुरिताधरोष्ठं च तं बालं ध्रुवं सा सुनीतिरुत्सङ्ग उदुह्य आरोप्य सपत्न्याः। सुरुच्यायत् गदितं वचनं नितान्तं ध्रुवस्य रोदनादेः कारणं तत् पौरमुखात् अन्तःपुरजनमुखान्निशम्य श्रुत्वा विव्यथे व्यथां प्राप ॥ १५ ॥ सेति ॥ सपत्न्याः वाक्यं स्मरती नुमभाव आर्षः । शोक एव तापकत्वाद्दावाग्निस्तेन दावाग्निमध्यगता लतेव मूर्च्छिता सा बाला धैर्यमुत्सृज्य त्यक्त्वा विललाप दुःखनिर्वचनपूर्वकं रोदनं चकार । सरो-

तपसाऽऽराध्य पुरुषं तस्यैवानुग्रहेण मे ॥ गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम् ॥ १३ ॥ मैत्रेय उवाच ॥ मातुः सपत्न्याः सुदुरुक्तिविद्धः श्वसन् रुषा दण्डहतो यथाहिः ॥ हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः प्ररुदन् सकाशम् ॥ १४ ॥ तं निश्वसन्तं स्फुरिताधरोष्ठं सुनीति-रुत्सङ्ग उदूह्य बालम् ॥ निशम्य तत्पौरमुखान्नितान्तं सा विव्यथे यद्गदितं सपत्न्याः ॥ १५ ॥ सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावल-तेव बाला ॥ वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह ॥ १६ ॥ दीर्घं श्वसन्ती वृजिनस्य पारमपश्यती बालकमाह बाला ॥ मा मङ्गलं तात परेष्वमंस्था भुङ्क्ते जनो यत् परदुःखदस्तत् ॥ १७ ॥ सत्यं सुरुच्याऽभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः ॥ स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्माम् ॥ १८ ॥ आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्राऽपि यदव्यलीकम् ॥ आराधयाऽधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ॥ १९ ॥

जश्रिया दृशा कमलवत्सुन्दरेण नेत्रेण बाष्पकलामश्रुधारामुवाह ॥ १६ ॥ दीर्घमिति ॥ दीर्घं श्वसन्ती नुमार्षः । राजकृतापमानस्यापरिहार्यत्वात्तद्धेतुकस्य वृजिनस्य दुः-खस्य पारमन्तमपश्यती नुमभाव आर्षः । बालकं ध्रुवमाह स्म हे तात परेषु सुरुच्यादिष्वमङ्गलं वक्रोक्त्यापराधं मा अमंस्थाः । अडार्षः । यत् यस्मात् यो जनः परदुःखदः तत् स्वदत्तं दुःखमेव भुङ्क्ते अतोऽस्माकं प्रारब्धमेवेदृक् तस्याः कोऽपराध इति भावः ॥ १७ ॥ सत्यमिति ॥ त्वं राजासनयोग्यो नेति सुरुच्या सत्यमभिहितमुक्तं यतो दुर्भगाया मम उदरे त्वं गृहीतः सम्भूतस्तस्या एव स्तन्येन वृद्धश्च यां मामिडस्पतिर्भूपतिर्भार्येति वोढुमङ्गीकर्त्तुं यद्वा भार्येति बुद्ध्या रक्षणभारं वोढुं विलज्जते वाशब्दाद्दासी-त्यपि वोढुं विलज्जते ॥ १८ ॥ आतिष्ठेति ॥ हे तात पितृभार्यात्वेन मात्रा समा समाता मम सपत्नी तया मम तव च शत्रुभूतयापि तपसाराध्यपुरुषमित्यादि यत् अव्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीकं सत्यं वचः उक्तं तत् विमत्सरः सुरुच्यां मात्सर्यरहितः सन् त्वम् आतिष्ठ अतः यदि उत्तमो यथा तथा अध्यासनं राज्यमिच्छसे । तङ्गार्षः । तदा अधोक्षजस्य हरेः पादपद्ममाराधय । यद्वा । आराधयेत्यादिसुरुचिवचोनुवादः । तथा च आराधयेत्यादि यत् समात्रा उक्तं तदपि अव्यलीकं सत्यमेव अतस्तदेव त्वमातिष्ठेति ॥१९॥ अधोक्षजं विशिनष्टि—यस्येति ॥ विश्वस्य विभावनाय पालनाय आत्ता स्वीकृता गुणाभिपत्तिः सत्वगुणाधिष्ठातृत्वं येन तस्य यस्याधोक्षजस्य जितः वशीकृतः आत्मा मनः श्वसनः प्राणश्च यैस्तैरभिवन्द्यं सत्कृतम् अङ्घ्रिपद्मं चरणकमलं परिचर्य निषेव्य अजो ब्रह्मा पारमेष्ठ्यं सर्वोत्कृष्टं पदमध्यतिष्ठत् प्राप्तवान् ॥ २० ॥ तथेति ॥ तथा ब्रह्मणा यथा भगवन्तमाराध्योत्कृष्टं पदं प्राप्तं तथा वो युष्माकं पितामहो भगवान् मनुर्यं हरिमेकमत्या एकाग्रबुद्ध्या सर्वान्तिर्यामिदृष्ट्या पुरुदक्षिणैर्मखैरिष्ट्वा संपूज्य अन्यतो देवान्तरात् भगवदाराधनव्यतिरिक्तसाधनतो वा दुरवापं प्राप्तुमशक्यं भौमं मन्वन्तराधिपत्यजं दिव्यं स्वर्गसंबन्धि च सुखम् अथ देहत्यागानन्तरमापवर्ग्यं मोक्षसुखं च अभिपेदे प्राप्तवान्

यस्याङ्घ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः ॥ अजोऽध्यतिष्ठत् खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवन्द्यम् ॥ २० ॥ तथा
मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः ॥ इष्ट्वाऽभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम् ॥ २१ ॥ तमेव
वत्साऽऽश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् ॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम् ॥ २२ ॥
नान्यं ततः पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कंचन ॥ यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरङ्ग विमृग्यमाणया ॥ २३ ॥
मैत्रेय उवाच ॥ एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः ॥ संनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात् ॥ २४ ॥ नारदस्तदुपाकर्ण्य
ज्ञात्वा तस्य चिकीर्षितम् ॥ स्पृष्ट्वा मूर्धन्यघघ्नेन पाणिना प्राह विस्मितः ॥ २५ ॥

॥ २१ ॥ तमेवेति ॥ हे वत्स भृत्य वत्सलं मुमुक्षुभिरपि मोक्षप्राप्त्यर्थं मृग्या अन्वेषणीया पदाब्जयोः पद्धतिर्मार्गो यस्य तं पूरुषं भगवन्तमेव आश्रय शरणं गच्छ । तथा अनन्यभावे नास्त्यन्यास्मिन् वस्तुमात्रे भावश्चिन्तनं यस्य तस्मिन् निजधर्मैः पाञ्चवार्षिकस्यानुपनीतस्य ते कर्मानाधिकारात् भक्तिधर्मैर्भाविते शोधिते मनसि तमेव पूरुषमवस्थाप्य भजस्व ॥ २२ ॥ नान्यमिति ॥ अङ्ग हे ध्रुव पद्मपलाशवत् भक्तजनतापहारके शोभमाने लोचने यस्य तस्मात् अन्यं कञ्चनापि ते तव दुःखच्छिदं दुःखनिवर्त्तकं न मृगयामि विचारेण न पश्यामि । यः इतरैः ब्रह्मादिभिः प्रसादार्थं विमृग्यमाणया अन्विष्यमाणयापि लीलया हस्ते गृहीतं दीपवत्पद्मं यया तया श्रिया स्वस्मिंस्तत्प्रसादार्थं यो मृग्यतेऽपेक्ष्यते ॥ २३ ॥ एवमिति ॥ एवमुक्तप्रकारकं मातुः संजल्पितं रोदनपूर्वकं कथितमर्थस्य स्वाभिलषितपदार्थस्यागमः प्राप्तिर्यस्मात्तथाभूतं वच आकर्ण्य श्रुत्वा आत्मना बुद्ध्या आत्मानं मनः संनियम्य धैर्ययुक्तं कृत्वा ध्रुवः पितुः पुरान्निश्चक्राम निर्जगाम ॥ २४ ॥ नारद इति ॥ सर्वज्ञत्वात्स्वस्थाने स्थित एव तत् सुनीत्युपदेशवचन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माकर्ण्य श्रुत्वास्य ध्रुवस्य चिकीर्षितं कर्तुमिष्टं भगवदाराधनं ज्ञात्वा विस्मितः संस्तत्रागत्याघघ्नेन पापनिवर्तकेन स्वपाणिना तस्य मूर्द्धनि स्पृष्ट्वा स्वचेतस्येवं प्राह स्म ॥ २५ ॥ अहो इति ॥ मानभङ्गममृष्यतामसहमानानां क्षत्रियाणामहो तेजः आश्चर्यजनकः प्रभावः कुतः यत् यस्मादयं ध्रुवो बालोऽपि समातुः मातुः सपत्न्याः सुरुच्याः असद्वचः तिरस्कारवचनं हृदा धत्ते धारयति ॥ २६ ॥ नाधुनेति ॥ हे पुत्रक अधुनापि आयुषः पञ्चवर्षातीतेऽपि क्रीडनादिषु सक्तस्य रतस्य कुमारस्य ते तव अवमानं संमानं वापि न लक्षयामः अवमानसंमानानुसन्धानं न पश्यामः ॥ २७ ॥ विकल्प इति ॥ विकल्पे मानापमानानुसन्धाने विद्यमानेऽपि पुंसोऽसंतोषहेतवः अपमानादयस्तत्कर्त्तारः शत्रवो वा मोहमृते हि निश्चयेन भिन्ना न सन्ति मोहकल्पिता एव ते कुतः यत् यस्माल्लोके सुखदुःखादि सर्वम् अपमानादि वा निजकर्मभिर्भवति ॥ २८ ॥ परितुष्येदिति ॥ यस्मात्स्वकर्मनिर्मितमेव लोको भुङ्क्ते ततस्तस्मात् हे तात स्वकर्मानुसारेण सुखदुःखादिकमीश्वरो ददात्येवातस्तामीश्वरगतिं वीक्ष्य ईश्वरानुकूल्यं विना नोद्यमाः फलदा इति

अहो तेजः क्षत्रियाणां मानभङ्गममृष्यताम् ॥ बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥ २६ ॥ नारद उवाच ॥ नाधुनाप्यवमानं ते सम्मानं वापि पुत्रक ॥ लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥ २७ ॥ विकल्पे विद्यमानेऽपि न ह्यसंतोषहेतवः ॥ पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः ॥ २८ ॥ परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः ॥ दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः ॥ २९ ॥ अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि ॥ यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ॥ ३० ॥ मुनयः पदवीं यस्य निःसङ्गेनोरुजन्मभिः ॥ न विदुर्मृगयन्तोऽपि तीव्रयोगसमाधिना ॥ ३१ ॥ अतो निवर्ततामेष निर्बन्धस्तव निष्फलः ॥ यतिष्यति भवान् काले श्रेयसां समुपस्थिते ॥ ३२ ॥ यस्य यद्दैवविहितं स तेन सुखदुःखयोः ॥ आत्मानं तोषयन् देही तमसः पारमृच्छति ॥ ३३ ॥

ज्ञात्वा यावद्दैवेन स्वप्रारब्धेन तदनुसारेणेश्वरेण वोपसादितं प्रापितं तावन्मात्रेण बुधः पुरुषः परितुष्येत् सन्तोषमेव कुर्यात् ॥ २९ ॥ अथेति ॥ अथ मदुक्तात् भिन्नप्रकारेण मात्रोपदिष्टेन योगेनोपायेन यस्य भगवतः प्रसादं त्वमवरुरुत्ससि अवरोद्धुं प्राप्तुमिच्छसि स देवो वै निश्चयेन मम पुंसां दुराराध्यो दुःखेनाराध्यो मतः ॥ ३० ॥ मुनय इति ॥ निःसङ्गेन सर्वतः सङ्गत्यागेन तीव्रयोगेन निरन्तरप्राणायामादिना युक्तेनापि समाधिना तत्राप्युरुजन्मभिर्यस्य पदवीं मार्गं मृगयन्तोऽपि मुनयो मननशीला मनस्विनोऽपि तां पदवीमपि न विदुः स पुंसां दुराराध्य इति पूर्वेणैव संबन्धः ॥ ३१ ॥ अत इति ॥ अतो हेतोः तवैषः तदाराधनाग्रहलक्षणो निष्फलो निर्बन्धो हठो निवर्त्ततामत्र त्वया हठो न कार्य इत्यर्थः । यतः श्रेयसां काले धर्मानुष्ठानोपयुक्ते काले वयसः प्रौढत्वे समुपस्थिते सति भवान् यतिष्यति यत्नं करिष्यति । तङ्भाव आर्षः ॥ ३२ ॥ यस्येति ॥ सुखदुःखयोर्मध्ये यस्य पुरुषस्य यत् सुखं दुःखं वा दैवविहितं दैवेनेश्वरेण स्वप्रारब्धानुरूपं दत्तं स देही तेन सुखदुःखान्यतरेणात्मानं तोषयन् स्वप्रारब्धमेव मया भुज्यतेऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रान्यस्य कोऽपराध इति सुखे सति पुण्यं क्षीयते दुःखे पापं क्षीयत इति वा मनःसंतोषं कुर्वन् तमसः संसारस्य पारमृच्छति प्राप्नोति ॥ ३३॥ गुणाधिकादिति ॥ स्वापेक्षया विद्याधनाभिजनादिगुणैरधिकात् ल्यब्लोपे पञ्चमी। सर्वत्र गुणाधिकं पुरुषं दृष्ट्वा मुदं लिप्सेत् तस्मिन् प्रीतिं कुर्यात् नासूयाम् । तथा स्वापेक्षया गुणाधमं दृष्ट्वा अनुक्रोशं तत्र दयां कुर्यात् न तिरस्कारम् । तथा स्वसमानगुणं दृष्ट्वा तत्र मैत्रीम् अन्विच्छेत् कुर्यान्न स्पर्धाम् । एवं कुर्वन् तापैर्लोकापमानादिजनितान्तःकरणवृत्तिविशेषैर्नाभिभूयते न पीड्यते ॥ ३४ ॥ पूर्वजन्मनि कश्चित्तपस्वी राजकुमारं दृष्ट्वा तत्र स्पृहावानभूत् स एव ध्रुवो जात इति पुराणान्तरम् । ततश्च नारदेन प्रशमे दर्शितेऽपि ध्रुवस्येच्छा न निवृत्तेत्याह–सोऽयमिति ॥ योऽस्मद्विधैर्द्रष्टुमप्यशक्यः सोऽयमात्मसंतोषलक्षणः शमः सुखदुःखाभ्यां हतः तिरस्कृतविवेकः आत्मा येषां तेषां मादृशानां पुंसामनुग्रहाय भवता कृपया दर्शितः ॥ ३५ ॥ अथापीति ॥ अथापि तथापि सः शमः क्षात्रं क्षत्रियस्वभावं घोरमसहनलक्षणमुपेयुषः प्राप्तवतोऽत एवाविनीतस्य भवता विनये शिक्षितेऽपि तेन रहितस्य मे मम सुरुच्या दुर्वचांस्येव पीडाकरत्वाद्बाणास्तैर्भिन्ने हृदि विदीर्णमृद्भाजन इव न श्रयते न तिष्ठति । एतेन शौर्यहीना ब्राह्मणादय एवोपशमोपदेशयोग्या

गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ॥ मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥ ३४ ॥ ध्रुव उवाच ॥ सोऽयं शमो भगवता सुखदुःखहतात्मनाम् ॥ दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥ ३५ ॥ अथापि मेऽविनीतस्य क्षात्त्रं घोरमुपेयुषः ॥ सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ॥ ३६ ॥ पदं त्रिभुवनोत्कृष्टं जिगीषोः साधुवर्त्म मे ॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ॥ ३७ ॥ नूनं भवान् भगवतो योऽङ्गजः परमेष्ठिनः ॥ वितुदन्नटते वीणां हितार्थं जगतोऽर्कवत् ॥ ३८ ॥ मैत्रेय उवाच ॥ इत्युदाहृतमाकर्ण्य भगवान् नारदस्तथा ॥ प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकम्पया ॥ ३९ ॥

न त्वहमिति सूचितम् ॥ ३६ ॥ पदमिति ॥ हे ब्रह्मन् अस्मत्पितृभिर्मन्वादिभिरन्यैरप्यनधिष्ठितमप्राप्तं त्रिभुवनेषु उत्कृष्टं पदं स्थानं जिगीषोः जेतुमिच्छोर्मे तस्य साधु सुकरं वर्त्म मार्गं ब्रूहि ॥ ३७ ॥ नूनमिति ॥ यो वीणां वितुदन् वादयन् जगतो हिताय अर्कवत् अटते भ्रमति । तङार्षः । सः भवान् नूनं निश्चितं भगवतः परमेष्ठिनो ब्रह्मणः अङ्गजः पुत्रः नारद एवास्ति वीणादिलिङ्गात् । अङ्कज इति पाठे उत्सङ्गाज्जातः यद्वा पूर्वश्लोकोक्तार्थे हेतुमाह। परमेष्ठिनः अङ्गजः यो भवान् ननु जगतो हितायाटति अतः त्रिभुवनोत्कृष्टपदप्राप्तिमार्गं ब्रूहीति संबन्धः। यद्वा । परमेष्ठिनोऽङ्गजोऽपि भवान् यदटति तल्लोकहितायैव अतो ममापि हितं करिष्यत्येव ॥ ३८ ॥ इतीति ॥ इत्येवं ध्रुवेणोदाहृतं कथितं वाक्यमाकर्ण्य प्रीतः भगवान् सर्वज्ञो भगवदिच्छैवैवमिति ज्ञात्वा नारदस्तदा तस्मिन्नेव समये तं बालं प्रति सद्वाक्यं तन्मनोरथसाधनपरं वाक्यम् अनुकम्पया प्राह स्म ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनन्येति ॥ यस्तव जनन्याभिहितः कथितः स एव भगवदाराधनलक्षणः ते तव निःश्रेयसस्य अभिप्रेतार्थस्य पन्थाः मार्गः वासुदेवः सर्वान्तर्यामी च तत्प्रवणात्मना तदेकाग्रचित्तेन तं भज ॥ ४० ॥ धर्मेति ॥ यः पुरुषः धर्मार्थकाममोक्षाख्यं समुदितं प्रत्येकं वा आत्मनः श्रेय इच्छेत् तस्य तत्र तत्प्राप्तौ हरेः पादसेवनमेकमेव कारणं नान्यत् ॥ ४१ ॥ तदिति ॥ तत् तस्मात् हे तात ते तव भद्रं भवतु त्वं भगवदाराधनार्थं मधुवनाख्यं शुचि पवित्रं पुण्यं पुण्यप्रदं यमुनायास्तटं गच्छ तस्य सिद्धक्षेत्रेषु मुख्यत्वात् यत्र मधुवने नित्यदा सर्वदा हरेः सान्निध्यमस्ति हरिस्तत्र नित्यं वसति ॥ ४२ ॥ स्नात्वेति द्वयम् ॥ तस्मिन् मधुवने निवसन्ननुसवनं शिवे परमपावने कालिन्द्याः सलिले स्नात्वा उचितानि अध्ययनाद्यभावेऽपि आत्मन उचितानि देवतानमस्कारादीनि कृत्वा इति यमनियमा उक्ताः। चैलाजिनकुशादिभिः स्वस्तिकादिभिश्च कल्पितमासनं येन तथाभूत्वा त्रिवृता पूरकरेचककुम्भकात्मकेन त्रिविधेन प्राणायामेन शनैः प्राणेन्द्रियमनोमलं प्राणमनसोर्मलं चाञ्चल्यम् इन्द्रियमलं विषयोन्मुखत्वं व्युदस्य निरस्य इति प्राणायामप्र-

नारद उवाच ॥ जनन्याऽभिहितः पन्थाः स वै निःश्रेयसस्य ते ॥ भगवान् वासुदेवस्तं भज तत्प्रवणात्मना ॥४०॥ धर्मार्थकाममोक्षार्थं य इच्छेत् श्रेय आत्मनः ॥ एकमेव हरेस्तत्र कारणं पादसेवनम् ॥ ४१ ॥ तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि ॥ पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥ ४२ ॥ स्नात्वाऽनुसवनं तस्मिन् कालिन्द्याः सलिले शिवे ॥ कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ॥ ४३ ॥ प्राणायामेन त्रिवृता प्राणेन्द्रियमनोमलम् ॥ शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम् ॥ ४४ ॥ प्रसादाऽभिमुखं शश्वत्प्रसन्नवदनेक्षणम् ॥ सुनासं सुभ्रुवं चारुकपोलं सुरसुन्दरम् ॥ ४५ ॥ तरुणं रमणीयाङ्गमरुणौष्ठेक्षणाधरम् ॥ प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम् ॥ ४६ ॥ श्रीवत्साङ्कं घनश्यामं पुरुषं वनमालिनम् ॥ शङ्खचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् ॥ ४७ ॥

त्याहारौ धारणामाह । गुरुणा धीरेण मनसा गुरुं सर्वोत्तमं परमपूज्यं भगवन्तमभिध्यायेदिति प्रथमपुरुषप्रयोगेन । न केवलं त्वदर्थेयं रीतिः किं त्वन्योऽपि यः कश्चिच्छ्रेयोर्थी स एवं कुर्यादिति ॥४३॥४४॥ प्रसादेति ॥ प्रसादाय वरदानाय अभिमुखमुद्युक्तं ध्यायेदित्यस्यैव क्रियापदस्य सर्वत्रान्वयः । शश्वत्सर्वदा प्रसन्नं वदनं मुखमीक्षणे च यस्य तं सुष्ठु नासा यस्य तं सुष्ठु भ्रुवौ यस्य तं चारुणी मनोहरे कपोले यस्य तं सुरेषु देवेषु सुरेभ्यो वा सुन्दरम् ॥ ४५ ॥ तरुणमिति ॥ तरुणं युवानं रमणीयानि मनोहराणि अङ्गानि करचरणादीनि यस्य तम् अरुणमोष्ठमीक्षणे च आधारयतीति तथा तम् । यद्वा । अरुणानि ओष्ठः उर्द्ध्वोष्ठः ईक्षणे अधरः अधरोष्ठश्च यस्य तम् । प्रणतानां शरणागतानामाश्रयणमाश्रयभूतं नृम्णं सुखकरं सर्वपुरुषार्थभूतधनं वा करुणायाः कृपाया अर्णवं समुद्रमत एव शरण्यं शरणयोग्यमाश्रयणीयम् ॥ ४६ ॥ श्रीवत्साङ्कमिति ॥ श्रीवत्साङ्कं घनश्यामं पुरुषं पुरुषाकारं वनमालिनं शङ्खचक्रगदापद्मैः अभिव्यक्ताश्चत्वारो भुजा यस्य तम् ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किरीटिनमिति ॥ किरीटिनं कुण्डलिनं केयूरवलयाभ्यामन्वितं युक्तं भूषितं कौस्तुभाभरणं यस्यां सा कौस्तुभस्यापि आभरणभूता वा ग्रीवा यस्य तं पीतेकौशेये कोशजन्ये वाससी यस्य तम्॥४८॥काञ्चीति॥काञ्चीकलापेन क्षुद्रघण्टिकासमूहेन पर्यस्तं परिवेष्टितं लसन्ती काञ्चनमये नूपुरे यस्य दर्शनीयतमं शान्तं मनोनयनयोर्वर्द्धनं हर्षकरम्॥४९॥ पद्भ्यामिति ॥ नखान्येव मणयस्तेषां श्रेणिः पङ्क्तिस्तया विलसद्भ्यां पद्भ्यां हृत्पद्मकर्णिकालक्षणं धिष्ण्यं मध्यस्थानमाक्रम्य समर्चतां भक्तिपूर्वकं पूजयतां निजभक्तानामात्मनि मनसि अवस्थितम् ॥ ५० ॥ ध्यानमाह—स्मयमानमिति ॥ नियतेन पूर्वोक्तधारणया वशीकृतेन अत एवैकभूतेन एकाग्रेण मनसा स्मयमानं हसन्तं सानुरागं भक्तविषयकानुरागसहितमवलोकनं यस्य तं वरदर्षभं वरदानां ब्रह्मादीनां मध्ये ऋषभं श्रेष्ठं यथेष्टदातारं भगवन्तमभिध्यायेत् धारणोक्तानि प्रसादाभिमुखत्वादीनि विशेषणानि ध्यानेऽपि द्रष्टव्यानि । यद्वा । नान्यानि चिन्तयेत् भूयः सुस्मितं भावयेन्मुखमित्येकादशरीत्या यथोक्तमात्रमेव ॥ ५१ ॥ समाधिमाह—एवमिति ॥ एवं सुभद्रं परममङ्गलं

किरीटिनं कुण्डलिनं केयूरवलयान्वितम् ॥ कौस्तुभाभरणग्रीवं पीतकौशेयवाससम् ॥ ४८ ॥ काञ्चीकलापपर्यस्तं लसत्काञ्चननूपुरम् ॥
दर्शनीयतमं शान्तं मनोनयनवर्धनम् ॥ ४९ ॥ पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चताम् ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम्
॥ ५० ॥ स्मयमानमभिध्यायेत् सानुरागावलोकनम् ॥ नियतेनैकभूतेन मनसा वरदर्षभम् ॥ ५१ ॥ एवं भगवतो रूपं सुभद्रं ध्यायतो मनः ॥
निर्वृत्त्या परया तूर्णं संपन्नं न निवर्तते ॥ ५२ ॥ जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज ॥ यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान्
॥ ५३ ॥ ॐ नमो भगवते वासुदेवाय ॥ मन्त्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः ॥ सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित् ॥ ५४ ॥ सलिलैः
शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्ताङ्कुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुम् ॥ ५५ ॥

भगवतो रूपं ध्यायतः पुरुषस्य मनः तूर्णं शीघ्रमेव परया निर्वृत्त्या परमानन्देन भगवता सम्पन्नं मिलितं सत् ततो न निवर्त्तते पृथङ् न भवति ध्येयं न त्यजति ॥ ५२ ॥ जप्यश्चेति ॥ हे नृपात्मज परम उत्कृष्टः अत एव गुह्यः न सर्वतः प्रसिद्धः जप्यः मन्त्रश्च मे मत्तः श्रूयताम् । दक्षिणः कर्ण आधीयताम् उपदिशामित्यर्थः । यं मन्त्रं सप्तरात्रं प्रपठन् वाचिकं जपन् पुमान् खेचरान् पार्षदान् आकाशगामिनो द्रष्टुमशक्यानपि पश्यति किं पुनरुपांशु मानसं वा ॥ ५३ ॥ मन्त्रमाह—ओमिति ॥ अनुपनीताय सप्रणवोपदेशेन वैष्णवमन्त्रेषु द्विजत्वाद्यवस्थापेक्षा नास्तीत्युक्तम् । मन्त्रेणेति देशकालविभागवित् यस्मिन् देशे यस्मिन्काले यानि योग्यानि द्रव्याणि लभ्यन्ते तैः पूजा कार्येति विभागवित् बुधः अनेन मन्त्रेण देवस्य भगवतो वासुदेवस्य द्रव्यमयीं द्रव्यप्रधानां सपर्यां पूजां विविधैर्द्रव्यैः कुर्यात् ॥ ५४ ॥ द्रव्याण्याह—सलिलैरिति ॥ शुचिभिः शुद्धैः सलिलैः माल्यैः पुष्पैः वन्यैः वनप्रभवैर्मूलफलादिभिः शस्तैः शास्त्रविहितैः अङ्कुरैः दूर्वादिभिः अंशुकैः वन्यैरेव भूर्जत्वगादिभिः भगवतः प्रियया तुलस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च प्रभुमर्चयेत् ॥ ५५ ॥ लब्ध्वेति ॥ द्रव्यमयीं शिलादिमयीमर्चां प्रतिमां लब्ध्वा सम्पाद्य क्षित्यादिषु वा प्रभुं भगवन्तमर्चयेदिति संबन्धः । आदिपदेनादित्यमण्डलाग्निविप्रगुरुग्रहणम् । आभृतो वशीकृत आत्मा चित्तं येन स तथा अत एव शान्तो विक्षेपरहितः मुनिर्मननपरः सावधानः यतवाक् गृहीतमौनः मितं वन्यं मूलफलादि भुङ्क्ते तादृशः स्यात् । वन्यस्य वृषादिदुःखप्रदकृष्याद्यनुत्पन्नत्वेन शुद्धत्वात् ॥ ५६ ॥ स्वेच्छेति ॥ अचिन्त्यया निजमायया शक्त्या स्वेच्छयावताराणां चरितानि तैः उत्तमश्लोको भगवान् यद्यद्धृदयंगमं मनोहरं पराक्रमं करिष्यति तत् शास्त्रे प्रसिद्धं ध्यायेत् तदानीं प्रथमे स्वायंभुवे मन्वन्तरेऽवतारप्राचुर्याभावात् करिष्यतीति भाविनिर्देशः ॥ ५७ ॥ परिचर्या इति ॥ भगवतो यावत्यः पूर्वैः सेविताः सेवनं कारिताः कर्तव्यत्वेन प्रदर्शितास्ता गन्धचन्दनछत्रचामराद्या द्रव्यवतीः मन्त्रेणैव ध्याता मूर्तिर्यस्य तस्मै मन्त्रमूर्तये तं प्रसादयितुं मन्त्रहृदयेनैव द्वादशाक्षरोच्चारणेनैव मनसा प्रकल्प्यानीतैरेवोपचारैरित्यर्थः । विरक्तस्य वस्तुतस्तत्तद्वस्त्वभावात् प्रयुञ्ज्यात् कुर्यात् ॥ ५८ ॥

लब्ध्वा द्रव्यमयीमर्चां क्षित्यम्ब्वादिषु चार्चयेत् ॥ आभृतात्मा मुनिः शान्तो यतवाङ् मितवन्यभुक् ॥ ५६ ॥ स्वेच्छावतारचरितैरचिन्त्यनिजमायया ॥ करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयङ्गमम् ॥ ५७ ॥ परिचर्या भगवतो यावत्यः पूर्वसेविताः ॥ ता मन्त्रहृदयेनैव प्रयुञ्ज्यान्मन्त्रमूर्तये ॥ ५८ ॥ एवं कायेन मनसा वचसा च मनोगतम् ॥ परिचर्यमाणो भगवान् भक्तिमत्परिचर्यया ॥ ५९ ॥ पुंसाममायिनां सम्यग्भजतां भाववर्धनः ॥ श्रेयो दिशत्यभिहितं यद्धर्मादिषु देहिनाम् ॥ ६० ॥ विरक्तश्चेन्द्रियरतौ भक्तियोगेन भूयसा ॥ तं निरन्तरभावेन भजेताद्धा विमुक्तये ॥ ६१ ॥ इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ॥ ययौ मधुवनं पुण्यं हरेश्चरणचर्चितम् ॥ ६२ ॥ तपोवनं गते तस्मिन् प्रविष्टोऽन्तः पुरं मुनिः ॥ आर्हितार्हणको राज्ञा सुखासीन उवाच तम् ॥ ६३ ॥

एवमिति द्वयम् ॥ एवमुक्तप्रकारेण मनोगतं दृढतरं यथा भवति तथा कायेन सलिलादिभिः मनसा ध्यानादिभिः वचसा जपादिभिः भक्तिमत्या प्रेमपूर्वकया परिचर्यया परिचर्यमाणः सेव्यमानो भगवान् भाववर्द्धनः भावान् भक्ताभिलषितान् वर्द्धयतीति सः अमायिनां दम्भरहितानामत एव सम्यक् प्रेमपूर्वकं भजतां पुंसां देहिनां देहवतां धर्मार्थकामेषु त्रिविधपुरुषार्थेषु यदभिमतं वाञ्छितं तच्छ्रेयो दिशति ददाति ॥ ५९ ॥ ६० ॥ विरक्तश्चेति ॥ यस्तु इन्द्रियरतौ विषयभोगे विरक्तः सः निरन्तरभावेन अनवच्छिन्नप्रेमलक्षणेन भूयसा भक्तियोगेन अद्धा साक्षात् विमुक्तये तं हरिं भजेत । यद्वा । यस्तु इन्द्रियरतौ त्रिवर्गे चकारान्मोक्षेऽपि विरक्तः सः प्रेमलक्षणभक्तियोगेन विशिष्टमुक्तये पार्षदत्वाय भजेतेत्याहुः ॥ ६१ ॥ इत्युक्त इति ॥ नारदेनैवमुक्तो ध्रुवस्तं परिक्रम्य प्रणम्य च पुण्यं पुण्यजनकं प्रतिकल्पमाविर्भावात् हरेश्चरणाभ्यां चर्चितं मण्डितम् । अनेन तत्र भगवतो नित्यम् विहारो दर्शितः मधुवनं ययौ ॥ ६२ ॥ तपोवनमिति ॥ एवं तस्मिन् ध्रुवे तपोवनं मधुवनं गते सति राज्ञः शोकनिवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वये मुनिः राज्ञोन्तःपुरं प्रविष्टः । तत्र च राज्ञा अर्हितं समर्पितमर्हणमर्घादि यस्मै सोऽर्हितार्हणकः सुखेनासीनस्तं राजानमुवाच । स्वयं जानन्नपि तन्मुखाच्छ्रोतुं पृष्टवान् ॥ ६३ ॥ राजन्निति ॥ हे राजन् त्वं परिशुष्यता मुखेन युक्तः दीर्घं किं ध्यायसे चिन्तयसि । तङार्षः । अर्थेन सहितः कामो धर्मो वा किन्न रिष्यते न नश्यति इति सवितर्कः प्रश्नः । तङार्षः ॥ ६४ ॥ सुत इति ॥ हे ब्रह्मन् स्त्रैणेन स्त्रीविश्येन अकरुणात्मना निर्दयेन मे मया पञ्चवर्षः अत एव बालकः अपि गुणैर्महान् कविर्धीमांश्च सुतो ध्रुवः मात्रा सह निर्वासितः निर्वसन्नुपेक्षितः अतो निर्वासितः मात्रा सहेति तु तस्या अप्युपेक्षणात् ॥ ६५ ॥ अपीति ॥ हे ब्रह्मन् अर्भकं बालकमत एव मार्गे चलनात् श्रान्तं क्षुधितं चात एव परिम्लानं शुष्कं मुखाम्बुजं यस्य तं शयानमनाथं रक्षकरहितं वृका मा स्मादन्ति किंस्विन्न खादन्ति अपीति सम्भावनायामेवं सम्भवतीत्यर्थः ॥ ६६ ॥ अहो इति ॥ बत खेदे । अहो आश्चर्ये । स्त्रीजितस्य मम स्त्रीविश्यत्वेन जातं दौरात्म्यमनार्यत्वम् उपधारय पश्य । प्रेम्णा अङ्कमारुरुक्षन्तमारोढुमिच्छन्तं बालं

नारद उवाच ॥ राजन् किं ध्यायसे दीर्घं मुखेन परिशुष्यता॥ किं वा नरिष्यते कामो धर्मो वाऽर्थेन संयुतः॥ ६४ ॥ राजोवाच ॥ सुतो मे बालको ब्रह्मन् स्त्रैणेनाऽकरुणात्मना ॥ निर्वासितः पञ्चवर्षः सह मात्रा महान् कविः ॥ ६५ ॥ अप्यनाथं वने ब्रह्मन् मा स्मादन्त्यर्भकं वृकाः ॥ श्रान्तं शयानं क्षुधितं परिम्लानमुखाम्बुजम् ॥ ६६ ॥ अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय ॥ योऽङ्कं प्रेम्णाऽरुरुक्षन्तं नाभ्यनन्दमसत्तमः ॥६७॥ नारद उवाच ॥ मा मा शुचः स्वतनयं देवगुप्तं विशांपते ॥ तत्प्रभावमविज्ञाय व्यावृङ्क्ते यद्यशो जगत् ॥६८॥ सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ॥ एष्यत्यचिरतो राजन् यशो विपुलयंस्तव ॥ ६९ ॥ मैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः ॥ राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिन्तयत् ॥ ७० ॥ तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् ॥ समाहितः पर्यचरदृष्यादेशेन पूरुषम् ॥ ७१ ॥

योऽहमसत्तमः स्त्रिया जडीकृतो नाभ्यनन्दम् ॥ ६७ ॥ मा मेति ॥ हे विशांपते राजन् देवेन श्रीहरिणा गुप्तमात्मसात्कृत्वा रक्षितं स्वतनयं तस्य स्वतनयस्य प्रभावमविज्ञाय वर्त्तमानस्त्वं मा मा शुचः तस्य शोकं मा कार्षीः । च्लेरङ् आर्षः । यद्वा । "शुचिर् पूतीभावे" इत्यस्य इरित्वात् च्लेरङ्धातोरनेकार्थता । यस्य ध्रुवस्य यशः कर्तृ जगत् कर्म आवृङ्क्ते व्याप्नोति सामीप्याद्वर्तमानवन्निर्देशः ॥ ६८ ॥ सुदुष्करमिति ॥ हे राजन् लोकपालैरिन्द्रादिभिरपि सुदुष्करमसाध्यं कर्म भगवदाराधनं कृत्वा प्रभुस्तत्करणे समर्थस्ततो वरान् प्राप्य तव यशो विपुलयन् विस्तारयन्नचिरत एष्यति प्राप्स्यति ॥ ६९ ॥ इतीति ॥ पाठ एवान्वयः । विश्रुत्येत्यत्र विश्रभ्येति वा पाठः ॥ ७० ॥ अथ ध्रुववृत्तमाह–तत्रेति ॥ तत्र मधुवने ध्रुवः प्रयतः पूतः समाहितः सावधानश्च सन् यस्यां तत्र प्राप्तस्तां विभावरीं रात्रिमुपोष्य ऋष्यादेशेन नारदोक्तप्रकारेण पूरुषं पुरुषोत्तमं भगवन्तं पर्यचरत् सेवितवान् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिरात्रान्त इति ॥ त्रिरात्रान्ते त्रिरात्रान्ते कपित्थानि बदराणि चाशनं यस्य स तथा तदपि न यथेष्टं किंतु आत्मनः शरीरस्य वृत्तिर्वर्तनं स्थितिस्तदनुसारेण यावता अशितेन शरीरनिर्वाहः स्यात्तावदश्नन् हरिं चार्चयन्मासं निन्ये ॥ ७२ ॥ द्वितीयमिति ॥ अर्भको ध्रुवः षष्ठे षष्ठे दिने हिंसापरिहारार्थं स्वयं शीर्णैः पतितैःशुष्कैस्तृणपर्णादिभिः कृतान्नः कृताहारः सन् द्वितीयं च मासं नयन् विभुं व्यापकं भगवन्तं वासुदेवमभ्यर्चयत् । आडभावश्छेदार्षः ॥ ७३ ॥ तृतीयमिति ॥ तृतीयं च मासमानयन् ईषदि-वानायासेन नयन् नवमे नवमे अहनि दिवसे अब्भक्षः सन्नुत्तमश्लोकं भगवन्तं समाधिना तदेकप्रवणचित्तेन उपाधावत् अचिन्तयत् । यद्वा । नवमे नवमेऽहनि अब्भक्ष उत्तमश्लोकमुपाधावत् । एवं तृतीयं मासं च अनयत् इत्यन्वयः । प्रतिमासमाहारसंकोचं तपोऽतिरेकं च कृतवानित्यर्थः ॥ ७४ ॥ चतुर्थमिति ॥ चतुर्थमपि मासमानयत् इत्यनुषङ्गः । द्वादशे द्वादशेऽहनि वायुभक्षः जितश्वासश्च सन् देवं भगवन्तं ध्यायन् देहमधारयत् । यद्वा । अत्रापि भगवन्तं ध्यायन् देहमधारयत् । एवं चतुर्थमासमनय-

त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः ॥ आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन् हरिम् ॥ ७२ ॥ द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने ॥ तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयद्विभुम् ॥ ७३ ॥ तृतीयं चानयन्मासं नवमे नवमेऽहनि ॥ अब्भक्ष उत्तमश्लोकमुपाधावत् समाधिना ॥ ७४ ॥ चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि ॥ वायुभक्षो जितश्वासो ध्यायन् देवमधारयत् ॥ ७५ ॥ पञ्चमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः ॥ ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६ ॥ सर्वतो मन आकृष्य हृदि भूतेन्द्रियाशयम् ॥ ध्यायन् भगवतो रूपं नाद्राक्षीत् किंचनापरम् ॥ ७७ ॥ आधारं महदादीनां प्रधानपुरुषेश्वरम् ॥ ब्रह्म धारयमाणस्य त्रयो लोकाश्चकम्पिरे ॥ ७८ ॥ यदैकपादेन स पार्थिवार्भकस्तस्थौ तदङ्गुष्ठनिपीडिता मही ॥ ननाम तत्रार्धमिभेन्द्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥ ७९ ॥

दिति ॥ ७५ ॥ पञ्चम इति ॥ पञ्चमे मासि अनुप्राप्ते सति वायुभक्षणमपि त्यक्त्वा जितश्वासः कृतकुम्भको नृपात्मजो ध्रुवोऽक्षरं ब्रह्म ध्यायन् एकेन पदा स्थाणुरिवाचल-स्तस्थौ ॥ ७६ ॥ सर्वत इति ॥ ततश्च भूतानि भूतकार्याणि शब्दादीनि इन्द्रियाणि चाशेरते यत्र तत् मनः सर्वतो विषयत आकृष्य हृदि भगवतो रूपं ध्यायंस्ततोऽपरं किञ्चनापि नाद्राक्षीत् । यद्वा । भूतानां कार्येष्विन्द्रियेषु न शेते न विषयीभवति तथाभूतमिति भगवद्रूपविशेषणम् । यद्वा । भूतेन्द्रियाणि आशेरते नतु जाग्रति यत्र तेषामगम्यमित्यर्थः ॥ ७७ ॥ आधारमिति ॥ प्रधानपुरुषयोरपीश्वरं कारणमत एव महदादीनामप्याधारमक्षरं ब्रह्म ध्यानेन प्रादुर्भूतं धारयमाणस्य सतो ध्रुवस्य त्रयो लोकास्तस्य तेजः सोढुमशक्नुवन्तश्चकम्पिरे कम्पिता जाताः ॥ ७८ ॥ यदेति ॥ स पार्थिवार्भको राजपुत्रो ध्रुवो यदा एकपादेन तस्थौ तत्र तदा तस्याङ्गुष्ठेन निपीडिता आक्रान्ता सती मही इभेन्द्रेण धिष्ठिता आक्रान्ता अलोप आर्षः । तरीर्नौर्यथा पदे पदे सव्यतो दक्षिणतश्च नमति तथा अर्द्धम् अर्द्धदेशं व्याप्य ननाम । “ देशश्चाकर्मणां कर्मसंज्ञ ” इति कर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वम् इत्याहुः । स्वामिपादास्तु अंशांशिनोरभेदविवक्षया महीसामानाधिकरण्यं समाशवाच्यद्वंशब्दस्य नियतक्लीबत्वात्तथा प्रयोग इति प्राहुः ॥ ७९ ॥ तस्मिन्निति ॥ असुं प्राणं मुखनासिकादि तद्द्वारं च निरुध्य आत्मन्येकीकृत्य आत्मनः सकाशात् अनन्यया धिया अभेददृष्ट्या विश्वात्मकमक्षरं ब्रह्म तस्मिन् ध्रुवेऽभिध्यायति सति भृशमत्यन्तं निरुच्छ्वासनिपीडिताः श्वासनिरोधेन पीडिताः सन्तो लोकपालैः सहिता लोकाः त्रिलोकस्था जनाः अन्यच्छरणमपश्यन्तो हरिमेव शरणं ययुः । व्यष्टिसमष्ट्योरैक्यधिया विश्वात्मकस्वप्राणनिरोधे कृते मुख्यस्य प्राणस्य निरोधात्सर्वप्राणिप्राणनिरोधो जातः ॥ ८० ॥ नैवमिति ॥ हे भगवन् चराचररूपस्याखिलसत्वधाम्नः सर्वप्राणिनां शरीरस्य एवमेकदा प्राणरोधं न विदामः न विद्मः । शपः अलुग्गुणाभावश्चार्षः । अतः वयं शरण्यं शरणागतरक्षकं त्वां शरणं प्राप्ताः अतः तत् तस्मात् प्राणनिरोधजनितात् वृजिनात् क्लेशात् नोऽस्माकं विमोक्षं विधेहि कुरु ॥८१॥ मा भैष्टेति ॥ मा भैष्ट यूयं भयं मा कुरुत स्वकीयं धाम गृहं प्रति यात गच्छत। औत्तानपादिः उत्तानपादस्य पुत्रो मयि विश्वा-

तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्याऽसुमनन्यया धिया ॥ लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥ ८० ॥
देवा ऊचुः ॥ नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्वधाम्नः ॥ विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् ॥ ८१ ॥
श्रीभगवानुवाच ॥ मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम ॥ यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८२ ॥ इति श्रीमद्भागवते चतुर्थस्कन्धे ध्रुवच० मधुवनसमागमनवर्णनं नाम अष्टमोऽध्यायः ॥ ८ ॥ मैत्रेय उवाच ॥ त एवमुच्छिन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपम् ॥ सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः ॥ १ ॥ स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभम् ॥ तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श ॥ २ ॥

त्मके सङ्गतः ऐक्यं प्राप्तः आत्मा स्वरूपं यस्य तथाविधः सन् तपस्यति अतः यतो हि तपसो वो युष्माकं प्राणनिरोध आसीत् जातस्तस्माद्दुरत्ययात् मत्प्रसादं विना विघटयितुमशक्यात् तपसः सकाशात् बालमहं निवर्तयिष्ये । यद्वा । मा भैष्ट स्वधाम प्रतियात बालं ध्रुवं तपसा निवर्त्तयिष्ये यतो ध्रुवाद्वः प्राणनिरोध आसीत् स औत्तानपादिर्मयि सङ्गतात्मा अतः स कमपि न जिघांसति ॥ ८२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्याष्टसे निरमादिमाम् ॥ ८ ॥ नवमे तु ध्रुवो लब्ध्वा वरं यातोऽन्तिकं पितुः ॥ तेनाकारि नृपस्तत्र श्लोकाः षष्टिस्तर्थाष्ट च ॥ उवाचनवकं चात्रीशीतिः सैका अनुष्टुभः ॥ ९ ॥ त एवमिति ॥ ते इन्द्रादयो लोकपाला एवं भगवद्वाक्यश्रवणेन उत्सन्नं गतं भयं येषां ते उरुक्रमे भगवति कृतावनामाः कृतप्रणामाः सन्तः त्रिविष्टपं स्वर्गं ययुः । ततस्तदनन्तरमेव सहस्रशीर्षा भगवानपि भृत्यस्य स्वसेवकस्य ध्रुवस्य दिदृक्षया गरुत्मता गरुडेन मधोर्वनमागतः सहस्रशीर्षेति गर्भोदशायिना सहाभेदात् तदानींतनोऽवतारः पृश्निगर्भो भागवतामृतादवगन्तव्यः ॥१॥ स वा इति ॥ स वै ध्रुवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगविपाकेन प्राणायामादिदार्ढ्येन तीव्रया निश्चलया धिया हृदये भगवन्तं पश्यन् यदैनं बहिरागतमपि अन्तर्दृष्टित्वान्न ददर्श तदा तस्य सर्वकार्यं तु बहिष्ठेनैव रूपेण सेत्स्यतीत्यन्तःस्थितौ प्रयोजनाभावात् तडित्प्रभं हृत्पद्मकोशे स्फुरितमपि रूपं भगवान् झटिति तिरोहितवांस्तदा सहसैव तदपि रूपं तिरोहितमुपलक्ष्य व्युत्थितः संस्तदवस्थं यादृशमन्तःस्फुरितं तादृशं रूपं बहिः स्थितं ददर्श ॥ २ ॥ तद्दर्शनेनेति ॥ तस्य भगवतो दर्शनेन आगतं प्राप्तं साध्वसं सम्भ्रमो यस्य सोऽर्भको बालो ध्रुवः अङ्गं शरीरं क्षितौ दण्डवद्विनमय्य आनतं कृत्वा अवन्दत । ततश्च दृग्भ्यां प्रपश्यन् प्रपिबन्निव लक्षितः आस्येन मुखेन चुम्बन्निव लक्षितः भुजैराश्लिषन्निव लक्षितः आश्लिषन्निति तौदादिकत्वमार्षम् । प्रपिबन्निवावन्दत इत्याद्यनुषङ्गो वा ॥ ३ ॥ स इति ॥ अस्य ध्रुवस्य सर्वस्य जगतश्च हृद्यवस्थितः स हरिः तं ध्रुवं कृताञ्जलिं विवक्षन्तं स्वगुणान् वक्तुमिच्छन्तं तथापि बालकत्वादतद्विदं तान् स्वगुणान् स्तुत्यादिकं वा अजानन्तं ज्ञात्वा तस्य सामर्थ्यसिद्धये ब्रह्ममयेन वेदात्मकेन कम्बुना शङ्खेन रुपया कपोले पस्पर्श ॥ ४ ॥

तद्दर्शनेनागतसाध्वसः क्षिताववन्दताङ्गं विनमय्य दण्डवत् ॥ दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकः पिबन्निवास्येन भुजैरिवाश्लिषन् ॥ ३ ॥ स तं विवक्षन्तमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च हृद्यऽवस्थितः ॥ कृताञ्जलिं ब्रह्ममयेन कम्बुना पस्पर्श बालं कृपया कपोले ॥ ४ ॥ स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः ॥ तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः ॥ ५ ॥ ध्रुव उवाच ॥ योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ॥ अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥ ६ ॥ एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम् ॥ सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ॥ ७ ॥

स वा इति ॥ तदैव शङ्खस्पर्शक्षण एव तां दैवीं देवो भगवान् तद्विषयां गिरं प्रतिपद्य प्रतिपादितां गिरमिति पाठे भगवता प्रतिपादितां गिरं प्रतिपद्येति शेषः । परितो ज्ञातः परात्मनोर्जीवेश्वरयोर्निर्णयो येन सः ध्रुवा क्षितिः स्थानं यस्येति भाविनिर्देशः स वै ध्रुवः भक्तियुक्तभावः सन् असत्वरं यथा स्यात्तथा परितः श्रुतं व्याप्तमुरु बृहत् श्रवः यशो यस्य तं भगवन्तमभ्यगृणात् तुष्टाव ॥ ५ ॥ य इति ॥ अखिलशक्तिधरो यो भगवानन्तः प्रविश्य मम प्रसुप्तां निद्रितां लीनामिमां वैखरीं संज्ञां वाचमन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणानिन्द्रियाणि स्वधाम्ना स्वतेजसा चिच्छक्त्या सञ्जीवयति पूर्वसंस्कारोद्बोधनेन स्वस्य व्यापारे प्रवर्तयति तस्मै भगवते पुरुषाय अन्तर्यामिणे तुभ्यं नमः ॥ ६ ॥ एक इति ॥ हे भगवन् उरुगुणया सत्वादित्रिगुणात्मिकया मायाख्यया निजशक्त्या इदं महदाद्यशेषं जगत् सृष्ट्वा तदनु प्रविश्य पुरुषः अन्तर्यामी त्वमेक एव तस्याः मायायाः असत्सु निद्रितविषयोन्मुखेषु गुणेषु देहेन्द्रियदेवतादिरूपेण परिणतेषु स्थितः सन् यथा विभावसुरग्निरेक एव दारुषु नानाकारवान्नानेव भाति न तु वस्तुतो नाना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा त्वं नानेव भासि न तु त्वद्व्यतिरेकेण ज्ञानक्रियाशक्तिधरः कश्चिदस्ति अतः वागादिशक्तिधरा वह्न्यादयोऽपि त्वमेव ॥ ७ ॥ ब्रह्मणोऽपि ज्ञानं त्वदधीनं का वार्ता वह्न्यादीनामित्याह—त्वद्दत्तयेति ॥ हे आर्तबन्धो पूर्वमविदन्नपि भवन्तं शरणं प्रपन्नो ब्रह्मा त्वद्दत्तया वयुनया ज्ञानेन इदं विश्वं सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्वत् अचष्ट अपश्यत् । अत एव आपवर्ग्याणां मुक्तानामपि चरणमाश्रयं तव पादमूलं कृतविदा सर्वेन्द्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते न कथमपि । अत एवं सर्वोपकारकर्त्तारं त्वां ये न भजन्ति ते मूर्खाः कृतघ्ना एवेति भावः । यद्वा । हे आर्त्तबन्धो भवत्प्रपन्नो ज्ञानिजनः त्वद्दत्तया वयुनया विश्वमचष्ट । तस्य त आपवर्ग्यस्य मोक्षार्हस्य जिज्ञासुभक्तस्य शरणं तव पादमूलं कृतविदा ज्ञानलाभवता कृतज्ञेन कथं विस्मर्यते । ज्ञानिनोऽपि त्वामभजन्तः कृतघ्ना एवेति । अनेन आर्त्तो जिज्ञासुर्ज्ञानी चेति गीतोक्तास्त्रयो भक्ता उक्ताः ॥ ८ ॥ चतुर्थोऽर्थार्थी मादृशो भक्तस्तु मूढ इत्याह—नूनमिति ॥ भवाप्ययौ जन्ममरणे ततो विमोक्षणं यस्मात् तं कल्पकतरुमिव सर्वकामदं त्वां येऽन्यहेतोः अर्थकामादिप्राप्त्यर्थमर्चन्ति भजन्ति ते नूनं निश्चयेन तव मायया विमुष्टमतयः मोहितचित्ताः । यतः यत्स्पर्शजं तत्तद्विषयसंबन्धजन्यं सुखं तन्नृणां प्राणिनां

त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तः प्रबुद्ध इव नाथ भवत्प्रपन्नः ॥ तस्याऽपवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबन्धो ॥ ८ ॥ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चन्ति कल्पकतरुं कुणपोपभोग्यमिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥ ९ ॥ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वन्तकासिलुलितात् पततां विमानात् ॥ १० ॥ भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनन्त महताममलाशयानाम् ॥ येनाञ्जसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथाऽमृतपानमत्तः ॥ ११ ॥

नरकेऽपि भवति । तत् कुणपोपभोग्यं कुणपेन मृततुल्येन शरीरेण उपभोग्यं सुखमिच्छन्ति । यद्वा । कल्पतरुं त्वामर्चन्ति ततश्च कुणपोपभोग्यं सुखमिच्छन्ति ॥ ९ ॥ या निर्वृतिरिति ॥ हे नाथ सर्वस्वामिन् तनुभृतां देहिनां तव पादपद्मस्य ध्यानात् भवज्जनैः भवद्भक्तजनैः सह भवत्कथाश्रवणेन वा या निर्वृतिः य आनन्दः स्यात् भवति सा निर्वृतिः स्वमहिमनि निजानन्दरूपे ब्रह्मण्यपि मा भून्न भवति । यद्येवं तर्हि अन्तकरयाऽसिना कालेन लवनिमेषादिना लुलितात् खण्डितात् विमानात् पततां स्वर्गिणां तु सा निर्वृतिर्नास्तीति किमु वक्तव्यम् ॥ १० ॥ भक्तिमिति ॥ हे अनन्त त्वयि भगवति वासुदेवे मुहुः निरन्तरं भक्तिं प्रेमलक्षणां प्रवहतां सातत्येन कुर्वताम् अमलाशयानां शुद्धचित्तानां महतां मे मम प्रकृष्टः सङ्गो भूयात् । येनैवंभूतमहत्प्रसङ्गेन भवद्गुणकथैव अमृतं तस्य पानेन मत्तः परमानन्दे निमग्नः सन् उरूणि व्यसनानि दुःखानि यस्मिंस्तम् अत एवोल्बणं भयंकरं भवाब्धिं संसारविस्मारकत्वात् स्वादु विशेषत्वाच्चामृतं तस्य पानेन मत्तः परमानन्दे निमग्नः सन् भवाब्धिं संसारसमुद्रमञ्जसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अनायासेनैव नेष्ये तरिष्यामि ॥ ११ ॥ कथामृतपानस्य मादकत्वमाह–ते इति ॥ हे ईश हे अब्जनाभ ये तु भवदीयपदारविन्दयोः सौगन्ध्ये लुब्धं हृदयं येषां त्वद्भक्तानां तेषु कृतः प्रकृष्टः सङ्गो यैस्ते अतितरां प्रियं मर्त्यं देहं न स्मरन्ति । ये चादो मर्त्यमनुसम्बद्धाः सुतादयस्तांश्च न स्मरन्ति । तुशब्देन केवलयोगादिनिष्ठानां देहाभिमानादनिवृत्तिमाह ॥ १२ ॥ ननु त्वं किमित्यभिमानं वहसीत्यत आह–तिर्यगिति ॥ हे अज हे परम तिर्यञ्चो गोमृगादयः नगा वृक्षपर्वतादयः द्विजाः पक्षिणः सरीसृपाः सर्पादयः देवा इन्द्रादयः दैत्याः प्रह्लादादयः मर्त्याः मनुष्यास्तैस्तिर्यगादिभिः परिचितं व्याप्तं सदसद्विशेषं सन्ति स्थूलानि पृथ्व्यादीनि पञ्चमहाभूतानि असन्ति भूतसूक्ष्माणि शब्दादीनि विशेषा यस्य तत् महदादीन्यनेकानि कारणानि यस्य तत् एवंभूतं ते तव स्थविष्ठं विराड्रूपं केवलमहं वेद्मि अतः परमीश्वरस्वरूपं न वेद्मि । तथा यत्र वादो " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " । इति श्रुतेर्लौकिकशब्दव्यापारो नास्ति तत् ब्रह्मरूपं च न वेद्मि ॥ १३ ॥ कल्पान्त इति ॥ कल्पान्ते कल्पस्य सृष्टिसमयस्यान्ते प्रलयसमय एतत् त्रैलोक्यमखिलं सर्वं जठरेण उदरेण गृह्णन् उदरे संनिवेश्य अनन्तसखः शेषसहायः तदङ्के शेषोत्सङ्गे यः पुमान् श्रीनारायणः शेते अत एव स्वदृक् प्रपञ्चक्रीडोपरत्या

ते न स्मरन्त्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ॥ ये त्वब्जनाभ भवदीयपदारविन्दसौगन्ध्यलुब्धहृदयेषु कृतप्रसङ्गाः ॥ १२ ॥ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम् ॥ रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः ॥ १३ ॥ कल्पान्त एतदखिलं जठरेण गृह्णञ्छेते पुमान्स्वदृगनन्तसखस्तदन्ते ॥ यन्नाभिसिन्धुरुहकाञ्चनलोकपद्मगर्भे द्युमान्भगवते प्रणतोऽस्मि तस्मै ॥ १४ ॥ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थितिमखण्डितया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥ १५ ॥

योगनिद्रारूढत्वात् स्वस्मिन्नेव न बहिर्दृग्दृष्टिर्यस्य सः यस्य नाभिरेव गाम्भीर्यात् सिन्धुः समुद्रस्तस्मिन् रोहतीति तथा तदेव प्रकाशबाहुल्यात् काञ्चनं सुवर्णवर्णं त्रिलोकात्मकं पद्मं तस्य गर्भे कर्णिकायां द्युमान् अतिद्युतिमान् तेजस्वी ब्रह्मा जातः स भवानिति शेषः । तस्मै तुभ्यं भगवते अचिन्त्यमहिम्ने तं त्वां भगवन्तमचिन्त्यशक्तिमनुकूलयितुमहं प्रणतोऽस्मि ॥ १४ ॥ ननु ममापि शयनाद्यवस्थावत्त्वे को जीवाद्विशेषस्तत्राह–त्वमिति ॥ त्वं नित्यमुक्तो जीवस्तु त्वत्प्रसादान्मुच्यते ।त्वं परिशुद्धः स तु मलिनः त्वं तु विबुद्धः ॥ ३१ ॥
सर्वज्ञः स त्वल्पज्ञः त्वमात्मा स तु देहाध्यासी जडः त्वं कूटस्थः निर्विकारः स तु विकारी त्वमादिपुरुषः सत्वादिमान् त्वं तु भगवान् स भगहीनः त्वं त्रयाणां गुणानामधीशः स तु परतन्त्रः । कुत एतद्वैलक्षण्यं यद्यतो बुद्ध्यवस्थितिं बुद्धेस्तां तामवस्थामखण्डितया स्वदृष्ट्या चिच्छक्त्या द्रष्टा पश्यसि । द्रष्टेति तृन्प्रत्ययान्तः शब्दः । अतो बुद्ध्यवस्थितिमित्यत्र षष्ठ्यभावः । जीवस्तु बुद्ध्यवस्थाभिः खण्डितदृष्टिः तथाभूत एव त्वं स्थितौ सर्वलोकपालनेऽधिमखो यज्ञाधिष्ठाता स तु मखादिकर्माधीनः अतः त्वं व्यतिरिक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवाद्विलक्षण एवास्से इति ॥ १५ ॥ सविशेषं रूपमुक्त्वा निर्विशेषमाह—यस्मिन्निति ॥ विरुद्धगतयः परस्परविरुद्धा गतिः स्वभावो येषां ते विद्याविद्यासर्गसंहारादयो नियमेन भिन्नाश्रया विविधशक्तयः अनिशं निरन्तरम् आनुपूर्व्यात् पर्यायेण यस्मिन् पतन्ति वर्तन्ते तद् ब्रह्म व्यापकं विश्वस्य भवो जन्म यस्मात्तद्विश्वभवम् एकमद्वितीयम् अनन्तम् आद्यम् आनन्दमात्रम् अविकारमहं प्रपद्ये शरणं व्रजामि ॥ १६ ॥ सत्येति ॥ हे भगवन् तथा तेन प्रकारेण त्वमेव पुरुषार्थ इत्येवमनुभजतः पुंसः पुरुषार्थः परमानन्दः स एव मूर्तिर्यस्य तस्य तव पादपद्ममेव हि निश्चितम् आशिषो राजादेः सकाशात् राज्याद्यपेक्षया सत्या आशीः परमार्थफलम् अस्ति । यद्यप्येवं तथापि हे आर्य स्वामिन् अनुग्रहे हिताचरणे कातरः परवशः भगवान् भवान् यथा वाश्रा नवप्रसूता धेनुर्वत्सकं क्षीरं पाययति वृकादिभ्यो रक्षति चेति तद्वत् दीनान् सकामानप्यस्मान् परिपाति संसारभयाद्रक्षत्येव ॥ १७ ॥ अथेति ॥ एवंप्रकारेण सत्संकल्पेन धीमता ध्रुवेणाभिष्टुतो भृत्येष्वनुरक्तः भगवान् प्रार्थनां प्रतिनन्द्य इदं वक्ष्यमाणमब्रवीत्

यस्मिन्विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्यात् ॥ तद्ब्रह्म विश्वभवमेकमनन्तमाद्यमानन्दमात्रमविकारमहं प्रपद्ये ॥ १६ ॥ सत्याऽऽशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः ॥ अप्येवमार्य भगवान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ १७ ॥ मैत्रेय उवाच ॥ अथाभिष्टुत एवं वै सत्संकल्पेन धीमता ॥ भृत्यानुरक्तो भगवान्प्रतिनन्द्येदमब्रवीत् ॥ १८ ॥ श्रीभगवानुवाच ॥ वेदाहं ते व्यवसितं हृदि राजन्यबालक ॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥ १९ ॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति ॥ यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम् ॥ मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनाम् ॥ २० ॥ धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ॥ चरन्ति दक्षिणीकृत्य भ्रमन्तो यत्सतारकाः ॥ २१ ॥

॥ १८ ॥ वेदेति ॥ हे राजन्यबालक हे सुव्रत ते भद्रं कल्याणं भवतु । यत्ते हृदि व्यवसितं सर्वोत्कृष्टं स्थानमाकाङ्क्षितं तदहं सर्वज्ञो वेद जानामि । तदन्यैर्दुरापं दुर्लभमपि तुभ्यं प्रयच्छामि ॥ १९ ॥ स्थानं विशिनष्टि—नेति ॥ हे भद्र यत् स्थानं त्वदन्यैर्मन्वादिभिर्महद्भिरप्यनधिष्ठितं न प्राप्तं भ्राजिष्णु प्रकाशमानं ध्रुवा क्षितिर्निवासो यत्र तत् यत्रेति यत्र च मेढ्यां धान्यक्रमणाय भ्राम्यमाणानां पशूनां बन्धस्तम्भो मेढी तस्यां गोचक्रवत् बलीवर्दसमूहवत् ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं निबद्धं परिक्रामति इति शेषः । यच्च अवान्तरकल्पवासिनां परस्तादपि स्थास्नु लोकत्रयनाशेऽपि स्थितिशीलम् ॥ २० ॥ धर्म इति ॥ धर्मः अग्निः कश्यपः शुक्रः इत्यादयो नक्षत्ररूपाः नक्षत्रमण्डले वर्तमानाः वनौकसो वानप्रस्थाः मुनयः सप्तर्षयः सतारका यत्स्थानं प्रदक्षिणीकृत्य भ्रमन्तश्चरन्ति तत्ते प्रयच्छामि इत्यनुषङ्गः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतच्च राज्यानन्तरं भविष्यतीत्याह—प्रस्थित इति ॥ गां पृथिवीं तुभ्यं दत्त्वा पित्रा वनं प्रति प्रस्थिते गमने कृते सति भावे क्तः। भवान् नै व्याहतानि श्रान्तानीन्द्रियाणि यस्य तथाभूतः तथा धर्मः संश्रयः आश्रयो यस्य स तथा धर्मानुसारेण षट्त्रिंशद्वर्षसहस्रपर्यन्तं साहस्रमिति स्वार्थेऽण् पृथिवीं रक्षिता रक्षिष्यति ॥ २२ ॥ त्वया असंकल्पितमपि मद्भक्तस्य तव द्रोहात्सुरुच्यामेवं भविष्यतीत्याह—त्वदिति ॥ त्वद्भ्रातर्युत्तमे मृगयायां नष्टे सति तस्मिन्नेव मनो यस्याः सा तन्माता तु वनमन्वेषन्ती वने उत्तमान्वेषणं कुर्वती तत्रोत्थितं दावाग्निं प्रवेक्ष्यति ॥ २३ ॥ इष्ट्वेति ॥ इह भूलोके पुष्कलदक्षिणैरुत्तमोपस्करैर्यज्ञैः यज्ञो हृदयं प्रिया मूर्तिर्यस्य तं मामिष्ट्वा सत्या आशिषः उत्तमान् भोगान् भुक्त्वा अन्ते भोगावसाने मां स्मरिष्यसि ॥ २४ ॥ तत इति ॥ ततस्तदनन्तरमृषिभ्य उपरिष्टाद्वर्त्तमानं सर्वलोकनमस्कृतं मत्स्थानं त्वं गन्तासि गमिष्यसि। यतः स्थानात्तत्र गतो यतिर्नावर्त्तते प्रच्युतो न भवति। यतिरित्यत्र गत इति च पाठः ॥ २५ ॥ इतीति ॥ इत्येवंप्रकारेणार्चितः स भगवान् गरुडध्वजः तस्मै ध्रुवाय आत्मनः

प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः ॥ षट्त्रिंशद्वर्षसाहस्रं रक्षिता मण्डलं भुवः ॥२२॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः ॥ अन्वेषन्ती वनं माता दावाग्निं सा प्रवेक्ष्यति ॥ २३ ॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः ॥ भुक्त्वा चेहाशिषः सत्या अन्ते मां संस्मरिष्यसि ॥ २४ ॥ ततो गन्तासि मत्स्थानं सर्वलोकनमस्कृतम् ॥ उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते गतः ॥ २५ ॥ मैत्रेय उवाच ॥ इत्यर्चितः स भगवानतिदिश्यात्मनः पदम् ॥ बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः ॥ २६ ॥ सोऽपि संकल्पजं विष्णोः पादसेवोपसादितम् ॥ प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरम् ॥ २७ ॥ विदुर उवाच ॥ सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्चितम् ॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् ॥ २८ ॥ मैत्रेय उवाच ॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन् ॥ नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान् ॥ २९ ॥

पदं स्थानम् अतिदिश्य दत्त्वा तस्य बालस्य पश्यत एव सतो गरुडारूढः सन् स्वं धामायात् गतः। अगादिति वा पाठः ॥ २६ ॥ सोऽपीति ॥ स ध्रुवोऽपि संकल्पजं मनोरथं तदपि न यथाकथंचित् किंतु संकल्पनिर्वाणं संकल्पस्य निर्वाणं समाप्तिर्यस्मात् तं पूर्णं मनोरथं विष्णोः परिपूर्णस्य भगवतः पादसेवयोपसादितं प्राप्यापि नातिप्रीतः किंचित्प्रसन्नोऽपि सर्वथा प्रसन्नो न जातस्तथाभूतः सन् पुरमभ्यगात् आगतः ॥ २७ ॥ सुदुर्लभमिति ॥ मायाविनः कपटवतः सकामस्य सुदुर्लभं यत्परममुत्कृष्टं हरेः पदं तत् तस्य हरेश्चरणार्चनेनार्जितं प्रापितमेकेनैव जन्मना स्वल्पकालेन लब्ध्वापि अर्थवित् अर्थतत्वज्ञोऽपि ध्रुवः स्वमात्मानमसिद्धार्थमप्राप्तमनोरथमिव कथममन्यत ॥ २८ ॥ मातुरिति ॥ मातुः सपत्न्याः सुरुच्या वाच एव पीडाकरत्वाद्बाणास्तैर्विद्धो ध्रुवः तान् वाग्बाणान् स्मरन् मुक्तिपतेर्भगवतः सकाशात् मुक्तिं नैच्छत्। मातृसपत्नीवचः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरणदशायां मुक्तिकामस्तपो नाचरत् । ततश्च मुक्तिमननुसन्धाय सर्वोत्कृष्टस्थानं प्राप्तुं तपश्चचार । ततश्च भगवतापि तदनुरूपफले दत्ते स्वमौढ्यमनुस्मृत्य तापमुपेयिवान् ॥ २९ ॥ समाधिनेति ॥ नैके अनेके भवा यस्मिंस्तेन बहुजन्मनाभ्यस्तेन समाधिना यत्पदं यस्य भगवतः स्वरूपं सनन्दादय ऊर्द्ध्वरेतसो जितेन्द्रिया विदुः । तस्यामुष्य भगवतः पादयोश्छायां तत्कृपया षड्भिरेव मासैरुपेत्यापि पृथङ्मतिर्भेददर्शी अहम् अपगतस्ततो निवृत्तः पुनर्दुःखार्णवे संसारे पतितः छायामिति स्तुत्यादिकाले गरुडाधिरूढस्य हरेश्छायायां स्थितमात्मानं स्मरता ध्रुवेणोक्तम् ॥ ३० ॥ अहो इति ॥ बतेति हा कष्टं जातम् । अहो आश्चर्यमिदं मन्दभाग्यस्य ममानात्म्यं हृदयराहित्यं मूर्खतां पश्यत । भवच्छिदः संसारोच्छेदकस्य हरेः पादमूलं गत्वापि यत् अन्तवत् राज्यं ध्रुवलोकादिचिरकालस्थाय्यपि अन्ततो विनाश्येव तद्याचे याचितवानस्मि ॥ ३१ ॥ मतिरिति ॥ पतद्भिः मदपेक्षयाधःस्थानं प्राप्तवद्भिः असहिष्णुभिर्देवैः इन्द्रियाद्यधिष्ठातृभिः मम मतिर्विदूषिता । योऽहमसत्तमः तथ्यं सत्यमपि नारदस्य वचः नाधुनापी-

ध्रुव उवाच ॥ समाधिना नैकभवेन यत्पदं विदुः सनन्दादय ऊर्ध्वरेतसः ॥ मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथङ्मतिः ॥ ३० ॥ अहो बत ममानात्म्यं मन्दभाग्यस्य पश्यत ॥ भवच्छिदः पादमूलं गत्वा याचे यदन्तवत् ॥ ३१ ॥ मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः ॥ यो नारदवचस्तथ्यं नाग्राहिषमसत्तमः ॥ ३२ ॥ दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् ॥ तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा ॥ ३३ ॥ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि ॥ ३४ ॥ प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनम् ॥ भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः ॥३५॥ स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत ॥ ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः ॥३६॥

त्यादिपूर्वमुक्तं न अग्राहिषं न गृहीतवान् । आर्षः प्रयोगः । नाग्रहीषमिति शुद्धम् ॥ ३२ ॥ दैवीमिति ॥ दैवीं देवानां शक्तिरूपां मायां जगन्मोहनीमुपाश्रित्य द्वितीये भगवद्व्यतिरिक्ते वस्तुन्यसत्यपि प्रसुप्त इव यथा सुप्तः स्वप्नार्थान् पश्यन् द्वितीये असत्यपि व्याघ्रसर्पादिभ्यः खिद्यते तद्वत् भिन्नदृक् भेददर्शी अहं भ्रातृभ्रातृव्यहृद्रुजा भ्रातेव दुःखदत्वात् भ्रातृव्यः । शत्रुरिति भेददृष्ट्या हृदयरोगेणैव तापजनकशोकेन तप्ये तापमनुभवामि ॥ ३३ ॥ मयेत्यर्द्धम् ॥ गतायुषि आसन्नमरणे पुंसि चिकित्सा इव यथा व्यर्था तथा मया प्रार्थितमेतत् स्वार्थसाधकताभावाद्व्यर्थम् ॥ ३४ ॥ प्रसाद्येति ॥ भवच्छिदं जन्ममरणनिवर्तकं जगत आत्मानं दुष्प्रसादनमन्यैः प्रसादयितुमशक्यमपि तपसा प्रसाद्य भाग्यविवर्जितोऽहं भवं जन्ममरणमेव अयाचे याचितवान् ॥ ३५ ॥ स्वाराज्यमिति ॥ ईश्वराद्राज्ञः सकाशादधनः फलीकारान् इव सतुषतण्डुलकणान् यथा याचते तद्वत् स्वाराज्यं निजानन्दं यच्छतो भगवतः सकाशान्मे मया क्षीणपुण्येन क्षीणेन पुण्येनेति वा । बत अहो कष्टं मौढ्यान्मानोऽभिमानहेतुः राज्यादिर्भिक्षितो याचितः ॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न वै इति ॥ हे तात वै निश्चितं यदृच्छया याञ्चादिप्रयत्नं विनैव लब्धेनैव मनसः समृद्धिर्मनोरथपूर्त्तिर्येषां ते मुकुन्दस्य पदारविन्दयो रजोजुषः चरणारविन्दसेवातत्पराः भवादृशा जनाः निष्कामभक्ताः तस्य दास्यमृते सेवां विना आत्मनः अन्यमर्थं नैव वाञ्छन्ति ॥ ३७ ॥ आकर्ण्येति ॥ सम्परेत्य मृत्वाऽऽगतं श्रुत्वा यथा जनो न श्रद्धत्ते तद्वत् आत्मजं पुत्रमायान्तमाकर्ण्य श्रुत्वापि अभद्रस्य भाग्यहीनस्य मम भद्रं पुत्रागमनकल्याणं कुत इति मत्वा राजोत्तानपादो न श्रद्दधे विश्वासं न चकार ॥ ३८ ॥ श्रद्धायेति ॥ ततश्च एष्यत्यचिरत इत्यादि देवर्षेर्नारदस्य वाक्यं श्रद्धाय हर्षवेगेन धर्षितः तिरस्कृतो व्याकुलोऽतिप्रीतश्च सन् महाधनं हारं वार्त्ताहर्तुः प्रादात् ॥ ३९ ॥ सदश्वमिति द्वयम् ॥ आत्मजस्य पुत्रस्याभीक्षणे दर्शने उत्सुकः उत्साहवान् स राजा सदश्वं कार्तस्वरपरिष्कृतं स्वर्णभूषितं रथमारुह्य अमात्यादिभिः पर्यस्तो वृतः तथा शङ्खदुन्दुभिनादेन ब्रह्मघोषेण वेदपाठेन वेणुभिस्तच्छब्दैश्च सह पुरात्तूर्णं निश्चक्राम ॥ ४० ॥ ४१ ॥ सुनीतिरिति ॥ रुक्मैर्भूषिते सुनीतिः सुरुचिश्चास्य राज्ञो महिष्यौ

मैत्रेय उवाच ॥ न वै मुकुन्दस्य पदारविन्दयो रजोजुषस्तात भवादृशा जनाः ॥ वाञ्छन्ति तद्दास्यमृतेऽर्थमात्मनो यदृच्छया लब्धमनःसमृद्धयः ॥ ३७ ॥ आकर्ण्यात्मजमायान्तं संपरेत्य यथागतम् ॥ राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम ॥ ३८ ॥ श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः ॥ वार्ताहर्तुरतिप्रीतो हारं प्रादान्महाधनम् ॥ ३९ ॥ सदश्वं रथमारुह्य कार्तस्वरपरिष्कृतम् ॥ ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोऽमात्यबन्धुभिः ॥ ४० ॥ शङ्खदुन्दुभिनादेन ब्रह्मघोषेण वेणुभिः ॥ निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ॥ ४१ ॥ सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते ॥ आरुह्य शिबिकां सार्धमुत्तमेनाभिजग्मतुः ॥ ४२ ॥ तं दृष्ट्वोपवनाभ्याश आयान्तं तरसा रथात् ॥ अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ॥ ४३ ॥ परिरेभेऽङ्गजं दोर्भ्यां दीर्घोत्कण्ठमनाः श्वसन् ॥ विष्वक्सेनाङ्घ्रिसंस्पर्शहताशेषाघबन्धनम् ॥ ४४ ॥ अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः ॥ स्नापयामास तनयं जातोद्दाममनोरथः ॥ ४५ ॥

उत्तमेन सहैकामेव शिबिकां नरयानमारुह्य अभि ध्रुवाभिमुखं जग्मतुः । ध्रुवनिष्क्रमणदिनानन्तरमेवानुतप्तो राजा सुनीतिं सादरमङ्गीचकार सुरुचिं चोपेक्षितवान् । तथापि दयानिधिः सुनीतिः सपत्नीं तत्पुत्रं च स्वशिबिकायामारोपयामासेति प्राहुः ॥ ४२ ॥ तमिति द्वयम् ॥ विष्वक्सेनस्य हरेरङ्घ्रिस्पर्शेन हतमशेषमघं बन्धनं रागद्वेषादि च यस्य तम् अङ्गजं पुत्रमायान्तमुपवनस्याभ्याशे समीपे दृष्ट्वा प्रेमविह्वलः दीर्घं बहुकालपर्यन्तमुत्कण्ठायुक्तं मनो यस्य स नृपः श्वसन् दीर्घश्वासान् मुञ्चन् तूर्णं शीघ्रमेव रथादवरुह्य तरसा वेगेन आसाद्य प्राप्य दोर्भ्यां भुजाभ्यां परिरेभे ॥ ४३ ॥ ४४ ॥ अथेति ॥ अथ जातः संसिद्धः उद्दामो महान् पुत्रप्राप्तिलक्षणो मनोरथो यस्य स मुहुस्तनयं मूर्ध्नि जिघ्रन् शान्तैः प्रेमोद्भवैर्नयनवारिभिः स्नापयामास ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिवन्द्येति ॥ सज्जनानामग्रणीर्मुख्यो ध्रुवः पितुः पादावभिवन्द्य तेनाशीर्भिः सहाभिमन्त्रितः कुशलप्रश्नादिना कृतसम्भाषणः सत्कृतश्च मातरौ द्वे अपि शीर्ष्णा ननाम । "शीर्षंश्छन्दसि" इति शीर्षन्नादेशः॥४६॥सुरुचिरिति ॥ सुरुचिस्तं पादयोरवनतमर्भकं बालकं सम्यक् प्रीतिपूर्वकमुत्थाप्य परिष्वज्य बाष्पैर्गद्गदया स्खलिताक्षरया गिरा जीवेत्याशीर्वचनमाह स्म ॥४७॥ सुरुच्याः प्रीतौ हेतुः—यस्येति ॥ यस्य कस्यापि जनस्य मैत्र्यादिभिः मैत्रीप्रीतिसन्तोषदयादिभिर्गुणैः भगवान् हरिः प्रसन्नो भवति तस्मै तं प्रति यथा निम्नं देशं प्रति स्वयमेवापो नमन्ति अवतरन्ति तथा सर्वाणि भूतानि नमन्ति अनुसरन्ति ॥ ४८ ॥ उत्तमश्चेति ॥ अन्योन्यमङ्गसङ्गादुत्पुलकौ रोमाञ्चितौ प्रेम्णा विह्वलौ उत्तमश्च ध्रुवश्चेत्युभौ अस्रौघं बाष्पप्रवाहं मुहुः ऊहतुः दधतुः ॥ ४९॥ सुनीतिस्तु ध्रुवदर्शनसमय एवानन्दमूर्छामाप तद्भङ्गे ध्रुवमेलनमाह—सुनीतिरिति ॥ अस्य ध्रुवस्य जननी प्राणेभ्योऽपि प्रियं सुतं ध्रुवमुपगुह्य तस्याङ्गस्पर्शेन निर्वृता आनन्दिता सती आधिं तद्वियोगजां मनःपीडां जहौ ॥ ५० ॥ पय इति ॥ हे वीर तदा वीरसुवः

अभिवन्द्य पितुः पादावाशीर्भिश्चाभिमन्त्रितः ॥ ननाम मातरं शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥ ४६ ॥ सुरुचिस्तं समुत्थाप्य पादावनतमर्भकम् ॥ परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ॥ ४७ ॥ यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः ॥ तस्मै नमन्ति भूतानि निम्नमाप इव स्वयम् ॥ ४८ ॥ उत्तमश्च ध्रुवश्चोभावन्योऽन्यं प्रेमविह्वलौ ॥ अङ्गसङ्गादुत्पुलकावस्रौघं मुहुरूहतुः ॥ ४९ ॥ सुनीतिरस्य जननी प्राणेभ्योऽपि प्रियं सुतम् ॥ उपगुह्य जहावाधिं तदङ्गस्पर्शनिर्वृता ॥ ५० ॥ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः ॥ तदाऽभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः ॥ ५१ ॥ तां शशंसुर्नरा राज्ञीं दिष्ट्या ते पुत्र आर्तिहा ॥ प्रतिलब्धश्चिरं नष्टो रक्षिता मण्डलं भुवः ॥ ५२ ॥ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा ॥ यदनुध्यायिनो वीरा मृत्युं जिग्युः सुदुर्जयम् ॥ ५३ ॥ लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ॥ आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम् ॥ ५४ ॥

ध्रुवमातुः । उवङार्षः । शिवैरानन्दोद्भवैर्नेत्रजैः सलिलैरश्रुभिरभिषिच्यमानाभ्यां स्तनाभ्यां पयो मुहुः सुस्राव ॥ ५१ ॥ तामिति ॥ तां राज्ञीं सुनीतिं जनाः प्रशशंसुः । तथाहि चिरं नष्टः अदर्शनं गतस्ते तव पुत्र इदानीं सर्वेषां तवास्माकं चार्तिहा दुःखनाशकः सन्नुपलब्धो दर्शनं गत एतद्दिष्ट्या महद् भद्रं जातम् । एष च भुवो मण्डलं रक्षिता रक्षिष्यति ॥ ५२ ॥ अभ्यर्चित इति ॥ नूनं निश्चितमेतत् । यस्य हरेः अनुध्यायिनः ध्यानपरायणाः धीरा योगिजनाः सुदुर्जयमपि मृत्युं जिग्युः जितवन्तः स प्रणतानामार्त्तिहा भगवान् त्वयाभ्यर्चितः पूजितः अत एव स्वपुत्रस्य मृत्युं त्वमजैषीरिति भावः ॥ ५३ ॥ लाल्यमानमिति ॥ एवमिति व्यवहितं पित्राद्युपलालनं परामृश्यते । जनैः सर्वैरेव लाल्यमानं ध्रुवं सभ्रातरं कवभाव आर्षः । करिणीमारोप्य जनैः दिष्ट्या ते इत्यादिश्लोकद्वयेन स्तूयमानो नृपो हृष्टः सन् पुरमविशत् ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरं वर्णयति—तत्रेति ॥ तत्रोपसंकॢप्तैः रचितैस्तदानीमेवोद्यानादिभ्य आनीयारोपितैः लसन्तो मकराः धात्वादिरचिता येषु तैः तोरणैः तथा सवृन्दैः फलपुष्पमञ्जरीसहितैः सवृन्तैरित्यपि पाठः । कदलीस्तम्भैः तथा तद्विधैः सवृन्दैः पूगानां पोतैर्बालवृक्षैः प्रतिद्वारमुपस्कृतमित्युत्तरेणान्वयः ॥ ५५ ॥ चूतेति ॥ चूता आम्रास्तेषां पल्लवाश्च वासांसि च स्रजश्च मुक्तादामानि च तेषां विशेषेण लम्बो लम्बनमस्ति येषु तैः दीपकैरपां कुम्भैश्च प्रतिद्वारमुपस्कृतमलङ्कृतम्॥५६॥प्राकारैरिति ॥ शातकुम्भाः स्वर्णमयाः परिच्छदाः परिकरा येषु तैः श्रीमतां विमानानामिव शिखरैर्द्युतिर्येषां तैः प्राकारैः गोपुरैः पुरद्वारैः अगारैर्गृहैश्च सर्वतोऽलंकृतं श्रीमदिति पृथग्वा पुरविशेषणम् ॥ ५७ ॥ मृष्टेति ॥ चत्वरमङ्गणं रथ्या रथयोग्यो राजमार्गः अट्ट उच्चगृहस्योपरि निर्मिता भूमिका मार्गोऽवान्तरः मृष्टाः संमार्जिताश्चत्वरादयो यस्मिन् चन्दनचर्चितं चन्दनमिश्रितजलैश्चत्वरादिषु सिक्तं लाजैर्भृष्टव्रीहिभिः अक्षतैर्यवैः पुष्पैः फलैः तण्डुलैः बलिभिर्मृष्टान्नैर्वस्त्रभूषादिभिश्च युतम् ॥ ५८ ॥ ध्रुवायेति द्वयम् ॥ तत्र तत्र पथि मार्गे दृष्टाय ध्रुवाय पुरस्त्रियो

तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः ॥ सवृन्दैः कदलीस्तम्भैः पूगपोतैश्च तद्विधैः ॥ ५५ ॥ चूतपल्लववासःस्रङ्मुक्तादामविलम्बिभिः ॥ उपस्कृतं प्रतिद्वारमपां कुम्भैः सदीपकैः ॥ ५६ ॥ प्राकारैर्गोपुरागारैः शातकुम्भपरिच्छदैः ॥ सर्वतोऽलंकृतं श्रीमद्विमानशिखरद्युभिः ॥ ५७ ॥ मृष्टचत्वररथ्याट्टमार्गं चन्दनचर्चितम् ॥ लाजाक्षतैः पुष्पफलैस्तण्डुलैर्बलिभिर्युतम् ॥ ५८ ॥ ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः ॥ सिद्धार्थाक्षतदध्यम्बुदूर्वापुष्पफलानि च ॥ ५९ ॥ उपजह्रुः प्रयुञ्जाना वात्सल्यादाशिषः सतीः ॥ शृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः ॥ ६० ॥ महामणिव्रातमये स तस्मिन्भवनोत्तमे ॥ लालितो नितरां पित्रा न्यवसद्दिवि देववत् ॥ ६१ ॥ पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः ॥ आसनानि महार्हाणि यत्र रौक्मा उपस्कराः ॥ ६२ ॥ यत्र स्फटिककुड्येषु महामारकतेषु च ॥ मणिप्रदीपा आभान्ति ललनारत्नसंयुताः ॥ ६३ ॥ उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः ॥ कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥ ६४ ॥

वात्सल्यात् स्नेहात् सतीः श्रेष्ठाः आशिषः प्रयुञ्जानाः सत्यः सिद्धार्थाक्षतादीनि उपजह्रुः व्यकिरन् । सिद्धार्थः श्वेतसर्षपः ध्रुवश्च तासां वल्गूनि मनोहराणि गीतानि शृण्वन् पितुर्भवनं प्राविशत् ॥ ५९ ॥ ६० ॥ महामणीति ॥ पित्रा नितरां लालितः सः ध्रुवः महामणीनां व्रातः समूहस्तन्मये तद्रचिते तस्मिन्भवनोत्तमे दिवि देववत् न्यवसत्॥६१॥ पय इति ॥ यत्र भवनोत्तमे शय्याः पयःफेननिभाः कोमलाः शुभ्राश्च दान्ताः हस्तिदन्तनिर्मिताः रुक्मनिर्मिताः परिच्छदाः परिकराः पात्रादयो यासु ताः शय्याः आभान्ति । महार्हाणि आसनानि आभान्ति । रौक्माः उपस्कराः पात्रादयश्चाभान्ति ॥ ६२ ॥ यत्रेति ॥ यत्र भवनोत्तमे स्फटिककुड्येषु महामारकतेषु च कुड्येषु मणय एव प्रदीपा इव प्रकाशका आभान्ति । तथा रत्नसंयुताः नानारत्नाभरणैर्भूषिताः ललनाःश्रेष्ठाः स्त्रियः परिचारिका आभान्ति॥६३॥उद्यानानीति ॥ कूजन्ति विहङ्गमिथुनानि येषु तैः गायन्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्ता मधुव्रता भ्रमरा येषु तैः विचित्रैः नानावर्णैः अमरद्रुमैर्देववृक्षैः रम्याणि मनोहराण्युद्यानानि चाभान्ति ॥ ६४ ॥ वाप्य इति ॥ यत्र वैदूर्यमणिरचितानि सोपानानि यासां ताः पद्ममुत्पलं कुमुत् कुमुदं तद्वतीः तद्युक्ताः । पूर्दसवर्णदीर्घ आर्षः । हंसकारण्डवानां कुलैः चक्राह्वैः सारसैश्च जुष्टाः सेविताः वाप्यश्च आभान्ति ॥ ६५ ॥ उत्तानपाद इति ॥ उत्तानपादः राजर्षिः अद्भुततमं तनयस्य प्रभावं मन्वाद्यनधिष्ठितपदप्राप्तिलक्षणं श्रुत्वा प्रजानुरागादिकं दृष्ट्वा च परं विस्मयं प्रपेदे प्राप ॥ ६६ ॥ वीक्ष्येति ॥ ऊढवयसं प्राप्तयौवनं राज्यनिर्वाहयोग्यं प्रकृतीनाममात्यादीनां प्रजापालनक्षमत्वेन संगतमनुरक्ताः प्रजा यस्मिंस्तं तमेवंगुणकं ध्रुवं वीक्ष्य राजोत्तानपादो भुवः पतिं चक्रे राज्येऽभिषिक्तवान् ॥ ६७ ॥ आत्मानमिति ॥ आत्मानं च प्रवयसं वृद्धमाकलय्य दृष्ट्वा विशांपतिः राजा विषयभोगाद्विरक्तः सन् आत्मनो गतिं तत्त्वं विमृशन् विचारयन् वनं प्रातिष्ठत् । तङभाव आर्षः ॥ ६८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्याध्याये नवमे व्यधात् ॥ ९ ॥ दशमे चालकां गत्वा यक्षान-

वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमुद्वतीः ॥ हंसकारण्डवकुलैर्जुष्टाश्चक्राह्वसारसैः ॥ ६५ ॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तम् ॥ श्रुत्वा दृष्ट्वाऽद्भुततमं प्रपेदे विस्मयं परम् ॥६६॥ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतम्॥अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिम् ॥६७॥ आत्मानं च प्रवयसमाकलय्य विशांपतिः॥वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिम् ॥६८॥ इति श्रीभागवते चतुर्थ० नवमोऽध्यायः॥९॥ ॥ मैत्रेय उवाच॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ॥ उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥ १ ॥ इलायामपि भार्यायां वायोः पुत्र्यां महाबलः ॥ पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ॥ २ ॥ उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा ॥ हतः पुण्यजनेनाद्रौ तन्माताऽस्य गतिं गता ॥ ३ ॥ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचाऽर्पितः ॥ जैत्रं स्यन्दनमास्थाय गतः पुण्यजनालयम् ॥ ४ ॥

नुजघातकान् ॥ बहून्ध्रुवोऽवधीत्तत्र श्लोकास्त्रिंशत्प्रकीर्तिताः ॥ अनुष्टुभः साङ्घ्रिदन्ता उवाचेति द्वयं तथा ॥ १० ॥ प्रजापतेरिति ॥ प्रजापतेः शिशुमारस्य दुहितरं कन्यां भ्रमिं नाम प्रसिद्धां ध्रुव उपयेमे । तत्सुतौ तस्याः भ्रमेः सुतौ कल्पवत्सराख्यौ बभूवतुः ॥ १ ॥ इलायामिति ॥ वायोः पुत्र्यामिलायामपि भार्यायां महाबलो ध्रुव उत्कलनामानं पुत्रं योषिद्रत्नं मनोहरां कन्यां च अजीजनत् । योषितां रत्नमिवातिमनोहरामिति विशेषणं वा ॥ २ ॥ उत्तम इति ॥ उत्तमस्तु अकृतोद्वाह एव मृगयायां बलीयसा पुण्यजनेन यक्षेणाद्रौ हिमवति हतः । आजाविति पाठे युद्धे हतः । तन्माता तस्योत्तमस्य माता सुरुचिः अस्योत्तमस्य गतिं मरणं गता ॥ ३ ॥ ध्रुव इति ॥ ध्रुवः भ्रातुर्वधं श्रुत्वा कोपामर्षाभ्यां युक्तया शुचा शोकेन द्वन्द्वैक्ये तु “ द्वन्द्वाच्चुदष ” इति अचि समस्तं पदम् । अर्पितो व्याप्तः सन् जैत्रं जयप्रदं स्यन्दनमास्थाय पुण्यजनानां यक्षाणामालयं स्थानमलकां पुरीं गतः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वेति ॥ राजा ध्रुवः रुद्रानुचरैर्भूतादिभिः सेविताम् उदीचीं दिशं गत्वा हिमवतो हिमाचलस्य द्रोण्यां हिमवदवयवभूतपर्वतानामन्तर्गते समे प्रदेशे गुह्यकैः यक्षैः संकुलां व्याप्तां पुरीम् अलकां ददर्श ॥ ५ ॥ दध्माविति ॥ हे क्षत्तः बृहद्बाहुर्ध्रुवः खं दिशश्च अनुनादयन् शङ्खं दध्मौ । येन शब्देन उद्विग्नदृशः उपदेव्यः यक्षस्त्रियः भृशमत्रसन् ॥६॥ तत इति ॥ बलिनः उपदेवस्य कुबेरस्य महाभटाः योद्धारः तस्य शङ्खस्य निनादम् असहन्तः उदायुधाः सन्तः ततः पुरीतः निष्क्रम्य अभिपेतुः संमुखमाययुः ॥७॥ स इति ॥ वीरः उग्रधन्वा महारथः स ध्रुवः एकैकं त्रिभिस्त्रिभिर्बाणैः सर्वान् आपतत आगच्छतस्तान् त्रयोदशायुतानि यक्षान् युगपत् एकदैवाहन् जघान प्रहृतवान् ॥ ८ ॥ त इति ॥ ते सर्व एव हि यक्षास्तैर्ललाटे लग्नैरिषुभिर्बाणैरात्मानं निरस्तं तिरस्कृतं मत्वा तस्य ध्रुवस्य तत् एवमेकदैव झटिति सर्वेषां हननलक्षणं कर्म आशंसन् मनसा श्लाघितवन्तः ॥ ९ ॥ तेऽपीति ॥ ततस्ते यक्षा अपि यथा पादस्पर्शमुरगा न सहन्ते तद्वत् अमृष्यन्तः तत्कर्मासहमानाः प्रचिकीर्षवः प्रतिकर्त्तुमिच्छवः द्विगुणं यथा भवति

गत्वोदीचीं दिशं राजा रुद्रानुचरसेविताम् ॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलाम् ॥ ५ ॥ दध्मौ शङ्खं बृहद्बाहुः खं दिशश्चानुनादयन् ॥
येनोद्विग्नदृशः क्षत्तरुपदेव्योऽत्रसन्भृशम् ॥ ६ ॥ ततो निष्क्रम्य बलिन उपदेवमहाभटाः ॥ असहन्तस्तं निनादमभिपेतुरुदायुधाः ॥ ७ ॥ स
तानापततो वीर उग्रधन्वा महारथः ॥ एकैकं युगपत्सर्वानहन् बाणैस्त्रिभिस्त्रिभि ॥८॥ ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव हि ॥ मत्वा निरस्तमा-
त्मानमाशंसन्कर्म तस्य तत् ॥ ९ ॥ तेऽपि चामुममृष्यन्तः पादस्पर्शमिवोरगाः ॥ शरैरविध्यन्युगपद्द्विगुणं प्रचिकीर्षवः ॥ १० ॥ ततः परिघ-
निस्त्रिंशैः प्रासशूलपरश्वधैः ॥ शक्त्यृष्टिभिर्भुशुण्डीभिश्चित्रवाजैः शरैरपि ॥ ११ ॥ अभ्यवर्षन्प्रकुपिताः सरथं सहसारथिम् ॥ इच्छन्तस्तत्प्रती-
कर्तुमयुतानि त्रयोदश ॥ १२ ॥ औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा ॥ न उपादृश्यत च्छन्न आसारेण यथा गिरिः ॥ १३ ॥ हाहा-
कारस्तदैवासीत्सिद्धानां दिवि पश्यताम् ॥ हतोऽयं मानवः सूर्यो मग्नः पुण्यजनार्णवे ॥ १४ ॥

तथा षड्भिः षड्भिः शरैर्युगपदमुं ध्रुवमविध्यन् ॥ १० ॥ तत इति द्वयम् ॥ ततश्च तस्य कर्म प्रतिकर्त्तुमिच्छन्तः प्रकुपिताः अयुतानां त्रयोदश त्रयोदशायुतानि प्रायः अयुतानीत्येव पाठः । परिघनिस्त्रिंशादिभिः चित्राः वाजाः पक्षा येषां तैः शरैरपि सरथं सहसारथिं ध्रुवमभ्यवर्षन् आच्छादयामासुः ॥ ११ ॥ १२॥ औत्तानपादिरिति ॥ स औत्तानपादिः ध्रुवस्तदा भूरिणा शस्त्रवर्षेण च्छन्नो यथा धारासम्पातेन च्छन्नो गिरिरदृश्यो भवति तथा नोपादृश्यत । ध्रुवस्य कापि क्षतिर्नाभूदिति दृष्टान्तेन सूच्यते ॥ १३ ॥ हाहेति ॥ तदा एव दिवि स्थित्वा पश्यतां सिद्धानां हाहाकार आसीत् । तद्वचनमाह । मानवः मनुपौत्रोऽयं सूर्यः सूर्यतुल्यः पुण्यजना यक्षा एवार्णववद्दुस्तरत्वादर्णवस्त-स्मिन्मग्नः प्रविष्टः सन् हतः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदत्स्विति ॥ मृधे रणभूमौ यातुधानेषु राक्षसेषु नदत्सु नादं कुर्वत्सु जयकाशिषु अस्माभिर्जितं जितमिति स्वजयप्रकाशकेषु सत्सु शत्रुकूटात्तस्य ध्रुवस्य रथः यथा नीहाराद्भास्करः सूर्य उत्तिष्ठति तद्वत् उदतिष्ठत् उद्भूतः ॥ १५ ॥ धनुरिति ॥ उग्रं शत्रूणां भयदं धनुः विस्फूर्जयन् टङ्कारघोषयुक्तं कुर्वन् द्विषतां खेदमुद्वहन् पातयंस्ते- षामस्त्रौघं वनानीकमनिल इव बाणैर्व्यधमत् चूर्णयामास ॥ १६ ॥ तस्येति ॥ तस्य ध्रुवस्य चापाद्विनिर्मुक्ता ये द्विषतामस्त्रौघं व्यधमंस्त एवैकदा प्रयुक्ता बाणा रक्षसां वर्माणि भित्त्वा यथा इन्द्रप्रयुक्ता अशनयो वज्राणि गिरीन् प्रविशन्ति तद्वत् कायान् शरीराणि आविविशुः प्रविष्टाः ॥ १७ ॥ भल्लैरिति द्वयम् ॥ भल्लैरर्द्धचन्द्राकारबाणविशेषैः सञ्छिद्यमानानां यक्षाणां चारूणि कुण्डलानि येषु तैः शिरोभिः हेमतालाभैः सुवर्णतालसदृशैरुरुभिः वलयैर्वल्गुभिर्मनोहरैर्दोर्भिर्भुजैः हारकेयूरमुकुटैः महान्ति धनानि येषु तैरुष्णीषैश्चास्तृताः प्रकीर्णास्ता रणभुवो वीराणां मनोहराः सत्यो विरेजुः शोभितवत्यः ॥ १८ ॥ १९ ॥ हतेति ॥ हतेभ्योऽवशिष्टाः उर्वरिताः अत एव क्षत्रियवर्यस्य

नदत्सु यातुधानेषु जयकाशिष्वथो मृधे ॥ उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥ १५ ॥ धनुर्विस्फूर्जयन्दिव्यं द्विषतां खेदमुद्वहन् ॥
अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः ॥ १६ ॥ तस्य ते चापनिर्मुक्ता भित्त्वा वर्माणि रक्षसाम् ॥ कायानाविविशुस्तिग्मा गिरी-
नशनयो यथा ॥ १७ ॥ भल्लैः संच्छिद्यमानानां शिरोभिश्चारुकुण्डलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥१८॥ हारकेयूरमुकु-
टैरुष्णीषैश्च महाधनैः ॥ आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥ १९ ॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः ॥
प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेन्द्रविक्रीडितयूथपा इव ॥ २० ॥ अपश्यमानः स तदाततायिनं महामृधे कंचन मानवोत्तमः ॥
पुरीं दिदृक्षन्नपि नाविशद्द्विषां न मायिनां वेद चिकीर्षितं जनः ॥ २१ ॥ इति ब्रुवंश्चित्ररथः स्वसारथिं यतः परेषां प्रतियोगशङ्कितः ॥
शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥ २२ ॥

ध्रुवस्य सायकैः प्रायो बाहुल्येन विवृक्णाः सञ्छिन्ना अवयवा हस्तादयो येषां ते इतरे रक्षोगणाः मृगेन्द्रेण सिंहेन विक्रीडिताः विद्राविताः यूथपाः गजा इव रणाजिरात् युद्धाङ्गणतो विदुद्रुवुः पलायिता जाताः ॥ २० ॥ अपश्यमान इति ॥ मानवेषु मनुवंशेषु उत्तमः स ध्रुवस्तदा तस्मिन् महामृधे युद्धभूमौ कञ्चनाप्याततायिनं शस्त्रपा- णिमपश्यमानोऽपि शानजार्षः । पुरीम् अलकां दिदृक्षन्नपि द्रष्टुमिच्छन्नपि सन्नन्ताद्दृशेरात्मने दाशाव आर्षः । न आविशत् । यतः जनः मायिनां द्विषां चिकीर्षितं न वेद ॥ २१ ॥ इतीति ॥ चित्रो रथो यस्य सः परेषां शत्रूणां प्रतियोगः पुनरुद्योगस्तस्माच्छङ्कितः अत एव यत्तः प्रयत्नवान् स ध्रुवः "न मायिनां वेद चिकीर्षितं जनः" इत्यादि वाक्यं स्वसारथिं प्रति ब्रुवन् सन् जलधेरिव ईरितमुत्पन्नं शब्दं शुश्राव । नभस्वतो वायोर्हेतोः सर्वदिक्षु रजोऽन्वदृश्यत ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणेनेति ॥ विस्फुरन्त्यः प्रकाशमानास्तडितो यस्मिंस्तेन त्रासयन्तः स्तनयित्नवोऽशनयो यस्मिंस्तेन घनानीकेन मेघमण्डलेन सर्वतो दिक्षु क्षणेन व्योमाच्छादितं जातम् ॥ २३ ॥ ववृषुरिति ॥ हे अनघ रुधिरौघादीन् ववृषुः मेघा इति शेषः । यद्वा । रुधिरादयः ववृषुः निपेतुः । न सृजति शरीरमित्यसृक् श्लेष्मादिरुधिरस्यासृक्छब्दवाच्यस्य पृथग्ग्रहणात् मेदांसीति वाच्ये मेदस इति पुंस्त्वमार्षम् । तथा गगनादस्य ध्रुवस्याग्रतः कबन्धानि शिरोरहितानि शरीराणि निपेतुः ॥ २४ ॥ तत इति ॥ ततश्च खे गिरिरदृश्यत तथा साश्मवर्षिणः अश्मसहितं यद्वर्षं तद्वन्तः । अश्मवर्षिभिः पुरुषैः सह वर्तमाना इति वा । गदापरिघनिस्त्रिंशमुसलाः सर्वतोदिशं सर्वदिक्षु निपेतुः । सर्वत इत्यस्य योगे दिशामिति द्वितीया ॥ २५ ॥ अहय इति ॥ अशनिर्मेघवह्निज्वाला तद्वन्निश्वासो येषां ते तथा रुषा क्रोधेनाक्षिभिरग्निं वमन्तोऽहयः मत्ता गजाः सिंहा व्याघ्राश्च यूथशः भूत्वा अभ्यधावन् वेगेन सम्मुखमाजग्मुः ॥ २६ ॥ समुद्र इति ॥ ऊर्मिभिः सर्वतो भुवं प्लावयन् महाह्लादः प्रचण्डशब्दवान् अत एव भीमः भयङ्करः समुद्रः कल्पान्ते

क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः ॥ विस्फुरत्तडिता दिक्षु त्रासयन् स्तनयित्नुना ॥ २३ ॥ ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः ॥ निपेतुर्गगनादस्य कबन्धान्यग्रतोऽनघ ॥ २४॥ ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतो दिशम् ॥ गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः ॥२५॥ अहयोऽशनिनिःश्वासा वमन्तोऽग्निं रुषाक्षिभिः ॥ अभ्यधावन्गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥ २६ ॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवम् ॥ आससाद महाह्लादः कल्पान्त इव भीषणः ॥ २७ ॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनाम् ॥ ससृजुस्तिग्मगतय आसुर्या माययाऽसुराः ॥ २८ ॥ ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तराम् ॥ निशम्य तस्य मुनयः शमाशंसन्समागताः ॥ २९ ॥ मुनय ऊचुः ॥ औत्तानपादे भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् ॥ यन्नामधेयमभिधाय निशम्य चाद्धा लोकोऽञ्जसा तरति दुस्तरमङ्ग मृत्युम् ॥ ३० ॥ इति श्रीभागवते चतुर्थस्कन्धे दशमोऽध्यायः ॥ १० ॥ ॥

इव भीषणः आससाद समीपमाजगाम ॥ २७ ॥ एवमिति ॥ तिग्मा क्रूरा गतिः प्रवृत्तिर्येषां ते तथाभूताः असुराः स्वसंबन्धिन्या आसुर्या मायया एवंविधान्यनेकान्यमनस्विनामधीराणामेव त्रासनानि भयङ्कराणि वस्तूनि ससृजुः । अत्रासुरराक्षसादिशब्दैः प्रकरणात्समशीलतया यक्षा एवोच्यन्ते । असुरतुल्या इति वार्थः ॥ २८ ॥ ध्रुव इति ॥ असुरैः ध्रुवे प्रयुक्तामतिदुस्तरां भगवत्स्मरणं विनोपायान्तरेण निवर्तयितुमशक्यां तां मायां निशम्य दृष्ट्वा मुनयस्तत्र समागताः सन्तस्तस्य ध्रुवस्य शं कल्याणमाशंसन् प्रार्थितवन्तः ॥ २९ ॥ औत्तानपादे इति ॥ अङ्ग हे औत्तानपादे अवनतानामार्तिहरः देवः भगवान् शार्ङ्गधन्वा तव विपक्षान् शत्रून् क्षिणोतु । नाशयतु यन्नाम अभिधाय उच्चार्य निशम्य श्रुत्वा वा लोकः प्राणिमात्रमद्धा साक्षात् अञ्जसा सुखेनैव दुस्तरमपि मृत्युं तरति ॥ ३० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायस्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्यतामतोऽग्रे त्वया रोषो न कर्त्तव्यः ॥ ७ ॥ नेति ॥ हे तात यत् ते त्वया अकृतैनसां न कृतम् एनः पापमपराधो यैस्तेषामपुण्यदेवानां यक्षाणां वध आरब्धः तदेतत् सद्भिर्विगर्हितं कर्म अस्माकं धर्मशास्त्रानुवर्तिनां कुल उचितं न भवति ॥ ८ ॥ नन्विति ॥ अङ्ग हे भ्रातृवत्सल ध्रुव ननु भ्रातुर्वधेन अभितप्तेन त्वया एकस्य त्वद्भ्रातृहन्तुरपराधेन प्रसङ्गाद्बहवो हताः ॥ ९ ॥ सत्यप्यपराधे तवैतन्नोचितमित्याह—नायमिति ॥ यत् पराक् बहिर्भूतं देहमात्मानं गृह्य मत्वा ल्यबार्षः । परागृह्येति पाठे परा इति निषेधे । आत्मानमज्ञात्वेत्यर्थः । पशुवत् पशवो यथा देहाभिमानादन्योन्यं घ्नन्ति तद्वत् भूतानां प्राणिनां वैशसं हिंसनं सोऽयं साधूनां हृषीकेशानुवर्तिनां मार्गो न भवति ॥ १० ॥ सर्वेति ॥ भवान् सर्वभूतानामावासमाधारभूतं दुराराध्यमपि हरिं सर्वभूतेष्वात्मभावेन आराध्य ध्यात्वा यद्विष्णोस्तस्य परमं सर्वोत्कृष्टं पदं स्थानं तदपि प्राप्तवान् । सर्वभूतानामात्मत्वेन हेतुना भूतानामावासमिति वान्वयः ॥ ११ ॥ स इति ॥ बाल्येऽपि साधुचरितेन त्वं हरेः हृदि अनुध्यातः स्थितो ज्ञातो वात्सल्यात्स्मर्यमाणः तत्पुंसां भागवता-

नास्मत्कुलोचितं तात कर्मैतत्सद्भिर्गर्हितम् ॥ वधो यदुपदेवानामारब्धस्तेऽकृतैनसाम् ॥ ८ ॥ नन्वेकस्यापराधेन प्रसङ्गाद्बहवो हताः ॥
भ्रातुर्वधाभितप्तेन त्वयाऽङ्ग भ्रातृवत्सल ॥ ९ ॥ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनाम् ॥ यदात्मानं पराग्गृह्य पशुवद्भूतवैशसम्
॥ १० ॥ सर्वभूतात्मभावेन भूतावासं हरिं भवान् ॥ आराध्याऽऽप दुराराध्यं विष्णोस्तत्परमं पदम् ॥ ११ ॥ स त्वं हरेरनुध्यातस्तत्पुंसामपि
संमतः ॥ कथं न्ववद्यं कृतवाननुशिक्षन्सतां व्रतम् ॥ १२ ॥ तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु ॥ समत्वेन च सर्वात्मा भगवान्संप्रसी-
दति ॥ १३ ॥ संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ॥ विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति ॥ १४ ॥ भूतैः पञ्चभिरारब्धैर्योषित्पुरुष एव
हि ॥ तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह ॥ १५ ॥ एवं प्रवर्तते सर्गः स्थितिः संयम एव च ॥ गुणव्यतिकराद्राजन्मायया परमात्मनः ॥ १६ ॥

नामपि साधुत्वेन संमतः नारदात्कृतां व्रतमनुशिक्षन्नाशिक्षता आर्षः । कथं नु अवद्यं निन्द्यं प्राणिहिंसनं कृतवान् ॥ १२ ॥ सतां व्रतमाह—तितिक्षयेति ॥ महत्सु तितिक्षया नीचेषु करुणया समेषु मैत्र्या अखिलेषु जन्तुषु समत्वेन च सर्वात्मा भगवान् सम्यक् प्रसीदति ॥ १३ ॥ सम्प्रसन्न इति ॥ भगवति संप्रसन्ने सति पुरुषः प्राणिमात्रं यः कश्चिदपि प्राकृतैर्गुणैः रजःसत्वतमोभिर्विशेषेण मुक्तोऽत एव तत्कार्येण जीवेन लिङ्गशरीरेण निर्मुक्तः सन् निर्वाणं सुखात्मकं ब्रह्म ऋच्छति प्राप्नोति ॥ १४ ॥ वस्तुतो भ्रातृपुत्रादिसंबन्धः मिथो हन्तृत्वादिकं च नास्तीत्याह—भूतैरिति ॥ पञ्चभिर्भूतैर्भूम्यादिभिरारब्धैः देहाद्याकारेण परिणतैरेव योषित् पुरुषश्च व्यवह्रियते तयोरेव स्त्रीपुंसयोर्व्यवायात् मैथुनादन्ययोर्योषित्पुरुषयोः इह संभूतिर्जन्म भवति हि ॥ १५ ॥ एवमिति ॥ हे राजन् एवं मातृपित्राद्याकारेण परिणतैर्भूतैरेव सर्गः स्थितिः संयमश्च एतत्त्रयमपि परमात्मनो मायया यो गुणानां व्यतिकरो वैषम्यं तत एव प्रवर्त्तते भवति नतु स्वतः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुर्यस्याध्याये दशमे व्यधात् ॥ १० ॥ एकादशे मनुर्यक्षवधात्तत्वोपदेशनैः ॥ अवारयद्ध्रुवं तत्र श्लोकास्त्रिंशच्च पञ्च च ॥ उवाचेति द्वे रं सङ्क्षिप्तं त्रिंशदनुष्टुभः ॥ ११ ॥ निशम्येति ॥ एवं गदतामृषीणां वचनमुपदेशमिव निशम्य प्रबुद्धो ध्रुव उपस्पृश्य हस्तपादप्रक्षालनमाचमनं च कृत्वा यन्नारायणनिर्मितं नारायणास्त्रं तद्धनुषि संदधे तन्मन्त्रं पठित्वा शरं धनुषि योजितवान् ॥ १ ॥ सन्धीयमान इति ॥ हे विदुर एवमेतस्मिन्नस्त्रे सन्धीयमाने सति गुह्यकनिर्मिताः माया मेघादिरूपाः ज्ञानस्योदये सति यथा क्लेशाः अविद्याऽस्मितादयो नश्यन्ति तद्वत् क्षिप्रमेव विनेशुः ॥ २ ॥ तस्येति ॥ ऋषेर्नारायणादुद्भूतमार्षमस्त्रं तस्य ध्रुवस्य धनुषि प्रयुञ्जतः सन्दधतः सतस्ततः सुवर्णमयाः पुङ्खाः मूलप्रान्ता ज्यानुरुन्धनप्रदेशा येषां ते तथा कलहंसानामिव वासांसि पक्षा येषां ते । शरा इति शेषः । विनिःसृताः सन्तो भीमो भयङ्करो रवः शब्दो येषां ते शिखण्डिनो मयूरा यथा वनं प्रविशन्ति तद्वत् द्विषतां शत्रूणां बलं सेनां निर्विविशुः ॥ ३ ॥ तैरिति ॥ तैस्तिग्मधारैस्तीक्ष्णाग्रभागैः शिलीमुखैः शरैः प्रधने युद्धभूमौ इतस्ततः सर्वतः पुण्यजना यक्षा उपद्रुताः अत

मैत्रेय उवाच ॥ निशम्य गदतामेवमृषीणां धनुषि ध्रुवः ॥ संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम् ॥ १ ॥ संधीयमान एतस्मिन्माया गुह्यकनिर्मिताः ॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा ॥ २ ॥ तस्यार्षास्त्रं धनुषि प्रयुञ्जतः सुवर्णपुङ्खाः कलहंसवाससः ॥ विनिःसृता निर्विविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखण्डिनः ॥ ३ ॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः ॥ तमभ्यधावन्कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः ॥ ४ ॥ स तान् पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् ॥ निनाय लोकं परमर्कमण्डलं व्रजन्ति निर्भिद्य यमूर्ध्वरेतसः ॥ ५ ॥ तान्हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूयसा ॥ औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः ॥ ६ ॥ मनुरुवाच ॥ अलं वत्सातिरोषेण तमोद्वारेण पाप्मना ॥ येन पुण्यजनानेतानवधीस्त्वमनागसः ॥ ७ ॥

एव कुपिताः उदायुधाः उद्यतानि आयुधानि यैस्ते यथोन्नद्धा उच्छ्रिताः फणाः येषां ते अहयः सुपर्णं गरुडं हन्तुमायान्ति तद्वत् ते तं ध्रुवमभ्यधावन् । तं मारयितुमेकयैव हेलया संमुखमागताः ॥ ४ ॥ स इति ॥ स ध्रुवस्तान् यक्षान् मृधे युद्धेऽभिधावतः पृषत्कैः शरैर्निकृत्तानि बाहवः ऊरवः शिरोधराः ग्रीवाः उदराणि च येषां तान् परं लोकं सत्यलोकं निनाय प्रापितवान् । अर्कमण्डलं निर्भिद्य यं लोकमूर्ध्वरेतसः संन्यासिनो व्रजन्ति । भगवद्भक्तस्य ध्रुवस्य हस्तेन सङ्ग्रामे मृतानामुत्तमलोकप्राप्तिर्विवक्षिता । ऊर्ध्वरेतःशब्दमात्रसाहचर्यान्नोक्षस्तु न व्याख्येयः ॥ ५ ॥ तानिति ॥ भूयसा बलिना चित्ररथेन ध्रुवेण तान् गुह्यकान् यक्षान् अनागसः उत्तमहन्तुरन्यत्वेन निरपराधानपि हन्यमानानभिवीक्ष्य कृपया परिप्लुतः पितामहोऽतः शिक्षायां समर्थो मनुस्तथापि स्ववचनानुमोदनार्थं गुरुत्वार्थं च ऋषिभिः सह तत्रोपगतः आगतः सन् औत्तानपादिं ध्रुवं प्रति जगाद ॥ ६ ॥ अलमिति ॥ हे वत्स येन त्वमनागसो निरपराधानप्येतान् पुण्यजनान् अवधीः हतवांस्तेन पाप्मना पापजनकेनात एव तमसो नरकस्य द्वारेणातिरोषेणाऽलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निमित्तेति ॥ तत्र सर्गादौ निर्गुणः पुरुषर्षभः परमात्मा तु निमित्तमात्रमासीत् । यत्र यस्मिन्निमित्ते सति व्यक्ताव्यक्तं स्थूलसूक्ष्मात्मकं विश्वं लोहवत् यथायस्कान्तसन्निधानमात्रेणाचेतनमपि लोहं प्रवर्त्तते तद्वत् भ्रमति । जडमपि चेतनमिव भवेत् । सृष्ट्यादौ परिवर्त्तते ॥ १७ ॥ नन्वेवं युगपत्सृष्ट्यादित्रयं प्राप्तं तत्राह—स इति ॥ सृष्ट्यादिनिमित्तभूतया कालाख्यया स्वशक्त्या क्रमेण यो गुणानां प्रवाहः क्षोभस्तेन विभक्तं वीर्यं रजआदि शक्तिर्यस्य स भगवानेवेदं विश्वमकर्त्तैव करोति अहन्तैव निहन्तीत्यन्वयः । अपालक एव पातीत्यनुक्तमपि ज्ञेयम् । विभूम्नो महतस्तस्य भगवतश्चेष्टा कालशक्तिः खलु निश्चयेन दुर्विभाव्या अचिन्त्या । विभूम्न इति हेतौ पञ्चमी वा विभुत्वादित्यर्थः ॥ १८ ॥ ननु पित्रादीनां स्रष्टृत्वादि प्रसिद्धं नत्वीश्वरस्येति तत्राह—स इति ॥ स भगवान् कालोऽपि न ततः पृथक् अत एव स्वयमनादिः जन्मरहितः अनन्तः अविनाशी अव्ययः स्वरूपतः शक्तितश्च क्षयरहितः जनेन पित्रादिना जनं पुत्रादिकं जनयन्नादिकृत् सृष्टिकर्त्ता भवति । मृत्युना अन्तकं चोरव्याघ्रादिकमपि मारयन्नन्तकरः संहारकर्त्ता भवति ।

निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः ॥ व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ १७ ॥ स खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः ॥ करोत्यकर्त्तैव निहन्त्यहन्ता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥ १८ ॥ सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनाऽन्तकम् ॥ १९ ॥ न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः ॥ तं धावमानमनुधावन्त्यनीशा यथा रजांस्यनिलं भूतसङ्घाः ॥ २० ॥ आयुषोऽपचयं जन्तोस्तथैवोपचयं विभुः ॥ उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ ॥ २१ ॥ केचित्कर्म वदन्त्येनं स्वभावमपरे नृप ॥ एके कालं परे दैवं पुंसः काममुतापरे ॥ २२ ॥

तथा पालकाकारेण जनेन पालयन् पालकश्च भवतीत्यपि ज्ञेयम् । अतः स्वयमुत्पत्तिमत्त्वात् पित्रादयोऽपि न स्वतन्त्राः ॥ १९ ॥ वैषम्यप्रसक्तिस्तु तस्य नास्ति इत्याह—न वा इति ॥ समं यथा स्यात्तथा प्रजाः कर्मभूताः विशतः परस्य तत्रानासक्तस्यास्य मृत्योः मरणहेतोः कालरूपस्येश्वरस्य स्वपक्षः स्वीयो विपक्षः शत्रुर्वा नैवास्ति । यथा अनिलं धावन्तं रजांसि तमनुधावन्ति तत्र यथा रजसां तमःप्रकाशजलाद्यादिविशेषेऽपि न वैषम्यं तथा तं कालरूपं भगवन्तं धावमानं सर्वसमतया निरन्तरं गच्छन्तं वेगवन्तं निमित्तं प्राप्यानीशाः कर्माधीनाः भूतसङ्घाः अनुधावन्ति जन्मादिषु प्रवर्त्तन्ते । न तत्रेश्वरस्य वैषम्यम् ॥ २० ॥ आयुष इति ॥ विभुः समर्थः उभाभ्यामायुष उपचयापचयाभ्यां रहितोऽसौ परमेश्वर एव स्वयं स्वस्थः सन् दुःस्थस्य कर्मवशात् स्वर्गनरकादौ गच्छतो जन्तोर्जीवस्य तत्कर्मानुसारेण देवादियोनावायुष उपचयं वृद्धिं तथैव पिपीलिकामशकादियोनावायुषोऽपचयं ह्रासं च विदधाति ॥ २१ ॥ केचिदिति ॥ हे नृप केचिन्मीमांसकाः एनमेव कर्मेति वदन्ति । अपरे चार्वाका एनमेव स्वभावं वदन्ति । एके व्यावहारिका एनमेव कालं वदन्ति । परे ज्योतिर्विद एनमेव दैवं ग्रहादिरूपं वदन्ति । उत तथा अपरे वात्स्यायनादयोऽप्येनमेव पुंसः कामं वदन्ति ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्यक्तस्येति ॥ हे तात अव्यक्तस्य अप्रमेयस्य नानाशक्तीनां महदादीनामुदयो यस्मात्तस्य परमेश्वरस्य चिकीर्षितं कर्तुमिष्टमेव तावत्कोऽपि न वेद। अथ ततः स्वस्य संभवः प्रादुर्भावो यस्मात्तं साक्षात् भगवन्तं तु को वेद न कोऽपीति। अथेऽत्र अद्धेत्यपि पाठः ॥ २३ ॥ उक्तं प्रकृते योजयति— न चेति ॥ हे पुत्रक एते धनदानुगाः कुबेरानुचरास्तव भ्रातुरुत्तमस्य हन्तारो न भवन्ति। चकारात् त्वमपि तेषां हन्ता न भवसीति ज्ञेयम्। हे तात यस्माद्धेतोः पुंसो विसर्गादानयोर्जन्ममरणयोर्दैवं परमेश्वर एव कारणम् ॥ २४ ॥ स एवेति ॥ यद्यपि स भगवानेव विश्वं सृजति स एवावति हन्ति च अथापि हि अनहङ्कारात् अहंकरोम्येतत्फलं भोक्ष्य इत्यहङ्काररहितत्वाद्गुणैः रजःप्रभृतिभिः कर्मभिस्तज्जनितैरदृष्टैः पुण्यपापादिभिश्च नाज्यते न संबद्धो भवति ॥ २५ ॥ एष इति ॥ यस्मात् एष भगवान् भूतेशः सर्वनियन्ता भूतभावनः सर्वपालकः भूतात्मा सर्वात्मत्वेन भेददर्शनरहितः सन्नेव स्वशक्तिरूपया मायया युक्तो भूतानि स्थावरजङ्गमात्मकानि सर्वाणि सृजत्यत्ति संहरते च पाति च। तस्मादनहङ्काराद्गुणकर्मभिर्नाज्यत इति पूर्वस्यानुषङ्गः ॥ २६ ॥ तमेवेति ॥ हे तात स्वविमुखानां मृत्युरूपं स्वभक्तानां चामृतं जन्ममरणादिनिवर्त्तकं विश्वस्य दैवं परमेश्वरं नियन्तारं जगतः परायणमुत्कृष्टमाश्रयं तं भगवन्तमेव सर्वात्मना तदेकाग्रचित्ततया उपेहि शरणं व्रज वृद्धिरार्षी। वै निश्चये नसि नासिकायां दामनि यन्त्रिता बद्धा गावो बलीवर्दा यथा स्वामिकार्यं कुर्वन्ति तथा विश्वसृजो ब्रह्मादयोऽपि नामभिर्बद्धाः सन्तो यस्मै भगवते बलिं हरन्ति स्वस्वाधिकारे स्थिता यस्याज्ञां पालयन्तीत्यर्थः ॥ २७ ॥ य इति ॥ अङ्ग हे ध्रुव यः पञ्चवर्षः त्वं मातुः सपत्न्याः सुरुच्या वचसा भिन्नं मर्म हृदयं यस्य स तथाभूतः स्वजननीं गृह एव विहाय वनं गतः स एव भवान् इति शेषः। अतः लेभे इति प्रथमः पुरुषः। यं प्रत्यगक्षं प्रत्यञ्चि अन्तर्मुखानि अक्षाणि यस्मिन् यद्विषयकाणि क्रियाविशेषणं वा। तपसा आराध्य त्रिलोक्याः मूर्ध्नि पदं स्थानं लेभे लब्धवान् ॥ २८ ॥ तमिति॥ अङ्ग हे ध्रुव स त्वम् आत्मदृक् प्रत्यग्दृष्टिः सन् मुक्तविग्रहे आत्मनि स्वान्तःकरणे व्यपाश्रितमवस्थितं निर्गुणम् एकम् अक्षरं विमुक्तम् एनम् आत्मानं परमात्मानम्

अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च ॥ न वै चिकीर्षितं तात को वेदाऽथ स्वसंभवम् ॥ २३ ॥ न चैते पुत्रक भ्रातुर्हन्तारो धनदानुगाः ॥ विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ॥ २४ ॥ स एव विश्वं सृजति स एवावति हन्ति च ॥ अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः ॥ २५ ॥ एष भूतानि भूतात्मा भूतेशो भूतभावनः ॥ स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च ॥ २६ ॥ तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणम् ॥ यस्मै बलिं विश्वसृजो हरन्ति गावो यथा वै नसि दामयन्त्रिताः ॥ २७ ॥ यः पञ्चवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा ॥ वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ॥ २८ ॥ त्वमेनमङ्गात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम् ॥ आत्मानमन्विच्छ विमुक्तमात्मदृक् यस्मिन्निदं भेदमसत्प्रतीयते ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्विच्छ अवलोकय । यस्मिन् परमात्मनि अधिष्ठाने इदंभेदमिति समस्तं पदम् अत एव क्लैब्यम् । अयं दृश्यमानो भेदो यस्मिंस्तद्विश्वमसदेव प्रतीयते ॥ २९ ॥ त्वमिति ॥ तदा अन्वेषणकाल एव प्रत्यगात्मनि स्वरूपभूते अनन्ते आनन्दमात्ररूपे उपपन्नाः सम्यक् सिद्धाः समस्ताः शक्तयो यस्य तस्मिन् भगवति परमां भक्तिं विधाय प्ररूढम् अतिदृढं मम अहमिति अहन्ताममतारूपम् अविद्याग्रन्थिमज्ञानकृतं बन्धनं त्वं शनकैः विभेत्स्यसि छेत्स्यसि ॥ ३० ॥ उपदेशसारमाह—संयच्छेति ॥ हे राजन् श्रेयसां धर्मादीनां परमत्यन्तं प्रतीपं विघातकं रोषम् अगदेनौषधेन यथामयं रोगं जनो नियच्छति तथा श्रुतेन भूयसा बहुधा श्रुतशास्त्रबलेन संयच्छ उपसंहर । ततश्च ते भद्रं भविष्यति ॥ ३१ ॥ येनेति ॥ येन रोषेण उपसृष्टात् व्याप्तात् पुरुषात् लोकः प्राणी भृशमुद्विजते भयेनात्यन्तमुद्वेगं प्राप्नोति अतः आत्मनः अभयमिच्छन् बुधस्तस्य रोषस्य वशं न गच्छेत् ॥ ३२ ॥ हेलनमिति ॥ गिरिशभ्रातुः गिरिशेन भ्रातृत्वेन स्वीकृतस्य धनदस्य हेलनमवज्ञानं त्वया कृतम् यत् यस्मात् भ्रातृघ्नान् इत्येवं मत्वामर्षितः असहमानः

त्वं प्रत्यगात्मनि तदा भगवत्यनन्त आनन्दमात्र उपपन्नसमस्तशक्तौ ॥ भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढम् ॥ ३० ॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परम् ॥ श्रुतेन भूयसा राजन्नगदेन यथाऽऽमयम् ॥ ३१ ॥ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशम् ॥ न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥ ३२ ॥ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतम् ॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ॥३३॥ तं प्रसादय वत्साशु सन्नत्या प्रश्रयोक्तिभिः ॥ न यावन्महतां तेजः कुलं नोऽभिभविष्यति ॥३४॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवम् ॥ तेनाभिवन्दितः साकमृषिभिः स्वपुरं ययौ ॥ ३५ ॥ इति श्रीभागवते चतुर्थस्कन्धे मनुना तत्त्वोपदेशेन यक्षवधनिवारणं नाम एकादशोऽध्यायः ॥ ११ ॥ मैत्रेय उवाच ॥ ॥ ध्रुवं निवृत्तं प्रतिबुद्ध्य वैशसादपेतमन्युं भगवान् धनेश्वरः ॥ तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानोऽभ्यवदत्कृताञ्जलिम् ॥ १ ॥

त्वं पुण्यजनान् तदनुचरान् यक्षान् जघ्निवान् हतवान् ॥ ३३ ॥ तमिति ॥ हे वत्स यावन्महतां लोकपालादीनां तेजः अपराधजन्मा क्रोधः नोऽस्माकं कुलं न अभिभविष्यति नाभिभवेत् तावत् ततः प्रथममेव त्वं सन्नत्या नमस्कारेण प्रश्रयोक्तिभिः नम्रीभावपूर्वकस्तुतिभिश्च तं धनदमाशु शीघ्रमेव प्रसादय ॥ ३४ ॥ एवमिति ॥ स्वायम्भुवो मनुः स्वपौत्रं ध्रुवमेवमनुशास्य शिक्षित्वा इच्छार्थाच्छास्तेः क्त्वो ल्यप् शास्तेः अनुशिष्टपर्यायाद्वा तत्र इत्वाभाव आर्षः । तेनाभिवन्दितः ऋषिभिः साकं स्वपुरं ययौ ॥ ३५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्कन्धस्यैकादशे व्यधात् ॥ ११ ॥ द्वादशे तु ध्रुवः श्रीदस्तुत इष्ट्वा मखैर्हरिम् ॥ जगाम तत्पदं तत्र श्लोका नयनमार्गणाः ॥ उवाचसप्तकं पादोनैकषष्टिरनुष्टुभः ॥ १२ ॥ ध्रुवमिति ॥ एवं मनूपदेशादपेतमन्युं शान्तक्रोधमत एव वैशसात् यक्षादीनां हिंसनान्निवृत्तं ध्रुवं प्रतिबुद्ध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारसुखाज्ज्ञात्वा भगवान् भगवत्कृपयैश्वर्यादिमान् अत एव चारणयक्षकिन्नरैः संस्तूयमानो धनेश्वरः यत्र ध्रुवोऽस्ति तत्रागतः संस्तं कृताञ्जलिं ध्रुवमभ्यवदत्प्रीतिपूर्वकमुवाच ॥१॥ भो भो इति ॥ भो भोः क्षत्रियदायाद हे अनघ अहं ते परितुष्टोऽस्मि । यत् यस्मात् हेतोः पितामहस्यादेशादुपदेशात् दुस्त्यजमपि वैरं त्वमत्यजः त्यक्तवानसि । यस्त्वमिति पाठान्तरम् ॥ २ ॥ नेति ॥ यक्षा भवान्नावधीत् न हतवान् न च तव भ्रातरमुत्तमं यक्षा हतवन्त इति शेषः । यतो भूतानामप्ययभावयोः मृत्युजन्मनोः काल एव प्रभुः समर्थः ॥ ३ ॥ अहमिति ॥ आत्मस्वरूपाज्ञानात् अतस्मिन् आत्मव्यतिरिक्ते देहे आत्मबुद्धिर्भवति ततश्च अतद्ध्यानात् आत्मस्य देहस्य ध्यानात् आत्मत्वेनानुसन्धानात् स्वप्नदृष्टस्यार्थस्य बाध्यत्वात् यथा स्वाप्नी धीर्मृषा तथा स्वदेहेऽहमिति परदेहे त्वमिति धीः पुरुषस्य अज्ञस्य प्राणिजातस्यापार्था मिथ्यैव आभाति जायते । यया धिया कर्मात्मको बन्धः विपर्ययो दुःखादिश्च भवतः ॥ ४ ॥ तद्गच्छेति द्वयम् ॥ हे ध्रुव तत्तस्माद्गृहं गच्छ गत्वा च अधोक्षजं सर्वभूतात्मको विग्रहो यस्य तं भजनीयावङ्घ्री

धनद उवाच ॥ भो भोः क्षत्रियदायाद परितुष्टोऽस्मि तेऽनघ ॥ यत्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः ॥ २ ॥ न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव ॥ काल एव हि भूतानां प्रभुरप्ययभावयोः ॥ ३ ॥ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि ॥ स्वाप्नीवाभात्यतद्ध्यानाद्यया बन्धविपर्ययौ ॥ ४ ॥ तद्गच्छ ध्रुव भद्रं ते भगवन्तमधोक्षजम् ॥ सर्वभूतात्मभावेन सर्वभूतात्मविग्रहम् ॥ ५ ॥ भजस्व भजनीयाङ्घ्रिमभवाय भवच्छिदम् ॥ युक्तं विरहितं शक्त्या गुणमय्यात्ममायया ॥ ६ ॥ वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशङ्कितः ॥ यतो वरार्होऽम्बुजनाभपादयोरनन्तरं त्वां वयमङ्ग शुश्रुम ॥ ७ ॥ मैत्रेय उवाच ॥ स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः ॥ हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः ॥ ८ ॥

यस्य भवच्छिदं संसारनिवर्त्तकं गुणमय्या आत्मनः शक्त्या मायया सगुणनिर्गुणभेदेन युक्तं विरहितञ्च भगवन्तम् अभवाय संसारनिवृत्तये सर्वभूतेषु आत्मभावेन भजस्व तेन ते भद्रं भविष्यति ॥ ५ ॥ ६ ॥ वृणीहीति ॥ हे औत्तानपदे इति ह्रस्वं छन्दोनुरोधेनार्षम् । हे औत्तानपादे हे नृप मत्तः सकाशात् अविशङ्कितो मया यक्षादिवधेनापराधः कृत इति शङ्कारहितः सन् त्वमनोगतं स्वाभिलषितं वरं कामम्संकोचेन वृणीहि । यतो हेतोः अङ्ग हे ध्रुव वयं त्वाम् अम्बुजनाभस्य हरेः पादयोः अनन्तरम् अतिनिकटवर्तिनं शुश्रुम श्रुतवन्तः अतस्त्वं वरार्हः वरप्रदानपात्रभूतोऽसि ॥ ७ ॥ स इति ॥ एवं महाभागवतः महामतिः स ध्रुवो राजराजेन धनदेन वराय वरं याचितुं चोदितः प्रेरितोऽभूदिति भिन्नं वाक्यम् । अतः स इत्यस्य न पौनरुक्त्यम् । परे तु राज्ञा सह वर्तमानेषु लोकेषु वर्तमानः स राजराजः कुबेर इत्यर्थेन पौनरुक्त्यं परिहरन्ति । स ध्रुवो हरौ हरिविषयिकामचलितां विघ्नैश्चालयितुमशक्यां स्मृतिं वव्रे । यया स्मृत्या जनो दुरत्ययम् उपायान्तरेणातरेतुं निवर्त्तयितुमशक्यं तमः आत्मावरकमज्ञानमप्रयत्ने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानायासेनैव तरति निवर्त्तयति ॥ ८ ॥ तस्येति ॥ इडविलायाः पुत्रो धनदः प्रीतेन प्रीतियुक्तेन मनसा तस्य ध्रुवस्य तामचलां भगवत्स्मृतिं दत्त्वा ततस्तदनन्तरं तस्य पश्यत एवान्तर्दधेऽन्तर्हितवान् । स ध्रुवोऽपि स्वपुरं प्रत्यपद्यत आजगाम ॥ ९ ॥ अथेति ॥ अथ गृहमागत्य द्रव्यक्रिया देवतानां यज्ञाङ्गभूतानां संबन्धि कर्मप्रदं कर्मफलप्रदं च स एव कर्म कारयति तत्फलं भोजयति चेत्यर्थः । यज्ञेशं भगवन्तं भूरिदक्षिणैः क्रतुभिर्यज्ञैः अयजत इष्टवान् ॥ १० ॥ सर्वात्मनीति ॥ सर्वेषामात्मनि असर्वे अविद्यमानसर्वोपाधौ गौणत्वान्न सर्वनामता । अच्युते तीव्रौघामखण्डितप्रवाहां भक्तिं चित्तवृत्तिमुद्वहन् स्वात्मनि सर्वभूतेषु च तमेव विभुं व्यापकमवस्थितं ददर्श ॥ ११ ॥ तमिति ॥ तमेवं पूर्वोक्तं शीलं भगवद्भक्तिलक्षणं तेन सम्पन्नं ब्रह्मण्यं ब्राह्मणभक्तं दीनेषु वत्सलं दयायुक्तं धर्मसेतूनां वर्णाश्रमधर्ममर्यादानां गोप्तारं रक्षकं सर्वाः प्रजाः पितरं मेनिरे ॥ १२ ॥ षडिति ॥ भोगैः विषयाणां धर्माद्यविरोधेन भोगैः प्रारब्धपुण्यस्य क्षयं कुर्वन् तथा अभोगैः यज्ञाद्यनुष्ठानैः प्रारब्धस्याशुभस्य

तस्य प्रीतेन मनसा तां दत्त्वेडविडासुतः ॥ पश्यतोऽन्तर्दधे सोऽपि स्वपुरं प्रत्यपद्यत ॥ ९ ॥ अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः ॥ द्रव्यक्रिया देवतानां कर्म कर्मफलप्रदम् ॥ १० ॥ सर्वात्मन्यच्युतेऽसर्वे तीव्रौघां भक्तिमुद्वहन् ॥ ददर्शात्मनि भूतेषु तमेवावस्थितं विभुम् ॥ ११ ॥ तमेवं शीलसम्पन्नं ब्रह्मण्यं दीनवत्सलम् ॥ गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥ १२ ॥ षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमण्डलम् ॥ भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम् ॥ १३ ॥ एवं बहुसवं कालं महात्माऽविकलेन्द्रियः ॥ त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनम् ॥ १४ ॥ मन्यमान इदं विश्वं मायारचितमात्मनि ॥ अविद्यारचितं स्वप्नगन्धर्वनगरोपमम् ॥ १५ ॥ आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोशमन्तःपुरं परिविहारभुवश्च रम्याः ॥ भूमण्डलं जलधिमेखलमाकलय्य कालोपसृष्टमिति स प्रययौ विशालाम् ॥ १६ ॥

पापस्य क्षयं कुर्वन् षट्त्रिंशद्वर्षसाहस्रं कालं तावत्कालपर्यन्तं क्षितिमण्डलं शशास ॥ १३ ॥ एवमिति द्वयम् ॥ एवं भोगान् भुञ्जानोऽप्यविकलेन्द्रियः न विकलानि निषिद्धभोगोन्मुखानि भोगैः श्रान्तानि वा इन्द्रियाणि यस्य सः तथा महात्मा शुद्धचित्तः स तथा ध्रुवः इदं देहादि विश्वं भगवतो मायया आत्मनि स्वस्मिन् रचितम् अविद्यारचितस्वप्नगन्धर्वनगरोपमं मन्यमानः सन् बहवः सवाः यागाः संवत्सरा वा यस्मिंस्तं त्रिवर्गस्य धर्मादेरौपयिकमुपभोगस्य साधनं कालं नीत्वा भोगाद्विरक्तः सन्नृपासनं पुत्राय वत्सरायादात् ॥ १४ ॥ १५ ॥ आत्मेति ॥ आत्मा देहः स्त्रियः अपत्यानि च सुहृदो मित्राणि बलं सेना ऋद्धः समृद्धः कोशः अन्तःपुरं रम्याः परितः विहारभुवः उद्यानानि च जलधिः समुद्रो मेखला परिखा यस्य तत् भूमण्डलम् आत्मादिकं सर्वं कालोपसृष्टं कालव्याप्तं नश्वरमित्याकलय्य विचार्य तद्धित्वा भगवन्तमाराधयितुं विशालां बदरिकाश्रमं ययौ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यामिति ॥ तस्यां विशालायां शिवं पवित्रं वार्जलं विगाह्य प्रविश्य जले स्नात्वेति स्नानादिनियमा उक्ताः । विशुद्धकरणः विशुद्धानि करणानि अन्तःकरणमिन्द्रियाणि च यस्य स तथेति शमदमादयो यमा उक्ताः । स्वस्तिकाद्यासनं बद्ध्वा जितो मरुत् प्राणवायुर्येन स तथेति प्राणायाम उक्तः । मनसा हृतानि स्वस्वविषयेभ्यः परावर्तितानि अक्षाणि इन्द्रियाणि येन स तथेति प्रत्याहारो दर्शितः । धारणामाह स्थूल इति । भगवतः प्रतिनिधिभूते स्थूले विराड्रूपे एतन्मनो दधार । ध्यानं समाधिं चाह । तद्ध्यायन्नव्यवहितो ध्यातृध्येयध्यानभेदस्फुरणरहितः समाधौ स्थितः संस्तदपि स्थूलं रूपं व्यसृजत् विस्मृतवान् ॥ १७ ॥ भक्तिमिति ॥ हरौ भगवति अजस्रं भक्तिं प्रकर्षेण वहन् अतः आनन्देन जातया बाष्पकलया अश्रुबिन्दुप्रवाहेण मुहुरर्द्यमानः अभिभूयमानः विक्लिद्यमानं द्रवत् हृदयं यस्य स तथेति पुलकैः उत्थितरोमभिराचितानि व्याप्तान्यङ्गानि यस्य अतः मुक्तं लिङ्गं शरीराभिमानो येन स ध्रुवः असौ ध्रुवोऽहमित्यात्मानं नास्मरत् ॥ १८ ॥ स इति ॥ स ध्रुवः उदितं रा-

तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वाऽऽसनं जितमरुन्मनसा हृताक्षः ॥ स्थूले दधार भगवत्प्रतिरूप एतद्ध्यायंस्तदव्यवहितो व्यसृजत्स-
माधौ ॥ १७ ॥ भक्तिं हरौ भगवति प्रवहन्नजस्रमानन्दबाष्पकलया मुहुरर्द्यमानः ॥ विक्लिद्यमानहृदयः पुलकाचिताङ्गो नात्मानमस्मरदसाविति
मुक्तलिङ्गः ॥ १८ ॥ स ददर्श विमानाग्र्यं नभसोऽवतरद्ध्रुवः ॥ विभ्राजयद्दश दिशो राकापतिमिवोदितम् ॥ १९ ॥ तत्रानु देवप्रवरौ
चतुर्भुजौ श्यामौ किशोरावरुणाम्बुजेक्षणौ ॥ स्थिताववष्टभ्य गदां सुवाससौ किरीटहाराङ्गदचारुकुण्डलौ ॥ २० ॥ विज्ञाय तावुत्तमगायकि-
ङ्करावभ्युत्थितः साध्वसविस्मृतक्रमः ॥ ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहताञ्जलिः ॥ २१ ॥ तं कृष्णपादाभिनिविष्टचे-
तसं बद्धाञ्जलिं प्रश्रयनम्रकन्धरम् ॥ सुनन्दनन्दावुपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ ॥ २२ ॥

कापतिं चन्द्रमिव दश दिशो विभ्राजयत् प्रकाशयत् नभसः सकाशादवतरद्विमानाग्र्यं श्रेष्ठं विमानं ददर्श ॥ १९ ॥ तत्रेति ॥ अनु विमानदर्शनानन्तरं तत्र विमाने चतुर्भुजौ श्यामौ किशोरौ अरुणे अम्बुजे इव ईक्षणे ययोर्गदामवष्टभ्य स्थितौ सुवाससौ किरीटहाराङ्गदसहिते चारुणी कुण्डले ययोस्तौ देवप्रवरौ भगवत्पार्षदौ सुनन्दनन्दौ ददर्श ॥ २० ॥ विज्ञायेति ॥ तावुत्तमगायस्य पुण्ययशसो भगवतः किङ्करौ निदेशकारिणौ विज्ञायाभ्युत्थितः मधुद्विषो हरेः पार्षत्प्रधानौ इमौ इति हेतोः साध्वसेन सम्भ्रमे
ण विस्मृतः पूजाक्रमो येन संहताञ्जलिः संयोजितहस्तः स ध्रुवः हरेः नामानि गृणन् तौ ननाम ॥ २१ ॥ तमिति ॥ कृष्णपादयोरभिनिविष्टं चेतश्चित्तं यस्य स तथा तं बद्धाञ्जलिं प्रश्रयेण विनयेन नम्रा आनता कन्धरा ग्रीवा यस्य तं पुष्करनाभस्य भगवतःपार्षदेषु श्रेष्ठत्वेन संमतौ सुनन्दनन्दावुपसृत्य तत्समीपं गत्वा सस्मितं यथा भवति तथा स्वप्रसन्नतां सूचयन्तौ तं प्रत्यूचतुः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भो भो इति द्वयम् ॥ भो भो राजन् ते तव भद्रं भवतु इति सशरीरस्य विष्णुपदारोहणाभिप्रायम् । अवहितः सावधानः सन्नोऽस्माकं वाचं त्वं शृणु । पञ्चवर्षो भवान् तपसा यं देवमतीतृपत् तृप्तमकार्षीत्तस्याखिलजगद्धातुः सर्वपालकस्य देवस्य शार्ङ्गिणः पार्षदौ आवां भगवत्पदं भगवद्दत्तस्थानं प्रति त्वां नेतुमिहास्मिन् स्थाने संप्राप्तौ विद्धि ॥ २३ ॥ ॥ २४ ॥ सुदुर्जयमिति ॥ सूरयः सप्तर्षयोऽपि यदप्राप्य तदधः स्थिता दूरतः परं केवलं विचक्षते पश्यन्ति । यच्च चन्द्रदिवाकरादयो ग्रहा ऋक्षाणि तारकाश्च दक्षिणं यथा स्यात्तथा परियन्ति परिक्रामन्ति तत् सुदुर्जयमतिदुर्जयं विष्णुपदं त्वया जितं तत्प्रसादात् प्राप्तं तदातिष्ठ अधितिष्ठ ॥ २५ ॥ अनास्थितमिति ॥ अङ्ग हे ध्रुव यत् ते पितृभिः अन्यैश्च तपस्विभिरपि कर्हिचिदपि अनास्थितम् अनधिष्ठितं जगतां वन्द्यं तद्विष्णोः परमं पदम् आतिष्ठ ॥ २६ ॥ एतदिति ॥ हे आयुष्मन्निति देहत्यागाभावं सूचयति । उत्तमश्लोकानां महायशस्कानां मौलिना मुख्येन हरिणा एतद्विमानप्रवरं श्रेष्ठं विमानमुपस्थापितं त्वत्समीपे प्रेषितं तदेतत्त्वमधिरोढुमर्हसि ॥ २७ ॥ निशम्येति ॥

सुनन्दनन्दावूचतुः ॥ भो भो राजन्सुभद्रं ते वाचं नोऽवहितः शृणु ॥ यः पञ्चवर्षस्तपसा भवान्देवमतीतृपत् ॥ २३ ॥ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः ॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदम् ॥ २४ ॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परम् ॥ आतिष्ठ तच्चन्द्रदिवाकरादयो ग्रहर्क्षताराः परियन्ति दक्षिणम् ॥२५॥ अनास्थितं ते पितृभिरन्यैरप्यङ्ग कर्हिचित् ॥ आतिष्ठ जगतां वन्द्यं तद्विष्णोः परमं पदम् ॥ २६ ॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना ॥ उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ॥२७॥ मैत्रेय उवाच ॥ निशम्य वैकुण्ठनियोज्यमुख्ययोर्मधुच्युतं वाचमुरुक्रमप्रियः ॥ कृताभिषेकः कृतनित्यमङ्गलो मुनीन्प्रणम्याशिषमभ्यवादयत् ॥ २८ ॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवन्द्य च ॥ इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम् ॥२९॥ तदोत्तानपदः पुत्रो ददर्शान्तकमागतम् ॥ मृत्योर्मूर्ध्नि पदं दत्त्वा आरुरोहाद्भुतं गृहम् ॥ ३० ॥

वैकुण्ठस्य भगवतो नियोज्यानां पार्षदानां मुख्ययोस्तयोर्मधुच्युतं मधु च्यवते स्रवतीति मधुच्युत् तां दीर्घपाठे मधु च्युतं यस्यां तामामृतस्राविणीमिव वाचं निशम्य उरुक्रमस्य हरेः प्रियो ध्रुवः कृताभिषेकः कृतं नित्यकर्म सन्ध्यावन्दनादिकं मङ्गलम् अलङ्कारादिकं च येन स तथाभूतः सन् मुनीन् बदरिकाश्रमनिवासिनः प्रणम्य तेभ्य आशिषमभ्यवादयत् वाचयामास ॥ २८ ॥ परीत्येति ॥ धिष्ण्याग्र्यं विमानश्रेष्ठमभ्यर्च्य भगवद्विमानाय नम इति गन्धादिभिः सम्पूज्य परीत्य प्रदक्षिणीकृत्य पार्षदौ चाभिवन्द्य तदेव स्वीयं रूपं हिरण्मयं प्रकाशबहुलं बिभ्रत्सन् तद्विमानमधिष्ठातुमारोढुम् इयेष ऐच्छत् ॥ २९ ॥ तदेति ॥ तदा उत्तानपदः पुत्रो ध्रुवः आगतम् अन्तकं मृत्युं ददर्श । स चोवाच । महाराज मामङ्गीकुरु । ततो ध्रुव उवाच । क्षणं तावदास्स्व इत्युक्त्वा विष्णुं संस्मृत्य सोपाने इव मृत्योर्मूर्ध्नि पदं दत्त्वा अद्भुतं गृहं विमानम् आरुरोह॥३०॥

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेति ॥ देवैर्वादिताः दुन्दुभयः मृदङ्गपणवादयश्च नेदुः । गन्धर्वमुख्याः प्रजगुः कुसुमवृष्टयश्च पेतुः ॥ ३१॥ स चेति ॥ स्वर्लोकमारोक्ष्यन्सः ध्रुवः स्वजननीं सुनीतिमस्मरत्। स्मरणाभिनयमाह । मद्वियोगेन दीनां दुःखितां जननीं हित्वा अगं दुर्गमस्थानं त्रिविष्टपं स्वर्गं कथं यास्य इति । तङार्षः ॥ ३२॥ इतीति ॥ इत्येवं तस्य ध्रुवस्य व्यवसितमभिप्रायं व्यवसाय निश्चित्य । व्यवसीयेति त्वार्षः पाठः । सुरोत्तमौ भगवत्पार्षदौ देवीं सुनीतिं यानेन पुरः पुरतो गच्छतीं दर्शयामासतुः तुमभावआर्षः॥ ३ ३॥तत्र तत्रेति ॥ पथि मार्गे तत्र तत्र प्रशंसाद्भिः वैमानिकैर्विमानस्थैः सुरैः कर्तृभिः कुसुमैः पूजासाधनैः अवकीर्यमाणः आच्छाद्यमानो ध्रुवः क्रमशः ग्रहान् आदित्यादीन् ददृशे ददर्श । तङार्षः॥ ३४॥ त्रिलोकीमिति ॥ ध्रुवा निश्चला गम्यत इति गतिः स्थानं यस्य सः ध्रुवगतिर्ध्रुवो देवयानेन देवमार्गेण भगवत्प्रस्थापितविमानेन वा त्रिलोकीं मुनीन्सप्तर्षीनप्यतिव्रज्य उल्लङ्घ्य ततः परस्तात् उपरिष्टाद्वर्त्तमानं यद्विष्णोः पदं तत् अथ ग्रहदर्शनाद्यनन्तरमभ्यगात् सुखेन प्राप्तवान् ॥ ३५ ॥ तत्पदं विशिनष्टि—यदिति ॥ यद्विष्णोः पदं स्वरुचैव स्वप्रकाशेनैव

तदा दुन्दुभयो नेदुर्मृदङ्गपणवादयः ॥ गन्धर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥ ३१ ॥ स च स्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुवः ॥ अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपम् ॥ ३२ ॥ इति व्यवसितं तस्य व्यवसीय सुरोत्तमौ ॥ दर्शयामासतुर्देवीं पुरो यानेन गच्छतीम् ॥ ३३ ॥ तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः ॥ अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ॥ ३४ ॥ त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि ॥ परस्ताद्यद्ध्रुवगतिर्विष्णोः पदमथाभ्यगात् ॥ ३५ ॥ यद्भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनुविभ्राजन्त एते ॥ यन्नाव्रजञ्जन्तुषु येऽननुग्रहा व्रजन्ति भद्राणि चरन्ति येऽनिशम् ॥ ३६ ॥ शान्ताः समदृशः शुद्धाः सर्वभूतानुरञ्जनाः ॥ यान्त्यञ्जसाऽच्युतपदमच्युतप्रियबान्धवाः ॥ ३७ ॥ इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः ॥ अभूत्त्रयाणां लोकानां चूडामणिरिवामलः ॥ ३८ ॥ गम्भीरवेगोऽनिमिषं ज्योतिषां चक्रमाहितम् ॥ यस्मिन्भ्रमति कौरव्य मेढ्यामिव गवां गणः ॥ ३९ ॥

सर्वतो भ्राजमानम् एते त्रयो लोकाः हि निश्चितमनु तद्रुचैव विभ्राजन्ते । ये जन्तुषु प्राणिष्वननुग्रहाः कृपारहिताः क्रूरस्वभावास्ते यन्नाव्रजन् कदापि न गतवन्तः येतुः दयालवो जन्तुष्वनिशं निरन्तरं भद्राणि हितानि चरन्ति ते यद्व्रजन्ति गच्छन्ति तदभ्यगादित्यनुष्वङ्गः॥ ३६ ॥शान्ता इति॥शान्ताः समदृशः शुद्धाः सर्वभूतानामनुरञ्जनाः अच्युतप्रियो बान्धवो येषां ते अञ्जसा अच्युतस्य पदं यान्तीति ॥ ३७ ॥ इतीति ॥ इत्येवं वर्णितेन प्रकारेण कृष्णपरायणः अमलश्च उत्तानपदः पुत्रो ध्रुवस्त्रयाणां लोकानां चूडामणिरिवाभूत् त्रिलोक्या मूर्ध्नि स्थानं प्रापेति ॥ ३८ ॥ गम्भीरेति ॥ हे कौरव्य अनिमिषमनलसं निरन्तरं यथा भवति तथा यद्वा अनिमिषं जाग्रदेव कालरूपं ज्योतिषामादित्यादीनां चक्रं यस्मिन् ध्रुवप्राप्ते स्थान आहितं समर्पितं सद्धान्यक्रमणाय भ्राम्यतां पशूनां बन्धनस्तम्भो मेढी तस्यामाहितो गम्भीरवेगोऽव्यवच्छिन्नवेगो गवां गणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा भ्रमति तथा भ्रमति । गम्भीरवेग इति लिङ्गपरिणामेन ज्योतिश्चक्रस्यापि विशेषणम् ॥ ३९ ॥ महिमानमिति ॥ अस्य ध्रुवस्य महिमानं विलोक्य दृष्ट्वा भगवान्नारदऋषिः प्रचेतसां राज्ञां ध्रुववंशराजानां सत्रे यज्ञसभायां वक्ष्यमाणांस्त्रीन् श्लोकान् आतोद्यं वीणां वितुदन् वादयन्नगायत् ॥ ४० ॥ नूनमिति ॥ नूनं पतिरेव देवता यस्यास्तस्याः सुनीतेः सुतस्य ध्रुवस्य यत्तपस्तत्प्रभावस्य तस्य माहात्म्यस्य तां सर्वोत्कृष्टां गतिं फलमधिगन्तुं प्राप्तुं वेदवादिनो ब्रह्मर्षयोऽपि अभ्युपायान् तत्प्राप्त्युपायान्ध्रुवेनानुष्ठितान् भगवद्धर्मान् दृष्ट्वापि प्राप्तुं नैव प्रभवन्ति तदा अन्ये नृपाः न प्राप्नुवन्तीत्यत्र किं पुनर्वक्तव्यम् । यद्वा । सुनीतेः तपःप्रभावरूपस्य अस्य सुतस्य ध्रुवस्य तां गतिं दृष्ट्वाभ्युपायान् अन्तरङ्गसाधनान्यप्यधिगन्तुं न प्रभवन्ति किमुत ताम् । यद्येवं तेऽपि न तर्हि किमुततरां नृपाः ॥ ४१ ॥ य इति ॥ यो ध्रुवः पञ्चवर्षोऽतिबालोऽपि गुरुदाराः पितृपत्नी सुरुचिस्तस्या वाच एव शरास्तैर्निर्भिन्नेनात एव दूयता उपतप्यमानेन शता आर्षः । हृदयेन युक्तो वनं यातस्तत्र मदादेशकरो मदुपदिष्टतपश्चर्यादि कुर्वन् अजितं दुराराध्यमपि तस्यैव ये भक्तास्तेषां ये गुणा मैत्रीकरुणादयस्तैः पराजितं वशीकृतं प्रभुं भगवन्तं जिगाय वशीकृतवान् ॥ ४२ ॥ य इति ॥ यः कोऽपि महानपि भुवि क्षत्रबन्धुः क्षत्रियोत्तमोऽपि

महिमानं विलोक्यास्य नारदो भगवानृषिः ॥ आतोद्यं वितुदञ्छ्लोकान्सत्रेऽगायत्प्रचेतसाम् ॥ ४० ॥ नारद उवाच ॥ नूनं सुनीतेः पतिदेवतायास्तपःप्रभावस्य सुतस्य तां गतिम् ॥ दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगन्तुं प्रभवन्ति किं नृपाः ॥ ४१ ॥ यः पञ्चवर्षो गुरुदारवाक्छरैर्भिन्नेन यातो हृदयेन दूयता ॥ वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितम् ॥ ४२ ॥ यः क्षत्रबन्धुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः ॥ षट्पञ्चवर्षो यदहोभिरल्पैः प्रसाद्य वैकुण्ठमवाप तत्पदम् ॥ ४३ ॥ मैत्रेय उवाच ॥ एतत्तेऽभिहितं सर्वं यत्पृष्टोहमिह त्वया ॥ ध्रुवस्योद्दामयशसश्चरितं संमतं सताम् ॥ ४४ ॥ धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् ॥ स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम् ॥ ४५ ॥

तदपेक्षया क्षत्रियाधम एव सन् सः तस्य ध्रुवस्याधिरूढं तेन प्राप्तं पदमनु तत्पश्चात् वर्षपूगैर्वर्षसमूहैरपि साधनकालैः शनैः शनैरारुरुक्षेदपि किमारोढुमपीच्छेत् दुःसाधतया तदिच्छाप्यसंभाविता तदारोहणं सुदूरत इति भावः।यद्वा । यः तस्याधिरूढं पदम् अनु पश्चात् आरोढुम् इच्छेत् स किं वर्षपूगैरप्यारोहेदिति शेषः।ध्रुवस्तु षट्पञ्चवर्षाणि वयो यस्य सः वयःशब्दस्य वृत्तावन्तर्भावः । बालोऽप्यल्पैरेवाहोभिर्दिवसैः षण्मासपरिमितैर्वैकुण्ठं दुराराध्यमपि भगवन्तं प्रसाद्य प्रसन्नं कृत्वा यदन्येषां दुर्लभं तत्तस्य भगवतः पदमवाप प्राप्तवान् ॥४३॥ एतदिति ॥ यत्सतां सम्मतम् उद्दाममुत्कृष्टं यशो यस्य तस्य ध्रुवस्य चरितं त्वयाहं पृष्टः विशेषतः प्रश्नाभावेऽपि " येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः । संप्रसीदति वा येषामेतदाख्याहि चानघ ॥ " इत्यादिसामान्यरीत्या त्वयाहं पृष्टस्तस्मादेतत् ध्रुवस्य चरितं ते तुभ्यं सर्वमिहाभिहितम् ॥४४॥ धन्यमिति ॥ धन्यं यशस्यमायुष्यं धनयशआयुषां साधनं पुण्यं स्वस्त्ययनं मङ्गलकरं महत् महद्भिः श्राव्यं स्वर्ग्यं स्वर्गसाधनं ध्रौव्यं ध्रुवपदप्रापकं सौमनस्यं मनःशुद्धिकरं प्रशस्यं प्रशंसायोग्यम् अघमर्षणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापनाशकम् ॥ ४५ ॥ श्रुत्वेति ॥ एतत् अच्युतप्रियस्य ध्रुवस्य चेष्टितं श्रद्धयाभीक्ष्णं श्रुत्वा वर्त्तमानस्येति शेषः । अतः समानकर्तृकता जनस्य भगवति भक्तिर्भवेत् । यया भक्त्या क्लेशानामविद्यादीनां संक्षयः स्यात् ॥४६॥ महत्त्वमिति ॥ महत्त्वमिच्छतां तीर्थं महत्त्वावाप्तिसाधनं यत्र यस्मिन् ध्रुवचरिते श्रुते श्रोतुः शीलादयो गुणा भवन्ति श्रोतुरिति वक्तुरप्युपलक्षणम् । तदिच्छूनां तेज आकाङ्क्षतां तेजो भवति । यत्र मनस्विनां मानः संमानः सर्वलोककृतः आदरो भवति ॥ ४७ ॥ प्रयत इति ॥ प्रयतः एकाग्रमनाः सन् इदं पुण्य श्लोकस्य ध्रुवस्य महत् चरितं प्रातः कीर्त्तयेत् । द्विजन्मनां समवाये सभायां कीर्त्तयेत् सायं च कीर्तयेत् ॥ ४८ ॥ पौर्णमास्यामिति ॥ पौर्णमास्यां सिनीवाल्याममावास्यायां द्वादश्यां श्रवणेऽथ वा दिनक्षये तिथिक्षयदिने व्यतीपाते संक्रमे संक्रान्तिदिने अर्कदिने आदित्यवारेऽपि वा प्रयतः कीर्त्तयेत् ॥ ४९ ॥ श्रावयेदिति ॥ तीर्थपादपदाश्रयः भगवदेकशरणः सन् श्रद्धानानां श्रवणे श्रद्धावतां द्वितीयार्थे षष्ठी । श्रावयेत् किंचिदपि फलं नेच्छन् तत्र चरिते कीर्तिते श्रुते वा आत्मना धैर्ययुक्तया

श्रुत्वैतच्छ्रद्धयाऽभीक्ष्णमच्युतप्रियचेष्टितम् ॥ भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ॥४६॥ महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः ॥ यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनाम् ॥ ४७ ॥ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनाम् ॥ सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् ॥ ४८ ॥ पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथ वा ॥ दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥ ४९ ॥ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः ॥ नेच्छंस्तत्रात्मनात्मानं संतुष्ट इति सिद्ध्यति ॥ ५० ॥ ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतम् ॥ कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥५१॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः ॥ हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥ ५२ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे ध्रुवचरितं नाम द्वादशोऽध्यायः ॥ १२ ॥

बुद्ध्यात्मानं मनः प्रतिसंतुष्टो भवति इति हेतोः सिद्ध्यति भगवत्प्रसादरूपां परमां सिद्धिं प्राप्नोति । यद्वा । फलं नेच्छन् कथावेतनद्रव्यमगृह्णन् आत्मानं प्रत्यात्मनैव संतुष्टः यत्कथ्यमानां भगवत्कथां भक्ताः श्रद्धया शृण्वन्तीत्येतदेव मम वेतनम् इति मन्यमानः अत एव सिद्धिं प्राप्नोति ॥ ५० ॥ ज्ञानमिति ॥ सत्पथे भगवन्मार्गे अज्ञाततत्त्वाय दीनाय यो ज्ञानरूपममृतं संसारनिवर्त्तकं दद्यात्तस्य दीननाथस्य दीनोद्धारकस्य कृपालोर्देवा इन्द्रियाधिष्ठातारोऽनुगृह्णते विघ्नं न कुर्वन्ति प्रत्युतानुग्रहमेव कुर्वन्ति ॥ ५१ ॥ इदमिति ॥ हे कुरूद्वह विख्यातं विशुद्धं कर्म यस्य तस्य ध्रुवस्य इदं चरितं मया ते तुभ्यमभिहितम् । योऽर्भकः बाल एव क्रीडनकानि क्रीडासाधनानि मातुर्गृहं च हित्वा विष्णुं शरणं जगाम ॥ ५२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्कन्धस्य द्वादशे व्यधात् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशे दुष्टपुत्रवेनदुःखाद्ध्रुवान्वये ॥ अङ्गो गृहाद्गतस्तत्र श्लोका नन्दर्षयोधयः ॥ अनुष्टुभश्चैन्द्रवाणा उवाचेति च सप्तकम् ॥ १३ ॥ निशम्येति ॥ कौषारविणा मैत्रेयेणोपवर्णितं ध्रुवस्य वैकुण्ठपदाधिरोहणं भगवत्स्थानप्राप्तिं निशम्य भगवत्यधोक्षजे प्ररूढो दृढतां गतो भावो भक्तिर्यस्य स तथाभूतो विदुरः पुनस्तं मैत्रेयं प्रष्टुं प्रचक्रमे प्रारब्धवान् ॥ १ ॥ सत्रेऽगायत्प्रचेतसामित्याकर्ण्य पृच्छति—के ते इति ॥ हे सुव्रत नारदो ध्रुवमहत्त्वं येषां प्रचेतसां सत्रेऽगायत् ते प्रचेतसो नाम कस्यान्ववाये वंशे प्रख्याताः प्रसिद्धाः। कस्य चापत्यानि कुत्र वा सत्रसंज्ञकं यागमासत अकुर्वत ॥ २ ॥ मन्य इति ॥ देवस्य हरेर्दर्शनं यस्य तं नारदं महाभागवतं मन्ये । येन नारदेन हरेः परिचर्याविधिः सेवाप्रकाररूपः क्रियायोगः पाञ्चरात्रादौ प्रोक्तः ॥ ३ ॥ स्वधर्मेति ॥ किलेत्यवधारणे । तत्र सत्रे स्वधर्मशीलैः प्रचेतःप्रभृतिभिः पुरुषैरिज्यमानः पूज्यमानो यज्ञपूरुषो भगवानेव भक्तिमता नारदेन ईडितः स्तुतः । नान्यः ईरित इति च पाठः ॥ ४ ॥ या इति ॥ हे ब्रह्मन् तत्र प्रचेतसां सत्रे देवर्षिणा नारदेन या भगवत्कथा वर्णितास्ता मह्यं

सूत उवाच ॥ निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुण्ठपदाधिरोहणम् ॥ प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥ १ ॥ विदुर उवाच ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत ॥ कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासत ॥ २ ॥ मन्ये महाभागवतं नारदं देवदर्शनम् ॥ येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥३॥ स्वधर्मशीलैः पुरुषैर्भ भगवान्यज्ञपूरुषः ॥ इज्यमानो भक्तिमता नारदेनेरितः किल ॥ ४ ॥ यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः ॥ मह्यं शुश्रूषवे ब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि ॥ ५ ॥ मैत्रेय उवाच ॥ ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनम् ॥ सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ॥ ६ ॥ स जन्मनोपशान्तात्मा निःसङ्गः समदर्शनः ॥ ददर्श लोके विततमात्मानं लोकमात्मनि ॥ ७ ॥ आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमितविग्रहम् ॥ अवबोधरसैकात्म्यमानन्दमनु सन्ततम् ॥ ८ ॥ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः ॥ स्वरूपमवरुन्धानो नात्मनोऽन्यं तदैक्षत ॥ ९ ॥

शुश्रूषवे कार्त्स्न्येन साकल्येनाचष्टुं कथयितुमर्हसि ॥ ५ ॥ ध्रुवस्य वंशे तज्जन्म वक्तुं ध्रुवस्य वंशमाह—ध्रुवस्येति ॥ चस्त्वर्थे । ध्रुवस्य पुत्र उत्कलस्तु पितरि ध्रुवे वनं प्रस्थिते प्रस्थातुमुद्यते सति ज्येष्ठत्वात्पित्रा दीयमानमपि पितुः सार्वभौमश्रियं पितृपालितभूसंबन्धिनीं सम्पदमधिराजासनं च नैच्छत् ॥ ६ ॥ स इति ॥ चोत्कलो जन्मना जन्मत एवोपशान्तात्मा भोगेच्छारहितमनाः निरसङ्गः सर्वत्र समदर्शनश्चासीत् अतः आत्मानं लोके विततं व्याप्तं ददर्श । आत्मनि च लोकं ददर्श ॥ ७ ॥ आत्मानमिति द्वयम् ॥ अव्यवच्छिन्नो निरन्तरमभ्यस्यमानो यो योगः सर्वत्र ब्रह्मानुसन्धानलक्षणः स एवाग्निस्तेन दग्धं कर्ममलं कर्मवासनात्मको दोषो यस्य तादृश आशयो यस्य सः उत्कलः निर्वाणं शान्तं प्रत्यस्तमितः सर्वतो निवृत्तो विग्रहो भेदो यस्मात्तत् अवबोधो ज्ञानं तदेकरसेनैकात्म्यं यस्य तत्तथा ज्ञानैकरसम् आनन्दम् अनु सन्ततं सर्वव्यापकम् आत्मानं स्वरूपभूतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्म अवरुन्धानः जानन् आत्मनः सकाशादन्यं तदा ज्ञानदशायां नैक्षत नापश्यत् ॥ ८ ॥ ९ ॥ जडेति ॥ पथि मार्गे बालानामज्ञानां जडान्धबधिरोन्मत्तमूकानामिवाकृतिर्यस्य तथाभूतो लक्षितोऽपि अतन्मतिः न तेषां जडादीनामिव मतिर्यस्य सर्वज्ञत्वात् अतः प्रशान्ताः अर्चिषो ज्वाला यस्य ईदृशः अनलः अग्निः इव स्थितः ॥ १० ॥ मत्वेति ॥ अतस्तमुत्कलं जडमुन्मत्तमतोऽनधिकारिणं मत्वा मन्त्रिसहिताः कुलवृद्धाः यवीयांसमुत्कलात्कनिष्ठमपि भ्रमेः सुतं वत्सरसंज्ञकं भूपतिं चक्रुः॥ ११ ॥स्ववींथिरिति॥ वत्सरस्य इष्टा प्रिया भार्या स्ववींथिः पुष्पार्णं तिग्मकेतुं च इषम् ऊर्जं वसुं जयम् इति षडात्मजान् असूत॥ १२ ॥पुष्पार्णस्येति॥पुष्पार्णस्य प्रभा नाम दोषा नाम चेति द्वे भार्ये बभूवतुः।प्रातः मध्यंदिनं सायमिति प्रभायाः सुता आसन् ॥ १३ ॥ प्रदोष इति ॥ प्रदोषः निशिथो निशीथः मध्यरात्रिः ह्रस्वत्वमार्षम्।व्युष्टः प्रातःकाल इति त्रयः दोषा सुता आसन् ।व्युष्टश्च पुष्करिण्यां स्त्रियां सर्वतेजसं पुत्रमादधे उत्पादितवान् । अत्र कालचक्राधिष्ठातुर्ध्रुवस्य वत्सरात्मककालाधिष्ठाता सुतः तस्य भार्या स्ववींथिः कालद्योतिकाकाशपद्धतिः पुष्पार्णा-

जडान्धबधिरोन्मत्तमूकाकृतिरतन्मतिः ॥ लक्षितः पथि बालानां प्रशान्तार्चिरिवानलः ॥ १० ॥ मत्वा तं जडवन्मत्तं कुलवृद्धाः सम-
न्त्रिणः ॥ वत्सरं भूपतिं चक्रुर्यवीयां संभ्रमेः सुतम् ॥ ११ ॥ स्ववींथिर्वत्सरस्येष्टा भार्याऽसूत षडात्मजान् ॥पुष्पार्णं तिग्मकेतुं च इषमूर्जं
वसुं जयम् ॥ १२ ॥ पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः ॥ प्रातर्मध्यंदिनं सायमिति ह्यासन्प्रभासुताः ॥ १३ ॥ प्रदोषो
निशिथो व्युष्ट इति दोषासुतास्त्रयः ॥ व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥१४॥ स चक्षुःसुतमाकूत्यां पत्न्यां मनुमवाप ह ॥ मनो-
रसूत महिषी विरजान्नड्वला सुतान् ॥ १५ ॥ पुरुं कुत्सं त्रितं द्युम्नं सत्यवन्तं धृतव्रतम् ॥ अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकम्
॥ १६ ॥ उल्मुकोऽजनयत्पुत्रान्पुष्करिण्यां षडुत्तमान् ॥ अङ्गं सुमनसं ख्यातिं क्रतुमङ्गिरसं गयम् ॥ १७ ॥ सुनीथाऽङ्गस्य या पत्नी
सुषुवे वेनमुल्बणम् ॥ यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात् ॥ १८ ॥

दयो वसन्ताद्यृतुभेदात्षट्प्रकाराहोरात्रात्मकाः कालाः अहोरात्रस्य प्रभा दिनव्यक्तिः दोषा रात्रिश्चेति द्वे भार्ये दिनव्यक्तेश्च प्रातरादयः कालाः रात्रेश्च प्रदोषादयः व्युष्टः प्रभातकालः स च पुष्करिण्यां कमलविकासलक्षितायां दिनप्रथमवेलायां सर्वतेजसं प्रकाशं पुत्रमुत्पादितवानिति इत्यादि बोध्यम्॥ १४ ॥स इति ॥स सर्वतेजाः एव चक्षुः आकूत्यां पत्न्यां चाक्षुषं नाम मनुं सुतमवापेति व्याख्येयम् । षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुरित्यष्टमात् । मनोर्महिषी नड्वला विरजान् रागादिदोषरहितान् पुरुप्रमुखानेकादश सुतानसूत ॥ १५ ॥ तानेव दर्शयति—पुरुमिति ॥ १६ ॥ उल्मुक इति ॥ उल्मुकः पुष्करिण्यां भार्यायाम् उत्तमान् शीलादिशुभगुणसम्पन्नान् षट्पुत्रान् अजनयत् । तानाह अङ्गमिति ॥ १७ ॥ सुनीथेति ॥ अङ्गस्य या पत्नी सुनीथा सा उल्बणं सर्वेषां भयङ्करं वेनसंज्ञं सुतं सुषुवे । यस्य वेनस्य दौःशील्याद्दुष्टस्वभावाद्धेतोः स राजर्षिर्धर्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजन्निति द्वयम् ॥ हे राजन् श्रद्धया आसादितानि प्रापितानि ते हवींषि अपुष्टानि तथा धृतव्रतैः अस्माभिर्योजितानि प्रयुक्तानि छन्दांसि वेदमन्त्रा अपि अयातयामानि वर्णस्खलनादिदोषराहित्येनागतवीर्याण्येव सन्ति । अतः ये देवाः कर्मसाक्षिणः कर्माङ्गभूता मुख्यास्ते यत् येनापराधेन स्वान्भागान्न गृह्णन्ति तद्देवानां हेलनमपराधं वयमण्वपि स्वल्पमपि इहास्मिन् यज्ञे न विदाम न विद्मः । शब्लुगभाव आर्षः ॥ २७ ॥ २८ ॥ अङ्ग इति ॥ यजमानः अङ्गः द्विजानामृत्विजां वचः श्रुत्वा सुदुर्मना जातः ततश्च यज्ञे गृहीतमौनोऽपि सदस्यान् प्रति तत्प्रष्टुं देवानागमनकारणं स्वदोषं प्रष्टुं यज्ञे वाचंयमोऽपि तदनुज्ञया तेषामृत्विगादीनामाज्ञया वाचं व्यसृजत् प्रयुक्तवान् ॥ २९ ॥ नेति ॥ हे सदसस्पतयः इह मम यज्ञ आहुता आहूताः ह्रस्वत्वमार्षम् । देवा नागच्छन्ति ग्रहान् सोमपात्राणि च न गृह्णन्ति । तत्र हेतुर्ममावद्यमेव यजमानत्वात् तथा च मया किमवद्यं कृतं तद्यूयं ब्रूत ॥ ३० ॥ नरदेवेति ॥ हे नरदेवेहास्मिञ्जन्मनि तावत् भवतोऽघं मनाक् ईषदपि न स्थितम् । कथंचिज्जातस्याघस्य प्राय-

राजन्हवींष्यदुष्टानि श्रद्धयाऽऽसादितानि ते ॥ छन्दांस्ययातयामानि योजितानि धृतव्रतैः ॥ २७ ॥ न विदामेह देवानां हेलनं वयमण्वपि ॥
यन्न गृह्णन्ति भागान्स्वान्ये देवाः कर्मसाक्षिणः ॥ २८ ॥ मैत्रेय उवाच ॥ ॥ अङ्गो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः ॥ तत्प्रष्टुं व्यसृजद्वाचं
सदस्यांस्तदनुज्ञया ॥ २९ ॥ नागच्छन्त्याहुता देवा न गृह्णन्ति ग्रहानिह ॥ सदसस्पतयो ब्रूत किमवद्यं मया कृतम् ॥ ३० ॥ सदसस्पतय
ऊचुः ॥ नरदेवेह भवतो नाघं तावन्मनाक्स्थितम् ॥ अस्त्येकं प्राक्तनमघं यदिहेदृक्त्वमप्रजः ॥ ३१ ॥ तथा साधय भद्रं ते आत्मानं सुप्रजं
नृप ॥ इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥ ३२ ॥ तथा स्वभागधेयानि ग्रहीष्यन्ति दिवौकसः ॥ यद्यज्ञपुरुषः साक्षादपत्याय हरि-
र्वृतः ॥ ३३ ॥ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयते जनः ॥ आराधितो यथैवैषां तथा पुंसां फलोदयः ॥ ३४ ॥

श्चित्तेन सद्य एव शोधनात् परन्तु प्राक्तनं पूर्वजन्मनि भवम् एकमघमस्ति इति कल्प्यते । यद्यस्मादघात् त्वमिह जन्मनि ईदृक् धार्मिकोऽपि अप्रजः असि । असिजभाव आर्षः ॥ ३१ ॥ तथेति ॥ हे नृप यथा देवाः स्वभागान् गृह्णीयुस्तथा आत्मानं सुप्रजं सुप्रजसं साधय प्राग्वदसिजभावः । एवं ते भद्रं भविष्यति । ते तव पुत्रकामनावतस्त्वयेष्टो यज्ञेन पूजितो यज्ञभुक् भगवान् पुत्रं दास्यति ॥ ३२ ॥ तथेति ॥ तथा सति दिवौकसो देवा अपि स्वभागधेयानि स्वभागान् यद्वा भागरूपाणि धेयानि पात्रेषु धार्याणि हवींषि इत्याहुः । ग्रहीष्यन्ति । यद्यस्मात् यज्ञपुरुषो हरिरेव साक्षात्त्वया अपत्याय वृतः स्यात् अतस्तेन सह सर्वे देवा आगमिष्यन्ति ॥ ३३ ॥ तांस्तानिति ॥ आराधको जनो यान्यान् कामान् कामयत इच्छति तांस्तान्कामांस्तस्मै हरिर्दद्यात् । कुत एवं यतो यथा यस्य कामनया एष हरिराराधितो भवति पुंसां तथा तस्यैव फलस्योदयः प्राप्तिर्भवतीति ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्माङ्गो निर्विण्णो विरक्तः सन् पुरात् निरगात् निर्जगाम ॥ १८ ॥ यमिति ॥ अङ्ग हे विदुर यमतिक्रूरस्वभावं वेनं वागेव वज्रं येषां तेऽतिप्रभावाः मुनयः कुपिताः सन्तः शेपुः । भूयः पुनस्तस्य गतासोर्निर्गतप्राणस्य वेनस्य दक्षिणं करं ते मुनयो ममन्थुः ॥ १९ ॥ मथने हेतुः—अराजके इति ॥ तदा अङ्गे वनं प्रति निर्गते वेने शापेन मृते च लोके अराजके सति प्रजाः दस्युभिः पीडिता जाताः अतस्तद्रक्षार्थं राजोत्पादनार्थं मन्थने कृते नारायणांशेन आद्यः क्षितीश्वरः प्रथमो राजा पृथुर्वेनस्य मथ्यमानात् करात् जातः तेनैव पुरग्रामादिरचनायाः कृतत्वादाद्यत्वम् ॥ २० ॥ तस्येति ॥ शीलनिधेः सर्वदा सुस्वभावस्य साधोः ब्रह्मण्यस्य ब्राह्मणभक्तस्य महात्मनः तस्याङ्गस्य राज्ञो दुष्टा प्रजा दुष्टः पुत्रः कथमभूत् । यत् यस्याः प्रजायाः हेतोर्विमनाः सन् पुरात् ययौ ॥ २१ ॥ किं चेति ॥ धर्मस्य कोविदाः अपि मुनयः दण्डः शासनमेव व्रतं तस्य धरे धारके राज्ञि वेने च किम् अंहः अपराधमुद्दिश्य ब्रह्मदण्डं शापम् अयूयुजन् योजितवन्तः । राज्ञो दण्डधर्मत्वात् तत्र शापोऽनुचित इति भावः । वेनमिति वा पाठः ॥ २२ ॥

यमङ्ग शेपुः कुपिता वाग्वज्रा मुनयः किल ॥ गतासोस्तस्य भूयस्ते ममन्थुर्दक्षिणं करम् ॥ १९ ॥ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः ॥ जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः ॥ २० ॥ विदुर उवाच ॥ तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः ॥ राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ ॥ २१ ॥ किं चांऽहो वेनमुद्दिश्य ब्रह्मदण्डमयूयुजन् ॥ दण्डव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥२२॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि ॥ यदसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥ २३ ॥ एतदाख्याहि मे ब्रह्मन्सुनीथात्मजचेष्टितम् ॥ श्रद्दधानाय भक्ताय त्वं परावरवित्तमः ॥ २४ ॥ मैत्रेय उवाच ॥ अङ्गोऽश्वमेधं राजर्षिराजहार महाक्रतुम् ॥ नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः ॥ २५ ॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः ॥ हवींषि हूयमानानि न ते गृह्णन्ति देवताः ॥ २६ ॥

नावध्येय इति ॥ अघवान् क्रौर्यादिमानपि प्रजापालो राजा प्रजाभिर्नावध्येय अवज्ञेयोऽपि न भवति किं पुनर्वध्यः । यत् यस्मादसौ राजा स्वतेजसा स्वप्रभावेण लोकपालानामिन्द्रादीनामोजः सामर्थ्यं बिभर्ति । राज्ञो लोकपालांशत्वात्तदवज्ञानं न युक्तम् । किञ्च राज्ञ एव दण्डेऽधिकारो नतु मुनीनामपि राजकर्मकदण्डनेऽधिकार इति ॥ २३ ॥ एतदिति ॥ हे ब्रह्मन् एतन्मुनिकोपकारणं सुनीथात्मजस्य वेनस्य चेष्टितं श्रद्दधानाय भक्ताय च मे मह्यमाख्याहि । यतः त्वं परावरवित्तमः भूतभविष्यज्ज्ञानां मध्येऽतिश्रेष्ठः असि ॥ २४ ॥ अभावी पुत्रः काम्यकर्मणा बलादापादितो न सुखायेति द्योतयन्नङ्गस्य पुत्रोत्पत्तिकथामाह—अङ्ग इति ॥ राजर्षिरङ्गो महाक्रतुं क्रतुश्रेष्ठमश्वमेधमाजहार प्रवर्त्तयामास । तस्मिन्नश्वमेधे ब्रह्मवादिभिर्मन्त्रज्ञैरप्याहूता देवताः नाजग्मुः ॥ २५ ॥ तमिति ॥ अथ तदा हे तात तत्र ऋत्विजो देवतानामनागमनेन विस्मिता आश्चर्यं गताः सन्तस्तं यजमानमूचुः । हे राजन् हूयमानानि ते हवींषि देवता न गृह्णन्ति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं सदसस्पतीनां वाक्यं श्रुत्वा विप्रा ऋत्विजो व्यवसिताः भगवद्यज्ञप्रवर्त्तने कृतनिश्चयाः सन्तस्तस्याङ्गस्य राज्ञः प्रजातये पुत्रोत्पत्तये शिपिविष्टाय " यज्ञो वै विष्णुः पशवः शिपिर्यज्ञपशुषु प्रतितिष्ठति " इति श्रुतेः । यज्ञरूपेण शिपिषु पशुषु प्रतिष्ठाय विष्णवे पुरोडाशं हविर्विशेषं निरपवन् विष्णूद्देशेन हविः सम्पाद्य होमं कृतवन्तः ॥ ३५ ॥ तस्मादिति ॥ तदा च हिरण्मयेन पात्रेण सिद्धं पक्वं पायसमादाय हेममाली अमले शुद्धे अम्बरे यस्य स तथाभूतः पुरुषस्तस्मात् प्रकरणलब्धयोग्यतया होमाधारभूतादग्नेरुत्तस्थौ निःसृतः ॥ ३६ ॥ स इति ॥ उदारधीः स राजा विप्रानुमतः विप्रैरनुज्ञातः अञ्जलिना ओदनं पयसि पक्वं पायसं गृहीत्वा मुदा हर्षेण युक्तः अवघ्राय तत्पत्न्यै सुनीथायै प्रादात् ॥ ३७ ॥ सेति ॥ सा सुनीथा राज्ञी पूर्वमप्रजाः पुत्ररहिता सती अविसर्गपाठे असिजभाव आर्षः । तत् पुंसवनं पुमांसं पुत्रं सूतेऽनेनेति तथा तत् पायसं प्राश्य अतिहर्षेण भुक्त्वा पत्युः सकाशाद्गर्भमादधे धृतवती । ततश्च प्रसूतिकाले उपावृत्ते प्राप्ते सति कुमारं सुषुवे जनयामास ॥ ३८ ॥ स इति ॥ स पुरुषः बाल

इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये ॥ पुरोडाशं निरवपञ्छिपिविष्टाय विष्णवे ॥ ३५ ॥ तस्मात्पुरुष उत्तस्थौ हेममाल्यमलाम्बरः ॥ हिरण्मयेन पात्रेण सिद्धमादाय पायसम् ॥ ३६ ॥ स विप्रानुमतो राजा गृहीत्वाऽञ्जलिनौदनम् ॥ अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः ॥ ३७ ॥ सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युराद्धे ॥ गर्भं काल उपावृत्ते कुमारं सुषुवेऽप्रजाः ॥ ३८ ॥ स बाल एव पुरुषो मातामहमनुव्रतः ॥ अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥ ३९ ॥ स शरासनमुद्यम्य मृगयुर्वनगोचरः ॥ हन्ति साधून्मृगान्दीनान्वेनोऽसावित्यरौज्जनः ॥ ४० ॥ आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः ॥ प्रसह्य निरनुक्रोशः पशुमारममारयत् ॥ ४१ ॥ तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः ॥ यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः ॥ ४२ ॥

एव अधर्मांशोद्भवं स्वमातामहं मृत्युमेवानुव्रतः अनुसृतः अभूत । तेन हेतुनाऽधार्मिकः अभवत् । सुनीथा हि मृत्योः पुत्री । " मृत्युर्देवो यमभ्राता वेनमाता महोऽसुरः " । इत्युक्तेः । मातृदोषादधार्मिकोऽपि विष्णुयज्ञोद्भूतत्वात् पितुर्वैराग्यहेतुत्वेन पितुरुपकारकः पृथुजनकत्वेन तद्यशोवर्द्धनश्च बभूवेति ज्ञेयम् ॥ ३९ ॥ स इति ॥ असाधुर्दुष्टः स बालो वेनः वनगोचरः वनं गतः सन् मृगयुर्लुब्धकश्च सन् शरासनं धनुरुद्यम्य आकृष्य दीनान् मृगान् हन्ति स्म । अत एव तं दृष्ट्वा अस्मत्प्राणघाती वेनोऽसौ आयातीति सर्वोऽपि जनः अरौत् चुक्रोश ॥ ४० ॥ आक्रीड इति ॥ अतिदारुणः कठिनचित्तः निरनुक्रोशः निर्दयः सः आक्रीडे क्रीडास्थाने क्रीडतो वयस्यान् समानवयस्कान् बालान् पशुमारं शौनिका यथा पशून् मारयन्ति तथा प्रसह्य बलात्कारेण अमारयत् । " उपमाने कर्मणि च " इति णमुल् ॥ ४१ ॥ तमिति ॥ नृपोऽङ्गस्तं वेनं स्वपुत्रं खलं प्राणिपीडानिरतं विचक्ष्य दृष्ट्वा विविधैस्ताडनतर्जनादिभिः शासनैः शिक्षणैर्यदा शासितुं शिक्षितुं शिक्षया सन्मार्गे नेतुं न कल्पः समर्थो न जातस्तदा भृशमत्यन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुदुर्मनाः दुःखितचित्त आसीत् ॥ ४२ ॥ एवं खिन्नः सन्नचिन्तयत्—प्रायेणेति ॥ गृहमेधिनो गृहस्थाः सस्त्रीका अपि ये अप्रजाः पुत्रादिरहिताः । असिजभाव आर्षः । तैर्देवो भक्तदुःखनिवर्तको भगवान् अर्चितः ये कुत्सितैरपत्यैः भृतं स्वस्मिन् धृतं पूर्णीकृतं वा दुर्भरं धारयितुमशक्यं दुःखं न विन्दन्ति न लभ्यन्ते ॥ ४३ ॥ यत इति॥ यतः कदपत्यात् नृणां पित्रादीनां पापीयसी कीर्तिर्दुर्यशो भवति महान् अधर्मश्च भवति । यतश्च कदपत्याद्धेतुभूतात् सर्वेषां सर्वैः प्राणिभिः सह विरोधो भवति यतश्च अनन्तकः आधिर्मनःपीडा भवति ॥ ४४ ॥ क इति ॥ यदर्थाः यन्निमित्ताः गृहाः क्लेशदा भवन्ति तं प्रजापदेशं प्रजेति कथनमात्रं यत्र वस्तुतस्त्वात्मनः स्वस्य मोहबन्धनमेव अतः पण्डितश्चेत्तदा को बहु मन्येत आद्रियेत ॥ ४५ ॥ कदपत्यमिति ॥ शुचां पदात् विरहादौ शोकानां स्थानात् सदपत्यात् श्रेष्ठापत्यात् कदपत्यमेव वरं मन्ये । यतः कदपत्याद्धेतोः मर्त्यः गृहान्निर्विद्येत विरक्तो भवेत् । यत् यतो हेतोः गृहाः गृहसंबन्धिनः सर्वे पदार्थाः क्लेशनिवहाः दुःखप्रदाः प्रतिभान्ति ॥ ४६ ॥ एवमिति ॥

प्रायेणाभ्यर्चितो देवो येऽप्रजा गृहमेधिनः ॥ कदपत्यभृतं दुःखं ये न विन्दन्ति दुर्भरम् ॥ ४३ ॥ यतः पापीयसी कीर्तिरधर्मश्च महान्नृणाम् यतो विरोधः सर्वेषां यत आधिरनन्तकः ॥ ४४ ॥ कस्तं प्रजाऽपदेशं वै मोहबन्धनमात्मनः ॥ पण्डितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ॥ ४५ ॥ कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् ॥ निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ॥ ४६ ॥ एवं स निर्विण्णमना नृपो गृहान्निशीथ उत्थाय महोदयोदयात् ॥ अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्ताम् ॥ ४७ ॥ विज्ञाय निर्विद्य गतं प्रजापतिं पुरोहितामात्यसुहृद्गणादयः ॥ विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः ॥ ४८ ॥ अलक्षयन्तः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीम् ॥ ऋषीन्समेतानभिवन्द्य साश्रवो न्यवेदयन्पौरवभर्तृविप्लवम् ॥ ४९ ॥ इति श्रीमद्भागवते चतुर्थस्कन्धे वेनसुतदुःखादङ्गनृपवनप्रवेशो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

एवं महतामुदयानां विभूतीनामुदयो यस्मिन् तस्माद्गृहात् निर्विण्णं सर्वतो विरक्तं मनो यस्य न लब्धा निद्रा येन स नृपोऽङ्गः निशीथेऽर्द्धरात्रे उत्थाय नृभिः अनुपलक्षितः अज्ञात एव वेनं सूते वेनसूः सुनीथा ताम् उवङार्षः । प्रसुप्तामेव हित्वा गतः ॥ ४७ ॥ विज्ञायेति ॥ पतिं राजानं निर्विद्य वैराग्यं कृत्वा गतं विज्ञायातिशोकेन कातरा विह्वलाः प्रजाः पुरोहिता अमात्याः सुहृद्गणादयश्च उर्व्यां विचिक्युरन्वेषितवन्तः तथापि यथा निगूढं पुरुषम् अन्तर्यामिणं कुयोगिनः विचिन्वन्तोऽपि न पश्यन्ति तद्वत् तन्नृपं नापश्यन्निति शेषः । निगूढमिति दृष्टान्तेन तत्र दिने तत्रैव पुरे राजा निगूढ आसीदिति सूचितम् ॥ ४८ ॥ अलक्षयन्त इति ॥ हे पौरव विदुर ते प्रजाः पुरोहितादयः प्रजापतेरङ्गस्य पदवीं मार्गं स्थानमलक्षयन्तः अपश्यन्तः अत एव हतो निष्फलतां गतः उद्यमोऽन्वेषणलक्षणो येषां ते पुरीं प्रत्युपसृत्य आगत्य तत्र समे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान् एकत्र मिलित्वा स्थितान् ऋषीन् अभिवन्द्य साश्रवः रुदन्तः सन्तो भर्तृविप्लुवं राज्ञो नाशं दर्शनाभावं न्यवेदयन् विज्ञापितवन्तः ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाच्चतुर्थस्य त्रयोदशे ॥ १३ ॥ चतुर्दशे निर्गतेऽङ्गेऽभिषिक्तोऽपि महाखलः ॥ वेनो हतो द्विजैस्तत्र श्लोकाः सार्द्धा रसाब्धयः ॥ चत्वार्युवाचेति सार्द्धाः सप्तवेदा अनुष्टुभः ॥ १४ ॥ भृग्वादय इति द्वयम् ॥ ते पूर्वोक्ताः लोकानां क्षेमदर्शिनः कल्याणचिन्तका ब्रह्मवादिनः भृग्वादयो मुनयः गोप्तरि रक्षके असति नृणां पशुसाम्यतां परस्परं परस्त्रीपरवित्तभोगोन्मुखतां पश्यन्तः । यद्वा । पशून् मेषादीन् यथा शृगालादयो घ्नन्ति तथा लोकान् दस्यव इति पशुतुल्यतां पश्यन्तः साम्यतामिति स्वार्थेष्वजन्तात्तल् वीरस्य वेनस्य मातरं सुनीथामाहूय तां पृष्ट्वा च प्रकृतीनां प्रजामात्यादिकानाम् असम्मतमपि वेनं प्रकृत्येति पाठे प्रकृत्या स्वभावेनासम्मतं राजपुत्रे विद्यमानेऽपराधातिशयं विनान्यस्य राज्ये स्थापनमयुक्तमिति विचार्य भुवः पतिमभ्यषिञ्चन् ॥ १ ॥ २ ॥ श्रुत्वेति ॥ अत्युग्रं शासनं यस्य तं वेनं नृपासनगतं श्रुत्वा दस्यवस्तस्कराः सद्यस्तच्छ्रवणकाल एव सर्पात्त्रस्ताः आखवो मूषका इव निलिल्युः निलीना बभूवुः ॥ ३ ॥ स इति ॥ आरूढमधिष्ठितं नृपस्थानं

मैत्रेय उवाच ॥ भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः ॥ गोप्तर्यसति वै नृणां पश्यन्तः पशुसाम्यताम् ॥ १ ॥ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः ॥ प्रकृत्यसंमतं वेनमभ्यषिञ्चन्पतिं भुवः ॥ २ ॥ श्रुत्वा नृपासनगतं वेनमत्युग्रशासनम् ॥ निलिल्युर्दस्यवः सर्वे सर्पत्रस्ता इवाखवः ॥ ३ ॥ स आरूढो नृपस्थान उन्नद्धोऽष्टविभूतिभिः ॥ अवमेने महाभागान्स्तब्धः संभावितः स्वतः ॥ ४ ॥ एवं मदान्ध उत्सिक्तो निरङ्कुश इव द्विपः ॥ पर्यटन्रथमास्थाय कम्पयन्निव रोदसी ॥ ५ ॥ न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित् ॥ इति न्यवारयद्धर्मं भेरीघोषेण सर्वशः ॥ ६ ॥ वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितम् ॥ विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ॥ ७ ॥

राजासनं येन अष्टविभूतिभिः अष्टलोकपालैश्वर्यैः संज्ञां विना समास आर्षः । यद्वा । अष्ट सङ्ख्या विभूतयो येषां तैः लोकपालांशैर्हेतुभिः उन्नद्धः विशृङ्खलः स्तब्धः अनम्रः स्वतः स्वेनैव संभावितः शूरोऽहमित्यादिकृतात्मश्लाघः स वेनः महाभागान् धार्मिकान् अवमेने तिरस्कृतवान् ॥ ४ ॥ एवमिति द्वयम् ॥ एवं प्राप्तराजासनत्वेन प्राप्तैरैश्वर्यैर्जातो यो मदो गर्वस्तेनान्धः अत एवोत्सिक्तस्त्यक्तलोकवेदाचारबन्धनः निरङ्कुशो द्विपो हस्ती यथा तद्वत् सन् रथमास्थाय क्रौर्येण रोदसी द्यावाभूमी कम्पयन्निव पर्यटन् भो द्विजाः क्वचित् क्वापि कदाचिदपि न यष्टव्यं न दातव्यं न होतव्यमित्येवं भेरीघोषेण सर्वतो धर्मं न्यवारयत् ॥ ५ ॥ ६ ॥ वेनस्येति ॥ मुनयः दुर्वृत्तस्य दुराचारस्य वेनस्य विचेष्टितं सदाचारप्रतिबन्धलक्षणमवेक्ष्य दृष्ट्वा ते नरलोकस्य सज्जनस्य व्यसनं स्वधर्महान्या कष्टं विमृश्य विचार्य कृपया पीडिताः सत्रिणः परस्परं मिलिताः सन्त ऊचुर्विचारवाक्यान्युक्तवन्तः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो इति ॥ अहो आश्चर्ये दारुणि काष्ठे उभयतो मूलतोऽग्रतश्च दीप्ते प्रज्वलिते सति तन्मध्यवर्त्तिनां जन्तूनां यथोभयतो दुःखं भवति तथा लोकस्य धर्मनिष्ठस्य जनस्य तस्करपालयोरिति षष्ठी पञ्चम्यर्था । तस्करेभ्यः पालकाच्चेत्युभयतः महत् व्यसनं प्राप्तम् ॥ ८ ॥ अराजकेति ॥ अराजकभयात् राजाभावे चोरादिकृतो-पद्रवभयात् अतदर्हणः राज्यानर्होऽप्येष वेनः ततो रक्षार्थमस्माभी राजा कृतः अथ इदानीं ततोऽपि वेनात् स्वधर्मत्यागलक्षणं भयं जातम् अतो देहिनां कथं स्वस्ति स्यात् ॥ ९ ॥ अहेरिवेति अर्द्धम् ॥ अहेः सर्पस्य यथा पयसा पोषः पोषणं यदा क्रुद्धोऽहिः पोषकं दशति तदा तस्याप्यनर्थभृत् अनर्थपोषको भवति अतोऽस्माकमपि धर्मलोपरूपोऽनर्थः प्राप्त एव । अनर्थप्रशमोपायं चिन्तयन्ति—वेन इति ॥ सुनीथागर्भसंभवः मृत्योर्दौहित्रः वेनः प्रकृत्यैव स्वभावेनैव खलोऽपि अस्माभिः प्रजापालो निरूपितः राजा कृतः । स वै स एव प्रजाः धर्मलोपद्वारा जिघांसति नरकपातेन नाशयितुमिच्छति ॥ १० ॥ तथापीति ॥ यद्यपि तद्विद्वद्भिः तत् वेनस्य दुष्टत्वं तत्पापं वा

अहो उभयतः प्राप्तं लोकस्य व्यसनं महत् ॥ दारुण्युभयतो दीप्त इव तस्करपालयोः ॥ ८ ॥ अराजकभयादेष कृतो राजाऽतदर्हणः ॥ ततोऽप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनाम् ॥ ९ ॥ अहेरिव पयः पोषः पोषकस्याप्यनर्थभृत् ॥ वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः ॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः ॥ १० ॥ तथापि सान्त्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥ तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः ॥ ११ ॥ सान्त्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत् ॥ लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा ॥ १२ ॥ एवमध्यवसायैनं मुनयो गूढमन्यवः ॥ उपव्रज्याब्रुवन्वेनं सान्त्वयित्वा च सामभिः ॥ १३ ॥ मुनय ऊचुः ॥ नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भोः ॥ आयुःश्रीबलकीर्तीनां तव तात विवर्धनम् ॥ १४ ॥ धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः ॥ लोकान्विशोकान्वितरत्यथानन्त्यमसङ्गिनाम् ॥ १५ ॥

जानद्भिरप्यस्माभिरसावसद्वृत्तो दुराचारो वेनो नृपः कृतः अतस्तत्पापमस्मानपि स्पृशेत् तथापि अमुं वेनं सान्त्वयेम सद्युक्तिभिः प्रार्थयिष्यामः ततश्च तत्कृतं पातकमस्मान्न स्पृशेत् । अन्यथा तत्कृतपातकभागित्वमस्माकमपि स्यात् ॥ ११ ॥ सान्त्वित इति ॥ सान्त्वितोऽनुनीतोऽप्यधर्मकृद्यदि नोऽस्माकं वाचं न ग्रहीष्यति तदा लोकधिक्कारेण संदग्धं मृतप्रायमेव एनं स्वतेजसा स्वकोपाग्निना दहिष्यामः धक्ष्यामः । इडार्षः ॥ १२ ॥ एवमिति ॥ गूढो बहिरलक्षितो मन्युः क्रोधो येषां ते मुनय एवं पूर्वोक्तप्रकारेणाध्यवसाय निश्चित्य एनं वेनमुपव्रज्य समीपं गत्वा सामभिः प्रियोक्तिभिः सान्त्वयित्वा अथानन्तरमब्रुवन्नुपदेशं कृतवन्तः ॥ १३ ॥ नृपवर्येति ॥ भो नृपवर्य भोस्तात वयं यत्तवायुःश्रीबलकीर्तीनां विवर्द्धनं साधनं ते तुभ्यं विज्ञापयाम तदेतत्त्वं सावधानतया निबोध अवधारय ॥ १४ ॥ धर्म इति ॥ पुंसामधिकारिणां विहितः वाङ्मनःकायबुद्धिभिराचरितोऽनुष्ठितो धर्मः विशोकान् स्वर्गादीन् लोकान् वितरति ददाति । अथ असङ्गिनां निष्कामानाम् आनन्त्यं मोक्षमपि ददाति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ हे वीर ते तव प्रजानां क्षेममेव लक्षणं यस्य स पूर्वोक्तो धर्मः मा विनशेत् न विनश्यतु ।श्यन्नभाव आर्षः । यस्मिन् धर्मे विनष्टे सति नृपतिरैश्वर्यात् राज्यात् अवरोहति भ्रष्टो भवति ॥ १६ ॥ राजन्निति ॥ हे राजन् असाधुभ्यः उत्कोचग्राहकादिभ्यः अमात्येभ्यश्चौरादिभ्यश्च प्रजा रक्षन् यथा यथाशास्त्रं ताभ्यो बलिं करं गृह्णन् नृपः इहास्मिन् लोके प्रेत्य परलोके च मोदते ॥ १७ ॥ यस्येति ॥ यस्य राज्ञो राष्ट्रे आज्ञानुवर्तिनि देशे पुरे च वर्णाश्रमान्वितैर्वर्णाश्रमवद्भिरधिकारिभिर्जनैः स्वेनाधिकारानुरूपेण धर्मेण भगवान् यज्ञपूरुषः यज्ञादि तत्तत्कर्मफलदाता इज्यते आराध्यते ॥ १८ ॥ तस्येति ॥ हे महाराज निजशासने प्रजापालनरूपे भगवच्छासने तिष्ठतः तस्य राज्ञः भूतभावनः प्राणिनां पालकः विश्वात्मा भगवान् परितुष्यति ॥ १९ ॥ तस्मिन्निति ॥ जगतामीश्वराणां ब्रह्मादीनामपीश्वरे तस्मिन् भगवति तुष्टे सति किं वस्तु अप्राप्यम् ।हि यस्मात् एतस्मै भगवद्भक्ताय लोकपालैः सहिता सर्वेऽपि लोकाः प्राणिनः आदृताः सादरा बलिं हरन्ति भोगं सम्पादयन्ति।उत्तरार्द्धं भगवद्विशेषणं वा॥ २०॥

स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः ॥ यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति ॥ १६ ॥ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः ॥ रक्षन्यथा बलिं गृह्णन्निह प्रेत्य च मोदते ॥ १७ ॥ यस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः ॥ इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः ॥ १८ ॥ तस्य राज्ञो महाभाग भगवान्भूतभावनः ॥ परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥ १९ ॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे ॥ लोकाः सपाला ह्येतस्मै हरन्ति बलिमादृताः ॥ २० ॥ तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयम् ॥ यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्स्वदेशाननुरोद्धुमर्हसि ॥२१॥ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः ॥ स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितं तद्धेलनं नार्हसि वीर चेष्टितुम् ॥ २२ ॥ वेन उवाच ॥ बालिशा बत यूयं वा अधर्मे धर्ममानिनः ॥ ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥ २३ ॥

तमिति॥हे राजन् सर्वान् स्वर्गादिलोकान् तत्पालकानमरांश्च तत्प्रापकान् यज्ञांश्च संगृह्णाति नियच्छति स तथा तं त्रयीमयं द्रव्यमयं तपोमयं च तं भगवन्तं विचित्रैः स्वाध्यायद्रव्यादिमयैर्यज्ञैस्ते तव भवायोद्भवाय यजतः स्वदेशान् स्वदेशवासिनो जनान् अनुरोद्धुं तत्रैव यजने प्रवर्त्तयितुमर्हसि ॥ २१ ॥ यज्ञेनेति ॥ हे वीर युष्मद्विषये युष्माकं देशे द्विजातिभिः त्रैवर्णिकैर्वितायमानेन प्रवर्त्यमानेन यज्ञेन हरेः कला अंशाः सुरा देवा इन्द्रादयः स्विष्टाः सम्यक् पूजिताः अत एव सुतुष्टाः सन्तो यज्ञकर्त्तॄणां देशाधिपतित्वेन तव च वाञ्छितमभिलषितं प्रदिशन्ति सर्वं सम्पादयन्ति ।अतो हे वीर तेषां देवानां तदंशिनो भगवतो वा हेलनं यज्ञादिप्रतिषेधेनावज्ञां चेष्टितुं कर्त्तुं नार्हसि ॥ २२॥ बालिशा इति ॥ यतो यूयमधर्मे मद्भजनत्यागपूर्वकविष्णुभजने धर्ममानिनोऽतो बालिशा वै भ्रान्ता एव । यतः ये भवन्तो वृत्तिदं स्वपतिं हित्वा स्वार्थपरमन्यं नरं स्वपतित्वेन कल्पितमुपासते । तथा ये भवन्तो वृत्तिदं जीविकाप्रदं राजानं पतिं पालकं मां हित्वा कुयोषितो जारमिव कल्पितं पतिं विष्णुमुपासते अतो बालिशा इत्यर्थः । वृत्तिदमित्यनेन अद्यैव मया फलादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रोटने निषिद्धे सद्य एव मरिष्यथ न तदा विष्णू रक्षितुं प्रभविष्यतीति सूचितम् ॥ २३ ॥ अवजानन्तीति ॥ येऽमी मूढाः तं नृपरूपिणमीश्वरम् अवजानन्ति तं हित्वाऽन्यभजनेन तदपमानं कुर्वन्ति ते अमी इहास्मिँल्लोके परत्र परलोके चानु कदापि भद्रं कल्याणं न विन्दन्ति न लभन्ते ॥ २४ ॥ क इति ॥ भर्तृस्नेहो विदूरो यासां तासां कुयोषितां निन्दितस्त्रीणां जारे परपुरुषे यथा भक्तिर्भवति तथा यत्र यज्ञपुरुषे वो युष्माकमीदृशी अत्युत्कटा भक्तिरस्ति स मद्भिन्नो यज्ञपुरुषो यज्ञाधिष्ठाता विष्णुर्नाम प्रसिद्धः कोऽस्ति न कोऽपीत्यर्थः ॥ २५ ॥ विष्णुरिति द्वयम् ॥ विष्णुः विरिञ्चः इत्यादयः एते अन्येऽनुक्ताश्च विबुधा देवाः वरशापयोर्ये प्रभवः समर्थास्ते सर्वे यतो नृपतेर्देहे अवयवभूता भवन्ति ततः सर्वदेवमयो नृपः न तदतिरिक्ताः केऽपि देवाः ॥ २६ ॥ २७ ॥ तस्मादिति ॥ हे विप्राः तस्मात् यूयं गतमत्सराः मयि मनुष्यसंभावनाप्रयुक्तमात्सर्यरहिताः सन्तः कर्मभिः मदिच्छानुरूपैः मामेव यजध्वम् । तथा मह्यमेव बलिं करं च हरत समर्पयत । यतः मत्तोऽन्योऽग्रभुक् प्रथमभोक्ता आराध्यः

अवजानन्त्यमी मूढा भूपरूपिणमीश्वरम् ॥ नानुविन्दन्ति ते भद्रमिह लोके परत्र च ॥ २४ ॥ को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी ॥ भर्तृस्नेहविदूराणां यथा जारे कुयोषिताम् ॥ २५ ॥ विष्णुर्विरिञ्चो गिरिश इन्द्रो वायुर्यमो रविः ॥ पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः ॥ २६ ॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः ॥ देहे भवन्ति नृपतेः सर्वदेवमयो नृपः ॥ २७ ॥ तस्मान्मां कर्मभिर्विप्राः यजध्वं गतमत्सराः ॥ बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान् ॥ २८ ॥ मैत्रेय उवाच ॥ इत्थं विपर्ययमतिः पापीयानुत्पथं गतः ॥ अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमङ्गलः ॥ २९ ॥ इति तेऽसत्कृतास्तेन द्विजाः पण्डितमानिना ॥ भग्नायां भव्ययाच्ञायां तस्मै विदुर चुक्रुधुः ॥ ३० ॥ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः ॥ जीवञ्जगदसावाशु कुरुते भस्मसात् ध्रुवम् ॥ ३१ ॥ नायमर्हत्यसद्वृत्तो नरदेववरासनम् ॥ योऽधियज्ञपतिं विष्णुं विनिन्दत्यनपत्रपः ॥ ३२ ॥

पुमान् यज्ञपुरुषः कः न कोऽपीति ॥ २८ ॥ इत्थमिति ॥ विपर्यया भ्रान्ता मतिर्यस्य सः पापीयान् उत्पथमसन्मार्गं गतः भ्रष्टमङ्गलः नष्टपुण्यः स वेन इत्थं नृपवर्यनिबोधेत्यादिपूर्वोक्तप्रकारेण मुनिभिरनुनीयमानोऽपि तेषां मुनीनां याच्ञां सदाचारप्रवृत्तिविषयां नाङ्गीचक्रे ॥ २९ ॥ इतीति ॥ हे विदुर इत्येवं पूर्ववर्णितप्रकारेण भव्या वेनस्यैवोद्भवहेतुभूता या याच्ञा भव्ययाच्ञा तस्यां भग्नायां सत्यां प्रत्युत पण्डितमानिना आत्मानं पण्डितं मन्यमानेन तेन वेनेन बालिशा बतेत्यादिदुर्वचोभिरसत्कृताः द्विजाः भृग्वादयो मुनयस्तस्मै वेनाय चुक्रुधुः ॥ ३० ॥ हन्यतामिति ॥ पापः प्रकृत्या दारुणः भयङ्करः अयं हन्यतां हन्यताम् । यतः ध्रुवं निश्चितम् असौ वेनः जीवन् सर्वं जगदेव स्वदुराचारेणाग्निना भस्मसात्कुरुते करिष्यति अतोऽयमेव भस्मीकार्य इति भावः ॥ ३१ ॥ नायमिति ॥ असद्वृत्तः दुराचारोऽयं वेनः नरदेवस्य राज्ञो वरमासनं नार्होऽर्हति नास्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपत्रपा अन्यतो लज्जा यस्य सः अनपत्रपः योऽयं वेनः अधियज्ञः यज्ञाधिष्ठाता चासौ पतिः स्वामी च तं विष्णुं विनिन्दति ॥ ३२ ॥ को वेति ॥ यस्य भगवतोऽनुग्रहभाजनः अनुग्रहविषयः सन्नीदृशमत्युत्कृष्टमैश्वर्यं प्राप्तस्तमेनं भगवन्तमशुभं पापमयं वेनमेकमृते विना को वा परिचक्षीत निन्देत् तस्मान्निरनुग्रहोऽयं वेनो हन्तव्य एवेति भावः ॥ ३३ ॥ इत्थमिति ॥ इत्थं हन्तुं व्यवसिताः कृतनिश्चयाः अतः पूर्वं गूढमन्यवोऽपीदानीं रूढमन्यवः प्रकटक्रोधाः ऋषयः अच्युतस्य निन्दया प्रथममेव हतं वेनं हुंकृतैः हुङ्कारैः एव निजघ्नुः ॥ ३४ ॥ ऋषिभिरिति ॥ एवं वेनं हत्वा ऋषिभिः स्वाश्रमपदं स्वस्थानं गते गमने कृते सति भावे क्तः । भाव्यवतारभगवदिच्छावशात्सुनीथा पुत्रमरणाच्छोचती सती नुमभाव आर्षः । मृतस्य पुत्रस्य कलेवरं शरीरं विद्या मन्त्रविशेषस्तत्सहितेन योगेन तैलौषधादिप्रयोगरूपशरीररक्षोपायेन पालयामास ॥ ३५ ॥ एकदेति ॥ एकदा तु यैर्वेनो हतस्ते भृग्वादयो मुनयः सरस्वत्या नद्याः सलिले आप्लुताः कृतस्नानाः पुंवद्भाव आर्षः । तस्या एव सरितस्तटे उपविष्टा अग्निं हुत्वा सत्कथाः

को वैनं परिचक्षीत वेनमेकमृतेऽशुभम् ॥ प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ॥ ३३ ॥ इत्थं व्यवसिता हन्तुमृषयो रूढमन्यवः ॥ निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिन्दया ॥३४॥ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरम् ॥ सुनीथा पालयामास विद्यायोगेन शोचती ॥ ३५ ॥ एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः ॥ हुत्वाऽग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥ ३६ ॥ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥ ३७ ॥ एवं मृशन्त ऋषयो धावतां सर्वतो दिशम् ॥ पांसुः समुत्थितो भूरिश्चोराणामपि लुम्पताम् ॥ ३८ ॥ तदुपद्रवमाज्ञाय लोकस्य वसु लुम्पताम् ॥ भर्तर्युपरते तस्मिन्नन्योऽन्यं च जिघांसताम् ॥ ३९ ॥ चोरप्रायं जनपदं हीनसत्त्वमराजकम् ॥ लोकान्नावारयञ्छक्ता अपि तद्दोषदर्शिनः ॥ ४० ॥

भगवत्कथाश्चक्रुः ॥ ३६ ॥ वीक्ष्येति ॥ तदा तु लोकस्य भयङ्करान् भयसूचकान् महोत्पातान् वामाङ्गस्फुरणहृदयकम्पश्वानरोदनादिरूपान् उत्थितान् वीक्ष्येदानीमनाथाया भुवो दस्युभ्योऽभद्रमपि न भवेत् किम् इत्याहुः स्म ॥३७॥ एवमिति ॥ यावदृषय एवं मृशन्तो विचारयन्तः स्थितास्तावदेव धनमभिलुम्पतां राजभयाभावाद्बलात्कारेण गृह्णतां सर्वतोदिशं धावतां चोराणां भूरि पांसुः समुत्थितः ॥ ३८ ॥ तदिति द्वयम् ॥ तत् तदा च ते मुनयस्तस्मिन् वेने भर्त्तरि पालके उपरते मृते सति वसु धनं लुम्पतां चोराणां तथान्योन्यं च जिघांसताम् दुर्जनानां कृतं लोकस्य साधुजनस्योपद्रवमालक्ष्य तथा अराजकं राजरहितमत एव चोरप्रायं चोरबाहुल्यमत एव हीनसत्वं त्यक्तधैर्यं जनपदमाज्ञाय लोकान् उपद्रवकर्त्तॄन् जनान् वारयितुं वेनवन्नाशयितुं च शक्ताः समर्था अपि तद्दोषदर्शिनः तस्मिन् निवारणे तेषां मरणप्राप्त्या तत्र दोषदर्शिनः सन्तः न अवारयन् न निवारितवन्तः । अन्ये तु उपद्रवादिकमाज्ञायापि शक्ता अपि अवारणे दोषदर्शिनोऽपि क्षत्रियाः आत्मानमेव रक्षन्तः किमस्माकमन्यैरित्युदासीनाः अन्यान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लुम्पतो लोकान्न अवारयन्निति व्याचक्षते ॥ ३९ ॥ ४० ॥ उपेक्षायामिति दोषमाह—ब्राह्मण इति ॥ समदृगपि शान्तोऽपि ब्राह्मणो यदि दीनानां समुपेक्षको भवेत् तदा तस्यापि ब्रह्मतपःस्वाध्यायादि पुण्यं भिन्नभाण्डात् पयो यथा स्रवति तथा स्रवति तदा क्षत्रियादीनां किमु वक्तव्यम् ॥ ४१ ॥ नाङ्गस्येति ॥ राजर्षेरङ्गस्यैष वंशः संस्थातुं नाशं गन्तुं नार्हति । हि यस्मात् अस्मिन् मनुवंशे नृपाः अमोघवीर्याः केशवाश्रयाश्च जाताः ॥ ४२ ॥ विनिश्चित्येति ॥ ऋषय एवम् उपेक्षादोषपरिहाराय नाङ्गस्येत्यादि विनिश्चित्य विपन्नस्य मृतस्य सुनीथया रक्षितस्य महीपतेर्वेनस्य दोषांशस्य मातृसंबन्धजस्य दूरीकरणार्थं प्रथममधोभागमूरुं तरसा वेगेन ममन्थुः । तत्र ततो मथ्यमानादूरोर्ह्रस्वबाहुको वामनको नरः पुरुषः आसीत् जातः । "ह्रस्ववामनबाहुकाः" इति कोशः ॥ ४३ ॥ तं वर्णयति—काकेति ॥ काक इव कृष्णवर्णः अतिह्रस्वमङ्गं शरीरं यस्य स तथा । तदेव प्रपञ्चयति ह्रस्वौ बाहू यस्य सः महत्यौ हनू कपोलप्रान्तौ यस्य सः ह्रस्वौ पादौ यस्य सः निम्नं नासाया अग्रं यस्य सः रक्ते अक्षिणी यस्य सः ताम्रमिव

ब्राह्मणः समदृक् शान्तो दीनानां समुपेक्षकः ॥ स्रवते ब्रह्म तस्यापि भिन्नभाण्डात्पयो यथा ॥ ४१ ॥ नाङ्गस्य वंशो राजर्षेरेष संस्थातुमर्हति ॥ अमोघवीर्या हि नृपा वंशेऽस्मिन्केशवाश्रयाः ॥ ४२ ॥ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ॥ ममन्थुरूरुं तरसा तत्रासीद्बाहुको नरः ॥ ४३ ॥ काककृष्णोऽतिह्रस्वाङ्गो ह्रस्वबाहुर्महाहनुः ॥ ह्रस्वपान्निम्ननासाऽग्रो रक्ताक्षस्ताम्रमूर्धजः ॥ ४४ ॥ तं तु तेऽवनतं दीनं किं करोमीति वादिनम् ॥ निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥ ४५ ॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः ॥ येनाहरज्जायमानो वेनकल्मषमुल्बणम् ॥ ४६ ॥ इति श्रीभागवते चतुर्थस्कन्धे पृथुचरित्रे निषादोत्पत्तिर्नाम चतुर्दशोऽध्यायः ॥१४॥ मैत्रेय उवाच ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः ॥ बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥ १ ॥

रक्ता मूर्द्धजाः केशा यस्य सः ॥ ४४ ॥ तमिति ॥ हे तात तं तु नरमवनतं नम्रशीर्षकं दीनं मनसापि नम्रीभूतं किं कार्यं भवत्सन्तोषकरमहङ्करोमीति वादिनं प्रार्थयमानं ते मुनयो निषीद स्थितो भवेत्यब्रुवन् । नासौ राज्ययोग्य इति निश्चित्येति भावः । स नरः ततो निषीदेति मुनिवचनात् निषादो निषादनाम्ना प्रख्यातो जातः । निषीदतीति निषादः ज्वलादित्वाण्णः ॥४५॥ तस्येति ॥ तु एवार्थे । तस्य निषादस्य वंश्या एवं नैषादाः ते च गिरिः काननं च गोचरः आश्रयो वासस्थानं येषां ते तथा अभूवन् । येन हेतुना जायमानोऽसौ पुरुष उल्बणमुग्रं भयङ्करं वेनस्य कल्मषं पापमहरत् । तद्धृत्वा जातस्तेन मुनिभिः स गिरिवनादिषु स्थापितोऽतस्तद्वंश्या अपि तत्रैव निवसन्ति न पुरादिषु ॥ ४६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो निरमाच्चतुर्थस्य चतुर्दशे ॥ १४ ॥ विप्रैः पञ्चदशे वेनबाहुतो मथितादभूत् ॥ पृथुस्तस्याभिषेकाद्यं तत्र श्लोकास्तु षड्दश ॥ उवाचेति चर्तुष्कं च ऋक्षैर्मानान्यनुष्टुभः ॥ १५ ॥ अथेति ॥ अथाधर्मांशदूरीकरणानन्तरमपुत्रस्य पुत्ररहितस्य महीपतेर्वेनस्य बाहुभ्यां विप्रैः पुनर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थ्यमानाभ्यां मिथुनं समपद्यत जातम् । क्षात्रं तेजो भगवत्प्रभावश्च क्षत्रियाणां बाह्वोरेव तिष्ठतीत्याशयेन बाह्वोर्मथनम् ॥ १ ॥ तद्देति ॥ तज्जातं मिथुनं दृष्ट्वा भगवत्कलां विदित्वा परमसंतुष्टाः ब्रह्मवादिन ऋषयः ऊचुः ॥ २ ॥ एष इति ॥ मिथुनमध्ये य एष पुरुषः स भगवतो विष्णोः भुवनपालिनी कलाऽस्ति । तथा येयं स्त्री सा तु पुरुषस्य भगवतोऽपायो वियोगस्तद्रहिता अनपायिनी भूतेः लक्ष्म्याः संभूतिः कला अस्ति ॥ ३ ॥ अयमिति ॥ योऽयं पुमान् स तु पुरग्रामादिविशेषकल्पकत्वाद्राज्ञां प्रथमो भविष्यति तथा यशः कीर्तिं प्रथयिता विस्तारयिष्यति । ततश्च पृथुश्रवाः महायशा भविष्यति । अतः निरुक्त्या पृथुर्नाम प्रसिद्धो महाराजो भविष्यति ॥ ४ ॥ इयमिति ॥ इयं च स्त्री देवी देदीप्यमाना सुदती शोभनदन्तवती गुणानां सौशील्यादीनां भूषणानां च भूषणभूता शोभाजननी वरारोहा वरः शोभनः आरोहः उत्सङ्गो यस्याः सा अर्चिर्नाम्ना प्रख्याता सती पृथुमेवावरुन्धती भक्त्या वशीकर्त्री भविष्यति ॥ ५ ॥ एष इति ॥ हि यस्मात् एष साक्षाद्धरेरंश एव लोकस्य रिरक्षया रिरक्षिषया इडभाव आर्षः । जातः

तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः ॥ ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम् ॥ २ ॥ ऋषय ऊचुः ॥ एष विष्णोर्भगवतः कला भुवनपालिनी ॥ इयं च लक्ष्म्याः संभूतिः पुरुषस्यानपायिनी ॥ ३ ॥ अयं तु प्रथमो राज्ञां पुमान्प्रथयिता यशः ॥ पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः ॥ ४ ॥ इयं च सुदती देवी गुणभूषणभूषणा ॥ अर्चिर्नाम वरारोहा पृथुमेवावरुन्धती ॥ ५ ॥ एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ॥ इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥ ६ ॥ मैत्रेय उवाच ॥ प्रशंसन्ति स्म तं विप्रा गन्धर्वप्रवरा जगुः ॥ मुमुचुः सुमनोधाराः सिद्धा नृत्यन्ति स्वःस्त्रियः ॥ ७ ॥ शङ्खतूर्यमृदङ्गाद्या नेदुर्दुन्दुभयो दिवि ॥ तत्र सर्व उपाजग्मुर्देवर्षिपितृणां गणाः ॥ ८ ॥ ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः ॥ वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ॥ ९ ॥ पादयोररविन्दं च तं वै मेने हरेः कलाम् ॥ यस्याऽप्रतिहतं चक्रमंशः स परमेष्ठिनः ॥ १० ॥

इयं च तत्परा भगवत एकान्तभक्ता अत एवानपायिनी तद्वियोगमसहमाना श्रीर्लक्ष्मीरनुजज्ञे तेन सह जाता अतोऽनयोर्दम्पतिभावो न विरुद्धः ॥ ६ ॥ प्रशंसन्तीति ॥ विप्राः तं प्रशंसन्ति स्म तुष्टुवुः । गन्धर्वप्रवरा विश्वावस्वादयस्तद्यशो जगुः । सिद्धाः सुमनसां धारा इव धाराः मुमुचुः । स्वःस्त्रियः अप्सरसो नृत्यन्ति स्म ॥ ७ ॥ शङ्खेति ॥ देवैर्वादिताः शङ्खतूर्यमृदङ्गाद्या दुन्दुभयश्च दिवि स्वर्गे नेदुः । तत्रेति यत्र पृथ्ववतारो जातस्तस्मिन् स्थाने देवर्षिपितृणां ह्रस्वत्वमार्षम् । सर्वे गणाः समूहा उपाजग्मुः ॥८॥ ब्रह्मेति द्वयम् ॥ सुरेश्वरैः देवश्रेष्ठैरिन्द्रादिलोकपालैः सनकादिभिः सिद्धैर्मरीच्यादिप्रजेशैश्च सह जगद्गुरुर्देवो ब्रह्मा तत्रासृत्य आगत्य गदाभृतो भगवतोर्विष्णोश्चिह्नं वैन्यस्य पृथोर्दक्षिणे हस्ते रेखात्मकं चक्रं पादयोररविन्दं रेखात्मकं कमलं च दृष्ट्वा यस्य दक्षिणे हस्ते पाणितले अप्रतिहतं रेखान्तरैरसंमिश्रितं रेखात्मकं चक्रं भवति स परमेष्ठिनः भगवतोंश इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धान्तात्तं पृथुं हरेः कलां वै अंशमेव मेने ॥ ९ ॥ १० ॥ तस्येति ॥ ब्रह्मवादिभिः ब्राह्मणैस्तस्य पृथो राज्याभिषेक आरब्धे सति जनाः अस्मै पृथवे सर्वतः सर्वदिग्भ्य आभिषेचनिकानि अभिषेकसाधनवस्तूनि आजह्रुः आनीय समर्पितवन्तः ॥ ११ ॥ सरिदिति ॥ सरित्समुद्रादयः सर्वभूतानि च उपायनं समाजह्रुः निवेदितवन्तः ॥१२॥ स इति ॥ स महाराजो ब्राह्मणैरभिषिक्तः सुवासाः साधु यथा भवति तथा ब्रह्मादिभिर्निवेदितैश्चामरच्छत्रादिभिः किरीटकुण्डलादिभिश्चालंकृतः अलंकृतयार्चिर्नाम्न्या पत्न्या सह हैमे राजसिंहासने स्थितोऽपरो द्वितीयोऽग्निरिव विरेजे ॥ १३ ॥ तस्मै इति ॥ हे वीर विदुर तस्मै पृथवे धनदः कुबेरः हैमं हेमनिर्मितं वरासनमुत्तमासनं जहार प्रापयामास । वरुणः सलिलस्य स्रावो यस्मात्तत् शशिप्रभं शुभ्रमातपत्रं छत्रं जहार ॥ १४ ॥ वायुरिति ॥ तस्मै वायुर्वालव्यजने द्वे चामरे धर्मः कीर्तिमयीं यस्या धारणे कीर्त्तिर्विततता स्यात्तामम्लानपुष्पां स्रजम् इन्द्रः उत्कृष्टमुत्तमं किरीटं यमः स्वदण्डादुत्पाद्य संयमनं शत्रुवशीकारकं दण्डं जहारेति सर्वत्रानुषङ्गः ॥ १५ ॥ ब्रह्मेति ॥ तस्मै ब्रह्मा

तस्याऽभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः ॥ आभिषेचनिकान्यस्मा आजह्रुः सर्वतो जनाः ॥ ११ ॥ सरित्समुद्रा गिरयो नगा गावः खगा मृगाः ॥ द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनम् ॥ १२ ॥ सोऽभिषिक्तो महाराजः सुवासाः साध्वलंकृतः ॥ पत्न्यार्चिषाऽलंकृतया विरेजेऽग्निरिवापरः ॥ १३ ॥ तस्मै जहार धनदो हैमं वीरवरासनम् ॥ वरुणः सलिलस्रावमातपत्रं शशिप्रभम् ॥ १४ ॥ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजम् ॥ इन्द्रः किरीटमुत्कृष्टं दण्डं संयमनं यमः ॥ १५ ॥ ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमम् ॥ हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियम् ॥ १६ ॥ दशचन्द्रमसिं रुद्रः शतचन्द्रं तथाम्बिका ॥ सोमोऽमृतमयानश्वांस्त्वष्टा रूपाश्रयं रथम् ॥ १७ ॥ अग्निराजगवं चापं सूर्यो रश्मिमयानिषून् ॥ भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहम् ॥ १८ ॥

ब्रह्ममयं वेदमयं वर्म कवचं भारती सरस्वती उत्तमं हारं हरिर्विष्णुरपि लोकव्यवहारापन्नः स्वचक्रादुत्पाद्य सुदर्शनं चक्रं तस्य हरेः पत्नीः श्रीः अव्याहतां व्याहतिः क्षयस्तद्रहितामक्षयां श्रियं सम्पदं जहार ॥ १६ ॥ दशेति ॥ तस्मै रुद्रः शिवः दश चन्द्राकाराणि बिम्बानि कोशे यस्य तमसिम् अम्बिका पार्वती च शतं चन्द्राकाराणि बुद्बुदापरपर्यायाणि यस्मिंस्तत् चर्म सोमश्चन्द्रमाः अमृतमयान् मरणश्रान्तिखेदोद्गमादिधर्मरहितान् अश्वान् त्वष्टा विश्वकर्मा रूपाश्रयमतिसौन्दर्ययुक्तं रथं जहार ॥ १७ ॥ ॥ ४९ ॥
अग्निरिति ॥ तस्मै अग्निः अजस्य गोश्च शृङ्गाभ्यां निर्मितमाजगवम् । यद्वा अजगो ग्रन्थिरस्यास्तीत्यजगवं गाण्ड्यजगादिति वः ततः स्वार्थेऽण् । सूर्यः रश्मिमयान् झटिति दूरदेशगामिनः इषून् बाणान् भूः भूमिर्योगमय्यौ पादधारणमात्रेणाभीष्टदेशप्रापिके पादुके द्यौः स्वर्गाभिमानिनी देवता अन्वहं प्रतिदिनं पुष्पावलिं पुष्पवृष्टिं जहार ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाट्यमिति॥ खेचराः आकाशगामिनो गन्धर्वविद्याधरादयः स्वस्वाधिकारानुरूपं नाट्यादिकौशलं वरत्वेन ददुः।ऋषयश्च सत्याः यथार्था आशिषो ददुः।समुद्रः क्षारोदः आत्मजं स्वप्रभवं शङ्खं जहार ॥ १९ ॥ सिन्धव इति ॥ सिन्धवः समुद्राः पर्वताः नद्यश्च महात्मनः विष्ण्ववतारस्य पृथोः रथवीथीः रथमार्गान् वरत्वेन ददुः समुद्रादिष्वपि रथप्रतिघातराहित्यं ददुरित्यर्थः । अथ सर्वैरुपायननिवेदनानन्तरं सूतादयस्तं स्तोतुमुपतस्थिरे उपस्थिताः । तत्र " सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः॥ " इति विवेकः ॥ २० ॥ स्तावकानिति ॥ तान् स्तावकान् स्तोतुमुद्यतानभिप्रेत्य ज्ञात्वा वैन्यः प्रतापवांश्च पृथुः प्रहसन् मेघानामिव तप्तजनाश्वासनकरो निह्रादो ध्वनिर्यस्यां तया वाचा इदं स्तुतिनिषेधपरं वक्ष्यमाणं वाक्यजातमब्रवीत् ॥ २१ ॥ भो इति ॥ भोः सूत हे मागध हे सौम्य बन्दिन् लोके स्पष्टगुणस्य सतो मे स्तवः स्यात् अधुना तु मम स्तवालम्बनस्पष्टगुणस्याभावान्मे स्तवः किमाश्रयः स्यात् । कान् गुणानाश्रित्य मां स्तुध्वे इत्यर्थः । अतः एषः क्रियमाणः मम स्तवः किमाश्रयः योज्यताम् अतो मयि मद्विषये वो युष्माकं गिरः मृषा मा भूवन्।अडार्षः। यद्वा।स्तवो मे इत्यत्र अमे इति च्छेदः। मद्भिन्नस्य कस्यचित्स्तवः योज्यतां

नाट्यं सुगीतं वादित्रमन्तर्धानं च खेचराः॥ ऋषयश्चाशिषः सत्याः समुद्रः शङ्खमात्मजम् ॥ १९ ॥ सिन्धवः पर्वता नद्यो रथवीथीर्महात्मनः ॥ सूतोऽथ मागधो बन्दी तं स्तोतुमुपतस्थिरे ॥ २० ॥ स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् ॥ मेघनिह्रादया वाचा प्रहसन्निदमब्रवीत् ॥ २१ ॥ पृथुरुवाच ॥ भोः सूत हे मागध सौम्य बन्दिँल्लोकेधुनाऽस्पष्टगुणस्य मे स्यात् ॥ किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः॥२२॥तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः ॥ सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः ॥२३॥ महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि ॥ तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ॥ २४ ॥

नतु मे मिथ्याभिमानापत्तेः । यद्वा । अस्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात् अतः एषः क्रियमाणः स्तवः मा योज्यतां यतः मयि विषये वः गिरः वितथा मिथ्या एव अभूवन् भवेयुः ॥ २२ ॥ तस्मादिति ॥ हे अपीच्यवाचः मधुरगिरः तस्मात् मम अस्पष्टगुणत्वात् परोक्षे एव कालान्तरे गुणेषु स्पष्टेषु सत्सु अस्माकमुपश्रुतानि यशांसि प्रति अलमत्यर्थं स्तोत्रं करिष्यथ यतः उत्तमश्लोकस्य गुणानामनुवादे कर्त्तव्ये सत्यपि जुगुप्सितमर्वाचीनमप्रसिद्धगुणकं मद्विधं सभ्या न स्तवयन्ति न स्तावयन्ति स्तावयितुं न योग्या भवन्तीत्यर्थः।ह्रस्वत्वमार्षम् । स्तवशब्दात्कर्मण्यप्प्रत्ययान्तात्तत्करोतीति णिजन्तस्य वा रूपम् । पृथोरंशावतारत्वेन पूर्णज्ञानाद्यप्राकट्यात्स्वतो भेदेन भगवतो निर्देशः कृत इति ज्ञेयम् ॥२३॥ महदिति ॥ महतां गुणान् धार्मिकत्वादीन् आत्मनि कर्त्तुमीशः समर्थोऽपि असतः अविद्यमानान् गुणान् संभावनामात्रेण स्तावकैः सूतादिभिः को वा सन्मतिः स्तावयते न कोऽपीति । यद्वा । आदावेव सतोऽपि कः स्तावयते स्वत एव ख्यातिसिद्धेः । मन्दस्तु स्तावयत इत्यर्थः । स च कुमतिर्मन्दबुद्धिः यद्ययं शत्रुशास्त्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलाभ्यासादिकमकरिष्यत्तदास्य ते प्रसिद्धाः शौर्यपाण्डित्यवैदग्ध्यादयो गुणाः अभविष्यन्निति क्रियातिपत्तिवचनैः स्तावकैर्जनैर्विप्रलब्धः उपहसितोऽपि तेषामवहासं न वेद ॥ २४ ॥ प्रभव इति ॥ परमोदाराः विशदचित्ताः ह्रीमन्तस्तु विश्रुताः प्रख्याता अपि प्रभवो विद्यमानगुणसम्पादने समर्था अप्यात्मनः स्तोत्रं जुगुप्सन्ति हि निवारयन्त्येव । तङभाव आर्षः । वाशब्दो दृष्टान्ते । यथा अतिस्तुतौ क्रियमाणायां विगर्हितं निन्दितं पौरुषं गोब्राह्मणवधादिकं प्रमादाज्जातं यथा जना जुगुप्सन्ते तथा उचितामपि स्तुतिं न सहन्त इति ॥ २५ ॥ वयमिति ॥ हे सूत वयं तु लोके वराणां भावा वरिमाणः पृथ्वादिदृढाद्यन्यतरकल्पनया इमनिचू । इकारदैर्घ्यमार्षम् । श्रेष्ठत्वैः भवितृप्रधाननिर्देशाद्वरिष्ठैः कर्मभिरिति वा अद्यापि अविदिता अप्रसिद्धाः अतः कर्मभिः गुणैः बालवत् अज्ञवत्कथमात्मानं गापयिष्याम गापयाम । लिङर्थे लृट् सलोपश्चार्षः ॥२६॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे व्याख्यां पञ्चदशे व्यधात् ॥ १५ ॥ षोडशे सत्कृतं लोकैः भार्यायुक्तं पृथुं नृपम् ॥ सूताद्यास्तुष्टुवुस्तत्र श्लो-

प्रभवो ह्यात्मनः स्तोत्रं जुगुप्सन्त्यपि विश्रुताः ॥ ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हितम् ॥ २५ ॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः ॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥ २६ ॥ इति श्रीभागवते चतुर्थस्कन्धे पृथोरवतारप्रादुर्भाववर्णनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ मैत्रेय उवाच ॥ ॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः ॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥ १ ॥ नालं वयं ते महिमानुवर्णने यो देववर्योऽवततार मायया ॥ वेनाङ्गजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ॥ २ ॥ अथाप्युदारश्रवसः पृथोर्हरेः कलाऽवतारस्य कथाऽमृतादृताः ॥ यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि ॥३॥ एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन् ॥ गोप्ता च धर्मसेतूनां शास्ता तत्परिपन्थिनाम् ॥ ४ ॥

कानां सप्तविंशतिः ॥ उवाचेत्येकं च सार्द्धा एकत्रिंशदनुष्टुभः ॥ १६ ॥ इतीति ॥ इत्येवं ब्रुवाणं नृपतिं पृथुं तापहारकत्वेन तस्य वागेवामृतं तस्य सेवया श्रोत्रद्वारान्तःस्थापनेन तुष्टं मनो येषां ते गायकाः सूतादयो मुनिभिश्चोदिताः सन्तस्तुष्टुवुः ॥ १ ॥ नालमिति ॥ यो देववर्यो विष्णुर्मायया शक्त्या भार्ययाऽर्चिषा सह वावततार तस्य ते तव महिमानुवर्णने वयं सूतादयो नालं न समर्थाः । यतः वेनस्याङ्गाज्जातस्य ते तव पौरुषाणि प्रति वाचस्पतीनां ब्रह्मादीनामपि धियो बभ्रमुः । अचिन्त्यतया भ्रान्ता जातास्तत्रास्माकं का गणना ॥ २ ॥ अथापीति ॥ यद्यपि साकल्येन वर्णने अशक्ताः अथापि तथापि कथामृते आदृताः सादराः मुनिभिः प्रचोदिताः प्रेरिताः सन्तो यथोपदेशं मुनिभिर्योगबलेनास्मन्मनसि प्रविश्य यथोपदिष्टं तदनतिक्रम्य उदारश्रवसः महायशस्कस्य हरेः कलावतारस्य पृथोः श्लाघ्यानि यानि तानि कर्माणि वयं वितन्महि विस्तरेण वर्णयामः । टितो लस्य टेरेत्वाभाव आर्षः ॥ ३ ॥ एष इति ॥ अत्र भविष्यतोऽपि सामीप्यात् क्वचिद्वर्तमाननिर्देशः । क्वचिच्च सिद्धवत्कृत्वा भूतनिर्देशः । एष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथुर्धर्मभृतां श्रेष्ठः तथा लोके जनसमूहं स्वस्वधर्मेऽनुवर्तयन् धर्मसेतूनां वर्णाश्रमधर्ममर्यादानां गोता रक्षकस्तत्परिपन्थिनां धर्ममर्यादाविघटकानां दुराचाराणां शास्ता दण्डयिता च भविता ॥ ४ ॥ एष इति ॥ वै निश्चितम् । एषः एकः एव यथाभागं यथायोग्यं पालनपोषणानुरञ्जनादिकार्यानुसारेण उभयोर्लोकयोः यज्ञादिप्रवर्तनेन देवलोकस्य वृष्ट्यादिसम्पादनेन मनुष्यलोकस्य च हितमाचरन् हितमिति बिभर्ति क्रियाविशेषणं वा । स्वतनौ स्वशरीरे लोकपालानामादित्येन्द्रादीनां तनूः मूर्त्तीः काले काले तत्तदवसरे बिभर्ति धारयति तत्तत्कार्यं स्वयमेव करिष्यति ॥ ५ ॥ सूर्यादितनुधारणमेवाहाष्टभिः—वस्विति ॥ प्रभुः समर्थः अयं पृथुः सर्वेषु भूतेषु प्राणिमात्रेषु समः रागद्वेषादिशून्यः सन् प्रतपन् स्वप्रतापं प्रकटयन् सूर्यवत् यथा सूर्यः सर्वेषु समं प्रतपन्नष्टौ मासाञ्जलमादत्ते वर्षासु विमुञ्चति तद्वत् करादानकाले वसु धनं प्रजाभ्य आदत्ते दुर्भिक्षादिकाले विमुञ्चति ददाति च॥६॥तितिक्षतीति ॥ क्षितेर्वृत्तिः सर्वापराधसहनं सा यस्यास्ति स तथा करुणः दयालुर्वैन्यः आर्त्तानां पीडिता नामत एवोपरि मस्तके पादेनाक्रमतामपि दीर्घाभाव आर्षः क्वचिद्दीर्घः पाठः । आर्त्तानां भूतानामक्रममतिक्रमं शश्वत् तितिक्षति सहते । तङभाव आर्षः ॥७॥ देव इति ॥ देवे इन्द्रे अवर्षति वर्षमकुर्वति सति कृच्छ्रं कष्टं

एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः ॥ काले काले यथाकालं लोकयोरुभयोर्हितम् ॥ ५ ॥ वसु काल उपादत्ते काले चायं विमुञ्चति ॥
समः सर्वेषु भूतेषु प्रतपन्सूर्यवद्विभुः ॥ ६ ॥ तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि ॥ भूतानां करुणः शश्वदार्तानां क्षितिवृत्तिमान् ॥ ७ ॥
देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः ॥ कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यञ्जसेन्द्रवत् ॥ ८ ॥ आप्याययत्यसौ लोकं वदनामृतमूर्तिना ॥
सानुरागावलोकेन विशदस्मितचारुणा ॥ ९ ॥ अव्यक्तवर्त्मैष निगूढकार्यो गम्भीरवेधा उपगुप्तवित्तः ॥ अनन्तमाहात्म्यगुणैकधामा पृथुः प्रचेता
इव संवृतात्मा ॥ १० ॥ दुरासदो दुर्विषह आसन्नोऽपि विदूरवत् ॥ नैवाभिभवितुं शक्यो वेनारण्युत्थितोऽनलः ॥ ११ ॥

गताः प्राणा यासां ताः प्रजाः नरदेववपुः राजशरीरो हरिरेव एष देवो राजा पृथुरञ्जसा अनायासेन इन्द्रवत् स्वयं वृष्टिं कृत्वा रक्षिष्यति॥८॥आप्याययतीति ॥ सानुरागोऽवलोको यस्मिंस्तेन विशदं स्वच्छं यत् स्मितं तेन चारुणा मनोहरेण वदनमेवामृतमूर्तिश्चन्द्रस्तेनासौ लोकं जनमाप्याययति तर्प्पयति अनेन चन्द्रतनुधारणमुक्तम् ॥ ९ ॥ अव्यक्तेति ॥ न व्यक्तं वर्त्म प्रवेशनिर्गममार्गो यस्य सोऽव्यक्तवर्त्मा निगूढं निष्पत्तेः पूर्वमविज्ञातं कार्यं कर्त्तव्यं यस्य स निगूढकार्यः गम्भीरं किमर्थमेतद्विदधातीत्यविज्ञातफलकं कार्यं विधत्त इति गम्भीरवेधाः उपगुप्तं सुरक्षितं वित्तं धनं ज्ञानं च यस्य अनन्तमाहात्म्यश्चासौ गुणानामेकं मुख्यं धाम श्रीविष्णुर्यस्मिन् अनन्तस्य विष्णोः माहात्म्यं गुणाश्चैकं धाम प्रभावहेतुर्यस्येति वा अनन्तमाहात्म्या ये गुणाः त एवैकं धाम स्थानं यस्येति वा । संवृतः प्रकृत्यादिभिरावृतः सुरक्षितः आत्मा यस्य स संवृतात्मा एष पृथुः प्रचेता वरुण इव शोभते समुद्रचरत्वेन वरुणस्याप्येते गुणा द्रष्टव्याः ॥ १० ॥ दुरासद इति ॥ वेन एवारणिस्तस्मादुत्थित उत्पन्नोऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नलोऽसौ पृथुः दुरासदः दुष्टतमिस्रैः प्राप्तुमशक्यः दुर्विषहः शत्रुघूकैः सोढुमशक्यः आसन्नः समीपे वर्त्तमानोऽपि विदूरवत् शत्रुभिः पौरुषेणाभिभवितुं नैव शक्यः ॥ ११ ॥ अन्तरिति ॥ देहिनामात्मान्तर्यामीव वायुः सूत्रात्मेव चासौ भूतानां प्राणिनामन्तर्मनसि बहिश्च वर्त्तमानानि कर्माणि चारणैर्गुप्तभृत्यैश्चेष्टितैश्च पश्यन्नपि स्वस्तुतिनिन्दादावध्यक्षः साक्षी वोदासीनो भृत्यामात्यादिष्वासक्तोऽपि उदासीन इव लक्ष्यमाणश्च वर्तिष्यते ॥ १२ ॥ नादण्ड्यमिति ॥ धर्मस्य यमस्य पथे मार्गे स्थितः धर्मराज इव वर्त्तमान इत्यर्थः । एष पृथुरात्मनो द्विषां सुतमप्यदण्ड्यं दण्डानर्हं न दण्डयति सुतग्रहणं स्वात्मजसाम्यार्थम्। दण्ड्यं तु आत्मजमपि दण्डयति वसुकाल इत्याद्यष्टसु सूर्यादितनुधारणमुक्तम् ॥१३॥ अस्येति ॥ भगवान् अर्कः सूर्यो गोगणैः रश्मिसमूहैर्यावद्देशं तपति प्रकाशयति तावदामानसाचलात् मानसाचलपर्वतमन्तिमद्वीपवर्षमर्यादाभूतं परितो वर्त्तमानमभिव्याप्य तद्देशपर्यन्तमस्य पृथोश्चक्रमाज्ञा सेना वा रथस्य चक्रं वा अप्रतिहतं वर्त्तते ॥१४॥ रञ्जयिष्यतीति ॥ यत् यस्मात् अयं स्वयं राजमानतया पूर्वमुक्तोऽपि मनोरञ्जना-

अन्तर्बहिश्च भूतानां पश्यन्कर्माणि चारणैः ॥ उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम् ॥ १२ ॥ नादण्ड्यं दण्डयत्येष सुतमात्मद्विषामपि ॥
दण्डयत्यात्मजमपि दण्ड्यं धर्मपथे स्थितः ॥१३॥ अस्याप्रतिहतं चक्रं पृथोरामानसाचलात् ॥ वर्तते भगवानर्को यावत्तपति गोगणैः ॥१४॥
रञ्जयिष्यति यल्लोकमयमात्मविचेष्टितैः ॥ अथामुमाहू राजानं मनोरञ्जनकैः प्रजाः ॥ १५ ॥ दृढव्रतः सत्यसन्धो ब्रह्मण्यो वृद्धसेवकः ॥ शरण्यः
सर्वभूतानां मानदो दीनवत्सलः ॥ १६ ॥ मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इवात्मनः ॥ प्रजासु पितृवत्स्निग्धः किङ्करो ब्रह्मवादिनाम् ॥ १७ ॥
देहिनामात्मवत्प्रेष्ठः सुहृदां नन्दिवर्धनः ॥ मुक्तसङ्गप्रसङ्गोऽयं दण्डपाणिरसाधुषु ॥ १८ ॥

नि कानि सुखानि येभ्यस्तैरात्मविचेष्टितैः स्वपराक्रमैर्लोकं जनं रञ्जयिष्यति आनन्दयिष्यति । अथ तस्मात् प्रजाः अमुं राजानमाहुः राजेति कथयिष्यन्ति । अन्यो राजा राजतीति निरुक्त्या अयं तु राजति रञ्जयतीति निरुक्तिद्वयेन राजेति भावः ॥१५॥ दृढेति॥ किंच अयं दृढव्रतः अखण्डितव्रतः सत्यसन्धः सत्यप्रतिज्ञः व्रतसन्धयोः शास्त्रीयलौकिकत्वाभ्यां भेदः कल्प्यः ब्राह्मणभक्तः वेदे विश्वासवान् वृद्धानां सेवकः सर्वभूतानां प्राणिजातस्य ब्रह्मण्यो शरण्यः आश्रयार्हः यतस्तेषां मानदः संमानकर्त्ता दीनेषु वत्सलः अनुग्रहकर्ता भविष्यति ॥१६॥ मातृभक्तिरिति ॥ परेषां स्त्रीषु मातरीव भक्तिर्दृष्टिर्यस्य सः स्वपत्न्यामात्मनो देहस्यार्द्ध इव प्रीतिमान् । यथा पुत्रेषु पिता स्नेहवान् भवति तथा प्रजासु स्नेहवान् ब्रह्मवादिनां वेदार्थज्ञानां किङ्करः आज्ञानुसारी ॥ १७ ॥ देहिनामिति ॥ देहिनां प्राणिनामपि आत्मवत्स्वजीववत्प्रेष्ठः प्रीतिविषयः सुहृदां मित्रादीनां नन्दिं सुखं वर्द्धयतीति तथा मुक्तसङ्गेषु साधुषु प्रकृष्टः सङ्गो यस्य सः असाधुषु परोद्वेजकेषु दुराचारेषु दण्डपाणिर्यमराज इवेत्यपराधानुपेक्षणेन यमसाम्यमुक्तम् । नादण्ड्यमित्यत्र तु पक्षपाताभावेन ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमिति ॥ अयं तु पृथुः साक्षाद्भगवान् त्र्यधीशः कूटस्थः निर्विकारः आत्मान्तर्यामी एव कलयावतीर्णः यस्मिन् प्रतीतमपि अविद्यया रचितं सर्वमपि नानात्वम् । विद्वांसः अनर्थकमर्थशून्यं पश्यन्ति ॥ १९ ॥ अयमिति ॥ अयं भगवदंशः पृथुः एकवीरः एको निरुपमः वीरः पराक्रमवान् अत एव नरदेवनाथः राजराजः आ उदयाद्रेः उदयाचलपर्यन्तं भुवो मण्डलं गोप्ता गोपायिष्यति तदर्थं च जैत्रं जयप्रदं रथमास्थाय आरुह्य आत्तचापः धनुर्गृहीत्वा यथार्कः अर्कवत् दक्षिणतः पर्यस्यते प्रदक्षिणीकरिष्यति । तङार्षः ॥ २० ॥ अस्मा इति ॥ अस्मै प्रदक्षिणीकुर्वते पृथवे सलोकपालाः लोकपालैर्वरुणेन्द्रकुबेरादिभिः सहिता नृपालाः राजानस्तत्र तत्र तस्मिंस्तस्मिन् स्वस्वाधिष्ठिते देशे बलिं शुल्कं हरिष्यन्ति समर्पयिष्यन्ति अत एव तस्य महाबलपराक्रमस्य यश उच्चरन्त्यः गायन्त्यः " उदश्चरः सकर्मकात् " अपि शता आर्षः । एषां लोकपालादीनां स्त्रिय एनं चक्रायुधं विष्णोरवतारत्वाच्चक्रधरमादिराजं राज्ञां प्रथमं मुख्यं वा मंस्यन्ते ज्ञास्यन्ति ॥ २१ ॥ तासां किमाकारकमेतद्यशःकीर्त्तनमित्याकाङ्क्षायामाहुश्चतुर्भिः-

अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्माकलयाऽवतीर्णः ॥ यस्मिन्नविद्यारचितं निरर्थकं पश्यन्ति नानात्वमपि प्रतीतम् ॥ १९ ॥ अयं भुवो मण्डलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः ॥ आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः ॥ २० ॥ अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यन्ति सलोकपालाः ॥ मंस्यन्त एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उच्चरन्त्यः ॥ २१ ॥ अयं महीं गां दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानाम् ॥ यो लीलयाऽद्रीन्स्वशरासकोट्या भिन्दन्समां गामकरोद्यथेन्द्रः ॥ २२ ॥ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ ॥ तदा निलिल्युर्दिशि दिश्यसन्तो लाङ्गूलमुद्यम्य यथा मृगेन्द्रः ॥ २३ ॥ एषोऽश्वमेधाञ्छतमाजहार सरस्वती प्रादुरभावि यत्र ॥ अहारषीद्यस्य हयं पुरन्दरः शतक्रतुश्चरमे वर्तमाने ॥ २४ ॥

अयमिति ॥ अधिराजः चक्रवर्त्ती प्रजानां पतिः पालकः अतः प्रजानां वृत्तिकरः जीविकासम्पादकः अयं पृथुः गां गोरूपां महीं दुदुहे । यथा इन्द्रः वज्रेणाद्रीन् बिभेद तथा यः स्वशरासनकोट्या स्वधनुषोऽग्रभागेनैव तत्रापि लीलया अनायासेनैवाद्रीन् भिन्दन् गां पृथिवीं समामकरोत् ॥२२॥ विस्फूर्जयन्निति ॥ यथा यदा मृगेन्द्रः सिंहः स्वलाङ्गूलं पुच्छमुद्यम्य वने चरति तदा क्षुद्रा मृगा भयेन सर्वतोदिशं लीना भवन्ति तथा यदाऽयं स्वयमाजगवमजस्य गोश्च शृङ्गाभ्यां निर्मितमत एवं शत्रूणामसह्यं धनुर्विस्फूर्जयन् टङ्कारयन् आजौ युद्धे क्ष्मां भूमिमचरत्तदा असन्तो दुष्टाः शत्रवो दिशि दिशि निलिल्युः निलीना बभूवुः ॥ २३ ॥ एष इति ॥ यत्र सरस्वती नदी प्रादुरभावि प्रादुर्भूता तत्रैव एष पृथुः शतमश्वमेधान् आजहार कृतवान् । अत्र चरमे अन्तिमे अश्वमेधे प्रवर्तमाने सति पुरन्दरः पुरन्दरनामकः शतक्रतुः इन्द्रः शततमेऽश्वमेधे समाप्तेयं मम स्थानं ग्रहीष्यतीति भयात्तत्र विघ्नार्थं यस्य पृथोर्यज्ञियं हयमहारषीत् हृतवान् । अकाराधिक्यमार्षम् । अत्र प्रथमान्ते कर्त्तरि अभावीति कथमिति चेत् कर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तरि चिण् इत्याहुः । मम त्वार्षः प्रयोगो भाति । सरस्वतीति " सुपां सुलुक् " इति लुप्ततृतीयान्तं वा प्रादुर्भवतेरकर्मकस्य कर्मकर्तरि प्रयोगासम्भवात् । न चेदं ण्यन्तं ण्यन्तस्य कर्मकर्तरि चिण्निषेधात् । न च ण्यर्थान्तर्भावेन सकर्मकतया निर्वाह इति वाच्यम् । एवं करणे सर्वधातूनां कर्मवद्भावापत्तेः । यत्तु हरिदासपण्डिताः सत्ताद्यर्थस्योपलक्षणत्वेन शं भवतीति शम्भुरित्यत्रेव भवतेरुत्पादनार्थतया सकर्मकतामाहुः । तत्रापि भवतेर्ण्यर्थान्तर्भावकल्पनयैवोत्पादनमर्थः नतु स्वातन्त्र्येणेति । तथैव कौमुद्यादिषु लेखात् स घटं भवतीत्यादिप्रयोगस्य कुत्राप्यदर्शनात् । अतिप्रसिद्धे शम्भुशब्दादावर्थसङ्गतिमात्रार्थं ण्यर्थान्तर्भावस्याश्रयणेऽपि आर्षग्रन्थादन्यत्र क्वाप्यनुपलब्धस्य प्रयोगस्य साधनार्थं तादृशक्लेशस्यानौचित्यात् । " नमते दण्ड " इत्यादाविव सूत्रे ज्ञापके निर्बाधे प्रयोगे तदौचित्यात् । अन्यथा स भवतीत्याद्यर्थे स भूयते इत्यादिप्रयोगस्य व्यवहार्यतापत्तिः । एतेन " तथापि सूनृता सौम्य हृदि न स्थीयते चले । " इत्यादयोऽप्यार्षा एव प्रयोगा इति युक्तायुक्तत्वे विद्वांसः प्रमाणम् ॥ २४ ॥ एष इति ॥ एष पृथुः स्वसद्मोपवने स्वगृहसमीपे वर्त्तमाने उपवने वाटिकायां भगवन्तं ज्ञानवैराग्यादियुक्तम् एकम् अनुपमं सनत्कुमारं समेत्य सङ्गत्य भक्त्या तमाराध्य यतः परं

एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवन्तमेकम् ॥ आराध्य भक्त्याऽलभतामलं तज्ज्ञानं यतो ब्रह्म परं विदन्ति ॥ २५ ॥ तत्र तत्र गिरस्ता-
स्ता इति विश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः ॥ २६ ॥ दिशो विजित्याऽप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकश-
ल्यः॥सुरासुरेन्द्रैरुपगीयमानमहाऽनुभावो भविता पतिर्भुवः॥२७॥इति श्रीभागवते चतुर्थस्कन्धे मुनिप्रयुक्तसूतादिस्तोत्रवर्णनं नाम षोडशोऽ-
ध्यायः ॥ १६ ॥ मैत्रेय उवाच ॥ एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः ॥ छन्दयामास तान्कामैः प्रतिपूज्याभिनन्द्य च ॥ १ ॥

ब्रह्म विदन्ति जानन्ति प्रत्यक्षीकुर्वन्ति तदमलं शुद्धं ज्ञानमलभत ॥ २५ ॥ तत्र तत्रेति ॥ पृथुपराक्रमः महापराक्रमः अत एव विश्रुतविक्रमः ख्यातपराक्रमः एष पृथुः इत्येवंवर्णितप्रकाराः आत्माश्रिताः स्वसंबन्धिनीस्तास्ताः सर्वत्र प्रसिद्धाः गाथाः प्रबन्धरूपा वाचस्तत्र तत्र श्रोष्यति अत एव दुदुहे इत्यादिर्भूतप्रयोगः । तदुक्तिकाले कर्मणामतीतत्वात् सिद्धवत्कृत्वा कथितत्वाद्वा तथा प्रयोगः ॥ २६ ॥ दिश इति ॥ सर्वा दिशो विजित्य स्थितत्वान्न प्रतिरुद्धं चक्रमाज्ञा यस्य स स्वतेजसा स्वप्रभावेण उत्पाटितानि निष्काशितानि लोकस्य शल्यानि शराग्रस्थलोहकण्टकतुल्या दुष्टा येन स अयं भुवः पतिः सुरासुरेन्द्रैरुपगीयमानो महान् अनुभावो यस्य तादृशो भविता भविष्यति ॥ २७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य षोडशे निरमादिमाम् ॥ १६ ॥ पृथुः सप्तदशे लोकक्षुच्छान्त्यै धरणीं क्रुधा ॥ निहन्तुमैच्छत्तत्रत्याः श्लोकाः षट्[३६]त्रिंशदीरिताः ॥ उवाचसप्तकं सैकाश्चत्वारिंशद[४१]नुष्टुभः ॥ १७ ॥ एवमिति ॥ स भगवान् वैन्यः पृथुः गुणकर्मभिः गुणकर्मवर्णनैः सूतादिभिः एवं ख्यापितः स्तुतः तान् सूतादीन् वचसाभिनन्द्य संश्लाघ्य कामैस्तदभिलषितैर्वस्त्रालङ्कारादिभिः प्रतिपूज्य च छन्दयामास सन्तोषितवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणेति ॥ ब्राह्मणः प्रमुखः श्रेष्ठो येषां तांश्चतुरो वर्णान् भृत्यान् अमात्यान् पुरोधसः पुरोहितांश्च पौरान् पुरवासिनः जानपदान् बहिर्देशवासिनः श्रेणीः तैलिक-ताम्बूलिकादीन् पौरविशेषान् प्रकृतीः साधारणान्नियोगिनः तत्तत्कामैः समपूजयत् धन्याः स्थ यूयं यथाशक्ति युष्माकं पालनरूपं परिचरणं करिष्यामीति मधुरमभ्य-भाषत ॥ २ ॥ कस्मादिति ॥ यां गोरूपं धृतवतीं पृथुर्दुदोह सा धरित्री पृथिवी देवतात्वाद्बहुरूपिणी अनेकरूपधारणे समर्थापि गोरूपमेव कस्माद्धेतोर्दधार । तत्र दोहनकार्ये वत्सः को जातः दोहनं पात्रं च किमभूत् ॥ ३ ॥ प्रकृत्येति ॥ देवी पृथिवी प्रकृत्या स्वभावतो विषमा कुत्रचिन्निम्ना कुत्रचिदुन्नता तेन पृथुना समा कथं कृता । तस्य पृथोर्मेध्यं यज्ञार्हं हयमश्वं देव इन्द्रः कस्य हेतोः कस्मात् कारणात् अपाहरत् हृतवान् ॥ ४ ॥ सनत्कुमारादिति ॥ हे ब्रह्मन् ब्रह्मवित्सु उत्तमात् भगवतः सनत्कु-मारात् सविज्ञानमपरोक्षज्ञानसहितं साक्षात्कारपर्यन्तं ब्रह्मज्ञानं लब्ध्वा प्राप्य राजर्षिः पृथुः कामलौकिकीं गतिं गतः ॥ ५ ॥ यच्चेति द्वयम् ॥ यदेतन्मया पृष्टं यच्चान्यदपृ-

ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः ॥ पौराञ्जानपदाञ्छ्रेणीः प्रकृतीः समपूजयत् ॥ २ ॥ विदुर उवाच ॥ ॥ कस्माद्दधार गोरूपं धरित्री बहुरूपिणी ॥ यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किम् ॥ ३ ॥ प्रकृत्या विषमा देवी कृता तेन समा कथम् ॥ तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ॥ ४ ॥ सनत्कुमाराद्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात् ॥ लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ॥ ५ ॥ यच्चान्यदपि कृष्णस्य भवान्भगवतः प्रभोः ॥ श्रवः सुश्रवसः पुण्यं पूर्वदेवकथाश्रयम् ॥६॥ भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च ॥ वक्तुमर्हसि योऽदुह्यद्वैन्यरूपेण गामिमाम् ॥ ७ ॥ सूत उवाच ॥ चोदितो विदुरेणैवं वासुदेवकथां प्रति ॥ प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥ ८ ॥ मैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरङ्ग विप्रैरामन्त्रितो जनतायाश्च पालः ॥ प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥ ९ ॥ वयं राजञ्जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः ॥ त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥ १० ॥

ष्टमपि सुष्ठु श्रवः यशो यस्य तस्य भगवतः प्रभोः कृष्णस्य पूर्वदेहः पृथ्ववतारस्तत्कथाश्रयं पुण्यं पवित्रं श्रवो यशो भवेत् तत् तव गुरोश्चाधोक्षजस्य भगवतश्च भक्ताय श्रवणानुरक्ताय च मे मह्यं भगवान् वक्तुमर्हति । यः कृष्णः वैन्यरूपेण इमां गां पृथ्वीम् अदुह्यत् अधुक्षत् । श्यन्नार्षः ॥ ६ ॥ ७ ॥ चोदित इति ॥ एवं विदुरेण वासुदेवकथां प्रति चोदितः प्रेरितो मैत्रेयः प्रीतमनाः सन् तं विदुरं प्रशस्य श्रीकृष्णकथानुरक्तस्त्वं धन्योऽसीत्यादिस्तुतिं कृत्वा प्रत्यभाषत ॥ ८ ॥ यदेति ॥ अङ्ग हे विदुर यदा पृथुर्विप्रैः राज्येऽभिषिक्तस्त्वं जनताया जनसमूहस्य पालः पालक इत्यामन्त्रितो नियुक्तश्च तदा क्षितिपृष्ठे भूतले निरन्ने अन्नरहिते सति क्षुधा क्षामाः क्षीणा देहा यासां ताः प्रजाः पतिं पृथुमेत्य आगत्याभ्यवोचन् ॥ ९ ॥ वयमिति ॥ हे राजन् यथा कोटरस्थेनाग्निना वृक्षास्तप्यन्ते तथा वयं जाठरेणाग्निनाभितप्तास्तच्छमकरस्यान्नादेरभावात् अतो यस्त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 नोऽस्माकं वृत्तिकरः जीविकाप्रदः पतिः सर्वतश्चोरादिभ्यः पालकश्च मुनिभिः साधितो वेनाङ्गमन्थनेन सम्पादितस्तं त्वां शरण्यं शरणार्हं शरणं याता आगताः स्मः ॥ १० ॥ तन्न
 इति ॥ हे नरदेवानां राज्ञां देव पूज्य तत्तस्माद्धेतोः उज्झितोर्जाः त्यक्तान्नाः सत्यो वयं यावन्न नङ्क्ष्यामहे । तङार्षः । ततः पूर्वमेव क्षुधार्दितानां नोऽस्माकम् अन्नं रातवे रातु
दातुं "तुमर्थे सेसेन्" इति तवेप्रत्ययश्छान्दसः । भवानीह तु यत्नं विधत्ताम् । तङभाव आर्षः । यतः किल त्वमेव वार्त्तायाः जीविकायाः पतिः सम्पादकः लोकपालः
सर्वतो रक्षकश्चासि ॥ ११ ॥ पृथुरिति ॥ हे कुरुश्रेष्ठ पृथुः प्रजानां करुणं दैन्यं निशम्य दृष्ट्वा परिदेवितं विलापं च श्रुत्वा कथमेवं भूतलं निरन्नमभूदिति दीर्घं चिरं दध्यौ
चिन्तयामास । तदा च स पृथुर्निमित्तं भूतलनिरन्नत्वस्य कारणं पृथिवीकृतसर्वौषधिबीजग्रासलक्षणमन्वपद्यत ज्ञातवान् ॥ १२ ॥ इतीति ॥ पृथिव्या ओषधिबीजानि ग्रस्तानि
इति बुद्ध्या व्यवसितो निश्चितवान्सन् त्रिपुरहा रुद्रो यथा क्रुद्धस्त्रिपुरहननार्थं विशिखसन्धानं कृतवांस्तथा प्रगृहीतं शरासनं येन क्रुद्धः सन् भूमेः भूमिं प्रति धनुषि विशिखं बाणं

तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेव देव ॥ यावन्न नङ्क्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ॥ ११ ॥ मैत्रेय उवाच ॥
पृथुः प्रजानां करुणं निशम्य परिदेवितम् ॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत ॥ १२ ॥ इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः ॥
संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा ॥ १३ ॥ प्रवेपमाना धरणी निशम्योदायुधं च तम् ॥ गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता
॥ १४ ॥ तामन्वधावत्तद्वैन्यः कुपितोऽत्यरुणेक्षणः ॥ शरं धनुषि संधाय यत्र यत्र पलायते ॥ १५ ॥ सा दिशो विदिशो देवी रोदसी चान्तरं
तयोः ॥ धावन्ती तत्र तत्रैनं ददर्शानूद्यतायुधम् ॥ १६ ॥ लोके नाविन्दत त्राणं वैन्यान्मृत्योरिव प्रजा ॥ त्रस्ता तदा निववृते हृदयेन विदूयता
॥ १७ ॥ उवाच च महाभागं धर्मज्ञाऽऽपन्नवत्सल ॥ त्राहि मामपि भूतानां पालनेऽवस्थितो भवान् ॥ १८ ॥

सन्दधे योजितवान् ॥ १३ ॥ प्रवेपमानेति ॥ उद्यतमायुधं येन स उदायुधस्तं तथाभूतं राजानं निशम्य दृष्ट्वा धरणी भीता अत एव प्रवेपमाना कम्पितगात्रा गौः सती मृगयुना
लुब्धकेन द्रुता अनुगता मृगीव अपाद्रवत् पलायत ॥ १४ ॥ तामिति ॥ तत्तदा यत्र यत्र भयेन भूमिः पलायते तत्र तत्र कुपितः अतिअरुणे ईक्षणे यस्य सः वैन्यः पृथुरपि धनुषि
शरं सन्धाय संयोज्य तामन्वधावत् ॥ १५ ॥ सेति ॥ सा च देवी भूमिः पूर्वाद्या दिशो विदिशः आग्नेय्यादिचतस्रो रोदसी द्यावापृथिव्यौ तयोरन्तरमन्तरिक्षं च धावन्ती तत्र तत्र
अनुपृष्ठदेशे उद्यतमायुधं बाणयुक्तं धनुर्येन तमेनं पृथुं ददर्श ॥ १६ ॥ लोक इति ॥ यथा मृत्योर्भीताः प्रजाः क्वापि शर्म न लभन्ते एवं पलायमाना भूमिर्यदा वैन्यात् सका-
शात् त्राणं रक्षकं लोके कुत्रापि नाविन्दत नालभत तदा विदूयता परितप्यमानेन शता आर्षः । हृदयेनोपलक्षिता सती निववृते पलायनान्निवृता पृथोरभिमुखी बभूव ॥ १७ ॥
उवाचेति ॥ भूमिः महाभागं पृथुम् उवाच । हे धर्मज्ञ हे आपन्नेषु शरणागतेषु वत्सल दयायुक्त त्वं मामपि त्राहि त्रायस्व । तङभावादिरार्षः । यतः भवान् भूतानां पालनेऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्थितोऽसि ॥ १८ ॥ स त्वमिति ॥ यो भूतानां पालनेऽवस्थितः स त्वं दीनामकृतकिल्बिषां निरपराधां कस्माद्धेतोर्जिघांससे हन्तुमिच्छसि । तङार्षः । यो भवान् धर्मज्ञ इति सर्वेषां सम्मतः स मां योषां स्त्रियं कथमहनिष्यत् हनिष्यति ॥ १९ ॥ प्रहरन्तीति ॥ हे राजन् वै निश्चितम् । कृतागस्स्वपि कृतापराधास्वपि स्त्रीषु जन्तवः साधारणा अपि प्राणिनो नैव प्रहरन्ति प्रहारं नैव कुर्वन्ति । त्वद्विधाः करुणाः कृपालवो दीनेषु वत्सलाः न प्रहरन्ति इत्यत्र किमुत वक्तव्यम् ॥ २० ॥ मामिति ॥ यत्र मयि विश्वं प्रतिष्ठितं स्थितं तां मामजरां दृढां नावं विपाट्य विदार्य अम्भसि जले इमाः प्रजाः आत्मानं च कथं धास्यसि धारयिष्यसि । मयि मृतायां गर्भोदे एव कथं धास्यसि चकारात् कृष्याद्यभावे प्रजाः कथं पोषयिष्यसि ॥ २१ ॥ वसुधे इति ॥ हे वसुधे मच्छासनपराङ्मुखीं त्वां वधिष्यामि । या भवती बर्हिषि यज्ञे देवतारूपेण भागम् आवृङ्क्ते संभजते गृह्णाति नोऽस्माकं वसु अन्नादिकं न तनोषि न विस्तारयसि ॥ २२ ॥ यवसमिति ॥ या गौरनुदिनं प्रतिदिनं यवसं तृणं जग्धि अत्ति ऊधसि भवमौधसं पयः दुग्धं

स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषाम् ॥ अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥ १९ ॥ प्रहरन्ति न वै स्त्रीषु कृतागःस्वपि जन्तवः ॥ किमुत त्वद्विधा राजन्करुणा दीनवत्सलाः ॥ २० ॥ मां विपाट्याऽजरां नावं यत्र विश्वं प्रतिष्ठितम् ॥ आत्मानं च प्रजाश्चेमाः कथमम्भसि धास्यसि ॥ २१ ॥ पृथुरुवाच ॥ वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीम् ॥ भागं बर्हिषि या वृङ्क्ते न तनोषि च नो वसु ॥ २२ ॥ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः ॥ तस्यामेवं हि दुष्टायां दण्डो नात्र न शस्यते ॥ २३ ॥ त्वं खल्वौषधिबीजानि प्राक् सृष्टानि स्वयंभुवा ॥ न मुञ्चस्यात्मरुद्धानि मामवज्ञाय मन्दधीः ॥ २४ ॥ अमूषां क्षुत्परीतानामार्तानां परिदेवितम् ॥ शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा ॥ २५ ॥ पुमान्योषिदुत क्लीब आत्मसंभावनोऽधमः ॥ भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः ॥ २६ ॥ त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः ॥ आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥ २७ ॥

नैव दोग्धि नैव मुञ्चति नैव ददाति । तस्यामेवमनेन प्रकारेण दुष्टायां गवि अत्रास्मिन्नपराधे दण्डो न शस्यते युक्तो न भवतीति न किं तु युक्तो भवत्येव ॥ २३ ॥ त्वमिति ॥ यतो यान्योषधिबीजानि अन्नादीनि प्राक् सृष्ट्यादौ स्वयंभुवा ब्रह्मणा लोकस्य जीवनहेतुत्वेन सृष्टानि तान्यात्मनि त्वद्देहे रुद्धानि मन्दधीस्त्वं मामीश्वरमवज्ञाय न विमुञ्चसि॥ २४ ॥ अमूषामिति॥ मद्बाणैर्भिन्नाया मृतायास्तव मेदसा मांसेनामूषां प्रजानां क्षुत्परीतानां क्षुधाव्याप्तानामत एवार्त्तानां परिदेवितं विलापं शमयिष्यामि ॥२५॥ पुमानिति ॥ पुमान् वा योषिद्वा क्लीबो वा य आत्मसंभावनः आत्मानं बहुमन्यते भूतेषु प्राणिषु निरनुक्रोशः दयारहितः दुःखोत्पादकः अत एवाधमस्तस्य वधो नृपाणामवध एव न दोषावहः ॥२६॥ त्वामिति ॥ त्वां मायागां मायया कपटेन गोरूपां नतु वस्तुतः टजभाव आर्षः । दुर्मदां दुष्टः परपीडाकरो मदो यस्यास्तामत एव स्तब्धामस्मदादिष्वप्यनम्रीं शरैस्तिलशस्तिलप्रमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णानि खण्डानि तथावस्थां नीत्वा आत्मनः स्वस्य मम योगः प्रभाव एव बलं तेनाहं प्रजाः अम्भसि धारयिष्यामि॥२७॥ एवमिति ॥ एवं निष्ठुरं वदन्तं मन्युमयीं क्रोधप्रचुरां मूर्तिं बिभ्रतं धारयन्तमत एव कृतान्तमिव मृत्युमिव भयङ्करमत एव भयेन सञ्जातो वेपथुः शरीरे कम्पो यस्याः सा तथा अत एव प्रणता प्रथमं कृतदण्डवत्प्रणामा ततश्च प्राञ्जलिः संहताञ्जलिः सती प्राह स्म तुष्टाव ॥२८॥ नम इति ॥ मायया विन्यस्ता धृता नाना घोरादितनवो येन गुणात्मने गुणमयत्वेन प्रतीयमानाय परस्मै पुरुषाय नमः । वस्तुतः स्वरूपस्य अनुभवेन निर्धूताः निरस्ताः द्रव्यक्रियाकारकाः शरीरेन्द्रियदेवताः तत्र यो विभ्रमस्तत्सङ्घाते मोहोऽहंप्रत्ययः तन्निमित्ता ऊर्मयो रागद्वेषकामक्रोधादयः क्षुत्पिपासादयो वा यस्मिंस्तस्मै नमः ॥ २९ ॥ येनेति ॥ येन धात्रा जगन्नाथेन अहं भूमिरात्मनां सर्वप्राणिनामायतनं स्थानं विनिर्मिता स्थानत्वेन सृष्टा अत एव यतो यस्यां मय्ययं गुणसर्गस्य जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्विधशरीरसमूहस्य सङ्ग्रहः स्थितिस्तां मां सर्वाधारभूतां मां स एव स्वराट् स्वतन्त्रः उद्यतायुधः सन् हन्तुमुप-

एवं मन्युमयीं मूर्तिं कृतान्तमिव बिभ्रतम् ॥ प्रणता प्राञ्जलिः प्राह मही संजातवेपथुः ॥ २८ ॥ धरोवाच ॥ नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ॥ नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥ २९ ॥ येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः ॥ स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ॥ ३० ॥ य एतदादावसृजच्चराचरं स्वमाययाऽऽत्माश्रययाऽवितर्क्यया ॥ तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ॥ ३१ ॥ नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाऽकृतात्मभिः ॥ न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ॥३२॥ सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ॥ तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ॥ ३३ ॥

स्थितस्ततोऽन्यं शरणं रक्षकं कमहमाश्रये ॥ ३० ॥ य इति ॥ य एव भगवान् आत्माश्रयया जीवविषयिण्या अवितर्क्यया अचिन्त्यया स्वमायया एतच्चराचरात्मकं विश्वमादावसृजत्सृष्टवान् किल निश्चये स एव तया निजशक्त्या माययैवायं पृथुस्वरूपः सन् स्वनिर्मितं विश्वं गोप्तुं रक्षितुमुद्यतः धर्मपरोऽपि विश्वाधारभूतां तत्रापि गोरूपां मां कथन्नु जिघांसति हन्तुमिच्छति ॥ ३१ ॥ नूनमिति ॥ नूनं निश्चये बताश्चर्ये दुर्जयया तन्मायया अकृतात्माभिः विक्षिप्तचित्तैर्जनैः ईशस्य समीहितं चेष्टितं न लक्ष्यते यः ईश्वरः स्वतन्त्रः प्रथमं ब्रह्माणमकरोत् ततश्च तद्द्वारा विश्वमकारयत् । यः स्वतः एकः परतः मायातः अनेकश्च ॥ ३२ ॥ सर्गादीति ॥ द्रव्याणि महाभूतानि क्रिया इन्द्रियाणि कारकाः देवाः चेतना बुद्धिः आत्माहङ्कारस्तैर्द्रव्यादिभिः स्वशक्तिभिर्योऽस्य विश्वस्य सर्गादि सृष्टिस्थितिभङ्गमनुरुणद्धि करोति तस्मै यथाकालं सन्नद्धाः समुत्कटा निरुद्धाश्च बन्धमोक्षहेतुभूताः विद्याऽविद्या धर्माधर्मादिरूपाः शक्तयो यस्य तस्मै वेधसेन्तर्यामिणे परस्मै पुरुषाय नमः । यद्वा । द्रव्यक्रियेत्यादिभिः समुन्नद्धा इत्यादि ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स वा इति ॥ हे विभो हे अज यः पूर्वं सृष्टवान् स एव भवान् आत्मना स्वेन विनिर्मितं भूतेन्द्रियान्तःकरणात्मकं जगत्संस्थापयिष्यन् सम्यक् स्थापयितुमादिसूकरः मत्स्वामी आदिवाराहमूर्तिः सन् मां रसातलादम्भसश्चाभ्युज्जहार उन्नीतवान् ॥ ३४ ॥ अपामिति ॥ स एव धराधरो मत्स्वामी वराहमूर्तिर्भवान् अपामुपस्थे जलस्योपरि मयि नावि आधारभूतायामवस्थिताः प्रजा रिरक्षिषुः रक्षितुमिच्छुः सन्नद्य वीरमूर्तिः पृथुरूपः समभूत् प्रादुर्भूतः । यः सर्वरक्षार्थमवतीर्णः स एवोग्रशरः सन् मां स्वभार्यां सर्वाधारभूतां स्वस्थापितां पयसि जलरूपे अल्पे निमित्ते जिघांसति तदाश्चर्यम् । अयमर्थः । इमाः प्रजाः मदपत्यान्येव तानि नित्यमहं पयः पाययाम्येव । साम्प्रतं दुर्वृत्तानेतान् शीलशिक्षणाय माताप्यहं क्रुद्धा पयो न पाययामि अतस्त्वं गृहपतिर्मां ताडयसीति ॥ ३५ ॥ नूनमिति ॥ तस्येश्वरस्य गुणसर्गरूपया मायया मोहितं चित्तमेव वर्त्म येषां तैः अस्मद्विधैरल्पज्ञैर्जनैः ईश्वराणां हरिभक्तानामेव ईहितं न ज्ञायते किं पुनस्तस्य परमेश्वरस्य । अतः वीराणां जितेन्द्रियाणां दयावीराणामित्यन्ये । यशः कुर्वन्ति

स वै भवानात्मविनिर्मितं जगद्भूतेन्द्रियान्तःकरणात्मकं विभो ॥ संस्थापयिष्यन्नज मां रसातलादभ्युज्जहाराम्भस आदिसूकरः ॥ ३४ ॥ अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल ॥ स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांसति ॥ ३५ ॥ नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ॥३६॥ इति श्रीभागवते चतुर्थस्कन्धे पृथुविजये धरित्रीनिग्रहो नाम सप्तदशोऽध्यायः ॥ १७ ॥ मैत्रेय उवाच ॥ इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम् ॥ पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥ १ ॥ संनियच्छामि भो मन्युं निबोध श्रावितं च मे ॥ सर्वतः सारमादत्ते यथा मधुकरो बुधः ॥ २ ॥ अस्मिँल्लोकेऽथ वामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः ॥ दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये ॥ ३ ॥

तेभ्यः ईश्वरेभ्यो नमोऽस्तु । यथा वीराणां यशो वर्द्धेत तथा भवान् चेष्टतां नतु यथेष्टमिति भावः ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य व्याख्यां सप्तदशे व्यधात् ॥ १७ ॥ अष्टादशे मही दुग्धा वत्सैः पृथ्वादिभिः क्रमात् ॥ स्वे स्वे पात्रे स्वस्वदुग्धं तत्र श्लोका भुजैस्त्रयः ॥ अनुष्टुभोऽपि तावन्त्यै उवाचेत्येकसंख्यकम् ॥१८॥ इत्थमिति ॥ रुषा क्रोधेन प्रस्फुरितोऽधरो यस्य तं पृथुमित्थं वर्णितप्रकारेणाभिष्टूय स्तुत्वापि दैर्घ्यमार्षं ततस्तुगभावः । तस्य क्रोधशान्तिमदृष्ट्वा भीतावनिरात्मानं मनः आत्मना बुद्ध्या संस्तभ्य धैर्ययुक्तं कृत्वा पुनराह स्म ॥ १ ॥ सन्नियच्छेति ॥ हे आभि भो प्रभो यद्वा भो देव आभि अभयं यथा स्यात्तथा मन्युं क्रोधं संनियच्छ संहर । मे मया श्रावितं विज्ञापितं च निबोध अवधारय । मधुकरो भ्रमरो यथा पुष्पेभ्यः सारं मधु गृह्णाति तथा लोके बुधो हि सर्वतः सतोऽसतो वा सारं स्वकार्यानुकूलमादत्ते गृह्णाति न तद्दोषान् पश्यति । अतो मद्वाचि सारश्चेद्गृहाण नान्यथा ॥ २ ॥ गवां दुग्धपूर्णादप्यापीनाद्दोहनरूपोपायेनैव दुग्धं लभ्यते न तु विदारणादत उपायेनैवान्नानि गृह्णा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेति वक्तुमुपायस्य प्रामाण्यं दर्शयति—अस्मिन्निति ॥ पुंसां श्रेयसः फलस्य प्रसिद्धये प्राप्तये अस्मिन् लोके कृष्यादयः अथवा अमुष्मिन् परलोके यज्ञादयः तत्वदर्शिभिर्मुनिभिः योगा उपायाः दृष्टाः शास्त्रतो निश्चिताः लोके प्रचारार्थं प्रयुक्ताः अनुष्ठिताश्च ॥ ३ ॥ तानिति ॥ अवरः इदानींतनोऽपि यः श्रद्धयोपेतः श्रद्धावांस्तान् पूर्वमुनिभिः प्रदर्शितानुपायान् सम्यगातिष्ठति अनुतिष्ठति सोऽञ्जसा अनायासेनोपेयान् फलानि विन्दति ॥ ४ ॥ तानिति॥ यः अविद्वान् यद्वा यो विद्वान् जानन्नपि तानुपायाननादृत्य स्वयं स्वेच्छया कल्पितान् अर्थान् उपायान् आरभते अनुतिष्ठति तस्य तेऽर्थाः पुनः पुनरारब्धा अपि व्यभिचरन्ति फलं न साधयन्ति ॥ ५ ॥ पुरेति ॥ हे विशांपते राजन् लोकयात्रार्थं यज्ञाद्यर्थं च याः हि पुरा सृष्ट्यादौ ओषधयो व्रीहियवादयो ब्रह्मणा सृष्टा उत्पादितास्ता असद्भिर्दुराचारैः अधृतव्रतैः शास्त्राचारापेतैर्भुज्यमाना मया दृष्टाः ॥ ६ ॥ वेनं मनसि कृत्य तत्पुत्रे पृथौ उपालम्भः—अपालिता इति ॥ भवद्भिर्लोकपालकैरिति सामान्यराजाभिप्रायेण बहुत्वम् । चोराद्यनिवारणेन कृष्याद्यप्रवर्त्तनेन चापा-

तानातिष्ठति यः सम्यगुपायान्पूर्वदर्शितान् ॥ अवरः श्रद्धयोपेत उपेयान्विन्दतेऽञ्जसा ॥४॥ताननादृत्य यो विद्वानर्थानारभते स्वयम् ॥
तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः ॥ ५ ॥ पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते ॥ भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ॥ ६ ॥ अपालिताऽनादृता च भवद्भिर्लोकपालकैः ॥ चौरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमौषधीः ॥ ७ ॥ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा ॥ तत्र योगेन दृष्टेन भवानादातुमर्हति ॥ ८ ॥ वत्सं कल्पय मे वीर येनाहं वत्सला तव ॥ धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोहनम् ॥ ९ ॥ दोग्धारं च महाबाहो भूतानां भूतभावन ॥ अन्नमीप्सितमूर्जस्वद्भगवान्वाञ्छते यदि ॥ १० ॥ समां च कुरु मां राजन्देववृष्टं यथा पयः ॥ अपर्त्तावपि भद्रं त उपावर्तेत मे विभो ॥ ११ ॥

लिता यज्ञाद्यप्रवर्त्तनेनानादृता चाहमथात एव लोके चौरीभूते सति यज्ञार्थे यदि कश्चिद्धर्मात्मा त्वादृशो राजाऽभविष्यत्तदा पुनर्यज्ञप्रवृत्तिरभविष्यदित्याशयेनाहमौषधीरग्रस ङ्गिलितवती । तङ्भाव आर्षः । अन्यथा अधृतव्रतैर्भुक्ता न प्रसोष्यन्ति ततश्च यज्ञादयो न प्रवर्त्तेरन्नित्याशयः ॥७॥ नूनमिति ॥ ता वीरुधः ओषधयो भूयसा महता कालेन मयि नूनं क्षीणाः लीनाः जीर्णाश्च सूक्ष्मतया स्थिता वा तत्र तत्प्राप्तौ दृष्टेन प्रसिद्धेन योगेन उपायेन भवांस्ताः मत्त आदातुं स्वीकर्तुमर्हति ॥ ८ ॥ वत्समिति द्वयम् ॥ हे वीर हे महाबाहो हे भूतानां भावन पालक यदि भगवान् भवान् भूतानामीप्सितमूर्जस्वत् बलसम्पादकमन्नं वाञ्छते इच्छति । तङार्षः । तदा मे गोरूपाया वत्सं कल्पय सम्पादय । तथा दोग्धारं च कल्पय । येन हेतुना वत्सला वत्सवती अहं क्षीरमयान् क्षीरस्थानापन्नांस्तव कामानन्नादीन् पदार्थान्धोक्ष्ये प्रपूरयिष्यामि ॥ ९ ॥ १० ॥ समामिति ॥ हे राजन् हे विभो देवेन इन्द्रेण वृष्टं पयो जलमपर्त्तावपि वर्षर्त्तावपगतेऽपि यथा मे ममोपरि उपावर्त्तेत सर्वत्र वर्त्तेत तथा मां समां च कुरु तेन सर्वत्र कृष्यादिसम्पत्तिः स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन ते भद्रं भविष्यति ॥ ११ ॥ इतीति ॥ इत्येवं प्रियं हितं च भुवो वाक्यमादाय अङ्गीकृत्य भूपतिः पृथुः स्वगणमुख्यं मनुं वत्सं कृत्वा पाणौ पात्रे सकलौषधीः व्रीहियवादीन्यन्नान्यदुहत् अधुक्षत् । च्लेरङ् आर्षः ॥ १२ ॥ तथेति ॥ यथा सारत्वेन भूमिवाक्यं पृथुना गृहीतं तथा अपरेऽपि ये बुधास्ते सर्वत्र सारमेव दोषमुपेक्ष्य गुणमेवाददते स्वीकुर्वन्ति । वेनराज्ये अराजके च धर्मलोपात्सर्वेषामपि नष्टं वस्तु सर्वं एव पुनः प्रापुरित्याशयः । ततः पृथुदोहनानन्तरं पृथुना भावितां सर्वेषां सर्वमहं दास्यामीति स्वीकारकरणेन वशीकृतां भूमिमन्येऽपि ऋष्यादयः पञ्चदश यथाकामं यथेष्टं दुदुहुः ॥१३॥ ऋषय इति ॥ हे सत्तम अथ बृहस्पतिं वत्सं कृत्वा वाङ्मनःश्रोत्रेन्द्रियैर्वेदग्रहणात्तेष्विन्द्रियेषु पात्रेषु शुचि पवित्रं छन्दोमयं वेदरूपं पयो देवीं भूमिमृषयो दुदुहुः दुहिर्द्विकर्मकः॥१४॥ कृत्वेति ॥ सुरगणा देवगणाः स्वगणमुख्यमिन्द्रं वत्सं कृत्वा हिरण्मयेन पात्रेण वीर्यम् ओजो बलं मन इन्द्रियदेहशक्तिकारणभूतं सोमममृतमेव पयः अदूदुहन् दुदुहुः ॥ १५ ॥ दैतेया इति ॥ दैतेयाः दितिवंश्याः

इति प्रियं हितं वाक्यं भुव आदाय भूपतिः ॥ वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ॥ १२ ॥ तथापरे च सर्वत्र सारमाददते बुधाः ॥
ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥ १३ ॥ ऋषयो दुदुहुर्देवीमिन्द्रियेष्वथ सत्तम ॥ वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि ॥ १४ ॥ कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन् ॥ हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥ १५ ॥ दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् ॥ विधायादूदुहन्क्षीरमयःपात्रे सुराऽऽसवम् ॥ १६ ॥ गन्धर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः ॥ वत्सं विश्वावसुं कृत्वा गान्धर्वं मधु सौभगम् ॥ १७ ॥ वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत ॥ आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥ १८ ॥ प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीम् ॥ सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥ १९ ॥ अन्ये च मायिनो मायामन्तर्द्धानाद्भुतात्मनाम् ॥ मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम् ॥ २० ॥

दानवा दनुवंशजाः असुरर्षभमसुरश्रेष्ठं स्वगणमुख्यं प्रह्लादं वत्सं विधाय कृत्वा अयःपात्रे लोहपात्रे सुरां मदिरामासवं तालादिमद्यं च सुरैव आसवो मादकद्रव्यं तम् इति वा क्षीरमदूदुहन् ॥ १६ ॥ गन्धर्वेति ॥ गन्धर्वा अप्सरसश्च स्वगणमुख्यं विश्वावसुं वत्सं कृत्वा पद्ममये पात्रे गान्धर्वं गन्धर्वाणां सत्कारकारणं मधु वाङ्माधुर्यं तथा सौभगं सौन्दर्यं च पयोऽधुक्षन् ॥ १७ ॥ वत्सेनेति ॥ महाभागाः श्राद्धदेवताः पितरोऽपि स्वगणमुख्येनार्यम्णा वत्सेन आमपात्रे अपक्वे मृन्मये पात्रे श्रद्धया कव्यं पितॄणामन्नलक्षणं क्षीरमधुक्षत ॥ १८ ॥ प्रकल्प्येति ॥ सिद्धाः कपिलं वत्सं प्रकल्प्य संकल्पनामयीं संकल्पनमात्रेण प्रभवामणिमादिलक्षणां सिद्धिं नभसि आकाशलक्षणे पात्रे दुदुहुरिति शेषः । तथा ये च विद्याधरादयस्तेऽपि तं कपिलमेव वत्सं प्रकल्प्य नभस्येव पात्रे विद्यामन्तर्द्धानखेचरत्वादिरूपां दुदुहुः ॥ १९ ॥ अन्ये चेति ॥ ये चान्ये मायिनः किंपुरुषादयस्तेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयं वत्सं प्रकल्प्य नभस्येव पात्रे अन्तर्द्धानेनाद्भुत आत्मा येषां तेषां संबन्धिनीं धारणामयीं धारणाप्रभवामन्तर्द्धानशक्तिं मायां दुदुहुः ॥ २० ॥ यक्षेति ॥ भूतेशो रुद्रो वत्सो येषां ते पिशिताशनाः मांसाहाराः यक्षाः रक्षांसि भूतानि पिशाचाश्च मनुष्यकपाले पात्रे क्षतजं रुधिरमेवासवं मादकं दुदुहुः ॥ २१ ॥ तथेति ॥ तथा अहयो निष्फणाः दन्दशूकाः वृश्चिकादयः सर्पाः सफणाः त एव कद्रूसन्ततिजा नागाः तक्षकं स्वगणमुख्यं वत्सं विधाय बिलं मुखमेव पात्रं तस्मिन् विषं पयो दुदुहुः ॥ २२ ॥ पशव इति सार्द्धम् ॥ पशवो गवाश्वादयो गोवृषं रुद्रवाहं वृषभं वत्सं कृत्वा अरण्ये पात्रे यवसं तृणं क्षीरमधुक्षन् दुदुहुः । दंष्ट्रिणः उन्नतदंष्ट्रावन्तः क्रव्यादाः मांसभक्षिणः प्राणिनो व्याघ्रादयो मृगेन्द्रेण सिंहेन वत्सेन स्वकलेवरे पात्रे क्रव्यं मांसमेव क्षीरं दुदुहुः ॥ २३ ॥ सुपर्णेति अर्द्धम् ॥ विहगाः पक्षिणः सुपर्णवत्साः सुपर्णं गरुडं वत्सं कृत्वा स्वकलेवरे एव पात्रे चरं कीटादि अचरं फलादि च तदेव स्वभोज्यं क्षीरं दुदुहुः ॥ २४ ॥ वटेति ॥ वनस्पतयो वटाख्या वटो वत्सो येषां तादृशाः सन्तः अत्राक्षराधिक्यम् ।

यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः ॥ भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥ २१ ॥ तथाऽहयो दन्दशूकाः सर्पा नागाश्च तक्षकम् ॥ विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः ॥ २२ ॥ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् ॥ अरण्यपात्रे चाधुक्षन्मृगेन्द्रेण च दंष्ट्रिणः ॥ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ॥ २३ ॥ सुपर्णवत्सा विहगाश्चरं वाऽचरमेव च ॥ २४ ॥ वटवत्सा वनस्पतयः पृथग्रसमयं पयः ॥ गिरयो हिमवद्वत्सा नानाधातून्स्वसानुषु ॥ २५ ॥ सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक्पयः ॥ सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥ २६ ॥ एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः ॥ दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ॥ २७ ॥ ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः ॥ दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः ॥ २८ ॥

वनस्पत्य इति पाठे यणार्षः । पृथङ्नानारसमयं पयः दुदुहुः । गिरयः हिमवद्वत्सा हिमवन्तं वत्सं कृत्वा स्वसानुषु पात्रेषु नानाधातून् स्वर्णमण्यादिलक्षणान् गैरिकादिरूपांश्च दुदुहुः ॥ २५ ॥ अनुक्तसङ्ग्रहायाह—सर्व इति ॥ अन्येऽपि सर्वे स्वगणे यो मुख्यस्तेन वत्सेन स्वे स्वे पात्रे पृथक् पृथक् पयः पृथुना भावितां वशीकृतां सर्वकामदुघां पृथ्वीं दुदुहुः ॥ २६ ॥ एवमिति ॥ हे कुरूद्वह एवमन्नादाः अद्यत इत्यन्नमिति व्युत्पत्त्या स्वस्वभोज्यानां तत्तदन्नत्वात्तदत्तारः पृथ्वादयः दोहवत्सदोग्धृभेदेन आत्मनः सुष्ठु अभीष्टमन्नमदनक्रियासाधनं छन्दोविद्यादीनामपि तत्साधनत्वादन्नत्वं तदेव क्षीरभेदं क्षीरविशेषं दुदुहुः ॥ २७ ॥ तत इति ॥ ततः प्रजाकामपूरणात्प्रीतः दुहितृवत्सलः महीपतिः पृथुः सर्वकामदुघाम् इमां पृथ्वीं प्रेम्णा दुहितृत्वे चकार । स्वहस्तेनैवान्नमयदुग्धग्रहणात्स्त्रीभावो नोचितः । शरहस्तेन दण्डोद्यमनान्मातृभावोऽप्यनुचितः परिशेषात्तस्या वात्सल्योदयाच्च दुहितृभाव एव रसावह इति ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चूर्णयन्निति ॥ राजराट् राज्ञामपि राजा विभुः समर्थः वैन्यः पृथुः स्वधनुषः कोट्या अग्रेण गिरीणां कूटानि शृङ्गाणि चूर्णयन्निदं भूमण्डलं प्रायः समं चक्रे । अधुनाप्युच्चनीचत्वस्य कचिद्दर्शनात्प्राय इति ॥ २९ ॥ अथेति ॥ अथ प्रजानां वृत्तिदः जीविकाप्रदः पिता च भगवान् वैन्यः अस्मिन् भूमण्डले यथार्हतः यथायोग्यं तत्र तत्र निवासान् कल्पयांचक्रे ॥ ३० ॥ तानाह—ग्रामानिति ॥ ग्रामान् हट्टादिशून्यान् पुरो हट्टादिमतीः पत्तनानि महतीः पुरः विविधानि औदकपार्वतादिभेदभिन्नानि दुर्गाणि प्रवेशप्रतिबन्धकस्थानानि घोषान् आभीराणां निवासान् व्रजान् गवां निवासान् शिबिरं सेनानिवासस्थानं तत्सहितान् आकरान् स्वर्णादिस्थानानि खेटाः कर्षकग्रामाः खर्वटाः पर्वतप्रान्तग्रामास्तांश्च ॥ ३१ ॥ प्रागिति ॥ पृथोः प्राक् पूर्वमेषां पुरग्रामादीनां कल्पना रचना नैवासीत् । यतस्तदा प्रजाः तत्र तत्र अभीष्टस्थाने अकुतोभया निर्भयाः सत्यो यथासुखं वसन्ति स्म । यद्वा । पृथुसमये ग्रामादिकल्पनया तत्र तत्र ग्रामादिषु यथासुखं वसन्ति स्म ॥ ३२ ॥ इति श्रीकृष्णसेवार्थमान्वितार्थप्रकाशिकाम् ॥ गङ्गासहाय-

चूर्णयन्स्वधनुष्कोट्या गिरिकूटानि राजराट् ॥ भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥ २९ ॥ अथास्मिन्भगवान्वैन्यः प्रजानां वृत्तिदः पिता ॥ निवासान्कल्पयांचक्रे तत्र तत्र यथार्हतः ॥ ३० ॥ ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च ॥ घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान् ॥ ३१ ॥ प्राक् पृथोरिह नैवैषा पुरग्रामादिकल्पना ॥ यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः ॥ ३२ ॥ इति श्रीभागवते पृथुविजये पृथुना पृथिवीदोहनवर्णनं नामाऽष्टादशोऽध्यायः ॥ १८ ॥ मैत्रेय उवाच ॥ अथादीक्षत राजा तु हयमेधशतेन सः ॥ ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥ १ ॥ तदभिप्रेत्य भगवान्कर्मातिशयमात्मनः ॥ शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ॥ २ ॥ यत्र यज्ञपतिः साक्षाद्भगवान्हरिरीश्वरः ॥ अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥ ३ ॥ अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः ॥ उपगीयमानो गन्धर्वैर्मुनिभिश्चाप्सरोगणैः ॥ ४ ॥

स्तुर्यस्य स्कन्धस्याष्टादशे व्यधात् ॥ १८ ॥ ऊनविंशेऽश्वमेधाश्वहरं घ्नन् वज्रिणं पृथुः ॥ अवारि वेधसा तत्र श्लोका नवत्यैनैवार्द्धयः ॥ उवाचेति द्वयं साङ्क्रिकृतवेर्दौ अनुष्टुभः ॥ १९ ॥ अथेति ॥ तुरप्यर्थे । अथ राजा पृथुरपि यत्र सरस्वती नदी प्राची प्राग्वाहिनी अस्ति तस्मिन्मनोः क्षेत्रे मनोर्यज्ञानुष्ठानदेशे ब्रह्मावर्त्ते तन्नाम्नि हयमेधशतेन निमित्तेन अदीक्षत शताश्वमेधसङ्कल्पमकरोत् । "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥" ॥ १ ॥ तदिति ॥ भगवान् शतक्रतुस्तदानींतन इन्द्रो यज्ञाख्यः आत्मनः कर्मातिशेत इत्यतिशयम् अभिप्रेत्य ज्ञात्वा तत् तं पृथोर्यज्ञमहोत्सवं न ममृषे न सेहे ॥ २ ॥ यत्रेति द्वयम् ॥ यत्र पृथुयज्ञे यज्ञपतिः ईश्वरः सर्वस्यात्मा सर्वलोकगुरुः प्रभुः ब्रह्मशर्वाभ्यामन्वितः सहितः तथा सहानुगैः अनुगच्छन्तीत्यनुगा गन्धर्वादयस्तत्सहितैर्लोकपालैर्वह्नीन्द्रोपेन्द्रवरुणादिभिरन्वितः गन्धर्वैर्मुनिभिश्चा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्सरसां गणैश्चोपगीयमानो भगवान् हरिः साक्षादन्वभूयत प्रत्यक्षतोऽदृश्यत ॥ ३ ॥ ४ ॥ सिद्धेति द्वयम् ॥ तथा सिद्धाः विद्याधराः दैत्या दितिकुलोद्भवाः दानवाः दनुकुलप्रसूताः गुह्यका यक्षाः आदिपदेन किन्नरकिंपुरुषादीनां ग्रहणम् । तथा सुनन्दनन्दौ प्रमुखौ मुख्यौ येषां ते हरेः पार्षदप्रवराश्च कपिलो नारदो दत्तः सनकादयो योगेशाः । ये च तस्य सेवने उत्सुका उत्साहवन्तो भागवता भक्तास्ते सर्वे तं भगवन्तमन्वीयुः अनुजग्मुः ॥ ५ ॥ ६ ॥ यत्रेति ॥ हे भारत यत्र यज्ञे भूमिः सर्वकामदुघा अतः धर्मदुघा धर्मसाधनानां पदार्थानां दोग्ध्री सती धेनुः सतीति स्वामिपादाः । यजमानस्य पृथोरभीप्सितानर्थान् दोग्धि स्म पूरयामास ॥ ७ ॥ ऊहुरिति ॥ नद्यः सर्वरसान् इक्षुद्राक्षादिरसान् क्षीरं दधि अन्नं गोरसः घृतं तक्रं च ऊहुः वहन्ति स्म । तथा तरवः भूरिवर्ष्माणः विस्तृतशरीराः सन्तः मधूनां च्युत् क्षरणं येषां ते मधुच्युतः सन्तः प्रासूयन्त फलन्ति स्म ॥ ८ ॥ सिन्धव इति ॥ सिन्धवो रत्ननिकरान् प्रासूयन्त । अपि च गिरयः चतुर्विधं भक्ष्यं लेह्यं चूष्यं च अन्नं प्रासूयन्त । तथा सर्वे सपालका लोका

सिद्धविद्याधरा दैत्या दानवा गुह्यकादयः ॥ सुनन्दनन्दप्रमुखाः पार्षदप्रवरा हरेः ॥ ५ ॥ कपिलो नारदो दत्तो योगेशाः सनकादयः ॥
तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥ ६ ॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ॥ दोग्धि स्माभीप्सितानर्थान्यजमानस्य भारत ॥७॥
ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् ॥ तरवो भूरिवर्ष्माणः प्रासूयन्त मधुच्युतः ॥ ८ ॥ सिन्धवो रत्ननिकरान्गिरयोऽन्नं चतुर्विधम् ॥ उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ॥ ९ ॥ इति चाधोक्षजेशस्य पृथोस्तु परमोदयम् ॥ असूयन्भगवानिन्द्रः प्रतिघातमचीकरत् ॥ १० ॥
चरमेणाऽश्वमेधेन यजमाने यजुष्पतिम् ॥ वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ॥ ११ ॥ तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा ॥ आमुक्तमिव पाखण्डं योऽधर्मे धर्मविभ्रमः ॥ १२ ॥ अत्रिणा चोदितो हन्तुं पृथुपुत्रो महारथः ॥ अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ १३ ॥

उपायनं स्वस्वसाधनानुरूपं देयं वस्तु उपाजह्रुः निवेदितवन्तः ॥ ९ ॥ इतीति ॥ इति वर्णितप्रकारकं परम उदयोऽभिवृद्धिर्यस्मिंस्तत् अधोक्षज ईशो नाथो यस्य तस्य पृथोः कर्म पृथोस्तदिति च पाठः । भगवान् इन्द्रः असूयन् असहमानस्तस्य प्रतिघातं विघ्नमचीकरत् चकार ॥ १० ॥ चरमेणेति ॥ चरमेणान्तिमेनाश्वमेधेन यजुष्पतिं भगवन्तं वैन्ये यजमाने पूजयति सति स्पर्द्धन् स्पर्द्धमानः । आर्षः शता । इन्द्रस्तिरोहितः सन् यज्ञपशुं यज्ञियमश्वमपोवाह अपहृतवान् ॥ ११ ॥ तमिति ॥ यः अधर्मे धर्मोऽयम् इति विभ्रमो जनानां भ्रान्तिकरः । यद्वा । धर्म इति विशिष्टो भ्रमो यतः स एव यः तं पाखण्डं पाखण्डवेषं कवचमिव आमुक्तं गृहीतवन्तम् "आमुक्तः प्रतिमुक्तश्च" इति कवचितनामस्वमरः । विहायसा आकाशमार्गेण त्वरमाणम् ईक्षणभीत्या त्वरया गच्छन्तं तम् इन्द्रं भगवान् अत्रिः ऐक्षत् ऐक्षत । तङभाव आर्षः ॥ १२ ॥ अत्रिणेति ॥ तदा अत्रिणा तमिन्द्रं हन्तुं चोदितः महारथः पृथुपुत्रः संक्रुद्धः संरतं धावन्तमन्वधावत । तिष्ठ तिष्ठेति चाब्रवीत् तमाकारितवांश्च ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ जटिलं मस्तके जटावन्तं भस्मना छन्नमवगुण्ठितं तादृशाकृतिं तमिन्द्रं वीक्ष्य पृथुपुत्रः शरीरिणं मूर्तिमन्तं धर्ममेव मेने । श्रीशिवादिषु तथा दर्शनादयमपि कश्चिद्धर्मप्रकारो भवेदिति सम्भावनया तस्मै बाणं न मुञ्चति स्म ॥ १४ ॥ वधादिति ॥ धर्मात्मत्वबुद्ध्या तद्वधान्निवृत्तं तं पृथुपुत्रं हन्तवे त हन्तुम् " तुमर्थेसेसेत् " इति तवे- छान्दसः । भूयः पुनरत्रिरचोदयत् । हे तात अश्वहरणेन यज्ञहनं यज्ञं हतवन्तं विबुधाधमं महेन्द्रमेव जहि मारय ॥ १५ ॥ एवमिति ॥ एवमत्रिणा प्रोक्तः पुनः प्रेरितो वैन्यस्य पृथोः पुत्रः अभिक्रुद्धः संस्तं विहायसा त्वरमाणं रावणं गृध्रराट् जटायुरिव अन्वद्रवत् ॥ १६ ॥ स इति ॥ स स्वराट् इन्द्रः तद्रूपं पाखण्डवेषं हित्वा तस्मै तदर्थं पृथुपुत्रार्थम् । यद्वा । तस्मै तं पृथुपुत्रमन्तर्द्धानविद्यां शिक्षयितुमित्यग्रिमग्रन्थदृष्ट्या व्याख्येयम् । अश्वं च हित्वा त्यक्त्वा अन्तर्हितः तिरोहितो जातः वीरः पृथुपुत्रः स्वपशुमादाय अश्वं गृहीत्वा पितुर्यज्ञमुपेयिवान् आगतः ॥ १७ ॥ तदिति ॥ हे प्रभो तस्य पृथुपुत्रस्य तत् इन्द्रमभिभूयाश्वानयनरूपमद्भुतं कर्म विचक्ष्य दृष्ट्वा परमर्षयः

तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणम् ॥ जटिलं भस्मना च्छन्नं तस्मै बाणं न मुञ्चति ॥१४॥ वधान्निवृत्तं तं भूयो हन्तवेऽत्रिरचोदयत् ॥
जहि यज्ञहनं तात महेन्द्रं विबुधाधमम् ॥ १५ ॥ एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा ॥ अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव ॥ १६ ॥
सोऽश्वं रूपं च तद्धित्वा तस्मा अन्तर्हितः स्वराट् ॥ वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥ १७ ॥ तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः ॥ नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ॥ १८ ॥ उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः ॥ चषालयूपतश्छन्नो हिरण्यरशनं विभुः ॥ १९ ॥ अत्रिः संदर्शयामास त्वरमाणं विहायसा ॥ कपालखट्वाङ्गधरं वीरो नैनमबाधत ॥२०॥ अत्रिणा चोदितस्तस्मै संदधे विशिखं रुषा ॥
सोऽश्वं रूपं च तद्धित्वा तस्थावन्तर्हितः स्वराट् ॥ २१ ॥

प्रसन्नाः सन्तस्तस्मै पृथुपुत्राय विजिताश्व इति नामधेयं ददुः ॥ १८ ॥ उपसृज्येति ॥ विभुः हरिरिन्द्रस्तीव्रं घनं तमः उपसृज्य सृष्ट्वा तेन च्छन्नः सन् हिरण्यरचिता रशना यस्य तमश्वं चषालो नाम यूपाग्रे निक्षिप्तः काष्ठकटकस्तद्युक्तो यूपश्चषालयूपस्तस्मात्पुनर्जहार हृतवान् । रशनाया दृढत्वेन तच्छेदाशक्त्या रशनासहितमेव नीतवानित्याहुः ॥ १९ ॥ अत्रिरिति ॥ पुनश्चाश्वं हृत्वा विहायसाकाशमार्गेण त्वरमाणं त्वरया गच्छन्तमिन्द्रमत्रिः पृथुपुत्राय संदर्शयामास । तदा च कपालखट्वाङ्गधरं दृष्ट्वा धर्मात्मानं मत्वा वीरः पृथुपुत्र एनमिन्द्रं न अबाधत न पीडितवान् । अधावतेत्यपि पाठः ॥ २० ॥ अत्रिणेति ॥ ततः नायं धर्मात्मा किन्त्विन्द्र एवात एनं जहीत्यत्रिणा चोदितस्तस्मै तमिन्द्रं हन्तुं रुषा क्रोधेन विशिखं बाणं धनुषि सन्दधे योजितवान् । स इन्द्रो यतः स्वराट् यथेष्टरूपग्रहणान्तर्धानादौ समर्थस्ततोऽश्वं तद्रूपं पाखण्डवेषं च हित्वान्तर्हितः संस्तस्थौ स्थितः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीर इति ॥ अथ वीरः पृथुपुत्रोऽश्वमुपादाय गृहीत्वा पितृयज्ञमाव्रजत् आगतः । तदवद्यं निन्दितं हरेः इन्द्रस्य गृहीतं विसृष्टं च रूपं ज्ञानदुर्बलाः ज्ञानसाधने असमर्थाः मन्दमतयो जगृहुः पृथुपुत्रेण अवधात्स्वेषामवध्यत्वमभिमन्यमानाः यज्ञादिविरुद्धमतप्रवर्त्तकं स्वसंप्रदायं रचयित्वा क्षुद्रसिद्धीरन्तर्धानादिकाः साध्यत्वेन निरचैषुरित्यर्थः॥२२॥ यानीति ॥ यानि रूपाणि हयजिहीर्षया हयस्य हरणेच्छया इन्द्रो जगृहे गृहीतवान् तानि पापस्य खण्डानि ज्ञेयानि । इह शास्त्रे खण्डं खण्डशब्दवाच्यं लिङ्गं चिह्नमुच्यते । तथा च पापस्य खण्डं पाखण्डमिति व्युत्पत्तिर्दर्शिता ॥ २३ ॥ तत्प्रभृतिपाखण्डमार्गाः प्रवृत्ता इत्याह—एवमिति द्वयम् ॥ वैन्ययज्ञस्य जिघांसया हननेच्छया इन्द्रे एवं वारं वारमश्वं हरति सति तद्गृहीतविसृष्टेषु तेनेन्द्रेण गृहीतेषु पुनर्विसृष्टेषु त्यक्तेषु उपधर्मेषु पाखण्डवेषेषु पेशलेषु चतुरेषु वाग्मिषु तर्ककुशलेषुं च नग्नरक्तपटादिषु जैनबौद्धादिषु आदिना कापालिकादिषु प्रायेण भ्रान्त्या धर्मोऽयमिति नृणां मतिः सज्जते ॥ २४ ॥ २५ ॥ तदिति ॥ तदिन्द्रस्य कर्म अभिज्ञाय ज्ञात्वा कुपितः पृथुपराक्रमः

वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् ॥ तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥ २२ ॥ यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया ॥
तानि पापस्य खण्डानि लिङ्गं खण्डमिहोच्यते ॥२३॥ एवमिन्द्रे हरत्यश्वं वैन्ययज्ञजिघांसया ॥ तद्गृहीतविसृष्टेषु पाखण्डेषु मतिर्नृणाम्
॥२४॥ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु ॥ प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥२५॥ तदभिज्ञाय भगवान्पृथुः पृथुपराक्रमः ॥
इन्द्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥ २६ ॥ तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुःष्प्रेक्ष्यमसह्यरंहसम् ॥ निवारयामासुरहो
महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥ २७ ॥ वयं मरुत्वन्तमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम् ॥ अयातयामोपहवै-
रनन्तरं प्रसह्य राजञ्जुहवाम तेऽहितम् ॥ २८ ॥

भगवान् पृथुः उद्यतकार्मुकः सन्निन्द्राय इन्द्रं हन्तुं बाणमादत्त जगृहे ॥ २६ ॥ तमिति ॥ तं पृथुं शक्रवधेऽभिसन्धिरभिप्रायोऽस्य सञ्जातस्तम् । इतजन्तः । अत एव क्रोधेन दुष्प्रेक्ष्यं रक्तनेत्रभुजस्फुरणादिविकारेण द्रष्टुमप्यशक्यमसह्यरंहसं शत्रुभिर्दुःसहवेगं विचक्ष्य दृष्ट्वा ऋत्विजः यज्ञानुष्ठानेऽधिकृता ब्राह्मणाः शक्रवधान्निवारयामासुः । अहो हे महामते प्रचोदितात् यज्ञाङ्गत्वेन विहितादश्ववधादन्यस्य वधोऽत्र यज्ञानुष्ठानकाले तव न युज्यते योग्यो न भवति ॥ २७ ॥ वयमिति ॥ हे राजन् अनन्तरमविलम्बितमद्यैव वयमयातयामैरगतवीर्यैरुपहवैराह्वानमन्त्रैस्तं तवाहितं शत्रुम् अर्थनाशकं यज्ञे विघ्नकर्त्तारं त्वच्छ्रवसा त्वद्यशसा एव हतत्विषं नष्टतेजसं तं मरुत्वन्तमिन्द्रमिह यज्ञशालायामेव ह्वयामहे । ततश्च प्रसह्य बलात्कारेण तमग्नये जुहवाम अग्नौ होष्यामः । अत्र कर्ममार्गस्य स्वभाव एवायं यत्र प्रवृत्ता विवेकिनोऽपि अनुचितं कुर्वन्तीति द्योतितम् । यथा ब्रह्मा दुहित्रभिलाषं रुद्रः कोपं विष्णववतारोऽपीन्द्रः कौटिल्यमिति ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ हे विदुर इत्येवं क्रतुपतिं यजमानमामन्त्र्य प्रतिबोध्य रुषा क्रोधेन जुह्वतः इन्द्राह्वानार्थं होमं कुर्वतः अत एव स्रुक् हस्ते येषां तान्स्रुग्घस्तान् अस्य पृथोः ऋत्विजोऽभ्येत्य उपगम्य स्वयंभूर्ब्रह्मा प्रत्यषेधत हवनप्रतिषेधवाक्यान्याह स्म । तच्चार्षः ॥ २९ ॥ न इति ॥ यज्ञरक्षार्थं यं जिघांसथ हन्तुमिच्छथ स इन्द्रो भवतां भवाद्भिर्वध्यो वधार्हो न भवति यतः यज्ञेनेष्टाः पूजिताः सर्वे सुरा यस्येन्द्रस्य तनवः करचरणाद्यवयवस्थानापन्नास्तदंशा एव यत् यस्मात् यज्ञो नामायमिन्द्रो भगवतस्तनुः अवतार एव ततः सप्तम आकूत्यां " रुचेर्यज्ञोऽभ्यजायत ' इत्युक्तत्वात् । तथा च भगवदवतारत्वात् यज्ञस्वरूपस्य तस्य यज्ञेन हन्तुमशक्यत्वात् तत्तनुभूतानां देवानामिष्टत्वाच्च यज्ञाख्य इन्द्रो न वध्य इति ॥ ३० ॥ तदिति ॥ हे द्विजाः तत्तस्मात्स्वस्यानुमतत्वात् राज्ञ एतत्कर्म जिघांसता तद्विघ्नमिच्छता इन्द्रेणानुष्ठितं प्रवर्त्तितं महद्धर्मव्यतिकरं महतां वेदवादिनां धर्मस्य नाशकमिदं पाखण्डं यूयं पश्यत अतो बलीयसानेन सख्यमेव कार्यमन्यथा भूयः पाखण्डं स्रक्ष्यतीति ॥ ३१ ॥ पृथुकीर्तेरिति ॥ यर्हि पुनर्य-

इत्यामन्त्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा ॥ स्रुग्घस्ताञ्जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत ॥ २९ ॥ न वध्यो भवतामिन्द्रो यद्यज्ञो भगवत्तनुः ॥ यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥ ३० ॥ तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः ॥ इन्द्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥३१॥ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः ॥ अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ॥ ३२ ॥ नैवात्मने महेन्द्राय रोषमाहर्तुमर्हसि ॥ उभावपि हि भद्रं त उत्तमश्लोकविग्रहौ॥३३॥माऽस्मिन्महाराज कृथाः स्म चिन्तां निशामयाऽस्मद्वच आदृतात्मा ॥ यद्ध्यायतो दैवहतं नु कर्तुं मनोतिरुष्टं विशते तमोऽन्धम् ॥ ३४ ॥

ज्ञप्रवर्त्तनेऽनर्थान्तरोत्पत्तिभयं तर्हि पृथुकीर्तेः ख्यातयशसः पृथोः एकेनोनं शतं क्रतवो यस्य तादृश एव प्रयोगो भूयात् । पृथुरिति पाठे एकोनं शतं क्रतवो यस्य तादृशोऽपि महेन्द्रात्पृथुकीर्तिर्भूयात् क्रतुशतसङ्कल्पस्य अपूर्णत्वेऽपि मदाशीर्वादात्तस्यैकोनत्वेऽपि पूर्तिर्भवतु राजानमाह । ते तव स्विष्टैः सम्यगनुष्ठितैः क्रतुभिरलं न किंचित्प्रयोजनम् । यद्यस्माद्भवान् मोक्षधर्मवित् अतो मोक्षधर्मा अनुष्ठेयाः किं स्वल्पफलैर्यज्ञैरिति ॥ ३२ ॥ नैवेति ॥ आत्मने स्वरूपाय महेन्द्राय रोषमाहर्त्तुं कर्तुं त्वं नैवार्हसि । हि यतः उभावपि युवाम् उत्तमश्लोकस्य भगवतो विग्रहौ मूर्ती अवतारावित्यर्थः । अतस्ते भद्रं भविता ॥ ३३ ॥ मास्मिन्निति ॥ हे महाराज अस्मिन् यज्ञे विघ्ने सत्यपि त्वं चिन्तां मा स्म कृथाः आदृतात्मा एते महान्तो यत्कथयन्ति तद्युक्तमेवेत्यस्मास्वादरयुक्तचित्तः सन्नस्मद्वचो निशामय शृणु । यत् यस्मात् दैवहतं दैवेन प्रारब्धकर्मणा तत्फ उदात्रा परमेश्वरेण वा हतं विघ्नितं कार्यं कर्त्तुं ध्यायतस्तु मनो नु निश्चितमतिरुष्टं रोषयुक्तं सत् अन्धमतिगाढं तमो मोहं विशति नतु शान्तिं लभते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रतुरिति ॥ एष क्रतुः विरमताम् । तङार्षः । यतोऽत्र देवेषु दुष्टोऽवग्रह आग्रहो भवति । यत्र यस्मिन् दुराग्रहे सतीन्द्रनिर्मितैः पाखण्डैर्धर्मस्य व्यतिकरो विनाशोऽभूत् ॥३५॥ इन्द्रदुराग्रहकृतमनर्थं पश्येत्याह—एभिरिति॥य इन्द्रः ते यज्ञध्रुक् अश्वमुट् अश्वापहारकश्च तेनेन्द्रेणोपसृष्टैः प्रवर्तितैर्हारिभिश्चित्ताकर्षकैरेभिः पाखण्डैरेनं जनं ह्रियमाणमाकृष्यमाणं विचक्ष्व पश्य ॥ ३६ ॥ भवानिति ॥ हे वैन्य समयानुरूपं शास्त्रानुरूपं जनानां धर्मं वेनस्यापचारात् अवलुप्तं विनष्टं परित्रातुं रक्षितुं तस्य वेनस्य देहतो भवान् अद्येदानीमिह भूतलेऽवतीर्णोऽस्ति अतः त्वं विष्णोः कलाऽसि। यद्वा । भवान् इति त्वमित्यस्य विशेषणं प्रशस्त इत्यर्थः। विष्णोः कलैव त्वमवतीर्णोऽसीत्येकवाक्यतयाऽन्वयः ॥३७॥ स त्वमिति॥ हे प्रजापते हे प्रभो स भगवदवतारस्त्वमस्य विश्वस्य भवमुद्भवं विमृश्य विचार्य यैर्वेनाङ्गमन्थनात्त्वमुत्पादितोऽसि तेषां विश्वसृजां भृग्वादीनां संकल्पनं मनोरथं प्रजापालनादिना पिपीपृहि पूरय । आर्षः प्रयोगः। पिपृहि इति पिपूर्हि इति वा योग्यम् । आदौ तु भागुरिमतेऽपरेल्लोपः ततः प्रचण्डपाखण्डपथरूपामुपधर्मस्य अधर्मस्य मातरं जननीम्

क्रतुर्विरमतामेष देवेषु दुरवग्रहः॥ धर्मव्यतिकरो यत्र पाखण्डैरिन्द्रनिर्मितैः ॥ ३५ ॥ एभिरिन्द्रोपसंसृष्टैः पाखण्डैर्हारिभिर्जनम् ॥ ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ॥ ३६ ॥ भवान्परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपम् ॥वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलाऽसि वैन्य ॥ ३७ ॥ स त्वं विमृश्यास्य भवं प्रजापतेः संकल्पनं विश्वसृजां पिपीपृहि ॥ ऐन्द्रीं च मायामुपधर्ममातरं प्रचण्डपाखण्डपथं जहि प्रभो ॥ ३८ ॥ मैत्रेय उवाच ॥ इत्थं स लोकगुरुणा समादिष्टो विशांपतिः ॥ तथा च कृत्वा वात्सल्यं मघोनाऽपि च संदधे ॥ ३९ ॥ कृतावभृथस्नानाय पृथवे भूरिकर्मणे ॥ वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥ ४० ॥ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः ॥ आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥ ४१ ॥

ऐन्द्रीं मायां च जनेषु प्रवृत्तां जहि निवारय । पाखण्डपथमिति मायाविशेषणत्वेऽपि अजहल्लिङ्गत्वात्पुंस्त्वम्॥ ३८॥इत्थमिति ॥ इत्थं लोकगुरुणा ब्रह्मणा समादिष्टः प्रतिबोधितः स विशांपतिः राजा यथा ब्रह्मणा प्रोक्तं तथा यज्ञाग्रहं हित्वा वात्सल्यं स्नेहं च कृत्वा मघोनापि संदधे इन्द्रेण सह सन्धानं च कृतवान् । वात्सल्यशब्देन पृथोः सद्गुणाधिकतया वयोज्येष्ठादपीन्द्रात् वृद्धत्वं सूच्यते ॥३९॥ कृतेति ॥ वरान्ददति ते वरदा देवा ये तस्य बर्हिषि तर्पिताः भागदानेन तोषितास्ते कृतमवभृथसंबन्धि स्नानं येन तस्मै भूरीणि कर्माणि यस्य तस्मै पृथवे वरान् ददुः ॥ ४० ॥ विप्रा इति ॥ हे क्षत्तः सत्या आशिषो येषां ते श्रद्धया लब्धा दक्षिणा यैस्ते सत्कृताः विप्रास्तुष्टाः सन्तस्तस्मै आदिराजाय पृथवे आशिषो युयुजुर्ददुः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टानां वाक्यम्—त्वयेति ॥ हे महाबाहो पितरो देवा ऋषयो मानवाश्च येऽत्र समागतास्ते सर्व एव त्वयाऽऽहूता दानमानाभ्यां यथायोग्यं पूजिताश्च ॥४२॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाच्चतुर्थस्योनविंशके ॥ १९ ॥ विंशे यज्ञेन्वशात् साक्षाद्धरिः प्रीतः पृथुं नृपम् ॥ वरदानप्रसङ्गोऽस्य श्लोकास्तत्राष्टवह्नयः ॥ उवाच षट्कं संपूर्णा रसतर्का अनुष्टुभः ॥ २० ॥ भगवानिति ॥ विभुर्यज्ञपतिर्यज्ञभुक् च यज्ञैः स्विष्टः सम्यक् पूजितः अतस्तुष्टः वैकुण्ठो भगवानपि मघवता इन्द्रेण सह प्रसन्नतया वरदानादीच्छया तं राजानमभाषत ॥ १ ॥ एष इति ॥ एष इन्द्रः ते तव हयमेधेषु शतस्य शततमस्यान्तिमस्य भङ्गं हे स्फुटमकारषीत् अकार्षीत् । अंकाराधिक्यमार्षम् । ततो लज्जितः अतः आत्मानमुभयोर्ममावतारत्वादात्मनः स्वरूपभूतं त्वां क्षमापयतः क्षमां कारयतः । आपुगार्षः । यद्वा क्षमामाप्नोति क्षमापः कर्मण्यण्

त्वयाऽऽहूता महाबाहो सर्व एव समागताः ॥ पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥ ४२ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे पृथुचरित्रे इन्द्रकृतपाषण्डमार्गवर्णनं नाम एकोनविंशोऽध्यायः ॥ १९ ॥ ॥ ऋषिरुवाच ॥ भगवानपि वैकुण्ठः साकं मघवता विभुः ॥ यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक्तमभाषत ॥ १ ॥ श्रीभगवानुवाच ॥ एष तेऽकारषीद्भङ्गं हयमेधशतस्य ह ॥ क्षमापयत आत्मानममुष्य क्षन्तुमर्हसि ॥ २ ॥ सुधियः साधवो लोके नरदेव नरोत्तमाः ॥ नाभिद्रुह्यन्ति भूतेभ्यो यर्हि नात्मा कलेवरम् ॥ ३ ॥ पुरुषा यदि मुह्यन्ति त्वादृशा देवमायया ॥ श्रम एव परं जातो दीर्घया वृद्धसेवया ॥ ४ ॥ अतः कायमिमं विद्वानविद्याकामकर्मभिः ॥ आरब्ध इति नैवास्मिन्प्रतिबुद्धोऽनुषज्जते ॥ ५ ॥ असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे ॥ अपत्ये द्रविणे वाऽपि कः कुर्यान्ममतां बुधः ॥ ६ ॥ एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः ॥ सर्वगोऽनावृतः साक्षी निरात्मात्मात्मनः परः ॥ ७ ॥

तादृशं कुर्वतः "तत्करोति" इति णिच् । अमुष्य त्वं क्षन्तुमर्हसि॥२॥सुधिय इति ॥ हे नरदेव यर्हि यस्माद्धेतोः कलेवरम् आत्मा न भवति अतः लोके सुधियः नरेषूत्तमाः साधवः सज्जनाः भूतेभ्यो भूतानि पीडयितुं "क्रियार्थ" इत्यादि चतुर्थी । अत उपसृष्टद्रुहो योगेऽपि न द्वितीया न अभिद्रुह्यन्ति ॥ ३ ॥ पुरुषा इति ॥ त्वादृशा विवेकिनोऽपि पुरुषाः देवस्य मम मायया यदि मुह्यन्ति द्रोहादिषु प्रवर्तन्ते तदा तेषां दीर्घया बहुकालाभ्यस्तयापि वृद्धानां ज्ञानिनां सेवया परं केवलं श्रम एव जातो न कश्चित्पुरुषार्थः ॥ ४ ॥ अत इति ॥ अविद्यास्वरूपाज्ञानं ततः कामस्ततः कर्माणि तैरारब्धो रचित इत्येवमिमं कायं विद्वान् प्रतिबुद्धः पुरुषोऽस्मिन् देहे नैवानुषज्जते अहमित्यात्मबुद्धिं नैव करोति॥५॥असंसक्त इति ॥ बुधः आत्मज्ञानी अत एवास्मिन् शरीरेऽपि असंसक्तश्चेत्तदा अमुना शरीरेणोत्पादिते गृहे अपत्ये द्रविणे धने वापि ममतां कः कुर्यात् ॥६॥ एक इति ॥ असौ आत्मा एकः शुद्धः स्वयंज्योतिः निर्गुणः गुणानामाश्रयः सर्वगः अनावृतः साक्षा द्रष्टा निरात्मा स्वस्मिन्नात्मान्तररहितः अतः आत्मनः देहात्परो भिन्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

देहस्तु अनेकः मलिनः जडः सगुणश्च स्वकारणभूतः गुणाश्रितः परिच्छिन्नः अतो वस्त्रादिना आवृतः दृश्यः आत्मन आयतनत्वात्सात्मा च इति नवधापि विलक्षणः ॥ ७ ॥ य इति ॥ यः पुरुष एवं वर्णितं सन्तं विद्यमानं तत्रापि न दूरं किं त्वात्मस्थम् आत्मन्येव स्थितमात्मानं वेद जानाति । स मयि परमेश्वरे एव स्थितः अतः प्रकृतिकार्यभूतदेहस्थोऽपि सः तद्गुणैः सुखदुःखपुण्यपापादिभिर्नाज्यते न लिप्यते ॥ ८ ॥ य इति ॥ हे राजन् यः निराशीः निष्कामः श्रद्धयान्वितश्च स्वधर्मेण मां नित्यं भजते तस्य मनः शनकैः प्रसीदति शुद्ध्यति ॥ ९ ॥ परित्यक्तेति ॥ यदा विशदाशयः शुद्धमना भवति तदा परित्यक्तगुणः सन् सम्यग्दर्शनो भूत्वा मम सम्यगौदासीन्येनावस्थानमेव ब्रह्म तदेव कैवल्यं तद्रूपां शान्तिम् अश्नुते । यद्वा । समं निर्भेदं वस्थानं भागुरिमतेऽकारलोपः ॥ १० ॥ उदासीनमिति ॥ द्रव्यं देहः ज्ञानानि ज्ञानेन्द्रियाणि क्रियाः कर्मेन्द्रियाणि आत्मा मनः तेषामध्यक्षं द्रष्टारमपि इमम् आत्मानं यस्तूदासीनमिव साक्षिमात्रं कूटस्थं निर्विकारं वेद स शोभनं शुद्धमक्षरं ब्रह्माप्नोति ॥ ११ ॥ भिन्न-

य एवं सन्तमात्मानमात्मस्थं वेद पूरुषः ॥ नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः ॥ ८ ॥ यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः ॥ भजते शनकैस्तस्य मनो राजन्प्रसीदति ॥ ९ ॥ परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः ॥ शान्तिं मे समवस्थानं ब्रह्मकैवल्यमश्नुते ॥ १० ॥ उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम् ॥ कूटस्थमिममात्मानं यो वेदाप्नोति शोभनम् ॥ ११ ॥ भिन्नस्य लिङ्गस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः ॥ दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्धसौहृदाः ॥ १२ ॥ समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेन्द्रियाशयः ॥ मयोपकॢप्ताखिललोकसंयुतो विधत्स्व वीराऽखिललोकरक्षणम् ॥ १३ ॥ श्रेयः प्रजापालनमेव राज्ञो यत्साम्पराये सुकृतात्षष्ठमंशम् ॥ हर्ताऽन्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघमत्ति ॥ १४ ॥

स्येति ॥ द्रव्याणि महाभूतानि क्रिया इन्द्रियाणि कारकाः इन्द्रियाधिष्ठातृदेवाः चेतना चिदाभासयुक्तमन्तःकरणं तदात्मनस्तत्सङ्घातात्मकस्य अतः आत्मनः सकाशाद्भिन्नस्य लिङ्गस्य देहस्यैव गुणप्रवाहो जन्ममरणसुखदुःखादिविकारो नात्मन इति पश्यन्तः मयि बद्धसौहृदाः सूरयो विवेकिनो दृष्टासु प्राप्तासु संपत्सु विपत्सु च न विक्रियन्ते हर्षशोकादि न कुर्वन्ति ॥ १२ ॥ सम इति ॥ हे वीर त्वं सुखे च दुःखे च समः तथा समाना उत्तममध्यमाधमा यस्य स तथाभूतश्च जितानीन्द्रियाण्याशयोऽन्तःकरणं च येन स तथा सन् मया परमेश्वरेणोपकॢप्ताः सम्पादिता येऽखिला लोका अमात्यादयस्तैः संयुतः सन् अखिललोकरक्षणं विधत्स्व कुरु ॥ १३ ॥ श्रेय इति ॥ प्रजापालनमेव राज्ञः श्रेयः श्रेयस्करम् । यत् यस्मात् सम्पराये परलोके प्रजापालकः प्रजाभिः कृतात्सुकृतात् षष्ठमंशं हर्त्ता हरति तत्फलं भुंक्ते अन्यथा करहारः सन् अरक्षिता चेत् प्रजाभिर्हृतं पुण्यं यस्य सः राजा प्रजानामघमत्ति पापफलं भुंक्ते ॥ १४ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं सति प्रजापालनस्य तवावश्यकत्वे सति द्विजाग्र्याणां वेदवादिनामनुमतः संमतश्चासावनुवृत्तः परम्पराप्राप्तश्च यो धर्मः स प्रधानो मुख्योऽर्थकामौ तु प्रासङ्गिकौ यस्य सः तथा अन्यतमः अतिशयेनान्यः धर्मादिष्वनासक्त इत्यर्थः । ऐकपद्यपाठे प्रागुक्तधर्मप्रधानावन्यतमावर्थकामौ यस्य स तथा । अत एव अनुरक्तो लोको यस्मिन्सः अस्याः पृथिव्याः अविता रक्षकश्च सन् ह्रस्वेनाल्पेन कालेन स्वगृहोपयातान् स्वगृहे प्राप्तान् सिद्धान् सनत्कुमारादीन्द्रष्टा त्वं द्रक्ष्यसीति ॥ १५ ॥ वरमिति ॥ हे मानवेन्द्र अहं ते गुणैः शीलेन च यन्त्रितः वशीकृतोऽस्मि अतः मत् मत्तस्त्वं कंचन यथेष्टं वरं वृणीष्व । यत् यस्मात् समं स्वीयपरकीयादिषु वैषम्यरहितं चित्तं येषां तेष्वेव वर्त्तितुं शीलं यस्य स तथाभूतोऽहम् अतः गुणशीलरहितजनैस्तु मखैर्यज्ञैः तपोभिः तथा योगेन वा अहं न सुलभः प्रसन्नो न भवामि ॥ १६ ॥ स इति ॥ विश्वजित् पृथुः लोकगुरुणा विष्वक्सेनेन भगवता अनुशासितः स्वार्थे णिच् । अनुशिक्षितः संस्तस्य हरेरादेशमाज्ञां शिरसा जगृहे बहुमानेनाङ्गीचकार ॥ १७ ॥ स्पृशन्तमिति ॥ क्षमयितुं पादयोः

एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽविताऽस्याः ॥ ह्रस्वेन कालेन गृहोपयातान्द्रष्टासि सिद्धाननुरक्तलोकः ॥ १५ ॥ वरं च मत्कश्चन मानवेन्द्र वृणीष्व तेऽहं गुणशीलयन्त्रितः ॥ नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती ॥ १६ ॥ मैत्रेय उवाच ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् ॥ अनुशासित आदेशं शिरसा जगृहे हरेः ॥ १७ ॥ स्पृशन्तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा ॥ शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥ १८ ॥ भगवानथ विश्वात्मा पृथुनोपहृतार्हणः ॥ समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः ॥ १९ ॥ प्रस्थानाभिमुखोऽप्येनमनुग्रहविलम्बितः ॥ पश्यन्पद्मपलाशाक्षो न प्रतस्थे सुहृत्सताम् ॥ २० ॥ स आदिराजो रचिताञ्जलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ॥ न किंचनोवाच सबाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥ २१ ॥

स्पृशन्तं यतः स्वेन कर्मणा अश्वापहरणलक्षणेन व्रीडितं लज्जितं शतक्रतुमिन्द्रं प्रेम्णा परिष्वज्य विद्वेषं विससर्ज त्यक्तवान् ॥ १८ ॥ भगवानिति द्वयम् ॥ विश्वस्यात्मा समुज्जिहानया प्रतिक्षणं वर्द्धमानया भक्त्या पृथुनोपहृतं समर्पितमर्हणं पूजासाधनमर्घ्यपाद्यादि यस्मै सः तथाभूतया भक्त्यैव तेन गृहीते चरणाम्बुजे यस्य पद्मपलाशाक्षः सतां सुहृन्मित्रं भगवान् प्रस्थानाभिमुखो गमनायोद्यतोऽप्यनुग्रहेण विलम्बितः कृतविलम्ब एनं पृथुं पश्यन्न प्रतस्थे प्रयाणं न कृतवान् ॥ १९ ॥ २० ॥ स इति ॥ अश्रुपूर्णलोचनः स आदिराजः पृथुः हरिं विलोकितुं न अशकत् तथा बाष्पेण कण्ठरोधकजलेन विक्लवो व्याकुलः सन् स पृथुः किंचन किंचिदपि न उवाच किन्तु रचितोऽञ्जलिर्येन स तथावस्थितः सन्नमुं हरिं हृदोपगुह्य संश्लिष्य तत्राधात् धृतवान् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ अथ अश्रुकलाः अश्रुबिन्दून् अवमृज्य विशोध्य अतृप्तयोर्दृशोर्गोचरं विषयभूतं पदा क्षितिं स्पृशन्तम् उरङ्गविद्विषः गरुडस्योन्नते अंसे स्कन्धे विन्यस्तं हस्ताग्रं येन तं पुरुषं भगवन्तं विलोकयन्नाह । यद्यपि देवाः क्षितिं न स्पृशन्ति तथापि कृपापरवशो हरिरात्मानं विस्मृतवानिवेति । अत एव स्खलनपरिहाराय गरुडस्यांसे हस्ताग्रन्यासः ॥ २२ ॥ वरानिति ॥ हे विभो हे ईश हे कैवल्यपते बुधः वरदानामीश्वरात् त्वत् त्वत्तः गुणैर्गुणकार्यैर्विषयैर्विक्रियते इति गुणविक्रियस्तथाभूतः आत्मा चित्तं येषां तेषां विषयिणां योग्यान् वरान् विषयान् कथं वृणीते नैव वृणीत इत्यर्थः । नारकाणां श्वशूकरादिनारकीं योनिमितानामपि देहिनां ये विषयाः सन्ति अतोऽहमपि तान् वरान्न वृणे । कैवल्यपतेरिति पञ्चम्यन्तः पाठो वा ॥ २३ ॥ कैवल्यपतेः कैवल्यं वरणीयमित्यपि नेत्याह—नेति ॥ हे नाथ महत्तमानां युष्मद्भक्तानामन्तर्हृदयान्मुखद्वारा च्युतो निर्गतो युष्मच्चरणाम्बुजासवः परमानन्दजनकयुष्मत्कथारूपो रसो यत्र कैवल्ये नास्ति तस्मात् तत् कैवल्यमप्यहं कश्चित्कदाचिदपि न कामये किन्तु भवत्कथाश्रवणाय कर्णानामयुतं दशसहस्राणि विधत्स्व । तावतां कर्णानां सामर्थ्यं मम द्वयोः कर्णयोर्देहीति एष एव मे मह्यं वरो देयः । यत्र यत्र यैर्यैर्या या गुणकथाः

अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषम् ॥ पदा स्पृशन्तं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरङ्गविद्विषः ॥२२॥ पृथुरुवाच ॥
वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनाम् ॥ ये नारकाणामपि सन्ति देहिनां तानीश कैवल्यपते वृणे न च ॥ २३ ॥
न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः ॥ महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥ २४ ॥ स
उत्तमश्लोकमहन्मुखच्युतो भवत्पदाम्भोजसुधाकणानिलः ॥ स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥ २५ ॥ यशः शिवं
सुश्रव आर्यसङ्गमे यदृच्छया चोपशृणोति ते सकृत् ॥ कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥ २६ ॥

कीर्त्येरन् ताः सर्वाः कथाः मत्कर्णे प्रविशेयुरिति बहुकर्णापेक्षा यानीन्द्रियाणि ज्ञानिनो निन्दन्ति तेष्वेवैकस्य बाहुल्यमहं प्रार्थये इति वैलक्षण्यं द्योतितम् ॥ २४ ॥ स इति ॥ हे उत्तमश्लोक महतां मुखाच्च्युतो यो भवत्पदाम्भोजसुधायाः कणो लेशस्तत्संबन्धी योऽनिलः दूरादपि कथमपि किंचिदपि भगवद्यशःश्रवणमात्रं स एव यस्मात् विस्मृतः तत्वस्य वर्त्म मार्गो यैस्तेषां कुयोगिनां चलचित्तानां नोऽस्माकं पुनः स्मृतिमात्मज्ञानं वितरति सम्पादयति तस्मात् कथाश्रवणादन्यैर्वरैरलं न किंचित्प्रयोजनम् ॥ २५ ॥ यश इति ॥ हे सुश्रवः सत्कीर्ते यः कश्चिदपि आर्याणां महतां सङ्गमे सति शिवं कल्याणं ते यशः सकृत् अपि यदृच्छया अन्यप्रसङ्गादपि उपशृणोति स पशुस्वभावादितरः गुणज्ञः सारग्राही चेत्तदा पशुं विना यशःश्रवणात्कथं विरमेत् विरक्तो भवेत् । अत एव गुणज्ञा श्रीर्लक्ष्मीरपि गुणानां सर्वपुरुषार्थानां सङ्ग्रहः स्वस्मिन्समाहारस्तदिच्छया यत् यशःश्रवणमेव प्रकर्षेण वव्रे वृतवती त्वत्त इति शेषः । यद्वाङ्गीकृतवतीत्यर्थः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथो इति ॥ अथो ततो हेतोः अहमपि पद्मकरा लक्ष्मीरिव लालसः भजने उत्सुकः सन् अखिलपुरुषोत्तमं गुणानामालयं त्वामेव भजे। एकस्मिन्पत्यौ स्वामिनि त्वयि स्पृधोः स्पर्द्धमानयोः स्पर्द्धधातोः स्पृधादेश आर्षः। कृतस्त्वच्चरणयोरेकोऽव्यवच्छिन्नस्तानो मनोविस्तारो याभ्यां तयोः आवयोः मम लक्ष्म्याश्च कलिः कलहोऽपि न स्यात् मा भवतु ॥ २७ ॥ भवतु वा कलिरित्याह—जगदिति ॥ हे जगदीश अतो यत् यस्याः लक्ष्म्याः कर्मणि भवत्सेवायां नोऽस्माकं ममानुयायिनां च समीहितमिच्छा भवति तस्यां जगज्जनन्यां लक्ष्म्यां वैशसं विरोधः स्यादेव संभवत्येव। तत्रापि भवान् ममैव पक्षपाती भविता इत्याह। यतो दीनवत्सलः त्वं भक्तैः कृतं फल्गु तुच्छमपि उरु बहु करोषि मन्यसे स्वे एव धिष्ण्ये परमानन्दस्वरूपेऽभिरतस्य तव तया लक्ष्म्या किं न किमपि प्रयोजनं येन तत्पक्षपातित्वं स्यात् ॥ २८ ॥ भजन्तीति ॥ हे भगवन् अथ अत एव पूर्वोक्ताद्धेतोः साधवो ज्ञानिनो व्युदस्तो निरस्तो मायागुणानां विभ्रमस्य विलासस्योदयो येन तं त्वामेव भजन्ति। न च ते सकामा इत्याह। भवत्पदानुस्मरणादृते

अथो भजे त्वाऽखिलपूरुषोत्तमं गुणालयं पद्मकरेव लालसः ॥ अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः ॥ २७ ॥ जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितम् ॥ करोषि फल्ग्वप्युरुदीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया ॥ २८ ॥ भजन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम् ॥ भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥ २९ ॥ मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजन्तमात्थ यत् ॥ वाचा नु तन्त्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः ॥ ३० ॥ त्वन्माययाऽद्धा जन ईश खण्डितो यदन्यदाशास्त ऋतात्मनोऽबुधः ॥ यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितम् ॥ ३१ ॥ मैत्रेय उवाच ॥ इत्यादिराजेन नुतः स विश्वदृक्तमाह राजन्मयि भक्तिरस्तु ते ॥ दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम् ॥ ३२ ॥

तद्विनाऽन्यत्तेषां सतां निमित्तं प्रयोजनं न विद्महे न विद्मः। तङ् आर्षः यद्वा हे इति संबोधने विद्म इति "विदो लटो वो" इति मसोमादेशः ॥ २९ ॥ मन्य इति॥ते तव गिरं वाचं जगतां विमोहिनीं मन्ये। यत् यस्माद्भजन्तं मामपि त्वं वरं वृणीष्वेत्यात्थ कथयसि। ते तव वाचा वेदलक्षणया तन्त्या रज्ज्वा यदि जनः असितः न बद्धः तर्हि मोहितः सन् पुनः पुनर्दुःखालयसंसारपातहेतुं कर्म कथं नु करोति अतस्तव वाचो मोहकत्वम् ॥ ३० ॥ त्वदिति ॥ हे ईश अद्धा निश्चितम् अयमबुधः अज्ञो जनस्त्वन्मायया ऋतात्मनः परमार्थसत्यस्वरूपात्त्वत्तः खण्डितः पृथक्कृतः पराङ्मुखीकृतः यत् यस्मात्त्वत्तोऽन्यत् पुत्रवित्तादिकमाशास्ते किन्तु यथा पिता बालानामप्रार्थितमपि हितं स्वयमेवाचरेत्तथा त्वमपि नोऽस्माकमज्ञानां हितमेवाप्रार्थितमपि स्वयं समीहितुं कर्त्तुमर्हसि॥ ३१ ॥इतीति॥आदिराजेन पृथुना इत्येवं नुतः स्तुतः स विश्वदृक् भगवान् तं पृथुमाह स्म।हे राजन् मयि ते भक्तिरस्तु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशी अलौकिकी प्रेमवती धीस्ते त्वया मयि कृतेत्येतद्दिष्ट्या भद्रं जातम् । कुतो यतो यया धिया दुस्त्यजां दुस्तरामपि मदीयां मायां जनस्तरति । स्मेति पूर्त्तौ ॥ ३२ ॥ तदिति ॥ हे प्रजापते तत् तस्मात् त्वमप्रमत्तः विषयेष्वनासक्तः सन्मया यत् प्रजापालनाद्यादिष्टं तत्कुरु । यस्मात्साक्षाद्वेदद्वारा वा मदादेशकरो मदाज्ञापालको लोकः प्राणी सर्वत्र इहामुष्मिंश्च शोभनं सुखं प्राप्नोति ॥ ३३ ॥ इतीति ॥ इत्येवं पृथुना पूजितः अच्युतः भगवान् राजर्षेः वैन्यस्य पृथोरर्थवत् पुरुषार्थहेतुं वचः प्रतिनन्द्य एवं पृथुम् अनुगृहीत्वा अभीष्टदानेन अनुगृह्य ल्यबभाव आर्षः । गन्तुं मतिं चक्रे ॥ ३४ ॥ देवेति द्वयम् ॥ ततश्च देवर्षिपितृगन्धर्वादयः अनेकानि भूतानि वैकुण्ठानुगताः भगवत्पार्षदा भगवद्भक्ताश्च यज्ञेश्वरो भगवान्विष्णुस्तद्विभूतिरूपत्वात्तद्बुद्ध्या वाचा स्तुत्यादिना वित्तेन वस्त्रादिप्रदानेन अञ्जलिभिर्नमस्कारैश्च भक्तिपूर्वकं राज्ञा सभाजिताः संपूजिताः सन्तस्ततः स्थानात्सर्वे ययुः ॥ ३५ ॥ ३६ ॥ भगवानिति ॥ सोपाध्यायः उपाध्यायैः ऋत्विग्भिश्च सहितस्यामुष्य राजर्षेः पृथोर्मनो हरन्निवेति लोकोक्तिः ।

तत्त्वं कुरु मयादिष्टमप्रमत्तः प्रजापते ॥ मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ॥ ३३ ॥ मैत्रेय उवाच ॥ इति वैन्यस्य राजर्षेः प्रतिनन्द्यार्थवद्वचः ॥ पूजितोऽनुगृहीत्वैनं गन्तुं चक्रेऽच्युतो मतिम् ॥३४॥ देवर्षिपितृगन्धर्वसिद्धचारणपन्नगाः ॥ किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः ॥ ३५ ॥ यज्ञेश्वरधिया राज्ञा वाग्वित्ताञ्जलिभक्तितः ॥ सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः ॥ ३६ ॥ भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः ॥ हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत ॥ ३७ ॥ अदृष्टाय नमस्कृत्य नृपः संदर्शितात्मने ॥ अव्यक्ताय च देवानां देवाय स्वपुरं ययौ ॥३८॥ इति श्रीभागवते चतुर्थस्कन्धे श्रीविष्णुना पृथोर्यज्ञेऽनुशासनवर्णनं नाम विंशोऽध्यायः ॥ २० ॥ मैत्रेय उवाच ॥ ॥ मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः ॥ महासुरभिभिर्धूपैर्मण्डितं तत्र तत्र वै ॥ १ ॥ चन्दनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् ॥ पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरार्चितम् ॥ २ ॥

वस्तुतः पृथोर्मनो हरेरधीनमेव सदाभूत् । अच्युतः प्रभुर्भगवानपि स्वधाम वैकुण्ठं राज्ञो हृदयं वा प्रत्यपद्यत अगात् ॥ ३७ ॥ अदृष्टायेति ॥ नृपः पृथुः अव्यक्तायापि सन्दर्शित आत्मा येन तस्मै अदृष्टाय दृक्पथमतिक्रान्ताय देवानां देवाय वासुदेवाय तमनुकूलयितुं नमस्कृत्य यज्ञस्थानात् स्वपुरं ययौ ॥ ३८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य विंशेऽध्याये व्यधादिमाम् ॥ २० ॥ एकविंशे महासत्रे देवादिसदसि प्रजाः ॥ अशिक्षयत्पृथुस्तत्र श्लोका नयननेमार्गणाः ॥ अनुष्टुभः सार्द्धषष्टिरुवाचेति वचांसि षट् ॥२१॥ स्वपुरं ययावित्युक्तं तत्र पुरं वर्णयति—मौक्तिकैरिति त्रिभिः ॥ मौक्तिकैः कुसुमानां स्रग्भिः दुकूलैः स्वर्णतोरणैः महासुरभिभिर्धूपैः तत्र तत्र स्थाने मण्डितम् ॥ १ ॥ चन्दनागुरुयुक्तैस्तोयैरार्द्रा रथ्याः चत्वराणि चतुष्पथाः अङ्गणानि वा मार्गाश्च तद्युक्तम् । पुष्पाक्षतफलैः तोक्मैरङ्कुरैः लाजैर्भ्रष्टधान्यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्चिभिर्दीपैश्चार्चितम् ॥ २ ॥ सवृन्दैः फलपुष्पादिवृन्दसहितैः कदलीस्तम्भैः तथा पूगानां पोतैर्बालवृक्षैः परिष्कृतं शृङ्गारितं तथा आम्रादितरूणां पल्लवाः कोमलपत्राणि तै रचिताभिर्मालाभिः सर्वतः सम्यगलङ्कृतम् ॥ ३ ॥ प्रजा इति ॥ दीपानां बलिभिस्तथा संभृतानि सम्पादितानि यान्यशेषाणि सर्वाणि मङ्गलानि दध्यक्षतफलादीनि तैश्च सह प्रजाः । स्त्रिय इत्यपि पाठः । तथा मृष्टाभ्यामुज्ज्वलाभ्यां कुण्डलाभ्यां मण्डिताः मृष्टाः स्नानादिना शुद्धाः कन्याश्च तं पृथुमभीयुः संमुखं जग्मुः ॥ ४ ॥ शङ्खेति ॥ शङ्खदुन्दुभिघोषेण तथा ऋत्विजां ब्राह्मणानां ब्रह्मघोषेण वेदपाठेन च सह सूतादिभिश्च स्तूयमानो वीरो महाप्रतापी तथापि गतस्मयः गर्वरहितः पृथुः भवनं स्वगृहं विवेश ॥ ५ ॥ पूजित इति ॥ महायशाः पृथुः गृहप्रवेशात्प्रागेव तत्र तत्र स्थाने पौरादिभिः पूजितः अत एव तेषु प्रीतः सन् प्रियान् मनोभीष्टान् वरान् प्रकर्षेणासंकोचेन ददातीति तथाभूतस्तांस्तान्पौरादींस्तत्तदभीष्टदानेन पूजयामास ॥ ६ ॥ स इति ॥ अनवद्यानि निर्दोषाणि चेष्टितानि यस्य सः गुणैर्महान् अत एव महत्तमः पूज्यः स पृथुः एवमादीनि

सवृन्दैः कदलीस्तम्भैः पूगपोतैः परिष्कृतम् ॥ तरुपल्लवमालाभिः सर्वतः समलंकृतम् ॥३॥ प्रजास्तं दीपबलिभिः संभृताशेषमङ्गलैः ॥ अन्वीयुर्मृष्टकन्याश्च मृष्टकुण्डलमण्डिताः ॥ ४ ॥ शङ्खदुन्दुभिघोषेण ब्रह्मघोषेण चर्त्विजाम् ॥ विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥ ५ ॥ पूजितः पूजयामास तत्र तत्र महायशाः ॥ पौराञ्जानपदांस्तांस्तान्प्रीतः प्रियवरप्रदः ॥ ६ ॥ स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान्महत्तमः ॥ कुर्वञ्छशासावनिमण्डलं यशः स्फीतं निधायारुरुहे हरेः पदम् ॥ ७ ॥ सूत उवाच ॥ तदादिराजस्य यशो विजृम्भितं गुणैरशेषैर्गुणवत्सभाजितम् ॥ क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणन्तमर्चयन् ॥ ८ ॥ विदुर उवाच ॥ सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाऽशेषसुरार्हणः ॥ बिभ्रच्च वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम् ॥ ९ ॥ को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः ॥ लोकाः सपाला उपजीवन्ति काममद्यापि तन्मे वद कर्म शुद्धम् ॥ १० ॥

यज्ञादीनि भूयांसि बहूनि कर्माणि स्वयं कुर्वन् अवनिमण्डलं शशास । ततश्च स्फीतं प्रवृद्धं यशः निधाय हरेः पदमारुरुहे । तदर्थः ॥ ७ ॥ तदिति ॥ हे सदस्पते शौनक अशेषैः सर्वैः गुणैर्विजृम्भितं प्रवृद्धं गुणवद्भिः सभाजितमादृतं तदपूर्वं पृथ्वीदोहनादि आदिराजस्य पृथोर्यशो गृणन्तं वर्णयन्तं कौषारविं मैत्रेयमर्चयन् सत्कुर्वन् महाभागवतः क्षत्ता विदुरः प्राह स्म पप्रच्छ ॥ ८ ॥ स इति ॥ विप्रैरभिषिक्तस्ततश्च लब्धान्यशेषेभ्यः सुरेभ्यो ब्रह्मादिभ्योऽर्हणानि च्छत्रासनादीनि येन स पृथुः याभ्यां बाहुभ्यां गां पृथ्वीं दुदोह तयोर्बाह्वोर्वैष्णवं तेजो बिभ्रत् सन् अग्रे किमकरोदिति शेषः ॥९॥ को न्विति ॥ यस्य पृथोर्विक्रमस्य पृथ्वीदोहनसमीकरणलक्षणस्योच्छिष्टं शेषं कामं भोग्यमद्याप्यशेषाः सर्वे भूपाः राजानस्तथा लोकपालैरिन्द्रादिभिः सहिता लोकाः सर्वे प्राणिनश्चोपजीवन्ति भुञ्जते तस्यास्य कीर्तिं को नु को वाभिज्ञो गुणग्राही न शृणोति तत्तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धं कर्म मे मह्यं वद ॥ १० ॥ गङ्गेति ॥ गङ्गायमुनयोर्नद्योरन्तरा मध्ये क्षेत्रं पुण्यदेशमावसन् स पृथुः पुण्यानां पूर्वकृतानां बन्धकरूपाणां जिहासया भोगेन क्षपणार्थं प्राचीनकर्मभिरारब्धानेव भोगान् बुभुजे नतु तदासक्त्या भोगान्तरार्थं यत्नं चकार । अत्र पृथुशरीरे भगवदंशो जीवश्चेत्यंशद्वयमभूत् । तत्र जीवमेवोद्दिश्य कर्म प्रारब्धभोगादिवर्णनम् ॥ ११ ॥ सर्वत्रेति ॥ सर्वत्र अस्खलितः अप्रतिहतः आदेशः आज्ञा यस्य सः ब्राह्मणकुलादन्यत्र तत् विना तथा अच्युतो भगवानेव गोत्रं प्रवर्तकतुल्यो येषां वैष्णवानां तेभ्यश्चान्यत्र तांश्च विना सप्तद्वीपेषु एको दण्डधृक् धृञेः क्विप् । अत्र तेन ब्राह्मणानां तत्तद्वेदाचार्याः वैष्णवानां तु तत्तन्मन्त्रगुरव एव शासितृत्वे स्थापिता इति सूचितम् ॥ १२ ॥ एकदेति ॥ हे सत्तम एकदा तस्य महासत्रदीक्षा आसीत् । तत्र सत्रे दिवौकसां देवगन्धर्वादीनां स्वर्गवासिनां तथा ब्रह्मर्षीणां राजर्षीणां च समाजो मेलनमासीत् ॥ १३ ॥ तस्मिन्निति ॥ तस्मिन् सत्रे अर्हत्सु पूज्येषु सर्वेषु यथार्हतः यथायोग्यं सुष्ठु अर्चितेषु सत्सु सदसः सभाया मध्ये ताराणां मध्ये

मैत्रेय उवाच ॥ गङ्गायमुनयोर्नद्योरन्तरा क्षेत्रमावसन्॥आरब्धानेव बुभुजे भोगान्पुण्यजिहासया॥११॥सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक्॥ अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥ १२ ॥ एकदासीन्महासत्रदीक्षा तत्र दिवौकसाम् ॥ समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ॥ १३ ॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ॥ उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥ १४ ॥ प्रांशुः पीनायतभुजो गौरः कञ्जारुणेक्षणः॥ सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥ १५ ॥ व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः ॥ आवर्तनाभिरोजस्वी काञ्चनोरुरुदग्रपात् ॥ १६ ॥ सूक्ष्मवक्रासितस्निग्धमूर्धजः कम्बुकन्धरः ॥ महाधने दुकूलाग्र्ये परिधायोपवीय च ॥ १७ ॥ व्यञ्जिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः ॥ कृष्णाजिनधरः श्रीमान्कुशपाणिः कृतोचितः ॥ १८ ॥

उडुराट् चन्द्र इव पृथुः विज्ञापनार्थम् उत्थितः ॥ १४ ॥ तं वर्णयति–प्रांशुरिति ॥ प्रांशुरुन्नतः पीनावायतौ च भुजौ यस्य स गौरः कञ्जे इवारुणे ईक्षणे यस्य सः सुनासः सुमुखः सौम्यः प्रियदर्शनः पीनौ अंसौ स्कन्धौ यस्य शोभना द्विजाः दन्ताः स्मितं च यस्य ॥ १५ ॥ व्यूढेति ॥ व्यूढं विस्तीर्णं वक्षो यस्य बृहत्यौ श्रोणी यस्य वलिभिर्वल्गु सुन्दरं दलवत् अश्वत्थपत्रवदुपरि विस्तृतमधस्तात्सङ्कुचितं चिक्कणं चोदरं यस्य आवर्त्त इव निम्ना नाभिर्यस्य सः ओजस्वी शक्तः काञ्चनवदुज्ज्वलावूरू यस्य उदग्रौ उन्नताग्रौ पादौ यस्य सः ॥ १६ ॥ सूक्ष्मेति ॥ सूक्ष्माश्च ते वक्राश्चासिताः कृष्णाश्च स्निग्धाश्चिक्कणाश्च मूर्द्धजाः केशा यस्य कम्बुवत् त्रिरेखाङ्किता कन्धरा यस्य महाधने ये दुकूलाग्र्ये वस्त्रश्रेष्ठे तयोरेकं परिधाय वसित्वा एकमुपवीय उत्तरीयं च कृत्वा वर्त्तमानः ॥ १७ ॥ व्यञ्जितेति ॥ नियमे निमित्ते सत्रनियमवशादित्यर्थः । न्यस्तानि त्यक्तानि भूषणानि येन अत एव तैरनावृतत्वात् व्यञ्जिता प्रकटिता अशेषगात्रेषु श्रीः स्वाभाविकी शोभा येन कृष्णाजिनधरः श्रीमान् कान्तिमान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुशपाणिः कृतानि उचितानि कर्माणि येन ॥ १८ ॥ शिशिरेति द्वयम् ॥ शिशिरे सन्तापहरे स्निग्धे च तारे ययोस्ते अक्षिणी यस्य सः उर्वीशः पृथुः तदा समन्ततः समैक्षत । ततश्च सभ्यान् स्वाभिमुखान् दृष्ट्वा सदः सभां संहर्षयन्निव इव एवार्थे । सर्वेषामुपकारार्थं स्वयमनुभूतमनुवदन्निव इदं वक्ष्यमाणं चारु श्रोत्रप्रियं चित्राणि पदानि यस्मिन् श्लक्ष्णं प्रशस्तं मृष्टं शुद्धं रागद्वेषादिना पक्षपातशून्यं गूढं गम्भीरार्थम् अविक्लवं व्याकुलतारहितं वचः ऊचिवान् ॥ १९ ॥ २० ॥ सभ्या इति ॥ हे सभ्याः हे साधवः ये इह सत्रे आगतास्ते सर्वे यूयं मे वाक्यं शृणुत वो युष्माकं भद्रं भविष्यति । यतो जिज्ञासुभिः स्वमनीषितं विचारितं धर्मं युक्तायुक्तपरीक्षार्थं सत्स्वावेद्यं वक्तव्यमेव अतो युक्तायुक्तनिर्णयार्थं मया स्वविचारितं युष्मासु निवेद्यते न युष्मदुपदेशार्थम् ॥ २१ ॥ अहमिति ॥ यतोऽहमिह अस्मिन्नवसरे प्रजानां राजा योजितः मुनिभिः स्थापितः अतः दुष्टानां दण्डधरः धर्मस्थानां रक्षिता वृत्तिदः जीविकाप्रदश्च । मुग्धानां स्वेषु सेतुषु धर्ममर्यादासु पृथक् यथाधिकारं स्थापिता स्थापयिता णिलोप

शिशिरस्निग्धताराक्षः समैक्षत समन्ततः ॥ ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव ॥ १९ ॥ चारुचित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवम् ॥ सर्वेषामुपकारार्थं तदा अनुवदन्निव ॥ २० ॥ राजोवाच ॥ सभ्याः शृणुत भद्रं वः साधवो य इहागताः ॥ सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितम् ॥ २१ ॥ अहं दण्डधरो राजा प्रजानामिह योजितः ॥ रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक् ॥ २२ ॥ तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः ॥ लोकाः स्युः कामसंदोहा यस्य तुष्यति दिष्टदृक् ॥ २३ ॥ य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् ॥ प्रजानां शमलं भुङ्क्ते भगं च स्वं जहाति सः ॥ २४ ॥ तत्प्रजा भर्तृपिण्डार्थं स्वार्थमेवानसूयवः ॥ कुरुताधोऽक्षजधियस्तर्हि मेऽनुग्रहः कृतः ॥ २५ ॥ यूयं तदनुमोदध्वं पितृदेवर्षयोऽमलाः ॥ कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम् ॥ २६ ॥

आर्षः ॥ २२ ॥ तस्येति ॥ यस्य स्वधर्मानुष्ठानात् राज्ञो दिष्टदृक् कर्मसाक्षी भगवांस्तुष्यति तस्य यत् यान् लोकान् फलत्वेन ब्रह्मवादिन आहुस्ते कामसन्दोहाः कामानां सन्दोहः पूरणं येषु ते लोकास्तदनुष्ठानात्तस्य प्रजारक्षणादिस्वधर्मस्यानुष्ठानान्मे ममापि स्युः ॥ २३ ॥ य इति ॥ यो राजा सन् धर्मेषु प्रजा अशिक्षयन् अप्रवर्त्तयन् ताभ्यः करमुद्धरेत् गृह्णीयात् स प्रजानां शमलं पापफलं भुङ्क्ते स्वं भगं ज्ञानैश्वर्यादिकं जहाति च ॥२४॥ तदिति ॥ हे प्रजाः तत्तस्मात् अनसूयवः अयमस्मान् दुःखे कर्मानुष्ठाने प्रवर्तयतीति मयि दोषारोपमकुर्वन्तः अधोक्षजे भगवति धीर्येषां तादृश्यः सत्यः भर्तुर्मम पिण्डार्थं परलोकहितार्थं स्वार्थं चैव स्वधर्ममेव कुरुत अनुतिष्ठत । यैस्त्वेवं कृतं यर्हि तर्हि मेऽनुग्रहः कृतो भवेत् ॥ २५ ॥ यूयमिति ॥ हे पितृदेवर्षयः यदि मया साधूक्तं तदा अमलाः विवेकिनो यूयं तत् मद्वाक्यम् अनुमोदध्वं साधूक्तमिति वदत । अनुमोदने युष्माकमपि तत्फलं स्यादित्याह । कर्तुरिति । यत् यस्मात् कर्तुः शास्तुः शिक्षयितुः अनुज्ञातुरनुमोदितुश्च प्रेत्य परलोके तत्तस्य धर्माधर्मानुष्ठानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलं तुल्यमिति। प्रेत्येत्यव्ययम् ॥ २६ ॥ अस्तीति ॥ हे अर्हसत्तमाः कैश्चिन्मीमांसकादिभिराग्रहेणानङ्गीकारेऽपि केषांचिन्महतां मते यज्ञयतिर्नाम प्रमाणसिद्धो भगवान् अस्त्येव। यतः इहामुत्र देशान्तरे च ज्योत्स्नावत्यः चन्द्रप्रभाशालिन्यो भुवः क्वचिदेव लक्ष्यन्ते न सर्वत्र। अतः भगवदङ्गीकारिणो धन्याः सर्वत्र न सन्तीति। यद्वा। केषांचिन्मते सत्वेऽपि विप्रतिपत्तिबाहुल्यान्नतत्सिद्धिरित्याशङ्क्य जगद्वैचित्र्यान्यथानुपपत्तिं प्रमाणयति। इहामुत्र च ज्योत्स्नावत्यः कान्तिमत्यः सुखजनिकाः भुवः भोगभूमयः शरीराणि च लक्ष्यन्ते इति विचित्रकर्मानुसारिफलदाता ईश्वरोऽवश्यमङ्गीकर्त्तव्यः। कर्मणस्तु जडत्वात् देवतानां चान्तर्यामिधीनत्वान्न स्वातन्त्र्येण फलदातृत्वं सम्भवति ॥ २७ ॥ विद्वदनुभवमप्याह—मनोरिति त्रयम् ॥ शोच्यान् शोकार्हान् धर्मे विषये विमोहितान् भ्रान्तान् मृत्योर्दौहित्रादीन् ऋते विना महीपतेर्मनोः उत्तानपादस्य ध्रुवस्यापि राजर्षेः प्रियव्रतस्य अस्मत्पितुरपि पितुः अङ्गस्य च अजस्य ब्रह्मणः भवस्य शिवस्य प्रह्लादस्य बलेश्चापि ईदृशामन्येषां च वर्गः धर्मार्थकामाख्यस्त्रिवर्गः स्वर्गो

अस्ति यज्ञपतिर्नाम केषांचिदिहसत्तमाः ॥ इहामुत्र च लक्ष्यन्ते ज्योत्स्नावत्यः क्वचिद्भुवः ॥ २७ ॥ मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः ॥ प्रियव्रतस्य राजर्षेरङ्गस्यास्मत्पितुः पितुः ॥ २८ ॥ ईदृशानामथान्येषामजस्य च भवस्य च ॥ प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥ २९ ॥ दौहित्रादीनृते मृत्योः शोच्यान्धर्मविमोहितान् ॥ वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना॥३०॥ यत्पादसेवाऽभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः ॥ सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित् ॥ ३१ ॥ विनिर्धुताशेषमनोमलः पुमानसङ्गविज्ञानविशेषवीर्यवान् ॥ यदङ्घ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ॥ ३२ ॥ तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः ॥ अमायिनः कामदुघाङ्घ्रिपङ्कजं यथाऽधिकारावसितार्थसिद्धयः ॥ ३३ ॥

धर्मफलम् अपवर्गो मोक्षः तेषां प्रायेणैकात्म्येन एकरूपेण हेतुना गदाभृता भगवता कृत्यं प्रयोजनमस्ति। ते श्रीभगवन्तं सम्यगङ्गीकुर्वन्तीति ॥ २८ ॥ २९ ॥ ३० ॥ यदिति ॥ यस्य पादसेवायामभिरुचिरन्वहं प्रतिदिनमेधती वर्द्धमाना सती शत आर्षः। तपस्विनां संसारतापतप्तानां तपोभिरपि सुखमलभमानानां वा जनानामशेषैर्जन्मभिरुपचितं वृद्धं धियो मलं कामादिवासनालक्षणं सद्यः क्षिणोति क्षपयति। यथा तस्य पदाङ्गुष्ठविनिस्सृता सरित् गङ्गा मलं पापं क्षिणोति ॥ ३१ ॥ विनिर्धुतेति ॥ विनिर्धुता अशेषा मनोमला यस्य सः पुमान् असङ्गो वैराग्यं तेन विज्ञानस्य विशेषसाक्षात्कारस्तदेव वीर्यं बलं यस्यास्ति स तथाभूतः सन् यस्य भगवतोऽङ्घ्रिमूले कृतकेतनः कृतनिवासो भवति पुनः क्लेशवहां क्लेशप्रापिकां तां संसृतिं न प्रपद्यते मुक्तो भवतीत्यर्थः ॥ ३२ ॥ तमेवेति ॥ अमायिनः निष्कपटाः यथाधिकारं वर्णधर्माद्यनतिक्रमपूर्वकमेव अवसिता निश्चिता समाप्ता वा अर्थसिद्धिर्येषां ते तथाभूताः यूयम् आत्मवृत्तिभिर्यथावर्णमध्यापनरक्षणकृषिसेवनादिभिर्मनोवचःकायानां गुणैर्ध्यानस्तुतिसपर्याभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वकर्मभिरध्ययनरक्षणदानादिभिश्च कामदुघम् अङ्घ्रिपङ्कजं यस्य तं भगवन्तमेव भजत ॥ ३३ ॥ यागादिषु भगवद्दृष्टये तेषां भगवद्रूपतामाह—असाविति ॥ असौ भगवानेव स्वरूपतो विशुद्धविज्ञानघनोऽप्यगुणो निर्विशेषणोऽपि सन्निह कर्ममार्गे पृथग्विधा या द्रव्यादयः तत्र द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः क्रिया अवघातादयः उक्तयो मन्त्रास्ताभिः अर्थोऽङ्गसाध्य उपकारः आशयः सङ्कल्पः लिङ्गं पदार्थानां शक्तिः नाम ज्योतिष्टोमादीनि तैश्चानेकगुणो नानाविशेषणवान् अध्वरो यज्ञः सम्पद्यते । "यज्ञो वै विष्णुः" इति श्रुतेः । यद्वा । असावध्वरो द्रव्यादिभिः अर्थादिभिश्चानेकगुणोऽपि "ब्रह्मार्पणं ब्रह्म हविः" इत्यादिब्रह्मदृष्ट्या क्रियमाणो विशुद्धविज्ञानघनः सम्पद्यते ॥ ३४ ॥ यागफलस्यापि भगवद्रूपतामाह—प्रधानेति ॥ एष विभुर्भगवानेव परमानन्दस्वरूपोऽपि प्रधानमव्यक्तं कालस्तत्क्षोभकः आशयो वासना धर्मोऽदृष्टं तैः संगृह्यते जन्यत इति तथा तस्मिन् शरीरे चेतनां विषयाकारां बुद्धिं प्रतिपद्य प्राप्य तदभिव्यङ्ग्यानन्दरूपः सन् क्रियाफलत्वेन विभाव्यते प्रतीयते । कर्मकर्तरि प्रयोगः । यथाऽनलः

असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः ॥ संपद्यतेऽर्थाशयलिङ्गनामभिर्विशुद्धविज्ञानघनः स्वरूपतः ॥ ३४ ॥ प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम् ॥ क्रियाफलत्वेन विभुर्विभाव्यते यथाऽनलो दारुषु तद्गुणात्मकः ॥ ३५ ॥ अहो ममामी वितरन्त्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरम् ॥ स्वधर्मयोगेन यजन्ति मामका निरन्तरं क्षोणितले दृढव्रताः ॥ ३६ ॥ मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च ॥ देदीप्यमानेऽजित देवतानां कुले स्वयं राजकुलाद्द्विजानाम् ॥ ३७ ॥ ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात् ॥ अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥ ३८ ॥ यत्सेवयाऽशेषगुहाशयः स्वराट् विप्रप्रियस्तुष्यति काममीश्वरः ॥ तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥ ३९ ॥

दारुषु स्थितस्तद्गुणात्मको दारुधर्मदैर्घ्यवक्रत्वादिमान् भवति तथा । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः ॥ ३५ ॥ अहो इति ॥ ये मामकाः मम प्रजाः भूताः क्षोणितले भूतले ये दृढव्रताः दृढसङ्कल्पाः सन्तः गुरुं पूज्यं यज्ञभुजां देवानामधीश्वरं हरिं स्वधर्मयोगेन निरन्तरं यजन्ति तेऽमी ममाहो अत्यनुग्रहं वितरन्ति कुर्वन्ति ॥ ३६ ॥ मा जात्विति ॥ महत्यश्च ताः ऋद्धयश्च ताभिर्हेतुभिर्यद्राजकुलात्मकं तेजस्तत्कर्तृसमृद्धिभिर्विनापि तितिक्षया तपसा विद्यया च स्वयमेव देदीप्यमाने द्विजानां कुले तथा अजितो विष्णुर्देवता येषां तेषां वैष्णवानां च कुले मा जातु प्रभवेत् कदाचिदपि प्रभावं मा करोतु ॥ ३७ ॥ ब्रह्मण्यदेव इति ॥ ब्रह्मण्यानां ब्राह्मणभक्तानां देवः पुरातनः पुरुषः महत्तमानामग्रणीश्च हरिः नित्यं यस्य ब्रह्मकुलस्य चरणाभिवन्दनात् अनपायिनीं वियोगरहितां लक्ष्मीमवाप । जगत्पवित्रं सर्वलोकशोधनं यशश्च अवाप ॥ ३८ ॥ यदिति ॥ तथा यस्य ब्रह्मकुलस्य सेवया अशेषगुहाशयः सर्वान्तर्यामी स्वराट् स्वप्रकाशः विप्राणां प्रिय ईश्वरः कामं निकाममतिशयेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्यति अतः तद्धर्मः भगवद्धर्म एव परो मुख्यो येषां तथाभूतैः विनीतैर्भवद्भिस्तद्भगवता सेवितं ब्रह्मकुलमेव निरन्तरं सर्वात्मना सर्वप्रकारेण सेव्यताम् ॥ ३९ ॥ पुमानिति ॥ यस्य ब्राह्मणकुलस्य नित्यं संबन्धेन निष्कपटत्वेन सम्यक् सेवया स्वत एव यज्ञाद्यनुष्ठानं विनैव प्रसीदतः शुध्यतः आत्मनश्चित्तात् हेतोः अनतिवेलं शीघ्रमेवात्यन्तशमं मोक्षं यद्वा आत्मन इति षष्ठी। शुध्यतश्चित्तस्य अत्यन्तशमं मोक्षम् अत्र स्वयमनायासेनैव पुमान् लभेत तत्तस्माद्ब्रह्मकुलात्परं श्रेष्ठमत्र लोके हविर्भुजां देवानां मुखं किमस्ति न किमपि। ब्राह्मणा एव देवानां मुखं नान्यदिति ॥ ४० ॥ हरेरपि ब्राह्मणा एव मुखमित्याह—अश्नातीति ॥ पारमहंस्यपराः ज्ञानिनः तानर्हन्ति अधिकुर्वन्ति इति पारमहंस्य पर्यस्ताः गावो वाचो यत्र उपनिषद्भिर्ज्ञान घनत्वेनोक्तः। यद्वा। परमहंसानां गम्यः पारमहंस्यः ज्ञानरूपः परितो न गच्छन्ति गावो वाचः इन्द्रियाणि च यस्मिन्स पर्यगुः इन्द्रियनियन्ता स चासौ पारमहंस्य पर्यगुः अनन्तः यथा तत्वकोविदैरग्नेः सकाशाद्ब्राह्मणमुखं श्रेष्ठमिति तत्वं जानद्भिरिज्यानां देवानां नामभिः इन्द्राय स्वाहेत्यादिमन्त्रैर्यस्य ब्रह्मकुलस्य मुखे श्रद्धया हुतमिष्टान्नादिकम् अश्नाति तथा चेतनया बहिष्कृते अचेतने हुताशने इज्यनामभिरपि हुतं न अश्नाति ॥ ४१ ॥ यदिति-

पुमाँल्लँभेतानतिवेलमात्मनः प्रसीदतोऽत्यन्तशमं स्वतः स्वयम् ॥ यन्नित्यसंबन्धनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम् ॥ ४० ॥
अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः ॥ न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्य पर्यगुः ॥ ४१ ॥ यद्ब्रह्म
नित्यं विरजं सनातनं श्रद्धातपोमङ्गलमौनसंयमैः ॥ समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ॥ ४२ ॥ तेषामहं पादसरो-
जरेणुमार्यावहेयाधिकिरीटमायुः ॥ यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजन्ति ॥ ४३ ॥ गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं
संवृणतेऽनु सम्पदः ॥ प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम् ॥ ४४ ॥

द्वयम्॥ हे आर्याः पूज्याः यत्रेदं कर्मज्ञानोपासनादिश्रेयः साधनमादर्शे दर्पणे मुखमिवावभासते तत् विरजं शुद्धं सनातनमनादि ब्रह्म वेदमर्थदृष्टये तदर्थज्ञानाय यत् ये ब्राह्मणाः श्रद्धा वेदवाक्ये विश्वासः तपो ब्रह्मचर्यादिमङ्गलमप्रशस्तवर्जनपूर्वकं प्रशस्ताचरणं मौनमध्ययनविरोधिवागनुचारणं संयमः इन्द्रियाणां विषयेभ्यः नियमनं तैः समाधिःचित्तैकाग्रता तेन च नित्यं बिभ्रति तेषां पादसरोजरेणुम् अहम् आ आयुर्यावज्जीवम् आङव्ययीभावः। अधिकिरीटं किरीटस्योपरि वहेय। प्रार्थने लिङ्। यं पादरेणुं नित्यदा शिरसि बिभ्रतः पुंसः पापमाशु नश्यति। यथामुं पुरुषं श्रद्धामैत्रीदयातितिक्षादयः सर्वे गुणा भजन्ति ॥ ४२ ॥ ४३ ॥ गुणायनमिति ॥ गुणानामयनं शीलं सुस्वभाव एव धनवद्रक्षणीयं यस्य तं कृतज्ञं परकृतोपकारं जानन्तं वृद्धा ज्ञानवृद्धाः गुर्वादयो वयोवृद्धाः पित्रादयश्चाश्रया यस्य तं नरम् अनु आनुपूर्व्येण यथाधिकारं सम्पदो धर्मार्थकाममोक्षाख्याः संवृणते सम्यग्भजन्ति। "वृङ् संभक्तौ" यस्मादेवं तस्मात् ब्रह्मकुलं गवां च कुलमनुचरैः स्वभक्तैः सहितो जनार्दनश्च मह्यं प्रसीदतां प्रसीदतु। तङार्षः ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं ब्रुवाणं नृपतिं पृथुं साधुवादेन तस्य सुष्ठु वचनेन हृष्टमनसः साधवः पितृदेवद्विजातयः तुष्टुवुः ॥ ४५ ॥ पुत्रेणेति ॥ सुकृतिना पुत्रेण पिता उत्तमान् लोकान् जयते प्राप्नोतीति वादिनी श्रुतिः सत्यवती यथार्था । तद्भावः । यत् यस्मात् ब्रह्मदण्डहतः ब्राह्मणशापदग्धः पापः वेनोऽपि तमः नरकमत्यतरत् अतिततार ॥ ४६ ॥ हिरण्यकशिपुरिति ॥ हिरण्यकशिपुश्चापि भगवन्निन्दया तमो विविक्षुः स्वसूनोः प्रह्लादस्य प्रभावतः तमः अत्यगात् ॥ ४७ ॥ वीरवर्य इति ॥ हे वीरवर्य हे पृथ्व्याः पितः यस्य तव सर्वलोकानामेकभर्तरि मुख्ये स्वामिनि अच्युते भक्तिरस्ति स त्वं शाश्वतीः समाः अनन्तान्संवत्सरान् सञ्जीव सुखं जीव ॥ ४८ ॥ अहो इति ॥ हे पवित्रकीर्ते अहो त्वयैव नाथेन स्वामिनाद्य वयं मुकुन्दो नाथो येषां ते तथा जाताः । हि यस्मात् यो भवान् उत्तमश्लोकतमस्य अतिप्रशस्तयशसः ब्रह्मण्यदेवस्य विष्णोः कथां व्यनक्ति ॥ ४९ ॥ नेति ॥ हे नाथ स्वामिन् इदमाजीविनां सेवकानामासमन्तादनुशासनं शिक्षणं तवात्यद्भुतमत्याश्चर्यं न भवति । हे आजीव्य इति सम्बोधनं वा । यतः करुणा-

मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः ॥ तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ॥ ४५ ॥ पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ॥ ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत् तमः ॥ ४६ ॥ हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ॥ विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः ॥ ४७ ॥ वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः ॥ यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि ॥४८॥ अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुन्दनाथाः ॥ य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ॥४९॥ नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनम् ॥ प्रजानुरागो महतां प्रकृतिः करुणात्मनाम् ॥५०॥ अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो ॥ भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥ ५१ ॥ नमो विवृद्धसत्त्वाय पुरुषाय महीयसे ॥ यो ब्रह्मक्षत्रमाविश्य बिभर्तीदं स्वतेजसा ॥ ५२ ॥

इति श्रीभागवते चतुर्थस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

त्मनां दयालूनां महतां यः प्रजास्वनुरागः स प्रकृतिः स्वभाव एव ॥ ५० ॥ अद्येति ॥ हे प्रभो नष्टदृष्टीनाम् अज्ञानेनावृतविवेकज्ञानानामत एव दैवसंज्ञितैः प्रारब्धनामकैः कर्मभिः संसारे देवतिर्यगादियोनिषु भ्राम्यतां नोऽस्माकमद्य त्वया तमसः अज्ञानस्य पारः उपासादितः प्रापितः भगवत्तत्त्वोपदेशेनाज्ञानं निवर्तितमित्यर्थः ॥ ५१ ॥ ईश्वरदृष्ट्या विप्रादयोऽपि प्रणमन्ति—नम इति ॥ यो ब्रह्म ब्राह्मणं क्षत्रं क्षत्रियं चाविश्य स्वतेजसा इदं विश्वं बिभर्ति पालयति ब्रह्माविश्य क्षत्रं विद्यादिना बिभर्ति । क्षत्रं चाविश्य जीविकादिना ब्रह्म बिभर्ति । तदुभयमाविश्य रक्षणादिना विश्वं बिभर्ति । तस्मै विवृद्धसत्वाय सत्वप्रधानाय महीयसे पुरुषाय पुरुषोत्तमाय नमः ॥ ५२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्यैकविंशे व्यधादिमाम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाविंशे परमं ज्ञानं पृथवे समुपादिशत् ॥ सनत्कुमारैस्तत्र स्युः श्लोकाः सार्द्धा गुर्णरियः ॥ उवाचसप्तकं सैका स्यात्सप्ततिरनुष्टुभः ॥ २२ ॥ जनेष्विति ॥ जनेष्वेवं पृथुलविक्रमं पृथुं प्रगृणत्सु स्तुवत्सु सत्सु सूर्यस्येव वर्चो दीप्तिर्येषां ते चत्वारो मुनयः सनत्कुमारादयस्तत्रोपजग्मुः ॥ १ ॥ तांस्तु इति ॥ लोकान् अपापान् कुर्वत्या अर्चिषा प्रकाशेन लक्षितान् सनत्कुमारादय इति ज्ञापितान् सिद्धानामीश्वरान् तान् व्योम्नः सकाशात् अवतरतः सानुगो राजा अचष्ट अपश्यत् ॥ २ ॥ तद्दर्शनेति ॥ तेषां सनत्कुमारादीनां दर्शनेनोद्गतान् निर्गतान् प्राणान् प्रत्यादित्सुरिव प्रत्यादातुमिच्छुरिव स सदस्यानुगः सदस्यैः अनुगैश्चामात्यादिभिः सह वैन्यः पृथुः इन्द्रियेशो मनो जीवो वा गुणान् गन्धादीन् आदित्सुरिव उत्थितः अयं भावः । "ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आगते।प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते"इति स्मृतेर्महतामागमने तत्तेजसा क्षिप्ताः प्राणास्तावता प्रत्युद्गच्छन्तीवा अतः स्वयमनुद्गच्छतः प्राणहानिः स्यादिति तान्प्रत्यादातुमिव विद्वांसः प्रत्युत्थानाभिवादादि कुर्वन्तीति पृथुरपि तथा चकार

मैत्रेय उवाच ॥ ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम् ॥ तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥ १ ॥ तांस्तु सिद्धेश्वरान् राजा व्योम्नोऽवतरतोऽर्चिषा ॥ लोकानपापान् कुर्वत्या सानुगोऽचष्ट लक्षितान् ॥ २ ॥ तद्दर्शनोद्गतान्प्राणान् प्रत्यादित्सुरिवोत्थितः ॥ स सदस्यानुगो वैन्य इन्द्रियेशो गुणानिव ॥ ३ ॥ गौरवाद्यन्त्रितः सभ्यः प्रश्रयानतकन्धरः ॥ विधिवत् पूजयांचक्रे गृहीताध्यर्हणासनान् ॥ ४ ॥ तत्पादशौचसलिलैर्मार्जितालकबन्धनः ॥ तत्र शीलवतां वृत्तमाचरन् मानयन्निव ॥५॥ हाटकासन आसीनान् स्वधिष्ण्येष्विव पावकान् ॥ श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ॥ ६ ॥ पृथुरुवाच ॥ अहो आचरितं किं मे मङ्गलं मङ्गलायनाः ॥ यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः ॥ ७ ॥ किं तस्य दुर्लभतरमिह लोके परत्र च ॥ यस्य विप्राः प्रसीदन्ति शिवो विष्णुश्च सानुगः ॥ ८ ॥

॥ ३ ॥ गौरवादिति ॥ तेषां गौरवाद्यन्त्रितो वशीभूतःसङ्कुचितकायिकवाचिकवृत्तिः सभ्यः सज्जनः अत एव प्रश्रयेण नम्रीभावेन आनता कन्धरा यस्य तथाभूतः सन् राजा गृहीतमध्यर्हणमर्घ्यमासनं च यैस्तान्सनत्कुमारादीन् विधिवत् यथाविधि पूजयांचकार ॥ ४ ॥ तदिति ॥ तेषां सनत्कुमारादीनां पादशौचसलिलैश्चरणक्षालनजलैर्मार्जितं क्षालितमलकबन्धनं यस्य तथाभूतः संस्तत्र सभायां शीलवतां सुस्वभावानां सदाचाराणां वृत्तमाचारमेव बहु मानयन्स्वयं तत् आसमन्तात् अचरत् । इवशब्द एवार्थः ॥५॥ हाटकेति ॥ श्रद्धा तेषु महत्त्वबुद्धिः संयमो मनसो वृत्त्यन्तरान्नियमनं ताभ्यां युक्तः तेषां दर्शनात् प्रीतश्च स पृथुः स्वधिष्ण्येषु वेदिष्वासीनान् पावकानिव हाटकस्यासनेषु आसीनान् भवस्यापि अग्रजत्वेन मान्यान् तान् आह स्म ॥ ६ ॥ अहो इति ॥ मङ्गलकरमयनमागमनं येषां ते हे मङ्गलायनाः अहो मे मया किं मङ्गलं पुण्यमाचरितम् । हि यतः यस्य मम योगिभिरपि दुर्दर्शानां वो युष्माकं दर्शनमासीत् । चोऽप्यर्थे ॥ ७ ॥ किमिति ॥ यस्य पुरुषस्य विप्राः प्रसीदन्ति तथा सानुगः अनुगैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहितः शिवो विष्णुर्वा प्रसीदति । तस्य ह्यस्मिन् भूलोके परत्र स्वर्गादौ च किं दुर्लभतरमत्यलभ्यम् ॥ ८ ॥ नैवेति ॥ यथा सर्वदृशं सर्वसाक्षिणमपि आत्मानं सर्वे दृश्याः न लक्षयन्ते । यथा च अस्य जगतो हेतवः महदादयो मन्वादयो वा न लक्षयन्ते तथा सर्वोपकाराय अर्कवत् लोकान् पर्यटतोऽपि यान् युष्मान् लोकः जनसमूहो नैव लक्षयते एते एवंप्रभावा इति नैव जानाति । यद्वा । ये सनकादयः अस्य सर्वदृगात्मदर्शनस्य हेतवस्तान् ॥ ९ ॥ अधना इति ॥ येषां गृहाः अर्हाणां पूज्यानां भवादृशां वर्याः वरणयोग्याः स्वीकार्याः अम्बु च तृणं च भूमिश्च ईश्वरः स्वामी च अवराः भृत्यादयश्च येषु तादृशाः सन्ति ते साधवः गृहमेधिनः अधना अपि धन्याः कृतार्था एव ॥ १० ॥ व्यालालयेति ॥ तीर्थानि पादयोर्यस्य भगवतः स तीर्थपात् तदीया भगवद्भक्तास्तेषां पादतीर्थेन चरणोदकेन विवर्जिताः येषु गृहेषु कदापि भगवद्भक्तानां पादप्रक्षालनमात्रमपि सत्कारो न जातः । एवंभूता यद्गृहाः ये गृहास्ते अरिक्ताः परिपूर्णा अखिलाः सम्पदो येषु तादृशा अपि व्यालानामालया येषु द्रुमेषु तादृशाः सर्पादि निवासभूतवृक्षतुल्या एव । यद्वा । यच्छब्देन गृहस्थानां ग्रहणम् । येषां गृहस्थानां गृहाः हरिभक्ताङ्घ्रिजलहीनास्ते गृहस्थाः व्यालतुल्यवाग्विषवर्षिपुत्रादीनामालया येषु

नैव लक्षयते लोको लोकान् पर्यटतोऽपि यान् ॥ यथा सर्वदृशः सर्व आत्मानं येऽस्य हेतवः ॥९॥ अधना अपि ते धन्याः साधवो गृहमेधिनः ॥
यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः ॥ १० ॥ व्यालालयद्रुमा वैतेऽप्यरिक्ताखिलसम्पदः ॥ यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ॥ ११ ॥
स्वागतं वो द्विजश्रेष्ठा यद् व्रतानि मुमुक्षवः ॥ चरन्ति श्रद्धया धीरा बाला एव बृहन्ति च ॥ १२ ॥ कच्चिन्नः कुशलं नाथा इन्द्रियार्थार्थवेदि-
नाम् ॥ व्यसनावाप एतस्मिन् पतितानां स्वकर्मभिः ॥ १३ ॥ भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते ॥ कुशलाकुशला यत्र न सन्ति मति-
वृत्तयः ॥ १४ ॥ तदहं कृतविश्रम्भः सुहृदो वस्तपस्विनाम् ॥ संपृच्छे भव एतस्मिन् क्षेमः केनाञ्जसा भवेत् ॥ १५ ॥

तथाभूता द्रुमा एव येषां छायापि कैरपि भीत्या न स्पृश्यते ॥ ११ ॥ स्वागतमिति ॥ हे द्विजश्रेष्ठाः वो युष्माकं स्वागतमागमनं सुष्ठु जातम् यत् यस्मात् बाला एव भवन्तो धीराः वशीकृतचित्ताः मुमुक्षवश्च सन्तो बृहन्ति नैष्ठिकब्रह्मचर्यादीन्येव व्रतानि चरन्ति । यद्वा । यद्यस्माद्बृहन्ति व्रतानि ब्रह्मचर्याणि मुमुक्षवश्चरन्ति । भवन्तस्तु बाला एव मुक्ता एवेति ब्रह्मचर्यकष्टं मुमुक्षाकष्टं च न जानन्तीति ॥ १२ ॥ कच्चिदिति ॥ हे नाथाः स्वामिनः इन्द्रियाणामर्था विषयाः रूपादय एवार्थाः पुरुषार्था इति ये विद-न्ति ते तथा तेषामत एव व्यसनानि दुःखान्येवोप्यन्ते उद्भवन्ति यस्मिंस्तस्मिन्नेतस्मिन् संसारे स्वकर्मभिः पापाद्यदृष्टैः पतितानां नोऽस्माकं कच्चित्कुशलमस्ति ॥ १३ ॥ ननु अतिथीनां कुशलं प्रष्टव्यं नत्वात्मन इत्याशंक्याह—भवत्स्विति ॥ आत्मारामेषु भवत्सु कुशलप्रश्नो नेष्यते न युज्यते । येषु भवत्सु कुशलाकुशलाकाराः मतिवृत्तयो न सन्ति ॥ १४ ॥ तदिति ॥ तत्तस्मादहंकृतविश्रम्भः कृतविश्वासः सन् तपस्विनां दुःखतप्तानां सुहृदो हितकारिणो वो युष्मान् तेषां दुःखितानां क्षेमः कल्याणं मोक्षः एत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिमन्भवे संसारे अञ्जसा अनायासेन केन साधनेन भवेदिति संपृच्छे। तङ्गार्थः ॥ १५ ॥ व्यक्तमिति ॥ व्यक्तं निश्चितम् आत्मवतां धीराणामात्मा तेषु आत्मत्वेन प्रकाशमानः अतस्तान्प्रत्यात्मानं भावयति प्रकाशयति इत्यात्मभावनः अजः श्रीनारायणः भगवान् एव सिद्धरूपी भवत्स्वरूपधरः संन् स्वानां भक्तानामनुग्रहायेमां पृथ्वीं चरति ॥ १६ ॥ पृथोरिति ॥ पृथोस्तत् पूर्वोक्तप्रकारं सारं न्याय्यं सुष्ठु गम्भीरार्थं मितमल्पाक्षरं मधु श्रोत्रप्रियं सूक्तं शोभनं वचनमाकर्ण्य स्मयमानः इव प्रतीयमानः सनत्कुमारः प्रीत्या तं प्रत्युवाच ह ॥ १७ ॥ साध्विति ॥ हे महाराज विदुषा जानतापि सर्वभूतानां हिते आत्मा यस्य तादृशेन भूतहिताय प्रश्नकर्त्रा इति भावः । भवता साधु पृष्टं यतः साधूनां भवादृशां मतिरीदृशी परहितपरैव भवति ॥ १८ ॥ सङ्गम इति ॥ साधूनां सदाचाराणां सङ्गमः उभयेषां पृच्छकानां तदुत्तरदातॄणां च सम्मतः एव येषां संभाषणपूर्वकः संप्रश्नः सर्वेषां शं सुखं वितनोति ॥ १९ ॥ अस्तीति ॥ हे राजन् मधुद्विषः भगवतः पादारविन्दस्य ये गुणाः पराक्रमास्तेषामनुवादने प्रश्नद्वारेणानुवादप्रवर्त्तने श्रवणे हरि-

व्यक्तमात्मवतामात्मा भगवानात्मभावनः ॥ स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः ॥ १६॥ मैत्रेय उवाच ॥ पृथोस्तत् सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु ॥ स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह ॥ १७ ॥ सनत्कुमार उवाच ॥ साधु पृष्टं महाराज सर्वभूतहितात्मना ॥ भवता विदुषा चापि साधूनां मतिरीदृशी ॥ १८॥ सङ्गमः खलु साधूनामुभयेषां च संमतः ॥ यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शम् ॥१९॥ अस्त्येव राजन् भवतो मधुद्विषः पादारविन्दस्य गुणानुवादने॥ रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमन्तरात्मनः ॥२०॥ शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः ॥ असङ्ग आत्मव्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥२१॥ सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया ॥ योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च ॥ २२ ॥ अर्थेन्द्रियारामसगोष्ठ्यतृष्णया तत्संमतानामपरिग्रहेण ॥ विविक्तरुच्या परितोष आत्मन् विना हरेर्गुणपीयूषपानात् ॥ २३ ॥

विमुखैर्दुरापा भवतो नैष्ठिकी निश्चला रतिरस्त्येव। या रतिर्जायमाना पुरुषस्यात्मनो मनसः अन्तःकामात्मकं मलं कषायं धातुरागवदुपायान्तरैरनिवर्त्यं विधुनोति नाशयति। यद्वा। कामं यथेष्टम् ॥ २० ॥ शास्त्रेष्विति ॥ आत्मव्यतिरिक्ते सर्वप्रपञ्चमात्रे असङ्गो वैराग्यं तथा आत्मनि सर्वात्मभूते निर्गुणे ब्रह्मणि दृढा रतिश्चेति सध्र्यक्विमृशेषु सम्यग्विचारितेषु शास्त्रेषु नृणां क्षेमस्य मोक्षस्य हेतुः साधनमियानेव एतावानेव सुनिश्चितोऽस्ति ॥ २१ ॥ सा इति ॥ नित्यमिति सर्वं तृतीयान्तैः संबध्यते । सा ब्रह्मणि रतिरसङ्गश्च नित्यं श्रद्धया भगवत्प्रीतिहेतुधर्माणां चर्यया आचरणेन जिज्ञासया तत्तद्विशेषबुभुत्सया आध्यात्मिके योगे यमनियमादौ निष्ठया योगेश्वराणामुपासनया सेवया पुण्यया पुण्यश्रवसो हरेः कथया तच्छ्रवणेन च स्यात् ॥ २२ ॥ अर्थेति ॥ अर्थेषु द्रव्येषु इन्द्रियेषु चारमन्ति ते धनलुब्धा भोगासक्ताश्च तैः सह या गोष्ठी तस्यामतृष्णाया तेषां सम्मता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये अर्थाः कामाश्च तेषामपरिग्रहेण अनासक्त्या हरेर्गुणपीयूषपानाद्विना आत्मन्येव परितोषे सति विविक्ते विजने रुच्या भगवद्गुणामृतपाने सति तु विविक्तरुचिर्न कार्या। न चात्मपरितोषः कार्य इत्याशयः ॥ २३ ॥ अहिंसयेति ॥ अहिंसया परपीडावर्जनेन पारमहंस्यधर्मस्य चर्यया यदृच्छालाभसन्तोषादिना स्मृत्या आत्महितानुसन्धानेन मुकुन्दस्याचरितमेव अग्र्यं श्रेष्ठं सीधु अमृतं तेन तच्चरितस्मरणसुखेनेत्यर्थः। तेन कथाश्रवणेन न पौनरुक्त्यम् । अकामैः कामत्यागैः कामरहितैरिति यमनियमविशेषणं वा । यमैः सत्यादिभिः नियमैः स्नानाद्यैः मतान्तरस्य अनिन्दया निरीहया योगक्षेमार्थक्रियाराहित्येन द्वन्द्वानां शीतोष्णादीनां तितिक्षया ॥ २४ ॥ हरेरिति ॥ तत्परा हरिभक्तास्तेषां कर्णपूराः कर्णालङ्कारभूताः ये भगवतो गुणास्तेषामभिधानेन कीर्त्तनेन तथा विजृम्भमाणया वर्द्धमानया हरेर्भक्त्या एतैः साधनैः सदसति कार्यकारणरूपे अनात्मनि प्रपञ्चे असङ्ग आसक्त्यभावः स्यात् । तथा निर्गुणे ब्रह्मणि अञ्जसा दृढा रतिश्च स्यात् ॥ २५ ॥ यदेति ॥ यदा ब्रह्मणि रतिः नैष्ठिकी निष्ठां प्राप्ता भवति तदा पुमान् आचार्यवान् सन् ज्ञानविरागयोः रंहसा वेगेन अवीर्यं निर्वासनं पञ्चात्मकं पञ्चभूतप्रधानम् अविद्यादिपञ्चक्लेशात्मकं वा जीवस्य कोशभावरकं हृदयं लिङ्गशरीरम्

अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुन्दाचरिताग्र्यसीधुना ॥ यमैरकामैर्नियमैश्चाप्यनिन्दया निरीहया द्वन्द्वतितिक्षया च ॥ २४ ॥
हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृम्भमाणया ॥ भक्त्या ह्यसङ्गः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ॥ २५ ॥
यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा ॥ दहत्यवीर्यं हृदयं जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ॥ २६ ॥
दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरन्तर्विचष्टे ॥ परात्मनोर्यद्व्यवधानं पुरस्तात् स्वप्ने यथा पुरुषस्तद्विनाशे ॥ २७ ॥ आत्मानमिन्द्रियार्थं च परं यदुभयोरपि ॥ सत्याशय उपाधौ वै पुमान् पश्यति नान्यदा ॥ २८ ॥

उत्थितः प्रज्वलितोऽग्निर्योनिमरणिमिव दहति । यद्वा । यदा ब्रह्मणि रतिः पुमान् आचार्यवांश्च भवति तदा ज्ञानविरागरंहसा उत्थितः साक्षात्कारोऽवीर्यं पुनः प्ररोहाक्षमं हृदयं दहति ॥ २६ ॥ दग्धाशय इति ॥ परोऽदृश्य आत्मा द्रष्टा तयोर्यत् व्यवधानं भेदकमाशयरूपं पूर्वमासीत्तस्य विनाशे दग्ध आशयो हृदयमुपाधिर्यस्य अत एव मुक्ताः समस्तास्तद्गुणाः कर्तृत्वादयो येन स पुमान् यथा स्वप्ने राजाहमित्यारोपितं सैन्यादिद्रष्टारं दृश्यं सैन्यं च स्वप्नावस्थानाशेन पश्यति तद्वत् आत्मनः सकाशात् बहिर्घटाद्यन्तःसुखदुःखादि नैव विचष्टे न पश्यत्येव । यद्वा । दग्धाशयो मुक्ताशयगुणश्च पुमान् आत्मनो बहिरन्तश्च भेदं न विचष्टे तथा परात्मनोः परमात्मजीवयोर्यत्पुरस्तात् व्यवधानं भेद आसीत्तदपि न पश्यति । यद्वा । बहिरन्तर्दर्शनाभावे हेतुः यत् परात्मनोः दृश्यद्रष्ट्रोः पुरस्तादन्तःकरणमेव व्यवधानं भेदकतया आसीत् तन्नाशेऽन्तर्बहिः पृथग्दर्शनं नश्येदेवेति भावः ॥ २७ ॥ दृश्यद्रष्टृभेदप्रतीतिरन्तःकरणसत्त्व एवेत्यन्वयव्यतिरेकाभ्यां दर्शयति—आत्मानमिति ॥ उपाधिभूत आशयेऽन्तःकरणे सत्येव जाग्रत्स्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयोरात्मानं द्रष्टारमिन्द्रियाणामर्थं विषयं दृश्यमुभयोस्तयोः परं यत् दर्शनहेतुमहङ्कारं चापि पुमान् पश्यति। अन्यदा सुषुप्तिसमाध्याद्यवस्थायामन्तःकरणस्य लीनत्वात् न तथा पश्यति। उक्तं च। "दृश्यानुरञ्जितं द्रष्टृ दृश्यं द्रष्ट्रनुरञ्जितम्। अहंकृत्योभयं रक्तं तन्नाशे द्वैततात्मनः॥" इति ॥ २८ ॥ निमित्त इति ॥ लोकेऽपि सर्वत्र भेदनिमित्ते जलदर्पणादौ सत्येवात्मनो बिम्बभूतस्य परस्य चापि भिदां पुरुषः पश्यति नान्यदा जलाद्यभावावस्थायामपीति यथा तथेत्यर्थः ॥ २९ ॥ इन्द्रियैरिति ॥ श्रुताननुभूतान्वा विषयान् ध्यायतां गुणारोपेण चिन्तयतां पुंसामिन्द्रियाणि ध्यातैर्विषयैराकृष्यन्ते तैश्च विषयाकृष्टैरिन्द्रियैर्मन आक्षिप्तमाकृष्टं सद्बुद्धेः सकाशाच्चेतनां युक्तायुक्तविवेकसामर्थ्यं हरति। तत्र दृष्टान्तः। स्तम्ब इति। यथा ह्रदतीरस्थः कुशमुंजादिस्तम्बो मूलैर्ह्रदात्तोयं हरति कैरप्यविवेकिभिर्न ज्ञायते तथा मनोऽपि बुद्धेश्चेतनां हरत्येतदविवेकिभिर्न ज्ञायते ॥ ३० ॥ भ्रश्यतीति ॥ चित्तं चेतनामनु तस्यामपहृतायां स्मृतिः पूर्वापरानुसन्धानलक्षणा भ्रश्यति स्मृतिक्षये सति स्वरूपज्ञानस्य भ्रंशो भवति तत्तस्य स्वरूपज्ञानस्य रोधं भ्रंशमात्मनः स्वस्मादेवात्मनः स्वस्य अपह्नवं नाशं कवयः प्राहुः ॥ ३१ ॥ नात इति ॥ लोके यदधि यमात्मानमधिकृत्यान्यस्य स्त्रीपुत्रगृहादेः

निमित्ते सति सर्वत्र जलादावपि पूरुषः ॥ आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ॥ २९ ॥ इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ॥ चेतनां हरते बुद्धेः स्तम्बस्तोयमिव ह्रदात्॥३०॥ भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये ॥ तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ॥३१॥ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः ॥ यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥ ३२ ॥ अर्थेन्द्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् ॥ भ्रंशितो ज्ञानविज्ञानाद् येनाविशति मुख्यताम् ॥ ३३ ॥ न कुर्यात् कर्हिचित सङ्गं तमस्तीव्रं तितीरिषुः ॥ धर्मार्थकाममोक्षाणां यदत्यन्तविघातकम् ॥ ३४ ॥ तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते ॥ त्रैवर्ग्योऽर्थो यतो नित्यं कृतान्तभयसंयुतः ॥ ३५ ॥

सर्वविषयजातस्य प्रेयस्त्वं प्रियतमत्वम्। आत्मनस्तु "कामाय सर्वं प्रियं भवति" इति श्रुतेः। तस्यात्मनः स्वेनैव यो व्यतिक्रमः अपलापस्तस्माद्यः स्वार्थस्य व्यतिक्रमो विनाशोऽतः परतरः उत्कृष्टोऽन्यः पुंसः स्वार्थनाशो नास्ति ॥ ३२ ॥ अर्थेति ॥ अर्थस्य धनादेः इन्द्रियार्थस्य रूपरसादेः कामस्य चाभिध्यानमेव नृणां सर्वार्थानामपह्नवः विनाशः येनार्थकामादिध्यानेन ज्ञानं शास्त्रोत्थं विज्ञानं चात्मसाक्षात्कारस्तदुभयात् भ्रंशितः सन्पुमान् मुख्यतां स्थावरतामाविशति वृक्षादियोनिषु जायते ॥ ३३ ॥ नेति ॥ अतस्तीव्रं तमः संसारमूलमज्ञानं तितीरिषुः तितीर्षुः तर्तुमिच्छुः पुरुषः इडार्षः। यद्वस्तु धर्मार्थकाममोक्षाणामत्यन्तविघातकं तस्मिन् कर्हिचिदपि सङ्गमासक्तिं न कुर्यात् ॥ ३४ ॥ तत्रापीति ॥ तत्र धर्मादिचतुर्ष्वप्यात्यन्तिकतया सर्वोत्कृष्टतया मोक्ष एव पुरुषार्थ इष्यते इष्टो भवति। धर्मार्थकामलक्षणस्त्रैवर्ग्योर्थः स्वार्थे ष्यञ्। यतो नित्यं सर्वदा कृतान्तात् भयेन संयुतो भयव्याप्त एवेत्यर्थः। मोक्षस्तु न तथेति ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयसंयुतत्वमाह—पर इति ॥ परे ब्रह्मादयः अवरे अस्मदादयश्च ये भावाः प्राणिनः गुणव्यतिकरात् सत्वादिगुणपरिणामादनु पश्चाज्जाताः इशेन कालेन विध्वंसिता आशिषो धर्मादयो येषां तेषां क्षेमं यथा सुखस्थितिर्न विद्यते ॥ ३६ ॥ तदिति ॥ तत्तस्मात् हे नरेन्द्र देहः इन्द्रियाणि असवः प्राणाश्च धिषणा बुद्धिश्च आत्मा अहङ्कारश्च तैरावृतानां जगतां जङ्गमानां तस्थुषां स्थावराणां हृदि यो भगवान् क्षेत्रविदं जीवं तपति नियमयति स क्षेत्रवित्तपः तस्य भावस्तत्ता तया अन्तर्यामिरूपेण आविः प्रत्यक्षः प्रत्यक् साक्षिरूपेण विश्वक् व्याप्तत्वेन चकास्ति प्रकाशते तं भगवन्तं सोऽहमस्मीति अभेदप्रकारेण अवेहि । सोऽस्तीति पाठे स एवैकोऽस्ति ततोऽन्यदसत् इत्यर्थः ॥ ३७ ॥ यस्मिन्निति ॥ विवेकेन विधुतिर्निराकृतिर्यस्य तत् इदं विश्वं सदसदात्मतया कार्यकारणभावेन स्रजि मालायामहिबुद्धिरिव । वशब्दो वाशब्दो वा इवार्थे । यस्मिन् परमात्मनि मायैव भाति नित्यमुक्तं परितः शुद्धं विशुद्धं ज्ञानरूपं तत्वं सत्यं च अत एव प्रत्यूढा अभिभूता कर्मभिः कलिला मलिना प्रकृतिर्येन तं प्रपद्ये शरणं गतोऽस्मि इति भक्त्या

परेऽवरे च ये भावा गुणव्यतिकरादनु ॥ न तेषां विद्यते क्षेममीशविध्वंसिताशिषाम् ॥ ३६ ॥ तत् त्वं नरेन्द्र जगतामथ तस्थुषां च देहेन्द्रिया-
सुधिषणात्मभिरावृतानाम् ॥ यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि ॥ ३७ ॥ यस्मिन्निदं सदसदात्म-
तया विभाति माया विवेकविधुतिः स्रजि वाऽहिबुद्धिः ॥ तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वप्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥ ३८ ॥ यत्पादपङ्क-
जपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः ॥ तद्वन्नरिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम् ॥ ३९ ॥
कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीरषन्ति ॥ तत् त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम् ॥ ४० ॥
मैत्रेय उवाच ॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा ॥ दर्शितात्मगतिः सम्यक् प्रशस्योवाच तं नृपः ॥ ४१ ॥

प्रणमति ॥ ३८ ॥ तमवेहीति ज्ञानमुपदिष्टं तद्दुष्करं मत्वा भक्तिमाह—यदिति ॥ यस्य वासुदेवस्य पादपङ्कजयोः पलाशानि अङ्गुलयस्तेषां विलासः कान्तिस्तस्य भक्त्या स्मरणेन सन्तो भक्ताः कर्मभिर्ग्रथितं कर्माशयमहङ्कारं यथा सुखेन उद्ग्रथयन्ति कर्मवासनाभिर्विनिर्मुक्तं कुर्वन्ति । नलोपः पृषोदरादित्वादार्षत्वाद्वा । रिक्ता भगवदालम्बनरहिता मतिर्येषां ते यतयो ज्ञानमार्गीया अत एव रुद्धः स्रोतसामिन्द्रियाणां गणो वर्गो यैस्ते तथाभूता अपि तद्वत् तथा सुखेन कर्माशयं न उद्ग्रथयन्ति तं वासुदेवम् अरणं शरणं भज ॥ ३९ ॥ ज्ञानमार्गिणां दुःखेन प्राप्तिरित्याह—कृच्छ्र इति ॥ षड्वर्गः इन्द्रियसमूहः नक्रो मकरो यत्र तादृशं भवार्णवम् असुखेन दुःखरूपेण योगादिना ये तितीरिषन्ति तितीर्षन्ति इट् आर्षः । अप्लवेशां न प्लवस्तरणे हेतुरीट् ईश्वरो येषां तेषाम् इह तरणे महान् कृच्छ्रः क्लेशो भवति तत्तस्मात् त्वं भजनीयं भगवतो हरेरङ्घ्रिम् उडुपं तरणसाधनं प्लवं कृत्वा दुस्तरार्णं दुस्तरोदकतुल्यं वकारलोपेन दुस्तरार्णवतुल्यं वा व्यसनं संसारदुःखम् उत्तर ॥ ४० ॥ स इति ॥ आत्मनि मेधा यस्य तेन असिजार्षः । ब्रह्मणः पुत्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमारेण एवं सम्यक् दर्शिता आत्मनो गतिस्तत्त्वं यस्मै स नृपः तं कुमारं प्रशस्य स्तुत्वा उवाच ॥ ४१ ॥ कृत इति ॥ हे ब्रह्मन् हे भगवन् " द्रष्टासि सिद्धाननुरक्तलोकः " इति उक्तवता आर्तेषु अनुकम्पिना दयावता हरिणा पूर्वमेव मम अनुग्रहः कृतः अतस्तं हरेरनुग्रहमापादयितुं सम्पादयितुं यूयमागताः। ब्रह्मन्निति प्रधानं कुमारं प्रति सम्बुद्धिः। यूयमागता इति सर्वान्प्रत्युक्तिः ॥ ४२ ॥ निष्पादित इति ॥ भगवत्कृतोऽनुग्रहश्च घृणालुभिर्दयालुभिर्भगवद्भिर्भवद्भिः कात्स्न्र्येन साकल्येन निष्पादितश्च निष्पादितमित्यपि पाठः। तत्र च यद्यपि गुरुदक्षिणार्थं किंचिद्देयं तथापि हि यस्मात् मे ममात्मनो देहेन सह सर्वं राज्यादिकं साधूच्छिष्टं साधूनां भवतामेवोच्छिष्टं भवद्भिरेव भृग्वादिभिर्दत्तं मया प्रसादरूपं प्राप्तं भुक्तं च। नतु मदीयं स्वत्वमतो भवद्भ्योऽहं किं ददे किं दद्याम् । नहि पित्रा दत्तं मोदकादि भुक्त्वा उच्छिष्टं तस्मै दानरूपेण प्रत्यर्प्यते ॥ ४३ ॥ प्राणा इति ॥ हे ब्रह्मन् मम स्वत्वाभावेऽपि भगवत्तोषार्थं प्राणाः दाराः सुताः इत्यादि सर्वं भवदीयमेव भवद्भ्यो निवेदितम् । यथा राज्ञ एव ताम्बूलादि भृत्यो राज्ञे निवेदयति। यद्वा। अश्वमेधयागान्ते प्राणादिकं सर्वं मया निवेदितं पुनश्च तैर्निजोच्छिष्टं मह्यमेव समर्पितमिति ॥ ४४ ॥ आत्मनः स्वत्वाभावं प्रपञ्चयति—सैनापत्यमिति ॥ सैनापत्यं सेनापतित्वं राज्यं दण्डनेतृत्वं प्राड्विवाकतां च सर्वलोकानामाधिपत्यं स्वामित्वं च सर्वं वेदशास्त्रविद्ब्राह्मण एवार्हति ॥ ४५ ॥ स्वमिति ॥ अतो ब्राह्मणः स्वमेव धनादिकं भुङ्क्ते स्वमेव वस्त्रं वस्ते परिधत्ते स्वमेव ददाति च। क्षत्रियादयस्तु तस्य ब्राह्मणस्यानुग्रहेणैवान्नं भुञ्जते नतु तेषां कुत्रापि स्वत्वम् येन दाने स्वातन्त्र्यं स्यादिति भावः ॥ ४६ ॥ यैरिति ॥ निगमिभिर्वेदविद्भिर्यैर्भवद्भिः आत्मवादे अध्यात्मविचारे एकान्ततो निश्चयेन ईदृशी अत्यपूर्वा भगवतो वासुदेवस्य सर्वात्मकस्य गतिस्तत्त्वं नोऽस्मान् प्रति प्रतिपादिता निरूपिता। अदभ्रकरुणाः अतिदयालवस्ते भवन्तः स्वकृतेनास्मदाद्युपकारेणैव तुष्यन्तु यतः उदपात्रम् अञ्जलिं हस्तसंयोजनं विना अन्यत् को नाम तत्प्रतिकरोति प्रत्युपकारं कः कर्तुं शक्नोति न कोऽपीत्यर्थः । मया तेभ्योऽञ्जलिरेव बद्ध इत्यर्थः। यद्वा। विनोदपात्रमुपहासास्पदं प्रत्युपकारे प्रवृत्तो जनानामुपहासास्पदं भवेदिति ॥ ४७ ॥

राजोवाच ॥ कृतो मेऽनुग्रहः पूर्वं हरिणाऽऽर्तानुकम्पिना ॥ तमापादयितुं ब्रह्मन् भगवन् यूयमागताः ॥ ४२ ॥ निष्पादितश्च कात्स्न्र्येन भगवद्भिर्घृणालुभिः ॥ साधूच्छिष्टं हि सर्वं मे आत्मना सह किं ददे ॥ ४३ ॥ प्राणा दाराः सुता ब्रह्मन् गृहाश्च सपरिच्छदाः ॥ राज्यं बलं मही कोश इति सर्वं निवेदितम् ॥ ४४ ॥ सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च ॥ सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥ ४५ ॥ स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ॥ तस्यैवानुग्रहेणान्नं भुञ्जते क्षत्रियादयः ॥४६॥ यैरीदृशी भगवतो गतिरात्मवाद एकान्ततो निगमिभिः प्रतिपादिता नः ॥ तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत् प्रतिकरोति विनोदपात्रम् ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त इति ॥ ते सनत्कुमारादयः आत्मयोगपतयः आत्मज्ञानदानसमर्था गुरवः मतय इत्यपि पाठः । आदिराजेन पृथुना पूजितास्तदीयं शीलं सुस्वभावं शंसन्तः स्तुवन्तः सन्तो नृणां तत्रत्यानां सर्वेषां मिषतां पश्यतां सतां खेऽभूवन् आकाशमार्गेण सत्यलोकं गताः ॥ ४८ ॥ वैन्य इति ॥ वैन्यः पृथुस्तु महतां धुर्यो मुख्यः सनत्कुमारादिकृतया अध्यात्मशिक्षया आत्मतत्वोपदेशेन या संस्थितिः मनसो निश्चलता तया आत्मन्यवस्थितः ब्रह्मात्मैक्यानुसन्धानपरः सन्नात्मानमाप्तकामं पूर्णकाममेव मेने।इवेत्यवधारणे ॥४९॥ कर्माणीति ॥ यथाकालं यत्र काले यद्विहितं तदनतिक्रमेण एवमग्रेऽपि । यथादेशं यथाबलं यथोचितं यथावित्तं च ब्रह्मसात्कृतं ब्रह्मार्पणं यथा भवति तथा कर्माणि च अकरोत् ॥ ५० ॥ फलमिति ॥ कर्मणां फलं ब्रह्मणि विन्यस्य निर्विषङ्गः कर्मस्वनासक्तः समाहितः सावधानः आत्मानं च प्रकृतेः परं कर्मणाम् अध्यक्षं साक्षिणं मन्वानः कर्माण्यकरोदित्यनुषङ्गः ॥ ५१ ॥ गृहेष्विति ॥ निरहंमतिः निरहङ्कारः अत एव गृहेषु वर्तमानोऽपि साम्राज्यश्रिया चक्रवर्तिसम्पदा अन्वितो युक्तोऽपि च अर्कवत् यथा

त आत्मयोगमतय आदिराजेन पूजिताः ॥ शीलं तदीयं शंसन्तः खेऽभूवन् मिषतां नृणाम् ॥ ४८ ॥ वैन्यस्तु धुर्यो महतां संस्थित्याऽध्यात्मशिक्षया ॥ आप्तकाममिवात्मानं मेने आत्मन्यवस्थितः ॥ ४९ ॥ कर्माणि च यथाकालं यथादेशं यथाबलम् ॥ यथोचितं यथावित्तमकरोद् ब्रह्मसात्कृतम् ॥ ५० ॥ फलं ब्रह्मणि विन्यस्य निर्विषङ्गः समाहितः ॥ कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परम् ॥ ५१ ॥ गृहेषु वर्तमानोऽपि स साम्राज्यश्रियाऽन्वितः ॥ नासज्जतेन्द्रियार्थेषु निरहंमतिरर्कवत् ॥ ५२ ॥ एवमध्यात्मयोगेन कर्माण्यनुसमाचरन् ॥ पुत्रानुत्पादयामास पञ्चार्ऽर्चिष्यात्मसंमतान् ॥ विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम् ॥ ५३ ॥ सर्वेषां लोकपालानां दधारैकः पृथुर्गुणान् ॥ गोपीथाय जगत्सृष्टेः काले स्वे स्वेऽच्युतात्मकः ॥ ५४ ॥

सूर्यः सर्वत्र पर्यटन्नपि नासक्तो भवति तथा इन्द्रियार्थेषु विषयेषु नासज्जत ॥ ५२ ॥ एवमिति सार्द्धम् ॥ एवम् अध्यात्मयोगेन आत्मज्ञानपूर्वकं भगवति समर्पणेन कर्माण्यनु निरन्तरं सम्यक् देशकालाद्यनुसारेण आचरन् अर्चिषि स्वभार्यायामात्मसंमतान् गुणपराक्रमादिना योग्यान् विजिताश्वं धूम्रकेशं चेत्यादिपञ्च पुत्रान् उत्पादयामासेति पूर्वजातानामत्रानुवादः।यद्वा । कर्माण्यनुसमाचरन् सः अध्यात्मयोगेन अध्यात्मेति समम्यर्थेऽव्ययीभावः।आत्मनि स्वतः सिद्धो योगः आसक्तिरहितविषयभोगलक्षणः सिद्धिविशेषस्तेनैव पुत्रानुत्पादयामास । न तु पुत्रोत्पादने हेतुः कोऽपि कामविकारस्तस्याभूदिति पूर्वप्रजातानामुत्पादनकथनम् ॥ ५३ ॥ सर्वेषामिति ॥ अच्युते आत्मा मनो यस्य सः अच्युतावतारभूतो वा पृथुः जगत्सृष्टेः गोपीथाय रक्षणाय स्वे स्वे काले तत्तद्वर्षादियोग्ये समये ये सर्वेषां लोकपालानां पृथक् पृथक् वर्षादयो गुणास्तान् सर्वानेक एव एषः स्वयं दधार ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकपालगुणानाह—मन इति ॥ मनोवृत्तयो हितचिन्तनानि वाग्वृत्तयो हितमितसत्यप्रियभाषणानि ताभिः सौम्यैर्मनोहरैर्गुणैः सुस्वभावादिभिश्च प्रजाः संरञ्जयन् राजेति स्वस्य नामधेयमधात् दधार । यद्यपि राजतेः कनिन्प्रत्यये राजन्निति सिद्ध्यति तथापि बाहुलकात् राजेरेव रञ्जनार्थाङ्गीकाराद्वा साध्यम् । अतोऽपरः द्वितीयः सोमश्चासौ राजा च सोमराजश्चन्द्र इव जात इत्यर्थः ॥ ५५ ॥ सूर्यवदिति ॥ सूर्यो यथा समं सर्वं प्रतपन् भुवो वसु जलमष्टौ मासान् गृह्णाति विसृजति च वर्षाकाले तथा सर्वत्र सममाज्ञाप्रवर्तनेन प्रतपन् करादि काले धनादि गृह्णन् दुर्भिक्षादिकाले च विसृजन्नसौ सूर्यवत् अभूत् । तेजसा अग्निरिव दुर्धर्षः धर्षयितुमभिभवितुमशक्यः महेन्द्र इव दुर्जयश्च ॥ ५६ ॥ तितिक्षयेति ॥ तितिक्षयाऽपराधसहनेन धरित्रीव नृणामभीष्टदो द्यौः स्वर्ग इव पर्जन्यो मेघो यथा प्रजास्तर्पयन् वर्षासु जलं वर्षति तथा कदाचिद्वृष्ट्यभावे प्रजास्तर्पयन् यथाकामं यथाऽपेक्षितं जलमप्यसौ वर्षति स्मातोऽद्वितीयः पर्जन्य इव जातः ॥ ५७ ॥ समुद्र इति ॥ समुद्रो यथा गाम्भीर्येणैतावानिति न बुध्यते तथासाव-

मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरञ्जयन् प्रजाः ॥ राजेत्यधान्नामधेयं सोमराज इवापरः ॥ ५५ ॥ सूर्यवत् विसृजन् गृह्णन् प्रतपंश्च भुवो वसु ॥ दुर्धर्षस्तेजसेवाग्निर्महेन्द्र इव दुर्जयः ॥ ५६ ॥ तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणाम् ॥ वर्षति स्म यथाकामं पर्जन्य इव तर्पयन् ॥ ५७ ॥ समुद्र इव दुर्बोधः सत्त्वेनाचलराडिव ॥ धर्मराडिव शिक्षायामाश्चर्ये हिमवानिव ॥ ५८ ॥ कुबेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा ॥ मातरिश्वेव सर्वात्मा बलेन सहसौजसा ॥ ५९ ॥ अविषह्यतया देवो भगवान् भूतराडिव ॥ कन्दर्प इव सौन्दर्ये मनस्वी मृगराडिव ॥ ६० ॥ वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः ॥ बृहस्पतिर्ब्रह्मवाद आत्मवत्त्वे स्वयं हरिः ॥ ६१ ॥ भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु ॥ ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ॥ ६२ ॥

प्यभिप्रायतो दुर्बोध इत्यर्थः । सत्वेन स्थैर्येण अचलराट् सुमेरुरिव शिक्षायां दण्डने पक्षपातराहित्येनानुल्लङ्घ्यशासनत्वेन च धर्मराट् यमराज इव आश्चर्ये हिमवान् हिमाचल इव ॥ ५८ ॥ कुबेर इति ॥ कुबेर इव कोशाढ्योऽभूत् गुप्तोऽज्ञातः सुरक्षितश्च धनादिपदार्थो यस्य स तथा एवंभूतो वरुणो यथा तथा पृथुरपि मातरिश्वा पवन इव बलेन सहसा ओजसा च शरीरमनइन्द्रियबलेन च सर्वेषां प्राणिनामात्मा नियन्ता ॥ ५९ ॥ अविषह्यतयेति ॥ अविषह्यतया भगवान् देवो भूतराट् श्रीरुद्र इव सौन्दर्ये काम इव मृगराट् सिंह इव मनस्वी धीरः निर्भयश्च ॥ ६० ॥ वात्सल्ये इति ॥ वात्सल्ये सस्नेहदयायां मनुवत् नृणां प्रभुत्वे स्वामित्वे महत्त्वे वा भगवानजो ब्रह्मेव ब्रह्मवादे ब्रह्मविचारे देवगुरुः बृहस्पतिरिव आत्मवत्त्वे जितेन्द्रियत्वे स्वयं हरिरिव ॥ ६१ ॥ भक्त्येति ॥ गोषु गुरुषु विप्रेषु तथा विष्वक्सेनानुवर्तिषु भगवद्भक्तेषु भक्त्या ह्रिया लज्जया च प्रश्रयेण नम्रीभावेन शीलेन सुस्वभावेन च परार्थोद्यमेन आत्मतुल्यो निरुपम एव ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्त्येति ॥ त्रैलोक्ये तत्र तत्र पुम्भिः पुरुषैरूर्ध्वमुच्चैर्गीतया कीर्त्या द्वारभूतया स्त्रीणां कर्णरन्ध्रेषु प्रविष्टः यथा श्रीरामो दाशरथिः स्वकीर्तिद्वारा सतां सत्पुरुषाणां कर्णरन्ध्रेषु प्रविष्टः ॥ ६३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य द्वाविंशे निरमादिमाम् ॥ २२ ॥ त्रयोविंशे सभार्यस्य वने नित्यसमाधितः ॥ पृथोर्वैकुण्ठगमनं तत्र श्लोकाः खर्वाब्धयः ॥ उवाचेति त्र्यं सार्द्धा वह्निर्वेदा'' अनुष्टुभः॥२३॥दृष्ट्वेति त्रयम् ॥ आत्मवान् जितचित्तः आत्मना स्वेन वर्द्धितः अशेषः स्वानुसर्गः स्वकृतोऽन्नादिसर्गः पुरग्रामादिसर्गश्च येन सः प्रजापतिः जगतो जङ्गमस्य तस्थुषः स्थावरस्य च अपिशब्देन देवादीनामपि वृत्तिदो जीविकासम्पादकः सतां धर्मभृत् धर्मरक्षकः यदर्थमिह भूतले जज्ञिवान् अवतीर्णः स सर्वोऽपि निष्पादित ईश्वरस्यादेशः प्रजापालनादिरूपो येन सः वैन्यः पृथुः एकदा आत्मानं प्रवयसं वृद्धं दृष्ट्वा आत्मजां दुहितृत्वेन स्वीकृतां पृथ्वीं स्वविरहाद्रुदतीमिव आत्मजेषु स्वपुत्रेषु न्यस्य अवस्थाप्य प्रजासु विमनस्सु चिन्तातुरासु सतीषु एको भृत्यादिरहितः सदारः सभार्यस्तपोवनमगात् ॥१॥२॥

कीर्त्योर्ध्वगीतया पुंभिस्त्रैलोक्ये तत्र तत्र ह ॥ प्रविष्टः कर्णरन्ध्रेषु स्त्रीणां रामः सतामिव ॥ ६३ ॥ इति श्रीभागवते चतुर्थस्कन्धे पृथुचरिते सनत्कुमारेण परमाध्यात्मोपदेशो नाम द्वाविंशोऽध्यायः ॥२२॥ मैत्रेय उवाच ॥ ॥ दृष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्मवान्॥ आत्मना वर्धिताशेषस्वानुसर्गः प्रजापतिः ॥ १ ॥ जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत् सताम् ॥ निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान् ॥ २ ॥ आत्मजेष्वात्मजां न्यस्य विरहाद्रुदतीमिव ॥ प्रजासु विमनस्स्वेकः सदारोऽगात् तपोवनम् ॥३॥ तत्राप्यदाभ्यनियमो वैखानससुसंमते ॥ आरब्ध उग्रतपसि यथा स्वविजये पुरा ॥ ४ ॥ कन्दमूलफलाहारः शुष्कपर्णाशनः क्वचित ॥ अब्भक्षः कतिचित् पक्षान् वायुभक्षस्ततः परम् ॥ ५ ॥ ग्रीष्मे पञ्चतपा वीरो वर्षास्वासारषाण्मुनिः ॥ आकण्ठमग्नः शिशिर उदके स्थण्डिलेशयः ॥ ६ ॥

॥३॥ तत्रेति॥तत्रापि तपोवनेऽपि अदाभ्या विघ्नैरखण्डिता नियमाः यस्य सः पृथुः''लपिदभिभ्यां च''इति ण्यत् दभिधातुरपठितोऽप्यत एव वार्तिकात् स्वीकार्यः । पुरा स्वस्य विजये महता यत्नेन प्रवृत्तस्तथा वैखानसानां वानप्रस्थविशेषाणां सुसंमते न तु स्वोत्प्रेक्षिते उग्रे देहेन्द्रियादिशोषकरे तपसि आरब्धः प्रवृत्तः । आदिकर्मणि कर्त्तरिक्तः ॥ ४ ॥ कन्देति॥क्वचित् काले कन्दमूलफलानि आहारो यस्य सः कदाचित् हिंसापरिहारार्थं शुष्काणां पर्णानामशनं यस्य सः कतिचित्पक्षान् अपो भक्षयतीत्यब्भक्षः ततः परमनन्तरं वायुभक्षः जातः ॥ ५ ॥ ग्रीष्मे इति ॥ मुनिर्वानप्रस्थः वीरः पृथुः ग्रीष्मे ऋतौ च तसृषुदिक्षु चत्वारोऽग्नयः उपरि सूर्य इति पञ्चानां तपः संतापो यस्य सः । वर्षासु आसारं धारासम्पातं सहत इत्यासारषाड् जातः " छन्दसि सहः " इति ण्विः । शिशिरे ऋतौ आकण्ठमुदके जले निमग्नो जातः स्थण्डिलेशयः भूमिशयानश्च सर्वदा जातः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तितिक्षुरिति ॥ तितिक्षुः सहिष्णुः यतवाक् मौनी दान्तः निर्जितसर्वेन्द्रियः अत एव ऊर्ध्वरेताः पत्नीसाहित्येऽपि मैथुनवर्जितः जितानिलः वशीकृतप्राणः कृष्णमारिराधयिषुरेवैवमुत्तमं तपः अचरत् कृतवान् ॥ ७ ॥ तेनेति द्वयम् ॥ क्रमानुविद्धेन शनैः परिपाकं प्राप्तेन तेन तपसा ध्वस्तानि नष्टानि कर्माणि अनारब्धफलानि यस्य सः । अमलाशयः निर्मलचित्तः प्राणायामैः सम्यक् यथा पुनः स्वच्छन्दप्रवृत्तिर्न स्यात्तथा निरन्तरं रुद्धः षड्वर्गः पञ्च ज्ञानेन्द्रियाणि मनश्च येन अत एव छिन्नानि बन्धनानि वासना यस्य सः पुरुषर्षभः पृथुः भगवान् सनत्कुमारः परं श्रेष्ठम् आध्यात्मिकम् अध्यात्मं भवम् ।अध्यात्मादित्वाट्ठञ् । आत्मन्यधिकृतं विनयादित्वात्स्वार्थे ठक् इत्येके । यत् यं योगं आह स्म तेनैव पुरुषं पुरुषोत्तमं भगवन्तमभजत् ॥ ८ ॥ ९ ॥ भगवदिति ॥ भगवद्धर्म्मिणः भगवत आराधकस्य साधोः श्रद्धया सदा यततः सेवमानस्य शतार्षः । पृथोः भगवति ब्रह्मणि व्यापके अनन्याविषया अव्यभिचारिणी भक्तिरभवत् ॥ १० ॥ तस्येति ॥ भगवतः परिकर्म सेवा तेन शुद्धसत्त्व आत्मा मनो यस्य तस्य

तितिक्षुर्यतवाग्दान्त ऊर्ध्वरेता जितानिलः ॥ आरिराधयिषुः कृष्णमचरत् तप उत्तमम् ॥ ७ ॥ तेन क्रमानुविद्धेन ध्वस्तकर्मामलाशयः ॥ प्राणायामैः संनिरुद्धषड्वर्गश्छिन्नबन्धनः ॥ ८ ॥ सनत्कुमारो भगवान् यदाहाध्यात्मिकं परम् ॥ योगं तेनैव पुरुषमभजत् पुरुषर्षभः ॥ ९ ॥ भगवद्धर्मिणः साधोः श्रद्धया यततः सदा ॥ भक्तिर्भगवति ब्रह्मण्यनन्यविषयाऽभवत् ॥ १० ॥ तस्यानया भगवतः परिकर्मशुद्धसत्त्वात्मनस्तदनुसंस्मरणानुपूर्त्या ॥ ज्ञानं बिरक्तिमदभून्निशितेन येन चिच्छेद संशयपदं निजजीवकोशम् ॥ ११ ॥ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत् तत्यजेऽच्छिनदिदं वयुनेन येन ॥ तावन्न योगगतिभिर्यतिरप्रमत्तो यावद् गदाग्रजकथासु रतिं न कुर्यात् ॥ १२ ॥ एवं स वीरप्रवरः संयोज्यात्मानमात्मनि ॥ ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरम् ॥ १३ ॥

पृथोः तस्य भगवतोऽनु संस्मरणेन अनुपूर्तिर्वृद्धिर्यस्यास्तया अनया भक्त्या निशितेन येन ज्ञानेन संशयानामसंभावनादीनां पदमाश्रयं निजमुपाधिं जीवस्य कोशमावरकमहङ्कारं चिच्छेद तत् विरक्तिमत् वैराग्यसहितं ज्ञानमभूत् ॥ ११ ॥ छिन्नेति ॥ छिन्ना अन्यधीर्भेदबुद्धिर्देहात्मबुद्धिर्वा यस्य अतः अधिगता ज्ञाता आत्मनो गतिस्तत्त्वं येन निरीहः शरीरयात्रायां योगसिद्धिषु वा निस्पृहः सन् येन वयुनेन ज्ञानेनेदं स्वावरकं हृदयमच्छिनत्तदपि तत्यजे तत्प्रयत्नमपि त्यक्तवान् । तङार्षः । यतिर्मुमुक्षुः यावत् गदाग्रजस्य हरेः कथासु रतिं न कुर्यात् तावद्यो गतिभिरणिमादिसिद्धिभिः अप्रमत्तोऽनासक्तो न भवति अपि त्वासक्तो भवति।अतः श्रीकृष्णकथारतत्वात्पृथोस्तासु लोभो न जातः ॥ १२ ॥एवमिति॥एवं वीरेषु प्रवरः स पृथुः दृढं ब्रह्मभूतः ब्रह्मात्मैक्यानुसन्धानपरः काले देहत्यागकाले प्राप्ते आत्मानं मनः आत्मनि परमात्मनि संयोज्य तं कलेवरं देहं तत्याज॥ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपीड्येति द्वयम् ॥ पार्ष्णिभ्यां पायुं गुदं सम्पीड्य तद्द्वारा वायुर्मा निःसरत्विति तस्य मुद्रणं कृत्वा इति मुक्तासनं सूचितम् । "संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु मध्यतः । सव्यदक्षिणमध्येन मुक्तासनमितीरितम् ॥" वायुं प्राणं मूलाधाराच्छनैरुत्सारयन् ऊर्ध्वं नयन् ताभ्यां मणिपूरके चक्रेऽवस्थाप्य ततो हृदि अनाहतचक्रे तत उरसि कण्ठस्याधोदेशे विशुद्धचक्रे ततः कण्ठे तस्यैव चक्रस्याग्रदेशे ततश्च शीर्षणि भ्रुवोर्मध्ये आज्ञाचक्रेऽवस्थाप्य शीर्षन्नार्षः । एवं कोष्ठेषु प्राणस्थानेष्ववस्थाप्य तं प्राणम् असूनिति पाठे प्राणानेवमुत्सर्पयन्नूर्ध्वंनयन् क्रमेण मूर्ध्नि ब्रह्मरन्ध्रे आवेश्य निस्पृहस्तं वायुं प्राणं वायौ महाभूतसमष्ट्यात्मके अयूयुजत् तयोरभेदं भावयामास । एवं कायं पार्थिवं कठिनं भागं क्षितौ पृथिव्यां शरीरगतं तेजस्तेजसि अयूयुजत् । एवं देहारम्भकपञ्चमहाभूतानि समष्टिभूतेषु अयूयुजत् व्यष्टीनां समष्टीनां चाभेदं भावयामास ॥१४॥१५॥खानीति ॥ खानीन्द्रियच्छिद्रावच्छिन्नाकाशप्रदेशान् आकाशे द्रवं शरीरगतं जलांशं तोये एवं यथास्थानं यथायोग्यं विभागशः पृथक् पृथक् अयूयुजदिति पूर्वस्यैवानुषङ्गः । अथाद्वितीयात्मप्रतिपत्तये महाभूतानां विलयमाह । क्षितिमम्भसि जले तत् अम्भः तेजसि अदः तेजो वायौ अमुं वायुं नभसि अयूयुजदिति सर्वत्रानुषङ्गः ॥ १६ ॥ तामसाहङ्कारकार्यस्याऽऽकाशपर्यन्तस्य लयमुक्त्वा सात्त्विकराजसाहङ्कारकार्याणां लयमाह—इन्द्रियेष्विति ॥ मन इन्द्रियेष्वयूयुजत् । मन इति देवानामप्युपलक्षणम् । तानीन्द्रियाणि यथो-

संपीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयन् शनैः ॥ नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरःकण्ठशीर्षणि ॥ १४ ॥ उत्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निःस्पृहः ॥ वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत् ॥ १५ ॥ खान्याकाशे द्रवं तोये यथास्थानविभागशः ॥ क्षितिमम्भसि तत्तेजस्यदो वायुं नभस्यमुम् ॥ १६ ॥ इन्द्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवम् ॥ भूतादिनाऽमून्युत्क्षिप्य महत्यात्मनि सन्दधे ॥ १७ ॥

द्भवम् उद्भवमनतिक्रम्य तन्मात्रेषु शब्दादिविषयेष्वयूयुजत् । सविकल्पकज्ञाने मनस इन्द्रियाधीनतया इन्द्रियैराकर्षणात्तेषु विलयभावनं न तु कार्यत्वात् । एवमिन्द्रियाणां विषयाधीनत्वाद्विषयेषु लयः सङ्गत एव।तदधीनतया आकर्षणं तूक्तम् । इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मन इति इन्द्रियेषु नभ इति पाठेऽप्ययमेवार्थः । भट्टादीनां मते नभश्चाक्षुषं केषांचिन्मानसम् आनुमानिकत्वमतेऽपीन्द्रियव्यापारोऽस्त्येव । नभोगुणश्च शब्दः श्रोत्रग्राह्योऽतः इन्द्रियग्राह्यत्वादिन्द्रियेषु नभो विलापितं तानीन्द्रियाणि यथोद्भवं उद्भवोऽत्र वृत्तिलाभः स च विषयाधीन इति श्रोत्रादीनां विषयेषु शब्दादिषु लयः।यद्वा। यथोद्भवमिति परत्रैवान्वेति न पूर्वत्र । यद्वा।तन्मात्रकार्याण्येवेन्द्रियाणि मनोऽप्य पञ्चीकृततन्मात्रकार्यम् आहङ्कारिकता तु तदधीनविवक्षया।यद्वा।इन्द्रियेषु नभ इति पाठे यथास्थानमित्यनुवृत्तेः सर्वत्राधाराधेयभावेनैव लयो ज्ञेयः । तथाहि क्षित्यादयोऽम्भआदिषु तिष्ठन्तीति पूर्वपूर्वाधेयानां परपरत्राऽधारे लयः नभश्चेन्द्रियेषु तिष्ठतीति तस्य तेषु लयः मनसोऽपीन्द्रियत्वादिन्द्रियाणि विषयोन्मुखानि विषयेषु तिष्ठन्तीतीन्द्रियाणां तन्मात्रेषु लयः ततश्च तन्मात्राणां यथोद्भवमित्यनेन पूर्वानुवृत्तेन यथास्थानमित्यनेनाप्यन्वयः । संभवति अमून्यवशिष्टानि नभआदीनि यथोद्भवं यथास्थानं च भूतादिना अहङ्कारेणोत्क्षि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्य संयोज्य तं चाहाङ्करं महत्यात्मनि महत्तत्त्वे सन्दधे योजितवानित्यन्वयः । तत्रावशिष्टं नभोमात्राणि च तामसाहङ्कारे मनइन्द्रियदेवताश्च सात्विकाहङ्कारे इन्द्रियाणि च राजसाहाङ्कर इत्येवं यथोद्भवं लयविभावना ज्ञेया ॥१७॥ तमिति सार्द्धम् ॥ सर्वेषां गुणानां गुणकार्याणां विन्यासः स्थितिर्यस्मिन्वृक्षस्य इव तं सर्वसंसारबीजभूतं महान्तं मायामये मायोपाधिप्रधाने जीवे जीवोपाधौ लिङ्गशरीरे न्यधात् । सर्वं दुःखसुखादिकार्यजातं लिङ्गशरीर एव पर्यवस्यति नात्मनीति चिन्तयामासेत्यर्थः । स जीवो यत्पुनर्भव इत्यादि लिङ्गशरीरेऽपि जीवशब्दप्रयोगदर्शनात् योऽसावनुशयी पूर्वं लिङ्गशरीराभिमानी प्रभुः पृथुः स इदानीं ज्ञानवैराग्ययोर्वीर्येण प्रभावेण स्वरूपस्थः संस्तं चात्मस्थं स्वसम्बन्धितया स्थितमनुशयं लिङ्गशरीरमजहात् पूर्वं चिच्छेद संशयपदं बीजजीवकोशमिति लिङ्गशरीरनाश उक्तः । स एवेदानीं स्थूलशरीरत्यागकालेऽनूद्यते ॥१८॥ वनप्रवेशमारभ्य राज्ञ्याः कथामाह–अर्चिरिति॥यत्पद्भ्यां भुवः स्पर्शनं तत्राहतीत्यतदर्हा सुकुमारी अर्चिर्नाम महती चासौ राज्ञी च तस्य पृथोः पत्नी अपि पृथुना सह वनं अनुगता अनुजगाम ॥ १९ ॥ अतीवेति ॥ भर्तुर्व्रतं भूमिशयनादि स चासौ धर्मस्तत्र या निष्ठा स्थितिस्तया भर्तुः शुश्रूषया सेवया च ऋषीणामियमार्षी देहयात्रा कन्दमूलादिभिर्देहनिर्वाहस्तया च

तं सर्वगुणविन्यासं जीवे मायामये न्यधात् ॥ तं चानुशयमात्मस्थमसावनुशयी पुमान् ॥ ज्ञानवैराग्यवीर्येण स्वरूपस्थोऽजहात् प्रभुः ॥ १८ ॥ अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनम् ॥ सुकुमार्यतदर्हा च यत् पद्भ्यां स्पर्शनं भुवः ॥ १९ ॥ अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चारषदेहयात्रया ॥ नाविन्दतार्तिं परिकर्शिताऽपि सा प्रेयस्करस्पर्शनमाननिर्वृतिः ॥ २० ॥ देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः ॥ आलक्ष्य किंचिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि ॥ २१ ॥ विधाय कृत्यं ह्रदिनीजलाप्लुता दत्त्वोदकं भर्तुरुदारकर्मणः ॥ नत्वा दिविस्थान् त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायती भर्तृपादौ ॥ २२ ॥

अतीव परिकर्शिता कृशीकृताऽपि सा अर्चिः प्रेयसः पत्युः करेण यत् स्पर्शनं मानश्च सत्कारस्ताभ्यां निर्वृतिः परमानन्दो यस्याः तथाभूता सती आर्तिं पीडां न अविन्दत न प्राप ॥ २० ॥ देहमिति ॥ विपन्नं विनष्टम् अखिलं चेतनादिकं यस्मिंस्तथाभूतं पृथिव्याः पत्युः पालकस्य आत्मनः स्वस्य च दयितस्य प्रियस्य देहमालक्ष्य दृष्ट्वा तद्वियोगाधिना किंचिद्विलप्य रोदनं च कृत्वा तदनुगमनार्थमद्रिसानुनि पर्वतप्रदेशविशेषे काष्ठैश्चितां विधाय तस्यां तद्देहमारोपयत् । अत्र पृथिव्याः पत्युरिति देशरूपपृथिव्यभिप्रायेणोक्तम्। दुहितृत्वे चकारेमानिति तु देवतारूपपृथिव्यभिप्रायेण। परे तु आत्मनः पत्युः पृथिव्याः दयितस्य दयावतः तारकादित्वादितच् इत्याहुः ।किञ्चिन्मात्रविलापोक्तिस्तु तत्कालोचितक्रियाव्यग्रत्वात् ॥ २१ ॥ विधायेति ॥ अन्यच्च तत्कालोचितं कृत्यं विधाय कृत्वा ह्रदिन्या जले आप्लुता स्नाता सती उदारं सर्वोपकारकरं पृथिवीदोहनादि कर्म यस्य तस्य स्वभर्तुरुदकं दत्वा दिवि अन्तरिक्षे स्थितांस्त्रिदशान्देवान् पृथुदर्शनायागतान् दृग्गोचरांश्च नत्वा स्वभर्तृपादौ ध्यायती । नुमभाव आर्षः । चितां त्रिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परीत्य प्रदक्षिणीकृत्य तरयां वह्निं विसृज्य स्वयं च विवेश ॥ २२ ॥ विलोक्येति ॥ वीरवरं पृथुं स्वपतिमनुगतां साध्वीं विलोक्य देवैः स्वपतिभिः सह वर्तमानाः वरदा वरदानसमर्थाः सहस्रशो देवपत्न्यस्तुष्टुवुः ॥ २३ ॥ कुर्वत्य इति ॥ मङ्गलार्थममरतूर्येषु नदत्सु सत्सु तस्मिन्मन्दरसानुनि कुसुमासारं पुष्पवृष्टिं कुर्वत्यः परस्परं गृणन्ति स्म अभाषन्त ॥ २४ ॥ अहो इति ॥ इयं वधूरर्चिरहो अतिशयेन धन्या कृतार्था । या चैवं यज्ञेशं हरिं श्रीर्लक्ष्मीर्वधूरिव भूभुजां राज्ञां पतिं पालकं पतिं पृथुं सर्वात्मना भेजे ॥ २५ ॥ सेति ॥ सा एषा सती पतिव्रताऽर्चिर्दुर्विभाव्येन अचिन्त्येन असतीनां कर्तुमशक्येन वा राज्यत्यागपतिसेवादिना स्वकर्मणा वैन्यं पतिमनु तेन सहास्मान् देवानप्यतीत्योर्ध्वंव्यापि वैकुण्ठं नूनं निश्चयेन व्रजति तत्पश्यत । यद्वा । अनुवैन्यमित्यग्रे विमानस्थं वैन्यं तत्पश्चादर्चिषमपि विमाने पश्यतेत्यर्थः ॥ २६ ॥ तेषामिति ॥ भुवि ये मनुष्याः लोलं तुच्छमायुर्येषां ते तथाभूता अपि भगवान् पद्यते गम्यतेऽनेन तत् नैष्कर्म्यं ज्ञानं साधयन्ति । तेषां मर्त्यानामन्यद्देवादिपदं किं नु दुरापं दुर्लभं नैव किञ्चित्

विलोक्यानुगतां साध्वीं पृथुं वीरवरं पतिम् ॥ तुष्टुवुर्वरदा देवैर्देवपत्न्यः सहस्रशः ॥ २३ ॥ कुर्वत्यः कुसुमासारं तस्मिन् मन्दरसानुनि ॥ नदत्स्वमरतूर्येषु गृणन्ति स्म परस्परम् ॥ २४ ॥ देव्य ऊचुः ॥ ॥ अहो इयं वधूर्धन्या या चैवं भूभुजां पतिम् ॥ सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव ॥२५॥ सैषा नूनं व्रजत्यूर्ध्वमनु वैन्यं पतिं सती ॥ पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा ॥२६॥ तेषां दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदम् ॥ भुवि लोलायुषो ये वै नैष्कर्म्यं साधयन्त्युत ॥ २७ ॥ स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ॥ लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥ २८ ॥ मैत्रेय उवाच ॥ स्तुवन्तीष्वमरस्त्रीषु पतिलोकं गता वधूः ॥ यं वा आत्मविदां धुर्यो वैन्यः प्रापाच्युताशयः ॥ २९ ॥ इत्थंभूतानुभावोऽसौ पृथुः स भगवत्तमः ॥ कीर्तितं तस्य चरितमुद्दामचारितस्य ते ॥ ३० ॥ य इदं सुमहत् पुण्यं श्रद्धयाऽवहितः पठेत् ॥ श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात् ॥ ३१ ॥

॥२७॥स इति ॥ यो जन्मान्तरे महता कृच्छ्रेण तपश्चर्यादिकष्टेनास्मिन् जन्मन्यापवर्ग्यं विमुक्तिसाधनं भुवि मानुष्यं लब्ध्वापि विषयेषु विषज्जते सः यतः आत्मने एव द्रुह्यति अतः वञ्चितः॥ २८॥स्तुवन्तीष्विति॥अमरस्त्रीष्वेवं स्तुवन्तीषु सतीषु नुमार्षः अनुमपिपाठः । यं वै लोकमात्मविदां ज्ञानिनां धुर्यो मुख्योऽच्युताश्रयः भगवद्भक्तः वैन्यः प्राप तमेव स्वपतिलोकं वधूरर्चिरपि गता ॥ २९ ॥ इत्थमिति ॥ सोऽसौ भगवत्तमः अतिशयैश्वर्यवान् पृथुः इत्थंभूतः अलौकिकः अनुभावो यस्य तादृशोऽभूत् । उद्दामं श्रेष्ठं चरितं यस्य तस्य चरितं ते तुभ्यं कीर्तितम् ॥ ३० ॥ य इति ॥ यः प्राणी अवहितः सन् इदं सुमहत् पुण्यं च पृथ्वाख्यानं श्रद्धया पठेदन्यान् श्रावयेत् स्वयं वा शृणुयात् सोऽपि पृथोः पदवीं स्थानमियात् प्राप्नुयात् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मण इति ॥ ब्राह्मण एतत् पठन् ब्रह्मणा अध्ययनादिना वर्चस्वी तेजस्वी स्यात् । राजन्यः क्षत्रियः जगतीपतिः राजा स्यात् । वैश्यः पठन् विशां पश्वादीनां वैश्यानां वा पतिः स्यात् ।शूद्रः सत्तमतामियात् शृण्वन्निति शेषः । पाठानधिकारात् ॥ ३२ ॥ त्रिरिति ॥ नरोऽथवा नारी वा आदृतः श्रद्धावान् सन्निदमाख्यानं त्रिःकृत्वः त्रीन् वारान् आकर्ण्य अप्रजः पुत्रादिरहितः असिजभाव आर्षः । सुप्रजतमो भवति। निर्धनो धनवत्तमो भवति ।न स्पष्टा न प्रसृता कीर्तिर्यशो यस्य स सुयशाः प्रख्यातयशाः भवति। मूर्खः पण्डितो भवति ॥ ३३ ॥ इदमिति ॥ इदमाख्यानं पुंसां स्वस्त्ययनम् अमङ्गल्यस्य दुःखादेर्वारणं धन्यं धनप्रापकम् एवं यशस्यम् आयुष्यम् स्वर्ग्यं कलेर्मलानपहन्ति तादृशं चास्ति ।धन्यमित्यादौ पुनरुक्तिराधिक्यार्था ॥ ३४ ॥ धर्मेति ॥ तस्माद्धर्मादीनां सम्यक् सिद्धिमभीप्सुभिः अनु अनुदिनम् अन्यात् प्रतिश्राव्यमित्युपलक्षणं श्रोतव्यं पठितव्यं च तयोर्धर्मादीनां चतुर्णां परमव्यभिचारिकारणमेतत् ॥ ३५॥ विजयेति ॥ विजयाभिमुखो राजा एतदाख्यानं श्रुत्वा यान् देशाननुयाति तद्देशीया राजानः पूर्वं

ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः ॥ वैश्यः पठन् विट्पतिः स्याच्छूद्रः सत्तमतामियात्॥३२॥त्रिःकृत्व इदमाकर्ण्य नरो नार्यथवादृता॥ अप्रजः सुप्रजतमो निर्धनो धनवत्तमः ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः ॥ ३३ ॥ इदं स्वस्त्ययनं पुंसाममङ्गल्यनिवारणम् ॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहम् ॥३४॥ धर्मार्थकाममोक्षाणां सम्यक् सिद्धिमभीप्सुभिः ॥ श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परम् ॥ ३५ ॥ विजयाभिमुखो राजा श्रुत्वैतदनुयाति यान् ॥ बलिं तस्मै हरन्त्यग्रे राजानः पृथवे यथा ॥ ३६ ॥ मुक्तान्यसङ्गो भगवत्यमलां भक्तिमुद्वहन् ॥ वैन्यस्य चरितं पुण्यं शृणुयाच्छ्रावयेत् पठेत् ॥ ३७ ॥ वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकम् ॥ अस्मिन् कृतमतिर्मर्त्यः पार्थिवीं गतिमाप्नुयात् ॥ ३८ ॥ अनुदिनमिदमादरेण शृण्वन् पृथुचरितं प्रथयन् विमुक्तसङ्गः ॥ भगवति भवसिन्धुपोतपादे स च निपुणां लभते गतिं मनुष्यः ॥३९॥ इति श्रीभा०चतुर्थ० पृथुचरित्रसमाप्तिवर्णनं नाम त्रयोविंशोऽध्यायः॥ २३ ॥

पृथवे यथा बलिं निवेदितवन्तस्तथा तस्मै अग्रे बलिं हरन्ति निवेदयन्ति ॥३६॥ मुक्तेति ॥ मुक्तान्यसङ्गस्त्यक्तफलाभिसन्धिः सन् भगवत्यमलां भक्तिमुद्वहन् वैन्यस्य पुण्यं चरितं शृणुयात् श्रावयेत् पठेच्च ॥ ३७ ॥ वैचित्रेति ॥ हे वैचित्रवीर्य विदुर महतो हरेर्महतां सतां वा माहात्म्यसूचकम् इदं पृथुचरितं मया अभिहितं कीर्तितम् । अस्मिन् कृतमतिर्मर्त्यः पार्थवीं पृथुसम्बन्धिनीं गतिमाप्नुयात् पार्थिवीमित्यपि पाठः ॥ ३८ ॥ अनुदिनमिति ॥ यो मनुष्यो विमुक्तफलाभिसङ्गः सन् अनुदिनं नित्यमादरेणेदं पृथुच । रितं शृण्वन् प्रथयन् श्रावणेन विस्तारयंश्च भवति स भवसिन्धौ संसारसागरोत्तरणार्थं पोतो नौः पादो यस्य तस्मिन् भगवति निपुणां संसारनिवर्तने दक्षां रतिं प्रीतिं लभते- पुष्पिताग्रा च्छन्दः ॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य त्रयोविंशे व्यधादिमाम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशे पृथोर्वंश्यान् सुतान् प्राचीनबर्हिषः॥रुद्र ऊचे हरेस्तोत्रं तत्र श्लोकाः खर्हंस्तिनः॥उवाच षट्कं पादोना षडशीतिरनुष्टुभः॥२४॥ विजिताश्व इति ॥ पृथश्रवा महायशाः पृथुपुत्रः विजिताश्वः अधिराजा आसीत् सन्धिरार्षः। भ्रातृवत्सलः स च यवीयेभ्यः कनिष्ठेभ्यो भ्रातृभ्यः काष्ठा दिशो ददौ ॥१॥ हर्यक्षायेति॥विभुः स हर्यक्षाय प्राचीं पूर्वां दिशमदिशत् । धूम्रकेशाय दक्षिणां वृकसंज्ञाय प्रतीचीं द्रविणसे तुर्यामुत्तरां दिशमदिशत् ॥ २ ॥ अन्तर्द्धानेति ॥ विजिताश्व एव अश्वविजयसमये धर्मवेषस्य शक्रस्य वधाकरणज्ञाप्यधार्मिकत्वप्रसन्नाच्छक्रात् वरत्वेन अन्तर्द्धानगतिं तिरोधानसामर्थ्यं लब्ध्वा अन्तर्धानसंज्ञितो जातः । स च शिखण्डिन्यां तन्नाम्न्यां भार्यायां सुसंमतं सर्वैरादृतम् अपत्यत्रयमाधत्त॥३॥अपत्यत्रयमाह—पावक इति॥पावकः पवमानश्च शुचिश्चेति येऽग्नयस्त एव वसिष्ठस्य शापाद्विजिताश्वपुत्रत्वेन उत्पन्नाः पुनश्च शापचारितार्थ्ये योगगतिं योगमार्गेण मुक्तिम् अग्नित्वं वा गताः ॥ ४ ॥ अन्तर्द्धान इति ॥ य इन्द्रमश्वहर्त्तारं विद्वानपि जानन्नपि न जघ्निवान्नहतवान् सः अन्तर्द्धानो विजिताश्वः नभस्वत्यां नाम अन्यस्यां

मैत्रेय उवाच ॥ विजिताश्वोऽधिराजासीत् पृथुपुत्रः पृथुश्रवाः ॥ यवीयोभ्योऽददात् काष्ठा भ्रातृभ्यो भ्रातृवत्सलः ॥ १ ॥ हर्यक्षायादिशत् प्राचीं धूम्रकेशाय दक्षिणाम् ॥ प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः ॥ २ ॥ अन्तर्धानगतिं शक्राल्लब्ध्वाऽन्तर्धानसंज्ञितः ॥ अपत्यत्रयमाधत्त शिखण्डिन्यां सुसंमतम् ॥ ३ ॥ पावकः पावमानश्च शुचिरित्यग्नयः पुरा ॥ वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ॥ ४ ॥ अन्तर्धानो नभस्वत्यां हविर्धानमविन्दत ॥ य इन्द्रमश्वहर्तारं विद्वानपि न जघ्निवान् ॥ ५ ॥ राज्ञां वृत्तिं करादानदण्डशुल्कादिदारुणाम् ॥ मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह ॥ ६ ॥ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् ॥ यजंस्तल्लोकतामाप कुशलेन समाधिना ॥ ७ ॥ हविर्द्धानाद्धविर्धानी विदुरासूत षट् सुतान् ॥ बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम् ॥ ८ ॥ बर्हिषत्सुमहाभागो हाविर्धानिः प्रजापतिः ॥ क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह ॥ ९ ॥ यस्येदं देवयजनमनुयज्ञं वितन्वतः ॥ प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम् ॥ १० ॥

भार्यायां हविर्द्धानं नाम पुत्रम् अविन्दत लब्धवान् ॥ ५ ॥ राज्ञामिति ॥ स चान्तर्द्धानः राज्ञां वृत्तिं जीविकां करस्यादानं दण्डः शुल्कग्रहणं चेत्यादिभिर्दारुणां प्राणिपीडाकरीं मन्यमानो दीर्घसत्रव्याजेन तां विससर्ज ॥ ६ ॥ तत्रेति ॥ तत्र सत्रेऽपि आत्मदृक् हंसं संशुद्धम् । यद्वा । भक्तक्लेशं हन्ति तं पुरुषं परमात्मानं यजन् कुशलेन निपुणेन कुशलं पुण्यं तद्रूपेण वा समाधिना तल्लोकतां तस्य लोक एव लोको यस्य तद्भावं भगवल्लोकम् आप ॥ ७ ॥ हविर्द्धानादिति ॥ हे विदुर हविर्द्धानात्स्वपत्युर्हविर्द्धानी तत्पत्नी बर्हिषदादीन् षट् सुतान् असूत ॥ ८ ॥ बर्हिषदिति ॥ हे कुरूद्वह हाविर्द्धानिर्हविर्द्धानस्य पुत्रः महाभागः प्रजापतिश्च बर्हिषत् क्रियाकाण्डे यज्ञादिषु निष्णातः कुशलोऽभूत् । तथा योगेषु अष्टाङ्गेषु च निष्णातः अभूत् ॥ ९ ॥ यस्येति ॥ देवयजनं यज्ञस्थानमनु समीप एवापरं यज्ञं वितन्वतः यत्रैको यज्ञः कृतस्तदनन्तरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्समीप एव यज्ञान्तरं मुख्यकल्पेनैव विस्तारयतो यस्य बर्हिषदः इदं वसुधातलं प्राचीनाग्रैः कुशैरास्तृतमाच्छादितमासीत् । अत एव प्राचीनबर्हिरित्यसावुच्यते ॥ १० ॥ सामुद्रीमिति अर्द्धम्॥स बर्हिषत् सामुद्रीं समुद्रकन्यां देवदेवेन ब्रह्मणोपदिष्टां शतद्रुतिं नामोपयेमे॥ ११ ॥ यामिति॥चारूणि मनोहराणि सर्वाण्यङ्गानि यस्यास्तां तत्रापि किशोरीं बालां तत्रापि सुष्ठलङ्कृतां तत्रापि परिक्रमन्तीमग्निप्रदक्षिणं कुर्वन्तीं दीर्घाभाव आर्षः । यां शतद्रुतिं वीक्ष्य उद्वाहे अग्निरपि पुरा शुकीमिव चकमे कामितवान्।एवं ह्याख्यायते"।सप्तर्षीणां सत्रे तद्भार्यादर्शनेनाग्निः कामसन्तप्तो जातस्तं चाग्निभार्या स्वाहा नाम सप्तर्षिभार्यारूपेण रमयामास।रमयित्वा च तद्रेतः शुकीरूपेण शरस्तम्बे निधायागच्छत्। तां यथा सप्तर्षिभार्या भ्रान्त्याऽग्निः कामितवांस्तथेति । " स्तुकीमिवेति पाठे स्तोकघृतधारामिवेति अग्निः शुकीमिव यां सर्वोऽपि जनः कामितवान् इत्यपि कश्चित् ॥ १२ ॥ विबुधेति ॥ सूर्यया नवोढया नूपुरैः पादौ क्वणयन्त्यैव ध्वनिमात्रेणैव सर्वदिक्षु तया विबुधाः सुरादयः विजिताः ॥ १३ ॥ प्राचीनेति ॥ प्राचीनबर्हिषः बर्हिषदः

सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिम् ॥ ११ ॥ यां वीक्ष्य चारुसर्वाङ्गीं किशोरीं सुष्ठलंकृताम् ॥ परिक्रमन्तीमुद्वाहे चकमेऽग्निः शुकी-
मिव ॥ सप्तर्षिभार्याभ्रान्त्याग्निः स्वाहायां चाप्यरीरमत् ॥१२॥ विबुधासुरगन्धर्वमुनिसिद्धनरोरगाः ॥ विजिताः सूर्यया दिक्षु क्वणयन्त्यैव
नूपुरैः ॥ १३ ॥ प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् ॥ तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः ॥ १४ ॥ पित्रादिष्टाः प्रजासर्गे
तपसेऽर्णवमाविशन् ॥ १५ ॥ दश वर्षसहस्राणि तपसाऽऽर्चंस्तपस्पतिम् ॥ यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता ॥ तद्ध्यायन्तो जप-
न्तश्च पूजयन्तश्च संयताः॥१६॥विदुर उवाच ॥ प्रचेतसां गिरित्रेण यथासीत्पथि सङ्गमः ॥ यदुताह हरः प्रीतस्तन्नो ब्रह्मन्वदार्थवत्॥१७॥
सङ्गमः खलु विप्रर्षे शिवेनेह शरीरिणाम् ॥ दुर्लभो मुनयो दध्युरसङ्गाद्यमभीप्सितम् ॥ १८ ॥ आत्मारामोऽपि यस्त्वस्य लोककल्पस्य
राधसे ॥ शक्त्या युक्तो विचरति घोरया भगवान्भवः ॥ १९ ॥

शतद्रुत्यां तुल्यं नाम व्रतं च येषां ते धर्मे स्नाताः । कुशलाः सर्वे प्रचेतोनामानः दश पुत्रा अभवन् ॥१४॥ पित्रेति अर्द्धम् ॥ ते च प्रजासर्गे पित्रा आदिष्टाः तपसे तपः कर्त्तुम् अर्णवमाविशन्॥ १५॥दश वर्षेति सार्द्धम् ॥ पथि मार्गे दृष्टेन प्रसीदता गिरिशेन यत् वक्ष्यमाणं रुद्रगीतमुक्तं संयताः जितेन्द्रियाः भूत्वा तत् जपन्तः हरिं ध्यायन्तः पूजयन्तश्च ते तपसां पतिं भगवन्तं तपसा दश वर्षसहस्राणि आर्चन् आराधयामासुः ॥१६॥ प्रचेतसामिति ॥ प्रचेतसां गिरित्रेण सह पथि यथा सङ्गमः आसीत् । यद्वा । प्रिप्रीतः प्रसन्नः सन् हरस्तेभ्यः आह स्म।अर्थवत्प्रयोजनवत् तत् नोऽस्मभ्यं वद।हर इत्यत्र रह इति यद्वापीत्यत्र यदुतेत्यपि च पाठः॥१७॥सङ्गम इति ॥ हे विप्रर्षे शिवेन सह सङ्गमः शरीरिणां दुर्लभः खलु दुर्लभ एव । मुनयोऽपि असङ्गात् असङ्गं विधाय यं श्रीशिवं दध्युरेव न तु झटिति प्रापुः ॥ १८ ॥ आत्मेति ॥ घोरया प्रलयहेतुभूतया शक्त्या यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्कोऽपि आत्मारामोऽपि च यो भगवान् भवः अस्य लोककल्पस्य लोकसर्गस्य राधसे पालनायैव विचरति घोरा शक्तिः ईश्वरत्वादवश्यकर्त्तव्यप्रलयार्थं स्वीकृताऽपि न कल्याणकरणं विहन्तुं शक्ता ॥ १९ ॥ प्रचेतस इति ॥ साधवः प्रचेतसः प्रजासर्गविषयं पितुर्वाक्यं शिरसा आदाय तपसि आहतं चेतो येषां तादृशाः सन्तः प्रतीचीं दिशं प्रययुः ॥ २० ॥ समुद्रमिति ॥ तत्र च प्रतीच्यां सुमहत् सरः अपश्यन् । तद्वर्णयति । समुद्रम् उप समुद्रात् किंचिन्न्यूनम् "उपोधिके च" इति कर्मप्रवचनीयता । तथाभूतं विस्तीर्णं विस्तृतं महतां मन इव स्वच्छं निर्मलजलं प्रसन्नाः सलिलाशयाः मत्स्यादयो यस्मिंस्तम् ॥ २१ ॥ नीलेति ॥ नीलानि रक्तानि च यानि उत्पलाम्भोजकह्लाराणि रात्रिदिनसंध्याविकासीनि इन्दीवराणि नीलोत्पलभेदाः तेषामाकरं जन्मस्थानं हंससारसादिभिः नितरां कूजितं शब्दितम् ॥ २२ ॥ मत्तेति ॥ मत्तानां भ्रमराणां सौस्वर्येण हृष्टरोमाण इव मुकुलयुक्ताः लताङ्घ्रिपा यस्मिंस्तत् पद्मकोशरजो दिक्षु विक्षिपता पवनेनोत्सवो यस्मिन् ॥ २३ ॥ तत्रेति ॥ तत्र स्थाने मृदङ्गपणवा-

मैत्रेय उवाच ॥ ॥ प्रचेतसः पितुर्वाक्यं शिरसाऽऽदाय साधवः ॥ दिशं प्रतीचीं प्रययुस्तपस्याहृतचेतसः ॥ २० ॥ समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः ॥ महन्मन इव स्वच्छं प्रसन्नसलिलाशयम् ॥ २१ ॥ नीलरक्तोत्पलाम्भोजकह्लारेन्दीवराकरम् ॥ हंससारसचक्राह्वकारण्डवनिकूजितम् ॥ २२ ॥ मत्तभ्रमरसौस्वर्यहृष्टरोमलताङ्घ्रिपम् ॥ पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवम् ॥ २३ ॥ तत्र गान्धर्वमाकर्ण्य दिव्यमार्गमनोहरम् ॥ विसिस्म्यू राजपुत्रास्ते मृदङ्गपणवाद्यनु ॥ २४ ॥ तर्ह्येव सरसस्तस्मान्निष्क्रामन्तं सहानुगम् ॥ उपगीयमानममरप्रवरं विबुधानुगैः ॥ २५ ॥ तप्तहेमनिकायाभं शितिकण्ठं त्रिलोचनम् ॥ प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ॥ २६ ॥ स तान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः ॥ धर्मज्ञाञ्छीलसंपन्नान्प्रीतः प्रीतानुवाच ह ॥ २७ ॥

दिवाद्यमनु पश्चाद्दिव्यैर्मार्गभेदैर्मनोहरं गान्धर्वं गन्धर्वाणां कर्म गानमाकर्ण्य ते राजपुत्राः प्रचेतसो विसिस्म्युः विस्मयं जग्मुः । यण् तङभावश्चार्षः । मृदङ्गपणवाद्यवदिति पाठे मतुबन्तं गान्धर्वविशेषणत्वेन योज्यम् । यद्वा । मृदङ्गपणवादि अवदिति च्छेदः । मृदङ्गादीनां ध्वनिमवत् रक्षत् अतिरस्कुर्वत् गान्धर्वमाकर्ण्येति योज्यम् ॥ २४ ॥ तर्हीति द्वयम् ॥ तर्ह्येव तस्मात्सरसः सकाशान्निष्क्रामन्तं सहानुगम् अनुगैर्भृत्यैः सहितं अमरेषु प्रवरं विबुधानुगैर्गन्धर्वादिभिः उपगीयमानम् ॥ २५ ॥ तप्तहेमनिकायाभं तप्तसुवर्णराशिसदृशकान्तिमन्तमतितेजस्विनं शितिकण्ठं नीलकण्ठं त्रिलोचनं प्रसादे सुमुखं स्वेषु प्रसादं कर्त्तुमुद्युक्तम् एवंभूतं श्रीमहादेवं वीक्ष्य जातकौतुकाः उत्पन्नोत्साहा जाताश्चर्या वा प्रचेतसः प्रणेमुः ॥ २६ ॥ स इति ॥ प्रपन्नानामार्त्तिहरः भगवान् धर्मवत्सलः प्रीतः स श्रीरुद्रः धर्मज्ञान् शीलसम्पन्नान् प्रीतान् तान् प्रचेतस उवाच ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यूयमिति॥यूयं वेदिषदः बर्हिषदः पुत्रा इति मम विदितम् । तथा वश्चिकीर्षितं कर्त्तुमिष्टं च विदितम् । वो युष्माकं भद्रं भवत्विति कृत्वा अनुग्रहाय अनुग्रहेण भगवदाराधनप्र-
कारप्रदर्शनाय मे मयैवं स्वदर्शनं कृतं दत्तम् ॥ २८ ॥ य इति ॥ यः प्राणी रंहसः सूक्ष्मात् त्रिगुणात् प्रधानात् जीवसंज्ञितात् पुरुषाच्च परं प्रकृतिपुरुषयोर्नियन्तारं भग-
वन्तं वासुदेवं साक्षात् फलेच्छाख्यव्यवधानरहितः प्रपन्नः स मे प्रियः ॥ २९ ॥ स्वधर्मेति ॥ स्वधर्मनिष्ठः पुमान् शतजन्मभिः विरचितां ब्रह्मपदं प्राप्नोति । ततः परं चापि
पुण्यातिशये मामेति । भागवतस्तु यथाऽहं रुद्रो विबुधाः देवाश्चाधिकारिकाः कलात्यये अधिकारसमाप्तौ कलाया लिङ्गशरीरस्यात्यये भङ्गे च सत्येष्यन्ति तथा अथ देहान्ते
अव्याकृतं प्रपञ्चातीतं वैष्णवं पदमेति ॥ ३० ॥ अथेति ॥ यस्माद्भगवद्भक्तो मम प्रियः अथ तस्मात् भागवताः यूयमपि यथा भगवान् प्रियोऽस्ति तथा मम प्रियाः स्थः ।
भागवतानामपि मे मत्तोऽन्यः कर्हिचित् कदाचिदपि प्रेयानतिप्रियो न भवति अतो भवद्भिरपि मयि प्रीतिः कार्येत्यर्थः ॥ ३१ ॥ इदमिति ॥ पवित्रं परं मङ्गलं निःश्रेयस-

श्रीरुद्र उवाच ॥ यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम् ॥ अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम् ॥२८॥ यः परं रंहसः साक्षात् त्रिगुणाज्जी-
वसंज्ञितात् ॥ भगवन्तं वासुदेवं प्रपन्नः स प्रियो हि मे ॥ २९ ॥ स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिञ्चतामेति ततः परं हि माम् ॥ अव्याकृतं
भागवतोऽथ वैष्णवं पदं यथाहंविबुधाः कलात्यये ॥ ३० ॥ अथ भागवता यूयं प्रियाः स्थ भगवान्यथा ॥ न मे भागवतानां च प्रेयानन्योऽस्ति
कर्हिचित् ॥ ३१ ॥ इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम् ॥ निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः ॥ ३२ ॥ मैत्रेय उवाच ॥ इत्यनुक्रोश-
हृदयो भगवानाह ताञ्छिवः ॥ बद्धाञ्जलीन्राजपुत्रान्नारायणपरो वचः ॥३३॥ श्रीरुद्र उवाच ॥ जितं त आत्मविद्धुर्य स्वस्तये स्वस्तिरस्तु मे ॥
भवता राधसा राद्धं सर्वस्मा आत्मने नमः ॥३४॥ नमः पङ्कजनाभाय भूतसूक्ष्मेन्द्रियात्मने ॥ वासुदेवाय शान्ताय कूटस्थाय स्वरोचिषे ॥३५॥

करमपि च इदं वक्ष्यमाणं गीतं युष्मान् अहं वदामि । तद्युष्माभिः श्रूयतां श्रुत्वा च विविक्तमसंकीर्णं यथा भवति तथा युष्माभिर्जप्तव्यम् । इडभाव आर्षः व्याकरणान्तरे
क्वचिज्जप्तमित्यपिसाधु ॥ ३२ ॥ इतीति ॥ अनुक्रोशः कृपा हृदये यस्य स नारायणः परो ध्येयो यस्य भगवान् शिवः बद्धाञ्जलीन् तान् राजपुत्रान् वचः वचनमाह स्म
॥ ३३ ॥ जितमिति ॥ आत्मविदां ये धुर्याः श्रेष्ठाः तेषां स्वस्तये शोभनसत्तायै आनन्दलाभाय । " इक्श्तिपौ धातुनिर्देशे " इति श्तिप् । ते त्वया जितम् उत्कर्ष आवि-
ष्कृतः । भावे क्तः । अतो भवत्प्रसादान्ममापि स्वस्तिः स्वानन्दलाभः अस्तु । भवता राधसा स्वानन्दरूपेण राद्धं सिद्धमेव । भावे क्तः । अतः सर्वस्मै सर्वरूपाय आत्मने च
तुभ्यं नमः ॥ ३४ ॥ नम इति ॥ पङ्कजं लोकात्मकं पद्मं नाभौ यस्य तस्मै कारणात्मने नमः अत एव सृज्यप्राण्युपाधयः भूतानि सूक्ष्माणि तन्मात्राणीन्द्रियाणि च तेषा-
मात्मने नियन्त्रे नमः । अन्तःकरणचतुष्टयाधिष्ठातृत्वेन प्रणमति । शान्ताय कूटस्थायनिर्विकाराय स्वरोचिषे स्वप्रकाशाय वासुदेवाय चित्ताधिष्ठात्रे नमः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्कर्षणायेति ॥ सूक्ष्मायाव्यक्ताय दुरन्तायाऽनन्ताय अन्तकाय मुखाग्निना लोकदाहकाय सङ्कर्षणाय अहङ्काराधिष्ठात्रे नमः । विश्वस्य प्रकृष्टो बोधो यस्मात् तस्मै अन्तरात्मने बुद्ध्यधिष्ठात्रे प्रद्युम्नाय नमः ॥ ३६ ॥ नम इति ॥ हृषीकाणां चक्षुरादीनामीशं यदिन्द्रियं मनस्तदात्मने अनिरुद्धाय नमो । नमः सूर्यादितेजस्त्वमाह । परमः श्रेष्ठो यः हंसः सूर्यस्तस्मै पूर्णाय तेजसा विश्वव्यापकाय निभृतात्मने वृद्धिक्षयशून्याय नमः ॥ ३७ ॥ स्वर्गेति ॥ कर्मज्ञानफलभूतयोः स्वर्गापवर्गयोर्द्वारभूताय त्रयीमयत्वादित्यर्थः । नित्यं शुचिन्यन्तःकरणे निषीदतीति शुचिषत्तस्मै "हंसः शुचिषत् ।" इति श्रुतेः । हिरण्यं वीर्यं यस्य तस्मै अग्निरूपाय चातुर्होत्रं कर्म तस्मै तत्साधनायेत्यर्थः । कुतस्तन्तवे तद्विस्तारकाय नमः ॥ ३८ ॥ नम इति ॥ ऊर्जे पितृणामन्नाय इषे देवानामन्नाय यज्ञरेतसे सोमाय स हि पितृणां देवानां चान्नम् एवं त्रय्याः पतये नमः । जलत्वमाहजीवानां तृप्तिदाय सर्वरसात्मने जलरूपाय नमः ॥ ३९ ॥ पृथिवीत्वमाह—सर्वेति ॥ सर्वेषां सत्वानां प्राणिनां ये आत्मानः स्वरूपाणि तेषां देहाय व्यष्टिदेहाय स्थवीयसेऽ-

संकर्षणाय सूक्ष्माय दुरन्तायान्तकाय च ॥ नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने ॥ ३६ ॥ नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने ॥ नमः परमहंसाय पूर्णाय निभृतात्मने ॥ ३७ ॥ स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तन्तवे ॥ ३८ ॥ नम ऊर्जे इषे त्रय्याः पतये यज्ञरेतसे ॥ तृप्तिदाय च जीवानां नमः सर्वरसात्मने ॥ ३९ ॥ सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे ॥ नमस्त्रैलोक्यपालाय सह ओजोबलाय च ॥ ४० ॥ अर्थलिङ्गाय नभसे नमोन्तर्बहिरात्मने ॥ नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥ ४१ ॥ प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे ॥ नमो धर्मविपाकाय मृत्यवे दुःखदाय च ॥ ४२ ॥ नमस्ते आशिषामीश मनवे कारणात्मने ॥ नमो धर्माय बृहते कृष्णाया-कुण्ठमेधसे ॥ पुरुषाय पुराणाय सांख्ययोगेश्वराय च ॥ ॥ ४३ ॥

तिस्थूलाय विराड्देहाय च विशेषाय पृथिवीरूपाय नमः । वायुत्वमाह—प्राणरूपेण त्रैलोक्यं पालयति तस्मै सह ओजोबलात्मने इन्द्रियदेहसामर्थ्यहेतुभूताय वायुरूपाय नमः ॥ ४० ॥ नभस्त्वमाह—अर्थेति ॥ अर्थलिङ्गाय स्वगुणशब्दद्वारा पदार्थज्ञापकाय अवकाशदातृत्वेन अन्तर्बहिर्वस्तुनोरात्मने व्यवहारकारणाय नभसे नम इति पञ्चभूतरूपता । नम इति । पुण्याय पुण्यलभ्याय भूरिवर्चसे प्रकाशबहुलाय अमुष्मै लोकाय स्वर्गादिरूपाय नमः ॥ ४१ ॥ प्रवृत्तायेति ॥ पितृदेवाय क्रमेण पितृदेवप्राप्तिसाधनाय प्रवृत्ताय निवृत्ताय च कर्मणे नमः । अधर्मस्य विपाकाय फलरूपाय दुःखाय दुःखदाय मृत्यवे च नमः ॥ ४२ ॥ नम इति सार्द्धम् ॥ हे ईश आशिषां कामनानां कारणात्मने मनवे ज्ञानिने मन्त्ररूपाय वा नमः । विष्णवादिदेवत्वेन प्रणमति । बृहते धर्माय परमधर्माय अकुण्ठमेधसे अलुप्तज्ञानशक्तये पुराणाय पुरुषाय साङ्ख्ययोगयोरीश्वराय प्रवर्त्तकाय कृष्णाय नमः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तित्रयेति॥अहङ्कृतमहङ्कारस्तदात्मने कर्तृकरणकर्मरूपशक्तित्रयेण समेताय मीढुषे श्रीरुद्राय नमः । " दाश्वान्साह्वान् मीढ्वांश्च " इति क्वस्वन्तो निपातः । चेतो ज्ञानमाकूतिः क्रिया तद्रूपाय वाचो विविधा भूतिः सृष्टिर्यस्मात्तस्मै द्रुहिणरूपाय नमः ॥ ४४ ॥ दर्शनमिति ॥ दिदृक्षूणां दर्शनेच्छूनां नोऽस्माकं भागवतैरर्चितम् आदृतं दर्शनं देहि । तदेव विवृणोति । स्वानां भक्तानां प्रियतमं रूपं प्रदर्शयेति । रूपं वर्णयति । सर्वेषामिन्द्रियाणां ये गुणा विषयास्तेषामञ्जनं व्यञ्जकं सर्वेन्द्रियविषयिरूपमित्यर्थः । सर्वेन्द्रियाणि स्वगुणैरनक्ति रञ्जयतीति वा ॥ ४५ ॥ स्निग्धेति ॥ स्निग्धः प्रावृषि यो घनस्तमिव श्यामं सर्वेषां सौन्दर्याणां सङ्ग्रहो यस्मिन् चारव आयताश्चत्वारो बाहवो यस्मिन् सुजातं यथोचितं सर्वावयवरुचिरमाननं यस्मिन् ॥ ४६ ॥ पद्मेति ॥ पद्मस्य कोषे मध्ये यानि पलाशानि पत्राणि तद्वद्रक्तरेखायुक्ते अक्षिणी यस्मिंस्तत् सुन्दर्यौ भ्रुवौ यस्मिंस्तत् शोभना नासिका यस्मिंस्तत् शोभना द्विजा दन्ता यस्मिंस्तत् सुकपोलमास्यं यस्मिंस्तत् समावन्यूनाधिकौ कर्णौ विभूषणं यस्य तत् कुण्डलयोरग्रे वक्ष्यमाणत्वात् ॥४७॥

शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने ॥ चेत आकूतिरूपाय नमो वाचोविभूतये॥४४॥दर्शनं नो दिदृक्षूणां देहि भागवतार्चितम् ॥ रूपं प्रियतमं स्वानां सर्वेन्द्रियगुणाञ्जनम् ॥४५॥ स्निग्धप्रावृड्घनश्यामं सर्वसौन्दर्यसङ्ग्रहम् ॥ चार्वायतचतुर्बाहुसुजातरुचिराननम् ॥ ४६ ॥ पद्मकोशपलाशाक्षं सुन्दरभ्रु सुनासिकम् ॥ सुद्विजं सुकपोलास्यं समकर्णविभूषणम् ॥ ४७ ॥ प्रीतिप्रहसितापाङ्गमलकैरुपशोभितम् ॥ लसत्पङ्कजकिञ्जल्कदुकूलं मृष्टकुण्डलम् ॥ ४८ ॥ स्फुरत्किरीटवलयहारनूपुरमेखलम् ॥ शङ्खचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ॥ ४९ ॥ सिंहस्कन्धत्विषो बिभ्रत्सौभगग्रीवकौस्तुभम् ॥ श्रियाऽनपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ॥ ५० ॥ पूररेचकसंविग्नवलिवल्गुदलोदरम् ॥ प्रतिसंक्रामयद्विश्वं नाभ्याऽऽवर्तगभीरया ॥ ५१ ॥

प्रीतीति॥ प्रीतिव्यञ्जकं प्रहसितमपाङ्गे नेत्रप्रान्ते यस्य तत् । प्रीत्या प्रहसितावीवापाङ्गौ यत्रेति वा । अलकैः केशैः कुञ्चितैर्भ्रमराकारैरुपशोभितं लसन्तः शोभमाना ये पङ्कजस्य किञ्जल्काः केशरास्तत्सदृशे पीते दुकूले वस्त्रे यस्मिंस्तत् मृष्टे उज्ज्वले कुण्डले यस्मिंस्तत् ॥ ४८ ॥ स्फुरदिति ॥ स्फुरन्त्यः दीप्यमानाः किरीटवलयादयो यस्मिंस्तत् शङ्खचक्रगदापद्मानि माला वनमाला मणयश्चाभरणस्थाः एतैरुत्तमा ऋद्धिः शोभा तद्युक्तम् ॥ ४९ ॥ सिंहेति ॥ सिंहस्कन्धसदृशौ स्थूलावप्रकटास्थिकौ यौ स्कन्धौ तयोस्त्विषः कुण्डलहारादिदीप्तीर्बिभ्रत् सौभगयुक्ता ग्रीवा येन सः कौस्तुभो यस्मिंस्तत् अनपायिन्या श्रिया लक्ष्मीरेखया हेतुभूतया क्षिप्तस्तिरस्कृतो निकषाश्मा स्वर्णरेखाङ्कितो निकषणपाषाणो येन तादृशेनोरसा उल्लसत् शोभमानम् ॥ ५० ॥ पूरेति ॥ पूररेचकाभ्यां श्वासोच्छ्वासाभ्यां संविग्नाश्चञ्चला वलयो रेखास्ताभिर्वल्गु मनोहरं दलवत् अश्वत्थपत्रसदृशमुदरं यस्मिंस्तत् आवर्तयुक्तया गम्भीरया नाभ्या द्वारभूतया बहिर्निर्गतं विश्वं तयैव पुनः प्रतिसङ्क्रामयत् प्रवेशयदिव स्थितम् । " मितां ह्रस्व " इत्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"वा चित्तविरागे" इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषया मित्त्वाभावः॥५१॥ श्यामेति ॥ श्यामश्रोण्या श्यामनितम्बेनाधिकं रोचिष्णु यद्दुकूलं पीताम्बरं तस्मिन् स्वर्णमयी-मेखला यस्मिंस्तत् समा अन्यूनाधिकाश्चारवः अङ्घ्रिजंघा यस्मिंस्तत् निम्ने जानुनी यस्मिंस्तत् शोभनं दर्शनं यस्य तत् ॥५२॥ पदेति ॥ हे गुरो तमोजुषामज्ञानां मार्गस्य गुरुः प्रदर्शकस्त्वं शरदि यत्पद्मं तस्य यत्पलाशं तद्वद्रोचिः शोभा यस्य तेन नखद्युभिर्नखदीप्तिभिर्नोऽस्माकम् अन्तरघम् अन्तःकरणास्थितमावरकमघं तमःस्थानीयं विधुन्वता दूरीकुर्वता पदा स्वचरणेन दीपस्थानीयेन अपास्तं दूरीकृतं साध्वसं संसारभयं येन तत् स्वीयं पदं स्वरूपं प्रदर्शय॥५३॥अतिदुर्लभं मया प्रार्थितमिति स्तोतैवाह—एतदिति ॥ आत्मनः शुद्धिमभीप्सता भक्तेन एतत्पूर्वोक्तं तव रूपमनुध्येयमेव न तु प्रत्यक्षतः प्राप्यम् । यस्मात् यस्य तव भक्तियोग एव स्वधर्ममनुतिष्ठताम् भक्तानाम् अभयदो मोक्षदः ॥ ५४ ॥ भवानिति ॥ स्वः स्वर्गादिष्वपि राज्यं राजत्वं यस्य स स्वाराज्यो ब्रह्मा तस्याप्यभिमतः सेव्यतया प्राप्यत्वेन संमतः एकान्तेन स्वर्गादितोऽपि विरक्तत्वेन यः

श्यामश्रोण्याऽधिरोचिष्णुदुकूलस्वर्णमेखलम् ॥ समचार्वङ्घ्रिजंघोरु निम्नजानु सुदर्शनम् ॥ ५२ ॥ पदा शरत्पद्मपलाशरोचिषा नखद्युभिर्नोऽन्तरघं विधुन्वता ॥ प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजुषाम् ॥ ५३ ॥ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सता ॥ यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठताम् ॥ ५४ ॥ भवान्भक्तिमतां लभ्यो दुर्लभः सर्वदेहिनाम् ॥ स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः ॥ ५५॥ तं दुराराध्यमाराध्य सतामपि दुरापया ॥ एकान्तभक्त्या को वाञ्छेत्पादमूलं विना बहिः ॥ ५६ ॥ यत्र निर्विष्टमरणं कृतान्तो नाभिमन्यते ॥ विश्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ॥ ५७ ॥ क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ॥ भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥५८॥ अथानघाङ्घ्रेस्तव कीर्तितीर्थयोरन्तर्बहिः स्नानविधूतपाप्मनाम् ॥ भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्सङ्गमोऽनुग्रह एष नस्तव ॥ ५९ ॥

केवलमात्मवित्तस्यापि गतिर्गम्यः भवान् सर्वदेहिनां दुर्लभोऽपि भक्तिमतामेव लभ्यो लब्धुं योग्यो भवति ॥ ५५ ॥ तमिति ॥ दुराराध्यं दुःखेन आराधयितुं योग्यं तं भगवन्तं सतामपि दुरापया दुर्लभया एकान्तया निरन्तया भक्त्या आराध्य प्रसाद्य तत्पादमूलं विना ततोऽन्यद्बहिर्विषयसुखं कः पण्डितो वाञ्छेत् ॥ ५६ ॥ यत्रेति ॥ वीर्यं प्रभावः शौर्यमुत्साहस्ताभ्यां विस्फूर्जितया क्षुभितया भ्रुवैव सर्वं विश्वं ब्रह्मादिस्थावरान्तं विध्वंसयन्नपि कृतान्तः कालो यत्र भगवत्पादमूले अरणं निर्विष्टं शरणं प्रविष्टं जनं नाभिमन्यते । अयं मम वश्य इत्यभिमानं न करोति ॥ ५७ ॥ क्षणेति ॥ भगवतो ये सङ्गिनो भक्तास्तेषां सङ्गस्य क्षणार्द्धेनापि स्वर्गमपुनर्भवं कैवल्यं मोक्षं च न तुलये तुल्यं न गणयामि । तर्हि मर्त्यानां मनुष्याणामाशिषो राज्याद्यास्तत्तुल्या न गणयामीति किमुत वक्तव्यम् ॥ ५८ ॥ अथेति ॥ अथ तस्मात् अनघौ पापनिवर्त्तकावङ्घ्री यस्य तव कीर्तिर्यशः तीर्थं गङ्गा तयोर्यथाक्रमेणान्तर्बहिःस्नानाभ्यां तव कीर्त्तौ मनःस्नानं गङ्गायां शरीरस्नानं ताभ्यां विधूतो निरस्तः पाप्मा येषां तेषाम् अतः भूतेषु सर्वप्राणिषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुक्रोशः कृपा सुसत्वं कामक्रोधादिराहितं चित्तं शीलं चार्जवादि विद्यते येषां तेषां सङ्गमो नोऽस्माकं स्यादेष एव तवानुग्रहः ॥ ५९ ॥ न यस्येति ॥ यद्यदा तव भक्तियोगेनानुगृहीतम् अतो विशुद्धं सत् यस्य चित्तं बहिरर्थेषु बाह्यविषयेषु विभ्रम आसक्तिर्यस्य तादृशं न भवति तथा तमोरूपायां गुहायां च आविशत् लयं प्राप्तं न भवति । क्रमेण विक्षेपलयाभावदर्शनार्थं विशेषणेननु निश्चितं तत्र तदैवाञ्जसा अनायासेनैव स मुनिर्मननशीलः सन् ते तव गतिं तत्वं विचष्टे पश्यति नान्यथा ॥ ६० ॥ तत्त्वमेवाह-यत्रेति॥ यत्रेदं विश्वं व्यज्यते प्रकाशते तन्तुषु पट इव विश्वस्मिंश्च यत् सच्चिदानन्दरूपेणावभाति कारणतया पटे तन्तुवत् तत् परं ज्योतिः आकाशमिव विस्तृतं ब्रह्म त्वमसि ॥ ६१ ॥ य इति ॥ हे भगवन् अविक्रियः यो भवान् पुरुरूपया बहुरूपया बहुरूपकरणसमर्थया आत्मनि त्वयि दुस्थया स्थातुमशक्तया स्वकार्यं मोहादि कर्त्तुमशक्तया मायया सदिव प्रतीयमानं न तु सत् इदं विश्वमसृजत्। भूयः पुनः बिभर्त्ति पालयति क्षपयति च । यत् यतो मायात एव अन्येषां भेदबुद्धिर्भवति तम् आत्मतन्त्रं स्वतन्त्रं त्वां

न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् ॥ यद्भक्तियोगानुगृहीतमञ्जसा मुनिर्विचष्टे ननु तत्र ते गतिम् ॥ ६० ॥
यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् ॥ तत्त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतम् ॥ ६१ ॥ यो माययेदं पुरुरूपयाऽसृजद्बिभर्ति भूयः क्षपयत्यविक्रियः ॥ यद्भेदबुद्धिः सदिवात्मदुस्थया तमात्मतन्त्रं भगवान्प्रतीमहि ॥ ६२ ॥ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजन्ति सिद्धये ॥ भूतेन्द्रियान्तःकरणोपलक्षितं वेदे च तन्त्रे च त एव कोविदाः ॥६३ ॥ त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्त्वतमो विभिद्यते ॥ महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः ॥ ६४ ॥ सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन ॥ अथो विदुस्तं पुरुषं सन्तमन्तर्भुङ्क्ते हृषीकैर्मधु सारघं यः ॥ ६५ ॥

वयं प्रतीमहि जानीमः। तङार्षः । यद्वा । सदिवेति भेदबुद्धेर्विशेषणम् । सामान्ये नपुंसकम्॥६२॥ क्रियेति ॥ यद्यपि त्वमेव निर्भेदं ब्रह्म तथापि ये श्रद्धान्विताः कर्मयोगिनः क्रियाकलापैः पूजाप्रकारैः अष्टाङ्गयोगैर्वा भूतेन्द्रियान्तःकरणैरस्वतन्त्रैर्नियम्यैरुपलक्षितं नियन्तृरूपमिदमेव साधु सम्यक् साकारं तत्त्वं सिद्धये यजन्ति पूजयन्ति त एव वेदे च तन्त्रे च कोविदाः कुशलाः न त्वेतदनादृत्य केवलं ज्ञाने प्रवृत्ताः ॥ ६३ ॥ त्वमिति ॥ आद्यस्त्वमेक एव पुरुषः यतो बहुभवनहेतुभूता सुप्ता मायाख्या शक्तिर्यस्य सः पश्चादुत्थितया तया मूलशक्त्या रजःसत्वतमोरूपं शक्तित्रयं विभिद्यते पृथग्भवति। यतो रजआदेर्महान् महत्तत्वमहमहङ्कारः खमाकाशः मरुत् पवनः अग्निः वाः जलं धरा पृथ्वी सुरा देवानां देहा ऋषयः ऋषीणां देहाः भूतगणाः अन्येषां सर्वप्राणिनां देहाश्च भवन्ति। एवमिदं सर्वं जगत्त्वं सृजसीत्यर्थः ॥ ६४ ॥ सृष्टमिति ॥ एवं स्वशक्त्या मायर्येदं जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्विधं सृष्टं पुरं शरीरमात्मांशकेन जीवात्मना प्रविष्टः अथो तस्मात् पुरि शयनाद्धेतोः पुरस्यान्तः सन्ततं चिदाभासं पुरुषं विदुः यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरघाभिर्मधुमक्षिकाभिः सृष्टं सारघं मधु तदिव तुच्छं विषयसुखं हृषीकैरिन्द्रियैरविद्यया वृतः सन् भुङ्क्ते ॥ ६५ ॥ स इति ॥ खलु निश्चितं यो विश्वं सृष्ट्वा तदन्तःप्रविष्टः स एषः अनुमेयमेव तत्त्वं यस्य न तु प्रत्यक्ष इति अतिचण्डवेगस्त्वम् अविसह्यः वायुर्घनावलीर्मेघपङ्क्तीः इव लोकान् कालयानः इतस्ततश्चालयमानः नाशयन् मृगभाव आर्षः। भूतैरेव भूतानि तत्रत्यानि स्थावरजङ्गमात्मकानि विकर्षसि उपसंहरसि ॥ ६६ ॥ प्रमत्तमिति ॥ इतिकृत्यम् एवमेवेदं कर्तव्यमिति चिन्तयोच्चैरतिशयेन प्रमत्तमसावधानं प्रवृद्धो लोभो यस्य तं विषयेषु लालसम् अतिप्रसक्तं जनम् अप्रमत्तः सावधानस्तत्तत्प्राणिकर्मानुसन्दधानः अन्तकः कालरूपस्त्वम् आखुं मूषकं क्षुधा लेलिहानो द्विशिखजिह्वयौष्ठप्रान्तौ स्पृशन्नहिः सर्पः इव सहसा अकस्मादेवाभिपद्यसे आक्रामसि ॥ ६७ ॥ क इति ॥ यस्ते तव योऽवमानः अनादरस्तेन व्ययमानं भयात्कम्पमानं नाशं प्राप्तमिव वा केतनं शरीरं यस्य स पण्डितः कस्त्वत्पदाब्जं विजहाति त्यजति। न कोऽपीत्यर्थः। अत एव कालाद्विनाशशङ्कयास्माकं सर्वेषां रुद्रादीनां गुरुः पितामहत्वेन पूज्यो ब्रह्माऽपि

स एष लोकानतिचण्डवेगो विकर्षसि त्वं खलु कालयानः॥ भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाऽविषह्यः॥ ६६ ॥ प्रमत्तमुच्चैरितिकृत्यचिन्तया प्रवृद्धलोभं विषयेषु लालसम्॥ त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः॥ ६७ ॥ कस्त्वत्पदाब्जं विजहाति पण्डितो यस्तेऽवमानव्ययमानकेतनः॥ विशङ्कयाऽस्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश ॥ ६८ ॥ अथ त्वमसि नो ब्रह्मन्परमात्मन्विपश्चिताम्॥ विश्वं रुद्रभयत्रस्तमकुतश्चिद्भया गतिः ॥ ६९ ॥ इदं जपत भद्रं वो विशुद्धा नृपनन्दनाः॥ स्वधर्ममनुतिष्ठन्तो भगवत्यर्पिताशयाः ॥ ७० ॥ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् ॥ पूजयध्वं गृणन्तश्च ध्यायन्तश्चासकृद्धरिम् ॥ ७१ ॥ योगादेशमुपासाद्य धारयन्तो मुनिव्रताः॥ समाहितधियः सर्व एतदभ्यसतादृताः॥ ७२ ॥

यच्चरणारविन्दमर्चति स्म तथोपपत्तिं युक्त्या दृढनिश्चयं विनाऽपि पितामहवचनाचारविश्वासेनैव चतुर्दश मनवोऽपि यदर्चन्ति स्म ॥ ६८ ॥ अथेति ॥ हे ब्रह्मन् हे परमात्मन् विश्वं रुद्रादिभयेन ध्वस्तं ग्रस्तप्रायम् इति विपश्चितां जानतां नोऽस्माकं त्वमेव अकुतश्चिद्भया न कुतश्चिद्भयं यत्र तादृशी गतिरसि ॥ ६९ ॥ इदमिति ॥ हे नृपनन्दनाः यूयं विशुद्धा रागादिरहिताः स्वधर्ममनुतिष्ठन्तः भगवति अर्पित आशयो मनो यैस्तादृशाः सन्तः इदं मयोपदिष्टं स्तोत्रं जपत तेन वो भद्रं भविष्यति ॥ ७० ॥ तमेवेति ॥ तमेव पूर्वोक्तमात्मानमन्तर्यामिणमात्मस्थं स्वस्मिन् स्थितं तथा सर्वभूतेषु स्थावरजङ्गमात्मकेषु चावस्थितं हरिमसकृत् निरन्तरं ध्यायन्तः तमेव च गृणन्तः स्तुवन्तः पूजयध्वम् ॥ ७१ ॥ योगादेशमिति ॥ योगादेशं नामेदं स्तोत्रमुपासाद्य पठतो मत्तः प्राप्य मनसा धारयन्तो मुनिव्रताः मुनीनां व्रतान्याहारनियमादीनि येषां ते तथा समाहितधियः आदृताः सादराश्च सन्तो भवन्तः सर्वे एतदभ्यसत अभ्यासेन जपतः ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमिति ॥ सिसृक्षुः प्रजासर्गमिच्छुः भगवान् विश्वसृजां पतिः ब्रह्मा इदं स्तोत्रं पुरा सृष्ट्यादौ संसिसृक्षतां प्रजासर्गमिच्छतां भृग्वादीनामात्मजानां पुत्राणां नोऽस्माकमाह स्म ॥ ७३ ॥ त इति ॥ ते सर्वे प्रजेश्वराः वयं ब्रह्मणा प्रजासर्गे नोदिताः अनेन स्तोत्राभ्यासेन ध्वस्ततमसो निरस्तसर्वदोषप्रतिबन्धाः सन्तो विविधा नानाप्रकाराः प्रजाः सिसृक्ष्मः सृष्टवन्तः आर्षः ॥ ७४ ॥ अथेति ॥ अथ तस्मादिदानीमपि यः पुमान् युक्तः प्रयत्नवान् अवहितः सावधानो विषयानासक्तो वासुदेव एव परं केवलमयनमाश्रयो यस्य तथाभूतः सन् नित्यदा निरन्तरमिदं स्तोत्रं जपन् भवति सोऽचिरादल्पेनैव कालेन श्रेयः कल्याणं प्राप्नोति ॥ ७५ ॥ श्रेयसामिति ॥ इह लोके सर्वेषां श्रेयसां मध्ये ज्ञानमेव परमुत्कृष्टं निःश्रेयसं फलम् । यतः ज्ञानमेव नौस्तरणसाधनं यस्य सः जनः दुष्पारं दुस्तरं व्यसनार्णवं दुःखसागरं संसारं सुखमनायासेन तरति ॥ ७६ ॥ य इति ॥ यः पुमान् श्रद्धया युक्तो मद्गीतमिमं भगवतः स्तवमधीयानो भवत्यसौ प्रकारान्तरेण दुराराध्यमपि हरिं सुखेनैवाराधयति प्रसादयति ॥ ७७ ॥ विन्दत इति ॥ मया योऽयं

इदमाह पुराऽस्माकं भगवान्विश्वसृक्पतिः ॥ भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षताम् ॥ ७३ ॥ ते वयं नोदिताः सर्गे प्रजासर्गे प्रजे-
श्वराः ॥ अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ॥ ७४ ॥ अथेदं नित्यदा युक्तो जपन्नवहितः पुमान् ॥ अचिराच्छ्रेय आप्नोति
वासुदेवपरायणः ॥ ७५ ॥ श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परम् ॥ सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवम् ॥ ७६ ॥ य इमं श्रद्धया
युक्तो मद्गीतं भगवत्स्तवम् ॥ अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥ ७७ ॥ विन्दते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरम् ॥ मद्गीतगी-
तात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥ ७८ ॥ य इदं कल्य उत्थाय प्राञ्जलिः श्रद्धयाऽन्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबन्धनैः
॥ ७९ ॥ गीतं मयेदं नरदेवनन्दनाः परस्य पुंसः परमात्मनः स्तवम् ॥ जपन्त एकाग्रधियस्तपो महच्चरध्वमन्ते तत आप्स्यथेप्सितम्
॥ ८० ॥ इति श्रीभागवते चतुर्थस्कन्धे रुद्रगीतं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

भवद्भ्यो गीत उपदिष्टः स्तवस्तेन गीतात् स्तुतात् अत एव सुप्रीतात् श्रेयसां धर्मादीनामेकश्चासौ वल्लभ आश्रयस्तस्मात् अमुष्मात् हरेः सकाशात् असत्वरन् असत्वर इवाचरन् स्थिर इत्यर्थः । आचारक्किबन्तम् । असौ स्तोता पुरुषो यद्यत्फलमिच्छति तत्तद्विन्दते प्राप्नोति ॥ ७८ ॥ य इदमिति ॥ यो मर्त्यो मनुष्यः कल्ये उषसि उत्थाय श्रद्धयान्वितः प्राञ्जलिः संयोजिताञ्जलिः सन् इदं स्तोत्रं शृणुयाच्छ्रावयेद्वा सोऽपि कर्मलक्षणैर्बन्धनैः संसारहेतुभिर्विमुच्यते ॥ ७९ ॥ गीतमिति ॥ हे नरदेवनन्दनाः यदिदं मया परमात्मनः परस्य पुंसो हरेः स्तवं गीतं भवद्भ्यः उपदिष्टं तत् एकाग्रधियः सन्तो यूयं जपन्तो महत्तपश्चरध्वम् । तङ्गार्षः । अन्ते तपःपरिपाकदशायां ततो भगवत ईप्सितं मनोवाञ्छितं फलमाप्स्यथ ॥ ८० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य चतुर्विंशे व्यधादिमाम् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविंशे तु देवर्षिः पुरञ्जनकथामिषात् ॥ बुद्धियोगात्स्मृतिं प्राह तत्र श्लोका मुंजद्विषः ॥ उवाचपञ्चकं सार्द्धाश्चतुषष्टिरनुष्टुभः ॥२५॥ इतीति ॥ इति प्रचेतोभ्यो भगवत्स्तोत्रं सन्दिश्य सम्यगुपदिश्य तैर्बार्हिषदैर्बर्हिषदः पुत्रैः अभिपूजितः भगवान् हरस्तेषां राजपुत्राणां प्रचेतसां पश्यतामेवान्तर्दधे ॥ १ ॥ रुद्रेति रुद्रेण गीतमुपदिष्टं भगवतः स्तोत्रं जपन्तस्ते सर्वे प्रचेतसो जले स्थिताः वर्षाणामयुतं दशसहस्रवर्षपर्यन्तं तपस्तेपुः कृतवन्तः ॥ २ ॥ प्रचेतस्सु तपस्यत्सु नारदः प्राचीनबर्हिषं बोधितवान् अतः प्रचेतःकथामसमाप्यैव तत्पितुर्वृत्तमाह—प्राचीनेति ॥ हे क्षत्तः प्राचीनबर्हिषं कर्मस्वासक्तमानसमपि अध्यात्मतत्वज्ञः कृपालुर्नारदः प्रत्यबोधयत् उपदिदेश ॥ ३ ॥ श्रेय इति ॥ हे राजन् कर्मणा काम्यकर्मानुष्ठानेन त्वमात्मने स्वार्थं कतमच्छ्रेय ईहसे किं फलमिच्छसि । दुःखस्य हानिः सुखस्य अवाप्तिश्चेति द्विविधं श्रेयः लोके प्रसिद्धम् तच्च इह कर्ममार्गे विचारकैः उभयमपि नेष्यते नाङ्गीक्रियते । कर्मफलस्य नश्वरत्वान्नात्यन्तिकी दुःखहानिः सुखावाप्तिश्चेति ॥ ४ ॥ नेति ॥ हे महाभाग कर्मभिरपविद्धा

मैत्रेय उवाच ॥ इति संदिश्य भगवान्बार्हिषदैरभिपूजितः ॥ पश्यतां राजपुत्राणां तत्रैवान्तर्दधे हरः ॥ १ ॥ रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः ॥ जपन्तस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥ २ ॥ प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसम् ॥ नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥ ३ ॥ श्रेयस्त्वं कतमद्राजन्कर्मणात्मन ईयसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥ ४ ॥ राजोवाच ॥ न जानामि महाभाग परं कर्मापविद्धधीः ॥ ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥५॥ गृहेषु कूटमार्गेषु पुत्रदारधनार्थधीः ॥ न परं विन्दते मूढो भ्राम्यन्संसारवर्त्मसु ॥६॥ नारद उवाच ॥ भो भोः प्रजापते राजन्पशून्पश्य त्वयाऽध्वरे ॥ संज्ञापिताञ्जीवसंघान्निर्घृणेन सहस्रशः ॥ ७ ॥ एते त्वां संप्रतीक्षन्ते स्मरन्तो वैशसं तव ॥ संपरेतमयः कूटैश्छिन्दन्त्युत्थितमन्यवः ॥८॥ अत्र ते कथयिष्येऽमुमितिहासं पुरातनम् ॥ पुरञ्जनस्य चरितं निबोध गदतो मम ॥९॥

विक्षिप्ता धीर्यस्य सोऽहं परं श्रेयो मोक्षाख्यं न जानामि । अतो येनाहं कर्मभिः कर्मजनितपुण्यपापादिभिर्मुच्येय तद्विमलं मोक्षसाधनं ज्ञानं मे ब्रूहीति ॥ ५ ॥ गृहेष्विति ॥ गृहेषु स्थितः पुत्रदारधनेष्वर्थधीः परमार्थ इति धीर्यस्य स मूढो जनः संसारवर्त्मसु जन्ममरणादिसंसारहेतुभूतेषु कूटधर्मेषु काम्यकर्माद्यनुष्ठानेषु तत्तत्फललोभेन भ्राम्यन् परं मोक्षं न विन्दते ॥ ६ ॥ कर्मफलेषु वैराग्यमुत्पादयितुं योगबलेन यज्ञहतान् पशून् प्रदर्शयन्नाह—भो इति ॥ भो भोः प्रजापते भो राजन् निर्घृणेन निर्दयेन त्वयाऽध्वरे यज्ञे ये संज्ञापिता मारितास्तान् पशून् गवाश्वादीन् अन्यांश्च जीवसंघान् पक्ष्यादिप्राणिसमूहान्सहस्रशः असङ्ख्यातांस्त्वं पश्य ॥ ७ ॥ एत इति ॥ एते पश्वादयस्तव वैशसं त्वत्कृतां पीडां स्मरन्तोऽत एवोत्थितमन्यवः प्रज्वलितक्रोधास्त्वां सम्परेतं मृतं कदायं मृतः सन्नस्मद्वशवर्त्ती स्यादिति सम्प्रतीक्षन्ते ततश्च अयःकूटैः लोहयन्त्रमयैः शृङ्गैस्त्वां च्छिन्दन्ति लट्निर्देशात् अविलम्बेन च्छेत्स्यन्ति ॥ ८ ॥ अत्रेति ॥ अत्र ज्ञानप्रश्नविषये एतस्मिन्संकटे वा निस्तारकं पुरातनं पुरञ्जनस्य चरितलक्षण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मितिहासं कथां ते तुभ्यमहं कथयिष्ये । तममुं मम गदतः सतस्त्वं निबोध सम्यगवधारय ॥ ९ ॥ तत्र जीवस्य विषयाऽऽसक्त्या संसारः स चेश्वरानुग्रहेण निवर्तत इति वक्तुं विपर्ययगृहीतस्य साक्षादवबोधयितुमशक्ये राजवृत्तान्तमिवाह । यद्वा । वैषयिककथाप्रियं राजानं तादृशकथयैव प्रबोधयन् प्राचीनबर्हिष एव कथां कथान्तरकल्पनयाऽप्रस्तुतप्रशंसालङ्कारेणाह—आसीदिति ॥ हे राजन् बृहच्छ्रवाः महायशाः पुरञ्जनो नाम राजा आसीत् । न विज्ञातं चेष्टितं यस्य स तथाभूतः अविज्ञातनामा तस्य पुरञ्जनस्य सखा आसीत् । यद्यपि पुरञ्जनादीन्स्वयमेवाग्रे व्याख्यास्यति तथापि सुखेन ग्रहणायात्रापि किञ्चिद्व्याख्यायते । तत्र पुरञ्जनो जीवः अविज्ञातनामा ईश्वरः ॥ १० ॥ स इति ॥ स पुरञ्जनः शरणं वासस्थानमन्वेषमाणः सर्वां पृथिवीं बभ्राम स प्रभुः समर्थोऽपि यदाऽनुरूपं स्वाभिलाषानुरूपं शरणं नाविंदत्तदा विमना इवाभूत् इवएवार्थे पक्षे स जीवः भोगायतनं देहमन्वेषमाणः पृथिवीं त्रिलोकीं बभ्राम सर्वत्र जन्म प्राप । यदाऽनुरूपं भोगभोग्यं शरीरं नाविन्दत्तदा विमना इवाभूत् ॥ ११ ॥ न साधु इति ॥ कामान् विषयभोगान् कामयमानोऽसौ पुरञ्जनस्तस्य तस्य कामभोगस्योपपत्तये सिद्धये भूतले यावतीः पुरः स्थानानि अपश्यत् ताः सर्वाः साधु योग्या न मेने । पक्षे असौ जीवो भूतले

आसीत्पुरञ्जनो नाम राजा राजन्बृहच्छ्रवाः ॥ तस्याविज्ञातनामाऽऽसीत्सखाऽविज्ञातचेष्टितः ॥ १० ॥ सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः ॥ नानुरूपं यदाऽविन्ददभूत्स विमना इव ॥ ११ ॥ न साधु मेने ताः सर्वा भूतले यावतीः पुरः ॥ कामान्कामयमानोऽसौ तस्य तस्योपपत्तये ॥ १२ ॥ स एकदा हिमवतो दक्षिणेष्वथ सानुषु ॥ ददर्श नवभिर्द्वार्भिः पुरीं लक्षितलक्षणाम् ॥ १३ ॥ प्राकारोपवनाट्टालपरिखैरक्षतोरणैः ॥ स्वर्णरौप्यायसैः शृङ्गैः सङ्कुलां सर्वतो गृहैः ॥ १४ ॥

त्रिलोक्यां यावतीः पुरः शरीराणि प्राप्तोऽपि कामान् कामयमानः ताः सर्वास्तस्य तस्य कामभोगस्योपपत्तये प्राप्त्यै साधु न मेने । गवादिदेहानामैहिकामुष्मिकभोगयोग्यत्वाभावात् । "ताभ्यो गामानयत्ता अब्रुवन्न वैनो यमलम्" इत्यादिश्रुतेः ॥ १२ ॥ स इति ॥ अथ एकदा कदाचिद्धिमवतः हिमाचलस्य दक्षिणेषु सानुषु नवभिः द्वार्भिर्युक्तामत एव लक्षितानि लक्षणानि रम्यपुरचिह्नानि यस्यां तथाभूतां पुरं ददर्श । पक्षे हिमवतो दक्षिणदेशेषु कर्मक्षेत्रेषु भारतवर्षेषु तत्रत्यमनुष्यदेहस्यैव फलसाधनत्वात् नवभिर्द्वार्भिर्युक्तां चक्षुरादिसप्तच्छिद्राणि मुखे द्वे चाधो देश इत्येवं नवद्वारयुक्ताम् लक्षितानि लक्षणानि भोगसाधनानि यस्यां तां पङ्गुत्वादिम्लेच्छान्त्यजादिदोषरहितां पुरं ब्राह्मणादिशरीरं ददर्श साधुतया मेने ॥ १३ ॥ पुरीं वर्णयति—प्राकारेति ॥ प्राकारोपवनाट्टालपरिखैः पुंस्त्वमार्षम् । अक्षतोरणैः गवाक्षैस्तोरणैश्च स्वर्णरौप्यायसैः शृङ्गैः शिखरैः युक्तैः गृहैश्च सर्वतः सङ्कुलां व्याप्ताम् । पक्षे त्वगादयः शरीरावरकाः प्राकाराः बाहिर्विषया उपवनानि मुखम् अट्टालः पतनहेतुर्निषिद्धाचारः रक्षाहेतवो गुणा वा परिखा रोमरन्ध्राणि गवाक्षाः नेत्रादीनि द्वाराणि तोरणानि तैः स्वर्णादिशृङ्गैः पित्तकफवातैर्धातुभिः राजसादिस्वभावैर्वा गृहैराधारचक्रकक्ष्याद्यैः सङ्कुलाम् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीलेति ॥ नीलस्फटिकादयः अरुणं माणिक्यं च तैः क्लृप्ता हर्म्यस्थल्यो यस्यां तां कबभाव आर्षः । श्रिया भोगवतीं नागपुरीमिव दीप्ताम् । पक्षे नीलादिवर्णा नाड्यः तत्तद्विषयवासनाहर्म्यस्थल्यो हृत्कण्ठभ्रूमध्यस्थानानि भोगवतीमिव वस्तुतस्तत्र भोगा अपि न सन्ति ॥ १५ ॥ सभेति ॥ कथार्थः स्पष्टः । सभा समाजस्थानं राजोपवेशस्थानं वा अन्तःकरणं च चत्वरं चतुष्पथं ताल्वधःस्थानं च तत्रैव नासिकामुखनेत्रकर्णानां चतुर्णां मार्गमेलः रथ्या राजमार्गाः इडापिङ्गलासुषुम्णाः आक्रीडायतनानि द्यूतादिस्थानानि इन्द्रियगोलकाः आपणो मनोगोलकः तैः चैत्यं विश्रामस्थानं चित्तं ध्वजो भगवद्वैमुख्यं तत्राविद्यादयः क्लेशाः पताकाभिः विद्रुमवेदयः आधारादिचक्रगतस्थानानि तैर्युक्ताम् ॥ १६ ॥ विषयनिष्ठबुद्धियोगेन जीवस्य देहयोग इति वक्तुं विषयवर्गं बाह्योपवनत्वेन निरूपयति—पुर्या इति चतुष्कम् ॥ पुर्यास्तु बाह्योपवने यदृच्छया तत्रागतां प्रमदोत्तमां ददर्शेति चतुर्थेनान्वयः । दिव्यैर्मनोहरैः द्रुमैर्लताभिश्चाकुले व्याप्ते नदतां विहङ्गालिकुलानां कोलाहलो येषु ते जलाशया यस्मिंस्तस्मिन् पक्षे स्रक्चन्दनादीनां द्रुमलताजलाशयादिभावः स्त्रीपुत्रादीनामेव विहङ्गालिकुलत्वं च कोलाहलश्च तेषां विहारादिकं शेषः कथालङ्कारः ॥ १७ ॥ हिमनिर्झराणां

नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः ॥ क्लृप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥१५॥ सभाचत्वररथ्याभिराक्रीडायतनापणैः ॥ चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥ १६ ॥ पुर्यास्तु बाह्योपवने दिव्यद्रुमलताकुले ॥ नदद्विहङ्गालिकुलकोलाहलजलाशये ॥ १७ ॥ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवालविटपनलिनीतटसंपदि ॥ १८ ॥ नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ॥ आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥ १९ ॥ यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम् ॥ भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः ॥ २० ॥ पञ्चशीर्षाहिना गुप्तां प्रतिहारेण सर्वतः ॥ अन्वेषमाणामृषभमप्रौढां कामरूपिणीम् ॥ २१ ॥

विप्रुषो बिन्दवस्तद्वता कुसुमाकरसम्बन्धिवायुना चलन्तः प्रवाला विटपाः शाखाश्च येषां तैर्विटपैर्वृक्षैर्नलिनीनां सरसीनां तटेषु सम्पत् समृद्धिर्यस्मिंस्तस्मिन् । पक्षे निर्झरैः कुसुमैः वायुचलत्प्रवालैः नलिनीभिश्च क्रमेण रसगन्धस्पर्शरूपसम्पात्तिर्दर्शिता ॥ १८ ॥ मुनिव्रतैरहिंस्रैर्नानारण्यमृगव्रातैरनाबाधे तत्कृतबाधारहिते यत्रोपवने कोकिलकूजितैः पान्थो मार्गगामी पुरुष आत्मानमाहूतं मन्यते । पक्षे मुनिव्रतैः पराधीनत्वेन भोगरहितैर्नानारण्यमृगव्रातैर्भृत्यादिभिरनाबाधे यत्र कोकिलकूजितैर्दारापत्यादिप्रियवचनैः पान्थः संसारमार्गपथिकोऽन्योऽपि जीव आत्मानमाहूतं मन्यते तद्गृहे भोक्तुमायाति ॥ १९ ॥ यदृच्छयेति ॥ एकैकशतनायकैः प्रत्येकं शतानामनन्तानां नायकैः स्वामिभिर्दशभिर्भृत्यैः सहायान्तीं यदृच्छया तत्रोपवन आगतां प्रमदोत्तमां ददर्श । पक्षे विषयविवेकवती बुद्धिः प्रमदोत्तमा यदृच्छयेति तयोः सम्बन्धस्य दुर्निरूपत्वं दर्शयति । मनोयुक्तानि दशेन्द्रियाणि भृत्याः अनन्तवृत्तयः क्षुद्रभृत्याः ॥ २० ॥ तां वर्णयति—पञ्चेति ॥ पञ्चशीर्षेण अहिना सर्पेण प्रतिहारेण पालकेन सर्वतो गुप्तां रक्षितामृषभं पति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भन्वेषमाणाम् अप्रौढां षोडशवर्षा कामरूपिणीं नानाशृङ्गारधारिणीं च । पक्षे पञ्चशीर्षाणि वृत्तयो यस्य तेनाहिना प्राणेन प्रतिहारेण गुप्तामृषभं जीवं चेतनं भोक्तारमन्वेषमाणाम् अप्रौढां विचाररहितत्वेनाविरक्ताम् अत एव कामरूपिणीं नानाविधकामभोगवासनावतीम् ॥ २१ ॥ सुनासामित्यर्द्धं स्पष्टम् । समं विन्यस्तौ रचितौ कर्णौ ताभ्यां कुण्डलश्रियं बिभ्रतीं दधतीम्। पक्षे गन्धज्ञानादिभिर्बुद्ध्यवयवैः सुनासत्वादिकं निरूप्यते। रसास्वादचर्वणशक्तयो दन्ताः सुकपोलत्वं बुद्धेः स्वच्छता आननमग्रभागः कुण्डलश्रीश्च प्रवृत्तिनिवृत्तिशास्त्रार्थः ॥ २२ ॥ पिशङ्गनीविम् पीताम्बरां ह्रस्वान्तो नीविशब्दः दीर्घान्ते वा। कबभाव आर्षः । एवं सुश्रोणिशब्देऽपि । सुश्रोणीं शोभननितम्बवतीम् श्यामां किशोरावस्थापन्नां कनकस्य मेखला कटिभूषणं यस्यास्तां नूपुरैः तद्गतक्षुद्रघण्टिकाभिप्रायं पादाङ्गुलीयकोपलक्षणं वा बहुत्वम् । क्वणद्भ्यां पद्भ्यां चलतीम् । नुमभाव आर्षः। देवतामिव शोभमानां पक्षे पिशङ्गनीवीं रजोगुणप्रत्युक्तकर्मानुष्ठानवासनावृताम्।श्यामामिति "अन्नमयं हि सोम्य मनः इति "यत्कृष्णं तदन्नस्य इत्यादिश्रुत्यनुसारेण बुद्धेरन्नमयत्वात् जीवान् प्रतिसूर्यस्थानीयेश्वराच्छादकमेघस्थानीयत्वाद्वा श्यामत्वमुक्तम्।तत्र सत्वांशस्यापि विद्यमानत्वात्कनकमेखलात्वम् । श्रोण्यादिभावेन बुद्ध्यवयवविशेषा ज्ञेयाः।

सुनासां सुदतीं बालां सुकपोलां वराननाम् ॥ समविन्यस्तकर्णाभ्यां बिभ्रतीं कुण्डलश्रियम् ॥ २२ ॥ पिशङ्गनीवीं सुश्रोणीं श्यामां कनकमेखलाम् ॥ पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव ॥ २३ ॥ स्तनौ व्यञ्जितकैशोरौ समवृत्तौ निरन्तरौ ॥ वस्त्रान्तेन निगूहन्तीं व्रीडया गजगामिनीम् ॥ २४ ॥ तामाह ललितं वीरः सव्रीडस्मित शोभनाम् ॥ स्निग्धेनापाङ्गपुङ्खेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा ॥ २५ ॥ का त्वं कञ्जपलाशाक्षि कस्यासीह कुतः सति ॥ इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे ॥ २६ ॥

बुद्धेश्चञ्चलत्वं प्रसिद्धमेवेति चलतीमित्युक्तम्॥ २३॥व्यंञ्जितं कैशोरं यौवनोपक्रमो याभ्यां तौ समौ तुल्यौ न्यूनाधिक्यवर्जितौ वृत्तौ वर्तुलौ निरन्तरौ मध्यव्यवधानरहितौ एवंभूतौ स्तनौ व्रीडया लज्जया वस्त्रान्तेन निगूहन्तीमाच्छादयन्तीं गजगामिनीं पक्षे स्तनौ रागद्वेषौ तौ च वृद्धस्यापि नित्यतरुणाविति व्यञ्जितकैशोरौ समं तुल्यं मोहकं वृत्तं चरितं ययोः निरन्तरौ "काम एष क्रोध एषः" इत्युक्तेरभिन्नावेव तयोर्निगूहनं च ह्रीविनयाभ्यां लौकैः क्रियते शेषं कथालङ्कारः ॥ २४ ॥ तामिति ॥ प्रेम्णा उच्चैर्भ्रमन्ती भ्रूर्धनुःस्थानीया यस्मिंस्तेन स्निग्धेन स्नेहयुक्तेन तस्या अपाङ्ग एव पुङ्खो मूलप्रान्तो यस्य कटाक्षलक्षणस्य बाणस्य तेन स्पृष्टो विद्धो वीरः पुरञ्जनः सव्रीडेन स्मितेन शोभनां तां प्रमदां ललितं मनोहरं यथा भवति तथा आह स्म पप्रच्छ। पक्षे वीरः भोगेषूत्साहवान् तयोः संवादोक्तिः परस्पराध्यासदार्ढ्याय।अपाङ्गस्पर्शेन बुद्धेर्भौतिकत्वमुक्तम्।मनुष्यशरीरे बुद्ध्यादयस्ततो विलक्षणा इत्यभिप्रायेण नूतनतया सम्बन्धप्रदर्शनम् ॥ २५ ॥ का त्वमिति ॥ हे कञ्जपलाशाक्षि हे सति हे भीरु त्वं का कस्य कन्या पत्नी वा त्वमसि। इह स्थाने कुतः स्थानादागताऽसि पुर्याः समीपस्था उपपुरी भूस्तामिमामालक्ष्य किं चिकीर्षसि कर्तुमिच्छसि एतत्सर्वं मे मह्यं पृच्छते शंस कथय। पक्षे कथालङ्कारमात्रम् ॥२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क इति ॥ हे सुभ्रु ह्रस्वत्वमपाणिनीयमपि बहुप्रयुक्तम् । एकादशी महाभटो बृहद्बलत्वेन वक्ष्यमाणः येषु दशसु ते तथाभूता ये ते तवानुपथाः अनुवर्तिनस्त एते के एता ललनाः स्त्रियो वा काः ते तव पुरःसरः अग्रचरः अहिरयं कः। पक्षे महाभटो मनः अनुपथाः इन्द्रियाणि ललना इन्द्रियवृत्तयः अहिः पञ्चवृत्तिकः प्राणः मनसः पृथगुपादानं बुद्धिपरिचारकेन्द्रियसहायतया तत्परिचारकत्वविवक्षया ॥ २७ ॥ त्वमिति ॥ त्वं रहः एकान्ते वने मुनिवत्संयता सती त्वदङ्घ्रिकामेनैव त्वच्चरणभजनादेव प्राप्ताः समस्ताः कामा येन तं स्वपतिं धर्मं विचिन्वती किं ह्रीरसि अथवा स्वपतिं शिवं विचिन्वती भवान्यसि किंवा स्वपतिं ब्रह्माणं विचिन्वती वाक् सरस्वत्यसि अथवा स्वपतिं विष्णुं विचिन्वती रमा लक्ष्मीरसि। यदि रमाऽसि तर्हि तव कराग्रात् पद्मकोशो लीलाकमलमसाधारणं चिह्नं क पतितः। पक्षे बुद्ध्यादिविशिष्टलिङ्गदेहाध्यास एव तात्पर्यम्।लीलाकमलं च जीवस्य विवेक एव स च तया तदलक्षित एव दूरतः क्षिप्तः इति संवादस्तु कथालङ्कारमात्रम् एवमग्रेऽपि ॥२८॥ नाऽऽसामिति ॥ हे वरोरु यतस्त्वं भुविस्पृक् अतः आसां स्त्र्यादीनां मध्येऽन्यतमाऽपि त्वं न भवसि न हि देवताः भुवं स्पृशन्ति अतो यज्ञपुंसा विष्णुना सह श्रीः लक्ष्मीर्यथा परं लोकं वैकुण्ठमलङ्करोति तथा वीरवरेण अदभ्रकर्मणा

क एतेऽनुपथा ये त एकादश महाभटाः ॥ एता वा ललनाः सुभ्रूः कोऽयं तेऽहिः पुरःसरः ॥ २७ ॥ त्वं ह्रीर्भवान्यस्यथवाग् रमापतिं
विचिन्वती किं मुनिवद्रहो वने ॥ त्वदङ्घ्रिकामाप्तसमस्तकामं क्व पद्मकोशः पतितः कराग्रात् ॥ २८ ॥ नाऽऽसां वरोर्वन्यतमा भुवि-
स्पृक्पुरीमिमां वीरवरेण साकम् ॥ अर्हस्यलंकर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ॥ २९ ॥ यदेष तेऽपाङ्गविखण्डितेन्द्रियं
सव्रीडभावस्मितविभ्रमद्भ्रुवा ॥ त्वयोपसृष्टो भगवान्मनोभवः प्रबाधतेऽथानुगृहाण शोभने ॥३०॥ तदाननं सुभ्रु सुतारलोचनं व्याल-
म्बिनीलालकवृन्दसंवृतम् ॥ उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ॥ ३१ ॥

इहामुष्मिकभोगसाधनदक्षेण मया सहेमां पुरीं त्वमलङ्कर्तुं शोभयितुमर्हसि। पक्षे स्वतोऽकर्मकोऽपि जीवो बुद्धिसङ्गात् सकर्मको भवति ॥ २९ ॥ यदिति ॥ हे शोभने यत् यस्मात् तवापाङ्गेनापाङ्गवीक्षितेन कटाक्षेण विखण्डितं मोहितमिन्द्रियं मनो तस्य तं मा मां सव्रीडं यद्भावेन प्रेम्णा स्मितं तेन विभ्रमन्ती या भ्रूलतया करणभूतया त्वया कर्तृभूतयोपसृष्टः प्रेरितः एष भगवान् मनोभवः कामः प्रबाधते प्रपीडयति। अथ तस्मात्त्वमनुगृहाण मय्यनुग्रहं कृत्वा तद्बाधानिवृत्तये मया सह पुरीं प्रविश्य रमस्व। पक्षे विखण्डितज्ञाननेत्रं मनोभवः विषयवासना अनुगृहाण शब्दस्पर्शादीन् भोजय। तेन राजसबुद्धिसन्निधाने पुरुषः क्षणमपि स्वस्थः स्थातुं न शक्नोतीति दर्शितम् ॥ ३० ॥ तदिति ॥ हे शुचिस्मिते शोभने भ्रुवौ यस्मिंस्तत् सुतारे शोभनकनीनिके लोचने यस्मिंस्तत् व्यालम्बिनो दीर्घा ये नीलाः अलकास्तेषां वृन्देन संवृतं वल्गूनि वाचकानि वाक्यानि यस्मिंस्तत् यद्व्रीडया लज्जया अभिमुखं मम संमुखं न भवति तत्स्वाननमुन्नीय मे प्रदर्शय। पक्षे एकान्तस्थितयोः स्त्रीपुरुषयोर्विकारस्यावश्यंभावित्वाच्छ्रेयोऽर्थिभिरे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वमेकान्ते न स्थेयमिति दर्शितम् ॥ ३१ ॥ इत्थमिति ॥ हे वीर इत्थमधीरवद्याचमानं प्रार्थयमानं तं वीरं पुरञ्जनं तेन मोहिता सा नारी हसन्ती सती अभ्यनन्दत अभिनन्दनपूर्वकमुत्तरं ददौ । तङार्षः ॥ ३२ ॥ नेति ॥ हे पुरुषर्षभ आत्मनो मम परस्यान्यस्य सहचरादेरपि च कर्त्तारं सम्यग्वयं न विदाम न विद्मः आर्षः । तथा गोत्रं नाम चोभयोर्यत्कृतं येन कृतं भवति तमपि न विद्मः बहुवचनेन ममानुवर्तिनोऽपि न जानन्ति सम्यगिति आपाततः किंचिज्ज्ञानं तु न कार्यकरम् । पक्षे बुद्धेरविद्यापरिणामरूपत्वेन सम्यग्ज्ञानाभावः ॥३३॥ इहेति ॥ इह पुर्यां सन्तमात्मानमेव केवलं विदाम विद्मः आर्षः । ततः परं येनात्मनो मम शरणं स्थानमियं पुरी निर्मिता तं तु न विद्मः । पक्षे अहमस्मीति ज्ञानं शरीरे निरन्तरं निष्प्रत्यूहरमणाभिमानं च प्रसिद्धमेव ॥ ३४ ॥ एत इति ॥ हे मानद एते नराः मे सखायः एता नार्यश्च मे सख्यः मम भोगसम्पादने निरतत्वात् । अयं च नागो मयि सुप्तायां ममेमां पुरीं पालयन् जागर्ति । पक्षे सखायः इन्द्रियाणि सख्यस्तद्वृत्तयः सुषुप्तौ बुद्धौ लीनायामपि पञ्चवृत्तिकस्य प्राणस्य जाग्रदवस्थावच्छरीर-

श्रीनारद उवाच ॥ इत्थं पुरंजनं नारी याचमानमधीरवत् ॥ अभ्यनन्दत तं वीर हसन्ती वीरमोहिता ॥ ३२ ॥ न विदाम वयं सम्यक् कर्तारं पुरुषर्षभ ॥ आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥ ३३ ॥ इहाद्य सन्तमात्मानं न विदाम ततः परम् ॥ येनेयं निर्मिता वीर पुरी शरणमात्मनः ॥ ३४ ॥ एते सखायः सख्यो मे नरा नार्यश्च मानद ॥ सुप्तायां मयि जागर्ति नागोऽयं पालयन्पुरीम् ॥ ३५ ॥ दिष्ट्याऽऽगतोऽसि भद्रं ते ग्राम्यान्कामानभीप्ससे ॥ उद्वहिष्यामि तांस्तेऽहं स्वबन्धुभिररिन्दम ॥ ३६ ॥ इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो ॥ मयोपनीतान्गृह्णानः कामभोगाञ्छतं समाः ॥३७॥ कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम् ॥ असंपरायाभिमुखमश्वस्तनविदं पशुम् ॥३८॥ धर्मो ह्यत्रार्थकामौ च प्रजानन्दोऽमृतं यशः ॥ लोका विशोका विरजा यान्न केवलिनो विदुः ॥३९॥

पालकत्वमपि सुप्रसिद्धम् ॥ ३५ ॥ दिष्टयेति ॥ हे अरिन्दम दिष्ट्या मम भाग्येनैव भवानत्राऽऽगतोऽस्ति । त्वमपि ग्राम्यान् कामान् विषयभोगानभीप्ससे इच्छसि तङार्षः । तान्भोगान् ते तुभ्यमहं स्वबन्धुभिः सखिभिः सखीभिश्च सहोद्वहिष्यामि प्रापयिष्यामि । इडार्षः । एवं ते तवापि भद्रं भविष्यति । पक्षे राजसबुद्धिसन्निधाने जीवस्य विषयभोगाभिलाषित्वं बुद्धीन्द्रियादेर्भोगसम्पादकत्वं प्रसिद्धमेव ॥ ३६ ॥ इमामिति ॥ हे विभो मयोपनीतान् प्रापितान् कामभोगान् विषयान् गृह्णानः उपभुञ्जानः संस्त्वं शतं समाः संवत्सरशतपर्यन्तं कालम् एतच्च मनुष्यशरीरप्रवेशादुक्तम् । इमां नवमुखीं पुरीमधितिष्ठस्व ॥ ३७ ॥ कमिति ॥ अरतिज्ञं नैष्ठिकम् अकोविदम् अनिषिद्धसुखत्यागिनम् सम्परायो मृत्युस्तदनभिमुखं परलोकचिन्ताशून्यम् अश्वस्तनविदम् श्वः किं भविष्यतीति चिन्ताशून्यम् अदीर्घदर्शिनमित्यर्थः । अत एव पशुतुल्यं त्वत् त्वत्तोऽन्यं कं नु रमये । पक्षे प्रवृत्तिस्वभावत्वान्निवृत्तिनिन्दा ॥ ३८ ॥ धर्म इति ॥ अत्र गार्हस्थ्ये अर्थकामौ प्रजाऽऽनन्दः पुत्रसुखम् अमृतं मोक्षः यशश्च विशोकाः विरजाः शुद्धा लोकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गादयश्चेति सर्वे सिद्ध्यन्ति यान् धर्मादीन् केवलिनो नैष्ठिकादयो न विदुः ॥३९॥ पित्रिति ॥ गृहाश्रम इति यत् तदेवास्मिन् भवे संसारे पितृदेवर्षिमर्त्यानां भूतानां प्राणिनामात्मनश्चेति सर्वेषामपि क्षेमं निर्वाहकं शरणमाश्रयं शास्त्रज्ञा वदन्ति ॥ ४० ॥ का नामेति ॥ हे वीर लोके विख्यातं प्रसिद्धं वदान्यमुदारचित्तं प्रियदर्शनमतिसुन्दरं पूर्वोक्तरतिज्ञत्वादिविशिष्टं च त्वादृशं गुणालयं पतिं स्वयं प्राप्तं मां वृणीष्वेति प्रार्थयमानं मादृशी गुणज्ञा या न वृणीत सा का नाम प्रसिद्धा लोके न कापीत्यर्थः । पक्षे कामिनी कामिनमेव बहुमन्यते न विरक्तमिति दर्शितम् ॥ ४१ ॥ कस्या इति ॥ हे महाभुज महापराक्रम युक्तभोगी सर्पस्तस्य भोगो देहस्तत्सदृशयोस्ते तव भुजयोर्भुवि पृथिव्यां कस्याः स्त्रिया मनो न सज्जेत् अपि तु सर्वस्या एव। यो भवान् घृणया कृपयोद्धतः प्रवृत्तो यः स्मितपूर्वकोऽवलोकस्तेन अनाथवर्गाणां रक्षकरहितानामस्माकमाधिं मनःपीडामलमत्यर्थं निर्मूलमपोहितुं निवर्त्तयितुं विचरति ॥ ४२ ॥ इति ताविति ॥ इत्येवं तौ दम्पती स्त्रीपुरुषौ तत्रोपवने समयं सङ्केतं मिथः परस्परं समुद्य समुदीर्य वदेः क्त्वे-

पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह ॥ क्षेमं वदन्ति शरणं भवेऽस्मिन्यद्गृहाश्रमः ॥ ४० ॥ का नाम वीरविख्यातं वदान्यं प्रियदर्शनम् ॥ न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिम् ॥४१॥ कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज ॥ योऽनाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुम् ॥ ४२ ॥ नारद उवाच ॥ इति तौ दंपती तत्र समुद्य समयं मिथः ॥ तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः ॥४३॥उपगीयमानो ललितं तत्र तत्र च गायकैः॥क्रीडन् परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ॥४४॥सप्तोपरिकृता द्वारः पुरस्तस्यास्तु द्वे अधः ॥ पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ॥ ४५ ॥ पञ्चद्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा ॥ पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ॥ ४६ ॥

ल्यप् । तां नवमुखीं पुरीं प्रविश्य शतं समाः मुमुदाते । पक्षे बुद्ध्यादिलिङ्गशरीरस्य परस्पराध्यासे जातेऽपि स्थूलशरीराध्यासं विना भोगासम्भवात्तदध्यासो दर्शितः ॥४३॥ उपगीयमान इति ॥ प्रविशन्नेव तत्र तत्र स्थाने गायकैः सूतमागधादिभिर्ललितं मनोहरं यथा भवति तथोपगीयमानः स्तूयमानः स्त्रीभिश्च परिवृतः क्रीडन् बभूव । ततश्च शुचौ निदाघकाले तापापनोदार्थं ह्रदिनीं सरसीमविशत् । पक्षे उपगीयमान इत्यादि जाग्रदवस्था शुचिः सुषुप्तिः ह्रदिनी हृदयाकाशं स्वापस्थानम् ॥ ४४ ॥ जाग्रदवस्थां प्रपञ्चयति- सप्तेति ॥ तस्यां पुरि यः कश्चन ईश्वरः स्वामी कश्चनेति आत्मनः सम्यगविज्ञानात् तस्य पृथग्विषये देशे गत्यर्थं तस्याः पुरः उपरि सप्त द्वारः कृताः । द्वे तु तस्या अधः कृते पक्षे जीवस्य पृथग्विषयभोगार्थं नेत्रे नासिके श्रोत्रे मुखं चेत्युपरि लिङ्गगुदे अधः ॥ ४५ ॥ पञ्चेति ॥ हे नृप तासु सप्तसु पञ्चद्वारस्तु पौरस्त्याः पूर्वदिग्भवाः एका दक्षिणा दक्षिणस्यां दिशि वर्त्तमाना तथैकोत्तरा उत्तरदिग्भवाः । ये द्वे अधस्ते तु पश्चिमे पश्चिमदिग्भवे अमूषां द्वारां नामानि ते तुभ्यमहं वर्णये । पक्षे नेत्रे नासिके मुखं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेति पौरस्त्याः दक्षिणैका दक्षिणा वामउत्तरा तथा द्वे गुदलिङ्गे पश्चिमे पश्चाद्भागे तत्र लिङ्गस्य पुरोभागभवत्वेऽपि गुदसहचरतया कथालङ्कारार्थं पृष्ठभवत्वनिर्देशः ॥ ४६ ॥ खद्योतेति ॥ खद्योता आविर्मुखी च द्वे द्वारावेकत्र संलग्ने प्राक् पूर्वस्यां दिशि निर्मिते ताभ्यां द्युमतस्तन्नाम्नो देशाभिज्ञस्य सखा स पुरञ्जनो विभ्राजितं नाम जनपदं देश-विशेषं याति । पक्षे खद्योतवदल्पप्रकाशत्वात्खद्योता वामनेत्रम् । आविर्मुखी प्रकाशबहुलत्वाद्दक्षिणनेत्रम् । तत्र प्रकाशाधिक्यं च । " दक्षिणोर्द्ध आत्मनो वीर्यवत्तर " इति श्रुतेः । स्वानुभवाच सिद्धं द्युमांश्चक्षुरिन्द्रियं तेन जीवस्ताभ्यां विभ्राजितं रूपं याति पश्यति ॥ ४७ ॥ नलिनीति ॥ नलिनी नालिनी चेति द्वे द्वारौ प्राक् पूर्वदिशि एकत्र निर्मिते ताभ्यामवधूतसंज्ञेन सख्या सह पुरञ्जनः सौरभं विषयं देशं याति । पक्षे नलनालशब्दौ छिद्रवचनौ तद्वत्यौ नलिनी नालिनी च वामदक्षिणनासिके तयोरपि संज्ञाभेदात्कार्यन्यूनाधिक्यं ज्ञेयम् । अवधूतो घ्राणेन्द्रियं तेन जीवः सौरभं विषयं गन्धं याति ॥ ४८ ॥ मुख्येति ॥ पुरस्तात्पूर्वत एका मुख्या नाम द्वास्तया पुरराट् पुरञ्जनो राजा रसज्ञविपणान्वितः सन्नापणबहूदनौ विषयौ याति तत्र यदा रसज्ञेन समन्वितस्तदा तया बहूदनसंज्ञकं देशं याति । यदा तु विपणेन समन्वितो भवति तदा आपणसंज्ञकं देशं तयैव यातीति विभागः । अन्याभ्यां द्वार्भ्यामेकं देशं याति अनया त्वेकयैव द्वौ देशौ यातीत्यस्याः मुख्यत्वं सूचितम् । पक्षे मुख्या आस्यं तस्यैव संभाषणभोजनद्वारा

खद्योताविर्मुखी च प्राग्द्वारावेकत्र निर्मिते ॥ विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ॥४७॥ नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते ॥ अवधूतसखस्ताभ्यां विषयं याति सौरभम् ॥ ४८ ॥ मुख्या नाम पुरस्ताद्द्वास्तयाऽऽपणबहूदनौ ॥ विषयौ याति पुरराड्रसज्ञविपणान्वितः ॥ ४९ ॥ पितृहूर्नृपपुर्या द्वार्दक्षिणेन पुरञ्जनः ॥ राष्ट्रं दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥ ५० ॥

सर्वशरीरनिर्वाहकत्वान्मुख्यत्वं तेनैव जीवो रसनेन्द्रियेण युक्तो बहूदनं चित्रमन्नं विषयं याति आस्वाद्यं भक्षयति । बह्वोदन इति वक्तव्ये बहूदन इत्युक्तिरार्षतया परोक्षवा-दत्वाय । एवमन्यत्राप्यूह्यम् । तथा विपणो वागिन्द्रियं तेन युक्तः आपणं भाषणं विषयं याति करोतीत्यर्थः ॥ ४९ ॥ पितृहूरिति ॥ हे नृप पुर्याः दक्षिणेन दक्षिणस्यां दिशि एनप्प्रत्ययान्तमव्ययम् । या पितृहूर्नाम द्वास्तया पुरञ्जनः श्रुतधरसंज्ञकेन देशाभिज्ञेन सहितो दक्षिणपाञ्चालं राष्ट्रं देशं याति । पक्षे पञ्चालं पञ्चानां विषयाणां प्रमाणान्तरेणानवगतानां बोधनायालमिति पृषोदरादिकत्वात् पञ्चालं शास्त्रं श्रवणकाले च बलाधिक्यात्प्रथमं दक्षिणकर्ण एव प्रवर्त्तते । शास्त्रे च प्रथमं श्रोतव्यं कर्म-काण्डमित्येतावता साम्येन प्रवृत्तसंज्ञस्य कर्मकाण्डस्य दक्षिणेन कर्णेन श्रवणमिष्यते । अतः कर्मकाण्डशास्त्रं दक्षिणपाञ्चालशब्दितं ज्ञेयम् । तदुक्तं " कर्मानुष्ठाय पितृ-भिराहूतः पितृलोकप्रापकं पितृयानं प्रपद्यते " इति । तथा च पितॄणामाह्वानमनेनेति पितृहूर्दक्षिणः कर्णः श्रुतधरः श्रोत्रेन्द्रियम् । तथा च श्रोत्रेन्द्रियेण जीवो दक्षि-णकर्णेन कर्मकाण्डं शृणोति ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवहूरिति ॥ पुर्या उत्तरेण उत्तरस्यां दिशि पूर्ववदेनबन्तमव्ययम् । देवहूर्नाम द्वास्तया पुरञ्जनः श्रुतधरेणैव देशाभिज्ञेनान्वित उत्तरपाञ्चालं राष्ट्रं देशं याति । पक्षे निवृत्तं शास्त्रमुत्तरपाञ्चालसंज्ञकं ज्ञेयम् । देवयानप्रापकत्वाद्देवहूरिति नाम शेषं प्राग्वत्॥५१॥आसुरीति॥आसुरी नाम पश्चात् पश्चिमदिग्भवा द्वास्तया दुर्मदेन देशाभिज्ञेन समन्वितः पुरञ्जनो ग्रामकं नाम विषयं देशं याति । पक्षे असुराणामिन्द्रियारामाणामियमासुरी द्वाः शिश्नं पश्चात् पृष्ठतः उक्ताभिप्रायमेतत् । ग्रामस्थानां गृहस्थानां कं सुखं यस्मात्तद्ग्रामकं व्यवायं दुर्मदो गुह्येन्द्रियं तथा च गुह्येन्द्रियेण युक्तो जीवः शिश्नेन स्त्रीसम्भोगं करोति ॥ ५२ ॥ निर्ऋतिरिति ॥ निर्ऋतिर्नाम पश्चात् पश्चिमदिग्भवा द्वास्तया लुब्धकेन मार्गाभिज्ञेन समन्वितः पुरञ्जनो वैशसं नाम विषयं देशं याति । पक्षे निर्ऋतिर्गुदः मृत्युद्वारत्वात्तस्य राक्षसनाम्ना निर्देशः । वैशसं मलविसर्गं पीडाहेतुत्वान्नारकं चाग्रे तथा व्याख्यानात् लुब्धकः पायुरिन्द्रियं तेनाक्रान्तस्य नरकादिदुःखप्राप्तेस्तस्य लुब्धकत्वम् । तथा च पाय्विन्द्रियेण समन्वितो जीवो गुदेन मलत्यागं करोति मरणसमये कदाचित्तेन मार्गेण निःसृतश्चेत्तदा नरकं यातीत्यर्थः ॥ ५३ ॥ अन्धाविति ॥ अमीषां पौराणां पुरद्वाराणां मध्ये निर्वाक्पेशस्कृतावुभौ द्वारभूतावन्धौ बहिर्निर्गमच्छिद्र-

देवहूर्नाम पुर्या द्वा उत्तरेण पुरञ्जनः ॥ राष्ट्रमुत्तरपञ्चालं याति श्रुतधरान्वितः ॥५१॥ आसुरी नाम पश्चाद्द्वास्तया याति पुरञ्जनः ॥ ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥ ५२ ॥ निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरञ्जनः ॥ वैशसं नाम विषयं लुब्धकेन समन्वितः ॥ ५३ ॥ अन्धावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ ॥ अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ॥ ५४ ॥ स यर्ह्यन्तःपुरगतो विषूचीनसमन्वितः ॥ मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम् ॥ ५५ ॥ एवं कर्मसु संयुक्तः कामात्मा वञ्चितोऽबुधः ॥ महिषी यद्यदीहेत तत्तदेवान्ववर्तत ॥ ५६ ॥

हितौ ताभ्यामक्षण्वतां द्वारपानामधिपतिः पुरञ्जनो याति करोतीति । पक्षे निर्वाक्पादः पेशस्कृत् हस्तः तयोश्छिद्राभावादन्धत्वम् । स्वतो ज्ञानक्रियाशक्त्यभावाच्च अक्षण्वतां च्छिद्रवतामिन्द्रियाणाम् इन्द्रियवतां देहानां वाधिपतिर्जीवः पादेन गच्छति हस्तेन करोति अक्षण्वतामित्यक्षिशब्दान्मतुपि "छन्दस्यपि दृश्यते" इति अनङ् अनो नुट् नलोपः । त्वगिन्द्रियस्यानुक्तिः सर्वेष्वन्तर्भावात् ॥ ५४ ॥ स इति ॥ स पुरञ्जनो विषूचीनेन सर्वाभिज्ञेन सर्वनायकेन स्त्रिया अन्तरङ्गेण नपुंसकेन समन्वितो यर्ह्यन्तःपुरं गतस्तदा तत्र जायात्मजोद्भवं जायादिनिमित्तं मोहं प्रसादं हर्षं वा याति स्म । पक्षे अन्तःपुरं हृदयं विषूचीनं सर्वतोमुखमुभयेन्द्रियनायकं मनः जाया बुद्धिः आत्मजा इन्द्रियपरिणामाः बुद्धिपरिणामाः संशयनिश्चयभ्रमाद्यात्मका वा तदुद्भवं तेभ्य उद्भूतं तत्र तमस उद्रेके मोहं सत्वोद्रेके प्रसादं रजस उद्रेके हर्षं मनःसंयुक्तो जीवो बुद्ध्यादिगुणैः प्राप्नोति । विषूचीनेति विषु सर्वतोऽञ्चतीति विष्वक्शब्दात्" विभाषाञ्चेः" इति खः । "अचः चौ" इत्यल्लोपदीर्घौ॥५५॥ एवमिति ॥ एवं जायाद्यर्थं कर्मसु संसक्तस्तद्भोगसाधनेष्वत्याग्रहेण प्रवृत्तः कामात्मा अबुधः वञ्चितः मोहितः पुरञ्जनो महिषी यद्यदीहेत करोति स्म तत्तदेव स्वयमप्यन्ववर्त्तत अनुरोति स्म । पक्षे आत्माज्ञाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्बुद्ध्याऽप्यध्यासाधीनमेव जीवस्य विषयभोगादिकमिति ॥ ५६ ॥ एतदेव प्रपञ्चयति—क्वचिदिति ॥ क्वचित्तस्यां मदिरां पिबन्त्यां स्वयमपि पुरञ्जनो मदिरां पिबति ततश्च मदेन मदिरापानजनितेन विह्वलः सर्वानुसन्धानशून्यो भवति। अश्नन्त्याम् ओदनादिभुञ्जानायां नुमार्षः। एवमग्रेऽपि क्वचित्। जक्षत्याम् चणकादिचर्वन्त्यां इत्यादि स्फुटम् ॥ ५७ ॥ ५८ ॥ आसतीम् आसीनां शता आर्षः ॥ ५९ ॥ ६० ॥ ६१ ॥ विप्रलब्ध इति ॥ एवं महिष्या विप्रलब्धो जडीकृतः अत एव सर्वा प्रकृतिरसङ्गत्वादिलक्षणा वञ्चिता यस्य सर्वप्रकृतिं त्याजितो वा विचारपूर्वप्रवृत्तिस्वभावभ्रष्टो वा अज्ञः सः क्रीडामृगो गृहवानरो यथा क्लैब्यात् कामपारवश्यादनिच्छन्नपि स्त्रियमनुकरोति स्म ॥ ६२॥ इति श्रीकृष्णासेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य पञ्चविंशे व्यधादिमाम् ॥ २५ ॥ षड्विंशे मृगयाव्याजात्स्वप्नजागरणोक्तितः ॥ प्रपञ्चः संसृतेस्तत्र श्लोकाः सार्द्धाश्च षड्भुजाः ॥चत्वार्युवाचेति सार्द्धा नन्दनेत्रौ अनुष्टुभः॥२६॥जाग्रत्सुषुप्ती उक्त्वा स्वप्नावस्थामाह–स इति त्रयम्॥एकदा महेष्वासः स्वर्णमयं वर्म कवचं यस्य सः

क्वचित् पिबन्त्यां पिबति मदिरां मदविह्वलः॥अश्नन्त्यां क्वचिदश्नाति जक्षत्यां सह जक्षति ॥ ५७ ॥ क्वचिद्गायति गायन्त्यां रुदत्यां रुदति क्वचित् ॥ क्वचिद्धसन्त्यां हसति जल्पन्त्यामनुजल्पति ॥ ५८ ॥ क्वचिद्धावति धावन्त्यां तिष्ठन्त्यामनुतिष्ठति ॥ अनुशेते शयानायामन्वास्ते क्वचिदासतीम् ॥ ५९ ॥ क्वचिच्छृणोति शृण्वत्यां पश्यन्त्यामनुपश्यति ॥ क्वचिज्जिघ्रति जिघ्रन्त्यां स्पृशन्त्यां स्पृशति क्वचित् ॥ ६० ॥ क्वचिच्च शोचतीं जायामनुशोचति दीनवत् ॥ अनुहृष्यति हृष्यन्त्यां मुदितामनुमोदते ॥ ६१ ॥ विप्रलब्धो महिष्यैवं सर्वप्रकृतिवञ्चितः ॥ नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ॥ ६२ ॥ इति श्रीभागवते चतुर्थस्कन्धे पुरञ्जनपुरञ्जनीरमणचरित्रवर्णनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ नारद उवाच ॥ ॥ स एकदा महेष्वासो रथं पञ्चाश्वमाशुगम् ॥ द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम् ॥ १ ॥ एकरश्म्येकदमनमेकनीडं द्विकूबरम् ॥ पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम् ॥ २ ॥ हैमोपस्करमारुह्य स्वर्णवर्माऽक्षयेषुधिः ॥ एकादशचमूनाथः पञ्चप्रस्थमगाद् वनम् ॥ ३ ॥

अक्षयः सदा बाणपूर्णः इषुधिर्निषङ्गो यस्य सः एकादशसंख्याश्चमूनाथा यस्य सः स पुरञ्जनः पञ्चाश्वा यस्य तम् आशुगं शीघ्रगामिनं द्वे ईषे दण्डिके यस्य तं द्विचक्रम् एकाक्षं त्रयो वेणवो ध्वजा यस्य तं पञ्च बन्धुराणि बन्धनानि यस्य तम् एको रश्मिः प्रग्रहो यस्य एको दमनः सूतो यस्य तं च तं च एकं नीडं रथिन उपवेशस्थानं यस्मिंस्तं द्वौ कूबरौ युगबन्धनस्थाने यस्य तं पञ्चानां वस्तूनां प्रहरणं प्रक्षेपो यस्मिंस्तम् । यद्वा । पञ्च प्रहरणानि आयुधानि यस्मिंस्तं सप्त वरूथा रक्षार्थमावरणानि यस्य तं पञ्च विक्रमाः गतिप्रकारा यस्य तं हैमा उपस्करा आभरणानि यस्य तं रथम् आरुह्य पञ्चप्रस्थसंज्ञकं वनमगात् । पक्षे महान् कर्तृत्वाद्यभिनिवेशो धनुर्यस्य स स्वर्णशब्दोपलक्षितरजोगुणो वर्म आवरकं यस्य अनन्ता भोगवासनाबाणास्तद्वानहङ्कारः इषुधिः एकादशः सङ्कल्पविकल्पात्मको मन एव ज्ञानकर्मभेदेन दशेन्द्रियलक्षणा या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चमूरतस्या नाथः वासनामयस्य मनसः प्रग्रहत्वं सङ्कल्पविकल्पात्मकत्वस्य बृहद्बलत्वेन वक्ष्यमाणस्य चमूनाथत्वमिति विभागः। सः पञ्चेन्द्रियाणि पञ्चाश्वाः संवत्सरवेगो गतिः द्वे अहंताममते ईषे द्वे पुण्यपापे चक्रे एकं प्रधानमक्षः त्रयः सत्वादयो गुणा ध्वजाः पञ्च प्राणा बन्धनानि एकं सवासनं मनो रश्मिः एका बुद्धिः सूतः एकं हृदयं नीडं द्वौ शोकमोहौ कूबरौ पञ्च शब्दादीनि प्रहरणं यत्र । यद्वा । पञ्चेन्द्रियव्यापाराः श्रवणादय आयुधानि सप्त धातवस्त्वगादयो वरूथाः पञ्चकर्मेन्द्रियव्यापाराः गमनादयो विक्रमाः हैमो रजोगुणः उपस्करः स्वमदेहो रथः तमारुह्य पञ्च पृथिव्यादयः प्रस्थाः सानवो यत्र तद्वनं स्वमदर्शनस्थानं नाडीविशेषमगात् ॥ १ ॥ २ ॥ ३ ॥ चचारेति ॥ दृप्तः मृगे मृगयायां मृगमांसादने वा व्यसनं तत्र लालसा अतिस्पृहा यस्य सः आत्ता गृहीता इषवः कार्मुकं च येन स पुरञ्जनः अतदर्हां तस्य त्यागस्यायोग्यां जायां विहायैव तत्र वने मृगयां चचार । पक्षे इषवो रागादयो दोषाः अहं कर्त्ता भोक्ता चेत्यभिनिवेशः कार्मुकं मृगाः शब्दादयो विषयाः तत्र व्यसनं तद्भोक्तुं स्वभावस्तेन लालसाऽतिस्पृहा यस्य सः जाया विवेकवती जाग्रद्बुद्धिः सा च त्यागानर्हैव मृगयाचरणं च विषयान्वेषणं परदाराभिलाषादिपापं च ॥ ४ ॥ आसुरीमिति ॥ यतो निर-नुग्रहः कृपारहितः अतः आसुरीं क्रूरां वृत्तिमाश्रित्य घोरात्मा भयङ्करस्वरूपः सन् वनेषु वनगोचरान् मृगान् निशितैस्तीक्ष्णैर्बाणैर्न्यहनत् । शब्लुगभाव आर्षः । पक्षे

चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः ॥ विहाय जायामतदर्हां मृगव्यसनलालसः ॥ ४ ॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ॥ न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥ ५ ॥
तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान् पशून् वने ॥ यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥ ६ ॥

जाग्रति निरनुग्रहः अन्तःसंस्कारवशात्स्वमेऽपि घोरात्मा सन् स्वमस्थानेषु वनगोचरान् तत्र कल्पितान् शब्दादिविषयान् बाणै रागादिकल्पिततत्तदिन्द्रियवृत्तिभिर्न्यहनत् भुक्तवान् ॥ ५ ॥ ननु मृगयायां हिंसासत्त्वेऽपि यज्ञाद्यर्थत्वान्न दोषः । परोक्षकथापक्षेऽपि जीवस्य विषयभोगो विहित इति चेन्न । तावत् हिंसाविषयभोगो वा शास्त्रेण विधी-यते रागप्राप्तत्वात् किंतु यथेष्टप्रवृत्तरागिवारणार्थं नियम्यते इत्याह—तीर्थेष्विति ॥ यद्यलमत्यर्थं लुब्धो मांसासक्तः सन् पशून् हन्यात्तदा तीर्थेषु श्राद्धादिष्वेव हन्यात् तत्रापि प्रतिदिष्टेषु शास्त्रेणोपदिष्टेषु येषु हननं शास्त्रेण विहितं तेष्वेव न नित्यश्राद्धादिष्वित्यर्थः । तत्रापि राजैव नान्यः तत्रापि मेध्यान् विहितानेव नान्यान् तत्रापि वन एव नान्यत्र तत्रापि यावदर्थं यावदुपयोगमेव नाधिकमिति नियम्यते । पक्षे विषयभोगोऽपि नियम्यते । यद्यलं लुब्धो विषयासक्तः पशून् हन्यात् विषयान् भुञ्जीत तर्हि तीर्थेषु उचितकालदेशादिष्वेव तत्रापि शास्त्रेण प्रतिदिष्टेष्वेव ऋतुकालादिष्वेव तत्रापि राजा गृहस्थ एव न ब्रह्मचार्यादिः तत्रापि मेध्यान् विहितस्वदारानेव न तु निषिद्धान् तत्रापि वने विहितदेशकालादौ विजनरात्र्यादावेव न तु देवालयदिनादौ तत्रापि यावदर्थम् उत्कण्ठाभिलाषप्रशमनपर्यन्तमेवेति यथेष्टभोगप्रवृत्तिः शास्त्रेण सङ्कोच्यते ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

य इति ॥ हे राजेन्द्र यो मानवः एवं पूर्वश्लोकोक्तं विद्वान् जानन् नियतः शास्त्रेण नियमितमेव परलोकार्थं लोकनिर्वाहार्थं च कर्म कुर्वीत स तेन नियमेनानुष्ठितेन कर्मणा जातेन ज्ञानेन हेतुना संसारबन्धनैर्धर्माधर्मलक्षणैर्न लिप्यते न निबध्यते। अध्यात्मपक्षेऽप्येवम्। एवमग्रेऽपि॥ ७॥अन्यथेति॥अन्यथा शास्त्रनियमोल्लङ्घनेन यो माना रूढोमानोऽभिमानस्तेन कर्म कुर्वाणो भवति स तु तैः कर्मभिर्निबध्यते। ततश्च गुणप्रवाहे संसारे पतितः पुनरपि पूर्वसंस्कारेणाग्रे निषिद्धानुष्ठानान्नष्टप्रज्ञस्ततोऽप्यधो नरकं व्रजति ॥ ८ ॥ प्रकृतमनुसरति—तत्रेति ॥तत्र वने पुरञ्जनस्य चित्राः वाजाः पक्षा येषां तैः शिलीमुखैर्बाणैर्भिन्नानि गात्राणि येषां तेषां दुःखितानां मृगाणां विप्लवो नाशोऽभूत्। स च करुणात्मनां कृपालूनां दुःसहः इति। पक्षे विविधदोषयुक्तैरिन्द्रियैः हिंसादि पापमभूत् ॥ ९ ॥ शशानिति ॥ तत्र शशान् वराहादीन् अन्यांश्च विविधान् मेध्यान् यज्ञाद्यर्हान् पशून् विनिघ्नन् श्रममध्यगात्। पक्षे स्वप्ने नानाविषयान् सम्पादयन् श्रान्तो जातः। यद्वा।धार्मिको जीवः पापं कृत्वा नु तताप ॥ १० ॥ तत इति ॥ ततः क्षुत्तृड्भ्यां परिश्रान्तः निवृत्तः सन् गृहमेयिवान् आगतः ततश्च कृतं स्नानमुचित आहारश्च येन सः संविवेश आसने उपविवेश ततश्च गतक्लमो जातः । पक्षे एवं स्वप्नपदार्थाननुभवंस्तत्र

य एवं कर्म नियतं विद्वान् कुर्वीत मानवः ॥ कर्मणा तेन राजेन्द्र ज्ञानेन न स लिप्यते ॥७॥ अन्यथा कर्म कुर्वाणो मानारूढो निबध्यते ॥ गुण-
प्रवाहे पतितो नष्टप्रज्ञो व्रजत्यधः ॥ ८ ॥ तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः ॥ विप्लवोऽभूद् दुःखितानां दुःसहः करुणात्मनाम् ॥ ९ ॥
शशान् वराहान् महिषान् गवयान् रुरुशल्यकान् ॥ मेध्यानन्यांश्च विविधान् विनिघ्नन् श्रममध्यगात् ॥ १० ॥ ततः क्षुत्तृट्परिश्रान्तो निवृत्तो
गृहमेयिवान् ॥ कृतस्नानोचिताहारः संविवेश गतक्लमः ॥ ११ ॥ आत्मानमर्हयांचक्रे धूपलेपस्रगादिभिः ॥ साध्वलंकृतसर्वाङ्गो महिष्या-
मादधे मनः ॥ १२ ॥ तृप्तो हृष्टः सुदृप्तश्च कन्दर्पाकृष्टमानसः ॥ न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीम् ॥ १३ ॥

क्षुत्तृट्परिश्रान्तस्ततः स्वप्नस्थानतो गृहं जाग्रदवस्थास्थानं हृदयं पुनरागतः स्वप्नदर्शनहेतुनिद्रादोषदूरीकरणमेव स्नानं स्वप्नदर्शनक्षुत्तृट्निवर्तको जाग्रदवस्थादर्शनजन्यसन्तोष एवाहारः तत्परिश्रमनिवृत्तिरेव गतक्लमत्वम्। हृदये स्थितिः संवेशनम्। यद्वा।क्षुत्तृट्परिश्रान्तः कृतपापानुतापः पापेभ्यो निवृत्तः गृहमेयिवान् अधर्मं त्यक्त्वा धर्मे स्थातुमियेष। उचिताहारः उचिताचारः सन् स्थिरोऽभूत् ॥ ११ ॥ आत्मानमिति ॥ धूपः आलेपश्चन्दनं तदादिभिश्च आत्मानमर्हयांचक्रे अलंकृतवान् । यदा साधु सम्यगलंकृतसर्वाङ्गो जातस्तदा महिष्यां मन आदधे । पक्षे स्वप्नसंस्कारनिवृत्त्या जाग्रद्वस्त्वनुसन्धानमेवालंकरणम्। यद्वा। प्रायश्चित्तसत्सङ्गाद्यैश्चित्तशोधनमेवालंकरणम्। विवेकवती बुद्धिर्महिषी तामन्वेषितवान्॥ १२॥तृप्त इति॥भोजनेन तृप्तः अत एव हृष्टो दृप्तो गर्वितः कन्दर्पेण कामेनाकृष्टं मानसं यस्य सः अन्वेषमाणोऽपि गृहमेधिनीं गृहनिर्वाहिकां वरारोहां गृहिणीं भार्यां न व्यचष्ट नापश्यत्। पक्षे जागरणं प्राप्तोऽपि स्वप्नसंस्कारभ्रमचित्तो राजस्यां बुद्ध्यां वर्तमानो व्यवहारनिर्वाहिकां सात्विकीं बुद्धिं स्वस्मिन्नापश्यत्॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri

अन्तःपुरेत्यर्द्धम् ॥ हे वेदिषत् हे प्राचीनबर्हिः यदा भार्यां नापश्यत्तदा विमना इवान्तःपुरस्त्रियोऽपृच्छत् इव एवार्थे । पक्षे अन्तःपुरस्त्रियः इन्द्रियवृत्तयः प्रश्नस्तदालोचनम् ॥ १४ ॥ अपीति ॥ हे रामाः वो युष्माकं सेश्वरीणां स्वामिनीसहितानां । कबभाव आर्षः । अपि किं कुशलमस्ति यतः यथा पुरा मृगयार्थं गमनात्पूर्वं गृहसम्पदोऽरोचन्त तथैतर्हि गृहेषु गृहसम्पदो न रोचन्ते न शोभन्ते । पक्षे स्वप्नादुत्थितस्यालस्यनिवृत्त्या बुद्धिस्वास्थ्यपर्यन्तं देहादिसम्पन्न रोचते ॥ १५ ॥ यदीति ॥ यदि माता पतिदेवता पतिव्रता पत्नी वा गृहे न स्यात्तदा को नाम प्राज्ञः व्यङ्गे चक्राद्यङ्गरहिते रथे इव तत्र गृहे दीनवदासीत । पक्षे यदि मातृवत्सात्विकी बुद्धिः पत्नीवद्राजसी बुद्धिर्वा न स्यात्तदा तामस्या बुद्ध्या पशुत्वाद्यापत्या किं शरीरेण ॥१६॥ क्वेति ॥ अतो मम प्रज्ञां दीपयन्ती उद्धारोपायं प्रतिबोधयन्ती या व्यसनार्णवे दुःखसागरे मज्जन्तं मां पदे पदे क्षणे क्षणे उद्धरते सा ललना क्व वर्त्तते । पक्षे स्पष्टम् ॥ १७ ॥ नरनाथेति ॥ हे नरनाथ राजन् त्वत्प्रिया यद्व्यवस्यति निश्चिनोति तद्वयं न जानीमः । हे शत्रुहन् निरव-

अन्तःपुरस्त्रियोऽपृच्छद्विमना इव वेदिषत् ॥१४॥ अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा ॥ न तथैतर्हि रोचन्ते गृहेषु गृहसम्पदः ॥१५॥ यदि न स्याद्गृहे माता पत्नी वा पतिदेवता ॥ व्यङ्गे रथ इव प्राज्ञः को नामासीत दीनवत् ॥ १६ ॥ क्व वर्तते सा ललना मज्जन्तं व्यसनार्णवे ॥ या मामुद्धरते प्रज्ञां दीपयन्ती पदे पदे ॥१७॥ रामा ऊचुः ॥ नरनाथ न जानीमस्त्वत्प्रिया यद् व्यवस्यति ॥ भूतले निरवस्तारे शयानां पश्य शत्रुहन् ॥ १८ ॥ नारद उवाच ॥ पुरञ्जनः स्वमहिषीं निरीक्ष्यावधुतां भुवि ॥ तत्सङ्गोन्मथितज्ञानो वैक्लव्यं परमं ययौ ॥ १९ ॥ सान्त्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता ॥ प्रेयस्याः स्नेहसंरम्भलिङ्गमात्मनि नाभ्यगात् ॥ २० ॥ अनुनिन्येऽथ शनकैर्वीरोऽनुनयकोविदः ॥ पस्पर्श पादयुगलमाह चोत्सङ्गलालितम् ॥ २१ ॥ पुरञ्जन उवाच ॥ नूनं त्वकृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे ॥ कृतागःस्वात्मसात् कृत्वा शिक्षादण्डं न युञ्जते ॥ २२ ॥

स्तारे आस्तरणरहिते भूतले शयानां तां पश्य ॥ १८ ॥ पुरञ्जन इति ॥ तदा स्वमहिषीं भुवि अवधुतां पतितां त्यक्तदेहादरां निरीक्ष्य तत्सङ्गेनोन्मथितं शिथिलीकृतं ज्ञानं यस्य स पुरञ्जनः परमवैक्लव्यं व्याकुलत्वं ययौ । पक्षे राजसबुद्धेरप्यौदासीन्ये व्यवहारेणापि रहितो जातः ॥ १९ ॥ सान्त्वयन्निति ॥ हृदयेन विदूयता कम्पमानेन । आर्षः शता । उपलक्षितः श्लक्ष्णया मधुरया वाचा तां सान्त्वयन् प्रेयस्यास्तस्याः स्नेहसंरम्भस्य प्रणयकोपस्य लिङ्गं कारणं कुटिलदृष्ट्यादिकमात्मनि स्वस्मिन्नाभ्यगात् न ज्ञातवान् । पक्षे राजसबुद्धेः शैथिल्यस्य हेतुं न ज्ञातवान् ॥२०॥ अनुनिन्य इति ॥ अथ अनुनये कोविदः पण्डितः वीरः पुरञ्जनस्तां शनकैः अनुनिन्ये । तत्र प्रथमं तस्याः पादयुगलं पस्पर्श शिरसा नमश्चकार । ततश्चोत्सङ्गमारोप्य लालितां तामाह स्म । पक्षे बुद्धिं स्वस्थां कृतवान् शेषं कथालङ्कारः ॥ २१ ॥ नूनमिति ॥ हे शुभे कृतागस्सु कृतापराधे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपि येषु भृत्येषु ईश्वराः स्वामिनः आत्मसात्कृत्वा अस्मदीयोऽयमिति मत्वा शिक्षार्थं दण्डं न युञ्जते न कुर्वन्ति । ते भृत्याः सेवका नूनं निश्चितमकृतपुण्याः सुकृतरहिता इति ॥ २२ ॥ परम इति ॥ हे तन्वि भृत्येषु कृतागस्सु यः प्रभुणा स्वामिनार्पितः कृतो दण्डः स तु पुनरपराधान्तरप्रतिबन्धकत्वात् परमोऽनुग्रह एव । तत्र यस्तु दण्डितः सन् अमर्षणः असहमानो भवति स तु बालः अज्ञ एव । यतो बन्धुकृत्यं स्वामिहिताचरणं न वेद न जानाति ॥२३॥ सेति ॥ हे सुदति हे मनस्विनि सा त्वमस्माकं स्वामिनी स्वानां स्वकीयानां नोऽस्माकं सुहृत् अनुरागभारेण व्रीडया च यो विलम्बो मन्थरता तेन विलसन् हसितावलोको यस्मिंस्तत् नीला अलका एवालयो भ्रमरास्तैरुपस्कृतं भूषितम् उन्नसमुच्चनासिकं वल्गु वाक्यं यस्मिंस्तत् स्वमुखं प्रदर्शय ॥ २४ ॥ तस्मिन्निति ॥ हे वीरपत्नि वीरस्य मम भार्ये यस्ते कृतकिल्बिषः कृतापराधो भवेत् तस्मिन् अहं ब्राह्मणकुलादन्यत्रान्यस्मिन्प्राणिनि तथा मुररिपोर्दासाद्वैष्णवादितरत्र च दमं दण्डं दधे करोमि । किन्तु तं वीतभयं निर्भयम् उद् उच्चैर्मुदितं त्रिलोक्याम् अन्यत्र वै

परमोऽनुग्रहो दण्डो भृत्येषु प्रभुणार्पितः ॥ बालो न वेद तत् तन्वि बन्धुकृत्यममर्षणः ॥ २३ ॥ सा त्वं मुखं सुदति सुहृदनुरागभारव्रीडाविलम्बविलसद्धसितावलोकम् ॥ नीलालकालिभिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यम् ॥ २४ ॥ तस्मिन् दधे दममहं तव वीरपत्नि योऽन्यत्र भूसुरकुलात् कृतकिल्बिषस्तम् ॥ पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात् ॥ २५ ॥ वक्त्रं न ते वितिलकं मलिनं विहर्षं संरम्भभीममविमृष्टमपेतरागम् ॥ पश्ये स्तनावपि शुचोपहतौ सुजातौ बिम्बाधरं विगतकुङ्कुमपङ्करागम् ॥ २६ ॥ तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य ॥ का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्नमुशती न भजेत कृत्ये ॥ २७ ॥ इति श्रीभागवते चतुर्थस्कन्धे पुरञ्जनोपा० नाम षड्विंशः ॥ २६ ॥

लोकत्रयाद्बहिरपि नपश्ये न पश्यामि । तङार्षः यस्तेऽपराधी स यत्र कुत्रापि गतो मद्भयादेव मरिष्यतीति ॥२५॥ वक्त्रमिति ॥ इतः पूर्वं कदापि ते तव वक्त्रं वितिलकं मलिनं विहर्षं हर्षरहितं संरम्भेण कोपावेशेन भीमं भयङ्करमविमृष्टमनुज्ज्वलमपेतरागं स्नेहशून्यं न पश्ये नापश्यम् । तथा सुजातौ शोभनौ ते स्तनावपि शुचा शोकाश्रुणा उपहतावभिषिक्तावितः पूर्वन्नापश्यम् । तथा बिम्बफलसदृशमतिरक्तं तवाधरमपीतः पूर्वं विगतः कुङ्कुमपङ्कतुल्यस्ताम्बूलरागो रक्तता यस्मात्तादृशं नापश्यमिति इदानीमेव सर्वं विपरीतं जातम् । बिम्बाधरमित्यत्र विन्दामि शमिति पाठे ईदृङ् मुखं स्तनौ च पश्यन् शं न विन्दामि विगतकुङ्कुमपङ्करागाविति स्तनयोर्विशेषणम् ॥ २६ ॥ तदिति ॥ तत् तस्मात् स्वैरं स्वेच्छया त्वामपृष्ट्वा मृगयां गतस्य व्यसनातुरस्य मृगयानुरक्तस्य अतः कृतकिल्बिषस्य कृतापराधस्यापि सुहृदः कपटरहितस्य मे त्वं प्रसीद अपराधक्षमां कृत्वा प्रसादं कुरु । देवो देवनं क्रीडारतिस्तां राति ददातीति देवरः कान्तस्तं कुसुमास्त्रस्य वेगेन विस्रस्तमपगतं पौंस्नं पौरुषं धैर्यं यस्य तम् अत एव स्ववशगतमुशती का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयमाना त्वादृशी चतुरशिरोमणिः कृत्ये भजनं कर्तुं योग्ये देशे काले च न भजेत् नाङ्गीकुर्यात् अङ्गीकृत्य भोगं न प्रदद्यात् । एवंभूता का न कापीत्यर्थः ॥ २७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य षड्विंशे निरमादिमाम् ॥ २६ ॥ सप्तविंशे कालकन्याद्युपाख्यानमिषादिह ॥ जरारोगादि कथितं श्लोकास्तत्र खवह्नयः ॥ उवाचेत्येकमेवास्मिन्नेकत्रिंशदनुष्टुभः ॥ १ ॥ एवं जीवस्यात्यन्तमुपाधिवश्यत्वमुक्त्वा तन्निमित्तां संसृतिं निरूपयितुमाह—इत्थमिति॥अत्र जीवस्य स्त्रीपुरुषवासनादार्ढ्येन विचित्रा संसृतिर्भवतीति दर्शितम् । क्वचित्पुमान् क्वचिच्च स्त्रीत्याद्युक्तेः पुंस्त्वेन संसृतिरध्यायत्रयेण स्त्रीत्वेन चैकेनाध्यायेन ततः ईश्वरप्रसादलब्धज्ञानेन मोक्ष इत्युक्तम् । प्रतिपदमध्यात्मयोजना तु सारल्येन दुर्घटा निष्प्रयोजना चेति यथोपयोगमेव व्याख्यायते । हे महाराज पुरञ्जनी इत्थं स्वविभ्रमैर्विलासैः पुरञ्जनं सम्यक् सम्यक् स्ववशमानीय तं पतिं रमयती स्वयं रेमे । नुमभाव आर्षः । पक्षे भोगे जीवस्य बुद्धिपारतन्त्र्यं दर्शितम् ॥ १ ॥ स इति ॥ हे राजन् स राजा पुरञ्जनोऽपि सुस्नातां रुचिराननां कृतं स्वस्त्ययनं मङ्गलं कुङ्कुमसिन्दूरादिभिरलङ्कारो यया ताम् अन्नादिभोजनेन तृप्ताम् उपागतां स्वसमीप आगतां स्वमहिषीं दृष्ट्वा अभ्यनन्दत् भोगार्थमङ्गीकृतवान्

नारद उवाच ॥ ॥ इत्थं पुरञ्जनं सम्यग् वशमानीय विभ्रमैः ॥ पुरञ्जनी महाराज रेमे रमयती पतिम् ॥ १ ॥ स राजा महिषीं राजन् सुस्नातां रुचिराननाम् ॥ कृतस्वस्त्ययनां तृप्तामभ्यनन्ददुपागताम् ॥ २ ॥ तयोपगूढः परिरब्धकन्धरो रहोऽनु मन्त्रैरपकृष्टचेतनः ॥ न कालरंहो बुबुधे दुरत्ययं दिवा निशेति प्रमदापरिग्रहः ॥ ३ ॥ शयान उन्नद्धमदो महामना महाऽर्हतल्पे महिषीभुजोपधिः ॥ तामेव वीरो मनुते परं यतस्तमोऽभिभूतो न निजं परं च यत् ॥ ४ ॥ तयैवं रममाणस्य कामकश्मलचेतसः ॥ क्षणार्धमिव राजेन्द्र व्यतिक्रान्तं नवं वयः ॥ ५ ॥

॥ २ ॥ तयेति ॥ तया स्त्रिया उपगूढः परिरब्धः परिरब्धा गृहीता तस्याः कन्धरा येन सः रहः एकान्ते तस्या अनुमन्त्रैरनुकूलैर्गुह्यभाषणैरपकृष्टा चेतना विवेको यस्य सः अतः सा प्रमदैव परिग्रहो न ज्ञानभक्त्यादिसाधनं यस्य सः दुरत्ययमत्येतुमशक्यं दिवा निशेत्येवंलक्षणं कालस्य रंहो वेगं न बुबुधे । पक्षे विषयासक्तस्यायुर्व्ययबोधो न भवतीति ॥ ३ ॥ शयान इति ॥ अतः मरणादिभयाभावात् उन्नद्धोऽतिवृद्धो मदो यस्य सः अत एव महामनाः नानाप्रकारसङ्कल्पविकल्पवान् महार्हे तल्पे शयानः महिष्या भुज एव उपधिः उपधानमुच्छीर्षकं यस्य सः अविसर्गपाठे शयनक्रियाविशेषणम् । तमसा अज्ञानेन अभिभूतः अन्धीकृतः वीरः प्रौढः पुरञ्जनः तां स्त्रियमेव परं पुरुषार्थं मनुतेऽमन्यत । न तु निजं स्वरूपं न च परं परमेश्वरं पुरुषार्थममन्यत ॥ ४ ॥ तयेति ॥ हे राजेन्द्र कामकश्मलचेतसः काममोहितचित्तस्य तया स्त्रिया सहैवं रममाणस्य तस्य नवं वयः युवावस्थोपलक्षितः कालः क्षणार्द्धमिव व्यतिक्रान्तमज्ञातमेव गतम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यामिति ॥ तस्यां पुरञ्जन्यां भार्यायां पुरञ्जनः एकादशशतानि पुत्रान् अजनयत् । अथ तावता च आयुषोऽर्द्धं संवत्सरपञ्चाशदब्दात्मकं कालं स विराट् राजा अत्यगात् अतिक्रान्तवान् । पक्षे पुत्रान् इन्द्रियपरिणामान् पुत्रसङ्ख्याबाहुल्यमात्रविवक्षया ॥ ६ ॥ दुहितॄरिति ॥ हे प्रजापते स पुरञ्जनः तस्यां पितृमातृयशस्करीः शीलौदार्यगुणोपेताः दशोत्तरशतं दुहितॄः अजनयत् ताश्च पुरञ्जनकन्यात्वात्पौरञ्जन्यो ज्ञेयाः । पक्षे दुहितॄर्बुद्धिवृत्तीः कन्यानां पुत्रापेक्षया न्यूनत्वं गार्हस्थ्यकथासौन्दर्याय ॥ ७ ॥ स इति ॥ स पाञ्चालपतिः पुरञ्जनः स्ववंशविवर्द्धनान् पुत्रान्दारैः संयोजयामास तान् विवाहितवान् । तथा दुहितॄः कन्याश्च सदृशैः शीलादिगुणयुक्तैर्वरैः संयोजयामास । पक्षे दारैः परिणामानन्तरं हिताहितचिन्ताभिः वरैः उचितविषयभोगैः ॥ ८ ॥ पुत्राणामिति ॥ पुत्राणां च एकैकस्य प्रत्येकं शतं शतं पुत्रा अभवन् यैर्वै यैरेव पुत्रपौत्रादिभिः पौरञ्जनो वंशः पञ्चालेषु पञ्चालसंज्ञकदेशेषु समेधितः वर्धितो जातः । पक्षे पुत्राणां च पुत्राः कर्माणि पञ्चालेषु विषयेषु ॥ ९ ॥ तेष्विति ॥ तेषु

तस्यामजनयत् पुत्रान् पुरञ्जन्यां पुरञ्जनः ॥ शतान्येकादश विराडायुषोऽर्धमथात्यगात् ॥ ६ ॥ दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः ॥ शीलौदार्यगुणोपेताः पौरञ्जन्यः प्रजापते ॥ ७ ॥ स पञ्चालपतिः पुत्रान् पितृवंशविवर्धनान् ॥ दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ॥ ८ ॥ पुत्राणां चाभवन्पुत्रा एकैकस्य शतं शतम् ॥ यैर्वै पौरञ्जनो वंशः पञ्चालेषु समेधितः ॥ ९ ॥ तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु ॥ निरूढेन ममत्वेन विषयेष्वन्वबध्यत ॥ १० ॥ ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः ॥ देवान् पितॄन् भूतपतीन् नानाकामो यथा भवान् ॥ ११ ॥ युक्तेष्वेवं प्रमत्तस्य कुटुम्बासक्तचेतसः ॥ आससाद स वै कालो योऽप्रियः प्रिययोषिताम् ॥ १२ ॥ चण्डवेग इति ख्यातो गन्धर्वाधिपतिर्नृप ॥ गन्धर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम् ॥ १३ ॥

पुत्रेषु तथा तद्रिक्थहारेषु तेषां पुत्रेषु च तथा गृहेषु कोशेषु अनुजीविषु भृत्यादिषु च निरूढेनातिदृढेन ममत्वेन हेतुना तेषां स्वस्य च भोगसम्पादनार्थं विषयेषु शब्दादिषु अन्वबध्यत नितरामत्यासक्तो जातः । पक्षे पुत्राः पौत्राश्चोक्ताः गृहाः आधारादिचक्राणि कोशाः उदरकुक्ष्यादयः अनुजीविनः इन्द्रियप्राणादयः ॥ १० ॥ ईजे चेति ॥ नानाकामः बहुकामनावान् दीक्षितः कृतसङ्कल्पः सन् भवान् त्वं प्राचीनबर्हिः यथा घोरैः शास्त्राननुमतैः पशुमारकैः पशुहिंसाप्रधानैः क्रतुभिर्देवान् पितॄन् भूतपतीन् भैरवादीन् च ईजे पूजयामास ॥ ११ ॥ युक्तेष्विति ॥ एवं कुटुम्बेषु आसक्तं चेतो यस्य अत एव युक्तेषु कर्तुं योग्येषु भगवदाराधनेषु प्रमत्तस्य अनवहितस्य पुरञ्जनस्य प्रिया योषितो येषां ते प्रिययोषितस्तेषां यः अप्रियः अनभिप्रेतः स वै स एव कालः आससाद ॥ १२ ॥ चण्डेति ॥ हे नृप गन्धर्वाणामधिपतिः राजा चण्डवेग इति नाम्ना विख्यातः कश्चिदस्ति । तस्य बलिनः महाबलवन्तः षष्ट्युत्तरशतत्रयसङ्ख्याकाः गन्धर्वाः सन्ति । पक्षे चण्डवेगः संवत्सरलक्षणः कालः गन्धर्वाः सावनवर्षदिवसाः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्धर्व्य इति ॥ अस्य चण्डवेगस्य गन्धर्व्यस्तादृशीः तादृश्यः । " वा च्छन्दसि " इति पूर्वसवर्णदीर्घः । बलवत्यः षष्ट्यधिकशतत्रयसंख्यान्विताश्च सितासिताः श्वेतकृष्ण-वर्णवत्यस्ताश्च मैथुन्यो गन्धर्वैः सह मिलिताः सत्यः सर्वैः कामैर्भोगविषयैः सह विनिर्मितां पुरञ्जनपुरीं परिवृत्त्या परिभ्रमणेन पर्यायेण वा विलुम्पन्ति । पक्षे गन्धर्व्यः रात्रयः सिताः शुक्ले असिताः कृष्णे आयुर्नाशं कुर्वन्ति ॥ १४ ॥ ते इति ॥ ते पूर्वोक्ताश्चण्डवेगस्यानुचरा योद्धारो गन्धर्वा गन्धर्व्यश्च यदाप्रभृतितः पुरञ्जनपुरं हर्त्तुमारेभिरे तत्र तदाप्रभृतित एव तान् प्रजागरः पुरपालकत्वेन स्थितः पञ्चशिरा नागः प्रत्यषेधत् पुरविनाशनान्निवारितवान् । पक्षे प्रजागरः प्राणस्तत्स्थित्या मरणं निरुध्यते ॥ १५ ॥ स इति ॥ बली बलवान्स पुरञ्जनपुरस्याध्यक्षः पालकः एक एव सप्तभिः शतैर्विंशत्या च गन्धर्वैः सह शतं समाः संवत्सरशतपर्यन्तं युयुधे । पक्षे प्राणस्थितिरेव युद्धम् ॥ १६ ॥ क्षीयमाण इति ॥ बहुभिर्विंशत्यधिकैस्सप्तभिः सह युधा युद्धेन बहुकालपर्यन्तेन एकस्मिंस्तस्मिंस्तस्मिन् स्वसम्बन्धे स्वसम्बन्धिनि पुररक्षके क्षीयमाणे सति राष्ट्रस्य पुरस्य च बान्धवः स्वामी स पुरञ्जनः आर्तः सन् परां महतीं चिन्तां जगाम । पक्षे देहाव्यसामर्थ्येन प्राणासामर्थ्यमनुमाय चिन्ताकुलोऽभूत् ॥ १७ ॥ स एवेति ॥

गन्धर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुम्पन्ति सर्वकामविनिर्मिताम् ॥ १४ ॥ ते चण्डवेगानुचराः पुरंजनपुरं यदा ॥
हर्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः ॥ १५ ॥ स सप्तभिः शतैरेको विंशत्या च शतं समाः ॥ पुरञ्जनपुराध्यक्षो गन्धर्वैर्युयुधे बली ॥ १६ ॥
क्षीयमाणे स्वसंबन्ध एकस्मिन् बहुभिर्युधा ॥ चिन्तां परां जगामार्तः सराष्ट्रपुरबान्धवः ॥ १७ ॥ स एव पुर्यां मधुभुक् पञ्चालेषु स्वपार्षदैः ॥
उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद् भयम् ॥ १८ ॥ कालस्य दुहिता काचित्त्रिलोकीं वरमिच्छती ॥ पर्यटन्ती न बर्हिष्मन् प्रत्यनन्दत
कश्चन ॥ १९ ॥ दौर्भाग्येनात्मना लोके विश्रुता दुर्भगेति सा ॥ या तुष्टा राजर्षये तु वृताऽदात् पूरवे वरम् ॥ २० ॥

यतः स पुरञ्जन एव तस्यां पुर्यां तथा पञ्चालेषु बहिर्देशेषु च मधुभुक् मधुतुल्यविषयसुखभोक्ता अतः स्वपार्षदैः उपनीतं प्रापितं बलिं गृह्णन् भुञ्जानः तथा स्त्रिया जितश्चातो भयं नाविदत् न आप्तवान् । विद्लृ लुङ् अङ् । पक्षे पार्षदैरिन्द्रियैर्विषयासक्त आयुःक्षयं न ज्ञातवान् ॥ १८ ॥ कालस्येति ॥ हे बर्हिष्मन् प्राचीनबर्हिः काचित्कालस्य दुहिता कन्याऽस्ति तां वरमिच्छतीमत एव तदन्वेषणार्थं त्रिलोकीं पर्यटन्तीमपि कश्चन कोऽपि न प्रत्यनन्दत असाध्वीं मत्वा नाङ्गीकृतवान् । तङार्षः । पक्षे कालकन्या जरा तां कोऽपि नाङ्गीकरोतीति स्पष्टमेव ॥ १९ ॥ दौर्भाग्येनेति ॥ आत्मनः स्वस्य दौर्भाग्येन पापिष्ठत्वेन सा लोके सर्वत्र दुर्भगेति नाम्ना विश्रुता प्रसिद्धा । या पूर्वं पूरुणा वृताऽङ्गीकृता स्वभोगावसाने तुष्टा तस्मै राज्यमदात् । इयं कथा नवमस्कन्धे स्फुटा । राज्यप्राप्तेर्जराग्रहणहेतुकत्वात् ययातिना दत्तत्वेऽपि जरा अदादित्युक्तम् । जराग्रस्तस्य स्नानादावप्यसामर्थ्याद्दुर्भगत्वम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचिदिति ॥ सैवं काममोहिता वरान्वेषणाय सर्वत्राटमाना । आर्षः शानच् । कदाचित्ब्रह्मलोकान्महीं गतं प्राप्तं मां बृहद्व्रतं नैष्ठिकब्रह्मचारिणं जानत्यपि वव्रे त्वं मम भर्त्ता भव मामङ्गीकुर्वित्युक्तवतीति । पक्षे ब्रह्मचार्यादिकमपि न त्यजतीति ॥ २१ ॥ मयीति ॥ बृहद्व्रतत्वात्प्रत्याख्यातवति मयि संरभ्य क्रोधं कृत्वा हे मुने यतस्त्वं मद्याच्ञा-विमुखो मां नाङ्गीकरोष्यत एकत्र स्थाने स्थातुं नार्हसीति विपुलं महान्तमन्यैः सुदुःसहं शापमदात् । पक्षे श्रीनारदस्य प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुमित्युक्ताऽ-प्राकृतदेहत्वाज्जराप्रवेशासम्भवात् लोकोपकाराय पर्यटनमेव शापफलत्वेनोत्प्रेक्षितम् ॥ २२ ॥ तत इति ॥ ततो मत्प्रत्याख्यानानन्तरं विहतो मद्विषयकः सङ्कल्पो यस्याः सा कालकन्या मयोपदिष्टं ज्ञापितं नाम्ना भयं भयनामानं यवनानामीश्वरमासाद्य गत्वा पतिं वव्रे । पक्षे यवना आधयो व्याधयश्च तेषामीश्वरो मृत्युस्तस्य सर्वभयङ्करत्वात्स एव भयनामा तस्य जराज्वरादिद्वारामरणहेतुत्वात् मयोपदिष्टमिति तु कथालङ्कारः ॥ २३ ॥ ऋषभमिति ॥ हे वीर यवनानाम् ऋषभं त्वाम् ईप्सितं पतिं वृणे । यतः त्वयि

कदाचिदटमाना सा ब्रह्मलोकान्महीं गतम् ॥ वव्रे बृहद्व्रतं मां तु जानती काममोहिता ॥२१॥ मयि संरभ्य विपुलमदाच्छापं सुदुःसहम् ॥ स्था-तुमर्हसि नैकत्र मद्याच्ञाविमुखो मुने ॥ २२ ॥ ततो विहतसंकल्पा कन्यका यवनेश्वरम् ॥ मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥ २३ ॥ ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिम् ॥ संकल्पस्त्वयि भूतानां कृतः किल न रिष्यति॥२४॥द्वाविमावनुशोचन्ति बालावसदवग्रहौ॥यल्लो-कशास्त्रोपनतं न राति न तदिच्छति ॥ २५ ॥ अथो भजस्व मां भद्र भजतीं मे दयां कुरु ॥ एतावान् पौरुषो धर्मो यदार्त्ताननुकम्पते ॥ २६ ॥ कालकन्योदितवचो निशम्य यवनेश्वरः ॥ चिकीर्षुर्देवगुह्यं स सस्मितं तामभाषत ॥२७॥ मया निरूपितस्तुभ्यं पतिरात्मसमाधिना ॥ नाभि-नन्दति लोकोऽयं त्वामभद्रामसंमताम् ॥ २८ ॥ त्वमव्यक्तगतिर्भुङ्क्ष्व लोकं कर्मविनिर्मितम् ॥ याहि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि॥ २९ ॥

कृतो भूतानां सङ्कल्पो नैव रिष्यति न नश्यति ।" रिष् हिंसायाम् । " विफलो न भवति ॥२४ ॥ द्वाविति ॥ लोकव्यवहारतः शास्त्रतो वा ग्राह्यत्वेनोपनतं प्राप्तं तद्याच्यमानं देवं यो न राति न ददाति यश्च तद्दीयमानं ग्राह्यं नेच्छति न गृह्णाति तौ बालौ अज्ञौ असन्नवग्रहः हठः ययोस्तौ इमौ द्वौ पुरुषौ कर्मभूतौ सज्जना अनुशोचन्ति ॥ २५ ॥ अथो इति ॥ अथो तस्मात् हे भद्र भजन्तीं त्वामनुवर्तमानां मां त्वं भजस्व ममोपरि दयां कुरु । यत् आर्तान् दुःखितान् अनुकम्पते पौरुषः पुरुषैरनुष्ठेयः एतावानेव धर्मः ॥ २६ ॥ कालेति ॥ यवनेश्वरः भयनामा कालकन्ययोदितम् उक्तं वचो निशम्य श्रुत्वा देवानां गुह्यं गुप्तं किंचित्कार्यं चिकीर्षुः सस्मितं तामभाषत । पक्षे देवगुह्यं संसारचक्रप्रवर्त्तनं मरणं वा तद्धि प्राणिनां वैराग्यानुदयाय देवैर्गोप्यते मरणे ज्ञाते वैराग्योदयात्प्राणिनो मुच्येरन् । तद्धि देवतानां न रोचते तदाराधनोच्छेदात् ॥ २७ ॥ मयेति द्वयम् ॥ तुभ्यं त्वां भोजयितुं पतिर्मया आत्मसमाधिना चित्तैकाग्र्येण निरूपितो विचारितः यतः अयं लोको याच्यमानः अभद्रां दुःखप्रदाम् असम्मतां च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वां नाभिनन्दति नाङ्गीकरोति अतः कुतः कथमागतेत्यव्यक्ता गतिर्यस्यास्तथाभूता सती त्वं कर्मभिर्विनिर्मितं लोकं प्राणिशरीरं बलाद्भुङ्क्ष्व ॥ एवं सति सर्वोऽपि लोकस्तव पतिः स्यात् नापि किंचित्त्वया भेतव्यम् । तथा च मे मम पृतनया युक्ता त्वं लोकं याहि भुक्त्वा प्रजानां नाशं प्रणेष्यसि करिष्यसि । पक्षे मृत्युसेना रोगादिसमूहस्तद्युक्तया जरया प्रजानाशः स्फुटः ॥ २८ ॥ २९ ॥ प्रज्वार इति ॥ अयं प्रज्वारसंज्ञको मम भ्रातास्ति त्वं च मम भगिनी भवेतीत्थमुभाभ्यां युवाभ्यां द्वारभूताभ्यां भीमाः सैनिकाः यवना यस्य सः तैश्चास्मिन् लोके प्रजानाशं कुर्वन्नव्यक्तः अलक्षित एव चरामि । पक्षे प्रज्वारः वैष्णवोऽन्तको ज्वरः माहेश्वरस्य व्याध्यन्तःपातित्वात् जरा ज्वरादिद्वारैव मरणं स्फुटम् ॥ ३० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्य सप्तविंशे व्यधादिमाम् ॥ २७ ॥ अष्टाविंशे तु वैदर्भ्याजनने स्त्रीत्वमीयुषः ॥ जीवस्य क्वापि मुक्तत्वं तत्र श्लोका मरुद्रसाः ॥ अनुष्टुभोऽपि तावन्त्य उवाचेति द्वयं परम् ॥२८॥ सैनिका इति ॥ हे बर्हिष्मन् ये भयनाम्नो दिष्टकारिणः आज्ञाकारिणः दुरदृष्टफलोत्पादका वा सैनिका योद्धारस्ते प्रज्वारकालकन्याभ्यां सह लोकविनाशार्थमिमामवनीं विचेरुः सर्वत्र पर्यटन्ति स्म ॥ १ ॥ त इति ॥ एकदा तु ते भौमभोगेन आढ्यां सम्पूर्णां जरता क्षिणवलेन पन्नगेन सर्पेण पालितां पुरञ्जनस्य पुरीं तरसा वेगेन रुरुधुः । पक्षे जरादयो दुर्बलप्राणं शरीरं ग्रस्तवन्तः ॥ २ ॥ कालेति ॥ कालकन्यापि बलात् पुरञ्जनपुरं बुभुजे स्वाधीनीकृतवती । ययाऽभिभूतः पुरप्रवेशभोगादिना तिरस्कृतः पुरुषः सर्वो यः कोऽपि सद्यो निःसारतामसमर्थतामियात् ॥ ३ ॥ तयेति ॥ तया कालकन्ययोपभुज्यमानां सकलां पुरीं सर्वतो दिशं द्वार्भिर्यवनाः प्रविश्य सुभृशं प्रार्दयन् बभञ्जुः । पक्षे जरया ग्रस्ते देहे चक्षुरादिभिर्द्वार्भिः रोगादयः प्रविश्यान्धत्वादि सम्पादितवन्तः ॥ ४ ॥ तस्यामिति ॥ तस्यां पुर्यां प्रपीड्यमानायां तदभिमानी पुरञ्जनो यतः कुटुम्बी पुत्रादिमान् तेषु ममतया आकुलो विवशश्चात उरुविधान् बहुप्रकारांस्तापानवाप । पक्षे जीवो देहे पीडिते तदध्यासात् दुःखी बभूव ॥ ५ ॥

प्रज्वारोऽयं मम भ्राता त्वं च मे भगिनी भव ॥ चराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः ॥ ३० ॥ इति श्रीभागवते चतुर्थस्कन्धे पुरञ्जनोपाख्याने कालकन्योपाख्यानवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ नारद उवाच ॥ सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः ॥ प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ॥ १ ॥ त एकदा तु रभसा पुरञ्जनपुरीं नृप ॥ रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालिताम् ॥ २ ॥ कालकन्याऽपि बुभुजे पुरञ्जनपुरं बलात् ॥ ययाऽभिभूतः पुरुषः सद्यो निःसारतामियात् ॥ ३ ॥ तयोपभुज्यमानां वै यवनाः सर्वतो दिशम् ॥ द्वार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीम् ॥ ४ ॥ तस्यां प्रपीड्यमानायामभिमानी पुरञ्जनः ॥ अवापोरुविधांस्तापान् कुटुम्बी ममताऽकुलः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्येति त्रयम् ॥ कन्यया कालकन्यया उपगूढः आश्लिष्टः नष्टश्रीः कृपणः दीनः विषयेषु आत्मा मनो यस्य नष्टप्रज्ञः गन्धर्वैर्यवनैश्च बलात् हृतमैश्वर्यं यस्य स पुरञ्जनः स्वपुरीं विशीर्णां वीक्ष्य पुत्रान् पौत्रान् अनुगान् अमात्यांश्च प्रतिकूलान् अभीष्टाप्रापकान् अनादृतान् आदररहितांश्च वीक्ष्य जायां च गतसौहृदां स्नेहरहितां वीक्ष्य आत्मानं च कालकन्यया ग्रस्तं वीक्ष्य पश्चालान् देशान् अरिभिः दूषितान् वीक्ष्य दुरन्तां चिन्तामापन्नः सन् तस्य पूर्वोक्तदुःखस्य प्रतिक्रियाम् उपायं न लेभे । पक्षे अनुगा इन्द्रियाणि अमात्या इन्द्रियदेवाः गतसौहृदां गताध्यवसायां जरया ग्रस्तः रोगादिभिर्हृतसामर्थ्यः शरीरं शिथिलं पुत्रादीन् इन्द्रियपरिणामादीन् स्वस्वभोगासम्पादकान् वीक्ष्य विषयान् सुखाजनकान् वीक्ष्य तदुपायं न लेभे ॥ ६ ॥ ७ ॥ ८ ॥ कामानिति द्वयम् ॥ कालकन्यया हेतुभूतया यातयामान् गतसारान् अपि कामान् विषयान् अभिलषन् तथा विगता असिद्धा साधनानुष्ठानाभावादात्मनो गतिः पारलौकिकी तयैहिकः पुत्रादिस्नेहश्च यस्य स तथाभूतोऽपि पुत्रदारांश्च लालयन् राजा

कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः ॥ नष्टप्रज्ञो हृतैश्वर्यो गन्धर्वयवनैर्बलात् ॥६ ॥ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् ॥ पुत्रान् पौत्राऽनुगामात्यान् जायां च गतसौहृदाम् ॥ ७ ॥ आत्मानं कन्यया ग्रस्तं पश्चालानरिदूषितान् ॥ दुरन्तचिन्तामापन्नो न लेभे तत्प्रतिक्रियाम् ॥८॥ कामानभिलषन् दीनो यातयामांश्च कन्यया ॥ विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ॥ ९ ॥ गन्धर्वयवनाक्रान्तां कालकन्योपमर्दिताम् ॥ हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥ १० ॥ भयनाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः ॥ ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥ ११ ॥ तस्यां संदह्यमानायां सपौरः सपरिच्छदः ॥ कौटुम्बिकः कुटुम्बिन्या उपातप्यत सान्वयः ॥ १२ ॥ यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया ॥ पुर्यां प्रज्वारसंसृष्टः पुरपालोऽन्वतप्यत ॥ १३ ॥

पुरञ्जनस्तां गन्धर्वयवनादिभिराक्रान्तां वशीकृतां कालकन्यया चोपमर्दितां भग्नामपि पुरीमनिकामतोऽनिच्छयाऽपि हातुं त्यक्तुं प्रचक्रमे उपक्रान्तवान् । पक्षे जरया विषयाणां सुखाजनकत्वम् इन्द्रियादीनां विकलतायां शरीरत्यागेच्छा चेत्यादि स्फुटम् ॥ ९ ॥ १० ॥ भयेति ॥ भयनाम्नोऽग्रजो ज्येष्ठो भ्राता प्रज्वारसंज्ञकः प्रत्युपस्थितः पुरीं प्रत्यागतः सन् भ्रातुर्भयनाम्नः प्रियस्य पुरीनाशस्य चिकीर्षया सकलां तां पुरीं ददाह । पक्षे देहनाशं चिकीर्षुः प्रज्वारो ज्वरो देहे दाहमुत्पादितवान् ॥ ११ ॥ तस्यामिति ॥ तस्यां पुर्यां दह्यमानायां सपौरः पुरप्राकारादिसहितः सपरिच्छदः भृत्यवर्गसहितः कुटुम्बेन दीव्यतीति कौटुम्बिकः कुटुम्बिन्या भार्यया च सहितः । अत्र सन्ध्यभावः अविवक्षया । सान्वयः पुत्रादिसहितश्च पुरञ्जनः उपातप्यत । पक्षे सपौरः सप्तधातुसहितः सपरिच्छदः इन्द्रियादिभिः सह जीवः अतप्यत ॥ १२ ॥ यवनेति ॥ कालकन्यया पुर्यां ग्रस्तायां यवनैरुपरुद्धं बलाद्गृहीतमायतनं वासस्थानं यस्य सः प्रज्वारेण संसृष्टः पीडितः पुरपालः पञ्चशिरा नागोऽप्यनुक्षणमतप्यत । पक्षे देहस्यान्तकाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगादिभिः स्थाने रुद्धे शीतज्वरपीडितः प्राणोऽतप्यत ॥ १३ ॥ नेति ॥ पुरुकृच्छ्रेण बहुकष्टेन उरुर्वेपथुः कम्पो यस्य सः अत एव तत्र स्थितोऽपि तामवितुं रक्षितुं स पुरपालो न शेके समर्थो न जातः । अतः यथा सानलात् अग्निना दह्यमानाद्वृक्षकोटरात्स निर्गन्तुमिच्छति तथा ततो बहिर्गन्तुमैच्छत् । पक्षे जरादिभिरुपद्रुतः प्राणो बहिर्गन्तुमैच्छत् ॥ १४ ॥ शिथिलेति ॥ हे राजन् शिथिला अवयवाः करचरणादयो यस्य सः तत्र हेतुः गन्धर्वैर्हृतं पौरुषं यस्य सः यवनैररिभिरुपरुद्धश्चातो झटिति बहिरपि निर्गन्तुमशक्तः संस्तदा पुरपालको नागो रुरोदैव न तत्र किंचित्पराक्रमं कर्तुं शशाक । पक्षे जीर्णत्वेन मन्दक्रियः कफादिरुद्धो गन्तुमप्यशक्तः प्राणः कण्ठे घुर्घुरध्वनिमकरोत् ॥ १५ ॥ दुहितॄरिति द्वयम् ॥ प्रमदया उपलक्षणतया प्रमदादिभिः सर्वैर्विप्रयोग उपस्थिते सति कुमतिः रजःक्रान्तमतिः गृही दीनश्च पुरञ्जनः गृहेषु गृहादिष्वहंममेति स्वीकृत्य दुहितॄः पुत्रपौत्रान् च जामीः स्नुषाः जामातॄन् पार्षदान् अन्यच्च यत् किंचित् स्वत्वे लुम्पनादवशिष्टं भोगस्य तु प्रागेव प्रक्षीणप्रतिरुद्धत्वात् कोशा धनसञ्चयाः परिच्छदाः गृहोपकरणानि च तानि दध्यौ । पक्षे मरणसमये ममतास्पदानां चिन्ता प्रसिद्धैव । प्रमदा चात्र ममतास्पदं व्यावहारिक्येव भार्या न पुरञ्जनी । जीवस्य स्थूलशरी-

न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः ॥ गन्तुमैच्छत् ततो वृक्षकोटरादिव सानलात् ॥ १४ ॥ शिथिलावयवो यर्हि गन्धर्वैर्हृतपौरुषः ॥
यवनैररिभी राजन्नुपरुद्धो रुरोद ह ॥ १५ ॥ दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् ॥ स्वत्वावशिष्टं यत् किंचित् गृहकोशपरिच्छदम्
॥ १६ ॥ अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही ॥ दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥ १७ ॥ लोकान्तरं गतवति मय्यनाथा कुटुम्बिनी ॥ वर्तिष्यते कथं त्वेषा बालकाननुशोचती ॥ १८ ॥ न मय्यनाशिते भुङ्क्ते नास्नाते स्नाति मत्परा ॥ मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग् भयात् ॥ १९ ॥ प्रबोधयति मामज्ञं व्युषिते शोककर्शिता ॥ वर्त्मैतद् गृहमेधीयं वीरसूरपि नेष्यति ॥ २० ॥

रवियोगे बुद्धिवियोगाभावात् । एवं दुहित्रादयोऽपि व्यावहारिका एव मरणकाले बुद्धिविवेकादीनां स्मृत्यभावात् ॥ १६ ॥ १७ ॥ लोकान्तरमिति ॥ मयि स्वामिनि लोकान्तरं गतवत्येषा मम भार्या अनाथा मया नाथेन विरहिता कुटुम्बिनी पुत्रादिकुटुम्बवती बालकाननुशोचती सती । नुमभाव आर्षः । कथं नु वर्त्तिष्यते ॥ १८ ॥ नेति ॥ मत्परा मदेकाश्रया सा मयि अनाशिते अभोजिते स्वयं न भुङ्क्ते तथा मयि अस्नाते स्वयं न स्नाति मयि रुष्टे सति स्वयं सुसन्त्रस्ता भवति भर्त्सिते भर्त्सनं कृतवति मया भर्त्सिते भर्त्सने कृते सतीति वा । भयात् यतवाक् गृहीतमौना भवति ॥ १९ ॥ प्रबोधयतीति ॥ मामविज्ञं कदाचिद्विस्मृतव्यवहारं प्रबोधयति मयि व्युषिते देशान्तरगते मद्वियोगशोकेन कर्शिता भवति । सैवंभूता मत्परायणा एतद्गृहमेधीयं वर्त्म गृहस्थमार्गं वीरसूः पुत्रवत्यपि किं नेष्यति अनुवर्त्तयिष्यते अपि तु न नेष्यति । पक्षे देहनाशे मतेरपि मोहः स्यात् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमिति ॥ दारकाः पुत्राः दारकीः दारक्यः कन्याः वा । “ छन्दसि ” इति पूर्वसवर्णदीर्घः ङीप् चार्षः । मयि गते सति न परमयनमाश्रयो येषां पुत्राः कन्याश्च । यद्वा परायणाः पराश्रयाः कन्याः अत एव दीनाः उदधौ समुद्रे भिन्ना नौर्येषां तादृशा जना इव कथं नु वर्त्तिष्यन्ते ॥२१॥ एवमिति ॥ एवं कृपणया मोहितया बुद्ध्या शोचन्तमतदर्हणं राजत्वाच्छोकानर्हमेनं पुरञ्जनं ग्रहीतुं कृता धीर्येन स भयनामा अभ्यपद्यत आजगाम । पक्षे चिद्रूपत्वेन शोकानर्हत्वेऽपि राजसाध्यासेन शोचन्तं ग्रहीतुं मृत्युराजगाम ॥ २२ ॥ पशुवदिति ॥ यदा यवनैः पशुवत्पाशैर्बद्ध्वा एष पुरञ्जनः स्वकं क्षयं स्थानं प्रति नीयमानो जातस्तदा येऽस्यानुपथाः अनुसारिणोऽनुजीविनो भृत्या नागादयस्तेऽपि भृशमातुराः अत्यन्तव्याकुलाः सन्तः शोचन्तं समन्वद्रवन् अन्वगच्छन् । पक्षे यदा यवनैर्यमदूतैरयं नरकाननीयत तदा प्राणादयोऽपि तमन्वगच्छन् ॥ २३ ॥ पुरीमिति ॥ प्रथमं यवनैरुपरुद्धो भुजङ्गमः पुरीपालको यदैव पुरीं विहायोपगतो बहिर्निर्गतस्तदा तमेवानु तत्पश्चादेव सा पुरी विशीर्णा विशकलिता सती प्रकृतिं स्वकारणं पृथि-

कथं नु दारका दीना दारकीर्वा परायणाः ॥ वर्तिष्यन्ते मयि गते भिन्ननाव इवोदधौ ॥ २१ ॥ एवं कृपणया बुद्ध्या शोचन्तमतदर्हणम् ॥ ग्रहीतुं कृतधीरेनं भयनामाऽभ्यपद्यत ॥ २२ ॥ पशुवद्यवनैरेष नीयमानः स्वकं क्षयम् ॥ अन्वद्रवन्ननुपथाः शोचन्तो भृशमातुराः ॥ २३ ॥ पुरीं विहायोपगत उपरुद्धो भुजङ्गमः ॥ यदा तमेवानु पुरी विशीर्णा प्रकृतिं गता ॥ २४ ॥ विकृष्यमाणः प्रसभं यवनेन बलीयसा ॥ नाविन्दत् तमसाऽऽविष्टः सखायं सुहृदं पुरः ॥ २५ ॥ तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना ॥ कुठारैश्चिच्छिदुः क्रुद्धाः स्मरन्तोऽमीवमस्य तत् ॥ २६ ॥ अनन्तपारे तमसि मग्नो नष्टस्मृतिः समाः ॥ शाश्वतीरनुभूयार्तिं प्रमदासङ्गदूषितः ॥ २७ ॥ तामेव मनसा गृह्णन् बभूव प्रमदोत्तमा ॥ अनन्तरं विदर्भस्य राजसिंहस्य वेश्मनि ॥ २८ ॥

व्यादिकं गता लीना जाता । पक्षे प्राणादिनिर्गमानन्तरं शीर्णो देहो भूम्यादौ लीनः ॥ २४ ॥ विकृष्यमाण इति ॥ बलीयसा प्रबलेन यवनेन प्रसभं बलात्कारेण विकृष्यमाणोऽपि पुरञ्जनः तमसा अज्ञानेन आविष्टो व्याप्तः सन् पुरः पूर्वं सुहृदं हितकर्त्तारं सखायमलक्षिततया सह वर्त्तमानमपि नाविन्दत् न सस्मार ॥ २५ ॥ तमिति ॥ अनेन अदयालुना दयारहितेन ये यज्ञे पशवः संज्ञप्ताः काम्यकर्मसु खड्गैश्छिन्नास्तेऽस्य तदमीवं तस्य पापं क्रौर्यं वा तेनोत्पादितां स्वपीडां वा स्मरन्तः क्रुद्धाः नानाभयङ्करवेषधारिणः सन्तो लोहमयैः कुठारैस्तं मार्गे चिच्छिदुः ॥ २६ ॥ अनन्तेति द्वयम् ॥ प्रमदासङ्गेन दूषितः अनन्तपारे अतिमहति तमसि निमग्नः नष्टा पूर्वस्मृतिर्यस्य स शाश्वतीः समाः अनन्तान् वर्षान् आर्तिं पीडामनुभूय तामेव प्रमदां पुरञ्जनीं मनसा गृह्णन् स्मरन् अनन्तरं पीडाभोगानन्तरं विदर्भदेशाधिपतेः राजसिंहस्य वेश्मनि गृहे प्रमदोत्तमा बभूव । पक्षे बहुकालं नरकदुःखमनुभूय तद्भोगनिवृत्तपापः स्वकृतपुण्यैः स्वर्गमप्यनुभूय तदनुक्रिरत्र प्राचीनबर्हिषो वैराग्याय । अतः परमस्मिन् प्रकरणे एतावदेव प्रकृतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयोगि विवक्षितम् । स्त्रीध्यानेन स्त्रीत्वप्राप्तावपि पतिव्रताध्यानेन पूर्वादृष्टेन च धार्मिकाद्विदर्भाज्जन्माभूत् । धार्मिकसङ्गेन च विशुद्धस्य भागवतेन मलयध्वजेन सङ्गोऽभूत् । ततो विष्णुभक्तिस्ततो वैराग्यं ततस्तमेव भर्तृरूपं गुरुं पातिव्रत्यधर्मेण भजतो भगवत्प्रसादलब्धज्ञानेन मोक्ष इति । अन्यत्तु कथालङ्कारमात्रं तथापि किञ्चिद्वृत्तिसामान्येनेह योजयिष्यामः । विदर्भस्य विशिष्टदर्भोपलक्षितस्य कर्मठस्य राजसिंहस्य धर्मेण हि प्रजापालनेन यज्ञादिना च क्षत्रिया राजन्ते तेषु श्रेष्ठस्य वेश्मनि जाता अत्र मरणकाले दुःखातिशयजनितमूर्च्छया क्षणमात्रं सद्बुद्धित्यागः । ततः स्वकर्मभोगान्ते पुण्यशेषेण धार्मिकगृहे जन्मेत्येतावद्विवक्षितं स्त्रीत्वपुंस्त्वादिकं त्वविवक्षितमेव ॥ २७ ॥ ॥ २८ ॥ उपयेमे इति ॥ तां वैदर्भीं विदर्भराजपुत्रीं वीर्यं प्रभाव एव पणो वैवाहिकं देयं यस्यास्तां पाण्ड्यः पाण्डुदेशाधिपतिः परपुरञ्जयः महापराक्रमो मलयध्वजो युधि राजन्यान् निर्जित्योपयेमे विवाहितवान् । पक्षे मलयोपलक्षिते भगवद्भक्तिप्रधाने दक्षिणदेशे परमभागवतत्वेन ध्वज इव प्रसिद्धो मलयध्वजः पण्डा भगवद्भजनादेव पुरुषार्थसिद्धिरिति शास्त्रार्थनिर्णयेन निश्चयात्मिका बुद्धिस्तामर्हतीति पण्ड्यः पण्ड्य एव पाण्ड्यः । स्वार्थेऽण् । अत एव परपुरञ्जयः अन्यमतजनितसंशयखण्डनदक्षः अत एव राजन्यान् अन्यमतपरान्वादिनः युधि शास्त्रार्थसभायां निर्जित्य उपयेमे तं शिष्यत्वेनाङ्गीकृतवान् ॥ २९ ॥ तस्यामिति ॥ तस्यां वैदर्भ्यां स मलयध्वजः असितेक्षणां नीलक-

उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ॥ युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरंजयः ॥ २९ ॥ तस्यां स जनयांचक्र आत्मजामसितेक्षणाम् ॥ यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः ॥ ३० ॥ एकैकस्याभवत् तेषां राजन्नर्बुदमर्बुदम् ॥ भोक्ष्यते यद्वंशधरैर्मही मन्वन्तरं परम् ॥ ३१ ॥ अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् ॥ यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः ॥ ३२ ॥

टाक्षामात्मजां कन्यां जनयांचक्रे । तथा ततो यवीयसः कनिष्ठान् सप्त सुतान् जनयांचक्र इति सम्बन्धः । ते च सप्त द्रविडदेशे भूभृतो राजानो जाताः । पक्षे तस्मिन् शिष्ये स गुरुः असितस्य श्रीकृष्णस्येक्षणं यया तां भगवत्कथाश्रवणसेवादिरुचिं तदनन्तरभाविनः श्रवणकीर्त्तनस्मरणपादसेवनार्चनवन्दनदास्यलक्षणसप्तभक्तिप्रकारांश्चोत्पादयामास । सख्यात्मनिवेदनयोस्तु जानासि किं सखायं मामित्यादिना भगवतैवाग्र उपदेक्ष्यमाणत्वादिदानीमनुत्पन्नत्वेन सप्तेत्युक्तम् । द्रविडदेशस्य श्रवणादिसप्तभक्तिप्रधानत्वात्तत्पालकत्वं ज्ञेयम् ॥ ३० ॥ एकैकस्येति ॥ हे राजन् तेषां पुत्राणामेकैकस्य पुत्रस्य पुत्राणामर्बुदमर्बुदमभवन् । यद्वंशधरैः येषां पुत्राणां वंशप्रभवैस्ततः परं मन्वन्तरपर्यन्तं मही भोक्ष्यते । पक्षे निरन्तरमभ्यस्यमानानां श्रवणादीनां प्रत्येकमनन्तप्रकारा जाताः । येषां वंशधरैः प्रकारभेदैः मही भोक्ष्यते महीवर्त्तिनः प्राणिनोऽविद्याकामकर्मभ्यो रक्षिष्यन्ते ॥ ३१ ॥ अगस्त्य इति ॥ मलयध्वजस्य प्राक् प्रथमा तां दुहितरं धृतव्रतामगस्त्य उपयेमे । यस्यां इध्मवाह आत्मजो यस्य तादृशो दृढच्युतो नाम मुनिर्जातः । अगस्त्यस्य तस्यां दृढच्युतस्तस्मादिध्मवाह इत्यर्थः । पक्षे अगानि निष्क्रियाणि गात्राणि स्त्यायति सङ्घातयतीत्यगस्त्यो मनः । धृतानि व्रतानि शमदमादीनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यया तां प्राग्दुहितरं कृष्णसेवारुचिम् उपयेमे मनः कृष्णे दृढां रतिं बबन्ध । यस्यां दृढेभ्यः सत्यलोकादिभ्योऽपि च्युतः निस्पृहः मुनिः भोगविरागो जातः स च इध्मवाहः आत्मजो यस्य सः तादृशोऽभूत् । "विरागात् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुत्युक्तसमिद्वहनोपलक्षितो गुरूपगमोऽभूत् । न ह्यविरक्तस्य गुरूपगमो भवति ॥ ३२ ॥ विभज्येति ॥ ततश्च कृष्णमाराराधयिषुः सन् राजर्षिर्मलयध्वजस्तनयेभ्यः स्वपुत्रेभ्यः क्ष्मां पृथ्वीं विभज्य विभागेन दत्वा स्वयं कुलाचलं पर्वतं जगाम । पक्षे तनयेभ्यः क्ष्मां विभज्य पृथ्व्यां श्रवणादिभक्तिभेदानवस्थाप्य मलयध्वजः गुरुः कुलाचलं पुण्यक्षेत्रम् एकान्तदेशं जगाम ॥ ३३ ॥ हित्वेति ॥ मदयतीति मदिरमीक्षणं यस्याः सा युवतिरपि वैदर्भी गृहान् सुतान् भोगान् हित्वा ज्योत्स्ना चन्द्रिका रजनीकरमिव पाण्ड्येशं मलयध्वजं स्वपतिमन्वधावत अनुजगाम । पक्षे वैदर्भी पूर्वं पुरञ्जनत्वेनोक्ता इदानीं विदर्भगृहे स्त्रीरूपेण जाता शिष्यतां प्राप्ता जीवव्यक्तिः पाण्डयेशं गुरुमन्वधावत । पतिरेव गुरुः स्त्रीणामिति पतिर्गुरुवदुक्तः ॥ ३४ ॥ तत्रेति द्वयम् ॥ तत्र देशे चन्द्र-

विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः ॥ आरिराधयिषुः कृष्णं स जगाम कुलाचलम् ॥ ३३ ॥ हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा ॥ अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरम् ॥ ३४ ॥ तत्र चन्द्रवसा नाम ताम्रपर्णी वटोदका ॥ तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ॥ ३५ ॥ कन्दाऽष्ठिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः ॥ वर्तमानः शनैर्गात्रकर्षणं तप आस्थितः ॥ ३६ ॥ शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये ॥ सुखदुःख इति द्वन्द्वान्यजयत् समदर्शनः ॥ ३७ ॥ तपसा विद्यया पक्वकषायो नियमैर्यमैः ॥ युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ॥ ३८ ॥ आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः ॥ वासुदेवे भगवति नान्यद् वेदोद्वहन् रतिम् ॥ ३९ ॥

वसा नाम ताम्रपर्णी वटोदका चेति नद्यस्तासां पुण्यैः सलिलैर्नित्यमुभयत्र अन्तर्बहिश्चात्मनो मलं मृजन् शोधयन् कन्दैः अष्ठिभिः बीजैः मूलैः फलैः पुष्पैः पर्णैः तृणैः उदकैश्च वर्तमानो देहादिस्थितिं सम्पादयन् शनैर्गात्रकर्शनं शरीरशोषकं तप आस्थितः कृतवान् । पक्षे गुरुस्तपसि स्थितः ॥ ३५ ॥ ३६ ॥ शीतेति ॥ समदर्शनः सः शीतोष्णे वातवर्षे क्षुत्पिपासे प्रियाप्रिये सुखदुःखे इति द्वन्द्वानि अजयत् ॥ ३७ ॥ तपसेति ॥ तपसा विद्यया उपासनया नियमैर्यमैश्च पक्वाः निर्दग्धाः कषायाः गैरिकादिकषायरूपवद्दुर्निवाराः कामक्रोधादयो मलानि यस्य सः अत एव विजिता अक्षादयो येन सः अक्षाणीन्द्रियाणि अनिलः प्राणः आशयः अन्तःकरणं ब्रह्मण्यात्मानमैक्यभावनेन युयुजे ॥ ३८ ॥ आस्ते इति ॥ एवं स्थिरः अनुद्विग्नचित्तः सन् दिव्यं वर्षशतं स्थाणुरिव एकत्र स्थान आस्ते स्म । ततश्च वासुदेवे भगवति रतिं प्रीतिमुद्वहन् अन्यत् देहादिप्रपञ्चं न वेद । पक्षे वर्षशतमिति ज्ञानस्य दुःसाधतां दर्शयति ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ स एवं वर्त्तमानः आत्मनि कार्यकारणसङ्घाते वर्त्तमानमेव आमर्शस्य अन्तःकरणवृत्तेः साक्षिणम् आत्मानं यथा स्वप्ने ममेदं शिरश्छिन्नमित्यादिप्रतीतौ तद्व्यतिरिक्तमात्मानं छिन्नशिरस्कस्य प्रकाशकं वेत्ति तद्वत् व्यापकतया देहादिप्रकाशकत्वेन व्यतिरिक्ततया देहादिव्यतिरिक्तत्वेन च विद्वान् अन्यस्मात् विरराम ॥ ४० ॥ साक्षादिति द्वयम् ॥ हे नृप साक्षाद्गुरुणा हरिणा भगवतोक्तेनान्तःकरणे प्रकाशितेन अत एव विश्वतः सर्वतोमुखं यथा भवति तथा स्फुरता प्रकाशमानेन विशुद्धज्ञानदीपेन हेतुना परे ब्रह्मणि " ब्रह्मैवाहं न संसारी " इति आत्मानमीक्षमाणस्तथा अहमेव ब्रह्म इत्यात्मनि परब्रह्म ईक्षमाणः तत ईक्षाम् ईक्षणं वृत्तिमपि विहाय अस्मात्संसारादुपरराम मरणं प्राप्तः । आद्येन शोकादिनिवृत्तिः द्वितीयेन ब्रह्मपारोक्ष्यनिवृत्तिः अतो व्यतिहारेणेक्षणम् । ईक्षायाश्च दग्धेन्धनाग्निवत्स्वयमुपशान्तिः ॥ ४१ ॥ ४२ ॥ पतिमिति ॥ भोगान् हित्वा पत्या सहागता पतिदेवता पतिव्रता सा वैदर्भी मलयध्वजं परमधर्मज्ञं स्वपतिं प्रेम्णा पर्यचरत् सेवितवती । पक्षे शिष्यः पतिव्रतावद्भक्त्या गुरुं

स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि ॥ विद्वान् स्वप्न इवामर्शसाक्षिणं विरराम ह ॥ ४० ॥ साक्षाद् भगवतोक्तेन गुरुणा हरिणा नृप ॥ विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखम् ॥ ४१ ॥ परे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि ॥ वीक्षमाणो विहायेक्षामस्मादुपरराम ह ॥ ४२ ॥ पतिं परमधर्मज्ञं वैदर्भी मलयध्वजम् ॥ प्रेम्णा पर्यचरद्धित्वा भोगान् सा पतिदेवता ॥ ४३ ॥ चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा ॥ बभावुपपतिं शान्ता शिखा शान्तमिवानलम् ॥४४॥ अजानती प्रियतमं यदोपरतमङ्गना ॥ सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ॥४५॥ यदा नोपालभेताङ्घ्रावूष्माणं पत्युरर्चती ॥ आसीत् संविग्नहृदया यूथभ्रष्टा मृगी यथा ॥ ४६ ॥ आत्मानं शोचती दीनमबन्धुं विक्लवाऽश्रुभिः ॥ स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ॥ ४७ ॥

सेवितवान् ॥ ४३ ॥ चीरेति ॥ चीरं जीर्णं वासो यस्याः सा व्रतेन क्षामा दुर्बला वेणीभूताः प्रसाधनाभावादेकीभूताः शिरोरुहाः केशाः यस्याः सा उपपतिं पत्युः समीपे । यद्वा पत्युः किंचिदूना तत्समा सतीत्यर्थः । " उपोऽधिके च " इति चाद्धीने कर्मप्रवचनीयः तद्योगे द्वितीया । शान्तज्वालाधःस्थमङ्गारावस्थमनलमुपशान्ता शुद्धा धूमरहिता शिखा ज्वाला इव बभौ । पक्षे गुरुणा सह शिष्योऽपि तद्वज्जातः ॥ ४४ ॥ अजानतीति ॥ तस्मिन् यदा साङ्गना वैदर्भी देहं त्यक्तवन्तमपि सुस्थिरासनमुपविष्टं तं प्रियतमं पतिमुपरतं देहं त्यक्तवन्तमजानती तदा आसाद्य समीपं गत्वा यथापूर्वमुपाचरत् असेवत ॥ ४५ ॥ यदेति ॥ पत्युरङ्घ्रिमर्चती नुमभाव आर्षः । यदा तस्मिन्नङ्घ्रावूष्माणं नोपालभेत नापश्यत्तदा यूथभ्रष्टमृगीवत्संविग्नहृदया व्याकुलचित्ता आसीत् । पक्षे शिष्यो गुरोः शरीरत्यागं दृष्ट्वा व्याकुलो जातः ॥ ४६ ॥ आत्मानमिति ॥ तदा सा विपिने अबन्धुं पत्यादिरहितमत एव दीनमात्मानं शोचती नुमभाव आर्षः । विक्लवाश्रुभिः स्वस्तनावासिच्य सुस्वरं प्ररुरोद । पक्षे गुरुवियोगे शिष्यो रुरोद ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तिष्ठेति ॥ हे राजर्षे त्वमुत्तिष्ठोत्तिष्ठ दस्युभ्यश्चोरेभ्यस्तथा क्षत्रबन्धुभ्यः अधार्मिकेभ्यः क्षत्रियेभ्यश्च बिभ्यतीमुदधिपर्यन्तामिमां पृथ्वीं पातुं रक्षितुमर्हसि । पक्षे विरुद्धमतावलम्बिभ्यः स्वमतपद्धतिं रक्षितुमर्हसि ॥ ४८ ॥ एवमिति ॥ पतिमनुगता बाला विपिने वन एवं विलपती नुमभाव आर्षः । भर्तुः पादयोः पतिता रुदन्ती च सती नुमार्षः । अश्रूण्यवर्तयत् मुमोच । पक्षे शिष्योऽश्रूणि मुमोच ॥४९॥ चितिमिति ॥ तदा दारुमयीं चितिं चित्वा कृत्वा तस्यां पत्युः कलेवरं निधाय अग्निना तामादीप्य च विलपन्ती स्वयमप्यनुमरणे चितिप्रवेशेन मरणे मनो दधे । पक्षे शिष्यो गुरुदेहक्रियां कृत्वा जीवने आसक्तिं त्यक्तवान् ॥ ५० ॥ तत्रेति ॥ हे प्रभो तस्मिन् देशे काले च आत्मवान् आत्मज्ञानवान् कश्चित्पूर्वतरः सखा ब्राह्मणस्वरूपधरस्तां रुदतीं वल्गुना मनोहरेण साम्ना प्रियवाक्येन सान्त्वयन् संबोधयन्नाह । पक्षे पूर्वतरः अनादिः सखा अन्तर्यामी आत्मवान् स्वतन्त्रः सर्वज्ञश्च तुल्यमन्यत् ॥ ५१ ॥ का त्वमिति ॥ त्वं काऽसि किन्नामासि कस्य कन्यासि यस्य यं शेषे षष्ठी । शोचसि सोऽयं शयानस्तव को वा । येन सहाग्रे

उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलाम् ॥ दस्युभ्यः क्षत्रबन्धुभ्यो बिभ्यतीं पातुमर्हसि ॥ ४८ ॥ एवं विलपती बाला विपिनेऽनुगता पतिम् ॥ पतिता पादयोर्भर्तुं रुदन्त्यश्रूण्यवर्तयत् ॥ ४९ ॥ चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥ आदीप्य चानुमरणे विलपन्ती मनो दधे ॥ ५० ॥ तत्र पूर्वतरः कश्चित् सखा ब्राह्मण आत्मवान् ॥ सान्त्वयन् वल्गुना साम्ना तामाह रुदतीं प्रभो ॥ ५१ ॥ ब्राह्मण उवाच ॥ ॥ का त्वं कस्यासि को वाऽयं शयानो यस्य शोचसि ॥ जानासि किं सखायं मां येनाग्रे विचचर्थ ह ॥ ५२ ॥ अपि स्मरसि चात्मानमविज्ञातसखं सखे ॥ हित्वा मां पदमन्विच्छन् भौमभोगरतो गतः ॥५३॥ हंसावहं च त्वं चार्य सखायौ मानसायनौ ॥ अभूतामन्तरावौकः सहस्रपरिवत्सरान् ॥ ५४ ॥

पूर्वं विचचर्थ । इडभाव आर्षः तत एत्वाभ्यासलोपयोरप्यभावः । तं मां सखायं किं जानासि । पक्षे केति स्त्रीत्वनिर्देशः पारोक्ष्यार्थः । गुरुभक्तं संसाराद्विरक्तं विशुद्धान्तःकरणमन्तर्यामी भगवान् कृपयाऽविर्भूय प्रतिबोधयति ॥ ५२ ॥ अपीति ॥ हे सखे यद्यपि मां न जानासि तथाप्यात्मानं त्वामपि अविज्ञातस्य कस्यचित्सखास्मीत्येवं किं स्मरसि सख इति पुंस्त्वं जीवाभिप्रायेण । सख्यं स्मारयन्स्ववियोगजमनर्थमाह । यतस्त्वं भौमभोगे रतः आसक्तः पदं भोगस्थानमन्विच्छन् अन्वेषयन् मां हित्वा गतोऽभूः ॥ ५३ ॥ हंसाविति ॥ हे आर्य हे श्रेष्ठ अहं च त्वं च द्वावपि हंसौ पक्षिणौ सखायौ मानसायनौ मानससरसि कृतनिवासौ यतस्ततः पूर्वं सहस्रपरिवत्सरान् तावत्कालपर्यन्तमोको गृहमन्तरा विनैवाभूतां वा एवार्थे । पक्षे हंसौ शुद्धौ सखायौ मानसं हृदयमयनं ययोस्तौ पूर्वं यावन्महाप्रलयस्तावत्सहस्रपरिवत्सरान् ओको विनैवाभूताम् । देहादिसङ्घातस्य स्थानस्य तदानीं ब्रह्मणि विलयात् ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ हे बन्धो स हंस एव त्वं ग्राम्ये विषयसुखे मतिर्यस्य स तथाभूतः सन्मां परहितकारिणं विहाय महीं गतस्तत्र विचरन् कयाचित् स्त्रिया निर्मितं पदं पुरमद्राक्षीर्दृष्टवान् । पक्षे ग्राम्यमतिर्विषयसुखाभिलाषी मां विहाय विस्मृत्य महीं त्रिलोकीं गतो देवतिर्यगादियोनिषु विचरन् कयाचित् स्त्रिया अनिर्वाच्यया मायया निर्मितं पुरं मनुष्यशरीरं त्वमद्राक्षीः ॥ ५५ ॥ पञ्चाराममिति ॥ पञ्च आरामा उपवनानि यस्मिंस्तत् नव द्वाराणि यस्मिंस्तत् एकः पालो यस्मिंस्तत् त्रीणि कोष्ठानि प्राकारा यस्मिंस्तत् षट् कुलानि अभीष्टविषयप्रापका वणिजो यस्मिंस्तत् पञ्चविपणा हट्टा यस्मिंस्तत् पञ्चसङ्ख्या प्रकृतिः उपादानकारणं यस्मिंस्तत् स्त्री धवः पतिः स्वामिनी यस्मिन् ॥ ५६ ॥ भगवान् स्ववचः स्वयमेव च व्याचष्टे—पञ्चेति ॥ पञ्चेन्द्रियाणामर्था विषयाः रूपरसादयः आरामा ज्ञेयाः । नव प्राणा इन्द्रिय द्वारो ज्ञेयाः । एकः प्राणः पाल इति ज्ञेयः । एतत् स्पष्टत्वान्न व्याख्यातम् । तेजोबन्नानि पृथिव्यप्तेजांसि कोष्ठानि ज्ञेयानि । इन्द्रियाणां सङ्ग्रहः । पञ्च ज्ञानेन्द्रियाण्येकं मन इति षट्कुलं ज्ञेयम् ॥ ५७ ॥ विपण इति ॥ क्रियासु शक्तिर्यस्य सः कर्मेन्द्रियवर्गो विपणो ज्ञेयः । पञ्च महाभूतान्येव प्रकृतिरुपादानकारणं ज्ञेयम् । तस्य शरीरनाशेऽप्याप्रलयं नाशाभावादव्यया शक्तिः

स त्वं विहाय मां बन्धो गतो ग्राम्यमतिर्महीम् ॥ विचरन् पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ॥ ५५ ॥ पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम् ॥
षट्कुलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम् ॥ ५६ ॥ पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो ॥ तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः ॥ ५७ ॥ विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया ॥ शक्त्यधीशः पुमांस्तत्र प्रविष्टो नावबुध्यते ॥ ५८ ॥ तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः ॥ तत्सङ्गादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ॥ ५९ ॥ न त्वं विदर्भदुहिता नायं वीरः सुहृत् तव ॥ न पतिस्त्वं पुरञ्जन्या रुद्धो नवमुखे यया ॥ ६० ॥ माया ह्येषा मया सृष्टा यत् पुमांसं स्त्रियं सतीम् ॥ मन्यसे नोभयं यद् वै हंसौ पश्यावयोर्गतिम् ॥ ६१ ॥

मायाकार्यभूता बुद्धिरेवाधीशा यस्येति स्त्रीधवमित्यस्य व्याख्या । स पुमानत्र शरीरलक्षणे पुरे प्रविष्टो बुद्धीन्द्रियादावहन्ताममताध्यासेनात्मानं नावबुद्ध्यते न जानाति॥५८॥ तस्मिन्निति ॥ हे प्रभो तस्मिन् शरीरलक्षणे पुरे त्वं प्रविष्टः रामया बुद्धिलक्षणया स्त्रिया स्पृष्टो मोहितस्तया रममाणस्तस्यां कृतात्माध्यासः अत एव न विद्यते श्रुते स्वरूपभूते ब्रह्मत्वे श्रुतस्य ममेश्वरस्य वा स्मृतिर्यस्य सः तत्सङ्गात् राजसबुद्धिसङ्गादीदृशीं तवायोग्यां पापीयसीं दुःखबहुलां दशां प्राप्तोऽसि ॥ ५९ ॥ नेति ॥ त्वं विदर्भदुहिता नासि अयं वीरः मलयध्वजस्तव सुहृत् पतिर्न । यया नवद्वारे पुरे त्वं रुद्धस्तस्याः पुरञ्जन्याः पतिरपि त्वं न भवसि ॥ ६० ॥ मायेति ॥ यत्पूर्वजन्मनि त्वमात्मानं पुमांसममन्यथास्तथेदानीं सतीं श्रेष्ठां स्त्रियं यन्मन्यसे सैषा माया मया सृष्टा यत उभयमपि वस्तुतो । नास्ति स्त्रीपुरुषशरीराध्यासेनैव जीवे तथाव्यवहारात् । यत् यस्मात् वै निश्चयेन आवां हंसौ शुद्धौ अतः आवयोर्वक्ष्यमाणां गतिं स्वरूपं पश्य ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमिति ॥ भोः सखे अहमेव भवान् न चान्यः इति विचक्ष्व त्वमेवाहमिति विचक्ष्व । व्यतिहारोपदेशः प्राग्वच्छोकादिनिवृत्तिपारोक्ष्य निवृत्त्यभिप्रायः । यतो वस्तुभेदो नास्त्यतः कवयो विवेकिनो नौ आवयोर्मनाक् ईषदपि च्छिद्रमन्तरं भेदं जातु कदाचिदपि न पश्यन्ति ॥ ६२ ॥ यथेति ॥ यथा पुरुषः एकमेवात्मानं स्वदेहमादर्शचक्षुषोः आदर्शे निर्मले निर्मलं महान्तं स्थिरं तेजस्विनं परस्य चक्षुषि च ततो विपरीतं समलं तुच्छं निस्तेजसमेवं द्विधाभूतं द्विप्रकारकमवेक्षेत पश्यति तथैवावयोरपि विद्याकृतं सर्वज्ञत्वादि अविद्याकृतं चाज्ञत्वादि अन्तरं भेदः न स्वरूपेण वस्तुतोऽभेदोऽस्ति ॥ ६३ ॥ अथ नारदवाक्यम्—एवमिति ॥ एवमुक्तप्रकारेण यः पूर्वं पुरञ्जनत्वेनेदानीं वैदर्भीत्वेन चोक्तः सः मानसो मानससरोनिवासी हंसो हंसेनाविज्ञातनाम्ना सख्या प्रतिबोधितः अतः स्वस्थः पतिवियोगजनितं शोकं विहाय सावधानचित्तः संस्तद्व्यभिचारेण तेन सख्या सह विभागेन नष्टामात्मनः स्मृतिं स्वरूपज्ञानं पुनरपि आप प्राप्तवान् । पक्षे स मानसो हंसः क्षेत्रज्ञः हंसेन परमात्मना प्रतिबोधितः सन् स्वस्थः आत्मनि स्थितः

अहं भवान्न चान्यस्त्वं त्वमेवाऽहं विचक्ष्व भोः ॥ न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥६२॥ यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ॥ द्विधाभूतमवेक्षेत तथैवान्तरमावयोः ॥ ६३ ॥ एवं स मानसो हंसो हंसेन प्रतिबोधितः ॥ स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ॥६४॥ बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम् ॥ यत् परोक्षप्रियो देवो भगवान् विश्वभावनः ॥६५॥ इति श्रीभागवते चतुर्थस्कन्धे पुरञ्जनोपाख्याने स्त्रीविचिन्तया स्त्रीत्वं प्राप्तस्य पुरञ्जनस्य दैवेन कदाचिन्मुक्तिवर्णनं नाम अष्टाविंशतितमोऽध्यायः ॥ २८ ॥ प्राचीनबर्हिरुवाच ॥ ॥ भगवं-स्ते वचोऽस्माभिर्न सम्यगवगम्यते ॥ कवयस्तद्विजानन्ति न वयं कर्ममोहिताः ॥ १ ॥ नारद उवाच ॥ ॥ पुरुषं पुरञ्जनं विद्याद् यद्व्यनक्त्या-त्मनः पुरम् ॥ एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥ २ ॥

संश्चिरं ध्यात्वा तद्व्यभिचारेणेश्वरवियोगेन विषयाभिलाषबुद्ध्या नष्टां स्मृतिं ब्रह्माहमिति ज्ञानं पुनः आप ॥ ६४ ॥ बर्हिष्मन्निति ॥ हे बर्हिष्मन् पारोक्ष्येण राजकथामिषेण एतत् अध्यात्मम् आत्मतत्वं प्रदर्शितम् अतः कथामात्रमेतदिति धियं मा कृथाः । यत् यतः देवो विश्वभावनः भगवान् परोक्षकथनं प्रियं यस्य तादृशोऽस्ति साक्षादात्म-ज्ञानकथाकथने तव चेतसि कथा नायातीति भावः ॥ ६५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्यस्याष्टाविंशे व्यधादिमाम् ॥ २८ ॥ ऊनत्रिंशे परोक्षार्थस्योक्तस्य विवृतिः क्रमात् ॥ ईशसङ्गान्मुक्तिरत्र श्लोकाः सार्द्धा रसाँर्द्रयः ॥ षँड्डुवाचेत्यथो सौँद्धश्चतुर्नन्दा अनुष्टुभः ॥२९॥ भगवन्निति ॥ हे भगवन् ते तव वचोऽस्माभिः सम्यग् नावगम्यते यतः कवयो विवेकिनः तद्विजानन्ति । वयं तु कर्मणा मोहिता आत्मविद्यायामकृताभ्यासाः अतः न विजानीमः ॥ १ ॥ पुरुषमिति ॥ पुरुषं जीवं पुरञ्जनं विद्यात् जानीयात् । यद्यतः स आत्मनः स्वस्य एकद्वित्रिचतुष्पादं बहुपादम् अपादकं च पुरं शरीरं व्यनक्ति स्वकर्मणा प्रकटयति जनयति तथा च मूलानुसारेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरम् अनक्ति इति विग्रहे रान्तपुरशब्दे दीर्घाभाव आर्षः । अदन्तपुरशब्दो शकन्ध्वादिः । पुरं जनयतीति विग्रहे मुमार्षः ॥ २ ॥ य इति ॥ यश्चाविज्ञातशब्देनाहृतः व्याहृतः कथितस्तस्य पुरञ्जनस्य सखा स ईश्वर इति विद्यात् । यत् यस्मात् पुंभिः कर्तृभिर्नामभिः क्रियाभिर्गुणैश्च न ज्ञायते ॥ ३ ॥ यदेति ॥ यदा पुरुषो जीवः कार्त्स्न्येन साकल्येन प्रकृतेर्गुणान् जिघृक्षन् ग्रहीतुमिच्छन् जातस्तदा तत्र तेषु एकद्विपादादिषु शरीरेषु मध्ये नवेन्द्रियच्छिद्राणि द्वाराणि यस्मिंस्तत् द्वौ हस्तौ अङ्घ्री च यस्मिंस्तन्मनुष्यशरीरं साधु सर्वविषयभोगौपयिकमित्यमनुत ॥ ४ ॥ बुद्धिमिति ॥ प्रमदां तु बुद्धिमविद्यां विद्यात् । देहेन्द्रियादिषु यत्कृतं यया बुद्ध्या कृतं ममाहमिति भवति यां बुद्धिमधिष्ठाय आश्रित्य पुरस्कृत्यास्मिन्देहे पुमान् जीवोऽक्ष भिरिन्द्रियैर्गुणान् रूपरसादीन् विषयान् भुङ्क्ते । अक्षभिरित्यत्र "छन्दस्यपि दृश्यते" इत्यनजादावप्यनङ् ॥५॥ सखाय इति॥इन्द्रियगणा दश सखायो ज्ञेयाः । यत्कृतं यैरिन्द्रियैर्जनितं ज्ञानं कर्म च भवति । सख्यस्तद्वृत्तयस्तेषामुभयविधेन्द्रियाणां वृत्तयो ज्ञेयाः । प्राणापानादिभेदेन पञ्च

योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः ॥ यन्न विज्ञायते पुंभिर्नामभिर्वा क्रियागुणैः ॥ ३ ॥ यदा जिघृक्षुः पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् ॥ नवद्वारं द्विहस्ताङ्घ्रि तत्रामनुत साध्विति ॥ ४ ॥ बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतम् ॥ यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽक्षभिर्गुणान् ॥ ५ ॥ सखाय इन्द्रियगणा ज्ञानं कर्म च यत्कृतम्॥ सख्यस्तद्वृत्तयः प्राणः पञ्चवृत्तिर्यथोरगः ॥ ६ ॥ बृहद्बलं मनो विद्यादुभयेन्द्रियनायकम् ॥ पञ्चालाः पञ्च विषया यन्मध्ये नवखं पुरम् ॥ ७ ॥ अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति ॥ द्वे द्वे द्वारौ बहिर्याति यस्तदिन्द्रियसंयुतः ॥ ८ ॥ अक्षिणी नासिके आस्यमिति पञ्च पुरः कृताः ॥ दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ॥ ९ ॥ पश्चिमे इत्यधोद्वारौ गुदं शिश्नमिहोच्यते ॥ १० ॥ खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते ॥ रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥ ११ ॥

वृत्तयो यस्य स प्राणः पञ्चशिरा उरग इव भवतीति स एव पुरपालकः पञ्चशिरा नागो ज्ञेयः ॥ ६ ॥ बृहदिति ॥ एकादश महाभटा इत्यनेनैकादशो महाभटो येष्वित्यत्रोभयेन्द्रियनायकत्वेन बृहद्बलं महाबलं मनो विद्यात् । पञ्चालशब्देन कथिता देशविशेषाः रूपरसादयः पञ्च ज्ञानेन्द्रियविषया ज्ञेयाः । यत् येषामिन्द्रियाणां मध्ये नव खानि द्वाराणि यस्मिंस्तथाविधं पुरं शरीरं भवति ॥ ७ ॥ अक्षिणी इति ॥ अक्षिणी नासिके कर्णाविति द्वे द्वे द्वारावेकत्र निर्मिते मुखं शिश्नं गुदश्च पृथगिति तत्र यस्तत्तदिन्द्रियसंयुतो जीवः स तैरक्ष्यादिच्छिद्रैर्बहिर्विषये देशे याति ॥ ८ ॥ अक्षिणी इति ॥ अक्षिणी नासिके आस्यं इति पञ्च पुरः प्राङ्मुखस्य पुरञ्जनपुरस्य पूर्वभागे शरीरस्याग्रभागे कृताः दक्षिणः कर्णो दक्षिणा द्वाः स्मृता कथिता तथा उत्तरः कर्णः उतरा द्वाः स्मृता॥९॥पश्चिम इति अर्द्धम्॥ये द्वारौ पश्चिमे इत्युक्ते ते इहाधो गुदं शिश्नं चोच्यते ॥१०॥ खद्योतेति ॥ ये च खद्योताविर्मुखी प्रागेकत्र निर्मिते द्वारावुक्ते ते अत्र शरीरे नेत्रे ज्ञेये । यत्तु विभ्राजितं जनपदमुक्तं तद्रूपं ज्ञेयम् । यो द्युमान्नाम सखा उक्तस्तच्चक्षुरिन्द्रियम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्सखः पुरञ्जनस्तदीश्वरः जीवो ज्ञेयः । ताभ्यां विभ्राजितं यातीत्युक्तम् तत्ताभ्यां नेत्राभ्यां रूपं विचष्टे पश्यति ॥ ११ ॥ नलिनीति ॥ ये नलिनालिनीति द्वे द्वारावेकत्रो-
क्ते ते नासे नासिकाच्छिद्रे ज्ञेये । यः सौरभदेश उक्तः स गन्ध उच्यते । अवधूतः प्रोक्तोयः सः घ्राणः इन्द्रियं ज्ञेयम् । अवधूनोत्यवधूतो वायुस्तदात्मकेनोच्छ्वासेन सहैक-
स्थानत्वात् मुख्या द्वाः आस्यं मुखं ज्ञेयम् । रसज्ञविपणान्वित इत्यत्र विपणो वागिन्द्रियमिति ज्ञेयम् । रसविच्छब्दोक्तरसज्ञशब्देन रसः रसनेन्द्रियं ज्ञेयम् । अत्र रसज्ञ इति
पूर्वत्रोक्तस्य रसविदित्यस्यानुवादः । रस इति तु व्याख्या । एवमग्रेप्यनुवादव्याख्ये ज्ञेये । नवाक्षरैकपादोऽयमनुष्टुप्भेदः इति केऽप्याहुः ॥ १२ ॥ आपण इति ॥ आपणो
देशोऽत्र व्यवहारो वाग्व्यापारो भाषणं ज्ञेयम् । बहूदनदेशोऽत्र चित्रं नानाविधमन्धः अन्नं ज्ञेयम् । पितृहूर्नाम दक्षिणस्यां द्वाः इति दक्षिणः कर्णो ज्ञेयः । उत्तरदिशि देवहूर्द्वा
इत्येनेनोत्तरः कर्णः स्मृतः कथितः ॥ १३ ॥ प्रवृत्तमिति ॥ दक्षिणपञ्चालं यातीत्यत्र पञ्चालसंज्ञितं प्रवृत्तं शास्त्रं कर्मकाण्डात्मकं ज्ञेयम् । उत्तरपञ्चालं यातीत्यत्रापि च
पञ्चालसंज्ञितं निवृत्तं शास्त्रमुत्तरकाण्डात्मकं ज्ञेयम् । याति श्रुतधरान्वित इत्यत्र श्रुतधरशब्दितं श्रोत्रेन्द्रियं ज्ञेयम् । यतः प्रवृत्तं शास्त्रं श्रुत्वा तदुक्तं कर्मानुष्ठाय पितृभिराहूतः

नलिनी नालिनी नासे गन्धः सौरभ उच्यते ॥ घ्राणोऽवधूतो मुख्याऽऽस्यं विपणो वाग्रसविद्रसः ॥ १२ ॥ आपणो व्यवहारोऽत्र चि-
त्रमन्धो बहूदनम् ॥ पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥ १३ ॥ प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चालसंज्ञितम् ॥ पितृयानं देवयानं
श्रोत्राच्छ्रुतधराद्व्रजेत् ॥ १४ ॥ आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः ॥ उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते ॥ १५ ॥
वैशसं नरकं पायुर्लुब्धकोऽन्धौ तु मे शृणु ॥ हस्त पादौ पुमांस्ताभ्यां युक्तो याति करोति च ॥ १६ ॥ अन्तःपुरं च हृदयं विषू-
चिर्मन उच्यते ॥ तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः ॥ १७ ॥

पितृयानं व्रजति निवृत्तं च शास्त्रं श्रुत्वा तदुक्तोपासनाद्यनुष्ठाय देवैराहूतो देवयानं च व्रजतीति परस्परया श्रुतधराख्यात् श्रोत्रादेव निर्मितात्पुमान् व्रजेत् व्रजतीत्यर्थः ॥ १४ ॥
आसुरीति ॥ अर्वाक् नीचैः आसुरी द्वाः इति मेढ्रं ज्ञेयम् । दुर्मदेन ग्रामकं नाम विषयं यातीत्यत्र ग्रामकशब्दोक्ताग्रामिणां रतिर्व्यवायः स्त्रीसङ्गो ज्ञेयः । दुर्मदेन समन्वित इति
दुर्मदशब्देन उपस्थः प्रोक्तः । निर्ऋतिशब्देन गुद उच्यते ॥ १५ ॥ वैशसमिति ॥ वैशसं यातीति नरकं यातीति ज्ञेयम् । लुब्धकेन समन्वित इति लुब्धकः पायुर्ज्ञेयः । अन्धौ
द्वारावुक्तौ तौ शृणु । तौ हस्तपादावन्धौ ज्ञेयौ । ताभ्यां युक्तः याति करोति च । तत्र पादेन युक्तः पुमान् याति चलति हस्तेन युक्तश्च कर्म करोति ॥ १६ ॥ अन्तःपुरमिति ॥
स यर्ह्यन्तःपुरगत इत्यत्रान्तःपुरं च हृदयं ज्ञेयम् । विषूचीनसमन्वित इति विषूचीनपदस्यानुवादो विषूचिरिति आर्षः । तदर्थः मन उच्यत इति तत्र तद्गुणैर्मनोगुणैः मोहा-
दिकं प्राप्नोति । तमसा मोहं सत्त्वेन प्रसादं रजसा च हर्षमिति विभागः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महिषी यद्यदीहेतेत्यादेरध्यायसमाप्तिपर्यन्तस्यार्थं सङ्गृह्याह—यथायथेति॥यथा यथा बुद्धिः स्वप्ने विक्रियते जाग्रति विकरोति वा इन्द्रियाणि परिणमयति तदा तस्या गुणैरक्तो लिप्तः आत्मा तथा तथा वृत्तीर्दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैव सः बलात् तया बुद्ध्यैव हेतुकर्त्र्या अनुकार्यते न हि बुद्ध्यादिव्यतिरेकेण केवल आत्मनि तस्मिन्कश्चित् विकारोऽस्ति॥१८॥देह इति ॥ रथं पञ्चाश्वमित्ये तद्व्याचष्टे रथ इति॥ स्वप्ने देहो रथो ज्ञेयः। पञ्च ज्ञानेन्द्रियाण्यश्वा यस्मिन्सः। आशुगमित्येतद्व्याचष्टे संवत्सरस्येवाप्रतिहतो रयो वेगः एव गतिः। यद्वा। तादृशो वेगः प्रतीतितो यस्य स तथा वस्तुतस्त्वगतिः स्वप्नशरीरादेर्बुद्बुदावेव विवर्त्तत्वेन देशान्तरेगत्यभावात् वयोगतिरिति पाठे संवत्सरश्च तत्कृतं वयश्च गतिर्यस्य द्वीषमित्यस्य व्याख्या नारदेन न कृता। द्वे पुण्यपापात्मके कर्मणी चक्रे यस्य सः। त्रिवेणुमिति व्याचष्टे त्रयो गुणा एव ध्वजा यस्य सः पञ्च असवः प्राणा बन्धुराणि बन्धनानि यस्य सः ॥१९॥ मनोरश्मिरिति ॥ मनो रश्मिः प्रग्रहो यस्य सः बुद्धिरेव सूतो यस्य सः हृत् हृदयमेव नीडं रथिन उपवेशस्थानं यस्मिन् सः। द्वन्द्वौ शो-

यथा यथा विक्रियते गुणाक्तो विकरोति वा ॥ तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते॥१८॥ देहो रथस्त्विन्द्रियाश्वः संवत्सररयो गतिः ॥ द्विकर्मचक्रस्त्रिगुणध्वजः पञ्चासुबन्धुरः ॥१९॥ मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वन्द्वकूबरः ॥ पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥ २० ॥ आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति ॥ एकादशेन्द्रियचमूः पञ्चसूनाविनोदकृत् ॥२१॥ संवत्सरश्चण्डवेगः कालो येनोपलक्षितः ॥ तस्याहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः ॥ हरन्त्यायुः परिक्रान्त्या षष्ट्युत्तरशतत्रयम् ॥ २२॥ कालकन्या जरा साक्षाल्लोकस्तां नाभिनन्दति ॥ स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥ २३ ॥ आधयो व्याधयस्तस्य सैनिका यवनाश्चराः ॥ भूतोपसर्गाशुरयः प्रज्वारो द्विविधोज्वरः ॥ २४ ॥

कमोहौ कूबरौ युगबन्धनस्थाने यस्य सः। पञ्चप्रहरणमिति व्याचष्टे पञ्चेन्द्रियार्थाः विषयाः शब्दादयः प्रक्षिप्यन्तेऽस्मिन्निति तथा सः सप्त धातवस्त्वगादयो वरूथा रक्षार्थमावरणानि यस्य सः ॥ २०॥ पञ्चविक्रममिति व्याचष्टे—आकूतिरिति ॥ आकूतिः कर्मेन्द्रियपञ्चकं बाह्यो विक्रमो ज्ञेयः। चचार मृगयामिति व्याचष्टे । तत्र एकादशेन्द्रियाण्येव चमूर्यस्य सः कवभाव आर्षः। पञ्चभिरिन्द्रियैः सूनाविनोदमिवान्यायेन विषयभोगं करोतीति पञ्चसूनाविनोदकृत् स जीवः मृगतृष्णावत्स्वप्ने मिथ्याभूतानेव विषयान्प्रधावति। मृगयां चचारेत्यस्येयं व्याख्या॥ २१ ॥ संवत्सर इति सार्द्धम् ॥ येन काल उपलक्षितो भवति स संवत्सरश्चण्डवेग इत्युक्तो ज्ञेयः । तस्य संवत्सरस्याहानि इह कथापक्षे गन्धर्वा इति रात्रयश्च गन्धर्व्य इति स्मृताः कथिताः। ते च सर्वे समुदिताः षष्ट्युत्तरशतत्रयं परिक्रान्त्या परिभ्रमणेन पुरुषस्यायुर्हरन्ति॥ २२॥ कालेति ॥ कालकन्या योक्ता सा जरा ज्ञेया। लोकः प्राणिवर्गस्तां साक्षान्नाभिनन्दति नाङ्गीकरोत्यतःयो यवनेश्वर इत्युक्तः स मृत्युर्लोकस्य क्षयाय नाशाय तां स्वसारं स्वसृत्वेन जगृहे ॥२३॥ आधय इति॥ ये च तस्य यवनेश्वरस्य चरा संचारिणः आज्ञाकारिणः सैनिकाः यवनाः प्रोक्तास्त आधयो मनोव्यथाः व्याधयो देहव्यथाश्च ज्ञेयाः। भूतकृताः उपसर्गकृताश्च अरयो ज्ञेयाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेन चारिभिरुपरुद्ध इत्यरिपदं व्याख्यातम् । पाठान्तरे भूतानामुपसर्गे पीडायामाशु शीघ्रो मृत्युहेतुः रयो वेगोऽस्य सः भूतसम्बन्ध्युपसर्गाः पवनजलकुपथ्यादिकृताः श्वास-तन्द्रादयः आशुरयस्येति वा शीतोष्णरूपभेदेन द्विविधो ज्वरः प्रज्वार इत्युक्तो ज्ञेयः ॥२४॥ कथेयं वैराग्यार्थेत्याह—एवमिति द्वयम् ॥ एवं कृपणया बुद्ध्येत्यन्तेनोक्तप्रकारेण बहुविधैरनन्तप्रकारैः देवभूतात्मसंभवैः आधिदैविकाधिभौतिकाध्यात्मिकभेदभिन्नैर्दुःखैः क्लिश्यमानः तमसा अज्ञानेनावृतः तृतीयालुगार्षः । देही जीवः प्राणधर्मान् अशनापि-पासादीन् इन्द्रियधर्मान् अन्धत्वादीन् मनोधर्मान् कामादीन् स्वयं निर्गुणोऽप्यात्मन्यध्यस्यारोप्य देहादौ ममाहमिति कृत्वा कामलवान् विषयसुखलेशान्ध्यायन्मम स्युरिति चिन्तयन् तद्धेतुकर्मकृत् तदर्थं कर्माणि कुर्वन् देहे शतं वर्षाणि शेते ॥२५॥२६॥ यदेति ॥ पुरुषो जीवो वस्तुतः स्वदृक् स्वप्रकाशस्वभावोऽपि यदा त्वात्मानमविज्ञाय तथा परमुत्कृष्टं गुरुं ज्ञानप्रकाशकं भगवन्तं चाविज्ञाय प्रकृतेर्गुणेषु गुणकार्यभूतेषु विषयेषु विषज्जेत आसक्तो भवति ॥ २७ ॥ गुणेति ॥ तदा स एवावशः देहादिपरतन्त्रः सन्

एवं बहुविधैर्दुःखैर्देवभूतात्मसंभवैः ॥ क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः ॥ २५ ॥ प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः ॥
शेते कामलवान्ध्यायन्ममाहमिति कर्मकृत् ॥ २६ ॥ यदात्मानमविज्ञाय भगवन्तं परं गुरुम् ॥ पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक्
॥ २७ ॥ गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः ॥ शुक्लं कृष्णं लोहितं वा यथा कर्माभिजायते ॥ २८ ॥ शुक्लात्प्रकाशभूयिष्ठाँल्लो-
कानाप्नोति कर्हिचित् ॥ दुःखोदर्कान्क्रियायासांस्तमः शोकोत्कटान्कचित् ॥ २९ ॥ क्वचित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः ॥
देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः॥३०॥क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहम् ॥ चरन्विन्दति यद्दिष्टं दण्डमोदनमेव वा॥३१॥
तथा कामाशयो जीव उच्चावचपथा भ्रमन् ॥ उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम् ॥ ३२ ॥

शुक्लं सात्विकं पुण्यजनकं कृष्णं तामसं पापजनकं लोहितं राजसं मिश्रमुभयजनकमेवं त्रिविधानि कर्माणि कुरुते । ततश्च यथाकर्म तत्तत्कर्मानुसारेण अभिजायते जन्म प्राप्नोति ॥२८॥शुक्लादिति॥शुक्लात्कर्मणः प्रकाशो भूयिष्ठो येषु तान्देवादिलोकान्कर्हिचिदाप्नोति तथा लोहितात्कर्मणः दुःखमुदर्कमुत्तरफलं येषु तान् क्रियया आयासो येषु तान् मनु-ष्यादिलोकान्कर्हिचिदाप्नोति तथा कृष्णात्कर्मणः तमोज्ञानं शोकश्चोत्कटो येषु तान् तिर्यगादिलोकान् कर्हिचिदाप्नोति ॥ २९ ॥ क्वचिदिति ॥ एक एव अन्धा अज्ञानावृता धीर्यस्य स जीवः क्वचित्पुमान् भवति क्वचिच्च स्त्री भवति क्वचिन्नोभयं नपुंसको भवति क्वचिद्देवो भवति क्वचिन्मनुष्यो भवति क्वचिद्वा तिर्यग्भवति । एवं यथाकर्मगुणं कर्मगुणावनतिक्रम्यैव भवो जन्म भवति॥३०॥क्षुदिति द्वयम्॥क्षुत्परीतः क्षुधाव्याप्तः अत एव दीनः सारमेयः श्वा यथा गृहं गृहं चरन् दण्डं दण्डेन ताडनमोदनमन्नं वा यद्दिष्टं स्वप्रारब्धानुसारेणेश्वरेण निर्मितं तदेव विन्दति लभते न तु स्वाभिलषितम्॥३१॥तथेति॥ तथा काम आशयेऽन्तःकरणे यस्य स जीवोऽपि उच्चावचपथा विहितप्रतिषेधलक्षणे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोच्चनीचमार्गेण समासान्ताभाव आर्षः । उपरि देवलोके अधो नरकादिलोके मध्ये मनुष्यादिलोके वा भ्रमन् गच्छन् प्रियाप्रियं सुखमप्रियं दुःखं वा यद्दिष्टं भाग्यं तदेव याति प्राप्नोति ॥ ३२ ॥ दुखेष्विति ॥ यद्यपि तस्य तस्य दुःखस्य प्रतिक्रिया निवारणोपायः स्यात् शास्त्रादौ प्रदर्शितोऽस्ति तथापि दैवभूतात्महेतुषु आधिदैविकादिषु दुःखेषु मध्य एकतरेणापि दुःखेन जीवस्य न व्यवच्छेदः वियोगो नास्ति । दुःखप्राप्तेः पूर्वं दुःखस्य विज्ञातत्वेन तदुपायसंभवः । प्राप्तिकाले च तन्निवृत्त्युपायस्य अपि दुःखरूपत्वात् । यद्वा । त्रिविधेष्वपि दुःखेषु मध्ये एकतरेणापि न व्यवच्छेदः । तत्तद्दुःखस्य प्रतिक्रियापि स्याच्चेत्तदपि न तासामपि दुःखरूपत्वात् ॥ ३३ ॥ यथेति ॥ हि प्रसिद्धमेतत् । यथा पुरुषो गुरुं भारं शिरसा उद्वहन् यदा श्रान्तो भवति शिरःपीडया तदा स तं भारं स्कन्धेन आधत्ते तथापि भारस्यानपगतत्वाच्छ्राम्यत्येव । तथा सर्वाः प्रतिक्रियाः सर्वे दुःखनिवृत्त्युपायाः एकान्ततो दुःखनिवर्त्तका न भवन्ति ॥३४॥ नेति ॥ हे अनघ केवलं ज्ञानरहितं कर्म कर्मणां दुःखहेतु सर्वदुरितानामेकान्ततः अत्यन्तं सवासनस्य प्रतीकारो निवर्तकं न भवति।हि यतः दुरितलक्षणं तन्निवर्तकं चोभयमपि कर्म अविद्यया उपसृतं व्याप्तं यथा स्वप्ने दृष्टस्स्वप्न इति तथाहि यथा स्वप्ने पुत्रो मृत इति दुःखप्राप्तिः तत्स्व-

दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु ॥ जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ॥ ३३ ॥ यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ॥ तं स्कन्धेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ॥ ३४ ॥ नैकान्ततः प्रतीकारः कर्मणां कर्म केवलम् ॥ द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥ ३५ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ मनसा लिङ्गरूपेण स्वप्ने विचरतो यथा ॥ ३६ ॥ अथात्मनोऽर्थभूतस्य यतोऽनर्थपरम्परा ॥ संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥ ३७ ॥

प्नमध्य एव पुनः स्वप्ने पुत्रो जीवतीति दुःखशमः तदैव पुनस्तं पुत्रं सर्पो दशतीति दुःखप्राप्तिरिति प्रबोधं विना स्वाप्निकं दुःखं न निवर्त्तते तथा अविद्यया देहान्तःकरणाद्यध्यासलक्षणयोपसृतम् अतोऽविद्यादशायां मोहेन कर्माणि विघ्नस्य पुनर्दुराचारस्य च संभवान्न सर्वथा दुःखनिवृत्तिः ॥ ३५ ॥ ननु तर्ह्यविद्याविलसितत्वेन संसृतिहेतोर्देहादेरप्यसत्त्वात्किं तन्निवर्त्तनप्रयासेन तत्राह- अर्थ इति ॥ मनसा लिङ्गरूपेणात्मत्वेनाध्यस्तेन दुःखहेतुना सह स्वप्ने विचरतः पुरुषस्य यथा तदा दृष्टव्याघ्रसर्पचौरादिपदार्थे अविद्यमानेऽपि जागरणेन निद्रादोषापगममन्तरेणोपायान्तरेण व्याघ्रादिदर्शनजं दुःखं न निवर्त्तते तथा जागरणेऽपि दुःखप्रदविषयस्य अविद्याकार्यत्वादविद्यानिवृत्तिं विना संसृतिः न निवर्त्तते ॥ ३६ ॥ अर्थेति ॥ अथ तस्मात् अर्थभूतस्य सर्वपुरुषार्थस्वरूपस्याध्यात्मनो जीवस्य यतोऽज्ञानादनर्थपरम्पराजन्ममरणादिदुःखसन्ततिलक्षणा संसृतिर्भवति तत्तस्य।ज्ञानस्य व्यवच्छेदो विनाशो गुरौ परमया भक्त्यैव भवति नान्यथा ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासुदेव इति ॥ भगवति वासुदेवे समाहितः सम्यक्कृतः भक्तियोगः सध्रीचीनेन प्रकारेण अनायासेन वैराग्यं ज्ञानं च जनयिष्यति ॥ ३८ ॥ स इति ॥ हे राजर्षे नित्यदा निरन्तरं श्रद्दधानस्य श्रद्धावतः भगवत्कथाः शृण्वतः अधीयतः भगवन्नामादिकं स्मरतः "इक् स्मरणे"। यद्वा। सानन्दं पठतः "इङ् धार्योः" इति शता। जनस्य अच्युतकथाश्रयः भगवत्कथादिभिः सम्पादितो भक्तियोगः अचिरात् शीघ्रमेव स्यात्। पुनरुक्तिः स्यादेवेति पुनरवधारणदार्ढ्याय ॥ ३९ ॥ यत्रेति ॥ हे राजन् यत्र समाजे साधवः सदाचाराः विशदाशयाः शुद्धचेतसः भगवद्गुणानामनुकथनं भूयःभूयःकथनं श्रवणं च तत्र व्यग्रं सत्वरं चेतो येषां ते भागवताः स्युः ॥४०॥तस्मिन्निति॥ हे नृप तस्मिन्समाजे महद्भिर्भागवतैर्मुखरिताः मुखं रान्ति गृह्णन्ति मुखराः कृता इति मुखरिताः कीर्तिता मुखराशब्दात्तत्करोतीति णिजन्तात् क्तः। मधुभिदो भगवतश्चरितमेव पीयूषममृतं तदेव शिष्यत इति शेषो यासु ताः कथालक्षणाः सरितो नद्यः परितः वक्तृबहुत्वात्सर्वतः स्रवन्ति वहन्ति। ताः सरितो ये अवितृषः अलं बुद्धिरहिताः सन्तो गाढैः सावधानैः कर्णैः

वासुदेवे भगवति भक्तियोगः समाहितः ॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥ ३८ ॥ सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः ॥ शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ॥ ३९ ॥ यत्र भागवता राजन्साधवो विशदाशयाः ॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥४०॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवन्ति ॥ ता ये पिबन्त्यवितृषो नृप गाढकर्णैस्तान्न स्पृशन्त्यशनतृड्भयशोकमोहाः ॥ ४१ ॥ एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः ॥ न करोति हरेर्नूनं कथामृतनिधौ रतिम् ॥ ४२ ॥ प्रजापतिपतिः साक्षाद्भगवान्गिरिशो मनुः ॥ दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ॥ ४३ ॥ मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठ इत्येते मदन्ता ब्रह्मवादिनः ॥ ४४ ॥ अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः ॥ पश्यन्तोऽपि न पश्यन्ति पश्यन्तं परमेश्वरम् ॥ ४५ ॥ शब्दब्रह्मणि दुष्पारे चरन्त उरुविस्तरे ॥ मन्त्रलिङ्गैर्व्यवच्छिन्नं भजन्तो न विदुः परम् ॥ ४६ ॥

पिबन्ति शृण्वन्ति तान् वा अशनतृट्भयशोकमोहाः न स्पृशन्ति न बाधन्ते। अशनशब्दे न क्षुल्लक्ष्यते। अशनतृड्भोजनेच्छा इति वा ॥ ४१ ॥ एतैरिति ॥ स्वभावजैः एतैः क्षुत्तृड्भयशोकमोहादिभिः नित्यमुपद्रुतोऽभिभूतो जीवलोकः नूनं निश्चितं हरेः कथारूपे अमृतनिधौ अमृतसमुद्रे रतिं प्रीतिं न करोति ॥ ४२ ॥ भगवदनुग्रहं विना न कथमपि ज्ञानसम्भव इत्याह—प्रजापतीति त्रयम् ॥ साक्षात् भगवान् प्रजापतीनां पतिर्ब्रह्मा तादृशो गिरिशश्च मनुः प्रजाध्यक्षाः दक्षादयः नैष्ठिकाः ऊर्द्ध्वरेतसः सनकादयः ॥ ४३ ॥ मरीचिप्रभृतयः वसिष्ठान्ताः इति मदन्ता अहं नारदोऽन्ते येषां त एते ब्रह्मवादिनः ॥ ४४ ॥ अन्ये च वाचस्पतयः अन्योपदेशाय वाचोयुक्तिकुशलाः तपोविद्यासमाधिभिः साधनैः पश्यन्तः दर्शनार्थं यतमाना अपि अद्यापि सृष्ट्यारम्भादद्यपर्यन्तमपि पश्यन्तमपि परमेश्वरं न पश्यन्ति न विदुः ॥ ४५ ॥ शब्देति ॥ दुष्पारे अर्थतः पारशून्ये उरुवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तरे ग्रन्थतोऽप्यतिविततते शब्दब्रह्मणि वेदाख्ये चरन्तोऽपि श्रमेण तदर्थं विचारयन्तोऽपि मन्त्रलिङ्गैर्मन्त्रप्रतिपादितैर्वज्रहस्तत्वादिरूपैः व्यवच्छिन्नं परिच्छिन्नमिन्द्रादिकमाग्रहेण भजन्तोऽपि तं परं परमेश्वरं तत्त्वतो न विदुः ॥ ४६ ॥ यदेति ॥ यदा यं पुरुषम् आत्मभावितः मनसि चिन्तितः भगवान् अनुगृह्णाति तदा स भगवत्तत्त्वं ज्ञात्वा लोके व्यवहारे वेदे च कर्माणि परिनिष्ठिताम् आसक्तां मतिं जहाति ॥ ४७ ॥ तस्मादिति ॥ हे बर्हिष्मन् तस्मात् अज्ञानात् अर्थकाशिषु परफलहेतुत्वेन प्रकाशमानेषु स्वर्गादिसुखसाधनत्वश्रवणेन श्रोत्रस्पर्शिषु कर्णप्रियेषु वस्तुतस्तु न स्पृष्टं वस्तु परमतत्त्वं यैस्तेषु कर्मसु अर्थदृष्टिं परमार्थसाधनबुद्धिं मा कृथाः ॥ ४८ ॥ स्वमिति ॥ ये तु धूम्रा रागाद्याच्छन्ना धीर्येषां ते ये वेदं सकर्मकं स्वर्गादिसाधनकर्मबोधकमाहुस्ते अतद्विदः वेदार्थज्ञा न भवन्ति यतः ते वै यत्र जनार्दनो देवोऽस्ति तं स्वलोकं स्वरूपभूतमात्मतत्त्वं न विदुः ॥४९॥ आस्तीर्येति ॥ प्रागग्रैर्दर्भैः कुशैः कार्त्स्न्येन साकल्येन क्षितिमण्डलमास्तीर्य आच्छाद्य बृहद्वधात् बहुपशुवधात् मानी महायज्वाहमित्यभिमानी अत एव स्तब्धः अविनी-

यदा यमनुगृह्णाति भगवानात्मभावितः ॥ स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥ ४७ ॥ तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु ॥ माऽर्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४८ ॥ स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः ॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥ ४९ ॥ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमण्डलम् ॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परम् ॥ ५० ॥ तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥ ५१ ॥ हरिर्देहभृतामात्मा स्वयंप्रकृतिरीश्वरः ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ ५२ ॥ स वै प्रियतमश्चात्मा यतो न भयमण्वपि ॥ इति वेद स वै विद्वान्यो विद्वान्स गुरुर्हरिः ॥ ५३ ॥ नारद उवाच ॥ प्रश्न एव हि संछिन्नो भवतः पुरुषर्षभ ॥ अत्र मे वदतो गुह्यं निशामय सुनिश्चितम् ॥ ५४ ॥

तस्त्वं यत् कर्म यच्च परं तत्फलं विद्यालक्षणं तदुभयमपि नावैषि न वेत्सि ॥ ५० ॥ तदित्यर्द्धम् ॥ यतः हरिं तोषयतीति हरितोषं यत्तदेव कर्म यया तत् तस्मिन् हरौ मतिर्भवति सैव विद्या ॥ ५१ ॥ हरिरिति ॥ हरिर्देहभृतां प्राणिनामात्मा स्वरूपं स्वयमेव सर्वेषां प्रकृतिः कारणम् ईश्वरः नियन्ता च अतः तस्य पादमूलमेवेह संसारे नृणां शरणमाश्रयः यतः पादाश्रयणात् क्षेमः कालादिभयनिवृत्तिर्भवति ॥ ५२ ॥ स वा इति ॥ यतो यत्र भगवति अण्वपि भयं न भवति यतः स वै स एव प्रियतमः इति हरिरित्यादिसार्द्धश्लोकोक्तमर्थं यो वेद स एव विद्वान् य एवं विद्वान् । स एव गुरुरुपदेशेन परोद्धारे समर्थः स्वयं तु स हरिरेव ॥ ५३ ॥ प्रश्न इति ॥ हे पुरुषर्षभ एवं हि भवतः प्रश्नः संछिन्नः दत्तोत्तरः अत्र तवोद्धारार्थं कर्तव्यनिर्द्धारणे सुनिश्चितं महद्भिर्निर्द्धारितं गुह्यं देवैर्गोपितमतो लोके अप्रसिद्धमुपायं वदतो मे वचनं निशामय शृणु ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतया कथयापि नातिनिर्विण्णं पुत्रागमनं प्रतीक्षमाणं नृपं दृष्ट्वा गृहान्निष्कासयितुं मृगरूपकेण महाभयं दर्शयति–क्षुद्रमिति ॥ क्षुद्रमल्पं यवसादि चरतीति क्षुद्रंचरं मुमार्षः । सुमनसां पुष्पाणां शरणे आश्रमे वाटिकायां मिथित्वा मिथो रहः कृत्वा " मिथोऽन्योन्यं रहस्यपि " इत्यमरः । स्त्रिया सह मिलित्वेत्यर्थः । मिथःशब्दात्तत्करोतीति णिजन्तात् क्त्वा मिथधातोर्वा । रक्तं तत्रैवासक्तं षडङ्घ्रयो भ्रमरास्तेषां गणस्य सामसु गीतेषु लुब्धः कर्णो यस्य तं परेषां मांसादिभिः स्वकीयानसूंस्तर्पयन्ति ते असुतृपस्तान्वृकानग्रे गच्छतो ज्ञानादविगणय्य अगणयित्वा यान्तं विचरन्तं पृष्ठे पृष्ठतो लुब्धकबाणेन भिन्नं भिन्नप्रायं मृगं मृगय अन्वेषय ॥ ५५ ॥ मृगरूपकोक्तमर्थं स्वयं व्याचष्टे–सुमन इति ॥ सुमनोभिः समानो धर्मः परिणामविरसत्वादिरूपो यासां तासां स्त्रीणां शरणे आश्रमे गृहे पुष्पमधुगन्धवत् क्षुद्रतममतितुच्छं काम्यकर्मणां विपाकजं फलरूपं जैह्वचोपस्थादिकामसुखलवं विचिन्वन्तमन्वेषयन्तं स्त्रीभिः सह मिथुनभूय तदभिनिवेशितमनसं तासु स्त्रीष्वेवाभिनिवेशितं मनो येन तं षडङ्घ्रिगणसामगीतवदतिमनो-

क्षुद्रंचरं सुमनसां शरणे मिथित्वा रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णम् ॥ अग्रे वृकानसुतृपोऽविगणय्य यान्तं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नम्
॥ ५५ ॥ दण्डकम् ॥ सुमनःसधर्मणां स्त्रीणां शरण आश्रमे पुष्पमधुगन्धवत्क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैह्वचौपस्थ्यादि विचिन्वन्तं मिथुनीभूय तदभिनिवेशितमनसं षडङ्घ्रिगणसामगीतवदतिमनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रान्तान्काललवविशेषानविगणय्य गृहेषु विहरन्तं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतान्तोऽन्तः शरेण यमिह पराविध्यति तमिममात्मानमहो राजन्भिन्नहृदयं द्रष्टुमर्हसि ॥ ५६ ॥ स त्वं विचक्ष्य मृगचेष्टितमात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते ॥
जह्यङ्गनाश्रममसत्तम यूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण ॥ ५७ ॥

हरेषु वनितापुत्रादिजनालापेष्वतितरामतिप्रलोभितः कर्णो यस्य तम् अग्रे वृकयूथवत् असुतृप आत्मनः आयुर्हरतः अहोरात्रान्तान् काललवविशेषान् अविगणय्य यान्तं गृहेषु विहरन्तं पृष्ठत एव परोक्षमनुप्रवृत्तः लुब्धकः कृतान्तो मृत्युर्यमन्तः अन्तःकरणे हृदये शरेण पराविध्यति दूरादेव वेद्धुमिच्छति । यद्वा । अन्तःशरेण अन्तर्नलिकायां गूढेन अलक्षितमारणव्यापारेणेत्यर्थः । तमिममात्मानं स्वमिह मृगकथायामहो राजन् भिन्नहृदयं मृतप्रायं द्रष्टुमर्हसीति अत्र मिथित्वेत्यस्य मिथुनीभूयेति रक्तमित्यस्याभिनिवेशितामिति असुतृप इत्यस्यायुर्हरत इति यान्तमित्यस्य विहरन्तमित्यर्थः ॥५६॥ स त्वमिति ॥ स त्वं मृगचेष्टितं विचक्ष्य कथितमृगवृत्तान्तेनात्मानं मृतप्रायं दृष्ट्वा आत्मनोऽन्तर्हृदि चित्तं नियच्छ । कर्णस्य श्रोत्रेन्द्रियस्य दूराच्छ्रवणमात्रादपि चित्तक्षोभकस्य धुनीं नदीमिव बहिर्वृत्तिं चित्ते नियच्छ । इन्द्रियान्तरनिरोधस्यापीदमुपलक्षणम् । असत्तमानां विषयासक्तानां यानि यूथानि तेषां गाथा वार्ता यस्मिंस्तदङ्गनाश्रमं स्त्रीप्रधानं गृहं जहि परित्यज्य हंसानां शुद्धानां जीवानां शरणमाश्रयं भगवन्तं प्रीणीहि प्रसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयैवं क्रमेण संसारदुःखाद्विरम निवृत्तो भव ॥ ५७ ॥ श्रुतमिति ॥ हे ब्रह्मन् भगवान् भवान् यदात्मतत्वमभाषत तन्मया श्रुतमन्वीक्षितं विचारितं च एतत् त्वदुक्तमात्मतत्त्वम् उपाध्यायाः ये मम कर्मोपदेष्टारः आचार्यास्ते न जानन्ति यदि विदुः जानन्ति तर्हि किन्न ब्रूयुः ॥ ५८ ॥ संशय इति ॥ अत्रात्मतत्वे तु तत्कृतः उपाध्यायकृतस्तद्वाक्यविरोधेनासम्भावनादिरूपो महान् संशयो मे ममासीत्स त्वया संछिन्नः निरस्तः । यत्रात्मतत्त्वे इन्द्रियवृत्तयो न प्रभवन्ति । यत्र च ऋषयोऽपि मुह्यन्त्येव ॥ ५९ ॥ संशयमाह—कर्माणीति ॥ येन देहेन इहास्मिँल्लोके पुमान् कर्माणि आरभते करोति तमत्रैव विहाय अमुत्र स्वर्गनरकादौ लोकान्तरे अन्येन कर्मोपस्थापितेन देहेन जुष्टानि कर्मफलानि सुखदुःखादीनि स जीवोऽश्नुते प्राप्नोतीति यद्वेदविदां वादस्तत्र तत्र शास्त्रे ह प्रसिद्धः श्रूयते स कथं सङ्गच्छते । कृतनाशाकृताभ्यागमप्रसङ्गात् स्थूलदेहस्यैव कर्तृत्वदर्शनात् तस्य चात्रैव नष्टत्वात् । संशयान्तरमाह । प्रोक्तं वेदोक्तं कर्म यज्ञादि यज्ञैः क्रियते तदनन्तरमेव परोक्षमदृश्यं सन्न प्रकाशते अतो यागाधिकरणस्य स्थूलदेहस्य तत्कारणस्य च यज्ञादेर्नष्टत्वात् परलोके तत्फलभोगोऽपि दुर्घटः ॥ ६० ॥ ६१ ॥ प्रथमस्योत्तरमाह—येनेति ॥ हि यस्मात् पुमान् जीवः इह येनैव मनःप्रधानेन लिङ्गेन

प्राचीनबर्हिरुवाच ॥ श्रुतमन्वीक्षितं ब्रह्मन्भगवान्यदभाषत ॥ नैतज्जानन्त्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ॥ ५८ ॥ संशयोऽत्र तु मे विप्र संछिन्नस्तत्कृतो महान् ॥ ऋषयोऽपि हि मुह्यन्ति यत्र नेन्द्रियवृत्तयः ॥ ५९ ॥ कर्माण्यारभते येन पुमानिह विहाय तम् ॥ अमुत्रान्येन देहेन जुष्टानि स यदश्नुते ॥ ६० ॥ इति वेदविदां वादः श्रूयते तत्र तत्र ह ॥ कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ॥ ६१ ॥ नारद उवाच ॥ येनैवारभते कर्म तेनैवामुत्र तत्पुमान् ॥ भुङ्क्ते ह्यव्यवधानेन लिङ्गेन मनसा स्वयम् ॥ ६२ ॥ शयानमिममुत्सृज्य श्वसन्तं पुरुषो यथा ॥ कर्मात्मन्याहितं भुङ्क्ते तादृशेनेतरेण वा ॥ ६३ ॥ ममैते मनसा यद्यदसावहमिति ब्रुवन् ॥ गृह्णीयात्तत्पुमान्राद्धं कर्म येन पुनर्भवः ॥ ६४ ॥

लिङ्गदेहेन करणभूतेन कर्म आरभते करोति तेनैव लिङ्गदेहेनाव्यवधानेन कर्तृभोक्तृदेहविच्छेदशून्येन स्वयं कर्त्तामुत्र परलोके स्वर्गनरकादौ तत्कर्मफलं सुखदुःखादि भुङ्क्ते । ततः स्थूलदेहनाशेऽपि लिङ्गदेहस्य अनाशान्न पूर्वोक्तशङ्कावकाशः ॥ ६२ ॥ लिङ्गदेहस्य भोक्तृत्वं स्वप्नदृष्टान्तेन स्पष्टयति—शयानमिति ॥ यथा पुरुषः प्राणी इमं शयानं जाग्रद्देहं श्वसन्तं जीवं तमेव उत्सृज्य तदनुसन्धानं त्यक्त्वा तादृशेन जाग्रद्देहसदृशेन इतरेण अन्यप्रकारकर्मोपस्थापितेन पश्वादिदेहेन वा आत्मनि मनसि संस्काररूपेण आहितं कर्म कर्मफलं सुखदुःखादिकं भुङ्क्ते तत्र स्वप्ने जाग्रद्देहाभावेऽपि देहान्तरेण भोगे न काप्यनुपपत्तिस्तथा लोकान्तरेऽपि भोगे न काप्यनुपपत्तिः ॥ ६३ ॥ ननु लिङ्गदेहविशिष्टस्य भोक्तृत्वमस्तु नाम । कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलविशिष्टस्यैवेत्याशङ्क्य लिङ्गविशिष्टस्यैव कर्तृत्वं स्थूलदेहस्य द्वारमात्रत्वमिति स्पष्टयति—ममेति ॥ ममैते पुत्रदारगृहादयः [illegible] देहमात्मत्वेन गृह्णीयात् गृह्णाति ततो देहात् राद्धं सिद्धं कर्मापि पुण्यपापात्मकं पुमान् गृह्णाति मयैतत्कर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतया कथयापि नातिनिर्विण्णं पुत्रागमनं प्रतीक्षमाणं ज्ञातं कमगारुढि पुनर्भावी जन्मदेहान्तरसम्बन्धो भवति । अन्यथा जन्मानुपपत्तेः । अतोऽभिमन्तुर्मनोविशिष्टस्यैव कर्तृत्वमभिमानविषयस्य तु देहस्य पुत्रादिदेहवद्द्वारमात्रत्वम् ॥ ६४ ॥ कर्मणो नष्टत्वान्नामुत्र भोग इति द्वितीयसंशयस्योत्तरमाह–यथेति ॥ यथोभयैरिन्द्रियाणामीहितैः ज्ञानकर्मलक्षणैर्युगपदप्रवृत्तैश्चित्तमनुमीयते । तदुक्तमक्षपादेनापि । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति । ज्ञानकर्मेन्द्रियवृत्तयः कारणान्तरजन्यास्तदितरकारणसद्भावेऽपि युगपदनुत्पद्यमानत्वात् कारणान्तरं विना युगपदनुत्पद्यमानघटादिवदित्यनुमाने यथा कारणान्तररूपेण मनसः सिद्धिः एवं विचित्रचित्तवृत्तिभिः प्राग्देहजं कर्म पुण्यपापात्मकं लक्ष्यते अनुमीयत इत्यर्थः । चित्तवृत्तयो विचित्रकारणजन्याः विचित्रकार्यत्वात् चित्रपटवदित्यनुमानेन विचित्रकारणान्तरासम्भवे न तथाभूता प्राग्जन्मकर्मसिद्धिः ॥ ६५ ॥ ननु स्थूलदेहनाशे लिङ्गदेहस्यानाशं कथं प्रतीम इत्याशङ्क्याह–नानुभूतमिति ॥ अनेन वर्तमानेन देहेन क्व च कुत्रचिदपि यन्नानुभूतम् अननुभूतमनुपभुक्तमदृष्टं चाश्रुतं च यद्रूपं यदात्मकं यादृक् यत्प्रकारं च तत्कदाचित् स्वप्नमनोरथादौ आत्मनि मनसि उपलभ्येत स्फुरति ॥ ६६ ॥ तेनेति ॥ हे राजन् । तेनोपलम्भेन हेतुना अस्य लिङ्गिनः लिङ्ग-

यथानुमीयते चित्तमुभयैरिन्द्रियेहितैः ॥ एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ॥ ६५ ॥ नानुभूतं क्व चानेन देहेनादृष्टमश्रुतम् ॥
कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥ ६६॥ तेनास्य तादृशं राजँल्लिङ्गिनो देहसंभवम् ॥ श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुमर्हति
॥ ६७॥ मन एव मनुष्यस्य पूर्वरूपाणि शंसति॥ भविष्यतश्च भद्रं ते तथैव न भविष्यतः ॥ ६८ ॥ अदृष्टमश्रुतं चात्र क्वचिन्मनसि
दृश्यते ॥ यथा तथाऽनुमन्तव्यं देशकालक्रियाश्रयम् ॥ ६९ ॥

विशिष्टस्य पूर्वसंस्काराश्रयस्य तादृशस्फुरणजनकमनुभवादिकं पूर्वदेहसम्भवं श्रद्धत्स्व निश्चयेन मन्यस्व । यतः अननुभूतोऽर्थो मनः स्प्रष्टुं मनसि स्फुरितुं नार्हति । तथा च पूर्वानुभवसंस्कारं विना वस्तुस्फुरणानुपपत्त्या तत्संस्कारसिद्धिस्तस्याश्रयं विनाऽनुपपत्त्या तदाश्रयत्वेन लिङ्गविशिष्टस्यात्मनः सिद्धिः कारणान्तरसद्भावेऽपि स्फुरणस्य कादाचित्कत्वेन तज्जनितसुखदुःखादिहेतुतदुन्नायककर्मसिद्धिः ॥ ६७ ॥ मन इति ॥ मनुष्यस्य मन एव उग्रत्वशान्त्यादिभिः औदार्यकार्पण्यादिभिश्च वृत्तिभिः लिङ्गैरयं पूर्वमपीदृशआसीदिति पूर्वरूपाणि शंसति ज्ञापयति तथा भविष्यतः पुनरुत्पत्स्यमानस्याप्येवंरूपो भविष्यतीति भावीनि रूपाणि शंसति । तथा न भविष्यतो नीचत्वं मोक्षं वा प्राप्स्यतो रूपं शंसति अत एव मनो मयं लिङ्गशरीरं न पुनः पुनर्जायते एवं निश्चये तव भद्रं भविष्यतीत्याशिषाऽभिनन्दति विश्वासार्थम् ॥ ६८ ॥ ननु कदाचिद्दर्शनानर्हमपि स्वप्ने दृश्यते तत्राह–अदृष्टमिति ॥ अत्र लोके क्वचित्स्वप्नाद्यवस्थाविशेषे अदृष्टं दर्शनानर्हमश्रुतं श्रवणानर्हं च मनसि स्फुरितं यथा येन प्रकारेण दृश्यं तथैव देशकालक्रियाश्रयं तत्तदनुमन्तव्यम् । यथा अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे निशाश्रयं नक्षत्रादिकं दिवसे अभ्यङ्गादिक्रियाश्रयं शिरोभेदनादिक्रियायां तदपि निद्रादिदोषेणैवानुमन्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्यापि तदनुपपत्तेस्तुल्यत्वादिति भावः ॥ ६९ ॥ ननु क्वापि दरिद्रः आत्मानमिन्द्रं पश्यति तत्कथं सङ्गच्छेत तत्राह—सर्व इति ॥ यतः सर्वे जनाः समनसः अनेकजन्मसंचितादृष्टसंस्कृतमनोयुक्ताः अतः शुभाशुभादृष्टवशादिन्द्रियगोचराः इन्द्रियविषयाः क्रियानुरोधेन सुखदुःखप्रदपुण्यपापानुसारेण क्रमेण वर्गशो यूथशश्च सर्व एव मनसि आयान्ति स्फुरन्ति यान्ति विस्मृताश्च भवन्ति अतो नात्यन्तादृष्टचरः कश्चित्पदार्थोऽस्ति ॥ ७० ॥ तदेवं सर्वैरपि सर्वेऽर्थाः क्रमेण दृश्यन्त इत्युक्तमिदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह—सत्वेति॥ सत्वैकनिष्ठे सत्वे एवैका निष्ठा यस्य तस्मिन् भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसीदं विश्वमुपरज्य संयोगमिव प्राप्यावभासते। प्रतीत्यनर्हस्यापि कदाचित्प्रतीतौ दृष्टान्तः । चन्द्रमस्युपरज्य तमो राहुरिव तदिदं शुद्धे मनसि सर्वविषयस्फुरणं योगिप्रत्यक्षमिति प्रसिद्धम्॥ ७१॥ तदेवं स्थूलदेहनाशेऽपि लिङ्गदेहस्यानाशादन्यः कर्ताऽन्यो भोक्तेति दोषो नास्तीत्युक्तम् । तत्रैवं शङ्कते । ननु लिङ्गदेहस्य स्थूलदेहद्वारेणैव कर्तृत्वभोक्तृत्वे न तु केवलस्य तत्र कदाचित्स्थूलदेहाभावे जीवस्य कर्तृत्वभोक्तृत्वाभावान्मुक्तिः प्रसज्येत तत्राह—नाहमिति ॥ बुद्धिश्च मनश्च अक्षाः इन्द्रियाणि च अर्थाः पञ्चतन्मात्राणि इत्येवंभूतो गुणव्यूहो गुणकार्यरूपोऽनादिमान् अनादिः

सर्वे क्रमानुरोधेन मनसीन्द्रियगोचराः ॥ आयान्ति वर्गशो यान्ति सर्वे समनसो जनाः ॥ ७० ॥ सत्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि ॥
तमश्चन्द्रमसीवेदमुपरज्यावभासते ॥ ७१ ॥ नाहं ममेति भावोऽयं पुरुषे व्यवधीयते ॥ यावद् बुद्धिमनोऽक्षार्थगुणव्यूहो ह्यनादिमान् ॥ ७२ ॥
सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः ॥ नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥ ७३ ॥ गर्भे बाल्येऽप्यपौष्कल्यादेकादशविधं तदा ॥ लिङ्गं
न दृश्यते यूनः कुह्वां चन्द्रमसो यथा ॥ ७४ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ७५ ॥

लिङ्गदेहो यावद्वर्तते तावत् हि निश्चितमेतत् देहेन्द्रियपुत्रकलत्रादिविषयकोऽहंममेति भावोऽयमध्यासलक्षणः पुरुषे आत्मनि न व्यवधीयते विच्छिन्नो न भवति ॥ ७२ ॥ सुप्त्यादौ अहम्ममेतिभावाप्रतीतौ हेतुमाह—सुप्तीति ॥ सुषुप्तौ मुर्च्छायामुपतापे इष्टवियोगादिजनितेऽत्यन्तदुःखे मृत्यौ मरणसमये प्रज्वारे अत्यन्तज्वरावेशदशायां च प्राणायतनानामिन्द्रियाणां विघाततः व्याकुलत्वादहं ममेति ज्ञानं नेहते न प्रकाशते इन्द्रियैरहङ्कारास्पदवस्तुग्रहणे ह्यहङ्कारः स्फुरति नान्यथा। अध्यासस्तु तदाप्यस्तीति भावः ॥ ७३ ॥ गर्भे इति ॥ यथा यूनस्तरुणस्य तत्तदिन्द्रियाध्यासादहं पश्याम्यहं शृणोमीत्येवमादि यदेकादशविधं लिङ्गमहंकरणं दृश्यते तत् गर्भे बाल्ये चेन्द्रियाणामपौष्कल्यात् सूक्ष्मत्वादेव न दृश्यते न प्रकाशते तदाप्यध्यासस्त्वस्त्येव । कुह्वाममावास्यायां सतोऽपि चन्द्रमसो लिङ्गं रूपं यथा न दृश्यते तथा ॥ ७४ ॥ अध्यासस्तु स्वयमेव न निवर्तते इत्याह—अर्थे हीति ॥ यथा स्वप्ने स्वशिरश्छेदादिलक्षणे अर्थेऽविद्यमानेऽपि स्वशिरश्छेदाद्यनर्थागमो भवति स च तद्धेतुनिद्रादिदोषनिवर्तकजागरणं विना न [illegible] तत्तः सुखदुःखादिलक्षणेऽर्थे अविद्यमानेऽपि तद्धेत्वन्तःकरणाध्यासनिवर्तकात्मज्ञानादिसाधनं विना संसृतिर्धर्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एतया कथयापि नातिनिर्विण्णं पुत्रागमं प्रतीक्षमाणं [illegible] संसारस्याऽनिवृत्तिं प्रपञ्चयन् लिङ्गदेहं विवृणोति—एवमिति ॥ एवं पञ्चविधं पञ्चतन्मात्रात्मकम् एकादशेन्द्रियैः सह षोडशात्मना विस्तृतं त्रिवृत् त्रिगुणकार्यभूतं यल्लिङ्गं लिङ्गदेहः स एष चेतनया युक्तो जीव इत्यभिधीयते ॥ ७६॥ अनेनेति ॥ अनेन लिङ्गदेहेन युक्त एव पुरुषो देही देहान् उच्चावचान् देवतिर्यगादीन् उपादत्ते विमुञ्चति च। अनेनैव च हर्षादिकं विन्दति प्राप्नोति ॥७७॥ नन्वेकं देहं विसृज्य देहान्तरप्रवेशात्पूर्वं विदेहता स्यात्तत्राह—यथेति सार्द्धम् ॥ यथेयं प्रसिद्धा तृणजलूका कीटविशेषः पूर्वधृततृणस्यात्यागात् नापयाति तृणं त्यक्त्वा न गच्छति तृणान्तरस्य धारणात् अपयाति तृणान्तरं गच्छति चेति प्रसिद्धम्। तथायं जनः जीवोऽपि यावदेव तद्देहप्रारम्भकारकाणां कर्मणां व्यवधानेन विशेषतो धारणेन भोगेन समाप्त्या वान्यं देहं सम्यक् न विन्देत न लभते तावत् म्रियमाणोऽपि मरणावस्थायां लोकान्तरगमनयोग्यदेहान्तरं प्रविशन्नपि प्राग्देहे अभिमतिमहंममेत्यभिमानं न त्यजेत् न त्यजति ॥ ७८ ॥ मन इति अर्द्धम् ॥ हे मनुष्येन्द्र मन एवं भूतानां भवभा-

एवं पञ्चविधं लिङ्गं त्रिवृत्षोडश विस्तृतम् ॥ एष चेतनया युक्तो जीव इत्यभिधीयते ॥ ७६ ॥ अनेन पुरुषो देहानुपादत्ते विमुञ्चति ॥ हर्षं शोकं भयं दुःखं सुखं चानेन विन्दति ॥ ७७ ॥ यथा तृणजलूकेयं नापयात्यपयाति च ॥ न त्यजेन्म्रियमाणोऽपि प्राग्देहाभिमतिं जनः ॥ यावदन्यं न विन्देत व्यवधानेन कर्मणाम्॥७८॥मन एव मनुष्येन्द्र भूतानां भवभावनम् ॥७९॥ यदाऽक्षैश्चरितान्ध्यायन्कर्माण्याचिनुतेऽसकृत् ॥ सति कर्मण्यविद्यायां बन्धः कर्मण्यनात्मनः ॥ ८० ॥ अतस्तदपवादार्थं भज सर्वात्मना हरिम् ॥ पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ॥ ८१ ॥ मैत्रेय उवाच ॥ भागवतमुख्यो भगवान्नारदो हंसयोर्गतिम् ॥ प्रदर्श्य ह्यमुमामन्त्र्य सिद्धलोकं ततोऽगमत् ॥ ८२ ॥ प्राचीनबर्हीं राजर्षिः प्रजासर्गाभिरक्षणे ॥ आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ॥ ८३ ॥

वनं जन्ममरणादिसंसारदुःखस्य कारणम् ॥७९॥ यदेति ॥ यदा अविद्यायां सत्यामनात्मनः आत्मानुसन्धानशून्यस्य शुभाशुभं कर्म भवति तस्मिन्कर्मणि सति तन्निमित्तको भोगो भवति ततश्च अक्षैरिन्द्रियैश्चरितान् उपभुक्तान् विषयान् मनसा ध्यायन् पुनः विषयप्राप्तिहेतुभूतानि कर्माणि आचिनुते करोति तदा तस्मिन् कर्मणि सति असकृत्पुनरस्य संसारबन्धो भवति॥८०॥अत इति ॥ यतो हरेर्विश्वस्य स्थित्युत्पत्त्यप्यया भवन्ति तदात्मकं विश्वं पश्यन् अतो हेतोः तस्याविद्याध्यासस्यापवादार्थं सर्वात्मना हरिं भज ॥ ८१ ॥ भागवतेति ॥ एवं भागवतेषु मुख्यो भगवान्नारदः प्राचीनबर्हिषे हंसयोर्जीवेश्वरयोर्गतिं तत्त्वं प्रदर्श्य निरूप्य अमुं राजानमामन्त्र्य पृष्ट्वा ततः स्थानात् सिद्धलोकमगमत् । प्रथमपादे अक्षराधिक्यम् ॥ ८२ ॥ प्राचीनेति ॥ प्राचीनबर्हिरपि राजर्षिः प्रजासर्गस्याभिरक्षणे पुत्रानादिश्य पुत्राः प्रचेतसो यदि गृहमागच्छेयुः तर्हि ते राज्ये स्थाप्या इति मन्त्रिणः कथयित्वा साक्षात्पुत्रादेशस्तु न व्याख्येयः । तत्र पुत्रानागमात् स्वयं तपसे कपिलाश्रमं गङ्गासागरसङ्गममगमत ॥ ८३ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति ॥ तत्र कपिलाश्रमे वीरोऽतिप्रयत्नवान् विमुक्तसङ्गः विषयेभ्यः प्रत्याहृतेन्द्रियवर्गः अत एवैकाग्रमनाः भक्त्या गोविन्दचरणाम्बुजमनुक्षणं भजन् ध्यायन् तत्साम्यताम् समताम् अगात् । स्वार्थे ष्यञन्तात्तल् ॥ ८४ ॥ एतदिति ॥ हे अनघ एतत् देवर्षिणा गीतम् आत्मपारोक्ष्यं परोक्षेण तत्त्वमार्गं यः श्रावयेद्यश्च शृणुयात् स लिङ्गेन लिङ्गदेहेन संसारहेतुना विमुच्यते ॥ ८५ ॥ एतदिति ॥ देवर्षिवर्यस्य नारदस्य मुखान्निःसृतमेतदाख्यानं मुकुन्दस्य यशसा माहात्म्येन युक्तमत एव भुवनं पुनानं पवित्रयत् आत्मनः शौचं शोधनं यस्मात् तत् पारमेष्ठ्यं परमात्मपदप्रापकम् अतो महद्भिः कीर्त्यमानं यः प्राणी अधिगच्छति सम्यगवधारयति सोऽपि मुक्तसमस्तबन्धः सन् अस्मिन्भवे संसारे न भ्रमति मुक्तो भवति ॥ ८६ ॥ अध्यात्मेति ॥ इदमत्यद्भुतमध्यात्मपारोक्ष्यं मयापि गुरोः कृपयाधिगतं निःसन्दिग्धं श्रुतं तत्तुभ्यं कथितमिति शेषः । एवमुक्तप्रकारेण स्त्रिया बुद्ध्या सहितस्य पुंसः श्रमोऽहङ्कारश्छिन्नो भवति आश्रमोऽहङ्कार इति वा गार्हस्थ्याश्रम इति च तथामुत्र कर्मफलभोगः कथमिति संशयश्च छिन्नो निरस्तः

तत्रैकाग्रमना वीरो गोविन्दचरणाम्बुजम् ॥ विमुक्तसङ्गोऽनुभजन्भक्त्या तत्साम्यतामगात् ॥ ८४ ॥ एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ ॥ यः श्रावयेद्यः शृणुयात्स लिङ्गेन विमुच्यते ॥ ८५ ॥ एतन्मुकुन्दयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचम् ॥ यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबन्धः ॥ ८६ ॥ अध्यात्मपारोक्ष्यमिदं मयाऽधिगतमद्भुतम् ॥ एवं स्त्रियाऽऽश्रमः पुंसश्छिन्नोऽमुत्र च संशयः ॥ ८७ ॥ इति श्रीभागवते चतुर्थस्कन्धे प्राचीनबर्हिर्नारदसंवादेऽध्यात्मज्ञानवर्णनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ विदुर उवाच ॥ ये त्वयाऽभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ॥ १॥ किं बार्हस्पत्येह परत्र वाऽथ कैवल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥ २ ॥

॥ ८७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्योनत्रिंशे व्यधादिमाम् ॥ २९ ॥ त्रिंशे लब्धवरा ईशाद्वार्क्षीं कन्यां विवाह्य च ॥ राज्यं प्रचेतसश्चक्रुस्तत्र श्लोकाः क्रमार्गणाः ॥ उवाचैषक्के पादाब्धाः षट्पञ्चाशदनुष्टुभः॥३०॥य इति ॥ हे ब्रह्मन् ये प्राचीनबर्हिषः सुताः प्रचेतसस्त्वयाभिहिताः पूर्वं कथितास्ते रुद्रगीतनामकेन स्तोत्रेण हरिं प्रतोष्य कां सिद्धिं फलमापुः ॥१॥ किमिति ॥ हे बार्हस्पत्य बृहस्पतेः शिष्य कस्यांचिद्विद्यायामुद्धवमैत्रेयौ बृहस्पतेः शिष्याविति प्रसिद्धेः ते प्रचेतसो यदृच्छया देवं गिरिशं श्रीरुद्रं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्ववर्तिनोऽनुग्रहविषया जाताः । अथ तस्मात् नूनं निश्चितं परं मोक्षं प्रापुर्नात्र संशयः । परं तु ततः पूर्वमिह अस्मिन् लोके अथवा परत्र लोकान्तरे किं फलं प्रापुरिति । यद्वा कैवल्यनाथस्य हरेः प्रिया पार्श्ववर्तिनश्च प्रचेतसः यदृच्छया गिरिशं प्राप्य इह लोके परत्र च किं परं वस्तु प्रापुः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

एतया कथयापि नातिनिर्विण्णं पुत्रागमं प्रतीक्षमाणं [illegible] संसारस्याऽनिवृत्तिं प्रपञ्चयन् लिङ्गदेहं विवृणोति—एवमिति ॥ एवं पञ्चविधं पञ्चतन्मात्रात्मकम् एकादशेन्द्रियैः सह
षोडशात्मना विस्तृतं त्रिवृत् त्रिगुणकार्यभूतं यल्लिङ्गं लिङ्गदेहः स एष चेतनया युक्तो जीव इत्यभिधीयते ॥ ७६॥ अनेनेति ॥ अनेन लिङ्गदेहेन युक्त एव पुरुषो देही देहान्
उच्चावचान् देवतिर्यगादीन् उपादत्ते विमुञ्चति च। अनेनैव च हर्षादिकं विन्दति प्राप्नोति ॥७७॥ नन्वेकं देहं विसृज्य देहान्तरप्रवेशात्पूर्वं विदेहता स्यात्तत्राह—यथेति सार्द्धम् ॥
यथेयं प्रसिद्धा तृणजलूका कीटविशेषः पूर्वधृततृणस्यात्यागात् नापयाति तृणं त्यक्त्वा न गच्छति तृणान्तरस्य धारणात् अपयाति तृणान्तरं गच्छति चेति प्रसिद्धम्। तथायं
जनः जीवोऽपि यावदेव तद्देहप्रारम्भकारकाणां कर्मणां व्यवधानेन विशेषतो धारणेन भोगेन समाप्त्या वान्यं देहं सम्यक् न विन्देत न लभते तावत् म्रियमाणोऽपि मरणाव-
स्थायां लोकान्तरगमनयोग्यदेहान्तरं प्रविशन्नपि प्राग्देहे अभिमतिमहंममेत्यभिमानं न त्यजेत् न त्यजति ॥ ७८ ॥ मन इति अर्द्धम् ॥ हे मनुष्येन्द्र मन एवं भूतानां भवभा-

एवं पञ्चविधं लिङ्गं त्रिवृत्षोडश विस्तृतम् ॥ एष चेतनया युक्तो जीव इत्यभिधीयते ॥ ७६ ॥ अनेन पुरुषो देहानुपादत्ते विमुञ्चति ॥
हर्षं शोकं भयं दुःखं सुखं चानेन विन्दति ॥ ७७ ॥ यथा तृणजलूकेयं नापयात्यपयाति च ॥ न त्यजेन्म्रियमाणोऽपि प्राग्देहाभिमतिं
जनः ॥ यावदन्यं न विन्देत व्यवधानेन कर्मणाम्॥७८॥मन एव मनुष्येन्द्र भूतानां भवभावनम् ॥७९॥ यदाऽक्षैश्चरितान्ध्यायन्कर्माण्या-
चिनुतेऽसकृत् ॥ सति कर्मण्यविद्यायां बन्धः कर्मण्यनात्मनः ॥ ८० ॥ अतस्तदपवादार्थं भज सर्वात्मना हरिम् ॥ पश्यंस्तदात्मकं
विश्वं स्थित्युत्पत्त्यप्यया यतः ॥ ८१ ॥ मैत्रेय उवाच ॥ भागवतमुख्यो भगवान्नारदो हंसयोर्गतिम् ॥ प्रदर्श्य ह्यमुमामन्त्र्य सिद्धलोकं
ततोऽगमत् ॥ ८२ ॥ प्राचीनबर्हीं राजर्षिः प्रजासर्गाभिरक्षणे ॥ आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ॥ ८३ ॥

वनं जन्ममरणादिसंसारदुःखस्य कारणम् ॥७९॥ यदेति ॥ यदा अविद्यायां सत्यामनात्मनः आत्मानुसन्धानशून्यस्य शुभाशुभं कर्म भवति तस्मिन्कर्मणि सति तन्निमित्तको
भोगो भवति ततश्च अक्षैरिन्द्रियैश्चरितान् उपभुक्तान् विषयान् मनसा ध्यायन् पुनः विषयप्राप्तिहेतुभूतानि कर्माणि आचिनुते करोति तदा तस्मिन् कर्मणि सति अस-
कृत्पुनरस्य संसारबन्धो भवति॥८०॥अत इति ॥ यतो हरेर्विश्वस्य स्थित्युत्पत्त्यप्यया भवन्ति तदात्मकं विश्वं पश्यन् अतो हेतोः तस्याविद्याध्यासस्यापवादार्थं सर्वात्मना हरिं
भज ॥ ८१ ॥ भागवतेति ॥ एवं भागवतेषु मुख्यो भगवान्नारदः प्राचीनबर्हिषे हंसयोर्जीवेश्वरयोर्गतिं तत्त्वं प्रदर्श्य निरूप्य अमुं राजानमामन्त्र्य पृष्ट्वा ततः स्थानात् सिद्धलो-
कमगमत् । प्रथमपादे अक्षराधिक्यम् ॥ ८२ ॥ प्राचीनेति ॥ प्राचीनबर्हिरपि राजर्षिः प्रजासर्गस्याभिरक्षणे पुत्रानादिश्य पुत्राः प्रचेतसो यदि गृहमागच्छेयुः तर्हि ते राज्ये
स्थाप्या इति मन्त्रिणः कथयित्वा साक्षात्पुत्रादेशस्तु न व्याख्येयः । तत्र पुत्रानागमात् स्वयं तपसे कपिलाश्रमं गङ्गासागरसङ्गममगमत् ॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति ॥ तत्र कपिलाश्रमे वीरोऽतिप्रयत्नवान् विमुक्तसङ्गः विषयेभ्यः प्रत्याहृतेन्द्रियवर्गः अत एवैकाग्रमनाः भक्त्या गोविन्दचरणाम्बुजमनुक्षणं भजन् ध्यायन् तत्साम्यताम् समताम् अगात् । स्वार्थे ष्यञन्तात्तल् ॥ ८४ ॥ एतदिति ॥ हे अनघ एतत् देवर्षिणा गीतम् आत्मपारोक्ष्यं परोक्षेण तत्त्वमार्गं यः श्रावयेद्यश्च शृणुयात् स लिङ्गेन लिङ्गदेहेन संसारहेतुना विमुच्यते ॥ ८५ ॥ एतदिति ॥ देवर्षिवर्यस्य नारदस्य मुखान्निःसृतमेतदाख्यानं मुकुन्दस्य यशसा माहात्म्येन युक्तमत एव भुवनं पुनानं पवित्रयत् आत्मनः शौचं शोधनं यस्मात् तत् पारमेष्ठ्यं परमात्मपदप्रापकम् अतो महद्भिः कीर्त्यमानं यः प्राणी अधिगच्छति सम्यगवधारयति सोऽपि मुक्तसमस्तबन्धः सन् अस्मिन्भवे संसारे न भ्रमति मुक्तो भवति ॥ ८६ ॥ अध्यात्मेति ॥ इदमत्यद्भुतमध्यात्मपारोक्ष्यं मयापि गुरोः कृपयाधिगतं निःसन्दिग्धं श्रुतं तत्तुभ्यं कथितमिति शेषः । एवमुक्तप्रकारेण स्त्रिया बुद्ध्या सहितस्य पुंसः श्रमोऽहङ्कारश्छिन्नो भवति आश्रमोऽहङ्कार इति वा गार्हस्थ्याश्रम इति च तथामुत्र कर्मफलभोगः कथमिति संशयश्च छिन्नो निरस्तः

तत्रैकाग्रमना वीरो गोविन्दचरणाम्बुजम् ॥ विमुक्तसङ्गोऽनुभजन्भक्त्या तत्साम्यतामगात् ॥ ८४ ॥ एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ ॥ यः श्रावयेद्यः शृणुयात्स लिङ्गेन विमुच्यते ॥ ८५ ॥ एतन्मुकुन्दयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचम् ॥ यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबन्धः ॥ ८६ ॥ अध्यात्मपारोक्ष्यमिदं मयाऽधिगतमद्भुतम् ॥ एवं स्त्रियाऽऽश्रमः पुंसश्छिन्नोऽमुत्र च संशयः ॥ ८७ ॥ इति श्रीभागवते चतुर्थस्कन्धे प्राचीनबर्हिर्नारदसंवादेऽध्यात्मज्ञानवर्णनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥
विदुर उवाच ॥ ये त्वयाऽभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ॥ १॥ किं बार्हस्पत्येह परत्र वाऽथ कैवल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥ २ ॥

॥ ८७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्योनत्रिंशे व्यधादिमाम् ॥ २९ ॥ त्रिंशे लब्धवरा ईशाद्वार्क्षीं कन्यां विवाह्य च ॥ राज्यं प्रचेतसश्चक्रुस्तत्र श्लोकाः कुमार्गणाः ॥ उवाचैंषड्कं पादाढ्याः षट्पञ्चाशदनुष्टुभः॥३०॥य इति ॥ हे ब्रह्मन् ये प्राचीनबर्हिषः सुताः प्रचेतसस्त्वयाभिहिताः पूर्वं कथितास्ते रुद्रगीतनामकेन स्तोत्रेण हरिं प्रतोष्य कां सिद्धिं फलमापुः ॥१॥ किमिति ॥ हे बार्हस्पत्य बृहस्पतेः शिष्य कस्यांचिद्विद्यायामुद्धवमैत्रेयौ बृहस्पतेः शिष्याविति प्रसिद्धेः ते प्रचेतसो यदृच्छया देवं गिरिशं श्रीरुद्रं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्ववर्तिनोऽनुग्रहविषया जाताः । अथ तस्मात् नूनं निश्चितं परं मोक्षं प्रापुर्नात्र संशयः । परं तु ततः पूर्वमिह अस्मिन् लोके अथवा परत्र लोकान्तरे किं फलं प्रापुरिति । यद्वा कैवल्यनाथस्य हरेः प्रिया पार्श्ववर्तिनश्च प्रचेतसः यदृच्छया गिरिशं प्राप्य इह लोके परत्र च किं परं वस्तु प्रापुः ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रचेतस इति ॥ पितुरादेशकारिणः पितुराज्ञया प्रजासृष्टिकामाः सन्तः प्रचेतसोऽन्तरुदधौ समुद्रमध्ये स्थिता रुद्रगीतस्य जप एव यज्ञस्तेन तपसा आहारादिनियमेन च पुरञ्जनं भगवन्तमतोषयन् ॥ ३ ॥ दशेति ॥ स्वरुचा कान्त्या तेषां कृच्छ्रं तपःक्लेशं शमयन् शान्तेन सत्वात्मकेन वपुषा सनातनः पुरुषो भगवान् दशवर्षसहस्रान्ते आविरभूत् ॥ ४ ॥ सुपर्णेति ॥ मेरुशृङ्गमारूढोऽम्बुदो मेघ इव सुपर्णस्य गरुडस्य स्कन्धमारूढः पीते वाससी यस्य सः मणिः कौस्तुभो ग्रीवायां यस्य सः स्वप्रकाशेन दिशो वितिमिरा अन्धकाररहिताः कुर्वन् ॥ ५ ॥ काशिष्णुनेति ॥ काशिष्णुना प्रकाशमानेन कनकमयेन वर्णवता नानारत्नखचितत्वेन नानावर्णवता विभूषणेन कुण्डलादिना भ्राजत् कपोलं वदनं च यस्य सः विलसच्छोभमानं किरीटं यस्य सः अष्टसु भुजेषु अष्टभिरायुधैर्युक्तः अनुचरैः पार्षदैः मुनिभिः सुरेन्द्रैः इन्द्रादिभिर्लोकपालैः सर्वतः सेवितः गरुड एव किन्नरस्तेन स्वपक्षस्वनैर्गीता कीर्तिर्यस्य ॥ ६ ॥ पीनेति ॥ पीनाश्च ते आयताश्च येऽष्टौ भुजास्तेषां मण्डलं समूहस्तन्मध्ये स्थितया लक्ष्म्या सह स्पर्द्धन्ती शतार्षः ।

मैत्रेय उवाच ॥ प्रचेतसोऽन्तरुदधौ पितुरादेशकारिणः ॥ जपयज्ञेन तपसा पुरञ्जनमतोषयन् ॥ ३ ॥ दशवर्षसहस्रान्ते पुरुषस्तु सना-
तनः ॥ तेषामाविरभूत्कृच्छ्रं शान्तेन शमयन्रुचा ॥४॥ सुपर्णस्कन्धमारूढो मेरुशृङ्गमिवाम्बुदः ॥ पीतवासा मणिग्रीवः कुर्वन्वितिमिरा
दिशः ॥ ५ ॥ काशिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः ॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेन्द्रैरासेवितो गरुड-
किन्नरगीतकीर्तिः॥६॥पीनायताष्टभुजमण्डलमध्यलक्ष्म्या स्पर्धच्छ्रिया परिवृतो वनमालयाद्यः ॥ बर्हिष्मतः पुरुष आह सुतान्प्रपन्नान्पर्ज-
न्यनादरुतया सघृणावलोकः ॥ ७ ॥ श्रीभगवानुवाच ॥ वरं वृणीध्वं भद्रं वो यूयं मे नृपनन्दनाः ॥ सौहार्देनाऽपृथग्धर्मास्तुष्टोऽहं
सौहृदेन वः ॥ ८ ॥ योऽनुस्मरति सन्ध्यायां युष्माननुदिनं नरः ॥ तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम् ॥ ९ ॥ ये तु मां रुद्र-
गीतेन सायं प्रातः समाहिताः ॥ स्तुवन्त्यहं कामवरान्दास्ये प्रज्ञां च शोभनाम् ॥ १० ॥

श्रीः शोभा यस्यास्तया वनमालया परिवृतः सघृणो दयायुक्तोऽवलोको यस्य सः एवंभूतः आद्यः पुरुषः प्रपन्नान् बर्हिष्मतः सुतान् प्रति पर्जन्यस्य मेघस्य नाद इव सन्तापनिवर्तकं रुतं नादो यस्यास्तया वाचा आह स्म ॥ ७ ॥ वरमिति ॥ हे नृपनन्दनाः यूयं यतः परस्परं सौहार्देन हेतुना अपृथक् धर्मो येषां तादृशाः स्थ सम्बोधनं वा । अतो वो युष्माकं सौहृदेनाहं तुष्टो युष्मभ्यं वरं ददामि वो युष्माकं भद्रं भवतु यूयं मे मत्तो वरं वृणीध्वम् ॥ ८ ॥ य इति ॥ अनुदिनं प्रतिदिनं सन्ध्यायां यो नरो युष्मान् स्मरति स्मरिष्यति तस्य भ्रातृषु तथाभूतेषु सर्वेषु प्राणिषु आत्मसाम्यं भवत्सदृशं सौहृदं मैत्र्यं भविष्यति ॥ ९ ॥ य इति ॥ ये तु समाहिताः सावधानाः सन्तः सायं प्रातरनेन रुद्रगीतेन मां स्तुवन्ति स्तोष्यन्ति तेभ्योऽप्यहं तुष्टः सन् कामभोगान् अभिलषितान् भोगान् शोभनामुद्धारोपयोगिनीं प्रज्ञां बुद्धिं च दास्ये किं पुनर्युष्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यम् ॥ १० ॥ यदिति ॥ यत् यस्मात् यूयं पितुरादेशं प्रजावृद्ध्यादिविषयकं मुदाऽन्विता हर्षयुक्ताः सन्तः अग्रहीषुर्गृहीतवन्तः । प्रथमपुरुष आर्षः । अग्रहीष्टेत्यपि पाठः । अथो तस्मात् वो युष्माकमुशती कमनीया कीर्तिर्लोकान् अनुलक्षीकृत्य भविष्यति व्याप्स्यतीत्यर्थः ॥ ११ ॥ भवितेति ॥ युष्माकं पुत्रश्च गुणैः प्रजाविसर्गसत्कीर्त्यादिभिः ब्रह्मणोऽपि सकाशादनवमः अन्यूनः अत एव लोके विश्रुतः प्रख्यातश्च भविता भविष्यति । य एतां त्रिलोकीमात्मवीर्येण स्वसन्तानेन पूरयिष्यति ॥ १२ ॥ कण्डोरिति ॥ हे नृपनन्दनाः प्रम्लोचया अप्सरसा कण्डोर्मुनेः सकाशात् कमललोचना कन्या लब्धा । तां कन्यां च अपविद्धां वृक्षेषु त्यक्तां भूरुहाः वृक्षा जगृहुः । कण्डुमुनेः तपोनाशार्थमिन्द्रेण प्रम्लोचा प्रेषिता तया सह कण्डूः रेमे । तस्मात्प्रम्लोचां कन्यां लब्ध्वा स्वर्गं गच्छन्ती वृक्षेषु तत्याजेति कथाऽनुसन्धेया ॥ १३ ॥ क्षुदिति ॥ तस्याः क्षुत्क्षामायाः क्षुधया पीडितायाः अतो रोदमानायाः रुदत्याः शब्लुगभावशानचावार्षौ । स्वार्थणिजन्ताद्वा । मुखे स प्रसिद्धो वनस्पतीनां राजा सोमो दयान्वितः पीयूषवर्षिणी-

यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ॥ अथो व उशती कीर्तिर्लोकाननुभविष्यति ॥ ११ ॥ भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः ॥ य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥ १२॥ कण्डोः प्रम्लोचया लब्धा कन्या कमललोचना ॥ तां चापविद्धां जगृहुर्भूरुहा नृपनन्दनाः ॥ १३ ॥ क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम् ॥ देशिनीं रोदमानाया निदधे स दयान्वितः ॥ १४ ॥ प्रजाविसर्ग आदिष्टः पित्रा मामनुवर्तता ॥ तत्र कन्यां वरारोहां तामुद्वहत मा चिरम् ॥ १५ ॥ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा ॥ अपृथग्धर्मशीलेयं भूयात्प्रत्यर्पिताशया ॥ १६ ॥ दिव्यवर्षसहस्राणां सहस्रमहतौजसः ॥ भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम ॥ १७॥ अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः ॥ उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥ १८ ॥

ममृतस्राविणीं देशिनीं स्वतर्जनीं निदधे अमृतपानार्थं धारितवान् । एतेनाप्सरोजन्यत्वेन अमृताहारेण च लावण्यादि सूचितम् ॥ १४ ॥ प्रजेति ॥ यूयं च मामनुवर्तता मदाज्ञामनुसरता आर्षः शता । पित्रा प्राचीनबर्हिषा प्रजाविसर्गे आदिष्टाः अतः तत्र प्रजाविसर्गे निमित्ते तामेव प्रम्लोचापुत्रीं वरारोहां कन्यां मा चिरम् अविलम्बेन उद्वहत ॥ १५ ॥ बहूनामेकभार्यात्वे विरोधमाशङ्क्याह–अपृथगिति ॥ अपृथक्धर्मः प्रजापालनादिरूपः शीलं च सुस्वभावादि येषां तेषां युष्माकं सर्वेषामेव इयं भवत्स्वेवार्पितः आशयो यया सा अत एवापृथग्धर्मशीला सुमध्यमा सुन्दरी पत्नी भूयात् अतो धर्मशीलैक्यात् आशीर्युक्तात् मद्वाक्यान्न दृष्टादृष्टदोषः ॥ १६ ॥ दिव्येति ॥ यूयं च ममानुग्रहाद्दिव्यवर्षसहस्राणां कपिञ्जलालम्भन्यायेन त्रयाणामित्यर्थः । सहस्रपर्यन्तं कालमहतौजसः अप्रतिहतबलाः सन्तो भौमान् भुवि भवान् दिव्यान् दिवि भवांश्च भोगान् भोक्ष्यथ।तङ्भाव आर्षः ॥ १७ ॥ अथेति ॥ अथ तावत्कालभोगानन्तरं मय्यनपायिन्या अव्यभिचारिण्या भक्त्या पक्वगुणो दग्धकामादिमल आशयोऽन्तःकरणं येष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाभूताः सन्तः इदं च सम्बोधनम् । अपक्वकषायाणां भगवद्दर्शनासम्भवादित्याहुः । यूयमतो लोकद्वयभोगान्निरयात् नरकतुल्यात् निर्विद्य मद्धाम मत्स्वरूपमुपयास्यथ प्राप्स्यथ ॥१८॥ गृहेष्विति ॥ कुशलं मयि समर्पितं कर्म येषां तेषां मद्वार्तयैव यातो यामः कालो येषां तेषां पुंसां गृहेष्वाविशतां प्रविष्टानां चापि गृहा बन्धाय न मताः न भवन्ति ॥ १९ ॥ तत्र हेतुः—नव्यवदिति ॥ यत् यस्मात् मत्कथाश्रवणात् ज्ञः सर्वज्ञः अहं श्रोतॄणां हृत् हृदयं नव्यवत् प्रतिपदं नूतनवत् अये प्राप्नोमि तत्र आविर्भवामि। एतत् हृदये ममाविर्भाव एव ब्रह्मवादिभिर्ब्रह्म ब्रह्मसाक्षात्कार इति व्यपदिश्यते। यतो गताः यं मां प्राप्ताः सन्तो जनाः पुनर्न मुह्यन्ति न शोचन्ति न हृष्यन्ति। यद्वा । कथाश्रवणादहं ब्रह्मवादिभिः प्रवक्तृभिः निमित्तभूतैः श्रोतॄणां हृदयं प्राप्नोमि यतः योऽहमेतदेव ब्रह्मशेषं प्राग्वत्।अथवा एतन्मत्स्वरूपं ब्रह्मवादिभिः ब्रह्म उच्यते। यतो यत्र ब्रह्मणि गताः मोहादिकान्न प्राप्नुवन्ति सोऽहं ज्ञो यद्यस्मात्तेषां कुशलकर्मणां हृदयं नव्यवत् अये प्राप्नोमि जानामि इति वा । यद्वा । यज्ज्ञः यन्मत्स्वरूपं जानाति तादृशो जनः हृदये नव्यवत् प्रतिक्षणं नूतनवत्परमानन्दभाग् भवति एतत्परमानन्दरूपं यच्छब्दोद्दिष्टं मत्स्वरूपमेव । ब्रह्मवादिभिर्ब्रह्मोच्यते । अत्र हेतुः न हृष्यन्तीत्यादि ॥ २० ॥ एवमिति ॥

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् ॥ मद्वार्तायातयामानां न बन्धाय गृहा मताः ॥ १९ ॥ नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः ॥ न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः॥२०॥मैत्रेय उवाच॥ एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्राञ्जलयः प्रचेतसः॥ तद्दर्शनध्वस्ततमोरजोमला गिराऽगृणन्गद्गदया सुहृत्तमम् ॥ २१ ॥ प्रचेतस ऊचुः ॥ नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय ॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥ २२ ॥ शुद्धाय शान्ताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ॥ नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥ २३ ॥ नमो विशुद्धसत्त्वाय हरये हरिमेधसे ॥ वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ॥ २४ ॥

एवं ब्रुवाणं पुरुषार्थं भाजयति प्रापयतीति तथा तम् अत एव सुहृत्तमं परमहितकर्तारं जनार्दनं तस्य दर्शनेन ध्वस्तं निरस्तं तमो रजो मलं येषां ते प्रचेतसः प्राञ्जलयः सन्तो गद्गदया स्खलिताक्षरया गिरा अगृणन् अस्तुवन् ॥२१॥ नमो नम इति ॥ भक्तानां क्लेशविनाशनाय निरूपिताः वेदैः श्रेयःसाधनत्वेन कथिताः उदाराः गुणा आह्वया नामानि च यस्य तस्मै मनोवचसोर्वेगादपि पुरोऽग्रतो जवो वेगो यस्य तस्मै वाङ्मनसागोचराय सर्वेषामक्षाणामिन्द्रियाणां मार्गैरगतः अनवगतः अध्वा मार्गोऽपि यस्य तस्मै नमो नमः ॥ २२ ॥ शुद्धायेति ॥ स्वनिष्ठया स्वरूपस्थित्या शुद्धाय अत एव शान्ताय च नमः मनसि निमित्ते सत्येवापार्थं वृथैव विलसत् स्फुरितं द्वयं द्वैतं यत्र तस्मै वस्तुत एकत्वेऽपि लीलार्थं जगतः स्थानं पालनं लयः प्रलयः उदयः उत्पत्तिः तेषु निमित्तेषु गृहीताः मायागुणैः सत्वादिभिर्विग्रहा ब्रह्मविष्णुरुद्रमूर्तयो येन तस्मै नमो नमः ॥ २३ ॥ नम इति ॥ विशुद्धसत्त्वाय नमः । हरये च हरति संसारं मेधाज्ञानं यस्य तस्मै हरिमेधसे वासुदेवाय कृष्णाय सर्वेषां सात्वतां यादवानां भक्तानां वा प्रभवे पालकाय नमः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम इति॥ब्रह्माण्डात्मकं कमलं नाभौ यस्य तस्मै नमः। कमलानां माला विद्यतेऽस्य तस्मै नमः।कमले इव कोमलौ पादौ यस्य तस्मै नमः।हे कमलेक्षण ते तुभ्यं नमः ॥२५॥ नम इति ॥ कमलस्य किञ्जल्काः केसरास्त इव अमले पिशङ्गे पीते वाससी यस्य तस्मै सर्वेषां भूतानां निवासाय आधाराय सर्वसाक्षिणे च नमः नमस्कारम् अयुंक्ष्महि कृतवन्तो वयम् ॥ २६ ॥ रूपमिति ॥ क्लिष्टानामविद्यास्मितादिक्लेशैर्व्याप्तानां नोऽस्माकम् अशेषाणां समस्तानां क्लेशानां संक्षयो यस्मात्तथाभूतमेतत् दृश्यमानं रूपं भगवता त्वयाविष्कृतं प्रकटितमतोन्यत्किमनुकम्पितमनुकम्पा इयमेवानुकम्पेत्यर्थः ॥ २७ ॥ एतावत्त्वमिति ॥ हे अभद्ररन्धन अमङ्गलनाशन यत् एतेऽस्मदीया इति स्वबुद्ध्या काले सेवादिकालेऽनुस्मर्यते दीनेषु वत्सलैः कृपालुभिः विभुभिः स्वामिभिरेतावत्वं एतावदेव त्वप्रत्ययोऽत्र स्वार्थे। भाव्यं कार्यम् त्वया तु रूपमपि दर्शितम् ॥ २८ ॥ येनेति ॥ येनानुस्मरणेन भूतानां स्मृतानामुपशान्तिः सर्वक्लेशनिवृत्तिर्भवति क्षुल्लकानामतितुच्छानामपि प्राणिनामीहतामिच्छतां शतार्षः। अन्तर्हृदयेऽन्तर्हितः साक्षितया स्थितो भवां-

नमः कमलनाभाय नमः कमलमालिने ॥ नमः कमलपादाय नमस्ते कमलेक्षण ॥ २५ ॥ नमः कमलकिञ्जल्कपिशङ्गामलवाससे ॥ सर्वभूत-
निवासाय नमोऽयुङ्क्ष्महि साक्षिणे ॥ २६ ॥ रूपं भगवता त्वे तदशेषक्लेशसंक्षयम् ॥ आविष्कृतं नः क्लिष्टानां किमन्यदनुकम्पितम् ॥ २७ ॥
एतावत्त्वं तु प्रभुभिर्भाव्यं दीनेषु वत्सलैः ॥ यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररन्धन ॥२८॥ येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् ॥ अन्त-
र्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः ॥ २९ ॥ असावेव वरोऽस्माकमीप्सितो जगतः पते ॥ प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः ॥ ३० ॥ वरं
वृणीमहेऽथापि नाथ त्वत्परतः परात्॥नह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे॥३१॥ पारिजातेऽञ्जसा लब्धे सारङ्गोऽन्यन्न सेवते ॥ त्वदङ्घ्रि-
मूलमासाद्य साक्षात् किं किं वृणीमहि ॥ ३२ ॥ यावत् ते मायया स्पृष्टा भ्रमाम इह कर्मभिः ॥ तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे ॥३३॥

स्तेषां मनोरथान् जानाति तर्हि नोऽस्माकं स्वभक्तानामाशिषो मनोरथान् कस्मान्न वेद वेदैवेति ॥ २९ ॥ असाविति ॥ हे जगतः पते अपवर्गस्य गुरुर्मार्गप्रदर्शकः गतिः पुरुषार्थरूपश्च भगवान् भवान् येषां प्रसन्नो जातस्तेषामस्माकमीप्सितो वरः असौ भवत्प्रसाद एव नान्यः ॥ ३० ॥ वरमिति ॥ अथापि तथापि परतः ब्रह्मादिभ्योऽपि परात् कारणादपि त्वत् त्वत्तः एकं वरं वृणीमहे । हि यस्मात् देवानां त्वद्विभूतीनामैश्वर्यादीनामन्तो नास्त्यन्तो यस्त्वमनन्त इति गीयसे अतः स वक्ष्यमाणो वरो देय एवेति ॥ ३१ ॥ पारिजात इति ॥ यथा पारिजाते वृक्षे अञ्जसा अनायासेन लब्धे सति तद्रसस्यात्युत्कृष्टत्वात्तं विहाय सारङ्गो भ्रमरोऽन्यत्सुलभमपि वृक्षान्तरं न सेवते तथा साक्षात्त्वदङ्घ्रिमूलमासाद्य प्राप्य वयमपि किं किं त्वत्परिचरणादन्यत् वरान्तरं वृणीमहि न किंचित् । यद्वा । अन्यत्तुच्छं वृणीमहि । यद्वा । मनोरथानामनन्तत्वात् किं किं वृणीमहि अतो भवत्परिचरणमेव वरणीयम् ॥ ३२ ॥ अतस्तादृशमेव वरं याचन्ते—यावदिति ॥ ते तव मायया स्पृष्टाः मोहिताः सन्तः स्वकर्मभिरिह संसारे यावद्वयं भ्रमाम-

CC-0. In Public Domain. Digitization by eGangotri

स्तावन्नोऽस्माकं भवे भवे जन्मनि जन्मनि भवति प्रकृष्टः सङ्गो येषां तेषां भवद्भक्तानां सङ्गः स्यात् ॥ ३३ ॥ तुलयामेति ॥ भगवतस्तव सङ्गिनो ये भक्तास्तेषां सङ्गस्य लवेनापि कालेन स्वर्गं न तुलयाम तुल्यतया न गणयाम। तथा अपुनर्भवं मोक्षमपि न तुलयाम तर्हि मर्त्यानामाशिषो राज्यभोगान् न तुलयामेति किमुत वक्तव्यम् ॥ ३४ ॥ यत्रेति ॥ यत्र भगवद्भक्तसमाजे मृष्टाः शुद्धाः परमानन्दजनिकाः भवत्कथा ईड्यन्ते भक्तैःस्तूयन्ते यतो याभ्यः कथाभ्यस्तृष्णायास्तत्तद्विषयभोगविषयिण्याः प्रशमः शान्तिर्भवति ।यत्र सर्वेषु भूतेषु निर्वैरं वैरहेतुतृष्णाया निवृत्तत्वाद्वैराभावो भवति अतः कश्चनापि चित्तोद्वेगो न भवतीति ॥ ३५ ॥ यत्रेति ॥ यत्र च सत्कथासु मुक्तसङ्गैर्निरपं पेर्भगवद्भक्तैः न्यासिनां त्यक्तसर्वफलानामपि स एव गतिः फलं भगवान्नारायणः साक्षात् पुनः पुनः स्तूयते ॥ ३६ ॥ तेषामिति ॥ तेषां तावकानां त्वद्भक्तानां तीर्थानामपि दुष्टसम्बन्धेन दुष्टानां पावनेच्छया पद्भ्यां विचरतां समागमः संसारात् भीतस्य किं न रोचेत कथं न स्वस्मिन् रुचिमुत्पादयेत् ॥ ३७ ॥ वयं त्विति ॥ हे भगवन् तव प्रियस्य

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्।।भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः।।३४।।यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः।। निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन।।३५।।यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः ।। संस्तूयते सत्कथासु मुक्तसङ्गैः पुनः पुनः।।३६।।तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ।। भीतस्य किं न रोचेत तावकानां समागमः।।३७।।वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसङ्गमेन।। सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाऽद्य गतिं गताः स्मः।।३८।।यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ।। आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ।।३९ ।। यन्नः सुतप्तं तप एतदीश निरन्धसां कालमदभ्रमप्सु ।। सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय।।४०।।मनुः स्वयंभूर्भगवान्भवश्च येऽन्ये तपोज्ञानविशुद्धसत्वाः ।। अदृष्टपारा अपि यन्महिम्नः स्तुवन्त्यथो त्वात्मसमं गृणीमः।। ४१ ।।

सख्युर्भवस्य श्रीरुद्रस्य क्षणमात्रभवेन सङ्गमेन हेतुना सुदुश्चिकित्सस्य अतिप्रयत्नेनापि चिकित्सितुं निवर्तयितुमशक्यस्य भवस्य जन्मनो मृत्योः मरणस्य चेति रोगद्वयस्यासाध्यस्यापि भिषक्तमं सद्वैद्य निवर्तकं त्वा त्वामद्य साक्षाद्वयं गतिं गताः शरणं प्राप्ताः स्म ॥ ३८ ॥ यन्न इति ॥ यत् नोऽस्माभिः सुष्ठु सम्यगधीतं वेदाध्ययनं कृतं तथा गुरवः उपदेष्टारः अन्ये च विप्राः वृद्धाः पित्रादयः आर्याः अन्येऽपि सदाचारपराः शिष्टाः सुहृदो मित्राणि भ्रातरः अन्यानि च सर्वाणि भूतानि प्राणिनः अनसूययैव शुद्धभावेनैव न तु लोकप्रदर्शनार्थं नताः नमस्कृताः ।सदानुवृत्त्या सदाचारेणास्माभिः प्रसादिताश्च ॥ ३९ ॥ यदिति ॥ हे ईश एतावन्तं कालमप्सु जले स्थितानां निरन्धसां निरन्नानां नोऽस्माकं यदेतत् सुतप्तं सम्यगनुष्ठितमत एवादभ्रमत्युग्रं तपस्तदेतत्सर्वमध्ययनाद्यनुष्ठानं भूम्नो व्यापकस्य अत एव पुरुषस्य सर्वान्तर्यामिणस्ते एव परितोषणाय भवत्विति वयं वृणीमहे ॥ ४० ॥ मनुरिति ॥ तपोज्ञानाभ्यां विशुद्धं सत्त्वं येषां तादृशा अपि मनुः स्वयंभूर्भगवान् भवश्च येऽन्येऽपि तथाभूताः यस्य तव महिम्नः न दृष्टः पारः अन्तः यैस्ते तथाभूता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि यथा त्वामात्मसमं स्वज्ञानशक्त्यनुरूपमेव स्तुवन्ति । अथो तथा वयमपि त्वा त्वामात्मसमं गृणीमः स्तुमः ॥ ४१ ॥ नम इति ॥ सर्वत्र समाय शुद्धाय पराय श्रेष्ठाय पुरुषाय सत्त्वाय शुद्धसत्त्वमूर्त्तये वासुदेवाय ते तुभ्यं नमः ॥ ४२ ॥ इतीति ॥ शरण्येषु शरणागतेषु वत्सलः हरिः इत्येवं प्रचेतोभिरभिष्टुतः स्तुतः प्रीतः सन् तथेत्याह । भवत्प्रार्थितं तथास्तु इत्याह स्म । ततश्च अनपवर्गवीर्यः अकुण्ठितशक्तिर्भगवान् स्वदर्शनेन न तृप्तानि चक्षूंषि येषाम् अत एव तस्य यानं प्रयाणमनिच्छतां सतां स्वधाम ययौ भक्तहृदयं विवेशेतिभावः॥४३॥ अथेति ॥ अथ प्रचेतस उदन्वतः समुद्रस्य सलिलान्निर्याय निर्गत्य तदा प्राचीनबर्हिषः प्रव्रजितत्वादराजके कर्षणाद्यभावात् गां स्वर्गं रोद्धुमिवोच्छ्रितैर्द्रुमैर्गां महीं च्छन्नां वीक्ष्यैवं सति पित्रा भगवता चादिष्टः प्रजाविसर्गः कथं सिद्धयेदिति व्याकुलचित्ताः द्रुमेभ्योऽकुप्यन् ॥ ४४ ॥ तत इति ॥ हे राजन् ततः रुषा क्रोधेन महीं निर्गताः वीरुधोऽपि यस्यास्तथाभूतां कर्तुं मुखतोऽग्निमारुतौ व्यमुञ्चन् यथा अत्यये प्रलयकाले संवर्तकः कालाग्निरुद्रः सङ्कर्षणो वा मुखादग्निं विमु-

नमः समाय शुद्धाय पुरुषाय पराय च ॥ वासुदेवाय सत्त्वाय तुभ्यं भगवते नमः ॥४२॥ मैत्रेय उवाच ॥ इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्त-
थेत्याह शरण्यवत्सलः ॥ अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामाऽनपवर्गवीर्यः ॥ ४३ ॥ अथ निर्याय सलिलात्प्रचेतस उदन्वतः ॥
वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः ॥४४॥ ततोऽग्निमारुतौ राजन्नमुञ्चन्मुखतो रुषा ॥ महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये॥४५॥
भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्य पितामहः ॥ आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः ॥४६॥ तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा ॥
उज्जहुस्ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा ॥ ४७ ॥ ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे ॥ यस्यां महदवज्ञानादजन्यजनयोनिजः ॥ ४८ ॥
चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते ॥ यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥ ४९ ॥

ञ्चति तथा ॥ ४५ ॥ भस्मसादिति ॥ तान् द्रुमान् भस्मसात् क्रियमाणान् वीक्ष्य पितामहो ब्रह्मा तत्रागतः सन् नयैर्युक्तिभिर्बर्हिष्मतः पुत्रान् प्रचेतसः शमयामास सान्त्वितवान् ॥ ४६ ॥ तत्रेति ॥ तत्र भूमौ येऽवशिष्टा दाहादुर्वरिता वृक्षास्ते तदा भीताः सन्तः स्वयंभुवा ब्रह्मणा उपदिष्टाः प्रचेतोभ्यः स्वदुहितरं कन्यामुज्जहुः समर्पयामासुः ॥ ४७ ॥ ते चेति ॥ ते च प्रचेतसो ब्रह्मण आदेशात् आज्ञातः मारिषानाम्नीं कन्यां वृक्षैर्दत्तामुपयेमिरे विवाहितवन्तः । अजनो नारायणो योनिः कारणं यस्य स अजनयोनिर्ब्रह्मा तस्मात् पूर्वं जातोऽपि दक्षो महतो महादेवस्यावज्ञानात् अपराधात् यस्यां क्षत्रियजातौ मारिषायामजनि जातः गर्भवासदुःखं प्राप पूर्वं वीरभद्रहस्तात्कालतश्चेति मरणद्वयं प्रापेत्यपि ज्ञेयम् ॥ ४८ ॥ पुनश्चाशुतोषस्य श्रीरुद्रस्यैव स्तुत्युत्थात् प्रसादात् स्वीयमैश्वर्यं प्रापेत्याह—चाक्षुष इति ॥ चाक्षुषे तु अन्तरे मन्वन्तरे प्राप्ते प्राक्सर्गे पूर्वदेहे कालेन विद्रुते विनष्टे सति यो दैवेनेश्वरेण चोदितः सन् नष्टाः प्रजाः ससर्ज स प्रसिद्धो दक्षः अजनीत्यनुषङ्गः । अत्राहुः । अस्य जन्म स्वायंभुवमन्वन्तर एव ततः

CC-0. In Public Domain. Digitization by eGangotri

स्वैश्वर्यप्राप्तये पञ्चममन्वन्तरपर्यन्तं तपश्चरणं चाक्षुषे मन्वन्तरे तपःफलप्राप्तिरिति ॥ ४९ ॥ य इति ॥ यो दक्षः जायमान एव । यद्वा । अजो ब्रह्मा इवाचरन् अजायमानो यो दक्षः स्वया रुचा प्रभया सर्वेषां तेजस्विनां तेज उपादत्त तिरस्कृतवान् । यं च कर्मणां दाक्ष्यात् चातुर्यात् सर्वे दक्षमब्रुवन् ॥ ५० ॥ तमिति ॥ तं च अनादिः ब्रह्माभिषिच्य प्रजासर्गरक्षायां युयोज नियुक्तवान् स एव दक्षोऽन्यान्सर्वान् प्रजापतीन्मरीच्यादींश्च युयुजे तद्व्यापारेषु नियुक्तवान् ॥ ५१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थेऽध्याये त्रिंशत्तमे व्यधात् ॥ ३० ॥ एकत्रिंशे त्यक्तराज्या वने नारदसङ्गतः ॥ प्रचेतसो ययुर्मुक्तिं तत्र श्लोकाः कुवह्नयः ॥ अष्टोवाचेति षट्त्रिंशत्पादहीना अनुष्टुभः ॥ ३१ ॥ तत इति ॥ ततो भगवदुक्तदिव्यवर्षसहस्राणां सहस्रानन्तरमुत्पन्नं विज्ञानं विवेको येषां ते प्रचेतसः " उपयास्यथ मद्धाम निर्विद्य निरयादत " इत्यधोक्षजस्य भगवतो भाषितं स्मरन्तः आत्मजे पुत्रे दक्षे भार्यां विसृज्य समर्प्य आशु शीघ्रमेव गृहात् प्राव्रजन् ॥ १ ॥ दीक्षिता इति ॥ सर्वभूतेष्वात्मेति मेधा

यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा ॥ स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ॥५०॥ तं प्रजासर्गरक्षायामनादिरभिषिच्य च ॥ युयोज युयुजेऽन्यांश्च स वै सर्वप्रजापतीन् ॥ ५१ ॥ इति श्रीभागवते चतुर्थस्कन्धे प्रचेतसां गृहे दक्षोत्पत्तिवर्णनं नाम त्रिंशोऽध्यायः ॥ ३० ॥ मैत्रेय उवाच ॥ ॥ तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम् ॥ स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन्गृहात् ॥२॥ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ॥ प्रतीच्यां दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः ॥२॥ तान्निर्जितप्राणमनोवचोदृशो जितासनाञ्छान्तसमानविग्रहान् ॥ परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः ॥ ३ ॥ तमागतं त उत्थाय प्रणिपत्याभिनन्द्य च ॥ पूजयित्वा यथादेशं सुखासीनमथास्तुवन् ॥ ४ ॥ प्रचेतस ऊचुः ॥ स्वागतं ते सुरर्षेऽद्य दिष्ट्या नो दर्शनं गतः ॥ तव चङ्क्रमणं ब्रह्मन्नभयाय यथा रवेः ॥ ५ ॥

ज्ञानं यस्मिंस्तेन ब्रह्मसत्रेण ब्रह्मविचारेण निमित्तेन दीक्षिताः कृतसंकल्पाः प्रतीच्यां दिशि वेलायां समुद्रतटे यत्र जाजलिर्नाम ऋषिः सिद्धोऽभूत् मुक्तिमवाप तत्र ययुः ॥ २ ॥ तानिति ॥ निर्जिताः प्राणमनोवचोदृशो यैस्तान् जितमासनं यैस्तान् शान्ताः उपरताः समाना मूलाधारादारभ्य ऋजवो विग्रहा येषां तान् परे सर्वोत्तमेऽत एवामले शुद्धे प्रपञ्चातीतत्वेन सर्वविकारशून्ये ब्रह्मणि व्यापके भगवति योजित आत्मा मनो यैस्तान् सुरासुरैरीड्यः नारदो ददृशे स्म । तङ्गार्षः ॥ ३ ॥ तमिति ॥ ते प्रचेतसस्तमागतमालोक्योत्थाय प्रणिपत्य अभिनन्द्य पूजयित्वा अथ यथादेशं योग्यदेशे सुखेनासीनमब्रुवन् ॥ ४ ॥ स्वागतमिति ॥ हे सुरर्षे हे ब्रह्मन् ते तव स्वागतम् सुष्ठु आगमनं जातम् अतो नोऽस्माकं दिष्ट्या भाग्येन त्वं दर्शनं गतोऽसि । यतः रवेर्यथा पर्यटनं चौरादिभयनिवृत्तये भवति तथा तव चङ्क्रमणं पर्यटनं लोकस्याभयाय ज्ञानभक्त्याद्युपदेशेन संसारभयनिवर्तनाय भवति ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिति ॥ हे प्रभो यत्तत्वं भगवता सर्वज्ञेन शिवेनाधोक्षजेन विष्णुना चादिष्टमुद्दिष्टं तद् गृहेषु प्रसक्तानामस्माकं प्रायशः क्षपितं विस्मृतम् ॥ ६ ॥ तदिति ॥ तत् अध्यात्ममात्मतत्त्वप्रकाशं तत्त्वार्थदर्शनं भगवत्तत्वप्रकाशकं ज्ञानं नोऽस्माकं त्वं प्रद्योतय पुनः प्रकाशय ।येन ज्ञानेन दुस्तरं भवसागरमञ्जसाऽनायासेनैव वयं तरिष्यामः ॥ ७ ॥ इतीति ॥ इत्येवं प्रचेतसां प्रचेतोभिः शेषे षष्ठी । पृष्टः भगवति उत्तमश्लोक आविष्ट आत्मा यस्य सः मुनिः भगवान्नारदः तान् नृपान् अब्रवीत् ॥८ ॥ तदिति ॥ येन जन्मादिना विश्वस्यात्मा हरिः सेव्यते इह संसारे नृणां तदेव जन्म तान्येव कर्माणि तदेव आयुः तदेव मनो वचश्चेति सफलत्वात् अन्यत्तु व्यर्थत्वादसत्कल्पं मनो वच इत्युपलक्षणं बुद्धीन्द्रियादिस्वाध्यायान्तानामित्युत्तरश्लोकार्थदृष्ट्या ज्ञेयम् ॥ ९ ॥ अन्वयं विवृत्य व्यतिरेकं विवृणोति—किमिति ॥ यत्र येषु जन्मादिषु सत्स्वपि हरिरात्मप्रदो न भवति तैः पुंसः जन्मादिभिः किं फलमित्यन्वयः । तत्र शौक्लं शुद्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन याज्ञिकं यज्ञदीक्षयेति त्रिभिर्जन्मभिः किं त्रयीप्रोक्तैः कर्मभिर्वा

यदादिष्टं भगवता शिवेनाधोऽक्षजेन च ॥ तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥ ६ ॥ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनम् ॥ येनाञ्जसा तरिष्यामो दुस्तरं भवसागरम् ॥ ७ ॥ मैत्रेय उवाच ॥ इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः॥भगवत्युत्तमश्लोक आविष्टात्माऽब्रवीन्नृपान् ॥ ८ ॥ नारद उवाच ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः ॥ नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥ ९ ॥ किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः ॥ कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥ १० ॥ श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या वा किं निपुणया बलेनेन्द्रियराधसा ॥ ११॥ किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ॥ किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥१२॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ॥ सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥ १३ ॥

किं विबुधानामिव दीर्घेणायुषाऽपि किम् ॥ १० ॥ श्रुतेनेति ॥ श्रुतेन वेदान्तादिश्रवणेन तपसा वचोभिः शास्त्रव्याख्यानैः वाग्विलासैर्वा चित्तवृत्तिभिः नानार्थकल्पनावधानसामर्थ्यैः किं निपुणया बुद्ध्या बलेन इन्द्रियाणां राधसा पाटवेन च किम् ॥ ११ ॥ किमिति ॥ योगेन प्राणायामादिना साङ्ख्येन देहादिभिन्नात्मज्ञानमात्रेण न्यासस्वाध्याययोः संन्यासवेदाध्ययनाभ्याम् अपि तृतीयार्थे षष्ठी । अन्यैश्च दानतीर्थपर्यटनादिभिः श्रेयःसाधनैरपि किम् ॥ १२ ॥ श्रेयसामिति ॥ सर्वेषामपि श्रेयसां फलानामवधिः परा काष्ठा अर्थतः विचारतः आत्मैव आत्मार्थत्वेनैवान्येषां प्रियत्वात् । हीति निश्चितमेतत्व सर्वेषामपि भूतानां प्राणिनामात्मा हरिरेव आत्मा आत्मदश्च अविद्यानिरासेन स्वरूपाभिव्यञ्जकः ऐश्वरेणापि रूपेण बलिप्रभृतिभ्य इवात्मप्रदः प्रियश्च परमानन्दरूपत्वात् अतो हरिसेवन एवात्मानं युञ्ज्यात् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ यथा तरोर्वृक्षस्य मूलनिषेचनेनैव तस्य स्कन्धाः मूलात्प्रथमं विभक्ताः भुजाः शाखा उपशाखाः शाखावयवाः पत्रपुष्पादयोऽपि च तृप्यन्ति फलन्ति च नतु मूलं विना स्वस्वमात्रसेचनेन प्राणस्योपहारो भोजनं तस्मादेव यथा सर्वेन्द्रियाणां तृप्तिर्न तु तत्तदिन्द्रियेषु पृथक् पृथगन्नलेपनेन तथैव अच्युतस्य इत्यापूजनमेव सर्वेषां देवपित्रादीनामर्हणं पूजनं न तु तेषां पृथक् पूजनमपेक्षितम् ॥ १४ ॥ हरिः सर्वेषां मूलमिति प्रतिपादयति—यथेति ॥ यथैव वारः जलानि वर्षाकाले सूर्यात् प्रभवन्ति पुनश्च ग्रीष्मे तस्मिन्सूर्य एव प्रविशन्ति यथा च स्थिरजङ्गमानि भूतानि देहा भूमेः प्रभवन्ति भूमौ प्रविशन्ति च तथा गुणप्रवाहश्चेतनाचेतनात्मकः प्रपञ्चः सृष्टिसमये हरेः सकाशादेव प्रभवति प्रलयकाले तस्मिन्नेव लीयते च भूमिदृष्टान्तेन हरावेव तिष्ठति चेत्यपि ज्ञेयम् ॥१५॥ नन्वेवं हरेः सोपाधिकत्वं स्यात्तत्राह—एतदिति ॥ एतद्विश्वं सवितुः प्रभा इव जगदात्मनो भगवतः तच्छास्त्रप्रसिद्धं परं निरुपाधिकम् पदं स्वरूपमेव तदुत्पन्नत्वात् न तु ततः पृथक् तत्र सकृत्कदाचित् गन्धर्वनगरवत् पृथक् विभातं स्फुरितं नतु वस्तुतः। यथा सवितुः प्रभा ततो न भिन्ना यथा च जाग्रदवस्थायाम् असव इन्द्रियाणि जाग्रति स्फुरन्ति सुषुप्तौ सुप्तशक्तयो भवन्ति । यद्वा । अजाग्रति सुषुप्तौ सुप्ताः शक्तयो येषां

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ॥ प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥ १४ ॥ यथैव सूर्यात्प्रभवन्ति वारः पुनश्च तस्मिन्प्रविशन्ति काले ॥ भूतानि भूमौ स्थिरजङ्गमानि तथा हरावेव गुणप्रवाहः ॥ १५ ॥ एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा ॥ यथाऽसवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाऽज्ञानभिदाभ्रमात्ययः ॥ १६ ॥ यथा नभस्यभ्रतमःप्रकाशा भवन्ति भूपा न भवन्त्यनुक्रमात् ॥ एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमः सत्त्वमिति प्रवाहः ॥ १७ ॥ तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ १८ ॥

ते भवन्ति सवितुः प्रभेत्युद्गतौ दृष्टान्तः इति । तथा द्रव्याणि महाभूतानि । क्रिया इन्द्रियाणि अज्ञानानि इन्द्रियाधिष्ठातारः एषां भिदा भ्रमस्य भेदभ्रान्तेरत्ययश्च भवति अथवा द्रव्यक्रियाज्ञानानां तन्निमित्तभेदभ्रमस्य चात्ययो यस्मादिति हरिविशेषणम् ॥ १६ ॥ यथेति ॥ हे भूपाः यथा नभसि आकाशे अभ्रतमःप्रकाशा रजस्तमःसत्वस्थानीयाः अनुक्रमात् कदाचिद् भवन्ति उपलभ्यन्ते न भवन्ति नोपलभ्यन्ते लीयन्ते च न हि तैराकाशस्य संश्लेषोऽस्ति येन तद्धर्मभागित्वम् । एवं परे ब्रह्मणि रजस्तमस्सत्वमित्यमूः शक्तयोऽपि तुरप्यर्थे । कदाचिद्भवन्ति कदाचिन्न भवन्ति इत्येवमयं जगत्प्रवाहो भवति । नहि भगवतस्तेन संश्लेषोऽस्ति अतो न तद्धर्मभागित्वम् ॥ १७ ॥ तेनेति ॥ तेन सर्वमूलत्वेन हेतुना एकम् अशेषदेहिनामात्मानं स्वरूपभूतं कालं निमित्तं प्रधानमुपादानं पुरुषं कर्तारम् एतत्त्रयात्मकत्वात्सर्वकारणं परेषां ब्रह्मादीनामपीशं स्वतेजसा चिच्छक्त्या ध्वस्तो निरस्तो गुणप्रवाहः संसारो यस्मात्तं भगवन्तम् आत्मैकभावेन आत्मनः अभेदेन अद्धा साक्षात् फलव्यवधानसन्तरेण भजध्वम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दययेति ॥ सर्वभूतेषु दयया येन केनचित् प्रारब्धलब्धेनैव सन्तुष्ट्या वा एवार्थे । सर्वेषामिन्द्रियाणामुपशान्त्या विषयेभ्यो निग्रहेण चकाराच्छ्रवणादिना च जनार्दनो भगवान् आशु शीघ्रमेव तुष्यति ॥ १९ ॥ अपहतेति ॥ सतां संबन्धि अपहता निरस्ताः सकलाः पुत्रवित्तलोकादिविषया एषणाः कामा यस्मात्स चासावत एवामलश्चात्मान्तःकरणं तस्मिन् अविरतं निरन्तरमेधितया भावनया भक्त्या उपहूतः सन्निधापितः सन्नक्षरोऽच्युतभगो भगवानात्मनो निजजनवशगत्वं स्वभक्ताधीनत्वमयन् अवगच्छन् । छिद्रवत् हृदयाकाशवत् ततो न सरति नापयाति । पुष्पिताग्रात्रयम् ॥ २० ॥ न भजतीति ॥ अधनाश्च ते आत्मधनाश्च भगवद्धनास्ते प्रिया यस्य स तथा रसज्ञः तेषां भक्तिरसं स्वप्रेमलक्षणं जानातीति तथा स पूर्वोक्तो भगवान् ये श्रुतधनकुलकर्मणां मदैः अकिञ्चनेषु श्रुतधनाद्यभिमानरहितेषु सत्सु स्वभक्तेषु पापं विदधति तिरस्कारं कुर्वन्ति तेषां कुमनीषिणां कुत्सितबुद्धीनां तु प्राणिनामिज्यां पूजामपि न भजति नाङ्गीकरोति ॥ २१ ॥ श्रियमिति ॥ यत् यतः स्वेनैव परमानन्देन पूर्णोऽपि निजभृत्यवर्गतन्त्रः स्वभक्ताधीनो

दयया सर्वभूतेषु संतुष्ट्या येन केन वा ॥ सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः ॥ १९ ॥ अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ॥ निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि ॥ २० ॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ॥ श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु ॥ २१ ॥ श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यत्स्वपूर्णः ॥ न भजति निजभृत्यवर्गतन्त्रः कथममुमुद्विसृजेत्पुमान्कृतज्ञः ॥ २२ ॥ मैत्रेय उवाच ॥ इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः ॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः ॥ २३ ॥ तेऽपि तन्मुखनिर्यातं यशो लोकमलापहम् ॥ हरेर्निशम्य तत्पादं ध्यायन्तस्तद्गतीं ययुः ॥ २४ ॥ एतत्तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् ॥ प्रचेतसां नारदस्य संवादं हरिकीर्तनम् ॥ २५ ॥ श्रीशुक उवाच ॥ य एष उत्तानपदो मानवस्यानुवर्णितः ॥ वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥ २६ ॥

यः अनुचरतीं निरन्तरं सेवमानां नुमभाव आर्षः । श्रियं लक्ष्मीं तदर्थिनः श्रीकामान् द्विपदपतीन्नरेन्द्रान् विबुधांश्च यो न भजति नानुवर्तते तममुं भगवन्तं कृतज्ञः पुमान् कथमुत् ईषदपि विसृजेत् परित्यजेत् ॥ २२ ॥ इतीति ॥ हे राजन् इत्येवंभूताः अन्याश्च भगवत्कथाः प्रचेतसः श्रावयित्वा स्वायंभुवः ब्रह्मणः पुत्रो मुनिर्नारदो ब्रह्मलोकं ययौ ॥ २३ ॥ तेऽपीति ॥ ते प्रचेतसोऽपि तस्य नारदस्य मुखान्निर्यातं लोकमलापहं हरेर्यशो निशम्य तस्य हरेः पादं ध्यायन्तस्तस्य हरेर्गतिं ययुः ॥ २४ ॥ एतदिति ॥ हे क्षत्तः यत् त्वं मां परिपृष्टवान् तदेवं हरेः कीर्तनं यत्र तत् प्रचेतसां नारदस्य च संवादलक्षणमेतदाख्यानं ते तुभ्यं मया अभिहितं वर्णितम् ॥ २५ ॥ य इति ॥ हे नृपसत्तम मानवस्य स्वायंभुवमनोः पुत्रस्योत्तानपदः य एष वंशः सोऽनुवर्णितः । इदानीं प्रियव्रतस्य तद्द्वितीयपुत्रस्य वंशं वर्णयामि तन्निबोध ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

य इति॥यः प्रियव्रतः प्रथमं नारदादात्मविद्यामधिगम्य प्राप्य पुनस्तदनन्तरं महीं भुक्त्वा राज्यं कृत्वा ततः पुत्रेभ्यः विभज्य विभागेन महीं दत्त्वा ऐश्वरं पदं स्वरूपं सम्यगनायासेन अगात् प्राप्तवान् ॥ २७ ॥ इमां त्विति ॥ इमामजितस्य भगवतो वादो माहात्म्यवर्णनं तस्यामत एव सतीं श्रोतॄणां रागादिदोषनिवारणीं कथां कौषारविणा मैत्रेयेण उपवर्णितां क्षत्ता विदुरो निशम्य प्रवृद्धो भावो भवति भक्तिर्यस्य स तथा अत एवाश्रूणां कलाभिराकुलो व्याकुलः हृदा मनसा हरेश्वरणं दधार तथा मुनेर्मैत्रेयस्य गुरोश्चरणं मूर्ध्ना दधार दण्डवत् प्रणनाम ॥ २८ ॥ सोऽयमिति ॥ हे महायोगिन् यत्र यस्मिन् सति अकिञ्चनगः अनन्यभक्तप्राप्यो हरिः प्राप्यते सोऽयं भगवद्भक्तिज्ञानात्मकः तमसः अज्ञानस्य पारो निवर्तकः करुणात्मना दयार्द्रचित्तेन भवता मह्यं दर्शितः ॥२९॥ इतीति ॥ इत्युक्त्वा आनम्य ततो गमनार्थं पुनः प्रणामं कृत्वा तं मुनिमामन्त्र्य गमनप्रार्थनां

यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥२७॥ इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याजितवादसत्कथाम् ॥ प्रवृद्धभावाऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः ॥ २८ ॥ विदुर उवाच ॥ सोऽयमद्य महायोगिन्भवता करुणात्मना ॥ दर्शितस्तमसः पारो यत्राकिंचनगो हरिः ॥ २९ ॥ श्रीशुक उवाच ॥ इत्यानम्य तमामन्त्र्य विदुरो गजसाह्वयम् ॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥ ३० ॥ एतद्यः शृणुयाद्राजन्राज्ञां हर्यर्पितात्मनाम् ॥ आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥ ३१ ॥ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां चतुर्थस्कन्धे प्राचेतसोपाख्यानं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ समाप्तोऽयं चतुर्थः स्कन्धः ॥ ४ ॥

कृत्वा तदनुज्ञातः निर्वृताशय आनन्दपूर्णचित्तः विदुरः स्वानां ज्ञातीनां स्वान् ज्ञातीन् धृतराष्ट्रादीन् शेषे षष्ठी । दिदृक्षुः गजसाह्वयं हास्तिनपुरं प्रययौ । निर्वृताशय इत्यनेन "यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः । जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ॥ " इति प्रथमस्कन्धोक्तान्यप्रश्नोत्तरश्रवणविरक्तिहेतुर्भक्तियोगः सूचितः ॥ ३० ॥ एतदिति ॥ हरौ अर्पितः आत्मा मनो यैस्तेषां राज्ञां प्रचेतसाम् एतत् चरितं यः शृणुयात् सः आयुः धनं यशः स्वस्ति कल्याणम् ऐश्वर्यं गतिं वैकुण्ठादिकां चाप्नुयात् ॥ ३१ ॥ ब्रह्मादिसंसदि विपक्षसदक्षदक्षरूक्षाक्षरेषुभिरनुक्षणमर्द्यमाणः ॥ शक्तोऽपि तत्प्रतिविधौ न दधौ स्वचेतः श्रीशङ्करोऽतुलमतिर्मम शं करोतु ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थस्यैकत्रिंशे व्यधादिमाम् ॥ ३१ ॥ ॥ समाप्तोऽयं चतुर्थस्कन्धः ॥ ४ ॥

अयं श्रीमद्भागवतस्य चतुर्थस्कन्धः बून्दीनगरनिवासिपण्डितगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वीये " लक्ष्मीवेङ्कटेश्वर " मुद्रणागारे मुद्रयित्वा प्रकाशितः । मार्गशीर्षकृष्णा ११ शकाब्दाः १८२२, संवत् १९५७.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते चतुर्थस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते पञ्चमस्कन्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं सञ्चिन्तयामि निखिले जगति स्फुरन्तम्॥तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयं लिखति सम्प्रति पञ्चमेऽस्मिन् ॥३॥ आद्ये प्रियव्रतस्त्यक्तं राज्यं प्राप्यार्णवान् व्यधात् ॥ द्वीपांश्च तज्ज्ञौ गद्यपद्यसङ्ख्या खर्वाब्धयः ॥ चत्वार्युवाचेति सार्द्धा ऊनाशीतिरनुष्टुभः ॥ १ ॥ अत्र पञ्चमस्कन्धगद्यानां प्रायोऽन्विततयानन्वितपदानामन्वयाय लेखः अवश्यं व्याख्येयानां व्याख्यार्थं लेखः तदन्येषां विस्तरभयात्त्यागोऽपि । पूर्वस्कन्धान्ते प्रियव्रतस्य पूर्वमात्मारामत्वं ततो विषयभोगं श्रुत्वा विस्मितः पृच्छति–प्रियव्रत इति ॥ हे मुने प्रियव्रतो भागवतः आत्मारामश्च अतः गृहे कथमरमत । यद्गृहरमणं मूलं कारणं यस्य तादृशः कर्मणा बन्धः पराभवः स्वस्वरूपतिरस्कारश्च भवति ॥१॥ गृहे तु रतिरपि तत्राभिनिवेशात्स्यात् स तु भागवतानां न संभवतीत्याह–नेति॥हे द्विजर्षभ नूनं सर्वतो मुक्तसङ्गानां तादृशानां प्रियव्रतसदृशानां पुंसामयमज्ञजनप्रसिद्धो गृहेष्वभिनि-

॥ श्रीगणेशाय नमः ॥ ॥ अथ पञ्चमस्कन्धप्रारम्भः ॥ राजोवाच ॥ प्रियव्रतो भागवत आत्मारामः कथं मुने ॥ गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः ॥ १ ॥ न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ ॥ गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति ॥ २ ॥ महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ॥ छायानिर्वृतचित्तानां न कुटुम्बे स्पृहा मतिः ॥ ३ ॥ संशयोऽयं महान्ब्रह्मन्दारागारसुतादिषु ॥ सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥ ४ ॥ श्रीशुक उवाच ॥ बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्दमकरन्दरसआवेशितचेतसो भागवतपरमहंसदयितकथां किंचिदन्तरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वन्ति ॥ ५ ॥

वेश आसक्तिर्न भवितुमर्हति ॥ २ ॥ कुटुम्बे स्पृहया गृहाभिरतिः स्यात्सापि तेषां नास्तीत्याह–महतामिति ॥ हे विप्रर्षे उत्तमश्लोकस्य हरेः पादयोर्या छाया कामादिसन्तापहारिणी तया निर्वृतमानन्दितं चित्तं येषां तेषां महतां खलु निश्चयेन कुटुम्बे स्पृहावती मतिर्न भवति । स्पृहायुक्ता स्पृहारूपा वा अमतिरज्ञानमिति वा ॥ ३ ॥ संशय इति ॥ हे ब्रह्मन् दारागारसुतादिषु प्रसक्तस्य प्रियव्रतस्य पुनः कृष्णे अच्युता अस्खलिता मतिर्भक्तिः सिद्धिर्मोक्षसिद्धिश्चाभूदित्ययमपि महान् संशयोऽस्ति॥४॥बाढमिति॥बाढं भवता सत्यमुक्तं तथापि भगवत उत्तमश्लोकस्य श्रीमतोः श्रिया सेव्यमानयोश्चरणारविन्दयोः यः मकरन्दरूपो रसः परमानन्ददायि लावण्यं तस्मिन्नावेशितं चेतो यैस्ते जनाः भागवता एव सत्यासत्यविवेकित्वात्परमहंसास्तेषां दयितस्य भगवतः कथामेव शिवतमां कल्याणात्मिकां स्वां स्वकीयां पदवीं मोक्षमार्गभूतां विघ्नबहुलत्वात्प्रायेण किंचिदन्तरायेण विहताः विघ्निता अपि न हिन्वन्ति न त्यजन्ति । विहतामिति पाठे कथाविशेषणम् । किंतु पूर्ववासनया तामेव सेवन्ते । हिन्वन्तीति "हिवि प्रीणने" इत्यस्य "हि गति-

CC-0. In Public Domain. Digitization by eGangotri

वृद्ध्योः " इति स्वादेर्वा रूपम् । धातूनामनेकार्थत्वात्त्यागे वृत्तिः ॥ ५ ॥ प्रियव्रतस्य ब्रह्मण आज्ञैव अन्तरायोऽभवदिति सप्रसङ्गमाह—यर्हीति ॥ हे राजन् यर्हि यदा वाव एव ह प्रसिद्धमेतत्। यदैव स राजपुत्रः प्रियव्रतः परमभागवतः नारदस्य चरणोपसेवया शरणागमनेन अञ्जसा अनायासेनैव तत्कृपयाऽवगतं ज्ञातं परमार्थस्यात्मनः सतत्त्वं स्वभावो याथार्थ्यं येन सः । " शीलं सतत्त्वं संसिद्धिः " इति हैमः । तथा ब्रह्मसत्रेण आत्मध्यानेन कार्येण दीक्षिष्यमाणः नियमं ग्रहीष्यन् एवं नियमकरणात्प्रागपि भगवति वासुदेव एवाव्यवधानं निरन्तरं समाधियोगेन चित्तैकाग्र्येण समावेशितः समर्पितः सकलकारकाणां सर्वेन्द्रियाणां क्रियाकलापः श्रवणकीर्त्तनदर्शनस्मरणादिक्रियासमूहो येन स राजपुत्रः प्रियव्रतः आम्नाता राज्ञां शास्त्रेणोक्ताः ये प्रवराः श्रेष्ठा गुणास्तेषां गणस्य समूहस्यैकान्तभाजनतया नित्याश्रयतया स्वपित्रा मनुना अवनितलपरिपालनाय आमन्त्रितो नियुक्तोऽपि नैवाभ्यनन्दत् नैवैच्छत् तदा ब्रह्मा स्वभवनादवततारेत्यग्रेतनेनान्वयः । यद्यपि तत्पितृवाक्यमप्रत्याम्नातव्यं न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकारेऽसतो मिथ्याभूतादपि राज्यप्रपञ्चात् पुरुषार्थभूतस्याप्यात्मनः पराभवं तिरस्कारमन्वीक्षमाण आलोचयन्नाभ्यनन्दत् ॥ ६ ॥ अथेति ॥ अथ ह भगवानादिदेवः

यर्हि वाव ह राजन्स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयाऽञ्जसाऽवगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकान्तभाजनतया स्वपित्रोपामन्त्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनन्दद्यद्यपि तदऽप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ ६ ॥ अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ॥ ७ ॥

गुणविसर्गस्य त्रिगुणकार्यस्यैतस्य प्रपञ्चस्य परिबृंहणं समृद्धिस्तदनुध्यानेन निरन्तरं तच्चिन्तनेन व्यवसितो निश्चितः सकलजगतां प्राणिनामभिप्राय इष्टानिष्टप्राप्तिरूपो येन सः ।यथा राज्ञा चारैर्मण्डलेश्वराणामभिप्रायो निश्चीयते तद्वत् आत्मयोनिर्ब्रह्मा अखिलैर्निगमैर्वेदैर्मूर्त्तिमद्भिर्निजगणैः मरीच्यादिभिश्च परिवेष्टितः परिवृतः स्वभवनात्सत्यलोकादवततार अवतीर्णः । अत्र प्रियव्रतं बाल्य एव विरक्तं वनं गतं ज्ञात्वा तदाज्ञया कनिष्ठोऽप्युत्तानपादो राज्यं चकार। तद्वंश्याश्च प्रचेतःपर्यन्ता यथासमयं राज्यं चक्रुरेवं च स्वायम्भुवमनोरर्द्धादप्यधिकः कालो जगाम । प्राचेतसो दक्षस्तु स्वायम्भुवमन्वन्तरे जातः । पूर्वजन्मैश्वर्यकामस्तपश्चचार । ततश्चाराजकं वीक्ष्य मनुमनोरथपूर्त्तये ब्रह्मा आगत्य प्रियव्रतं राज्ये प्रवर्त्तयामास। ततः पञ्चमन्वन्तरपर्यन्तं प्रियव्रतस्य तद्वंश्यानां राज्ञां चाधिकारः तृतीयचतुर्थपञ्चमानामुत्तमादीनां प्रियव्रतपुत्रत्वात् द्वितीयमनोःस्वारोचिषस्यापि तदन्तःपातात् तत्तन्मनुपुत्रपौत्राद्यास्तु प्रैयव्रत एव राज्येखण्डमण्डलेश्वररूपा राजानो बभूवुः । ततः षष्ठचाक्षुषमन्वन्तरारम्भे तपसो निवृत्तेन दक्षेण प्रजासृष्टिस्तत्रैव । तस्य साम्राज्यं च चाक्षुषस्योत्तानपादवंश्यत्वात्तदवधि स्वायंभुवाधिकारः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ स ब्रह्मा तत्र तत्र गगनतले आकाशमार्गे उडुपतिश्चन्द्र इव दिशोऽवभासयन् विमानानामावलयो येषां तैरमरपरिवृढैः देवश्रेष्ठैरिन्द्रादिभिस्तारादिस्थानीयैरनुपथमभिपूज्यमानस्तथा पथि पथि च वरूथशः सङ्घीभूतैः सिद्धगन्धर्वादिगणैरुपगीयमानः स्तूयमानो गन्धमादनपर्वतस्य द्रोणीं पर्वतद्वयान्तःप्रियव्रतस्थितिस्थानमुपससर्प आजगाम ॥ ८ ॥ तत्रेति ॥ तत्र ह वा तस्मिन्नेव स्थाने हंसयानेन उपलक्षणेन एनं भगवन्तं हिरण्यगर्भं ब्रह्माणं पितरमुपलभमानः मत्पिताऽयमिति लक्षयन् देवर्षिः पितापुत्राभ्यां मनुप्रियव्रताभ्यां सहावहिताञ्जलिः सन् सहसैवाभ्युत्थायाऽर्हणेन पूजया सहोपतस्थे तुष्टाव । नारद उपदेशाय मनुश्च तन्नयनायागतोऽभूदिति ॥ ९ ॥ भगवानिति ॥ हे भारत भगवानादिपुरुषो ब्रह्मापि तत्तेन नारदेनोपनीतं समर्पितमर्हणं पूजा यस्य सः तथा सूक्तवाक्येन यथोचितमधुरवाक्येन यकारसहितो रहितश्च पाठः । अतितरामुदिता वर्णिता गुणगणा अवताराः सुजयाः सर्वोत्कर्षाश्च यस्य सः अत एव सदयहासपूर्वकोऽवलोको यस्य स तं प्रियव्रतमिति वक्ष्यमाणमुवाच ॥ १० ॥ प्रियव्रतो मद्वाक्येऽपि न श्रद्धा-

स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीयमानो गन्धमादनद्रोणीमवभासयन्नुपससर्प ॥ ८ ॥ तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहिताञ्जलिरुपतस्थे ॥ ९ ॥ भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥१०॥ श्रीभगवानुवाच ॥ निबोध तातेदमृतं ब्रवीमि माऽसूयितुं देवमर्हस्यप्रमेयम् ॥ वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥ ११ ॥ न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ॥ नैवार्थधर्मैः परतः स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात् ॥ १२ ॥ भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय ॥ सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताऽङ्ग धत्ते ॥ १३ ॥

स्यतीति शङ्कमानो ब्रह्मा हरिरेव मन्मुखेन त्वामुपादिशतीति वदन् प्रवृत्तिनिवृत्तिरहस्यमाह—निबोधेति ॥ हे तात इदं वक्ष्यमाणमृतं सत्यं ब्रवीमि । अप्रमेयं देवं परमेश्वरम् असूयितुं नार्हसि दोषारोपेण द्रष्टुं नार्हसि । अहं तत्प्रेरणयैव त्वां प्रजापालने नियुनज्मि मद्वाक्यानादरात्तस्यैवानादरः । अहं ब्रह्मा भवो रुद्रः ते तव ततः तातः मनुरेष महर्षिर्नारदस्तव गुरुरन्ये च सर्वे वयं विवशाः यदधीनाः सन्तो यस्य दिष्टमादिष्टमाज्ञां वहाम पालयाम ॥ ११ ॥ नेति ॥ तस्य कृतं तेन निर्मितं तनुभृद्देहधृग् जीवः कोऽपि तपसा विहन्तुं न विभूयात् एवं प्रत्येकं न विभूयादित्यस्यान्वयः । विद्यया योगवीर्येण मनीषया बुद्धिनैपुण्येन अर्थेन धनादिना धर्मैर्यज्ञानुष्ठानादिभिः परतः बलवतासहायेन स्वतः स्वतःसिद्धप्रभावेण अतस्त्वं राज्यमनिच्छन्नपि तदिच्छातिक्रमे समर्थो नासीति भावः ॥ १२ ॥ देहधारणेऽपि लोकाः परतन्त्रा इत्याह—भवायेति ॥ अङ्ग हे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियव्रत जनता जीवसमूहः भवाय जन्मने नाशाय मरणाय कर्म कर्तुं शोकाय मोहाय भ्रमाय भयाय सुखाय दुःखाय च अव्यक्तेनेश्वरेण दिष्टं निर्मितं देवमनुष्यादिदेहयोगं सदा धत्ते न त्वन्यथा कर्तुं शक्नोति ॥ १३ ॥ कर्मकरणेऽपि लोकाः परतन्त्रा इत्याह—यदिति ॥ हे वत्स यस्य भगवतो वाचि वेदलक्षणायां तन्त्यां दामन्यां गुणकर्मदामभिः गुणाः सत्त्वादयः कर्माणि च तत्पूर्वकाणि तन्निबन्धनैर्दामभिर्ब्राह्मणादिनामभिः प्रग्रहस्थानीयैः सुदुस्तरैः सुदृढैर्वयं सर्वे सुयोजिताः निबद्धाः सन्तस्तस्मै ईश्वराय बलिं वहामः तदाज्ञया स्वाधिकारप्राप्तं कर्म कुर्मः । अन्यथा दण्डभागित्वं स्यात् । यथा नसि नासिकायां रज्जुप्रोता बद्धाः सन्तश्चतुष्पदो बलीवर्दा द्विपदे पुरुषाय यदि बलिं भारं वहन्ति तदैव खादनपानादिना सुखिनो भवन्त्यन्यथा तु दण्डभागिन एव भवन्ति तथेत्यर्थः ॥ १४ ॥ कर्मफलभोगेऽपि पारतन्त्र्यमाह—ईशेति ॥ गुणाः सत्त्वादयस्तदनुरूपाणि यान्यस्मत्कर्माणि तत्सङ्गात् तत्संबन्धात्तदनुरूपं यत् यत् देवतिर्यगादिलक्षणं देहं नाथः स्वामी अयुङ्क्त योजितवांस्तत्तदास्थाय स्वीकृत्य तेनैवेशा ईश्वरेण अभिसृष्टं दत्तं दुःखं सुखं वा वयमवरुन्ध्महे । हि निश्चयेन स्वीकुर्म एव नतु यथेष्टम् । यथा स्वामिना दत्तमेव कणिशादि बलीवर्दा भक्षयन्ति तद्वत् गुणकर्मसङ्गादितीश्वरे वैषम्यं वारयति । यथा

यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः ॥ सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ १४ ॥ ईशाऽभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसङ्गात् ॥ आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मताऽन्धा इव नीयमानाः ॥ १५ ॥ मुक्तोपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ॥ यथाऽनुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृङ्क्ते ॥ १६ ॥ भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सह षट्सपत्नः ॥ जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् ॥ १७ ॥

चक्षुष्मता अन्धाः पुरुषाः छायामातपं वा नीयमाना यत्र नीयन्ते तत्र गच्छन्ति न स्वातन्त्र्येण तथेत्यर्थः ॥ १५ ॥ नन्वेतत्सर्वमविदुष एव नात्मविद इत्यत आह—मुक्तोऽपीति ॥ यावत्प्रारब्धं सुखदुःखादिप्रदं पुण्यपापरूपं कर्मास्ति तावत्तदश्नन् मुक्तो जीवन्मुक्तोऽपि अभिमानशून्यः सन् स्वदेहं बिभृयात् बिभर्त्येव । यथा स्वप्ने अनुभूतं वस्तु प्रतियातनिद्रो गतनिद्रः पुरुषोऽभिमानशून्य एवानुस्मरति तद्वत् । ननु तर्हि भोगवासनया पुनर्जन्म स्यात्तत्राह । किंतु ज्ञानेन अविद्यानिवृत्त्या अन्यदेहाय देहान्तरारम्भकान् गुणान् वासनाः कर्माणि च न वृङ्क्ते न सम्भजते ॥ १६ ॥ भयमिति ॥ प्रमत्तस्य स्वकर्तव्यविमुखस्य विषयासक्तस्य वनेषु सङ्गभयेन वनाद्वनान्तरं गच्छतोऽपि भयं संसारादिप्राप्तिलक्षणं स्यादेव । कुतः यतः स वनवासी सहैव षट् सपत्नाः शत्रवो मनःपञ्चज्ञानेन्द्रियलक्षणा यस्य स तथाभूत एव तत्रास्ते । बुधस्य विवेकिनस्तु जितेन्द्रियस्य अत एवात्मरतेरात्मारामस्य गृहाश्रमोऽवद्यं रागादिदोषं किं नु करोति नैव करोतीत्यर्थः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजितेन्द्रियजितेन्द्रिययोर्गृहाश्रमे न दोष इत्युक्तम् । इन्द्रियजयेच्छोस्तु प्रत्युत गुण इत्याह—य इति ॥ अतो यः षट् सपत्नान् इन्द्रियाणि विजिगीषमाणः विजेतुमिच्छन् ज्ञाननिष्ठाविरोधित्वेन पूर्वं गृहेषु निर्विश्य स्थित्वा शनैस्तेषां निरोधं कुर्वन् जेतुं यतेत तेष्वरिषु क्षीणेषु वशीकृतेषु सत्सु पश्चात् विपश्चिदात्मारामः सन् कामं यथेष्टं गृहे वने वा विचरेत् । यथा लोकेऽपि राजा दुर्गाश्रित एव ऊर्जितान् अरीन् अत्येति जयति । युध्येतति पाठे प्रहरेदित्यर्थः । पश्चात् दुर्गे वान्यत्र वा वर्त्तते । प्रथमतो दुर्गान्निःसरणे शत्रुभयं स्यात्तथेत्यर्थः । गृहे कथंचिद्विषयभोगेऽपि दोषाभावात् शनैर्निरोद्धुं शक्यत्वाच्च तस्य दुर्गत्वं बोध्यम् ॥ १८ ॥ त्वमिति ॥ इदं गृहदुर्गाश्रयणं प्राकृतानामेव त्वं तु अब्जनाभस्याङ्घ्रिसरोजकोश एव दुर्गं तदाश्रितोऽत एव तत्प्रसादेन निर्जितषट्सपत्नोऽतो यद्यपि गृहे वने वा तव भयं नास्ति तथापि पुरुषेण भगवता आदिष्टान् अधिकारप्रापितान् भोगान् इह राज्याधिकारे स्थितो भुङ्क्ष्व । अधिकारसमाप्त्यनन्तरं तत्त्यक्त्वा विमुक्तसङ्गः सन् प्रकृतिं स्वरूपं भजस्व आत्मनिष्ठो भव ॥ १९ ॥ इतीति ॥ इत्येवं

यः षट् सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ॥ अत्येति दुर्गाश्रित ऊर्जितारीन्क्षीणेषु कामं विचरेद्विपश्चित् ॥ १८ ॥ त्वं त्वब्जनाभाङ्घ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ॥ भुङ्क्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्तसङ्गः प्रकृतिं भजस्व ॥ १९ ॥ श्रीशुक उवाच ॥ इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयाऽवनतशिरोधरो बाढमिति स बहुमानमुवाह ॥ २० ॥ भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥ २१ ॥ मनुरपि परेणैवं प्रतिसन्धितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगुप्तये आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥ २२ ॥

समभिहितः सम्यक् ब्रह्मणा आज्ञापितो महाभागवतः प्रियव्रत आत्मनः स्वस्य ततो लघुतया अल्पतया पौत्रत्वेन हेतुना त्रिभुवनगुरोः सर्वपूज्यस्य भगवतो ब्रह्मणोऽनुशासनमाज्ञामवनतशिरो नमत्कन्धर एव बाढं तथा करिष्यामीत्येवं सबहुमानं यथा भवति तथा उवाह अङ्गीकृतवान् । यद्वा । आत्मनो यदनुशासनं तत् अलघुतया गौरवेण अङ्गीचकार ॥ २० ॥ भगवानिति ॥ भगवान् ब्रह्मापि मनुना संतुष्टेन यथावत् सम्यक् उपकल्पिता समर्पिता अपचितिः पूजा यस्य स तथा प्रियव्रतनारदयोरविषमं यथा भवति तथाभिसमीक्षमाणयोः सतोः प्रियव्रतस्य योगभ्रंशान्नारदस्य शिष्यनाशात्कुटिलमीक्षणं नाभूदित्यर्थः । आत्मनः स्वस्य समवस्थानं सम्यगाश्रयभूतमवाङ्मनसं वाङ्मनसयोरविषयमव्यवहृतं सर्वव्यवहारातीतं स्वरूपं प्रवर्त्तयन् चिन्तयन् स्वक्षयं स्वनिवासं सत्यलोकमगमत् । अवाङ्मनस इति पाठे अवाक् वाचामगोचरं कथंचिन्मनसः क्षयं विषयम् ॥ २१ ॥ मनुरिति ॥ मनुरपि परेण ब्रह्मणैव हेतुना प्रतिसन्धाऽस्य सञ्जाता स प्रतिसन्धितः सम्पन्नः मनोरथः प्रियव्रतराज्याभिषेकरूपो यस्य सः सुरर्षिवरः

CC-0. In Public Domain. Digitization by eGangotri

नारदस्तदनुमतेनात्मजं प्रियव्रतमखिलधरामण्डलस्य स्थितिगुप्तये मर्यादापालनाय राज्ये आस्थाप्य स्वयमतिविषमोऽतिदुस्तरो यो विषया एव विषजलानि तेषामाशयः स्थानं गृहं तस्य आशा भोगेच्छा तस्या उपरराम उपरतोऽभूत् ॥ २२ ॥ इतीति ॥ इति ह वाव एवमेव हि ईश्वरस्येच्छया अधिनिवेशितः प्रापितः कर्माधिकारो यस्य महतां ब्रह्मादीनां मानवर्द्धनः सम्मानकर्त्ता ब्रह्मवाक्याद्राज्ये प्रवृत्तः अखिलस्य जगतो बन्धध्वंसने परोऽनुभावः प्रभावो लीला यस्य तस्य भगवत आदिपुरुषस्य यदङ्घ्रियुगलं तस्यानवरतं निरन्तरं ध्यानं तस्यानुभावेन परिरन्धितकषायो दग्धरागादिमल आशयोऽन्तःकरणं यस्य स तथा अत एवावदातः शुद्धोऽपि स जगतीपतिः महीतलमनुशशास पालयामास ॥ २३ ॥ अथेति ॥ राज्याङ्गीकारानन्तरं प्रजापतेर्विश्वकर्मणो बर्हिष्मतीं नाम दुहितरं कन्यामुपयेमे व्यूढवान् । उ विस्मये ह स्फुटं वाव निश्चये । तस्यामात्मना समानैः शीलादिभिरुदारान् महतो दशात्मजान् पुत्रान् भावयांबभूव उत्पादयामास । तत्र शीलं स्वभावः गुणाः शौर्यादयः रूपं सौन्दर्यं वीर्यं पराभिभवसामर्थ्यं शौर्यं रणमध्ये

इति ह वाव स जगतीपतिरीश्वरेच्छयाऽधिनिवेशितकर्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥ २३ ॥ अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामु ह वाव आत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान्दश भावयाम्बभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ॥ २४ ॥ आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥ २५ ॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥ २६ ॥ तस्मिन्नु ह वाव उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ २७ ॥

स्वगृह इव प्रवेशः औदार्यं वदान्यता यवीयसीं कनिष्ठामूर्जस्वतीं नाम कन्यां च भावयांबभूव ॥२४॥ आग्नीध्रेति ॥ अग्नीनामेव नामानि येषां स्फुटं शेषम् ॥ २५ ॥ एतेषामिति ॥ एतेषां पुत्राणां मध्ये कविर्महावीरः सवन इति त्रयः पुत्रा ऊर्ध्वरेतसोऽकृतविवाहाः स्त्रीसंबन्धरहिता जितेन्द्रिया आसन् । यतस्ते अर्भभावात् बाल्यादारभ्यात्मविद्यायामेव कृतपरिचयाः कृताभ्यासाः अतः पारमहंस्यमाश्रममेवाभजन् स्वीकृतवन्तः ॥ २६ ॥ तस्मिन्निति ॥ तस्मिन् पारमहंस्याश्रमेऽपि उ ह वै उपशमशीलाः परमर्षयश्च कव्यादयः सकलजीवनिकायाः आवसन्त्यत्र तस्य भीतानां शरणभूतस्य रक्षकस्य वासुदेवस्य भगवतः श्रीमच्चरणारविन्दयोरविरतं निरन्तरं स्मरणेनाविगलितोऽखण्डितो यः परमो भक्तियोगस्तस्यानुभावेन परिभाविते संशोधितेऽन्तर्हृदये हृदयमध्येऽधिगतः प्रतीतो यो भगवान् तस्मिन् सर्वेषां भूतानामात्मभूतेऽत एव प्रत्यगात्मनि स्वरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पभूते आत्मनः स्वस्य त्वंपदार्थस्य तादात्म्यमैक्यमेवाविशेषेण देहाद्यहन्ताममतानिरासेन समीयुः प्रापुः ॥ २७ ॥ अन्यस्यामिति ॥ प्रियव्रतस्यान्यस्यामपि भार्यायामुत्तमादयस्त्रयः पुत्रा आसन् जातास्ते च क्रमेण मन्वन्तराधिपतयो मनवो बभूवुरिति शेषः ॥ २८ ॥ एवमिति ॥ एवमुक्तप्रकारेण स्वतनयेषु कव्यादिषु त्रिषु उपशमायनेषु संन्यासाश्रमगतेषु अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन संभृतौ दोर्दण्डौ भुजदण्डौ तयोर्यत् युगलं तेनापीडित आकृष्टो यो मौर्वीगुणः धनुषः प्रत्यञ्चा तस्य स्तनितेन युद्धं विनैव टङ्कारमात्रेण विरमिता निरस्ताः धर्मप्रतिपक्षाः येन सः । भोगातिशयं वर्णयति । बर्हिष्मत्याः स्वभार्यायाश्चानुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इव अत एव विषयासक्त्या आत्मानमनवबुध्यमान इव इवशब्दाभ्यां वस्तुतस्तु भगवदनुकम्पयाऽन्यवत्तस्य विवेकराहित्यमात्माज्ञानं च नाभूदिति सूचितम् । तत्र प्रमोदः पतिं दृष्ट्वा हर्षः प्रसरणमभिगमनं यौषिण्यं योषित्स्वभावकृतं शृङ्गारानुभावप्रकाशनं ततो व्रीडया प्रमुषिताः सङ्कोचिता हासावलोकाः रुचिराः क्ष्वेल्यादयः परिहासवाक्यादीनि सः जगतीपतिः पृथिवीपतिः परिवत्सराणां वर्षाणामेकादशार्बुदानि तावत्कालपर्यन्तं जगतीं पृथिवीं बुभुजे। अत्र "अर्बुदं कोटिरित्याहुः" इति निबन्धो-

अन्यस्यामपि जायायां त्रयः पुत्रा आसन् ॥ उत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥ २८ ॥ एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दण्डयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥ २९ ॥ यावदवभासयति सुरगिरिमनुपरिक्रामन्भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनन्दन्समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतङ्गः ॥ ३० ॥

क्तेः ।अर्बुदं कोटिपर्यायमिति सन्दर्भोक्तेः । वेदेऽपि "नियुतं च प्रयुतं चार्बुदं च" इति प्रयुतानन्तरनिर्देशाच्च । एकादशार्बुदानीत्येकादश कोटय इत्यर्थो ग्राह्यः । एवं च ध्रुवादारभ्य शतजित्पर्यन्ते मनुवंशे तत्र तत्रोक्ता राज्यसंबन्धिन्यः संवत्सरसङ्ख्याः स्वायम्भुवे मन्वन्तर एवावकाशं लभन्ते । अर्बुदं दश कोटय इत्यङ्गीकारे तु तासां मन्वन्तरान्तरसाङ्कर्येण । "स्वं स्वं कालं मनुर्भुङ्क्ते साधिकां ह्येकसप्ततिम् । स एवं स्वान्तरं निन्ये युगानामेकसप्ततिम् ॥" इति तृतीयस्कन्धाविरोधापत्तिः ॥ २९ ॥ प्रभावातिशयमाह—यावदिति ॥ सुरगिरिं मेरुमनुपरिक्रामन् प्रदक्षिणीकुर्वन्भगवानादित्यः सूर्यो यावल्लोकालोकाचलपर्यन्तं वसुधातलमवभासयति तस्मिन्नर्द्धेनावर्त्तेन दिवसनाम्ना प्रतपति प्रकाशयति अर्द्धेन अपरार्द्धावर्त्तेन रात्रिनाम्ना चावच्छादयति तमसा वृतं करोति तदा तत् अन्धकारावरणमनभिनन्दन् अरोचयन् भगवत उपासनेनोपचितोऽतिपुरुषः पुरुषानातिक्रान्तः प्रभावो यस्य स प्रियव्रतः रजनीमपि दिनं करिष्यामीत्यभिप्रायवान् सूर्यरथसमानवेगवता ज्योतिर्मयेनात्युत्तुङ्गेन रथेन द्वितीयः पतङ्गः सूर्य इव

CC-0. In Public Domain. Digitization by eGangotri

सप्तकृत्वः सप्तवारान् तरणिमनु सूर्यस्य पृष्ठतः पर्यक्रामत् मेरुं प्रदक्षिणीकृतवान् । तरणेरस्ताचलारोहणे स्वयमुदयाचलमारोहदिति । एतच्च प्रजानां सुखाय नतु सूर्यस्पर्द्धया । तेनर्त्तुजमुष्णत्वं योगबलात् प्रजानुकूलमेव चकार ॥ ३० ॥ ये इति ॥ ये वा उ ह तस्य प्रियव्रतस्य रथचरणनेमिकृताः परिखाताः परितो गर्त्ताः सप्त ते एव प्रसिद्धा अत्याश्चर्यभूताः सप्त सिन्धवः आसन् । यतो यैरेव सिन्धुभिः सप्तभिः परिखाभूतैः भुवः सप्त द्वीपा आसन् । अत्र समुद्राणां सप्तत्वाद्रथानां सप्तत्वमनुमेयम् । ते चैकचक्राः सूर्यरथादप्युच्चाः मण्डलावृत्तिरीत्या बभ्रमुः । अतो बहिर्बहिरधिकप्रमाणाः उत्तरोत्तरमुच्चाश्च तत्र दक्षिणायने पञ्चविंशत्या दिनैः सार्द्धपञ्चचत्वारिंशद्घटिकाभिरेकैकरथारोहणम् । उत्तरतो दक्षिणदेशगमनं पौषान्तम् । तत उत्तरायणे प्रोक्तकालेनैकैकरथारोहणं दक्षिणत उत्तरदेशगमनं च । आषाढपर्यन्तं यथेच्छगत्या । एवं रथानां सप्तत्वात् तैरेभुवोमानस्य समाप्तत्वात्सप्तकृत्व इत्युक्तं नतु सप्त दिनान्येवायं व्यापारः किन्तु तद्राज्यकालपर्यंतमभूदेव ॥ ३१ ॥ जम्बू इति ॥ जम्बूः प्लक्षः शाल्मलिः कुशः क्रौञ्चः शाकः पुष्करः

ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिन्धव आसन्यत एव कृताः सप्त भुवो द्वीपाः ॥ ३१ ॥ जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात् पूर्वस्मादुत्तरोत्तरं यथासङ्ख्यं द्विगुणमानेन बहिः समन्तत उपक्लृप्ताः ॥ ३२ ॥ क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः सप्त द्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथापूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक्परित उपकल्पितास्ते जम्ब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान् यथासङ्ख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥ ३३ ॥ नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम् ॥ चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् ॥ ३४ ॥

इति संज्ञा येषां तेषां द्वीपानां परिमाणं शृण्विति शेषः । पूर्वस्य यन्मानं विस्तारस्ततस्तत उत्तरो यथासङ्ख्यं द्विगुणेन मानेन युक्त इत्येवं समुद्रेभ्यो बहिः समन्तत उपक्लृप्ताः प्रियव्रतेन रचिताः ॥ ३२ ॥ क्षारोदेति ॥ क्षारमुदकं यस्मिन् स क्षारोदः एवमिक्षुरसोदादयः । दधिमण्डो मथितं दधिसप्तजलधयः सप्तद्वीपानां परिखा इव यथानुपूर्वं सप्तस्वपि द्वीपेष्वैकैकश्येन एकैकशः अभ्यन्तरे तैः संवेष्टिता ये द्वीपास्तैर्विस्तारतः समानाः पृथक् पृथगसंकीर्णा बहिर्बहिः परित उपकल्पिताः रचिताः तेषु जम्ब्वादिषु द्वीपेषु बर्हिष्मतीपतिः प्रियव्रतोऽनुव्रतान् स्वाज्ञानुसारिणः आत्मजान् पुत्रान् आग्नीध्रादिसंज्ञान् सप्त यथासंख्येन यथोक्तक्रमेण एकैकस्मिन् द्वीप एकैकमेवाविवादाय अति पतिं विदध इत्यन्वयः । ऊर्जस्वतीं नाम दुहितरं कन्यां च उशनसे शुक्राय प्रायच्छत् ददौ । यस्यामूर्जस्वत्यां देवयानी नाम काव्यस्य शुक्रस्य सुताऽऽसीज्जाता ॥ ३३ ॥ नैवमिति ॥ उरुक्रमस्य स्थानादिलीलया बहुधा क्रीडतो भगवतः पुंसां भक्तानामत एव तस्याङ्घ्रिरजसा जिताः षड् गुणाः पञ्च ज्ञानेन्द्रियाणि एकं मनश्च षडूर्मयो वा यैस्तेषामेवंविधः वर्णितप्रकारकः पुरुषकारः द्वीप- ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुद्रादिरचनसामर्थ्यं चित्रमाश्चर्यमसम्भावितं न भवति यस्माद्विदूरं विगतोऽन्त्यजादिनीचयोनिं प्राप्तोऽपि सकृदेकदापि विवशावस्थायामपि यस्य भगवतो नाम आददीत गृह्णीयात् उच्चारयेत्। यदि तदा सोऽपि अधुना तत्क्षणमेव बन्धमनादिपरम्परागतसंसारहेतुमविद्यां जहाति त्यजति। तन्वामिति पाठेऽपि स एवार्थः। यणार्षः। तत्त्वमिति पाठे चाण्डालत्वं जहाति शुद्धो भवतीत्यर्थः ॥ ३४ ॥ स एवमिति ॥ स प्रियव्रत एवमपरिमितबलपराक्रमोऽपि देवर्षिचरणयोरनुशयनमुपसत्तिः शरणगमनेन विद्याग्रहणं तदनुपतितो यो गुणविसर्गो राज्यादिप्रपञ्चस्तस्य संसर्गेणात्मानमनिर्वृतमनानन्दितमिव मन्यमानः यत आत्मनि मनसि निर्वेदो यस्य सः। एकदा त्विदं वक्ष्यमाणमात्मनिन्दापरं वचनमाह स्म ॥ ३५ ॥ अहो इति ॥ अहो आश्चर्यम्। विवेकिनापि मया असाध्वनुष्ठितं यद्यस्मादविद्ययाहंममात्मिकया रचिताः शोभनतया प्रकाशिताः विषमा दुःखदा विषया यस्मिंस्तस्मिन्नन्धकूपे अन्धकूपवन्निष्फले दुर्निष्क्रमणे गृहे इन्द्रियैरभिनिवेशितस्तत्तस्मादलमलं विषयभोगैरमुष्या वनिताया विनोदमृगं वानरतुल्यं मां

स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥ ३५ ॥ अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैरविद्यारचितविषमविषयान्धकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयांचकार ॥ ३६ ॥ परदेवता प्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सहमहाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥ ३७ ॥ तस्य ह वा एते श्लोकाः ॥ प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् ॥ यो नेमिनिम्नैरकरोच्छायां घ्नन्सप्त वारिधीन् ॥ ३८ ॥ भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः ॥ सीमा च भूतनिर्वृत्त्यै द्वीपे द्वीपे विभागशः ॥ ३९ ॥

धिग्धिगित्यात्मानं गर्हयाञ्चकार निन्दितवान् ॥ ३६ ॥ परेति ॥ परदेवता भगवान् तस्याः प्रसादेनाधिगतः प्राप्तो य आत्मप्रत्यवमर्श आत्मसाक्षात्कारस्तेन हृदि निहितः स्थितो निर्वेदो विषयवैतृष्ण्यं यस्य सः हृदीत्यस्योत्तरत्राप्यन्वयः। हृदि गृहीतो निश्चितो भगवल्लीलानुस्मरणेनैव परमपुरुषार्थसिद्धिर्नान्यथेत्येवं हरिविहारानुभावो येन स प्रियव्रतः एवमात्मानं निन्दित्वा च अनुप्रवृत्तेभ्यः स्वपुत्रेभ्य इमां पृथ्वीं यथादायं यथायोग्यं विभज्य विभागेन दत्त्वा तथा सहमहाविभूतिं महाविभूतिः साम्राज्यलक्ष्मीस्तत्सहितां भुक्तो भोगो यस्यास्तां महिषीं भार्यां च मृतकशरीरमिवापहाय परित्यज्य स्वयं भगवतः परमभागवतस्य नारदस्य पदवीं तदुपदिष्टमार्गमेव पुनरनुससार ॥ ३७ ॥ तस्येति ॥ तस्य प्रियव्रतस्य महिमोपनिबन्धनाः पूर्वसिद्धाः एते त्रयः श्लोकाः सन्ति। यथा वेदे तदप्येष श्लोको भवतीति प्रियव्रतेति प्रियव्रतेन कृतं कर्मेश्वरं विना को नु कुर्यात् यश्छायां घ्नन् तमो निरस्यन् रजनीं विलोपयन् इत्यर्थः। रथचक्रनेमिनिम्नैः तद्गर्तैः सप्त वारिधीन् समुद्रान् अकरोत् ॥ ३८ ॥ भूसंस्थानमिति ॥ येन प्रियव्रतेन

CC-0. In Public Domain. Digitization by eGangotri

भूतनिर्वृत्त्यै प्राणिनां निर्विवादेन सुखलाभाय तैः सिन्धुभिर्भूसंस्थानं द्वीपरचनात्मकं कृतं तथा द्वीपे द्वीपे विभागशः सरिद्गिरिवनादिभिः सीमामर्यादा च कृता ॥ ३९ ॥ भौममिति ॥ पुरुषानुजना भगवद्भक्ता नारदादयस्तेषां प्रियः यः भौमं पातालभवं दिव्यं स्वर्गभवं मानुषं मनुष्यलोकभवं च कर्मयोगजं कर्मानुष्ठानजं महित्वमैश्वर्यं तत्त्वेन नश्वरत्वाद्बन्धहेतुत्वाच्च निरयौपम्यं नरकतुल्यं चक्रे मेने ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो विवृतिं पञ्चमस्यादिमे व्यधात् ॥ १ ॥ द्वितीयेतुपूर्वचित्त्यां नाभिमुख्यानजीजनत् ॥ आग्नीध्रस्तनयां स्तत्र गद्याद्या वह्निदङ्क्षिताः ॥ उवाचद्वितयं वेदैर्वार्द्धयः स्युरनुष्टुभः ॥ २ ॥ एवमिति ॥ एवं पूर्वोक्तप्रकारेण पितरि प्रियव्रते भगवद्भजने संप्रवृत्ते सति तस्यानुशासन आज्ञायां वर्त्तमानोऽत एव धर्मविक्षमाणः धर्ममेवावेक्षमाणः नतु धनादि समास आर्षः प्रतिभाति। यद्वा। धर्म एवावेक्षमाणोयमिति। जम्बूद्वीपमोको यासां ताः प्रजा औरसवत् पुत्रवत् पर्यगोपायत् पालयामास ॥ १ ॥ स चेति ॥ स चाग्नीध्रः पितृलोककामः पुत्रकामः पत्नीलाभकामो वा

भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम् ॥ यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥ ४० ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे भुवनकोशवर्णने प्रियव्रतविजये प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ ॥ एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवद्धर्मविक्षमाणः पर्यगोपायत्॥१॥ स च कदाचित् पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्वी आराधयाम्बभूव ॥ २ ॥ तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥ ३ ॥ सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिनिकरसंश्लिष्टपुरटलतारूढस्थलविहङ्गममिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ॥ ४ ॥

आभृतानि सम्पादितानि परिचर्योपकरणानि पुष्पादीनि येन सः तथा तपस्वी सन् सुरवनितानां क्रीडाचलस्य मन्दरस्य द्रोण्यां स्थित आत्मैकाग्र्येण ध्यानेन भगवन्तं विश्वसृजां पतिं ब्रह्माणमाराधयांबभूव ॥ २ ॥ तदिति ॥ तदुत्कटकामेन स्वयर्थं स्वाराधनमुपलभ्य ज्ञात्वा भगवान् सर्वज्ञ आदिपुरुषः सृष्टिकर्त्ता ब्रह्मा सृष्टिवृद्ध्यर्थम् आग्नीध्रकामपूर्त्यर्थं च स्वसदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास संभोगार्थं प्रस्थापयामास ॥ ३ ॥ सा चेति ॥ सा च तत आगत्य तस्याग्नीध्रस्यातिरमणीयं विविधाश्च निबिडाश्च ये विटपिनस्तेषां विटपाः शाखास्तेषां निकरास्तैः संश्लिष्टाः पुरटलताः स्वर्णवल्लयस्तास्वारूढाः ये स्थलविहङ्गा मयूरादयस्तेषां मिथुनैः स्त्रीपुरुषद्वन्द्वैः प्रोच्यमानाभिः श्रुतिभिः उच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा भवति तथोपकूजिता नादिता ये अमला जलाशयास्तेषु यानि कमलानि तेषामाकरम् आश्रमोपवनम् उपबभ्राम। स्वराश्च "षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा। धैवतश्च निषादश्च सर्वे स्युः श्रुतिसंभवाः॥ मयूरचातकच्छागक्रौञ्चकोकिल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्दुराः । पतङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान्॥" ॥ ४ ॥ तस्या इति ॥ सुललिते गमने ये पदविन्यासास्तैर्गतौ विलासो यस्याः।यद्वा।पदविन्यासैरेव गतिश्चेष्टा विलासश्च सर्वाङ्गगतो यस्यास्तस्याश्चानुपदं खणखणेति ध्वनिं कुर्वतोः रुचिरयोश्चरणाभरणयोर्नूपुरयोः स्वनं शब्दमाकर्ण्य नरदेवकुमार आग्नीध्रः समाधियोगेनाऽऽमीलिते नयने एव नलिनमुकुले तयोर्युगलमीषद्विकचय्य किंचिदुन्मील्य व्यचष्ट ददर्श ॥ ५ ॥ तामिति ॥ तां पूर्वचित्तिमविदूरे स्वसमीपे एव मधुकरीं भ्रमरीमिव सुमनसः पुष्पाणि उपजिघ्रन्तीं दिविजानां देवानां मनुजानां च यानि मनांसि नयनानि च तेषामाह्लाददुघैरानन्दजनकैः गतिर्गमनं च विहारः क्रीडा च विनयपूर्वकोऽवलोकश्च सुस्वराक्षराणि मधुरभाषणानि च अवयवाः मुखकर्णनेत्रादयश्च तैर्नृणां पुरुषाणां मनसि कुसुमायुधस्य कामस्य विवरं प्रवेशद्वारं विदधतीं निजमुखाद्विगलितं यदमृतमिव स्वादु आसव इव च मादकं सहासं भाषणं तस्मिन् य आमोदो निःश्वासगन्धस्तेन मदान्धा ये मधुकरनिकरास्तैर्य उपरोध आवरणं तेन भयाद्यो द्रुतः शीघ्रः पदविन्यासस्तेन वल्गु मनोहरं स्पन्दनं किंचिच्चलनं

तस्याः सुललितगमनपदविन्याससगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥ ५ ॥ तामेवाऽविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहार विनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं निजमुखविगलितामृतासवसहासभाषणामोदपदान्धमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पन्दनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन निवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच ॥ ६ ॥ का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायाऽसि कापि भगवत्परदेवतायाः ॥ विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान् मृगयसे विपिने प्रमत्तान् ॥ ७ ॥ बाणाविमौ भगवतः शतपत्रपत्रौ शान्तावपुङ्खरुचिरावतितिग्मदन्तौ ॥ कस्मै युयुङ्क्षसि वने विरचन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥ ८ ॥

स्तनकलशयोः कबरभारे रशनायां वस्त्रे च यस्यास्तां देवीं देदीप्यमानामवलोक्य तदवलोकनेन विवृतावसरस्य लब्धप्रवेशावकाशस्य भगवतो जगद्विमोहकस्य मकरध्वजस्य कामस्य वशमुपनीतः सन् जडवदिति वक्ष्यमाणान् दश श्लोकान् ह स्फुटमुवाच । स्त्रीरञ्जनार्थमेव जाड्यानुकरणं नतु वस्तुत इति वतिप्रयोगः ॥ ६ ॥ का त्वमिति ॥ का त्वमित्युक्त्वा ससंभ्रमं पुंस्त्रीज्ञानाभावमाह । हे मुनिवर्येत्यादिजाड्यानुकरणार्थम् । त्वं का किंनामासि शैलेऽस्मिन् गिरिवरे च किं चिकीर्षसि कर्तुमिच्छसि । भगवतः परदेवतायाः परमेश्वरस्य कापि मायासि किं । भ्रुवावालक्ष्याह विज्ये इति । हे सुहृत् सखे विज्ज्ये ज्यारहिते द्वे धनुषी बिभर्षि तत्किमात्मनोऽर्थे तवैव ताभ्यां किंचित्कार्यमस्ति किंवा विपिने संसाराटव्यां प्रमत्तान् मृगान् पशुतुल्यानस्मदादीन् मृगयसे अन्वेषयसि तान् वशीकर्तुं धनुषी बिभर्षि ॥ ७ ॥ कटाक्षावालक्ष्याह—बाणाविति ॥

CC-0. In Public Domain. Digitization by eGangotri

वने विचरन् त्वं शतपत्रे नेत्रकमले ते एव पत्राणि पिच्छानि ययोस्तौ शान्तौ विभ्रमेण मन्थरौ अपुङ्खरुचिरौ पुङ्खाभ्यां विनापि रुचिरौ पत्रतया कल्पिताभ्यां नेत्राभ्यां पूर्वभागस्य पुङ्खस्थानीयस्याभावादपुङ्खत्वम् । अतितिग्मौ तीक्ष्णौ दन्तौ अग्रभागौ ययोस्तौ भगवतस्तवेमौ बाणौ कस्मै युयुङ्क्षसि योक्तुमिच्छसि नुमार्षः । इति न विद्मः । अतो भयादेतावदेव प्रार्थयामहे । तवायं विक्रमो नोऽस्माकं जडबुद्धीनां क्षेमायास्तु ॥ ८ ॥ तदङ्गपरिमललोभेनानुगच्छतो भ्रमरानालक्ष्याह–शिष्या इति ॥ भगवतः सर्वज्ञस्य तवेमे शिष्या ईशं गुरुं त्वां परितः अजस्रं पठन्ति तथा सरहस्यं मन्त्रादियुक्तं साम अजस्रं गायन्ति । ईशेति पाठे सम्बोधनम् । युष्मच्छिखातो विलुलिता विगलिताः सुमनसां पुष्पाणामभितो वृष्टीः सर्वे भजन्ति गृह्णन्ति । यथा ऋषिगणा वेदशाखा गृह्णन्ति तथेत्यर्थः ॥ ९ ॥ नूपुरशब्दमाकर्ण्याह–वाचमिति ॥ हे ब्रह्मन् अरूपा अदृष्टवक्तृका मुखरा अतिप्रकटा तां च तां चेति तथा तां तुभ्यं त्वामानन्दयितुं तव चरणगतपञ्जरयोस्तित्तिरीणां परं केवलं वाचं शृणवाम शृणुमः । पञ्जरशब्देन नूपुरयोर्ग्रहणं तित्तिरिशब्देन तदन्तर्मणीनां ग्रहणम् । शब्देन च पञ्जरगतास्तित्तिरिपक्षिणोऽनुमीयन्ते । पीतं परिधानवस्त्रं नितम्बकान्तित्वेन प्रकल्प्याह । लब्धेति । अङ्कस्य नितम्बस्य विटङ्कबिम्बे मनोहर-

शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीशम् ॥ युष्मच्छिखाविलुलिताः सुमनोभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः ॥ ९ ॥ वाचं परं चरणपञ्जरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ॥ लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कलं ते ॥ १० ॥ किं संभृतं रुचिरयोर्द्विज शृङ्गयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ॥ पङ्कोऽरुणः सुरभिरात्मविषाण ईदृग्येनाश्रमं सुभग मे सुरभीकरोषि ॥ ११ ॥ लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसाऽवयवावपूर्वौ ॥ अस्मद्विधस्य मन उन्नयनौ बिभर्ति बह्वद्भुतं सरसरासुधादिवक्त्रे ॥ १२ ॥

मण्डले । अङ्गेति पाठे सम्बोधनम् कदम्बकुसुमस्य रुचिर्दीप्तिः क्व लब्धेत्यन्वयः । मेखलामालक्ष्याह । यस्यां रुच्यामलातपरिधिः मण्डलाकारोल्मुकवह्निर्वर्तत इति शेषः।वस्त्रस्य नितम्बरुचित्वेन कल्पितत्वाद्वस्त्रमदृष्ट्वैव पृच्छति ते तव वल्कलं क्व गतमिति शेषः ॥ १० ॥ स्तनावालक्ष्याह–किमिति ॥ हे द्विज ते तव रुचिरयोर्मनोहरयोः शृङ्गयोः किं संभृतं पूर्णमस्ति मनोहरं किंचिदस्तीत्येतावत्तु जानामि मद्दृष्टिपातसमय एव मुहुराच्छादनात् यतस्त्वं मध्ये कृशोऽपि कष्टेन वहसीति । यत्र च शृङ्गयोर्मेममदृशिः दृष्टिः श्रिता संलग्ना न प्रचलति अन्यथेदं द्वयं न स्यादिति भावः । स्तनगतं कुङ्कुममालक्ष्याह । पङ्क इति । आत्मनस्तव विषाणे शृङ्गे अरुणः पङ्क ईदृगतपूर्वोऽस्ति । हे सुभग येन पङ्केन ममाश्रमं सुरभीकरोषि ॥ ११ ॥ लोकमिति ॥ हे सुहृत्तम तावकं लोकं स्थानं मे मह्यं प्रदर्शय यत्रत्यः यन्निवासी जनः अस्मद्विधस्य कामिपुरुषस्य मनस उन्नयनौ क्षोभकावपूर्वावयववित्थमुरसा बिभर्त्ति । उन्नयनैरिति पाठे उत्कर्षेण ग्रहणैः तथा वक्त्रे रसो मधुरालापः रासो विलासस्ताभ्यां सहिता सुधा अधरामृतमादिपदेन स्मितादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहु अद्भुतं बिभर्त्ति ॥ १२ ॥ ताम्बूलादिसुगन्धमालक्ष्याह—का वेति ॥ अङ्ग हे मित्र तवात्मनो देहस्य वृत्तिः आहारः का वेत्यन्वयः । यस्यादनात् भक्षणात् हेतोः हविर्वाति तत्संबन्धी गन्ध आगच्छति । अदनाद्बहिरङ्ग भातीति पाठे तु मम तावद्भक्षणाद्बहिः भोजनं विनैव तव देहेऽस्य वृत्तिः स्थितिर्भाति त्वं विष्णोः कलासि विष्णुश्च नाश्नाति ।"अनश्नन्नन्योऽभिचाकशीति" इति श्रुतेः । किं च यतः ते कर्णौ विष्णोरिवानिमिषोन्मकरौ रत्नमयत्वेन निमिषरहिते उत्कृष्टमकराकारे कुण्डले ययोस्तथाभूतावित्यर्थः । किञ्च उद्विग्नं भीत्या चञ्चलं मीनयुगलं नेत्रद्वयरूपं यस्मिन् द्विजाः पक्षिणो हंसाद्याः दन्ताश्च तेषां पङ्क्त्या शोचिः शोभा यस्मिंस्तत् आसन्नो भृङ्गनिकर इव केशस्तोमः परिमललुब्धभृङ्गस्तोम एव वा यस्मिंस्तत् ते तव मुखं सर इत्सर इव भाति । इत् इति इवार्थेऽव्ययम् ॥ १३ ॥ य इति ॥ योऽसौ त्वया करसरोजेन हतः पतङ्गः कन्दुकः स दिक्षु भ्रमन् सन् भ्रमतो भ्रमचित्तस्य मे अक्षिणी एजयते चालयति अहं त्वेवं त्वय्यासक्तमनास्त्वं क्रीडासक्ता सती ते तव वक्रजटावरूथं वक्रकेशसमूहमपि मुक्तं मुक्तबन्धनं न स्मरसि न संभालयसि । तथा लम्पटस्त्वय्यासक्तः एष कष्टो धूर्त्तोऽनिलस्ते नीवीं वस्त्रं हरति तच्चापि न स्मरसि ॥ १४ ॥ रूपमिति ॥ हे तपोधन तपस्विन् तपश्चरतां

> का वात्मवृत्तिरदनाद्धविरङ्ग वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ॥ उद्विग्नमीनयुगलं द्विजपङ्क्तिशोचिरासन्नभृङ्गनिकरं सर इन्मुखं ते ॥१३॥ योऽसौ त्वया करसरोजहतः पतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे ॥ मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लम्पट एष नीवीम् ॥ १४ ॥ रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ॥ चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे ॥ १५ ॥ न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन् मनो दृगपि नो न वियाति लग्नम् ॥ मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः ॥ १६ ॥

मादृशां तपोघ्नमेतद्रूपं तु भवता केन तपसा उप आधिक्येन लब्धं प्राप्तं तद्ब्रवीत्विति शेषः । अतो हे मित्र मह्यं मां सुखयितुं मया सह त्वं तपश्चर्तुमर्हसि इडभाव आर्षः । येन त्वत्सदृशतपश्चरणेनाहमपि त्वत्सदृशरूपवान् स्यामिति भावः । वा अथवा किं स प्रसिद्धो भवभावनः सृष्टिकर्त्ता ब्रह्मा मे मां लब्धार्थं कर्तुं प्रसीदति त्वां भार्यां सम्पादयतीत्यर्थः ॥ १५ ॥ नेति ॥ दयितं प्रियं द्विजदेवेन ब्रह्मणा दत्तं त्वां न त्यजामि । यस्मिंस्त्वयि मनो दृक् नेत्रं च लग्नं संसक्तं सन् न वियाति वियुक्तं न भवति त्वमप्येवमनुव्रतं स्वानुसारिणं मामुपेक्षितुं नार्हसि किन्तु यतो यत्र ते चित्तं तत्र नेतुमर्हसि । हे चारुशृङ्गि मनोहरस्तनि सचिव्यस्तव सख्योऽपि गौरादिकल्पनया कथंचित् ङीष् शिवा मदनुकूलाः सत्यः मां प्रतिसरन्तु अनुवर्त्तन्ताम् । यद्वा । एतावत्पर्यन्तं मे याः सचिव्यः सख्यः शिवाः फेरवः शृगाल्यस्ताः प्रतिसरन्तु गच्छन्तु । यद्वा । वनवासे मे सचिव्यः सहचारिण्यो हरिण्यः शिवा अनुकूलाः सत्यः प्रतिसरन्तु शुभसूचकशकुनार्थं प्रदक्षिणं गच्छन्तु ॥ १६ ॥

Nepal Sanskrit University, Balmeeki...

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ विबुधानां देवानामिव निपुणा मतिर्यस्य सः अत एव ललनानामनुनये वशीकरणे अतिविशारदोऽतिचतुर आग्नीध्र इत्येवं पूर्वोक्तया ग्राम्येषु विषयभोगेषु वैदग्ध्यं नैपुण्यं यस्यास्तया परिभाषया विबुधवधूमप्सरसं तां पूर्वचित्तिमधिसभाजयामास सत्कारपूर्वकं स्ववशीकृतवान् ॥ १७ ॥ सा चेति ॥ सा च पूर्वचित्तिरपि तस्य वीरयूथप-तेर्बुद्ध्यादिभिः पराक्षिप्तमनाः मोहितचित्ता सती ततः प्रभृति तेन जम्बूद्वीपपतिना सहायुतानामयुतपरिवत्सरोपलक्षणं न्यर्बुदमितं कालं भौमस्वर्गभोगान् बुभुज इत्यन्वयः । बुद्ध्यादीनां द्वन्द्वैक्यम् ॥ १८ ॥ तस्यामिति ॥ स च राजवर आग्नीध्रस्तस्यां नाभिरित्यादिः संज्ञा येषां तान् आत्मजान् स्ववीर्यजान् नव पुत्रानजनयत् ॥ १९ ॥ सेति ॥ सा च पूर्वचित्तिः अनुवत्सरं नव पुत्रान् सूत्वा प्रसूय तान् गृह एवापहाय स्वयं भूयोऽजं देवं ब्रह्माणमेवोपतस्थेऽभजत् ॥ २० ॥ आग्नीध्रेति ॥ मातुरनुग्रहात् तदीयस्तनपानात् औत्पत्तिकेन स्वभावेनैव संहननं दृढाङ्गत्वं बलं च ताभ्यामुपेता युक्ताः पित्रा विभक्ताः पृथक् पृथक् भूमिविभागेन राज्ये स्थापिता आत्मना स्वेन स्वेन

श्रीशुक उवाच ॥ इति ललनाऽनुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास॥१७॥सा च ततस्त-
स्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बूद्वीपपतिना भौमस्वर्गभोगान्
बुभुजे॥१८॥तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्रानजन-
यत् ॥ १९ ॥ सा सूत्वाऽथ सुतान् नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥ २० ॥ आग्नीध्रसुतास्ते मातुरनुग्रहादौत्प-
त्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ॥२१॥ आग्नीध्रो राजाऽतृप्तः कामानामप्सरस-
मेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुन्धे यत्र पितरो मादयन्ते ॥ २२ ॥ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रति-
रूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमितिसंज्ञा नवोदवहन् ॥२३॥ इति श्रीभा० पञ्चम० आग्नीध्रवर्णनं नाम द्वितीयोऽध्यायः ॥२॥

तुल्यानि सदृशानि नामानि येषां तानि जम्बूद्वीपस्य वर्षाणि खण्डानि यथाभागं निर्विवादं बुभुजुः अपालयन् ॥२१॥ आग्नीध्र इति ॥ आग्नीध्रो राजा कामानां विषयाणां भोगैरतृप्तोऽतोऽनुदिनं निरन्तरं तामप्सरसमेवाधि अधिकं पुरुषार्थं मन्यमानः श्रुतिभिः श्रुत्युक्तकर्मभिस्तस्याः सलोकतामवारुन्ध प्राप । तल्लोकमेव निर्दिशति यत्र लोके पितरो मादयन्ते मोदन्त इत्यर्थः । यद्वा । यत्र लोके प्राप्तं पुरुषं पितरो हर्षयन्तीत्यर्थः ॥ २२ ॥ सम्परेत इति ॥ एवं पितरि सम्परेते सम्यक् पितृलोकं गते सति नाभ्यादयो नव भ्रातर इत्येवंभूता मेरुदेव्यादयः संज्ञा यासां ता नव मेरुदुहितॄरुदवहन् यथाक्रमं विवाहितवन्तः ॥ २३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीये पञ्चमस्य व्यधादिमाम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीये तु क्रतौ नाभेः प्रीतोऽभूत्प्रकटो हरिः ॥ पुत्रश्चर्षभनाम्नासौ तत्र गद्यानि भूदृशः ॥ उवाचपञ्चैकं सार्द्धा अष्टत्रिंशदनुष्टुभः ॥ ३ ॥ नाभिरिति ॥ नाभिरपत्यकामः अप्रजया अपत्यरहितया असिजभाव आर्षः । मेरुदेव्या स्वभार्यया: सहावहितात्मा सावधानचित्तो भगवन्तं यज्ञपुरुषं यज्ञाधिष्ठातारमयजत् ॥ १ ॥ तस्येति ॥ तस्य वाव नाभेः श्रद्धया विश्वासेन विशुद्धभावेन यजतो यागं कुर्वतः प्रवर्ग्येषु प्रचरत्सु प्रवर्ग्यसंज्ञेषु कर्मसु क्रियमाणेषु द्रव्यादयो ये सप्त योगा अङ्गानि उपाया वा तेषामुपपत्त्या संपत्त्या निजजनानां भक्तानामभिप्रेता अर्था: फलानि तेषां विधित्सया सम्पादनेच्छया गृहीतं वशीकृतं हृदयं चित्तं यस्य सः भगवान् दुष्प्रापोऽपि भागवतेषु वात्सल्यतया कृपालुतया स्वार्थष्प्ययन्तात्तल् । सुप्रतीकः शोभनावयवः सन् मनोनयनानि चानन्दयन्ति येऽवयवाः तैरभिराममतिसुन्दरम् अपराजितमपरतन्त्रम् अपि हृदयङ्गमं परमानन्द-जनकत्वेन मनोहरमात्मानमाविश्चकार ॥२॥ अथेति ॥ अथ अवनतानि शीर्षाणि येषां त ऋत्विक्सदस्या गृहपतिर्यजमानो नाभिः एते आविष्कृतं भुजानां युगलद्वयं चतुष्टयं

श्रीशुक उवाच ॥ नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत् ॥ १ ॥ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयं गमं मनोनयनानन्दनावयवाभिरामलाविश्चकार॥२॥अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालोऽच्छूर्यमृतमणिमदादिभिरुपलक्षितं स्फुटकिरणप्रवरम-णिमयमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनत-शीर्षाण उपतस्थुः ॥३॥ ऋत्विज ऊचुः ॥ अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो नम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान् प्रकृति-गुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥ ४ ॥

येन तं हिरण्मयं तेजोमयत्वेन प्रकाशमानं पुरुषेषु विविशिष्यत इति पुरुषविशेषं पुरुषोत्तमम् । कपिशे पीते कौशेये कीटकोशजनितसूत्रनिर्मिते अम्बरे धारयतीति तथा तम् उरसि विलसन् श्रीवत्सः रोमावर्तविशेष एव ललामं चिह्नं यस्य तं दरवरः शङ्खश्रेष्ठः वनरुहं कमलं वनमाला विचित्रपुष्पग्रथिता माला अच्छूरिचक्रममृतमणिः सर्वजीवतत्व-त्वात्कौस्तुभः गदा कौमोदकीशङ्खादिभिरुपलक्षितं युक्तं तथा स्फुटकिरणा ये प्रवराः श्रेष्ठा मणयः तन्मयानि यानि मुकुटादीन्यङ्गानां भूषणानि तैर्विभूषितं तं भगवन्तं बहुमानं यथा भवति तथाऽर्हणेनार्घ्येण सह तमुपतस्थुः तुष्टुवुः । तङ्भाव आर्षः । यथा अधनाः निर्धनाः पुरुषाः उत्तमधनं निधिं प्राप्य तस्य बहुमानं कुर्वन्ति॥ ३॥अर्हसीति ॥ हे अर्हत्तम परिपूर्णोऽपि त्वम् अनुपथानां भृत्यानामस्माकम् अर्हणं पूजां मुहुः स्वीकर्त्तुमर्हसि । न वयं स्तोतुं शक्ता इत्याहुः नमो नम इत्येतावदेव भगवते कर्त्तव्यं नाधिकमि

CC-0. In Public Domain. Digitization by eGangotri

त्यस्माकं सद्भिरुपाशिक्षितं त्वद्रूपस्य दुर्ज्ञानत्वात् ॥ ४ ॥ क इति ॥ प्रकृतिपुरुषयोरपि परस्य अत एवेश्वरस्य तव ये सकलजननिकायस्य वृजिनानि पापानि निरस्यन्तीति तथाभूताः शिवतमा मङ्गलकारिणोऽत एव प्रवराः सकलसाधनश्रेष्ठा गुणगणास्तेषामेकदेशस्तस्य कथनादृते ततो विनाधिकं नार्हति इत्यर्थः । अर्वाक्तनाभिस्तव स्वरूपमस्पृशन्तीभिः नाम च रूपं चाऽऽकृतिराकारश्च ताभिस्तव रूपनिरूपणं कर्त्तुं प्रकृतिगुणैरंजस्तमआदिभिः व्यतिकरा विक्षिप्ता गुणानां व्यतिकरे प्रपञ्च एव वा मतिर्यस्यात एवानीशः गुणाधीनत्वेनासमर्थः कः पुमान् अर्हति न कोऽपीत्यर्थः ॥ ५ ॥ वाङ्मनसा गोचरोऽपि त्वं भक्तानां सुखाराध्य इत्याहुः—परीति ॥ हे परमपूर्ण त्वं परिजनैः सेवकजनैरनुरागेण विरचिता ये शबलसंशब्दाः प्रेम्णास्खलिताक्षरस्तुतयः सलिलं च सितांकिसलयाः शुद्धपल्लवाश्च तुलसिश्च दूर्वा च अङ्कुरा यवाङ्कुराश्च शिलेति पाठे शिलं कुशादिमञ्जरी तैः संभृतया सम्पादितया सपर्यया पूजया परितुष्यसि ॥ ६ ॥ अथेति ॥ अथान्यथा आत्मनः स्वत एवानुसवनं निरन्तरमञ्जसा साक्षात् बोभूयमाना अतिशयेन भवन्तो ये

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥ ५ ॥ परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि संभृतया सपर्यया किल परम परितुष्यसि ॥ ६ ॥ अथानयाऽपि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥ ७ ॥ आत्मन एवानुसवनमञ्जसा व्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किंतु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हसि ॥ ८ ॥ तद् यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपरमपुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥ ९ ॥

अशेषाः सर्वे पुरुषार्थास्ते स्वरूपं यस्य परमानन्दस्वरूपस्य तस्य भवतः अनया अस्मत्सम्पादितयोरुभारभरया अनेकसाधनसम्पन्नयापीज्यया यागेन भवतः समुचितमपेक्षितमर्थं प्रयोजनमिह यागेनोपलभामहे नैव पश्यामः ॥ ७ ॥ किं त्विति ॥ यद्यपि पूजादिना भगवत उपकाराभावात्तदपेक्षा नास्ति तथापि हे नाथ स्वामिन् आशिषो भोगान् आशासानानां कामयमानानामस्माकमेतत्पूजादिकं भवदभिसंराधनमात्रं भवितुमर्हति भवत्सन्तोषद्वाराऽस्मन्मनोरथपूर्त्तये भवत्येवातो न व्यर्थमित्यर्थः ॥ ८ ॥ तद्यथेति ॥ तत्तस्मात्पूर्वोक्तहेतोरेव स्वयमात्मनः स्वस्य परं श्रेयो मोक्षाख्यमविदुषामजानतामचिन्तयतामपि परमेभ्य उत्कृष्टेभ्यो ब्रह्मादिभ्योऽपि परमः पुरुषः पुरुषोत्तमो भवान् प्रकर्षयुक्तया करुणया अपवर्गाख्यं स्वमहिमानं निजानन्दमुपकल्पयिष्यन् सम्पादयिष्यन् चकारात् कामितं च सम्पादयिष्यन् स्वयं नापचितः अपूजित एव पूजापक्षारहितत्वात् इतरवत् सापेक्षवदिह यज्ञे स्वयम् उपलक्षितः दृष्टो जातः । तत्र दृष्टान्तमाह । यथेति । यथा बालिशानां बालकानामात्मनः श्रेयोऽनभिज्ञानामपि पिता स्वयमेव तच्छ्रेयः सम्पादयति तथेत्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ हि यस्माद्भवान् वरदर्षभः वरदानां ब्रह्मादीनां मध्ये श्रेष्ठोऽतो नूनं यद्यपि वरान् दातुमेवाविर्भूतः । अथ तथापि हे अर्हत्तम पूज्यतम यर्हि राजर्षेर्नाभेर्बर्हिषि यज्ञे निजपुरुषाणां स्वसेवकानामस्माकमीक्षणविषयो भवानासीत्तदायमेव भवद्दर्शनलाभ एवास्माकं वरः सञ्जातः ॥ १० ॥ असङ्गेति ॥ अनवरतं निरन्तरं परिगुणिता अभ्यासेन वर्णिता गुणगणा यस्येति तस्य सम्बोधनम् असङ्गेन सर्वतो वैराग्येण निशितं तीक्ष्णीकृतं यज्ज्ञानं स एवानलस्तेन विधूता अशेषाः सर्वे मला रागलोभादयो येषामत एव भवत इव शान्तः स्वभावो येषामत एवात्मनि रमणं येषामेवंभूतानामपि मुनीनामपि परममङ्गलायनं परमानन्दजनकं गुणगणकथनमेव यस्य तथाभूतोऽसि दर्शनं तु तेषामपि दुर्लभमेवेति भावः ॥ ११ ॥ अथेति ॥ यद्यपि भगवद्दर्शनेनैव वयं कृतार्था अथ तथापि स्खलनादिस्थानेषु ज्वरमरणदशायां च स्मरणाय त्वां स्मर्तुं विवशानामशक्तानामपि नोऽस्माकं सकलानि कश्मलानि पापानि निरस्यन्तीति तथा तानि तव गुणकृतनामध्येयानि भक्तवत्सल इत्यादीनि उपलक्षणतया जन्मकर्मकृतानि मत्स्यादीनि गोवर्द्धनो-

अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥१०॥ असङ्गनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणपरममङ्गलायनगुणगणकथनोऽसि ॥११॥ अथ कथंचित् स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥१२॥ किं चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भगवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम्॥१३॥को वा इह तेऽपराजितोऽपराजितयामाययाऽनवसितपदव्याऽनावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः॥१४॥ यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मन्दानां नस्तद्यद् देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषाम् ॥ १५ ॥

द्धरणादीनि च कथंचित् वचनगोचराणि उच्चारणविषयाः भवन्तु ॥ १२ ॥ किं चेति ॥ प्रजायामेवार्थप्रत्ययः पुरुषार्थबुद्धिर्यस्य सः अयं राजर्षिरपत्यकामो भवादृशीं प्रजां भवत्सदृशं पुत्रमाशासान आकाङ्क्षन् आशिषामैहिकभोगानां स्वर्गापवर्गयोरपीश्वरं भगवन्तं त्वामुपधावत्याराधयति यथा अधनः फलीकरणं तुषकणादिकमाशासानो धनदं धनाढ्यं कुबेरं वा उपधावति तथा बहुप्रदं धनिनं प्रसाद्यापि यथा मूर्खस्तुच्छमेव याचते तथा सर्वपुरुषार्थदं त्वां पुत्रमेव याचते ॥ १३ ॥ क इति ॥ न उपासितौ महतां चरणौ येन तादृशः को नाम पुरुषः इह संसारे नावसिता न लक्षिता पदवी कुत आगतेति मार्गो यस्यास्तयेत्यर्थः । कबभाव आर्षः । अपराजितया ते तव मायया अनावृतमतिरमोहितचित्तोऽत एवापराजित इन्द्रियादिपारवश्यमनापादितोऽत एव विषय एव विषं तस्य रयो वेगस्तेनानावृता प्रकृतिः स्वभावो यस्य तादृशोऽस्ति न कोऽपीत्यर्थः ॥ १४ ॥ यदु हेति ॥ हे अदभ्रकर्त्तः बहुकार्यकारिन् हे देवदेव यदु ह वाव पुनरप्यर्थे । एवंभूतोऽपि त्वं यत् इह यज्ञेऽल्पीयसे पुत्रप्राप्तिकार्यायैवास्माभिः समाहूतोऽसीति तत्तत्रापत्य-

CC-0. In Public Domain. Digitization by eGangotri

एव परमार्थधीर्येषां तेषां मन्दानां मन्दमतीनाम् अविदुषां स्वार्थमजानतां नोऽस्माकं तु यत् देवस्य तव हेलनमवज्ञानं जातं तत्प्रतिवोढुं सोढुमर्हसि ॥ १५ ॥ इतीति ॥ इत्येवं निगदेन गद्यात्मकेन स्तोत्रेणाभिष्टूयमानः वर्षधरो भारतवर्षपतिर्नाभिस्तेनाभिवादिता ये ब्राह्मणास्तैरभिवन्दितौ चरणौ यस्य सः भगवान् अत एवानिमिषाणां देवानामप्यृषभः पालकः सदयं यथा भवति तथेदं वक्ष्यमाणमाह स्म ॥ १६ ॥ अहो इति ॥ हे ऋषयः अमुष्य नाभेर्मया सदृश आत्मजः पुत्रो भूयादिति यत् तत् अवितथगीर्भिः सत्यवाग्भिर्भवद्भिरसुलभं दुर्लभमेव वरमभियाचितः॥१७॥ ममेति ॥ कैवल्यात् मम सदृशस्यान्यस्याभावात् ममाभिरूपः सदृशोऽहमेव अथापि वरस्य दुर्लभत्वेऽपि ब्रह्मवादो ब्राह्मणानां युष्माकं वचनं मृषा भवितुं नार्हति । हि यस्मात् द्विजेषु ब्राह्मणक्षत्रियवैश्येषु देवा इव प्रकाशमानाः मान्याः ये ब्राह्मणास्तेषां कुलं ममैव मुखम् ॥ १८ ॥ तत इति ॥ ततस्तस्माद्ब्राह्मणवचनस्य वितथत्वस्यायुक्तत्वादात्मतुल्यमैश्वर्यादिभिः स्वसदृशमन्यमनुपलभमानोऽपश्यन्नहमेवांशकलया स्वांशेन आग्नीध्रीये आग्नीध्रपुत्रे नाभाववतरिष्याम्ये-

श्रीशुक उवाच ॥ इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥ १६ ॥ श्रीभगवानुवाच ॥
अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्य आत्मजो मया सदृशो भूयादिति ॥१७॥ ममाहमेवाभिरूपः कैवल्याद-
थापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद् द्विजदेवकुलम् ॥ १८ ॥ तत आग्नीध्रीयेंऽशकलयावतरिष्यामि आत्मतुल्यमनुपलभ-
मानः ॥ १९ ॥ श्रीशुक उवाच ॥ इति निशामयन्त्यां मेरुदेव्यां पतिमभिधायान्तर्दधे भगवान् ॥ २० ॥ बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान्
परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया
तनुवाऽवततार ॥ २१ ॥ इति श्रीभागवते पञ्चमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगव-
ल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥ १ ॥

तत्पुत्रो भविष्यामि ॥ १९ ॥ इतीति ॥ मेरुदेव्या नाभेर्भार्याया निशामयन्त्याः सत्यास्तस्याः पतिं नाभिमित्येवमभिधाय उक्त्वा भगवानन्तर्दधे ॥ २० ॥ बर्हिषीति ॥ हे विष्णुदत्त परीक्षित् तस्मिन् बर्हिषि नाभेर्यज्ञ एवमुक्तेन प्रकारेण परमर्षिभिः प्रसादितः ऊर्ध्वमन्थिनां वातरशनानां दिग्वाससां श्रमणानां तपआदिषु कृतश्रमाणां ऋषीणां विवेकिनां सर्वतो विरक्तानां धर्मान् दर्शयितुकामः स्वाचारेण लोके प्रचारयितुकामः भगवान् नाभेः प्रियचिकीर्षया तस्यावरोधायनेऽन्तःपुरे मेरुदेव्यां शुद्धया शुद्धसत्त्वात्मिकया तनुवा मूर्त्या अवङार्षः अवततार ॥२१॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये पञ्चमस्य व्यधादिमाम् ॥३॥ तुर्येऽध्याये तु ऋषभचरित्रे दर्शयन्मुनिः ॥ सत्कर्मनैष्कर्म्यमपि गद्यान्यत्रोनविंशतिः[१९] ॥ उवाचेत्येकं सपादाश्चतुस्त्रिंशदनुष्टुभः[३४] ॥ ४ ॥ अथेति ॥ अथ प्रकृतयोऽमात्यादयः उत्पत्त्या स्वत एवाभिव्यज्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानानि भगवतो लक्षणानि पादतलादिषु वज्राङ्कुशादीनि चिह्नानि यस्य तं साम्यं स्वपरपक्षपातराहित्यमुपशमः शान्तता वैराग्यं विषयवैतृष्ण्यम् ऐश्वर्यमलौकिकसामर्थ्यं महाविभूतिः सर्वसम्पत्तिरनुभावस्तेजोतिशयःतैः सहानुदिनमेधमानोऽनुभावो यस्य तं भगवन्तमवनितलस्य समवनाय परिपालनाय अतितरां जगृधुः।अयमेव भूतलराज्यं करोत्विन्त्यभिकाङ्क्षन्ति स्म॥ १॥तस्येति ॥ तस्य ह वरीयसा श्रेष्ठतमेन बृहन्तः श्लोकाः पद्यानि कवीनां यस्मिंस्तेनेत्यर्थः। वर्ष्मणा ओजसा इन्द्रियसामर्थ्येन श्रिया शोभातिशयेन यशसा कीर्त्यतिशयेन वीर्येण प्रभावातिशयेन शौर्येण मनसः सामर्थ्येन चकारावनुक्तसर्वशुभगुणसमुच्चयार्थौ। एतैर्गुणैरतिश्रेष्ठत्वनिश्चयात्तस्य पिता ऋषभ इति इदं नाम चकार ॥ २ ॥ तस्य हीति ॥ स्पर्द्धमानो भगवानिन्द्रः यदा तस्य वर्षे अजनाभखण्डे न ववर्ष तदा तदवधार्य इन्द्रकृतमवर्षणं ज्ञात्वा योगेश्वरः भगवान् ऋषभदेवः प्रहस्यात्मयोगमायया स्वशक्त्या अजनाभं नाम अजः ऋषभदेवः नाभिस्तस्य पिता ताभ्यां रक्षितत्वादजनाभ्योरिदमित्यणि संज्ञापूर्वकत्वाद्वृद्ध्यभावेऽजनाभसंज्ञं स्ववर्षमभ्यवर्षत् ॥ ३ ॥ नाभिस्त्विति ॥

तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन च ओजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ २ ॥ तस्य हीन्द्रः स्पर्धमानो भगवान्वर्षे न ववर्ष तदवधाय भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ॥ ३ ॥ नाभिस्तु यथाऽभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन्परां निर्वृतिमुपगतः ॥ ४ ॥ विदितानुरागमापौरप्रकृतिजनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥ ५ ॥

मायया विलसिता मम पुत्रोऽयमिति विमोहिता मतिर्यस्य स नाभिस्तु यथाभिलषितं स्वाभिलाषानुरूपं सुप्रजस्त्वं भगवदवताररूपसत्पुत्रत्वमवरुध्य प्राप्य प्रमोदभरविह्वलः प्रहर्षातिशयेनानवस्थितचित्तो हे वत्स हे तातेत्येवं गद्गदाक्षरया स्खलितवर्णया गिरा स्वैरं स्वेच्छया गृहीतो नरलोकसमानधर्मो मनुष्यव्यवहारो येन तं पुराणपुरुषं भगवन्तमुपलालयन् परां निर्वृतिमानन्दम् उपगतः प्राप्तः ॥ ४ ॥ विदितेति ॥ जनाः पौरादयः पदं प्रमाणमात्मजाभिषेके यस्य सः पौरादिमतमनुसरन्नित्यर्थः । राजा नाभिः आपौरप्रकृति पौरान् प्रकृतीश्चाभिव्याप्य विदितोऽनुरागो यस्मिंस्तम् आत्मजमृषभं समयानां सदाचाराणां ये सेतवः मर्यादास्तेषां रक्षायां राज्येऽभिषिच्य तं ब्राह्मणेषूपनिधाय नीतिधर्मशिक्षाविषये ब्राह्मणवशवर्त्तिनं कृत्वा स्वयं मेरुदेव्या स्वभार्यया सह विशालायां बदरिकाश्रमे प्रसन्नं प्रसादयुक्तमनुद्वेजकं सर्वसुखदं च निपुणमव्यवच्छिन्नं फलसाधनसमर्थं वा तेन तपसा मनसः समाधियोगेन च नारायणाख्यं भगवन्तमुपासीनः सेवमानः कालेन बहुकालाभ्यासेन तन्महिमानं जीवन्मुक्तिमवाप ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

यत्रेति ॥ हे पाण्डवेय यत्र नाभियशोवर्णनप्रसङ्गे पुराविदो द्वौ श्लोकावुदाहरन्ति पठन्ति इत्यर्थः । कोऽन्विति । तत् तस्य राजर्षेर्नाभेः कर्म अनु तदनन्तरं को नु पुमानाचरेत् कर्त्तुं शक्नुयात् न कोऽपीत्यर्थः । यस्य शुद्धेन कर्मणा भक्त्या यज्ञानुष्ठानेन हरिः स्वयमेवापत्यतामगात् ॥ ६ ॥ ब्रह्मण्य इति ॥ नाभेरन्यस्तत्सदृशो ब्रह्मण्यो ब्राह्मणभक्तः । कुत्रास्ति यस्य बर्हिषि यज्ञे मङ्गलैर्दक्षिणादिभिः पूजिताः सन्तः मङ्गलरूपेण राज्ञा पूजिताः इति वा विप्रा ओजसा मन्त्रबलेन यज्ञेशं भगवन्तं दर्शयामासुः ॥ ७ ॥ अथेति ॥ अथ पितरि प्रस्थिते सति भगवानृषभदेवः स्ववर्षमजनाभखण्डं कर्मक्षेत्रं स्वर्गापवर्गसाधनकर्मानुष्ठानभूमिमनुमन्यमानो जानन् गृहमेधिनां गृहस्थानां धर्माननुशिक्षमाणोऽनुशिक्षयन्नत एवान्यसङ्ग्रहाय प्रदर्शितो गुरुकुले वासो येन सः लब्धवरैः प्राप्तदक्षिणैः गुरुभिर्गार्हस्थ्यार्थमनुज्ञातः समाम्नायाम्नातं शास्त्रविहितं ब्राह्मणोपदेशेनाभ्यस्तं वा उभयलक्षणं श्रौतं स्मार्त्तं च उभयविधमिति वा पाठः कर्माभियुञ्जन् अनुतिष्ठन् इन्द्रेण दत्तायां जयन्त्यां स्वभार्यायामात्मसमानानां स्वयोग्यानामात्मजानां शतं जनयामास

यस्य ह पाण्डवेय श्लोकावुदाहरन्ति ॥ को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ ६ ॥ ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मङ्गलपूजिताः ॥ यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ ७ ॥ अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास ॥ ८ ॥ येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति ॥ ९ ॥ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इन्द्रस्पृग् विदर्भः कीकट इति नव नवतिप्रधानाः ॥ १० ॥ कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥ ११ ॥

॥ ८ ॥ येषामिति ॥ येषां पुत्राणां मध्ये श्रेष्ठाः प्रजानुरञ्जका गुणा यस्य सः तथा महायोगी आत्मज्ञानित्वेन प्रसिद्धः भरतो ज्येष्ठ आसीत् । येन गुणश्रेष्ठत्वेन पूर्वमजनाभनाम्ना प्रसिद्धमपीदं वर्षमिदानीं जना भारतमिति व्यपदिशन्ति ॥ ९ ॥ तमिति ॥ तं भरतमनु भरतस्य कनिष्ठाः इत्यर्थः । कुशावर्त्तादयो नव पुत्राः नवतेर्नवतिसङ्ख्याकेभ्यः पुत्रेभ्यः प्रधानाः ज्येष्ठा इत्यर्थः। प्रधानस्य पुंस्त्वमार्षम्॥ १० ॥ कविरिति ॥ कीकटान्तेभ्यो दशभ्योऽनन्तरं कव्यादयो नव पुत्रा जाताः तेषां वंशश्च न जातो यतस्ते जन्मत एव महाभागवताः भागवतधर्मस्य दर्शकाः तेषां सुष्ठु चरितं भागवतधर्मप्रदर्शनलक्षणमत एव भगवन्महिम्नोपबृंहितं शोभमानमत एवोपशमायनं श्रोतृचित्तशान्तिकरं वसुदेवनारदयोः संवादो यस्मिंस्तदुपरिष्टादेकादशस्कन्धे वर्णयिष्यामः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यवीयांस इति ॥ ततो यवीयांसः कनिष्ठा एकाशीतिसङ्ख्याकाः जायन्तेयाः जयन्तीपुत्राः पितुरादेशकारिण आज्ञानुसारिणो महाशालिनाः अतिविनीताः महाश्रोत्रियाः अध्ययनतोऽर्थतश्च वेदे निपुणाः यज्ञे शीलं स्वभावो येषां ते तथा अत एव यज्ञादिकर्मानुष्ठानेन विशुद्धान्तःकरणा ब्राह्मणा बभूवुः ॥ १२ ॥ भगवानिति ॥ एवकारोऽप्यर्थः । ऋषभसंज्ञो भगवान् स्वयमात्मतन्त्रः कर्मानधीनो यत ईश्वरः सकलनियन्ता केवलानन्दानुभवः सच्चिदानन्दरूपोऽत एव नित्यं निवृत्ता जन्ममरणाद्यनर्थपरम्परा यस्मात्स तथा अत एव उपशान्तः रागलोभादिदोषरहितोऽत एव समः सर्वप्राणिपक्षपातरहितः कारुणिकः सर्वेषु करुणावान् मैत्रः सर्वेषां हिताचरणे प्रयत्नवान् एवंभूतोऽपि विपरीतवत् अनीश्वरवत् कर्माण्यारभमाणः कुर्वन् कालेनानुगतमुच्छिन्नं धर्मं स्वयमाचरणेन अतद्विदां षष्ठी द्वितीयार्थे । धर्माचारमजानत उपशिक्षयन् धर्मादीनामवरोधेन संग्रहेण प्राप्त्या हेतुनेति वा लोकं गृहेषु नियमयत्स्वेच्छाचारान्निवर्त्य शास्त्राचारे नियमितवानित्यर्थः । अडभाव आर्षः । न्यरमयदिति पाठे नितरामरमयत् ।

यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥ १२ ॥ भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशान्तो मैत्रः कारुणिको धर्मार्थयशःप्रजानन्दामृतावरोधेन गृहेषु लोकं नियमयत् ॥ १३ ॥ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥ १४ ॥ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ॥ १५ ॥ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ॥ १६ ॥ भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृम्भितस्नेहातिशयमन्तरेण ॥ १७ ॥

धर्माद्याः स्पष्टाः आनन्दो भोगः प्रजा सन्ततिः अमृतं मोक्षः ॥ १३ ॥ यद्यदिति ॥ यतः यद्यत् शुभमशुभं वा कार्यं शीर्षण्येन श्रेष्ठेनाचरितं तत्तदेव लोक इतरोऽपि जनः अनुवर्तते करोति ॥ १४ ॥ यद्यपीति ॥ यद्यपि सकलो धर्मो यस्मिंस्तत् ब्राह्मं गुह्यं वेदरहस्यं स्वेनैव विदितं तथापि ब्राह्मणैर्दर्शितमार्गेण तान् पृष्ट्वैव सामादिभिरुपायैर्जनतां जनसमूहमनुशशास शिक्षितवान् ॥ १५ ॥ द्रव्येति ॥ द्रव्यं व्रीह्यादि देशः पुण्यस्थलविशेषः कालो वसन्तादिः वयो यौवनम् "युवैव धर्ममन्विच्छेत्" इति वाक्यात् विविधोद्देशाः तैः नानादेवतोद्देशाः उपचितैः सर्वैरपि क्रतुभिर्यज्ञैर्यथोपदेशं यथाविधि शतकृत्वः यज्ञेशमियाज इष्टवान् ॥ १६ ॥ भगवतेति ॥ भगवता ऋषभेण परिरक्ष्यमाण एतस्मिन् वर्षेऽजनाभखण्डे कश्चनान्त्यजादियोनिं प्राप्तोऽतिनीचोऽपि पुरुषः भर्त्तरि ऋषभे अनुसवनं प्रतिक्षणं विजृम्भितो वर्द्धमानो यः स्नेहस्तस्यातिशय उत्कटता तदन्तरेण ततोऽन्यत् अन्तरेणेत्यव्ययं विनार्थे । यद्वा । अन्तरेण अन्तरात्मना आत्मनोऽर्थे अन्यस्मात्सकाशात्किमपि अत्युत्कृष्टमपि वस्तु कर्हिचित्कस्मिंश्चिदपिकाले कथञ्चन केनापि

CC-0. In Public Domain. Digitization by eGangotri

प्रकारेण न वाञ्छति न चावेक्षते नं पश्यत्यपि इत्यर्थः। भर्त्तरि स्नेहमेव वाञ्छति नान्यत्किञ्चनेत्यर्थः। यथा अविद्यमानं खपुष्पादिकं यथा कश्चिदपि कदाचिन्न पश्यति न च वाञ्छति तथेत्यर्थः ॥ १७ ॥ स इति ॥ स भगवानृषभः कदाचिद्भूमिमटमानः शानजार्षः। ब्रह्मावर्त्तं गतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनां शृण्वतीनाम् अवहितात्मनः संयतचित्तान् प्रश्रयप्रणययोर्नम्रतास्नेहयोर्भरेण सुयन्त्रितान् वशीकृतानपि आत्मजान् पुत्रान् प्रजानुशासनार्थमुपशिक्षयन्निति वक्ष्यमाणं तत्त्वमुवाच ॥ १८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे पञ्चमस्य व्यधादिमाम् ॥ ४ ॥ पञ्चमेत्वृषभः पुत्रान् मोक्षधर्ममुपादिशत् ॥ तस्येष्टचेष्टा च पद्यगद्यान्यत्रेषु वर्ह्णयः ॥ द्वे उवाचेति पादाद्याः त्रयःषष्टिनुष्टुभः ॥ ५ ॥ नेति ॥ हे पुत्रकाः नृलोके देहभाजां प्राणिनां मध्ये अयं मनुष्यदेहः विड्भुजां श्वशूकरादीनामपि ये कामाः सन्ति तान् कष्टान् निन्दितान् कष्टप्रदान् वा कामान् विषयभोगान्नार्हते तद्योग्यो न भवति। तङ्नर्षः । कामार्हत्वे मनुष्यशूकरयोरतुल्यत्वापत्तेरित्यर्थः। किंतु अन्यदेहालभ्यं

स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तङ्गतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितानप्युप-शिक्षयन्निति होवाच ॥ १८ ॥ इति श्रीभागवते पञ्चमस्कन्धे ऋषभदेवानुचरिते चतुर्थोऽध्यायः ॥ ४ ॥ ऋषभ उवाच ॥ नायं देहो देहभाजां नृलोके कष्टान्कामानर्हते विड्भुजां ये ॥ तपो दिव्यं पुत्रका येन सत्त्वं शुध्येद्यस्माद् ब्रह्मसौख्यं त्वनन्तम् ॥ १ ॥ महत्सेवां द्वारमाहुर्विमु-क्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ॥ महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥ २ ॥ ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्तिकेषु ॥ गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ ३ ॥

दिव्यमुत्कृष्टं तपोऽर्हति येन तपसा सत्त्वमन्तःकरणं शुद्ध्येत् यस्माच्च शुद्धात् सत्त्वादनन्तमविनाशि ब्रह्मसौख्यं ब्रह्मानन्दो भवति। शालिनी ॥ १ ॥ महत्सेवामिति ॥ शिष्टाः महतां सेवां संसारविमुक्तेर्द्वारमाहुः। तथा योषितां ये सङ्गिनस्तेषां सङ्गः तमसः संसरणस्य द्वारमाहुः। तत्र ये समचित्ताः प्रशान्ताः शुद्धचित्ताः विमन्यवः क्रोधरहिताः सुहृदः सर्वेषां हितकारिणः साधवः परदोषाग्राहिणः भवन्ति ते महान्तो ज्ञेयाः ॥ २ ॥ ये वेति ॥ ये मयि ईशे कृतं सौहृदं प्रेमैव अर्थः पुरुषार्थो येषां ते वा महान्तः वाशब्देनान्यनैरपेक्ष्येणास्य लक्षणत्वं दर्शयति। तथा देहं बिभर्तीति देहंभरं धनार्जनविषयभोगादिविषयमेव न धर्मविषयं वार्तिकं वार्त्ता येषु ते तथा । यद्वा। देहंभराणां भोजनाद्यासक्तानां या वार्त्तास्ताभिरेव दीव्यन्ति तेषु जाया आत्मजाः रातिर्धनं मित्रं वा तद्वत्सु जायात्मजरातिदेष्विति पाठे जायादिप्रदेषु गृहेषु च विद्यमानेषु अपि न प्रीतियुक्ताः तथा लोके यावदर्थं यावत्प्रयोजनमेवार्थो येषामिति देहनिर्वाहाधिकस्पृहारहिता इत्यर्थः। ते महान्त इत्यनुषङ्गः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामान्नार्हत इति यदुक्तं तदुपपादयति—नूनमिति॥यत् यदा इन्द्रियप्रीतये आपृणोति व्याप्रियते "पृप्रीतौ" स्वादिः धातूनामनेकार्थता पृङो वा रूपम् । श्नुस्तङभावश्चार्षः । तदा नूनं निश्चितं प्रमत्तः कर्त्तव्याकर्त्तव्यानुसन्धानरहितः सन् विकर्म पापमेव कुरुते तत्त्वहं साधु न मन्ये । यतः यस्मात्पापाचरणादेवायमसन्नपि आत्मनः क्लेशदः देह आस यतः क्लेशोत्पत्तिस्तस्यैव पुनः करणं न योग्यमित्यर्थः ॥ ४ ॥ विकर्मवत् पुण्यकर्मापि क्लेशहेतुरित्याह—पराभव इति ॥ यावदयमात्मतत्त्वं स्वयथार्थरूपं सच्चिदानंदात्मकत्वं न जिज्ञासते न विचारयति विचारेण न प्रत्यक्षं करोति तावदबोधजातः अविद्यया जातः आत्मनः पराभवः स्वरूपतिरस्कारो भवति यावदज्ञानं तावन्न क्रियाव्यवच्छेदः यावत्क्रियास्तावदिदं मनः कर्मात्मकं कर्मस्वभावमेव भवति येन कर्मस्वभावेन मनसा पुरुषस्य शरीरबन्धः शरीरप्राप्त्या संसारबन्धो भवति ॥ ५ ॥ एवमिति ॥ एवमुक्तप्रकारेणाविद्ययात्मनि उपधीयमाने देहेन्द्रियाद्यध्यासेनाच्छाद्यमाने सति इदं जीवन्मुक्तकर्मव्यावृत्तये ज्ञेयम् । कर्तृभूतं प्रवृत्तिस्वभावं मनः पुरुषं कर्मभूतं वशं प्रयुंङ्क्ते अवश्यं कर्म कारयति । यद्वा । पूर्वकृतं कर्म कर्तृभूतं मनः कर्मभूतं वशं प्रयुंङ्क्ते अतो यावन्मयिवासुदेवे पुरुषस्य प्रीतिर्न जायते तावद्देहयोगेन न विमुच्यते ॥ ६ ॥ यदेति ॥ विपश्चित्

नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आपृणोति ॥ न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः ॥ ४ ॥ पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् ॥ यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः ॥ ५ ॥ एवं मनः कर्मवशं प्रयुङ्क्ते अविद्ययात्मन्युपधीयमाने ॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ ६ ॥ यदा न पश्यत्ययथागुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ॥ गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ॥ ७ ॥ पुंसः स्त्रिया मिथुनीभावमेनं तयोर्मिथो हृदयग्रन्थिमाहुः ॥ अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति ॥ ८ ॥

अपि यदा स्त्रीसङ्गिसङ्गात्तैः प्रोत्साहितः सन् गुणानामिन्द्रियाणाम् ईहां तत्तद्विषयोन्मुखतया प्रेरणलक्षणां चेष्टामयथा मिथ्या आत्मीया न भवति इति तापहेतुरिति वा पुरुषो न पश्यति । नु पश्यतीति पाठे अयथा आत्मीयत्वेनेत्यर्थः । तत्र तदा सहसा झटिति गतस्मृतिः स्वरूपस्मृतिशून्यः स्वस्यार्थे प्रमत्तः अज्ञः सन् मैथुन्यमगारं मैथुनसुखप्रधानं गृहमासाद्य प्राप्य तत्र गृहे तापान् विविधानि दुःखानि विन्दति ॥ ७ ॥ पुंस इति ॥ पुंसः स्त्रियाश्च यो मिथुनीभावः परस्परमात्मत्वाभिनिवेशस्तमेतं तयोर्द्वयोर्मिथः परस्परं हृदययोर्ग्रन्थिमाहुर्विवेकिन इति शेषः । अतः अस्मान्मिथुनीभावाज्जनस्य गृहादिभिर्निमित्तभूतैरहंममेत्ययं मोहो भवति । अयं भावः । पुंसः स्त्रियाश्च प्रत्येकं देहेन्द्रियादौ अहंममेतिरूपो हृदयग्रन्थिरस्त्येव तथापि इयं मे स्त्री अयं मे पतिरिति एतं मिथः स्यूतमन्यं हृदययोर्ग्रन्थिं दुर्भेदं वदन्ति प्रत्येकं हृदयग्रन्थिना तु देहेन्द्रियमात्रेऽहंममेति मोहः । अस्मात्तु मिथुनीभावात् गृहादिभिर्विषयभूतैर्महान् मोहो भवेदित्यर्थः । उपलक्षणमिदं पितापुत्रयोः सख्योरित्यादीनाम् ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ यदास्य जनस्य मनोलक्षणो दृढः कर्मभिः संचितैरनुबद्धः हृदयग्रन्थिराश्लथेत शिथिलो भवेत्तदा जनोऽस्मान्मिथुनीभावात् संपरिवर्त्तते विमुखो भवति ततश्च हेतुमनर्थकारणमहंकारमतिहाय त्यक्त्वाऽनर्थाद्विमुक्तः जीवन्मुक्तः सन् परं पदं याति ॥ ९ ॥ हेतुमतिहायेत्युक्तं तत्र चतुर्भिः साधनान्याह—हंस इति चतुष्कम् ॥ हे पुत्राः हंसे हंसवद्विवेकवति गुरौ तथा मयि भगवति च भक्त्या सेवया अनुवृत्त्या तत्परतया च वितृष्णया विषयभोगाभिलाषत्यागेन द्वन्द्वतितिक्षया सुखदुःखादिद्वन्द्वसहनेन सर्वत्र इहामुत्र जन्तोर्जीवस्य व्यसनावगत्या दुःखानुसन्धानेन जिज्ञासया तत्त्वातत्त्वविचारेण तपसा व्रतोपवासाहारादिनियमेन ईहानिवृत्त्या काम्यकर्मत्यागेन ॥ १० ॥ हे पुत्राः मयि समर्पितैः कर्मभिः मत्कथया मम कथाश्रवणेन नित्यं निरन्तरमित्यस्य सर्वत्रान्वयः । अहमेव देव आराधनीयो येषां मद्भक्तानां तेषां सङ्गात् मे मम गुणानां कीर्तनात् निर्वैरेण प्राणिषु वैरत्यागेन साम्येन सर्वेषां सुखदुःखादिसमानदर्शनेन उपशमेन चित्तशान्त्या देहेऽहमिति गेहे ममेति च याऽऽत्मनः स्वस्य बुद्धिस्तस्या जिहासया

यदा मनोहृदयग्रन्थिरस्य कर्मानुबद्धो दृढ आश्लथेत ॥ तदा जनः संपरिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुम् ॥ ९ ॥ हंसे गुरौ मयि भक्त्याऽनुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च ॥ सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ १० ॥ मत्कर्मभिर्मत्कथया च नित्यं मद्देवसङ्गाद् गुणकीर्तनान्मे ॥ निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ॥ ११ ॥ अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सम्यक् ॥ सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचाम् ॥ १२ ॥ सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ॥ योगेन धृत्युद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत् कुशलोऽहमाख्यम् ॥ १३ ॥ कर्माशयं हृदयग्रन्थिवन्धमविद्ययाऽऽसादितमप्रमत्तः अनेनयोगेन यथोपदेशं सम्यक् व्यपोह्योपरमेत योगात् ॥ १४ ॥

त्यागेच्छया ॥ ११ ॥ अध्यात्मयोगेन अध्यात्मशास्त्राभ्यासेन विविक्तसेवया निर्जनदेशवासेन प्राणस्य प्राणायामैः इन्द्रियाणां प्रत्याहारैः आत्मनो मनसो धारणयाभिजयेन वशीकारेण सध्यक् सम्यक् इत्यस्यापि सर्वत्र सम्बन्धः । सच्छ्रद्धया शास्त्रविहितानुष्ठानश्रद्धया ब्रह्मचर्येण यस्य यादृग्ब्रह्मचर्यं विहितं तेन । यथा गृहस्थस्यर्तुभार्यागमनं ब्रह्मचर्यमेव शश्वत् सर्वदा असंप्रमादेन कर्त्तव्यस्यापरित्यागेन वाचांयमेन व्यर्थालापवर्जनेन ॥ १२ ॥ सर्वत्र मद्भावो मद्भावना तत्र विचक्षणेनातिनिपुर्णन विज्ञानविराजितेन अनुभवपर्यन्तेन ज्ञानेन योगेन समाधिना धृतिर्धैर्यम् उद्यमः प्रयत्नः सत्त्वं विवेकस्तैर्युक्तः अत एव कुशलो निपुणः पुरुषोऽहमाख्यं लिङ्गमहङ्काराख्यमुपाधिं संसारकारणभूतं व्यपोहेत् निरस्येदित्यर्थः ॥ १३ ॥ कर्मेति ॥ कर्माण्याशेरते यस्मिंस्तं हृदयग्रन्थिलक्षणमात्मनो बन्धमविद्यया देहेन्द्रियाद्यध्यासलक्षणया आसादितं प्रापितमनेन पूर्वोक्तेन योगेनोपायेन यथोपदेशमनुष्ठितेन सम्यक् निर्वासनं व्यपोह्य निरस्य योगात् विमुक्त्युपायादुपरमेत् तदर्थः । यद्यपि फले सिद्धे साधनोपरमः सिद्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव तथापि यावज्जीवं तदभ्यासशङ्कावारणायोक्तम् ॥ १४ ॥ पुत्रानिति ॥ विमन्युः शिक्षितस्याकरणेऽपि क्रोधरहितः मदनुग्रह एवार्थो यस्य सः मल्लोककामः पिता गुरुर्नृपश्च क्रमेण पुत्रान् शिष्यान्प्रजाश्च इत्थमनुशिष्यात् शिक्षयेत् । अतज्ज्ञान् तत्त्वम् अजानतोऽत एव तत्साधनबुद्ध्या कर्मसु मूढान् मौढ्येन प्रवृत्तान् पुनस्तत्र कर्मस्वेव न योजयेन्न प्रेरयेत् ॥१५॥ कमित्यर्द्धम्॥ लोकं काम्यकर्मसु योजयन् अत एव नष्टदृशम् अज्ञानिनं गर्त्ते संसारकूपे पातयन् मनुजः कमर्थं किं फलं लभेत न कश्चिदर्थंप्रत्युत पापभाग्येव स्यादित्यर्थः । यथा नष्टदृशमन्धं गर्त्तमार्गे गच्छन्तमयमेवेष्टदेशमार्गोऽनेनैव गच्छेति प्रेरणया गर्त्ते पातयन्न किञ्चित्फलं लभते किंतु प्रत्युत पापमेव लभते ॥१६ ॥ तत्र हेतुः—लोक इति ॥ लोकः प्राणी स्वयं श्रेयसि श्रेयःसाधने नष्टदृष्टिर्ज्ञानशून्यः यतः नितरां कामकामः भोगाभिलाषी निकाममतिशयेन कामो यस्येति वा यः अर्थान्भोग्यान् विषयान् समीहेत इच्छति अत एव स मूढः सुखलेशस्य हेतोः अन्योऽन्यं वैरं यस्य सः तथाभूतः सन् परद्रोहजनितमनन्तं महत् नरकपातादिदुःखं न वेद ॥ १७ ॥

पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः ॥ इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान् ॥ १५ ॥ कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥१६॥ लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः ॥ अन्योऽन्यवैरः सुखलेशहेतोरनन्तदुःखं च न वेद मूढः ॥ १७ ॥ कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम् ॥ दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ॥ १८ ॥ गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्यात् जननी न सा स्यात् ॥ दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥१९॥ इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः ॥ पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्याः ॥२०॥

क इति ॥ विवेकी सघृणः दयालुश्च अविद्यायामन्तरे वर्त्तमानमत एव कुबुद्धिं परद्रोहोपार्जितविषयेण स्वसुखमिच्छन्तं तं दृष्ट्वा पुनस्तं तत्रैव काम्यकर्मसु कः प्रयोजयेत् न कोऽपीत्यर्थः । यथा उत्पथगं गर्त्तमार्गे गच्छन्तमन्धं सघृणो विवेकी को वानेनैव गच्छेति प्रवर्त्तयेत्तथेत्यर्थः ॥ १८ ॥ गुरुरिति ॥ समुपेतः संप्राप्तो मृत्युः जन्ममरणादिलक्षणः संसारो येन तं भक्तिमार्गोपदेशेन ततो यो न मोचयेत् स गुरुर्न स्यात् एवं स्वजनो न स्यादित्यादि दैवं देवसमूहः तथा च तादृशान् गुर्वादीन् बलिः शुक्रमिव बिभीषणो रावणमिव प्रह्लादो हिरण्यकशिपुमिव भरतः केकयीमिव खट्वाङ्ग इन्द्रादिदैवतमिव याज्ञिकब्राह्मणी याज्ञिकब्राह्मणमिव त्यजेत् । यद्वा । यतः यस्तं मोचयितुं न शक्नुयात् अतः स तस्य गुर्वादिर्न स्यात् गुरुर्भवितुमन्यं न शिष्यात् स्वजनो भवितुं बन्धुतां न दध्यात् पिता भवितुं पुत्रोत्पत्तौ यत्नं न कुर्यात् जननी भवितुं गर्भं न दध्यात् दैवं भवितुं पूजां न गृह्णीयात् पतिर्भवितुं पाणिं न गृह्णीयात् इति ॥ १९ ॥ एवं मोक्षधर्मानुपदिश्य भ्रातृशुश्रूषणं वक्तुमाह—इदमिति ॥ इदं मनुष्याकारं मम शरीरं दुर्विभाव्यमवितर्क्यं

Nepal Sanskrit University, Balmeeki

CC-0. In Public Domain. Digitization by eGangotri

स्वेच्छया गृहीतं नतु प्राकृतपुरुषवत्कर्माधीनम् । हि यस्मात्त्वं परमार्थभूतं शुद्धसत्वात्मकमेव मे हृदयं यत्र मम हृदये धर्मस्तिष्ठति यत् यस्मात् मे मया अधर्म आरात् दूरादेव पृष्ठे कृत उत्सारितः अत एव आर्याः वृद्धाः पित्रादयो मामृषभं श्रेष्ठं प्राहुः॥२०॥ तस्मादिति ॥ तस्मान्मम सर्वश्रेष्ठत्वाद्भवन्तश्च सर्वे मम हृदयेन धर्मस्थानेन शुद्धसत्वमयेन जाताः अतः अक्लिष्टबुद्ध्या शुद्धबुद्ध्या मत्सरादिदोषं हित्वा महीयांसम् अतिमहान्तं सनाभं सोदरममुं भरतं भजध्वम् । तत् भरतस्य शुश्रूषणमेव प्रजानां भरणं पालनं भरतानुगुणतयैव सर्वं कृतं स्यात् । यद्वा । भरतेच्छयैव प्रजापालनं कर्त्तव्यं न स्वातन्त्र्येणेति भावः ॥२१॥ ब्राह्मणाश्च सेव्या इत्याह—भूतेष्विति ॥ भूतेषु चेतनाचेतनेषु मध्ये विरोहन्तीति वीरुधः वृक्षादयस्ते मृत्पाषाणादिभ्य उत् उच्चैः अतिशयेनोत्तमास्तेभ्योऽपि ये सरीसृपाः जङ्गमास्ते उदुत्तमा इति सर्वत्र संबन्धः । तेष्वपि सबोधा निष्ठा स्थितिर्येषां पश्वादीनां ते कीटादिभ्य उदुत्तमाः ततस्तेष्वपि मनुष्याः ततोऽपि प्रमथा भूतप्रेतादयो देवयोनित्वादुदुत्तमाः । ततोऽपि गन्धर्वास्ततः सिद्धास्ततोऽन्ये विबुधानुगा ये किन्नरादयस्ते उदुत्तमाः ॥ २२ ॥ देवा इति ॥ तेभ्यो विबुधानुगेभ्यः असुराः उदुत्तमाः असुरेभ्यो देवाः उदुत्तमाः । अत्र सन्धिरार्षः । देवाश्च मघवत्प्रधानाः

तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् ॥ अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥ २१ ॥ भूतेषु
वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ॥ ततो मनुष्याः प्रमथास्ततोऽपि गन्धर्वसिद्धा विबुधानुगा ये ॥ २२ ॥ देवासुरेभ्यो
मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम् ॥ भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥ २३ ॥ न ब्राह्मणैस्तुलये
भूतमन्यत्पश्यामि विप्राः किमतः परं तु ॥ यस्मिन्नृभिः प्रहुतं श्रद्धयाऽहमश्नामि कामं न तथाऽग्निहोत्रे ॥ २४ ॥

मघवानिन्द्रः प्रधानम् उत्तमः येषां ते देवेभ्यः इन्द्र उत्तमः इत्यर्थः । ततोऽपि ब्रह्मसुता दक्षादय उत्तमाः तेषां ब्रह्मपुत्राणां मध्ये तु भवो महादेवः परः श्रेष्ठः सभवो विरिञ्च्यो वीर्यं शक्तिः कारणं यस्य स विरिञ्चवीर्यः तज्जन्यत्वात्ततो विरिञ्च्यः श्रेष्ठ इत्यर्थः । अत्र ब्राह्मणभक्तेर्विधेयत्वाद्ब्राह्मणत्वांशेनैव विरिञ्च्यस्य भवाच्छ्रेष्ठत्वम् । ऐश्वर्येण तु भवस्यैव विरिञ्च्याच्छ्रेष्ठता इति ज्ञेयम् । स विरिञ्च्यो मत्परः अहं परः श्रेष्ठः पूज्यो यस्य सः ततोऽहं श्रेष्ठ इत्यर्थः । अहं च द्विजदेवदेवः द्विजेषु देवाः पूज्या द्विजदेवा ब्राह्मणा एव देवा यस्य सः मम पूज्यत्वाद्ब्राह्मणा मत्तोऽपि श्रेष्ठा इत्यर्थः ॥२३॥ नेति ॥ हे विप्रा इति तत्रत्यब्राह्मणसंबुद्धिः । ब्राह्मणैरन्यद्भूतं न तुलये तुल्यत्वेन न गणयामि ॥ १३ ॥ अतो ब्राह्मणात्परं भूतं किं पश्यामि न किञ्चित् । चस्त्वर्थे क्वचित्तथा पाठोऽपि रहस्यज्ञैर्नृभिर्यस्मिन् ब्राह्मणमुखे श्रद्धया प्रहुतं भोजितमन्नादिकमहं यथाकामं यथेष्टं सन्तोषपूर्वकमश्नामि तथाग्निहोत्रे यज्ञादौ प्रहुतं नाश्नामि ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धृतेति ॥ इह प्राणिसमुदायमध्ये येन ब्राह्मणेन पुराणी चिरन्तनी उशती कमनीया वेदाख्या मे तनुः मूर्त्तिः अध्ययनादिना धृता यत्र च परमं पवित्रं सत्वं गुणः शमोऽन्तःकरणनिग्रहः दमो बाह्येन्द्रियनिग्रहः सत्यं यथार्थभाषणम् अनुग्रहः परदुःखनिवृत्तिप्रयत्नः तपः आहारादिनियमः तितिक्षा त्रिविधतापसहनम् अनुभवो वेदार्थज्ञानम् एतेऽष्टगुणाः सन्ति तैर्ब्राह्मणैरन्यद्भूतं न तुलय इत्यनुषङ्गः ॥ २५ ॥ मत्त इति ॥ अनन्तात् अनन्तशक्तियुक्तादत एव परतो ब्रह्मादिभ्योऽपि परस्मादुत्कृष्टादत एव स्वर्गापवर्गाधिपतेर्भोगमोक्षदाने समर्थान्मत्तोऽप्यकिञ्चनानां भोगसम्पत्तिहीनानामपि येषां न किञ्चित्प्रार्थनीयमस्ति तेषां मयि भक्तिभाजाम् इतरेण राज्यादिना किमु प्रयोजनं स्यात् न किमपीति तैर्ब्राह्मणैरन्यद्भूतं न तुलये ॥२६॥ सर्वभूतसम्मानं विधत्ते–सर्वाणीति ॥ हे सुताः वो युष्माभिः तथा भवद्भिश्च सभास्थजनैः अतो व इति भवद्भिरिति च न पौनरुक्त्यम् । सर्वैरेव विविक्तदृग्भिः विविक्ता मात्सर्यादिदोषरहिता दृक् येषां तथाभूतैः चराणि जङ्गमानि ध्रुवाणि स्थावराणि च सर्वाणि भूतानि मद्धिष्ण्यतया मम भगवतोऽधिष्ठानतया पदे

धृता तनूरुशती मे पुराणी येनेह सत्वं परमं पवित्रम् ॥ शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ॥ २५ ॥ मत्तोप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित् ॥ येषां किमु स्यादितरेण तेषामकिंचनानां मयि भक्तिभाजाम् ॥२६॥ सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि ॥ संभावितव्यानि पदे पदे वो विविक्तदृग्भिस्तदुदार्हणं मे ॥ २७ ॥ मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि ॥ विना पुमान्येन महाविमोहात्कृतान्तपाशान्न विमोक्तुमीशेत् ॥ २८ ॥ श्रीशुक उवाच ॥ एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभादेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥ २९ ॥

पदे क्षणे क्षणे अवसरे संभावितव्यानि । सम्माननीयानि णिलोप आर्षः । तदु तदेव हि सर्वभूतसम्माननं मे मम ह यथावत् अर्हणं पूजनं न केवलं प्रतिमादिषु पूजनम् ॥ २७ ॥ सर्वकर्मणामीश्वरार्पणं विधत्ते–मन इति ॥ मनोवचोदृशामन्येषां च करणानामिन्द्रियाणामीहितस्य देहव्यापारस्य मे परिबर्हणं मदाराधनमेव साक्षात्कृतं फलं हि यस्मात् येन मदाराधनेन विना कृतान्तस्य कालस्य पाशात् विमोहात् अहंममत्वात्मकात् आत्मानं विमोक्तुं पुमान्नैवेशेन्नैव समर्थो भवेत् । तङभावः शपः अलुक् चार्षः ॥२८॥ एवमिति॥ महानुभावः परमसुहृत् ऋषभ इत्यपदेशो नाम यस्य स भगवान् स्वयमनुशिष्टान् स्वतःसुशिक्षितानथात्मजान् लोकानुशासनार्थम् अधिकारिजनस्य शिक्षार्थमेवं गृहस्थधर्माननुशास्य इत्वाभाव आर्षः । महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यसंज्ञकं धर्ममुपशिक्षमाण उपशिक्षयिष्यन् धरणिपालनाय स्वतनयशते ज्येष्ठं परमभागवतं भरतं राज्ये-

CC-0. In Public Domain. Digitization by eGangotri

ऽभिषिच्य भवने एव सर्वत्यागात् उर्वरितः अवशिष्टः शरीरमात्रं परिग्रहो यस्य सः अत एव गगनपरिधानः नग्नः प्रकीर्णाः केशा यस्य सः केशबन्धनेऽप्यनुसन्धानरहितः आत्मन्येव आरोपितः चिन्तया स्थापितः आहवनीयः अग्निर्येन सः अत एव उन्मत्त इव ब्रह्मावर्त्तात्स्वदेशात्प्रवव्राज निर्जगाम ॥ २९ ॥ जडेति ॥ अवधूतस्येव मृदाद्यवगुण्ठितो वेषो यस्य सः जनानां मध्ये जडादिवद्वर्त्तमानस्तैर्भाष्यमाणो वाच्यमानोऽपि गृहीतमौनव्रतस्तूष्णीमेव बभूव ॥ ३० ॥ तत्रेति ॥ तत्र तत्र पुरं पत्तनं राजस्थानं ग्रामा हट्टहीनाः आकरः खनिः खेटाः कृषीवलग्रामाः वाटः पुष्पादिवाटिका शिबिरं सेनाया वासस्थानं व्रजो गवां स्थानं घोषो गोपानां वासस्थानं सार्थो यात्रिकजनसङ्घातः गिरयः पर्वताः आश्रमाः ऋषीणां स्थानानि तेषु अनुपथं मार्गे मार्गे अवनिचरापसदैः पुरुषाधमैस्तर्जनादिभिः परिभूयमानोऽपि तर्जनं भर्त्सनं ताडनं प्रहारः अवमेहनमुपरि मूत्रणं ष्ठीवनं थूत्कृत्य श्लेष्मप्रक्षेपः ग्राव्णां शकृतो रजसश्च प्रक्षेपः पूतिवातोऽधोवायुः दुरुक्तं शापः असति मिथ्याभूते संस्थाने संनिवेशे देह इत्युपलक्षणमाकारो यस्य तस्मिन्

जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥३०॥ तत्र तत्र पुरग्रामाकरखेटवाटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथिवीमेकचरः परिबभ्राम ॥ ३१ ॥ अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुन्दरस्वभावहाससुमुखो नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः सदृशसुभगकपोलकर्णकण्ठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुपदधानः परागवलम्बमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ॥३२॥

सदित्यपदेशमात्रं यस्य तस्मिन् उभयोः स्थूलसूक्ष्मयोः सदसतोर्वा चिदचितोर्वा योऽनुभवस्तत्स्वरूपेण यत्स्वमहिम्नि अवस्थानं स्वरूपनिश्चयः तेन एतस्मिन् कार्यकारणसङ्घाते शरीरे असमारोपिताहंममाभिमानत्वात् अविखण्डितमानः अक्षुभितचित्तः तं परिभवमगणयन्नेवैकचर एकाकी पृथिवीं परिबभ्राम । यथा मक्षिकाभिः परिभूयमानो वनस्थो गजः परिभवं न गणयति तथेत्यर्थः ॥ ३१ ॥ अतीति ॥ अतिसुकुमाराणि करचरणोरःस्थलानि विपुलानि बाह्वंसयुगलानि च वदनं च एते येऽवयवास्तेषां विशिष्टो न्यासः संनिवेशो यस्य सः तथा प्रकृत्यैव सुन्दरः तथा स्वभावसिद्धो यो हासस्तेन शोभनं मुखं यस्य सः तथा नवनलिनदलवदाचरन्ती ये शिशिरतारे तापहारिकनीनिके अरुणे रक्ते आयते दीर्घे नयने ताभ्यां रुचिरः मनोहरः तथा सदृशा अन्यूनाधिकाः सुभगाश्च कपोलकर्णकण्ठनासा यस्य स भूमिं पर्यटन् विगूढस्मितं यद्वदनं तस्य महोत्सवेन विभ्रमेण पुरवनितानां मनसि कुसुमशरासनं काममुपदधान उद्दीपयन्नपि पराक् पुरतोऽवलम्बमानाश्च ते कुटिलाः वक्राश्च ते जटिलाश्च ते कपिशाः पिशङ्गाश्च ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केशास्तेषां भूरिभारो यस्य सः अवधूतवदनादृतमत एव मलिनं निजशरीरं तेन ग्रहगृहीतः पिशाचाद्याविष्ट इवादृश्यत ॥ ३२ ॥ यर्हीति ॥ यर्हि वाव यदा तु स भगवानृषभ इमं लोकं जनसमूहं योगस्य अद्धा साक्षात्प्रतीपं प्रतिपक्षं नाशकमिवाचक्षाणः पश्यन् बभूव तत्प्रतिक्रियाकर्म तस्य लोकस्य योगविरुद्धाचारनिराकरणं च बीभत्सितं विवादग्रस्तत्वाच्चित्तोद्वेगकरत्वाच्च निन्दितमिति पश्यन् बभूव तदाऽऽजगरं व्रतमास्थितो जातः अत एव उच्चरिते पुरीषे चेष्टमानो विलुण्ठन् तेनैव आदिग्धा आलिप्ता उद्देशा देहप्रदेशा यस्य सः । एकत्र शयान एवाश्नाति स्म पिबति फलादिकं खादति अवमेहति मूत्रयति हदति पुरीषमुत्सृजति स्मेति । तङभाव आर्षः । यदेकत्रैव स्थित्वा प्रारब्धकर्मोपभोगस्तदाजगरं व्रतमिति दर्शितम् ॥ ३३ ॥ भगवच्छरीरस्यैतद्बीभत्सितमाशङ्क्याह—तस्येति ॥ तस्य पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य स एवंभूतो यो वायुः स समन्तात्सर्वतो दशयोजनपर्यन्तं तं देशं सुरभिं चकार ॥ ३४ ॥ एवमिति ॥ एवमाजगरव्रतमिव काकमृगगवामिव चरितं यस्य सः । काकमृगगोचरित इति पाठे काकमृगाणां

यर्हि वाव स भगवाँल्लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः ॥ ३३ ॥ तस्य ह यः पुरीषसुरभिसौगन्ध्यवायुस्तं देशं दशयोजनं समन्तात्सुरभिं चकार ॥ ३४ ॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकगोमृगचरितः पिबति खादत्यवमेहति स्म ॥ ३५ ॥ इति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽविरतपरममहानन्दानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानान्तरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवान्तर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नाञ्जसा नृप हृदयेनाभ्यनन्दत् ॥ ३६ ॥ इति श्रीभागवते पञ्चमस्कन्धे ऋषभदेवानुचरिते पञ्चमोऽध्यायः ॥ ५ ॥

पशुतुल्यलोकानां गोचरितः तादृशस्वभावत्वेन दृष्टिविषयीभूत इति व्याख्यान्तरमपि गोमृगकाकचर्यया व्रजन् गच्छन् तिष्ठन्नासीनः शयान एव पिबति खादत्यवमेहति स्म ॥ ३५ ॥ इतीति ॥ हे नृप इत्येवं मुमुक्षुभिः योगविघ्नकर्तृजनसङ्घर्षपरिहारार्थमेवं वर्तितव्यमिति शिक्षार्थं नाना योगचर्या आचरति तथोक्तः स भगवान् कैवल्यपतिर्मोक्षदाता एतेन अन्येभ्योऽपि कृपया यः कैवल्यं ददाति तस्येयं लीला ध्येयैव नतु अनुचिकीर्षणीयेति सूचितम् । अविरतः निरन्तरः परममहान् उपनिषत्सु उत्तरोत्तरशतगुणत्वेनोक्तो यः आनन्दस्तदनुभवस्वरूपः सर्वेषां भूतानामात्मभूते अत एवात्मनि सर्वव्यापके वासुदेवे भगवति आत्मनः स्वस्याव्यवधानेन अभेदेन न विद्यते अन्तरा मध्ये उदरस्य देहोपाधेर्यो भावस्तेन निरस्तदेहाद्युपाधित्वेनैव सिद्धैः समस्तैरर्थैः फलैः परिपूर्णः भगवान् ऋषभो यदृच्छया सङ्कल्पं विनैव अञ्जसा साक्षात्प्रत्यक्षतयोपगतानि प्राप्तान्यपि वैहायसं खेचरत्वं मनोजवं मनस इव देहस्य वेगः अन्तर्द्धानं परकाये प्रवेशः दूरग्रहणं दूरस्थवस्तुदर्शनम् आदिपदेनैकादशस्कन्धोक्तानामवशिष्टानामणिमादीनां सङ्ग्रहः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानि योगैश्वर्याणि हृदयेन मनसा नाभ्यनन्दत् नाङ्गीचकार ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाव् पञ्चमे पञ्चमस्य तु ॥ ५ ॥ षष्ठे तु ऋषभं त्यक्तराज्यं त्यक्ताभिमानकम् ॥ वनाग्निरदहत्तत्र गव्यानामूनविंशतिः ॥ द्वे उवाचेति पादोनाः षट्त्रिंशत्स्युरनुष्टुभः ॥ ६ ॥ नेति ॥ हे भगवः भगवन् आर्षः । योगेन समीरितं समुद्दीपितं यज्ज्ञानं तेनावभर्जितानि दग्धानि कर्मबीजानि रागादीनि येषामत एवात्मारामाणां क्लेशबीजाहंममाभिमानाभावात् यदृच्छयोपगतानि प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि भवितुं नार्हन्ति । नूनं निश्चितमेतदतस्तानि कुतो नाभ्यनन्ददिति शेषेणान्वयः ॥ १ ॥ सत्यमिति ॥ त्वया सत्यमुक्तं किंतु परन्तु इह योगमार्गे एके मुख्या विवेकिनः अनवस्थानस्य प्रतिक्षणं प्राप्तनानादशाकस्य अतिचञ्चलस्य मनसो विश्रम्भं विश्वासं नैव सङ्गच्छन्ते सम्यक् नैव प्राप्नुवन्ति । सकर्मकात्तङार्षः । यथा शठे धूर्त्ते किराते नीचजातौ च लोको न विश्वसिति धूर्त्तः सौहार्दं प्रदर्श्य हन्ति नीचः अस्तेयादिधर्ममध्यापितोऽपि कोषाधिकारप्राप्तौ चौर्यादि करोति मनश्च कामाद्यनभिभवरूपां स्वशुद्धिं प्रदर्श्य ततः कामादिनैवाधः पातयति । यद्वा । प्रथमान्तत्वे शठो वञ्चकः किरातो व्याधो यथा धृतेऽपि मृगे विश्वासं न गच्छति । सप्तम्यन्ते शठे किराते ततो विमुक्ता

राजोवाच ॥ न नूनं भगव आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि ॥ १ ॥ ऋषिरुवाच ॥ सत्यमुक्तं किं त्विह वा एके न मनसोऽद्धा विश्रम्भमनवस्थानस्य शठकिरात इव सङ्गच्छन्ते ॥ २ ॥ तथा चोक्तम् ॥ न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते ॥ यद्विश्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ॥ ३ ॥ नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः ॥ योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ ४ ॥ कामो मन्युर्मदो लोभः शोकमोहभयादयः ॥ कर्मबन्धश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ॥ ५ ॥

मृगा यथा विश्वासं न गच्छन्ति तथा किराट इति पाठान्तरे यथा शठः किराटो वणिक् यथा व्यवहर्त्तरि अस्मिन्वा व्यवहर्त्ता विश्वासं न यातीत्यर्थः । पाक्षिकोऽपि दोषो वर्जनीय इत्युपदेष्टुं नाभ्यनन्दत् इति भावः ॥ २ ॥ तथेति ॥ तथा च अत्र विषये शिष्टैरित्थमुक्तं तदाह—नेति ॥ मनसि ह्यनवस्थिते चञ्चले सति कर्हिचित्कदाचिदपि केनापि सह सख्यं मैत्रीं न कुर्यात् । यस्य मनसो विश्रम्भाद् विश्वासात् ऐश्वरमीश्वराणां मोहिनीदर्शनादिभिः रुद्रादीनामपि सम्बन्धि ईश्वराणां सौभरिप्रभृतीनां वा चिराच्चीर्णं बहुकालसञ्चितं तपश्चस्कन्द सुस्राव ॥ ३ ॥ नित्यमिति ॥ कृतं मैत्रं विश्वासो येन तस्य योगिनो विश्वसितं मनो नित्यं सर्वदा तं भ्रंशयितुं कामस्य विषयभोगाभिलाषस्य ये च तं काममनुवर्त्तन्तेऽरयः शत्रवस्तेषां च च्छिद्रं प्रवेशावकाशं ददाति यथा पुंश्चली जाया कृतविश्वासस्य पत्युर्घाताय जाराणामवकाशं ददाति तथा ॥ ४ ॥ काम इति ॥ कामादयः कर्मणा बन्धश्च अयं सर्वोऽपि शत्रुसमूहो यन्मूलः मनोनिमित्तो भवति तन्मनः को नु बुधः स्वीकुर्यात्स्वाधीनं मन्येत ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ एवं पूर्वोक्तप्रकारेण भगवल्लक्षणादिमत्त्वेनाऽखिललोकपालानां ललामो मण्डनभूतोऽपि अथानन्तरं योगिनां साम्परायविधिं देहत्यागप्रकारमनुशिक्षयन् लोकविलक्षणैरनेकप्रकारैर्जडवदवधूतवेषभाषाचरितैर्न विलक्षितः नाभिव्यक्तो भगवत्प्रभावो यस्मिन् सः स्वकलेवरं देहं जिहासुः त्यक्तुमिच्छुः आत्मनि परमात्मनि भगवति आत्मानमनर्थान्तरभावेन देहाद्यर्थान्तरकृतभेदनिरासेन इदं चाधाराधेयभावव्यावृत्त्यर्थम् असंव्यवहितं व्यवधानशून्यमेकतां प्राप्तमन्वीक्षमाणः पश्यन् अत एव उपरता बाधिता देहाद्यभिमानानुवृत्तिर्यस्मात्स उपरराम । संसारादुपरतो जातस्तदनुसन्धानशून्यो जातः ॥ ६ ॥ तस्येति ॥ तस्य भगवतः ऋषभस्यैवं मुक्तलिङ्गस्य त्यक्तदेहाभिमानस्यापि देहो योगमायावासनया जातेनाभिमानाभासेन जगतीं पृथिवीमभिचङ्क्रममाणः पर्यटन् कोङ्कादिदेशान् यदृच्छयोपगतः सन् यथा आवधूत्यलीलेच्छासंस्कारेणातिबालः यद्यत्प्राप्नोति तत्तन्मुखे क्षिपति तथा आस्ये कृतः अश्मकवलो येन सः मुक्ता मूर्द्धजा यस्य सः असंवीतः नग्न एव अत एव उन्मादः वातादिना विक्षिप्त इव । यद्वा । सप्तम्यन्तमिदम् ।

अथैवमखिललोकपालललामो विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां साम्परायविधिमनुशिक्षयन्स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥ तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन चङ्क्रममाणः कोङ्कवेङ्ककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्मकवल उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥ ७ ॥ अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥ ८ ॥ यस्य किलानुचरितमुपाकर्ण्य कोङ्कवेङ्ककुटकानां राजाऽर्हन्नामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाखण्डमसमञ्जसं निजमनीषया मन्दः संप्रवर्तयिष्यते ॥ ९ ॥

उन्मादे सति पुमान् यथा चेष्टते तद्वदिति । कुटकाचलस्योपवने विचचार मनसा स्वयं त्यक्तेऽप्यभिमाने केनापि संस्कारेण देहः प्रचलति । यथा दण्डापनयेऽपि कुलालचक्रम् । सोऽयमभिमानाभासः स च जीवन्मुक्तानामविद्यावासनया भवति भगवत ऋषभस्य तु योगमायावासनयेति विशेषः ॥ ७ ॥ अथेति ॥ समीरस्य वेगेन विधूतानां कम्पितानां वेणूनां विघर्षणेन जात उग्रो दावानलस्तद्वनमालेलिहानः सर्वतो ग्रसमानस्तेनर्षभेण सह ददाह । अत्र वनवर्तितरुमृगादीनां स्थूलशरीराणि वह्निर्ददाह । सूक्ष्मं शरीरं तु ऋषभ इति तद्वनवर्त्तिनो मुक्ता बभूवुरित्यर्थः॥८॥यस्येति॥ अवधूतवेषेण कोङ्कादिदेशान् गतस्य यस्यर्षभस्य किलाश्रमातीतं पारमहंस्यमनुचरितं तद्देशवासिभ्यः शास्त्रद्वारा च उपाकर्ण्य श्रुत्वा मन्दः कलौ अधर्मे उत्कृष्यमाणे वर्द्धमाने सति भवितव्येन प्राणिनां दुरदृष्टफलेन विमोहितः । अर्हन्निति नाम यस्य सः कोङ्कादीनां राजा स्वयमुपशिक्ष्य ऋषभचरिताचरणेन वयमपि तादृशा भवामेति मत्वा अकुतोभयं शास्त्रानुमतत्वात्सर्वतो भयनिवर्त्तकं स्वधर्मपथं स्वधर्ममार्गमपहाय त्यक्त्वा कुपथश्चासौ पाखण्डश्च तत् अत एवासमञ्जसं

CC-0. In Public Domain. Digitization by eGangotri

वेदविरुद्धत्वान्नरकपातादिदुःखकारणं मतं निजमनीषया वेदविचारमन्तरेणैव संप्रवर्तयिष्यते ॥ ९ ॥ येनेति ॥ येन प्रवर्त्तितपाखण्डमतेन वाव एव कलौ मनुजापसदा मनुजेष्वतिनिकृष्टाः स्वविधिना स्ववर्णाश्रमानुरूपशास्त्रेण नियोगो यस्मिन् शौचचारित्रे शोधककर्मणि तद्विहीनाः देवस्य भगवतो मायया मोहिताः अत एवाधर्मो बहुलो यस्मिंस्तेन कलिना उपहता तिरस्कृता धीर्विवेको येषां ते जनाः देवहेलनानि देवानामवज्ञारूपाण्यस्नानादीनि अपव्रतानि निजेच्छया गृह्णानाः ब्रह्मादीनां विदूषका भविष्यन्ति ॥ १० ॥ ते चेति ॥ ते च पाखण्डिनः निजलोकयात्रया पाखण्डिजनप्रवर्त्तितया अत एव सर्वमूलानादिवेदप्रमाणशून्यत्वादर्वाक्तनया प्रवृत्त्या श्वस्ताः कृतविश्वासाः स्वयमन्धे तमसि दुःखभोगातिरिक्ततरणोपायरहिते नरक एव प्रपतिष्यन्तीत्यन्वयः । तत्र दृष्टान्तमाह । अन्धपरम्परयेति । यथा वञ्चनपरैः धनादिलोभेन वयं मार्गं पश्याम इति वदद्भिरन्धैः सह गच्छन्नन्धोऽन्धे कूपे पतति तथा ॥ ११ ॥ ननु तर्ह्यनर्थकारी किमर्थोऽयमवतारस्तत्राह—अयमिति ॥ अयमवतारो रजसा उपप्लुतानां व्याप्तानां मोक्षमार्गोपशिक्षणार्थ

येन ह वाव कलौ मनुजापसदा देवमायामोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजेच्छया गृह्णाना अस्नानाचमनाशौचकेशोल्लुञ्चनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ॥१०॥ ते च ह्यर्वाक्तनया निजलोकयात्रयाऽन्धपरम्परयाश्वस्तास्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ॥ ११ ॥ अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः ॥ तस्यानुगुणाञ्छ्लोकान्गायन्ति ॥ १२ ॥ अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ॥ गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥ १३ ॥ अहो नु वंशो यशसाऽवदातः प्रैयव्रतो यत्र पुमान्पुराणः ॥ कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥१४॥ को न्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेनाप्यभवस्य योगी ॥ यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ॥ १५ ॥

एव पाखण्डमार्गप्रवृत्तिस्तु प्राणिदुरदृष्टवशादित्युक्तमेव ॥ १२ ॥ तस्य कैवल्योपशिक्षणस्यानुगुणान् अनुरूपान् श्लोकान् गायन्ति—अहो इति ॥ अहो आश्चर्यम् । सप्तसमुद्रवत्या भुवो ये द्वीपास्तेषु तेषां वर्षेषु च मध्ये एतद्भारतं वर्षमधिपुण्यमधिकं पुण्यं यस्मिंस्तत्कुतो यतः भद्राणि मोक्षप्रदानि मुरारेर्ऋषभाद्यवतारवन्ति कर्माणि यत्रत्या जना गायन्ति ॥ १३ ॥ अहो इति ॥ प्रैयव्रतो वंशो यशसा सत्कीर्त्या अहो अवदातः अतिशुद्धः यत् यस्मात् पुरुषः सर्वान्तर्यामी आद्यः सर्वकारणं यः पुराणः पुमान् भगवान् स यत्र वंशे कृतावतारः सन् अकर्मा कर्माप्राप्यो मोक्षस्तस्य हेतुं धर्मं चचार ॥ १४ ॥ को न्विति ॥ अभवस्य संसारातीतस्य अस्य ऋषभस्य काष्ठां दिशम् अपि अपरो योगी मनोरथेनापि किम्पुनः कर्मणा को नु गच्छेत् । यो योगी ऋषभोऽस्मान् स्वीकरोतु इति सेवितुं कृतः प्रयत्नो याभिस्तथाभूता अपि येन ऋषभेण असत्तया तुच्छत्वेन उदस्तास्त्यक्ता हि एव योगमायाः योगसिद्धीः स्पृहयति वाञ्छति । यद्वा । कृतः प्रयत्नो या तु इति योगसिद्ध्यर्थं प्रयत्नमपि करोतीति स्पृहाधिक्यानुगुणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषणम् ॥ १५ ॥ इतीति ॥ इत्येवं ह स्फुटतया सकलवेदादीनां परमगुरोः रक्षकस्य भगवत ऋषभाख्यस्य विशुद्धे आचरिते यत् ईरितं तत् वक्तृश्रोत्रोः समस्तं दुश्चरितमभितो हरतीति तथा तथा परममहामङ्गलानामतिदुर्लभफलानामप्ययनम् । यद्वा । ऋषभाख्यस्य विशुद्धाचरितं तथा ईरितम् " नायं देहो देहभाजाम् । " इत्यादि कथितं वाक्यं च समस्तदुरिताभिहरणं परममङ्गलायनं चेति तदिदमवहितः सावधानः सन्नुपचितया श्रद्धयानुवारं शृणोत्याश्रावयति वा तयोरनयोः श्रोतृश्रावयित्रोः अपिकारात्स्मर्तुरनुमोदयितुश्च तस्मिन्सर्वशास्त्रप्रसिद्धे भगवति वासुदेवे एकान्ततः फलाभिसन्धानशून्या भक्तिः समनुवर्त्तते उत्पद्यते ॥ १६ ॥ यस्यामिति ॥ यस्यां भक्तावेव सुधासरिति नतु योगादिपल्वले । अनुसवनं प्रतिदिनं तत्राप्यविरतं निरन्तरं प्रतिक्षणं विविधानि वृजिनानि दुःखानि यस्मिन् तस्मिंस्तिर्यगादियोनिषु भ्रमणात्मके संसारे तापैर्दुःखैरुपतप्यमानमभिभूयमानमात्मानं स्नापयन्तस्तया भजनोत्पन्नया परया सर्वोत्कृष्टया निर्वृत्या आनन्देन पूर्णाः भगवदीयत्वेन भगवता स्वकीयत्वेनाङ्गीकारेणैव

इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितेरितं पुंसां समस्त दुश्चरिताभिहरणं परममहामङ्गलायनमिदमनुश्रद्धयोपचितयाऽनुशृणोत्याश्रावयति वाऽवहितो भगवति तस्मिन्वासुदेव एकान्ततो भक्तिरनयोरपि समनुवर्तते ॥ १६ ॥ यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव पराय निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥ १७ ॥ राजन्पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः ॥ अस्त्वेवमङ्ग भगवान्भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ १८ ॥ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ॥ लोकस्य यः करुणयाभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ १९ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे ऋषभदेवानुचरितवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥

परिसमाप्ताः परिपूर्णाः सर्वेऽर्था मनोरथा येषां ते भगवदीयत्वेनेत्यत्र दत्वमार्षम् । कवयः स्वयमासादितमाकाङ्क्षां विनापि भगवतैव प्रापितमात्यन्तिकं जन्ममरणादिदोषवर्जितमत एव परमपुरुषार्थरूपमपवर्गमपि नो एवाद्रियन्ते नैवाङ्गीकुर्वन्ति ॥ १७ ॥ राजन्निति ॥ अङ्ग हे राजन् भवतां पाण्डवानां यदूनां यादवानां च पतिः रक्षकः गुरुः धर्मोपदेष्टा दैवमुपास्यः फलदश्च प्रियः मित्रं कुलपतिः गणमुख्यः कार्यनियन्ता किं बहुना क्व च कदाचित् दौत्यादौ वः पाण्डवानां किङ्कर आज्ञाकार्यपि जातो न तु यदूनामिति । यदुभ्योऽपि भवतामाधिक्यमेव तदेवमलमस्तु नामैवं तथापि अन्येषां नित्यं भजतामपि भगवान् मुकुन्दः कर्हिचिन्मुक्तिं ददाति स्म । भक्तियोगं प्रेमलक्षणं तु नैव ददाति स्म ॥ १८ ॥ नित्येति ॥ नित्यमनुभूतं यन्निजं रूपं स एव लाभस्तेन निवृत्ता तृष्णा यस्य सः सः यः ऋषभः आत्मा तत्पदवाच्यः तद्व्यतिरिक्तं देहादि अतत्

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

तदर्था या रचना लौकिको व्यवहारस्तया श्रेयसि भगवद्भजने चिरं बहुकालतः सुप्ता लुप्ता बुद्धिर्यस्य तस्य लोकस्य प्राणिजातस्य करुणया अभयं संसारभयनिवर्तकमात्मा चासौ लोकः सर्वोपद्रवरहितनिवासश्च तमात्मतत्वमाख्यात् उपदेशेनाचारेण च प्रकटितवांस्तस्मै भगवत ऋषभाय नमः ॥ १९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ षष्ठेऽध्याये पञ्चमस्य व्यधाद्रङ्गासहायकः ॥ ६ ॥ सप्तमे भरतो यज्ञैर्हरिमिष्ट्वा गृहाद्गतः ॥ हरिक्षेत्रेऽभजत्तत्र गव्यानि स्युश्चतुर्दश ॥ उवाचेत्येकं सपादात्रिंशदुक्ता अनुष्टुभः ॥७॥ भरत इति ॥ महाभागवतो भरतस्तु यदा भगवता ऋषभेणावनितलपरिपालनाय संचिन्तितः विचारेण राज्ये स्थापितस्तदा तदनुशासनपरः तस्याज्ञानुसारी सन् विश्वरूपदुहितरं पञ्चजनीमुपयेमे विवाहितवान् ॥ १ ॥ तस्यामिति ॥ तस्यां पञ्चजन्यां भार्यायामात्मनः स्वस्य कात्स्न्येन सर्वप्रकारेणानुरूपान् बुद्धिनैपुण्यादिगुणैर्योग्यानेव पञ्चात्मजान् जनयामास । सन्ततिवृद्धौ दृष्टान्तः । यथा भूतादिस्तामसाहङ्कारः स यथा भूतसूक्ष्माणि भगवत्प्रेरित उत्पादयति तथेत्यर्थः ॥ २ ॥ सुमतिमिति ॥ सुमत्यादीन् पुत्रान्

श्रीशुक उवाच ॥ भरतस्तु महाभागवतो यदा भगवताऽवनितलपरिपालनाय सञ्चिन्तितस्तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥ १ ॥ तस्यामु ह वा आत्मजान्कात्स्न्र्येनानुरूपानात्मनः पञ्च जनयामास भूतादिरिव भूतसूक्ष्माणि ॥ २ ॥ सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति ॥ अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति ॥ ३ ॥ स बहुविन्महीपतिः पितृपितामहवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः पर्यपालयत् ॥ ४ ॥ ईजे च भगवन्तं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ॥ ५ ॥

जनयामास । अजनाभनाम्ना पूर्वं प्रसिद्धमप्येतद्वर्षं यतो भरतादारभ्य सर्वे जना भारतमिति व्यपदिशन्ति कथयन्ति स्वनाम्ना ख्यापकत्वेन धर्मातिशयः सूचितः ॥ ३ ॥ स इति ॥ स महीपतिः बहुवित्सर्वशास्त्ररहस्यज्ञोऽत एव स्वधर्ममनुवर्त्तमानः अनुतिष्ठन् स्वे स्वे कर्मणि वर्त्तमानाः प्रजा उरुवत्सलतया अतिप्रीत्या पितृपितामहवत् पर्यपालयत् सर्वतः पालयामास ॥ ४ ॥ ईजे चेति ॥ आहृताः स्वाधिकारेणात्मसात्कृताः येऽग्निहोत्रादयस्तेषां प्रकृतिविकृतिभिरग्निहोत्रादयो द्विविधाः सकलाङ्गयुक्ताः प्रकृतयः विकलाङ्गाः विकृतयः तैर्द्विविधैरपि उच्चावचैः महद्भिरल्पैश्च क्रतुभिर्यज्ञैः होत्रोपलक्षिताश्चत्वारः ऋत्विजस्तैरनुष्ठेयं कर्म चातुर्होत्रं तत्र यो विधिः प्रकारस्तेन यज्ञाः अयूपाः क्रतवः सयूपाः तद्रूपं भगवन्तमनुसवनं तस्मिंस्तस्मिन् योग्ये काले श्रद्धया ईजे च । अनुसवनमित्यन्तं चातुर्होत्रविधिनेत्यन्तं वा गद्यम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्रचरत्स्विति ॥ विरचिता अनुष्ठानेन सम्पादिता अङ्गक्रिया येषां तेषु नानायागेषु संप्रचरत्सु प्रवर्त्तमानेषु अध्वर्युभिः बहुत्वं नानाकर्माभिप्रायेण हविष्षु गृह्यमाणेषु सत्सु स यजमानो भरतो यागजनितं सूक्ष्मरूपेणोत्पन्नं फलं क्रियाफलं तथा धर्माख्यं कालान्तरे फलजनकं शक्त्यात्मकमदृष्टशब्दवाच्यं चेति द्विविधं यदपूर्वं तत् परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां तत्तद्देवताप्रकाशकानां मन्त्राणां येऽर्था इन्द्रादिदेवतास्तेषां नियामकतया साक्षात्कर्त्तरि परदेवतायां भगवति वासुदेवे एव भावयमानश्चिन्तयन् यज्ञभाजो ये देवाः सूर्यादयस्तान् पुरुषस्य वासुदेवस्यावयवेषु चक्षुरादिष्वेवाभ्यध्यायन्न पृथक्तया सूर्याय स्वाहेत्युक्ते भगवन्नेत्रपूजेयमिति भावयामासेत्यादि तत्रापूर्वे ह्यस्ति मीमांसकानां पक्षद्वयम् । तदानीमेव सूक्ष्मरूपेणोत्पन्नं फलमेवापूर्वं कालान्तरफलोत्पादिका कर्मशक्तिर्वेति तदुक्तम् । " यागादेव फलं तद्धि शक्तिद्वारेण सिद्ध्यति । सूक्ष्मं शक्त्यात्मकं वापि फलमेवोपजायते ॥ " तदेवाह । क्रियाफलं धर्माख्यमिति च । ननु यदि कर्मप्रधानं देवताश्च तदङ्गं तदा कर्मजन्यापूर्वं कर्तृनिष्ठं भवति यदि तु देवताराधनार्थं तदा तु देवताप्रसादरूपत्वादपूर्वस्य देवताश्रयत्वमेव युक्तम् अतः कथं वासुदेवाश्रयत्वभावनं इति चेत् यदि कर्मप्रधानपक्षेऽपूर्वस्य कर्त्राश्रयत्वमिष्टं तदा वासुदेवस्यान्तर्यामिणः

संप्रचरत्सु नानायागेषु विरचिताङ्गक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थ-नियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायोहविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवास्तान्पुरुषावयवेष्वभ्यध्यायत् ॥ ६ ॥ एवं कर्मविशुद्ध्या विशुद्धसत्त्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालाऽरिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरया अजायत ॥ ७ ॥

प्रवर्त्तकत्वेन मुख्यकर्तृत्वात्तदाश्रयमेवापूर्वं युक्तं न तत्प्रयोज्ययजमानाश्रयं शास्त्रफलं प्रयुक्तरीतिन्यायात् अन्यथा ऋत्विजामप्यपूर्वाश्रयत्वप्रसङ्गात् । तदेतदुक्तं साक्षात्कर्त्त-रीति । यदि तु देवताप्रधानपक्षेऽपूर्वस्य देवताश्रयत्वमिष्टं तदा तु वासुदेवस्य परदेवतात्वात्सुतरामेव तदाश्रयत्वं युक्तमित्याह । परदेवतायामिति ॥ ६ ॥ एवमिति ॥ एवं भगवति फलादिभावनया या कर्मणां विशुद्धिर्वैगुण्यं तया विशुद्धं सत्त्वमन्तःकरणं यस्य तस्य भरतस्य अन्तर्हृदये य आकाशः स शरीरमभिव्यक्तिस्थानं यस्य तस्मिन् महापुरुषरूपस्योपलक्षणमाकारो यस्य तस्मिन् पुरुषोत्तमे अत एव श्रीवत्सादिभिरुपलक्षिते युक्ते तत्र श्रीवत्सो रोमावर्त्तविशेषः कौस्तुभाख्यो मणिः वनमाला अनेकवर्ण-पुष्पग्रथिता माला अरि चक्रं दरः शङ्खः गदा कौमोदकी निजपुरुषाणां नारदादीनां हृदि लिखितवन्निश्चलतया स्थितेन आत्मनि स्वान्तःकरणे पुरुषरूपेण विरोचमाने शोभमाने भगवति वासुदेवे अनुदिनमेधमानो रयो वेगः प्रकर्षो यस्यास्तथाभूता अत एवोच्चैस्तरामत्युत्कटा भक्तिरजायत ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं पूर्वोक्तप्रकारेण गृहेषु वर्त्तमानो वर्षाणामयुतानि तेषां सहस्रं तत्पर्यन्ते काले अवसितो निश्चितः कर्मनिर्वाणावसरः राज्य भोगादृष्टसमाप्तिसमयो येन सः अधिकृत्य भुज्यमानं पितृपितामहपरम्परयाऽऽगतं रिक्थं धनं स्वतनयेभ्यो यथादायं यथाविभागं विभज्य विभागेन दत्त्वा स्वयं सकलसम्पदां निकेतात्स्थानात् स्वनिकेतात्पुलहाश्रमं हरिक्षेत्रं प्रवव्राज जगामेत्यर्थः ॥ ८ ॥ यत्रेति ॥ यत्र क्षेत्रे विद्याधरकुण्डे वा वात्सल्यं भक्तेषु कृपा तेन कर्त्रा तत्रत्यानां निजजनानां भगवद्भक्तानाम् इच्छारूपेण भक्तानामपेक्षितेन रूपेण भगवान् हरिरद्यापि सन्निधाप्यते संनिहितः क्रियते ॥९॥ यत्रेति॥ यत्र क्षेत्रे चक्रनदी सरित्प्रवरा गण्डकीति प्रसिद्धा आश्रमपदानि ऋषीणां स्थानानि उभयत उपर्यधश्च नाभिर्येषां तैर्दृषच्चक्रैः शिलामध्यगतैश्चक्रैः शालग्रामैः सर्वतः पवित्रीकरोति ॥ १० ॥ तस्मिन्निति ॥ तस्मिन् हि पुलहाश्रमोपवने उपभृतः संप्रवृद्ध उपशमो यस्य स उपरतो निवृत्तो विषयाभिलाषो यस्य विविक्तः शुद्धचित्तः एकलः एकान्तस्थः निश्चयेन विविधकुसुमादिभिर्भगवत आराधनमेव समीहमानः कुर्वाणः परां निर्वृतिं परमानन्दमवाप । किसलयाः कोमलपल्लवाः उपहाराः नैवेद्यानि ॥ ११ ॥ तयेत्थमिति ॥ तया इत्थं वर्णितप्रकारया अविरतया निरन्तरया पुरुषस्य भगवतः परिचर्यया पूजया तस्मिन् भगवति प्रवर्द्धमानो योऽनुरागस्तस्य भरेण द्रुतं द्रवीभूतं यद्धृदयं तस्मिन् शैथिल्यमनुद्यमो यस्य सः प्रहर्षवेगेनात्मनि देह उद्भिद्यमानं रोमपुलककुलं रोमाञ्चवृन्दं यस्य सः कप्समासान्तः । औत्कण्ठ्यात्प्रवृत्तेन प्रणयबाष्पेण प्रेमाश्रुणा निरुद्धोऽवलोको ययोस्ते नयने यस्य सः एवं निजरमणस्य स्वप्रीतिदातुर्भगवतो ये अरुणे चरणारविन्दे तयोरनुध्यानेन परिचितः समृद्धो यो भक्तियोगस्तेन परिप्लुतः सर्वतो व्याप्तः परम उत्कृष्ट आह्लाद आनन्दो यस्मिन् गम्भीरे हृदयरूपे ह्रदे तस्मिन्नवगाढा निमग्ना धिषणा बुद्धिर्यस्य स भरतः तामपि क्रियमाणां भगवतः सपर्यां पूजां न सस्मार कदाचिद्विस्मृतवानित्यर्थः ॥ १२ ॥

एवं वर्षायुतसहस्रपर्यन्तावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसम्पन्निकेतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥८॥ यत्र ह वाव भगवान्हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन संनिधाप्यत इच्छारूपेण॥९॥यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥ १० ॥ तस्मिन् वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाऽम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ॥ ११ ॥ तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कण्ठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविन्दानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगम्भीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमिति ॥ इत्थं धृतानि भगवद्व्रतानि येन सः अत एव एण्या हरिण्या अजिनमैणेयं तदेव वासस्तेन तथा अनुसवनं त्रिकालं योऽभिषेकः स्नानं तेनार्द्राः कपिशाश्च याः कुटिला जटाः तासां कलापेन समूहेन च विरोचमानः सूर्यर्चा सूर्यप्रकाशकया "तत्सवितुः" इत्यनया ऋचा हिरण्मयं "ध्येयः सदा सवितृमण्डलमध्यवर्ती" इत्यादिनोक्तं भगवन्तं पुरुषं पूर्णमपि उज्जिहाने उद्गच्छति सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदु होवाच । उज्जिहास इति पाठे सन्नन्तात्पचाद्यच् । उदेतुमिच्छति सतीत्यर्थः ॥ १३ ॥ पर इति ॥ रजसः प्रकृतेः परमिति परोरजः पृषोदरादित्वात् सुट् । जातं वेदो धनं कर्मफलं यस्मात्कर्मफलदातृत् यन्मनसा सङ्कल्पमात्रेणैवेदं विश्वं जजान ससर्ज । "जन जनने" इति वैदिकधातो रूपम् । यच्च सृष्टमदः विश्वं सुरेतसा चिच्छक्त्या सु इति स्वेति च पाठः । अन्तर्यामिरूपेण प्रविश्य गृध्राणं सुखमाकाङ्क्षन्तं हंसं जीवं विचष्टे पश्यति । नृषु प्राणिषु सीदन्ति उपाधितया तिष्ठन्तीति नृषदो बुद्धीन्द्रियप्राणादयस्तेषां रिङ्गिं गतिं राति ददातीति नृषद्रिङ्गिरां डप्रत्यये वा छन्दसीत्यमिपूर्वरूपत्वाभावः क्विबन्तस्य वा रूपम् । तत्र क्लीबे ह्रस्वप्राप्तिः । तत् देवस्य द्योतनात्मकस्य सवितुः परमात्मनः सूर्यस्य वा भर्गः तेजः सान्तोभर्गः शब्द इमः शरणं व्रजामः छन्दोभङ्गः ॥ १४ ॥ इति

इत्थं धृतभगवद्व्रत ऐणयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवन्तं हिरण्मयं पुरुषमुज्जिहाने सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदु होवाच ॥ १३ ॥ परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ॥ सुरेतसाऽदः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिङ्गिरामिमः ॥ १४ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे भरतचरित्रे भगवत्परिचर्यायां सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकान्त उपविवेश ॥ १ ॥ तत्र तदा राजन्हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम ॥ २ ॥ तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयंकर उदपतत् ॥ ३ ॥

श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात् पञ्चमेऽस्यात्र सप्तमे ॥ ७ ॥ अष्टमे भरतो विष्णुं भजन्नप्येणसङ्गतः ॥ एणत्वं गतवांस्तत्र द्वात्रिंशद्व्यजामितिः ॥ उवाचेत्येकमङ्घ्र्यूनां षष्टिसंख्या अनुष्टुभः ॥८॥एकदेति ॥ एकदा तु महानद्यां गण्डक्यां कृतोऽभिषेकः स्नानं नैयमिकं नित्यनैमित्तिकविधिप्राप्तम् आवश्यकमर्थप्राप्तं मूत्रोत्सर्गादि च येन क्रमोऽत्र न विवक्षितः अभिषेकस्याल्पाच्तरत्वात्पूर्वनिपात इत्येके । यद्वा । कृतोऽभिषेकः नैयमिकं नियमप्राप्तमावश्यकं सन्ध्यावन्दनादि च येनेति ब्रह्माक्षरं प्रणवमभिगृणानो जपन् शानजार्षः चानश् वा । मुहूर्तत्रयमुदकान्ते नद्यास्तीर उपविवेश ॥ १ ॥ तत्रेति ॥ हे राजन् तत्र तस्मिन् स्थाने तदा जलाशयाभ्याशं नद्याः समीपं पिपासया जलपानेच्छया एकैव स्वगणाद्वियुक्ता हरिण्युपजगाम ॥ २ ॥ तयेति ॥ तया हरिण्या उदके पेपीयमानेऽत्यासक्त्या पीयमाने सति तावदेव तत्क्षणमेवाविदूरेण समीप एव नदतो मृगपतेः सिंहस्य लोकभयङ्कर उन्नादो महान्नाद उदपतत् उद्गतः ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तस्मादमुपश्रुत्य सा मृगवधूः हरिणी प्रकृत्या स्वभावत एव विक्लवा व्याकुलचित्ता चकितनिरीक्षणा सुतरामपि तु हरेः सिंहात् यद्भयं तस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः सा अत एव पारिप्लवदृष्टिः परिभ्रान्तनेत्रा अगततृषा न गता तृषा यस्याः सा तथाभूताऽपि सहसैवोच्चक्राम नदीमुल्लङ्घितवती ॥ ४ ॥ तस्या इति ॥ तस्या अन्तर्वत्न्या गर्भिण्या उत्पतन्त्या नदीमुल्लङ्घयन्त्या उरुभयेनावगलितः स्थानाद्विचलितो योनेर्बहिर्निर्गतः सन् गर्भः स्रोतसि प्रवाहे निपपात ॥ ५ ॥ तदिति ॥ तत्प्रसवो गर्भपातः उत्प्रसव इति पाठे उच्चाकाशादेव गर्भपातः उत्सर्पणं नद्युल्लङ्घनं भयं च तैरेतैर्यः खेदस्तेनातुरा पीडिता स्वगणेन च वियुज्यमाना कृष्णसारसती मृगवधूः कस्यांचिद्दर्यां गिरिगुहायां निपपात । अथानन्तरमेव ममार च ॥ ६ ॥ तमिति ॥ स्रोतसा प्रवाहेणानूह्यमानमपविद्धं बन्धुभिस्त्यक्तं मृतमातरं च

तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम ॥ ४ ॥ तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात ॥ ५ ॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती निपपात अथ च ममार ॥ ६ ॥ तं त्वेणकुणकं कृपणं स्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धं बन्धुरिवानुकम्पया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत् ॥ ७ ॥ तस्य ह वा एणकुणक उच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ ८ ॥ अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्च ॥ अत एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुनाऽनुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ९ ॥

कभाव आर्षः । अत एव कृपणं दीनं तं त्वेणकुणकं हरिणबालकम् अभिवीक्ष्य बन्धुरिव एतैः कृपणत्वादिहेतुभिर्यानुकम्पा तया राजर्षिर्भरत आदाय गृहीत्वा स्वाश्रमपदमनयत् ॥ ७ ॥ तस्य हेति ॥ एतस्मिन्नेणकुणके उच्चैरतिशयेन कृतो निजः स्वीय इत्यभिमानो येन तस्य भरतस्य अहरहः तस्य मृगस्य पोषणं तृणादिदानं पालनं वृकादिभ्यो रक्षणं लालनं चुम्बनादिना तैः प्रीणनं प्रीतिजननं कण्डूयनादिना एतैर्यदनुध्यानं तस्मिन्नासक्तिस्तेनात्मनः स्वस्य पुरुषपरिचर्या भगवत्पूजा आदिर्येषां स्नानशौचजपपाठादीनां ते सर्वे नियमाः सहयमाः यमैरहिंसादिभिः सहिताः प्रत्यहमेकैकशो वियुज्यमानाः सन्तः कतिपयेनाहर्गणेन सर्व एव किलोदवसन् उत्सन्ना बभूवुः ॥ ८ ॥ आसक्तिं प्रपञ्चयति—अहो इति ॥ अयं हरिणकुणकः मृगबालकः कृपणः दीनः यत ईश्वररथचरणः कालचक्रं तस्य परिभ्रमणवेगेन स्वगणसुहृद्बन्धुभ्यः परिवर्जितः भ्रंशितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा मां च शरणमुपसादितः प्रापितः अतो मामेव मातापितरौ भ्रातृज्ञातीन् यौथिकान् यूथसङ्घातिनश्च मत्वोपेयाय प्राप्तोऽन्यं कंचनापि नैव वेद नैव जानाति । मय्यतिविश्रब्धः कृतातिविश्वासश्चात एव मयापि शरण्यस्य शरणागतस्योपेक्षायां दोषं विदुषा । यद्वा । शरण्यः शरणार्हो रक्षकस्तत्कर्तृकोपेक्षादोषविदुषा अनसूयिना एतन्निमित्तं मम स्वार्थो भ्रश्यतीति दोषदृष्टिमकुर्वताऽस्य मत्परायणस्य शरणागतस्य पोषणाद्यनुष्ठेयम् ॥ ९ ॥ नूनमिति ॥ अतो नूनं हि निश्चितमेवार्याः शिष्टाः साधवः सज्जनाः उपशमशीलाः सर्वतो विरक्ता अपि कृपणसुहृदः दीने दयायुक्ताः सन्त एवंविधेऽर्थे परोपकारप्रसङ्गे प्राप्ते गुरुतरान्महतोऽपि स्वार्थानुपेक्षन्ते स्वार्थानुपेक्ष्य परोपकारे यतन्त इत्यर्थः ॥ १० ॥ इतीति ॥ इत्येवं कृतोऽनुषङ्गः मृग आसक्तिर्येन स आसनादिषु मृगजहुना मृगापत्येन सह स्नेहेनाऽनुबद्धं हृदयं येन स तथाभूत एवासीदित्यर्थः ॥ ११ ॥ कुशेति ॥ कुशाद्या-हरिष्यमाणो यदा वृकाः प्रसिद्धाः शालावृकाः कपिक्रोष्टुश्वानः तदादिभ्यो भयमाशंसमान आशङ्कमानो भवति तदा हरिणकुणकने सहैव तमादायैव वनं समाविशति ॥ १२ ॥

नूनं ह्यार्याः साधव उपशमनशीलाः कृपणसुहृद एवंविधार्थे स्वानर्थानपि गुरुतरानुपेक्षन्ते ॥ १० ॥ इति कृतानुषङ्ग आसनशयनाटन-स्थानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ ११ ॥ कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणोवृकसालावृका-दिभ्यो भयमाशंसमानो यदा सह हरिणकुणकेन वनं समाविशति ॥ १२ ॥ तदा पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभर-हृदयः कार्पण्यात्स्कन्धेनोद्वहति ॥ १३ ॥ एवमुत्सङ्ग उरसि चाऽऽधायोपलालयन्मुदं परमामवाप ॥ १४ ॥ क्रियायां निर्वर्त्यमानायाम-न्तरालेषूत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ते सर्वत इति ॥ १५ ॥ अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमे-वानुशोचन्किल कश्मलं महदभिरम्भित इति होवाच ॥ १६ ॥

पथिष्विति ॥ यदा च मुग्धभावेन बाल्यस्वभावेन स पथिषु मार्गे मार्गे तत्र तत्र कर्दमोपरितने कोमलतृणादौ कर्दमे निमङ्क्ष्यामीति ज्ञानरहितो विषक्तः स्थितो भवति तदा तस्मिन्नतिशयितः प्रणयस्य स्नेहस्य भरो यस्य तथाभूतं हृदयं यस्य सः राजा कार्पण्यात् स्नेहपारवश्यात् तं स्कन्धेनोद्वहति ॥ १३ ॥ एवमिति ॥ एवमुत्सङ्गे उरसि चाधाय संस्थाप्य लालयन्परमां मुदमवाप ॥ १४ ॥ क्रियायामिति ॥ क्रियायां भगवत्पूजादिरूपायां निर्वर्त्यमानायां क्रियमाणायामन्तराले तन्मध्येऽपि क्व गतो हरिणकुमार इत्युत्थायोत्थाय यदैनं मृगपोतमभिचक्षीत सम्यक् पश्यति तर्हि वाव तदैव स वर्षपतिर्भरतः प्रकृतिस्थेन तद्दर्शनानन्दप्राप्त्या स्वस्थेन मनसा हे वत्स ते तव सर्वतः स्वस्ति स्तात् भूयादिति तस्मा आशिष आशास्ते प्रार्थयते ॥ १५ ॥ अन्यदेति ॥ अन्यदा यदा मृगस्वभावात्स स्वस्थानाद्विनिर्गतस्तदा तददर्शनसमये भृशमुद्विग्नं व्याकुलं

CC-0. In Public Domain. Digitization by eGangotri

मनो यस्य सः । तत्र हेतुमाह । अतितर्षेणात्यौत्सुक्येन हेतुना हरिणकुणकविरहेण विह्वले हृदये सन्तापो यस्य सः सकरुणं सदैन्यं यथा भवति तथा तमेवानुशोचन् किल महत्कश्मलं मोहमभिरम्भितः प्रापितः सन्निति वक्ष्यमाणं होवाच । यथा कृपणो धनं प्राप्य पुनस्तस्मिन्विनष्टे यथा मोहं प्राप्नोति तद्वदित्यर्थः ॥ १६ ॥ अपीति ॥ अकृतसुकृतस्य निर्भाग्यस्य शठो वञ्चको यः किरातो व्याधः द्वन्द्वो वा तद्वद्वञ्चनपरा क्रूरा मतिर्यस्य तस्यात एवानार्यस्य दुर्जनस्य मम तत् शाठ्यादिकमगणयन् अचिन्तयन्स वै मृतहरिणीसुतः अत एव कृपणो दीन एणबालक आत्मप्रत्ययेन स्वान्तःकरणविशुद्ध्या कृतविश्रम्भः मयि कृतविश्वासः सन् किमागमिष्यतीति । यथा सुजनः स्वान्तःकरणविशुद्ध्या कृतविश्वासो दुर्जनकृतापराधमचिन्तयंस्तद्गृहमागच्छति तद्वत् ॥ १७ ॥ अपीति ॥ अस्मिन् ममाश्रमस्योपवने क्षेमेण वृकादिबाधाराहित्येन शष्पाणि कोमलतृणानि चरन्तं देवेन भगवता गुप्तं द्रक्ष्यामि किम् ॥ १८ ॥ अपीति ॥ अपि किं वृकः शालावृकः श्वान्यतमो वानैकचरो यूथचरः सूकरादिरेक एव चरति यः क्रूरस्वभावो व्याघ्रादिर्वा न भक्षयतीति ॥ १९ ॥ निम्लोचतीति ॥ ह खेदे । सकललोकस्य क्षेमो यस्मात्स उदयो यस्य सः । यतः वेदत्रयी आत्मा स्वरूपं यस्य स भगवान् सूर्यो निम्लोचति अस्तं याति मम मृगवध्वा न्यासो निक्षेपभूतस्त्वद्यापि नागच्छति ॥ २० ॥ अपिस्विदिति ॥ विविधा रुचिराः अत एव दर्शनीया ये निजाः स्वीया मृगदारकविनोदाः तैः स्वानां स्वकीयानामस्माकमसन्तोषं खेदमपनुदन् हरिण एव राजकुमारः आगत्याकृतसुकृतं पुण्यहीनमपि मां किंस्वित्सुखयिष्यति ॥ २१ ॥ क्ष्वेलिकायामिति ॥ क्ष्वेलिकायां क्रीडायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं मां चकितादपि चकितः सन्नागत्य प्रेमसंरम्भेण प्रणयकोपेन पृषत् जलबिन्दुस्तद्वदपरुषेण कोमलेन विषाणाग्रेण लुठति सङ्घट्टयति ॥ २२ ॥

अपि बत स वै कृपण एणबालको मृतहरिणीसुतः अहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविश्रम्भ आत्मप्रत्ययेन तदविगणयन्सुजन इवागमिष्यति किम् ॥ १७ ॥ अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरन्तं देवगुप्तं द्रक्ष्यामि ॥ १८ ॥ अपि च न वृकः शालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति ॥ १९ ॥ निम्लोचति ह भगवान्सकलजगत्क्षेमोदयस्त्रय्यात्माऽद्यापि मम न मृगवधून्यास आगच्छति ॥ २० ॥ अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसंतोषं स्वानामपनुदन् ॥ २१ ॥ क्ष्वेलिकायां मां मृषासमाधिनाऽऽमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसादितेति ॥ आसादितं स्थापितं हविर्यस्मिंस्तस्मिन् बर्हिषि दर्भे दन्ताकर्षणादिना दूषिते सति दूषित्वेति पाठे दूषणं कृत्वा स्थितश्चेदित्यर्थः । णिलोपस्त्वत्रार्षः । तदा आः किमरे करोषीति मयोपालब्धोऽधिक्षिप्तः सन् सपदि तत्क्षणमेव भीतादपि भीतः अत एवोपरतरासः त्यक्तक्रीडः अवहितः संयतः करणकलाप इन्द्रियसमूहो यस्य स तथा ऋषिकुमारवदास्ते ॥ २३ ॥ इति बहुधा विलप्य बहिर्गत्वा तत्खुरक्षुण्णं भूतलं दृष्ट्वाह—किमिति ॥ अरे अहो येयमवनिस्तयाऽनया तपस्विन्या महापुण्यया किं वा तप आचरितं यत् मया नाचरितमित्यर्थः । यस्मादियं सविनयस्य संयतेन्द्रियस्य कृष्णसारतनयस्य मृगपोतस्य तनुतरा अतिसूक्ष्मा अत एव सुभगाः शोभमानाः शिवतमाः शुद्धिहेतुत्वान्मङ्गलरूपाश्चाऽखराः कोमलाश्च खुरा येषु तेषां पदानां तत्र तत्राङ्कितानां पंक्तिभिर्द्रविणं मृग एव तेन विधुरो रहितः अत एवातुरो व्याकुलो योऽहं तस्य अत एव कृपणस्य दीनस्य मम द्रविणस्य तस्यैव पदवीं मार्गं सूचयन्ती अनया पदव्या त्वं मृगबालं प्राप्स्यसीति कथयन्तीव ताभिः पंक्तिभिरेव सर्वतः कृतकौतुकं कृतमङ्गलमात्मानं द्विजानां स्वर्गापवर्गकामानां देवयजनं यज्ञस्थानं करोति । “ यस्मिन् देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत । ” इति स्मृतेरस्यापि कृष्णत्वं ज्ञेयम् ॥ २४ ॥ उदिते चन्द्रे तदङ्कभूतं

आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितकरणकलाप आस्ते ॥ २३ ॥ किं वा अरे आचरितं तपस्तपस्विन्याऽनया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुरपदपङ्क्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयन्त्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ॥ २४ ॥ अपि स्विदसौ भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकम्पया कृपणजनवत्सलः परिपाति ॥ २५ ॥ किं वात्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशान्तानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयतीति च ॥ २६ ॥

मृगं संभाव्याह—अपि स्विदिति ॥ किंस्विदेनं मृगपतेः सिंहस्य भयान्मृता माता यस्य तम् । कबभाव आर्षः । स्वाश्रमात् परिभ्रष्टं मृगबालकं कृपणजनेषु वत्सलः दयावान् भगवान् असावुडुपतिश्चन्द्रः कृपया परिपाति ॥२५॥ किमिति ॥ आत्मजः पुत्रत्वेनाङ्गीकृतो मृगपोत एव तस्य विश्लेषेण वियोगेन यो ज्वरस्तापः स एव दवदहनः वनवह्निस्तस्य शिखाभिर्ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलनलिनी यस्य तम् उपसृतः पुत्रत्वेनानुमतः प्राप्तो वा मृगीतनयो येन तं मां भगवांश्चन्द्रः शिशिरं च तच्छान्तं सुखकरं च मय्यनुरागेण गुणितमावर्तितं पुनः पुनः स्रवद्यान्निजवदनसलिलं तदेवामृतमया गभस्तयस्तैः स्वधयति अमृतप्लुतं करोति । स्वधाशब्दोऽत्र देवभोज्यवाची अत एव देवनामसु । “ स्वाहास्वधाक्रतुसुधाभुज आदितेयाः ” इति हैमः । स्वधावन्तं करोति स्वधयति । “ तत्करोति ” इति णिच् “ विन्मतोर्लुक् । ” सारार्थसंदर्शिन्यां तु सुधयतीत्येव पाठः । लोके हि मन्त्रवादिनो वदनसलिलैस्तापं शमयन्तीति प्रसिद्धम् । उपसृत्य मृगीतनय इति पाठे मनोरथान्तरमेतत् । मृगीतनय उपसृत्य किं वा मां स्वधयतीति ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवमुक्तप्रकारेणाघटमानो दुःसम्पाद्यो यो मनोरथस्तेनाकुलं हृदयं यस्य स योगयुक्तस्तापसो भरतो मृगदारकाभासेन मृगदारकवदाभासमानेन वस्तुतस्तु स्वारब्धकर्मणा योगारम्भणतो योगचर्यातः भगवदाराधनलक्षणात्कर्मणश्च भ्रंशितः इतरथा यदि योगारम्भभ्रंशकं प्रारब्धकर्म न स्यात्तदा इत्यर्थः । निःश्रेयसस्य मोक्षस्य प्रतिपक्षतया बाधकतया प्राक् पूर्वं परित्यक्ता दुस्त्यजा हृदयाभिजाता औरसाः पुत्रा येन तस्य जात्यन्तरे विजातीय एणकुणके साक्षात्पुत्रवदासङ्ग आसक्तिः कथं स्यात् । एवमुक्तप्रकारेणान्तरायेण मृगासक्तिरूपेण विहतं योगारम्भणं यस्य तस्य तथा मृगार्भकस्य पोषणाद्यनुषङ्गेण तत्राभिनिवेशेनात्मानमविगणयतः आत्मचिन्तामकुर्वतः तस्य राजर्षेर्भरतस्य तावत्तदा दुरतिक्रम उपायसहस्रैरनुल्लङ्घनीयः यतः करालरभसः अतितीव्रवेगः कालो मृत्युसमय आपद्यत प्राप्तः । यथा आखुबिलं प्राप्तोऽहि-

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः स योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यन्तर एणकुणक आसङ्गः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥ २७ ॥ तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचन्तमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनुमृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥ २८ ॥ तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ॥ २९ ॥ अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनु परिसुस्राव ॥ ३० ॥

स्तस्य दुरतिक्रमो भवति तथा प्राणिनां कालोऽपि ॥ २७ ॥ तदानीमिति ॥ तदानीं मरणसमयेऽपि यथा पार्श्ववर्त्तिनमनुशोचन्तमात्मजमाभिवीक्षमाणस्तत्राभिनिवेशितमना भवति तथा मृग एवाभिनिवेशितमना अतस्तेन मृगेण सहेमं लोकं देहं विसृज्य कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृतिर्यस्य स तथा इतरवद्भगवद्विमुखवन्मृगशरीरमवाप ॥ २८ ॥ तत्रेति ॥ तत्रापि मृगजन्मनि आत्मनः स्वस्य मृगत्वकारणं मृगासक्तिरूपं भगवदाराधनस्य या समीहा अनुष्ठानं तदनुभावेन वा एवानुस्मृत्य भृशमनुतप्यमान आह स्म । स्वचित्ते इति शेषः ॥ २९ ॥ अहो इति ॥ अहो आश्चर्यं मम कष्टं जातम् । यत आत्मवतां धीराणां मुनीनामनुपथात् मार्गादहं भ्रष्टः यद्यस्मात् विमुक्तास्त्यक्ताः समस्ताः पुत्रादिसङ्गा येन तस्य विविक्तं जनसङ्घर्षरहितं पुण्यं पवित्रमरण्यं शरणं स्थानं यस्य तस्य आत्मवतो धीरस्याप्यबुधस्य मम मनः सर्वेषामात्मनामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मन्यन्तर्यामिणि भगवति वासुदेवे तस्य भगवतो नु श्रवणमननसंकीर्त्तनाराधनानुस्मरणेषु अभियोगः अभिनिवेशः तेनाशून्याः सम्बद्धाः सकला यामा यस्मिंस्तेन कालेन महता प्रयासेन समावेशितं स्थापितं समाहितं सम्यङ् निश्चलतया स्थितं च यन्मम मनस्तत्तु पुनराराद्दूरात्कात्स्न्येन सर्वांशेन मृगसुतमनु मृगसुताभिनिवेशात् परिसुस्राव अवगलितम् ॥ ३० ॥ इतीति ॥ इत्येवं निगूढ आच्छन्नो निर्वेदो यस्य सः मातरं विसृज्य त्यक्त्वा यत्र हरिणो जातस्तस्मात् कालञ्जराख्यात् पर्वतात् भगवत्क्षेत्रम् उपशमशीलस्य मुनिगणस्य दयितं शालवृक्षोपलक्षितं ग्रामं शालग्रामाख्यं क्षेत्रं पुलस्त्यपुलहाश्रमं प्रत्याजगाम आगतः ॥ ३१ ॥ तस्मिन्निति ॥ तस्मिन्नपि क्षेत्रे कालमेव प्रतीक्षमाणः मृगसङ्गाद् भ्रंशितोऽतोऽन्यस्यापि सङ्गाद्भृशमत्यन्तमुद्विग्नः भीतः आत्मैव सहचरो यस्य सः एकाकी हिंसापरिहाराय शुष्कैरेव पर्णादिभिर्वर्त्तमानः शरीरनिर्वाहं कुर्वन् मृगत्वनिमित्तस्य मृगासक्तिजन्यदोषस्यावसानं समाप्तिमेव गणयन् तस्मिन् काले प्राप्ते तीर्थोदकेन क्लिन्नमार्द्रमर्धोदकस्थं मृगशरीरमुत्ससर्ज तत्याज ॥ ३२ ॥ इति श्रीकृष्णसे-

इत्येवं निगूढनिर्वेदो विसृज्य मृगीमातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालञ्जरात्प्रत्याजगाम ॥३१॥ तस्मिन्नपि कालं प्रतीक्षमाणः सङ्गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज॥३२॥इति श्री०म०प० भरतचरिते मनुष्यदेहत्यागपूर्वकमृगत्वशरीरप्राप्तिवर्णनं नामाऽष्टमोऽध्यायः॥८॥श्रीशुक उवाच॥अथ कस्यचिद्द्विजवरस्याऽङ्गिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्याऽनसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अङ्गजा बभूवुः॥मिथुनं च यवीयस्यां भार्यायाम् ॥१॥ यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः॥२॥तत्रापि स्वजनसङ्गाच्च भृशमुद्विजमानो भगवतः कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणचरणारविन्दयुगलं मनसा विदधदात्मनः प्रतिघातमाशङ्कमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिरस्वरूपेण दर्शयामास लोकस्य ॥ ३ ॥

वार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो विवृतिं पञ्चमस्याष्टमे व्यधात् ॥ ८ ॥ नवमे जडवद्विप्रो भरतोऽभूदमुष्य तु ॥ कालीबलावप्यभीतिर्गवान्यत्र तु दृग्दृशः ॥ उवाचेत्येकं च सार्द्धा द्वापञ्चाशदनुष्टुभः ॥ ९ ॥ अथेति ॥ अथ शमदमतपःस्वाध्यायादियुक्तस्य त्यागोऽत्रातिथ्यादिभ्योऽन्नदानादि विद्या कर्मविद्या आत्मज्ञानं देहादिव्यतिरिक्तभोक्त्रात्मज्ञानम् आनन्दो धर्मसम्पत्तिजः अङ्गिरःप्रवरस्य आङ्गिरसगोत्रजानां मध्ये श्रेष्ठस्य कस्यचिद्द्विजवरस्य ब्राह्मणश्रेष्ठस्यात्मना सदृशाः श्रुतादयो गुणा येषांस्तथाभूताः सोदर्याः समानोदरा नव अङ्गजाः पुत्रा बभूवुः । यवीयस्यां कनिष्ठायां च भार्यायां तस्य मिथुनं स्त्रीपुरुषयुग्मं च बभूव ॥ १ ॥ य इति ॥ तत्र मिथुने यस्तु पुमांस्तमुत्सृष्टं मृगशरीरं येन तं चरमशरीरेण विप्रत्वं गतं परमभागवतं राजर्षिप्रवरं भरतमाहुः ॥ २ ॥ तत्रेति ॥ तत्रापि कर्मबन्धविध्वंसनं श्रवणं स्मरणं गुणानां विवरणं कथनं

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

च यस्य तस्य भगवतश्चरणारविन्दयुगलं मनसा विदधत् विशेषेण धारयन् भगवदनुग्रहेणानुस्मृता स्वपूर्वजन्मनामावलिर्येन सः स्वजनसङ्गादात्मनः प्रतिघातं पुनर्योन्यन्तरसंबन्धलक्षणमाशङ्कमानोऽत एव ततो भृशमुद्विजमानो भीतश्च तत्परिहाराय लोकस्य लोकम् उन्मत्तादिरूपेणात्मानं दर्शयामास॥३॥ तस्येति ॥ तस्योन्मत्तादिवद्वर्त्तमानस्य अपि आत्मजस्य पुत्रस्नेहेनानुबद्धं मनो यस्य स विप्रः पितुः सकाशात् अनुशिक्षितेनैव पुत्रेण भाव्यमित्यभिप्रायेण जडस्य गार्हस्थ्यानधिकारं मत्वाप्याऽऽसमावर्त्तनात् समावर्त्तनान्तान् संस्कारान् यथोपदेशं विदधानस्तमुपनीयोपनीतस्य च पुनः शौचाचमनादींस्तस्यानभिप्रेतानपि कर्मनियमान् सम्यगशिक्षयत शिक्षितवानेव न तूपेक्षितवान्॥४॥ स चेति ॥ स च भरतः आत्मनिष्ठोऽपि पितुर्निर्बन्धात् पितृसन्निधौ स्थित एवासध्रीचीनमसमीचीनमिव तत्पितृशिक्षितं सर्वं करोति स्म ॥ ५ ॥ छन्दांसीति ॥ उपाकरणवेदव्रताद्यनन्तरं श्रावणादिमासेषु छन्दांसि वेदानध्यापयिष्यन्नादौ तावद्व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं सावित्रीं चैत्रादिग्रैष्मवासन्तिकांश्चतुरो मासानधीयानमप्यसमवेतरूपं यथा

तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान्यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन्कर्मनियमाननभिप्रेतानपि समशिक्षयत् अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति ॥ ४ ॥ स चापि तदु ह पितृसन्निधावेवासध्रीचीनमिव स्म करोति ॥ ५ ॥ छन्दांस्यध्यापयिष्यन्सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासन्तिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास॥६॥एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः ॥ ७ ॥ अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्यामुपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् ॥ ८ ॥ पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बन्धान्न्यवृत्सत ॥ ९ ॥

भवत्येवं ग्राहयामास। तावतापि कालेन स्वरानुपूर्व्यादियुक्तं व्याहृत्यादिकमपि तस्य नागतमित्यर्थः॥६॥एवमिति ॥ पितुः सकाशात् सम्यगनुशिष्टेनैवावश्यं पुत्रेण भाव्यमित्यसन् अयोग्य आग्रहो यस्य सः एवमुक्तप्रकारेण आत्मन्यात्मत्वेनाभिमते स्वतनुजेऽनुरागेणावेशितं चित्तं येन सः अनभियुक्तानि तेनानादृतान्यपि शौचादीन्यौपकुर्वाणकस्य सावधिकब्रह्मचर्यवतः कर्माणि तं पुत्रं प्रत्यनुशास्यापि स्वयं तावदनधिगतमनोरथः नाधिगतः न प्राप्तः पुत्रपाण्डित्यलक्षणो मनोरथो येन सः स्वयं गृहे प्रमत्तः गृहकार्यासक्त एवाप्रमत्तेनानुल्लङ्घितमर्यादेन कालेनोपसंहृतो मृतः ॥७॥ अथेति ॥ अथ यवीयसी कनिष्ठा द्विजसती ब्राह्मणस्य तस्य भार्या स्वगर्भजातं मिथुनं सपत्न्यै उपन्यस्य समर्प्य सपत्न्यामिति सप्तम्यन्तपाठेऽपि स एवार्थः। स्वयमनुसंस्थयाऽनुमरणेन पतिलोकमगात् गता ॥ ८ ॥ पितरीति ॥ एवं पितर्युपरते मृते सति त्रय्यां कर्मकाण्डविषयायां विद्यायामेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्यवसिता निश्चयं गता मतिर्येषां ते तथाभूता न परविद्यायामात्मविद्यायां पर्यवसितमतयः अतः न तस्य प्रभावमात्मारामत्वं विदन्ति ते तथाभूताः तद्भ्रातरो भरतं जडा स्तब्धा मतिर्यस्य स तथाभूतोऽयमित्येवं मत्वा भ्रातुरस्यानुशासने शिक्षणे यः पितुर्निर्बन्धो हठस्तस्मात् न्यवृत्सन् निवृत्ता जाताः । न्यवृत्सत इत्यपि पाठः । उभयथाप्यार्षः प्रयोगः ॥ ९ ॥ स चेति ॥ स च यदा प्राकृतैः नीचैः द्विपदपशुभिर्विवेकशून्यैर्मनुष्यैरुन्मत्तः जडः बधिर इत्येवं मत्वाभिभाष्यमाणो भवति तदा तदनुरूपाणि उन्मत्तादियोग्यान्येव वचनानि प्रभाषते । तैरेव स यदा कर्माणि कार्यमाणो भवति तदा परेच्छया तान्यपि करोति च विष्टिर्बलात्कर्मकारणं ततः वेतनं मूल्यसङ्केतः ततो वा याच्ञया यदृच्छया याच्ञादिप्रयत्नं विनैव आसादितं प्रापितमन्नं तदपि कदाचिदल्पं कदाचिद्बहु कदाचित् मिष्टं कदाचित्कदन्नं कुत्सितं परं केवलं देहनिर्वाहार्थमभ्यवहरति भुङ्क्ते नेन्द्रियप्रीतिनिमित्तम्॥ १० ॥नित्येति ॥ नित्यं सदा निवृत्तं निमित्तं यस्मात् स उत्पादकशून्यः अत एव स्वसिद्धः स्वयंप्रकाशः विशुद्धः केवलो योऽनुभवः स एव आनन्दरूपः

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि स च कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहु मिष्टं कदन्नं वाऽभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम् ॥ १० ॥ नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसंभावितदेहाभिमानः ॥ ११ ॥ शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः संहननाङ्गः स्थण्डिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञया अतज्ज्ञजनावमतो विचचार ॥ १२ ॥ यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किं तु न समविषमन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषाण्यप्यमृतवदभ्यवहरति ॥ १३ ॥

स्वात्मा तस्य लाभ एवंभूतोऽहमिति ज्ञानं तस्याधिगमः प्राप्तिरस्ति यस्य सः अत एव द्वन्द्वानि सम्मानावमानशीतोष्णादीनि तन्निमित्तयोः सुखदुःखयोरप्यसंभावितोऽनारोपितो देहाभिमानो येन सः यस्मादेवमिन्द्रियाद्यध्यासरहितस्तस्मान्नेन्द्रियप्रीतिनिमित्तमभ्यवहरति ॥ ११ ॥ शीतेति ॥ अत एव शीतोष्णादिषु वृष इवानावृताङ्गः वस्त्रकम्बलादिनाऽनावृतदेहः पीनः पुष्टः संहननाङ्ग इति संहन्यन्ते निबिडीभवन्ति स्माङ्गानि यस्य स दृढावयवः स्थण्डिलसंवेशनं भूमिशयनम् अनुन्मर्दनं तैलादिसंस्काराभावः अमज्जनं स्नानाभावस्तैर्यद्रजस्तेनानभिव्यक्तमप्रकटं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य सः । तत्र दृष्टान्तः । रजसा वृतो महामणिर्यथानभिव्यक्ततेजा भवति तथा कुत्सितेन मलिनेन पटेनावृता कटिर्यस्य उरुमषिणाऽतिमलिनेनोपवीतेन च द्विजातिरिति ब्रह्मबन्धुरिति च संज्ञया निन्दितनामग्रहणेन न तत्त्वतस्तं जानन्ति । ये तेऽतज्ज्ञास्तैर्जनैरवमतः सन् भूमिं चचार ॥ १२ ॥यदेति॥ यदा तु स्वदेहनिर्वाहार्थं कर्मवेतनतः कर्ममूल्येन परतः परेभ्य आहारमीहमानोऽपेक्षमाणो भवति तदा स्वभ्रातृभिरपि यद्यन्ये आहारमात्रदानेन कर्म कारयन्ति

CC-0. In Public Domain. Digitization by eGangotri

तर्हि वयमपि तथा कारयामः । अप्रतिष्ठा च तावती न भविष्यतीति विचार्य आहारप्रलोभनेन केदारकर्मणि शालिक्षेत्रे कर्दमविलोडनप्रक्षेपादौ निरूपितो नियुक्तः संस्तदपि करोति । किन्त्वत्र कर्दमप्रक्षेपे क्षेत्रं समं स्यादितः कर्दमोद्धरणे तद्विषमं स्यादित्यादिकं न वेद । आत्मनिष्ठत्वेन बहिर्वृत्त्यभावात् भ्रातृभिर्दत्तानि कणादीन्यप्यमृतवदभ्यवहरति भुङ्क्ते । कणाः चूर्णतण्डुलाः पिण्याकं तैलयन्त्रोद्धृतं तिलकिट्टं फलीकरणं तुषः कुल्माषाः कीटदष्टा माषाः स्थालीपुरीषं स्थालीलग्नं दग्धान्नम् ॥ १३ ॥ तस्य रागादिराहित्यमुक्त्वा मृत्यावप्यसम्भ्रममाह—अथेति ॥ कदाचित्कश्चिद्वृषलपतिः शूद्रसामन्तश्चोरराजः अपत्यकामो भद्रकाल्यै पुरुषपशुमालभत आलब्धुं प्रवृत्तः ॥ १४ ॥ तस्येति ॥ तमिस्रायामिति तमसा व्याप्तायां निशि तत्रापि निशीथसमयेऽर्द्धरात्रावसरे तस्य हि वृषलपतेः दैवान्मुक्तस्य हस्तान्निर्गतस्य मरणभयात्पलायितस्य पुरुषपशोः पदवीं मार्गं तस्यानुचराः परिधावन्तोऽप्यनधिगतपशवः आकस्मिको दैवनिर्मितो विधिः प्रकारस्तेन वीरासनेन ऊर्ध्वावस्थानेन मृगवराहादिभ्यः केदारान् संरक्षमाणं शानजार्षः चानश् वा ।

अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥१४॥ तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावन्तो निशि निशीथसमये तमसा वृतायामनधिगतपशव आकस्मिकेन विधिना केदारान्वीरासनेन मृगवराहादिभ्यः संरक्षमाणमङ्गिरःप्रवरसुतमपश्यन् ॥ १५ ॥ अथ त एतमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चण्डिकागृहमुपनिन्युर्मुदा विकसितवदनाः ॥ १६ ॥ अथ पणयस्तं स्वविधिनाऽभिषिच्याऽहतेन वाससाऽऽच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥१७॥ अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालनिशितमुपाददे ॥ १८ ॥

अङ्गिरःप्रवरसुतं भरतमपश्यन् ॥ १५ ॥ अथेति ॥ अथ ते वृषलपत्यनुचरा एनमनवद्यलक्षणमवमृश्य स्थूलत्वादिगुणविशिष्टं ज्ञात्वा तेन च स्वभर्तृकर्मनिष्पत्तिं मन्यमाना अतः कार्यसिद्ध्या मुदा हर्षेण विकसितवदनाः सन्तस्तं रशनया रज्ज्वा बध्वा चण्डिकाया भद्रकाल्या गृहमुपनिन्युरानीतवन्तः ॥ १६ ॥ अथेति ॥ अथ पणयश्चौराणां पुरोहिताः स्वविधिना स्वकल्पितप्रकारेण तमभिषिच्य स्नानं कारयित्वाऽहतेन नूतनेन वाससाऽऽच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतमलङ्कृतं भुक्तवन्तं पुरुषपशुं धूपाद्युपेतया वैशससंस्थया हिंसाविधानेन महता गीतादिघोषेण च सह भद्रकाल्याः पुरत उपवेशयामासुः । लाजाः भ्रष्टधानाः किसलयाः नवपल्लवा अङ्कुराः यवदूर्वाद्यङ्कुरा उपहारो नैवेद्यम् ॥ १७ ॥ अथेति ॥ अथ वृषलराजस्य पणिः पुरोहितत्वेन कल्पितश्चोरः पुरुषपशोर्भरतस्याऽसृगासवेन मादकरुधिरेण देवीं भद्रकालीं यक्ष्यमाणस्तर्पयंस्तदभिमन्त्रितं भद्रकालीमन्त्राभिमन्त्रितं स्वरूपेणाप्यतिकरालं भयङ्करमसिमुपाददे गृहीतवान् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ रजस्तमोभ्यां व्याप्ता प्रकृतिर्येषां तेषां धनमद एव रजो यथार्थदर्शनप्रतिबन्धकं तेनोत्सिक्तं त्यक्तमर्यादं मनो येषां तेषां हिंसायामेव विहारः चित्तोल्लासो येषां ते तथा तेषाम् अत एव भगवतः कला ऐश्वर्यादियुक्तं यद्वीराणां तेजस्विनां ब्राह्मणानां कुलं तत्कदर्थीकृत्य तुच्छीकृत्योत्पथेन मर्यादामार्गबहिर्भूतेन स्वैरं स्वेच्छया विहरतां प्रवर्त्तमानानां तेषां वृषलानाम् इत्येवं सूनायामापत्कालेऽनुज्ञातायामपि हिंसायामननुज्ञातमतिनिषिद्धमित्यर्थः। ब्रह्मर्षिसुतस्य तत्रापि साक्षाद्ब्रह्मभूतस्य ब्रह्मनिष्ठस्यात एव निर्वैरस्यात एव सर्वभूतानां सुहृदो हितचिन्तकस्यालम्भनं हिंसनमतिदारुणं दुःसहं कर्म तदुपलभ्य दृष्ट्वा ब्रह्मभूतस्यातिदुर्विषहेण तेजसा सहसैव दन्दह्यमानेन गर्हितं दह्यमानेन वपुषा हेतुना निर्गता सा देवी भद्रकाल्येवोच्चचाट प्रतिमां त्यक्त्वा बहिर्निर्गता ॥१९॥ भृशमिति ॥ भृशमत्यन्तम् अमर्षोऽपराधासहनं तद्धेतुको रोषश्च वपुषो दाहजन्यः क्रोधो वा यस्तयो-

इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमालम्भनं तदुपलभ्य ब्रह्मतेजसा अतिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली ॥ १९ ॥ भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं महाऽट्टहासमतिसंरम्भेण विमुञ्चन्ती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात् स्रवन्तमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त च विजहार च शिरःकन्दुकलीलया॥२०॥ एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति॥२१॥न वा एतद्विष्णुदत्त महदद्भुतं यदसंभ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवता अनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम्॥२२॥ इति श्रीभा० महा० पञ्चमस्कन्धे जडभरतचरिते जडभरतस्य बलिप्रदानान्मुक्तिवर्णनं नाम नवमोऽध्यायः॥९॥

रावेशस्तस्य रभसेन वेगेन विलसित उत्तम्भितो भ्रूकुटिलक्षणो विटपः शाखा च कुटिला भयङ्करा दंष्ट्राश्च अरुणानीक्षणानि च तेषामाटोपः संभ्रमस्तेनातिभयानकं वदनं यस्याः सा स्वरूपभयानकत्वेनोत्प्रेक्षते। इदं विश्वं हन्तुकामा हन्तुमुद्यतेवेत्यतिसंरम्भेण कोपावेशेन महान्तमट्टहासं संनादं हासं विमुञ्चती ततस्तदनन्तरमेवोत्पत्य स्वेन तेनैव तद्धननार्थमभिमन्त्रितेनासिना विवृक्णानि च्छिन्नानि शीर्षाणि येषां तेषां पापीयसां दुष्टानां गलात्स्रवन्तमासवं मादकमत्युष्णमसृक् स्वगणेन परिवारेण सह निपीय तस्यातिपानेन यो मदस्तेन विह्वला विवशा स्वपार्षदैः सहोच्चैस्तरां जगौ ननर्त्त च। शिरांस्येव कन्दुकानि तेषां लीलया विजहार चिक्रीड च॥२०॥एवमिति ॥ एवं सर्वत्र महत्स्वभिचारो मारणोद्योगरूपो योऽतिक्रमोऽपराधः स कार्त्स्न्येन सर्वांशेनाऽऽत्मने एव फलति ॥ २१ ॥ न वा इति ॥ हे विष्णुदत्त विमुक्तो देहेन्द्रियाद्यात्मभावलक्षणः सुदृढो हृदयग्रन्थिर्यैस्तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषु सत्त्वेषु प्राणिषु सुहृत् मैत्री युक्त उपकारचिन्तक आत्मा अन्तःकरणं येषां सर्वेषां सत्वानाम् आत्मानश्च ये तेषामिति वा अत एव निर्वैराणामिति अनिमिषः निमेषरहितः काल एवारिचक्रं वरं श्रेष्ठमायुधं यस्य तेन साक्षाद्भगवता तैस्तैर्भावैरन्तर्यामितया प्रवर्त्यमानैर्भद्रकाल्यादिरूपैः भक्तवात्सल्यदुष्टनिग्रहाद्यैर्वा परिरक्ष्यमाणानां न कुतश्चिद्भयं यस्मात्तदकुतश्चिद्भयं सर्वतो भयनिवर्त्तकं यत्तस्य भगवतः पादमूलं तदुपसृतानां भागवतपरमहंसानां स्वशिरश्छेदन आपतितेऽपि यदसम्भ्रमोऽव्याकुलत्वादि तदेतन्महदद्भुतमत्यन्तासंभावितं न वा नैव भवति ॥ २२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमे पञ्चमस्य व्यधादिमाम् ॥ ९ ॥ दशमे विप्रभरतो रहूगणकुवाच्यपि ॥ न क्रुद्धस्तेनानुनीतो गद्यादीन्यत्र षड्दशः॥ त्रीण्युवाचेति पादोनाः सप्तवेदा अनुष्टुभः ॥ १० ॥ अथेति ॥ अथ कदाचित् सिन्धुसौवीरदेशद्वयपते राज्ञो रहूगणनाम्नो ब्रह्मविद्यार्थं कपिलाश्रमं व्रजतः इक्षुमत्या नद्यास्तीरे तत्कुलपतिना तेषां शिबिकावाहानां कुलस्य नाथेन शिबिकावाहपुरुषान्वेषणसमये दैवेन केनचित्प्रारब्धेनोपसादितः प्रापितः स द्विजवर उपलब्धो दृष्टः । तदा च एष पीवा पुष्टः युवा संहननाङ्गः कठिनावयवशरीरोऽतो गौरिव खर इव च धुरं भारं वोढुमलं समर्थ इति मत्वा ये

श्रीशुक उवाच ॥ अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननाङ्गो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स ह महानुभावः ॥१॥ यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां शिबिकां रहूगण उपधार्य पुरुषानधिवहत आह ॥ हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति॥२॥अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्योपायतुरीयाच्छङ्कितमनसस्तं विज्ञापयाम्बभूवुः ॥३॥ न वयं नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः ॥ अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमु ह वयं पारयाम इति ॥४॥

पूर्वं विष्ट्या बलाद्गृहीतास्तैः सहायमपि गृहीतोऽतदर्हः शिबिकावाहनायोग्योऽपि स महानुभावः प्रसभं बलात्तत्र नियोजितः सन् शिबिकामुवाह ॥ १ ॥ यदेति ॥ हिंसापरिहारार्थमिषुमात्रप्रदेशावलोकमनु पश्चाद्गतिर्यस्य तस्य द्विजवरस्य गत्या सह यदा ह्यन्येषां पुरुषाणां गतिर्न समाहिता एकरूपा न जाता । यद्वा । इषुमात्रावलोकस्यानु पश्चाद्या गतिस्ततो हेतोः पुरुषगतिर्न समाहितेति । तदा विषमगतामान्दोलितां स्वशिबिकामुपधार्योपलभ्य रहूगणो हे वोढारो यानं साधु यथा भवति तथातिक्रमत वहत क्रमेर्दीर्घाभाव आर्षः । किमिति विषममुह्यत इत्यधिवहतः पुरुषानाह स्म ॥ २ ॥ अथेति ॥ अथ ते वोढारः पुरुषाः ईश्वरस्य दण्डसमर्थस्य राज्ञः सोपालम्भं साक्षेपं वच उपाकर्ण्य श्रुत्वा उपायतुरीयात् सामदानभेददण्डेषूपायेषु चतुर्थाद्दण्डलक्षणात् शङ्कितमनसः भीतचित्तास्तं स्वामिनं विज्ञापयांबभूवुः ॥ ३ ॥ नेति ॥ हे नरदेव न वयं प्रमत्ताः अनवहितचित्ताः किन्तु भवन्नियमानुपथा भवदाज्ञानुसारिणः सावधानचित्ता एवातः साध्वेव यानं वहामः। अयमधुनैव विनियुक्तोऽतः श्रान्तिरहितोऽपि न द्रुतं शीघ्रं व्रजतीति यानं विषमं भवती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यनेन सह वयं वोढुं न पारयामः समर्था न भवामः ॥४॥ सांसर्गिक इति ॥ उपासिताः सेविता वृद्धा ज्ञानिनो येन तथाभूतोऽपि निसर्गेण क्षत्रियस्वभावेन बलात्स्ववशीकृतः अत ईषदुत्थितो मन्युर्यस्य सः रजसाऽऽवृता मतिर्यस्य स राजा रहूगणः एवं कृपणानां वचो निशम्य नूनं सांसर्गिकः संसर्गनिमित्त एकस्यापि दोषः सर्वेषामेव संसर्गिणां भवितुमर्हतीति निश्चित्य न विस्पष्टं ब्रह्म तेजो यत्र तं जातवेदसं भस्मच्छन्नमग्निमिव स्थितं तं विप्रमुपालम्भवचनमाह स्म । यथा भस्मना च्छन्नमग्निमज्ञः पराभावितुं प्रवर्तते तथा ॥५॥ अहो इति॥हे भ्रातः हे सखे तव अतिकष्टं जातम् । व्यक्तं निश्चितं त्वमुरु परिश्रान्तोऽसि इत्यादीनि विपरीतार्थानि षड्वाक्यानि दीर्घमध्वानं सुचिरं कालं त्वमेक एव यानमूहिवान् प्रापितवान्।कस्वन्तः वस्वेकाजितीट् । अपर एते संघट्टिनः सहचरा नो एव वहन्ति।भवान्नातिपीवा पुष्टो नास्ति न संहननाङ्गो जरसा वार्द्धकेन चोपद्रुतः इत्येवं बहु यथा भवति तथा विप्रलब्धो विपरीतलक्षणाव्यङ्ग्यवक्रोक्त्या तिरस्कृत उपहसितो वा तेन त्वं श्रान्तो नासि । अधुनैवात्र नियोजितः अतिपीवा दृढाङ्गो युवा चासि । एते तव सङ्गिनस्त्व-

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसाऽऽवृतमतिराह ॥ ५ ॥ अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननाङ्गो जरसा चोपद्रुतो भवान् सखे नो एवापर एते संघट्टिन इति बहुविप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहं ममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥ ६ ॥ अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः॥७॥किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां दण्डपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति ॥ ८ ॥

द्विरुद्धगत्या वोढुं न शक्नुवन्ति । मयि राजन्यपि किं दुष्टत्वं प्रकाशयसीति व्यञ्जितोऽर्थः । अविद्यया विहितानि द्रव्याणि महाभूतानि गुणाः सत्त्वादय इन्द्रियाणि च कर्माणि पुण्यपापानि आशयोऽन्तःकरणं ये यस्मिन् तस्मिन् स्वचरमकलेवरेऽवस्तुनि परमार्थवस्त्वात्मव्यतिरिक्ते संस्थानविशेषे हस्तपादाद्याकारविशेषेण परिणते न अध्यारोपितोऽहंममेतिमिथ्याप्रत्ययोऽभिमानो येन स ब्रह्मभूतः भरतः तूष्णीमेव पूर्ववच्छिबिकामुवाह ॥ ६ ॥ अथेति ॥ अथ पुनरपि स्वशिबिकायां विषमगतायां प्रकुपितो रहूगण उवाच ॥७॥ किमिति ॥ अरे दुष्ट त्वं किमिदं करोषि यद्यानं विषमं नयसि । किं त्वं जीवन्नेव मृतोऽसि मां कदर्थीकृत्यानादृत्य भर्तुः स्वामिनो मम शासनमाज्ञामतिचरसि अतिक्रामसि । प्रमत्तस्य च ते चिकित्सां दण्डं करोमि । यथा स्वां प्रकृतिं सावधानतां भजिष्यसे इडार्थः । यथा दण्डपाणिर्यमो जनसमूहस्य दण्डं करोति तेन च जनः शुद्धो भवति तथा

CC-0. In Public Domain. Digitization by eGangotri

इत्युवाचेत्यनुषङ्गः ॥ ८ ॥ एवमिति ॥ नरदेवोऽहमित्यभिमानो यस्य रजसा तमसा चानुविद्धेन संवर्द्धितेन मदेन तिरस्कृता अशेषाः बहवो भगवतः प्रिया निकेता भक्ता येन तम् । यद्वा । तिरस्कृतम् अशेषाणां भगवत्प्रियाणां निकेतं येन तं पण्डितमानिनम् आत्मानं पण्डितं मन्यमानम् एवं बह्वबद्धमयुक्तं भाषमाणमपि राजानं ब्रह्मभूतः सर्वभूतानां सुहृत् आत्मा च योगेश्वराणां चर्यायां पराभिप्रायज्ञाने जडादिवदाचरणेऽतिव्युत्पन्ना निपुणा मतिर्यस्य विगतस्मयः ज्ञानित्वगर्वरहितः स भगवान् ब्राह्मणः स्मयमान इवेदं वक्ष्यमाणमाह स्म ॥ ९ ॥ त्वयेति ॥ हे वीर त्वया विपरीतलक्षणया यदुदितमुक्तं तव श्रमादि नास्तीति तद्व्यक्तं सत्यमेवातो विप्रलब्धमुपालम्भो न भवति यतः भर्त्तुर्वोढुर्देहस्य यो भारः स यदि मे ममात्मनः स्यात् तदा विप्रलम्भः स्यात् । अहं देहाद्भिन्नो वोढेव न भवामीति भावः । गन्तुर्गमनकर्त्तुर्देहस्य यदधिगम्यं प्राप्यं स्थानमध्वा मार्गश्च यदि मे स्यात्तदा तन्निमित्तः श्रमोऽपि मे स्यात्।अद्धेति पाठे साक्षात् परमार्थतः तच्च मे यदि स्यादित्यादि योज्यम् । अतस्तदभावाच्छ्रमो नास्तीति सत्यमेवोक्तं नोपालम्भ इति भावः । यद्वा । यदि भारो नाम कश्चित्स्यात्स च भर्त्तुर्देहस्य यदि स्यात् स च मे यदि प्रसक्तः स्यात् तर्हीदानीं भाराभावाद्विप्रलम्भः स्यान्नत्वेतदस्ति । भारस्य वोढुश्चानि-

एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसाऽनुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायामतिव्युत्पन्नमतिः स्मयमान एव विगतस्मय इदमाह ॥ ९ ॥ ब्राह्मण उवाच ॥ त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्‌ यदि वीर भारः ॥ गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः ॥ १० ॥ स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृट् भयं कलिरिच्छा जरा च ॥ निद्रा रतिर्मन्युरहं मदः शुचो देहेन जातस्य हि मे न सन्ति ॥११॥ जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टम् ॥ स्वस्वाम्यभावो ध्रुव ईड्य यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ॥ १२ ॥

रूप्यत्वात् मम च तत्संबन्धाभावात् यच्चोक्तं पीवेत्यादि तदपि भवतु मूर्खाणां तथा व्यवहारः विदामात्मानात्मविवेकवतां तु राशौ देहादिसङ्घात एव पीवेत्यादि प्रवादो नात्मनीति॥१०॥स्थौल्यमिति ॥ स्थौल्यं पीनत्वं कार्श्यं दुर्बलत्वं व्याधयो रोगाः जरा वृद्धत्वम् एते देहधर्मा आधयो मानस्यः पीडाः भयमिष्टविघातकाङ्क्षीतिः कलिः कलहः इच्छा विषयेषु रागः निद्रा प्रसिद्धा अरतिः ग्लानिः मन्युः क्रोधः अहं देहाद्यध्यासः मदः गर्वः अहङ्कारेण मद इति वा । शुचः इष्टवियोगजास्तापाः एतेऽन्तःकरणधर्माः क्षुत्तृषौ प्राणधर्मौ अतः सर्वेऽप्येते देहे देहादिसङ्घात एव भवन्ति न जातस्य जन्मरहितस्य मे मम तु न सन्ति । यद्वा । देहेन सह तदभिमानेन जातस्य भवन्ति । मम तु निरभिमानस्य न सन्ति । यद्वा । देहे जाते यो जातस्तस्यैव तानि मम तु तत्र न जातस्य न सन्ति छन्दोभङ्गः सोढव्यः ॥११॥ जीवदिति ॥ हे राजन् जीवन्मृत इति यदुक्तं तत्र यदि त्वयाहं देहाभिमानी निश्चितः तदा जीवन्मृतत्वं न केवलं ममैव किन्तु सर्वस्यैव विकृतस्य परिणामिनो देहादेर्नियमेन दृष्टं यत् यस्मात्सर्वमपि विकृतं प्रतिक्षणमाद्यन्तवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्पत्तिविनाशवत् सर्वेषामेव भावानां प्रतिक्षणं परिणामित्वात् भर्तृशासनमतिचरसीत्युक्तं तत्राह । हे ईड्य स्वं च भृत्यत्वं स्वाम्यं च स्वामित्वं तयोर्भावः सत्ता यत्र पक्षे ध्रुवो निश्चल एव स्यात् यदि व्यवस्थितः स्यादित्यर्थः । तर्ह्यसौ विधिकृत्ययोगः विधिकृत्ये शिबिकावाहनादिकर्मणि योगः यद्वा स्वामिनो विधिर्नियोगः भृत्यस्य कृत्यं कर्म तयोर्योगोऽपि ध्रुव उच्यते उचितः स्यात् । "उच समवाये" इति धातुः । तथा च स्वस्वामिभावस्यानित्यत्वात्तव राज्यभ्रंशे मम च तत्प्राप्तौ वैपरीत्यस्य संभवाद्वृथैव तवाहं राजेत्ययमभिमान इति भावः ॥ १२ ॥ ननु यावदहं राजा तावत्स्वाम्येवेति चेत्तत्राह–विशेषेति ॥ विशेषो राजभृत्यादिभेदस्तद्बुद्धेर्विवरमवकाशं यद्यदा व्यवहारतोऽन्यन्मनागीषदपि न पश्याम तत्र तदा क ईश्वरो राजा किञ्चेशितव्यं भृत्यादि भवेत् । यद्यपि परमार्थतः न राजभृत्यादि तथापि हे राजन् तव राजत्वाभिमानश्चेत्तर्हि ब्रूहि किं ते कार्यं करवामेति ॥ १३ ॥ उन्मत्तेति ॥ हे वीर उन्मत्तादिवद्वर्तमानस्य वस्तुतस्तु स्वसंस्थां स्वरूपभूतब्रह्मभावं गतस्य मे मम भवता चिकित्सितेन दण्डाद्युपायेन तथा शिक्षितेन वा कियानर्थः सेत्स्यति न कोऽपीत्यर्थः । मुक्तस्यार्थानर्थयोरसम्भवात् । यद्यहं तव दृष्ट्या न मुक्तः किन्तु स्तब्धः प्रमत्त एव तदापि मम तत्तु शिक्षादिकं पिष्टपे-

विशेषबुद्धेर्विवरं मनाक्च पश्याम यन्न व्यवहारतोऽन्यत् ॥ क ईश्वरस्तत्र किमीशितव्यं तथापि राजन् करवाम किं ते ॥ १३ ॥ उन्मत्तमत्तजडवत् स्वसंस्थां गतस्य मे वीर चिकित्सितेन ॥ अर्थः कियान्भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः ॥ १४ ॥ श्रीशुक उवाच ॥ एतावदनुवादपरिभाषया प्रत्युदीर्य स मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन्राजयानमपि तथोवाह ॥१५॥ स चापि पाण्डवेयसिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक् श्रद्धयाऽधिकृताधिकारस्तद्धृदयग्रन्थिविमोचनं द्विजवच आश्रुत्य बहुयोगग्रन्थसंमतं त्वरयाऽवरुह्य शिरसा पादमूलमुपसृतः क्षमापयन् विगतनृपदेवस्मय उवाच ॥ १६ ॥

षणं व्यर्थमेव । न हि पिष्टं वस्तुपेषणेन अपिष्टं भवत्यपि तु अतिपिष्टम् । एवं प्रमत्तजडस्वभावः ताडनादिना पटूकर्तुं न शक्यते अपि तु अतिप्रमत्तो भवति ॥ १४ ॥ एतावदिति ॥ उपशमशीलः शान्तचित्तः उपरतं निवृत्तमनात्म्ये देहात्मभावे निमित्तमविद्यालक्षणं यस्य सः उपभोगेन आरब्धं प्रारब्धं कर्म व्यपनयन् क्षपयन् स मुनिवरः राजोक्तानुवादरूपया परिभाषया भाषणेनैतावत् प्रत्युदीर्य राजानं प्रत्युत्तरं दत्त्वा राजयानमपि तथा पूर्ववदेवोवाह ॥ १५ ॥ स चेति ॥ हे पाण्डवेय ततः सम्यगिन्द्रियनिग्रहादिपूर्विका या श्रद्धा तया तत्त्वजिज्ञासायां तत्त्वविचारेऽधिकृतः प्राप्तोऽधिकारो येन सः यथा दर्शपूर्णमासाधिकृतस्यैव गोदोहनेन पशुकामस्यापः प्रणयेदिति गुणफलसंबन्धेऽप्यधिकारः एवं सात्त्विकश्रद्धायामधिकृतस्यैवास्यामधिकारः इत्यर्थः । सः सिन्धुसौवीराख्यदेशपती रहूगणः बहुषु योगग्रन्थेषु श्रेष्ठत्वेन संमतम् अत एव हृदयरूपग्रन्थिविमोचनं तद्द्विजवच आश्रुत्य विगतोऽहं नृपाणां देवः पूज्य इति स्मयो गर्वो यस्य तादृशः सन् त्वरया शिबिकातोऽवरुह्य शिरसा तत्पादमूलमुपसृतः कृतदण्डवत्प्रणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मस्तं क्षमापयन्नुवाच ॥ १६ ॥ क इति ॥ निगूढोऽलक्षितवर्णाश्रमाचारस्त्वं को वा विचरसि द्विजानां दत्तात्रेयादीनां मध्ये त्वं कतमोऽवधूतः स्वरूपसंदेहेऽपि द्विजत्वे तु न संदेहः यतः सूत्रमुपवीतं बिभर्षि अतो विशेषतो ब्रूहि त्वं कस्य पुत्रोऽसि कुत्रत्यः किंदेशवास्यसि इहास्मिन्स्थानेऽपि कस्माद्धेतोरागतोऽसि नोऽस्माकं क्षेमाय चेदिह प्राप्तस्तर्हि किं शुक्लः शुद्धसत्वमूर्त्तिः कपिलस्तु न भवसि । उतेति वितर्के ॥ १७ ॥ नाहमिति ॥ सुरराजस्येन्द्रस्य वज्रादहं न विशङ्के न बिभेमि तथा त्र्यक्षस्य रुद्रस्य शूलान्न बिभेमि यमस्य दण्डादपि न बिभेमि तथा अग्नेरर्कस्य सूर्यस्य सोमस्य चन्द्रस्यानिलस्य पवनस्य वित्तपस्य कुबेरस्य चास्त्रान्न बिभेमि । वज्रादिप्रहारान्न बिभेमीत्यर्थः । किन्तु ब्राह्मणकुलावमानात् भृशमत्यन्तं शङ्के बिभेमि ॥ १८ ॥ तदिति ॥ यस्मादेवं तत् तस्मात् निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन अत एव तदाच्छादयितुमसङ्गः सर्वजनसङ्गरहितः वस्तुतोऽपारोऽचिन्त्यानन्तमहिमापि जडवद्विचरसि स त्वं क इति ब्रूहि । हे साधो योगग्रन्थितानि युक्तिसहितानि वचांसि त्वद्वचनानि

कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः॥ कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्लः ॥१७॥ नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात् ॥ नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥ १८ ॥ तद् ब्रूह्यसङ्गो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः ॥ वचांसि योगग्रथितानि साधो न नः क्षमं ते मनसाऽपि भेत्तुम् ॥ १९ ॥ अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै ॥ प्रष्टुं प्रवृत्तः किमिहारणं तत् साक्षाद्धरिं ज्ञानकलाऽवतीर्णम् ॥ २० ॥ स वै भवाँल्लोकनिरीक्षणार्थमव्यक्तलिङ्गो विचरत्यपिस्वित् ॥ योगेश्वराणां गतिमन्धबुद्धिः कथं विचक्षीत गृहानुबन्धः ॥ २१ ॥ दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गन्तुर्भवतश्चानुमन्ये ॥ यथाऽसतो दानमानाद्यभावात् समूल इष्टो व्यवहारमार्गः ॥ २२ ॥

नोऽस्माभिर्मनसापि भेत्तुं भेदेन तदर्थविवेकेन धारयितुं न क्षमन्ते न शक्यन्ते । यद्वा । त्वद्वचांसि कर्माणि भेत्तुं मनसा युक्ताः सूक्ष्मदृष्टयोऽपि न क्षमन्ते न शक्नुवन्ति । यद्वा । वचांसि नोऽस्माकं मनसापि भेत्तुं न क्षमं न शक्यम् । यद्वा । नोऽस्मान् प्रति तव वचांसि योगिनोऽपि भेत्तुमुत्तरयितुं न क्षमन्तेऽतस्त्वमेवोत्तरयेति ॥१९॥ अहमिति ॥ अहं च योगेश्वरम् आत्मतत्वविदां मुनीनाम् अपि परमं गुरुं ज्ञानकलयावतीर्णं ज्ञानस्य कलायै ज्ञापनायावतीर्णं वा साक्षाद्धरिं कपिलं प्रति इह संसारे यदरणं शरणं तत् किमिति प्रष्टुं प्रवृत्तः ॥ २० ॥ स वा इति ॥ अपिस्वित्किंस्वित्स कपिल एवाव्यक्तलिङ्गो लक्षितस्वरूपः सन् भवान् लोकनिरीक्षणार्थं विचरति अन्धबुद्धिर्निर्विवेकः गृहे गृहोपलक्षिते लौकिके व्यापारेऽनुबन्धोऽभिनिवेशो यस्य स मादृक् जनः योगेश्वराणां युष्माकं गतिममुकोऽयमीदृक्प्रभाव इति तत्वं कथं विचक्षीत पश्येज्जानीयात् ॥ २१ ॥ अथ जडभरतवचांसि आक्षिपति—दृष्ट इति ॥ आत्मनो मम युद्धादिकर्मतः श्रमो दृष्टो वै अतो भर्त्तुर्भारवोढुर्गन्तुर्भवतश्च श्रममनुमन्येऽनुमिमे । तथा हि भवान् भारवाहनादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रान्तः कर्तृत्वात् यः कर्त्ता सः श्राम्यति । यथाहं युद्धादिकर्त्तेति । नन्वेतद्व्यवहारमात्रमिति चेत्तत्राह । व्यवहारमार्गः प्रपञ्चोऽपि यथा यथावत् समूल इष्टः सप्रमाणक एव इष्टः असता घटादिना उदकानयनादेरभावात् प्रयोगश्चैवं प्रपञ्चः सत्यः सुखदुःखादिलक्षणार्थक्रियाकारित्वात् । यत्रार्थक्रियाकारित्वं तत्र यथार्थवस्तुपूर्वकत्वं यथा क्रीतघटादौ । यत्र यथार्थवस्तुपूर्वकत्वं नास्ति तत्रार्थक्रियाकारित्वमपि नास्ति । यथा मिथ्याघटादौ सत्योदकानयनाद्यभावः ॥ २२ ॥ स्थौल्यादय औपाधिका मे न सन्तीत्युक्तं तत्रौपाधिकत्वेऽपि सुखदुःखादिकरत्वं किन्न स्यादित्याह—स्थालीति ॥ स्थाल्याम् अग्निना तापात्तन्मध्यवर्त्तिनः पयसः क्षीरस्याभितापस्तत्तापतस्तण्डुलानां बहिर्भागस्य तापस्ततस्तद्गर्भगतस्य कणस्य रन्धिः पाको यथा भवति । न चात्र किञ्चिन्मिथ्या तथा अनुरोधात् । उपाधिधर्मानुवृत्तेः स्थाल्यादितापक्रमेण दृष्टान्तानुसाराद्वा देहेन्द्रियादिभिः संनिकर्षात्संबन्धात्तु तन्निमित्ता देहादिगतापि संसृतिः श्रमादिदुःखसन्ततिः पुरुषस्यात्मनस्तव वा मम वान्यस्य वा सर्वस्यापि स्यादेव । तथा हि निदाघादिना देहे तप्ते इन्द्रियाणां तापः ततः असूनां प्राणानां तत आशयस्य मनसः एवं प्रकृतेऽपि पूर्वं शिबिकादिभारेण देहस्य श्रमस्तत इन्द्रियाणां ततोऽसूनां ततो मनसः ततो जीवस्येति क्रमेण

स्थाल्यग्नितापात् पयसोऽभितापस्तत्तापतस्तण्डुलगर्भरन्धिः ॥ देहेन्द्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥ २३ ॥ शास्ताऽभिगोप्ता नृपतिः प्रजानां यः किंकरो वै न पिनष्टि पिष्टम् ॥ स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ॥ २४ ॥ तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य ॥ कृषीष्ट मैत्रीदृशमार्तबन्धो यथा तरे सदवध्यानमंहः ॥ २५ ॥ न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ॥ महद्विमानात् स्वकृताद्धि मादृक् नङ्क्ष्यत्यदूरादपि शूलपाणिः ॥ २६ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे रहूगणजडभरतसंवादो नाम दशमोऽध्यायः ॥ १० ॥

॥२३॥ स्वस्वाम्यभावोऽध्रुव इत्युक्तं तत्राह—शास्तेति ॥ अध्रुवत्वेऽपि योऽच्युतस्य किङ्कर आज्ञानुवर्त्ती नृपति प्रजानामुत्पथगानामभितो शास्ता सन्मार्गस्थानामभितो गोप्ता च भवति स पिष्टं न पिनष्टि विफलं नैव करोति । यद्यतः प्रमत्तस्य स्तब्धत्वाद्यनपगमेऽपि श्रेयः प्रजापालनमेव राज्ञ इत्यादिभगवदाज्ञानुसारेण प्रजापालनादिस्वधर्माचरणमेवाच्युतस्याराधनमीहमानः कुर्वन्नृपतिरघौघं दोषसमूहं जहाति ततो विमुच्यत इत्यर्थः ॥ २४ ॥ तन्म इति ॥ यस्मात्त्वदुक्तं मम सर्वं विपरीतं प्रतिभाति । तत् तस्मात् नरदेवोऽहमित्यभिमानेन यो मदस्तेन तुच्छीकृतास्तिरस्कृताः सत्तमा भवादृशा येन तस्यात्यन्तापराधिनोऽपि मम भवान् मैत्रीदृशं स्नेहयुक्तां दृष्टिं कृषीष्ट करोतु । यथा सतां भवतामवध्यानमवज्ञानरूपमंहः पापमहं तरे तरिष्यामि । तद्भार्थः ॥ २५ ॥ नेति ॥ विश्वस्य सुहृच्चासौ सखा च तस्य अत एव सर्वत्र साम्येन स्वदेहेऽपि वीताभिमतेः गताभिमानस्य तव ममापमानकृता विक्रिया नास्ति तथापि स्वकृतान्महतां विमानान्मादृगपमानकर्त्ता शूलपाणी रुद्र इवातिसमर्थोऽप्यदूरात् क्षिप्रमेव विनङ्क्ष्यति ॥ २६ ॥ इति श्री-

CC-0. In Public Domain. Digitization by eGangotri

कृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे पञ्चमस्य व्यधादिमाम् ॥ १० ॥ एकादशे ज्ञानमदात् रहूगणमहीभृते॥संपृष्टो विप्रभरतोऽत्र श्लोकाः सार्द्धवारिदाः॥ उवाचेत्येकमेवात्र जिनैसंख्या अनुष्टुभः ॥ ११ ॥ अकोविद इति ॥ अकोविदोऽविवेक्येव त्वं कोविदानां विवेकिनां ये वादा यथार्थवचनानि तत्तुल्यान् युक्त्या भासमानानप्ययथार्थान् व्यवहारयथार्थत्वपरान् वादान् वाक्यानि एव वदसि अथो तथापि त्वं व्यवहारेऽतिनिपुणोऽप्यतिविदां परमविवेकिनां मध्ये वरिष्ठः श्रेष्ठो न भवसि । हि यस्मात्सूरयो विवेकिन एतमहंताममतापूर्वकस्वामिभृत्यसुखदुःखादिव्यवहारं तत्त्वावमर्शेन परमार्थविचारेण सह नामनन्ति न वदन्ति किं त्वविचाररमणीयमेव अतो न सत्यः ॥ १ ॥ तथेति ॥ हे राजन् यथा राजभृत्यादिव्यवहारस्तथैवोरवो गार्हा गृहसंबन्धिनो ये मेधा यज्ञास्तेषां वितानो विस्तारस्तद्विषयासु विद्यासु उरु अधिकं विजृम्भितेषु विलसितेषु वेदवादेषु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति।" इत्यादिरूपार्थवादेषु यस्तत्त्ववादः स प्रायेण शुद्धो हिंसादिदोषशून्यः साधुः रागादिशून्यः यथार्थश्च न चकास्ति न प्रकाशते । नु निश्चितमेवैतत् ।" यथैवेह कर्मजितो लोकः क्षीयते । एवमेवामुत्र पुण्यजितो लोकः क्षीयते । " इत्यादितर्कानुगृहीतश्रुतिविरोधेन सुकृतस्य तज्ज-

ब्राह्मण उवाच ॥ अकोविदः कोविदवादवादान्वदस्यथो नातिविदां वरिष्ठः ॥ न सूरयो हि व्यवहारमेतं तत्त्वावमर्शेन सहामनन्ति ॥१॥
तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु ॥ न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ॥ २ ॥ न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ॥ स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥ ३ ॥ यावन्मनो रजसा पूरुषस्य सत्वेन वा तमसा वाऽनुरुद्धम् ॥ चेतोभिराकूतिभिरातनोति निरङ्कुशं कुशलं चेतरं वा ॥ ४ ॥ स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ॥ बिभ्रत्पृथङ्नामभि रूपभेदमन्तर्बहिष्ट्वं च पुरैस्तनोति॥ ५ ॥

न्यसुखस्य चाक्षय्यत्वासंभवात् भगवदर्पितकर्मणां परमपुरुषार्थहेतुत्वात्तद्व्यावृत्त्यर्थं प्रायग्रहणम् ॥ २ ॥ नेति ॥ वरीयसीर्वरीयस्यः पूर्वसवर्णदीर्घ आर्षः । सर्वप्रमाणश्रेष्ठा अपि वेदवाचस्तस्य पुरुषस्य साक्षात् यथावत्तत्त्वग्रहणाय न समासन् नैव भवन्ति । स्वप्ने या निरुक्तिः दृष्टान्तस्तेन यस्य पुरुषस्य गृहमेधिसौख्यं गृहसंबन्धियज्ञादिकर्मजन्यं सुखं स्वयमेव हेयमित्यनुमितं न स्यात् । अतः यः स्वप्नदृष्टान्तेन कर्मजन्यं सुखं हेयं निश्चिनोति तस्यैव वेदवाचोऽपि तत्वग्रहणायेति ॥ ३ ॥ यावदिति ॥ यावत्पूरुषस्य मनोरजआदिभिर्गुणैरनुविद्धं वशीकृतं भवति तावन्निरङ्कुशं त्यक्तवेदमर्यादं स्वतन्त्रं सत् चेतोभिर्ज्ञानेन्द्रियैराकूतिभिः कर्मेन्द्रियैश्च स्वर्गनरकादिशरीरप्राप्तिकारणं कुशलं पुण्यमितरत्पापं वा चकारादुभयमिश्रं वा कर्म आतनोति विस्तारयत्येव ॥ ४ ॥ स इति ॥ पुंस्त्वनिर्देश आत्मशब्दविशेषणत्वात् तन्मन इत्यर्थः । धर्माधर्मादिवासनायुक्त आत्मा वासनात्मा विकृतः कामादिविकारवान् विषयोपरक्तः विषयासक्तः गुणै रजआदिभिः प्रवाहो यस्य गुणैर्वशीकृत इत्यर्थः । षोडशात्मा षोडशकलासु पञ्चमहाभूतैकादशेन्द्रिय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपेषु आत्मा मुख्यः देवतिर्यङ्मनुष्यादिपृथङ्नामभिः सह पृथग्रूपभेदं बिभ्रत् देहत्यागसमये देवादिदेहान् चिन्तयन् रेफलोपेऽपि दीर्घाभाव आर्षः । चिन्वया प्राप्तैः पुरैस्तैर्देहैरेवान्तर्बहिष्टिमुत्कृष्टत्वनिकृष्टत्वद्वारा वेदोक्ताचारेऽधिकारित्वमनधिकारित्वं च तनोति ॥ ५ ॥ दुःखमिति ॥ मायया रचितोऽन्तरात्मा मनः स्वदेहिनं जीवमालिङ्ग्य चेतनं सन्तं संसृतिचक्रे संसारसमूहे कूटयाति च्छलयतीति तथाभूतः सन् तापफलं दुःखं पुण्यफलं सुखं च व्यतिरिक्तं मोहं तीव्रं भोगमन्तरेणोपायान्तरेण दुर्निवारं कालोपपन्नं धर्माधर्मादिविपाकहेतुना कालेन प्राप्तं फलमा सर्वतो व्यनक्ति ॥ ६ ॥ तावानिति ॥ यावन्मन इत्याद्युक्तप्रकारेण यावन्मनः संसारे पुरुषं भ्रमयति तावानेवायं क्षेत्रज्ञसाक्ष्यः साक्षिणो भावः साक्ष्यं ष्यञ् । क्षेत्रज्ञस्य साक्ष्यं यत्र सः क्षेत्रज्ञस्य दृश्यः जाग्रदवस्थायां स्थूलः स्वप्नावस्थायां च सूक्ष्मः सदाविः सन् इव प्रकाशमानो भवति । यद्वा । आविः प्रकाशमानः सदा क्षेत्रज्ञस्य दृश्यो भवति यस्मादेवं तस्मादेव परावरस्योत्कृष्टापकृष्टयोनिसंबन्धस्य तथा गुणागुणत्वस्य बन्धमोक्षयोश्चादौ मन एव लिङ्गं कारणमिति

दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ॥ आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥ ६ ॥ तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः ॥ तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्य ॥ ७ ॥ गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ॥ यथा प्रदीपो घृतवर्तिमश्नञ्छिखाः सधूमा भजति ह्यन्यदा स्वम् ॥८॥ पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम् ॥ एकादशासन्मनसो हि वृत्तय आकूतयः पञ्च धियोऽभिमानः ॥ ९ ॥ मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमीः ॥ १० ॥ गन्धाकृतिस्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः ॥ एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः ॥ ११ ॥

विवेकिनो वदन्ति ॥ ७ ॥ गुणेति ॥ जन्तोर्जीवस्य मनो यदा गुणानुरक्तं विषयासक्तं तदा तस्य व्यसनायोक्तप्रकारेण संसारदुःखाय भवति । अथो यदि तु नैर्गुण्यं निर्गुणं विषयविमुख्यं भवति । स्वार्थे ष्यञ् । तदा तु तस्य क्षेमाय मोक्षाय भवतीत्यर्थः । यथा प्रदीपो घृतवर्त्तिमश्नन् सधूमाः शिखा ज्वाला भजति अन्यदा हि घृताद्यभावकाले तु स्वं स्वरूपं शुक्लभास्वररूपं महाभूतात्मत्वं वा भजति । अन्यदा काञ्चनपिण्डमश्नंस्तु स्वं पदं निर्धूमतेजःस्वरूपमिति वा ॥ ८ ॥ पदमिति ॥ तथा मनोऽपि गुणेषु विषयेषु कर्मसु तदनुकूलक्रियासु चानुबद्धमासक्तं नानावृत्तीः श्रयते तद्रूपेण परिणमतेऽन्यत्र विषयादि विहाय भगवति स्थितिकाले तु तत्त्वं परमार्थं पदं स्वरूपं श्रयते मनसो वृत्तयः आकूतयः क्रियाकाराः पञ्च धियो ज्ञानाकाराश्च पञ्च अभिमानश्चैकादशः इति एकादश आसन् ॥ ९ ॥ मात्राणीति सार्द्धम् ॥ हे वीर मात्राणि गन्धाद्यानि पञ्च ज्ञानेन्द्रियाणां कर्माणि च पञ्च कर्मेन्द्रियाणां पुरं शरीरं गेहादिकं चैकाभिमानस्य इत्यासां वृत्तीनामेकादशैव भूमीर्विषयान् वदन्ति विज्ञाः । ता आह । गन्धश्चाकृती रूपं च स्पर्शश्च रसश्च

CC-0. In Public Domain. Digitization by eGangotri

श्रवः शब्दश्च तानि पञ्चमात्राशब्दवाच्यानि घ्राणादीन्द्रियद्वारा धीवृत्तीनां विषयाः विसर्गो मलत्यागः रतिः स्त्रीसम्भोगः अर्तिः गतिः अभिजल्पः भाषणं शिल्पं हस्तकार्यं ते कर्मशब्दवाच्याः पाय्वादिपश्च कर्मेन्द्रियद्वारा क्रियाकारवृत्तीनां विषयाः । ममेत्यभिमानेन स्वीक्रियत इति स्वीकरणं शरीरगेहादि एकादशमभिमानस्य विषयमाहुः । अयं भावः । शरीराद्यभिमानस्य गन्धादिवन्नज्ञेयतया विषयः नापि विसर्गादिवत् कार्यतया तद्विषयः किंतु भोगसाधनत्वेन ममेति स्वीकार्यतया तद्विषय इति । एके त्वात्मानात्मविवेकवतामेव शरीरं ममत्वाभिमानविषयः अतो विवेकिनां तथास्तु । अविवेकिनां त्वहङ्कारं द्वादशं वृत्त्यन्तरं तस्य च शरीरमेव शय्यासंज्ञं द्वादशं विषयमाहुरित्यन्वयः । शरीरे हि जीवोऽहङ्कारेण शेते इति तस्य शय्यापदवाच्यत्वं बोध्यम् । अत एव पुरि शयनाज्जीवस्यापि पुरुषपदवाच्यत्वं ज्ञेयम् । यद्वा । एके आचार्या अभिमानस्य द्वैविध्यात् ममेति ममकारस्य शय्यां विषयं गेहादिकमेकादशम् अहमिति अहङ्कारस्य शय्यां देहं द्वादशमाहुः ॥ १० ॥ ११ ॥ तासां वृत्तीनामवान्तरभेदैरानन्त्यमाह—द्रव्येति ॥ द्रव्यस्वभावादिभिर्निमित्तभूतैरमी एकादश मनसो विकारा वृत्तय एव प्रथमं शतशस्ततः सहस्रशस्ततः लक्षशः कोटिशश्च स्युः । द्रव्याणां विषयाणां चन्दनस्वर्णादीनामानन्त्यात् । गन्धादिः कोऽपि कस्मैचिद्रोचते इति स्वभावानन्त्यात् आशयः संस्कारोऽन्तःकरणं वा तस्यादुष्टतादुष्टताभ्यां कर्म अदृष्टं तद्वशादपि कालो

द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः ॥ सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ १२ ॥ क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः ॥ आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ १३ ॥ क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ॥ नारायणो भगवान्वासुदेवः स्वमाययात्मन्यवधीयमानः ॥ १४ ॥

बाल्ययौवनादि ततोऽपि प्रत्येकमनन्ता एव गन्धादय इति ते च क्षेत्रज्ञतो जीवान्न स्युः तस्याविकारित्वात् । न स्वतः आत्माश्रयापत्तेः नापि मिथो भवन्त्यन्योन्याश्रयापत्तेः अतो मिथ्याभूता एव । यद्वा । कोटिशो भवन्ति अतस्ताः क्षेत्रज्ञतः अचिन्त्यशक्तेः परमेश्वरादेव तत्सत्तयैव सत्तां लभेरन् न मिथः न च स्वतः॥ १२ ॥ गुणकर्मानुबद्धं मनोवृत्तीः श्रयत इति प्रपञ्चितम् अन्यदा तत्त्वं श्रयत इत्युक्तं तदाह—क्षेत्रज्ञ इति ॥ अविशुद्धं संसारबन्धकारणं कर्म करोति तथा तस्य माययारचितस्य अहंममाध्यासेन स्थितस्य जीवस्य जीवोपाधेर्मनसः एताः अनन्तरोक्ताः नित्याः प्रवाहरूपेणाविच्छिन्ना आविर्हिताः जाग्रत्स्वप्नयोराविर्भूताः धात्रः कः हिरादेशः । क्वापि सुप्तिसमाध्यादौ तिरोहितास्तिरोभूताश्च विभूतर्वृत्तीः शुद्धः क्षेत्रज्ञोऽवस्थात्रयसाक्षी केवलो विचष्टे पश्यति सः क्षेत्रज्ञ एवात्मतत्वमित्यर्थः ॥ १३ ॥ क्षेत्रज्ञो द्विधा । जीव ईश्वरश्च । तत्राद्यो निरूपितस्तत्प्यमीश्वरं निरूपयति—क्षेत्रज्ञ इति ॥ क्षेत्रज्ञ आत्मा व्यापी पुराणः जगत्कारणं पुरुषः पूर्णः साक्षादपरोक्षः स्वयंज्योतिः अजः परेषामपीशः नारायणः भगवान् वासुदेवः स्वमाययाचिन्त्यशक्त्यात्मनि जीवे अवधीयमानः अवस्थाप्यमानः । कर्मकर्त्तरि प्रयोगः । स्वेच्छया तन्नियन्तृत्वेन वर्त्तमान इत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ अनिलः पवनो यथा बहिःस्थितोऽप्यात्मस्वरूपेण प्राणरूपेण स्थावरजङ्गमानामन्तर्निविष्टः संस्तानीशेत् नियमयति शबलुक् तङ्भावश्चार्षः । एवं परः प्रपञ्चाद्बहिरपि सन् भगवान् वासुदेवः क्षेत्रज्ञः साक्षी आत्मा व्यापकश्चापि इदं विश्वमनुप्रविष्टः सन् तन्नियमयति ॥ १५ ॥ नेति ॥ हे नरेन्द्र विमुक्तसङ्गः जिताः षट् ज्ञानेन्द्रियमनोरूपाः सपत्नाः शत्रवो येन स तनुभृद्देही शास्त्रश्रवणादिना वयुनोदयेन ज्ञानोत्पत्त्या एतामात्मावरणभूताहंममाध्यासकारणभूतां मायामविद्यां विधूय निरस्य यावदात्मतत्वं न वेद साक्षात्कारं न कुर्यात्तावदिह संसारे भ्रमति ॥ १६ ॥ नेति ॥ आत्मनो लिङ्गमुपाधिभूतमेतन्मन एव जनस्य प्राणिनः संसारतापानामावपनं क्षेत्रं कारणमिति यावन्न वेद तावद्विषयविरक्त्यभावादिह भ्रमतीत्यनुषङ्गः । यन्मनः शोकमोहादीनामनुबन्धमनुवृत्तिं ममतां च विधत्ते ॥ १७ ॥ भ्रातृव्यमिति ॥ अदभ्रवीर्यं महाबलम् उपेक्षया अध्येधितमतिप्रवृद्धं व्यलीकं मिथ्याभूतं तथापि आत्ममोषं स्वरूपाच्छादकम् एनं मनोलक्षणं भ्रातृव्यं शत्रुं गुरोर्हरेश्च चरणोपासनमेवास्त्रं यस्य तथाभूतः त्वं

यथाऽनिलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईशेत् ॥ एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ १५ ॥ न यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन ॥ विमुक्तसङ्गो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥ १६ ॥ न यावदेतन्मन आत्मलिङ्गं संसारतापावपनं जनस्य ॥ यच्छोकमोहामयरागलोभवैरानुबन्धं ममतां विधत्ते ॥ १७ ॥ भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाऽध्येधितमप्रमत्तः ॥ गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥ १८ ॥ इति श्रीभा० प० भरतचरिते भरतरहूगणसं० रहूगणाय मनोविजयवर्णनं नाम एकादशोऽध्यायः ॥ ११ ॥ रहूगण उवाच ॥ नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय ॥ नमोऽवधूतद्विजबन्धुलिङ्गनिगूढनित्यानुभवाय तुभ्यम् ॥ १ ॥ ज्वरामयार्तस्य यथाऽगदं सन्निदाघदग्धस्य यथा हिमाम्भः ॥ कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेऽमृतमौषधं मे ॥ २ ॥

स्वयमप्रमत्तः सन् जहि नाशय ॥ १८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्पञ्चमैकादशे स्फुटाम् ॥ ११ ॥ द्वादशे विप्रभरतः पृष्टः सर्वानपानुदत् ॥ रहूगणस्य संदेहाँस्तत्र पद्यानि षोडश[१६] ॥ उवाचेति वचोयुग्मं[२] द्वाविंशतिरनुष्टुभः[२२] ॥ १२ ॥ नम इति ॥ कारणमीश्वरस्तस्यैव लोकरक्षणार्थो विग्रहो देहो यस्य यद्वा कारणेन जनोद्धारहेतुना विग्रहो यस्य तस्मै तथास्वरूपेणात्मानन्दानुभवेन तुच्छीकृतो विग्रहो भेदो येन तस्मै तुभ्यं नमो नमः । अवधूतं सम्मानत्यागेन मलिनं यद्द्विजबन्धुलिङ्गं ब्राह्मणशरीरं तेन निगूढ आच्छादितो नित्यः स्वानन्दानुभवो येन तस्मै नमः । अवधूतेति संबोधनं वा ॥ १ ॥ ज्वरेति ॥ हे ब्रह्मन् ज्वर एवामयो रोगस्तेनार्त्तस्य पीडितस्य यथा सत्तच्छान्तिकरं स्वादु वाऽगदमौषधं यथा च निदाघेन दग्धस्य संतप्तस्य हिमाम्भः तापशान्तिकरं शीतलमुदकं गङ्गोदकं वा तथा कुत्सिते विष्ठादिपूर्णे देहे यो मानः सर्वोत्कृष्टो नरदेवोऽहमित्यहङ्कारः स एवाहिस्तेन विशेषेण दष्टा विनष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मे मम ते तवेदं वचोऽमृततुल्यमौषधं विवेकसम्पादकत्वात् ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ यस्मादेवं तस्मात् भवन्तं सर्वज्ञं मम संशयविषयमर्थं पश्चात् प्रक्ष्यामि अधुना तु अध्यात्मयोगैः अतिसूक्ष्मात्मावबोधानुकूलयुक्तिभिः ग्रथितं तवोक्तं वचः सुबोधं यथा स्यात्तथा कौतूहलचेतसः चकितचित्तस्य मे समाख्याहि ॥ ३ ॥ यदिति ॥ हे योगेश्वर प्रत्यक्षादिभिर्दृश्यमानमतः सद् अबाधितमपि लौकिकालौकिकक्रियाफलं दुःखसुखादिव्यवहारमूलमेवास्ति अञ्जसा परमार्थतस्तत्त्वविमर्शनाय तु क्षमं नैव भवतीति यद्भवानाह अमुष्मिन्नर्थे मे मम मनो भ्रमते । तद्भ्रमः । यद्यपि स्वप्नदृष्टान्तेन लौकिकसुखस्य मिथ्यात्वं प्रतिपादितं तथापि स्वप्नपदार्थस्य मिथ्यात्वेऽपि जाग्रदवस्थायां सर्वपदार्थानां सत्यत्वात्सुखादेः कथं मिथ्यात्वमिति भावः ॥ ४ ॥ अबाधितत्वम-सिद्धमित्याह—अयमिति ॥ हे पार्थिव यः पार्थिवः पृथिवीविकारः स एव कस्य हेतोः कुतश्चित्कारणात् पृथिव्यां चलन्नयं भारवाहकादिर्जनो नाम प्रसिद्धः यस्तु न चलति स पाषाणादिरित्येतावानेव भेदः ।तस्य च जडत्वान्न भारः श्रमश्च। वस्तुतः अवयवव्यतिरेकेण श्रमास्पदस्यावयविनोऽनिरूपणादपि स नास्ति इत्याह।तस्यापि देहत्वेनाभिमतस्य पृथिवीविकारस्यापि अङ्घ्र्योरधि उपर्युपरि गुल्फादयोऽवयवाः सन्ति । उरसः सलोप आर्षः ॥ ५ ॥ शिबिकायां त्वय्यपि चावयवी नास्तीत्याह—अंस इति ॥ अंसे स्कन्धे

तस्माद्भवन्तं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधम् ॥ अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥ ३ ॥ यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलम् ॥ न ह्यञ्जसा तत्त्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे ॥ ४ ॥ ब्राह्मण उवाच ॥ अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः ॥ तस्यापि चाङ्घ्र्योरधिगुल्फजङ्घाजानूरुमध्योरशिरोधरांसाः ॥ ५ ॥ अंसेधि दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते ॥ यस्मिन् भवान् रूढनिजाभिमानो राजाऽस्मि सिन्धुष्विति दुर्मदान्धः ॥ ६ ॥ शोच्यानिमांस्त्वम-धिकष्टदीनान् विष्ट्या निगृह्णन् निरनुग्रहोऽसि ॥ जनस्य गोप्ताऽस्मि विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ॥ ७ ॥

चाधिष्ठिता दार्वी शिबिकास्ति यस्यां सौवीरराज इत्यपदेशो नाममात्रं यस्य वस्तुतस्तु पृथिवीविकार एव स भवद्देह आस्ते । यस्मिन् देहे सिन्धुदेशेष्वहं राजास्मीत्येवं यो दुष्टो मदस्तेनान्धः भवान् रूढनिजाभिमानः कृतात्माध्यासोऽस्ति न वस्तुतः । अत्रायमाशयः । अत्र पृथिव्यादीनां शिबिकान्तानां भारवहनात् किं सर्वेषां श्रमः उत कस्यचित् नाद्यः । पृथिवीशिबिकयोः श्रमादर्शनात् नाप्याङ्घ्र्यादीनां शिबिकाया अभावे गुल्फादिभारवाहिनामपि तेषां श्रमानुलब्धेः अङ्घ्र्यादेरवयविनः शिबिकादिवहना-च्छ्रम इति चेदवयवेभ्यः पृथगवयविनः श्रमाश्रयस्यानिरूपणात् । ननु श्रमोऽनुभूयत एवेति चेत् अतिसुकुमार्या अलङ्कारवहने स्वबालकवहने च श्रमानुपलब्धेः तस्माद-भिमानविशेषेणैव दुःखं सुखं च तवाप्यभिमानेनैव राजास्मीति सुखं निरभिमानानां तु न सुखदुःखे ॥ ६ ॥ शोच्यानिति ॥ अधिकेन कष्टेन दीनान् इमान् शोच्यान् एतेषां शिवं कथं स्यादिति चिन्तयानुग्रहपात्रभूतान् विष्ट्या बलात्कारेण निगृह्णंस्त्वं निरनुग्रहो दयारहितोऽसि अतः धृष्टः अन्तर्दुर्वृत्तस्त्वम् अहं जनस्य गोप्तास्मीति विकत्थमानो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुधैवात्मानं श्लाघमानो वृद्धानां विवेकिनां सभासु न शोभसे ॥ ७ ॥ उत्तरोत्तरावयवभारः पूर्वपूर्वावयवानां स्यादित्यपि नेत्याह—यदेति ॥ यदा चराचरस्य कार्यजातस्य देहस्य क्षितावेव निष्ठां वर्तमानकाले स्थितिं विनाशानन्तरं लयं च तत एव च प्रभवमुत्पत्तिं च नित्यं नियमेन व्यवहारावस्थायां विदाम विद्मः आर्षः प्रयोगः । तत्तदा नामतस्तत्तन्नाम्ना व्यवह्रियमाणात्पृथिवीपदार्थादन्यत् यत्क्रियया उदकाहरणादिकर्मणा सत् सत्यमित्यनुमेयं व्यवहारस्य मूलं कारणं किं वस्त्वस्ति तन्निरूप्यताम् । अतः अवयवव्यतिरिक्तस्यावयविनोऽसत्वात् तेन चात्मनः सम्बन्धाभावादध्यासेनैव श्रमादिसिद्धिर्न तु परमार्थतः । अन्यथा गुल्फाद्युत्तरोत्तरावयववाहकानामङ्घ्र्यादीनामपि तच्छ्रमप्रसङ्गः स्यादिति भावः ॥ ८ ॥ एवमिति ॥ असत्स्वतिसूक्ष्मेषु स्वकारणभूतेषु परमाणुषु निधानात् लयात् तद्व्यतिरेकेण निरूपयितुमशक्यत्वात् क्षितिशब्दस्य वृत्तं वाचकत्वेन वर्त्तनं यस्मिंस्तदपि वस्त्वेवं देहवत्स्वावयवव्यतिरेकेणासत्त्वेन निरुक्तम् अतः परमाणुव्यतिरेकेण क्षितिर्नास्ति परमाणूनामपि अतिरिक्तत्वं नास्तीत्याह । येषां समूहेन विशेषः पृथिवीबुद्ध्यालम्बनपदार्थः कृतः अवयविनो निरस्तत्वात्समूहेनेत्युक्तम् । ते परमाणवोऽपि अविद्यया अज्ञानेन हेतुना मनसा कार्यानुपपत्तिबलेन वादिभिः कल्पिताः वस्तुतः

यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम् ॥ तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिययाऽनुमेयम् ॥ ८ ॥ एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात् परमाणवो ये ॥ अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः ॥ ९ ॥ एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ॥ द्रव्यस्वभावाशयकालकर्मनाम्नाऽजयाऽवेहि कृतं द्वितीयम् ॥ १० ॥ ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् ॥ प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ॥ ११ ॥ रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ॥ न च्छन्दसा नैव जलाऽग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥ १२ ॥

असद्रूपा एव ॥ ९ ॥ एवमिति ॥ एवं पृथिवीवदन्यदपि यत् कृशत्वादिधर्मकं बुद्ध्या प्रतीतं द्वितीयं द्वैतं तद्द्रव्यादिनाम्ना व्यवह्रियमाणया अजया मायया कृतमवेहि जानीहीत्यन्वयः । तत्र कृशं ह्रस्वं स्थूलं तत्प्रतियोगि अणु स्वल्पं बृहत् महत् असत्कारणं सत्कार्यं जीवं चेतनम् अजीवं जडं द्रव्यं महाभूतादि स्वभावः तत्तद्वस्तुपरिणामहेतुः आशयः संस्कारः कालो गुणक्षोभहेतुः कर्म धर्माधर्माख्यमदृष्टम् ॥ १० ॥ तर्हि किं सत्यं तदाह—ज्ञानमिति ॥ ज्ञानमेव सत्यं व्यावहारिकसत्यत्वं व्यावर्त्तयति । परमार्थमबाधितं वृत्तिज्ञानं व्यवच्छिनत्ति विशुद्धं तत्त्वाविद्यकम् एकं तत्तु नाना अनन्तरम् अबहिश्चेति व्यापकतया बाह्याभ्यन्तरभावरहितं तत्तु विपरीतं ब्रह्म परिपूर्णं तत्तु परिच्छिन्नं प्रत्यक् तत्तु विषयाकारं प्रशान्तं निर्विकारं तच्च भगवच्छब्दवाच्यं यत् कवयो वासुदेवमिति वदन्ति तत्स्वरूपज्ञानमेव सत्यम् ॥ ११ ॥ रहूगणेति ॥ हे रहूगण महतां पादरजसा य आत्मनोऽभिषेकः स्नानं तद्विनैतदुक्तमात्मतत्त्वं केवलेन तपसा पुरुषो न याति न लभते । एवं तपसा वानप्रस्थधर्मेण इज्यया यज्ञादिककर्मणा

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

निर्वपणात् अन्नादिसंविभागात् गृहाद्वा तन्निमित्तपरोपकारात् छन्दसा वेदाध्ययनादिब्रह्मचारिधर्मेण जलादिभिर्वोपासितैः जलाद्यादिकरणकतपसा वा ॥ १२ ॥ यत्रेति ॥ यत्र येषु महत्सु उत्तमश्लोकस्य हरेर्गुणानुवादः लीलाकथा अज्ञाननिवर्तकत्वादेव ग्राम्यकथानां विघातो यस्मात्स तथाभूतः प्रस्तूयते निरन्तरं प्रवर्तते स चानुदिनं निषेव्यमाण आदरपूर्वकं श्रूयमाणो मुमुक्षोः सतीं संसारतापोपशमनीं वासुदेवे भगवति मतिं भक्तिं यच्छति सम्पादयति ततश्च तदनुग्रहेणैवमात्मतत्त्वं स्फुरतीत्यर्थः ॥ १३ ॥ विषयसङ्गाद्योगभ्रंश इति वदन् कस्त्वं निगूढ इत्यस्योत्तरमाह—अहमिति ॥ अहं पुरा पूर्वं विमुक्तो दृष्टश्रुताभ्यामिह लोकपरलोकाभ्यां सङ्गनिमित्तो बन्धो येन तथाभूतो भरतो नाम राजाभवम् । स चाहं भगवत आराधनमीहमानः कुर्वन् मृगसङ्गात् मृगआसक्तितः मृगोऽभवम् । एवं हतोऽर्थः प्रयोजनं यस्य सः पुनर्मृगदेहमुत्सृज्य ब्राह्मणो जातोऽस्मीति शेषः ॥ १४ ॥ सेति ॥ हे वीर सा पूर्वजन्मविषया कृष्णार्चनात् प्रभव उत्पत्तिर्यस्याः सा स्मृतिर्मृगदेहेऽपि पशुत्वेन कर्त्तव्यानुसन्धानायोग्ये देहेऽपि

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ॥ निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ १३ ॥ अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः ॥ आराधनं भगवत ईहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः ॥ १४ ॥ सा मां स्मृतिर्मृगदेहेऽपि वीर कृष्णार्चनप्रभवा नो जहाति ॥ अथो अहं जनसङ्गादसङ्गो विशङ्कमानोऽविवृतश्चरामि ॥ १५ ॥ तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनेहैव विवृक्णमोहः ॥ हरिं तदीहाकथनस्मृतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥१६॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे ब्राह्मणरहूगणसंवादे श्रीभगवत्कथास्वरूपनिरूपणवर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥ ब्राह्मण उवाच ॥ दुरत्ययेऽवध्न्यजया निवेशितो रजस्तमःसत्वविभक्तकर्मदृक् ॥ स एष सार्थोऽर्थपरः परिभ्रमन् भवाटवीं याति न शर्म विन्दति ॥ १ ॥

मां नो जहाति न जहौ । अथो तस्मान्मृगासक्त्याहं भ्रष्ट इति स्मृतिसत्त्वादेवाहं जनसङ्गाद्विशङ्कमानो भीतः असङ्ग एकाकी सर्वतो विरक्तः अविवृतोऽप्रकटः स्वज्ञानादिकमाच्छादयंश्चरामि ॥ १५ ॥ तस्मादिति ॥ तस्मादसङ्गाः सर्वतो विरक्ताः महान्तस्तैर्यः सुष्ठु प्रयत्नपूर्वकः सङ्गस्तेन जातम् । यद्वा । असङ्गो व्यवहारानासक्तिः सुसङ्गः साधुसङ्गस्ताभ्यां जातं ज्ञानं तदेवासिस्तेनेहैव जन्मनि विवृक्णः सञ्छिन्नो मोहः यस्य सः तस्य भगवतो या ईहा लीलास्तासां कथनस्मृतिभ्यां लब्धा स्मृतिरात्मतत्त्वसाक्षात्कारलक्षणा येन स एवाध्वनः संसारमार्गस्यातिशयितं श्रेष्ठं पारं हरिं याति नान्यः । यद्वा । पारमति अतिक्रम्य हरिं याति । "अतिरतिक्रमणे च" इति कर्मप्रवचनीयत्वाद्द्वितीया ॥ १६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्पञ्चमद्वादशे स्फुटाम् ॥ १२ ॥ त्रयोदशे विरागस्य दार्ढ्यहेतोर्भवाटवीम् ॥ उक्त्वागाद्भरतस्तत्र पद्यगद्यानि षड्दृशः ॥ चतुर्थ्यमुवाचेति चत्वारिंशदनुष्टुभः ॥१३॥ अध्वनः पारं यातीत्युक्तम् तमेवाध्वानमध्वनीनं च प्रसिद्धाध्वसार्थरूपकेण वैराग्यदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्व्याय प्रपञ्चयति—दुरत्यय इति ॥ रजस्तमःसत्त्वैर्विभक्तेषु कर्मस्वेव दृक् दृष्टिर्यस्य स तथा अर्थपरः विषयाभिलाषी एषः प्रसिद्धः सार्थो वणिक्समूह इव जीवसमूहः " सार्थो वणिक्समूहे स्यात् " इति मेदिनी। अजया भगवन्मायया दुरत्यये दुस्तरेऽध्वनि प्रवृत्तिरूपे मार्गे निवेशितस्तत्र भ्रमन् देवतिर्यगादियोनिषु गच्छन् भवाटवीं संसारवनमेव याति। तत्र च शर्म सुखं न विन्दति अत्रागामिन्यध्याये व्याख्यास्यमानोप्यऽर्थो रूप्यरूपकयोर्यौगपद्येन सुखार्थमत्रापि व्याख्यायते ॥ १ ॥ यस्यामिति ॥ हे नरदेव यस्यां भवाटव्याम् इमे षट् दस्यवः इन्द्रियनामानश्चौराः कुत्सितो नायको रक्षको बुद्धिलक्षणो यस्य तं सार्थं बलात् विलुम्पन्ति तस्य धर्म्यं धनमुपभोगेन मुष्णान्ति इत्यर्थः। यत्र प्रमत्तं स्वहिते प्रमाद्यन्तं कुटुम्बिनं त्वं मे भर्ता त्वं पितेत्येवं गृह इव चित्ते प्रविश्य गोमायुतुल्या दारपुत्रादयः सार्थिकं सार्थे स्थितमन्नवस्त्रादिसम्पुटं हरन्ति इतस्ततः कर्षन्ति यथा रक्ष्यमाणमप्युरणं मेषं वृका हरन्ति ॥ २ ॥ प्रभूतेति ॥ प्रभूतैर्बहुभिः वीरुधो लताः तृणानि गुल्मानि लतादिजालानि तैर्गह्वरस्थानवत्कामकर्मादिभिर्गह्वरे गृहाश्रमे कठोरैर्दंशैर्मक्षिकाविशेषैर्मशकैश्च तुल्यैर्दुर्जनैः क्वचिदुपद्रुतो भवति प्रारब्धं विना गन्धर्वपुरवद्दुर्लभमघटमानं क्षणान्तरे दुःस्थं च देहगेहदारापत्यादिविषयजातं क्वचित्सत्यतया प्रपश्यति

यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुम्पन्ति कुनायकं बलात् ॥ गोमायवो यत्र हरन्ति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः ॥ २ ॥
प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ॥ क्वचित्तु गन्धर्वपुरं प्रपश्यति क्वचित् क्वचिच्चाशुरयोल्मुकग्रहम् ॥ ३ ॥ निवासतो-
यद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्याम् ॥ क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥ ४ ॥ अदृश्यझिल्ली-
स्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा ॥ अपुण्यवृक्षाञ्छ्रयते क्षुधाऽर्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५ ॥

स्वीकर्तुमुपधावति च क्वचिच्च आशु रयो वेगो यस्य तम् उल्मुकग्रहम् उल्मकाकारो ग्रहः पिशाचस्तद्वदप्राप्तौ मोहकरं प्राप्तौ च कलहाधर्मादिभिर्मरणनरकादिप्रापकं सुवर्णमादेयत्वेन पश्यति ॥ ३ ॥ निवासेति ॥ भो राजन् निवासो वासस्थानं तोयं जलं द्रविणं धनमात्मा देह उपलक्षणमन्येषामपि दारपुत्राद्यभिलषितवस्तूनां तेषु बुद्धिर्यस्य निवासादिष्वात्मा स्वभावो यस्याः सा बुद्धिर्यस्येति वा निवासादिष्वात्मनो ममेदमिति बुद्धिर्यस्येति वा। सोऽटव्यां वने ततस्ततस्तत्र तत्र तत्तत्प्रयोजनसिद्धये धावति। क्वचिच्च रजस्वलाक्षः धूलिपिहितदृष्टिः रजोगुणपिहितदृष्टिश्च वात्या चक्रवातः सेव बंहभ्रमयन्ती या स्त्री तस्यामुत्थितैः पांशुसदृशैः दृष्ट्याच्छादकै रजोगुणकार्यै रागादिभिः कन्दर्पवेगैश्चाप्रकाशमानाः कर्मसाक्षिभूताः दिशः दिग्देवता न जानाति ॥ ४ ॥ अदृश्येति ॥ अदृश्यानां झिल्लीनां भृङ्गारिकासंज्ञानां कीटविशेषाणामिव परोक्षे अप्रियवक्तॄणां दुर्जनानां स्वनैः कर्णयोः शूलं व्यथा यस्य उलूकानाम् इव स्पष्टमप्रियवादिनां राजपुरुषादीनां वाग्भिर्व्यथितोऽन्तरात्मा यस्य क्षुधार्दितः सन् येषां छायापि पापहेतुस्ते अपुण्यवृक्षास्तत्तुल्यान् पापिनः भिक्षायै श्रयते सेवते। क्वचित् मरीचितोयवन्निष्फलत्वेन विज्ञातानपि विषयानभिधावति । यद्वा। मरीचितोयानीव रूप-

CC-0. In Public Domain. Digitization by eGangotri

णलोकान् अभिधावति ॥ ५ ॥ क्वचिदिति ॥ वितोयासु सरित्सु पतितस्य सद्यो गात्रभङ्ग उदकस्यालाभश्च तथेह क्वचित् वितोयाः सरितः इह परत्र च सुखरहितान् पाखण्डानभियाति । निरन्धः अन्नहीनः निरन्न इत्यपि पाठः । परस्परं दायादादिभ्यः अन्नमालषतेऽभिवाञ्छति । क्वचिद्दावबत्सन्तापकं गृहमासाद्य शोकाग्निना तप्तो निर्विद्यते विषीदति । क्व च यक्षराक्षसतुल्यैः राजभिर्हृतमसुवत्प्रेष्ठं धनं यस्य सः मृततुल्यो मूर्च्छितो भवतीत्यर्थः ॥ ६ ॥ शूरैरिति ॥ क्व च क्वचिदन्यैरेव शूरैः प्रबलैर्हृतं स्वं वित्तं यस्य सः अत एव निर्विण्णं विषण्णं चेतो यस्य स शोचन् विमुह्यन् संभ्रमन् कश्मलं मूर्च्छां याति। क्वचिच्च गन्धर्वपुरं मनोरथोपगतं वस्तुतः सुखाजनकं पितृपुत्रादिसमाजं प्रविष्टः सन् सर्वदा दुःखप्रतिकारं कुर्वन्नपि मुहूर्त्तं सुखिवत् प्रमोदते ॥ ७ ॥ चलन्निति ॥ क्वचिन्नगारुरुक्षुः पर्वतारोहणवद्दुष्करं शास्त्रोदितकर्मानुष्ठातुमिच्छुः चलन् पूर्वमेव कण्टकशर्करादितुल्यैर्विघ्नैर्विद्धाङ्घ्रिरभिभूयमानःपदे पदे क्षणे क्षणे विमना इवास्ते विषण्णो भवति।अथ कौटुम्बिकः कुटुम्बे ममत्वाक्रान्तःअभ्यन्तरवह्निना जठराग्निनार्दितः

क्वचिद् वितोयाः सरितोऽभियाति परस्परं चालषते निरन्धः ॥ आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥ शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन् विमुह्यन्नुपयाति कश्मलम् ॥ क्वचिच्च गन्धर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन् मुहूर्तम् ॥७॥ चलन् क्वचित् कण्टकशर्कराऽङ्घ्रिर्नगारुरुक्षुर्विमना इवास्ते ॥ पदे पदेऽभ्यन्तरवह्निनाऽर्दितः कौटुम्बिकः क्रुध्यति वै जनाय ॥ ८ ॥ क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किञ्चिद्विपिनेऽपविद्धः ॥ दष्टः स्म शेते क्व च दन्दशूकैरन्धोऽन्धकूपे पतितस्तमिस्रे ॥ ९ ॥ कर्हि स्म चित् क्षुद्ररसान् विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः ॥ तत्रातिकृच्छ्रं प्रतिलब्धमानो बलाद्विलुम्पन्त्यथ तं ततोऽन्ये ॥ १० ॥ क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते ॥ क्वचिन्मिथो विपणन् यच्च किंचिद्विद्वेषमृच्छत्युत वित्तशाठ्यात् ॥ ११ ॥

पीडितो बुभुक्षितः सन् जनाय दारपुत्रादिजनेभ्यः क्रुध्यति ॥ ८ ॥ क्वचिदिति ॥ क्वचिदजगराहिना निद्रारूपेण निगीर्णो गिलितो विपिनेऽपविद्धः त्यक्तो जनः शव इव शेते न किञ्चिदवैति न जानाति । क्व च क्वचिच्च दन्दशूकादिवदतिक्रूरैर्जनैर्दष्टः पीडितः अन्धो नष्टविवेकः अन्धकूपवद्दुरुत्तरे मोहे पतितस्तमिस्रे तमसा वृते दुःखे शेते लीयते ॥ ९ ॥ कर्हीति ॥ कर्हि स्म चित् कदाचित् क्षुद्ररसान् परदारादीन् विचिन्वन् तत्र मक्षिकाभिरिव तत्स्वामिभिः राजभिश्च विमानितः निहतो बद्धो वा व्यथितो भवति तत्र यद्यतिकृच्छ्रमतिकष्टेन प्रतिलब्धमानः प्राप्तपरदारसम्भोगो भवति तदा ततोऽन्ये बलिनो राजभृत्यादयो बलाद्विलुम्पन्ति तान्यदाऽभियुङ्क्ते तदा ततोऽप्यन्ये हरन्ति स तु भोक्तुं न शक्नोतीत्यर्थः ॥ १० ॥ क्वेति ॥ क्वचिच्च शीतादीनां प्रतिक्रियां निवारणं कर्तुमनीशोऽसमर्थो विषण्ण आस्ते । क्वचिन्मिथः परस्परं विपणन् क्रयविक्रयादिभिर्व्यवहरन् शता आर्षः । यत्किंचित् उत अपि स्वल्पमपि धनमपहरन् वित्तशाठ्याद्धनवञ्चनाद्धेतोर्विद्वेषमृच्छति ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केति ॥ क्वचित्तु तस्मिन् भवारण्ये क्षीणधनोऽत एव शय्यादिहीनोऽतः परं याचमानो यदा परादप्रतिलब्धकामोऽप्राप्तमनोरथस्तदा पारक्ये परकीये वस्तुनि दृष्टिरभिलाषो यस्य स ततोऽवमानं लभते । शय्या प्रसिद्धा आसनं कम्बलादि स्थानं गृहादि विहरन्त्यनेनेति विहारो यानादि ॥ १२ ॥ अन्येति ॥ अन्योन्यं वित्तव्यतिषङ्गेण धनसाङ्कर्येण विनिमयेन वा परस्परजिघृक्षया वा वृद्धो वैरानुबन्धो यस्य तथाभूतोऽपि मिथः परस्परं विवहन् विवाहादि कुर्वन् भवति ।अमुष्मिन्नध्वनि विहरन् भ्रमन् उरुभिः कृच्छ्रैः कष्टैर्वित्तबाधैश्चान्यैरुपसर्गैश्च रोगद्वेषादिभिर्विपन्नो विपदं प्राप्तो मृतो वा भवति ॥१३॥ अध्वनो दुरत्ययत्वं दर्शयति–तानिति ॥ हे वीर तांस्तान् विपन्नान् तत्र तत्र विहाय जातं नवीनं परिगृह्य स हि सार्थो विहरन्नत्र सार्थे कश्चिदतिसमर्थोऽपि यतः प्रस्थितः तं परमेश्वरं प्रति अद्यापि नावर्त्तते । अध्वनः पारं पारप्रापको यो योगस्तं च नोपैति न लभत इत्यर्थः॥१४॥तदेवाह–मनस्विन इति ॥ मनस्विनः शूराः निर्जिता दूरस्था अपि दिग्गजेन्द्रा यैस्तथाभूता अपि अनिर्जितनिकटस्थेन्द्रियाः वृथाशूराः ममेयं भूर्ममेयमिति भुवि

क्वचित् क्वचित् क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः ॥ याचन् परादप्रतिलब्धकामः पारक्यदृष्टिर्लभतेऽवमानम् ॥१२॥ अन्योऽन्यवित्तव्यतिषङ्गवृद्धवैरानुबन्धो विवहन् मिथश्च ॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन् विपन्नः ॥ १३ ॥ तांस्तान् विपन्नान् स हि तत्र तत्र विहाय जातं परिगृह्य सार्थः ॥ आवर्ततेऽद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ॥ १४ ॥ मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः ॥ मृधे शयीरन् नतु तद्व्रजन्ति यन्न्यस्तदण्डो गतवैरोऽभियाति ॥ १५ ॥ प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः ॥ क्वचित् कदाचिद्धरिचक्रतस्त्रसन् सख्यं विधत्ते बककङ्कगृध्रैः ॥ १६ ॥ तैर्वञ्चितो हंसकुलं समाविशन् न रोचयन् शीलमुपैति वानरान् ॥ तज्जातिरासेन सुनिर्वृतेन्द्रियः परस्परोद्वीक्षणविस्मृतावधिः ॥ १७ ॥

निमित्तभूतायां बद्धं वैरं यैस्ते सर्वेऽपि मृधे शयीरन् मृताः परंतु यदध्वनः पारं भगवत्पदं न्यस्तदण्डः सर्वभूताभयदो गतवैरोऽभियाति तत्तु न व्रजन्ति स्म ॥ १५ ॥ सिंहावलोकनेन पुनर्भवाटवीमनुवर्त्तयति–प्रसज्जति इति ॥ क्वापि लतानां भुजाः शाखाः तत्तुल्यसुकुमारस्त्रीभुजाश्रयः सन् तदाश्रया अव्यक्तपदाः अस्फुटाक्षराः कलभाषिपक्षितुल्या ये पुत्रादयस्तेषु स्पृहा यस्य तत्पोषणादावासक्तो भवति । क्वचित्कदाचित् हरिचक्रतः सिंहसमूहादिव कालचक्रनिमित्ताज्जन्ममरणादेः त्रसन् ततो रक्षार्थं कैश्चित्प्रलोभितः बककङ्कगृध्रैरिव पाखण्डैः सख्यं विधत्ते तान्सेवते ॥ १६ ॥ तैरिति ॥ तैः पाखण्डमार्गीयैः वञ्चितः श्रद्धया सेवमानोऽपि ततो रक्षामदृष्ट्वा हंसानां शुद्धानां ब्राह्मणानां कुलमाश्रयते तेषामपि शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनादिकमाचारमरोचयन् अप्रियं पश्यन् वानरतुल्यान् यथेष्टचारिणः शूद्रप्रायान् उपैति तेषां जातिरासेन वानरजातिक्रीडया स्त्रिया सह मिथुनीभावेन सुनिर्वृतेन्द्रियः अत्यन्तं प्रसन्नमनाः स्त्रीपुरुषपरस्परमुखोद्वीक्षणेन विस्मृतोऽवधिर्मरणं येन तादृक् भवति ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

द्रुमेष्विति ॥ द्रुमवत्केवलैहिकार्थेषु गृहेषु रंस्यन् शतार्षः । व्यवायदीनः स्त्रीसंभोगेच्छया कृपणोऽत एव सुतदारवत्सलः पुत्रादिषु प्रीतियुक्तः अतस्तेष्वासक्त्या स्वस्य बन्धने प्राप्ते विवशो भवति । चरन् वने इति पाठे वने संसारे चरन् कचित्प्रमादादधिकान्नभक्षणादेः पापाचरणाद्वा गिरिकन्दरवदतिभयानके रोगादिदुःखे नरकादौ वा पतितस्तत्रापि कन्दरस्थगजवद्भयानकान्मृत्योर्भीतः सन् वल्लीतुल्यं स्वप्राचीनं कर्मावलम्ब्यास्ते ॥ १८ ॥ अत इति ॥ हे अरिन्दम अत आपदः स कथंचित् दुःखं भुक्त्वा विमुक्तोऽपि स्वर्गादिलोकं गतो वा पुनश्च सार्थं प्रविशति । यथा पूर्वं प्रवृत्तिमार्गे एव रमते न दुःखानुसन्धानेन ततो विरज्यते । अमुष्मिन्नध्वनि प्रवृत्तिमार्गेऽजया भगवन्मायया निवेशितो जनो भ्रमन् कश्चनातिसमर्थोऽप्यद्याप्यध्वनः पारं हरिं न वेद ॥ १९ ॥ रहूगणेति ॥ हे रहूगण हि यस्मात् त्वमप्यध्वनि निवेशित एवेत्यनुषङ्गः अतः संन्यस्तस्त्यक्तो भूतेषु दण्डः पीडा येन सः तथा कृता भूतेषु मैत्री कृपा येन सः तथा न सज्जितः विषयेषु आसक्त आत्मा मनो यस्य सः तथाभूतः सन्नित्यर्थः । हरिसेवया शितं तीक्ष्णीकृतं

द्रुमेषु रंस्यन् सुतदारवत्सलो व्यवायदीनो विवशः स्वबन्धने ॥ क्वचित् प्रमादाद् गिरिकन्दरे पतन् वल्लीं गृहीत्वा गजभीत आस्थितः ॥ १८ ॥
अतः कथंचित् स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिन्दम ॥ अध्वन्यमुष्मिन्नजया निवेशितो भ्रमञ्जनोऽद्यापि न वेद कश्चन ॥ १९ ॥
रहूगण त्वमपि ह्यध्वनोऽस्य संन्यस्तदण्डः कृतभूतमैत्रः ॥ असज्जितात्मा हरिसेवया शितज्ञानासिमादाय तरातिपारम् ॥ २० ॥ राजोवाच ॥
अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ॥ न यत् हृषीकेशयशः कृतात्मनां महात्मनां वः प्रचुरः समागमः ॥ २१ ॥
न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ॥ मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥ २२ ॥ नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ॥ ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ॥ २३ ॥

ज्ञानलक्षणमसिमादाय मायां छित्त्वास्याध्वनोऽतिशयितं पारं हरिमतितर गच्छेत्यर्थः । "छन्दसि परेऽपि" इत्यतेः परत्वम् ॥ २० ॥ अहो इति ॥ अहो अतिशयेनाखिलजन्मसु शोभनं नृजन्मैवेत्यन्वयः । अमुष्मिन् न परं श्रेष्ठं येभ्यस्तैरपरैर्देवादिजन्मभिरपि तु किं फलं नैव किंचित् फलं भवतीत्यर्थः । तथा अमुष्मिन् स्वर्गे वा जन्मभिः किं यत् येषु जन्मसु यत्र स्वर्गे वा हृषीकेशस्य यशसा कृतः शोधितः आत्मान्तःकरणं यैस्तेषां वो युष्माकं महात्मनां समागमः प्रचुरो न भवति ॥ २१ ॥ नेति ॥ सर्वदोषासितैः त्वच्चरणाब्जरेणुभिर्हतमंहो यस्य तस्याधोक्षजे भगवति अमला भक्तिर्भवतीति नैवाद्भुतं नैवाश्चर्यम् । हि यस्मात् यस्य तव मुहूर्तमात्रभवत्समागममात्रादेव दुस्तर्केण बद्धमूलोऽपि मे ममाविवेकोऽपहतो विनष्टः ॥ २२ ॥ नम इति ॥ महद्भ्यो वृद्धेभ्यो नमोऽस्तु । शिशुभ्यो बालेभ्यो नमोऽस्तु । युवभ्यो नमोऽस्तु । आवटुभ्यः बटवो ब्रह्मचारिणस्तानभिव्याप्य सर्वेष्वाश्रमेषु ये ब्रह्मविदस्तेभ्यः यद्वा ये बटवः क्रीडारतत्वादश्रद्धेयास्तानप्यभिव्याप्य सर्वेभ्यो नमोऽस्तु । ये ब्राह्मणा ब्रह्मविदोऽवधूतलिङ्गाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवधूतवेषेणासंभावितज्ञातिस्वरूपाः गां पृथिवीं चरन्ति तेभ्यो राज्ञां शिवं कल्याणमस्तु ॥ २३ ॥ इतीति ॥ उत्तरा माता यस्य तत्सम्बोधनं हे उत्तरामातः कवभाव आर्षः । इत्येवं स वै ब्रह्मर्षिसुतः सिन्धुपतये रहूगणाय विगणयतः षष्ठी चतुर्थ्यर्थे । स्वापमानं कुर्वतेऽपि परमकारुणिकतया आत्मनः सतत्वं स्वरूपमुपदिश्य " शीलं सतत्वं संसिद्धिः " इति स्वरूपनामसु हैमः । तेन रहूगणेन सकरुणं सदैन्यं यथा भवति तथाभिवन्दितचरणः परानुभावः निभृताः उपशान्ताः करणानामूर्मयो यस्मिन् स आशयोऽन्तःकरणं यस्य सः आपूर्णोऽर्णव इव स इमां धरणीं विचचार ॥ २४ ॥ सौवीरेति ॥ सौवीरपती रहूगणोऽपि सुजनात् तस्मात् भरतात् सम्यगवगतं परस्यात्मनः सतत्त्वं येन तथाभूतः संस्तदानीमेवात्मनि अविद्ययाध्यारोपितां तां देहात्ममतिं विससर्ज तत्याज । आश्चर्येण संबोधयति । हे नृप भगवदाश्रितो यो भरतस्तदाश्रितो यो

श्रीशुक उवाच ॥ इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिन्धुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवन्दितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥ २४ ॥ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याऽध्यारोपितां देहात्ममतिं विससर्ज ॥ एवं हि नृप भगवदाश्रिताश्रितानुभावः ॥ २५ ॥ राजोवाच ॥ यो ह वा इह बहुविदा महाभागवत त्वयाऽभिहितः पारोक्ष्येण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नाञ्जसाऽव्युत्पन्नलोकसमधिगमः ॥ अथ तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥ २६ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे रहू० सूक्ष्मभवाटव्युपवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

रहूगणस्तस्याप्यनुभावः प्रभाव एवंभूतः सद्यो देहाद्यहंममभावत्यागसामर्थ्यलक्षणो जातः ॥ २५ ॥ य इति ॥ हे महाभाग बत त्वया बहुविदा सर्वज्ञेनेह भरतरहूगणसंवादे पारोक्ष्येण वचसा वणिक्सार्थरूपकेण यो जीवलोकस्य भवाध्वा संसारमार्गोऽभिहितः कथितः स ह्यार्याणां विवेकिनां मनीषया बुद्ध्या कल्पिता विषयाः दस्युगोमाय्वादिस्थानीया इन्द्रियपुत्रादयो यस्मिंस्तादृशः अतोऽव्युत्पन्नस्य तादृक्कल्पनाशक्तिरहितस्य लोकस्याञ्जसा साक्षात् व्याख्यानं विना न समधिगमः सम्यगधिगम्यो न भवति । अथ तस्मात् तदेतदेव भवाध्वस्वरूपं समवेतानुकल्पेन प्रस्तुते तत्तदनुरूपदार्ष्टान्तिकवाचकशब्दोपकल्पनेन निर्दिश्यतां निरूप्यताम् ॥ २६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो निरमात्पञ्चमस्य त्रयोदशे ॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशे भवारण्यरूपकव्याकृतिः कृता ॥ राज्ञे शुकेनात्र गद्यपद्यान्यङ्कपयोधयः ॥ उवाचेत्येकमेवाथो एकाशीतिरनुष्टुभः ॥ १४ ॥ स हेति ॥ यः परीक्षिता पृष्टः स श्रीशुकः ह हर्षेणोवाचेति सूतो वदति। तत्र "दुरत्ययेऽध्वनि" इति व्याचष्टे—य इति ॥ यथाय एष प्रसिद्धो वणिजां सार्थः समूहोऽर्थार्जनपरः कुशकण्टकशर्करादिभिरसुगमे मार्गे पतितोऽटवीं याति तथायं जीवलोको भगवत ईश्वरस्य विष्णोर्वशवर्तिन्या मायया मोहितोऽतस्तत्सुखार्थी सन् स्वदेहनिष्पादितानां कर्मणां दुःखादिफलद्वारेणानुभवो यस्य सः विफलाश्च बहुप्रतियोगाः बहुविघ्नाश्च ईहाश्चेष्टाः क्रिया यस्य तथाभूतः देहात्ममानिनामज्ञानां संबन्धिनो मोहकास्तदध्यासनिमित्तभूता ये सत्त्वादयो गुणविशेषास्तैर्विकल्पितानि भिन्नानि कुशलानि सत्त्वेन पुण्यानि अकुशलानि तमसा पापानि तेषां समवहारभूतानि रजसा मिश्राणीति यानि त्रिविधानि कर्माणि तैर्विनिर्मिताभिर्विविधप्रकाराभिर्देवतिर्यङ्मनुष्यादिदेहावलीभिर्वियोगसंयोगादिलक्षणो योऽनादिः संसारस्तदनुभवस्य द्वारभूतेन पञ्च ज्ञानेन्द्रियमनोलक्षणेन षडिन्द्रियवर्गेण तस्मिन् प्रसिद्धकण्टकादिभिर्दुर्गाध्ववत् प्रसि-

स होवाच ॥ य एष देहात्ममानिनां सत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन् दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविन्दमधुकरानुपदवीमवरुन्धे ॥१॥ यस्यामु ह वा एते षडिन्द्रियनामानः कर्मणा दस्यव एव ते ॥२॥ तद् यथा पुरुषस्य धनं यत्किंचित्साक्षाद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात् परमपुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु सांपराय उदाहरन्ति॥ तद् धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्याजितात्मनो यथा सार्थस्य तथाऽजितात्मनो विलुम्पति ॥ ३ ॥

द्धदुर्गमार्ग इव दुःखशोकश्रमधनव्ययादिसाध्यत्वेनासुगमेऽध्वनि प्रवृत्तिमार्ग आपतितः संसाराटव्यां गतोऽद्यापि तत्तापोपशमनीं तस्यां संसाराटव्यां ये आध्यात्मिकाद्यास्तापास्तेषामुपशमनीं नाशनीं हरिगुरुचरणारविन्देषु ये मधुकरा इव सेवकास्तेषामनुपदवीं तैरनुष्ठितं भक्तिमार्गं नावरुन्धे न प्राप्नोति ॥१॥ "यस्यामिमे" इत्येतद्व्याचष्टे—यस्यामिति ॥ यस्यां भवाटव्याम् ॥ २ ॥ तद्यथेति ॥ तत् इन्द्रियाणां दस्युत्वं यथास्ति तन्निबोधेति शेषः । कुनाथस्य कुबुद्धेरजितात्मनः अवशीकृतचित्तस्य पुरुषस्य यत्किंचिद्बहुना कृच्छ्रेणाधिगतं प्राप्तं साक्षाद्धर्मौपयिकं धर्मकारणं धनं तद्धर्म्यं धर्मार्हं धनं योऽसौ साक्षात्फलाभिसान्धिमन्तरेणैव परमपुरुषस्य पुरुषोत्तमस्य भगवत आराधनलक्षणो धर्मः स एव धर्मत्वेनाभिप्रेतः । कुतो यतस्तं तु तमेव साम्पराये परलोके परमपुरुषार्थहेतुत्वेनोदाहरन्ति वृद्धाः कथयन्ति तद्धनमिन्द्रियाणि दर्शनादिभिर्यो गृहे ग्राम्य उपभोगस्तेन विलुम्पन्ति नाशयन्तीत्यन्वयः । तत्र दर्शनाद्याः पञ्च ज्ञानेन्द्रियाणां वृत्तयः संकल्पव्यवसायौ मनसः । यथा स्वामिहिताचिन्ताशून्यश्चौरैः सह कृतमैत्रः कुत्सितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायको रक्षको यस्य तस्य अजितात्मनोऽसावधानचित्तस्य सार्थस्य धनं यथा चौरा विलुम्पन्ति तथेत्यर्थः ॥ ३ ॥ " गोमायवो यत्र हरन्ति " इत्येतद्व्याचष्टे—अथेति ॥ अथ चेत्यर्थान्तरोपन्यासे। यत्र संसारमार्गे कौटुम्बिका नाम्ना दारपुत्रादयोऽपि कर्मणा तु वृकशृगाला एव यत उचितधर्मस्वशरीरादिनिर्वाहार्थमपि धनव्ययमनिच्छतोऽपि कुटुम्बिनः कदर्यस्यातिलुब्धस्य प्रयत्नेन रक्ष्यमाणमपि धनं तस्य मिषतः पश्यत एव त्वं मम भर्त्ता पिता त्वदीयमिदमस्मदर्थमिति वदन्तो हरन्ति। तत्र दृष्टान्तमाह—उरणकवदिति। यथा पालकेन स्वामिना संरक्ष्यमाणमप्युरणकं मेषं वृका बलाद्धरन्ति तद्वदित्यर्थः ॥ ४ ॥ " प्रभूतवीरुत्तृणगुल्मगह्वरे " इत्येतद्व्याचष्टे—यथा हीति ॥ यथा हि अन्नक्षेत्रमनुवत्सरं प्रतिवर्षं हलादिना कृष्यमाणं कर्षणादिना तृणादिनिःसारणेन शोध्यमानमपि न दग्धानि बीजानि यस्मिंस्तथाभूतं सत् आवपनकाले पुनरेव गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येवमेवायं गृहाश्रमः कर्मक्षेत्रं यस्मिन् कदापि कर्माणि न ह्युत्सीदन्ति न शाम्यन्ति। तत्र हेतुमाह यदिति। यत् यस्मात् योऽयमावसथ आश्रयः स एष कामानां

अथ च यत्र कौटुम्बिका दारापत्यादयो नाम्ना कर्मणा वृकशृगाला एव अनिच्छतोऽपि कदर्यस्य कुटुम्बिन उरणकवत् संरक्ष्यमाणं मिषतोऽपहरन्ति ॥ ४ ॥ यथा ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवति ॥ एवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन् न हि कर्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः ॥ ५ ॥ तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभशकुन्ततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणः क्वचित् परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसाऽनुपपन्नार्थं नरलोकं गन्धर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥ ६ ॥ तत्र च क्वचिदातपोदकनिभान् विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ॥ ७ ॥

नानाविधमनोरथानां करण्डः भाजनविशेषः। यथा कर्पूरादिभाजने कर्पूराद्यपगमेऽपि तद्वासना न हीयते तथैकमनोरथे सिद्धेऽपि तद्वासना न गच्छति। तथा च मनोरथासमाप्तेस्तत्प्रयुक्तकर्मासमाप्तिरित्यर्थः ॥ ५ ॥ " कठोरदंशैर्मशकैरुपद्रुतः " इत्यादिर्व्याचष्टे—तत्रेति ॥ तत्र गृहाश्रमगतः क्वचिद्दंशमशकसमैः पीडाकरैरपसदैर्नीचैर्मनुजैः शलभशकुन्ततस्करमूषकादिभिश्चोपरुध्यमानः प्रपीड्यमानो बहिःप्राणः धनं यस्य "वित्तम् बहिश्चराः प्राणाः" इत्यभियुक्तोक्तेः। उपरुध्यमानबहिःप्राण इत्येकं पदम्। अस्मिन्नध्वनि प्रवृत्तिमार्गे परिवर्त्तमानः परिभ्रमन्नविद्यया कामकर्मभिश्चोपरक्तेन व्याप्तेन मनसा हेतुना मिथ्या दृष्टिर्दर्शनं ज्ञानं यस्य स गन्धर्वनगरवदनुपपन्नार्थमनुपपन्नाः क्षणान्तरे दुःस्था अघटमानाश्च अर्थाः पदार्था यस्मिंस्तथाभूतं नरलोकमुपपन्नमनश्वरं सत्यमित्यनुक्षणं पश्यति ॥ ६ ॥ प्रपश्यतीति प्रशब्दसूचितमर्थं दर्शयति—तत्रेति ॥ पानभोजनव्यवायादिषु व्यसनेन लोलुपो लम्पटः सार्थः आतपोदकनिभान् मृगतृष्णाजलतुल्यान् प्रारब्धं विना सर्वथा दुर्लभान् मिथ्याभूतांश्च विषयान् स्वीकर्तुं क्वचिदुपधावति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यान्मन्यते च ॥ ७ ॥ " क्वचित् क्वचिचाशुरयोल्मुकग्रहम् " इत्येतद्व्याचष्टे–क्वचिदिति ॥ क्वचिच्चाशेषाणां दोषाणां हिंसापरस्त्रीगमनद्यूतमद्यपानादीनां निषदनं स्थानं कारणं पुरीषविशेषम् अग्नेर्विष्ठारूपं सुवर्णमुपलक्षणतया परद्रव्यमात्रं तस्य सुवर्णस्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता उत्पादिता तद्विषया मतिर्यस्य सः उपादित्सति न्यायतोऽन्यायतो वा उपादातुमिच्छति । यथारण्ये शीतनिवृत्तयेऽग्निकामेन कातरः परवशः अग्निवज्जाज्वल्यमानं ततस्ततो धावन्तमुल्मुकसदृशं पिशाचमग्निबुद्ध्यानुधावति न च प्राप्नोति प्राप्तश्चेत्तेन भक्ष्यते । एवं सुवर्णं जिघृक्षुस्तन्न प्राप्नोति प्राप्नोति चेत्पापरतो नरकमनुभवति ॥ ८ ॥ " निवासतो यद्द्रविणात्मबुद्धिः " इत्येतद्व्याचष्टे–अथेति ॥ अथ निवासो वासः स्थानं पानीयं द्रविणं च इत्यादिषु अनेकेषु आत्मनः स्वस्योपजीव्येष्वभिनिवेशो यस्य स एतस्यां संसाराटव्यामितस्ततः परिधावति ॥ ९ ॥ "क्वचिच्च वात्योत्थित"इत्येतद्व्याचष्टे–क्वचिच्चेति ॥ क्वचित्कदाचिच्च वात्यया चक्रवातेन सह औपम्यमुपमा यस्याः चाञ्चल्येन मोहोत्पादकत्वेन च चक्रवातसदृश्या प्रमदया आरोहमङ्कमारोपितस्तस्मिन् काले यत् रजः कामवेगः तेन रजस्वलाक्षो विनष्टविवेकः अतिशयेन रजस्वला मतिर्यस्य सः कामान्धः अत एवा-

क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचम् ॥ ८ ॥ अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति ॥ ९ ॥ क्वचिच्च वात्यौपम्यया प्रमदयाऽऽरोहमारोपितस्तत्कालरजसा रजनीभूत इवासाधुमर्यादो रजस्वलाक्षो दिग्देवता अतिरजस्वलमतिर्न विजानाति ॥ १० ॥ क्वचित् सकृदवगतविषयवैतथ्यः स्वयं पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्तानेवाभिधावति॥ ११ ॥क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षं परोक्षं वा रिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥ स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुण्डाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान् जीवन्मृतान् स्वयं जीवन् म्रियमाण उपधावति ॥ १२ ॥

साधुमर्यादस्त्यक्तमर्यादो रजनीभूता इवादृश्याः सर्वतः सञ्चारिण्यस्तत्तत्कर्मसाक्षिभूता दिग्देवता न विजानाति । रजनीभूत इति पुंस्त्वपाठे तमोमय इत्यर्थः ॥ १० ॥ "मरीचितोयानभिधावति" इत्येतद्व्याचष्टे–क्वचिदिति ॥ क्वचित् स्वयमेव सकृदवगतं विषयाणां वैतथ्यं विफलत्वं दुःखहेतुत्वं च येन स तथाभूतोऽपि पराभिध्यानेन देहात्माभिमानेन विभ्रंशिता स्मृतिर्यस्य सः तयैव विभ्रंशितया स्मृत्यैव स्मृतिभ्रंशादेवेत्यर्थः । दुर्लभत्वेन दुःखहेतुत्वेन मनोरथापूरकत्वेन च मरीचितोयतुल्यांस्तान् विषयानेवाभिधावति तत्प्राप्तिव्यापारक्लिष्टो भवतीत्यर्थः । क्वचिदातपोदकनिभानित्यत्र मिथ्याविषयेषु लम्पटत्वं निवासतोयेत्यत्र तदर्जनप्रयासः । अत्र बाधितेष्वपि पुनः प्रवृत्तिरुच्यते इत्यपौनरुक्त्यम् । वस्तुतोऽत्र पूर्वाध्यायक्रमोल्लङ्घनेन पौनरुक्त्येनापि चात्राध्याये व्याख्यानं न दोषाय । न हि महाटव्याः सर्वः पन्था ऋजूकरणीय एवेति नियमः॥ ११ ॥ "अदृश्यझिल्ली " इत्येतद्व्याचष्टे–क्वचिदिति ॥ क्वचिदुलूकझिल्लीस्वनवदतिपरुषः दुःसहः रभस उत्साहस्तेनाटोपः संभ्रमो यथा भवति तथा प्रत्यक्षं परोक्षं वा रिपूणां राजकुलस्य च निर्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्सितेन दुर्वचनेनातिव्यथितं कर्णमूलं हृदयं च यस्य तादृग्भवति। "अपुण्यवृक्षान्" इति व्याचष्टे—स इति। यदा दुग्धमुपभुक्तं पूर्वं सुकृतं पुण्यं येन स तथाभूतो भवति तदा कारस्करो विषतिन्दुः काकतुण्डश्च निषिद्धवृक्षविशेषस्तत्प्रमुखा येऽपुण्यद्रुमास्तथाविधा लताश्च विषोदपाना विषयुक्ताः कूपाश्च तद्वदुभयार्थशून्यद्रविणान् दृष्टादृष्टप्रयोजनशून्यधनान् जनान् अत एव जीवन्मृतान् स्वयमपि जीवन् म्रियमाण एव उपधावति विषयभोगार्थं धनाशया सेवते ॥ १२ ॥ "क्वचिद्वितोयाः सरितोऽभियाति" इत्येतद्व्याचष्टे—एकदेति ॥ एकदा कदाचिदसतां यः प्रकृष्टः सङ्गस्तस्मात् निकृता वञ्चिता मतिर्यस्य स इह निन्दाहेतुत्वेन परत्र नरकपातादिहेतुत्वेन चोभयतोऽपि दुःखपाखण्डवेदविरुद्धमार्गमभियाति। यथा ह्युदकस्रोतासि निर्जलनदीगर्ते पतितस्य सद्यः शिरः स्फुटति पश्चादपि च तद्वेदना वर्त्तते न चोदकलाभो भवति एवमिह परत्र च दुःखदम् ॥ १३ ॥ "परस्परं चालषते निरन्धः" इत्येतद्व्याचष्टे—यदा त्विति ॥ यदा तु भाग्यहीनत्वात् परकृतया शत्रुकृतया कालकृतया वा बाधया हेतुना परेषां बाधया पीडाप्रदया जीविकयापि वा आत्मने अन्धः अन्नं नोपनमति नोपतिष्ठति तदा पितृपुत्रबर्हिष्मतः पितुः पुत्राणां वा कुशादितृणवदतितुच्छमपि वस्तु येषु विद्यते तान् पितृपुत्रान्

एकदाऽसत्प्रसङ्गान्निकृतमतिर्व्युदकस्रोत स्खलनवदुभयतोऽपि दुःखदं पाखण्डमभियाति ॥ १३ ॥ यदा तु परबाधयाऽन्ध आत्मने नोपनमति तदा हि पितृपुत्रबर्हिष्मतः पितृपुत्रान् वा खलु भक्षयति ॥ १४ ॥ क्वचिदासाद्य गृहं दाववत् प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ॥ १५ ॥ क्वचित् कालविषमितराजकुलरक्षसाऽपहृतप्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते ॥ १६ ॥ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत् सदिति स्वप्ननिर्वृतिलक्षणमनुभवति ॥ १७ ॥ क्वचित् गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्षितमनाः कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ १८ ॥

वा अपि स भक्षयति बलेन विवादादिना वा बाधते। पितृपुत्रबर्हिष्ठानिति वा पाठः ॥ १४ ॥ "आसाद्य दावम्" इत्येतद्व्याचष्टे—क्वचिदिति ॥ दाववत् ज्वलद्वनवत् प्रियार्थविधुरं प्रत्युत असुखं दुःखमुदर्कमुत्तरोत्तरफलं यस्मिंस्तथाभूतं गृहमासाद्य प्राप्य शोकाग्निना दह्यमानः क्वचिद्भृशमत्यन्तं निर्वेदमुपगच्छति विषादं प्राप्नोति ॥ १५ ॥ "क्व च यक्षैर्हृतासुः" इत्येतद्व्याचष्टे—कचिदिति ॥ क्वचित्कालेन विषमितं प्रतिकूलतां नीतं यद्राजकुलं तदेव रक्षस्तेनापहृताः प्रियतमा धनरूपा असवो यस्य सः अत एव प्रमृतक इव विगतानि जीवलक्षणानि हर्षचेष्टादीनि यस्य स तथाभूतः शोकमूर्च्छितो वा आस्ते। "शूरैर्हृतस्वः" इत्येतदप्यनेनैव व्याख्यातमिति ज्ञेयम् ॥ १६ ॥ "क्वचिच्च गन्धर्वपुरं प्रविष्टः" इत्येतद्व्याचष्टे—कदाचिदिति ॥ कदाचिन्मनोरथेनोपगतं प्राप्तं पितृपितामहादि असदपि मृतमपि सत् परलोकादागतमिति मत्वा दुःखदमपि सुखदं मत्वा वा स्वप्ननिर्वृत्तिलक्षणं स्वप्नसुखसदृशं सुखमनुभवति। पूर्वं गन्धर्वनगरवदघटमानदर्शनमुक्तमिदानीं तन्निमित्तसुखासक्तिरिति भेदः ॥ १७ ॥ "चलन् क्वचित्" इत्येतद्व्याचष्टे—क्वचि-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

दिति ॥ गृहाश्रमे याः कर्मचोदनाः विधयः उपलक्षणं पुत्रविवाहादेः तासामतिभरोऽतिविस्तारः स एव गिरिस्तमारुरुक्षन् अनुष्ठानेन तदन्तं गन्तुमिच्छन् पूर्वमेव प्रतिदिनभोजनाच्छादनादिव्यवहारनिर्वाहनिमित्तसञ्चितऋणादिना क्लिष्टः ततश्च लोके लोकव्यवहारे यद्व्यसनमभिनिवेशस्तेन कर्शितं वशीकृतं मनो यस्य सः प्रतिवेशिभिः कृतं महत्कर्म दृष्ट्वा एते महत्कुर्वन्ति अहं कथं न करोमीति क्षुभितचित्तः कण्टकशर्कराक्षेत्रं प्रविशन्निव क्वचित्सीदति ॥ १८ ॥ "पदे पदेऽभ्यन्तरवह्निनार्दितः" इत्येतद्व्याचष्टे—क्वचिदिति ॥ क्वचिच्च दुःसहेन सोढुमशक्येन कायाभ्यन्तरवह्निना जाठराग्निना गृहीतसारः हृतधैर्यः स्वकुटुम्बाय दारपुत्रादिलक्षणाय क्षुधापीडितो विवशीभूतः क्रुध्यति ॥ १९ ॥ "क्वचिन्निगीर्णः" इत्येतद्व्याचष्टे—स एवेति ॥ य एव दिवसे जाग्रदवस्थायां नानाव्यापारवान् स एव रात्रौ पुनर्निद्रारूपेणाजगरेण गृहीतो दष्टोऽतोऽन्धे तमसि अज्ञानरूपे मग्नः शून्येऽरण्येऽपविद्धस्त्यक्तः शव इव शेते नान्यत्किञ्चन वेदेत्यन्वयः ॥ २० ॥ "दष्टः स्म शेते क्व च दन्दशूकैः" इत्येतद्व्याचष्टे—कदाचिदिति ॥ दुर्जना एव पीडाकरत्वाद्दन्दशूका वृश्चिकादयस्तैर्भग्ना मान एव दंष्ट्रा पीडाकरत्वात् यस्य सः अत एव न लब्धो निद्रायाः क्षणोऽवसरोऽपि येन स व्यथितेन हृदयेन हेतुनानुक्षणं क्षीयमाणं विज्ञानं

क्वचिच्च दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः स्वकुटुम्बाय क्रुध्यति ॥ १९ ॥ स एव पुनर्निद्राऽजगरगृहीतोऽन्धे तमसि मग्नः
शून्यारण्य इव शेते नान्यत् किंचन वेद शव इवापविद्धः ॥ २० ॥ कदाचिद् भग्नमानदंष्ट्रो दुर्जनदन्दशूकैरलब्धनिद्राक्षणो व्यथितहृदये-
नानुक्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत् पतति ॥२१॥ कर्हि स्म चित् काममधुलवान् विचिन्वन् यदा परदारपरद्रव्याण्यवरुन्धानो राज्ञा
स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २२ ॥ अथ च तस्मादुभयथाऽपि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरन्ति ॥ २३ ॥
मुक्तस्ततो यदि बन्धाद् देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः ॥ २४ ॥

यस्य सोऽन्धकूपसदृशे महामोहे पतति । तत्र दृष्टान्तमाह—अन्धकूपेऽन्धवदिति । यथान्धकूपे पतितस्यान्धस्य ततो निःसरणं दुर्घटं तथा मोहे निमग्नस्याज्ञस्य ततो निःसरणं दुर्घटमित्यर्थः ॥ २१ ॥ "कर्हि स्म चित् क्षुद्ररसान् विचिन्वन्" इत्येतद्व्याचष्टे—कर्हि स्म चिदिति ॥ कदाचिच्च काममधुलवान् विचिन्वन् भोगजन्यानि मधुवदादौ मनोज्ञानि सुखान्यभिकाङ्क्षन् यदा परदारपरद्रव्याणि परस्त्रीधनवस्त्रादीनि अवरुन्धान आहरन् भवति तदा राज्ञा तत्स्वामिभिर्वा हतोऽपारेऽनन्ते निरये नरके पतति कारागृहादिषु निबद्धो वा भवतीत्यपि ज्ञेयम् । मुक्तस्तत इत्यग्रे वक्ष्यमाणत्वात् ॥ २२ ॥ अथेति ॥ अथ च यस्माचैवं तस्मादुभयथापि इहामुत्र वा पापं पुण्यं वा लौकिकं शास्त्रीयं च वा कर्मास्मिन् प्रवृत्तिमार्ग आत्मनो जीवस्य संसारावपनं जन्ममरणसंसारस्य कारणमुदाहरन्ति । ऋषयो वेदा वेति शेषः ॥ २३ ॥ "तत्रातिकृच्छ्रं प्रतिलब्धमानः" इत्येतद्व्याचष्टे—मुक्त इति ॥ यदि कथंचित्ततो बन्धात् तत्स्वामिदत्तबन्धप्रहारादितः द्रव्यव्ययादिना मुक्तस्तदा तान्परदारान् ततः सकाशादेभ्यो देवदत्त उपाच्छिनत्ति बलादाहरति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादप्यन्यो विष्णुमित्र आहरतीत्येवमनवस्थितिः आहरणपरम्परा भवति न त्वसौ भोक्तुं शक्नोति ॥२४॥ "क्वचिच्च शीतातपे"इत्येतद्व्याचष्टे—क्वचिच्चेति ॥ शीतादयोऽनेका आधिदैविकाद्या या दशा दुःखावस्थास्तासां प्रतिनिवारणेऽकल्पोऽसमर्थो दुरन्तया चिन्तया विषण्ण आस्ते॥२५॥"क्वचिन्मिथो विपणन्" इत्येतद्व्याचष्टे—क्वचिदिति॥ क्वचिन्मिथो यत्किंचिद्धनं व्यवहरन् काकिणिकामात्रं विंशतिकपर्दिकामात्रं वा ततोऽपि न्यूनं वा यत्किञ्चिदन्येभ्योऽपहरन् भवति तदा ततो वित्तशाठ्याद्धनवञ्चनाद्विद्वेषमेति॥२६॥ अध्वनीति ॥ अमुष्मिन्नध्वनि प्रवृत्तिमार्ग इमे पूर्वोक्ता उरुकृच्छ्रवित्तबाधादयस्तथात्रोक्ताः सुखदुःखरागादयश्चोपसर्गाः ॥ २७ ॥ " व्युत्क्रमैः पुनरुक्तैश्च नानापाठैरतः परम् । दुर्गमोऽपि भवाध्वायं संप्रदायेन तीर्यते ॥ प्रसज्जति क्वापि " इत्यादि व्याचष्टे—क्वापीति ॥ क्वापि देवमायया स्त्रिया स्वभुजलताभ्यामुपगूढोऽतिबद्धः अत एव प्रस्कन्नमपगतं कार्याकार्यविवेकविज्ञानं यस्य सः अत एवाकार्ये प्रवृत्त इत्याह । यस्याः स्त्रिया विहारार्थं गृहारम्भ आकुलं हृदयं यस्य सः तस्याः स्त्रिया आश्रये गृहे अवसक्ताः संलग्नाः

क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारण अकल्पो दुरन्तचिन्तया विषण्ण आस्ते ॥ २५ ॥ क्वचिन्मिथो व्यवहरन् यत्किंचिद् धनमन्येभ्यो वा काकिणिकामात्रमपहरन् यत्किंचिद् वा विद्वेषमेति वित्तशाठ्यात् ॥ २६ ॥ अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्याऽवमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥ २७ ॥ क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारम्भाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेऽन्धे तमसि प्रहिणोति ॥ २८ ॥ कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात् परमाण्वादिद्विपरार्धापवर्गोपलक्षणात् परिवर्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तम्बादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायुधं साक्षाद् भगवन्तं यज्ञपुरुषमनादृत्य पाखण्डदेवताः कङ्कगृध्रबककवटप्राया आर्यसमयपरिहृताः साङ्केत्येनाभिधत्ते ॥ २९ ॥

सुता दुहितरश्च कलत्रं च तत्सुतवधूः सैव स्त्री च तेषां भाषितावलोकविचेष्टितैरपहृतं हृदयं यस्य सः अजितात्मा एवं प्रवृत्त्या आत्मानमपारेऽन्धे तमसि प्रहिणोति दुस्तरेऽत्यन्तदुःखहेतौ नरके प्रक्षिपति ॥ २८ ॥ " क्वचित्कदाचिद्धरिचक्रतस्त्रसन् " इत्येतद्व्याचष्टे—कदाचिदिति ॥ कदाचित् ईश्वरस्य भगवतो विष्णोः परमाणुरादिर्द्विपरार्धोपवर्गः अन्तो यस्य सः काल उपलक्षणं नामान्तरं यस्य । कालोपलक्षणादिति पृथक्पदपाठे कालस्वरूपादित्यर्थः । परमाण्वादिद्विपरार्द्धापवर्गेण । कालेन उप आधिक्येन लक्षणं यस्य इति वा तस्मात् द्विपरार्द्धापवर्गात् रंहसा अतिवेगेन परिवर्तितेन परिभ्रमणेन वयसा बाल्ययुवादिक्रमेण।आब्रह्मेत्यादयः कर्मणि षष्ठ्यः । ब्रह्माणमभिव्याप्य तृणस्तम्बादीनि भूतानि मिषन्त्येव हरतः संहरतः । यद्वा । भूतानामायुर्हरत इत्यध्याहारेणान्वयः । अनिमिषतः निमेषमप्यकुर्वतः अप्रमत्तात् चक्रात् वित्रस्तहृदयः तमेवेश्वरं काल-

Nepal Sanskrit University, Balmeeki Campus Library

चक्रमेव निजमायुधं यस्य तं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य कङ्कगृध्रबकप्रायाः कङ्कादयो यथा सिंहसमूहाद्रक्षितुमशक्तास्तथा पाखण्डदेवता अपि कालचक्रतो रक्षितुं साम-र्थ्यहीना एवेत्यर्थः । अत एव आर्यसमये शिष्टाचारे परिहृताः सेव्यतया अनङ्गीकृताः पाखण्डदेवताः साङ्केत्येन मूलप्रमाणशून्येन पाखण्डिनिर्मितशास्त्रेणाभिधत्ते सेव्यतया-दरेण स्वीकरोति ॥ २९ ॥ " तैर्वञ्चित " इत्येतद्व्याचष्टे—यदा त्विति ॥ यदा तु स्वरक्षासंदेहेन यथेष्टधनाद्यदानादात्मना वञ्चितैस्तैः पाखण्डिभिः कालतो रक्षां विनापि धनादिहरणादुरु अधिकं वञ्चितः स्वगणान्निःसारितस्तदा सुस्वभावानां ब्राह्मणानां कुलं समावसन् भवति तत्सङ्गत्या कालाभयमत्येतुमिच्छति ततश्च तेषां तु शीलमुपनयन-गुरुकुलवासादिश्रौतस्मार्त्तकर्मानुष्ठानेन भगवतः कालचक्रायुधस्य यज्ञपुरुषस्य सर्वकर्मफलदातुराराधनमेव तस्य दुष्करत्वात्तदरोचयञ्छूद्रकुलं भजते आदरेणानुसरति । तत्र हेतुमाह । यस्येति । यस्य शूद्रकुलस्य निगमोक्ताचारे अशुद्धितः अधिकाराभावात् वानरजातेः यथा तथा केवलं स्त्रिया मिथुनीभावः कुटुम्बभरणं चैव व्यापारो नाग्निहोत्र-सन्ध्योपासनादिः क्लेशावहः अतः शूद्रकुलमनुसरति । यद्वा । निगमाचारे या अशुद्धिरुच्यते तयैव यस्य मिथुनीभावः विधवायाः सक्तधवाया वा परिणयः इत्यादि ॥ ३० ॥

यदा तु पाखण्डिभिरात्मवञ्चितैस्तैरुरुवञ्चितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्य आराधनमेव तदरोचयञ्छूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथुनीभावः कुटुम्बभरणं यथा वानरजातेः ॥ ३० ॥ तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः ॥ ३१ ॥ क्वचिद् द्रुमवदैहिकार्थेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥ ३२ ॥ एवमध्वन्यवरुन्धानो मृत्युगजभयात्तमसि गिरिकन्दरप्राये ॥ ३३ ॥

" तज्जातिरासेन " इत्यादि व्याचष्टे—तत्रेति ॥ तत्रापि शूद्रसमाजेऽपि प्रविष्टो निरवरोधः धर्ममर्यादादिप्रतिबन्धरहितः अतः स्वैरेण स्वेच्छया विहरन् क्रीडन् स्त्रीपुरुषान्योन्य-मुखनिरीक्षणादिना ग्राम्यकर्मणा तत्तद्विषयभोगोपयोगिव्यापारेण च विस्मृतः कालावधिर्मृत्युकालो येन स तथा भूतो भवतीति शेषः ॥ ३१ ॥ " द्रुमेषु रंस्यन् " इत्ये-तद्व्याचष्टे—क्वचिदिति ॥ क्वचिद्द्रुमवदैहिकार्थेषु ऐहिकसुखप्रयोजनकेषु गृहेषु रंस्यन् रममाणः शता आर्षः । सुतदारवत्सलः सुतदारादिषु प्रीतियुक्तो व्यवायक्षणः स्त्रीसंभो-गलब्धोत्सवः संसारबन्धादात्मानं विमोक्तुं न शक्नोतीति शेषो बोध्यः । विवशः स्वबन्धन इत्युक्तत्वात् तत्र दृष्टान्तमाह । यथा वानर इति । स्त्रीसंभोगासक्तः प्रमत्तो द्रुमेषु रममाणो वानरो यथा लुब्धकेन गृहीत आत्मानं विमोक्तुं न शक्नोति ॥ ३२ ॥ " क्वचित्प्रमादाद्गिरिकन्दरे पतन् " इत्येतद्व्याचष्टे—एवमिति ॥ अध्वनि प्रवृत्तिमार्गे एवं प्रमादेन कर्त्तव्यं भगवदाराधनं परित्यज्य विषयासक्त्या पापमाचरंस्तत्फलानि विविधदुःखान्यवरुन्धानोऽनुभवन् गिरिकन्दरप्राये तमसि रोगादिमहत्यामापदि पतितो मृत्युरूपगजभयात्कम्पितहृदय आस्ते । यद्वा । मृत्युभयात्तमसि महारोगोपशमार्थकर्मणि अवरुन्धानः आत्मानमवरुन्धन् भवति ॥ ३३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राग्व्याख्यातमपि वैराग्यार्थं पुनः क्वचिच्छीतेत्यादि व्याचष्टे—क्वचिदिति॥शीतवातादिजन्यानि यान्यनेकविधानि दैविकादीनि दुःखानि तेषां प्रतिनिवारणे अकल्पः असमर्थोऽतो दुरन्तविषयविषण्ण आस्ते दुरन्तचिन्तया व्याकुलस्तिष्ठतीत्यर्थः । तत्र शीतातपवातवर्षादिजन्य देवनिमित्तं दुःखं दैविकं चोरशत्र्वादिप्राणिकृतं भौतिकं शरीरनिमित्तं रोगादिजन्यमात्मीयं तत्रापि हेतूनामनेकविधत्वाद्दुःखानामनेकविधत्वम् ॥ ३४ ॥ तदेवं सिंहावलोकनन्यायेनोक्तमर्थं यथास्थानमपकृष्य व्याख्याय क्रमस्थमनुवर्त्तयितुं पूर्वोक्तमनुवदति—क्वचिदिति ॥ क्वचिन्मिथो व्यवहरन् वित्तशाठ्येन परधनवञ्चनेन यत्किञ्चिद्धनमुपयाति प्राप्नोतीत्यनेनापि दोषवत्त्वं सूचितम् ॥ ३५ ॥ " क्वचित्क्वचित् क्षीणधनस्तु " इत्येतद्व्याचष्टे—क्वचित् क्षीणधन इति ॥ क्षीणधनत्वादेव शय्याद्युपभोगविहीनः यावत् यदा याच्ञया प्रतिलब्धं यन्मनोरथेनोपगतं वाञ्छितं तस्यादानेऽन्यायेनापि स्वीकारेऽवसिता निश्चिता मतिर्यस्य तथाभूतः सन् यस्य यस्य धनादि स्वीकर्तुं प्रवर्त्तते तदा ततस्ततो जनादवमानादीनि सर्वतो लभते ॥ ३६ ॥ " अन्योन्यवित्तव्यतिषङ्ग " इत्येतद्व्याचष्टे—एवमिति ॥ एवमनर्थान्तरं शृण्विति शेषः । अन्योन्यं वित्तस्य व्यतिषङ्गे साङ्कर्येणापहारेण तच्छङ्कया वा विवृद्धो वैरानुबन्धो यस्य तथाभूतो-

क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणे अकल्पो दुरन्तविषयविषण्ण आस्ते ॥ ३४ ॥ क्वचिन्मिथो व्यवहरन् यत् किंचिद् धनमुपयाति वित्तशाठ्येन ॥ ३५ ॥ क्वचित् क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादपि लभते ॥ ३६ ॥ एवं वित्तव्यतिषङ्गविवृद्धवैरानुबन्धोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥३७॥ एतस्मिन् संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यस्तमु ह वावेतरस्तत्र विसृज्य जातं जातमुपादाय शोचन् मुह्यन् बिभ्यद् विवदन् क्रन्दन् संहृष्यन्गायन्नह्यमानः साधुवर्जितो नैवावर्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थो यमध्वनः पारमुपदिशन्ति ॥ ३८ ॥

ऽपि पूर्ववासनया प्रारब्धवशान्मिथ उद्वहति विवाहादिसंबन्धं करोति । अथानन्तरं पुनर्वैरानुसन्धानेनापवहति संबद्धानपि त्यजति ॥ ३७ ॥ " अध्वन्यमुष्मिन् " इत्यादि व्याचष्टे—एतस्मिन्निति ॥ एतस्मिन् संसाराध्वनि जन्ममरणादिसंसारकारणभूते प्रवृत्तिमार्गे नानाविधैः क्लेशोपसर्गैः पूर्वोक्तैर्बाधितः पीडितः सन् यत्र य आपन्न आपदं प्राप्तो विपन्नो विनष्टो मृतो वा तमितरस्तत्रैव विसृज्य त्यक्त्वा दग्ध्वा वा जातं जातं पुत्रादिकमादाय स्वीकृत्य पुत्रकलत्रादीनां मरणेन शोचन् पुनर्जातजातपुत्रादिग्रहणेन संहृष्यन् हर्षेण गायन् पुनस्तेषां मरणाद्यनुसन्धानेन बिभ्यत् यथा मरणादि न स्यात्तथा तत्तदुपाये विवदन् क्रन्दंश्चैवं मुह्यन् नह्यमानः बध्यमानः साधुभिर्वर्जितः साधुव्यतिरिक्तो वा साधुस्तु तरतीति भावः । यत एष नरलोकसार्थो देवतिर्यङ्मनुष्यादिसर्ग आरब्धः प्रवृत्तो यं चाध्वनः संसारमार्गस्य पारमुपदिशन्ति वेदा ऋषयो वा वदन्ति तं सर्वकारणकारणं भगवत्पदमद्यापि नैवावर्त्तते नैव प्राप्नोति ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

यदिति ॥ यदिदं योगानुशासनं भक्तियोगं यच्च भक्तियोगैकगम्यं परं पदं न्यस्तदण्डास्त्यक्तप्राणिद्रोहाः मुनयः मननपराः उपशमशीलाः शान्तचित्ताः उपरतात्मानः सांसारिकविषयविरक्तान्तःकरणाः समवगच्छन्ति अनायासेन प्राप्नुवन्ति एतन्नावरुन्धे न प्राप्नोति ॥ ३९ ॥ यदिति ॥ यदपि यद्यपि येऽपि इति वा यत् यतो ये वै राजर्षयो दिग्भिजयिनो यज्विनःयज्ञानुष्ठातारः । आर्षः प्रयोगः । तथापि तेऽपीति वा तत्पदं प्राप्नुवन्ति किन्तु अस्यां भूमौ निमित्तभूतायां ममेयं न तवेति कृतपरस्परवैरानुबन्धाः यां भूमिं विसृज्य स्वयमुपसंहृता मृताः सन्तः परं केवलं मृधे युद्धभूमौ शयीरन्॥४०॥ "प्रसज्जति इत्यादि गिरिकन्द इत्यन्तमपकृष्य व्याख्यातं ग्रन्थं प्रतिक्रम्य वल्लीं गृहीत्वा" इत्येतद्व्याचष्टे—कर्मेति ॥ आपदि नरके वा पतितस्तत्र प्राचीनकर्मरूपां वल्लीमवलम्ब्य स्थितः कथंचित् दुःखभोगानन्तरं तत आपदो नरकाद्वा विमुक्तः पुनरपि संसाराध्वनि प्रवृत्तिमार्गे वर्तमानो नरलोकसार्थमेवोपयाति अनुसरति न संसारविमोक्षार्थं यतते । एवमुपरि देवलोकं गतोऽपि तत आगत्य नरलोकसार्थमेवोपयाति ॥ ४१ ॥ तस्येति ॥

यदिदं योगानुशासनं न वा एतदवरुन्धे यन्न्यस्तदण्डा मुनय उपशमशीला उपरतात्मानः समवगच्छन्ति ॥ ३९ ॥ यदपि दिग्भिजयिनो यज्विनो ये वै राजर्षयः किं तु परं मृधे शयीरन् ॥ अस्यामेव ममेयमिति कृतवैरानुबन्धा यान्ति विसृज्य स्वयमुपसंहृताः ॥ ४० ॥ कर्मवल्लीमवलम्ब्य तत आपदः कथंचिन्नरकाद् विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थमुपयाति एवमुपरिगतोऽपि ॥ ४१ ॥ तस्येदमुपगायन्ति ॥ आर्षभस्येह राजर्षेर्मनसाऽपि महात्मनः ॥ नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥ ४२ ॥ यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशः ॥ जहौ युवैव मलवदुत्तमश्लोकलालसः ॥ ४३ ॥ यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् ॥ नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवाऽनुरक्तमनसामभवोऽपि फल्गुः ॥ ४४ ॥

तस्य भरतस्येदं माहात्म्यं शिष्टाः श्लोकैः उपगायन्ति । राजर्षेः महात्मनः आर्षभस्य ऋषभपुत्रस्य भरतस्यानुवर्त्मेह भूर्लोकेऽन्यो नृपो मनसापि नार्हति भरतानुष्ठितं कर्म कर्तुं नैव शक्नोति किमुत कर्मणा । यथा मक्षिका गरुत्मतो गरुडस्य वर्त्मानुगन्तुं न शक्नोति तद्वदित्यर्थः ॥ ४२ ॥ य इति ॥ उत्तमश्लोकलालसः युवा एव यो दुस्त्यजान् हृदिस्पृशः मनोज्ञान् दारादीन् सुहृद्राज्ययोर्द्वन्द्वैक्यम् । मलवद्विष्ठामिव जहौ तस्यार्षभस्येति सबन्धः । यथा मलस्य त्यागे एव सुखम् अत्यागे कष्टं स्मरणेऽपि जुगुप्सा तथैवेत्यर्थः ॥ ४३ ॥ य इति ॥ यो नृपो भरतो दुस्त्यजान् क्षित्यादीन् सुरवरैः प्रार्थ्यां सदयावलोकां भरतस्य दयापि भवत्वित्यवलोकवतीमित्यर्थः । परिजनावलोकः श्रियामुपचर्यते ताम् । यद्वा । भरतो वैराग्येण शारीरं कष्टं मा स्वीकरोतु मया लालितो गृह एव तिष्ठतु इति सदयोऽवलोको यस्यास्तां श्रियं च नैच्छत् त्यक्तवानिति यत्तत्तस्योचितमेवेति संबन्धः । तत्र हेतुः महतामिति । यतो मधुद्विषः सेवायामनुरक्तं मनो येषां तेषां महतामभवो मोक्षोऽपि फल्गुस्तुच्छ एवेति ॥ ४४ ॥ ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञायेति ॥ यज्ञाय यज्ञरूपाय धर्मपतये यज्ञादिफलदात्रे विधौ नैपुणं निपुणतास्य तस्मै सर्वकर्मप्रवर्त्तकाय तदनुष्ठात्रे च योगाय अष्टाङ्गयोगलभ्याय साङ्ख्यशिरसे साङ्ख्यशास्त्रप्रतिपाद्याय प्रकृतीश्वराय प्रकृतिनियन्त्रे नारायणाय नारं जीवसमूहः सोऽयनमाश्रयो यस्य जीवनियन्त्रे हरये नम इत्युदारमुच्चैर्यो मृगत्वं हास्यन् मृगशरीरं त्यक्ष्यन् व्याकुलतादशायामपि समुदाजहार सम्यगुच्चरितवान् । अत्र त्रिभिः पादैः क्रमेण कर्मज्ञानदेवताकाण्डैः प्रतिपादितत्वम् । तस्य भरतस्यानुवर्त्मान्यो नृपो नार्हतीति पूर्वेणैव संबन्धः ॥ ४५ ॥ य इदमिति ॥ भागवतैः सभाजिताः सत्कृता भागवतेऽत्र ग्रन्थे स्तुता वा यतोऽवदाताः शुद्धाः गुणाः परोपकारस्वभावादयः कर्माणि च भगवत्परिचर्यादीनि यस्य तस्य राजर्षेर्भरतस्य इदं स्वस्त्ययनं पुत्रोत्पत्त्यादिकारणम् । आयुष्यमायुर्वृद्धिकरं धन्यं धनवृद्धिकरं यशस्यं यशोविस्तारकं स्वर्ग्यापवर्ग्यं स्वर्गप्रदं मोक्षप्रदं च अनुचरितं योऽनुशृणोत्याख्यास्यत्यभिनन्दति च स आत्मनः एव सकाशात्सर्वा आशिषः कामान् आशास्ते स्वत एव प्राप्नोति न तु काञ्चिदप्याशिषं परतः परस्मादाशास्ते ॥४६॥

यज्ञाय धर्मपतये विधिनैपुणाय योगाय साङ्ख्यशिरसे प्रकृतीश्वराय ॥ नारायणाय हरये नम इत्युदारं हास्यन् मृगत्वमपि यः समुदाजहार ॥ ४५ ॥ इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वाऽनुशृणोत्याख्यास्यति अभिनन्दति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ॥ ४६ ॥ इति श्रीभा० म० पञ्च० भरतोपाख्याने ब्राह्मणरहूगणसंवादे पारोक्ष्यविवरणं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ भरतस्यात्मजः सुमतिर्नामाभिजितो यमु ह वाव केचित्पाखण्डिन ऋषभपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यन्ति ॥ १ ॥ तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥ २ ॥ अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः ॥ ३ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्पञ्चमस्य चतुर्दशे ॥ १४ ॥ अथ पञ्चदशे प्रोक्ता भूपा भरतवंशजाः ॥ चरमे विरजो यत्र गद्यपद्यानि षोडश[१६] ॥ उवाचेत्येकं सपादा ऋक्षमाना[२७] अनुष्टुभः ॥ १५ ॥ भरतस्येति ॥ भरतस्यात्मजः पुत्रः सुमतिर्नामाभिहितः कथितो यमु ह वाव यमेव ऋषभपदवीं जीवन्मुक्तमार्गमनुवर्तमानं श्रुत्वा दृष्ट्वा इति वा शेषः । केचित्पाखण्डिनो वेदाचारविमुखाः अनार्या दुर्जनाः पापीयस्या पापाचरणतत्परया स्वमनीषया अवेदसमाम्नातां पाखण्डिकपोलकल्पितामिष्टदेवतां कलौ कल्पयिष्यन्ति मंस्यन्ते । यद्वा । यं सुमतिमेव अवेदसमाम्नातां देवतां कल्पयिष्यन्ति । बुद्धोऽयं साक्षादवतीर्ण इति मंस्यन्त इत्यर्थः।अस्माकं सुमतिरेव देवता यथा बुद्ध इति बौद्धसंप्रदायाद्विच्छिद्य कल्पयिष्यन्तीति परे व्याचख्युः॥ १ ॥तस्मादिति॥तस्मात्सुमतेः वृद्धसेनायां भार्यायाम्॥ २ ॥अथेति॥अथानन्तरमासुर्याम् आसुरीनाम्न्यां भार्यायां तत्तनयो देवताजितः पुत्रो देवद्युम्नो जातः ततो देवद्युम्नात् धेनुमतीसंज्ञायां परमेष्ठीसुतो जातः । तस्य परमेष्ठिनः सुवर्चलायां प्रतीहः पुत्र उपजातः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ यः प्रतीहो बहुभ्यः आत्मविद्यामाख्याय उपदिश्य व्याख्यानेनैव स्वयं संशुद्धः निवृत्तकर्मबन्धनो महापुरुषं भगवन्तमनुसस्मार अपरोक्षतयानुभूतवान् ॥ ४ ॥ प्रतीहादिति ॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्ता प्रस्तोता उद्गातेति त्रयः इज्याकोविदाः यज्ञनिपुणाः सूनवः आसन् । प्रतिहर्त्तुः स्तुत्याम् अजभूमानौ अजनिषातां जातौ ॥ ५ ॥ भूम्न इति ॥ भूम्नः ऋषिकुल्यायाम् उद्गीथः हृदयजः पुत्र आसीत् । ततः उद्गीथात् देवकुल्यायां प्रस्ताव आसीत् । प्रस्तावान्नियुत्सायां विभुरासीत् । विभो रत्यां पृथुषेणः तस्मात्पृथुषेणादाकूत्यां नक्तः जज्ञे । नक्तात् द्रुतिसंज्ञायां पुत्रो गयो नामासीत् स च राजर्षिप्रवरः उदारश्रवाः पुण्यकीर्त्तिः जगतो रिरक्षिषया रक्षितुमिच्छया गृहीतं सत्त्वं गुणो येन तस्य भगवतो विष्णोः साक्षात्कला अंशावतार इत्यर्थः । अत एव लोकसंग्रहार्थमात्मवत्त्वादिलक्षणेन ज्ञानित्वादिना महापुरुषतां सर्वजनश्रेष्ठतां प्राप्तः ॥ ६ ॥ स वै इति ॥ राज्ञश्च धर्मो द्विविधः । अभिषिक्तत्वात्प्रजापालनादिरूपः एकः गृहस्थत्वाच्च यज्ञानुष्ठानादिरूपश्चापरः । तत्र प्रजानां पालनं दुष्टेभ्यो रक्षणं पोषणम्

य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ॥ ४ ॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानौ अजनिषाताम् ॥ ५ ॥ भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुः ॥ विभो रत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कलात्मवत्त्वादिलक्षणेन महापुरुषतां प्राप्तः ॥ ६ ॥ स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मन्यर्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्ये आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत् ॥ ७ ॥ तस्येमां गाथां पाण्डवेय पुराविद उपगायन्ति ॥ ८ ॥

अन्नादिभोग्यसम्पादनेन पुष्टीकरणं प्रीणनं प्रियवस्तुदानेन सन्तोषजननम् उपलालनं मधुरवाक्यादिना हर्षोत्पादनम् अनुशासनं शिक्षया सन्मार्गे प्रवर्त्तनम् इत्यादिः । यज्ञादिश्चेति द्विविधोऽपि सर्वात्मनि महापुरुषे परे उत्कृष्टा ब्रह्मादयः अवरे अपकृष्टा यस्मात्तस्मिन्नित्यर्थः । ब्रह्मणि भगवति समर्पितः सन् परमार्थलक्षणः परमपुरुषार्थसाधको भवति तेन तथा ब्रह्मविदां चरणानुसेवया सम्पादितो यो भगवद्भजनमिज्या च तदादिर्यो भक्तियोगस्तेन चाभीक्ष्णशो निरन्तरं परिभाविता संस्कृता अतोऽतिशुद्धा मतिर्यस्य अत एवोपरतमनात्म्यं देहेन्द्रियाद्यहंभावो यस्मिंस्तस्मिन्नात्मनि अन्तःकरणे स्वयमेवोपलभ्यमानं यद्ब्रह्म तस्मिन्नात्मानुभवो यस्य तादृशोऽपि निरभिमान एवावनिमजूगुपत् पालयामास ॥ ७ ॥ तस्येति ॥ हे पाण्डवेय तस्य गयस्येमां गाथां माहात्म्यकथां पुराविदः उपगायन्ति ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गयमिति ॥ यज्वायज्ञाद्यनुष्ठाता अभि सर्वतः मानी संमानास्पदीभूतः मनस्वी वा बहुविद् अनेकशास्त्रमतज्ञाता धर्मगोप्ता प्रजापालनानुशासनादिना सर्वरक्षकः समागता सम्प्राप्ता श्रीर्यं सदसः सभायाः पतिः सतां सेवकः एवं सर्वगुणसम्पन्नोऽपि भगवत्कलामृते भगवदवतारं विनाऽन्यो यज्वादिरूपोऽपि गयं नृपं कर्मभिः कः प्रतियाति सदृशो भवितुमर्हति न कोऽपि ॥ ९ ॥ यमिति ॥ सत्या यथार्थाः आशिषो यासां ताः यतः सतीः सत्यः पतिव्रताः । पूर्वसवर्णदीर्घ आर्षः । दक्षकन्याः श्रद्धामैत्रीदयाद्याः यं गयं सरिद्भिः सत्सरिज्जलैरभ्यषिञ्चन् । यस्य प्रजापालनानुशासनादिगुण एव वत्सस्तेन स्नुतमूधो यस्या गोरूपायाः सा धरा पृथिवी यस्य निराशिषो निष्कामस्यापि प्रजानामाशिषः सर्वान् कामान् दुदुहे प्रपूरयामास । तं गयं कः प्रतियातीति सर्वयच्छब्दानां पूर्वेणैव संबन्धः ॥ १० ॥ छन्दांसीति ॥ यस्य अकामस्य कामनारहितस्यापि कामान् छन्दांसि वेदास्तद्विहितानि कर्माणि च दुदूहुः दुदुहुः । दैर्घ्यमार्षम् । अथो तथा युधि प्रत्यञ्चिताः बाणैः प्रतिपूजिता नृपाः यस्य बलिमाजहुः धनादिकमर्पयामासुः ।

गयं नृपः कः प्रतियाति कर्मभिर्यज्वाऽभिमानी बहुविद्धर्मगोप्ता ॥ समागतश्रीः सदसः पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते
॥ ९ ॥ यमभ्यषिञ्चन्परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ॥ यस्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः
॥ १० ॥ छन्दांस्यकामस्य च यस्य कामान् दुदूहुराजह्रुरथो बलिं नृपाः ॥ प्रत्यञ्चिता युधि धर्मेण विप्राः यदाशिषां षष्ठमंशं परेत्य
॥ ११ ॥ यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ॥ श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥१२॥ यत्प्री-
णनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमा विरिञ्चात् ॥ प्रीयेत सद्यः सहविश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ १३ ॥

तथा धर्मेण प्रजापालनदानादिलक्षणेन यदा विप्रादयः प्रजाः प्रत्यञ्चितास्तदा परेत्य लोकान्तरे आशिषां शुभकर्मफलानां षष्ठमंशमाजह्रुः । " पुण्यषड्भागमादत्ते न्यायेन परिपालयन् । " इति स्मृतेः ॥ ११ ॥ यस्येति ॥ उरुसोमपीथे बहुसोमपाने यस्याध्वरे मघोनि इन्द्रे माद्यति मदं प्राप्नुवति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितमिज्याफलमध्वरात्मा यज्ञमूर्त्तिर्भगवानाजहार प्रत्यक्षतोऽर्हणमिव स्वयं स्वीकृतवानित्यर्थः ॥ १२ ॥ यदिति ॥ यत् यस्य भगवतः सर्वात्मनः प्रीणनात् आविरिञ्च्यात् ब्रह्माणमभिव्याप्य देवतिर्यगादि तृणान्तं सर्वं सद्यः प्रीयेत प्रीतिं गच्छेत् सह विश्वं जीवयतीति विश्वजीवः सर्वान्तर्यामी स्वयं प्रीतः सर्वदा प्रसन्नचित्तोऽपि गयस्य बर्हिषि यज्ञे प्रीतिमगात् । हे राजंस्तव पूजयाऽहं तृप्तोऽस्मि प्रसन्नोऽस्मीत्युक्तवान् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गयादिति ॥ द्वौ स्पष्टौ ॥१४॥१५॥ तत्रायं श्लोकः—प्रैयव्रतमिति ॥ चरमोद्भवः प्रियव्रतवंशे अन्ते जातो विरजः स्वकीर्त्या पुण्ययशसा इमं प्रैयव्रतं वंशमत्यलमकरोद् अतिशयेन भूषितवान् । यथा सुरोत्तमो विष्णुः स्वतेजसा विजयसम्पादनात्सुरगणमत्यलंकरोति तद्वत् ॥ १६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चमस्य पञ्चदशे व्यधाद्गङ्गासहायकः ॥१५॥ षोडशे मेरुर्द्दराब्जकर्णिकास्वाङ्गसंयुता ॥ जम्बूद्वीपे वर्णितोऽत्र त्रिंशंद्वयमितिर्भवेत् ॥ द्वे उवाचेति पादोना द्वापञ्चाशदनुष्टुभः ॥१६॥ उक्त इति॥ यावदादित्यस्तपति प्रकाशयति तत्पर्यन्त इति यत्र च ज्योतिषां गणैर्नक्षत्रसमूहैः सह चन्द्रमा दृश्यते तावान् तत्पर्यन्तश्च भूमण्डलस्य आयामविशेषो विस्तारविशेषस्त्वयोक्तः ॥ १ ॥ तत्रेति ॥ हे भगवन् तत्रापि भूमण्डले प्रियव्रतस्य सूर्यस्य पृष्ठतो मेरुं प्रदक्षिणीकुर्वतो रथचरणेन रथचक्रेण परितः सर्वतः खातैर्गर्तैः सप्तभिः सप्तसिन्धव उपक्लृप्ता उक्ताः यतो येभ्यः सप्तभ्यः सिन्धुभ्य एव तस्या भुवः सप्तद्वीपविशेषविकल्पः सप्तद्वीपरचनाविशेषस्त्वया खलु निश्चयेन सूचितः सामान्यतः प्रदर्शितः एतत्सामान्यत उक्तमे-

गयाद् गयन्त्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुश्चित्ररथादूर्णायां सम्राडजनिष्ट ॥ १४ ॥ तत उत्कलायां मरीचिः मरीचेर्बिन्दुमत्यां बिन्दुमानुदपद्यत तस्मात् सरघायां मधुनामाऽभवत् ॥ मधोः सुमनसि वीरव्रतः ॥ ततो भोजायां मन्थुप्रमन्थू जज्ञाते मन्थोः सत्यायां भौवनः ॥ ततो दूषणायां त्वष्टाऽजनिष्ट ॥ त्वष्टुर्विरोचनायां विरजः ॥ विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्यां किल जातम् ॥१५॥ तत्रायं श्लोकः ॥ प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ॥ अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥ १६ ॥ इति श्रीभा० म० पञ्च० प्रियव्रतवंशानुकीर्तनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ राजोवाच ॥ उक्तस्त्वया भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा सह दृश्यते ॥ १ ॥ तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धव उपक्लृप्ताः ॥ यत एतस्याः सप्तद्वीपविशेषविकलपस्त्वया भगवन् खलु सूचितः ॥ एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥२॥ भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद् गुरोऽर्हस्यनुवर्णयितुमिति ॥ ३ ॥

वाखिलं मानतः लक्षणतः असाधारणचिह्नतश्च सर्वं विशेषतो जिज्ञासामि ज्ञातुमिच्छामि । तङभाव आर्षः ॥२॥ भगवत इति ॥ हे गुरो हि यस्मात् भगवतःगुणमये स्थूलरूपे विराड्विग्रहे आवेशितं स्थिरीकृतं मनः सूक्ष्मतमे दुर्दर्शे आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये अगुणेऽपि आवेशितुं स्थिरीकर्त्तुम् । णिलोप आर्षः । क्षमं योग्यं भवति तत्तस्मात् उ ह एव एतत् ब्रह्माण्डात्मकं स्थूलं रूपं कृपया वर्णयितुमर्हसि । तथा च नाहं बहिर्मुखतया चित्तचमत्कारार्थं श्रोतुमिच्छामि किन्तु भगवत्परतया तस्मिन्मनः समाधानार्थमेवेत्याशयः । परे त्वत्र मयेति कर्तृपदानुक्त्या अत्रत्यानां मनोनिधित्सयैव मया पृच्छयते।मम तु त्वन्मुखोद्गतभगवद्गुणश्रवणमेव तत्प्राप्तिसाधनमिति द्योतितमित्याहुः॥ ३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न वै इति ॥ हे महाराज भगवतो मायाया ये गुणाः सत्त्वादयस्तेषां विभूतेर्विस्तारस्य काष्ठामन्तं विबुधा देवास्तेषामप्यायुषा पुरुषो मनसाऽधिगन्तुं ज्ञातुं वचसा वक्तुं वा यस्मान्न वै अलं नैव समर्थः तस्मात्प्राधान्येनैव भूगोलकविशेषं नामतः रूपतः सन्निवेशतः मानतः विस्तारतः लक्षणतः असाधारणचिह्नतश्च व्याख्यास्यामः विशेषेण प्रकथयिष्यामः ॥ ४ ॥ यो वा इति ॥ कुवलयं भूमण्डलं तदेव कमलं तस्य कोशा इव सप्त द्वीपास्तेष्वभ्यन्तरकोशो यो वाऽयं प्रथमो जम्बूद्वीपः स नियुतयोजनविशालो लक्षयोजनविस्तीर्णः समवर्तुलः सर्वतः समपरिमाणो वर्तुलश्च यथा पुष्करपत्रम् ॥ ५ ॥ यस्मिन्निति ॥ यस्मिन् जम्बूद्वीपेऽष्टभिर्मर्यादागिरिभिः सुविभक्तानि पृथक्कृतानि नव वर्षाणि रम्यकहिरण्मयादीनि प्रत्येकं नवयोजनसहस्रमायामो येषां तथाभूतानि भवन्ति। आयामोऽत्र विस्तारः । वर्षाणां सन्निवेशस्तु वायुपुराणे उक्तः । " धनुर्वत्सं स्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे । दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् ॥ " इति दक्षिणोत्तरे दक्षिणोत्तरप्रान्तस्थिते भारतोत्तरकुरुवर्षे चत्वारि किम्पुरुषहरिवर्षरम्यक-

ऋषिरुवाच ॥ न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाऽधिगन्तुमलं विबुधायुषाऽपि पुरुषस्तस्मात् प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥ ४ ॥ यो वाऽयं जम्बुद्वीपः कुवलयकमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम् ॥५॥ यस्मिन् नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ॥६ ॥ एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रं तावताऽन्तर्भूम्यां प्रविष्टः॥७॥उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रं पृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ॥८॥

हिरण्मयानि। केचित्तु नीलनिषधयोस्तिरश्चीनीभूय समुद्रं प्रविष्टयोः संलग्नत्वमङ्गीकृत्य भद्राश्वकेतुमालयोरपि धनुराकृतित्वम् अत एव तयोर्दैर्घ्यत एव मध्ये सङ्कुचितत्वेन नवसहस्रायामत्वम् । इलावृतस्य तु मेरोः सकाशाच्चतुर्दिक्षु नवसहस्रायामत्वं भवेत् इत्याहुः ॥ ६ ॥ एषामिति ॥ एषां वर्षाणां मध्ये इलावृतं नामाभ्यन्तरं वर्षं तस्य नाभ्यां मध्ये सर्वतः सौवर्णः सुवर्णमयः कुलगिरीणां श्रेष्ठत्वेन गणितानां पर्वतानां राजा द्वीपायामसमुन्नाहः जम्बूद्वीपस्य आयामो विस्तारो यावांस्तावान् लक्षयोजनं समुन्नाह उच्छ्रायो यस्य मेरुः कुवलयकमलस्य कमलसदृशस्य भूमण्डलस्य कर्णिकाभूत इवावस्थितोऽस्ति । मेरोर्विस्तारं वदन् कर्णिकात्वं सम्पादयति–मूर्धनीति ॥ मूर्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रयोजनविततः तावता षोडशसहस्रयोजनमानेन भूम्यामन्तः प्रविष्टश्चतुरशीतियोजनसहस्रमानेन बहिर्दृश्यते । एवं लक्षयोजनोन्नाहः ॥ ७ ॥ उत्तरेति ॥ इलावृतमुत्तरोत्तरेण इलावृतस्योत्तरोत्तरतः क्रमेण स्थिता नीलः श्वेतः शृङ्गवानिति त्रयः क्रमेण स्थितानां रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयो

CC-0. In Public Domain. Digitization by eGangotri

विभाजकाः पर्वताः प्रागायताः पूर्वपश्चिमतो दीर्घा उभयतः क्षारोदः समुद्र एवावधिर्येषां ते तथोभयतः समुद्रलग्ना द्विसहस्रपृथवः पृथुत्वे द्विसहस्रयोजनविस्तीर्णाः अयुतयोजनोत्सेधा इत्यपि ज्ञेयम् । पूर्वस्मात्पूर्वस्मात् दक्षिणतो दक्षिणतः स्थितात् उत्तरोत्तरस्थित एकैकशो दशांशादीषदधिको योंऽशस्तेन दैर्घ्य एव ह्रसन्ति न तूच्चत्वे पृथुत्वे वा । यथोक्तं विष्णुपुराणे । " लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे । " इति इदमपि स्थूलं मध्ययोरपि यथावन्मध्यगत्वाभावेन लक्षप्रमाणत्वाभावात् द्वीपस्य मण्डलाकारत्वात् ॥ ८ ॥ एवमिति ॥ यथा नीलादय उक्ताः एवं दक्षिणेनेलावृतमिलावृतस्य दक्षिणतो दक्षिणतः क्रमेण निषधो हेमकूटो हिमालय इति त्रयः । प्रागायताः पूर्वपश्चिमतो दीर्घा उभयतः समुद्रसंलग्नाः द्विसहस्रयोजनपृथवः अयुतयोजनमुत्सेध उच्छ्रायो येषां ते अयमुत्सेधो नीलादीनामपि ज्ञेयः । नीलादीनामिव पृथुत्वमेषामपि द्रष्टव्यं तथा क्रमेण स्थितानां हरिवर्षकिंपुरुषभारतसंज्ञानां वर्षाणां यथासंख्यं मर्यादागिरयः । तत्राप्युत्तरत उत्तरतः स्थिताद्दक्षिणतो दाक्षिणतः स्थित एकैकशो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति न तूच्चत्वे पृथुत्वे वेति पूर्ववत् ज्ञेयम् ॥ ९ ॥ तथेति ॥ तथैवेलावृतमपरेण पूर्वेण च इलावृतस्य पश्चिमतः पूर्वतश्च यथाक्रमेण स्थितौ आनीलनिषधायतौ

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासङ्ख्यम् ॥ ९ ॥ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ॥ १० ॥ मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इति अयुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः ॥ ११ ॥ चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १२ ॥ ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयन्ति ॥ १३ ॥

उत्तरतो नीलपर्वतपर्यन्तं दक्षिणतो निषधपर्वतपर्यन्तं च दीर्घौ चतुस्त्रिंशत्सहस्रयोजनदीर्घावित्यर्थः । माल्यवद्गन्धमादनौ मर्यादापर्वतौ द्वियोजनसहस्रं पप्रथतुर्विस्तीर्णौ भवतः । तङ्भाव आर्षः । अयुतयोजनोत्सेधावित्यपि ज्ञेयम् । तौ इलावृतस्य पश्चिमतः पूर्वतश्च स्थितयोः केतुमालभद्राश्वयोर्वर्षयोः सीमानं विदधाते ॥ १० ॥ मन्दर इति ॥ अयुतयोजनपरिमाणौ विस्तारोन्नाहौ येषां ते तथाभूता विस्तारोऽत्र दैर्घ्यं मेर्वादयश्चत्वारो गिरयो मेरोश्चतुर्दिशं तस्यावष्टम्भभूता उपक्लृप्ताः परमेश्वरेण रचिताः सन्ति । तेषां च सुवर्णमयत्वं मन्थानाकृतित्वं च बहूनमरदानवान् " चूर्णयामास । महता भारेण कनकाचल " इत्यष्टमस्कन्धे वक्ष्यमाणेन मन्दरस्य मन्थानत्वकरणेन च ज्ञेयम् ॥ ११ ॥ चतुर्ष्विति ॥ एतेषु मन्दरादिषु चतुर्षु चूतादयश्चत्वारः अधिसहस्रमेकादशशतानि योजनान्युन्नाह उच्छ्रायो येषां तावती एकादशशतयोजनप्रमाणा विटपविततिर्येषां शतयोजनं परिणाहो विस्तारः परितः स्थौल्यं येषां तथाभूताः पादपप्रवराः पर्वतानां तेषां केतव इव स्थिताः सन्ति ॥ १२ ॥ ह्रद इति ॥ हे भरतर्षभ जलस्थाने मध्वादयो येषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाभूताश्चत्वारो ह्रदाश्च प्रत्येकं चतुर्षु पर्वतेषु सन्ति। यदुपस्पर्शिनो यत्सेविन उपदेवगणाः स्वाभाविकानि योगप्रयत्नं विनैव सिद्धानि अणिमाद्यैश्वर्याणि धारयन्ति ॥ १३ ॥ देवेति ॥ नन्दनादीनि चत्वारि देवोद्यानानि च तेषु चतुर्षु भवन्तीत्यर्थः ॥ १४ ॥ येष्विति ॥ सुरललना देवस्त्रियस्तासामपि ललामानि भूषणभूता याः श्रेष्ठाः स्त्रियस्तासां यूथपतय उपदेवगणैर्गन्धर्वादिभिरुपगीयमानो महिमा येषां तेऽमरपरिवृढा विबुधश्रेष्ठास्ताभिः सह संभूय येषु विहरन्ति ॥ १५ ॥ मन्दरेति ॥ मन्दरस्योत्सङ्ग एकादशशतयोजनमुत्तुङ्गो यो देवचूतनामक आम्रवृक्षस्तस्य शिरसः सकाशात् गिरिशिखरवत्स्थूलानि अमृततुल्यानि मिष्टानि फलानि पतन्ति। फलप्रमाणं वायुपुराणे। "अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च। फलप्रमाणं निर्दिष्टं मुनिभिस्तत्त्वदर्शिभिः ॥" इति ॥ १६ ॥ तेषामिति ॥ तेषां फलानामुच्चनिपातेन विशीर्यमाणानां योऽतिमधुरश्चासौ

देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥ १४ ॥ येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ॥ १५ ॥ मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति ॥ १६ ॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति ॥ १७ ॥ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति ॥ १८ ॥ एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बू नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ॥ १९ ॥ तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदाऽमरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ॥ २० ॥

स्वतः सुरभिश्चासौ सुगन्धिः अन्येषां गन्धैरधिवासितश्च बहुलश्चारुणश्च रसः स एवोदमुदकं तेन जाता अरुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेण पूर्वदिशि इलावृतमुपप्लावयति व्याप्य वहति ॥ १७ ॥ यदिति ॥ यदुपजोषणात् यस्य रसस्य पानात्। स्पष्टं शेषम् ॥१८॥ एवमिति ॥ अत्युच्चदेशान्निपातेन विशीर्णानाम् अनस्थिप्रायाणामतिसूक्ष्मबीजानाम् इभकायनिभानां हस्तिदेहतुल्यानां जम्बूफलानां रसेन जाता जम्बू नाम नदी यत्र निपतन्ती भवति। तत आरभ्य दक्षिणेनात्मानमात्मनो दाक्षिणतः यावत् सर्वमिलावृतमभिव्याप्योपस्यन्दयति प्रवहतीत्यर्थः। तथा च यावदिलावृतं तावदात्मानं वर्द्धयन्ती नवयोजनसहस्रं निःसृतेति ॥ १९ ॥ तावदिति ॥ तस्या उभयोरपि रोधसोस्तटयोर्या मृत्तिका तस्या रसेनानुविध्यमाना विक्लिद्यमाना तावत्सर्वतः वाय्वर्कसंयोगाद्विपाकेन सदा सर्वदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति॥२०॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यदिति ॥ यत्सुवर्णं विबुधादयो युवतिभिः सह मुकुटाद्याभरणरूपेण धारयन्ति ॥ २१ ॥ य इति ॥ यस्तु सुपार्श्वनिरूढो महाकदम्बस्तस्य कोटरेभ्यो विनिःसृता याः पञ्चायामपरिणाहाः आयामोऽत्र व्यामः स च "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।" इत्युक्तलक्षणः पञ्च व्यामाः परिणाहः स्थौल्यं यासां तथाभूताः केचित् पञ्चव्यामपरिणाहा इत्येव पठन्ति।पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्योऽपरेणात्मानमात्मनः पश्चिमत इलावृतमनुमोदयन्ति शोभयन्ति तत्रत्यं प्राणिजातं हर्षयन्तीति वार्थः ॥ २२ ॥ या इति ॥ उपयुञ्जानानां सेवमानानां प्राणिनाम् ॥ २३ ॥ एवमिति ॥ कुमुदे निरूढो यः शतस्कन्धत्वात् शतवल्शो नाम वटः तस्य स्कन्धेभ्यः नीचीना अधोमुखाः पयआदिप्रवाहिणः सर्व एव कामदुघाः सर्वमनोरथपूरका नदाः कुमुदाग्रात्पतन्तस्तमुत्तरेणात्मन उत्तरत इलावृतं योजयन्ति उत्तरादिशि प्रवहन्तीत्यर्थः॥२४॥यानिति

यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति ॥ २१ ॥ यस्तु महाकदम्बः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति ॥ २२ ॥ या ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयोजनमनुवासयति ॥ २३ ॥ एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति ॥ २४ ॥ यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति ॥ यावज्जीवं सुखं निरतिशयमेव ॥ २५ ॥ कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनीवासकपिलशङ्खवैदूर्यजारुधिहंसर्षभनागकालञ्जरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥ २६ ॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः ॥ एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ ॥ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः ॥ २७ ॥

यान् नदसंबन्धिपदार्थान् पयआदीनुपजुषाणानामुपभुञ्जानानाम् । मुगभावआर्षः। प्रजानां कदाचिदपि वलिपलितादय उपसर्गादयस्तापविशेषाश्च न भवन्ति किंतु यावज्जीवं निरतिशयं सर्वोत्कृष्टं सुखमेव तिष्ठतीत्यन्वयः। वलिःशरीरचर्मसंकोचःपलितं केशशौक्ल्यं क्लमःशरीरे श्रान्तिःस्वेदादयःप्रसिद्धाः मृत्युः अपमृत्युःउपसर्गादयः पूर्वं मूल एवोक्ता विवृताश्च ज्ञेयाः ॥ २५ ॥ कुरुङ्गेति ॥ स्पष्टम् ॥ २६ ॥ जठरेति ॥ मेरुं पूर्वेण मेरोः पूर्वतः जठरदेवकूटसंज्ञौ पर्वतौ भवतः तिष्ठत इत्यर्थः । अष्टादशयोजनसहस्रप्रमाणमुदगायतौ दक्षिणोत्तरतो दीर्घौ द्वियोजनसहस्रं पृथू तुङ्गौ च एवमपरेण मेरोः पश्चिमतः पवनपारियात्रसंज्ञौ तिष्ठतः तावपि दक्षिणोत्तरतोऽष्टादशयोजनसहस्रं दीर्घौ द्वियोजनसहस्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथू तुङ्गौ च तथा मेरोर्दक्षिणतः कैलासकरवीरौ प्रागायतौ पूर्वपश्चिमतोऽष्टादशयोजनसहस्रं दीर्घौ द्वियोजनसहस्रं पृथू तुङ्गौ च भवतः तथा मेरोरुत्तरतस्त्रिशृङ्गमकरसंज्ञौ पूर्वपश्चिमतोऽष्टादशयोजनसहस्रं दीर्घौ द्वियोजनसहस्रं पृथू तुङ्गौ च भवतः। एतेषां जठरादीनां रजतमयत्वं कैलासस्य राजतत्वप्रसिद्ध्या तत्सादृश्येन ज्ञेयम् । चतुर्दिक्षु मेरुमूलाद्योजनसहस्रं त्यक्त्वाग्नेः परितः परिधय इव जठरदेवकूटादयस्तिष्ठन्ति अतोऽष्टादशसहस्रयोजनप्रमाणमत्रोक्तम् । "वैष्णवादिपुराणेषु परिमाणादि यत्पुनः । अन्यथा वर्णितं तत्तु कल्पभेदाद्व्यपेक्षया ॥" इति स्वामिपादाः एतैरष्टाभिर्गिरिभिः परितः परिस्तृतः आवृतः काञ्चनगिरिर्मेरुः परिधिपरिस्तृतः कुण्डे ज्वलन्नग्निरिव चकास्ति ॥ २७ ॥ मेरोरिति ॥ मेरोर्मूर्द्धनि मध्यतः उपक्लृप्तां भगवत आत्मयोनेर्ब्रह्मणः पुरीं समचतुरस्रां शातकौम्भीं सुवर्णमयीं मनोवतीं नाम सहस्राणि परिमाणं यस्याः साहस्री शतमानेऽत्यणन्तान्ङीप् । अयुतयोजना चासौ साहस्री च अयुतयोजनसाहस्रीं वदन्ति । सहस्रशब्देन विष्णुपुराणानुसारेण चतुःसहस्री गृह्यते तेन चतुर्दशसहस्रविस्तृता । यदि तु सहस्रशब्दः सामान्यतः प्रमाणवाच्येव व्याख्यायते तदा अयुतयोजनप्रमाणामित्यर्थः । विष्णुपुराणं तु । " चतुर्दशसहस्राणि योजनानां महापुरी । मेरोरुपरि मैत्रेय ब्रह्मणः प्रथिता दिवि ॥ "

मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥ २८ ॥ तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयभागेन पुरोऽष्टावुपक्लृप्ताः ॥ २९ ॥ इति श्रीभा० पञ्चभुवनकोशवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ श्रीशुक उवाच ॥ ॥ तत्र भगवतः साक्षाद् यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तः प्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद् भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानाऽतिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार ॥ यत् तत् विष्णुपदमाहुः ॥ १ ॥

इति ॥ २८ ॥ तामिति ॥ तां ब्रह्मपुरीमनु परितोऽन्येषामष्टानां लोकपालानां यथादिशं प्राच्यादिदिक्षु यथारूपं यथानुरूपं तुरीयमानेन ब्रह्मपुरीविस्तारस्य चतुर्थभागप्रमाणेन सार्धत्रिसहस्रयोजनविस्तारेणाष्टौ पुर उपक्लृप्ता रचिताः सन्ति तासान्नामानि तु "मेरौ नव पुराणि स्युर्मनोवत्यमरावती । तेजोवती संयमनी तथा कृष्णाङ्गना परा ॥ श्रद्धावती गन्धवती तथा चान्या महोदया । यशोवती च ब्रह्मेन्द्रहुताशयमरक्षसाम् ॥ वरुणानिलयोः श्रीदेशानयोश्च यथाक्रमम् ॥ " अत्र तुरीयमानेनेत्यस्य सार्द्धद्विसहस्रप्रमाणेनेति प्राचां व्याख्यानम् । ब्रह्मपुर्या अयुतयोजनमात्राभिप्रायं साहस्रशब्दस्तत्र प्रमाणमात्रार्थः । पूर्वं तु अयुतयोजनसाहस्रीमित्यत्र साहस्रीशब्दवैयर्थ्यभयाद्विष्णुपुराणानुसारेण चतुर्दशसहस्रपरतया व्याख्यातम् इत्यलम् ॥ २९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात् पञ्चमस्य तु षोडशे ॥ १६ ॥ अथ सप्तदशे गङ्गागतिर्मेरोश्चतुर्दिशम् ॥ स्तौति संकर्षणं रुद्रोऽनुष्टुभोऽत्र स्वर्मार्गणाः ॥ तेर्स्वानि गद्यादीनि स्युः द्वे उवाचेति कीर्तिते ॥ १७ ॥ तत्रेति ॥ तत्र यदा वामना-

CC-0. In Public Domain. Digitization by eGangotri

वतारो जातस्तदा यज्ञलिङ्गस्य बलेर्यज्ञे लिङ्गं वामनमूर्त्तिर्यस्य तस्य साक्षाद्भगवतो विष्णोर्विक्रमतो दक्षिणेन पदा भुवं क्रान्त्वा वामं पादमुत्क्षिपतः । शता दीर्घाभावश्चार्षौ ।
वामपदाङ्गुष्ठनखेन निर्भिन्नमूर्द्धमुपरि भागो यस्य तस्याण्डकटाहस्य विवरेणान्तःप्रविष्टा त्रिसाम्यसदनादुरुकम्पयानमिति ब्रह्मोक्तौ तस्य प्रकृत्यावरणपर्यन्तं प्राप्तिश्रवणात् ।
बाह्या पृथिव्याद्यष्टावरणबहिर्भूता कारणार्णवसम्बन्धिनी चिन्मयी या जलधारा तस्य भगवतश्चरणपङ्कजस्यावनेजनं प्रक्षालनं तेनारुणं यत्तद्रतं कुङ्कुमं तदेव किञ्जल्काः केसरा-
स्तैरुपरञ्जिता अखिलानां सर्वेषां स्वसंबन्धिनां जगतां प्राणिनामघान्यन्तःपापानि मलानि बहिष्ठान्यपहन्तीति तथाभूतमुपस्पर्शनं यस्याः सा अमला अन्येषां पापमलादिनि-
राकरणेऽपि स्वयं तत्संसर्गरहितैव साक्षात् भगवत्पदसंबन्धाद्भगवत्पदीति यदनुपलक्षितं जाह्नवी भागीरथीत्यादिनाम्नां भूम्यवतरणानन्तरजातत्वात्तत्समये तदुपलक्षणरहितं
यद्वचो नाम तेनाभिधीयमाना भगवत्पदीति नाम्ना व्यवह्रियमाणा युगसहस्रोपलक्षणेन अतिमहता कालेन दिवो मूर्द्धनि ध्रुवलोकेऽवततार । तथा च चतुर्युगसहस्रग्रहणे ब्रह्मणो
दिनपरिमितकालोक्त्या तस्य रात्रौ ध्रुवलोके गङ्गावतरणं सिद्ध्यति । तस्यापि दिवो मूर्द्धत्वोक्त्या त्रिलोक्या बहिष्ठत्वेन प्रलये नाशाभावात्।यथा श्रुतयुगसहस्रग्रहणे तु तद्दिन

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाऽभिव्यज्यमानरोमपुलकोऽधुनापि परमादरेण शिरसा बिभर्ति ॥ २ ॥ ततः सप्त ऋषयस्तत्प्रभावाभिज्ञायां ननु तपस आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहन्ति ॥ ३ ॥

एव तत्र गङ्गावतरणं संभवतीत्यपि ज्ञेयम् । कोऽसौ दिवो मूर्धा तमाह । यदिति । यत्तत् प्रसिद्धं दिवो मूर्द्धरूपं विष्णुपदमाहुः ॥ १ ॥ यत्रेति ॥ यत्र लोके ह वाव परमभा-
गवतः अनुसवनं प्रतिक्षणमुत्कृष्यमाणः संवर्द्धमानो यो भगवद्भक्तियोगस्तेन दृढमत्यन्तं क्लिद्यमानमन्तर्हृदयं यस्य सः अत एवौत्कण्ठ्येन विवशमामीलितं यल्लोचनयुगलं तदेव
कुड्मले ताभ्यां विगलितममलं बाष्पं तस्य कलया सहाभिव्यज्यमानं रोमपुलकानां कुलकं यस्य स वीरव्रतः दृढसङ्कल्पः औत्तानपादिः ध्रुवोऽस्मत्कुलदेवताया भगवतश्चरणा-
रविन्दोदकमिति निश्चयेनाधुनापि यां गङ्गां परमादरेण शिरसा बिभर्त्ति साऽवततारेति पूर्वेणान्वयः । पुलककुलक अधुनापीत्यार्षः पाठः । कुलकोऽधुना इति तु साधुरेव ॥ २ ॥
तत इति ॥ ततोऽधस्तात् तस्याः गङ्गायाः प्रभावस्याभिज्ञाः ननु तपस आत्यन्तिकी परमोत्कर्षापन्ना सिद्धिः फलमेतावती भगवच्चरणोदकप्राप्तिरेव नातोऽधिकास्तीत्यभिप्राय-
वन्तः भगवति सर्वात्मनि वासुदेवेऽनुपरतो निरन्तरो यो भक्तियोगस्तस्य लाभेनैव कृतार्थत्वेनोपेक्षिता अन्ये धर्मादयः पुरुषार्था आत्मगतिरात्मज्ञानं च यैस्ते सप्तर्षयो यां
गङ्गां सबहुमानं यथा तथाऽद्यापि जटाजूटाजूटैरुद्वहन्ति धारयन्ति । यथा प्रत्यक्षत आगतां मुक्तिं मुमुक्षवो जना यथा बहुमानेनाङ्गीकुर्वन्ति तथेत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततः सप्तर्षिस्थानादनेकसहस्रकोटीनां विमानानामनीकैः सङ्कुलेन व्याप्तेन देवयानेन देवलोकमार्गेणाकाशमार्गेणावतरन्ती चन्द्रमण्डलमावार्य आप्लाव्य मेरुमूर्द्धस्थे ब्रह्मसदने निपतति । अत्र न कर्मभिस्तां गतिमाप्नुवन्ति । "विद्यातपोयोगसमाधिभाजाम्" इत्युक्तानुसारेण सप्तर्षिभ्योऽर्वागेव प्रायशः कर्मिणां गतिरिति ततोऽर्वागेव तद्विमान-सङ्कुलत्वमुक्तमिति ज्ञेयम् ॥ ४ ॥ तत्रेति ॥ अभिस्यन्दती अभितो गच्छन्ती । नुमभावः शता चार्षौ । स्पष्टमन्यत् ॥ ५ ॥ सीतेत्यादीनि चतसृणां नामानि केसराचलानां मेरुसमानोच्छ्रायत्वात् समीपत्वाच्च । सीता तु ब्रह्मसदनात् प्रथमं तेषामादिशिखरेषु मुख्यशृङ्गेषु पतित्वा तेभ्योऽधोऽधः प्रस्रवन्ती सती गन्धमादनस्य मूर्द्धसु पतित्वा ततो भद्राश्ववर्षमन्तरेण भद्राश्वखण्डस्य मध्यतः पतित्वा इलावृतमुल्लङ्घ्येत्यर्थः । प्राच्यां दिशि क्षारसमुद्रमभिविशति ॥ ६ ॥ एवमिति ॥ एवं चक्षुःसंज्ञापि ब्रह्मसदनात् केसरा-चलादिशिखरेषु पतित्वा ततो माल्यवच्छिखरे निपत्य अनुपरतवेगा सती ततः केतुमालवर्षमभिलक्ष्य केसराचलात्तदभिमुखं निपतन्ती तन्मध्येन प्रतीच्यां दिशि सरित्पतिं

ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरन्तीन्दुमण्डलमावार्य ब्रह्मसदने निपतति ॥४॥ तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दि-शमभिस्यन्दती नदनदीपतिमेवाभिनिविशति ॥ ५ ॥ सीताऽलकनन्दा चक्षुर्भद्रेति ॥ सीता तु ब्रह्मसदनात् केसराचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्धसु पतित्वा अन्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥ ६ ॥ एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुप-रतवेगा केतुमालमभिचक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७ ॥ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद् गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ॥८॥ तथैवालकनन्दा दक्षिणेन ब्रह्मसदनात् बहूनि गि-रिकूटान्यतिक्रम्य हेमकूटाद् हैमकूटान्यतिरभसतररंहसा लुठन्ती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति॥९॥ यस्यां स्नानार्थं पानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति॥१०॥अन्ये च नदा नद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादिगिरिदुहितरः शतशः॥११॥

समुद्रं प्रविशति ॥ ७ ॥ भद्रेति ॥ भद्रा चोत्तरतो मेरुशिरसः केसराचलादिगिरिशिखरे पतित्वा तत उच्चलन्ती नीलगिरिशिखरं निपत्य तत उच्चलिता श्वेतगिरिशिखरं पतित्वा तदप्यतिहाय त्यक्त्वा शृङ्गवतः शृङ्गं प्राप्य इलावृतादिवर्षत्रयमुल्लङ्घ्येत्यर्थः । ततस्तूत्तरान् कुरूनभिलक्ष्याभितोऽवस्यन्दमाना प्रस्रवन्ती उदीच्यां दिशि जलधि-मभिप्रविशति ॥ ८ ॥ तथेति ॥ तथैवालकनन्दापि दक्षिणतो ब्रह्मसदनात्पतिता बहूनि केसराचलादिकैलासनिषधादीनि गिरिकूटान्यतिक्रम्य हेमकूटं गिरिं प्राप्य ततोऽ-प्यतिरभसतररंहसाऽस्खलिततीव्रतरवेगेन हिमालयसंबन्धीनि कूटानि हैमकूटानि लुठयन्ती भारतं वर्षमभिगम्य दक्षिणस्यां दिशि जलधिमभिप्रविशति ॥ ९ ॥ यस्यामिति ॥ यस्यां गङ्गायां स्पष्टं शेषम् ॥ १० ॥ अन्य इति ॥ मेर्वादिगिरीणां दुहितरस्ततः प्रसूताः बहुशो बहुप्रकाराः शतशोऽन्येऽपि नदा नद्यश्च वर्षे वर्षे सन्ति ॥ ११ ॥

Nepal Sanskrit University, Balmeeki ...

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति ॥ तत्र भारतमेव वर्षं कर्मक्षेत्रं दिव्यभौमबिलभेदेन स्वर्गस्य त्रिविधत्वादन्यान्यष्टवर्षाणि भौमानि स्वर्गपदानि व्यपदिशन्ति तानि च पुण्योत्कर्षेण ये स्वर्गं गच्छन्ति तेषां तत्र पुण्यफलोपभोगेन येषां पुण्यशेषो भवति तत्फलोपभोगस्थानानि ॥ १२ ॥ एष्विति ॥ एषु वर्षेषु अयुतं पुरुषस्य मनुष्यस्य मानेनायुषो वर्षाणि येषां तेषामयुतवर्षजीविनां देवकल्पानां नैरोग्यादियुतानां नागायुतस्य हस्तिदशसहस्रस्य प्राणो बलं येषां तेषां वज्रवत्संहननं दृढं यच्छरीरं तस्मिन् ये बलवयोमोदास्तैः प्रमुदितानि यानि महासौरतानि मिथुनानि तेषां व्यवायापवर्गे संभोगावसान एकवर्षशेष आयुषि धृत एको गर्भो यैस्तादृशानि कलत्राणि येषां तेषामित्यर्थः । अनेन स्त्रीणां पुत्राद्युत्पत्त्या शरीरशैथिल्येन सम्भोगे वैरस्यं निरस्तम् । तत्र तु त्रेतायुगसमः कालो वर्त्तते विषयसुखोत्कर्षात् । कृतयुगे हि प्रायो ध्याननिष्ठाः द्वापरादौ दुःखबहुलाः ॥ १३ ॥ यत्र हेति ॥ यत्र येषु हि वर्षेषु सर्वेषु ऋतुषु कुसुमस्तबकादीनां श्रिया समृद्ध्या आनम्यमाना अत्यन्तं नम्यमाना विटपास्तदाश्रिता लताश्च येषु तैर्विटपिभिर्वृक्षैरुपशुम्भमा-

तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थनानि भौमानि स्वर्गपदानि व्यपदिशन्ति ॥ १२॥ एषु पुरुषाणामयुतं पुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः कालो वर्तते ॥ १३ ॥ यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहाऽर्हणाः सर्वर्तुकुसुमस्तबकफलकिसलयश्रियाऽऽनम्यमानविटपलता विटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलाऽवलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ॥१४ ॥

नानि रुचिराणि प्रीतिकराणि काननानि येषु तेष्वाश्रमेषु आयतनेषु वर्षगिरयो वर्षमध्यवर्तिनः वर्षख्यातिकरा वा गिरयस्तेषां द्रोणीषु पर्वतद्वयान्तरालेषु उन्नतपार्श्वद्वयान्तरालदेशेषु वा तथा विकचानि प्रफुल्लानि यानि विविधानि नवानि वनरुहाणि नीरजानि तेषामामोदेन मुदितै राजहंसादिभिः पक्षिभिर्मधुकरानिकराणां चाकृतिभिर्जातिविशेषैरुपकूजितेषु । अधिकरणे निष्ठा षष्ठ्यभाव आर्ष इति चक्रवर्त्ती । भृङ्गैर्नादितं पद्ममितिवत्कर्मण्येव वा क्तः । कर्मघञन्तात् "तत्करोति" इति णिच् ततः क्तो वा । अमलजलाशयेषु सुललिताः मनोहरा याः सुरसुन्दर्यो देवाङ्गनास्तासामुद्बुद्धो यः कामस्तेन कलिलः सञ्जातो विलासः क्रीडा हासश्च लीलया कटाक्षेणावलोकश्च तैराकृष्टं क्षुभितं मनो दृष्टिश्च येषां ते देवपतय इन्द्रादयोऽपि स्वैः स्वैर्गणनायकैः सेवकगणेषु मुख्यैर्विहितमहार्हणाः समर्पितस्रक्चन्दनादिमहोपचाराः सन्तः स्वैरं यथेष्टं जलक्रीडादिभिर्विचित्रविनोदैः स्त्रीभिः सह विहरन्ति ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवस्विति ॥ नवस्वपि वर्षेषु भगवान्नारायणः महापुरुषः पुरुषाणां स्वभक्तानां तदनुग्रहाय स चासौ प्रसिद्धः वक्ष्यमाणानुग्रहश्च तत्तत्पुरुषार्थदानलक्षणस्तदर्थमात्मतत्त्वव्यूहेनात्मनस्तत्त्वानां गुणानां व्यूहः समूहो यत्र तेनात्मना स्वमूर्तिसमूहेन रूपेणाद्यापि संनिधीयते संनिहितो भवति । अत्र उपास्यदेवताः वर्षेषु भगवन्मूर्त्तयः प्रायः प्रतिमारूपा एव ज्ञेयाः । आविराविर्भवेति वक्ष्यमाणप्रह्लादोक्तेः ॥ १५ ॥ इलावृते त्विति ॥ इलावृते तु भगवान् भव एक एव पुमानस्ति न हि ततोऽन्यो परो जनः कोऽपि भवान्याः शापनिमित्तज्ञःपुमांस्तत्र प्रविशति । यस्मिन् प्रवेक्ष्यतः प्रवेशं करिष्यतः पुंसः स्त्रीभावो भवति । तच्छापस्य कारणं पश्चान्नवमस्कन्धे वक्ष्यामीत्यर्थः । अत्र प्रवेक्ष्यत इति लट्। यः प्रवेक्ष्यंति स स्त्री भविष्यति इति शापाभिनयप्रदर्शनार्थः । न त्वत्र शुकोक्तावुपयुक्तः अयं च शापःकैलासकरवीरयोः पर्वतयोर्मध्ये इलावृतैकदेशविशेषे ज्ञेयोऽन्यथा सर्वस्येलावृतस्य शप्तत्वे तु मेर्वादौ देवस्थितिर्भौमादीनामैन्द्रामरस्थानहरणार्थगमनं दशमे वक्ष्यमाणं यत्र देवपतयः स्वैरं विहरन्तीत्युक्तं च बाधितं स्यादिति ज्ञेयम् ॥ १६ ॥ भवानीति ॥ भवानी नाथा स्वामिनी येषां तैः स्त्रीगणानामर्बुदसहस्रैरवरुध्यमानः सर्वतः सेव्यमानो भवः वासुदेवप्रद्युम्नानिरुद्धसंकर्षणसंज्ञाश्चतस्रो मूर्त्तयो यस्य तस्य भगवतो

नवस्वपि वर्षेषु भगवान् नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाऽद्यापि सन्निधीयते ॥ १५ ॥ इलावृते तु भगवान् भव एक एव पुमान् न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञः ॥ यत् प्रवेक्ष्यतः स्त्रीभावस्तत् पश्चाद् वक्ष्यामि ॥ १६ ॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्यैतदभिगृणन् भव उपधावति ॥१७॥ श्रीभगवानुवाच ॥ ॥ ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति ॥ १७ ॥
भजे भजन्यारणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम् ॥ भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥ १९ ॥

महापुरुषस्य तुरीयां चतुर्थीं सङ्कर्षणसंज्ञामात्मनः स्वस्य शिवस्य प्रकृतिं तामसत्वात्कारणभूतां तामसीं मूर्त्तिमात्मसमाधिरूपेण मनःसमाधानलक्षणेन ध्यानेन सन्निधाप्य सन्निधानमानीय एतद्वक्ष्यमाणं मन्त्रस्तोत्रादिकमभिगृणन् जपन्नुपधावत्युपास्ते । अत्र तामसीमिति बहिरेव तमःप्रदर्शनं न यस्य मायेत्यादि वक्ष्यमाणत्वात् ॥ १७ ॥ ॐ नम इति ॥ सर्वेषां गुणानां गुणकार्याणां सङ्ख्यानं प्रकाशो यस्मात्तस्मै । स्पष्टं शेषम् ॥ १८ ॥ भज इति ॥ भजनमर्हतीति हे भजन्य भजनीय । “ तदर्हति ” इति यत् । अरणं भक्तानां भयाद्रक्षकं पादपङ्कजं यस्य तम् । अत्र नितराम् आ सम्यगेव अरणं शरणं पादपङ्कजं यस्य तं भजे भजे इति हर्षाद् द्विरुक्तिरिति विवृण्वन् चक्रवर्त्ती भजे भजे इति पाठमभिप्रैति । कृत्स्नस्य भगस्य ऐश्वर्यादिषाड्गुण्यस्य परायणमाश्रयं परं श्रेष्ठं भक्तेष्वलमत्यर्थं भावितं प्रकटितं भूतभावनं भक्तपालकं निजं रूपं येन तं भक्तेषु अलम् अलङ्कारवद्वर्त्तमानमिति भिन्नं विशेषणं वा । भयापहं भक्तानां मोक्षदस्तथा अभक्तानां भवं भावयतीति भवभावस्तम् ईश्वरं त्वामहं भजे ॥ १९ ॥

CC-0. In Public Domain. Digitization by eGangotri

तामसत्वेन प्रसक्तमनादरं वारयति—नेति ॥ यस्य हि ईशनं नियमनम् ईट् तस्यै । सम्पदादित्वाद्भावे क्विप् । निरीक्षतो निरीक्षमाणस्यापि । शता आर्षः । मायागुणैस्तद्विषयैश्चित्तवृत्तिभिः करणैश्च दृष्टिरण्वपि ईषदपि नाज्यते न लिप्यते । तत्र वैधर्म्ये दृष्टान्तः । यथेति । न जितं मन्युरंहः क्रोधवेगो यैस्तेषां नोऽस्माकं यथा विषयैर्दृष्टिरज्यते तथा यस्य नाज्यत इत्यर्थः । तमीश्वरम् आत्मनः देहेन्द्रियप्राणादीनात्मत्वेनाभिमतान् जिगीषुः वशीकर्तुमिच्छुः को न मन्येत को वा न सेवेत ॥२०॥ असदिति ॥ यो भगवान् असती दृक् दृष्टिर्यस्य तस्य स्वमायया क्षीबा मत्त इव भयङ्करो भाति तथा मधु सुरा आसवस्तालादिरसस्ताभ्यामाताम्रे अतिरक्ते लोचने यस्य स इव च भाति । यद्वा । यः असद्दृशः कुबुद्धीन् प्रति मायया क्षीबा मत्त इव भाति । यथान्यः क्षीबा मध्वासवाभ्याम् आताम्रविलोचनो विवेकहीनो भवति तथेत्यर्थः । अतः स नादरेण भजति तथा प्रथमवन्दनादौ यस्य पादयोः स्पर्शनेन धर्षितं मोहितमिन्द्रियं मनो यासां ताः । नागवध्वो ह्रिया अस्माकमन्तःक्षोभमयं जानातीति लज्जया यस्यार्हणे पूजायां न ईशिरे समर्था न जाता आमभाव आर्षः । कस्तन्न मन्येतेति सर्वयच्छब्दानां पूर्वेणैवान्वयस्तस्मै नम इत्यग्रे पञ्चमेन वाऽन्वयः॥२१॥ यमिति ॥ ऋषयः ऋकारो देवमाता लक्ष्मीः अदितिर्वा

न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ॥ ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥ २० ॥ असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ॥ न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥२१॥ यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमृषयः ॥ न वेद सिद्धार्थमिव क्वचित् स्थितं भूमण्डलं मूर्धसहस्रधामसु ॥ २२ ॥ यस्याद्य आसीद् गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल ॥ यत्संभवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे ॥ २३ ॥ एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः ॥ महानहं वैकृततामसेन्द्रियाः सृजाम सर्वे यदनुग्रहादिदम् ॥ २४ ॥

ऋनामा त्वदितिरिति त्रिकाण्डशेषः । सा च ऋषयश्चेति द्वन्द्वः । ह्रस्वपाठे छन्दोभङ्ग आर्षः । अस्य विश्वस्य स्थितिजन्मसंयमाः तत्कारकम् तत्करोतीति णिच् । यमाहुः तथा त्रिभिर्जन्मादिभिर्गुणैर्वा विहीनं च यमाहुः । मूर्द्धसहस्रमेव धामानि स्थानानि तेषु क्वचिदेकदेशे स्थितं भूमण्डलं सिद्धार्थमिव सर्षपमिव यो न वेद तस्य भारं महत्त्वं च न गणयति तस्मै नमः ॥२२॥ यस्येति ॥ यस्य गुणनिमित्तो महान्नामाऽऽद्यो विग्रहः महत्तत्त्वम् आसीत्स च विज्ञानधिष्ण्यः चित्तरूपत्वेन सत्वप्रधानत्वात् विज्ञानस्य चैतन्यस्य प्रकाशस्याश्रयभूतः स एव किलाधिदैवो वासुदेवाभेदविवक्षया भगवान् अजो ब्रह्माख्यः यद्यस्माद्ब्रह्मणः संभवो जन्म यस्य सोऽहं रुद्रः त्रिवृता गुणत्रयकार्यमहत्तत्त्वतो जातत्वात्त्रिविधेन स्वतेजसा स्वशक्तिरूपेणाहङ्कारेण वैकारिकं सात्विकं देवतावर्गं तामसं पञ्चमहाभूतवर्गमैन्द्रियं राजसमिन्द्रियवर्गं च सृजे सृजामि तङार्षः ॥२३॥ एते इति ॥ महान् महत्तत्त्वम् अहम् अहङ्कारः वैकृतः तामसश्च ऐन्द्रियश्चेति एते वयं सूत्रेण क्रियाशक्तिप्राणेन यन्त्रिता निबद्धाः सन्तः सूत्रेण निबद्धाः शकुन्ताः पक्षिण इव महात्मनो यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशे स्थिताः सन्तो यदनुग्रहादेवेदं विश्वं सृजामः न तु स्वयं समर्थाः ॥२४॥ यदिति ॥ येन निर्मितां कर्माण्येव पर्वाणि बन्धहेतुत्वाद् ग्रन्थयस्तानि नयति प्रापयतीति तथा ताम् । "एरनेकाच" इत्यनेन यणभाव आर्षः । मायामेव तावत् गुणानां सत्वादीनां सर्गः देहादिपुत्रादिरूपो रसादिरूपश्च तत्र विमोहितः आसक्तः अयं जनोऽञ्जसा तत्स्वरूपं विना कर्ह्यपि न वेद न जानाति ततो निस्तारणयोगं मुक्त्युपायं तु सुतरां न जानाति तस्मै विलीयतेऽस्मिन्निति विलयः उदेत्यस्मादित्युदयः विलयश्चासावुदयश्चात्मा स्वरूपं यस्य तस्मै ते तुभ्यं नमः ॥ २५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चमस्य व्यधात्सप्तदशे गङ्गासहायकः ॥ १७ ॥ अष्टादशे वर्षषट्के सेव्यसेवकवर्णने ॥ मन्त्राः स्तुतिः श्लोकयुक्ता गद्यपद्यानि गोऽग्नयः ॥ उवाचद्वितयं सार्द्धा पञ्चषष्टिरनुष्टुभः ॥ १८ ॥ तथा चेति ॥ यथा संकर्षणं रुद्र उपास्ते तथैवेत्यर्थः । भद्राश्ववर्षे भद्रश्रवा नाम वर्षपतिस्तत्कुलपतयः तस्य सन्तानमुख्याः सेवका गणमुख्याश्च साक्षाद्भगवतो वासुदेवस्य हयशीर्षाभिधानां धर्ममयीं प्रियां तनुं मूर्तिं परमेण समाधिना सन्निधाप्य स-

यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः ॥ न वेद निस्तारणयोगमञ्जसा तस्मै नमस्ते विलयोदयात्मने ॥ २५ ॥ इति श्रीभागवते पञ्चमस्कन्धे इलावृतखण्डे भगवत्संकर्षणवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद् भगवतो वासुदेवस्य प्रियां तनुं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना सन्निधाप्येदम-भिगृणन्त उपधावन्ति ॥ १ ॥ भद्रश्रवस ऊचुः ॥ ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति ॥ २ ॥ अहो विचित्रं भगवद्विचेष्टितं घ्नन्तं जनोऽयं हि मिषन्न पश्यति ॥ ध्यायन्नसद् यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषुः ॥ ३ ॥

न्निधिमानीयेदं मन्त्रादिकमभिगृणन्त उच्चारयन्त उपधावन्ति उपासते ॥ १ ॥ भद्रश्रवस ऊचुरिति ॥ भद्रश्रवःशब्देन अजहत्स्वार्थलक्षणया तद्गणोऽप्युच्यते । तेन "प्राण-भृत उपदधाति" इतिवत् गणिषु लिङ्गसमवायन्यायेन बहुवचनम्[1] । ॐ नम इति स्पष्टम् ॥ २ ॥ अहो इति ॥ अहो भगवतः विचेष्टितं लीलाविचित्रमतर्क्यं यतोऽयं जनो घ्नन्तं हिंसन्तं मृत्युं मिषन् पश्यन्नपि न पश्यति नानुसन्धत्ते । यर्हि यतोऽसत्तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्यायन् मृतं पुत्रं स्वेन जनितं बालं पितरं स्वस्य जनकं वृद्धं च निर्हृत्य दग्ध्वा तन्मध्यवर्त्ती जनको जनितश्च सन् तन्मरणेन स्वस्य मरणं नियतं जानन्नपि स्वयं जिजीविषति जीवितुमिच्छति । जिजीविषुरिति जिजीविषन्निति च छन्दोऽनुरोधिनी पाठान्तरे । ननु भद्राश्वादिवर्षाणां भौमस्वर्गरूपत्वात् तद्वासिनां युगपत्पितुः पुत्रस्य च मृत्युदर्शनं न घटते । सत्यम् । उपदेशार्थत्वाच्छास्त्रस्य सर्वा एव वाचः

---

१ तत्समवायादित्यधिकरणे "इष्टकाचयने प्राणभृत उपदधाति" इति श्रुतिः । प्राणभृतस्तन्नामकान्मन्त्रानुपदधाति अत्र तैर्मन्त्रै रच्यमाना इष्टका अपि प्राणभृतस्ता रचयेदि-त्यर्थः । अत्र प्रकरणे यद्यपि प्रथममन्त्र एव प्राणभृल्लिङ्गमस्ति तथापि तस्यैकस्यापि लिङ्गस्य छत्रिन्यायेन सर्वमन्त्रेषु समवायाद्बहुत्वम् एवमत्रापि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मभूमिं भारतवर्षमधिकृत्यैवोच्यन्ते वयमधन्याः पशुवत् भद्राश्वादिषु वर्त्तामहे। ये तु मोक्षमपि साधयितुं शक्नुवन्ति ते भारतवासिनः कथमहो मुह्यन्ति इति ॥ ३ ॥ वदन्तीति ॥ हे अज यद्यपि कवयो विवेकिनोऽध्यात्मविद उपनिषद्विदो विपश्चितो ज्ञानिनो विश्वं नश्वरं वदन्ति शास्त्रतः पश्यन्ति च तथापि तव मायया मुह्यन्ति तन्नाशाननुसंधानेन नित्यत्वबुद्ध्या तत्रासक्ता भवन्ति। एवं विपश्चितामपि मायया मोहकं तव कृत्यं कार्यं चरितं सुविस्मितमतिविचित्रमेव । अतः सर्वसाधनश्रमं विहाय त्वामजमहं नतोऽस्मि। पूर्वमूचुरिति बहुत्वेऽपि प्रत्येकाभिप्रायकं नतोऽस्मीत्येकत्वम् ॥ ४ ॥ विश्वेति ॥ अपगता आवृत् मायावरणं यस्मात्तादृशस्य अकर्तुरपि ते तव यद्विश्वोद्भवादि कर्म वेदेनाङ्गीकृतं तत् कर्म कार्यकारणरूपे मायया कार्यस्य कारणे स्रष्टरि इति वा सर्वात्मनि वस्तुतः सर्वतोऽतिरिक्ते च त्वयि चित्रमसम्भावितं नास्ति किन्तु तत्कर्म युक्तमेव ॥ ५ ॥ वेदानिति ॥ युगान्ते प्रलये तमसा निद्रादोषेण तिरस्कृतान् ब्रह्मणो मुखतो विगलितान् सृष्ट्यादौ जातेन तमसा मधुदैत्यरूपेण हृतान्वा वेदान् यो भगवान् नृतु-

वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः ॥ तथाऽपि मुह्यन्ति तवाऽज मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम्॥४॥विश्वोद्भवस्थान निरोधकर्म ते विकर्तुरङ्गीकृतमप्यपावृतः॥युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥५॥वेदान् युगान्ते तमसा तिरस्कृतान् रसातलाद् यो नृतुरङ्गविग्रहः॥प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथे हिताय ते इति ॥६॥ हरिवर्षे चापि भगवान् नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये॥ तद्दयितं रूपं महापुरुषगुणमहाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति॥७॥ ॐनमो भगवते नरसिंहाय नमस्तेजस्तेजसे॥ आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रन्धय रन्धय तमो ग्रस ग्रस ॐ स्वाहाअभयमभयात्मनि भूयिष्ठाः ॐ क्ष्रौम्॥८॥

रङ्गविग्रहः ना च तुरङ्गश्च नृतुरङ्गौ तद्रूपो विग्रहो यस्य तथाभूतः संस्तं दैत्यं हत्वा रसातलादानीय अभियाचते कवये ब्रह्मणे प्रत्याददे समर्पितवांस्तस्मै अवितथे हिताय सत्यसङ्कल्पाय ते तुभ्यं नमः। इतिशब्दो मन्त्रस्तोत्रसमाप्त्यर्थः एवमग्रेऽपि ॥ ६ ॥ हरिवर्षे चेति ॥ हरिवर्षे चापि भगवान् नरहरिरूपेणास्ते तस्य तथाभूतस्वरूपग्रहणस्य निमित्तमुत्तरत्र सप्तमस्कन्धेऽभिधास्ये कथयिष्यामि तदपि आत्मनः दयितं प्रियं रूपं महापुरुषाणां ये गुणाः करुणामैत्र्यादयस्तेषां भाजनः पात्रम्। पुंस्त्वमार्षम्। महाभागवतः दैत्यदानवकुलानामन्येषामपि तीर्थीकरणं शीलमाचरितं च यस्य तथाभूतः प्रह्लादः अव्यवधानो निरन्तरः फलसङ्कल्पव्यवधानशून्यो वा स चासौ अनन्यः अव्यभिचारी च यो भक्तियोगस्तेन तद्वर्षपुरुषैः सह उपास्ते। इदं च मन्त्रस्तोत्रादिकमुदाहरति जपति ॥ ७ ॥ ॐ नम इति ॥ भगवते नरसिंहाय नमः । तेजसामग्न्यादीनामपि तेजसे प्रकाशकाय नमः। हे वज्रनख वज्रदंष्ट्र त्वमाविराविर्भव प्रकटो भव। वीप्सा आदरार्था। कर्माशयान् जन्ममरणादिहेतुभूताः कर्मवासनाः। कर्माश्रयानिति पाठे रागादीन् रन्धय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रन्धय निर्दह निर्दह । तमोऽज्ञानं ग्रस दूरीकुरु तङ्भाव आर्षः । तेन चात्मनि जीवेऽभयमभयं यथा स्यात्तथा त्वं भूयिष्ठाः भूयाः । आर्षः । उभयत्र वीप्साऽऽवश्यकत्वद्योतनार्था । स्वाहापदं कर्मसमर्पणार्थं । क्ष्रौमिति श्रीनृसिंहबीजम् ॥ ८ ॥ स्वस्तीति ॥ विश्वस्य सर्वस्य जगतः स्वस्ति मङ्गलमस्तु । ननु सर्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत् तच्च साधुपीडां विना न भवेत् अत आह । जगदमङ्गलहेतुः खलः प्रसीदतां क्रौर्यं त्यजतु। तङार्षः । मिथो वैरिणां मिथो घातं विना स्वस्ति न स्यादत आह । सर्वाण्येव भूतानि मिथः परस्परं शिवं मङ्गलमेव ध्यायन्तु न द्रोहं तेषां सर्वेषां मनश्च भद्रमुपशमादिकं भजतात् । तथा नोऽस्माकं सर्वेषां मतिरप्यहैतुकी निष्कामा सती अधोक्षजे आवेश्यतां । कर्मणि कर्मकर्त्तरि वा लोट् । आद्ये अधोक्षजेनेति शेषः । एवं विश्वस्य स्वस्ति स्यात् न चैवं क्रमेण सर्वमुक्तौ ब्रह्माण्डानि शून्यानि स्युरिति वाच्यम् । जीवशक्तिमायाशक्त्योर्नित्यत्वात्पुनरनन्तानां जीवानां प्रसवादित्याहुः ॥ ९ ॥ मा इति ॥ नोऽस्माकं सर्वेषां प्राणिनाम् अगारे गृहे दारादिषु च उपलक्षणतयाऽन्यत्रापि च सङ्गो मा स्यात् । यदि कथंचित्सङ्गः स्यात्तर्हि भगवत्प्रियेष्वेव स्यात् । यद्वा । सङ्गः क्वापि मा स्यात् यदि स्यात् तदा अगारादिषु मा स्यात् किन्तु भगवत्प्रियेष्वेव ।

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया ॥ मनश्च भद्रं भजतादधोक्षज आवेश्यतां नो मतिरप्यहैतुकी
॥ ९ ॥ माऽगारदारात्मजवित्तबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः ॥ यः प्राणवृत्त्या परितुष्ट आत्मवान् सिध्यत्यदूरान्न तथेन्द्रियप्रियः
॥ १० ॥ यत्सङ्गलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम् ॥ हरत्यजोऽऽन्तःश्रुतिभिर्गतोऽङ्गजं को वै न सेवेत मुकुन्दविक्रमम्
॥ ११ ॥ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥१२॥

यद्वा । यदि भगवत्प्रियेषु सङ्गः स्यात् तदा अगारादिषु सङ्गो मास्तु । यः भगवद्भक्तसङ्गी केवलं प्राणवृत्त्या प्राणादिस्थितिहेत्वाहारमात्रेण परितुष्टः आत्मवान् वशीकृतमनाः स यथा अदूरात् शीघ्रमेव सिध्यति कृतकृत्यो भवति तथा इन्द्रियप्रियः गृहविषयाद्यासक्तो न सिद्ध्यति किन्तु दुःखमेव लभते ॥ १० ॥ यत्सङ्गेति ॥ येषां भगवद्भक्तानां सङ्गात् लब्धं निजमसाधारणं वीर्यवैभवं भगवदाविर्भावहेतुप्रभावातिशयो यस्य तं मुकुन्दस्य विक्रमं यशःश्रुतिभिः श्रवणकीर्त्तनस्मरणैः मुहुर्निरन्तरं संस्पृशतां सेवमानानां पुंसामन्तर्हृदि गतोऽजो भगवान्मानसं मलं हरति विनाशयति । पुष्करादितीर्थं तु मुहुः संस्पृशतामपि अङ्गजमेव मलं पापं हरति नतु मनोगतास्तद्वासनाः अतस्तान् भगवद्भक्तान् को विवेकी न सेवेत अपि तु सर्वोऽपि । यद्वा । तीर्थरूपं मुकुन्दविक्रमं संस्पृशतां हृदि गतो भगवान् मानसम् अङ्गजं च मलं हरति । शेषं प्राग्वत् ॥ ११ ॥ यस्येति ॥ यस्य भगवति अकिञ्चना निष्कामा भक्तिरस्ति भवति तत्र तस्मिन्नेव धर्मज्ञानवैराग्यादिभिः सर्वैर्गुणैः सह सर्वे सुरा देवाः सम्यगासते नित्यं वसन्ति। विषयासक्तस्य हरावभक्तस्य असति अतितुच्छे विषयसुखे मनोरथेन बहिः संसारे धावतस्तु कुतो महतां गुणाः धर्मादयो भवन्ति न कुतोऽपीत्यर्थः ॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri

हरिर्हीति ॥ हि यस्मात् यथा झषाणां मीनानामीप्सितं तोयमेव जीवनहेतुस्तथा भगवान् हरिः सर्वदेहिनां साक्षादात्मा जीवनहेतुरस्ति तं हरिं हित्वा महानतिप्रसिद्धोऽपि यदि गृहे गृहोपलक्षितेषु विषयेषु सज्जते आसक्तो भवति तदा तस्य दम्पतीनां मिथुनानां केवलं शूद्रादिषु प्रसिद्धं वयसा एव पश्वादीनामिव महत्त्वं नतु धर्मज्ञानादिगुणप्रयुक्तम्। मिथुनेषु पूज्यमानेषु स्त्रीभ्यः पुंसां महत्त्वम्। बालमिथुनेभ्यश्च वृद्धमिथुनानां वयसैव यथा महत्त्वं तथेत्यर्थः ॥१३॥ तस्मादिति ॥ तस्मात् हे दैत्याः रजस्तृष्णा रागोऽभिनिवेशः शेषाः स्पष्टाः। रजआदीनां मूलं कारणमत एव संसृतीनां जन्ममरणादीनां चक्रवालं मण्डलमविच्छेदो यस्मात्तथाभूतं गृहं हित्वाऽकुतोभयं न कुतोऽपि भयमुपासकानां यस्मात्तथाभूतं नृसिंहपादं भजत ॥ १४ ॥ केतुमाल इति ॥ केतुमाले भगवान् प्रद्युम्नाख्यः लक्ष्म्याः प्रियचिकीर्षया तथा पुरुषायुषा पुरुषवर्षशतेन यान्यहोरात्राणि तैः परिसङ्ख्यानं गणना येषां तेषां षट्त्रिंशत्सहस्रसङ्ख्यानां "प्रजापतेः संवत्सरो वै प्रजापतिः" इति श्रुतेः। प्रजापतिः संवत्सरस्तदभिमानी देवस्तस्य दुहितरो रात्र्यभिमानिन्यो

हरिर्हि साक्षात् भगवाञ्छरीरिणामात्मा झषाणामिव तोयमीप्सितम् ॥ हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनाम् ॥ १३ ॥ तस्मात् रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ॥ हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताऽकुतोभयमिति ॥ १४ ॥ केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाऽहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते विनिपतन्ति ॥ १५ ॥ अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तम्भितसुन्दरभ्रूमण्डलसुभगवदनारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥ १६ ॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहस्सु च तद्भर्तृभिरुपास्ते ॥ इदं चोदाहरति ॥ १७ ॥

देवताः पुत्राश्च दिवसाभिमानिनो देवास्तेषां तद्वर्षपतीनां च प्रियचिकीर्षया कामदेवस्य स्वरूपेणास्ते। यासां पतिमतीनां दुहितॄणां दिवससहितानां रात्रीणामित्यर्थः। महापुरुषस्य विष्णोर्यन्महास्त्रं कालचक्रं तस्य तेजसा उद्वेजितमनसां विध्वस्ता अतो व्यसवो मृताः सन्तो गर्भाः संवत्सरान्ते विनिपतन्ति । अत्र गर्भाः क्षणलवाद्याः कालाः। यद्वा। वर्षभोज्यानि प्रारब्धफलान्येव ता रात्रीर्निमित्तीकृत्योद्भूतत्वात्तासामेव गर्भा इत्युत्प्रेक्ष्यन्ते तेषां संवत्सरान्ते भोगेन क्षय एव गर्भपातत्वेनोत्प्रेक्षितः ॥ १५ ॥ अतीवेति ॥ अतीव सुललितया गत्या यो विलासो विहारस्तेन विलसितो यो रुचिरो हासलेशो मन्दस्मितं तत्सहितोऽवलोक एव लीला तया किञ्चिदुत्तम्भितमुत्तुङ्गितं यत्सुन्दरं भ्रूमण्डलं तेन सुभगमतिरमणीयं वदनारविन्दं तस्य श्रिया शोभया रमां लक्ष्मीं रमयन् स्वीयानीन्द्रियाणि रमयते ॥ १६ ॥ तदिति ॥ तद्भगवतो मायामयं राजसं रूपं रात्रिषु प्रजापतेः संवत्सरस्य दुहितृभिः रात्र्यभिमानिदेवताभिस्तथाहस्सु दिवसेषु च तद्भर्तृभिर्दिवसाधिष्ठातृदेवताभिरुपेता मिलिता समाधियोगेन चित्तैकाग्रतालक्षणोपायेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रमा देवी उपास्ते सेवते । इदं च मन्त्रादिकमुदाहरति उच्चारयति ॥ १७ ॥ ओमिति ॥ ह्रामित्यादिबीजत्रयम् भगवते हृषीकेशाय सर्वैस्तेजस्वित्वादिभिर्गुणविशेषैर्विलक्षित आत्मा आदित्यादिमूर्त्तिर्यस्य तस्मै इन्द्रियनियामकतत्तद्देवतारूपाय । यद्वा । सर्वैर्गुणविशेषैः श्रेष्ठवस्तुभिः विलक्षितो लक्षीकृत आत्मा यस्य आकूतीनां वागादीन्द्रियाणां चित्तीनां चक्षुरादिबुद्धीन्द्रियाणां चेतसां चतुर्णामन्तःकरणभेदानां विशेषाणां पृथिव्यादीनां चाधिपतये एकादशेन्द्रियपञ्चमहाभूतरूपाः षोडश कलाः यस्य तस्मै छन्दोमयाय अन्नं मनुष्यभोज्यममृतं देवभोज्यं तन्मयाय अतः सर्वमयाय । यद्वा । छन्दोमयाय वेदोक्तकर्मप्राप्याय अन्नमयाय अन्नोपष्टभ्यत्वात् अमृतमयाय परमानन्दाविष्कारत्वात् सर्वमयाय सर्वविषयत्वात् सहसे ओजसे बलाय इति अन्तःकरणेन्द्रियदेहसामर्थ्यरूपाय कान्ताय भर्त्रे ते तुभ्यम् उभयत्र इह लोके परलोके च नमः भूयात् ॥ १८ ॥ स्त्रिय इति ॥ पतिकामानां हि कामाराधनं व्रतेषु प्रसिद्धम् अतः लोके हि याः स्त्रियो व्रतैः स्वतः स्वतन्त्रतया हृषीकाणामिन्द्रियाणामीश्वरं पतिम् । ह्रस्व आर्षः । त्वामाराध्य त्वत्तोऽन्यं पतिमाशासते प्रार्थयन्ते । ते च पतयस्तासामपत्यं धनानि आयूंषि अन्यच्च प्रियवस्तु न वै परिपान्ति नैव रक्षितुं शक्नुवन्ति यतो यस्मात्ते पतयः अस्वतन्त्राः

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मन आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात् ॥ १८ ॥ स्त्रियो व्रतैस्त्वां हृषिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् ॥ तासां न ते वै परिपान्त्यपत्यं प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥ १९ ॥ स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम् ॥ स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम् ॥ २० ॥

कालकर्मगुणाद्यधीनाः न ह्यजगरगृहीतोऽन्यान् गोप्तुं शक्नोतीति ॥ १९ ॥ अतस्ते प्रागुक्ताः पतयो न भवन्तीत्याह–स वा इति ॥ यः स्वयमकुतोभयः न कुतोऽपि कालादितो भयं यस्य स तथा सर्वतो निर्भयः सन् भयातुरं कालादिभयेन व्याकुलं जनं समन्ततः सर्वतः पाति स वै पतिः स्यात् स एव यथार्थपतिशब्दवाच्यः स्यात्-स एवंभूतः पतिर्भवनेक एव नान्यः । यतो भवान् आत्मलाभात् परमानन्दरूपात् परमन्यदधिकं न मन्यते अन्यस्य तु इतरथा आत्मदर्शनाभावेन अन्याधीनसुखस्य न स्वतन्त्रता । स्वतन्त्रनानात्वे च मण्डलेश्वराणामिव मिथो भयं भवति । यद्वा । इतरथा प्रकारान्तरेण पतिशब्दव्याख्यायाम् सप्तम्यर्थ एव वा थाल् । इतरत्र मण्डलेश्वराणामिव स्वप्रजापालकानामपि मिथो भयं ततश्च प्रजानामपि भयं तदपालनमेव वस्तुतः अत एवात्मनस्तव लाभादधि अधिकं वस्तु न मन्यते । शास्त्रज्ञैरिति शेषः । त्वत्प्राप्त्यपेक्षया अन्यप्राप्तिर्नैवाधिकाऽतः त्वमेव वस्तुतः पतिशब्दवाच्यः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येति॥या स्त्री तस्योक्तलक्षणस्य ते तव पत्युः पादसरोरुहस्यार्हणं पूजामेव नितरां कामयेन्न फलान्तरम्।तद्भाव आर्षः। साऽखिलेषु कामेषु लम्पटा सर्वानेव कामान् प्राप्नोतीत्यर्थः। निष्कामपदवीं कीर्त्तिं च प्राप्नोतीति ईप्सितं प्रति ईप्सितः फलान्तरं प्राप्तुमपेक्षितः सन्नर्चितश्चेत्तर्हि तदेकैकमीप्सितं फलं रासि ददासि न तु नित्यम्। यत् यतः पुनः फलभोगानन्तरं भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोतीत्यर्थः। सकामपदवीं दुर्यशश्च प्राप्नोतीति। यद्वा। या स्त्री तव पादार्हणं निकामयेत् निरन्तरं कामास्यै कुर्यात् साऽखिलकामेषु एव लम्पटा आसक्ता भवति। तत्र ईप्सितं फलं प्रतीक्षितस्त्वं तदेकमेवेप्सितं ददासीत्यादि ॥ २१ ॥ मदिति ॥ हे अजित ऐन्द्रिये इन्द्रियविषये एव धीर्येषां ते। अलुक्समासः। अजः ब्रह्मा ईशः शिवः सुरा सुरादयश्च सर्वे यद्यपि मत्प्राप्तय उग्रं तपस्तप्यन्ते कुर्वन्ति तथापि भवत्पादपरायणादृते मां न विन्दन्ति मत्कटाक्षविलसिताः विभूतीः न प्राप्नुवन्ति यतः अहं त्वय्येव हृदयं यस्यास्तादृशी अस्मि अतः त्वद्भक्तानेवानुगृह्णामि नान्यम् ॥ २२ ॥ स त्वमिति ॥ हे

या तस्य ते पादसरोरुहार्हणं निकामयेत् साऽखिलकामलम्पटा ॥ तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाच्ञा भगवन् प्रतप्यते ॥ २१ ॥ मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रियेधियः ॥ ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्धृदया यतोऽजित ॥२२॥ स त्वं ममाप्यच्युत शीर्ष्णि वन्दितं कराम्बुजं यत्त्वदधायि सात्वताम् ॥ बिभर्षि मा लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति ॥ २३ ॥ रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक् प्रदर्शितम्॥ स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ॥ २४ ॥ ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ॥ २५ ॥

अच्युत येन त्वत् त्वया वन्दितं सर्वैः स्तुतं यत्कराम्बुजं स्वहस्तकमलं सात्त्वतां शीर्ष्णि अधायि कृपया न्यस्तं सः सर्वपुरुषार्थदो मद्धृदयवर्त्ती त्वं तत्कराम्बुजं ममापि शीर्ष्णि निधेहीति शेषः। हे वरेण्य मा मां तु केवलं मायया मदाश्वासनार्थं कपटेनैव लक्ष्म वक्षसि स्वर्णरेखाचिह्नरूपं बिभर्षि मयि केवलमादरमात्रं परमा कृपा तु भक्तेष्वेवेति भावः। यत ईश्वरस्य तव ईहितम् आशयम् ऊहितुं ज्ञातुं को नाम प्रभुः ॥ २३ ॥ रम्यक इति ॥ रम्यके च वर्षे तद्वर्षपुरुषस्य तस्य वर्षस्य स्वामिनः सत्यव्रतस्य राज्ञो मनोरिदानीं मनुत्वेन वर्त्तमानस्य श्राद्धदेवसंज्ञस्य प्राक् चाक्षुषमन्वन्तरान्ते प्रलये राजावस्थायां भगवता यन्मात्स्यं रूपं प्रदर्शितं तद्भगवतोऽवताररूपमात्मनः प्रलये रक्षकत्वात्प्रियतमं स मनुरिदानीं मन्ववस्थायामपि महता भक्तियोगेनाराधयतीदं च मन्त्रादिकमुदाहरति जपति ॥ २४ ॥ ओमिति ॥ भगवते सत्त्वाय सत्त्वप्रधानाय मुख्यतमाय सर्वेन्द्रियनियन्त्रे प्राणाय सूत्रात्मने ओजआदिहेतवे महामत्स्याय नमः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तरिति ॥ यथा दारुमयीं स्त्रियं नरः सूत्रेण वशयति तथा उरुस्वनः वेदात्मकमहानादयुक्तः यस्त्वं विधिनिषेधालम्बभूतेन ब्राह्मणादिनाम्ना इदं विश्वं वशे अनयत् नियमितवान् स एवेश्वरस्त्वमखिललोकपालकैर्ब्रह्मेन्द्रादिभिरप्यदृष्टरूपः सन् प्राणरूपेण सर्वस्यान्तर्वायुरूपेण बहिश्च विचरसि ॥ २६ ॥ यमिति ॥ यं त्वां हित्वा विहाय मत्सरः ईर्ष्यैव ज्वरो येषां ते लोकपाला ब्रह्मेन्द्रादयः पृथक्स्थिताः वा सन्तः समेत्य परस्परं मिलिताः वा सन्तः द्विपदो मनुष्यादयः चतुष्पदो गवादयः सरीसृपं जङ्गमं स्थाणु स्थावरं च यदत्र दृश्यते तत्किंचिदपि पातुं न शेकुः न शक्ता भवन्ति स्म। स प्राणरूपेण पालकः सर्वेश्वरस्त्वमेवेति शेषः । तथा च श्रुतिः । " ता अहिंसन्ताहमुक्थमस्म्यहमुकर्स्मीति " अस्यार्थः । ता देवताः अहिंसन्त समत्सरा बभूवुः उ भोः अहं कमाश्रित्य अस्मि वर्त्ते न कमपीत्यर्थः ॥ २७ ॥ भवानिति ॥ ऊर्मीणां मालाऽस्यास्तीति तथाभूते युगान्तार्णवे प्रलयसमुद्रे औषधीनां वीरुधां च निधिमाश्रयभूतामिमां दृश्यमानां क्षोणीं पृथिवीं मया सह मत्सहितां नौरूपां मत्स्यरूपेण स्वशृङ्गे बध्वा उरु बहुधा ओजसा

अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः ॥ स ईश्वरस्त्वं य इदं वशे नयन् नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥ २६ ॥ यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक् समेत्य च ॥ पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥ २७ ॥ भवान् युगान्तार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिम् ॥ मया सहोरुक्रम तेऽज ओजसा तस्मै जगत्प्राणगणात्मने नम इति ॥ २८ ॥ हिरण्मयेऽपि भगवान् निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति ॥ मन्त्रमिमं चानुजपति ॥ २९ ॥ ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणाय नोपलक्षितस्थानाय नमो वर्ष्मणे भूम्ने नमो नमोऽवस्थानाय नमस्ते ॥३०॥ यद्रूपमेतन्निजमाययाऽर्पितमर्थस्वरूपं बहुरूपरूपितम् ॥ सङ्ख्या न यस्यास्त्ययथोपलम्भनात् तस्मै नमस्तेऽव्यपदेशरूपिणे ॥ ३१ ॥

वेगेन यो भवान् अजः क्रमते विचरति स्म। यद्वा । पातुमित्यनुषङ्गः । क्षोणीं पातुं क्रमते उत्सहते इत्यर्थः । अतो वृत्तिसर्गेति तङप्युपपन्नः । तस्मै जगतः प्राणगणस्यात्मने नियन्त्रे सूत्रात्मने नमः॥२८॥हिरण्मय इति॥हिरण्मये वर्षेऽपि भगवान् कूर्मतनुं बिभ्राणो निवसति तस्य भगवतस्तत् तामात्मनः प्रियतमां तनुं पितृगणाधिपतिरर्यमा तद्वर्षपुरुषैः सहोपधावति सेवते । इमं वक्ष्यमाणं मन्त्रं चानु निरन्तरं जपति ॥ २९ ॥ ओमिति ॥ भगवते अकूपाराय कूर्मरूपाय सर्वः सत्त्वगुणो विशेषणं यस्य तस्मै सत्त्वप्रधानाय वारिचरत्वात्सर्वान्तर्यामित्वाद्वा न उपलक्षितं प्रत्यक्षं स्थानं यस्य तस्मै वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय भूम्ने सर्वगताय अवस्थानाय सर्वाधारभूताय नमः ॥ ३० ॥ यद्रूपमिति ॥ निजया माययाऽर्पितं प्रकाशितम् अर्थस्वरूपं सर्वपदार्थरूपं बहुभी रूपै रूपितं निरूपितम् एतत् सर्वमपि पृथिव्यादि यस्यैव रूपमस्ति यतः पृथङ् नास्ति तथा अयथोपलम्भनात् अयथा मिथ्यैवोपलम्भाद्धेतोः यस्य परमेश्वरस्य सङ्ख्या सम्यग् ज्ञानं नास्ति । न हि मरीचिजलमेतावदिति सङ्ख्यातुं शक्यते । तस्मै अव्यपदेशरूपिणे अनिरुक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रपञ्चाकाराय नमस्ते ॥ ३१ ॥ जरायुजमिति ॥ जरायुणा गर्भे वेष्टितं सत्ततो जायत इति तथा मनुष्यादि स्वेदाज्जायत इति तथा मत्कुणादि अण्डाज्जायत इति तथा पक्ष्यादि ऊर्ध्वं भित्त्वा जायत इत्युद्भिदं वृक्षादि तत्रापि चरं जङ्गमं मनुष्यादि अचरं वृक्षपर्वतादि देवा इन्द्रादयः ऋषयो वसिष्ठादयः पितरः अर्यमादयः भूतानि आकाशादीनि ऐन्द्रियमिन्द्रियवर्गः द्यौः स्वर्गः खमन्तरिक्षं भुवर्लोकः क्षितिः भूर्लोकः शैलाः पर्वताः सरितो नद्यः समुद्राः क्षारोदादयः द्वीपा जम्ब्वादयः ग्रहाः आदित्यादयः ऋक्षाणि अश्विन्यादीनि नक्षत्राणि इत्येवं तत्तन्नाम्नाऽभिधेयस्त्वमेक एव न त्वद्व्यतिरिक्तं किंचिदप्यस्ति। "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतेः ॥ ३२ ॥ यस्मिन्निति ॥ असङ्ख्येया अनन्ता विशेषा येषां तानि नामानि रूपाणि आकृतयश्च यस्य तादृशे यस्मिंस्त्वयि प्रपञ्चात्मके कविभिः साङ्ख्याचार्यैः कपिलादिभिर्याः इयं चतुर्विंशत्यादिसङ्ख्या विवेकाय कल्पिता सा यया तत्त्वदृशा येन तत्त्वज्ञानेनापनीयते तस्मै साङ्ख्यशास्त्रेण निदर्शनं प्रतिपादनं यस्य तस्मै साङ्ख्यसिद्धान्तरूपाय परमार्थरूपाय वा ते तुभ्यं नमः ॥ ३३ ॥ उत्तरेष्विति ॥ उत्तरेषु कुरुषु च यज्ञपुरुषो हि भगवान् कृतवराहरूपः आस्ते। तं तु एषा भूः देवी भूम्यभिमानिदेवतारूपा कुरुभिः कुरुखण्डवासि-

जरायुजं स्वेदजमण्डजोद्भिदं चराचरं देवर्षिपितृभूतमैन्द्रियम् ॥ द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३२ ॥ यस्मिन्नसङ्ख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ॥ सङ्ख्या यया तत्त्वदृशाऽपनीयते तस्मै नमः साङ्ख्यनिदर्शनाय त इति ॥३३॥ उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति ॥ इमां च परमामुपनिषदमावर्तयति ॥ ३४ ॥ ॐ नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ ३५ ॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् ॥ मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियाऽर्थैर्नम ईरितात्मने ॥ ३६ ॥

पुरुषैः सहास्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदं वक्ष्यमाणां मन्त्राद्यात्मिकामावर्त्तयति निरन्तरमभ्यासेन जपति ॥ ३४ ॥ ओमिति ॥ मन्त्रैस्तत्त्वेन लिङ्ग्यते ज्ञायत इति मन्त्रतत्त्वलिङ्गस्तस्मै यज्ञक्रतवे यज्ञाः अयूपाः क्रतवः सयूपास्तद्रूपाय अत एव महान्तोऽध्वरा अवयवा यस्य स तथा तस्मै महापुरुषाय कर्मणां शुक्लं शुद्धफलं यस्मात्तस्मै कर्मणा शुद्धाय यज्ञानुष्ठात्रे वा कर्मभिः चरितैः त्रिषु युगेषु धर्मप्रचारात्त्रियुगमूर्त्तये कृतयुगे यज्ञाभावात् कलौ छन्नत्वाद्वा त्रीणि युगानि युगलानि यस्य ऐश्वर्यादिभगषट्कयुताय इति वा ते तुभ्यं नमः ॥ ३५ ॥ यस्येति ॥ गुणेषु देहेन्द्रियादिसङ्घातेषु गुणकार्येषु क्रियाभिः कर्मभिरर्थैस्तत्फलैश्च गूढं यस्य स्वरूपं मथ्ना साधनभूतेन वशीकृतेन मनसा विपश्चितः विवेकिनः दिदृक्षवः जिज्ञासमानाः कवयः अभिज्ञाः मथ्नन्ति विविच्य निष्कर्षन्ति। यथा काष्ठेषु निगूढं जातवेदसमग्निं विवेकिन एव निर्मन्थनेन निष्कर्षन्ति नान्ये तथेत्यर्थः। एवं मन्थनेनेरितः प्रकटित आत्मा स्वरूपं यस्य तस्मै नमः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मथनमेवाह—द्रव्येति ॥ अन्वीक्षया विचारेण अङ्गैर्यमनियमश्रवणमननादिसाधनैरतिशययुक्तो विवेकसमर्थ आत्मा स्वरूपं यस्याः सा निश्चयवती बुद्धिर्येषां तैः पुरुषैः द्रव्यं विषयः क्रिया इन्द्रियव्यापारः हेतुस्तद्देवता अयनं देहः ईशः कालः कर्त्ताऽहङ्कारः एतैर्मायागुणैः प्रकृतिगुणकार्यैरुपलक्षणैर्वस्तुत्वेन निरीक्षितो य आत्मा तस्मै निरस्ता माया निमित्ता आकृतिर्यस्मात्तस्मै नमः ॥ ३७ ॥ निर्गुणरूपेण नत्वा परमेश्वररूपेण प्रणमति—करोतीति ॥ यस्येप्सितुर्भगवतः जीवार्थमीप्सितम् अत्यन्तानिच्छायामीक्षणायोगात् स्वार्थं तु नेप्सितं विश्वस्य स्थितिसंयमोदयं जडाऽपि माया स्वगुणैः करोति । यथा ग्राव्णः अयस्कान्तान्निमित्तात्तदाश्रयं तत्सन्निहितं जडमपि अयो लोहं भ्रमति तथा भगवदीक्षणमात्रेणैव माया प्रवर्त्तते तस्मै गुणानां कर्मणां जीवादृष्टानां च साक्षिणे ते नमः ॥ ३८ ॥ प्रमथ्येति ॥ यो जगतामादिः कारणभूतो भगवान् सूकरः सन् रसातलं गतां मां पृथिवीमग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा ततो रसायाः रसातलोपलक्षितगर्भोदादारभ्योदन्वतः प्रलयार्णवात् निरगात्।यथा इभः गजो दंष्ट्राग्रे पद्मिनीं कृत्वा क्रीडन् जला-

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ॥ अन्वीक्षयाऽङ्गातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥ करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ॥ माया यथाऽयो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥३८॥ प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः ॥ कृत्वाऽग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतोऽस्मि तं विभुमिति ॥३९॥ इति श्रीभागवते पञ्चमस्कन्धे भुवनकोशवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ श्रीशुक उवाच ॥ ॥ किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताऽभिरामं श्रीरामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपास्ते ॥ १ ॥ आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ॥ २ ॥

न्निःसरति न चैवं श्रान्तो भवति तथेति । ततश्च प्रतिवारणं प्रतिगजतुल्यं दैत्यं हिरण्याक्षं मृधे युद्धे प्रमथ्य हत्वा स्थितस्तं विभुं समर्थं परमेश्वरमहं प्रणतोस्मि ॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्॥ पञ्चमस्याष्टादशेऽमूं व्यधाद्गङ्गासहायकः ॥१८॥ ऊनविंशे किंपुरुषैर्भारते सेव्यसेवकाः ॥ भारतस्य श्रैष्ठ्यमत्र गद्यपद्यानि भूर्गुणाः[३१]॥ द्वे[२] उवाचगिरौ सार्द्धाः षट्पञ्चाशदनुष्टुभः[५६॥] ॥ १९ ॥ किम्पुरुषे इति ॥ किम्पुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणस्याग्रजं सीतायाः अभिरामं पतिं श्रीरामं तस्य रामस्य चरणयोः सन्निकर्षे सेवायामेवाभिरतो नान्याभिलाषी परमभागवतः अविरतं विघ्नैरप्रतिहतं यथा स्यात्तथा भक्तिर्यस्य स हनूमान् किम्पुरुषैः तद्वर्षवासिभिः सह उपास्ते ॥ १ ॥ आर्ष्टिषेणेनेति ॥ गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां भर्त्ता चासौ भगवांश्च तस्य कथामार्ष्टिषेणनामकेन किंपुरुषमुख्येन सह सम्यक् सावधानतया उपशृणोति स्वयं चेदं मन्त्रादिकं गायति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ नम इति ॥ भगवते उत्तमश्लोकाय आर्याणां श्रेष्ठानां लक्षणानि शीलं सुस्वभावः व्रतमाचारश्च यस्य तस्मै उपशिक्षितो वशीकृत आत्मा मनो येन तस्मै उपासितोऽनुसृतो लोको येन तस्मै लोकानुरञ्जनाय साधुवादो लोके साधुत्वप्रसिद्धिस्तस्य निकषणाय स्वर्णसाधुत्वनिर्धारणार्थनिकषाश्मवन्निर्धारणस्थानाय परमसीम्ने इत्यर्थः । यद्वा । साधुवादा ब्रह्मण्यत्वादयस्तेषां परमोत्कर्षप्रापकाय लोका हि साधुवादैरुत्कृष्यन्ते रामं प्राप्य तु साधुवादा उत्कृष्टा भवन्तीति ब्रह्मण्यः लोकसङ्ग्रहार्थं ब्राह्मणभक्तश्चासौ देवः परमेश्वरश्च तस्मै महापुरुषाय महाराजाय नमः ॥ ३ ॥ यदिति ॥ यत् विशुद्धश्चासावनुभवश्च स एव मात्रा स्वरूपं यस्य तत् वेदान्तेषु प्रसिद्धम् एकं स्वतेजसा स्वरूपप्रकाशेनैव ध्वस्ता दूरतो निरस्ता गुणानां विविधा जाग्रदाद्यवस्था यस्मिंस्तत् प्रत्यक् दृश्यादन्यत् साक्षिमात्रं प्रशान्तं सुधिया शुद्धचेतसा पुरुषेण उपलभ्यत इति उपलम्भनं शुद्धचित्ते ब्रह्मत्वे नैवोपलभ्यत इत्यर्थः । अनामरूपं निरहम् अहङ्कारशून्यं तत्प्रपद्ये ॥ ४ ॥ मर्त्येति ॥ विभोः श्रीरामस्य मर्त्याकारावतारस्तु रक्षसो रावणस्य वधाय तस्य मनुष्यादन्यतोऽवध्यत्वात् न केवलमेतावत् किं त्विह संसारे मर्त्यानां शिक्षणं पितुराज्ञा पाल्या साध्वी भार्या नोपेक्ष्या तदर्थं दुःखानि सोढव्यानि

ॐ नमो भगवत उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥ ३ ॥ यत् तद् विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थम् ॥ प्रत्यक् प्रशान्तं सुधियोपलम्भनं ह्यनामरूपं निरहं प्रपद्ये ॥ ४ ॥ मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ॥ कुतोऽन्यथा स्यू रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य ॥५॥ न वै स आत्माऽऽत्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः ॥ न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ॥ ६ ॥

लोकापवादाद्भेतव्यम् इत्यादिकम् अपि तत्प्रयोजनम् अन्यथा शिक्षार्थत्वानङ्गीकारे स्वे स्वरूपे रममाणस्य सर्वात्मनः परमेश्वरस्य सीताविरहकृतानि व्यसनानि दुःखानि कुतः स्युः । स्यादिति पाठे वचनव्यत्यय आर्षः ॥ ५ ॥ न वा इति ॥ आत्मा व्यापकः आत्मवतां धीराणां सुहृत्तमः हितकरः आत्मवतामात्मा सुहृत्तमश्चेति वाऽन्वयः । भगवान् वासुदेवः श्रीरामस्त्रिलोक्यां क्वापि विषये नैवासक्तोऽतः स्त्रीकृतं कश्मलं सीतावियोगकृतमोहेन दुःखं नाश्नुवीत नैव प्राप्नुयात् लक्ष्मणं चापि विहातुं नार्हति । देवदूतेन श्रीरामं मन्त्रयता विज्ञापितम् आवयोः संवदतोरत्र कश्चिदागतश्चेत्स त्वया वध्यः स्यादिति श्रीरामेण तथाऽस्त्विति प्रतिज्ञातं तदान्तः कश्चिन्मा प्रविशत्विति लक्ष्मणं द्वारि संस्थाप्य मन्त्रयामास तदा दुर्वासा आगतः तच्छापभयात् विज्ञापयितुं लक्ष्मणः प्रविष्टः । ततो भ्रातुर्वधमनुचितं मन्वानो रामः लक्ष्मणं हन्तुं नैच्छत् पुनर्वसिष्ठवाक्यात् तं तत्त्याजेति वाल्मीकीये प्रसिद्धम् । तच्च सत्यसंकल्पत्वब्रह्मण्यत्वादिशिक्षार्थमेवान्यथा तत्कर्तुमपि स नार्हति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ नूनं महतः श्रीरामस्य सन्तोषहेतुः सत्कुले जन्म सौभगं सौन्दर्यं वाक् वाङ्माधुर्यं बुद्धिर्बुद्धिनैपुण्यम् आकृतिर्जातिः इत्यादिकं न भवति । यत् यस्मात् लक्ष्मणाग्रजः श्रीरामः तैः गुणैर्विसृष्टान् त्यक्तानपि नोऽस्मान् वनौकसो वानरान् सख्ये चकार सखित्वेनाङ्गीकृतवान् सुग्रीवमुपलक्ष्योक्तिः ॥ ७ ॥ सुर इति ॥ अथ तस्मात् सुरो देवः असुरो वानरो नसे मनुष्यः अनरो नरेतरः पशुपक्ष्यादिर्यः कोऽपि वा सर्वात्मना सर्वप्रकारेण सुकृतज्ञम् अल्पीयस्यपि भजने बहुमानिनं मनुजाकृतिं हरिं रामं भजेत । यः कोशलानयोध्यावासिनः सर्वान् पशुपक्ष्यादींस्तिर्यग्योनिगतानपि जीवान् दिवं ब्रह्मलोकादुपरि वर्त्तमानं क्रममुक्तिस्थानं सान्तानिकं नाम लोकमनयत् । यथोक्तं वाल्मीकीये । " लोकान् सान्तानिकान्नाम यास्यन्ती मे समागता । " इति ॥ ८ ॥ भारतेऽपीति ॥ भारतेऽपि वर्षे अव्यक्तगतिर्भगवान्नरनारायणाख्यः अनुकम्पया आत्मवतां भक्तानामनुग्रहाय तपःशिक्षारूपाय नतु स्वार्थम् ईश्वरत्वात् आकल्पान्तं कल्पपर्यन्तं करिष्यामीति सङ्कल्पविषयम् उपचितैर्धर्मज्ञानादिभिरात्मा उपलभ्यते येन तत् तपश्चरति

न जन्म नूनं महतो न सौभगं न वाङ्न बुद्धिर्नाकृतिस्तोषहेतुः ॥ तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥ ७ ॥ सुरोऽसुरो वाऽप्यथ वा नरोऽनरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ॥ भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत् कोसलान् दिवमिति ॥ ८ ॥ भारतेऽपि वर्षे भगवान् नरनारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलम्भनमनुग्रहायाऽत्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरति ॥ ९ ॥ तं भगवान् नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां साङ्ख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥१०॥ ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इति ॥ ११ ॥ गायति चेदम् ॥ कर्ताऽस्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः ॥ द्रष्टुर्न दृग् यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥

उपशम इन्द्रियाणां संयमः उपरमो निरहङ्कारिता अत्रानुग्रहस्तपसि प्रयोजनम् अनुकम्पा तत्कारणमित्यपौनरुक्त्यम् ॥ ९ ॥ तमिति ॥ तं भगवन्तं भगवत्प्रोक्ताभ्यां साङ्ख्ययोगाभ्यां सह भगवदनुभाव उपवर्ण्यते । येन तत् पञ्चरात्रं सावर्णेः सावर्णिं भाविनं मनुं शेषे षष्ठी उपदेक्ष्यमाणः भगवान् नारदः वर्णाश्रमवतीभिर्भारतवर्षनिवासिनीभिः प्रजाभिः सह परमभक्तिभावेनोपसरति सेवते । इदं च मन्त्रात्मकं गद्यमभिगृणाति ॥ १० ॥ ॐ नम इति ॥ उपरतं नित्यनिवृत्तमनात्म्यमहन्तादिकं यस्मात् अकिञ्चनानां विरक्तानां वित्ताय ऋषिषु ऋषभाय श्रेष्ठाय शेषं स्पष्टम् ॥११॥ गायतीति॥ इदं वक्ष्यमाणं गायति च । कर्त्तेति ॥ अस्य विश्वस्य सर्गादिषु कर्त्ताऽपि यो न बध्यते अहं कर्त्तेति न मन्यते इति तेभ्यो विविक्तत्वं देहगतोऽपि दैहिकैरिन्द्रियादिभिः क्षुत्पिपासादिभिश्च यो न हन्यते नाभिभूयते इत्यसंसक्तत्वम्।यस्य द्रष्टुरपि सतो गुणैर्विषयैर्दृग् दृष्टिर्न विदूष्यते न विक्रि-

CC-0. In Public Domain. Digitization by eGangotri

यते इति साक्षित्वम् । एवमसक्तश्चासौ विविक्तश्च साक्षी च तस्मै नमः ॥ १२ ॥ इदं हीति ॥ हे योगेश्वर यद्भगवान् हिरण्यगर्भो योगस्य नैपुणं जगाद उक्तवांस्तदिदं हि इदमेव किं तत् तदाह । यत् उज्झितं त्यक्तं दुष्टं संसारदुःखकारणं कलेवरं तत्राहंममाभिमानो येन तथाभूतः सन्नन्तकाले निर्गुणे त्वयि भक्त्या मनो दधीत धारयेत् । यद्वा । यदिति शत्रन्तम् । अन्तकाले यत् गच्छत् चपलं मन इति ॥ १३ ॥ यथेति ॥ ऐहिकामुष्मिककामेषु लम्पट आसक्तः अज्ञः सुतादिषु योगक्षेमं चिन्तयन् मयि मृते एते कथं वर्त्तेरन्निति चिन्तां कुर्वन् कुत्सितस्य विष्ठादिमलपूर्णस्य दुःखमूलस्यापि कलेवरस्यात्ययान्नाशाच्छङ्कते बिभेति तथैव चेद्विद्वानपि शङ्केत तदा तस्य सर्वसाधनप्रयत्नः केवलं श्रम एव ॥ १४ ॥ तदिति ॥ हे प्रभो हे अधोक्षज यतो विदुषामपीयं दशा तस्मात् त्वमेव त्वयि स्वभावजं सहजवासनारूपं निरुपाधिकं प्रेमलक्षणं योगं

इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत्॥यदन्तकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः॥१३॥यथैहिकामुष्मिककामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् ॥ शङ्केत विद्वान् कुकलेवरात्ययाद् यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥ तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाऽहंममतामधोक्षज ॥ भिन्द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावजमिति॥१५ ॥ भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः ॥ मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः ॥१६॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति ॥ १७॥ चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धुः अन्धः शोणश्च नदौ महानदी वेदस्मृती ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥ १८ ॥

नोऽस्माकं विधेहि सम्पादय । येन योगेन त्वन्मायया मोहितैर्नोऽस्माभिः कुकलेवरे मलपूर्णत्वादिहेतुना निन्दिते शरीरेऽर्पिताम् अनेकजन्मस्वनुवर्तिताम् अत एव सुदुर्भिदाम् उपायान्तरैः सर्वथा त्यक्तुमशक्याम् अहंममतां वयमाशु शीघ्रमेव भिन्द्याम त्यजेम ॥ १५ ॥ भारतेऽपीति ॥ इलावृतवत् भारतेऽपि सरितः शैलाश्च बहवः सन्ति तत्र तत्र शैला मलय इत्यादयः तेषां नितम्बप्रभवाः तटेभ्यः सम्भूताः शेषं स्पष्टम् ॥ १६ ॥ एतासामिति ॥ नामभिरेव पुनन्तीनां । नुमार्षः । एतासां नदीनाम् अपः भारत्यः प्रजा आत्मना च देहेनाप्युपस्पृशन्ति ॥ १७ ॥ चन्द्रवशेति ॥ अन्धो ब्रह्मपुत्राख्यो नदः । शेषं स्पष्टम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन्निति ॥ अस्मिन् भारते वर्षे एव लब्धं जन्म यैस्तैः पुरुषैः स्वारब्धेन स्वानुष्ठितेन शुक्ललोहितकृष्णवर्णेन सात्त्विकराजसतामसेन पुण्यमिश्रपापेन वा कर्मणा आनुपूर्व्येण सात्त्विकादिकर्मानुसारेण आत्मनः बह्व्यः दिव्यमानुषनारकादिगतयो विधीयन्ते साध्यन्ते । हि यस्मादानुपूर्व्येण कर्मानुसारेण सर्वा एव गतयः सर्वेषामेव भवन्ति । यथा वर्णविधानं यस्य वर्णस्य यद्विधानं मोक्षप्रकारः संन्यासवनस्थत्वगृहस्थत्वादि तदनतिक्रमेणास्मिन्नेव वर्षे नृणामपवर्गो मोक्षश्च भवति । एतच्च कर्मादिबहुसाधनसम्भवाभिप्रायेणोक्तम् । न त्वन्यत्रापवर्गाभावाभिप्रायेण तदुपर्यपि बादरायणः संभवादिति देवानामपि मोक्षस्य सूचितत्वात् । युगधर्मप्रवृत्तिरप्यत्रैव बोध्या नान्यत्र । उक्तं च वैष्णवे । " चत्वारि भारते वर्षे युगान्यत्र महामुने । कृतं त्रेता द्वापरं च कलिश्चान्यत्र न क्वचित् ॥ " इति । तत्रापि सहस्रयोजनप्रमाणे प्रदेश एवेति ज्ञेयम् । यतः भारतस्याप्यवान्तरदेशप्रभेदास्तत्रैव दर्शिताः । " भारतस्यास्य वर्षस्य नव भेदान्निशामय । इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ॥ नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः । अयं तु नवमस्तेषां द्वीपः सागरसंभृतः ॥ योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरात् । " इति सागरसंभृतः समुद्रप्रान्तवर्त्तीति वैष्णवे । स्वामिपादाः अस्य नवमस्य खण्डस्य नामा-

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते यथावर्णविधानमपवर्गश्चापि भवति ॥ १९ ॥ योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताऽविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः ॥ २० ॥ एतदेव हि देवा गायन्ति ॥ अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ॥ यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः ॥ २१ ॥

कथनात् " नाम्नाऽपि नवद्वीपोऽयम् " इति गम्यते इत्याहुः । यद्वाऽस्य नाम कुमारिकेति वर्णव्यवस्थितिरिहैव कुमारिकाख्ये । " शेषेषु चान्त्यजजना निवसन्ति सर्वे " इति सिद्धान्तशिरोमण्युक्तेः ॥ १९ ॥ अपवर्गस्वरूपं तत्कालं चाह—य इति ॥ यदा ह्यनेकजन्मसुकृतपरिपाकदशायां महापुरुषस्य भगवतः पुरुषैर्भक्तैः सह प्रकृष्टः सङ्गः स्यात्तदा नानाविधदेवतिर्यङ्मनुष्यादिगतीनां कामकर्मादिद्वारा निमित्तभूतो योऽविद्यालक्षणो ग्रन्थिः बन्धनं तस्य रन्धनं निरासस्तद्द्वारेण योऽसौ भगवति सर्वभूतानामात्मनि आत्मनि भवम् आत्म्यं रागादि तच्छून्ये अनिरुक्ते वाचामगोचरे अनिलयने प्रलयरहिते अनाधारे वा परमात्मनि वासुदेवे अनन्यनिमित्तः फलाभिसन्धिशून्यो भक्तियोगलक्षणः सर्वाधिकप्रेमप्रवाहरूपः स भवतीत्यनुषङ्गः । अत्र भक्तेरपवर्गशब्दवाच्यता ॥ २० ॥ एतदिति ॥ एतदेव मानुष्यमेव सर्वपुरुषार्थसाधनं गायन्ति । अहो इति । यैर्भारताजिरे भारताङ्गणे मुकुन्दसेवायामौपयिकम् उपायरूपं नृषु जन्म लब्धं यस्मिन्नोऽस्माकमपि केवलं स्पृहैवास्ति न प्राप्त्याशा तैरमीषाममीभिः । शेषे कर्त्तरि षष्ठी । किमाश्चर्यभूतं शोभनं सुकृतमकारि कृतम् । उतस्वित् अथवा स्वयं साधनं विनैवैषां हरिः प्रसन्नोऽभूत् । एवंभूतस्य पुण्यस्य दुष्करत्वात् । " यमेवोन्निनीषति तं साधु कर्म कारयति " इति श्रुतेः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पृहामेवाह—किमिति ॥ दुष्करैरपि क्रत्वादिभिः नोऽस्माकं फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्याऽपि किं फलं जातं न किंचिदपीत्यर्थः । यत्र स्वर्गे नारायणस्य पादपद्मयोः स्मृतिर्नास्ति प्रत्युत सा स्मृतिः अतिशयितादिन्द्रियोत्सवात् विषयभोगात् प्रमुष्टा विलुप्तेत्यर्थः ॥ २२ ॥ ब्रह्मलोकादपि भारतभूमेरुत्कर्षमाहुः—कल्पेति ॥ पुनर्भवात् पुनरावृत्तियुक्तात् कल्पायुषां ब्रह्मादीनामपि स्थानजयात् ब्रह्मलोकप्राप्तेः सकाशात् क्षणमल्पमायुर्येषां तेषां स्थानं यद्भारतभूलक्षणं तस्य जयो वरः श्रेष्ठः । यत्र मर्त्येन क्षणभङ्गुरेणापि देहेन क्षणेनैव कालेन कृतं कर्म संन्यस्य हरौ समर्प्य मनस्विनो धीरा अभयं सर्वतापविवर्जितं हरेः पदं स्थानं सम्यक् पुनरावृत्तिवर्जं यान्ति ॥ २३ ॥ नेति ॥ यत्र वैकुण्ठस्य भगवतः कथा एव सुधापगा अमृतनद्यो न सन्ति । यत्र च तदाश्रयाः कथासुधापगाश्रयाः भगवदाश्रया वा भागवताः साधवश्च न सन्ति । यत्र च महान्तो नृत्याद्युत्सवा येषु ते यज्ञेशस्य भगवतः मखाः संकीर्त्तनबहुलाः पूजा न सन्ति स एवंभूतः सुरेशस्य ब्रह्मणो लोकश्चेत्तदाऽपि न वै सेव्यतां नैवाश्रीयतां विवेकिभिः ॥ २४ ॥ प्राप्ता इति ॥ ज्ञानानि

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ॥ न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टाऽतिशयेन्द्रियोत्सवात् ॥ २२ ॥ कल्पायुषां स्थानजयात् पुनर्भवात् क्षणायुषां भारतभूजयो वरम् ॥ क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः ॥ २३ ॥ न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ॥ न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ २४ ॥ प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसंभृताम् ॥ न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनम् ॥ २५ ॥ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमन्त्रवस्तुतः ॥ एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत् पुनरर्थिता यतः॥ स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥ २७ ॥

ज्ञानेन्द्रियाणि चक्षुरादीनि क्रियाः कर्मेन्द्रियाणि द्रव्याणि पञ्च महाभूतानि तेषां कलापेन संभृतामविकलदेहेन्द्रियादिसम्पन्नाम् । यद्वा । ज्ञानं तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि तेषां कलापेन संभृतां नृजातिमिह भारतवर्षे प्राप्ता अपि ये तु जन्तवः प्राणिनः अपुनर्मृतायोक्तलक्षणमोक्षाय न यतेरन् प्रयत्नं न कुर्वन्ति ते वै भूयः पुनरपि बन्धनमेव यान्ति । यथा वनौका वनौकसः पक्षिणो लुब्धकान्मुक्ता अपि यदि फललोभेन तत्रैव वृक्षे विहरन्ति तदा पुनर्बध्यन्ते तद्वत् ॥ २५ ॥ यैरिति ॥ यैर्भारतवासिभिरधिकारिभिर्बर्हिषि यागे श्रद्धया पृथगिन्द्रादिनामभिराहुत आहूतः । दीर्घाभाव आर्षः । आशिषां चतुर्विधपुरुषार्थानां प्रभुर्दाता अत एव स्वयं पूर्णोऽपि हरिरागत्य विधिना प्रकारेण मन्त्रेण वस्तुतश्चरुपुरोडाशादिभेदेनेष्टं तत्तद्देवतायोग्यमग्नये जुष्टं निर्वपामि । इन्द्राय जुष्टं निर्वपामीत्येवं भागशो निरुप्तं पृथक्कृतं हविर्मुदा गृह्णाति ॥ २६ ॥ सत्यमिति ॥
तत्र द्विविधभक्तानां मध्ये सकामानां नृणां तैरर्थितः प्रार्थितः सन्नर्थितं फलं दिशति ददातीति सत्यं तथापि अर्थदः परमार्थफलदो नैव भवति । यत् यस्मात् दत्तस्य भोगेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षयादनन्तरं पुनरप्यर्थिता भवति निष्कामानां तु परमार्थदो भवत्येव । यतस्तेषामनिच्छतामपि भजतामिच्छानां पिधानमाच्छादकं सर्वकामपूरकं सर्वकामनिवर्तकं वा निजपादपल्लवं स्वयमेव विधत्ते सम्पादयति । भक्तिरसिकास्त्वाहुः । नृणां भजतामर्थितं वस्तु अर्थितः प्रार्थितः भगवान् दिशतीति सत्यं किन्तु यत् यथा पुनरर्थिता भोगान्ते याचकत्वं स्यात्तथा नैवार्थदः । यतः निजपादपल्लवमनिच्छतामपि भजतां स्वयमेव ध्रुवादीनामिव इच्छापिधानं सर्वकामाच्छादकं तदेव निजपादपल्लवं विधत्ते कृपया ददाति । निजपादपल्लवं स्वयमेव बलाद्दत्त्वा इच्छायाः पिधानं विधत्ते करोतीति वा ततश्चानीप्सितामपि सितां पितुः सकाशात् प्राप्य शिशवो यथा मृदि स्पृहां त्यजन्ति तथा सकामभक्ताः कामानपीत्यर्थः । अत एव "अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥" इत्युक्तम् ॥ २७ ॥ यदीति ॥ यदि अत्रास्मिन् काले नोऽस्माकं स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य कृतस्यान्यस्य वा कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं शोभनं सुकृतं किञ्चिदस्ति तर्हि तेनाजनाभे वर्षे

यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ॥ तेनाजनाभे स्मृतिमज्जन्मनः स्याद्द्‌ वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥ श्रीशुक उवाच ॥ ॥ जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥ तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्र आवर्तनो रमणको मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति ॥ ३० ॥ एवं तव भारतोत्तम जम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ ३१ ॥ इति श्रीभा० म० पञ्चम० जम्बूद्वीपवर्णनं नामैकोनविंशतितमोऽध्यायः ॥ १९ ॥ श्रीशुक उवाच ॥ अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ॥ १ ॥ जम्बूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन ॥ २ ॥

स्मृतिमत् हरिरेव सेव्यो नान्यदित्यनुसन्धानयुक्तं नोऽस्माकं जन्म स्यात् । यत् यस्मात् हरिर्भजतां शं स्वानुभवसुखं तनोति । भारते भजनसम्भवात्स्वर्गे तत्प्रतिबन्धकबाहुल्याच्च ॥ २८ ॥ जम्बूद्वीपस्येत्यादि स्पष्टम् ॥ २९ ॥ ३० ॥ ३१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्पञ्चमस्योनविंशके ॥ १९ ॥ विंशे प्लक्षादिषड्द्वीपस्थितिमाह सहार्णवैः ॥ लोकालोकस्थितिं चात्र गद्यपद्यानि नन्दषट् ॥ द्वे उवाचेत्यर्द्धयुक्ताश्चतुर्नागौ" अनुष्टुभः ॥ २० ॥ अत इति ॥ प्रमाणं योजनानि लक्षणमसाधारणं चिह्नं नाम हेतुः प्लक्षादि संस्थानं मण्डलाकारतिरश्चीनाकारादि स्पष्टं शेषम् ॥ १ ॥ जम्ब्विति ॥ अयं जम्बूद्वीपो यावत्प्रमाणविस्तारः यावता लक्षयोजनेन प्रमाणेन विततस्तावता लक्षयोजनविस्तृतेन क्षारोदधिना स्वयं परिवेष्टितः । तत्र दृष्टान्तः । यथा मेरुर्जम्ब्वाख्येन द्वीपेनेति वेष्टितत्वमात्रे दृष्टान्तो न समप्रमाणत्वेऽपि षोडशसहस्रयोजनमेरुप्रमाणोक्तिविरोधात् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

लवणेति ॥ परिक्षिप्तः वेष्टितः ॥ ३ ॥ प्लक्ष इति ॥ जम्बूप्रमाण एकादशशतयोजनोच्छ्रायः शाखाभिरेकादशशतयोजनविततः शतयोजनस्थूलश्च प्लक्षो वृक्षः । द्वीपाख्याकरो महाप्रमाणप्लक्षवृक्षवत्त्वात् प्लक्ष इति द्वीपनाम निरुक्तिहेतुरस्ति । यत्र द्वीपे प्लक्षे वा उत्थितः अतिप्रज्वलितो हिरण्मयः प्रकाशमानः सप्तजिह्वः अग्निः उप समीपे इव आधिक्येन वा आस्ते तिष्ठति ॥ ४ ॥ तस्येति ॥ तस्य द्वीपस्य आकलय्य दत्त्वा ॥ ५ ॥ शिवमित्यादीनि सप्त वर्षनामानि पुत्रनामानि च तेषु प्लक्षद्वीपवर्षेषु गिरयो मर्यादापर्वता नद्यश्चाभिज्ञाताः प्रसिद्धाः सप्तैव अन्ये च पर्वता नद्यश्च सहस्रशः सन्तीत्यर्थः । सर्वेषां द्वीपानां मण्डलाकारत्वात् पुष्करद्वीपे च मानसोत्तरेणैकेनैवाद्रिणा भागद्वयोक्तेर्मानसोत्तरोऽपि मण्डलाकारः अन्यथा एकेनाद्रिणा मण्डलाकारस्य विभागासम्भवः प्लक्षादिषु पञ्चसु द्वीपेषु तु तत्तद्वर्षविभाजकाः अद्रयस्तिर्यग्रेखाकारा उभयतो-

लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येण परिक्षिप्तो यथा परिखाबाह्योपवनेन ॥ ३ ॥ प्लक्षो जम्बूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः ॥ ४ ॥ तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥ ५ ॥ शिवं यवसं सुभद्रं शान्तं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ॥ ६ ॥ मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः ॥ ७ ॥ अरुणा नृम्णाङ्गिरसा सावित्री सुप्रभाता ऋतंभरा सत्यंभरा इति महानद्यः ॥ ८ ॥ यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते ॥ ९ ॥ प्रत्नस्य विष्णो रूपं च सत्यस्यर्तस्य ब्रह्मणः ॥ अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥ १० ॥

ऽब्धिं स्पृशन्तः सन्तीति ज्ञेयम् । अन्यथा सप्तभिः सप्तवर्षविभागासम्भवात् वैष्णवे वर्षाणां पूर्वादिक्रमोक्तेश्च ॥ ६ ॥ मणीति द्वयम् ॥ स्पष्टम् ॥ ७ ॥ ८ ॥ यासामिति ॥ यासां नदीनां जलोपस्पर्शनस्नानादिना विधूतं निरस्तं रजस्तमश्च येषां ते सहस्रं वर्षसहस्रमायुर्येषां ते विबुधोपमं संदर्शनं क्लमस्वेदादिरहितं रूपं प्रजननमपत्योत्पादनं च येषां ते हंसादयो ब्राह्मणादिस्थानीयाश्चत्वारो वर्णास्त्रय्या वेदत्रयात्मिकया विद्यया स्वर्गद्वारं स्वर्गप्रदं त्रयीमयं वेदप्रतिपाद्यम् आत्मानमन्तर्यामिणं भगवन्तं सूर्यं यजन्ते ॥ ९ ॥ मन्त्रमाह—प्रत्नस्येति ॥ सत्यादीनामात्मानमधिष्ठातारं प्रत्नस्य पुराणस्य विष्णोरेव रूपं सूर्यम् ईमहि शरणं व्रजेम । आर्षः प्रयोगः । तत्र सत्यम् अनुष्ठीयमानो धर्मः ऋतं प्रमीयमाणो धर्मः ब्रह्म तद्बोधको वेदः अमृतं शुभफलं मृत्युः अशुभफलम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्लक्षेति ॥ औत्पत्तिकी स्वाभाविकी अविशेषेण समानत्वेन ॥ ११ ॥ प्लक्ष इति ॥ यथा प्लक्षः प्लक्षद्वीपः स्वसमानेन द्विलक्षयोजनविस्तारेण इक्षुरसोदेनावृतस्तथा ततो द्विगुणविशालश्चतुर्लक्षयोजनविस्तृतः शाल्मलीद्वीपोऽपि स्वसमानविस्तारेण सुरोदेनावृतः परिवृङ्क्ते सर्वतो विराजते ॥ १२ ॥ यत्रेति ॥ यत्र द्वीपे हि प्लक्षायामा शतयोजनस्थूला एकादशशतयोजनोच्छ्रिता सा वै प्रसिद्धाशाल्मली वृक्षः द्वीपस्य हूतये नामनिरुक्त्यै उपलक्ष्यते दृश्यत आस्ते । यस्यां शाल्मल्यां "सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरः" इति श्रुतेश्छन्दोभिः स्वावयवैर्भगवन्तं स्तौतीति च्छन्दस्तुत् तस्य भगवतः पतत्रिराजस्य गरुडस्य निलयं स्थानमाहुः ॥ १३ ॥ १४ ॥ वर्षाण्याह—सुरोचनमिति ॥ १५ ॥ १६ ॥ पर्वतानाह—स्वरस इति ॥ १७ ॥ नदीराह—अनुमतिरिति ॥ १८ ॥ तदिति ॥ १९ ॥ मन्त्रमाह—स्वेति ॥ यः स्वस्य गोभिः

प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते ॥ ११ ॥ प्लक्षः स्वमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृङ्क्ते ॥ १२ ॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छन्दः स्तुतः पतत्त्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥ १३ ॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् ॥ १४ ॥ सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥ १५ ॥ तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः ॥१६॥ स्वरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पदन्तः सहस्रश्रुतिरिति ॥१७॥ अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥१८॥ तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसंधरेषन्धरसंज्ञा भगवन्तं देवमयं सोममात्मानं वेदेन यजन्ते ॥ १९ ॥ स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः ॥ प्रजानां सर्वासां राजाऽन्धः सोमो न अस्त्विति ॥ २० ॥ एवं सुरोदाद्बहिस्तद्द्विगुणस्वमानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपः ॥ २१ ॥ यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति ॥ २२ ॥ तद्द्वीपपतिः प्रैयव्रतो राजा हिरण्यरेतो नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत ॥ २३ ॥

किरणैः । टजभाव आर्षः । कृष्णशुक्लपक्षयोः क्रमेण पितृदेवेभ्योऽन्धः अन्नं विभजन् वर्त्तते सर्वासां प्रजानां राजा स सोमो नोऽस्माकम् आस्तु आभिमुख्येन भवतु । ह्रस्वपाठस्त्वार्षः ॥ २० ॥ एवमिति ॥ यथा पूर्वः शाल्मलिद्वीपः स्वसमानेन सुरोदेनावृत एवं सुरोदाद्बहिस्ततो द्विगुणोऽष्टलक्षयोजनविस्तृतः कुशद्वीपोऽपि स्वसमानेनाष्टलक्षयोजनविततेन घृतोदेनावृतोऽस्ति ॥ २१ ॥ यस्मिन्निति ॥ यस्मिन् द्वीपे तस्य द्वीपस्य आख्याकरः नामनिरुक्तिकरः अपरः द्वितीयः ज्वलनः अग्निरिव प्रकाशमानः देवकृतः परमेश्वरेण रचितः कुशस्तम्बः स्वशष्पाणां कोमलशिखानां रोचिषा दीप्त्या सर्वा दिशो विराजयति प्रकाशयति ॥ २२ ॥ तद्द्वीपेति ॥ वसुः वसुदानः दृढरुचिः नाभिगुप्तः

CC-0. In Public Domain. Digitization by eGangotri

स्तुत्यव्रतः विविक्तः वामदेव इति नामानि येषां तेभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य विभागेन दत्त्वा स्वयं च तप आतिष्ठत तपः कर्तुं प्रतिज्ञातवान्। "प्राङः प्रतिज्ञायाम्" इति तङ्। स्पष्टं शेषम् ॥ २३ ॥ २४ ॥ गिरीनाह—चक्र इति ॥ २५ ॥ नदीराह—रसकुल्येति ॥ २६ ॥ यासामिति ॥ यासां नदीनां पयोभिर्जलैर्विशुद्धाः सन्त इति शेषः। कुशलाद्याः संज्ञा येषां ते ब्राह्मणादिस्थानीयाश्चत्वारो वर्णाः जातवेदा अग्निस्तत्स्वरूपिणं भगवन्तं कर्मकौशलेन यज्ञादिकर्मानुष्ठाननैपुण्येन यजन्ते ॥ २७ ॥ मन्त्रमाह—परस्येति ॥ हे जातवेदः त्वं साक्षाद् परस्य ब्रह्मणो भगवतो मुखरूपो हव्यवाडसि अतो देवानां यज्ञेन पुरुषं भगवन्तं हरिमेव यज। अङ्गानां नाम्ना दत्तमङ्गिने समर्पयेत्यर्थः ॥ २८ ॥ तथेति ॥ द्विगुणः षोडशलक्षयोजनविततः स्वसमानेन क्षीरोदेन परित उपक्लृप्तो वेष्टितोऽस्तीति शेषः। वृत इति परत्रान्वितम्। यथा कुशद्वीपो

वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनाभ्यस्तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव ॥ २४ ॥ चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति ॥ २५ ॥ रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति॥२६॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवन्तं जातवेदसरूपिणं कर्मकौशलेन यजन्ते ॥ २७॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाड् ॥ देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यजेति ॥२८॥ तथा च घृतोदाद् बहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तः ॥ २९॥ वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥ ३० ॥ योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥३१॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम ॥ ३२ ॥ आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः॥ ३३ ॥ शुक्लो वर्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्वभद्र इति ॥ ३४ ॥

घृतोदेन वृतः ॥ २९ ॥ ३० ॥ य इति ॥ गुहस्य कार्त्तिकेयस्य प्रहरणेन शस्त्रेण शक्तिरूपेण उन्मथिताः नितम्बाः तटभागाः कुञ्जानि च यस्य स तथाभूतोऽपि विभयः विगतभयः स्पष्टं शेषम् ॥ ३१ ॥ तस्मिन्निति ॥ स्वयं भगवान् ज्ञानी तस्याधिपतिः प्रैयव्रतः प्रियव्रतपुत्रो घृतपृष्ठो नाम सोऽपि तस्मिन् स्वे द्वीपे सप्त वर्षाणि विभज्य तेषु पुत्रनामसु पुत्राणां नामान्येव नामानि येषां तेषु वर्षेषु सप्त रिक्थादान् स्वपुत्रान् वर्षपान् प्रजापालकान् निवेश्य भगवतः परमकल्याणं यशो यस्य तस्य आत्मभूतस्य हरेश्चरणारविन्दध्यानार्थं वनमुपजगाम ॥ ३२ ॥ पुत्रानाह—आम इति ॥ ३३ ॥ गिरीनाह—शुक्ल इति ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदीराह—अभयेति॥ ३५॥ यासामिति॥ अमलं निर्मलं यासामम्भो जलमुपयुञ्जानाः सेवमानाः पुरुषादिसंज्ञका ब्राह्मणादिस्थानीया वर्षपुरुषाः आपोमयमम्मयम्। अत्र आपस्-शब्दः सकारान्तः। देवं भगवन्तमपामपोभिः पूर्णेनाञ्जलिना यजन्ते पूजयन्ति॥ ३६॥ मन्त्रमाह—आप इति ॥ हे आपः पुरुषवीर्याः स्थ ईश्वराल्लब्धसामर्थ्याः भवथ अत एवा-त्मना स्वरूपेणैवाऽमीवघ्नीः पापहन्त्र्यः। पूर्वसवर्णदीर्घ आर्षः। भूर्भुवः स्वस्त्रैलोक्यं पुनन्तीः पुनत्यः। पूर्वसवर्णदीर्घो नुम्र् चार्षः। ता यूयं नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनीत। यद्वा। आत्मना शरीरेण भुवः भूमिप्रदेशान् स्पृशतां दण्डवत्प्रणमतां नोऽस्माकं। शेषे षष्ठी। पुनीत॥ ३७॥एवमिति॥ एवं क्रौञ्चद्वीपवत्क्षीरोदात् परस्तात् दध्नो

अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति॥३५॥ यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनाञ्जलिना यजन्ते ॥३६॥ आपः पुरुषवीर्याः स्थ पुनन्तीर्भूर्भुवः स्वः। ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥ ३७ ॥ एवं परस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परीतः ॥ ३८ ॥ यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगन्धस्तं द्वीपमनुवासयति ॥ ३९ ॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः ॥ ४० ॥ सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान् निधायाधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥ ४१ ॥ एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ॥ ४२ ॥ ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति ॥ ४३ ॥ अनघाऽयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृति-रिति ॥ ४४ ॥ तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते ॥ ४५ ॥ अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ॥ अन्तर्यामीश्वरः साक्षात् पातु नो यद्वशे स्फुटम् ॥ ४६ ॥ एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतः ॥ ४७ ॥

मण्डं रसः स एवोदकं यस्य तेन स्वसमानविस्तारेण समुद्रेण परिवेष्टितो द्वात्रिंशल्लक्षयोजनमायामो विस्तारो यस्य तथाभूतः शाकद्वीपः परितः सर्वत उपवेशितो रचितोऽस्ति ॥ ३८ ॥ यस्मिन्निति ॥ स्वक्षेत्रव्यपदेशको द्वीपनामनिरुक्तिहेतुः शाको नाम वृक्षः। यस्य पर्णान्यन्तः खरस्पर्शानि बहिर्मृदुस्पर्शानि सोऽस्ति । स्पष्टं शेषम् ॥ ३९ ॥ ॥ ४० ॥ ४१ ॥ ४२ ॥ पर्वतानाह—ईशान इति ॥ ४३ ॥ नदीराह—अनघेति ॥ ४४ ॥ तदिति ॥ तेषु वर्षेषु ऋतव्रतादिनामानो ब्राह्मणादिवर्णस्थानीयाः पुरुषाः प्राणा-यामेन विधूतं रजस्तमश्च येषां ते परमसमाधिना वाय्वात्मकं भगवन्तं यजन्ते ध्यायन्ति ॥ ४५ ॥ मन्त्रमाह—अन्तरिति ॥ योऽन्तः प्रविश्य स्थावरजङ्गमात्मकानि भूतानि

CC-0. In Public Domain. Digitization by eGangotri

आत्मकेतुभिः प्राणादिवृत्तिभिर्बिभर्त्ति धारयति पोषयति च अत एव साक्षादन्तर्यामी ईश्वर एव यस्य वशे स्फुटमेव सर्वं जगद्वर्त्तते स नोऽस्मान् पातु ॥ ४६ ॥ ४७ ॥ यस्मिन्निति ॥ ज्वलनोऽग्निस्तच्छिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत् भगवतः कमलासनस्य ब्रह्मणः अध्यासनभूतं पुष्करं परिकल्पितम् ॥ ४८ ॥ तदिति ॥ तद् द्वीपमध्ये मानसोत्तरनामा एकः पर्वतोऽष्टसु दिक्षु परितो द्वीपवन्मण्डलाकारः अतस्ते उभयपार्श्ववर्त्तिनी द्वे वर्षे अपि अष्टसु दिक्षु मण्डलाकारे ज्ञेये । अयुतयोजनमुच्छ्राय आयामो विस्तारश्च यस्य स तथाभूतोऽस्ति । यत्र च पर्वते लोकपालानामिन्द्रादीनां पुराणि सन्ति ॥ ४९ ॥ यदिति ॥ देवानामहोरात्राभ्यामुत्तरायणदक्षिणायनाभ्यामित्यर्थः । स्पष्टमन्यत् ॥ ५० ॥ एतदिति ॥ एतस्यात्मजौ सुतौ स तत्र वर्षपती नियुज्य संस्थाप्य स्वयं भगवत्कर्मणि तत्परिचर्यायां शीलं यस्य स तथाभूत इत्येवं

यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम् ॥ ४८ ॥ तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनाम् ॥ ४९ ॥ यदुपरिष्टात् सूर्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ५० ॥ एतद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवत् भगवत्कर्मशील इत्यास्ते ॥ ५१ ॥ तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्मकेन कर्मणाऽऽराधयन्ति ॥ ५२ ॥ इदं चोदाहरन्ति ॥ एतत् कर्ममयं लिङ्गं ब्रह्मलिङ्गं जनोऽर्चयेत् ॥ एकान्तमद्वयं शान्तं तस्मै भगवते नम इति ॥ ५३ ॥ ऋषिरुवाच ॥ ततः परस्ताल्लोकालोकनामाऽचलो लोकालोकयोरन्तराले परित उपक्षिप्तः ॥ ५४ ॥ यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिः काञ्चन्यन्याऽऽदर्शतलोपमा ॥ ५५ ॥ यस्यां प्रहितः पदार्थो न कथंचित् पुनः प्रत्युपलभ्यते तस्मात् सर्वसत्त्वपरिहृताऽऽसीत् ॥ ५६ ॥

तत्सेवापरतयैवाऽऽस्ते स्म । स्फुटमन्यत् ॥ ५१ ॥ तदिति ॥ तद्वर्षाणां पुरुषाः सकर्मकेण अनेकजन्मानुष्ठितस्वकर्मसंस्कारपूर्वकेण ब्रह्मसालोक्यादिसाधनेन कर्मणा ब्रह्मरूपिणं कमलासनमूर्त्तिमाराधयन्ति ॥ ५२ ॥ इदमिति ॥ इदं च मन्त्रात्मकं पद्यमुदाहरन्ति जपन्ति । यत्तत्सृष्टिकर्तृत्वेन प्रसिद्धं कर्ममयं स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरञ्चितामेतीति कर्मफलरूपं ब्रह्म लिङ्ग्यते प्राप्यते यस्मात्तत् एकस्मिन्नेव परमेश्वरे अन्तो निष्ठा यस्य तत् एकान्तम् अत एव वस्तुतः अद्वयं शान्तं लिङ्गं मूर्त्तिं श्रेयोऽर्थी जनोऽर्चयेत् तस्मै भगवते नमः ॥ ५३ ॥ तत इति ॥ ततः शुद्धोदात् परस्तात् लोकः सूर्याद्यालोकवान् देशः अलोकस्तद्रहितो देशस्तयोरन्तराले मध्ये तयोरविभागार्थं लोकालोकनामाचलः परितः अष्टसु दिक्षु मण्डलाकारतया उपक्षिप्तः परमेश्वरेण स्थापितोऽस्ति ॥ ५४ ॥ ततः परस्तादित्युक्तेस्तदेव कियताऽन्तरेणेत्यपेक्षायां तदन्तर्वर्तिनीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमिमाह—यावदिति ॥ यावन्मानसोत्तरमेर्वोरन्तरं मानसोत्तरमध्यान्मेरुमध्यान्तं स्थलं सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटिपरिमितं तावती भूः शुद्धोदात्परतोऽस्ति । तत्र प्राणिनोऽपि सन्ति ततः परं लोकालोकसंलग्ना आदर्शतलोपमा दर्पणसदृशी काञ्चनी अन्याऽस्तीत्यन्वयः । ततः परं लोकालोकः पर्वत इत्यर्थः । अत्रान्येत्युक्ते कुतोऽन्येति प्रतियोग्यपेक्षातः या शुद्धोदात्परतः प्रथममुक्ता ततोऽन्या ज्ञेया । सा च एकोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमिता एवं सति मेरुलोकालोकयोरन्तरं सार्द्धद्वादशकोटिमितमुपपन्नं ज्ञेयम् इति स्वामिपादाः । चक्रवर्त्ती तु शुद्धोदात्परतः काञ्चनी भूरन्याऽस्ति सा च मानसोत्तरमेर्वोर्यावदन्तरं सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटिपरिमितं तावती ज्ञेया । ततः परं लोकालोकाचल इति व्याख्यानमभिप्रैति । यत्तु चक्रवर्त्तिटीकापुस्तके यावन्मानसेति गद्यटीकायां मानसोत्तरमध्यान्मेरुमध्यपर्यन्तं स्थलं सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटिपरिमितं तावती भूः शुद्धोदात्पराऽस्ति तत्र प्राणिनोऽपि सन्ति । ततः परा काञ्चनी भूरन्याऽस्ति इति स्वामिपादसम्मतमिव दृश्यते तत्तु प्रक्षिप्तं प्रतिभाति । तदीयाग्रेतनग्रन्थेन महाविरोधात् । यस्यामिति ॥ यस्यामादर्शतलोपमायां प्रहितोऽवगलितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते यस्मादेवं तस्मात्सर्वसत्वपरिहृता सर्वप्राणिवर्जिता आसीदस्ति ।

लोकालोक इति समाख्या यदनेनाचलेन लोकालोकस्यान्तर्वर्तिनाऽवस्थाप्यते ॥ ५७ ॥ स लोकत्रयान्ते परित ईश्वरेण विहितो यस्मात् सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनाँस्त्रींल्लोकानावितन्वाना न कदाचित् पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः ॥ ५८ ॥ एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः ॥ ५९ ॥ स तु पञ्चाशत्कोटिगणितस्य भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ॥ ६० ॥

लटः स्थाने लङार्षः । देवक्रीडार्थत्वोक्त्या देवविहारोस्त्येव ॥ ५५ ॥ ५६ ॥ लोकालोक इति ॥ यत् यस्मादनेन लोकालोकप्रदेशस्य मध्यवर्त्तिना चलेन तदवस्थाप्यते । अयं लोकमयो देशः अयमलोकमयो देश इति व्यवहारः संपाद्यते तस्मादस्य लोकालोक इति समाख्याव्यपदेशः ॥ ५७ ॥ स इति ॥ स लोकालोकाचलो लोकत्रयस्य भूर्भुवः स्वः इत्यस्य अन्ते परितः अष्टसु दिक्षु मण्डलाकारतया त्रिलोकीव्यवहारमर्यादारूप ईश्वरेण विहितो रचितस्त्रिलोकीमर्यादारूपत्वोक्त्याऽत्युच्चत्वं सूचितं तत्स्पष्टयति । यस्मादिति ॥ यस्मात्प्रतिबन्धकीभूतात् पर्वतात् सूर्य आदिर्येषां ध्रुवः अपवर्गोऽन्तो येषां तेषां ज्योतिर्गणानां गभस्तयः किरणा अर्वाचीनास्तन्मण्डलान्तर्वर्त्तमानान् त्रीन् लोकानावितन्वानाः समन्तात् प्रकाशयन्तः कदाचिदपि पराचीना भवितुं नोत्सहन्ते परतो गन्तुं न शक्नुवन्ति तावदुन्नहनमुत्सेधस्तदनुरूप आयामो विस्तारश्च यस्य स ध्रुवादप्युच्छ्रितत्वात् त्रिलोकीमर्यादाभूत इत्यर्थः ॥ ५८ ॥ एतावानिति ॥ लोकविन्यासः लोकविस्तारो मानादिभिः सहितः कविभिर्विवेकिभिर्व्यासादिभिश्चिन्तितो विचारेण निश्चित एतावान् ॥ ५९ ॥ स त्विति ॥ स त्वयं लोकविस्तारो मेरुमारभ्यैकतो यावल्लोकालोकाचलस्तावत्साकल्येन पञ्चाशत्कोटियोजनगणितस्य भूगोलकस्य तुरीयभागः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थोंऽशः सार्द्धद्वादशकोटियोजन इत्यन्वयः । यद्वा । सोऽयं तु लोकालोकाचलः भूगोलकस्य भूसम्बन्ध्यण्डगोलकस्येत्यर्थः । सूर्यस्येव भुवोऽप्यण्डगोलकयोर्मध्यवर्त्तित्वात् खगोलमिव भूगोलमपि पञ्चाशत्कोटियोजनं तस्य तुरीयभाग इति । एवं लोकालोकाद्बहिरप्यण्डकटाहपर्यन्तं सार्द्धद्वादशकोटियोजनपरिमिता अलोकभूमिः । एवं तत्समानसूत्रे मेरुमारभ्यान्यतोऽप्यण्डकटाहपर्यन्तं पञ्चविंशतिकोटियोजनपरिमिता भूमिः तथा च समानसूत्रे सर्वत्र कटाहान्तात् कटाहान्तपर्यन्तं पञ्चाशत्कोटियोजनत्वं सिद्धम् । लोकालोकमानसोत्तरयोः प्रमाणं तु अत्र स्वनिकटभूप्रमाण एवान्तर्भूतमतो न तस्य पृथग्गणनेति ज्ञेयम् ॥ ६० ॥ तदिति ॥ तस्य लोकालोकस्योपरिष्टात् चतसृषु आशासु दिक्षु आत्मयोनिना स्वतः सिद्धेन जन्मादिविकाररहितेन सर्वकारणेनात एवाखिलस्य जगतो गुरुणा स्वामिना पूज्यतमेन परमेश्वरेण सकललोकस्य स्थितिहेतवः ऋषभः पुष्करचूडः वामदेवः अपराजित इति चत्वारो द्विरदपतयः हस्तिश्रेष्ठाः अधिनिवेशिताः स्थापिताः आसते । हस्तिनां लोकस्थितिहेतुत्वं तु जलस्योपरिस्थिताया भुवो नमनोन्नमनादिप्रतिबन्धकत्वेन ज्ञेयम् ॥ ६१ ॥ तेषामिति ॥ परममहापुरुषः महाविभूतेः परमैश्वर्यस्य पतिः अन्तर्यामी भगवान्धर्मज्ञानादीनि भगशब्दवाच्यानि अणिमादयोऽष्ट

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाऽखिलजगद्गुरुणाऽधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥ ६१ ॥ तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान् परममहापुरुषो महाविभूतिपतिरन्तर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदण्डैः संधारयमाणस्तस्मिन् गिरिवरे समन्तात् सकललोकस्वस्तय आस्ते ॥ ६२ ॥ आकल्पमेवं वेषं गत एष भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीथायेति ॥६३॥

महासिद्धयश्चोपलक्षणं यस्य तत् तथा निजानि स्वकीयानि वराणि श्रेष्ठानि आयुधानि सुदर्शनादीनि तैरुपशोभितैर्निजैर्दोर्दण्डैश्चोपलक्षितमात्मनः स्वस्य विशुद्धसत्त्वं रजस्तमोभ्याममिश्रविशुद्धसत्वात्मकं रूपं सन्धारयमाण आविष्कुर्वन् स्वपार्षदप्रवरैर्विष्वक्सेनादिभिः परिवारितः सर्वतः सेव्यमानो भगवान् तेषां दिग्गजानां तथा स्वविभूतीनां निजांशभूतानां लोकपालानां महेन्द्रादीनां च विविधवीर्योपबृंहणायानेकविधपराक्रमसिद्धये सकललोकानां स्वस्तये तस्मिन् लोकालोकाख्ये गिरिवरे एकयैव मूर्त्या समन्तादास्ते महाविभूतिपतित्वात् अनेनैव तस्मिन् गिरावपि यथादिशमष्टलोकपालानामपि पुर्यः सन्तीति ज्ञेयम् ॥ ६२ ॥ नन्वन्तर्यामिरूपेणैवैतत्कर्त्तुं शक्यं किं बहिः समन्तादवस्थानेनेत्याशङ्क्याह—आकल्पमिति ॥ आत्मनो योगमायया विरचिता या विविधा लोकयात्रा तस्या गोपीथाय रक्षणाय एष भगवान् आकल्पमेवंभूतवेषं गतो लीलया प्राप्त इति समन्ताद्बहिरास्थानप्रयोजनम् ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ योऽयमन्तर्विस्तारः मेरुमारभ्यैकतो लोकालोकपर्यन्तः सार्द्धद्वादशकोटियोजनलक्षण उक्त एतेनैवालोकस्यापि परिमाणं व्याख्यातं ज्ञेयम् । तथा च लोकालोकाद्बहिः समानसूत्रेऽण्डकटाहपर्यन्तमप्यष्टसु दिक्षु सार्द्धद्वादशकोटियोजनपरिमिता भूमिर्ज्ञेयेत्यर्थः । चक्रवर्त्तिमते अलोकपरिमाणं द्वाविंशतिलक्षोत्तरं कोटयष्टकं बहिः सर्वदिक्षु ॥ ६४ ॥ तत इति ॥ ततः अलोकात् परस्तात् योगेश्वराणामावरणाष्टकं भित्त्वा भगवत्पदं गन्तॄणां गतिं द्विजपुत्रानयनेऽर्जुनाय श्रीकृष्णेन प्रदर्शितां विशुद्धामेतां गतिं भागवतीमिति द्वितीयस्कन्धोक्तामुदाहरन्ति वृद्धाः कथयन्ति ॥६५॥ एवं विराट्पुरुषस्य कटिभागं भूमिं निरूप्य तत उपरि काञ्चीदाममणिवत्स्थितं सूर्यं निरूपयन् ब्रह्माण्डमध्यं दर्शयति–अण्डमध्यगतः सूर्य इति ॥ किं तन्मध्यं तदाह । द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदन्तरं सन्धानरूपं मध्यस्थानमन्तरिक्षं तथा च सूर्यश्च अण्डगोलश्च तयोर्मध्ये सर्वतः समानसूत्रे पञ्चविंशतिकोटियोजनानि स्युरित्यर्थः । सूर्यादूर्ध्वगोलपर्यन्तं यथा पञ्चविंशतिः कोट्यः तथा अधोगोलकपर्यन्तं चेत्याहुः ॥ ६६ ॥ मृत

योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् ॥६४॥ ततः परस्ताद् योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥ ६५ ॥ अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् ॥ सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः ॥ ६६ ॥ मृतेऽण्ड एष एतस्मिन् यदभूत् ततो मार्तण्ड इति व्यपदेशः ॥ हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ॥ ६७ ॥ सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा ॥ स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥ ६८ ॥ देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधाम् ॥ सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥ ६९ ॥ इति श्रीभा० म० पञ्चम० भुवनकोशवर्णन समुद्रद्वीपवर्षसन्निवेशपरिमाणलक्षणो नाम विंशतितमोऽध्यायः ॥ २० ॥

इति ॥ यत् यस्मात् मृते अचेतने एवास्मिन्नण्डे एष सूर्योऽभूत् सृष्टिसमये वैराजरूपेण प्रविष्टः ततो मार्त्तण्ड इति व्यपदेशः अस्य नाम यत् यस्माच्च हिरण्याण्डसमुद्भवः हिरण्मये प्रकाशबहुलेऽण्डे सम्यक् तत्प्रकाशकतया भवति वर्त्तत इति तथा ततो हिरण्यगर्भ इति व्यपदेशः । यद्वा । मृते अचेतनेण्डे एष सूर्यः अभूत् प्रविष्टः ततो मार्त्तण्डः स एव क इत्यत आह । हिरण्यगर्भः समष्टिजीवसूक्ष्मोपाधिरूपः यद्यत एव हिरण्याण्डस्य तदीयस्थूलदेहस्य संभवः सम्यग् विद्यमानता ॥ ६७ ॥ सूर्येणेति ॥ दिशः खं द्यौः स्वर्गः महीभिदा पृथिवीगतभेदः महीति भिन्नं पदं वा । मही तथा अन्याऽपि भिदा स्वर्गापवर्गौ भोगमोक्षदेशौ नरकाः रसौकांसि अतलादीनि सर्वशः सूर्येणैव विभज्यन्ते । सर्वोऽपि व्यवहारः सूर्येणैव सिद्ध्यतीत्यर्थः ॥ ६८ ॥ देवेति ॥ देवादीनां सर्वजीवनिकायानां सूर्य एवात्मान्तर्यामी आत्मत्वेनोपास्यो वा दृगीश्वरः नेत्राधिष्ठाता च ॥ ६९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चमे गङ्गासहायो विंशेऽध्याये व्यधादिमाम् ॥ २० ॥

CC-0. In Public Domain. Digitization by eGangotri

एकविंशेऽन्वहं गत्या राशिसंचरणे रविः ॥ लोकयात्रां करोतीति तत्र गद्यानि दृग्दर्शः ॥ उवाचेत्येकं च सार्द्धा एकत्रिंशदनुष्टुभः ॥ २१ ॥ एतावानिति ॥ भूवलयस्य संनिवेशः रचनाविशेषः प्रमाणतः पञ्चाशत्कोटियोजनविस्तारतः पञ्चविंशतिकोटियोजनोत्सेधतः लक्षणतः जम्ब्वादितत्तदसाधारणचिह्नतश्च व्याख्यातः कविभिः प्रकथितः ॥ १ ॥ एतेनेति ॥ एतेन पञ्चाशत्कोटियोजनात्मकेन मानेन दिवो मण्डलमानं तद्विदः प्रमाणविद उपदिशन्ति । यथा निष्पावादीनां द्विदलधान्यविशेषाणां द्वयोर्दलयोर्मध्ये यथैकस्य मानेनापरस्यापि मानमुपदिश्यते तथा भूगोलकखगोलकयोर्विस्तारेण तुल्यमेव मानम् ॥२॥ ते इति ॥ ते अन्तरेण तयोर्मध्ये तदुभयसन्धितं ताभ्यां भूगोलद्युगोलाभ्यामुपर्यधोभागे उभयतः संलग्नमन्तरिक्षलोकमस्तीति तच्च लक्षद्वयप्रमाणमाहुः । तद्विस्तारोऽपि तावानेवेति भावः । सन्धानं सन्धा सास्य संजाता इति सन्धितम् । अङ्न्तात्सन्धाशब्दादितच् ॥ ३ ॥ यदिति ॥ यस्यान्तरिक्षस्य मध्यगतो भगवान् तपतां प्रकाशवतां चन्द्रादीनां स्वरश्मिभिः पोषकत्वात्पतिः तपनः सूर्यः आतपेन ऊष्मणा त्रिलोकीं प्रतपति प्रतापयति आत्मनः स्वान्तःस्थस्य भगवतो भासा त्रिलोकीमवभासयति ॥ ४ ॥ स इति ॥ स एष सूर्यः यथासवनं यथाकालमारोहणादिस्थानेषु मकरादिराशिष्व-

श्रीशुक उवाच ॥ ॥ एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतो व्याख्यातः ॥ १ ॥ एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति ॥ यथा द्विदलयोर्निष्पावादीनाम् ॥ २ ॥ ते अन्तरेणान्तरिक्षं तदुभयसंधितम् ॥ ३ ॥ यन्मध्यगतो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा ॥४॥ स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मान्द्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ५ ॥ यदा मेषतुलयोर्वर्तते तदाऽहोरात्राणि समानानि भवन्ति ॥ ६ ॥ यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाऽहान्येव वर्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ॥ ७ ॥

भिपद्यमानः प्राप्नुवन् सन्नुदगयनादिसंज्ञाभिर्मान्द्यादिभिर्गतिभिरहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते। मान्द्यशैघ्र्यशब्दौ स्वार्थष्यञन्तौ । तथा च उदगयननाम्न्या मन्दया गत्या आरोहणस्थाने यथाकालं प्राप्नुवन् मकरादिषु राशिषु अहानि क्रमेण दीर्घाणि रात्रीस्तु ह्रस्वा विधत्ते । दक्षिणायननाम्न्या क्षिप्रगत्या अवरोहेण कर्कटादिषु अहानि ह्रस्वानि विधत्ते रात्रीश्च दीर्घा विधत्ते । वैषुवतसंज्ञया उत्तरदक्षिणायनमध्यवर्त्तिन्या समानया गत्या मेषतुलयोरहोरात्रान् समानान् विधत्ते ॥ ५ ॥ तत् प्रपञ्चयति—यदेति ॥ यदा मेषतुलयोः वर्त्तते प्रचलति तदाऽहोरात्राणि समानानि भवन्ति अत्यन्तवैषम्याभावात्समानानीत्युक्तम् । सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्येति ज्ञेयम् ॥ ६ ॥ यदेति ॥ स्पष्टम् । यद्यपि वृषभमिथुनयोरेवाह्नां वृद्धिः कर्कटादिषु च ह्रासस्तथापि रात्र्यपेक्षयाऽधिकत्वाद्वर्द्धन्त इत्युक्तम् । एवं रात्रिवृद्धावपि द्रष्टव्यम् । दिनापेक्षया न्यूनत्वाद्ध्रसतेत्युक्तम् । वस्तुतस्तु मकरादिष्वह्नां वृद्धिप्रक्रमः कर्कटादिषु ह्रासप्रक्रमः एकैका घटिकेत्यपि स्थूलदृष्टचैवोक्तम् । वृद्धिह्रासयोः प्रतिदिनं वैषम्यात् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ विपर्ययाणि भवन्तीति अहानि न्यूनानि रात्रयश्चाधिका भवन्तीत्यर्थः ॥ ८ ॥ यावदिति ॥ उत्तरायणाद्दक्षिणायनपर्यन्तं यावदुदगयनं तावद्दिनानि वर्द्धन्ते पूर्वपूर्वदिनापेक्षयोत्तरोत्तरदिनानि वृद्धिं प्राप्नुवन्ति । रात्रयस्तु पूर्वपूर्वरात्र्यपेक्षयोत्तरोत्तरा ह्रसन्ति । दक्षिणायनादुदगयनपर्यन्तं यावद्दक्षिणायनं तावत्पूर्वपूर्वरात्र्यपेक्षयोत्तरोत्तररात्रयो वर्द्धन्ते । दिनानि तु पूर्वपूर्वदिनापेक्षयोत्तरोत्तराणि ह्रसन्तीत्यर्थः । अत्र उत्तरायणे ध्रुवेण रथयुगाक्षकोटिनिबद्धवायुपाशद्वयाकर्षणे रथस्यारोहणमभ्यन्तरमण्डलप्रवेशश्च । तथा गतिमान्द्यं दिनवृद्धिः रात्रिह्रासश्च । दक्षिणायने च ध्रुवेण पाशप्रेरणाद्रथस्यावरोहणं बहिर्मण्डलप्रवेशो गतिशैघ्र्यं दिनह्रासो रात्रिवृद्धिश्च । वैषुवते तु पाशसाम्यात्समावस्थानं मध्यमण्डलप्रवेशो गतिसाम्यमहोरात्रसाम्यं च । तथोक्तं विष्णुपुराणे । "आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ । तदाऽभ्यन्तरतः सूर्यो भ्रमते मण्डलानि तु ॥ ध्रुवेण मुच्यमानेन पुना रश्मियुगेन तु । तथैव बाह्यतः सूर्यो भ्रमते मण्डलानि च ॥" इति । अत्राऽरोहणादिस्थानानि विशेषतो वायुपुराणे दर्शितानि । "सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः । स्थानं जरद्गवं मध्यं तथैरावतमुत्तरम् ॥ वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ।" इति । तदपि मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैः । तथा हि नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । आर्षभी गोवीथी जरद्गवी चेति वैषुवते मध्यममार्गे वीथीत्रयम् । अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयम् । तदप्युक्तं तत्रैव । "अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता ।

यदा वृश्चिकादिषु पञ्चसु वर्तते तदाऽहोरात्राणि विपर्ययाणि भवन्ति ॥ ८ ॥ यावद्दक्षिणायनमहानि वर्धन्ते यावदुदगयनं रात्रयः ॥ ९ ॥

रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥ पुष्याऽश्लेषा तथाऽदित्या वीथी चैरावती स्मृता । एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥ तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता । हस्तश्चित्रा तथा स्वातिर्गोवीथीति तु शब्दिता ॥ ज्येष्ठा विशाखाऽनुराधा वीथी जारद्गवी मता । एतास्तु वीयथस्तिस्रो मध्यमो मार्ग उच्यते ॥ मूलाऽषाढोत्तराषाढा अजवीथ्यभिशाब्दिता । श्रवणं च धनिष्ठा च मार्गी शतभिषक् तथा ॥ वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता । एतास्तु वीयथस्तिस्रो दक्षिणो मार्ग उच्यते ॥" अत्र याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः मार्गी मृगवीथीति ज्ञेयम् । अत्र पुराणरीत्या सुमेरुमूर्ध्नः ध्रुवाधःस्थानात् विलोकनयाऽश्विन्यादिषु भ्रमन् रविः क्षितिजात्प्रत्यहमारोहन्निव दृश्यते अत उच्चत्वसाधर्म्याद्गजवीथ्यादिनाम्ना व्यवहारः उत्तरध्रुवदिक्त्वादुत्तरमार्गव्यपदेशः । ततः मघादिषु किंचिदवरोहणाद्गजापेक्षयाऽल्पतुङ्गत्वसाम्याद्गोवीथ्यादिव्यवहारः मध्यमार्गव्यवहारश्च । एवं मूलादिषु ततोऽप्यवरोहणादजवीथ्यादिव्यवहारः । दक्षिणदिक्त्वात् दक्षिणमार्ग इति ज्योतिःशास्त्राविरुद्धा पुराणरीतिः । न चैवमारोहणावरोहणस्थानभेदेऽपि मेरुं प्रदक्षिणीकुर्वन् यावन्तं मार्गमेकतो दिवसे प्रचलति तावन्तमेवापरतोऽपि रात्रौ प्रचलतीति मार्गस्य समानत्वेऽप्यहोरात्रस्य वृद्धिह्रासादिवैषम्यं कथमिति शङ्कनीयं यतो मार्गस्य समानत्वेऽपि राशिप्रमाणयोर्भेदेन वैचित्र्यं घटते । तथा हि ज्योतिश्चक्रस्य द्वादशोंऽशः सपादनक्षत्रद्वयात्मक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकैको राशिः । तत्र च प्रायशो मीनमेषौ ह्रस्वौ वृषकुम्भौ ततः किञ्चिदधिकौ मकरमिथुने ततः किञ्चिद्दीर्घे सिंहवृश्चिकौ दीर्घतरौ कर्कचापे दीर्घतमे कन्यातुले समे । तत्रार्काक्रान्तराशिमारभ्य षड्राशिक्षेत्रदर्शनकालो दिनम् इतरराशिषट्कदर्शनकालो रात्रिः । तथा च राशीनां दीर्घह्रस्वादिवैषम्याद्राशिप्रमाणाधीनावेव दिनरात्रिवृद्धिह्रासा-वित्यादि ज्योतिःशास्त्रप्रसिद्धा प्रक्रिया पुराणाविरुद्धत्वादत्राप्यनुसन्धेया । तथा चोक्तं विष्णुपुराणे । " एकप्रमाणमेवैष मार्गं याति दिवाकरः । अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज ॥ षडेव राशयो भुङ्क्ते रात्रावन्याश्च षड् दिवा । राशिप्रमाणजनिता दीर्घह्रस्वात्मता दिने ॥ तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता । दिनादेर्दीर्घह्रस्वत्वं तद्भोगेनैव जायते ॥ " इति । राशय इति राशीनित्यर्थः । यद्यपि राशिचक्रे राशयः समक्षेत्रा एव तथापि तिर्यक्स्थितस्य राशेरुदयोऽल्पकालेनेति स राशिर्ह्रस्व उक्तः । ऊर्द्ध्व-स्थस्य राशेरुदयोऽनल्पकालेनेति स राशिर्दीर्घ उक्तः । अयमेवार्थः सिद्धान्तशिरोमणौ । " यो हि प्रदेशोपममण्डलस्य तिर्यक्स्थितो यात्युदयं तथाऽस्तम् । सोऽल्पेन कालेन य ऊर्द्ध्वसंस्थोऽनल्पेन तस्मादुदया न तुल्या ॥ " इत्यनेनोक्तः ॥९॥ एवमिति ॥ एवं प्रागुक्तसूर्यभ्रमणप्रकारेण मानसोत्तरगिरौ मण्डलाकारे यत्सूर्यचक्रस्य परिवर्त्तनं परिभ्रमणं तस्य तन्मानसोत्तरमण्डलस्य परिमाणम् । योजनानां नव कोटय एकपञ्चाशल्लक्षाण्युपदिशन्ति । अयं भावः । सूर्यरथस्यैकोऽक्षो मेरौ निबद्धः स्वस्थानं न त्यजति द्वितीयेऽक्षे

एवं नव कोटय एकपञ्चाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्तनस्योपदिशन्ति ॥ तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥ १० ॥

निबद्धं चक्रं तु अजस्रं मानसोत्तरगिरेर्मूर्द्धि मण्डलाकारेण भ्रमति । तद्भ्रमणमार्गस्येदं प्रमाणम् । नव कोटय एकपञ्चाशल्लक्षाणि च योजनानीति तस्य चेयमुपपत्तिः । सुमेरुमध्यान्मानसोत्तरमध्यं व्यासार्द्धं तद्द्विगुणं व्यासः मानसोत्तरमध्ये रथनेमिरेखा परिधिः तत्र मण्डलमध्ये यो विस्तारो व्यासाख्यस्ततस्त्रिगुणं व्याससप्तमांशाधिकं स्थूलं व्यवहारयोग्यं मानं परिधिसंज्ञकस्य मण्डलस्येति नियमः । मेरुमध्यान्मानसोत्तरमध्यप्रमाणं सार्द्धसप्तपञ्चाशल्लक्षाधिका कोटिः तद्द्विगुणं मेरोरुभयतः समानसूत्रे मानसोत्तराभ्यन्तरविस्तारः पञ्चदशलक्षाधिककोटित्रययोजनम् । तत्र त्रिगुणं व्याससप्तमांशाधिकं परिधिः स्यात् तत्तु यद्यपि नवतिलक्षाधिका नव कोटयो लभ्यन्ते तथापि वस्तुतः मेरोर्मध्यमारभ्य सूर्यबिम्बान्तमेव व्यासार्द्धं विवक्षितम् । तस्यैवोदयास्तादौचित्यात् मानसोत्तरकथनं रथचक्राधारबोधनाय । तथा च सूर्यबिम्बपर्यन्तमानाद्द्विगुणमानं लक्षद्वयान्नाधिकं कोटित्रयम् । तदनुसारेण परिधिरुक्त इति । तस्मिन्निति । तस्मिन् मानसपर्यन्ते मेरोः पूर्वस्मात् पूर्वस्यां दिशि ऐन्द्रीं पुरीमुपदिशन्ति एवं दक्षिणस्यां याम्यां पश्चिमायां वारुणीमुत्तरस्यां सौम्यां च पुरीमुपदिशन्ति । मेरोश्चतुर्दिशं वर्त्तमानासु तासु पुरीषु भूतानां लौकिककर्मसु व्यवस्थया प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण काल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषेण उदयमध्याह्नास्तमयनिशीथा भवन्ति । चतुर्दिशमित्युक्तेर्ये मेरोर्दक्षिणे देशे तेषामैन्द्रीमारभ्य ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे तेषां वारुणीमारभ्य ये पूर्वदेशे तेषां सौम्यामारभ्य पूर्वादय इति ज्ञेयम् ॥ १० ॥ तत्रेति ॥ तत्रत्यानां मेरुस्थानां प्राणिनां दिवसमध्यङ्गत एवादित्यस्तपति सव्येनेति नक्षत्राभिमुखतया स्वगत्या अचलं मेरुं सव्येन वामतः कुर्वन्नपि प्रदक्षिणावर्त्तप्रवाहाख्यवायुभ्रम्यमाणज्योतिश्चक्रवशात् प्रत्यहं दक्षिणतः करोति । सव्येन चलन्निति पाठान्तरम् । अतश्चक्रगतिवशादतिदूरतो भूसंलग्नस्येव दर्शनमुदयः । आकाशमारूढस्येव दर्शनं मध्याह्नः । भूमिं प्रविष्टस्येवादर्शनमस्तमयः । ततोऽतीवदूरगमने निशीथ इति समुद्रतीरस्थदृष्ट्या च। "अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति" इति श्रुत्यादिव्यवहारः कल्पनीयः न वास्तवः । यत्रोदेति यस्मिन् देशे प्रथमतो दर्शनं याति तस्य समानसूत्रविषयीभूते देशे निपाते प्राप्तौ सत्यां सूर्यो निम्लोचति अस्तं याति उदयानन्तरं गच्छन् त्रिंशद्घटिकान्ते इति यत्र क्वचनाकाशमध्यस्थः स स्यन्देन प्रस्वेदोद्गमनेनाभितपति तस्य समानसूत्रनिपातविषयीभूते देशे निपाते सति एष सूर्यो जनान् प्रस्वापयति निशीथं करोति यस्मात् ये प्रथमं तमुदयास्ताद्यवस्थायां समनुपश्येरन् । तदार्षः। तदा तत्र गतं स्वसमानसूत्रनिपातदेशस्थं न पश्यन्ति । तथा च मेरोर्दिक्चतुष्टयस्थितेषु वर्षेषु मध्ये यदा यत्र सूर्यो दृश्यते तदैव तस्मात्पूर्व वर्षे मध्याह्नः पश्चिमे वर्षे निशीथ उत्तरे वर्षे निम्लोचः । एवं मध्याह्नदर्शनसमय

तत्रत्यानां दिवसमध्यंगत एव सदादित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥ यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्पन्देनाभितपति तस्य हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यन्ति ये तं समनुपश्येरन् ॥ ११ ॥

एव पूर्ववर्षे निम्लोचः पश्चिमवर्षे उदय उत्तरवर्षे निशीथश्च तथा तद्दर्शनसम एव पश्चिमे मध्याह्नः पूर्ववर्षे निशीथ उत्तरे वर्षे उदयश्च ज्ञेयः। तथा निशीथसमये पश्चिमे निम्लोच उत्तरे मध्याह्नः पूर्ववर्षे प्रातःकालः तदेवं सर्ववर्षस्था जना आत्मनो मेरोर्दक्षिणदेशस्थानेऽवमन्यमानाः स्ववर्षे सूर्यस्योदयमध्याह्ननिम्लोचनिशीथानि पश्यन्त एवान्येषु वर्षेषु तानि पूर्वोक्तविवेकेन जानन्ति । तथा च वैष्णवे । "उदयास्तसमये चैव सर्वकालं तु सम्मुखे । दिशास्वशेषासु तथा मैत्रेय विदिशासु च ॥ यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः । तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः । शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् । विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा ॥" अस्यार्थः । शक्राद्यन्यतमस्य पुरे तिष्ठन्पुरत्रयं दिक्त्रयं युगपत्स्पृशति द्वौ विकर्णौ कोणौ च तथा हि शक्रपुरे तिष्ठन् शक्रदिग्वर्षे मध्याह्नं दक्षिणदिग्वर्षे उदयम् उत्तरदिग्वर्षेऽस्तं करोतीति दिक्पुरत्रयस्पर्शः । अग्निकोणवर्षे प्रथमं याममीशानकोणवर्षे तृतीयं यामं करोतीति विकर्णद्वयस्पर्शः। विकर्णस्थः अग्न्याद्यन्यतमकोणस्थः सन् त्रीन् कोणान् द्वे पुरे दिशौ च स्पृशति । तथा अग्निकोणे तिष्ठन् अग्निकोणवर्षे मध्याह्नं नैर्ऋतकोणवर्षे उदयम् ईशानकोणेऽस्तमनम् इति कोणत्रयस्पर्शः । तथा दक्षिणदिग्वर्षे प्रथमो यामः पूर्वदिग्वर्षे तृतीयो यामः इति दिक्पुरद्वयस्पर्शः एवमन्यत्र । अत एवोक्तं तत्रैव । "तस्माद्दिश्युत्तरस्यां तु दिवारात्रिः सदैव हि । सर्वेषां द्वीपवर्षाणां मेरोरुत्तरतः स्थितिः" ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यतो यत्र पश्यति सैव तस्य प्राची तस्य च वामतो मेरुस्तिष्ठतीति सिद्धान्तशिरोमणौ चायमर्थो भङ्ग्यन्तरेणोक्तः । " यत्रोदितोऽर्कः किल तत्र पूर्वा तत्रापरा यत्र गतः प्रतिष्ठाम् । तन्मत्स्यतोऽन्ये च ततोऽखिलानामुदक्स्थितो मेरुरिति प्रसिद्धम् ॥ " इति ॥ ११ ॥ यदेति ॥ यदा च ऐन्द्रयाः पुर्याः सकाशात् याम्यां पुरीं प्रति प्रचलति तदा पञ्चदशघटिकाभिर्योजनानां सपादकोटिद्वयं साधिकानि पञ्चविंशतिसहस्राधिकानि सार्द्धद्वादशलक्षाणि चोपयाति गच्छति । एतानि हि योजनानि पूर्वोक्तस्य मानसोत्तरपरिवर्त्तनमार्गस्य एकपञ्चाशल्लक्षाधिकनवकोटियोजनप्रमाणस्य चतुर्थांशः पञ्चदशघटिकाश्चाहोरात्रचतुर्थांश इति । एवं ततो याम्याया यदा वारुणीं प्रतिगच्छति वारुण्या वा सौम्यां प्रति सौम्यायाश्चैन्द्रीं पुरीं प्रति गच्छति तदापि सर्वत्र पञ्चदशभिर्घटिकाभिः तावन्ति योजनानि गच्छति । एवं षष्टिघटिकात्मकाहोरात्रेण पुरीचतुष्टयाऽक्रान्त्या मानसोत्तरपरिमण्डलमार्गः समाप्यते । दिनान्तरे च पुनस्तथेति ॥ १२ ॥ अन्ये चेति ॥ सह वा सहैव यद्यपि सूर्यस्यापि नक्षत्रैः सहैवोदयास्तौ तथापि तस्य तत्साहित्यादर्शनात् सोमादीनामेव तत्साहित्यमुक्तं स्पष्टमन्यत् ॥ १३ ॥ एवमिति ॥ तत एकपञ्चाशल्लक्षाधिकनवकोटियोजनपरिमितस्य पूर्वोक्तमार्गस्य त्रिंशत्तमो भागः

यदा चैन्द्रयाः पुर्याः प्रचलते पञ्चदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति एवं ततो वारुणीं सौम्यामैन्द्रीं च पुनस्तथा ॥ १२ ॥ अन्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यन्ति सह वा निम्लोचन्ति ॥ १३ ॥ एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु ॥ १४ ॥ यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि संवत्सरात्मकं समामनन्ति ॥ १५ ॥ तस्याक्षो मेरोर्मूर्धनि कृतोत्तरभागो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति ॥ १६ ॥ तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन संमितस्तैलयन्त्राक्षवद् ध्रुवे कृतोपरिभागः ॥ १७ ॥

सप्ततिसहस्राधिकैकत्रिंशल्लक्षयोजनात्मक एकमुहूर्त्तगमनयोग्यो भवति । मुहूर्त्तस्य दिनत्रिंशत्तमभागत्वात् अत्र चाष्टशताधिकचतुस्त्रिंशल्लक्षयोजनोक्तिर्न पूर्वोक्तविरुद्धा । रथस्यावरोहणे बहिर्मण्डलप्रवेशेन मार्गस्याधिक्यात् गतेः क्षिप्रत्वाच्च । पुरीष्विति । एकेन मुहूर्त्तेनैतावन्ति योजनानि गच्छन् क्रमेण चतसृषु पुरीषु परिभ्रमति इत्यर्थः । त्रयीमय-इत्याद्युपासनार्थम् ॥ १४ ॥ यस्येति ॥ द्वादश मासा अरा यस्य षट् ऋतवो नेमयो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य तत् ॥ १५ ॥ तस्येति ॥ तस्य सूर्यरथस्याक्षो दण्डविशेषः मेरोर्मूर्द्धनि मूर्द्धाधःप्रदेशे तैलयन्त्राक्षस्य तथा दृष्टेः कृत इतरभागो यस्य यत्र यस्मिन्नक्षे मानसोत्तरगिराविति ततो लक्षार्द्धात् उपरि वायुबद्धभूमाविति ज्ञेयम् । चक्रं वा तावदुच्छ्रितम् अन्यथा मानसोत्तरस्यायुतयोजनमात्रोच्छ्रयत्वान्मेरोश्च चतुरशीतियोजनोच्छ्रायत्वादक्षस्य साम्यं न स्यात् । स च किञ्चिन्न्यूनसप्तपञ्चाशल्लक्षाधिककोटिप्रमाणः ॥ १६ ॥ तस्मिन्निति ॥ तस्मिन्नक्षे चक्रप्रान्तवर्त्तिनि कृतमूलः कीलितपूर्वभागस्तुर्यमानेन मेरुमानसोत्तरायतस्य सार्द्धसप्तपञ्चाशल्लक्षाधिकसार्द्धकोटि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमाणस्य प्रथमाक्षस्य चतुर्थभागेन सार्द्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशल्लक्षमानेन संमितः इत्यक्षोऽयं लवणसागरसमानसूत्रपाते प्रथमाक्षप्रदेशे ग्रथित इति ज्ञेयम् । द्वितीयाक्षस्य प्रथमाक्षादल्पप्रमाणत्वात् तैलयन्त्राक्षवद्ध्रुवे कृतो वायुपाशेन निबद्ध उपरिभागो यस्य सः द्वितीयोऽक्षोऽस्तीति शेषः ॥ १७ ॥ रथनीड इति ॥ रथनीड उपवेशस्थानं षट्त्रिंशल्लक्षयोजनानि आयतो दीर्घः तत्तुरीयभागेन नवलक्षयोजनेन विशालो विस्तृतः तावानिति नवलक्षयोजनदीर्घ इत्यर्थः । चक्राच्चत्वारिंशत्सहस्रोपरितने स्थाने नीडमध्ये सूर्य उपविष्टो ज्ञेयः । यत्र युगेऽरुणेन गरुडभ्रातृत्वाच्छन्दोमयेन सारथिना योजिता गायत्र्यादिच्छन्दोनामानः सप्त हया आदित्यं देवं वहन्ति ॥ १८ ॥ पुरस्तादिति ॥ सौत्येऽश्ववाहनरूपे सूतकर्मणि नियुक्तोऽरुणः पूर्वमुखोपविष्टस्य सवितुः पुरस्तादग्रे पश्चात् पृष्ठप्रदर्शनदोषपरिहाराय तत्संमुखं प्रत्यङ्मुख आस्ते किलेति । एवं स्थितस्यापि सारथ्यकर्मनिर्वाहो दैवशक्तिवशादिति सूचयति । यद्वा । यत्सूर्यस्य परस्तात्तस्य वै पश्चिमत्वात्पश्चादित्युक्तम् । अश्वस्थानं च वायुनोक्तम् । " सप्ताश्वरूपच्छन्दांसि वहन्ते

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाश्छन्दोनामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ॥ १८ ॥ पुरस्तात् सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलाऽस्ते ॥ १९ ॥ यथा वालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥ २० ॥ तथाऽन्ये च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथङ्‌ नानानामानः पृथक्कर्मभिर्द्वन्द्वश उपासते ॥ २१ ॥ लक्षोत्तरं सार्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ॥ २२ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नामैकविंशतितमोऽध्यायः ॥ २१ ॥

वामतो रविम् । चक्रपक्षनिबद्धानि चक्रे चाक्षः समाहितः ॥ " इति ॥ १९ ॥ यथेति ॥ सूक्तवाकाय सुभाषिताय स्तुतय ईश्वरेण नियुक्ताः प्रत्यङ्मुखाः पुरतो गच्छन्तः सूर्यं संस्तुवन्ति । स्पष्टमन्यत्॥ २० ॥ तथेति ॥ तथा वालखिल्यवदन्ये चर्ष्यादय एकैकशश्चतुर्दशसङ्ख्याका द्वन्द्वशः सप्त गणाः सन्तो मासि मासि पृथङ् नाना नामानः पृथक्कर्मभिर्मासि मासि नानानामानं भगवन्तमात्मानं सूर्यमुपासते । ग्रामण्यो यक्षाः यातुधाना राक्षसाः तत्तन्नामकर्मविवेचनं तु द्वादशस्कन्धे भविष्यति । " संयुक्तानामधीश्वरैः " इति द्वादशोक्तेः । स्वस्वपतिसाहित्येन द्वन्द्वं ज्ञेयम् ॥ २१ ॥ लक्षोत्तरमिति ॥ लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य मानसोत्तरस्य यदुक्तं तन्मध्ये सगव्यूत्युत्तरं क्रोशद्वयाधिकं यथा भवति तथा द्विसहस्रं योजनानि क्षणेन स आदित्यो भुङ्क्ते परिक्रामतीत्यन्वयः । गव्यूतिः क्रोशद्वयम् ॥ २२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्पञ्चमस्यैकविंशके ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वाविंशे सोमशुक्रादेः स्थानमाहोत्तरोत्तरम् ॥ इष्टानिष्टे तथा नृणां तत्र गद्यानि गो[११]र्भुवः ॥ उवाचद्वितेयं सार्द्धि[३६]षट्ट्रिंशत्स्युरनुष्टुभः ॥ २२ ॥ यदेतदिति ॥ अमुष्य भगवत आदित्यस्य भगवता सर्वज्ञेन त्वया यदेतद्राशीनामभिमुखमप्रदक्षिणं प्रचलितमुपवर्णितं सव्येन चलन् दक्षिणेन करोति इति तद्वयं कथमनुमिमीमहि अनुमानात्मकतर्केण निश्चितं जानीमः विरुद्धत्वादित्यर्थः ॥१॥ स हेति ॥ स श्रीशुकः ह स्पष्टमुवाच । यथेति । सह भ्रमतां चक्रवैपरीत्येन चलतां प्रदेशान्तरेषु दृश्यमानगतिविरुद्धप्रदेशेषु नक्षत्रान्तरे पूर्वदिगवस्थितनक्षत्रे तथा राश्यन्तरे स्पष्टं शेषम् । चक्रवशात् स्वतश्च गतिद्वयमविरुद्धमिति वाक्यार्थः। अयं भावः । शिशुमारचक्रप्रेरकप्रवहवायुगतिरतिशीघ्रा ग्रहनक्षत्रादीन् पश्चिमाभिमुखं भ्रमयति तथैव प्रतिदिनमुद्यन्तोऽस्तमयन्तश्च ते दृश्यन्ते ग्रहादीनां स्वीया गतिश्च पूर्वाभिमुखैव सा तु स्फुटं न दृश्यते । कालान्तरे च पूर्वदिग्गतराशिनक्षत्रेषु तेषामुपलम्भात्साऽनुमीयत इति ॥ २ ॥ स एष इति ॥ स प्रसिद्ध एष सूर्यः साक्षादादिपुरुषः सकलजगत्कारणीभूतो भगवान् बहुधा भवनसमर्थः अत एव कविभिरपि

॥ राजोवाच ॥ यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं च प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमीमहीति ॥ १ ॥ स होवाच ॥ यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वात् ॥ एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणे परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात् ॥ २ ॥ स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिषु ऋतुषु यथोपजोषमृतुगुणान् विदधाति ॥ ३ ॥ तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ॥४॥ अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादश मासान् भुङ्क्ते राशिसंज्ञान् संवत्सरावयवान् ॥ ५ ॥

वेदेन च विजिज्ञास्यमानो वितर्क्यमाणो नारायण एव त्रयीमयं वेदत्रयप्रतिपाद्यं कर्म विशुद्धिनिमित्तं कर्मणां विशुद्धेः साद्गुण्यस्य निमित्तभूतं कर्मणस्तत्तत्कालाधीनत्वात्कालस्वरूपमात्मानं द्वादशधा विभज्य लोकानां सर्वप्राणिनां स्वस्तये वसन्तादिषु षट्सु ऋतुषु यथोपजोषं यथाकर्मभोगमृतुगुणान् शीतोष्णादीन् विदधाति ॥ ३ ॥ तमिति ॥ तमेतमादित्यरूपं भगवन्तमिह मर्त्यलोके वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्रय्या विद्यया आम्नातैरुच्चावचैः सन्ध्योपासनाग्निहोत्रादिकर्मभिरिन्द्रादिरूपं योगवितानैश्च ध्यानादिभिरन्तर्यामिरूपं श्रद्धया यजन्तः पूजयन्त एवाञ्जसाऽनायासेनात्मनः श्रेयः कल्याणं समधिगच्छन्ति ॥४॥ अथेति ॥ स एष लोकानामात्मा सूर्यो द्यावापृथिव्योरन्तरेण मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं तद्गतो राशिभिर्मेषादिभिः संज्ञा येषां तान् संवत्सरस्यावयवभूतान् मासान् भुङ्क्ते इत्यन्वयः । भुक्तिरतिक्रमणं चैत्रादिसंज्ञास्तु

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चान्द्रमासानाम् ॥ ५ ॥ मास इति ॥ पक्षद्वयं मास इति चान्द्रेण मानेन तदेव दिवानक्तं चाहोरात्रं च पितॄणामिति शेषः । सपादर्क्षद्वयं सपादं महानक्षत्रद्वयं मास इति तु सौरेण मानेन स्वगम्यस्य नभोमण्डलस्य यावता द्वादशमंशं भुङ्क्ते स कालो मास इत्यपि ज्ञेयम् । इत्युपदिशन्तीति प्रमाणोक्तिः सर्वत्र संबध्यते ॥ ६ ॥ यावतेति ॥ संवत्सरस्य षष्ठमंशं राशिद्वयम् ॥ ७ ॥ अथ चेति ॥ अर्द्धेन यावता मासषट्केन नभोवीथ्यां प्रचरति तं कालम् अयनमाचक्षते ॥ ८ ॥ अथ चेति ॥ अथ च अपि च भानोः मान्द्यादिगतिभिर्द्यावापृथिव्योर्मण्डलाभ्यां सह कार्त्स्न्येन नभोमण्डलं यावत् सह स हि प्रसिद्धः सूर्यः भुञ्जीत तं कालं भानो रेव निमित्तात्संवत्सरादिसंज्ञया समामनन्ति कथयन्ति वृद्धाः । द्यावापृथिव्योरिति द्युमण्डलभूमण्डलयोर्मध्यवर्त्तिनभोमण्डलेन तुल्यमेव ज्ञापितम् । न त्वर्थाऽधिक्यम् । तत्र यदा शुक्लपक्षप्रतिपदि संक्रान्तिर्भवति तदा सौरचान्द्रयोर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षट् दिनानि वर्द्धन्ते । चान्द्रमानेन च षड् दिनानि ह्रसन्तीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो

मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशन्ति ॥ ६ ॥ यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ॥ ७ ॥ अथ च यावताऽर्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते ॥ ८ ॥ अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन सह भुञ्जीत ॥ तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्यसमगतिभिः समामनन्ति ॥ ९ ॥ एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते ॥ १० ॥ अथ च पूर्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैन भुङ्क्ते ॥ ११ ॥

भवति । एवं पञ्च वर्षाणि गच्छन्ति तन्मध्ये द्वौ मलमासौ भवतः । वर्षाणां च यथाक्रमं संवत्सरादिसंज्ञा भवति ततः पुनः षष्ठः संवत्सरसंज्ञको वर्षः प्रवर्त्तते । एवमवान्तर-भेदो ज्ञेयः ॥ ९ ॥ एवमिति ॥ अर्कगभस्तिभ्यः सूर्यमण्डलरूपेभ्यः लक्षे इति भूतलाद्द्विलक्ष इत्यर्थः । अर्कस्य संवत्सरभुक्तिं पक्षाभ्यां भुङ्क्ते तस्य मासभुक्तिं तु सपादर्क्षाभ्यां सपादनक्षत्रद्वयेन सपाददिनद्वयेन भुङ्क्ते । यदि तु कदाचिदुग्रचारी भवति तदा द्रुततरगमनः सन्नैकेनैव दिनेनाहोरात्रात्मकेन पक्षभुक्तिं भुङ्क्ते । अन्यदा तु सार्द्धसप्तघटिकोत्तरेण दिनेन ॥ १० ॥ अथ चेति ॥ आपूर्यमाणाभिश्च कलाभिः शुक्लपक्षेणामराणामहानि पूजादिनानि वितन्वानः । " तस्मादापूर्यमाणपक्षे यजन्त " इति श्रुत्या देवपूजायाः शुक्लपक्षे विधानात् तेन शुक्लपक्षेण पितॄणां रात्रीश्च वितन्वानः क्षीयमाणाभिश्च कलाभिः कृष्णपक्षेण पितॄणामहानि पूजादिनानि वितन्वानः अपरपक्षे पितॄणामिति श्रुत्या कृष्णपक्षे पितृपूजाविधानात् । तदा च देवपूजाया अप्रशस्तत्वादेव तेषां रात्रीर्वितन्वान इत्युक्तम् । न हि शुक्लपक्षकृष्णपक्षाभ्यां देवानामहोरात्रं भवति । उत्तरायणदक्षिणा य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

नाम्यां तदहोरात्रस्य तृतीयस्कन्धे प्रतिपादितत्वादन्यथा तद्विरोधापत्तेः सर्वेषां जीवनिवहानां प्राणिसमूहानां प्राणः सर्वौषधिपोषकत्वेनान्नमयत्वात् । " अन्नं हि प्राणिनां प्राणाः " इति स्मृतेः । अत एव जीवनहेतुत्वाज्जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्त्तैरेकदिवसपरिमितकालेन भुङ्क्ते ॥ ११ ॥ य इति– य एष षोडशकलः पुरुषः भगवान् मनोमयः दशेन्द्रियपञ्चमहाभूतमनआत्मकसङ्घातप्रधानमनोनियन्ता अन्नमयः अमृतमयश्च अतो देवपित्रादीनां प्राणनाऽप्यायनशीलत्वात्सर्वजीवनहेतुत्वात्सर्वमय इति वर्णयन्ति ॥ १२ ॥ तत इति ॥ ततश्चन्द्रमण्डलात् उपरिष्टात् त्रिलक्षयोजनतः भूतलात्तु पञ्चलक्षतः कालायने कालचक्रे ईश्वरेण योजितानि उत्तराषाढाश्रवणसन्धावभिजिन्नक्षत्रं पृथक्कल्पितं तेन सहाष्टाविंशतिर्नक्षत्राणि मेरुं दक्षिणेनैव गच्छन्ति न हि तेषां सूर्यादिवत्पृथगन्या गतिरस्ति ॥ १३ ॥ तत इति ॥ ततो नक्षत्रमण्डलात् उपरिष्टात् उशना शुक्रः द्विलक्षयोजनतः भूतलात्तु सप्तलक्षतः उपलभ्यते अर्कस्य पुरतः पश्चात्सहैव वा शैघ्र्यादिगतिभिरर्कवच्चरति । चकारो वाकारार्थः । सूर्येण सहास्य गतिसाम्यमे-

य एष षोडशकलः पुरुषो भगवान् मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात् सर्वमय इति वर्णयन्ति ॥१२॥ तत उपरिष्टात् त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताऽष्टाविंशतिः ॥१३॥ तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात् सहैव वाऽर्कस्य शैघ्र्यमान्द्यसाम्याभिर्गतिभिरर्कवच्चरति ॥लोकानां नित्यदाऽनुकूल एव प्रायेण वर्षयन् चारेणानुमीयते स वृष्टिविष्टम्भग्रहोपशमनः ॥ १४ ॥ उशनसा बुधो व्याख्यातः तत उपरिष्टाद् द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद् यदाऽर्काद् व्यतिरिच्येत तदाऽतिचरताऽभ्रप्रायानावृष्ट्यादिभयमाशंसते ॥१५॥अत ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः॥ १६ ॥ तत उपरिष्टाद् द्विलक्षयोजनान्तरगतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं चरति यदि न वक्रः स्यात् प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ १७ ॥

वाग्रपश्चाद्भावस्त्वतिचारवशात् स च वृष्टेर्विष्टम्भः स्तम्भनं यस्माद् ग्रहात्तमुपशमयतीति प्रायेण वर्षयन् वृष्टिं कुर्वन् लोकानां नित्यदानुकूल एवास्ते चारेण क्रमस्थनक्षत्राद्यतिक्रमेण अनुमीयते च ॥१४॥ उशनसेति ॥ उशनसा शुक्रेण बुधोऽपि व्याख्यात इति पुरतः पश्चात्सहैव वा चरतीत्यंशेन तुल्यतया निरूपित इत्यर्थः । विशेषमाह । ततः शुक्रादुपरिष्टाद्विलक्षयोजनतो भूतलात्तु नवलक्षतः इत्यादि स्पष्टम् ॥ १५ ॥ अत इति ॥ लक्षद्वितय इति भूतलादेकादशलक्षे यदि वक्रेण नाभिवर्तते तदा त्रिभिस्त्रिभिः पक्षैरेकैकशो द्वादशराशीन् भुङ्क्ते वक्रेण वर्तमानस्तु अनियतगतिर्भवति अघशंसः दुःखसूचकः स्पष्टं शेषम् ॥ १६ ॥ तत इति ॥ द्विलक्षेति भूतलात्त्रयोदशलक्षे यदि वक्रो न स्यात्तर्हि परिसंवत्सरं चरति स्पष्टं शेषम् ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ योजनलक्षद्वयात् भूतलात्पञ्चदशलक्षे पर्येति अनुक्रामति ॥ १८ ॥ तत इति ॥ एकादशलक्षेति भूतलात्षड्विंशतिलक्षे यत्परमं पदं ध्रुवस्थानम् ॥ १९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वाविंशे पञ्चमस्य व्यधादिमाम् ॥ २२ ॥ त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं तथा ॥ शिशुमारस्थितिश्चात्र गव्यानि स्युर्नवैवं तु ॥ उवाचेत्येकमर्द्धाढ्या ऋक्षसंङ्ख्या अनुष्टुभः ॥ २३ ॥ अथेति ॥ अथ तस्मादृषिस्थानात्त्रयोदशलक्षयोजनान्तरे यत्तत्प्रसिद्धं विष्णोः परमं पदमभिवदन्ति तदस्तीति शेषः । यत्र महाभागवत औत्तानपादिः ध्रुवः समकालमेव युज्यन्त इति तथा तैरग्न्यादिभिर्नक्षत्ररूपैः सबहुमानं दक्षिणतः क्रियमाणः कल्पजीविनामवान्तरकल्पे वर्त्तमानानां मर्त्यलोकान्तरिक्षलोकादिलोके जीवतामाजीव्यः महर्लोकाद्युपरितनस्थानां भूमेरधःस्थानां च तद्विनापि स्थितिसम्भवात् उपास्ते तिष्ठति । तस्य ध्रुवस्येह

तत उपरिष्टाद् योजनलक्षद्वयात् प्रतीयमानः शनैश्चर एकैकस्मिन् राशौ त्रिंशन्मासान् विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः ॥ १८ ॥ तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलक्ष्यन्ते ॥ य एव लोकानां शमनुभावयन्तो भगवतो विष्णोर्यत् परमं पदं प्रदक्षिणं प्रक्रमन्ति ॥ १९ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे ज्योतिश्चक्रवर्णने द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत् तद् विष्णोः परमं पदमभिवदन्ति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते ॥ तस्येहानुभाव उपवर्णितः ॥ १ ॥ स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते ॥ २ ॥ यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति ॥ एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणा आकल्पान्तं परिचङ्क्रमन्ति ॥ ३ ॥

मनुष्यलोके योऽनुभावः भगवदाराधनराज्यपालनादिरूपः स तु चतुर्थस्कन्धे उपवर्णितः ॥ १ ॥ स हीति ॥ स हि ध्रुवः अनिमिषेण विश्रान्तिरहितेन अव्यक्तं रंहो वेगो यस्य तेन भगवद्रूपेण कालेन भ्राम्यमाणानां सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनां स्थाणुरिवावष्टम्भ आलम्बनं प्रस्तुतकालचक्रस्यावष्टम्भो वा सर्वे कालचक्राधीना अयं तु कालचक्रमप्यधीनयतीति ईश्वरेण विहितः स्थापितः शश्वदवभासते ॥२॥ यथेति ॥ स्थलमध्यनिखाते मेढीस्तम्भे धान्याक्रमणपशवो बलीवर्दाः कृषीवलेन संयोजितास्त्रिभिः सवनैः प्रातरादिकालविभागैः मेढीस्तम्भनिकटमध्यदूरवर्त्तिभिर्विभागैर्वा यथास्थानं स्वस्वस्थानमनतिक्रम्य मण्डलानि चरन्ति एवमेतस्मिन् कालचक्रे त्रिभिस्त्रिभिः उत्तरदक्षिणायनवैषुवतैः अन्तर्बहिर्योगेनोपर्यधःस्थानविभागेन चेश्वरेणायोजिताः सूर्यादयो भगणाः ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणाः प्रवर्त्यमाना आकल्पान्तं भूमेरुपरि चङ्क्रमन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रमन्ति । अदभाव आर्षः ॥ ३ ॥ नभसीति ॥ कर्म सारथिः सहायो येषां ते स्पष्टमन्यत् ॥ ४ ॥ केचनेति ॥ केचन ईश्वराधारतावादिनः शिशुमारः जलजन्तुविशेषस्तत्सं-स्थानेन तदाकारेण ज्योतिरनीकं ज्योतिश्चक्रं योगधारणायां स्थितमिति शेषः । स्फुटं शेषम् ॥ ५ ॥ यस्येति ॥ अवाक्शिरसः कुण्डलीभूतदेहस्य यस्य शिशुमारस्य पुच्छाग्रे ध्रुव उपकल्पित इत्यादिलाङ्गूलेऽधादधोभागे यानि उदगयनानि अभिजिदादीनि पुनर्वस्वन्तानि चतुर्दश नक्षत्राणि तानि दक्षिणपार्श्वे दक्षिणायनानि पुष्यादीन्युत्तरा-षाढान्तानि चतुर्दश सव्ये वामे पार्श्वे कल्पयन्ति । तत्र दृष्टान्तमाह । यथेति । शिशुमारस्य सर्पविशेषस्य अजवीथींदक्षिणमार्गस्य प्रथमो भागः उक्तान्येव नक्षत्रस्थानानि

नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते ॥ एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ॥ ४ ॥ केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति ॥ ५ ॥ यस्य पुच्छाग्रेऽवाक्-शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः ॥ तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः ॥ तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति ॥ दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसङ्ख्या भवन्ति पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः ॥ पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राऽऽश्लेषे च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासङ्ख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोः धनि-ष्ठामूलं च दक्षिणवामयोः कर्णयोः मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्व-वङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत ॥ शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ॥ ६ ॥ उत्तराहनावगस्तिरधराहनौ यमः ॥ मुखेषु चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥ ७ ॥

विशेषेण विभज्य दर्शयति । पुनर्वसुपुष्यावित्यादिना पुनर्वसुरुदगयनान्त्यनक्षत्रं पुष्यो दक्षिणायनस्याद्यमार्द्राश्लेषे तयोर्निरन्तरे अभिजिदुत्तराषाढे उत्तरदक्षिणायनयोराद्यन्त-नक्षत्रे श्रवणपूर्वाषाढे धनिष्ठा मूलं च तयोरप्युत्तरपूर्वे मघादीनि यान्यनुराधान्तान्यष्ट दक्षिणायननक्षत्राणि तानि वामपार्श्ववङ्क्रिषु वामपार्श्वास्थिषु युञ्जीत प्रातिलोम्येन मृगशिरा रोहिणी कृत्तिकेत्येवं व्युत्क्रमेण पूर्वाभाद्रपदान्तानि यान्यष्टोदगयननक्षत्राणि तानि दक्षिणपार्श्ववङ्क्रिषु युञ्जीत । शतभिषग्ज्येष्ठे उत्तरदक्षिणायनयोर्ये अवशिष्टे ते स्कन्धयोः ॥ ६ ॥ उत्तरेति ॥ अगस्तियमनारायणाश्विनस्तारा एव ककुदि गलपृष्ठे ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदिति ॥ भगवत एतद्रूपमहरहः सन्ध्यायां निरीक्षमाण उपतिष्ठेत । उपस्थानमन्त्रं दर्शयति । नम इति । ज्योतिर्लोकाय ज्योतिषामाश्रयाय कालाय कालचक्ररूपाय अनिमिषां सूर्यादीनां । नुडभाव आर्षः क्विबन्तं वा । पतये महापुरुषाय नमो धीमहीति ॥ ८ ॥ ग्रहेति ॥ यस्मादेतद्ग्रहर्क्षतारामयमाधिदैविकं सर्वदेवाधिदेवस्य भगवतो विष्णोः स्वरूपं त्रिकालं मन्त्रकृतां पूर्वोक्तं मन्त्रं जपतां पापापहं पापनाशकं तस्मात् त्रिकालमेतत्स्मरतो नमस्यतो वा पुंसस्तत्तत्कालजं पापमाशु नश्येत । तङार्षः ॥ ९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चमस्य त्रयोविंशे व्यधाद्गङ्गासहायकः ॥ २३ ॥ चतुर्विंशे रवेरर्वाक् स्वर्भान्वादिस्थितिः क्रमात् ॥ अतलादिस्थितिरपि तत्र गद्यानि भूर्शराः ॥ उवाचेत्येकं सपादास्त्रिंसंततिरनुष्टुभः ॥ २४ ॥ अधस्तादिति ॥ एके पौराणिका इत्येवं वदन्ति । केचिन्मौहूर्त्तिकास्त्वन्यथा वदन्तीत्यर्थः । स्वर्भानुः राहुः

एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत ॥ नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषाय धीमहीति ॥ ८ ॥ ग्रहर्क्षतारामयमाधिदैविकं पापापहं मन्त्रकृतां त्रिकालम् ॥ नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापम् ॥ ९ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे शिशुमारसंस्थानं नाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ श्रीशुक उवाच ॥ अधस्तात् सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके ॥ १ ॥ योऽसावमरत्वं ग्रहत्वं चाऽलभत भगवदनुकम्पया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हः ॥ २ ॥ तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः ॥ ३ ॥ यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि ॥ ४ ॥ तद्व्यवधानकृद्वैरानुबन्धः सूर्याचन्द्रमसावभिधावति॥५॥तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते ॥ ६ ॥

स्फुटमन्यत् ॥ १ ॥ य इति ॥ स्वयम् असुरेषु अपसदो नीचः सैंहिकेयः सिंहिकापुत्रः योऽसौ राहुः अतदर्हः ग्रहत्वामरत्वयोरनर्होऽपि भगवदनुकम्पया स्वयममरत्वं ग्रहत्वं चालभत ॥ २ ॥ तस्येति ॥ हे तात उपरिष्टात् षष्ठस्कन्धाष्टमस्कन्धयोः ॥ ३ ॥ यदिति ॥ प्रतपतस्तरणेः सूर्यस्य यददो मण्डलं तद्विस्तरतो योजनायुतमाचक्षते । एवं सोमस्य द्वादशसहस्रयोजनं मण्डलमाचक्षते ॥ ४ ॥ तदिति ॥ तद्व्यवधानकृत् अमृतपानसमये मध्यप्रवेशेन तयोः सूर्याचन्द्रमसोः व्यवधानं करोतीति तथा अत एवैताभ्यां सूचितत्वात् वैरमनुबध्नातीति तथा । यो राहुः पर्वणि अमावस्यापौर्णमास्योः सूर्याचन्द्रमसावभि अभिभवितुं तयोर्भूतलस्थजनचक्षुषां व्यवधानं कर्त्तुं धावति ॥ ५ ॥ तदिति ॥ तत्तस्य तयोरभिभवोद्योगं निशम्य ज्ञात्वा भगवता भागवतं स्वकीयं दयितं प्रियमस्त्रं सुदर्शनमुभयत्र सूर्ये चन्द्रे च रक्षणाय प्रत्युक्तं तत् प्रसिद्धं परिवर्त्तमानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परिभ्रमत् दृष्ट्वेति शेषः । अभि अभिमुखं मुहूर्त्तमवस्थितः सन् उद्विजमानः भीतः अत एव चकितहृदयः कम्पितहृदयः आरात् दूरादेव निवर्त्तते ॥ ६ ॥ तदिति ॥ तद्राहोर्मध्यस्थित्या व्यवधानेन सूर्याचन्द्रमसोरदर्शनमेव लोकाः प्राणिन उपरागं ग्रहणं वदन्ति तत्र च ऋजुवक्रस्थितिभ्यामर्द्धग्राससर्वग्रासौ न तु ग्रासोऽस्ति दूरान्तरत्वात्॥७॥ तत इति ॥ तावन्मात्रे योजनायुते ॥ ८ ॥ तत इति ॥ यावद्वायुः प्रवाति तीव्रो वाति तस्याप्यवधिमाह । यावच्च मेघा उपलभ्यन्ते तदुपलक्षितं ग्रहहीनमन्तरिक्षमिति शेषः ॥ ९ ॥ पृथिव्या उपरि भूर्लोकावधिमाह—तत इति ॥ यावद्धंसादयः पार्थिवा विकाराः ॥ १० ॥ उपवर्णितमिति ॥ ११ ॥ अवनेरिति ॥ षोडशसहस्रयोजनं मेरोर्भूमिप्रवेशस्योक्तत्वात्तावान् भूकन्दो ज्ञेयस्ततोऽधस्तादधोऽवयवेष्वित्यर्थः । योजनायुतान्तरेण प्रत्येकमुच्छ्रिताः। यद्वा । योजनायुतावधिमित्यर्थः । "अन्तरमवकाशावधि" इत्यमरः ।

तदुपरागमिति वदन्ति लोकाः ॥ ७ ॥ ततोऽधस्तात् सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ॥ ८ ॥ ततोऽधस्तात् यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमन्तरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यन्ते ॥ ९ ॥ ततोऽधस्ताच्छतयोजनान्तर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्रिप्रवरा उत्पतन्तीति ॥ १० ॥ उपवर्णितं भूमेर्यथा संन्निवेशावस्थानम् । ११ ॥ अवनेरप्यधस्तात् सप्त भूविवरा एकैकशो योजनायुतान्तरेणायामविस्तारेणोपक्लृप्ताः ॥ १२ ॥ अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ॥ १३ ॥ एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानन्दविभूतिभिः सुसमृद्धभवनोद्यानाऽऽक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबन्धुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसन्ति ॥ १४ ॥ येषु महाराज मयेन मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासति ॥ १५ ॥

भूतलाद्योजनायुतावधौ अतलं तस्माद्योजनायुतावधौ वितलमित्येवम् आयामविस्तारेणेति कटाहस्य य आयामो विस्तारस्तावद्विस्तारेणेत्यर्थः । यद्वा । आयामविस्तारेणापि योजनायुतावधिना उपक्लृप्ताः दैर्घ्यविशालताभ्यां समा एवेति । उच्छ्रितत्त्वं तु यथासंभवं ज्ञेयम् । भूविवरा इति । " भूलोकः कल्पितः पद्भ्याम् " इत्युक्त्यनुरोधेन तेषां भूलोकान्तःपातित्वं दर्शितम् ॥ १२ ॥ तान् दर्शयति—अतलमिति ॥ १३ ॥ एतेष्विति ॥ स्वर्गादपि अधिकः कामभोगश्च ऐश्वर्यानन्दश्च भूतिः प्रभावश्च विभूतिः सम्पत्तिश्च तैः समृद्धा भवनादयो येषु तेषु आक्रीडं मिथुनक्रीडास्थानम् आविहारः प्रकटविहारस्थानम् एतेषु बिलस्वर्गेषु नित्यप्रमुदिताः परस्परमनुरक्ताश्च कलत्रादयो येषां ते ईश्वरादतिसमर्थादिन्द्रादेरप्यप्रतिहतः कामो येषां ते मायया यथेष्टं विनोदो येषां ते दैत्यादयो निवसन्ति ॥ १४ ॥ येष्विति ॥ हे महाराज येषु बिलस्वर्गेषु मायाविना मयेन

CC-0. In Public Domain. Digitization by eGangotri

विनिर्मिताः नाना ये मणिप्रवरास्तेष्वपि ये प्रवेका मुख्यास्तैर्विरचितैर्विचित्रैर्भवनादिभिः समलंकृताः तत्र भवनानि प्रजानां गृहाः प्राकाराः प्रसिद्धाः गोपुराणि सभा राजोपवेशस्थानानि चैत्यानि देवालयाः चत्वराणि चतुष्पथाः आयतनानि प्रवासिजनविश्रामस्थानानि तथा नागाश्चासुराश्च मिथुनीभूताः पारावतादयश्च तैराकीर्णाः सङ्कुलाः कृत्रिमा भूमयो येषु तैः । नानास्वनेति पाठे तु नानास्वनत्वं मिथुनविशेषणम् । तैः विवरेश्वराणां गृहोत्तमैश्च समलंकृताः पुरश्चकासति ॥ १५ ॥ उद्यानानीति ॥ येषु अतितरां मनइन्द्रियानन्दिभिः कुसुमफलस्तबकाश्च सुभगकिसलयानि च तैरवनता रुचिरा विटपा येषां विटपिनां लतानामङ्गैरालिङ्गितानां तथा समिथुनाः सस्त्रीका विविधा विहङ्गमा येषु जलाशयेषु तेषाममलजलपूर्णानां च श्रीभिः झषकुलोल्लङ्घनेन क्षुभितं यज्जलाशयानां नीरं तस्मिन् यानि नीरजादीनि तेषां वनेषु कृतं निकेतनं यैस्तेषां पक्षिणामेकोऽखण्डो यो विहारस्तेनाकुलाश्च ते मधुराश्च ये विविधाः स्वनादयस्तैर्ये इन्द्रियोत्सवास्तैश्च साधनैः अमरलोकश्रियमतिशयितानि उद्यानानि चकासति। समिथुनेत्यादे-

उद्यानानि चातितरां मनइन्द्रियानन्दिभिः कुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपविटपिनां लताङ्गाऽऽलिङ्गितानां श्रीभिः समिथुनविविधविहङ्गमजलाशयानाममलजलपूर्णानां झषकुलोल्लङ्घनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिन्द्रियोत्सवैरमरलोकश्रियमतिशयितानि ॥ १६ ॥ यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ॥ १७ ॥ यत्र हि महाहिप्रवरशिरोमणयः सर्वं तमः प्रबाधन्ते ॥ १८ ॥ न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति ॥ १९ ॥ न हि तेषां कल्याणानां प्रभवति कुतश्च न मृत्युर्विना भगवत्तेजश्चक्रापदेशात् ॥ २० ॥ यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥ २१ ॥ अथातले मयपुत्रोऽसुरो बलो निवसति ॥ २२ ॥

रुत्तरेणैव संबन्धः । इन्द्रियानन्दिभिरिति स्वनादिविशेषणम् इति स्वामिपादाः । पुंस्त्वमार्षमिति चक्रवर्त्ती वदन् श्रीविशेषणमभिप्रैति नीरजं सामान्येन कमलं लोहितशतपत्रं तद्विशेषः ॥ १६ ॥ यत्रेति ॥ अत्र यदहोरात्रादिभिर्भयं तदत्र नोपलक्ष्यते सूर्याद्यभावात् ॥ १७ ॥ यत्रेति ॥ मणिकृत एव प्रकाश इत्यर्थः ॥ १८ ॥ न वा इति ॥ एतेषु बिलस्वर्गेषु वसतां प्राणिनां दिव्यौषध्यादिपानादिभिराध्यादयो नैव भवन्तीत्यन्वयः । आधयो मनोव्यथाः व्याधयो देहव्यथाः तथा द्विविधा वयोवस्थाश्च न भवन्ति । तत्र प्रथमावलीप्रभृतयः द्वितीया देहवैवर्ण्यादयः वली चर्मसङ्कोचः पलितमकाले केशशौक्ल्यं क्लमः श्रमः ग्लानिरुत्साहहानिः ॥ १९ ॥ न हीति ॥ कल्याणानां मङ्गलरूपाणां चक्रापदेशात् सुदर्शननाम्नः विना ॥ २० ॥ यस्मिन्निति ॥ यस्मिन् सुदर्शने प्रविष्टे पुंसवनानि गर्भाः भयात्स्रवन्ति पतन्ति च । “ आचतुर्थाद्भवेत्स्रावः पातः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमषष्ठयोः । " इति ॥ २१ ॥ २२ ॥ येन मयेन ॥ २३ ॥२४॥ तान् दर्शयति—स्वैरिण्य इति ॥ सवर्णे रताः स्वैरिण्यः असवर्णेऽपि रताः कामिन्यः तत्राप्यतिचञ्चलाः पुंश्चल्य इति भेदः ॥२५॥ या वा इति ॥ बिलायनं बिलरूपमायतनं साधयित्वा सम्भोगसमर्थं कृत्वा स्वे ये असाधारणा विलासास्तत्पूर्वको योऽवलोकस्तेनानुरागयुक्तं यत्स्मितं तेन संलाप उपगूहनं च तदादिभिः स्वैरं यथेष्टं रमयन्ति ॥ २६ ॥ यस्मिन् हाटकाऽख्ये रसे उपयुक्ते सेविते सति ॥२७॥२८॥ भवयोर्भवस्य भवान्याश्च ॥ २९ ॥ यत्रेति ॥ यत्र वितले चित्रभानुरग्निर्मातरिश्वना पवनेन समिध्यमानः प्रज्वलित ओजसा बलेन तद्वीर्यं पिबति संशोष्य कठिनीकरोति ॥ ३० ॥ तन्निष्ठ्यूतं तेनाग्निना निष्ठ्यूतं दाहोची-

येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयन्ति ॥२३॥ यस्य च जृम्भमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यन्त ॥२४॥ स्वैरिण्यः कामिन्यः पुंश्चल्यः इति ॥ २५ ॥ या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापो-पगूहनादिभिः स्वैरं किल रमयन्ति ॥ २६ ॥ यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमिति अयुतमहागजबल आत्मानमभिमन्यमानः कत्थते मदान्ध इव ॥ २७ ॥ ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणाऽवृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनी-भूत आस्ते ॥ २८ ॥ यतः प्रवृता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण ॥ २९ ॥ यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति ॥ ३० ॥ तन्निष्ठ्यूतं हाटकाऽख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ॥ ३१ ॥ ततोऽधस्तात्सुतल उदारश्रवाः पुण्य-श्लोको विरोचनाऽत्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा बटुवामनरूपेण पराक्षिप्तस्वलोकत्रयो भगवदनुक-म्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाऽभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधु-नापि ॥ ३२ ॥ नो एवैतत्साक्षात्कारो भूमिदानस्य यत् तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे सर्वजीव-नियन्तर्यात्मारामे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यम् ॥ ३३ ॥

र्णीकृतम् । यद्वा । भवभवानीभ्यां थूत्कृत्य त्यक्तं भूषणेन रत्नालङ्कारेण सह असुरेन्द्राणामवरोधेषु अन्तःपुरेषु पुरुषीभिः स्त्रीभिः ॥ ३१ ॥ तत इति ॥ ततोऽधस्तात् सुतले उदारश्रवाः महायशाः पुण्यश्लोकः विरोचनस्याऽत्मजो बलिः अदितेः सकाशाल्लब्धकायो भूत्वा स्वरूपमाविष्कृत्य महेन्द्रस्य प्रियं चिकीर्षमाणेन बटुवामनरूपेण भगवता पराऽ-क्षिप्तं त्रिपदयाच्ञयाऽपहृतं लोकत्रयं यस्य सोऽपि भगवदनुकम्पया पुनर्भगवतैव तत्र प्रवेशितः इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाऽभिजुष्टः सन् आराधनीयं तमेव भगवन्तं स्वधर्मेण भगवदुपदिष्टेनाऽराधयन् अपगतेन्द्रादिसाध्वसः अधुनाऽप्यास्ते ॥ ३२ ॥ सुतलराज्यं भूमिदानस्य फलं तु नेत्याह—नो इति ॥ यत्तत् यद्बिलनिलये सुतले ऐश्वर्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत् अशेषाणां जविानिकायानां प्राणिसमूहानां जीवभूतश्चासावात्मभूतश्च तद्रूपे परमात्मनि तीर्थतमे सर्वजीवनियन्तरि आत्मारामे भगवति वासुदेवे पात्र उपपन्ने सति परया श्रद्धया परमादरसमाहितेन मनसा सम्प्रतिपादितस्य अत एव साक्षादपवर्गद्वारस्य भूमिदानस्य त्रिलोकीदानस्य साक्षात्कारः फलं नो एव न भवत्येव ॥ ३३ ॥ यस्येति ॥ त्रैलोक्यदानस्य तु का वार्त्ता क्षुतादिषु विवशोऽपि सकृदपि पुरुषो यस्य नामाभिगृणन् दुर्निवारमपि कर्मबन्धम् अञ्जसा विधुनोति ॥ ३४ ॥ यस्येति ॥ यस्य कर्मबन्धस्य प्रतिबाधनम् अन्यथैव साङ्ख्ययोगाभ्यासमहाक्लेशेनैवोपलभन्ते तं कर्मबन्धं त्यजति ॥ ३५ ॥ तदिति ॥ तत्तस्मात् तस्मिन् सर्वेषां प्राणिनामात्मनि भक्तानामात्मदे वशीभूयाऽत्मानमपि दत्तवति आत्मवतां ज्ञानिनाम् आत्मतमे अत्यन्तमभिन्ने आत्मतयैव कृतस्य त्रिलोकीदानस्यैतत्फलं न भवतीति पूर्वेणैव संबन्धः ॥ ३६ ॥ न वाइति ॥ नूनं निश्चितमेतत् अमुष्य अमुम् इन्द्रं भगवान् न वा अनुजग्राह स्वकीयपरमभक्तत्वेन नैवानुगृहीतवान् ॥ ३७ ॥ यदिति ॥ यत् यस्मात्पुनरात्मनः स्वस्य भगवतोऽ-

यस्य ह वाव क्षुत्पतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन् पुरुषः कर्मबन्धनमञ्जसा विधुनोति ॥ ३४ ॥ यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभन्ते ॥ ३५ ॥ तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतयैव ॥ ३६ ॥ न वै भगवान् नूनममुष्यानुजग्राह ॥ ३७ ॥ यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति ॥ ३८ ॥ यद्भगवताऽनधिगतान्योपायेन याच्ञाछलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च संप्रति मुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥ ३९ ॥ नूनं बतायं भगवानर्थेषु न निष्णातो योऽसाविन्द्रो यस्य सचिवो मन्त्राय वृत एकान्ततो बृहस्पतिस्तमतिहाय स्वयमुपेन्द्रेणाऽत्मानमयाचत ॥ आत्मनश्चाशिषो नो एव तद्दास्यमिति गम्भीरवयसः कालस्य मन्वन्तरपरिवृतं कियल्लोकत्रयमिदम् ॥ ४० ॥

नुस्मृतिं मुष्णातीति तथाभूतं मायामयं प्रकृतिकार्यं भोगैश्वर्यमेवातनुत विस्तारितवानिति ॥ ३८ ॥ बलेस्त्वनुग्रहं कृतवानित्याह—यत्तदिति ॥ यत् यस्मात् याच्ञां विना नाधिगतो न प्राप्तोऽन्य उपायो येन तेन भगवता याच्ञाछलेनैवापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य स तथाभूतोऽपि वरुणपाशैश्च सम्यक् प्रतिमुक्तः निबद्धश्च गिरिदर्यामपविद्धः प्रक्षिप्तोऽपि इति वक्ष्यमाणमुवाच ॥ ३९ ॥ नूनमिति ॥ योऽसौ भगवान् विद्वानपन्द्रिः स नूनं बत अर्थेषु स्वप्रयोजनेषु न निष्णातो न निपुणः यस्येन्द्रस्य बृहस्पतिः सचिवः सहायः यत एकान्ततः परया भक्त्या तेन इन्द्रेण मन्त्राय मन्त्रविचारार्थं वृतः स बृहस्पतिरपि अर्थेषु न निष्णातः यतो भगवति प्रसन्ने सति स एव सेव्यतया वरणीयो नान्यत् अयं तु स्वयं तं भगवन्तमतिहायोपेन्द्रेणैव द्वारभूतेनात्मानं मामात्मनः स्वस्य आशिषः लोकत्रयस्य भोगानेवायाचत । तद्दास्यं तु नो एवायाचततो मूर्ख इत्यर्थः । चकार एवकारार्थः । यद्वा । तं बृहस्पतिमतिहायेत्यर्थः । तथा च यदि तस्य त्रिलोक्यपेक्षा तर्हि बृहस्पतिं प्रेष्य तद्द्वारा कुतो न याचितवांस्ताव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मात्रं तु ब्राह्मणत्वात्तस्मा अप्यहं दद्यामेव तदर्थं तु भगवत्प्रेषणमत्यनुचितमेवेति भावः । अतस्तद्दास्यवरणमेवोचितं तदपेक्षयाऽतिगम्भीरः अनिवार्यो वेगो यस्य तस्य कालस्य यन्मन्वन्तरं तेन परिवृतं पर्यस्तमिदं लोकत्रयं कियत् ॥४०॥ यस्येति ॥ अस्मत्पितामहः प्रह्लादस्तु स्वार्थे निपुण एव यतः खलु स्वपितरि उपरते सति स्वपित्र्यं पदमकुतोभयं निर्भयं भगवता दीयमानमपि भगवतः परमन्यदिति कृत्वा न तु वव्रे किंतु किल निश्चये । यस्यानुदास्यमेव वव्रे ॥ ४१ ॥ ननु त्वमपि प्रह्लादसदृश एवेत्याशङ्क्य नेत्याह-तस्येति ॥ तस्य प्रह्लादस्य अनुपथमनुवर्त्म अमृजिता अक्षीणाः कषाया रागादयो यस्य सः परिहीणो भगवदनुग्रहो यस्य सः भगवदनुग्रहरहितः को वाऽस्मद्विध उपगन्तुमिच्छति ॥४२॥ तस्येति ॥ तस्य बलेरनुचरितमुत्तरस्मादुपरिष्टादष्टमस्कन्धे विस्तारिष्यते विस्तरेण कथयिष्यते ॥४३॥ यस्येति ॥ यस्य बलेर्द्वारि ब्रह्मादिस्थावरान्ताखिलजग-

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे नतु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥ ४१ ॥ तस्य महानुभावस्यानुपथममृजितकषायः को वाऽस्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥ ४२ ॥ तस्यानुचरितमुत्तरस्माद्विस्तरिष्यते ॥ ४३ ॥ यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयो येनाङ्गुष्ठेन पदा दशकन्धरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥ ४४ ॥ ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशंचिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥ ४५ ॥ ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः ॥ ४६ ॥ कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवन्तः पतत्रिराजाधिपतेः ॥ पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुम्बसङ्गेन क्वचित् प्रमत्ता विहरन्ति ॥ ४७ ॥ ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसन्ति ॥ ४८ ॥

द्गुरुः सर्वपूज्योऽपि भगवान् निजजने स्वभक्ते बलावनुकम्पितं कृतानुकम्पं हृदयं यस्य सः तद्रक्षार्थं गदापाणिः सन् स्वयमवतिष्ठते । येन श्रीनारायणेन दिग्विजये निमित्ते बलेर्द्वारि प्रविशन् दशकन्धरो रावणो राक्षसाधिपो विख्यातविजयः पदा तत्राप्यङ्गुष्ठेनैव योजनायुतमुच्चाटितः प्रक्षिप्तः॥४४॥तत इति ॥ लब्धं पदं स्थानं येन सः गतं सुदर्शनाद् भयं यस्य सः महीयते पूज्यते स्फुटमन्यत् ॥ ४५ ॥ तत इति ॥ नैकशिरसामनेकफणानां गणोऽस्ति ॥ ४६॥ कुहकेति ॥महाभोगवन्तः महाकायाः पुरुषवाहात् भगवद्वाहनाद् गरुडादनवरतमुद्विजमानाः भीता अपि स्वकलत्रादिसङ्गेन क्वचित्प्रमत्तास्तद्भयानुसन्धानरहिता विहरन्ति॥४७॥तत इति ॥ दैतेयादयः असुरभेदाः विबुधप्रत्यनीकाः देवशत्रवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकलेष्वपि लोकेष्वनुभावो यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां ते अत एव गरुडाद्भीता बिलेशयाः सर्पा इव रसातले वसन्ति ॥ ४८ ॥ ये वा इति ॥ इन्द्रदूत्या सरमया प्रत्युक्ताभिर्मन्त्ररूपाभिर्वाग्भिरिन्द्राद्बिभ्यति । एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढां गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां सन्धिमिच्छन्तः पणयः प्राहुः । किमिच्छन्ती सरमा इत्यादि । सा च सन्धिमनिच्छन्ती इन्द्रस्तुतिपूर्वकं तान् प्रति परुषमाह । हता इन्द्रेण पणयः शयध्वमित्यादि ते च तच्छ्रुत्वा बिभ्यतीति ॥ ४९ ॥ तत इति ॥ महाभोगिनो महाकाया महाफणा वा पञ्चादिसङ्ख्यानि शीर्षाणि येषाम् ॥ ५० ॥ ५१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चमस्य चतुर्विंशे व्यधाद्गङ्गासहायकः ॥ २४ ॥ पञ्चविंशे ततोऽधस्तादाह शेषस्य संस्थितिम् ॥ यतो रुद्रोद्भवस्तत्र गद्यपद्यान्यगेन्द्रवः ॥ उवाचेत्येकमर्द्धाढ्याः द्वात्रिंशत्स्युरनुष्टुभः ॥ २५ ॥ तस्येति ॥ तस्य पातालस्य मूलदेशेऽधस्तात् त्रिंशद्योजनसहस्रान्तरे या वै प्रसिद्धा भगवतस्तामसी तमःकार्यसंहारप्रवर्त्तयित्री नतु तमोमयी

ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभिरिन्द्राद्बिभ्यति ॥ ४९ ॥ ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनंजयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति तेषामु ह वै पञ्चसप्तदशशतसहस्रशीर्षाणाम् ॥ ५० ॥ फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ॥ ५१ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे अतलादिबिलवर्णनं नाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ श्रीशुक उवाच ॥ तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसीसमाख्याताऽनन्त इति ॥ १ ॥ सात्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं यं संकर्षणमित्याचक्षते ॥ २ ॥ यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ ३ ॥ यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरन्तरेण संकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् ॥ ४ ॥

कला मूर्त्तिः अनन्त इति समाख्याता सा आस्ते ॥ १ ॥ सात्वतीया इति ॥ सात्वतीयाः सात्त्वततन्त्रनिष्ठा भक्ता वासुदेवादिचतुर्व्यूहोपासने द्रष्टृदृश्ययोश्चेतनाचेतनयोर्जीवशरीरयोः भोक्तृभोग्ययोः सम्यक् कर्षणमेकीकरणं येन तं देहेन्द्रियादावहमस्य भोक्ता इदं मे भोग्यमित्यभिमानो लक्षणं चिह्नमधिष्ठातुर्यस्य अहङ्काराधिष्ठानेन दृग्दृश्यसङ्कर्षणात् सङ्कर्षण इत्याचक्षते वदन्ति अभिमन्तुरहन्ताममतयोः शुद्धचर्थं तदधिष्ठातृत्वेन ध्यायन्तीति भावः ॥ २ ॥ यस्येति ॥ सिद्धार्थ इव सर्षप इव यच्छब्दानां स एष भगवाननन्त इत्युत्तरेणान्वयः ॥ ३ ॥ यस्येति ॥ कालेन प्रलयसमयेनोपलक्षितमिदं विश्वमुपसंजिहीर्षत उपसंहर्त्तुमिच्छतो यस्यामर्षेण क्रोधेन विरचिते कुटिलीकृते रुचिरे भक्तानां हृदयङ्गमे भ्रमन्त्यौ ये भ्रुवौ तयोरन्तरेण मध्यात् त्रिशिखं शूलमुत्तम्भयन्नुन्नमयं त्र्यक्ष एकादशव्यूहः साङ्कर्षणो नाम रुद्र उदतिष्ठत् । यथा सिसृक्षतः पुरुषस्य नाभेः कमलमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दभूत्तथा संजिहीर्षतो भ्रूमध्याद्रुद्र इति ॥ ४ ॥ यस्येति ॥ यस्याङ्घ्रिकमलयुगलेऽरुणा विशदा नखा एव मणयः तेषां खण्डः समूहः तस्य मण्डलेषु अहिपतयः परिस्फुरतां कुण्डलानां प्रभामण्डलेन मण्डितानि गण्डस्थलानि येषु तानि स्ववदनानि विलोकयन्ति । स्पष्टं शेषम् ॥ ५ ॥ यस्येति ॥ नागराजकुमार्यो हि आशिषो भोगानाशासाना अभिकाङ्क्षन्त्यो यस्य चारुणि अङ्गवलये अङ्गमण्डले विलसिताश्च ते विशदाश्च विपुलाश्च धवलाश्च सुभगाश्च रुचिराश्च भुजा एव रजतस्तम्भास्तेषु अगरुचन्दनकुङ्कुमानां पङ्क एवानुलेपोऽनुलेपसाधनं तेनावलिम्पमाना अवलिम्पन्त्य एव तेषामभिमर्शनेनोन्मथिते हृदये मकरध्वजस्यावेशेन रुचिरं च ललितं च स्मितं यासां तास्तस्यानुरागेण मदेन च मुदितं च तन्मदेन विघूर्णिते प्रचलिते च आ ईषदरुणे करुणावलोकयुक्ते नयने यस्मिंस्तद्वदनारविन्दं सव्रीडम् अस्मन्मनोविकारं भगवान् ज्ञातवानिति लज्जासहितं यथा भवति

यस्याङ्घ्रिकमलयुगलारुणविशदनखमणिखण्डमण्डलेष्वहिपतयः सह सात्वतर्षभैरेकान्तभक्तियोगेनावनमन्तः स्ववदनानि परिस्फुरत्कुण्डलप्रभामण्डलमण्डितगण्डस्थलान्यतिमनोहराणि प्रमुदितमनसः खलुः विलोकयन्ति ॥ ५ ॥ यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वङ्गवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तम्भेष्वगरुचन्दनकुङ्कुमपङ्कानुलेपेनावलिम्पमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणाऽवलोकनयनवदनारविन्दं सव्रीडं किल विलोकयन्ति ॥ ६ ॥ स एव भगवाननन्तोऽनन्तगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ७ ॥ ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकाऽमृतेनाप्यायमानः स्वपार्षदविबुधयूथपपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्ति ॥ ८ ॥

तथा विलोकयन्ति ॥६॥ स इति ॥ उपसंहृतो मर्षस्यासहनस्य तथा रोषस्य क्रोधस्य वेगो येन स तथा तस्य प्रलयहेतुत्वेनेदानीं स्थितिसमयेऽनौचित्यात् ॥ ७ ॥ ध्यायमान इति ॥ निरन्तरं सुरादिभिर्ध्यायमानश्चिन्त्यमानः अनवरं निरन्तरम् मदेन मुदितश्चासौ विकृतविह्वललोचनश्च सः सुललितेन मुखरिकाऽमृतेन स्वपार्षदान् विबुधयूथपानां पतींश्चाप्यायमानो हर्षयन् नीले वाससी यस्य स एकं कुण्डलं यस्य सः हलस्य ककुदि पृष्ठे कृतः न्यस्तः सुभगश्च सुन्दरश्च भुजो येन सः उदारा भक्तानां मनोरथपूरिका लीला यस्य सः न परिम्लानो रागः कान्तिर्यस्यास्तस्या नवतुलसिकाया आमोदमध्वासवेन सुरभिमधुररसेन माद्यतां मधुकराणां ये व्राताः समूहास्तेषां मधुरगीतेन श्रीर्यस्यास्तां स्वां वैजयन्तीं चित्ररूपपुष्पग्रथितां वनमालां भगवान् बिभर्त्ति । माहेन्द्रो वारणेन्द्रः काञ्चनीं कक्षां वरत्रामिवेति ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य एष इति ॥ एवमुक्तप्रकारकोऽनुश्रुतो ध्यायमानश्च मुमुक्षूणामन्तर्हृदयं गतोऽनादिकालकर्मवासनादिभिर्ग्रथितं सत्वरजस्तमोमयम् अतः अविद्यामयं हृदयग्रन्थिमहङ्कारमाशु निर्भिनत्ति ॥ ९ ॥ तस्येति ॥ सह तुम्बुरुणा तुम्बुरुनाम्ना गन्धर्वेण सह संश्लोकयामास वर्णयामास ॥ १० ॥ उत्पत्तीति ॥ अस्य जगतः उत्पत्तिस्थितिलयहेतवः सत्त्वाद्याः प्रकृतिगुणा यस्येक्षया कल्पाः स्वस्वकार्ये समर्था आसन् यदीक्षणं विना तु समर्था नासन् यतः ध्रुवं नित्यम् अकृतमकृत्रिमं यत्पूर्वमेकमेव सदात्मनि स्वस्मिन्नेव नानाकार्यं प्रपञ्चमधात् संकल्पमात्रेणोत्पाद्य दधार तस्य ब्रह्मणो वर्त्म तत्त्वं प्राप्तिमार्गं वा तत्कृपां विना जनः कथमु ह वेद कथमपि नैव वेद । प्रहर्षिणीचतुष्कम् ॥ ११ ॥ मूर्त्तिमिति ॥ यत्रेदं सदसत् स्थूलसूक्ष्मात्मकं कार्यकारणात्मकं विश्वं विभाति स सच्चिदानन्दात्मको भगवान् नोऽस्माकं भक्तानां पुरुकृपया संशुद्धं सत्वं शुद्धसत्वात्मिकां मूर्त्तिं बभार दधार । उदाराणि वीर्याणि यस्य स मृगपतिः सिंहः स्वजनानां मनांसि आदातुं वशीकर्त्तुं कृतामनवद्यां यस्य लीलामाददे अशिक्षत । यद्वा । मृगपतिरिवोदारवीर्यः यत् यः

य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थिं सत्वरजस्तमोमयमन्तर्हृदयं गत आशु निर्भिनत्ति ॥ ९ ॥ तस्यानुभावान् भगवान् स्वायंभुवो नारदः सह तुम्बरुणा सभायां ब्रह्मणः संश्लोकयामास ॥ १० ॥ उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन् ॥ यद्रूपं ध्रुवमकृतं यदेकमात्मन् नानाधात् कथमु ह वेद तस्य वर्त्म ॥ ११ ॥ मूर्तिं नः पुरुकृपया बभार सत्वं संशुद्धं सदसदिदं विभाति यत्र ॥ यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥ १२ ॥ यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलम्भनाद् वा ॥ हन्त्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ १३ ॥ मूर्धन्यर्पितमणुवत् सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् ॥ आनन्त्यादनवसितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥ १४ ॥ एवंप्रभावो भगवाननन्तो दुरन्तवीर्योरुगुणानुभावः ॥ मूले रसायाः स्थित आत्मतन्त्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ १५ ॥

स्वजनमनांसि आदान्तुं लीलाम् आददे ॥ १२ ॥ यन्नामेति ॥ यस्य भगवतो नामाऽन्यतः श्रुतमकस्माद्वा आर्त्तो दुःखितो दुःखनिवृत्त्यर्थं वा प्रलम्भनादुपहासाद्वा पतितो महापातक्यपि यद्यनुकीर्त्तयेत्तर्हि तन्नामश्रवणं कीर्तनं वा नृणामशेषमंहः पापं सपद्येव हन्ति अतो मुमुक्षुः भगवतः शेषादन्यं कमाश्रयेत् ॥ १३ ॥ मूर्द्धनीति ॥ यस्य सहस्रमूर्ध्नः शेषस्यैकस्मिन्नेव मूर्द्धन्यर्पितं स्वेच्छया स्थापितं गिर्यादिसहितं भूगोलमणुवत्तिष्ठति तस्यानवसितविक्रमस्य अनन्तपराक्रमस्य भूम्नः आनन्त्याद्धेतोः वीर्याणि सहस्रजिह्वोऽपि को गणयेत् ॥ १४ ॥ एवमिति ॥ भगवाननन्तः एवंभूतोऽचिन्त्यः प्रभावो यस्य स दुरन्तमनन्तं वीर्यं बलं यस्य । दुःशब्दो नञर्थः । उरवो बहवो गुणा ज्ञानवैराग्यैश्वर्यादयः अनुभावः शक्तिश्च यस्य स च स च अत एवात्मतन्त्रः आत्माधारः यो रसायाः भूमेर्मूले स्थितः सन् लीलयाऽनायासेनैव जगतः स्थितये क्ष्मां पृथिवीं बिभर्त्ति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एता इति ॥ इह प्रवृत्तिमार्गे कामान्कामयमानैर्नृभिरुपगन्तव्याः यथाकर्म तत्तत्कर्मानुसारेण विनिर्मिताः गतय एता एव हि प्रसिद्धा यथोपदेशं मयानुवर्णिताः ॥ १६ ॥
तस्यैव प्रपञ्चः—एतावतीरिति॥ हे राजन् प्रवृत्तिलक्षणस्य धर्मस्य कर्मणो विपाकरूपाः फलभूताः या उच्चाः स्वर्गादिरूपा अवचाः नीचाः पातालादिरूपाःतत्रासुरसर्पादीनां सुदर्शनादिभयस्य दर्शितत्वाद्विसदृशा मध्यमा ङीबभाव आर्षः । मर्त्यलोकादिरूपाः दुःखसुखोभयस्य प्रबलत्वात् पुंसो गतयस्ता हि एतावतीः यथाप्रश्नं तव प्रश्नानुसारेणाह व्याचख्ये व्याख्यातवानस्मि अन्यत् किं कथयाम तद्ब्रूहि इति शेषः । अथ प्रागुक्तभूगोलवर्षद्वीपादिविभागसूर्यादिग्रहर्क्षपातालादिवर्णनस्य निष्कर्षः । तत्र पुराणमते भूः पुष्करपलाशसमा चिपिटा चक्राकारा इति दृश्यत एव सेयं पञ्चाशत्कोटियोजनव्यासा तस्या मध्ये मेरुः मेरोर्मूले चतुर्षु दिक्षु अवष्टम्भगिरयः ततः परं मेरोः परितः केसराचलाः मेरुसमानोच्छ्रायाः तेषां स्थितिरवष्टम्भगिरिशून्यदेशे मेरोरव्यवधानेन अवष्टम्भस्थले तु अवष्टम्भगिरिशिरोऽधिरुह्य मेरुशिरःपर्यन्तमिति । अथ वा प्रथमं केसराचलाः ते चात्र मते मेरोरवयवभूता एव ततोऽवष्टम्भगिरयः इति । अथ ततः परं प्रतिदिशं द्वौ द्वावित्यष्टौ परिधिगिरयः एवमवष्टम्भकेसरपरिधिगिरिभिश्चतुर्षु दिक्षु वेष्टितो मेरुः मेरोः सर्वत

एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्मनिर्मिताः यथोपदेशमनुवर्णिताः कामान् कामयमानैः ॥ १६ ॥ एतावतीर्हि राजन् पुंसः
प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत् कथयाम इति ॥ १७ ॥ इति श्रीभागवते महापुराणे पञ्चमस्कन्धे शेषमहाराजस्वरूपवर्णनं नाम पञ्चविंशतितमोऽध्यायः॥ २५ ॥

इलावृतवर्षम् इलावृतात्पूर्वस्यां गन्धमादननामा भद्राश्ववर्षसीमा पर्वतः ततः समुद्रपर्यन्तं भद्राश्ववर्षं दक्षिणे च क्रमेण निषधगिरिः हरिवर्षं हेमकूटगिरिः किंपुरुषवर्षं हिमालयगिरिः भारतवर्षमिति पश्चिमायां माल्यवान् गिरिः ततः समुद्रपर्यन्तं केतुमालसंज्ञवर्षम् उत्तरतोऽपि क्रमेण नीलगिरिः रम्यकवर्षं श्वेतगिरिः हिरण्मयवर्षं शृङ्गवान् गिरिः कुरुसंज्ञवर्षमिति नववर्षात्मको जम्बूद्वीपः । तस्य परितः क्षारोदः ततः परं परं प्लक्षद्वीप इक्षुरसोदः शाल्मलद्वीपः सुरोदः कुशद्वीपः घृतोदः क्रौञ्चद्वीपः क्षीरोदः शाकद्वीपः दधिमण्डोदः पुष्करद्वीपः शुद्धोदः ततः प्राणिनिवासभूता काञ्चनी भूमिः ततो द्वितीया काञ्चनी भूमिः ततो लोकालोकाचलः ततः अलोका भूमिरिति । एवं भूगोलादुपरि सूर्यः तत उपर्युपरि चन्द्रः नक्षत्राणि शुक्रः बुधः भौमः गुरुः शनिः सप्तर्षयः ध्रुवः महर्लोकः जनलोकः तपोलोकः सत्यलोकः वैकुण्ठलोकः ततोऽण्डकटाहाख्योऽण्डगोलकः अण्डगोलक एव मह्यादिप्रकृत्यन्तावरणाष्टकसमूह उच्यते । भूमेरधोऽधः अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति क्रमेण सप्त पातालानि ततो गर्भोदः तन्मध्येऽधस्तात् कूर्म उपरि शेष इति गर्भोदात्परमण्डकटाहाख्योऽण्डगोलः इति लोकसंस्थानसङ्क्षेपः । अथ जम्बूद्वीपस्य सर्वतो लक्षयोजनादिव्यवस्था । अत्र केचित् । वर्षाणां नवसहस्रयोजनमानत्वं मर्यादागिरिसहितानामेव तथा चलावृतस्योत्तरतः स्थितानां रम्यकहिरण्मयकुरुसंज्ञानां वर्षाणां सप्तविंशतियोजनसहस्रं मानं तथा तस्य दक्षिणतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितानां हरिवर्षकिंपुरुषभारतसंज्ञानां वर्षाणां सप्तविंशतियोजनसहस्रम् इलावृतस्य मेरुसहितस्य तु षट्चत्वारिंशद्योजनसहस्रम् । यतः षोडशसहस्रमूलस्य मेरोः परितः स्थितानामयुतायुतयोजनविस्ताराणामवष्टम्भगिरीणां स्थित्यनुरोधेन षट्चत्वारिंशत्सहस्रं मानमुचितम् । एवं दक्षिणोत्तरतो जम्बूद्वीपस्य लक्षयोजनविततत्वं भवति । पूर्वपश्चिमतस्तु तस्य जम्बूद्वीपस्येलावृतस्य पश्चिमतो नवयोजनसहस्रकं केतुमालसंज्ञं वर्षम् । तस्यैव पूर्वतो नवयोजनसहस्रकं भद्राश्वसंज्ञं वर्षं तयोर्मध्ये मेरुसहितं ह्यशीतियोजनसहस्रकमिलावृतमिति लक्षयोजनविततत्वं भवतीत्याहुः । स्वामिपादादयस्तु रम्यकादीनां षण्णां वर्षाणां चतुष्पञ्चाशत्सहस्राणि योजनानि मेरुसहितस्येलावृतस्य चतुस्त्रिंशत्सहस्राणि योजनानि षण्णां नीलादिमर्यादागिरीणां द्वादश सहस्राणि योजनानि एवं दक्षिणोत्तररेखायां लक्षं योजनानि तथा पूर्वापररेखायामपि षोडशसहस्रं मेरुमूलं ततः सर्वतो नवसहस्रमिलावृतमिति मेरुसहितस्येलावृतस्य चतुस्त्रिंशत्सहस्राणि योजनानि मर्यादागिर्योर्माल्यवद्गन्धमादनयोश्चत्वारि सहस्राणि योजनानि केतुमालभद्राश्ववर्षयोस्तु शेषाणि द्विषष्टिसहस्राणि योजनानि एवं लक्षयोजनानि इत्याहुः । तेषामयमाशयः । पूर्वमते पूर्वापररेखायामिलावृतमानमत्यधिकम् । दक्षिणोत्तररेखायामपि मूले षोडशसहस्रमितो मेरुः तत उभयतो दशदशसहस्रपरिमित्या विंशतिसहस्रमिताववष्टम्भगिरी षड्वर्षाणि चतुष्पञ्चाशत्सहस्रमितानि इत्येषां योगे नवतिः सहस्राणि अतः अवष्टम्भगिर्योः परित इलावृतं पञ्चपञ्चसहस्रमितविस्तारमेव क्वापि नवसहस्रता नायाति । तथा च मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम् इलावृतं महाभागेति विष्णुपुराणोक्तनवसहस्रमानविरोधः । किञ्च अवष्टम्भगिरीणां स्थितौ कल्पितायामपि केसरपरिधिगिरीणां तथाप्यगतेः । ननु तव मते तेषां का व्यवस्थेति चेत् अवष्टम्भगिरयस्तावन्न मेरोः परितः सर्वं देशं नाक्रामन्ति अतः सान्तरालतया इलावृतान्तर्गता एव ते विस्तीर्णमूर्ध्नो मेरोरवष्टम्भत्वात् पूर्वपश्चिमौ गिरी दक्षिणोत्तरदीर्घौ दक्षिणोत्तरौ च पूर्वापरदीर्घौ ज्ञेयौ । पूर्वं विस्तारशब्देनात्र दैर्घ्यमेव ग्राह्यम् । " महापादास्तु चत्वारो मेरोरथ चतुर्दिशम् । यैर्धृतत्वान्न चलति सप्तद्वीपवती मही ॥ दशयोजनसाहस्र आयामस्तेषु पठ्यते ॥ " इति वायुपुराणात् । सर्वतो दशसहस्रविस्ताराङ्गीकारे दैर्घ्यं ततोऽप्यधिकमङ्गीकार्यमत इलावृतलोपात्पूर्वेणेलावृतमुपप्लावयतीत्यादिविरोधः स्यात् । केसराचला अपि सर्वे सान्तराला एव तिष्ठन्ति न त्विलावृतस्य देशं सर्वत आक्रामन्ति अतो वर्षान्तर्गता एव ते न तु पृथक् । विष्णुपुराणे च केसराचलविषये " मेरोरनन्तराङ्गेषु जठरादिष्ववस्थिताः । " इत्युक्तम् । मूलसमीपस्थानानि तान्येव जठरादीनि इति तत्र टीका । जठरदेवकूटादयोऽपि इलावृतान्तर्गता एव इलावृतवर्षस्यैव अवान्तरविभागहेतुत्वं तेषाम् । ननु भद्राश्वकेतुमालयोः प्रत्येकमेकत्रिंशत्सहस्रमानाङ्गीकारे नव वर्षाणि नवसहस्रयोजनायामानीति प्रत्येकनवसहस्रविस्तारबोधकवाक्यविरोधः । अत एव केचित् नीलनिषधयोः संलग्नाग्रयोः समुद्रप्रवेशेन संकुचितत्वात् तयोर्नवसहस्रविस्तारं क्लेशेनापि प्रतिपादयन्ति इति चेत् अत्र वाक्ये छत्रिन्यायेन सर्वेषां नवसहस्रविस्तारोक्तेः । अत एव विष्णुपुराणे वायुपुराणे च स्फुटतया नवसहस्रमानत्वं सप्तानामेवोक्तम् । भद्राश्वकेतुमालयोर्मानं नोक्तम् इति स्वामिपादनिष्कर्षः । इदं त्वत्र बोध्यम् । मेरोर्मूलदेशे प्रथममवष्टम्भगिरयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संलग्नाः ततः केसराचलाः ततः परं परिधिगिरय इति भागवते विष्णुपुराणे च। तेनैव क्रमेण पाठात् वायुपुराणेऽवष्टम्भगिरीणां मेरुमहापादत्वोक्तेश्च। अयुतयोजनमात्रोच्छ्रायवतामवष्टम्भगिरीणां चतुरशीतिसहस्रयोजनोच्छ्रितस्य मूलापेक्षया द्विगुणमूर्ध्नो मेरोरव्यवधानेन मूले स्थितिं विना अवष्टम्भत्वानुपपत्तेश्च। अन्यथा मूलभागान्मूर्द्धभागस्य द्विगुणविस्ताराद् गौरवेण भङ्गप्रसङ्गात् इति विष्णुपुराणटीकायां स्वामिपादोक्तेश्च। अत एव तेषां विस्तारोऽपि मूले त्रिसहस्रयोजनतो न न्यूनः। केसराचलानां प्रथममङ्गीकारे तैर्मेरुसमानोच्छ्रायैर्व्यवधाने मेरुस्पर्शस्याप्यसंभवे न सुतरामवष्टम्भत्वं न सम्भवतीति प्रथममेवावष्टम्भगिरयः संलग्नाः। ते च प्रत्येकमयुतयोजनमात्रदैर्घ्यात् अल्पमेव मेरोर्मूलपरिधिं स्पृशन्ति न तु सर्वम्। केसराचलाश्च अवष्टम्भगिरिशून्यदेशे मेरुमूलात् मेरुशिरःपर्यन्तं संलग्नाः। अन्यत्र त्ववष्टम्भगिरीणां मूलादारभ्य तेषामुपर्यारुह्य च मेरुशिरःपर्यन्तसंलग्नाः सर्वत्र मेरुस्पर्शानङ्गीकारेऽत्युच्छ्रितानामल्पविस्ताराणां तेषां स्थितिरेव सम्यक् न स्यात्। विस्तारश्च तेषां न नियतः दैर्घ्यमपि। यद्यपि भागवते नोक्तं तथापि "मेरोरनन्तराङ्गेषु जठरादिष्ववस्थिता।" इति विष्णुपुराणवचनात् उन्नेतुं शक्यते। यद्यपि स्वामिपादैस्तत्र मूलसमीपस्थानान्येव जठरादीनि इति व्याख्यातं तथापि चाध्याहारेण मेरोरनन्तराङ्गेषु मूलदेशेषु तथा अवष्टम्भगिरिषु जठरादिषु परिधिगिरिषु चावस्थिता इत्यपि स्फुटोऽर्थः उन्नीयते। जठरशब्दस्य लाक्षणिकसमीपस्थानार्थापेक्षया जठराख्यपर्वतार्थस्यौचित्यात्। तथा च जठरादिपरिधिगिरिपर्यन्तं तेषां दैर्घ्यं ज्ञेयम्। "जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्दिशम्। मेरोश्चतुर्दिशं ये च प्रोक्ताः केसरपर्वताः॥ शीतान्ताद्या मुने तेषामतीव तु मनोरमाः। शैलानामन्तरे द्रौण्यः सिद्धचारणसेविताः॥" इति विष्णुपुराणोक्तास्तत्र द्रौण्योऽप्युपपन्नाः। यदि च स्वामिपादानां सुमेरुणा सह केसरपर्वतानां सर्वत्र संलग्नतायामेव तात्पर्यमित्याग्रहस्तर्हि वयमपि तथैव स्वीकुर्मः। अवष्टम्भगिरीणां केसरगिरिभ्योऽग्रे स्थितिरस्तु न वयं स्वामिवचः प्रत्याख्यातुं पारयामः। अत्र पक्षे मेरोरवयवभूता एव केसराचलाः मेरोर्मूलदेशगावष्टम्भगिरिसमुच्छ्रयदेशादग्रे मूलासन्नदेशे वा तेषामारम्भः। परिधिगिरीणां च यद्यपि स्वामिपादैर्मेरुमूलाद्योजनसहस्रमात्रं त्यक्त्वा स्थितिरुक्ता तथापि अष्टादशसहस्रमात्रदैर्घ्यैः परिधिगिरिभिः षोडशसहस्रमूलस्य मेरोरेकसहस्रयोजनमात्रान्तरस्थितावेव वेष्टनं सम्भवति नान्यथा इति यथा श्रुतं सम्यक् मत्वा एकसहस्रान्तरे तेषां स्थितिरिति स्वामिपादाभिप्रायः। कैश्चित्कल्प्यते न तु तेषामयमभिप्रायः सम्भवति। तथा हि "भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पत्राणि लोकपद्मस्य मर्यादाशैलबाह्यतः॥" इत्युक्त्वा "जठरो देवकूटश्च मर्यादापर्वतावुभौ।" इत्युक्तिः। त्रिशृङ्गो जारुधिश्च उत्तरौ वर्षपर्वतौ इत्युक्तिश्च तेषाम् इलावृतान्तेऽपि स्थितिं बोधयति। किं च पूर्वोक्तयुक्त्या अवष्टम्भगिरीणां केसराणां च मेरुमूलादव्यवधानेन स्थितौ निश्चितायामवष्टम्भगिरीणां विस्तारे सहस्रत्रयादन्यूने निश्चिते कथं मेरुमूलादेकसहस्रान्तरे परिधिगिरीणां स्थितिः सम्भवति अतो मेरुमूलशब्देनावष्टम्भगिरिसहितमेव मेरुमूलं स्वामिपादोक्तौ गृह्यते। परिधिगिरिभिः सर्वमूलवेष्टनं तु न विवक्षितम्। एकयोजनसहस्रान्तस्थित्याभ्यन्तरपरिधिना वेष्टनसंभवेऽपि तावत्प्रमाणैर्गिरिभिर्बाह्ये वेष्टनासंभवात् किन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवष्टम्भगिरिभिरिव सान्तरालं वेष्टनं विवक्षितम् । तथा च मेरुमूलाच्चतुःसहस्रयोजनेभ्योऽग्रे जठरपवनकैलासत्रिशृङ्गैः परिधिः सप्तसहस्रयोजनेभ्योऽग्रे देवकूटपारियात्रकरवीरमकरैः परिधिरिति । नन्वेवं मर्यादापर्वतत्ववर्षपर्वतत्वोक्तिसामञ्जस्याय इलावृतान्तेऽष्टभिः जठराद्यैरेकः परिधिः स्वीक्रियतामिति चेत् चतुस्त्रिंशत्सहस्रविस्तीर्णस्य चतुष्कोणस्येलावृतस्य परिधिः षट्त्रिंशत्सहस्रोत्तरलक्षमितः जठरादीनां दीर्घतैक्यम् । चतुश्चत्वारिंशत्सहस्रोत्तरलक्षमितमिति तस्य नीलनिषधमाल्यवद्गन्धमादनैः सर्वतो रुद्धे स्थाने मातुमशक्यत्वात्तथा कल्पनम्। अनया कल्पनया एकस्य परिधेर्मेर्वङ्गतुल्यावष्टम्भकेसराचलसहितमेरुमर्यादात्वं द्वितीयस्येलावृते स्थित्या वर्षपर्वतत्वं चोपपन्नम्। एवं च एकैकदिशि द्विद्विपर्वतोक्तिरपि सङ्गच्छते।अन्यथा एक एव गिरिः षट्त्रिंशत्सहस्रमितो गण्येतेत्यलम् । यदि च नववर्षशब्दे छत्रिन्यायो नाङ्गीक्रियते तदा च मेरुमध्यादेकोनचत्वारिंशत्सहस्रयोजनाग्रतः पूर्वस्यां गन्धमादनः पश्चिमायां माल्यवान् इति भद्राश्वकेतुमालयोरपि भारतवर्षवन्नवसाहस्रविस्तारः धनुराकृतित्वं च । नन्वेवमिलावृतस्य दीर्घता जाता तथा च मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतम् । इलावृतमिति प्रागुक्तवचनविरोधः।इलावृतं मेरोश्चतुर्दिशमस्ति तच्च नवसाहस्रविस्तृतमिति तदर्थात् तथा चोत्तरदक्षिणयोर्नवसहस्रविस्तारोऽस्त्येव दैर्घ्यं त्वन्यदिशि तत्तु सर्वेषु वर्षेष्विवेलावृतेऽपि भिन्नमेव । यद्वा । परिधिगिरिपर्यन्ताभिप्रायकं सर्वतो नवसहस्रवत्त्वमित्यलम्। अथ जिज्ञासुबालबोधाय मानचित्रं प्रदर्श्यते । तत्र स्पष्टप्रतिपत्त्यर्थमादाविलावृतस्य ततो जम्बूद्वीपस्य। अत्र केवलं परिचयमात्रमपेक्षितमतः सङ्क्षेपेण श्रीस्वामिपादमतेनैव लेखः। मतान्तराणि स्वयं बोद्धुं शक्यानि । तत्रेष्टविस्तारं समचतुरस्रं क्षेत्रं दिगङ्कितं कुर्यात् तन्मध्ये पूर्वापरां दक्षिणोत्तरां चेति द्वे मध्यमिलिते बिन्द्वात्मिके रेखे कुर्यात् ततो बहिर्विस्तारमितां रेखां निर्माय तस्याश्चतुस्त्रिंशद्भागान् कुर्यात् । अस्या रेखाया एकैको भागः सहस्रयोजनपरिमाणो ज्ञेयः । अथ मध्यबिन्दोरष्टभागपरिमितकर्कटेन वृत्तं कुर्यात् स सुमेरुः पर्वतो ज्ञेयः । मेरुमध्यबिन्दोरष्टभागान्तादग्रे मेरुमूलपरिसंलग्नां पूर्वरेखागतमध्यां ततो दशभागदीर्घां दक्षिणोत्तरां रेखां कुर्यात् तदग्रे मध्यादेकादशभागान्ते तादृशीमन्यां रेखां कुर्यात् ते द्वे रेखे प्रान्ते रेखया मिलिते कार्ये । मन्दरो नामावष्टम्भगिरिस्त्रिसहस्रविस्तारोऽयुतयोजनदीर्घो भवति एवमेव दक्षिणादिदिक्षु मेरुमन्दरादयोऽवष्टम्भगिरयः कार्याः ततः केन्द्रात् द्वादशभागान्ते चतुर्दशभागान्ते च मध्यमरेखागतमध्ये उभयतो नवनवभागमिते द्वे रेखे कृत्वा प्रान्तौ रेखया संमिलितौ कुर्यात् अयं जठराख्यः । परिधिगिरिरष्टादशसहस्रयोजनायतः द्विसहस्रयोजनविस्तारः एवं स्वस्वदिक्षु चतुरः परिधिगिरीन् कुर्यात् ततः केन्द्रात्पञ्चदशभागान्ते सप्तदशभागान्ते च तादृश्यौ रेखे कृत्वा प्रान्तौ मेलयेत् । अयं देवकूटाख्यः । परिधिगिरिः एवं स्वस्वदिक्षु पुनः परिधिगिरीन् कुर्यात् ततोऽवष्टम्भगिरिशून्यदेशे मेरुमूलात् तत्सहितदेशे चावष्टम्भगिरिमूलादारभ्य प्रथमपरिधिपर्यन्तदीर्घान् प्रतिदिशं पञ्च पञ्च केसराचलान् कुर्यात् ततो मेरौ ब्रह्मादीनां पुरीणां नामानि गङ्गाप्रवाहभेदान् औच्च्यादियोजनसंख्याङ्कान् अन्यपर्वतेषु विस्तारोच्चयदैर्घ्याङ्कान्स्वनामसहितान् लिखेत् इति पर्वतः सर्वत्र गो मूत्राकाररेखावेष्टितः नदीबिन्दुकल्पित गोमूत्राकाररेखात्मिका ज्ञेया । अथ जम्बूद्वीपचित्रम् । तत्रेष्टव्यासार्द्धमितेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्कटेन वृत्तं दिगङ्कितं प्राग्वद्विन्द्वात्मकदिग्रेखाद्वययुतं कुर्यात्। बहिर्व्यासमितां च रेखां कृत्वा तस्याः शतं भागान् कुर्यात्। अत्राप्येको भागः सहस्रयोजनपरिमितो ज्ञेयः। तत्र केन्द्राद्दिग्रेखासु सप्तदशभागान्तेषु चिह्नानि कृत्वा तैश्चोभयतः सरलरेखैश्चतुस्त्रिंशद्भागमितं चतुर्भुजं समचतुरस्रं क्षेत्रं कुर्यात् तदन्तर्मेरुप्रभृतिभिः संक्षिप्त-मिलावृतं दर्शयेत्। ततः केन्द्रादुत्तररेखायां सप्तदशभागान्ते ऊनविंशतिभागान्ते च रेखे पूर्वापरायते समुद्रस्थानापन्नपरिधिपर्यन्तदीर्घे कुर्यात् प्रान्ते रेखया मेलयेच्च। अयं रेखाद्वयात्मको नीलनामा रम्यकवर्षस्य मर्यादापर्वतो द्विसहस्रयोजनविस्तारः अतः केन्द्रात्तस्यामेव रेखायामष्टाविंशतिभागान्ते त्रिंशद्भागान्ते च प्राग्वद्रेखे कुर्यात्। अयं श्वेतनामा हिरण्मयवर्षस्य मर्यादापर्वतः ततः केन्द्रादेकोनचत्वारिंशद्भागान्ते एकचत्वारिंशद्भागान्ते च प्राग्वद्रेखे कुर्यात्। अयं शृङ्गवान्नाम कुरुवर्षमर्यादापर्वतः। एवं दक्षिणरेखायामपि पूर्वोक्ततत्तद्भागान्तेष्वेव कृताभी रेखाभिः निषधहेमकूटहिमालयनामकान् हरिवर्षकिम्पुरुषभारतवर्षमर्यादापर्वतान् कुर्यात्। ततः पूर्वदिग्रेखायां सप्तदशोनविंशतिभागान्ते रेखाद्वयेन नीलनिषधाख्यपूर्वोक्तगिरिपर्यन्तदीर्घो गन्धमादननामा भद्राश्ववर्षसीमापर्वतः। एवं पश्चिमरेखायां पूर्वोक्तभागान्तकृतरेखाद्वयेन नीलनिषधपर्यन्तः माल्यवान्नाम केतुमालसीमापर्वतः। येषां मते भद्राश्वकेतुमालावपि नवसहस्रविस्तारौ अभीष्टौ तेषां मते पूर्वापररेखाभ्यां केन्द्रादेकोनचत्वारिंशदेकच-त्वारिंशद्भागान्ते नीलनिषधावधिके द्वे द्वे रेखे कुर्यात्। एताभ्यां जातौ गन्धमादनमाल्यवन्तौ भद्राश्वकेतुमालसीमापर्वतौ ज्ञेयौ। अथ शेषद्वीपादिसहितसर्वभूमिमानव्यव-स्था। तत्र मेरुमध्यमारभ्यैकतो जम्बूद्वीपोऽर्द्धलक्षयोजनस्ततः क्षारोदः समुद्र एकलक्षयोजनः ततः प्लक्षद्वीपो द्विलक्षयोजनस्ततस्तावान् इक्षुरसोदः ततः शाल्मलीद्वीपश्चतु-र्लक्षः ततस्तावान् सुरोदः ततः कुशद्वीपोऽष्टलक्षयोजनः ततः तावान् घृतोदः ततः क्रौञ्चद्वीपः षोडशलक्षः ततस्तावान् क्षीरोदः ततः शाकद्वीपो द्वात्रिंशल्लक्षः ततस्तावान् दधिमण्डोदः ततो मानसोत्तरपर्यन्तमर्द्धपुष्करद्वीपो द्वात्रिंशल्लक्षयोजनः। एवं मेरुमध्यमारभ्य मानसोत्तरपर्यन्तं सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटिपरिमिता भूमिस्ततो मानसो-त्तरतोऽर्द्धपुष्करद्वीपो द्वात्रिंशल्लक्षयोजनः ततः शुद्धोदश्चतुःषष्टिलक्षयोजनः ततः सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटिपरिमिता प्राणिनिवासभूता काञ्चनी भूमिः ततः अन्या काञ्चनी भूमिरेकोनचत्वारिंशल्लक्षाधिकाष्टकोटिपरिमिता तथा च मेरुमारभ्य लोकालोकपर्यन्तं सार्द्धद्वादशकोटिपरिमिता भूमिर्भवति। शैवतन्त्रेऽप्येवमेवोक्तं कोटिद्वयं त्रिपञ्चाशल्ल-क्षाणि च। ततः परं "पञ्चाशच्च सहस्राणि सप्त द्वीपाः ससागराः। ततो हेममयी भूमिर्दशकोट्यो वरानने॥ देवानां क्रीडनार्थाय लोकालोकस्ततः परः।" इति। अत्र दशकोटित्वमपि पूर्वोक्तप्राणिनिवासभूम्या सह द्रष्टव्यम्। काञ्चन्या भूमेः परतो लोकालोकाचलः ततः अलोकभूमिरेकतः सार्द्धद्वादशकोटियोजनविस्तारा परतोऽपि तावती लोकाचलप्रमाणं त्वत्रान्तर्भूतमिति प्रागुक्तमेव पञ्चविंशतिकोटिमिता तदन्तर्भूमिस्तावतीति पञ्चाशत्कोटियोजनमितो भूगोलः इति श्रीस्वामिपादमतनिष्कर्षः। चक्रवर्तिनिष्कर्षस्तु भूस्तु चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटिप्रमाणा ज्ञेया। यथा मेरुमध्यान्मानसोत्तरमध्यपर्यन्तं पूर्वोक्तमेव सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटिपरिमितं मानसोत्तरमध्यात्स्वादूदकसमुद्रपर्यन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षण्णवतिलक्षयोजनानि ततः काञ्चनी भूमिः सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनप्रमाणा एवमेकतो मेरुलोकालोकयोरन्तरमेकादशलक्षाधिकचतुष्कोटिपरिमितम् । अन्यतोऽपि तथा इति लोकालोकान्तरे तन्मण्डलान्तरव्यासरूपं द्वाविंशतिलक्षोत्तराष्टकोटिपरिमितं लोकालोकाद्बहिरप्येकत एतावदेव अन्यतोऽप्येतावदेव तयोरैक्यं षोडश कोटयश्चतुश्चत्वारिंशल्लक्षाणि पूर्वोक्तमानेन सह चतुस्त्रिंशल्लक्षोना पञ्चविंशतिकोटयः एकतो लोकालोकविस्तारः सार्धा द्वादश कोटयः अन्यतोऽपि तथेति पञ्चविंशतिः कोटयो लोकालोकविस्तारः पूर्वमानेन सह चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटिमाना भूः साब्धिद्वीपपर्वता ज्ञेया । ततः परं सर्वतो दिक्षु सप्तदशलक्षयोजनावकाशे भुवः शेषनागेन धारणम् । दिग्गजैः स्थिरीकरणं सार्थकमिति सर्वथा मेरुमध्यादेकतः पञ्चविंशतिकोटियोजनपरिमिता भूः अन्यतोऽप्येवमिति।तथा च समानसूत्रे सर्वत्र कटाहान्तात्कटाहान्तपर्यन्तं पञ्चाशत्कोटियोजनत्वं सिद्धम् । अथ भूमेरुपरि लक्षयोजने सूर्यः ततो लक्षयोजने चन्द्रः ततस्त्रिलक्षयोजने नक्षत्राणि ततो द्विलक्षयोजने शुक्रः ततः क्रमाद्द्विद्विलक्षयोजने बुधभौमगुरुशनयः । तत एकादशलक्षयोजने सप्तर्षयः।ततः त्रयोदशलक्षयोजने ध्रुवः । एवं सूर्याद्ध्रुवपर्यन्तमष्टत्रिंशल्लक्षयोजनानि भवन्ति । ध्रुवादेककोटियोजने महर्लोकः ततः कोटिद्वययोजने जनलोकः तत उपरि योजनकोट्यष्टके तपोलोकः तत उपरि द्वादशकोटियोजनतः सत्यलोकः । तदुक्तं वैष्णवे । " ध्रुवस्योर्ध्वं महर्लोको यत्र ते कल्पवासिनः । एकयोजनकोटिस्तु यत्र ते कल्पवासिनः ॥ द्वे कोट्यौ तु जनो लोको यत्र ते ब्रह्मणः सुताः । सनन्दनाद्यास्तिष्ठन्ति मैत्रेयामलचेतसः ॥ चतुर्गुणोत्तरे चोर्ध्वं जनलोकात्तपः स्मृतः । वैराजा यत्र ते देवाः स्थिता दोषविवर्जिताः ॥ षाड्गुण्येन तपोलोकात्सत्यलोको विराजते । अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः॥ " ततोऽप्युपरिष्टादेककोटियोजनतो वैकुण्ठलोकः। तथोक्तं ब्रह्मवैवर्त्तकृष्णजन्मखण्डे । " वैकुण्ठं परमं धाम जरामृत्युहरं परम् । कोटियोजनमूर्ध्वं च ब्रह्मलोकात्सनातनम् ॥ " अवशिष्टानि द्विषष्टिलक्षयोजनानि तदुपर्यवकाशे ज्ञेयानि । ततोऽण्डकटाहाख्योऽण्डगोलकः । अण्डगोलक एव मह्यादिप्रकृत्यन्तावरणाष्टकसमूह उच्यते । एवं च सूर्यादुपर्यण्डकटाहपर्यन्तं पञ्चविंशतिकोटियोजनानि भवन्ति । चक्रवर्ती तु सत्यलोकाद्द्विषष्टिलक्षोत्तरायां कोटौ वैकुण्ठस्ततोऽण्डगोलक इत्याह । एवं सूर्याल्लक्षे भूतलं ततः सप्ततिसहस्रेषु सप्त पातालानि ततस्त्रिंशत्सहस्रेषु शेषः । एवं सूर्याल्लक्षद्वये गर्भोदः स च लक्षद्वयन्यूनपञ्चविंशतिकोटिपरिमितः तन्मध्येऽधस्तात्कूर्मस्तस्योपरि शेष इति ज्ञेयम् । एवं मिलित्वा ऊर्द्ध्वाधः पञ्चाशत्कोटिप्रमाणमण्डगोलकं प्रथमावरणम् । ततोग्रेऽन्यान्यावरणानि इति । ज्योतिःशास्त्ररीत्या तु भूः पुष्करपलाशवत्समा चिपिटा साधारा च नास्ति किन्तु कन्दुकवद्गोलरूपा निराधारा च । अस्या उपर्यधः पार्श्वेषु चेति सर्वतो नगराद्रिसमुद्राद्याः सन्ति न केवलमुपर्येवेति । भूगोलस्य परिधिः सप्ताङ्गनन्दाब्धि (४९६७) योजनानि । व्यासश्च कुभुजङ्गसायकभू (१५८१) योजनानि किंचिदधिकानि । पृष्ठक्षेत्रफलं च युगगुणत्रिंशच्छराष्टाद्रि (७८५३०३४) मितानि योजनानि इति । ननु भूमेर्गोलाकारत्वे किं मानमिति चेत् सांयात्रिकैः पोतस्थितैर्दूरादागच्छतोऽन्यपोतस्य प्रथमं शिरोभागोऽवलोक्यते ततः क्रमादधो भाग इति । अत्र यदि सममेव समुद्रजलं स्यात्तर्हि स्थूलत्वात् प्रथममधोभागो दृश्येत । एवं भुवः समत्वे अतिदूरतो हिमवदादीनां शिखराणीव मूलभागाः स्थूलाः सम्यग्दृश्येरन् । ननु भूः पिण्डवद्गोलाकारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत्तत्पृष्ठगतो जनः पर्वतवदुन्नतप्रदेशस्थमात्मानं मन्येत भूमिं च सर्वतः क्रमनिम्नां मन्येत ननु समाम् इति चेत् गोलस्य यावान् परिधिर्भवति तस्य शततमोंऽशः सम एव प्रतीयते । भूपृष्ठस्थो जनोऽतिखर्वतया भूपरिधिशतांशमितां पञ्चाशद्योजनतोऽपि न्यूनामेव स्वस्थानाद्भूमिं द्रष्टुं शक्नोति नाधिकाम् । तावती च प्रायः समैवातस्तस्य सा सर्वा समैव भाति । तारादीनामिव निराधाराया भूमेः स्थितौ च न कोऽपि विरोधः प्रत्युताधारपरम्पराकल्पनायामनवस्थादोषः । ननु भूमेः सर्वतो ग्रामादिस्थितौ उपरिस्थितजनापेक्षयाऽधःस्थिता जना अधःशिरस्काः स्युस्ते च कथं व्यवहरेयुः कथं च न पतेयुरिति चेत् वस्तुतो देशस्य ऊर्ध्वाधरतानाम न काचिदप्यस्ति यतः यो यत्र तिष्ठति स आत्मानमूर्ध्वस्थं मन्यते । भूपरिध्यर्द्धान्तरस्थं द्वितीयमधःशिरस्कं मन्यते । एवं द्वितीयोऽप्यात्मानमूर्ध्वस्थं प्रथमं चाधःशिरस्कं मन्यते एवं भूपरिधि-तुर्यान्तरस्थौ मिथस्तिर्यक्स्थौ मन्येते । वस्तुतः सर्वेऽपि स्वदृष्ट्या ऊर्ध्वस्था एव । किमत्र मानमिति चेत् यत्र स्थितो जन आत्मानमूर्ध्वस्थममन्यत स एव प्रतिदिनं सम्मुखदिशं गच्छन्महता कालेन भूपरिध्यर्द्धमितं दूरदेशं गतोऽपीषदप्यधःशिरस्कतां स्वस्य न मन्यत इति प्रतीतेरेव मानत्वात् । ननु भवतु प्रतीतिरेवं तथापि अवश्यं द्वयोर्मध्य एक उपरिस्थोऽन्योऽधस्थस्तत्कथं न पततीति चेत् भूम्यादिषु सर्वेषु पदार्थेष्वाकर्षणशक्तिरस्ति तया आकृष्टा न कुत्रापि पतन्तीत्यन्यत्र विस्तरः । न हि दृष्टेऽनुपपन्नं नामेति न्यायेन सर्वं समञ्जसम् । ननु पुराणेषु भूमेर्विस्तारः पञ्चाशत्कोटियोजनमितः कथितः त्वया तु भूमिगोलपरिधिः सप्ताङ्गनन्दाब्धि (४९६७) मित एवोक्तस्तत्र किं मानमिति चेत् भूमेर्गोलाकारता तावत् सिद्धा भूमेः परितो व्योमापि गोलं व्योम्नि च भपञ्जरोऽपि गोलस्तत्र भूमानार्थं प्राचीनैर्भूपरिधेः षष्ट्युत्तरं शतत्रयमंशाः कल्पिताः । अत एकैकस्मिन् वृत्तपादे नवतिर्नवतिरंशा भवन्ति एवमाकाशस्यापि तथैवांशाः कल्पिताः । अथ सायनमेषारम्भदिने रविर्यत्र वृत्ते भ्रमति तद्विषुवद्वृत्तं तदधः पृथिव्यां कल्पितरेखाकारो निरक्षदेशः तत्र स्थितो जनः उत्तरध्रुवं दक्षिणध्रुवं च क्षितिजसंलग्नवत्पश्यति । यत्राकाशो भूमिसंलग्न इव दृश्यते तत् क्षितिजाख्यवृत्तम् । ये पूर्वं भूपरिधेरंशाः कथितास्तेषामारम्भो निरक्षदेशादुत्तरदिशि दक्षिणदिशि च अयमस्मन्निवासदेशो निरक्षदेशादुत्तरदिशि अस्ति । अथ निरक्षदेशाद्यथा यथा जन उत्तरां दिशं गच्छति तथा तथा खमध्याद्विषुवद्वृत्तं नतम् । उत्तरध्रुवमुन्नतं पश्यति यत्र च खमध्यगतं ध्रुवं पश्यति तत्र निरक्षान्नवतिरंशास्तत्रैव भूपरिधेश्चतुर्थांशः । एवं च ध्रुवोन्नतेरंशैस्तुल्या एवाक्षांशाः भवन्ति तथा च स्वेष्टपुरेऽक्षांशान् ज्ञात्वा स्वेष्टपुरनिरक्षदेशमध्ययोजनानि च ज्ञात्वानुपातः कार्यः । यदि एतैरक्षांशैरेतानि योजनानि लभ्यन्ते तदा षष्ट्युत्तरशतत्रयमितैरंशैः कियन्ति इति षष्ट्युत्तरशतत्रयेण योजनानि गुणयित्वा स्वेष्टाक्षांशैर्भजेत् ततः सप्ताङ्गनन्दाब्धियोजनमितो भूपरिधिर्लभ्यते । यद्वा । कस्मिंश्चित्पुरेऽक्षांशान् ज्ञात्वा तस्मात्पुराच्छुद्धोत्तरतोऽन्यस्मिन् पुरे ज्ञेयाः । ततस्तेषामन्तरांशैः पुरान्तरयोजनैश्चानुपातः। यदि पुरयोः अन्तरांशैः पुरान्तरयोजनानि लभ्यन्ते तदा षष्ट्युत्तरशतत्रयमितैश्चक्रांशैः किमिति फलं भूपरिधियोजनानि (४९६७)। यथा अवन्त्यामक्षांशाः (२२।३०) अवन्तीनिरक्षदेशान्तरयोजनानि (३१०।२६।१५) चक्रांशैः (३६०) गुणितानि (१११७५७।३०) अवन्त्यक्षांशैः (२२।३०) भक्तानि जातानि भूपरिधियोजनानि(४९६७)एवमन्यदूह्यम् । अक्षांशादिज्ञानार्थं पूर्वैर्यन्त्रं कल्पितम् । तथा हि आदौ दारुजं धातुजं वा समतलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रं कुर्यात् । तन्नेम्यां शिथिलं शृङ्खलादिकमाधारं कुर्यात् चक्रमध्ये च सूक्ष्मं छिद्रं कुर्यात् । तत्र आधारादारभ्य मध्यछिद्रस्पर्शिनीं द्वितीयप्रान्तपर्यन्तां सरलां रेखां कुर्यात् । तस्या द्वाभ्यां प्रान्ताभ्यां नेम्यां सम्पातः । अथैतच्चक्रव्यासार्द्धादधिकेन कर्कटेन प्रान्तसम्पातद्वयाद्वृत्तद्वयं कुर्यात् । तयोर्वृत्तयोः सम्पातद्वयं यज्जायते तत् सम्पातद्वयं केन्द्रं च या स्पृशति तादृशीं प्रान्तद्वयस्पर्शिनीं रेखां कुर्यात्।एवं रेखाद्वयेन चक्रस्य शुद्धं भागचतुष्टयं स्यात्।तत्रैकैकस्मिन् भागे परिधिं नवत्या नवत्यांशैरङ्कयेत् ततः आधारान्नवत्यंशेषु क्षितिजं प्रकल्प्य तत आरभ्याधारपर्यन्तमेकद्व्यादिनवत्यन्तानङ्कान् कुर्यात् । अथ केन्द्रस्थशङ्कुप्रोतमध्यां शिथिलां पट्टीं परिधिप्रान्तस्थितांशाङ्कस्पर्शिनीं यन्त्रे न्यसेत् । यद्वा । चक्रतुर्यांशेनैव यन्त्रं कुर्यात् यत्र पुरेऽक्षांशा ज्ञातुमिष्यन्ते तत्र रात्रौ ध्रुववेधाय शृङ्खलाधारे लम्बमानं यन्त्रं धृत्वा यथा पट्टीमूलाग्रगतया दृष्ट्या ध्रुवो दृश्येत तथा पट्टीं चालयेत् । एवं कृते पट्टचग्रे नेमौ येंऽशास्ते सावयवा अक्षांशा ज्ञेयाः । यद्यपि ध्रुवशब्देन लोके ध्रुवाख्यतारैव गृह्यते तथापि नेयं ध्रुवस्थाने नापि स्थिरैव किन्तु ध्रुवस्थानात् किञ्चिदन्तरे भ्रमति अतो यत्र काले ध्रुवः दक्षिणोत्तरवृत्ते परमनीचस्थो भवेत् यत्र च परमोच्चस्थो भवेत्तत्रोभयत्र वेधेन पृथगक्षांशानानीय तद्योगार्द्धमिता अक्षांशाः स्युरिति ज्ञेयम् । यद्यपि सिद्धान्तशिरोमणौ पुराणमते कश्चिद्विषयं परिवर्त्य वर्षद्वीपादिविभागोऽप्युक्तस्तथाप्युपपत्त्येकशरणा ज्योतिर्विदस्तन्नाद्रियन्ते । केचिज्ज्योतिर्विद आर्यभट्टादयस्तु प्राहुः । भूमिरेव पूर्वाभिमुखं प्रत्यहमेकवारं परिवर्त्तते । परिवर्त्तनरूपया गत्या भ्रमन्त्या भूमेर्यः प्रदेशः सूर्यप्रकाशे भवति तत्र दिनम् । यश्च तत्प्रकाशगोचरो न भवति तत्र रात्रिः । भूमिपरिवर्तनेनैव सूर्यस्य नक्षत्रादीनां च पश्चिमगत्या उदयास्तमयौ दृश्येते । वस्तुतो नक्षत्रादीनि स्थिराण्येवेति समीचीनम् । अन्यथा प्रवहवातकृता एकाहोरात्रमात्रेण बहुकोटियोजनमिता तेषां सर्वेषां प्रत्यहं गतिरसंभाविता कल्पनीया स्यात् इति महद्गौरवम् । भूमिपरिवर्त्तनाङ्गीकारे तु एकस्या भूमेरेकेनाहोरात्रेण सप्ताङ्गनन्दाब्धियोजनपरिवर्त्तनमात्रमिति महल्लाघवम् । ननु एवं भूमिर्भ्रमन्ती कथं न लक्ष्यते कथं वा सूर्यादयो भ्रमन्तो दृश्यन्ते इति चेदत्राहुः । यथा अनुलोमगतिर्नौस्थः अचलमपि तटं स्वसमीपमायान्तं विलोमगं पश्यति तथा द्रष्टा भूस्थो भ्रमन्नचलान्यपि भानि पश्चिमगानि पश्यति इति तदन्ये श्रीपत्यादयो न मन्यन्ते । तथा हि यदि भूमिर्भ्रमति तर्हि व्योम्नि उड्डीयमानाः पक्षिणः स्वनीडानि न प्राप्नुयुः । नडिानां भूप्रदेशेन सह पश्चिमदिशि बहुदूरं गतत्वात् व्योम्नि निक्षिप्तं शरादिकं क्षेपस्थानाद्दूरं पश्चिमे पतेत् मेघाः सदा पश्चिमां व्रजन्तो दृश्येरन् न च भूवेगेनैव तत्समपिस्थानां तदनुसारिणी गतिर्भवतीति वाच्यम् । अनुलोमगतेरेवं सम्भवेऽपि प्रतिलोमगतेरेवमसम्भवात् इति सङ्क्षेपः । ज्योतिःशास्त्ररीत्या भूमेः परं चन्द्रबुधशुक्ररविभौमगुरुशनिनक्षत्रकक्षाः क्रमेण सन्ति । सर्वेषां ग्रहाणां पूर्वाभिमुखा प्रत्यहं गतिः पादोनगोक्षधृतिभूमि-(११८५८॥।) तयोजनानि शीघ्रमन्दगामित्वं च ग्रहाणां स्वस्वकक्षायाः अल्पत्वमहत्त्वाभ्याम् । उक्तं हि । " कक्षाः सर्वा अपि दिविषदां चक्रलिप्ताङ्किताश्ता वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ताः । तस्मादेते शशिजभृगुजादित्यदैत्येज्यमन्दा मन्दाक्रान्ता इव शशधराद्भान्ति यान्तः क्रमेण ॥ " इति पृथ्वीगर्भात्सूर्यो नगनगाग्निनवाष्टरसयोजनानि (६८९३७७) दूरे चन्द्रश्च रसरसेषुमहीबाणाः योजनानि (५१५६६) एवं भौमः गोकुरसषण्णवसूर्यमितानि (१२९६६१९) बुधः दन्ताभ्रष-

CC-0. In Public Domain. Digitization by eGangotri

ण्नृपमितानि (१६६०३२) गुरुर्नागगुणपञ्चरसाद्रिभूमिनागमितानि (८१७६५३८) शुक्रः सर्पगजखाब्धियमाब्धिमितानि (४२४०८८) शनिः भूसप्तखाङ्कमहीगुणनखमितानि (२०३१९०७१) नक्षत्राणि नागपञ्चषट्भुजरसाग्निभूवेदमितानि (४१३६२६५८) योज नानि । किञ्च । " कोटिघ्नैर्नखनन्दषट्कनखभूभूभृद्भुजङ्गेन्दुभि (१८७१२०६९२००००००००) र्ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः । तद्ब्रह्माण्डकटाहसम्पुटतटे केचिज्जगुर्वेष्टनं केचित्प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः सूरयः ॥ ब्रह्माण्डमेतान्मितमस्तु नो वा कल्पे ग्रहः क्रामति योजनानि । यावन्ति पूर्वैरिह तत्प्रमाणं प्रोक्तं खकक्षाख्यमिदं मतं नः ॥ " इति । नन्वेवं पुराणोक्तभूमानविरोधः कथं समाधेय इति चेदत्र गोलदर्पणकारो यथामति समर्थयते । पृथिव्या आकारद्वयमस्ति । एको महापरिमाणको विशेषाकारः द्वितीयो ज्योतिःशास्त्रोक्तः स्वल्पपरिमाणको गोलाकार एव । एवमेव परीक्षिता पृष्टं "पञ्चमे शुकेनाप्युत्तरं दत्तं भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः"इति भूगोलकपदेन ज्योतिःशास्त्रोक्तो गोलाकारो मार्तिकोऽण्डः विशेषपदेन मण्डलाकारः पुराणोक्तो हिरण्मयोऽण्डः । उक्तञ्च योगिनिर्याणे द्वितीयस्कन्धे ।" ततो विशेषं प्रतिपद्य निर्भयः " इति । पञ्चमेऽप्युक्तम् । " काञ्चनी ततोऽन्याऽऽदर्शतलोपमा " इत्यादि । तृतीयेऽप्युक्तम् । " एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः । " इत्यादि । " यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते " इति सिद्धार्थदृष्टान्तेन गोलाकारत्वं प्रतीयते । " प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया । " इति कर्दमविहारेऽप्युक्तम् । दशमे अष्टमाध्यायेऽपि "सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः । साद्रिद्वीपाब्धिभूगोलम्" इत्यादिप्रामाण्यात् पृथिवीद्वयम् अङ्गीकार्यम् । ननु स्वल्पा पृथिवी इयं चेत्तदन्या महती कुत्रास्ति उच्यते । महती तु नक्षत्रकक्षाया ऊर्ध्वं प्रतिबिम्बरूपा । तन्मानं पञ्चमे । लक्षोत्तरसार्धनवकोटियोजनं परिमण्डलं भूवलयस्य " इति स्थूलदृष्ट्या भकक्षोर्ध्वभाग एवायाति । अथ कथं प्रतिबिम्बवत् कथमेतदाकारा सा इति चेदुच्यते । पञ्चसहस्रयोजनात्मकस्य भूगोलस्य समन्तात् योजनान्तरितो वायुगोलस्तेन दूरकान्ताख्यकाचवत् स्वल्पाया अप्यस्या नक्षत्रकक्षाया उपरि या काञ्चनी भूमिः निर्मलाख्या तत्तेजोव्यवधानकारी तत्र महान् प्रतिबिम्बः समन्तात् यथा दूरकान्ते एकत्र महतोऽल्पत्वम् दृश्यते परत्राल्पस्य महत्त्वं एवं बाह्याङ्गानां चन्द्रादीनामल्पत्वम् अन्तर्गतस्य भूगोलस्य महत्त्वम् । ननु वायुगोले किं प्रमाणम् उच्यते । भूपृष्ठतः खगकक्षापर्यन्तमष्टौ पवना आवहादयः सन्ति । उभयोर्योगे जलगोलः । तदुक्तं पुलिशसिद्धान्ते । " भूवातोद्वहयोर्योगे जलगोलोऽस्ति काचवत् । दृश्यन्ते येन संलग्ना भिन्नाः सूर्यादिरश्मयः ॥" इति । सूर्यसिद्धान्तेऽपि " अत्यासन्नतया तेन ग्रीष्मे तीव्राः करा रवेः । " इति । अत्यासन्नत्वं दूरत्वं चानिलगोलप्रतिबिम्बकारकेण विना न संभवति । श्रीशुकैस्तु पुराणानुगैर्महत्प्रमाणमेव व्याख्यातं स्वल्पप्रमाणं तु सूचितमेव इति । अथ खगोलविरोधपरिहारोऽपि यथामति गोलदर्पणे उक्तः । " एतेन दिवोमानं तद्विद उपदिशन्ति " अस्यार्थः । एतेन भूगोलकेन्द्रेण दिवोमण्डलानां ग्रहनक्षत्रादिकक्षाणामौच्च्यपरिध्यादीनामिति । यथा " द्विदलयोर्निष्पावादीनामन्तरेणान्तरीक्षं तदुभयसन्धितम् " अस्यार्थः । भूगोलदिवोमण्डलयोः सन्धितमन्तरीक्षम् अन्तरेण मानं विना अन्तरीक्षं तु मानशून्यमित्यर्थः । यथा " द्विदलयोर्निष्पावादीनां मानं नास्ति तद्वत् यन्मध्यगतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवांस्तपतां पतिः " इति । अस्यार्थः । यस्यान्तरिक्षस्य मध्यमिव मध्यं जलगोलः यथान्तरिक्षस्य मध्याभावस्तथा गोलरूपत्वात् जलगोलस्यापि तत्र गतः प्रतिबिम्बरूपेण संस्थित इत्यर्थः । "बिम्बस्वरूपेण तु भूकेन्द्रात्सपादलक्षयोजनेष्वस्ति एवं नव कोटय एकपञ्चाशल्लक्षाणि मानसोत्तरपरिवर्त्तनस्योपदिशन्ति" इति अस्यार्थः । मानसश्चन्द्रस्तदपेक्षया उत्तरः परः शनिस्तन्मण्डलस्य मानं ज्यौतिषोक्तकरणार्थं शन्यंशयुतं जातं द्वादशकोटिमितम् अष्टषष्टिलक्षमिति । " सूर्याण्डगोलयोर्मध्ये कोटयः स्युः पञ्चविंशतिः ।" अस्यार्थः । सूर्यस्य बिम्बितार्कस्य अण्डगोलो हिरण्मयोऽण्डपरिधिस्तयोर्मध्येऽन्तः पञ्चविंशतिकोटयः स्युः इति । " अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् । " इति । अस्यार्थः । द्यावाभूम्योर्नक्षत्रकक्षाभूम्योर्यदन्तरं तदेवाण्डस्य हिरण्मयाण्डस्य तत्रान्तः सूर्यो जलगोलप्रतिबिम्बितार्को भवतीति ज्ञेयम् । भूप्रमाणविषये भारतभीष्मपर्वटीकायां नीलकण्ठचतुर्द्धरास्तु "अत्रेयं शास्त्रानुभवयोरविरोधेन भूकल्पना प्रतिभाति यथा हस्तमात्रस्य चतुरस्रस्य चतुर्विंशत्यंगुलानि परिणाहः षण्णवत्यंगुलानि परिधिः किञ्चिन्न्यूनानि चतुस्त्रिंशदङ्गुलानि कर्णो भवति।एवम् अष्टादश सहस्राणि षट् शतानि च जम्बूपर्वतसंज्ञितायाः भुवः प्रमाणमुक्तम्।तदेवात्र परिधित्वेन चत्वारि सहस्राणि षट् शतानि पञ्चाशच्च योजनान्येकैको भुजः । " इति तदेव समचतुरस्रस्य विष्कम्भप्रमाणम् । अस्य कर्णः शुल्बशास्त्रोक्तरीत्या षट् सहस्राणि पञ्च शतानि षट्सप्ततिश्च योजनानि। तस्यास्य भूचतुरस्रस्य चतुर्भिः समुद्रैर्वेष्टितस्य कोणा विदिक्षु वर्तन्ते तेन दक्षिणस्यां दिशि रामसेतौ द्वयोः समुद्रयोः सन्धिः एवमितरास्वपि दिक्षु समुद्रसन्धयो ज्ञेयाः । यस्त्वत्र ज्योतिर्विदां भूपरिधिः सप्ताङ्गनन्दाब्धि (४९६७) योजन संमितोऽभिमतः स एवास्माकं चतुरस्रविष्कम्भः । खबाणरसवेदमितः (४६५०) यत्तु एतयोरन्तरं सप्तेन्दुराममितं (३१७) तदपि यजमानेनोर्ध्वबाहुना प्रपदोच्छ्रितेन वा उन्मितस्य सूत्रस्य यः पञ्चमोंशः स हस्त इति विकल्पस्य कात्यायनादिभिरुक्तत्वात् । हस्तप्रमाणभेदकल्पनया योजनबहुत्वाल्पत्ववचनेन समाधेयम् । तथा भूमेश्चतुरस्रत्वेऽपि तन्मध्यस्थमत्युच्छ्रितं मेरुं प्रदक्षिणीकुर्वतः सूर्यस्य मार्गो मण्डलाकारोऽस्तीति न बौद्धाभिमतं सूर्यद्वयं कल्प्यं भवति । अन्यत्सर्वं युक्त्यविरुद्धं ज्योतिर्विन्मतमेवात्रानुसर्तव्यम् । यत्तु पुराणे पञ्चाशत्कोटियोजनं भूगोलप्रमाणमित्युक्तं तदपि" अचिन्त्याः खलु ये भावा न तांस्तर्केण साधयेत् ।" इत्यनेनैव प्रत्युक्तम् । अव्यवस्थितत्वान्मतानामनिर्वचनीयवाद एव शरणीकरणीव इत्येवं परम्।यद्वा।सर्वत्र यत्प्रमाणं दृष्टं तद्विंशांशेन तद्बोध्यम् । तेन पञ्चाशत्कोटिस्थाने सार्धकोटिद्वयविस्तारा भूमिः लक्षस्थाने पञ्चसहस्रविस्तारो जम्बूद्वीपः नवसहस्रस्थाने सार्धचतुःशतयोजनायामं भरतखण्डमिति । अस्मिन् पक्षे उदाहरिष्यमाणवैष्णवादिवाक्ये जम्बूद्वीपश्चतुर्दलकमलाकारः तस्य प्रान्तपरिधिः षट्शताधिकान्यष्टादशयोजनसहस्राणि त्रयस्त्रिंशच्छतानि मध्यव्यासः तेन फलतः पञ्चसहस्रव्यासता ज्ञेया । एवं सति यदा प्रागायतो हिमाचलः पूर्वपश्चिमसमुद्रौ स्पृशति तदाऽयं भरतवर्षस्त्रिकोणो भवति तेन पृथिवी त्रिकोणेति लोकप्रवादोऽनुभवश्चानुसृतो भवति अन्यथा भारतवर्षस्य धनुराकारत्वे भूमध्यरेखायाः लङ्कातः सेतुमार्गेण प्रस्थितायाः " पुरी रक्षसां देवकन्याथ काञ्ची सितः पर्वतः पर्युलीवत्सगुल्मम् । पुरी चोज्जयिन्याह्वया गर्गराटं कुरुक्षेत्रमेषा भुवो मध्यरेखा ॥ " इति स्मर्यमाणया मध्यरेखया कुरुक्षेत्रस्य रामसेतुः सन्निहितो द्वारका च दूरे स्यात् द्वारकासमीपे सेतुश्च दूरे इति प्रत्यक्षमुपलभ्यते।भारतवर्षं त्रिकोणमित्येषैव कल्पना साधी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यसीति दिक् इत्याहुः । मया मन्दमतिनाप्यत्र किञ्चिद्वाच्यं तच्च श्रीमद्भागवतपर्यङ्के स्फुटीभविष्यति । ताराग्रहादिविन्यासः शिशुमारसंस्थानं च यद्यपि मूले लिखितं तथापि चित्रं विना तथारूपेण बोधयितुं न शक्यते । ताराणां ध्रुवकाः पुराणेषु नोपलभ्यन्तेऽतः सिद्धान्तशिरोमण्युक्तध्रुवकैश्चक्रे स्थानानि प्रकल्प्य प्रदर्श्यन्ते शराश्चात्र ध्रुवस्थानाभिमुखा एव लिखिताः । तारासंस्थानकल्पनेन शिशुमारसंस्थानं कल्प्यम् । इलावृतखण्डादिचित्राणि स्कन्धान्ते लिखितानि ॥ १७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चविंशे पञ्चमस्य व्यधाद्गङ्गासहायकः ॥ २५ ॥ षड्विंशे तु ततोऽधस्तान्नरकस्थितिरुच्यते ॥ पापिनां यातना याम्या गद्यान्यत्राब्धिर्मार्गणाः ॥ चत्वार्युवाचेति पञ्चनवतिः स्युरनुष्टुभः ॥ २६ ॥ पुंसो गतय उच्चावचाः विसदृश्य इति भोगवैचित्र्यमुक्तं तत्कुत इति पृच्छति—महर्षे इति ॥ हे महर्षे लोकस्य एतद्वैचित्र्यं कथम् ॥ १ ॥ त्रिगुणत्वादिति ॥ त्रिगुणात्वाद्धेतोः कर्त्तुः त्रिविधश्रद्धया कर्मगतयोऽपि पृथग्विधा अतस्ता गतयस्तारतम्येन सर्वा एव सर्वस्य भवन्ति । तथा हि सात्विक्या श्रद्धया धर्मस्ततः सुखं राजस्या धर्माधर्मौ ततः सुखं दुःखं च । तामस्या पापं ततो दुःखमोहौ श्रद्धानां तारतम्याच्च सुखादीनामपि तारतम्यम् । तत्रापि कालादिभेदात्सर्वस्यैव सर्वा एवेति न हि

राजोवाच ॥ महर्षे एतद् वैचित्र्यं लोकस्य कथमिति ॥ १ ॥ ऋषिरुवाच ॥ त्रिगुणत्वात् कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति ॥ २ ॥ अथेदानीं प्रतिषिद्धलक्षणस्य धर्मस्य तथैव कर्तुः श्रद्धया वैसादृश्यात् कर्मफलं विसदृशं भवति ॥ या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ॥ ३ ॥ राजोवाच ॥ नरका नाम भगवन् किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ॥ ४ ॥ ऋषिरुवाच ॥ अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्तात् भूमेरुपरिष्टाच्च जलाद् यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ॥५॥

कश्चित्सर्वदैव सात्विकश्रद्धावानेव तिष्ठति । एवं राजसश्रद्धावानेव वा अतः कालभेदेन सर्वविधस्य जीवस्य सर्वविधा गतयः ॥ २ ॥ तत्र धर्मस्य फलानि स्वर्गादीनि यथा तथा अधर्मस्य नरकादीनि दर्शयति—अथेति ॥ न केवलं धर्मकतुरेवे श्रद्धावैचित्र्यात्फलवैचित्र्यं भवति किं तु तथैव धर्मकर्त्तुर्यत् प्रतिषिद्धलक्षणस्य प्रतिषिद्धं प्रतिषेधः स एव लक्षणं प्रमाणं यस्य तस्याधर्मस्यापि कर्त्तुः श्रद्धया वैसादृश्यात्कर्मफलं दुःखमपि विसदृशं भवति । तथा हि प्रमादेनाधर्मकरणादल्पत्वं ज्ञानेन मध्यमत्वं नास्तिकत्वेन पूर्णत्वं तमस्त्रैविध्यस्यापि कारणत्वं दर्शयति । या इति । अतो हि अनाद्यविद्यया अनादिजन्मपरम्परया देहादावहंममाध्यासेन कृतकामानां कृतमनोरथानां पुंसां संबन्धिन्यस्तत्परिणामलक्षणाः अधर्मफलभूताः सृतयो नरकाः सहस्रशः प्रवृत्ताः परमेश्वरेण विरचिताः सन्ति तासां मध्ये प्राचुर्येण बाहुल्येन काश्चित्प्रधाना अथेदानीं वर्णयिष्यामः ॥ ३ ॥ नरका इति ॥ हे भगवन् नरका नाम किं भूमावेव देशविशेषा अथवा त्रिलोक्याः ब्रह्माण्डाद्बहिः आवरणेषु मध्ये सन्ति आहोस्वित्तदन्तराल एव भूमिव्यतिरिक्ते ॥ ४ ॥ अन्तराल इति ॥ त्रिजगत्यास्त्रिलोक्यास्त्वन्तराले मध्य एव ते सन्ति तर्हि कुत्र सन्तीत्यपेक्षायामाह—दिशीति ॥ भारतवर्षापेक्षया दक्षिणस्यां दिशि भूमेः सप्तपातालवत्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधस्ताज्जलाद्गर्भोदकसंज्ञकादुपरिष्टात् यत्रिंशत्सहस्रयोजनान्तरालमुक्तं तन्मध्ये यस्यां दिशि अग्निष्वात्तादयः पितृगणाः परमेण समाधिना भगवन्तं ध्यायन्तस्ततः स्वगोत्राणां प्राणिनां सत्या आशिषः कामभोगान् आशासानाः निवसन्तीत्यन्वयः । " कर्मणा पितृलोकः " इति श्रुतेः । "यत्र पितरो मादयन्ते " इत्याग्नीध्रप्रकरण उक्तत्वाच्च सुखभोगस्थानविशेषः पितृलोक उपर्यप्यस्तीति ज्ञेयम् । स तु चन्द्रमण्डल इत्याहुः ॥५॥ यत्रेति॥ यत्र ह वाव पितृराजो भगवान् वैवस्वतो रविपुत्रो यमः न उल्लङ्घितं भगवच्छासनं येन तथा परेतेषु मृतेषु स्वविषयं स्वदेशं दण्डस्थानं प्रापितेषु जन्तुषु प्राणिषु यथा कर्मावद्यं कर्मजन्यं पापमनतिक्रम्य दोषं तत्फलरूपं दुःखमेव दमं दण्डं धारयति तादृश्या बिभीषिकया जीवान्भगवदुन्मुखीकर्त्तुम् इत्यर्थः । न च स किंचिदन्यथा कर्त्तुं शक्नोति ॥६॥ तत्रेति ॥७॥ तामिस्र इति॥८॥ मतान्तरमाह–किं चेति ॥९॥तत्रेति ॥१०॥

यत्र ह वाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु सम्परेतेषु यथाकर्मावद्यं दोषमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ॥६॥ तत्र हैके नरकानेकविंशतिं गणयन्ति अथ तांस्ते राजन् नामरूपलक्षणतोऽनुक्रमिष्यामः ॥७॥ तामिस्रोन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमन्धकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मलीवैतरणीपूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति ॥८॥ किं च क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकः अवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः॥९॥तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते ॥ १० ॥ अनशनानुदपानदण्डताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये ॥११॥ एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं दारादीनुपयुङ्क्ते ॥ १२ ॥ यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति ॥१३॥ यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १४ ॥

अनशनेति ॥ अनशनादिभिर्यातनाभिर्यात्यमानः पीड्यमानो जन्तुर्यत्र तामिस्रप्रायेऽन्धकारबहुले स्थाने कश्मलं बहुदुःखमासादितः प्रापितः सन्नेकदैव तदैव मूर्च्छामुपयाति ॥ ११ ॥ एवमिति युग्मम् ॥ यस्तु पुरुषं स्वामिनं वञ्चयित्वा तद्दारादीनुपभुङ्क्ते स एवमेवान्धतामिस्रे नरके बलान्निपात्यते । यत्र निपात्यमानः यातनास्थः शरीरी यथा वृश्च्यमानमूलश्छिद्यमानमूलः वनस्पतिस्तथा वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति तस्मात् अन्धत्वापादकान्धकारयोगात् तमन्धतामिस्रमुपदिशन्ति ॥ १२ ॥ १३ ॥ यस्त्विति ॥ यस्त्विह वै एतच्छरीरमहमिति इदं धनापत्यकलत्रादि ममेति मत्वा भूतद्रोहेण केवलं कुटुम्बमेवानुदिनं पुष्णाति स तद्देहं कुटुम्बं चेहैव विहाय तदशुभेन प्राणिद्रोहजनितपापेन रौरवे निपतति भूतद्रोहेणेत्युक्त्या भूतद्रोहं विना तु केवलाहंममकाराभ्यां रौरवे न पतति इति बुध्यते ॥ १४ ॥

CC-0. In Public Domain. Digitization by eGangotri

ये इति॥ रुरवो भूत्वा कर्मण्येव तथा परिणामं प्राप्य रुरुर्भारश्‍ङ्गाख्य इति स्वामिपादाः। रुरुशब्दस्य स्वयं मुनिनैव व्याख्यातत्वात् लोकेष्वप्रसिद्ध एवायमिति सन्दर्भः ॥ १५ ॥ रुरुरिति ॥ सर्पादप्यतिक्रूरस्य सत्त्वस्य प्राणिविशेषस्य अपदेशः संज्ञा ॥ १६ ॥ एवमिति ॥ यः प्राणिद्रोहेण केवलं देहंभरः स्वदेहपोषणपरस्तं यत्र महारौरवे पतितं पुरुषं क्रव्येण निमित्तेन मांसार्थं घातयन्ति। स्पष्टं शेषम् ॥ १७ ॥ यस्त्विति ॥ उग्रः क्रूरस्वभावः प्राणतः सजीवानुपरन्धयति पचति अपकरुणं निष्कृपम् ॥ १८ ॥ यस्त्विति ॥ तप्तखले तप्तसमे देशे ॥१९॥ यस्त्विति ॥ अपगतः भ्रष्टः पाखण्डं वेदविरुद्धमार्गमुपगतः प्राप्तः। कशया वेत्रेण ॥ २० ॥ तत्रेति ॥ तालवनस्यासिवद्वर्त्तमानैः पत्रैः

ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं तत एव रुरवो भूत्वा तथा तमेव विहिंसन्ति तस्माद् रौरवमित्याहुः ॥ १५ ॥ रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः॥१६॥एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहंभरः ॥१७॥ यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैल उपरन्धयन्ति ॥ १८ ॥ यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरकेऽयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्का-भ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिः शरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि ॥१९॥ यस्त्विह वै निजवेदपथादनापद्यपगतः पाखण्डं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति ॥२०॥तत्र हासादित इतस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखण्डानुगतं फलं भुङ्क्ते ॥ २१ ॥ यस्त्विह वै राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान् नरकेऽमुत्र सूकरमुखे निपतति ॥ २२ ॥ तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखण्ड आर्त्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥ २३ ॥ यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपर-व्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति ॥ २४ ॥

हा हतोऽस्मीति वदन्निति शेषः। स्वधर्महा वेदविहितस्वधर्मत्यागी पाखण्डानुगतं पाखण्डमार्गस्वीकारात् प्राप्तम् ॥२१॥ यस्त्विति ॥ अदण्ड्ये दण्डानर्हे निरपराधिनि ब्राह्मणे सापराधेऽपि शरीरदण्डं ताडनादि। ब्राह्मणस्य दैहिकदण्डनिषेधात्॥२२॥ तत्रेति॥ तत्रातिबलैर्निष्पिष्टमाणावयवो यथैवेह इक्षुदण्डः शब्दं करोति तथा हा हतोऽस्मीत्यार्त्तस्वरेण स्वनयन् रुदन् कश्मलं मोहमुपगतः सन् क्वचिन्मूर्च्छितो भवति यथैवेहादृष्टदोषा निर्दोषास्तेनोपरुद्धा दण्डिताः सन्तो मोहमुपगता मूर्च्छिता भवन्ति स्म तथेत्यर्थः ॥ २३ ॥ यस्त्विति ॥ यस्त्विह वै पुरुषेणेश्वरेण पुरुषेण स्वयं वा ब्राह्मणादिभावेन वा विधिनिषेधपूर्वकम् उपकल्पिता वृत्तिर्यस्य विविक्ता ज्ञाता परव्यथा येन सः पापः ईश्वरेणैवोपक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्पिता मनुष्याणामन्नभक्षणवद्रक्तपानादिलक्षणा वृत्तिर्येषां तेषाम् । तथा न विविक्ता न विज्ञाता परव्यथा यैः अविवेकिभिस्तेषां भूतानां व्यथां पीडामाचरति स तेषामभिद्रोहेण द्रोहजनितपापेन परत्र परलोके यमपुरेऽन्धकूपसंज्ञके नरके पतति अयं भावः । जलौकामत्कुणादीनां मनुष्यरक्तपानादिवृत्तिरीश्वरेणैव कल्पिता न च ते परव्यथां जानन्ति नापि शास्त्राधिकारिणः अतस्तेषां परपीडायां दोषाभावः।मनुष्यस्तु शास्त्राधिकारी अहिंसादिकं च तस्य शास्त्रेण विहितं तदतिक्रमात्तस्य नरकपातो भवत्येवेति ॥२४॥तत्रेति ॥ ये केचनानेन जन्तुदुःखाभिज्ञेन अभिद्रुग्धाः विहिंसितास्तैः पशुमृगादिभिः जन्तुभिः सर्वतोऽभिद्रुह्यमाणः अत एव विहता निद्रारूपा निर्वृतिः सुखं यस्य सः न लब्धमवस्थानं येन सः तमसि परिक्रामति ॥ २५ ॥ यस्त्विति ॥ यत्किञ्चन भक्ष्यादिकमुपनतं प्राप्तं तदसंविभज्यातिथिबालवृद्धादिभ्यो यथायोग्यविभागेनादत्त्वा स्वयमेवाश्नाति तथा न

तत्र ह्यसौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये केचनाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः ॥ २५ ॥ यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपञ्चयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति ॥२६॥ तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते ॥२७॥ यस्त्विह वै स्तेयेन बलाद् वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरति अन्यस्य वाऽनापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिण्डैः संदंशैस्त्वचि निष्कुषन्ति ॥२८॥ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ॥२९॥ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकण्टकशाल्मलीमारोप्य निष्कर्षन्ति ॥३० ॥ ये त्विह वै राजन्या राजपुरुषा वा अपाखण्डा धर्मसेतून् भिन्दन्ति ते संपरेत्य वैतरण्यां निपतन्ति भिन्नमर्यादाः ॥ ३१ ॥ तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरन्त उपतप्यन्ते ॥ ३२ ॥

निर्मिताः पञ्चयज्ञा येन सः अत एव वायसैः काकैः संस्तुतः समत्वेन वर्णितः वायसतुल्यैर्जनैः स्तुतो वा कृमिभोजनसंज्ञके निपतति ॥२६॥ तत्रेति ॥ अप्रत्तमसंविभक्तमप्रहुतं चात्तीति सः स्वयमपि कृमिभोजनः कृमीनेव भुञ्जानो यावत्तत् यावन्ति योजनानि तत् कृमिकुण्डं तावन्ति वर्षाणि । यद्वा । यावत् तदसंविभागादिनिमित्तं पापं यावदवधारणे इति समासः । तावदनिर्वेशमकृतप्रायश्चित्तमात्मानं यातयते पीडयति ॥ २७ ॥ यस्त्विति ॥ निष्कुषन्ति छिन्दन्ति । अनेनैव तस्य संदंश इति नामनिरुक्तिर्ज्ञेया ॥ २८ ॥ यस्त्विति ॥ तिग्मया तप्तया सूर्म्या प्रतिमया ॥ २९ ॥ यस्त्विति ॥ सर्वाभिगमः पश्वादीनप्युपगन्ता ॥ ३० ॥ अपाखण्डाः सत्कुलजाः सन्तः । अपाखण्डानिति पाठे सेतुविशेषणम् ॥ ३१ ॥ तस्यामिति ॥ स्वाघेन स्वकृतपापेन यस्यां मुह्यमाना आत्मना देहेनासुभिः प्राणैश्चावियुज्यमानाः स्वकर्मफलं स्मरन्त उपतप्यन्ते ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विण्मूत्रेति ॥नदीविशेषणं निरयपरिखाभूतायामित्युक्तमेव स्पष्टयति ॥ ३३॥ ये त्विति ॥ पशुचर्यां पशुवत्स्वेच्छाचारं कुर्वन्ति ते पूयादिपूर्णार्णवे पूयोदसंज्ञके नरके निपतन्ति ॥ ३४॥अतीर्थे विहिताद्यज्ञश्राद्धादेरन्यत्र विध्यन्तीति प्राणनिरोधो दर्शितः ॥ ३५॥ ये त्विति ॥ दाम्भिका अनुष्ठानतत्त्वमज्ञात्वापि स्वधार्मिकत्वप्रकाशनार्थं यज्ञानुष्ठाने प्रवृत्ताः विशसन्ति मारयन्ति निरयपतयः तदधिकारे स्थापिता यमपुरुषाः॥ ३६ ॥रेतः पाययति वशीकरणकार्मणविशेषार्थं रेतःपानं कारयति । यद्वा । काममोहितत्वात् तस्या मुखमेव योनिं प्रकल्प्य रममाणच्युतं रेतः पाययति ॥ ३७॥ ये त्विति ॥ यमदूताः श्वानः संवत्सरादिनरात्रि रूपाः सरभसं ससंभ्रमं यथा भवति तथा तान् खादन्ति ॥ ३८॥ यस्त्विति ॥

विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते ॥ ३३ ॥ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतन्ति ॥ तदेवातिबीभत्सितमश्नन्ति ॥३४॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान् निघ्नन्ति तानपि संपरेताँल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति॥३५॥ ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तानमुष्मिँल्लोके वैशसे नरके पतितान् निरयपतयो घातयित्वा विशसन्ति ॥ ३६ ॥ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः संपाययन्ति ॥३७॥ ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानो राजभटास्तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादन्ति ॥३८॥ यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित् स वै प्रेत्य नरकेऽवीचिमत्यधःशिराः निरवकाशे योजनशतोच्छ्रयाद् गिरिमूर्ध्नः संपात्यते ॥३९॥ यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥४०॥यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयभीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति ॥४१॥ अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुते॥४२॥ द्रव्यविनिमये क्रयविक्रयादौ निरवकाशे निरालम्बे ॥ ३९॥ अवीचिमच्छब्दार्थमाह—

यत्रेति ॥ वीचिस्तरङ्गः जलाभावेन वीचिरहितत्वादवीचिमदित्यर्थः। तिलश इति अत्युच्चनिपतनादिति शेषः॥ ४०॥ यस्त्विति॥ यस्तु विप्रस्तत्कलत्रं वा अन्यो वा व्रतस्थः सन् प्रमादतः मोहात्सुरां पिबति तथा राजन्यो वा वैश्यो वा इहास्मिन् जन्मनि यज्ञादौ प्रमादतः सोमपीथः कृतसोमपानो भवति तेषामित्यन्वयः।राजन्यवैश्ययोः सोमस्थाने फलचमसविधानात् सोमपाननिषेधाच्च । तथा च श्रुतिः। " न्यग्रोधस्तन्तीराहृत्य ताः संपिष्यता दधत्युपमृज्य तमस्मै भक्ष्यं संप्रयच्छेन्न सोममिति वह्निना द्रवत् कार्ष्णायसं लोहम् " ॥ ४१॥ अथेति ॥ आत्मसम्भावनेनेति अहं महान् विद्यादिगुणवान् सर्वश्रेष्ठ इत्यभिमानेनेत्यर्थः । वरीयसः संमानयोग्यान् श्रेष्ठान्न बहु मन्येत स जीवन्नपि मृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव सन् मृत्वा क्षारकर्दमे लवणपङ्के पातितो दुरन्ता यातनाः अनवसानदुःखानि हि अश्नुते ॥४२॥ ये त्विति॥ पुरुषस्य मेधेन हिंसया भैरवादीन् यजन्ते तान् पुरुषान् ताश्च स्त्रियः ये च पशव इह तैर्निहतास्ते कामरूपाः रक्षोगणा भूत्वा यातयन्तः पीडयन्तः सौनिका इव पशुमारका कसाई इति ख्याता इव स्वधितिना शस्त्रविशेषेणेति यथेह ते पुरुषादाः सन्तः पूर्वमनृत्यंस्तद्वत् ॥ ४३ ॥ ये त्विहेति ॥ अनागसोऽहिंस्रान् जन्तून् वैश्रम्भकैर्विश्वासोत्पादनोपायैः उपविश्रम्भय्य विश्वासमुत्पाद्य उपसृताननुगतान् कृतविश्वासान् शूलादिषु प्रोतान् कृत्वा तैर्जिजीविषून् क्रीडनकतया तान् क्रीडनकवत् यातयन्ति पीडयन्ति तेऽपि चेत्यादि स्पष्टम् ॥ ४४ ॥ ये त्विति ॥ उल्बणस्वभावाः भयङ्करस्वभावाः ॥४५॥ यत्रेति ॥ बिलेशयान् मूषकान् ॥४६॥ ये त्विति ॥ अन्धावटं निरुच्छ्वासबिलं कुशूलं धान्यगर्तम् आदिशब्दात् जलादिनिरोधग्रहणं सगरेण विषसहिते-

ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ते पशव इव निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायासृक् पिबन्ति नृत्यन्ति गायन्ति च हृष्यमाणा यथेह पुरुषाः ॥ ४३॥ ये त्विह वा अनागसोऽरण्ये ग्रामे वैश्रम्भिकैरुपसृतानुपविश्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां वाऽभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति॥४४॥ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति ॥४५॥ यत्र नृप दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् ॥४६॥ ये त्विह वा अन्धावटकुशूलगुहादिषु भूतानि निरुन्धन्ति तथाऽमुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ॥ ४७ ॥ यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य वाऽपि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः कङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥ ४८ ॥ यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशङ्की अर्थव्ययनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृत्तिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणशमलग्रहः सूचीमुखे नरके निपतति ॥ ४९ ॥

नाग्निना जातेन धूमेन सह निरुन्धन्ति ॥ ४७ ॥ य इति ॥ अतिथयोऽज्ञातपूर्वकाः अभ्यागताः ज्ञातपूर्वकाः तान् पापेन वक्रीकृतेन प्रसह्य हठात् ॥ ४८ ॥ य इति ॥ यस्त्विह वै आढ्याभिमतिः धनगर्वितः अहंकृतिः श्रेष्ठोऽहमित्यभिमानी तिर्यक्प्रेक्षणः वक्रदृष्टिः सर्वतोऽभिविशङ्की सर्वत्र पितृगुर्वादिषु अपि अयं मे धनं चोरयिष्यतीति विशङ्कमानः हि यस्मात् अर्थविनाशचिन्तया परिशुष्यमाणं हृदयं वदनं च यस्य सः अत एव निर्वृतिं सुखमनवगतोऽप्राप्तः ग्रह इव ब्रह्मराक्षसवत्परार्थं धनं रक्षति अत एव तस्य धनादेरुत्पादने उत्कर्षणे संवर्धने संरक्षणे च शमलं पापं गृह्णातीति तथा सोऽपि सूचीमुखे नरके निपतति ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus

यत्रेति ॥ वित्तग्रहं धनलुब्धं पापव्याप्तं पुरुषं वायकाः कन्थादिनिर्माणकर्त्तारः सूत्रैः परिवयन्ति सूत्रप्रोतान् कुर्वन्ति ॥ ५० ॥ एवंविधा इति ॥ इतरत्र स्वर्गादौ सुखभोगस्थाने विशन्ति इह मनुष्यलोके भारतभूमौ वा पुनर्भवे पुनर्जन्मनिमित्तस्थाने उभयोर्धर्माधर्मयोः शेषाभ्यां निविशन्ते आदावेव द्वितीयस्कन्धादावेव वैश्वानरं यातीत्यादिनेति शेषः ॥५१॥ एतावानिति ॥ चतुर्दशधा चतुर्दशभुवनप्रकारेण विकल्पितो भगवता रचितः पुराणेषु उपगीयते उपगेयमुपनिषद्गीतं रूपं श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य अग्राह्यमपि निर्गुणं रूपमपि॥५२॥श्रुत्वेति ॥ यतिः भगवतः स्थूलं सूक्ष्मं चेति द्वे रूपे यथा यथावच्छ्रुत्वा स्थूले निर्जितं स्थिरीकृतमात्मानं मनः धिया शनैः सूक्ष्मं रूपं प्रति नयेत्॥५३॥

यत्र ह वित्तग्रहं पापं पुरुषं धर्मराजपुरुषा वायसा इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥ ५० ॥ एवंविधा नरका यमालये सन्ति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशन्ति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशन्ति ॥ निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥५१॥ एतावानेवाण्डकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत् तद् भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥ ५२ ॥ श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो यतिः ॥स्थूले निर्जितमात्मानं शनैः सूक्ष्मे धिया नयेदिति ॥ ५३ ॥ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था ॥ गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ५४ ॥ इति श्रीभागवते महापुराणे अष्टादशसाहस्र्यां संहितायां पञ्चमस्कन्धे नरकानुवर्णनं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ समाप्तोऽयं पञ्चमः स्कन्धः ॥ ५ ॥

भूद्वीपेति ॥ भूद्वीपादीनां संस्था या मया तव गीता तदिदं सकलजीवनिकायानां धाम आश्रयभूतमीश्वरस्याद्भुतं स्थूलं वपुरस्ति भागणो ज्योतिर्गणः ॥५४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षड्विंशे पञ्चमस्य व्यधादिमाम् ॥ २६ ॥ हे गोपबालक भवानवलम्ब्य लीलां चिक्षेप नः किमिति हन्त तमोऽन्धकूपे ॥ अस्यां महाविपदि सन्ततमर्दितांस्त्वं पश्यन् कदा नु करुणामवलम्बितासे ॥ १ ॥

अयं श्रीमद्भागवतस्य पंचमस्कन्धः बूंदीनगरनिवासि पण्डित गंङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गंङ्गाविष्णुना स्वीये "लक्ष्मीवेंकटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितः माघ कृष्ण ६ शकाब्दाः १८२२ संवत् १९५७.

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते पञ्चमस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते षष्ठस्कन्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीपरमेश्वराय नमः ॥ आनन्द[1]धामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं सञ्चिन्तयामि निखिले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयं सुगममातनुतेऽत्र षष्ठे ॥ ३ ॥ तत्राद्येऽजामिलस्याग्रे दूतानां यमकृष्णयोः ॥ संवादे धर्मलक्ष्मादि तत्र श्लोकास्तु नागषट् ॥ अनुष्टुभः सार्द्धगोषट् सन्तोवाचवचांसि च ॥ १ ॥ निवृत्तीति ॥ भगवता त्वया आदौ द्वितीयस्कन्धे वैश्वानरं यातीत्यादिना यथा यथावत् निवृत्तिमार्गः कथितः । यत् येन मार्गेण क्रमेण योगोऽर्चिरादिप्राप्तिस्तेनोपलब्धेन प्राप्तेन ब्रह्मणा सह असंसृतिर्मोक्षो भवति । " ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ " इति श्रुतेः । इति क्रममुक्त्यभिप्रायेण योजना । यद्वा । आदौ द्वितीयस्कन्धे केचित्स्वदेहान्तर्हृदयेत्यादिना त्वया यथावन्निवृत्तिमार्गः कथितः । येन मार्गेण धारणाध्यानसमाधिक्रमयोगरीत्या प्राप्तेन ब्रह्मणा भगवता हेतुभूतेन असंसृतिर्मोक्षो भवतीति सद्योमुक्तिपक्षे योजना ॥ १ ॥ प्रवृत्ती-

॥ श्रीगणेशाय नमः ॥ राजोवाच ॥ निवृत्तिमार्गः कथित आदौ भगवता यथा ॥ क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥ प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ॥ यो सावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥ २ ॥ अधर्मलक्षणा नाना नरकाश्चानुवर्णिताः ॥ मन्वन्तरश्च व्याख्यातः आद्यः स्वायंभुवो यतः ॥३॥ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च ॥ ४ ॥ द्वीपवर्षसमुद्राद्रीन्नद्युद्यानवनस्पतीन् ॥ धरामण्डलसंस्थानं भागलक्षणमानतः ॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥ ५ ॥ अधुनेह महाभाग यथैव नरकान्नरः ॥ नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥

ति ॥ हे मुने न लीना न निवृत्ता प्रकृतिर्माया यस्य प्राणिनः तस्य पुनः पुनः भोगार्थं गुणानां सर्गः कार्यं देहारम्भो यस्मिन् सः त्रैगुण्यं स्वर्गादिसुखं तदेव विषयः प्राप्यं फलं यस्य सः योऽसावेवंभूतः प्रवृत्तिलक्षणो मार्गः सोऽपि त्वया " दक्षिणेन पथार्यम्णः पितृलोकं व्रजन्ति ते । " इत्यादिना कथितः ॥ २ ॥ अधर्मेति ॥ अधर्मं लक्षयन्ति स्वकारणतया ज्ञापयन्तीति अधर्मलक्षणा नानाप्रकारका नरकाश्च पञ्चमस्कन्धान्ते त्वयानुवर्णिताः । यतो यस्मिन् स्वायम्भुवो ब्रह्मपुत्रो मनुः स आद्यः प्रथमो मन्वन्तरमनुदेवऋष्यादिषट्कलक्षणश्च चतुर्थस्यादौ व्याख्यातः कथितः॥३॥ प्रियेत्यर्द्धम्॥ प्रियव्रतोत्तानपादयोर्वंशो व्याख्यातः। तद्वंशचरितानि च व्याख्यातानि॥४॥द्वीपेति सार्द्धम् ॥ विभुः परमेश्वरो द्वीपवर्षादीन् यथासृजत्तथा व्याख्यातम् । भागतो लक्षणतो मानतश्च धरामण्डलसंस्थानं तथा ज्योतिषां सूर्यादीनां विवराणां पातालादीनां च, इदं संस्थानं विभुर्यथासृजत्तथा त्वया व्याख्यातम् ॥ ५ ॥ अधुनेति ॥ हे महाभाग नाना अनेकविधा उग्राः तीव्राः यातना वेदना येषु तान्नरकानिह जीवसमूहे नरः पापिजनोऽपि यथा

१ अस्य टिप्पणमुपोद्घातारम्भे द्रष्टव्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

येनोपायेन नैवेयात् नैव गच्छेत्तदुपायरूपमधुना मे मह्यं व्याख्यातुमर्हसि । अनिष्टे ज्ञाते तत्परिहारोऽपि ज्ञातव्य इत्याशयः॥६॥ राज्ञः परीक्षायै कर्मिणां मतेनोत्तरमाह—न चेदि-ति ॥ इह जन्मनि मनउक्तिपाणिभिर्मनोवाक्कायैर्व्यस्तैः समस्तैर्वा कृतस्यांहसः पापस्येहैव जन्मनि यथा यथावत् मन्वाद्युक्तधर्मशास्त्रानुसारेण चेत् यदि अपचितिं प्रायश्चित्तं न कुर्यात्तदा स पापी प्रेत्य मृत्वा मे मया ये भवतः कीर्तिताः तिग्माः दारुणा यातना येषु तान्नरकान्नुपैति प्राप्नोति ॥ ७ ॥ तस्मादिति ॥ तस्मादुक्तहेतोः मृत्योः पुरैव अवि-पद्यता जरारोगादिना अक्षीयमाणेन । शता आर्षः । आत्मना देहेन यावद्युक्तः स्यात् व्रताचरणेष्वसमर्थो न स्यादित्यर्थः । तावदेव इह लोक एव पापस्य निष्कृतौ प्रायश्चित्ते आशु शीघ्रं पापकरणानन्तरमेव यतेत । अन्यथा अतीते चिरकाले तु द्विगुणं व्रतमर्हतीति द्वैगुण्यापत्तेः।यथा भिषग् वैद्यः अत एव रुजां रोगाणां निदानं कारणं वेत्तीति तथा। स यथा दोषस्य रोगस्य महत्त्वमल्पत्वं च ज्ञात्वा मृत्योः पुरैवाशु चिकित्सेत तथेत्यर्थः॥८॥दृष्टेति॥दृष्टं राजदण्डलोकनिन्दादि श्रुतं नरकपातादि ताभ्यां पापम् आत्मनःअहितम् जानन्नपि यत् यस्माद्विवशस्तद्वासनाधीनः सन् प्रायश्चित्तानन्तरमपि जनः पापं करोति ।अथो तस्मात्कारणात् द्वादशाब्दादिकं प्रायश्चित्तं पापनाशकं कथं तेन समूलदोषनिवृत्तौ

श्रीशुक उवाच॥न चेदिहैवापचितिं हतां हसः कृतस्य कुर्यान्मन उक्तिपाणिभिः॥ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातना ॥७॥ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥८॥ राजोवाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम् ॥ करोति भूयो विवशः प्रायश्चित्तमथो कथम् ॥ ९ ॥ क्वचिन्निवर्तते भद्रात्क्वचिच्चर-ति तत्पुनः ॥ प्रायश्चित्तमतोऽपार्थं मन्ये कुञ्जरशौचवत् ॥ १० ॥ श्रीशुक उवाच ॥ कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते ॥ अविद्वद-धिकारित्वात्प्रायश्चित्तं विमर्शनम् ॥ ११ ॥ नाऽश्नतः पथ्यमेवान्नं व्याधयोऽभिभवन्ति हि ॥ एवं नियमकृद्राजञ्छनैः क्षेमाय कल्पते ॥ १२ ॥

पुनः पापप्रवृत्त्यसम्भवात् ततो ज्ञायते न तेन समूलपापनिवृत्तिरिति भावः॥९॥क्वचिदिति॥यस्मात् क्वचित्कदाचित् यौवनादौ प्रायश्चित्तानुष्ठानसमये प्रायश्चित्तस्य कृतत्वादभद्रा-त्पापान्निवर्तते क्वचित्कालान्तरे वार्द्धकादौ पुनस्तदेव तत्सदृशमेव पापमाचरति।अतः तस्मात्कुञ्जरशौचवत् प्रायश्चित्तम् अपार्थं व्यर्थं मन्ये । यथा कुञ्जरः स्नातोऽपि रजोभिरा-त्मानं मलिनीकरोति तथा प्रायश्चित्ते कृतेऽपि पुनः पापाचरणात् नरकपातस्यावश्यंभावात्प्रायश्चित्तं व्यर्थम् अत इत्यत्र अथो इति पाठे सन्धिरार्षः॥१०॥कर्मणेति॥ अविद्वान् अविद्यया देहाद्यध्यासवान् एव अधिकारी यस्मिन् प्रायश्चित्ते तस्य भावस्तत्त्वं तस्माद्धेतोः कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य निर्हारो नाश आत्यन्तिकः समूलो न हीष्यते अविद्या एव पापप्रवृत्तेर्मूलं सैव च प्रायश्चित्तस्य मूलम् अतस्तादृशस्य पापस्य तादृशेनैव समूलो नाशो न भवति अतः विमर्शनम् आत्मसाक्षात्कारलक्षणं ज्ञानमेव सम्यक् प्रायश्चित्तं तस्यैवाविद्यानिवर्तकत्वात् ॥ ११ ॥ नेति ॥ हे राजन् पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो नाभिभवन्ति न बाधन्ते किंतु शनैर्निवर्तन्ते एवं नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमकृन्नियमेन तपआदिकर्ता शनैः शनैः कामादिदोषनिवृत्त्या क्षेमाय पापनाशाय आत्मतत्त्वसाक्षात्काराय च कल्पते समर्थो भवति॥ १२॥ तपसेति द्वयम् ॥ तपसा कृच्छ्रादिना ब्रह्मचर्येण स्त्र्यादित्यागेन शमेन मनसो नियमेन दमेन बाह्येन्द्रियाणां निग्रहेण त्यागेन अन्नादिदानेन सत्येन यथार्थभाषणेन शौचेन स्नानादिना यमेन अहिंसादिसंकल्पेन नियमेन जपार्चनादिना च धर्मज्ञाः ज्ञातधर्मरहस्याः शास्त्रगुर्वादिश्रद्धानिष्ठाः धीराः सर्वतो विरक्ताः लब्धज्ञानाश्च सन्तो देहवाग्बुद्धिजं महदप्यघं पापं क्षिपन्ति नाशयन्ति । यथा अनलोऽग्निर्वेणूनां गुल्मं नाशयति दहतीत्यर्थः ॥ १३ ॥ १४ ॥ केचिदिति ॥ केचिद्वासुदेवपरायणाः केवलया तपआदिकमनपेक्षमाणया भक्त्या कात्स्न्र्येन समूलम-विद्यासहितमघं पापं धुन्वन्ति विनाशयन्ति । केचिदित्यनेनैवंभूता भक्तिप्रधाना विरला इति सूचयति । यथा भास्करो नीहारं नाशयति तथेत्यर्थः ॥ १५ ॥ नेति ॥ हे राजन् तत्पूरुषाः श्रीकृष्णभक्ताः तेषां निषेवा निरन्तरं सङ्गतिः तया कृष्णेऽर्पिताः तत्तद्विषयेभ्यः परावर्त्य तद्भजनोन्मुखीकृताः प्राणा इन्द्रियाणि येन सः पापकर्माणं मां शिक्षार्थं नरके पातयतु न वा स एव मे गतिरित्यात्मसमर्पणेन नरकप्रतीकारमप्यकुर्वन् शुद्धभक्तिमान् इत्यर्थः । पूर्वमघवान् महापातक्यपि यथा पूयेत शुद्ध्येत् तथा तप-

तपसा ब्रह्मचर्येण शमेन च दमेन च ॥ त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ॥
क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः ॥१४॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥१५॥
न तथा ह्यघवान्राजन्पूयेत तपआदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥१६॥ सध्रीचीनो ह्ययं लोके पन्थाः क्षेमोऽकुतोभयः ॥ सु-
शीलाः साधवो यत्र नारायणपरायणाः ॥१७॥ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ॥ न निष्पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः ॥१८॥
सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भटान्स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥ १९ ॥

आदिभिर्न पूयेत ॥१६॥ सध्रीचीन इति ॥ हि निश्चितम् । लोके क्षेमः दुःखनिवर्तकः अकुतोभयः नास्ति कुतोऽपि विघ्नादेर्भयं यस्मिन् तथाविधः अयं शास्त्रप्रसिद्धः पन्थाः भक्तिमार्गः एव सध्रीचीनः समीचीनः । यत्र भक्तिमार्गे सुशीलाः साधवो नारायणपरायणाः जनाः साधका भवन्ति । सुशीलाः साधव इति अत्र ज्ञानमार्ग इव असहायतानि-मित्तं भयं न नापि कर्ममार्गवन्मत्सरतादिहेतुकं भयमिति भावः ॥ १७ ॥ अन्वयव्यतिरेकाभ्यां भगवद्भक्तिरेव पापप्रशमनीत्याह—प्रायश्चित्तानीति ॥ हे राजेन्द्र चीर्णान्यनु-ष्ठितानि बहून्यपि सर्वप्रकाराणि कर्ममयानि प्रायश्चित्तानि नारायणपराङ्मुखमेकमपि जनं न निष्पुनन्ति निश्शेषेण न पुनन्ति । यथा बहवोऽपि आपगा नद्यः एकमपि सुराकुम्भं न निष्पुनन्ति तथेति । भक्तिस्त्वन्यनिरपेक्षा पापशोधिकेति भावः । सुरेति महतामप्यशोधकत्वे दृष्टान्तः ॥ १८ ॥ नात्र भक्तेर्बाहुल्यमप्यपेक्षितमित्याह—सकृ-दिति ॥ तस्य कृष्णस्य गुणेषु रागि अनुरक्तं मनो यैः प्राणिभिरिह संसारे कृष्णपदारविन्दयोः सकृदपि निवेशितं ते हि यस्मात् चीर्णनिष्कृताः कृष्णे मनोनिवेशमात्रेण कृतप्रा-

CC-0. In Public Domain. Digitization by eGangotri

यश्चित्ता भवन्ति अतः ते यमं पाशभृतस्तद्भटांश्च स्वप्नेऽपि न पश्यन्ति । कदाचिद्भक्तस्य दैवात् पापानां पौनःपुन्येऽप्युत्खातदंष्ट्रोरगदंशानामिव तेषामकिञ्चित्करत्वान्न भक्तिः कुञ्जरशौचाक्षेपयोग्या इति । "अपि चेत्सुदुराचारः" इत्यादिगीतोक्तेः ॥१९॥ अत्रेति ॥ अत्र भक्तेः समूलपापनाशकत्वे पुरातनमिमं वक्ष्यमाणमितिहासं च पुराविद उदाहरन्ति दृष्टान्तेन वर्णयन्ति यत्र विष्णुयमयोर्दूतानां संवादोऽभूत् । तं मे मत्तस्त्वं निबोध जानीहि ॥२०॥ कान्यकुब्जे इति ॥ कान्यकुब्जे पुरे नाम्ना अजामिलो नाम दासीपतिः नष्टः सदाचारः सन्ध्यावन्दनादिर्यस्य दास्याः संसर्गेण दूषितः कश्चिद्द्विजः आसीत्॥२१॥बन्दीति ॥ बन्दी शृङ्खलितजनता तया तद्ग्रहणेन अक्षैर्द्यूतैः कैतवैः वञ्चनादिभिः चौर्यैः परस्वापहारैश्च गर्हितां निन्दितां वृत्तिं जीविकामास्थितः अत एव अशुचिः सन् कुटुम्बं बिभ्रत् पुष्णन् देहिनः प्राणिनः यातयामास पीडयामास ॥ २२ ॥ एवमिति ॥ हे राजन् एवं दुराचारेण निवसतो वर्त्तमानस्य तस्याः दास्याः सुतान् लालयानस्य । मुगभाव आर्षः। प्रमत्तस्य अष्टाशीत्या सङ्ख्यया उपलक्षिताः समाः संवत्सराः एता-

अत्र चोदाहरन्तीममितिहासं पुरातनम् ॥ दूतानां विष्णुयमयोः संवादस्तं निबोध मे ॥ २० ॥ कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ॥ नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥ २१ ॥ बन्द्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ॥ बिभ्रत्कुटुम्बमशुचिर्यातयामास देहिनः ॥ २२ ॥ एवं निवसतस्तस्य लालयानस्य तत्सुतान् ॥ कालोऽत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥ २३ ॥ तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः ॥ बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥ २४ ॥ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥२५॥ भुञ्जानः प्रपिबन्खादन्बालकस्नेहयन्त्रितः ॥ भोजयन्पाययन्मूढो न वेदागतमन्तकम् ॥२६॥ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते ॥ मतिं चकार तनये बाले नारायणाह्वये ॥ २७ ॥

वद्वर्षप्रमाणः आयुषः संबन्धी महान् कालोऽत्यगात् ॥ २३ ॥ तस्येति ॥ तस्य प्रवयसो वृद्धस्यापि दश पुत्रा जाताः । तेषां मध्ये तु योऽवमः कनिष्ठः अत एव बालो नाम्ना नारायणः स मातापित्रोर्भृशमन्यन्तं दयितः प्रियश्चासीत् ॥ २४ ॥ स इति ॥ कलभाषिणि मधुरवादिनि अर्भके बाले बद्धं हृदयं येन स जरठः वृद्धः स अजामिलः तस्य लीलां बालचेष्टां निरीक्षमाणो भृशं मुमुदे ॥२५॥ भुञ्जान इति ॥ मूढः स भुञ्जानः प्रपिबन् खादन् चर्वन् यतो बालके स्नेहेन यन्त्रितः निबद्धहृदयः अतः स्वयं भोजनादि कुर्वंस्तमपि भोजनादि कारयन्नागतमन्तकं मृत्युं न वेद एतच्च तदुपलालनादिषु श्रीनारायणनामोच्चारणमाहात्म्येन तद्भक्तिरेवाभूदिति सिद्धान्तोपयोगित्वेनापि द्रष्टव्यम् ॥२६॥ स इति ॥ एवं वर्त्तमानः अज्ञः बालकस्नेहेन यन्त्रितः वशीकृतः सः मृत्युकाले उपस्थिते प्राप्ते सति बाले नारायणाह्वये तनये मतिं चकार तस्य स्मरणं चकार ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति युग्मम् ॥ पाशहस्तान् भृशदारुणान् वक्राणि तुण्डानि मुखानि येषां तान् ऊर्ध्वाणि रोमाणि येषां तान् आगतान् त्रीन् पुरुषान् दृष्ट्वा व्याकुलेन्द्रियः विह्वलचित्तः सन् दूरे क्रीडनकेषु आसक्तं नारायणाह्वयं पुत्रं प्लावितेन प्लुतत्वं नीतेन उच्चैः स्वरेण हे नारायण इति सम्बोधनेन आजुहाव । अत्र कायिकवाचिकमानसभेदेन पापानां त्रित्वात्त्रयो याम्या भगवन्नाम्नश्चतुरक्षरत्वाच्चत्वारः पार्षदा आगताः ॥ २८ ॥ २९ ॥ निशम्येति ॥ हे महाराज तदा तस्य म्रियमाणस्य ब्रुवतः पुत्रस्नेहान्नारायणेति तमाकारयतः सतस्तद्भर्तुः स्वस्वामिनः सदृशं नाम निशम्य श्रुत्वा तस्य तद्धरिकीर्तनं मत्वा सहसा झटित्येव भगवत्पार्षदा आपतन् आययुः ॥ ३० ॥ विकर्षत इति ॥ अन्तर्हृदयाद्दासीपतिमजामिलं विकर्षतः निःसारयतो यमस्य प्रेष्यान् दूतान् मा एनं विकर्षथ यदि जीवितुमिच्छथेति वदन्तो विष्णुदूता ओजसा बलात्कारेण वारयामासुः ॥ ३१॥ ऊचुरिति ॥ तदा ते वैवस्वतस्य यमस्य पुरःसराः भृत्या एवं प्रतिषेधिताः सन्तो धर्मराजस्य धर्माधर्मनिर्णेतुर्यमराजस्य शासनमाज्ञां । तृन्नन्तयोगे द्वितीया । प्रति-

स पाशहस्तांस्त्रीन्दृष्ट्वा पुरुषान्भृशदारुणान् ॥ वक्रतुण्डानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥ २८ ॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम् ॥ प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥ २९ ॥ निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्तनम् ॥ भर्तुर्नाम महाराज पार्षदाः सहसाऽपतन् ॥३०॥ विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम् ॥ यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ ३१ ॥ ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः ॥ के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम् ॥ ३२ ॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ ॥ किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥३३॥ सर्वे पद्मपलाशाक्षा पीतकौशेयवाससः ॥ किरीटिनः कुण्डलिनो लसत्पुष्करमालिनः ॥ ३४ ॥ सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ॥ धनुर्निषङ्गासिगदाशङ्खचक्राम्बुजश्रियः ॥ ३५ ॥ दिशो वितिमिरालोकाः कुर्वन्तः स्वेन रोचिषा ॥ किमर्थं धर्मराजस्य किंकरान्नो निषेधथ ॥ ३६ ॥ श्रीशुक उवाच ॥ इत्युक्ते यमदूतैस्तैर्वासुदेवोक्तकारिणः ॥ तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥

षेद्धारो यूयं क इति तान् भगवत्पार्षदान् प्रत्यूचुः पप्रच्छुरित्यर्थः ॥ ३२ ॥ कस्येति ॥ कस्य भृत्याः कुतो वा देशादागताः कस्माद्धेतोरस्य नयनं निषेधथ यूयं किं देवा उपदेवाः यक्षगन्धर्वादयो वा किंवा सिद्धेषु सत्तमाः श्रेष्ठाः केचित् ॥ ३३ ॥ सर्व इति त्रयम् ॥ तत्र सर्व इत्यादि सार्द्धं स्पष्टम् । निषङ्ग इषुधिः धनुरादिभिः श्रीः शोभा येषां ते स्वेन रोचिषा प्रकाशेन विगतं तिमिरं विगतः आलोकः अन्यप्रकाशश्च यासु तथाभूता दिशः कुर्वन्तः सर्वे यूयं के तथा धर्माणां पालस्य यमस्य किङ्करान्नोऽस्मान् अस्य नयनं किमर्थं निषेधथ भवतां नोचितमिदमिति॥ ३४ ॥ ३५ ॥ ३६ ॥इतीति ॥ इत्येवमुक्तप्रकारेण यमदूतैरुक्ताः पृष्टास्ते वासुदेवोक्तकारिणो भगवदाज्ञानुसारिणस्तत्पार्षदाः अहो एतेऽस्मद्भिया स्वस्य धर्मराजकिंकरतां वदन्ति वस्तुतश्चोरा एवेत्याशयेन प्रहस्य मेघनिर्ह्रादया मेघगर्जितवद्गम्भीरया गिरा इदं वक्ष्यमाणं तान् यमदूतान् प्रत्यूचुः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus

यूयमिति ॥ यदि यूयं धर्मराजस्य निर्देशकारिणस्तर्हि यद्धर्मस्य तत्त्वं स्वरूपं यच्च धर्मस्य लक्षणं प्रमाणं तन्नोऽस्मान्प्रति ब्रूत ॥ ३८ ॥ कथमिति ॥ युष्माभिः कथंस्वित् केन प्रकारेण दण्डो ध्रियते अस्य दण्डस्य ईप्सितं योग्यं स्थानं विषयः कारणं वा किमस्ति । नृणां मध्ये कारिणः कर्मिणः । आवश्यके णिनिः । सर्वे एव किं दण्ड्या भवन्ति आहोस्वित्कतिचिदेव ॥ ३९ ॥ वेदेति ॥ वेदेन प्रणिहितः कर्त्तव्यत्वेनाभिप्रेतो यः स धर्मः इति धर्मस्य स्वरूपं प्रमाणं चोक्तम् । दण्डकथनायापृष्टस्याप्यधर्मस्य लक्षणमाहुः । अधर्म इति । तद्विपर्ययः वेदेन निषिद्धत्वेनाभिप्रेतो यः सः अधर्मः वेदस्य प्रामाण्ये हेतुमाहुः । वेद इति । " अस्य महतो भूतस्य निश्वसितमेतदृग्वेदः " । इत्यादिश्रुतेः । वेदश्च साक्षात्स्वयम्भूः भगवतो विश्वासमात्रेण स्वयमनायासेन भवतीति साक्षान्नारायण एवेति शुश्रुम ॥ ४० ॥ कोऽसौ नारायण इति चेत्तत्राहुः—येनेति ॥ येन स्वधाम्नि स्वस्वरूपे अमी दृश्यमाना रजआदिगुणकार्यभूता भावाः प्राणिनः गुणनामादिभिर्यथायथं यथायोग्यं वर्णाश्रमाद्यधिकारिविभागपूर्वकं विभाव्यन्ते विरच्यन्ते स नारायणः तत्र

विष्णुदूता ऊचुः ॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः ॥ ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणम् ॥ ३८ ॥ कथं स्विद् ध्रियते
दण्डः किं वाऽस्य स्थानमीप्सितम् ॥ दण्ड्याः किंकारिणः सर्वे आहोस्वित्कतिचिन्नृणाम् ॥ ३९ ॥ यमदूता ऊचुः ॥ वेदप्रणिहितो
धर्मो ह्यधर्मस्तद्विपर्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम ॥ ४० ॥ येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः ॥
गुणनामक्रियारूपैर्विभाव्यन्ते यथातथम् ॥ ४१ ॥ सूर्योऽग्निः खं मरुद्गावः सोमः संध्याहनी दिशः ॥ कं कुः कालो धर्म इति ह्येते
दैह्यस्य साक्षिणः ॥ ४२ ॥ एतैरधर्मो विज्ञातः स्थानं दण्डस्य युज्यते ॥ सर्वे कर्मानुरोधेन दण्डमर्हन्ति कारिणः ॥ ४३ ॥ संभवन्ति हि
भद्राणि विपरीतानि चानघाः ॥ कारिणां गुणसङ्गोऽस्ति देहवान्न ह्यकर्मकृत् ॥ ४४ ॥

गुणाः शान्तत्वघोरत्वमूढत्वादयः नामानि ब्राह्मणक्षत्रियवैश्यादीनि क्रिया अध्ययनाध्यापनयज्ञानुष्ठानाद्याः रूपाणि द्विहस्तद्विपाचतुष्पादादीनि ॥ ४१ ॥ सूर्य इति ॥ अदृयाद्यभिमानिनो देवा ग्राह्याः खमाकाशः मरुत्पवनः गावः वाचः तदधिष्ठात्री सरस्वती । पाठान्तरे । देवः अन्तर्यामी सोमः चन्द्रः अहनी अहश्च रात्रिश्च कम् उदकं कुः पृथ्वी धर्मः धर्माभिमानी देवः इत्येते दैह्यस्य जीवस्य धर्माधर्मसाक्षिणः निर्विकारित्वेन द्रष्टृत्वे सति यथावद्वक्तार इत्यर्थः॥४२॥दण्डस्य कारणमाहुः—एतैरिति॥ एतैः सूर्यादिसाक्षिभिर्विज्ञातः अधर्मो दण्डस्य स्थानं युज्यते कारणं सम्पद्यते । दण्ड्याः किङ्कारिणः सर्व इत्याक्षेपस्योत्तरमाहुः । सर्व इति । सर्वस्यैकदा पापासंभवादेकदा दण्डानर्हत्वेऽपि क्रमेण पापसंभवात्सर्वे पापकारिणः क्रमेण दण्डमर्हन्ति ॥ ४३ ॥ सर्वेषां दण्ड्यत्वे हेतुः—संभवन्तीति ॥ हे अनघाः कारिणां भद्राणि पुण्यानि विपरीतानि पापानि च संभवन्ति । कुतः हि यस्मात् तेषां गुणसंयोगोऽस्ति सत्त्वादिगुणसंबन्धोऽस्ति अत एव कश्चिदपि देहवान् क्षणमपि अकर्मकृत् कायिकवाचनिकमानसिकव्यापारनिर्मुक्तो न तिष्ठति तथा च तत्तद्गुणोद्रेकानुसारेण सदा धर्माधर्मोत्प-

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिर्भवत्येव ॥ ४४ ॥ कथंस्वित् ध्रियते दण्ड इत्यस्योत्तरमाहुः—येनेति ॥ येन यावान् यत्प्रमाणकः यथा येन प्रकारेण धर्मोऽधर्मो वा समीहितः कृतः स एव नान्यस्तावत्प्रमाणकः तथा तत्तदवान्तरभेदभिन्नेन प्रकारेण तावत्प्रमाणकं तत्फलं सुखदुःखादिकममुत्र स्वर्गनरकादौ भुङ्क्ते । अत्र धर्मो वेति दृष्टान्तार्थः धर्मानुसारेण सुखमिव अधर्मानुसारेण दुःखमिति ॥ ४५ ॥ सूर्यादिवदर्थापत्तिरपि धर्माधर्मज्ञापिकेति सूचयन्तः सत्त्वादिगुणसङ्गः स्फुटमुपलभ्यतामित्याशयेनाहुः—यथेति ॥ हे देवप्रवराः यथेह जन्मनि भूतेषु प्राणिषु त्रैविध्यं शान्तघोरमूढत्वेन सुखित्वदुःखित्वतदुभयमिश्रितत्वेन वा धार्मिकत्वादिना वोपलभ्यते तेन च तदन्यथानुपपत्त्या तत्कारणं जन्मान्तरीयपुण्यपापादि कल्प्यते तथात्र गुणवैचित्र्येण धर्माधर्मादिषु प्रवृत्तिदर्शनात्तेनान्यत्र जन्मान्तरेऽपि सुखदुःखादिकमनुमीयते ॥ ४६ ॥ वर्त्तमानजन्मनैव पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टान्तमाहुः—वर्त्तमान इति ॥ यथा वर्त्तमानो वसन्तादिकालः स्वगुणैः पुष्पफलादिभिरन्ययोर्भूतभाविनोर्वसन्तयोर्गुणानां पुष्पफलादीनामभिज्ञापकोऽनुमापकः एवमेतज्जन्माप्यन्ययोर्भूतभाविजन्मनोर्धर्माधर्मौ निदर्शयतीति तथा ॥ ४७ ॥ यमस्तु सर्वेषां धर्माधर्मादि स्वयमेव जानाति अतस्तदाज्ञयास्माकमागमनं योग्यमेवेत्याशयेनाहुः—मनसेति ॥ भगवान् सर्वज्ञः

येन यावान्यथा धर्मोऽधर्मो वेह समीहितः ॥ स एव तत्फलं भुङ्क्ते तथा तावदमुत्र वै ॥ ४५ ॥ यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते ॥ भूतेषु गुणवैचित्र्यात्तथाऽन्यत्रानुमीयते ॥ ४६ ॥ वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा ॥ एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ॥ ४७ ॥ मनसैव पुरे देवः पूर्वरूपं विपश्यति ॥ अनुमीमांसतेऽपूर्वं मनसा भगवानजः ॥ ४८ ॥ यथाऽज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥ पञ्चभिः कुरुते स्वार्थान्पञ्च वेदाथ पञ्चभिः ॥ एकस्तु षोडशेन त्रीन्स्वयं सप्तदशोऽश्नुते ॥ ५० ॥

अजश्च देवः ईश्वरः यमो वा पुरे प्राण्यन्तर्हृदये संयमन्यां वा स्थितो मनसैव तेषां पूर्वरूपं देवमनुष्यादिधर्माधर्मादियुक्तं पश्यति जानाति अनु अनन्तरमप्ययमीदृग्धर्माधर्मादिमानीदृग्रूपो भविष्यति अपूर्वं भाविरूपं च मनसैव मीमांसते विचारयति ॥ ४८ ॥ जीवस्त्वल्पज्ञो वर्त्तमानमात्रं पश्यतीत्याहुः—यथेति ॥ नष्टा जन्मपरम्परा स्मृतिर्यस्य स तमसा युक्तो व्याप्तः अज्ञः पश्वादिर्व्यक्तं वर्त्तमानमेव देहमुपास्तेऽहंममेतिभावेन यथेष्टाहारादिना सेवते पूर्वमपरं भूतं भाविनं च न वेद तथा मनुष्यादिरपीति शेषेणान्वयः । यद्वा । यथा तमसा निद्रया युक्तो जनः स्वप्नेऽपि व्यक्तमेव देहाद्युपास्ते न तु जाग्रद्देहादिपूर्वस्वप्नादिगतं वा तद्वत् नष्टा जन्मनां स्मृतिर्यस्य सः अज्ञः अविद्योपाधिर्जीवः व्यक्तं प्राचीनकर्मणाभिव्यक्तं वर्तमानमेव देहाद्युपास्ते अहमिति मन्यते पूर्वमपरं वा न वेद ॥ ४९ ॥ एवम्भूतस्य संसारं प्रपञ्चयति—पञ्चभिरिति ॥ षोडशेन मनसा सह सप्तदशः एकस्तु एक एव जीवः पञ्चभिर्वागादिभिः कर्मेन्द्रियैः स्वार्थान् स्वाभिलषितान्वचनशिल्पगतिविसर्गानन्दाख्यान् कुरुते । अथ तथा पञ्चभिः श्रोत्रादिभिर्ज्ञानेन्द्रियैः पञ्च शब्दस्पर्शरूपरसगन्धान् वेद जानाति । एवं स्वयमेक एव त्रीन् ज्ञानकर्मेन्द्रियमनोविषयानश्नुते भुङ्क्ते ॥ ५० ॥

तदिति ॥ तदेतत् महत् दुर्निवारं शक्तित्रयं सत्त्वादिगुणत्रयकार्यं षोडशकलं दशेन्द्रियाणि एकं मनः पञ्चतन्मात्राणि चेत्येवं षोडश कलाः अंशा यस्मिंस्तत् लिङ्गं सूक्ष्मशरीरं धर्माधर्मानुष्ठानद्वारा पुंसि जीवे अन्वनु भूयो भूयः सत्वोद्रेके हर्षः रजउद्रेके शोकः तमउद्रेके भयमित्येवं हर्षादिप्रदां संसृतिं देवमनुष्यादियोनिं धत्ते विधत्ते ॥ ५१ ॥ देहीति ॥ अज्ञः न जितः पञ्च ज्ञानेन्द्रियाणि एकं मनश्च एवं षड्वर्गो येन स देही नेच्छन् कर्मानुष्ठानेच्छारहितोऽप्यनेन सङ्घातेन बलात्कर्माणि कार्यते अत एव तेन कारितेन कर्मणात्मानमाच्छाद्य प्रतिरुद्धच मुह्यति । यथा कोशकारः कीटविशेषः स्वमुखनिःसारितैः तन्तुभिः कोशं निर्माय स्वपिति स्वनिर्गमाय द्वारमपि नावशेषयति तदा तस्मिन् कोशे संनिरुद्धच मुह्यति म्रियते च तथा जीवोऽपि कर्मभ्यो निर्गमोपायं न जानाति तत्फलं च भुङ्क्ते ॥ ५२ ॥ न हीति ॥ हि यस्मात् कश्चिदपि प्राणी क्षणमपि जातु कदाचित् अपि अकर्मकृत् कायिकवाचनिकमानसान्यतमव्यापाररहितो न तिष्ठति । अतो हि निश्चितमेतत् स्वाभाविकैः स्वतःसिद्धैः पूर्वकर्मसंस्कारवशाद्रा-गादिरूपेण परिणतैः गुणैः सत्वादिभिरेवायमवशोऽपि बलात्कर्म कार्यते ॥ ५३ ॥ लब्ध्वेति ॥ अव्यक्तमदृष्टं पुण्यपापात्मकं निमित्तं लब्ध्वा उत एव क्वचित् यथायोनि

तदेतत्षोडशकलं लिङ्गं शक्तित्रयं महत् ॥ धत्तेऽनु संसृतिं पुंसो हर्षशोकभयार्तिदाम् ॥ ५१ ॥ देह्यज्ञोऽजितषड्वर्गो नेच्छन्कर्माणि कार्यते ॥ कोशकार इवात्मानं कर्मणाऽऽच्छाद्य मुह्यति ॥ ५२ ॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म गुणैः स्वाभाविकै-र्बलात् ॥ ५३ ॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ॥ यथायोनि यथाबीजं स्वभावेन बलीयसा ॥ ५४ ॥ एष प्रकृतिसङ्गेन पुरुषस्य विपर्ययः ॥ आसीत्स एव न चिरादीशसङ्गाद्विलीयते ॥ ५५ ॥ अयं हि श्रुतसंपन्नः शीलवृत्तगुणालयः ॥ धृतव्रतो मृदुर्दान्तः सत्यवान्मन्त्रवि-च्छुचिः ॥ ५६ ॥ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः ॥ सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥

मातृसदृशं क्वचित् यथाबीजं पितृसदृशं क्वचिदुभयसदृशं च स्त्रीरूपं पुरुषरूपं वा तत्रापि व्यक्ताव्यक्तं स्थूलं सूक्ष्मं वा बलीयसा प्रबलेन स्वभावेन सत्वादिगुणकार्येण शान्तत्वघोरत्वादिना विशिष्टं शरीरं भवति ॥ ५४ ॥ एष इति ॥ पुरुषस्य जीवस्य प्रकृतिसङ्गेन मायया स्वरूपावरणेन एष विपर्ययः देहेन्द्रियाद्यात्माध्यासेन स्वानन्दाद्य-भिभवपूर्वकदुःखित्वादिलक्षण आसीत् । स ईशसङ्गात् भगवद्भजनात् भगवद्भक्तादिसङ्गात् वा भगवत्कृपया मायानिवृत्त्या नचिरात् शीघ्रमेव विलीयते नान्यथा ॥ ५५ ॥
अयमिति ॥ अयमजामिलः पूर्वं श्रुतसम्पन्नः अधीतवेदः शीलं शुद्धभावः वृत्तं सदाचारः गुणाः क्षमादयः तेषाम् आलयः धृतव्रतः कृतजपपूजादिनियमः मृदुः कोमलचित्तः दान्तः जितेन्द्रियः सत्यवाक् मन्त्रवित् शुचिः शुद्धदेहश्चासीत् ॥ ५६ ॥ गुर्विति ॥ तथा गुर्वादीनां शुश्रूषुः सेवकः अग्निसेवा होमः अतिथिसेवा भोजनादि सम्माननं गुरूणां वृद्धानां च सेवा तदाज्ञानुसारित्वं परिचर्यादिकं च निरहङ्कृतः एवं सर्वसाधनपरत्वेऽपि तत्राहं करोमीत्यहङ्काररहितः सर्वभूतसुहृत् कृपयैव सर्वप्राणिहित-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारी साधुः परलोकसाधनतत्परः मितवागल्पभाषी वृथालापरहितः अनसूयकः परेषु दोषारोपोऽसूया तद्रहितः आसीत् ॥ ५७ ॥ एकदेति ॥ एकदासौ द्विजः पितृसन्देशकृत् तदाज्ञाकारी तदाज्ञया फलाद्यानयनार्थं वनं यातः ततो वनात्फलान्यादाय गृहीत्वा आवृत्तः परावृत्तः ॥ ५८ ॥ ददर्शेति युग्मम् ॥ स च मार्गे मैरेयं मधु पैष्टीं सुरां पीत्वा तन्मदेनाघूर्णिते भ्रान्ते नेत्रे यस्याः तया अत एव मत्तया यथावदनुसन्धानरहितया अत एव विशेषेण श्लथन्ती नीवी यस्यास्तया भुजिष्यया साधारणभोगस्त्रिया दास्या सह क्रीडन्तं व्यपेतं स्वाचाराद् भ्रष्टं निरपत्रपं निर्लज्जम् अस्या अन्तिके समीपेऽनया सहानुगायन्तं हसन्तं च कंचित्कामिनं शूद्रं ददर्श ॥ ५९ ॥ ६० ॥ दृष्ट्वेति ॥ कामलिप्तेन कामोद्दीपकागरुचन्दनादिना लिप्तेन शूद्रस्य बाहुना परिरम्भितामाश्लिष्टां तां दृष्ट्वा सहसैव प्रारब्धवशादयं विमोहितः सन् हृच्छयस्य कामस्य वशं जगाम ॥ ६१ ॥ स्तम्भयन्निति ॥ यावत्सत्त्वं यावद्धैर्यं यथाश्रुतं यावच्छास्त्रज्ञानं तावत्तद्बलेनात्मानं मनः आत्मना स्वबुद्ध्या स्तम्भयन्नपि मदनेन कामेन वेपितं कम्पितं मनः समाधातुं न शशाक न

एकदाऽसौ वनं यातः पितृसंदेशकृद्द्विजः ॥ आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८॥ ददर्श कामिनं कंचिच्छूद्रं सह भुजिष्यया ॥
पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ॥५९॥ मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम् ॥ क्रीडन्तमनुगायन्तं हसन्तमनयाऽन्तिके ॥६०॥ दृष्ट्वा
तां कामलिप्तेन बाहुना परिरम्भिताम् ॥ जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥ स्तम्भयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतम् ॥ न
शशाक समाधातुं मनो मदनवेपितम् ॥ ६२ ॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ॥ तामेव मनसा ध्यायन्स्वधर्माद्विरराम ह ॥ ६३ ॥
तामेव तोषयामास पित्र्येणार्थेन यावता ॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥ विप्रां स्वभार्यामप्रौढां कुले महति लम्भिताम् ॥
विससर्जाचिरात्पापः स्वैरिण्याऽपाङ्गविद्धधीः॥६५॥यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम्॥ बभारास्याः कुटुम्बिन्याः कुटुम्बं मन्दधीरयम्॥६६॥

शक्तोऽभूत् ॥ ६२ ॥ तदिति ॥ तत्तस्यादर्शनमेव निमित्तं यस्य तस्य स्मरव्याजस्य वस्तुतस्तु प्रारब्धरूपस्य ग्रहस्य तेन ग्रस्तोऽत एव विचेतनः कर्तव्याकर्तव्यानुसन्धानशून्यः केवलं तां स्त्रियमेव मनसा ध्यायन् स्वधर्माद्विरराम । तया रममाणः स्वधर्माद् भ्रष्टो बभूव । एतेन बुद्धिपूर्वकबहुपापाभ्यासाद्रक्षानर्होऽपि नामाभासमात्रेणापि निष्पापो वैकुण्ठं जगामेति धर्मज्ञानभक्तीनामुत्तरोत्तरं प्राबल्यं दर्शितम् ॥ ६३ ॥ तदिति ॥ यावता समग्रेण पित्र्येण पित्रार्जितेनार्थेन तामेव दासीं तोषयामास । यथा ग्राम्यैर्मनोरमैः कामैर्विषयैः सा प्रसीदेत । तङ्गर्षः । तथा अचेष्टतेति शेषः॥६४॥विप्रामिति ॥ स्वैरिण्या इति भिन्नं पदम् । स्वैरिण्या तया अपाङ्गैर्विद्धा धीर्यस्य सः पापः अप्रौढां नवयौवनां महति कुले लम्भितां तस्याः पित्रा विचार्यैव दत्ताम् इत्यर्थः । विप्रां स्वभार्याम् अचिरात् दासीसंबन्धसमकाल एव विससर्ज त्यक्तवान् ॥ ६५ ॥ यत इति ॥ मन्दधीः अयं यतस्ततः न्यायतः प्रतिग्रहादेः अन्यायतः चौर्यादिनापि धनमानिन्ये तेनास्याः कुटुम्बिन्याः कुटुम्बं बभार पुपोष ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिति ॥ यद् यस्मादसौ शास्त्रमुल्लङ्घ्य स्वैरचारी निरङ्कुशत्वेन वर्त्तमानः अत एव आर्यैः वृद्धैर्गर्हितः अघायुः अघं पापं तदर्थमेवायुर्जीवनं यस्य सः अत एव मलात् रागादिदोषादशुचिश्च सन् चिरं कालमवर्त्तत । यद्वा । मलमेव तदीयोच्छिष्टादिकमत्तीति मलात्॥६७॥तत इति ॥ ततस्तस्मात् कृतकिल्बिषं न कृतो निर्वेशः प्रायश्चित्तं येन तमेनं दण्डपाणेर्यमस्य सकाशं समीपं नेष्यामः । यत्र दण्डेन शुद्ध्यति शुद्धो भवति इत्यर्थः । तेनास्यैव हितार्थे नयनमतो वारणं न युक्तम् ॥ ६८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य प्रथमे निरमादिमाम् ॥ १ ॥ द्वितीयेऽजामिलो विष्णोर्नाममाहात्म्यतः शुचिः ॥ तस्य लोकं गतस्तत्र श्लोका नन्दखयोर्धयः ॥ अनुष्टुभस्तु भूवार्णा उवाचेति चतुर्ष्टयम् ॥ २ ॥ एवमिति ॥ हे राजन् नये प्राश्चित्तादिनिर्णये कोविदाः पण्डिताः ते भगवद्दूताः एवं यमदूतानामभिभाषितमुपधार्य तात्पर्यपूर्वकं श्रुत्वा अथानन्तरमेव तान्प्रत्युत्तरमाहुः ॥ १ ॥ अहो धर्मराजस्य धर्मराजतैव विपरीता जातेत्याहुः । अहो इति । अहो महाकष्टं प्राप्तं कुतः यतो धर्मदृशां धर्माधर्मविवेकिनामपि

यदसौ शास्त्रमुल्लङ्घ्य स्वैरचार्यार्यगर्हितः ॥ अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥ तत एनं दण्डपाणेः सकाशं कृतकिल्बिषम् ॥ नेष्यामोऽकृतनिर्वेशं यत्र दण्डेन शुध्यति ॥ ६८ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे अजामिलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ एवं ते भगवद्दूता यमदूताभिभाषितम् ॥ उपधार्याऽथ तान्राजन्प्रत्याहुर्नयकोविदाः ॥ १ ॥ विष्णुदूता ऊचुः ॥ ॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम् ॥ यत्रादण्ड्येष्वपापेषु दण्डो यैर्ध्रियते वृथा ॥ २ ॥ प्रजानां पितरो ये च शास्तारः साधवः समाः ॥ यदि स्यात्तेषु वैषम्यं कं यान्ति शरणं प्रजाः ॥ ३ ॥ यद्यदाचरति श्रेयानितरस्तत्तदीहते ॥ स यत् प्रमाणं कुरुते लोकस्तदनु वर्तते ॥ ४ ॥ यस्याङ्के शिर आधाय लोकः स्वपिति निर्वृतः ॥ स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥

सभामधर्मः स्पृशते । तङ्गार्षः । यत्र सभायां यैर्धर्मदृग्भिरेव यमादिभिरपापेषु अत एवादण्ड्येषु दण्डानर्हेषु वृथा दण्डो ध्रियते ॥ २ ॥ प्रजानामिति ॥ ये च प्रजानां पितरः पितृवद्वात्सल्येन पालकाः शास्तारः गुरुवत्सन्मार्गशिक्षकाः साधवो हिताचरणेनेष्टसाधकाः समाः सर्वत्र स्वसुखदुःखसाम्यदर्शिनः एवं शास्त्रतो लोके प्रसिद्धाः यमादयस्तेषु यदि वैषम्यं पूर्वोक्तवैपरीत्यं प्रजापीडकत्वं धर्मशिक्षौदासीन्यमहितकारित्वं परदुःखानभिज्ञत्वं च स्यात्तदा प्रजाः कं शरणमाश्रयं यान्ति प्राप्नुयुः ॥ ३ ॥ यदिति ॥ श्रेयान् धर्मज्ञतया श्रेष्ठत्वेनाभिमतः यद्यदाचरति इतरः अज्ञोऽपि तदाचारं दृष्ट्वा तत्तदेवेह ते करोति स श्रेष्ठो यत् शास्त्रं प्रमाणं कुरुते अन्योऽपि लोकः प्राणी तत् शास्त्रमनुवर्त्तते अनुसरति प्रमाणीकरोति ॥ ४ ॥ विश्वासघातित्वमपीत्याहुः—यस्येति ॥ यस्य श्रेष्ठत्वेनाभिमतस्याङ्के उत्सङ्गे शिर आधाय लोकः प्राणी निर्वृतः निश्चिन्तः स्वपिति स धर्मपालनं करोतु अधर्मं वा करोतु तत् स्वयं न वेद । यथा पशुः स्वस्वामिनि कृतविश्वासः स्वपिति स पालनं करिष्यति हननं वा तन्न जानाति तथेत्यर्थः ॥ ५ ॥ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ सः प्रमाणभूतः अत एव भूतानां विश्रम्भणीयः विश्वसनीयः सघृणः परक्लेशदर्शने द्रवीभूतचित्तश्चेत् तदा कृतमैत्रं कृतविश्वासं विश्वासेन नितरामर्पित आत्मा येन तम् अचेतनमज्ञं कथं द्रोग्धुमर्हति अतो यमः सदयश्चेत्पीडयितुं नार्हति ॥ ६ ॥ नन्वकृतप्रायश्चित्तस्यास्य शोधनार्थमेव दण्डो दीयते न तत्र निर्घृणतेति चेत् तत्राहुः—अयं हीति ॥ अयं ह्यजामिलः न केवलमेतज्जन्मपापानाम् अपि तु जन्मकोटीनां यान्यंहांसि पापानि तेषामपि कृतो निर्वेशः प्रायश्चित्तं येन तादृशोऽस्ति । यत् यस्मात् विवशोऽप्ययं स्वस्त्ययनं मोक्षस्यापि साधनं ननु प्रायश्चित्तमात्रं हरेर्नाम व्याजहार उच्चारितवान् ॥७॥ एतेनेति ॥ यदासौ पूर्वं भोजनादिकाले हे नारायण आय आगच्छेति अपभ्रंशभाषयापि चतुरक्षरं नाम जगाद उच्चारितवान् । आयेत्याङ्पूर्वादय गतावित्यस्माल्लोट् तङभाव आर्षः । तदैवैतेन पुत्रोपचरितनाम्नैवास्याघोनोऽघवतः । संप्रसारणमार्षम् । अनेकजन्मसञ्चितस्याघस्य निष्कृतं प्रायश्चित्तं कृतं स्यात् । यद्वा । यत् आ इति च्छेदः । आ ईषदाभासमात्रं चतुरक्षरं यन्नाम जगाद एतेनैव केवलेन अघनिष्कृतं कृतं स्यादिति । ननु "यस्य स्मृत्या च नामोक्त्या तपोदानक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥" इत्याद्युक्तेः कर्मसाद्गुण्याय हरेर्नामेति युक्तं स्वातन्त्र्येणाघनिवर्तकं

स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम् ॥ विश्रम्भणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥ अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥ एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् ॥ यदा नारायणायेति जगाद चतुरक्षरम्
॥ ८ ॥ स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरुतल्पगः ॥ स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥ ९ ॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ १० ॥

तु तत्कथमिति चेत् खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्यादित्यादिवत्संयोगपृथक्त्वन्यायेन प्रायश्चित्तार्थत्वमपि युक्तम् । एकस्योभयत्र विनियोगः संयोगपृथक्त्वं तेन स्वातन्त्र्येण कर्माङ्गत्वेन च हरिनाममाहात्म्यं पापं नाशयतीति । "अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः । पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥" इत्यादिभिः पुराणे तावत्सहस्रशो नाम्नः स्वातन्त्र्यमवगम्यते न चैतेऽर्थवादा इति शङ्कनीयं विधिशेषत्वाभावात् । न च विध्यश्रवणादन्यशेषता कल्पनीया यदाग्नेयोऽष्टाकपालो भवतीत्यादिवत् स्वतन्त्रप्राप्तार्थत्वेन[1] विधिकल्पनोपपत्तेः । मन्त्रेषु च "मर्त्या अमर्त्यस्य ते भूरिनाम मनाम हे विप्रासो जातवेदसः आस्य जानन्तो नाम चिद्विवक्त" इत्यादिषु नाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते । उपपादितं च मन्त्रार्थवादानामपि स्वार्थे प्रामाण्यम् । देवताधिकरणे तस्माच्छ्रीनारायणनामाभासमात्रेणैव सर्वाघनिष्कृतं कृतं स्यात् ॥ ८ ॥ स्तेन इति युग्मम् ॥ यः स्तेनः ब्राह्मणस्वर्णहर्ता इत्यादिकः ये च अपरे पातकिनः तेषां सर्वेषामपि अघवताम् इदं विष्णोर्नामव्याहरणं नामोच्चारणमेव सुनिष्कृतं श्रेष्ठं प्रायश्चित्तम् । यतो नामव्याहरणात् तद्विषया सेव्यतया भगवद्विषया पुरुषस्य मतिर्भवति । यद्वा । तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय इति

१ रागादिभिरप्राप्तार्थत्वेन ।

CC-0. In Public Domain. Digitization by eGangotri

भगवतो मतिर्भवति ॥ ९ ॥ १० ॥ नेति ॥ यथा उदाहृतैः मनोनिवेशराहित्येनाप्युच्चारितमात्रैः हरेर्नामपदैः ननामीत्यादिक्रियानिरपेक्षैरेव अघवान् पापी विशुद्ध्यति तथा ब्रह्मवादिभिर्मन्वादिभिरुदितैर्विहितैर्व्रतादिभिर्निष्कृतैः प्रायश्चित्तैर्न विशुद्ध्यति । यतः तन्नामपदोच्चारणम् उत्तमश्लोकस्य महायशस्विनो भगवतो ये गुणा ऐश्वर्यादयस्तेषामुपलम्भकं प्रकाशकं भवति न त्वन्यव्रतवत्पापनिवृत्तिमात्रोपक्षीणम् ॥ ११ ॥ नैकान्तिकमिति ॥ तत्प्रायश्चित्तान्तरं नैकान्तिकमत्यन्तशोधकं न भवति कुतः हि यस्मात्तस्मिन्निष्कृते प्रायश्चित्ते कृतेऽपि पुनः असत्पथे पापमार्गे मनो धावति अत्यन्तशुद्धौ तन्न स्यादिति भावः । चेत् यद्येवं तत्तदा कर्मणां पापानां निर्हारमात्यन्तिकं नाशमिच्छतां हरेर्गुणानुवाद एव खलु निश्चयेन प्रायश्चित्तं यतोऽसौ सत्वभावनः पापमूलाविद्यानाशकत्वादत्यन्तान्तःकरणशोधकः ॥ १२ ॥ अथेति ॥ यत् यस्मादसौ म्रियमाणो भगवन्नाम समग्रहीत् संपूर्णमुच्चारितवान् नामैकदेशेनाप्यलमिति भावः । म्रियमाण इत्यनेन पुनः पापान्तरासम्भव उक्तो न तु तत्कालत्वमेव विवक्षितं मरणकाले[1] कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसम्भवात् । न च विधिं विना काकतालीयनामोच्चारणं पापापहमिति प्रमाणमस्ति । अथ तस्मात् कृतमशेषाणामघानां निष्कृतं प्राय-

न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुध्यत्यघवान् व्रतादिभिः ॥ यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकम् ॥११॥ नैकान्तिकं तद्द् हि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे ॥ यत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः ॥ १२ ॥ अथैनं मापनयत कृताशेषाघनिष्कृतम् ॥ यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ १३ ॥ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह पुमान् नार्हति यातनाम् ॥ १५ ॥

श्चित्तं येन तमेनमपमार्गेण मा नयत ॥ १३ ॥ ननु नायं भगवन्नामाग्रहीत् किंतु पुत्रनामैवातः कथं तेन पापनिवृत्तिरित्याशङ्क्याहुः—साङ्केत्यमिति ॥ साङ्केत्यं पुत्रादौ सङ्केतः । स्वार्थे ष्यञ् । सर्वत्र तृतीयार्थे प्रथमा । सङ्केतादिभिरपीत्यर्थः । पारिहास्यं प्रीतिगर्भमेव न तु निन्दागर्भम् । भो विख्यातकीर्ते कृष्ण दृष्टा तव मर्यादा रासोत्सव इति परिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं योऽह्यनेककोटिब्रह्माण्डानि धत्ते तेन कृष्णेन गोवर्द्धनोद्धारे कः श्रमः कृतः स्यात् मम भाग्यमेवेदृग्घरिणा किं कर्त्तव्यमिति मर्यादागर्भेण हेलया कृतं नतु निन्दागर्भितं तथा सति "निन्दां भगवतः शृण्वन्" इत्याद्युक्तनिन्दाश्रवणादिदोषप्रसङ्गात् । यद्वा । हेलया गिरिरुद्धृत इतिवत् प्रयत्नराहित्येन अबुद्धिपूर्वकं यदृच्छया कृतमिति वैकुण्ठस्य भगवतो नाम्नां ग्रहणमुच्चारणमशेषाणि वासनापर्यन्तानि समूलानि अघानि पापानि हरतीति तथा विदुः शास्त्ररहस्यज्ञा जानन्ति ॥ ॥ ६ ॥
॥ १४ ॥ साङ्केत्यादिभ्योऽन्यत्र वैवश्येऽपि पापनाशमाह—पतित इति ॥ पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नो भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरादिना आहतो दण्डादिना अत एवावशेन वेदनादिवशेनापि यः पुमान् हरिरित्याह स यातनां नार्हति पुमानित्यनेन नात्र वर्णाश्रमादिनियमः किंतु प्राणिमात्रमधिकारीति सूचितम् ॥ १५ ॥

१ मरणकाले नामोच्चारः कार्य इति विधिकल्पनं न विवाक्षितामित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु महतः पापस्य महदेव प्रायश्चितं युक्तं न त्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादितारतम्यवत् तत्राहुः—गुरूणामिति ॥ गुरूणां पापानि गुरूणि प्रायश्चित्तानि लघूनां च पापानां लघूनि प्रायश्चितानि महर्षिभिः ज्ञात्वा विचार्योक्तानि अतस्तत्र तथैव व्यवस्था । हरिनाम्नस्तु नेयं व्यवस्था। "विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैः।" इत्युक्तेः ॥ १६ ॥ किञ्च—तैरिति ॥ अतस्तैस्तपोदानजपादिभिः प्रायश्चितैस्तान्येवाघानि पूयन्ते नश्यन्ति । पूङ् विनाशे । अधर्मजम् अधर्मानुष्ठानाज्जातं तद्धृदयं तेषाम् अघानां हृदयं सूक्ष्मरूपं संस्काराख्यं तु न नश्यति। ईशाङ्घ्रिसेवया श्रवणादिभगवद्भक्त्या तु तदपि नश्यति । अयं भावः । महान्त्यपि पापानि सकृदुच्चारितेनैव नाम्ना दीपेन गाढध्वान्तानीव निवर्त्तन्ते तदावृत्त्या तु पापान्तरस्यानुत्पत्तिः दीपधारण इव तमोन्तरस्य ततश्च वासनाक्षयाद्धृदयशुद्धिः पापक्षयश्च भवति एतदर्थमेव तत्र तत्रावृत्तिविधानम् । " स्मरतां तमहर्निशम् " इत्यादौ अत्रापि " गुणानुवादः खलु सात्वभावनः " इत्यादि । अतोऽजामिलस्य हरिनाम्नैव सर्वपापक्षयः । वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति ॥ १७ ॥ अज्ञा-

गुरूणां च लघूनां च गुरूणि च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १६ ॥ तैस्तान्यघानि पूयन्ते तपोदानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशाङ्घ्रिसेवया ॥ १७ ॥ अज्ञानादथ वा ज्ञानादुत्तमश्लोकनाम यत् ॥ संकीर्तितमघं पुंसो दहेदेधो यथाऽनलः ॥ १८ ॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजानतोऽप्यात्मगुणं कुर्यान्मन्त्रोऽप्युदाहृतः ॥ १९ ॥ श्रीशुक उवाच ॥ त एवं सुविनिर्णीय धर्मं भागवतं नृप ॥ तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥ २० ॥ इति प्रत्युदिता याम्या दूता यात्वा यमान्तिकम् ॥ यमराज्ञे यथासर्वमाचचक्षुरारिंदम ॥ २१ ॥

नादिति ॥ सर्वपापप्रायश्चित्तमिदमिति ज्ञानादथवा अज्ञानादपि यदुत्तमश्लोकस्य भगवतो विष्णोर्नाम संकीर्त्तितं तत्पुंसः कीर्त्तयतः प्राणिनोऽघं पापं दहेदेवेति । यथा बालेनाज्ञानादपि काष्ठराशौ प्रक्षिप्तोऽग्निस्तं दहेदेवेति ॥ १८ ॥ नन्विदं पर्षदनुपदिष्टं श्रद्धाहीनं चेति कथं प्रायश्चित्तं स्यात्तत्राहुः—यथेति ॥ यथा वीर्यतमं वीर्यवत्तमम् । अर्शआद्यजन्तात्तमप् । अगदमौषधं यदृच्छयाऽकस्मादेव तत्प्रभावज्ञानाभावाच्छ्रद्धाहीनेनाप्युपयुक्तं भक्षितं सत्तस्याजानतोऽप्यात्मगुणमारोग्यं बलपुष्ट्यादिकं च कुर्यादेव तथा नामात्मको मन्त्रोऽप्युदाहृतः उच्चारितः आत्मगुणं पापनिवृत्तिं कुर्यादेव नहि वस्तुशक्तिः श्रद्धामपेक्षते न च नाममाहात्म्यवादाः अर्थवादत्वान्न स्वार्थे प्रमाणानीति वाच्यम् । " अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः । स पापिष्ठो मनुष्याणां नरके पतति स्फुटम् ॥ " इत्यादिभिरर्थवादत्वकल्पने दोषात् ॥ १९ ॥ ते इति ॥ हे नृपते भगवत्पार्षदाः भागवतं धर्मं सुष्ठु युक्तिपूर्वकं निर्णीय बलात्कारेण तं विप्रं याम्यपाशान्निर्मुच्य मृत्योर्देहवियोगलक्षणादप्यमूमुचन् मोचयामासुः ॥ २० ॥ इतीति ॥ हे अरिन्दम प्रत्युदिता निराकृता यमसंबन्धिनो दूता यमस्यान्तिकं समीपं यात्वा गत्वा तस्मै यमराजाय तत्सर्वमाचचक्षुः कथयामासुः । तङभाव आर्षः । यमराज्ञे यथा सर्वमिति पाठे टजभाव आर्षः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा यथावत् ॥ २१ ॥ द्विज इति ॥ द्विजोऽजामिलो यमपाशाद्विनिर्मुक्तोऽत एव गतभीर्निर्भयोऽत एव प्रकृतिं स्वस्थचित्ततां गतः तेषां विष्णुदूतानां दर्शनेन उत्सवो यस्य सः तान्विष्णोः किंकरान् शिरसा ववन्दे ॥ २२ ॥ तं विवक्षुमिति ॥ हे अनघ महापुरुषस्य भगवतः किङ्कराः तदानीं तस्यायुःशेषतया भगवत्पदनयनस्यायुक्तत्वात्तं विवक्षुं किंचिद्वक्तुमिच्छन्तमभिप्रेत्य ज्ञात्वा तस्य पश्यत एव सतस्तत्रैव ते सहसा अकस्मादेवान्तर्दधिरे न च शिष्टायुषस्तस्य मध्य एव कथं यमदूता ग्रहणे प्रवृत्ता इति शङ्कनीयम् पापिनामकालेऽपि मरणसम्भावनया भ्रान्त्या तत्र प्रवृत्तिः स एव समयो मरणकालत्वेनोपचरितः वस्तुतः पापक्षयादायुर्भङ्गाभाव इति ॥ २३ ॥ अजामिल इति युग्मम् ॥ अजामिलोऽपि यमकृष्णयोर्दूतानां संवादे कृष्णदूतेभ्यो भागवतं शुद्धं धर्मं तथा यमदूतेभ्यस्त्रैविद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयमविद्वत्कर्तृकं संसारफलकं धर्मं प्रायश्चित्ताद्यात्मकं चाकर्ण्य श्रुत्वा अथ हरेर्माहात्म्यश्रवणाद्धेतोः आशु भगवति भक्तिमानासीत् आत्मनः अशुभं स्मरतस्तस्य महाननुताप आसीत् ॥ २४ ॥ २५ ॥ अहो इति ॥ येन

द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ ववन्दे शिरसा विष्णोः किंकरान् दर्शनोत्सवः ॥ २२ ॥ तं विवक्षुमभिप्रेत्य महापुरुष-
किंकराः ॥ सहसा पश्यतस्तस्य तत्रान्तर्दधिरेऽनघ ॥ २३ ॥ अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविद्यं
च गुणाश्रयम् ॥ २४ ॥ भक्तिमान् भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो महानासीत् स्मरतोऽशुभमात्मनः ॥ २५ ॥ अहो मे
परमं कष्टमभूदविजितात्मनः ॥ येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ ॥ धिङ् मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम् ॥
हित्वा बालां सतीं योऽहं सुरापामसतीमगाम् ॥ २७ ॥ वृद्धावनाथौ पितरौ नान्यबन्धू तपस्विनौ ॥ अहो मयाऽधुना त्यक्तावकृतज्ञेन
नीचवत् ॥ २८ ॥ सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे ॥ धर्मघ्नाः कामिनो यत्र विन्दन्ति यमयातनाः ॥ २९ ॥ किमिदं स्वप्न
आहोस्वित् साक्षाद्दृष्टमिहाद्भुतम् ॥ क्व याता अद्य ते ये मां व्यकर्षन् पाशपाणयः ॥ ३० ॥

मया वृषल्यां शूद्रयां जायता पुत्ररूपेण जायमानेन । आर्षः शता । आत्मना स्वेन ब्रह्म विप्लावितं ब्राह्मणत्वं नाशितं तस्य अविजितात्मनः अवशीकृतचित्तस्य मे मम परमं कष्टमभूत् महती हानिर्जाता ॥ २६ ॥ धिगिति ॥ अतः सद्भिर्विगर्हितं दुष्कृतं पापकर्त्तारं कुलस्य कज्जलं कलङ्कभूतं मां धिक्। योऽहं सतीं बालां हित्वा असतीं सुरापामगां गतवानस्मि ॥ २७ ॥ वृद्धाविति ॥ अहो अकृतज्ञेन पालनाद्युपकारं विस्मृतवता मया अधुना तत्क्षणमेव दासीसंबन्धसमय एव वृद्धौ तत्राप्यनाथौ रक्षकहीनौ नास्ति अन्यो बन्धुः पुत्रादिर्ययोस्तौ अत एव तपस्विनौ सन्तप्तौ मातापितरौ नीचवत् शूद्रान्त्यजादिवत् त्यक्तौ अनादृतौ ॥ २८ ॥ सोऽहमिति ॥ स पापिष्ठोऽहं भृशदारुणे नरके व्यक्तं स्फुटं पतिष्यामि । यत्र नरके धर्मघ्नाः कामिनः यमयातनाः विन्दन्ति ॥ २९ ॥ किमिति ॥ इदमद्भुतमाश्चर्यं मया किं स्वप्ने दृष्टमाहोस्वित् अथवा इह जाग्रदवस्थायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षात्प्रत्यक्षमेव दृष्टं ये पाशपाणयो विकृतवेषाः मां व्यकर्षन् तेऽद्य क्व याताः ॥ ३० ॥ अथेति ॥ ये च पाशैर्बध्वा भुवोऽधो नरकं प्रति नीयमानं मां व्यमोचयन् चारु दर्शनं येषां ते चत्वारः सिद्धा अथ अपि क्व गताः ॥ ३१ ॥ अथेति ॥ यद्यप्यहमस्मिन् जन्मनि दुर्भगः पापीयान् अथापि मे जन्मान्तरीयेण मङ्गलेन कल्याणकर्मणा भवितव्यम् । येन मङ्गलेन हेतुना विबुधोत्तमानां दर्शने जाते सति मे आत्मा मनः प्रसीदति । यद्वा । विबुधोत्तमानां दर्शने विषये केनापि मङ्गलेन पुण्येन भवितव्यम् इति योजना । कार्यद्वारा कारणमनुमेयं तद्विना भक्तिबीजवपनासंभवात् अत एव स्वपुत्रस्य नारायण इति नाम चकार ॥ ३२ ॥ अन्यथेति ॥ अन्यथा पूर्वपुण्यं विना म्रियमाणस्येह विवशावस्थायाम् अशुचेः वृषलीपतेः मम जिह्वा वैकुण्ठस्य भगवतो नामग्रहणं वक्तुं कर्तुं नार्हति । यद्वा । गृह्यते वशीक्रियते भगवाननेन इति ग्रहणमिति पृथक्पदं नामविशेषणम् ॥ ३३ ॥ क्वेति ॥ कितवः वञ्चकः पापः पापीयान् ब्रह्मघ्नः विप्रत्वनाशकः निरपत्रपः निर्लज्जः अहं क्व नारायणेत्येतन्मङ्गलकरं भगवन्नाम क्व ॥ ३४ ॥

अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः ॥ व्यमोचयन् नीयमानं बद्ध्वा पाशैरधो भुवः ॥ ३१ ॥ अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ॥ भवितव्यं मङ्गलेन येनात्मा मे प्रसीदति ॥ ३२ ॥ अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ॥ वैकुण्ठनामग्रहणं जिह्वा वक्तुमिहार्हति ॥ ३३ ॥ क्व चाऽहं कितवः पापो ब्रह्मघ्नो निरपत्रपः ॥ क्व च नारायणेत्येतद्भगवन्नाम मङ्गलम् ॥ ३४ ॥ सोऽहं तथा यतिष्यामि यतचित्तेन्द्रियानिलः ॥ यथा न भूय आत्मानमन्धे तमसि मज्जये ॥ ३५ ॥ विमुच्य तमिमं बन्धमविद्याकामकर्मजम् ॥ सर्वभूतसुहृच्छान्तो मैत्रः करुण आत्मवान् ॥ ३६ ॥ मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया ॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ॥ ३७ ॥ ममाऽहमिति देहादौ हित्वा मिथ्याऽर्थधीर्मतिम् ॥ धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ॥ ३८ ॥

सोऽहमिति ॥ सोऽहं यतः वशीकृताः चित्तेन्द्रियानिला येन तथाभूतः सन् भूयः अन्धे तमसि महामोहव्याप्ते संसार आत्मानं यथा न मज्जये तथा यतिष्यामि । तङ्भाव आर्षः ॥ ३५ ॥ विमुच्येति युग्मम् ॥ अविद्यादेहादावात्मबुद्धिः ततः कामः विषयभोगाभिलाषः ततः कर्म लौकिकालौकिकव्यापारः ततो जातो यो गृहपुत्रकलत्राद्यात्मको विविधो बन्धस्तमिमं विमुच्य त्यक्त्वा शान्तः विषयभोगाभिलाषादिशून्यः सर्वभूतेषु सुहृत्सुखादिसमदर्शी तेषु करुणो दयावान् मैत्रः हितकारी आत्मवान् समाहितचित्तः सन् योषिन्मय्या आत्मनो हरेर्मायया मोहिन्या शक्त्या ग्रस्तमात्मानं मोचये क्रीडामृगो वानर इवाधमोऽज्ञोऽहं यया स्त्रियैव विक्रीडितः ॥ ३६ ॥ ३७ ॥ ममेति ॥ पूर्वं मिथ्याभ्रान्तिरूपैव धनपुत्रादिष्वर्थधीः परमार्थबुद्धिर्यस्य सोऽहं देहादौ ममाहमिति मतिं हित्वा त्यक्त्वा । यद्वा । देहादौ मिथ्याभूता अमी अर्था इति धीर्यस्य तथा भूतः सन् ममाहमिति मतिं हित्वा तस्य भगवतो नामकीर्त्तनादिभिः शुद्धं मनस्तस्मिन्भगवति धास्ये धारयिष्यामि ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं साधुषु भगवत्पार्षदेषु यः क्षणमात्रसङ्गस्तेन जातसुनिर्वेद उत्पन्नवैराग्योऽत एव मुक्तं सर्वमनुबन्धनं पुत्रादिस्नेहो येन सः गङ्गाद्वारं हरिद्वारमुपेयाय जगाम ॥ ३९ ॥ स इति ॥ तस्मिन् देवसदने आसीनः योगमास्थितः प्रत्याहृतो विषयेभ्य इन्द्रियग्रामो येन सः अजामिलः आत्मनि भगवति मनः युयोज युयुजे ॥ ४० ॥ तत इति ॥ ततश्च भगवतः करपादमुखोदरादितत्तदवयवान् ध्यायन् गुणेभ्यः देहेन्द्रियादिभ्य आत्मानं मनो वियुज्य विशोध्य आत्मसमाधिना चित्तैकाग्र्येण ब्रह्मणि व्यापकेऽनुभवात्मनि ज्ञानस्वरूपे सच्चिदानन्दात्मके भगवद्धाम्नि भगवत्स्वरूपे युयुजे ॥ ४१ ॥ यर्हीति ॥ यर्हि यदा तस्मिन् भगवद्धाम्नि उपारता निश्चला धीर्यस्य स तथा स्थितः तस्मिन्नेव काले पुरः स्वपुरतः प्रागुपलब्धान् दृष्टानेव पुरुषानद्राक्षीत् उपलभ्य च स द्विजः उत्थाय तान् शिरसा ववन्दे ॥ ४२ ॥ हित्वेति ॥ तेषां दर्शनादनु अनन्तरं सद्य एव हरिद्वारसंज्ञके तीर्थे गङ्गायां स्वकलेवरं हित्वा भगवत्पार्श्ववर्त्तिनां पार्षदानां शुद्धसत्त्वात्मकं चतुर्भुजादिविशिष्टं भगवत्सेवोपयोगि स्वरूपं जगृहे ॥ ४३ ॥ साकमिति ॥

इति जातसुनिर्वेदः क्षणसङ्गेन साधुषु ॥ गङ्गाद्वारमुपेयाय मुक्तसर्वानुबन्धनः ॥ ३९ ॥ श्रीशुक उवाच ॥ स तस्मिन् देवसदन आसीनो योगमा-
श्रितः ॥ प्रत्याहृतेन्द्रियग्रामो युयोज मन आत्मनि ॥ ४० ॥ ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ॥ युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवा-
त्मनि ॥ ४१ ॥ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलभ्योपलब्धान्प्राग् ववन्दे शिरसा द्विजः ॥ ४२ ॥ हित्वा कलेवरं तीर्थे गङ्गायां
दर्शनादनु ॥ सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनाम् ॥ ४३ ॥ साकं विहायसा विप्रो महापुरुषकिंकरैः ॥ हैमं विमानमारुह्य ययौ यत्र श्रियः
पतिः ॥ ४४ ॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ॥ निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥
॥ ४५ ॥ नातः परं कर्मनिबन्धकृन्तनं मुमुक्षतां तीर्थपदानुकीर्तनात् ॥ न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ॥ ४६ ॥

ततः स विप्रो महापुरुषकिङ्करैर्भगवत्पार्षदैः साकं हैमं सौवर्णं विमानमारुह्य यत्र श्रियः पतिर्भगवान् विष्णुर्विराजते तत्र विहायसा आकाशमार्गेण ययौ ॥ ४४ ॥ एवमिति ॥ सः अजामिलः एवं वर्णितप्रकारेण विप्लाविताास्त्यक्ताः सर्वे धर्मा येन सः हतं व्रतं स्वदारनियमादिर्यस्य सः गर्ह्येण निन्दितकर्मणा चौर्यादिना पतितो ब्राह्मण्याद् भ्रष्टः सर्वत्र हेतुः दास्याः पतिरिति अत एव यमदूतैर्निरये निपात्यमानोऽपि भगवन्नाम गृह्णन् सद्यस्तत्क्षणमेव यमपाशाद्विमुक्तः ॥ ४५ ॥ नेति ॥ अतः कारणात् तीर्थानि पादे यस्य तस्य हरेरनुकीर्त्तनात् नामसंकीर्त्तनादेः सकाशात् परं श्रेष्ठं मुमुक्षतां कर्मनिबन्धकृन्तनं पापमूलोच्छेदकं नास्ति । यत् यस्मात् भगवन्नामसंकीर्त्तनादितः पुनर्मनः कर्मसु दुष्टाचारेषु प्रायेण न सज्जते ततो नामसंकीर्त्तनादेरन्यथा प्रायश्चितान्तरैस्तु मनः पुनः रजस्तमोभ्यां कलिलं मलिनं भवत्येव दुराचारप्रवृत्तिदर्शनादिति भावः ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ एवं वर्णितमघापहं परमं गुह्यं शास्त्ररहस्यम् इतिहासं श्रद्धया विश्वासेन भक्त्या च युक्तो यो मर्त्यः शृणुयात् यश्चानुकीर्तयेत् स यद्यप्यमङ्गलः पापीयांस्तथापि नरकं नैव याति । यमकिङ्करैश्चेक्षितो न भवति किंतु विष्णुलोके महीयते विराजते ॥ ४७ ॥ ४८ ॥ म्रियमाण इति ॥ यदि म्रियमाणो विवशावस्थायां श्रद्धाभक्तिरहितोऽजामिलोऽतिपातक्यपि पुत्रोपचारितमपि हरेर्नाम गृणन् भगवद्धामागाच्चदा सावधानतायां श्रद्धाभक्तियुक्तो निरपराधी साक्षात्तन्नाम गृणंस्तद्धाम यातीति किं पुनर्वक्तव्यम् ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य द्वितीये निरमादिमाम् ॥ २ ॥ तृतीये बोधिता विष्णोरुत्कर्षं सर्वतोऽधिकम् ॥ स्वदूता धर्मराजेन तत्र श्लोकाः शरांभयः ॥ उवाचपञ्चकं षट्युक्चत्वारिंशदनुष्टुभः ॥ ३ ॥ निशम्येति ॥ एवं हता आज्ञा यस्य सः अयं सर्वोऽपि जनो यस्य वशे तिष्ठति स देवो धर्मराजः स्वभटैरुपवर्णितं वृत्तं निशम्य मुरारेर्नैदेशिकैः किङ्करैर्विहतान् तान् स्वभटान् प्रति किमाह स्म ॥ १ ॥ यमस्येति ॥ हे ऋषे यमस्य देवस्य दण्डभङ्गः आज्ञापरिवर्त्तनं

य एवं परमं गुह्यमितिहासमघापहम् ॥ शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्याऽनुकीर्तयेत् ॥४७॥ न वै स नरकं याति नेक्षितो यमकिंकरैः ॥ यद्यप्यमङ्गलो मर्त्यो विष्णुलोके महीयते ॥४८॥ म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितम् ॥ अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन् ॥ ४९ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धेऽजामिलोपाख्याने भगवन्नाममाहात्म्यवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ राजोवाच ॥ निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान्प्रति धर्मराजः ॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयम् ॥ १ ॥ यमस्य देवस्य न दण्डभङ्गः कुतश्चनर्षे श्रुतपूर्व आसीत् ॥ एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्ये इति मे विनिश्चितम् ॥ २ ॥ श्रीशुक उवाच ॥ भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः ॥ पतिं विज्ञापयामासुर्यमं संयमनीपतिम् ॥ ३ ॥ यमदूता ऊचुः ॥ कति सन्तीह शास्तारो जीवलोकस्य वै प्रभो ॥ त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥ ४ ॥ यदि स्युर्बहवो लोके शास्तारो दण्डधारिणः ॥ कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ॥ ५ ॥

कुतश्चन कस्मादपि सकाशात् श्रुतपूर्वो नासीत् अतः सर्वस्यापि लोकस्य संशयोऽस्ति । हे मुने एतत् एतं सामान्ये क्लैब्यम् । लोकसंशयं त्वत्तोऽन्यः हि यस्मान्न वृश्चति न च्छिनत्ति अल्पज्ञत्वाच्छेत्तुं न शक्नोतीति तु मे निश्चितम् अतो भवानेव ब्रवीतु ॥ २ ॥ भगवदिति ॥ हे राजन् भगवत्पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः यमदूताः स्वपतिं संयमिनीपतिं यमं विज्ञापयामासुः ॥ ३ ॥ कतीति ॥ हे प्रभो त्रैविध्यं त्रिविधं । स्वार्थे ष्यञ् । सत्त्वादिगुणत्रयहेतुकं पुण्यपापमिश्रात्मकं । यद्वा । त्रैविध्यं यथा स्यात्तथा कर्म कुर्वतो जीवलोकस्य शास्तारः शिक्षकाः कर्मफलस्याभिव्यक्तिहेतवो दातार इह त्रिलोक्यां कति सन्तीत्याक्षेपोक्तिः ॥ ४ ॥ यदीति ॥ यदि लोके शास्तारो दण्डधारिणो बहवः स्युस्तर्हि मृत्युः पापफलं नरकात्मकं दुःखम् अमृतं पुण्यफलं स्वर्गात्मकं सुखमेव वा कस्य स्यातां न कस्यापीत्यर्थः । कस्य वा न स्यातां सर्वस्यापि

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

स्यातामित्यर्थः । अयं भावः । यदि बहवः शास्तारः स्युः तर्हि शास्तृणां विप्रतिपत्तौ सुखदुःखे कस्यापि न स्यातां परस्परविरोधेनोभयोरपि प्रतिबन्धात् । ऐकमत्ये तु एकः सुखं कर्तुमिच्छति दुःखं चान्यस्तयोश्चान्योन्यकार्यानुमोदनेन सर्वेषामपि सुखदुःखे स्याताम् ॥ ५ ॥ ननु बहूनां कर्मिणां व्यवस्थयैव शास्तृबहुत्वमतो न दोषस्तत्राहुः—किन्त्विति ॥ बहूनां कर्मिणां व्यवस्थया शास्तृबहुत्वे यत् शास्तृत्वं तत् स्यात् घटेत तत्तु यथा मण्डलवर्तिनामेकदेशवृत्तित्वात् उपचारमात्रं स्यात् निरङ्कुशत्वाभावात् चक्रवर्तिवन्मुख्यं शास्तृत्वं न स्यात्तथा च मुख्यः शास्तान्य एव कल्प्यः स्यादिति भावः ॥ ६ ॥ अत इति ॥ यस्मादेवं शास्तृबहुत्वं मुख्यतया न घटतेऽतोऽस्मज्ज्ञाने तु सेश्वराणां देवैः सहितानां सर्वभूतानां त्वमेक एवाधीश्वरः स्वामी शास्ता शिक्षकः नृणामधिकारिणां शुभाशुभविवेचकः पुण्यपापनिर्णयकृद्दण्डधरः पापिनां पुण्यवतां सुखदश्चेति ज्ञेयम् ॥ ७ ॥ तस्येति ॥ तस्यैवं प्रभावस्य ते तव विहितो निरूपितो विहतः इति पाठे तु खण्डितो दण्डो लोकेऽधुना न प्रवर्त्तते यतः चतुर्भिरद्भुतरूपैः सिद्धैः ते तवाज्ञा विप्रलम्भिता वञ्चिता उल्लङ्घितेत्यर्थः ॥ ८ ॥ नीयमानमिति ॥ तवादेशादाज्ञातोऽस्माभिर्यातनागृहान् प्रति नीयमानं पातकिनमजामिलं प्रसह्य

किंतु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणाम्॥ शास्तृत्वमुपचारो हि यथा मण्डलवर्तिनाम् ॥६॥ अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः॥ शास्ता दण्डधरो नृणां शुभाशुभविवेचनः॥७॥तस्य ते विहितो दण्डो न लोके वर्ततेऽधुना॥चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलम्भिता ॥८॥ नीयमानं तवादेशादस्माभिर्यातनागृहान्॥व्यमोचयन्पातकिनं छित्त्वा पाशान्प्रसह्य ते ॥९॥ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम् ॥ नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतम् ॥१०॥ श्रीशुक उवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः॥प्रीतः स्वदूतान्प्रत्याह स्मरन्पादाम्बुजं हरेः ॥११॥ यम उवाच ॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वम् ॥ यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥ १२ ॥

बलात्कारेण पाशान् छित्त्वा ते सिद्धपुरुषा व्यमोचयन् ॥ ९ ॥ तानिति ॥ नारायणेत्यभिहिते सति मा भैः भयं मा कुर्विति वदन्तः शीघ्रमाययुरागताः मा भैरिति "बहुलं छन्दसि" इति अपृक्तहल ईडभावः । तान् ते त्वत्तो वेदितुमिच्छामो यदि नोऽस्माकं क्षमं हितं मन्यसे तर्हि वद अन्यथा अज्ञानतस्तदवज्ञानेन तवाप्यनर्थः स्यात् ॥ १० ॥ इतीति ॥ इत्येवं स आपृष्टः प्रजानां संयमनः यमो देवो नारायणनामश्रवणेन प्रीतः हरेः पादाम्बुजं स्मरन् स्वदूतान् प्रत्याह स्म ॥ ११ ॥ पर इति ॥ यूयं यं परं जानीथ तस्मात् मत् मत्तः इत्युपलक्षणं मदुपलक्षितेभ्य इन्द्रवरुणादिसर्वलोकपालेभ्योऽन्यः पर उत्कृष्टश्च जगतो जङ्गमस्य तस्थुषः स्थावरस्य चाधीश्वरोऽस्ति । अहं तु जङ्गमानामेव तत्रापि नृणामेव तत्रापि पापिनामेव तत्किङ्करः सन्नीश्वरः स तु सर्वेश्वरः यस्य त्वंशेभ्यो विष्णुब्रह्मरुद्रेभ्योऽस्य विश्वस्य यथाक्रमं स्थितिः पालनं जन्मोत्पत्तिः नाशः प्रलयश्च भवति । यत्र यस्मिन् ऊर्द्ध्वतिर्यक्तन्तुषु पटवद्विश्वमोतं प्रोतं च नसि नासिकायामोतः प्रोतरज्जुनिबद्धः बलीवर्दस्तद्वत् लोको यस्य वशेऽस्ति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ यो निजायां स्वस्मात्प्रादुर्भूतायां तन्तीस्थानापन्नायां वेदलक्षणायां वाचि ब्रह्मादिनामभिः खण्डरज्जुस्थानीयैर्जनान् ब्राह्मणादीन् बध्नाति तत्तदधिकारप्राप्तकर्मसु प्रयोजयति । यथा तन्त्यां दीर्घरज्ज्वां दामभिः रज्जुखण्डैर्निबद्धा गाः बलीवर्दान् बध्नाति तथेत्यर्थः । त इमे जनाः नामकर्मभिः निबन्धैर्बद्धा अत एव चकिता भीताः सन्तो यस्मै बलिं वहन्ति स्वस्वकर्मभिर्यमाराधयन्ति सः सर्वेश्वरः ॥ १३ ॥ अहमिति युग्मम् ॥ अहं यमः प्रचेताः वरुणः ईशो महादेवः विश्वसृजो मरीच्यादयः अमराणामीशा बृहस्पत्यादयः अन्ये च ये मनुष्यादिषु महान्तः स्पष्टाः शेषाः न स्पृष्टं रजस्तमश्च यैस्ते तत्र हेतुः सत्त्वं प्रधानं येषां ते एवंभूता अपि स्पृष्टमायाः मायया मोहिताः एते यस्येहितमभिप्रेतं चेष्टितं वा न विदुः ततस्तेभ्योऽन्ये न विदुरिति किं पुनः वक्तव्यम् ॥ १४ ॥ १५ ॥ यमिति ॥ आत्मनां स्थावरजङ्गमशरीराणां जीवानामन्तर्हृदि सन्तं विद्यमानमप्यात्मानं सर्वव्यापकं ततस्तेभ्य इन्द्रियादिभ्यः परं यं गोभिर्ज्ञानेन्द्रियैर्मनसा सङ्कल्पात्मकेन हृदा चित्तेन असुभिः प्राणैः प्राणप्रधानैः कर्मेन्द्रियैर्गिरा शब्दात्मकेन

यो नामभिर्वाचि जनान्निजायां बध्नाति तन्त्यामिव दामभिर्गाः ॥ यस्मै बलिं त इमे नामकर्मनिबन्धबद्धाश्चकिता वहन्ति ॥ १३ ॥ अहं महेन्द्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिञ्चः ॥ आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ॥ १४ ॥ अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः ॥ यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये ॥ १५ ॥ यं वै न गोभिर्मनसाऽसुभिर्वा हृदा गिरा वाऽसुभृतो विचक्षते ॥ आत्मानमन्तर्हृदि सन्तमात्मनां चक्षुर्यथैवाकृतयस्ततः परम् ॥ १६ ॥ तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ॥ प्रायेण दूता इह वै मनोहराश्चरन्ति तद्रूपगुणस्वभावाः ॥ १७ ॥ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि ॥ रक्षन्ति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥१८॥ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः ॥ न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः ॥ १९ ॥

शास्त्रेण च असुभृतो जीवा न विचक्षते न पश्यन्ति न जानन्ति न प्राप्नुवन्ति च । यथा आकृतयो रूपाणि कर्तृभूतानि ततः परम् आकृतीनां प्रकाशकं चक्षुः कर्मभूतं यथा न पश्यन्ति तथेत्यर्थः । न हि प्रयाता प्रयाणस्य विषय इति भावः । एवंभूतः सर्वेश्वरो मदन्योऽस्ति ॥ १६ ॥ ननु भवत्वन्य ईश्वरः परं तु अजामिलस्य रक्षितारः के इत्यत आह—तस्येति ॥ आत्मतन्त्रस्य अधीशितुः परस्य मायाधिपतेः महात्मनः तस्य हरेः तस्यैव रूपं चतुर्भुजादिविशिष्टं गुणाः प्रभावादयः स्वभावो भक्तवात्सल्यादिर्येषां ते मनोहरा दूताश्च इह प्रायेण चरन्ति ॥ १७ ॥ भूतानीति ॥ सुरैरपि पूजितानि दुर्दर्शानि द्रष्टुमप्यशक्यानि लिङ्गानि मूर्तयो येषां तानि यतो महाद्भुतानि अलौकिकरूपाणि विष्णोर्भूतानि भृत्यास्तद्भक्तिमतो भगवद्भक्तान् मर्त्यान् परेभ्यः कालकर्मादिभ्यो मत्तश्च सर्वतः सर्वत्र सर्वदैव रक्षन्ति ॥ १८ ॥ ननु ते कथमधर्मपक्षपातं कृतवन्तस्तत्राह—

Nepal Sanskrit University, Balmandir Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्ममिति ॥ साक्षाद्भगवत्प्रणीतं धर्मं तु सत्त्वप्रधाना ऋषयोऽपि न विदुः नापि देवाः न च सिद्धमुख्याः विदुः तदा रजःप्रधानाः असुराः मनुष्याः विद्याधरचारणादयः कुतो विदुः ॥ १९ ॥ ननु केऽपि न जानन्ति चेत्तस्य सत्त्वे किं मानमित्याशङ्क्याह—स्वयंभूरिति युग्मम् ॥ हे भटाः स्वयंभूर्ब्रह्मा शम्भुः शिवः कुमारः सनत्कुमारः मनुः स्वायम्भुवः वैयासकिः शुकः शेषाः स्पष्टाः । वयमिति अहमिति वक्तव्ये आत्मानमेव बहु मन्यमानो बहुत्वेन निर्दिष्टवान् । एते द्वादश वयं भागवतं भगवता प्रोक्तं गुह्यं धर्मं विजानीमः गुह्यत्वादेव स्वस्वस्मृतिशास्त्रेषु न स्फुटं प्रोक्तवन्तः । यं धर्मं ज्ञात्वैव पुरुषोऽमृतं मोक्षरूपं भगवन्तमश्नुते प्राप्नोति ॥ २० ॥ २१ ॥ एतावानिति ॥ अस्मिन् लोके पुंसां परः सर्वोत्कृष्टो धर्मः एतावानेव वेदरहस्यज्ञैः स्मृतः यस्तस्य भगवतो नामग्रहणादिभिः साधनभक्तिभिः भगवति परमपुरुषार्थरूपे प्रेमलक्षणो भक्तियोगः सः ॥ २२ ॥ नामेति ॥ हे पुत्रकाः हरेर्नामोच्चारणमाहात्म्यं पश्यत येन पुत्रोपचारितनामोच्चारणमात्रेणैव महापातकित्वेनाभिमतोऽजामिलोऽपि मृत्युपाशादमुच्यत ॥ २३ ॥ ननु नामाभासेन कथं सर्वपापक्षयः भक्त्यादेरपि विधानात् अत आह—एतावतेति ॥ भगवतो गुणनाम्नां भक्तवत्सलादीनां कर्मनाम्नां कंसारिरित्यादीनाम् उपलक्ष-

स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः ॥ प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ २० ॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः ॥ गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वाऽमृतमश्नुते ॥ २१ ॥ एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः ॥ भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ ॥ २२ ॥ नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ॥ अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥२३॥ एतावताऽलमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नाम् ॥ विक्रुश्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥ २४ ॥ प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययाऽलम् ॥ त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥ २५ ॥

णतया जन्मनाम्नां वासुदेवइत्यादीनामपि । यद्वा । गुणाः कर्माणि नामानि चेति द्वन्द्वः तेषां सम्यक्कीर्त्तनमिति यत् एतावता पुंसामघनिर्हरणाय पापक्षयमात्राय अलं पर्याप्तम् । यद्वा । अलं वारणार्थे उपयोगो नास्तीत्यर्थः । नामादीनामेकतरस्यापि असम्यक्कीर्त्तनादपि पापहरणस्य सिद्धेरिति यद्यस्मान्नारायणेति पुत्रं न तु नारायणं विक्रुश्य न तु श्रद्धादिपूर्वकं सम्यक्कीर्त्तयित्वा अघवानपि नतु विशुद्धः म्रियमाणः मरणदुःखेन विवशोऽपि न तु स्वस्थचित्तः अजामिलोऽपि महापापोऽपि न तु क्षुद्रपापः मुक्तिमियाय प्राप नतु पापनिर्हरणमात्रं भक्तिश्रद्धादिविधयस्तु वासनाक्षयार्थाः ॥ २४ ॥ ननु व्यर्थं तर्हि द्वादशाब्दादिस्मरणमिति तत्राह—प्रायेणेति ॥ अयं महाजनो धर्मशास्त्रप्रणेता तदिदं भागवतं धर्मं प्रायेण न वेद । अयं भावः । यथा मृतसंजीवनौषधिमजानन्तो वैद्या रोगनिर्हरणाय त्रिकटुकनिम्बादीनि स्मरन्ति तथा पूर्वोक्तस्वयंभूशम्भुप्रमुखद्वादशव्यतिरेकेणायं महाजनोऽतिगुह्यमिदमज्ञात्वा द्वादशाब्दादिकं स्मरतीति किंच मायया देव्या अलं विमोहितमतिरयं जनो मधु मधुरं यथा भवत्येवं पुष्पितायां पुष्पस्थानीयैरर्थवादैर्मनोह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रायां त्रय्यां जडीकृता अभिनिविष्टा मतिर्यस्य अतो वैतानिके महत्येव कर्मणि श्रद्धया युज्यमानो नाल्पे प्रवर्तते दृश्यते हि प्राकृतस्य लोकस्य महति मन्त्रादौ श्रद्धाल्पे चाश्रद्धा तस्मादस्य ग्राहको नास्तीति तैर्नोक्तम् । यद्वा । स्वाधीनः सिंहोऽस्त्येतावता श्वसृगालादिनिवारणाय तं यथा न प्रयुञ्जते तथातितुच्छत्वात्पापस्य न तन्निरसनाय परममङ्गलं हरेर्नाम स्मरन्ति । यद्वा । नाममाहात्म्यज्ञाने सर्वमुक्तिप्रसङ्गादित्येषा दिक् ग्रन्थविस्तरभयात्तु नातिप्रपञ्च्यते ॥ २५ ॥ एवमिति ॥ सुधियो जनाः एवं पूर्वोक्तं विमृश्य विचार्य सर्वात्मना एकाग्रेण मनसाऽनन्तेऽनन्तगुणे भगवति भावयोगं परमप्रेमोपायं नामसंकीर्त्तनादिकं विदधते । ये एवंभूतास्ते मे मम दण्डं नार्हन्ति तेषां भगवन्निष्ठानां पापप्रवृत्त्यसंभवात् । अथ कदाचित् यद्यमीषां प्रमादतः पातकं स्यात्तदा तदपि उरुगायस्य बहुधा वर्णितमाहात्म्यस्य भगवतो वादः नामकीर्तनमेव हन्ति नाशयति ॥२६॥ ते इति ॥ ये साधवः समदृशः भगवन्तं प्रपन्नाः शरणं गताः ते देवैः सिद्धैश्च परिगीताः स्तुताः पवित्राः गाथाः कथा येषां ते तथाभूताः सन्ति अतः हरेर्गदयाभिगुप्तान् सर्वतो रक्षितान्

एवं विमृश्य सुधियो भगवत्यनन्ते सर्वात्मना विदधते खलु भावयोगम् ॥ ते मे न दण्डमर्हन्त्यथ यद्यमीषां स्यात्पातकं तदपि हन्त्युरुगायवादः
॥ २६ ॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ॥ तान्नोपसीदत हरेर्गदयाऽभिगुप्तान्नैषां वयं न च वयः प्रभवाम दण्डे
॥ २७ ॥ तानानयध्वमसतो विमुखान्मुकुन्दपादारविन्दमकरन्दरसादजस्रम् ॥ निष्किञ्चनैः परमहंसकुलै रसज्ञैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान्
॥ २८ ॥ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविन्दम् ॥ कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥ तत्क्षम्यतां स भगवान्पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः ॥ स्वानामहो न विदुषां रचिताञ्जलीनां क्षान्तिर्गरीयसि नमः पुरुषाय भूम्ने ॥ ३० ॥ तस्मात्संकीर्तनं विष्णोर्जगन्मङ्गलमंहसाम् ॥ महतामपि कौरव्य विद्ध्यैकान्तिकनिष्कृतिम् ॥ ३१ ॥

तान् नोपसीदत तत्समीपमपि न गच्छत यतः एषां दण्डे वयं ब्रह्मादयः ईश्वराभिमानिनो न प्रभवाम तथास्मन्नियन्ता वयः कालश्च न प्रभवति ॥ २७ ॥ तानिति ॥ निष्किञ्चनैः परमहंसकुलैः रसज्ञैः जुष्टात् मुकुन्दस्य पादारविन्दयोर्यो मकरन्दरूपो रसस्तस्मात् विमुखान् अतः निरयस्य वर्त्मनि मार्गभूते गृहे अजस्रं निबद्धतृष्णान् तान् असतः दुष्टान् दण्डार्थमानयध्वम् ॥ २८ ॥ जिह्वेति ॥ यत् येषां जिह्वा एकदापि भगवद्गुणनामधेयं न वक्ति येषां चेतश्चैकदापि तस्य चरणारविन्दं न स्मरति येषां शिर एकदापि कृष्णाय नो नमति एवं न कृतं विष्णुसंबन्धि कृत्यं कर्त्तव्यं भजनं यैस्तानसतोऽसाधून् दण्डार्थमानयध्वम् ॥ २९ ॥ तदिति ॥ स्वपुरुषैः स्वदासैः नः अस्माभिर्यदसदन्याय्यं कृतं तत् स्वानां स्वकीयानाम् । अहो न विदुषां इति पाठे माहात्म्यमविदुषामित्यर्थः । रचिताञ्जलीनामस्माकमपराधं स भगवान् पुरुषः पुराणो नारायणः स्वयमेव क्षम्यतां सहतां । आर्षः प्रयोगः । यतः गरीयसि अतिशयेन गुरुतमे तस्मिन् क्षान्तिरेव युक्ता अतः भूम्ने परममहते पुरुषाय नमः ॥३०॥ तस्मादिति ॥ यस्माद्यमेनाप्येवमुक्तं तस्मात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे कौरव्य विष्णोर्नामसंकीर्त्तनं महतामप्यंहसां पापानामैकान्तिकनिष्कृतिं समूलानां प्रायश्चित्तं जगतां प्राणिनां मङ्गलं पुरुषार्थचतुष्टयप्रापकं च विद्धि ॥३१॥ शृण्वतामिति ॥ उद्दामानि पापनाशनादौ विशृङ्खलानि हरेर्वीर्याणि मुहुः शृण्वतां गृणतां नृणां सुजातयानायासेनैव निश्चिन्तयोत्पन्नया भक्त्या आत्मान्तःकरणं यथा निर्वासनं शुध्येत्तथा व्रतादिभिः प्रायश्चितान्तरैर्न शुध्येत् किंतु सवासनमेव शिष्यते ॥ ३२ ॥ कृष्णेति ॥ कृष्णाङ्घ्रिपद्मयोर्मधु लेढि आस्वादयतीति तथा भगवत्सेवासुखाभिज्ञः वृजिनावहेषु नरकादिदुःखप्रदेषु तुच्छतया विसृष्टास्त्यक्ता ये मायागुणा विषयास्तेषु पुनर्न रमते अन्यः सेवासुखानभिज्ञस्तु कामाभिभूतः सन्नात्मनो रजः पापं प्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहेत करोति। यतोऽनन्तरं पुनरपि रजः स्यात्पापकर्मणि प्रवर्त्तेत एव सत्वशुद्धेरभावात् ॥ ३३ ॥ इत्थमिति ॥ हे राजन् स्वभर्त्रा यमेन गदितं भगवन्महित्वम् इत्थम् ईदृक्प्रभावं संस्मृत्य ततःप्रभृति विस्मितधियः सन्तः ते यमकिंकराः अच्युताश्रयजनं प्रति अस्मानेवैष हन्यादिति शङ्कमानाः नैव गच्छन्तीति शेषः । किंतु तं द्रष्टुमपि

शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः ॥ यथा सुजातया भक्त्या शुध्येन्नात्मा व्रतादिभिः ॥ ३२ ॥ कृष्णाङ्घ्रिपद्ममधुलिड्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ॥ अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् ॥ ३३ ॥ इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते ॥ नैवाच्युताश्रयजनं प्रति शङ्कमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ॥ ३४ ॥ इतिहासमिमं गुह्यं भगवान्कुम्भसंभवः ॥ कथयामास मलय आसीनो हरिमर्चयन् ॥ ३५ ॥ इति श्रीभा० षष्ठस्कन्धे अजामिलोपाख्यानसमाप्तिवर्णनपूर्वकं यमेन स्वभटान्प्रति भगवद्भक्तिनाममाहात्म्यवर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥ राजोवाच ॥ देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् ॥ सामासिकस्त्वया प्रोक्तो यस्तु स्वायंभुवेऽन्तरे ॥ तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ १ ॥ अनुसर्गं यथा शक्त्या ससर्ज भगवान्परः ॥२॥

बिभ्यति स्म । यद्वा । नैव विस्मितधियो जाताः किन्तु सत्यमिति मेनिरे ततोऽच्युताश्रयजनं प्रति शङ्कमानाः तं प्रष्टुमपि बिभ्यति स्म । ते चाच्युतेति पाठे ते विस्मिता जातास्ते च बिभ्यति स्मेत्यन्वयद्वयम् ॥ ३४ ॥ इतिहासमिति ॥ मलये पर्वते हरिमर्चयन् आसीनो भगवान् कुम्भसंभवोऽगस्त्यः इममितिहासं मह्यं कथयामास ॥ ३५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायः षष्ठस्य तृतीये निरमादिमाम् ॥ ३ ॥ चतुर्थे विश्वरूपस्य जन्म वक्तुं प्रचेतसाम् ॥ सूनोर्दक्षस्य वंशोऽत्र श्लोकाः सार्द्धाश्चतुःशैरीः ॥ सार्द्धा नवेषवोऽनुष्टुम्मानं चोवाचसप्तकम् ॥ ४ ॥ देवेति सार्द्धम् ॥ हे भगवन् स्वायंभुवे मन्वन्तरे सामासिकः संक्षिप्तो देवादीनां सर्गो यस्त्वया प्रोक्तः तस्यैव व्यासं विस्तारं ते त्वत्तो ज्ञातुमिच्छामि ॥ १ ॥ अनुसर्गमिति ॥ तथा "यः ससर्ज प्रजा इष्टाः स दक्षो ब्रह्मचोदितः ।" इत्युक्तेर्दक्षस्यानुसर्गमनुप्रवृत्तं सर्गं भगवान् परः परमेश्वरो ब्रह्मा वा यथा येन प्रकारेण यया शक्त्या ससर्ज तां शक्तिं तत्प्रकारं च ज्ञातुमिच्छामि ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ हे मुनिसत्तमाः इत्येवं राजर्षेः परीक्षितः संप्रश्नमाकर्ण्य महायोगी बादरायणिः श्रीशुकः प्रतिनन्द्य संश्लाघ्य जगाद उत्तरं दत्तवान् ॥ ३ ॥ दक्षादिरूपेण ससर्जेति वक्तुं रुद्रापराधाच्छागमुखस्य दक्षस्यावमानदुःखेन देहं त्यक्तवतः पुनर्जन्मप्रकारमाह—यदेति ॥ यदा प्राचीनबर्हिषो दश पुत्राः प्रचेतसोन्तःसमुद्रात् समुद्रमध्यादुन्मग्ना निर्गतास्तदा गां पृथ्वीं द्रुमैर्वृतामाच्छादितां ददृशुरित्यन्वयः । नारदोपदेशेन प्राचीनबर्हिषि विरज्य वनं गते सत्यराजकेन कृष्याद्यभावाद्द्रुमबाहुल्यं ज्ञेयम् ॥ ४ ॥ द्रुमेभ्य इति ॥ तपसा निरन्नत्वनिमित्तेन सन्तापेन दीपितो मन्युर्येषां ते प्रचेतसो द्रुमेभ्यः क्रुद्ध्यमानाः । शानजार्षः । तद्दिधक्षया तेषां द्रुमाणां दग्धुमिच्छया मुखतो वायुमग्निं च ससृजुः ॥ ५ ॥ ताभ्यामिति ॥ हे कुरूद्वह तदा ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तान्वृक्षानुपलभ्य दृष्ट्वा तेषां महान् राजा सोमस्तेषां प्रचेतसां मन्युं प्रशमयन्निवोवाच । इवशब्दोऽवधारणे। स्वकिरणैर्वृक्षपोषकत्वात्सोमस्यैव मुख्यराजत्वं चतुर्थस्कन्धे ब्रह्मणा कृतं प्रचेतसां सान्त्वनं वाराहकल्पीयं सोमेन कृतं तु पाद्मकल्पीयं इति न विरोधः

सूत उवाच ॥ इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ॥ प्रतिनन्द्य महायोगी जगाद मुनिसत्तमः ॥ ३ ॥ श्रीशुक उवाच ॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ॥ अन्तः समुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम् ॥ ४ ॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ॥ राजोवाच महान्सोमो मन्युं प्रशमयन्निव ॥ ६ ॥ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ ॥ विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ ७ ॥ अहो प्रजापतिपतिर्भगवान्हरिरव्ययः ॥ वनस्पतीनोषधींश्च ससर्जोर्जामिषं विभुः ॥ ८ ॥ अन्नं चराणामचरा ह्यपदः पादचारिणाम् ॥ अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ ९ ॥ यूयं च पित्राऽन्वादिष्टा देवदेवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥

॥ ६ ॥ मा इति ॥ हे महाभागाः दीनेभ्यो द्रुमेभ्यो द्रोग्धुं मार्हथ योग्या न भवथ यतः यूयं प्रजानां शेषे षष्ठी । विवर्द्धयिषवः वृद्धिं कर्तुमिच्छवोऽत एव तासां यूयं पतयः पालकाः स्मृताः ॥ ७ ॥ प्रजापतीनां तद्भक्ष्यभोज्यदाहोऽनुचित इत्याह—अहो इति ॥ प्रजापतीनां पतिः भगवान् अव्ययः विभुः हरिः वनस्पत्यादीन् ससर्ज । ये पुष्पं विनैव फलन्ति ते वनस्पतयः पिप्पलादयः उपलक्षणमेतत्सर्ववृक्षाणाम् । फलपाकान्ता ओषधयो यवादयः । उर्जं पित्रन्नम् । इषं देवान्नम् । यद्वा । ऊर्जं वृक्षनिष्पन्नं फलादि इषमोषधिनिष्पन्नं व्रीह्यादि ॥ ८ ॥ अन्नमिति ॥ चराणां पक्षाभ्यां चरतां भ्रमरादिपक्षिणामचराः पुष्पफलाद्या अन्नं भक्ष्यम् । पादचारिणां गोमहिषादीनामपदः घासाद्याः अन्नम् । हस्तयुक्तानां व्याघ्रादीनामहस्ताः मृगादयः अन्नम् । द्विपदां मनुष्याणां चतुष्पदो गवादयः चकाराद्व्रीह्यादयः अन्नम् । अत्र चतुष्पदामन्नसाधनत्वादन्नत्वमन्येषां तु साक्षादिति विवेकः ॥ ९ ॥ यूयं चेति ॥ हे अनघाः हि यस्मात् पित्रा प्राचीनबर्हिषा देवदेवेन भगवता च प्रजासर्गाय यूयमन्वादिष्टा आज्ञप्ता अतः प्रजोपजी-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

व्यान् वृक्षान् कथं निर्दग्धुमर्हथ ॥ १० ॥ आतिष्ठतेति ॥ अतः वः पित्रादिभिर्जुष्टं सेवितं सतां सुशीलानां कृपालूनां मार्गं जीवसंरक्षणलक्षणमातिष्ठत कुरुत दीपितं कोपं यच्छत उपसंहरत ॥ ११ ॥ तोकानामिति ॥ यथा तोकानां बालानां पितरौ मातापितरौ बन्धुः शरणं यथा च दृशो नेत्रस्य पक्ष्म बन्धुः रक्षकः यथा च स्त्रियाः पतिर्बन्धुः पोषको रक्षकश्च यथा च भिक्षूणां गृही गृहस्थो बन्धुः अन्नवस्त्रादिप्रदानेन निर्वाहकः । यथा चाज्ञानां बुधो ज्ञानी सुहृत् ज्ञानोपदेशेन संसारभयनिवर्त्तकः तथा प्रजानां पतिः राजा बन्धुः सर्वापद्भ्यो रक्षकः जीविकाप्रदश्च । अतः प्रजोपकारिणां वृक्षाणां विनाशोऽनुचितः ॥ १२ ॥ ईश्वराधिष्ठानत्वाच्च न द्रोहो युक्त इत्याह—अन्तरिति ॥ सर्वभूतानां देहेष्वन्तर्मध्ये तेषामात्मा अन्तर्यामीश्वरः हरिरास्ते अतः सर्वं स्थावरजङ्गमात्मकं विश्वं तस्य धिष्ण्यमितीक्षध्वम् । एवमीक्षणेन वो युष्मभिरसौ हरिस्तोषितो भविष्यति च । तस्मिंस्तुष्टे किं दुर्लभमिति भावः ॥ १३ ॥ य इति ॥ यः प्राणी आकाशादिव देहे समुत्पतितमाकस्मिकमित्यर्थः । यद्वा । देहे यो हृदयाकाशस्तस्मात्समुत्पतितं समुद्भू-

आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम् ॥ पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥११॥ तोकानां पितरौ बन्धुर्दृशः पक्ष्म स्त्रियाः पतिः॥ पतिः प्रजानां भिक्षूणां गृह्यऽज्ञानां बुधः सुहृत् ॥ १२ ॥ अन्तर्देहेषु भूतानामात्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥ १३ ॥ यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् ॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्तते ॥ १४ ॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ॥ वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम् ॥ १५ ॥ इत्यामन्त्र्य वरारोहां कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ दत्त्वा ते धर्मणोपयेमिरे ॥ १६ ॥ तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल ॥ यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥

तम् उल्बणं मन्युमात्मनः जिज्ञासया विचारेण यच्छेत् उपशमयेत्सगुणान् संसारदुःखहेतुभूतानतिवर्त्तते अतीतो भवति ॥ १४ ॥ अलमिति ॥ दीनैर्दग्धैर्द्रुमैरलं तेषां दाहे उपयोगो नास्तीत्यर्थः । खिलानामवशिष्टानां वृक्षाणां वो युष्माकं च शिवं कल्याणमस्तु वार्क्षी वृक्षैः पालितत्वात्तदीया एषा मारिषानाम्नी वरा वरणीया कन्या पत्नीत्वे पत्न्यर्थं प्रतिगृह्यताम् ॥ १५ ॥ इतीति ॥ हे नृप इत्येवमामन्त्र्य सान्त्वयित्वा वरः श्रेष्ठः आरोहो नितम्बप्रदेशो यस्यास्तामप्सरसीमप्सरसः प्रम्लोचायाः सुतां कन्यां तेभ्यो दत्त्वा राजा सोमो ययौ । ते च सर्वे दश तामेकां धर्मेण भगवद्वचनप्रमाणेनोपयेमिरे विवाहितवन्तः ॥ १६ ॥ तेभ्य इति ॥ तेभ्यः प्रचेतोभ्यः तस्यां मारिषायां प्राचेतसस्तत्पुत्रः किल प्रसिद्धो दक्षः समभवज्जातः यस्येत्यादि स्पष्टम् । दक्षस्य स्वायंभुवे मन्वन्तरे जन्म यस्य प्रजाविसर्गेणेति प्रजाविसर्गस्तु चाक्षुष मन्वन्तर एव " चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते । यः ससर्ज प्रजा इष्टाः स दक्षो ब्रह्मचोदितः ॥ " इति चतुर्थोक्तिस्तस्मान्मन्वन्तरपञ्चकमस्य तप एव पौर्वकालिकैश्वर्यप्राप्त्यर्थमवगम्यते ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ यथा दुहितृवत्सलः एतेन तस्य कन्यावंश एवेत्युक्तम् । दक्षः रेतसा मनसा च भूतानि ससर्ज तन्मम मत्तः अवहितः सावधानः सन् शृणु ॥ १८ ॥ मनसेति ॥ प्रजापतिर्दक्षः नभः आकाशः स्थलं च पृथ्वी जलं च ओकांसि येषां तान् देवादीनिमाः प्रजाः मनसैवासृजत् ॥ १९ ॥ तमिति ॥ स प्रजापतिस्तं प्रजानां सर्गम् अबृंहितमसंवृद्धमालोक्य विन्ध्यस्य पादान् प्रान्तपर्वतान् उपव्रज्य दुष्करं तपः अकरोत् ॥ २० ॥ तत्रेति ॥ तत्राघमर्षणं नाम पापहरं परं श्रेष्ठं तीर्थमस्ति । तत्र अनुसवनं त्रिकालमुपस्पृश्य आचमनस्नानादि कृत्वा तपसा हरिमतोषयत् ॥ २१ ॥ अस्तौषीदिति ॥ हंसानां परमहंसानां गुह्यं रहस्यं तेन हंसगुह्येन तन्नाम्ना स्तोत्रेण अधोक्षजं भगवन्तमस्तौषीत् । इडभाव आर्षः । यतः स्तोत्रात् कस्य दक्षस्य हरिरतुष्यत् तत्तुभ्यमभिधास्यामि कथयिष्यामि ॥ २२ ॥ नम इति ॥ पराय अवितथा यथार्थानुभूतिश्चिच्छक्तिर्यस्य तस्मै भ्रान्तिरहिताय गुणत्रयाभासो जीवः निमित्तं माया च तयोः बन्धवे नियन्त्रे प्रवर्तकाय च गुणेषु रूपरसादिविषयेषु तत्त्वं परमार्थ

यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहितः शृणु ॥ १८ ॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्नभःस्थलजलौकसः ॥ १९ ॥ तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ॥ विन्ध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः ॥२०॥ तत्राघमर्षणं नाम तीर्थं पापहरं परम् ॥ उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम् ॥ २१ ॥ अस्तौषीद्धंसगुह्येन भगवन्तमधोक्षजम् ॥ तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ २२ ॥ प्रजापतिरुवाच ॥ नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबन्धवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे ॥ २३॥ न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन्संवसतः पुरेऽस्मिन् ॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥ देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे ॥२५॥

इति बुद्धिर्येषां तैर्न दृष्टं धाम स्वरूपं यस्य तस्मै निवृत्तं मानं प्रमाणं प्रत्यक्षादि यस्मात् स्वयंभुवे स्वप्रकाशाय नमः दधे नमस्करोमि । निवृत्तमानावधय इति पाठे तु निवृत्तो मानावधिः परिमाणेयत्ता यस्मात्तस्मै नमोऽस्त्विति ॥ २३ ॥ नेति ॥ अस्मिन् पुरे शरीरे संवसतोऽपि अव्यक्तदृष्टेः प्रपञ्चद्रष्टुः दृश्यत्वाभावतः यस्य सख्युरीश्वरस्य सख्यं बहिरन्तःकरणप्रवर्तकत्वादिकं सखा पुरुषो जीवोऽस्मिन् पुरे सह वसन्नपि नावैति न जानाति यथा गुणो रूपादिर्विषयः गुणिनो विषयिण इन्द्रियादेः सख्यं प्रकाशकत्वं यथा न वेत्ति तद्वत् इति तस्मै महेशाय नमस्करोमि । दृष्टिरिति प्रथमान्तपाठे व्यक्ते प्रपञ्च एव दृष्टिः परमार्थबुद्धिर्यस्य सः पुरुषः ॥ २४ ॥ देह इति ॥ देहः असवः प्राणाः अक्षा इन्द्रियाणि मनवःअन्तःकरणानि भूतानि पृथिव्यादीनि मात्रास्तन्मात्राणि शब्दादयश्च आत्मानं स्वस्वरूपमन्यं देवतावर्गं ततोऽपि परं यत् जीवस्वरूपं च न विदुर्न जानन्ति जडत्वात् । पुमान् जीवस्तु सर्वं पूर्वोक्तं गुणान् देहादिकारणीभूतान् सत्त्वादीन् च वेद जानाति चेतनत्वात् । एवं तज्ज्ञोऽपि यं सर्वज्ञं न वेद तमनन्तमहमीडे स्तौमि ॥२५॥

Nepal Sanskrit University, Balmeeki ...

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ यदा समाधिसमये दृष्टं दर्शनं प्रमाणविकल्पविपर्ययलक्षणं त्रिविधं ज्ञानं स्मृतिश्च स्मरणं तयोः संप्रमोषात् नाशादित्यर्थः । नामरूपे रूप्येते येन तन्नामरूपरूपं तस्य मनसः उपरामो भवति तदा यः केवलया स्वसंस्थया सच्चिदानन्दरूपया प्रतीयते तस्मै हंसाय शुद्धाय परमविवेकिने शुचि शुद्धं मनः सद्म प्रतीतिस्थानं यस्य तस्मै नमः । एके तु ननु तज्ज्ञोऽपि न वेदेति यदुक्तं तत्र तदेव वेद्यं वस्तु द्विविधं सुज्ञेयं दुर्ज्ञेयं च तत्र सुज्ञेयं निर्विशेषस्वरूपमाह । यदेति । तथा तत्स्वरूपस्य सुज्ञेयत्वमुक्तं ब्रह्मणा "तथापि भूमन्महिमा गुणस्य ते" इत्यादि इत्याहुः ॥ २६ ॥ मनीषिण इति ॥ मनोनियमने समर्था मनीषिणो विवेकिनः त्रिवृद्भिः त्रिगुणात्मिकाभिः नवभिः प्रकृतिमहदहङ्कारमनःपञ्चतन्मात्ररूपाभिः चकारात्पञ्चमहाभूतदशेन्द्रियरूपाभिश्च स्वशक्तिभिर्गूढमप्रकाशमानं मनीषया श्रवणादिविशुद्धया बुद्ध्यान्तर्हृदि संनिवेशितं निश्चलीकृतं यं निष्कर्षन्ति अहंकारास्पदादात्मनोऽन्यं परमात्मानं विविच्य ध्यायान्ति स निर्वाणसुखानुभूतिर्मम प्रसीदतामित्युत्तरेणान्वयः । यथा दारुणि स्थितं पाञ्चदश्यं पञ्चदशसामिधेनीमन्त्रैः प्रकाश्यमलौकिकं वह्निं निष्कर्षन्ति तथा प्रकृत्यादिसंघातेभ्यो भक्ता भगवन्तं निष्कर्षन्ति । केचित्तु व्याचक्षते दुर्विज्ञेयं सविशेषं स्वरूपमाह । मनीषिणः श्रवणादिद्वारा

यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् ॥ य ईयते केवलया स्वसंस्थया हंसाय तस्यै शुचिसद्मने नमः ॥ २६ ॥ मनीषिणोन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ॥ वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निष्कर्षन्ति गूढम् ॥ २७ ॥ स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८ ॥ यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य ॥ मा भूत्स्वरूपं गुणरूपबृंहितं स वै गुणापायविसर्गलक्षणः ॥ २९ ॥

अन्तर्हृदि सन्निवेशितं नवभिर्विमलोत्कर्षिण्यादिभिः तिसृभिर्ह्लादिनीसन्धिनीसंविद्वृत्तिभिश्चेति स्वशक्तिभिश्चिच्छक्तिभिः सहितं पुनर्मनीषया प्रेमभक्त्युत्थया निष्कर्षन्ति अन्तर्हृदयान्निष्कृष्य च क्षुरादिभिरिन्द्रियैः सौन्दर्यादिमाधुर्यमास्वादयन्ति । अस्य सविशेषस्वरूपस्याप्राकृतानन्तगुणस्य दुर्विज्ञेयत्वमुक्तं ब्रह्मस्तुतौ । "गुणात्मनस्तेऽपि गुणान्विमातुम्" इत्यादि ॥ २७ ॥ स वा इति ॥ अशेषा विशेषा यस्यास्तस्या मायायाः कार्यकारणात्मकप्रपञ्चरूपायाः प्रकृतेर्नेति नेति निषेधे विवेकेन त्यागे सति निर्वाण इति सुखम् आनन्दरूपानुभूतिर्यस्य सः सर्वाणि नामानि यस्य स सर्वनामा विश्वानि सर्वाणि रूपाणि यस्य स विश्वरूपश्च अनिरुक्ता निर्वचनानर्हा आत्मनि शक्तिर्यस्य सः मम प्रसीदतां तद्भार्षः ॥२८॥ यद्यदिति ॥ यद् यत् वचसा निरुक्तमभिहितं धिया निरूपितं व्यवसितमक्षभिर्वा इन्द्रियैरपि निरूपितं गृहीतम् । "छन्दस्यपि दृश्यते" इत्यक्ष्णोऽनङ् । उतापि मनसा वापि निरूपितं संकल्पितं तत्तत् यस्य सच्चिदानन्दात्मकस्य भगवत उपास्यं मोक्षप्रदं स्वरूपं मा भूत् न भवति । हि यस्मात्तत्सर्वं गुणरूपं सत्त्वादिगुणकार्यमेवेत्यर्थः । गुणबृंहितं हि तदिति पाठे गुणैर्वर्धितमित्यर्थः । गुणरूपबृंहितमिति पाठे गुणै रूपैश्च बृंहितं स वै स परमेश्वरस्तु गुणकार्यस्य विश्वस्यापायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां तत्का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणतया लक्ष्यतेऽनुमीयते इति तथा सोऽस्ति चेतनाधिष्ठानं विना तयोरसंभवात् । यद्वा । यस्य स्वरूपं मा भूत्र भवति तस्मै नम इति तृतीयेनान्वयः ॥ २९ ॥ यस्मिन्निति ॥ इदं विश्वं यस्मिन्नधिकरणे यतोऽपादानात् येन च करणेन यस्य संबन्धि यस्मै संप्रदानाय यदीप्सिततमं कर्म यः स्वतन्त्रः कर्त्ता यथा येन प्रकारेण कुरुते येन प्रयोजककर्त्रा कार्यते च तत्परेषामवरेषां हेतूनां परमकारणं यतः सर्वेभ्यः प्राक् प्रसिद्धं तद्धेतुः तेषां कारणम् अनन्यत् विजातीयभेदशून्यम् एकं सजातीयादिभेदशून्यं तत् ब्रह्मैव एवं चात्र सप्तभिर्यच्छब्दैः सप्त विभक्त्यर्थाः दर्शिताः । यथेति च क्रियाकारकसंबन्धप्रकारवाचिनामव्ययानामर्था दर्शिताः । कुरुते कार्यते चेति स्वार्थपरार्थक्रियान्वयश्च सर्वेषां दर्शितः। चशब्देन भावकर्मादिविहितप्रत्ययार्थाः संगृहीताः ॥ ३० ॥ नन्वेवंभूते विश्वस्य हेतौ ब्रह्मणि मीमांसकतार्किकादयो विवदन्ते तत्राह—यदिति ॥ यस्य मायाविद्याद्याः शक्तयो वदतां वादिनां क्वचिद्विवादस्य क्वचित्संवादस्य च भुवः कारणानि भवन्ति एषां पण्डितंमन्यानां मुहुर्निरन्तरमात्मनः मनसो मोहं च कुर्वन्ति तस्मै अनन्तगुणाय भूम्ने व्यापिने नमः ॥ ३१ ॥ एवं विवादादिकं प्रदर्श्य तदुदाहरणं दर्शयन् धर्मिणि विवादाभावमाह—अस्तीति ॥ योग उपासनाशास्त्रं तत्र हि विराड्रूपेणोपासनायां पातालपादादि-

यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ॥ परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकम् ॥ ३० ॥ यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति ॥ कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥ ३१ ॥ अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ॥ अवेक्षितं किंचन योगसाङ्ख्ययोः समं परं ह्यनुकूलं बृहत्तत् ॥ ३२ ॥ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननन्तः ॥ नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥ ३३ ॥

कमस्तीत्युपास्यत्वेन विधीयते । साङ्ख्यं हि ज्ञानशास्त्रं तत्र हि अपाणिपादमित्यादिना तस्य नामरूपादिकं नास्तीति निषिद्ध्यते इति अस्तीति नास्तीति च भिन्नौ भावाभावात्मकतया विरुद्धौ धर्मौ प्रतिपाद्यतया ययोस्तयोः वस्तुनि परमात्मनि निष्ठा ययोस्तयोः एकस्थयोः एकस्मिन्नेव तिष्ठतोः ब्रह्मैव प्रतिपादयतोः तयोर्योगसाङ्ख्यशास्त्रयोः यत्किंचन समनुगतम् अनुकूलं विवादापनोदसाधकं वस्तु अवेक्षितं प्रतीतं तद्बृहद्ब्रह्मैव तस्मै नम इत्यनुषङ्गः । अयं भावः । यद्यपि योगसाङ्ख्यप्रोक्तौ भगवति पादादिसद्भावासद्भावौ एकत्रैव विरुद्धत्वात् विरुद्धौ प्रतीयेते तथापि अनुकूलमधिष्ठानं विना पादादिकल्पनायोगात् अवधिं विना तन्निषेधायोगाच्च तयोरुपपादकं ब्रह्म सिद्धमेव अतो वस्तुतो योगसाङ्ख्यप्रोक्तपादादितदभावयोरपि न विरोधः । उपासनायां कल्पनामात्रत्वात् । भक्तास्तु योगशास्त्रं भक्तियोगशास्त्रं तत्र गुणरूपनामादिकं भगवत्यस्तीत्युक्तम् । साङ्ख्यशास्त्रे च गुणरूपादि नास्तीत्युक्तं तत्र हेयानां प्राकृतानां च गुणादीनां निषेध इति वस्तुतो न विरोध इत्याहुः ॥ ३२ ॥ य इति ॥ यो भगवानचिन्त्यैश्वर्यादिमाननन्तः ,देशकालवस्तुपरिच्छेदशून्यः अनामरूपः प्राकृतनामरूपरहितोऽपि स्वपादमूलं भजतामनुग्रहार्थं जन्मभिरवतारैर्विशुद्धसत्वानि रूपाणि कर्मभिर्नामानि च भेजे तत्तत्समये प्रकटितवान् स परमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमेश्वरो मह्यं प्रसीदतु ॥ ३३ ॥ य इति ॥ योऽन्तर्यामी जनानां सर्वदेहगतोऽपि प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपासनामार्गैर्यथाशयं तत्तद्वासनानुसारेण तत्तद्देवतारूपेण विभिन्नतया भाति तत्तद्देवतारूपेण ईश्वरस्यैव फलदातृत्वात् । यथा पार्थिवं गुणं धूसरत्वादिकमाश्रित्यानिलो विविधनामरूपवान् विभाति तथेत्यर्थः । स ईश्वर एव मे मम मनोरथं सत्यं कुरुतात् किं देवतान्तरैः परापेक्षैः ॥ ३४ ॥ इतीति ॥ हे कुरुश्रेष्ठ इत्येवं तस्मिन्नघमर्षणसंज्ञके तीर्थे संस्तुवतो दक्षस्य स्तुतो भक्तवत्सलः स भगवानाविरासीत् ॥ ३५ ॥ तं वर्णयति—कृतपाद इति ॥ सुपर्णस्यांसे स्कन्धे कृतौ पादौ येन प्रलम्बा अष्टौ महान्तो भुजा यस्य सः चक्राद्यष्टायुधधरः ॥ ३६ ॥ पीतेति ॥ पीते वाससी यस्य सः घन इव श्यामः प्रसन्नं वदनमीक्षणे च यस्य सः वनमालया निवीतं कण्ठादिपादान्तं व्याप्तमङ्गं यस्य सः लसन्तौ श्रीवत्सकौस्तुभौ यस्य सः श्रीवत्सो रोमावर्तविशेषः कौस्तुभो मणिः

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम् ॥३४॥ श्रीशुक उवाच ॥ इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे ॥ आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः ॥ ३५ ॥ कृतपादः सुपर्णांसे प्रलम्बाष्टमहाभुजः ॥ चक्रशङ्खासिचर्मेषुधनुःपाशगदाधरः ॥ ३६ ॥ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः ॥ वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः ॥ ३७॥ महाकिरीटकटकः स्फुरन्मकरकुण्डलः ॥ काञ्च्यङ्गुलीयवलयनूपुराङ्गदभूषितः ॥३८॥ त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः ॥ वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः ॥ ३९ ॥ स्तूयमानोऽनुगायद्भिः सिद्धगन्धर्वचारणैः ॥ रूपं तन्महदाश्चर्यं विचक्ष्याऽऽगतसाध्वसः ॥ ननाम दण्डवद्भूमौ प्रहृष्टात्मा प्रजापतिः ॥ ४० ॥ न किंचनोच्चारयितुमशकत्तीव्रया मुदा ॥ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ॥ ४१ ॥ तं तथाऽवनतं भक्तं प्रजाकामं प्रजापतिम् ॥ चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥ ४२ ॥

॥ ३७ ॥ महाकिरीटेति ॥ महान्ति किरीटकटकानि यस्य सः स्फुरन्ती मकराकारे कुण्डले यस्य सः काञ्च्यादिभिर्विभूषितः कटकौ पादयोः वलयौ करयोः ॥ ३८ ॥ त्रैलोक्येति ॥ त्रैलोक्यमोहनं श्रीपुरुषोत्तमाख्यं सुरयूथपैरिन्द्रादिभिर्लोकपालैः स्पष्टं शेषम् ॥३९ ॥ स्तूयमान इति ॥ एवंभूत आविरासीत् इत्येकक्रियान्वयः । स्पष्टं शेषम् । रूपमिति ॥तस्य भगवतो महदाश्चर्यमत्यलौकिकं मनोहरं रूपं विचक्ष्य दृष्ट्वा प्रहृष्ट आत्मा यस्य सः अत एवागतसाध्वसः जातसम्भ्रमः प्रजापतिर्दक्षो दण्डवत् भूमौ ननाम॥४०॥ नेति ॥ यथा निर्झरैर्ह्रदिन्यो नद्यः पूर्यन्ते तथा मुदा आनन्देनापूरितैर्मनोद्वारैरिन्द्रियैर्हेतुभूतैः प्रजापतिः किंचिदप्युदीरयितुं वक्तुम् उपलक्षणतया द्रष्टुं श्रोतुं च नाशकत् महानन्दपूर्णतया योगादीनां वृत्तिनिरोधात् ॥४१ ॥ तमिति ॥ यद्यप्यसौ नावोचत् तथापि सर्वभूतानां चित्तज्ञः जनार्दनः तथावनतं भक्तं प्रजाकामं तं प्रजापतिमिदमाह स्म ॥४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचेतसेति ॥ हे प्राचेतस हे महाभाग यत् यतः मत्परया मदेकविषयया श्रद्धया मयि परं भावं भक्तिं गतोऽसि अतः भवान् तपसा संसिद्धः ॥४३॥ प्रीत इति ॥ हे प्रजानाथ यत् यस्मात्ते तपः अस्य विश्वस्य उद्बृंहणं वृद्धिकरमस्ति अतोऽहं ते प्रीतः भूतानां विभूतयः समृद्ध्यादयो भूयासुरिति यत् एष एव मम कामः अतो मत्कामपूरणादहं प्रीतोऽस्मीति । यद्वा । अस्य विश्वस्य उद्बृंहणं यत्ते तपोऽभूत् एष ममैव कामः ममेच्छयैव तव तपःसिद्धिरित्यर्थः । कामस्वरूपमाह । भूतानां विभूतयो भूयासुरिति ॥ ४४ ॥ ब्रह्मेति ॥ ब्रह्मा भवः भवन्तः प्रजापतयः इत्याद्या भूतानां प्राणिनां भूतेरुद्भवस्य हेतवः हि यस्मात् एता ब्रह्माद्या मम विभूतयोऽवतारविशेषा एव ॥ ४५ ॥ तप इति ॥ हे ब्रह्मन् तपो यमनियमादिसहितं ध्यानं मे हृदयं विद्यासाङ्गमन्त्रजपो मे तनुः क्रिया नित्यनैमित्तिकपरिचर्याद्याः आकृतिः आकारः क्रिया ध्यानादिविषयः पुंव्यापारः भावनाशब्दवाच्यः । तेन हि ध्यानादिकमाक्रियत इत्याकृतिरिति स्वामिपादाः । जाताः सुनिष्पन्नाः क्रतवो मेऽङ्गानि शिरो वा एतद्यज्ञस्य " यत्प्रवर्ग्यः ग्रीवा उपसदः चक्षुषी

श्रीभगवानुवाच ॥ प्राचेतस महाभाग संसिद्धस्तपसा भवान् ॥ यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥ ४३ ॥ प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योद्बृंहणं तपः ॥ ममैष कामो भूतानां यद्भूयासुर्विभूतयः ॥ ४४॥ ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वराः ॥ विभूतयो मम ह्येता भूतानां भूतिहेतवः ॥ ४५ ॥ तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाऽऽकृतिः ॥ अङ्गानि क्रतवो जाता धर्म आत्माऽसवः सुराः ॥ ४६ ॥ अहमेवासमेवाग्रे नान्यत्किंचान्तरं बहिः ॥ संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ४७ ॥ मय्यनन्तगुणेऽनन्ते गुणतो गुणविग्रहः ॥ यदासीत्तत एवाद्यः स्वयम्भूः समभूदजः ॥ ४८ ॥ स वै यदा महादेवो मम वीर्योपबृंहितः ॥ मेनेऽखिलमिवात्मानमुद्यतः सर्गकर्मणि ॥ ४९ ॥ अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम् ॥ नव विश्वसृजो युष्मान्येनादावसृजद्विभुः ॥ ५० ॥

आज्यभागौ " इत्यादिश्रुतेः । धर्मः क्रत्वाद्यपूर्वमात्मा मनः सुरा यज्ञभागभुजो मे असवः प्राणाः सन्तर्पणीयत्वात् ॥ ४६ ॥ अहमिति ॥ अग्रे सृष्टेः पूर्वम् अहमेवासमेव आन्तरं ग्राहकमन्तःकरणं बहिःकरणं वा बहिः ग्राह्यं वस्तु चान्यत् किंचिदपि नासीत् आसमेवेत्येवकारेण क्रियान्तरं व्यावर्त्तयति संज्ञानमात्रं चैतन्यमात्रमव्यक्तं यदिदानीमपीन्द्रियवृत्तिभिरनभिव्यक्तं विश्वतः सर्वतः प्रसुप्तमिव इवशब्दः प्रकाश्याभावमात्रेण प्रकाशकत्वाभावोपचारसूचनाय ॥ ४७ ॥ मयीति ॥ अनन्तगुणेऽनन्ते व्यापके मयि यदा गुणतः सत्वादितः गुणमयो गुणकार्यभूतो गुणविग्रहो ब्रह्माण्डात्मक आसीत्तदा ततस्तस्मिन्नेव आद्यः युष्माकं प्रजापतीनां कारणभूत उद्यमं विनैव जातत्वात्स्वायंभूः अदृष्टपितृकत्वादज इति व्यवह्रियमाणो ब्रह्मा समभूत् ॥ ४८ ॥ स इति ॥ स महादेवो देवेभ्यो महानपि मम वीर्येणोपबृंहितः समर्थीकृतोऽपि सर्गकर्मणि उद्यतो यदा वै आत्मानं खिलं तत्रासमर्थमिव मेने ॥ ४९ ॥ अथेति ॥ अथ तदा स देवः मे मया अभिहितः तपतपेति उपदिष्टः सन् दारुणं तपोऽतप्यत । येन तपसा स विभुः

Nepal Sanskrit University, Bal...

CC-0. In Public Domain. Digitization by eGangotri

समर्थः सन्नादौ युष्मान्विश्वसृजोऽसृजत् । नव विश्वसृज इति पाठांतरम् ॥५०॥ एषेति ॥ अङ्ग हे प्रजेश पञ्चजनसंज्ञकस्य प्रजापतेरसिक्नी नामैषा दुहिता पत्नीत्वे पत्न्यर्थं प्रतिगृह्यताम् ॥ ५१ ॥ मिथुनेति ॥ मिथुनस्य यो व्यवायः रतिः स एव धर्मो यस्य स तथाभूतस्त्वं तथाभूतायां तस्यां पत्न्यामिमं प्रजासर्गं पुनर्भूरिशो भावयिष्यसि उत्पादयिष्यसि । हंसगुह्यस्तोता तत्त्वज्ञोऽपि दक्षो यत्सृष्टिमार्ग एव भगवता निक्षिप्तस्तत् श्रीशिवापराधस्य शेषत्वादेवेति ॥ ५२ ॥ त्वत्त इति ॥ त्वत्तोऽधस्तादग्रे सर्वाः प्रजा मदीयया मायया स्त्रीरूपया सह मिथुनीभूय भविष्यन्ति पुत्रादिरूपेण जनिष्यन्ते मे बलिं च हरिष्यन्ति मम पूजनं च करिष्यन्ति ॥ ५३ ॥ इतीति ॥ इत्येवमुक्त्वा विश्वस्य भावनः उपबृंहकः भगवान् हरिः तस्य प्रजापतेर्मिषतः सतः स्वम उपलब्धो दृष्टोऽर्थ इव तत्रैवान्तर्दधे ॥ ५४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य चतुर्थे निरमादिमाम् ॥ ४ ॥ पञ्चमे स्वसुतान् दक्षो गतान्नारदवाक्यतः ॥ श्रुत्वा शशाप तं तत्र श्लोका दृष्टाः कृतार्णवैः ॥ तार्वर्द्येयोऽनुष्टुभोऽप्यत्रोवाचवाचां चतुष्टयम् ॥ ५ ॥

एषा पञ्चजनस्याऽङ्ग दुहिता वै प्रजापतेः ॥ असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम् ॥ ५१ ॥ मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः ॥ मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥ ५२ ॥ त्वत्तोऽधस्तात्प्रजाः सर्वा मिथुनीभूय मायया ॥ मदीयया भविष्यन्ति हरिष्यन्ति च मे बलिम् ॥ ५३ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभावनः ॥ स्वप्नोपलब्धार्थ इव तत्रैवान्तर्दधे हरिः ॥ ५४ ॥ इति श्रीभा० षष्ठ० प्रचेतसां दक्षोत्पत्तिवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ तस्यां स पाञ्चजन्यां वै विष्णुमायोपबृंहितः ॥ हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥ १ ॥ अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप ॥ पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशम् ॥ २ ॥ तत्र नारायणसरस्तीर्थं सिन्धुसमुद्रयोः ॥ सङ्गमो यत्र सुमहन्मुनिसिद्धनिषेवितम् ॥ ३ ॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥ तेपिरे तप एवोग्रं पित्रादेशेन यन्त्रिताः ॥ प्रजाविवृद्धये यत्तान्देवर्षिस्तान्ददर्श ह ॥ ५ ॥

तस्यामिति ॥ विष्णुमायया उपबृंहितः लब्धसामर्थ्यः विभुः स दक्षः तस्यां पाञ्चजन्यां हर्यश्वसंज्ञानयुतं पुत्रानजनयत् ॥ १ ॥ अपृथगिति ॥ हे नृप अपृथग्धर्मशीला एकाचारस्वभावास्ते सर्वे दाक्षायणा दक्षपुत्राः प्रजासर्गे पित्रा प्रोक्ताः प्रेरिताः तपोर्थं प्रतीचीं दिशं प्रययुः ॥ २ ॥ तत्रेति ॥ तत्र प्रतीच्यां दिशि यत्र सिन्धुसंज्ञाया नद्याः समुद्रस्य च सङ्गमोऽस्ति तत्रस्थं मुनिभिः सिद्धैश्च नितरां सेवितं सुमहत् अतिविस्तीर्णं नारायणसरो नाम तीर्थमस्ति तद्ययुरित्यनुषङ्गः ॥ ३ ॥ तदिति युग्मम् ॥ तस्य तीर्थस्य स्पर्शनादेव तत्र स्नानाचमनादिमात्रेणैव विशेषेण निर्धूतो मलो रागलोभादिर्यस्मात् स आशयोऽन्तःकरणं येषां ते तथा अत एव परमहंसानां विवेकिनां धर्मे आत्मज्ञाने प्रकर्षेणोत्पन्ना मतिर्येषां ते तथाभूता शुद्धसत्त्वा अपि प्रजाविवृद्धये पित्रादेशेन यन्त्रिताः सन्तः उग्रं तप एव तेपिरे तान् प्रजाविवृद्धये यत्तान् उद्युक्तान् देवर्षिर्नारदो ददर्श॥४॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो निवृत्तिमार्गाधिकारिणः प्रवृत्तिमार्गे क्लिश्येरन्निति कृपया उपदिशति स्मेत्याह–उवाचेति ॥ हे हर्यश्वाः प्रजापालकाः अपि यूयं बालिशाः अज्ञा एव अतः भुवः अन्तमदृष्ट्वा प्रजाः कथं स्रक्ष्यथ। बालका इति पाठे बालिशत्वे हेतुः ॥ ६ ॥ तथेति युग्मम् ॥ तथा भुवोन्तवत् एक एव पुरुषो यस्मिंस्तद्राष्ट्रमदृष्ट्वा तथा अदृष्टो निर्गमो यस्मात्तद्विलमदृष्ट्वा बहुरूपं स्त्रियं चादृष्ट्वा पुंश्चल्याः पतिं पुमांसमदृष्ट्वा उभयतोवाहां विरुद्धोभयदिक्प्रवाहवर्तीं नदीमदृष्ट्वा पञ्चपञ्चानां पञ्चविंशतिवस्तूनामद्भुतं गृहमदृष्ट्वा चित्राः कथा यस्य तं हंसं क्वचिददृष्ट्वा क्षौरपव्यं क्षुरैः पविभिर्वज्रैश्च विनिर्मितमिवातितीक्ष्णं दृढं च स्वयं स्वतन्त्रं भ्रमिं भ्रमणस्वभावं किमपि वस्तु अदृष्ट्वा प्रजाः कथं स्रक्ष्यथ ॥ ७ ॥ ८ ॥ कथमिति ॥ अहो विपश्चितः सर्वज्ञस्य स्वपितुः स्वानुरूपमादेशमनुशासनमविद्वांसो जानन्तः कथं सर्गं करिष्यथ ॥ ९ ॥ तदिति ॥ तद्देवर्षेर्वाचः कूटं परोक्षवादेनार्थान्तरमिव प्रतीयमानं वचनसमूहं निशम्याथानन्तरमौत्पत्तिकी सहजा मनीषा विचारशक्तिर्यस्यास्तया धिया हर्यश्वाः स्वयमेव विममृशुः विचारितवन्तः ॥ १० ॥ तत्रादृष्ट्वान्तमित्यस्यार्थ-

उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः ॥ अदृष्ट्वान्तं भुवो यूयं बालिशा बत पालकाः ॥ ६ ॥ तथैकपुरुषं राष्ट्रं विलं चादृष्टनिर्गमम् ॥ बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ॥ ७ ॥ नदीमुभयतोवाहां पञ्चपञ्चाद्भुतं गृहम् ॥ क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयंभ्रमि ॥ ८ ॥ कथं स्वपितुरादेशमविद्वांसो विपश्चितः ॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ९ ॥ श्रीशुक उवाच ॥ तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया ॥ वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥ १० ॥ भूः क्षेत्रं जीवसंज्ञं यदनादि निजबन्धनम् ॥ अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ॥ ११ ॥ एक एवेश्वरस्तुर्यो भगवान्स्वाश्रयः परः ॥ तमदृष्ट्वाऽभवं पुंसः किमसत्कर्मभिर्भवेत् ॥ १२ ॥ पुमान्नैवेति यद्गत्वा बिलसर्गं गतो यथा ॥ प्रत्यग्धामाऽविद इह किमसत्कर्मभिर्भवेत् ॥ १३ ॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता ॥ तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥

माहुः–भूरिति ॥ भूः भूशब्दोक्तं क्षेत्रं क्षेत्रवत् पुण्यपापसुखदुःखाद्युद्भवस्थानत्वाज्जीवोपाधिभूतं लिङ्गशरीरं यदनादि चिरन्तनं निजस्य जीवस्य बन्धनं तस्य निर्वाणमन्तशब्दोक्तं नाशोपायमदृष्ट्वाऽसद्भिर्मोक्षानुपयोगिभिर्बन्धहेतुभिः कर्मभिः किं फलं भवेन्न किमपीत्यर्थः ॥ ११ ॥ तथैकपुरुषमित्यस्यार्थमाहुः–एक इति ॥ राष्ट्रशब्देन जगत् विवक्षितं तत्र ईश्वरः कर्त्तुमन्यथा कर्त्तुं समर्थः तुर्यः विश्वतैजसप्राज्ञेभ्योऽन्यश्च चतुर्थः सर्वसाक्षी स्वाश्रयं स्वाधारः परः सर्वकारणं भगवानेक एव तमभवं भवरहितं नित्यमुक्तमदृष्ट्वा असद्भिस्तदसमर्पितैर्लौकिकालौकिकैः कर्मभिः पुंसः किं फलं भवेन्न किमपीत्यर्थः ॥ १२ ॥ बिलं चादृष्टनिर्गममित्यस्यार्थमाहुः–पुमानिति ॥ यद्गत्वा प्राप्य बिलस्वर्गं पातालं गत इव पुमान् नैवैति पुनः संसारे नावर्त्तते तत्प्रत्यग्धाम ज्योतीरूपं ब्रह्म अविदोऽविदुषः तदर्हमिति ज्ञापकात्कृद्योगेऽपि कर्मणि द्वितीया । इह जगति असद्भिर्नश्वरस्वर्गादिसाधनैः कर्मभिः किं भवेत् ॥ १३ ॥ बहुरूपां स्त्रियमित्यस्यार्थमाहुः–नानारूपेति ॥ स्वैरिणीव नानारूपा कुत्सितविषयोन्मुखतया रूपरसादिनानाकारा आत्मनो जीवस्य बुद्धिः तथात्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुः रजआदिगुणान्विता स्वैरिण्यपि वस्त्राभरणादिभिर्नानाकारा भवति तन्निष्ठां तस्या अवसानं विवेकमगतस्याप्राप्तस्येहासद्भिः कुत्सितभोगद्वारा नरकहेतुभिः कर्मभिः किं भवेत् ॥ १४ ॥ पुमांसं पुंश्चलीपतिमित्यस्यार्थमाहुः—तत्सङ्गेति ॥ तस्या बुद्धेः सङ्गेनाभ्यासेन भ्रंशितमैश्वर्यमसङ्गत्वस्वातन्त्र्यादि यस्य तम् अत एव कुभार्यपुरुषवत् तस्या बुद्धेर्गतीः सुखदुःखहर्षविषादादिलक्षणाः संसरन्तं गच्छन्तमात्मानमबुधस्य पुरुषस्येहासद्भिस्तदध्यासनिवर्त्तकैः कर्मभिः किं भवेत् ॥ १५ ॥ नदीमुभयतोवाहामित्यस्यार्थमाहुः—सृष्ट्यप्ययकरीमिति ॥ सृष्टिरुत्पत्तिः अप्ययः प्रलयः तौ करोतीति तथा तां भगवतो मायां शक्त्यात्मिकां प्रकृतिं सृष्टिकाले हि तत आरभ्य पूर्वपूर्वतस्तत्त्वानि निःसरन्ति प्रलयकाले चोत्तरोत्तरतः पूर्वं पूर्वं प्रविशन्तीत्युभयतः प्रवाहो दर्शितः । वेलाकूलं नदीप्रवाहे पतितानां ततो निर्गमस्थानं तीरं " वेला स्यात्तीरनीरयोः " इत्यभिधानात् । तद्वत्संसारप्रवाहपतितानां ततो निर्गमस्थानं तपोविद्यादि तस्यान्ते समीपे वेगितां निर्गमप्रतिबन्धाय तपोविद्यावत्सु दृष्टैः क्रोधाहङ्कारादिभिः कृतवेगां वेगिनीमित्यपि पाठः । तामविज्ञस्य एवं मायामोहेन कामक्रोधादिभिरहं संसारप्रवाहे पतितोऽस्मीति विचारशून्यस्यात एव मत्तस्य तत उद्धारहेतुं भगवद्भजनं विहाय तत्कारणविषयभो-

तत्सङ्गभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत् ॥ तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥१५॥ सृष्ट्यप्ययकरीं मायां वेलाकूलान्तवेगिताम् ॥ मत्तस्य तामविज्ञाय किमसत्कर्मभिर्भवेत् ॥ १६ ॥ पञ्चविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणम् ॥ अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥ ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् ॥ विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ॥ १८ ॥ कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् ॥ स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥ शास्त्रस्य पितुरादेशं यो न वेद निवर्तकम् ॥ कथं तदनुरूपाय गुणविश्रम्भ्युपक्रमेत् ॥२०॥

गप्रसक्तस्यासद्भिः संसारपातहेतुभिः कर्मभिः किं भवेत् ॥१६॥ "पञ्चपञ्चाद्भुतं गृहम्" इत्यस्यार्थमाहुः—पञ्चेति ॥ पञ्चविंशतितत्त्वानां पुरुषोऽन्तर्यामी अद्भुतदर्पणमाश्चर्यरूपः आश्रयः प्रकाशश्च तमध्यात्मं कार्यकारणसंघाताधिष्ठातारमबुधस्याजानतः तदर्हमितिवत् द्वितीया । इहासद्भिः स्वातन्त्र्याभिमानेन कृतैः स्वरूपावरकैः कर्मभिः किं भवेत् ॥ १७ ॥ " क्वचिद्धंसं चित्रकथम् " इत्यस्यार्थमाहुः—ऐश्वरमिति ॥ ऐश्वरमीश्वरप्रतिपादकं विविक्तं पदं चिज्जडरूपं वस्तु येनेति हंसपदार्थः बन्धमोक्षावनुदर्शयतीति तथा अनेन चित्राः कथाः यस्येति व्याख्यातमेवंभूतं शास्त्रमुत्सृज्यानभ्यस्यात एवाज्ञाय तदर्थमविदुषो षष्ठ्यर्थे चतुर्थी । असद्भिर्बहिर्मुखैः कर्मभिः किं भवेत् ॥ १८ ॥ " क्षौरपव्यं स्वयं भ्रमि " इत्यस्यार्थमाहुः—कालचक्रमिति ॥ भ्रमि भ्रमणात्मकमित्यनुवादः तीक्ष्णमिति सर्वं जगन्निष्कर्षयत् जन्ममरणादिनेतस्ततः स्वर्गनरकादौ प्रक्षिपदिति द्वयं क्षौरपव्यपदव्याख्यानं स्वतन्त्रमिति स्वयमित्यस्य व्याख्यानम् । एवंभूतं कालचक्रमबुधस्य द्वितीया प्राग्वत् तत्तत्फलानां नित्यत्वबुद्ध्या कर्माणि कुर्वतस्तैरसद्भिः कालग्रस्तफलकैः कर्मभिः किं भवेत् ॥ १९ ॥ " कथं स्वपितुरादेशम् " इत्यादेरर्थमाहुः—शास्त्रस्य पितुरिति ॥ उपनयनादिसंस्कारद्वारा द्वितीयजन्महेतुत्वाद्धितोपदेष्टृत्वाच्च शास्त्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिता तस्य निवर्तकं निवृत्त्युपदेशकमादेशमुपदेशं यो न वेद असौ गुणविश्रम्भी गुणप्रयुक्तप्रवृत्तिमार्गे विश्वासवान् तदनुरूपाय निवृत्तिरूपाय कथम् उपक्रमेत् । तङ्भाव दीर्घाभावश्चार्षः । "मोक्षेश ब्रह्मबुद्धीनां जीवमायान्तरात्मनाम् । शास्त्रकालोपदेशानामज्ञाने किमु कर्मभिः॥" इति । वाचः कूटसंग्रहश्लोकः ॥२०॥ इतीति ॥ हे राजन् इत्येवं व्यवसिता नारदवाक्यार्थे कृतनिश्चया एकचेतसः ऐकमत्यप्रयुक्ताः हर्यश्वास्तं नारदं परिक्रम्य प्रणम्य च अनिवर्तकं पुनः संसाराप्रापकं पन्थानं भगवन्मार्गं ययुः ॥ २१ ॥ स्वरेति ॥ स्वराः षड्जादय एव ब्रह्म तत्र निर्भात आविर्भूतो यो हृषीकेशो भगवान् तस्य पदाम्बुजेऽखण्डमेकाग्रं चित्तमावेश्य मुनिर्लोकाननुचरत् अन्वचरदित्यर्थः । अडभाव आर्षः ॥ २२ ॥ नाशमिति ॥ शीलेन सुस्वभावेन शालन्ते शोभन्त इति तथा तेषां पुत्राणां नारदात् नाशम् अदर्शनं गार्हस्थ्यधर्मभ्रंशं वा निशम्य श्रुत्वा कः दक्षः अहो ममाज्ञानुसारिणः सुशीलाः पुत्राः स्वधर्माद् भ्रष्टा इति शोचन्नन्वतप्यत । यतः सुप्रजस्त्वं सत्पुत्रवत्त्वमेव तद्वियोगे शुचां शोकानां पदं स्थानं कारणमित्यर्थः ॥ २३ ॥

इति व्यवसिता राजन्हर्यश्वा एकचेतसः ॥ प्रययुस्तं परिक्रम्य पन्थानमनिवर्तनम् ॥ २१ ॥ स्वरब्रह्मणि निर्भातहृषीकेशपदाम्बुजे ॥ अखण्डं चित्तमावेश्य लोकाननुचरन्मुनिः ॥ २२ ॥ नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् ॥ अन्वतप्यत कः शोचन् सुप्रजस्त्वं शुचां पदम् ॥ २३ ॥ स भूयः पाञ्चजन्यायामजेन परिसान्त्वितः ॥ पुत्रानजनयद् दक्षः शबलाश्वान् सहस्रशः ॥ २४ ॥ तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः॥नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः॥२५॥तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ जपन्तो ब्रह्म परमं तेपुस्तत्र महत्तपः॥ २६ ॥ अब्भक्षाः कतिचिन्मासान् कतिचिद् वायुभोजनाः॥आराधयन्मन्त्रमिममभ्यस्यन्त इडस्पतिम् ॥२७॥ ॐ नमो नारायणाय पुरुषाय महात्मने ॥ विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ॥ २८ ॥ इति तानपि राजेन्द्र प्रतिसर्गधियो मुनिः ॥ उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत् ॥ २९ ॥

स इति ॥ ततश्च ब्रह्मणा परिसान्त्वितः स दक्षः पाञ्चजन्यायां स्वभार्यायां भूयः सहस्रशः सहस्रसङ्ख्यान् शबलाश्वसंज्ञान् पुत्रानजनयत् ॥ २४ ॥ तेऽपीति ॥ तेऽपि शबलाश्वाः पित्रा दक्षेण प्रजासर्गे समादिष्टा नियुक्ताः धृतव्रताः सन्तस्तपः कर्तुं यत्र स्वपूर्वजा भ्रातरो नारदोपदेशेन सिद्धाः भक्तिं प्राप्य कृतार्थाः जातास्तन्नारायणसरो नाम तीर्थं जग्मुः ॥ २५ ॥ तदिति ॥ तस्य तीर्थस्योपस्पर्शनादेव विशेषेण निर्धूतो निरस्तो मलो यस्य स आशयोऽन्तःकरणं येषां ते परमं ब्रह्म प्रणवं वक्ष्यमाणं मन्त्रं वा जपन्तोऽत्र स्थाने महत्तपस्तेपुः ॥२६॥ अब्भक्षा इति ॥ पूर्वार्द्धं स्पष्टम्। इमं वक्ष्यमाणं मन्त्रमभ्यसन्तः इडस्पतिं वाचां मन्त्राणां च पतिं भगवन्तमाराधयामासुः ॥२७॥ ओमिति ॥ विशुद्धं सत्वं चित्तमेव धिष्ण्यं प्रतीतिस्थानं यस्य तस्मै महाहंसाय ईश्वराय नमः धीमहि करवाम । शेषं स्पष्टम् ॥ २८ ॥ इतीति ॥ हे राजन् इत्येवं प्रतिसर्गेऽर्वाचीनसर्गोत्पादने धीर्येषां तान्मुनिर्नारद उपेत्य आगत्य पूर्ववत् अदृष्टान्तं भुव इत्यादीनि वाचः कूटानि परोक्षार्थवचनानि प्राह स्म ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यदप्याह—दाक्षायणा इति ॥ हे दाक्षायणाः हे भ्रातृवत्सलाः गदतो मम निगममुपदेशं सम्यक् सावधानतया शृणुत भ्रातॄणां पदवीमेवान्विच्छत अवलोकयत ॥ ३० ॥ भ्रातॄणामिति ॥ यो भ्राता धर्मवित् भ्रात्रनुगमनं धर्म इति ज्ञानवान् भ्रातॄणां प्रायणं श्रेष्ठमार्गमनुतिष्ठति स पुरुषः पुण्यमेव बन्धुर्यस्य पुण्यवान् मरुद्भिर्भ्रातृवत्सलैर्देवैः सह स्वर्गे मोदते ॥ ३१ ॥ एतावदिति ॥ हे मारिष श्रेष्ठ अमोघं सफलं दर्शनं यस्य स नारद एतावदुक्त्वा प्रययौ । ते शबलाश्वाश्चापि भ्रातॄणामेव मार्गमन्वगमन् सर्गोद्योगं त्यक्त्वाऽऽत्मचिन्तनं कृतवन्तः ॥ ३२ ॥ सध्रीचीनमिति ॥ सध्रीचीनं समीचीनं प्रतीचीनं प्रत्यग्वृत्तिलभ्यं परस्य पुरुषोत्तमस्य संबन्धिनमनुपथमनुकूलं मार्गं गतास्ते अद्यापि संसारं प्रति न निवर्तन्ते । तत्र दृष्टान्तः । पश्चिमा यामिनीः यामिन्य इव । पूर्वसवर्णदीर्घ आर्षः । अतीता रात्रयो यथा न पुनरायान्ति तथेत्यर्थः ॥ ३३ ॥ एतस्मिन्निति ॥ स्पष्टम् ॥ ३४ ॥ चुक्रोधेति ॥ तच्छ्रुत्वा पुत्रशोकेन मूर्च्छितः असौ दक्षः नारदाय चुक्रोध । स्वायंभुवमनोर्वंश्याः प्रियव्रतोत्तानपादध्रुव-

दाक्षायणाः संशृणुत गदतो निगमं मम ॥ अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ॥ ३० ॥ भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् ॥ स पुण्यबन्धुः पुरुषो मरुद्भिः सह मोदते ॥ ३१ ॥ एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः ॥ तेऽपि चान्वगमन् मार्गं भ्रातॄणामेव मारिष ॥ ३२ ॥ सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ॥ नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ॥ ३३ ॥ एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः ॥ पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ॥ ३४ ॥ चुक्रोध नारदायासौ पुत्रशोकविमूर्च्छितः ॥ देवर्षिमुपलभ्याऽऽह रोषाद् विस्फुरिताधरः ॥ ३५ ॥ दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिङ्गेन नस्त्वया ॥ असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥ ३६ ॥ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ॥ विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ॥ ३७ ॥

प्राचीनबर्हिःप्रचेतोहर्यश्वाद्याः भगवत्कृपया मोक्षमार्गे मया प्रवर्तिताः । कथमेको दक्षोऽन्धकूपे पतन्नोद्ध्रियते अधुना च पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोऽपि विरक्तः सुखेनोद्धार्यः स्यादिति तदनुग्रहार्थं देवर्षिस्तत्पार्श्वं गतः तदा च देवर्षिमुपलभ्यागतं दृष्ट्वा रोषात् स्फुरितोऽधरो यस्य स आह स्म ॥ ३५ ॥ अहो इति ॥ अहो हे असाधो साधुवल्लिङ्गं चिह्नं जटायज्ञोपवीतादि यस्य तेन महादाम्भिकेन त्वया नोऽस्माकं साधूनां सन्मार्गस्थानाम् असाधु अभद्रमेव अकारि कृतं यतोऽर्भकाणां बालानां भिक्षोर्मार्गो निवृत्तिमार्गः प्रदर्शितः । यद्वा । नोऽस्माकमर्भकाणामसाधु अकारि यतः साधूनां स्वधर्मे प्रवृत्तानां भिक्षोर्मार्गः प्रदर्शित इत्यन्वयः । वास्तवोऽर्थस्तु नास्ति साधुर्यतः साधूनि लिङ्गान्यपि यस्य साधुभिर्लिङ्ग्यते ज्ञायते नास्ति साधु यतस्तथाकारि ॥ ३६ ॥ ननु संन्यासिनो मार्गः साधुरेव तत्राह—ऋणैरिति ॥ हे पाप " जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी " इति श्रुतेः । सर्वे त्रैवर्णिका ऋणत्रयवन्त एव जायन्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेऽपि त्रिभिर्ऋणैरमुक्ता यतो न मीमांसितानि न परिचारितानि कर्माणि यैस्ते तथा अतस्तेषां विषयभोगत्यागादेतल्लोकविघातः मोक्षानधिकारित्वाच्च परलोकश्रेयसोऽपि विघातः कृतः । तथा चाह मनुः । " ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ " इति ॥ ३७ ॥ एवमिति ॥ एवं प्राणिद्रोहेण स्वस्वामिनो हरेरपि यशोहा यशोनाशकोऽसि यतो बालानामज्ञानां मतिं सृष्ट्यादिसत्कर्मविषयां भिनत्तीति तथा अत एव परमपुरुषार्थनाशकत्वान्निरनुक्रोशो निर्दयः अत एव निरपत्रपः निर्लज्जस्त्वं हरेः पार्षदमध्ये कथं चरसि ॥ ३८ ॥ निर्लज्जत्वमाह—नन्विति ॥ ननु सौहृदघ्नम् अवैरिणामपि वैरंकरं त्वामृते विना भागवता नित्यं भूतानामनुग्रहे कातराः भवन्ति । त्वं तु भूतानामहितं कुर्वन् कथं न लज्जसे इति भावः ॥ ३९ ॥ ननु विरक्तानामृणापाकरणं नावश्यकं " यदहरेव विरजेत्तदहरेव प्रव्रजेत् " इति श्रुतेः । अतः ऋणैरित्याद्ययुक्तमित्याशङ्क्याह—नेति ॥ यद्यपि वैराग्यादुपशमः तस्मात्स्नेहपाशच्छेद इति रीत्या उपशमं स्नेहपाशनिकृंतनं त्वं मन्यसे तथापि मृषा केवलिना ज्ञानं विनावधूतवेषेण त्वया इत्थं मतिचालने कृतेऽपि पुंसां विरागो नैव स्यात् ॥ ४० ॥ तत्र हेतुः— नेति ॥ नानुभूय विषयभोगं विना पुमान् विषयाणां तीक्ष्णतां

एवं त्वं निरनुक्रोशो बालानां मतिभिद् हरेः ॥ पार्षदमध्ये चरसि यशोहा निरपत्रपः॥ ३८॥ ननु भागवता नित्यं भूतानुग्रहकातराः ॥ ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणाम्॥३९॥नेत्थं पुंसां विरागः स्यात् त्वया केवलिना मृषा॥मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनम्॥ ४०॥ नानुभूय न जानाति पुमान् विषयतीक्ष्णताम् ॥ निर्विंद्येत स्वयं तस्मान्न तथा भिन्नधीः परैः ॥ ४१ ॥ यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनाम् ॥ कृतवानसि दुर्मर्षं विप्रियं तव मर्षितम्॥४२॥तन्तुकृन्तन यन्नस्त्वमभद्रमचरः पुनः ॥ तस्माल्लोकेषु ते मूढ न भवेद् भ्रमतः पदम् ॥ ४३ ॥ श्रीशुक उवाच॥ प्रतिजग्राह तद्बाढं नारदः साधुसंमतः॥एतावान् साधुवादो हि तितिक्षेतेश्वरः स्वयम्॥४४॥इतिश्रीभा० म० षष्ठ०दक्षनारदशापो नाम पञ्चमोऽध्यायः ॥५ ॥

दुःखहेतुत्वं न जानाति अतो यथा स्वयं परप्रेरणमन्तरेणैव तस्माद्विषयानुभवेन तत्तीक्ष्णत्वज्ञानान्निर्विद्येत तथा परैर्भिन्ना प्रेरणया चालिता धीर्यस्य स न निर्विद्यते ॥ ४१ ॥ यदिति ॥ नोऽस्माकं कर्मसन्धानां वैदिककर्मानुष्ठानसंकल्पवतां । कर्तुमन्धानामिति पाठे विप्रियं कर्तुमजानतामित्यर्थः । साधूनां स्वर्गादिसाधनपराणां गृहमेधिनां गृहस्थानां पुत्रनाशनेन दुर्मर्षं दुःसहं विप्रियं यत्त्वं कृतवानसि तत्तव मर्षितमेकदा तु सोढमित्यर्थः ॥ ४२ ॥ तन्विति ॥ हे तन्तुकृन्तन अस्मत्सन्तानोच्छेदक यत्तु पुनस्त्वं नोऽस्माकमभद्रं शबलाश्वनाशनेन विप्रियमचरः कृतवान् तस्मात् हे मूढ लोकेषु भ्रमतः पर्यटतस्ते कुत्रापि पदं स्थानं न भवेत् ॥ ४३ ॥ प्रतीति ॥ साधुषु संमतः नारदः तत् तं दक्षशापं बाढं तथास्त्विति प्रतिजग्राह स्वीकृतवान् । स्वयमीश्वरः प्रतिकर्तुं समर्थोऽपि परोपद्रवं तितिक्षेत सहेतैव न शापादिनाऽपकारं कुर्यादित्येतावानेव हि यस्मात्साधुवादः साधुशब्दनिरुक्तिः ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य पञ्चमे निरमादिमाम् ॥ ५ ॥

Nepal Sanskrit University ...

CC-0. In Public Domain. Digitization by eGangotri

षष्ठे दक्षस्य कन्यानां षष्टेर्वंशाः प्रकीर्त्तिताः ॥ विश्वरूपजनिश्चात्र श्लोकाः सार्द्धाः शरा४४॥ ग्र४यः ॥ ता४४॥र्त्योऽनुष्टुभश्चैकोर्वांचवागपि दृश्यते ॥ ६ ॥ तत इति ॥ ततः पुत्रशोकेन
निर्विण्णः पुनः पूर्वोक्तरीत्या स्वयंभुवा ब्रह्मणा अनुनीतः सान्त्वयित्वा सृष्टौ प्रवर्त्तितः प्राचेतसो दक्षः पुनर्नारदात् पुत्राणां नाशमाशङ्कमानोऽसिक्न्यां स्वभार्यायां षष्टिं
पितृवत्सलाः पितृस्नेहवतीः दुहितॄः जनयामास ॥ १ ॥ दशेति ॥ दश धर्माय दत्तवान् । द्विषट् द्विगुणिताः षट् द्वादश या सुताः त्रयोदश काय कश्यपाय दत्तवान् । त्रिनव
त्रिगुणिता नव सप्तविंशतिमिन्दोः इन्दवे सोमाय दत्तवान् । द्वे अङ्गिरसे द्वे कृशाश्वाय अपराः अवशिष्टाश्चतस्रश्च पुनस्ताक्ष्यार्य ताक्ष्र्यनामान्तरप्राताय कश्यपायैव दत्तवान्॥२॥
नामेति ॥ सापत्यानाम् अपत्यसहितानाममूषां दक्षकन्यानां नामधेयानि मे मत्तः शृणु यासां प्रसूतिप्रसवैः पुत्रपौत्रादिभिस्त्रयो लोका आपूरिताः ॥ ३ ॥ भानुरिति ॥ भान्वाद्या
धर्मपत्न्यस्तासां सुतान् शृणु स्पष्टम् ॥ ४ ॥ भानोरिति ॥ हे नृप भानोर्देवऋषभ आसीत् तत इन्द्रसेन आसीत् । लम्बाया विद्योत आसीत् । ततो विद्योतात् स्तनयित्नव

श्रीशुक उवाच ॥ ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा ॥ षष्टिं संजनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥ दश धर्माय कायेन्दोर्द्विषट्
त्रिणव दत्तवान् ॥ भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे ताक्ष्र्याय चापराः ॥ २ ॥ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ॥ यासां प्रसूतिप्रसवैर्लोका
आपूरितास्त्रयः ॥ ३ ॥ भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुताञ्छृणु ॥ ४ ॥ भानोस्तु देवऋ-
षभ इन्द्रसेनस्ततो नृप ॥ विद्योत आसील्लम्बायास्ततश्च स्तनयित्नवः ॥ ५ ॥ ककुभः संकटस्तस्य कीकटस्तनयो यतः ॥ भुवो दुर्गाणि जा-
मेयः स्वर्गो नन्दिस्ततोऽभवत् ॥ ६ ॥ विश्वेदेवास्तु विश्वाया अप्रजांस्तान् प्रचक्षते ॥ साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥
मरुत्वांश्च जयन्तश्च मरुत्वत्या बभूवतुः ॥ जयन्तो वासुदेवांश उपेन्द्र इति यं विदुः ॥८॥ मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ॥ ये वै फलं
प्रयच्छन्ति भूतानां स्वस्वकालजम् ॥९॥ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥ १० ॥

आसन् ॥ ५ ॥ ककुभ इति ॥ ककुभः संकटः पुत्रः तस्य संकटस्य कीकटस्तनयोऽभवदित्यन्वयः । यतः कीकटाद्भुवो दुर्गाभिमानिनो देवा जाताः । जामेयः जाम्याः पुत्रः
स्वर्गः ततः स्वर्गान्नन्दिरभवत् ॥ ६ ॥ विश्वेदेवा इति ॥ प्रचक्षते वृद्धाः कथयन्ति । तत्सुतः तेषां साध्यानां सुतः स्पष्टमन्यत् ॥ ७ ॥ मरुत्वानिति ॥ पूर्वार्द्धं स्पष्टम् । तत्र
उपेन्द्रो वासुदेवांशः यं वोपेन्द्र इति विदुः अदितेः पुत्र उपेन्द्र इव जयन्तोऽप्युपेन्द्रसंज्ञः । केचित्तु पूर्वकल्पवृत्तकथनात्तत्र जयन्त उपेन्द्रः । अस्मिन् कल्पे तु वामनस्योपेन्द्र-
त्वस्य वक्ष्यमाणत्वात् । अयं धर्मवंशः पाद्मे कल्पे वाराहकल्पे तद्वंशस्य चतुर्थे निरूपितत्वात् तत्रत्यस्य श्रीनारायणस्य विद्यमानत्वाच्चेत्याहुः ॥ ८ ॥ मौहूर्तिकास्तत्तन्मुहू-
र्त्ताभिमानिनः स्पष्टमन्यत् ॥ ९ ॥ संकल्पाया इति ॥ स्पष्टम् । कामः पूर्वं ब्रह्मपुत्रत्वेनोक्तः । अत्र तु संकल्पपुत्र इत्यपि कल्पभेदज्ञापकम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसुनामान्याह—द्रोण इत्यादि ॥ द्रोणस्याभिमतिर्नाम पत्नी तस्या हर्षादयः हर्षाद्यन्तःकरणवृत्त्यभिमानिनो देवाः पुत्राः। इदमपि कल्पान्तरवृत्तं दशमे। द्रोणभार्याया धरेति नाम्नो वक्ष्यमाणत्वात् हर्षादीनां चतुर्थस्कन्धे धर्माधर्मयोर्वंशे निरूपितत्वाच्च ॥११॥ प्राणस्येति॥ प्राणस्य ऊर्जस्वती भार्या तस्याः सहः आयुः पुरोजवः इति त्रयः पुत्राः। ऊर्जस्वती भार्येति सप्तम्यर्थे प्रथमेत्येके। पुरः तत्पुराभिमानिनीर्देवताः शेषम् उत्तरार्द्धं स्पष्टम्॥१२॥अर्कस्येति॥ स्पष्टम्॥१३॥स्कन्द इवि॥स्कन्दश्चाग्निपुत्रः धात्रीत्वेन कृत्तिकापुत्रःकृत्तिका चाग्नेर्भार्या। वस्तुतः स्कन्दः शिवपुत्रः ये विशाखादयस्ते ततः स्कन्दाज्जाताः।दोषस्य भार्या शर्वरी तत्पुत्रः शिशुमारः स च हरेः कला॥१४॥ वसोरिति॥ वसोर्भार्या आङ्गिरसी तत्पुत्रो विश्वकर्मा आकृत्याः पतिः शिल्पाचार्यः ततो विश्वकर्मणश्चाक्षुषो मनुरभूत्। ध्रुववंशजोऽप्यसौ दक्षादिवदत्रापि जातः। केचित्तु एतदपि कल्पान्तरत्वज्ञापकं चतुर्थे। "स चक्षुःसूतमाकूत्यां पत्न्यां मनुमवाप ह।" इति सर्वतेजसः पुत्रत्वोक्तेः। विश्वे साध्याश्च मनोः सुताः ॥ १५ ॥ विभावसोरिति ॥ विभावसोर्भार्या उषा व्युष्टादिपुत्रत्रय-

द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥ ११ ॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः ॥ ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः ॥ १२ ॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ॥ १३ ॥ स्कन्दश्च कृत्तिकापुत्रो ये विशाखादयस्ततः॥ दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला ॥१४॥ वसोराङ्गिरसी पुत्रो विश्वकर्मा कृतीपतिः ॥ ततो मनुश्चाक्षुषोऽभूद् विश्वे साध्या मनोः सुताः ॥ १५ ॥ विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ॥ पञ्च यामोऽथ भूतानि येन जाग्रति कर्मसु ॥ १६ ॥ सरूपाऽसूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥ १७ ॥ अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ॥ रुद्रस्य पार्षदाश्चान्ये प्रेतभूतविनायकाः ॥ १८ ॥ प्रजापतेरङ्गिरसः स्वधा पत्नी पितॄनथ ॥ अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत् सती ॥ १९ ॥ कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् ॥ धिषणायां वेदशिरा देवलं वयुनं मनुम् ॥ २० ॥

मसूत। चतुर्थे तु "प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः।" इत्युक्तं तदपि कल्पान्तरवृत्तमिति ज्ञेयम्। अथ आतपात्पञ्चयामो दिवसाभिमानी जातः अत एव रात्रिस्त्रियामा प्रदोषप्रत्यूषयोर्दिवसावयवत्वात् येन पञ्चयामेन हेतुना भूतानि कर्मसु जाग्रति प्रवर्त्तन्ते ॥ १६ ॥ सरूपेति युग्मम् ॥ भूतस्य द्वे भार्ये तत्र सरूपाख्या भार्या कोटिशो रुद्रानसूत। तेषु रैवताद्याः बहुरूपान्ताः मुख्या रुद्रा महानिति सर्वेषां विशेषणम्। एवमेकादशरूपस्य रुद्रस्य ये पार्षदाः अन्ये च ये घोररूपा भूतप्रेतादयस्तेऽन्यस्यां भार्यायां जाताः ॥ १७ ॥ १८ ॥ प्रजापतेरिति ॥ प्रजापतेरङ्गिरसो द्वे भार्ये तयोर्मध्ये स्वधा नाम पत्नी पितॄन् पुत्रत्वेऽकरोत्। अथ च सती नाम पत्नी अथर्वाङ्गिरसं नाम वेदं पुत्रत्वेऽकरोत् ॥ १९ ॥ कृशाश्व इति ॥ कृशाश्वः अर्चिर्नाम्न्यां भार्यायां धूम्रकेशमजीजनत्। धिषणाख्यायां च भार्यायां वेदशिरा वेदशिरसमित्यर्थः। देवलादित्रयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेति चतुरः पुत्रानजीजनत् ॥ २० ॥ तार्क्ष्यस्येति ॥ तार्क्ष्यस्य तृक्षस्य मरीचेः पुत्रत्वात् तार्क्ष्यनाम्नः कश्यपस्य विनताद्याश्चतस्रो भार्याः । सन्ध्यभाव आर्षः । स्पष्टं शेषम् ॥ २१ ॥ सुपर्णेति ॥ सुपर्णा विनता साक्षाद्यज्ञेशस्य वाहनं गरुडमसूत । गरुडस्यावतारोऽयं साक्षाद्गरुडस्य नित्यत्वात् सुपर्णैव सूर्यस्य । सूतमनूरुमरुणं च असूत । कद्रूरनेकशो नागानसूत ॥ २२ ॥ कृत्तिकेति सार्द्धम् ॥ हे भारत इन्दोः पत्न्यस्तु कृत्तिकादीनि नक्षत्राणि आसन् स इन्दुः रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात् कुपितस्य दक्षस्य शापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तासु पत्नीषु अनपत्यः अभूत् । पुनस्तं दक्षं प्रसाद्य क्षये कृष्णपक्षे दिताः खण्डिताः सतीः । क्षयैधिता इति पाठे क्षये सति पुनरेधितास्तेनैव वर्द्धिताः सतीः कला एव लेभे न त्वपत्यानि ॥ २३ ॥ शृण्विति ॥ अथ इदं जगत् याभ्यः प्रसूतं तासां लोकानां मातॄणां कश्यपपत्नीनां शङ्कराणि

तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनी इति ॥ पतङ्गयसूत पतगान् यामिनी शलभानथ ॥ २१ ॥ सुपर्णाऽसूत गरुडं साक्षाद् यज्ञेशवाहनम् ॥ सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥ २२ ॥ कृत्तिकादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत ॥ दक्षशापात् सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ पुनः प्रसाद्य तं सोमः कला लेभे क्षयेदिताः ॥ २३ ॥ शृणु नामानि लोकानां मातॄणां शंकराणि च ॥ अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥ २४ ॥ अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ॥ २५ ॥ तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ॥ सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ॥ २६ ॥ ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ दन्दशूकादयः सर्पा राजन् क्रोधवशात्मजाः ॥ २७ ॥ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ अरिष्टायाश्च गन्धर्वाः काष्ठाया द्विशफेतराः ॥२८॥ सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु॥ द्विमूर्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः ॥ अयोमुखः शङ्कुशिराः स्वर्भानुः कपिलोऽरुणः ॥२९॥ पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ॥ धूमकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ॥ ३० ॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ॥ वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ॥ ३१ ॥

सुखकराणि नामानि चकारादपत्यानि च शृणु ॥ २४ ॥ अदितिरिति ॥ स्पष्टम् । सन्ध्यभावावार्षौ ॥ २५॥ अल्पत्वेन सुगमत्वाद्यथायथं सूचीकटाहन्यायमनुसृत्य व्युत्क्रमेण तासां वंशमाह—तिमेरिति ॥ यादोगणाः मत्स्यादयो जलचराः श्वापदाः व्याघ्रादयो वनचराः । स्पष्टमन्यत् ॥ २६ ॥ ताम्राया इति ॥ स्पष्टम् ॥ २७ ॥ इलाया इति ॥ भूरुहाः वृक्षाद्याः सौरसाः सुरसायाः इमे पुत्राः द्विशफेतराः एकशफाः अश्वगर्दभादयः । स्पष्टमन्यत् ॥ २८ ॥ सुता इति सार्द्धद्वयम् ॥ एकषष्टिसङ्ख्याका दनोः पुत्रा जातास्तेषां मध्ये प्राधानिकान् मुख्यानष्टादश शृणु । द्विमूर्द्धेति ॥ २९ ॥ ३० ॥ स्वर्भानोरिति ॥ वृषपर्वणः शर्मिष्ठां कन्यां बली नाहुषः नहुषपुत्रः ययातिः उवाह ॥ ३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैश्वानरेति ॥ वैश्वानरो दनोः पुत्रः ॥ ३२ ॥ उपदानवीमिति सार्द्धम् ॥ अथ पुलोमां कालकां चेति द्वे वैश्वानरस्य सुते ब्रह्मणा चोदितः कः प्रजापतिर्भगवान् कश्यपः उपयेमे । तयोरतिबलत्वात् कश्यपं विना तन्मनोरथपूर्त्यसंभवात् ब्रह्मप्रेरणया अधर्ममपि पौत्रीपरिणयनमङ्गीकृतवान् ॥ ३३ ॥ ३४ ॥ पौलोमा इति सार्द्धम् ॥ हे राजन् तयोः पुलोमाकालकयोः पुत्राः पौलोमाः कालकेयाश्च दानवा युद्धशालिनो महापराक्रमवन्तः षष्टिसहस्रसङ्ख्याका निवातकवचसंज्ञका जाताः । तांश्च यज्ञघ्नान्स्वर्गं गतः इन्द्रस्य प्रियङ्करः एक एव ते पितुः पिता अर्जुनः जघान ॥ ३५ ॥ विप्रचित्तिरिति ॥ पूर्वार्द्धं स्पष्टम् । शतं चैकमित्यस्य विवरणं राहुर्ज्येष्ठो यस्य तत् तत्केतूनां शतम् इति यः केतुभिः सहितो राहुः ग्रहत्वमुपागतः ॥ ३६ ॥ अथेति ॥ मङ्गलार्थः यः अदितेर्वंशः सः अतोऽग्रे अनुपूर्वशः क्रमेण श्रूयताम् । योऽत्र विभुः नारायणो देवः स्वांशेन

वैश्वानरसुतायाश्च चतस्रश्चारुदर्शनाः ॥ उपदानवी हयशिरा पुलोमा कालका तथा ॥ ३२ ॥ उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ॥ पुलोमां कालकां च द्वे वैश्वानरसुते तु कः ॥ ३३ ॥ उपयेमेऽथ भगवान् कश्यपो ब्रह्मचोदितः ॥ ३४ ॥ पौलोमाः कालकेयाश्च दानवा युद्धशालिनः ॥ तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता॥ जघान स्वर्गतो राजन्नेक इन्द्रप्रियंकरः ॥ ३५ ॥ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ॥ राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागतः ॥ ३६ ॥ अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ॥ यत्र नारायणो देवः स्वांशेनावतरद् विभुः ॥ ३७ ॥ विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः ॥ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥३८ ॥ विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुम् ॥ मिथुनं च महाभागा यमं देवं यमीं तथा ॥ सा वै भूत्वाऽथ वडवा नासत्यौ सुषुवे भुवि ॥ ३९ ॥ छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः ॥ कन्यां च तपतीं या वै वव्रे संवरणं पतिम् ॥ ४० ॥ अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः ॥ यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥ ४१ ॥ पूषाऽनपत्यः पिष्टादो भग्नदन्तोऽभवत् पुरा ॥ योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ॥ ४२ ॥

वामनरूपेण अवतरत् अवातरत्। अडभाव आर्षः ॥३७॥ विवस्वानित्याद्याः द्वादशादित्या अदितेः सुताः ॥ ३८ ॥ विवस्वत इति सार्द्धम् ॥ महाभागा विवस्वतो भार्या संज्ञा श्राद्धदेवाख्यं मनुमसूयत । तथा यमीं यमुनां यमं देवं चेति मिथुनमपि संज्ञैवासूत। सैव वडवा भूत्वा भुवि गता सती नासत्यावश्विनीकुमारौ सुषुवे ॥३९॥ छायेति ॥ छायाख्या द्वितीया पत्नी तु ततः विवस्वतः शनैश्चरं तथा सावर्णिं मनुं तपतीं नाम कन्यां च लेभे । या तपती संवरणं राजानं पतिं वव्रे ॥ ४० ॥ अर्यम्ण इति ॥ अर्यम्णो मातृकानाम पत्नी तयोरर्यममातृकयोश्चर्षणयः कृताकृतज्ञानवन्तः सुताः पश्यति कर्मत्वेन चर्षणीनां निघण्टादावुक्तेः । यत्र येषु आत्मानुसन्धानविशेषत्वेन मानुषी जातिश्च ब्रह्मणोपकल्पिता । तथा च श्रुतिः । “ पुरुषत्वे चाविस्तरामात्मा” इति ॥ ४१ ॥ पूषेति ॥ पूषा तु अनपत्योऽभूत्। यः पुरा दक्षयज्ञे भग्नदन्तः अभूत् पश्चात्पिष्टादश्चाभूत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यः दक्षाय कुपितं हरमिति शेषः । विवृतद्विजः प्रकटितदन्तः सन् जहास ॥ ४२ ॥ त्वष्टुरिति ॥ दैत्यात्मजा रचना नाम कन्यका त्वष्टुर्भार्या तयोः ताभ्यां त्वष्टृरचनाभ्यां स्पष्टं शेषम् ॥ ४३ ॥ तमिति ॥ तं द्विषतां शत्रूणां दैत्यानां स्वस्रीयं भागिनेयमपि तं विश्वरूपं सुरगणाः पौरोहित्ये वव्रिरे । यत् यदा विमतेन अवज्ञातेन आङ्गिरसेन बृहस्पतिना गुरुणा त्यक्तास्तदा गत्यन्तराभावात् तं वृतवन्तः ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य षष्ठेऽध्याये व्यधादिमाम् ॥६॥ सप्तमे गुरुणा त्यक्तैर्विश्वरूपो वृतः सुरैः ॥ पौरोहित्यं चकारात्राध्यायश्लोकाः कुवर्द्धयः ॥ उवाचेत्यष्टकं साङ्घ्विनेत्रैर्वेदा अनुष्टुभः ॥ ७ ॥ कस्येति ॥ हे भगवन् आत्मन आचार्येण सुराः कस्य हेतोः परित्यक्ताः तेषां शिष्याणां त्यागकारणं यत्तदेतत् गुरौ अक्रममपराधमाचक्ष्व । एतदिति सामान्ये नपुंसकम् ॥ १ ॥ इन्द्र इति अष्टकम् ॥

त्वष्टुर्दैत्यानुजा भार्या रचना नाम कन्यका ॥ सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ॥ ४३ ॥ तं वव्रिरे सुरगणा दौहित्रं द्विषतामपि ॥ विमतेन परित्यक्ता गुरुणाङ्गिरसेन यद् ॥ ४४ ॥ इति श्रीभागवते षष्ठस्कन्धे दक्षकन्यावंशवर्णनं नाम षष्ठोऽध्यायः ॥६॥ राजोवाच ॥ कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः ॥ एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ ॥ १ ॥ श्रीशुक उवाच ॥ इन्द्रस्त्रिभुवनैश्वर्यमदोल्लङ्घितसत्पथः ॥ मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ॥ २ ॥ विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः ॥ सिद्धचारणगन्धर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥३॥ विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ॥ निषेव्यमाणो मघवान् स्तूयमानश्च भारत ॥ ४ ॥ उपगीयमानो ललितमास्थानाध्यासनास्थितः ॥ पाण्डुरेणातपत्रेण चन्द्रमण्डलचारुणा ॥ ५ ॥ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ॥ विराजमानः पौलोम्या सहार्धासनया भृशम् ॥ ६ ॥ स यदा परमाचार्यं देवानामात्मनश्च ह ॥ नाभ्यनन्दत संप्राप्तं प्रत्युत्थानासनादिभिः ॥ ७ ॥ वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम् ॥ नोच्चचालासनादिन्द्रः पश्यन्नपि सभागतम् ॥८॥ ततो निर्गत्य सहसा कविराङ्गिरसः प्रभुः ॥ आययौ स्वगृहं तूर्ष्णीं विद्वाञ्छ्रीमदविक्रियाम् ॥९॥

हे भारत हे नृप त्रिभुवनैश्वर्यमदेनोल्लङ्घितः सतां पन्थाः येन सः मरुदादिभिः परिश्रितः परिवृतो निषेव्यमाणः स्तूयमानश्च आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदाश्रितः अप्सरोगन्धर्वादिभिर्ललितं यथा भवति तथोपगीयमानः चन्द्रमण्डलवच्चारुणा मनोहरेण पाण्डुरेण श्वेतवर्णेन आतपत्रेण छत्रेण । अन्यैश्च चामरव्यजनादिभिः पारमेष्ठ्यैर्महाराजचिह्नैर्युक्तश्च अर्द्धमासनमेवासनं यस्यास्तया मृगलोचनेतिवदासनपदस्य वृत्तावन्तर्भावः । पौलोम्या सह भृशमतिशयेन विराजमानः स इन्द्रो देवानामात्मनश्च परमाचार्यं सुरासुरैर्नमस्कृतं मुनिवरं सम्प्राप्तं सम्यक् कृपया आगतमपि वाचस्पतिं बृहस्पतिं पश्यन्नपि यदा आसनान्नोच्चचाल आसनमारुह्य प्रत्युत्थानासनादिभिश्च नाभ्यनन्दत् तदा श्रीमदेन या विक्रिया तां विद्वान् जानन् कविः क्रान्तदर्शी आङ्गिरसः बृहस्पतिः प्रभुः शापादिना इन्द्रदण्डे समर्थोऽपि तूर्ष्णीं ततः स्थानान्निर्गत्य सहसा स्वगृ-

CC-0. In Public Domain. Digitization by eGangotri

हमाययौ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ तर्हीति ॥ तर्ह्येवेन्द्रोऽप्यात्मनः सकाशाद्गुरोर्हेलनमपमानं प्रतिबुद्ध्य ज्ञात्वा सदसि स्वयं परप्रेरणमन्तरेणैवात्मनात्मानं गर्हयामास निन्दितवान् ॥ १० ॥ अहो इति ॥ अहो मम कृतं कर्म वै निश्चितमसाध्वेव यत् दभ्रा अल्पा बुद्धिर्यस्य तेनैश्वर्यमत्तेन मया गुरुः सदसि कात्कृतः तिरस्कृतः सदसीत्यपराधाधिक्याय ॥ ११ ॥ क इति ॥ अतः त्रिविष्टपपतेर्ममापि लक्ष्मीं सम्पदं पण्डितः तस्या मादकतादिदोषज्ञानवान् को गृध्येत् वाञ्छेत् । यया सम्पदाहं विबुधानां सात्त्विकानां देवानामीश्वरोऽप्यासुरं भावमहङ्कारमद्य नीतोऽस्मि ॥ १२ ॥ ननु राजसिंहासनस्थस्य अनभ्युत्थाने दोषाभाव इत्याशङ्क्याह—य इति ॥ पारमेष्ठ्यं धिषणं महाराजसिंहासनमधितिष्ठन् ब्राह्मणादि कमपि कंचन न प्रत्युत्तिष्ठेदिति ये ब्रूयुस्ते परमुत्कृष्टं धर्मं न विदुः। "ब्राह्मणं कुलसम्पन्नं भक्तं विष्णोर्महात्मनः ।आयान्तं वीक्ष्य नोत्तिष्ठेत्स दुःखैः परिभूयते ॥ " इत्यादिशास्त्रविरोधात् ॥ १३ ॥ तेषामिति ॥ अधस्तमसि पततां कुपथदेष्टॄणां कुमार्गे प्रवर्त्तकानां तेषां वचो ये श्रद्दध्युः तत्र श्रद्धां कुर्वन्ति

तर्ह्येव प्रतिबुध्येन्द्रो गुरुहेलनमात्मनः ॥ गर्हयामास सदसि स्वयमात्मानमात्मना ॥ १० ॥ अहो बत मयाऽसाधु कृतं वै दभ्रबुद्धिना ॥ यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥ ११ ॥ को गृध्येत् पण्डितो लक्ष्मीं त्रिविष्टपपतेरपि ॥ ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥ १२ ॥ ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन ॥ प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥ १३ ॥ तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ॥ ये श्रद्दध्युर्वचस्ते वै मज्जन्त्यश्मप्लवा इव ॥ १४ ॥ अथाहममराचार्यमगाधधिषणं द्विजम् ॥ प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥ १५ ॥ एवं चिन्तयतस्तस्य मघोनो भगवान् गृहात् ॥ बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥ १६ ॥ गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट् ॥ ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥ १७ ॥

ते मज्जन्ति नरकादिदुःखे निमग्ना भवन्ति । यथा अश्मना कृतः प्लवो नौर्यैस्ते तथा मज्जन्तं प्लवमनुमज्जन्ति तद्वदित्यर्थः ॥ १४ ॥ अथेति ॥ अथ तस्मात् अगाधा धिषणा यस्य तं सर्वज्ञम् अमराणामाचार्यं द्विजं ब्राह्मणत्वात्कृपालुं बृहस्पतिं निशठः शाठ्यरहितः अहं शीर्ष्णा तच्चरणं स्पृशन् प्रसादयिष्ये ॥ १५ ॥ एवमिति ॥ एवं तस्य मघोनः इन्द्रस्य स्वसभायामेव चिन्तयतः सतो बृहस्पतिर्यतो भगवान् सर्वज्ञोऽतस्तदभिप्रायं भाविकार्यं च सर्वं ज्ञात्वा अधि अधिकया उत्कृष्टया आत्मनो मायया शक्त्या स्वगृहादप्यदृष्टामन्तर्धानलक्षणां गतिं स्थितिं गतः ॥ १६ ॥ गुरोरिति ॥ यदा च भगवान् स्वराट् इन्द्रः परीक्षन् परित ईक्षमाणोऽपि । शता आर्षः । गुरोः संज्ञां स्थितिं स्थानज्ञानं नाधिगतो न प्राप्तस्तदा गुरुवैमुख्येन रक्षकाभावादसुरेभ्यः कथमस्माकं निर्वाहो भविष्यतीति धिया ध्यायन् सर्वैः सुरैर्युक्तोऽप्यात्मनो मनसः शर्म स्वास्थ्यं नालभत ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ तद् बृहस्पतेर्वैमनस्यं श्रुत्वैव दुर्मदाः सर्वेऽसुराः औशनसं मतं शुक्राचार्यस्य संमतिमाश्रित्य आततायिनः गृहीतशस्त्राः सन्तो देवान् प्रत्युद्यमं चक्रुः तेषां नाशाय युद्धं चक्रुः ॥ १८ ॥ तैरिति ॥ तदा तैरसुरैर्विसृष्टैस्तीक्ष्णैरिषुभिर्निर्भिन्नान्यङ्गानि ऊदरशिरआदीनि उरवो बाहवश्च येषां ते तथाभूताः अत एव लज्जया आनता कन्धरा येषां ते तथाभूताः इन्द्रेण सहिता देवाः ब्रह्माणं शरणं ययुः उपायार्थं विज्ञापनं चक्रुः ॥ १९ ॥ तानिति ॥ तान् देवान् तथोक्तप्रकारेणासुरैरभ्यर्दितान् पीडितान् वीक्ष्य परया कृपया व्याप्तस्तान् परिसान्त्वयन् भगवानजो देवः आत्मभूः ब्रह्मा उवाच ॥ २० ॥ अहो इति ॥ हे सुरश्रेष्ठाः ऐश्वर्यमदात् ब्राह्मणं तत्रापि दान्तं वशीकृतचित्तं तत्रापि ब्रह्मिष्ठं ब्रह्मज्ञानिनं यन्नाभ्यनन्दत नाभिनन्दितवन्तस्तद्वो युष्माभिर्महदभद्रमन्याय्यमेव कृतम् ॥२१॥ तस्येति॥ हे सुरा ःस्वे स्वयं वैरिणो हन्तारो येषां तेभ्यः पूर्वं भवद्भिरेव पराभूतेभ्य इत्यर्थः । प्रक्षीणेभ्यः परेभ्यः दैत्येभ्यः अत्र परेभ्योऽन्येभ्यः सकाशात् केभ्यः स्ववैरिभ्य इति चक्रवर्ती । वो युष्माकं समृ-

तच्छ्रुत्वैवासुराः सर्वे आश्रित्यौशनसं मतम्॥देवान् प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः॥१८॥तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नाङ्गोरुबाहवः ॥ ब्रह्माणं शरणं जग्मुः सहेन्द्रा नतकन्धराः॥१९॥तांस्तथाऽभ्यर्दितान् वीक्ष्य भगवानात्मभूरजः॥कृपया परया देव उवाच परिसान्त्वयन्॥२०॥ब्रह्मोवाच॥ अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत्॥ ब्रह्मिष्ठं ब्राह्मणं दान्तमैश्वर्यान्नाभ्यनन्दत॥२१॥तस्यायमनयस्यासीत् परेभ्यो वः पराभवः॥प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः॥२२॥मघवन् द्विषतः पश्य प्रक्षीणान् गुर्वतिक्रमात्॥संप्रत्युपचितान् भूयः काव्यमाराध्य भक्तितः॥आददीरन् निलयनं ममापि भृगुदेवताः॥२३॥त्रिविष्टपं किं गणयन्त्यभेद्यमन्त्रा भृगूणामनुशिक्षितार्थाः॥न विप्रगोविन्दगवीश्वराणां भवन्त्यभद्राणि नरेश्वराणाम्॥२४॥तद् विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवन्तम्॥सभाजितोऽर्थान् स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ २५ ॥

द्धानामपि यत् यः पराभवः स एव तस्यैवानयस्य अन्यायस्यायं विपाकः फलं युष्माकमासीत् ॥ २२ ॥ मघवन्निति सार्द्धम् ॥ हे मघवन् पूर्वं गुरोरतिक्रमात् प्रक्षीणान् अपि द्विषतः शत्रून् सम्प्रति भक्तितः काव्यं शुक्रं गुरुमाराध्य उपसेव्य भूय उपचितान् पश्य । यतः भृगुः शुक्रः देवता येषां ते ममापि निलयनं स्थानमाददीरन् गृह्णीयुः । गुरुसत्कारतिरस्कारावेव सम्पद्विपदोर्हेतू इति भावः ॥ २३ ॥ अत्र सामाद्या उपाया अप्यशक्या इत्याह—त्रिविष्टपमिति ॥ अभेद्यो मन्त्रो मन्त्रणा येषां ते तथा । तत्र हेतुमाह । भृगूणामिति । शुक्राचार्याणामनुशिक्षितमेवार्थः पुरुषार्थत्वेनोपादेयो येषां ते दैत्याः त्रिविष्टपं किं गणयन्ति । यतः विप्रा गोविन्दो गावश्चेश्वरा अनुग्राहका येषां तेषां नरेश्वराणामभद्राणि नैव भवन्ति अन्येषां तु भवन्ति अतः यावद्दैत्यानां विप्रादयोऽनुग्राहकास्तावत्तेषामभद्राणि न भविष्यन्ति । यदा भवतामपि विप्राद्या अनुग्राहका भविष्यन्ति तदा भवतामपि दुःखशान्तिर्भविष्यतीति ॥ २४ ॥ तदिति ॥ तत्तस्मात् तपस्विनं त्वाष्ट्रं त्वष्टुः पुत्रम् आत्मवन्तं स्वाधीनं विश्वरूपं विप्रमाशु भजत । यद्यस्य विश्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपस्य कर्म असुरपक्षपातरूपं क्षमिष्यध्वम् । लृटि टेरेत्वाभाव आर्षः । तत्तदा सः युष्माभिः सभाजितः सत्कृतः सन्नथानन्तरमेव वो युष्माकमर्थान् मनोरथान् विधास्यत साधयिष्यति ॥ २५ ॥ त इति ॥ हे राजन् ते देवाः ब्रह्मणा एवमुदिताः उक्ताः अत एव विगतः ज्वरोऽसुरजनितः सन्तापो येषां ते त्वाष्ट्रं विश्वरूपम् ऋषिम् उपव्रज्य परिष्वज्य चेदं वक्ष्यमाणमब्रुवन् ॥ २६ ॥ वयमिति ॥ हे तात ते तव भद्रमस्तु । वयमतिथयो याचकास्ते तवाश्रमं प्राप्ताः अतो हे तात पितॄणामस्माकं समयोचितः एतत्कालयोग्यः कामः मनोरथः सम्पाद्यताम् ॥ २७ ॥ पुत्राणामिति ॥ हे ब्रह्मन् पुत्रवतां पुत्रादिपोषणव्यापृतानामपि सतां पुत्राणां परः उत्कृष्टो धर्मः पितृशुश्रूषणं सेवनमेव ब्रह्मचारिणां पुत्राद्यभावेन तत्पोषणचिन्तारहितानां भवादृशानां तु पितृसेवापरो धर्म इति किमुत वक्तव्यम् । तेषां तु तद्भवत्येवेत्यर्थः ॥ २८ ॥ आचार्य इति ॥ आचार्यः उपनयनपूर्वकं साङ्गोपनिषद्वेदाध्यापकः ब्रह्मणो वेदस्य मूर्त्तिः पिता प्रजापतेर्ब्रह्मणो मूर्त्तिः भ्राता मरुत्पतेरिन्द्रस्य मूर्त्तिः माता साक्षात्क्षितेस्तनुः ॥ २९ ॥ दयाया इति ॥

श्रीशुक उवाच ॥ त एवमुदिता राजन् ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥ २६ ॥ देवा ऊचुः ॥ वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ॥ कामः सम्पाद्यतां तात पितॄणां समयोचितः ॥ २७ ॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् ॥ अपि पुत्रवतां ब्रह्मन् किमुत ब्रह्मचारिणाम् ॥ २८ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात् क्षितेस्तनुः ॥ २९ ॥ दयाया भगिनी मूर्तिर्धर्मस्यात्माऽतिथिः स्वयम् ॥ अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ३० ॥ तस्मात् पितॄणामार्तानामार्तिं परपराभवम् ॥ तपसाऽपनयंस्तात संदेशं कर्तुमर्हसि ॥ ३१ ॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् ॥ यथाञ्जसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३२ ॥ न गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र्यभिवादनम् ॥ छन्दोभ्योऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणम् ॥ ३३ ॥

भगिनी दयाया मूर्त्तिः अतिथिः अज्ञातपूर्वः गृहागतः स्वयं साक्षाद्धर्मस्य आत्मा मूर्त्तिः अभ्यागतो ज्ञातपूर्वः सः अग्नेर्मूर्त्तिः। सर्वभूतानि च स्थावरजङ्गमानि सर्वात्मनो भगवतो मूर्तयः । सर्वभूतेष्वात्मदृष्टिः कर्त्तव्येत्यर्थः ॥ ३० ॥ तस्मादिति ॥ हे तात तस्मात् पितॄणामार्त्तानामस्माकं परेभ्यः शत्रुभ्यः पराभवरूपामार्तिं स्वतपसापनयन् सन्देशमस्मदर्थितं कर्तुमर्हसि ॥ ३१ ॥ वृणीमह इति ॥ ब्रह्मिष्ठं ब्रह्मनिष्ठं ब्राह्मणं गुरुं त्वाम् उपाध्यायं वृणीमहे । यथा येनोपाध्यायवरणप्रकारेण तव तेजसा अञ्जसा अनायासेनैव सपत्नान् स्वशत्रून् विजेष्यामः । तङ्भाव आर्षः ॥ ३२ ॥ ननूपाध्यायस्य पादाभिवन्दनमावश्यकं तज्ज्येष्ठानां वः भ्रातुष्पुत्रे मयि कथं युक्तमित्याशङ्क्याह—नेति ॥ हे ब्रह्मन् अर्थेषु प्रयोजननिमित्तं हि यविष्ठस्य कनिष्ठस्याङ्घ्र्यभिवादनं न गर्हयन्ति वृद्धाः । वस्तुतस्तु छन्दोभ्योऽन्यत्र वेदज्ञानं विहाय न वयो ज्यैष्ठ्यस्य ज्येष्ठत्वस्य कारणं किंतु वेदज्ञत्वमेव ज्येष्ठत्वस्य कारणम् । यद्वा । छन्दोभ्यो वैदिककृत्येभ्योऽन्यत्र अर्थेषु व्यावहारिककृत्येषु यविष्ठाङ्घ्र्यभिवादनं न गर्हयन्तीति न अपि तु गर्हयन्त्येव । यतो व्यव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हारकृत्येषु वय एव ज्येष्ठत्वकारणं वैदिककृत्येषु न वयोज्येष्ठत्वकारणं किन्तु छन्दोज्ञत्वमेवातस्तव वेदज्ञानेऽधिकत्वादभिवादनीयोऽसि इति ॥ ३३ ॥ अभ्यर्थित इति ॥ स्पष्टम् ॥ ३४ ॥ विगर्हितमिति सार्द्धम् ॥ हे नाथाः पौरोहित्यं धर्मशीलैर्विगर्हितं निन्दितं ब्रह्मवर्चसः ब्रह्मतेजसः । समासान्ताभाव आर्षः । उपव्ययः अधिकक्षयो यस्माद् तथापि मद्विधः सुशीलः तच्छिष्यः तेषां भवतां शिक्षणार्हः लोकेशैर्युष्माभिरभियाचितं कथं प्रत्याख्यास्यति । अस्माकं तु स एव युष्मद्वचनप्रत्याख्यानाभाव एव स्वार्थः स्वपुरुषार्थ उच्यते । शास्त्रे शास्त्रज्ञैरिति शेषः ॥ ३५ ॥ धनलाभार्थं पौरोहित्यं नाङ्गीकरोम्यपि तु भवतां गौरवादेवेत्याह—अकिञ्चनानामिति ॥ हे अधीश्वराः क्षेत्रे स्वाम्युपेक्षितकणिशोपादानं शिलं हट्टादौ पतितव्रीह्यादेरुपादानमुञ्छनं तदेवाकिंचनानां तपस्विनां धनं हि प्रसिद्धम् । तत्र तत्र शास्त्रे तेनेह द्विविधेनान्नेनेह गृहाश्रमे निर्वर्तिता साधूनां सदाचाराणां सती लौकिकालौकिकक्रिया येन स तथाविधोऽहं येन दुर्मतिर्हृष्यति तादृशं विगर्ह्यं तेजोहानिकरत्वेन निन्द्यं पौरोधसं कथं करोमि ॥३६॥ तथापीति ॥

ऋषिरुवाच ॥ अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ॥ स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥ विश्वरूप उवाच ॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययम् ॥ कथं नु मद्विधो नाथा लोकेशैरभियाचितम् ॥ प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥ ३५ ॥ अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्क्रियः ॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥ ३६ ॥ तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ॥ भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥३७॥ श्रीशुक उवाच ॥ तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः॥ पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥ ३८ ॥ सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ॥ आच्छिद्यादान्महेन्द्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥ यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ॥ तां प्राह स महेन्द्राय विश्वरूप उदारधीः ॥ ४० ॥ इति श्रीभा० म० ष० इन्द्रादिदेवैर्विश्वरूपस्य पौरोहित्याय वरणं नाम सप्तमोऽध्यायः ॥ ७ ॥

तथापि तेजोनाशकत्वेन निन्दितत्वेऽप्यहं न प्रतिब्रूयां न प्रत्याख्यायां गुरुभिर्युष्माभिरेतत् कियत् प्रार्थितं स्वल्पमेव प्रार्थितमतो भवतां प्रार्थितं त्वन्यदपि सर्वं प्राणैरर्थैश्चाहं साधये ॥ ३७ ॥ तेभ्य इति ॥ महातपा अपि विरूपस्तेभ्यो देवेभ्य एवं प्रतिश्रुत्य प्रतिज्ञाय तैर्वृतः परमेण समाधिना परमोद्यमेन पौरोहित्यं पुरोहितकार्यं चक्रे ॥ ३८ ॥ सुरेति ॥ उशनस इयम् औशनसी तया विद्यया गुप्तामपि सुरद्विषां दैत्यानां श्रियं विष्णुर्देवतास्या इति वैष्णवी तया श्रीनारायणकवचात्मिकया विद्यया आच्छिद्य आहृत्य विभुः भगवदनुग्रहेण समर्थो विश्वरूपो महेन्द्राय अदात् ॥ ३९ ॥ ययेति ॥ यया विद्यया गुप्तो रक्षितः सहस्राक्ष इन्द्रः विभुः समर्थः सन्नसुरचमूर्दैत्यसेना जिग्ये । तङार्षः । तां विद्यां स उदारधीः उदारबुद्धिः विश्वरूपो महेन्द्राय प्राह स्म प्रादात् ॥४०॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य सप्तमे निरमादिमाम् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमे विश्वरूपोऽदाद्वर्म नारायणात्मकम् ॥ शक्राय जैत्रं तत्राङ्घ्रियुक्ताः श्लोकास्त्रिंर्वार्द्धयः ॥ चत्वार्युवाचेति साङ्घ्रिनागवेदा अनुष्टुभः ॥ ८ ॥ ययेति ॥ यया विद्यया गुप्तो रक्षितः सहस्राक्षः क्रीडन्निवानायासेन सवाहान् रिपुसैनिकान् दैत्यसेनापतीन् विनिर्जित्य त्रिलोक्याः संबन्धिनीं श्रियं बुभुजे ॥ १ ॥ भगवन्निति ॥ हे भगवन् तन्नारायणात्मकं वर्म कवचं ममाख्याहि । येन सहायभूतेन गुप्तो रक्षित इन्द्रो मृधे युद्धे यथा येन प्रकारेण आततायिनः वधोद्यतान् शत्रून् अजयत् तत्प्रकारं च ममाख्याहि ॥ २ ॥ वृत इति ॥ स्पष्टम् ॥ ३ ॥ धौतेति सार्द्धम् ॥ भये आगते सति धौतौ प्रक्षालितौ अङ्घ्री पाणी च येन सः आचम्य आचमनं कृत्वा अत एव शुचिः सपवित्रः पवित्रेण कुशरचितमुद्रिकाविशेषेण सहितः उदङ्मुखतयोपविश्य वाग्यतः मौनी मन्त्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वाङ्गेषु करयोश्च न्यासो येन स नारायणपरं नारायणदैवत्यं वर्म संनह्येत् बध्नीयात् ॥ ४ ॥ तत्राष्टाक्षरेण पादाद्यष्टाङ्गेषु न्यासमाह–पादयोरिति सार्द्धम् ॥ " ॐ नमो नारायणाय " इत्यस्याष्टाक्षरमन्त्रस्य प्रणवसम्पुटितमोङ्काराद्येकै-

राजोवाच ॥ यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ॥ यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे ॥ २ ॥ श्रीशुक उवाच ॥ वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उवाच ॥ धौताङ्घ्रिपाणिराचम्य सपवित्र उदङ्मुखः ॥ कृतस्वाङ्गकरन्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ नारायणमयं वर्म सन्नह्येद् भय आगते ॥ ४ ॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ मुखे शिरस्यानुपूर्व्यादोङ्कारादीनि विन्यसेत् ॥ ५ ॥ ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ करन्यासं ततः कुर्याद् द्वादशाक्षरविद्यया ॥ प्रणवादियकारान्तमङ्गुल्यङ्गुष्ठपर्वसु ॥ ६ ॥ न्यसेद् हृदयमोङ्कारं विकारमनुमूर्धनि ॥ षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥ वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसन्धिषु ॥ ७ ॥ मकारमस्त्रमुद्दिश्य मन्त्रमूर्तिर्भवेद् बुधः ॥ सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर्दिशेत् ॥ ॐ विष्णवे नम इति ॥ ८ ॥

कमक्षरमानुपूर्व्यात् यथाक्रमेण पादाद्यष्टाङ्गेषु विन्यसेत् । अथ वा विपर्ययं यथा भवति तथा शिरआदिपादान्तेषु यकाराद्योङ्कारान्तमपि विन्यसेत् क्रमेण सृष्टिन्यासं व्युत्क्रमेण संहारन्यासं वा कुर्यात् ॥ ५ ॥ " ॐ नमो भगवते वासुदेवाय " इति मन्त्रेण करन्यासं कुर्यात् । तत्र करन्यासमिति ततोऽङ्गन्यासानन्तरं द्वादशाक्षरविद्यया प्रणवादि यकारान्तं प्रणवसम्पुटितमेकैकमक्षरं दक्षिणतर्जनीपर्यन्तमङ्गुलीषु परिशिष्टमक्षरचतुष्टयमङ्गुष्ठयोराद्यन्तपर्वसु विन्यसेदिति शेषः ॥ ६ ॥ पुनः षडक्षरमन्त्रेण षडङ्गन्यासमाह–न्यसेदिति सार्द्धद्वयम् ॥ तत्राद्यः श्लोको व्याख्यातप्रायः । षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषडङ्गेषु न्यसेत् । शिखया शिखायामित्यर्थः । मकारमस्त्रमुद्दिश्य ध्यात्वा बुधः मन्त्रमूर्त्तिर्भवेत् । एवं मन्त्रमूर्त्तिः सन् तत् मकारास्त्रं,मः अस्त्राय फडित्येवं सविसर्गं फडन्तं सर्वदिक्षु विनिर्दिशेत् दिग्बन्धं कुर्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

षकारणकारयोर्विश्लेषेणान्यथा प्रतीतेर्भ्रमनिरासाय मन्त्रं दर्शयति ओमिति ॥ ७ ॥ ८ ॥ आत्मानमिति ॥ षड्भिरैश्वर्यादिभिः भगशब्दवाच्याभिः शक्तिभिर्युतं विद्या च मन्त्रात्मिका तेजश्च तपश्च मूर्तिर्यस्य तं ध्येयं ध्यातुं योग्यमीश्वररूपं परमात्मानं ध्यायेत् । तदनन्तरं चेमं वक्ष्यमाणं श्रीनारायणकवचाख्यं मन्त्रमुदाहरेत् आवृत्त्या जपेदित्यर्थः ॥ ९ ॥ ॐ हरिरिति ॥ पतगेन्द्रस्य गरुडस्य पृष्ठे न्यस्ताङ्घ्रिपद्मः दरः शङ्खः अरि चक्रं तदादिकानष्टायुधान् दधानः । अष्टगुण इति अणिमाद्यष्टैश्वर्ययुक्तः अष्टायुधधारणायाष्टबाहुः हरिः सर्वदेशे सर्वकाले च मम रक्षां विदध्यात् करोतु ॥ १० ॥ जले त्विति ॥ जलेष्विति वा पाठः । यादांसि हिंस्रा जलजन्तवस्तद्गणेभ्यो वरुणस्य पाशाच्च यादोगणा एव वरुणपाशस्तस्माद्वा मां जले तु मत्स्यमूर्त्ती रक्षतु । मायया स्वेच्छया बटुवामनरूपो जातो भगवान् स्थलेषु मां रक्षतु। त्रयो विक्रमाः बलेस्त्रिभुवनमादातुं पादविक्षेपा यस्य स विश्वरूपः स्थूलरूपो मां खे आकाशे रक्षतु ॥ ११ ॥ दुर्गेष्विति ॥ यस्य महाट्टहासं विमुञ्चतः कुर्वतो दिशो विनेदुः दशदिक्षु प्रतिध्वनिर्जातस्तच्छ्रवणेन

आत्मानं परमं ध्यायेद् ध्येयं षट्शक्तिभिर्युतम् ॥ विद्यातेजस्तपोमूर्तिमिमं मन्त्रमुदाहरेत् ॥ ९ ॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ॥ दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥ १० ॥ जले तु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ॥ स्थलेषु मायाबटुवामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ ११ ॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ॥ विमुञ्चतो यस्य महाऽट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १२ ॥ रक्षत्वसौ माऽध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद् भरताग्रजोऽस्मान् ॥ १३ ॥ मामुग्रधर्मादखिलात् प्रमादान्नारायणः पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पायाद् गुणेशः कपिलः कर्मबन्धात् ॥ १४ ॥ सनत्कुमारोऽवतु कामदेवाद् हयशीर्षा मां पथि देवहेलनात् ॥ देवर्षिवर्यः पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥ १५

चासुरस्त्रीणां गर्भाश्च न्यपतन् । सः असुरयूथपस्य हिरण्यकशिपोररिः प्रभुर्नृसिंहः अटवीवनमाजिमुखं युद्धसंमुखप्रदेशः आदिर्येषां तेषु दुर्गेषु सङ्कटस्थानेषु मां पायात् ॥ १२ ॥ रक्षत्विति ॥ यज्ञैः स्वावयवरूपैः कल्प्यते निरूप्यत इति तथेति स्वार्थे कल्पप् वा यज्ञाः कल्पाः यतः इति वा स्वदंष्ट्रया उन्नीता रसातलादुद्धृता धरा येन सः असाववतारेषु प्रसिद्धो वराहो मा मामध्वनि मार्गे रक्षतु । अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यो मां रक्षतु । विप्रवासे देशान्तरे सलक्ष्मणो भरताग्रजो दाशरथिः रामोऽस्मान् अव्यात् ॥ १३ ॥ मामिति ॥ उग्रधर्मादभिचारादिप्रवृत्तितोऽखिलात्प्रमादात् विहिताकरणलक्षणाच्च मां नारायणः पातु नरश्च मां हासात् गर्वात् पातु । अयोगात् योगभ्रंशात् योगनाथो दत्तः दत्तात्रेयश्च मां पातु । सत्त्वादिगुणप्रेरितात् कर्मरूपबन्धात् मां गुणाधीशः कपिलः पायात् ॥ १४ ॥ सनदिति ॥ कामदेवात् कन्दर्पवेगात् मां सनत्कुमारोऽवतु । पथि मार्गे यद्देवानां हेलनं नमस्कारादि यथोचितमकृत्वा गमनेनावज्ञानं तस्मात् मां हयशीर्षा हयग्रीवोऽवतु । देवर्षिवर्यः नारदः पुरुषो महापुरुषो भगवांस्तदर्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्यान्तराच्छिद्रात् द्वात्रिंशदपराधलक्षणादवतु । कूर्मः कच्छपावतारो हरिर्मामशेषात् निरयात् अवतात् ॥ १५ ॥ धन्वन्तरिरिति ॥ अपथ्यात् रोगजनकद्रव्यभक्षणात् मां धन्वन्तरिर्भगवान्पातु । द्वन्द्वात् शीतोष्णादिजनिताद्भयात् निर्जितः आत्मा येन स ऋषभो मां पातु । लोकात् जनापवादात् यज्ञः यज्ञावतारो भगवान् पातु । जननिमित्तो योऽन्त उपघातस्तस्माद्बलो बलभद्रोऽवतात् । कृतान्तादिति पाठे कालादित्यर्थः । क्रोधवशात्सर्पाणां गणादहीन्द्रः शेषो मामवतात् ॥ १६ ॥ द्वैपायन इति ॥ अप्रबोधादज्ञानान्मां द्वैपायनो वेदव्यासो भगवान् प्रपातु । बुद्धस्तु पाखण्डगणाद्वेदविरुद्धाचारसमूहात् प्रमादाद्वेदाविहिताचारे आलस्यादिना प्रवृत्त्यभावाच्च मां प्रपातु । धर्मस्यावनाय रक्षणाय उरवो बहवः कृता अवतारा येन स कल्किः कालमलभूतात्कलेः सकाशान्मां प्रपातु ॥ १७ ॥ दिनस्य रात्रेश्च षड्षड्भागेषु रक्षाप्रार्थनम्—मामिति ॥ तत्र दिनस्य रात्रेश्च षष्ठो भागः त्रिंशद्घटिकामिते दिनमाने पञ्चघटिकात्मकः न्यूनेऽधिके वाऽनुपातात् तत्र प्रातः दिनस्य प्रथमे भागे मां गदया युक्तः केशवोऽव्यात् । आसङ्गवं

धन्वन्तरिर्भगवान् पात्वपथ्याद् द्वन्द्वाद् भयादृषभो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनान्ताद् बलो गणात् क्रोधवशादहीन्द्रः ॥ १६ ॥ द्वैपायनो भगवानप्रबोधाद् बुद्धस्तु पाखण्डगणात् प्रमादात् ॥ कल्किः कलेः कालमलात् प्रपातु धर्मावनायोरुकृतावतारः ॥ १७ ॥ मां केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवमात्तवेणुः ॥ नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररीन्द्रपाणिः ॥ १८ ॥ देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम् ॥ दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ १९ ॥ श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ॥ दामोदरोऽव्यादनुसन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥ २० ॥ चक्रं युगान्तानलतिग्मनेमि भ्रमत् समन्ताद् भगवत्प्रयुक्तम् ॥ दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ २१ ॥

द्वितीयो भागः सङ्गवः तमभिव्याप्य माम् आत्तवेणुः गृहीतवेणुर्गोविन्दोऽव्यात् । तृतीयो भागः प्राह्णस्तत्र गृहीतशक्तिर्नारायणोऽव्यात् । चतुर्थो भागः मध्यंदिनं तत्र मामरीन्द्रपाणिः चक्रहस्तो विष्णुरव्यात् ॥ १८ ॥ देव इति ॥ पञ्चमो भागोऽपराह्णस्तत्र मामुग्रं दैत्यभयङ्करं शार्ङ्गाख्यं धनुर्यस्य स देवो देवपक्षपाती मधुहा मधुसूदनोऽवतु । षष्ठो भागः सायं तत्र मां त्रिधामा ब्रह्मादित्रिमूर्त्तिः माधवोऽवतु । रात्रौ प्रथमो भागः प्रदोषस्तत्र हृषीकेशोऽवतु । उत अपि अर्द्धरात्रे द्वितीये भागे तथा निशीथे तृतीये भागेऽपि एकः पद्मनाभ एवावतु ॥ १९ ॥ श्रीवत्सेति ॥ अपररात्रे चतुर्थे भागे श्रीवत्सो रोमावर्त्तचिह्नविशेषो धामनि स्वविग्रहे वक्षःस्थले यस्य स ईशो मामव्यात् । प्रत्यूषे पञ्चमे भागे जनानामविद्यामर्दयतीति जनार्दन ईशोऽसिधरः सन् मामव्यात् । प्रभाते षष्ठे भागे दामोदरोऽव्यात् । प्राह्णादिशब्दानां क्वचित् किंचिद्भिन्नार्थवाचकत्वेऽप्यत्र तत्तद्भागपरतया विवक्षा । अनुसन्ध्यं प्रतिसन्ध्यं दिनरात्रिसन्ध्ययोः कालमूर्त्तिर्विश्वेश्वरो भगवान् मामव्यात् ॥ २० ॥ चक्रमिति ॥ युगान्तानलस्येव तिग्मा तीक्ष्णत्वेना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिभयङ्करा नेमिर्यस्य तत् भगवता प्रयुक्तं प्रेरितं चक्रं समन्तादस्मत्सर्वतो भ्रमत्सदस्मदरिसैन्यमाशु दन्दग्धि दन्दग्धि गर्हितं दहति। तस्यायं स्वभाव एव नतु तस्मात्प्रार्थनीय-मित्यर्थः । दहतेर्यङ्लुकि लट् । यद्वा । त्वमेवंभूतं चक्रमसि अतोऽरिसैन्यं गर्हितंद हेति लोण्मध्यमैकवचनम् । कक्षं शुष्कतृणं यथा वातोद्धूतो हुताशोऽग्निर्दहति तद्वदित्यर्थः ॥ २१ ॥ गदे इति ॥ अशनिवत्स्पर्शनं येषां ते विस्फुलिङ्गा यस्यास्तस्याः सम्बोधनं हे गदे त्वमजितस्य भगवतः प्रियासि अहं च तस्य दासः अनेन कर्त्तव्यस्यावश्यकत्वं सूचितम्।अतस्त्वं कूष्माण्डादीन्निष्पिण्ढि निष्पिण्ढि संचूर्णय संचूर्णय।अन्याननुक्तांश्चास्मदरीन् चूर्णय चूर्णय।सर्वत्र वीप्सा अतिशीघ्रत्वाय॥२२॥त्वमिति॥हे दरेन्द्र पाञ्चजन्य त्वं कृष्णेन पूरितो मुखवायुपूरणेन वादितः अत एव भीमः स्वनः शब्दो यस्य तथाभूतः सन् यातुधानादीनामन्यस्य च ममारेर्हृदयानि कम्पयन् तान् विद्रावयेति । यातुधानाः राक्षसाः प्रमथादयो रुद्रगणविशेषाः विप्रग्रहाः ब्रह्मराक्षसाः ये चान्ये घोरदृष्टयस्तान् ॥ २३ ॥ त्वमिति ॥ तिग्मा तीक्ष्णा धारा यस्य तत्सम्बोधनं हे तिग्मधार हे असिवर खड्गश्रेष्ठ त्वमीशेन भगवता प्रयुक्तो ममारिसैन्यं च्छिन्धि छिन्धि शतचन्द्राकाराणि मण्डलानि यस्मिंस्तत्सम्बोधनं हे शतचन्द्र चर्मन् अघोनामघवतां संप्रसारण-

गदेऽशनिस्पर्शनविस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजितप्रियासि॥कूश्माण्डवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २२ ॥ त्वं यातुधानप्रम-
थप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कम्पयन् ॥ २३ ॥ त्वं तिग्मधाराऽसिवरारिसैन्यमी-
शप्रयुक्तो मम छिन्धि छिन्धि ॥ चक्षूंषि चर्मन् शतचन्द्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥ २४ ॥ यन्नो भयं ग्रहेभ्योऽभूत् केतुभ्यो नृभ्य
एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यस्तथा अंहोभ्य एव वा ॥ २५ ॥ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयान्तु संक्षयं सद्यो ये नः श्रेयः-
प्रतीपकाः ॥ २६ ॥ गरुडो भगवान्स्तोत्रस्तोभश्छन्दोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विश्वक्सेनः स्वनामभिः ॥ २७ ॥

मार्षम् । द्विषां चक्षूंषि छादय । पापचक्षुषां च उग्रदृष्टीनां चक्षूंषि हर ॥ २४ ॥ यदिति युग्मम् ॥ नोऽस्माकं यद्भयं ग्रहेभ्य आदित्यादिभ्यो नवभ्योऽभूत् यच्च भयं केतुभ्यः उल्कापातादिभ्योऽभूत् राहुभ्रातृकेतोः ग्रहान्तर्भूतत्वात् नृभ्यो दुष्टमनुष्येभ्य एव वा यद्भयमभूत् यद्भयं सरीसृपेभ्यः सर्पवृश्चिकादिभ्योऽभूत् यत्तु भयं दंष्ट्रिभ्यो व्याघ्रसिंहादि-भ्योऽभूत् यच्च भयं भूतेभ्यः प्रेतादिभ्यः । यद्वा । पञ्चमहाभूतेभ्यो जलाग्निविद्युदादिभ्योऽभूत् यच्च भयमंहोभ्यः पापेभ्य एव वाऽभूत् एतानि सर्वाणि भयानि ये चान्ये नोऽस्माकं श्रेयसां च प्रतीपकाः व्याघातकाः ते च । तत्करोतीति ण्यन्तात्प्रतीपशब्दात् ण्वुल् । भगवतो नामानि रूपाणि अस्त्राणि च तेषां कीर्त्तनात् सद्यस्तत्क्षणमेव सम्यक् पुनरुत्पत्तिराहित्यं यथा भवन्ति तथा क्षयं प्रयान्तु ॥ २५ ॥ २६ ॥ गरुड इति ॥ स्तोत्राणि बृहद्रथन्तरादिसामानि तैः स्तोभ्यते संस्तूयत इति स्तोत्रस्तोभः छन्दोमयो वेदमूर्तिः ।ऐकपद्यपाठे स्तोभाः गीतिपूरकाक्षराणि । स्तोत्रस्तोमच्छन्दोमय इति पाठे तु स्तोत्रस्तोमः सामाधारऋक्समूहस्तल्लक्षणं छन्दःसामवेदस्तन्मयः भगवान् प्रभुः एवंभूतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरुडो मामशेषकृच्छ्रेभ्यः सर्वदुःखेभ्यो रक्षतु । तथा विश्वक् सर्वतः सेना यस्य स भगवान् स्वनामभिरशेषकृच्छ्रेभ्यो रक्षतु विश्वक्सेनः पार्षदविशेषो वा ॥ २७ ॥ सर्वेति ॥ हरेर्नामानि च रूपाणि च यानानि वाहनानि आयुधानि च तानि सर्वापद्भ्यो नो बुद्धीन्द्रियमनःप्राणान् पान्तु । तथा पार्षदभूषणाः भगवत्पार्षदमुख्याश्च नो बुद्ध्यादीन् पान्तु ॥ २८ ॥ यथेति ॥ वस्तुतः परमार्थतः सच्च असच्च मूर्तामूर्तं यत्तत्सर्वं जगद्भगवानेव न ततो भिन्नम् यथा हि यथार्थं शास्त्रप्रतिपादितं सत्यं चेत्तदानेनैव सत्येन नोऽस्माकं सर्व उपद्रवा नाशं यान्तु गच्छन्तु । यदि वेदाः प्रमाणं स्युरितिवत् असन्देहे सन्देहवचनं शैलीविशेषः ॥२९॥ यथेति युग्मम् ॥ यथा ऐकात्म्यस्यानुभावो भावना ध्यानं येषां तेषां विकल्पो भेदस्तद्रहितोऽपि तथा भावनारहितानां भेददर्शिनां भूषणानि कौस्तुभादीनि आयुधानि सुदर्शनादीनि लिङ्गानि च चतुर्भुजद्विभुजादिमूर्तीः आख्याः रामकृष्णादिनामानि शक्तीः ज्ञानैश्वर्यादीनि स्वमायया स्वेच्छया स्वयमेव धत्त इति प्रतिभाति । तत्तु "यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय।" इत्यादिशास्त्रोक्तं

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः॥बुद्धीन्द्रियमनःप्राणान्पान्तु पार्षदभूषणाः ॥२८॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यान्तु नाशमुपद्रवाः ॥२९॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ॥ भूषणायुधलिङ्गाख्या धत्ते शक्तीः स्वमायया ॥३०॥ तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः॥पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥३१॥ विदिक्षु दिक्षूर्ध्वमधः समन्तादन्तर्बहिर्भगवान्नारसिंहः॥प्रहापयल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः॥३२॥मघवन्निदमाख्यातं वर्म नारायणात्मकम्॥विजेष्यस्यञ्जसा येन दंशितोऽसुरयूथपान्॥३३॥ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा॥पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते॥३४॥न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित्॥३५॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः॥ योगधारणया स्वाङ्गं जहौ स मरुधन्वनि ॥३६॥

यथा यथार्थं सत्यं चेत् तदा तेनैव सत्यमानेन यथार्थभूतेन प्रमाणेन सर्वैः पूर्वोक्तैरनुक्तैश्चाष्टभुजादिस्वरूपैर्नोऽस्मान् सदा सर्वत्र सर्वज्ञः सर्वगः भगवान् हरिः पातु ॥ ३० ॥ ३१ ॥ विदिक्ष्विति ॥ स्वनेन महाट्टहासेन यः सर्वलोकानां यद्भयं तत्प्रहापयन् अपसारयन् विदिक्षु आग्नेय्यादिषु चतसृषु दिक्षु प्राच्यादिषु चतसृषु ऊर्ध्वमधः समन्तात् सर्वतः अन्तर्बहिश्चास्मान् स्वतेजसा ग्रस्तानि अभिभूतानि समस्तानां तेजस्विनां दिग्गजविषशस्त्रजलाग्न्यादीनां तेजांसि प्रभावाः येन स भगवान्नारसिंहः नरसिंह एव पातु। यद्वा । नारसिंहः नरसिंहभक्तः प्रह्लादः स्वनेन नृसिंहनामगर्जनेन॥ ३२ ॥भगवन्निति ॥ दंशितः कवचितः विजेष्यसीति। तङ्भाव आर्षः । स्पष्टमन्यत्॥ ३३॥ एतदिति ॥ स दृष्टः स्पृष्टो वा सद्यः साध्वसात् भयाद्विमुच्यते किं पुनर्धारकः । स्पष्टमन्यत्॥ ३४॥नेति ॥ तस्य विद्यां धारयतः राजादिभ्यः कुतश्चित्कर्हिचिदपि भयं नैव भवेत् ॥ ३५॥ इमामिति ॥ पुरा कश्चित्कौशिको द्विजोऽभूत् स च मरुधन्वनि निरुदके मलिनेऽपि देशे इमां विद्यां धारयन् पुरा योगधारणया स्वाङ्गं जहौ । एतेन क्षेत्रतीर्थाद्यनपेक्षत्वं विद्याया दर्शितम् ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति ॥ एकदा स्त्रीभिर्वृतश्चित्ररथो नाम गन्धर्वपतिः यत्र द्विजस्य क्षयः देहत्यागस्तस्योपरि विमानेन ययौ ॥ ३७ ॥ गगनादिति अर्द्धम् ॥ तस्य स्थानस्योल्लङ्घनात् सद्यस्तत्क्षणमेव सविमानोऽवाक्शिराः अधःशिरा गगनाद्यपतत् ॥ ३८ ॥ स इति ॥ अस्यास्थीनि सरस्वत्यां क्षिप ततस्त्वमितो गन्तुं शक्ष्यसि नान्यथेति वालखिल्यानां ऋषीणां वचनात्स चित्ररथः तस्यास्थीन्यादाय प्राचीसरस्वत्यां पूर्ववाहिन्यां । सरस्वत्यां पुंवद्भावाभाव आर्षः । प्रास्य प्रक्षिप्य तत्र स्नात्वा च तत्प्रभावेण विस्मितः सन् स्वं धाम गन्धर्वलोकमन्वगात् जगाम । अन्यथा गन्तुं नापारयिष्यदिति ॥ ३९ ॥ य इति ॥ काले यस्मिन् कस्मिन्नपि काले भयकाले च स्पष्टमन्यत् ॥ ४० ॥ एतामिति ॥ विश्वरूपादधिगतः प्राप्तः सन् स्पष्टमन्यत् ॥ ४१ ॥ इति श्रीकृष्णसेवार्थमान्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्याष्टमेऽध्याये व्यधादिमाम् ॥ ८ ॥ नवमे विश्वरूपस्य वधो वृत्रस्य चोद्भवः ॥ देवैर्हरेः स्तुतिस्तत्र श्लोकाः सार्द्धाः शरेषवः ॥ उवाचषट्कं पादोना स्याद् द्व्यशीतिरनुष्टुभाम् ॥ ९ ॥ तस्येति ॥ हे भारत तस्य विश्वरूपस्य त्रीणि

तस्योपरि विमानेन गन्धर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३७ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥३८॥ स बालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ३९ ॥ श्रीशुक उवाच ॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४० ॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४१ ॥ इति श्रीभागवते महा० षष्ठ० नारायणवर्मवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥ श्रीशुक उवाच ॥ तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥ १ ॥ स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ॥ २ ॥ स एव हि ददौ भागं परोक्षमसुरान्प्रति ॥ यजमानोऽवहद्भागं मातृस्नेहवशानुगः ॥ ३ ॥ तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः ॥ आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥ ४ ॥

शिरांसि आसन् । सोमस्य पीथं पानं यस्मिंस्तत् एवं सुरापीथम् अन्नमत्तीत्यन्नादम् इति वयं शुश्रुम ॥ १ ॥ स वा इति ॥ हे नृप यस्य देवाः पितरः स वै विश्वरूपो बर्हिषि यज्ञे प्रत्यक्षं प्रकटं सप्रश्रयं सविनयं च यथा भवति तथा देवेभ्यो हविर्भागमिन्द्रायेदमग्नय इदमित्युच्चकैरवदत् उच्चारयन्ददौ ॥ २ ॥ स इति ॥ मातू रचनाया दैत्येषु स्नेहेन तद्वशमनुगच्छतीति स एव विश्वरूपः देवान् यजमानोऽप्यसुरान्प्रति तु देवानां दृष्टिं वञ्चयित्वा परोक्षं गुप्तं यथा भवति तथा भागम् अवहत् प्रापयत् ॥ ३ ॥ तदिति ॥ तत् असुरेभ्यो हविर्दानलक्षणं तस्य विश्वरूपस्य देवहेलनं देवापराधं धर्मेऽलीकं कपटं चालक्ष्य ज्ञात्वा सुरेश्वर इन्द्र एवमयमसुरान् वर्द्धयित्वास्मान् घातयिष्यतीति भीतो रुषा क्रोधेन तरसा वेगेन तस्य शीर्षाण्यच्छिनत् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमपीथमिति ॥ यत्तस्य शिरः सोमपीथं तत्कपिञ्जलः पक्षी आसीत् एवमन्यदपि ॥ ५ ॥ ब्रह्मेति अर्द्धम् ॥ यदपि यद्यपि इन्द्र ईश्वरस्त्रिलोक्यधीश्वरस्तथापि ब्रह्महत्यायाः प्राबल्यात्तामञ्जलिना हस्तद्वयेन जातत्वात्तेनैव जग्राह स्वयमनुतापं चकारेत्यर्थः। संवत्सरेति ॥ एवमनुतापेन क्षीणपापवेगः संवत्सरपर्यन्तं तथैव विगीतः स्थित्वा तदन्ते भूतानां स्वशरीरारम्भकमहाभूतानां शुद्धये।यद्वा।प्राणिनां मध्ये स्वविशुद्धये अपवादपरिहाराय तदघं हत्यारूपं पापं भूम्यादिभ्यश्चतुर्द्धा व्यभजद्विभज्य ददौ। आकाशस्य अपावित्र्यासंभवाच्चतुर्द्धा विभागः। अन्तःकरणगतमघं तु सूक्ष्मरूपेण स्थितमेव तदेव पुनरपि वृत्रवधेन ब्रह्महत्यां जनयिष्यति ॥ ६ ॥ भूमिरिति ॥ खातस्य गर्तस्य पूरः पूरणं तेन वरेण यदि खातस्य पूरणं स्वत एव भविष्यति तर्हि हत्यां ग्रहीष्यामीति भाषाबन्धरूपेणैव ब्रह्महत्यायास्तुरीयं रूपं चतुर्थभागं भूमिर्जग्राह।भूमौ यदीरिणमूषरं प्रदृश्यते तद्ब्रह्महत्यारूपमेवेति ज्ञेयम्। अत एवोषरेऽध्ययनादिशुभक्रियानिषेधः ॥ ७ ॥ तुर्यमिति ॥ छेदे सति विरोहः पुनः प्ररोहो भवत्विति वरेण तुर्यं ब्रह्महत्यायाश्चतुर्थं भागं द्रुमा जगृहुः। तेषामिति स्पष्टम् अतो निर्यासभक्षणनिषेधः ॥ ८ ॥ शश्वदिति ॥ शश्वत्कामवरेण नित्यबहुसंभोगेऽपि अलंबुद्ध्यभावः गर्भवत्या अपि संभोगे गर्भानुपघातश्च तद्रूपेण

सोमपीथं तु यत्तस्य शिर आसीत्कपिञ्जलः ॥ कलविङ्कः सुरापीथमन्नादं यत्स तित्तिरिः ॥ ५ ॥ ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः ॥
संवत्सरान्ते तदघं भूतानां स विशुद्धये ॥ भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ६ ॥ भूमिस्तुरीयं जग्राह खातपूरवरेण वै॥ ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥ ७ ॥ तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः ॥ तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥८॥ शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः ॥ रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥ ९ ॥ द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम् ॥ तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् ॥ १० ॥ हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ॥ इन्द्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम् ॥ ११ ॥

वरेणांहस्तुरीयं पापस्य चतुर्थं भागं स्त्रियो जगृहुः। तासु रजोरूपेण मासि मासि तत्प्रदृश्यते। तथा च रजोदर्शने स्त्रीस्पर्शादि न कार्यम् ॥ ९ ॥ द्रव्येति ॥ द्रव्यस्य भूयः आधिक्यं यत्र द्रव्ये क्षीरादावापो मिश्रा भवेयुस्तस्याधिक्यं स्यादिति वरेण। यद्वा। द्रव्याणां मध्ये स्वस्य कूपादावुद्धृतस्यापि भूयस्त्वं निर्झरोद्गमादिना पुनर्वृद्धिस्तेन वरेण तुरीयं मलं पापमापो जगृहुः। द्रवभूय इति पाठेऽप्ययमेवार्थः। यद्वा।द्रवभूयः सांसिद्धिकं द्रवत्वं तेन वरेण तत्पापं बुद्बुदफेनाभ्यां तासु दृष्टम् अत एतदभिज्ञस्तद्बुद्बुदादि क्षिपन् दूरीकुर्वन्नपो हरति आहरति। बुद्बुदादिसहिताहरणे तु पापमेवाहरति।दृष्टं तद्धरिकिल्बिषमिति पाठे इन्द्रपापमित्यर्थः ॥१०॥ संवत्सरान्ते इति प्रागुक्तेराश्विनमासारम्भ इन्द्रो ब्रह्महत्यातो मुक्तस्तदैवं त्वष्टा स्वपुत्रवधं श्रुत्वा इन्द्रवधोपायं चकारेत्याह—हतेति ॥ एवमिन्द्रस्य दोषनिवृत्तौ ततस्तदनन्तरं हतः पुत्रो विश्वरूपो यस्य स त्वष्टा इन्द्रस्य शत्रुः इन्द्रशत्रुस्तत्संबोधनं हे इन्द्रशत्रो विवर्धस्व इन्द्रस्य शत्रुः सन् विवर्धस्व। मा चिरं शीघ्रमेव विद्विषं शत्रुमिन्द्रं जहीत्युच्चारयन् इन्द्राय इन्द्रं हन्तुं शत्रवे शत्रूत्पत्त्यै ।यद्वा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्ररूपं शत्रुं हन्तुं जुहावेत्यन्वयः। इन्द्रशत्रो इत्यत्र तत्पुरुषस्याभिप्रेतत्वेऽपि इन्द्रः शत्रुर्यस्येति बहुव्रीह्यर्थ एव स्वरव्यक्तिक्रमादापतितः। तथा हि इदिधातोरुदात्तगणपठितत्वेनेन्द्रशब्दो ह्याद्युदात्तः। तत्र समासस्य चेति सूत्रेण समाससमात्र एवान्तोदात्तविधानात्तत्पुरुषे। अनुदात्तं पदमेकवर्जमित्यनेन इन्द्रशत्रो इत्यस्याद्यनुदात्तत्वं ततो बहुव्रीहौ प्रकृत्या पूर्वपदमिति तद्बाधकसूत्रेण पूर्वपदस्य स्वभावसिद्धस्वरस्थापनाद्बहुव्रीहाविन्द्रशत्रो इत्यस्याद्युदात्तत्वम्। त्वष्टा तु दैवादाद्युदात्तस्वरतयैव पपाठ तेन इन्द्र एव तस्य शत्रुर्हन्ता जातः। तदुक्तं श्रुत्या। "यदब्रवीत् स्वाहेन्द्रशत्रो वर्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत्" इति। तथा चोक्तंशिक्षायाम्। " मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति ॥११॥ अथेति ॥ अथ अन्वाहार्यपचनाद्दक्षिणाग्नितः घोरदर्शनः भयङ्कररूपो वृत्र उत्थितः। भयङ्करत्वमेव स्पष्टयति।युगान्तसमये प्रलयप्रारम्भे लोकानां कृतान्तः कालात्मा रुद्रो यथा तद्वत्। चक्रवर्त्ती तु पचनादित्यत्र पठनादिति पपाठ व्याचख्यौ च। अथ स्वीयपाठव्यतिक्रमेऽवगते सति ससंभ्रममनु पश्चादेव आहार्यपठनात् स्वभावप्राप्ताद्युदात्तव्यञ्जितबहुव्रीहिपठनानन्तरम् आहार्यताप्राप्ताद्यनुदात्तव्यञ्जिततत्पुरुषपाठाद्धेतोः घोरदर्शनः

अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ॥ कृतान्त इव लोकानां युगान्तसमये यथा ॥ १२ ॥ विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने ॥ दग्धशैलप्रतीकाशं सन्ध्याऽभ्रानीकवर्चसम् ॥ १३ ॥ तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् ॥ १४ ॥ देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी ॥ नृत्यन्तमुन्नदन्तं च चालयन्तं पदा महीम् ॥ १५ ॥ दरीगम्भीरवक्त्रेण पिबता च नभस्तलम् ॥ लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् ॥ १६ ॥ महता रौद्रदंष्ट्रेण जृम्भमाणं मुहुर्मुहुः ॥ वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ १७ ॥ येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्तिना ॥ स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥ १८ ॥

उत्थितः।स्वाभाविकपाठादिन्द्रोऽस्य हन्ता भविष्यति पश्चादाहार्यपाठादिन्द्रोऽप्यनेन हतो भविष्यति स वाहनस्येन्द्रस्य निगरणात् इति भावः अन्वाहार्यशब्दस्य षाण्मासिकश्राद्धवाचित्वाद्व्याख्यान्तरं न घटते इति चाह स्म ॥ १२ ॥ विष्वगिति सार्द्धचतुष्कम् ॥ विष्वक् समन्ततः स्वस्योर्द्ध्वाधो दिक्षु च इषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानं दग्धशैलप्रतीकाशमत्युच्चं कृष्णवर्णं च सन्ध्याभ्रानीकवद्वर्चो दीप्तिर्यस्य तं तप्तताम्रवच्छिखाः श्मश्रूणि च यस्य तं मध्याह्नार्कवदुग्रे सन्तापकरे भयङ्करे च लोचने यस्य तं तिस्रः शिखाः अग्राणि यस्य तस्मिन् देदीप्यमाने शूले रोदसी आरोप्येव नृत्यन्तमुन्नदन्तं पदा महीं चालयन्तं नभस्तलं पिबतेव ऋक्षाणि नक्षत्राणि जिह्वया लिहतेवेति भुवनत्रयं ग्रसतेव शतार्षः। महता विस्तीर्णेन रौद्रा दंष्ट्रा यस्मिंस्तेन दरीतुल्येन गम्भीरेण वक्त्रेण मुहुर्मुहुर्जृम्भमाणं तं वीक्ष्य वित्रस्ताः सर्वे लोका दश दिशः प्रदुद्रुवुः ॥ १३॥ १४ ॥ १५ ॥ ॥ १६ ॥ १७ ॥ येनेति ॥ येन त्वाष्ट्रमूर्तिना त्वष्टुरपत्यरूपेण तमसा इमे सर्वे लोका आवृताः। स परमदारुणः भयङ्करः लोकानां पापरूप इव त्वाष्ट्र आवरकत्वाद्वृत्र इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोक्तः इति वृत्रशब्दनिरुक्तिः ।पाप इत्युत्प्रेक्षामात्रं नतु पापवत्त्वं भगवद्भक्तत्वात् ॥ १८ ॥ तमिति ॥ आद्यं पादत्रयं स्पष्टम् । सः वृत्रः तानि अस्त्रशस्त्रादीनि कृत्स्नशः सर्वाणि अग्रसत् भक्षितवान् । तङ्भाव आर्षः ॥ १९ ॥ तत इति ॥ एवं ग्रस्तं तिरस्कृतं तेजो येषां ते सर्वे देवगणास्ततस्तेजसस्तिरस्काराद्विस्मिताः विषण्णास्ते समाहिताः सन्तः प्रत्यञ्चमन्तर्यामिणमादिपुरुषमुपतस्थुः तुष्टुवुः । तङ्भाव आर्षः ॥ २० ॥ वाय्विति ॥ वाय्वाद्युपलक्षितानि त्रयोविंशतिस्तत्त्वानि तैर्निर्मितास्त्रयो लोकास्तत्रत्याः प्राणिनस्तेषामधिपतयो ब्रह्मादयश्च ततोऽर्वाचीना ये वयं ते सर्व उद्विजन्तो भीताः सन्तः । शता आर्षः । यस्मै अन्तकाय कालाय बलिंहराम वहाम तत्तत्कालविहितं कर्म नियमेन कुर्मः । असावपि कालो यस्माद्बिभेति ततः परमेश्वरादेव नोऽस्माकमरणं शरणं रक्षणमस्तु ॥ २१ ॥ अविस्मितमिति ॥ अविस्मितं निरहङ्कारं कुतूहलशून्यं वा यद्वा।न विद्यते विस्मितमाश्चर्यं यत्र तं भावे क्तः सर्वाश्चर्यनिर्मातरि आश्चर्यासम्भवात् स्वेन स्वस्वरूपभूतपरमानन्दलाभेनैव परिपूर्णाः कामाः यस्य समम् उपाधिपरिच्छेदशून्यं प्रशान्तं

तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ॥ स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः॥१९॥ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः ॥ प्रत्यञ्चमादिपुरुषमुपतस्थुः समाहिताः ॥२०॥ देवा ऊचुः॥ वाय्वम्बराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजन्तः ॥ हराम यस्मै बलिमन्तकोऽसौ बिभेति यस्मादरणं ततोऽस्तु नः ॥ २१ ॥ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशान्तम् ॥ विनोपसर्पत्यपरं हि बालिशः श्वलाङ्गुलेनातितितर्ति सिन्धुम् ॥२२॥ यस्योरुशृङ्गे जगतीं स्वनावं मनुर्यथाऽऽबध्य ततार दुर्गम् ॥ स एव नस्त्वाष्ट्रभयाद्दुरन्तात्त्राताश्रितान्वारिचरोऽपि नूनम् ॥ २३ ॥ पुरा स्वयंभूरपि संयमाम्भस्युदीर्णवातोर्मिरवैः कराले ॥ एकोऽरविन्दात्पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः॥२४॥य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम्॥वयं न यस्यापि पुरः समीहतः पश्याम लिङ्गं पृथगीशमानिनः॥२५॥

रागादिशून्यं तं विना विहाय योऽपरं शरणार्थमुपसर्पति गच्छति स बालिशः महामूर्ख एव नतु विज्ञः।हि यस्मात्स शुनो लाङ्गुलेन। ह्रस्व आर्षः।सिन्धुमतितितर्ति अतितरितुमिच्छति अतितितीर्षति आर्षः प्रयोगः । यथा श्वा एव सिन्धुं तरितुं न शक्नोति कुतः श्वपुच्छग्राहिणस्ते च यथा समुद्रे मज्जन्ति तथा परमेश्वरं त्यक्त्वान्योपायावलम्बिनो मज्जन्ति ॥ २२ ॥ यस्येति ॥ यस्य मत्स्यमूर्त्तेः उरुशृङ्गे विस्तृतशृङ्गे जगतीं पृथ्वीरूपां स्वनावं बध्वा मनुः सत्यव्रतो नाम राजा यथा यथावदनायासेनैव दुर्गं प्रलयकालिकं महाभयं ततार अतः स एव वारिचरः गृहीतमत्स्यमूर्तिर्नोऽस्मानप्याश्रितान् शरणागतान् दुरन्तात् त्वाष्ट्रभयान्नूनं त्राता रक्षिष्यति ॥ २३ ॥ पुरेति ॥ पुरा सृष्टिप्रारम्भसमय उदीर्णैरुद्गतैर्वातैर्य ऊर्मयस्तेषां रवैः शब्दैः कराले भयङ्करे संयमाम्भसि प्रलयोदकेऽरविन्दात् नाभिकमलात्स्वस्थानात् पतितः पतितप्रायः एकः असहायः स्वयम्भूः ब्रह्मापि तस्माद्भयात् येन सहायभूतेन ततार स एव नोऽस्माकमपि पारः अस्माद्भयात्तारकोऽस्तु ॥ २४ ॥ य इति ॥ यः ईशः एकः असहाय एव निजमायया नोऽस्मान् ससर्ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनानुगृहीताः सन्तो वयं विश्वं सृजामः पृथगीशमानिनोऽपि वयं यस्य पुरः समीहितः अस्मत्तः पूर्वमेव अन्तर्यामितयास्मदादिशरीराणि तत्तत्कार्येषु प्रेरयतोऽपि । शता आर्षः । लिङ्गं चिह्नं वयं न पश्यामः तमेव शरणं व्रजामः इति तृतीयेन संबन्धः ॥ २५ ॥ यो न इति ॥ नित्य एव वस्तुतः सच्चिदानन्द एव यः स्वमायया अचिन्त्यनिजशक्त्या नानातनुभिर्देवादिषु कृतावतारः सन् सपत्नैः शत्रुभिरसुरादिभिर्भृशमत्यन्तमर्द्यमानान् पीड्यमानान्नोऽस्मान् आत्मसात्कृत्वा स्वकीयान् मत्वा युगे युगे तत्तदवसरे पाति च तमेवेत्युत्तरेणान्वयः । तत्र देवेषु वामनः ऋषिषु परशुरामः तिर्यक्षु नृसिंहहयग्रीववाराहादिः नृषु रामकृष्णादिः ॥ २६ ॥ तमेवेति ॥ वयं सर्वे आत्मनां जीवानां दैवतमुपास्यं परं कारणं प्रधानं प्रकृतिरूपं पुरुषं च विश्वरूपं ततः अन्यं पृथगपि स्थितं शरण्यं शरणार्हं तमेव शरणं व्रजाम। स्वानां स्वभक्तानां नोऽस्माकं शं सुखं स एव महात्मा विधास्यति ॥२७॥ इतीति ॥ हे महाराज इत्युपतिष्ठतां तेषां सुराणां । शता आर्षः । प्रथमं प्रतीच्यां दिशि शङ्खचक्रगदाधरः। भगवानाविरभूत् अत्र प्रतीच्यां दिशि समुद्रकूले इत्यर्थः ।

यो नः सपत्नैर्भृशमर्द्यमानान्देवर्षितिर्यङ्नृषु नित्य एव ॥ कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च ॥ २६ ॥ तमेव दैवं वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यत् ॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा॥२७॥श्रीशुक उवाच॥ इति तेषां महाराज सुराणामुपतिष्ठताम् ॥ प्रतीच्यां दिश्यभूदाविः शङ्खचक्रगदाधरः ॥ २८ ॥ आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ॥ पर्युपासितमुन्निद्रशरदम्बुरुहेक्षणम् ॥ २९ ॥ दृष्ट्वा तमवनौ सर्वे ईक्षणाह्लादविक्लवाः ॥ दण्डवत्पतिता राजञ्छनैरुत्थाय तुष्टुवुः ॥ ३० ॥ देवा ऊचुः ॥ नमस्ते यज्ञवीर्याय वयसे उत ते नमः ॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ॥ ३१ ॥ यत्ते गतीनां तिसृणामीशितुः परमं पदम् ॥ नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ॥ ३२ ॥

देशान्तरस्योत्तमस्य दैत्याक्रान्तत्वात् इत्याहुः ॥ २८ ॥ आत्मेति युग्मम् ॥ हे राजन् श्रीवत्सकौस्तुभौ विनान्यैश्चतुर्भुजत्वादिभिश्चिह्नैरात्मतुल्यैः भगवत्समानरूपैः श्रीवत्सकौस्तुभौ भगवतः एव चिह्ने न तु सुनन्दादीनामिति भावः । षोडशभिः पार्षदैः सुनन्दादिभिः परितः सेवितम् उन्निद्रे फुल्ले शरदम्बुरुहे ते इवेक्षणे यस्य तं दृष्ट्वा तस्येक्षणेन य आह्लादः तेन विक्लवा विवशास्ते सर्वेऽवनौ दण्डवत्पतिताः सन्तः शनैरुत्थाय तुष्टुवुः ॥ २९ ॥ ३० ॥ नम इति ॥ यज्ञस्य वीर्यं फलजनकत्वं यस्मात्तस्मै यज्ञाधिष्ठात्रे ते तुभ्यं नमः । उत अपि वयसे कालात्मने ते नमः । अस्तं प्रक्षिप्तं चक्रमर्थादस्मद्विघातकेषु दैत्येषु येन तस्मै दैत्यविनाशकाय ते नमः । सुशोभनाः पुरवो बहवो हूतयो नामानि यस्य तस्मै नमः ॥३१ ॥ यदिति ॥ हे धातः गुणत्रयस्येशितुर्नियन्तुः गुणत्रयात्मकानां तिसृणां गतीनां परमं पदं निर्गुणस्वरूपम् । यद्वा । तिसृणां देवतिर्यङ्मनुष्याख्यानां गतीनामीशितुः प्रापकस्य ते तव यत्परमं पदं सर्वोत्कृष्टं रूपं तद्विसर्गस्यार्वाचीनः अस्मादृशो जनो वेदितुं ज्ञातुं नार्हति अतः केवलं तस्मै नमोऽस्तु ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ नम इति ॥ परमहंसपरिव्राजकैः संन्यासिभिः परमेणातिदृढन आत्मयोगेन परमात्मविषयकेण समाधिना चित्तैकाग्र्येण परिभाविते संशोधितेऽन्तः करणे परिस्फुटः परिस्फुरितो यः पारमहंस्यो धर्मो भगवद्भजनं तेन उद्घाटितं तमः अज्ञानरूपं कपाटं यस्य तस्मिन् द्वारभूते चित्ते अपावृते प्रकटे आत्मलोके स्वधामनि प्रत्यग्रूपे स्वयमुपलब्धमाविर्भूतं निजसुखं तदनुभवरूपो भवान् स्पष्टं शेषम्॥ ३३॥ दुरवबोध इति ॥ इवशब्दोऽवधारणे । यत्त्वमशरणो निराश्रय एवाशरीरः शरीररहितोऽपि अनवेक्षितोऽस्माकं बलाद्यधिष्ठातृणामिन्द्रादीनां समवायो मेलनं साहाय्यं येन स तथाभूतोऽपि अगुणेऽपि सर्वोपादानत्वेऽप्यविक्रियमाणेनैवात्मनेदं सगुणं विश्वं सृजसि पासि संहरसि च सोऽयं तव विहारयोगः क्रीडाप्रकारो दुरवबोध एव ॥ ३४ ॥ अथेति ॥ अर्थान्तरे संशयान्तरमप्यस्तीत्यर्थः । देवदत्तो यथेह गृहादि निर्माय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते तथा भवान् ब्रह्मस्वरूपो जीवरूपेण संसारे गुणविसर्गपतितः गुणकार्ये शरीरे प्रविष्टः पारतन्त्र्येण कालकर्मस्वभावाद्यधीनतया स्वकृतयोः शुभाशुभयोः

ॐ नमस्तेऽस्तु भगवन्नारायण वासुदेवादिपुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिनापरिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकवाटद्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥३३॥ दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ॥ ३४ ॥ अथ तत्रभवान्किं देवदत्तवदिह गुणविसर्गपतितः पारतन्त्र्येण स्वकृतकुशलाकुशलं फलमुपाददाति आहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः ॥ ३५ ॥ न हि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरे अनवगाह्यमाहात्म्ये अर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामन्तर्धाय को नु अर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥ ३६ ॥

कुशलाकुशलं सुखदुःखात्मकं फलमुपाददाति भुङ्क्ते । तङ्भाव आर्षः । यद्वा । भवानपि तत्र गुणविसर्गे पतितोऽन्तर्यामितया प्रविष्टः। यद्वा । रामकृष्णाद्यवतारेषु सुखदुःखाद्यनुभवात्तद्रूपेण स्थितःपारतन्त्र्येण कुशलाकुशलं फलमुपाददाति तङ्भाव आर्षः आहोस्वित् अथ वा आत्मारामःउपशमशीलःसमञ्जसमप्रच्युतं दर्शनं चिच्छक्तिर्यस्य तादृशो भवान् उदास्त उदासीनतया साक्षितया वर्त्तत इति ह वाव न विदाम इत्यपि नैव विद्मः ॥ ३५ ॥एवं विरोधेन दुर्ज्ञेयत्वमुक्त्वा तत्परिहारेण ज्ञानप्रकारमाह—न हीति ॥ भगवति अपरिगणितगुणगणे ईश्वरे अनवगाह्यं ज्ञातुमशक्यं माहात्म्यं यस्य तत्र अर्वाचीना नव्यकल्पिताः वस्तुस्वरूपा संस्पर्शिनो विकल्पवितर्कविचारप्रमाणाभासकुतर्का येषु तैः शास्त्रैः कलिलं व्याकुलं दूषितमन्तःकरणमाश्रयो यस्य दुरवग्रहस्य तेनैव वादिनां विवादस्यानवसरे अविषये तत्र विकल्प एवं वा एवं वेत्याकारः वितर्कः किमत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तमित्यनिश्चयः विचार इत्थमेवेति निश्चयः। तत्र प्रमाणाभासास्तदनुग्राहकाः कुतर्काश्च उपरतो निरस्तः समस्तः मायामयः संसारो यस्मिन् केवलेऽद्वितीयेऽपि त्वयि विरुध्यत इति विरोधः कर्तृत्वाकर्तृत्वं सुखित्वदुःखित्वादिकं चोभयं त्वयि न विरुद्धमित्यर्थः। न ह्यन्यदृष्टान्तेन त्वयि विकल्पो युज्यते अप्रतर्क्यैश्वर्यात्। आत्ममायामघटितघटनाकारिणीमन्तर्धाय मध्ये निधाय कोऽन्वर्थः कर्तृत्वादि दुर्घटः असङ्गत इव भवतीति यदि वस्तुतः कर्तृत्वादि भवेदपि न तु तदस्तीत्याहुः स्वरूपद्वयस्य अभावात् ॥ ३६ ॥ समेति ॥ सममतीनां यथार्थबुद्धीनां विषममतीनां भ्रान्तबुद्धीनां च मतमभिप्रायमनुसरासि। तत्र दृष्टान्तमाहुः। यथेति। यथा रज्जुखण्डः यथार्थबुद्धीनां रज्जुरूपेण भासमानोऽपि सर्पादिविषया धीर्येषां तेषां भयंकरादिरूपेण प्रतिभाति तथा यथार्थबुद्धीनां त्वं सच्चिदानन्दपूर्णगुणस्वरूपेण भासमानोऽपि भ्रान्तानां दुःखित्वपक्षपातित्वादिरूपेण भासि ॥ ३७ ॥ स इति ॥ पुनर्विचारे कृते स एव भगवानेव सर्ववस्तुनि सर्वप्रपञ्चवस्तुस्वरूपः परमार्थभूतः सर्वेश्वरः सकलजगतो यानि कारणानि महदादीनि तेषामपि कारणभूतः सर्वेषां जीवानां प्रत्यगात्मत्वादन्तर्यामित्वादित्यर्थः। सर्वेषां गुणानां गुणकार्यत्वेन जडानां बुद्धीन्द्रियादीनामाभासैः प्रकाशैरुपलक्षितः अन्यथा

समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादिधियाम् ॥ ३७ ॥ स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ॥ ३८ ॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्पन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरन्तरं निर्वृतमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला: स्वात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्यावर्तः ॥ ३९ ॥

जडतादात्म्याध्यासे जीवस्यापि जडप्रायत्वात्त्वां विना जीवस्यापि न प्रकाश इति अतः सर्वलयाधिष्ठानतया नेति नेति इत्यादिश्रुतिभिः एको भवानेव पर्यवशेषित इति ॥ ३८ ॥ अथेति ॥ अथ ह वाव अत एव हे मधुमथन तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिन्दुमात्रेण सकृदवलीढया आस्वादितया भक्त्या स्वमनसि निष्पन्दमानमतिशयेन स्रवत् यत् अविरतं निरन्तरं सुखं तेन विस्मारिता दृष्टश्रुतविषयाः सुखलेशाभासा येषां ते एकान्तिनः भोगाकाङ्क्षाशून्याः सर्वभूतानां प्रिये सुहृदि च सर्वात्मनि भगवति त्वयि नितरां प्रतिदिनं तत्रापि निरन्तरं प्रतिक्षणं च निर्वृतं सुखेन प्रतिष्ठितं मनो येषां ते हि यस्मात् स्वार्थे पुरुषार्थे कुशला निपुणाः स्वात्मा प्रियः सुहृच्च येषाम्। यद्वा। स्वात्मनां जीवानां प्रियसुहृदः साधवः परमभागवताः एते त्वच्चरणाम्बुजानुसेवां पुनः कथमु ह वा विसृजन्ति। यत्र यस्यामनुसेवायां सत्यां सेवकस्य संसारपर्यावर्तः संसारे भ्रमणं पुनर्न भवतीत्यर्थः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु यूयं परहिंसामुद्दिश्य मां यजध्वेऽतो नानुग्राह्या इत्याशङ्क्याहुः—त्रिभुवनेति ॥ त्रिभुवनमात्मा भुवनं स्थानं च यस्य त्रिभुवनस्यात्मा भुवनं चेति वा त्रिषु भुवनेषु विक्रमः प्रभावो यस्य त्रिषु लोकेषु नयनं दृष्टिर्यस्य त्रिषु लोकेषु मनोहरोऽनुभावो लीला यस्येति सम्बोधनानि हे दण्डधर । हे भगवन् दितिजा दैत्याः दनुजा दानवाश्च अपिशब्दादेव मनुष्यादयश्च तवैव विभूतयः । तत्र दैत्यदानवकृतलोकोपद्रवं दृष्ट्वा तस्य प्रलयहेतुत्वात्तेषामनुपक्रमसमयोऽयमुपद्रवकालोऽयं न भवतीति मत्वा स्वात्ममायया स्वस्वरूपभूतया मायया शक्त्या सुराद्याकृतिभिर्यथापराधं तेषां दण्डं दधर्थ । एवं तथैव यदि मन्यसे हन्तुमिच्छसि तदा एनं त्वाष्ट्रं वृत्रमपि जहि । तत्र सुराकृतिर्वामनादिः नराकृती रामकृष्णादिः मृगाकृतिर्वराहादिः मिश्रिताकृतिर्हयग्रीवनृसिंहादिः जलचराकृतिर्मत्स्यकूर्मादिः ॥ ४० ॥ अस्माकमिति ॥ हे तत पितः हे ततामह हे पितामह वेदे व्यवहृतौ तततततामहशब्दौ । हे अनघ तावकानां तव पादयोर्नतानां तव चरणकमलयुगले तद्ध्यानेनैवानुबद्धो हृदये निगडः शृङ्खला येषां तेषां स्वलिङ्गविवरणेन निजमूर्त्तिप्रकटनेन

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दण्डं दण्डधर दधर्थ एवमेनमपि भगवञ्जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ४० ॥ अस्माकं तावकानां तव नतानां तत ततामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिङ्गविवरणेनात्मसात्कृतानामनुकम्पाऽनुरञ्जितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चान्तस्तापमनघार्हसि शमयितुम् ॥ ४१ ॥ अथ ह भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथा देशकालदेहावस्थानविशेषं तदुपादानोपलम्भकतयाऽनुभवतः सर्वप्रत्ययसाक्षिणः ॥ आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद्विस्फुलिङ्गादिभिरिव हिरण्यरेतसः ॥ ४२ ॥

आत्मसात्कृतानां स्वकीयत्वेनाङ्गीकृतानामित्यर्थः । अस्माकमन्तःस्थितं तापं वृत्रभयम् अनुकम्पय । अनुरञ्जितं सानुरागं च विशदं निर्मलं कपटादिदोषशून्यं च रुचिरं मनोहरं च शिशिरं शीतलं च यत्स्मितं तत्सहितेनावलोकेन तथानुकम्पयैव विगलितो मुखचन्द्रान्निर्गतो यो मधुरो मोदकरो मुखरसः प्रियवाक् सैवामृतकला तया चेत्यर्थः । शमयितुमर्हसि ॥ ४१ ॥ अथेति ॥ हे भगवन् अस्माभिः अखिलजगतामुत्पत्त्यादिषु निमित्तायमाना या दिव्या अन्तरङ्गशक्त्यात्मिका माया तया विनोदो यस्य तस्य सकलजीवनिकायानामन्तर्हृदयेषु ब्रह्मस्वरूपेण उदासीनतया प्रत्यगात्मान्तर्यामी तद्रूपेण च तथा बहिरपि प्रधानस्वरूपेण च स्थितस्येति शेषः । अत एव देशकालदेहावस्थानविशेषाननुलङ्घ्य तेषामुपादानतया तेषामुपलम्भकतया चानुभवतः सर्वेषां प्रत्ययानां बुद्ध्यादीनां साक्षिणः आकाशवन्निर्विकारं शरीरं स्वरूपं यस्य तस्य साक्षात्परब्रह्मणः

Nepal Sanskrit University, Balmeeki Campus Library, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमात्मनस्तव इह इदानीं कियान् वै अर्थविशेषो विज्ञापनीयः स्यात्। यथा हिरण्यरेतसोऽग्नेस्तदंशभूतैर्विस्फुलिङ्गादिभिः प्रकाशो न क्रियते तथास्माभिरपि सर्वज्ञस्य तवाग्रे कार्यार्थं प्रकाशनं न कार्यमित्यर्थः ॥ ४२ ॥ अत इति ॥ अतः सर्वज्ञत्वाद्वयं यत्कामेन यस्य कार्यस्य कामनात् उपसृतानां शरणागतानां त्वद्भक्तानां विविधैर्वृजिनैर्दुःखैर्यः संसारपरिश्रमस्तस्योपशमकरीं भगवतः परमगुरोस्तव चरणमेव शतपलाशं कमलं तस्य च्छायामुपसादिताः प्राप्ताः त्वयैवान्तर्यामिणा कृपया प्रापिता इति वा तदस्माकं कार्यं त्वं स्वयं विज्ञप्तिमन्तरेणैवोपकल्पय सम्पादय ॥ ४३ ॥ अथो इति ॥ हे ईश हे कृष्ण अथो अनन्तरं शीघ्रमेव भुवनत्रयं ग्रसन्तं शतार्षः त्वाष्ट्रं वृत्रं जहि । येन नोऽस्माकं तेजांसि अस्त्राणि मन्त्राः आयुधानि च ग्रस्तानि ॥४४॥ हंसायेति ॥ हंसाय शुद्धाय दह्नं दहरं हृदयाकाशः स निलयो यस्य तस्मै निरीक्षकाय साक्षिणे कृष्णायानन्दरूपाय मृष्टम् उज्ज्वलं यशो यस्य निरुपक्रमायेति श्रमजनकलौकिकप्रकारमन्तरेणैव कार्यसम्पादनसमर्थायेत्यर्थः । सद्भिः संगृह्यते यस्तस्मै भवपान्थः भवरूपे पथि वर्त्तमानस्तस्य

अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ॥ ४३ ॥ अथो ईश जहि त्वाष्ट्रं ग्रसन्तं भुवनत्रयम् ॥ ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च॥ ४४ ॥ हंसाय दह्ननिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ॥ सत्संग्रहाय भवपान्थनिजाश्रमाप्तावन्ते परीष्टगतये हरये नमस्ते ॥ ४५ ॥ श्रीशुक उवाच ॥ अथैवमीडितो राजन्सादरं त्रिदशैर्हरिः ॥ स्वमुपस्थानमाकर्ण्य प्राह तानभिनन्दितः ॥ ४६ ॥ श्रीभगवानुवाच ॥ प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥ ४७ ॥ किं दुरापं मयि प्रीते तथाऽपि विबुधर्षभाः ॥ मय्येकान्तमतिर्नान्यन्मत्तो वाञ्छति तत्त्ववित् ॥ ४८ ॥ न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ॥ तस्य तानिच्छतो यच्छेद् यदि सोऽपि तथाविधः ॥ ४९ ॥

जनस्य निजाश्रमाप्तौ स्वशरणप्राप्तौ सत्यां संसारस्यान्ते परीष्टा सर्वतः पूजिता उत्तमा गतिः फलरूपा यस्तस्मै हरये ते तुभ्यं नमः ॥ ४५ ॥ अथेति ॥ हे राजन् एवं सादरं यथा भवति तथा त्रिदशैर्देवैरीडितः स्तुतः अभिनन्दितः प्रसादितश्च हरिः स्वकीयमुपस्थानं स्तोत्रमाकर्ण्य अथानन्तरं तान् प्राह स्म ॥ ४६ ॥ प्रीत इति ॥ हे सुरश्रेष्ठाः मदीयं यदुपस्थानं स्तोत्रं तत्सहितया विद्यया ज्ञानेन वः युष्माकमहं प्रीतः आत्मनो ममैश्वर्यस्यासंसारित्वादेः पूर्वोक्तस्य स्मृतिर्मयि भक्तिश्च पुंसां यया विद्यया भविष्यत्येव ॥ ४७ ॥ किमिति ॥ हे विबुधर्षभाः मयि प्रीते सति किं दुरापं किं दुर्लभं तथापि मयि एकान्ता एकरसा मतिर्यस्य सः तत्वविन्मत्तः अन्यत् किमपि न वाञ्छति ॥ ४८ ॥ यदुक्तं देवैः स्वयं तदुपकल्पयास्माकमित्यादि तत्सम्पादनं कृपालोर्ममानुचितमित्याशयेनाह–नेति ॥ गुणेषु विषयेषु तत्त्वदर्शी अनात्मज्ञ इत्यर्थः । कृपणः पुरुषः आत्मनः श्रेयो न वेद न जानाति तस्याज्ञस्य तान् विषयानिच्छतो यदि कश्चित्तान्विषयान् यच्छेत् दद्यात् तदा स दातापि तथाविधो ज्ञेयः अनात्मज्ञ एवेत्यर्थः ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमिति॥ यः स्वयं निःश्रेयसं परमानन्दप्राप्तिसाधनं भगवद्भजनं विद्वान् जानाति सः अज्ञाय जनाय कर्म दुःखकारणविषयप्राप्तिसाधनं न हि वक्ति तदुपदेशमपि नैव करोति तत्सम्पादनं तु दूरतः । यथा भिषक्तमः सद्वैद्यो हि अपथ्यं वाञ्छतोऽपि रोगिणो यथा तन्न राति न ददाति तद्वत् ॥ ५० ॥ एवं तत्त्वमुक्त्वा तदभिप्रायमनुसरन्नाह—मघवन्निति ॥ हे मघवन् ऋषिसत्तमं दध्यञ्चं यात एवं वो युष्माकं भद्रं भविष्यति विद्यया व्रतैस्तपसा च सारं दृढं तस्य गात्रं शरीरं शीघ्रं याचत याचध्वम् ॥ ५१ ॥ स व इति ॥ " स दध्यङ् ह यन्मध्वाथर्वणो नाम अश्वस्य शीर्ष्णा प्रपदीमुवाच " इति श्रुत्यादिप्रसिद्धः दध्यङ्नामा ऋषिः निष्कलं शुद्धं ब्रह्माधिगतो ज्ञातवान् । निष्कृतमिति पाठे तु नितरां कृतं भवति धनं येन तं प्रवर्ग्यं चाधिगतः ततश्च स विद्याद्वयमश्विभ्यां प्रादादित्युत्तरस्यानुषङ्गः उपदिदेशेत्यर्थः । यद्वै निष्कलं ब्रह्म अश्वशिरसा प्रोक्तत्वादश्वशिरो नाम प्रसिद्धम् । एवं च तयोर्वैद्यतया देवैर्निराकृतामृतादिभागयोरप्यश्विनोरमरतां जीवन्मुक्ततां व्यधात्सम्पादितवानित्यर्थः । एवं ह्यत्र प्रसिद्धा कथा । " निशम्याथर्वणं दक्षं प्रवर्ग्यब्रह्मविद्ययोः । दध्यञ्चं समुपागम्य तमूचतुरथाश्विनौ ॥ भगवन् देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् । कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छ-

स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि ॥ न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः ॥ ५० ॥ मघवन्यात भद्रं वो दध्यञ्चमृषिसत्तमम्॥ विद्याव्रततपःसारं गात्रं याचत मा चिरम् ॥ ५१ ॥ स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम् ॥ यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ॥ ५२ ॥ दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकम्॥ विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः ॥ ५३ ॥ युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति ॥ ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥ येन वृत्रशिरो हर्ता मत्तेज उपबृंहितः ॥ ५४ ॥

तम् ॥ तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिम् । उवाच भिषजोर्विद्यां मा वादीरश्विनोर्मुने ॥ यदि मद्वाक्यमुल्लंङ्घ्य ब्रवीषि सहसैव ते । शिरश्छिन्द्यां न संदेह इत्युक्त्वा स ययौ हरिः ॥ इन्द्रे गते तथाभ्येत्य नासत्यावूचतुर्द्विजम् । तन्मुखादिन्द्रगदितं श्रुत्वा तावूचतुः पुनः ॥ आवां तव शिरश्छित्त्वा पूर्वमश्वस्य मस्तकम् । सन्धास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज ॥ तस्मिन्निन्द्रेण सञ्छिन्ने पुनः सन्धाय मस्तकम् । निजं ते दक्षिणां दत्त्वा गमिष्यावो यथागतम् ॥ एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः । प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशङ्कितः ॥" ॥५२॥ दध्यङ्ङिति ॥ आथर्वणो दध्यङ् अभेद्यं मन्त्रान्तरैरनिराकार्यं मदात्मकं वर्म श्रीनारायणकवचमधिगत इति पूर्वस्यानुषङ्गः । यत् स त्वष्ट्रे प्रादात् त्वष्टा च विश्वरूपाय स्वपुत्राय प्रादात् यच्च त्वं ततो विश्वरूपादधाः धृतवानसि तदेवं विद्यासारं तद्गात्रं ततो याचध्वमिति पूर्वेणान्वयः ॥ ५३ ॥ युष्मभ्यमिति सार्द्धम् ॥ युष्मास्वेव स्थिताभ्याम् आश्विभ्यां स्वशिष्याभ्यां याचितः संस्तयोः प्रीत्यर्थं धर्मज्ञः परार्त्तिहरणं परो धर्म इति जानन् युष्मभ्यमङ्गानि दास्यति । यद्वा । अश्विभ्यामिति दृष्टान्तः । यथा याचितः सन् स्वशिरच्छेदनमङ्गीकृत्याप्यसत्यत्वभयादश्विभ्यां विद्यां प्रादात्तथेत्यर्थः । यतो धर्मज्ञः ततो दानानन्तरमेव मम तेजस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपबृंहितः वर्धितः सन् अस्थिभिर्विश्वकर्मणा निर्मित आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः । येन भवान् वृत्रशिरो हर्ता हरिष्यति ॥ ५४ ॥ तस्मिन्निति ॥ वृत्रे निहते सति तेजश्च अस्त्राणि च आयुधानि च सम्पदश्च भूयो यूयं प्राप्स्यथ एवं वो युष्माकं भद्रमेव भविष्यति । मत्परान् मद्भक्तान् केऽपि न हिंसन्तीति निश्चेतव्यम् ॥ ५५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्॥ गङ्गासहायः षष्ठस्य नवमे निरमादिमाम्॥९॥ दशमे तु दधीच्यस्थिजातवज्रधरो वृषा॥ वृत्रेणायुद्ध्यत महांस्तत्र श्लोकास्त्रिवह्नयः॥ अनुष्टुभः सार्द्धपञ्चत्रिंशच्चत्वार्युवाच च ॥ १० ॥ इन्द्रमिति ॥ अनिमिषाणां देवानां स्पष्टम् ॥१॥ तथेति ॥ हे भारत यथा भगवता शिक्षितं तथा देवैर्याचितः महानुदारचित्तः आथर्वणः दध्यङ् मोदमानोऽपि तन्मुखाद्धर्मं श्रोतुकामः प्रत्याचक्षाण इव प्रहसन्निदमुवाच ॥ २ ॥ अपीति ॥ हे वृन्दारकाः देवाः यूयं सात्विकत्वेनेन्द्रियाधिष्ठातृत्वेन च प्रसिद्धा अपि संस्थायां मृत्यौ यस्तु चेतनापहः मूर्च्छाजनकः अत एव दुःसहः अभिद्रोहो दुःखलक्षणोपद्रवः शरीरिणां भवति तम् अपि किंन्न जानीथ । यद्वा । यूयं तम-

तस्मिन्विनिहते यूयं तेजोस्त्रायुधसम्पदः ॥ भूयः प्राप्स्यथ भद्रं वो न हिंसन्ति च मत्परान् ॥ ५५ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे इन्द्रादिकृतगद्यपद्यात्मकस्तोत्रवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ इन्द्रमेवं समादिश्य भगवान्विश्वभावनः ॥ पश्यतामनिमेषाणां तत्रैवान्तर्दधे हरिः ॥ १ ॥ तथाऽभियाचितो देवैर्ऋषिराथर्वणो महान् ॥ मोदमान उवाचेदं प्रहसन्निव भारत ॥ २ ॥ अपि वृन्दारका यूयं न जानीथ शरीरिणाम् ॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥ जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः ॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥ ४ ॥ देवा ऊचुः ॥ किं नु तद्दुस्त्यजं ब्रह्मन्पुंसां भूतानुकम्पिनाम् ॥ भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणाम् ॥ ५ ॥ ननु स्वार्थपरो लोको न वेद परसंकटम् ॥ यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥

भिद्रोहं न जानीथेति ज्ञायतेऽन्यथा युष्माकमियं याच्ञा न स्यादिति शेषः ॥ ३ ॥ जिजीविषूणामिति ॥ इह प्रियेषु वस्तुषु जीवानामात्मा देहः प्रेष्ठः प्रियतमः यतो जिजीविषूणामीप्सितः धनादि दत्त्वापि रक्षणीयः अतो भिक्षमाणाय अतिथिरूपेण याचमानाय विष्णवेऽपि तं दातुं क उत्सहेत ॥ ४ ॥ किमिति ॥ हे ब्रह्मन् भवद्विधानां भूतानुकम्पिनां प्राणिषु दयातिशयवतां महतामुदारचित्तानामत एव पुण्यश्लोकैः सत्कीर्त्तिभिरपि ईड्यानि स्तुत्यानि कर्माणि येषां तेषां पुंसा यद्दुस्त्यजं तत्किं नु न किमपीत्यर्थः ॥ ५ ॥ नन्विति ॥ अत्र इदं पद्यं नन्वित्यादि न याचेतेत्यन्तमृषेर्वचः तत इदमेव न याचेतेति चतुरक्षरविनाभूतं देवानां वचः । तथा हि स्वार्थपरः स्वर्गाद्यैश्वर्यभोगाभिलाषी लोको याचकादिजनः परस्य दातुः संकटं स्वदेहास्थिदानपीडां न वेद न जानाति । यदि वेद तदा च न याचेत। उपलक्षणमेतत् यज्ञादिषु पशून्न हन्यादित्यपि ज्ञेयम् । ततो देवा ऊचुः।स्वार्थपरः जीवनेन विषयभोगाभिलाषी भवादृशो दाता लोकोऽपि परस्य याचकस्य सङ्कटं न जानाति। यदि सोऽपि वेद तदा ईश्वरो दातुं समर्थः सन्नेति नाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्याख्यानं न कुर्यादित्यन्वयः । यद्वा । देवानामेवेदं वचः प्रोक्तप्रकारद्वयेन व्याख्येयम् । तथा च यथा वयं स्वार्थपरास्तव सङ्कटानुसन्धानं न कुर्मस्तथा त्वमपि स्वार्थपरः प्रत्याचक्षाणोऽस्मत्सङ्कटं नानुसन्धत्स इति तुल्य एवोपालम्भ इति भावः ॥ ६ ॥ धर्ममिति ॥ वो युष्माकं मुखाद्धर्मं श्रोतुकामेन मे मया यूयं प्रत्युदाहृताः निराकृता इवोक्ता न वस्तुतः अत एषोऽहं त्यजन्तं त्यक्ष्यन्तं प्रियमप्यात्मानं देहं वो युष्माकमर्थे सन्त्यजामि त्यजन्तमित्यनेन अन्ते मामयं त्यक्ष्यतीति धर्मयशोलाभाय तत्त्यागः प्रथमत एवोचित इति सूचितम् ॥ ७ ॥ य इति ॥ हे नाथाः यः पुमान् भूतानां दयया अध्रुवेण अनित्येन आत्मना देहेन धर्मं यशो वा न ईहेत न सम्पादयेत्स स्थावरैरपि शोच्यः स्थावरेभ्योऽपि जड इत्यर्थः ॥ ८ ॥ एतावानिति ॥ आत्मा स्वयंभूतानां शोकेन शोचति हर्षेण च हृष्यति तस्य यो धर्मः पुण्यविशेषः सः पुण्यश्लोकैरुपासितः स एतावानेवाव्ययोऽक्षयः ॥ ९ ॥ अहो इति ॥ पारक्यैः मरणान्तरं श्वगालादिभक्ष्यैः अस्वार्थैः आत्मोपयोगशून्यैः क्षणभङ्गुरैः स्वं वित्तं ज्ञातयः पुत्रादयो विग्रहो देहस्तैर्यत् यो मर्त्यो

ऋषिरुवाच ॥ धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः ॥ एष वः प्रियमात्मानं त्यजन्तं संत्यजाम्यहम् ॥ ७ ॥ योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान् ॥ ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः ॥ यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥ अहो दैन्यमहो कष्टं पारक्यैः क्षणभङ्गुरैः ॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः॥१०॥श्रीशुक उवाच ॥ एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुम् ॥ परे भगवति ब्रह्मण्यात्मानं सन्नयञ्जहौ॥ ११ ॥ यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबन्धनः ॥ आस्थितः परमं योगं न देहं बुबुधे गतम् ॥ १२ ॥ अथेन्द्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ॥ मुनेः शुक्तिभिरुत्सिक्तो भगवत्तेजसाऽन्वितः ॥ १३ ॥ वृतो देवगणैः सर्वैर्गजेन्द्रोपर्यशोभत ॥ स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥

नोपकुर्यात् परोपकारं न कुर्याद्यदि तदा तस्याहो दैन्यमहो कष्टं तस्य जीवनं केवलं दैन्येन दुःखभोगार्थमेवेत्यर्थः ॥ १० ॥ एवमिति ॥ एवं कृतं व्यवसितं निश्चयो येन स आथर्वणो दध्यङ् परे ब्रह्मणि भगवति आत्मानं मनः सन्नयन् तनुं जहौ ॥ ११ ॥ यतेति ॥ यता वशीकृता अक्षा इन्द्रियाणि असवः प्राणाः मनो बुद्धिश्च येन सः तत्वदृक् अतो ध्वस्तबन्धनः निरस्तदेहाद्यध्यासः परमं योगं समाधिलक्षणमास्थितः सन् गतं त्यक्तं देहं न बुबुधे मरणपीडां नानुभूतवान् । एतेन दधीचोऽपि मुक्तिरभूदिति सूचितम् ॥ १२ ॥ अथेति युग्मम् ॥ अथ मुनेः शुक्तिभिः अस्थिभिः विश्वकर्मणा निर्मितं वज्रमुद्यम्य उत्सिक्तः उन्नद्धः भगवत्तेजसान्वितः सर्वैर्देवगणैर्वृतः गजेन्द्रस्य ऐरावतस्योपरि स्थितः मुनिगणैश्च स्तूयमानः इन्द्रः त्रैलोक्यं हर्षयन्निव अशोभत । अत्र शक्तिभिरिति सास्थिभिरास्थिभिरिति च पाठः ॥ १३ ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृत्रमिति ॥ हे राजन् स इन्द्रः क्रुद्धः सन् ओजसा वेगेन असुरानीकानां यूथपैः पर्यस्तं परिवृतं वृत्रं च्छेत्तुमभ्यद्रवत् । यथा प्रलयसमये क्रुद्धो रुद्रोऽन्तकं यमं हन्तुमभिद्रवति तद्वदित्यर्थः । रुद्रो यममपि हन्तुं शक्नोतीत्यभिप्रायेण दृष्टान्तः ॥१५॥ तत इति ॥ तदा वैवस्वतमन्वन्तरस्य प्रथमे चतुर्युगे त्रेतायुगस्य मुखे प्रारम्भे नर्मदातीरे सुराणामसुरैः सह परमदारुणः रणः अभवत् ॥१६॥रुद्रैरिति युग्मम्॥ हे राजन् रुद्रादिभिर्देवगणैः स्वया श्रिया च रोचमानं वज्रधरं मरुत्पतिं शक्रं दृष्ट्वा वृत्रः पुरःसरः स्वामी येषां ते असुरा मृधे युद्धे नामृष्यन् नासहन्त ॥१७॥१८॥ नमुचिरिति सार्द्धत्रयम् ॥ कार्त्तस्वरपरिच्छदाः स्वर्णभूषिताः नमुचिरित्यादयः उत्कल इत्यन्ताः सहस्रशः अन्ये च दैतेयादयः सुमालिमालिप्रमुखाश्च मृत्योरपि दुरासदं दुष्प्रवेशमपीन्द्रसेनाग्रं सिंहनादेन भयङ्करगर्जनेन प्रतिषिध्य निवार्याभ्यार्दयन् पीडितवन्तः । अभ्यर्दयन्निति ह्रस्वपाठे आडभाव आर्षः ॥ १९ ॥ २० ॥ २१ ॥ गदाभिरिति सार्द्धम् ॥ गदादिभिश्च विबुधर्षभान् सर्वतोऽवाकिरन् अभ्यवर्षन् । "शतघ्नी च चतुर्हस्ता लोहकण्टकसञ्चिता । भुशुण्डी सर्वतो लोहकण्टकानुक्रमोन्नता ॥" इत्यभिधानम् ॥ २२ ॥ न त इति ॥ पुङ्खः शरस्य मूलप्रदेशः एकस्य शरस्य मूलदेशमनु तत्संलग्नो परस्य पुङ्खो यथा भवति तथा पतितैः शरजालैः समन्ततः सञ्छन्नास्ते देवा नादृश्यन्त । यथा नभस्थैर्घनैः छन्नानि ज्योतींषि यथा न दृश्यन्ते तद्वत् एतेन तेषां तदप्राप्तिः सूचिता ॥२३॥न त इति॥ शस्त्राणामस्त्राणां चयानि वर्षाणि तेषामोघाः सुरसैनिकान्न व्यासेदुः न प्रापुः यतो लघुहस्तैः शीघ्रभेदिभिर्देवैः सिद्धपथ आकाशमार्गे स्वप्राप्तेः पूर्वमेव सहस्र-

वृत्रमभ्यद्रवच्छेत्तुमसुरानीकयूथपैः ॥ पर्यस्तमोजसा राजन्क्रुद्धो रुद्र इवान्तकम् ॥१५॥ततः सुराणामसुरै रणः परमदारुणः॥ त्रेतामुखे नर्मदायामभवत्प्रथमे युगे ॥ १६ ॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ॥ मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ॥ १७ ॥ दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वमायया ॥ नामृष्यन्नसुरा राजन्मृधे वृत्रपुरःसराः ॥ १८ ॥ नमुचिः शम्बरोऽनर्वा द्विमूर्धा ऋषभोऽम्बरः ॥ हयग्रीवः शङ्कुशिरा विप्रचित्तिरयोमुखः ॥ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ॥ १९ ॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ॥ इल्वलः पल्वलश्चैव दन्दशूको वृषध्वजः ॥ कालनाभमहानाभौ भूतसंतापनो वृकः ॥२०॥ सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः ॥ प्रतिषिध्येन्द्रसेनाग्र्यं मृत्योरपि दुरासदम् ॥ अभ्यर्दयन्नसंभ्रान्ताः सिंहनादेन दुर्मदाः ॥२१॥ गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ॥ शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुण्डिभिः ॥ सर्वतोऽवाकिरञ्छस्त्रैरस्त्रैश्च विबुधर्षभान् ॥ २२ ॥ न तेऽदृश्यन्त संछन्नाः शरजालैः समन्ततः ॥ पुङ्खानुपुङ्खपतितैर्ज्योतींषीव नभोघनैः ॥ २३ ॥ न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान् ॥ छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धा च्छिन्नाः ॥ २४ ॥ अथेति ॥ क्षीणा अस्त्राणां शस्त्राणां च ओघा येषां ते असुराः अथानन्तरं गिरिशृङ्गैर्द्रुमैरुपलैः पाषाणैश्च सुरबलमभ्यवर्षन् तांश्च गिरिशृङ्गादीन् देवाः पूर्ववत् अस्त्रादिवच्चिच्छिदुः ॥ २५ ॥ तानिति ॥ तानिन्द्रसैनिकान् शस्त्राणामस्त्राणां च पूगैः समूहैरक्षतान् क्षतशून्यान् स्वस्तिमतः सुखिनो द्रुमादिभिश्चाविक्षतान्निशाम्य वृत्रो नाथो येषां ते असुराः तत्रसुः भीता जाताः ॥ २६ ॥ सर्वे इति ॥ कृष्णोऽनुकूलो येषां तेषु देवगणेषु दैत्यैः कृताः कृताः पुनः पुनः कृताः प्रयासाः प्रहारप्रयत्नलक्षणाः सर्वे विमोघाः वृथा अभवन् । यथा महत्सु साधुषु क्षुद्रैर्बहिर्मुखैः पुरुषैः प्रयुक्ताः रुशतीः रुशत्यः शापरूपाः पूर्वसवर्णदीर्घ आर्षः । रूक्षाः परुषाः निन्दापरा वाचो यथा अकल्याणकर्त्र्यः क्षोभकर्त्र्यो वा न भवन्ति तद्वत् ॥ २७ ॥ त इति ॥ हरौ अभक्ताः हतो निवृत्तो युद्धे दर्पो गर्वो येषां ते आत्तः परैर्गृहीतः सारो येषां ते अति प्रसिद्धाः ते असुराः अत्रैकस्तच्छब्दः प्रसिद्धवाची अपरः परामर्शक इत्यपौनरुक्त्यम् । स्वप्रयासं वितथं निरीक्ष्य आजिमुखे युद्धारम्भे पतिं वृत्रं विसृज्य पलायनाय मनो

अथ क्षीणास्त्रशस्त्रौघा गिरिशृङ्गद्रुमोपलैः ॥ अभ्यवर्षन्सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २५ ॥ तानक्षतान्स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः ॥ द्रुमैर्दृषद्भिर्विविधाद्रिशृङ्गैरविक्षतांस्तत्रसुरिन्द्रसैनिकान् ॥ २६ ॥ सर्वे प्रयासा अभवन्विमोघाः कृताः कृता देवगणेषु दैत्यैः ॥ कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥ २७ ॥ ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥ २८ ॥ वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् ॥ पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः ॥ २९ ॥ कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः ॥ हे विप्रचित्ते नमुचे पुलोमन्मयानर्वञ्छम्बर मे शृणुध्वम् ॥ ३० ॥ जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता ॥ लोको यशश्चाथ ततो यदि ह्यमुं मृत्युं वरं को न वृणीत युक्तम् ॥ ३१ ॥

दधुः ॥ २८ ॥ वृत्र इति ॥ भग्नं परैः क्षतयुक्तं कृतमत एव तीव्रेण भयेन पलायितं च स्वबलं सैन्यं प्रेक्ष्य प्रधावतः पलायमानान् तान् वीरतया प्रसिद्धान् अनुगान् स्वान्तरङ्गानप्यसुरान् वीक्ष्य मनस्वी धीरः वीरश्च वृत्रः विहस्य वीराणां कातर्यमनुचितमिति सूचयंस्तेषामुपहासं कृत्वा एतद्वक्ष्यमाणं बभाषे ॥ २९ ॥ कालेति ॥ पुरुषेषु प्रकृष्टो वीरः वृत्रः कालोपपन्नां तदवसरोचितां मनस्विनां रुचिरां शौर्यव्याञ्जिकां वाचमुवाच । हे विप्रचित्त्यादयः मे वचः शृणुध्वम् । तङार्षः ॥ ३० ॥ जातस्येति ॥ जातस्य प्राणिमात्रस्य एषः प्रसिद्धो मृत्युः सर्वतः सर्वत्र ध्रुवः कुत्रापि त्रिलोक्यां गत्वाप्यनिवार्यः यतः यस्येह संसारे प्रतिक्रिया निवृत्त्युपायो न च क्लृप्ता भगवतापि नैव निर्मिता ततो मृत्योर्यदि लोको ब्रह्मलोके इह यशश्च स्यात् । अथ तर्हि अमुं युक्तं समुचितं मृत्युं को नाम न वृणीत ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri

द्वाविति ॥ योगरतो योगमार्गे प्रवृत्तः जितासुःवशीकृतप्राणेन्द्रियश्च सन् ब्रह्मसंधारणया भगवद्ध्यानेन कलेवरं जह्यादिति यत्स एको मृत्युः अग्रणीः अनिवृत्तः अपराङ्मुखश्च सन् वीरशये रणभूमौ कलेवरं विजह्यादिति यत्स चैको मृत्युः तौ द्वो मृत्यू इह शास्त्रे सम्मतौ अत एव दुरापौ दुर्लभौ ॥३२॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य दशमे निरमादिमाम् ॥ १० ॥ एकादशे वृत्रशक्रयुद्धे वृत्रो जगाद च ॥ ज्ञानभक्तिमयीर्वाचः श्लोकास्तत्राद्रिबाँहवः ॥ अनुष्टुभः पञ्चरामाँ उवाचद्वितयं तथा ॥ ११ ॥ त इति ॥ हे नृप एवं धर्मं शंसतः कथयतः पत्युर्वृत्रस्य वचः अचेतसः व्याकुलचित्ताः भयत्रस्ताः पलायनपराश्च ते असुरा नैवागृह्णन् ॥ १ ॥ विशीर्यमाणामिति युग्मम् ॥ हे राजन् कालोऽनुकूलो येषां तैस्त्रिदशैर्देवैः काल्यमानां विद्राव्यमाणामत एवानाथवदनाथामिव विशीर्यमाणामासुरीं स्वकीयां पृतनां सेनां दृष्ट्वा क्रुद्धः अमर्षितः असहनः असुरर्षभः इन्द्रशत्रुर्वृत्रः अतप्यत ततश्च ओजसा बलात्कारेण तान् त्रिदशान्निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणं वचनमुवाच ॥ २ ॥३॥ किमिति ॥ मातुः

द्वौ संमताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः ॥ कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः ॥ ३२ ॥ इति श्रीभा० षष्ठ० दशमोऽध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ ॥ त एवं शंसतो धर्मं वचः पत्युरचेतसः ॥ नैवागृह्णन्भयत्रस्ताः पलायनपरा नृप ॥ १ ॥ विशीर्यमाणां पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥ दृष्ट्वाऽतप्यत संक्रुद्ध इन्द्रशत्रुरमर्षितः ॥ तान्निवार्यौजसा राजन्निर्भर्त्स्येदमुवाच ह ॥ ३ ॥ किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ ४ ॥ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ॥ अग्रे तिष्ठत मात्रं मे न चेद् ग्राम्यसुखे स्पृहा ॥ ५ ॥ एवं सुरगणान्क्रुद्धो भीषयन्वपुषा रिपून् ॥ व्यनदत्सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥

उच्चरितैः पुरीषवदुदरान्निर्गतैः धावद्भिः पलायमानैः पृष्ठतो हतैर्दैत्यैर्वो युष्माकं किं फलं न यशो नापि धर्म इत्यर्थः । आत्मानं शूरं मन्यमानानां भीतस्य यो वधः स श्लाघ्यो न भवति नापि स्वर्ग्यः स्वर्गहेतुः । मातुरुच्चरिता इति पाठे देवानां सम्बोधनम् ॥ ४ ॥ यदीति ॥ हे क्षुल्लकाः ममाग्रे यूयं तुच्छा एव तथापि यदि वो युष्माकं प्रधने युद्धे श्रद्धा हृदि सारं धैर्यं वाऽस्ति चेत् यदि ग्राम्यसुखे विषयभोगे स्पृहा इच्छा नास्ति तदा मात्रं क्षणमात्रं मेऽग्रे तिष्ठत तिङन्तादग्रेऽपि मात्रशब्दो बहुस्थलेषु समासावयव इव प्रयुज्यते । गच्छतिमात्रं चलतिमात्रं केवलं गच्छति न त्वन्यत्करोतीत्यर्थः । तथात्रापि चेत् तदायमर्थः । यदि मदग्रे योद्धुं न शक्नुथ तदा केवलं तिष्ठत नाहं भीतान् हन्मीति परन्तु नायं विवक्षितोऽर्थः ॥ ५ ॥ एवमिति ॥ सुमहाप्राणो महाबलो वृत्रः क्रुद्धः सन् एवं वचसा वपुषा शरीरेण च स्वरिपून् स्वशत्रून् सुरगणान् भीषयन् व्यनदत् नादं चकार । येन वृत्रनादेन हेतुना लोकाः प्राणिनः सर्वे विचेतसो जाताः ॥ ६ ॥ तेनेति ॥ तेन नादेन वृत्रस्य विस्फोटनेन ऊर्वोः प्रगण्डयोर्वा करतलाघातेन च मूर्छिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवगणाः यथा अशनिना हतास्तथा भूमौ निपेतुः । वै चार्थे ॥ ७ ॥ ममर्देति ॥ रणरङ्गे रणभूमौ दुष्टः उत्कृष्टो मदो यस्य सः अत एव उद्यतं शूलं येन सः वृत्रः ओजसा स्वसामर्थ्येन गां पृथ्वीं कम्पयन् आतुरं भतिमतः निमीलिताक्षं सुरसैन्यं पद्भ्यां ममर्द । यथा नलानां समूहो नालं वनमुत्कृष्टो मदो यस्य स यूथपतिर्गजो यथा मर्दयति तद्वत् ॥ ८ ॥ विलोक्येति ॥ वज्रधरः इन्द्रस्त वृत्रं विलोक्यात्यमर्षितोऽसहमानोऽभिद्रवते स्वसम्मुखमागच्छते स्वशत्रवे तस्मै तं हन्तुं महागदां चिक्षेप आपततीं नुमभाव आर्षः । सुदुःसहामपि तां वृत्रः वामेन करेण लीलया जग्राह ॥ ९ ॥ स इति ॥ हे नृप स उग्रविक्रमः इन्द्रशत्रुर्वृत्रो भृशं कुपितोऽतो मृधे उन्नदन् तया गदया महेन्द्रवाहमैरावतं कुम्भस्थले मस्तके जघान । तस्यतत्कर्म सर्वे स्वपरसैनिकाः समपूजयन् सत्कृतवन्तः ॥ १० ॥ ऐरावत इति ॥ वृत्रगदयाभिमृष्टः अभिहतः भिन्नमुखः विदीर्णवक्त्रः भृशार्त्तः अतिपीडितः सहेन्द्रः इन्द्रं वहन्नित्यर्थः । ऐरावतः असृङ् मुञ्चन् विघूर्णितः सन् सप्त धनुः प्रमाणमष्टाविंशतिहस्तमात्रं देशमपासरत् तिर्यक् पृष्ठतो वा गतः । यथा

ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरङ्गदुर्मदः ॥ गां कम्पयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥ विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम् ॥ चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥९॥ स इन्द्रशत्रुः कुपितो भृशं तया महेन्द्रवाहं गदयोग्रविक्रमः ॥ जघान कुम्भस्थल उन्नदन्मृधे तत्कर्म सर्वे समपूजयन्नृप ॥ १० ॥ ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ॥ अपासरद्भिन्नमुखः सहेन्द्रो मुञ्चन्नसृक्सप्तधनुर्भृशार्तः ॥ ११ ॥ न सन्नवाहाय विषण्णचेतसे प्रायुङ्क्त भूयः स गदां महात्मा ॥ इन्द्रोऽमृतस्यन्दिकराभिमर्शवीतव्यथक्षतवाहोऽवतस्थे ॥ १२ ॥ स तं नृपेन्द्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ॥ स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसञ्जगाद ॥ १३ ॥ वृत्र उवाच ॥ दिष्ट्या भवान् मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च ॥ दिष्ट्याऽनृणोऽद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाऽचिरात् ॥ १४ ॥

कुलिशेनाहतोऽद्रिस्तथेति॥११॥नेति॥ सन्नो वसन्नो वाहो वाहनं यस्य तस्मै अत एव विषण्णं विषादेन व्याकुलं चेतो यस्य तस्मै इन्द्राय महात्मा धर्मात्मा स वृत्रो भूयो गदां न प्रायुङ्क्त न चिक्षेप इन्द्रस्तु अमृतस्यन्दी अमृतस्रावी यः स्वकरस्तेनाभिमर्शः स्पर्शस्तेन वीता गता व्यथा पीडा यस्य तथाभूतः क्षतो वाहो हस्ती यस्य स तथाभूतोऽवतस्थे॥१२॥स इति॥हेनृपेन्द्र आहवकाम्यया युद्धेच्छया वज्रायुधं वज्रं गृहीत्वाऽवस्थितं रिपुं भ्रातृहणं विश्वरूपं हतवन्तं तमिन्द्रं विलोक्य नृशंसं क्रूरं तत्कृतमंहः पापरूपं कर्म च स्मरन् शोकेन मोहेन भ्रातृस्नेहेन च संतप्तः सहन् जगाद रिपोरवज्ञार्थं क्रोधजोऽयं हासः ॥ १३ ॥ दिष्ट्येति ॥ हे असत्तम यो ब्रह्महा ब्राह्मणं हतवान् एवं स्वगुरुहा मम भ्रातृहा च रिपुर्भवानद्य मे ममाग्रतः समवस्थितः एतद्दिष्ट्या भद्रं जातमित्यर्थः । मम शूलेन निर्भिन्नं दृषत्तुल्यं पाषाणसदृशं हृत् हृदयं यस्य तेन त्वया निमित्तेन अद्य

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अचिरादेवाहं भ्रातुरनृणः स्यामेतद्दिष्ट्या भद्रमेव ॥ १४ ॥ य इति ॥ यः स्वर्गकामो भवानात्मविदः द्विजातेर्ब्राह्मणस्य स्वगुरोः नारायणकवचोपदेष्टुः अपापस्य दीक्षितस्य यज्ञे दीक्षावतः नोऽस्माकमग्रजस्य विश्वरूपस्य विश्रभ्य उपाध्यायतयावरणेन विश्वासं दत्त्वा खड्गेन शिरांसि अवृश्चत् । स्वर्गकामो याज्ञिकः पुरुषः अकरुणः दयाशून्यः सन् यथा पशोः शिरः छिनत्ति तद्वदित्यर्थः ॥ १५ ॥ ह्रीति ॥ एवंभूतविश्वरूपवधादेव ह्रीश्रीदयाकीर्तिभिः सद्गुणैरुज्झितं त्यक्तं रहितं पुरुषान् अदन्तीति पुरुषादाः राक्षसास्तेऽपि गुरुतया स्वीकृतं सेवन्त एव नतु तद्धननं कुर्वन्ति तत्करणात्तेन स्वकृतेन कर्मणा तैरपि गर्ह्यं निन्द्यं मच्छूलेन विभिन्नो देहो यस्य तम् अत एव कृच्छ्रेण मृतम् अतो महाघोरे युद्धे मृतस्य मदग्रतो दाहार्थनयनस्याशक्यत्वादस्पृष्टवह्निमदग्धदेहं समदन्तीति वर्तमानसामीप्ये वर्तमानवन्निर्देशो नात्र विलम्बः संदेहश्च नास्ति ॥ १६ ॥ अन्य इति ॥ अन्ये तु येऽज्ञा मत्प्रभावानभिज्ञास्तु त्वा त्वां नृशंसं क्रूरमनुवर्तमानाः यदि उद्यतास्त्राः सन्त इह संग्रामे मह्यं मां प्रहरन्ति प्रहरिष्यन्ति तदा निशातेन तीक्ष्णीकृतेन शूलेन

यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ॥ विश्रभ्य खड्गेन शिरांस्यवृश्चत् पशोरिवाऽकरुणः स्वर्गकामः ॥ १५ ॥
ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यम् ॥ कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदन्ति गृध्राः ॥ १६ ॥ अन्येऽनु
ये त्वेह नृशंसमज्ञा ये ह्युद्यतास्त्राः प्रहरन्ति मह्यम् ॥ तैर्भूतनाथान् सगणान् निशातत्रिशूलनिर्भिन्नगलैर्यजामि ॥ १७ ॥ अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह ॥ तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥ १८ ॥ सुरेश कस्मान्न हिनोषि वज्रं पुरः स्थिते वैरिणि मय्यमोघम् ॥ मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याच्ञा ॥ १९ ॥ नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा स तेजितः ॥ तेनैव शत्रुं जहि विष्णुयन्त्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः ॥ २० ॥

भिन्नो गलो येषां तैः सगणान् भूतप्रेतादिगणसहितान् भूतनाथान् भैरवादीन् यजामि यक्ष्यामीत्यर्थः । वर्त्तमानत्वनिर्देशः प्राग्वत् ॥ १७ ॥ अथो इति ॥ हे वीर हे हरे इन्द्र अथो अथ वा इह संग्रामे मे यदि प्रमथ्य मम सेनां विलोड्य कुलिशेन वज्रेण मम शिरो भवानेव हर्त्ता हरिष्यति तत्र तर्हि मृतेन स्वशरीरेण भूतेभ्यो बलिं विधाय तेभ्योऽनृणः सन् मनस्विनां धीराणां नारदादीनां पादरजः प्रपत्स्ये । यत्र ते गच्छन्ति तद्भगवत्स्वरूपं प्राप्स्यामीत्यर्थः ॥ १८ ॥ सुरेशेति ॥ हे सुरेश पुरःस्थिते वैरिणि मयि अमोघं वज्रं कस्माद्धेतोर्न हिनोषि न क्षिपसि गदेव वज्रमपि निष्फलं भविष्यतीति मा संशयिष्ठाः संशयं मा कार्षीः। कृपणादर्थः प्रयोजनं यस्याः सा याच्ञा यथा निष्फला भवति तथा वज्रं न स्यात् ॥ १९ ॥ नन्विति ॥ निश्चितमेतत् । हे शक्र एष तव वज्रो हरेस्तेजसा दधीचेस्तपोजानितेतेजसा च तेजितस्तीक्ष्णीकृतोऽतो विष्णुना यन्त्रितः प्रेरितः त्वं तेनैव वज्रेण शत्रुं मां जहि । यतः यत्र पक्षे हरिस्ततस्तस्मिन् पक्षे विजयः श्रीर्गुणाश्च दयासन्तोषसौशील्यादयो भवन्तीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमिति ॥ अहं तु तव वज्रस्य रंहसा वेगेन विलुलितः छिन्नो ग्राम्यपाशः संसारबन्धनभूतो देहो यस्य सः अपविद्धास्त्यक्ताः लोकास्तत्तल्लोकविषयभोगवासना येन तथाभूतः सन् भगवान् संकर्षणो यथा मामाह स्म तथा तस्य भगवतश्चरणारविन्दे मनः समाधाय स्थिरीकृत्य मुनेर्मननशीलस्य भगवद्भक्तस्य गतिं भगवन्तमहं यामि यास्यामि ॥ २१ ॥ संकर्षणो मत्स्वाम्यपि मह्यं स्वर्गराज्यं न दास्यतीत्याह—पुंसामिति ॥ एकान्तधियां विवेकिनां स्वकानां स्वकीयत्वेनाङ्गीकृतानां पुंसां याः सम्पदो दिवि स्वर्गे इत्युपलक्षणमन्तरिक्षलोकस्य महर्लोकादिचतुर्णां च तेषु च याश्च भूमौ याश्च रसायां भूमेरधः सप्तसु लोकेषु ताः का अपि भगवान्न राति नैव ददाति यत् याभ्यः सम्पद्भ्यः द्वेषोऽन्योन्यवैरम् उद्वेगो मनश्चाञ्चल्यम् आधिर्मानससन्तापः मदो गर्वः कलिः कलहः व्यसनं तन्नाशे ह्रासे वा दुःखं प्रयासः संवर्द्धनसंरक्षणादिप्रयत्नेन श्रमः एते भवन्ति ॥ २२ ॥ त्रैवर्गिकेति ॥ हे शक्र अस्माकं पतिर्भगवान् पुरुषस्य त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते करोति ततस्त्रैवर्गिकायासविघातात् भगवत्प्रसादोऽनुमेयः यः

अहं समाधाय मनो यथा ह संकर्षणस्तच्चरणारविन्दे ॥ त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ॥ २१ ॥ पुंसां किलैकान्तधियां स्वकानां याः सम्पदो दिवि भूमौ रसायाम् ॥ न राति यद् द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयासः ॥ २२ ॥ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ॥ ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोऽन्यैः ॥ २३ ॥ अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक् कर्म करोतु कायः ॥ २४ ॥ न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे ॥ २५ ॥ अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ॥ प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥ २६ ॥

प्रसादः अकिंचनगोचर एकान्तभक्तिलभ्य इत्यन्वये हेतुः । यश्चान्यैर्विषयाक्रान्तचित्तैर्दुर्लभः तथा चानुमानप्रयोगः अहं भगवत्प्रसादवान् त्रैवर्गिकायासरहितत्वात् एवं त एवं यथैकान्तभक्ता नारदादयः येनैवं तेनैवं यथा विषयाक्रान्तचित्ता युष्मदादय इति अतो भगवत्प्रसादाभावात्तव सम्पदो भविष्यन्तीति भावः ॥ २३ ॥ अथेन्द्रं शिक्षयन् भगवन्तं प्रार्थयते—अहमिति ॥ हे हरे तव पादावेव एकं मूलमाश्रयो येषां तेषां दासानामनुदासोऽहं भूयः पुनर्भवितास्मि भविष्यामि भवेयम् । असुपतेः प्राणनाथस्य तव गुणान् मम मनः स्मरेत चिन्तयेत्।तङार्षः । वाक् च तानेव गुणान् गृणीत कीर्त्तयेत् । तङार्षः । कायस्तस्यैव कर्म सेवां करोतु ॥ २४ ॥ नेति ॥ हे समञ्जस निखिलसौभाग्यनिधे त्वा त्वां विरहय्य त्यक्त्वा नाकपदं स्वर्गपदं न कांक्षे नेच्छामि।तङार्षः । एवं पारमेष्ठ्यादीन्न काङ्क्षे परमेष्ठी ब्रह्मा तत्स्थानं पारमेष्ठ्यं सार्वभौमं सर्वभूमेरैश्वर्यं रसाधिपत्यं भूमेरधोलोकानां राज्यं योगसिद्धीरणिमादिकाः किं बहुना अपुनर्भवं मोक्षमपि न काङ्क्षे ॥ २५ ॥ अजातेति ॥ हे अरविन्दाक्ष यथा अजातपक्षाः पक्षिणः वृकाद्यैः

CC-0. In Public Domain. Digitization by eGangotri

पीडिताः मातरं द्रष्टुमिच्छन्ति तद्वद् यथा वत्सतराः अतिबालकाः वत्साः दाम्ना बद्धाः क्षुधा पीडिताः कदा स्तन्यं दुग्धं प्राप्स्याम इति तदिच्छन्ति तथेत्यर्थः । व्युषितं प्रवासिनं प्रियं पतिं यथा विषण्ण तद्विरहेण विषादं प्राप्ता प्रिया द्रष्टुमिच्छति तद्वत् तापत्रयपीडितं कर्मभिर्बद्धं कामादिभिर्विषण्णं च मम मनस्त्वां दिदृक्षते द्रष्टुमिच्छति ॥ २६ ॥ ममेति ॥ हे नाथ स्वामिन् स्वकर्मभिः संसारचक्रे भ्रमतोऽपि मम उत्तमश्लोकस्य तव जनेषु भक्तेषु सख्यं भूयात् त्वन्मायया आत्मात्मजदारगेहेष्वासक्तं चित्तं यस्य तस्य मम तेषु आत्मात्मजादिषु सख्यमासक्तिर्न भूयात् ॥ २७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्यैकादशे निरमादिशाम् ॥ ११ ॥ द्वादशे तु महायुद्धे शिरो वृत्रस्य वासवः ॥ वज्रेण चिच्छेद तत्र श्लोकाः सार्द्धाः शैराग्नयः ॥ चत्वार्युवाचेति साङ्गिनन्दरामा अनुष्टुभः ॥ १२ ॥ एवमिति ॥ हे नृप आजौ युद्धे मोक्षप्रतिबन्धकं देहं जिहासुः त्यक्तुमिच्छुः अतः विजयादपि मृत्युमेव वरं मन्यमानः वृत्रः शूलं प्रगृह्य सुरेन्द्रमभ्यपतत् । यथा अप्सु प्रलयोदके महापुरुषं विष्णुं

ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ॥ त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥ २७ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे वृत्रासुरेण भगवत्स्तोत्रवर्णनं नाम एकादशोऽध्यायः ॥११॥ ऋषिरुवाच॥ एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयान्मन्यमानः ॥ शूलं प्रगृह्याभ्यपतत् सुरेन्द्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥ ततो युगान्ताग्निकठोरजिह्वमाविध्य शूलं तरसाऽसुरेन्द्रः ॥ क्षिप्त्वा महेन्द्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद ॥२॥ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः ॥ वज्रेण वज्री शतपर्वणाऽच्छिनद्भुजं च तस्योरगराजभोगम्॥३॥छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम् ॥हनौ तताडेन्द्रमथाऽमरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ ॥ वृत्रस्य कर्मातिमहाद्भुतं तत् सुरासुराश्चारणसिद्धसङ्घाः ॥ अपूजयंस्तत् पुरुहूतसंकटं निरीक्ष्य हा हेति विचुक्रुशुर्भृशम् ॥ ५ ॥

कैटभाख्यो दैत्योऽभ्यपतत्तद्वत् ॥ १ ॥ तत इति ॥ ततः वीरः असुरेन्द्रो वृत्रो युगान्ताग्निवत्कठोरा जिह्वा शिखा यस्य तत् शूलमाविध्य भ्रमयित्वा महेन्द्राय तरसा वेगेन क्षिप्त्वा विनद्य हे पाप त्वं मया हतोऽसीति रुषा जगाद ॥ २ ॥ ख इति ॥ तच्छूलं खे आकाशे आपतत् आगच्छत् विचलत् विभ्रमत् ग्रहश्च उल्का च ग्रहोल्कं तद्वद्दुष्प्रेक्ष्यमपि निरीक्ष्य अजातविक्लवो भयशून्य एव वज्री इन्द्रः शतं पर्वाणि यस्य तेन वज्रेणाच्छिनत् तथा उरगराजो वासुकिस्तस्य भोगो देहस्तदाकारं तस्य वृत्रस्य भुजं चाच्छिनत् ॥ ३ ॥ छिन्नेति ॥ छिन्न एको बाहुर्यस्य स तथाभूतोऽपि वृत्रः संरब्धः क्रुद्धः सन् गृहीतो वज्रो येन स तमिन्द्रमासाद्य प्राप्य परिघेण लोहदण्डविशेषेण हनौ कपोलप्रान्ते तताड । अथानन्तरमेवामरेभम् ऐरावतं च तताड । " अनित्यण्यन्ताश्चुरादयः " इति न णिच् आर्षत्वाद्वा । मघोनः इन्द्रस्य हस्ताद्वज्रं च न्यपतत् ॥४॥ वृत्रस्येति ॥ तदतिमहाद्भुतं वृत्रस्य कर्म सुरादयः सर्वेऽपूजयन् सत्कृतवन्तः पुरुहूतस्येन्द्रस्य तत्सङ्कटं निरीक्ष्य सुरादयो हा हेति भृशं विचुक्रुशुश्च ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्र इति ॥ अरेः सन्निधौ स्वहस्तात् च्युतं वज्रं विलज्जितः इन्द्रः पुनर्न जगृहे तदा च वृत्रस्तमिन्द्रमाह स्म । हे हरे इन्द्र आत्तवज्रः संस्त्वं शत्रुं मां जहि अयं विषादस्य कालो न भवति ॥ ६ ॥ युयुत्सतामिति ॥ उत्पत्तिलयस्थितीनामीश्वरं सर्वज्ञमाद्यमनादिं सनातनं नित्यं पुरुषं भगवन्तं विना तस्य तु सर्वत्र जय इति भावः । परो देह एवात्मा येषां पराधीनात्मनामिति वा युयुत्सतां योद्धुमिच्छतां शता आर्षः । आततायिनां गृहीतशस्त्राणामेकत्र स्वपक्ष एव सदा जय इति नियमो न किंतु कुत्रचिदेव जयः एकत्र कुत्रचित् नैव । यद्वा । कुत्रचिदपि सदा जयो नैव किं तु एकत्रैव कदाचिदेव तेन कुत्रचित्पराजयोऽपि भवत्येव ॥ ७ ॥ पराधीनतामाह—लोका इति ॥ इमे सपाला लोकाः यस्य वशे स्थिताः स्वयं विवशाः सन्तः श्वसन्ति चेष्टन्ते शिचा जालेन बद्धाः द्विजाः पक्षिणो यथा चेष्टन्ते तद्वत् अतः सः कलयतीति कालो भगवानेवेह जयपराजयादौ कारणम् ॥ ८ ॥ ओज इति ॥ ओज आदिरूपेण स्थितं तं भगवन्तमेव हेतुमज्ञाय अविज्ञाय ल्यबार्षः जनो मोहात् जडमस्वतन्त्रमात्मानं देहमेव हेतुं मन्यते । ओजः सहो

इन्द्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः ॥ तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥ युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनाम् ॥ विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनम् ॥ ७ ॥ लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे ॥ द्विजा इव शिचा बद्धाः स काल इह कारणम् ॥ ८ ॥ ओजः सहो बलं प्राणममृतं मृत्युमेव च ॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडम् ॥ ९ ॥ यथा दारुमयी नारी यथा यन्त्रमयो मृगः ॥ एवं भूतानि मघवन्नीशतन्त्राणि विद्धि भोः ॥ १० ॥ पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेन्द्रियाशयाः ॥ शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहात् ॥ ११ ॥ अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ॥ भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम् ॥ १२ ॥ आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः ॥ भवन्त्येव हि तत्काले यथानिच्छोर्विपर्ययाः ॥ १३ ॥

बलं क्रमादिन्द्रियमनोदेहशक्तयः स्पष्टमन्यत् ॥ ९ ॥ यथेति ॥ स्पष्टम् ॥ १० ॥ पुरुष इति ॥ पुरुषः प्रकृत्यधिष्ठाता प्रकृतिः प्रधानं व्यक्तं महत्तत्त्वमात्मा अहङ्कारः भूतानि आकाशादीनि इन्द्रियाणि चक्षुरादीनि आशया मनो बुद्धिश्चित्तं च एते यस्य भगवतोऽनुग्रहाद्विना अस्य विश्वस्य सर्गादौ न शक्नुवन्ति समर्था न भवन्ति ॥ ११ ॥ ननु स्वकर्मद्वारा जीव एव सृष्ट्यादिहेतुरिति मीमांसका मन्यन्ते तत्राह—अविद्वानिति ॥ एवमीश्वरं स्वतन्त्रं सर्वनियन्तारमविद्वान् अजानन्ननीशं पराधीनतया असमर्थमात्मानं जीवमीश्वरं स्वतन्त्रं मन्यते ननु पित्रादयः स्रष्टारो व्याघ्रादयो हन्तारः प्रसिद्धास्तत्राह । वस्तुतः स्वयं भगवानेव भूतैर्भूतानि सृजति तैरेव तानि ग्रसते ॥ १२ ॥ आयुरिति ॥ याः पुरुषस्य आयुः श्रीः कीर्तिरैश्वर्यं चेत्याशिषः काम्यमानाः सन्ति ता अपि तत्काले आयुराद्युचिते काले भगवत एव भवन्ति अनिच्छोरपि विपर्यया अपकीर्त्यादयो यथा प्रयत्नं विनैव भवन्ति तथेत्यर्थः । अतस्तव जयकालत्वात्त्वमेव जेष्यसीत्यर्थः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ तमात्सर्वेश्वराधीनत्वात् अकीर्तियशसो जयापजययोः अपि तथा मृत्युर्जीवितयोश्चेत्येतेषां कार्यभूताभ्यां सुखदुःखाभ्यां समः स्यात् ॥ १४ ॥ सत्त्वमिति ॥ सत्त्वादयः प्रकृतेर्गुणा भवन्ति आत्मनो गुणा न भवन्ति तत्र कार्यकारणसङ्घातात्मके देहे स्थितमात्मानं यः साक्षिमात्रं तदध्यासरहितं वेद जानाति स हर्षविषादादिभिर्न बध्यते न लिप्यत इत्यर्थः ॥ १५ ॥ अत्रार्थेऽहमेव ते गुरुरित्याह—पश्येति ॥ हे शक्र वृक्णं च्छिन्नमायुधं भुजश्च यस्य तमत एव त्वया निर्जितं तथापि तव प्राणजिहीर्षया यथाशक्ति मृधे घटमानं मां पश्य अतस्त्वमपि अहमिव विषादरहितो भव ॥ १६ ॥ प्राणेति ॥ अयं समर एव द्यूतं प्राणा एव ग्लहः पणो यस्मिन् सः इषव एवाक्षाः पाशकाः यस्मिन् सः वाहनानि हस्त्यश्वादीन्येव ततस्ततश्चाल्यमानानि आसनानि फलका यस्मिन् तथा च यथा द्यूते जयपराजयौ पूर्वं ज्ञातुमशक्यौ तथात्र समरे अमुष्य जयोऽमुष्य पराजय इति न ज्ञायते ॥ १७ ॥ इन्द्र इति॥ इन्द्रः गतालीकं निष्कपटं वृत्रवचः श्रुत्वा गृहीतवज्रः सन् तमपूजयत् वचसा सत्कृवान् । ततश्च भगवद्भक्तस्य वृत्रस्य धैर्यवत्त्वे

तस्मादकीर्तियशसोर्जयापजययोरपि ॥ समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा ॥१४॥ सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥१५॥ पश्य मां निर्जितं शक्र वृक्णायुधभुजं मृधे ॥ घटमानं यथाशक्ति तव प्राणजिहीर्षया॥१६॥ प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः ॥ अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः ॥१७॥ श्रीशुक उवाच ॥ इन्द्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् ॥ गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः॥१८॥ इन्द्र उवाच ॥ अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी॥ भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरम् ॥१९॥ भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् ॥यद्विहायासुरं भावं महापुरुषतां गतः ॥२०॥ खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव॥वासुदेवे भगवति सत्वात्मनि दृढा मतिः ॥२१॥ यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे॥विक्रीडतोऽमृताम्भोधौ किं क्षुद्रैः खातकोदकैः ॥२२॥

गतविस्मयः प्रहसन् सन् तं वृत्रमाहस्म ॥ १८ ॥ अहो इति ॥ हे दानव यस्य ते तवास्मिन् सङ्कटस्थानेऽपि ईदृशी विवेकधैर्यभक्त्यादियुक्तात्यलौकिकी मतिरस्ति अतस्त्वं सिद्धः कृतार्थः असि सर्वेषामात्मानं सुहृदं मित्रं च जगदीश्वरं भगवन्तं सर्वात्मना अनन्यभावेन मनसा त्वं भक्तः सेवितवानसि।प्रथमं कर्माविवक्षया कर्त्तरि क्तः ततः कर्मयोगः ॥ १९ ॥ भवानिति ॥ भवान् जनमोहिनीं वैष्णवीं मायाम् अतार्षीत् अजैषीत् । इडभाव आर्षः । यद्यस्मादासुरं भावं क्रौर्यमौढ्यादिकं विहाय महापुरुषतां ज्ञानवैराग्यभक्त्यादिभक्तलक्षणं गतः प्राप्त इत्यर्थः ॥ २० ॥ खल्विति ॥ रजःप्रकृतेस्तव सत्वात्मनि वासुदेवे भगवति दृढा निश्चला मतिः भक्तिरिति यत्तदिदं खलु महदाश्चर्यम् ॥ २१ ॥ यस्येति ॥ निश्रेयसं मोक्षस्तस्येश्वरे दातरि हरौ भगवति यस्य भक्तिरस्ति तस्य अमृताम्भोधौ विक्रीडतः तव क्षुद्रैः खातकोदकैः गर्त्तादिजलोपमैः स्वर्गादिभिः किं न किंचित्प्रयोजनम् अस्माकं तु भक्त्यभावादेतैरेव निर्वृतिरिति भावः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ हे नृप अन्योऽन्यं धर्मजिज्ञासया इत्येवं धर्मं ब्रुवाणौ महावीर्यौ युधां युद्धानां युध्यन्त इति युधो योद्धारस्तेषां वा पती मुख्यौ इन्द्रवृत्रौ युयुधाते ॥ २३ ॥ आविध्येति ॥ हे मारिष मान्य अरिन्दमः वृत्रः कार्ष्णायसं लोहरचितं घोरं परिघं वामहस्तेन आविध्य भ्रमयित्वा इन्द्राय प्राहिणोत् प्रक्षिप्तवान् ॥ २४ ॥ स इति ॥ स तु देव इन्द्रः वृत्रस्य परिघं करभोपमं हस्तिशावकशुण्डाकारं करं च शतपर्वणा वज्रेण युगपच्चिच्छेद ॥ २५ ॥ दोर्भ्यामिति ॥ उत्कृत्तं मूलं ययोस्ताभ्यां दोर्भ्यां भुजाभ्यां रक्तं रुधिरं स्रवतीति तथाभूतोऽसुरः वृत्रो यथा वज्रिणा हतः च्छिन्नपक्षः खात् अत्युच्चप्रदेशाद् भ्रष्टः पतितो गोत्रः पर्वतो भाति तथा बभौ ॥ २६ ॥ कृत्वेति सार्द्धत्रयम् ॥ दैत्यो वृत्रः अधरां हनुं भूमौ कृत्वा उत्तरां हनुं दिवि स्वर्गे कृत्वा नभोवद्गम्भीरेण वक्त्रेण लेलिहः सर्पस्तद्वदुल्बणया भयङ्करया जिह्वया कालकल्पाभिः मृत्युतुल्याभि-

श्रीशुक उवाच ॥ इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृपः ॥ युयुधाते महावीर्याविन्द्रवृत्रौ युधांपती ॥ २३ ॥ आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः ॥ इन्द्राय प्राहिणोद्घोरं वामहस्तेन मारिष ॥ २४ ॥ स तु वृत्रस्य परिघं करं च करभोपमम् ॥ चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥ २५ ॥ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः ॥ छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥ २६ ॥ कृत्वाऽधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ॥ २७ ॥ नभोगम्भीरवक्त्रेण लेलिहोल्बणजिह्वया ॥ दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ॥ २८ ॥ अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् ॥ गिरिराट् पादचारीव पद्भ्यां निर्जरयन् महीम् ॥ २९ ॥ जग्रास स समासाद्य वज्रिणं सहवाहनम् ॥ महाप्राणो महावीर्यो महासर्प इव द्विपम् ॥ ३० ॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ॥ हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥ ३१ ॥ निर्गीर्णोऽप्यसुरेन्द्रेण न ममारोदरं गतः ॥ महापुरुषसन्नद्धो योगमायाबलेन च ॥ ३२ ॥ भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः ॥ उच्चकर्त शिरः शत्रोर्गिरिशृङ्गमिवौजसा ॥ ३३ ॥

दंष्ट्राभिश्च जगत्त्रयं ग्रसन्निव । शतार्षः । अतिमात्रोऽत्युच्छ्रितो महान् कायो यस्य सः महाप्राणः महावीर्यश्च अतस्तरसा वेगेन गिरीन् आक्षिपन् चालयन् पद्भ्यां महीं निर्जरयन् संचूर्णयन् पादचारी गिरिराडिव वज्रिणं वज्रधरमिन्द्रं समासाद्य झटिति प्राप्य सवाहनमैरावतसहितं महासर्पोऽजगरः द्विपमिव जग्रास । तङ्भाव आर्षः ॥ २७ ॥ ॥ २८ ॥ २९ ॥ ३० ॥ वृत्रेति ॥ वृत्रग्रस्तमिन्द्रं समालक्ष्य दृष्ट्वा सप्रजापतयः सुरादयो निर्विण्णाः सन्तो हा कष्टमिति चुक्रुशुः ॥ ३१ ॥ निर्गीर्ण इति ॥ महापुरुषेण श्रीनारायणकवचरूपेण सन्नद्धो दंशितः योगमायाबलेन चेति योगबलेन स्वमायाबलेन च सन्नद्धः तत्र योगोऽष्टाङ्गः माया अन्तर्द्धाय पवनादिरूपेण स्थितिः इन्द्रः असुरेन्द्रेण निगीर्णः अतः उदरं गतोऽपि न ममार ॥ ३२ ॥ भित्त्वेति ॥ बलभित् इन्द्रः विभुः भगवदनुग्रहेण समर्थः वज्रेण तस्य कुक्षिं भित्त्वा बहिर्निष्क्रम्य ओजसा बलेन

CC-0. In Public Domain. Digitization by eGangotri

शत्रोर्वृत्रस्य शिरः गिरिशृङ्गमिव वज्रेणोच्चकर्त चिच्छेद । अत्र वृत्रेणेन्द्रे ग्रस्ते मम हन्ताऽन्यो नास्तीति मत्वा वृत्रो योगेन देहं त्यक्तुं समाधिं चकार । तेन निश्चेष्टस्य तस्य कुक्षिं भित्त्वा इन्द्रः सुखेन तच्छिरश्चकर्त्त इति गिरिशृङ्गमिव वज्रेणेति दृष्टान्तेन लभ्यते ॥३३॥ वज्रस्त्विति ॥ आशुवेगः अतिवेगवानपि वज्रस्तस्य वृत्रस्य कन्धरं कन्धरां कृन्तन् तस्य समन्तात्सर्वदिक्षु परिवर्तमानोऽपि ज्योतिषां सूर्यादीनामयने दक्षिणोत्तरगतिरूपे संवत्सरे योऽहर्गणः षष्ट्युत्तरशतत्रयात्मको भवेत् तावताहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्ये काले शिरो न्यपातयत् । यद्वा । स्वार्थे तद्धितः । वृत्रहत्यायां वृत्रहननार्थं परिवर्तमान इत्यर्थः । यद्वा । आशुवेगोऽपि समन्तात् परिवर्त्तमानः कन्धरायाः सर्वतो दिक्षु भ्रमन्नेव कृन्तन् नत्वेकतो दिशः तत्रापि वर्षमितेन कालेन कन्धराया महासारत्वात् यद्वा वार्त्रहत्ये इति अयनविशेषणम् दण्डादियप्रत्ययान्तात्स्वार्थिकेन तत्र भवार्थेन वा अणा रूपम् ॥ ३४ ॥ तदेति ॥ तदा च खे स्वर्गे दुन्दुभयो विनेदुः गन्धर्वसिद्धादयश्च वार्त्रघ्नलिङ्गैर्वृत्रहन्तुर्वीर्यप्रकाशकैर्मन्त्रैर्वार्त्रहत्याय शवसे पृतनाषाढाय चेत्याद्यैस्तमिन्द्रमभिष्टुवाना अभिष्टुवन्तः मुदा कुसुमैरभ्यवर्षन् ॥ ३५ ॥ वृत्रस्येति ॥ हे अरिन्दम वृत्रस्य देहान्निष्क्रान्तम् आत्मज्योतिः जीवाख्यं तेजः सर्वलोकानां पश्यतां सताम्

वज्रस्तु तत्कन्धरमाशुवेगः कृन्तन् समन्तात् परिवर्तमानः ॥ न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥३४॥ तदा च खे दुन्दुभयो विनेदुर्गन्धर्वसिद्धाः समहर्षिसङ्घाः ॥ वार्त्रघ्नलिङ्गैस्तमभिष्टुवाना मन्त्रैर्मुदा कुसुमैरभ्यवर्षन् ॥ ३५ ॥ वृत्रस्य देहान्निष्क्रान्तमात्मज्योतिररिन्दम॥ पश्यतां सर्वलोकानामलोकं समपद्यत ॥ ३६ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे वृत्रवधो नाम द्वादशोऽध्यायः ॥१२॥ श्रीशुक उवाच ॥ वृत्रे हते त्रयो लोका विना शक्रेण भूरिद ॥ सपाला ह्यभवन् सद्यो विज्वरा निर्वृतेन्द्रियाः ॥ १ ॥ देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयम् ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेन्द्रादयस्ततः ॥ २ ॥

अलोकं लोकातीतं भगवन्तं समपद्यत सम्यक् पुनरावृत्तिवर्जं यथा तथा प्राप ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम्॥ गङ्गासहायः षष्ठस्य द्वादशे निरमादिमाम् ॥ १२ ॥ त्रयोदशे वृत्रहत्याभयान्नष्टश्चिरं वृषा ॥ रक्षितो विष्णुना तत्र श्लोका दहनबाहवः ॥ षड्वाचेति पादोना षड्विंशतिरनुष्टुभः ॥ १३ ॥ वृत्रे इति ॥ हे भूरिद वृत्रे हते सति शक्रेण विना सपालाः त्रयः लोकाः भयङ्करवृत्रमरणात् विज्वराः सन्तापरहिताः स्वर्गादिस्वस्वस्थानभोगसम्पत्त्या च निर्वृतेन्द्रियाः आनन्दितमनसश्चाभवन् ॥ १ ॥ देवेति ॥ ततः स्थानाद्देवादयो ब्रह्मेशादयश्च स्वयं स्वधिष्ण्यानि प्रतिजग्मुः । देवानुगाः सेनापतयः गन्धर्वादयश्च अत्र अनिर्वृतं शक्रमपृष्ट्वा स्वयमेव प्रतिजग्मुरिति स्वामिपादाः । यतोऽत्र वृत्रवधानन्तरमेव इन्द्रस्य स्वधिष्ण्यगमनं नोपपद्यते वृत्रवधक्षण एव वृत्रहत्योपद्रवप्राप्तेः तस्मादन्येषु वृत्रवधानन्तरं गतेष्वपि इन्द्रस्तु मानससरोवरादागत्य प्रवर्त्तिताश्वमेधात्परतो गत इति बोद्धव्यम् । ब्रह्मेशेन्द्रादय इत्यत्रेन्द्रग्रहणं तु न समकालत्वाय किन्तु क्रियान्वयमात्राय ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रस्येति ॥ भो मुने येन वृत्रवधेन हरेरिन्द्रस्य स्पष्टं शेषम् ॥ ३ ॥ वृत्रेति ॥ वृत्रस्य विक्रमेण संविग्नाः भीताः ऋषिभिः सह सर्वे देवाः तस्य वृत्रस्य वधाय इन्द्रं प्रार्थयन् प्रार्थयन्त इन्द्रश्च बृहद्वधात् ब्राह्मणवधात् भीतः सन् वृत्रवधं नैच्छत् ॥ ४ ॥ स्त्रीति ॥ अनुगृह्णद्भिर्मय्यनुग्रहं कुर्वद्भिस्त्वयादिभिर्विश्वरूपवधोद्भवमेनः पापं विभक्तं विभज्य गृहीतमतोऽहं ततो विमुक्त इति शेषः । वृत्रहत्यामहं क्व मार्ज्मि कस्यै दत्त्वात्मानं शोधयिष्यामि ॥५॥ ऋषय इति ॥ पूर्वार्द्धं स्पष्टम् । हयमेधेन वयं त्वा याजयिष्याम सलोप आर्षः। तथा च ते भद्रं भविष्यति पापाद्विनिर्मुक्तो भविष्यसि अतो मा स्म भैः भयं मा कुरु सिज्लुगार्षः ॥ ६ ॥ हयमेधेनेति ॥ हयमेधेन पुरुषं परमात्मानमीश्वरं देवं नारायणम् इष्ट्वा पूजयित्वा तत्प्रसादात् जगद्वधात् जगद्वधजनितात् पापादपि विमोक्ष्यसे किमेकया वृत्रहत्यया विमोक्ष्यस इत्यत्राश्चर्यमिति शेषः ॥ ७ ॥ ब्रह्मेति ॥ ब्रह्महादयो पातकिनोऽपि यस्य नारायणस्य नामकीर्त्तनमात्रात् शुद्ध्येरन् । तङार्षः॥८॥ तमिति ॥ श्रद्धान्वितस्त्वम् अस्माभिरनुष्ठितेन महामखेनाश्वमेधेन तं भगवन्तमिष्ट्वा स ब्रह्मब्राह्मणसहितं चराचरं

राजोवाच ॥ इन्द्रस्याऽनिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने ॥ येनासन् सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ॥ ३ ॥ श्रीशुक उवाच ॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः ॥ तद्वधायार्थयन्निन्द्रं नैच्छद्भीतो बृहद्वधात् ॥ ४ ॥ इन्द्र उवाच ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम् ॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व माज्र्म्यहम् ॥ ५ ॥ श्रीशुक उवाच ॥ ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रुवन् ॥ याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ॥ ६ ॥ हयमेधेन पुरुषं परमात्मानमीश्वरम् ॥ इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥७॥ ब्रह्महा पितृहा गोघ्नो मातृहाऽऽचार्यहाऽघवान् ॥ श्वादः पुल्कसको वाऽपि शुध्येरन् यस्य कीर्तनात् ॥८॥ तमश्वमेधेन महामखेन श्रद्धाऽन्वितोऽस्माभिरनुष्ठितेन ॥ हत्वाऽपि सब्रह्म चराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥ ९ ॥ श्रीशुक उवाच ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुम् ॥ ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥ तयेन्द्रः स्मासहत् तापं निर्वृतिर्नाऽमुमाऽऽविशत् ॥ ह्रीमन्तं वाच्यतां प्राप्तं सुखयन्त्यपि नो गुणाः ॥ ११ ॥

सर्वं जगद्धत्वापि तत्पापेन यर्हि न लिप्यसे तर्हि खलस्य वृत्रस्य निग्रहजनितेन न लिप्यस इति किं वक्तव्यम् ॥९॥ एवमिति ॥ एवं विप्रैः संचोदितः प्रेरितो मरुत्वान् इन्द्रः रिपुं शत्रुं वृत्रमहनत् शब्लुगभाव आर्षः । तस्मिन् वृत्रे हते सति "वृषाकपिमिन्द्रं वृषाकपिर्हरे शक्रे हरीतक्यां जनार्दने" इत्यभिधानात् ब्रह्महत्या आससाद । अत्र प्रायश्चित्तबलेन पापाचरणात् पूर्वतोऽपीयमपि प्रबलदुःखभोगं विना केवलेन प्रायश्चित्तेन न शाम्येदित्यत एव तदानीमेव तमश्वमेधेन न याजयामासुरिति ज्ञेयम् । ऋषयोऽपि प्रायश्चित्तबलेन पापप्रवर्त्तनजन्यपापफलभूतं दुःखं नहुषेणेन्द्रपदारूढेन प्रापिताः ॥१०॥ तयेति ॥ स्मेत्यवधारणे । तया देवादिभिः कारितया हत्यया इन्द्रस्तापमेवासहत् असहत अतोऽमुमिन्द्रं निर्वृतिः सुखं नाविशत् यतः ह्रीमन्तं वाच्यतां स्वर्गसुखलोभेनायं ब्राह्मणं हतवानिति निन्द्यतां प्राप्तमैश्वर्यादयो गुणा अपि नो सुखयन्ति ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तामिति युग्मम् ॥ चाण्डालीमिव रूपिणीं जरया वेपमानम् अङ्गं यस्यास्तां यक्ष्मग्रस्तां क्षयरोगव्याप्ताम् असृक् रुधिरं तद्व्याप्तः पटो यस्यास्तां पलितान् लम्बमानान् श्वेतान् केशान् विकीर्य स्थिताम् इन्द्रं प्रति तिष्ठ तिष्ठेति भाषिणीं मीनस्येव गन्धो यस्य स मीनगन्धिः स चासावसुश्च श्वासवायुस्तस्य गन्धेन मार्गदूषणं कुर्वतीं हत्यामनुधावन्तीमिन्द्रो ददर्श ॥ १२ ॥ १३ ॥ नभ इति ॥ हे विशाम्पते हे नृप सहस्राक्षः इन्द्रः प्रथमं नभः आकाशं गतस्तत्रापि तां दृष्ट्वा सर्वा दिशो गतस्ततोऽत्र सर्वत्र तां दृष्ट्वा प्रागुदीचीमैशानीं दिशं गतः संस्तूर्णं मानसं सरः प्रविष्टः ॥ १४ ॥ स इति ॥ स इन्द्रः यत् यस्मात् इह जलेऽवसत् स्वयं चाग्निर्दूतः भागनेता यस्य सः तथा चाग्नेर्जलप्रवेशासम्भवात् न लब्धो भागो येन सः भोग इत्यपि पाठः । अन्तः मनसि ब्रह्मवधात् ब्रह्महत्यातो विमोक्षं संचिन्तयन्न लक्षितः सर्वैरज्ञात एव साहस्रं सहस्रं वर्षाणि पुष्करनालस्य तन्तून् अत्यन्तसूक्ष्मत्वादलक्ष्यान् आवसत् यद्यप्यग्निना जलं न दुष्प्रवेशं तदन्तःस्थिताय वरुणायापि हविर्वहनात् तथापि मानसजलं दुष्प्रवेशमेवासीत् रुद्रानुचरै रक्ष्यमाणत्वात् अत एव सर्वत्र गामिनी ब्रह्महत्यापि तत्र गन्तुं न शशाकेति ॥ १५ ॥ तावदिति ॥ न अकं दुःखं यस्मिन्निति नाकः पुण्यलोकः तृतीयो नाकः

तां ददर्शानुधावन्तीं चाण्डालीमिव रूपिणीम् ॥ जरया वेपमानाङ्गीं यक्ष्मग्रस्तामसृक्पटाम् ॥ १२ ॥ विकीर्य पलितान् केशान् तिष्ठ तिष्ठेति भाषिणीम् ॥ मीनगन्ध्यसुगन्धेन कुर्वतीं मार्गदूषणम् ॥ १३ ॥ नभोगतो दिशः सर्वाः सहस्राक्षो विशांपते ॥ प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसम् ॥ १४ ॥ स आवसत् पुष्करनालतन्तूनलब्धभोगो यदिहाग्निदूतः ॥ वर्षाणि साहस्रमलक्षितोऽन्तः संचिन्तयन् ब्रह्मवधाद्विमोक्षम्॥१५॥ तावत् त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः ॥ स सम्पदैश्वर्यमदान्धबुद्धिर्नीतस्तिरश्चां गतिमिन्द्रपत्न्या ॥ १६ ॥ ततो गतो ब्रह्मगिरोपहूत ऋतम्भरध्याननिवारिताघः ॥ पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥ १७ ॥

त्रिणाकः स्वर्गस्तं तावत् विद्यातपोयोगबलैरनुभावः स्वर्गपालनसामर्थ्यं यस्य सः नहुषो नाम राजा शशास सम्पदैश्वर्याभ्यां यो मदस्तेनान्धा विवेकरहिता बुद्धिर्यस्य नहुषः इन्द्रपत्न्या शच्या तिरश्चां गतिं सर्पयोनिं नीतःउपायेन प्रापितः एवं व्याख्यायते । नहुषः किल कदाचिदिन्द्राणीमुवाच । इन्द्रस्तावदहमतस्त्वं मां भजेति तया चावेदितवृत्तान्तो बृहस्पतिस्ताम् उवाच । ब्राह्मणवाह्यशिबिकामारुह्यागतं त्वां भजेयमिति तं ब्रूहि । ततोऽसौ ब्राह्मणशापात्पतिष्यतीति तथा च तथोक्तो नहुषोऽगस्त्यादीन् शिबिकां वाहयामास । तदा च शीघ्रं सर्प सर्पेति ब्रुवन्नगस्त्यं पदा पस्पर्श । तेन कुपितेन सर्पो भवेति शप्तो महान् सर्पोऽजगरोऽभूदिति ॥ १६ ॥ तत इति ॥ ततो नहुषभ्रंशानन्तरम् ऋतंभरः सत्यसङ्कल्पो हरिस्तस्य ध्यानेन निवारितमघं प्रायश्चित्तबलेन पापाचरणरूपोऽपराधः येन सः ब्रह्मणो ब्राह्मणानां वा गिरा वाक्येनोपहूतः सन्निन्द्रः स्वर्गं गतः दिग्देवतया ईशानदिशि स्थितया श्रीरुद्रेणेन्द्ररक्षकेण हतमोजो यस्य स हत्याजनितः पापस्तु पुंस्त्वमार्षम्। विष्णुपत्न्या मानससरः कमलवनस्थितया लक्ष्म्या अवितमिन्द्रं नाभ्यभूत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याभिभवं नाकरोदित्यर्थः ॥ १७ ॥ तमिति ॥ हे भारत ब्रह्मर्षयः तमिन्द्रमभ्येत्य पुरुषस्य भगवत आराधनं यस्मिंस्तेन हयमेधेन यथावद्दीक्षयां चक्रुः ॥ १८ ॥ अथेति युग्मम् ॥ ब्रह्मवादिभिः वेदवादिभिः ऋषिभिर्वितते अनुष्ठिते अश्वमेधे महेन्द्रेण सर्वदेवमय आत्मा यस्य तस्मिन् सर्ववेदमयात्मनीति वा पाठः । पुरुषे सर्वान्तर्यामिणि भगवति इज्यमाने सति अथानन्तरमेव स पूर्वोक्तः त्वाष्ट्रवधो वृत्रवधाज्जातं पापं स्वतो भूयान् तत्रापि ज्ञानपूर्वककृतत्वात्तस्य भक्तत्वाच्च पापचयो जातः सोऽपि तेन पूजितेन भगवतैव भानुना नीहार इव शून्याय नीतः निरवशेषो विनाशितः ॥ १९ ॥ २० ॥ स इति ॥ स इन्द्रः मरीचिमुख्यैर्मुनिभिर्वितायमानेन यथोदितेन यथाविध्यनुष्ठितेन तेन वाजिमेधेन अश्वमेधेन अधिकृता यज्ञा येन तमधियज्ञं पुरुषं सर्वान्तर्यामिणं पुराणं सर्वकारणकारणमिष्ट्वा विधूतपापः महान् सर्वपूज्यः आस दिदीपे ॥ २१ ॥ इदमिति युग्मम् ॥ इदं स्वरूपतो गुणतश्च महाख्यानम् अशेषाणां निरवशेषाणां पाप्मनां प्रक्षाल्यतेऽनेनेति प्रक्षालनं निवर्त्तकमित्यर्थः । तीर्थानि पादयोर्यस्य स तीर्थपदः भगवान् तस्यानुकीर्त्तनं

तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत ॥ यथावद्दीक्षयां चक्रुः पुरुषाराधनेन ह॥१८॥अथेज्यमानेः पुरुषे सर्वदेवमयात्मनि ॥ अश्वमेधे महेन्द्रेण वितते ब्रह्मवादिभिः॥१९॥ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ॥ नीतस्तेनैव शून्याय नीहार इव भानुना ॥२०॥ स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः॥ इष्ट्वाऽधियज्ञं पुरुषं पुराणमिन्द्रो महानास विधूतपापः॥२१॥ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनम् ॥ भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेन्द्रमोक्षं विजयं मरुत्वतः ॥ २२ ॥ पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणीन्द्रियम्॥ धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथाऽऽयुषम् ॥ २३ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे इन्द्राश्वमेधवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ परीक्षिदुवाच ॥ रजस्तमःस्वभावस्य ब्रह्मन् वृत्रस्य पाप्मनः ॥ नारायणे भगवति कथमासीद् दृढा मतिः ॥ १ ॥

माहात्म्यवर्णनं यस्मिंस्तत् भक्तेरुच्छ्रय उत्कर्षो यस्मिन् तत् भक्तजनानां वृत्रेन्द्रादीनामनुवर्णनं यस्मिंस्तत् महेन्द्रस्य पापान्मोक्षो यस्मिंस्तत् मरुत्वतः इन्द्रस्य विशेषेण जयो यस्मिंस्तत् इन्द्रियमिन्द्रियपाटवकरम् इन्द्रजुष्टं वा धन्यं धनप्रदं यशस्यं यशोवर्द्धकं निखिलाघमोचकं सर्वदुःखनिवर्त्तकं रिपुंजयं शत्रुजयप्रदं स्वस्त्ययनं पुत्रपौत्रादिमङ्गलकारणं तथा आयुषमायुर्वर्द्धकमस्ति ।अत्रायुःशब्दो लक्षणया आयुर्वर्धकार्थः ततः स्वार्थिकोऽण्।अथो अत इदमाख्यानं बुधाः सदा पठेयुः सदा सावकाशाभावे तु पर्वणि पर्वणि एकादश्यादिविहितपवित्रकालेऽवश्यं शृण्वन्ति शृणुयुः ॥ २२॥ २३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायः षष्ठस्य व्यधादेतां त्रयोदशे ॥ १३ ॥ चतुर्दशे कृच्छ्रलब्धे चित्रकेतोः सुते मृते ॥ अतिशोकोऽभवत्तत्र श्लोकाः षष्टिस्तथार्द्धकः ॥ अनुष्टुभः सार्द्धषष्टिरुवाचेति च सप्तकम् ॥ १४ ॥ रज इति ॥ हे ब्रह्मन् रजः तमश्च स्वभावो यस्य तस्य पाप्मनः पापाचारस्य वृत्रस्य नारायणे भगवति दृढा मतिः निश्चला भक्तिः कथमासीत् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

देवानामिति ॥ शुद्धसत्वानां शुद्धसत्वगुणोपाधीनाम् अत एवामलात्मनां शुद्धान्तःकरणानां देवानामृषीणां चापि प्रायेण मुकुन्दचरणे भक्तिर्नोपजायते । अन्तःकरणशुद्धौ यथा ज्ञानं स्वतः स्यात्तथा न भक्तिः तस्याः साधुसङ्गं विना असंभवात् ॥ २ ॥ रजोभिरिति ॥ जन्तवो जीवा पार्थिवैः रजोभिः परमाणुभिः समाः सङ्ख्याताः अनन्ताः उक्तास्तेषां मध्ये ये केचन कतिपय एव मनुजादयः श्रेयो धर्ममीहन्ते कुर्वन्ति ॥ ३ ॥ प्राय इति ॥ हे द्विजोत्तम तेषां धर्मानुष्ठातॄणामपि मध्ये केचन वै मुमुक्षवो भवन्ति । मुमुक्षूणामपि सहस्रेषु कश्चिदेव गृहादिसङ्गाद् मुच्येत तेष्वपि कश्चिदेव सिद्ध्यति तत्त्वं जानाति ॥ ४ ॥ मुक्तानामिति ॥ हे महामुने मुक्तानां निवृत्ताध्यासानां सिद्धानां ज्ञानिनामपि कोटिष्वपि प्रशान्तात्मा भोगवासनारहितान्तःकरणः नारायणपरायणः सुदुर्लभः अत्रास्यातिवैरल्येन दौर्लभ्यात् प्रक्रान्तसहस्रशब्दमप्रयुज्यकोटिष्वपीत्युक्तम् ॥ ५ ॥ वृत्र इति ॥ स प्रसिद्धः पापः असुरदेहः अत एव सर्वलोकान् उपतापयतीति तथाभूतो वृत्रः सङ्ग्रामे उल्बणे भयङ्करस्थानेऽपि कृष्णे इत्थं वर्णितप्रकारा दृढा निश्चला मतिर्भ-

देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम् ॥ भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते ॥ २ ॥ रजोभिः समसङ्ख्याताः पार्थिवैरिह जन्तवः ॥ तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः ॥ ३ ॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम ॥ मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥४॥ मुक्तानामपि सिद्धानां नारायणपरायणः ॥ सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥५॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ॥ इत्थं दृढमतिः कृष्ण आसीत् संग्राम उल्बणे ॥ ६ ॥ अत्र नः संशयो भूयान् श्रोतुं कौतूहलं प्रभो ॥ यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥ ७ ॥ सूत उवाच ॥ परीक्षितोऽथ संप्रश्नं भगवान् बादरायणिः ॥ निशम्य श्रद्दधानस्य प्रतिनन्द्य वचोऽब्रवीत् ॥ ८ ॥ श्रीशुक उवाच ॥ शृणुष्वावहितो राजन्नितिहासमिमं यथा ॥ श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ॥ ९ ॥ आसीद्राजा सार्वभौमः शूरसेनेषु वै नृप ॥ चित्रकेतुरिति ख्यातो यस्यासीत् कामधुङ् मही ॥ १० ॥ तस्य भार्यासहस्राणां सहस्राणि दशाभवन् ॥ सान्तानिकश्चापि नृपो न लेभे तासु संततिम् ॥ ११ ॥

क्तिर्यस्य स तथाभूतः कथमासीत् ॥ ६ ॥ अत्रेति ॥ हे प्रभो यो वृत्रः समरे पौरुषेण शौर्यादिना सहस्राक्षम् अतोषयत् नतु भयेन कृष्णं शरणं गतः तस्य वृत्रस्य अत्र भक्त्यादिमत्त्वे नोऽस्माकं श्रोतॄणां सर्वेषां भूयान् संशयो भवति अतस्तत्कारणं श्रोतुं महत्कौतूहलमुत्साहो वर्त्तते ॥ ७ ॥ परीक्षित इति ॥ श्रद्दधानस्य परीक्षितः सम्यक् प्रश्नं निशम्य भगवान् बादरायणिः अथानन्तरमेव प्रतिनन्द्य वचोऽब्रवीत् ॥ ८ ॥ शृणुष्वेति ॥ हे राजन् अवहितः सावधानस्त्वं द्वैपायनमुखात् नारदाद्देवलादपि श्रुतम् इमम् इतिहासं यथा यथावच्छृणुष्व । तत्रार्थः ॥ ९ ॥ आसीदिति ॥ हे राजन् शूरसेनेषु देशेषु सार्वभौमः चित्रकेतुरिति ख्यातः राजा आसीत् । यस्य मही कामधुगासीत् ॥ १० ॥ तस्येति ॥ तस्य भार्यासहस्राणां दश सहस्राणि कोटिर्भार्या अभवन्नित्यर्थः । सान्तानिकः स्वयं सन्तानार्होऽपि पुत्रोत्पादनसमर्थोऽपि स नृपः तासु सन्ततिं पुत्रं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेभे दैवयोगेन ताः सर्वाः वन्ध्या एव मिलिताः इति भावः॥ ११॥ रूपेति ॥ रूपादिभिः सर्वैर्गुणैः इयङ्गार्षः सम्पन्नस्यापि तस्य वन्ध्यापतेःपुत्रं विना चिन्ताभूत्॥ १२॥ नेति ॥ सार्वभौमस्यापि तस्य सर्वाः सम्पदः वामलोचनाः मनोहरनेत्रा महिष्यः इयं भूश्च प्रीतिहेतवो नाभवन् ॥ १३ ॥ तस्येति ॥ भगवानङ्गिरा ऋषिरेतान् लोकाननुचरन् यदृच्छया भगवत्प्रेरणया एकदा तस्य चित्रकेतोर्भवनमुपागच्छत् ॥ १४ ॥ तमिति ॥ तमङ्गिरसं प्रत्युत्थानादिभिर्विधिवत्पूजयित्वा कृतातिथ्यं सुखमासीनं स्वयमपि राजा समाहितः संयतः उपासीदत् तस्य समीपमुपविवेश ॥ १५ ॥ महर्षिरिति ॥ हे महाराज महर्षिः प्रश्रयावनतं क्षितौ उपासीनं तं प्रतिपूज्य सत्कृत्य समाभाष्य सम्बोध्य इदं वक्ष्यमाणमब्रवीत् ॥१६॥ अपीति ॥ अपि किं ते तवात्मनः शरीरस्यानामयमारोग्यमस्ति स्वस्ति शुभमस्ति तथाप्रकृतीनामपि अनामयं स्वस्त्यस्ति किम् । यथा सप्तभिः प्रकृतिभिः महदहङ्कारपञ्चसूक्ष्मभूतरूपैर्गुप्तः पुमान् जीवः नित्यं गुप्तो भवति नतु ता विना क्षणमपि तिष्ठति तथा राजापि सप्तभिः।"स्वाम्यमात्यजनपदा दुर्गद्रविणसंचयाः।दण्डो मित्रं च तस्यै-

रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ॥ संपन्नस्य गुणैः सर्वैश्चिन्ता वन्ध्यापतेरभूत् ॥ १२ ॥ न तस्य संपदः सर्वा महिष्यो वामलोचनाः ॥ सार्वभौमस्य भूश्चेयमभवन् प्रीतिहेतवः ॥ १३ ॥ तस्यैकदा तु भवनमङ्गिरा भगवानृषिः ॥ लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥ १४ ॥ तं पूजयित्वा विधिवत् प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमुपासीदत् सुखासीनं समाहितः ॥ १५ ॥ महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ॥ प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् ॥ १६ ॥ अङ्गिरा उवाच ॥ अपि तेऽनामयं स्वस्ति प्रकृतीनां तथात्मनः॥ यथा प्रकृतिभिर्गुप्तः पुमान् राजापि सप्तभिः ॥ १७ ॥ आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् ॥ राज्ञा तथा प्रकृतयो नरदेवाऽहिताधयः ॥१८॥ अपि दाराः प्रजामात्या भृत्याः श्रेण्योऽथ मन्त्रिणः ॥ पौरा जानपदा भूपा आत्मजा वशवर्तिनः ॥१९॥ यस्यात्मानुवशश्चेत् स्यात् सर्वे तद्वशगा इमे ॥ लोकाः सपाला यच्छन्ति सर्वे बलिमतन्द्रिताः ॥ २० ॥

ताः सप्त प्रकृतयो मताः ॥ " इत्युक्तलक्षणाभिर्गुप्त एव सुखमनुभवति नान्यथा स्वामी स्वयम्॥ १७॥आत्मानमिति ॥ हे नरदेव आत्मानं प्रकृतिषु अद्धा साक्षान्निधाय तदनुवर्तिनं कृत्वा राजा श्रेयो राज्यसुखमाप्नुयात् तथा प्रकृतयोऽपि राज्ञा अहिताधयः निहितनिक्षेपाः धनतुरगहस्त्यादिभिः समृद्धा भवन्ति । आहताधय इति पाठे आ समन्ततो हताधयो निरस्तमनोदुःखा भवन्ति ॥ १८ ॥ अपीति ॥ दाराः प्रजाश्च अमात्याश्च भृत्याः श्रेण्यः समयविशेषेण सङ्घशो वर्त्तमानास्तैलिकताम्बूलिकादयः वणिग्विशेषाः पौराः पुरवासिनः जानपदाः तत्तद्देशाधिकारिणः भूपाः खण्डमण्डलपतयः आत्मजाः पुत्राश्चापि किन्ते वशवर्तिनः सन्ति ॥ १९ ॥ तव मनः स्ववशेऽस्ति न वेत्याशयेनाह—यस्येति ॥ यस्य आत्मा मनः अनुवशः अनुवर्त्ती स्वाधीनश्चेत् स्यात्तदा इमे सर्वे दारापत्यादयस्तद्वशगाः तद्वशवर्त्तिनो भवन्ति किं च सपाला लोकाः अतन्द्रिता निरलसाश्च सन्तो बलिं

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

पूजां यच्छन्ति भृत्यादीनां का वार्त्ता ॥ २० ॥ तदाप्यब्रुवाणं राजानं पुनराह—आत्मन इति ॥ आत्मनस्तवात्मा मनः न प्रीयते न तुष्यति तत्किमर्थमिति शेषः । परतो वा स्वतो वा न लब्धः कामो मनोरथो येन तथाभूतमेव त्वामहं लक्षये जानामि अत एव तव मुखं चिन्तया शबलं व्याप्तं लक्षये ॥ २१ ॥ एवमिति ॥ हे राजन् विदुषा सर्वज्ञेनापि मुनिना त्वन्मुखात्तद्वृत्तं श्रोतुमेवं विकल्पितः विविधप्रश्नविषयीकृतः स प्रजाकामः चित्रकेतुः प्रश्रयेणावनतः सन् मुनिमभ्याह स्म ॥ २२ ॥ भगवन्निति ॥ हे भगवन् सर्वज्ञ तपोज्ञानसमाधिभिर्ध्वस्तं निरस्तं पापमन्तःकरणावरकं कालुष्यं येषां तेषां योगिनां भवतां शरीरिषु अस्मदादिषु बहिरन्तर्यदवस्थितं तत्किं न विदितं सर्वं विदितमेवेत्यर्थः ॥ २३ ॥ तथापीति ॥ हे ब्रह्मन् यद्यपि तवाविदितं किंचिन्नास्ति अथाप्यात्मनि मनसि चिन्तितं संकल्पितं ब्रूयाम् भवत इति षष्ठी तृतीयार्थे । यतो विदुषापि पृच्छता भवता त्वयाहं प्रश्नेन चोदितोऽतस्त्वदनुज्ञया वक्तव्यमेवेति शेषः । यद्वा भवतोऽहमाज्ञाकारी ॥ २४ ॥ लोकेति ॥ यथा क्षुत्तृड्भ्यामन्नपानकामं

आत्मनः प्रीयते नात्मा परतः स्वत एव वा ॥ लक्षयेऽलब्धकामं त्वां चिन्तया शबलं मुखम् ॥ २१ ॥ एवं विकल्पितो राजन् विदुषा मुनिनाऽपि सः ॥ प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिम् ॥ २२॥ चित्रकेतुरुवाच॥ भगवन् किं न विदितं तपोज्ञानसमाधिभिः ॥ योगिनां ध्वस्तपापानां बहिरन्तः शरीरिषु ॥ २३ ॥ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिन्तितम् ॥ भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥ २४ ॥ लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसम्पदः ॥ न नन्दयन्त्य प्रजं मां क्षुत्तृट्काममिवापरे ॥ २५ ॥ ततः पाहि महाभाग पूर्वैः सह गतं तमः ॥ यथा तरेम दुस्तारं प्रजया तद् विधेहि नः ॥ २६ ॥ श्रीशुक उवाच ॥ इत्यर्थितः स भगवान् कृपालुर्ब्रह्मणः सुतः ॥ श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥ २७ ॥ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत ॥ नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्विजः ॥ २८ ॥

पुरुषम् अपरे स्रक्चन्दनादयो न सुखयन्ति तथा प्रजाकामम् अप्रजं पुत्ररहितं माम् असिजभाव आर्षः । लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसम्पदः न नन्दयन्ति॥२५॥ तत इति ॥ हे महाभाग ततः पुत्राभावात् पूर्वैः पित्रादिभिः सह तमोगतं नरकं प्राप्तं मां पाहि रक्ष । यथा प्रजया हेतुभूतया वयं दुस्तारं नरकं स्वार्थणिजन्तात्तरतेः खलु । तरेम न गच्छाम तथा तदुपायं नो विधेहि उपदिश । " पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥ " इत्युक्तेः ॥ २६ ॥ इतीति ॥ इत्येवं भगवान् कृपालुर्ब्रह्मणः सुतः स द्विजो ब्राह्मणोऽङ्गिरा अर्थितः राज्ञा प्रार्थितः त्वाष्ट्रं त्वष्टृदेवताकं चरुं हविर्विशेषं श्रपयित्वा सिद्धं कृत्वा पुत्रलाभाय त्वष्टारमयजत् ॥ २७ ॥ ज्येष्ठेति ॥ हे भारत राज्ञो महिषीणां मध्ये या प्रथमविवाहितत्वेन ज्येष्ठा सौशील्यादिगुणविशिष्टतया श्रेष्ठा च नाम्ना कृतद्युतिरिति प्रसिद्धा तस्यै यज्ञोच्छिष्टं यज्ञशेषं द्विजोऽङ्गिरा अदात् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ अथ तद्धविःशेषदानान्तरं हे राजन् तुभ्यं हर्षशोकप्रदस्तवात्मजः पुत्र एको भविता भविष्यतीति नृपतिं प्राह स्मेत्यन्वयः । इत्युक्त्वा च ब्रह्मसुतोऽङ्गिरा ययौ । हर्षशोकप्रद इति जन्मना हर्षो मरणेन शोक इति सूचितवानपि अप्रियत्वात् स्पष्टं नोवाच । राजा तु पुत्रो मे बहुगुणान्वितो भविष्यतीति हर्षदः । ऐश्वर्यवशात्सगर्वो भविष्यतीति शोकद इत्याशयं प्रकल्प्य प्रसन्न एवाभूत् इति ज्ञेयम् ॥ २९ ॥ सेति ॥ सा वन्ध्यापि कृतद्युतिस्तस्य हविःशेषस्य प्राशनाद्भक्षणादेव हेतोः चित्रकेतोः सकाशात् गर्भमधारयत् । यथा अग्नेः सकाशात् कृत्तिका देवी आत्मजं स्कन्दमधारयत् तद्वदित्यर्थः ॥ ३० ॥ तस्या इति ॥ हे नृप शूरसेनानामीशस्य चित्रकेतोस्तेजसा वीर्येण धृतो यो गर्भः स तस्याः कृतद्युतेः शनकैरनुदिनं ववृधे । शुक्लपक्षे यथा उडुपश्चन्द्रः शनकैर्वर्धते तद्वत् ॥ ३१ ॥ अथेति ॥ अथ काले प्रसूतिसमय उपावृत्ते प्राप्ते सति शूरसेनानां शूरसेनदेशनिवासिनां प्राणिनां शृण्वतां परमां मुदं जनयन् कुमारः समजायत ॥ ३२ ॥ हृष्ट इति ॥ तच्छ्रुत्वा हृष्टो राजा स्नातः शुचिरलङ्कृतश्च

अथाह नृपतिं राजन् भवितैकस्तवात्मजः ॥ हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥ २९ ॥ सापि तत्प्राशनादेव चित्रकेतोरधारयत् ॥ गर्भं कृतद्युतिर्देवी कृत्तिकाऽग्नेरिवात्मजम् ॥ ३० ॥ तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः ॥ ववृधे शूरसेनेशतेजसा शनकैर्नृप ॥ ३१ ॥ अथ काल उपावृत्ते कुमारः समजायत ॥ जनयञ्छूरसेनानां शृण्वतां परमां मुदम् ॥ ३२ ॥ हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः ॥ वाचयित्वाऽऽशिषो विप्रैः कारयामास जातकम् ॥ ३३ ॥ तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ॥ ग्रामान् हयान् गजान् प्रादाद्धेनूनामर्बुदानि षट् ॥ ३४ ॥ ववर्ष काममन्येषां पर्जन्य इव देहिनाम् ॥ धन्यं यशस्यमायुष्यं कुमारस्य महामनाः ॥ ३५ ॥ कृच्छ्रलब्धेऽथ राजर्षेस्तनयेऽनुदिनं पितुः ॥ यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्द्धत ॥ ३६ ॥ मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः ॥ कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥ ३७ ॥

सन् विप्रैः कुमारस्याशिषो वाचयित्वा जातकं जातकर्म कारयामास ॥ ३३ ॥ तेभ्य इति ॥ तेभ्यो विप्रेभ्यः हिरण्यादिकान् गजान्तान् प्रादात् तथा धेनूनां षट् अर्बुदानि प्रादात् । अर्बुदं दशकोट्यः वेदे तु कोटिरेवार्बुदं नियुतं च प्रयुतं चार्बुदं चेति प्रयुतानन्तरनिर्देशात् ॥ ३४ ॥ ववर्षेति ॥ महामनाः स नृपः कुमारस्य धन्यं धनकरं यशस्यं यशस्करम् आयुष्यम् आयुष्करं यथा तथा अन्येषामपि देहिनां कामान् मनोरथान् पर्जन्य इव ववर्ष यथोचितं पूरयामास । एके तु धन्यमुत्तमं कामं ववर्षेति व्याचख्युः ॥ ३५ ॥ कृच्छ्रेति ॥ यथा निस्वस्य दरिद्रस्य कृच्छ्राप्ते धनेऽनुदिनं स्नेहोऽनुवर्द्धते तथा कुमारपितुः राजर्षेः चित्रकेतोरथापि कृच्छ्रलब्धे तनयेऽनुदिनं स्नेहोऽन्ववर्द्धत ॥ ३६ ॥ मातुरिति ॥ मातुस्तु मोहादज्ञानात् समुद्भवो यस्य स पुत्रे स्नेहोऽतितरामन्ववर्द्धतेत्यनुषङ्गः । कृतद्युतेः सपत्नीनां तु प्रजाकामरूपो ज्वरस्तापोऽभवत् ॥ ३७ ॥

CC-0. In Public Domain. Digitization by eGangotri

चित्रेति ॥ बालमन्वहं लालयतश्चित्रकेतोः यथा प्रजावति दारे कृतद्युतौ एकत्वमार्षम् अतिप्रीतिः संजज्ञे तथान्येषु प्रजारहितेषु दारेषु न संजज्ञे ॥ ३८ ॥ ता इति ॥ ताः प्रजारहिताः आत्मानं गर्हयन्त्यः अभ्यसूयया सपत्न्यां दोषारोपेण अनपत्येन अपुत्रत्वनिमित्तेन राज्ञः कर्त्तरि षष्ठी । अनादरणेन च पर्यतप्यन् ॥ ३९ ॥ गर्हणं दर्शयति– धिगिति ॥ पत्युरपि अगृहसंमतां न गृहे बहुमतां । यद्वा । अगृहं गृहभिन्नं वनं तत्रैव संमतां पत्युरपि वनवासदानार्हामित्यर्थः । सप्रजाभिः सपत्नीभिः दासीमिव तिरस्कृतां पापामप्रजां स्त्रियं धिक् असिजभाव आर्षः ॥ ४० ॥ दासीनामिति ॥ स्वामिनः परिचर्यया अभीक्ष्णं लब्धो मानः सम्मानो याभिस्तासां दासीनां कोऽनुसंतापो भवेत् न कोऽपीत्यर्थः । दुर्भगाः वयं तु यथा दास्याः दासी भवति तथा नादरपात्राणि । यद्वा । दास्या दासीव कस्याश्च दुर्भगाया दास्या दास्य इव वयं दुर्भगाः ॥ ४१ ॥ एवमिति ॥ एवं सपत्न्याः पुत्रसम्पदा दह्यमानानां राज्ञो न सम्मता वृत्तिर्जीवनं यासां तासां पत्नीनां बलवान् विद्वेषः अभवत् ॥ ४२ ॥ विद्वेषेति ॥ विद्वेषेण नष्टा मतिर्विवेको यासां ताः

चित्रकेतोरतिप्रीतिर्यथा दारे प्रजावति ॥ न तथान्येषु संजज्ञे बालं लालयतोऽन्वहम् ॥ ३८ ॥ ताः पर्यतप्यन्नात्मानं गर्हयन्त्योऽभ्यसूयया ॥
आनपत्येन दुःखेन राज्ञोऽनादरणेन च ॥ ३९ ॥ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमताम् ॥ सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम् ॥ ४० ॥
दासीनां को नु संतापः स्वामिनः परिचर्यया ॥ अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ॥ ४१ ॥ एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा ॥
राज्ञोऽसंमतवृत्तीनां विद्वेषो बलवानभूत् ॥ ४२ ॥ विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः ॥ गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति ॥ ४३ ॥
कृतद्युतिरजानन्ती सपत्नीनामघं महत् ॥ सुप्त एवेति संचिन्त्य निरीक्ष्य व्यचरद्गृहे ॥ ४४ ॥ शयानं सुचिरं बालमुपधार्य मनीषिणी ॥ पुत्रमानय
मे भद्रे इति धात्रीमचोदयत् ॥ ४५ ॥ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम् ॥ प्राणेन्द्रियात्मभिस्त्यक्तं हताऽस्मीत्यपतद्भुवि ॥ ४६ ॥
तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नन्त्याः कराभ्यामुर उच्चकैरपि ॥ प्रविश्य राज्ञी त्वरयात्मजान्तिकं ददर्श बालं सहसा मृतं सुतम् ॥ ४७ ॥

दारुणचेतसः नृपतिं प्रति दुर्मर्षाः तदनादरमसहमानाः स्त्रियः कुमाराय विषं ददुः ॥ ४३ ॥ कृतेति ॥ कृतद्युतिश्च सपत्नीनां महत् अघं विषदानरूपमपराधम् अजानन्ती नुमार्षः । बालः सुप्त एवेति संचिन्त्य सुप्तवन्निरीक्ष्य गृहे व्यचरत् ॥ ४४ ॥ शयानमिति ॥ मनीषिणी धीमती कृतद्युतिः बालं सुचिरं शयानम् उपधार्य संचिन्त्य हे भद्रे मे पुत्रमानयेति धात्रीं स्तनदात्रीमचोदयत् ॥ ४५ ॥ सेति ॥ सा धात्री शयानं बालमुपव्रज्य उद्गते तारके कनीनिके ययोस्ते लोचने यस्य तथाभूतं प्राणादिभिस्त्यक्तं रहितं च दृष्ट्वा हतास्मीति ब्रुवाणा भुवि अपतत् ॥ ४६ ॥ तस्या इति ॥ कराभ्यामुरो घ्नन्त्यास्तस्याः नुमार्षः । धात्र्यास्तद्भृशातुरमतिव्याकुलमुच्चकैः स्वरमाकर्ण्य राज्ञी त्वयात्मजान्तिकं प्रविश्य सहसा आकस्मिकेन बालं सुतं मृतं ददर्श ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पपातेत्यर्द्धम्॥ दृष्ट्वा च भूमौ पपात तथा विभ्रष्टाः विकीर्णाः शिरोरुहा अम्बरे च यस्याः सा परिवृद्धया शुचा शोकेन मुमोह मुमूर्च्छ ॥४८॥ तत इति॥ ततश्च हे नृप अन्तःपुरवर्त्तिनो नरा नार्यश्च सर्वेऽपि जना रोदनं निशम्य तुल्यं व्यसनं येषां ते तत्रागत्य रुरुदुःतथा कृतमागःविषदानं याभिस्ताश्च सपत्न्योऽपि व्यलीकं मिथ्यैव सुदुःखितास्तत्रागत्य रुरुदुः ॥ ४९ ॥ श्रुत्वेति युग्मम् ॥ अलक्षितोऽन्तको मृत्युहेतुर्यस्य तं पुत्रं मृतं श्रुत्वा विनष्टा दृष्टिर्यस्य सः स्नेहस्य योऽनुबन्धः निरन्तरानुवृत्तिस्तेन एधितया शुचा पथि भृशं प्रपतन् स्खलन् च स चित्रकेतुस्तत्रागत्य विमूर्च्छितः सन् अनुगताः प्रकृतयोऽमात्यादयो यस्य स द्विजैर्वृत्तश्च विस्रस्तशिरोरुहाम्बरः दीर्घं श्वसंश्च मृतस्य बालस्य पादमूले पपात । अमात्यादयः ब्राह्मणादयश्चापि पेतुरित्यर्थः । ततश्च मूर्च्छागमेऽपि बाष्पकलाभिरश्रुबिन्दुभिरुपरोधतः संवृतत्वेन निरुद्धः कण्ठो यस्य सः किंचिद्भाषितुं न शशाक ॥ ५० ॥ ५१ ॥ पतिमिति ॥ उरुशुचार्पितं बहुशोकेन व्याप्तं पतिं निरीक्ष्य एकमेव सन्ततिरूपं बालं सुतं च मृतं निरीक्ष्य तदा राज्ञी अन्तःपुरजनस्य प्रकृते-

पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहाम्बरा ॥४८॥ततो नृपान्तःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम्॥आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः॥४९॥श्रुत्वा मृतं पुत्रमलक्षितान्तकं विनष्टदृष्टिः प्रपतन् स्खलन् पथि॥स्नेहानुबन्धैधितया शुचा भृशं विमूर्च्छितोऽनुप्रकृतिर्द्विजैर्वृतः ॥ ५०॥ पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहाम्बरः ॥ दीर्घं श्वसन् बाष्पकलोपरोधतो निरुद्धकण्ठो न शशाक भाषितुम् ॥५१॥ पतिं निरीक्ष्योरुशुचाऽर्पितं तदा मृतं च बालं सुतमेकसंततिम्॥ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥ ५२ ॥ स्तनद्वयं कुङ्कुमगन्धमण्डितं निषिञ्चती साञ्जनबाष्पबिन्दुभिः ॥ विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरम् ॥५३॥ अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे॥ परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः॥५४॥न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः॥यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि॥५५॥

श्चामात्यादेर्हृद्रुजं शोकं दधाना पुष्यन्ती सती चित्रधा विललाप । धा आर्षः ॥ ५२ ॥ स्तनेति ॥ विगलन्त्यः स्रजो येभ्यस्तान् केशान् विकीर्य साञ्जनैः बाष्पबिन्दुभिः कुङ्कुमगन्धमण्डितं स्तनद्वयं निषिञ्चती सुस्वरं चित्रं च यथा भवति तथा कुररी पक्षिणीव रुदती च सती सुतं शुशोच ॥ ५३ ॥ अहो इति ॥ हे विधातः नु अहो यस्तु त्वं परे वृद्धे पितरि जीवति सत्यपि अपरस्य बालस्य या मृतिरित्येवरूपमात्मसृष्टेरप्रातिरूपं प्रतिकूलं यथा स्यात्तथा ईहसे चेष्टसे अतः सर्ववृद्धोऽपि अतीव बालिशो महामूर्ख एवासि तदा हि वृद्धस्य सृष्टिसामर्थ्याभावे बाले च मृते तव सृष्टेर्लोप एव स्यात् । यदि च विपर्ययश्चेत् संप्रति स्वसृष्टेर्विपरीतोऽस्मीति मन्यसे चेत्तर्हि त्वमेव ध्रुवो निश्चितः परः शत्रुरसि न तु कृपालुः स्वविरुद्धं कृत्वापि अस्माकं कष्टदानात् ॥ ५४ ॥ ननु जीवकर्मानुसारेण जन्मादि कुर्वतो मम नो दोष इत्याशङ्क्याहुः—न हीति ॥ प्रथमं पुत्रो

CC-0. In Public Domain. Digitization by eGangotri

जायते ततः पिता म्रियते ततः पुत्रो म्रियते इति क्रमो नास्ति कर्माधीनत्वात् इति चेत्तर्ह्यात्मकर्मभिरेव शरीरिणां तज्जन्मादिकमस्तु त्वया किं कृत्यमस्तीति शेषः । ननु मां विना जडैः कर्मभिः किं सिद्ध्येदिति चेत्सत्यं त्वयैव सिद्ध्यन्तु तथापि निजसर्गवृद्ध्ये त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव पुत्रादिमारणेन विवृश्चसि छिनत्सि स्नेहे एतादृशं दुःखं दृष्ट्वा पुत्रादिषु कोऽपि स्नेहं न करिष्यति स्नेहाकरणे पुत्रादयः कथं जीविष्यन्तीति सृष्टिलोपात् त्वं मूर्ख एवासि । यद्वा । लोडर्थे लट् छिन्धीत्यर्थः । स्नेह एव सुख-दुःखयोर्हेतुः स्नेहाभावे पुत्रो जायतां म्रियतां वा सुखदुःखे तु नैव स्याताम् इति भावः । अतस्त्वं मूर्ख एव ॥५५॥ त्वमिति ॥ हे तात कृपणां दीनां त्वच्छोकेन राज्ञि मृते रक्षकहीनां मां त्यक्तुं नार्हसि तव शोकेन तप्तं स्वपितरं च विचक्ष्व पश्येति तमपि त्यक्तुं नार्हसीत्यनुषङ्गः । भवता निमित्तेन अप्रजदुस्तरमप्रजानां । दुस्तरम् असिजभाव आर्षः । यत् ध्वान्तं नरकदुःखं तदञ्जः अनायासेनैव वयं तरेम अतः अकरुणेन निर्दयेन यमेन सह दूरं न याहि मा गच्छ ॥ ५६ ॥ उत्तिष्ठेति ॥ हे तात हे नृपनन्दन त्वं चिरं बहुकालं सुप्त इदानीमुत्तिष्ठते वयस्या इमे शिशवो बालाः त्वां विहर्तुमाह्वयन्ति आकारयन्ति हि यस्माच्चिरं सुप्तोऽतो भवांश्चापि अशनया क्षुधया परीतो व्याप्तःअतोऽन्नं

त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम् ॥ अञ्जस्तरेम भवताऽप्रजदुस्तरं यत् ध्वान्तं न याह्यकरुणेन यमेन दूरम् ॥५६॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयन्ति नृपनन्दन संविहर्तुम्॥ सुप्तश्चिरं ह्यशनया च भवान्परीतो भुङ्क्ष्व स्तनं पिब शुचो हर नः स्वकानाम् ॥५७॥ नाहं तनूज ददृशे हतमङ्गला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जम् ॥ किं वा गतोऽस्य पुनरन्वयमन्यलोकं नीतोऽघृणेन न शृणोमि कला गिरस्ते॥५८॥ श्रीशुक उवाच ॥ विलपन्त्या मृतं पुत्रमिति चित्रविलापनैः॥ चित्रकेतुर्भृशं तप्तो मुक्तकण्ठो रुरोद ह ॥५९॥ तयोर्विलपतोः सर्वे दम्पत्योस्तदनुव्रताः॥ रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥ ६० ॥

भुङ्क्ष्व स्तनं च पिब स्वकानां त्वत्संबन्धिनां नोऽस्माकं शुचः शोकान् हर अपनय अशनायाशब्दस्थानेऽशनाशब्द आर्षः भावे क्विपि अल्लोपयलोपाभ्यां वा कथंचित्साध्यम् ॥५७॥ नाहमिति ॥ हे तनुज हे पुत्र हतमङ्गला नष्टपुण्याहं प्रथमं त्वत्पार्श्वमागता सती मुग्धमल्पं स्मितं यस्मिंस्तत् मुदितं वीक्षणं यस्मिंस्तत् ते तवाननाब्जं मुखकमलमहं न ददृशे न दृष्टवत्यस्मि । तङार्षः इदानीमपि कलामधुरास्ते गिरो न शृणोमीति अतः अघृणेन निर्दयेन यमेन नीतस्त्वमपुनरन्वयं पुनरागमनं यथा न भवति तथाऽन्यलोकं यमलोकं गतोऽसि किं वा इति पादपूरणे । यद्वा । अहं तवाननाब्जं न ददृशे यत्त्वं न जागर्षि तेन किं वाऽन्यलोकं गतोऽसि तव को दोषः ! यतः अघृणेन यमेन नीतः अत एव ते कला गिरः न शृणोमि ॥५८॥ विलपन्त्या इति ॥ इत्येवं चित्रविलापनैः मृतपुत्रं विलपन्त्यां सत्यां तच्छ्रुत्वा चित्रकेतुर्भृशं तप्तोऽतो मुक्तकण्ठः सन् रुरोद । यद्वा। विलपन्त्या तया सहेति तृतीयान्तम्॥५९॥ तयोरिति॥ तयोर्दम्पत्योरेवं विलपतोः सतोस्तदनुव्रताः अमात्यादयोऽपि सर्वे नरा नार्यश्च रुरुदुः तदा चित्रकेतोर्मृततुल्यत्वात् सर्वमेव नगरमचेतनं नष्टसंज्ञमराजकमिवासीत् ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं सर्वमेव जनं कश्मलं मोहमापन्नं प्राप्तमत एव नष्टसंज्ञं देहाद्यनुसन्धानरहितमनायकं प्रतिबोधकरहितं ज्ञात्वा सनारदः नारदेन सहितोऽङ्गिरा नाम मुनिराजगाम ॥ ६१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य व्यधाट्टीकां चतुर्दशे ॥ १४ ॥ पञ्चदशे चित्रकेतोर्नारदेनाङ्गिरो युजा ॥ शोकशान्तिः कृता तत्र श्लोका विंशतिरष्ट च ॥ पञ्चोवाचेति पादोना ऊनत्रिंशदनुष्टुभः ॥ १५ ॥ ऊचतुरिति ॥ शोकेनाभिभूतमचेतनीकृतमत एव मृतकोपमं मृतकस्य शवस्य उपान्ते समीपे पतितं राजानं सदुक्तिभिः यथार्थहितप्रियवाक्यैर्बोधयन्तौ नारदाङ्गिरसावूचतुः ॥ १ ॥ कोऽयमिति ॥ हे राजन् भवान् यमनुशोचति सोऽयं सृष्टौ पुरा पूर्वजन्मनि इदानीमत्र जन्मनि अतः परं भविष्यज्जन्मनि च कः किं संबन्धवान् स्यात् एवं पूर्वजन्मादिषु त्वं चास्य कतमोऽसि ।अयं भावः । यः पुरा जन्मनि पिता सोऽत्र जन्मन्यपि पितैवेति नियमो नास्त्येव अतः कदाचिदयं पिता त्वं पुत्रः कदाचिदन्यथापीति तवायं कस्त्वं चास्य कः इत्यनिश्चितमेव ॥ २ ॥ यथेति ॥ यथा स्रोतसः प्रवाहस्य वेगेन वालुकाः

एवं कश्मलमापन्नं नष्टसंज्ञमनायकम् ॥ ज्ञात्वाङ्गिरा नाम मुनिराजगाम सनारदः ॥ ६१ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ ॥ ऊचतुर्मृतकोपान्ते पतितं मृतकोपमम् ॥ शोकाभिभूतं राजानं बोधयन्तौ सदुक्तिभिः ॥ १ ॥ कोऽयं स्यात्तव राजेन्द्र भवान्यमनुशोचति ॥ त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परम् ॥ २ ॥ यथा प्रयान्ति संयान्ति स्रोतोवेगेन वालुकाः ॥ संयुज्यन्ते वियुज्यन्ते तथा कालेन देहिनः ॥ ३ ॥ यथा धानासु वै धाना भवन्ति न भवन्ति च ॥ एवं भूतेषु भूतानि चोदितानीशमायया ॥ ४ ॥ वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः ॥ जन्ममृत्योर्यथा पश्चात्प्राङ् नैवमधुनापि भोः ॥ ५ ॥ भूतैर्भूतानि भूतेशः सृजत्यवति हन्त्यजः ॥ आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत् ॥ ६ ॥

प्रयान्ति वियुज्यन्ते तथैव कालवेगेन देहिनो जीवा अपि संयुज्यन्ते वियुज्यन्ते च ॥ ३ ॥ यथेति ॥ यथा धानासु यवादिबीजेषु धानाः यवादिबीजान्तराणि क्वचित्कदाचिद्भवन्ति क्वचित्कदाचिन्न भवन्ति च नोत्पद्यन्ते च उत्पन्ना अपि नश्यन्ति च ननु भवन्त्येव तिष्ठन्त्येवेति वा नियमः । एवमीशस्य मायया इच्छया चोदितानि प्रेरितानि भूतानि पुत्रादिरूपाणि भूतेषु पित्रादिषु भवन्ति न भवन्ति भूतान्यपि नश्यन्ति अतः शोको न कार्यः । अत्र श्लेषेण यथा धानासु भ्रष्टयवेषु धाना न भवन्ति तथा पुत्रजनकादृष्टरहितेषु त्वादृशेषु भूतान्यपत्यानि न भवन्ति किन्तु ईश हे राजन् मायया प्रेरिता भवन्ति चेत्यहमङ्गिरा एव त्वत्प्रबोधार्थं मायया त्वत्पुत्रोऽभूवमिति भावः ॥ ४ ॥ वयमिति ॥ भो राजन् तुल्यकालाः वर्त्तमानकालभवाः वयं च त्वं च ये चेमेऽन्ये चराचरास्ते यथा जन्मनः प्राक् मृत्योः पश्चाच्च न सन्ति एवमधुना वर्त्तमानकालेऽपि न सन्ति आद्यन्तयोरसत्वात्स्वप्नवत् ॥ ५ ॥ असत्वे कथं प्रतीतिः कथं वाहमस्य जनक इत्यभिमानस्तत्राहतुः—भूतैरिति ॥ अनपेक्षः प्रयोजनरहितोऽपि अजः अनादिः भूतेशः

Nepal Sanskrit University, Balmeeki Campus ... Library

CC-0. In Public Domain. Digitization by eGangotri

जगदीश्वरः बालवल्लीलया आत्मसृष्टैरत एवास्वतन्त्रैः स्ववशीभूतैः पित्रादिभिर्भूतानि पुत्रादीन् सृजति राजाद्यैः अवति सर्पाद्यैः हन्ति च ईश्वरेण मायया सृष्टत्वात् भ्रतीति-निमित्तमात्रत्वेनैव भूतानामयमभिमानः ईश्वरस्य च सृष्ट्यादेः प्रयोजनाभावेऽपि स्वभावात् बालवल्लीलया स करोति इति भावः ॥ ६ ॥ देहेनेति ॥ हे राजन् पितुर्देहेन संयुक्तान्मातुर्देहात् देहिनः पुत्रस्य देहोऽभिजायते प्रादुर्भवति । तत्र दृष्टान्तः । यथा बीजादेव बीजान्तरं जायते तथा देही जीवस्तु अर्थ इव भूम्यादिरिव शाश्वत एव अतो जन्मादिव्यवहारोऽपि देहानामेव न त्वात्मनः ॥ ७ ॥ देहेति ॥ अयं देहदेहिनोर्विभागो भेदः पुरा पुरातनः अनादिरित्यर्थः । अविवेककृतोऽज्ञानकल्पितः । तत्र दृष्टान्तमाह । जातिर्गोत्वादि सामान्यं व्यक्तिर्गवादिपिण्डविशेषस्तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः परस्परापेक्षसिद्धत्वेन भेदेन निरूपयितुमशक्यत्वात् ॥ ८ ॥ एवमिति ॥ एवं

देहेन देहिनो राजन्देहाद्देहोभिजायते ॥ बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः ॥ ७ ॥ देहदेहिविभागोऽयमविवेककृतः पुरा ॥ जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः ॥ ८ ॥ श्रीशुक उवाच ॥ एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ॥ प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ॥ ९ ॥ राजोवाच ॥ कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसाम् ॥ अवधूतेन वेषेण गूढाविह समागतौ ॥ १० ॥ चरन्ति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ॥ मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिङ्गिनः ॥ ११ ॥ कुमारो नारद ऋभुरङ्गिरा देवलोऽसितः ॥ अपान्तरतमो व्यासो मार्कण्डेयोऽथ गौतमः ॥ १२ ॥ वसिष्ठो भगवान् रामः कपिलो बादरायणिः ॥ दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथाऽरुणिः ॥१३॥ रोमशश्च्यवनो दत्त आसुरिः सपतञ्जलिः ॥ ऋषिर्वेदशिरा बोध्यो मुनिः पञ्चशिरास्तथा ॥१४॥ हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः ॥ एते परे च सिद्धेशाश्चरन्ति ज्ञानहेतवः ॥ १५ ॥ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू ॥ अन्धे तमसि मग्नस्य ज्ञानदीप उदीर्यताम् ॥१६॥ अङ्गिरा उवाच ॥ अहं ते पुत्रकामस्य पुत्रदोऽस्म्यङ्गिरा नृप ॥ एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः ॥१७॥ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ॥ अतदर्हमनुस्मृत्य महापुरुषगोचरम् ॥१८॥ अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ॥ ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥१९॥

द्विजोक्तिभिः आश्वासितो राजा चित्रकेतुः आधिना म्लानं वक्त्रं पाणिना प्रमृज्य अभाषत ॥ ९ ॥ काविति ॥ स्पष्टम् ॥ १० ॥ चरन्तीति ॥ ग्राम्ये विषयसुखे इष्टबुद्धिर्येषां तेषां मादृशां मूर्खाणां बोधाय भगवत्प्रियाः उन्मत्तस्येव लिङ्गं येषां ते ब्राह्मणाः ब्रह्मविदोऽवनौ पृथिव्यां कामं यथेष्टं चरन्ति ॥ ११ ॥ कुमार इति चतुष्कम् ॥ स्पष्टम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ तस्मादिति ॥ युवां प्रभू प्रबोधे समर्थौ स्तः अतो ग्राम्यपशोरिव मूढधियः अन्धे तमसि महामोहे मग्नस्य मम तत उद्धारार्थं ज्ञानरूपः प्रदीप उदीर्यतां युवाभ्यां प्रवर्त्यताम् ॥ १६ ॥ अहमिति ॥ स्पष्टम् ॥ १७ ॥ इत्थमिति युग्मम् ॥ हे प्रभो इत्थम् अतदर्हं दुःखानुभवायोग्यं महापुरुषगोचरं भगवद्भक्तं पुत्रशोकेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुस्तरे तमसि मग्नं त्वामनुस्मृत्य ज्ञात्वा ब्रह्मण्यो भगवद्भक्तः अवसीदितुं दुःखमनुभवितुं सीदभाव आर्षः। नार्हति इति विचार्य भवतोऽनुग्रहाय आवामिह प्राप्तौ ॥१८॥१९॥ तदैवेति ॥ यदाहं पूर्वं तव गृहमागतस्तदैव ते तुभ्यं परमुत्कृष्टं बन्धविमोचकं ज्ञानं ददामि अदास्यं परं तु तदा तवान्याभिनिवेशं पुत्राग्रहं ज्ञात्वा पुत्रमेव ददामि अददाम् उभयत्र कालव्यत्ययाल्लट्। क्वापि ददाम्यहमित्यत्र ददावहमित्यपि पाठः ॥२०॥ अधुनेत्यर्धम् ॥ अधुना भवता एव पुत्रिणां तापः अनुभूयते॥२१॥एवमिति त्रयम् ॥ हे शूरसेनेश एवं दारादयः सर्वेऽपि शोकमोहादिप्रदाः आगमापायित्वेन गन्धर्वनगरप्रख्याः गन्धर्वनगरं ह्यकस्मादेव क्वचिदायाति याति च स्वप्नश्च माया च मनोरथश्च तैस्तुल्याः मिथ्याभूताः अत एव मनोभवाः मनःकल्पिताः अर्थेन परमार्थतया विनापि तथात्वेन दृश्यमानाः अत एव क्षणान्तरे न दृश्यन्ते अतो मिथ्याभूताः ॥ २२ ॥ २३ ॥ २४ ॥ नन्वेते कर्मभिः कृता इति मीमांसका मन्यन्ते तत्राह—कर्मभिरित्यर्धम् ॥ कर्मभिः प्राचीनकर्मवासनाभिः विषयान् ध्यायतः पुंसो मनस एव निमित्तात् नानाकर्माणि अभवन् । कर्म-

तदैव ते परं ज्ञानं ददामि गृहमागतः ॥ ज्ञात्वान्याऽभिनिवेशं ते पुत्रमेव ददावहम्॥२०॥ अधुना पुत्रिणां तापो भवतैवानुभूयते॥२१॥एवं दारा गृहा रायो विविधैश्वर्यसंपदः ॥ शब्दादयश्च विषयाश्चला राजविभूतयः ॥ २२ ॥ मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः ॥ सर्वेऽपि शूरसेनेश शोकमोहभयार्तिदाः॥२३॥गन्धर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः॥२४॥ कर्मभिर्ध्यायतो नानाकर्माणि मनसोऽभवन् ॥ २५ ॥ अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ॥ देहिनो विविधक्लेशसंतापकृदुदाहृतः ॥ २६ ॥ तस्मात्स्व-स्थेन मनसा विमृश्य गतिमात्मनः ॥ द्वैते ध्रुवार्थविश्रम्भं त्यजोपशममाविश ॥ २७ ॥ नारद उवाच ॥ एतां मन्त्रोपनिषदं प्रतीच्छ प्रयतो मम ॥ यां धारयन्सप्तरात्राद्द्रष्टा सङ्कर्षणं प्रभुम् ॥ २८ ॥

भिर्ध्यायत इति पाठे कर्म ईप्सिततममभिध्यायत इत्यर्थः । कर्मणो मनोभवत्वात्तत्साध्या अर्था अपि तथेति भावः ॥ २५ ॥ अयमिति ॥ हीत्यवधारणे । अयं द्रव्याणि महाभूतानि ज्ञानानि ज्ञानेन्द्रियाणि क्रियाः कर्मेन्द्रियाणि तदात्मकः अधिभूताधिदैवाध्यात्मरूपो देह एव देहिनां देहेऽहमित्यभिमानवतो देहिनो जीवस्य विविधान् क्लेशान् संतापांश्च करोतीति तथा उदाहृतः तत्त्वदर्शिभिर्निरूपितः ॥ २६ ॥ तस्मादिति ॥ तस्मात्स्वच्छेनाव्यग्रेण सावधानेन स्वस्थेनेत्यपि पाठः । मनसा आत्मनो गतिं तत्त्वं विमृश्य द्वैते प्रपञ्चे ध्रुवोऽयमर्थ इति विश्रम्भं विश्वासं प्रणयं वा त्यज ततश्चोपशममुपरतिमाविश आश्रय ॥ २७॥ तत्त्वमुपदिश्य अङ्गिरसि निवृत्ते परमेश्वरप्रसादं विना तत्त्वं न प्राप्यत इति तत्प्रसादाय मन्त्रविद्यां नारदो दिशति—एतामिति ॥ एतां ॐ नमस्तुभ्यमित्यादिपरमपरमेष्ठिन्नित्यन्तां वक्ष्यमाणां मन्त्ररूपामुपनिषदम् उपनिषीदति परं श्रेयोऽस्यां ताम् मे मत्तः प्रयतः मृतकक्रियां समाप्य विशुद्धः सावधानश्च सन् प्रतीच्छ गृहाण यां विद्यां धारयन् भवान् सप्तरात्रात् सङ्कर्षणं प्रभुं द्रष्टा द्रक्ष्यति ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्पादेति ॥ हे नरेन्द्र यस्य भगवतः सङ्कर्षणस्य पादमूलमुपसृत्य प्राप्य पूर्वे शर्वादयो महादेवाद्य इमं द्वितयं द्वैतात्मकं भ्रमं विसृज्य त्यक्त्वा सद्यः अतुलं च तदनधिकं च समानाधिकशून्यमत एव परं सर्वोत्कृष्टं तदीयं महत्त्वं महिमानं प्रापुः । भवानपि परं तत्फलं नचिरात् शीघ्रमेव उपैति उपैष्यति ॥२९॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य टीकां पञ्चदशे व्यधात् ॥ १५ ॥ षोडशे नारदश्चित्रकेतवे शेषतोषिणीम् ॥ महाविद्यामदात्तत्र श्लोकाः सार्द्धास्तु पञ्चषट् ॥ उवाचनवकं सार्द्धाश्चतुःशैलाः" अनुष्टुभः ॥१६॥ अथेति ॥ हे राजन् अथ तदा तत्पुत्रमुखेनैव पितृपुत्रादिसंबन्धो मिथ्येति दर्शयितुं देवऋषिर्नारदः सम्परेतं मृतमपि नृपात्मजमनुशोचतां ज्ञातीनां द्वितीयार्थे षष्ठयौ । योगबलेन दर्शयित्वा जीवात्मन्नित्याद्युवाच ॥१॥ जीवेति ॥ हे जीवात्मन् त्वत्कृतया शुचा शोकेन भृशं व्याप्तांस्ते पित्रादीन् पश्य ते भद्रं भवतु ॥ २ ॥ कलेवरमिति ॥ अपमृत्युना मृतत्वाच्छेषमवशिष्टमायुरस्ति चेत्तदा स्वं कलेवरमाविश्य सुहृद्वृतः सन् पित्रा प्रत्तान् दत्तान् भोगान् भुङ्क्ष्व जीवतैव पित्रा प्रत्तं नृपासनं चाधि-

यत्पादमूलमुपसृत्य नरेन्द्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ॥२९॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे पुत्रशोकातुरचित्रकेतोरङ्गिरोज्ञानदानवर्णनं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ अथ देवऋषी राजन् संपरेतं नृपात्मजम् ॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ॥ १ ॥ नारद उवाच ॥ जीवात्मन्पश्य भद्रं ते मातरं पितरं च ते ॥ सुहृदो बान्धवांस्तप्ताञ्छुचा त्वत्कृतया भृशम् ॥ २ ॥ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ॥ भुङ्क्ष्व भोगान्पितृप्रत्तानधितिष्ठ नृपासनम् ॥ ३ ॥ जीव उवाच ॥ कस्मिञ्जन्मन्यमी मह्यं पितरो मातरोऽभवन् ॥ कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥ ४ ॥ बन्धुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ॥ सर्व एव हि सर्वेषां भवन्ति क्रमशो मिथः ॥ ५ ॥ यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ॥ पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥

तिष्ठ वस्तुतस्तस्यायुर्नास्त्येव मायिकत्वात् ॥ ३ ॥ जीव उवाचेति ॥ तदेव कलेवरं योगबलेन प्रविष्ट ऋषिर्जीवन्निव जीव इत्यर्थः । कस्मिन्निति । स्वकर्मभिर्देवतिर्यङ्नृयोनिषु भ्राम्यमाणस्य मित्त्वेऽपि ह्रस्वाभाव आर्षः । मह्यं मम कस्मिन् जन्मनि अमी पितरो मातरोऽभवन् ॥ ४ ॥ मयि मृते पुत्रदृष्ट्या शोकश्चेत् शत्रुदृष्ट्या हर्षः किं न क्रियते इत्याशयेन संबन्धस्यानि-यतत्वमाह—बन्धिवति ॥ हि यतः बन्धवो विवाहादिभिः संबन्धिनः ज्ञातयः सपिण्डाः अरयो घातका मित्राणि उपकारकाः मध्यस्था व्यवहारसंबन्धिनोऽपि पक्षपातरहिताः विद्विषः द्रव्यादिहरणेन उत्कर्षासहनेन वा विकृतचित्ताः उदासीना उपेक्षकाः सर्व एव प्राणिनः सर्वेषामेव मिथः परस्परं क्रमशः क्रमेण भवन्ति ॥ ५ ॥ यथेति ॥ पण्यानिक्रयविक्रयाद्यर्हाणि हेमादीनि वस्तूनि यथा ततस्ततः सर्वत्र नरेषु व्यवहर्त्तृषु पर्यटन्ति एवं जीवोऽपि कर्तृषु पितृषु योनिषु मातृषु भ्रमति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकस्मिन्नपि जन्मनि संबन्धस्यानित्यत्वमाह—नित्यस्येति ॥ नित्यस्य अविनष्टस्याप्यर्थस्य वस्तुनः संबन्धो नृषु अनित्यो दृश्यते । हि यस्मात् यावत्कालं यस्य वस्तुनो यस्मिन्पुरुषे संबन्धो भवति तावत्कालमेव तस्य पुरुषस्य तत्र वस्तुनि ममत्वं भवति विक्रयाद्यनन्तरं तत्र ममत्वाभावात्संबन्धोऽपि निवृत्त इति निश्चय इत्यर्थः ॥७॥ एवमिति ॥ एवं योनिगतः पित्रादिसंबन्धं प्राप्तो जीवोऽपि नित्यः निरहङ्कृतः देहादिष्वहंभावायोग्यश्च स यावत्कालं यत्र पित्रादौ संबन्धिन्युपलभ्येत कर्मवशेन वर्त्तेत तावदेव तस्य पित्रादेस्तत्तस्मिन् पुत्रादौ स्वत्वं न तु मरणाद्युत्तरकालमपि तथा चेदानीं संबन्धस्य निवृत्तत्वादनुचित एव मदर्थोऽयं शोकः ॥८॥ एष इति ॥ एष आत्मा नित्यः अव्ययः अपक्षयशून्यः सूक्ष्मः अव्यक्तः एष च सर्वस्य देहादेराश्रयः स्वदृक् स्वप्रकाशः प्रभुः आत्मनो मायाया गुणैः सत्वादिभिरात्मानमेव विश्वात्मकं सृजते सृजति । तङार्षः । "तदात्मानं स्वयमकुरुत" इति श्रुतेः। उपादानं कारणत्वात्सर्वाश्रयः जीवस्य वस्तुतो ब्रह्मत्वात् ब्रह्मण एव चिच्छक्तिविशिष्टस्येश्वरत्वेन सृष्टृत्वात् जीवः सृजतीत्युक्तं। यद्वा। स्वकर्मद्वारा सृष्टिनिमि-

नित्यस्यार्थस्य संबन्धो ह्यनित्यो दृश्यते नृषु ॥ यावद्यस्य हि संबन्धो ममत्वं तावदेव हि ॥ ७ ॥ एवं योनिगतो जीवः स नित्यो निरहङ्कृतः ॥
यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ॥८॥ एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् ॥ आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः
॥ ९ ॥ न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥१०॥ नादत्त आत्मा हि गुणं न दोषं न
क्रियाफलम् ॥ उदासीनवदासीनः परावरदृगीश्वरः॥११॥ श्रीशुक उवाच॥इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ॥ विस्मिता मुमुचुः शोकं
छित्त्वात्मस्नेहशृङ्खलाम् ॥ १२ ॥ निर्हृत्य ज्ञातयो देहं तथा कृत्वोचिताः क्रियाः ॥ तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदम् ॥ १३ ॥

त्तत्वेन स्रष्टृत्वं भोग्यस्य च सर्वभोक्त्राश्रयत्वात् सर्वाश्रयत्वं चोक्तम्॥९॥ सुहृद्वृत इत्युक्तं तत्राह—न हीति ॥ अस्य कश्चिदप्यतिप्रियो न भवति नाप्यस्य कश्चिदप्रियः एवमस्य स्वः स्वीयः परो वा नास्ति अयमेक एव सुहृदादिसङ्गरहितः गुणदोषयोर्धर्माधर्मयोर्हिताहितयोर्वा कर्तॄणां मित्रादीनां याः सर्वा धियः विचित्रा बुद्धयस्तासां द्रष्टा साक्षी ॥१०॥ भुङ्क्ष्व भोगानित्युक्तं तत्राह—नादत्त इति ॥ आत्मा स्वकर्मणापि गुणं दोषं पुण्यं पापं च नादत्ते नच क्रियाफलं सुखदुःखादिकमादत्ते । परावरे कारणकार्ये पश्यति तथाविध ईश्वरः स्वतन्त्रोऽयम् उदासीनवदासीनः स्वरूपस्थ एव भवति । एवंभूतस्य मम युष्माकं च संबन्धाभावाच्छोको न कार्य इति भावः ॥ ११ ॥ इतीति ॥ इत्येवमुदीर्य उक्त्वा जीवो यदा गतस्तदा ते पूर्वोक्ताः चित्रकेत्वादयस्तस्य बालस्य ज्ञातयस्तद्वचनेन विस्मिताः सन्त आत्मनः स्वस्य स्नेहरूपां शृङ्खलां छित्त्वा शोकं मुमुचुः ॥ १२ ॥ निर्हृत्येति ॥ ज्ञातयः सपिण्डाः चित्रकेत्वादयः ज्ञातेः सपिण्डस्य मृतस्य बालस्य देहं निर्हृत्य दग्ध्वा तदुचिताः क्रियाः श्राद्धतर्पणादिरूपाश्च कृत्वा शोकमोहभयार्त्तिदं दुस्त्यजमपि स्नेहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्यजुः ॥ १३ ॥ बालेति सार्द्धम् ॥ हे महाराज बालहत्यया हतप्रभाः स्वदुष्टकर्मणा व्रीडिताश्च द्विजेनाङ्गिरसा भाषितं पुत्रादीनां दुःखहेतुत्वं स्मरन्त्यः बालघ्न्यो विषदात्र्योऽपि ब्राह्मणैरङ्गिरआदिभिर्यन्निरूपित्तं निर्णीयोक्तं तत् बालहत्याया व्रतं प्रायश्चित्तं यमुनायां चेरुः कृतवत्यः ॥१४॥ स इति ॥ इत्थं द्विजोक्तिभिः नारदाङ्गिरोवाक्यैः प्रतिबुद्धो ज्ञातः आत्मा येन स अतिधीरः चित्रकेतुर्गृहान्धकूपान्निष्क्रान्तः निर्गतः यथा निबिडतमात् सरःपङ्कात् द्विपो हस्ती निःसरेत्तद्वदिति ॥ १५ ॥ कालिन्द्यामिति ॥ विधिवत् कालिन्द्यां यमुनायां स्नात्वा कृताः पुण्याः दुरितनिवर्त्तिकाः जलक्रियाः देवर्षिपितृतर्पणाद्याः येन स मौनेन सह संयतप्राणो वशीकृतेन्द्रियः चित्रकेतुर्ब्रह्मपुत्रौ नारदाङ्गिरसावववन्दत विद्याग्रहणाय प्रणनाम ॥ १६ ॥ अथेति ॥ अथ प्रीतो भगवान् नारदः प्रपन्नाय भक्ताय प्रयतात्मने वशीकृतचित्ताय तस्मै एतामुच्यमानां विद्यामुवाच ॥ १७ ॥ नम इति ॥ नमो धीमहि नमस्कुर्मो ध्यायेम च वासुदेवादीनां चित्तबुद्धिमनोहङ्कारेषु उपास्यत्वं स्पष्टं शेषम् ॥ १८ ॥ नम इति ॥ निवृत्ता द्वैतदृष्टिर्यस्मात्तस्मै । स्पष्टं

बालघ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः ॥ बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम् ॥ यमुनायां महाराज स्मरन्त्यो द्विजभाषितम् ॥ १४ ॥ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ॥ गृहान्धकूपान्निष्क्रान्तः सरःपङ्कादिव द्विपः ॥१५॥ कालिन्द्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः॥ मौनेन संयतप्राणो ब्रह्मपुत्राववन्दत ॥ १६ ॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ॥ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥ १७ ॥ ॐ नमस्तुभ्यं भगवते वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ १८ ॥ नमो विज्ञानमात्राय परमानन्दमूर्तये ॥ आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये ॥ १९ ॥ आत्मानन्दानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ॥ हृषीकेशाय महते नमस्ते विश्वमूर्तये ॥ २० ॥ वचस्युपरते प्राप्य य एको मनसा सह ॥ अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २१ ॥ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ॥ मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥ यन्न स्पृशन्ति न विदुर्मनोबुद्धीन्द्रियासवः ॥ अन्तर्बहिश्च विततं व्योमवत्तं नतोऽस्म्यहम् ॥ २३ ॥

शेषम् ॥ १९ ॥ आत्मेति ॥ आत्मनः स्वस्य स्वरूपभूतानन्दस्यानुभवेनैव न्यस्ताः निरस्ताः शक्त्यूर्मयः मायानिमित्ता रागद्वेषादयो येन तस्मै नमः । स्पष्टं शेषम् ॥ २० ॥ वचसीति ॥ मनसा सह वचसि वचआदीन्द्रियेषु उपरतेषु सत्सु यः अनामरूपः चिन्मात्रः सदसतः कार्यकारणयोः कारणम् एकः यः प्राप्यो भवति स नोऽस्मान् अव्यात् संसारभयाद्रक्षतु ॥ २१ ॥ यस्मिन्निति ॥ इदं कार्यकारणात्मकं विश्वं यतो जायते जातं च यस्मिन् तिष्ठति अप्येति लीयते च मृन्मयेषु घटादिषु मृज्जातिर्मृन्मात्रमिव यत्सर्वानुस्यूतं तस्मै ते ब्रह्मणे नमः ॥ २२ ॥ यदिति ॥ यद्ब्रह्म व्योमवन्निर्लेपतया अन्तर्बहिश्च विततं व्याप्तमपि असवः प्राणाः कर्मेन्द्रियाणि क्रियाशक्त्या न स्पृशन्ति मनोबुद्धिः ज्ञानेन्द्रियाणि च ज्ञानशक्त्या न विदुस्तदहं नतोऽस्मि ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri .

देहेति ॥ अमी देहादयो यदंशविद्धाः यस्य चैतन्यांशेनाविष्टाः सन्तः जाग्रति स्वप्ने च । कर्मसु स्वस्वविषयेषु प्रचरन्ति अन्यदा सुषुप्तिमूर्च्छादौ तु तदंशवेधाभावात्तथा नैव प्रचरन्ति यथा अप्रतप्तं लोहं न दहति अतो यथा लोहमग्निशक्त्यैव दाहकं सदग्निं विना न दहति एवं ब्रह्मगतज्ञानक्रियाशक्तिभ्यां प्रवर्त्तमाना देहादयस्तन्न स्पृशन्ति न विदुश्चेति भावः । जीवस्तर्हि द्रष्टृत्वाज्जानातु नेत्याह । स्थानेषु जाग्रदादिषु द्रष्टृपदेशं द्रष्टृसंज्ञां तदैवैति प्राप्नोति । "नान्यो जीवो नामास्ति नान्योऽतोऽस्ति द्रष्टा" इत्यादिश्रुतेः । यद्वा । द्रष्टृपदेशं द्रष्टृसंज्ञं जीवमपि तदेव एति जानाति नतु जीवस्तज्जानातीत्यर्थः ॥ २४ ॥ ओमिति ॥ महाविभूतिर्लक्ष्मीः तत्पतये सकलेत्यादिसंबोधनं सकलाः ये सात्वतपरिवृढाः भक्तश्रेष्ठास्तेषां निकरस्य समूहस्य करकमलानां कुड्मलैर्मुकुलैरुपलालितं सेवितं चरणारविन्दयुगलं यस्येति परमश्रेष्ठ परमेष्ठिन् सर्वेश्वर स्पष्टं शेषम् ॥ २५ ॥ भक्तायेति ॥ हे प्रभो भगवद्भक्ताय प्रपन्नाय स्वशरणागताय चित्रकेतव एतां पूर्वदर्शितां विद्यामादिश्य नारदोऽङ्गिरसा साकं स्वायंभुवं धाम ब्रह्मलोकं ययौ । पूर्वं सनारदोऽङ्गिरा आजगामेति

देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु ॥ नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टृपदेशमेति ॥ २४ ॥ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविन्दयुगल परमपरमेष्ठिन्नमस्ते ॥२५॥ ॥ श्रीशुक उवाच ॥ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ॥ ययावङ्गिरसा साकं धाम स्वायंभुवं प्रभो ॥२६॥ चित्रकेतुस्तु विद्यां तां तथा नारदभाषिताम् ॥ धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥२७॥ ततश्च सप्तरात्रान्ते विद्यया धार्यमाणया ॥ विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ॥ २८ ॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥ जगाम देवदेवस्य शेषस्य चरणान्तिकम् ॥ २९ ॥ मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकङ्कणम् ॥ प्रसन्नवक्त्रारुणलोचनं तं ददर्श सिद्धेश्वरमण्डलैः प्रभुम् ॥ ३० ॥

अङ्गिरसः प्राधान्यं तदा पुत्रेच्छो राज्ञः पुत्रप्रदत्वात् अधुना तु नारदोऽङ्गिरसा साकमिति नारदस्य प्राधान्यम् । ज्ञानेच्छोरुपदेशकत्वात् ॥ २६ ॥ चित्रेति ॥ चित्रकेतुस्तु अब्भक्षः सुसमाहितः सावधानचित्तश्च संस्तां नारदभाषितां विद्यां यथा यथावत्स्वरवर्णादिविपर्ययराहित्येन सप्ताहं धारयामास जजाप ॥ २७ ॥ तत इति ॥ हे नृप ततश्च धार्यमाणया अभ्यस्यमानया विद्ययैव हेतुभूतया सप्तरात्रान्ते अप्रतिहतमनुल्लङ्घितशासनं विद्याधराणामाधिपत्यमवान्तरफलं लेभे ॥२८॥ तत इति ॥ कतिपयैरहोभिः विद्यया इद्धेन दीप्तेन मनसा गतिर्यस्य सः । स्पष्टं शेषम् ॥ २९ ॥ मृणालेति ॥ मृणालं कमलकन्दस्तद्वद्गौरं शितिवाससं नीलाम्बरं स्फुरन्ति किरीटादीनि यस्य तं किरीटं शिरोभूषणं केयूरं बाहुभूषणं कटित्रं कटिसूत्रं कङ्कणं हस्तभूषणं प्रसन्नानि वक्त्राणि यस्य अरुणानि लोचनानि यस्य तं च तं च सिद्धेश्वराः सनत्कुमारादयस्तेषां मण्डलैर्वृतं प्रभुं

CC-0. In Public Domain. Digitization by eGangotri

सङ्कर्षणं ददर्श ॥ ३० ॥ तदिति ॥ तस्य दर्शनेन ध्वस्तं समस्तं किल्विषं यस्य सः अत एव स्वच्छममलं चान्तःकरणं यस्य सः मुनिः गृहीतमौनः प्रणयेन प्रेम्णाश्रुयुक्ते लोचने यस्य सः प्रहृष्टानि रोमाणि यस्य सः प्रवृद्धया भक्त्या आदिपुरुषं सङ्कर्षणमभ्ययात् अभिमुखमगच्छत् अभ्येत्य चानमत् ननाम ॥ ३१ ॥ स इति ॥ प्रेमाश्रुलेशैः उत्तमश्लोकस्य शेषस्य पादाब्जयोर्विष्टरमासनं मुहुरुपमेहयन् अभिषिञ्चन् प्रेम्णा उपरुद्धः अखिलानां वर्णानां निगम उच्चारणं यस्य सः चित्रकेतुः तं सङ्कर्षणं प्रसमीडितुं स्तोतुं चिरं नैवाशकत् न शशाक ॥ ३२ ॥ तत इति ॥ ततो मनीषया बुद्धया मनः समाधाय वशीकृत्य तथा सर्वेन्द्रियाणां बाह्यवर्तनं विषयाभिमुखधावनं नियम्य निरुध्य प्रतिलब्धा वाग्येन सोऽसौ चित्रकेतुः सात्वतशास्त्रं भक्तिप्रतिपादकं पञ्चरात्रादि तदुक्तः सच्चिदानन्दात्मको विग्रहो यस्य तं जगद्गुरुं सर्वपूज्यं प्रति एतद्वक्ष्यमाणं बभाषे तं तुष्टाव ॥ ३३ ॥ अजितेति ॥ हे अजित भवान् शूरैर्देवादिभिश्चाजितोऽपि सममतिभिर्जितचित्तैः साधुभिस्तु जितः स्वाधीनीकृत एवासितेऽपि निष्कामाः प्रबलैरिन्द्रियादिभिरजिता एव यतो यो

तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलान्तःकरणोऽभ्ययान्मुनिः ॥ प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽनमदादिपूरुषम् ॥ ३१ ॥
स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः ॥ प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरम् ॥ ३२ ॥ ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ ॥ नियम्य सर्वेन्द्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहम् ॥ ३३ ॥ चित्रकेतुरुवाच ॥ अजित जितः सममतिभिर्भवाञ्जितात्मभिर्भवता ॥ विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः ॥ ३४ ॥ तव विभवः खलु भगवञ्जगदुदयस्थितिलयादीनि ॥ विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्धन्ति पृथगभिमत्या ॥ ३५ ॥ परमाणुपरममहतोस्त्वमाद्यन्तान्तर-वर्तीत्रयविधुरः ॥ आदावन्तेऽपि च सत्त्वानां यद्ध्रुवं तदेवान्तरालेऽपि ॥ ३६ ॥ क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैराण्डकोशः ॥ यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिस्तदनन्तः ॥ ३७ ॥

भवान् तेषामकामात्मनामपि भजतामात्मदोऽतिकरुणश्चासि आर्याचतुर्दशकम् । तत्रस्थूलं लक्षणमपि न सङ्गच्छते नितरां सूक्ष्मं तच्चार्षत्वात्सोढव्यम् ॥ ३४ ॥ तवेति ॥ हे भगवन् जगतः उदयस्थितिलयप्रवेशनियमनादीनि तवैव विभवः लीलास्ति विश्वसृजो ब्रह्मादयस्तु तवांशस्य पुरुषस्याप्यंशा एव तत्र लोके वयं पृथगीश्वरा इत्यभि मत्याभिमानेन ते मृषैव स्पर्धन्ते इत्यन्वयः ॥ ३५ ॥ परमेति ॥ परमाणुः सूक्ष्मं मूलं कारणं परममहत् अन्तिमं कार्यं तयोस्त्वमेवाद्यन्तान्तरवर्त्ती आदावन्ते च अन्तरे मध्ये च वर्त्तितुं शीलं यस्य सः अत एव त्रयविधुरः आद्यन्तमध्यशून्यो नित्यः ते च त्वया सृज्यन्त इति न नित्याः तत्र हेतुमाह । सत्वानां सत्वेन प्रतीयमानानां कार्याणामादावन्ते च यद् ध्रुवं स्थिरमन्तरालेऽपि तदेव ध्रुवं सुवर्णादिवत् ॥ ३६ ॥ कालतः परिच्छेदाभावमुक्त्वा देशतोऽप्याह—क्षितीति ॥ पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरैरधिकैः क्षित्यादिभिः सप्तभिर्बहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रावृत एषोऽण्डकोशः ब्रह्माण्डः अन्यैर्ब्रह्माण्डकोटिभिः सह यत्र त्वयि अणुकल्पः अणुतुल्यः पतति परिभ्रमति तस्मात्त्वमेवानन्त इति शास्त्रे प्रसिद्धः ॥ ३७ ॥ विषयेति ॥ हे ईश विषयेषु तृट् तृष्णा येषां ते अविवेकित्वान्नराकाराः पशव एव अतो विषयकामनया ते विभूतीः तव विभूतिरूपानिन्द्रादीनुपासते नतु परं सर्वोत्तमं त्वामुपासते तेषामुपासकानामाशिषस्तद्दत्तभोगास्तदनु उपास्यदेवनाशानन्तरमेव विनश्यन्ति । यथा राजकुलनाशानन्तरमेव तद्दत्तास्तत्सेवकानां भोगा विनश्यन्ति तद्वदित्यर्थः । अयं च परमोऽवधिर्मध्येऽपि पुण्यक्षये स्वर्गादिभोगनाशस्य प्रसिद्धत्वात् ॥ ३८ ॥ कामेति ॥ हे परम कामाः राज्याद्या विषयास्तदर्थमपि धियो मतयः ज्ञानात्मनि अगुणमये निर्गुणे त्वयि रचिताः कृताश्चेत्तर्हि न रोहन्ति देहान्तरोत्पत्तये न भवन्ति यथा करम्भबीजानि भर्जितबीजानि अङ्कुरोत्पत्तये न भवन्ति तद्वदित्यर्थः । यतोऽस्य जीवस्य गुणगणत एव द्वन्द्वजालानि संसारकारणानि अहन्ताममतादीनि भवन्ति अतः कामेनापि तव भजनाच्छनैर्नैर्गुण्यं भवतीत्यर्थः ॥३९॥ जितमिति ॥ हे अजित यदा भवान् भागवतं स्वप्राप्ति-साधनभूतमनवद्यं निर्दोषं धर्ममाह तदैव भवता जितं सर्वोत्कर्षेण स्थितं निष्किञ्चनाः लोकैषणावित्तैषणासुतैषणारहिताः यतो मुनयः मननशीलाः आत्मारामाः आत्मज्ञतया

विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ॥ तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम् ॥ ३८ ॥
कामधियस्त्वयि रचिता न परम रोहन्ति यथा करम्भबीजानि ॥ ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि ॥ ३९ ॥
जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यम् ॥ निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ ४० ॥
विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ॥ विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥ ४१ ॥
कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ॥ स्वद्रोहात्तव कोपः परसंपीडया च तथाऽधर्मः ॥ ४२ ॥

तन्निष्ठा ये तेऽपि अपवर्गाय संसारविमोकेन त्वत्प्राप्तये यं धर्ममुपासते यं भवन्तमिति वा ॥ ४० ॥ विषमेति ॥ यत्र भागवते धर्मे नृणामुपासकानां त्वमहमिति मम तवेति च विषममतिर्नास्ति तत्र वैधर्म्यदृष्टान्तमाह । यदन्यत्रेति। यत् यथान्यत्र काम्यधर्मे विषममतिर्भवति तथा यत्र नास्तीत्यर्थः। ननु सोऽपि वेदोक्त इत्यत आह। विषमधिया शत्रुमर-णस्वर्गप्राप्त्यादिकामनया रचितो विहितो यः धर्मः सह्यविशुद्धो रागद्वेषादिप्रयुक्तत्वात् क्षयिष्णुश्च नश्वरफलकत्वात् अधर्मबहुलश्च हिंसादिबाहुल्यात् ॥ ४१ ॥ क इति ॥ स्वपरद्रुहा स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेन धर्मेण निजपरयोरहन्तास्पदस्य आत्मनः ममतास्पदस्य पुत्रादेश्च कः क्षेमः किं कुशलं कियान् अर्थो लाभश्च न किंचिदित्य-न्वयः। यतः स्वद्रोहात् अत्यन्तकायक्लेशात्तव कोपः। यथोक्तं गीतासु। "कर्षयन्तः शरीरस्थं भूतग्राममचेतसः। मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्॥" इति। तथा परस्य पश्वादेः सम्पीडया अधर्मः चकारात्तव कोपश्च अतस्त्वया रागान्धमपि कथंचित् वेदमार्गे प्रवर्त्तयितुं काम्यधर्मोऽभिहितो न तत्वदृष्ट्या ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ यया ईक्षया भवता भागवतो धर्मोऽभिहितः निरूपितः सा तवेक्षा मद्भक्त्या जीवाः कृतार्थाः भवन्त्विति परामर्शो न व्यभिचरति काम्यधर्मवद्वैगुण्याभावात् अत एव स्थिरचरसत्वकदम्बेषु स्थावरजङ्गमप्राणिसमूहेषु अपृथग्धियः एकं त्वामेव पश्यन्तः आर्याः श्रेष्ठाः यं धर्ममुपासते॥४३॥न हीति॥हे भगवन् त्वद्दर्शनान्नृणामखिलपापक्षयो भवतीति इदमघटितमसंभावितं न भवति । हि यस्मात् यस्य तव नाम्नः एकस्यापि सकृदपि श्रवणादेव पुल्कसकोऽत्यन्तनिकृष्टोऽपि संसारात् विमुच्यते॥४४॥ अथेति ॥ अथ तस्माद्धेतोर्हे भगवन् त्वदवलोकनेन परिमृष्टा निरस्ता आशयमला अन्तःकरणदोषाः पापानि तत्कार्यभूता रागलोभादयश्च येषां ते तथाभूता वयमधुना जाता इति शेषः। यतः तावकेन त्वद्भक्तेन सुरऋषिणा नारदेन यत् उदितं तदन्यथा कथं भवति ॥ ४५ ॥ विदितमिति ॥ हे अनन्त इह संसारे जनैर्यदाचरितं तत्सर्वं जगदात्मनस्तव विदितमेव अतः परमगुरोः सर्वप्रकाशकस्य तवाग्रे निर्विसर्गपाठे सम्बोधनम् । अन्येन विशेषतो ज्ञाप्यं प्रकाशनीयं कियदिव न किमपीत्यर्थः । यथा सवितुरग्रे खद्योतैर्न किंचित्प्रकाशनीयमस्ति तद्वदि-

न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ॥ स्थिरचरसत्वकदम्बेष्वपृथग्धियो यमुपासते त्वार्याः ॥ ४३ ॥ न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ॥ यन्नामसकृच्छ्रवणात्पुल्कसकोऽपि विमुच्यते संसारात् ॥ ४४ ॥ अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ॥ सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥ विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितम् ॥ विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥ ४६ ॥ नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ॥ दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥ ४७ ॥ यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति यं चेकितानमनुचित्तय उच्चकन्ति ॥ भूमण्डलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥४८॥ श्रीशुक उवाच ॥ संस्तुतो भगवानेवमनन्तस्तमभाषत ॥ विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ॥ ४९ ॥ श्रीभगवानुवाच ॥ यन्नारदाङ्गिरोभ्यां ते व्याहृतं मेऽनुशासनम् ॥ संसिद्धोऽसि तया राजन्विद्यया दर्शनाच्च मे ॥ ५० ॥

त्यर्थः ॥ ४६ ॥ नम इति ॥ सकलस्य जगतः स्थित्यादीनामीशाय कर्त्रे तथापि भिदा भेददर्शननिमित्तेन कुयोगिनां विषयाविष्टचित्तानां दुरवसिता अविज्ञाता आत्मगतिर्निजं तत्वं यस्य तस्मै परमहंसाय भगवते तुभ्यं नमः ॥ ४७ ॥ यमिति ॥ यं श्वसन्तं चेष्टमानमनु विश्वसृजो ब्रह्मादयो देवास्तदधीनानि कर्मेन्द्रियाणि च श्वसन्ति चेष्टन्ते यं चेकितानं पश्यन्तं प्रकाशयन्तं कितधातोर्यङ्लुकि ताच्छील्ये चानश्। अनु पश्चात् चित्तयः सूर्यादयो देवाः ज्ञानेन्द्रियाणि च उच्चकन्ति स्वस्वविषयं प्रकाशयन्तीत्यर्थः। उत्पूर्वाच्चकतेर्लट् तङभाव आर्षः । यस्य मूर्ध्नि भूमण्डलं सर्षपायति सर्षपवदतिलघुत्वेनानुसन्धेयतया वर्त्तते।तङभाव आर्षः। तस्मै सहस्रमूर्ध्ने भगवते तुभ्यं नमः ॥४८॥ संस्तुत इति॥ हे कुरूद्वह भगवाननन्तः संकर्षण एवं संस्तुतोऽत एव प्रीतः सन् तं विद्याधरपतिं चित्रकेतुमभाषत ॥४९॥ यदिति ॥ हे राजन् यन्मेऽनुशासनं मद्विषय उपदेशः कोऽयं स्यात्तव राजेन्द्रे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यादिना ते तव नारदाङ्गिरोभ्यां व्याहृतं निरूपितं तेन तया नारदोपदिष्टया स्तोत्रमन्त्रात्मिकया विद्यया मे मम दर्शनाच्च त्वं सम्यक् सिद्धः कृतार्थोऽसि ॥५०॥ तद्बोधदार्ढ्याय स्वयमप्युपदिशति—अहमिति ॥ सर्वभूतानि स्थावरजङ्गमात्मकान्यहमेव तथाभूतानामात्मा भोक्ताऽप्यहमेव भोक्तृभोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः । यतोऽहमेवं भूतभावनः भूतानां भावनः प्रकाशकः नियन्ता कारणं च ननु शब्दब्रह्म प्रकाशकं परं ब्रह्म कारणं प्रकाश्यं प्रसिद्धं तत्राह। शब्दब्रह्म परं ब्रह्म च इत्युभे ममैव शाश्वती शाश्वत्यौ पूर्वसवर्णदीर्घ आर्षः। तनू मूर्ती स्तः ॥५१॥ लोक इति ॥ लोके भोग्यात्मके प्रपञ्चे भोक्तृत्वेन विततमनुगतमात्मानं जीवं तथा लोकं चात्मनि जीवे सन्ततं भोग्यत्वेन व्याप्तं तदुभयं च मया कारणात्मना व्याप्तं यतस्तदुभयमपि मय्येवाधिष्ठाने कृतं रचितमिति पश्येदिति शेषः ॥ ५२ ॥ यथेति ॥ यथा सुषुप्तः पुरुषः स्वप्ने विश्वं गवाश्वव्याघ्राद्यनेकरूपं देशान्तरस्थमपि आत्मनि एव पश्यति स्वप्नमध्ये सुषुप्तिं स्वप्नं च पश्यतीत्यर्थः । ननु स तद्रूपो भवति तथा स्वप्न एवं पुनरुत्थितः सन्नात्मानं मनुष्यमेकदेशस्थं गृहे शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ॥५३॥ एवमिति ॥ एवं जागरणादीनि जीवस्थानानि जीवोपाधेर्बुद्धेरवस्थाभूतानि आत्मनो मायामात्राणि मायया कल्पितानीति

अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥ शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू॥५१॥ लोके विततमात्मानं लोकं चात्मनि संततम् ॥ उभयं
च मया व्याप्तं मयि चैवोभयं कृतम् ॥५२॥ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ॥ आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥५३ ॥
एवं जागरणादीनि जीवस्थानानि चात्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ॥
सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ॥ ५५ ॥ उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ॥ अन्वेति व्यतिरिच्येत यज्ज्ञानं ब्रह्म तत्परम्
॥ ५६ ॥ यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः ॥ ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ॥ ५७ ॥

विज्ञाय तेषां द्रष्टारमत एव परं तदवस्थारहितमात्मानं स्मरेत् ॥ ५४ ॥ ननु स्वापे दृश्याभावेन द्रष्टृत्वाभावात् कथं तद् द्रष्टारं स्मरेत् तत्राह—येनेति ॥ प्रसुप्तः पुरुषो जीवो येन ब्रह्मणैकीभूतेन रूपेण तदा प्रस्वापकाल आत्मनः स्वापं निर्गुणं विषयसंबन्धाजन्यमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म व्यापकं मामवेहि । तथा च तदा स्वापसुखयोः संवेदनाभावे "सुखमहमस्वाप्सं न किंचिदवेदिषम्" इति स्मरणासंभवात्स्वापादिसाक्षितया आत्मसिद्धिः ॥ ५५ ॥ ननु स्वापसाक्षिणा दृष्टं जाग्रदवस्थः कथं स्मरेत् न ह्यन्येन दृष्टमन्यः स्मरति तत्राह—उभयमिति ॥ उभयं प्रस्वापं प्रतिबोधं च स्मरतोऽनुसंदधतः पुंसस्तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति ताभ्यां व्यतिरिच्येत एकैकापायेऽप्यनपायात् तज्ज्ञानं परं ब्रह्मैव न ततो भिन्नम् अतो बाल्ये दृष्टस्य यौवने स्मृतिवत् अवस्थान्तरत्वेऽपि स्वापानन्दयोः स्मरणं घटत इति भावः । तदेवंभूतं ब्रह्म आत्मानमवेहीत्यनुषङ्गः ॥ ५६ ॥ यदिति ॥ यत् यदि एतत् पूर्वोक्तं मद्भावं मत्स्वरूपं ब्रह्म पुंसो विस्मृतं भवति तदात्मनः सकाशाद्भिन्नं भवति ततश्च भेददर्शनादेतस्य

जीवस्य संसारो भवति तत्स्वरूपमाह । देहादिति । भेददर्शनेन देहपुत्रादावहंममाध्यासपूर्वककृतकर्मानुसारेण देहाद्देहो देवमनुष्यादिजन्मानन्तरं पुनर्जन्म मृतेरनन्तरं पुनर्मृतिश्चेत्यर्थः ॥ ५७ ॥ भोगो योन्यन्तरेऽपि सुलभः ज्ञानं मनुष्यजन्मन्येवेत्यतोप्यत्रैव तदर्थं यतितव्यमित्याह—लब्ध्वेति ॥ ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं तयोः संभवः उत्पत्तिः संभावना यस्यां तां मानुषीं योनिमिह पुण्यक्षेत्रे भारतवर्षे लब्ध्वा य आत्मानं न बुद्ध्येत स क्वचिद्देवादियोनिं गत्वापि क्षेमं नाप्नुयात् ॥ ५८ ॥ स्मृत्वेति ॥ ईहायां लौकिके वैदिके च द्विविधेऽपि प्रवृत्तिमार्गे परिक्लेशं ततः ईहात एव फलविपर्ययं च स्मृत्वा अनीहायां निवृत्तिमार्गे तु अभयं मोक्षं च स्मृत्वा कविर्विवेकी नानाफलसंकल्पाद्विरमेत् । नोभयमिति पाठे परिक्लेशः फलविपर्ययश्च नास्तीत्येवं स्मृत्वेत्यर्थः ॥ ५९ ॥ विपर्ययमेव स्पष्टयति—सुखायेति ॥ दम्पती स्त्रीपुंसौ सुखाय दुःखमोक्षाय दुःखनिवृत्तये च क्रियाः नानाविधकर्माणि कुर्वतः कुरुतः। अडार्षः। ततः कर्मभ्यो दुःखस्यानिवृत्तिः सुखस्याप्राप्तिश्चकारात्प्रत्युत ततः कर्मण एवं भूयो दुःखप्राप्तिश्च भवतीति ज्ञेयम् ॥६०॥ एवमिति

लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवाम् ॥ आत्मानं यो न बुध्येत न क्वचिच्छममाप्नुयात् ॥५८॥ स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम्॥ अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः ॥ ५९ ॥ सुखाय दुःखमोक्षाय कुर्वाते दम्पती क्रियाः ॥ ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥ ६० ॥ एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम् ॥ आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥६१॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ॥ ज्ञानविज्ञानसंतुष्टो मद्भक्तः पुरुषो भवेत् ॥६२॥ एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः ॥ स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनम् ॥६३॥त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम॥ ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि॥६४॥ श्रीशुक उवाच॥ आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः॥ पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः ॥ ६५ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ छ ॥

युग्मम् ॥ विज्ञाभिमानिनां विज्ञाः उद्यमे प्रवीणाः वयमित्यभिमानवतां नृणामेवं फलविपर्ययं बुध्वा आत्मनश्च गतिं तत्वं सूक्ष्मामतिदुर्ज्ञेयां स्थानत्रयविलक्षणां जागरणाद्यवस्थात्रयरहितां बुध्वा स्वेन तेजसा विवेकबलेन दृष्टश्रुताभिः मात्राभिः ऐहिकामुष्मिकैर्विषयैर्निर्मुक्तः तदभिलाषरहितः ज्ञानविज्ञानाभ्यां संतुष्टोऽपि पुरुषः मद्भक्तः मद्भजनपरो भवेत् अन्यथा पुनः प्रमादेन भ्रश्येत् ॥ ६१ ॥ ६२ ॥ एतावानिति ॥ यत् परस्यात्मन एकं दर्शनं तदेतावानेव योगेन नैपुण्यं यस्याः सा बुद्धिः येषां तैर्मनुजैः सर्वात्मना सर्वप्रयत्नसाध्यः स्वार्थः पुरुषार्थो ज्ञेयो नातः परं कृत्यमस्ति ॥ ६३ ॥ त्वमिति ॥ हे राजन् त्वमप्रमत्तः विषयानासक्तः श्रद्धया विश्वासेनैतन्मम वचो धारयन् ज्ञानविज्ञानसम्पन्नश्च सन्नाशु सिद्धचसि मां प्राप्स्यसीत्यर्थः ॥ ६४ ॥ आश्वास्येति ॥ भगवान् जगद्गुरुः विश्वात्मा हरिः इत्थं चित्रकेतुमाश्वास्य आश्वासनपूर्वकं तत्वमुपदिश्य तस्य पश्यत एव ततश्च तत्रैवान्तर्दधे ॥ ६५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायः षष्ठस्य षोडशे निरमादिमाम् ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशे चित्रकेतुर्विमानस्थः शिवं हसन् ॥ गौरीशापादभूद्वृत्रस्तत्र श्लोकाः कुवौर्द्धयः ॥ अनुष्टुभो वह्नि वेदा उवाचैनवकं तथा ॥ १ ७॥ यत इति ॥ यतः यस्यां दिशि अनन्तः अन्तर्हितस्तस्यै दिशे नमस्कृत्य गगनेचरः विद्याधरः चित्रकेतुश्चचार ॥१॥ स इति युग्मम्॥ मुन्यादिभिः स्तूयमानः महायोगी वर्षलक्षाणां लक्षमव्याहतं बलं शारीरमिन्द्रियमिन्द्रियपाटवं च यस्य स चित्रकेतुर्विद्याधरस्त्रीभिः ईश्वरं हरिं गापयन् नानाविधसंकल्पानां सिद्धयो यासु तासु कुलाचलेन्द्रः पर्वतराजः सुमेरुस्तस्य द्रोणीषु पर्वतद्वयमध्ये समप्रदेशेषु रेमे ॥२॥३॥ एकदेति ॥ एकदा विष्णुदत्तेन भास्वता विमानेन गच्छन् सः सिद्धचारणैः परीतं गिरिशं ददृशे। तङ्गर्षः ॥४॥ आलिङ्ग्येति॥अङ्कीकृतामुत्सङ्गेनैकीकृतां देवीं बाहुनालिङ्ग्य मुनिसंसदि स्थितं शिवं दृष्ट्वा देव्याः शृण्वन्त्याः सत्याः नुमार्षः । तदन्तिके स्थितः सन्नुच्चैर्जहास उवाच च ॥ ५ ॥ एष इति ॥ एष साक्षाल्लोकगुरुः वेदप्रवर्त्तक ईश्वरः साक्षादपि शरीरिणां धर्मं वक्ता वदति एतस्यां मुनिसिद्धादिसभायां मुख्यश्च सभायामेव भार्यया मिथुनीभूयास्ते ॥६॥ जटेति ॥ जटाधरः तीव्रतपाः ब्रह्मवादी सभापतिः

॥ श्रीशुक उवाच ॥ यतश्चान्तर्हितोऽनन्तस्तस्यै कृत्वा दिशे नमः॥ विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥१॥ स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रियः ॥ स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ॥२॥ कुलाचलेन्द्रद्रोणीषु नानासंकल्पसिद्धिषु ॥ रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरम् ॥३॥ एकदा स विमानेन विष्णुदत्तेन भास्वता ॥ गिरिशं ददृशे गच्छन्परीतं सिद्धचारणैः ॥४॥ आलिङ्ग्याङ्कीकृतां देवीं बाहुना मुनिसंसदि॥ उवाच देव्याः शृण्वन्त्या जहासोच्चैस्तदन्तिके ॥ ५॥ चित्रकेतुरुवाच ॥ एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणाम् ॥ आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ॥ ६ ॥ जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः ॥ अङ्कीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥ ७ ॥ प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति ॥ अयं महाव्रतधरो बिभर्ति सदसि स्त्रियम् ॥ ८ ॥ भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप ॥ तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥ श्रीशुक उवाच ॥ इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनम् ॥ रुषाऽऽह देवी धृष्टाय निर्जितात्माभिमानिने ॥ १० ॥

एष स्त्रियमङ्कीकृत्य यथा प्राकृतोऽतिनिकृष्टो जनो गतह्रीर्निर्लज्जः सन्नास्ते तथायमीश्वरोऽप्यास्ते ॥७॥ प्रायश इति ॥ स्पष्टम् ॥८॥ भगवानिति ॥ हे नृप चित्रकेतोरभिप्रायज्ञानात् अगाधा गम्भीरा धीर्यस्य स भगवान् शिवोऽपि तस्य वचनं श्रुत्वा सदसि प्रहस्य तूष्णीं बभूव नतु कोपं चकार। न वा किञ्चिदुवाच तस्य शिवस्यानुव्रताः सभ्याश्च तूष्णीं बभूवुः ॥९॥ इतीति ॥ न तद्वीर्यं स्वातन्त्र्यं वेत्तीत्यतद्वीर्यं विद्वांस्तस्मिन् न हि स्वतन्त्र एवं शिक्षार्ह इति भावः । इति बह्वशोभनमीश्वरशिक्षालक्षणमनुचितं ब्रुवाणे सति । निर्जितः आत्मा मनोमयेत्यभिमानवते धृष्टाय निःशङ्काय तस्मै देवी रुषा आह स्म। अत्र चित्रकेतोरयमभिप्रायः अयं खलु ईश्वर एव नास्य दुराचारत्वेऽपि क्षतिः यः खलु अस्येदृशमाचारं दृष्ट्वा इमं निन्दिष्यति तस्य पापोत्पत्त्या नाशो भविष्यत्येव। यथा दक्षस्य तस्माद्व्यारभ्य मद्वचोभिरयं स्वस्य दुराचारमुत्सृजेत्तदा लोकस्य भद्रं स्यात् । श्रीशिवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च यशः स्यादिति श्रीशिवेन चास्याभिप्रायो ज्ञात एव तत्सभ्यैरपि तत्कृपया ज्ञात एवेति सर्वेऽपि क्रोधं न चक्रुः सर्वज्ञाया देव्या अपि क्रोधो नाभूदेव किंतु शिक्षार्थमेव उपालम्भः शापश्च अत एव पुत्रेति सानुकम्प संबोधनम् ॥ १० ॥ अयमिति ॥ दण्डधरः प्रभुः समर्थः दुष्टानां निर्लज्जानां च अस्मद्विधानां शास्ता शिक्षकः विप्रकृत् विरुद्धं प्रकर्षेण करोतीति तथा दण्डेन हितकर्त्ताधुना लोके किमयमेव ॥ ११ ॥ नेति ॥ पद्मयोनिर्ब्रह्मा धर्मं न वेद किल न च ब्रह्मपुत्राद्याः मनुपर्यन्ताः धर्मं विदुः । ये ब्रह्माद्याः अतिवर्त्तिनं शास्त्रमतिक्रम्य वर्त्तनशीलं हरं नो निषेधन्ति न निवारयन्ति॥१२॥ एषामिति ॥ यः क्षत्रबन्धुः क्षत्रियाधमश्चित्रकेतुः सूरीन् ब्रह्मादीन् परिभूय तिरस्कृत्य अज्ञान् मत्वा एषां ब्रह्मादीनाम नु निरन्तरं ध्येयं पदाब्जयुग्मं यस्य तमत एव जगद्गुरुं सर्वपूज्यं मङ्गलमङ्गलं परमधर्ममूर्त्तिं शिवं स्वयं धृष्टः सन् शास्ति तस्मादयमेव दण्ड्यः ॥ १३ ॥ नेति ॥ संभाविता अहमुत्तम इति कृता मतिर्येन सः अत एव स्तब्धः अनम्रः अयं साधुभिः पर्युपासितं वैकुण्ठपादमूलोपसर्पणमस्मिन् जन्मनि नार्हति ॥ १४ ॥ अत इति ॥

पार्वत्युवाच ॥ अयं किमधुना लोके शास्ता दण्डधरः प्रभुः ॥ अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् ॥११ ॥ न वेद धर्मं किल पद्मयो-
निर्न ब्रह्मपुत्रा न तु नारदाद्याः ॥ न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त्यतिवर्तिनं हरम् ॥ १२ ॥ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं
मङ्गलमङ्गलं स्वयम्॥ यः क्षत्रबन्धुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दण्ड्यः ॥१३ ॥ नायमर्हति वैकुण्ठपादमूलोपसर्पणम् ॥ संभावित-
मतिः स्तब्धः साधुभिः पर्युपासितम् ॥ १४ ॥ अतः पापीयसीं योनिमासुरीं याहि दुर्मते ॥ यथेह भूयो महतां न कर्ता पुत्र किल्बिषम् ॥१५॥
श्रीशुक उवाच ॥ एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः ॥ प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ॥ १६ ॥ चित्रकेतुरुवाच ॥ प्रतिगृह्णामि ते
शापमात्मनोऽञ्जलिनाऽम्बिके ॥ देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् ॥ १७ ॥ संसारचक्र एतस्मिञ्जन्तुरज्ञानमोहितः ॥ भ्राम्यन्सुखं च
दुःखं च भुङ्क्ते सर्वत्र सर्वदा ॥ १८ ॥ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः ॥ कर्तारं मन्यते प्राज्ञ आत्मानं परमेव च ॥ १९ ॥

अतः हे दुर्मते हे पुत्र यथेह संसारे भूयो महतां किल्बिषमपराधं भवान् न कर्त्ता न करिष्यति तथा पापीयसीमासुरीं योनिं याहि पुत्रेऽतिदोषेऽपि स्वस्य हितकारित्वं द्योतयति ॥ १५ ॥ एवमिति ॥ स्पष्टम् ॥ १६ ॥ प्रतिगृह्णामीति ॥ हे अम्बिके ते तव शापमहमात्मनोऽञ्जलिना प्रतिगृह्णामि । हि यस्मात् देवैर्मर्त्याय यत्सुखं दुःखं वा प्रोक्तं तत्तस्य पूर्वदिष्टं प्राचीनकर्म प्राप्तमेव ॥ १७ ॥ संसारेति ॥ अज्ञानमोहितो जन्तुर्जीव एतस्मिन् संसारचक्रे भ्राम्यन् सर्वदा सर्वकाले सर्वत्र देशे च सुखं च दुःखं च भुक्त एव अतोऽत्रेमम तव च दोषो नास्ति ॥ १८ ॥ नेति ॥ अत्र संसारे सुखःदुखयोः कर्त्ता आत्मा स्वयं न स्यात् तथा परः मित्रशत्रुप्रभृतिरपि न स्यात् । अप्राज्ञः अतिमूर्ख एव जनः आत्मानं परं च सुखदुःखयोः कर्त्तारं मन्यते ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणेति ॥ वस्तुतः मायागुणानां प्रवाहरूपेऽत्र संसारे कः शापानुग्रहादिः॥२०॥एक इति ॥ निष्कलः शुद्धः एकः असहाय एव भगवान् आत्ममायया निजशक्तिरूपया भूतानि प्राणिनः सृजति एषां प्राणिनां बन्धमोक्षादिकं च सृजति । तत्र मायांशभूतया अविद्यया बन्धः विद्यया च मोक्षः सत्वेन सुखं तमसा च दुःखमिति विवेकः ॥२१॥ नेति ॥ सर्वत्र समस्य निरञ्जनस्य अविद्यारहितस्य भगवतः कश्चिदितिपदद्वयस्य सर्वत्रान्वयः । दयितः प्रियो नास्ति प्रतीपोऽप्रियः शत्रुर्नास्ति ज्ञातिः सपिण्डो नास्ति बन्धुर्विवाहादिना संबन्धी नास्ति परः परकीयो नास्ति स्वः स्वकीयो नास्ति अत एव तन्निमित्ते सुखे रागो नास्ति । रोषस्य तु रागपूर्वकत्वनियमात्तदभावे स कुतः स्यात्॥२२॥ तथापीति ॥ यद्यप्येवं तथापि तस्य शक्त्या मायया यो विसर्गः पुण्यपापादिलक्षणं कर्म स एषां शरीरिणां सुखादिजन्मान्तार्थमवकल्पते समर्थो भवति । मृत्युजन्मनोरिति चतुर्थ्यर्थे षष्ठी ।

गुणप्रवाह एतस्मिन् कः शापः को न्वनुग्रहः॥ कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा॥२०॥एकः सृजति भूतानि भगवानात्ममायया॥ एषां बन्धं च मोक्षं च सुखं दुःखं च निष्कलः ॥ २१ ॥ न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबन्धुर्न परो न च स्वः ॥ समस्य सर्वत्र निरञ्जनस्य सुखेन रागः कुत एव रोषः ॥ २२ ॥ तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ॥ बन्धाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते ॥ २३ ॥ अथ प्रसादये न त्वां शापमोक्षाय भामिनि ॥ यन्मन्यसे असाधूक्तं मम तत्क्षम्यतां सति ॥ २४ ॥ श्रीशुक उवाच ॥ इति प्रसाद्य गिरिशौ चित्रकेतुररिन्दम ॥ जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥ २५ ॥ ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् ॥ देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ॥ २६ ॥ श्रीशुक उवाच ॥ दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः ॥ माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ॥ २७ ॥ नारायणपराः सर्वे न कुतश्चन बिभ्यति ॥ स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ २८ ॥ देहिनां देहसंयोगाद्द्वन्द्वानीश्वरलीलया ॥ सुखं दुःखं स्मृतिर्जन्म शापोऽनुग्रह एव च ॥ २९ ॥

मृत्यवे जन्मने च ॥ २३ ॥ अथेति ॥ हे भामिनि कोपने हे सति अथ तस्मात् सुखदुःखयोः स्वकर्माधीनत्वात् त्वां केवलं प्रसादये न तु शापमोक्षाय लोकमर्यादारक्षणहेतुत्वान्ममोक्तं साध्वपि यत्त्वमसाधु मन्यसे तत्त्वया क्षम्यताम् ॥ २४ ॥ इतीति ॥ हे अरिन्दम चित्रकेतुः गिरिशौ एकशेषेण भवानीशङ्करौ प्रसाद्य तयोः स्मयतोः विस्मयं कुर्वतोः सतोः शता आर्षः । स्वविमानेन जगाम ॥ २५ ॥ तत इति ॥ स्पष्टम् ॥ २६ ॥ दृष्टवतीति ॥ हे सुश्रोणि निस्पृहाणां महात्मनाम् अद्भुतकर्मणः हरेर्भक्तानां नारदादीनां ये भृत्याः सेवकाः चित्रकेतुप्रभृतयस्तेषां माहात्म्यं त्वं दृष्टवत्यसि ॥ २७ ॥ नारायणेति ॥ स्वर्गादिष्वपि तुल्योऽर्थः प्रयोजनमिति द्रष्टुं शीलं येषां ते नारायणपराः सर्वे कुतश्चन न बिभ्यति ॥ २८ ॥ देहिनामिति ॥ देहिनामीश्वरस्य लीलया मायया देहसंयोगात् सुखं दुःखमित्यादीनि द्वन्द्वानि भवन्ति ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

अविवेकेति ॥ तेषु सुखदुःखादिषु यः गुणदोषविकल्पः सुखादौ गुणदृष्टिः दुःखादौ दोषदृष्टिः स पुंसोऽविवेकेन कृतः मिथ्यैव तत्र दृष्टान्तौ स्वम आत्मन्यर्थभेदः राजरङ्कादिभेद इव क्षीरभोजनपुत्रमरणादिरिव जागरे च स्रजिभिद्वदेव मालायां सर्पादिभेदवदेव कृतो न तु परमार्थत इत्यर्थः । वत्शब्द इवार्थेऽव्ययमपि । "इववद्वा यथा शब्दा" इत्युक्तेः । स्वामिपादास्तु स्रग्वदिति वक्तव्ये स्रजिवदित्यार्षमित्याहुः । तत्कृत इति पाठे तु स्रजि तत् ततो हेतोः भिदा भेद इव कृतः यद्वा स्रजि भिदा इव तत्कृतः जागरे च अविवेककृत इत्यर्थः । प्रथमपाठे भित् इति क्विबन्तः। द्वितीयपाठे भिदा इति टाबन्तः ॥ ३० ॥ वासुदेव इति ॥ वासुदेवे भगवति भक्तिमुद्वहतां ज्ञानं वैराग्यं च वीर्यं येषां तेषां नृणामिह संसारे कश्चिदप्यर्थो विशेषेणाहंममतयाश्रय आश्रयणीयो नास्ति ज्ञानेन तन्मूलाविद्याया निवृत्तत्वादिति भावः ॥ ३१ ॥ नाहमिति ॥ अहं रुद्रः विरिञ्च्यादयश्च यस्यांशकांशका अपि वयं पृथगीशमानिनः सन्तो यस्येहितमभिप्रायं लीलां वा तस्य रूपं च न विदाम न विद्मः। आर्षः प्रयोगः। अत्र नेति नञां प्रत्येकम् अहं न वेद्मीत्या-

अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि ॥ गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः ॥ ३० ॥ वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् ॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ३१ ॥ नाहं विरिञ्चो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः ॥ विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥ ३२ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ॥ आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥ ३३ ॥ तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः ॥ सर्वत्र समदृक् शान्तो ह्यहं चैवाच्युतप्रियः ॥ ३४ ॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु ॥ महापुरुषभक्तेषु शान्तेषु समदर्शिषु ॥ ३५ ॥ श्रीशुक उवाच ॥ इति श्रुत्वा भगवतः शिवस्योमाभिभाषितम् ॥ बभूव शान्तधी राजन् देवी विगतविस्मया ॥ ३६ ॥ इति भागवतो देव्याः प्रतिशप्तुमलंतमः ॥ मूर्ध्ना संजगृहे शापमेतावत्साधुलक्षणम् ॥ ३७ ॥

दिरीत्यान्वये कृते ततः न विदामेति युगपदन्वयः । दशमस्कन्धे "नेमं विरिञ्चो न भवः" इत्यत्र तथा "न क्रोधो न च मात्सर्यम्" इत्यादौ चैवम् विस्तरो नेमं विरञ्च इत्यत्र शेषः ॥ ३२ ॥ न हीति ॥ सर्वभूतानामात्मत्वाद्धेतोः हरिः सर्वभूतानां प्रियः अस्य भगवतस्तु समत्वात् कश्चित्प्रियो नास्ति एवमप्रियः स्वः परोऽपि कश्चिन्नास्ति ॥ ३३ ॥ तस्येति ॥ अयं महाभागश्चित्रकेतुः तस्य भगवतः प्रियः अनुगः सेवकः सर्वत्र समदृक् शान्तः रागादिरहितः अहं चाच्युतस्य प्रियः तस्मादस्मिन् मम क्रोधो नाभूदिति भावः ॥ ३४ ॥तस्मादिति ॥ तस्मात् महापुरुषभक्तेषु शान्तेषु समदर्शिषु महात्मसु पुरुषेषु विस्मयः शापहेतुर्गर्वः तन्माहात्म्यं दृष्ट्वा विस्मयो वा न कार्यः ॥ ३५ ॥ इतीति ॥ हे राजन् इति भगवतः शिवस्याभिभाषितं श्रुत्वा देवी उमा विगतविस्मया गर्वरहिता अत एव शान्ता क्रोधरहिता धीर्यस्यास्तथाभूता बभूव ॥ ३६ ॥ इतीति ॥ भागवतश्चित्रकेतुः प्रतिशप्तुमलन्तमः अतिसमर्थोऽपि देव्याः शापमित्येवं मूर्ध्ना संजगृहे एतावदेव परापकारवर्जनमेव साधु लक्षणम् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जज्ञ इति ॥ स एव भवानीशापवशाद् दानवीं योनिमाश्रितो वृत्र इत्यभिविख्यातः प्रसिद्धः त्वष्टुर्दक्षिणाग्नौ जज्ञे तत्रापि भगवत्प्रभावात् ज्ञानविज्ञानसंयुत एव जातः ॥ ३८ ॥ एतदिति ॥ यत्त्वं मां परिपृच्छसि तदेतत् वृत्रस्यासुरजातेः कारणं तत्रापि भगवति मतेश्च कारणमन्यच्च तत्प्रासङ्गिकं सर्वं ते तव मयाऽऽख्यातम्॥३९॥इतिहासमिति ॥स्पष्टम् ॥ ४० ॥ य इति ॥ य एतत् इतिहासवर्णनं नियमेन पठेत् सोऽन्ते हरिं स्मृत्वा तमेव परमां गतिं याति शेषं स्पष्टम् ॥ ४१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्य टीकां सप्तदशे व्यधात् ॥ १७ ॥ अष्टादशे दितेर्गर्भं चिच्छेदेन्द्रो मुहुस्ततः ॥ बभूवुर्मरुतो देवाः श्लोकास्तत्राष्टसप्ततिः ॥ एकादशोवाचसार्द्धाष्टसप्तति-रनुष्टुभः ॥ १८ ॥ दक्षकन्यावंशकथने अदित्या द्वादश पुत्राः प्रोक्ताः विवस्वानर्यमा पूषा इत्याद्याः मित्रः शक्र उरुक्रम इत्यन्ताः तत्र अष्टाध्यायान्तरमारभ्य विश्वरूपवृत्र-

जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः ॥ वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः॥३९॥ इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः॥ माहात्म्यं विष्णुभक्तानां श्रुत्वा बन्धाद्विमुच्यते ॥ ४० ॥ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् ॥ इतिहासं हरिं स्मृत्वा स याति परमां गतिम् ॥ ४१ ॥ इति श्रीभागवते षष्ठस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीम् ॥ अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ १ ॥ सिद्धिर्भगस्य भार्याङ्ग महिमानं विभुं प्रभुम् ॥ आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ॥ २ ॥ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ॥ सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ३ ॥ अग्नीन्पुरीष्यानाधत्त क्रियायां समनन्तरः ॥ ४ ॥ चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ॥ ५ ॥

चित्रकेतूपाख्यानैस्त्वष्टुर्वंशमनुवर्ण्य सवितुर्वंशमाह—पृश्निस्त्विति ॥ सवितुः पत्नी पृश्निस्तु सावित्र्यादीन् तत्तदभिमानिदेवान् प्रासूतेत्युत्तरस्यापकर्षः। अग्निहोत्रादयो यागविशेषाः महामखान् पञ्चयज्ञान् ॥ १ ॥ सिद्धिरिति ॥ अङ्ग हे राजन् भगस्य भार्या सिद्धिर्नाम्नी महिमादीन् पुत्रान् सुव्रतां कन्यां च प्रासूत ॥ २ ॥ धातुरिति ॥ धातुः कुह्वाद्याश्चतस्रः भार्याः सायमादींश्चतुरः पुत्रान् अनुक्रमात् प्रासुवत । तत्र कुहूः सायं पुत्रं सिनिवाली दर्शं पुत्रं प्रासूतेत्यादिरन्वयः । तत्रामावास्याभिमानिनी कुहूः कृष्णपक्षचतुर्दश्यभिमानिनी सिनीवाली पूर्णमास्यभिमानिनी राका शुक्लपक्षचतुर्दश्यभिमानिनी अनुमतिः चतुर्थस्कन्धेऽङ्गिरसः पत्न्यां श्रद्धायां सिनीवाल्यादीनामुत्पत्तिरुक्ता ॥ ३॥ अग्नीनिति अर्द्धम् ॥ समनन्तरो विधाता क्रियायां स्वभार्यायां पुरीष्यसंज्ञान् पञ्चचित्तानादत्त " पुरीष्यासो अग्नय " इति " पञ्च वा एतेऽग्नयो यच्चित्तय " इति श्रुतेः ॥ ४॥ चर्षणीति ॥ चर्षणी वरुणस्य भार्यासीत् । पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः वरुणस्यैव महायोगी वाल्मीकिर्वल्मीकादभवत् । एतौ च भृगुवाल्मीकी वरुणस्यासाधारणपुत्रौ ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगस्त्यश्चेति ॥ अगस्त्यश्च वसिष्ठश्च एतौ ऋषी मित्रावरुणयोरेवासाधारणपुत्रौ तत्र हेतुः उर्वश्याः सन्निधौ द्रुतं स्कन्नं रेतो यतो मित्रावरुणावुभावपि कुम्भे सिषिचतुरतः कुम्भाज्जातावगस्त्यवसिष्ठावुभयोः पुत्रावित्यर्थः । रेवत्यामित्यर्द्धम् । रेवत्यां भार्यायां मित्र उत्सर्गादीन् पुत्रान् व्यधादिति ते मित्रस्यैवासाधारणाः पुत्रा इत्यर्थः ॥ ६ ॥ पौलोम्यामिति ॥ पौलोम्यां भार्यायां प्रभुः स्वर्गस्वामी इन्द्रो जयन्तादींस्त्रीन् पुत्रान् आधत्तेति नोऽस्माभिः श्रुतम् ॥ ७ ॥ उरुक्रमस्येति ॥ उरुक्रमस्य देवस्य भगवदवतारस्य मायया वामनरूपिणः कीर्तिसंज्ञायां पत्न्यां बृहच्छ्लोकसंज्ञकः पुत्रो जातः तस्य च सौभगादय आसन् ॥ ८ ॥ तत्कर्मेति ॥ महात्मनः काश्यपस्य वामनस्य तत्प्रसिद्धं कर्म तथा गुणवीर्याणि च यथा चादित्यामवततार तत्सर्वं पश्चादष्टमस्कन्ध एव वक्ष्यामहे ॥ ९ ॥ अथेति ॥ अथ कश्यपस्य दायादान् पुत्रान् दैतेयान् दित्यां जातान् ते तुभ्यं

अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी ॥ रेतः सिषिचतुः कुम्भ उर्वश्याः सन्निधौ द्रुतम् ॥ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ ६ ॥
पौलोम्यामिन्द्र आधत्त त्रीन्पुत्रानिति नः श्रुतम् ॥ जयन्तमृषभं तात तृतीयं मीढुषं प्रभुः ॥ ७॥ उरुक्रमस्य देवस्य मायावामनरूपिणः ॥
कीर्तौपत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ॥ ८॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः ॥ पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥९॥
अथ कश्यपदायादान्दैतेयान्कीर्तयामि ते ॥ यत्र भागवतः श्रीमान्प्रह्लादो बलिरेव च ॥१०॥ दितेर्द्वावेव दायादौ दैत्यदानववन्दितौ ॥ हिरण्यक-
शिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥ ११ ॥ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ॥ जम्भस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥१२॥ संह्लादं
प्रागनुह्लादं ह्लादं प्रह्लादमेव च ॥ तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥ १३ ॥ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतम् ॥ संह्लादस्य
कृतिर्भार्याऽसूत पञ्चजनं ततः ॥१४॥ ह्लादस्य धमनिर्भार्याऽसूत वातापिमिल्वलम् ॥ योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलम् ॥१५॥

कीर्त्तयामि । यत्र श्रीमान् बलिः प्रह्लादश्च भागवतो जातः ॥ १० ॥ दितेरिति ॥ दितेः दैत्यादिवन्दितौ हिरण्यकशिपुर्हिरण्याक्षश्चेति द्वावेव दायादौ पुत्रौ प्रथमं जातौ । तौ च तृतीयस्कन्धे कीर्तितौ ॥ ११ ॥ हिरण्येति युग्मम् ॥ जम्भस्य तनया दत्ता जम्भेन हिरण्यकशिपवे दत्ता अतः हिरण्यकशिपोर्भार्या दानवी दनुवंशजा कयाधुर्नामाभूत् । सा संह्लादादीन् चतुरः सुतान् सुषुवे । तत्स्वसा प्रह्लादभगिनी सिंहिका विप्रचितोदानवात् स्वभर्तुः सकाशात् राहुं पुत्रमग्रहीत् अजीजनत् ॥ १२ ॥ १३ ॥ शिर इति ॥ यस्यामृतं पिबतो राहोः हरिश्चक्रेण शिरः अहरत् । संह्लादस्य भार्या कृतिर्नाम्नी ततः संह्लादात् पञ्चजनसंज्ञकं पुत्रमसूत ॥ १४ ॥ ह्लादस्येति ॥ ह्लादस्य धमनिर्भार्या वातापिमिल्वलं चासूत । अतिथये अगस्त्याय अगस्त्यं भोजयितुं यस्तु मेषरूपधरं वातापिं पेचे तमिल्वलं यं च पेचे तं वातापिं चासूत ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्विति ॥ अनुह्लादस्य सूर्म्यायां भार्यायां बाष्कलो महिषश्चेति द्वौ पुत्रौ जाताविति शेषः । प्राह्लादिः प्रह्लादपुत्रो विरोचनोऽभूत् तस्य विरोचनस्य देव्यां भार्यायां बलिः पुत्रोऽभवत् ॥ १६ ॥ बाणेति ॥ ततो बलेः सकाशात् अशनायां भार्यायां बाणो ज्येष्ठो यस्मिंस्तत् पुत्रशतमभवत् । सुश्लोक्यः तस्य बलेरप्यनुभावः पश्चादष्टमस्कन्ध एवाभिधास्यते ॥ १७ ॥ बाण इति ॥ बाणो गिरिशमाराध्य तस्य गणेषु पार्षदादिषु मुख्यतां प्राधान्यं लेभे तस्मिंस्तत् रूपाधिक्यं किं वक्तव्यं पुरपालकः सन् भगवान् शिवोऽद्यापि यस्य पार्श्व आस्ते ॥ १८ ॥ मरुत इति ॥ दितेः पुत्रा मरुतः नवाधिकाः चत्वारिंशत्पुत्रा आसन् ते अप्रजाः अप्रजसः आसन् । असिजभाव आर्षः । इन्द्रेण सात्मतां समानस्वभावतां देवत्वं नीताश्चासन् ॥ १९ ॥ कथमिति ॥ हे गुरोते मरुतः औत्पत्तिकं स्वभावसिद्धम् आसुरं भावं क्रौर्यवैरादिकम् अपोह्य त्यक्त्वा कथं स्थिताः तत्तस्येन्द्रस्य च तैः किं साधु कृतमुपकारः कृतः । हि यस्मात्साधुकरणादिन्द्रेण ते सात्म्यं प्रापिताः॥२०॥ इम इति ॥ हे ब्रह्मन् हे भगवन् मया सह इमे समस्ता ऋषयोऽपि

अनुह्लादस्य सूर्म्यायां बाष्कलो महिषस्तथा ॥ विरोचनस्तु प्राह्लादिर्देव्यास्तस्याभवद्बलिः ॥ १६ ॥ बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत् ॥
तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥ १७ ॥ बाण आराध्य गिरिशं लेभे तद्गणमुख्यताम् ॥ यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः
॥ १८ ॥ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः ॥ त आसन्नप्रजाः सर्वे नीता इन्द्रेण सात्मताम् ॥ १९ ॥ राजोवाच ॥ कथं त आसुरं भावम-
पोह्यौत्पत्तिकं गुरो ॥ इन्द्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः ॥ २० ॥ इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह ॥ परिज्ञानाय भगवंस्तन्नो
व्याख्यातुमर्हसि ॥ २१ ॥ सूत उवाच ॥ तद्विष्णुरातस्य स बादरायणिर्वचो निशम्याहृतमल्पमर्थवत् ॥ सभाजयन्संनिभृतेन चेतसा जगाद
सत्रायण सर्वदर्शनः ॥ २२ ॥ श्रीशुक उवाच ॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ॥ मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् ॥२३॥
कदा नु भ्रातृहन्तारमिन्द्रियाराममुल्बणम् ॥ अक्लिन्नहृदयं पापं घातयित्वा शये सुखम् ॥ २४ ॥

एतस्य पृष्टस्य परिज्ञानाय श्रद्दधते इच्छन्ति । "श्रद्धास्तिक्येऽभिलाषे च" इति हैमः । तत्तस्मान्नोऽस्माकमेतद्व्याख्यातुमर्हसि ॥ २१ ॥ तदिति ॥ सत्रमयनमाश्रयो यस्येति तथा तत्सम्बोधनं हे सत्रायण शौनक आदृतं सादरम् अल्पं मिताक्षरम् अर्थवत्सर्वोपकारकं विष्णुरातस्यतद्वचो निशम्य सर्वदर्शनः सर्वज्ञो बादरायणिः श्रीशुकः निभृतेन आनन्दपूर्णेन चेतसा तं सभाजयन् सत्कुर्वन् जगाद उत्तरं दत्तवान् । सभाजनं तु ग्रन्थाद्बहिरेव ॥ २२ ॥ हतेति ॥ शक्रस्य पार्ष्णिग्राहेण पृष्ठतः सहायेन विष्णुना हतौ पुत्रौ हिरण्यकशिपुहिरण्याक्षौ यस्याः सा दितिः शोकेन दीप्तेन प्रज्वलितेन मन्युना ज्वलन्ती पर्यचिन्तयत् ॥ २३ ॥ कदा न्विति ॥ इन्द्रियारामं पापाचारं भ्रातरौ हिरण्यकशिपु-हिरण्याक्षौ तयोर्विष्णुद्वारा हन्तारमत एव उल्बणं निर्दयहृदयम् इन्द्रं घातयित्वा मारयित्वाहं कदा नु सुखं शये सुखेन निद्रां कुर्यामित्यचिन्तयदित्यनुषङ्गः॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृमीति ॥ ईशः प्रभुरित्यभिहितस्यापि यस्य पूर्वेषां राज्ञां देहस्य मरणानन्तरं बहुदिनावस्थितस्य कृमय इति श्वादिभिर्भक्षितस्य तु विडिति दग्धस्य तु भस्मेति संज्ञासीत् तत्कृते तस्य देहस्यार्थे यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद न वेदैव यतो भूतद्रोहात्स्वस्यैव निरयः नरकपातो भवति ॥ २५ ॥ आशासानस्येति ॥ इदं देहादिकं ध्रुवं नित्यमाशासानस्य मन्यमानस्य अत एवोन्नद्धमुच्छृङ्खलं चेतो यस्य तस्येन्द्रस्य यो मदस्त्रिलोकेशाभिमानस्तस्य शोषकः सुतो येन हेतुना मे मम भूयात् भवेत् स हेतुः क इत्यचिन्तयत् ॥ २६ ॥ इतीति अर्द्धम् ॥ इति भावेन इन्द्रमारकपुत्रलाभाभिप्रायेण सा दितिरसकृत् निरन्तरं भर्तुः कश्यपस्य प्रियं चचार ॥२७॥ शुश्रूषयेति सार्द्धम् ॥ हे राजन् भावज्ञा अभिप्रायज्ञा सा शुश्रूषया सेवया अनुरागेण प्रेम्णा प्रश्रयेण नम्रीभावेन दमेन स्वेन्द्रियनिग्रहेण च परमया भक्त्या आराध्यत्वबुद्ध्या मनोज्ञैर्मनोहरैः वल्गुभाषितैः मधुरवचनैश्च सुस्मितेन सहितैरपाङ्गवीक्षणैः कटाक्षनिरीक्षणैश्च भर्तुर्मनो जग्राह वशीचकार ॥ २८ ॥ एवमिति ॥ विद्वानपि कश्यपः विदग्धया कपटाचारनिपुणया स्त्रिया

कृमिविड्भस्मसंज्ञासीद्यस्येशाभिहितस्य च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥२५॥ आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ॥ मदशोषक इन्द्रस्य भूयाद्येन सुतो हि मे ॥ २६ ॥ इति भावेन सा भर्तुराचचारासकृत्प्रियम् ॥ २७ ॥ शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥ भक्त्या परमया राजन्मनोज्ञैर्वल्गुभाषितैः ॥ मनो जग्राह भावज्ञा सुस्मितापाङ्गवीक्षणैः ॥ २८ ॥ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया ॥ बाढमित्याह विवशो न तच्चित्रं हि योषिति ॥२९॥ विलोक्यैकान्तभूतानि भूतान्यादौ प्रजापतिः ॥ स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता ॥३०॥ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया ॥ प्रहस्य परमप्रीतो दितिमाहाभिनन्द्य च ॥३१॥ कश्यप उवाच ॥ वरं वरय वामोरु प्रीतस्तेऽहमनिन्दिते ॥ स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ॥ ३२ ॥ पतिरेव हि नारीणां दैवतं परमं स्मृतम् ॥ ३३ ॥ मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥ स एव देवतालिङ्गैर्नामरूपविकल्पितैः ॥ इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् ॥ ३४ ॥

एवं शुश्रूषादिभिः जडीभूतो मोहितोऽत एव विवशः स्त्रीपरतन्त्रश्च सन् बाढं तव मनोरथं पूरयिष्यामीति यदाह तत् योषिति चित्रमाश्चर्यं न भवति ॥ २९ ॥ विलोक्येति ॥ आदौ सृष्टिप्रारम्भसमये भूतानि प्राणिनः एकान्तभूतानि निःसङ्गानि विलोक्य तेषां मोहार्थं प्रजापतिः मैथुनेन सृष्टिवृद्ध्यर्थं स्वदेहार्द्धं स्त्रियं चक्रे । यया स्त्रिया पुंसां मतिर्हृता स्नेहपाशेन सृष्ट्युन्मुखी कृता ॥३०॥ एवमिति ॥ हे तात भगवान् कश्यपः स्त्रिया एवं शुश्रूषितः सन् परमप्रीतो जातोऽतः प्रहस्य दितिमभिनन्द्य संश्लाघ्य चाह स्म ॥३१॥ वरमिति ॥ हे वामोरु हे अनिन्दिते अहं ते तव प्रीतः अतस्त्वं वरं वरय भर्त्तरि सुप्रीते सति स्त्रियाः कः काम इह चकारात्परत्र च अगमः दुर्लभः ॥३२॥ पतिरिति अर्द्धम् ॥ नारीणां पतिरेव परमं दैवतं स्मृतम् ॥३३॥ मानस इति सार्द्धम् ॥ यः सर्वभूतानां मानसः मनसि स्थितो वासुदेवो नियमनादिक्रीडापरः श्रियः पतिरस्ति नाम इन्द्रादिरूपं वज्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हस्तादि ताभ्यां विविधं कल्पितैर्देवतानां लिङ्गैर्मूर्तिभिर्यथा स एव भगवान् पुंभिः कर्मभिरिज्यते तथा स्त्रीभिश्च पतिरूपधृक् स एवेज्यते । धृजेः क्विप् ॥ ३४ ॥ तस्मादिति ॥ हे सुमध्यमे यस्मात्पतिरूपेण भगवानेव वर्त्तते तस्मात् श्रेयस्कामा विवेकवत्यो नार्यः पतिव्रतास्तदेकश्रवणचित्ताः सत्योऽनन्यभावेन परमया भक्त्या आत्मानं सर्वात्मानमीश्वरं पतिं पतिरूपं यजन्ते पूजयन्ति ॥ ३५॥ सोऽहमिति ॥ हे भद्रे शुभाचारे यस्मात् ईदृग्भावेन अलौकिकप्रकारेण भक्तितः प्रेम्णा त्वयाहं पतिरूपो भगवानर्चितस्तत्तस्मादसतीनां पतिभक्तिरहितानां सुदुर्लभमपि ते कामं मनोरथं सम्पादये ॥ ३६ ॥ वरद इति ॥ हे ब्रह्मन् यदि त्वं मे वरदोऽसि वरं ददासि तदा अपुत्रा मृतपुत्रा अहम् इन्द्रहणमिन्द्रहन्तारममृत्युं स्वयं मृत्युशून्यं पुत्रं वृणे । तत्रेन्द्रापराधमाह । येनेन्द्रेण विष्णुना सहायभूतेन मे सुतौ घातितौ अतोऽहं मृतपुत्रेति ॥ ३७ ॥ निशम्येति ॥ तस्यादितेर्वचो निशम्य श्रुत्वा तन्मनोरथपूर्तेरिन्द्रमरणाधीनत्वं ज्ञात्वा विप्रः कश्यपो विमनाः खिन्नमनाः सन् पर्यतप्यत । अहो अद्य मे सुमहानधर्मः इन्द्रहत्यारूपः समुपस्थितः ॥ ३८ ॥

तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे ॥ यजन्तेऽनन्यभावेन पतिमात्मानमीश्वरम् ॥३५॥ सोऽहं त्वयार्चितो भद्रे ईदृग्भावेन भक्तितः॥ तत्ते संपादये काममसतीनां सुदुर्लभम् ॥ ३६ ॥ दितिरुवाच ॥ वरदो यदि मे ब्रह्मन्पुत्रमिन्द्रहणं वृणे ॥ अमृत्युं मृतपुत्राऽहं येन मे घातितौ सुतौ ॥ ३७ ॥ निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत ॥ अहो अधर्मः सुमहानद्य मे समुपस्थितः ॥३८॥ अहो अद्येन्द्रियारामो योषिन्मय्येह मायया ॥ गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम् ॥ ३९ ॥ कोऽतिक्रमोऽनुवर्तन्त्याः स्वभावमिह योषितः ॥ धिङ् मां बताबुधं स्वार्थे यदहं त्वजितेन्द्रियः ॥४०॥ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् ॥ हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥ ४१ ॥ न हि कश्चित्प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम् ॥ पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च ॥ ४२ ॥

अहो इति ॥ ध्रुवं निश्चितमद्यैव शीघ्रमेव इन्द्रियारामः विषयभोगपरः योषिन्मय्या भगवन्मायया इहास्मिन्नवसरे गृहीतचेताः वशीकृतचित्तः कृपणः धैर्यादिरहितः अहं नरके पतिष्ये । तङार्षः ॥ ३९ ॥ क इति ॥ स्वभावं मोहकत्वमनुवर्त्तन्त्या शता आर्षः । योषितः इह मद्विषये कोऽतिक्रमः कोऽपराधः । बत निश्चितं स्वार्थे अबुधमनभिज्ञं मामेव धिक् त्ववधारणे । यस्मादहमेवाजितेन्द्रिय इत्यर्थः ॥ ४० ॥ शरदिति ॥ वक्त्रं शरत्पद्मस्येवोत्सवो विकासो यस्मिंस्तथाभूतं वचश्च श्रवणयोरमृतमिव हर्षजनकं हृदयं चित्तं तु क्षुरधाराभं परविघातेऽतितीक्ष्णम् अतः स्त्रीणां चेष्टितं को वेद ॥ ४१ ॥ न हीति ॥ स्वस्याशिषा कामनया आत्मनाम् आत्मवत्प्रेष्ठत्वेन प्रतीयमानानां ।यद्वा। स्वस्य आशिषैवात्मा यत्नो यासां ताः नतु पत्यादिसुखापेक्षयेति भावः । अलुक् समासः । आशिषाशब्दष्टाबन्तो वा । तासां स्त्रीणामञ्जसा साक्षात् स्वप्रयोजनरूपमुपाधिं विना कश्चिदपि प्रियो न भवति अत एवार्थे निमित्ते सति पत्यादीन् घ्नन्ति घातयन्ति च ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीति ॥ वरं ददामीति यन्मया प्रतिश्रुतं तन्मम वचो मृषा न भवेत् । इन्द्रोऽपि त्रिलोकेशत्वाद्देवत्वात् पुत्रत्वाच्च वधं नार्हतीति तद्वधश्च न भवेदिति द्वयमपेक्षितम् । तत्रेदमुपकल्पते योग्यं भवति । इदमिति मानसिको विचारस्तथा हि वैष्णवं व्रतं तावदुपदेक्ष्यामि तेनैवास्याश्चित्तशुद्धौ सत्यामिन्द्रे क्रोधो निवर्त्तिष्यते तत्प्रभावेण पुत्रश्चामर्त्यो भविष्यति दुष्फलदानानर्हत्वेन पुत्रश्चेन्द्रघाती न भविष्यति किंतु वरप्रार्थनप्रदानवाक्ययोर्हन्तिधातुप्रयोगात्तस्य गत्यर्थत्वेनापि निर्वाहादिन्द्रानुगो भविष्यति ॥४३॥ इतीति ॥ हे कुरुनन्दन इत्येवं सञ्चित्य भगवान् मारीचः कश्यपस्तस्याः दुर्भावानुसन्धानेन किञ्चित्कुपितः स्वस्य मोहेन तत्पारवश्यानुसन्धानेनात्मानं विगर्हयंस्तामुवाच ॥४४॥ पुत्र इति ॥ हे भद्रे वस्तुतस्तु हे अभद्रे दुःसंकल्पे संवत्सरपर्यन्तमिदं व्रतं यद्यज्ञः यथावत् धारयिष्यसि तर्हि ते पुत्र इन्द्रहा इन्द्रस्य हन्ता अदेवानां बान्धवश्च भविता इति दितेः बोधयितुमिष्टोऽर्थः । किञ्चिद्वैगुण्ये च व्रतस्य वैष्णवत्वेन सर्वथा वैफल्यासंभवात् इन्द्रानुगः देवानां बान्धवः इन्द्रपक्षपाती भविष्यति ॥ ४५ ॥ धारयिष्य इति ॥ हे ब्रह्मन् व्रतमहं धारयिष्ये

प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् ॥ वधं नार्हति चेन्द्रोऽपि तत्रेदमुपकल्पते ॥ ४३ ॥ इति संचिन्त्य भगवान्मारीचः कुरुनन्दन ॥
उवाच किंचित्कुपित आत्मानं च विगर्हयन् ॥ ४४ ॥ कश्यप उवाच ॥ पुत्रस्ते भविता भद्रे इन्द्रहा देवबान्धवः ॥ संवत्सरं व्रतमिदं यद्यञ्जो
धारयिष्यसि ॥ ४५ ॥ दितिरुवाच ॥ धारयिष्ये व्रतं ब्रह्मन्ब्रूहि कार्याणि यानि मे ॥ यानि चेह निषिद्धानि न व्रतं घ्नन्ति यानि तु ॥ ४६ ॥
कश्यप उवाच ॥ न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत् ॥ न च्छिन्द्यान्नखरोमाणि न स्पृशेद्यदमङ्गलम् ॥ ४७ ॥ नाप्सु स्नायान्न कुप्येत
न संभाषेत दुर्जनैः ॥ न वसीताधौतवासः स्रजं च विधृतां क्वचित् ॥४८ ॥ नोच्छिष्टं चण्डिकान्नं च सामिषं वृषलाहृतम् ॥ भुञ्जीतोदक्यया
दृष्टं पिबेदञ्जलिना त्वपः ॥ ४९ ॥ नोच्छिष्टाऽस्पृष्टसलिला संध्यायां मुक्तमूर्धजा ॥ अनर्चिता संयतवागसंवीता बहिश्चरेत् ॥ ५० ॥

तत्र यानि कार्याण्यावश्यकानि यानि चेह व्रते निषिद्धानि उत अपि यानि व्रतं न घ्नन्ति नावश्यकानि न निषिद्धानि किन्त्वभ्यनुज्ञातानि तानि सर्वाण्यपि मे ब्रूहि ॥ ४६ ॥ नेति ॥ भूतजातानि प्राणिसमूहाः तेषु कञ्चिदपि न हिंस्यात् इति प्रथम एवेन्द्रवधाशङ्का निषिद्धा । न शपेन्नाक्रोशेत् अनृतं न वदेत् नखलोमानि च न च्छिन्द्यात् यदमङ्गलं कपालास्थ्यादिकं तन्न स्पृशेत् ॥४७॥ नेति॥ अप्सु प्रविश्य न स्नायात् न कुप्येत दुर्जनैः साकं न संभाषेत अधौतं वासो न वसीत न परिदध्यात् विधृतां पूर्वधृतां स्रजं पुनर्न धारयेत्॥४८॥नोच्छिष्टमिति ॥ उच्छिष्टं न भुञ्जीत । चण्डिकान्नं भद्रकाल्यादिनिवेदितमन्नं पिपीलिकादिदूषितमन्नं वा न भुञ्जीत। "चण्डिका स्यात्पिपीलिका" इत्यभिधानात् । सामिषं मांससहितं वृषलाहृतं शूद्रानीतमन्नं न भुञ्जीत। उदक्यया रजस्वलया दृष्टमन्नं न भुञ्जीत। अञ्जलिना त्वपो न पिबेत् ॥४९॥ नोच्छिष्टेति ॥ उच्छिष्टा उच्छिष्टमुखी सती अस्पृष्टसलिला अधौतहस्तपादा च मुक्तमूर्द्धजा अनर्चिता मण्डनहीना असंयतवाक् असंवीता अप्रावृता च बहिर्न चरेत् इति सर्वत्रान्वेति । तथा सन्ध्यायां बहिर्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरेत् ॥ ५० ॥ नाधौतेति ॥ न शयीतेत्यष्टस्वप्यन्वेति । अप्रयता अशुचिः अपराक् पश्चिमशिराः अन्यैः स्त्रीजनैरपि सह । स्पष्टं शेषम्॥५१॥धौतेति ॥ धौतवासाः शुचिः सर्वमङ्गलसंयुता गृहीतपूजोपकरणाप्रातराशात् प्रथमभोजनात् प्राङ् नित्यं गोविप्रादीन् पूजयेत् ॥ ५२ ॥ स्त्रिय इति ॥ वीरवतीः जीवद्भर्तृकाः स्त्रियः स्रग्गन्धाद्यैरर्चेत् । पतिं च आर्च्य आ सर्वप्रकारैः संपूज्य उपतिष्ठेत स्तुवीत । कोष्ठगतं कुक्ष्यन्तरगतं च तं पतिं ध्यायेत्॥५३॥सांवत्सरमिति॥सांवत्सरम् संवत्सरेऽनुष्ठेयं पुंसवनं पुत्रोत्पत्तिकरम् इदं व्रतम् अविप्लुतं निर्विघ्नं धारयिष्यसि तदा तुभ्यं तव इन्द्रहा सुतो भविता अन्यथा त्विन्द्रबान्धवो भविष्यतीति सूचितम् ॥ ५४ ॥ बाढमिति ॥ हे राजन् सा दितिः बाढमेवं धारयिष्यामीत्यभिप्रेत्य अङ्गीकृत्य महामनाः हृष्टमनाः सती काश्यपं गर्भं वीर्यमाधत्त अञ्जो यथावत्प्रयत्नेन व्रतं च दधार ॥ ५५ ॥ मातृष्वसुरिति ॥ हे मानद

नाधौतपादाऽप्रयता नार्द्रपान्नो उदक्शिराः ॥ शयीत नापराङ् नान्यैर्न नग्ना न च संध्ययोः ॥ ५१ ॥ धौतवासाः शुचिर्नित्यं सर्वमङ्गलसंयुता ॥
पूजयेत्प्रातराशात्प्राग्गोविप्राञ्छ्रियमच्युतम् ॥ ५२ ॥ स्त्रियो वीरवतीश्चार्चेत्स्रग्गन्धबलिमण्डनैः ॥ पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तम्
॥ ५३ ॥ सांवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ॥ धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥५४॥ बाढमित्यभिप्रेत्याथ दिती राजन्महामनाः॥
काश्यपं गर्भमाधत्त व्रतं चाञ्जो दधार सा ॥ ५५ ॥ मातृष्वसुरभिप्रायमिन्द्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥५६॥
नित्यं वनात्सुमनसः फलमूलसमित्कुशान् ॥ पत्राङ्कुरमृदापश्च काले काल उपाहरत् ॥ ५७॥ एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ॥ प्रेप्सुः
पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥५८॥ नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ॥ चिन्तां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥५९॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्शिता ॥ अस्पृष्टवार्यधौताङ्घ्रिः सुष्वाप विधिमोहिता ॥ ६० ॥

राजन् कविः कार्यसाधनकुशलः इन्द्रः स्वमातृष्वसुर्दित्या अभिप्रायमाज्ञाय व्रते विघ्नेन स्वकार्यसिद्ध्यर्थं तामाश्रमस्थां व्रतस्थामदितिं शुश्रूषणेन सेवया सह नित्यं पर्यचरन् तदपेक्षितं सर्वं सम्पादितवान् ॥ ५६ ॥ नित्यमिति ॥ सुमनसः पुष्पाणि । स्पष्टमन्यत् ॥ ५७ ॥ एवमिति ॥ हे नृप हरिरिन्द्रः व्रतस्थायाः तस्या व्रतच्छिद्रं व्रतविघ्नस्यावसरं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः अन्तःकुटिलोऽप्युपरि साधुवेषश्च संस्तामेवं पर्यचरदित्यन्वयः । जिह्मत्वे दृष्टान्तः । यथा मृगहा लुब्धको मृगवञ्चनाय मृगाकृतिर्भवति तथा परिचारकवेषो बभूव ॥५८॥ नेति ॥ हे नृप एवं तत्परः छिद्रान्वेषणपरोऽपि शक्रः यदा व्रतच्छिद्रं नाध्यगच्छत् न प्राप तदा इहास्मिन् समये मे शिवं कार्यं केन हेतुना स्यादिति तीव्रां चिन्तां गतः ॥५९॥ एकदेति ॥ व्रतेन कर्शिता उच्छिष्टा सती विधिना प्रारब्धेन मोहिता चेति अतः अस्पृष्टवारिश्चासावधौताङ्घ्रिश्च सा सन्ध्यायां सुष्वाप ॥६०॥

CC-0. In Public Domain. Digitization by eGangotri

लब्ध्वेति ॥ योगेशः अणिमादिसिद्धिमान् शक्रः तदन्तरमवसरं लब्ध्वा निद्रयापहृतं चेतो यस्यास्तस्या दितेरुदरं योगमायया परकायप्रवेशाख्यसिद्ध्या प्रविष्टः ॥ ६१ ॥ चकर्त्तेति ॥ उदरं प्रविष्टः इन्द्रः कनकवत्प्रभा कान्तिर्यस्य तं गर्भं वज्रेण सप्तधा चकर्त्त चिच्छेद । एवं छेदने कृतेऽपि रुदन्तं गर्भं मा रोदीरित्युपलालयन्निव पुनस्तानेकैकं सप्तधा चकर्त्त ॥ ६२ ॥ ते इति ॥ हे नृप ते सर्वे गर्भाः पीड्यमाना अतः प्राञ्जलयः सन्तस्तमिन्द्रमूचुः । हे इन्द्र वयं तु मरुतस्तव भ्रातरः अतो नोऽस्मान् त्वं किं जिघांससि हन्तुमिच्छसि ॥ ६३ ॥ मा भैष्टेति ॥ एवं तैरुक्तः कौशिक इन्द्रोऽपि तान् मरुतां गणान् अनन्यभावान् अतिस्नेहवतः आत्मनः स्वस्य पार्षदान् आज्ञाकारिणो निश्चित्य यदि यूयं मह्यं मम भ्रातरस्तदा मा भैष्ट भयं मा कुरुतेत्याह स्म ॥ ६४ ॥ नेति ॥ बहुधा कुलिशेन क्षुण्णः छिन्नः अपि दितेर्गर्भः श्रीनिवासस्य विष्णोः अनुकम्पया कृपया न ममार द्रौण्यस्त्रेण दग्धोऽपि भवान् यथा न ममार तथेत्यर्थः । अत्र यथा यथेन्द्रेण गर्भश्छिन्नस्तथा तथा तत्र भगवदिच्छया जीवाः प्रविष्टाः । यद्वैकस्य

लब्ध्वा तदन्तरं शक्रो निद्राऽपहृतचेतसः ॥ दितेः प्रविष्ट उदरं योगेशो योगमायया॥६१॥चकर्त सप्तधा गर्भं वज्रेण कनकप्रभम् ॥ रुदन्तं सप्तधैकैकं मा रोदीरिति तान्पुनः ॥ ६२ ॥ ते तमूचुः पाट्यमानाः सर्वे प्राञ्जलयो नृप ॥ नो जिघांससि किं इन्द्र भ्रातरो मरुतस्तव ॥६३॥ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥ अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ॥ ६४ ॥ न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ॥ बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ॥ ६५ ॥ सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यताम् ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥ ६६ ॥ सजूरिन्द्रेण पञ्चाशद्देवास्ते मरुतोऽभवन् ॥ व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ॥ ६७ ॥ दितिरुत्थाय ददृशे कुमाराननलप्रभान् ॥ इन्द्रेण सहितान् देवी पर्यतुष्यदनिन्दिता ॥६८॥ अथेन्द्रमाह ताताहमादित्यानां भयावहम् ॥ अपत्यमिच्छन्त्यचरं व्रतमेतत्सुदुष्करम् ॥६९॥

जीवस्य योगिवत्सर्वत्र प्रवेशो ज्ञेयः । भगवता सर्वं कर्त्तुं शक्यत्वात् ॥ ६५ ॥ सकृदिति युग्मम् ॥ यमादिपुरुषं भगवन्तं सकृदपि इष्ट्वा पुरुषस्तत्साम्यतां समतां स्वार्थे ष्यत्रन्तात्समशब्दात्तल । सात्मतामिति वा पाठः । याति स हरिर्यस्मादित्या किञ्चिदूनं संवत्सरपर्यन्तमर्चितस्तस्मात्ते मरुतः इन्द्रेण सजूः सह पञ्चाशद्देवा अभवन् । हरिणा कृपया तेषां मातृप्रयुक्तं दोषं दैत्यत्वमपोह्य दूरीकृत्य सोमपा अमृतपातारः कृता इति न चित्रम् ॥ ६६ ॥ ६७ ॥ दितिरिति ॥ अनिन्दिता भगवद्व्रतधारणेन शुद्धान्तःकरणा देवी दितिः उत्थाय अनलप्रभान् अतितेजस्विन इन्द्रेण सहितान् इन्द्रेण सह कृतमैत्रान् कुमारान् ददृशे । तङार्षः । ततः पर्यतुष्यच्च ॥ ६८ ॥ अथेति ॥ अथ दितिरिन्द्रमाह स्म हे तात आदित्यानां युष्माकं भयावहं भयङ्करमपत्यमिच्छन्त्येतत्सुदुष्करं व्रतमहमचरं कृतवती ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एक इति ॥ तत्र एकः पुत्रः संकल्पितः सप्त सप्त एकोनपञ्चाशत् पुत्राः कथमभवन् । हे पुत्र यदि ते तवैतद्विदितं तदा सत्यं यत्तत्कथय मृषा मा कथय ॥ ७० ॥ दित्या निष्कपटमुक्ते इन्द्रोऽपि निष्कपटमाह स्म । अम्बेति हे अम्ब अर्थे बुद्धिर्यस्य सः न धर्मं वेत्ति अनुसन्धत्ते तथाभूतः अहं ते तव व्यवसितं निश्चितमुपधार्य ज्ञात्वा तवान्तिकमागतः लब्धमन्तरमवसरो येन सः तेऽन्तः प्रविश्य गर्भमच्छिदम् ॥ ७१ ॥ कृत्त इति ॥ प्रथमं मे मया गर्भः सप्तधा कृत्तः तदा सप्त कुमारका आसन् । ते सप्तापि चैकैकशः सप्तधा वृक्णाः छिन्नास्तथापि न मम्रिरे । तद्गर्भः ॥ ७२ ॥ तत इति ॥ तत्तेषां जीवने परमाश्चर्यं वीक्ष्य ततोऽनन्तरं महापुरुषस्य पूजायाः अनुषङ्गिणी अवान्त-

एकः सङ्कल्पितः पुत्रः सप्तसप्ताभवन्कथम् ॥ यदि ते विदितं पुत्र सत्यं कथय मा मृषा ॥ ७० ॥ इन्द्र उवाच ॥ अम्ब तेऽहं व्यवसितमुपधार्यागतोऽन्तिकम् ॥ लब्धान्तरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥ ७१ ॥ कृत्तो मे सप्तधा गर्भ आसन्सप्त कुमारकाः ॥ तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७२ ॥ ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया ॥ महापुरुषपूजायाः सिद्धिः काप्यनुषङ्गिणी ॥७३ ॥ आराधनं भगवत ईहमाना निराशिषः ॥ ये तु नेच्छन्त्यपि परं ते स्वार्थकुशलाः स्मृताः ॥ ७४ ॥ आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्वरम् ॥ को वृणीते गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ॥ ७५॥ तदिदं मम दौर्जन्यं बालिशस्य महीयसि ॥ क्षन्तुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥ ७६ ॥ श्रीशुक उवाच ॥ इन्द्रस्तयाऽभ्यनुज्ञातः शुद्धभावेन तुष्टया ॥ मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥ ७७ ॥ एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ मङ्गलं मरुतां जन्म किं भूयः कथयामि ते ॥ ७८ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे मरुद्गणजन्मकथनं नाम अष्टादशोऽध्यायः ॥ १८ ॥

रफलभूता कापि सिद्धिरियमिति मयाध्यवसितं निश्चितम् ॥७३॥ आराधनमिति ॥ ये तु निराशिषः निष्कामाः सन्तो भगवत आराधनमीहमानाः कुर्वन्तस्ततः परं मोक्षमपि फलं नेच्छन्ति त एव स्वार्थकुशलाः निपुणाः शास्त्रे स्मृताः ॥ ७४ ॥ आराध्येति ॥ स्वात्मानं जगदीश्वरमात्मप्रदं देवं भगवन्तमाराध्य गुणस्पर्शं विषयभोगं को बुधो वृणीते । यत् यः विषयभोगो नरके श्वशूकरादिजन्मन्यपि स्यात् ॥ ७५ ॥ तदिति ॥ हे महीयसि महत्तमे हे मातः बालिशस्य अज्ञस्य मम यत्तु दौर्जन्यमपराधस्तत्त्वं क्षन्तुमर्हसि गर्भः मृतः सन् उत्थित एतदपि दिष्ट्या भद्रमेव जातम् ॥ ७६ ॥ इन्द्र इति द्वयम् ॥ स्पष्टम् ॥ ७७ ॥ ७८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठस्याष्टादशे निरमादिमाम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊनविंशे मरुज्जन्महेतुव्रतविधिं मुनिः ॥ जगद्धितायाकथयत्तत्र श्लोकाः कुंवह्नयः ॥ उवाचद्वयमङ्घ्र्यूनाः पञ्चत्रिंशदनुष्टुभः ॥१९॥ व्रतइति ॥ हे ब्रह्मन् भवता यत् पुंसवनं व्रतमुदीरितं निरूपितं तस्य प्रकारविशेषं वेदितुं तत्वतो ज्ञातुमिच्छामि येन साङ्गेन व्रतेन विष्णुः प्रसीदति ॥ १ ॥ शुक्ले इति सार्द्धम् ॥ भर्तुरनुज्ञया आज्ञया मरुतां जन्म व्रतारम्भात्पूर्वं निशम्य श्रुत्वा ब्राह्मणाननुमन्त्र्य पृष्ट्वा च ।येोषित् मार्गशिरे मासे" पिण्डं दद्याद्गयाशिरे।" इत्यादावदन्तोऽपि शिरशब्दः आर्षो वा । शुक्ले पक्षे आदितः प्रतिपदि सार्वकामिकं सर्वकामप्रदमिदं व्रतमारभेत ॥ २ ॥ स्नात्वेति ॥ शुक्लाः धौताः दन्ताः यस्याः सा शुक्लदती स्नात्वा शुक्ले अम्बरे वस्त्रे वसीत तत्श्चालंकृता सती प्रातराशात् प्रथमभोजनात् प्राक् श्रिया सह भगवन्तं पूजयेत् ॥ ३ ॥ पूजानन्तरं नमस्कुर्यात्तन्मन्त्रानाह—अलमिति ॥ हे पूर्णकाम ते तुभ्यमलं पर्याप्तं नान्यैः किंचित्कार्यमस्ति अतः निरपेक्षाय ते तुभ्यं नमोऽस्तु । महाविभूतिर्लक्ष्मीस्तत्पतये सकलाः सिद्धयः अणिमाद्या यस्मिंस्तस्मै नमः ॥ ४ ॥ यथेति ॥ हे ईश यतस्त्वं यथा यथावत्साकल्येन कृपया

राजोवाच ॥ व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितम् ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥ १ ॥ श्रीशुक उवाच ॥ शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ॥ आरभेत व्रतमिदं सार्वकामिकमादितः ॥ निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च ॥ २ ॥ स्नात्वा शुक्लदती शुक्ले वसीताऽलंकृताऽम्बरे ॥ पूजयेत्प्रातराशात्प्राग्भगवन्तं श्रिया सह ॥ ३ ॥ अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते ॥ महाविभूतिपतये नमः सकलसिद्धये ॥ ४ ॥ यथा त्वं कृपया भूत्या तेजसा महिनौजसा ॥ जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान्प्रभुः ॥ ५ ॥ विष्णुपत्नि महामाये महापुरुषलक्षणे ॥ प्रीयतां मे महाभागे लोकमातर्नमोऽस्तु ते ॥ ६ ॥ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुपाहराणीनि ॥ ७ ॥ अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगन्धपुष्पधूपदीपोपहाराद्युपचारांश्च समाहिता उपाचरेत् ॥ ८ ॥

भूत्या श्रिया तेजसा ऐश्वर्येण महिना महिम्ना असङ्गत्वादिना ओजसा वीर्येण अन्यैश्च सत्यत्वानन्दत्वादिभिः सर्वैर्गुणैर्जुष्टः सेवितः परिपूर्णस्ततो हेतोर्भगवान् प्रभुः सर्वथा समर्थः सर्वपूज्यश्चासि ॥५॥ लक्ष्मीं नमस्यति—विष्ण्विति ॥ हे विष्णोः पत्नि हे महामाये महापुरुषस्य पुरुषोत्तमस्य भगवत इव लक्षणानि निरपेक्षत्वादीनि यस्याः हे महाभागे मे मम प्रीयेथाः । हे लोकमातस्ते नमोऽस्तु॥६॥पूजामन्त्रमाह—ॐ नम इति ॥ भगवते ऐश्वर्यादिगुणपूर्णाय अत एव महापुरुषाय पुरुषोत्तमाय अत एव महान् अनुभावः प्रभावो यस्य तस्मै अत एव महाविभूतिर्लक्ष्मीस्तस्याः पतये नमः । महाविभूतिभिरिति बहुवचनं । विष्वक्सेनादिपार्षदानामुपलक्षणार्थं लक्ष्म्यादिसहिताय तुभ्यं बलिमुपहराणि समर्पयाणि । इतीति मन्त्रसमाप्तिद्योतकः ॥७॥ अनेनेति ॥ समाहिता एकाग्रचित्ता सती अनेन मन्त्रेण विष्णोरावाहनादि अहरहः प्रतिदिनम् उपाहरेत् समर्पयेत्॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हविरिति अर्द्धम् ॥ हविःशेषमुपहारावशिष्टमनले द्वादशाहुतीर्जुहुयात् ॥ ९ ॥ होममन्त्रमाह—ॐ इति ॥ १०॥ श्रियमिति ॥ प्रभवौ उत्पादनसमर्थौ। स्पष्टमन्यत् ॥ ११ ॥ प्रणमेदिति ॥ स्पष्टम् ॥ १२ ॥ युवामिति॥युवां विश्वस्य सर्वस्य जगतः विभू स्वामिनौ परं मुख्यं कारणं च युवामेव इयं लक्ष्मीरेव सूक्ष्मा दुर्ज्ञेया प्रकृतिः इयमेव दुरत्यया अनुल्लङ्घ्या मायारूपा शक्तिः ॥ १३ ॥ तस्या इति ॥ तस्या प्रकृतेरधीश्वरः नियन्ता परः पुरुषः साक्षात्त्वमेव त्वं सर्वयज्ञमूर्तिः इयं लक्ष्मीः इज्या यज्ञनिवर्त्तकः पुरुषव्यापारो भावनाख्यः इयं लौकिकी क्रिया भवान् फलभुग् जीवः ॥ १४ ॥ गुणेति ॥ इयं देवी गुणानां व्यक्तिः भवांश्च गुणानां व्यञ्जकः कालः गुणभुक् विराट् त्वं हि सर्वशरीरी सर्वजीवरूपः आत्मा श्रीश्च शरीरेन्द्रियाशयरूपा स्त्रीत्वमार्षम् ॥१५॥ नामेति अर्द्धम् ॥ नामरूपे भगवती लक्ष्मीः प्रत्ययो नामरूपयोः प्रकाशः अपाश्रयः तयोराधारश्च त्वम्

हविःशेषं तु जुहुयादनले द्वादशाहुतीः ॥९॥ ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥ १० ॥ श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ ॥ भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसंपदः ॥११॥ प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा ॥ दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥१२॥ युवां तु विश्वस्य विभू जगतः कारणं परम् ॥ इयं हि प्रकृतिः सूक्ष्मा माया शक्तिर्दुरत्यया ॥१३॥ तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः ॥ त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥१४॥ गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग् भवान् ॥ त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेन्द्रियाशया ॥ १५ ॥ नामरूपे भगवति प्रत्ययस्त्वमपाश्रयः ॥ १६ ॥ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ ॥ तथा म उत्तमश्लोक सन्तु सत्या महाशिषः ॥१७॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ॥ तन्निःसार्योपहरणं दत्त्वाऽऽचमनमर्चयेत् ॥ १८ ॥ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ॥१९॥ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥ पतिं च परया भक्त्या महापुरुषचेतसा ॥ २० ॥ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ॥ बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च ॥ २१ ॥

॥ १६ ॥ यथेति ॥ यथा युवां त्रिलोकस्य वरप्रदौ परमेष्ठिनौ परमेश्वरौ च तथा हे उत्तमश्लोक मे मम महाशिषः महान्तोऽपि मनोरथाः सत्याः सन्तु ॥ १७ ॥ इतीति ॥ वरदं श्रीनिवासं हरिं श्रिया सह इत्यभिष्टूय दैर्घ्यमार्षं ततः तुगभावः । तदुपहरणं नैवेद्यनिर्माल्यादि निःसार्य अपसारणं कृत्वाऽऽचमनं दत्त्वा पुनरर्चयेत् ॥ १८ ॥ तत इत्यर्द्धम् ॥ स्तुवीत पुनः स्तुवीत स्पष्टम् ॥ १९ ॥ यज्ञेति ॥ पूर्वार्द्धं स्पष्टम् । पतिं महापुरुषचेतसा परमेश्वरबुद्ध्या अभ्यर्चयेदित्यनुषङ्गः ॥ २० ॥ प्रियैरिति ॥ प्रीतैस्तैः प्रियैः सह तत्प्रियसम्पादनपूर्वकं पतिमुपनमेत् पतिश्च प्रेमशीलः सन् पत्न्याः उच्चावचानि सर्वाणि कर्माणि स्वयं बिभृयात्तदनुकूलतया पूजादिषु साहाय्यं कुर्यात् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतमिति ॥ यतो दम्पत्योर्मध्य एकतरेणापि कृतमुभयोरपि फलकारणं भवति तस्मात्पत्न्यामनर्हायां पतिः स्वयं समाहितः सन्नेतत्कुर्यात् ॥२२॥ विष्णोरिति ॥ इदं विष्णोर्व्रतं विभ्रत्कथंचन कामक्रोधादिवशादपि न विहन्यात् । पूर्वाध्यायोक्तानां निषेधानामुपलक्षणमिदं विप्रादीन् स्रगादिभिर्भक्त्या अर्चेदित्यपकर्षः ॥ २३ ॥ अर्चेदित्यर्द्धम् ॥ एवं नियममास्थितः सन् देवं भक्त्या अहरहरर्चेत् ॥ २४ ॥ उद्वास्येति ॥ देवं भगवन्तं स्वे धाम्नि उद्वास्य संहारमुद्रया विसर्ज्य तन्निवेदितमग्रत इति ल्यब्लोपे पञ्चमी । अग्रभागं यथोचितं विभज्य तत आत्मविशुद्ध्यर्थं तथा सर्वकामानामृद्धये स्वयमद्यात् ॥२५॥ एतेनेति॥ साध्वी एतेन पूजाविधिना द्वादशमासात्मकं हायनं संवत्सरं यस्मिन् वर्षे व्रतारम्भात्समाप्त्यन्तमधिमासो न पतति तमित्यर्थः॥ नीत्वा अथो कार्त्तिके चरमेऽहनि पूर्णमास्यामुपचरेत् उपवसेत्॥२६॥ श्वोभूत इति सार्द्धम्॥श्वोभूते कृष्णप्रतिपदि अप उपस्पृश्य पूर्ववत् कृष्णमभ्यर्च्य पाकयज्ञविधानेन गृह्यसूत्रोक्तेन पयःशृतेन घृतपक्वेन सह सर्पिषा सघृतेन चरुणा पतिरेव द्वादशाहुतीर्जुहुयात् । एवकारः स्त्रिया होमेऽनधिकारं

कृतमेकतरेणापि दम्पत्योरुभयोरपि ॥ पत्न्यां कुर्यादनर्हायां पतिरेतत्समाहितः ॥ २२ ॥ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन ॥ विप्रान् स्त्रियो वीरवतीः स्रग्गन्धबलिमण्डनैः ॥ २३॥ अर्चेदहरहर्भक्त्या देवं नियममास्थितः ॥ २४ ॥ उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः ॥ अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा॥२५॥एतेन पूजाविधिना मासान्द्वादशहायनम् ॥ नीत्वाऽथोपचरेत्साध्वी कार्तिके चरमेऽहनि ॥२६॥ श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ॥ पयः शृतेन जुहुयाच्चरुणा सह सर्पिषा ॥ पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥ २७ ॥ आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः ॥ प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥ २८ ॥ आचार्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः ॥ दद्यात्पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥ २९ ॥ एतच्चरित्वा विधिवद्व्रतं विभोर भीप्सितार्थं लभते पुमानिह ॥ स्त्री त्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम् ॥ ३० ॥

सूचयति ॥ २७ ॥ आशिष इति ॥ स्पष्टम् । प्रीतैरित्यनेन प्रथमतस्तेषां भोजनादिकं सूचितम् । क्वचित्पुस्तके तु " ब्राह्मणान् भोजयेद्भक्त्या स्वन्नाद्यैर्द्वादशान्विभुः । तेभ्यो दद्यात्तिलान् गाश्च सोदपात्रसमन्वितान् ॥ " इत्येकः श्लोकोऽधिकोऽस्ति ॥ २८ ॥ आचार्यमिति ॥ बन्धुभिः सहितः वाग्यतः धृतमौनः आचार्यम् अग्रतः कृत्वा आचार्याज्ञापुरःसरं यथा भवति तथेत्यर्थः । सुप्रजस्त्वं सत्पुत्रकरं सुसौभगं सौभाग्यकरम् इति चरुविशेषणम् । चरोः शेषं पत्न्यै दद्यात् । यद्वा । तस्य सुप्रजस्त्वं सुसौभगं च स्यात् इति वाक्यान्तरम् ॥ २९ ॥ एतदिति ॥ एतद्व्रतं विधिवच्चरित्वा कृत्वा विभोर्भगवतः सकाशादिहैव जन्मनि पुमान् अभीप्सितार्थं लभते । स्त्रीतु एतदास्थाय कृत्वा सौभगं सौभाग्यं श्रियं प्रजां जीवतीति जीवः स चासौ पतिश्च तं जीवपतिं दीर्घजीविनं पतिं यशो गृहं च लभेत ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्या चेति सार्द्धम् ॥ एतच्चरित्वा कन्या समग्राणि लक्षणानि सद्गुणा यस्मिंस्तथाभूतं वरं पतिं लभेत अवीरा पुत्रहीना विधवा च हतकिल्बिषां दोषवर्जितां वैकुण्ठादिशामिलक्षणां गतिं लभेत । हतकिल्बिषेति प्रथमान्तपाठो वा । मृतप्रजा या सा जीवसुता धनेश्वरी च भवति सुदुर्भगा सुभगा भवति विरूपा अग्र्यं श्रेष्ठं रूपं विन्देत् । आमयावी रोगी विरुजा विशिष्टया रुजा विमुच्यते । इन्द्रियैः सहितं कल्पं देहं च विन्देदिति शेषः ॥ ३१ ॥ एतदिति ॥ पठन्निति श्रवणादेरप्युपलक्षणम् । अभ्युदये यज्ञदानादिपि-

कन्या च विन्देत समग्रलक्षणं वरं त्ववीरा हतकिल्बिषा गतिम्॥मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम्॥विन्देद्विरूपा विरुजा विमुच्यते य आमयावीन्द्रियकल्पदेहम् ॥३१॥ एतत्पठन्नभ्युदये च कर्मण्यनन्ततृप्तिः पितृदेवतानाम् ॥ तुष्टाः प्रयच्छन्तिसमस्त कामान्होमावसाने हुतभुक् श्रीर्हरिश्च ॥ ३२ ॥ राजन् महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥ ३३ ॥ इति श्रीभागवते महापुराणे षष्ठस्कन्धे पुंसवनव्रतकथनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ संपूर्णोऽयं षष्ठः स्कन्धः ॥ ६ ॥

तृदेवादिकर्मणि य एतत् पाठादिपरो भवेत्तस्य पित्रादीनामनन्ता तृप्तिर्भवति । ते च तथैव हुतभुगादयः सन्तुष्टाः सन्तः होमावसाने कर्मसमाप्तौ तस्मै समस्तकामान् प्रयच्छन्ति ॥ ३२ ॥ राजन्निति अर्द्धम् ॥ स्पष्टम् ॥ ३३ ॥ लुभ्यन् भवन्मधुरिमानुभवाय कृष्ण न प्राप्नुवंस्तमहमेव न वञ्चितोऽस्मि ॥ शुच्याभमप्यशुचि मे नवनीतबुद्ध्या चेतो हरंस्त्वमपि वञ्चकवञ्चितोऽसि ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ षष्ठस्कन्धस्योनविंशे व्यधाद्गङ्गासहायकः ॥ १९ ॥

अयं श्रीमद्भागवतस्य षष्ठः स्कन्धः बून्दीनगरनिवासिपण्डितगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वीये "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितः । फाल्गुनशुक्ला ७ शकाब्दाः १८२२, संवत् १९५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

॥ श्रीमद्भागवते षष्ठः स्कन्धः ॥

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते सप्तमस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

॥ श्रीमद्भागवते सप्तमः स्कन्धः ॥

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेति ॥ पूजितश्च मुनिर्नारदः कृष्णं पार्थं पृथापुत्रं युधिष्ठिरं च उपामन्त्र्य पृष्ट्वा प्रययौ पार्थो युधिष्ठिरः श्रीकृष्णं परं ब्रह्म श्रुत्वा परमाविस्मितः आश्चर्ययुक्तो जातः ॥ ७९ ॥ इतीति ॥ इत्येवं दाक्षायणीनां दक्षकन्यानां वंशास्ते तव मया पृथक् पृथक् प्रकीर्तिताः यत्र वंशे देवादयश्चराचरा लोकाः प्राणिनो जाताः ॥ ८० ॥ दैत्यं परासुमपि

कृष्णपार्थावुपामन्त्र्य पूजितः प्रययौ मुनिः ॥ श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥ ७९ ॥ इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः ॥ देवासुरमनुष्याद्या लोका यत्र चराचराः ॥ ८० ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे प्रह्लादानुचरिते युधिष्ठिरनारदसंवादे सदाचारनिरूपणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ छ ॥

॥ समाप्तोऽयं सप्तमः स्कन्धः ॥

निर्दहदुग्रमेकं बालं स्वभक्तममृतैरिव सिञ्चदन्यत् ॥ आश्वासयत्सुरगणानपरं भयार्त्तान् नेत्रत्रयं नरहरेर्दिशतात्सुखं वः ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चरमे सप्तमस्य व्यधादिमाम् ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अयं श्रीमद्भागवतस्य सप्तमः स्कन्धः बून्दीनगरनिवासिपण्डितगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वीये "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितः । चैत्रकृष्णा ११ शकाब्दाः १८२३, संवत् १९५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते षष्ठस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते सप्तमस्कन्धः

प्रारभ्यते।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीकृष्णाय नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं सञ्चिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयं लिखति सम्प्रति सप्तमेऽस्मिन् ॥ ३ ॥ प्रथमे तु विप्रशापाज्जन्मत्रयकथादिकम् ॥ भगवद्भाःस्थयोस्तत्र श्लोकाः सार्द्धा नगाब्धयः[४७] ॥ उवाचाष्टकमङ्ग्यूनाः स्युः पञ्चाशदनुष्टुभः[४९] ॥ १ ॥ तत्र पूर्वस्कन्धान्ते " हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत् ॥ " इति यदुक्तं तच्छ्रुत्वा विस्मितः परीक्षित्पृच्छति–सम इति ॥ हे ब्रह्मन् भगवान् विष्णुः स्वयं भूतानां समः प्रियः सुहृच्च स इन्द्रस्यार्थे दैत्यान् कथमवधीत् । यथा समस्य कथं वैषम्यं प्रियस्य कथमसुरेषु प्रीत्यभावः सुहृदः कथं तेष्वसौहृदं विषमभेददर्शी जीवः पुत्रादिपक्षपातेन तच्छत्रून् हन्ति । न हि समस्य सुहृदश्च वैषम्यं भवति न च प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः ॥ १ ॥ न हीति ॥ हि यतः साक्षान्निश्रेयसं परमानन्द आत्मा स्वरूपं यस्य तस्याप्तकामस्य

श्रीगणेशाय यमः ॥ ॥ राजोवाच ॥ समः प्रियः सुहृद्ब्रह्मन् भूतानां भगवान् स्वयम् ॥ इन्द्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ॥ १ ॥ न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ॥ नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ २ ॥ इति नः सुमहाभाग नारायणगुणान् प्रति ॥ संशयः सुमहान् जातस्तद्भवान् छेत्तुमर्हति ॥ ३ ॥ श्रीशुक उवाच ॥ साधु पृष्टं महाराज हरेश्चरितमद्भुतम् ॥ यत्र भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥ ४ ॥ गीयते परमं पुण्यमृषिभिर्नारदादिभिः ॥ नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥ ५ ॥ निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ ६ ॥

अस्य भगवतः सुरगणैः साध्यः अर्थः प्रयोजनं नास्ति अतः कथं तत्पक्षपाती भवति तथा अगुणस्य गुणकार्याध्यासरहितस्यास्य असुरेभ्यो विद्वेष उद्वेगश्च नैवास्ति अतः कथं तान् द्वेष्टि । अगुणस्येति गुणाधीनौ प्रीतिद्वेषावित्यर्थः ॥ २ ॥ इतीति ॥ हे सुमहाभाग नारायणस्य गुणान् अनुग्रहनिग्रहादीन् प्रति नोऽस्माकं सर्वेषां श्रोतॄणामित्येवं सुमहान् संशयो जातस्तत् तं भवानेव छेत्तुमुपपत्त्या निवारयितुमर्हति ॥ ३ ॥ साध्विति युग्मम् ॥ हे महाराज त्वया साधु सम्यक् पृष्टं यतः अद्भुतं श्रोतृजनाह्लादकं संसारदुःखनिवर्त्तकं च हरेश्चरितं पृष्टं यत्र यस्मिन् दुष्टनिग्रहपूर्वकभक्तरक्षारूपे चरिते परमं पुण्यं सर्वपापनिवर्त्तकमर्थाद्वक्तृश्रोतृजनानामत एव भगवद्भक्तिवर्धनं भागवतस्य प्रह्लादस्य माहात्म्यं नारदादिभिर्ऋषिभिरपि गीयते । कृष्णायेति चतुर्थी द्वितीयार्थे । कृष्णं मुनिं वेदव्यासं नत्वा हरेः कथां कथयिष्ये ॥ ४ ॥ ५ ॥ निर्गुण इति ॥ अजः अव्यक्तः रागद्वेषादिहेतुभूतशरीरेन्द्रियादिभिरपि रहितः प्रकृतेः परः निर्गुणोऽपि चेत्येवंभूतोऽपि भगवान् स्वमायया गुणं सत्त्वादिकमाविश्य बाध्यान् प्रतिबाधकतां गतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्वा । देवासुराणां या परस्परं बाध्यबाधकता तां गतः तत्र हेतुर्जातः न तु द्वेषस्नेहाद्यैः अतस्तस्य दोषो नास्ति ॥ ६ ॥ तस्माद् भगवतो वैषम्यं यत्प्रतीयते तत् गुणवैषम्यमूलकमेव । वैषम्यं च न्यूनत्वमाधिक्यं च तदपि न युगपत्किंतु क्रमेणैवेत्याह—सत्त्वमिति ॥ हे राजन् प्रकृतेर्गुणाः सत्वादय आत्मनो भगवतः पारतन्त्र्यसम्पादका नैव भवन्ति । यद्वा । सत्वादयः प्रकृतेरेव गुणा न त्वात्मनः भगवतः तत्र तस्याध्यासाभावात् तेषां गुणानां ह्रासो न्यूनत्वं बाध्यत्वहेतुः समुल्लासो वृद्धिर्बाधकत्वहेतुः युगपदेव न भवतः किन्तु कालक्रमेणैव अतः स्वेच्छया गुणाधिष्ठानेनापि पक्षपातवैषम्यं नास्ति ॥ ७ ॥ जयेति ॥ सत्वस्य जयकाले आधिक्यस्य काले सात्विकान् देवानृषींश्च अभजत् तदा सत्वगुणं यथाऽधिकं भवति तथा तत्राधिष्ठानमपि तस्याधिकं भवति ततः सः देवादिदेहं प्रविश्य तद्बलमधिकं कुर्वन् असुरादीन् बाधत इत्यर्थः । रजसो जयकाले राजसानभजत् तमसो जयकाले तामसान् यक्षादीन् अभजत् एवं तत्तत्कालस्यानुगुणोऽनुरूपो भवति गुणाधिक्यस्यापि कारणं काल एव न तु सः इत्यर्थः ॥ ८ ॥ ज्योतिरिति ॥ ज्योतिः अग्निः यथा काष्ठादिषु जलं यथा पात्रादिषु आकाशो यथा घटादिषु अधिकेष्वधिकरूपं न्यूनेषु न्यूनरूपं तिष्ठदपि न विषममुच्यते तथैव देवनिष्ठे सत्वगुणेऽधिके सति सोऽपि देवेष्वधिकरूपः तथैवासुरनिष्ठे रजसि न्यूनरूपे न्यूनरूप इत्यसुराणां देवबाध्यत्वे देवानामसुरबाधकत्वे सति सोऽपि देवपक्षपाती असुरबाधक इत्युच्यते ।

सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः॥ न तेषां युगपद् राजन् ह्रास उल्लास एव वा॥ ७ ॥ जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् ॥ तमसो
यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥ ८ ॥ ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यते ॥ विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ॥ ९ ॥

एवमसुरनिष्ठरजस्यधिके सोऽप्यसुरपक्षपाती देवबाधक इति प्रतीत्या विषमोऽप्यविषम एवेत्यर्थः । नन्वेवं काष्ठादौ वह्निरिव देवादिदेहेषु भगवान् किं न प्रतीयते तत्राह । सङ्घातात् देवादिदेहात् न विविच्यते पृथक्तया न प्रतीयते तथापि कवयो निपुणाः मथित्वा देहादिसङ्घातस्य जडत्वेन स्वतः प्रवृत्त्यसम्भवात् जीवस्य चेतनत्वेऽपि पारतन्त्र्यानुभवावृतत्वात्प्रेरकोऽन्यः कश्चिदस्तीति विचार्य तत्राप्यन्ततः स्वभावकर्मादिवादनिरासेन आत्मस्थं देहादिसङ्घाते स्थितमात्मानं भगवन्तं विदन्ति जानन्ति । विन्दन्तीति पाठे लाभोऽपि ज्ञानमेव अत्रापि ज्योतिरादिरिवेति द्रष्टव्यम् । यथा सूर्यकान्तादौ दाहदर्शनात् ज्योतिर्ज्ञायते यथा च गन्धदर्शनाद्वायुरित्यादि । नन्विन्द्रादिपक्षपाती भगवान् कदाचित्सर्वैः प्रत्यक्षीभूत एवासुरान् हन्ति तथैव रजस्तमसोरपि वृद्धौ सत्यां कदाचिदसुरादीनामपि पक्षपाती भवन् देवादीन् हिंस्यात् तदैवोक्तयुक्त्या तस्य साम्यं सिद्ध्येदित्यत आह । ज्योतिरादिरिवेति । तमेव श्लोकं तन्त्रेणार्थान्तराभिधायकं ज्योतिरादिरिव ज्योतिरादिगतं रूपरसगन्धस्पर्शं यथा सङ्घाते तद्वति वस्तुनि आभाति स्पष्टतया भासते किञ्चित् तथा किञ्चित् सङ्घातवशान्न विविच्यते न पृथक् स्पष्टमाभाति च किंतु तदन्तर्गततयैव भाति । एवमेव जगत्यस्मिन् देवासुरादिषु मध्ये भगवान् क्वचित् स्पष्टं भासते क्वचित्तदन्तर्गतं तिष्ठतीत्यर्थः । तत्र ज्योतिषः सत्वप्राधान्यादनावरकत्वात् तद्गतरूपं यथा किञ्चिद्दूरेऽपि शुक्लमिदं क्षीरमिति सुदूरे लक्षद्वयेऽपि चन्द्रोऽयं शुक्ल इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयनेन्द्रियेण गृहीतं स्पष्टमाभाति तथैव देवादेः सत्वप्राधान्यात् सत्वेन अनावरणात्तद्गतो भगवांस्तत्पक्षपाती स्पष्टमेवोपेन्द्रादिस्वरूप आभाति । यथा च जलादेस्तमोरजः-प्राधान्यात्तेनावरणात्तद्गतरसगन्धस्पर्शं न स्पष्टमाभाति किंतु तद्गतः पदार्थस्य योगे एवेन्द्रियगोलकेषु तथा हि रसनायां रसवतो योगे एव रसः श्रोत्रे शब्दवत् आकाशस्य योगे सत्येव शब्दः त्वचि शैत्यादिमद्वस्तुयोग एव स्पर्शः नासायां गन्धवतो वायोर्योग एव गन्ध इति तथैवासुरराक्षसादे रजस्तमःप्राधान्यात्तेनावरणात्तद्गतो भगवांस्तत्पक्षपाती न स्पष्टमाभाति । अत्र मेघातपाभ्यामावरणानावरणे सूर्यस्य यथा तथैव तमःसत्वाभ्यां भगवतो ज्ञेये । ननु तर्हि स्पष्टभानाभावे असुरादिपक्षपातित्वं तस्य कथं प्रतीमस्तत्राह । विदन्तीति । देवपराभवादिकार्यदर्शनलिङ्गेन जानन्तीत्यर्थः ॥ ९ ॥ एवं मायागुणैरेतद्वैषम्यं न स्वाभाविकमिति चेद् गुणपारतन्त्र्यादनीश्वरत्वं स्यात्तत्राह—यदेति ॥ यदा पर एष परमेश्वरः आत्मनः जीवस्य भोगाय पुरः क्रीडासाधनभूतानि स्थावरजङ्गमात्मकानि शरीराणि सिसृक्षुर्भवति तदा स्वमायया साम्येन स्थितं रजः पृथक् सृजति पृथक् कृत्वाङ्गीकरोति । यदा च विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुर्भवति तदा सत्वं पृथक् सृजति । यदा तु क्रीडामुपसंहृत्य शयिष्यमाणो भवति तदासौ विश्वोपसंहाराय

यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ॥ सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥ १० ॥
कालं चरन्तं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत् ॥ य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यजः ॥
तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ॥ ११ ॥ अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ॥ प्रीत्या महाक्रतौ
राजन् पृच्छतेऽजातशत्रवे ॥ १२ ॥

तमः पृथगीरयति अधिकतां नयति ॥ १० ॥ यदा सिसृक्षुरित्यादिना प्रतीतं कालपारतन्त्र्यं वारयन् प्रधानपुरुषपारतन्त्र्यमपि वारयति—कालमिति सार्द्धम् ॥ हे नरदेव प्रधानपुंभ्यां निमित्तभूताभ्यां सत्यकृत् अमोघजगत्कर्ता ईशः चरन्तं वर्तमानं कालमाश्रयं सृजति प्रकृतिपुंसोः सहकारिणं करोति स्वचेष्टारूपत्वात् कालस्य न तत् पारतन्त्र्यम् । हे राजन् य एष सहकारित्वेनाधिकृतः कालः स यदा स्थितिसमये सत्वं गुणमेधयति वर्द्धयति तदा तदीशिता नियन्ता अजः भगवानपि सत्वप्रधानं सुरानीकं देवसमूहमेव एधयति वर्द्धयति इव ततश्च उरुश्रवाः महायशा भगवान् सुराः प्रिया यस्य स तथाभूतः सन् तत्प्रत्यनीकान् सुरप्रतिपक्षान् रजस्तमस्कान् तद्गुणप्रधानान् असुरान् प्रमिणोति हिनस्ति कालशक्तिक्षुभितगुणगतं वैषम्यमिह सन्निधिमात्रेण तदधिष्ठातरि स्फुरतीति प्रकरणार्थः ॥ ११ ॥ अत्रेति ॥ हे राजन् अत्र द्वेषादिराहित्येन समस्यापि दैत्यवधो महाक्रतौ राजसूये पृच्छते अजातशत्रवे युधिष्ठिराय सुरर्षिणा नारदेन प्रीत्या इतिहासः पूर्वमेवोदाहृतो वर्णितोऽस्ति तदानीं तयोर्वधो न सुरपक्षपातेन अपि तु शापेन आसुरीं योनिं गतयोः अनुग्रहार्थ एवेति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टेति युग्मम् ॥ पाण्डुसुतो राजा युधिष्ठिरो महाक्रतौ राजसूये चेदिभूभुजः चेदिदेशराजस्य शिशुपालस्य भगवति वासुदेवे महाद्भुतं योगिजनातिदुर्लभं सायुज्यं दृष्ट्वा विस्मितमनाः सन् मुनीनां शृण्वतां तत्रासीनं सुरर्षिं नारदं पप्रच्छ । "क्रत्यकः" इति सन्ध्यभावः ॥ १३ ॥ १४ ॥ अहो इति ॥ एकान्तिनामेकस्मिन् भगवत्येवान्तः पर्यवसानं विद्यते येषां तेषां भक्तानामपि या दुर्लभा परे तत्त्वे वासुदेवे श्रीकृष्णे प्राप्तिःसायुज्यं सा अस्य विद्विषः चैद्यस्य शिशुपालस्य जातेत्येतत् हि यस्मादत्यद्भुतमत्याश्चर्यं जातम् ॥१५॥ एतदिति ॥ हे मुने एतद्विद्विषोऽपि तत्प्राप्तौ कारणं सर्वे एव वेदितुमिच्छामः यतः भगवन्निन्दया वेनः द्विजैर्हि तमसि नरके पातितः अतः चैद्यस्यापि नरकपात एव योग्यः। अत्र वेनस्य नरकपातः ब्राह्मणशापेन मृतत्वात् निश्चितवत् कथितः। वस्तुतो "ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः ।" इत्यादिना नरकपाताभाव एव ॥१६॥ दमघोषेति ॥ दमघोषसुतः शिशुपालः पापः पापीयान् अत एव कलभाषणात् बाल्ये मधुरभाषणमारभ्य सम्प्रत्यधुनापि गोविन्दे अमर्षी मत्सरी तथैव दुर्मतिर्दन्तवक्त्रोऽपि

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ ॥ वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥ १३ ॥ तत्रासीनं सुरर्षिं राजा पाण्डुसुतः क्रतौ ॥ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ॥ १४ ॥ युधिष्ठिर उवाच ॥ अहो अत्यद्भुतं ह्येतद् दुर्लभैकान्तिनामपि ॥ वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १५ ॥ एतद् वेदितुमिच्छामः सर्व एव वयं मुने ॥ भगवन्निन्दया वेनो द्विजैस्तमसि पातितः ॥ १६ ॥ दमघोषसुतः पाप आरभ्य कलभाषणात् ॥ संप्रत्यमर्षी गोविन्दे दन्तवक्त्रश्च दुर्मतिः ॥ १७॥ शपतोरसकृद् विष्णुं यद् ब्रह्म परमव्ययम् ॥ श्वित्रो न जातो जिह्वायां नान्धं विविशतुस्तमः ॥ १८ ॥ कथं तस्मिन् भगवति दुरवग्राह्यधामनि ॥ पश्यतां सर्वलोकानां लयमीयतुरञ्जसा ॥ १९ ॥ एतत् भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ॥ ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणम् ॥ २० ॥ श्रीशुक उवाच ॥ राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः ॥ तुष्टः प्राह तमाभाष्य शृण्वन्त्यास्तत्सदः कथा ॥ २१ ॥

॥ १७ ॥ शपतोरिति ॥ यदव्ययम् अपक्षयशून्यं परमं ब्रह्म तं विष्णुं श्रीकृष्णमसकृत् वारं वारं शपतोर्द्वयोर्जिह्वायां श्वित्रः श्वेतकुष्ठो न जातो न तत्रान्धंतमो नरकं तौ विविशतुः ॥ १८ ॥ कथमिति ॥ दुरवग्राह्यं दुर्लभं धाम स्वरूपं स्थानं वा यस्य तस्मिन् भगवति अञ्जसा साक्षात् साधनायासमन्तरेणैव वा सर्वलोकानां पश्यतां लयमीयतुः सायुज्यं प्रापतुः । अत्र भाविनोऽपि दन्तवक्त्रलयस्य तज्जातकप्रामाण्येन सिद्धवत् कृत्वा भूतनिर्देश इति ज्ञेयम् ॥ १९ ॥ एतदिति ॥ यतः एतत् भगवति लयात्मकं फलमद्भुततममसंभावितं जातमत एतत्प्रति मे बुद्धिर्भ्राम्यति । वायुना यथा दीपस्यार्चिर्ज्वाला भ्राम्यति तद्वत्। अतः भगवान् सर्वज्ञस्त्वं तत्र कारणं ब्रूहि ॥२०॥ राज्ञ इति ॥ भगवान् सर्वज्ञो नारदर्षिः राज्ञो युधिष्ठिरस्य तत् माहात्म्योद्बोधकत्वेन तत्कथाप्रवृत्त्यङ्गभूतं प्रश्नात्मकं वच आकर्ण्य श्रुत्वा तुष्टः सन् तं राजानमाभाष्य सम्बोध्य सीदन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निषीदन्त्यस्यामिति सद् तस्याः सदः सभायाः शृण्वन्त्याः सत्याः । नुमार्षः । कथाः प्राह स्म ॥ २१ ॥ ननु भगवन्निन्दकस्य नरकपातं कथयतस्तव कोऽभिप्रायः भगवत्पीडाकरत्वेन वा निन्दकस्य पापोक्त्या वा तत्र न तावत् भगवतः पीडास्ति पीडाया देहाभिमानहेतुकत्वाद् भगवतश्च देहाभिमानाभावादित्याह—निन्दनेति ॥ हे राजन् निन्दनं दोषकीर्त्तनं न्यक्कारस्तिरस्कारः तत्र निन्दनन्यक्काराभ्यां दुःखं स्तवसत्काराभ्यां सुखं तथा च निन्दनस्तवाद्यर्थं निन्दास्तुत्यादिना सुखदुःखसाक्षात्कारार्थं जीवानां कलेवरं प्रधानपरयोः प्रकृतिपुरुषयोः अविवेकेन परस्पराध्यासेन कल्पितं रचितम् ॥ २२ ॥ हिंसेति सार्द्धम् ॥ हे पार्थिव यथा तदभिमानेन प्रकृतिपुरुषयोरैक्याध्यासेन भूतानाम् इह देहादौ ममाहमिति वैषम्यं भ्रमः भवति । यथा च तेन वैषम्येण दण्डस्ताडनं पारुष्यं निन्दा तयोः सतोः हिंसा पीडा च भवति अयमहंममात्मकोऽभिमानो यन्निबद्धः यस्मिन् देहे निबद्धस्तस्य देहस्य वधादेव प्राणिनां वध इति व्यवह्रियते । यद्वा । तदभिमानेन देहाभिमानेन सुखदुःखे इव हिंसापि भवति कयोः सतोः दण्डपारुष्ययोस्ताडनतर्जनयोः एवं भूतानामिह संसारे मम अहमिति वैषम्यं भवति शेषं प्राग्वत् ॥ २३ ॥ तथेति ॥ देहादावात्माभिमानेन भूतानां यथा ममाहमिति वैषम्यं

नारद उवाच ॥ निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम् ॥ प्रधानपरयो राजन्नविवेकेन कल्पितम् ॥ २२ ॥ हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा ॥ वैषम्यमिह भूतानां ममाहमिति पार्थिव ॥ यन्निबद्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः ॥ २३ ॥ तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ॥ परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥ २४ ॥ तस्माद् वैरानुबन्धेन निर्वैरेण भयेन च ॥ स्नेहात् कामेन वा युञ्ज्यात् कथंचिन्नेक्षते पृथक् ॥ २५ ॥ यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ॥ न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २६ ॥

तथा हिंसादिकं च भवति अखिलात्मनः परस्य दमकर्तुर्धर्मादिमर्यादामनुसृत्य दैत्यादिषु दण्डं विधातुः यस्य श्रीकृष्णस्य कैवल्यात् अद्वितीयत्वाद्धेतोः तथा जीववत् देहादावभिमानो नास्ति तस्यास्य हिंसा पीडादिकं केन हेतुना कल्प्यते तत्कारणाध्यासाभावादित्यर्थः । अखिलात्मत्वान्न वैषम्यमद्वितीयत्वादभिमन्तव्याभावः तेन चाभिमानाभावः ततः हिंसाद्यभावः दैत्यादिदण्डनमपि धर्ममर्यादामनुसृत्य तेषां हितार्थमेवेति ॥ २४ ॥ तस्मादिति ॥ तस्मात् भगवतो यः कश्चित् वैरानुबन्धेन निर्वैरेण नास्ति वैरं केनापि यस्मिन् तेन भक्तियोगेनेत्यर्थः । वैरभिन्नेन बन्धुत्वादिना वा वैषम्याभावात् भयेन स्नेहात् सेव्यबुद्धिं विनापि केवलस्नेहात् कामेन तत्तद्भोगेच्छया वा तस्मिन्मनो युञ्ज्यात् स वस्तुमहिम्नैव सर्वत्र तमेव पश्यन् पुनः कथञ्चिदपि ततः पृथगन्यद्वस्तु नेक्षते नैव पश्यति अतो भगवतो निन्दादिकृतवैषम्याभावात् यथाकथञ्चिन्मनोयोगाद् ध्यानेन निन्दादिकृतपापस्यापि नाशात्सायुज्यं भवतीति भावः ॥ २५ ॥ यथेति ॥यथा वैरानुबन्धेन भगवन्तं चिन्तयन्मर्त्यः मरणधर्मा दैत्यमनुष्यादिः प्राणी यथा शीघ्रं तन्मयतां तत्समानतां तत्सायुज्यं वा इयात् प्राप्नुयात्तथा भक्तियोगेन चिन्तयन् न प्राप्नुयात् इति मे निश्चिता मतिः संहिताविवक्षाभावान्न सन्धिः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीट इति ॥ यथा कीटः पेशस्कृता भ्रमरेण कुड्यायां भित्तिछिद्रे रुद्धः संरम्भो द्वेषः भयं च स एव योगः हेतुस्तेन तं भ्रमरमनुस्मरन् ध्यायन् तस्य सरूपतां विन्दते ॥ २७॥ एवमिति ॥ एवं भगवति मायामनुजे ईश्वरे कृष्णे वैरेण या अनुचिन्ता ध्यानं तयैव पूतो निवृत्तः पाप्मा येषां ते तमीयुः प्रापुः ॥ २८ ॥ कामादिति ॥ कामादिभ्यो हेतुभ्यो यथा भक्त्या ईश्वरे श्रीकृष्णे मन आवेश्य तदघं द्वेषादिजनितं पापं हित्वा बहवस्तद्गतिं तदीयां गतिं सायुज्यादिलक्षणां गतास्तथा शृणिवति शेषः ॥ २९ ॥ गोप्य इति ॥ हे विभो गोप्यः कामादीश्वरे मन आवेश्य तद्गतिं गता इति सर्वत्र स्पष्टोऽन्वयः । पाण्डवादेः भाविन्या अपि प्राप्तेः निश्चयाद्भूतनिर्देशः ॥ ३० ॥ कतमोऽपि इति ॥ पञ्चानां पूर्वोक्तस्नेहादिमतां मध्ये पुरुषं भगवन्तं प्रति वेनः कतमः एकतमोऽपि न स्यात् न भवति तस्य केवलं स्वभोगपरत्वेन ध्यानेन भगवदावेशाभावान्निन्दादिना पापमेव फलितमतः स नरकाधिकार्येव । तस्मादित्यादि स्पष्टम् ॥ ३१ ॥ मात्रिति ॥ हे पाण्डव चैद्यः दन्तवक्रश्च वः मातृष्वसेयौ तौ विष्णोः पार्षदप्रवरावपि विप्रशापाद्धेतोः पदाद्वै-

कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् ॥ संरम्भभययोगेन विन्दते तत्सरूपताम् ॥२७॥ एवं कृष्णे भगवति मायामनुज ईश्वरे ॥ वैरेण पूतपाप्मानस्तमीयुरनुचिन्तया ॥२८॥ कामाद् द्वेषाद् भयात् स्नेहाद् यथा भक्त्येश्वरे मनः ॥ आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥२९॥ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ॥ संबन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥३० ॥ कतमोऽपि न वेनः स्यात् पञ्चानां पुरुषं प्रति ॥ तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३१ ॥ मातृष्वसेयो वश्चैद्यो दन्तवक्त्रश्च पाण्डव ॥ पार्षदप्रवरौ विष्णोर्विप्रशापात् पदाच्च्युतौ ॥३२॥ युधिष्ठिर उवाच ॥ कीदृशः कस्य वा शापो हरिदासाभिमर्शनः॥ अश्रद्धेय इवाभाति हरेरेकान्तिनां भव॥३३॥ देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम् ॥ देहसंबन्धसंबद्धमेतदाख्यातुमर्हसि ॥ ३४ ॥ नारद उवाच ॥ एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया ॥ सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम् ॥३५॥ पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः॥ दिग्वाससः शिशून् मत्वा द्वास्थौ तान् प्रत्यषेधताम् ॥३६॥

कुण्ठाच्च्युतौ ॥ ३२ ॥ कीदृश इति ॥ हरिदासौ अभिमृशति अभिभवतीति तथाभूतः शापः कीदृगिति शापस्वरूपप्रश्नः कस्येति शापदातुः प्रश्नः मम तु हरेरेकान्तिनां पार्षदप्रवराणां भवः जन्ममरणादिसंसारः अश्रद्धेयः मिथ्या इव आभाति ॥ ३३ ॥ देहेति ॥ अतः देहेन्द्रियप्राणैः हीनानां शुद्धसत्वमयदेहादीनां वैकुण्ठवासिनां प्राकृतदेहसंबन्धेन एतत्संबद्धं बन्धनं त्वमाख्यातुमर्हसि ॥ ३४ ॥ एकदेति ॥ ब्रह्मणः पुत्राः सनन्दनादयो भुवनत्रयं चरन्तो यदृच्छया भगवदिच्छया एकदा विष्णोर्लोकं वैकुण्ठं जग्मुः॥ ३५॥ पञ्चेति ॥ ते यद्यपि पूर्वेषां मरीच्यादीनामपि पूर्वजास्तथापि पञ्च वा षड् वा हायनानि संवत्सरा येषां तेषामर्भाणां बालानामिवाभा येषां ते पञ्च षडित्यत्र डजभाव आर्षः । तथा दिग्वाससः नग्नाश्चेति तान् शिशून् मत्वा द्वाःस्थौ द्वारपालौ जयविजयौ प्रत्यषेधतामन्तःप्रवेशनान्निवारितवन्तौ ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशपन्निति सार्द्धम् ॥ एवं प्रतिषेधेन ते कुपिताः सन्तस्तावशपन् शापमेव दर्शयति। हे बालिशौ रजस्तमोभ्यां रहिते मधुद्विषः भगवतः पादमूले चरणसमीपे स्थाने वैकुण्ठे युवां विषमदृष्टिमन्तौ वासमेव नार्हथः कुतः पुनस्तत्सेवामिति चकारार्थः। अतः कारणात् आशु शीघ्रमेव पापिष्ठामासुरीं योनिं यातं गच्छतम् ॥ ३७ ॥ एवमिति ॥ एवं शप्तौ अतः स्वभवनात् वैकुण्ठात् पतन्तौ तौ तैः कृपालुभिः सनकादिभिः वां युवयोः त्रिभिर्जन्मभिः लोकाय स्वस्थानप्राप्तये शापः कल्पतां तावता अयं शापः समाप्यतामिति पुनः प्रोक्ताविवत्यर्थः ॥ ३८ ॥ जज्ञाते इति ॥ स्पष्टम् ॥ ३९ ॥ हत इति ॥ सिंहरूपिणा नरसिंहरूपेण हरिणा हिरण्यकशिपुर्हतः। धरोद्धारे निमित्ते सति सौकरं वपुर्बिभ्रता हरिणा तत्प्रतिघाती हिरण्याक्षो हतः ॥ ४० ॥ हिरण्येति ॥ हिरण्यं कशिपुः केशवप्रियं स्वपुत्रं प्रह्लादं जिघांसुः सन् तन्मृत्युहेतवे नाना यातनाः अकरोत् ॥ ४१ ॥

अशपन् कुपिता एवं युवां वासं न चार्हथः ॥ रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ॥ पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ॥ ३७ ॥ एवं शप्तौ स्वभवनात् पतन्तौ तैः कृपालुभिः ॥ प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम् ॥ ३८ ॥ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ ॥ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ॥ ३९ ॥ हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ॥ हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ॥ ४० ॥ हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् ॥ जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४१ ॥ सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनम् ॥ भगवत्तेजसा स्पृष्टं नाशक्नोत् हन्तुमुद्यमैः ॥ ४२ ॥ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवस्सुतौ ॥ रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ ॥ ४३ ॥ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ॥ रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात् प्रभो ॥ ४४ ॥ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ॥ अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४५ ॥ वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् ॥ नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४६ ॥

सर्वेति ॥ सर्वभूतानाम् आत्मभूतं प्रशान्तं द्वेषादिरहितं समदर्शनं सममनुस्यूतं ब्रह्मैव पश्यति तथा तं भगवत्तेजसा स्पृष्टं व्याप्तं तं प्रह्लादम् उद्यमैः शस्त्रास्त्रादिभिः हन्तुं नाशक्नोत् ॥ ४२ ॥ तत इति ॥ ततः तौ केशिन्यां विश्रवसः सुतौ सर्वलोकोपतापनौ तौ रावणः कुम्भकर्णश्च इति राक्षसौ जातौ ॥ ४३ ॥ तत्रेति ॥ न्यहनत् हतवान् शवलुगार्षः। शेषं स्पष्टम् ॥ ४४ ॥ ताविति ॥ पूर्वार्द्धं स्पष्टम्। अधुना कृष्णचक्रेण हतमंहो ययोस्तौ तयोः पापमेव हतं न तु तावित्यर्थः। यथा वह्निना स्वर्णस्य मलमेव नाश्यते न स्वर्णमितिवत् अधुना सनकाद्युक्तजन्मत्रयस्य व्यतीतत्वादधुना शापनिर्मुक्तौ जातौ ॥ ४५ ॥ वैरेति ॥ वैरानुबन्धेन तीव्रं ध्यानं तेन प्रथममच्युतसात्मतां तत्र लयं नीतौ प्राप्तावपि पुनस्ततो निःसृत्य विष्णुपार्षदौ सन्तौ हरेः पार्श्वं जग्मतुः स्वाधिकारे स्थितौ ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्वेष इति ॥ हे भगवन् दयिते स्वभावात् प्रीतिविषये महात्मनि पुत्रे प्रह्लादे पितुर्विद्वेषः कथमासीत्तद्ब्रूहि तथा समदर्शनादेरुक्तत्वात् येन कारणेन प्रह्लादस्याच्युतात्मता भगवदेकचित्तत्वं तदपि ब्रूहि ॥ ४७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः प्रथमे सप्तमस्य व्यधादिमाम् ॥ १ ॥ द्वितीये भ्रातृशोकार्त्तो दैत्यो लोकान् विनाशयन् ॥ असान्त्वयत्स्वमात्रादीन् श्लोकाः सार्द्धा द्विषण्मिताः ॥ उवाचपञ्चैवं प्रोक्तमर्द्धषष्टिरनुष्टुभः ॥ २ ॥ भ्रातरीति॥ हे राजन् क्रोडमूर्तिना हरिणा एवं भ्रातरि विनिहते सति हिरण्यकशिपुः रुषा भगवद्विषयकरोषेण शुचा भ्रातृविषयकशोकेन च पर्यतप्यत् ॥ १ ॥ आहेति ॥ रुषा घूर्णः प्रकम्पितगात्रः संदष्टः दशनच्छदः ओष्ठः येन सः कोपेन उत् अतिशयेन ज्वलद्भ्यां चक्षुर्भ्यां कोपाग्निधूमेनैव धूम्रमम्बरमाकाशं निरीक्षन् । शता आर्षः । स इदमाह स्म च ॥ २ ॥ करालेति ॥ करालाभिः दंष्ट्राभिर्युक्तया उग्रया दृष्ट्या दुष्प्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः स्वशूरत्वं ख्यापयन् सदसि शूलमुद्यम्य दानवानिदमब्रवीत् आह चेदमिति पौनरुक्त्यं क्रोधख्यापनाय ॥ ३ ॥ भो भो

युधिष्ठिर उवाच ॥ विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि ॥ ब्रूहि मे भगवन् येन प्रह्लादस्याच्युतात्मता ॥ ४७ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे जयविजयत्रिजन्मवर्णनं नाम प्रथमोऽध्यायः ॥१॥ नारद उवाच ॥ भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ॥ हिरण्यकशिपू राजन् पर्यतप्यद् रुषा शुचा ॥ १ ॥ आह चेदं रुषा घूर्णः संदष्टदशनच्छदः ॥ कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन् धूम्रमम्बरम् ॥ २ ॥ करालदंष्ट्रोऽग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः ॥ शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥ ३ ॥ भो भो दानवदैतेया द्विमूर्धन् त्र्यक्ष शम्बर ॥ शतबाहो हयग्रीव नमुचे पाक इल्वल ॥ ४ ॥ विप्रचित्ते मम वचः पुलोमन् शकुनादयः ॥ शृणुतानन्तरं सर्वे क्रियतामाशु मा चिरम् ॥ ५ ॥ सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् ॥ पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ॥ भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै ॥ रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥

इति युग्मम् ॥ भो भो दानवदैतेयाः इत्यादयः शकुनादयश्च यूयं सर्वे मम वचः शृणुत ततः अनन्तरमाशु शीघ्रमेव कुरुत चिरं विलम्बं मा कुरुत ॥ ४ ॥ ५ ॥ सपत्नैरिति॥ क्षुद्रैः तुच्छैः स्वयमकिञ्चित्करैः सपत्नैः शत्रुभिर्देवैः कर्तृभिः समेनापि हरिणा उपधावनैः सेवनैर्निमित्तभूतैः स्वपार्ष्णिग्राहेण तत्सहायीभूतेन हरिणा प्रयोज्यकर्त्रा दयितः सुहृत् आज्ञानुसारी मे मम भ्राता घातितः ॥ ६ ॥ तस्येति युग्मम् ॥ त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शोच्यस्य मायया वनौकसः पशुरूपस्य भजन्तं भजमानस्य अत एव बालस्य इव अस्थिरात्मनः अव्यवस्थितचित्तस्य अतः मम शूलेन भिन्ना ग्रीवा यस्य तस्य विष्णोर्भूरिणा रुधिरेण रुधिरप्रियं मे भ्रातरं तर्पयिष्ये तर्पयिष्यामि तेन च गतव्यथो भविष्यामि । वस्तुतः घृणेः शुद्धतेजोरूपस्यापि मायया वराहरूपस्य भक्तवात्सल्यात्त्यक्तस्वभावस्येत्यादिमच्छूलाद्भिन्ना पृथग्भूता ग्रीवा यस्य शूलस्य तत्र प्रवेशासम्भवात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुधिरेण भगवदङ्गरागकुङ्कुमेन निर्माल्यभूतेन भ्रातरं भगवद्भक्तं तर्पयिष्ये । " रुधिरं कुङ्कुमं प्रोक्तम् " इति कोशः ॥ ७ ॥८॥ तस्मिन्निति ॥ कूटं दुर्ज्ञानं समीहितं चरितं यस्य तस्मिन् महामायाविनि कूटे कपटवति अहिते शत्राविति वा तस्मिन्नष्टे विष्णुरेव प्राणा जीवनं येषां ते दिवौकसो देवाः शुष्यन्ति स्वयमेव नाशं यास्यन्ति । यथा वनस्पतौ कृत्तमूले सति विटपाः स्वयमेव शुष्यन्ति तथेति । वस्तुतः कूटेषु कपटिष्वपि ईहितं कृपायुक्तं चेष्टितं यस्य तस्मिन् विष्णौ नष्टे अदृश्ये सति इत्यादि ॥ ९ ॥ तावदिति ॥ यावदहमेतत्कुर्यां तावद्यूयं विप्रक्षत्रसमेधितां भुवं यात तत्र च तपोयज्ञादियुक्तान् जनान् सूदयध्वं घातयत ॥ १० ॥ विष्णुरिति ॥ विष्णुः पुमान् द्विजानां क्रियायागाद्यनुष्ठानमेवं मूलं यस्य स तथाभूतोऽस्ति यतोऽसौ यज्ञः धर्ममयश्च यस्मात् देवादीनां परायणं परम आश्रयश्च अतो यज्ञरूपस्य विष्णोर्मूलत्वान्मामनादृत्य तदाश्रयणाच्च ते वध्याः ॥ ११ ॥ यत्रेति ॥ यत्र यत्र द्विजादयः सन्ति तं तं जनपदं देशं यात तं तं च सन्दीपयत दहत वृश्चत छेदं कुरुत । यज्ञोपयोगिवृक्षानिति शेषः ॥ १२ ॥

तस्मिन् कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ ॥ विटपा इव शुष्यन्ति विष्णुप्राणा दिवौकसः ॥ ९ ॥ तावद् यात भुवं यूयं विप्रक्षत्रसमेधिताम् ॥ सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः ॥ १० ॥ विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ॥ देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥११॥ यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः ॥ तं तं जनपदं यात संदीपयत वृश्चत ॥ १२ ॥ इति ते भर्तृनिर्देशमादाय शिरसादृताः ॥ तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥ १३ ॥ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ॥ खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥ १४ ॥ केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ॥ आजीव्यांश्चिच्छिदुर्वृक्षान् केचित् परशुपाणयः ॥ प्रादहञ्छरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥ १५ ॥ एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः ॥ दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥ १६ ॥

इतीति ॥ कदनप्रियाः हिंसाविहारास्ते दानवाः आदृताः सादरा इत्येवंभूतं स्वभर्तृनिर्देशं स्वाम्याज्ञां शिरसा आदाय अङ्गीकृत्य तथा तदाज्ञानुसारेणैव प्रजानां कदनं हिंसनं विदधुः चक्रुः ॥ १३ ॥ पुरेति ॥ पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं पुष्पप्रधानं वनं क्षेत्रं व्रीह्यादेरुत्पत्तिस्थानम् आरामः फलप्रधानं वनम् आश्रम ऋषीणां स्थानम् आकरो रत्नादिस्थानं खेटः कृषीवलानां वासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी एतानि ददहुः दाहादिभिर्नाशयांचक्रुः । एत्वाद्यभाव आर्षः ॥ १४ ॥ केचिदिति सार्द्धम् ॥ केचित् खनित्रैः खननसाधनैः सेत्वादीन्बिभिदुः । केचित्परशुपाणयः आजीव्यान् उपजीव्यान् आम्रपनसादीन् वृक्षान् चिच्छिदुः । प्रादहन्नित्यर्द्धम् । अन्ये तु ज्वलितोल्मुकैः प्रज्वलितकाष्ठैः प्रजानां शरणानि गृहान् प्रादहन् ॥ १५ ॥ एवमिति ॥ एवं दैत्येन्द्रस्यानुचरैः लोके मुहुर्विप्रकृते उपद्रुते सति दिवं परित्यज्यं देवा अलक्षिताः सन्तो भुवि चेरुः यज्ञभागाभावात् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिरण्येति ॥ भ्रातृमरणदुःखितो हिरण्यकशिपुः सम्परेतस्य मृतस्य भ्रातुः कटोदकं प्रेताय प्रदेयमुदकम् आदिपदाच्छ्राद्धादिकं च कृत्वा भ्रातृपुत्रानसान्त्वयत् । अलुक्समासाभाव आर्षः । लोकेऽपि प्रजावती भ्रातृजायेत्यादौ प्रयुज्यते ॥ १७ ॥ शकुनिमिति युग्मम् ॥ रुषा युक्तः देशकालज्ञः जनेश्वरः हिरण्यकशिपुः हे जनेश्वरेति संबुद्ध्यन्तं वा । श्लक्ष्णया मधुरया गिरा शकुन्यादीन् भ्रातृपुत्रान् भानुं तन्नाम्नीं तेषां मातरं स्वजननीं दितिं च इदमाह स्म॥ १८॥ १९॥अम्बेति ॥ हे अम्बाम्ब हे मातः हे वधूर्भ्रातृभार्ये ह्रस्वाभाव आर्षः । हे पुत्राः वीरं हिरण्याक्षं शोचितुं मार्हथ यतो रिपोरभिमुखे शूराणां यो वधः स श्लाघ्यः अतः ईप्सितः इष्ट एव ॥ २० ॥ भूतानामिति ॥ हे सुव्रते मातः प्रपायां पानीयशालायां भूतानां यथा संवासः अध्रुवस्तथा इह संसारे स्वकर्मभिर्द्वारभूतैः कृत्वा दैवेनेश्वरेण एकत्र नीतानां संयोजितानां पुनश्च उन्नीतानां वियोजितानां मातृपुत्रादीनामपि सहवासः अध्रुव एव ॥ २१ ॥ नित्य इति ॥ आत्मा नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः रागादिविडादिमलरहितः सर्वगः सर्ववित् परः

हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः ॥ कृत्वा कटोदकादीनि भ्रातृपुत्रानसान्त्वयत् ॥ १७ ॥ शकुनिं शम्बरं धृष्टं भूतसंतापनं वृकम् ॥
कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ॥ १८ ॥ तन्मातरं रुषा भानुं दितिं च जननीं गिरा॥ श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वरः॥१९॥
हिरण्यकशिपुरुवाच ॥ अम्बाम्ब हे वधूः पुत्रा वीरं माऽर्हथ शोचितुम् ॥ रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ २० ॥ भूतानामिह
संवासः प्रपायामिव सुव्रते ॥ दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥ २१ ॥ नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित् परः ॥ धत्तेऽसावा-
त्मनो लिङ्गं मायया विसृजन् गुणान् ॥ २२ ॥ यथाम्भसा प्रचलता तरवोऽपि चला इव ॥ चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥ २३ ॥
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् ॥ याति तत्साम्यतां भद्रे ह्यलिङ्गो लिङ्गवानिव ॥ २४ ॥

देहादिभ्यः अन्यः अतः मृत इति कृश इति मलिन इति वियुक्त इति अज्ञ इति च मत्वा शोको न कार्यः । कथं तर्हि तस्य संसारस्तत्राह । धत्ते इति असौ आत्मनो मायया अविद्यया शक्त्या मोहितः गुणान् तत्तद्विषयान् सुखादीन् वा विसृजन् सम्पादयन् लिङ्गं मूर्तीः धत्ते । देहेन्द्रियान्तःकरणेषु ममाहमित्यध्यासं करोति । लिङ्गशरीरोपाधिः संसार इत्यर्थः ॥ २२॥ यथेति ॥ उपाधिधर्मा उपहिते भवन्तीति रीत्या यथाम्भसा प्रचलता हेतुभूतेन तत्र प्रतिबिम्बितास्तरवोऽपि चला इव लक्ष्यन्ते वस्तुतस्तरूणां तीरस्थत्वेनाध्यासमन्तरेण जलसंबन्धाभावात् यथा च ग्राहकधर्मा ग्राह्ये भवन्तीति रीत्या भ्राम्यमाणेन चक्षुषा हेतुना मित्त्वे ह्रस्वाभाव आर्षः । एवमग्निप्रपद्येऽपि भूश्चलतीव भ्रमतीव दृश्यते ॥ २३ ॥ एवमिति ॥ हे भद्रे गुणैः सत्वादिभिः मनसि भ्राम्यमाणे सति पुमान् जीवो वस्तुतः अविकल्पः शोकादिविकाररहितोऽपि तत्साम्यतां मनःसमानतां शोकादिमत्त्वां याति समशब्दात्स्वार्थे ष्यञ् ततस्तल् । अतः वस्तुतः अलिङ्गोऽपि अध्यासमन्तरेण देहादिसङ्गरहितोऽपि लिङ्गवानिव देहादिमानिव प्रतीयते॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एष इति युग्मम्॥यः अलिङ्गे लिङ्गादिव्यतिरेकेऽपि लिङ्गभावना देहादावहंममाध्यासःस एष एवात्मनो जीवस्य विपर्यासः अन्यथाभावः एवं विपर्यासादेष एव प्रियैर्योगो भवति सर्वत्र शेषः । अप्रियैर्वियोगश्च चकारादप्रियैर्योगः प्रियैर्वियोगश्च नानाविधं कर्म च संसृतिः स्वर्गनरकादिगमनं सम्भवो जन्मविनाशो मरणं विविधः शोकश्च तत्वज्ञैः स्मृतः अविवेकः देहादिव्यतिरिक्तात्मा ज्ञानं चिन्ता तत्तत्पदार्थानुध्यानं कदाचिद्विवेके जातेऽपि पुनस्तस्याऽस्मृतिः अननुसन्धानं चेति ॥ २५ ॥ २६॥ अत्रेति ॥ अत्र विषये शोकहेतुं विना वृथैवायं शोक इत्यस्मिन्नर्थेऽपि यमस्य प्रेतस्य मृतस्य बन्धवः तेषां च संवादरूपमिमं पुरातनमितिहासं पुराविद उदाहरन्ति वर्णयन्ति तं मया उच्यमानं निबोध ॥ २७ ॥ उशीनरेष्विति ॥ उशीनरेषु देशेषु सुयज्ञ इति नाम्ना विश्रुतः प्रसिद्धः राजा अभूत् । स च युद्धे सपत्नैः शत्रुभिः निहतस्तं च ज्ञातयः सपिण्डा उपासत तत्समीपे आवृत्य स्थिताः॥ २८ ॥ विशीर्णेति युग्मम् ॥ विशीर्णं रत्नमयं कवचं यस्य तं विभ्रष्टानि आभरणानि स्रजश्च यस्य तं शरेण निर्भिन्नं हृदयं यस्य तं मृधे युद्धभूमौ शयान-

एष आत्मविपर्यासो ह्यलिङ्गे लिङ्गभावना ॥ एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥ २५ ॥ संभवश्च विनाशश्च शोकश्च विविधः स्मृतः ॥ अविवेकश्च चिन्ता च विवेकस्मृतिरेव च ॥ २६ ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ यमस्य प्रेतबन्धूनां संवादं तं निबोधत ॥ २७ ॥ उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः ॥ सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥२८॥ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् ॥ शरनिर्भिन्नहृ-दयं शयानमसृगाविलम् ॥ २९ ॥ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ॥ रजःकुण्ठमुखाम्भोजं छिन्नायुधभुजं मृधे ॥ ३० ॥ उशीनरेन्द्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ॥ हताः स्म नाथेति करैरुरो भृशं घ्नन्त्यो मुहुस्तत्पदयोरुपापतन् ॥३१॥रुदन्त्य उच्चैर्द-यिताङ्घ्रिपङ्कजं सिञ्चन्त्य अस्रैः कुचकुङ्कुमारुणैः ॥ विस्रस्तकेशाभरणाः शुचं नृणां सृजन्त्य आक्रन्दनया विलेपिरे ॥ ३२ ॥

मसृजा रुधिरेणाविलं व्याप्तं प्रकीर्णाः केशो यस्य तं ध्वस्ते अक्षिणी यस्य तं रभसा संरम्भेण दष्टः दच्छदः ओष्ठो येन तं रजसा कुण्ठमावृतं मुखाम्भोजं यस्य छिन्नमायुधं भुजश्च यस्य तमुपासतेति पूर्वस्यानुषङ्गः॥२९॥३० ॥ उशीनरेति ॥ उशीनराणां देशानामिन्द्रं स्वपतिं भर्तारं विधिना प्रारब्धेन कर्मणा तथाकृतं प्राणादिरहितं कृतं प्रसमीक्ष्य तन्महिष्यो दुःखिताः सत्यो हे नाथ त्वयि निहते वयमपि हताः स्मेति वदन्त्यः मुहुः करैरुरो भृशं घ्नन्त्यः सत्यः नुमार्षः । तस्य राज्ञः पदयोः समीपे असमन्तात् अपतन् ॥ ३१ ॥ रुदन्त्य इति ॥ उच्चैः अतिशयेन रुदन्त्यः नुमार्षः । कुचेषु निपातेन तत्कुङ्कुमेनारुणैरस्रैः दयितस्य प्रियस्य राज्ञोऽङ्घ्रिपङ्कजं सिञ्चन्त्यः विस्रस्ताः केशा आभरणानि च यासां ताः नृणां प्राणिनां शुचं शोकं सृजन्त्य आक्रन्दनया आक्रोशेन विलेपिरे विलापं चक्रुः । तद्गार्षः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अहो इति ॥ हे प्रभो अहो आश्चर्यं पुरा येन विधात्रा ब्रह्मणा पुण्यवानुशीनराणां तद्वासिप्राणिनां वृत्तिदः वृत्तिप्रदानपूर्वकपालनेन सुखदः कृत आसीत्। अधुना तेन एवाकरुणेन सता भवान् नोऽस्माकं सर्वेषां दृशाम्गोचरां दशां प्रणीतो गमितोऽसि अतस्तेनैवाधुना तेषां भवानेव शुचां शोकानां विवर्द्धनः कृतोऽसि ॥ ३३ ॥ त्वयेति ॥ हे महीपते हे वीर कृतज्ञेन सुहृत्तमेन च त्वया विना वयं कथं स्याम भवेम जीवेम अतः हे वीर यत्र त्वं यास्यसि तत्र ते तवानुयानमनुगमनं तव पादयोः शुश्रूषतीनां शुश्रूषां कुर्वतीनामस्माकं शता आर्षः। दिश आदिश तव शुश्रूषार्थं वयमपि म्रियामहे इत्यर्थः ॥ ३४ ॥ एवमिति ॥ मृतं पतिं परिगृह्य एवं विलपतीनां नुमभाव आर्षः। निर्हारं तस्य दाहाय नयनमनिच्छतीनामेव तासाम् अर्कः अस्तमस्ताचलं प्रति सन्न्यवर्तत संप्राप्तः ॥ ३५ ॥ तत्रेति ॥ प्रेतबन्धूनां परिदेवितं रोदनं स्वपुर्यामेवाश्रुत्य श्रुत्वा बालको भूत्वा पुण्यादृष्टबलात् यमः स्वयमेव तत्रोपागतः सन् ह स्फुटं तान् बन्धूनाह स्म। बालको भूत्वेत्यनेन अतिशोकेऽपि बालस्य वचने शुश्रूषासंभवात् चमत्कारकत्वाच्च ॥ ३६ ॥

अहो विधात्राऽकरुणेन नः प्रभो भवान् प्रणीतो दृगगोचरां दशाम् ॥ उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्धनः ॥ ३३ ॥ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते ॥ तत्रानुयानं तव वीरपादयोः शुश्रूषतीनां दिश यत्र यास्यसि ॥ ३४ ॥ एवं विलपतीनां वै परिगृह्य मृतं पतिम् ॥ अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥ ३५ ॥ तत्र ह प्रेतबन्धूनामाश्रुत्य परिदेवितम् ॥ आह तान् बालको भूत्वा यमः स्वयमुपागतः ॥ ३६ ॥ यम उवाच ॥ अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः ॥ यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचन्त्यपार्थम् ॥ ३७ ॥ अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः ॥ अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ॥ ३८ ॥ य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुम्पते च यः ॥ तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं निग्रहसंग्रहे प्रभुः ॥ ३९ ॥

अहो इति ॥ अहो वयसा अधिकानां प्रौढानां लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामप्यमीषां प्रेतबन्धूनामाश्चर्यजनको विमोहः यतः इमे स्वयं तेन मृतेन राज्ञा सह समानो मृत्युलक्षणो धर्मो येषां ते तथाभूता अपि यत्र यस्मात् अव्यक्तान्मनुष्यदेहः आगतस्तत्रैव प्रलयं गतस्तमपार्थं व्यर्थमेव शोचन्ति अवश्यंभाविनि अर्थे प्रतीकाराभावाद्व्यर्थः शोक इत्याशयः। उक्तं च गीतासु। "अव्यक्तादीनि भूतानि" इत्यादि ॥ ३७ ॥ अहो इति ॥ अहो वयं बाला अपि धन्यतमाः विचारसामर्थ्येनैतदपेक्षया कृतार्थाः यत् यस्माद्रक्षकत्वेनाभिमताभ्यां मातापितृभ्यामत्र दुःखार्णवे संसारे त्यक्ताः अबलाः दुर्बला अपि वृकादिभिरभक्ष्यमाणा वयम् अपि को वास्मान् रक्षिष्यतीति न विचिन्तयामः यतः योऽतिसंकटे गर्भे रक्षति स एव सर्वत्र रक्षिता ॥ ३८ ॥ य इति ॥ हे अबलाः यः अव्ययः ईशः स्वेच्छयैवेदं विश्वं सृजति य एव विश्वं रक्षति यश्च विश्वमवलुम्पते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरति तस्येशितुरिदं चराचरं क्रीडनं क्रीडासाधनं तत्वविद आहुरिति अतः स एव प्राणिनां निग्रहे संहारे संग्रहे पालने च प्रभुः ॥ ३९ ॥ पथीति ॥ पथि जनसहस्रदृष्टिपातसंभवस्थलेऽपि मार्गे च्युतं वस्तु यदि दिष्टेन दैवेन परमेश्वरेण रक्षितं तदा तत्रैव तिष्ठति कस्यापि दृष्टिविषयो न भवति केनापि नापह्रियते पुनरन्वेषणसमये स्वामिना लभ्यते च तद्विहतं तेनेश्वरेण प्राणिदुरदृष्टानुसारेण तिरोहितं भवत्विति चिन्तितं चेत्तदा गृहेऽलक्ष्यस्थाने स्थितं सुगुप्तमपि यत्नतः पाल्यमानमपि विनश्यति अदृष्टं भवति स्वामिना न लभ्यते मात्रा व्यभिचारिण्या व्यभिचारप्राकट्यभिया वने प्रक्षिप्तः अत एवानाथः रक्षकहीनोऽपि तदीक्षितः तेनेश्वरेणायं जीवत्विति कृपादृष्ट्येक्षितश्चेत्तदा येन केनाप्युपलभ्य रक्षितो जीवत्येव अस्य हतः अनेन ईश्वरेणायं म्रियतामिति विचारितश्चेत्तदा गृहेऽपि स्वजनैरोषधमन्त्राद्यनेकोपायैर्गुप्तो रक्षितोऽपि नैव जीवति ॥ ४० ॥ भूतानीति ॥ सर्वशः सर्वाण्येव देवतिर्यङ्नरादिरूपाणि भूतानि शरीराणि निजयोनिः स्वकारणभूतलिङ्गशरीरं तन्निमित्तैः कर्मभिः कस्मिंश्चित्काले भवन्ति जायन्ते कर्मसमाप्तौ च न भवन्ति विनश्यन्ति च तत्र सर्वप्राणिशरीरे प्रकृतौ प्रकृतिकार्यभूते स्थितोऽपि तत्रायम् आत्मा तस्याः प्रकृतेर्गुणैर्देहधर्मैर्जन्मादिभिः न निबध्यते यतोऽन्यतमः देहादत्यन्तवि-

पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ॥ जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति ॥ ४० ॥
भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः ॥ न तत्र हात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४१ ॥
इदं शरीरं पुरुषस्य मोहजं यथा पृथग् भौतिकमीयते गृहम् ॥ यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४२ ॥ यथाऽनलो दारुषु भिन्न ईयते यथाऽनिलो देहगतः पृथग् स्थितः ॥ यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ॥ ४३ ॥

लक्षणः ॥ ४१ ॥ ननु अहं कृशः स्थूल इत्यादि कथं प्रतीयते—इदमिति ॥ इदं देवमनुष्यादि शरीरं पुरुषस्य जीवस्य मोहजमविवेकादात्मत्वेन ज्ञातं तच्च भौतिकम् अतः शरीरं जीवात्पृथगीयते अनुमीयते । यथा गृहं गृहस्वामिनः पृथक् दृश्यते तथेत्यर्थः । तथा च प्रयोगः । अहमित्यात्मत्वेनाभिमतमपि शरीरं द्रष्टुरभौतिकाच्च पुरुषाद्भिन्नं दृश्यत्वात् भौतिकत्वाच्च यथात्यन्ताविवेकिन आत्मत्वेनाभिमतमपि गृहं ततः गृहात् गृही पृथक् तद्वदिति विनाशित्वात् अपि देहः आत्मनः पृथक् इत्याह । यथेति । यथा औदकैः परमाणुभिः जातो बुद्बुदादिर्यथा च पार्थिवैर्जातो घटादिः यथा च तैजसैर्जातः कुण्डलादिर्विनश्यति तथा तैरेव त्रिविधैः परमाणुभिरुपादानभूतैः कालेन निमित्तेन जातो जनो देहो विकृतः कालेनैव परिणतः सन् विनश्यति न त्वात्मेत्यन्वयः ॥ ४२ ॥ पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टान्तः—यथेति ॥ यथाऽनलो दारुतः पृथगवस्थानदशायां प्रतीत्य विषयोऽपि दारुष्ववस्थितो दाहकत्वेन प्रकाशकत्वेन च ततो भिन्न एव ईयते प्रतीयते । यथा च वायुरप्रत्यक्षोऽपि देहगतः प्राणादिरूप उदरनासिकादिचेष्टया भिन्नः स्थित इति प्रतीयते । यथा च नभः सर्वगतमपि न सज्जते क्वापि सङ्गं न प्राप्नोति तथा पुमान् पुरुषः सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयभूतोऽपि तेष्वाश्रितो वा ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परः पृथगेवेत्यर्थः ॥ ४३ ॥ सुयज्ञ इति ॥ हे मूढाः यमनुशोचथ स सुयज्ञोऽयं ननु शेत एव न त्वन्यत्र गतोऽतः किमनुशोचथ नन्वतः प्रागसौ शृणोति उत्तरयति स्म च न त्वधुना ततोऽयं मृत इति शोचाम इति चेत् यस्तु शरीरी पूर्वं श्रोता यश्च अनुवक्ता उत्तरदाता स तु इह लोके कर्हिचिदपि प्रागपि न दृश्येत दृश्यो नासीदेवेत्यर्थः । यस्तु दृश्यो देहः स इदानीमपि दृश्यते अतः इदानीमपि शोकोऽनुचितः ॥४४॥ ननु प्राण एव श्रोता वक्ता चेत्याह—नेति ॥ महान् सर्वेन्द्रियप्रवृत्तिहेतुत्वात् अत एव तेषु मुख्यः " प्राणो वै मुख्यः " इति श्रुतेः । असुः प्राणोऽप्यत्र शरीरे न श्रोता नानुवक्ता अचेतनत्वादिति भावः । कस्तर्हि श्रोता वक्ता च तत्राह । इह देहे यस्त्विन्द्रियवान् तत्तदिन्द्रियैस्तत्तदर्थद्रष्टा श्रोता वक्ता आत्मा स तु प्राणदेहयोः प्राणदेहेन्द्रियादिभ्योऽन्य एव चेतनत्वादित्यर्थः ॥ ४५ ॥ कथं तर्हि कृश इत्यादिदेहधर्मोपाधिस्तत्राह—भूतेति ॥ हि यस्मादयं देहादिभ्योऽन्यस्तस्मादेव भूतेन्द्रियमनोभिर्लिङ्ग्यन्ते लक्ष्यन्त इति तथा तान् उच्चावचान् उत्कृष्टनिकृष्टान् देवतिर्यगादिरूपान् देहान् भजति स्वीकरोति भोगावसाने उत्सृजति त्यजति च कदाचित् तच्चापि देहस्वीकारपरित्यागादिसंसरणमपि स्वेन तेजसा विवेकबलेन उत्सृजति हीत्यनुभवं प्रमाणयति ॥ ४६ ॥ यावदिति ॥ हेत्यवधारणे ।

सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ ॥ यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ॥ ४४ ॥ न श्रोता नानुवक्ताऽयं मुख्योऽप्यत्र महानसुः ॥ यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ॥ ४५ ॥ भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान् विभुः ॥ भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥ ४६ ॥ यावल्लिङ्गान्वितो ह्यात्मा तावत्कर्मनिबन्धनम् ॥ ततो विपर्ययः क्लेशो मायायोगोऽनुवर्तते ॥ ४७ ॥ वितथोऽभिनिवेशोऽयं यद्गुणेष्वर्थदृक् वचः ॥ यथा मनोरथः स्वाप्नः सर्वमैन्द्रियकं मृषा ॥ ४८ ॥ अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः ॥ नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ॥ ४९ ॥

यावदात्मा लिङ्गान्वितो देहेन्द्रियादावभिमानवान् भवति तावदेव तस्य कर्मनिबन्धनं बन्धहेतुर्भवति ततः कर्माभिभवादस्यानन्दस्वरूपस्यापि विपर्ययः देहधर्मभाक्त्वं क्लेशो दुःखाविर्भावश्चेत्ययं मायायोगः अनुवर्त्तते ॥४७॥ वितथेति ॥ गुणेषु गुणकार्येषु विषयजन्यसुखादिषु यदर्थः परमार्थ इति दृग् दृष्टिः वचः " अपामसोममृता अभूमाप्सरोभिर्विहराम " इत्यादिवचनं च तदयं वितथो निष्फलो मिथ्यैवाभिनिवेशः अभिमानं यथा जाग्रदवस्थायां मनोरथप्राप्तराज्यादिसुखं यथा स्वप्नावस्थायां प्राप्तस्त्रीसंभोगादिसुखं च यथा मृषा वस्त्वभावेऽपि तदारोपितत्वात् तथा सर्वमैन्द्रियकमिन्द्रियजन्यं सुखादिकं मृषेति ॥ ४८ ॥ अथेति ॥ अथ तस्माच्छोकस्यानर्थहेतुत्वादित्यर्थः । इह संसारे तद्विदः तत्त्वज्ञाः पण्डिताः नित्यमात्मानमनित्यं देहं वा नैव शोचन्ति आत्मा तु नित्य एवातो नैव शोकार्ह अविनाशित्वात् । देहादयस्त्वनित्या नश्वरस्वभावा एव शोचतां शोचद्भिरपि तेषां स्वभावो नश्वरत्वमन्यथा कर्त्तुं नैव शक्यते इति शोको वृथेति । यद्वा । ननूपदेष्टारोऽपि शोचन्तो दृश्यन्ते तत्राह । नान्यथेति । ज्ञानदार्ढ्याभावाद् शोचतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वभावो न निवर्त्तते ॥ ४९ ॥ लुब्धक इति ॥ ईश्वरेण पक्षिणामन्तको नाशको निर्मितः कश्चित् लुब्धको विपिने वने यत्र पक्षिणोऽपश्यत्तत्र तत्र जालं वितत्य विस्तार्य तान् मांसादिभिः प्रलोभयन् विदधे विशेषेण धृतवानित्यन्वयः । प्रलोभनमिति पाठे प्रलोभनं विदधे कृतवानित्यर्थः ॥ ५० ॥ कुलिङ्गेति ॥ तत्र वने विचरन् सन् कुलिङ्गः पक्षिविशेषः कुलिङ्गयोर्मिथुनं युगलं समदृश्यत दृश्यं बभूव तयोर्मध्ये कुलिङ्गी लुब्धकेन सहसा आपन्ना प्रलोभिता ॥ ५१ ॥ सेत्यर्द्धम् ॥ सा च कुलिङ्गस्य महिषी भार्या कालेन यन्त्रिता प्रेरिता सती शिचस्तन्त्यां जालसूत्रे असज्जत बन्धनं प्राप ॥५२॥ कुलिङ्ग इति॥तां कुलिङ्गीं तथा आपन्नाम् आपदं प्राप्ताम् अत एव कृपणां दीनां निरीक्ष्य कुलिङ्गो भृशदुःखितस्तां मोचयितुम् अकल्पः असमर्थः कृपणो दीनश्च स्नेहात्पर्यदेवयत् विलापं कृतवान् ॥५३॥ अहो इति ॥ देवो ब्रह्मा यमो वा अतीव अकरुणः कृपाहीन इत्यर्थः । यतः विभुः महानपि आ सर्वतः करुणयाऽनुकम्पया । यद्वा। करुणया मयि कृपावत्या कृपणं दीनं मा मामनुशोचन्त्या दीनया स्त्रिया किं करिष्यति

लुब्धको विपिने कश्चित् पक्षिणां निर्मितोऽन्तकः ॥ वितत्य जालं विदधे तत्र तत्र प्रलोभयन् ॥ ५० ॥ कुलिङ्गमिथुनं तत्र विरचत् समदृश्यत॥ तयोः कुलिङ्गी सहसा लुब्धकेन प्रलोभिता ॥ ५१ ॥ सासज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता ॥ ५२ ॥ कुलिङ्गस्तां तथापन्नां निरीक्ष्य भृशदुःखितः ॥ स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ॥ ५३ ॥ अहो अकरुणो देवः स्त्रिया करुणया विभुः ॥ कृपणं माऽनुशोचन्त्या दीनया किं करिष्यति ॥ ५४॥ कामं नयतु मां देवः किमर्धेनात्मनो हि मे ॥ दीनेन जीवता दुःखमनेन विधुरायुषा ॥ ५५ ॥ कथं त्वजातपक्षांस्तान् मातृहीनान् विभर्म्यहम् ॥ मन्दभाग्याः प्रतीक्षन्ते नीडे मे मातरं प्रजाः ॥ ५६ ॥ एवं कुलिङ्गं विलपन्तमारात् प्रियावियोगातुरमश्रुकण्ठम् ॥ स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ॥५७॥ एवं यूयमपश्यन्त आत्मापायमबुद्धयः॥ नैनं प्राप्स्यथ शोचन्त्यः पतिं वर्षशतैरपि ॥ ५८ ॥

॥ ५४ ॥ काममिति ॥ यदि मम भार्यां नयति तदा स देवो मामपि कामं यथेष्टं नयतु यतः आत्मनो देहस्यार्द्धभागस्य पत्नीरूपस्य नीतत्वादवशिष्टेनार्द्धेनानेन मम देहेन विधुरायुषा भार्याशून्यजीवितेन अत एव दीनेन अत एव दुःखं यथा भवति तथा जीवता मे मया लोके किं प्रयोजनम् ॥ ५५ ॥ कथं त्विति ॥ तुः पादपूर्त्तौ । ये मे प्रजाः पुत्राः मृतमातृत्वान्मन्दभाग्या नीडे स्थिताः आहारार्थं मातरं प्रतीक्षन्ते न जाताः पक्षाः येषां तान्मातृहीनानहं कथं बिभर्मि पुष्णामि ॥ ५६ ॥ एवमिति ॥ एवं प्रियावियोगेनातुरं व्याकुलम् अत एव अश्रुकण्ठं विलपन्तं तं कुलिङ्गं स प्रसिद्धः शाकुनिकः पक्षिहन्ता कालेन प्रहितः प्रेरितः विलीनः छन्नः सन्नाराददूरादेव शरेण विव्याध ताडितवान् ॥ ५७ ॥ एवमिति ॥ हे अबुद्धयः अज्ञाः एवं कुलिङ्गवत् यूयमपि आत्मापायं स्वमृत्युमपश्यन्त्यः अननुसंदधत्यः पतिं शोचन्त्यो वर्षशतैरप्येनं न प्राप्स्यथ किंतु मृत्युमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्स्यथ ॥ ५८ ॥ बाल इति ॥ बालस्वरूपे यमे एवं प्रवदति सति मृतस्य सुयज्ञस्य सर्वे ज्ञातयस्तद्वचनश्रवणेन विस्मितचेतसः सन्तः सर्वं सुखदुःखादिकम् अनित्यमयथोत्थितं वृथैवात्मन्यारोपितं मेनिरे ॥ ५९ ॥ यम इति ॥ यत्साम्परायिकं परलोककृत्यं तच्चक्रुः स्पष्टमन्यत् ॥६०॥ तत इति अर्द्धम् ॥ स्पष्टम् । अशोचत इति पाठे अडागम आर्षः ॥ ६१ ॥ क इति ॥ अयं स्वः अयं परः इत्यभिनिवेश एवाज्ञानं तेन विना अत्र संसारे देहिनां क आत्मा कः परः कः स्वीयः को वा पारक्यः ॥ ६२ ॥ इतीति ॥ सस्नुषा स्नुषया हिरण्याक्षस्त्रिया सहिता । स्पष्टमन्यत् ॥ ६३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीये सप्तमस्य व्यधादिमाम् ॥ २ ॥ तृतीये तपसा तुष्टे हिरण्यकशिपोर्विधिः ॥ तस्मै वरानदात्तत्र श्लोका नवगुणा मताः ॥ चत्वार्युवाचेति चैकचत्वारिंशदनुष्टुभः ॥३॥ हिरण्येति ॥ हे राजन् इति हिरण्यकशिपुरात्मानम-

हिरण्यकशिपुरुवाच ॥ बाल एवं प्रवदति सर्वे विस्मितचेतसः॥ ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥५९॥ यम एतदुपाख्याय तत्रैवान्तरधीयत ॥ ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत् साम्परायिकम् ॥ ६० ॥ ततः शोचत मा यूयं परं चात्मानमेव च ॥ ६१॥ क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा ॥ स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम् ॥ ६२ ॥ नारद उवाच ॥ इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ॥ पुत्रशोकं क्षणात् त्यक्त्वा तत्त्वे चित्तमधारयत् ॥ ६३ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे कुलिङ्गकथनेन दितिशोकापनयनं नाम द्वितीयोऽध्यायः ॥ २ ॥ नारद उवाच ॥ हिरण्यकशिपू राजन्नजेयमजरामरम् ॥ आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत ॥१॥ स तेपे मन्दरद्रोण्यां तपः परमदारुणम् ॥ ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः ॥ २ ॥ जटादीधितिभी रेजे संवर्तार्क इवांशुभिः ॥ तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ॥ ३ ॥ तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः ॥ तिर्यगूर्ध्वमधो लोकानतपद् विष्वगीरितः ॥ ४॥

जेयं शत्रुभिर्जेतुमशक्यम् अजरमपक्षयरहितम् अमरं मृत्युशून्यम् अप्रतिद्वन्द्वं प्रतिपक्षहीनम् एकराजं त्रिषु लोकेषु एकमेव राजानं व्यधित्सत कर्तुमैच्छत् वक्ष्यमाणाभिप्रायेण ब्रह्मलोकपर्यन्तं स्वस्यैवैकाधिपत्यं कामयमानोऽभूत् ॥ १॥ स इति ॥ स हिरण्यकशिपुः ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य सः पादाङ्गुष्ठेनाश्रिता अवनिर्येन सः मन्दराचलस्य पर्वतस्य द्रोण्यां तत्समीपस्थगिरिद्वयान्तरालदेशे परमदारुणं दुष्करं तपस्तेपे ॥२॥ जटानां दीधितिभिः कान्तिभिः रेजे अंशुभिः रश्मिभिः संवर्तार्क इव प्रलयकर्ता सूर्यो यथा राजते दीप्यते तद्वत् । तस्मिन् हिरण्यकशिपौ तपस्तप्यमाने सति तद्भयाभावात् पूर्वं ये देवाः तद्भयेनालक्षिताः सन्तो भुवि चेरुस्ते पुनः स्वानि स्थानानि भेजिरे ॥ ३ ॥ तस्येति ॥ तस्य मूर्ध्नः समुद्भूतो निःसृतः तपोमयः तपसैधितः सधूमोऽग्निः विष्वगीरितः सर्वतः प्रसृतः सन् तिर्यगूर्ध्वमधश्च स्थितान् लोकान् अतपत् तापयामास ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चुक्षुभुरिति ॥ नद्यः उदन्वन्तः समुद्राश्च चुक्षुभुः वृद्धिं प्राप्ताः द्वीपैरद्रिभिश्च सहिता भूश्चचाल ग्रहैः शुक्रादिभिः सहितास्तारा निपेतुः दश दिशश्च तपोमयाग्निना जज्वलुः॥५॥ तेनेति सार्द्धम् ॥ तेनाग्निना दैत्येन्द्रस्य तपोवर्धिताग्नितापेन । स्पष्टमन्यत् ॥६॥ तस्येति ॥ हे भूमन् हे अभिभूः अभितो भवतीत्यभिभूः सर्वाधिपतिस्तत्संबोधनं यावत् तव बलिहाराः पूजाकारिणः लोकाः न नङ्क्ष्यन्ति तावदेव यदि मन्यसे तर्हि तस्य सर्वलोकोपद्रवस्योपशमं निवारणं विधेहि कुरु । अभिभोः इति सविसर्गपाठे भो इति सम्बोधनम् । अभि अभितः यावन्न नङ्क्ष्यन्ति इति संबन्धः ॥ ७ ॥ ब्रह्मणस्तस्मिन् द्वेषमुत्पादयितुमाहुः—तस्येति ॥ दुश्चरमितरैः कर्तुमशक्यं तपश्चरतस्तस्य योऽयं संकल्प इत्यर्थः । स सर्वज्ञस्य तव किं न विदितः किलेत्यवधारणे ज्ञात एव तथाप्यस्माभिर्निवेदितं त्वया श्रूयताम् ॥८॥ सृष्ट्वेति युग्मम् ॥ परमेष्ठी ब्रह्मा तपसि व्रतोपवासादौ योगे आसनप्राणायामादौ च यः समाधिः निष्ठा तेन चराचरात्मकमिदं सर्वं जगत्सृष्ट्वा सर्वपूज्यः सन् सर्वधिष्ण्येभ्यः इन्द्रादिस्थानेभ्यः श्रेष्ठं यन्निजासनं सत्यलोकं तत् यथा अध्यास्ते अधिति-

चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः ॥ निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥ ५ ॥ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः ॥ धात्रे विज्ञापयामासुर्देवदेव जगत्पते ॥ दैत्येन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ॥ ६ ॥ तस्य चोपशमं भूमन् विधेहि यदि मन्यसे ॥ लोका न यावन्नङ्क्ष्यन्ति बलिहारास्तवाभि भोः ॥ ७ ॥ तस्यायं किल संकल्पश्चरतो दुश्चरं तपः ॥ श्रूयतां किं न विदितस्तवाथापि निवेदितम् ॥ ८ ॥ सृष्ट्वा चराचरमिदं तपोयोगसमाधिना ॥ अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥ ९ ॥ तदहं वर्धमानेन तपोयोगसमाधिना ॥ कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः॥१०॥ अन्यथेदं विधास्येऽहमयथापूर्वमोजसा ॥ किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः ॥ ११ ॥ इति शुश्रुम निर्बन्धं तपः परममास्थितः ॥ विधत्स्वानन्तरं युक्तं स्वयं त्रिभुवनेश्वर ॥ १२ ॥ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते ॥ भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १३ ॥

इति तथाहमपि देहस्य वारंवारं मरणेऽपि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिस्तपस्तथा वर्धमानेन तपोयोगसमाधिना तदेव स्थानम् आत्मनः साधयिष्ये ॥ ९ ॥ १० ॥ अन्यथेति ॥ ओजसा तपोबलेन इदं विश्वम् अन्यथा वैपरीत्येन अयथापूर्वं यथा पूर्वन्नासीत्तथा विधास्ये पापमेव सुखसाधनम् पुण्यं दुःखसाधनं असुराणां स्थानं स्वर्गः देवानां च स्थानं पातालादीत्येवं सर्वं पूर्वतो वैपरीत्यमेव यथेष्टं सम्पादयिष्यामि अवान्तरकल्पान्ते कालेन निर्धूतैः कालेन विनाश्यैरन्यैर्वैष्णवादिभिः ध्रुवादिपदैः किं प्रयोजनम् अतो ब्रह्मलोकमेव साधयिष्यामि ॥ ११ ॥ इतीति ॥ इत्येवं त्वत्पदहरणे तस्य निर्बन्धमाग्रहं शुश्रुम तदर्थमेव परमं तपोऽयमास्थितः त्वमपि त्रिभुवनेश्वरः सर्वथा तत्प्रतीकारे समर्थोऽसि अतो यदत्र युक्तं तदनन्तरमाश्वेव विधत्स्व निर्विसर्गपाठे हे त्रिभुवनेश्वर॥१२॥तव स्थानभ्रंशे द्विजादीनां कष्टं स्यादित्याशयेनाहुः—तवेति ॥ हे जगत्पते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवेदं पारमेष्ठ्यं सर्वोत्कृष्टमासनं स्थानं द्विजानां गवां च भवाय उद्भवाय श्रेयसे सुखाय भूत्यै ऐश्वर्याय क्षेमाय लब्धपालनाय विजयाय उत्कर्षाय चेति ॥ १३ ॥ इतीति ॥ हे नृप इत्येवं देवैर्विज्ञापितः भगवानात्मभूर्ब्रह्मा भृगुदक्षाद्यैः प्रजेश्वरैः परीतः दैत्येश्वरस्य आश्रमं तपश्चर्यास्थानं ययौ ॥ १४ ॥ नेति युग्मम् ॥ वल्मीकैस्तृणैः कीचकैर्वेणुभिश्च प्रतिच्छन्नं पिपीलिकाभिः आचीर्णं समन्तात् भक्षितं मेदश्च त्वक् च मांसं च शोणितं च यस्य तं तपसा तपोऽग्निना लोकान् तपन्तम् अभ्रैरपिहितः प्रतिच्छन्नोऽपि रविर्यथा नैव लक्ष्यते तथा वल्मीकादिभिः प्रतिच्छन्नं हंसवाहनो ब्रह्मा तत्र गत्वा प्रथमं तं न ददर्श पश्चात्कथंचिद्विलक्ष्य विस्मितः सन् प्रहसन् प्राह स्म ॥ १५ ॥ १६ ॥ उत्तिष्ठेति ॥ हे काश्यप त्वमुत्तिष्ठोत्तिष्ठ वीप्सा आदरार्था । तव भद्रमेव भविष्यति यतः तपसा सिद्धोऽसि फलसिद्धियोग्यतपःसंपन्नोऽसि इत्यर्थः । अत एवाहं वरदः अभीष्टदोऽनुप्राप्तोऽस्मि अतस्त्वया स्वेप्सितो वरो व्रियताम् ॥ १७ ॥ अद्राक्षमिति ॥ अहं ते तवैतत् हृत्सारं धैर्यं महदद्भुतमत्याश्चर्यजनकमद्राक्षं दृष्टवानस्मि । हि यस्मात् दंशैर्मक्षिकाविशेषैर्भक्षितो

इति विज्ञापितो देवैर्भगवानात्मभूर्नृप ॥ परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमम् ॥ १४ ॥ न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ॥ पिपीलिकाभिराचीर्णं मेदस्त्वङ्मांसशोणितम् ॥ १५ ॥ तपन्तं तपसा लोकान् यथाऽभ्रापिहितं रविम् ॥ विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः ॥ १६ ॥ ब्रह्मोवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप ॥ वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १७ ॥ अद्राक्षमहमेतत् ते हृत्सारं महदद्भुतम् ॥ दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते ॥ १८ ॥ नैतत् पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे ॥ निरम्बुर्धारयेत् प्राणान् को वै दिव्यसमाः शतम् ॥ १९ ॥ व्यवसायेन तेऽनेन दुष्करेण मनस्विनाम् ॥ तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ॥ २० ॥ ततस्त आशिषः सर्वा ददाम्यसुरपुङ्गव ॥ मर्त्यस्य ते अमर्त्यस्य दर्शनं नाफलं मम ॥ २१ ॥ नारद उवाच ॥ इत्युक्त्वाऽऽदिभवो देवो भक्षिताङ्गं पिपीलिकैः ॥ कमण्डलुजलेनौक्षद् दिव्येनामोघराधसा ॥ २२ ॥

देहो यस्य तस्य तव प्राणा अस्थिषु शेरते अस्थीनि भुञ्जानास्तिष्ठन्तीति ॥ १८ ॥ नेति ॥ एतत् एवंविधं तपः पूर्वर्षयो भृग्वादयो न चक्रुर्न चापरे अर्वाचीनाः करिष्यन्ति को वै दिव्यसमाः शतं देवमानेन संवत्सरशतपर्यन्तं निषिद्धमम्बु येन स निरम्बुस्त्यक्तोदकः सन् प्राणान् धारयेत् न कोऽपीत्यर्थः ॥ १९ ॥ व्यवसायेनेति ॥ हे दितिनन्दन मनस्विनाम् ऋष्यादीनामपि शेषे षष्ठी दुष्करेणानेन तपोविषयकेन ते तव व्यवसायेनैव तावदहं जितो वशीकृतोऽस्मि तपोनिष्ठेन भवता तु सुतरां जितोऽस्मि ॥ २० ॥ तत इति ॥ ततस्तस्मात् हे असुरपुङ्गव ते तुभ्यं सर्वा आशिषः सर्वान् इष्टान् अर्थान् ददामि यतः मर्त्यस्य मरणधर्मकदेहवतस्तव अमर्त्यस्य देवस्य द्विपरार्धायुषो मम दर्शनमफलं निष्फलं न भवति किं तु सफलमेवेत्यर्थः । अतो वरं वृणीष्व ॥ २१ ॥ इतीति ॥ आदौ भवति इति आदिभवो देवो ब्रह्मा एवमुक्त्वा तेनाप्रार्थितत्वात्कृपावशात् अमोघम् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टार्थसाधकं राधः प्रभावो यस्य तेन दिव्येन कमण्डलुजलेन पिपीलिकैर्भक्षितमङ्गं यस्य तं दैत्यमङ्गादिसम्पत्त्यर्थमौक्षत् प्रोक्षितवान् ॥ २२ ॥ स इति सार्द्धम् ॥ तत् ततः प्रोक्षणादेव सहः मनःशक्तिः ओजः इन्द्रियशक्तिः बलं देहशक्तिः तैरन्वितः सर्वैरवयवैः पाणिपादादिभिः सम्पन्नो युक्तः वज्रसंहननः वज्रवद्दृढगात्रः युवा युवावस्थां प्राप्तः तप्तस्य हेम्न इवाभा कान्तिर्यस्य सः हिरण्यकशिपुः कीचकाच्छन्नाद्वल्मीकात् कीटादिसम्पादितमृच्चयात् उत्थितः विनिःसृतः एधसः काष्ठाद्यथा विभावसुः अग्निः प्रादुर्भवति तद्वदित्यर्थः ॥ २३ ॥ स इति ॥ स एवंविधः हंसवाहं देवं ब्रह्माणम् अम्बरे आकाशे अवस्थितं निरीक्ष्य तस्य दर्शनेन महान् उत्सवः आह्लादो यस्य स तथाभूतः शिरसा भूमौ ननाम ॥ २४ ॥ उत्थायेति ॥ तत उत्थाय दृशा नेत्रेण विभुं ब्रह्माणमीक्षमाणः हर्षेणाश्रूणि पुलकोद्भेदो रोमोद्गमश्च यस्य तादृशः प्राञ्जलिः प्रह्वः नम्रश्च सन् गद्गदया स्खलिताक्षरया गिरा अगृणात् अस्तावीत् ॥ २५ ॥ कल्पान्त इति युग्मम्॥ कल्पान्ते दैनंदिनप्रलये कालेन निमित्तेन सृष्टेन प्रेरितेन अन्धेन तमसा प्रकृत्यवयवेन तमोगुणेन

स तत्कीचकवल्मीकात् सहओजोबलान्वितः ॥ सर्वावयवसंपन्नो वज्रसंहननो युवा ॥ उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥ स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् ॥ ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥ उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम् ॥ हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयाऽगृणात् ॥ २५ ॥ हिरण्यकशिपुरुवाच ॥ कल्पान्ते कालसृष्टेन योऽन्धेन तमसा वृतम् ॥ अभिव्यनग् जगदिदं स्वयंज्योतिः स्वरोचिषा ॥ २६ ॥ आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति ॥ रजःसत्त्वतमोधाम्ने पराय महते नमः ॥ २७ ॥ नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये ॥ प्राणेन्द्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥ २८ ॥ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ॥ चित्तस्य चित्तेर्मनइन्द्रियाणां पतिर्महान्भूतगुणाशयेशः ॥ २९ ॥

नतु ध्वान्तेन आवृतमिदं जगत् यः स्वयंज्योतिः स्वयंप्रकाशरूपः स्वरोचिषा स्वप्रकाशेन पुनरभिव्यनक् अभिव्यक्तमकरोत् । यश्च त्रिवृता त्रीन् गुणान् वृणोति सृष्ट्यादि-कार्यार्थं स्वीकरोति इति तथा तेन आत्मना इदं विश्वं सृजति अवति रक्षति लुम्पति संहरति च तस्मै रजःसत्वतमसां धाम्ने आश्रयाय पराय परमेश्वराय महते व्यापकाय नमः ॥ २६ ॥ २७ ॥ नम इति ॥ आद्याय बीजाय सर्वेषामादिकारणाय ज्ञानं ज्ञप्तिः विज्ञानं विशेषज्ञानं विषयाकारं ते मूर्त्ती यस्य प्राणाश्च उभयविधेन्द्रियाणि च मनश्च बुद्धिश्च विकाराश्च पृथ्व्यादयस्तैर्व्यक्तिं कार्यरूपतामीयुषे प्राप्तवते नमः । एतेन स्वप्रकाशत्वं जगत्प्रकाशकत्वं निमित्तत्वमुपादानत्वं चोक्तम् ॥ २८ ॥ त्वमिति ॥ मुख्येन प्राणेन सूत्रात्मकेन जगतो जङ्गमस्य तस्थुषः स्थावरस्य च त्वमेवेशिषे नियन्ता भवसि प्राणेनैव रूपेण प्रजानां पतिर्भवसि तथा चित्तस्य चित्तेस्तत्परिणामभूतायाश्चेतनायाश्च मनसश्च तन्नियम्यानामिन्द्रियाणां च पतिः पालकश्च महांश्च त्वमेव यतो भूतानामाकाशादीनां तद्गुणानां शब्दादिविषयाणाम् आशयानामन्तःकरणानां तद्वासनानां चेशः स्रष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेन महत्त्वमीश्वरत्वं स्रष्टृत्वं च दर्शितम् ॥ २९ ॥ त्वमिति ॥ त्रय्या तन्वा वेदत्रयरूपेण चत्वारो होतारो होता उद्गाता अध्वर्युर्ब्रह्मेति यत्र तच्चातुर्होत्रकं कर्म तद्विषयया विद्यया च त्वमेव सप्ततन्तून् तन्यन्ते विस्तार्यन्त इति तन्तवः अग्निष्टोमोक्थषोडश्यतिरात्राप्तोर्यामवाजपेयरूपाः सप्तविधा यज्ञाः तान् वितनोषि विस्तारयसि त्वमेव एकः आत्मवतां जीवानाम् आत्मा अनादिः अनन्तपारः नास्त्यन्तः पारश्च कालदेशाभ्यां यस्य स कविः सर्वज्ञः अन्तरात्मा अन्तर्यामी चेति ॥ ३० ॥ त्वमेवेति ॥ अनिमिषः निमेषोन्मेषादिरहितः सर्वद्रष्टा कालोऽपि त्वमेव अतो लवाद्यैरवयवैर्जनानामायुः क्षिणोषि क्षपयसि तथा त्वमेव कूटस्थो निर्विकारः आत्मा परमेष्ठी परमे स्वस्वरूपे स्थानशीलः अजः जन्मशून्यः महान् व्यापकः जीवलोकस्य जीवयिता तस्य आत्मा च ॥ ३१ ॥ त्वत्त इति ॥ परं कारणमुत्कृष्टं वा अपरं कार्यं निकृष्टं वा तत्रापि राजत् जङ्गमम् अनेजत् स्थावरं च यत्किञ्चिदपि वस्तु त्वत्तो व्यतिरिक्तं नास्ति सर्वाः विद्या वेदोपवेदादयः कलास्तदङ्गानि व्याकरणादीनि च तवैव तनवः शरीरभूताः हिरण्यरूपं प्रकाशमानं

त्वं सप्ततन्तून्वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च ॥ त्वमेक आत्मात्मवतामनादिरनन्तपारः कविरन्तरात्मा ॥३०॥ त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ॥ कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ॥ ३१ ॥ त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति ॥ विद्या कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥ ३२ ॥ व्यक्तं विभो स्थूलमिदं शरीरं येनेन्द्रियप्राणमनोगुणांस्त्वम् ॥ भुङ्क्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ॥ ३३ ॥ अनन्ताव्यक्तरूपेण येनेदमखिलं ततम् ॥ चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः॥३४॥यदि दास्यस्यभिमतान् वरान् मे वरदोत्तम ॥ भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ॥३५॥

ब्रह्माण्डं गर्भो यस्य सः बृहद् ब्रह्मासीति त्रिपृष्ठः त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः बहिरपि स्थित इत्यर्थः ॥ ३२ ॥ व्यक्तम् इति ॥ हे विभो येन शरीरेण पारमेष्ठ्ये सर्वोत्कृष्टे स्वधामनि स्वस्वरूपे स्थित एव त्वम् इन्द्रियप्राणमनसां गुणान् विषयान् भुङ्क्षे न त्वस्मदादिवत्स्वरूपतिरोधानेन तदिदं तव शरीरं व्यक्तं वैराजाख्यं कार्यभूतमेव यतः स्थूलं वस्तुतस्तु त्वमव्यक्तः अतीन्द्रियः आत्मा सर्वव्यापकः पुरुषः सर्वान्तर्यामी पुराणः सर्वकारणकारणभूतो जन्मादिविकाररहितो नित्यश्च ॥ ३३ ॥ अनन्तेति ॥ अनन्तम् अव्यक्तं च यद्रूपं स्वरूपं तेन येनाखिलमिदं विश्वं ततं मृत्सुवर्णादिना घटकुण्डलादिवद्व्याप्तं तस्मै चिच्छक्तिःविद्या अचिच्छक्तिर्माया ताभ्यां युक्ताय तस्मै भगवते नमः॥ ३४॥ यदीति ॥ हे वरदोत्तम हे प्रभो यदि ममाभिमतान् वरान् त्वं दास्यसि तदा त्वया विसृष्टेभ्यो भूतेभ्यः सकाशान्मम मृत्युर्मा भूदिति । अत्रामरत्वप्रार्थने ब्रह्मा प्रत्याख्यास्यति अतः युक्त्या अमरत्वं वरणीयमिति दैत्याशयः । ब्रह्मणैव सर्वभूतानां सृष्टत्वादपरः कोऽवशिष्ट इति भावः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्योः स्वतोऽपि संभवादत आह—नेति ॥ गृहादीनामन्तः तेभ्यो बहिश्च दिवा अहनि नक्तं रात्रौ चेति सर्वदेशकालनिराकरणम् अन्यस्मात् त्वत्सृष्टव्यतिरिक्तादर्थात् त्वत्तोऽपि कालाच्च आयुधैः खड्गादिभिः भूमौ पृथिव्याम् अम्बरे आकाशे अन्तरालप्रदेशे न नरैर्न मृगैरपीति मृत्युर्मा भूदिति देहीति नरमृगयोः ब्रह्मसृष्टत्वेऽपि व्याकुलतावशात्पुनरुक्तिः दक्षादिसृष्टत्वशङ्कया वा एवमग्रेऽपि । विष्णुरुद्रयोस्तु मोहाद् ब्रह्मसृष्टचन्तःपातित्वं मत्वा न तयोर्नामग्रहणम् ॥ ३६ ॥ व्यसुभिरिति ॥ व्यसुभिः प्राणरहितैः पाषाणादिभिः असुमद्भिः सप्राणैरिति सामान्येन चराचरवस्तुमात्रैर्वा सुरैरसुरैर्महोरगैः सर्पैश्च मृत्युर्मा भूदित्यन्तमेको वरः युद्धे अप्रतिद्वन्द्वतां प्रतिपक्षराहित्यं देहि इति द्वितीयः । तथा देहिनामैकपत्यमेकाधिपतित्वं च देहीति तृतीयः ॥ ३७ ॥ सर्वेषामिति ॥ सर्वेषां लोकपालानां मध्ये यथा आत्मनः तव महिमा अस्ति तं देहीति चतुर्थः । तपसा योगेन च प्रभावो येषां तेषां यदैश्वर्यादिकं कर्हिचिदपि न रिष्यति न नश्यति तन्मे न नश्येदिति च देहीति पञ्चमः ॥ ३८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥

नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः ॥ न भूमौ नाम्बरे मृत्युर्नरैरपि मृगैरपि ॥ ३६ ॥ व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः ॥ अप्रतिद्वन्द्वतां युद्धे ऐकपत्यं च देहिनाम् ॥ ३७ ॥ सर्वेषां लोकपालानां महिमानं यथात्मनः ॥ तपोयोगप्रभावानां यन्न रिष्यति कर्हिचित् ॥३८॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे हिरण्यकशिपोर्वरयाचनं नाम तृतीयोऽध्यायः ॥ ३ ॥ नारद उवाच ॥ ॥ एवं वृतः शतधृतिर्हिरण्यकशिपोरथ ॥ प्रादात् तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् ॥ १ ॥ ब्रह्मोवाच ॥ तातेमे दुर्लभाः पुंसां यान् वृणीषे वरान् मम ॥ तथापि वितराम्यङ्ग वरान् यदपि दुर्लभान् ॥ २ ॥ ततो जगाम भगवानमोघाऽनुग्रहो विभुः ॥ पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ॥ ३ ॥ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः ॥ भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥

गङ्गासहायस्तृतीये सप्तमस्य व्यधादिमाम् ॥ ३ ॥ चतुर्थे लोकपान् जित्वा विष्णुद्वेषेण दैत्यराट् ॥ तान् भूयोऽपीडयत्तत्र श्लोकाः सार्द्धा नगाब्धयः ॥ अनुष्टुभस्तु पञ्चाशदुवाचेति चतुर्ष्टयम् ॥ ४ ॥ एवमिति ॥ एवं वृतो याचितः तस्य तपसा प्रीतः शतधृतिर्ब्रह्मा अथानन्तरं तस्य हिरण्यकशिपोः सुदुर्लभानपि वरान् प्रादात् ॥ १ ॥ ताततेति ॥ हे तात यान् वरान् त्वं मम मत्तो वृणीषे ते इमे पुंसां दुर्लभाः । यदपि यद्येवं तथापि तान् दुर्लभानपि वरान् तुभ्यं वितरामि ददामि ॥ २ ॥ तत इति ॥ ततः अमोघः सत्योऽनुग्रहो यस्य सः विभुर्भगवान् ब्रह्मा असुरवर्येण तेन पूजितः प्रजेश्वरैर्मरीच्यादिभिः स्तूयमानः सन् स्वस्थानं जगाम ॥३॥ एवमिति ॥ एवं लब्धा वरा येन स दैत्यः हिरण्यकशिपुः हेममयं हिरण्यवत्प्रकाशमानं वपुर्बिभ्रत्सन् भ्रातुर्हिरण्याक्षस्य वधं भगवत्कृतमनुस्मरन् तस्मिन् भगवति द्वेषमकरोत् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति त्रयम् ॥ स महासुरो हिरण्यकशिपुः त्रीन् लोकान् सर्वा दिशश्च विजित्य तत्रापि देवासुरमनुष्येन्द्रादीन् सर्वसत्त्वपतीन् सर्वप्राण्यध्यक्षांश्च जित्वा वशमानीय विश्वजित् सन् सर्वलोकपालानां तेजसा सह स्थानानि जहार अपहृतवान् । पक्षिणां मुख्यत्वात् तदुपलक्षणार्थं गरुडग्रहणम्॥५॥६॥७॥ देवेति सार्द्धम् ॥ देवोद्यानं च जहारेत्यनुषङ्गः। देवोद्यानेति समस्तोऽपि पाठः। श्रिया सर्वसमृद्ध्या जुष्टं युक्तं त्रिविष्टपं स्वर्गमध्यास्ते स्म अधिष्ठितवान् । अत्र त्रिविष्टपेऽपि विश्वकर्मणा निर्मितं त्रैलोक्यलक्ष्म्या आयतनमाधारभूतमत एवाखिलार्द्धयुक्तं साक्षान्महेन्द्रभवनं महेन्द्रभवन अध्युवास ॥८॥ यत्रेति चतुष्कम् ॥ यत्र भवने विद्रुममणिमयाः सोपाना महामारकताः इन्द्रनीलमयाः भुवः स्थलानि वेदिकादीनि यत्र भुवने स्फटिकमयानि कुड्यानि भित्तयः यत्र वैडूर्यमणिमयानां स्तम्भानां पङ्क्तयः यत्र चित्राणि विचित्ररूपाश्रयभूतानि वितानानि पद्मरागमयान्यासनानि च पयःफेननिभाः दुग्धफेनवन्मृदुलाः शुभ्राश्च शय्याः मुक्तादामानि परिच्छदाः परिकरा यासां ताः यत्र च देव्यः देवस्त्रियः सुदतीः सुदत्यः । पूर्वसवर्णदीर्घ आर्षः ।

स विजित्य दिशः सर्वा लोकांश्च त्रीन् महासुरः ॥ देवासुरमनुष्येन्द्रान् गन्धर्वगरुडोरगान् ॥५॥ सिद्धचारणविद्याध्रानृषीन् पितृपतीन् मनून् ॥
यक्षरक्षःपिशाचेशान् प्रेतभूतपतीनथ ॥ ६ ॥ सर्वसत्त्वपतीन् जित्वा वशमानीय विश्वजित् ॥ जहार लोकपालानां स्थानानि सह तेजसा ॥७॥
देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम् ॥ महेन्द्रभवनं साक्षान्निर्मितं विश्वकर्मणा ॥ त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्धिमत् ॥ ८ ॥
यत्र विद्रुमसोपाना महामारकता भुवः ॥ यत्र स्फाटिककुड्यानि वैडूर्यस्तम्भपङ्क्तयः ॥ ९ ॥ यत्र चित्रवितानानि पद्मरागासनानि च ॥ पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः ॥ १० ॥ कूजद्भिर्नूपुरैर्देव्यः शब्दयन्त्य इतस्ततः ॥ रत्नस्थलीषु पश्यन्ति सुदतीः सुन्दरं मुखम्॥ ११ ॥
तस्मिन् महेन्द्रभवने महाबलो महामना निर्जितलोक एकराट् ॥ रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः ॥ १२ ॥
तमङ्ग मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ॥ उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् ॥१३॥

कूजद्भिः ध्वनद्भिर्नूपुरैरितस्ततः तत्र शब्दयन्त्यः शब्दं कुर्वत्यः रत्नस्थलेषु सुन्दरं स्वकीयं मुखं पश्यन्ति तस्मिन् महेन्द्रभवने महाबलः महामनाः निर्जिता लोका येन सः एक एव राजते इति एकराट् प्रतापितैः देवादिभिरभिवन्द्यम् अङ्घ्रियुगं यस्य सः ऊर्जितमधिकं प्रचण्डं तापकं शासनं यस्य स दैत्यः रेमे ॥ ९ ॥ १०॥ ११ ॥ १२ ॥ तमिति ॥ अङ्ग हे युधिष्ठिर त्रिभिः ब्रह्मविष्णुशिवैर्विनान्ये अशेषधिष्ण्यपाः सर्वलोकपालाः उपायनं पूजाद्रव्यं तद्युक्तपाणिभिरुपलक्षिताः सन्तः उरुगन्धिना महासुगन्धिना मधुना सुरया समासान्त आर्षः । मत्तम् अनवहितमत एव विवृत्ते विघूर्णिते ताम्रे अरुणे अक्षिणी यस्य तं तपः तेजः योगः देहेन्द्रियादिवशीकारः बलं देहसामर्थ्यम् ओज इन्द्रियादिसामर्थ्यं तेषां च पदमाश्रयं तम् उपासत सेवितवन्तः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपासनप्रकारमाह—जगुरिति ॥ ओजसा स्वबलेन महेन्द्रस्यासनमास्थितमधिष्ठितं तं विश्वावसुर्गन्धर्वमुख्यः तुम्बुरुश्च अस्मदादयो नारदादयश्च गाननिपुणाः सर्वे जगुस्तद्गुणगानं चक्रुरित्यर्थः । तथा हे पाण्डव गन्धर्वादयः विद्याधरादयश्च मुहुरस्तुवन् ॥ १४ ॥ स इति ॥ स एवासुरः वर्णाश्रमनिष्ठैर्गृहस्थादिभिः कर्तृभिः भूरिर्दक्षिणा येषु तैः साधनभूतैः क्रतुभिरिज्यमानः हविर्भागान् स्वेन तेजसा बलात्कारेणाग्रहीत् ॥ १५ ॥ अकृष्टेति ॥ तस्यासुरस्य संबन्धिनी या सप्तद्वीपयुक्ता मही पृथिवी सा अकृष्टपच्या कर्षणेन विनैव पक्वफलवत्यभूत् दैत्यस्यास्य वेनवदधर्मिष्ठत्वेऽपि तद्भयादेव भूम्यादयोऽकृष्टपच्यत्वादिगुणयुक्ता अभूवन् । अन्यथा दैत्येनानेन भूम्यादयः शीघ्रं नाश्येरन् वेनस्तु तादृक्प्रभावो नासीत् यतः स भृग्वादिभिरेव भस्मीकृतः । अयं भृग्वादीनां तेजः प्रथममेवाजहार इति ज्ञेयम् । तथा द्यौः स्वर्गः नानाकामदुघा अभूत् नभः नानाश्चर्यमयं विविधवस्तुप्रदमभूत्। नानाश्चर्यपदमित्यपि पाठः ॥ १६ ॥ रत्नेति ॥ क्षारश्च सीधु सुरा च घृतं च क्षौद्रम् इक्षुरसश्च दधि च क्षीरं च अमृतं शुद्धं च उदकानि येषां ते तथा क्रमश्च नात्र विवक्षितः रत्नाकराः समुद्राः तत्पत्न्यो नद्यश्च ऊर्मिभिः तरङ्गैः रत्नौघान् रत्नसमूहान् ऊहुः प्रापयामासुः ॥ १७ ॥ शैला इति ॥ शैलाः पर्वताः द्रोणीभिः पर्वतद्वयान्तरसमदेशैः आक्रीडं क्रीडास्थानं मुहुः मुहुः तथा द्रुमाः सर्वे एव सर्वेष्वेव षट्सु ऋतुषु स्वगुणान् फलपुष्पादींश्च ऊहुः स एक एव सर्वेषां लोकपालानामिन्द्राग्निवाय्वादीनां पृथग्गुणान् वर्षणदाहशोषणादिरूपान् प्रतिनियतान् दधार सर्वेषामाधिपत्यमेकः स्वयमेव चकारेत्यर्थः ॥ १८ ॥ स इत्थमिति ॥ इत्थं निर्जिताः ककुभो दिशो येन सः अत एक एव राजते इत्येकराट् तथाभूतः सन्नपि अजितेन्द्रियः सः यथोपजोषं यथाप्रीति प्रियान् इष्टान् विषयान् भुञ्जानोऽपि नातृप्यत् ॥ १९ ॥ एवमिति ॥ ऐश्वर्येण मत्तस्य दृप्तस्य उच्छास्त्रवर्तिनः शास्त्रमर्यादामुल्लङ्घ्य वर्तमानस्य ब्रह्मशापमुपेयुष इति सनकादिशापं प्राप्तवतः तस्य दैत्यस्य महान् कालो विफल एव व्यतीयाय अतिक्रान्तोऽभूत् । एकसप्ततियुगानि किञ्चिदधिकानि इति स्वामिपादाः ॥ २० ॥ तस्येति ॥ तस्योग्रेण दण्डेन शासनेन संविग्नाः अतिभीताः सपालकाः सर्वे लोकाः भगवतः सकाशादन्यत्र न लब्धं

जगुर्महेन्द्रासनमोजसा स्थितं विश्वावसुस्तुम्बुरुरस्मदादयः ॥ गन्धर्वसिद्धा ऋषयोऽस्तुवन् मुहुर्विद्याधरा अप्सरसश्च पाण्डव ॥ १४ ॥ स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ॥ इज्यमानो हविर्भागानग्रहीत् स्वेन तेजसा ॥ १५ ॥ अकृष्टपच्या तस्यासीत् सप्तद्वीपवती मही ॥ तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥ १६ ॥ रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ॥ क्षारसिन्धुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥ शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः ॥ दधार लोकपालानामेक एव पृथग्गुणान् ॥ १८ ॥ स इत्थं निर्जितककुबेकराड्विषयान्प्रियान् ॥ यथोपजोषं भुञ्जानो नातृप्यदजितेन्द्रियः ॥१९॥ एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ॥ कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः ॥ २० ॥ तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः ॥ अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरणं रक्षको यैस्ते अच्युतं भगवन्तं विष्णुं शरणं ययुः ॥ २१ ॥ तस्यै इति ॥ प्रणतिश्लोकः यत्र यस्यां सर्वेषामात्मा हरिरीश्वरः आस्ते यत् यां काष्ठां यं श्रीहरिं वा गत्वा प्राप्य शान्ताः अमलाः संन्यासिनो लोकाः पुत्रधनेच्छारहिता न निवर्तन्ते संसारे न पतन्ति तस्यै काष्ठायै दिशे नमः । सर्वदेशस्यासुरतेजोग्रस्तत्वात् वयं क्व गत्वा स्तुवीमहीति । यद्वा । तस्यै काष्ठायै तस्मै उत्कर्षाय नमः यस्मिन्नुत्कर्षे हरिरस्तीति अन्ये सर्व एवोत्कर्षा अनेनासुरेण जिता इति भावः ॥ २२ ॥ इतीति ॥ इत्येवं संयतात्मानः वशीकृतचित्ताः समाहितधियः एकाग्रबुद्धयः विनिद्रा वायुभोजनाः अमलाश्च सन्तस्ते हृषीकेशं भगवन्तमुपतस्थुः तुष्टुवुः । तङ्भाव आर्षः ॥ २३ ॥ तेषामिति ॥ तेषां देवानामनुग्रहसूचिका अरूपा अदृष्टवक्तृका मेघनिस्वना मेघवत् गम्भीरघोषा ककुभो दिशः संनादयन्ती प्रतिध्वनयन्ती साधूनामभयङ्करी भयनिवर्त्तिका वाणी आविरभूत् तैः श्रुतेत्यर्थः ॥ २४ ॥ मेति ॥ हे विबुधश्रेष्ठाः यूयं मा भैष्ट भयं मा कुरुत वो युष्माकं सर्वेषां सप्रजानां भद्रं सुखमेवास्तु । हि यस्मान्मम दर्शनं स्तवनं श्रवणं च भूतानां सर्वश्रे-

तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ॥ यद्गत्वा न निवर्तन्ते शान्ताः संन्यासिनोऽमलाः ॥ २२ ॥ इति ते संयतात्मानः समाहितधियोऽमलाः ॥ उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥ २३ ॥ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना ॥ सन्नादयन्ती ककुभः साधूनामभयंकरी ॥ २४ ॥ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ॥ मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् ॥ तस्य शान्तिं करिष्यामि कालं तावत् प्रतीक्षत ॥ २६ ॥ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ॥ धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २७ ॥ निर्वैराय प्रशान्ताय स्वसुताय महात्मने ॥ प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २८ ॥ नारद उवाच ॥ इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ॥ न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ॥ २९ ॥ तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ॥ प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥ ३० ॥

यसां पुरुषार्थानामुपपत्तये प्राप्तये भवति ॥ २५ ॥ ज्ञातमिति ॥ दैतेयेषु अपसदस्य अधमस्य एतस्य हिरण्यकशिपोर्यत् दौरात्म्यं दुर्जनत्वं सर्वपीडाकरत्वं तत् युष्मद्विज्ञापनं विनैव मया ज्ञातमतस्तस्य दैत्यस्य शान्तिं वधं करिष्यामि तावत्कालं प्रतीक्षत किञ्चित्कालं विलम्बं सहध्वमित्यर्थः । तङ्भाव आर्षः ॥ २६ ॥ यदेति ॥ यदा यस्मिन् काले यस्य प्राणिनो देववेदादिषु विद्वेषो जायते तदा स आशु विनश्यति ॥ २७ ॥ ननु बहुकालं देवादीन्द्विषन्नपि नायं नष्ट इति चेत्तत्राह—निर्वैरायेति ॥ यदायं निर्वैराय प्रशान्ताय महात्मने स्वसुताय प्रह्लादाय द्रुह्येत् तद्वधोपायं करिष्यति तदा ब्रह्मवरैरूर्जितमप्येनमहं हनिष्ये । तङार्षः । सर्वमहं सहे न मद्भक्तद्रोहमिति भावः ॥ २८ ॥ इतीति ॥ इत्येवं लोकगुरुणा भगवता उक्तास्तद्वचनविश्वासात् गत उद्वेगो भयं येषां ते तथा दिवौकसो देवास्तं प्रणम्य स्वस्थानं प्रति न्यवर्तन्त तदानीं प्रह्लादद्वेषस्य प्रवृत्तत्वात्तमसुरं हतप्रायं मेनिरे अमन्यन्त ॥ २९ ॥ तस्येति ॥ तस्य दैत्यपतेः प्रह्लादानुह्लादसंह्लादाह्लादाख्याश्चत्वारः परमाद्भुताः परमप्रभावाः पुत्रा आसन् तेषां मध्ये प्रह्लादः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महतामुपासकः इत्यादिभिः गुणैः महानभूत् ॥ ३० ॥ ब्रह्मण्य इति ॥ ब्रह्मणि कुले परस्मिन् वा साधुर्ब्रह्मण्यः शीलेन सुस्वभावेन सम्पन्नः सत्यसन्धः सत्यप्रतिज्ञः जितेन्द्रियः आत्मवत् परमात्मवत् एक एव सर्वभूतानां प्रियः सुहृत्तमः हितैषी चेति ॥ ३१ ॥ दासवदिति सार्द्धम् ॥ दासवत् सम्यक् सन्नता नमस्कृता आर्याणां महतामङ्घ्रयो येन सः पितृवत् दीनेषु वत्सलः वात्सल्ययुक्तः भ्रातृवत्सदृशे स्वतुल्ये स्निग्धोऽनुरागयुक्तः गुरुषु ईश्वर इति भावना दृष्टिर्यस्य सः विद्यादिभिर्यो मानो गर्वः स्तम्भः अनम्रता ताभ्यां विवर्जितः । जन्माढ्य इति पाठे यद्यपि विद्यादिभिराढ्यः तथापि मानस्तम्भविवर्जितः ॥ ३२ ॥ नेति ॥ व्यसनेषु दुःखेषु प्राप्तेष्वपि न उद्विग्नं न व्याकुलं चित्तं यस्य सः श्रुतेषु आमुष्मिकेषु स्वर्गराज्यादिषु दृष्टेषु ऐहिकेषु च गुणेषु विषयेषु निस्पृहः तृष्णारहितः यतस्तेष्ववस्तुदृक् अप्रयोजकत्वबुद्धिः दान्ता नियमेन वशीकृताः इन्द्रियादयो यस्य सः बुद्धिवशीकरणादेव प्रशान्तः कामो यस्य सः स्वयमसुरोऽपि रहितासुरः मात्सर्याद्यासुरभावरहितः । सदेति प्रतिविशेषणमन्वीयते ॥ ३३ ॥ यस्मिन्निति॥

ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेन्द्रियः ॥ आत्मवत् सर्वभूतानामेकः प्रियसुहृत्तमः ॥ ३१ ॥ दासवत् संनतार्याङ्घ्रिः पितृवद् दीनवत्सलः ॥ भ्रातृवत् सदृशे स्निग्धो गुरुष्वीश्वरभावनः ॥ विद्यार्थरूपजन्माढ्यो मानस्तम्भविवर्जितः ॥ ३२ ॥ नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ॥ दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो रहितासुरोऽसुरः ॥३३॥ यस्मान्महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः ॥ न तेऽधुनापि धीयन्ते यथा भगवतीश्वरे ॥३४॥ यं साधुगाथा सदसि रिपवोऽपि सुरा नृप ॥ प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः ॥ ३५ ॥ गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते ॥ वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥ ३६ ॥

हे राजन् यस्मिन् प्रह्लादे महतो भगवतो महतां तद्भक्तानां वा ये गुणा निःस्पृहत्वादयस्ते मुहुर्मुहुः कविभिर्विवेकिभिर्गृह्यन्ते । महति काले गतेऽपि तेऽधुना वर्तमानकालेऽपि नापि धीयन्ते तिरोहिताः न भवन्ति । तत्र दृष्टान्तः । यथेति । यथा भगवतीश्वरे वर्तमाना गुणा नापि धीयन्ते कविभिश्च मुहुर्गृह्यन्ते तथेत्यर्थः ॥ ३४ ॥ यमिति ॥ हे नृप साधुगाथा सदसि साधुकथा प्रसङ्गवत्यां सभायां रिपवः शत्रवोऽपि सुराः यं प्रह्लादं प्रतिमानं साधुत्वे प्रह्लादतुल्योऽयं भक्त इति दृष्टान्तं प्रकुर्वन्ति । अन्ये भवादृशा मध्यस्थास्तं प्रति मानं कुर्वन्तीति किमुत वक्तव्यमित्यर्थः ॥ ३५ ॥ गुणैरिति ॥ यस्य प्रल्हादस्य वासुदेवे भगवति नैसर्गिकी स्वाभाविक्येव रतिः नतु कामाद्युपाधिकृता अतः तस्य असङ्ख्येयैर्गुणैरलं पर्याप्तं सर्वे गुणा मया वर्णयितुं न शक्यन्ते इत्यर्थः । किन्तु एवं गुणवर्णनेन तस्य माहात्म्यं सूच्यते तत् सूचनामात्रं क्रियते इत्यर्थः । यद्वा । असङ्ख्येयैरेव गुणैरतस्यालं कः खलूत्कर्षः अन्ये पुरुषा गुणैरुत्कर्ष्यन्तां नाम प्रह्लादस्योत्कर्षहेतुरन्यदेव वस्तु वर्त्तते तदेव किं तदाह । सूच्यते सुष्ठु उच्यते किं तत् वासुदेव इत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३६ ॥ नैसर्गिकरतेर्लिङ्गान्याह—न्यस्तेति ॥ बालोऽपि न्यस्तक्रीडनकः परित्यक्तक्रीडासाधनः कृष्ण एव ग्रहः विषयेभ्य आकर्षकस्तेन गृहीतः आकृष्ट आत्मा मनो यस्य सः अन्यभक्तैरिव न तेन चित्तं कृष्णे निवेशितं किन्तु कश्चिद् ग्रहो लोभ्यं द्रव्यमिव कृष्ण एव तन्मनो गृहीतवानिति भावः। तन्मनस्तया भगवदेकचित्तत्वेन जडवत् अन्यैर्ल- क्ष्यमाणः ईदृशं यथा व्यवहारावस्थायां प्रतीयते तादृशं जगन्न वेद किन्तु कृष्णमयमेव ॥ ३७ ॥ आसीन इति ॥ गोविन्देन परिरम्भितः आत्मना एकीकृतः अयं भावः। अतिवत्सलेन पित्रा मात्रा वा एकद्व्याब्दिको बालो यथा प्रतिक्षणमेव परिरभ्य क्रोडस्थीक्रियते तथैव प्रह्लादोऽपि भोजनशयनादिसमये भगवता लिङ्ग्यते तादृशोऽसौ आसीनः इत्यादि आसनादिव्यापारं कुर्वन्नप्येतानि आसनवर्त्मभक्ष्यशयनीयपेयवक्तव्यानि नानुसंधत्ते न जानाति ॥ ३८ ॥ क्वचिदिति ॥ मातरि गतायां बाल इव क्वचिद्भगवति क्षणमन्तर्हिते वैकुण्ठस्य हरेः चिन्तया शबला व्यामिश्रा चेतना यस्य स क्वचिद्रुदति रोदिति रौति । तुदादित्वमार्षम् । क्वचित् भगवत्प्रादुर्भावे मुग्धबाल इव हसति क्वचिच्च तस्य वैकुण्ठस्य चिन्तया ह्लादो यस्य सः तद्गुणानेव क्वचिदुच्चैस्तरां गायतीत्यर्थः ॥ ३९ ॥ नदतीति ॥ दूरे प्रादुर्भूतं भगवन्तं दृष्ट्वा उत्कण्ठ उच्चीकृतकण्ठः सन् क्वचिन्नदति

न्यस्तक्रीडनको बालो जडवत् तन्मनस्कया ॥ कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥ ३७ ॥ आसीनः पर्यटन्नश्नञ्छयानः प्रपिबन् ब्रुवन् ॥ नानुसंधत्त एतानि गोविन्दपरिरम्भितः ॥ ३८ ॥ क्वचिद्रुदति वैकुण्ठचिन्ताशबलचेतनः ॥ क्वचिद् हसति तच्चिन्ताह्लाद उद्गायति क्वचित् ॥ ३९ ॥ नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् ॥ क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥ ४० ॥ क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ॥ अस्पन्दप्रणयानन्दसलिलामीलितेक्षणः ॥ ४१ ॥ स उत्तमश्लोकपदारविन्दयोर्निषेवयाऽकिंचनसङ्गलब्धया ॥ तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसङ्गदीनान्यमनः शमं व्यधात् ॥ ४२ ॥

हे कृष्ण हे प्रभो इत्याकारयति । क्वचित् आनन्दातिशयेन विक्षिप्त इव विलज्जो नृत्यति । क्वचिद्भगवत्स्फूर्तिभङ्गे सति तद्विरहखेदाधिक्येन तद्भावनातिशययुक्त उन्मत्तवदह- मेव भगवानिति तन्मयः सन् अनुचकार तल्लीलामपि स्वयमेव कृतवानित्यर्थः ॥ ४० ॥ क्वचिदिति ॥ क्वचित् संस्पर्शस्तद्भावापत्तिस्तेन निर्वृतः सुखितः । यद्वा । क्वचित्स्वहृदये प्रादुर्भूतं भगवन्तमालोक्य तत्पाणिसंस्पर्शेन निर्वृतः सुखितः अत एव उत्पुलकः उदञ्चितरोमा अस्पन्दः स्थिरो यः प्रणयः स्नेहस्तेन यः आनन्दः तेन यत्सलिलं तेन युक्ते आमीलिते ईषन्निमीलिते ईक्षणे यस्य सः क्वचित्तूष्णीमास्ते ॥ ४१ ॥ स इति ॥ स प्रह्लादः अकिंचनाः त्यक्तलोकव्यवहारा भगवद्भक्ता अस्मदादयस्तेषां सङ्गेन तत्कृपया लब्धया उत्तमश्लोकस्य भगवतः पदारविन्दयोर्नितरां सेवया आत्मनः स्वस्य परां निर्वृतिं परमानन्दं तन्वन् विस्तारयन् मुहुर्मुहुः दुःसङ्गेन दीनानामन्येषामपि दैत्यबालानां मनः शमं शान्तं व्यधात् । यद्वा । "शमो मन्निष्ठता बुद्धेः" इति भगवद्वचनात् भगवन्निष्ठमकरोदित्यर्थः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्निति ॥ हे राजन् महाभागवते महाभागे महात्मनि तस्मिन् आत्मजे प्रह्लादे हिरण्यकशिपुः अघं द्रोहमकरोत् ॥ ४३ ॥ पूर्वाध्यायान्तपृष्टमेवार्थमतिविस्मयेन पुनः पृच्छति–देवर्ष इति ॥ हे देवर्षे हे सुव्रत तव त्वत्तः एतद्वेदितुं ज्ञातुं वयमिच्छामः । यत् आत्मजाय स्वपुत्राय प्रीतियोग्याय शुद्धाय निर्दोषाय साधवे पित्राद्याप्तभक्ताय प्रह्लादाय पिता हिरण्यकशिपुः अघमदात् मरणपर्यन्तं तस्य द्रोहमकरोत् तत्र कारणं वेदितुमिच्छाम इत्यर्थः ॥ ४४ ॥ पुत्रानिति सार्द्धम् ॥ विप्रतिकूलान् स्वाज्ञामुल्लङ्घ्य दुराचारे प्रवृत्तानपि स्वकीयान् पुत्रान् पुत्रवत्सलाः पितरः शिक्षार्थं केवलम् उपालभन्ते आक्षिपन्ति अपरो यथा शत्रुरिव अघं मरणपर्यवसायिनं द्रोहं तु नैव कुर्वन्ति अनुवशान् स्वानुकूलान् साधून् अनुरागद्वेषान् गुरुः पिता एव देवता देवतावदुपासनीयो येषां तान् तादृशान् प्रह्लादसदृशान् पुत्रानुद्दिश्य द्रोहं न कुर्वन्तीति किमुत वक्तव्यम् ॥ ४५ ॥ एतदिति ॥ हे प्रभो पुत्राय पुत्रमुद्दिश्य पितुर्द्वेषः पित्रा कृतो द्वेषः पुत्रस्य मरणार्थं प्रयोजित इति यत् । यद्वा । यद्यस्मात् पुत्राय यो द्वेषः स तस्य पितुरेव मरणाय

तस्मिन्महाभागवते महामाये महात्मनि ॥ हिरण्यकशिपू राजन्नकरोदघमात्मजे ॥ ४३ ॥ युधिष्ठिर उवाच ॥ देवर्ष एतदिच्छामो वेदितुं तव सुव्रत॥ यदात्मजाय शुद्धाय पिताऽदात्साधवे ह्यघम् ॥ ४४ ॥ पुत्रान्विप्रतिकूलान्स्वान्पितरः पुत्रवत्सलाः ॥ उपालभन्ते शिक्षार्थं नैवाघमपरो यथा ॥ किमुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् ॥४५ ॥ एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ॥ पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः॥ मनो भ्रमति मे विद्वन्नेतस्मिन्संकटे द्विजः ॥ ४६ ॥ इति श्रीभागवते सप्तमस्कन्धे हिरण्यकशिपुदिग्विजयप्रह्लादसाधुभाववर्णनं नाम चतुर्थोऽध्यायः ॥४॥ नारद उवाच ॥ पौरोहित्याय भगवन्वृतः काव्यः किलासुरैः ॥ शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ॥ १ ॥ तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् ॥ पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥२॥ यत् तत्र गुरुणा प्रोक्तं शुश्रुत्वेऽनुपपाठ च ॥ न साधु मनसा मेने स्वपरासद्ग्रहाश्रयम् ॥३॥

इत्येतदस्माकं कुतूहले भवं कौतूहलं सन्देहं विधम अपाकुरु ॥ ४६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे सप्तमस्य व्यधादिमाम् ॥ ४ ॥ पञ्चमे स्वसुतं विष्णोर्भक्तं घ्नन् भुजगादिभिः ॥ नाशकत् दैत्यराट् तत्र श्लोकाः सार्द्धा नगेषवः ॥ उवाचदर्शकं सार्द्धत्रिकैषष्टिरनुष्टुभः ॥ ५ ॥ पौरोहित्यायेति ॥ भगवान् काव्यः शुक्रः पौरोहित्याय पुरोहितकर्म कर्तुमसुरैर्वृतः स्वीकृतः किल तस्य काव्यस्य सुतौ शण्डामर्काख्यौ दैत्यराजस्य हिरण्यकशिपोर्गृहस्य अन्तिके समीपे न्यवसतामिति शेषः ॥ १ ॥ताविति ॥ तौ च शण्डामर्कौ राज्ञा हिरण्यकशिपुना प्रेषितं नये युक्त्या तत्त्वविचारे कोविदं निपुणमपि बालं प्रह्लादं तथान्यानसुरबालकांश्च पाठ्यान् दण्डनीत्यादीन् पाठयामासतुः पठनं कारितवन्तौ । पाठ्यानसुरबालकानिति वान्वयः ॥ २ ॥ यदिति ॥ तत्र गुरुगृहे यत्तु दण्डनीतिशास्त्रं गुरुणा प्रोक्तं तत् प्रह्लादः शुश्रुवे श्रुतवान् अनु अनन्तरं पपाठ च परंतु तन्नीतिशास्त्रम् अयं स्वः स्वकीयः मित्रम् अयं परः शत्रुरित्येवंभूतो यः असद्ग्रहः मिथ्याभिनिवेशः स एवाश्रयो यस्य तत्तादृशमभूत् अतः तत्साधु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्यक् मनसा न मेने ॥ ३ ॥ एकदेति ॥ हे पाण्डव एकदा असुरराट् स्वपुत्रं प्रह्लादमङ्कमारोप्य उत्सङ्गे निधाय हे वत्स भवान् यत्साधु मन्यते तत्कथ्यतामित्येवं पप्रच्छ। कठिनविषयप्रश्ने बालस्य खेदो भविष्यति अतो यमभ्यस्तीकृतं वस्तु मद्ग्रे वक्तुं शक्नुयात्तदेव वदत्विति हिरण्यकशिपोरभिप्रायः ॥ ४ ॥ प्रह्लादस्तु अत्र जगति जिज्ञास्यानां मध्ये किं वस्तु भवान् साधु मन्यते इति मां पृच्छति इति ज्ञात्वोत्तरमाह—तदिति ॥ हे असुरवर्य्य असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशाद्धेतोः सदा सम्यक् अत्यन्तमुद्विग्ना अनवस्थिता धीर्येषां ते तेषां देहिनां तदहं साधु मन्ये यत् आत्मनः पातो यस्मात् तत् अन्धकूपं जलशून्यकूपवत् दुःखप्रदं गृहं हित्वा परित्यज्य वनं गतः सन् हरिमाश्रयेत भजेत वनमित्येकान्तस्थानोपलक्षणम् ॥५॥ श्रुत्वेति ॥ परपक्षे देवपक्षे विष्णौ समाहिताः परिनिष्ठिताः पुत्रस्य गिरः श्रुत्वा दैत्यो जहास हासपूर्वकमुवाचेत्यर्थः। बालानां बुद्धिः परस्मिन् शत्रौ विष्णौ बुद्धिर्येषां तैर्देवपक्षैर्भिद्यते विपरीता क्रियते ॥ ६ ॥ सम्यगिति ॥ हे दैत्याः अयं बालो गुरुगृहे सम्यग् विधार्यतां स्थाप्यतामिति

एकदाऽसुरराट् पुत्रमङ्कमारोप्य पाण्डव ॥ पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ ४ ॥ प्रह्लाद उवाच ॥ तत् साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ॥ हित्वात्मपातं गृहमन्धकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५ ॥ नारद उवाच ॥ श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः ॥ जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥ ६ ॥ सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः॥ विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥ ७ ॥ गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः ॥ प्रशस्य श्लक्ष्णया वाचा समपृच्छन्त सामभिः॥ ८ ॥ वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृषा ॥ बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः॥९॥ बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत्॥ भण्यतां श्रोतुकामानां गुरूणां कुलनन्दन ॥ १० ॥ प्रह्लाद उवाच ॥ स्वः परश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः ॥ विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥ ११ ॥

यथा येन प्रकारेण प्रतिच्छन्नैः असुरवेषेणाच्छन्नैः विष्णुपक्षैर्विष्णुभक्तैर्द्विजातिभिर्ब्राह्मणादिभिरस्य धीर्न भिद्येत विपरीता न भवेत्तथेत्यर्थः ॥७॥ गृहमिति ॥ दैत्ययाजकाः दैत्यपुरोहिताः स्वगृहं प्रति दैत्यभटैरानीतं प्रापितं प्रह्लादं प्रशस्य प्रस्तुत्य सामोक्तिभिः श्लक्ष्णया मृद्व्या वाचा समपृच्छन्त। तङार्षः ॥ ८ ॥ वत्सेति ॥ हे वत्स हे प्रह्लाद ते भद्रं भवतु यद्वयं पृच्छामस्तत्सत्यं यथार्थं कथय मृषा मा कथय। बालानतिक्रम्य सर्वान् बालान् विहाय तुभ्यं तवैव एष बुद्धिविपर्ययः कुतो हेतोरभूत् ॥९॥ बुद्धीति ॥ तवायं बुद्धिभेदः बुद्धिविपर्यासः परैर्विष्णुपक्षपातिभिः कैश्चित्कृतः उताहो आहोस्वित् स्वत एवाभवत् तदेतत् हे दैत्यकुलनन्दन नः श्रोतुकामानां गुरूणामस्माकमग्रे भण्यतां कथ्यताम् ॥ १० ॥ स्व इति ॥ पुंसां स्वः परश्चेत्यसद्ग्राहः मिथ्याभिनिवेशः यस्य मायया एव कृतः नतु वास्तवः अत एव तद्विमुखानां तन्मायया विमोहितधियां भवतामेव स्वः पर इत्यभिनिवेशो दृष्टः प्रत्यक्षः न तु मम। तस्मै भगवते नमः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु किमेवं प्रलपसि यतस्तव बुद्धिभेदो जातस्तं कथयेत्याक्षिप्तः सन् तत्प्रसादादेवेत्युत्तरमाह—स इति ॥ यदा स एव भगवान् अनुव्रतः अनुकूलो भवति तदा अन्य एषः अन्योऽहमित्येवं भेदगता देहाद्यात्मविषया असती दुष्टा अनर्थहेतुः पुंसां पशुबुद्धिर्विभिद्यते निवर्तते अभिन्नात्मनिष्ठा भवति ॥ १२ ॥ भेदस्यासत्वं दर्शयन्नाह—स एष इति ॥ हि यस्मादेषः स्वः पर इत्येवंभूता भेददर्शनरूपा अबुद्धिः अविद्या येषां तैर्दुरत्ययं दुर्घटमनुक्रमणमनुसरणं विश्वासेन भजनं यस्य स तथाभूतः शास्त्रेषु तत्त्वज्ञैर्निरूप्यते । यद्वा । दुरत्ययमनुक्रमणमनुचरणमनुवर्णनं वा यस्य सः स एष परमात्मैव स्वः पर इति च अबुद्धिभिरविवेकिभिर्निरूप्यते यस्य वर्त्मनि कथं सृष्ट्यादिलीलां करोति कृत्वापि कथं निर्विकार एव तिष्ठति कथं प्रसीदतीत्यादिरूपे मार्गे ब्रह्मादयो वेदवादिनोऽपि मुह्यन्ति कान्यस्य कथेति स एव आत्मा अन्तर्याम्येव मे मतिं भिनत्ति सर्वात्मैकविषयां करोति ॥ १३॥ यथेति ॥ हे ब्रह्मन् यथा अयो लोहमाकर्षस्यायस्कान्तस्य सन्निधौ स्वयं कारणान्तरं प्रयोजनं चानुद्दिश्य भ्राम्यति तथा मे मम चेतः

स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते ॥ अन्य एष तथाऽन्योऽहमिति भेदगताऽसती ॥ १२ ॥ स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ॥ मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ॥१३॥ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ ॥ तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥ १४ ॥ नारद उवाच ॥ एतवाद् ब्राह्मणायोक्त्वा विरराम महामतिः ॥ तं निर्भर्त्स्याथ कुपितः स दीनो राजसेवकः॥१५॥आनीयतामरे वेत्रमस्माकमयशस्करः॥ कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ॥ १६ ॥ दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः॥यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः॥१७॥इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः ॥ प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥१८॥

चक्रपाणेर्हरेः सन्निधौ स्वयं यदृच्छया तस्यैवेच्छया भिद्यते तत्प्रवणं भवति । कस्य पुण्यस्य फलमेतदिति न ज्ञायत इत्यर्थः ॥ १४ ॥ एतावदिति ॥ ब्राह्मणाय शुक्रपुत्राय एतावदुक्त्वा स महामतिः प्रह्लादः विरराम तूष्णीं बभूव । अथ स्वानभीष्टश्रवणात् कुपितः दीनो राजसेवकः स ब्राह्मणस्तं प्रह्लादं निर्भर्त्स्य उवाचेति शेषः ॥ १५ ॥ आनीयतामिति ॥ अरे इति राजभृत्यविशेषस्य सम्बोधनम्। वेत्रं प्रहरणसाधनयष्टिविशेष आनीयताम् । यतोऽयं प्रह्लादोऽस्माकम् अयशस्करः अपयशःकर्ता अतः दैत्यकुलाङ्गारवत्तन्नाशकस्य दुर्बुद्धेरस्य प्रह्लादस्य चतुर्थो दमः दण्डाख्य उचितः ॥ १६ ॥ दैतेयेति ॥ दैतेया एव चन्दनद्रुमास्तेषां वनेऽयं कण्टकद्रुमतुल्यो जातः तदेवाह । यस्य दैतेयवनस्य मूलस्योन्मूलने च्छेदने परशोः परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितो नालवदाचरितवान् परशोर्नालदण्ड इवायं विष्णोर्दैत्योच्छेदने सहकारी जातः ॥ १७ ॥ इतीति ॥ इत्येवं वदन् तं प्रह्लादं विविधोपायैस्तर्जनादिभिः भीषयन् धर्मार्थकामाख्यस्य त्रिवर्गस्योपपादकं शास्त्रं ग्राहयामास ग्राहयितुं यतते स्म इत्यर्थः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततः किञ्चित् कालानन्तरं ज्ञातं ज्ञेयं सामाद्युपायचतुष्टयं येन तं तथाभूतमेनं प्रह्लादं ज्ञात्वा पूर्वं मात्रा मृष्टमुद्वर्तितं स्नपितमलंकृतं च तं परीक्षार्थं दैत्येन्द्रं प्रति दर्शयामास तत्समीपं नीतवानित्यर्थः ॥ १९ ॥ पादयोरिति ॥ असुरो हिरण्यकशिपुः पादयोः पतितं बालं चिरं जीवेत्याशिषा प्रतिनन्द्य दोर्भ्यां चिरं परिष्वज्य आलिङ्गच परां निर्वृतिं परमानन्दमाप प्राप्तवानित्यर्थः ॥ २० ॥ आरोप्येति ॥ हे युधिष्ठिर तमङ्कमारोप्य तस्य मूर्धन्यवघ्राय अश्रूणां कला बिन्दवः तासामम्बुभिस्तमासिञ्चन् हर्षेण विकसद्वक्त्रः प्रसन्नमुखः इदं वक्ष्यमाणमाह स्म ॥ २१ ॥ प्रह्लादेति ॥ हे प्रह्लाद हे तात हे आयुष्मन् एतावता कालेन गुरोर्हिरण्यकशिपुमते शुक्रात्मजात् प्रह्लादमते नारदाद् भवान् यदशिक्षत् तङ्भाव आर्षः । तत्र यत्स्वधीतं सुष्ठु अभ्यस्तमसंदिग्धमुत्तमं श्रेष्ठं च तत्किञ्चिदुच्यताम् ॥ २२ ॥ प्रल्हादस्तु ब्राह्मणाधमयोरनयोर्गुरुत्वं नास्तीत्यतो नारदाच्छिक्षितमाह—श्रवणमिति युग्मम् ॥ विष्णोः श्रवणं कीर्त्तनं स्मरणं पादसेवनं परिचर्या अर्चनं पूजनं वन्दनं वाचा नामसहितनमस्कारोच्चारणं कायेन

तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ॥ दैत्येन्द्रं दर्शयामास मातृमृष्टमलंकृतम् ॥१९॥ पादयोः पतितं बालं प्रतिनन्द्याशिषासुरः॥परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥ २० ॥ आरोप्याङ्कमवघ्राय मूर्धन्यश्रुकलाम्बुभिः ॥ आसिञ्चन् विकसद्वक्त्रमिदमाह युधिष्ठिर ॥ २१ ॥ हिरण्यकशिपुरुवाच ॥ प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमम् ॥ कालेनैतावता युष्मन् यदशिक्षद् गुरोर्भवान् ॥ २२ ॥ प्रह्लाद उवाच ॥ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥ आर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥ इतिपुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥ क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४ ॥ निशम्यैतत् सुतवचो हिरण्यकशिपुस्तदा ॥ गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥ २५ ॥ ब्रह्मबन्धो किमेतत् ते विपक्षं श्रयताऽसता ॥ असारं ग्राहितो बालो मामनादृत्य दुर्मते ॥ २६ ॥

दण्डवत्प्रणामश्च दास्यं कर्मार्पणं सख्यं तद्विश्वासादि आत्मनिवेदनं देहादि सर्वं भगवत एव इति भावनया सर्वचिन्तात्यागः । यथा विक्रीतस्य गवाश्वादेः पालनादिचिन्ता न क्रियते तद्वदिति । इत्येवं नव लक्षणानि अवान्तरप्रकारा यस्याः सा एकप्रकारापि भक्तिर्भगवति विष्णौ अर्पिता समर्पितैव सती तत्प्रीत्यर्थमेव केवलं फलोद्देशं विनैव पुंसा ॥ १५ ॥ अद्धा साक्षात् अनन्तरमेव चेत् क्रियते नतु कृता सती पश्चादर्प्यते तदुत्तममधीतं मन्ये न त्वस्माद्गुरोरधीतं शिक्षितं वा तथाविधं किञ्चिदस्तीति भावः ॥ २३ ॥ २४ ॥ निशम्येति ॥ तदा स्वसुतस्यैतद्वचो निशम्य श्रुत्वा रुषा प्रस्फुरितोऽधरओष्ठो यस्य स हिरण्यकशिपुर्गुरुपुत्रमिदं वाक्यमुवाच ॥ २५ ॥ ब्रह्मेति ॥ हे ब्रह्मबन्धो ब्राह्मणेष्वधम हे दुर्मते एतत्त्वया किं कृतं यतः विपक्षं देवपक्षं श्रयता आश्रयता असता दुष्टेन त्वया मामनादृत्यायं बालोऽसारं मम द्वेषि विष्णुभजनं ग्राहित इति वस्तुतो न सारं यस्मादिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वसारमित्यर्थः ॥ २६ ॥ सन्तीति ॥ दुष्टं कपटयुक्तं मित्रं मित्रत्वं येषां ते तथा च्छद्म कपटयुक्ता मित्रवद्वेष एषामिति तथा तादृशाः लोके असाधवः सन्त्येव परं तु अन्ततः कस्मिंश्चित्काले तेषामघं द्वेषाचरणमुदेति प्रकटं भवत्येव । यथा " ब्रह्महा क्षयरोगी स्यात् " इत्यादिवचनैः पातकिनां रोगे यथोदेति तेन तत्पापं ज्ञातं भवति तथा कार्यद्वारा एतेषां कपटमपि ज्ञायत इत्यर्थः ॥ २७ ॥ नेति ॥ हे इन्द्रशत्रो न हि दीने ब्राह्मणे मयि तव कोप उचित इति भावः । हे राजन् एष तव सुतो यद्वदति तन्मया न प्रणीतं न पाठितं न वा परेणान्येन केनचित्प्रणीतं पाठितमिति अस्य इयं मतिः नैसर्गिकी स्वाभाविकी न तु केनापि शिक्षिता अतः मन्युं कोपं नियच्छ नोऽस्मभ्यं कत् कुत्सितं दोषं मा स्म अदाः माङ् माङ्योगेऽप्यडागम आर्षः । मयि दोषारोपं मा कुथा इत्यर्थः ॥ २८ ॥ गुरुणेति ॥ गुरुणैवं प्रतिप्रोक्तः दत्तोत्तरः सन्नसुरः हिरण्यकशिपुः भूयः सुतं प्रह्लादमाह स्म । हे अभद्र कुलनाशक यदि इयं गुरुमुखी गुरुर्मुखमुद्भवहेतुर्यस्याः सा गुरुवाक्यजनिता न भवति । ङीष् तु क्लेशेनैव समर्थनीयः । तदा असती दुष्टा मतिरियं तव कुतो जाता भद्रा सती सर्वोत्तमा इति वास्तवोऽर्थः ॥ २९ ॥ अस्या मतेर्यूयं नाधिकारिण इत्याशयेनाह—मतिरिति ॥ गृह एव व्रतं संकल्प आसक्तिर्येषाम् अदान्तैः

सन्ति ह्यसाधवो लोके दुर्मैत्राच्छद्मवेषिणः ॥ तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥ गुरुपुत्र उवाच ॥ न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ॥ नैसर्गिकीयं मतिरस्य राजन् नियच्छ मन्युं कददाः स्म मानः ॥ २८ ॥ नारद उवाच ॥ गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम् ॥ न चेद् गुरुमुखीयं ते कुतोऽभद्राऽसती मतिः ॥ २९ ॥ प्रह्लाद उवाच ॥ मतिर्न कृष्णे परतः स्वतो वा मिथोभिपद्येत गृहव्रतानाम् ॥ अदान्तगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानाम् ॥ ३० ॥ न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ॥ अन्धा यथान्धैरुपनीयमाना वागीशतन्त्यामुरुदाम्नि बद्धाः ॥ ३१ ॥

रवशीभूतैरिन्द्रियैः हेतुभिस्तमिस्रं संसारं विशताम् यद्वा । नरकपातहेतुभूतं पापमाचरतां पुनः पुनः स्वपराभ्यां चर्वितस्यैव चर्वणं येषां तेषां भवादृशानां परतः एवंभूताद्गुरोः सकाशात् स्वतः प्रयत्नात् वा मिथोऽन्योऽन्यतो वा कृष्णे मतिर्नाभिपद्यते ॥ ३० ॥ नेति ॥ ये दुराशयाः दुष्टो विषयाक्रान्त आशयोन्तःकरणं येषां ते बहिर्विषयेष्वर्थः परमार्थबुद्धिर्येषां ते बहिरर्थास्तानेव गुरुत्वेन मन्तुं शीलं येषां ते स्वस्मिन् भगवत्येवार्थः पुरुषार्थो येषां त्यक्तलोकवित्तपुत्रैषणानां तेषां गतिगम्यमित्यर्थः । तं विष्णुं न विदुः किंतु । स्वर्गादिकमेव किन्तु वागीशस्य विष्णोः तन्त्यां दीर्घरज्ज्वां वेदलक्षणायामुरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां तैस्तैः काम्यकर्मभिर्बद्धा भवन्तीत्यर्थः । अन्धैरुपनीयमाना अन्धा यथा पन्थानं नैव विदुः किंतु गर्त एव पतन्ति तथा अज्ञानां शिष्या अपि दुःखमेवानुभवन्ति नतु भगवन्तं विदुः । तदुक्तम् । " विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः । " इत्यादि ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैषामिति ॥ यावत् निष्किञ्चनानां महीयसां पादरजोभिरात्मनोऽभिषेकं न वृणीत तच्चरणं नाश्रयेत तावद्वेदवाक्यतो जाताप्येषां मतिरुरुक्रमस्याङ्घ्रिं न स्पृशति न प्राप्नोति । असम्भावनाविपरीतभावनादिभिर्विहन्यते इत्यर्थः । अनर्थस्य संसारपरम्परादुःखस्यापगमो यदर्थः यस्या भगवदङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनं तथा च वेदान्तशीलिनामपि तेषां महदनुग्रहाभावान्न तत्त्वनिश्चयो नापि मोक्ष इत्यर्थः ॥ ३२ ॥ इतीति ॥ रुषा अन्धीकृतात्मा हिरण्यकशिपुः इत्युक्त्वा उपरतं पुत्रं स्वोत्सङ्गान्महीतले निरस्यत चिक्षेप । आडभाव आर्षः ॥ ३३ ॥ आहेति ॥ अमर्षः असहनं तेन सहितया रुषा आविष्टो व्याप्तः अत एव कषायीभूते आताम्रे लोचने यस्य सः दैत्यः आह स्म । हे नैर्ऋताः हे राक्षसाः एनमितः आशु निःसारयत ततश्च वध्यतां यतोऽयं वध्यः वधार्हः ॥ ३४ ॥ अयमिति ॥ अधमः नीचः अयमेव मे भ्रातृहा हिरण्याक्षः हतवान् यः स्वानस्मान् पित्रादीन् सुहृदो हितकारिणः पालकान् हित्वा त्यक्त्वा पितृव्यस्य हिरण्याक्षस्य हन्तुर्विष्णोः अस्मच्छत्रोः पादौ दासवदर्चति तत्पक्षपाती सोऽयः

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ॥ महीयसां पादरजोभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ ३२ ॥ इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा ॥ अन्धीकृतात्मा स्वोत्सङ्गान्निरस्यत महीतले ॥ ३३ ॥ आहामर्षरुषाविष्टः कषायीभूतलोचनः ॥ वध्यतामाश्वयं वध्यो निःसारयत नैर्ऋताः ॥३४ ॥ अयं मे भ्रातृहा सोऽयं हित्वा स्वान् सुहृदोऽधमः ॥ पितृव्यहन्तुर्यः पादौ विष्णोर्दासवदर्चति ॥ ३५ ॥ विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः ॥ सौहृदं दुस्त्यजं पित्रोरहाद् यः पञ्चहायनः॥ ३६ ॥ परोऽप्यपत्यं हितकृद्यथौषधं स्वदेहजोऽप्यामयवत् सुतोऽहितः ॥ छिन्द्यात् तदङ्गं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात् ॥ ३७ ॥ सर्वैरुपायैर्हन्तव्यः संभोजशयनासनैः ॥ सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियम् ॥ ३८ ॥

मेव तद्धन्ता ॥ ३५ ॥ विष्णोरिति ॥ योऽसौ पञ्चहायनः पञ्चवार्षिको बालोऽपि अन्यैर्दुस्त्यजमपि पित्रोः सौहृदं स्नेहमहात् त्यक्तवान् अहादित्यार्षः । सोऽसौ असमञ्जसकृतघ्नत्वादसाधुः विष्णोरपि किं नु साधु उपकारं करिष्यति न किञ्चिदित्यर्थः ॥ ३६ ॥ पर इति ॥ परोऽपि हितकृच्चेत् तदा सः अपत्यमेव अपत्यवत्संरक्षणीयमित्यर्थः । यथा हितकृदौषधं वने जातमपि तत आनीय संरक्ष्यते तथेत्यर्थः । स्वदेहजोऽपि सुतः अहितः शत्रुश्चेत्तदा स हन्तव्य एव आमयो रोगः स यथा देहजोऽपि विविधोपायैर्निराक्रियते तथेत्यर्थः । यतः यस्य रुग्ग्रस्तस्य पीडाकरस्याङ्गस्य करचरणादेर्विवर्जनात् त्यागाच्छेषमङ्गं सुखं जीवति चेत्तदा यदात्मनः अहितं दुःखदमहन्तास्पदमङ्गं तदपि छिन्द्यात् का कथा ममतास्पदस्यापत्यस्य ॥ ३७ ॥ सर्वैरिति ॥ यस्मादयं सुहृल्लिङ्गधरः पुत्रवेषधारी शत्रुरेव तस्मात् सर्वैरुपायैः सम्भोजो भोजने विषदानं शयनं निद्रायां शिरश्छेदः आसनम् उपवेशने शिरश्छेदः इत्यादिभिः हन्तव्य एव । दुष्टं निषिद्धविषयकमिन्द्रियं यथा मुनेः शत्रुः तच्च तैः सर्वैरुपायैर्हन्यते तथायमपि शत्रुः सर्वैरुपायैर्हन्तव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः ॥ ३८ ॥ नैर्ऋता इति युग्मम् ॥ एवं स्वभर्त्रा हिरण्यकशिपुना समादिष्टाः आज्ञप्ता तिग्माः तीक्ष्णा दंष्ट्रा येषां करालान्यास्यानि येषां ते च ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषां ते भैरवान् भयङ्करान् नादान् नदन्तः कुर्वन्तः एनं छिन्धि भिन्धीति वादिनः वदन्तः शूलपाणयस्ते नैर्ऋताः तैः शूलैः आसीनं चकारात् प्रसुप्तं भुञ्जानं गच्छन्तं चानवहितं प्रह्लादं सर्वेषु मर्मस्थानेषु अहनन् अघ्नन् । शबलुगार्षः । वृषणकुक्षिहृदयकण्ठशिरआदीनि स्वल्पप्रहारेऽपि प्राणहारीणि मर्मस्थानानि ज्ञेयानि ॥ ३९ ॥ ॥ ४० ॥ परे इति ॥ ब्रह्मणि निर्विकारे अनिर्देश्ये अविषये भगवति अखिलात्मनि शब्दादीनां नियन्तारि परे परमेश्वरे युक्तः एकतां प्राप्तः आत्मा स्वरूपं यस्य तस्मिन् प्रह्लादे तेषां प्रहाराः निष्फला आसन् अपुण्यस्य पुण्यहीनस्य पुनः पुनरारब्धा अपि सत्क्रिया लौकिका महोद्यमा यथा निष्फला भवन्ति तथेत्यर्थः ॥ ४१ ॥ प्रयास इति ॥ हे युधिष्ठिर एवं प्रयासे शूलप्रहारादिमरणोपायरूपे अपहते निष्फलतां गते सति दैत्येन्द्रः हिरण्यकशिपुः परिशङ्कितः प्रह्लादविरोधेन स्वमरणाशङ्कानिर्बन्धेन अत्याग्रहेण

नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः ॥ तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ ३९ ॥ नदन्तो भैरवान् नादाञ्छिन्धि भिन्धीति वादिनः ॥ आसीनं चाहनच्छूलैः प्रह्लादं सर्वमर्मसु ॥ ४० ॥ परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ॥ युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥ ४१ ॥ प्रयासेऽपहते तस्मिन् दैत्येन्द्रः परिशङ्कितः ॥ चकार तद्वधोपायान् निर्बन्धेन युधिष्ठिर ॥ ४२ ॥ दिग्गजैर्दन्दशूकैश्च अभिचारावपातनैः ॥ मायाभिः संनिरोधैश्च गरदानैरभोजनैः ॥ हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ॥ ४३ ॥ न शशाक यदा हन्तुमपापम-सुराः सुतम् ॥ चिन्तां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥ ४४ ॥ एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ॥ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा॥४५॥ वर्तमानोविदूरे वै बालोप्यजडधीरयम् ॥ न विस्मरति मेऽनार्यं शुनःशेफ इव प्रभुः ॥ ४६ ॥

तस्य प्रह्लादस्य वधोपायान् चकार ॥ ४२ ॥ दिग्गजैरिति सार्द्धद्वयम् ॥ दिग्गजैः तस्योपरि दिग्गजाक्रमणैः दन्दशूकेन्द्रैः सर्पश्रेष्ठदंशनैः अभिचारैः कृत्योत्पादनैः अवपातनैः गिरिश्रृङ्गादिभ्योऽधःपातनैः मायाभिः अकस्मादुत्पादितैः सिंहव्याघ्रादिभिः अवटादिषु सन्निरोधैः गरदानैर्विषप्रयोगैः अभोजनैरुपवासैः हिमादिषु पातनैः पर्वताक्रमणैः तदुपरि पर्वतनिक्षेपैः सर्वत्र बहुवचनैस्तेषामावृत्तिं सूचयति एतैरुपायैर्यदा अपापं निर्दोषं स्वसुतं हन्तुं न शशाक तत् तस्य हननं कर्तुमुपायान्तरं च नाभ्यपद्यत न लेभे तदासोऽसुरः दीर्घतमां चिन्तां प्राप्तः ॥ ४३ ॥ ४४ ॥ चिन्तामाह–एष बालो मे मया बह्वसाधु यथा भवति तथा उक्तः । तथास्य तैस्तैर्द्रोहैः शूलघातादिभिः असद्धर्मैर-प्रकारैरभिचारादिभिश्च वधोपायाश्च निर्मिताः तत्रापि स्वेन तेजसा प्रभावेणैव ततो मुक्तः ॥ ४५ ॥ वर्तमान इति ॥ अविदूरे समीपे वर्तमानोऽपि बालोऽपि अयं अजडधीः मत्तोऽपि भयेन न जडा न व्याकुला धीर्यस्य तादृशः प्रभुः समर्थः अतो मेऽनार्यं दौर्जन्यं शत्रुत्वमयं न विस्मरति न विस्मरिष्यति । यद्वा । अविदूरे वर्तमानोऽपि मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनार्यं शत्रुं विष्णुं न विस्मरति यथा अजीगर्तस्य मध्यमः पुत्रः शुनःशेफो मातापितृभ्यां हरिश्चन्द्राय विक्रीतः स यथा तयोरपकारमविस्मरंस्तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् । यद्वा स्वभावापरित्यागे दृष्टान्तः शुनःशेफः पुच्छमिवेति ॥ ४६ ॥ अप्रमेयेति ॥ अप्रमेयः अपरिमेयः अनुभावो यस्य सः अतो न कुतश्चिदपि भयं यस्य सः अत एवामरः मरणरहितः यत एतादृशोयमतो नूनं निश्चितमेतद्विरोधेनैव हेतुना मे मृत्युर्भविता भविष्यति न वा भविता अन्यथा मम मृत्युर्नैव भविष्यति ॥ ४७ ॥ इतीति ॥ इत्येवंभूतया चिन्तया किञ्चिन्म्लानश्रियं निस्तेजस्कमत एव अधःकृतमुखं तं हिरण्यकशिपुमौशनसौ उशनसः पुत्रौ नीतिज्ञौ शण्डामर्कौ विविक्ते निर्जने देशे ह उपपत्तिपूर्वकमिति वक्ष्यमाणमूचतुः ॥ ४८ ॥ जितमिति ॥ हे नाथ तव भ्रुवोर्विजृम्भणेन चलनमात्रेण त्रस्ता भीताः समस्ता धिष्ण्यपाः लोकपाला यस्मिन् तज्जगत्त्रयं त्वयैकेन सहायरहितेनैव जितं तस्यैवंभूतस्य तव चिन्त्यं भयहेतुत्वेन चिन्ताविषयं वयं न चक्ष्महे न पश्यामः यतः शिशूनां चरितं गुणदोषयोः पदं विषयो नैव

अप्रमेयाऽनुभावोऽयमकुतश्चिद्भयोऽमरः ॥ नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ॥ ४७ ॥ इति तं चिन्तया किञ्चिद् म्लानश्रियमधोमुखम् ॥ शण्डामर्कावौशनसौ विविक्त इति होचतुः ॥ ४८ ॥ जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृम्भणत्रस्तसमस्तधिष्ण्यपम् ॥ न तस्य चिन्त्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदम्॥४९॥इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ॥ बुद्धिश्च पुंसो वयसार्यसेवया यावद्गुरुर्भार्गव आगमिष्यति॥५०॥तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत्॥धर्मा ह्यस्योपदेष्टव्या राज्ञां ये गृहमेधिनाम् ॥५१॥ धर्ममर्थं च कामं च नितरां चानुपूर्वशः॥प्रह्लादायोचतू राजन् प्रश्रयावनताय च ॥ ५२ ॥ यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम्॥न साधु मेने तच्छिक्षां द्वन्द्वारामोपवर्णिताम् ॥५३॥

भवतीत्यर्थः । यद्वा । शिशूनां पदं व्यवसायं गुणदोषयोर्मध्ये न चक्ष्महे । " पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु । " इत्यमरः ॥ ४९ ॥ इममिति ॥ यावद् भार्गवो गुरुः शुक्राचार्यः आगमिष्यति आगच्छेत् तावद्यथा भीतः सन्न पलायेत तथा इमं वरुणस्य पाशैर्बद्ध्वा निधेहि स्थापय पुंसो बुद्धिश्च वयसा वयआधिक्येन आर्याणां महतां सेवया सङ्गतस्तदुपदेशेन च भवति तथा च वयआधिक्येन आचार्योपदेशेन च बुद्धिः परावर्तिष्यत इति भावः ॥ ५० ॥ तथेति ॥ एवमेवेति गुरुपुत्रेणोक्तं तथेत्यनुज्ञायाङ्गीकृत्य सभायामिदं वक्ष्यमाणमब्रवीद् । गृहमेधिनां गृहस्थानां राज्ञां ये धर्मास्ते हित एव अस्य प्रह्लादस्योपदेष्टव्याः ॥ ५१ ॥ धर्ममिति ॥ हे राजन् प्रश्रितो विनययुक्तश्चासाववनतश्च तस्मै प्रल्हादाय नितरां निरन्तरमनुपूर्वशोऽनुक्रमेण धर्मादीनेवोचतुः ॥ ५२ ॥ यथेति ॥ आत्मने स्वस्मै यथा यथावद् गुरुभिः उपशिक्षितं त्रिवर्गं साधु न मेने तथा द्वन्द्वे रागद्वेषादिभिः विषयेष्वारमणं येषां तैरुपवर्णितां तच्छिक्षां च साधु न मेने ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ यदा आचार्यः परावृत्तः अध्यापनस्थानाद् गृहं गतः तत्र गृहमेधीयकर्मसु प्रसक्तश्चेति शेषः । तदा कृतक्षणैः क्रीडार्थं लब्धावसरैर्वयस्यैः समानवयस्कैः बालकैः तत्र प्रह्लादः उपहूतः "सोऽचि लोपे" इति सुलोपः सन्धिश्च ॥ ५४ ॥ अथेति ॥ अथानन्तरं स श्लक्ष्णया मधुरया वाचा तान् बालकान् प्रत्याहूय तेषां निष्ठां जन्मम-रणादिलक्षणां विद्वान् जानन् यद्वा । तेषां स्वस्मिन् गुरुत्वनिष्ठां जानन् महाबुधः प्रह्लादः प्रसन्नचित्तत्वात् प्रहसन्निव कृपया उवाच ॥ ५५ ॥ ते इति युग्मम् ॥ हे राजेन्द्र द्वन्द्वारामाणां द्विजानामीरितैरुपदेशैरीहितैश्चेष्टितैश्च न दूषिता धीर्येषां ते बालास्तु तद्गौरवात् तद्वचनगौरवात् त्यक्ताः क्रीडापरिच्छदाः क्रीडोपकरणानि यैस्तथाभूताः तस्मिन् प्रह्लादे न्यस्तं हृदयमीक्षणं च यैस्ते तस्य सर्वत उपविष्टाः तं प्रह्लादं पर्युपासत ततः करुणः दयालुः मैत्रः हितकारी महाभागवतः असुरः प्रह्लादस्तानाह स्म उपदिदेश ॥ ५६ ॥ ५७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चमे गङ्गासहायः सप्तमस्य व्यधादिमाम् ॥ ५ ॥ षष्ठे गुरौ गृहव्यग्रे प्रल्हादो दैत्यबालकान् ॥ उपादिशत्परं

यदाचार्यः परावृत्तो गृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥ ५४ ॥ अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ॥ उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥ ५५ ॥ ते तु तद्गौरवात् सर्वे त्यक्तक्रीडापरिच्छदाः ॥ बाला न दूषितधियो द्वन्द्वारामेरितेहितैः ॥ ५६ ॥ पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः ॥ तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥ ५७ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे प्रह्लादेन नवधा भक्तिवर्णनं नाम पञ्चमोऽध्यायः ॥५॥ प्रह्लाद उवाच ॥ कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवम-र्थदम् ॥ १ ॥ यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ॥ यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ २ ॥ सुखमैन्द्रियकं दैत्या देहयोगेन देहिनाम् ॥ सर्वत्र लभ्यते दैवाद् यथा दुःखमयत्नतः ॥ ३ ॥ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् ॥ न तथा विन्दते क्षेमं मुकुन्दचरणाम्बुजम् ॥ ४ ॥

धर्मं तत्र पद्यानि खाग्नयः ॥ उवाच द्वितयं साङ्घ्रिपञ्चत्रिंशदनुष्टुभः ॥ ६ ॥ कौमार इति ॥ प्राज्ञः प्राणी इहैव मानुषजन्मनि तत्रापि कौमारे एव भागवतानेव धर्मानेवाचरेत् न सुखार्थप्रयासान् यतः इह मानुषं जन्म दुर्लभं तदपि जन्म अध्रुवमनित्यम् अर्थदं पुरुषार्थदं च अतः अस्थिरेणानेन स्थिरं पुरुषार्थं साधयेदिति भावः ॥ १ ॥ यथेति ॥ इह मनुष्यजन्मनि पुरुषस्य प्राणिनः विष्णोः पादोपसर्पणं शरणगमनमेव यथा यथावत् योग्यमित्यर्थः । यद्वा । यथा येन प्रकारेण विष्णोः पादयोरुपसर्पणं प्राप्तिर्भवेत् तथा आचरेदित्यनुषङ्गः । यद्यस्मादेष विष्णुः सर्वभूतानां प्रियः आत्मा ईश्वरः सुहृच्च ॥२॥ सुखमिति ॥ हे दैत्याः देहिनां प्राणिनां देहयोगेन ऐन्द्रियकमिन्द्रियविषयसंबन्धजन्यं सुखं सर्वत्र पश्वादिजन्मस्वपि अयत्नतः आधुनिकप्रयत्नं विनापि दैवात्प्राचीनकर्मवशादेव लभ्यते यथा प्रयत्नं विनैव दुःखं लभ्यते तथेत्यर्थः ॥ ३ ॥ तदिति ॥ तत् तदर्थः प्रयासो न कर्त्तव्यो यतः प्रयासात् परं केवलमायुषो व्ययः क्षय एव भवति न किंचित्फलमित्यर्थः । यथा मुकुन्दचरणाम्बुजं भजन् आत्यन्तिकं क्षेमं प्राप्नोति तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैषयिकसुखार्थं यतमानः तादृशं क्षेमं न विन्दते । यद्वा । तथा तेन प्रकारेण क्षेमं क्षेमरूपं मुकुन्दचरणाम्बुजं न विन्दते ॥ ४ ॥ तत इति ॥ ततस्तस्मात् कारणात् कुशलो विवेकी पुरुषः भयमाश्रितः संसारदुःखाद्भीतः सन् पुष्कलं सर्वाङ्गपूर्णं पौरुषं पुरुषरूपं मानुषं शरीरं यावन्न विपद्येत अङ्गविकलतया असमर्थं न भवेत्तावत् शीघ्रमेव कौमारमारभ्यैव क्षेमाय मोक्षाय यतेत ॥५॥ आयुर्व्ययक्रममाह–पुंस इति ॥ पुंसो मनुष्यस्य तावत् वर्षशतमायुः शतवर्षपरिमितो जीवनयोग्यः कालः तत्र च अजितात्मनः पुंसः तस्यार्द्धं पञ्चाशद्वर्षात्मकं निष्फलमेव याति यस्मादसौ पुरुषः अन्धं गाढं तमो निद्रारूपं प्रापितः सन् तूष्णीं रात्र्यां शेते ॥ ६ ॥ मुग्धस्येति ॥ एवं बाल्ये मुग्धस्य मूढस्य दश वर्षाणि कौमारे क्रीडतश्च दश वर्षाणीत्येवं वर्षाणां विंशतिर्निष्फलं याति तथा जरया ग्रस्तो देहो यस्य तस्य अत एवाकल्पस्य लौकिककार्येऽप्यसमर्थस्य वर्षाणां विंशतिर्वृथैव याति ॥ ७ ॥ दुरिति ॥ शेषमायुः दुरापूरेण दुःखैः आसमन्तात्पूर्यमाणेन कामेन विषयभोगाभिलाषात्मकेन बलीयसा मोहेनाहंता-

ततो यतेत कुशलः क्षेमाय भयमाश्रितः ॥ शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ ५ ॥ पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः ॥ निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ॥ ६ ॥ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः ॥ जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः॥७॥ दुरापूरेण कामेन मोहेन च बलीयसा ॥ शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥ को गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥ कोन्वर्थतृष्णां विसृजेत् प्राणेभ्योपि य ईप्सितः ॥ क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥ कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ॥ सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ ॥ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीस्तु कुल्याः पशुभृत्यवर्गान् ॥ १२ ॥ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ॥ औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः ॥ १३ ॥

ममतारूपेण च गृहेषु सक्तस्य अत एव प्रमत्तस्य कर्तव्यानुसन्धानशून्यस्य अपयाति वृथा यातीत्यर्थः ॥८॥ ननु वार्द्धके विरक्त्या क्षेमं यास्यतीत्याशङ्क्याह–क इति ॥ गृहेषु उपलक्षणतया गृहपुत्रदारादिषु सक्तमत एव दृढैर्भगवत्कृपां विना दुर्मोचनीयैः स्नेहपाशैर्बद्धमात्मानं को नाम अजितेन्द्रियः पुमान् विमोचयितुमुत्सहेत शक्नुयात् ॥ ९ ॥ को न्विति ॥ अर्थस्य धनादेः तृष्णां को नु अजितेन्द्रियो विसृजेत् न कोऽपीत्यर्थः । योऽर्थः प्राणेभ्योऽपि ईप्सितः इष्टतमः प्रियतम इत्यर्थः । यमर्थं तस्करः चोरः धनिनां गृहप्रवेशेन सेवको युद्धादिना वणिक् सांयात्रिकादिः समुद्रादियानेन प्रेष्ठैरप्यसुभिः क्रीणाति प्राणहानिमङ्गीकृत्याप्यर्थं साधयितुं प्रवर्तत इत्यर्थः ॥१०॥ कथमिति त्रिकम् ॥ सुहृत्सु दारापत्यादिषु यः स्नेहः स्नेहलक्षणः पाशः तेन सितो बद्धः तेष्वनुरक्तचित्तश्च जनः अनुकम्पितायाः प्रियाया रहस्यं रहसि भवं सङ्गं कथं त्यजेत इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्र द्वितीयान्तपदस्यानेनैव क्रियापदेन संबन्धः। तङार्षः। रुचिरान् मनोज्ञान् मन्त्रान् हितालापांश्च कलानि मधुराण्यक्षराणि येषां तेषां शिशूनां सङ्गं च कथं त्यजेत् पुत्रान् स्मरन् तांश्च श्वशुरगेहे स्थिताः हृदय्याः हृदयंगमाः दुहितॄः पुत्रीः भ्रातॄंश्च स्वसॄः भगिनीश्च दीनौ वृद्धत्वेन सामर्थ्यरहितौ पितरौ मातापितरौ च मनोज्ञाः मनोहराः उरवः बहवः परिच्छदाः भोगोपकरणानि येषु तान् गृहांश्च कुल्याः कुलपरम्परागताः वृत्तीः जीविकाश्च पशून् गाः कुञ्जरादींश्च तथा भृत्यवर्गान् दासीदासादीन् त्यजेत तत्तत्फललोभात्कर्माणि ईहमानः कुर्वन् कोशस्कृत् कोशकारी कीटः सुडार्षः। स यथा कोशात्मकं स्वगृहं कुर्वन् निर्गमाय द्वारमपि नावशेषयति ततो निरुद्ध्यते तथा निरुद्धः अवितृप्तकामश्च औपस्थ्यं शैश्न्यं च जैह्वयं च सुखं बहु अधिकं मन्यमानः दुरन्तो मोहो यस्य सः ततः कथं विरज्येत कथं विरक्तः स्यात् ॥११॥१२॥१३॥ कुटुम्बेति ॥ प्रमत्तः कुटुम्बासक्तः कुटुम्बपोषाय कुटुम्बपोषणनिमित्तेन कर्मणा वियत् क्षीयमाणं निजमायुः न बुद्ध्यते तथा विहतमर्थं पुरुषार्थं भगवदाराधनादिपरमानन्दावाप्तिलक्षणं च न बुद्ध्यते धनस्य तु वराटकमात्रस्य विघातं बुद्ध्यते तथा स्वकुटुम्बे रामो रतिर्यस्य सः सर्वत्र सर्वस्मिन् देशे काले चाध्यात्मिकादितापत्रयेण दुःखित आत्मा मनो यस्य सः

कुटुम्बपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः ॥ सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः ॥ १४ ॥ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ॥ प्रेत्येह चाथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी ॥ १५ ॥ विद्वानपीत्थं दनुजाः कुटुम्बं पुष्णन् स्वलोकाय न कल्पते वै ॥ यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥ १६ ॥ यतो न कश्चित् क्व च कुत्रचिद् वा दीनः स्वमात्मानमलं समर्थः ॥ विमोचितुं कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः ॥ १७ ॥ ततो विदूरात् परिहृत्य दैत्या दैत्येषु सङ्गं विषयात्मकेषु ॥ उपेत नारायणमादिदेवं विमुक्तसङ्गैरिषितोऽपवर्गः ॥ १८ ॥

तादृशोऽपि न निर्विद्यते तत्र दुःखबुद्धिं न करोतीत्यर्थः ॥ १४ ॥ वित्तेष्विति ॥ अजितेन्द्रियः अशान्तकामः कुटुम्बी वित्तेषु धनादिषु नित्यमभिनिविष्टं चेतो यस्य सः परवित्तहर्त्तुः प्रेत्य मरणान्तरं यमयातनादिरूपमिह च स्वामिदण्डराजदण्डादिरूपं दोषं यद्यपि विद्वान् जानाति अथापि तत्परवित्तं हरते ॥ १५ ॥ विद्वानिति ॥ हे दनुजाः स्वीयमिदं पारक्यमिदमिति विभिन्नो भावो भावना यस्य सः विद्वान् शास्त्रज्ञतयाऽतिप्रसिद्धोऽपि इत्थमत्यासक्ततया वर्णितप्रकारेण कुटुम्बं पुष्णन् स्वलोकाय आत्मपरामर्शाय यद्वा। स्वलोकाय कोऽहं किं करोमीति स्वमवलोकितुं न वै कल्पते समर्थो नैव भवति किन्तु विद्वानपि विमूढो यथा तथा तमः अभिनिवेशमेव प्रपद्येत प्राप्नुयात् ॥ १६ ॥ यत इति युग्मम् ॥ हे दैत्याः अत एव कामो दृशि यासां तासां स्त्रीणां विहारे क्रीडानिमित्ते क्रीडामृगः वानरतुल्यः विहारमिति पृथक् पाठे तासां विहारसाधनभूतमात्मानमित्यर्थः। यतस्तासां क्रीडामृगः स इत्यन्वयः। किं च यत् यासु निगडः शृङ्खलातुल्यो विसर्गः पुत्रादिरूपो भवति। यतः यस्मात् कश्चिदपि क्व च क्वचिदपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

काले कुत्रचिदपि देशे वा स्वमात्मानं विमोचितुं मोचयितुं न समर्थः णिलोप आर्षः। अतः विदूरात् दूरतः विषयात्मकेषु विषयरक्तेषु दैत्येषु सङ्गं परिहृत्य त्यक्त्वा आदिदेवं नारायणमेव उपेत शरणं व्रजत अतः विमुक्तसङ्गैः संन्यासिभिरपि इषितः इष्टः अपवर्गः परमानन्दरूपो मोक्षोऽपि स एव॥ १७ ॥ १८ ॥ न हीति ॥ हे असुरात्मजाः सर्वभूतानां स्थावरजङ्गमात्मकानामात्मत्वादिति न तस्य किञ्चिदपेक्षितमिति सूचितम् अत एव सर्वतः सर्वस्मिन् देशे काले च सिद्धत्वात् अच्युतं प्रीणयतः प्रसन्नं कुर्वतः पुंसः कर्मान्तरवद्बह्वायासो नास्त्येव ॥ १९ ॥ परेति चतुष्कम् ॥ ब्रह्मा चतुर्मुखः अन्तो येषां स्थावरो वृक्षादिरादिर्येषां तेषु परावरेषु उच्चावचेषु जीवेषु भौतिकेषु विकारेषु पृथ्व्यादिपञ्चमहाभूतकार्येषु जडेषु घटपटादिषु अथ तथा महत्सु च भूतेष्वाकाशादिषु गुणेषु सत्वरजस्तमस्सु गुणसाम्ये च प्रधाने तथा गुणव्यतिकरे गुणवैषम्यवति महदहङ्कारादौ च परः ब्रह्मस्वरूपः आत्मा भगवान् ईश्वरः अव्ययः एक एवास्ति ईयत इत्युत्तरस्य संबन्धो वा । वस्तुतोऽतिसूक्ष्मत्वादनिर्देश्यो निर्देष्टुमशक्योऽपि अविकल्पितो भेदरहितोऽपि गुणात्मकः सर्गो यस्याः तया मायया स्थावरजङ्गमानां प्रत्यगात्मा तत्तद्द्रष्टा भोक्ता च जीवस्तत्स्वरूपेण दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यव्यापकनिर्देश्यः

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ॥ आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः ॥ १९ ॥ परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु ॥
भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥ २० ॥ गुणेषु गुणसाम्यं च गुणव्यतिकरे तथा ॥ एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः॥२१॥
प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ॥ व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २२ ॥ केवलानुभवानन्दस्वरूपः परमेश्वरः ॥
माययाऽन्तर्हितैश्वर्य ईयते गुणसर्गया ॥ २३ ॥ तस्मात् सर्वेषु भूतेषु दयां कुरुत सौहृदम् ॥ आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥२४॥
तुष्टे च तत्र किमलभ्यमनन्त आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ॥ धर्मादयः किमगुणेन च काङ्क्षितेन सारंजुषां चरणयोरुपगायतां नः ॥ २५ ॥

ईयते प्रतीयते । तत्र प्रत्यगात्मस्वरूपेण व्यापकतया निर्देश्यः दृश्यरूपेण व्याप्यतया निर्देश्यः ईयते तथा केवलः अनुभवात्मको ज्ञानस्वरूप आनन्द एव स्वरूपं यस्य तादृशोऽपि गुणसर्गया मायया अन्तर्हितमाच्छादितं स्वैश्वर्यं स्वरूपं येन सः तादृशः ईयते ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ तस्मादिति ॥ तस्मात् सर्वेषु भूतेषु असुरं भावं द्वेषादिकमुन्मुच्य संत्यज्य सौहृदं मैत्रीं दयां तद्दुःखप्रहाणेच्छां च कुरुत यया दयया अधोक्षजः तुष्यति ॥ २४ ॥ तुष्ट इति ॥ तत्र तस्मिन्ननन्ते अनन्तगुणे आद्ये सर्वकारणभूते भगवति तुष्टे च सति तद्भक्तानां किमलभ्यं किं दुर्लभं न किञ्चिदित्यर्थः । तथापि गुणव्यतिकरात् कर्मानुगुणसत्त्वादिगुणपरिणामाद्दैवशब्दवाच्यादेव इह लोके स्वतः सिद्धाः ये धर्मादयः धर्मार्थकामरूपाः पुरुषार्थास्तैर्नः किं फलं तथा अगुणेन निर्गुणेऽक्षरे लयात्मकेन मोक्षेणापि काङ्क्षितेन भगवतश्चरणयोः सारंजुषां सारग्राहिणां परमानन्दमनुभवतां तमुपगायतां नोऽस्माकं किं न किञ्चित्प्रयोजनमित्यर्थः ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

धर्मेति ॥ धर्मोऽर्थः कामश्चेति यस्त्रिवर्गो वेदेनाभिहितः तदर्थम् ईक्षा आत्मविद्या त्रयी कर्मविद्या नयो नीतिः दमो दण्डः विविधा कृष्यादिरूपा वार्ता जीविका चेति ईक्षाद्या अभिहिताः तदेतत्सर्वं निगमस्य वेदस्यार्थजातं स्वसुहृदः स्वान्तर्यामिणो भगवतः परमस्य पुंसः स्वात्मार्पणं तत्समर्पितानुष्ठानेन चित्तविशुद्धिविवेकादिद्वारात्मनिवेदनसाधनं चेत्तर्हि सत्यपरत्वात् सत्यं यथार्थमेव मन्ये फलाकाङ्क्षया तु नश्वरमेव । यद्वा । तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं तु निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेव ॥२६ ॥ तेषां विश्वासार्थं गुरुसंप्रदायमाह—ज्ञानमिति ॥ तदेतत् अमलं दुरवापं महत्कृपामन्तरेण दुर्लभं ज्ञानं नरस्य सखा भगवान्नारायणो बदरिकाश्रमवासी नारदायाह स्म उपदिष्टवान् तत् भगवत एकान्तिनाम् एकान्तभक्तानाम् अकिञ्चनानां भगवदतिरिक्तेच्छारहितानां यत्पादारविन्दरजस्तेनाप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यान्न तूत्तमानामेवेति नियमः । अतो युष्माकमपि तत्राधिकार इति भावः ॥ २७ ॥ श्रुतमिति ॥ अत एव मया एतच्छास्त्रीयं ज्ञानं विज्ञानं विज्ञानसंयुतमनुभवपर्य-

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता ॥ मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥ २६ ॥ ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ॥ एकान्तिनां भगवतस्तदकिञ्चनानां पादारविन्दरजसाप्लुतदेहिनां स्यात् ॥ २७ ॥ श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् ॥ धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥ दैत्यपुत्रा ऊचुः ॥ प्रह्लाद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुम् ॥ एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥२९॥ बालस्यान्तःपुरस्थस्य महत्सङ्गो दुरन्वयः ॥ छिन्धि नः संशयं सौम्य स्याच्चेद् विश्रम्भकारणम् ॥ ३० ॥ इति श्रीभागवते महा० स० प्रह्लादेन बालानां ब्रह्मज्ञानवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ नारद उवाच ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ॥ उवाच स्मयमानांस्तान् स्मरन् मदनुभाषितम् ॥ १ ॥

न्तं तथा शुद्धं हिंसादिदोषरहितं भागवतं भगवत्प्रीतिकरं श्रवणकीर्त्तनादिधर्मं च पूर्वं देवदर्शनात् भगवद्दर्शनवतः नारदात् श्रुतम् ॥ २८ ॥ प्रह्लादेति ॥ हे इति पृथक् पदम् । हे प्रह्लाद त्वं वयं चापि एताभ्यां गुरुपुत्राभ्यामृते विनाऽन्यं गुरुं न विद्मः " विदो लटो वा " इति मयो मादेशः बालानामपि सतामस्माकमेतावेवेश्वरौ नियन्तारौ अतस्तवान्यत्र गमनं न संभवतीति भावः ॥ २९ ॥ स एवात्रागत इत्यपि न संभवतीत्याहुः—बालस्येति । हे सौम्य बालस्यात एवान्तःपुरस्थस्य तव महतः श्रीनारदस्य सङ्गो दुरन्वयः दुर्घट एव अतस्तत्र नोऽस्माकं संशयो भवति तत्र विश्रम्भस्य विश्वासस्य कारणं हेतुः स्यादस्ति चेत्तर्हि तदुक्त्यास्माकं संशयं छिन्धि ॥ ३० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठेऽस्मिन् सप्तमस्य व्यधादिमाम् ॥ ६ ॥ सप्तमे नारदादेशं स्वस्य गर्भगतस्य च ॥ प्रह्लादोऽकथयद्बालान् तत्र श्लोकाः शरेषुभिः ॥ चत्वार्युवाचेत्यनुष्टुम्मितिः पादोनगोशैरः ॥ ७॥ एवमिति ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः प्रह्लादो मदनुभाषितं मयोपदिष्टं तत्त्वं स्मरन् स्मयमानः स्वप्रौढिं प्रकटयन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान् बालकान् प्रत्युवाच ॥ १ ॥ पितरीति ॥ अस्माकं पितरि हिरण्यकशिपौ तपसे तपः कर्त्तुं मन्दराचलं प्रति प्रस्थिते गते सति इन्द्रादयो विबुधा देवाः दानवान् प्रति परमुत्कटं युद्धोद्यमं चक्रुः ॥ २ ॥ पिपीलकैरिति ॥ अहिः सर्प इव लोकोपतापनः सर्वप्राणिदुःखदः पापः पापीयान् पापेन स्वकृतपापेनैव हेतुना पिपीलिकैरभक्षि भक्षित इति दिष्ट्या भद्रं जातमिति वादिनः सन्तो वासवादयो युद्धोद्यमं चक्रुरित्यनुषङ्गः ॥ ३ ॥ तेषामिति ॥ तेषां वासवादीनाम् अतिबलप्रयुक्तं युद्धोद्योगं निशम्य दृष्ट्वा सुरैर्वध्यमानाः अत एव भीताः सन्तोऽसुरयूथपाः सर्वतो दिशं यथावकाशं दुद्रुवुः पलायितवन्तः ॥ ४ ॥ कलत्रेति ॥ प्राणपरीप्सवः प्राणमात्रपरित्राणेच्छव इत्यर्थः । कलत्रादीन् नावेक्षमाणाः तदनुसन्धानरहिताः त्वरिताः त्वरया युक्ताः सर्वे दुद्रुवुः परिच्छदाः भोगोपकरणानि ॥ ५ ॥ व्यलुम्पन्निति ॥ जयकाङ्क्षिणः अमरा देवाः राज्ञो हिरण्यकशिपोः शिबिरं गृहं व्यलुम्पन् सर्वस्वापहारेण विनाशितवन्तः । इन्द्रस्तु राज्ञो महिषीं भार्यां मम मातरमग्रहीत् ॥ ६ ॥ नीयमानामिति ॥ तां चेन्द्रेण नीयमानाम् अत एव भयेन

प्रह्लाद उवाच ॥ पितरि प्रस्थितेऽस्माकं तपसे मन्दराचलम् ॥ युद्धोद्यमं परं चक्रुर्विबुधा दानवान् प्रति ॥२॥ पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः ॥ पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥ तेषामतिबलोद्योगं निशम्यासुरयूथपाः ॥ वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशम् ॥ ४ ॥ कलत्रपुत्रमित्राप्तान् गृहान् पशुपरिच्छदान् ॥ नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥ व्यलुम्पन् राजशिबिरममरा जयकाङ्क्षिणः ॥ इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६ ॥ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ॥ यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥ प्राह नैनां सुरपते नेतुमर्हस्यनागसम् ॥ मुञ्च मुञ्च महाभाग सतीं परपरिग्रहम् ॥ ८ ॥ इन्द्र उवाच ॥ आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ॥ आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं गतः ॥ ९ ॥ नारद उवाच ॥ अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ॥ त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली ॥ १० ॥

उद्विग्नां कम्पितां कुररीं तन्नाम्नीं पक्षिणीमिव रुदन्तीं क्रन्दतीं नुमार्षः । तत्र पथि मार्गे यदृच्छया आगतो देवर्षिर्नारदो ददृशे ददर्श । तद्भार्षः ॥ ७ ॥ प्राहेति ॥ दृष्ट्वा प्राह स्म च हे सुरपते हे महाभाग एनां परपरिग्रहं परभार्यां सतीं पतिव्रताम् अत एव अनागसं निरपराधां त्वं नेतुं मा अर्हसि अतो मुञ्च मुञ्चेति ह । आवश्यके वीप्सा ॥ ८ ॥ आस्त इति ॥ अस्या जठरे कुक्षाववषह्यमस्माभिः सोढुमशक्यं सुरद्विषो हिरण्यकशिपोर्वीर्यं गर्भरूपेण वर्द्धमानमास्ते अतः अनया यावत्प्रसवं प्रसवपर्यन्तमास्यतां मत्कारागारे स्थीयतां ततश्चार्थस्य पदवीं मार्गं गतः प्राप्तः सन्निमां मोक्ष्ये जातं पुत्रं हत्वा त्यक्ष्यामीत्यर्थः ॥ ९ ॥ अयमिति ॥ अयं गर्भगः शिशुः निष्किल्बिषः निर्दोषः महाभागवतः भगवता स्वीयत्वेनाङ्गीकृतः साक्षात् स्वगुणैरेव महान् महाप्रभावः न तु पित्रादिसबन्धात् अनन्तस्यानुचरः बली चातः त्वया संस्थां मृत्युं न प्राप्स्यते तद्भार्षः॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवमुक्तः इन्द्रः देवर्षेर्वचो मानयन् तद्गौरवादङ्गीकुर्वन् तां मम मातरं विहाय अनन्तस्य भगवतः प्रियो योऽहं स वा प्रियो यस्य तस्य मम भक्त्या एनां परिक्रम्य प्रदक्षिणीकृत्य दिवं ययौ ॥ ११ ॥ तत इति ॥ ततश्च ऋषिर्नारदः नो मम मातरं निजाश्रमं प्रति सम्यक् सम्मानपूर्वकमानीय आश्वास्य सान्त्वयित्वा हे वत्से बाले तव भर्तुर्यावदागमस्तावत्पर्यन्तं त्वया इहास्मिन् ममाश्रमे उष्यतां स्थीयतामित्युवाचेत्यर्थः ॥ १२ ॥ तथेति ॥ ततः सा मम मातापि देवर्षेर्वचस्तथेत्यङ्गीकृत्य यावद्दैत्यपतिः हिरण्यकशिपुः घोरात् तपसो न न्यवर्तत तावत् तस्य नारदस्यान्ति समीपे नास्ति कुतोऽपि भयं यस्यास्तादृशी सती अवात्सीत् ॥ १३ ॥ ऋषिमिति ॥ यतः सती पतिव्रता अन्तर्वत्नी गर्भिणी च अतः स्वगर्भस्य क्षेमाय इच्छया भर्तुरागमनानन्तरं प्रसूतये च परमया भक्त्या तत्र ऋषिं नारदं पर्यचरत् शुश्रूषितवती ॥ १४ ॥ ऋषिरिति ॥ कारुणिकः दयालु ईश्वरः गर्भस्थस्याप्युपदेशे समर्थः ऋषिर्नारदः स्वमनसि मामप्युद्दिश्य तस्याः परिचरन्त्याः मम मातुर्निर्मलं हिंसादिरहितं धर्मस्य तत्वं भक्तिलक्षणं तथा निर्मलं

इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन् वचः॥अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ॥११॥ततो नो मातरमृषिः समानीय निजाश्रमम्॥आश्वास्येहोष्यतां वत्से यावत् ते भर्तुरागमः॥१२॥तथेत्यवात्सीद्देवर्षेरन्ति साऽप्यकुतोऽभया॥यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्तत॥१३॥ऋषिं पर्यचरत्तत्र भक्त्या परमया सती ॥ अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः॥ धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम्॥१५॥तत्तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे॥ऋषिणाऽनुगृहीतं मां नाधुनाप्यजहात् स्मृतिः॥१६॥भवतामपि भूयान्मे यदि श्रद्दधते वचः॥वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा॥१७॥ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः ॥ फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥ आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ॥अविक्रियः स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः ॥१९॥

ज्ञानमात्मानात्मविवेकं चेत्युभयं प्रादात् ॥ १५ ॥ तदिति ॥ तत्तु ज्ञानादिकं कालस्य दीर्घत्वात् स्त्रीत्वाच्च मातुः तिरोदधे विस्मृतम् ऋषिणा अनुगृहीतं मां तु सा स्मृतिः अधुनापि नाजहान्न तत्याज ॥ १६ ॥ भवतामिति ॥ यदि भवन्तो मद्वचः श्रद्दधते विश्वसन्ति तदा तदुभयं भवतामपि भूयात् भवेत् आशीर्वादो वा । यतः विशारदो भगवांस्तद्विषया धीः यद्वा वैशारदी स्वार्थेऽण् । देहाद्यहङ्कारच्छेदनिपुणा धीः श्रद्धातः स्त्रीणां बालानां चापि भवति । यथा गर्भस्थस्यैव मे यथा जाता तथेत्यर्थः ॥ १७ ॥ पुनः प्रकृतमुपदेशमनुसरति—जन्मेति ॥ ईश्वरो गुणपरिणामापादनसमर्था मूर्त्तिराकारो यस्य तेन कालेन निमित्तभूतेन जायते अस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवंरूपा इमे षड्भावविकारा ये दृष्टाः प्रत्यक्षमुपलब्धास्ते देहस्यैव धर्माः न त्वात्मनः । यथा वृक्षे सत्येव फलानां जन्मादयो दृश्यन्ते न ते वृक्षस्य तद्वदात्मनि सत्येव देहस्य जन्मादयो भवन्ति नात्मन इत्यर्थः ॥१८॥ आत्मेति ॥ आत्मा नित्यः उत्पत्तिविनाशरहितः अव्ययः अपक्षयशून्यः शुद्धः रागादिरहितः एकः क्षेत्रज्ञः क्षेत्रं शरीरं जानाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आश्रयः सर्वाधारः अविक्रियः निर्विकारः स्वदृक् स्वयंप्रकाशः हेतुः कारणं व्यापकः असङ्गी अनावृतः पूर्णः॥१९॥एतैरिति ॥ एतैरुक्तैर्नित्यत्वादिभिः परैः श्रेष्ठैः विवेकप्रतिपत्तिहेतुभिर्द्वादशभिरात्मनो लक्षणैर्विद्वान् देहादिभ्यः पृथगात्मानं विद्वान् सन् देहादौ देहपुत्रगृहादौ मोहजमज्ञानजमहं ममेत्यसद्भावं मिथ्याभिमानं त्यजेत् ॥२०॥ स्वर्णमिति ॥ क्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु पाषाणेषु योगैर्धमनादिभिस्तत्प्राप्त्युपायैस्तदभिज्ञः तत्प्राप्त्युपायाभिज्ञो हेमकारो यथा स्वर्णमाप्नुयात् तथा क्षेत्रेषु देहादिसङ्घातेषु आत्मप्राप्त्युपायैस्तत्त्वविवेकादिभिरध्यात्मवित् आत्माधिकृतकार्यकारणसङ्घातज्ञाता ब्रह्मगतिं ब्रह्मात्माभेदसाक्षात्कारं लभेत प्राप्नुयात् ॥ २१ ॥ अष्टाविति ॥ आचार्यैः कपिलादिभिः मूलप्रकृतिः महदहङ्कारौ पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः प्रोक्ताः त्रयः सत्वरजस्तमोरूपास्तस्याः प्रकृतेर्गुणाः एव न तु ततो भिन्नाः प्रोक्ताः तथा एकादशेन्द्रियाणि पञ्चमहाभूतानि चेति षोडश विकाराः प्रोक्ताः पुमान् पुरुषस्तु समन्वयात् एषु साक्षित्वेनान्वयात् एक एव प्रोक्तः। तदुक्तम् " मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥" इति एवकारो गुणानामात्मधर्मत्ववारणार्थः॥२२॥ देह इति॥ देहस्तु सर्वसङ्घातः प्रकृति-

एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ॥ अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥ स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ॥ क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद् ब्रह्मगतिं लभेत ॥ २१ ॥ अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ॥ विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥ देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा ॥ अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् ॥ २३ ॥ अन्वयव्यतिरेकेण विवेकेनोशतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ॥ ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥

विकृतिसङ्घातात्मकः स च जगत् जङ्गमः तस्थुः स्थावरश्चेति द्विधा नेति एवं विधो गन्धवान्न भवति रसवान्न भवति रूपवान्न भवतीत्यादिप्रकारेणापोहे स्वयमेव अतत् आत्मव्यतिरिक्तं यत्पृथिव्यादि वस्तु तत् त्यजन् अनात्मवर्गात्पृथगुपलभ्यमानः आत्मा पुरुषः अत्र देह एव मृग्यः विवेचनीयः ॥ २३ ॥ अन्वयेति ॥ मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः अत एव मणिभ्यः सूत्रस्येवैकैकव्यतिरेकः तयोर्द्वन्द्वैक्यं तेन यो विवेकः तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थितिसंहारैः " यतो वा इमानि भूतानि जायन्ते " इत्यादि श्रुत्युक्तसर्गाद्यनुसन्धानेनेत्यर्थः । विमृशद्भिः विचारयद्भिः असत्वरैः अव्यग्रैः पुरुषो मृग्यत इति ॥२४॥ विमर्शप्रकारमाह—बुद्धेरिति ॥ जागरणं स्वप्नः सुषुप्तिरित्येतास्तिस्रो बुद्धेर्वृत्तयो व्यापारास्ता वृत्तयो येनैवानुभूयन्ते स परः देहेन्द्रियान्तःकरणादिभ्योऽन्य एव अध्यक्षः देहादीनां द्रष्टा पुरुषः प्रत्यगात्मेत्यन्वयः । तत्र जागरणं नाम बाह्येन्द्रियव्यापारानुविद्धा वृत्तिः स्वप्नस्तदननुविद्धा वृत्तिः सुषुप्तिर्बुद्धिवृत्त्युपरामः तदुपरमोऽपि तत्संबन्धयेवेति बुद्धिवृत्तय इत्युक्तम् । एतत्रि-

CC-0. In Public Domain. Digitization by eGangotri

तयज्ञानाश्रयत्वेन यः प्रतीयते स प्रत्यगात्मेति विवेकः ॥ २५ ॥ एभिरिति ॥ पर्यस्तैः अनात्मधर्मत्वेन निरस्तैः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः एभिर्बुद्धिभेदैः जागरादिरूपैर्बुद्धिपरिणामैरात्मनः स्वरूपं बुध्येत् जानीयात् । तङ्भाव आर्षः। बुद्धेरेव त्रिगुणात्मकत्वात् कर्मकर्तृत्वाच्च तस्या एवैता अवस्थाः । आत्मा तु बुद्ध्यन्वयात् तदवस्थावानिव भाति न तत्वत इति आत्मनः स्वरूपं जानीयात् पुष्पाद्यवयवाश्रयत्वेनान्वितत्वात् । यथा गन्धैः कुसुमादिगैर्भैरुपलक्षितं तदाश्रयं वायुं बुध्यते तथेत्यर्थः । तद्वदात्मनोऽपि बुद्ध्याश्रयत्वेनान्वयाद्बुद्धिधर्मेणात्मानं बुध्यत इत्यर्थः ॥ २६॥ एतदिति ॥ गुणाः सत्त्वादयः कर्माणि गुणोद्बोधकानि तैर्निबध्यते स्थिरीक्रियत इति तथा यतो ज्ञानमविद्यैव मूलं यस्य सः पुंसो जीवस्य संसारो जन्ममरणादिरूपः एषा बुद्धिः तदवस्था वा द्वारं यस्य तथाभूत एवास्ति अतः अपार्थो मिथ्याविभूतोऽपि आप्यते प्राप्यते । ईयत इति पाठे प्रतीयते । इष्यत इति पाठान्तरम् । तत्र दृष्टान्तमाह । स्वप्न इव यथा स्वाप्निकः पदार्थः दोषवशादेव प्रतीयते तथेत्यर्थः ॥२७॥ तस्मादिति ॥ यस्माद्बुद्धिनिबन्धन एव संसारः तस्मात्त्रिगुणात्मनां त्रिगुणकार्याणां त्रिगुणपरिणामहेतूनां च कर्मणां बीजस्य देहाद्यात्माध्यासस्य निर्हरणं भवद्भिः कर्त्तव्यं स एव योगः स योगस्तु धियः

एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ॥ स्वरूपमात्मनो बुध्येद् गन्धैर्वायुमिवान्वयात् ॥ २६ ॥ एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः ॥ अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेष्यते ॥ २७ ॥ तस्माद् भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनाम् ॥ बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥ तत्रोपायसहस्राणामयं भगवतोदितः ॥ यदीश्वरे भगवति यथा यैरञ्जसा रतिः ॥ २९ ॥ गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ॥ सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥ ३० ॥ श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ॥ तत्पादाम्बुरुहध्यानात् तल्लिङ्गेक्षाऽर्हणादिभिः ॥ ३१ ॥

प्रवाहं जाग्रदादिवृत्तिरूपमुपरमयतीति तथाभूत एव ॥ २८ ॥ तत्रेति ॥ तत्र बीजनिर्हरणे विषये उपायसहस्राणां मध्ये अयमेवोपायो भगवता उदितः कथितः यैर्धर्मैर्यथानुष्ठितैर्वा भगवति ईश्वरे अञ्जसा साक्षात्फलानुसन्धानव्यवधानरहिता रतिः निरतिशयिता प्रीतिः स्यात् सा तेषां सर्वसाधनानां समुदाय इति शेषः ॥ २९ ॥ गुर्विति युग्मम् ॥ सा च भगवति रतिः गुरूणां शुश्रूषया सेवया गुरुभ्यस्तत्वश्रवणेच्छया वा भक्त्या गुरूणां प्रेम्णा सर्वेषां लब्धानां वस्तूनां तेभ्यः गुरुभ्यः अर्पणेन च साधुलक्षणलक्षितानां भक्तानां सङ्गेन यद्वा साधु निष्कपटं यथा भवति तथा भक्तानां सङ्गेन सेवया ईश्वरस्याराधनेन हृदये मानसैर्द्रव्यैः पूजया च तत्कथायां भगवत्कथायां श्रद्धया श्रवणासक्त्या भगवतो गुणानां भक्तवात्सल्यादीनां कर्मणां लीलावतारचरितानां कीर्त्तनैः तस्य भगवतः पादाम्बुरुहयोर्ध्यानात् तस्य भगवतो लिङ्गस्य मूर्त्तेः ईक्षार्हणादिभिः ईक्षणं दर्शनमर्हणं बहिर्द्रव्यैः पूजा आदिपदेन प्रणामपरिक्रमादिसंग्रहः तैश्च भवति ॥ ३० ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिरिति ॥ हरिर्भगवानीश्वरः सर्वेषु भूतेष्वास्ते इति मनसा एवमभिप्रायेण तैस्तैषामपेक्षितैः कामैर्विषयैः साधु यथोचितं सर्वाणि भूतानि मानयेत् ॥ ३२ ॥ एवमिति ॥ निर्जितः षण्णां कामक्रोधलोभमोहमदमत्सराणाम् इन्द्रियाणां वा वर्गो यैः तैरेवमुक्तप्रकारेण ईश्वरे भक्तिः क्रियते यया साधनभक्त्या वासुदेवे भगवति रतिं परमप्रेमलक्षणां सम्यक् निश्चलात्मिकां पुमाँल्लभते ॥ ३३ ॥ निशम्येति ॥ भगवतः अतुल्यान् इतरेषु अविद्यमानान् गुणान् भक्तवात्सल्यादीन् तथा लीलातनुभिः स्वेच्छोपात्तरामकृष्णा-दिमूर्तिभिः कृतानि कर्माणि दधिपयश्चौर्यादीनि लौकिकचेष्टारूपाणि वीर्याणि रावणवधगोवर्द्धनोद्धरणादीनि इतरैः कर्तुमशक्यानि च निशम्य श्रुत्वातिहर्षेण उद्गताः उदश्चि-ताः पुलका रोमाण्यश्रूणि आनन्दबाष्पबिन्दवश्च तैर्गद्गदं यथा भवति तथा प्रोत्कण्ठो मुक्तकण्ठः सन् यदा उद्गायति उच्चैर्गायति रौति निरभिव्यक्तिवर्णपूर्वकं शब्दं करोति नृत्यति च ॥ ३४ ॥ यदेति ॥ यदा च क्वचित् कदाचित् ग्रहग्रस्त इव हसति क्वचिदाक्रन्दते तत्तद्गुणोच्चारणपूर्वकं विलपति । तद्भावः । क्वचिच्च भगवन्तं ध्यायति । क्वचिच्च जनं भगवदात्मकं पश्यन् वन्दते नमस्करोति । क्वचिच्च मुहुर्वारंवारं श्वसन् श्वासान् मुञ्चन् आत्मनि भगवति गतिर्यस्य सः अतोऽत्रात्मानुसन्धानाभावात् गता त्रपा लज्जा

हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः॥इति भूतानि मनसा कामैस्तैः साधु मानयेत्॥३२॥एवं निर्मितषड्वर्गैः क्रियते भक्तिरीश्वरे॥ वासुदेवे भग-वति यया संलभते रतिम्॥३३॥निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि॥यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३४ ॥ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् ॥ मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्ग-तत्रपः ॥ ३५ ॥ तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः ॥ निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ॥ ३६ ॥ अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम्॥ तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३७ ॥

यस्य सः तथाभूतः सन् हे हरे हे जगत्पते हे नारायणेति वक्ति ॥ ३५ ॥ तदेति ॥ तदा मुक्तं समस्तं बन्धनं भगवत्प्राप्तिविरोधिपूर्वोत्तरपुण्यपापात्मकादिरूपं यस्मात् तादृशः तस्य भगवतो भावो लीलादिस्तस्य भावो भावनानुध्यानं तेनानुकृत आशयोन्तःकरणमाकृतिः विग्रहश्च यस्य महीयसाऽतिवेगवता भक्तिप्रयोगरूपेणोपायेन निःशेषेण दग्धं बीजं बन्धनमूलभूतमविद्यादेहाध्यासादिलक्षणं च अनुशयो वासना च यस्य स पुमानुक्तभक्तियोगनिष्ठोऽधोक्षजं भगवन्तं सम्यक् पुनरावृत्तिवर्जं यथा भवति तथा एति प्राप्नोति ॥ ३६ ॥ अधोक्षजेति ॥ इह लोके अशुभात्मनः रागादियुक्तमनसः शरीरिणः अधोक्षजस्यालम्भः मनसा स्पर्शः प्राप्तिरेव संसृतिचक्रशातनं चक्रवत्परिवर्तमानायाः संसृतेः शातनं निवर्तकं तदधोक्षजालम्भनमेव ब्रह्मसंबन्धि निर्वाणं निरतिशयं सुखं बुधाः ब्रह्मविदो विदुर्जानन्ति ततो हेतोः हृदये हृदयपुण्डरीके एव हृदीश्वरमन्तर्यामिणं भगवन्तं भजध्वम् । अधोक्षजालम्भमिति पाठे आलम्बनमाश्रयणमित्यर्थः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क इति ॥ हे असुरबालकाः स्वे स्वकीये हृदि छिद्रवत् आकाशवत् सतः वर्तमानस्य स्वस्य जीवस्यात्मनः स्वरूपभूतस्य तथा स्वस्य सख्युर्हितकर्त्तुः हरेः उपासने कोऽतिप्रयासो न कोऽपीत्यर्थः । अशेषाणां सर्वेषां देहिनां श्वशूकरादीनामपि सामान्यतो विषयोन्मुखत्वेन तत्परत्वे तुल्यत्वापत्तेर्हेतोः विषयाणां स्रक्चन्दनवनितादीनामुपपादनैरर्जनैः किं प्रयोजनं न किमपीत्यर्थः । न चैवमादौ पौनरुक्त्यं दोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ॥ ३८ ॥ राय इति ॥ चलाः विनश्वराः रायः धनानि कलत्रं भार्या पशवः गवाश्वादयः सुताः पुत्राः आदिशब्देनान्ये पित्रादयो देहसंबन्धिनः गृहाः महीक्षेत्रमाजीविकासाधनं कुञ्जराः कोशाः तेषां शालाः धनकोशस्य राय इत्यनेनोक्तत्वात् भूतयो भोगोपकरणादिसमृद्धयः सर्वे अर्थाः कामाश्च क्षणेन भङ्गुरमायुर्यस्य तस्य मर्त्यस्य कियत्प्रियं कुर्वन्ति अल्पमेवेत्यर्थः ॥ ३९ ॥ एवमिति ॥ एवममी शास्त्रप्रसिद्धाः अपि स्वर्गादिलोकाः यतः क्रतुभिर्यागाद्यनुष्ठानैः कृताः साधिताः अतो यत्कृतकं तन्नश्वरं सातिशयं दुःखमिश्रितं चेति व्याप्तेस्तेऽपि क्षयिष्णवः सातिशयाः पुण्यतारतम्येन स्वापेक्षया अन्येषामधिकैश्वर्यवतां सद्भावात् न निर्मलाश्च स्पर्द्धादिदोषवत्त्वात् तस्मात् आत्मलब्धये अदृष्टश्रुतदूषणं न दृष्टं न वा श्रुतिस्मृतिभ्यां श्रुतं दूषणं यस्य तमेव परं

कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत् सतः॥ स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥ रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः ॥ सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत् प्रियं चलाः ॥ ३९ ॥ एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ॥ तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥ यदध्यर्थ्येह कर्माणि विद्वन्मान्यः सकृन्नरः ॥ करोत्यतो विपर्यासममोघं विन्दते फलम् ॥ ४१ ॥ सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः ॥ सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ॥४२॥ कामान् कामयते काम्यैर्यदर्थमिह पूरुषः ॥ स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥ ४३ ॥

परमात्मानमीशमेकया कर्मादिनिरपेक्षया भक्त्या भजत ॥ ४० ॥ यदिति ॥ विद्वन्मानी आत्मानं विद्वांसं मन्यमानः नरः प्राणी इह संसारे यद् वैषयिकसुखम् अध्यर्थ्य संकल्प्य ल्यबन्तम् । असकृत् वारंवारं कर्माणि लौकिकानि वैदिकानि च करोति अतः अभिलषितात् विपर्यासं विपरीतं दुःखात्मकमेव फलममोघमवश्यं विन्दते लभते ॥ ४१ ॥ एतदेव स्पष्टयति–सुखायेति ॥ इह कर्ममार्गे कर्मिणः पुरुषस्य सुखाय सुखप्राप्त्यर्थं तथा दुःखमोक्षाय दुःखनिवृत्त्यर्थं वा सङ्कल्पो भवति एतदन्यतरसङ्कल्पेनैव कर्मसु प्रवर्तत इत्यर्थः । ततश्च यः कर्मप्रारम्भात्पूर्वमनीहायाः इच्छायाः क्रियाया वा हेतोः सुखेनावृतो व्याप्तः आसीत्स एव ईहया सर्वदा दुःखमाप्नोति ॥ ४२ ॥ कामानिति ॥ इह लोके पुरुषो यदर्थं यस्य देहस्य सुखाय काम्यैः कर्मभिः कामान् शब्दादिविषयान् कामयते स देहस्तु पारक्यः न त्वात्मीयः श्वसृगालादिभक्ष्यः भङ्गुरो नश्वरः याति आत्मानं जहाति उपैति तमालिङ्गति च ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमिति ॥ यदा साक्षात्संबन्धिनः अहन्तास्पदस्य देहस्येयमवस्था तदा व्यवहिता देहसंबन्धेन संबद्धाः ममतास्पदाः अपत्यादयः पारक्या भङ्गुरा यान्त्युपयान्ति चेति किमु वक्तव्यम् ॥ ४४ ॥ किमिति ॥ तुच्छैरत्यल्पैर्वस्तुतोऽनर्थैः नरकाद्यनर्थहेतुभिः अर्थसंकाशैर्विचारं विना पुरुषार्थतया प्रकाशमानैस्तत्रापि नश्वरैस्तथाभूतेन देहेन सहैतैर्दारापत्यादिभिः नित्यानन्दमहोदधेः पूर्णसुखसमुद्रस्य आत्मनः किं प्रयोजनं न किमपीत्यर्थः ॥ ४५ ॥ निरूप्यतामिति ॥ हे असुराः इह संसारे प्राचीनैः कर्मभिः क्लिशमानस्य दुःखमनुभवतो देहभृतः प्राणिनः निषेकादिषु स्त्रीसंभोगादिष्वप्यवस्थासु स्वार्थः उत्पन्नः आनन्दः कियान् इति भवद्भिर्निरूप्यताम् । यद्वा । निषेकादिष्ववस्थासु पितूरेतोद्वारा मातृयोनिप्रवेशादिषु श्मशानान्तास्ववस्थासु प्राचीनैः कर्मभिः क्लिश्यमानस्येत्यन्वयः ॥४६॥ कर्माणीति ॥ देही जीवः आत्मानुवर्तिना देहेन कर्माणि देहान्तरारम्भकाणि पुण्यपापात्मकानि आरभते करोति तैः स्वनिमित्तभूतैः कर्मभिर्देहान्तरं तनुते बिभर्ति तेन पुनः कर्माणि तैश्च पुनर्देहमित्येवं बीजाङ्कुरन्यायेन परिवृत्तिर्न निवर्तते । यतः देहं

किमु व्यवहितापत्यदारागारधनादयः ॥ राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥ किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ॥
अनर्थैरर्थसंकाशैर्नित्यानन्दमहोदधेः ॥ ४५ ॥ निरूप्यतामिह स्वार्थः कियान् देहभृतोऽसुराः ॥ निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ॥
॥ ४६ ॥ कर्माण्यारभते देही देहेनात्मानुवर्तिना ॥ कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥ ४७ ॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ॥
भजतानीहयात्मानमनीहं हरिमीश्वरम् ॥ ४८ ॥ सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ॥ भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥ ४९ ॥
देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव च ॥ भजन्मुकुन्दचरणं स्वस्तिमान् स्याद्यथा वयम् ॥५०॥ नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः॥
प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥५१॥ न दानं न तपो नेज्या न शौचं न व्रतानि च॥ प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम्॥५२॥

कर्म चेति उभयमपि अविवेकतः अज्ञानेनैव तनुते ॥ ४७ ॥ तस्मादिति ॥ तस्मात् यद्यपि अर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः यस्य हरेरधीनाः सन्ति अतस्तद्भक्तानां तेऽतिसुलभा एव तथाप्यनीहया तत्कामनाराहित्येनैव अनीहं निरपेक्षम् आत्मानमीश्वरं हरिं भजत ॥ ४८ ॥ सर्वेषामिति ॥ स्वकृतैः स्वसृष्टैर्महद्भिर्भूतैः पृथ्व्यादिभिः कृतानां स्वेन सृष्टानां सर्वेषामपि देवासुरादीनां भूतानां देहानां जीवसंज्ञितः अन्तर्यामी आत्मा प्रियः ईश्वरः नियन्ता च हरिरेव ॥ ४९ ॥ देव इति ॥ अतः देवः असुरः इत्यादिः जातिविभागमन्तरेणैव यः कश्चिदपि मुकुन्दस्य चरणं भजन् भवेत् सः स्वस्तिमान् कल्याणभाक् स्यादेव यथा वयमसुरा अपि भगवन्तं भजन्तः स्वस्तिमन्तो जातास्तथेत्यर्थः ॥ ५० ॥ नालमिति युग्मम् ॥ हे असुरात्मजाः द्विजत्वादिकं मुकुन्दस्य प्रीणनाय नालं न समर्थम् । एवं दानादिषु प्रत्येकमन्वयः । अत्र द्विजत्वादिशब्दा वर्णोत्कर्षजात्युत्कर्षाजितेन्द्रियत्वोपलक्षकाः । यतोऽसौ हरिरमलया निष्कामया भक्त्यैव प्रीयते अन्यत्सर्वं द्विजत्वादिकं साधनान्तरं च विडम्बनं भक्तिं विना नटनमात्रमाकि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चित्करमेवेति ॥ ५१ ॥ ५२ ॥ तत इति ॥ तस्मात् हे दानवाः भगवति सर्वभूतात्मनि ईश्वरे हरौ आत्मौपम्येन स्वतुल्यतया सर्वत्र सर्वभूतेषु स्नेहरूपां भक्तिं कुरुत ॥५३॥ दैतेया इति ॥ भक्त्या दैतेयादयः पापजीवा अपि अच्युततां भगवत्साधर्म्यममृतत्वं गताः सन्ति ॥ ५४ ॥ एतावानिति ॥ अस्मिन् लोके संसारे पुंसः सर्वत उत्कृष्टः स्वार्थः पुरुषार्थः एतावानेव तत्त्वज्ञैः शास्त्रेषु स्मृतो निरूपितः यद्गोविन्दे एकान्ता अनन्यप्रयोजना भक्तिरिति सापि भक्तिः यत्सर्वत्र स्थावरजङ्गमेषु तस्य गोविन्दस्येक्षणं तद्दृष्ट्या सर्वसम्मानमिति ॥ ५५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ सप्तमे गङ्गासहायः सप्तमस्य व्यधादिमाम् ॥ ७ ॥ अष्टमे घ्नन् सुतं दैत्यो नृसिंहेन हतो नखैः ॥ स च स्तुतः सुरैस्तत्र श्लोकाः पर्वतमार्गणाः ॥ उवाचविंशतिः साङ्घ्रिगजशैला अनुष्टुभः ॥ ८ ॥ अथेति ॥ दैत्यसुताः सर्वे तेन प्रह्लादेनानुवर्णितुं श्रुत्वा अथ निरवद्यत्वान्निर्दुष्टत्वात्तदेव जगृहुः गुरुणा दैत्याचार्येण यदनुशिक्षितं तन्नैव जगृहुः संसारहेतुत्वेन दुष्टवात् ॥ १ ॥ अथेति ॥ अथ तेषां दैत्यसुतानां बुद्धिमेकान्तसंस्थितां प्रत्यङ्निष्ठामालक्ष्य

ततो हरौ भगवति भक्तिं कुरुत दानवाः ॥ आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः॥ खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ॥ ५४ ॥ एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः ॥ एकान्तभक्तिर्गोविन्दे यत् सर्वत्र परीक्षणम् ॥ ५५ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे प्रह्लादेन दैत्यपुत्रानुशासने ब्रह्मस्वरूपवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ नारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ॥ जगृहुर्निरवद्यत्वात् नैव गुर्वनुशिक्षितम् ॥ १ ॥ अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम् ॥ आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयम् ॥ कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे ॥ ३ ॥ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम् ॥ आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥ प्रश्रयावनतं दान्तं बद्धाञ्जलिमवस्थितम् ॥ सर्पः पदा हत इव श्वसन्प्रकृतिदारुणः ॥ ५ ॥

दृष्ट्वा लिङ्गैर्ज्ञात्वा राजोपालम्भाद्भीतः अत एव त्वरितः त्वरया युक्तः आचार्यसुतो यथा यथावत् राज्ञे हिरण्यकशिपवे आवेदयत् ॥ २ ॥ श्रुत्वेति ॥ तद्गुरुपुत्रेण कथितं तनयस्य प्रल्हादस्यानयं विष्णुभजनपरत्वं दैत्यपुत्राणामपि तच्छिक्षणं च दुःसहमप्रियं श्रुत्वा दैत्यः हिरण्यकशिपुः कोपावेशेन चलत् कम्पमानं गात्रं शरीरं यस्य तादृशः सन् पुत्रं प्रल्हादं हन्तुं मनो दधे कृतवान् ॥ ३ ॥ क्षिप्त्वेति युग्मम् ॥ प्रकृत्या स्वभावत एव दारुणः सदैत्यः पदा हतः पादताडितः सर्प इव श्वसन् प्रश्रयेण विनयेन अवनतं नम्रं दान्तं जितचित्तं बद्धः अञ्जलिर्येन तम् अवस्थितं स्वसम्मुखे नीचैः स्थितम् अतदर्हणं तिरस्कारानर्हमपि प्रल्हादं परुषया कठोरया वाचा क्षिप्त्वा तिरस्कृते पापेन सरोषेण तिरश्चीनेन वक्रेण चक्षुषा तमीक्षमाण आह स्म ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे इति ॥ हे दुर्विनीत मन्दात्मन् अल्पबुद्धे कुलभेदकर हे अधम नीच मच्छासनोद्धूतं मदाज्ञोल्लङ्घिनं स्तब्धमनम्रीभूतं त्वामद्य हत्वा यमस्य क्षयं स्थानं नेष्ये प्रापयिष्यामि एवं तेन निन्दायां प्रवर्त्तितापि सरस्वती भगवद्भक्तत्वात्तं स्तौति । तथा हि दुष्टेष्वपि विशिष्टं कृपायुक्तं नीतं मनो यस्य सः अत एव मन्दानामप्यात्मा मनो यत्र सः कुलभेदकराः कुलविशेषस्रष्टारः प्रजापतयोऽप्यधमा यस्मात्सः भगवद्भक्तत्वात् अत एव स्तब्धमसुरेषु पूज्यत्वबुद्ध्यभावात् यमानां द्वन्द्वानां सुखदुःखादीनां क्षयो यस्मात् यत्र वा तं भगवन्तं प्रति त्वां नेष्यामीति । यद्वा । यमादीनां योगाङ्गानां क्षयं निवासभूतं त्वां नेष्ये स्वरक्षकतयाङ्गीकरिष्ये ॥ ६ ॥ क्रुद्धस्येति ॥ हे मूढ यस्य क्रुद्धस्य भयेन सहेश्वराः लोकपालैः सहितास्त्रयो लोकाः कम्पन्ते तस्य मे मम शासनमाज्ञामभीतवत् किं बलं यस्य सः तादृशः अत्यगाः कस्य बलमबलं व्यातिक्रान्तवानसि ॥ ७ ॥ नेति ॥ हे राजन् त्वया पृष्टं यन्मम बलं तन्न केवलं मे ममैव बलं किं तु भवतोऽन्येषां च सर्वेषां बलिनां बलं स एव येन ब्रह्मादयः परे अवरे उच्चावचाः ये स्थिरजङ्गमाः चराऽचराः सर्वेऽपि ते अमी लोकाः स्ववशं प्रणीताः प्रापिताः ॥८॥ स इति ॥ स ईश्वरः कालः उरुक्रमः महापराक्रमः असावेव ओजः इन्द्रियशक्तिः सहः मनःशक्तिः सत्वं

हे दुर्विनीत मन्दात्मन् कुलभेदकराधम ॥ स्तब्धं मच्छासनोद्धूतं नेष्ये त्वाऽद्य यमक्षयम् ॥६॥ क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः ॥तस्य मेऽभीतवन्मूढ शासनं किंबलोऽत्यगाः॥७॥ प्रह्लाद उवाच ॥ न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषाम् ॥ परेऽवरेऽमी स्थिरजङ्गमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥ स ईश्वरः काल उरुक्रमोऽसावोजःसहःसत्त्वबलेन्द्रियात्मा ॥ स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः॥९॥ जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न सन्ति विद्विषः॥ ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनन्तस्य महत् समर्हणम् ॥१०॥दस्यून्पुरा षण्न विजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश॥जितात्मनोऽज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥११॥

धैर्यं बलं देहशक्तिः इन्द्रियाणि च तेषामात्मा स्वरूपं स एव परमः श्रेष्ठः गुणत्रयेशः अतस्तैः सत्वादिभिः सर्वं विश्वं सृजति अवति अत्ति संहरति च ॥ ९ ॥ जहीति ॥ त्वम् आत्मनः स्वस्य ममासुरं भावं शत्रुमित्रादिकल्पनारूपं जहि परित्यज मनश्च सर्वत्र समं मित्रादिभेदरहितं धत्स्व कुरु वस्तुतः अजितात् अवशीकृतात् अतः उत्पथे दुर्विषये स्थितात् आत्मनो मनसः ऋते विनाऽन्ये विद्विषो न सन्ति तत्सर्वत्र समदर्शनमेव अनन्तस्य महत्सर्वोत्कृष्टं समर्हणं सम्यगाराधनं विद्धि ॥ १० ॥ दस्यूनिति ॥ पुरा प्रथमं स्वशरीर एव वर्तमानान् आत्मन ऐश्वर्यादिधनानि लुम्पतः अपहरतः षडिन्द्रियरूपान् दस्यून् शत्रून् न विजित्य एके दश दिशः स्वेन जिताः मन्यन्ते एवमभिमानमात्रमेव तेषां न तु ते निर्जितसपत्नाः शरीर एव शत्रूणां विद्यमानत्वात् जितात्मनः निर्जितमनसः ज्ञस्य विदुषः अत एव सर्वदेहिनां समस्य सर्वत्र तमेव पश्यतः अत एवं साधोः स्वमोहेन देहाद्यात्माभिमानेन प्रभवः प्रतीतिर्येषां ते स्वाज्ञानकल्पिताः परे शत्रवः कुतो भवेयुर्न कुतोऽपि कारणाभावात् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यक्तमिति ॥ यस्त्वमतिमात्रमत्यन्तं विकत्थसे मन्निन्दापूर्वकं जितसपत्नतयाऽऽत्मानं श्लाघसे ततः व्यक्तं निश्चितं त्वं मर्तुकामः असि मर्त्तुमिच्छसि हे मन्दात्मन् हि यस्मात् मुमूर्षूणाम् आसन्नमृत्यूनां गिरो वाचो विक्लवा अनन्विताः स्युर्भवन्तीति ननु निश्चितमेव ॥१२॥ य इति ॥ हे मन्दभाग्य त्वयोक्तो यो मदन्यो जगदीश्वरः यद्यस्ति तर्ह्यसौ क्वास्ति तत्र प्रल्हाद आह । स सर्वत्रास्ति हिरण्यकशिपुराह । यदि स सर्वत्रास्ति तर्हि स्तम्भे कस्मान्नास्ति । प्रल्हादस्तु स्तम्भं निरीक्षमाणो नमस्यन्नाह । दृश्यत इति । स्वामिपादाः हिरण्यकशिपुमात्रवाक्यतयापि श्लोको व्याख्यातुं शक्यः ॥ १३ ॥ सोऽहमिति ॥ स सर्वेश्वरत्वेन प्रसिद्धोऽहं विकत्थमानस्य विपरीतं ब्रुवाणस्य ते तव कायाच्छिरो हरामि पृथक्करोमि यो हरिस्ते शरणं रक्षकः ईप्सितः इष्टः स इदानीं त्वां गोपायेत रक्षेत् तङार्षः ॥ १४ ॥ एवमिति ॥ एवं रुषा दुरुक्तैः परुषोक्तिभिः महाभागवतं सुतं प्रल्हादं मुहुः अर्दयन् पीडयन् खड्गं प्रगृह्य वरासनात् सिंहासनात् उत्पतितः उत्थितः सन् अतिबलः स महासुरः हिरण्यकशिपुः स्वमुष्टिना स्तम्भं तताड णिजभाव

हिरण्यकशिपुरुवाच ॥ व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ॥ मुमूर्षूणां हि मन्दात्मन्ननु स्युर्विक्लवा गिरः ॥१२॥ यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ॥ क्वासौ यदि स सर्वत्र कस्मात्स्तम्भे न दृश्यते ॥ १३॥ सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ॥ गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् ॥१४॥ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः ॥ खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलः स्वमुष्टिना ॥ १५ ॥ तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत् ॥ यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमङ्ग मेनिरे ॥१६॥ स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतम् ॥ अन्तःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥१७॥ सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥१८॥

आर्षो भाति अनित्यो वा णिच् । स्तम्भेऽपि हरिरस्ति चेत्प्रकटीभवेत् इति विचार्येति ॥ १५ ॥ तदेति ॥ तदैव ताडनानन्तरमेव तस्मिन् स्तम्भेऽतिभीषणो निनदो ध्वनिर्बभूव येन निनदेनाण्डकटाहमस्फुटत् भिन्नमिवाभूत् तद्भित्त्वा निनदो बहिर्गत इत्यर्थः । अङ्ग हे युधिष्ठिर यन्निनदं स्वधिष्ण्योपगतं स्वस्थानप्राप्तं श्रुत्वा ब्रह्मादयः स्वधामात्ययमागतं मेनिरे अमन्यन्त ॥१६॥ स इति ॥ ओजसा बलेन पुत्रवधेप्सुस्तदर्थं विक्रमन् पराक्रमं कुर्वन् दीर्घाभाव आर्षः । स दैत्येन्द्रः येन सुरारियूथपाः दैत्यश्रेष्ठाः वितत्रसुः त्रासं प्रापुस्तमश्रुतपूर्वमद्भुतं निर्ह्रादं ध्वनिं निशम्य श्रुत्वान्तःसभायां सभामध्ये तत्पदं तस्य ध्वनेः आश्रयं कर्तारं न ददर्श ॥ १७ ॥ सत्यमिति ॥ निजभृत्येन प्रह्लादादिना यद्भाषितं तत्सत्यं विधातुं कर्तुं तथा अखिलेषु भूतेषु चात्मनः स्वस्य व्याप्तिं च सत्यां कर्तुम् अत्यद्भुतं दैत्येभ्यो भयदं ब्रह्मसृष्टावदृष्टमश्रुतं च न मृगं मृगाकारं न च मानुषं मनुष्याकारं रूपमुद्वहन् भगवान् सभायां मध्ये स्तम्भे अदृश्यत । अत्र निजभृत्यभाषितं सत्यं कर्तुमिति सर्वत्रोपयुज्यते तत्र स्तम्भे दृश्यते इति स्वभृत्येन प्रह्ला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देन भाषितं तथा भौतिकेषु च भावेषु भूतेष्वथ महत्सु च भगवानास्त इति सर्वभूतव्याप्तिरपि तेन भाषिता तथा निजभृत्यैः सनकादिभिः शापानन्तरमनुतप्तैस्त्रिभिर्जन्मभिः शापमोक्षो भवत्विति भाषितं तथा निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति " भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो । " इति " नान्तर्न बहिः " इति " न नरैर्न मृगैः " इति भाषितं तथा ब्रह्मणा च निजभृत्येन तथात्विति भाषितं न हि तद् ब्रह्मसृष्टं न च नरो मृगो वा न च सभागृहान्तः न च प्राङ्गणवद्बहिः यच्च निजभृत्यद्वास्थावतारेण हिरण्यकशिपुना नूनमेतद्विरोधेन मृत्युर्मे भविता न वेति भाषितं तथा निजभृत्येन नारदेन तथायमकुतश्चिद्भयोऽमर इति अयं महान् संस्थां न प्रपत्स्यति अनन्तानुचर इत्यनेन स्वस्य भक्तपक्षपातित्वं च भाषितं चकारात् " कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति " इति " तेषामहं समुद्धर्ता मृत्युसंसारसागरात् " इत्यादि भाषितं तच्च सत्यं कर्तुमदृश्यतेति द्रष्टव्यमलमतिविस्तरेण ॥ १८ ॥ स इति ॥ स दैत्येन्द्रः एवं शब्दं श्रुत्वा तदाश्रयनिर्धारणार्थं परितो विपश्यन् स्तम्भस्य मध्यादनुनिर्जिहानं निर्गच्छत् नृमृगेन्द्रयोर्मिश्रं रूपं दृष्ट्वा अयं मृगो न नापि नरः अहो आश्चर्यं किमेतद्विचित्रमद्भुतं सत्वं प्राणिविशेष इति मीमांसितवानिति शेषः । यद्वा । स दैत्यः एवं भूतं सत्वं प्राणि-

स सत्वमेनं परितो विपश्यन्स्तम्भस्य मध्यादनुनिर्जिहानम् ॥ नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्ररूपम् ॥ १९ ॥
मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपं तदलं भयानकम् ॥ प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम्॥ करालदंष्ट्रं
करवालचञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम् ॥ २० ॥ स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ॥ दिवि
स्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यम् ॥ चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ॥ २१ ॥ दुरासदं
सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ॥ २२ ॥

विशेषं स्तम्भस्य मध्यादनुनिर्जिहानं परितः स्तम्भस्य चतुर्दिशं विपश्यन् अयं मृगो नास्ति नापि नरोस्त्यतः नृमृगेन्द्रमिश्ररूपं विचित्रमेतत् किमिति मीमांसितवानित्यन्वयः ॥ १९ ॥ मीमांसमानस्येति सार्द्धत्रिकम् ॥ एवमलमत्यर्थं भयानकं प्रतप्तं यच्चामीकरं स्वर्णं तद्वत् पिशङ्गे चण्डे उग्रे लोचने यस्मिंस्तत् सटाः जटाः केसराः कण्ठरोमाणि स्फुरद्भिः सटाकेसरैर्जृम्भितं साटोपमाननं यस्मिंस्तत् कराला उदग्रा दंष्ट्रा यस्मिंस्तत् करवालः खड्गः तद्वच्चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिंस्तत् भ्रुकुटीयुक्तेन मुखेनोल्बणं भयंकरं स्तब्धौ उन्नतौ शङ्कुवदूर्ध्वौ कर्णौ यस्मिंस्तत् गिरिकन्दरवदद्भुतं व्याप्तं प्रसृतमास्यं नासे च यस्मिंस्तत् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणं दिविस्पृशन् कायो यस्मिंस्तत् अलुक् समासः । अदीर्घा ह्रस्वा पीवरा स्थूला च ग्रीवा यस्मिन् उरु विशालं वक्षस्थलं यस्मिन् तच्च अल्पं मध्यममुदरं यस्मिंस्तत् चन्द्रांशुवद्गौरैस्तनुरुहैर्लोमभिश्छुरितं व्याप्तं विष्वक् सर्वतः प्रसृता भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिंस्तत् नखान्येवायुधानि यस्मिंस्तत् दुरासदं प्राप्तुमशक्यं सर्वाणि च निजानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रादीनि इतराणि वज्रादीनि च त एवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविताः दैत्या दानवाश्च येन तदेवमलं भयानकं रूपं मीमांसमानस्य विचारयतः तस्य दैत्यस्य अग्रतो नृसिंहरूपो हरिः समुत्थितः ॥२०॥२१॥२२॥ प्रायेणेति ॥ प्रायेण महामायाविना हरिणा मे मम अयमेवंभूतो वधः मृत्युहेतुः स्मृतः चिन्तितस्तथाप्यनेन समुद्यतेन कृतोद्यमेनापि किं न किंचित्स्यान्मद्बलस्यानेन दुष्प्रतीकारत्वादित्येवं ब्रुवन् गदायुधः गृहीतगदो दैत्यकुञ्जरो हिरण्यकशिपुर्नदन् नादं कुर्वन्नृसिंहं प्रत्यभ्यपतत् युद्धार्थं संमुखं जगाम ॥२३॥ अलक्षित इति ॥ तदा सोऽसुरः नृसिंहस्यौजसि दीप्तौ पतितः सन्नलक्षितोऽदृष्टोऽभूत् । तत्र दृष्टान्तमाह । अग्नौ पतितः पतङ्गमः शलभो यथा तथेति सत्वधामनि शुद्धसत्वाश्रये भगवति यत्तस्य तमोमयस्य दैत्यस्यादर्शनं तद्विचित्रं नैव भवति यो भगवान् पुरा सृष्ट्यादौ प्रलयकालिकं तमः नु अतिगाढं स्वतेजसा अपिबत् तिरस्कृतवान् ॥ २४ ॥ तत इति ॥ ततो महासुरोऽभिपद्य अभिमुखमागत्य रुषा उरुवेगया भ्राम्यमाणया गदया नृसिंहमभ्यहनत् हन्तुं प्रवृत्त इत्यर्थः । शब्लुगभाव आर्षः ।

प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किम् ॥ एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुञ्जरः॥२३॥अलक्षितोऽग्नौ पतितः पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तदा ॥ न तद् विचित्रं खलु सत्त्वधामनि स्वतेजसा योऽनु पुराऽपिबत्तमः ॥ २४ ॥ ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया ॥ तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाऽग्रहीत् ॥ २५ ॥ स तस्य हस्तोत्कलितस्तदाऽसुरो विक्रीडतो यद्वदहिर्गरुत्मतः ॥ असाध्वमन्यन्त हृतौकसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः ॥ २६ ॥ तं मन्यमानो निजवीर्यशङ्कितं यद्धस्तमुक्तो नृहरिं महासुरः ॥ पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥२७॥ तं श्येनवेगं शतचन्द्रवर्त्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः ॥ कृत्वाऽट्टहासं खरमुत्स्वनोल्वणं निमीलिताक्षं जगृहे महाजवः ॥ २८ ॥

तं विक्रमन्तं प्रहर्तुं प्रवृत्तं क्रमेर्दीर्घाभाव आर्षः । सगदं गदाधरो नृसिंहः अग्रहीत् यथा तार्क्ष्यसुतो गरुडो महान्तमप्युरगं गृह्णाति तथेति ॥ २५ ॥ स इति ॥ हे भारत स गृहीतोऽसुरस्तदा विक्रीडतस्तस्य नृसिंहस्य हस्तादुत्कलितः विनिःसृतः यथा विक्रीडतो गरुत्मतो गरुडस्य अहिर्विगलितो भवति तथेत्यर्थः । दैत्येन हृतमोकः स्थानं येषां ते अत एव तद्भयेन घनच्छदाः मेघान्तरिताः सन्तः स्थिताः सर्वे धिष्ण्यपाः लोकपालाः अमरा इन्द्रादयः भगवद्धस्ताद्दैत्यनिर्गमनम् असाध्वमन्यन्त ॥ २६ ॥ तमिति ॥ महासुरः यत् यस्मात् नृहरेर्हस्तान्मुक्तस्तस्मात्तं नृहरिं निजवीर्यात् स्वबलात् शङ्कितं भीतं मन्यमानः स्वयं च मृधे युद्धे जितश्रमः श्रमरहितः खड्गचर्मणी प्रगृह्य पुनर्वेगेन तं नृहरिमासज्जताभ्यपतत् ॥ २७ ॥ तमिति ॥ महाजवः हरिश्च श्येनस्येव वेगो यस्य तं शतचन्द्रवर्त्मभिः खड्गचर्ममार्गैः अच्छिद्रमन्यप्रहारस्यानवसरं यथा भवति एवमुपर्यधश्चरन्तं दैत्यं विलोक्य खरं तीव्रमुत्स्वनेन महाशब्देन उल्बणं भयङ्करम् अट्टहासं कृत्वा अट्टहासशब्दभयेन हरेः तेजसा च निमीलिते अक्षिणी येन तं जगृहे ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वगिति ॥ विश्वक् सर्वतः स्फुरन्तं सर्वावयवान् प्रचालयन्तं यतो ग्रहणेन हेतुना आतुरं विवशम् इन्द्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेनापि न क्षता त्वगपि यस्य तं दैत्यं हरिः द्वारि तत्रापि स्वोरुमूरौ अङ्के द्वितीया सप्तम्यर्थे निपात्य लीलया नखैर्ददार विदारितवान् यथा उर आपात्येतिपाठे दैत्यमापात्य ऊरः ददारेत्यन्वयः । दैर्घ्यमार्षम् । व्यालः सर्पः आखुं मूषकमिति । ग्रहणे दृष्टान्तः । महाविषम् अहिं गरुडो यथेति । विदारणे दृष्टान्तः । ब्रह्मवरेणापि तस्य विदारणमन्यैरशक्यं भगवता तु तत्प्रतीकारः कृतः तथा हि द्वारीति नान्तर्न बहिरित्यस्य ऊराविति न भूमौ नाम्बर इत्यस्य नखैरिति व्यसुभिरसुमद्भिर्वा नेत्यस्य प्रतीकारः एवं न दिवा नक्तमित्यस्य प्रतीकाराय सन्ध्यायामिति ज्ञेयम् । तदुक्तं पुराणान्तरे । "तस्मात्स्तम्भात्स्वयं देवो विष्णुराविरभूत्तदा । सन्ध्यायां क्रुद्ध्यमानस्तु त्रासयन् दैत्यसत्तमान्" इति । ब्रह्मसृष्ट्यादिपरिहाराय स्वयं नृसिंहरूपेण विदारणं कृतमिति च स्पष्टम् ॥ २९ ॥ संरम्भेति ॥ आहितेन संरम्भेण क्रोधेन दुष्प्रेक्ष्ये कराले भयङ्करे लोचने यस्य सः व्यात्तं विकाशितं यदाननं मुखं तस्यान्तं स्वजिह्वया विलिहन् असृजो रक्तस्य लवैर्बिन्दुभिः अक्ताः सिक्ताः अत एवारुणाः केसराः आननं च यस्य सः यथान्त्रैर्माली मालाधरो मालारूपेणान्त्रं

विश्वक् स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशाक्षतत्वचम् ॥ द्वार्यूर आपात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम् ॥ २९॥
संरम्भदुष्प्रेक्ष्यकराललोचनो व्यात्ताननान्तं विलिहन् स्वजिह्वया ॥ असृग्लवाक्तारुणकेसराननो यथान्त्रमाली द्विपहत्यया हरिः ॥ ३० ॥
नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ॥ अहन् समन्तान्नखशस्त्रपार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान् सहस्रशः ॥ ३१ ॥ सटावधूता जलदाः परापतन्ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः ॥ अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥ ३२ ॥ द्यौस्तत्सटोत्क्षिप्तविमानसंकुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता ॥ शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ॥ ३३ ॥

दधानः हरिः सिंहो द्विपस्य गजस्य हत्यया वधेनोपलक्षितो भाति तथा बभाविति शेषः ॥ ३० ॥ नखेति ॥ दोर्दण्डानां भुजदण्डानां यूथानि यस्य सः नखाङ्कुरैरुत्पाटितं हृत्सरोरुहं हृदयकमलं यस्य तं यत्राहमेव सुखमवसं तत्रायं मन्दभाग्यः कं कं कामक्रोधादिकं वासयति स्मेति द्रष्टुमित्युत्प्रेक्षा । सरोरुहरूपकेण व्यज्यत इत्यलङ्कारेणालङ्कारव्यक्तिः । दैत्येन्द्रं विसृज्य त्यक्त्वा उद्यतानि आयुधानि यैस्तान् तस्यानुचरान् भृत्यान् तं दैत्यमनुपन्था येषां तान् अन्यांश्च तत्पक्षपातिनः सहस्रशो नखैः शस्त्रैः पाणिभिश्च समन्तात् अहन् हतवान् ॥ ३१ ॥ सटेति ॥ तस्य सटाभिरवधूताः प्रकम्पिताः जलदाः मेघाः परापतन् व्यशीर्यन्त तेन च मेघान्तरिता देवाः स्पष्टं पश्यन्तु इत्याज्ञां दत्तवानित्यर्थः । ग्रहाः खेचराः तस्य दृष्ट्या विमुष्टमपहृतं रोचिर्येषां ते तथाभूता अभूवन् तस्य श्वासेन हताः अम्भोधयः समुद्राश्चुक्षुभुः सञ्चेलुः । तस्य निर्ह्रादेन शब्देन भीता दिगिभाः विचुक्रुशुः ॥ ३२ ॥ द्यौरिति ॥ तस्य सटाभिरुत्क्षिप्तानि यानि विमानानि तैः सङ्कुला व्याप्ता द्यौः प्रोत्सर्पत प्रचलितेवाभूत् तङ् अडभावश्चार्षौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्ष्मा तस्य पदा पद्भ्यामतीव पीडिताऽभूत् तस्यासह्येन रंहसा वेगेन शैलाः समुत्पेतुः तस्य तेजसा खमाकाशः ककुभो दिशश्च न रेजिरे सर्वेषां तेजस्विनां तेजस्तिरोहितमभूत् ॥ ३३ ॥ तत इति ॥ ततः स्वभृत्यैश्वर्यमाश्चर्यमिव मत्वा कौतूहलेन सभायाम् उत्तमे नृपासने उपविष्टं सम्भृतं पूर्णं तेजो यस्य तम् अत एव न लक्षितो द्वैरथः प्रतियोद्धा येन तम् अत्यमर्षणम् अतिभयङ्करं प्रचण्डम् उग्रं वक्त्रं यस्य तं विभुं प्रभुं श्रीनृसिंहं कश्चनापि सेवको न बभाज सेवितुं समीपं न जगाम ॥ ३४ ॥ निशम्येति ॥ लोकत्रयस्य मस्तकज्वरं शिरोव्यथामिव दुःसहं तमादिदैत्यं हिरण्यकशिपुं हरिणा श्रीनृसिंहेन मृधे हतं निशम्य दृष्ट्वा प्रहर्षवेगेन उत्कलितानि विकसितानि आननानि यासां ताः सुराणां स्त्रियो मुहुः पुनः पुनः प्रसूनवर्षैर्नृहरिं ववृषुः ॥ ३५ ॥ तदेति ॥ तदा दिदृक्षतां द्रष्टुमिच्छतां दर्शनार्थमागतानां शता आर्षः । नाकिनां देवानां विमानपङ्क्तिभिर्नभस्तलं सङ्कुलं व्याप्तमास बभूव । अथानन्तरमेव सुराणामानकाः पटहाः दुन्दुभयश्च जघ्निरे तैर्वादिताः गन्धर्वश्रेष्ठा जगुः स्त्रियः अप्सरसो ननृतुः ॥ ३६ ॥ तत्रेति सार्द्धत्रयम् ॥ ब्रह्मादय-

ततः सभायामुपविष्टमुत्तमे नृपासने संभृततेजसं विभुम् ॥ अलक्षितद्वैरथमत्यमर्षणं प्रचण्डवक्त्रं न बभाज कश्चन ॥ ३४ ॥ निशम्य लोकत्रय-मस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ॥ प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥ ३५ ॥ तदा विमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनाम् ॥ सुरानका दुन्दुभयोऽथ जघ्निरे गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः॥३६॥तत्रोपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः॥ ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥ मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः ॥ ३७ ॥ यक्षाः किंपुरुषास्तात वेतालाः सिद्धकिन्नराः ॥ ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः ॥ मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम् ॥ ३८ ॥ ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥ यन्त्रम-न्त्रादिभिः स्तोत्रैरष्टकैः कवचैर्हरिम् ॥ ३९ ॥ ब्रह्मोवाच ॥ नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ॥ विश्वस्य सर्गस्थितिसं-यमान्गुणैः स्वलीलया संदधतेऽव्ययात्मने॥४०॥श्रीरुद्र उ०॥कोपकालोयुगान्तस्ते हतोऽयमसुरोऽल्पकः॥तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल॥४१॥

स्तत्रोपव्रज्य किंचित्समीपमागत्य नातिदूरचराः मूर्ध्नि बद्धाञ्जलिपुटाः सन्तः आसीनमुपविष्टं तीव्रं दुःसहं तेजो यस्य तं नरशार्दूलं नृहरिं पृथक् पृथक् यूथशः ईडिरे तुष्टुवुः आमभाव आर्षः । गन्धर्वाप्सरचारणा इत्यत्र सकारलोप आर्षः ॥ ३७ ॥ ३८ ॥ ३९ ॥ नतोऽस्मीति ॥ अनन्ताय देशकालवस्तुपरिच्छेदरहिताय दुरंता अनन्ताः शक्तयो यस्य तस्मै अत एव विचित्राणि आश्चर्यजनकानि वीर्याणि प्रभावा यस्य तस्मै पवित्राणि अविद्यादिदोषनिवर्तकानि कर्माणि यस्य तस्मै गुणैः सत्त्वादिभिः विश्वस्य सर्गादीन् स्वलीलया अनायासेनैव सन्दधते सम्यक्कुर्वते अव्ययात्मने अप्रच्युतस्वरूपाय तुभ्यं त्वां प्रसादयितुं नतोऽस्मि । सर्वत्र क्रियार्थेत्यादिना चतुर्थी ॥४० ॥ कोपेति ॥ हे भक्तव-त्सल तव कोपस्य कालो युगान्तः द्विपरार्धावसानमेव अस्य हननार्थं कोपः कुतश्चेत्तदायं त्वसुरोऽल्पकः अतितुच्छो न तव कोपयोग्यः यदि तु भक्तरक्षान्यथानुपपत्त्या को-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाविष्कारस्तदा सोऽपि ते त्वया हत एवातो कोपस्य किंचित्प्रयोजनं दृश्यते अतस्तस्य सुतमुपसृतं शरणागतं ते तव भक्तं प्रल्हादं पाहि ॥ ४१ ॥ प्रत्यानीता इति ॥ हे परम परमेश्वर सर्वान्तर्यामिन् नोऽस्मान् त्रायता रक्षता शता आर्षः। भवता स्वीया एव भागा दैत्यात् प्रत्याहृताः वस्तुतोन्तर्यामिणस्तवैव यज्ञेषु भोक्तृत्वात् अस्मदीयं हृदयकमलं च त्वद्गृहमेवैतावत्पर्यन्तं भयहेतुत्वेनास्मत्स्मृतिपथे नित्यं स्थितेन दैत्येनाक्रान्तं व्याप्तं तत्प्रत्यबोधि सद्बाधाज्ञ्यापाकरणेन त्वया विकाशं नीतम् एतावत्कालपर्यन्तं दैत्यतमः आक्रान्तत्वात्सङ्कुचितं तव सम्प्रति तव नृसिंहसूर्यस्योदये विकसितमित्यर्थः । अहो हे नाथ अस्माकं तव सेवकानां तु तव सेवैवोचिता । कालग्रस्तम् इदं त्रैलोक्यैश्वर्यं कियत् अतितुच्छमेव अत एव हे नारसिंह नरस्य सिंहस्य चाकाराभ्यामाविर्भूत ते त्वां शुश्रूषतां सेवमानानां शता आर्षः । परमपुरुषार्थरूपा मुक्तिरपि बहुपुरुषार्थतया न मता न संमता हि यद्येवं तर्हि अपरैर्धर्मादिभिः पुरुषार्थैस्तेषां किं प्रयोजनम् । मन्दाक्रान्ता छन्दः ॥ ४२ ॥ त्वमिति ॥ हे शरण्य शरणार्ह हे पाल पालक त्वं नोऽस्माकम्

इन्द्र उवाच ॥ प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ॥ कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहु मता नारसिंहापरैः किम्॥४२॥ऋषय ऊचुः॥त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज॥ तद्विप्रलुप्तमधुनाऽद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४३ ॥ पितर ऊचुः ॥ श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽपि तिलाम्बवसभ्यः ॥ तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ४४ ॥ सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहारषीद्योगतपोबलेन ॥ नानादर्पं तन्नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ ४५ ॥

ऋषीणाम् आत्मनस्तव तेजोरूपं यत्परमं सर्वसाधनोत्कृष्टं ध्यानलक्षणं तपः आत्थ उपदिष्टवान् येन तपसा आत्मनि लीनमिदं विश्वं ससर्ज सृष्टवानसि तदमुना दैत्येन विप्रलुप्तं प्रलोपितं सत् अद्य रक्षार्थं गृहीतेनानने वपुषा पुनरपि तपः कुरुतेत्यन्वमंस्थास्तद्वधेनानुज्ञापितवानसि तस्मै ते नम इत्युत्तरश्लोकादपकर्षः ॥ ४३ ॥ श्राद्धानीति ॥ यः असभ्यः दैत्यः नोऽस्माकं तनूजैः पुत्रादिभिः अस्मदुद्देशेन दत्तानि श्राद्धानि श्राद्धसंबन्धीनि अन्नानि प्रसभं बलात् स्वयमधिबुभुजे अधिकृत्य स्वीकृतवान् तथा तीर्थस्नानसमयेऽस्मत्तनूजैर्दत्तं तिलाम्बु तिलोदकमपिबत् नखैर्विदीर्णा वपा यस्योदरस्य तस्मात् यस्य दैत्यस्योदरात् यः श्राद्धानि तिलमम्बु च आर्च्छत् आहृत्यास्मभ्यं दत्तवान् तस्मै अखिलधर्मगोप्त्रे नृहरये नमः ॥४४॥ य इति ॥ योऽसाधुर्दुरात्मा दैत्यो नोऽस्माकं योगेन सिद्धां गतिं अणिमादिरूपां योगबलेन तपोबलेन वा अहारषीत् अपहृतवान् अकाराधिक्यमार्षम् तं नानादर्पं धनाभिजनादिजनितानेकगर्वयुक्तं यो नखैर्निर्ददार विदारितवांस्तस्मै तुभ्यं हे नृसिंह वयं प्रणताः स्मः शालिनीच्छन्दोभङ्गः ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यामिति ॥ पृथक् नानाविधमनोधारणयानुराद्धां सिद्धामस्माकं विद्यामन्तर्धानादिलक्षणां बलं देहशक्तिः वीर्यं पराभवसामर्थ्यं ताभ्यां दृप्तः गर्वितः अज्ञः यः न्यषेधत् प्रतिबद्धामकरोत् स येन सङ्ख्ये युद्धे पशुवत् हतस्तं त्वां मायया गृहीतनृसिंहस्वरूपं वयं नित्यं प्रणताः स्मः ॥ ४६ ॥ येनेति ॥ येन पापेन दुराचारेण नोऽस्माकं रत्नानि फणासु स्थितानि स्त्रीरत्नानि उत्तमाः स्त्रियश्च हृतानि तस्य वक्षःपाटनेन विदारणेन आसां स्त्रीणां दत्त आनन्दो येन तस्य सम्बोधनं हे एवं भूत ते तुभ्यं नमोऽस्तु अस्मद्दत्तानन्देति पाठान्तरे अस्मभ्यं दत्त आनन्दो येनेत्यर्थः ॥ ४७ ॥ मनव इति ॥ हे देव वयं तव निदेशकारिणः कैङ्कर्यकारिणो मनवः एतावन्तं कालं येन दितिजेन परिभूता परिहापिताः सेतवो वर्णाश्रममर्यादा येषां तादृशा बभूविम अधुना स खलो दितिजस्त्वया उपसंहृतो हतः अतो हे प्रभो ते तव किं कैङ्कर्यं करवाम तत्किङ्करानस्मान् शाधि आज्ञापय । मञ्जुभाषिणी छन्दः ॥ ४८ ॥ प्रजेशा इति ॥ हे परेषां ब्रह्मादीनामीश वयं ते त्वया विसृष्टाः उत्पादिताः प्रजेशा प्रजोत्पादकाः येन दैत्येन निषिद्धाः सन्तः

विद्याधरा ऊचुः ॥ विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥४६॥ नागा ऊचुः ॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षःपाटनेनासां दत्तानन्दः नमोस्तु ते ॥ ४७ ॥ मनव ऊचुः ॥ मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेवतः ॥ भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ॥ ४८ ॥ प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वया भिन्नवक्षा नु शेते जगन्मङ्गलं सत्वमूर्तेऽवतारः ॥ ४९ ॥ गन्धर्वा ऊचुः ॥ वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः ॥ स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते॥५०॥ चारणा ऊचुः ॥ हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः ॥ यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः ॥ ५१ ॥

प्रजा न वै नैव सृजामः स एष त्वया भिन्नं वक्षो यस्य तथाभूतो नु निश्चितं मृत एव शेते अतः हे सत्वमूर्ते तवावतारः जगति मङ्गलं मङ्गलरूपः । भुजङ्गप्रयातं छन्दः ॥ ४९ ॥ वयमिति ॥ हे विभो वयं ते त्वदीयाः नटा नर्तकाः नाटने नृत्ये गायकाश्च वीर्यं शौर्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तथाभूतेन येन वीर्यबलौजसेति द्वन्द्वैक्यं वा करणे तृतीया । आत्मसात्कृताः स्वाधीनीकृताः स एष दैत्यो भवता इमां दशां मरणावस्थां नीतः तदुचितमेवेत्याहुः । उत्पथस्थः त्वद्भजनविरोधिमार्गस्थः किं कुशलाय कल्पते किं क्षेमी भवति न भवत्येवेत्यर्थः ॥ ५० ॥ हरे इति ॥ हे हरे भवापवर्गं संसारनिवर्तकं तवाङ्घ्रिपङ्कजं चरणकमलं वयमाश्रिताः । तत्र हेतुमाहुः । यत् यस्मात् साधूनां हृदि त्वच्छय्यायां भयजनकत्वेन शेते तिष्ठतीति तथा स एष महाबलपराक्रमत्वेनातिप्रसिद्धोऽप्यसुरस्त्वया समापितः अन्तं नीतः प्रमाणिका छन्दः ॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वय मिति ॥ हे पञ्चविंश चतुर्विंशतितत्वनियामक मनोज्ञैः कर्मभिर्येऽनुचरास्तेषु मुख्याः यद्वा । अनुचरास्त्वद्भक्ता एव मुख्या तेषां ते वयम् इह एतस्मिन् काले दितिसुतेन भारवाहकत्वं प्रापिताः हे नरहरे अचिन्त्यमहिमन् तेन दैत्येन कृतं जनानां परितापं दुःखं जानता ते त्वया स तु सर्वदुःखदः पञ्चतां मृत्युमुपनीतः प्रापितः । मालिनी छन्दः ॥ ५२ ॥ वयमिति ॥ वयं किंपुरुषाः कुत्सिताः पुरुषाः त्वं तु महापुरुषः अचिन्त्यगुणपूर्णः पुरुषोत्तम ईश्वरः सर्वनियन्ता च अयं च कुपुरुषः अतो यदा साधुभिर्धिक्कृतः शप्तस्तदैव नष्टो नष्टप्रायः अतस्तद्वधे किं माहात्म्यं वर्णनीयमिति भावः ॥ ५३ ॥ सभास्विति ॥ हे भगवन् सभासु सत्रेषु यज्ञेषु च अमलं सकलपापनिवर्तकं तव यशो गीत्वा वयं महतीं सपर्यां पूजां धनादिसम्पत्तिं लभामहे यः दैत्यः तां सपर्यां व्यनैषीत् निवारितवान् स एष भृशमत्यन्तं दुर्जनस्ते त्वया हतः एतद्दिष्ट्या भद्रमेव जातमित्यन्वयः । आमयो रोगस्तद्विनाशे यथा भद्रमेव भवति तथेत्यर्थः ॥५४॥ वयमिति ॥ हे ईश वयं किन्नरगणा इति प्रसिद्धास्तवानुगाः अनुचरा एव ते वयमेतावन्तं कालममुना

यक्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ॥ स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पञ्चतां पञ्चविंश ॥ ५२ ॥ किंपुरुषा ऊचुः ॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः ॥ अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ ५३॥ वैतालिका ऊचुः ॥ सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे ॥ यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽमयः ॥ ५४ ॥ किन्नरा ऊचुः ॥ वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः ॥ भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ॥ ५५ ॥ विष्णुपार्षदा ऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म ॥ सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥५६॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे प्रह्लादानुचरिते हिरण्यकशिपुदैत्यवधे नृसिंहस्तवो नामाष्टमोऽध्यायः ॥ ८ ॥ नारद उवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः ॥ नोपेतुमशकन् मन्युसंरम्भं सुदुरासदम् ॥ १ ॥

दितिजेन विष्टिमनुकारिताः द्रव्यादिदानं विनैव कार्यं कारिताः अतो हे हरे वृजिनः पापात्मा स दैत्यो भवता अवसादितो नाशितः अतः परमपि हे नरसिंह हे नाथ नोऽस्माकमनुचराणां विभवाय सुखसमृद्धये त्वं भव । मञ्जुभाषिणी छन्दः ॥ ५५ ॥ अद्येति ॥ हे शरणद आश्रयप्रद सर्वेषां लोकानां शर्म सुखावहमेतदद्भुतमवितर्क्यं हरिनररूपं नरसिंहरूपं तु तवाद्यैव नोऽस्माभिर्दृष्टमित्यन्वयः । हे ईश सोऽयं दैत्यस्ते तव विधिकरः किङ्कर एव विप्रैः सनकादिभिः शप्तः सन् दैत्यो जातस्तस्येदं निधनं नाशम् अनुग्रहाय शापविमुक्त्या स्वलोकप्राप्तये वयं विद्मः । प्रहर्षिणी छन्दः ॥५६॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो विवृतिं सप्तमस्याष्टमे व्यधात् ॥ ८ ॥ प्रह्लादो नवमे भीतो ब्रह्मणा प्रेरितो हरिम् ॥ कोपं प्रशमयन्नस्तौत् श्लोकास्तत्रेषुमार्गणाः ॥ चत्वार्युवाचेति साङ्घ्रिरष्टाशीतिरनुष्टुभाम् ॥ ९ ॥ एवमिति ॥ एवं ब्रह्मरुद्रपुरः सराः सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरादयः दूरतः स्तुवन्तोऽपि मन्युना संरम्भः आवेशो यस्य तं दुरासदं दुष्प्रापं हरिम् उपैतुं समीपं गन्तुं नाशकन् न समर्था बभूवुः ॥ १ ॥ साक्षादिति ॥ साक्षात्समीपवर्त्तिन्यपि श्रीर्लक्ष्मीर्देवैः ब्रह्मादिभिः प्रेषिता प्रभोः क्रोधप्रशान्त्यर्थं समीपं गच्छेति प्रार्थिता सती महदद्भुतं भयङ्करं नृसिंहरूपं दृष्ट्वा यन्न दृष्टं न श्रुतं पूर्वं कदापि तददृष्टश्रुतपूर्वं तस्य भावस्तत्त्वं तस्माद्धेतोः शङ्किता सती सा नोपेयाय समीपं न जगाम नित्यस्य नृसिंहस्य नित्यया लक्ष्म्या दृष्टत्वेऽपि तदानीमदृष्टाश्रुतत्वे प्रतीतिर्लीलाशक्त्यैव कारिता ॥ २ ॥ प्रल्हादमिति ॥ ततश्च ब्रह्मा अन्तिके स्वसमीपे स्थितं प्रह्लादं तच्छान्त्यर्थं प्रेषयामास । हे तात उपेहि समीपं गच्छ गत्वा च स्वपित्रे कुपितं प्रभुं प्रशमय प्रसन्नं कुर्विति ॥ ३ ॥ तथेति ॥ हे राजन् युधिष्ठिर तथेति ब्रह्मवाक्यमभ्युपगम्य महाभागवतोऽर्भकः प्रल्हादः शनकैरुपेत्य समीपं गत्वा विधृताञ्जलिः मूर्ध्नि बद्धाञ्जलिः सन् कायेन भुवि दण्डवन्ननाम ॥ ४ ॥ स्वेति ॥ स्वपादमूले पतितमर्भकं प्रह्लादं विलोक्य देवः श्रीनृसिंहः कृपया परितः प्लुतः व्याप्तः संस्तमुत्थाप्य तस्य शीर्ष्णि काल एवाहिः सर्पस्तस्माद्वित्रस्ता

साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् ॥ अदृष्टा श्रुतपूर्वत्वात् सा नोपेयाय शङ्किता ॥ २ ॥ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमन्तिके ॥
तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥ तथेति शनकै राजन् महाभागवतोऽर्भकः ॥ उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ॥
॥ ४ ॥ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ॥ उत्थाप्य तच्छीर्ष्ण्यदधात् कराम्बुजं कालाहिवित्रस्तधियां कृताभयम् ॥
॥ ५ ॥ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ॥ यत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥
अस्तौषीद् हरिमेकाग्रमनसा सुसमाहितः ॥ प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥ प्रह्लाद उवाच ॥ ब्रह्मादयः सुरगणा मुनयोऽथ
सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः ॥ नाराधितुं पुरुगुणैरधुनापि पप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥

भीता धीर्येषां तद्भयाच्छरणागतानां तेषां कृतमभयमभयदानं येन तादृशमित्यर्थः । कराम्बुजमदधात् निहितवान् शीर्ष्णार्षः ॥ ५ ॥ स इति ॥ स प्रह्लादस्तस्य भगवतः करस्पर्शेन धुतं निरस्तमखिलमशुभं दुरदृष्टं वासनारूपं यस्य सः अतः सपदि तत्क्षणमेव अभिव्यक्तमपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञानं यस्य सः अत एव निर्वृतः परमानन्दपूर्णः अत एव हृष्यत्तनुः उदञ्चितरोमयुक्ततनुः क्लिन्नं प्रेमार्द्रं हृद् हृदयं यस्य सः अश्रूणि आनन्दजलानि लोचनयोर्यस्य स तादृशः संस्तस्य भगवतः पादपद्मं स्वहृदि दधौ धृतवान् ॥ ६ ॥ अस्तौषीदिति ॥ एकाग्रेण मनसा तस्मिन् भगवति न्यस्तं हृदयमीक्षणं च येन सः अतः सुसमाहितः प्रेम्णा गद्गदया स्खलिताक्षरया वाचा तं हरिमस्तौषीद इडभाव आर्षः ॥ ७ ॥ ब्रह्मेति ॥ सत्वेषु सत्वकार्येषु धर्मज्ञानतपःस्वेवैकताना अनन्यवर्तिनी मतिर्येषां ते ब्रह्मादयः सुरगणाः अथ तथा मुनयः सनकादयः सिद्धाः ज्ञानिनोऽपि बहुकालं तमाराधयन्त इदानीं पर्यन्तमपि वचसां भगवद्गुणवर्णनप्रधानानां प्रवाहैर्व्यवधानरहितसमूहैः तथा वक्ष्यमाणैः पुरुभिर्धनाभिजनादिभिर्गुणैरपि यद्वा पुरुगुणैरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचःप्रवाहविशेषणम् । वचः पक्षे गुणालङ्कारादियुक्तैः प्रवाहपक्षे स्वच्छत्वशैत्यादिगुणयुक्तैः यमाराधितुमाराधयितुं स्तुत्यादिरूपाराधनद्वारा तस्य स्वस्मिन् सन्तोषमुत्पादयितुं णिलोप आर्षः ।न पिप्रुः न पूर्णाः समर्था न जाताः स हरिः उग्रा घोरा अधर्मा ज्ञानादिस्वभावा आसुरी तामसी जातिर्यस्य तस्य मे मम किं तोष्टुमर्हति ॥ ८ ॥ न च त्वं धनादिदानैस्तुष्यसीत्याह–मन्य इति ॥ धनं वित्तमभिजनः सत्कुले जन्म रूपं सौन्दर्यं तपः स्वधर्मकृच्छ्रादिरूपं वा श्रुतं पाण्डित्यमोज इन्द्रियशक्तिः तेजः कायकान्तिः प्रभावः प्रतापः बलं शरीरशक्तिः पौरुषमुद्यमः बुद्धिः प्रज्ञायोगः यमनियमाद्यष्टाङ्गः कर्मयोगश्च एते गुणा लोके शास्त्रे च महत्वहेतुत्वेन प्रसिद्धा अपि परस्य पुंसः भगवतः आराधनाय सन्तोषोत्पादनाय न भवन्तीत्यहं मन्ये हि यस्मात् भगवान् गजयूथपाय धनादिगुणैरहितायापि भक्त्यैव केवलया तुतोष तुष्टोऽभूत् विप्रादिति ॥ द्विषट् द्वादश गुणाः सनत्सुजातोक्ताः तैर्युतात् ज्ञानं च सत्यं च दमः श्रुतं च ह्यमात्सर्यं ह्रीस्तितिक्षानसूया यज्ञश्च दानं च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्येति । यद्वा धनाभिजनादयः पूर्वश्लोकोक्ता द्वादशगुणास्तैर्युतायादपि अरविन्दनाभस्य भगवतः पादारविन्दात् विमुखात् तादृशं विप्रमपेक्ष्य तस्मिन्नरविन्दनाभे अर्पिता मनआदयो येन तं तमर्दिशं श्वपचमपि वरिष्ठं मन्ये मनसोऽर्पणं तद्व्यतिरिक्तस्याचिन्तनं वचनस्यार्पणं तद्वार्त्ताकथनातिरिक्ता कथनमीहितं कर्म तदर्पणं तत्प्रीतये आचरणं न स्वार्थम् अर्थो वित्तं तस्या-

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥ ९ ॥

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ॥ यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ १० ॥

तस्मादहं विगतविक्लवः ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम् ॥ नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥ ११ ॥

र्पणं तदर्थे विनियोगः प्राणस्य जीवनस्यार्पणं नाम यावज्जीवं तत्सेवादि इति यतः स एवंभूतः श्वपचः स्वकुलमपि पुनाति अतः श्रेष्ठः गुणैः कृत्वा भूरिमानो गर्वः अन्यकृतसंमानो वा यस्य स विप्रस्त्वात्मानमपि न पुनाति कुतः कुलं तथा च यतो भक्तिहीनस्यैते गुणा गर्वाद्यर्थमेव भवन्ति न तूद्धारार्थमतः स हीन इति भावः ॥ ९ ॥ नैवेति ॥ निजलाभेनानन्दस्वरूपेनैव पूर्णः करुणः दयालुः अयं प्रभुः भगवान् अविदुषः अज्ञात् भगवदपेक्षया सर्वोऽपि जनः अज्ञ एव तस्मात् यन्मानं पूजां वृणीते स्वीकरोति तदात्मनः स्वस्यार्थाय नैव वृणीते । यद्वा । प्रभुः जनात् मानमात्मनोऽर्थे न वृणीते इत्येकमेव वाक्यम् । निजलाभपूर्णः अत आत्मनोऽर्थे मानं न वृणीते करुणत्वाद्वृणीते चेति स्वामिपादाः । तव माननेनापि मानायितुरेवोत्कर्ष इत्याह । यद्यत् यं यं मानं जनो भगवते विदधीत करोति तच्चात्मने स्वार्थमेव भवति यथा मुखे कृतैव तिलकालङ्कारादिश्रीः शोभा प्रतिमुखस्य दर्पणादौ प्रतिबिम्बितस्य प्रति फलति नतु साक्षात् प्रतिबिम्बस्यैव कर्तुं शक्यते ॥ १० ॥ तस्मादिति ॥ यस्माद्भगवान् केवलया भक्त्यैव तुष्यति न जातिगुणादिना तस्मादहं नीचः सर्वगुणहीनोऽपि विगतविक्लवः अधिकाराभावशङ्काशून्यः सन् सर्वात्मना सर्वप्रयत्नेन यथा मनीषं स्वबुद्ध्यनुसारेणेश्वरस्य भगवतो महि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महिमानं गृणामि अनुवर्णयामि येनानुवर्णितेन महिम्ना अजया अविद्यया गुणविसर्गं देहमनुप्रविष्टः तत्र कृताहंममेत्यध्यासः पुमान् पुरुषः पूयेत शुद्धचेत् अविद्यानिवृत्त्या विमुच्येतेत्यर्थः ॥ ११ ॥ सर्वे इति ॥ हे ईश उद्विजन्तः त्वत्कोपात् बिभ्यतः शता आर्षः । अमी सर्वे ब्रह्मादयः सत्वधाम्नः सत्वाधिष्ठातुस्तव विधिकरः किङ्कराः भक्ताः त्वत्सेवका एव नतु वयमसुरा इव तव द्वेषभावेन भक्ताः किन्तु श्रद्धयैव भगवतस्तव रुचिरैर्मनोज्ञैरवतारैर्यद्विक्रीडनं तदस्य विश्वस्य क्षेमाय लब्धपरिपालनाय भूतये अलब्धलाभायापि आत्मसुखाय स्वलीलानुभवसुखदानाय चेति नतु भयोत्पादनाय ॥ १२ ॥ तदिति ॥ तत्तस्मात् एषां भयपरिहाराय मन्युं क्रोधं यच्छ उपसंहर । यदर्थेऽयं मन्युः सोऽसुरस्त्वयाद्य हत एव । यथा वृश्चिकसर्पादेः परपीडाकर्तुः हत्यावधेन परकृतेन साधोरपि भयनिवृत्त्या मोदो भवति तथास्यासुरस्य वधेनापि इत्यर्थः । अतः सर्वेपि लोकाः निर्वृतिमिताः सुखं प्राप्ताः सन्तः प्रतियन्ति क्रोधोपसंहारं प्रतीक्षन्ते तथा हे नृसिंह विभयाय इतोऽग्रे भयनिवृत्तये तवेदं रूपं जनाः स्मरन्ति स्मरिष्यन्ति तथा चैतद्रूपस्मरणेनैव

सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजन्तः ॥ क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः ॥ १२ ॥ तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ॥ लोकाश्च निर्वृतिमिताः प्रतियन्ति सर्वे रूपं नृसिंह विभयाय जनाः स्मरन्ति ॥ १३ ॥ नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ॥ अन्त्रस्रजः क्षतजकेसरशङ्कुकर्णान्निर्ह्राद-भीतदिगिभादरिभिन्नखाग्रात् ॥ १४ ॥ त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनात् ग्रसतां प्रणीतः ॥ बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥ १५ ॥ यस्मात् प्रियाप्रियवियोगसयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः ॥ दुःखौषधं तदपि दुःखमतद्धियाहं भूमन् भ्रमामि वद मे तव दास्ययोगम् ॥ १६ ॥

भयनिवृत्तिध्रौव्यान्न मन्युधारणे न कृत्यमस्ति भयङ्करत्वादिति भावः॥१३॥नाहमिति ॥ हे अजित आस्यं च जिह्वा चार्कसदृशे नेत्रे च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्च एतानि अतिभयानकानि यस्मिंस्तस्मात् अन्त्रमय्यः स्रजो यस्मिंस्तत् अन्त्रस्रक् तस्मात् क्षतजाक्ताः केसरा यस्मिन् शङ्कुवदुन्नतौ स्तब्धौ कर्णौ यस्मिंस्तच्च तस्मात् निह्रादेन उत्कटशब्देन भीता दिगिभा यस्मात्तस्मात् अरीन् भिन्दतीत्यरिभिन्दितानि नखाग्राणि यस्मिन् तस्माद् भयङ्करादपि रूपादहं न बिभेमि प्रार्थनं त्वन्येषां भयनिवृत्त्यर्थमेव ॥ १४ ॥ मम तु भयं महदन्यदस्तीत्याह–त्रस्त इति ॥ हे कृपणवत्सल हे उशत्तम श्रेष्ठ ग्रसतां हिंस्राणामसुराणां त्वन्निन्दकानां मध्ये शता आर्षः । प्रणीतः त्वया निक्षिप्तः स्वकर्मभिर्बद्धश्चाहं दुःसहं यदुग्रमुत्कटं संसारचक्रे यत् कदनं दुःखं तस्मादहं त्रस्तोऽस्मीति अतस्त्वं प्रीतः सन् अपवर्गं संसारदुःखनिवर्त्तकं शरणम् आश्रयभूतं चरणकमलं प्रति मां कदा नु ह्वयसे आह्वारयसि ॥ १५ ॥ यस्मादिति ॥ हे भूमन् यस्मात्प्रियैरप्रियैश्च सह यथासङ्ख्यं कर्मवशात् वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निषु देवादियोनिष्वपि दह्यमानोऽतीव दुःखितोऽस्मि अत्र दुःखस्यौषधं प्रतिकारात्मकं लौकिकं द्रव्योपार्जनादिरूपं वैदिकं च प्रायश्चित्तयज्ञानुष्ठानादिकं च तदपि सर्वं दुःखात्मकमेव। एवमपि अतद्धिया देहाद्यात्माधिमानेन भ्रमामि मुह्यामि च तस्मात्सर्वकारणदुःखसंसारनिवर्तकं तव दास्यरूपं योगमुपायं वद वरदानविधया ब्रूहि ॥ १६ ॥ सोऽहमिति ॥ हे नृसिंह स त्वयानुगृहीतस्त्वद्दास्ये प्रवृत्तः अत एव ते तव पदयुगलमेवालयः निवासस्थानं येषां भक्तानां त एव हंसाः सारासारविवेकिनस्तैः सह सङ्गो यस्य तादृशोऽहं गुणे रजआदिभिः विशेषेण प्रमुक्तः सन् प्रियस्य सुहृदः परदेवतायाः परमेश्वरस्य तव विरिञ्चेन गीताः तत्संप्रदायप्रवृत्ताः गीता लीलाकथा अनुगृणन् वर्णयन् दुर्गाणि उपायान्तरसहस्रैरप्यनिवर्त्तनीयानि सर्वदुःखान्यञ्जसा अनायासेनैव तितर्मि अतिशयेन तरिष्यामि न गणयिष्यामि तातर्मीति वक्तव्येऽतितर्मीत्यार्षम् ॥ १७ ॥ बालस्येति ॥ हे नृसिंह हे विभो इह बालस्य पितरौ मातापितरौ शरणं रक्षकौ न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् कचित् अजीगर्त्तादिषु ताभ्यामेव तद्वधार्थं तद्विक्रयदर्शनात् चार्त्तस्य न रोगिणः अगदमौषधं शरणं कृतेऽप्यौषधे मृत्युदर्शनात् औषधादेव कचिद्रोगवृद्धिदर्शनाच्च न चोदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तया सहि-

सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिञ्चगीताः ॥ अञ्जस्तितर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससङ्गः ॥ १७ ॥ बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः ॥ तप्तस्य तत्प्रतिविधिर्य इहाञ्जसेष्टस्तावद्विभो तनुभृतां त्वदुपेक्षितानाम् ॥ १८ ॥ यस्मिन् यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा ॥ भावः करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्वरूपम् ॥ १९ ॥

तस्यापि मज्जनदर्शनात् अतस्तप्तस्य दुःखितस्य जनस्य तत्प्रतिविधिः तस्य दुःखस्य प्रतीकारः निवर्त्तक इह लोके यस्तावदिष्टः संमतः स त्वदुपेक्षितानां तनुभृतां प्राणिनां किमञ्जसा साक्षात्तन्निवर्त्तको भवति न भवत्येवेति काक्वा योज्यम् यद्वा। तप्तस्य तत्प्रतिविधिः इह लोके योऽञ्जसा इष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव न त्वात्यन्तिकः यस्तावदिह प्रतिविधिः इष्टः स किमञ्जसा अपि तु नैवाञ्जसा इति अतस्त्वमेव शरणं नान्यः ॥ १८ ॥ यत्तु कचित्केनचित्कस्यचिद्रक्षा दृश्यते तत्रापि त्वमेव रक्षक इत्याशयेन सर्वात्मकत्वमाह—यस्मिन्निति ॥ पृथक् पृथक् स त्वरजआदिः स्वभावः प्रकृतिर्यस्य सः यस्त्वपरः अर्वाचीनः अपकृष्टो वा पित्रादिः परः प्राचीनः उत्कृष्टो वा ब्रह्मादिरूपो भावः कर्त्ता यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन् काले येन च करणेन येन हेतुकर्त्ता वा सञ्चोदितः प्रेरितः यस्य सबन्धि यस्मादपादानात् यस्मै संप्रदानाय यत् ईप्सिततमं कर्म इत्येवं सप्तविभक्त्यर्थाः प्रदर्शिताः यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थाश्च दर्शिताः उतेत्यप्यर्थे एवं यः कर्त्ता तत्कारकै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यद्यत्करोति उत्पादयति विकरोति रूपान्तरं नयति तत्सर्वं कारकादि भगवतः स्वरूपमेव न पृथक् ॥ १९ ॥ मायेति ॥ हे अज त्वदंशस्य पुंसोऽनुमतेन ईक्षणरूपेणानुग्रहेण प्रेरितेन कालेन चोदिताः क्षोभिताः गुणाः सत्वादयो यस्याः सा माया प्रकृतिः कर्ममयम् अनन्तकर्मवासनावासितं कुर्वद्रूपं बली यः दुर्जयं छन्दोमयं वेदोक्तकर्मप्रधानम् अजया अविद्यया तद्भोगार्थं अर्पिताः षोडश एका दशेन्द्रियपञ्चमहाभूतात्मका अरा यस्मिंस्तत् संसारचक्रात्मकं यत् मनः मनःप्रधानं लिङ्गशरीरं सृजति तत्त्वदन्यः त्वत्तः पृथक् स्थितो विमुखस्त्वामभजन् कः पुमानतितरेत् ॥२०॥ स इति ॥ हि यस्मात्स सर्वनियन्तृत्वेन स्वतन्त्रतया प्रसिद्धः स्वधाम्ना चिच्छक्त्या नित्यं विजिता दूरतो निरस्ता आत्मनो बुद्धेर्गुणा धर्माः सुखदुःखरागलोभादयो येन सः कालो मायादिनियन्ता अत एव वशीकृता विसृज्यानां कार्याणां विसर्गाणां कारणानां च शक्तयो येन स एवं भूतस्त्वं तस्मात् हे ईश्वर सर्वनियन्तः हे विभो सर्वसमर्थ अजया अविद्यया षोडशारे संसारचक्रे विसृष्टं पातितमत एवेक्षुदण्डवन्निष्पीड्यमानं त्वां प्रपन्नं शरणागतं मामुपकर्ष समीपं

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः ॥ छन्दोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥ ॥ २० ॥ सत्वं निहत्य विजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्य विसर्गशक्तिः ॥ चक्रे विसृष्टमजयेश्वरषोडशारे निष्पीड्यमानमुपकर्ष विभो प्रपन्नम् ॥ २१ ॥ दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोऽयम् ॥ येऽस्मत्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥ २२ ॥ तस्मादमूस्तनुभृतामहमाशिषोज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिञ्चात् ॥ नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वम् ॥ २३ ॥ कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ॥ निर्विद्यते न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन् दुरापैः ॥ २४ ॥

नय ॥ २१॥ राज्यादिभोगांस्तु नेच्छामीत्याह—दृष्टा इति ॥ हे विभो दिवि स्वर्गे यान् अयं संसारी जन इच्छति ते अखिलधिष्ण्यपानां सर्वलोकपालानां आयुः श्रियः भोग्यभोगोपकरणादिसमृद्धयः विभवस्त्रैलोक्याधिपत्यरूपमैश्वर्यं ते आयुरादयो मया दृष्टाः अनपुंसकशेष आर्षः । ये आयुरादयः अस्मत्पितुः कुपितेन कोपेन यो हासस्तत्र विजृम्भिताया विकृताया भ्रुवो विस्फूर्जितेन चेष्टामात्रेण विलुलिताः विध्वस्ताः सोऽस्मत्पितापि ते त्वया निरस्तः मारितः ॥२२॥ तस्मादिति ॥ तस्मात्तुच्छत्वेन निश्चितत्वात् तनुभृतां जीवानां अमूराशिषः भोगान् आयुः श्रियं विभवमैन्द्रियमिन्द्रियभोग्यम् आविरिञ्च्याद् ब्रह्मणोऽपि भोग्यमभिव्याप्य किमपि नेच्छामि तथा कालात्मना उरुविक्रमेण ते त्वया विलुलितान् विध्वस्तानणिमादीन् अपि ज्ञः विवेकी अहं नेच्छामि अतः मां निजभृत्यानां स्वसेवकानां पार्श्वं समीपं नय प्रापय ॥ २३ ॥ कुत्रेति ॥ श्रुतिं श्रवणेन्द्रियं सुखयन्तीति श्रुतिसुखाः आपातरम्याः मृगतृष्णिर्मृगतृष्णा मरीचितोयं तद्रूपाः आर्षशब्दः प्रतीतिमात्रसुखाः आशिषः शब्दादयो विषयाः कुत्र तथा अशेषाणां रुजां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगाणां विरोहः उद्भवस्थानं चेदं कलेवरं क्व यदपि यद्यपि इति एवं विषयाणां नश्वरत्वादिकं पूर्वोक्तं विद्वान् जानाति तथापि काम एव अनलस्तं दुरापैर्दुर्लभैरपि मधुलवैः घृतबिन्दुतुल्यैः वैषयिकसुखलेशैः शमयन् नतु नैव निर्विद्यते ततश्च घृतबिन्दुभिरग्निरिव कामः प्रत्युत उद्दीप्यत एव ॥ २४ ॥ क्वाहमिति ॥ रजसः प्रभवो जन्म यस्मिंस्तस्मिन् यद्वा । रजसैव प्रभवो यस्य स इति अहमित्यस्य विशेषणं तथा तमोऽधिकं यस्मिन् तस्मिन् सुरेतराणामसुराणां कुले जातः क्वाहं हे ईश क्व च तवानुकम्पा अतः अयं प्रसादः न ब्रह्मणो नतु भवस्य न वै रमायाः यद्यस्मात् ययानुकम्पयेति वा पद्मवत्सकलसंतापहरः करः मे मम शिरसि त्वयार्पितः न तेषाम् ॥ २५ ॥ नेति ॥ एते ब्रह्मादयः परे उत्तमाः अयमसुरोऽवरो नीच इत्येषा परावरविषया मतिर्जन्तोः प्राकृतस्य जनस्य यथास्ति तथा बुद्धिर्ननु निश्चितं जगतः आत्मनः सुहृदो हितकारिणश्च भवतो न स्यात् नास्त्येव तथापि सुरतरोरिव संसेवया तव प्रसादो भवति तत्रापि सेवानुरूपमेव उदयः फलतारतम्यं भवति नतु तत्र परावरत्वं प्रसादकारणम् ॥ २६ ॥ एवमिति ॥

क्वाहं रजःप्रभव ईश तमोधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकम्पा ॥ न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥ २५ ॥ नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथात्मसुहृदो जगतस्तथाऽपि ॥ संसेवया सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न परावरत्वम् ॥ २६ ॥ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रतपन् प्रसङ्गात् ॥ कृत्वात्मसात् सुरर्षिणा भगवन् गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥ २७ ॥ मत्प्राणरक्षणमनन्त पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ॥ खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ २८ ॥

हे भगवन् प्रकृष्टः भवः संसार एवाहिकूपः कालाजगरयुक्तः कूपः तस्मिन् निपतितं यतः कामाभिकामं कामा विषयांस्तानभितः कामयमानं जनमनुसृत्य तत्प्रसङ्गात्तत्र प्रपतन् योऽहं सुरर्षिणा नारदेन आत्मसात्कृत्वा स्वकीयत्वेनाङ्गीकृत्य एवं यथा भवत्प्रसादो जातस्तथा पूर्वं मातृगर्भस्थ एवानुगृहीतोऽस्मि साधनजातमुपदिष्टोऽस्मि सोऽहं तत्फलस्यानुभूतत्वात् तव भृत्यस्य सेवां कथं नु विसृजे विसृजामि तङार्षः । अयमेव च परमोऽनुग्रहः न पुनरतितुच्छं प्राणरक्षादि ॥ २७ ॥ मत्प्राणेति ॥ हे अनन्त यदेतन्मम प्राणरक्षणं मत्पितुर्वधश्चैतदुभयं त्वया कृतं तत्स्वभृत्यसनकाद्यृषिवाक्यमृतं विधातुं सत्यं कर्तुमित्यहं मन्ये । यद्यस्मात् असद्विधित्सुः असत् अयुक्तं त्वद्भक्तस्य स्वपुत्रस्य मम हिंसनं कर्तुमिच्छुः मत्पिता खड्गं प्रगृह्य अवोचत् मदपरो मद्व्यतिरिक्त ईश्वरोऽस्ति चेत्तर्हि त्वामिदानीमवतु तव कं शिरो हरामीति यद्यदा अवोचत्तत्तदा मत्प्राणरक्षणमिति वान्वयः । एतच्च सत्यं विधातुं निजभृत्यभाषितमित्यत्रैव बहुधा व्याख्यातमनुसन्धेयम् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एक इति ॥ एतज्जगत् त्वमेवैकः यत् यतः अमुष्य विश्वस्यादावन्ते च सृष्टेः पूर्वं प्रलयानन्तरं च पृथगवस्यसि विरामं करोषि कारणत्वेनावधित्वेन च वर्तस इत्यर्थः । अतो मध्यतः मध्येपि त्वमेव निजमायया प्रकृत्या गुणव्यतिकरं गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वमेव तैर्देवतिर्यगादिरूपेण परिणतैर्गुणैर्नानेव उत्पादक इव रक्षक इव हन्तेव च अवसितः प्रतीतः वस्तुतः तमः एव हन्तृ सत्वमेव पालकं रज एव स्रष्टृ तेष्वौदासीन्येन प्रवेशादेव त्वं हन्तेत्यादिव्यपदेशः ॥ २९ ॥ त्वं वा इति ॥ हे ईश सदसत् कार्यकारणात्मकमिदं जगत् त्वमेव नतु त्वत्तः पृथक् भवांस्तु ततोऽन्यः आद्यन्तयोः पृथगवस्थानात् इति स्वरूपतो धर्मतश्चाप्रच्युतः प्रपञ्चातीत एवेत्यर्थः । अतः अयमात्मीयः अयं पर इतीयं या भेदबुद्धिः सा अपार्था मायारूपैव सर्वस्यैव जगतो भवद्रूपत्वात् यद्यस्मात् यस्य जन्म ईक्षणं प्रकाशश्च यस्मिन् निधनं च स्थितिश्च तद्वै तदेव अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथावसु कालमात्रत्वं तथेति अयमर्थः । कालशब्देन नीलत्वसाधारणगुणयोगात्पृथ्वी वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्र तरोर्यथा पृथ्वीमयबीजमात्रत्वं बीजस्य च यथा भूतसूक्ष्ममात्रत्वं तथा सर्वमपि कार्यकारणात्मकं जगत् परमकारणभवदात्मकमेवेति ॥ ३० ॥ आद्यन्तमध्यावस्थानेनोक्तं जगत्कारणत्वं

एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यन्तयोः पृथगवस्यसि मध्यतश्च ॥ सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥ २९ ॥ त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था॥ यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वै तदेव वसुकालवदष्टितर्वोः ॥ ३० ॥ न्यस्येदमात्मनि जगद्विलयाम्बुमध्ये शेषेत्मना निजसुखानुभवो निरीहः ॥ योगेन मीलितदृगात्मनि पीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्षे ॥ ३१ ॥ तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढम् ॥ अम्भस्यनन्तशयनाद्विरमत्समाधेर्नाभेरभूत् स्वकणिकावटवन्महाब्जम् ॥ ३२ ॥

प्रपञ्चयति पञ्चभिः—न्यस्येति ॥ निजसुखस्य स्वरूपानन्दस्यानुभवः साक्षात्कारो यस्य स निरीहः क्रियाशून्यः योगेन स्वरूपानुसन्धानलक्षणेन मीलिते दृशौ येन सः निद्रित इव तिष्ठन् वस्तुतस्तु आत्मना स्वरूपप्रकाशेन निपीता निरस्ता निद्रा येन स तथा अतस्तुर्ये जाग्रदाद्यवस्थात्रयातीते स्वरूपे स्थितः नतु सुप्तः त्वम् आत्मना स्वेनैवात्मनि स्वस्मिन्नेवेदं जगन्न्यस्य निक्षिप्य विलयाम्बुमध्ये प्रलयोदकमध्ये शेषे शयनमिव करोषि नतु स्वपिष्येव अतः सुप्तजीववत् आत्मना तमो न युङ्क्ष्व न योजयसि पश्यसि नच जाग्रत्स्वप्नयोरिव गुणान् विषयान् युङ्क्षे । शेषेत्मना इत्यत्र मन्त्रेष्वाङ्यादेरित्यात्मन आकारलोपः ॥ ३१ ॥ तस्येति ॥ यस्त्वमम्भसि शेषे तस्यैव ते तव इदं विश्वं वपुः स्वरूपं नान्यस्य अतो मध्यतश्चापि त्वमेवेत्यर्थः । कुत एवं यतः प्रलये आत्मनि त्वय्येव गूढं लीनं सत् पुनः निजकालशक्त्या सञ्चोदिताः कार्यार्थं सम्प्रेरिताः प्रकृतेर्धर्माः सत्त्वादयो गुणा येन तस्य अत एवानन्तशयनात् शेषपर्यङ्कात् विरमन् समाधिर्निद्रा नाट्यं यस्य तस्य तव नाभेः सकाशादम्भसि एकार्णवोदके महाब्जं लोकात्मकं पद्ममभूत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा स्वकणिकातः सूक्ष्माद्वटबीजात् महावटो भवति तद्वदिति । यद्वा । एवमन्वयः तस्यैव सृष्टयारम्भे निजकालशक्त्या सञ्चोदितप्रकृतिधर्मेणस्तव आत्मनि स्वस्मिन्गूढमेव इदं ब्रह्माण्डरूपं वपुः प्रकृतेः सकाशान्महाब्जम् अभूत् स्वकर्णिकातः महावट इवेति ॥ ३२ ॥ तदिति ॥ तस्मिन्नब्जे संभवो यस्य सः अत एव कविः सूक्ष्मदर्श्यपि ब्रह्मा अतः पश्चादन्यदपश्यमानः अपश्यन् शानजार्षः । त्वां बीजमुपादानकारणभूतमात्मनि स्वस्मिन् ततं व्याप्तं सन्तमपि स्वबहिरेव वर्त्तमानं विचिन्त्य विचार्य अब्दशतमप्सु निमज्जमानः अन्विष्यन्नपि शानजार्षः । नाविन्दत् युक्तं चैतत् उ ह अहो अङ्कुरे जाते सति बीजं तदनुगतं कारणं पृथक् पुमान् कथमुपलभेत पश्येत् ॥ ३३ ॥ स इति ॥ स तु आत्मयोनिर्ब्रह्मातिविस्मितः अन्वेषणान्निवृत्य अब्जमेवास्थितः सन् कालेन तीव्रेण तपसा ध्यानेन परिशुद्धभावश्च सन् हे ईश भूतेन्द्रियाशयमये आत्मनि स्वदेह एव उपादानसद्रूपेण विततमति सूक्ष्मं त्वां ददर्श भुवि तत्कारणभूतं सूक्ष्मं गन्धं विततं यथा विवेकी पश्यति तथेत्यर्थः ॥ ३४ ॥ एवमिति ॥ यथा सूक्ष्मं रूपं दृष्टवान् एवं

तत्संभवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिन्त्य ॥ नाविन्ददब्दशतमप्सु निमज्जमानो जातेङ्कुरे कथमु होपलभेत बीजम् ॥ ३३ ॥ स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः ॥ त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं भूतेन्द्रियाशयमये विततं ददर्श ॥ ३४ ॥ एवं सहस्रवदनाङ्घ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम् ॥ मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः ॥ ३५ ॥ तस्मै भवान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ ॥ हत्वाऽनयत् श्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनन्ति ॥ ३६ ॥ इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभावयसि हंसि जगत्प्रतीपान् ॥ धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ सत्वम् ॥ ३७ ॥ नैतन्मनस्तव कथासु विकुण्ठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रम् ॥ कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ॥ ३८ ॥

सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं युक्तं मायामयं सता पातालादिप्रपञ्चेनोपलक्षितः सन्निवेशः पादादिरचना यस्य तं महापुरुषं विराट्पुरुषं च दृष्ट्वा विरिञ्चो ब्रह्मा मुदं हर्षमाप ॥ ३५ ॥ तस्मा इति ॥ सत्वं सत्वगुणरूपां तव प्रियतमां तनुमामनन्ति तां हयशिरस्तनुवं श्रीहयग्रीवमूर्तिं वङ्घार्षः । बिभ्रत्सन् वेदद्रुहौ अतिबलौ रजस्तमश्च रजस्तमोरूपौ मधुकैटभाख्यौ दैत्यौ हत्वा भवांस्तस्मै ब्रह्मणे ताभ्यां हृतान् श्रुतिगणान् अनयत् समर्पितवान् ॥ ३६ ॥ इत्थमिति ॥ हे महापुरुष इत्थं नृतिर्यगृषिदेवझषावतारैः कृष्णादिवराहादिपरशुरामादिवामनादिमत्स्यकूर्मादिभिः लोकान्विभावयसि जगतः प्रतीपान् प्रतिकूलान् असुरादीन् हंसि घातयसि युगानुवृत्तं धर्मं च पासि यत् यस्मात्त्वं कलौ छन्नोऽभवः आविर्भूय तन्न करोषि अथ तस्मात्त्रिष्वेव युगेष्वाविर्भावात्स एवं भूतस्त्वं त्रियुग इति प्रसिद्धः ॥ ३७ ॥ नेति ॥ हे विकुण्ठनाथ दुरितैर्दुष्टम् असाधु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहिर्मुखं तीव्रम् अविनीतं कामादिष्वातुरमासक्तं हर्षशोकादिभिरार्त्तं व्याप्तं दुःखितमपि एतन्मनस्तव कथासु न संप्रीयते प्रीतियुक्तं नैव भवति अतस्तस्मिन् दुष्टे मनसि सति दीनस्तदधीनोऽहं तव तत्वं कथं विमृशामि विचारयामि ॥ ३८ ॥ जिह्वेति ॥ हे अच्युत अवितृप्ता जिह्वा मा माम् एकतः मधुरादिरसं प्रति विकर्षत्याकर्षति शिश्नोऽन्यतः कामिनीं प्रति आकर्षति इत्यस्य सर्वत्रान्वयः । त्वगन्यतः स्रक्चन्दनादिप्रति उदरं क्षुधा तप्तमाहारं प्रति श्रवणं श्रोत्रमिन्द्रियं कुतश्चित् गीतादिशब्दं प्रति घ्राणोऽन्यतः सुगन्धं प्रति चपला दृक् चक्षुः रूपं प्रति कर्मशक्तिः कर्मणी धनोपार्जनादौ शक्तिर्यस्य हस्तादिः सः उपलक्षणतया कर्मेन्द्रियाणि स्वस्वव्यापारं प्रति यथा गेहपतिं स्वामिनं बह्व्यः सपत्न्यः स्वगृहं प्रत्याकर्षन्त्यो लुनन्ति त्रोटयन्ति तद्वदित्यर्थः ॥ ३९ ॥ एवमिति ॥ हे पारचर संसारवैतरण्याः पारे चरतीति यमद्वारस्था पापिनां यातनार्था नदी वैतरणी तद्दुःखबाहुल्याद्भवः संसार एव वैतरणी तस्यां स्वकर्मभिर्दुरदृष्टैः पतितमतः कर्मवशादन्योऽन्यतो यानि जन्मादीनि तेभ्यो भीतभीतमतिभीतं स्वेषां परेषां च विग्रहे देहे यथायथं वैरं मैत्रं च यस्य तमेवंभूतं मूढं जनं पश्यन् हन्तेति अहो कष्टमित्येवमनुकम्प्याद्य पीपृहि वैतरणीमुत्तार्य पालय अभ्यासदैर्घ्यमार्षम् ॥ ४० ॥ को न्विति ॥

जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित ॥ घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥३९॥ एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतम् ॥ पश्यञ्जनं स्वपरविग्रहवैरमैत्रं हन्तेति पारचर पीपृहि मूढमद्य ॥४०॥कोन्वत्र तेऽखिलगुरो भगवन्प्रयास उत्तारणेऽस्य भवसंभवलोपहेतोः॥मूढेषु वै महदनुग्रह आर्तबन्धो किं तेन ते प्रियजनाननुसेवतां नः॥४१॥ नैवोद्विजे पर दुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहाऽमृतमग्नचित्तः॥शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान्॥४२॥प्रायेण देवमुनयः स्वविमुक्तिकामा मौनं चरन्ति विजनेन परार्थनिष्ठाः ॥ नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदन्यशरणं भ्रमतोऽनुपश्ये ॥ ४३ ॥

हे अखिलगुरो हे भगवन् हे आर्त्तबन्धो अत्र सर्वजनोत्तारणे अस्य विश्वस्य भवसंभवलोपानामुत्पत्तिस्थितिसंहाराणां हेतोः कर्त्तुः ते तव को नु प्रयासः न कोऽपि इति मूढेषु महतामनुग्रहः उचित इति शेषः । ते तव ये प्रियजना भक्तास्तान् अनुसेवतामनुसेवमानानां शता आर्षः । नोऽस्माकं तेन संसारोद्धारणेन किं न किमपीत्यर्थः । त्वद्भक्तसेवाप्रभावाद्वयं तु संसारं तरिष्याम एवातस्तदन्यतारण एव तव यशः ॥ ४१ ॥ नेति ॥ हे पर त्वद्वीर्यस्य प्रभावस्य गायनमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोऽहं दुरत्यया दुस्तरा या भववैतरणी तस्याः सकाशादहं नैवोद्विजे नैव बिभेमि परमदुस्तरेति वा पाठः । किं तु ततस्तद्वीर्यगायनमहामृताद्विमुखं चेतो येषां तान् प्रत्युतेन्द्रियार्थं यन्मायासुखं विषयसुखं तदर्थं भरं कुटुम्बादिभारमुद्वहतः विमूढानहं शोचामि ॥ ४२ ॥ तान्मुनय उपदेक्ष्यन्तीति चेत्तत्राह—प्रायेणेति ॥ हे देव मुनयस्तु प्रायेण स्वविमुक्तिकामाः सन्तो विजने एकान्तदेशे स्थिता मौनं चरन्ति ध्यानविचारादिपरास्तूष्णीमेव तिष्ठन्ति अतो न परार्थनिष्ठाः न परोपकारकाः एव प्रायग्रहणान्नारदादीनां परार्थनि-

CC-0. In Public Domain. Digitization by eGangotri

इत्वं सूचितम् अतोऽहमेतान् कृपणान् दीनान् विहाय एको न विमुमुक्षे विमुक्तिं नैवेच्छामि त्वत्तोऽन्यमस्य मूढजनस्य नानायोनिषु भ्रमतः शरणं संसारदुःखादुद्धारे अवलम्बं नानुपश्ये नैव पश्यामि तद्भावः । अतस्तन्मुक्तये प्रार्थये ॥ ४३ ॥ यदिति ॥ मैथुनादिना स्त्रीसंबन्धादिना गृहमेधिनां गृहस्थानां यत्सुखं तत्तुच्छं यथा करयोः कण्डूयनेन दुःखमनु दुःखमेव भवति सुखं तु घर्षणकालमात्रे मोहकल्पितमेव तथेत्यर्थः । एवं बहुदुःखभाजोपि कृपणाः विषयिण इह गृहमेधिसुखे न तृप्यन्ति अलमिति न मन्यन्ते त्वत्प्रसादादेव कश्चिद्धीर एव कण्डूतिवत् मनसिजं कामं विषहेत न तु सर्वे ॥ ४४ ॥ मौनेति ॥ रहः विविक्तवासः शेषाः स्पष्टाः हे पुरुष मौनादयो दश ये आपवर्ग्याः अपवर्गो मोक्षस्तत्साधनत्वेन प्रसिद्धास्ते त्वत्र संसारे अजितेन्द्रियाणां तत्तदिन्द्रियविषयभोगार्थं मौनादीन् विक्रीणानानां प्रायेण परं केवलं वार्त्ताः जीवनोपाया एव भवन्ति भगवदनुगृहीतानां मोक्षहेतुत्वात्प्रायग्रहणम् उत अपि दाम्भिकानां तु कदाचिद्वार्त्ता भवन्ति कदाचिद्वार्त्ता अपि न भवन्ति दम्भस्य अनियतफलत्वात् ॥ ४५ ॥ रूपे इति ॥

यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम्॥तृप्यन्ति नेह कृपणा बहुदुःखभाजः कण्डूतिवन्मनसिजं विषहेत धीरः॥ ॥ ४४ ॥ मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ॥ प्रायः परं पुरुष ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वाऽत्र तु दाम्भिकानाम् ॥ ४५ ॥ रूपे इमे सदसती तव वेदसृष्टे बीजाङ्कुराविव न चान्यदरूपकस्य ॥ युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४६ ॥ त्वं वायुरग्निरवनिर्वियदम्बुमात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च ॥ सर्वं त्वमेव सगुणो विगुणश्च भूमन् नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ ४७ ॥

बीजाङ्कुराविव प्रवाहापन्ने वेदेन सृष्टे प्रकाशिते इमे सदसती कार्यकारणात्मके समष्टिव्यष्ट्यात्मके वा अरूपकस्य रूपादिरहितस्य तव रूपे उपलक्षणभूते एव कार्यकारणात्मकं विश्वं त्वत्तोऽन्यं न भवति एवंभूतं त्वां युक्ता वशीकृतचित्ताः योगेन भक्तियोगेन उभयत्र कार्ये कारणे च समष्टौ व्यष्टौ चेति वा समक्षं प्रत्यक्षमेव त्वत्कृपया विचक्षते पश्यन्ति त्वद्विमुखानां त्वेवं ज्ञानमन्यत उपायान्तरेण देवतान्तरेण च तज्ज्ञानं न स्यान्नैव भवति । यद्वा । एतदुभयमन्यतः प्रधानपरमाणवादेर्न स्यात् अतस्त्वमेव कारणत्वात्सर्वानुस्यूतः । यथा दारुषु स्थितं वह्निं मथनेनैव प्राप्नुवन्ति तथा स्थावरजङ्गमेषु स्थितमपि भगवन्तं केवलया भक्त्यैव प्राप्नुवन्ति नान्यथेत्यर्थः ॥ ४६ ॥ त्वमिति ॥ हे भूमन् वाय्वादि सर्वं त्वमेवेत्यन्वयः । मात्राशब्दादिविषयवर्गः हृदयं मनः चित् चित्तम् अनुग्रहः अनुग्राहको देवतावर्गः सगुणः गुणकार्यः स्थूलः विगुणः गुणकार्याद्व्यतिरिक्तः सूक्ष्मः जीवान्तर्याम्यादिपदार्थः किं बहुना मनश्च वचश्च मनोवचस्तने निरुक्तं प्रकाशितं किमपि वस्तु त्वत्तोऽन्यद्भिन्नं नास्ति सर्वं त्वमेव ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ उरु बहुधा गीयत इति हे उरुगाय आद्यन्तवन्तः आगमापायिनः देवैर्मर्त्यैश्च सहिताः ये एते गुणाः सत्त्वादयः गुणिनस्तदभिमानिनो देवाः महदादयो महाभूततन्मात्रेन्द्रियान्ताः मनःप्रभृतयः चित्तबुद्ध्यहङ्काराश्च त्वां नैव हि विदन्ति तस्मात् सुधियो विवेकिनः एवं विमृश्य भवदनुग्रहेणैव तत्त्वं ज्ञायते न बहुशास्त्राभ्यासश्रमेणेति निश्चित्य शब्दाच्छास्त्राभ्यासाद्विरमन्ति त्वामेव समाधिनोपासत इत्यर्थः ॥ ४८ ॥ तदिति ॥ हे अर्हत्तम पूज्यतम नमो नमस्कारश्च स्तुतिश्च कर्म पूजा सर्वकर्मसमर्पणं च ताः कर्मपरिचर्या च चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्ग्या ते तव सम्यक् सेवया विना परमहंसानां गतौ प्राप्ये त्वयि जनः किं भक्तिं प्रेमलक्षणां लभेत नैव लभेतेति तस्मात्त्वमेव सर्वजनमुद्धर ॥ ४९ ॥ एतावदिति ॥ निर्गुणोऽपि भक्तेन प्रह्लादेन भक्त्या एतावन्तो वर्णिता गुणाः करुणादयो यस्य सः तस्मिन् प्रीतः अत एव यतमन्युः उपसंहृतकोपः संस्तं प्रणतं प्रह्लादमभाषत ॥ ५० ॥ प्रह्लाद इति ॥ हे प्रल्हाद हे भद्र हे असुरोत्तम ते तुभ्यमहं प्रीतोऽस्मि प्रसन्नोऽस्मि अतस्तव भद्रमेव भविष्यति । नृणां

नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः ॥ आद्यन्तवन्त उरुगाय विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शब्दात् ॥ ४८ ॥ तत्तेऽर्हत्तम नमः स्तुतिकर्म पूजाकर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ॥ संसेवया त्वयि विनेति षडङ्ग्या किं भक्तिं जनः परमहंसगतौ लभेत ॥ ४९ ॥ नारद उवाच ॥ एतावद् वर्णितगुणो भक्त्या भक्तेन निर्गुणः ॥ प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥ ५० ॥ श्रीभगवानुवाच ॥ प्रह्लाद भद्र भद्रं ते प्रीतोहं तेऽसुरोत्तम ॥ वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥ ५१ ॥ मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे ॥ दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति ॥ ५२ ॥ प्रीणन्ति ह्यथ मां धीराः सर्वभावेन साधवः ॥ श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम् ॥ ५३ ॥ एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ॥ एकान्तित्वाद् भगवति नैच्छत् तानसुरोत्तमः ॥ ५४ ॥ इति श्रीभागवते सप्तमस्कन्धे प्रह्लादचरिते भगवत्स्तवो नाम नवमोऽध्यायः ॥ ९ ॥

भक्तानामहं कामपूरोऽस्मि अभीष्टपूरकः पुरुषार्थप्रवाहो वास्मि अतस्त्वं स्वाभिमतं वरं वृणीष्व ॥ ५१ ॥ मामिति ॥ हे आयुष्मन् मामप्रीणतः अप्रीणयतो जनस्य मे मम दर्शनं दुर्लभमेवातः सर्वजनोद्धारे आग्रहस्त्वया त्याज्यः मर्यादालोपापत्तेः संसारोच्छेदप्रसङ्गाच्चेति भावः । मां दृष्ट्वा तु जन्तुः पुनरात्मानं तप्तुमपूर्णकामत्वेन शोचितुं नार्हति ॥ ५२ ॥ प्रीणन्तीति ॥ अथ हि तस्मादेव सर्वासामाशिषां सर्वमनोरथानां पतिं दातारं मां धीराः श्रेयस्कामाः महाभागाः साधवः सर्वभावेन परमया भक्त्या प्रीणन्ति तोषयन्ति मां प्रति तुष्यन्ति वा ॥ ५३ ॥ एवमिति ॥ लोकाः प्राणिनः प्रलोभ्यन्ते यैस्तैर्वरैर्भगवतैवं प्रलोभ्यमानोऽपि असुरोत्तमः प्रह्लादो भगवति एकान्तित्वात् अनन्यप्रयोजनभगवद्भक्तियुक्तत्वात्तान् वरान् नैच्छत् ॥ ५४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमे सप्तमस्य व्यधादिमाम् ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

दशमे प्रह्लादमनुगृह्य चान्तर्दधौ हरिः ॥ सोऽनुग्रहीच्छिवमपि श्लोकास्तत्रैकसप्ततिः ॥ उवाचेत्येकादशार्द्धं चतुःशैला अनुष्टुभः ॥ १० ॥ भक्तीति ॥ तत्सर्वं धर्मादिवरजातं भक्तियोगस्य अन्तरायतया विघ्नतया मन्यमानः अर्भकः बालकोऽपि प्रल्हादः स्मयमानः अहो सर्वज्ञोऽपि प्रलोभयतीत्याश्चर्यं कुर्वन् तं हृषीकेशमुवाच ॥१॥ मा मामिति ॥ उत्पत्त्या स्वभावेनैव कामेषु विषयेषु आसक्तं मां तैः कामरूपैर्वरैर्मा प्रलोभय लुब्धं मा कार्षीः । यतोऽहं न विषयकामी किन्तु तेषां कामानां सङ्गाद्भीतः ततो विरक्तः मुमुक्षुः संस्त्वामुपाश्रितः शरणमागतोऽस्मि ॥ २ ॥ भृत्येति ॥ हे प्रभो प्रभुरित्यपि पाठः । भवान् हृदयस्य ग्रन्थिवद्दुर्विमोच्येषु अत एव जन्ममरणादिसंसारस्य बीजेषु कामेषु भक्तं मां यदचोदयत् प्रेरितवांस्तद्भृत्यलक्षणजिज्ञासुः अयमेवोत्तममध्यमभक्तलक्षणं कथयत्वित्यभिप्रायवान् सन्नेवेति ॥ ३ ॥ नेति ॥ अन्यथा एवं न चेत् तदा ते तवाखिलगुरोः सर्वहितोपदेष्टुः करुणात्मनः तत्रानर्थसाधने स्वभक्तप्रवर्तनं न घटेत ते त्वत्तो यः पुमान् आशिषो विषयान् आशास्ते त्वत्सेवां कृत्वा कामयते स तव भृत्यो न भवति

नारद उवाच ॥ भक्तियोगस्य तत् सर्वमन्तरायतयाऽर्भकः ॥ मन्यमानो हृषीकेशं स्मयमान उवाच ह ॥१॥ प्रह्लाद उवाच ॥ मा मां प्रलोभयोत्पत्त्या सक्तं कामेषु तैर्वरैः ॥ तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः॥२॥ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् ॥ भवान् संसारबीजेषु हृदयग्रन्थिषु प्रभो ॥ ३ ॥ नान्यथा तेऽखिलगुरो घटेत करुणात्मनः ॥ यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ॥ ४ ॥ आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ॥ न स्वामी भृत्यतः स्वाम्यमिच्छन् यो राति चाशिषः ॥ ५ ॥ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ॥ नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ६ ॥ यदि रासीश मे कामान् वरांस्त्वं वरदर्षभ ॥ कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् ॥७॥

अनन्यप्रयोजनत्वे सति सेवकत्वस्य भृत्यलक्षणस्याभावात् किं तु स्वप्रयोजनानुरोधेनान्यानुवृत्तिस्वरूपस्य वाणिग्लक्षणसाम्यसत्वात्स वणिगेवेत्यर्थः । तुभ्यं किंचित्पत्रपुष्पादि दत्त्वा इन्द्रादिपदं जिघृक्षतीति भावः ॥ ४ ॥ आशासान इति ॥ यः स्वामिनि आत्मनः आशिषः आशासानः कामयमानो भवति स शुद्धो भृत्यो न भवति एवं यो भृत्यतः स्वाम्यं स्वामिनः स्वस्य कार्यमिच्छंस्तस्मै आशिष राति ददाति सोऽपि शुद्धः स्वामी नैव भवति किं तु सोऽपि वणिगेव तल्लक्षणसत्त्वादिति भावः । अतो लोके प्रसिद्धः स्वस्वामिभावो विगीत एवेति भावः ॥ ५ ॥ अहमिति ॥ अहं त्वकामः अनन्यप्रयोजन एव त्वद्भक्तः त्वं च अनपाश्रयः सेवकात्प्रयोजनं नाश्रयते इति तथाविध एव स्वामी तथा च यथा लौकिकयो राजसेवकयोरन्यथा प्रयोजनमुद्दिश्यैवार्थः स्वामिभृत्यभावो भवति तथेहावयोः स्वामिभृत्यभावे द्वयोरपि प्रयोजनोद्देशो नास्तीत्यर्थः ॥ ६ ॥ यदीति ॥ हे ईश हे वरदानामृषभश्रेष्ठ यदि त्वं मे मह्यं कामान् इष्टान् वरान् रासि ददासि तर्हि भवतः सकाशादहं मम हृदि कामानां कामाङ्कुराणां कामवासनानामसंरोहम्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुत्पत्तिरूपं वरं वृणे ॥ ७ ॥ इन्द्रियाणीति ॥ यस्य कामाङ्कुरस्य जन्मना हृदि संरोहमात्रेणैवेन्द्रियादीनि नश्यन्तीत्यन्वयः ॥८॥ विमुञ्चतीति ॥ मानवो मनुष्यो यदा मनसि स्थितान् कामान् विषयान् विमुञ्चति तर्ह्येव हे पुण्डरीकाक्ष स भगवत्त्वाय त्वत्कृपया त्वत्समानज्ञानैश्वर्यादिलाभाय कल्पते समर्थो भवति ॥ ९ ॥ ॐ नम इति ॥ स्पष्टम् ॥ १० ॥ नेति ॥ ये भवद्विधास्त्वत्सदृशा मयि एकान्तिनः अनन्यप्रयोजना भक्तास्ते यद्यपि इहास्मिन्लोके अमुत्र परलोके च या आशिषः विषयास्तान् जातु कदाचिदपि मे मत्तोऽपि नाशासते नैव वाञ्छति तथाप्येतन्मन्वन्तरपर्यन्तमत्र भूमावेव स्थित्वा दैत्येश्वराणामधिपो भूत्वा भोगान् भुंक्ष्व ॥ ११ ॥ कथा इति ॥ प्रियाः मदीयाः कथाः जुषमाणः शृण्वन् सर्वेषु भूतेषु सन्तमेकम् ईशम् अधियज्ञं यज्ञाधिष्ठातारं माम् आत्मनि स्वचित्ते आवेश्य योगेन मय्यर्पणेन कर्म हिन्वन् त्यजन् यजस्व यज्ञैराराधयस्व तेन कर्मणा तव बन्धो न स्यात् नापि कर्माकरणदोषः इदं च लोकसंग्रहार्थे कर्मणि प्रवर्त्तितस्यानुद्वेगमात्राय ॥ १२ ॥ भोगेनेति ॥ भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा

इन्द्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ॥ ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यन्ति जन्मना ॥ ८ ॥ विमुञ्चति यदा कामान्मानवो मनसि स्थितान् ॥ तर्ह्येव पुण्डरीकाक्ष भगवत्त्वाय कल्पते॥९॥ॐ नमो भगवते तुभ्यं पुरुषाय महात्मने ॥ हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥ १० ॥ नृसिंह उवाच ॥ नैकान्तिनो ये मयि जात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः ॥ अथापि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् ॥ ११ ॥ कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि सन्तमेकम् ॥ सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥ १२ ॥ भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ॥ कीर्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबन्धः ॥ १३ ॥ य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः ॥ त्वां च मां च स्मरन्काले कर्मबन्धात्प्रमुच्यते ॥ १४ ॥

कुशलेन पुण्याचरणेन पापं हित्वा कलेवरं च कालजवेन हित्वा त्यक्त्वा सुरलोकगीतां विशुद्धां कीर्तिं च लोके विताय विस्तार्य सर्वथा मुक्तबन्धः सन् मामेष्यसि प्राप्स्यसि । अत्र भगवत्कृपया प्राप्तज्ञानस्य तस्य कुशलेन पापमिति विभीषामात्रम् । अन्यथा तस्य राज्ये प्रवृत्तेः नतु तस्य प्राचीनं पापमस्ति ज्ञानेन तन्नाशात् । " तत्सुकृतदुष्कृते विधुनुते " इति श्रुतेः । न चेदं प्रारब्धपापाभिप्रायं तस्य भोगेनैव क्षयात् । यद्वा । कुशलेन " दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।" इत्याद्युक्तबुद्धिकौशलयुक्तेन भोगेन प्रारब्धं पुण्यं पापं च हित्वेति व्याख्येयम् अन्ये तु प्राग्जन्मनि भोगेन पुण्यं कुशलेन पापं प्राक्कलेवरं च हित्वा सम्प्रति मामेषि प्राप्तोऽसि । अत्र जन्मनि तु मुक्तबन्ध एवासीति व्याचख्युः ॥ १३ ॥ य इति ॥ यो नरस्त्वां च मां च इदं मम चरित्रं च स्मरन् मह्यं ममैतत्त्वया गीतं स्तोत्रं कीर्त्तयेत्सोऽपि प्रारब्धावसानकाले पापपुण्यात्मकात्कर्मबन्धाद्विमुच्यते कुतस्तव बन्धशङ्केति ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरमिति त्रिकम् ॥ हे महेश्वर वरदा ब्रह्मादयस्तेषामपीशा ते त्वत्त एतद्वरं दरये वृणे । हे कृपणवत्सल यद्यपि तदा मरणसमये ते तवापाङ्गेन कटाक्षेण सम्यक् कृपया दिष्टः अतः पूत एव तथापि श्रीमुखात्प्रसादवाचं श्रोतुं कार्पण्यात्प्रार्थय इति ऐश्वरमीश्वरस्य तवेदं तेजः अविद्वान् अजानन् विद्धः अमर्षेण क्रोधेन आशयोऽन्तःकरणं यस्य सः भ्रातृहा इति मृषा दृष्टिः त्वद्भक्ते मयि चाघवान् कृतद्रोहः मे पिता सर्वलोकगुरुं प्रभुं त्वां यत् अनिन्दत् तस्मात् दुरन्तात् दुस्तरादघात् पापात् पूयेत विशुद्धचेत् ॥ १५॥ ॥ १६ ॥ १७ ॥ त्रिः सप्तभिरिति ॥ हे अनघ हे साधो त्रिः सप्तभिः स्वपितृभिः सह ते पिता पूतः यत् यस्मात् कुलपावनो भवान् अस्य हिरण्यकशिपोर्गृहे जातः यद्यपि कश्यपो मरीचिर्ब्रह्मा चेति तत्पितृत्रय एव पितरस्तथापि प्राक्कल्पगतपित्रभिप्रायेण त्रिःसप्तभिः सहेत्युक्तमिति ज्ञेयम् ॥ १८ ॥ यत्रेति ॥ यत्र यत्र देशे प्रशान्ताः समदर्शिनः साधवः सम्यगुत्तमाचाराः मद्भक्तास्तिष्ठन्ति ते कीकटाः कीकटो देशस्तत्तुल्या अन्येऽप्यशुद्धदेशा अपिशब्दात्तन्निवासिनः प्राणिनश्च पूयन्ति शुद्धा भवन्ति तङ्भाव आर्षः

प्रह्लाद उवाच ॥ वरं वरय एतत्ते वरदेशान्महेश्वर ॥ यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ॥ १५ ॥ विद्धामर्षाशयः साक्षात् सर्वलोकगुरुं प्रभुम् ॥ भ्रातृहेति मृषा दृष्टिस्त्वद्भक्ते मयि चाघवान् ॥१६॥ तस्मात् पिता मे पूयेत दुरन्ताद् दुस्तरादघात् ॥ पूतस्तेऽपाङ्गसंदृष्टस्तदा कृपण-वत्सल ॥ १७ ॥ श्रीभगवानुवाच ॥ त्रिः सप्तभिः पिता पूतः पितृभिः सह तेऽनघ ॥ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥ १८ ॥ यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ॥ साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः ॥ १९ ॥ सर्वात्मना न हिंसन्ति भूतग्रामेषु किंचन ॥ उच्चावचेषु दैत्येन्द्र मद्भावेन गतस्पृहाः ॥ २० ॥ भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ॥ भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २१ ॥ कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ॥ मदङ्गस्पर्शनेनाङ्ग लोकान्यास्यति सुप्रजाः ॥२२ ॥ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ॥ मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥ २३ ॥

॥ १९ ॥ सर्वेति ॥ हे दैत्येन्द्र मद्भावेन मद्भक्त्यैव विगता हिंसा मूलक्रोधकारणभूता स्पृहा येषां ते मद्भक्ताः उच्चावचेषु उत्कृष्टापकृष्टेषु भूतग्रामेषु प्राणिसमूहेषु मध्ये सर्वात्मना कामक्रोधादिपारवश्येनापि किंचन कृकलाससर्पादिकमपि न हिंसन्ति न पीडयन्ति ॥ २० ॥ भवन्तीति ॥ लोके ये केचित्पुरुषास्त्वामनुव्रतास्त्वल्लक्षणसंपन्नास्ते मद्भक्ता भवन्ति अतः भवांस्तु खलु निश्चयेन सर्वेषां मद्भक्तानां प्रतिरूपं तुल्यत्वं धर्जति इति प्रतिरूपधृक् उपमानास्पदं श्रेष्ठ एव " धृज गतौ " क्विप् ॥ २१ ॥ कुर्विति ॥ अङ्ग हे प्रह्लाद मदङ्गस्पर्शनेनैव सर्वतः पापात् पूतस्यापि ते पितुः शास्त्रपरिपालनाय लोकसंग्रहाय च त्वं प्रेतकार्याणि दाहश्राद्धतर्पणादीनि कुरु तथा सति सुष्ठु प्रजापुत्रो भवान् यस्य सः उत्तमान् लोकान् यास्यति ॥ २२ ॥ पित्र्यमिति ॥ इन्द्रभवनादिकं विहाय पित्र्यं पितृसंबन्धि दानवाधिपत्यस्थानमधितिष्ठ । हे तात अहमेव परः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलरूपो यस्य तथाभूतः सन्मनो मय्यावेश्य यद्यप्येवंभूतस्य तव कृत्यं नास्ति तथापि लोकानुग्रहार्थं वेदवादिभिरुक्तमनतिक्रम्य कर्माणि कुरु ॥ २३ ॥ प्रह्लाद इति ॥ हे राजन् युधिष्ठिर प्रह्लादोऽपि पितुर्यत्साम्परायिकं प्रेतोद्देशेन यत्कर्त्तव्यं तच्चक्रे । तथा द्विजोत्तमै राज्येऽभिषिक्तः सन् यथा भगवानाह स्म तथा तत्परः सन् कर्माणि चक्रे ॥ २४ ॥ प्रसादेति ॥ देवादिभिर्वृतो ब्रह्मा पूर्वं भयंकरमुखं दृष्ट्वा भीत इदानीं प्रसादे सुष्ठु सौम्यं मुखं यस्य तं तथाभूतं नरहरिरूपं हरिं दृष्ट्वा पवित्राभिः वाग्भिः स्तुत्वा प्राह स्म ॥ २५ ॥ देवेति ॥ हे देवदेव हे अखिलाध्यक्ष हे भूतभावन हे पूर्वज ते त्वयायं पापात्मा लोकसंतापनोऽसुरो निहतस्तदेतद्दिष्ट्या भद्रमेव लोकस्य कृतम् ॥ २६ ॥ य इति ॥ योऽसौ मम सृष्टिभिर्मया सृष्टैर्देवमनुष्यादिभिः न वध्यः हन्तुमशक्यः मत्तो लब्धो वरो येन स तपोयोगाभ्यां यद्बलं तेन उन्नद्धः गर्वित अत एव समस्तान् निगमान् वेदविहितान् वर्णाश्रमधर्मान् अहन् हतवान् स त्वया निहत इत्यनुषङ्गः ॥२७॥ दिष्ट्येति ॥ साधुः महाभागवतः अर्भकः अस्य तनयः प्रह्लादो मृत्योः सकाशात्त्वया विमो-

श्रीनारद उवाच ॥ प्रह्लादोऽपि तथा चक्रे पितुर्यत् साम्परायिकम् ॥ यथाऽऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ॥ २४ ॥ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् ॥ स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २५ ॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज॥दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः ॥ २६ ॥ योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ॥ तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २७ ॥ दिष्ट्यास्य तनयः साधुर्महाभागवतोऽर्भकः ॥ त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना ॥ २८ ॥ एतद्वपुस्ते भगवन् ध्यायतः प्रयतात्मनः ॥ सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः ॥ २९ ॥ नृसिंह उवाच ॥ नैवं वरोऽसुराणां ते प्रदेयः पद्मसंभव ॥ वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ ३० ॥ नारद उवाच॥ इत्युक्त्वा भगवान् राजंस्तत्रैवान्तर्दधे हरिः ॥ अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३१ ॥ ततः संपूज्य शिरसा ववन्दे परमेष्ठिनम् ॥ भवं प्रजापतीन् देवान् प्रह्लादो भगवत्कलाः ॥ ३२ ॥

चित एतदपि दिष्ट्या भद्रमेव जातम् । अधुना त्वां समितः सम्यक् शरणं प्राप्त इत्येतदपि दिष्ट्या ॥ २८ ॥ एतदिति ॥ हे भगवन् प्रयतात्मनो वशीकृतमनसस्तवैतद्वपुः नृसिंहरूपं ध्यायतः पुंसः सर्वतः संत्रासाद्भयात्किं बहुना जिघांसतः हन्तुमिच्छतो मृत्योरपि सकाशादेतद्वपुः गोप्तृ रक्षकम् ॥ २९ ॥ नैवमिति ॥ हे पद्मसंभव क्रूरो निसर्गः स्वभावो येषां तेषामसुराणां शेषे षष्ठी तेभ्यः ते त्वया एवं वरोऽतिबृहत्तमो वरः न प्रदेयः यथा अहीनाममृतं क्षीरं न देयं विषवर्द्धकत्वात् तथेत्यर्थः । क्रूरेत्यादि अहिष्वप्यन्वेति ॥ ३० ॥ इतीति ॥ हे राजन् युधिष्ठिर भगवान् हरिर्ब्रह्माणं प्रतीत्युक्त्वा तेन परमेष्ठिना पूजितः संस्तत्रैवान्तर्दधे अतः सर्वभूतानामदृश्यो बभूव ॥ ३१॥ तत इति ॥ ततः प्रह्लादोऽपि भगवतः कलारूपान् परमेष्ठिनं ब्रह्माणं भवं महादेवं प्रजापतीन् देवादीन् इन्द्रादींश्च संपूज्य शिरसा ववन्दे ॥ ३२ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततश्च काव्यः शुक्रस्तदादिभिर्मुनिभिः सार्धं कमलासनो ब्रह्मा प्रह्लादं दैत्यानां दानवानां च पतिमकरोत् ॥ ३३ ॥ प्रतिनन्द्येति ॥ ततश्च हे राजन् प्रह्लादेन प्रतिपूजिता ब्रह्माद्या देवाः प्रह्लादं प्रतिनन्द्य दिष्ट्या भगवदनुग्रहभाजनमसि भोगान् भुंक्ष्वेति प्रशस्य स्वधामानि ययुः ॥ ३४ ॥ एवमिति ॥ पूर्वं तौ जयविजयसंज्ञकौ विष्णोः पार्षदौ सनकादिशापेन दितेः पुत्रत्वं प्रापितौ वैरभावेन हेतुना हृदि स्थितेन हरिणा नृसिंहरूपं बिभ्रता हतौ ॥ ३५ ॥ पुनरिति ॥ पुनश्च जन्मत्रयपर्यन्तेन सनकादिविप्रशापेन तौ कुम्भकर्णदशग्रीवौ राक्षसौ बभूवतुः तौ च रामस्य विक्रमैर्हतौ ॥ ३६ ॥ शयानाविति ॥ रामस्य सायकैर्बाणैः निर्भिन्नं हृदयं ययोस्तौ युधि युद्धे शयानौ सन्तौ यथा प्राक्तनजन्मनि तथा तस्मिन् श्रीरामे एव चित्तं ययोस्तौ देहं जहतुस्तत्यजतुः ॥ ३७ ॥ ताविति ॥ अथेति मनुष्येषु तावेव पुनः शिशुपालः करूषजो दन्तवक्त्रश्चेत्येतौ जातौ हरिणा च हतौ तस्मिन् हरौ वैरानुबन्धेन हेतुना ते तव पश्यतः सतः तस्मिन् समीयितुः सायुज्यं प्रापतुः इदानीं शापस्य निवृतेः ॥ ३८ ॥ एन इति ॥

ततः काव्यादिभिः सार्धं मुनिभिः कमलासन ॥ दैत्यानां दानवानां च प्रह्लादमकरोत् पतिम् ॥ ३३ ॥ प्रतिनन्द्य ततो देवाः प्रयुज्य परमाशिषः ॥ स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ॥३४॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः ॥ हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३५ ॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः॥ कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३६ ॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ॥ तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३७ ॥ ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ॥ हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥ ३८ ॥ एनः पूर्वकृतं यत्तद् राजानः कृष्णवैरिणः ॥ जहुस्तं ते तदात्मानः कीटः पेशस्कृतो यथा ॥ ३९ ॥ यथा यथा भगवतो भक्त्या परमयाभिदा ॥ नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः ॥ ४० ॥ आख्यातं सर्वमेतत् ते यन्मां त्वं परिपृष्टवान् ॥ दमघोषसुतादीनां हरेः सात्म्यमपि द्विषाम् ॥ ४१ ॥ एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ॥ अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४२ ॥

कृष्णवैरिणो राजानो निन्दारूपं एनः पापं पूर्वकृतं तत् अन्ते प्रारब्धभोगानन्तरं कीटो यथा पेशस्कृतो भ्रमरविशेषस्य ध्यानात्तदाकारादिधर्मा भवति तद्वत् तदात्मनः तस्य श्रीकृष्णस्येव आत्मा स्वभावगुणाकारादि येषां ते तथाभूताः सन्तो जहुः तत्यजुः ॥३९॥ यथेति ॥ अभिदा आत्मभेददर्शनरहितया अत एव परमया भगवतो भक्त्या तस्य हरेश्चिन्तया भक्ताः यथा यथा हरेः सात्म्यं तत्सारूप्यं ययुः तथैव चैद्यादयो नृपा अपि वैरानुबन्धेन तच्चिन्तया तत्सारूप्यं ययुः ॥ ४० ॥ आख्यातमिति ॥ दमघोषसुतादीनां शिशुपालादीनां द्विषामपि हरेः सात्म्यं सायुज्यं कथमिति यत्त्वं मां परिपृष्टवान् तदेतत्सर्वं ते तुभ्यं मया आख्यातम् ॥ ४१ ॥ एषेति ॥ ब्रह्माणि साधुः ब्रह्मण्यः स चासौ देवश्च ब्रह्मण्यदेवस्तस्य महात्मनः कृष्णस्य एषा पुण्या श्रोत्रादीनां पुण्यावहा नृसिंहावतारकथा मया आख्याता यत्र यस्यां कथायाम् आदिदैत्ययोः हिरण्याक्षहिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यकशिपोः वधो निरूपितः ॥ ४२ ॥ प्रह्लादस्येति ॥ यत्र च महाभागवतस्य प्रह्लादस्यानुचरितं पाठोपदेशादि वर्णितं तथा तस्य भक्तियोगानुष्ठानप्रकारो वर्णितः तथा भगवत्तत्त्वज्ञानं च तस्य वर्णितं तथा तस्य विरक्तिश्च वर्णिता तथास्य हरेर्याथात्म्यं स्वरूपं वर्णितम् ॥ ४३ ॥ सर्गेति ॥ सर्ग उत्पत्तिः स्थितिः पालनम् अप्ययः प्रलयः तेषामीशस्य कर्तुर्गुणा ऐश्वर्यादयः कर्माणि सृष्ट्यादीनि तेषां वर्णनं कृतं परावरेषां देवासुरादीनां यानि स्थानानि तेषां कालेन निमित्तेन महान् व्यत्ययो विपर्यासोऽपि वैराग्यार्थं निरूपितः ॥४४॥ धर्म इति ॥ येन धर्मेण भगवान् गम्यते प्राप्यते स तथाविधो भागवतानां धर्मोऽनन्यपरत्वे सति भगवत्परत्वरूपो वर्णितः तथाध्यात्मिकमात्मानमधिकृत्य वर्त्तमानम् आत्मानात्मविवेकादिकमशेषतोऽस्मिन्नाख्याने समाख्यातम् ॥ ४५ ॥ य इति ॥ अतो विष्णोर्वीर्येण पराक्रमादिनोपबृंहितं तत्प्रतिपादनेन विस्तीर्णमत एव पुण्यमेतदाख्यानं श्रद्धया श्रुत्वा यः कीर्त्तयेत्स कर्मपाशैः पुण्यपापात्मकैः विमुच्यते ॥ ४६ ॥ एतदिति ॥ य एतत् एतां दैत्येन्द्र एव यूथपो हस्तियूथनाथस्तस्य वध-

प्रह्लादस्यानुचरितं महाभागवतस्य च ॥ भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४३ ॥ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनम् ॥ परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४४॥ धर्मो भागवतानां च भगवान्येन गम्यते ॥ आख्यानेऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४५ ॥ य एतत् पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् ॥ कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशाद्विमुच्यते ॥ ४६ ॥ एतद्य आदिपुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत ॥ दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकम् ॥ ४७ ॥ यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियन्ति ॥ येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ४८ ॥ स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद् वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ४९ ॥

रूपाम् आदिपुरुषस्य विष्णोः मृगेन्द्रस्य नृसिंहरूपस्य लीलाम् ऋद्धस्य राजमातङ्गा इतिवदार्षः समासः । प्रयतः समाहितचित्तः सन् पठेत तङार्षः । तथा सतां भगवद्भक्तानां मध्ये प्रवरस्य श्रेष्ठस्य दैत्यात्मजस्य प्रह्लादस्य च पुण्यं पुण्यावहमनुभावं प्रभावं श्रुत्वा पठेत तङार्षः । सोऽकुतोभयं न कुतोऽपि भयं यत्र तथाभूतं लोकं वैकुण्ठमेति प्राप्नोति ॥ ४७ ॥ यूयमिति ॥ नृलोके यूयं प्रह्लादापेक्षयापि भूरिभागाः यस्मान् मनुष्यलिङ्गं नराकृतिगूढं परं ब्रह्म येषां युष्माकं गृहान् साक्षादावसतीति मत्वा लोकं पुनानाः समदर्शनादिना पवित्रीकुर्वन्तः मुनयोऽपि येषां युष्माकं गृहान् अभियन्ति सर्वत आगच्छन्ति नैतादृशं प्रह्लादस्य सौभाग्यम् इति भावः ॥ ४८ ॥ स वा इति ॥ महद्भिर्विवेकिभिर्विमृग्यमन्वेषणीयं यत् कैवल्यं निर्वाणसुखं निरुपाधिः परमानन्दः तदनुभूतिरनुभवरूपं ब्रह्म स एवायं खलु प्रसिद्धो नराकृतिः वो युष्माकं प्रियः प्रीतिविषयः सुहृन्मित्रं हितचिन्तकः मातुलेयः मातुलपुत्रः आत्मा देहवत्स्वाधीनः अर्हणीय ईश्वरत्वेनाराधनीयः विधिकृत् आज्ञानुवर्ती गुरुश्च हितोपदेष्टा ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ यस्य भगवतः श्रीकृष्णस्य रूपं तत्वं भवो महादेवः पद्मजो ब्रह्मा तदादिभिरपि धियापि वस्तुतया याथार्थ्येन साक्षान्नोपवर्णितं न विषयीतं स एष सात्वतां पतिः भक्तानां पालको मौनेन मौनपूर्वकध्यानविचारादिना भक्त्या श्रवणादिरूपया उपशमेन इन्द्रियादिविजयेन पूजितः आराधितोऽस्माकं प्रसीदतां तङार्षः॥५०॥ स एष इति ॥ हे राजन् पुरा पूर्वं देवस्य रुद्रस्य अनन्तमायिना मयेन विहतं यशः स एष भगवान् विष्णुः व्यतनोत् विस्तारितवान्॥५१॥ कस्मिन्निति ॥ जगदीशितुर्महादेवस्य कीर्तिं कस्मिन् कर्मणि मयोऽहन् हतवान् यथा चानेन श्रीकृष्णेन सा कीर्तिरुपचिता तदेतद् द्वयं त्वया कथ्यताम् ॥ ५२ ॥ निर्जिता इति ॥ अनेन श्रीकृष्णेनोपबृंहितैः संवर्धितैर्देवैर्युधि निर्जिता असुरा मायिनां परमाचार्यं महामायाविनं मयं शरणमाययुः ॥ ५३ ॥ स इति ॥ विभुः समर्थो मयः दुर्लक्ष्यौ अपायसंयोगौ गमनागमने यासां ताः दुर्वितर्क्याः परिच्छदाः उपकरणानि यासु ताः हैमी च रौप्या चायसी चेति द्वन्द्वः ताः तिस्रः पुरो निर्माय तेभ्यो ददाविति शेषः ५४ ॥ ताभिरिति ॥ नृप हे युधिष्ठिर ताभिर्विमान-

न यस्य साक्षाद् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ५० ॥ स एष भगवान्राजन्व्यतनोद् विहतं यशः ॥ पुरा रुद्रस्य देवस्य मयेनानन्तमायिना ॥ ५१ ॥ राजोवाच ॥ कस्मिन्कर्मणि देवस्य मयोहन् जगदीशितुः ॥ यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यताम् ॥५२॥ नारद उवाच ॥ निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ॥ मायिनां परमाचार्यं मयं शरणमाययुः ॥५३॥ स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥५४॥ ताभिस्तेसुरसेनान्यो लोकांस्त्रीन् सेश्वरान् नृप ॥ स्मरन्तो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥ ५५ ॥ ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो ॥ त्राहि नस्तावकान् देव विनष्टांस्त्रिपुरालयैः ॥ ५६ ॥ अथानुगृह्य भगवान् मा भैष्टेति सुरान्विभुः ॥ शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुञ्चत ॥ ५७ ॥ ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमण्डलात् ॥ यथा मयूखसंदोहा नादृश्यन्त पुरो यतः ॥ ५८ ॥

रूपाभिरपेक्षितदेशगमनक्षमाभिः पुरीभिरसुरसेनान्यः असुरसेनापतयः अलक्षिताः सन्तः पूर्ववैरं स्मरन्तश्च सेश्वरान् सपालान् त्रीन् लोकान् नाशयांचक्रुः नाशयितुमारब्धवन्तः ॥ ५५ ॥ तत इति ॥ ततस्ते सेश्वरा इन्द्रादिलोकपालैः सहिता लोका जना ईश्वरं रुद्रमुपासाद्य प्राप्य हे विभो हे देव त्रीणि पुराणि आलयाः स्थानानि येषां तैरसुरैर्विनष्टप्रायान् अत एव त्रस्तान् तावकान् त्वदीयान् नोऽस्मान् त्राहि पालयेत्यूचुः तङभाव आर्षः ॥ ५६ ॥ अथेति ॥ अथ तान् देवान् मा भैष्ट भयं मा कुरुतेत्यनुगृह्य भगवान् विभुः रुद्रः धनुषि शरं सन्धाय तस्मिन्नस्त्रं पाशुपतं संयोज्य पुरेष्वमुञ्चत अस्त्रमभिमन्त्रितं शरमिति वा ॥ ५७ ॥ तत इति ॥ यथा सूर्यमण्डलान्मयूखसन्दोहा रश्मिसमूहा उत्पतन्ति तथा ततो धनुषोऽग्निवर्णा इषव उत्पेतुः । यतः यैरिषुभिः प्रच्छन्नाः पुरो नादृश्यन्त ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैरिति ॥ तैरिषुभिः स्पृष्टास्ताडितास्त्रीणि पुराणि ओकांसि स्थानानि येषां ते सर्वे असुरा व्यसवः विगतप्राणाः सन्तो निपेतुः । तान् व्यसूनसुरानानीय महायोगी महामायावी मयः कूपरसे स्वयं विनिर्मितकूपगते रसे मृतसञ्जीवयितारि अक्षिपत् अपातयत् ॥ ५९ ॥ सिद्धेति ॥ तेन सिद्धामृतरसेन स्पृष्टा असुरा वज्रसारा वज्रवददतिदृढाङ्गा महौजसो महाबलाः सन्तः मेघदलना मेघभेदिनो वैद्युताः विद्युद्रूपावह्नय इव उत्तस्थुः मेघस्था विद्युतो यथा मेघकान्तितिरस्कारिण्यस्तथा ते वीरा अपि श्यामविमानकान्तितिरस्कारिण इति ॥ ६० ॥ विलोक्येति ॥ भग्नः सङ्कल्पो यस्य तमत एव विमनस्कं दुःखितमनस्कं वृषध्वजं रुद्रं विलोक्यायं श्रीकृष्ण एव भगवान् विष्णुस्तत्र सिद्धामृतरसविनाशे उपायमकल्पयत् ॥ ६१ ॥ वत्स इति ॥ तदा ब्रह्मा चतुर्मुखो वत्स आसीत् अयं श्रीकृष्णरूपो विष्णुः स्वयं गौरासीत् एवं सवत्सा गौर्भूत्वा मध्याह्नकाले त्रिपुरं प्रविश्य रसकूपगतममृतं पपौ ॥ ६२ ॥ त इति अर्द्धम् ॥ ते रक्षका असुराः पानं कुर्वतीं गां पश्यन्तोऽपि हि यस्मात् भगवन्मायया विमोहिताः अतो न न्यषेधन् ॥६३॥

तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः ॥ तानानीय महायोगी मयः कूपरसेऽक्षिपत् ॥ ५९ ॥ सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ॥ उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ॥ ६० ॥ विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजम् ॥ तदाऽयं भगवान्विष्णुस्तत्रोपायमकल्पयत् ॥ ६१ ॥ वत्स आसीत् तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ॥ प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ ६२ ॥ तेऽसुरा ह्यपि पश्यन्तो न न्यषेधन्विमोहिताः ॥ ६३ ॥ तद्विज्ञाय महायोगी रसपालानिदं जगौ ॥ स्वयं विशोकः शोकार्तान् स्मरन्दैवगतिं च ताम् ॥ ६४ ॥ देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन ॥ आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ॥ ६५ ॥ अथासौ शक्तिभिः स्वाभिः शम्भोः प्राधनिकं व्यधात् ॥ धर्मज्ञानविरक्त्यर्द्धितपोविद्याक्रियादिभिः ॥ रथं सूतं ध्वजं वाहान्धनुर्वर्म शरादि यत् ॥ ६६ ॥ सन्नद्धो रथमास्थाय शरं धनुरुपाददे ॥ ६७ ॥

तदिति ॥ महायोगी मयः तद्विज्ञाय अमृतपानं ज्ञात्वा तामचिन्त्यकार्यकर्तृत्वरूपां दैवस्य भगवतो गतिं स्मरन् स्वयं विशोकः शोकार्तान् रसपालान् असुरान् इदं वक्ष्यमाणं जगौ उवाच ॥ ६४ ॥ देव इति ॥ देवो वा असुरो वा नरो मनुष्यो वा कश्चन यक्षरक्षोगन्धर्वादिः आत्मनः स्वस्य अन्यस्य वा द्वयोर्वा दैवेनेश्वरेण यद्दिष्टमुपकल्पितं तदपोहितुं परिहर्तुमन्यथाकर्तुमीश्वरः समर्थः इह लोके नास्ति ॥ ६५ ॥ अथेति सार्द्धम् ॥ अथासौ श्रीकृष्णोऽपि शम्भोः रुद्रस्य प्राधनिकं प्रधनं संग्रामस्तत्साधनं यद्रथसूतादिरूपं तत् धर्मादिभिः स्वाभिः शक्तिभिराविष्टं व्यधात् स्वशक्तीनामनश्वरत्वाज्जिष्णुत्वाच्च तदाविष्टानां रथादीनामपि तादृशत्वसम्पादनाय तत्र स्वीयधर्मस्य भक्तियोगस्यावेशो रथे शक्तियोगाश्रितानां ज्ञानादीनां रथाश्रितेषु सूतादिषु ज्ञेयः ॥ ६६ ॥ सन्नद्ध इति अर्द्धम् ॥ स्पष्टम् ॥ ६७ ॥

CC-0. In Public Domain. Digitization by eGangotri

शरमिति ॥ हे नृप अथेश्वरः रुद्रः अभिजिति मुहूर्ते मध्याह्ने धनुषि शरं सन्धाय दुर्भेद्या अपि त्रिपुरस्तिस्रः पुरस्तेन शरेण ददाह त्रिपुर इति समासान्ताभावादिकमार्षम् ॥ ६८ ॥ दिवीति सार्द्धम् ॥ दिवि दुन्दुभयो नेदुः । विमानानां शतानि सङ्कुलानि संकीर्णानि येषां ते देवर्ष्यादयो जयेति वदन्तः कुसुमोत्करैः कुसुमवर्षैः शम्भुमवाकिरन् छन्नं चक्रुः । अप्सरोगणा हृष्टाः सन्तो जगुर्ननृतुश्च ॥ ६९ ॥ एवमिति ॥ हे नृप त्रिपुरहा भगवान् रुद्रः एवं श्रीकृष्णसाहाय्येन तिस्रः पुरो दग्ध्वा ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ययौ ॥ ७० ॥ एवमिति ॥ स्वमायया आत्मनो नृलोकं नराकारं विडम्बमानस्य अनुकुर्वतः जगद्गुरोः अस्य हरेः एवंविधानि तत्प्रकाराण्यवतारान्तरेषु कृतानि लोकान्पुनानानि वीर्याणि ऋषिभिर्गीतानि बहूनि सन्तीति शेषः । अपरम् अन्यत् किं वदामि ॥ ७१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो

शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ॥ ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप ॥ ६८ ॥ दिवि दुन्दुभयो नेदुर्विमानशतसंकुलाः ॥ देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ॥ अवाकिरञ्जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ॥६९॥ एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ॥ ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥७०॥ एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः ॥ वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किम् ॥७१॥ इति श्री० महा०सप्तमस्कन्धे युधिष्ठिरनारदसंवादे त्रिपुरविजयो नाम दशमोऽध्यायः ॥१०॥ श्रीशुक उवाच ॥ श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः ॥युधिष्ठिरो दैत्यपतेर्मुदा युतः पप्रच्छ भूयस्तनयं स्वयंभुवः ॥१॥ युधिष्ठिर उवाच॥ भगवन् श्रोतुमिच्छामि नृणां धर्मं सनातनम् ॥ वर्णाश्रमाचारयुतं यत्पुमान् विन्दते परम् ॥ २ ॥ भवान् प्रजापतेः साक्षादात्मजः परमेष्ठिनः ॥ सुतानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ ३ ॥ नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ॥ करुणा साधवः शान्तास्त्वद्विधा न तथाऽपरे ॥ ४ ॥

दशमे सप्तमस्य व्यधादिमाम् ॥ १० ॥ एकादशे नृणां धर्मा वर्णानां च विशेषतः ॥ योषितामपि मुख्याश्च श्लोकास्तत्र रसाग्नयः ॥ उवाचेति त्रयं सार्द्धाः षट्त्रिंशच्चाप्यनुष्टुभः ॥ ११ ॥ श्रुत्वेति ॥ साधूनां ब्रह्मादीनां भगवद्भक्तानां सभासु सभाजितं सत्कृतं महत्तमानां भगवद्भक्तानामग्रण्यः मुख्यस्य " एरनेकाच " इति यणम् । उरुक्रमे भगवति आत्मा यस्य तस्य दैत्यपतेः प्रह्लादस्य ईहितं चरितं श्रुत्वा मुदा हर्षेण युधिष्ठिरः स्वयंभुवो ब्रह्मणस्तनयं श्रीनारदं भूयः पप्रच्छ ॥ १ ॥ भगवन्निति ॥ हे भगवन् सर्वज्ञ अहं वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्याद्याश्रमनिष्ठानां चाचारैर्युतं सनातनमनादिपरम्परागतं नृणां धर्मं श्रोतुमिच्छामि । यद्यस्माद्धर्मात् पुमान् परं भक्तिं ज्ञानं च विन्दते प्राप्नोति ॥ २ ॥ भवानिति ॥ हे ब्रह्मन् यत भवान् प्रजापतेः परमेष्ठिनो ब्रह्मणः साक्षादात्मजः पुत्रः तपोयोगसमाधिभिः सुतानां मध्ये तस्य श्रेष्ठतया संमतश्च अतो नूनं ततो गृहीतधर्मरहस्यः ॥ ३ ॥ नारायणेति ॥ करुणाः दयालवः साधवः शान्ताः नारायण एव पर उपास्यो येषां ते त्वद्विधा विप्राः यथा परमुत्कृष्टमत एव गुह्यं धर्मं भगवदनुग्रहेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदुस्तथापरे स्मृतिकाराः न विदुः । तथा च त्वयैव वक्तव्यमिति भावः ॥ ४ ॥ नत्वेति ॥ भगवते लोकानां धर्महेतवे धर्मप्रवर्तकाय अजाय नारायणाय तमनुकूलयितुं नत्वा तस्यैव नारायणस्य मुखाच्छ्रुतं सनातनं धर्मं वक्ष्ये ॥ ५ ॥ य इति ॥ यो भगवान्नारायण आत्मनोंऽशभूतेन नरेण सह धर्मतो दाक्षायण्यां दक्षदुहितरि मूर्तावक्तीर्य धर्मज्ञानादिप्रवर्तनेन लोकानां स्वस्तये बदरिकाश्रमेऽद्यापि तपोऽध्यास्ते करोति ॥ ६ ॥ धर्ममूलमिति ॥ हे राजन् सर्ववेदमयः भगवान् हरिरेव धर्मे मूलं कारणं प्रमाणं च तथा तद्विदां वेदविदां स्मृतं स्मृतिश्च प्रमाणम् तच्च स्वमूलभूतश्रुत्यनुमापनद्वारैव न साक्षात् तेन प्रत्यक्षवेदविरुद्धस्मृतीनामप्रामाण्यम् । येन चात्मा प्रसीदति तुष्यति तदपि प्रमाणम् इदं चात्मतुष्ट्याख्यं प्रायो विकल्पविषयं यथा गर्भाष्टमे वाब्दे इति चकाराच्छिष्टाचारोऽपि प्रमाणम् । तथा च मनुः। "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥" इति ॥७॥ तत्रादौ नरमात्रसाधारणधर्मानाह–सत्यमिति पञ्चकम् ॥ सत्यं यथार्थभाषणं समदर्शनं वा दया परदुःखप्रहरणेच्छा तपः एकादश्युपवा-

नारद उवाच ॥ नत्वा भगवतेऽजाय लोकानां धर्महेतवे ॥ वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतम् ॥५॥ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः ॥ लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥६॥ धर्ममूलं हि भगवान्सर्ववेदमयो हरिः ॥ स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ॥ ७ ॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ॥ अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥ ८ ॥ संतोषः समदृक् सेवा ग्राम्येहोपरमः शनैः ॥ नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः ॥ तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ॥१०॥ श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ॥ सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ॥ ११ ॥ नृणामयं परो धर्मः सर्वेषां समुदाहृतः ॥ त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति ॥ १२ ॥

सादि शौचं स्नानादिजन्यं शुद्धत्वं तितिक्षा शीतोष्णादिसहिष्णुत्वम् ईक्षा युक्तायुक्तविवेकः शमो मनःसंयमः दमो बाह्येन्द्रियजयः अहिंसा सर्वथा परपीडावर्जनं ब्रह्मचर्यं परस्त्रीवर्जनं निषिद्धदेशकालादौ स्वस्त्रीवर्जनं च त्यागो दानं स्वाध्यायो यथोचितमन्त्रजपादि आर्जवं मनसः कौटिल्यवर्जनं संतोषो दैवाल्लब्धेनालंबुद्धिः समदृशां महतां भगवद्भक्तानां सेवा शनैः ग्राम्येहाभ्यः प्रवृत्तिकर्मभ्यः उपरमो निवृत्तिः तस्या एकदैव झटिति सम्पादनमशक्यमतः शनैरित्युक्तं नृणां विपर्ययेहा निष्फलक्रियास्तासामीक्षा पर्यालोचनं मौनं वृथावाक्यनिवृत्तिः आत्मविमर्शनं देहादिव्यतिरिक्ततयाऽऽत्मनोऽनुसन्धानम् अन्नमोदनम् आद्यम् अदनीयं मोदकादि आदिपदेन वस्त्रादिग्रहणं तदादेर्भूतेभ्यो यथोचितं संविभागः विभज्य प्रदानं तेषु भूतेषु पश्वादिष्वपि आत्मेति देवतेति च बुद्धिः हे पाण्डव नृषु तु सुतरां तथाबुद्धिः महतां भक्तानां गतेः शरणभूतस्यास्य भगवतः गुणकर्मणां श्रवणं कीर्तनं च स्वरूपगुणविभूतीनां स्मरणं चिन्तनं सेवा पादसंवाहनादिरूपा इज्या पूजा अर्घपाद्यादिनिवेदनरूपा अवनतिः नमस्कृतिः दास्यं दासवत्स्वकृतकर्मफलस्य भग-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

वति समर्पणं सख्यं विश्वासादि आत्मसमर्पणं देहस्य तत्संबन्धिनश्च तदीयतयाऽनुसन्धानं हे राजन् अयं त्रिंशल्लक्षणवान् अवान्तरप्रकारभेदेन त्रिंशत्सङ्ख्याकः सर्वेषां नृणां साधारणतया परो धर्मान्तरेभ्यः उत्कृष्टो धर्मः ऋषिभिः सम्यक् उदाहृतः निरूपितः येन धर्मेण सर्वात्मा भगवांस्तुष्यति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ संस्कारा इति सार्द्धम् ॥ यत्र यस्मिन् संस्कारा मन्त्रवन्तो गर्भाधानादयः षोडश अविच्छिन्नाः यं चैवंभूतमविच्छिन्नसंस्कारवत्वेन अजो ब्रह्मा जगाद स द्विजः यत्र संस्कारविच्छेदः स द्विजबन्धुरित्यर्थः । शूद्रं तु न मन्त्रवत्संस्कारयुक्तं जगाद न चोपनयनवन्तमतो नासौ द्विजः स द्विजो वैदिकादय इति पाठे गर्भाधानादयः । इज्येति जन्मना विशुद्धेन कुलेन कर्मणा आचारेण च अवदातानां शुद्धानां द्विजन्मनां त्रैवर्णिकानामिज्यादीनि विहितानि दुष्कुलानां दुराचाराणां च न विहितानीत्यर्थः । तथा ब्रह्मचर्याद्याश्रमेषु चोदिता क्रियाश्च विहिताः ताश्च तैर्गृहीत तत्तदाश्रमैरनुष्ठेयाः शूद्रस्य तु वर्णधर्मा एव आश्रमभेदकृतविशेषाभावात् ॥ १३ ॥ विप्रस्येति ॥ विप्रस्याध्ययनादीनि षट्कर्माणि विहितानीत्यनुषङ्गः । तत्रेज्याध्ययनदानानीति त्रीण्यवश्यानुष्ठेयधर्मरूपाणि याजनाध्यापनप्रतिग्रहरूपाणि तु जीविकासाधनानि नावश्यकानि अन्यस्य क्षत्रियस्य

संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यम् ॥ इज्याध्ययनदानानि विहितानि द्विजन्मनाम् ॥ जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥ १३ ॥ विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः ॥ राज्ञो वृत्तिः प्रजागोप्तुरविप्राद् वा करादिभिः ॥ १४ ॥ वैश्यस्तु वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः ॥ शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १५ ॥ वार्ता विचित्रा शालीनयायावरशिलोञ्छनम् ॥ विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥ १६ ॥

अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चापद्यनुजानाति वक्ष्यते चानन्तरमेव ऋते राजन्यमिति जीविकां विना तु अनापद्यपि क्षत्रियादेर्न दोषः । अत एव अश्वपतिकैकयमन्वादिक्षत्रियाणामुपदेष्टृत्वादि स्वामिग्राह्यो भागः करः आदिपदेन दण्डशुल्कादिग्रहणम् । अविप्रात् विप्रव्यतिरिक्तात्करादिभिः प्रजागोप्तुः प्रजापालकस्य राज्ञो वृत्तिर्विहितेति शेषः । राज्येऽनधिकृतस्य क्षत्रियस्य खड्गधारणादिना वृत्तिर्ज्ञेया ॥ १४ ॥ वैश्य इति ॥ वैश्यस्तु नित्यं ब्रह्मकुलमनुगच्छत्यनुवर्तत इति तथाभूतः सन् वार्ता "कृषिवाणिज्यगोरक्षा कुसीदं तुर्यमुच्यते । वार्ता चतुर्विधा तत्र" इत्युक्तरूपा वृत्तिर्यस्य तथा भवेदित्यर्थः । शूद्रस्य द्विजशुश्रूषा धर्मः स्वामिनः द्विजस्य शुश्रूषा तु वृत्तिर्जीविका च भवेत् ॥ १५ ॥ विप्रस्य मुख्यवृत्तिः कथिता कल्पभेदेन युगभेदेन च वृत्त्यन्तराण्याह—वार्तेति ॥ वार्ता विचित्रा कृषिगोरक्षवाणिज्यादिरूपा शालीनमयाचितं यायावरं प्रत्यहं धान्यमात्रयाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानम् उञ्छनमापणादिपतितकणोपादानम् इयं विप्रवृत्तिश्चतुर्द्धा शिलोञ्छनमिति द्वयमेकीकृत्य चतुर्धेत्युक्तम् । आसां चतसृणां वृत्तीनां मध्ये पूर्वपूर्वापेक्षया उत्तरोत्तरावृत्तिः श्रेयसी उत्तमेत्यर्थः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जघन्य इति ॥ जघन्यो नीचोऽनापदि स्ववृत्त्यलाभरूपा पदभावे उत्तमामध्यापनादिरूपां वृत्तिं न भजेत् न स्वीकुर्यात् । स्वस्ववृत्त्यैव निर्वाहं कुर्यात् । आपत्सु तु ऋते राजन्यं क्षत्रियं विना सर्वेषामपि सर्वा एव वृत्तयो भवन्ति । क्षत्रियस्य तु प्रतिग्रहं विहायान्या वृत्तयो भवन्ति । अन्यस्याप्रतिग्रह इत्युक्तत्वात् ॥ १७ ॥ ऋतेति ॥ मूले व्याख्यातम् ॥ १८ ॥ ऋतमिति सार्द्धम् ॥ स्पष्टम् ॥ १९ ॥ वर्जयेदिति ॥ विप्रो राजन्यश्च जुगुप्सितां तां श्ववृत्तिं सदा वर्जयेत् । अत्र हेतुरुत्तरोर्द्धं स्पष्टम् ॥२०॥ शम इति ॥ शमादिकं ब्रह्मलक्षणं ब्राह्मणत्वाभिव्यञ्जकमित्यर्थः । शान्तिः क्रोधाभावः ज्ञानं विवेकः अच्युतात्मत्वं भगवन्निष्ठत्वं शेषं साधारणधर्मेषु व्याख्यातम् ॥ २१ ॥ शौर्यमिति ॥ शौर्यादि-क्षत्रलक्षणं क्षत्रियत्वस्याभिव्यञ्जकमित्यर्थः । शौर्यं युद्धोत्साहः वीर्यं प्रभावः परैरनभिभाव्यत्वं धृतिर्धैर्यम् आपद्यप्यदुःखित्वं तेजः पराभिभवसामर्थ्यं त्यागः उदारता लोभाभावो वा आत्मजयः देहादिधर्मैः क्षुत्पिपासादिभिरनभिभाव्यत्वं क्षमा परापराधसहिष्णुता ब्रह्मण्यता ब्राह्मणकुलानुवृत्तिः प्रसादः अनुग्रहः रक्षा प्रजापालनम् ॥ २२ ॥

जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ॥ ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ १७ ॥ ऋतामृताभ्यां जीवेन मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥ १८ ॥ ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम् ॥ मृतं तु नित्ययाच्ञा स्यात्प्रमृतं कर्षणं स्मृतम् ॥ सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ॥ १९ ॥ वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ॥ सर्ववेदमयो विप्रः सर्वदे-वमयो नृपः ॥ २० ॥ शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवम् ॥ ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २१ ॥ शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ॥ ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ॥ २२ ॥ देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम् ॥ आस्ति-क्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ॥ २३ ॥ शूद्रस्य संततिः शौचं सेवा स्वामिन्यमायया ॥ अमन्त्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्ष-णम् ॥ २४ ॥ स्त्रीणां च पतिदेवानां तच्छुश्रूषाऽनुकूलता ॥ तद्बन्धुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ॥ २५ ॥

देवेति ॥ देवादिभक्त्यादिकं वैश्यलक्षणमित्यर्थः । देवाश्च गुरवश्च अच्युतश्च तत्र भक्तिः देवगुर्वार्यगोभक्तिरिति पाठान्तरम् । त्रिवर्गेण धर्मार्थकामरूपेण परितोषणं परितुष्टिः आस्तिक्यमस्ति शास्त्रोक्तं सर्वमिति विश्वासः नित्यमुद्यमः अर्थार्जने प्रयत्नः । तत्र नैपुण्यं चातुर्यम् ॥ २३ ॥ शूद्रस्येति ॥ शूद्रस्य सन्नत्यादिकं लक्षणमित्यनुषङ्गः । संनतिर्ब्राह्मणादिवर्णत्रये नम्रता शौचं शुद्धत्वं स्वस्वामिनि अमायया निष्कपटभावेन सेवा अमन्त्रयज्ञः नमस्कारान्तनाममन्त्रेण पञ्चयज्ञानुष्ठानम् । तथा चाह याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्च यज्ञान्न हापयेत् ।" इति । अस्तेयमचौर्यं सत्यं स्पष्टं गवां विप्राणां च रक्षणम् ॥ २४ ॥ स्त्रीणामिति ॥ पतिरेव देवो यासां तासां पतिव्रतानां स्त्रीणां पतिशुश्रूषादिचतुष्टयं लक्षणं धर्मश्चेति तस्य पत्युः शुश्रूषा परिचर्या तदनुकूलता च हिताचरणं तस्य बन्धुषु पितृभ्रात्रादिष्वनुवृत्तिः नित्यं तस्य पत्युः यद्व्रतं नियमस्तस्य

CC-0. In Public Domain. Digitization by eGangotri

धारणं निर्वाहः ॥ २५ ॥ संमार्जनेति द्वयम् ॥ साध्वी स्वयं च नित्यं मण्डिता अलंकृता परिमृष्टाः निर्मलीकृताः परिच्छदाः पात्रवस्त्रभूषादयो यया तादृशी सती गृहस्य संमार्जनोपलेपाभ्यां जलेन सेकः मण्डनमलङ्कारः वर्तनं नित्यं स्वगृह एवावस्थानं तैः उच्चावचैर्नानाविधैः पत्युरपेक्षितैः कामैः विषयैः प्रश्रयेण विनयेन दमेनेन्द्रियसंयमेन च सत्यैर्यथार्थैः प्रियैः प्रीतिजनकैर्वाक्यैश्च प्रेम्णा च काले काले तत्तदुचितावसरे पतिं भजेत् ॥ २६ ॥ २७ ॥ संतुष्टेति ॥ स्वयं तु यथालाभेन संतुष्टा तावन्मात्रेऽपि अलोलुपा अलुब्धा दक्षा अनलसा धर्मज्ञा प्रिया सत्या च वाक् यस्याः सा वाक्यैः सत्यैरिति पतिविषये अत्र प्रियाया सत्यवागिति तु तदन्यविषयेऽपीत्यपौनरुक्त्यं बोध्यम् अप्रमत्ता पतिशुश्रूषणादौ सावधाना शुचिः स्नानादिना शुद्धा स्निग्धा स्नेहयुक्ता अपतितं महापातकरहितं पतिं भजेत् । तु शब्देन पतितेन संबन्धो न कार्य इति सूचितम् । " आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः " इति याज्ञवल्क्योक्तेः ॥२८॥ येति ॥ श्रीर्लक्ष्मीर्यथा हरिपरा सती हरिं भजते तथा या स्त्री तत्परा स पतिरेव परः सर्वत उत्कृष्टो यस्या सा तथाभूता सती पतिं भजेत् । सा यथा हरेर्लोके वैकुण्ठे हरिणा सह श्रीर्मोदते तथा हर्यात्मना चतुर्भुजादिरूपेण स्वपतिना सह तत्र मोदते ॥ २९ ॥ वृत्तिरिति ॥ संकरजा-

संमार्जनोपलेपाभ्यां गृहमण्डलवर्तनैः ॥ स्वयं च मण्डिता नित्यं परिमृष्टपरिच्छदा ॥ २६ ॥ कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ॥ वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत् पतिम् ॥२७॥ संतुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ॥ अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥२८॥ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ॥ हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥२९॥ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् ॥ अचौराणामपापानामन्त्यजान्तेऽवसायिनाम् ॥ ३० ॥ प्रायः स्वभावविहितो नृणां धर्मो युगे युगे ॥ वेददृग्भिः स्मृतो राजन्प्रेत्य चेह च शर्मकृत् ॥ ३१ ॥ वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत् ॥ हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥ ३२ ॥

तयस्तु प्रतिलोमजाः अनुलोमजाश्चेति द्विविधाः । तत्रावरवर्णात् प्रकृष्टवर्णायां स्त्रियां जाताः प्रतिलोमजाः । प्रकृष्टवर्णादवरवर्णायां जातास्त्वनुलोमजाः । " रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥" इति स्मृत्युक्ता अन्त्यजा ज्ञेयाः । अन्तेवसायिनस्तु चाण्डालपुल्कसमातङ्गादयः । अचौराणाम् अपापानां च अन्त्यजानाम् । अन्त्येवसायिनां च सङ्करजातीनां तत्तत्कुलकृता कुलपरम्परा प्राप्तैव । नापितरजकादीनां क्षौरवस्त्रनिर्णेजनादिरूपा वृत्तिर्भवेत् । कुलपरम्परागतमपि चौर्य- हिंसादिकं न कार्यमिति सूचनाय अचौरादिविशेषणम् ॥ ३० ॥ श्रेष्ठादपि परधर्मात् नीचोऽपि स्वधर्म एव श्रेयानित्याशयेनाह—प्राय इति ॥ हे राजन् नृणां वर्णाश्रमादिमतां सर्वेषामपि स्वभावेनोक्तशमदमादिप्रयुक्तवर्णाश्रमाद्यनुसारेण विहितो यो धर्मोऽध्ययनाध्यापनादिरूपः स एव इह लोके प्रेत्य परलोके च युगे युगे तत्तदवसरे वेददृग्भिः वेदज्ञैः शर्मकृत्सुखहेतुः स्मृतः ॥ ३१ ॥ ननु सर्वस्यापि कर्मणो बन्धहेतुत्वात्कथं सुखहेतुत्वं तत्राह—वृत्त्येति ॥ स्वभावकृतया शमदमादिस्वभावाभिव्यक्तवर्णाश्रमादिप्रयुक्तयाध्याप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नादिवृत्त्या वर्तमानः स्वनिर्वाहं कुर्वन् स्वकर्माणि अध्ययनादीनि करोति स्वभावजं राजसादिप्रयुक्तं कर्म दुरितं हित्वा शनैर्निर्गुणतामियात् ॥ ३२ ॥ ननु काम्यानि कर्माणि कुर्वतस्तत्फलभोगपरस्य कथं नैर्गुण्यं स्यादित्याशंक्य तत्राधिकारिभेदेन व्यवस्थां सदृष्टान्तमाह–उप्यमानमिति ॥ यथा मुहुर्मुहुरुप्यमानं क्षेत्रं स्वयमेव निर्वीर्यतामसारतामियात् । पुनः सूत्यै सस्यप्रसवनाय न कल्पते समर्थं न भवति अत एव तत्रोप्तं बीजं च नश्यति ॥ ३३ ॥ एवमिति ॥ हे राजन् एवं कामा विषया आशेरते वासनारूपेण यस्मिंस्तत् कामाशयं चित्तं कामानां विषयाणामतिसेवयाऽतिभोगेन विरज्येत ततो विरक्तं भवति अतः उत्कटविषयवासनायुक्तं चित्तं कामबिन्दुभिर्न नश्यति । महद्भिः कामैस्तु शाम्यत्येव । प्रज्वलितोऽग्निर्यथा घृतबिन्दुभिर्न शाम्यति किंतु महता घृतपूरेण शाम्यति अयं भावः । उत्कटविषयवासनाविष्टस्य सहसैव कामत्यागासम्भवाद्वेदोक्तनियमेन बहुशः कामान् भुञ्जानस्यैव नित्यनैमित्तिकैर्विशुद्धचेतसस्तद्दोषदर्शनेन ययातिसौभरिप्रमुखानामिव शनैर्विरागो भवति यथा सवीर्यं क्षेत्रं शनैर्निर्वीर्यं भवति । प्रह्लादकुतस्तुतौ कौमार एव निवृत्त्युपदेशो मन्दवासनान्प्रत्येवेति ॥ ३४ ॥ शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्य इत्याह–यस्येति ॥ यस्य पुंसो ब्राह्मणादेर्ब्राह्मणत्वादिवर्णाभिव्यञ्जकं यत्

उप्यमानं बहु क्षेत्रं स्वयं निर्वीर्यतामियात् ॥ न कल्पते पुनः सूत्या उप्तं बीजं च नश्यति ॥ ३३ ॥ एवं कामाशयं चित्तं कामानामतिसेवया ॥ विरज्येत यथा राजन्नाग्निवत्कामबिन्दुभिः ॥ ३४ ॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम् ॥ यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ३५ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नामैकादशोऽध्यायः ॥ ११ ॥

नारद उवाच ॥ ब्रह्मचारी गुरुकुले वसन्दान्तो गुरोर्हितम् ॥ आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥ सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमात् ॥ उभे संध्ये च यतवाग् जपन्ब्रह्म सनातनम् ॥ २ ॥

शमादिरूपं लक्षणं प्रोक्तं तत् यत् यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तर्हि तद्वर्णान्तरं तेनैव लक्षणनिमित्तेन वर्णेनैव विनिर्दिशेत् व्यवहरेत् नतु कुलमात्रेणेति ब्राह्मणवदादराभिप्रायेण नतु सन्ध्यावन्दनवेदपाठादिप्राप्त्यर्थं दानादियोग्यतार्थं वा व्यवहारविरोधात् ॥ ३५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो विवृतिं सप्तमैकादशे व्यधात्॥ ११ ॥ द्वादशे वर्णिनां धर्मा वनस्थानां च कीर्तिताः ॥ साधारणाश्च केऽपीह श्लोकाः सार्द्धाः कुंर्वंद्वयः ॥ अनुष्टुभोऽपि तांवंत्य उवाचेत्येकमीरितम् ॥ १२ ॥ वर्णधर्मानुक्त्वाऽऽश्रमधर्मानाह–ब्रह्मचारीति ॥ ब्रह्मचर्यं द्विविधमौपकुर्वाणं नैष्ठिकं चेति । तत्र सावधिकमौपकुर्वाणं निरवधिकमा आयुर्नैष्ठिकम् । तत्रौपकुर्वाणधर्मानाह ब्रह्मचारी दान्तः जितेन्द्रियः नीचः आत्मनो नीचत्वं भावयन् गुरौ सुदृढं सौहृदं यस्य तादृशः सन् दासवद्गुरोर्हितमाचरन् गुरुकुले गुरुगृहे वसन् भवेत् ॥ १ ॥ सायमिति ॥ सायं प्रातश्च गुर्वग्न्यर्कसुरोत्तमान् उपासीत समाहित एकाग्रचित्तो ब्रह्म गायत्रीं जपन् सन्ध्यात्रयमुपासीत । तत्र उभे संध्ये तु यतवाग् भवेत् । सायं प्रातः सन्ध्याकालनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्तं मौनं कुर्यादित्यर्थः ॥ २ ॥ छन्दांसीति ॥ गुरुणा चेत् यदि आहूतस्तदा सुयन्त्रितः सावधानः सन् गुरोः सकाशाच्छन्दांसि वेदानधीयीत । अध्ययनस्य उपक्रमे अवसाने च प्रत्यहं शिरसा गुरोश्चरणौ नमेत् ॥ ३ ॥ मेखलेति ॥ दर्भः पवित्रं पाणौ यस्य सः यथोदितं "पालाशो दण्डो ब्राह्मणस्य" इत्यादि नियममनतिक्रम्य मेखलादीनि उपवीतं च बिभृयात् । जटाधारणं तु केशप्रसाधनाभावमात्रम् ॥ ४ ॥ सायमिति ॥ सायं प्रातश्च भैक्षं चरेत् भिक्षाटनं कुर्यात् । तत् भिक्षया लब्धमन्नं गुरवे निवेदयेत् गुरोः पुरतो निदध्यात् । यत् यदि गुरुणा अनुज्ञातस्तदा तदन्नं भुञ्जीत । चेत् यदि क्वचिदेकादश्यादावुपवासकाले गुरोरनुज्ञाभावो वा तदा उपवसेत् उपवासं कुर्यात् ॥ ५ ॥ सुशील इति ॥ सुशीलः सुस्वभावो भवेदिति सर्वत्र शेषः । मितं भुङ्क्ते इति तथा मानं च उदरस्यार्द्धभागमन्नेन पूरयेत् तदर्धं जलेनेति ज्ञेयम् । दक्षः अनलसः श्रद्दधानः शास्त्रगुरूपदिष्टार्थेषु विश्वासवान् जितेन्द्रियश्च सन् स्त्रीषु स्त्रीभिर्निर्जिता ये पुरुषास्तेषु च यावदर्थं यावत्प्रयोजनमेव भिक्षाग्रहणपर्यन्तं व्यवहरेन्नाधिकमित्यर्थः ॥ ६ ॥ वर्ज-

छन्दांस्यधीयीत गुरोराहूतश्चेत्सुयन्त्रितः ॥ उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ॥ ३ ॥ मेखलाजिनवासांसि जटादण्डकमण्डलून् ॥
बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ॥४॥ सायं प्रातश्चरेद् भैक्षं गुरवे तन्निवेदयेत् ॥ भुञ्जीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ॥५॥
सुशीलो मितभुग् दक्षः श्रद्दधानो जितेन्द्रियः ॥ यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥ ६ ॥ वर्जयेत् प्रमदागाथामगृहस्थो बृहद्व्रतः ॥
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ७ ॥ केशप्रसाधनोन्मर्दस्नपनाभ्यञ्जनादिकम् ॥ गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा
॥ ८ ॥ नन्वग्निः प्रमदा नाम घृतकुम्भमयः पुमान् ॥ सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ॥ ९ ॥ कल्पयित्वात्मना यावदाभासमि-
दमीश्वरः ॥ द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः ॥ १० ॥

येदिति ॥ अगृहस्थो गृहस्थव्यतिरिक्तो बृहद्व्रतः ब्रह्मचर्यवांस्तु सर्वोऽपि प्रमदानां गाथामपि वर्जयेदित्यर्थः। यतः इन्द्रियाणि प्रमाथीनि प्रमथनशीलानि बलवन्ति अतः यतेः संयतचित्तस्यापि मनः हरन्ति । प्रमदा गाथाश्रवणादिना स्ववशीकुर्वन्तीत्यर्थः ॥ ७ ॥ केशेति ॥ युवा ब्रह्मचारी गुरुस्त्रीभिः अन्याभिश्च युवतिभिः स्त्रीभिः आत्मनः केशप्रसाधनादिकं न कारयेत् । गुरुपत्न्यो हि शिष्यं पुत्रवद्वात्सल्येन पश्यन्त्यो यदि केशप्रसाधनादिकं स्वेच्छयैव कुर्वन्ति तदपि न कारयेदित्यर्थः ॥ ८ ॥ नन्विति ॥ ननु निश्चितमेतत् नामेति विवेकिजनप्रसिद्धमपि प्रमदा अग्निसदृशी तथा पुमान् घृतकुम्भमयः तत्सदृशः । तथा च यथाग्निसमीपे घृतकुम्भः क्षरति तथा पुमानपि प्रमदासाहचर्यात्क्षरति अतः रहः एकान्ते सुतामपि जह्यात् त्यजेत् । अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकान्तावसरे वा यावदर्थं यावत्प्रयोजनं तावन्मात्रं करोति इति तादृशो भवेत् ॥ ॥ ९ ॥ ननु जितेन्द्रियस्य युवतयः किं कुर्युरित्याशङ्क्याह—कल्पयित्वेति ॥ यावदसौ जीवः आत्मना स्वरूपसाक्षात्कारेण इदं देहेन्द्रियादिकमाभासमात्रं कल्पयित्वा निश्चित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरः स्वतन्त्रो न भवेत् तावद्वैतं इयं स्त्री भोग्या अहं पुमान् भोक्तेत्यादिभेदो न विरमेत् ततो हि द्वैतदर्शनादस्य पुरुषस्य विपर्ययो गुणाध्यासेन भोग्यताबुद्धिर्भवति अतो जह्यादेवेत्यर्थः ॥ १० ॥ एतदिति ॥ एतत्सुशील इत्याद्युक्तं सर्वं गृहस्थस्य यतेरपि च समाम्नातम् । ऋतुगामिनः " ऋतौ भार्यामुपेयात् " इत्यादि शास्त्रानुसारेण ऋतौ भार्यामुपगच्छतस्ततो जातपुत्रादिपालनव्यग्रस्येत्यर्थः । गृहस्थस्य गुरूणां वृत्तिः जीविका विकल्पेन ज्ञेया सामर्थ्यं चेत्कल्पयितव्या नो चेन्नेत्यर्थः ॥ ११ ॥ अञ्जनेति ॥ किं च ये धृतव्रताः गृहस्थास्तेऽपि अञ्जनादीनि स्रग्गन्धादींश्च त्यजेयुः । अञ्जनादीनामामिषान्तानां द्वन्द्वैक्यम् । अञ्जनं तैलादिना शरीरस्य अभ्यञ्जनं शिरसः । यद्वा । अञ्जनं कज्जलादिना नेत्रयोः अभ्यञ्जनं तैलोद्वर्त्तनादिना शरीरस्य उन्मर्दं हस्तादिना शरीरस्य स्त्रीणां कुड्यादाववलेखो निरीक्षणं वा यद्वा स्त्रियं च अवलेखं चित्रकर्म चेति आमिषं मांसं मधु पुष्परसः क्षत्रियाद्यभिप्रायेण मद्यं वा ब्राह्मणस्य प्राप्त्यभावात् अत्राञ्जनाभ्यञ्जनादि स्वरूपतो निषिध्यते केशप्रसाधनादि पूर्वं तु कथंचिदापदि प्राप्तमपि स्त्रीकर्तृकं निषिध्यत इति भेदः ॥ १२ ॥ उषित्वेति युग्मम् ॥ द्विजस्त्रैवर्णिकः एवमुक्तप्रकारेण गुरुकुले उषित्वा अङ्गैः शिक्षादिभिः उपनिषद्भिश्च सहितां वेदत्रयीं यथाबलं यावदर्थं

एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि ॥ गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥ अञ्जनाभ्यञ्जनोन्मर्दस्त्र्यवलेखामिषं मधु ॥ स्रग्गन्धलेपालंकारांस्त्यजेयुर्ये धृतव्रताः ॥ १२ ॥ उषित्वैवं गुरुकुले द्विजोधीत्यावबुध्य च ॥ त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलम् ॥ ॥ १३ ॥ दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः ॥ गृहं वनं वा प्रविशेत् प्रव्रजेत् तत्र वा वसेत् ॥ १४ ॥ अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम् ॥ भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥ एवं विधो ब्रह्मचारी वानप्रस्थो यतिर्गृही ॥ चरन् विदितविज्ञानः परं ब्रह्माधिगच्छति ॥ १६ ॥ वानप्रस्थस्य वक्ष्यामि नियमान् मुनिसंमतान् ॥ यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहाञ्जसा ॥ १७ ॥

स्वाधिकारानुसारेण चाधीत्य अवबुध्य तदर्थं च विचार्य यदि ईश्वरः समर्थस्तर्हि गुरोः काममपेक्षितं वरं दत्त्वा तदनुज्ञातः सन् गृहं प्रविशेत् गार्हस्थ्यं स्वीकुर्यात् वनं वा प्रविशेत् वानप्रस्थं वा स्वीकुर्यात् प्रव्रजेद्वा संन्यासाश्रमं वा स्वीकुर्यात् तत्र ब्रह्मचर्याश्रमे वा वसेत् नैष्ठिको वा भवेत् ॥ १३ ॥ १४ ॥ अग्नाविति ॥ सर्वोपादानतया पूर्वमेव विद्यमानत्वात् अग्न्यादिषु वस्तुतः अप्रविष्टमप्युपासनारीत्या तेषु पञ्चमहाभूतैः स्वधामभिः स्वाश्रयैर्जीवैश्च सह तन्नियन्तृतया प्रविष्टवदधोक्षजं भगवन्तं पश्येत् ॥ १५ ॥ एवंविध इति ॥ एवंविधः सर्वत्र भगवद्दर्शी ब्रह्मचार्याद्यन्यतमः चरन् स्वाश्रमधर्मानाचरन् विदितं विज्ञानं विज्ञेयं येन स तथाविधः सन् परं ब्रह्माधिगच्छति प्राप्नोति ॥ १६ ॥ वानप्रस्थस्येति ॥ मुनीनां संमतान् तैरुक्तान् वानप्रस्थस्य नियमान् धर्मान् वक्ष्यामि । यान् धर्मानिह लोके आतिष्ठन् मुनिरञ्जसा सुखेनैव ऋषिलोकं क्रममुक्तिस्थानं महर्लोकं गच्छेत् ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ कृष्टपच्यं कृष्याद्युपायैर्निष्पन्नं शाल्यन्नादिकं नाश्नीयात् वनस्थ इति सर्वत्र शेषः । अकृष्टपच्यमपि फलमूलादिकमकालतः परिपाककालात्पूर्वमेव परिपक्वं नाश्नीयात् अग्निपक्वमामं च नाश्नीयात् । उत अपि तु स्वस्वकाले अर्कपक्वं सूर्यकिरणपक्वं फलादिकमेवाहरेत् ॥ १८ ॥ वन्यैरिति ॥ वन्यैर्नीवारादिभिः कालचोदितान् नित्यान् चरुपुरोडाशान् निर्वपेत् सम्पादयेत् । नवे नवे नूतने अन्नाद्ये लब्धे सति पुराणं पूर्वसञ्चितमन्नाद्यं परित्यजेत् ॥ १९ ॥ अग्नीति ॥ अग्न्यर्थमग्नीनां रक्षणार्थमेवोटजं पर्णशालात्मकं शरणं गृहं स्वीकुर्यात् । अथवा अद्रिकन्दरं पर्वतगुहामाश्रयेत । स्वयं तु हिमवाय्वादीन् सहत इति तथा भवेत् ॥२०॥ केशेति ॥ जटा अस्य सन्तीति जटिलः केशादीन् कमण्डल्वादींश्च दधत् धारयन् भवेत् । मलधारणं नाम मुसलवत्स्नानमात्रेण देहमर्दनपूर्वकतत्प्रक्षालनाभावमात्रम् । अग्निपरिच्छदाः स्रुक्स्रुवाद्युपकरणानि ॥२१॥ चरेदिति ॥ कृच्छ्रतरतपःक्लेशात् यथा बुद्धिर्न विपद्येत न विनश्येत तथा द्वादशाब्दान् संवत्सरान् अष्टौ वा चतुरो वा द्वौ वा एकं वा वानप्रस्थधर्मानाचरेत् ॥ २२ ॥

न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः ॥ अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ॥ १८ ॥ वन्यैश्चरुपुरोडाशान्निर्वपेत् कालचोदितान् ॥ लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् ॥१९॥ अग्न्यर्थमेव शरणमुटजं वाऽद्रिकन्दराम् ॥ श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयम् ॥२०॥ केशरोमनखश्मश्रुमलानि जटिलो दधत् ॥ कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदान् ॥ २१ ॥ चरेद् वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥ २२ ॥ यदाऽकल्पः स्वक्रियायां व्याधिभिर्जरयाऽथवा ॥ आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम् ॥ २३ ॥ आत्मन्यग्नीन् समारोप्य संन्यस्याहंममात्मताम् ॥ कारणेषु न्यसेत् सम्यक् सङ्घातं तु यथाऽर्हतः ॥२४॥ खे खानि वायौ निःश्वासांस्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक् श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ॥ २५ ॥

द्वादशाब्दाद्यनन्तरमपि यदि धर्मानुष्ठाने शक्तस्तर्हि वन एव वसेत् ज्ञानाभ्यासे योग्यश्चेत्संन्यसेदित्युत्तराध्याये वक्ष्यति तदुभयराहितस्य कृत्यमाह—यदेति॥ यदा च स वानप्रस्थः एकाब्दाद्यनन्तरं व्याध्यादिभिर्जरया वा स्वकीयक्रियायामान्वीक्षिक्यामात्मविचाररूपायां विद्यायां तुरीयाश्रमधर्मे चाकल्पः असमर्थस्तदा अनशनादिकं कुर्यात् । आदिपदेनाग्न्यारोहणादिकं वक्ष्यमाणं विवक्षितम् ॥ २३ ॥ अनशनादिकं करिष्यतः पूर्वकृत्यमाह—आत्मनीति ॥ ज्वालापानैः अग्नीनात्मनि समारोप्य देहादावहंममात्मतां च संन्यस्य त्यक्त्वा यथार्हतः यथायोग्यं स्वस्वकारणे सङ्घातं देहेन्द्रियादिसमूहं सम्यक् न्यसेत् विलापयेत् ॥२४॥ विलापनं दर्शयति—ख इति ॥ ख आकाशे खानि शरीरमच्छिद्राणि विनिर्दिशेत् इमानि खानि खे विलापयामीति प्रयुञ्जीत । ततः अभिनिवेशयेत् विलापयेदिति क्रियाद्वयेन सर्वेषामन्वयः । निश्वासान् प्राणापानादीन् वायौ उष्माणं तेजसि असृक् रुधिरं च श्लेष्माणं पूयं मूत्रादि च तान्यप्सु शेषमस्थिमांसादिकं कठिनांशं क्षितौ एवं यथोद्भवं यद्यत उत्पन्नं तत् तस्मिन् विनिर्दिशेत्ततोऽभिनिवेशयेत् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थूलशरीरस्य लयमुक्त्व लिङ्गशरीरस्याह—वाचमिति ॥ तत्र यद्यपि यथोद्भवं लयस्य युक्तत्वादध्यात्मादीनां स्वस्वकारणेषु राजसाहङ्कारेषु लयो वाच्यः । अधिदैवेभ्यस्तु नेन्द्रियाणामुत्पत्तिरिति तत्र तेषां लयानुसन्धानकथनमसङ्गतं तथापि तेषां तत्र लयानुसन्धानमद्वितीयात्मप्रतिपत्तयेऽतो यथाकथंचिल्लये न भाव्ये देवानामिन्द्रियप्रवर्तकत्वेन प्राधान्यादिन्द्रियतद्विषययोर्देवतासु लयः कथ्यते । वक्तव्यम् उक्तिः भावे तव्यः स वक्तव्यां सोक्तिकां वाचं वागिन्द्रियमग्नौ विनिर्दिशेत् ततोऽभिनिवेशयेत् । करौ शिल्पमादानादिरूपं व्यापारं चेन्द्रे तदधिदैवते गत्या सह पादौ वयसि कालात्मके विष्णौ रत्या सहोपस्थेन्द्रियं प्रजापतौ विनिर्दिशेत् ततोऽभिनिवेशयेत् अग्रेऽप्येवम् ॥ २६ ॥ मृत्याविति ॥ विसर्गः पुरीषोत्सर्गः तत्सहितं पायुमिन्द्रियं मृत्यौ तदधिदैवते यथास्थानं तदनतिक्रमेण विनिर्दिशेद्विलयमनुसन्दधीत स वानप्रस्थः नादेन शब्देन विषयेण सह श्रोत्रमिन्द्रियं दिक्षु तदधिदेवतासु विनिर्दिशेत् । तथा स्पर्शं विषयं त्वचमिन्द्रियं च अध्यात्मनि वायौ तदधिदैवते विनिर्दिशेत् ॥ २७ ॥ रूपाणीति ॥ हे राजन् युधिष्ठिर चक्षुषेन्द्रियेण सह रूपाणि तद्विषयभूतानि ज्योतिषि सूर्ये तदधिदैवते अभिनिवेशयेत् विलयं भावयेत् रसगन्धयोस्तु इन्द्रियाद्याकर्षकत्वेन प्राधान्यविवक्षया देवतासहितस्य

वाचमग्नौ सवक्तव्यामिन्द्रे शिल्पं करावपि ॥ पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥ मृत्यौ पायुं विसर्गं च यथास्थानं
विनिर्दिशेत् ॥ दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम् ॥ २७ ॥ रूपाणि चक्षुषा राजन् ज्योतींष्यभिनिवेशयेत् ॥ अप्सु
प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ २८ ॥ मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ॥ कर्माण्यध्यात्मना रुद्रे यदहंममता
क्रिया ॥ सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥

विषये लयमाह । अप्स्विति । प्रचेतसा वरुणेनाधिदैवेन सह जिह्वां रसनेन्द्रियमप्सु अप्शब्दोपलक्षितरसेषु अभिनिवेशयेत् । घ्राणशब्देनाश्विनोरपि ग्रहणम् । आश्विभ्यां सह घ्राणं घ्रेयैर्गन्धैरुपलक्षितायां क्षितौ अभिनिवेशयेत् इत्युत्तरार्द्धं स्वामिपादाः व्याचक्षते । परे तु प्रकरणस्वारस्यात् प्रकृष्टं चेतो यत्र स प्रचेताः मधुरादिरसस्तेन सह जिह्वाम् अप्सु जलाधिष्ठातरि वरुणे न्यसेत् । घ्रेयैः विविधगन्धैः सह घ्राणेन्द्रियं क्षितौ क्षीयतेऽत्रेति क्षितिस्तदधिष्ठातृदेवता तस्यामश्विनोरित्यर्थ इति व्याचक्षते ॥ २८ ॥ मन इति ॥ मनोरथैः व्यापारैः सह मन इन्द्रियमधिदैवते चन्द्रे न्यसेत् । बोध्यैर्विषयैः सह बुद्धिं परे श्रेष्ठे कवौ चतुर्मुखे न्यसेत् अध्यात्मना अहङ्कारेण सह तत्कर्माणि देहाद्याभिमानरूपाणि तदधिदैवते रुद्रे न्यसेत् । अध्यात्मतामिति पाठे कर्माण्यहङ्कारं चेत्यर्थः । यद्यस्मादहङ्कारात् देहादावहं बुद्धिस्तदनुबन्धिषु ममता तन्मूलाः क्रियाः प्रवृत्तयश्च भवन्ति । सत्वेन सत्वगुणकार्यस्वच्छत्वप्रकाशत्वादिरूपचित्तवृत्त्या सह चित्तं क्षेत्रज्ञसंज्ञके जीवे न्यसेत् । गुणैस्तत्कार्यैः प्रागवशिष्टैर्देवैः सह वैकारिकं सात्विकाहङ्कारं परे तत्कारणे महत्तत्त्वे न्यसेत् । यद्वा । सत्वादिभिर्गुणैर्हेतुभूतैर्वैकारिकं भोक्तृत्वादिविकारवन्तं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि न्यसेदिति ॥ २९ ॥

Nepal Sanskrit University, Balmeeki

ननु विकारवतः कथमविकारे लयः स्यादित्याशंक्य विकारहेतूनां सर्वोपाधीनां लयद्वारेणेत्याह—अप्स्विति ॥ क्षितिमप्सु न्यसेत् । अपः ज्योतिषि न्यसेत् । अपो ज्योतिर्वायौ न्यसेत् अमुं वायुं नभसि आकाशे न्यसेत् । तच्चाकाशं कूटस्थे तामसाहङ्कारे न्यसेत् । तच्च कूटस्थं महति न्यसेत् । महत्तत्वमव्यक्ते प्रधाने न्यसेत् । प्रधानं च अक्षरे ब्रह्मणि न्यसेदिति ॥ ३० ॥ इतीति ॥ इत्येवं सर्वोपाधिविलयाद्धेतोः अवशेषितं चिन्मात्रमात्मानं क्षेत्रज्ञमक्षरतया ज्ञात्वा अथ अद्वयः सन् वानप्रस्थः कृत्याद्विरमेदित्यन्वयः । तत्र दृष्टान्तमाह । दग्धेति । यथा निर्दग्धकाष्ठोऽग्निः दाहाद्विरमति तद्वदित्यर्थः ॥ ३१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ द्वादशे गङ्गा-सहायः सप्तमस्य व्यधादिमाम् ॥ १२ ॥ त्रयोदशे यतेर्धर्माः साधकस्येतरस्य च ॥ अवधूतेतिहासोऽत्र श्लोकाः सार्द्धाः षड[४६]र्धयः॥चत्वार्युवाचेत्यङ्घ्रयूनाः [४६]सप्तवेदा अनुष्टुभः ॥ ॥ १३ ॥ कल्प इति ॥ वनस्थधर्मे आन्वीक्षिक्यां च विद्यायां योऽसमर्थः स एवमद्वितीयमात्मानं ध्यायन् अनशनादिकं कुर्यादित्युक्तम् । यस्त्वान्वीक्षिक्यां विद्यायां कल्पः

अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् ॥ कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ॥ ३०॥ इत्यक्षरतयात्मानं चिन्मात्रमवशेषितम् ॥ ज्ञात्वाऽद्वयोथ विरमेद् दग्धयोनिरिवानलः ॥ ३१ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ नारद उवाच ॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ॥ ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥ १ ॥ बिभृयाद्द यद्यसौ वासः कौपीनाच्छादनं परम् ॥ त्यक्तं न दण्डलिङ्गादेरन्यत् किंचिदनापदि ॥ २ ॥ एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥ ३ ॥ पश्येदा-त्मन्यदो विश्वं परे सदसतोऽव्यये ॥ आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥ सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् ॥ पश्यन्बन्धं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥

समर्थः स एवं ध्यात्वा परिव्रज्य संन्यस्य विधिपूर्वकं सर्वं त्यक्त्वा देहमात्रेणावशेषितः सन् ग्रामैकरात्रविधिना एकैकस्मिन् ग्रामे एकैकां रात्रिं नयेत् इति विधिना निरपेक्षः विषयाभिलाषशून्यः सन् महीं चरेत् ॥ १ ॥ बिभृयादिति ॥ किं च वासो न बिभृयात् यद्यसौ संन्यासी वासः बिभृयात्तदा कौपीनं मेढ्रमाच्छाद्यते येन परं केवलं तावन्मा-त्रमेव बिभृयात् । संन्यासे यत् त्यक्तं व्यावहारिकजनसङ्गादि तदपि न बिभृयात् । अनापदि लिङ्गदण्डादिकादन्यत् किंचिद्वस्तु न बिभृयात् । आपदि तु देहसंरक्षार्थं कम्बलौषधशय्यादेस्त्यक्तस्यापि ग्रहणे न दोष इत्यर्थः ॥ २॥ एक इति ॥ भिक्षुः भिक्षान्नोपजीवी आत्मारामः सर्वभूतसुहृत् शान्तः नारायणपरायणः अनपाश्रयः राजाद्या-श्रयरहित एक एव चरेत् ॥ ३ ॥ पश्येदिति ॥ सदसतः परे इति कार्यकारणात्मकप्रपञ्चातीते अव्यये क्षयशून्ये आत्मन्यदो विश्वं पश्येत् तथा सदसन्मये प्रपञ्चे सर्वत्र परं ब्रह्म आत्मानं पश्येत् ॥ ४ ॥ सुप्तेति ॥ सुषुप्तौ हि तमसावृतमात्मतत्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते सन्धौ तु न तमो नापि विक्षेपः अतस्तदा आत्मदृक् आत्मानं

CC-0. In Public Domain. Digitization by eGangotri

लक्षीकृत्य स्थितः सन्नात्मनो गतिं तत्त्वं पश्यन् अत एव बन्धं मोक्षं च मायामात्रमविद्यया देहाद्यध्यासेन कल्पितं न वस्तुत इति पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यनुषङ्गः । तदुक्तम् । " निद्रादौ जागरस्यान्ते यो भाव उपजायते । तं भावं भावयन्नित्यं मुच्यते नेतरो यतिः ॥ " इति ॥ ५ ॥ नेति ॥ यथा अज्ञो जनो निश्चितमपि मृत्युं दुःखानुभवदशायामभिवाञ्छति सुखानुभवावस्थायां त्वध्रुवमपि जीवितमभिनन्दति तथा अस्य देहस्य ध्रुवं निश्चितमपि मृत्युं नाभिनन्देत् तथा अध्रुवमपि जीवितं नाभिनन्देत् इति उभयमपि नाभिनन्देत् । परं केवलं भूतानां प्रभवोऽप्ययश्च यस्मात्तं कालमेव प्रतीक्षेत प्रतिपालयेत् ॥ ६ ॥ नेति ॥ असच्छास्त्रेषु अनात्मपरेषु नाटकादिषु न सज्जेत आसक्तो न भवेत् । जीविकां नोपजीवेत शास्त्रेण जीविकां न सम्पादयेत् तद्भार्षः । पूर्वमध्यापनस्य तु गृहस्थस्यैव ब्राह्मणस्य जीविकात्वेनोक्तत्वात् वादवादान् वितण्डादिनिष्ठान् ज्ञानोपासनादिविरोधितर्कान् त्यजेत् कमपि पक्षं निर्बन्धेन नाश्रयेत् ॥ ७ ॥ नेति ॥ वृत्तिहेतोः शिष्यान्नानुबध्नीत प्रलोभनबलादिना नापादयेत् । तद्भार्षः । बहून् ग्रन्थान्नैवाभ्यसेत् पूर्वोक्तपरमात्मपरत्वविरोधित्वात् । अत एव ग्रन्थानां व्याख्यां नोपयुञ्जीत अन्यान्न पाठयेत् । आरम्भान् निषिद्धान् मठादिव्यापारान् क्वचिदपि

नाभिनन्देद्ध्रुवं मृत्युमध्रुवं वाऽस्य जीवितम् ॥ कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम्॥६॥नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ॥ वादवादांस्त्यजेत् तर्कान्पक्षं कंचन संश्रयेत् ॥७॥ न शीष्यानननुबध्नीत ग्रन्थान् नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुञ्जीत नारम्भानारभेत्क्वचित् ॥८॥ न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ॥ शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ ९ ॥ अव्यक्तलिङ्गोऽव्यक्तार्थो मनीष्युन्मत्तबालवत् ॥ कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ॥ १० ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥

नारभेत् निग्रहादिना वैषम्यप्रसङ्गात् तद्भाव आर्षः ॥ ८ ॥ परमहंसस्य विशेषमाह—न यतेरिति ॥ महात्मनः शान्तस्य समचित्तस्य यतेराश्रमः प्रायो धर्महेतुर्न भवति किं बहुना विहितं दण्डादिलिङ्गमपि लोकसंग्रहार्थं बिभृयात् धारयेत् । उत वा अथवा त्यजेत् अयं भावः । यतिर्द्विधा सिद्धः साधकश्च तत्र साधकस्याज्ञस्य क्वचिद्धर्महेतुरपि भवतीति तदभिप्रायेण प्रायग्रहणं तेन ज्ञानोत्पत्तिपर्यन्तं बहूदकादिलिङ्गमाश्रित्य सत्वशुद्ध्यर्थं यमनियमान् आचरन्नेव ज्ञानोत्पत्त्यै यतेत । उत्पन्नज्ञानस्य परमहंसस्य सिद्धस्य न नियमैः कृत्यमस्ति । यमास्तु स्वत एव स्युः अतस्तदा लिङ्गादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति ॥ ९ ॥ अव्यक्तेति ॥ अव्यक्तं न बहिर्व्यक्तं वर्णाश्रमचिह्नं यस्य व्यक्तोऽर्थः प्रयोजनमात्मानुसन्धानं यस्य सः । यद्वा । अव्यक्तार्थ इति च्छेदः । परैरविदितप्रयोजन इत्यर्थः । स मनीष्यपि उन्मत्तवद्बालवदज्ञवच्च कविर्वाग्म्यपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेत् ते तं यथोन्मत्तादिरूपं मन्येरंस्तथा वर्तेत । स्वदृष्ट्येति पाठे बाह्यानुसन्धानाभावेनेत्यर्थः ॥ १० ॥ अत्रापीति ॥ अत्रापि स्वमाहात्म्याच्छादनेनावस्थानेऽपि प्रह्लादस्य आजगरस्य अजगरवृत्तस्य मुनेः प्रह्लादादिभ्य ऊचिवानिति ज्ञापकात् दत्तात्रेयस्य च संवादरूपं पुरातनमिममितिहासमुदाहरन्ति

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

दृष्टान्तत्वेन बुधा दर्शयन्तीत्यर्थः । अजगरवृत्तं नाम एकत्र स्थित्या प्रारब्धकर्मभोगः ॥ ११ ॥ तमिति युग्मम् ॥ लोकानां प्राणिनां तत्वस्य साधुत्वलक्षणस्य विवित्सया वेदितुमिच्छया इडभाव आर्षः । विन्दतेर्वा ज्ञानार्थताकल्पनं कतिपयैरमात्यादिभिर्वृतो लोकान् विचरन् भगवत्प्रियः प्रह्लादः तं मुनिं कावेर्यां कावेरीनदीतीरे सह्याख्यस्य पर्वतस्य सानुनि धरोपस्थे भूमौ शयानं रजस्वलै रजोभिर्धूसरैः तनूदेशैर्देहावयवैर्निगूढममलं तेजो यस्य तं ददर्श ॥ १२ ॥ १३ ॥ कर्मणेति ॥ दृष्ट्वा च यं कर्मादिभिः संसिद्धावस्थापन्नो वासौ न वेति जनाः न विदन्ति न जानन्ति ॥ १४ ॥ तमिति ॥ तं विधिवदभ्यर्च्य पूजयित्वा पादयोः शिरसा स्पृशन्नत्वा ततस्तत्वं विवित्सुर्विविदिषुः अनिट्त्वं पूर्ववत् । महाभागवतोऽसुरः प्रह्लाद इदं वक्ष्यमाणमप्राक्षीत् पृष्टवान् ॥ १५ ॥ बिभर्षीति सार्द्धम् ॥ सोद्यमस्य वित्तं भवति ततश्च भोगः सिध्यति स सोद्यमः भोगवान् यथा पीवानं स्थूलं कायं बिभर्ति तथा त्वमुद्यमादिरहितोऽपि पीवानं कायं बिभर्षि तद्वदेति शेषः । तदेव स्फुटयति । वित्तमिति । इह लोके उद्यमवताम् एव वित्तं भवति

तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ॥ १२ ॥ ददर्श लोकान्विचरन् लोकतत्त्वविवित्सया ॥ वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥ कर्मणाऽऽकृतिभिर्वाचा लिङ्गैर्वर्णाश्रमादिभिः ॥ न विदन्ति जना यं वै सोऽसाविति न वेत्ति च ॥ १४ ॥ तं नत्वाऽभ्यर्च्य विधिवत् पादयोः शिरसा स्पृशन् ॥ विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः ॥ १५ ॥ बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा ॥ वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ॥ भोगिनां खलु देहोऽयं पीवा भवति नान्यथा ॥ १६ ॥ न ते शयानस्य निरुद्यमस्य ब्रह्मन्नुहार्थो यत एव भोगः ॥ अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत् ॥ १७ ॥ कविः कल्पो निपुणदृक् चित्रप्रियकथः समः ॥ लोकस्य कुर्वतः कर्म शेषे तद्वीक्षिताऽपि वा ॥ १८ ॥ नारद उवाच ॥ स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ॥ स्मयमानस्तमभ्याह तद्वागमृतयन्त्रितः ॥ १९ ॥

वित्तवतामेव भोगो भवति भोगिनामेवायं पाञ्चभौतिकत्वाद्देहः पीवा भवति । अन्यथा भोगं विना पीवा न भवति ॥ १६ ॥ नेति ॥ हे ब्रह्मन् हे विप्र निरुद्यमस्य शयानस्य च ते तव अर्थो वित्तं नास्त्येव यत एव वित्ताद्भोगः स्यात् इति अतः अभोगिनः भोगरहितस्यापि तवायं पाञ्चभौतिकत्वेन प्रतीयमानो देहो यतः कारणात् पीवा तत्क्षमं नः श्रोतुं योग्यं चेत् तदा वदेति ॥ १७ ॥ कविरिति ॥ कविर्वाग्व्यवहारे निपुणः कल्पः समर्थः निपुणदृक् चतुरः चित्राः प्रियाः लोकरञ्जनाः कथा यस्य सः तथापि तत्तत्कर्म कुर्वतः सतः तद्वीक्षितापि वा तत्सर्वं पश्यन्नपि समः उदासीनः सन् शेषे शयनं करोषि तत्र किं कारणमिति शेषः । न द्वे क्षिनौषि वा इति पाठे न तत्कर्मद्वे क्षिनौषि वा न च स्तौषीत्यर्थः॥ १८॥स इति॥ स महामुनिर्दैत्यपतिना प्रह्लादेनेत्थं परिपृष्टस्तस्य वागेवामृतं तेन यन्त्रितो वशीकृतश्च सन् स्मयमानस्तमभ्याह स्म उत्तरं दत्तवान्॥ १९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदेति ॥ हे असुरश्रेष्ठ आर्याणां ज्ञानिनां सर्वज्ञत्वेन संमतः भवान् अध्यात्मचक्षुषा अन्तर्दृष्ट्या इदं लोकचरितं वेद जानात्येव तथा नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानि च वेद ॥ २० ॥ यस्येति ॥ केवलया अनन्यप्रयोजनया भक्त्या यस्य तव हृद्गतः सन्नारायणो देवः भगवान् सदा अज्ञानं धुनोति । अर्कः सूर्यो यथा ध्वान्तमन्धकारं धुनोति तद्वदित्यर्थः ॥ २१ ॥ अथेति ॥ यद्यपि भवान् सर्वं वेद अथापि हे राजन् यथाश्रुतं तव प्रश्नान्प्रति ब्रूमहे प्रश्नानामुत्तराणि वदामि । यथा श्रुतमित्यौद्धत्यपरिहारायोक्तम् । हि यस्मादात्मनः अन्तःकरणस्य शुद्धिमिच्छतां भगवद्भक्तत्वाद्भवान् संभाषणीयोऽसि ॥ २२ ॥ स्वस्य निरुद्यमत्वे तावद्धेतुमाह—तृष्णयेति ॥ योग्यैः कामैः अपूरया पूरयितुमशक्यया भववाहिन्या जन्मपरम्पराकारिण्या तृष्णया नद्या कर्माणि कार्यमाणः अहं पूर्वं नानायोनिषु योजितः ॥ २३ ॥ यदृच्छयेति ॥ कर्मभिर्भ्रमन्नहं सम्प्रति पुण्येन स्वर्गस्य द्वारं साधनं ज्ञानभक्तिभ्यामपवर्गस्य द्वारं पापेन तिरश्चां श्वशूकरादियोनेर्द्वारं पुण्यपापमिश्रेण कर्मणा पुनरस्य मनुष्यलो-

ब्राह्मण उवाच ॥ वेदेदमसुरश्रेष्ठ भवान्नन्वार्यसंमतः ॥ ईहोपरमयोर्नॄणां पदान्यध्यात्मचक्षुषा॥२०॥ यस्य नारायणो देवो भगवान् हृद्गतः सदा ॥ भक्त्या केवलयाऽज्ञानं धुनोति ध्वान्तमर्कवत् ॥२१॥ अथापि ब्रूमहे प्रश्नांस्तव राजन् यथा श्रुतम् ॥ संभावनीयो हि भवानात्मनः शुद्धिमिच्छताम् ॥२२॥ तृष्णया भववाहिन्या योग्यैःकामैरपूरया॥कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः॥२३॥यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन्॥स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥२४॥ अत्रापि दम्पतीनां च सुखायान्यापनुत्तये ॥ कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ॥२५॥ सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः ॥ मनः संस्पर्शजान् दृष्ट्वा भोगान्स्वप्स्यामि संविशन् ॥२६॥ इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् ॥ विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ॥ २७ ॥ जलं तदुद्भवैश्छन्नं हित्वाऽज्ञो जलकाम्यया ॥ मृगतृष्णामुपाधावेद्यथाऽन्यत्रार्थदृक् स्वतः ॥ २८ ॥

कस्य द्वारम् इमं लोकं मनुष्यदेहं यदृच्छया प्रापितः ॥ ४ ॥ अत्रेति ॥ अत्र मनुष्यजन्मन्यपि सुखप्राप्तये अन्यस्य दुःखस्यापनुत्तये निवृत्तये च कर्माणि कुर्वतां दम्पतीनां फलविपर्ययं दुःखप्राप्तिरूपं दृष्ट्वा सर्वेभ्यः कर्मभ्यो निवृत्तोस्मि ॥२५॥ ननु निवृत्त्या कथं सुखं तत्राह—सुखमिति॥ सुखं हि अस्य जीवात्मनः स्वरूपमेव सर्वेहोपरतिः सर्वक्रियानिवृत्तिः तनोतीति तनुः प्रकाशश्च सर्वक्रियानिवृत्तौ स्वयं प्रकाशत इत्यर्थः । यद्वा । सुखमात्मनो रूपमेव सर्वेहोपरतिश्च तनुः यथातनुं विना सुखं न प्रकाशते तथा सर्वेहोपरतिं विना सुखं न प्रकाशते अतः भोगान् मनआदीन्द्रियसंस्पर्शाज्जातान्दृष्ट्वा एकत्र संविशन् तिष्ठन् प्रारब्धान् भोगान् भुंजान एव स्वप्स्यामि । स्वपि मिलङर्थे लृडार्षः ॥ ॥ २६ ॥ इतीति ॥ इत्येतदात्मनः स्वरूपं भूतं पुरुषार्थं सन्तं स्वस्मिन्नेव विद्यमानं पुमान् विस्मृत्य वै द्वैते असति दुःखहेतुभूते घोरां जन्ममरणादिभिर्भयंकरां विचित्रं देवतिर्यङ्नरादिनानारूपां संसृतिमाप्नोति ॥ २७ ॥ जलमिति ॥ अज्ञो जनो यथा तदुद्भवैर्जलोद्भवैस्तृणशैवालादिभिश्छन्नं जलं हित्वा त्यक्त्वा जलकाम्यया जलस्य इच्छया

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

मृगतृष्णां मरीचितोयमुपाधावेत् तथा स्वतः पुरुषार्थभूतादात्मनः सकाशादन्यत्र विषयेषु अर्थदृक् पुरुषार्थं पश्यन्नात्मानं हित्वा विषयानुपधावति ॥ २८ ॥ स्वस्य निरुद्यमत्वे हेतुमुक्त्वा विपर्ययं दृष्टेत्युक्तं विवृणोति—देहेति ॥ दैवतन्त्रैः कर्मायत्तैर्देहेन्द्रियादिभिरात्मनः स्वस्य सुखं दुःखस्यात्ययं निवृत्तिं चेहतः इच्छतः अनीशस्य कृताः कृताः पुनः पुनरारब्धाः क्रियाः मोघा व्यर्था भवन्तीत्यर्थः । न सुखजनिका नापि दुःखनिवर्तिका भवंति ॥ २९ ॥ आध्यात्मिकेति ॥ आध्यात्मिकाधिभौतिकाधिदैविकैः दुःखैः कर्हिचित्कदाचिदप्यविमुक्तस्य मर्त्यस्य मरणशीलस्य कृच्छ्रोपनतैर्दुःखेनोपार्जितैरर्थैर्वित्तैस्तन्निमित्तैः कामैश्च विषयैश्च किं कियत्सुखं क्रियेत ॥ ३० ॥ कृच्छ्रं विना लब्धेप्यर्थे दुःखमाह—पश्यामीति ॥ लुब्धानाम् अजितात्मनाम् धनापहारभयान्न लब्धा निद्रा यैस्तेषां सर्वतः पितृपुत्रादिभ्योप्ययमपहरिष्यतीति शंकावतां धनिनां क्लेशं पश्यामि ॥ ॥ ३१ ॥ राजत इति ॥ राजादिभ्यो नित्यमेव प्राणेच्छावतामर्थवतां धनेच्छूनां च भयम् । तत्र स्वस्मात् मत्त एव कथंचित्त्यागभोगविस्मरणादिना नाशः स्यादिति प्राणोत्र

देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः ॥ दुःखात्ययं चानीशस्य क्रिया मोघाः कृताकृताः ॥ २९ ॥ आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ॥ मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥ ३० ॥ पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् ॥ भयादलब्धनिद्राणां सर्वतोऽभिविशङ्किनाम् ॥ ३१ ॥ राजतश्चोरतः शत्रोः स्वजनात् पशुपक्षितः ॥ अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयम् ॥ ३२ ॥ शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ॥ यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ॥ ३३ ॥ मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ ॥ वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ॥ ३४ ॥ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ॥ कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिम् ॥ ३५ ॥ अनीहः परितुष्टात्मा यदृच्छोपनतादहम् ॥ नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥ ३६ ॥

संभोगादिप्रयोजकं शरीरबलं ज्ञेयं जीवनमात्रं तु विहितमेव जीवस्य तत्वजिज्ञासेत्यादौ इत्याहुः ॥ ३२ ॥ शोकेति ॥ नृणां यौ प्राणार्थौ मूलं येषां तादृशाः शोकादयः स्युः तयोः प्राणार्थयोर्बुधः स्पृहां जह्यात् शरीरबलाधिक्यार्थं च न यतेत स्वल्पाभ्यामपि धनबलाभ्यां पारमार्थिककार्यसिद्धेरिति भावः । तत्र विनाशे शोकः विद्यमाने मोहो भयं च अपहारके क्रोधः तत्राकिंचित्करत्वे क्लैब्यम् उपार्जने श्रमः तत्र सहकारिणि रागः आदिपदेन कलहमत्सरदैन्यादिपरिग्रहः ॥ ३३ ॥ मधुकारेति ॥ मधुकारो मधुमक्षिका महासर्पोऽजगरस्तौ नोस्माकमस्मिन् लोके गुरुषु उत्तमौ ययोः शिक्षया वृत्तपर्यालोचनया यथाक्रमं वयं वैराग्यं परितोषं च प्राप्ताः ॥ ३४ ॥ विराग इति ॥ सर्वकामेभ्यः सर्वविषयेभ्यो विरागो मे मया मधुव्रतात् मधुकराच्छिक्षितः कृच्छ्रेण मधुवत् आप्तमपि वित्तं तत्पतिं हत्वान्यो हरेदिति किं वित्तेनानर्थहेतुत्वादित्यर्थः । मधुवदिति । यथा मधुव्रतैः कृच्छ्रेण सञ्चितं मधु मधुव्रतान् हत्वान्यो हरति तद्वदित्यर्थः ॥ ३५ ॥ अनीह इति ॥ अनीहो निर्व्यापारोप्यहं यदृच्छयोपनतात् दैवाल्लब्धात् परितुष्टः आत्मा मनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य तथा भूतः अस्मि नोचेत् यदृच्छोपनतं न चेत् तदापि सत्ववान् धैर्यवान् सन् महाहिरजगर इव बहूहानि शये शयानो भवामि असंज्ञायां सङ्ख्यासमास आर्षः ॥ ३६ ॥ पीनत्वे हेतुं वदन् परितोषं प्रपञ्चयति–क्वचिदिति ॥ क्वचित्कदाचित् अल्पं क्वचित् भूरि बहु क्वचित् साधु रसवत् क्वचित् असाधु रसवर्जितं वा स्वाद्वस्वादु वेतिपाठः । क्वचिद्भूरिगुणोपेतं सौरभ्यादिगुणयुक्तं उताथवा क्वचिद्गुणहीनं वाहं भुञ्जे ॥ ३७ ॥ श्रद्धयेति ॥ यदृच्छया क्वापि श्रद्धयोपाहृतमानीतं भुक्त्वा कदाचिन्मानवर्जितं भुञ्जे अथ कस्मिंश्चिद्देशे दिवा दिवसे कस्मिंश्चिद्देशे च नक्तं रात्रौ भुञ्जे ॥ ३८ ॥ क्षौममिति ॥ एवं दिष्टभुक् प्रारब्धकर्मफलभोगी तुष्टधीरहं वस्त्रमपि क्षौमदुकूलाद्यन्यतममन्यदपि वा यदृच्छया सम्प्राप्तं वसे परिदधे चीरं जीर्णवस्त्रखण्डम् ॥ ३९ ॥ क्वचिदिति ॥ क्वचिद्धरोपस्थे भूपृष्ठे क्वचित्तृणादिषु क्वचिच्च परेच्छया प्रासादमध्ये पर्यङ्के तत्रापि क्वचित् कशिपौ तूलिकायाम् वा शब्दात्तं विनापि शये स्वपिमि ॥ ४० ॥ क्वचिदिति ॥ हे विभो प्रह्लाद क्वचित्परेच्छयैव स्नातः अनुलिप्तं चन्दनादिनाङ्गं यस्य सः सुवासाः स्रग्वी अलं-

क्वचिदल्पं क्वचिद्भूरि भुञ्जेऽन्नं स्वाद्वऽस्वादु वा ॥ क्वचिद् भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥ श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम् ॥ भुञ्जे भुक्त्वाथ कस्मिंश्चिद्दिवानक्तं यदृच्छया ॥ ३८ ॥ क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा ॥ वसेऽन्यदपि संप्राप्तं दिष्टभुक्तुष्टधीरहम् ॥ ३९ ॥ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ॥ क्वचित्प्रासादपर्यङ्के कशिपौ वा परेच्छया ॥ ४० ॥ क्वचित्स्नातोनुलिप्ताङ्गः सुवासाः स्रग्व्यलंकृतः ॥ रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ॥ ४१ ॥ नाहं निन्दे न च स्तौमि स्वभावविषमं जनम् ॥ एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥ विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे ॥ मनो वैकारिके हुत्वा तन्मायायां जुहोत्यनु ॥ ४३ ॥ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ् मुनिः ॥ ततो निरीहो विरमेत्स्वानुभूत्यात्मनि स्थितः ॥ ४४ ॥ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् ॥ व्यपेतं लोकशास्त्राभ्यां भवान्हि भगवत्प्रियः ॥ ४५ ॥

कृतश्चाहं रथादिभिर्यानैश्चरे सञ्चरामि तङार्षः । क्वचिच्च दिग्वासा नग्न एव ग्रहवद्ग्रहग्रस्तोन्मत्तवच्चरे ॥ ४१ ॥ नेति ॥ स्वभावतः सत्वादिगुणतः एव विषममतस्तस्य सर्वस्य जनस्य गुणाधीनप्रवृत्तित्वादपमानकर्तारं जनमहं न निन्देत निन्दामि नच सम्मानकर्तारं स्तौमि उत अपितु एतेषां जनानां सर्वेषां महात्मनि ब्रह्मणि ऐकात्म्यरूपं श्रेयः आशासे ॥ ४२ ॥ विकल्पमिति ॥ विकल्पं जातिरूपादिभेदं चित्तौ भेदग्राहकमनोवृत्तौ जुहुयात् ऐक्यं भावयेत् तां वृत्तिमर्थस्य देहात्मादिपदार्थस्य विभ्रमो विपर्ययो यस्मिंस्तस्मिन् मनसि जुहुयात् मनो वैकारिके स्वकारणे सात्विकाहंकारे हुत्वा अनु अनन्तरं तमहंकारं महत्तत्वद्वारा मायायां जुहोति जुहुयात् ॥ ४३ ॥ आत्मेति ॥ मुनिर्मननशीलः तां मायामात्मानुभूतौ स्वयंप्रकाशे ब्रह्मणि जुहुयात् ततश्च सत्यमेव परमात्मानं पश्यतीति तथा भूतः स्वानुभूत्यात्मनि स्वप्रकाशात्मनि स्थितः निरीहः सर्वक्रियाशून्यश्च सन् कृत्याद्विरमेत् ॥ ४४ ॥ स्वात्मेति ॥ मन्ददृष्ट्या लोकशास्त्राभ्यां व्यपेतं तन्मर्यादारहितम् नतु तत्वदृष्ट्या सुगुप्तमपि स्वस्यात्मन इदं वृत्तं मया ते तुभ्यं वर्णितं हि यस्माद्भवान्

CC-0. In Public Domain. Digitization by eGangotri

भगवत्प्रिय इति भगवत्पर इति पाठान्तरम् ॥ ४५ ॥ धर्ममिति ॥ एवम् असुरेश्वरः प्रह्लादः मुनेः सकाशात् पारमहंस्यं परमहंसम्बन्धिनं धर्मं श्रुत्वा तं पूजयित्वा आमन्त्र्य पृष्ट्वा च प्रीतः संस्ततः स्थानात्स्वगृहं प्रययौ ॥ ४६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गंगासहायोऽरचयत् सप्तमस्य त्रयोदशे ॥ १३ ॥ चतुर्दशे गृहस्थस्य परमो धर्म ईरितः॥कालादिभिर्विशेषोत्र श्लोकाः सार्द्धा द्विर्सिर्धवः॥ तावत्योनुष्टुभोप्यत्रोवाचेति द्वितयं तथा ॥१४॥ गृहस्थ इति॥ हे देवर्षे ऋत्यक इति प्रकृतिभावः। गृहे मूढा प्रसक्ता धीर्यस्य स मादृशो गृहस्थः एतां पूर्वोक्तां मोक्षलक्षणां पदवीं गतिं येन विधिना प्रकारेण अञ्जसा सुखेन याति तं ब्रूहि ॥ १ ॥ गृहेष्विति ॥ हे राजन् गृहेष्ववस्थितः गृहस्थः प्रतिदिनं गृहोचिताः स्नानतर्पणसन्ध्योपासनपञ्चमहायज्ञादिरूपाः साक्षात् फलसंकल्पमन्तरेण वासुदेवार्पणं यथा भवति तथा कुर्वन् महामुनीन् भगवद्भक्तान् उपासीत सेवेत॥२॥ शृण्वन्निति युग्मम् ॥ यथाकालमावश्यककर्मानुष्ठानावशेषितं कालमुपशान्तजनैर्भगवद्भक्तैरावृतस्तेषां संगाद्भगवतोवतारकथामृतमभीक्ष्णं श्रद्दधानः सन्

नारद उवाच ॥ धर्मं पारमहंस्यं वै मुनेः श्रुत्वाऽसुरेश्वरः ॥ पूजयित्वा ततः प्रीत आमन्त्र्य प्रययौ गृहम् ॥ ४६ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे युधिष्ठिरनारदसंवादे प्रह्लादाय दत्तात्रेयेण पारमहंस्यधर्मवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ युधिष्ठिर उवाच ॥ गृहस्थ एतां पदवीं विधिना येन चाञ्जसा ॥ याति देवऋषे ब्रूहि मादृशो गृहमूढधीः ॥ १॥ नारद उवाच ॥ गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः॥ वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ २ ॥ शृण्वन् भगवतोऽभीक्ष्णमवतारकथाऽमृतम् ॥ श्रद्दधानो यथाकालमुपशान्तजनावृतः ॥ ३ ॥ सत्सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु ॥ विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥४॥ यावदर्थमुदासीनो देहे गेहे च पण्डितः॥ विरक्तो रक्तवत् तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ॥ यद् वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ॥ ६ ॥ दिव्यं भौमं चान्तरिक्षं वित्तमच्युतनिर्मितम् ॥ तत् सर्वमुपभुञ्जान एतत् कुर्यात्स्वतो बुधः ॥ ७ ॥

शृण्वन् कथाश्रवणकाले च वार्त्तान्तरमशृण्वन् इति मुच्यमानेषु स्वयमेव वियुज्यमानेषु आत्मजायात्मजादिषु देहकलत्रपुत्रादिषु संगमहं ममेत्यभिमानम् उत्थितः स्वप्नवत् शनकैर्विमुञ्चेत् यथा शयनादुत्थितः प्रबुद्धः पुरुषः स्वप्नदृष्टेषु पुत्रादिषु सङ्गं विमुञ्चति तद्वदित्यर्थः। तत्र तस्येवेति वतिः स्वप्नशब्देन स्वप्नदृष्टा लक्ष्यन्ते ॥३॥४॥ यावदिति ॥ यावतार्थः प्राणधारणं क्रियानिर्वाहश्च तावदेव भोग्यवस्तूनि उपासीनः स्वीकुर्वन् पण्डितः अन्तर्देहगेहादिषु विरक्तोपि बहिस्तत्र रक्तवत् आसक्तवत् नृलोके जनमध्ये नरतां मनुष्यत्वं न्यसेत् पुरुषकारमाविष्कुर्यात् ॥ ५ ॥ अन्तर्विरक्ततां बहिः संरक्ततां च स्पष्टयति—ज्ञातय इति ॥ ज्ञात्यादयो यद्वदन्ति यच्चेच्छन्ति तत्सर्वं स्वयं निर्ममः सन्ननुमोदेत क्वाप्याग्रहं न कुर्यात् अन्यथा कलहादिना विक्षेपः स्यात् ॥ ६ ॥ नन्वेव सर्वानुमोदनेन वित्तक्षये कुतो निर्वाह इत्याशंक्याह—दिव्यमिति ॥ दिव्यं वृष्ट्यादिभिर्जातं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धान्यादि भौमं भूम्यां लब्धं सुवर्णादि आन्तरिक्षमकस्मात्प्राप्तम् एवं स्वत एव यदच्युतेन भगवता स्वप्रारब्धानुसारेण निर्मितं वित्तं तत्सर्वमुपयुञ्जानः स्वीकुर्वन् बुधः एतत् प्राणधारणादिकं कुर्यात् ॥ ७ ॥ यावदिति ॥ यावत् यावता जठरमुदरं भ्रियेत पूर्येत तावदेव देहिनां स्वत्वं तावत्स्वीकारे न दोषः । यस्तु ततोधिकमभिमन्येत स्वकीयत्वेनाङ्गीकुर्यात् स स्तेनः चोर एव अतो जन्ममरणादिदुःखानुभवलक्षणं दण्डमर्हति ॥ ८ ॥ मृगेति ॥ मृगादीनपि आत्मनः पुत्रवत्पश्येत् यथा पुत्रान् पालयति सुखान्न निवारयति तथा मृगादीनपि गृहं क्षेत्रं वा प्रविश्य भुञ्जानान्न निवारयेत् यतः तैः पुत्रैः एषां मृगादीनामन्तरं तारतम्यं कियत् न किञ्चिदपि स्वैकाश्रितत्वेन तुल्यत्वादित्यर्थः । मर्को मर्कटः सरीसृप् सर्पादिः ॥ ९ ॥ त्रिवर्गमिति ॥ गृहस्थोप्यतिकृच्छ्रेण त्रिवर्गं धर्मार्थकामाख्यं न भजेत न सेवेत किं त्वल्पायासेन यथादेशं यथाकालं देशकालानुसारेण यावद्दैवेनोपपादितं तावदेव भजेत ॥ १० ॥ आश्वाघेति ॥ श्वानश्च अघाश्च पतिताः अन्तेवसायिनश्च चांडालादयस्तानभिव्याप्य यथायथार्हं कामान्संविभजेत् स्व-

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ॥ अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥ ८ ॥ मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः ॥
आत्मनः पुत्रवत् पश्येत् तैरेषामन्तरं कियत् ॥९॥ त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि ॥ यथादेशं यथाकालं यावद्दैवोपपादितम् ॥ १० ॥
आश्वाघान्तेऽवसायिभ्यः कामान् संविभजेद् यथा ॥ अप्येकामात्मनो दारान् नृणां स्वत्वग्रहो यतः ॥११॥ जह्याद् यदर्थे स्वप्राणान् हन्याद् वा
पितरं गुरुम् ॥ तस्यां स्वत्वं स्त्रियां जह्याद् यस्तेन ह्यजितो जितः ॥ १२॥ कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम् ॥ क्व तदीयरतिर्भार्या
क्वायमात्मा नभश्छदिः ॥ १३ ॥ सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद् वृत्तिमात्मनः ॥ शेषे स्वत्वं त्यजन् प्राज्ञः पदवीं महतामियात् ॥ १४ ॥

भोग्यात् विभज्य दद्यात् यतः यस्यां नृणां स्वत्वग्रहः।ममैवेयमित्याग्रहस्तामेकामप्यात्मनो दारामपि संविभजेत् आत्मनः सेवामनपेक्ष्यापि अतिथ्यादिशुश्रूषणे नियुंजीतेत्यर्थः। नान्यथा मन्तव्यं यथार्हं संविभजेदित्युक्तत्वात् दारशब्दस्यैकत्वं स्त्रीत्वं चार्षम् ॥ ११ ॥ जह्यादिति ॥ यदर्थे यन्निमित्तं स्वप्राणान् जह्यात् पितरं गुरुं वा हन्यात् तस्यां स्त्रियां यः स्वत्वं स्वकीयत्वाभिमानं जह्यात् त्यजेत् । अन्यैरजितोपि भगवांस्तेन जितो वशीकृतो भवति तत्प्रसादात्तस्य न किंचिद्दुर्लभमित्यर्थः ॥ १२ ॥ भार्यायां स्वत्वाभिमानत्यागे तत्वविचारमाह—कृमीति ॥ कृमिविड्भस्मसु निष्ठा पर्यवसानमन्ते यस्य तदिदं तुच्छं कलेवरं क्व तदीया देहार्था रतिर्यस्यां सा भार्या क्व स्वानन्दे न नभोऽपि छादयतीति तथायमात्मा क्व तथा च देहत्रयादावभिमानत्यागे आत्मानन्दो लभ्यतेऽतस्तत्राभिमानं त्यजेत् ॥ १३ ॥ सिद्धैरिति ॥ सिद्धैर्दैवलब्धैरन्नादिभिः शेष उदरभरणप्रमिताधिके स्वत्वाभिमानं त्यजन् यः प्राज्ञो विवेकी आत्मनो वृत्तिं कल्पयेत् स महतां निवृत्तानां परमहंसानां पदवीमियात्प्राप्नुयात् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवानिति ॥ देवान् ऋषीन् नॄन् मनुष्यान् भूतानि पितॄंश्च पञ्चमहायज्ञदेवताः आत्मानं च स्ववृत्त्या याजनाध्यापनादिरूपया पूर्वोक्तया आगतेनोपार्जितेन वित्तेन पृथगन्वहम- हरहर्यजन् पुरुषं सर्वान्तर्यामिणमेव यजेत ॥ १५ ॥ यर्हीति ॥ यर्हि आत्मनः स्वस्य अधिकाराद्याः सर्वाः यज्ञसंपदः स्युस्तदा वैतानिकेन वितानो यज्ञग्रन्थः श्रौतकल्पसू- त्रादिरूपस्तदुक्तेन विधिनाऽग्निहोत्रादिना पुरुषं यजेत् ॥ १६ ॥ नहीति ॥ हे राजन् हि यस्मात् सर्वयज्ञभुक् सर्वयज्ञभागभोक्ता तत्फलदातायं भगवान् श्रीकृष्णो यथा विप्रमुखे हुतैर्घृतान्नादिभिरिज्यते पूज्यते संतुष्यति तथाऽग्निमुखे हुतैर्हविर्भिः नैवेज्यते नैव संतुष्यति ॥ १७ ॥ तस्मादिति ॥ तस्मात् ब्राह्मणेषु देवेषु च पंचमहायज्ञदेवतासु तथा ब्राह्मणाननु ब्राह्मणेषु यजनानन्तरमन्येषु मर्त्यादिषु पश्वादिषु च यथार्हतः यथाशक्ति तैस्तैः कामैर्विषयैरेनं यज्ञभोक्तारं क्षेत्रज्ञं सर्वान्तर्यामिणं यजस्व ब्राह्मणाननमितिपाठे तु ब्राह्मणा आननं यस्य तमेनं क्षेत्रज्ञम् ॥ १८ ॥ कुर्यादिति ॥ द्विजस्त्रैवर्णिको यदि वित्तवांस्तदा यथावित्तं स्ववित्तानुसारेण प्रौष्ठपदे शुक्लादिमानेन भाद्रपदे मासि कृष्णादि-

देवान् ऋषीन् नृभूतानि पितॄनात्मानमन्वहम् ॥ स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥ १५॥ यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः ॥
वैतानिकेन विधिना अग्निहोत्रादिना यजेत्॥१६॥न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक् ॥ इज्यते हविषा राजन् यथा विप्रमुखे हुतैः॥१७॥
तस्माद् ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः ॥ तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु ॥१८॥ कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः॥श्राद्धं पित्रो-
र्यथावित्तं तद्बन्धूनां च वित्तवान् ॥१९॥ अयने विषुवे कुर्याद् व्यतीपाते दिनक्षये ॥चन्द्रादित्योपरागे च द्वादशीश्रवणेषु च ॥२०॥ तृतीयायां
मासि शुक्ले नवम्यामथ कार्त्तिके ॥ चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥२१॥ माघे च सितसप्तम्यां मघाराकासमागमे ॥राकया चानुमत्या
वा मासर्क्षाणि युतान्यपि ॥ २२ ॥ द्वादश्यामनुराधा स्याच्छ्रवणस्तिस्र उत्तराः ॥ तिसृष्वेकादशी वाऽऽसु जन्मर्क्षं श्रोणयोगयुक् ॥ २३ ॥

मानेनाश्विने इत्यर्थः । पित्रोस्तद्बन्धूनां चापरपक्षीयं कृष्णपक्षीयं श्राद्धं महालयाख्यं कुर्यात् ॥ १९॥ अयने इति चतुष्कम्॥ अयनादिकालेषु पित्रादिश्राद्धं कुर्यादित्यन्वयः। एवमग्रेपि तत्र अयनं कर्कटसंक्रान्तिः मकरसंक्रान्तिश्च विषुवं मेषसंक्रान्तिस्तुलासंक्रान्तिश्च व्यतीपातदिने दिनक्षये तिथिक्षयदिने चन्द्रादित्योपरागे चन्द्रसूर्यग्रहणसमये द्वाद- श्यां श्रवणेषु श्रवणादिषु त्रिषु शुक्लपक्षे तृतीयायां वैशाखशुक्लपक्षे अक्षयतृतीयायामित्यर्थः । कार्त्तिके शुक्लपक्षे नवम्यामक्षयनवम्याम् हेमन्ते शिशिरे च मार्गशीर्षादिमासच- तुष्टयेपि याश्चतस्रोष्टकास्तासु अष्टकासु " सप्तम्यादित्रयं चैव तथा चैव त्रयोदशी । चतस्रस्त्वष्टकाः प्रोक्ताः सर्वयज्ञाद्विशेषतः " ॥ इतिवचनाज्ज्ञेयाः । माघे च सितसप्तम्यां शुक्लसप्तम्यां सम्पूर्णचन्द्रा पौर्णमासी राका मघाराकयोः समागमे एककलान्यूनचन्द्रा पौर्णमासी अनुमतिः यदा राकानुमतिभ्यां युतानि मासर्क्षाणि मासनामप्रवृत्तिनिमित्तानि चैत्रादिपूर्णमासीषु चित्रादीनि नक्षत्राणि तदापीत्यन्वयः । यदा च द्वादश्यामनुराधाश्रवणः उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा चेति तिस्र उत्तराः स्युः आसु तिसृषूत्तरासु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशी वा यदा स्यात् जन्मर्क्षं स्वीयजन्मनक्षत्रं तस्य श्रोणस्य श्रवणस्य वा योगेन युक्तं यद्दिनं स्यात्तदपि कुर्यात् योगग्रहणं संबन्धबाहुल्यार्थम् अत्र भागवताः एकादशी चात्र दशमीविद्धा उपवासानर्हा ग्राह्या उक्तं च उपवासार्हायां तु श्राद्धनिषेधः "ये कुर्वन्ति महीपाल श्राद्धं चैकादशीदिने । त्रयस्ते नरकं यान्ति दाता भोक्ता च प्रेरकः" इति । धर्मशास्त्रे तु एकादश्यां श्राद्धं कृत्वा श्राद्धशेषं जिघ्रेत् इत्यादि ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ त इति ॥ एते पूर्वोक्ताः अयनादयः न केवलं श्राद्धस्यैवकालाः अपि तु नृणां श्रेयसः पुण्यमात्रस्य कालाः अनुष्ठानस्य योग्याः कालाः यतः श्रेयो विवर्द्धनाः एतेषु स्वल्पमप्यनुष्ठितं साधनं महाफलं जनयति तस्मात् एतेषु कालेषु सर्वात्मना सर्वप्रयत्नेन श्रेयः वक्ष्यमाणं स्नानादिकं कुर्यात्तदा तस्यायुषः अमोघममोघत्वं साफल्यं भवति ॥ २४ ॥ एष्विति ॥ एषु कालेषु यत्स्नानादिकृतं यच्चापि पित्राद्युद्देशेन दत्तं भावेकः । दानं कृतं तद्धि अनश्वरमक्षयफलसाधनं भवतीत्यर्थः ॥ २५ ॥ संस्कारेति ॥ हे नृप यः जायादिसंस्कारस्य कालः यदा च प्रेतसंस्था प्रेतदाहादिकर्म यश्च मृताहस्तदा

त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः ॥ कुर्यात् सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥ २४ ॥ एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ॥ पितृदेवनृभूतेभ्यो यद् दत्तं तद् ह्यनश्वरम् ॥ २५ ॥ संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ॥ प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥ २६ ॥ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेय आवहान् ॥ २७ ॥ स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥ बिम्बं भगवतो यत्र सर्वमेतच्चराचरम् ॥ यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितम् ॥ ॥ २८ ॥ यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ॥ यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥ २९ ॥

अन्यस्मिन्नप्यभ्युदयार्थे कर्मणि यत्कृतं स्नानादिसाधनं तदनश्वरमिति पूर्वेणैवान्वयः । तत्र जायायाः संस्कारः पूंसवनादिः अपत्यसंस्कारो जातकर्मादिः आत्मनः स्वस्य संस्कारो यज्ञोपवीतादिः ॥ २६ ॥ अथेति अर्द्धं स्पष्टम् ॥ २७ ॥ सर्वे इति सार्द्धम् ॥ यत्र सत्पात्रं लभ्यते स देशः पुण्यतमः यत्र सर्वमेतच्चराचरं जगत् तिष्ठति तद्भगवतो बिम्बं मूर्तिर्यत्र लभ्यते स देशः पुण्यतमः । यद्वा । यत्र यस्मिन्नेतच्चराचरमस्ति तस्य भगवतो बिम्बरूपं सत्पात्रं यत्र लभ्यते स पुण्यतमो देशः यत्र च तपोविद्यादयान्वितं ब्राह्मणकुलं सोपि देशः पुण्यतमः स्वल्पसाधनानुष्ठानेन महापुण्यकरो देशः अत्र चक्रवर्त्ती सन् साधुश्चासौ पात्रं च तच्च कीदृशम् यत्र चराचरमेतज्जगत् तस्य भगवतो बिम्बं बिम्बतुल्यमित्यर्थः । प्रतिमा हि प्रतिबिम्बरूपा इति तस्याः सकाशादपि भक्तस्योत्कर्ष इत्याह ॥ २८ ॥ यत्रेति ॥ यत्र यत्र हरेरर्चा पूजा आराधनं भवति भक्तास्तिष्ठति अर्चा शालग्रामादिप्रतिमा वा यत्र च पुराणेषु प्रसिद्धा गङ्गादयो नद्यः संति स देशः श्रेयसां पुण्यानुष्ठानानां पदं स्थानम् ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

सरांसीति सार्द्धचतुष्कम् ॥ पुष्करादीनि सरांसि अर्हैः मुन्यादिभिराश्रितानि क्षेत्राणि कुरुक्षेत्रं गयशिरः गयपतनस्थानगयासुरशिरः यागः गङ्गायमुनयोः सङ्गस्थानं पुलहाश्रमः सालग्रामक्षेत्रं नैमिषं फाल्गुनं सेतुः श्रीरामनिबद्धः सेतुः प्रभासः शङ्खोद्धारतीर्थविशेषः कुशस्थली द्वारवती वाराणसी काशी मधुपुरी मथुरा पम्पाख्यं सरः बिन्दुसरः कर्दमाश्रमः नारायणाश्रमः नन्दा नदी सीताया रामस्य चाश्रमश्चित्रकूटाद्रिरादिर्येषां ते द्वयोः पृथग्ग्रहणं वियोगकालाभिप्रायेण हे राजन् महेन्द्रादयश्च ये सर्वे कुलाचलाः श्रेष्ठपर्वतास्ते हरेरर्चा स्थिरप्रतिमा श्रीजगन्नाथादि तदाश्रिता उत्कलादयः बिम्बं भगवतो यत्रेति यत्र यत्र हरेरचैंति हरेरर्चा श्रिताश्चेति त्रिरुक्तिर्देशानां पुण्यजनकत्वे भगवन्मूर्त्तेः प्राधान्यद्योतनार्था श्रेयस्कामः पुमान् अभीक्ष्णशः पुनः पुनरेतानेव देशान्नितरां सेवेत तत्र हेतुमाह—धर्मइति ॥ पुंसां यत्फलसाधनत्वेन यो धर्म उदितः स हि यस्मात् अत्र एषु देशेषु ईहितः अनुष्ठितः सहस्रगुणमधिकस्य फलस्योदयो यस्मात् तादृशो भवति ॥३०॥३१॥३२॥३३॥ पात्रमिति ॥ हे उर्वीश पात्रवित्तमैः कविभिः

सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत॥ कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः॥३०॥नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली॥वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥३१॥ नारायणाश्रमो नन्दा सीतारामाश्रमादयः ॥ सर्वे कुलाचला राजन्महेन्द्रमलयादयः ॥३२॥ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ॥ एतान् देशान् निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥३३॥ हरिरेवैक उर्वीश यन्मयं वै चराचरम् ॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः॥३४॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ॥ राजन्यदग्रपूजायां मतःपात्रतयाच्युतः ॥३५॥ जीवराशिभिराकीर्णं आण्डकोशाङ्घ्रिपो महान् ॥ तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥३६॥ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ॥ शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ॥३७॥ तेष्वेषु भगवान्राजंस्तारतम्येन वर्तते॥तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते॥३८॥

विवेकिभिरेको हरिरेवात्र लोके पात्रं निरुक्तं पात्रतया सर्वपूज्यतया निर्णीतः वै यतः चराचरं सर्वं विश्वं यन्मयमेवेत्यर्थः ॥ ३४ ॥ तत्रहेतुः—देवेति ॥ हे राजन् देवेषु ऋषिषु अर्हत्सु तपोयोगादिसिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीयराजसूये यत् यस्मात् पात्रतयाऽग्रपूजायामच्युतः श्रीकृष्ण एवमतः सर्वसंमतो जातः ॥ ३५ ॥ जीवेति ॥ जीवानां राशिभिराकीर्णः व्याप्तोयं महान् ब्रह्माण्डकोष एवाङ्घ्रिपो वृक्षस्तस्य मूलत्वादच्युतेज्यैव सर्वजीवानामात्मनश्च तर्पणं पूजा भवति ॥ ३६ ॥ एतदेव पुरुषनामनिरुक्त्या द्रढयति—पुराणीति ॥ अनेन भगवता मनुष्यादिशरीरात्मकानि पुराणि सृष्टानि तेषु पुरेषु हि यस्मात् जीवरूपेणान्तर्यामिरूपेण च स्वयमेव शेते तस्मादसौ पुरुष इति प्रसिद्धः ॥ ३७ ॥ तेष्विति ॥ हे राजन् तेषु एषु देवमनुष्यतिर्यगादिषु तारतम्येन अधिकन्यूनभावेन वर्तमानो भगवान् तिर्यगादिभ्यः पुरुषे आधिक्येन वर्तते तस्मात् पुरुषः पात्रं तत्रापि यत्र यत्र यथा यथा तप आधिक्ययोगे यावानात्मज्ञानवैराग्याद्यंशः यथा यथा तपआदियोगेन यत्र यत्र ईयते प्रतीयते तत्र तत्र तथा तथाऽसौ पात्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति मन्तव्यमित्यर्थः। तथाच श्रुतिः "पुरुषत्वे चाविस्तरामात्माइत्यादि"॥३८॥ दृष्ट्वेति ॥ हे नृप त्रेतादिषु कालेषु तेषां नृणां मिथोवज्ञानं तिरस्कारस्तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा परस्परसन्मानाभावेन भगवदाराधनाभावान्न कोपि पुरुषार्थः। सिद्ध्येदिति हरेः क्रियायै पूजार्थं कविभिरर्चा प्रतिमा कृता कल्पिता ॥ ३९ ॥ तत इति ॥ ततश्च केचित् संश्रद्धाय श्रद्धां कृत्वार्चायां महत्या सपर्यया पूजासामग्र्या हरिमुपासते तत्रापि पुरुषद्विषां पुरुषद्वेषिणां तैरुपास्ता आराधितापि इडभाव आर्षः। प्रतिमानार्थदा पुरुषार्थदा न भवति पुरुषेषु द्वेषं हित्वाऽर्चिता सती सापि मन्दाधिकारिणां पुरुषार्थदा भवत्येव॥४०॥पुरुषेष्वपि जात्या तपआदिभिश्च श्रैष्ठ्यमाह—पुरुषेष्वपीति ॥ पुरुषेष्वपि यस्तपसा विद्यया विचारेण तुष्ट्या दैवलब्धसंतोषेण च हरेस्तनुं वेदं धत्ते तं ब्राह्मणं सुपात्रं विदुः ॥ ४१ ॥ नन्विति ॥ ननु निश्चयेन हे राजन् स्वपादरजसा त्रिलोकीं पुनन्तः पवित्रीकुर्वंतो ब्राह्मणाः जगदात्मनः श्रीकृष्णस्यापि महद्दैवतं किमुतान्येषामस्मद्विधानां ते दैवतमिति वक्तव्यमित्यर्थः ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥

दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ॥ त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ३९ ॥ ततोऽर्चायां हरिं केचित् संश्रद्धाय सपर्यया ॥ उपासत उपास्तापि नार्थदा पुरुषद्विषाम् ॥४०॥ पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः ॥ तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥४१॥ नन्वस्य ब्राह्मणा राजन्कृष्णस्य जगदात्मनः ॥ पुनन्तः पादरजसा त्रिलोकीं दैवतं महत् ॥ ४२ ॥ इति श्रीभागवते महापुराणे सप्तमस्कन्धे सदाचारनिर्णये चतुर्दशोऽध्यायः ॥ १४ ॥ नारद उवाच ॥ कर्मनिष्ठा द्विजाः केचित् तपोनिष्ठा नृपापरे ॥ स्वाध्यायेऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ॥ १ ॥ ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता ॥ दैवे च तदभावे स्यादितरेभ्यो यथाऽर्हतः ॥ २ ॥ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत् सुसमृद्धोपि श्राद्धे कुर्यान्न विस्तरम् ॥ ३ ॥

गंगासहायोरचयत्सप्तमस्य चतुर्दशे ॥१४॥ पंचदशे सर्ववर्णाश्रमाणां धर्मसंग्रहः ॥ मोक्षकारणमप्यत्र श्लोका भूमिर्गजा मताः ॥ अनुष्टुभः पंचर्नागा उवाचेति द्वयं मतम् ॥१५॥ अथ सर्वेषां मोक्षधर्माणां सारसंग्रहार्थमध्यायारम्भः—कर्मेति ॥ हे नृप द्विजाः त्रैवर्णिकाः केचित् गृहस्थाः स्ववर्णाश्रमोचितकर्मनिष्ठाः केचित् वानप्रस्था अनशनादितपोनिष्ठाः अपरे ब्रह्मचारिणः स्वाध्यायाध्ययने प्रवचने अध्यापने च परिनिष्ठिताः केचन संन्यासिनो ज्ञानयोगयोः परिनिष्ठिताः ज्ञानं यथार्थात्मज्ञानं योगो भगवद्ध्यानम् ॥ समासान्तर्वर्त्तिनाप्यर्थवशादनुवर्त्तितेन निष्ठापदेन निष्ठावन्तो लक्ष्यन्ते सर्वेषु यथोत्तरं श्रेष्ठ्यं ज्ञेयम् ॥ १ ॥ ज्ञानेति ॥ दत्तस्यानन्त्यं पितृणामात्मनश्च मोक्षरूपं वा फलमिच्छता पुरुषेण कव्यानि पितॄनुद्दिश्य श्राद्धादीनि तथा दैवे च कर्माणि देवानुद्दिश्य हव्यानि द्रव्याणि वा ज्ञाननिष्ठाय देयानि तस्य ज्ञाननिष्ठस्याभावे इतरेभ्यः कर्मनिष्ठादिभ्यो यथार्हतः यथायोग्यं ज्ञानादितारतम्यानुसारेण देयानि ॥ २ ॥ द्वाविति ॥ सुसमृद्धोपि दैवे विश्वेदेवस्थाने द्वौ ब्राह्मणौ भोजयेत् पितृकार्ये पितॄनुद्दिश्य त्रीन् ब्राह्मणान् भोजयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभयत्र द्वयोरपि कार्ययोरेकैकं वा ब्राह्मणं भोजयेत् श्राद्धे विस्तरं भोक्तृबाहुल्यं न कुर्यात् घञभाव आर्षः ॥ ३ ॥ तत्रहेतुः—देशेति ॥ स्वजनार्पणात् जामातानिमंन्त्रितश्चे-त्तद्भ्रात्रादयः कथं वर्ज्या इत्येवं प्राप्ताद्विस्तरात् देशकालौ प्रागुक्तौ उचिता श्रद्धा तदुत्साहः उचितं द्रव्यमन्नवस्त्रादिपात्रं प्रागुक्तम् अर्हणं पूजनं तान्येतानि विस्तरात्सम्यक् यथायोग्यं न भवनि ॥ ४ ॥ देशे इति ॥ पुण्यदेशे पुण्यकाले च संप्राप्ते मुन्यन्नमारण्यं नीवारादिहरिदैवतं हरये निवेदितं सत् श्रद्धया उत्साहेन विधिवत्सत्कारपूर्वकं पात्रे बुभुक्षिते न्यस्तं सकामं प्रतिकामधुक् मनोरथपूरकं निष्कामं प्रति तु अक्षयमक्षयमोक्षफलकं भवति ॥ ५ ॥ देवेति ॥ देवादिभ्यः आत्मने स्वजनाय स्वबन्धुवर्गाय च स्वान्नं विभजन् तद्देवादिकं सर्वं प्राणिजातं पुरुषात्मकं भगवत्स्वरूपं पश्येत् ॥ ६ ॥ नेति ॥ धर्मस्य तत्वं यथार्थस्वरूपं वेत्तीति तथा विद्वान् श्राद्धे पित्राद्युद्देशेन आमिषं मांसं न दद्यात् नच मांसं स्वयमप्यद्यात् अश्नीयात् मुन्यन्नैर्हिंसारहितैः यथा पित्रादीनां भगवतश्च परा उत्कृष्टा प्रीतिः स्यात् तथा पशुहिंसया न स्यात् ॥ ७॥ नेति ॥ यः सर्वभूतेषु

देशकालोचिता श्रद्धा द्रव्यपात्रार्हणानि च ॥ सम्यग् भवन्ति नैतानि विस्तरात् स्वजनार्पणात् ॥ ४ ॥ देशे काले च संप्राप्ते मुन्यन्नं हरिदैवतम् ॥ श्रद्धया विधिवत् पात्रे न्यस्तं कामधुगक्षयम् ॥ ५ ॥ देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ॥ अन्नं संविभजन् पश्येत् सर्वं तत्पुरुषात्मकम् ॥ ६ ॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ॥ मुन्यन्नैः स्यात् परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम् ॥ न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य सः ॥ ८ ॥ एके कर्ममयान् यज्ञान् ज्ञानिनो यज्ञवित्तमाः ॥ आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ॥ एष माऽकरुणो हन्याद-तज्ज्ञो ह्यसुतृप् ध्रुवम् ॥ १० ॥ तस्माद् दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् ॥ संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः ॥ ११ ॥ विधर्मः परधर्मश्च आभास उपमा छलः ॥ अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत् त्यजेत् ॥ १२ ॥

मनोवाक्कायजन्यस्य दण्डस्य हिंसादिपीडायास्त्यागः संन्यासौ धर्मश्च तमुत्कृष्टं धर्ममिच्छतां नृणामेतादृश उत्कृष्टः परो धर्मो नास्ति ॥ ८ ॥ अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजन्तीत्याह—एक इति ॥ अनीहा निष्कामा एके केचित् ज्ञानिनो धर्मरहस्यं जानन्तः यज्ञवित्तमाः यज्ञयाथात्म्यविदः कर्ममयान् पशुपुरोडाशादिद्रव्यकान् यज्ञान् ज्ञानदीपिते आत्मस्फूर्तिमति आत्मनो मनसः संयमनं वशीकारस्तास्मिन् योगाग्नौ जुह्वति मनो नियम्येतस्यान्तरायतया त्यजन्ती ॥ ९ ॥ द्रव्येति ॥ पशुपुरोडाशादिद्रव्ययज्ञैर्य-क्ष्यमाणं पुरुषं दृष्ट्वा भूतानि पश्वादीनि कर्तॄणि एषः यष्टा अकरुणः निर्दयः अतज्ज्ञः धर्मरहस्यानभिज्ञः असुतृप् स्वप्राणपोषकः एष मा मां ध्रुवं हन्यात् इति बिभ्यति ॥ १० ॥ तस्मादिति ॥ सर्वत्र सन्तुष्टः भूतान्यहिंसन्नित्यर्थः । शेषं स्पष्टम् ॥ ११ ॥ विधर्म इति ॥ यत इमाः पञ्चविधर्मादयः अधर्मवृक्षस्य शाखाभूतास्ततो धर्मज्ञः अधर्मवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षान्निषिद्धवत् त्यजेत् उपमा उपधर्मः ॥१२॥ ता व्याचष्टे—धर्मबाध इति ॥ धर्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्मस्य बाधः स्यात् सः वामाचारादिर्विधर्म इत्यर्थः । अन्यस्य क्षत्रियादेश्चोदितो विहितो यो धर्मः युद्धादिः सोन्यस्य ब्राह्मणादेः परधर्म इत्यर्थः । उपमेत्यस्यानुवादः उपधर्मस्त्विवति तस्य व्याख्यानम् पाखण्डः वेदविरुद्धागमोक्तो धर्मः दम्भो वा परवञ्चनार्थो वा धर्मः उपधर्म इत्यर्थः । शब्दस्य भित् भेदः अन्यथा व्याख्यानं यस्मिन् सः छलः स्यात् यथा दशावरान्भोजयेदित्युक्ते विवक्षितं बहुव्रीहिं त्यक्त्वा तत्पुरुषेण दशसंख्याकेभ्योऽवरान् नवाष्टादीन् इति शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गां दद्यादित्युक्ते मरिष्यन्त्या गोर्दानम् ॥१३॥ यस्त्विवति ॥ यस्तु पुंभिः स्वेच्छया चतुर्भ्य आश्रमेभ्यः पृथगवधूताद्याश्रमः कल्पितः स आभासः तस्मात् ब्राह्मणत्वादिस्वभावेन विहितो यः पूर्वोक्तोध्ययनयागादिर्धर्मः स कस्य प्रशान्तये दुःखविनाशाय नेष्टः न समर्थः अपि तु स एव तत्र समर्थ इत्यर्थः । कल्पतेस्योपशान्तये इति तु पाठान्तरम् ॥१४॥ धर्मेति ॥ अधनो निर्धनः पुमान् स्वधर्मार्थं यात्रार्थं स्वदेहधारणार्थं वापि धनं नेहेत नेच्छेत् धनार्थं न चेष्टेतेति वार्थः । अनीहमानस्य देहयात्रार्थं धनार्थमपि चेष्टामकुर्वतः, पुंसः महाहेः अजगरस्य अनीहा क्रियानिवृत्युपलक्षितदै-

धर्मबाधो विधर्मः स्यात् परधर्मोऽन्यचोदितः ॥ उपधर्मस्तु पाखण्डो दम्भो वा शब्दभिच्छलः ॥ १३ ॥ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात् पृथक् ॥ स्वभावविहितो धर्मः कस्य नेष्टः प्रशान्तये ॥ १४ ॥ धर्मार्थमपि नेहेत यात्राऽर्थं वाऽधनो धनम् ॥ अनीहानीहमानस्य महाहेरिव वृत्तिदा ॥ १५ ॥ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत् सुखम् ॥ कुतस्तत् कामलोभेन धावतोऽर्थेहया दिशः ॥ १६ ॥ सदा संतुष्टमनसः सर्वाः सुखमया दिशः ॥ शर्कराकण्टकादिभ्यो यथोपानत्पदः शिवम् ॥१७॥ संतुष्टः केन वा राजन् न वर्तेतापि वारिणा ॥ औपस्थ्यजैह्वयकार्पण्याद्‌ गृहपालायते जनः ॥ १८ ॥ असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशः ॥ स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवावकीर्यते ॥ १९ ॥

वशब्दवाच्यं प्रारब्धमेव वृत्तिदा जीविकासंपादिकेत्यर्थः । यथा अनीहमानस्याप्यजगरस्यानीहैव यथा जीविकासंपादिका भवति तथेत्यर्थः ॥१५॥ संतुष्टस्येति ॥ दैवलब्धेन संतुष्टस्य अत एव निरीहस्य निरुद्यमस्य निष्कामस्य वा स्वात्मारामस्य यत्सुखं भवति तत्सुखं काम्यन्ते इति कामाः शब्दादयो विषयास्तल्लोभेन दश दिशः प्रति धावतो भ्राम्यतः पुंसः कुतः स्यात् ॥ १६ ॥ सदेति ॥ सदा सन्तुष्टमनसो जनस्य सर्वा दिशः सर्वे देशाः सुखमयाः सुखप्रचुरा एव ङीबभाव आर्षः । यथा उपानहौ पादयोर्यस्य तस्य शर्कराकण्टकादिभ्यः शिवम् व्यथाभावः तथा ॥ १७॥ संतुष्ट इति ॥ हे राजन् संतुष्टो जनः वारिमात्रेणापि केन हेतुना न वर्तेत अपितु वारिणापि वर्तेतैव। यद्वा । दैवलब्धेन संतुष्टो जनः केन वा न वर्त्तेत अपितु वारिणापि वर्तेत औपस्थ्यजैह्वयकार्पण्यात् उपस्थाजिह्वाजन्यसुखार्थदैन्यान्निमित्तात् जनः गृहपालायते गृहपालः श्वाः तद्वदाचरतीत्यर्थः ॥ १८ ॥ असंतुष्टस्येति ॥ असंतुष्टस्य विप्रस्येन्द्रियाणां लौल्येन विषयासक्त्या तेज आदयः स्रवन्ति क्षीयन्ते ज्ञानं विवेकश्चावकीर्यतेऽपगच्छत्येवेत्यन्वयः ॥१९॥

Nepal Sanskrit University, Valmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

कामस्येति ॥ अन्नजलविषयककामस्यान्तं क्षुत्तृड्भ्यां निवृत्ताभ्यां याति । यद्वा । स्रक्चन्दनवनितादिविषयस्य कामस्यान्तं क्षुत्तृड्भ्यामुत्पन्नाभ्यां याति ताभ्यां व्याप्तस्यान्नोदकव्यतिरिक्तविषयककामाभावात् क्रोधस्याप्यन्तमेतस्य क्रोधस्य यत्फलं परपीडादिरूपं तस्योदयान्निष्पत्तेः जनो याति लोभस्यान्तं तु दिशो जित्वापि भुवो भुक्त्वापि जनो नैव याति ॥ २० ॥ पण्डिता इति ॥ हे राजन् बहवः पण्डिताः शास्त्रज्ञाः बहुज्ञाः बहुविधलौकिकाभिज्ञाः अत एव परस्यापि संशयान् च्छिन्दन्तीति तथा अत एव सदसः सभायाः पतयोऽप्येके जनाः असन्तोषाद्धेतोरधो नरके पतन्ति असन्धिरविवक्षणात् ॥ २१ ॥ कामादिजयोपायमाह—असंकल्पादिति ॥ असंकल्पात् भोगार्हता बुद्धिवर्जनात् कामं विषयस्पृहां जयेत् । यद्वा । स्त्रीविषयकसंकल्पवर्जनात्कामं जयेत् क्रोधं तु कामविवर्जनात् जयेत् कामस्य क्रोधहेतुत्वात् कामाभावे क्रोधासंभवात् लोभं त्वर्थस्य तत्तत्पदार्थस्यानर्थेक्षया अनर्थहेतुत्वानुसंधानेन जयेत् भयं तु तत्वावमर्शनात् "नैनं छिन्दन्ति शस्त्राणि" इत्याद्यात्मतत्वविचारादद्वैतानुसन्धानाद्वा जयेत् ॥ २२ ॥ आन्वीक्षिक्येति ॥ आन्वीक्षिक्या आत्मानात्मविवेकेन शोकमोहौ जयेत् आत्मनोऽजातत्वेन विनाशाभावात् अनात्मनो देहादेर्जातत्वेन विनाशस्यावश्यकत्वादुभयत्रापि न

कामस्यान्तं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् ॥ जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥ २० ॥ पण्डिता बहवो राजन् बहुज्ञाः संशयच्छिदः ॥ सदसस्पतयोऽप्येके असंतोषात् पतन्त्यधः ॥ २१ ॥ असंकल्पाज्जयेत् कामं क्रोधं कामविवर्जनात् ॥ अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ २२ ॥ आन्वीक्षिक्या शोकमोहौ दम्भं महदुपासया ॥ योगान्तरायान् मौनेन हिंसां कायाद्यनीहया ॥ २३ ॥ कृपया भूतजं दुःखं दैवं जह्यात् समाधिना ॥ आत्मजं योगवीर्येण निद्रां सत्वनिषेवया ॥ २४ ॥ रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ॥ एतत् सर्वं गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत ॥ २५ ॥ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ॥ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुञ्जरशौचवत् ॥ २६ ॥

शोकमोहावकाश इति भावः । दम्भं तु परप्रतारणात्मकं महतां सात्विकानामुपासया सेवया जयेत् योगस्यान्तरायान् विघ्नभूतान् वृथा लौकिकवार्तादिकांस्तु मौनेन तूष्णींभावेन जयेत् कायाद्यनीहया धर्मकामार्थदेहादिचेष्टाराहित्येन हिंसां जयेत् ॥ २३ ॥ कृपयेति ॥ भूतजं येभ्यो भूतेभ्यः स्वस्य दुःखमुत्पत्स्यते तेष्वेव कृपया हिताचरणेन जयेत् दैवं देवोपसर्गनिमित्तं दुःखं समाधिना प्रारब्धजमिदमनिवार्यमिति मनः समाधानेन जह्यात् त्यजेत् आत्मजं देहजं व्याध्यादिरूपं योगवीर्येण प्राणायामादिबलेन जयेत् निद्रां सत्वनिषेवया सात्विकाहारादिनियमेन जयेत् ॥ २४ ॥ रज इति ॥ रजस्तमश्च सत्वेन जयेत् सत्वं च उपशमेन आसक्तिराहित्येन जयेत् एतत्कामादिकं गुरौ भक्त्या पुरुषोऽञ्जसा अनायासेनैव साधनसंपत्त्या जयेत् ॥ २५ ॥ यस्येति ॥ यस्य पुरुषस्य साक्षाद्भगवद्रूपे ज्ञानरूपदीपप्रदे गुरौ मर्त्यासद्धीः अस्मत्सदृशो मर्त्य एवासावित्यसती बुद्धिस्तस्य श्रुतं शास्त्राध्ययनादिकं सर्वं कुञ्जरशौचवत् यथा कुञ्जरस्य स्नानं पुनर्धूलिप्रक्षेपेण कृतमप्यकृतवद्व्यर्थं भवति तथा व्यर्थमिति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु गुरोरपि पुत्रादयस्तं नरमेव मन्यन्ते तत्राह–एष इति ॥ यथा एष श्रीकृष्णः प्रधानपुरुषयोरीश्वरो नियंता अत एव योगेश्वरैरप्यस्मदादिभिर्विमृग्यौ ध्येयावङ्घ्री पादौ यस्य स साक्षाद्भगवानेव तथापि तत्स्वरूपानभिज्ञोयं लोकः एनं नरं मन्यते तथैव गुरुरपि भगवानेवेति ॥ २७ ॥ षड्वर्गेति ॥ सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः विधिभिरनुष्ठापिता धर्माः पञ्च ज्ञानेन्द्रियाणि मनश्चैकमिति षड्वर्गस्तस्य यः संयमो वशीकारस्तस्मिन्नेवैकस्मिन्नन्तो यासां तदेकपरा इत्यर्थः । ततस्तास्तदन्ताः तदेकपराः सत्योपि यदि योगान् भगवद्धारणाध्यानसमाधीन् नो आवहेयुः न साधयेयुस्तर्हि केवलं श्रमावहाः श्रमफला एव जाता इत्यर्थः ॥ २८ ॥ यथेति ॥ हीति प्रसिद्धौ यथा वार्तादयः कृष्यादयः अर्थास्तत्फलानि च योगस्यार्थं मोक्षं न बिभ्रति न साधयन्ति अतोऽनर्थाय संसारायैव भवेयुः जीवनहेतवोपि परमार्थसाधका न भवन्ति तथा असतो भगवद्विमुखस्य पूर्तमिष्टं च तदादयोपि लोकप्रसिद्धिहेतवोपि परमार्थसाधका न भवन्ति ॥ २९ ॥ य इति ॥ यश्चित्तस्य विजये यत्त उद्युक्तः स्यात्स निःसङ्गः स्यात्कुटुम्बादि परित्य-

एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ॥ योगेश्वरैर्विमृग्याङ्घ्रिर्लोको वै मन्यते नरम् ॥ २७ ॥ षड्वर्गसंयमैकान्ताः सर्वा नियमचोदनाः ॥
तदन्ता यदि नो योगानावहेयुः श्रमावहाः ॥ २८ ॥ यथा वार्त्तादयो ह्यर्था योगस्यार्थं न बिभ्रति ॥ अनर्थाय भवेयुस्ते पूर्तमिष्टं तथासतः
॥ २९ ॥ यश्चित्तविजये यत्तः स्यान्निःसङ्गोऽपरिग्रहः ॥ एको विविक्तशरणो भिक्षुर्भिक्षामिताशनः ॥ ३० ॥ देशे शुचौ समो राजन् संस्थाप्यासनमात्मनः ॥ स्थिरं समं सुखं तस्मिन्नासीतर्ज्वङ्ग ओमिति ॥ ३१॥ प्राणापानौ सन्निरुन्ध्यात् पूरकुम्भकरेचकैः ॥ यावन्मनस्त्यजेत् कामान् स्वनासाग्रनिरीक्षणः ॥ ३२ ॥ यतो यतो निःसरति मनः कामहतं भ्रमत् ॥ ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः॥ ३३ ॥ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः ॥ अनिशं तस्य निर्वाणं यात्यनिन्धनवह्निवत् ॥ ३४ ॥

जेत् तथा अपरिग्रहः स्यात् तथा एक एव विविक्तशरणः एकान्तवासी स्यात् तथा भिक्षुः सन्नपि भिक्षया प्राप्तमपि मितमशनं यस्य तथा स्यात् ॥ ३० ॥ देश इति ॥ हे राजन् शुचौ शुद्धे समे अनिम्नोन्नते च देशे चैलाजिनकुशोत्तरमित्युक्तविधमात्मनः आसनं संस्थाप्य कल्पयित्वा ऋज्वङ्गः ऋजु अवक्रमङ्गं यस्य स ऋजुकायः सन् तस्मिन्नासने स्थिरं चाञ्चल्यरहितं समं सुखं च यथा स्यात्तथा ओमित्युच्चारयन्नासीत ॥ ३१ ॥ प्राणेति युग्मम् ॥ पूरकुम्भकरेचकैः प्राणापानौ वायू सम्यक् निरुन्ध्यात् प्राणेनापानाभिभवः पूरकः अपानेन प्राणाभिभवो रेचकः उभयोः समानभावः कुम्भक इति विवेकः । यावन्मनः कामान् शब्दादीन् विषयान् त्यजेत् तदनुसन्धानरहितं भवेत् तावत्स्वस्य नासाया अग्रे निरीक्षणं यस्य नासाग्रं निरीक्षमाणः बुधः कामैः विषयैश्चिन्तितैर्हतमाकृष्टमत एव भ्रमन्मनः यतो यतो निःसरति यं यं विषयं विषयीकरोति ततस्ततो विषयान्मन उपाहृत्य शनैर्हृदि रुन्ध्यात् ॥ ३२ ॥३३॥ एवमिति ॥ एवमनिशं निरन्तरमभ्यसतस्तस्य यतेश्चित्तमल्पीयसैव कालेन अनिन्धनवह्निवत् निर्वाणं बहि-

CC-0. In Public Domain. Digitization by eGangotri

वृत्तिराहित्यं याति यथा निरिन्धनो वह्निर्ज्वालाधूमादिबहिर्वृत्तिरहितोऽङ्गाररूपेणावशेषितो भवति तथेत्यर्थः ॥ ३४ ॥ कामेति ॥ यत् चित्तं कामाः विषयाः तदादिभिरनाविद्धमक्षुभितं प्रशान्ता अखिला वृत्तयो यस्य तादृशं सत् पश्चात् ब्रह्मसुखेन स्पृष्टं तस्माच्चित्तं पुनः कर्हिचिदपि नैवोत्तिष्ठेत तं विहाय बहिर्वृत्तिनैव स्यादित्यर्थः ॥ ३५ ॥ य इति ॥ त्रयाणां धर्मादीनां वर्गः आसमंतादुप्यते यस्मिंस्तस्माद्गृहात् यो भिक्षुः पूर्वं प्रव्रज्य संन्यासं कृत्वा पुनर्यदि तानेव धर्मादीन् सेवेत स वै वान्ताशी छर्दितभोजी अपत्रपो निर्लज्जश्च ॥ ३६ ॥ दृष्टं चैतदित्याह—यैरिति॥ यैः स्वदेहः अनात्मा आत्मा न भवति भौतिकत्वादत एव मर्त्यो मरणधर्मा मरणानन्तरं च केनचिद्भक्षितश्चेद्विड् भवति नोचेत्कृमिर्भवति दग्धश्चेद्भस्म भवतीत्येवं पूर्वं स्मृतश्चिन्तितः त एवासत्तमाः मूर्खाः पुनरेनमात्मसात् कृत्वा आत्मेति मत्वा श्लाघयन्ति स्तावयन्ति ॥ ३७ ॥ गृहस्थस्येति युग्मम् ॥ यो गृहस्थस्य स्ववर्णाश्रमोचितक्रियात्यागः यश्च बटोर्ब्रह्मचारिणः गुरुकुलवासादिव्रतत्यागः या च तपस्विनो वानप्रस्थस्य ग्रामसेवा पुनर्ग्रामनिवासः या च

कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत् ॥ चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३५ ॥ यः प्रव्रज्य गृहात् पूर्वं त्रिवर्गावपनात् पुनः ॥ यदि सेवेत तान् भिक्षुः स वै वान्ताश्यपत्रपः ॥ ३६ ॥ यैः स्वदेहः स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात् ॥ त एनमात्मसात् कृत्वा श्लाघयन्ति ह्यसत्तमाः ॥ ३७ ॥ गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि ॥ तपस्विनो ग्रामसेवा भिक्षोरिन्द्रियलौल्यता ॥ ३८ ॥ आश्रमापसदा ह्येते खल्वाश्रमविडम्बकाः ॥ देवमायाविमूढांस्तानुपेक्षेतानुकम्पया ॥ ३९ ॥ आत्मानं चेद्विजानीयात् परं ज्ञानधुताशयः ॥ किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति लम्पटः ॥ ४० ॥ आहुः शरीरं रथमिन्द्रियाणि हयानभीषून् मन इन्द्रियेशम् ॥ वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बन्धुरमीशसृष्टम् ॥ ४१ ॥

भिक्षोः संन्यासिनः इन्द्रियलौल्यता विषयेष्वासक्तिः लोलशब्दात्स्वार्थेष्यञ् ततस्तल् । तान् क्रियात्यागादीन् ये कुर्वन्ति ते एते स्वधर्मत्यागिनः खलु निश्चयेन आश्रमापसदाः आश्रमस्थेषु निकृष्टाः हि यतः आश्रमविडम्बकाः केवलमाश्रमस्थानेवान्यान् विडम्बयन्त्यनुकुर्वन्ति नतु तद्धर्मं पालयन्तीति देवस्य भगवतो मायया विमूढान् मोहितान् तान् अनुकम्पया उपेक्षेत ॥ ३८ ॥ ३९ ॥ नन्वात्मज्ञस्य भिक्षोरिन्द्रियलौल्येपि को दोषस्तत्राह—आत्मानमिति ॥ आत्मानं चेत् यदि परं ब्रह्म विजानीयात् तर्हि तेन ज्ञानेन धुता निरस्ता आशया वासना यस्य स यतिः कस्य वा हेतोः किं सुखमिच्छन् लम्पटः विषयासक्तः सन् देहं पुष्णाति न पुष्णात्येवेत्यर्थः । तथा चेन्द्रियलौल्यत्वे आत्मज्ञत्वमेव न संभवति ज्ञानिनस्तु इन्द्रियलौल्यं न संभवतीति भावः ॥ ४० ॥ अत इन्द्रियलौल्यपरिहाराय सदा तत्वज्ञाने यतनीयमितीममर्थमाह—आहुरिति ॥ ईशसृष्टमिति यथायोग्यं विभक्तिपरिणामेन शरीरादीनां सर्वेषां विशेषणम् । शरीरं रथमाहुः इन्द्रियाणि हयान् अश्वानाहुः इन्द्रियाणामीशं नियतृ मनः अभीषून् रश्मीनाहुः मात्राशब्दा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीन् वर्त्मानि गन्तव्यदेशानाहुः धिषणां बुद्धिं सूतं सारथिमाहुः सत्वं चित्तं बृहत् देहव्यापि बन्धुरं बंधनमाहुः चित्तं विना ह्यनिबद्धमिव शरीरं भवति ॥ ४१ ॥ अक्षमिति ॥ दशानां प्राणानां समाहारो दशप्राणम् ङीबभाव आर्षः।प्राणादयः पञ्च नागादयश्च पञ्चेति दशकं दशाविधं प्राणम् अक्षं पठन्ति अधर्मधर्मौ पुण्यपापे चक्रे पठन्ति धर्माधर्मयोः शरीरप्रवृत्तिहेतुत्वात् अभिमानं देहाद्यभिमानिनं जीवं रथिनं पठन्ति प्रणवमोङ्कारं हितस्य रथिनो धनुः पठन्ति शुद्धं जीवं तु शरं पठन्ति तु शब्देन प्रवृत्तिनिमित्तभेदो न स्वरूपभेद इति सूचयति परं परमात्मानमेव लक्ष्यं पठन्ति यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यते शरस्य लक्ष्ये प्रवेशवज्जीवस्य ब्रह्मणि प्रवेश इत्यंशेन ब्रह्मणो लक्ष्यता वेध्यत्वादिना साम्यं रागादेः ॥ ४२ ॥ राग इति युग्मम् ॥ रजः अभिनिवेशः रागादयः जेतव्याः शत्रवः तत्र केचित् रागादयः रजस्तमसी प्रकृती कारणे येषां ते तथाभूताः कचित् आरूढसमाधेः सत्वं प्रकृतिः कारणं येषां ते तथाभूताः परोपकारादयोपि भरतस्य मृगपोतरक्षावच्छत्रवो भवन्तीति ॥ ४३ ॥ ४४ ॥ यावदिति ॥ नृकायरूपं रथमात्मवशः उपकल्प इन्द्रियादिपरिकरो यस्मिंस्तथा भूतं यावज्जनो धत्ते तावदेव गरिष्ठानां गुरूणां चरणयोरर्चना सेवा तया निशातं तीक्ष्णीकृतं ज्ञान-

अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवम् ॥ धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम् ॥४२॥ रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानोऽवमानोऽसूया च माया हिंसा च मत्सरः॥४३॥रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः॥ रजस्तमःप्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥ ४४॥ यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातम् ॥ ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्ट उपशान्त इदं विजह्यात्॥४५॥नो चेत् प्रमत्तमसदिन्द्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु हि क्षिपन्ति॥ ते दस्यवः सहयसूतममुं तमोऽन्धे संसारकूप उरुमृत्युभये क्षिपन्ति ॥ ४६ ॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम् ॥ ४७ ॥

मेवासिं खड्गं दधत् बिभ्रत् अच्युत एव बलं यस्य तादृशः भगवदेकनिष्ठः सन् अस्तशत्रुः रागादिदोषरहितः अत एव उपशान्तचित्तः अत एव स्वाराज्येन परमानन्दलाभेन एव तुष्टः सन्निदं शरीररथादिकं विजह्यात् परित्यजेत् उपेक्षेतेत्यर्थः ॥ ४५ ॥ अच्युताश्रयाभावे बाधकमाह--नोचेदिति ॥ नोचेत् यदि रथिनो बलं न स्यात् पक्षे हरिसंश्रयणजं बलं न स्याच्चेत्तदा प्रमत्तमेनं रथिनं बलाभावे लक्ष्यवेधार्थं रथारोहणं प्रमादः पक्षे भक्त्यभावे मुमुक्षाप्रमादः असन्तो विषयोन्मुखा ये इन्द्रियरूपा वाजिनः अश्वाः बुद्धिरूपः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयरूपेषु दस्युषु क्षिपन्ति ते विषयाख्या दस्यवो हयैः सूतेन च सहवर्तमानममुं प्रमत्तं रथिनमुर्वधिकं मृत्युभयं यस्मिंस्तस्मिन् अन्धे तमसि अन्धतामिस्रनरकतुल्ये संसाररूपे कूपे क्षिपन्ति ॥ ४६ ॥ ननु वेदविहिते प्रवृत्तिमार्गे चरतः कथमनर्थप्राप्तिस्तत्राह--प्रवृत्तमिति ॥ प्रवृत्तेन कर्मणा तत्फलानुभवाय लोकान्तरं प्राप्य तदनुभूयोवशिष्टेन कर्मणा गृहस्थः ततः पुनरिहावर्तते निवृत्तेन कर्मणा तु यतिः अमृतमश्नुते तत्फलं परमानन्दं प्राप्य ततः पुनरिह नावर्तते

CC-0. In Public Domain. Digitization by eGangotri

शेषं स्पष्टम् ॥ ४७ ॥ हिंस्रमिति युग्मम् ॥ हिस्रं श्येनादि कर्म पश्वादिहिंसा युक्तं वा अग्निहोत्रादि द्रव्यमयं व्रीह्यादि द्रव्यप्रचुरम् आदिशब्दविवरणमाह दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः पशुयागः सुतः सोमयागः इत्यात्मकं यत्कर्म यच्च हुतं वैश्वदेवं प्रहुतं बलिहरणं च तदेतत्सर्वं वैदिकं कर्म इष्टमिष्टाख्यं पूर्तं तु सुरालयो देवमन्दिरम् आरामः कूपश्च आजीव्यं प्रपादिच आदिपदेनान्नप्रदानादिलक्षणं यस्य तत् एतदिष्टापूर्तं द्विविधमपि यदि काम्यं कामनया कृतमत एव अशान्तिदं रागाद्यनिवर्त्तकं तत् प्रवृत्ताख्यं भवति अकाम्यं शान्तिकरं निवृत्ताख्यमित्यर्थाज्ज्ञेयम् ॥ ४८ ॥ ४९ ॥ प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह—द्रव्येति युग्मम् ॥ आरोहणे सोपानानि दर्शयति सोमपर्यन्तं तत्र प्रथमं द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहान्तरारम्भकः येन संपरिष्वक्तो गच्छति य एव श्रुतावशब्देनोक्तः पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति तं प्राप्नोति इति सर्वत्र शेषः । द्रव्यमूष्मविपाकश्चेति पाठे तु द्रव्यशब्देन तेजोमात्राशब्दोक्तानीन्द्रियाणि ऊष्मविपाकशब्देन हृदयाग्रप्रद्योतः तदा च सत्कर्मसाधकानीन्द्रियाणि प्रथमं प्राप्नोति ततो निर्याणकाले हृदयाग्रप्रद्योतं प्राप्नोति ततो धूममिति क्रमः तथा च श्रुतिः " य इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्वक्रामतीति " । तथा

हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम् ॥ दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः ॥ ४८ ॥ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ॥ पूर्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥ ४९ ॥ द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः ॥ अयनं दक्षिणं सोमो दर्श औषधिवीरुधः ॥ ५० ॥ अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः ॥ एकैकश्येनानुपूर्वं भूत्वा भूत्वेह जायते ॥ ५१ ॥ निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ॥ इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ॥ इन्द्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ॥ ५२ ॥

तस्य हृदयस्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामतीति धूमादिशब्दैस्तत्तदभिमानिन्यो देवता ग्राह्याः ततो धूमः धूमाभिमानिनी देवता तां प्राप्नोति ततो रात्रिः रात्र्यभिमानिनी दवेता तां प्राप्नोति ततोपक्षयः अपरपक्षः कृष्णपक्षाभिमानिनी देवता तां प्राप्नोति ततो दक्षिणायनाभिमानिनी देवतां प्राप्नोति ततश्च सोमा चन्द्रलोकस्तं प्राप्नोति एवं चन्द्रलोकं प्राप्तः भोगान् भुंक्ते अथ तत्र भुक्तभोगस्य ततोवरोहणप्रकारमाह दर्श इति ॥दर्शशब्देन विपरीतलक्षणया विशिष्टभोगक्षयाच्छोकाग्निना देहलयेनादर्शनमुच्यते । यद्वा । चन्द्रक्षयवत्या अमावस्यया देहक्षयो लक्षितः एतदुक्तं भवति भूतसूक्ष्मयुक्तो धूमाद्यातिवाहिकदेवताभिः सोमलोकं प्रापितः तद्भोगावसाने विलीनदेहो वृष्टिद्वारेण ओषध्यादि प्राप्नोति ॥ ५२ ॥
ततोन्नं व्रीह्यादिबीजं प्राप्नोति ततो रेतः प्राप्नोति हे क्ष्मेश पृथ्वीपते इत्येवं भूतः पुनर्भवतीत्यस्मादिति पुनर्भवः पितृयानसंज्ञकः प्रवृत्तकर्ममार्ग उक्तः पुनर्भवत्वमेव स्पष्टयति एकैकश्येन प्रत्येकमानुपूर्व्या उक्तक्रमेण औषध्यादिः भूत्वा भूत्वा तत्तत्सान्निध्यं प्राप्य इह भूमौ जायते ॥ ५० ॥ ५१॥ निषेकेति अर्द्धम् ॥ निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः एतन्मार्गं प्राप्नोति इति शेषः । स एवात्राधिकारीत्यर्थः । अन्यस्त्विष्टादिकारी अपि एवं जन्म न लभते निवृत्तं कर्माह इन्द्रियेष्विति ज्ञानेन दीप्यन्त इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानदीपास्तेषु ज्ञानेन्द्रियेषु क्रियायज्ञान् इन्द्रियव्यापारान् इष्टापूर्त्तादीन् जुह्वति तन्मात्रतया भावयन्तीत्यर्थः । ऊर्मौ दर्शनादिसंकल्परूपे मनसि इन्द्रियाणि जुह्वति इन्द्रियाणां मनोधीनप्रवृत्तिकत्वात्तन्मात्रतया भावयन्तीत्यर्थः । वैकारिकं विकारयुक्तं मनो वाचि जुह्वति विध्यादिलक्षणया वाचा हि मनः कर्तृत्वादिविकारं भजति नान्यथेति मनोवागात्मतया भावयन्ति ॥ ५२ ॥ वाचमिति ॥ वाचं वर्णानां समाम्नाये समुदाये जुह्वति तद्विशेषरूपत्वात्तन्मात्रतया भावयन्ति तं च वर्णसमुदायं स्वरे अकारादिस्वरत्रयात्मके ओङ्कारे न्यसेत् जुहुयात् जुह्वति इति तन्मूलकतया तन्मात्रतया भावयन्ति ओङ्कारं न्बिदौ जुह्वति तं बिन्दुं नादे जुह्वति तं तु नादं प्राणे सूत्रात्मनि प्राणसहचारिणि जीवे वा जुह्वति अमुं जीवं महति ब्रह्मणि जुह्वति ॥ ५३ ॥ अथ मुमुक्षोर्गतिहेतुभूतमर्चिरादिमार्गमंशतो दर्शयति—अग्निरिति ॥ अग्न्यादिशब्दास्तत्तदभिमानिदेवतापरास्ताः प्राप्नोतीति पूर्ववत् अत्र क्रमो न विवक्षितः । श्रौतक्रमविरोधात् । दिवा अहः प्राह्णस्तस्यैवान्तः शुक्लः शुक्लपक्षः राका तस्यैवान्तः उत्तरमुत्तरायणं स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह—विश्वश्चेति विश्वाख्यः स्थूलोपाधिः स स्थूलं सूक्ष्मे विलाप्य सूक्ष्मोपाधिस्तैजसो भवति सूक्ष्मं कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति

वाचं वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत् ॥ ओङ्कारं बिन्दौ नादे तं तं तु प्राणे महत्यमुम् ॥ ५३ ॥ अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् ॥ विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ ५४॥ देवयानमिदं प्राहुर्भूत्वा भूत्वानुपूर्वशः ॥आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्तते॥ ५५॥ य एते पितृदेवानामयने वेदनिर्मिते॥शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति॥५६॥आदावन्ते जनानां सद्बहिरन्तः परावरम्॥ ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिस्त्वयं स्वयम्॥५७॥आबाधितोऽपि ह्याभासो यथा वस्तुतया स्मृतः॥दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम्॥५८॥

कारणं च सर्वसाक्षित्वेन समन्वयात् साक्षिस्वरूपे विलाप्य तुर्यो भवति तेषां च व्यभिचारिणां साक्ष्याणां लये शुद्ध आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥ देवेति ॥ इदमर्चिरादिदेवयानं वेदाः प्राहुः यत्र हि उपशान्तात्मा रागादिशून्यचित्तः आत्मयाजी परमात्मोपासकः तत आत्मस्थः आत्मनि तिष्ठन् न निवर्त्तते यथा इतरः अनुपूर्वशः भूत्वा भूत्वा निवर्त्तते तथायं न निवर्त्तते ॥ ५५ ॥ य इति ॥ एते पितृदेवानामयने वर्त्मनी वेदेन निर्मिते । ते धूममभिसंभवन्ति इत्यादिना, ते अर्चिरभिसंभवन्तीत्यादिना च निश्चयेन विविच्य ज्ञापिते । अतः शास्त्रेण चक्षुषो यः पुमान् वेद जानाति स जनस्थो देहस्थोपि न मुह्यति ॥५६॥ तत्र हेतुमाह—आदाविति ॥ जनानां देहानामादौ कारणत्वेन अन्ते अवधित्वेन च यत्सत् तथा बहिर्भोग्यमन्तर्भोक्तृपरमुत्कृष्टमवरमपकृष्टं ज्ञानं बुद्धिः ज्ञेयं बोध्यं वचो नाम वाच्यं रूपं तमोऽप्रकाशः ज्योतिः प्रकाशश्च तत्तु सर्वमयं ज्ञानी स्वयमेव न तस्माद्व्यतिरिक्तं वस्तु किंचिदस्ति येन मुह्येदित्यर्थः ॥ ५७ ॥ ननु तर्हि कथं पृथगर्थस्तस्यापि प्रतीयते तत्राह—आबाधित इति ॥ आबाधितस्तर्कविरोधेन सर्वतो बाधितोपि आभासः प्रतिबिम्बादिर्यथा वस्तुतया यथार्थत्वेन स्मृतः प्रतीतस्तद्वदेव सर्वमैन्द्रियकं विषयं भौतिकत्वादिना प्रतीतमर्थत्वेन यथार्थतया विकल्पितं ननु परमा-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

र्थतोस्ति । दुर्घटत्वात् ॥ ५८ ॥ दुर्घटत्वमाह—क्षितीति ॥ इह क्षित्यादीनां पञ्चभूतानां छाया ऐक्यबुद्ध्यालम्बनरूपं देहादिकं सङ्घातारम्भपरिणामानां मध्ये कतमाप्यन्य-तमापि न भवति न तावत्तेषां पञ्चानां भूतानां सङ्घातो वृक्षाणामिव वनम् । एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः । न ह्येकस्मिन्वृक्ष आकृष्टे सर्वं वनमाकृष्यते नच पञ्चभूतानां विकारः पञ्चभिर्भूतैः आरब्धोऽवयवी अपि शब्दान्न परिणामोपि यतः न पृथक् न चान्वितः।स किं स्वावयवेभ्यः परिणतेभ्यो वा पृथक्, तदन्वितो वा। न तावदत्यन्तं पृथक्, तथा अप्रतीतेः। न चान्वितः, स किं प्रत्यवयवं सर्वोऽप्यन्वेत्यंशेन वा, आद्ये अङ्गुलिमात्रेपि देहबुद्धिः स्यात्, द्वितीये तस्याप्यंशाङ्गीकारे सत्यनवस्था स्यादतो मृषैवेत्यर्थः। ॥ ५९ ॥ देहादीनां मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह—धातव इति ॥ धारयन्तीति धातवो महाभूतानि तानि च तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युस्ते पामप्यवयवित्वात् अवयविनश्च निरस्तत्वात्तर्ह्यवयवः सत्यः इति चेत्तत्राह उक्तरीत्या अवयविनि चासति अवयविप्रतीत्यन्यथाऽनुपपत्तिं विना तत्सद्भावे प्रमाणाभावादवयवो-प्यन्ततोऽसन्नेव ॥ ६० ॥ ननु अवयविनोभावे आगमापायिषु बाल्यादिषु सोयं देवदत्त इत्यादि प्रत्याभिज्ञानं न स्यात् तत्राह—यदिति ॥ परमार्थतः वस्तुनः विकल्पे भेदे

क्षित्यादीनामिहार्थानां छाया न कतमापि हि ॥ न संघातो विकारोऽपि न पृथङ्‍ नान्वितो मृषा ॥ ५९ ॥ धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना ॥ न स्युर्ह्यसत्यऽवयविन्यसन्नवयवोऽन्ततः ॥६०॥ स्यात् सादृश्यभ्रमस्तावद् विकल्पे सति वस्तुनः ॥ जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥ भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं यथात्मनः ॥ वर्तयन् स्वानुभूत्येह त्रीन् स्वप्नान् धुनुते मुनिः ॥ ६२ ॥ कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् ॥ अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥ यद् ब्रह्मणि परे साक्षात् सर्व-कर्मसमर्पणम् ॥ मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ॥ ६४ ॥

असत्यपि पूर्वपूर्वारोपसादृश्यात् स एवेति भ्रमः स्यात् स चाविद्यानिवृत्तियावत्तावत् पर्यन्तमेव। ननु सर्वस्य मिथ्यात्वे शास्त्रस्य विधिनिषेधकता कथमत आह। यथा स्वप्नमध्ये जाग्रत्स्वापव्यवस्था तथा विधिनिषेधव्यवस्था ॥ ६१ ॥ भावेति ॥ भावाद्वैतादिकं वर्तयन् आलोचयन् मुनिः मननशीलः साधकः स्वानुभूत्या आत्मतत्त्वानुभवेनेह अस्मिन् देह एव वर्तमानः आत्मनः स्वस्य त्रीन्स्वप्नान् जाग्रदादीन् धुनुते निवर्त्तयतीत्यर्थः । यद्वा । वस्तुभेदबुद्धिरेकः स्वप्नः ततस्तत्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः स्वप्नः ततो मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः स्वप्नः इति त्रयः स्वप्ना ज्ञेयाः ॥ ६२ ॥ कार्येति ॥ विकल्पस्य कार्यकारणभेदस्य अवस्तुत्वात् हेतोः पटतन्तुवत् तन्तुरेव पट इतिवत् यत्सर्वत्र कार्यकारणयोर्वस्त्वैक्यस्य दर्शनमालोचनं तद्भावाद्वैतमुच्यते॥६३॥यदिति॥ हे पार्थ युधिष्ठिर मनोवाक्तनुभिः कृतानां सर्वेषां कर्मणां परे ब्रह्मणि भगवति यत्साक्षात्फलाभिसंधिमन्तरेणैव समर्पणं तत् क्रियाद्वैतमुच्यते उद्देश्यफलभेदो हि क्रियाभेदे हेतुः फलोद्देशं विनेश्वरार्पणे च तदभावात् क्रियाणामद्वैतं भवतीति भावः॥६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मेति ॥ आत्मनः स्वस्य जायासुतादीनामन्येषां च स्वसंबन्धरहितानां सर्वदेहिनां स्वार्थस्य वित्तादेः कामस्य भोगस्य च यदैक्यमैक्यभावनेति यावेवार्थकामौ स्वस्य तावेव सर्वेषामेव सर्वेषां देहादीनां पञ्चमहाभूतात्मकत्वेनैक्यात् भोक्तुर्जीवस्य च परमात्मत्वेनाभेदालोचनेन अर्थकामयोर्यदैक्यदर्शनं तद्द्रव्याद्वैतमुच्यते ॥६५॥ उक्तान् आश्रमधर्मान् संक्षिप्याह—यदिति ॥ हे नृप यत् द्रव्यं यस्य पुरुषस्य येनोपायेन यत्र यस्मिन् देशे यस्मिन्काले च यतः सकाशादनिषिद्धं विहितं स्यात् स नरः अनापदि तेनैव विहितोपायलब्धेन द्रव्येण कार्याणि विहितानि कर्माणि ईहेत कुर्यात् नान्यैरुपायान्तरोपार्जितैर्द्रव्यैः आपत्सु तु न दोषः ॥ ६६ ॥ एतैरिति ॥ हे राजन् एतैः पूर्वोक्तैरन्यैश्च वेदोक्तैः स्वकर्मभिर्भगवति समर्पितैस्तद्भक्तिभाक् तस्य भक्तः सन् गृहे वर्तमानोपि नरोऽस्य कृष्णस्य गतिं लोकं स्वरूपं वा यायात् प्राप्नुयात् ॥ ६७ ॥ एतत्पश्चाध्यायात्मकं प्रकरणं सर्वसाधारणमुक्तं भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव लक्षीकृत्याह—यथेति ॥ हे नृपदेव यद्वा । नृपैर्देवैश्च सहायभूतैरपि दुस्त्यजात् आपद्गणात् प्रभोः सर्वथा समर्थात् आत्मनः परमात्मनः श्रीकृष्णादेव हेतोः यथा यूयमुत्तरत उत्कर्षेण तरत अडभाव आर्षः । यथाच यस्य पादपङ्करुहयोश्चरणकमलयोः सेवया

आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् ॥ यत् स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥ यत् यस्य वा निषिद्धं स्याद् येन यत्र यतो नृप ॥ स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥ ६६ ॥ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ॥ गृहेऽप्यस्य गतिं यायाद् राजंस्तद्भक्तिभाङ् नरः ॥ ६७ ॥ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ॥ यत्पादपङ्केरुहसेवया भवानहारषीन्निर्जितदिग्गजः क्रतून् ॥ ६८ ॥ अहं पुराऽभवं कश्चिद् गन्धर्व उपबर्हणः ॥ नाम्नाऽतीते महाकल्पे गन्धर्वाणां सुसंमतः ॥ ६९ ॥ रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः ॥ स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलम्पटः ॥ ७० ॥ एकदा देवसत्रे तु गन्धर्वाप्सरसां गणाः ॥ उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥

निर्जिता दिग्गजास्तत्पर्यन्ता जना येन तथाभूतः सन् भवान् क्रतून् राजसूयाश्वमेधादीन् अहार्षीत् कृतवान् अकाराधिक्यमार्षम् । यथा यथावत् तमेव भजतेति शेषः । यद्वा । यथात्वमापद्गणादुत्तीर्णः यथा च क्रतूनहार्षीः तथा श्रीकृष्णादेव तारकात्संसारादप्युत्तरिष्यथेत्यर्थः । यथा त्वम् आपद्गणादुत्तीर्णस्तथान्योपि तद्भक्तिमान्नरस्तत्कृपया संसारादुत्तीर्य तं प्राप्नुयात् इति शेषः ॥ ६८ ॥ अहमिति ॥ अहं पुरा पूर्वमतीते महाकल्पे गन्धर्वाणां सुसंमतः श्रेष्ठो नाम्ना उपबर्हणः कश्चिद्गन्धर्वोऽभवम् ॥ ६९ ॥ रूपेति ॥ रूपं च पेशलं च सौकुमार्यं च माधुर्यं मञ्जुभाषित्वं च सौगन्ध्यं सुगन्धित्वं च तैः रूपादिभिः प्रियं दर्शनं यस्य सः अत एव स्त्रीणां प्रियतमोतिशयेन प्रीतिविषयः अत एव पुरुलम्पटः तास्वत्यासक्तश्च अत एव नित्यं सर्वदा प्रमत्तोऽभवम् ॥ ७० ॥ एकदेति ॥ एकदा देवानां सत्रे सत्रसंज्ञके यागे तु गन्धर्वाणामप्सरसां च गणाः हरिगाथोपगायने भगवद्यशोगानार्थं विश्वसृग्भिर्दक्षमरीच्यादिभिरुपहूताः आकारिता जाताः ॥ ७१ ॥

Nepal Sanskrit University, Bakdeekeri

CC-0. In Public Domain. Digitization by eGangotri

अहमिति सार्द्धम् ॥ अहं च तत् आह्वानं विद्वान् स्त्रीभिः परिवृतः उन्मत्तः सन् हरिगाथां विनाऽन्यदेव यथेच्छं गायन्नेव तत्र गतः विश्वसृजस्तु तत् आज्ञां विनैव स्त्रैणगानरूपं मे मम हेलनमपराधं ज्ञात्वा ओजसा क्रोधवेगेन शेपुः कृतं हेलनमस्मदवज्ञानं येन सः नष्टा श्रीः शोभा यस्य तथाभूतः सन्नाशु त्वं शूद्रतां याहि ॥ ७२ ॥ तावदिति ॥ तावत् शापेनाहं दास्यां जज्ञे जातः तत्रापि शूद्रजन्मन्यपि ब्रह्मवादिनां विदुषां शुश्रूषणानुषङ्गेण सेवाप्रसङ्गेनाहं ब्रह्मपुत्रतां प्राप्तः ॥ ७३ ॥ धर्म इति ॥ येन धर्मेण गृहस्थोपि न्यासिनां पदवीं गतिमञ्जसा अनायासेनैव इयात् गच्छेत् स गृहमेधीयो गृहस्थसंबन्धी पापनाशनः धर्मस्ते तव मया वर्णितः ॥ ७४ ॥ त्वं तु कृतार्थ एवेति हर्षेण पूर्वोक्तान् त्रीन् श्लोकान् पठति—यूयमिति॥नृलोके जीवसमूहे यूयं भूरिभागाः अतिभाग्यवन्तः यस्मान्मनुष्यलिङ्गं नराकृतिसद्गूढं परं ब्रह्म येषां युष्माकं गृहान् साक्षादावसतीति हेतोः स्वदर्शनादिना लोकं पुनानाः लोकत्रयमपि पवित्रीकुर्वन्तो मुनयोपि येषां युष्माकं गृहान् अभियन्ति सर्वत आगच्छन्ति ॥७५॥ स वा इति ॥ महद्भिर्विमृग्यमन्वेषणीयं यत्

अहं च गायंस्तद्विद्वान् स्त्रीभिः परिवृतो गतः ॥ ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ॥ याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥ ७२ ॥
तावद् दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम् ॥ शुश्रूषयानुषङ्गेण प्राप्तोऽहं ब्रह्मपुत्रताम् ॥ ७३ ॥ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः ॥
गृहस्थो येन पदवीमञ्जसा न्यासिनामियात् ॥७४॥ यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियन्ति ॥ येषां गृहानावसतीति साक्षाद्
गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ७५ ॥ स वा अयं ब्रह्म महद्‌ विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद्‌ वः खलु मातुलेय आत्मार्हणीयो
विधिकृद्‌ गुरुश्च ॥ ७६ ॥ न यस्य साक्षात् भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स
सात्वतां पतिः ॥ ७७ ॥ श्रीशुक उवाच ॥ इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः ॥ पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥ ७८ ॥

कैवल्यनिर्वाणसुखं निरुपाधिः परमानंदस्तदनुभूतिः अनुभवरूपं ब्रह्म सोयं खलु प्रसिद्धो नराकृतिर्वो युष्माकं प्रियः प्रीतिविषयः सुहृत् मित्रं हितचिन्तकः मातुलेयः मातुलपुत्रः आत्मा देहवत् स्वाधीनः अर्हणीयः परमेश्वरत्वेनाराधनीयः विधिकृत् आज्ञानुवर्ती गुरुर्हितोपदेष्टा च श्रीकृष्ण एव ॥ ७६ ॥ नेति ॥ यस्य भगवतः श्रीकृष्णस्य रूपं तत्त्वं भवो महादेवः पद्मजो ब्रह्मा तदादिभिरपि धियापि वस्तुतया याथार्थ्येन साक्षान्नोपवर्णितं न विषयीकृतं स एष सात्वतां पतिः भक्तानां पालकः मौनेन मौनपूर्वकध्यानविचारादिना भक्त्या श्रवणादिरूपया उपशमेन इन्द्रियान्तःकरणादिविजयेन पूजितः आराधितोस्माकं प्रसीदताम् । तङार्षः ॥ ७७ ॥ इतीति ॥ इत्येवं देवर्षिणा प्रोक्तं निशम्य श्रीकृष्णप्रेम्णा विह्वलः भरतर्षभो युधिष्ठिरः सुप्रीतः सन् नारदं श्रीकृष्णं च पूजयामास ॥ ७८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते अष्टमस्कन्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत् सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हंत हृदन्तरे मे गोपस्य कोपि शिशुरञ्जनपुञ्जमञ्जुः॥ २ ॥मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽष्टमे सुगममन्वयमातनोति ॥ ३ ॥ प्रथमे मनवः स्वायंभुवः स्वारोचिषोत्तमौ ॥ तामसश्चेत्यमी उक्ता तत्र श्लोकास्त्रिंशन्हयः [३३] ॥ उवाच षट्कं [६] सार्द्धाश्च [३४] चतुस्त्रिंशदनुष्टुभः ॥ राजोवाच ॥ स्वायंभुवस्येति ॥ हे गुरो इह व्यतीते ग्रन्थे स्वायंभुवस्य मनोर्वंशोयं मया विस्तराच्छ्रुतः । गुरोरिति पाठान्तरे गुरोस्त्वत्तः श्रुतः यत्र वंशे विश्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिरूपः सर्गो जात इत्यर्थः । अथ नोऽस्मभ्यमन्यान् मनून् वदस्व सचरित्रांस्तद्वंशान् यत्नेन कथय ॥ १ ॥ यत्रेति सार्द्धम् ॥ आद्यार्द्धमसार्वत्रिकम् । हे ब्रह्मन् यत्र यत्र मन्वन्तरे चातुर्वर्ण्याश्रिताः शुभा भगवत्परितोषजनका विविधा धर्मा

श्रीगणेशाय नमः ॥ ॐनमो भगवते वासुदेवाय ॥ राजोवाच ॥ स्वायम्भुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः ॥ यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः ॥ १ ॥ यत्र यत्र हरेर्जन्म कर्माणि च महीयसः ॥ गृणन्ति कवयो ब्रह्मंस्तानि नो वद शृण्वताम् ॥ २ ॥ यस्मिन्मन्वन्तरे ब्रह्मन् भगवान्विश्वभावनः ॥ कृतवान्कुरुते कर्ता ह्यतीतेऽनागतेऽद्य वा ॥ ३ ॥ ऋषिरुवाच ॥ मनवोऽस्मिन्व्यतीताः षट् कल्पे स्वायम्भुवादयः ॥ आद्यस्ते कथितो यत्र देवादीनां च सम्भवः ॥ ४ ॥ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ॥ धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ॥ ५ ॥ कृतं पुरा भगवतः कपिलस्यानुवर्णितम् ॥ आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह ॥ ६ ॥ विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ॥ विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥

निरूप्यन्ते यत्र यत्र च महीयसः सर्वोत्कृष्टस्य हरेर्जन्म कर्माणि च कवयो गृणन्ति तानि मन्वन्तराणि नोऽस्माकं शृण्वतां वद ॥ २ ॥ यस्मिन्निति ॥ विश्वस्य भावनः पालकः भगवान् यस्मिन्नतीते मन्वन्तरे यत्कर्म कृतवान् यस्मिन्ननागते यत्कर्ता करिष्यति अद्य वा वर्तमाने यत्कुरुते तत् हे ब्रह्मन्नो वद ॥ ३ ॥ मनव इति ॥ अस्मिन् कल्पे स्वायंभुवादयः षण्मनवो व्यतीताः तत्राद्यः स्वायंभुवो मनुस्ते कथितो यत्र देवादीनां संभव उक्तः । आदिपदेन दैत्यमनुष्यतिर्यगादीनां संग्रहः ॥ ४ ॥ आकूत्यामिति ॥ तस्य स्वायंभुवस्यैव मनोर्दुहित्रोराकूत्यां देवहूत्यां च धर्मज्ञानोपदेशार्थं भगवान् विष्णुः पुत्रतां गतः प्राप्तः ॥ ५ ॥ कृतमिति ॥ भगवतः कपिलस्य कृतं ज्ञानभक्त्युपदेशादिकं पुरा तृतीयस्कन्धे मया वर्णितं तच्च त्वया श्रुतमेव हे कुरूद्वह परीक्षित् भगवान् यज्ञो यच्चकार तदिदानीमाख्यास्ये कथयिष्यामि ॥ ६ ॥ विरक्त इति ॥ काम्यन्त इति कामाः शब्दादयो विषयास्तेषां भोगेषु विरक्तः शतरूपायाः पतिः स्वायंभुवो मनुः प्रभुः राज्यं विसृज्य तपसे तपः कर्तुं सभार्यो वनमाविशत् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुनन्दायामिति ॥ हे भारत वनं गत्वा सुनन्दायां सुनन्दाया नद्यास्तीरेण केन पदा भुवं स्पृशन् वर्षशतपर्यतं घोरं दुष्करं तपस्तप्यमानः कुर्वाणः स मनुरिदं वक्ष्यमाणम् अन्वाह स्म जजाप ॥ ८ ॥ येनेति ॥ येन चिदात्मना हेतुभूतेन विश्वं देहेन्द्रियान्तःकरणादिरूपं कर्तृ चेतयते चेतनी भवति विश्वं तु यं न चेतयते न चेतनी करोति स्वत एव चिन्मयत्वात् । एकत्र चेतयतिरकर्मकः, परत्र सकर्मकः । तत्र हेतुः अस्मिन् देहादौ शयाने स्वपति सति यो जागर्ति साक्षितया वर्तते अहो अयं जनस्तं न वेद स तु इमं वेद ॥ ९ ॥ आत्मेति ॥ जगत्यां लोके यत्किंचिज्जगत् स्थावरजङ्गमात्मकं वस्तु तत् विश्वं सर्वमात्मना ईश्वरेण आवास्यमाच्छादनीयं सत्ताचैतन्याभ्यां संव्याप्तम् अतस्तेनैवेश्वरेण यत्किंचित्त्यक्तं कर्मकारेभ्यो वेतनमिव यत् दत्तं धनं तेनैव भुञ्जीथाः भोगान् भुंक्ष्व । यद्वा । तेन हेतुना त्यक्तेन ईश्वराय समर्पितेनैव भुञ्जीथाः देहादीनां निर्वाहं कुरु कस्यस्वित् कस्यचिदपि धनं मागृधः माभिकाङ्क्षीः । यद्वा । गृहे स्थितमपि धनं कस्यस्वित् न कस्यापि किन्त्वीश्वरस्यैवातो माकाङ्क्षीः । अत्रार्थे ईशावास्यमित्यादिका प्रायः समपाठा श्रुतिश्च ॥ १० ॥ यमिति ॥ यं सर्वं पश्यन्तमप्ययं जनश्चक्षुर्वा न पश्यति चक्षुराद्यविषयत्वात् नहि प्रमातारं प्रमाणं विषयीकरोतीति भावः । पश्यतोपि यस्य

सुनन्दायां वर्षशतं पदैकेन भुवं स्पृशन् ॥ तप्यमानस्तपो घोरमिदमन्वाह भारत ॥ ८ ॥ मनुरुवाच ॥ येन चेतयते विश्वं विश्वं चेतयते न यम् ॥ यो जागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः ॥ ९ ॥ आत्मा वास्यमिदं विश्वं यत् किञ्चिज्जगत्यां जगत् ॥ तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ १० ॥ यं न पश्यति पश्यन्तं चक्षुर्यस्य न रिष्यति ॥ तं भूतनिलयं देवं सुपर्णमुपधावत ॥ ११ ॥ न यस्याद्यन्तौ मध्यं च स्वः परो नान्तरं बहिः ॥ विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥ १२ ॥ स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः ॥ धत्तेऽस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥ १३ ॥

चक्षुः ज्ञानं न रिष्यति न नश्यति "रिष हिंसायाम्" अस्मदादिवृत्त्यात्मकज्ञानस्य विनाशित्वेपि तस्य स्वरूपात्मकज्ञानस्याविनाशित्वात् नहि सवितृप्रकाशः प्रकाश्यस्य नाशे नश्यति इति भावः । भूतानि निलयो यस्य तं सर्वान्तर्यामिणं देवं सुपर्णं शोभनपतगं जीवसखम् असङ्गम् उपधावत भजध्वम् ॥ ११ ॥ न यस्येति ॥ यस्य भगवतः आदिः जन्म न भवति अन्तो विनाशश्च न भवति अत एव मध्यं च नास्ति स्वः स्वकीयः परश्च नास्ति सर्वात्मकत्वात् तथा अन्तरं बहिश्च नास्ति सर्वत्र परिपूर्णत्वात् विश्वस्य अमूनि आद्यन्तादीनि यस्माद्भवन्ति विश्वं च यत् यद्रूपं तत् महत् परिपूर्णं ब्रह्मैव ऋतं सत्यं परमार्थभूतम् ॥ १२ ॥ तत्र हेतवः—स इति ॥ विश्वमेव कायो पुराणे बहूनि हूतानि नामानि यस्य सः ईशः सत्यः स्वयंज्योतिः स्वप्रकाशः अजः पुराणश्च स पूर्वोक्त ईश एव अजया अनादिसिद्धया स्वशक्तिरूपया मायया अस्य विश्वस्य जन्मादिकं धत्ते करोति विद्यया चिच्छक्त्या तां मायामुदस्य तिरस्कृत्य निरीहः निष्क्रिय एवास्ते ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ यस्मादीश्वरः कर्म कृत्वा संत्यज्य नैष्कर्म्येणास्ते अथ तस्मात् ऋषयो विवेकिनः अकर्महेतवे नैष्कर्म्याय । कर्महन्तवे इति पाठे बन्धनरूपकर्महननार्थम् । तुमर्थे तवेप्रत्ययश् छान्दसः ।अग्रे आदौ भगवदर्पितानि कर्माण्येवेहंते कुर्वन्ति हि यस्मात् ईहमानो भगवदर्पणेन कर्माणि कुर्वाणः पुरुषः प्रायोऽनीहां मोक्षं प्रपद्यते प्राप्नोति॥ १४॥ ईहत इति ॥ भगवानीश ईहते सृष्ट्यादि करोति परन्तु तत्र कर्मसु न विषज्जते अहं करोम्येतत्फलं भोक्ष्य इत्यासक्तिं न करोति हि यस्मात् परमानन्दात्मलाभेनैव पूर्णार्थः पूर्णकामः अतो ये तं भगवन्तमनुवर्तन्ते तेपि नावसीदन्ति कर्मभिर्न निबध्यन्त इत्यर्थः ॥ १५ ॥ तमिति ॥ ईहमानं सृष्ट्यादिकर्माणि कुर्वन्तमपि निरहङ्कृतं बुधं निराशिषं निष्कामं पूर्णं न अन्यैः चोदितं स्वतन्त्रमित्यर्थः । श्रीरामाद्यवतारैः स्वाचारेण नॄन् शिक्षयन्तं निजवर्त्मनि वेदमार्गे संस्थितम् अखिलान् धर्मान् भावयति तं प्रभुं प्रपद्ये ॥ १६ ॥ इतीति ॥ इत्येवं मन्त्रात्मिकामुपनिषदं व्याहरन्तं यतः समाहितं समाहितचित्तं स्वायंभुवं मनुं दृष्ट्वा सुप्तोच्छ्वसितवत् विवशमिव मन्वानाः असुरा यातुधानाश्च क्षुधानिमित्तेन जग्धुमत्तुमभ्यद्रवन् अत्रेशावास्योपनिषदर्थे कथनात् मन्त्रोपनिषदमित्युक्तं संहितासु पठिता उपनिषद्मन्त्रोपनिषदुच्यते तत्र शुक्लयजुषि ईशावास्योपनिषत्

अथाग्रे ऋषयः कर्माणीहन्तेऽकर्महेतवे ॥ ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥ १४ ॥ ईहते भगवानीशो न हि तत्र विषज्जते ॥
आत्मलाभेन पूर्णार्थो नावसीदन्ति येऽनु तम् ॥ १५ ॥ तमीहमानं निरहङ्कृतं बुधं निराशिषं पूर्णमनन्यचोदितम् ॥ नॄन् शिक्षयन्तं
निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनम् ॥ १६ ॥ श्रीशुक उवाच ॥ इति मन्त्रोपनिषदं व्याहरन्तं समाहितम् ॥ दृष्ट्वाऽसुरा यातु-
धाना जग्धुमभ्यद्रवन्क्षुधा ॥ १७ ॥ तांस्तथावसितान्वीक्ष्य यज्ञः सर्वगतो हरिः ॥ यामैः परिवृतो देवैर्हत्वाऽशासत्त्रिविष्टपम् ॥ १८ ॥
स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत् ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः ॥ १९ ॥

प्रसिद्धा सर्वसम्मता च कृष्णयजुषि श्वेताश्वतरोपनिषदम् अथर्वणि मुण्डकोपनिषदं च मन्त्रोपनिषदमाहुः । शेषा ब्राह्मणोपनिषदः ॥ १७॥ तानिति ॥ तथावसितान् मनुभक्षणे कृतनिश्चयांस्तानसुरादीन् वीक्ष्य सर्वगः सर्वसाक्षी यज्ञाख्यो हरिः यामैः स्वपुत्रैर्देवैः परिवृतस्तान् हत्वा त्रिविष्टपं स्वर्गमशासत् अपालयत् स्वयमेवेन्द्रो बभूवेत्यर्थः । अत्र शास इत्वाभाव आर्षः । तत्र प्रतिमन्वन्तरं मन्वादयः षडन्येऽन्ये भवन्ति यथाहि सूतो द्वादशे वक्ष्यति "मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः । ऋषयोंशावतारश्च हरेः षड्विध-मुच्यते" । इति तत्राद्यः स्वायम्भुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ यामादयो देवाः " तुषितानाम ते देवा आसन् स्वायंभुवान्तर " इति चतुर्थस्कन्धवचनं तु कल्पान्तरी-यमिति ज्ञेयम् । " मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः । पुलस्तश्च वसिष्ठश्च सप्तैते ब्रह्मणः सुताः " ॥ इति हरिवंशोक्ताः सप्तर्षयः यज्ञो हरेरवतारः इन्द्रश्च स एवेति तन्मन्वन्तरं पञ्चविधमेवेति ॥ १८ ॥ स्वारोचिष इति ॥ अग्नेः सुतः स्वारोचिषाख्यो द्वितीयो मनुरभवत् द्युमदादयस्तस्यात्मजाः पुत्राश्च बभूवुः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति ॥ तत्र मन्वन्तरे यज्ञपुत्रो रोचन इन्द्रो जातः यज्ञपुत्रास्तुषितादयो देवा आसन् आदिपदेन "तोषः प्रतोषः संतोषो भद्रः शान्तिरिडस्पतिः । इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट्" ॥ इति चतुर्थस्कन्धोक्तावशिष्टा ज्ञेयाः । ऊर्जस्तंभादयः सप्त ब्रह्मवादिन ऋषयो बभूवुः। आदिपदेन "ऊर्जो वशिष्ठपुत्रश्च स्तम्भः काश्यप एव च । प्राणो बृहस्पतिश्चैव दत्तोऽत्रिश्च्यवनस्तथेति" ॥ हरिवंशोक्ता अन्ये ज्ञेयाः ॥ २० ॥ ऋषेरिति ॥ वेदशिरस ऋषेस्तुषितेति नाम प्रसिद्धा पत्न्यभूत् तस्यां तुषितायां ततो वेदशिरसः सकाशात् विभुरित्यभिविश्रुतः विख्यातो देवो भगवान् जज्ञे॥ २१ ॥अष्टाशीतीति॥ अष्टाशीतिसहस्रसंख्याका ये धृतव्रताः यमनियमादिसाधनसंपन्ना मुनयस्ते तस्य कौमारब्रह्मचारिणो विभोर्व्रतमाचारमन्वशिक्षन् । तद्भाव आर्षः ॥ २२ ॥ तृतीय इति ॥ हे नृप प्रियव्रतस्य सुत उत्तमाख्यस्तृतीयो मनुरभवत् पवनादयस्तस्य सुता अभवन् ॥ २३ ॥ वसिष्ठेति ॥ तत्र वसिष्ठस्य तनयाः पुत्राः प्रमदादयः सप्त ऋषय आसन् सत्यादिसंज्ञकाश्च देवगणा आसन् सत्यजिदाख्यश्चेन्द्र आसीत् ॥ २४॥ धर्मस्येति ॥ धर्मस्य भार्यायां

तत्रेन्द्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ॥ ऊर्जस्तम्भादयः सप्त ऋषयो ब्रह्मवादिनः ॥ २० ॥ ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ॥
तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥ २१ ॥ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ॥ अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः ॥
॥ २२ ॥ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ॥ पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप ॥ २३ ॥ वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः ॥
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥ २४ ॥ धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः ॥ सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥
॥ २५ ॥ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् ॥ भूतद्रुहो भूतगणांस्त्ववधीत्सत्यजित्सख ॥ २६॥ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः॥
पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥ २७ ॥ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ॥ ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे ॥
॥ २८ ॥ देवा वैधृतयो नाम विधृतेस्तनया नृप ॥ नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥ २९ ॥

सूनृताख्यायां तु भगवान् पुरुषोत्तमः सत्यसेन इति नाम्ना ख्यातः प्रसिद्धः सत्यव्रतैः तदाख्यैर्देवविशेषैः सह जातः ॥२५॥ स इति ॥ स च सत्यव्रतादिभिर्देवैः सहितः सत्यजितः इन्द्रस्य सखा भूत्वा अनृतमनृतभाषणमेव व्रतं येषां दुष्टं शीलं येषां ते च तान् असतो दुष्टान् भूतद्रुहः यक्षराक्षसान्भूतगणांश्च अवधीत् ॥२६॥ चतुर्थ इति ॥ उत्तमस्य तृतीयमनोः भ्राता प्रियव्रतस्य पुत्रो नाम्ना च तामसश्चतुर्थो मनुरासीत् पृथ्वादयो दश तस्य सुता आसन् ॥२७॥ सत्यका इति ॥ सत्यकादयस्तत्र देवा आसन् त्रिशिखसंज्ञकः ईश्वरः इन्द्र आसीत् तामसे मन्वन्तरे ज्योतिर्धामादयः सप्त ऋषय आसन् आदिपदेन "ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्धनदस्तथा ॥ पीवरश्चर्षयो ह्येते सप्त तत्रापि चान्तर" इति हरिवंशोक्ता अन्येपि ग्राह्याः ॥२८॥ देवा इति ॥ हे नृप विधृतेस्तनया वैधृतय इति प्रसिद्धास्तामसमन्वन्तरे देवा बभूवुः यैर्वैधृतिभिः स्वेन तेजसा स्वबुद्धिबलेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेन नष्टाः लुप्ताः वेदा विधृताः अत एतस्मिन्मन्वन्तरे द्विविधा देवा आसन्निति दर्शितम् ॥ २९ ॥ तत्रेति ॥ तत्रापि मन्वन्तरे हरिमेधसो भर्तुः सकाशात् हरिण्यां भार्यायां हरिरित्याहृतो मुनिभिरुदाहृतः भगवान् जज्ञे येन हरिसंज्ञकेन भगवता ग्रहात् मकरात् गजेन्द्रो मोचित इति ॥ ३० ॥ बादरायण इति ॥ हे बादरायणे यः हर्याख्यो भगवान् ग्राहग्रस्तं गजपतिं यथा अमूमुचत् मोचयामास तदेतत् ते त्वत्तो वयं सर्वं श्रोतुमिच्छामः॥३१॥ तदिति ॥ यत्र यत्र कथायां उत्तमः श्लोको यशो यस्य सः हरिर्गीयते तत्सैव कथा धन्यं स्वस्त्ययनं मोक्षावहं शुभं महत्पुण्यं यद्वा तत् कथासु तासु कथासु ॥ ३२ ॥ परीक्षितेति ॥ हे विप्राः स तु सर्वज्ञतया प्रसिद्धः बादरायणिः वेदव्यासस्य पुत्रः । शुकः एवं प्रायोपविष्टेन परीक्षिता भगवत्कथासु चोदितः मुदा हर्षेण पार्थिवं परीक्षितं प्रतिनन्द्य सदसि मुनीनां शृण्वतां सतां सदसि उवाच इतिहासं वर्णितवान् ॥ ३३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । अष्टमस्यादिमे गङ्गासहायो निरमादिमाम् ॥ १ ॥ द्वितीये क्रीडनाजीभिः ग्रस्तो ग्राहेण हस्तिराट् ॥ स्वमुक्त्यै हरिमस्मार्षीत्तत्र

तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधसः ॥ हरिरित्याहृतो येन गजेन्द्रो मोचितो ग्रहात् ॥ ३० ॥ राजोवाच ॥ बादरायण एतत्ते श्रोतुमिच्छामहे वयम् ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥ ३१ ॥ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभम् ॥ यत्र यत्रोत्तमश्लोको भगवान्गीयते हरिः ॥ ३२ ॥ सूत उवाच ॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ॥ उवाच विप्राः प्रतिनन्द्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वताम् ॥ ३३ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे मन्वन्तरानुचरिते प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः ॥ क्षीरोदेनावृतः श्रीमान्योजनायुतमुच्छ्रितः ॥ १ ॥तावता विस्तृतः पर्यक् त्रिभिः शृङ्गैः पयोनिधिम् ॥ दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥ २ ॥ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसाम् ॥ ३ ॥ स चावनिज्यमानाङ्घ्रिः समन्तात्पय ऊर्मिभिः ॥ करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥ ४ ॥

श्लोका गुणाग्नयः ॥ उवाचेत्येकमङ्कं चूर्नाश्चत्वारिंशदनुष्टुभः ॥ २ ॥ आसीदिति ॥ हे राजन् क्षीरसमुद्रेणावृतः क्षीराब्धिद्वीपस्थ इत्यर्थः । श्रीमान् रत्नादिसमृद्ध्या शोभावान् योजनायुतमुच्छ्रितः उन्नतः त्रिकूट इति विश्रुतः प्रख्यातः कश्चिद्गिरिवर आसीत् अस्ति ॥ १ ॥ तावतेति ॥ पर्यक् परितस्तावता योजनायुतेन विस्तृतश्च त्रिकूटसमाख्याबीजमाह—त्रिभिःशृङ्गैरिति ॥ रौप्यायसहिरण्मयैस्त्रिभिर्मुख्यैः शृङ्गैः पयोनिधिं दिशश्च खम् आकाशं च रोचयन् प्रकाशयन्नास्ते ॥ २ ॥ अन्यैरिति ॥ तथारत्नैर्धातुभिश्च विचित्रितैरन्यैश्च शृङ्गैर्नानाद्रुमादिभिः निर्झराम्भसां निर्घोषैश्च सर्वाः ककुभः दिशः रोचयन्नास्ते इत्यनुषङ्गः।निर्घोषैर्दिशां रोचना तासु प्रतिध्वनिसमर्पणेनेति ज्ञेयम् ॥ ३ ॥ स चेति ॥ स च त्रिकूटः पयसः समुद्रजलस्योर्मिभिः समन्तात्सर्वतोऽवनिज्यमानाः प्रक्षाल्यमाना अङ्घ्रयः मूलप्रान्ता यस्य स तथाभूतः ऊर्मिभिरितस्तत आकर्षणेन घर्षितैर्हरि-

Nepal Sanskrit University, Dang. Digitized by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

द्भिः पालाशवर्णैर्मरकतमणिभिर्भूमिं श्यामलां करोति । यद्वा । हरित्सु अष्टसु दिक्षु स्थितैर्मरकताश्मभिर्मध्यगतां भूमिं दूर्वादलश्यामलां करोति ॥४॥ सिद्धेति ॥ तथा क्रीडद्भिः सिद्धादिभिरप्सरोन्तैर्जुष्टाः सेविताः कन्दरा गुहा यस्य स तथाभूतः ॥ ५ ॥ यत्रेति ॥ यत्र त्रिकूटे किन्नरादीनां संगीतसंनादैर्नदन्त्यो गुहा यस्मिन्प्रदेशे तं प्रदेशमभिलक्षीकृत्य श्लाविनः स्ववीर्यश्लाघिनः अवश्यके णिनिः । हरयः सिंहाः परशङ्कया सिंहान्तराशङ्कया जातया अमर्षया असहनेन स्त्रीत्वमार्षम् । अभिगर्जन्ति ॥ ६ ॥ नानेति ॥ नानाविधा ये आरण्याः अरण्यभवाः पशवो महिषादयस्तेषां व्रातैः सङ्कुलाभिर्व्याप्ताभिः द्रोणीभिः पर्वतान्तर्देशैरलंकृतः किंच चित्रा द्रुमा येषु तेषु सुरोद्यानेषु कलकण्ठा मधुरस्वरविहङ्गमा यस्मिन् तादृशः आस्ते इति संबन्धः ॥ ७ ॥ सरिदिति ॥ अच्छोदकैः सरित्सरोभिर्युतः मणय इव वालुका येषु तैः पुलिनैश्च युतः देवस्त्रीणां मज्जनेन य आमोदस्तेन

सिद्धचारणगन्धर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकन्धरः॥ ५ ॥ यत्र सङ्गीतसन्नादैर्नदद्गुहममर्षया॥अभिगर्जन्ति हरयः श्लाघिनः परशङ्कया ॥ ६ ॥ नानारण्यपशुव्रातसंकुलद्रोण्यलङ्कृतः ॥ चित्रद्रुमसुरोद्यानकलकण्ठविहङ्गमः ॥७॥ सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः॥ देवस्त्रीमज्जनामोदसौरभाम्ब्वनिलैर्युतः ॥८॥ तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ॥ उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥सर्वतोऽलङ्कृतं दिव्यैर्नित्यं पुष्पफलद्रुमैः ॥ ९ ॥ मन्दारैः पारिजातैश्च पाटलाशोकचम्पकैः ॥ चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥ १० ॥ क्रमुकैर्नारिकेलैश्च खर्जूरैर्बीजपूरकैः ॥ मधूकैः सालतालैश्च तमालैरसनार्जुनैः॥११ ॥अरिष्टोदुम्बरप्लक्षैर्वटैः किंशुकचन्दनैः ॥ पिचुमन्दैः कोविदारैः सरलैः सुरदारुभिः ॥ १२ ॥द्राक्षेक्षुरम्भाजम्बूभिर्बदर्यक्षाभयामलैः ॥ बिल्वैः कपित्थैर्जम्बीरैर्वृतो भल्लातकादिभिः॥१३॥तस्मिन्सरःसु विपुलं लसत्काञ्चनपङ्कजम् ॥ कुमुदोत्पलकह्लारशतपत्राश्रियोर्जितम् ॥ मत्तषट्पदनिर्घुष्टं शकुन्तैश्च कलस्वनैः ॥१४॥ हंसकारण्डवाकीर्णं चक्राह्वैः सारसैरपि॥ जलकुक्कुटकोयष्टिदात्यूहकुलजितम्॥१५॥मत्स्यकच्छपसंचारचलत्पद्मरजःपयः॥कदम्बवेतसनलनीपवञ्जुलकैर्वृतम्॥१६॥कुन्दैः कुरबकाशोकैः शिरीषैः कुटजेङ्गुदैः॥ कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥१७॥ मल्लिकाशतपत्रैश्च माधवीजालकादिभिः ॥ शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः ॥ १८ ॥

सौरभेण युक्तान्यम्बूनि अनिलाश्च तैश्च युत आस्ते ॥ ८ ॥ तस्येति सार्द्धम् ॥ तस्य त्रिकूटस्य द्रोण्यां सुरयोषितामाक्रीडं क्रीडास्थानम् ऋतुमदिति नाम प्रसिद्धं दिव्यैः नित्यं पुष्पाणि फलानि च येषां तादृशैर्द्रुमैः सर्वतोलङ्कृतं भगवतो महात्मनो लोकपालस्य वरुणस्य उद्यानमस्ति ॥९॥ पुनर्गिरिं वर्णयति—मन्दारैरिति चतुष्केण ॥ मन्दारादिभिर्वृत इत्यन्वयः । यद्वा । उद्यानस्यैवेदं वर्णनं । तत्र वृत इति पुंस्त्वमार्षम् । स्पष्टमेतत्॥१०॥११॥१२॥१३॥तस्मिन्निति सार्द्धपञ्चकम् । तस्मिन् गिरौ उद्याने वासरोऽस्ति तद्वर्णयति सुविपुलमतिविस्तृतं लसन्ति काञ्चनपङ्कजानि यस्मिंस्तत् कुमुदादीनां श्रिया ऊर्जितं समृद्धं मधुपानेन मत्तैः षट्पदैर्भ्रमरैः निर्घुष्टं नादितं तथा कलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुरः स्वनो येषां तैः पक्षिभिश्च निर्घुष्टं हंसैः कारण्डवैश्चाकीर्णं संकुलं चक्राह्वैः सारसैरप्याकीर्णं जलकुक्कुटादीनां कुलैः कूजितं मत्स्यानां कच्छपानां च संचारेण चलतां पद्मानां रजसा युक्तं पयो जलं यस्मिंस्तत् कदम्बादिभिर्वृतं कुन्दादिभिरलं शोभितमिति नित्यमृतवः फलपुष्पादिसम्पत्तिहेतवो येषां तैरन्यैश्च तीरजैर्द्रुमैरमलं शोभितम् ॥१४॥१५॥१६॥१७॥१८॥ तत्रेति ॥ तत्रैवं सति एकदा स गिरिः काननं चाश्रयः स्थानं यस्य सः वारणयूथपः गजेन्द्रः करेणुभिर्गजीभिः सह चरन् कीचकवेणुवेत्रवन्तं विशालं गुल्मं लतादिसंदर्भं वनस्पतींश्च प्ररुजन् प्रभञ्जन्नासीत् ॥१९॥ यद्गन्धेति ॥ यस्य गजेन्द्रस्य गन्धमात्राद्वायुनोपनीतात् सिंहादयो भयाद्द्रवन्ति । पलायन्ते हरयः सिंहाः गजेन्द्राः अन्ये प्रतिपक्षिणो गजाः ॥ २० ॥ वृका इति ॥ वृकादयस्तु क्षुद्रा अल्पप्राणिनो यदनुग्रहेण यस्यानुज्ञानेन अन्यत्र दृष्टिपथं त्यक्त्वा अभीता निर्भयाश्चरन्ति चेरुः ॥२१॥ स इति युग्मम् ॥ स गजेन्द्रो घर्मेण आतपेन तप्तः करिभिः गजैः करेणुभिः गजीभिश्च वृतः मदच्युत् मदस्रावी कलभैर्गजपोतैरनुद्रुतः गरिम्णा स्थौल्येन गिरिं प्रकम्प-

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् ॥ सकण्टकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् ॥१९॥ यद्गन्धमात्राद्धरयो
गजेन्द्रा व्याघ्रादयो व्यालमृगाश्च खड्गाः ॥ महोरगाश्चापि भयाद्द्रवन्ति सगौरकृष्णाः शरभाश्चमर्यः ॥ २० ॥ वृका वराहा महिषर्क्षशल्या गोपु-
च्छशालावृकमर्कटाश्च ॥ अन्यत्र क्षुद्रा हरिणाः शशादयश्चरन्त्यभीता यदनुग्रहेण ॥२१ ॥ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैर-
नुद्रुतः ॥ गिरिं गरिम्णा परितः प्रकम्पयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥ २२ ॥ सरोऽनिलं पङ्कजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः ॥
वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद् द्रुतम् ॥ २३ ॥ विगाह्य तस्मिन्नमृताम्बुनिर्मलं हेमारविन्दोत्पलरेणुवासितम् ॥ पपौ
निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः ॥ २४ ॥ स पुष्करेणोद्धृतशीकराम्बुभिर्निपाययन्संस्नपयन्यथा गृही ॥ घृणी करेणूः
कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ॥ २५ ॥

यन् मदमश्नन्तीति तथा तैरलिकुलैः परितो निषेव्यमाणः पङ्कजरेणुभिः रूषितं व्याप्तं सरसः संबन्धिनमनिलं वायुं विदूरादेव जिघ्रन् मदेन विह्वले चलिते ईक्षणे यस्य सः । तृषा पिपासया अर्दितेन पीडितेन स्वयूथेन वृतस्तस्य सरोवरस्याभ्याशं समीपं द्रुतं सत्वरमथानन्तरमेवागमत् ॥ २२ ॥ २३ ॥ विगाह्येति ॥ तस्मिन् सरसि विगाह्य प्रविश्य अद्भिः सरोजलैरात्मानं स्नपयन् गतक्लमः श्रमरहितः सन् निर्मलं स्वच्छं हेमवत्प्रकाशमानानामरविन्दादीनां रेणुभिर्वासितं निजपुष्करेण स्वशुण्डाग्रेण उद्धृतममृतमिव स्वादु अम्बु जलं निकामं यथेष्टं पपौ ॥ २४ ॥ स्वेति ॥ घृणी करेणुषु कलभेषु च कृपाशीलः अजस्य हरेर्मायया कृपणस्तेष्वासक्तः दुर्मदश्च स गजेन्द्रः स्वपुष्करेणोद्धृतैः शीकराम्बुभिः जलबिन्दुभिः करेणूः गजीः कलभांस्तत्पोतांश्च पाययन् संस्नपयंश्च कृच्छ्रं कष्टमागतं नाचष्ट नालोचितवान् । यथा गृही गृहाद्यासक्तः पुरुषस्तथेति ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ हे नृप तत्र सरसि दैवेन प्रारब्धकर्मानुगुणं प्रवृत्तेनेश्वरेण चोदितः कश्चिद्बलीयान् ग्राहो मकरस्तं गजेन्द्रं चरणे पादे रुषा क्रोधेनाग्रहीत् जग्राह । स गजेन्द्रो यदृच्छया दैवेनैवं व्यसनं दुःखं गतः प्राप्तः सन् यतोऽतिबलोऽतो यथाबलं स्वबलानुसारेण विचक्रमे आत्मानं मोचयितुं पराक्रममकरोत् ॥ २६ ॥ तथेति ॥ तथा बलीयसा ग्राहेण तरसा बलेन विकृष्यमाणमत एवाऽऽतुरं विवशं यूथपतिं गजेन्द्रं प्रति दीनधियः करेण वो विचुक्रुशुः रुरुदुः । पार्ष्णिग्रहाः पृष्ठतः उपोद्बलका अन्ये च गजास्तं तारयितुं ततो विमोचयितुं नाशकन् नाशक्नुवन् ॥ २७ ॥ नियुध्यतोरिति ॥ महीपते इभेन्द्रनक्रयोर्गजेन्द्रग्राहयोरेवं मिथो नियुध्यतोः शता आर्षः । अन्तरतो बहिश्च विकर्षतोः सप्राणयोर्जीवतोरेव सहस्रं समाः संवत्सरा व्यगमन् अतिक्रान्ता बभूवुः । तद्दृष्ट्वाऽमरा देवा अपि चित्रम् आश्चर्यममंसत मेनिरे ॥ २८॥ तत इति ॥ ततः संवत्सरसहस्रानन्तरं दीर्घेण भूयसा कालेन जले विकृष्यमाणस्य अत एव अवसीदतः खिद्यमानस्य गजेन्द्रस्याहारसंचाराभावात् मनआदीनां महान् व्ययः क्षयोऽभूत् । तत्र मन उत्साहशक्तिः बलं शरी-

तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत् ॥ यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ॥ २६ ॥ तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ॥ विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् ॥ २७ ॥ नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः ॥ २८ ॥ ततो गजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्सकलं जलौकसः ॥ २९ ॥ इत्थं गजेन्द्रः स यदाप सङ्कटं प्राणस्य देही विवशो यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥ ३० ॥ नमामि मे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम् ॥ ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् ॥ ३१ ॥

रशक्तिः ओज इन्द्रियशक्तिः जलमोकः स्थानं यस्य तस्य ग्राहस्य तु जलरूपाहारसंचारसद्भावात्सकलं मनआदिकं विपर्ययोऽधिकमभूदित्यर्थः । यद्वा । ग्राहस्य तु सकलं यथा स्यात्तथा बलादीनां विपर्ययः व्ययस्याभावः अभूत् प्रत्युताधिक्यमित्यर्थः ॥ २९ ॥ इत्थमिति ॥ देही देहसामर्थ्यमात्रसारः स गजेन्द्रो यदा इत्थं यदृच्छया विवशो ग्राहवशस्तत आत्मानं विमोचयितुमपारयन् प्राणस्य संकटं प्राणस्थितावपि संशयं प्राप तदात्मविमोक्षणे चिरं दध्यौ कथं ग्राहान्मम विमोक्षणं स्यादिति चिरं चिन्तितवान् ।अथानन्तरमिमां वक्ष्यमाणां बुद्धिमभ्यपद्यत प्राप ॥ ३० ॥ बुद्धिमाह—नमामीति ॥ आतुरं ग्राहवशवर्तितया व्याकुलं मामिमे ज्ञातयो गजा मोचितुं णिलोप आर्षः । न प्रभवन्ति तदा करिण्यः कुतः प्रभवेयुरतो विधातुर्दैवस्य पाशरूपेण ग्राहेणावृतो निबद्धोऽप्यहं पशुरपि तमेव परायणं परममाश्रयभूतं परमेश्वरं यामि शरणं व्रजामि ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ बलिनः प्रचण्डवेगात् अन्तयति नाशयति इत्यन्तको मृत्युः स एवोरगो महासर्पस्तस्मादभिधावतः सर्वत्रागच्छतो भीतमत एव प्रपन्नं स्वशरणागतं जनं यः कश्च-नेशः परिपाति यस्य भयात् मृत्युश्च प्रधावति सर्वप्राणिषु प्रवर्तते । यद्वा । मृत्युरपि शरणागतान्निवर्त्तते तमेवारणं शरणमीमहि व्रजेमेत्यर्थः । ईङ् दिवादिः, आर्षः श्यन्लुक् ॥ ३३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमादष्टमस्य द्वितीयके ॥ २ ॥ स्तुतस्तृतीये गजेन हरिर्ग्राहादमोचयत् ॥ ग्राहं देवलशापाच्च श्लोका रामाग्नयोऽ-त्र तु ॥ त्रीण्युवाचेति सार्द्धास्त्रिचत्वारिंशदनुष्टुभः ॥ ३ ॥ एवमिति ॥ एवं व्यवसितः कृतनिश्चयो गजेन्द्रो बुद्ध्या मनः हृदि समाधाय स्थिरीकृत्य विषयान्तरेभ्यः प्रत्याहृत्य प्राग्जन्मनि इन्द्रद्युम्नसंज्ञके जन्मनि अनुशिक्षितमभ्यस्तं परमं जप्यमेव जाप्यं स्तोत्रं स्वार्थेऽण् । जजाप ॥ १ ॥ नम इति ॥ यतश्चिद्रूपादेतद्देहेन्द्रियादिकं चिदात्मकं चेतनं भवति तस्मै पुरुषाय पूर्षु कारणत्वेन प्रविष्टाय आदिः प्रकृतिः बीजं पुरुषस्तद्रूपाय परेशाय स्वतन्त्राय भगवते नमः नमनम् अभिधीमहि ग्राहगृहीतत्वेन कायप्रणतेरशक्य-

यः कश्चनेशो बलिनोऽन्तकोरगात्प्रचण्डवेगादभि धावतो भृशम् ॥ भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ॥ ३२ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे मन्वन्तरानुवर्णने गजेन्द्रोपाख्याने द्वितीयोऽध्यायः ॥२॥ श्रीशुक उवाच ॥ एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥ १ ॥ गजेन्द्र उवाच ॥ नमो भगवते तस्मै यत एतच्चिदात्मकम् ॥ पुरुषायादिबी-जाय परेशायाभिधीमहि ॥ २ ॥ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ॥ योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ॥३॥ यः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितम् ॥ अविद्धदृक्साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ॥ ४ ॥ कालेन पञ्चत्व-मितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ॥ तमस्तदासीद्गहनं गभीरं यस्यास्य पारेऽभिविराजते विभुः ॥ ५ ॥

त्वात् ॥ २ ॥ यस्मिन्निति ॥ यस्मिन्नधिष्ठाने इदं विश्वं तिष्ठति यतश्चोपादानादिदं भवति येन कर्त्रा येन साधनेन चेदं क्रियते यश्च स्वयमेवेदं भवति योऽस्मात् स्थूलात् कार्यात् परस्मात्सूक्ष्मात्कारणाच्च परस्तं स्वयंभुवं स्वतः सिद्धं प्रपद्ये शरणं व्रजामीत्यर्थः ॥ ३ ॥ य इति ॥ यः स्वात्मनि स्वस्मिन्नेव निजमाययार्पितं विरचितं क्वचित्कदाचि-त्सृष्टिसमये स्थूलकार्यतया विभातमभिव्यक्तं क्व च प्रलये तत्तिरोहितं सूक्ष्मकारणरूपेण लीनं च तत्कार्यकारणात्मकमुभयम् अविद्धदृक् अलुप्तदृष्टिः साक्षी सन्नीक्षते सः आत्ममूलः स्वयंप्रकाशः परः प्रकाशकादपि चक्षुरादेः परः तस्यापि प्रकाशकः मामवतु ॥ ४ ॥ कालेनेति ॥ द्विपरार्धावसानरूपेण कालेन निमित्तेन कृत्स्नशो लोकेषु चतुर्द-शभुवनात्मकेषु तथा तत्पालेषु ब्रह्मादिशरीरेषु च पञ्चत्वं पञ्चमहाभूतात्मकत्वमितेषु प्राप्तेषु तथा सर्वहेतुषु महत्तत्वादिषु च प्रकृतौ लीनेषु सत्सु तदा गहनं दुरवगाहं गभीरमनन्तं तमः प्रकृत्याख्यमासीत् यस्तस्य पारे तेनानभिभूतः संस्तस्याश्रयभूतो विभुर्व्यापकोऽभितो विराजते ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ सत्वप्रधाना देवादयोऽपि यस्य पदं यथावत्स्वरूपं न विदुस्तर्हि पुनरन्यो रजस्तमः प्रधानो जन्तुः अर्वाचीनः तत्त्वानभिज्ञःप्राणी तं गन्तुं ज्ञातुमीरितुं वर्णयितुं वा कोऽर्हति। यथा आकृतिभिः रूपभेदैः विचेष्टतः नटनं कुर्वतः शताऽऽर्षः। नटस्य तत्त्वं जना न विदुस्तथेत्यर्थः । एवं दुरत्ययं दुर्गममनुक्रमणं चरितं कथनं वा यस्य सः मा मामवतु ॥६॥ दिदृक्षव इति ॥ यस्य पदं स्वरूपं दिदृक्षवः साक्षात्कर्तुमिच्छवः विमुक्तो दारपुत्रादिषु शब्दादिविषयेषु च सङ्गो यैस्तथाभूताः भूतानां प्राणिनामात्मभूताः स्वात्मसमदर्शिनश्च वने स्थिताः सुसाधवो मुनयः सुमङ्गलम् अव्रणमच्छिद्रम् अलोकव्रतं ब्रह्मचर्यादिचरन्ति कुर्वन्ति स भगवान् मे मम गम्यत इति गतिः प्राप्तव्योऽस्तु ॥ ७ ॥ नेति ॥ यद्यप्य-स्मदादिवत् प्रारब्धकर्माधीनं यस्य जन्मादिदोषपर्यन्तं न विद्यते गुणदोषमिति समाहारे द्वन्द्वः। गुणदोष एवेति पाठे "सर्वो द्वन्द्वो विभाषयैकवद्भवति" इतीतरेतरयोगेऽप्येकत्वम्। "ऊकालोज्झस्वदीर्घप्लुतः" इतिवत् तथापि लोकस्य अप्ययः प्रलयः संभव उत्पत्तिस्तयोर्द्वन्द्वैक्यं तदर्थं स्वमायया तानि जन्मादीनि अनुकालं तत्तदवसरे य ऋच्छति स्वीकरोति

न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम् ॥ यथा नटस्य कृतिभिर्विचेष्टितो दुरत्ययानुक्रमणः स मावतु ॥ ६ ॥ दिदृक्षवो यस्य पदं सुमङ्गलं विमुक्तसङ्गा मुनयः सुसाधवः ॥ चरन्त्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः ॥ ७ ॥ न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ॥ तथाऽपि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकालमृच्छति ॥८॥ तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये ॥ अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥ नम आत्मप्रदीपाय साक्षिणे परमात्मने ॥ नमो गिरां विदूराय मनसश्चेतसामपि ॥ १० ॥ सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ॥ नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥ ११ ॥ नमः शान्ताय घोराय मूढाय गुणधर्मिणे ॥ निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥ १२ ॥ क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ॥ पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥ १३ ॥

तस्मै परेशाय नमः ॥ ८ ॥ तस्मै इति ॥ परेशाय ब्रह्मणे परिपूर्णाय अनन्ताः शक्तयो यस्य तस्मै अरूपाय उरूणि बहूनि रूपाणि यस्य तस्मै आश्चर्यं विश्वसृष्ट्यादिरूपं कर्म यस्य तस्मै नमः ॥ ९ ॥ नम इति ॥ आत्मनैव प्रदीप्यत इत्यात्मप्रदीपः प्रकाशान्तरस्याविषयः तस्मै साक्षिणे प्रकाशाय परमात्मने जीवनियन्त्रे गिरां वाचां मनसश्चेतसां चित्तवृत्तीनां च विदूराय अविषयाय नमः ॥ १० ॥ सत्वेनेति ॥ विपश्चिता विवेकिना कर्त्रा सत्वेन गुणेन नैष्कर्म्येण निवृत्तिधर्मेण प्रतिलभ्याय कैवल्यं मोक्षस्तस्य नाथाय अधिपतये दात्रे नमः ।निर्वाणसुखसंविदे मोक्षानन्दानुभूतये नमः ॥ ११॥ नम इति ॥ शान्ताय सत्त्वप्रधानाय घोराय रजःप्रधानाय मूढाय तमःप्रधानाय अत एव गुणधर्मिणे सत्त्वादिधर्मानुकारिणे निर्विशेषाय अत एव साम्याय वैषम्यरहिताय ज्ञानघनाय चिद्रूपाय निर्विशेषत्वेऽपि प्रधानतो विलक्षणायेत्याशयः । नमः ॥१२॥ क्षेत्रेति ॥ क्षेत्रं शरीरे-न्द्रियादिसङ्घातं जानातीति तथा तस्मै नमः।सर्वेषामध्यक्षाय साक्षिणे पुरुषाय सर्वान्तर्यामिणे नमः।आत्मनां क्षेत्रज्ञानां मूलाय सर्वेषां मूलप्रकृतये प्रकृतेरपि मूलकारणाय नमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजदन्तादिः मूलप्रकृतिरूपायेति वा ॥ १३ ॥ सर्वेति ॥ सर्वेषामिन्द्रियाणां तद्गुणानां शब्दादिविषयाणां च द्रष्ट्रे सर्वे ये प्रत्ययाः प्रमाणसंशयविपर्ययादयस्तेषां हेतवे " मत्तः स्मृतिर्ज्ञानमपोहनं च " इति वचनात् । असता जडेन देहेन्द्रियादिसङ्घातेन छायया अविद्यया च उक्ताय प्रतिबिम्बेन बिम्बवत्सूचिताय । अक्तायेति पाठे छायया अध्यासेन अक्ताय युक्ताय तदधिष्ठानाय सत्सु कार्येषु देहेन्द्रियादिषु आभासो यस्य सद्रूपो विषयेष्वाभासो यस्येति वा तस्मै ते नमः ॥ १४ ॥ नम इति ॥ अखिलकारणाय सर्वस्य कारणरूपाय स्वयं तु निष्कारणाय अद्भुतकारणाय कारणत्वेऽपि विकाररहित्येन मृदादिलौकिककारणतो विलक्षणाय ते नमो नमः। सर्वे आगमाः पञ्चरात्रादयः आम्नाया वेदाश्च तेषां महार्णवाय स्रोतसां समुद्राय इव पर्यवसानभूमये अपवर्गाय मोक्षरूपाय अत एव परायणाय उत्तमानामाश्रयरूपाय नमः ॥ १५ ॥ गुणेति ॥ सत्वादयो गुणा एवारणिस्तया छन्नं चिज्जीवसमष्टिरूपमूष्माणमग्निं पिबति संहारकाले स्वस्मिन्नुपसंहृत्य यो निदधाति स तथोक्तस्तस्मै नमः। यद्वा।गुणारण्या छन्नश्चिदूष्मपो ज्ञानाग्निस्तस्मै

सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ॥ असता च्छाययोक्ताय सदाभासाय ते नमः॥ १४ ॥ नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय ॥ सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ॥ १५ ॥ गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय ॥ नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥ १६ ॥ मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ॥ स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते॥ १७॥आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसङ्गविवर्जिताय॥मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ॥ १८ ॥ यं धर्मकामार्थविमुक्तिकामा भजन्त इष्टां गतिमाप्नुवन्ति ॥ किं त्वाशिषो रात्यपि देहमव्ययं करोति मेऽदभ्रदयो विमोक्षणम् ॥ १९ ॥

तेषां गुणानां क्षोभे कार्ये विस्फूर्जितं बहिर्वृत्तिकं मानसं मनो यस्य तस्मै नमः । नैष्कर्म्यमात्मतत्त्वं तस्य भावो भावना तेन विवर्जिता निवर्तिता आगमा विधिनिषेधलक्षणा यैस्तेषु ज्ञानिषु स्वयमेव प्रकाशो यस्य तस्मै नमस्करोमि ॥ १६ ॥ मादृगेति ॥ मादृग् मद्विधश्चासौ प्रपन्नः शरणागतश्चासौ पशुश्च पशुवदविद्यया निबद्धश्च तस्य पाशः अविद्या तस्य विशेषेण निर्मूलतया मोक्षणं यस्मात् तस्मै मुक्ताय भूरिकरुणाय अलयोदयाय जन्मनाशरहिताय स्वांशेन अन्तर्यामिरूपेण सर्वेषां तनुभृतां मनसि प्रतीता या प्रत्यक् दृक् तस्मै भगवते बृहते अपरिच्छिन्नाय ते तुभ्यं नमः ॥१७॥ आत्मेति ॥ आत्मा देहः आत्मजाः पुत्राः तदादिषु सक्तैर्दुष्प्रापणाय प्राप्तुमशक्याय नमः। गुणेषु सङ्ग आसक्तिस्तेन विवर्जिताय नमः ।मुक्तात्मभिः देहादिष्वनासक्तैः स्वहृदये परितो भाविताय निरन्तरं चिन्तिताय नमः। ज्ञानात्मने भगवते ईश्वराय नमः ॥ १८ ॥ यमिति ॥ ये धर्मं काममर्थं विमुक्तिं च कामयन्ते ते यं भजन्तः सन्तः इष्टां स्वाभिप्रेतां गतिं धर्मादिफलं प्राप्नुवन्त्येव नतु तावदेव किंतु यास्तैरकामिता अन्या अप्याशिषो भोगान् राति ददाति अव्ययमनश्वरं

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहं च राति सोऽदभ्रदयोऽपारकरुणो मम संसाराद् ग्राहाच्च विमोक्षणमात्रं करोतु नाधिकं प्रार्थये ॥ १९ ॥ एकेति ॥ ये भगवन्तं प्रपन्नाः शरणं प्राप्ताः । यद्वा । भगवतः सर्वज्ञान्मुक्तान् प्रपन्नाः सेवितवन्तः यस्य भगवत एकान्तिनोऽनन्यपरा भक्तास्ते धर्मादिषु कञ्चन अप्यर्थं न वाञ्छन्ति किन्तु अत्यद्भुतमलौकिकं सुमङ्गलं तस्य भगवतश्चरितं गायन्त एव आनन्दसमुद्रे निमग्ना भवन्ति ॥ २० ॥ तमिति ॥ अक्षरं क्षयरहितं ब्रह्म अन्तर्बहिश्च व्यापकं परं सर्वोत्तमं परेशं ब्रह्मादीनामपि नियन्तारम् अव्यक्तमपि आध्यात्मिकयोगेन भक्तियोगेन गम्यम् अतिदूरमिव अतीन्द्रियं सूक्ष्मं च यथातिदूरं वस्तु अतीन्द्रियं सूक्ष्मं च भवति तथेत्यर्थः । अनन्तं विनाशरहितम् आद्यं सर्वकारणं परिपूर्णमीडे । अत्यद्भुतसुमङ्गलत्वप्रदर्शनार्थमक्षरत्वादिविशेषणानि ॥ २१ ॥ यस्येति ॥ ब्रह्मादयो देवाः वेदाश्चराचरात्मका लोकाश्च नामरूपविभेदेन यस्य फल्ग्व्या स्वल्पया कलया अंशेनैव कृता रचिताः ॥ २२ ॥ यथेति ॥ यथा स्वरोचिषः अग्नेः सकाशादर्चिषः विस्फुलिङ्गा यथा च सवितुः सकाशाद् गभस्तयः किरणाः असकृन्निर्यान्ति

एकान्तितो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः॥ अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ॥ २० ॥ तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम्॥ अतीन्द्रियं सूक्ष्ममिवातिदूरमनन्तमाद्यं परिपूर्णमीडे ॥२१॥ यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ॥ नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥ २२ ॥ यथाऽर्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत्स्वरोचिषः ॥ तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥ २३ ॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान्न जन्तुः॥ नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥ २४ ॥ जिजीविषे नाहमिहाऽमुया किमन्तर्बहिश्चावृतयेभयोन्या ॥ इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षम् ॥ २५ ॥ सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ॥ विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥ २६ ॥

उद्भवन्ति संयान्ति पुनस्तत्रैव लीयन्ते तथा बुद्धिर्मनः खानि इन्द्रियाणि शरीरसर्गाः देवादिशरीरसंघातश्चेत्येवं गुणसंप्रवाहः गुणपरिणामप्रपञ्चो यतो निर्याति यत्र संयाति च ॥ २३ ॥ स इति ॥ स वै सर्वमूलकारणभूतो भगवान् देवादीनां मध्ये कतमोऽपि न भवति न जन्तुः लिङ्गत्रयशून्यं प्राणिमात्रं सत् कार्यम् असत्कारणं किन्तु यतो निषेधशेषः । सर्वस्य देवादिप्रपञ्चस्य निषेधे अवधित्वेन शिष्यत इति तथा पुनश्च मायया अशेषः सर्वरूपो भवति स जयतात् मद्विमोक्षणायाविर्भवत्वित्यर्थः ॥ २४ ॥ जिजीविष इति॥ अहं न जिजीविषे ग्राहाच्छरीरस्य मोक्षणेन जीवितुं नैवेच्छामीत्यर्थः। तङ्गार्षः । तत्र हेतुमाह । इहेति । इह संसारे अन्तर्बहिश्चावृतया अविवेकव्याप्तया अमुया इभयोन्या गजशरीरेण किं प्रयोजनं न किमपीत्यर्थः । किन्तु यस्यात्मलोकावरणस्य स्वात्मरूपप्रकाशावरणलिङ्गशरीरस्याज्ञानस्य वा ज्ञानं विना कालेन विप्लवो विनाशो नास्ति तस्यैव मोक्षं निवृत्तिमिच्छामि ॥ २५ ॥ सोऽहमिति ॥ सोऽहं मुमुक्षुः विश्वसृजमिति विश्वस्रष्टारं विश्वं विश्वरूपम् अविश्वं विश्वव्यतिरिक्तं च विश्वं वेदो धनं क्रीडोपकरणं यस्य तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वात्मानं विश्वान्तर्यामिणम् अजं जन्मादिविकाररहितं ब्रह्म सर्वव्यापकं परं पदं प्राप्तव्योत्तमं भगवन्तं केवलं प्रणतोऽस्मि ननु तं जानामि ॥ २६ ॥ योगेति ॥ योगेन भगवद्धर्मेण रन्धितानि दग्धानि कर्माणि येषां ते योगिनो योगेन विभाविते शोधिते हृदि यं पश्यन्ति साक्षात्कुर्वन्ति तं योगेशं योगफलदातारमहं नतोऽस्मि ॥२७॥ नम इति ॥ असह्यः अप्रतिहतः वेगो रागादिलक्षणो यस्य तथाभूतं शक्तित्रयं सत्त्वादिगुणत्रयात्मकं यस्य तस्मै नमः।अखिला धीगुणाः संशयविपर्ययादिवृत्तयो यस्मात्तस्मै नमः। प्रपन्नानां शरणागतानां पालाय रक्षित्रे दुरन्ताः शक्तयो यस्य तस्मै कुत्सितानि विषयाभिमुखानीन्द्रियाणि तेषामनवाप्यं दुरवगमं वर्त्म मार्गोऽपि यस्य तस्मै कदिन्द्रियाणामित्यत्र बहुव्रीहौ कदादेशो दुर्लभः। यद्वा। कदिति पृथगव्ययम्।तुभ्यं नमो नमोऽस्तु ॥२८॥ नेति ॥ यस्य शक्त्या अविद्याख्यया देहेन्द्रियादावहंधीस्तया हतमावृतं स्वमात्मानमयं जनो न वेद तं दुरत्ययमाहात्म्यमनतिक्रमणीयप्रभावं भगवन्तमहमितोऽस्मि शरणमागतोऽस्मि ॥ २९ ॥ एवमिति ॥ एवमुक्तप्रकारेण उपवर्णितं निर्विशेषं ब्रह्मादिषु विद्यमाना-

योगरन्धितकर्माणो हृदि योगविभाविते ॥ योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ॥ २७ ॥ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालाय दुरन्तशक्तये कदिन्द्रियाणामनवाप्यवर्त्मने ॥ २८ ॥ नायं वेद स्वमात्मानं यच्छक्त्याऽहंधिया हतम् ॥ तं दुरत्ययमाहात्म्यं भगवन्तमितोऽस्म्यहम् ॥ २९ ॥ श्रीशुक उवाच ॥ एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाऽभिमानाः ॥ नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ॥ ३० ॥ तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ॥ छन्दोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः ॥ ३१ ॥

साधारणचिह्नविशेषरहितं भगवत्स्वरूपं येन तं गजेन्द्रं यदा विविधानि यानि लिङ्गानि चतुर्मुखत्वहंसवाहनत्वत्र्यक्षत्वादीनि तत्प्रयुक्ता भिदा मूर्तिभेदस्तस्याभिमानो येषां ते तथा तथा च गजेन्द्रेण तथा वर्णितत्वात् प्रत्युत" यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः।नामरूपविभेदेन फल्ग्व्या च कलया कृताः॥" इति तुच्छत्वेन निरूपणात् न वयमनेन स्तुता इत्यभिमानेन एते यदा नोपससृपुः तत्र तदा निखिलात्मकत्वात् अखिलामरमयः सर्वदेवस्वरूपः हरिर्हरिसंज्ञको भगवान् हरिमेधसः सकाशात् हरिण्यां तद्भार्यायां यो जातः स आविरासीदिति शेषेणान्वयः। पूर्वं तथोक्तत्वात् ॥ ३० ॥ तमिति ॥ तद्वदार्तं तथा ग्राहेण पीडितं तं गजेन्द्रमुपलभ्य ज्ञात्वा तत्कृतं स्तोत्रं च निशम्य श्रुत्वा जगन्निवासः चक्रायुधः ग्राहमुखविदारणार्थं चक्रं गृहीत्वा संस्तुवद्भिः दिविजैः देवैः सार्द्धं छन्दोमयेन ।वेदरूपेण यद्वा। छन्दोमयेन इच्छामयेन तत्तुल्यवेगेनेति चक्रवर्ती।गरुडेन समुह्यमानः सम्यक् शैघ्र्यातिशयेन प्राप्यमाणः सन् यतो यत्र गजेन्द्रः अभूत् तत्राशु अभ्यगमत् आजगाम ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ स गजेन्द्रः अन्तः सरसि सरोमध्ये उरुबलेन महाबलेन ग्राहेण गृहीतः अत एवार्तः पीडितः खे आकाशे गरुत्मति गरुडे स्थितमुपात्तचक्रं हरिं दृष्ट्वा "रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्"इति वचनात् भगवच्चरणयोः समर्पयितुं शुण्डाग्रेण तत्रत्यानि अम्बुजानि गृहीत्वा साम्बुजं करं शुण्डादण्डमुत्क्षिप्य उद्धृत्य हे नारायण हे अखिलगुरो हे भगवन् ते तुभ्यं नम इति गिरं कृच्छ्रात् ग्राहगृहीतत्वेनातिकष्टादाह स्म ॥ ३२ ॥ तमिति ॥ अजः भगवान् हरिः तं गजेन्द्रं पीडितं वीक्ष्य गरुडोऽपि मन्दगामीति सहसा झटिति ततोऽवतीर्य अवरुह्य उच्छ्रियाणा उत्कृष्टा श्रीर्येषां ते उच्छ्रियः तेषामुच्छ्रियाणां देवानाम् आर्षः प्रयोगः। संपश्यतामेव आशु शीघ्रमेव सरसः सकाशात् सग्राहं ग्राहेण सहितं तं कृपयैवोज्जहार वामेन हस्तेन शुण्डां गृहीत्वा बहिर्निष्काशितवान् ततो दक्षिणहस्तस्थेन अरिणा चक्रेण विपाटितं मुखं यस्य तस्मात् ग्राहात् गजेन्द्रं हरिरमूमुचत् मोचयामास ॥ ३३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमादष्टमस्य तृतीयके ॥ ३ ॥ तुर्ये गन्धर्वतां ग्राहं पार्षदत्वं गजं हरिः॥ प्राप-

सोऽन्तः सरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ॥ उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ॥ ३२ ॥ तं वीक्ष्य पीडितमजः सहसाऽवतीर्य सग्राहमाशु सरसः कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणा गजेन्द्रं संपश्यतां हरिरमूमुचदुस्त्रियाणाम् ॥ ३३ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे गजेन्द्रमोक्षणे तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ तदा देवर्षिगन्धर्वा ब्रह्मेशानपुरोगमाः ॥ मुमुचुः कुसुमासारं शंसन्तः कर्म तद्धरेः ॥ १ ॥ नेदुर्दुन्दुभयो दिव्या गन्धर्वा ननृतुर्जगुः ॥ ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम्॥२॥योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक्॥मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः॥३॥प्रणम्य शिरसाऽधीशमुत्तमश्लोकमव्ययम् ॥ अगायत यशोधामकीर्तन्यगुणसत्कथम् ॥ ४ ॥ सोऽनुकम्पित ईशेन परिक्रम्य प्रणम्य तम्॥लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ ५ ॥

ग्य च ययौ लोकं तत्र श्लोकास्तु षड्दर्शैः ॥ चत्वार्युवाचेति सार्द्धा अष्टाविंशत्यनुष्टुभः॥४॥ तदेति ॥ तदा गजेन्द्रमोचनदशायां ब्रह्मा चतुर्मुखः ईशानो रुद्रश्च पुरोगमः अग्रेसरो येषां ते देवादयस्तद्गजेन्द्रमोक्षणरूपं हरेः अद्भुतकर्म प्रशंसन्तस्तस्मिन् कुसुमासारं कुसुमवृष्टिं मुमुचुः ॥१॥ नेदुरिति ॥ देवानां दुन्दुभयो नेदुर्गन्धर्वा ननृतुर्जगुश्च ऋष्यादयः पुरुषोत्तमं भगवन्तं तुष्टुवुः ॥ २ ॥ य इति ॥ योऽसौ ग्राहः स वै पूर्वं हूहूर्नाम गन्धर्वसत्तम आसीत् स भगवत्स्पर्शेन देवलशापेन मुक्तः परमाश्चर्यरूपधृक् अभूत् ॥ ३ ॥ प्रणम्येति ॥ उत्तमश्लोकम् अव्ययं यशसां धाम आश्रयं कीर्तन्याः कीर्त्तनार्हाः गुणाः सत्याः कथाश्च यस्य तम् अधीशं भगवन्तं शिरसा प्रणम्य तमगायत । तङ्गार्वः ॥ ४ ॥ स इति ॥ स हूहूर्नामको गन्धर्वो लोकस्य ब्रह्मादिजनस्य पश्यतः सतः ईशेन हरिणानुकम्पितः कृपाविषयीकृतः मुक्तकिल्बिषः देवलशापाद्विमुक्तस्तं हरिं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य च स्वं स्वकीयं गन्धर्वलोकमगात्। एवं हि ग्राहकथा । सरसि स्त्रीभिः क्रीडन् हूहूर्गन्धर्वः स्नातुं प्रविष्टं देवलं पादे प्रगृह्य विचकर्ष । स च कुपितो ग्राहो भवेति हूहूं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शशाप तेन च प्रसादितः सन्नुवाच । एवमेव गजेन्द्रं गृहीतवन्तं त्वां हरिर्मोचयिष्यतीति ॥ ५ ॥ गजेन्द्र इति॥गजेन्द्रस्तु भगवतो हरेः स्पर्शाद्धेतोरज्ञानलक्षण बन्धनाद्विमुक्तः सन् पीतवासाश्चतुर्भुजश्चेति भगवतो रूपं सारूप्यं प्राप्तः ॥ ६ ॥ स वा इति ॥ स वै गजेन्द्रः पूर्वं पूर्वजन्मनि पाण्ड्यः पाण्ड्यदेशपतिः द्रविडदेशपतिः द्रविडदेशनिवासिषु श्रेष्ठः विष्णुव्रतमेव परमुत्कृष्टमयनमनुष्ठेयतया आश्रयो यस्य तादृश इन्द्रद्युम्नाख्यो राजाऽभूत् ॥ ७ ॥ स इति ॥ आत्मवान् वशीकृतचित्तः गृहीतं मौनात्मकं व्रतं येन सः जटाधरः तापसस्तपोनिष्ठः आप्लुतः कृतस्नानः कुलाचले मलयाद्रावाश्रमो यस्य सः इन्द्रद्युम्न एकदा भगवदाराधनकाले ईश्वरम् अच्युतं हरिं समर्चयामास पूजितवान् ॥८॥ यदृच्छयेति ॥ तदा शिष्यगणैः परिश्रितः परिवृतः महायशा मुनिरगस्त्यस्तत्र इन्द्रद्युम्नाश्रमे समागमत् तूष्णीं वाचाप्यकृतसत्कारमित्यर्थः । अकृतमसमर्पितमर्हणादि-कमर्घ्यादिकं येनं तमित्यर्थः । रहस्येकान्ते उपासीनमुपविष्टं तमिन्द्रद्युम्नं वीक्ष्य ऋषिरगस्त्यश्चुकोप ॥ ९ ॥ तस्मा इति ॥ क्रुद्धश्च तस्मै इन्द्रद्युम्नाय इमं शापमदात् । अयं

गजेन्द्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबन्धनात् ॥ प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ॥ ६ ॥ स वै पूर्वमभूद्राजा पाण्ड्यो द्रविडसत्तमः ॥ इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥ स एकदाऽऽराधनकाल आत्मवान्गृहीतमौनव्रत ईश्वरं हरिम् ॥ जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥ ८ ॥ यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः ॥ तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥ तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य ॥ विप्रावमन्ता विशतां तमोऽन्धं यथा गजः स्तब्धमतिः स एव ॥१०॥ श्रीशुक उवाच ॥ एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः ॥ इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ॥ ११ ॥ आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम् ॥ हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः ॥ १२ ॥ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः ॥ गन्धर्वसिद्धविबुधैरुपगीयमानकर्माऽद्भुतं स्वभवनं गरुडासनोऽगात् ॥ १३ ॥

असाधुः दुरात्मा अकृतबुद्धिः आशिक्षितबुद्धिः विप्राणामवमन्ता अतः यथा गजः स्तब्धमतिस्तथैवायं मत्तः स एव गज एव भवतीति शेषः ॥ १० ॥ एवमिति युग्मम् ॥ हे नृप भगवान् अगस्त्य एवं शप्त्वा सानुगः शिष्यैः सहितस्तत्स्थानात् गतः राजर्षिः इन्द्रद्युम्नोऽपि तत् शापात्मकं दिष्टं स्वप्रारब्धफलमित्युपधारयन्निश्चिन्वन् आत्मनः स्वस्वरूपस्य स्मृतिविनाशिनीं कौञ्जरीं योनिमापन्नः प्राप्तः यद्गजत्वेऽप्यात्मनः पूर्वजन्मनः अनुस्मृतिस्तद्धर्यर्चनस्यानुभावेनैवेत्यर्थः ॥ ११ ॥ १२ ॥ एवमिति॥अब्जनाभो भगवान् एवमुक्तप्रकारेण गजयूथपं गजेन्द्रं विमोक्ष्य पार्षदगतिं गमितेन प्रापितेन तेन गजेन्द्रयूथपेन अपिशब्दात्स्वपार्षदैश्च युक्तः गन्धर्वादिभिरुपगीयमानं कर्म गजेन्द्रमोक्षणादि यस्य स गरुडासनः गरुडमारूढः अद्भुतमलौकिकं स्वभवनं वैकुण्ठमगात् ययौ ॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri

एतदिति ॥ हे महाराज कुरुवर्य गजेन्द्रमोक्षणरूपः कृष्णस्यानुभावस्तव तुभ्यं मयेरितः कथित एतद्भगवच्चरितं शृण्वतां जनानां स्वर्ग्यं स्वर्गप्राप्तिसाधनं यशस्यं यशस्करं कलिकल्मषाण्यपहन्ति तादृशं तथा दुःस्वप्नं दुःस्वप्नफलं नाशयतीति तादृशं च ॥ १४ ॥ यथेति ॥ अत एव श्रेयस्कामाः धर्माद्यर्थिनः द्विजातयस्त्रैवर्णिकाः प्रातरुत्थाय शुचयः सन्तो दुःस्वप्नाद्युपशान्तये आदिपदेन धर्मादिश्रेयोलाभाय च एतत् गजेन्द्रमोक्षणं भगवच्चरितं यथा यथावदनुकीर्तयन्ते ॥ १५ ॥ इदमिति ॥ हे कुरुसत्तम गजेन्द्रमोक्षानन्तरं तत्रत्यानां सर्वभूतानां शृण्वतां सतामेव सर्वभूतमयः सर्वात्मा विभुः सर्वान्तर्यामी हरिः प्रीतः सन् गजेन्द्रं प्रति इदं वक्ष्यमाणमाह स्म॥१६॥ये मामित्यष्टकम्॥ये प्रयताः शुद्धाः जनाः अपररात्रान्ते प्रभाते उत्थाय त्वां मां इन्द्रं सरः इत्यादीनि मम रूपाणि मद्विभूतीश्च स्मरन्ति इत्यन्वयः । तेऽखिलादेनसः पापाद्विमुच्यन्ते गिर्यादिकानां समाहारद्वन्द्वः,

एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणम् ॥ स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वताम् ॥ १४ ॥ यथाऽनुकीर्तयन्त्येतच्छ्रेयस्कामा द्विजादयः ॥ शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये ॥ १५ ॥ इदमाह हरिः प्रीतो गजेन्द्रं कुरुसत्तम ॥ शृण्वतां सर्वदेवानां सर्वभूतमयो विभुः॥१६॥श्रीभगवानुवाच॥ये मां त्वां च सरश्चेदं गिरिकन्दरकाननम्॥वेत्रकीचकवेणूनां गुल्मानि सुरपादपान्॥१७॥ शृङ्गाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ॥ क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम् ॥ १८॥ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम ॥ सुदर्शनं पाञ्चजन्यं सुपर्णं पतगेश्वरम् ॥ १९ ॥ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयाम् ॥ ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥ २० ॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ॥ कर्माण्यनन्तपुण्यानि सूर्यं सोमं हुताशनम् ॥ २१ ॥ प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्ययम् ॥ दाक्षायणी धर्मपत्नीः सोमकश्यपयोरपि ॥ २२ ॥ गङ्गां सरस्वतीं नन्दां कालिन्दीं सितवारणम् ॥ ध्रुवं ब्रह्मऋषीन्सप्त पुण्यश्लोकांश्च मानवान् ॥ २३ ॥ उत्थायापररात्रान्ते प्रयताः सुसमाहिताः ॥ स्मरन्ति मम रूपाणि मुच्यन्ते ह्येनसोऽखिलात् ॥ २४ ॥

वेत्रादीनामितरेतरयोगद्वन्द्वः । तेषां गुल्मानि संदर्भविशेषात्मकानि सुरपादपान् मन्दारादीन् इमानि त्रिकूटस्य शृङ्गाणि ब्रह्मणश्चतुर्मुखस्य मे मम हरेः शिवस्य च धिष्ण्यानि स्थानानि क्षीरोदं क्षीरसागरं मे मम प्रियं धाम स्थानं तथा भास्वरं श्वेतद्वीपं च मम प्रियं स्थानं ममेत्यस्य सर्वत्रान्वयः । श्रीवत्सं वक्षःस्थले रोमरेखाविशेषात्मकं कौस्तुभं मणिं मालां वैजयन्तीं कौमोदकीं गदां सुदर्शनं चक्रं पाञ्चजन्यं शङ्खं पतगेश्वरं सुपर्णं गरुडं सूक्ष्मां मत्कलां तद्रूपं शेषं सङ्कर्षणम् अहमेवाश्रयो यस्यास्तां देवीं देदीप्यमानां श्रियं महालक्ष्मीं ब्रह्माणं चतुर्मुखं नारदमृषिं भवं श्रीमहादेवं प्रह्लादं च श्रोतॄणामनन्तपुण्यानि मे मया मत्स्याद्यवतारैः कृतानि कर्माणि सूर्यं सोमं हुताशनं प्रणवमोङ्कारं सत्यं यथार्थवचनमव्यक्तं प्रधानं गाः विप्रान् ब्राह्मणांश्च अव्ययं धर्मं भगवद्भक्तिरूपं दाक्षायणीर्दक्षदुहितॄर्धर्मस्य पत्नीस्तथा सोमकश्यपयोरपि पत्नीर्दाक्षायणी गङ्गाद्याः पञ्चनदीः सित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारणमैरावतं-ध्रुवमुत्तानपादपुत्रं सप्त ब्रह्मर्षीन् पुण्यश्लोकान् धार्मिकान् मानवांश्च ॥१७॥१८॥१९॥२०॥२१॥२२॥२३॥ २४ ॥ ये मामिति ॥ अङ्ग हे गजेन्द्र ये जना निशात्यये प्रभाते प्रतिबुध्य अनेन त्वत्कृतेन स्तोत्रेण मां स्तुवन्ति तेषां प्राणात्यये प्राणप्रयाणकाले विमलां मद्विषयां मतिमहं ददामि दास्यामि ॥ २५ ॥ इतीति ॥ हृषीकेशः भगवानित्येवं गजेन्द्रं प्रत्यादिश्य जलजोत्तमं शङ्खं श्रेष्ठं पाञ्चजन्यं प्रध्माय ध्वनयित्वा विबुधानीकं ब्रह्मादिदेवतावर्गं हर्षयन् खगाधिपं गरुडमारुरोह आरुह्य स्वभवनमगादित्यर्थः ॥ २६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तुर्येऽस्मिन्नष्टमस्य व्यधादिमाम् ॥ ४ ॥ पञ्चमे मनुसंख्याने कृता देवैर्हरेः स्तुतिः ॥ विप्रशापाद्धतश्रीकै-स्तत्र श्लोकाः खर्मार्गणाः॥षडुवाचेति पादोनां ऊनषष्टिरनुष्टुभः॥५॥राजन्निति॥हे राजन् अघनाशकम् एतद्गजेन्द्रमोक्षणं हरेः कर्म ते तुभ्यं मे मया उदितम् अथ पञ्चमं रैवतं मन्वन्तरं शृणु ॥१॥ पञ्चम इति॥ दैवतो नाम प्रसिद्धः पञ्चमो मनुः स च तामसस्य प्रियव्रतात्मजस्य सोदरो भ्राता तस्य मनोरर्जुनः पूर्वो मुख्यो येषां तादृशाः बलिविन्ध्यादयः

ये मां स्तुवन्त्यनेनाङ्ग प्रतिबुध्य निशात्यये॥ तेषां प्राणात्यये चाहं ददामि विमलां मतिम् ॥ २५ ॥ श्रीशुक उवाच ॥ इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम्॥हर्षयन्विबुधानीकमारुरोह खगाधिपम्॥२६॥इति श्रीभागवते महा० अष्टमस्कन्धे गजेन्द्रमोक्षणं नाम चतुर्थोऽध्यायः॥४॥

॥ श्रीशुक उवाच ॥ ॥ राजन्नुदितमेतत्ते हरेः कर्माघनाशनम्॥ गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु ॥१॥ पञ्चमो रैवतो नाम मनुस्तामस-सोदरः ॥ बलिविन्ध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥ २ ॥ विभुरिन्द्रः सुरगणा राजन्भूतरयादयः॥हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ॥ ३ ॥ पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः ॥ तयोः स्वकलया जज्ञे वैकुण्ठो भगवान्स्वयम् ॥ ४ ॥ वैकुण्ठः कल्पितो येन लोको लोक-नमस्कृतः॥रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया॥५॥तस्यानुभावः कथितो गुणाश्च परमोदयाः ॥भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान्॥६॥

सुताः ॥२॥ विभुरिति ॥ तत्र विभुनामा इन्द्र आसीत् । हे राजन् भूतरयादयो देवा आसन् । हिरण्यरोमादयो द्विजाः सप्त ऋषयः आदिपदेन "हिरण्यरोमा वेदशिरा ऊर्ध्वबाहुस्तथापरः । देवबाहुः सुधामा च पर्जन्यश्च महामुनिः॥एते सप्तर्षयो विप्राः तत्रासन् रैवतेऽन्तरे।"इति हरिवंशोक्ता अन्येऽपि ज्ञेयाः॥३॥पत्नीति ॥ शुभ्रस्य विकुण्ठाख्या पत्न्यासीत्। तयोर्विकुण्ठाशुभ्रयोर्भगवान् कलया स्वांशेन वैकुण्ठ इति नाम्ना प्रसिद्धोऽन्यैश्च वैकुण्ठाख्यैः सुरसत्तमैः सह स्वयं जज्ञे अवतीर्णः॥४॥ वैकुण्ठ इति॥ देव्या स्वक्रीडासाधनभूतया रमया लक्ष्म्या प्रार्थ्यमानेन वैकुण्ठसंज्ञकेन भगवता तस्या लक्ष्म्याः प्रियकाम्यया सर्वलोकनमस्कृतः वैकुण्ठाख्यो लोकः कल्पितः रचितः । यथा भगवत आविर्भावमात्रं जन्मेति भण्यते तथैव वैकुण्ठस्य कल्पनमाविर्भवनमेव उभयत्रापि नित्यत्वात् मूलवैकुण्ठं तु अष्टावरणपारे विरिञ्चसृष्टेः प्राक् ब्रह्मणा दृष्टमिति द्वितीयस्कन्धे प्रसिद्धमिति सन्दर्भः ॥ ५ ॥ तस्येति ॥ तस्य वैकुण्ठसंज्ञस्य भगवतोऽनुभावः प्रभावः सनकादिशापेन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां हिरण्याक्षहिरण्यकशिपुभ्यां वराहादिरूपेण युद्धादि-

CC-0. In Public Domain. Digitization by eGangotri

लक्षणः गुणाश्च ब्रह्मण्यतादयः परमोदया महर्द्धयश्च तृतीयस्कन्धादिषु कथिताः । सर्वे गुणास्तु वक्तुं न शक्या इत्याह । भौमानिति । यः पुमान् विष्णोर्गुणान् साकल्येन वर्णयेत् स भौमान् भूम्यंशभूतान् रेणूनपि विममे गणयेदित्यर्थः ॥ ६ ॥ षष्ठश्चेति ॥ चक्षुषश्च पुत्रश्चाक्षुषो नाम षष्ठो मनुर्जातः । पूर्वादयश्चाक्षुषस्य मनोरात्मजाः पुत्राः ॥ ७ ॥ इन्द्र इति ॥ तत्र मन्त्रद्रुमनामक इन्द्रोऽभूत् । आप्यादयो देवगणा जाताः । हे राजन् तत्र मन्वन्तरे हविष्मदादयः मुनयः सप्तर्षयो जाताः।आदिपदेन "सुमेधा वीरकश्चैव हविष्मानुत्तमो मधुः । अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥" इति हरिवंशोक्ता अन्येऽपि ज्ञेयाः ॥ ८ ॥ तत्रेति ॥ तत्र षष्ठे मन्वन्तरेऽपि वैराजसंज्ञस्य संभूत्याख्यायां भार्यायां देवः जगतीपतिः जगत्पालको भगवानंशेन अजित इति नाम्ना प्रसिद्धः सुतोऽभवत् ॥ ९ ॥ पयोधिमिति ॥ येनाजिताख्येन पयोधिं क्षीरसागरं निर्मथ्य सुराणां सुधा अमृतं साधिता येन च कूर्मरूपेणाम्भसि भ्रममाणो मन्दरोऽद्रिः पृष्ठे धृतः । भ्रमेः शानजार्षः ॥ १० ॥ यथेति ॥ हे ब्रह्मन् भगवता यथा येन प्रकारेण क्षीरसागरो मथितः यदर्थं वा येषां प्रयोजनाय च

षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः ॥ पूरुः पुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ७ ॥ इन्द्रो मन्त्रद्रुमस्तत्र देवा आप्यादयो गणाः ॥ मुनयस्तत्र वै राजन्हविष्मद्वीरकादयः ॥ ८ ॥ तत्रापि देवः सम्भूत्यां वैराजस्याभवत्सुतः॥अजितो नाम भगवानंशेन जगतः पतिः ॥ ९ ॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा ॥ भ्रममाणोऽम्भसि धृतः कूर्मरूपेण मन्दरः ॥ १० ॥ राजोवाच ॥ यथा भगवता ब्रह्मन्मथितः क्षीरसागरः ॥ यदर्थं वा यतश्चाद्रिं दधाराम्बुचरात्मना ॥ ११ ॥ यथाऽमृतं सुरैः प्राप्तं किञ्चान्यदभवत्ततः ॥ एतद्भगवतः कर्म वदस्व परमाद्भुतम् ॥१२॥ त्वया संकथ्यमानेन महिम्ना सात्वतां पतेः ॥ नातितृप्यति मे चित्तं सुचिरं तापतापितम् ॥ १३ ॥ सूत उवाच ॥ संपृष्टो भगवानेवं द्वैपायनसुतो द्विजाः ॥ अभिनन्द्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥ १४ ॥ श्रीशुक उवाच ॥ यदा युद्धेऽसुरैर्देवा बाध्यमानाः शितायुधैः ॥ गतासवो निपतिता नोत्तिष्ठेरन्स्म भूयशः ॥ १५ ॥ यदा दुर्वाससः शापात्सेन्द्रा लोकास्त्रयो नृप ॥ निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः ॥ १६ ॥

मथितः यतश्च हेतोरम्बुचरात्मना कूर्मरूपेणाद्रिं मन्दरं दधार ॥ ११ ॥ यथेति ॥ यथा येन च प्रकारेण सुरैरमृतं प्राप्तं ततोऽमृतमथनादन्यत् युद्धादिकं किमभवत् । एतत्पयोधिमन्थनाद्यात्मकं भगवतः परमाद्भुतं कर्म यत्नेन वदस्व ॥ १२ ॥ त्वयेति ॥ त्वया सम्यक् कीर्त्यमानेन सात्वतां पतेर्भगवतो महिम्ना सुचिरं बहुकालं तापेनाध्यात्मिकादिना तापितं दुःखितं मे चित्तं नैव तृप्यति ॥ १३ ॥ संपृष्ट इति ॥ एवं सम्यक् सत्कारपूर्वकं पृष्टो भगवान् सर्वज्ञो द्वैपायनस्य व्यासस्य सुतः शुको राज्ञः प्रश्नमभिनन्द्य हरेर्वीर्यं माहात्म्यमभ्याचष्टुं कथयितुं प्रचक्रमे प्रारेभे ॥ १४ ॥ यदेति युग्मम् ॥ यदा असुरैः कर्तृभिः शितैस्तीक्ष्णैरायुधैः साधनैः बाध्यमाना देवाः गतासवः प्राणरहिताः सन्तो युद्धे भूयशो बहुशो निपतिताः पुनर्नोत्तिष्ठेरन् स्म न पुनर्जीवन्ति स्म लिङार्षः। यदा च दुर्वाससो मुनेः शापेन इन्द्रेण सहितास्त्रयो लोकाः निःश्रीकाः लक्ष्मीरहिताः निःसम्पदोऽभवंस्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदा इज्यादयो यागादयः क्रिया नेशुः नष्टा बभूवुः। दुर्वाससा हि कदाचिन्मार्गे गच्छन्तमिन्द्रं विलोक्य स्वकण्ठस्था भगवत्प्रसादभूता माला तस्मै दत्ता। उक्तं च इयं माला यस्य शिरसि धृता भविष्यति स सर्वदेवेभ्यः प्रथमं पूज्यो भविष्यतीति तेन चैश्वर्यमदमत्तेनेन्द्रेणानादृत्य सा माला ऐरावतस्य मस्तके निक्षिप्ता। स च मत्तः पद्भ्यां तां मालां चूर्णीचकार। ततः कुपितो दुर्वासा इन्द्रं शशाप। त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति अत एव गणेशस्य शिरसि शनैश्चरदृष्ट्या अदर्शनं गते सति तत्स्थान ऐरावतशिरःसंयोजनाद्गणेशः सर्वदेवेभ्यः प्रथमं पूज्यत इति ब्रह्मवैवर्तात् ज्ञेयम् ॥ १५ ॥ १६ ॥ निशम्येति ॥ महेन्द्रवरुणादयः सुरगणा एतत्त्रैलोक्यस्य निःश्रीकत्वं पतितानां देवानां चानुत्थानं निशम्य दृष्ट्वा स्वयं मन्त्रैर्मन्त्रयन्तोऽप्यालोचनानि कुर्वन्तोऽपि यदा निःश्रीकत्वादिनिवृत्त्युपायनिश्चयं नाध्यगच्छन्न प्रापुः ॥ १७॥ तत इति ॥ ततस्तदा मेरोर्मूर्द्धनि स्थितां ब्रह्मणः सभां सर्वे जग्मुः। तत्र च तं प्रणताः सन्तस्तस्मै परमेष्ठिने निःश्रीकत्वादिकं सर्वं विज्ञापयांचक्रुः ॥ १८ ॥ स इति युग्मम्। सः विभुर्ब्रह्मा इन्द्रवाय्वादीन् देवान् निःसत्वान् बलहीनान् अत एव विगतप्रभान् निस्तेजस्कान् तथा लोकान् अमङ्गलप्रायान् विलोक्य तथा असुरान् अयथा देववैलक्ष्येण तेजोबलादियुक्तान् विलोक्य समाहितेनैकाग्र्येण

निशम्यैतत्सुरगणा महेन्द्रवरुणादयः॥नाध्यगच्छन्स्वयं मन्त्रैर्मन्त्रयन्तो विनिश्चयम्॥१७॥ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः॥सर्वं विज्ञापयाञ्चक्रुः प्रणताः परमेष्ठिने॥१८॥स विलोक्येन्द्रवाय्वादीन्निःसत्त्वान्विगतप्रभान्॥लोकानमङ्गलप्रायानसुरानयथा विभुः॥१९॥समाहितेन मनसा संस्मरन्पुरुषं परम्॥उवाचोत्फुल्लवदनो देवान्स भगवान्परः ॥ २० ॥ अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः ॥ यस्यावतारांशकला विसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥ २१ ॥ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयाऽऽदरणीयपक्षः ॥ अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्वतमांसि काले॥२२॥अयं च तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम्॥तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः॥२३॥

मनसा परं पुरुषं पुरुषोत्तमं संस्मरन् आसीत् इति वाक्यभेदान्न स इत्यस्य पौनरुक्त्यम्। ततश्च हरिं शरणं गताः सन्तः यथापूर्वं सर्वं प्राप्स्याम इत्युपायस्फुरणोत्पन्नहर्षेण उत्फुल्लं विकसितं वदनं यस्य स भगवान् परः ब्रह्मा देवान् प्रत्युवाच ॥ १९ ॥ २० ॥ अहमिति ॥ अहमित्यादयः सर्वे यस्य भगवतोऽवतारः पुरुषस्तस्यांशोऽहं ब्रह्मा तस्य कला मरीच्यादयः ताभिर्विसर्जिताः पुत्रपौत्रादिद्वारा उत्पादितास्तमेवाव्ययं भगवन्तं शरणं व्रजाम घर्मजातयः स्वेदजाः ॥ २१ ॥ नेति ॥ यस्य भगवतो यद्यपि वध्यादिपक्षो नास्ति अथापि तथापि सृष्ट्याद्यर्थं काले सृष्ट्यादियोग्ये काले रजआदि धत्ते सर्गार्थं रजो धत्ते स्थित्यर्थं सत्वं धत्ते संयमः संहारस्तदर्थं तमो धत्ते ॥ २२ ॥ अयं त्विति ॥ देहिनां प्राणिनां भवाय सत्तायै स्थितये सत्वं गुणं जुषाणस्य स्वीकृतवतः। मुगभाव आर्षः। भगवत इयं स्थितिर्मर्यादा तस्याः पालनस्य क्षणः कालः यत एवं तस्मात्सर्वे वयं तं जगद्गुरुं सर्वपूज्यं शरणं व्रजाम। स सुराः प्रियाः यस्य तथाभूतः सन् स्वानां स्वीयत्वेन परिगृहीतानां नोऽस्माकं शं सुखं धास्यति करिष्यतीत्यर्थः ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ हे अरिन्दम वेधा ब्रह्मा इत्येवं सुरान् आभाष्य आज्ञाप्य तैर्देवैः सह यत्र क्षीराब्धौ हरेर्वासः तदेव तमसः परं स्थानम् । यद्वा । लोकात् परं यदलोकाख्यं तमस्तस्मात्परमजितस्य यत्साक्षात्पदं स्थानं तज्जगाम ॥ २४ ॥ तत्रेति ॥ हे विभो तत्र स्थाने त्ववहितेन्द्रियो वशीकृतेन्द्रियः सन् ब्रह्मा वै निश्चयेन अदृष्टं स्वरूपं यस्य तस्मै तं प्रसादयितुम्। क्रियार्थोपपदस्येति चतुर्थी । श्रुतः पूर्वं श्रुतपूर्वस्तस्मै सर्ववेदप्रतिपाद्यत्वात् ज्ञात इत्यर्थः । साक्षात्कारेण तत्प्राप्तये दैवीभिर्वैदिकीभिर्गीर्भिः स्तुतिमब्रूत अकरोत् ॥ २५ ॥ अविक्रियमिति ॥ हे देव अविक्रियं निर्विकारं सत्यमनन्तमाद्यं हृदयगुहायां शयानं निष्कलं निरुपाधिकम् अप्रतर्क्यं मनसोऽग्रे यानं यस्य मनसः अविषयमित्यर्थः । वचसा अनिरुक्तमिति । इदमित्थन्तया निरूपयितुमयोग्यमित्यर्थः । वरं वरेण्यमापत्सु सर्वतो रक्षकत्वेन वरणयोग्यं त्वां वयं नमाम ॥२६॥ विपश्चितमिति ॥ प्राणादीनां विपश्चितं ज्ञातारं तत्रात्मा देहोऽहङ्कारो वा जीवो वा अर्थाः शब्दादयो विषयाः इन्द्रियाणि तद्ग्राहकाणि श्रोत्रादीनि तदुभयरूपेण आभासते इति तथा तम् । यद्वा । तैर्न भासते न विषयीक्रियते इति । यद्वा । तेषामाभासं प्रकाशकमनिद्रं निद्राग्रहणं जागराद्यवस्थोपलक्षणं जागराद्यवस्थात्रयरहितमित्यर्थः । अव्रणं जीववन्न दुःखितमित्यर्थः।

श्रीशुक उवाच ॥ इत्याभाष्य सुरान्वेधाः सह देवैररिन्दम ॥ अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥ २४ ॥ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो ॥ स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेन्द्रियः ॥ २५ ॥ ब्रह्मोवाच ॥ अविक्रियं सत्यमनन्तमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ॥ मनोऽग्रयानं वचसा निरुक्तं नमामहे देववरं वरेण्यम् ॥ २६ ॥ विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम् ॥ छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पञ्चदशारमाशु ॥ त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥ २८ ॥ य एकवर्णं तमसः परं तदलोकमव्यक्तमनन्तपारम् ॥ आसांचकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥ २९ ॥

अदेहं वा अक्षरं परिपूर्णं खमिव व्यापकं नित्यसुखस्वरूपं वा।"खमिन्द्रिये सुखे स्वर्गे"इति कोशात् । यत्र यस्मिन् गृध्रपक्षौ रागादिमज्जीवपक्षपातिनौ च्छायातपौ अविद्याविद्ये नस्तस्तं त्रियुगं त्रिषु युगेष्वाविर्भवन्तम् । यद्वा । त्रीणि युगलानि यत्र तं षडैश्वर्यवन्तं वयं शरणं व्रजामहे । तङार्षः॥२७॥ अजस्येति ॥ अजया मायया ईर्यमाणं प्रवर्त्यमानमित्यर्थः । मनोमयं मनःप्रधानं पञ्चदशारं दशेन्द्रियाणि पञ्च प्राणाश्चेत्येवं पञ्चदश आरा यस्य तत् आशु शीघ्रगं त्रयः सत्वादयो गुणा नाभिर्यस्य तत् विद्युद्वच्चलं भूमिरापोऽनलो वायुः खं मनो बुद्धिरहङ्कार इत्यष्टप्रकृतयो नेमय इवावरणानि यस्य तत् अजस्य जीवस्य चक्रं चक्रवत् आवर्तमानं देहादि यदक्षं यः भगवान् अक्षो यस्य तत्तथाभूतं यदधिष्ठानमाहुर्वेदास्तमृतं सत्यमहं प्रपद्ये शरणं व्रजामि ॥२८॥ य इति ॥ एकवर्णमानन्दैकस्वरूपं तमसः प्रकृतेः परमलोकं लोकातीतमव्यक्तमदृश्यमनन्तपारं कालतो देशतो वस्तुतश्च परिच्छेदरहितं यत्परं ब्रह्म तदेव यः उपसुपर्णं जीवसमीपे तन्नियन्तृत्वेन आसांचकार आस्ते स्म । " द्वासुपर्णा " इत्यादिश्रुतेः । यद्वा । स्वभक्तरक्षार्थं गरुडस्योपरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विराजत इत्यर्थः । अत एव धीरा विवेकिनो योगरथेन तत्प्राप्तिसाधनेन योगेन धारणाध्यानसमाध्यादिना । यद्वा । भक्तियोगेन श्रवणादिना एनमेवोपासते ॥२९॥ नेति ॥ यस्य मायां कश्चिदपि नातितितर्ति नातिक्रामति आर्षः । प्रयोगः । तातर्तीति भाव्यम् । यया मायया देहादावात्मबुद्ध्या जनो मुह्यति अर्थमात्मस्वरूपं न वेद । निर्जित आत्मा आत्मभूता मायाशक्तिस्तद्गुणाः सत्वादयश्च येन तमत एव सर्वभूतेषु समं चरन्तं विषमप्रवृत्तेस्तत्तत्कर्मानुसारित्वात् अत एव परेषामस्मदादीनामपीशं तं नमाम ॥ ३० ॥ इमे वयमिति ॥ इमे वयं देवा ऋषयश्च यस्य प्रियया तन्वा शरीरभूतेन सत्वेन गुणेन सृष्टा अपि बहिरन्तश्च सत्ताप्रकाशाभ्यामाविः प्रकटामपि यस्य सूक्ष्मां दुर्ज्ञेयां गतिं तत्त्वं न विद्महे । आर्षः प्रयोगः । यद्वा । हे इति पृथक् सम्बोधनार्थम् । " विदो लटो वा "इति मसो मादेशः । तर्हि इतरप्रधानाः रजस्तमःप्रधानाः आसुराद्याः कुतो विदुस्तं नमामेति पूर्वेणान्वयः ॥ ३१ ॥ पादाविति ॥ यत्र यस्यां जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्विधः भूतसर्गः प्राणिदेहसमूहस्तिष्ठति सेयं स्वकृता एव महीयस्य पादौ स महापूरुषः आत्मतन्त्रं महाविभूतिर्महैश्वर्यः नोऽस्माकं प्रसीदतात् । तातङादेशः ॥ ३२ ॥ अम्भ इति ॥ उदारं वीर्यं शक्तिर्यस्य तदम्भो जलं तु यत् यस्य रेतः यतोऽम्भसस्त्रयो लोकास्तथा

न यस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थम्॥तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरन्तम् ॥३०॥ इमे वयं तत्प्रिययैव तन्वा सत्वेन सृष्टा बहिरन्तराविः॥गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ॥३१ ॥ पादौ महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः॥ स वै महापूरुष आत्मतन्त्रः प्रसीदतां ब्रह्म महाविभूतिः ॥३२॥ अम्भस्तु यद्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमानाः॥ लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः॥३३॥सोमं मनो यस्य समामनन्ति दिवौकसां वै बलमन्ध आयुः॥ईशो नगानां प्रजनःप्रजानां प्रसीदतां नः स महाविभूतिः॥३४॥अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा॥अन्तःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतां नः स महाविभूतिः॥३५॥

अखिललोकपालाश्च सिध्यन्ति जायन्ते रेतसो जलप्रचुरत्वात् यतश्च जीवन्ति वर्धमानाश्च भवन्ति जलाप्यायनस्य प्रसिद्धत्वात्स महाविभूतिर्नः प्रसीदतात् ॥ ३३॥ सोममिति ॥ यं सोमं दिवौकसां देवानामन्धः अन्नमत एव बलमायुश्च समामनन्ति अमृतस्रावित्वात् यश्च अमृतरश्मिभिः पोषकत्वान्नगानां वृक्षाणामीशो राजा अन्नाद्युत्पादकत्वेनान्नसाररेतोहेतुत्वात्प्रजानामपि प्रजनः उत्पादक इत्यर्थः । तं सोमं चन्द्रमसं यस्य मनः समामनन्ति वदन्ति वेदाः स महाविभूतिर्नः प्रसीदतात् ॥ ३४ ॥ अग्निरिति ॥ यः अग्निः जातं वेदो धनं यस्मात् । यद्वा । जातं स्वस्मिन्निहितं चरुपुरोडाशादिकमिन्द्रादिभ्यो वेदयति प्रापयतीति तथेत्यर्थः । क्रियाकाण्डं तत्प्रतिपाद्यं कर्म तन्निमित्तं जन्म यस्य सः यश्चान्तःसमुद्रे उदरमध्ये स्वधातून् स्वपाकार्हानन्नादीन् अनुपचन् यथोचितं परिणामयन्नस्ति प्रसिद्धसमुद्रेऽपि वाडवरूपोऽग्निः उदकानि पचति सः अग्निः यस्य मुखं जातः सः महाविभूतिर्नः प्रसीदतात् ॥ ३५ ॥

Nepal Sanskrit University, Balmiki

CC-0. In Public Domain. Digitization by eGangotri

यदिति ॥ देवयानम् अर्चिरादिमार्गदेवता त्रयीमयः वेदरूपः एष सूर्यः ब्रह्मणः धिष्ण्यमुपासनास्थानं सूर्येऽपि ब्रह्मण उपासनाप्रसिद्धेः मुक्तेर्द्वारं देवयानत्वात् अमृतं च पुण्यलोकत्वात् मृत्युश्च कालात्मकत्वात् एवं भूतस्तरणिर्यस्य चक्षुः स महाविभूतिर्नः प्रसीदतात् ॥३६॥ प्राणादिति ॥ यः वायुः प्राणरूपः चराचराणां सहो मनसः शक्तिः बलं शरीरस्य शक्तिः ओज इन्द्रियाणां शक्तिश्च यं पञ्चवृत्तिं प्राणं वयं बुद्ध्याद्यधिष्ठातारो ब्रह्मादयो देवताः सम्राजं सार्वभौमं तद्भृत्या इवान्वास्म अनुसृत्य स्थिताः स वायुर्यस्य प्राणात् अभूत् स महाविभूतिर्नः प्रसीदतात् ॥ ३७ ॥ श्रोत्रादिति॥ यस्य पुरुषस्य श्रोत्रेन्द्रियाद्दिशः प्रजज्ञिरे हृदश्च खानि देहगतानि छिद्राणि प्रजज्ञिरे नाभ्याश्च प्राणः पञ्चवृत्तिक इन्द्रियाणि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि वागादीनि पञ्च कर्मेन्द्रियाणि च आत्मान्तःकरणमसवो नागकूर्मादयः शरीरं च तेषां के तमवकाशदातृत्वेनाश्रय-भूतं खमाकाशः प्रजज्ञे सः महाविभूतिर्नः प्रसीदतात् ॥३८॥ बलादिति ॥ यस्य बलान्महेन्द्रो जज्ञे प्रसादात् त्रिदशा देवा जज्ञिरे मन्योः क्रोधात् गिरीशो रुद्रो जज्ञे धिषणात्

यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम्॥ द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः॥३६॥प्राणादभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः॥अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः॥३७॥श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः॥प्राणेन्द्रियात्मासुशरीरकेतं प्रसीदतां नः स महाविभूतिः॥३८॥बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिञ्चः॥खेभ्यश्च छन्दां-स्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः॥३९॥श्रीर्वक्षसः पितरश्छायया ऽऽसन्धर्मः स्तनादितरः पृष्ठतोऽभूत्॥द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारा-त्प्रसीदतां नः स महाविभूतिः ॥४०॥ विप्रो मुखं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ॥ ऊर्वोर्विडोऽजोङ्घ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभू-तिः॥४१॥लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः॥भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः ॥ ४२ ॥

बुद्धेः सकाशात् । स्त्रीत्वाभाव आर्षः । विरिञ्चः ब्रह्मा जज्ञे खेभ्यो देहच्छिद्रेभ्यः छन्दांसि गायत्र्यादीनि ऋषयश्च जज्ञिरे । मेढ्रात् कः प्रजापतिर्जज्ञे सः ॥ ३९ ॥ श्रीरिति ॥ यस्य वक्षसः सकाशात् श्रीः महालक्ष्मीः आसीत् । छायया पितर आसन् स्तनात् धर्मोऽभूत् पृष्ठतः इतरः अधर्मोऽभूत् शीर्ष्णः शिरसः । आर्षः शीर्षन् । द्यौः स्वर्गोऽभूत् विहारात् अप्सरस आसन् सः महाविभूतिर्नः प्रसीदतात् ॥४०॥ विप्र इति॥ यस्य मुखं मुखात् विप्रो ब्राह्मणकुलं गुह्यमतीन्द्रियार्थावबोधकं ब्रह्म वेदश्चासीत् भुजयोर्बाहुभ्यां राजन्यः क्षत्रियः बलं प्रजापालनसामर्थ्यं चासीत् ऊर्वोः ऊरुभ्यां विट् वैश्यः ओजः नैपुण्यं तस्य वृत्तिश्चासीत् अङ्घ्रिः अङ्घ्रेः सकाशात् "सुपां सुलुक्" इति ङसेः सुः। अवेदशूद्रौ अवेदः वेदव्यतिरिक्तशुश्रूषावृत्तिस्तथा तद्वृत्तिमान् शूद्रश्चेति आस्ताम्। विशोऽङ्घ्रेरभवच्च शूद्र इति च पाठः । सः महाविभूतिर्नः प्रसीदतात्॥४१॥ लोभ इति॥ यस्य अधरात् अधरोष्ठात् लोभोऽभूत् उपरि उत्तरोष्ठात् प्रीतिरभूत् नस्तः नासिकातो द्युतिः कान्तिरभूत् स्पर्शेन पशव्यः पशूनां तत्तुल्यानामज्ञानां हितः कामोऽभूत् भ्रुवोः सकाशात् यमो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूत् । कालस्तु पक्ष्मभवः पक्ष्मणो जातः सः महाविभूतिर्नः प्रसीदतात् ॥ ४२ ॥ द्रव्यमिति ॥ यद्द्रव्यादिकं दुर्विभाव्यं मायामयतया ज्ञातुमशक्यं प्रबुधापबाधमिति विद्वद्भिरत्याज्यमित्यर्थः । प्रबुधाववोधमिति पाठे प्रबुधानामेव मायामयतयाववोधो यस्मिन्नित्यर्थः । तत् द्रव्यं त्रयोविंशतिस्तत्त्वानि वयः कालं कर्म जीवादृष्टं गुणान् सत्वादीन् विशेषं ब्रह्माण्डं तदुपलक्षितं कार्यवर्गं च एवं कार्यकारणात्मकं सकलं जगत् यत् यस्य योगमायया विहितान् वदन्ति सः स महाविभूतिर्नः प्रसीदतात् ॥४३॥ नम इति ॥ उपशान्ताः निवृत्ताः शक्तयः सत्वादयो गुणा यस्मिन् तस्मै स्वाराज्यं परमानन्दः तल्लाभेनैव प्रतिपूरित आत्मा मनो यस्य तस्मै अत एव मायारचितेषु गुणेषु तत्कार्येषु दर्शनादिवृत्तिभिर्न सज्जमानाय आसक्तिरहिताय नभस्वान् वायुस्तद्वद्भूतिर्लीला यस्य तस्मै यथा वायुः सर्वत्र संचार्यपि कुत्रापि न सज्जते तथेतिभावः । तस्मै नमः ॥ ४४ ॥ स त्वामिति ॥ स भक्तवत्सलस्त्वं ते तव सस्मितं मुखाम्बुजं दिदृक्षूणां नोऽस्माकं दिदृक्षूनस्मान् अस्मचक्षुरादिकरणगोचरं यथा भवत्येवमात्मानं स्वस्वरूपं दर्शय ॥ ४५ ॥

द्रव्यं वयःकर्मगुणान्विशेषं यद्योगमायाविहितान्वदन्ति ॥ यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः स महाविभूतिः ॥ ४३ ॥ नमोऽस्तु तस्मा उपशान्तशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥४४॥ स त्वं नो दर्शयात्मानमस्मत्करणगोचरम् ॥ प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम् ॥ ४५ ॥ तैस्तैः स्वेच्छाधृतै रूपैः काले काले स्वयं विभो ॥ कर्म दुर्विषहं यन्नो भगवांस्तत्करोति हि ॥ ४६ ॥ क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च ॥ देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥ ४७ ॥ नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः ॥ कल्पते पुरुषस्यैष स ह्यात्मा दयितो हितः ॥४८॥ यथा हि स्कन्धशाखानां तरोर्मूलावसेचनम् ॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ४९ ॥

तैस्तैरिति ॥ हे विभो हि यस्मात् काले काले तत्तदवसरे स्वस्येच्छया स्वेषां स्वकीयानां भक्तानामिच्छया वा भृतैः धृतैः रूपैर्यन्नोऽस्माकं दुर्विषहमशक्यं तत् कर्म भगवान् स्वयमेव करोति ॥ ४६ ॥ क्लेशेति ॥ विषयार्तानां विषयेष्वासक्तानां देहिनां कर्माणि यथा क्लेशो भूरिर्येषु अल्पं सारं फलं येषु तथाभूतानि भवन्ति वस्तुतः स्वर्गादेः फलस्यापि विनाशित्वात्तान्यपि विफलान्येव । त्वय्यर्पितं तु कर्म तथा नैव भवति किंतु सफलमेवेति अतस्त्वद्भक्तैरस्माभिस्त्वय्यर्पितानि कर्माणि विफलानि न भवन्ति ॥ ४७ ॥ नेति ॥ अवमः अल्पोऽपि कर्मकल्पः कर्माभासोऽपि ईश्वरे त्वयि अर्पितश्चेद्विफलाय विफलत्वाय न कल्पते विफलो न भवति । हि यस्मात् स एष ईश्वरः पुरुषस्य सर्वजीवस्यात्मा स्वरूपम् अत एव दयितः प्रियः हितश्च न ह्यात्मनि दयिते चार्पितं निष्फलं स्यात् ॥ ४८ ॥ यथेति ॥ यथा तरोर्मूलस्यावसेचनं स्कन्धानां शाखानां च भवति एवमेव विष्णोराराधनं सर्वेषां प्राणिनां तथात्मनः स्वस्याराधकस्य चाराधनं भवति ॥ ४९ ॥

Nepal Sanskrit University, Valmeeki Campus

नम इति॥ अनन्ताय दुर्वितर्क्याणि आत्मकर्माणि स्वभावचेष्टितानि यस्य तस्मै निर्गुणाय गुणेशाय साम्प्रतमिदानीं पालनकालत्वात्तदर्थं सत्वस्थाय सत्वगुणमङ्गीकृतवते॥५०॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य पञ्चमे निरमादिमाम् ॥ ५ ॥ षष्ठे दृष्टो हरिर्देवैः स्तुतो प्राहामृताप्तये ॥ सन्धिं दैत्यैः साकमत्र श्लोकाः सार्द्धा[३९] नवान्वयः ॥ उवाच पञ्चैकं तत्रानुष्टुभो[४३] रामसिन्धवः ॥ ६ ॥ एवमिति ॥ हे राजन् सुरगणैरेवं स्तुत ईश्वरो भगवान् हरिः सहस्रसंङ्ख्यानामर्काणामुदये द्युतिरिव द्युतिर्यस्य तथाभूतः सन् तेषां पुरतः आविरभूत् ॥ १ ॥ तेनैवेति॥ तेनैव महसा तेजसा प्रतिहतानीक्षणानि नेत्राणि येषां ते सर्वे देवाः खादीन् आत्मपर्यन्तानेव नापश्यन् । विभुं भगवन्तं तु कुतः पश्येयुः ॥ २ ॥ विरिञ्च इति सार्द्धपञ्चकम् ॥ शर्वेण सह भगवान् विरिञ्चः स्वच्छां निर्मलां मरकतमणिमिव श्यामां कञ्जस्य गर्भो मध्यमिवारुणे ईक्षणे यस्याः तप्तहेम्न इवावदातेन पीतेन लसता कौशेयवाससा युक्तां प्रसन्नानि चारूणि सर्वाण्यङ्गानि यस्याः शोभनं मुखं यस्याः सुन्दरे भ्रुवौ यस्याः महान्तो मणयो यस्मिन् तेन किरीटेन

नमस्तुभ्यमनन्ताय दुर्वितर्क्यात्मकर्मणे ॥ निर्गुणाय गुणेशाय सत्त्वस्थाय च साम्प्रतम् ॥ ५० ॥ इति श्रीभा० अष्टमस्कन्धेऽमृतमथने पञ्चमोऽध्यायः ॥ ५ ॥ श्रीशुक उवाच ॥ एवं स्तुतः सुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः ॥ १ ॥ तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः ॥ नापश्यन्खं दिशः क्षोणिमात्मानं च कुतो विभुम् ॥ २ ॥ विरिञ्चो भगवान्दृष्ट्वा सह शर्वेण तां तनुम् ॥ स्वच्छां मरकतश्यामां कञ्जगर्भारुणेक्षणाम् ॥ ३ ॥ तप्तहेमावदातेन लसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वाङ्गीं सुमुखीं सुन्दरभ्रुवम् ॥४॥ महामणिकिरीटेन केयूराभ्यां च भूषिताम् ॥ कर्णाभरणनिर्भातकपोलश्रीमुखाम्बुजाम् ॥ ५ ॥ काञ्चीकलापवलयहारनूपुरशोभिताम् ॥कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीम् ॥६॥ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासिताम् ॥ तुष्टाव देवप्रवरः सशर्वः पुरुषं परम्॥सर्वामरगणैः साकं सर्वाङ्गैरवनिं गतैः॥७॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणाय निर्वाणसुखार्णवाय ॥ अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ८ ॥

केयूराभ्यां च भूषितां कर्णाभरणे कुण्डले ताभ्यां निर्भातौ यौ कपोलौ ताभ्यां श्रीर्मुखाम्बुजे यस्यां काञ्चीरूपः कलापो भूषणं वलयो हारः नूपुरौ च तैः शोभितां कौस्तुभः आभरणं कण्ठे यस्या लक्ष्मीं वक्षसि बिभ्रतीं वनमालिनीं च मूर्तिमद्भिः सुदर्शनादिभिः स्वैरस्त्रैरुपासितां तां भगवतस्तनुं दृष्ट्वा सर्वाङ्गैः अवनिं गतैः साष्टाङ्गप्रणतैः सर्वामरगणैः साकं तथा स शर्वः शिवेन च सहितो देवप्रवरो ब्रह्मा पूरुषं परं पुरुषोत्तमं तुष्टाव ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ अजातेति ॥ न जाता जन्मस्थितिसंयमाः यस्य अगुणाय निर्गुणाय निर्वाणसुखस्यार्णवाय निर्दुःखपरमानन्दमहोदधये किंच अणोरप्यणिम्ने दुर्ज्ञेयत्वादतिसूक्ष्मायेत्यर्थः । वस्तुतः अपरिगण्यमियत्तारहितं धाम मूर्तिर्यस्य तस्मै एवं महानचिन्त्यः अनुभावः प्रभावो यस्य ते तुभ्यं नमो नमः । "अनाविराविरासेयं नाभूताभूदिति ब्रुवन् ॥ ब्रह्माभिप्रैति नित्यत्वविभुत्वे भगवत्तनोः" ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

तन्मूर्तेः सनातनत्वमपरिमेयत्वं चोपपादयति—रूपमिति॥ हे पुरुषर्षभ पुरुषोत्तम हे धातः तवैतद्रूपं वैदिकतान्त्रिकेण वेदतन्त्राभ्यामवबोधितेन योगेन साधनेन श्रेयोर्थिभिः इज्यं पूज्यम् अतो नेदमिदानीमपूर्वं जातमिति भावः। यतः उ अहो ह स्फुटं नोऽस्मान् त्रिलोकान् त्रीन् लोकांश्च। त्रिलोकानिति समास आर्षः। " दिक्सङ्ख्ये संज्ञायाम् " इति नियमात्। अमुष्मिन् अस्मिन्नेव विश्वमूर्तौ तव रूपे सह युगपदेव पश्यामि ॥ ९ ॥ त्वयीति॥ इदं विश्वम् आत्मतन्त्रे त्वय्येवाश्रये कारणे च अग्रे आसीत् त्वय्येव मध्ये आसीत् त्वय्येव अन्ते आसीत् परस्मात्प्रधानादपि परः त्वम् एव घटस्य मृत्स्ना इव अस्य जगतः आदिरन्तो मध्यं चासि ॥१०॥ मृत्स्नादृष्टान्तेन प्राप्तं परिणामं वारयति—त्वमिति॥ आत्माश्रयया स्वाधीनया मायया इदं विश्वं निर्माय रचयित्वा तदनु पश्चात् अन्तर्यामितया स्वयं प्रविष्टः। युक्ता सावधाना मनीषिणो विवेकिनो विपश्चितः शास्त्रज्ञाः मनसैव करणेन गुणानां व्यवाये परिणामेऽप्यगुणं गुणवश्यताविरहितमेव त्वां पश्यन्ति ॥ ११ ॥ यथेति ॥ यथा अग्निमेधसि काष्ठे मन्थनेन अमृतं क्षीरं गोषु दोहनादिना भुवि

रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतान्त्रिकेण॥ योगेन धातः सह नस्त्रिलोकान्पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ ॥९॥ त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यन्त आसीदिदमात्मतन्त्रे ॥त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्॥१०॥त्वं माययात्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः॥पश्यन्ति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ॥११॥ यथाऽग्निमेधस्यऽमृतं च गोषु भुव्यन्नमम्बूद्यमने च वृत्तिम् ॥ योगैर्मनुष्या अधियन्ति हि त्वां गुणेषु बुद्ध्या कवयो वदन्ति॥१२॥तं त्वां वयं नाथ समुज्जिहानं सरोजनाभाऽतिचिरेप्सितार्थम् ॥ दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गाङ्गमम्भः॥१३॥ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलम् ॥ समागतास्ते बहिरन्तरात्मन्किंश्चान्यविज्ञाप्यमशेषसाक्षिणः॥१४॥अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते॥किं वा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमन्त्रम् ॥ १५ ॥

अन्नं व्रीह्यादि कर्षणादिना भुवि अम्बु च जलं खननेन उद्यमेन पुरुषकारेण वाणिज्यादिना वृत्तिं जीविकाम् एवं योगैस्तत्तदुपायैर्मनुष्या अधियन्ति प्राप्नुवन्ति। हीति प्रसिद्धमेवैतत्। तथैव गुणेषु कार्येष्वेव कवयो विवेकिन एव त्वां योगविशुद्धया बुध्यैवाधियन्ति इति योगिनो वदन्ति ॥ १२ ॥ तमिति ॥ हे नाथ हे सरोजनाभ तं सर्वकारणभूतमत एव चिरादीप्सितार्थं योगैकप्राप्यं त्वां समुज्जिहानमाविर्भवन्तं प्रत्यक्षतो दृष्ट्वा अद्य वयं सर्वे दवार्ताः दावाग्निपीडिताः गजा गाङ्गमम्भः गङ्गाजलं प्राप्येव यथा सुखिनो भवन्ति तथा निर्वृतिं परमानन्दं गताः प्राप्ताः ॥ १३ ॥ स त्वमिति ॥ स उक्तविधः सर्वेश्वरस्त्वं वयमखिललोकपाला यदर्था यत्प्रयोजनाः सन्तस्तव पादमूलं शरणं समागतास्तद्विधत्स्व सम्पादय। हे बहिरन्तरात्मन् बहिरन्तश्च व्यापिन् अशेषसाक्षिणः सर्वं युगपत् साक्षात्कुर्वतस्ते तव सर्वज्ञस्य अन्येन विज्ञाप्यं किमस्ति न किमपीत्यर्थः। यद्वा। हे अन्तरात्मन् बहिः किं वाऽन्यैर्विज्ञाप्यमस्ति ॥ १४ ॥ अहमिति ॥ अहं ब्रह्मा गिरित्रो रुद्रः ये चान्ये सुरनरादयः दक्षादयः प्रजापतयश्च एते सर्वेऽपि वयमग्नेः सकाशात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

केतवः विस्फुलिङ्गा इव ते त्वत्तः पृथग्विभाताः सन्तः आत्मनः शं सुखं सुखसाधनं किं विदाम न विद्म एवेत्यर्थः। अतो हे ईश द्विजानां देवानां च मन्त्रं सुखोपायं नोऽस्माकं विधत्स्व इदं कुरुतेत्युपदिशेत्यर्थः ॥ १५ ॥ एवमिति ॥ एवं विरिञ्चादिभिरीडितः स्तुतो भगवान् तेषां तत् हृदयमभिप्रायं यथावदेव विज्ञाय जीमूतस्य मेघस्येव गम्भीरया गिरा बद्धा अञ्जलयो यैस्तान् तथा संवृतानिति नियमितानि कारकाणि इन्द्रियाणि यैस्तान् विरिञ्चादीन् जगाद उवाच ॥ १६ ॥ एक इति ॥ यद्यपि सुरेश्वरो भगवान् स्वयमेक एव तस्मिन् सुराणां कार्ये ईश्वरः कर्तुं समर्थस्तथापि स्वयमपि समुद्रोन्मथनादिभिर्विहर्तुकाम इति तान्देवानुपायमेवाह स्म ॥ १७ ॥ हन्तेति ॥ हन्त हर्षे। हे ब्रह्मन् हे शम्भो हे सुराः हे देवाः हे देवयोनयो गन्धर्वाद्याः वो युष्माकं यथा श्रेयः स्यात्तथा मम भाषितं यूयं सर्वे अवहिताः सावधानचित्ताः सन्तः शृणुत ॥ १८ ॥ यातेति ॥ यावद्वो युष्माकमात्मनः स्वस्य भवो वृद्धिः स्यात्तावत्तान् प्रति यात कालेनानुगृहीतैरिति कालानुग्रहवशात्सर्वतोऽनुकूलतां प्राप्तैरित्यर्थः। तैः स्वशत्रुभिर्दानवैः दैतेयैश्च सन्धि-

श्रीशुक उवाच ॥ एवं विरिञ्चादिभिरीडितस्तद्विज्ञाय तेषां हृदयं यथैव ॥ जगाद जीमूतगभीरया गिरां बद्धाञ्जलीन्संवृतसर्वकारकान् ॥ १६ ॥
एक एवेश्वरस्तस्मिन्सुरकार्ये सुरेश्वरः ॥ विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ॥ १७ ॥ श्रीभगवानुवाच ॥ हन्त ब्रह्मन्नहो शम्भो हे देवा मम भाषितम् ॥ शृणुतावहिताः सर्वे श्रेयो वः स्याद्यथासुराः ॥ १८ ॥ यात दानवदैतेयैस्तावत्सन्धिर्विधीयताम् ॥ कालेनानुगृहीतैस्तैर्यावद्वो भव आत्मनः ॥ १९ ॥ अरयोऽपि हि सन्धेयाः सति कार्यार्थगौरवे ॥ अहिमूषकवद्देवा अर्थस्य पदवीं गतैः ॥ २० ॥ अमृतोत्पादने यत्नः क्रियतामविलम्बितम् ॥ यस्य पीतस्य वै जन्तुर्मृत्युग्रस्तोऽमरो भवेत् ॥ २१ ॥ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः ॥ मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ सहायेन मया देवा निर्मन्थध्वमतन्द्रिताः ॥ २२ ॥

र्विधीयतां सख्यं क्रियताम् ॥ १९ ॥ अरयोऽपीति ॥ कार्यार्थस्य कर्तव्यप्रयोजनस्य गौरवे भूयस्त्वे सति तत्सिद्ध्यर्थमरयः शत्रवोऽपि सन्धेयाः मित्रतां नेया एव। हीत्यवधारणे। अतो हे देवाः अर्थस्य प्रयोजनस्य पदवीं सिद्धिं गतैः प्राप्तैर्युष्माभिः पश्चादहिमूषकवद्विधीयताम्। यथा पेटिकायां संनिरुद्धोऽहिस्ततो निर्गमद्वारविधानार्थं प्रथमं मूषकेण सन्धिं विधत्ते यदा मूषकः पेटिकादशनं कृत्वा द्वारं विधत्ते तदा ततो निर्गत्य तमेव भक्षयति तथा युष्माभिः कृतार्थैर्दैत्या वध्याः ॥ २० ॥ अमृतेति ॥ अविलम्बितम् अमृतस्योत्पादने यत्नः क्रियताम्। यस्येति षष्ठ्यौ संबन्धमात्रे तृतीयार्थे। येन पीतेनामृतेन मृत्युग्रस्तोऽपि जन्तुः प्राणी अमरो भवेत् ॥ २१ ॥ क्षिप्त्वेति सार्द्धम् ॥ हे देवाः वीरुधः गुल्मानि तृणानि लताश्च ओषधयश्च इमाः सर्वाः क्षीरोदधौ क्षिप्त्वा मन्दरनामकं कनकपर्वतं मन्थानं कृत्वा वासुकिनामानं सर्पराजं नेत्रं रज्जुं कृत्वा मया सहायेन अतन्द्रिताः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरालस्याः सन्तः सिन्धुं निर्मन्थध्वम्। तङार्षः। ततश्च मत्साहाय्येन मन्थनं सुकरमिति भावः॥२२॥ननु तर्हि दैत्या अप्यमृतपानेनामराः स्युस्तत्राह—क्लेशभाज इति अर्द्धम्॥ मत्साहाय्येन दैत्यास्तु केवलं क्लेशभाजो भविष्यन्ति यूयं च फलग्रहाः अमृतपायिनो भविष्यथेत्यर्थः ॥ २३ ॥ यूयमिति ॥ हे सुराः असुरा यद्यदिच्छन्ति तत्तदेव यूयमनुमोदध्वम् । सान्त्वया साममार्गेण यथा सर्वे पदार्थाः सिध्यन्ति तथा संरम्भेण न ते सिध्यन्ति ॥२४॥ नेति ॥ जलधिसंभवात् कालकूटसंज्ञकात् विषान्न भेतव्यं नोद्विजितव्यं तत्तु रुद्रो ग्रसिष्यत इति भावः । वस्तुषु मथनादुत्पन्नेषु वो युष्माभिः जातु कदाचिदपि कामो लोभश्च न कार्यः तथा वस्तुग्रहणकर्तृषु दैत्येषु रोषश्च न कार्यः ॥ २५ ॥ इतीति ॥ स्वच्छन्दगतिः ईश्वरः भगवान्पुरुषोत्तमः देवानिति समादिश्य उपायोपदेशं कृत्वा तेषां ब्रह्मादीनां पश्यतां सतामेवान्तर्दधे ॥२६ ॥ अथेति ॥ अथ तस्मै तिरोहिताय भगवते नमस्कृत्य पितामहो ब्रह्मा भवो रुद्रश्च स्वं स्वं स्थानं जग्मतुः । सुरा इन्द्रादयस्तु बलिमुपेयुः उपजग्मुः ॥२७॥ दृष्ट्वेति ॥ असंयत्तान् युद्धार्थमनुद्यतानपि अरीन् शत्रून्

क्लेशभाजो भविष्यन्ति दैत्या यूयं फलग्रहाः॥२३॥यूयं तदनुमोदध्वं यदिच्छन्त्यसुराः सुराः॥न संरम्भेण सिध्यन्ति सर्वेऽर्थाः सान्त्वया यथा ॥२४॥ न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात्॥लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु॥२५॥श्रीशुक उवाच॥इति देवान्समादिश्य भगवान्पुरुषोत्तमः॥ तेषामन्तर्दधे राजन्स्वच्छन्दगतिरीश्वरः॥२६॥अथ तस्मै भगवते नमस्कृत्य पितामहः॥भवश्च जग्मतुःस्वं स्वं धामोपेयुर्बलिं सुराः॥२७॥दृष्ट्वारीनप्यसंयत्ताञ्जातक्षोभान्स्वनायकान्॥न्यषेधद्दैत्यराट्श्लोक्यः सन्धिविग्रहकालवित् ॥२८॥ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः ॥ श्रिया परमया जुष्टं जिताशेषमुपागमन्॥२९॥महेन्द्रः श्लक्ष्णया वाचा सान्त्वयित्वा महामतिः॥अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात्॥३०॥ तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः॥शम्बरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः॥३१॥ततो देवाऽसुराः कृत्वा संविदं कृतसौहृदाः॥उद्यमं परमं चक्रुरमृतार्थे परन्तप ॥ ३२ ॥

देवान् दृष्ट्वा जातः क्षोभो युद्धोत्साहो येषां तथाभूतान् स्वनायकान् स्वसेनापतीन् श्लोक्यः प्रशंसायोग्यः सन्धिविग्रहयोः कालवित् दैत्यराट् बलिर्न्यषेधत् न्यवारयत्॥२८॥ ते इति ॥ ते देवाः असुराणां ये यूथपास्तैर्गुप्तं सुरक्षितं परमया श्रिया सम्पदा जुष्टं युक्तं जिता अशेषाः देवादयो येन तं वैरोचनिं बलिमासीनमुपागमन् ॥ २९ ॥ महेन्द्र इति ॥ महामतिर्महेन्द्रः श्लक्ष्णया मधुरया वाचा सान्त्वयित्वा सामोपायेन तं प्रसन्नं कृत्वा यत्पुरुषोत्तमाद्भगवतः शिक्षितं तत्सर्वममृतोत्पादनप्रयत्नरूपमभ्यभाषत अकथयत् ॥ ३० ॥ तदिति ॥ तत् इन्द्रोक्तं दैत्यस्य बलेररोचत। शेषे षष्ठी। येऽत्रान्ये शम्बरादयः असुराधिपाः ये च त्रिपुरवासिनस्तेषां चारोचत । अमृते उत्पन्ने वयमेभ्यो देवेभ्यो बलात्सर्वं ग्रहीष्याम इत्याशयेन ॥ ३१ ॥ तत इति ॥ हे परन्तप ततो देवाः असुराश्च सर्वे संविदम् एवं सत्येवं करिष्याम इति मिथो नियमरूपं समयं कृत्वा कृतं परस्परं सौहृदं मैत्री यैस्तादृशाः सन्तः अमृतार्थे परममुद्यमं चक्रुः ॥ ३२ ॥

Nepal Sanskrit University, Belmeek, Dang

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ दुर्मदाः सगर्वाः शक्ताः समर्थाः परिघा इव बाहवो येषां तथाभूताश्चेति ते देवाऽसुराः ओजसा बलेन मन्दरगिरिमुत्पाट्य नदन्तउदधिं निन्युर्नेतुं प्रवृत्ता इत्यर्थः ॥ ३३ ॥ दूरेति ॥ शक्रादयः सर्वे दूरं भारोद्वहनेन श्रान्ता अत एव तं मन्दरं वोढुमपारयन्तोऽशक्नुवन्तः अत एव विवशाः सन्तो गिरिं पथि मार्गे एव विजहुः तत्यजुः ॥ ३४ ॥ निपतन्निति ॥ कनकमयः अत एव भाराधिक्यात् अचलश्च सः गिरिस्तत्र निपतन् बहून् अमरान् दानवांश्च महता स्वभारेण चूर्णयामास ॥ ३५ ॥ तानिति ॥ अनिष्टलाभात् भग्नं मनउत्साहो येषां तान् तथा भग्नाः बाहवः ऊरवः कन्धराश्च येषां तथाभूतांस्तान् अमरदानवान् विज्ञाय गरुडध्वजः गरुडारूढः सन् भगवान् तत्र बभूव आविर्बभूवेत्यर्थः ॥ ३६ ॥ गिरीति ॥ गिरिपातेन निष्पिष्टान् चूर्णीकृतान् अमरान् दानवांश्च विलोक्य ईक्षया अमृतदृष्ट्या यथा यथावत् निर्जरान् निर्व्रणांश्च कृत्वा जीवयामास ॥ ३७ ॥ गिरिमिति ॥ तत एकेनैव हस्तेन लीलयैव गिरिमुद्धृत्य गरुडे आरोप्य स्वमप्यारुह्य सुरासुरगणैर्वृतः अब्धिं प्रययौ ॥ ३८ ॥ अवरोप्येति ॥

ततस्ते मन्दरगिरिमोजसोत्पाट्य दुर्मदाः ॥ नदन्त उदधिं निन्युः शक्ताः परिघबाहवः ॥ ३३ ॥ दूरभारोद्वहश्रान्ताः शक्रवैरोचनादयः ॥ अपारयन्तस्तं वोढुं विवशा विजहुः पथि ॥ ३४ ॥ निपतन्स गिरिस्तत्र बहूनमरदानवान् ॥ चूर्णयामास महता भारेण कनकाचलः ॥३५॥ तांस्तथा भग्नमनसो भग्नबाहूरुकन्धरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥ ३६ ॥ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ॥ ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥ ३७ ॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया ॥ आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥ ३८ ॥ अवरोप्य गिरिं स्कन्धात्सुपर्णः पततां वरः ॥ ययौ जलान्त उत्सृज्य हरिणा स विसर्जितः ॥ ३९ ॥ इति श्रीभागवते म० अष्टमस्कन्धेऽमृतमथने मन्दराचलानयनं नाम षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ ते नागराजमामन्त्र्य फलभागेन वासुकिम् ॥ परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥ आरेभिरे सुसंयत्ता अमृतार्थे कुरूद्वह ॥ १ ॥ हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥ तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितम् ॥ २ ॥

ततः सः पततां पक्षिणां वरः श्रेष्ठः सुपर्णो गरुडः स्वस्कन्धाद्गिरिमवरोप्य अवतार्य जलान्ते जलसमीपे उत्सृज्य निधाय हरिणा विसर्जितः प्रस्थापितः सन् प्रययौ गरुडप्रस्थापनं च मन्थने आवश्यकस्य नेत्ररज्जुरूपस्य वासुकेर्निर्भयमागमनाय ॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य षष्ठेऽध्याये व्यधादिमाम् ॥ ६ ॥ सप्तमे सिन्धुतो जातं विषं देवैः स्तुतो हरः ॥ कृपया पीतवांस्तत्र श्लोकाः पर्वतँसिन्धवः ॥ पश्चोर्वाचेति पञ्चाशदर्द्धयुक्ता अनुष्टुभः ॥ ७ ॥ त इति सार्द्धम् ॥ हे कुरूद्वह ते देवा असुराश्च फलभागेन अमृतरूपे फले तवापि भागो भविष्यतीत्येवं नागराजं वासुकिमामन्त्र्य सम्प्रार्थ्य तं नेत्रीभूतं तस्मिन् मन्दरगिरौ परिवीय संवेष्टय मुदा हर्षेण अन्विताः युक्ताः यताः प्रयत्नवन्तश्च सन्तोऽमृतार्थमब्धिं मथितुमारेभिरे ॥ १ ॥ हरिरिति ॥ वासुकेर्विषोद्गारित्वादतितीव्रं मुखं दैत्यान् ग्राहयि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुमेव पूर्वं हरिस्तस्य पुरस्तान्मुखं जगृहे ।देवा अपि ततो भवन्मुखं जगृहुरित्यर्थः । तन्मुखग्रहणरूपं महापुरुषस्य भगवतश्चेष्टितं दैत्यपतयो नैच्छन् साधु न मेनिरे ॥ २ ॥ नेति ॥ वयं स्वाध्यायस्य वेदस्य श्रुतेनाध्ययनेन सम्पन्ना जन्मभिः कर्मभिश्च प्रख्याताः प्रसिद्धाः अतः अहेरमङ्गलमशुद्धमङ्गं पुच्छं न गृह्णीमः ॥ ३ ॥ इतीति ॥ इत्युक्ताभिप्रायेण तूष्णीं स्थितान् दैत्यान् विलोक्य भगवान् पुरुषोत्तमः स्मयमानोऽहिमुखज्वालया यूयमेव म्रियध्वमित्यभिप्रायेण प्रहसन् अग्रं मुखं विसृज्य सामरः अमरैः सहितः पुच्छं जग्राह ॥ ४ ॥ कृतेति ॥ एवं कृतो ग्रहणस्थानविभागो यैस्ते कश्यपनन्दना देवा सुराः परमायत्ताः परमयत्नवन्तः सन्तः अमृतार्थं पयोधिं ममन्थुः ॥ ५ ॥ मथ्यमान इति ॥ हे पाण्डुनन्दन परीक्षित् अर्णवे पयोधौ मथ्यमाने सति स मन्दराख्यः अद्रिः हि यतोऽनाधारोऽधोभागे आधाररहितः अतो बलिभिर्देवादिभिः ध्रियमाणोऽपि गौरवात् अपो विशत् अपामधोभागे प्रविष्टोऽभूत् ॥६॥ त इति ॥ एवमिति॥ बलीयसा दैवेन हेतुना स्वपौरुषे प्रयत्ने नष्टे सति ते देवादयः सुनिर्विण्णमतिखिन्नं मनो येषां ते तथा अत

न गृह्णीमो वयं पुच्छमहेरङ्गममङ्गलम् ॥ स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ॥ ३ ॥ इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः ॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ॥ ४ ॥ कृतस्थानविभागास्त एवं कश्यपनन्दनाः ॥ ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम् ॥ ५ ॥ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ध्रियमाणोऽपि बलिभिर्गौरवात्पाडुनन्दन ॥ ६ ॥ ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ॥ आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥ ७ ॥ विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसन्धिः ॥ कृत्वा वपुः कच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहार॥८॥ तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः॥ दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान्॥९॥ सुरासुरेन्द्रैर्भुजवीर्यवेपितं परिभ्रमन्तं गिरिमङ्ग पृष्ठतः॥ बिभ्रत्तदा वर्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः ॥१०॥

एव परिम्लाना मुखश्रीर्येषां ते तथाभूताश्च आसन् ॥ ७ ॥ विलोक्येति ॥ तदातिविघ्ने ईष्टे प्रभवतीति विघ्नेशः विघ्ननाशहेतुर्यो विधिस्तं विलोक्य अस्मिन् विघ्ने अयमेव प्रकार इति विचार्य अत्र विघ्नेशस्य विधिं तद्रचितं विघ्नमिति स्वामिपादाः। दुरन्तवीर्यः अपारबलः अत एवावितथः सत्योऽभिसन्धिः संकल्पो यस्य सः ईश्वरः महत् अद्भुतं च काच्छपं वपुः कृत्वा तोयं जलं प्रविश्य तदधोभागे गतं मन्दरगिरिमुज्जहार उद्धृतवान् । कच्छपजातेरेव जलाधोगतवस्तूद्धारणं स्वभावः ॥ ८ ॥ तमिति ॥ तं तेनोद्धृतं कुलाचलं वीक्ष्य सुराऽसुराः पुनर्मथितुं समुत्थिता बभूवुः । अपरो जम्बूद्वीप इव महान् विपुलदेहः स कूर्मो लक्षयोजनः प्रस्तारो विस्तारोऽस्यास्तीति तथा तेन पृष्ठेन गिरिं दधार ॥ ९ ॥ सुरेति ॥ अङ्ग हे राजन् अप्रमेयः अनन्तशक्तिः आदिकच्छपः सुरासुरेष्विन्द्रैः श्रेष्ठैः कर्तृभिर्भुजानां वीर्येण बलेन वेपितं कम्पितं परितो भ्रमन्तं गिरिं पृष्ठतः पृष्ठे बिभ्रत् तस्य आवर्तनं परिभ्रमणमङ्गकण्डूयनं मेने ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

पुनरपि देवादीनामसामर्थ्यं कष्टं चालोक्य कृपया स्वयमुपचकारेत्याह—तथेति ॥ विष्णुस्तेषामसुराणां बलं वीर्यं प्रभावं च ईरयन् प्रवर्तयन् आसुरेण असुराकारेण रूपेण राजशक्त्या असुरानाऽऽविशत् तथा देवानां बलवीर्यादिकम् उद्दीपयन् प्रवर्द्धयन् दैवेन देवाकारेण रूपेण सात्विकशक्त्या देवगणानाविशत् । तथा अबोधरूपः निद्रारूपः तामसशक्तिमयः सन् नागेन्द्रं वासुकिं प्राविशत् । येन तस्य कर्षणजन्यपीडानुभवो न स्यात् ॥ ११ ॥ मन्दरमूर्द्ध्वमुच्छलन्तं वीक्ष्य तदुपरिभागावष्टम्भं चकारेत्याह—उपरीति ॥ सहस्रं बाहवो यस्य सः तथान्यो गिरिराडिव महाकायः सन्नेकेन हस्तेन अगेन्द्रं पर्वतेन्द्रं मन्दरमाक्रम्य धृत्वा तस्योपरि तस्थौ । दिविस्थितैर्ब्रह्मभवेन्द्रा मुख्या येषां तैः स्तुवद्भिर्भगवान् सुमनोभिः पुष्पैरभितो वृष्टः आच्छादितो बभूव । ब्रह्मादयो मुख्या देवाः कायव्यूहं कृत्वा मन्थनस्थाने स्वस्वस्थाने चासन्निति ज्ञेयम् ॥१२॥ उपरीति ॥ तदेवमुपरि सहस्रबाहुरूपेण अधश्च कच्छपरूपेण आत्मनि दैत्यदेवशरीरे राजसतामसशक्त्या नेत्रे सर्पे अबोधरूपेण गोत्रे पर्वते दार्ढ्यरूपेण प्राविशता परेण परमात्मना समेधिताः समुपो-

तथाऽसुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन्॥उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः॥११ ॥उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः॥तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोऽभिवृष्टः॥१२॥उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः॥ ममन्थुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रचक्रम्॥१३॥ अहीन्द्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः॥पौलोमकालेयबलील्वलादयो दवाग्निदग्धाःसरला इवाभवन्॥१४॥देवांश्च तच्छ्वासशिखाहतप्रभान्धूम्राम्बरस्रग्वरकञ्चुकाननान्॥ समभ्यवर्षन्भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः॥१५॥मथ्यमानात्तदा सिन्धोर्देवासुरवरूथपैः॥यदा सुधा न जायेत निर्ममन्थाजितः स्वयम्॥१६॥मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः ॥ जैत्रैर्दोर्भिर्जगदभयदैर्दन्दशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभिताया धृताद्रिः ॥ १७॥

द्वलिताः अत एव मदोत्कटा देवासुरास्तरसा बलेन महाद्रिणा मन्दरेण क्षोभितं नक्राणां चक्रं समूहो यस्मिंस्तमब्धिं ममन्थुः ॥ १३ ॥ अहीन्द्रेति ॥ दृशश्च मुखानि च श्वासाश्च अहीन्द्रस्य वासुकेः साहस्रमपरिमिताः कठोरा ये दृङ्मुखश्वासास्तेभ्यो निर्गताभ्यामग्निधूमाभ्यामाहतं वर्चो येषां ते असुरादयो दावाग्निना दग्धाः सरला द्रुमविशेषा इवाभवन् ॥ १४ ॥ देवानिति ॥ तस्य वासुकेर्यः श्वासाग्निस्तस्य शिखया हता प्रभा येषां तान् धूम्राणि निश्वासधूमाक्तानि अम्बराणि वस्त्राणि स्रग्वराणि कञ्चुकान्याननानि च येषां तान् भगवद्भक्तान्देवांस्तु भगवद्वशा घना मेघाः समभ्यवर्षन् । तथा तद्वशाः समुद्रस्योर्मिभिस्तरङ्गैरुपगूढाः संवृता वायवः पवनाश्च ववुः ॥ १५ ॥ मथ्यमानादिति ॥ यदा देवासुरवरूथपैस्तथा मथ्यमानादपि सिन्धोः सकाशात् सुधा न जायेत नाजायत मन्थनाधिक्यादसारभागे निस्सृत एव सुधोद्गमसंभवादिति भावः । तदा अजितो भगवान् स्वयमेव निर्ममन्थ ॥ १६ ॥ मेघेति ॥ मेघ इव श्यामवर्णः कनकमिव स्वच्छः पीतश्च परिधिः परिधानं वस्त्रं यस्य सः कर्णयोर्विद्योतमाना विद्युत् इव मकराकारे कुण्डले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य सः मूर्ध्नि भ्राजन्तो विलुलिताः कचा यस्य सः शता आर्षः । स्रग्धरः वनमालाधरः रक्ते नेत्रे यस्य सः धृतः अद्रिर्येन सः एवंभूतो भगवान् जैत्रैः सर्वतो जयावहैः अत एव जगतामभयदैर्दोर्भिर्भुजैश्चतुर्भिर्दन्दशूकं सर्पं गृहीत्वा मथ्ना मन्थनसाधनेन कनकपर्वतेन मथन्शब्दो न दृष्टचरः । सिन्धुं मन्थन् प्रतिगिरिरिव नीलमणिमयपर्वतान्तरवत् अशोभत । मन्दाक्रान्ता छन्दः ॥ १७ ॥ निरिति ॥ एवं निर्मथ्यमानात् अत एव संभ्रान्ताः मीना उत् उद्गताः मकराहिकच्छपाश्च यस्मिन् तस्मात् तिम्यादयो मत्स्यविशेषास्तैराकुलाच्चोदधेः सकाशात् अग्रतः प्रथमतो हालहलाह्वं हालाहलाख्यं महोल्बणं दुःसहं विषमभूत् । ओषधिषु विषस्यामृतस्य च सत्वात् प्रथमं विषभागः पृथक्तया उत्थित इति ज्ञेयम् । "हालाहलं हालहलं तथैव च हलाहलम् ।" इति द्विरूपकोशः ॥१८॥ तदिति ॥ अङ्ग हे राजन् उग्रो वेगो वैद्यकप्रसिद्धो रोमाञ्चस्वेदादिर्यस्य तत् दिशि दिशि उपरि अधश्च विसर्पत् गच्छत् उत्सर्पत् उर्ध्वं गच्छच्च असह्यं सोढुमशक्यम् अप्रति अप्रतिमम् अद्भुतं प्रतिक्रियाशून्यं वा तद्विषं दृष्ट्वा भीताः सेश्वराः सपालाः प्रजाः ताश्चात्र देवासुराः एव साधारणानां क्षीरसागरतटस्थानां कैलासस्थं शिवं प्राप्तुं झटिति समुद्रलङ्घनाऽशक्तेः अन्यत्रारक्ष्यमाणाः जनाः सदाशिवं शरणं दुद्रुवुः जग्मुः

निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः ॥ संभ्रान्तमीनोन्मकराहिकच्छपात्तिमिद्विपग्राहतिमिङ्गिलाकुलात् ॥ १८ ॥ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति ॥ भीताः प्रजा दुद्रुवुरङ्ग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥ १९ ॥ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याऽभिमतं मुनीनाम् ॥ आसीनमद्रावपवर्गहेतोस्तपोजुषाणं स्तुतिभिः प्रणेमुः ॥ २० ॥ प्रजापतय ऊचुः ॥ देवदेव महादेव भूतात्मन्भूतभावन ॥ त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥ २१ ॥ त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः ॥ तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ २२ ॥ गुणमय्या स्वशक्त्याऽस्य सर्गस्थित्यप्ययान्विभो ॥ धत्से यदा स्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधाम् ॥ २३ ॥

॥१९॥ विलोक्येति ॥ त्रिलोक्या भवाय समृद्धये देव्या भवान्या सहाद्रौ कैलासे आसीनं मुनीनामपवर्गस्य मोक्षस्य हेतोरत एव तेषामभिमतं तपोजुषाणं स्वाचारेण शिक्षयन्तं मुगभाव आर्षः । देववरममरोत्तमं तं सदाशिवं विलोक्य स्तुतिभिस्तुष्टुवुः प्रणेमुश्च । " निर्गुणं सगुणं चैव शिवं हरिपराक्रमैः । स्तुवन्तस्तु प्रजेशाना नामन्यन्तान्तरं तयोः ॥" इति स्वामिपादश्लोकः ॥२०॥ देवेति ॥ पूर्वार्द्धे संबोधनानि नोऽस्मान् शरणापन्नान् त्रैलोक्यदहनात् विषात् त्राहि पालय । तङ्भाव आकारश्च आर्षः ॥२१॥ त्वमेक इति ॥ त्वमेक एव सर्वजगतो बन्धमोक्षयोरीश्वरः समर्थः अत एव कुशलाः विवेकिनस्तं बन्धमोक्षप्रदं प्रपन्नानामार्त्तिहरं गुरुं त्वामेवार्चन्ति ॥ २२ ॥ गुणेति ॥ हे विभो हे भूमन् व्यापक त्वं यदा गुणमय्या रजःसत्त्वतमआत्मिकया स्वशक्त्या मायारूपया अस्य विश्वस्य सर्गं स्थितिम् अप्ययम् उपसंहारं च धत्से कर्तुमिच्छसि तदा स्वदृक् स्वतःसिद्धज्ञानः त्वं यथाक्रमं ब्रह्मविष्णुशिवेति अभिधां धत्से कार्यभेदान्नामभेद एव न वस्तुभेदः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति ॥ गुह्यं वेदे गोप्यं सर्ववेदतात्पर्यविषयं यत्परमं ब्रह्म सत्वमेव सदसतो भावान् देवतिर्यगादीन् भावयत्युत्पादयतीति तथा सृज्यं तु त्वद्व्यतिरिक्तं नास्ति इत्याहुः । आत्मैव त्वं नानाशक्तिभिः सत्त्वादिगुणैर्जगद्रूपेणाऽऽभातः अतो जगदीश्वरः ॥ २४ ॥ त्वमिति ॥ शब्दस्य वेदस्य योनिः कारणं त्वं जगदादिर्महत्तत्वं प्राणेन्द्रियद्रव्याणां कारणभूता गुणा यस्य स राजसादित्रिविधः आत्मा अहङ्कारस्त्वं तथा स्वभावादयस्त्वं स्वभावः परिणामहेतुः कालः क्षोभकः क्रतुः सङ्कल्पः सत्यं यथार्थभाषणम् ऋतं मधुरभाषणं च धर्मो यज्ञादिरूपः त्वम् एवंभूते त्वयि त्रिवृदक्षरमकारोकारमकारात्मकं प्रणवं प्रकाशकमामनन्ति वदन्ति । यद्वा । त्रिवृत् त्रिगुणात्मकं यदक्षरं प्रधानं तत् त्वयि त्वदाश्रयमामनान्ति ॥ २५ ॥ अग्निरिति ॥ लोका भवन्ति यस्मात्स हे लोकभव यः अखिलदेवतात्माग्निस्तं ते मुखं विदुः । क्षितिं तेऽङ्घ्रिपङ्कजं विदुः। अखिलदेवतात्मनस्ते कालं गतिं विदुः । दिशश्च कर्णौ विदुः । जलेशं वरुणं रसनेन्द्रियं विदुः ॥ २६ ॥ नाभिरिति ॥ हे भगवन् नभस्तव नाभिः नभस्वान् वायुस्तव श्वसनं श्वासः सूर्यस्तव चक्षूंषि

त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः ॥ नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥ २४ ॥ त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्वभावः ॥ कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत्त्रिवृदामनन्ति ॥ २५ ॥ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम् ॥ कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ॥ २६ ॥ नाभिर्नभस्ते श्वसनं नभस्वान्सूर्यश्च चक्षूंषि जलं स्मरेतः ॥ परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवञ्छिरस्ते ॥ २७ ॥ कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा रोमाणि सर्वौषधिवीरुधस्ते ॥ छन्दांसि साक्षात्तव सप्त धातवस्त्रयीमयात्मन्हृदयं सर्वधर्मः॥२८॥मुखानि पञ्चोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः॥यत्तच्छिवाख्यं परमार्थतत्त्वं देवः स्वयंज्योतिरवस्थितिस्ते ॥२९॥ छाया त्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्त्वरजस्तमांसि ॥ साक्षान्मनुः शास्त्रकृतस्तवेक्षा छन्दोमयो देवऋषिः पुराणः॥३०॥

जलं च तव रेतः परे ब्रह्मादयः अपरे तिर्यगादयो ये आत्मानो जीवास्तेषामाश्रयणमाश्रयस्तवात्मा अहङ्कारः सोमश्चन्द्रस्तव मनः द्यौः स्वर्गस्तव शिरः ॥ २७ ॥ कुक्षिरिति ॥ हे त्रयीमयात्मन् वेदत्रयमूर्ते सर्वे समुद्रास्तव कुक्षिः गिरयः पर्वतास्तवास्थिसङ्घा अस्थिसमूहाः सर्वा ओषधयो यवादयो वीरुधो लताश्च तव रोमाणि सप्त छन्दांसि गायत्र्यादीनि तव सप्त धातवः प्रसिद्धो वेदोक्तः सर्वो धर्मस्तव हृदयम् ॥ २८ ॥ मुखानीति ॥ हे ईश पञ्चोपनिषदः तत्पुरुषाऽघोरसद्योजातवामदेवेशानात्मकाः पञ्चानुवाकाः तव मुखानि मुखव्यापारात्मकाः यैर्मुखैस्त्रिंशदष्टोत्तरमन्त्रवर्गः अष्टोत्तरत्रिंशन्मन्त्राणां वर्गः तेषामेव मन्त्राणां पदच्छेदेनाष्टोत्तरत्रिंशत्कलात्मका मन्त्रा जाता इत्यर्थः । हे देव यत्तच्छास्त्रप्रसिद्धं शिवाख्यं परमार्थतत्त्वं स्वयंज्योतिः स्वयंप्रकाशं तत्ते तवावस्थितिरवस्थानमुपरतावस्था ॥२९॥ छायेति ॥ अधर्मस्योर्मिषु दम्भलोभादिषु तु तव छाया अप्रकाशः अधर्मोर्मयस्तव छायाभूता इत्यर्थः । यैरधर्मोर्मिभिः विसर्गः संहारः । यद्वा । यैः सत्वादिभिर्गुणैः विसर्गः प्रपञ्चसृष्टिस्तानि सत्वरजस्तमांसि तव नेत्रत्रयम् । हे देव छन्दोमयः गायत्र्यादि- ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छन्दःप्रचुरः पुराणः पुरातन ऋषिर्वेदः साङ्ख्यात्मनः सर्वज्ञस्य शास्त्रकृतः वेदप्रणेतुस्तव ईक्षा ईक्षणं साङ्ख्यात्मन इत्यत्र साक्षान्मनुरिति पाठे मनुर्वेदः तमेवाह । छन्दोमय इति ॥ ३० ॥ नेति ॥ हे गिरित्र यत्परं ज्योतिः यत्र च रजस्तमश्च सत्वं चेति गुणा न सन्ति यत्र निरस्तः भेदो यत्र तत्ते ब्रह्मस्वरूपं तदखिललोकपालादिभिर्गम्यं न भवति ॥ ३१ ॥ कामेति ॥ कामश्चाध्वरश्च दक्षयज्ञः त्रिपुरादयश्च ये अनेके भूतद्रुहस्तान् क्षपयतः संहरतस्ते तव तत् कामादिक्षपणात्मकं कर्म स्तुतये न भवति । अत्यल्पमेतदिति भावः । यस्तु भवान् आत्मना स्वेनैव कृतं सृष्टमिदं जगदन्तकाले स्वनेत्रवह्निस्फुलिङ्गस्य शिखया भासितं भस्मसाज्जातं न वेद कदा जगदिदं भस्मीकृतमित्यपि नानुसन्धत्ते तस्य कामादिक्षपणं तुच्छमेव । गरभक्षणस्याप्यवश्यंभावित्वेन सिद्धवन्निर्देशः । कालो गरश्च दैत्यविशेष आसीत् इत्यप्याहुः ॥ ३२ ॥ ये त्विति ॥ आत्मारामाश्च ते गुरवो विश्वहितोपदेष्टारश्च तैरपि हृदि चिन्तितमङ्घ्रिद्वन्द्वं यस्य तं तथापि मुनीनां संप्रदायप्रवृत्त्यर्थं तपसाभितप्तं तपः कुर्वन्तमित्यर्थः । त्वां ये तु उमया भवान्या सह चरन्तं तस्यां नितरां कामिनं कत्थन्ते प्रलपन्ति तथा श्मशाने चरन्तमुग्रं क्रूरं परुषं हिंस्रं च कत्थन्ते ते नूनं तवोतिं लीलामविदन्निति काकुः। त्वल्लीलां नैव विदुः

न ते गिरित्राखिललोकपाल विरिञ्चिवैकुण्ठसुरेन्द्रगम्यम् ॥ ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद् ब्रह्म निरस्तभेदम् ॥ ३१ ॥ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते ॥ यस्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं न वेद ॥ ३२ ॥ ये त्वात्मरामगुरुभिर्हृदि चिन्तिताङ्घ्रिद्वन्द्वं चरन्तमुमया तपसाभितप्तम् ॥ कत्थन्त उग्रपुरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ॥ ३३ ॥ तत्तस्य ते सदसतोः परतः परस्य नाञ्जः स्वरूपगमने प्रभवन्ति भूम्नः ॥ ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रम् ॥ ३४ ॥ एतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥ ३५ ॥

अतः त्वन्निन्दका हातलज्जाः त्यक्तत्रपा एव आत्मारामैरपि पूज्यस्य ते कथं कामित्वं तपस्विनः शान्तस्य च कथमुग्रत्वादिकमित्यविचार्यैव ते प्रलपन्ति । स्वयं च कामादिभिश्चर्व्यमाणा अतस्ते निर्लज्जा एव ॥ ३३ ॥ तदिति ॥ तत्तस्मात् तस्य अनन्तमहिम्नः सदसतोः कार्यकारणयोः परतः प्रधानात् परस्य सर्वकारणस्य भूम्नः व्यापकस्य ते तव स्वरूपगमने यथावत्स्वरूपज्ञाने संस्तवने च प्राचीनाः ब्रह्मादयोऽप्यञ्जसा न प्रभवन्ति समर्था न भवन्ति संस्तवने तु कुतः शक्ताः स्युः । यद्येवं तदा वयं तु तत्सर्गस्य मरीच्यादेरपि सर्गविषयास्तेषां सर्गे अत्यर्वाचीनाः किमुतेति तज्ज्ञाने तत्स्तुतौ च कथं प्रभवेम इत्यर्थः । तथापि एतत्स्तवनं तु शक्तिमात्रं स्वशक्त्यनुरूपमत्यल्पमेव ॥ ३४ ॥ एतदिति ॥ हे महेश्वर परं केवलं ते तवैतत् दृश्यमानं रूपमेव प्रपश्यामोऽतः परमन्यत् यत्सर्वकारणभूतमतिसूक्ष्मं तन्न पश्यामः । हि यस्मात् अव्यक्तं कर्म यस्य तस्य ते व्यक्तिः प्राकट्यं लोकस्य जनस्य मृडनाय सुखसम्पादनायैवेति ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ तासां प्रजानां तत् विषोत्पत्तिजन्यं व्यसनं दुःखं वीक्ष्य कृपया भृशमत्यन्तं पीडितः सर्वभूतानां सुहृत् देवः शिवः स्वप्रियां सतीमिदमाह स्म ॥ ३६ ॥ प्रभावमविज्ञाय स्नेहेन विषपानात् मां प्रिया वारयेदिति आशङ्क्याह—अहो इति ॥ अहो बत कष्टे हे भवानि क्षीरोदमथनात् यदुद्भूतं कालकूटाख्यं विषं तस्मात् उपस्थितं संप्राप्तं प्रजानामेतद्वैशसं दुःखं पश्य ॥ ३७ ॥ आसामिति ॥ प्राणपरीप्सूनां जिजीविषूणामासां प्रजानां मे मया अभयं विधेयमेव हि यस्मात् यद्दीनानां दुःखिनां परिपालनमित्येतावानेव प्रभोः समर्थस्यार्थः कर्त्तव्यम् ॥ ३८ ॥ प्राणैरिति ॥ आत्मनः मायया मोहितेषु अत एव परस्परं बद्धवैरेषु परस्परं जिघांसत्सु भूतेषु साधवः कृपालवः परोपकारकाः दुःखितान् प्राणिनः क्षणभङ्गुरैः स्वैः स्वकीयैः प्राणैः पान्ति तेन च स्थिरं धर्मं यशश्च चिन्वन्तीति भावः ॥ ३९ ॥ पुंस इति सार्द्धम् ॥ हे भद्रे कृपयतः कृपाङ्कुर्वतः पुंसः सर्वात्मा हरिः प्रीयते भगवति हरौ प्रीते सचराचरः सर्वप्राणिवर्गसहितः अहं च प्रीये तस्मादिदं गरं भुञ्जेम। मत्तः सकाशात् प्रजानां स्वस्तिः शोभना सत्ता अस्तु ताः सुखेन

श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः ॥ सर्वभूतसुहृद्देव इदमाह सतीं प्रियाम् ॥ ३६ ॥ शिव उवाच ॥ अहो बत भवान्येतत्प्रजानां पश्य वैशसम् ॥ क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितम् ॥ ३७ ॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे ॥ एतावान्हि प्रभोरर्थो यद्दीनपरिपालनम् ॥ ३८ ॥ प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभङ्गुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥ पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ॥ प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥ तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ॥ ४० ॥ श्रीशुकदेव उवाच ॥ एवमामन्त्र्य भगवान्भवानीं विश्वभावनः ॥ तद्विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत ॥ ४१ ॥ ततः करतलीकृत्य व्यापि हालाहलं विषम् ॥ अभक्षयन्महादेवः कृपया भूतभावनः ॥ ४२ ॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ॥ यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥ ४३ ॥ तप्यन्ते लोकतापेन साधवः प्रायशो जनाः ॥ परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥ ४४ ॥

जीवन्तु ॥ ४० ॥ एवमिति ॥ विश्वभावनः विश्वसुखकरो भगवान् रुद्रः एवं भवानीमामन्त्र्यानुज्ञाप्य तद्विषं जग्धुमत्तुमारेभे प्रवृत्तः । सापि तत्प्रभावज्ञा अन्वमोदत अनुमोदितवती ॥ ४१ ॥ तत इति ॥ ततः सर्वतो व्यापि प्रसर्पि हालाहलाख्यं विषं करतलीकृत्य करतलमात्रपरिमितं कृत्वा कृपया भूतभावनः प्राण्यभयकरो महादेवोऽभक्षयत् ॥ ४२ ॥ तस्येति ॥ जलकल्मषः जलदोषो विषं स्ववीर्यं स्वबलं तस्य महादेवस्यापि दर्शयामास यतस्तं गले नीलं चकार तच्च नैल्यं साधोः कृपालोः परोपकारिणो रुद्रस्य विशेषेण भूषणमेवाभूत् ॥ ४३ ॥ तप्यन्त इति ॥ साधवो जनाः प्रायशो लोकतापेन तप्यन्ते दुःखितान् वीक्ष्य स्वयमपि दुःखिता भवन्तीत्यर्थः । यद्वा । तमान् वीक्ष्य तत्तापनिवृत्त्युपाये प्रवृत्तास्तदनुष्ठानजन्यक्लेशमनुभवन्तीत्यर्थः । हि यस्मात् तत्परार्थदुःखसहनम् अखिलात्मनः पुरुषस्य भगवतः परमुत्कृष्टमाराधनम् ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशम्येति ॥ देवानामपि देवस्य मीढुषः भक्तकामपूरकस्य । छान्दसः क्स्वन्तो निपातः । शम्भोस्तद्विषपानरूपं कर्म निशम्य दृष्ट्वा प्रजाः दाक्षायणी दक्षकन्या सती ब्रह्मा वैकुण्ठो विष्णुश्च शशंसिरे । तङार्षः ॥ ४५ ॥ प्रस्कन्नमिति ॥ तस्य पिबतः पाणेः सकाशात् यत्किंचिद्विषं प्रस्कन्नं गलितं तद्वृश्चिका अहयः विषवत्य ओषध्यः दन्दशूका अपि सर्पजातिविशेषाः अपरे च ये सविषाः श्वसृगालादयस्तेऽपि जगृहुः । अनेन विषस्य तीव्रतोक्ता ॥ ४६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य सप्तमे निरमादिमाम् ॥७॥ अष्टमे रत्नेषु जाते मृते दैत्यैर्बलाद्धृते ॥ हरिर्योषिदभूत्तत्र श्लोकाः सार्द्धाः षडब्धयः ॥ उवाचेत्येकं च सार्द्धा महीबाणा अनुष्टुभः ॥८॥ पीत इति ॥ वृषाङ्केण शिवेन गरे विषे पीते सति तेऽमरदानवाः प्रीताः सन्तस्तरसा वेगेन सिन्धुं ममन्थुः ततो मन्थनात् हविर्धानी कामधेनुरभवत् निःसृता । अत्र पूर्वं मन्थनाशक्ता अपि देवासुरा अधुना भगवच्छक्त्याविष्टा ममन्थुः अतो वस्तुतो भगवत एव मन्थकत्वम् ॥ १ ॥ तामिति ॥ हे नृप तां कामधेनुमग्निहोत्रीमग्निहोत्रसाधनभूतघृताद्युत्पादिकां

निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः ॥ प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे ॥४५॥ प्रस्कन्नं पिबतः पाणेर्यत्किञ्चिज्जगृहुः स्म तत् ॥ वृश्चिकाहिविषौषध्यो दन्दशूकाश्च ये परे ॥ ४६ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे अमृतमथने सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ॥ ममन्थुस्तरसा सिन्धुं हविर्धानी ततोऽभवत् ॥ १ ॥ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः ॥ यज्ञस्य देवयानस्य मेध्याय हविषे नृप ॥ २ ॥ तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ॥ तस्मिन्बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ॥ ३ ॥ तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः ॥ दन्तैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिम् ॥ ४ ॥ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः ॥ तस्मिन्हरिः स्पृहां चक्रे वक्षोऽलंकरणे मणौ ॥ ५ ॥ ततोऽभवत्पारिजातः सुरलोकविभूषणम् ॥ पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥ ६ ॥

देवयानस्य ब्रह्मलोकादिप्रापकस्य यज्ञस्य संबन्धिने मेध्याय पवित्राय हविषे हविःसिद्ध्यर्थं ब्रह्मवादिनो वेदज्ञा यज्ञाद्यनुष्ठानपरा ऋषयो जगृहुः ॥२॥ तत इति ॥ ततस्तदनन्तरं चन्द्रपाण्डुरः चन्द्र इव शुक्लवर्णः उच्चैःश्रवा नाम हयः अश्वः प्रादुरभूत् । तस्मिन्नश्वे दैत्यराजो बलिः स्पृहामिच्छां चक्रे गृहीतवान् । इन्द्रस्तु दैत्यानां मनोवर्द्धनार्थं प्रथममेवेश्वरेण कृतया " यूयं तदनुमोदध्वं यदिच्छन्त्यसुराः सुराः । " इति शिक्षया हेतुना नैच्छत् किन्तु तूष्णीमास ॥ ३ ॥ तत इति ॥ ततः मथ्यमानात् समुद्रात् भगवतो रुद्रस्य यः श्वेताद्रिः कैलासस्तस्य महिं महिमानं शोभां श्वेततया शिखरतुल्यैश्चतुर्भिर्दन्तैश्च हरन् ऐरावतो नाम वारणेन्द्रो हस्तिश्रेष्ठो विनिर्गतः ॥ ४ ॥ कौस्तुभेति ॥ महोदधेः सकाशात् पद्मरागमण्यात्मकं कौस्तुभाख्यं रत्नमभूत् । वक्षोलङ्करणार्थं तस्मिन् मणौ हरिर्भगवान् विष्णुः स्पृहां चक्रे तं जग्राहेत्यर्थः ॥ ५ ॥ तत इति ॥ ततः सुरलोकस्य विभूषणं शोभाकरः पारिजाताख्यो वृक्षोऽभवत् यः शश्वत्सर्वदार्थिनोऽर्थैः पूरयति । यथा भवान् प्रार्थितो भुवि जनानां कामान् पूरयति तथेत्यर्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत इति ॥ ततश्च निष्ककण्ठ्यः उपलक्षणमन्यभूषणानाम् । सर्वभूषणभूषिताः सुवाससः वल्गुभिर्गत्यादिभिः स्वर्गिणां स्वर्गवासिनां रमण्यः रमयित्र्यः अप्सरसो जाताः ॥७॥ तत इति ॥ ततः सुदामा पर्वतस्तेन एकस्यां दिशि जाता सौदामनी स्फटिकादिमयगिरिशृङ्गेष्वाधिकं विस्फुरन्ती विद्युदिव कान्त्या दिशो रञ्जयन्ती भगवत्परा रमा भगवन्तं रमयन्ती श्रीर्भगवत्प्रेयसी प्रादुर्भूता । तथा द्वितीया संपद्रूपा च साक्षान्मूर्तिमती प्रादुर्भूता इति द्वयोः प्रादुर्भावः । तत्र संपद्रूपा लक्ष्मीर्हरिप्रेयस्या विभूतिः संपत्पक्षे कान्त्येति इच्छार्थककमिधातोर्भावे रूपम् । अभिलाषेणेत्यर्थः । दिशः दिग्वर्तिनो जनान् रञ्जयन्ती सम्पत्तिरस्माकं भूयादिति रागवतीः कुर्वती ॥८॥ तस्यामिति ॥ तस्या रूपादिमहिम्ना आक्षिप्तं चेतो येषां ते सुरादयः सर्वे तस्यां संपद्रूपायामेव स्पृहां चक्रुः न तु हरेः प्रेयस्याम् । "तस्याः श्रियस्त्रिजगतो जनको जनन्याः" इति जगतो जननीत्वज्ञापनात् ॥९॥ तस्या इति ॥ तस्या मूर्तिमत्याः सम्पदः चकारात् हरिप्रेयस्याः श्रियश्च महदद्भुतमासनं महेन्द्रः आनिन्ये समर्पितवान् तथा मूर्तिमत्यः सत्यः सरिच्छ्रेष्ठाः हेमकुम्भैः शुचि प-

ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः ॥ रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ॥ ७ ॥ ततश्चाविरभूत्साक्षाच्छ्रीरमा भगवत्परा ॥
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा ॥ ८ ॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ॥ रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ९ ॥
तस्या आसनमानिन्ये महेन्द्रो महदद्भुतम् ॥ मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुम्भैर्जलं शुचि ॥ १० ॥ आभिषेचनिका भूमिराहरत्सकलौषधीः ॥
गावः पञ्च पवित्राणि वसन्तो मधुमाधवौ ॥ ११ ॥ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गन्धर्वा नट्यश्च ननृतुर्जगुः ॥ १२ ॥
मेघा मृदङ्गपणवमुरजानकगोमुखान् ॥ व्यनादयञ्छङ्खवेणुवीणास्तुमुलनिःस्वनान् ॥ १३ ॥ ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीम् ॥
दिग्गिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥ १४ ॥ समुद्रः पीतकौशेयवाससी समुपाहरत् ॥ वरुणः स्रजं वैजयन्तीं मधुना मत्तषट्पदाम् ॥ १५ ॥

वित्रमभिषेकयोग्यं जलमानिन्युः॥१०॥आभिषेचनिका इति ॥ आभिषेचनिका अभिषेकेऽपेक्षिताः सकलाः औषधीर्भूमिराहरत् समर्पितवती गावः पञ्च पवित्राणि दुग्धादिपञ्चगव्यानि आजह्रुः। वसन्ताख्यः ऋतुः मधुमाधवौ चैत्रवैशाखभवं फलपुष्पादिकं मधुमाधवमिति पाठान्तरेऽपि द्वन्द्वैक्येऽयमेवार्थः । यद्वा । मधुमासोद्भवं माधवं मधु॥११॥ऋषय इति ॥ यथाविधि तस्या अभिषेकमभिषेकोचितविधिमृषयः कल्पयांचक्रुः । तथा गन्धर्वा भद्राणि मङ्गलानि जगुः तथा नट्यः नटानां स्त्रियश्च ननृतुर्जगुश्च॥१२॥मेघा इति ॥ मेघा मन्दं मन्दं गर्जितवन्तः तुमुलो महान् निःस्वनो येषां तान् मृदङ्गादीन् शङ्खादींश्च प्रभाववशाद् व्यनादयन् वादितवन्तः ॥१३ ॥ तत इति ॥ ततो द्विजेरितैर्ब्राह्मणपठितैः सूक्तवाक्यैः सह जलपूर्णकलशैर्देवीं सम्पद्विस्तरणेन क्रीडन्तीं श्रियं सम्पद्रूपां तथा पद्मकरां कमलहस्तां सतीं पतिव्रतां हरिप्रेयसीं च दिग्गिभाः दिग्गजाः अभिषिषिचुः इत्यन्वयः ॥ १४॥ समुद्र इति ॥ कौशेये कीटोत्पादितकोशसूत्रोत्पन्ने द्वे वाससी वस्त्रे परिधानीयोत्तरीये समुद्रः समुपाहरत् अर्पितवान् । अभिषेकानन्तरं पीतवस्त्रस्यैव विधानात्

CC-0. In Public Domain. Digitization by eGangotri

मधुना पुष्परसेन हेतुना मत्ता षट्पदा भ्रमरा यस्यां तां वैजयन्तीनाम्नीं स्रजं वरुणः समुपाहरत् ॥ १५ ॥ भूषणानीति ॥ प्रजापतिर्विश्वकर्मा भूषणानि सरस्वती हारम् अजो ब्रह्मा पद्मं समुपाहरत् । नागाश्च कुण्डले द्वे समुपाहरन् ॥१६॥ उभयरूपाया एव तस्याः श्रीनारायण एवाश्रय इत्याह—तत इति ॥ ततः कृतस्वस्त्ययना कृतमनादिकालादेव स्वस्ति मङ्गलरूपं हरिवक्ष एवायनमास्पदं यस्याः तत्कालकृतस्वस्तिवाचना वा द्विविधैव एकीभूता सती स्वस्त्ययनादनु नदन्तो द्विरेफा भ्रमरा यस्यां तामुत्पलस्रजं कमलमालां पाणिना प्रगृह्य तथा सुष्ठु कपोलयोः कुण्डले यस्मिन् तत् तथा सव्रीडः हासो यस्मिंस्तत् सुशोभनं वक्त्रं दधती सती स्वमनोज्ञवरविलोकनार्थमासनाच्चचाल ॥ १७ ॥ स्तनेति ॥ तथातिकृशमुदरं यस्याः सा समं तुल्यं निरन्तरं मध्येऽन्तरालरहितं चन्दनकुङ्कुमाभ्यामुक्षितं लिप्तं स्तनद्वयं च दधती नूपुराणां वल्गु शिञ्जितैर्मनोहरशब्दैरुपलक्षिता ततस्ततः महासदसि प्रसर्पती गच्छन्ती नुमभाव आर्षः । हेमलतेव जङ्गमा स्वर्णवल्लीव बभौ ॥ १८ ॥ किंच तयोरेकीभूतयोर्लक्ष्म्योः सम्पद्रूपा लक्ष्मीः भगवदेकानुरागापि भगवत उत्कर्षं ख्यापयितुं स्वयंवरणेऽपि गुणदोषविवेकपूर्वकं प्रवृत्तेत्याह—विलोकयन्तीति ॥ निरवद्यं सर्वदोषरहितं ध्रुवं विनाशरहितमव्यभिचारिणो नित्याः सन्तो गुणा

भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः ॥ हारं सरस्वती पद्ममजो नागाश्च कुण्डले ॥ १६ ॥ ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना॥चचाल वक्त्रं सुकपोलकुण्डलं सव्रीडहासं दधती सुशोभनम्॥१७॥स्तनद्वयं चातिकृशोदरी समं निरन्तरं चन्दनकुङ्कुमोक्षितम् ॥ ततस्ततो नूपुरवल्गुसिञ्जितैर्विसर्पती हेमलतेव सा बभौ ॥१८॥ विलोकयन्ती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारि सद्गुणम् ॥ गन्धर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविन्दत॥१९॥नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न सङ्गवर्जितम्॥ कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतोव्यपाश्रयः ॥२०॥ धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम्॥वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः॥२१॥

यस्मिंस्तत् आत्मनः स्वस्य पदमाश्रयं पतिं गन्धर्वयक्षादिषु विलोकयन्ती विचिन्वत्यपि नान्वाविन्दत । क्वचित्कस्यचिद्दोषस्य सद्भावात् त्रैविष्टपेयाः देवाः । ढक् तु आर्षः॥१९॥ सम्पद्रूपा लक्ष्मीः स्वगतमाह—नूनमिति ॥ यस्य कस्यचिन्नूनं निश्चितं तपोऽस्ति तु परं तस्य दुर्वासःप्रभृतेर्मन्युनिर्जयो नास्ति क्वचिच्च बृहस्पतिशुक्रादिषु ज्ञानमस्ति परं तु तत्सङ्गवर्जितं वैराग्यविशिष्टं नास्ति कश्चिन्महान् महत्त्ववानप्यस्ति परंतु तस्य ब्रह्मसोमबृहस्पत्यादेः कामनिर्जयो नास्ति । यः परतो व्यपाश्रयः पराश्रित इन्द्रादिः स तु किमीश्वरः पराधीनत्वात् । यद्वा । परतः शत्रोः व्यपाश्रयः मुहुर्मुहुर्विगतास्पदो भवति स इन्द्रादिः किमीश्वरः॥२०॥धर्म इति॥ क्वचित् शुक्रादौ धर्मोऽस्ति परंतु तत्र भूतसौहृदं प्राणिमैत्रं नास्ति असुरपुरोहितत्वात् । क्वचित्परशुरामादाविति स्वामिपादाः । क्वचित्सकामेषु पुरुषेषु त्यागो दानमस्ति तत्तु न मुक्तिकारणम् पुंसः कार्तवीर्यादेः वीर्यं बलमस्ति परंतु अजस्य कालस्य वेगेन निष्कृतं परिहृतं न भवति । गुणसङ्गवर्जितः सनकादिवत् विषयभोगासक्तिरहितः द्वितीयो मम वरयोग्यो न भवति ॥ २१ ॥

Nepal Sanskrit University, Balmeeki...

क्वचिदिति ॥ क्वचिन्मार्कण्डेयादिके चिरायुरप्यस्ति परन्तु तस्य शीलं स्वभावो मङ्गलं स्त्रीणां सुखप्रदं न भवति सदा तद्विरोधीन्द्रियदमनशीलत्वात् । क्वचित् हिरण्यकशिप्वादौ तदपि शीलमङ्गलमप्यस्ति परंतु तस्य आयुषः स्थैर्यं वेद्यं निश्चेतुं योग्यं न भवति भगवद्विद्वेषेणाकस्मादपि मृत्युसंभवात् । यत्र कुत्र च श्रीमहादेवे मार्कण्डेयादिवत्सदेन्द्रियदमनाद्यभावाच्छीलमङ्गलमायुर्निश्चयश्चेत्युभयमप्यस्ति न चान्यः पूर्वोक्तः कश्चिद्दोषः परन्तु सोऽप्यमङ्गलः श्मशानवासाद्यमङ्गलचेष्टितः भगवन्तं लक्षीकृत्याह । कश्चेति । कश्चित्सुमङ्गलः सर्वदोषरहितत्वे सति सर्वशुभगुणपरिपूर्णोऽस्ति परंतु स मां न हि काङ्क्षते पूर्णानन्दत्वेनात्मारामत्वात् । तङ्गार्षः॥२२॥ एवमिति ॥ एवं विमृश्य सर्वत्र गुणदोषान्विचार्य रमा लक्ष्मीः अव्यभिचारिभिर्नित्यैः सद्भिः धर्मज्ञानादिभिर्गुणैः निजैकाश्रयतया स्वरूपभूतपरमानन्दानुभवेनान्यनैरपेक्ष्येण च वरं सर्वोत्तमम् अगुणाश्रयं निर्गुणं सर्वैर्गुणैरणिमादिभिरपि निजाश्रयार्थमपेक्षितमणिमादिसिद्ध्यधिष्ठातारमित्यर्थः । अत एव स्वस्यापि ईप्सितमिष्टं निरपेक्षं रमापेक्षारहितमपि मुकुन्दं वव्रे वृतवती अयं रमाभि-

क्वचिच्चिरायुर्न हि शीलमङ्गलं क्वचित्तदप्यस्ति न वेद्यमायुषः ॥ यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्च न काङ्क्षते हि माम् ॥ २२ ॥ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतया गुणाश्रयम् ॥ वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥ २३ ॥ तस्यांसदेश उशतीं नवकञ्जमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ॥ तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता ॥ २४ ॥ तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥ २५ ॥

प्रायः । यद्यप्ययं हरिरन्यनिरपेक्षः तथापि यथा आश्रिता अणिमादिसिद्धीर्नापेक्षते तद्वन्मामपि नोपेक्षेत तावतैवाहं कृतार्था स्यां किमन्यैः प्राकृतैरिति ॥ २३ ॥ तस्येति ॥ तस्य भगवतो विष्णोरंसदेशे स्कन्धे माद्यन्तो ये मधुव्रता भ्रमरास्तेषां वरूथस्य समूहस्य गिरा शब्देन उपघुष्टां नादिताम् उशतीं कमनीयां नवकञ्जमालां निधाय सव्रीडहासेन विकसन्नयनं तेन तस्य उरः वक्षः स्वधाम याता इदं मम स्थानं भवत्विति प्रतीक्षमाणा सती तस्य निकटे तस्थौ ॥ २४ ॥ द्विविधाया अपि लक्ष्म्या व्यवस्थया वासमाह— तस्या इति ॥ तत्र त्रिजगतो जनको भगवान् तस्याः प्रसिद्धायाः हरिप्रेयसीरूपायाः श्रियः जगतो जनन्याः वक्ष एव निवासमकरोत् तथैव विभूतेः सर्वसम्पद्रूपायाः श्रियोऽपि परमं श्रेष्ठं सार्वकालिकं वक्ष एव निवासमकरोत् । तेन ब्रह्मादयः सम्पद्रूपलक्ष्मीविभूतिभूताया अपि असार्वत्रिका गौणाश्च निवासाः स्युरिति ध्वनितम् । तदेव स्फुटयति । तत्र भगवद्वक्षसि स्थिता एव संपद्रूपा श्रीः सकरुणेन निरीक्षणेनैव स्वाः स्वकीयाः प्रजास्तद्भूतान् साधिपतीन् त्रिलोकान् । समास आर्षः । ऐधयत समवर्द्धयत् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शङ्खेति ॥ सस्त्रीणां कवभाव आर्षः । देवानुगानां गन्धर्वादीनां नृत्यतां गायतां वादित्राणां शङ्खादीनां पृथक् पृथक् स्वनः शब्दोऽभूत् ॥२६॥ ब्रह्मेति ॥ पुष्पवर्षिणः पुष्पाणि वर्षन्तः सन्तो ब्रह्मादयो मुख्या येषु ते सर्वे विश्वसृजः प्रजापतयस्तल्लिङ्गैर्विष्णुप्रतिपादकैः अवितथैः यथार्थैर्मन्त्रैः विभुं भगवन्तमीडिरे तुष्टुवुः । आमभाव आर्षः ॥ २७ ॥ श्रियेति ॥ श्रिया विलोकिता देवादयः प्रजाः शीलादिगुणसम्पन्नाः सन्तः परां निर्वृतिं परमानन्दं लेभिरे ॥ २८ ॥ निःसत्वा इति ॥ हे राजन् यदा च लक्ष्म्या उपेक्षिताः नावलोकितास्तदा दैत्यदानवाः निःसत्वा धैर्यरहिता लोलुपाः स्त्र्यादिविषयासक्ताः निरुद्योगाः व्यापारसामर्थ्यरहिताः गतत्रपाः लज्जारहिताश्च बभूवुः ॥ २९ ॥ अथेति ॥ अथ वारुणी वरुणदेवत्यं यदन्नं तन्मयी या सुरा तदभिमानिनी देवी देवता कन्यावस्थापन्ना कमलवल्लोचने यस्याः सा आसीत् । समुद्राद्विनिःसृतां तां तु हरेः विष्णोरनुमतेन ते पूर्वोक्तावस्थापन्ना असुरा जगृहुः ॥ ३० ॥ अथेति सार्द्धत्रयम् ॥ हे महाराज अथानन्तरममृतार्थिभिः काश्यपैः देवासुरैर्मथ्यमानादुदधेः सकाशात् परमाद्भुतः अत्यलौकिक-

शङ्खतूर्यमृदङ्गानां वादित्राणां पृथुः स्वनः ॥ देवानुगानां सस्त्रीणांनृत्यतां गायतामभूत् ॥ २६ ॥ ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुम् ॥
ईडिरेऽवितथैर्मन्त्रैस्तल्लिङ्गैः पुष्पवर्षिणः ॥२७॥ श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः॥शीलादिगुणसंपन्ना लेभिरे निर्वृतिं पराम् ॥२८॥
निःसत्त्वा लोलुपा राजन्निरुद्योगा गतत्रपाः ॥ यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥ २९ ॥ अथासीद्वारुणी देवी कन्या कमललोचना ॥
असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥ ३० ॥ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराज पुरुषः परमाद्भुतः॥३१॥दीर्घपीवर-
दोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः ॥ श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥ ३२ ॥ पीतवासा महोरस्कः सुमृष्टमणिकुण्डलः ॥ स्निग्धकुञ्चित-
केशान्तः सुभगः सिंहविक्रमः ॥ अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ॥ ३३ ॥ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः ॥ धन्वन्तरिरिति ख्यात
आयुर्वेददृगिज्यभाक् ॥३४॥ तमालोक्यासुराः सर्वे कलशं चामृताभृतम् ॥ लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन् ॥ ३५ ॥

स्वरूपः दीर्घौ पीवरौ च दोर्दण्डौ भुजौ यस्य सः कम्बुग्रीवः कम्बुः शङ्खस्तन्नाभिवत्त्रिरेखापन्ना ग्रीवा यस्य सः अरुणे ईक्षणे नेत्रे यस्य सः श्यामलः मेघवर्णः तरुणावस्था-पन्नः स्रग्वी पुष्पमालाधरः अन्यैश्च सर्वाभरणैः भूषितः पीतं वासो वस्त्रं यस्य सः महोरस्कः दीर्घवक्षाः सुमृष्टे मणिमये कुण्डले यस्य सः स्निग्धः कुञ्चितश्च केशानामन्तोऽपि यस्य सः सुभगः सुन्दरः सिंहवत् विक्रमो गतिर्यस्य सः अमृतेन आपूर्णं कलशं बिभ्रत् तथा वलयाभ्यां भूषितः पुरुष उदतिष्ठत् विनिर्गतः ॥३१॥३२॥३३॥ स इति ॥ स पुरुषो वै शास्त्रप्रसिद्धः साक्षाद्भगवतो विष्णोरंशांशेन संभवः प्रादुर्भावो यस्य सः धन्वन्तरिरिति ख्यातः प्रसिद्धः । आयुर्वेददृक् वैद्यशास्त्रप्रवर्तकः इज्यभाक् यज्ञभागभोक्ता ॥ ३४ ॥ तमिति ॥ तं पुरुषं तथा अमृतेन आभृतं परिपूर्णं कलशं च आलोक्य सर्वे असुराः सर्वाणि वस्तूनि धेन्वादीन्यपि लिप्सन्तो लब्धुमिच्छन्तस्तरसा वेगेन

CC-0. In Public Domain. Digitization by eGangotri

कलशमहरन् ॥ ३५ ॥ नीयमान इति ॥ तस्मिन्नमृतभाजने कलशे असुरैर्नीयमाने सति विषण्णं विषादं प्राप्तं मनो येषां ते तथाभूताः सन्तो देवाः हरिं भगवन्तमेव शरणमायुः ॥ ३६ ॥ इतीति ॥ इत्येवं तेषां देवानां स्वभक्तानां दैन्यमालोक्य भृत्यकामकृत् भगवान् मा खिद्यत खेदं मा कुरुत । तङ्भाव आर्षः । मिथः रहसि अन्यैरलक्षितं यथा स्यात्तथा वो युष्माकमर्थमहं स्वमायया मम योगमायाबलेन साधयिष्यामि । " मिथोऽन्योन्यं रहस्यपि " इत्यमरः । मिथो मा खिद्यतेति वा ॥ ३७ ॥ मिथ इति ॥ हे प्रभो तदर्थे अमृतार्थे तर्षचेतसां तृष्णाव्याकुलचित्तानां तेषां समबलानां दैत्यानां मिथः अहं पूर्वं पास्यामि अहं पूर्वं पास्यामि त्वं न पास्यसि त्वं न पास्यसीति मुहुः कलिरभूत् ॥ ३८ ॥ दुर्बलानां त्वाक्रोशमाह—देवा इति ॥ देवाः तुल्येनायासेन हेतवः अमृतसाधकाः तुल्य आयासो हेतुर्द्धनादिश्च येषामिति वा ते देवा अप्येतस्मिन्नमृते सत्रयागे इव स्वभागमर्हन्ति एष तुल्यायासवतां भागदानलक्षणो धर्मः सनातनो न त्विदानीमस्माभिः कल्प्यते । सत्रयागे यथा सर्वेषां समं फलं भवति तद्वदित्यर्थः । तथा च

नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने ॥ विषण्णमनसो देवा हरिं शरणमाययुः ॥ ३६ ॥ इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृत् ॥ मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ॥ ३७ ॥ मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसाम् ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ॥३८॥ देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः ॥ सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥ ३९ ॥ इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः॥ दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ॥ ४० ॥ एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥ ४१ ॥ प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरम् ॥ समानकर्णाभरणं सुकपोलोन्नसाननम् ॥ ४२ ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरम् ॥ मुखामोदानुरक्तालिझङ्कारोद्विग्नलोचनम् ॥ ४३ ॥ बिभ्रत्स्वकेशभारेण मालामुत्फुल्लमल्लिकाम् ॥ सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितम् ॥ ४४ ॥

श्रुतिः । " ऋद्धिकामाः सत्रमासीरन् इति, ये यजमानास्ते ऋत्विज इति " च ॥३९॥ इतीति ॥ हे राजन् अमृतालाभेन जातो मत्सरः येषां ते दुर्बला दैतेयाः गृहीतकलशान् प्रबलान् स्वान् दैत्यान् वै निश्चयेन इत्येवं मुहुः प्रत्यषेधन् ॥ ४० ॥ एतस्मिन्निति ॥ तेषां कलहमध्ये एव सर्वोपायवित् ईश्वरः विष्णुरनिर्देश्यं वर्णयितुमशक्यं परमाद्भुतं योषिद्रूपं दधार ॥ ४१ ॥ तद्वर्णयति—प्रेक्षणीयेति पञ्चकम् ॥ प्रेक्षणीयमुत्पलमिव श्यामं सर्वेष्ववयवेषु सुन्दरं समानयोः कर्णयोराभरणे यस्मिंस्तत् सुकपोलं च तदुन्नतनासिकं चाननं यस्मिंस्तत् ॥४२॥ नवयौवनेन हेतुना निःशेषेण वृत्तौ वर्तुलौ यौ स्तनौ तयोर्भारेणेव कृशमुदरं यस्मिंस्तत् मुखस्य आमोदे सुगन्धे अनुरक्ता ये अलयो भ्रमरास्तेषां झङ्कारशब्देन उद्विग्ने भीते लोचने यस्य तत् ॥ ४३ ॥ उत्फुल्ला मल्लिका यस्यां तां मालां स्वकेशभारेण बिभ्रत् शोभना ग्रीवा येन तत्कण्ठाभरणं यस्मिंस्तत् सुभुजयोरङ्गदाभ्यां भूषितम् ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरजाम्बरेण संवीतो नितम्ब एव द्वीपः विशालत्वात् तत्र शोभा यस्यास्तया काञ्च्या प्रकर्षेण विलसद्वल्गु यथा भवत्येवं चलतोश्चरणयोर्नूपुरे यस्मिंस्तत् ॥ ४५ ॥ सव्रीडेन स्मितेन सह विक्षिप्ता कम्पिता या भ्रूस्तस्या विलासेन सह यान्यवलोकनानि तैर्दैत्ययूथपानां चेतस्सु मुहुर्मुहुः काममुद्दीपयत् योषिद्रूपं दधारेति ॥४६॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो विवृतिमष्टमस्याष्टमे व्यधात् ॥ ८ ॥ नवमे मोहितैर्दैत्यैः सुधापात्रेऽर्पिते हरिः ॥ सुधामपाययद्देवांस्तत्र श्लोकास्तु गोभुजाः ॥ अनुष्टुभः सार्धदन्ता उवाचेति त्रयं तथा ॥९॥ त इति ॥ ततश्च ते असुराः अमृतार्थं त्यक्तसौहृदाः त्यक्तस्नेहाः अत एव अन्योन्यतः क्षिपन्तो दुर्वचनैस्तिरस्कुर्वन्तो दस्युधर्माणः अन्यायेनामृतग्रहणे कृतनिश्चयाः अतोऽन्योन्यतः सुधापात्रं हरन्तः सन्तः आयान्तीं स्त्रियं मोहिनीरूपं भगवन्तं ददृशुः ॥ १ ॥ अहो इति ॥ तद्दर्शनाच्च जातो हृच्छयः कामो येषां ते असुराः अहो अस्या रूपं सौन्दर्यमहो अस्या धाम द्युतिः अहो अस्या नवं वयः इति वदन्तस्तामभिद्रुत्य प्राप्य पप्रच्छुः ॥ २ ॥ केति ॥ हे कञ्जपलाशाक्षि हे

विरजाम्बरसंवीतनितम्बद्वीपशोभया ॥ काञ्च्या प्रविलसद्वल्गुचलच्चरणनूपुरम् ॥ ४५ ॥ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ॥ दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥ श्रीशुक उवाच ॥ तेऽन्योन्यतोऽसुराः पात्रं हरन्तस्त्यक्तसौहृदाः ॥ क्षिपन्तो दस्युधर्माण आयान्तीं ददृशुः स्त्रियम् ॥१॥ अहो रूपमहो धाम अहो अस्या नवं वयः ॥ इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ २ ॥ का त्वं कञ्जपलाशाक्षि कुतो वा किं चिकीर्षसि ॥ कस्यासि वद वामोरु मथ्नन्तीव मनांसि नः ॥ ३ ॥ न वयं त्वाऽमरैर्दैत्यैः सिद्धगन्धर्वचारणैः ॥ नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ॥ ४ ॥ नूनं त्वं विधिना सुभ्रूः प्रेषितासि शरीरिणाम् ॥ सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन किम् ॥ ५ ॥ सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ॥ ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ॥ ६ ॥ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ॥ विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥ ७ ॥

वामोरु नोऽस्माकं मनांसि मथ्नन्तीव क्षोभयन्तीव। नुमार्षः। त्वं कासि कुतो वा स्थानादागतासि अत्रागमनेन किं चिकीर्षसि कर्तुमिच्छसि कस्य कन्यासि एतत्सर्वं नोस्मान् वद ॥३॥ नेति ॥ त्वा त्वाममरादिभिरस्पृष्टपूर्वां वयं न जानीम इति न अपि तु जानीम एव। तेन त्वमत्र स्वयंवरार्थमागता इति जानीमः अतस्त्वयि कामदृष्टिर्युक्तैवेति भावः॥४॥ नूनमिति ॥ हे सुभ्रूः शरीरिणां सर्वेन्द्रियाणां मनसश्च प्रीतिं विधातुं सघृणेन परमदयालुना विधिना परमेश्वरेण प्रेषितासि किं वा यदृच्छया आगतासि। नैवम्। नूनं प्रेषितैवेत्यर्थः। यद्वा। किं नूनं त्वं विधिनैव प्रेषिता इत्येकमेव वाक्यम् ॥ ५ ॥ सेति ॥ हे मानिनि हे सुमध्यमे सा ईश्वरप्रेरिता त्वं नोऽस्माकमेकवस्तुनि अमृतार्थे स्पर्धमानानां विवदमानानामत एव बद्धवैराणां ज्ञातीनां शं सुखं विधत्स्व ॥ ६ ॥ वयमिति ॥ वयं कश्यपस्य दायादाः पुत्रा अतः परस्परं भ्रातरः कृतपौरुषाः अमृतार्थं कृततुल्यप्रयत्नाः

Nepal Sanskrit ...

CC-0. In Public Domain. Digitization by eGangotri

अतोऽस्माकं भेदो विग्रहो यथा न भवेत्तथा यथान्यायं यथायोग्यममृतं विभजस्व विभागेन देहीति॥ ७॥ इतीति ॥ मायया योषिद्वपुर्हरिर्दैत्यैरित्येवमुपामन्त्रितः संप्रार्थितः सन् स्वाभिलषितसिद्ध्यर्थं तेषां मोहनार्थं प्रहस्य रुचिरापाङ्गैस्तान्निरीक्षिन् । शता आर्षः । इदं वक्ष्यमाणमब्रवीत् ॥ ८ ॥ कथमिति ॥ हे कश्यपदायादाः मयि पुंश्चल्यां यूयं कथं सङ्गताः विश्वासं गताः । हि यस्मात् पण्डितः कामिनीषु विश्वासं जातु कदाचिदपि न याति ॥९॥ शालेति ॥ हे सुरद्विषः नूत्नं नूत्नं पुरुषं सुखं च विचिन्वतामन्वेषमाणानां शालावृकाणां वानराणां शृगालानां शुनां वा ।" शालावृकाः कपिक्रोष्टुश्वानः " इत्यमरः । स्वैरिणीनां स्वेच्छाचारिणीनां स्त्रीणां च सख्यान्यानित्यान्याहुः ॥ १० ॥ इतीति ॥ इत्येवं तस्या मोहिन्याः क्ष्वेलितैः छलवचनैः आश्वस्तं विश्वासं गतं मनो येषां ते असुराः भावेन केनापि अभिप्रायेण गम्भीरमन्यैर्दुष्प्रवेशं यथा भवत्येवं जहसुः अमृतभाजनं ददुश्च ॥ ११ ॥ तत इति ॥ ततश्चामृतभाजनं गृहीत्वा ईषत् स्मितेन शोभा यस्याः तया गिरा हरिर्बभाषे तद्भाषणं दर्शयति । क्व च कस्मिन्नप्यंशे मया कृतं साधु वा असाधु

इत्युपामन्त्रितो दैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्रहस्य रुचिरापाङ्गैर्निरीक्षन्निदमब्रवीत् ॥ ८ ॥ श्रीभगवानुवाच ॥ कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः ॥ विश्वासं पण्डितो जातु कामिनीषु न याति हि ॥९॥ शालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः॥सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वताम् ॥ १० ॥ श्रीशुक उवाच ॥ इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः ॥ जहसुर्भावगम्भीरं ददुश्चामृतभाजनम् ॥ ११ ॥ ततो गृहीत्वाऽमृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ॥ यद्यभ्युपेत क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमाम् ॥ १२ ॥ इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुङ्गवाः ॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥ १३ ॥ अथोपोष्य कृतस्नाना हुत्वा च हविषाऽनलम् ॥ दत्त्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः ॥ १४ ॥ यथोपजोषं वासांसि परिधायाऽहतानि ते ॥ कुशेषु प्राविशन्सर्वे प्रागग्रेष्वभिभूषिताः ॥ १५ ॥ प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च ॥ धूपामोदितशालायां जुष्टायां माल्यदीपकैः ॥ १६ ॥ तस्यां नरेन्द्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ॥ सा कूजती कनकनूपुरसिञ्जितेन कुम्भस्तनी कलशपाणिरथाविवेश ॥ १७ ॥

वा यद्यभ्युपेत अङ्गीकुरुत तर्हि वो युष्माकमिमां सुधां विभजे यथोचितं विभागं कृत्वा ददामि नो चेत्तर्हि किमस्माकं प्रयोजनमिति ॥ १२ ॥ इतीति ॥ तस्या मोहिन्या इत्येवमभिव्याहृतं वचनमाकर्ण्य श्रुत्वा ते असुरपुङ्गवाः बुद्धिमत्त्वेनासुरेषु श्रेष्ठा अपि अप्रमाणविदः अभिप्रायमविदन्तस्तस्यास्तद्वचनं तथा इति यथेच्छसि तथा कुरु इत्येवमन्वमंसत अङ्गीकृतवन्तः ॥ १३ ॥ अथेति युग्मम् ॥ अथ उपोष्य कृतस्नानाः हविषा अनलं हुत्वा गोविप्रभूतेभ्यः दानादि दत्त्वा द्विजैः कृतस्वस्त्ययनाः यथोपजोषं यथाप्रीति अहतानि नवीनानि वासांसि परिधाय भूषणैश्चाभिभूषितास्ते सर्वे प्राक् पूर्वमग्रं येषां तेषु कुशेषु प्राविशन् ॥ १४ ॥ १५ ॥ प्रागिति युग्मम् ॥ हे नरेन्द्र माल्यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीपकैश्च जुष्टायां धूपैरामोदितायां शालायां सुरेषु दितिजेषु दैत्येषु प्राङ्मुखेषूपविष्टेषु सत्सु अथानन्तरं तस्याम् " मणिबन्धादाकनिष्ठं करस्य करभो बहिः । " इत्यमरः । करभसदृशौ सुवृत्तौ सुश्लक्ष्णौ च ऊरू यस्याः सा उशत्कमनीयं दुकूलं यस्मिंस्तेन श्रोणीतटेन विशालया श्रोण्या अलसा मन्दा गतिर्यस्याः सा । करभोरुलसद्दुकूलेति पाठान्तरे करभसदृशयोरूर्वोर्लसत् शोभमानं दुकूलं यस्याः सा चासौ श्रोणी तस्या यस्तटस्तेन अलसगतिश्च सा तथा मदेन विह्वले अक्षिणी यस्याः सा कनकमयनूपुरयोः शिञ्जितेन शब्देन कूजती नुमभाव आर्षः । कुम्भौ इव स्तनौ यस्याः सा अमृतकलशः पाणौ यस्याः सा तस्यां सभायां विवेश ॥ १६ ॥ १७ ॥ तामिति ॥ श्रीसखीं सौन्दर्येण लक्ष्मीतुल्यां वस्तुतस्तु लक्ष्म्याः सखापि स्वभक्तकार्यार्थं तत्सखीव जातः इति श्रीसखीमित्युक्तमत एवाह । परदेवताख्यामिति कनकमये कुण्डले यस्याः सा चासौ चारवः कर्णादयो यस्यास्तां च तां विगलितो विस्रस्तः स्तनपट्टिकाया अन्तो यस्यास्तां संवीक्ष्य तस्याः उत्स्मितपूर्वकवीक्षणेन देवासुराः संमुमुहुः ॥ १८ ॥ असुराणामिति ॥ जातिनृशंसानां स्वभावतः क्रूराणामसुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयमन्याय्यं मत्वा अच्युतो मोहिनीरूपः तां सुधां तेभ्यो न व्यभजत् । सर्पाणां क्षीरदानं यथा

तां श्रीसखीं कनककुण्डलचारुकर्णनासाकपोलवदनां परदेवताख्याम् ॥ संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकान्ताम् ॥ १८ ॥ असुराणां सुधादानं सर्पाणामिव दुर्नयम् ॥ मत्वा जातिनृशंसानां न तां व्यभजदच्युतः ॥ १९ ॥ कल्पयित्वा पृथक्पङ्क्तीरुभयेषां जगत्पतिः ॥ तांश्चोपवेशयामास स्वेषु स्वेषु च पङ्क्तिषु ॥२०॥ दैत्यान्गृहीतकलशो वञ्चयन्नुप संचरैः ॥ दूरस्थान्पाययामास जरामृत्युहरां सुधाम् ॥ २१ ॥ ते पालयन्तः समयमसुराः स्वकृतं नृप ॥ तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥ २२ ॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः ॥ बहुमानेन चाबद्धा नोचुः किंचन विप्रियम् ॥ २३ ॥

अन्याय्यं दातुरप्यनर्थहेतुत्वात्तथैतेभ्योऽमृतदानमप्यन्याय्यमित्यर्थः । दैत्यैश्च यथान्याय्यं विभजस्वेत्युक्तं वस्तुतः देवा दैत्याश्च समुद्रमथने निष्फलप्रयत्नाः जाता एव हरिणैवामृतमुत्पादितं ततः स्वशरणागतेभ्यो देवेभ्य एवामृतं ददाविति ॥ १९ ॥ कल्पयित्वेति ॥ जगत्पतिर्भगवान् मोहिनीरूपः उभयेषां देवानामसुराणां च पङ्क्तीः पृथक् विविक्ताः कल्पयित्वा विधाय तांश्च देवासुरान् तासु पङ्क्तिषु स्वेषु स्वेषु तत्तज्जातीयेषु उपवेशयामास । असुराणामुपवेशनं प्रतारणार्थम् ॥२०॥ दैत्यानिति ॥ गृहीतः कलशो येन स भगवान् उप संचरैः उपसमीपे एव संचरैः भ्रूभङ्गिस्मितव्रीडाभूषणवसनसंचलनपूर्वकैश्चरणसंचलनैः किंचिन्मात्रदानेन दूरस्थानां देवानामुत्कण्ठां निवर्त्य संपूर्णं युष्मानेव पाययिष्यामीति प्रत्यायनैः समीपस्थानपि दैत्यान् वञ्चयन् दूरस्थानपि देवान् जरामृत्युहरां सुधां पाययामास ॥ २१ ॥ ते इति ॥ हे नृप तस्यां कृतः स्नेहो यैस्ते असुराः साध्वसाधु वा यथेष्टं विभजस्वेति स्वकृतं समयं पालयन्तः स्त्रिया सह विवादस्य जुगुप्सया लज्जयापि तूष्णीमासन् ॥२२॥ तस्यामिति ॥ तस्यां मोहिन्यां कृतः अतिप्रणयः

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

स्नेहो यैस्ते अत एव प्रणयस्यापायेन भङ्गेन कातराः भीताः एते तावत्कृपणाः पूर्वं तावत्किंचित्पिबन्तु यूयं तु धीराः क्षणं प्रतीक्षध्वमित्यादि बहुमानेन च आबद्धाः तद्वशत्वं गताः किंचिदप्यप्रियं नोचुः ॥ २३ ॥ देवेति ॥ देवानां लिङ्गेन वेषेण प्रतिच्छन्नः आच्छादितासुरस्वरूपः स्वर्भानू राहुर्देवसंसदि देवानां पङ्क्तौ चन्द्रार्कयोर्मध्ये प्रविष्टः सन् सोममृतमपिबत् । तदा च ताभ्यामयमसुर इति भगवते सूचितः बलिष्ठत्वेन तद्भयात्स्पष्टं वक्तुमशक्यत्वाद्भ्रूभङ्ग्या ज्ञापित इत्यर्थः ॥२४॥ चक्रेणेति ॥ ज्ञात्वा च हरिः क्षुरवत्तीक्ष्णधारेण चक्रेण अमृतं पिबतस्तस्य राहोः शिरो जहार कायात् पृथक्कृतवान् तस्य कबन्धः शिरोरहितदेहस्तु सुधया अप्लावितोऽसंस्पृष्टो यतः अपतत् मृत इत्यर्थः ॥ २५ ॥ शिर इति ॥ तस्य शिरस्त्वमृतसम्बन्धेन अमरतां नीतमतोऽजः भगवान् तद्ग्रहमचीक्लृपत् सूर्यादिवद्ग्रहत्वाधिकारे स्थापितवान् । एतेनामृतप्रभावः प्रदर्शितः । चन्द्रार्काभ्यां सूचितत्वात्तयोर्वैरधीः सन् यस्तु पर्वाणि लब्धावसरे चन्द्रार्कावभिधावति ॥ २६ ॥ पीतेति ॥ देवैरमृते पीतप्राये सति लोकस्य भावनो रक्षको भगवान् हरिः असुरेन्द्राणां पश्यतामेव सतां स्वं रूपं जगृहे ॥ २७ ॥ एवमिति ॥ एवं समाः देशादयो येषां ते तथाभूता अपि सुरासुरगणाः फले विविधः कल्पः फलं केषांचिज्जातं केषां-

देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ॥ प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः ॥२४॥ चक्रेण क्षुरधारेण जहार पिबतः शिरः ॥ हरिस्तस्य
कबन्धस्तु सुधयाऽप्लावितोऽपतत् ॥ २५ ॥ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ॥ यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ॥ २६ ॥
पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः ॥ पश्यतामसुरेन्द्राणां स्वं रूपं जगृहे हरिः ॥ २७ ॥ एवं सुराऽसुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि
फले विकल्पाः ॥ तत्राऽमृतं सुरगणाः फलमञ्जसापुर्यत्पादपङ्कजरजःश्रयणान्न दैत्याः ॥२८॥ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभि-
स्तदसत्पृथक्त्वात् ॥ तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥२९॥ इति श्री०म०अष्ट०अमृतमथने नवमोऽध्यायः ॥९॥

चिन्नेति वैचित्र्यं येषां ते फले वैषम्यवन्तो बभूवुरित्यर्थः । हेतुः मन्दरादिः । अर्थः समुद्रे क्षिप्तवीरुधादिकर्म मन्थनप्रयत्नः तत्र देवासुरमध्ये यस्य पादपङ्कजरजःश्रयणात् आश्रयणात् सुरगणाः अमृतरूपं फलमञ्जसा अनायासेनापुः यद्वैमुख्यात् दैत्यास्तन्नापुः स हरिरेव सर्वैः सेव्य इति शेषः । यत्तदोर्नित्यसंबन्धात् ॥ २८ ॥ यदिति ॥ असुः प्राणः वसु धनं कर्म कर्मेन्द्रियप्राणादिभिः करणैः नृभिः कर्तृभिर्यत् संमाननं देहात्मजादिषु युज्यते क्रियते तत् पृथक्त्वाद्धेतोः असद्व्यर्थं भवति देहादीनां परस्परं भिन्नत्वाच्छाखानिषेचनवदेकस्य सम्माननं न सर्वस्येति यत्तु तैरेव असुवस्वादिभिर्नृभिर्वा भगवति सम्माननं क्रियते तत् अपृथक्त्वाद्धेतोः सत् महाफलं भवति तच्च सर्वस्य जगतः संमाननं भवति । भगवतः सर्वात्मकत्वेन केनापि भेदाभावादित्यर्थः । यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कन्धशाखादेरपि भवति तथा भगवदाराधनं सर्वस्य देवमनुष्यादेरपि भवतीत्यर्थः । यद्वा ल्यब्लोपे पञ्चम्यौ पृथक्त्वं पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन यत् क्रियते तदसत् अपृथक्त्वम्पर्यालोच्येश्वरदृष्ट्या तैरेव तेष्वेव च यत् क्रियते तत्सद्भवतीति ॥ २९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य नवमे निरमादिमाम् ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमे तु मृधे दैत्यैर्देवसङ्घे च पीडिते ॥ आविर्बभूव भगवांस्तत्र श्लोका नगेषवः ॥ उवाचेत्येकं विपादा द्वाषष्टिः स्यादनुष्टुभाम् ॥१०॥ इतीति ॥ हे नृप इत्येवं युक्ताः सहिताः कर्मणि यत्ताः यत्नवन्तोऽपि दानवदैतेया यतो वासुदेवपराङ्मुखा अतोऽमृतं नाविन्दन् न प्रापुः ॥१॥ साधयित्वेति ॥ हे राजन् एवं समुद्रमन्थनेनामृतं साधयित्वा तथा स्वकान् स्वभक्तान् सुरान् अमृतं पाययित्वा तत्रत्यानां सर्वभूतानां पश्यतां सतां गरुडवाहनः गरुडारूढः सन् हरिर्ययौ ॥ २ ॥ सपत्नानामिति ॥ सपत्नानां स्वशत्रूणां परामुत्कृष्टां समृद्धिं दृष्ट्वा ते अप्राप्तामृतभागा दितिनन्दना दैत्याः अमृष्यमाणाः असहमानाः उद्यतायुधाः सन्तः युद्धार्थं देवान्प्रत्युत्पेतुः आजग्मुः ॥ ३ ॥ तत इति ॥ ततः पीतया सुधया एधिता नारायणभुजाश्रयाश्वातो निर्भयाः सर्वे सुरगणाः शस्त्रैः प्रतिसंयुयुधुः । तङ्भाव आर्षः ॥ ४ ॥ तत्रेति ॥ हे राजन् तत्र उदन्वतः समुद्रस्य रोधसि तीरे

श्रीशुक उवाच ॥ इति दानवदैतेया नाविन्दन्नमृतं नृप ॥ युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥ साधयित्वाऽमृतं राजन्पाययित्वा स्वकान् सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥ २॥ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनन्दनाः ॥ अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधाः ॥ ३ ॥ ततः सुरगणाः सर्वे सुधया पीतयैधिताः ॥ प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ॥ ४ ॥ तत्र दैवासुरो नाम रणः परमदारुणः ॥ रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ॥ ५ ॥ तत्रान्योऽन्यं सपत्नास्ते संरब्धमनसो रणे ॥ समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥ शङ्खतूर्यमृदङ्गानां भेरीडमरुणां महान् ॥ हस्त्यश्वरथपत्तीनां नदतां निस्वनोऽभवत् ॥ ७ ॥ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरिभाश्चेभैः समसज्जन्त संयुगे ॥ ८ ॥ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ॥ केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥ गृध्रैः कङ्कैर्बकैरन्ये श्येनभासैस्तिमिङ्गिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥ १० ॥ शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ॥ बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः ॥ ११ ॥ सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः ॥ १२ ॥

दैवासुरो नाम परमदारुणः अतिभयङ्करः तुमुलः संकीर्णः रोमहर्षणः रणः सङ्ग्रामः बभूव ॥ ५ ॥ तत्रेति ॥ तत्र समुद्रतीरे संरब्धमनसः क्रोधव्याप्तचित्ताः सपत्नाः शत्रवः देवासुराः अन्योऽन्यम् आसाद्य प्राप्य असिभिः बाणैः अन्यैश्च विविधैरायुधैरन्योऽन्यं निजघ्नुः॥६॥ शङ्खेति ॥ नदतां शङ्खादीनां हस्त्यादीनां च महान् निस्वनः शब्दोऽभवत् डमरुणामित्यार्षम् ॥७॥ रथिन इति ॥ तत्र संयुगे युद्धे रथिनो रथिभिः सह समसज्जन्त युयुधिरे । एवं पत्तिभिः सह पत्तयः हया हयारूढाः हयैः हयारूढैः इभाः हस्त्यारूढा इभैः हस्त्यारूढैः सह समसज्जन्त ॥ ८ ॥ उष्ट्रैरिति ॥ केचित् भटाः उष्ट्रैर्युयुधुः । अभियुयुरित्यादि स्पष्टं सार्द्धं त्रिकम् । तङ्भाव आर्षः । बस्तैश्छागैः ॥९॥१०॥११॥ सेनयोरिति ॥ हे राजन् ते उष्ट्रादिवाहनाः अग्रतोऽग्रतः उभयोः सेनयोर्विविशुः ॥ १२ ॥

Nepal Sanskrit University, Dang

CC-0. In Public Domain. Digitization by eGangotri

चित्रेति त्रिकम् ॥ हे राजन् हे पाण्डुनन्दन चित्रैर्ध्वजपटैः सितैरमलैः स्वच्छैरातपत्रैर्वज्रदण्डैः हीरकखचितदण्डैर्व्यजनैर्बार्हचामरैः मयूरपिच्छविरचितचामरैः वातेनोद्धूतैरुत्तरैः उत्तरीयैः उष्णीषैश्च अर्चिभिरर्चिष्मद्भिः सूर्यरश्मिभिर्हेतुभूतैः सुतरां स्फुरद्भिरिति तृतीयान्तानां सर्वेषां विशेषणं विशदैः स्वच्छैः वीराणां मालाभिः समुदायैश्च देवदानववीराणां ध्वजिन्यौ सेने रेजतुः । यादसां जलचराणां मालाभिर्यथा सागरौ राजेतां तथेत्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥ वैरोचन इति त्रिकम् ॥ हे प्रभो वैरोचनः विरोचनपुत्रः सङ्ख्ये युद्धे असुराणां चमूपतिः स प्रसिद्धः बलिः वैहायसं नाम प्रसिद्धं कामगं यथेष्टगति मयेन निर्मितं सर्वसाङ्ग्रामिकोपेतमपेक्षितसर्वसङ्ग्रामसाधनपूर्णं सर्वाश्चर्यमयं सर्वथा अद्भुतत्वेनाश्चर्यजनकम् अप्रतर्क्यं मनसः अविषयमत एव अनिर्देश्यं निर्देष्टुं वचसा निरूपयितुमशक्यं कदाचित् दृश्यमानं भवति कदाचित् कचिददर्शनं च

चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदण्डैर्व्यजनैर्बार्हचामरैः॥१३॥वातोद्धूतोत्तरोष्णीषैरर्चिभिर्वर्मभूषणैः ॥ स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥ १४ ॥ देवदानववीराणां ध्वजिन्यौ पाण्डुनन्दन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥१५॥ वैरोचनो बलिः सङ्ख्ये सोऽसुराणां चमूपतिः ॥ यानं वैहायसं नाम कामगं मयनिर्मितम् ॥ १६ ॥ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम् ॥ १७ ॥ आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ॥ वालव्यजनछत्राग्र्ये रेजे चन्द्र इवोदये ॥ १८ ॥ तस्यासन्सर्वतो यानैर्यूथानां पतयोऽसुराः ॥ नमुचिः शम्बरो बाणो विप्रचित्तिरयोमुखः ॥ १९ ॥ द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः ॥ शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥२०॥ हयग्रीवः शङ्कुशिराः कपिलो मेघदुन्दुभिः ॥ तारकश्चक्रदृक् शुम्भो निशुम्भो जम्भ उत्कलः॥ २१॥अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः ॥ अन्ये पौलोमकालेयनिवातकवचादयः ॥२२॥ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः॥ सर्व एते रणमुखे बहुशो निर्जितामराः ॥ सिंहनादान्विमुञ्चतः शङ्खान्दध्मुर्महास्वनान् ॥ २३ ॥ दृष्ट्वा सपत्नानुत्सिक्तान्बलभित्कुपितो भृशम् ॥ ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट् ॥ यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ २४ ॥

भवतीति तत् सर्वश्रेष्ठत्वेन प्रसिद्धं विमानाग्र्यं विमानश्रेष्ठं यानं वाहनमास्थितः सर्वानीकाधिपैर्वृतश्च वालव्यजनैश्छत्राग्र्यैश्च उदये उदयगिरिशिखरे स्थितश्चन्द्र इव रेजे ॥१६॥ ॥ १७ ॥ १८ ॥ तस्येति चतुष्कम् ॥ तस्य बलेः सर्वतोऽसुरयूथानां पतयः नमुचिरित्यादयः असुराः यानैरासन् । स्पष्टं शेषम् ॥ १९ ॥ २० ॥२१ ॥ २२॥ अलब्धेति सार्द्धम् ॥ सर्वे एते च सोमस्यामृतस्य न लब्धो भागो यैस्ते असमर्थसमासः अतः केवलं मथनक्लेशभागिनः तथा पूर्वं रणमुखे बहुशो निर्जिता अमरा यैः अतः पुनरपि जयाशया सिंहनादान् विमुञ्चन्तः महारवान् शङ्खान्दध्मुः ॥ २३ ॥ दृष्ट्वेति सार्द्धम् ॥ सपत्नान् शत्रून् असुरान् उत्सिक्तान् गर्वितान् दृष्ट्वा स्वयमेव राजते स्वराट् बलभिदिन्द्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुपितः सन् स्रवन्ति प्रस्रवणानि दानजलानि निर्झराश्च यस्मिन् तम् ऐरावतं नाम दिक्करिणमारूढः सन् शुशुभे । उदयाद्रिमारूढोऽहर्पतिः सूर्यो यथा शोभते तथेत्यर्थः॥ २४॥ तस्येति ॥ तस्येन्द्रस्य सर्वतः स्वस्वगणैः सह वर्तमाना नाना वाहध्वजायुधानि येषां ते तथाभूता देवाः वाय्वग्निवरुणादयो लोकपालाश्च आसन् ॥ २५ ॥ त इति ॥ ते देवा असुराश्चान्योऽन्यमभिसंसृत्य संमुखमागत्य स्पर्द्धया इन्द्रेण बलिर्युयोधेत्यादिस्सम्पस्त्वन्वयः। तङभाव आर्षः। नामाभिराह्वयन्तः शता आर्षः। मर्माभिः दुर्वचनैः क्षिपन्तस्तिरकुर्वन्तः अग्रेऽग्रे विशन्तो द्वन्द्वयोधिनश्च सन्तो मिथो युयुधुः । तङभाव आर्षः ॥ २६ ॥ युयोधेति ॥ गुहः कार्तिकेयः अस्यत आस्यत् अस्त्राणि चिक्षेप । आडभावतङावार्षौ । सूर्यो देव एक एव शतेन बाणज्येष्ठैर्बलिसुतैर्युयुधे । निशुम्भेति षष्ठी तृतीयार्थे । निशुम्भशुम्भाभ्यां तरस्विनी महावेगवती विभावसुरग्निः ब्रह्मपुत्रैर्मरीच्यादिभिः समस्तु श्लोकेषु

तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः ॥ लोकपालाः सह गणैर्वाय्वग्निवरुणादयः ॥२५॥ तेऽन्योऽन्यमभिसंसृत्य क्षिपन्तो मर्मभिर्मिथः ॥ आह्वयन्तो विशन्तोऽग्रे युयुधुर्द्वन्द्वयोधिनः ॥ २६ ॥ युयोध बलिरिन्द्रेण तारकेण गुहोऽस्यत ॥ वरुणो हेतिनाऽयुध्यन्मित्रो राजन्प्रहेतिना ॥ २७ ॥ यमस्तु कालनाभेन विश्वकर्मा मयेन वै ॥ शम्बरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥ २८ ॥ अपराजितेन नमुचिरश्विनौ वृषपर्वणा ॥ सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च ॥ २९ ॥ राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः ॥ निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ॥३०॥ वृषाकपिस्तु जम्भेन महिषेण विभावसुः ॥ इल्वलः सहवातापिर्ब्रह्मपुत्रैररिन्दम ॥ ३१ ॥ कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह ॥ बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ॥ ३२ ॥ मरुतो निवातकवचैः कालेयैर्वसवोऽमराः ॥ विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ॥३३॥ त एवमाजावसुराः सुरेन्द्रा द्वन्द्वेन संहत्य च युध्यमानाः॥अन्योऽन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः॥३४॥ भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिन्दिपालैश्च शिरांसि चिच्छिदुः॥३५॥गजास्तुरङ्गाः सरथाः पदातयः सारोहवाहा विविधा विखण्डिताः ॥ निकृत्तबाहूरुशिरोधराङ्घ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥ ३६ ॥

शेषं स्पष्टम् ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥३१ ॥ ३२॥३३॥ त इति ॥ ते जिगीषवः परस्परं जेतुमिच्छवः असुराः सुरेन्द्राश्च आजौ युद्धे एवं द्वन्द्वेन संहत्य मिलित्वा युद्ध्यमानाः ओजसा वेगेनान्योऽन्यमासाद्य संप्राप्य तीक्ष्णशरासितोमरैर्निजघ्नुः ॥ ३४ ॥ भुशुण्डिभिरिति ॥ अन्योऽन्यं भुशुण्ड्यादिभिश्च शिरांसि चिच्छिदुः ॥ ३५ ॥ गजा इति ॥ गजास्तुरङ्गाश्च तत्तदारूढा अपीत्यपि ज्ञेयम् । सरथाः रथेन सहिताः रथिनः आरोहन्तीत्यारोहाः योद्धारस्तैः सहिता अन्ये च वाहा वाहनानि विविधा बहुप्रकारकाः पूर्वोक्ता उष्ट्रादयो विखण्डिताः सन्तः निकृत्ताः संछिन्ना बाह्वादयो येषां ते छिन्नानि ध्वजादीनि येषां तादृशा आसन् । इष्वासो धनुः तनुत्रं कवचम् ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषामिति॥ तेषां देवादीनां पदाघातैः रथाङ्गैः रथचक्रैश्च चूर्णितादायोधनात् रणभूमेः सकाशात् उत्थित उल्बणः रेणुर्दिशः खमाकाशं द्युमणिं सूर्यं च छादयन् तदैव असृक्स्रुतिभिः रक्तक्षरणैः परिप्लुतात् संसिक्तादित्यर्थः। आयोधनविशेषणम्। यद्वा परिप्लुतादिति भावे क्तः। परिप्लवनाद्धेतोः न्यवर्तत रक्तधाराणां सूर्यपर्यन्तमुच्छलनादित्यर्थः। परिप्लुत इति पाठे रेणोर्विशेषणम् ॥ ३७ ॥ शिरोभिरिति ॥ उद्धूतानि उत्पतितानि किरीटानि कुण्डलानि च येभ्यस्तैः संरम्भः क्रोधस्तद्युक्ता दृशो येषु तैः क्रोधेनैव परिदष्टा दच्छदाः ओष्ठा येषु तैः शिरोभिः तथा साभरणैः आभरणानि भूषणानि तत्सहितैः सहायुधैः आयुधसहितैश्च महाभुजैः तथा करभसदृशैरूरुभिश्च सा रणभूः प्रकर्षेणास्तृता आच्छादिता सती बभौ ॥३८॥ कबन्धा इति ॥ उद्यतान्यायुधानि यैस्तथाभूतैर्दोर्दण्डैर्युक्ताः कबन्धाः शिरोभी रहिता देहाश्च तत्र पतितानि यानि स्वशिरांसि तत्रत्यैरक्षिभिरेव ते पश्यन्त इत्यर्थः। तत्र मृधे युद्धभूमौ आ सर्वतो धावन्तो भटान् प्रति उत्पेतुः योद्धुमतिवेगेन समागताः॥ ३९॥ बलिरिति ॥ बलिर्दशभिः शरैरिन्द्रमार्च्छयत् विव्याध। एवं

तेषां पदाघातरथाङ्गचूर्णितादायोधनादुल्बण उत्थितस्तदा॥ रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ॥३७॥ शिरोभिरुद्धूतकिरीटकुण्डलैः संरम्भदृग्भिः परिदष्टदच्छदैः॥ महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ॥३८॥ कबन्धास्तत्र चोत्पेतुः पश्यन्तः स्वशिरोक्षिभिः॥ उद्यतायुधदोर्दण्डैराधावन्तो भटान्मृधे॥३९॥ बलिर्महेन्द्रं दशभिस्त्रिभिरैरावतं शरैः॥ चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत्॥४०॥ स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः॥ चिच्छेद निशितैर्भल्लैरसंप्राप्तान्हसन्निव॥४१॥ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे॥ तां ज्वलन्तीं महोल्काभां हस्तस्थामच्छिनद्धरिः॥४२॥ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः॥ यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः॥४३॥ ससर्जाथासुरीं मायामन्तर्धानं गतोऽसुरः॥ ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो॥४४॥ ततो निपेतुस्तरवो दह्यमाना दवाग्निना॥ शिलाः सटङ्कशिखराश्चूर्णयन्त्यो द्विषद्बलम्॥४५

त्रिभिः शरैरैरावतं तद्धस्तिनमार्च्छयत्। चतुर्भिः शरैश्चतुरो वाहान् ऐरावतपादरक्षकान् आर्च्छयत्। एकेन शरेण आरोहं हस्तियन्तारमार्च्छयत् ॥ ४० ॥ स इति ॥ शीघ्रविक्रमः सः शक्रः हसन्निव बलिप्रयुक्तान् बाणान् आपततः आगच्छतः असंप्राप्तानेव तावद्भिरष्टादशभिः शितैस्तीक्ष्णैर्भल्लैर्बाणविशेषैश्चिच्छेद ॥ ४१ ॥ तस्येति ॥ तस्येन्द्रस्य तद्बाणच्छेदनलक्षणमुत्तमं कर्म वीक्ष्य दुर्मर्षः शत्रुत्वादसहनो बलिस्तं हन्तुं शक्तिमाददे गृहीतवान्। महोल्कावदाभा यस्यास्तामत एव ज्वलन्तीं तां शक्तिं तद्धस्तस्थामेव हरिरिन्द्रः आच्छिनत्॥ ४२॥ तत इति ॥ ततश्च शूलादिकम् ऋष्टयन्तं यद्यच्छस्त्रं तं हन्तुं बलिः समादद्यात् गृहीतवान्। लङर्थे लिङ् तङभावश्चार्षौ। तत्सर्वं विभुः इन्द्रः अच्छिनत्॥ ४ ३॥ ससर्जेति ॥ हे प्रभो अथ सोऽसुरो बलिरासुरीं मायां ससर्ज तत्र पूर्वमन्तर्द्धानं गतः ततः सुरानीकस्योपरि शैलः प्रादुरभूत् ॥४४॥ तत इति॥ ततः शैलात् दावाग्निना दह्यमानाः प्रज्वलन्तस्तरवः निपेतुः। सुरानीकोपरि इत्यनुषज्यते। सर्वत्र द्विषतां देवानां बलं सेनां चूर्णयन्त्यः टङ्कवत्तीक्ष्णाग्रैः शिखरैः सहिताः शिलाश्च निपेतुः ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महोरगा इति ॥ महोरगाः सवृश्चिकाः दन्दशूकाः सर्पविशेषाः समुत्पेतुः तथा सिंहादयश्च महागजान् मर्दयन्तः समुत्पेतुः ॥४६॥ यातुधान्य इति ॥ तथा हे प्रभो शूलहस्ता विवाससो नग्नाः छिन्धि भिन्धीति वादिन्यः शतशो यातुधान्यो राक्षस्यो रक्षोगणाश्च समुत्पेतुः ॥ ४७ ॥ तत इति ॥ ततश्च गम्भीरः परुषः श्रवणपीडाकरश्च स्वनो येषां ते स्तनयित्नवः गर्जनस्वभावाः महान्तो घनाः मेघाः व्योम्नि स्थिता वातैराहताः अङ्गारान् मुमुचुः॥४८॥ सृष्ट इति ॥ दैत्येन बलिना सृष्टः श्वसनः पवनः सारथिः सहायो यस्य सः अत एव सांवर्तकः प्रलयकालिक इवात्युग्रो भयङ्करः सुमहान् अतिवृद्धो वह्निः विबुधानां देवानां ध्वजिनीं सेनामधाक् अधाक्षीत् । "बहुलं छन्दसि" इति अपृक्तहल्ङ्याब्भ्य इति इडभावः ॥४९॥ तत इति ॥ ततश्च उद्वेलः वेला मर्यादा तामुल्लङ्घ्य वर्तमानः प्रचण्डवातैरुद्धूतैस्तरङ्गैरावर्तैश्च भीषणः समुद्रः सर्वतः प्रत्यदृश्यत ॥५०॥ एवमिति ॥ एवं बलिवद् महामायैः अलक्ष्याभिर्गतिभिर्भीषणैः अन्यैरपि दैत्यैः सृज्यमानासु मायासु सुरसैनिका विषेदुः विषादं प्रापुः ॥ ५१ ॥ नेति ॥ हे नृप यत्र यदा इन्द्रादयो देवास्तस्या दैत्यनि-

> महोरगाः समुत्पेतुर्दन्दशूकाः सवृश्चिकाः ॥ सिंहव्याघ्रवराहाश्च मर्दयन्तो महागजान् ॥४६॥ यातुधान्यश्च शतशः शूलहस्ता विवाससः ॥ छिन्धि भिन्धीति वादिन्यस्तथा रक्षोगणाः प्रभो ॥ ४७ ॥ ततो महाघना व्योम्नि गम्भीरपरुषस्वनाः ॥ अङ्गारान्मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४८ ॥ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः ॥ सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ॥ ४९ ॥ ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ॥ प्रचण्डवातैरुद्धूततरङ्गावर्तभीषणः ॥ ५० ॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः ॥ सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥ ५१ ॥ न तत्प्रतिविधिं यत्र विदुरिन्द्रादयो नृप ॥ ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ॥ ५२ ॥ ततः सुपर्णांसकृताङ्घ्रिपल्लवः पिशङ्गवासा नवकञ्जलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुण्डलः ॥ ५३ ॥ तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ॥ स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥ ५४ ॥

र्मितमायायाः प्रतिविधिं निवृत्त्युपायं न विदुः नाविदंस्तत्र तदा तैर्ध्यातः सन् विश्वस्य भावनः पालको भगवांस्तत्र प्रादुरभूत् ॥५२॥ तत इति ॥ ततः सुपर्णस्यांसे स्कन्धे कृतौ स्थापितौ अङ्घ्रिपल्लवौ येन सः पिशङ्गं पीतं वासो वस्त्रं यस्य सः नवकञ्जवल्लोचने यस्य सः अष्टौ आयुधयुक्ता बाहवो यस्य सः श्रीश्च कौस्तुभश्च अनर्घ्यममूल्यं किरीटं कुण्डले च उल्लसन्ति श्रीकौस्तुभादीनि यस्मिन् स भगवान् देवैरदृश्यत ॥ ५३ ॥ तस्मिन्निति ॥ तस्मिन् भगवति देवसेनां प्रविष्टे सति तस्य महीयसो महत्तरस्य महिना महिम्नैव असुराणां यत्कूटकर्म मन्त्रादिप्रयोगस्तस्माज्जाता या मायास्ता विनेशुः । यथा प्रतिबोधे आगते सति स्वप्नो विनश्यति तथेत्यर्थः । हि यस्मात् हरेः स्मृतिरेव तावत्सर्वासां विपदां विमोक्षणरूपा किमुत तत्प्रवेश इत्यर्थः ॥ ५४ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वेति ॥ हे नृप अथ इभारिः सिंहः वाहो यस्य सः कालनेमिः मृधे युद्धे गरुडवाहं हरिं दृष्ट्वा शूलमाविध्य उद्यम्य कम्पयित्वा वा अहिनोत् चिक्षेप । त्र्यधीशः त्रिलोकेशो भगवान् गरुडस्य मूर्ध्नि पतत् तच्छूलं लीलया अनायासेनैव गृहीत्वा तेनैव शूलेन सवाहं वाहनभूतसिंहसहितमरिं कालनेमिमहनत् अहन् । शब्लुगभाव आर्षः ॥ ५५ ॥ मालीति ॥ अतिबलौ माली सुमाली च भगवन्तं हन्तुं युधि पेततुः आगच्छतां तदा भगवता चक्रेण छिन्नशिरसौ कृतौ । यत् यस्य भगवतश्चक्रेण तौ कृत्तशिरसौ सन्तौ युधि पेततुस्तं तथाभूतमपि भगवन्तमथानन्तरमेव माल्यवानाहत्य संघट्य तिग्मया गदया अण्डजेन्द्रं गरुडमहनत् हन्तुं गदामुद्धृतवान् । शब्लुगभाव आर्षः । तावत् गदाप्रक्षेपात् पूर्वमेवाद्यो हरिररिणा चक्रेण नदतः तस्यारेः शिरोऽच्छिनत् ॥ ५६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य दशमे [illegible]रमादिमाम् ॥ १० ॥ एकादशे मृधे दैत्या हता देवैस्ततः सुरान् ॥ नारदोऽवारयत्तत्र श्लोकाः सार्द्धा गजार्ध्वयः ॥ उवाचर्पञ्चकं साङ्घ्रिमहीवाणा अनुष्टुभः ॥ ११ ॥ अथो इति ॥ अथो परस्य

दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः ॥ तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥ ५५ ॥ माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम् ॥ आहत्य तिग्मगदयाऽहनदण्डजेन्द्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽऽद्यः ॥ ५६ ॥ इति श्री० म० अष्टमस्कन्धे दशमोऽध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकम्पया ॥ जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान्रणे यैरभिसंहताः पुरा ॥ १ ॥ वैरोचनाय संरब्धो भगवान्पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हा हेति चुक्रुशुः ॥ २ ॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरः स्थितम् ॥ मनस्विनं सुसंपन्नं विचरन्तं महामृधे ॥ ३ ॥ नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनम् ॥ ४ ॥ आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवम् ॥ तान्दस्यून्विधुनोम्यज्ञान् पूर्वस्माच्च पदादधः ॥ ५ ॥

या अनुकम्पया कृपया प्रत्युपलब्धचेतसः शक्रादयः सुराः पुरा यैर्दैत्यैः सह अभिसंहता योद्धुं प्रवृत्ताः । यद्वा । यैर्हननविषयीकृतास्तांस्तान् रणे भृशं जघ्नुरित्यर्थः ॥ १ ॥ वैरोच- पुंसः भगवतः परयायेति ॥ भगवान् पाकशासन इन्द्रः संरब्धः क्रुद्धः सन् वैरोचनाय बलये तं हन्तुं यदा वज्रमुदयच्छत् उन्निन्ये तदा तस्य प्रजा दैत्याः हा हेति चुक्रुशुः ॥ २ ॥ वज्रेति ॥ मनस्विनं धैर्यवन्तं सुसंपन्नं युद्धसाधनशस्त्रादिसंयुक्तं महामृधे विशेषेण निर्भयतया चरन्तमतः स्वपुरः स्थितं बलिं वज्रपाणिरिन्द्रो वचसा तिरस्कृत्येदं वक्ष्यमाणमाह स्म ॥ ३ ॥ नटवदिति ॥ हे मूढ नटः कपटवृत्तिर्मायाभिर्मन्त्रादिप्रयोगैर्निबद्धानि भ्रान्तानि अक्षीणि येषां तान् बालानज्ञान् जित्वा स्ववशीकृत्य यथा तेषां धनं हरति तद्वत्त्वं मायाभिर्मायेशान् नो जेतुमिच्छसि तद्व्यर्थमिति शेषः ॥ ४ ॥ आरुरुक्षन्तीति ॥ ये स्वमायाभिर्दिवं स्वर्गमारुरुक्षन्ति आरोढुमिच्छन्ति ये च तमुत्सिसृप्सन्ति उत्स्रष्टुम् उल्लङ्घ्य तदुपरि गन्तुमिच्छन्ति महर्लोकादिष्वधिकर्तुमिच्छन्तीति वा तान् अज्ञान् दस्यून् अहं पूर्वस्मादपि पदात् रसातलादपि अधो विधुनोमि पातयामि ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ स एवंप्रभावोऽहं शतपर्वणा वज्रेण दुर्मायिनः लोकमोहनमायावतस्ते तव शिरोऽद्यैव हरिष्ये।हे मन्दात्मन् मन्दबुद्धे त्वं ज्ञातिभिः सह घटस्व पराक्रमं कुरु॥६॥सङ्ग्राम इति ॥ कालेन कीर्त्यादिष्वनुकूलकालेन चोदितमुद्बुद्धं कर्म येषां तेषां सङ्ग्रामे वर्तमानानां सर्वेषामेव कीर्त्यादयः अनुक्रमादेव कालभेदेनैव स्युर्भवन्ति न त्वेकदा सर्वदैव एकस्य कस्यचित् ॥७॥ तदिति॥ तदिदं कीर्त्यादिकं सर्वं कालरशनं कालपाशाधीनमिति सूरयो विवेकिनः जनाः पश्यन्ति अतो न हृष्यन्ति न शोचन्ति । तत्रैवं विवेके यूयमपण्डिताः अनिपुणाः ॥८॥ न वयमिति ॥ तत्र कीर्तिजयादौ आत्मानं स्वं साधनं मन्यमानानामत एव अज्ञतया साधुभिः शोच्यानां वो युष्माकं मर्मसु हृदयादिषु ताडनं याभिस्तास्तथाभूता अपि गिरो वयं न गृह्णीमो यथार्थतया नाङ्गीकुर्मः।यथा यूयं जीवन्तोऽपि साधुभिः शोच्यध्वे तथा वयं मृता अपि न शोच्यामह इति भावः ॥९॥ इतीति ॥ वीरान् मर्दयतीति तथाभूतो वीरो बलिर्विभुं महान्तमपीन्द्रमित्येवं वचोभिराक्षिप्य तिरस्कृत्य आक्षेपैः परुषवाक्यैराहतं तिरस्कृतमपि तमाकर्णपूर्णैः कर्णपर्यन्तमाकृष्टैर्नाराचैर्बाणैरह-

सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा ॥ शिरो हरिष्ये मन्दात्मन्घटस्व ज्ञातिभिः सह ॥ ६ ॥ बलिरुवाच ॥ संग्रामे वर्तमानानां कालचोदितकर्मणाम् ॥ कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात्॥७॥तदिदं कालरशनं जनाः पश्यन्ति सूरयः ॥ न हृष्यन्ति न शोचन्ति तत्र यूयमपण्डिताः॥८॥न वयं मन्यमानानामात्मानं तत्र साधनम् ॥ गिरो वः साधु शोच्यानां गृह्णीमो मर्मताडनाः॥९॥ श्रीशुक उवाच ॥ इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः ॥ आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥ १० ॥ एवं निराकृतो देवो वैरिणा तथ्यवादिना ॥ नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ॥ ११ ॥ प्राहरत्कुलिशं तस्मा अमोघं परमर्दनः ॥ सयानो न्यपतद्भूमौ छिन्नपक्ष इवाचलः ॥ १२ ॥ सखायं पतितं दृष्ट्वा जम्भो बलिसखः सुहृत् ॥ अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् ॥ १३ ॥ स सिंहवाह आसाद्य गदामुद्यम्य रंहसा ॥ जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥ १४ ॥ गदाप्रहारव्यथितो भृशं विह्वलितो गजः ॥ जानुभ्यां धरणिं स्पृष्ट्वा कश्मलं परमं ययौ ॥ १५ ॥

नत् अहन् । शब्लुगभाव आर्षः ॥१०॥ एवमिति ॥ तथ्यवादिना यथार्थवक्त्रापि वैरिणा बलिना एवं निराकृतो देव इन्द्रस्तस्याधिक्षेपं निराकरणवाक्यं नामृष्यत् नासहत । तोत्रमङ्कुशस्तेन आहतस्ताडितो द्विपो हस्ती यथा तत्ताडनं न सहते तथेत्यर्थः ॥ ११ ॥ प्राहरदिति ॥ परः शत्रुस्तं मर्दयतीति तथाभूत इन्द्रस्तस्मै बलये बलिं हन्तुममोघं कार्यमकृत्वा अप्रत्यावर्ति कुलिशं वज्रं प्राहरत् चिक्षेप । तेन हतो बलिः छिन्नपक्षः अचल इव सयानो वाहनसहितो भूमौ न्यपतत् ॥ १२ ॥ सखायमिति ॥ सखायं बलिं पतितं दृष्ट्वा बलेः सखा सुहृत् स्नेहवान् जम्भो हतस्यापि तस्य सख्युः सौहृदं हितं समाचरन् अभ्ययात् संमुखमागच्छत् ॥ १३ ॥ स इति ॥ सुमहाबलः स जम्भः सिंहवाहः सिंहारूढ आसाद्य इन्द्रसमीपमागत्य गदामुद्यम्य रंहसा अतिवेगेन जत्रौ स्कन्धोपर्यस्थिप्रदेशे शक्रं गजमैरावतं च अताडयत् ॥ १४ ॥ गदेति ॥तस्य गदाप्रहारेण

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यथित अत एव भृशं विह्वलितो व्याकुलो गजो जानुभ्यां धरणीं स्पृष्ट्वा परमं कश्मलं ययौ परां मूर्छां प्राप ॥१५॥ तत इति ॥ ततो दशशतैः सहस्रसङ्ख्यैः हरिभिः अश्वैर्वृतः युक्तः रथो मातलिनाम्ना सूतेनानीतस्ततश्च विभुरिन्द्रो द्विपं हस्तिनमुत्सृज्य त्यक्त्वा रथमारुरुहे तङ्गार्षः ॥ १६ ॥ तस्येति ॥ तस्य यन्तुः सूतस्य तत् झटिति रथानयनरूपं कर्म पूजयन् सत्कुर्वन् स्मयमानः विस्मयं कुर्वन् इव च दानवसत्तमः जम्भो ज्वलता अग्निवत्स्फुरता स्वशूलेन मृधे तं सूतं त्वहनत् अहन् प्राहरत् । शबलुगभाव आर्षः ॥ १७ ॥ सेह इति ॥ मातलिस्तु सत्वं धैर्यमालम्ब्य सुदुर्मर्षां दुःसहामपि रुजं शूलप्रहारपीडां सेहे । इन्द्रश्च संक्रुद्धः सन् वज्रेण जम्भस्य शिरोऽपाहरत् ॥ १८ ॥ जम्भमिति ॥ ऋषेर्नारदात् जम्भं हतं श्रुत्वा तस्य जम्भस्य ज्ञातयः नमुचिर्बलः पाकश्चेत्येते त्वरान्विताः युद्धभूमावापेतुराजग्मुः ॥ १९ ॥ वचोभिरिति ॥ परुषैः रूक्षैर्वचोभिरस्येन्द्रस्य मर्मसु मनआदिषु अर्दयन्तः पीडयन्तः शरैरिन्द्रमवाकिरन् आच्छादितवन्तः मेघा यथा जलधाराभिः पर्वतमाच्छादयन्ति तथेत्यर्थः ॥२०॥ हरीनिति ॥ लघुहस्त-

ततो रथो मातलिना हरिभिर्दशशतैर्वृतः ॥ आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥ १६ ॥ तस्य तत्पूजयन्कर्म यन्तुर्दानवसत्तमः ॥ शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे ॥ १७ ॥ सेहे रुजं सुदुर्मर्षां सत्वमालम्ब्य मातलिः ॥ इन्द्रो जम्भस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥ १८ ॥ जम्भं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः ॥ नमुचिश्च बलः पाकस्तत्रापेतुस्त्वराऽन्विताः ॥ १९ ॥ वचोभिः परुषैरिन्द्रमर्दयन्तोऽस्य मर्मसु ॥ शरैरवाकिरन्मेघा धाराभिरिव पर्वतम् ॥ २० ॥ हरीन्दशशतान्याजौ हर्यश्वस्य बलः शरैः ॥ तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥ २१ ॥ शताभ्यां मातलिं पाको रथं सावयवं पृथक् ॥ सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे ॥ २२ ॥ नमुचिः पञ्चदशभिः स्वर्णपुङ्खैर्महेषुभिः ॥ आहत्य व्यनदत्संख्ये सतोय इव तोयदः ॥ २३ ॥ सर्वतः शरकूटेन शक्रं सरथसारथिम् ॥ छादयामासुरसुराः प्रावृट्सूर्यमिवाम्बुदाः ॥ २४ ॥ अलक्षयन्तस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगा ॥ अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथाऽर्णवे ॥ २५ ॥

वान् शीघ्रविक्रमः बलो दैत्यः हर्यश्वस्य इन्द्रस्य दशशतानि एकसहस्रं । हरीन् अश्वान् आजौ युद्धे तावद्भिः दशभिः शतैः शरैर्युगपत् एकदैव अर्दयामास पीडयामास ॥२१॥ शताभ्यामिति ॥ सकृत् एकदैव सन्धानं धनुषि संयोजनं ततो मोक्षणं च तन्मात्रेण शराणां शताभ्यां शतद्वयेन पाको मातलिं सावयवं रथं च पृथक् पृथगर्दयामासेत्यनुषङ्गः । शतेन मातलिं शतेन रथं चेत्यर्थः । तत् एव मर्दनं रणे अद्भुतमाश्चर्यमभूत् ॥२२॥ नमुचिरिति॥ स्वर्णमयाः पुङ्खाः पूर्वभागा येषां तैः पञ्चदशभिर्महेषुभिर्महाबाणैः सङ्ख्ये सङ्ग्रामे इन्द्रमाहत्य विध्वा नमुचिर्विशेषेण अनदत् नादमकरोत् । तोयेन सहितस्तोयदो मेघो यथा विनदति तथेत्यर्थः ॥ २३ ॥ सर्वत इति ॥ अन्येऽपि असुराः रथसारथिभ्यां सहितं शक्रं शरकूटेन बाणसमूहेन सर्वतश्छादयामासुः । प्रावृट्काले वर्तमानं सूर्यं यथा अम्बुदाश्छादयन्ति तथेत्यर्थः ॥२४॥ अलक्षयन्त इति ॥ अनायकाः स्वरक्षकस्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिहीनाः शत्रूणां बलेन सेनया निर्जिताः पराजिताः तमिन्द्रमलक्षयन्तः अपश्यन्तः सहानुगाः अनुगैः सहिता देवगणा अतीव विह्वला व्याकुलाः सन्तो विचुक्रुशुः वणिक्च्यथा वणिजः भिन्ना नौर्येषां ते भिन्नवः भिन्ननाव इत्यर्थः । ह्रस्वमार्षम् तथाभूताः सन्तो यथार्णवे अतिव्याकुला विक्रोशन्ति तथेत्यर्थः ॥ २५ ॥ तत इति ॥ तत इषुबद्धपञ्जरात् बाणसमूहात् तुराषाट् इन्द्रः साश्वरथध्वजाग्रणीः अश्वरथध्वजैः अग्रण्या सारथिना च युक्तः विनिर्गतः सन् स्वतेजसा खं पृथिवीं च रोचयन् प्रकाशयन् बभौ । क्षपात्यये रात्रिविनाशे सति यथा सूर्यः स्वतेजसा दिशः प्रकाशयन् भाति तथेत्यर्थः ॥ २६ ॥ निरीक्ष्येति ॥ देव इन्द्रः पृतनां स्वसेनां परैः शत्रुभिरभितः अर्दितां पीडितां निरीक्ष्य वज्रधरः सन् रुषा रणे रिपुं हन्तुं वज्रमुदयच्छत् उन्निन्ये ॥ २७ ॥ स इति ॥ हे राजन् स इन्द्रः पश्यतां तज्ज्ञातीनां भयं जनयंस्तेनैवाष्टधारेण वज्रेण बलपाकयोः शिरसी जहार ॥ २८ ॥ नमुचिरिति ॥ तयोर्बलपाकयोर्वधं दृष्ट्वा ज्ञातिवधाच्छोक इन्द्रे अमर्षस्ताभ्यां युक्तया रुषा क्रोधेनान्वितो युतो नमुचिरिन्द्रं जिघांसुर्हन्तुमिच्छन् परमं

ततस्तुराषाडिषुबद्धपञ्जराद्विनिर्गतः साश्वरथध्वजाग्रणीः ॥ बभौ दिशः खं पृथिवीं च रोचयन्स्वतेजसा सूर्य इव क्षपात्यये ॥ २६ ॥ निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे ॥ उदयच्छद्रिपुं हन्तुं वज्रं वज्रधरो रुषा ॥ २७ ॥ स तेनैवाष्टधारेण शिरसी बलपाकयोः ॥ ज्ञातीनां पश्यतां राजञ्जहार जनयन्भयम् ॥२८॥ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ॥ जिघांसुरिन्द्रं नृपते चकार परमोद्यमम् ॥२९॥ अश्मसारमयं शूलं घण्टावद्धेमभूषणम् ॥ प्रगृह्याभ्यद्रवत्क्रुद्धो हतोऽसीति वितर्जयन् ॥ प्राहिणोद्देवराजाय निनदन्मृगराडिव ॥३०॥ तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा ॥ तमाहनन्नृप कुलिशेन कन्धरे रुषान्वितस्त्रिदशपतिः शिरोऽहरत् ॥३१॥ न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः ॥ तदद्भुतं परमतिवीर्यवृत्रभित्तिरस्कृतो नमुचिशिरोधरत्वचा ॥३२॥ तस्मादिन्द्रोऽबिभेच्छत्रोर्वज्रःप्रतिहतो यतः ॥ किमिदं दैवयोगेन भूतं लोकविमोहनम् ॥ ३३ ॥

महान्तमुद्यमं चकार ॥ २९ ॥ अश्मेति सार्द्धम् ॥ मृगराट् सिंह इव निनदन् अश्मसारमयं लोहमयं घण्टावत् घण्टाभिर्युक्तं हेमभूषणं शूलं प्रगृह्य हतोसीति इन्द्रं तर्जयन् अभ्यद्रवत् हन्तुं संमुखमाजगाम । ततश्च देवराजाय देवराजं हन्तुं तत्प्राहिणोत् चिक्षेप॥ ३०॥ हे नृप महान् जवो वेगो यस्य तथाभूतमपि तच्छूलमापतद्गगनतले आकाशे एव हरिरिन्द्र इषुभिः सहस्रधा विचिच्छिदे । ततश्च त्रिदशपतिः इन्द्रो रुषा क्रोधेनान्वितो युक्तः संस्तस्य शिरो हरन् हर्तुं कन्धरे ग्रीवायां कुलिशेन वज्रेण तं नमुचिमाहनत् शब्लुगभाव आर्षः ॥ ३१ ॥ नेति ॥ यः सुरपतिना ओजसा बलेन ईरितः प्रक्षिप्तः स वज्र ऊर्जितः अतिप्रभाववानपि तस्य नमुचेस्त्वचमपि न बिभेद तस्मात् जनानां परमद्भुतमत्याश्चर्यमभूत् । पूर्वमतिवीर्यमपि वृत्रमभिनत्स इदानीं नमुचिशिरोधरत्वचा तिरस्कृतः ॥ ३२ ॥ तस्मादिति ॥ यतो यस्माच्छत्रोः सकाशादिन्द्रोऽबिभेत् भयं प्राप्याचिन्तयत् दैवयोगेन प्रारब्धवशेन लोकविमोहनमिदं किंभूतं जातम् ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनेति ॥ पतत्रैः पक्षैः निविशतां यत्र तत्र यथेष्टं गच्छताम् । शता आर्षः । तत्र तत्र भुवि पतताम‌द्रीणां भारैः प्रजानामत्यये नाशे प्राप्ते सति येन वज्रेण मे मया पूर्वं पक्षच्छेदः कृतः ॥ ३४ ॥ तप इति ॥ सारमयं वीर्याधिकं त्वाष्ट्रं तप एव वृत्रः स येन वज्रेण मया विपाटितः विनाशितः तथा सर्वैरस्त्रैर्न क्षता त्वगपि येषां तथाभूता अन्ये चापि बलोपेता वीरा येन वज्रेण मया विपाटिताः ॥ ३५ ॥ स इति ॥ सोऽयं वज्रोऽल्पके तुच्छे नमुचौ मया मुक्तः प्रक्षिप्तः सन् प्रतिहतस्तस्य त्वचमपि न बिभेद ततो ब्रह्मतेजो दधीचेः तेजस्तपोरूपमप्यकारणमकिंचित्करं दण्डं लकुटतुल्यमेनं वज्रमहं नाददे नाङ्गीकरिष्यामि ॥ ३६ ॥ इतीति ॥ इत्येवं विषीदन्तं विषादं प्राप्नुवन्तं शक्रम् अशरीरिणी अदृष्टवक्तृका वागाह स्म । अयं दानवो नमुचिः शुष्कैः पदार्थैर्वधं नार्हति अथो तथा आर्द्रैरपि वधं नार्हति ॥ ३७ ॥ मयेति ॥ यत् यस्मात् आर्द्रशुष्कयोः आर्द्रशुष्काभ्यां तव मृत्युर्नैव भविष्यतीत्यस्मै मया वरो दत्तः अतो हे मघवन् ते त्वया रिपोर्वधोपायोऽन्यश्चिन्तनीयः ॥ ३८ ॥ तामिति ॥ तां दैवीं परमेश्वरीं गिरमाकर्ण्य

येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये ॥ कृतो विविशतां भारैः पतत्रैः पततां भुवि ॥ ३४ ॥ तपःसारमयं त्वाष्ट्रं वृत्रो येन विपाटितः ॥ अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ ३५ ॥ सोऽयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके ॥ नाहं तदाददे दण्डं ब्रह्मतेजोऽप्यकारणम् ॥३६ ॥ इति शक्रं विषीदन्तमाह वागशरीरिणी ॥ नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥३७ ॥ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ॥ अतोऽन्यश्चिन्तनीयस्ते उपायो मघवन्रिपोः ॥३८॥ तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ॥ ध्यायन्फेनमथापश्यदुपायमुभयात्मकम् ॥३९॥ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः॥ तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुम् ॥४०॥गन्धर्वमुख्यौ जगतुर्विश्वावसुपरावसू॥देवदुन्दुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥ ४१ ॥ अन्येऽप्येवं प्रतिद्वन्द्वान्वाय्वग्निवरुणादयः ॥ सूदयामासुरस्त्रौघैर्मृगान्केसरिणो यथा ॥ ४२ ॥ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप ॥ वारयामास विबुधान्दृष्ट्वा दानवसंक्षयम् ॥ ४३ ॥

श्रुत्वा सुसमाहितः सन् मघवान् इन्द्रो ध्यायंस्तद्वधोपायं चिन्तयन् अथानन्तरमेव आर्द्रशुष्कोभयात्मकं फेनरूपमुपायमपश्यत् ज्ञातवान् ॥ ३९ ॥ नेति ॥ अतः न शुष्केण न चार्द्रेण किंतूभयात्मकेन फेनेन नमुचेः शिरो जहार।तथा च श्रुतिः । "अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयत्।"इति तं विभुमिन्द्रं मुनिगणास्तुष्टुवुर्माल्यैः पुष्पैश्चावाकिरन् आच्छादयामासुः ॥ ४० ॥ गन्धर्वेति ॥ मुदा हर्षेण विश्वावसुः परावसुश्च द्वौ गन्धर्वमुख्यौ जगतुर्गानं कृतवन्तौ देवानां दुन्दुभयो नेदुः नर्तक्योऽप्सरसो ननृतुः ॥ ४१ ॥ अन्य इति ॥ अन्येऽपि वाय्वादयः स्वप्रतिद्वन्द्वान् अस्त्रौघैरेवमेव सूदयामासुर्विनाशितवन्तः । केसरिणः सिंहाः मृगान् हरिणादीन् यथा विनाशयन्ति तथेत्यर्थः ॥ ४२ ॥ ब्रह्मणेति ॥ हे नृप वैरवशात् दानवानां संक्षयं दृष्ट्वा ब्रह्मणा प्रेषितो देवर्षिर्नारदो देवान् विबुधान् देवानुगान् अन्यांश्च दानवविनाशान्निवारयामास ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवद्भिरिति ॥ नारायणभुजा आश्रयो येषां तथाभूतैर्भवद्भिस्तदनुग्रहेणामृतं प्राप्तं तदनुग्रहादेव तद्वशवर्तिन्या श्रिया लक्ष्म्या च सर्वे यूयं सम्यगेधिताः कृपादृष्ट्या वर्धिताः अतः कार्यस्य जातत्वात् अधुना निष्फलाद्विग्रहात् युद्धादुपारमत ॥ ४४ ॥ संयम्येति ॥ मुनेर्नारदस्य वचो मानयन्तो मन्युसंरम्भं क्रोधावेशं संयम्य त्यक्त्वा अनुचरैर्गन्धर्वादिभिरुपगीयमानाः सन्धिरार्षः। उपगीयमानैरनुचरैः सहेति वा सर्वे देवाः त्रिविष्टपं स्वर्गं ययुः ॥ ४५ ॥ ये इति ॥ तस्मिन् रणे ये दानवा अवशिष्टा उर्वरितास्ते नारदस्यानुमतेन संमत्या विपन्नं मृतं बलिमादाय अस्ताचलमुपागमन् ॥ ४६ ॥ तत्रेति ॥ तत्रास्ताचले न विनष्टा अवयवाः करचरणादयो येषां तान् विद्यमानाः शिरोधरा ग्रीवा येषां तान् संजीविन्या स्वविद्यया उशना शुक्रः जीवयामास ॥ ४७ ॥ बलिरिति ॥ चस्त्वर्थे। लोकतत्वे जयपराजयादिदैवाधीनमिति विषये विचक्षणः बलिस्तूशनसा स्पृष्टस्तत्स्पर्शमात्रेणैव प्रत्यापन्नानि पुनः प्राप्तानीन्द्रियाणि स्मृतिश्च येन तथाभूतः सन् पराजितोऽपि नाखिद्यत्। तङ्भाव आर्षः ॥ ४८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थ-

नारद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः ॥ श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥ ४४ ॥ श्रीशुक उवाच ॥ संयम्य मन्युसंरम्भं मानयन्तो मुनेर्वचः ॥ उपगीयमानानुचरैर्ययुः सर्वे त्रिविष्टपम् ॥ ४५ ॥ येऽवशिष्टा रणे तस्मिन्नारदानुमतेन ते ॥ बलिं विपन्नमादाय अस्तं गिरिमुपागमन्॥४६॥तत्राऽविनष्टावयवान्विद्यमानशिरोधरान्॥उशना जीवयामास संजीविन्या स्वविद्यया॥४७॥बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेन्द्रियस्मृतिः॥पराजितोऽपि नाखिद्यल्लोकतत्त्वविचक्षणः ॥ ४८ ॥ इति श्रीभा०म०अ०देवासुरसंग्रामवर्णनं नाम एकादशोऽध्यायः ॥ ११ ॥
बादरायणिरुवाच ॥ वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् ॥ मोहयित्वाऽसुरगणान्हरिः सोममपाययत् ॥ १ ॥ वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः ॥ सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः॥२॥सभाजितो भगवता सादरं सोमया भवः॥सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हरिम्॥३॥

प्रकाशिकाम् ॥ गङ्गासहायो विवृतिमष्टमैकादशे व्यधात् ॥११॥ द्वादशे मोहिनीं विष्णुं दृष्ट्वाभून्मोहितः शिवः ॥ हरिणा सान्त्वितस्तत्र श्लोकाः सप्तपयोर्धयः ॥ उवाचेर्त्स्यष्टसङ्ख्याताः षट्पञ्चाशदर्नुष्टुभः ॥१२॥ वृषेति युग्मम् ॥ हरिर्योषिद्रूपेण दानवान् मोहयित्वा स्वभक्तान् सुरगणान् सोममममृतमपाययदितीदं गिरीशः कैलासवासी वृषभध्वजो महादेवो निशम्य श्रुत्वा वृषमारुह्य सर्वभूतगणैर्वृतः सह देव्या पार्वत्या सहितो यत्र मधुसूदनः विष्णुरास्ते तत्र तन्मोहिनीरूपं द्रष्टुं ययौ ॥ १ ॥ २ ॥ सभाजित इति ॥ भगवता विष्णुना सादरं यथा भवति तथा सोमया सः उमया इति च्छेदः। " सोऽचिलोपे चेत् " इति सोर्लोपः। सहार्थयोगं विनापि तृतीया। तथा च उमया सहितः स भव इत्यर्थः। अत्र सोमया उमया सहेति व्याख्यातॄणामप्यत्रैव तात्पर्यं कल्प्यम् अन्यथा सहस्य सो न स्यात् सभाजितः सत्कृतः अतः सूपविष्टः सुखेन उपविष्टः हरिं प्रतिपूज्य सत्कृत्य स्मयन् विस्मयं कुर्वन् शतार्षः। इदं वक्ष्यमाणमुवाच ॥ ३ ॥

६

Nepal Sanskrit University, Valmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

देवेति ॥ हे देवदेवेत्यादिसंबोधनानि । सर्वेषामपि भावानां पदार्थानाम् आत्मा उपादानं हेतुर्निमित्तम् ईश्वरो नियामकश्च त्वमेव॥४॥आद्यन्तावितिं॥अस्य जगतो यौ आद्यन्तौ जन्ममृत्यू यच्च मध्यं जीवनं यच्च इदं प्रत्यक्षं वस्तु यच्चान्यत् परोक्षं वस्तु यच्चाहमहङ्कारास्पदं भोक्तृ यच्च बहिर्ममकारास्पदं भोग्यं वस्तु तत्सर्वं यतो भवति यस्याव्ययस्या-पक्षयशून्यस्य चैतानि आद्यन्तादीनि न भवन्ति तत्सत्यं चित् चैतन्यरूपं ब्रह्म भवानेव ॥ ५ ॥ तवैवेति ॥ श्रेयस्कामाः मुमुक्षवः निराशिषः निष्कामाः मुनयः उभयतः इहामुत्र च सङ्गं भोगासक्तिं विसृज्य तवैव चरणाम्भोजं समुपासते॥६॥त्वमिति॥ पूर्णं ब्रह्म व्यापकम् अमृतं नाशरहितं विगुणं विशोकम् आनन्दमात्रम् अविकारम् अनन्यत् न विद्यते अन्यद्यस्मात् तद्व्यतिरिक्तस्यान्यस्याभावात् अन्यत् सर्वतो व्यतिरिक्तं च भिन्नं च ब्रह्मत्वेऽपि नात्यन्तमुदासीनः किन्तु विश्वस्य उदयादीनां हेतुः आत्मा अन्तर्यामी तदपेक्षतयेति तैः प्राणिभिस्तत्तत् फलदानार्थमपेक्ष्यत इति तदपेक्षस्तस्य भावस्तदपेक्षता तया ईश्वरस्तत्फलदाता चेत्यर्थः। स्वयं तु अनपेक्षः असि नतु राजादिवत्

श्रीमहादेव उवाच ॥ देवदेव जगद्व्यापिञ्जगदीश जगन्मय ॥ सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ॥ ४ ॥ आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहिः ॥ यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ॥ ५ ॥ तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः ॥ विसृज्योभयतः सङ्गं मुनयः समुपासते ॥ ६॥ त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानन्दमात्रमविकारमनन्यदन्यत् ॥ विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः॥७॥ एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः ॥ अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद् गुणैर्व्यतिकरो निरुपाधिकस्य ॥ ८ ॥ त्वां ब्रह्म केचिदवयन्त्युत धर्ममेक एके परं सदसतोः पुरुषं परेशम् ॥ अन्येऽवयन्ति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतन्त्रम् ॥९॥नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः॥ यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः॥१०॥

केनचिदर्थेन सेवकाद्यपेक्षः ॥ ७ ॥ एकस्यैव अन्यत्वमनन्यत्वं च विरुद्धमित्याशङ्क्याह–एक इति ॥ सत् स्थूलमसत्सूक्ष्मं द्वयं कार्यमद्वयं कारणं च त्वमेवैकः । अत इह त्वयि प्रपञ्चे च न वस्तुतो भेदः यथाकृतं कुण्डलादिरूपं द्वयं कार्यमकृतं च केवलमद्वयं कारणरूपं स्वर्णमेकमेव न तत्र वस्तुतो भेदस्तथेत्यर्थः । यस्मादज्ञानतस्त्वयि जनैर्वि-कल्पस्तत्तद्भेदो विहितः कल्पित एव यस्मान्निरुपाधिकस्य शुद्धस्यैव तव गुणैरेव व्यतिकरो भेदो न वस्तुतः ॥ ८ ॥ अत एव बहुधा वर्णयन्ति तत्वतस्तु न जानन्तीत्याह–त्वामिति ॥ केचिद्वेदान्तिनस्त्वामेव ब्रह्म अवयन्ति मन्यन्ते । एके मीमांसकास्त्वामेव धर्मं मन्यन्ते । एके केचित्साङ्ख्यास्त्वामेव सदसतोः प्रकृतिपुरुषयोः परं पुरुषं परेषां ब्रह्मादीनामपीशं मन्यन्ते । अन्ये पाञ्चरात्रा भक्तास्त्वामेव विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुतं परं परमेश्वरं मन्यन्ते । केचित् पातञ्जलास्त्वामेव अव्ययम् आत्मतन्त्रं महापुरुषं मन्यन्ते ॥ ९ ॥ नाहमिति ॥ हे ईश अहं रुद्रः परायुर्द्विपरार्द्धायुर्ब्रह्मा मरीचिमुख्या ऋषयश्चापि सत्वेन सर्गो येषां तादृशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि तस्य तव मायया मुषितं मोहितं चेतो येषां ते रुद्रादयः येन विरचितं विश्वमपि तत्वतो न जानन्ति तर्हि शश्वदभद्रं तामसं राजसं च वृत्तमुत्पत्तिर्वृद्धिश्च येषां ते दैत्यादयो न जानन्तीति किमुत वक्तव्यम् । यदा त्वद्विरचितं विश्वमपि न जानन्ति तदा त्वां न जानन्तीत्यपि किं वक्तव्यम्॥ १०॥ स त्वमिति ॥ अवगमः ज्ञानस्वरूपः सत्वं समीहितम् । स्वकृतमदो जगतः स्थितिजन्मनाशं तथाभूतानाम् ईहितं कर्म च तथा तेषां भवेन बन्धं ततो मोक्षं चेति अवरुन्त्से जानासि तथा तदात्मकतया तस्य सर्वस्य जगत उपादानतया सर्वं जगत् अवरुन्त्से व्याप्नोषि । व्याप्तौ दृष्टान्तः । चराचराख्यं देहजातं खं च यथा वायुराविशति तथेत्यर्थः ॥ ११ ॥ अवतारा इति ॥ गुणैः सत्वादिभिः रममाणस्य तवावतारा नरसिंहादयो मया दृष्टाः । स तव कृपापात्रत्वेन प्रसिद्धोऽहमिदानीं ते त्वया यद्योषिद्वपुर्धृतं तद्द्रष्टुमिच्छामि ॥ १२ ॥ येनेति ॥ येन योषिद्रूपेण दैत्याः संमोहिताः सुराश्चामृतं पायितास्तद्रूपं दिदृक्षवः सन्तो वयमत्रायाताः यस्मान्नोऽस्माकं परं कौतूहलमाश्चर्यं जातम् ॥ १३ ॥ एवमिति ॥ शूलपाणिना रुद्रेण एवमभ्यर्थितः

स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबन्धमोक्षौ ॥ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयाऽवगमोऽवरुन्त्से ॥ ११ ॥ अवतारा मया दृष्टा रममाणस्य ते गुणैः ॥ सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतम् ॥ १२ ॥ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः ॥ तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितो विष्णुर्भगवाञ्छूलपाणिना ॥ प्रहस्य भावगम्भीरं गिरिशं प्रत्यभाषत ॥ १४ ॥ श्रीभगवानुवाच ॥ कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः ॥ पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥ तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ॥ कामिनां बहु मन्तव्यं संकल्पप्रभवोदयम् ॥ १६ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवान्तरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया ॥ १७ ॥ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ॥ विक्रीडतीं कन्दुकलीलया लसद्दुकूलपर्यस्तनितम्बमेखलाम् ॥ १८ ॥

संप्रार्थितो भगवान् विष्णुः भावगम्भीरं तद्रूपदर्शनेन शिवोऽपि विमोहितो भविष्यतीति भावो गम्भीरो यस्मिंस्तद्यथा भवत्येवं प्रहस्य गिरिशं प्रत्यभाषत ॥१४॥ कौतूहलायेति॥ पीयूषभाजने दैत्यहस्तगते सति वञ्चनमोहनादिसारेण योषिद्रूपेणैव सुरकार्याणि पश्यता मया दैत्यानां कौतूहलाय संमोहनाय योषिद्वेषो धृतो रूपान्तरेण तदसंभवात् ॥ १५ ॥ तदिति ॥ हे सुरसत्तम सङ्कल्पप्रभवः कामः तस्योदयो यस्मात् तत् अत एव कामिनां बहु मन्तव्यं तद्रूपमहं ते दिदृक्षोर्दर्शयिष्यामि ॥ १६ ॥ इतीति ॥ भगवान् विष्णुरित्येवं ब्रुवाणः संस्तत्रैवान्तरधीयत । " धीङ् धारणे " उमया सह भवः सर्वतश्चक्षुश्चारयंस्तत्रैवास्ते स्म ॥ १७ ॥ तत इति ॥ ततः विचित्राणि पुष्पाणि अरुणाः पल्लवाश्च येषां ते द्रुमा यस्मिंस्तस्मिन्नुपवने कन्दुकलीलया विक्रीडतीं नुमभाव आर्षः । लसता दुकूलेन पर्यस्ते परिवृत्ते नितम्बे मेखला यस्यास्तां वरस्त्रियं शिवो ददर्श ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊर्द्ध्वमुत्क्षिप्तं कन्दुकं ग्रहीतुं ये आवर्तनोद्वर्त्तने नमनोन्नमने ताभ्यां कम्पितयोः स्तनयोः प्रकृष्टहाराणां च उरुभारैः प्रतिपदं मध्ये प्रभज्यमानामिव चलत्पदमेव प्रवालवत्को-मलत्वात्प्रवालं तत्ततस्ततो नयतीम् । नुमभाव आर्षः । ददर्शेत्यनुषङ्गः ॥ १९ ॥ दिक्षु भ्रमतः कन्दुकस्य चापलैश्चाञ्चल्यैर्भृशं प्रोद्विग्नतारे आयते दीर्घे लोले चञ्चले लोचने यस्यास्तां स्वकर्णाभ्यां विभ्राजिते ये कुण्डले ताभ्यामुल्लसन्तौ यौ कपोलौ ताभ्यां च नीलालकैश्च मण्डितमाननं यस्यास्तां ददर्श ॥ २० ॥ श्लथत् विश्लेषं प्राप्नुवत् दुकूलं विच्युतां विकीर्णां कबरीं च वल्गुना मनोहरेण वामकरेण संनह्यतीं बध्नतीम् । नुमभाव आर्षः । अन्येन दक्षिणेन करेण कन्दुकं . विनिघ्नतीमात्ममायया स्वचमत्कारेण जगद्विमोहयन्तीं वरस्त्रियं ददर्श ॥ २१ ॥ तामिति ॥ तां स्त्रियं वीक्ष्य इत्येवंभूतया कन्दुकलीलया या ईषद्व्रीडा तया अस्फुटं यत्स्मितं तेन सह विसृष्टो यः कटाक्षस्तेन मुष्टो वञ्चितः स्वयं यत् शिवेन स्त्रियाः प्रेक्षणं तया च यत्प्रतिसमीक्षणं ताभ्यां विह्वल आत्मा मनो यस्य स देवः महादेव अन्तिके समीपे स्थितामुमां स्वगणांश्च नन्दीश्वरादीन्न

आवर्तनोद्वर्तनकम्पितस्तनप्रकृष्टहारोरुभरैः पदे पदे ॥ प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥१९॥ दिक्षु भ्रमत्क-न्दुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम् ॥ स्वकर्णविभ्राजितकुण्डलोल्लसत्कपोलनीलालकमण्डिताननाम् ॥ २० ॥ श्लथद्दुकूलं कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना ॥ विनिघ्नतीमन्यकरेण कन्दुकं विमोहयन्तीं जगदात्ममायया ॥ २१ ॥ तां वीक्ष्य देव इति कन्दुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमन्तिक उमां स्वगणांश्च वेद ॥ २२ ॥ तस्याः कराग्रात्स तु कन्दुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः ॥ वासः ससूत्रं लघुमारुतोऽहरद्भवस्य देवस्य किलानुपश्यतः ॥ २३ ॥ एवं तां रुचिरापाङ्गीं दर्शनीयां मनोरमाम् ॥ दृष्ट्वा तस्यां मनश्चक्रे विषज्जन्त्यां भवः किल ॥ २४ ॥ तयाऽपहृतविज्ञानस्त-त्कृतस्मरविह्वलः ॥ भवान्या अपि पश्यन्त्या गतह्रीस्तत्पदं ययौ ॥ २५ ॥

वेद ॥ २२ ॥ तस्या इति ॥ यदा तु तस्याः कराग्रात्स क्रीडासाधनीभूतः कन्दुको विदूरं गतस्तदा देवस्य भवस्यानु निरन्तरं पश्यतः सतस्तं कन्दुकमनुव्रजन्त्याः स्त्रियाः लघु सूक्ष्मं ससूत्रं काञ्चीसहितं वासो मारुतः अहरत् उच्चिक्षेप । किलाश्चर्ये ॥२३॥ एवमिति ॥ रुचिरापाङ्गीं दर्शनीयां मनोरमाम् एवंभूतां तां विवस्त्रां दृष्ट्वा भवः किलेत्यलीके । विषज्जन्त्यां मां पश्यति न वेति द्योतकैः कुञ्चत्कटाक्षैः श्रीमहादेवनिरीक्षणेन तस्मिन्नात्मन आसक्तिमभिनयन्त्यामित्यर्थः । मनश्चक्रे ॥ २४ ॥ तयेति ॥ तया मोहिन्या निमित्तभूतया अपहृतं विज्ञानं यस्य सः तथा तयैव कृत उत्पादितो यः स्मरः तेन विह्वलः परवशः अतः गतह्रीर्निर्लज्जः स शिवः भवान्या अपि पश्यन्त्याः पश्यन्तीं तामना-दृत्यैव तन्मोहिन्याः पदं स्थानसमीपं ययौ ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेति ॥ विवस्त्रा स्खलदुत्तरीया न तु अधोवस्त्रहीना वैरस्यापातात् सा स्त्री तं शिवम् आयान्तमालोक्य भृशं व्रीडिता हसन्ती च वृक्षेषु निलीयमाना आत्मानमाच्छादयन्ती भवं लक्षीकृत्य नान्वतिष्ठत न स्थितवती किंतु दुद्रावैव ॥ २६ ॥ तामिति ॥ कामस्य वैरिणः वशं नीतः प्रमुषितेन्द्रियः व्याकुलचित्तः भगवानपि भवः तां स्त्रियमन्वगच्छत्। यथा कामी यूथपो मतङ्गजः करेणुं हस्तिनीमनुगच्छति तथेत्यर्थः ॥ २७॥ स इति ॥ स तु भवः तामालिङ्गनादिकमनिच्छन्तीमपि स्त्रियं वेगेनानुव्रज्य केशबन्धे कबर्यां गृहीत्वा उपानीय आकृष्य बाहुभ्यां परिषस्वजे ॥२८ ॥ सेति युग्मम् ॥ अङ्ग हे राजन् देवविनिर्मिता माया सा स्त्री भगवता रुद्रेण बलादुपगूढा अत एव पारवश्याद्विप्रकीर्णाः शिरोरुहा यस्याः सा यथा करिणा हस्तिना बलादुपगूढा आलिङ्गिता करिणी हस्तिनी इतस्ततः प्रसर्पन्ती तथा इतस्ततः सर्पन्ती सुरर्षभस्य महादेवस्य भुजान्तरात् बाहुमध्यात् आत्मानं मोचयित्वा पृथुश्रोणी स्थूलनितम्बापि प्राद्रवत् ॥ २९ ॥ ३० ॥ तस्येति ॥ असौ रुद्रः स्ववैरिणा कामेन विनिर्जित इव परवश इव अद्भुतकर्मणः

सा तमायान्तमालोक्य विवस्त्रा व्रीडिता भृशम् ॥ निलीयमाना वृक्षेषु हसन्ती नान्वतिष्ठत ॥ २६ ॥ तामन्वगच्छद्भगवान्भवः प्रमुषितेन्द्रियः ॥ कामस्य च वशं नीतः करेणुमिव यूथपः ॥ २७ ॥ सोऽनुव्रज्यातिवेगेन गृहीत्वाऽनिच्छतीं स्त्रियम् ॥ केशबन्ध उपानीय बाहुभ्यां परिषस्वजे ॥ २८ ॥ सोपगूढा भगवता करिणा करिणी यथा ॥ इतस्ततः प्रसर्पन्ती विप्रकीर्णशिरोरुहा ॥ २९ ॥ आत्मानं मोचयित्वाऽङ्ग सुरर्षभभुजान्तरात् ॥ प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ॥ ३० ॥ तस्याऽसौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः ॥ प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥ ३१ ॥ तस्यानुधावतो रेतश्चस्कन्दामोघरेतसः ॥ शुष्मिणो यूथपस्येव वासितामनुधावतः ॥ ३२ ॥ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ॥ ३३ ॥ सरित्सरःसु शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयस्तत्र सन्निहितो हरः ॥ ३४ ॥

तस्य विष्णोः पदवीं मार्गं प्रत्यपद्यत अन्वधावत् ॥ ३१ ॥ तस्येति ॥ अमोघं रेतो यस्य तस्य तं मोहिनीरूपं विष्णुमनुधावतस्तस्य रुद्रस्य रेतश्चस्कन्द सुस्राव । वासितां गर्भधारणायोद्यतां गामनुधावतः शुष्मिणो मत्तस्य यूथपस्य महोक्षस्य यथा रेतः स्रवति तथेत्यर्थः । यद्वा । वासितां करिणीं यूथपस्य करिणः रेतसो मोघत्वं स्वर्णादिरूपेण परिणामात् ॥ ३२ ॥ यत्रेति ॥ हे महीपते महात्मनः तस्य रुद्रस्य रेतो मह्यां यत्र यत्रापतत् तानि स्थानानि रूप्यस्य हेम्नः सुवर्णस्य च क्षेत्राण्यासन् ॥ ३३ ॥ सरिदिति ॥ तामनुधावन् हरः सरित्सरःसु शैलादिषु च यत्र क्व च स्थानेष्वृषय आसंस्तत्र संनिहितो बभूव तत्र मोहिनीसंनिधिं प्रापेत्यर्थः । मोहिन्यास्तत्र तत्र धावनं तत्रस्थानृषीन् हरस्य योगभ्रंशं साक्षाद्दर्शयितुम् अनेन रुद्रदशाप्रदर्शनेन निर्जितेन्द्रियकामैरपि स्त्रीदर्शनादिकं वर्जनीयमिति शिक्षिता मुनयः ॥ ३४ ॥

CC-0. In Public Domain. Digitization by eGangotri

स्कन्न इति ॥ हे नृपश्रेष्ठ एवं रेतसि स्कन्ने सति स रुद्रो देवस्य भगवतो विष्णोर्मायया जडीकृतमात्मानमपश्यत् अतः कश्मलात् मोहात् सन्यवर्तत ॥३५॥ अथेति ॥ अथ आत्मनः स्वस्य अपरिमेयं वीर्यं मायारूपं यस्य तस्य जगदात्मनो हरेश्चावगतं ज्ञातं माहात्म्यं येन स रुद्रस्तद्भगवन्मायया जडीकरणमद्भुतमाश्चर्यं न मेने ॥ ३६ ॥ तमिति ॥ तं श्रीरुद्रमविक्लवं व्याकुलतारहितं स्वपरमाहात्म्यानुसन्धानेन अव्रीडं गतलज्जं चालक्ष्य परमप्रीतः स्वां सनातनीं पौरुषीं तनुं बिभ्रत्सन् मधुसूदन उवाच ॥३७॥ दिष्ट्येति ॥ अङ्ग हे विबुधश्रेष्ठ यत् यस्मात् स्त्रीरूपया मे मम मायया स्वैरं यथेष्टं पूर्वं त्वं मोहितोऽपि आत्मना स्वत एव त्वं स्वां निष्ठां प्रकृतिं प्रकृतौ स्थित इति दिष्ट्या भद्रं जातम्। अन्यस्तु मोहितश्चेत् स्वनिष्ठां गन्तुं न शक्नुयादित्याशयः ॥३८॥ क इति ॥ विषक्तो विषयभोगासक्तः को नु पुमान् अकृतात्मभिः अवशीकृतचित्तैर्दुस्तरां तांस्तान् भावान् विषयान् विसृजतीं मे मम मायां त्वदृतेऽतितरेत् उल्लङ्घ्य स्वस्थचित्तो भवेत् ॥ ३९ ॥ सेति ॥ कालेन सृष्ट्यादिनिमितेन कालरूपेण मया भागशः रजआदिविभागेन समेता अङ्गीकृता

स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया ॥ जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ॥ ३५ ॥ अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदुहाद्भुतम् ॥ ३६ ॥ तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ॥ उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुम् ॥ ३७ ॥ श्रीभगवानुवाच ॥ दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः ॥ यन्मे स्त्रीरूपया स्वैरं मोहितोऽप्यङ्ग मायया ॥ ३८ ॥ को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् ॥ तांस्तान्विसृजतीं भावान्दुस्तरामकृतात्मभिः ॥ ३९ ॥ सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता कालेन कालरूपेण भागशः ॥ ४० ॥ श्रीशुक उवाच ॥ एवं भगवता राजञ्छ्रीवत्साङ्केन सत्कृतः ॥ आमन्त्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ४१ ॥ आत्मांशभूतां तां मायां भवानीं भगवान्भवः ॥ शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ॥ ४२ ॥ अपि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ॥ अहं कलानामृषभो विमुह्ये ययाऽवशोऽन्ये किमुतास्वतन्त्राः ॥ ४३ ॥

सा दुस्तरेयं रजआदिगुणमयी मम मायेतोऽग्रे त्वां नैवाभिभविष्यति तव मोहं नैव करिष्यति ॥ ४० ॥ एवमिति ॥ हे राजन् श्रीवत्सः अङ्कश्चिह्नविशेषो यस्य तेन भगवता विष्णुनैवं सत्कृतः श्रीवत्साङ्केति विशेषणात् भगवता वक्षसा संस्पृश्यालिङ्गितः शिवस्तमामन्त्र्य पृष्ट्वा परिक्रम्य प्रदक्षिणीकृत्य च सगणः स्वगणसहितः स्वस्यालयं स्थानं कैलासं ययौ ॥४१॥ आत्मेति॥ हे भारत अथ ऋषिमुख्यानां शंसतां स्तुवतामेव सताम् आत्मांशभूतामात्मनः विष्णोः शक्तिरूपां मायां भवानीं प्रति भगवान् भवः प्रीत्या आचष्ट । भगवन्मायायाः प्राबल्यमुक्तवान् ॥ ४२ ॥ अपीति ॥ हे देवि अपीति प्रश्ने । अजस्य परदेवतायाः तथा परस्य पुंसो हरेः मायां त्वं व्यपश्यः दृष्टवत्यसि । कलानां तदंशावताराणामृषभः श्रेष्ठोऽप्यहमवशः सन् यया मायया विमुह्ये विमोहं गतोऽस्मि । तङार्षः । तदा अस्वतन्त्राः इन्द्रियादिपरवशा अन्ये विमुह्येयुरिति किमुत वक्तव्यम् ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमिति ॥ समासहस्रान्ते संवत्सरसहस्रान्ते योगात् ध्यानसमाध्यादेरुपारतं निवृत्तं मामुपेत्य परमेश्वरः कस्य ध्यानं करोषीति त्वं यमपृच्छः पृष्टवती स पुराणः पुरुषः साक्षादेष एव यत्र भगवति कालो न विशते । तङ्नार्थः । न च वेदोऽपि यं जानाति॥४४॥इतीति ॥ हे तात सिन्धोर्निर्मथने येन महाबलपराक्रमेण महान् अचलः पर्वतः मन्दरनामकः पृष्ठे धृतस्तस्य शार्ङ्गधन्वन इत्येवं समुद्रनिर्मथनादिरूपो विक्रमस्ते तुभ्यं मया अभिहितः कथितः ॥ ४५ ॥ एतदिति ॥ एतत्समुद्रमथनादिरूपं भगवच्चरितं मुहुः कीर्तयतोऽनुशृण्वतश्च पुंसः समुद्यमः जातु कदाचिदपि काले क्वचिदपि देशे न रिष्यते न नश्यति निष्फलो न भवतीति । तङ्नार्थः । यस्मादेवं तस्मादुत्तमश्लोकस्य हरेः गुणानामनुवर्णनादिकं समस्तो यः संसारे परिश्रमः खेदस्तमपहन्तीति परिभ्रमेत्यपि पाठः ॥ ४६ ॥ असदिति ॥ यः कपटेन मायया युवतिवेषः सन् सुरारीन् असुरान् मोहयन्

यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रान्त उपारतं वै ॥ स एष साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥ ४४ ॥ श्रीशुक उवाच ॥ इति तेऽभिहितस्तात विक्रमः शार्ङ्गधन्वनः ॥ सिन्धोर्निर्मथने येन धृतः पृष्ठे महाचलः ॥ ४५ ॥ एतन्मुहुः कीर्तयतोऽनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम् ॥४६॥ असदविषयमङ्घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिन्धुमथ्यम् ॥ कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां कामपूरं नतोऽस्मि ॥ ४७ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे शङ्करमायामोहनं नाम द्वादशोऽध्यायः ॥१२॥ श्रीशुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ सप्तमो वर्तमानो यस्तदपत्यानि मे शृणु ॥ १ ॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥ २ ॥ करूषश्च पृषध्रश्च दशमो वसुमान् स्मृतः ॥ मनोर्वैवस्वतस्यैते दश पुत्राः परन्तप ॥ ३ ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः ॥ ४ ॥ कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥ ५ ॥

असताम् अविषयं दुर्विज्ञानं भावेन भक्त्या गम्यं च अङ्घ्रिं स्वचरणं प्रपन्नान् शरणमागतान् अमरवर्यान् सिन्धुमथ्यं सिन्धुमथनोद्भूतममृतमाशयत् अभोजयत् । तमुपसृतानां भक्तानां कामपूरम् अहं नतोऽस्मि ॥ ४७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य द्वादशे निरमादिमाम् ॥ १२ ॥ त्रयोदशे षड्विधानि सप्तमादीन्यनुक्रमात् ॥ मन्वन्तराणि वर्ण्यन्ते श्लोकाः षट्त्रिंशदत्र तु ॥ तावत्योऽनुष्टुभो ज्ञेया उवाचेत्येकमेव तु ॥ १३ ॥ मनुरिति ॥ यो विवस्वतः सूर्यस्य पुत्रः श्राद्धदेव इति श्रुतः प्रसिद्धः सप्तमो वर्तमानो मनुस्तस्यापत्यानि मे मत्तस्त्वं शृणु ॥ १ ॥ इक्ष्वाकुरिति युग्मम् ॥ हे परन्तप वैवस्वतस्य मनोः इक्ष्वाकुरित्यादयः दश पुत्रा आसन् ॥ २ ॥ ३ ॥ आदित्या इति ॥ हे राजन् अस्मिन् मन्वन्तरे आदित्यादयः देवाः सन्ति तेषामिन्द्रस्तु पुरन्दरनामास्ति ॥ ४ ॥ कश्यप इति ॥ कश्यपादयः सप्तर्षयः स्मृताः ॥ ५ ॥

Nepal Sanskrit University ...

CC-0. In Public Domain. Digitization by eGangotri

अत्रेति ॥ अत्रापि अस्मिन्नपि मन्वन्तरे कश्यपात् पितुः अदितेर्मातुश्च सकाशात् भगवतो जन्म प्रादुर्भावः अभूत् । द्वादशादित्यानां विवस्वानर्यमा पूषेत्याद्युक्तानां मध्ये योऽसाववरजः सर्वतः कनिष्ठो वामनरूपधृक् "धृज गतौ" स एव भगवान् विष्णुः॥६॥सङ्क्षेपत इति ॥ सप्त मन्वन्तराणि मया सङ्क्षेपतः ते तुभ्यम् उक्तानि । अथेदानीं भगवतो विष्णोः शक्त्या अवतारेणान्वितानि युक्तानि भविष्याणि मन्वन्तराणि वक्ष्यामि ॥ ७ ॥ विवस्वत इति ॥ हे राजेन्द्र प्राक् षष्ठस्कन्धे ये मया तव त्वां प्रत्यभिहिते कथिते ते विवस्वतः द्वे भार्ये संज्ञा छाया चेति ते उभे अपि विश्वकर्मणः सुते॥८॥तृतीयामिति ॥ एके तु वडवां तृतीयां भार्यामाहुः।मम तु संज्ञैव वडवा जातेति मतम्।तदुक्तं षष्ठे । "सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि" इति । तासां स्त्रीणां मध्ये यमो यमी यमुना श्राद्धदेवश्चेति त्रयः संज्ञायाः सुताः ॥ ९॥ सावर्णिरिति ॥ सावर्णिः पुत्रः तपती नाम्नी कन्या या च तपती संवरणस्य राज्ञः भार्या जाता शनैश्चरश्च तृतीयः पुत्रोऽभूत् । वडवाया आत्मजौ तु अश्विनौ नासत्यदस्रौ ॥१०॥ अष्टम इति ॥ अष्टमे मन्वन्तरे तद्योग्ये

अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ॥आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥६॥संक्षेपतो मयोक्तानि सप्त मन्वन्तराणि ते॥भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च॥७॥विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे॥संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव॥८॥तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः॥यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु॥९॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या॥ शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ॥१०॥ अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः॥निर्मोकविरजस्काद्याः सावर्णितनया नृप ॥११॥ तत्र देवाः सुतपसो विरजा अमृतप्रभाः ॥ तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति॥१२॥दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम् ॥राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥१३॥योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः॥निवेशितोऽधिके स्वर्गादधुनास्ते स्वराडिव॥१४॥गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ॥ ऋष्यशृङ्गः पिताऽस्माकं भगवान्बादरायणः ॥१५॥ इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः ॥ इदानीमासते राजन्स्वे स्व आश्रममण्डले॥१६॥

काले आयाते सति विवस्वतः पुत्रः सावर्णिर्मनुर्भविता भविष्यति । हे नृप निर्मोकाद्यास्तस्य सावर्णेस्तनया भविष्यन्ति ॥ ११ ॥ तत्रेति ॥ तत्र तस्मिन् मन्वन्तरे सुतपसो विरजा अमृतप्रभा इति संज्ञका देवा भविष्यन्ति । विरोचनसुतो बलिश्च तेषां देवानामिन्द्रो भविष्यति ॥ १२ ॥ दत्त्वेति ॥ यो बलिः पदत्रयं याचमानाय विष्णवे इमां सर्वां महीं सप्तमे मन्वन्तरे दत्त्वा अष्टमे मन्वन्तरे विष्णोः प्रसादेन राद्धं लब्धमिन्द्रपदं हित्वा ततः सिद्धिं मुक्तिमवाप्स्यति ॥ १३ ॥ य इति ॥ तद्धैर्यादिगुणान् दृष्ट्वा प्रीतेन भगवता लोके तद्धैर्यादिगुणान् ख्यापयितुं योऽसौ बद्धः पुनश्च सुखभोगार्थं स्वर्गादप्यधिके अधिकसुखे सुतले निवेशितः सन्नधुनापि स्वराडिव इन्द्र इव भोगैश्वर्यादिसम्पन्न आस्ते ॥१४॥ गालव इति युग्मम् ॥ हे राजन् तत्र तस्मिन् मन्वन्तरे इमे गालवादयः सप्तर्षयो भविष्यन्तीति । तत्र रामः परशुरामः द्रोणपुत्रः अश्वत्थामा इदानीमपि ते हे राजन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयोगप्रभावेण स्वे स्वे आश्रममण्डल आसते ॥ १५ ॥ १६ ॥ देवेति ॥ देवगुह्याख्यपितुः सकाशात् सरस्वत्याख्यायां मातरि सार्वभौम इति नाम्ना प्रभुर्भगवान् अवतरिष्यतीति शेषः । स चेश्वरः स्थानं स्वर्गं पुरन्दरात् हृत्वा बलये दास्यति ॥१७॥नवम इति ॥ हे नृप वरुणसंभवो दक्षसावर्णिनामको नवमो मनुर्भविष्यति । भूतकेतुरित्याद्याः तस्य सुताः भविष्यन्ति ॥ १८ ॥ पारा इति ॥ तत्र मन्वन्तरे पारा मरीचिगर्भाद्या देवा भविष्यन्ति । अद्भुतनाम्ना स्मृतः प्रसिद्ध इन्द्रो भविष्यति । ततस्तस्मिन् मन्वन्तरे द्युतिमत्प्रमुखाः सप्तर्षयो भविष्यन्ति । प्रमुखशब्देन "सवनो द्युतिमान् हव्यो वसुर्मेधातिथिस्तथा । ज्योतिष्मान्सप्तमः सत्यस्तथैते च महर्षयः॥" इति हरिवंशोक्ता अन्येऽपि ज्ञेयाः॥१९॥ आयुष्मत इति ॥ आयुष्मतः पितुः सकाशादम्बुधारायां मातरि भगवतः कला अवतारः ऋषभनामको येन ऋषभेण संराद्धां स्ववशीकृतां त्रिलोकीमद्भुतसंज्ञक इन्द्रो भोक्ष्यते ॥ २० ॥ दशम इति ॥ उपश्लोकस्य सुतो गुणैर्महान् ब्रह्मसावर्णिनामको दशमो मनुर्भविष्यति भूरिषेणाद्यास्तत्सुताः हविष्मत्प्रमुखा द्विजा भविष्यन्ति

देवगुह्यात् सरस्वत्यां सार्वभौम इति प्रभुः ॥ स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः ॥१७॥ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तिकेतुरित्याद्यास्तत्सुता नृप ॥ १८ ॥ पारा मरीचिगर्भाद्या देवा इन्द्रोऽद्भुतः स्मृतः ॥ द्युतिमत्प्रमुखास्तत्र भविष्यन्त्यृषयस्ततः ॥ १९ ॥ आयुष्मतोऽम्बुधारायामृषभो भगवत्कला ॥ भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥ २० ॥ दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् ॥ तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥ २१ ॥ हविष्मान्सुकृतः सत्यो जयो मूर्तिस्तदा द्विजाः ॥ सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः ॥ २२ ॥ विष्वक्सेनो विषूच्यां तु शम्भोः सख्यं करिष्यति ॥ जातः स्वांशेन भगवान्गृहे विश्वसृजो विभुः ॥२३॥ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ॥ अनागतास्तत्सुताश्च सत्यधर्मादयो दश ॥ २४ ॥ विहङ्गमाः कामगमा निर्वाणरुचयः सुराः ॥ इन्द्रश्च वैधृतिस्तेषामृषयश्चारुणादयः ॥ २५ ॥

॥ २१ ॥ तेषु कांश्चिद् द्विजानाह—हविष्मानिति ॥ इतोऽप्यवशिष्टाः " हविष्मान् पौलहश्चैव सुकृतिश्चैव भार्गवः । जयो मूर्तिस्तथात्रेयो वासिष्ठश्चाष्टमः स्मृतः ॥ पौलस्त्यः प्रमितिश्चैव नाभागश्चैव काश्यपः। अङ्गिरा नभसः सत्यः सप्तैते च महर्षयः॥"इति हरिवंशोक्ता ज्ञेयाः। तदा तस्मिन्मन्वन्तरे सुवासनाद्यो देवा भविष्यन्ति शम्भुनामा सुरेश्वरः इन्द्रो भविष्यति ॥२२॥ विष्वगिति ॥ तत्रापि विष्वसृजो गृहे विषूच्यां स्वांशेन जातः सन् विष्वक्सेननामको भगवान् विभुः शम्भोः शम्भुनामकस्येन्द्रस्य सख्यं साहाय्यं करिष्यति ॥ २३ ॥ मनुरिति ॥ आत्मवान् जितमना धर्मसावर्णिरेकादशम एकादशो मनुर्भविष्यति । मडार्षः । तस्य सत्यधर्मादयो दश सुताश्चानागता भाव्याः ॥ २४ ॥ विहङ्गमा इति ॥ तस्मिन् मन्वन्तरे विहङ्गमाद्याः सुरा देवगणाः तेषां देवानामिन्द्रश्च वैधृतनामा ऋषयश्चारुणादयो भविष्यन्ति । आदिपदेन "हविष्मान् काश्यपश्चापि वपुष्मान् यश्च भार्गवः । अरुणश्च तथात्रेयो वसिष्ठस्त्वनवस्तथा ॥ अङ्गिराश्चोरुधिश्चापि पौलस्त्यो निश्चरस्तथा। पोलहश्चाग्नितेजाश्च भाव्याः सप्त महर्षयः ॥ " इति हरिवंशे उक्ताः ।

CC-0. In Public Domain. Digitization by eGangotri

इतो वशिष्ठा ज्ञेयाः ॥२५॥ आर्यकस्येति ॥ तत्र तस्मिन्नपि मन्वन्तरे आर्यकस्य पितुः सुतो वैधृतायां मातरि प्रादुर्भूतो हरेरंशः धर्मसेतुरिति नाम्ना स्मृतः स त्रिलोकीं धारयिष्यति पालयिष्यति ॥२६॥ भवितेति ॥ हे राजन् रुद्रसावर्णिर्द्वादशमो मनुर्भविता । मडार्षः । देववानित्यादयस्तस्य सुता भविष्यन्ति ॥ २७ ॥ ऋतधामेति ॥ तत्र तस्मिन् मन्वन्तरे च ऋतधामा इन्द्रो भविष्यति हरितादयश्च देवा भविष्यन्ति । तपोमूर्त्यादयश्च सप्तर्षयो भविष्यन्ति । अत्राप्यादिपदेन "द्युतिर्वशिष्ठपुत्रश्च आत्रेयः सुतपास्तथा । अङ्गिरास्तपसो मूर्तिस्तपस्वी काश्यपस्तथा ॥ तपोधनश्च पौलस्त्यः पौलहश्च तपोरतिः । भार्गवः सप्तमस्तेषां विज्ञेयस्तु तपोधृतिः॥" इति हरिवंशोक्ता अवशिष्टा ज्ञेयाः ॥२८॥ स्वधामेति ॥ सत्यसहसः पितुः सूनृताया मातुश्च सुतः विभुः समर्थः स्वधामाख्यो हरेरंशस्तस्य मनोरन्तरं साधयिष्यति मन्वादीन् पालयिष्यतीत्यर्थः ॥ २९ ॥ मनुरिति ॥ देवसावर्णिस्त्रयोदशो मनुर्भाव्यो भविष्यति । चित्रसेनादयो देवसावर्णेर्देहजाः पुत्रा भविष्यन्ति ॥ ३० ॥ देवा इति ॥ तदा सुकर्मादिसंज्ञका देवा भविष्यन्ति । दिवस्पतिनामक

आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः॥वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥२६॥ भविता रुद्रसावर्णी राजन्द्वादशमो मनुः ॥ देववानुपदेवश्च देवश्रेष्ठादयः सुताः॥२७॥ऋतधामा च तत्रेन्द्रो देवाश्च हरितादयः॥ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः॥२८॥स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः॥अन्तरं सत्यसहसः सूनृतायाः सुतो विभुः॥२९॥मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान्॥चित्रसेनविचित्राद्या देवसावर्णिदेहजाः॥ ३० ॥ देवाः सुकर्मसुत्रामसंज्ञा इन्द्रो दिवस्पतिः॥निर्मोकतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा ॥३१ ॥ देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ॥ योगेश्वरो हरेरंशो बृहत्यां संभविष्यति॥३२॥मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यति॥उरुगम्भीरबुद्ध्याद्या इन्द्रसावर्णिवीर्यजाः ॥ ३३ ॥ पवित्राश्चाक्षुषा देवाः शुचिरिन्द्रो भविष्यति॥अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः॥३४॥सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः॥वितानायां महाराज क्रियातन्तून्वितायिता३५

इन्द्रो भविष्यति निर्मोकादयः सप्तर्षयो भविष्यन्ति । अत्राप्यादिपदेन "निर्मोकस्तत्वदर्शी च निष्कम्पश्च निरुत्सुकः । धृतिमानव्ययश्चान्यः सप्तमः सुतपा मुनिः॥" इत्यत्रोक्ता अवशिष्टा ज्ञेयाः ॥ ३१ ॥ देवेति ॥ बृहत्यां मातर्यवतीर्णो देवहोत्रस्य तनयो योगेश्वराख्यो हरेरंशो भगवदवतारो दिवस्पतेरिन्द्रस्योपहर्ता त्रिलोकीराज्यसम्पादकः संभविष्यति ॥ ३२ ॥ मनुरिति ॥ इन्द्रसावर्णिश्चतुर्दशमश्चतुर्दशः । मडार्षः । मनुरेष्यति आगमिष्यति उरुगम्भीरबुद्ध्याद्यास्तस्येन्द्रसावर्णेर्वीर्यजाः पुत्रा भविष्यन्ति ॥ ३३ ॥ पवित्रा इति ॥ पवित्रादयस्तत्र देवा भविष्यन्ति । शुचिसंज्ञक इन्द्रो भविष्यति । अग्निबाह्वादयस्तपस्विनः सप्तर्षयो भविष्यन्ति । आदिपदेन "आग्नीध्रः काश्यपश्चैव पौलस्त्यो मागधस्तथा । भार्गवोऽथाग्निबाहुश्च शुचिराङ्गिरसस्तथा ॥ मुक्तश्चैव तथात्रेयः शुद्धो वाशिष्ठ एव च । अजितः पौलहश्चैव अन्त्याः सप्तर्षयश्च ते॥" इति हरिवंशोक्तेस्तेष्ववशिष्टा ज्ञेयाः ॥ ३४ ॥ सत्रायणस्येति ॥ हे महाराज तदा तस्मिन् मन्वन्तरे वितानायां मातरि प्रादुर्भूतः सत्रायणस्य पितुस्तनयः सन् बृहद्भानुसंज्ञको हरिः क्रिया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्तून् कर्मसन्ततीर्वितायिता विस्तारयिष्यति ॥ ३५॥ राजन्निति ॥ हे राजन् त्रिषु कालेष्वनुगतानि एतानि चतुर्दशमन्वन्तराणि ते तुभ्यं मया प्रोक्तानि एभिश्चतुर्दशभिर्मन्वन्तरैर्युगसाहस्रेण पर्ययः परिवर्तो यस्य ब्रह्मदिवसात्मकस्य स कल्पो मितः॥३६॥इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य व्यधादेतां त्रयोदशे॥१३॥ चतुर्दशे तु सर्वेषां मन्वादीनां यथायथम् ॥ पृथक्कर्माणि वर्ण्यन्ते श्लोका एकादशैव तु ॥ अनुष्टुभोऽपि तावत्य उवाचद्वितयं मतम् ॥ १४ ॥ मन्वन्तरेष्विति ॥ हे भगवन् इमे पूर्वं वर्णिता मन्वादयः स्वस्वमन्वन्तरेषु यस्मिन् कर्माणि येन ये यथा नियुक्तास्तन्मे यत्नेन वदस्व ॥ १ ॥ मनव इति ॥ हे महीपते मन्वादयः सर्वे पुरुषशासनाः पुरुषेण भगवता यज्ञाद्यवतारैः शिष्यन्ते तत्तत्कर्मसु नियुज्यन्त इति तथाभूता एवेत्यर्थः॥२॥ तदेवाह–यज्ञादय इति ॥ हे नृप या यज्ञादयः पुरुषस्य भगवतस्तनवोऽवतारमूर्तयो मया पूर्वं कथिता आभिर्मूर्तिभिः प्रचोदिताः प्रेरिताः सन्तो मन्वादयो जगतो यात्रां नयन्ति निर्वाहं कुर्वन्ति ॥ ३ ॥ चतुरिति ॥ कालेन ग्रस्तान् विलोपितान् श्रुतिगणान्

राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ॥ प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ॥ ३६ ॥ इति श्रीभा०महा०अष्टमस्कन्धे मन्वन्तरानुवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ राजोवाच ॥ मन्वन्तरेषु भगवान् यथा मन्वादयस्त्विमे ॥ यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे ॥ १ ॥ ऋषिरुवाच ॥ मनवो मनुपुत्राश्च मुनयश्च महीपते ॥ इन्द्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ २॥ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप ॥ मन्वादयो जगद्यात्रां नयन्त्याभिः प्रचोदिताः ॥ ३ ॥ चतुर्युगान्ते कालेन ग्रस्तान् श्रुतिगणान्यथा ॥ तपसा ऋषयोऽपश्यन्यतो धर्मः सनातनः ॥ ४ ॥ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः॥युक्ताः संचारयन्त्यद्धा स्वे स्वे काले महीं नृप॥५॥पालयन्ति प्रजापाला यावदन्तं विभागशः ॥ यज्ञभागभुजो देवा ये च तत्रान्विताश्च तैः ॥६॥ इन्द्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम् ॥ भुञ्जानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति ॥ ७॥

चतुर्युगस्यान्ते कृतयुगप्रवृत्तिसमये तपसा स्वतपोबलेन ऋषयो यथा यथावत् अपश्यन् । दृष्ट्वा धर्मप्रचारार्थं लोके वर्णयन्तीत्यर्थः । यतो येभ्यो वर्णितेभ्यः श्रुतिगणेभ्यः पुनः सनातनो धर्मः प्रवर्तत इत्यर्थः ॥ ४ ॥ तत इति ॥ हे नृप ऋष्युपदेशानन्तरं युक्ताः संयतमनस्काः हरिणा उदिताः अन्तर्यामिणा प्रेरिता मनवः स्वे स्वे काले चतुष्पादं धर्मम् अद्धा साक्षात् महीं संचारयन्ति मह्यां प्रवर्तयन्ति ॥ ५ ॥ पालयन्तीति ॥ विभागशः पुत्रपौत्रादिक्रमेण प्रजापालाः मनुपुत्राः यत्र मन्वन्तरे ये च यज्ञभागभुजः देवाः अनुकीर्तिताः ते च ये चान्ये द्यावापृथिव्यादयो यत्र कर्मणि भोक्तृत्वेनान्वितास्तैश्च सह प्रजां धर्मं च यावदन्तं मन्वन्तरावसानपर्यन्तं पालयन्ति ॥६॥ इन्द्र इति ॥ भगवता दत्तामत एव ऊर्जितां महतीं त्रैलोक्यसंबन्धिनीं श्रियं भुञ्जानः इन्द्रश्च त्रीन् लोकान् पाति तत्र च कामं यथेष्टं लोके जलं प्रवर्षति ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

मन्वादिष्वपि न नियतं किन्तु नानारूपो हरिरेव करोतीत्युक्तानुक्तसङ्क्षेपेणाह—ज्ञानमिति ॥ सिद्धाः सनकादयस्तत्स्वरूपधृग्घरिरेवानुयुगं तत्तदवसरे ज्ञानं ब्रूते । ऋषिरूपधरः कर्म ब्रूते । योगेशा दत्तादयस्तद्रूपधृग्योगं ब्रूते॥८॥सर्गमिति ॥ पृथक् पृथक् सर्गाद्यनुरूपाः रजआदयो गुणा यस्य सः। यद्वा । पृथग्गुण इत्यस्य कालरूपतया सबन्धे पृथक् स्थौल्यकार्श्यव्याधिशीतोष्णाद्या गुणा यस्य स हरिरेव मरीच्यादिप्रजेशरूपेण सर्गं करोति । स्वराड्वपुः राजमूर्तिः मनुपुत्रमूर्तिर्वा सन् हरिरेवानुयुगं दस्यून् चोरान् हन्यात् हन्ति काला वार्द्धकादयस्तद्रूपेण हरिरेव सर्वेषां पदार्थानामभावाय विनाशाय भवति ॥ ९ ॥ स्तूयमान इति ॥ नामरूपात्मिकया मायया विमोहितात्मभिरेभिः शास्त्रज्ञत्वेन प्रसिद्धैर्जनैर्नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोऽपि भगवान्नैव दृश्यत इदमित्थमिति रूपेण निश्चेतुं नैव शक्यते॥१०॥ एतदिति ॥ एतत्कल्पविकल्पस्य कल्पे चतुर्मुखायुः-पर्यन्तमध्ये यो विकल्पः अवान्तरकल्पस्तदेकदिवसात्मकस्तस्य प्रमाणं मया परिकीर्तितम्।यत्र यस्मिन्नवान्तरकल्पे चतुर्दश मन्वन्तराणि भवन्तीति पुराविदो वृद्धा आहुः॥११

ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ॥ ऋषिरूपधरः कर्मयोगं योगेशरूपधृक् ॥ ८ ॥ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः ॥ काल-रूपेण सर्वेषामभावाय पृथग्गुणः ॥ ९ ॥ स्तूयमानो जनैरेभिर्मायया नामरूपया ॥ विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते ॥ १० ॥ एतत्क-ल्पविकल्पस्य प्रमाणं परिकीर्तितम् ॥ यत्र मन्वन्तराण्याहुश्चतुर्दश पुराविदः ॥ ११ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कन्धे चतुर्दशोऽ-ध्यायः ॥ १४ ॥ राजोवाच ॥ ॥ बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत ॥ भूत्वेश्वरः कृपणवल्लब्धार्थोऽपि बबन्ध तम् ॥ १ ॥ एतद्वेदितु-मिच्छामो महत् कौतूहलं हि नः ॥ यज्ञेश्वरस्य पूर्णस्य बन्धनं चाप्यनागसः ॥ २ ॥ श्रीशुक उवाच ॥ पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन् भृगुभिः स जीवितः ॥ सर्वात्मना तानभजद् भृगून् बलिः शिष्यो महात्माऽर्थनिवेदनेन ॥ ३ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य व्यधादेतां चतुर्दशे॥१४॥बलिः पञ्चदशे विश्वजिद्याजी जितवान् दिवम् ॥ भयान्निलिल्यिरे देवाः श्लोकास्त-त्राद्रिवह्नयः ॥ उवाचेति त्र्यं सार्द्धाश्चत्वारिंशदनुष्टुभः ॥१५॥ बलेरिति ॥ हरिः स्वयमेवेश्वरो भूत्वा कृपणवद्दीनवद्बलेः सकाशाद्भूमेः पदत्रयं कस्माद्धेतोरयाचत । त्रैलोक्यग्र-हणेन लब्धार्थोऽपि सन् कस्माद्धेतोस्तं बलिं बबन्ध ॥१॥ एतदिति ॥ एतत् सर्वं वेदितुमिच्छामो हि यस्मान्नोऽस्माकं महत्कौतूहलं महदाश्चर्यं वर्तते । यज्ञेश्वरस्य यज्ञादिकर्म-फलदातुः पूर्णस्य पूर्णकामस्य हरेः अनागसः निरपराधस्य बलेर्बन्धनमपिशब्दात् कृपणवद्याचनं च न युज्यते इति शेषः । अत्र हरिः कर्ता बलिः कर्म "उभयप्राप्तौ कर्मणि" त्युक्तेः । हरौ तृतीया युज्यते तथापि "शेषे विभाषा" इत्यनेन सर्वत्राविशेषेण विकल्प इति मते शब्दानामनुशासनमाचार्येणाचार्यस्य वेतिवत् षष्ठी ॥२॥ परेति ॥ हे राजन् युद्धे पराजिता श्रीर्येन सः इन्द्रेण असुभिः प्राणैश्च हापितस्त्याजितः सन् हि यस्मात् भृगुभिः भृगुवंश्यैः शुक्रादिभिः पुनर्जीवितस्तस्मात् महात्मा उदारचित्तः शिष्यः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलिः सर्वात्मना दृढविश्वासेन अर्थनिवेदनेन तदपेक्षिततत्तत्पदार्थानां समर्पणेन च तान् भृगून् अभजत् ॥३॥ तमिति ॥ त्रिणाकं स्वर्गं जिगीषमाणं जेतुमिच्छन्तम् । आर्षः शानच् । तं बलिं प्रीयमाणाः महानुभावाश्च भृगवो भृगुवंश्या ब्राह्मणा महाभिषेकेण ऐन्द्रेण बह्वृचब्राह्मणप्रसिद्धेन विधिना प्रकारेणाभिषिच्य विश्वजिता विश्वजित्संज्ञकयागेन अयाजयन् ॥४॥ तत इति ॥ ततो हविर्भिरिष्टात् पूजितात् हुताशनात् अग्नेः सकाशात् काञ्चनेन पट्टेन वस्त्रेण नद्धः आच्छादितो रथः आस । विनिःसृतः हर्यश्वस्येन्द्रस्य ये तुरङ्गास्तेषामिव हरितो वर्णो येषां ते तथाभूता हयाश्च आसन् । सिंहेन चिह्नेन विराजमानो ध्वजश्च आस ॥ ५ ॥ धनुरिति ॥ पुरटेन सुवर्णेनोपनद्धं निबद्धमत एव दिव्यमलौकिकं धनुश्च आस । अरिक्तौ अक्षयशरौ तूणौ इषुधी आस्ताम् । दिव्यं कवचं च आस । पितामहः प्रह्लादः अम्लानपुष्पां सदैव समवर्णपुष्पग्रथितां मालां च तस्य ददौ । शुक्रः शुक्राचार्यश्च तस्य जलजं शङ्खं च ददौ ॥ ६ ॥ एवमिति ॥ एवं विप्रैरर्जितः सम्पादितो योधनार्थो युद्धपरिकरो यस्य स बलिः तैरेव कल्पितं स्वस्त्ययनं मङ्गलवा-

तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन् विश्वजिता त्रिणाकम् ॥ जिगीषमाणं विधिनाऽभिषिच्य महाऽभिषेकेण महानुभावाः ॥ ४ ॥ ततो रथः काञ्चनपट्टनद्धो हयाश्च हर्यश्वतुरङ्गवर्णाः ॥ ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ॥ ५ ॥ धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम् ॥ पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥ ६ ॥ एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान् ॥ प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामन्त्र्य नमश्चकार ॥ ७ ॥ अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ॥ सुस्रग्धरोऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः ॥ ८ ॥ हेमाङ्गदलसद्बाहुः स्फुरन्मकरकुण्डलः ॥ रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥ ९ ॥ तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः ॥ पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ॥ १० ॥ वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः ॥ ययाविन्द्रपुरीं स्वृद्धां कम्पयन्निव रोदसी ॥ ११ ॥ रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः ॥ कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥ प्रवालफलपुष्पोरुभारशाखामरद्रुमैः ॥ १२ ॥

चनादि यस्य सः अथानन्तरं विप्रान् प्रदक्षिणीकृत्य कृतप्रणामः सन् प्रह्लादमामन्त्र्य पृष्ट्वा नमश्चकार नमस्कारं कृतवान् ॥ ७ ॥ अथेति युग्मम् ॥ अथ भृगुभिर्दत्तं यज्ञेन संपादितं दिव्यं रथमारुह्य महारथः सुस्रग्धरः शोभनमालाधरः धन्वी खड्गी धृत इषुधिर्येन सः हेमरचिताङ्गदाभ्यां लसन्तौ बाहू यस्य सः स्फुरती मकराकारे कुण्डले यस्य सः रथमारूढः बलिः धिष्ण्यस्थः कुण्डस्थो हव्यवाट् आहवनीयोऽग्निरिव रराज ॥ ८ ॥ ९ ॥ तुल्येति युग्मम् ॥ तुल्यमैश्वर्यं प्रभावो बलं च श्रीः सम्पच्च येषां तैर्मुखेन खमाकाशं पिबद्भिरिव तथा दृग्भिर्नेत्रैः परिधीन् दिशो दहद्भिरिव दैत्ययूथपैः स्वयूथैर्वृतः विभुः बलिर्महतीमासुरीं ध्वजिनीं सेनां विकर्षन् रोदसी द्यावाभूमी कम्पयन्निव स्वृद्धाम् अतिसमृद्धामिन्द्रपुरीं ययौ ॥ १० ॥ ११ ॥ पुरीं वर्णयति—रम्यामिति सार्द्धम् ॥ कूजन्ति विहङ्गानां मिथुनानि येषु तथा गायन्तो मत्ता मधुव्रता भ्रमरा येषु तथा

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

प्रवालादीनामुरुर्भारो यासु ताः शाखा येषां ते अमरद्रुमा देववृक्षाः पारिजातादयो येषु तैः श्रीमद्भिः शोभातिशयवद्भिर्नन्दनादिभिरुपवनैः फलप्रधानैर्निष्कुटैः उद्यानैः पुष्पप्रधानैर्दूरस्थैः विहारस्थानैः रम्यामिन्द्रपुरीं ययौ ॥१२॥ हंसेति ॥ यत्र हंसादिपक्षिविशेषाणां कुलैः समूहैराकुला व्याप्ता नलिन्यः सरस्यः सन्ति । यत्र यासु नलिनीषु सुरसेविताः प्रमदाः सुरस्त्रियः क्रीडन्ति ॥१३॥ आकाशेति ॥ देव्या पूज्यया परिखाभूतया । ङ्यापोरिति ह्रस्वः । आकाशगङ्गया वृताम् अट्टालास्तत्र तत्र प्राकारोपरि रचितान्युन्नतानि युद्धस्थानानि तत्सहितेनोन्नतेन मणिसुवर्णादिभिः रचितत्वादग्निवर्णेन अग्निवत्प्रकाशमानेन प्राकारेण च वृताम् ॥ १४ ॥ रुक्मेति ॥ रुक्मपट्टानि कपाटानि येषु तैर्द्वारैरेवान्तरैः स्फटिकमयैर्गोपुरैः पुरद्वारैश्च जुष्टां युक्तां विभक्ताः प्रपथा राजमार्गा यस्यास्तां विश्वकर्मणा विनिर्मिताम् ॥ १५ ॥ सभेति ॥ सभा उपवेशनस्थानानि चत्वराण्यङ्गणानि रथ्या उपमार्गाः तैराढ्यां सम्पन्नां न्यर्बुदं दश कोटयस्तावत्सङ्ख्याकैरनन्तैर्विमानैर्युतां वज्रविद्रुममय्यो वेदयो येषु तैर्मणिमयैः शृङ्गाटकैश्च चतुष्पथैश्च युताम् ॥ १६ ॥

हंससारसचक्राह्वकारण्डवकुलाकुलाः ॥ नलिन्यो यत्र क्रीडन्ति प्रमदाः सुरसेविताः ॥ १३ ॥ आकाशगङ्गया देव्या वृतां परिखभूतया ॥
प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च ॥१४॥ रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः ॥ जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ॥१५॥
सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम् ॥ शृङ्गाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥ १६ ॥ यत्र नित्यवयोरूपाः श्यामा विरजवाससः ॥
भ्राजन्ते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः ॥ १७ ॥ सुरस्त्रीकेशविभ्रष्टनवसौगन्धिकस्रजाम् ॥ यत्रामोदमुपादाय मार्ग आवाति मारुतः
॥ १८ ॥ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना ॥ पाण्डुरेण प्रतिच्छन्नमार्गे यान्ति सुरप्रियाः ॥ १९ ॥ मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ॥ शिखण्डिपारावतभृङ्गनादितां वैमानिकस्त्रीकलगीतमङ्गलाम् ॥ २० ॥

यत्रेति ॥ नित्यं वयस्तारुण्यं रूपं च सौकुमार्यं यासां ताः श्यामाः। "शीतकाले भवत्युष्णा उष्णकाले सुशीतला । स्तनौ सुकठिनौ यस्याः सा श्यामा परिकीर्त्तिता ॥" इत्युक्तलक्षणाः । विरजे शुद्धे वाससी यासां ता रूपवन्नार्यः स्वलंकृताः स्त्रियो यत्र यस्यां पुर्यां भ्राजन्ते यथा अर्चिर्भिर्ज्वालाभिः वह्नयो भ्राजन्ते तथालङ्कारैः स्त्रियो भ्राजन्त इत्यर्थः ॥ १७ ॥ सुरेति ॥ यत्र यस्यां पुर्यां मारुतः सुरस्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगन्धिकपुष्परचितानां स्रजां मालानामामोदं परिमलमादाय मार्ग आवाति ॥ १८ ॥ ॥ ३४ ॥
हेमेति ॥ अगुरुगन्धिना पाण्डुरेण श्वेतवर्णेन हेमरचिता ये जालाक्षा गवाक्षास्तेभ्यो निर्गच्छता धूमेन प्रतिच्छन्ने मार्गे यत्र सुरप्रियाः अप्सरसो निःशङ्कं यान्ति॥१९॥मुक्तेति ॥ मुक्तामयैर्वितानैः मणिहेममयैः केतुभिर्ध्वजैश्च नानाविधपताकायुक्ताभिर्वलभीभिर्गृहपुरोभागोपरि रचितैरुपवेशनस्थानविशेषैश्चावृतां व्याप्तां शिखण्ड्यादिपक्षिविशेषैर्नादितां शब्दितां वैमानिकस्त्रीणां कलगीतैर्मधुरगीतैर्मङ्गलं श्रवणसुखं यस्यां ताम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृदङ्गेति ॥ मृदङ्गादीनां स्वनैः शब्दैः सतालवीणादिभिश्च सवाद्यैर्नृत्यैश्च उपदेवा गन्धर्वादयस्तेषां गीतकैश्च मनोरमां स्वप्रभया जिता तिरस्कृता अन्येषां सूर्यादीनां प्रभा यया ताम् यद्वा । जिता प्रभा साक्षात् दीप्त्यधिष्ठात्री देवतापि यया । जितग्रहामिति पाठे तु जिता ग्रहाः सूर्यादयो यया ताम्॥ २१॥यामिति ॥ यां पुरीम् अधर्मिष्ठाः पापिनः खलाः दुष्टाः भूतद्रुहः प्राणिपीडाकर्तारः शठाः वञ्चकाः मानिनः अभिमानवन्तः कामिनो विषयासक्ताः लुब्धा इष्टलाभेऽप्यलंबुद्धिरहिताः न व्रजन्ति यत् यां च एभिरधर्मादिदोषैर्हीना व्रजन्ति ॥२२॥ तामिति ॥ तामतिसमृद्धां देवधानीं देवानां निवासभूतामिन्द्रपुरीं स वरूथिनीपतिः सेनापतिर्बलिः पृतन्यया पृतनया स्वसेनया । यकारोऽधिक आर्षः। बहिः समन्तात् सर्वतो रुरुधे ।इन्द्रस्य योषितां स्त्रीणां भयं प्रयुञ्जन् उत्पादयितुं महान् स्वनो यस्य तमाचार्येण शुक्रेण दत्तं जलजं शङ्खं दध्मौ वादितवान् ॥ २३ ॥ मघवानिति॥ तद्बलेः परममुद्यमम् अभिप्रेत्य ज्ञात्वा मघवान् इन्द्रः सर्वदेवगणेनोपेतः सहितो गुरुं बृहस्पतिं प्रत्येत्य तद्वक्ष्यमाणमुवाच ह ॥ २४ ॥ भगवन्निति सार्द्धम् ॥ हे भगवन् नोऽ-

मृदङ्गशङ्खानकदुन्दुभिस्वनैः सतालवीणामुरजार्ष्टिवेणुभिः ॥ नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभाम् ॥ २१ ॥ यां न व्रजन्त्यधर्मिष्ठाः खला भूतद्रुहः शठाः ॥ मानिनः कामिनो लुब्धा एभिर्हीना व्रजन्ति यत्॥२२॥ तां देवधानीं स वरूथिनीपतिर्बहिः समन्ताद्रुरुधे पृतन्यया ॥ आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुञ्जन् भयमिन्द्रयोषिताम् ॥ २३ ॥ मघवांस्तदभिप्रेत्य बलेः परममुद्यमम् ॥ सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २४ ॥ भगवन्नुद्यमो भूयान् बलेर्नः पूर्ववैरिणः ॥ अविषह्यमिमं मन्ये केनासीत् तेजसोर्जितः ॥ नैनं कश्चित् कुतो वापि प्रतिव्योढुमधीश्वरः ॥२५॥ पिबन्निव मुखेनेदं लिहन्निव दिशो दश ॥ दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥२६॥ ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः ॥ ओजः सहो बलं तेजो यत एतत्समुद्यमः ॥ २७ ॥ गुरुरुवाच ॥ जानामि मघवन् शत्रोरुन्नतेरस्य कारणम् ॥ शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः ॥ २८ ॥

स्माकं पूर्ववैरिणः बलेरिदानीं भूयानुद्यमो जातः अत इममुद्यमं बलिं वा अहमविषह्यं सोढुमशक्यं मन्ये । सः इदानीं केन हेतुना एवं तेजसा ऊर्जितो वर्द्धितः आसीत् न केवलं ममैवायमविषह्यः किं कुतोऽप्युपायात्कश्चिदप्येनं प्रतिव्योढुं प्रतिवोढुमपाकर्तुम् । यकाराधिक्यमार्षम् । अधीश्वरः सर्वतो न दृश्यत इति शेषः ॥ २५ ॥ पिबन्निति ॥ मुखेनेदं विश्वं पिबन्निव दश दिशो लिहन् आस्वादयन्निव दृग्भिर्नेत्रैर्दिशो दहन्निव च संवर्त्ताग्निः प्रलयाग्निरिवोत्थितः ॥२६॥ ब्रूहीति ॥ यतः एतस्य ओजःसहोबलानि इन्द्रियमनोदेहसामर्थ्यानि तेजः प्रभावः एतानि जातानि यतश्च ओजआदेः एतस्य सम्यक् महानुद्यमो जातस्तदेतदस्य मद्रिपोर्दुर्धर्षत्वस्य कारणं ब्रूहि ॥ २७ ॥ जानामीति ॥ हे मघवन् अस्य तव शत्रोरुन्नतेः कारणमहं जानामि शिष्याय सर्वस्वोपहारकाय बलये ब्रह्मवादिभिर्भृगुभिः शुक्राद्यैः स्वीयमेव तेजः उपभृतं प्रत्युपहारत्वेन दत्तमित्यर्थः ॥ २८ ॥

CC-0. In Public Domain. Digitization by eGangotri

भवदिति॥अतः ईश्वरं हरिं वर्जयित्वा भवान् भवद्विध ऐश्वर्यादिमानन्यो वा कोऽपि युद्धार्थमस्य पुरः स्थातुं न शक्तः।यथा जनाः केऽपि कृतान्तस्य मृत्योः पुरः स्थातुं न शक्नुवन्ति तथेत्यर्थः ॥ २९ ॥ तस्मादिति ॥ तस्मात् यतः कालात् युष्माकं शत्रोर्बलेर्विपर्ययः पराभवो भविष्यति तं कालं प्रतीक्षन्तः । शता आर्षः । यूयं सर्वे त्रिविष्टपं स्वर्गमुत्सृज्य त्यक्त्वा निलयमदर्शनं यात । यद्वा । स्वस्य निलयं स्थानं त्रिविष्टपमुत्सृज्य यत्र कुत्र यात ॥ ३० ॥ एष इति ॥ एष बलिर्विप्राणां बलेन उदर्क उत्तरोत्तरमधिकं फलं यस्य तथाविधः अत एव संप्रत्यूर्जितो महान् विक्रमो यस्य सः तेषामेव विप्राणामपमानं यदा करिष्यति तदा तेनैव सानुबन्धो दैत्यादिस्वयूथसहितो विनङ्क्ष्यति पराभूतो भविष्यति।इदं चेन्द्रसन्तोषार्थमेव वस्तुतस्तत्कृतविप्रावमानस्य स्वर्गैश्वर्यभ्रंशहेतुत्वेऽपि भगवत्प्रसादकीर्तिस्वर्गाधिकसुतलभोगद्वारपालीकृतविष्णुत्वभाविमन्वन्तरेन्द्रत्वाद्यर्थमभूत् ॥ ३१ ॥ एवमिति ॥ अर्थानुदर्शिना यथावद्विचारनिपुणेन गुरुणा एवं सुमन्त्रितो विचारपूर्वकमुक्तोऽर्थः कार्यं येषां ते गीर्वाणा देवास्त्रिविष्टपं स्वर्गं हित्वा कामरूपिणः यथेष्टरूपधारणे सामर्थ्याद्यत्र कुत्र जग्मुः विचेरुः ॥ ३२ ॥ देवेष्विति ॥ एवं देवेषु निलीनेषु सत्सु अथानन्तरं विरोचनपुत्रो बलिर्देवधानीमिन्द्रपुरीमधिष्ठाय जगत्त्रयं भूरादिलोकत्रयं वशं निन्ये ॥ ३३ ॥ तमिति ॥ शिष्ये वत्सलाः कृपायुक्ताः भृगवः शुक्रादयः अनुव्रतमनुवर्तिनं विश्वजयिनं च शिष्यं बलिं हयमेधानां शतेन अयाजयन् । एवं प्राप्तमिन्द्रपदं स्थिरीकर्तुम् इति भावः ॥ ३४ ॥ तत इति ॥ ततः तदनुभावेन यज्ञानुष्ठानप्रभावेण भुवनत्रये विश्रुतां प्रसिद्धां स्वकीर्तिं दशदिक्षु वितन्वानो विस्तारयन् स बलिरुडुराट् चन्द्रमा इव रेजे ॥ ३५ ॥ बुभुज इति ॥ यथेष्टविषयलाभान्महन्मनो यस्य सः आत्मानं कृतकृत्यमिव मन्यमानो द्विजेषु क्षत्रियादिषु देवा देववत्पूज्या ये ब्राह्मणास्तैरुपलम्भितां प्रापितां स्वृद्धां श्रियं च बुभुजे ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य टीकां पञ्चदशे व्यधात् ॥ १५ ॥

भवद्विधो भवान् वापि वर्जयित्वेश्वरं हरिम् ॥ नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः ॥२९॥ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम् ॥ यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः ॥ ३० ॥ एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः ॥ एषामेवापमानेन सानुबन्धो विनङ्क्ष्यति॥३१॥ एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना ॥ हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ॥ ३२ ॥ देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम् ॥ देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयम् ॥ ३३ ॥ तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः ॥ शतेन हयमेधानामनुव्रतमयाजयन् ॥ ३४ ॥ ततस्तदनुभावेन भुवनत्रयविश्रुताम् ॥ कीर्तिं दिक्षु वितन्वानः स रेजे उडुराडिव ॥ ३५ ॥ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलम्भिताम् ॥ कृतकृत्यमिवात्मानं मन्यमानो महामनाः ॥ ३६ ॥ इति श्रीभा० अष्टमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशे तु पुत्रदुःखदुःखितामदितिं पतिः ॥ पयोव्रतं जगादात्र श्लोकाः सार्द्धा द्विषं[2]ण्मिताः ॥ उवाचपंश्चकं प्रोक्तं स्यात्त्रिषंष्टिरनुष्टुभाम्॥ १६॥एवमिति॥ एवं स्वपुत्रेष्विन्द्रादिषु नष्टेषु अदर्शनं गतेषु सत्सु त्रिविष्टपे स्वर्गे च दैत्यैर्हृते सति तदा देवमाता अदितिरनाथवत् रक्षकरहितवदतप्यत ॥ १ ॥ एकदेति ॥ एकदा निरुत्सवं निरानन्दं च तस्या आश्रमं समाधेः सकाशाच्चिराद्विरतो निवृत्तो भगवान् कश्यपः अगात् ॥ २ ॥ स इति ॥ हे कुरूद्वह यथान्यायं देशकालाद्यनुसारेण यथायोग्यं सभाजितः अदित्या पूजितः कृतः आसनस्य परिग्रहः स्वीकारो येन स कश्यपो दीनवदनां पत्नीमदितिमिदं वक्ष्यमाणमाह स्म ॥ ३ ॥ अपीति ॥ अपि प्रश्ने । हे भद्रे अपि किमधुना लोके विप्राणामभद्रं दुःखं तु नागतं किंवाऽधर्मस्य भद्रं तु नागतं तथा मृत्योश्छन्दमिच्छामनुवर्तते इति तथा तस्य मृत्युवशवर्त्तिनः लोकस्याभद्रं नागतम् ॥ ४ ॥ अपीति ॥ हे गृहमेधिनि हे गृहस्वामिनि अपि वा किंवा गृहेषु धर्मादेः किंचिदकुशलं ह्रासो जात इति शेषः । यत्र येषु गृहेषु अयोगिनां योगाभ्यासरहितानामपि योगः स्वधर्माचरणादिना योगफलं भवति ॥ ५ ॥

श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु देवमाताऽदितिस्तदा ॥ हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥ १ ॥ एकदा कश्यपस्तस्या आश्रमं भगवानगात् ॥ निरुत्सवं निरानन्दं समाधेर्विरतश्चिरात् ॥ २ ॥ स पत्नीं दीनवदनां कृतासनपरिग्रहः ॥ सभाजितो यथान्यायमिदमाह कुरूद्वह ॥ ३ ॥ अप्यभद्रं न विप्राणां भद्रे लोकेऽधुना गतम् ॥ न धर्मस्य न लोकस्य मृत्योश्छन्दानुवर्तिनः ॥ ४ ॥ अपि वा कुशलं किंचिद् गृहेषु गृहमेधिनि ॥ धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनाम् ॥ ५ ॥ अपि वाऽतिथयोऽभ्येत्य कुटुम्बासक्तया त्वया ॥ गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ॥ ६ ॥ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ॥ यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः ॥ ७ ॥ अप्यग्नयस्तु वेलायां न हुता हविषा सति ॥ त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥ ८ ॥ यत्पूजया कामदुघान्याति लोकान्गृहान्वितः ॥ ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ॥९॥ अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि ॥ लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहम् ॥१०॥

अपीति ॥ अपि किंवा कच्चित्कदाचित् अतिथयः अभ्येत्य आगत्य कुटुम्बासक्तया त्वया प्रत्युत्थानादिनाप्यपूजिता गृहाद्याताः ॥६॥ गृहेष्विति ॥ येषु गृहेष्वतिथयोऽभ्येत्य यदि सलिलैरपि नार्चिताः सत्काररहिताः सन्तो निर्यान्ति तदा ते गृहा नूनं निश्चयेन फेरुराजः श्रृगालनाथस्तद्गृहोपमाः तद्विवरतुल्या एव ॥७॥ अपीति ॥ हे सति हे भद्रे मयि प्रोषिते देशान्तरं गते सति उद्विग्ना धीर्यस्यास्तया त्वया वेलायां होमकाले अपि किमग्नयो हविषा न हुताः॥८॥यदिति ॥ यस्याग्नेः ब्राह्मणस्य च पूजया गृहान्वितो गृहस्थः कामदुघान् लोकान्याति असौ ब्राह्मणोऽग्निश्च वै निश्चयेन सर्वदेवतात्मनः विष्णोर्मुखम् ॥ ९ ॥ अपि इति ॥ हे मनस्विनि अपि किं तव पुत्राः सर्वे कुशलिनः सन्ति भवत्या आत्मानं मनः अस्वस्थमप्रकृतिस्थमहं लक्षणैर्मुखम्लान्यादिभिर्लक्षयामि ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

भद्रमिति ॥ हे ब्रह्मन् हे गृहमेधिन् द्विजगवां धर्मस्य अस्य जनस्य भृत्यादेश्च भद्रमेवास्ते इमे । त्वदीयाः गृहाः त्रिवर्गस्य परं क्षेत्रमुद्भवस्थानं सन्ति । त्रिवर्गोऽपि यथावद्वर्तत इत्यर्थः ॥ ११ ॥ अग्नय इति ॥ हे ब्रह्मन् अग्न्यतिथ्यादयः ये चान्येऽपि लिप्सवः आकाङ्क्षावन्तः ते सर्वेऽपि मया पूजिता इति शेषः । भगवतस्तवानुक्षणं ध्यानं यन्मया क्रियते तस्मात्सर्वं न रिष्यति किंचिदपि न हीयत इत्यर्थः ॥१२॥ क इति ॥ हे भगवन् यस्याः प्रजाध्यक्षः प्रजापतिर्भवानेवमुक्तप्रकारेण धर्मान् प्रभाषते तस्या मम मानसो मनसि वर्तमानः कामो मनोरथः को नु न सम्पद्येत अपि तु सर्वः सम्पद्येत ॥१३॥ तवेति ॥ हे मारीच सत्वरजस्तमोजुषः सत्त्वादिगुणत्रयवत्य इमाः प्रजाः प्राणिसमूहस्तवैव मनःशरीरजाः केचिन्मनसो जाताः केचिच्छरीराच्च जाताः अतो हे प्रभो स्वामिन् यद्यपि तासु असुरादिषु प्रजासु भवान् समस्तुल्यदृष्टिस्तथापि यथा महेश्वरः सृष्ट्यादि-कर्त्ता परमेश्वरः सर्वत्र समोऽपि स्वभक्तमेव भजते तथा भवानपि भक्तं भजते स्वभक्तस्यैव मनोरथं पूरयति ॥ १४ ॥ तस्मादिति ॥ तस्मात् हे ईश हे सुव्रत त्वमपि त्वां

अदितिरुवाच ॥ भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च ॥ त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे ॥ ११ ॥ अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः ॥ सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥ १२ ॥ को नु मे भगवन्कामो न संपद्येत मानसः ॥ यस्या भवान्प्रजाध्यक्ष एवं धर्मान् प्रभाषते ॥ १३ ॥ तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः॥समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः ॥ १४ ॥ तस्मादीश भजन्त्या मे श्रेयश्चिन्तय सुव्रत ॥ हृतश्रियो हृतस्थानान् सपत्नैः पाहि नः प्रभो ॥ १५ ॥ परैर्विवासिता साऽहं मग्ना व्यसनसागरे ॥ ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥ १६ ॥ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः ॥ तथा विधेहि कल्याणं धिया कल्याणकृत्तम ॥ १७ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव ॥ अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥ १८ ॥ क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः ॥ कस्य के पतिपुत्राद्या मोह एव हि कारणम् ॥ १९ ॥

भजन्त्या मे श्रेयश्चिन्तय । सपत्नैः शत्रुभिः दैत्यैर्हृता श्रीर्येषां तान् हृतं स्थानं येषां तान्नोऽस्मान् पाहि रक्ष । पुत्राभिप्रायं बहुत्वम् ॥ १५ ॥ परैरिति॥प्रबलैः परैः शत्रुभिः मम ऐश्वर्यं स्वामित्वं श्रीः यशः स्थानं च हृतानि सा ऐश्वर्यादिरहिताहं परैर्विवासिता स्थानाच्च निष्कासिता अतो व्यसनस्य दुःखस्य सागरे निमग्ना ॥ १६ ॥ यथेति ॥ हे साधो हे कल्याणकृत्तम यथा ममात्मजास्तान्यैश्वर्यादीनि पुनः प्रपद्येरन् लभेरन् तथा धिया विचार्य कल्याणं शुभं साधनं विधेहि उपदिश ॥१७॥ एवमिति ॥ कः कश्यपो-ऽदित्या एवमभ्यर्थितः प्रार्थितः सन् स्मयन् तस्या वैराग्यमुत्पादयितुं विस्मयं कुर्वन्निव । शता आर्षः । तामाह स्म उपदिदेश । अहो आश्चर्यरूपमेव विष्णोर्मायाबलं यत इदं जगत् प्राणिजातं स्नेहेन बद्धम्॥१८॥क्वेति ॥ भौतिकः पञ्चमहाभूतकार्यरूपोऽत एवानात्मा आत्मनो भिन्नो देहः क्व प्रकृतेः परो भिन्नः आत्मा च क्व कस्य के पतिपुत्राद्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः मोहः अहन्ताममताध्यास एव स्नेहादौ कारणम् ॥ १९ ॥ उपेति ॥ भगवन्तं जनार्दनं पुरुषं सर्वभूतगुहावासं जगद्गुरुं वासुदेवमुपतिष्ठस्व भजस्व ॥ २० ॥ स इति ॥ स दीनानामनुकम्पनः हरिस्ते कामान्विधास्यति भगवद्भक्तिरेवामोघा निश्चितफला इतरा देवतान्तरभक्तिस्तथाविधा नेति मम निश्चिता मतिः ॥ २१ ॥ केनेति ॥ हे ब्रह्मन् जगत्पतिं भगवन्तमहं केन विधिना उपस्थास्ये । सत्यः सङ्कल्पो यस्यस भगवान् यथा मे मनोरथं विदध्यात्सम्पादयेत्॥२२॥ आदिशेति ॥ हे द्विजश्रेष्ठ पुत्रकैः सह सीदन्त्या मे देवो भगवान् यथा आशु शीघ्रं तुष्यति तुष्येत् तथा तदुपधावनं विधिं तदाराधनप्रकारं त्वमादिशेति ॥२३॥ एतदिति ॥ भगवान् पद्मजो ब्रह्मा मया पृष्टः सन् प्रजाकामस्य यद्व्रतमाह स्म तदेतत् केशवतोषणं व्रतं ते तुभ्यं प्रवक्ष्यामि ॥२४॥ फाल्गुनस्येति ॥ फाल्गुनस्य अमले शुक्ले पक्षे द्वादशाहं प्रतिपदमारभ्य द्वादशीपर्यन्तं पयोव्रतः केवलपयः-

उपतिष्ठस्व पुरुषं भगवन्तं जनार्दनम् ॥ सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ॥ २० ॥ स विधास्यति ते कामान् हरिर्दीनानुकम्पनः ॥ अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ॥ २१ ॥ अदितिरुवाच ॥ केनाहं विधिना ब्रह्मन् उपस्थास्ये जगत्पतिम् ॥ यथा मे सत्यसंकल्पो विदध्याच्च मनोरथम् ॥ २२ ॥ आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम् ॥ आशु तुष्यति मे देवः सीदन्त्याः सह पुत्रकैः ॥ २३॥ कश्यप उवाच ॥ एतन्मे भगवान् पृष्टः प्रजाकामस्य पद्मजः ॥ यथाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥ २४ ॥ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ॥ अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः ॥ २५ ॥ सिनीवाल्यां मृदाऽऽलिप्य स्नायात्क्रोडविदीर्णया ॥ यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत् ॥ २६ ॥ त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ॥ उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥ २७ ॥ निर्वर्तितात्मनियमो देवमर्चेत्समाहितः ॥ अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ॥ २८ ॥ नमस्तुभ्यं भगवते पुरुषाय महीयसे ॥ सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ २९ ॥ नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ॥ चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥ ३० ॥

पायी सन् परमया भक्त्यान्वितश्च सन्नरविन्दाक्षं महाविष्णुमर्चयेत् ॥२५॥ तत्रादौ पूर्वकृत्यमाह—सिनीवाल्यामिति ॥ सिनीवाल्याममावास्यायां यदि क्रोडविदीर्णा मृल्लभ्येत तदा तां गृहीत्वा स्रोतसि नदीप्रवाहे स्थित्वा एतं वक्ष्यमाणं मन्त्रमुदीरयेत् उच्चारयेत् । ततश्च तया क्रोडविदीर्णया वन्यवराहोत्खातया मृदा स्वशरीरमालिप्य स्नायात् । यदि लभ्यतेत्यस्य स्रोतसीत्यनेनापि सम्बन्धः ॥ २६ ॥ त्वमिति ॥ हे देवि पृथ्वि प्राणिनां स्थानमिच्छता आदिवराहेण भगवता त्वं रसायाः रसातलादुद्धृताऽसि अतो मे पाप्मानं प्रणाशय तुभ्यं नमः ॥२७॥ निर्वर्तितेति ॥ निर्वर्तितस्सम्पादित आत्मनः स्वस्य नियमो नित्यनैमित्तिको येन स समाहितः एकाग्रचित्तः सन्नर्चादौ देवं भगवन्तमर्चयेत् ॥२८॥ तत्रावाहनादौ नव मन्त्राः पाद्यादौ विशेषतस्तु द्वादशाक्षरं वक्ष्यति—नम इति॥स्पष्टम्॥२९॥ नम इति॥ अव्यक्ताय सूक्ष्माय प्रधानपुरुषरूपाय चतुर्विंशतिगुणान् वैशेषिकोक्तान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपादीन् साङ्ख्योक्ततत्त्वानिवाजानाति तस्मै । चतुर्विंशतेरिकारलोप आर्षः । गुणानां तत्त्वानां सङ्ख्यानमाविर्भावः तस्य हेतवे प्रधानाय गुणसङ्ख्यानस्य साङ्ख्यशास्त्रस्य प्रवर्तकाय वा नमः ॥ ३० ॥ एवं सामान्यतो नत्वा गुणावतारान् प्रणमति—नम इति ॥ द्वे शीर्षे यस्य त्रयः पादा यस्य चत्वारि श्रृङ्गाणि यस्य तन्तवे फलविस्तारकाय सप्त हस्ता यस्य त्रय्यां विद्यायामात्मा यस्येति।त्रिधा बद्ध इत्यस्यार्थ उक्तः । ईदृशाय तन्तवे यज्ञरूपाय नमः।तथा च मन्त्रः । "चत्वारि श्रृङ्गास्त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश" इति।तथा च यास्कः ।चत्वारि श्रृङ्गेति वेदा एवोक्ताः त्रयोऽस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्ताः सप्तच्छन्दांसि त्रिधा बद्धो मन्त्रब्राह्मणकल्पैर्वृषभो रोरवीति रोरवणं सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिः यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति । सामभिः स्तुवन्तीति ॥ ३१ ॥ नम इति ॥ स्पष्टम् ॥ ३२ ॥ नम इति ॥ प्राणाय सूत्रात्मने । स्पष्टं शेषम् ॥ ३३ ॥ नमस्त इति ॥ स्पष्टम् ॥३४॥ नम इति ॥ मरकतमणिरिव श्यामं वपुर्यस्य

नमो द्विशीर्ष्णे त्रिपदे चतुःश्रृङ्गाय तन्तवे ॥ सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥३१ ॥नमः शिवाय रुद्राय नमः शक्तिधराय च ॥ सर्वविद्याधिपतये भूतानां पतये नमः ॥ ३२ ॥ नमो हिरण्यगर्भाय प्राणाय जगदात्मने ॥ योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥ ३३ ॥ नमस्ते आदिदेवाय साक्षिभूताय ते नमः ॥ नारायणाय ऋषये नराय हरये नमः ॥३४॥ नमो मरकतश्यामवपुषेऽधिगतश्रिये ॥ केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ ॥ अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥ ३६ ॥ अन्ववर्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः ॥ स्पृहयन्त इवामोदं भगवान् मे प्रसीदताम् ॥ ३७ ॥ एतैर्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम् ॥ अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥ अर्चित्वा गन्धमाल्याद्यैः पयसा स्नपयेद्विभुम् ॥ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥ गन्धधूपादिभिश्चार्चेद् द्वादशाक्षरविद्यया ॥ ३९ ॥

अधिगता प्राप्ता श्रीर्येन तस्मै केशवाय ते तुभ्यं नमः । पीतं वासो यस्य तस्मै ते तुभ्यं नमः ॥ ३५ ॥ त्वमिति ॥ हे वरेण्य हे वरदर्षभ त्वं पुंसां सर्ववरदः यत एवमत एव धीरा विवेकिनः श्रेयसे ते तवैव पादरेणुमुपासते॥ ३६॥अन्ववर्तन्तेति॥तत्पादपद्मयोरामोदं स्पृहयन्त इह देवाः श्रीर्लक्ष्मीश्च यमन्ववर्तन्त सेवितवन्तः स भगवान् मे प्रसीदताम्।तङार्षः ॥ ३७ ॥ एतैरिति ॥ एतैर्मन्त्रैरावाहनेन पुरस्कृतं स्वपुरः स्थिरीकृतं केशवं श्रद्धया युक्तः पाद्योपस्पर्शनादिभिरर्चयेत् उपस्पर्शनमाचमनीयम् ॥ ३८ ॥ अर्चित्वेति सार्द्धम् ॥ प्रथमं द्वादशाक्षरविद्यया ॐ नमो भगवते वासुदेवायेति मन्त्रेणेत्यर्थः । पाद्यादिभिर्गन्धमाल्याद्यैश्चार्चित्वा विभुं श्रीविष्णुं पयसा स्नापयेत् स्नापयित्वा च ततोऽनन्तरं वस्त्रोपवीताभरणपाद्योपस्पर्शनैर्गन्धधूपादिभिश्च पुनरर्चेत् । द्वादशाक्षरविद्ययेति सर्वत्र सम्बध्यते । आदिना अन्येऽपि विष्णुयोग्योपचारा ग्राह्याः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रृतमिति ॥ विभवे सति पयसि श्रृतं पक्कं पायसं ससर्पिः सघृतं सगुडं च शाल्यन्नं नैवेद्यं दत्त्वा समर्प्य तेनैव मूलविद्यया द्वादशाक्षरमन्त्रेण तदग्नौ जुहुयात् । विभवाभावे यल्ल-भ्येत तदेवेत्यर्थलभ्यम् ॥४०॥ निवेदितमिति ॥ तन्निवेदितं नैवेद्यं भक्ताय वैष्णवाय सर्वमेव दद्यात् । किंचिद्दत्त्वा स्वयं वा पूजासमाप्त्यनन्तरं भुञ्जीत ततो नैवेद्यान्त आचमनं दत्त्वा अर्चित्वा पूगादिभिः संस्कृत्य ताम्बूलं च निवेदयेत् ॥४१॥ जपेदिति ॥ द्वादशाक्षरं मन्त्रमष्टोत्तरशतं जपेत् । ततश्च पूर्वोक्ताभिरन्याभिश्च स्तुतिभिः प्रभुं भगवन्तं स्तुवीत । ततस्तं प्रदक्षिणं कृत्वा दण्डवद्भूमौ प्रणमेत् ॥ ४२ ॥ कृत्वेति ॥ तस्य शेषां निर्माल्यं स्वशिरसि कृत्वा देवमुद्वासयेत् विसर्जयेत् । द्वौ अवरौ येषां तान् द्वित्र्यादीन् विप्रान् पायसेन यथोचितं भोजयेत् । सामर्थ्याभावे द्वावपि भोजयेत् इत्यर्थः ॥४३ ॥ भुञ्जीतेति युग्मम् ॥ सभाजितैः पूजितैस्तैर्विप्रैरनुज्ञातः सन् शेषं ब्राह्मणभोजनावशिष्टमन्नं सेष्टः बन्धुभिः सहितः स्वयं भुञ्जीत । उक्तमेवानुवदति अथ प्रारम्भे तस्यां रात्र्यां ब्रह्मचारी स्त्रीसङ्गरहितः शयीतेति शेषः । श्वोभूते प्रभाते सति प्रथमे अहनि प्रतिपदि स्नातः

श्रृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥ ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ॥ ४०॥ निवेदितं तद् भक्ताय दद्याद् भुञ्जीत वा स्वयम् ॥ दत्त्वाचमनमर्चित्वा ताम्बूलं च निवेदयेत् ॥ ४१ ॥ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥ कृत्वा प्रदक्षिणं भूमौ प्रणमेद् दण्डवन्मुदा ॥ ४२ ॥ कृत्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः ॥ द्व्यवरान् भोजयेद्विप्रान् पायसेन यथोचितम् ॥ ४३ ॥ भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ॥ ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ॥ ४४॥ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥ पयसा स्नापयित्वार्चेद्यावद्व्रतस-मापनम् ॥ ४५ ॥ पयोभक्षो व्रतमिदं चरेद्विष्णवर्चनादृतः ॥ पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥ ४६ ॥ एवं त्वहरहः कुर्याद् द्वादशाहं पयोव्रतः ॥ हरेराराधनं होममर्हणं द्विजतर्पणम् ॥ ४७ ॥ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ॥ ब्रह्मचर्यमधः स्वप्नं स्नानं त्रिषवणं चरेत् ॥ ४८ ॥ वर्जयेदसदालापं भोगानुच्चावचांस्तथा ॥ अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥ ४९ ॥

शुचिः सुसमाहितः एकाग्रमनाश्च सन् भगवन्तं पयसा स्नापयित्वा यथोक्तेन विधिना पूर्वोक्तेन प्रकारेणार्चेत् । एवं यावद्व्रतसमापनं कुर्यात् ॥ ४४ ॥ ४५ ॥ पय इति ॥ पय एव भक्षं यस्य स विष्णोरर्चने आदृतश्च सन्निदं व्रतं चरेत् । तत्र पूर्ववदेवाग्निं जुहुयात् ब्राह्मणांश्चापि भोजयेत् ॥ ४६ ॥ उक्तमेव स्पष्टयति—एवं त्विति ॥ एवं तूक्त-प्रकारेण द्वादशाहं द्वादशदिनपर्यन्तं पयोव्रतं पयआहारं हरेराराधनं स्तुतिनमस्कारजपादिहोममर्हणं भगवत्पूजनं द्विजतर्पणं ब्राह्मणभोजनं चाहरहः प्रतिदिनं कुर्यात् ॥ ४७ ॥ प्रतिपदिति ॥ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी तावत् ब्रह्मचर्यमित्यादिकं चरेत् ॥ ४८ ॥ वर्जयेदिति ॥ असदालापादि वर्जयेत् सर्वभूतानाम् अहिंस्रः स्यात् पीडां न कुर्यात् वासुदेवपरायणश्च स्यात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रयोदश्यामिति सार्द्धम्॥ अथो त्रयोदश्यां विधिकोविदैः शास्त्रोक्तप्रकाराभिज्ञैर्ब्राह्मणैः शास्त्रदृष्टेन विधिना प्रकारेण पञ्चकैः दुग्धादिपञ्चामृतैर्विभोर्विष्णोः स्नपनं स्नानं कारयेत् । वित्तशाठ्यविवर्जितः उदारचित्तः सन् भगवतो महतीं पूजां च कुर्यात् ॥ ५० ॥ चरुमिति सार्द्धम् ॥ शिपिविष्टायान्तर्यामिणे विष्णवे चरुं निरूप्य सम्पाद्य तेन पयसि श्रृतेन पक्वेन चरुणा सुसमाहितः सन् पुरुषं भगवन्तं यजेत । तच्चातिगुणवत् मधुरादिषड्रसवत् अतएव पुरुषतुष्टिदं भगवत्सन्तोषकरं हिंसादिनिषिद्धदोषरहितं नैवेद्यं च दद्यात्॥५१॥ आचार्यमिति ॥ ज्ञानसम्पन्नमाचार्यमन्यांश्च ऋत्विजो वस्त्राभरणादिभिस्तोषयेत् । तत् आचार्यादिसन्तोषणमपि हरेरेवाराधनं विद्धि ॥ ५२ ॥ भोजयेदिति ॥ हे शुचिस्मिते तानाचार्यादीन् अन्यांश्च ब्राह्मणान् ये चान्ये प्राणिनस्तत्र समागतास्तानपि शक्त्या स्वसामर्थ्यानुसारेण मधुरादिगुणवता सदन्नेन शुद्धेन हिंसादिदोषरहितान्नेन भोजयेत् ॥ ५३ ॥ दक्षिणामिति ॥ गुरवे आचार्यायान्येभ्यश्च ऋत्विग्भ्यो यथार्हतः यथायोग्यं दक्षिणां दद्यात् अन्नं च तदाद्यं भक्षणयोग्यं च तेन आश्वपाकान् चाण्डालादीनभि-

त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ॥ पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ॥ ५० ॥ चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥ श्रृतेन तेन पुरुषं यजेत सुसमाहितः ॥ नैवेद्यं चातिगुणवद्दद्यात् पुरुषतुष्टिदम् ॥ ५१ ॥ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ॥ तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ॥ ५२ ॥ भोजयेत् तान् गुणवता सदन्नेन शुचिस्मिते ॥ अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ॥ ५३ ॥ दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथाऽर्हतः ॥ अन्नाद्येनाऽश्वपाकांश्च प्रीणयेत् समुपागतान् ॥ ५४ ॥ भुक्तवत्सु च सर्वेषु दीनान्धकृपणेषु च ॥ विष्णोस्तत् प्रीणनं विद्वान् भुञ्जीत सह बन्धुभिः ॥ ५५ ॥ नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ॥ कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ॥ ५६ ॥ एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥ पितामहेनाभिहितं मया ते समुदाहृतम् ॥ ५७ ॥ त्वं चानेन महाभागे सम्यक्चीर्णेन केशवम् ॥ आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ॥ ५८ ॥

व्याप्य समुपागतान् प्रीणयेत् ॥ ५४ ॥ भुक्तवत्स्विति ॥ दीनान्धकृपणादिषु सर्वेषु च भुक्तवत्सु सत्सु तद्भोजनं विष्णोः सर्वात्मकस्य भगवतः प्रीणनमिति विद्वान् चिन्तयन् बन्धुभिः सह स्वयमपि भुञ्जीत ॥ ५५ ॥ नृत्येति ॥ नृत्यादिभिः सह अन्वहं प्रतिपद्दिनमारभ्य त्रयोदशीपर्यन्तं प्रतिदिनं भगवतः पूजां कारयेदित्यन्वयः । स्वसामर्थ्येऽधिकारे च सति पूजां स्वयमेव कुर्यात्तदभावेऽन्येनापि कारयेदित्याशयः ॥ ५६ ॥ एतदिति ॥ एतत्पयोव्रतं नाम प्रसिद्धं परमन्येभ्यः साधनेभ्यः उत्कृष्टं यतः पुरुषस्य हरेः आराधनं पितामहेन ब्रह्मणा अभिहितं मह्यं कथितं मया च ते तुभ्यं समुदाहृतम् ॥ ५७ ॥ त्वामिति ॥ हे महाभागे शुद्धो भावो भक्तिर्यस्मिन् तेनात्मना चित्तेन नियतात्मा वशीकृतमनाः सती त्वं च सम्यक् चीर्णेनानुष्ठितेनानेन व्रतेन अव्ययं केशवं भगवन्तं भज ॥ ५८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमिति ॥ अयं यज्ञः सर्वयज्ञाख्यः सर्वयज्ञफलदः इदं व्रतं च सर्वव्रतं सर्वव्रतफलदम् इति स्मृतम् ब्रह्मणा कथितं हे भद्रे इदमेव व्रतं तपसां सारम् इदमेव ईश्वरस्य तर्पणं तृप्तिकरं दानं च ॥ ५९ ॥ त इति ॥ येन इति "नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्" इत्येकत्वम् । येन यैश्च अधोक्षजः भगवान् तुष्यति साक्षात् उत्तमा नियमास्त एव यमोत्तमाश्च त एव उत्तमं तपश्च तदेव उत्तमं दानं च तदेव उत्तमं व्रतं च तदेव उत्तमो यज्ञश्च स एव ॥ ६० ॥ तस्मादिति ॥ तस्मात् हे भद्रे प्रयता नियमवती सती श्रद्धया एतद्व्रतमाचर कुरु । अनेन परितुष्टो भगवान् ते तव वरान् मनोरथान् आशु विधास्यति सम्पादयिष्यति ॥६१॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥गङ्गासहायोऽष्टमस्य षोडशे निरमादिमाम् ॥ १६॥ सप्तदशे व्रतेऽदित्या कृते तस्याः सुतो हरिः ॥ वामनाभोऽभवत्तत्र श्लोकाः सार्द्धाष्टविंशतिः ॥ षड्विंशाचेति पादोनाश्चतुस्त्रिंशदनुष्टुभः ॥ १७॥ इतीति ॥ हे राजन् इत्येवं स्वभर्त्रा कश्यपेनोक्ता उपदिष्टा सा देवमाता अदितिरतन्द्रिता निरालस्या सती द्वादशाहमिदं पयोव्रतमन्वतिष्ठत् ॥ १ ॥ चिन्तयन्तीति

अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् ॥ तपःसारमिदं भद्रे दानं चेश्वरतर्पणम् ॥ ५९ ॥ त एव नियमाः साक्षात्त एव च यमोत्तमाः ॥ तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥ ६० ॥ तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धयाऽऽचर ॥ भगवान् परितुष्टस्ते वरानाशु विधास्यति ॥६१॥ इति श्रीभा० म० अष्टमस्कन्धेऽदितिपयोव्रतं नाम षोडशोऽध्यायः ॥ १६॥श्रीशुक उवाच ॥ इत्युक्ता साऽदिती राजन् स्वभर्त्रा कश्यपेन वै ॥ अन्वतिष्ठद्व्रतमिदं द्वादशाहमतन्द्रिता ॥ १ ॥ चिन्तयन्त्येकया बुद्ध्या महापुरुषमीश्वरम् ॥ प्रगृह्येन्द्रियदुष्टाश्वान् मनसा बुद्धिसारथिः ॥ २ ॥ मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि ॥ वासुदेवे समाधाय चचार ह पयोव्रतम् ॥ ३ ॥ तस्याः प्रादुरभूत्तात भगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥ ४॥ तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरम् ॥ ननाम भुवि कायेन दण्डवत् प्रीतिविह्वला ॥ ५ ॥ सोत्थाय बद्धाञ्जलिरीडितुं स्थिता नोत्सेह आनन्दजलाकुलेक्षणा ॥ बभूव तूष्णीं पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥

युग्मम् ॥ एकया एकाग्रया बुद्ध्या महापुरुषमीश्वरं चिन्तयन्ती तथा बुद्धिरेव सारथिर्यस्याः सादितिः प्रग्रहरूपेण मनसा इन्द्रियरूपान् दुष्टान् अश्वान् प्रगृह्य स्वस्वविषयेभ्यो निवर्त्य एकाग्रया बुद्ध्या भगवति अखिलात्मनि वासुदेवे मनश्च समाधाय स्थिरीकृत्य पयोव्रतं चचारेति । यद्वा । चिन्तयन्तीत्येतत् पूर्वश्लोके योज्यम् ॥ २ ॥ ३ ॥ तस्या इति ॥ हे तात तस्या व्रतानुष्ठानं कृतवत्या अदितेः पुरः पीतवासाः चतुर्बाहुः शङ्खादिधरः भगवान् आदिपूरुषः हरिः प्रादुरभूत् ॥४॥ तमिति ॥ सहसैव स्वनेत्रगोचरं तं भगवन्तं वीक्ष्य प्रीत्या विह्वला व्याकुला सती अदितिरुत्थाय सादरं यथा भवति तथा कायेन दण्डवद्भुवि ननाम ॥ ५ ॥ सेति ॥ ततश्च आनन्दजातैर्जलैरश्रुभिराकुले ईक्षणे यस्याः सेत्यर्थः । पुलकैरुत्थितरोमभिराकुला व्याप्ता आकृतिर्देहो यस्याः सा तस्य भगवतो दर्शनेन योऽत्युत्सवस्तेन गात्रे शरीरे वेपथुः कम्पो यस्याः सा अदितिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्थाय बद्धाञ्जलिः सत्येव स्थिता केवलं तमीडितुं स्तोतुं पुनर्नोत्सेहे न शशाक किन्तु तूष्णीमेव बभूव ॥६॥ प्रीत्येति ॥ हे कुरूद्वह ततश्च किञ्चिल्लब्धावकाशा सा देवी अदितिः प्रीत्या शनैर्गद्गदया स्खलिताक्षरया गिरा हरिं तुष्टाव । तथा सा रमापतिं यज्ञपतिं जगत्पतिं हरिं चक्षुषा पिबतीव स्वान्तः प्रवेशयन्तीव। नुमभाव आर्षः । उद्वीक्षती बभूव तुष्टाव पिबतीवेत्यादिक्रियाभेदात्सेति द्विरुक्तिर्न दोषः ॥ ७ ॥ यज्ञेशेति ॥ हे यज्ञेश हे यज्ञरूप पुरुष हे अच्युत हे तीर्थपाद तीर्थानि गङ्गादीनि पादे यस्य तीर्थरूपं सर्वपापनिवर्तकं श्रवः कीर्तिर्यस्य श्रवणमात्रेण मङ्गलं शुभादृष्टं यस्मात्तथाभूतं नामधेयं यस्य आपन्नानां शरणागतानां लोकानां वृजिनस्य दुःखस्योपशमाय निवृत्तये उदय आविर्भावो यस्य स हे आद्य हे ईश हे भगवन् यस्त्वं दीनानां मादृशानां नाथः पालकः स्वाम्यस्यतो नोऽस्माकं शं सुखं कृधि सम्पादय । " सुशृणु " इत्यादिना हेर्धिश्छान्दसः विकरणलुक् च ॥८॥ विश्वायेति ॥ विश्वाय विश्वरूपाय विश्वस्य भवनमुत्पत्तिः स्थितिः पालनं संयमः उपसंहारश्च यस्मात्तस्मै स्वैरं स्वेच्छयैव न तु जीववत्कर्मवश्यतया गृहीताः

प्रीत्या शनैर्गद्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ॥ उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिम् ॥ ७ ॥ अदितिरुवाच ॥ यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमङ्गलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि दीननाथः ॥ ८ ॥ विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ॥ स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥ आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाः सकलयोगगुणास्त्रिवर्गः ॥ ज्ञानं च केवलमनन्त भवन्ति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥ १० ॥ श्रीशुक उवाच ॥ अदित्यैवं स्तुतो राजन् भगवान् पुष्करेक्षणः ॥ क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥ ११ ॥ श्रीभगवानुवाच ॥ देवमातर्भवत्या मे विज्ञातं चिरकाङ्क्षितम् ॥ यत् सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १२ ॥

पुरुशक्तेः प्रकृतेर्गुणा येन तस्मै भूम्ने व्यापकाय स्वस्थाय अप्रच्युतस्वरूपाय शश्वदुपबृंहितो नित्योर्जितः यः पूर्णबोधः तेन व्यापादितं निरस्तमात्मनि तमः अज्ञानं येन तस्मै हरये ते तुभ्यं नमः ॥९॥ आयुरिति ॥ हे अनन्त तुष्टात् प्रसन्नात् त्वत्तः परं द्विपरार्धकालपरिमितमायुः अभीष्टं बलं पराक्रमः सौन्दर्यादियुक्तं वपुः शरीरं अतुल्या लक्ष्मीः धनादिसम्पत् द्यौश्च स्वर्गः । समासे द्यो इति पाठः । भूश्च रसा अधस्तना लोकाश्च सकला योगगुणा अणिमादयः धर्मार्थकामरूपस्त्रिवर्गश्च केवलम् अपरोक्षं चेति पदार्थाः सुलभा भवन्ति । सपत्नानां शत्रूणां जयादिराशीः संपत्सुलभा भवतीति किमु वक्तव्यम् ॥ १० ॥ अदित्येति ॥ हे राजन् हे भारत एवमदित्या संस्तुतः पुष्करेक्षणः सर्वभूतानां क्षेत्रज्ञः अन्तर्यामी भगवान् इति होवाच ॥ ११ ॥ देवमातरिति ॥ हे देवमातः सपत्नैः शत्रुभिर्दैत्यैर्हृता श्रीः संपद्येषां तेषां स्वधामतः स्वर्गात् च्यावितानां विवासितानां स्वपुत्राणां देवानां यच्चिरकाङ्क्षितं स्वर्गलाभादि तदेव भवत्याः चिरकालं काङ्क्षितं तन्मे मया विज्ञातम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिति ॥ दुष्टो मदो येषां तान् असुरर्षभान् समरे युद्धे विनिर्जित्य प्रतिलब्धो जयः श्रीश्च यैस्तैः पुत्रैः सहोपासितुमेकत्र स्थातुमिच्छसि ॥ १३ ॥ इन्द्रेति ॥ इन्द्रो ज्येष्ठो येषु तैः स्वतनयैर्युधि हतानां विद्विषां स्वशत्रूणां स्त्रियः आसाद्य मृतभर्तृसमीपमागत्य दुःखिताः रुदन्तीश्च । नुमार्षः । द्रष्टुमिच्छसि॥ १४ ॥आत्मजानिति॥ प्रत्याहृतं प्रत्यानीतं यशः श्रीश्च यैस्तान् अत एव सुसमृद्धान् नाकपृष्ठं स्वर्गमधिष्ठाय क्रीडतः आत्मजान् स्वतनयांस्त्वं द्रष्टुमिच्छसि ॥ १५ ॥ प्राय इति ॥ हे देवि ते त्वच्छत्रवः अधुना प्रायो झटिति अपारणीयाः अजेया इति मे मतिः निश्चयः। यद् यस्मात्ते अनुकूला ईश्वराः समर्था ये विप्रास्तैर्गुप्ता रक्षिताः अतस्तत्र तेषु कुतो विक्रमः पराक्रमः सुखं न ददाति न दास्यति सुखहेतुर्न भविष्यतीत्यर्थः । समर्थेनापि मया स्वो ब्राह्मणमहिमाऽपि रक्षणीयः ॥ १६ ॥ अथेति ॥ यद्यप्येवमथापि ते त्वया व्रतचर्यया सन्तोषितस्य मे मम उपायस्तवैश्वर्यादिप्राप्त्युपायः कश्चिच्चिन्त्यो विचिन्तनीय एव यतः श्रद्धानुरूपमिच्छानुसारेण फलस्य हेतुकत्वात् उत्तमकारणत्वात् ममार्चनं मदाराधनमन्यथा गन्तुं विफली-

तान् विनिर्जित्य समरे दुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥ १३ ॥ इन्द्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषाम् ॥ स्त्रियो रुदन्तीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥ १४ ॥ आत्मजान् सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः॥नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥ १५ ॥ प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः ॥ यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥ १६ ॥ अथाप्युपायो मम देवि चिन्त्यः सन्तोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गन्तुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥ १७ ॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः॥स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्ताऽस्मि मारीचतपस्यधिष्ठितः॥१८॥उपधाव पतिं भद्रे प्रजापतिमकल्मषम्॥मां च भावयती पत्यावेवंरूपमवस्थितम्॥१९॥नैतत्परस्मा आख्येयं पृष्टयाऽपि कथंचन॥सर्वं सम्पद्यते देवि देवगुह्यं सुसंवृतम्॥२०॥

श्रीशुक उवाच॥एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत॥अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभो॥उपाधावत् पतिं भक्त्या परया कृतकृत्यवत्२१॥

भवितुं नार्हति ॥ १७ ॥ त्वयेति ॥ अहं च त्वया अपत्यगुप्तये स्वपुत्ररक्षणाय अनुगुणं यथोचितं पयोव्रतेनार्चितः सम्यगीडितः स्तुतश्चातो मारीचस्य कश्यपस्य तपसि तपोजनिते तेजस्यवस्थितः सन् स्वांशेन तव पुत्रत्वमुपेत्याङ्गीकृत्य ते तव सुतान् गोप्ताऽस्मि गोपायिष्यामि ॥ १८ ॥ उपेति ॥ हे भद्रे पत्यावेवंरूपमवस्थितं मां भावयती चिन्तयन्ती सती । नुमभाव आर्षः । प्रजापतिमकल्मषं तपसा शुद्धं पतिं कश्यपमुपधाव अनुवर्तस्व ततो गर्भं धारयेत्यर्थः ॥ १९ ॥ नेति ॥ अन्येन पृष्टयाऽपि त्वयैतन्मदुक्तं कथंचिदप्यन्यस्मै नाख्येयं न कथनीयम् । तत्र हेतुमाह । हे देवि देवानां गुह्यं रहस्यं कार्यं सर्वं सुसंवृतं गुप्तं सदेव संपद्यते सिद्ध्यति॥२०॥एतावदिति सार्द्धम्॥एतावदेवोक्त्वा भगवांस्तत्र तस्मिन्नेव स्थाने अन्तरधीयत अन्तर्हितवान् । " धीङ् धारणे " दिवादिः । अदितिस्तु प्रभोः हरेर्दुर्लभमात्मनि स्वास्मिन् जन्म लब्ध्वा तल्लाभं निश्चित्य आत्मानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतकृत्यवन्मन्यमाना परया भक्त्या पतिमुपाधावत् अन्ववर्त्तत ॥ २१ ॥ स इति ॥ अवितथेक्षणः सर्वज्ञः स वै कश्यपस्तत् तदा समाधिलक्षणेन योगेनोपायेन आत्मनि स्वस्मिन् प्रविष्टं हरेरंशमबुध्यत ज्ञातवान् ॥२२॥ स इति ॥ हे राजन् समाहितमनाः स कश्यपस्तपसा निमित्तेनात्मनि चिरकालं संभृतं धृतं वीर्यं तस्यामदित्यामाधत्त मनसा गर्भस्थापनमचिन्तयत् न तु वीर्यद्वारा । यथा अनिलो वायुः सर्वत्र समोऽपि दारुणि संघर्षेणाग्निं तद्दाहकमाधत्ते तथा स्वयं पुत्रेषु समोऽपि दैत्यक्षपणं वीर्यमाधत्तेति यथैवाग्निरनिलदार्वंशो न भवति तथैव भगवद्देहोऽपि कश्यपादित्यंशो न भवतीति शुक्रशोणितसम्बन्धो निरस्तः॥२३॥अदितेरिति ॥ अदितेर्गर्भे धिष्ठितम् अधिष्ठाय स्थितम् । अलोप आर्षः । सनातनं स्वकारणभूतं भगवन्तं विज्ञाय हिरण्यगर्भो ब्रह्मा गुह्यनामभिस्तदसाधारणगुणप्रतिपादकैर्नामभिः समीडे तुष्टावेत्यर्थः । आमभाव आर्षः ॥२४॥ जयेति ॥ उरु बहुधा गीयत इति हे उरुगाय उरुक्रम महापराक्रम । स्पष्टमन्यत् ॥ २५ ॥ नम इति ॥ अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति नाम तस्या गर्भाय पुत्राय नमः । वेदा गर्भे

स वै समाधियोगेन कश्यपस्तदबुद्ध्यत ॥ प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ॥ २२ ॥ सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतम् ॥ समाहितमना राजन् दारुण्यग्निं यथाऽनिलः ॥ २३ ॥ अदितेर्धिष्ठितं गर्भं भगवन्तं सनातनम् ॥ हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥ २४ ॥ ब्रह्मोवाच ॥ जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते ॥ नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः ॥ २५ ॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे ॥ त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥ २६ ॥ त्वमादिरन्तो भुवनस्य मध्यमनन्तशक्तिं पुरुषं यमाहुः ॥ कालो भवानाक्षिपतीश विश्वं स्रोतो यथाऽन्तः पतितं गभीरम् ॥ २७ ॥ त्वं वै प्रजानां स्थिरजङ्गमानां प्रजापतीनामसि संभविष्णुः ॥ दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु ॥ २८ ॥ इति श्रीभा० महापुराणे अष्टमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

यस्य तस्मै वेधसे त्रयो लोकाः प्रलये नाभ्यां यस्य तस्मै त्रयाणां लोकानां पृष्ठे उपरि स्थिताय शिपयः पशुतुल्याः जीवास्तेष्वन्तर्यामितया प्रविष्टाय विष्णवे व्यापिने नमः ॥ २६ ॥ त्वमिति ॥ भुवनस्य विश्वस्य आदिरुपादानमन्तः प्रलयावधिर्मध्यं वर्तमानं स्वरूपं च त्वमेव यं त्वां वेदाः अनन्तशक्तिं पुरुषाख्यमाहुः । हे ईश कालरूपः सन् भवानेव विश्वमाक्षिपति आकर्षति । तत्र दृष्टान्तमाह । स्रोत इति । गम्भीरं स्रोतो नदीप्रवाहो यथा स्वान्तः पतितं तृणादिकमाक्षिपति तथेत्यर्थः ॥ २७ ॥ त्वमिति ॥ स्थिरजङ्गमानां प्रजानामस्मदादीनां प्रजापतीनां च त्वमेव सम्भविष्णुरुत्पादनशीलोऽसि अतो हे देव दिवश्च्युतानां स्वर्गाद् भ्रष्टानां दिवौकसां देवानां परायणं परमाश्रयः त्वमेवासि । तत्र दृष्टान्तमाह । नौरिवेति । अप्सु मज्जतो जनस्य नौरिव अतस्तान्स्वर्गे स्थापयेत्याशयः ॥ २८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य टीकां सप्तदशे व्यधात् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशे वामनः सत्क्रतो बलिमखं ययौ ॥ वरान्वृणिवति तेनोक्तं श्लोकास्तत्रार्द्धयुग्मदाः ॥ उवाचद्वितयं नन्दवह्नयः स्युरनुष्टुभः ॥ १८ ॥ इत्थमिति ॥ इत्थं विरिञ्चेन ब्रह्मणा स्तुतं कर्म देवकार्यलक्षणं वीर्यं प्रभावश्च यस्य सः अमृतभूः मोक्षदाता मृत्युजन्मशून्यो वा भगवानदित्यां प्रादुर्बभूव । चत्वारो भुजाः यस्य सः शङ्खगदाब्जचक्राणि सन्त्यस्येति । अर्श आद्यच् । तथा पिशङ्गे पीते वाससी यस्य सः । समस्तपाठे स चासौ पिशङ्गवासाश्च नलिने इव आयते दीर्घे चेक्षणे यस्य सः ॥ १ ॥ श्यामेति ॥ श्यामश्चासाववदातो निर्मलश्च सः झषराजो मकरस्तदाकारयोः कुण्डलयोस्त्विषा दीप्त्या उल्लसन्ती श्रीः शोभा यस्य तादृग् वदनाम्बुजं यस्य सः पुमान् पुरुषविग्रहः श्रीवत्सो रोमचिह्नविशेषो वक्षसि यस्य सः वलयैरङ्गदैश्च सहोल्लसन्ति किरीटादीनि यस्य सः प्रादुर्बभूवेत्यनुषङ्गः ॥ २ ॥ मधुव्रतेति ॥ मधुव्रतानां व्रातेन सङ्घेन विघुष्टया नादितया स्वया असाधारणया श्रीमत्या वनमालया विराजितः कण्ठे निविष्टः धृतः कौस्तुभो मणिर्येन सः स्वरोचिषा स्वकान्त्या प्रजापतेः कश्यपस्य वेश्मगतं तमः विनाशयन् अपनुदन् हरिः प्रादुर्बभूवेत्यनुषङ्गः ॥३॥ दिश इति ॥ तदा दिशः सलिलानि आशया जनानामन्तःकरणानि च प्रसेदुः प्रसन्नानि निर्मलानि जातानीत्यर्थः । अत एव प्रजाः सर्वे प्राणिनः

श्रीशुक उवाच॥इत्थं विरिञ्चस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् ॥ चतुर्भुजः शङ्खगदाब्जचक्रः पिशङ्गवासा नलिनायतेक्षणः॥१॥श्यामावदातो झषराजकुण्डलत्विषोल्लसच्छ्रीवदनाम्बुजः पुमान् ॥ श्रीवत्सवक्षा वलयाङ्गदोल्लसत्किरीटकाञ्चीगुणचारुनूपुरः ॥२॥ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः ॥ प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन् कण्ठनिविष्टकौस्तुभः ॥३॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः ॥ द्यौरन्तरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥ ४ ॥ श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः॥सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम्॥५॥द्वादश्यां सविता तिष्ठन् मध्यंदिनगतो नृप॥विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥६॥

सदाचाराः प्रहृष्टा जाताः ऋतवः प्रावृडादयः गुणान्विताः पुष्पफलादिस्वगुणयुक्ता जाताः। तथा द्युप्रभृतयः संजहृषुर्हर्षयुक्ता बभूवुः । तत्र द्युप्रभृतीनां लोकानां हर्षस्तत्रत्यानां प्राणिनां हर्षेण समृद्ध्या वा उपचर्यते । अग्निजिह्वाः देवाः नगाः पर्वताः ॥४॥ श्रोणायामिति ॥ श्रवणद्वादशी भाद्रपदशुक्लद्वादशीति प्रसिद्धा तत्रापि श्रोणायां श्रवणनक्षत्रस्थे चन्द्रे सतीत्यर्थः । तत्रापि श्रवणस्य प्रथमांशे अभिजिन्नामके नक्षत्रे तच्च श्रुत्या प्रदर्शितम् अभिजिन्नामनक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणाया इति एवं विशिष्टे मुहूर्ते प्रभुर्भगवान् प्रादुर्बभूवेत्यर्थः । किं च नक्षत्राणि अश्विन्यादीनि ताराशब्देनान्याः प्रसिद्धाः आद्यपदेन सूर्यादयो ग्रहाश्च ते सर्वे तज्जन्म दक्षिणमुदारं चक्रुः । जन्ममुहूर्ते गुणावहा बभूवुः ॥५॥ द्वादश्यामिति ॥ यस्यां द्वादश्यां हरेर्जन्म विदुः सा द्वादशी विजया नाम प्रोक्ता । हे नृप तदा च स सविता सूर्यो मध्यन्दिनगतः संस्तिष्ठन् बभूवेति । यद्वाऽन्वयः । अहनि मध्यन्दिनगतः सविता यदाऽभूत् तदा जन्मेति शेषः । यस्यां द्वादश्यां जन्म विदुः सा विजया प्रोक्ता इति ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

शङ्खेति ॥ तदा शङ्खादयो मृदङ्गादयश्च नेदुः दध्वनुः । तेषां चित्रवादित्राणां चित्रतूर्याणां च तुमुलो महान् निर्घोषः शब्दोऽभवत् ॥ ७ ॥ प्रीता इति ॥ प्रीता अप्सरसः अनृत्यन् प्रीताः गन्धर्वप्रवरा जगुः प्रीता मुनिप्रभृतयो यथायोग्यं तुष्टुवुः ॥ ८ ॥ सिद्धेति ॥ सिद्धादयस्तुष्टुवुरित्यनुषङ्गः ॥ ९ ॥ गायन्त इति ॥ विबुधानुगाः गायन्तः अतिप्रशंसन्तो नृत्यन्तश्च प्रमुदिताः सन्तोऽदित्या आश्रमपदं कुसुमैः समवाकिरन् ॥ १० ॥ दृष्ट्वेति ॥ अदितिस्तं परं पुमांसं पुरुषोत्तमं निजयोगमायया स्वाचिन्त्यशक्त्या गृहीतः देहो दिव्यविग्रहो येन तं निजगर्भसंभूतं दृष्ट्वा विस्मिता सती मुदमाप प्रजापतिः कश्यपश्च तं दृष्ट्वा विस्मितः सन् जयेत्याह स्म ॥ ११ ॥ यदिति ॥ अव्यक्तचिद्रूपः हरिः भातिर्दीप्तिः विभूषणानि चायुधानि च तैर्व्यक्तं यत्तद्वपुः अधारयत् प्रकटितवांस्तेनैव वपुषा मातापित्रोः संपश्यतोरेव वामनो ह्रस्वाङ्गो बटुर्ब्रह्मचारी बभूव । यथा दिव्यगति-

शङ्खदुन्दुभयो नेदुर्मृदङ्गपणवानकाः ॥ चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥ ७ ॥ प्रीताश्चाप्सरसोऽनृत्यन् गन्धर्वप्रवरा जगुः ॥ तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ॥ ८ ॥ सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः ॥ चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥ ९ ॥ गायन्तोऽतिप्रशंसन्तो नृत्यन्तो विबुधानुगाः ॥ अदित्या आश्रमपदं कुसुमैः समवाकिरन् ॥ १० ॥ दृष्ट्वाऽदितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता ॥ गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ॥ ११ ॥ यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः ॥ बभूव तेनैव स वामनो बटुः संपश्यतोर्दिव्यगतिर्यथा नटः ॥ १२ ॥ तं बटुं वामनं दृष्ट्वा मोदमाना महर्षयः ॥ कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ॥ १३ ॥ तस्योपनीयमानस्य सावित्रीं सविताऽब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥ १४ ॥ ददौ कृष्णाजिनं भूमिर्दण्डं सोमो वनस्पतिः ॥ कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥ १५ ॥ कमण्डलुं वेदगर्भः कुशान्सप्तर्षयो ददुः ॥ अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥ १६ ॥

रद्भुतकौशलः नटस्तथेति । यद्वा । विभूषणायुधैः सह यद्वपुः भाति वर्तमाननिर्देशेन वपुषः नित्यत्वम् । यत् अव्यक्तचित्स्वरूपं च तदेव व्यक्तं कृपया व्यक्तीकृतमधारयत् ॥ १२ ॥ तमिति ॥ तं भगवन्तं वामनं बटुं दृष्ट्वा मोदमानाः संहृष्यन्तः महर्षयः प्रजापतिं कश्यपं पुरस्कृत्य कर्माणि जातकर्मादीनि कारयामासुः ॥ १३ ॥ तस्येति ॥ तस्य वामनस्योपनीयमानस्योपनयनेन संस्क्रियमाणस्य सविता सूर्यः सावित्रीमब्रवीत् उपदिष्टवान् । बृहस्पत्यादयश्च ब्रह्मसूत्रादीनि ददुः । ब्रह्मसूत्रं यज्ञोपवीतं मेखलां कटिसूत्रम् ॥ १४ ॥ ददाविति॥ ददावित्यादौ त्रिकेऽन्वयः स्पष्टः । कृष्णाजिनं मृगचर्म भूमिस्तदभिमानिनी देवता वनस्पतिर्वनानां वृक्षाणां पतिः सोमश्चन्द्रः कौपीनं तदाच्छादनं च माता अदितिः द्यौस्तदभिमानिनी देवता जगतः पतेः पालकस्य वामनस्य ॥ १५ ॥ कमण्डलुमिति ॥ वेदगर्भो ब्रह्मा हे महाराज अव्ययात्मनः अपक्षयादिरहितस्वरूपस्य ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्मा इति ॥ इत्येवमुपनीताय तस्मै वामनाय यक्षराट् कुबेरः पात्रिकां भिक्षापात्रमदात् । साक्षाद्भगवती अम्बिका जगतो माता सती उमा भवानी भिक्षामदात् ॥ १७ ॥ स इति ॥ एवं संभावितः सत्कृतः मारिषः श्रेष्ठः स वामनो बटुः ब्रह्मवर्चसेन स्वतेजसा ब्रह्मर्षिगणसंजुष्टां सभामतिक्रम्यारोचत ॥ १८ ॥ समिति ॥ स द्विजो वामनः समिद्धं प्रज्वलितमाहितं स्थापितमुपनयनाग्निं परिसमूहनमृजुं कृत्वा परिस्तीर्य प्रसार्य सम्यगभ्यर्च्य समिद्भिर्हवनसाधनैरजुहोत् ॥१९॥ श्रुत्वेति ॥ अखिलस्य प्रपञ्चस्य सारेण भारेण अखिलेन बलेन वा अखिलैः सारभूतैः विवेकधैर्यपाण्डित्यादिभिर्वा संभृतः पूर्णः वामनो भृगूणां भृगुभिरुपकल्पितैः कारितैरश्वमेधैर्यजन्तमूर्जितं धनादिभिः समृद्धं बलिं श्रुत्वा ततः स्वस्थानात् स्वभारेण गां पृथिवीं पदे पदे सन्नमयन् नम्रां कुर्वंस्तत्र बलिसमीपं जगाम ॥ २० ॥ तमिति ॥ नर्मदाया नद्या उत्तरे तटे भृगुकच्छसंज्ञके क्षेत्रे

तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् ॥ भिक्षां भगवती साक्षादुमाऽदादम्बिका सती ॥ १७ ॥ स ब्रह्मवर्चसेनैवं सभां संभावितो बटुः ॥ ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः ॥ १८ ॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनम् ॥ परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद्द्विजः ॥ १९ ॥ श्रुत्वाऽश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ॥ जगाम तत्राखिलसारसंभृतो भारेण गां सन्नमयन् पदे पदे ॥ २० ॥ तं नर्मदाया-स्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञके ॥ प्रवर्तयन्तो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविम् ॥ २१ ॥ ते ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप ॥ सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः ॥ २२ ॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान् स वामनः ॥ सदण्डछत्रं सजलं कमण्डलुं विवेश बिभ्रद्धयमेधवाटम् ॥२३॥ मौञ्ज्या मेखलया वीतमुपवीताजिनो-त्तरम् ॥ जटिलं वामनं विप्रं मायामाणवकं हरिम् ॥ २४ ॥ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः ॥ प्रत्यगृह्णन् समुत्थाय संक्षिप्ता-स्तस्य तेजसा ॥ २५ ॥

क्रतूत्तमं यज्ञश्रेष्ठं प्रवर्तयन्तो ये बलेः ऋत्विजो भृगवस्ते तं वामनमारात् समीपे एवोदितं रविं सूर्यमिवातितेजस्विनं व्यचक्षत अपश्यन् ॥ २१ ॥ त इति ॥ हे नृप वामनस्य तेजसा हतत्विषः अपहृततेजस्कास्ते ऋत्विजो यजमानो बलिश्च सदस्याः सभास्थाश्च सर्वे क्रतोर्यज्ञस्य दिदृक्षया किल किं सूर्यः आयाति उत वा अथवा विभावसुरग्निरायाति अथवा सनत्कुमार आयातीति व्यतर्कयन्निति शेषः ॥ २२ ॥ इत्थमिति ॥ इत्थं स शिष्येषु तृतीयार्थे सप्तमी । सशिष्यैः बलिसहितैर्भृगुभिरनेकधा वितर्क्यमाणः स भगवान् वामनः सदण्डछत्रं जलपूर्णं कमण्डलुं च बिभ्रत् हयमेधवाटं यज्ञशालां विवेश ॥ २३ ॥ मौञ्ज्येति युग्मम् ॥ मौञ्ज्या मुञ्जनिर्मितया मेखलया वीतं निबद्धकटिम् उपवीतवद्धृतमजिनमेवोत्तरमुत्तरीयं यस्य तं जटिलं जटाधारिणं मायामाणवकं धृतब्रह्मचारिविग्रहं वामनं ह्रस्वाङ्गं विप्रं हरिं यज्ञवाटे प्रविष्टं वीक्ष्य तस्य वामनस्य तेजसा

CC-0. In Public Domain. Digitization by eGangotri

सङ्क्षिप्ताः संकुचितप्रकाशास्ते सशिष्या अग्निभिश्च सहिता भृगवः समुत्थाय प्रत्यगृह्णन् यथोचितविनयनमस्कारासनार्घ्यादिना सत्कृतवन्तः ॥२४॥ २५ ॥ यजमान इति ॥ यजमानो बलिः दर्शनीयं मनोरमं सुन्दरं रूपस्य अनुरूपा अवयवाः करचरणादयो यस्य तं दृष्ट्वा इति शेषः । प्रमुदितः संस्तस्मा आसनमाहरत् समर्पितवान् ॥ २६ ॥ स्वेति ॥ अथ बलिः मुक्तसङ्गानां सर्वतो विरक्तानां योगिनां मनोरमं मनः सुक्रीडन्तमित्यर्थः । व्यस्तो वा पाठः । तं स्वागतेन स्वागतमिति वचनेनाभिनन्द्य तस्य भगवतः पादाववनिज्य प्रक्षाल्य तमर्चयामास ॥ २७ ॥ तदिति ॥ सर्वस्य कुलस्य कल्मषापहं पापहरं सुमङ्गलं च तस्य पादयोः शौचं प्रक्षालनजलं धर्मवित्स बलिः मूर्ध्नि अदधात् यत्पादशौचं देवानां देवो ब्रह्मा चन्द्रमौलिर्गिरिशो महादेवश्च परया भक्त्या परमप्रेम्णा मूर्ध्ना दधार ॥२८॥ स्वागतमिति ॥ हे ब्रह्मन् हे आर्य ते तव स्वागतं सुष्ठ्वागमनमतस्तुभ्यं नमः । तव किं कार्यं करवाम त्वा त्वां साक्षात्प्रत्यक्षं वपुर्धरं मूर्तिमत् ब्रह्मर्षीणां तपोऽहं मन्ये ॥ २९ ॥ अद्येति ॥ अतो यद्यस्मात् भवान् गृहान् आगतः अतः अद्य

यजमानः प्रमुदितो दर्शनीयं मनोरमम् ॥ रूपानुरूपावयवं तस्मा आसनमाहरत् ॥ २६ ॥ स्वागतेनाभिनन्द्याथ पादौ भगवतो बलिः ॥ अवनिज्यार्चयामास मुक्तसङ्गं मनोरमम् ॥ २७ ॥ तत्पादशौचं कुलकल्मषापहं स धर्मविद् मूर्ध्न्यदधात् सुमङ्गलम् ॥ यद्देवदेवो गिरिशश्चन्द्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥ २८ ॥ बलिरुवाच ॥ स्वागतं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते ॥ ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरम् ॥ २९ ॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् ॥ अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ॥ ३० ॥ अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः ॥ हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥ ३१ ॥ यद्यद्बटो वाञ्छसि तत् प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये ॥ गां काञ्चनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्र कन्याम् ॥ ग्रामान् समृद्धान् तुरगान् गजान् वा रथांस्तथाऽर्हत्तम संप्रतीच्छ ॥ ३२ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे बलिवामनसंवादेऽष्टादशोऽध्यायः ॥ १८ ॥

नोऽस्माकं पितरस्तृप्ता उद्धृता जाताः । तथा नोऽस्माकं कुलं पुत्रपौत्रभृत्यादिवर्गः अद्य पावितं पवित्रं जातं तथा अयमनुष्ठीयमानः क्रतुश्चाद्यैव स्विष्टः यथावदनुष्ठितो जातः ॥ ३० ॥ अद्येति ॥ हे द्विजात्मज त्वच्चरणावनेजनैस्तव चरणप्रक्षालनोपयुक्तैर्वार्भिर्जलैर्हतमंहः पापं यस्य तस्य मे ममाग्नयोऽद्य यथाविधि शास्त्रविहितप्रकारेण सुष्ठु हुता जाताः तथा इयं प्रदृश्यमाना मम भूश्च तनुभिः सूक्ष्मैस्तव पदैः पुनीता पाविता । भ्रा आर्षः ॥ ३१ ॥ यदिति सार्द्धम् ॥ हे बटो विप्रसुत त्वामर्थिनं याचितारमनुतर्कये आलक्षये अतो यद्यद्वाञ्छसि कामयसे तन्मे मत्तः प्रतीच्छ प्रतिगृहाण । अतः हे विप्र हे अर्हत्तम गां धेनुं काञ्चनं सुवर्णं गुणवत् यथेष्टभोगोपकरणवत् धाम गृहं मृष्टं स्वादु अन्नपेयं उत अथवा विप्रकन्यादिकान् संप्रतीच्छ गृहाण ॥३२॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य टीकामष्टादशे व्यधात् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊनविंशेऽर्थितां भूमिं बलौ दित्सति विष्णवे ॥ तं शुक्रोऽवारयत्तत्र श्लोकाः सार्द्धास्त्रि[४३] सिन्धवः॥षड्डुवाचेति पादाढ्याः [४४]पञ्चवेदा अनुष्टुभः॥१९॥इतीति॥ इत्युक्तविधं धर्मयुक्तं ससूनृतं यथार्थं मधुरं च वैरोचनेर्विरोचनपुत्रस्य बलेर्वाक्यं निशम्य प्रीतः सन् भगवांस्तं प्रतिनन्द्य प्रतिश्लाघ्येदं वक्ष्यमाणमब्रवीत् ॥१॥ दातुः स्तुतिः स्वयंतुष्टिरित्यादिप्रस्तुतोचितं वक्तव्यमिति भिक्षूंस्तु शिक्षयन्नाह वामनः—वच इति ॥ हे जनदेव एतद्वचः सूनृतं सत्यं धर्मयुक्तं च तव कुलस्योचितं योग्यं च तव यशस्करं यशोविस्तारकं च यस्य तवैहिकव्यवहारे भृगवः शुक्रादयः प्रमाणं साम्पराये परलोकसाधने च कुलवृद्धः प्रशान्तः पितामहः प्रह्लादः प्रमाणम् ॥ २ ॥ न हीति ॥ अस्मिन् त्वदीये कुले यो द्विजातये याचकाय प्रत्याख्याता न ददामि इति वक्ता इति निःसत्वलक्षणम् यो वा प्रतिश्रुत्य दास्यामीति प्रतिज्ञाय अदाता वा शब्दात्प्रतिश्रुत्य प्रत्याख्याता च इति निःसत्वविशेषस्य कृपणस्य लक्षणम् । यः अदाता स कश्चिदपि निस्सत्वः कृपणश्च न जातो न भावी नास्ति च ॥३॥ नेति ॥ तीर्थे दानावसरे अर्थिना विप्रादिनाऽर्थिता याचिताः सन्तो ये तु

श्रीशुक उवाच ॥ इति वैरोचनेर्वाक्यं धर्मयुक्तं ससूनृतम् ॥ निशम्य भगवान् प्रीतः प्रतिनन्द्येदमब्रवीत ॥१॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करम् ॥ यस्य प्रमाणं भृगवः साम्पराये पितामहः कुलवृद्धः प्रशान्तः॥२॥न ह्येतस्मिन् कुले कश्चिन्निःसत्त्वः कृपणः पुमान् ॥ प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये ॥ ३ ॥ न सन्ति तीर्थे युधि चार्थिनाऽर्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः ॥ युष्मत्कुले यद्यशसाऽमलेन प्रह्लाद उद्भाति यथोडुपः खे ॥ ४ ॥ यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम् ॥ प्रतिवीरं दिग्विजये नाविन्दत गदायुधः ॥ ५ ॥ यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतम् ॥ नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥ ६ ॥ निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा ॥ हन्तुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ॥७॥ तमायान्तं समालोक्य शूलपाणिं कृतान्तवत् ॥ चिन्तयामास कालज्ञो विष्णुर्मायाविनां वरः ॥८॥

पराङ्मुखाः प्रत्याख्यानकर्तारो भवेयुः तथा युधि युद्धावसरे क्षत्रियादिनाऽर्थिताः सन्तो ये युद्धात् पराङ्मुखास्तथाभूता अमनस्विनः धैर्यरहिता भवेयुः ते नृपा युष्मत्कुले न सन्ति यत् यस्मिन् कुले अमलेन शुद्धेन यशसा प्रह्लाद उद्भाति चकास्ति । तत्र दृष्टान्तमाह । खे आकाशे उडुपश्चन्द्रो यथा भाति तथेति॥४॥ यत इति ॥ यतो यस्मिन् कुले जातो हिरण्याक्षो गदैवायुधं यस्य स एकः असहाय एव दिग्विजये निमित्ते इमां कृत्स्नां महीं चरन् पर्यटन् प्रतिपक्षं वीरं न लेभे ॥ ५ ॥ यमिति ॥ क्ष्मोद्धारे भूम्या उद्धरणसमये आगतं यं हिरण्याक्षं विष्णुर्धृतवराहरूपः कृच्छ्रेणातिप्रयासेन विनिर्जित्य हत्वापि तस्य भूरि अधिकं वीर्यमनुस्मरन्नात्मानं जयिनं न मेने ॥ ६ ॥ निशम्येति ॥ तस्य हिरण्याक्षस्य वधं निशम्य तस्य भ्राता हिरण्यकशिपुः पुरा क्रुद्धः सन् भ्रातृहणं भ्रातुर्हन्तारं विष्णुं हन्तुं मारयितुं ज्ञातुमिति वास्तवोऽर्थः । हरेर्विष्णोर्निलयं स्थानं जगाम ॥ ७ ॥ तमिति ॥ शूलपाणिं कृतान्तवत् मृत्युमिव तं हिरण्यकशिपुमायान्तं विलोक्य स मायाविनां वरः श्रेष्ठः कालज्ञस्तत्कालकर्तव्याभिज्ञो विष्णुश्चिन्तयामास ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत इति ॥ अहं यतो यतो यत्र यत्र गमिष्यामि तत्र सर्वत्रासौ हिरण्यकशिपुरप्यागमिष्यत्येव । यथा प्राणिनो यत्र यत्र गच्छन्ति तत्र तेषां मृत्युरपि यथा गच्छति तद्वत् अतोऽहं पराग्दशः परान् शत्रून् अञ्चन्ती प्राप्नुवती दृग् यस्य । पक्षे बहिर्दृष्टेरस्य हृदयमेव प्रवेक्ष्यामि अन्तर्यामित्वात् अतः तत्रस्थं मां न द्रक्ष्यति अधुनैवास्य वधसमयो नास्तीति वास्तवाशयः ॥ ९ ॥ एवमिति ॥ हे असुरेन्द्र बले स विष्णुरेवं निश्चित्य विविग्नं भयेन कम्पितं चेतो यस्य सः अनुकम्पितचित्त इति वास्तवोऽर्थः । तच्छ्वासानिलेऽन्तर्हितः अन्तर्द्धाय स्थितः सूक्ष्मो देहो यस्य तथाभूतः सन् आधावतो वेगेनागच्छतो रिपोः शरीरं स्तस्य रिपोः प्राणरन्ध्रेण नासामार्गेण निर्विविशे । तङ्गार्षः ॥ १० ॥ स इति ॥ स हिरण्यकशिपुः शून्यं विष्णुरहितं तस्य विष्णोर्निकेतं स्थानं परिमृश्य सर्वतोऽन्विष्य तमपश्यमानः । शानजार्षः। कुपितः सन् ननाद । जितं मयेत्युद्घोषितवानित्यर्थः। ततश्च पुनः क्ष्मां पृथिवीं दिवं दिशः खमन्तरिक्षं विवरान् अतलादीन् समुद्रांश्च विचिन्वन्नपि स वीरो विष्णुं न ददर्श ॥ ११ ॥ अपश्यन्निति ॥ तमपश्यन् इति वक्ष्यमाणं ह निश्चितमुवाच । तदेवाह मयेदं सर्वमपि जगदन्विष्टमन्वेषितं तथापि यतो मे भ्रातृहा विष्णुः क्वापि न दृश्यते अतः पुमान् यतोऽयं प्राप्य पुनर्नावर्तते तं मृत्युमेवासौ नूनं गतः

यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव ॥ अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥ ९ ॥ एवं स निश्चित्य रिपोः शरीरमाधावतो
निर्विविशेऽसुरेन्द्र ॥ श्वासानिलान्तर्हितसूक्ष्मदेहस्तत्प्राणरन्ध्रेण विविग्नचेताः ॥ १० ॥ स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो
ननाद ॥ क्ष्मां द्यां दिशः खं विवरान्समुद्रान्विष्णुं विचिन्वन्न ददर्श वीरः ॥ ११ ॥ अपश्यन्निति होवाच मयाऽन्विष्टमिदं जगत् ॥ भ्रातृहा
मे गतो नूनं यतो नावर्तते पुमान् ॥ १२ ॥ वैरानुबन्ध एतावानामृत्योरिह देहिनाम् ॥ अज्ञानप्रभवो मन्युरहंमानोपबृंहितः ॥ १३ ॥
पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः ॥ स्वमायुर्द्विजलिङ्गेभ्यो देवेभ्योऽदात् स याचितः ॥ १४ ॥

प्राप्तः मद्भयादेव मृत इत्यर्थः । तद्ब्रह्मैव स्वरूपभूतं प्राप्तः नित्यमुक्तत्वात् इति वास्तवोऽर्थः ॥ १२ ॥ वैरेति ॥ इह देहिनां देहे निगूढाभिमानवतां शूराणां वैरानुबन्ध एतावानामृत्योः मृत्युपर्यन्तं भवति तथाऽहं मानेनोपबृंहितो मन्युश्च भवत्येव यतोऽज्ञानप्रभवः अज्ञाननिवृत्तेः प्राक् पौरुषत्यागो मान्द्यमेवेत्यर्थः । यद्वा । आमृत्योः मृत्युपर्यन्तो विष्णुपर्यन्तश्च शौर्यहेतुकः वैरानुबन्ध एतावानेव यावान् हिरण्यकशिपोः अभूत् इह लोकेऽन्येषां तु मन्युरेव न तु वैरानुबन्धः यतः स मन्युरज्ञानप्रभवः क्रोधविशेष एव तथा अहं शूर इति मानोऽभिमानमात्रं शौर्याभावेऽपि शौर्यमननं तेनोपबृंहितश्च देहिनां मन्युः सत्यो वैरानुबन्धस्तु हिरण्यकशिपोरेव दृष्टः इति ॥ १३ ॥ पितेति ॥ द्विजवत्सलः प्रह्लादस्य पुत्रस्ते तव पिता विरोचनस्तु तद्विद्वान् द्विजरूपधारिणो मद्वैरिणो देवा एवैते नतु द्विजा इति जानन्नपि देवैर्याचितः सन् स द्विजलिङ्गेभ्यो ब्राह्मणवेषधारिभ्यो देवेभ्यः स्वकीयमायुरदात् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवानिति ॥ गृहमेधिभिर्गृहस्थैर्ब्राह्मणैः शुक्रादिभिः पूर्वजैर्विरोचनादिभिः उद्दामा विपुला कीर्तिर्येषां तैरन्यैश्च शूरैराचरिताननुष्ठितान् धर्मान् भवानास्थितः अनुष्ठितवान् इत्यर्थः ॥ १५ ॥ तस्मादिति ॥ हे दैत्येन्द्र तस्मात् एतादृशकुले प्रसूतत्वात् धर्मिष्ठत्वाच्च वरदश्रेष्ठात्त्वत्तोऽहमीषत् मम पदा पादेन संमितानि परिच्छिन्नानि त्रीणि पदानि त्रिभिः क्रमैरित्युपरिष्टादुक्तेस्त्रीन् पादविक्षेपान् व्याप्या या मही तां वृणे याचे तावत्यैव मह्या मम पर्णशाला भविष्यति वृत्तिस्त्वाजगरी मम भूयस्येवेति भावो बलिं बोधयितुमिष्टः । मम पदा सम्मितानीति त्रिविक्रमपदद्वयस्य एकशेषवृत्तावन्तर्भावः । न चानृतवादः । तत्रापि स्वपदत्वानपायात् ॥ १६ ॥ नेति ॥ हे राजन् वदान्यात् उदारात् जगदीश्वरात् बहुदाने समर्थादपि ते त्वत्तोऽन्यत् पादविक्रमत्रयपरिमितभूमेरधिकं न कामये नेच्छामि यतः यावदर्थस्य उपयुक्तार्थस्यैव परिग्रहो यस्य स विद्वान् एनः प्रतिग्रहनिमित्तं पापं नैव प्राप्नोति अन्यस्तु तत् प्राप्नोति इत्यर्थः । वस्तुतः यावन्तस्तवार्थास्तेषां सर्वेषामेव परिग्रहो यस्य स मल्लक्षणो विद्वान् एनः कष्टं न प्राप्नोति ॥ १७ ॥ राज्ञः प्रश्ने ईश्वरोऽपि कुतोऽयाचत लब्धार्थोऽपि कुतो बबन्धेत्यंशद्वयम् । तत्राद्यस्योत्तरमुक्त्वा बलेर्बन्धनप्रश्नोत्तरत्वेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह—अहो इति त्रिभिः ॥ हे ब्राह्मण-

भवानाचरितान्धर्मानास्थितो गृहमेधिभिः ॥ ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः ॥ १५ ॥ तस्मात्त्वत्तो महीमीषद्वृणेऽहं वरदर्षभात् ॥
पदानि त्रीणि दैत्येन्द्र संमितानि पदा मम ॥१६॥ नान्यत्ते कामये राजन्वदान्याज्जगदीश्वरात् ॥ नैनः प्राप्नोति वै विद्वान्यावदर्थपरिग्रहः ॥१७॥
बलिरुवाच ॥ अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः ॥ त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा ॥ १८ ॥ मां वचोभिः समाराध्य लोकानामेकमीश्वरम् ॥ पदत्रयं वृणीते योऽबुद्धिमान् द्वीपदाशुषम् ॥ १९ ॥ न पुमान् मामुपव्रज्य भूयो याचितुमर्हति ॥ तस्माद्वृत्तिकरीं भूमिं बटो कामं प्रतीच्छ मे ॥ २० ॥ श्रीभगवानुवाच ॥ यावन्तो विषयाः प्रेष्ठास्त्रिलोक्यामजितेन्द्रियम् ॥ न शक्नुवन्ति ते सर्वे प्रतिपूरयितुं नृप ॥ २१ ॥

दायाद ब्राह्मणपुत्र तव वाचस्तु वृद्धानां संमताः प्रशस्ततयाभिमताः । अथापि त्वं बालः अत एव बालिशमतिः बालिशानामज्ञानामिव मतिर्यस्य सः अत एव स्वार्थं स्वप्रयोजनं प्रति तु यथावत्त्वमबुधः अज्ञ एव । वस्तुतस्तु बाल इव अबालिशमतिश्चेति च्छेदः । स्वार्थं प्रत्यबुध इति च भक्तानामेव स्वार्थं बुध्यसे न स्वार्थमिति ॥ १८ ॥ मामिति ॥ लोकानां त्रयाणामेकमद्वितीयमीश्वरं स्वामिनमत एव द्वीपदाशुषं जम्ब्वादेर्द्वीपस्य दातारं दातुं समर्थम् । "दाश्वान् साह्वान्" इति च्छान्दसो निपातः।तत्राभत्वेऽपि सम्प्रसारणं च । मां वचोभिः समाराध्य प्रसाद्य यो भवान् पदत्रयं स्वपदविक्रमत्रयपरिमितं भूभागं वृणीते स अबुद्धिमान् वस्तुतः बुद्धिमानित्येव च्छेदः ॥ १९ ॥ नेति ॥ यस्मात् पुमान् मामुपव्रज्य याचित्वा भूयोऽन्यं याचितुं नार्हति तस्मात् हे बटो कामं यथेच्छं वृत्तिकरीं जीविकासंपादनयोग्यां विपुलां भूमिं मे मत्तः प्रतीच्छ गृहाण अत एव यथेच्छं पादप्रसारणेनाक्रमिष्यति ॥ २० ॥ सन्तुष्टोऽहमेतावतैव पूर्णः असन्तुष्टं तु त्वमपि पूरयितुं न शक्ष्यसत्याह—यावन्त इति ॥ हे नृप त्रिलोक्यां यावन्तः प्रेष्ठाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रियाः विषया देशा भोग्यपदार्था वा ते सर्वेऽपि प्रतिगृहीताः सन्तः अजितेन्द्रियं पुरुषं पूरयितुमलं बुद्धिं कारयितुं न शक्नुवन्ति ॥ २१ ॥ त्रिभिरिति ॥ त्रिभिः क्रमैः पदैः पदविक्रमत्रयपरिमितभूभागेन यद्यसन्तुष्टस्तदा सप्तानां द्वीपवराणामिच्छया हेतुना नववर्षसमेतेन द्वीपेनापि न पूर्यते एकद्वीपलाभे सप्तद्वीपलाभेच्छा भवतीत्यर्थः ॥ २२ ॥ सप्तेति ॥ वैन्यः पृथुः गयश्चादिर्येषां ते नृपाः सप्तानां द्वीपानामधिपतयोऽपि अर्थैः कामैश्च हेतुभिर्या तृष्णा तस्या अन्तं न गताः इति नोऽस्माभिः श्रुतम् ॥ २३ ॥ यदृच्छयेति ॥ अतो यो यदृच्छया प्रारब्धवशादुपपन्नेन प्राप्तेनान्नादिना सन्तुष्टः ससुखं यथा स्यात्तथा वर्तते । यस्त्वजितात्मा असन्तुष्टश्च स उपसादितैः प्राप्तैस्त्रिभिर्लोकैरपि न सुखं वर्तते ॥ २४ ॥ पुंस इति ॥ अर्थकामयोर्विषययोर्योऽसन्तोषः स पुंसः संसृतेः जन्ममरणादेः हेतुः । यश्च यदृच्छयोपपन्नेन सन्तोषः स तस्य मुक्तये स्मृतः ॥ २५ ॥ यदृच्छेति ॥ यदृच्छया लाभेन तुष्टस्य विप्रस्य तेजो वर्धते असन्तोषात्तु तत् तेजः प्रशाम्यति विनश्यति । यथाम्भसा आशुशुक्षणिरग्निः प्रशाम्यति तद्वदिति ॥ २६ ॥

त्रिभिः क्रमैरसन्तुष्टो द्वीपेनापि न पूर्यते ॥ नववर्षसमेतेन सप्तद्वीपवरेच्छया ॥ २२ ॥ सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः ॥ अर्थकामैर्गता नान्तं तृष्णाया इति नः श्रुतम् ॥ २३ ॥ यदृच्छयोपपन्नेन सन्तुष्टो वर्तते सुखम् ॥ नासन्तुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ ॥ २४ ॥ पुंसोऽयं संसृतेर्हेतुरसन्तोषोऽर्थकामयोः ॥ यदृच्छयोपपन्नेन सन्तोषो मुक्तये स्मृतः ॥ २५ ॥ यदृच्छलाभतुष्टस्य तेजो विप्रस्य वर्धते ॥ तत्प्रशाम्यत्यसन्तोषादम्भसेवाशुशुक्षणिः ॥ २६ ॥ तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात् ॥ एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम् ॥२७॥ श्रीशुक उवाच ॥ इत्युक्तः स हसन्नाह वाञ्छातः प्रतिगृह्यताम् ॥ वामनाय महीं दातुं जग्राह जलभाजनम् ॥ २८ ॥ विष्णवे क्ष्मां प्रदास्यन्तमुशना असुरेश्वरम् ॥ जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदां वरः ॥ २९ ॥ शुक्राचार्य उवाच ॥ एष वैरोचने साक्षाद्भगवान् विष्णुरव्ययः ॥ कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥ ३० ॥

तस्मादिति ॥ तस्मात्सन्तोषस्यैव श्रेयस्करत्वात् वरदर्षभादपि त्वत्तः त्रीणि पदान्येव पदविक्रमपरिमितां भूमिमेव वृणे एतावतैव एतावद्भूमिलाभेनैवाहं संसिद्धः कृतार्थः एतावतैव सर्वस्वापहारसिद्धेरिति गूढोऽभिप्रायः । यतः यावत्प्रयोजनमेव वित्तं सुखदं भवति अधिकस्य चिन्ताशोकक्लेशादिहेतुत्वात् ॥ २७ ॥ इतीति ॥ भगवतैवमुक्तः स बलिर्हसन् सन् वाञ्छातः प्रतिगृह्य तामित्याह एवमुक्त्वा च वामनाय महीं दातुं जलभाजनं जग्राह सङ्कल्पार्थं जलपात्रं गृहीतवान् ॥ २८ ॥ विष्णव इति ॥ तदा विष्णवे वामनाय क्ष्मां भूमिं प्रदास्यन्तं दातुमुद्यन्तं शिष्यमसुरेन्द्रं बलिं विष्णोश्चिकीर्षितं सर्वस्वापहारलक्षणं जानन् विदां ज्ञानिनां वरः उशनाः शुक्रः प्राह स्म । विदांवर इत्यनेन वामनस्य परोक्ष एवाह स्म ॥ २९ ॥ एष इति ॥ हे वैरोचने एष वामनरूपः देवानां कार्यसाधकः सन् कश्यपाददितेः जातः अव्ययः साक्षाद्भगवान् विष्णुरेव ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीति ॥ स्वानर्थमजानता त्वया यदेतस्मै प्रतिश्रुतं भूमिदानं प्रतिज्ञातं तदहं साधु समीचीनं न मन्ये अतः दैत्यानां महाननयः अन्यायः क्लेशः उपगतः प्राप्तः ॥ ३१ ॥ एष इति ॥ मायया माणवकः ब्रह्मचारिरूप एष हरिस्ते तव स्थानादिकमाच्छिद्यापहृत्य शक्राय दास्यति ऐश्वर्यं स्वर्गराज्यादिकं श्रियं धनादिसम्पत्तिं ततं व्याप्तं यशः ॥ ३२ ॥ त्रिभिरिति ॥ विश्वकायो विश्वरूपो भूत्वा त्रिभिः क्रमैः पादविन्यासैरिमान् त्रीन् लोकान् क्रमिष्यति परिच्छिद्य ग्रहीष्यतीत्यर्थः । हे मूढ सर्वस्वं विष्णवे दत्त्वा कथं वर्तिष्यसे जीविष्यसि ॥ ३३ ॥ क्रमत इति ॥ एकेन महता पदा पादन्यासेन गां भूमिं क्रमतः दीर्घाभाव आर्षः । द्वितीयेन महता पादन्यासेन दिवं स्वर्गं क्रमतः महता कायेन खमन्तरिक्षं च क्रमतः विभोर्विश्वरूपस्य भगवतः तार्तीयस्य तृतीयपादन्यासस्य स्वार्थेऽण् । कुतः गतिः स्थानम् । यद्वा । तार्तीयस्य तृतीयसंबन्धिनः तृतीयपदक्रम्यवस्तुनः कुतो हेतोर्गतिः प्राप्तिस्ते भविष्यतीत्यर्थः । एवमपि प्रतिश्रुतं न संपादितं भवतीत्याशयः ॥ ३४ ॥ प्रत्युत परलोकहानिः स्यादित्याह—निष्ठामिति ॥ यो भवान्

प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ॥ न साधु मन्ये दैत्यानां महानुपगतोऽनयः ॥ ३१ ॥ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतम् ॥ दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ॥ ३२ ॥ त्रिभिः क्रमैरिमाँल्लोकान् विश्वकायः क्रमिष्यति॥ सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्यसे कथम् ॥ ३३ ॥ क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः ॥ खं च कायेन महता तार्तीयस्य कुतो गतिः ॥ ३४ ॥ निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् ॥ प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ॥ ३५ ॥ न तद्दानं प्रशंसन्ति येन वृत्तिर्विपद्यते ॥ दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ॥ ३६ ॥ धर्माय यशसेऽर्थाय कामाय स्वजनाय च ॥ पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥ ३७ ॥ अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम ॥ सत्यमोमिति यत् प्रोक्तं यन्नेत्याहानृतं हि तत् ॥ ३८ ॥

प्रतिश्रुतं प्रतिपादयितुं पूरयितुमनीशः असमर्थस्तस्येत्यर्थः । प्रतिश्रुतमप्रदातुरप्रदानशीलस्य ते तव निष्ठां स्थितिं नरक एव मन्ये ॥ ३५ ॥ न तद्दानमिति ॥ येन दानेन वृत्तिर्जीविका विपद्यते विनश्यति तद्दानमार्याः न प्रशंसन्ति यतो लोके वृत्तिमतः जीविकावत एव पुंस संबन्धीनि दानादीनि भवन्ति नान्यस्येत्यर्थः । तपश्चित्तैकाग्र्यं कर्म पूर्तम् ॥ ३६ ॥ धर्मायेति ॥ अतो विद्वान् धर्माय यशसे अर्थाय धनादिवृद्ध्युपयोगिव्यापाराय कामाय कामभोगाय स्वजनपरितोषाय चेत्येवं पञ्चधा वित्तं धनं विभजन्निहास्मिन् लोके अमुत्र परलोके च मोदते सुखमनुभवतीत्यर्थः ॥ ३७ ॥ अत्रेति ॥ अत्रापि सत्यानृतव्यवस्थायामपि बह्वृचैर्यद्गीतं तन्मे मत्तः कथयतो हे असुरसत्तम त्वं शृणु । बह्वृचश्रुत्या हि प्रथममोमिति सत्यं नेत्यनृतमित्यादिना सत्यानृतयोर्लक्षणपूर्वकस्तुतिनिन्दाभ्यां सत्यं विहितमनृतं च निषिद्धम् । तदनन्तरं च पराग् वा एतद्रिक्तमक्षरमित्यादिना सत्ये दोषान् अनृते च गुणानुक्त्वा तस्मात्काल एव दद्यात्काले न दद्यात् तत्सत्यानृते मिथुनीकरोतीत्युपसंहारेण वृत्तिसङ्कटादिष्वनृतमप्यनुज्ञातं तमिमं श्रुत्यर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शयन्नाह । ओमित्यङ्गीकारेण यत्प्रोक्तं तत्सत्यम् । नेति यदाह । तद्धि तदेवानृतम् ॥३८॥ तत्तु सत्यमीषदनृतं विना न सिद्ध्यतीत्याह—सत्यमिति ॥ आत्मा देहस्तद्रूपवृक्षस्य जीवतः सत्यं पुष्पफलं विद्यात् जानीयात् । जीवत इत्यत्र गीयत इति पाठे तु श्रुतिकर्तृकं गानं ज्ञेयम् । वृक्षे देहे अजीवति तत्पुष्पं फलं च न स्यात् । देहश्चानृतेन रक्षणीय इत्याह । अनृतं त्वात्मनो देहस्य मूलमिति ॥ ३९ ॥ तत्स्फुटयति—तदिति ॥ तत् तत्र यथा उन्मूलः उत्पाटितमूलो वृक्षः शुष्यति अचिरादेवोद्वर्तते पतति च एवमेव नष्टमनृतं यस्य सः आत्मा देहः सर्वस्वदानात्सद्य एव शुष्येदत्र संशयो नास्ति । तथा च श्रुतिः । “ ओमिति सत्यन्नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं सहेश्वरो यशस्वी कल्याणकीर्तिर्भविता पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्त्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते तस्मादनृतं न वदेद्दयेत त्वेतेन ” इति । वाच इति वाचो देहनिर्वाहाधीनत्वाद्वागुपलक्षितदेहस्येत्यर्थः । मूलं यथा आविष्कृतमेव शुष्यति न तु गुप्तं तस्माद्धेतोरनृतं न वदेत् किंतु एतेन अनृतेन दयेत सङ्कटेष्वात्मानं रक्षेदिति श्रुत्यर्थः ॥ ४० ॥ परागिति ॥ दास्यामीत्यङ्गीकारार्थकम् ओमिति तत् पराक् अर्थं गृहीत्वा

सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते ॥ वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ॥ ३९ ॥ तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् ॥ एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥ ४० ॥ पराग्रिक्तमपूर्णं वा अक्षरं यत् तदोमिति ॥ यत्किञ्चिदोमिति ब्रूयात् तेन रिच्येत वै पुमान् ॥ ४१ ॥ भिक्षवे सर्वमोङ्कुर्वन्नालं कामेन चात्मने ॥ अथैतत्पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ॥ ४२ ॥ सर्वं नेत्यनृतं ब्रूयात्स दुष्कीर्तिः श्वसन्मृतः ॥ ४३ ॥

परा दूरमञ्चतीति पराक् अत एव रिक्तमर्थशून्यमपूर्णमपूर्तिकरं च यतः अर्थिने पुमान् यदा यत्किञ्चिदपि ओमिति दास्यामीति ब्रूयात् तदा तेनार्थेन रिच्येत न्यूनो रहितो भवेदेव ॥ ४१ ॥ भिक्षव इति ॥ भिक्षवे सर्वमों कुर्वन् दास्यामीत्यङ्गीकुर्वन् आत्मने स्वस्मै कामेन भोगेन अलं पर्याप्तो न भवति तस्य भोगो न सिद्ध्यति । तथा च श्रुतिः । “पराग् वा एतद्रिक्तमक्षरं यदेतदोम्” इति । यत् किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमों कुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यादिति । अथ तस्मात् यत् नेत्यनृतं वचस्तदेतत् पूर्णमर्थव्ययाभावात् अभ्यात्मं चेति चकारान्वयः । आत्मनोऽभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मम् । यो हि नित्यं मम किञ्चिदपि नास्ति सीदामीति ब्रूते स हि तेनानृतेन परेषामर्थानाकर्षतीति प्रसिद्धम् ॥४२॥ सर्वमिति अर्द्धम् ॥ यः सर्वं न किंचिदपि न दास्यामीत्यनृतं ब्रूयात् दुष्टा कीर्तिर्यस्य तादृशः सन् श्वसन् जीवन्नपि मृत एव । तथा च श्रुतिः ।“ स यत्सर्वं नेति ब्रूयात्पापिकाऽस्य कीर्तिर्जायेत सैनं तत्रैव हन्यात् तस्मात्काले एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोतीति ” इति शास्त्रानुसारेण कदाचित् देयं कदाचित्किञ्चिन्न देयं सर्वस्वं तु नैव देयमिति सिद्धम् ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतो वृत्तिसङ्कटादिष्वनृतं न दोषायेत्याह--स्त्रीष्विति॥ स्त्रीषु प्रोत्साहनेन वशीकारार्थं नर्मणि यत्र क्वापि परिहासे विवाहे वरादिस्तुतौ वृत्त्यर्थे जीविकार्थे स्वस्य प्राणसङ्कटे प्राप्ते तत्परिहारार्थं गवां ब्राह्मणानां च हितार्थे हिंसायां यस्य कस्यचिदपि प्राप्तायां च इत्यष्टसु अनृतं मिथ्याभाषणं जुगुप्सितं निन्दितं न स्यात् ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो निरमादष्टमस्योनविंशके ॥१९॥ विंशे ज्ञात्वापि कपटं विष्णवेऽदान्महीं बलिः ॥ असावतीव ववृधे तत्र श्लोकाश्चतुर्गुणाः ॥ त्रीण्युवाचेति पादोना नेत्रवेदाअनुष्टुभः ॥२०॥ बलिरिति ॥ हे राजन् कुलाचार्येण शुक्रेणैवं भाषितः उक्तो गृहपतिर्यजमानो बलिः क्षणं तूष्णीमवहितः विचारपरो भूत्वा तं गुरुमुवाच ॥ १ ॥ सत्यमिति ॥ कर्हिचिदपि योऽर्थादिकं न बाधेत सोऽयं गृहमेधिनां धर्म इति भगवता त्वया सत्यं प्रोक्तम् ॥ २ ॥ स इति ॥ प्राह्लादिः प्रह्लादपौत्रः सः सर्वलोकेऽत्युदारतया प्रसिद्धोऽहं ददामीति प्रतिश्रुत्य वृत्तिलोभेन कितवो यथा वञ्चक इव द्विजं कथं प्रत्याचक्षे न दास्यामीति वदामि ॥ ३ ॥ न हीति ॥ असत्यात् अनृतभाषणात् पर

स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे ॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥ ४४ ॥ इति श्रीभा०महा०अष्ट०वामनप्रादुर्भाव एकोनविंशोऽध्यायः॥१९॥श्रीशुक उवाच ॥ बलिरेवं गृहपतिः कुलाचार्येण भाषितः ॥ तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम्॥१॥ बलिरुवाच ॥ सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनाम् ॥ अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥२॥ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम्॥प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ॥ ३ ॥ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियम् ॥ सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरम् ॥ ४ ॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् ॥ न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलम्भनात् ॥ ५ ॥ यद्यद्धास्यति लोकेऽस्मिन्संपरेतं धनादिकम् ॥ तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ॥ ६ ॥ श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासुभिः॥दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥७॥

उत्कृष्टोऽन्यः अधर्मो न ह्यस्ति अतः अलीकपरमनृतवादिनं नरमृते विना सर्वं मेरुमन्दरादिकं वोढुं धर्तुमलं समर्थमात्मानं मन्ये इति इयं भूः ह स्फूटमुवाच ॥ ४ ॥ नेति ॥ विप्रप्रलम्भनात् अनृतभाषणेन विप्रवञ्चनाद्यथाहं बिभेमि तथा निरयादिभ्यो न बिभेमि । अधन्यात् दारिद्र्यात् असुखार्णवात् दुःखसमुद्रात् ॥५॥ यदिति ॥ किंच यद्यत् धनादिकं तत्सर्वं कर्तृ संपरेतं मृतं पुरुषमस्मिन्नेव लोके हास्यति त्यक्ष्यति तत्किमिति जीवता स्वयमेव न देयमिति शेषः । ननु तथापि किंचिद्देयं न सर्वमित्याशङ्क्याह । येन दत्तेनार्थेन चेत् यदि विप्रो न तुष्येत्तर्हि तस्यार्थस्य त्यागे दाने किं निमित्तं किं फलं न किञ्चित् याचितादल्पस्य दाने विप्रस्य सन्तोषाभावात् तद्दानं व्यर्थमेव स्यादतस्तद्याचितं सर्वमेव देयं नतु किंचिदिति भावः। अत्र महाभक्तेनापि बलिना ज्ञात्वापि हरेः प्रणतिस्तुत्यादि न कृतं तत् शुक्रस्य असुराणां च दुःखाभावार्थमेव भावगोपनेनेति ज्ञेयम् ॥६॥ श्रेय इति ॥ साधवः विवेकिनो दध्यङ्शिबिप्रभृतयो दुस्त्यजैरसुभिः प्राणैरपि भूतानां श्रेय उपकारं कुर्वन्ति तर्हि धरादिषु को विकल्पः धरादिप्रदाने को विचार इत्यर्थः ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यैरिति॥ हे ब्रह्मन् यैर्दैत्येन्द्रैर्युद्धेष्वनिवर्तिभिरियं भूमिर्बुभुजे उपभुक्ता तेषां लोकान् भोगान् कालोऽग्रसीत् विनाशितवान् । तङभाव आर्षः । भुव्यधिगतं प्राप्तं यशः सत्कीर्तिं तु नाग्रसीत् तच्छ्रवणात् अतो धरादिदानेन कीर्तिरेव संपादनीयेत्याशयः ॥ ८ ॥ सुलभा इति ॥ हे विप्रर्षे युधि अनिवृत्ताः सन्तो ये तनुं देहं त्यजन्तीति तथा ते हि लोके सुलभा बहवः । ये तु तीर्थे सत्पात्रे आयाते श्रद्धया धनं त्यजन्तीति तथा ते तथा सुलभा न सन्ति अतो दुष्करो धनत्याग एव मया कार्य इति भावः ॥ ९ ॥ मनस्विन इति ॥ अर्थिनां यादृशतादृशानामपि कामोपनयेन कामपूरणेन यत् दुर्गतिर्दारिद्र्येण दैन्यं तत्कारुणिकस्य दयालोर्मनस्विनो दानशूरस्य शोभनं यशो धर्मादिहेतुत्वादृद्रमेव ब्रह्मविदां भवादृशां कामपूरणे न प्राप्तं दैन्यं शोभनं भवतीति कुतः किं पुनर्वक्तव्यं ततस्तस्माद्धेतोरस्य बटोर्ब्राह्मणस्य वाञ्छितं ददामि ॥ १० ॥ यजन्तीति ॥ हे मुने आम्नायविधानकोविदाः वेदोक्तयज्ञाद्यनुष्ठानकुशला भवन्तः आदृताः सादराः सन्तः यज्ञैः ससोमैः क्रतुभिरसोमकैश्च यागैर्यं विष्णुं यजन्ति आराधयन्ति स एष विष्णुर्मम वरदो वा परः शत्रुर्वास्तु सर्वथा एतदीप्सितां क्षितिममुष्मै दास्याम्येव ॥ ११ ॥ यदिति ॥ अनागसं निष्कपटं सर्वस्वसमर्पणेन निरपराधं च मां यद्यप्यसौ अधर्मेण वामनं रूपं

यैरियं बुभुजे ब्रह्मन्दैत्येन्द्रैरनिवर्तिभिः ॥ तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि ॥८॥ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥९॥ मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः ॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो बटोरस्य ददामि वाञ्छितम् ॥१०॥ यजन्ति यज्ञक्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः ॥ स एष विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥११॥ यद्यप्यसावधर्मेण मां बध्नीयादनागसम् ॥ तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥१२॥ एष वा उत्तमश्लोको न जिहासति यद्यशः ॥ हत्वा मैनां हरेद्युद्धे शयीत निहतो मया ॥१३॥ श्रीशुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ॥ शशाप दैवप्रहितः सत्यसन्धं मनस्विनम् ॥१४॥

प्रदर्श्य तत्परिमितपादत्रयभूमिं याचित्वा पुनर्विश्वरूपमाविष्कृत्य तत्पदा भूमिक्रमणलक्षणच्छलेन बध्नीयात् तथापि भीतं ब्रह्मतनुमेनं रिपुं शत्रुमपि न हिंसिष्ये न हनिष्यामि । तङार्षः ॥ १२ ॥ एष इति ॥ यत् यद्येष उत्तमश्लोकः सत्कीर्तिर्विष्णुरेव तर्हि यशः कीर्तिं न जिहासति त्यक्तुं नेच्छति न विनाशयिष्यतीत्यर्थः । सर्वस्वं गृहीत्वापि मह्यं दास्यत्येवेति भावः । प्रत्याख्याने तु याञ्चाभङ्गपराभवमसहमानेनानेन तर्हि युद्धं देहीति प्रार्थिते मयि चोमित्युक्तवति युद्धे मा मां हत्वा एनां भूमिं हरेत् तथा च धर्महानिः प्राणहानिर्यशोहानिश्चाधिका स्याद्व । यदि मां हन्तुमसमर्थो विष्णोरन्यो वा तदा मया हतो युद्धे शयीत यद्वा शयीतेति काकुः। विष्णुर्मया युद्धे निहतः शयीत न शयीतेत्यर्थः। अवध्यत्वादजितत्वाच्चेति निहतः सम्यग्ज्ञातो मम चित्ते शयीतेति वास्तवोऽर्थः । अतो दानमेव योग्यम् ॥ १३ ॥ एवमिति ॥ एवमुक्तप्रकारेण सत्यसन्धं सत्यप्रतिज्ञं मनस्विनमुदारचित्तम् अतः गुरुवचने अश्रद्धा सञ्जातास्येति अश्रद्धितम् । इतच्प्रत्ययान्तः । अनादेशकरं स्वाज्ञोल्लङ्घिनं शिष्यं दैवप्रहितः भगवत्प्रेरितः गुरुः शुक्रः शशाप ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृढमिति ॥ दृढं यथा स्यात्तथात्मानं मन्यत इति तथा । वस्तुतस्तु अज्ञ एव । अत एव स्तब्धः अनम्रः अत एव मच्छासनातिगः ममाज्ञामतिक्रान्तवानसि । यस्त्वमेवंभूतः । सः अस्माकं गुरूणामुपेक्षया अचिरात् शीघ्रमेव श्रियः त्रैलोक्याधिपत्याद् भ्रश्यसे भ्रष्टो भविष्यसीति । वस्तुतस्तु पण्डितमानी पण्डितैर्मान्यः न विद्यते ज्ञो यस्मात् सः अस्मदुपेक्षया अस्मत्कर्मकया उपेक्षयापि भयाभावात् स्तब्धः अनम्रः मच्छासनमतिक्रम्य गच्छसि विष्णुमतः श्रियो न चिरादपि भ्रश्यसि । नञर्थे अकारः । नित्यां सम्पदं प्राप्स्यसि ॥ १५ ॥ एवमिति ॥ एवं स्वगुरुणा शप्तोऽपि महान् धैर्यादिगुणः बलिः सत्यात् स्वप्रतिश्रुतात् न चलितः किंतु वामनमर्चित्वा उदकदानपूर्वकं तस्मै एनां भूमिं ददावेव ॥१६॥ विन्ध्यावलिरिति ॥ जालकमालिनीति जालकं मुक्तादिरत्नविशेष इति स्वामिपादाः । मल्लिकादिकोरका इत्येके । तन्मालावती बलेः पत्नी विन्ध्यावलिस्तदा आगत्य अवनेजनीनां पादप्रक्षालनार्थानामपामद्भिः भृतं पूर्णं हैमं कलशमानिन्ये आनीतवती ॥ १७ ॥ यजमान इति ॥ यजमानो बलिस्तस्य श्रीवामनस्य श्रीमत्पादयुगं मुदा

दृढं पण्डितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया ॥ मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥ १५ ॥ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ॥ वामनाय ददावेनामर्चित्वोदकपूर्वकम् ॥ १६ ॥ विन्ध्यावलिस्तदाऽऽगत्य पत्नी जालकमालिनी ॥ आनिन्ये कलशं हैममवनेजन्यपां भृतम् ॥ १७ ॥ यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा ॥ अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥ १८ ॥ तदासुरेन्द्रं दिवि देवतागणा गन्धर्वविद्याधरसिद्धचारणाः ॥ तत्कर्म सर्वेऽपि गृणन्त आर्जवं प्रसूनवर्षैर्ववृषुर्मुदाऽन्विताः ॥ १९ ॥ नेदुर्मुहुर्दुन्दुभयः सहस्रशो गन्धर्वकिम्पूरुषकिन्नरा जगुः ॥ मनस्विनाऽनेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयम् ॥ २० ॥ तद्वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम् ॥ भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥ २१ ॥

हर्षेण अवनिज्य प्रक्षाल्य विश्वस्य पावनीः पापनिवर्तनेन पवित्रकर्त्रीस्तदपः पादप्रक्षालनजलानि समासान्ताभाव आर्षः । मूर्ध्नि अवहत् दधार ॥ १८ ॥ तदेति ॥ तदा दिवि स्थिता निर्भया देवगणाः गन्धर्वादयश्च सर्वे अपिशब्दात् शत्रुभूता अपि मुदान्विताः हर्षपूर्णाः सन्तस्तस्य बलेः कर्मभूमिदानमार्जवमकौटिल्यं सत्येव स्थानं च गृणन्तः प्रशंसन्तः असुरेन्द्रं बलिं प्रसूनवर्षैर्ववृषुः आच्छादितवन्तः ॥ १९ ॥ नेदुरिति ॥ तदा च तैर्वादिताः सहस्रशो दुन्दुभयो मुहुर्नेदुः । गन्धर्वादयो जगुश्च किं जगुस्तदाह । मनस्विना विवेकधैर्यादिपूर्णमनस्केनानेन बलिनाऽन्यैर्दुष्करं कर्तुमशक्यं कर्म कृतम् । तदेवाहुः । यत् विद्वान् देवपक्षपाती त्रिपदव्याजेन जगत्त्रयं ग्रहीष्यतीति जानन्नपि रिपवे जगत्त्रयमदादिति ॥ २० ॥ तदिति ॥ वाञ्छातः प्रतिगृह्यतामिति बलिनोक्तत्वाल्लोकत्रयस्य वाञ्छितत्वात्तत्प्रतिग्रहीकर्तुम् अनन्तस्य हरेः गुणत्रयात्मकं गुणत्रयकार्यं जगत् आत्मनि स्वस्मिन् यस्य तत् वामनं रूपमद्भुतं यथा स्यात्तथा अवर्धत अत एव भूः खमित्यादयो यत् यस्मिन् आसत स्थिताः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काये इति ॥ तदा ऋत्विगादिसहितो बलिर्महत्यो विभूतयः शक्तयो यस्य तस्य भगवतः गुणात्मके गुणत्रयकार्यजगदाश्रये त्रिगुणं गुणत्रयकार्यं भूतानि पृथिव्यादीनि इन्द्रियाणि वागादीनि अर्थाः शब्दादयः । आशयश्चतुर्विधान्तःकरणं जीवश्च तैर्युक्तम् एतद्विश्वं ददर्श ॥ २२ ॥ रसामिति ॥ इन्द्रस्य सेना इव सेना यस्य स इन्द्रपदे स्थितो बलिः पुरुषस्य विश्वमूर्तेः विश्वरूपस्य भगवतः । अङ्घ्रितले रसां रसातलादिलोकसप्तकमचष्ट अपश्यदिति सर्वत्र द्वितीयान्तेन संबन्धः । अथ तथा पादयोर्महीं जङ्घयोर्महीध्रान् पर्वतान् । जानुनि इत्येकवचनं जात्यभिप्रायकम् । पतत्रिणः पक्षिणः ऊर्वोः मारुतं गणं वायुसङ्घम् अचष्ट ॥ २३ ॥ सन्ध्यामिति ॥ विभोर्महतस्तस्य वाससि वस्त्रे सन्ध्यामैक्षत् । तङभाव आर्षः । गुह्ये गुदे आत्मा स्वयं मुख्यो येषां तानसुरानैक्षत । जघने प्रजापतीन् मरीच्यादीन् नाभ्यां नभः अन्तरिक्षलोकं कुक्षिषु सप्त सिन्धून् । कुक्षिषु इति बहुवचनं तत्र स्थानभेदसूचनार्थम् । तदधिष्ठेयानां समुद्राणां पृथक्स्थितित्वात् । उरुक्रमस्य विश्वरूपस्य उरसि ऋक्षमालां नक्षत्रसमूहमैक्षत ॥ २४ ॥ हृदीति ॥ अङ्ग

काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत्॥ददर्श विश्वं त्रिगुणं गुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम् ॥२२॥ रसामचष्टाङ्घ्रितलेऽथ
पादयोर्महीं महीध्रान्पुरुषस्य जङ्घयोः ॥ पतत्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिन्द्रसेनः ॥२३॥ सन्ध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजापतीञ्जघने
आत्ममुख्यान्॥नाभ्यां नभः कुक्षिषु सप्तसिन्धूनुरुक्रमस्योरसि चर्क्षमालाम्॥२४॥ हृद्यङ्ग धर्मं स्तनयोर्मुरारेर्ऋतं च सत्यं च मनस्यथेन्दुम् ॥ श्रियं
च वक्षस्यरविन्दहस्तां कण्ठे च सामानि समस्तरेफान्॥२५॥इन्द्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि ॥ केशेषु मेघाञ्छ्वसनं नासिका-
यामक्ष्णोश्च सूर्यं वदने च वह्निम् ॥२६॥ वाण्यां च छन्दांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ॥ अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटे-
ऽधर एव लोभम्॥२७॥स्पर्शे च कामं नृप रेतसोऽम्भः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ॥ छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजातयश्च ॥ २८ ॥

हे राजन् मुरारेर्हृदि धर्मं स्तनयोः ऋतं सूनृतवाचं सत्यं समदर्शनं च अथ मनसि इन्दुं चन्द्रमसं वक्षसि अरविन्दं कमलं हस्ते यस्यास्तां श्रियं लक्ष्मीं कण्ठे सामानि समस्तान् रेफान् रेफोपलक्षितान् अकारादिवर्णांश्च ऐक्षत ॥२५॥ इन्द्रेति ॥ भुजेषु इन्द्रः प्रधानो येषां तान् अमरान् देवान् कर्णयोः ककुभो दिशः मूर्ध्नि द्यौः द्याम् । "सुपां सुलुक्" इति अमः सुः । केशेषु मेघान् नासिकायां नासिकयोः श्वसनं प्राणवायुं बाह्यवायोर्मारुतमित्युक्तत्वात् । स्पष्टमन्यत्॥२६॥वाण्यामिति॥ वाण्यां च छन्दांसि वेदान् रसे रसने जलेशं वरुणं भ्रुवोर्निषेधं निवर्तकं शास्त्रं विधिं प्रवर्तकं शास्त्रं च परस्य पुंसः भगवतः पक्ष्मसु अहः दिनं रात्रिं च ललाटे मन्युं क्रोधम् अधरे अधरोष्ठे एव लोभम् ऐक्षत ॥ २७ ॥ स्पर्श इति ॥ हे नृप स्पर्शे त्वगिन्द्रिये कामं रेतसो रेतसि अम्भो जलं पृष्ठे त्वधर्मं पापं क्रमणेषु पादन्यासेषु यज्ञं छायासु मृत्युं हसिते च मायां मोहकशक्तिं तनूरुहेषु लोमसु ओषधिजातयः औषधजातीः । आर्षी प्रथमा ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदीरिति ॥ नाडीषु नदीश्च नखेषु शिलाः स्थूलपाषाणान् बुद्धौ अजं ब्रह्माणं प्राणेषु इन्द्रियेषु देवगणान् पूर्वोक्तेभ्योऽन्यान् इन्द्रियाधिष्ठातॄनादित्यादीन् ऋषींश्च गात्रे इत्यादि स्पष्टम् ॥२९॥ सर्वात्मनीत्यर्द्धम् ॥ अङ्ग हे राजन् सर्वात्मनि सर्वाधारभूते भगवतीदं भुवनं निरीक्ष्य सर्वे असुराः कश्मलं भयमापुः ॥३०॥ सुदर्शनमिति द्वयम् ॥ मूर्तिमन्तः सुदर्शनादयः ईशं भगवन्तमुपतस्थुः । तङ्भाव आर्षः । तत्र असह्यं तेजो यस्य तत्सुदर्शननामकं चक्रं स्तनयित्नुवत् घोषो यस्य तच्छार्ङ्गनामकं धनुः पर्जन्यवत् घोषो यस्य सः पाञ्चजन्याख्यो जलजः शङ्खः तरस्विनी वेगवती कौमोदकी नाम्नी विष्णोर्गदा शतं चन्द्राकाराणि बुद्बुदाख्यानि यस्य तेन चर्मणा युक्तो विद्याधराख्यः असिः खड्गः अस्यैव नन्दक इति नामान्तरम् । अक्षयाः सायका ययोस्तौ तूणोत्तमौ च सुनन्दो मुख्यो येषां ते सहलोकपाला लोकपालैः सहितास्तत्पार्षदमुख्या ईशमुपतस्थुः तत्समीपे स्वस्वयोग्यस्थाने स्थितवन्तः ॥३१॥३२॥ स्फुरदिति ॥ हे राजन् स्फुरन्ति किरीटादीनि यस्य सः श्रीवत्सादिभिः आवृतः मधुव्रतानां भ्रमराणां स्रक् पंक्तिर्यस्यां तया

नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च ॥ प्राणेषु गात्रे स्थिरजङ्गमानि सर्वाणि भूतानि ददर्श वीरः ॥ २९ ॥ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरङ्ग ॥३०॥ सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ॥ पर्जन्यघोषो जलजः पाञ्चजन्यः कौमोदकी विष्णुगदा तरस्विनी ॥३१॥ विद्याधरोऽसिः शतचन्द्रयुक्तस्तूणोत्तमावक्षयसायकौ च ॥ सुनन्दमुख्या उपतस्थुरीशं पार्षदमुख्याः सहलोकपालाः ॥३२॥ स्फुरत्किरीटाङ्गदमीनकुण्डलः श्रीवत्सरत्नोत्तममेखलाम्बरैः ॥ मधुव्रतस्रग्वनमालया वृतो रराज राजन्भगवानुरुक्रमः ॥ ३३ ॥ क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ॥ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि ॥ उरुक्रमस्याङ्घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥ ३४ ॥ इति श्रीभागवते महापुराणे अष्टमस्कन्धे विश्वरूपदर्शनं नाम विंशतितमोऽध्यायः ॥ २० ॥

वनमालया चावृत उरुक्रमो भगवान् रराजेत्यन्वयः । तत्र मीनकुण्डले मकराकृतिकुण्डले श्रीवत्सो रोमावर्तविशेषः रत्नोत्तमः कौस्तुभः ॥३३॥ क्षितिमिति सार्द्धम् ॥ बलेः संबन्धिनीं क्षितिमेकेन पदा विचक्रमे नभोऽन्तरिक्षं शरीरेण दिशश्च सर्वा बाहुभिर्विचक्रमे आक्रान्तवान् द्वितीयं पदं क्रमतो विक्षिपतः । दीर्घाभाव आर्षः। त्रिविष्टपं स्वर्गं तदीयं किञ्चिन्मात्रं जातम् । यद्वा । द्वितीयं वामपादं क्रमतस्तस्य त्रिविष्टपं तदीयं प्राप्तमेवाभूदिति शेषः। तृतीयाय तृतीयपादन्यासार्थं तु तदीयं किञ्चिदणुमात्रमपि न वै नैवावशिष्टमित्यर्थः। तत्र हेतुमाह । उरुक्रमस्याङ्घ्रिः त्रिविष्टपादुपर्युपरि दूरे गच्छन् महर्जनाभ्यां तपसश्च परं सत्यं लोकं गत इति । अत्र त्रिपदमात्रभूमेः प्रतिगृहीतत्वेऽपि भुजाद्यङ्गैर्नभआदिव्याप्तिश्च नान्याग्र्या । तावद्भूमावूर्ध्वावस्थितेरप्यपेक्षितत्वादिति सन्दर्भः। नभआदीनामपि पदद्वयान्तर्भूतत्वात्पदद्वयेनैव व्याप्तिरुच्यते इति परे तदीयो नखस्तु कटाहं बिभेदेति केचित् अष्टावरणानि भित्त्वा विरजाजले प्रविष्ट इत्यन्ये ॥३४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य विंशेऽध्याये व्यधादिमाम् ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

एकविंशे पदा पूर्त्तिमुक्त्वा बध्वा बलिं हरिः ॥ तद्यशो प्रथयंस्तत्र श्लोकाः सार्द्धाः कृताग्रियः ॥ उवाचेति वचोद्वन्द्वं सप्तत्रिंशदनुष्टुभः ॥ २१ ॥ सत्यमिति सार्द्धद्वयम् ॥ हे नरदेव भगवतो नखा एवेन्दवस्तैर्हता स्वधाम्नो द्युतिर्यस्य सः अब्जभवो ब्रह्मा सत्यं सत्यलोकप्राप्तं भगवदङ्घ्रिं समीक्ष्य मरीच्यादिस्वगणैर्वृतोऽभ्यगात् संमुखमाजगाम मरीच्यादयश्चाभ्ययुः । ततश्चाब्जभवादयः सर्वे तमङ्घ्रिं ववन्दिरे इत्यन्वयः । मरीच्यादय ऋषयः बृहद्व्रताः नैष्ठिकब्रह्मचारिणो नारदादयः योगिनो ज्ञानयोगनिष्ठाः सनन्दनादयः वेदादयोऽपि मूर्तिमन्तस्तदभिमानिनो देवा ज्ञेयाः । तत्र वेदा ऋगादयः उपवेदा आयुर्वेदादयः तदङ्गानि शिक्षादीनि यमा अहिंसादयस्तदन्विता नियमाः स्नानादयः तर्को न्यायशास्त्रम् इतिहासा महाभारतादयः पुराणानि भागवतादीनि संहिताः पञ्चरात्रादयः ये चापरे योग एव समीरो वायुस्तेन दीपितं ज्ञानमेवाग्निस्तेन रन्धितं दग्धं कर्म पापरूपं कल्मषं मलं येषां ते तथाभूताः सन्तः यस्य भगवच्चरणारविन्दस्य स्मरणानुभावतः अकर्मकं काम्यकर्मभिरप्राप्यं स्वायंभुवं धाम ब्रह्मलोकं गताः ॥१॥२॥ अथेति ॥ अथ शुचि-

श्रीशुक उवाच ॥ सत्यं समीक्ष्याब्जभवो नखेन्दुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् ॥ मरीचिमिश्रा ऋषयो बृहद्व्रताः सनन्दनाद्या नरदेव योगिनः ॥ १ ॥ वेदोपवेदा नियमा यमान्वितास्तर्केतिहासाङ्गपुराणसंहिताः ॥ ये चापरे योगसमीरदीपितज्ञानाग्निना रन्धितकर्मकल्मषाः ॥ ववन्दिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकम् ॥ २ ॥ अथाङ्घ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणोदकम् ॥ समर्च्य भक्त्याऽभ्यगृणाच्छुचिश्रवा यन्नाभिपङ्केरुहसंभवः स्वयम् ॥ ३ ॥ धातुः कमण्डलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र ॥ स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥ ४ ॥ ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः ॥ सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥ ५ ॥ तोयैः समर्हणैः स्रग्भिर्दिव्यगन्धानुलेपनैः ॥ धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलाङ्कुरैः ॥ ६ ॥ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः ॥ नृत्यवादित्रगीतैश्च शङ्खदुन्दुभिनिस्वनैः ॥ ७ ॥

श्रवा विमलकीर्तिः पद्मभवो ब्रह्मा स्वयं यस्य नाभिपङ्केरुहसम्भवस्तस्य विष्णोः प्रोन्नमिताय प्रकर्षेण ऊर्ध्वं स्थितायाङ्घ्रये अर्हणोदकमर्घ्यमाहरत् समर्पितवान् । ततश्चाङ्घ्रिं सम्यगभ्यर्च्य भक्त्याभ्यगृणात् अस्तावीत् ॥ ३ ॥ धातुरिति ॥ हे नरेन्द्र तत् अर्हणतया समर्पितं धातुर्ब्रह्मणः कमण्डलुजलमुरुक्रमस्य पादयोरवनेजनेन प्रक्षालनेन निमित्तेन पवित्रतया स्वर्धुनी गङ्गाभूत् । या नभसि आकाशमार्गे पतती पतन्ती सती नुमभाव आर्षः । ध्रुवमण्डलमेर्वादिक्रमेणास्रवन्ती भगवतो विशदा विमला कीर्तिरिव लोकत्रयं निमार्ष्टि पवित्रीकरोति । पञ्चमे स्कन्धे वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहजलं गङ्गेत्युक्तम् । क्वचित्तु साक्षान्नारायण एव द्रवरूपो गङ्गा इत्यतो जलत्रितयमेव मिलितं गङ्गेति बोध्यम् ॥ ४ ॥ ब्रह्मेति त्रिकम् ॥ सङ्क्षिप्ता उपसंहृता आत्मविभूतिः स्वदेहविस्तारो येन तस्मै यथा पूर्वं वामनरूपेण स्थिताय स्वनाथाय स्वामिने लोकनाथा ब्रह्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयः सम्यगादृताः सादराः सानुगाश्च तत्रागत्य तोयादिभिर्बलिं पूजामाजह्रुः कृतवन्तः । सुरभिरिति यथायोग्यं सर्वेषां विशेषणम् । तोयैः स्नानाचमनादिजलैः समर्हणैरर्घ्यजलैः दिव्यो गन्धो येषां तैरनुलेपनैश्चन्दनादिभिः लाजा भृष्टधानाः अङ्कुरा यवदूर्वाद्यङ्कुरास्तैः तस्य वीर्यं पराक्रमः स्पष्टमन्यत् ॥ ५ ॥ ६ ॥ ७ ॥ जाम्बवानिति ॥ मनोवज्जवो वेगो यस्य सः ऋक्षाणां राजा जाम्बवांस्तु भेरीशब्दैः सह सर्वासु दिक्षु महान् उत्सवो यथा भवति तथा वामनस्य विजयमघोषयत् ॥ ८ ॥ महीमिति ॥ त्रिपदानीति व्याजमात्रं यस्यास्तया याच्ञया दीक्षितस्य दीक्षितत्वात् त्यक्तदण्डस्य स्वभर्तुर्बलेः सर्वां महीं हृतां दृष्ट्वा अत्यमर्षिणस्तदसहमाना असुराः परस्परमूचुः ॥ ९ ॥ न वा इति ॥ अयं वामनो ब्रह्मबन्धुर्ब्राह्मणविशेषो नैव भवति किंतु मायाविनां वरः विष्णुरेव द्विजरूपेण प्रतिच्छन्नः तिरोधापितरूपः सन् देवानां कार्यं चिकीर्षति ॥ १० ॥ अनेनेति ॥ याचमानेन बटुरूपिणानेन शत्रुणा बर्हिषि यज्ञे निमित्ते न्यस्तः त्यक्तो दण्डो दुष्टविषयो येन तस्य नोऽस्माकं भर्तुः सर्वस्वमपहृतम् ॥ ११ ॥ सत्येति ॥ सततं सर्वदा

जाम्बवानृक्षराजस्तु भेरीशब्दैर्मनोजवः ॥ विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥ ८ ॥ महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया ॥ ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिणः ॥ ९ ॥ न वा अयं ब्रह्मबन्धुर्विष्णुर्मायाविनां वरः ॥ द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति ॥ १० ॥ अनेन याचमानेन शत्रुणा बटुरूपिणा ॥ सर्वस्वं नो हृतं भर्तुर्न्यस्तदण्डस्य बर्हिषि ॥ ११ ॥ सत्यव्रतस्य सततं दीक्षितस्य विशेषतः ॥ नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ॥ १२ ॥ तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः ॥ इत्यायुधानि जगृहुर्बलेरनुचराऽसुराः ॥ १३ ॥ ते सर्वे वामनं हन्तुं शूलपट्टिशपाणयः ॥ अनिच्छतो बले राजन्प्राद्रवञ्जातमन्यवः ॥१४॥ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप ॥ प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥ १५ ॥ नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः ॥ कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट् ॥ १६ ॥ जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ॥ सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम् ॥ १७ ॥

सत्यं व्रतं सङ्कल्पो यस्य तस्य तत्रापि विशेषतो दीक्षितस्य यज्ञदीक्षायां स्थितस्य ब्रह्मण्यस्य सर्वप्राणिषु दयावतः । षष्ठी तृतीयार्थे । एवंभूतेनानेनानृतं भाषितुं न शक्यम् ॥ १२ ॥ तस्मादिति ॥ तस्मादस्य वामनस्य वध एव नोऽस्माकं धर्मः । हि यस्मात् भर्तुः शुश्रूषणं सेवनम् इत्येवं वदन्तो बलेरनुचराश्च ते असुराश्च ते तं हन्तुम् आयुधानि जगृहुः ॥ १३ ॥ त इति ॥ हे राजन् जातमन्यवः शूलादयः पाणिषु येषां ते सर्वे असुरा बलेरनिच्छत एव वामनं हन्तुं प्राद्रवन् प्रदुद्रुवुः ॥ १४ ॥ तानिति ॥ हे नृप तान् दितिजानां दैत्यानामनीकपान् सेनापतीन् अभिद्रवतो वामनस्याभिमुखमागच्छतो दृष्ट्वा उद्यतानि आयुधानि यैस्ते विष्णोः पार्षदाः प्रहस्य तुच्छीकृत्य प्रत्यषेधन् निवारयामासुः ॥ १५ ॥ नन्द इति युग्मम् ॥ नन्दादयः सात्वतान्ताः नागायुतस्य हस्तिदशसहस्रस्य प्राणो बलं येषां ते सर्वे आसुरीं चमूं सेनां जघ्नुः ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"अचिराद् भ्रश्यसे श्रिय" इति काव्यस्य शुक्रस्य
हन्यमानानिति ॥ बलिः पुरुषानुचरैः भगवत्पार्षदैः स्वकान् दैत्यान् हन्यमानान् दृष्ट्वा तान् सुसंरब्धान् अतिक्रुद्धान्
शापमनुस्मरन् वारयामास ॥१८॥ हे इति ॥ हे विप्रचित्त्यादयो युष्माभिर्मे वचः श्रूयताम् । किं तत्राह । मा युध्यत तङ्भाव आर्षः । किंतु ततो निवर्तध्वं यतोऽयं कालो नो-
ऽस्माकमर्थकृज्जयप्रदो न भवति ॥१९॥ य इति ॥ हे दैत्याः यः कालः सर्वेषां भूतानां सुखदुःखयोरुपपत्तये प्रदानाय प्रभुः समर्थस्तं पुमान् पौरुषैः स्वकीयबलपराक्रमादि-
भिरतिवर्तितुमीशः समर्थो न भवति ॥ २० ॥ य इति ॥ यः कालरूपो भगवान् प्राक् पूर्वं नोऽस्माकं भवाय समृद्धये दिवौकसामभवाय चासीत् । स एवाद्य ततो विपर्यय-
मस्माकमभवाय देवानां भवाय वर्तते ॥ २१ ॥ बलेनेति ॥ अतो भगवद्रूपत्वाज्जनो बलादिभिरुपायैः कालं वै नात्येति नैवातिक्रामति सचिवैर्मन्त्रिभिः ॥ २२ ॥
भवद्भिरिति ॥ दैवेन कालेन ऋद्धैः समृद्धैर्भवद्भिरेते हरेरनुचरा देवा बहुशो निर्जिताः त एवाद्य युधि नोऽस्मान् जित्वा नदन्ति ॥ २३ ॥ एतानिति ॥ पुनश्च यदि दैवं कालः

हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः ॥ वारयामास संरब्धान्काव्यशापमनुस्मरन् ॥ १८ ॥ हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः ॥ मा
युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ॥१९॥ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये ॥ तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ॥२०॥
यो नो भवाय प्रागासीदभवाय दिवौकसाम् ॥ स एव भगवानद्य वर्तते तद्विपर्ययम् ॥२१॥ बलेन सचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभिः ॥ सामादि-
भिरुपायैश्च कालं नात्येति वै जनः॥२२॥भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ॥ दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदन्ति नः॥२३॥ एतान्वयं
विजेष्यामो यदि दैवं प्रसीदति॥तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते॥२४॥श्रीशुक उवाच॥पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः॥रसां
निर्विविशू राजन्विष्णुपार्षदताडिताः॥२५॥अथ तार्क्ष्यसुतो ज्ञात्वा विराट्प्रभुचिकीर्षितम् ॥ बबन्ध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतौ ॥२६॥

प्रसीदति अस्मदनुकूलो भविष्यति तदा वयमप्येतान् विजेष्यामः । तङ्भाव आर्षः । तस्मात् जयपराजययोः कालाधीनत्वात् यः कालो नोऽस्माकमर्थत्वाय आनुकूल्याय
कल्पते तं कालं प्रतीक्षध्वं तावत्पराभवं सहध्वम् ॥ २४ ॥ पत्युरिति ॥ हे राजन् एवं पत्युः बलेर्निगदितं वाक्यं श्रुत्वा ते दैत्यदानवयूथपाः विष्णुपार्षदैस्ताडिताः सन्तो
रसां रसातलं निर्विविशुः ॥ २५ ॥ अथेति ॥ अथ विषु पक्षिषु राजत इति विराट् पक्षिराजस्तार्क्ष्यस्य कश्यपस्य सुतो गरुडः प्रभोर्हरेश्चिकीर्षितं ज्ञात्वेति अस्य सर्वस्वापहा-
रेण ममेदमित्यभिमानं सन्त्याज्येदानीं देहस्वीकारेण तत्राहमित्यभिमानमपि त्याजयित्वा परमानुग्रहः कर्तव्यस्तथा न चानेन तुल्योऽन्यः कोऽपि सत्यसन्धो धीरो वास्तीति
सत्कीर्तिख्यापनायास्य बन्धनं च कर्तव्यमिति प्रभोर्भगवतः चिकीर्षितमभिप्रायं ज्ञात्वेत्यर्थः । क्रतोर्यज्ञस्य सौत्येऽहनि सोमाभिषवदिने वारुणैः पाशैर्बलिं बबन्ध ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हाहेति ॥ प्रभविष्णुना सर्वशक्तिमता विष्णुना दैत्यपतौ बलौ निगृह्यमाणे वध्यमाने सति रोदस्योर्द्यावापृथिव्योः सर्वतोदिशं सर्वदिक्षु महान् हाहाकारशब्दः आसीत् ॥ २७ ॥ तमिति ॥ हे नृप वारुणैः पाशैर्बद्धम् अतः नष्टश्रियं तथापि स्थिरा प्रज्ञा बुद्धिर्यस्य तमत एव उदारयशसं विपुलकीर्तिं तं बलिं भगवान् वामन आह स्म ॥२८॥ पदानीति ॥ हे असुर भूमेस्त्रीणि पदानि त्वया मह्यं दत्तानि प्रतिश्रुतानि तत्र द्वाभ्यां पद्भ्यां तव सर्वा मही मया क्रान्ता परिच्छिद्य परिगृहीता इदानीं तृतीयपदस्थानमुपकल्पय देहि॥२९॥ यावदिति ॥ असौ सूर्यो गोभिः किरणैर्यावत्तपति उडुभिर्नक्षत्रैः सह इन्दुः चन्द्रो यावत्प्रकाशते पर्जन्यो मेघो यावद्वर्षति तावत्येवेयं तव संबन्धिनी भूः ॥ ३० ॥ पदेति ॥ एवं सत्येकेन पदा मया भूर्लोकः क्रान्तः तथा खमन्तरिक्षं दिशश्च तनोः तन्वा क्रान्ताः द्वितीयेन पदा तु स्वर्लोकः क्रान्तः एवं ते तव पश्यत एवात्मना व्यापकेन मया ते स्वं सर्वं गृहीतम् । तृतीयपदन्यासार्था त्वदीया भूमिर्नास्ति ॥ ३१ ॥ प्रतिश्रुतमिति ॥ अतः प्रतिश्रुतं तृतीयपदस्थानमदातुस्ते तव निरये नरके वास इष्यते इष्टो भवति

हाहाकारो महानासीद्रोदस्योः सर्वतो दिशम् ॥ गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ॥ २७ ॥ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः ॥
नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥ २८ ॥ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयाऽसुर ॥ द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय ॥ २९ ॥
यावत्तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः ॥ यावद्वर्षति पर्ज्यन्यस्तावती भूरियं तव ॥ ३० ॥ पदैकेन मया क्रान्तो भूर्लोकः खं दिशस्तनोः ॥
स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना ॥ ३१ ॥ प्रतिश्रुतमदातुस्ते निरये वास इष्यते ॥ विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः
॥ ३२ ॥ वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः ॥ प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलम्भते ॥ ३३ ॥ विप्रलब्धो ददामीति त्वयाहं चाढ्य-
मानिना ॥ तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित्समाः ॥ ३४ ॥ इति श्रीभागवते महापुराणे अ०बलिनिग्रहो नामैकविंशोऽध्यायः ॥ २१ ॥

तस्मात् प्रतिश्रुताऽदानात् गुरुणा शुक्रेण चानुमोदितः तेनाप्येतत्कथनात् त्वं निरयं नरकं विश वस्तुतस्तु नरकवासे भगवतस्तात्पर्यं नास्त्येव तथा च प्रतिश्रुतमदातुरपि ते निरये रलयोरैक्यात् निलये मम स्थाने वैकुण्ठे वास इष्यते तथा संप्रति निलयं सुतलमेव विश ॥ ३२ ॥ वृथेति ॥ यः प्रतिश्रुतस्यादानेनार्थिनं याचकं विप्रलम्भते वञ्च-यते तस्य सुखविषयको मनोरथो वृथैव स्वर्गश्च दूर एव यतः सोऽध एव पतति वस्तुतस्तु तस्य मद्भक्तस्य तव इन्द्रपदप्राप्तिमनोरथो वृथैव यतः मत्स्थानप्राप्तियोग्यस्य तव स्वर्गोऽपि दूरेऽधः पतति यो भवान् प्रतिश्रुतस्यासम्यग्दानेन अर्थिनं मामपि विप्रलम्भते छलयितुमागतं मां द्वारपालीकरणेन प्रत्युत च्छलयति ॥ ३३ ॥ विप्रलब्ध इति ॥ आढ्यमानिना आढ्यः त्रैलोक्यैश्वर्यवानहमित्यभिमानवता अतो यथेष्टं गृहाणाहं ददामि इति वदता त्वयाऽहं विप्रलब्धो वञ्चितः अतस्तस्य व्यलीकस्य वञ्चनस्य फलं निरयं नरकदुःखं कतिचित् समा संवत्सरान् भुङ्क्ष्व वस्तुतः आढ्येभ्यः शक्रादिभ्योऽपि मानवता त्वयाहं विप्रलब्धः स्वयं वञ्चकोऽपि वञ्चित इति हेतोः अहं वरं ददामि । वरमाह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 व्यलीकं विगतालीकं सत्यं फलं वैकुण्ठं भुंक्ष्व कतिचित्समास्तु निलयं सुतलं तदुत्तरं निलयमिन्द्रपदं च भुंक्ष्व ततो वैकुण्ठमिति ॥ ३५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थ-
प्रकाशिकाम् ॥ गङ्गासहायो निरमादष्टमस्यैकविंशके ॥ २१ ॥ द्वाविंशे तु वरान्दत्त्वा प्रस्थाप्य सुतलं बलिम् ॥ द्वारपोऽभूद्धरिस्तत्र श्लोकाः सार्द्धाः षडग्नयः[३६॥] ॥ उवाचेर्त्यष्टाथ
 सार्द्धा गुणा[४३॥] वेदा अनुष्टुभः ॥ २२ ॥ हे राजन् एवं विप्रकृतः बन्धनेन वचसा च तिरस्कृतः भिद्यमानः सत्याच्चाल्यमानोऽपि अभिन्नः सत्यादप्रचलित आत्मा मनो यस्य स
असुरो बलिरविक्लवमदीनं वचस्तं प्रत्याह स्म ॥ १ ॥ यदीति ॥ हे उत्तमश्लोकेति हे सुरवर्येति च कटाक्षः । यद्यपि ममेरितं प्रतिश्रुतं वचो व्यलीकमनृतं तावन्न भवति त्वया कपटेन वामनतया भिक्षित्वा ग्रहणसमये रूपान्तरस्याविष्कृतत्वात् तथापि यदि भवान् व्यलीकं मन्यते तदा तद्वचनं प्रलम्भनं वञ्चनपरं यथा ऋतं सत्यमेव करोमि कथं तत्राह निजं तृतीयं पदं मे शीर्ष्णि कुर्विति । नच द्वाभ्यां पद्भ्यां विश्वं क्रान्तवतो मे तव शिरः पदपर्याप्तं कथं स्यादिति मन्तव्यं वित्तेन चेत्पदद्वयपूर्तिर्जाता तर्हीदमधिकमेव स्यात् वित्तापेक्षयाऽपि वित्तवतोऽधिकत्वादिति भावः ॥ २ ॥ बिभेमीति ॥ असाधुवादात् भगवद्भक्ता ब्राह्मणवञ्चका भवन्ति यथा बलिरिति दुष्कीर्तिवादात् यथाहं भृशमु-

श्रीशुक उवाच ॥ एवं विप्रकृतो राजन्बलिर्भगवताऽसुरः ॥ भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥ १ ॥ बलिरुवाच ॥ यद्युत्तम-
श्लोक भवान्ममेरितं वचोऽव्यलीकं सुरवर्य मन्यते ॥ करोम्यृतं तन्न भवेत्प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥ २ ॥ बिभेमि
नाहं निरयात्पदच्युतो न पाशबन्धाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ॥ ३ ॥ पुंसां
श्लाघ्यतमं मन्ये दण्डमर्हत्तमार्पितम् ॥ यं न माता पिता भ्राता सुहृदश्च दिशन्ति हि ॥ ४ ॥ त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः॥
यो नोऽनेकमदान्धानां विभ्रंशं चक्षुरादिशत् ॥५॥ यस्मिन्वैरानुबन्धेन रूढेन विबुधेतराः ॥ बहवो लेभिरे सिद्धिं यामु हैकान्तयोगिनः ॥६॥

द्विजे बिभेमि तथा निरयादिभ्यो न बिभेमीत्यन्वयः । निरयान्नरकदुःखात् पदस्य स्थानस्य च्युतः च्यवनात् भ्रंशात् क्विबन्तमिदं क्रान्तमहमित्यस्य विशेषणं वा । पाशैर्ब-न्धात् दुरत्ययात् दुरतिक्रमणीयात् व्यसनात् दुःखात् अर्थकृच्छ्रात् भवता विनिग्रहात् अन्यस्मादपि दण्डात् ॥ ३ ॥ पुंसामिति ॥ अर्हत्तमेन योग्यतमेन भवता अर्पितं कृतं दण्डं पुंसां श्लाघ्यतममहं मन्ये पापनिवर्तकत्वात्सत्कीर्तिहेतुत्वाच्च । हि यस्मात् यमेवंभूतं दण्डं मात्रादयो न चादिशन्ति नैवार्पयन्ति अतो निग्रहान्ममापयशो नास्ति
॥ ४ ॥ त्वमिति ॥ त्वन्नोऽस्माकमसुराणां पारोक्ष्यः शत्रुतया प्रतीयमानोऽपि परमो गुरुर्हितकारी असि यो भवान् इति शेषः । अतो न मध्यमपुरुषः अनेकैः शौर्यवीर्य-धनाभिजनादियुक्तैर्मदैरन्धानामस्माकमैश्वर्यविभ्रंशात्मकं चक्षुरादिशत् दत्तवान् ॥ ५ ॥ यस्मिन्निति ॥ परोक्षहितकारित्वादेव यां मोक्षलक्षणां सिद्धिं फलमेकान्तयोगिनः अनन्यभक्तियोगनिष्ठा लेभिरे तां सिद्धिं बहवो विबुधेतराः असुराः रूढेन दृढेन यस्मिंस्त्वयि वैरानुबन्धेनैव लेभिरे ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनेति ॥ तेन भूरिकर्मणा अचिन्त्यानन्तविचेष्टितेन भवताहं निगृहीतो वशीकृतो वारुणैः पाशैर्बद्धश्च नातिव्रीडे लज्जां न प्राप्नोमि न च व्यथे व्यथामपि न प्राप्नोमि । त्वत्कृत-निग्रहादेर्मुक्तिकीर्तिहेतुत्वादित्याशयः ॥ ७ ॥ पितामह इति ॥ मे मम पितामहः प्रह्लादो भवदीयत्वेन संमतः आविष्कृतः साधुवादः सत्कीर्तिर्यस्य त्वमेव परमः सेव्यः यस्य सः अत एव भवद्विपक्षेण भवच्छत्रुणा स्वपित्रा हिरण्यकशिपुना विचित्रवैशसं नानाविधं दुःखं प्रापितः ॥ ८ ॥ किमिति ॥ मर्त्यस्य मरणशीलस्य पुंसः यः अन्ततो देहिनं जहाति तेनानेनात्मना देहेन किं प्रयोजनं तथा रिक्थहारैर्दायादैः पुत्रैः स्वजन इत्याख्या व्यवहारमात्रं येषाम् । वस्तुतस्तु धनधर्मादिक्षयहेतुतया दस्यव एव तैः किं जन्मम-रणादिसंसृतिहेतुभूतया जायया भार्ययाऽपि किं गेहैरपि किं न किमपि प्रयोजनं सिद्ध्यति किं त्विह प्रवृत्तिमार्गे एतैः केवलमायुषो व्ययः क्षय एव भवतीति निश्चितवानिति शेषः ॥ ९ ॥ इत्थमिति ॥ महान् अगाधबोधः अपरिमितज्ञानः सत्तमः सोऽस्मत् पितामहः इत्थं निश्चित्य जनात् जनसङ्गाद्भीतः सन् स्वपक्षं दैत्यकुलं क्षपयतीति तथा-

तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ॥ ७ ॥ पितामहो मे भवदीयसंमतः प्रह्लाद आविष्कृतसा-धुवादः ॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ॥८॥ किमात्मनाऽनेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ९ ॥ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम् ॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तम ॥ १० ॥ अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः ॥ इदं कृतान्तान्तिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥ ११ ॥ श्रीशुक उवाच ॥ तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ॥ आजगाम कुरुश्रेष्ठ राकापतिरि-वोत्थितः ॥१२॥ तमिन्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम् ॥ प्रांशुं पिशङ्गाम्बरमञ्जनत्विषं प्रलम्बबाहुं सुभगं समैक्षत ॥ १३ ॥

भूतस्यापि भवतः ध्रुवं नित्यपुरुषार्थरूपम् । हि यस्मात् अकुतोभयं नास्ति कुतोऽपि भयं यस्मात्तथाभूतं पादपद्मं प्रपेदे शरणं जगाम ॥ १० ॥ अथेति ॥ अथ तस्मात् त्वद्भक्तपौत्रत्वादहमपि दैवेन तस्यैव भजनप्रभावेण आत्मरिपोरपि वस्तुतः आत्मनोः स्थूलसूक्ष्मदेहयोः रिपोर्नाशकस्य मोक्षप्रदस्य तवान्तिकं समीपं नीतः त्वया च कृपया प्रसभं बलात् त्याजिता श्रीर्यस्य तथाभूतो जातः यया श्रिया स्तब्धमतिः कुण्ठितविवेकः पुमान् कृतान्तस्य मृत्योरन्तिकवर्ति इदं जीवितमध्रुवमिति न बुद्ध्यते ॥ ११ ॥ तस्येति ॥ हे कुरुश्रेष्ठ तस्य बलेरित्थं भाषमाणस्य सतः उत्थितः उदितो राकापतिः पूर्णचन्द्र इव प्रकाशमानः भगवत्प्रियः प्रह्लाद आजगाम ॥ १२ ॥ तमिति ॥ श्रिया कान्त्या विराजमानं नलिने इवायते ईक्षणे यस्य तं प्रांशुं महाकायं पिशङ्गे पीते अम्बरे वस्त्रद्वयं यस्य तम् अञ्जनत्विषं श्यामलं प्रलम्बावाजानुलम्बौ बाहू यस्य तं सुभगं सुन्दरं तमागतं स्वपितामहं प्रह्लादमिन्द्रसेनः प्राप्तेन्द्रराज्यो बलिः सम्यगैक्षत ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मै इति ॥ वारुणैः पाशैः यन्त्रितः बद्धः बलिः तस्मै प्रह्लादाय पूर्ववत् समर्हणमर्घ्यादिपूर्वकं पूजनं नोपजहार न कृतवान् किन्तु केवलं मूर्ध्ना ननाम ततश्च प्रह्लादेन सर्वदा शिक्ष्यमाणं निरहङ्कारित्वं विहाय त्वं बालो बालिशमतिरित्यादि यद्भगवन्तं प्रति साहङ्कारमुक्तं तत्स्मरणेनाऽश्रुभिर्विलोले चञ्चले लोचने यस्य सः सव्रीडं नीचीनमधःकृतं मुखं यस्य तादृशश्च बभूव ॥ १४ ॥ स इति ॥ स महामनाः प्रह्लादः सतां पतिं सुनन्दादिभिः अनुगैः पार्षदैरुपासितं तत्रासीनमुपविष्टं वामनरूपं हरिमुद्वीक्ष्य बलेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकैरुत्थितरोमभिरश्रुभिश्च विह्वलः शिरसा नमन्नेवोपेत्य मूर्ध्ना भूमौ ननाम ॥ १५ ॥ त्वयेति ॥ ऊर्जितं समृद्धमैन्द्रं पदमस्मै त्वयैव पूर्वं दत्तं तदद्य त्वयैव हृतं न ह्यैन्द्रं पदमेतदीयं त्वयापहृतं किन्तु स्वीयमेव पुनः स्वीकृतं तथैव शोभनं तच्चातिशोभनमेव कृतमित्यर्थः । अस्य बलेर्भवता महानेवानुग्रहः कृत इत्यहं मन्ये । कुतस्तत्राह । यत् यस्मात् श्रीरेवात्ममोहनमात्मज्ञानप्रतिबन्धकं तस्मादयं विभ्रंशितः अन्यथा विवेकरहितोऽयं विनश्येदिति भावः । न चात्र तव दत्तापहारलक्षणो दोषोऽपि स्नेहेन पुत्रहस्ते दत्त-

तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणं नोपजहार पूर्ववत् ॥ ननाम मूर्ध्नाऽश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥ १४ ॥ स तत्र हासीनमुदीक्ष्य सत्पतिं सुनन्दनन्दाद्यनुगैरुपासितम् ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविह्वलः ॥ १५ ॥ प्रह्लाद उवाच ॥ त्वयैव दत्तं परमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम् ॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ १६ ॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय नारायणायाखिललोकसाक्षिणे ॥ १७ ॥ श्रीशुक उवाच ॥ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृताञ्जलेः ॥ हिरण्यगर्भो भगवानुवाच मधुसूदनम् ॥१८॥ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला ॥ प्राञ्जलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप ॥ १९ ॥

स्यापि मोदकादेरहिताशङ्कया पुनराच्छिद्य नीतवतः पितुर्यथा तथेत्यर्थः ॥१६॥ ययेति ॥ यया श्रिया विद्वान् विवेकी यतः संयतोऽपि मुह्यते ज्ञातमप्यात्मतत्त्वं विस्मरति । तद्भावः । तत्तस्यां सत्यां को वान्यः पुमानात्मनो गतिं तत्त्वं यथावद्विचष्टे पश्यति तस्मै श्रीविभ्रंशनेनोपकारकाय जगदीश्वराय नारायणाय अखिललोकसाक्षिणे ते तुभ्यं नमः ॥ १७ ॥ तस्येति ॥ हे राजन् कृताञ्जलेर्बद्धाञ्जलेस्तस्य प्रह्लादस्य शृण्वत एव सतो भगवान् हिरण्यगर्भो ब्रह्मा मधुसूदनं वामनमुवाच किंचिद्वक्तुमुद्यत इत्यर्थः ॥ १८ ॥ बद्धमिति ॥ यदा ब्रह्मा वक्तुं प्रवृत्तस्तदैव हे नृप तस्य बलेः पत्नी विन्ध्यावलिनाम्नी पतिं बद्धं वीक्ष्य भयेन विह्वला तत्र हेतुमाह । साध्वी पतिव्रता बलेरभिमानोक्तिं स्मृत्वा लज्जयावाङ्मुखी च प्रणता दण्डवद्भूमौ पतनेन कृतनमस्कारा पुनश्च प्राञ्जलिः संयोजिताञ्जलिः सती उपेन्द्रं वामनं प्रति इदं वक्ष्यमाणं बभाषे ब्रह्मा तु तां संमानयन् क्षणं तूष्णीं स्थितः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रीडार्थमिति ॥ हे ईश ते त्वया आत्मनः स्वस्य क्रीडार्थमिदं त्रिजगत् लोकत्रयात्मकं कृत्स्नं जगत् कृतं सृष्टं तत्र त्वत्क्रीडोपकरणभूते जगति अपरे केचित् त्यक्तह्रियः निर्लज्जाः। वस्तुतस्तु त्वयैव मायाप्रेरणया अवरोपितः आरोपितः कर्तृवादो वयं स्वतन्त्राः कर्तार इति वादमात्रं येषाम् । यद्वा । अवरोपितः सहसैवावतारितः कर्तृवादो येषां ते कुधियः स्वाम्यं स्वत्वबुद्धिं कुर्युः कुर्वन्ति तथा बुद्धिं कृत्वा वयं दातार इति मन्यन्त इत्यर्थः । वस्तुतस्तु कर्त्तुः जगत्स्रष्टुः प्रभोः पालकस्य अस्यतः संहर्तुश्च तव ते कुधियः किमावहन्ति किं समर्पयन्ति न किमपि स्वत्वस्यैवाभावात् । अयं भावः । त्वया पदत्रयभूमियाचने कृते त्वदीयमेव सर्वं यथेच्छं गृहाणेत्येव वक्तव्यं नतु त्रिलोकीशोऽहं मामुपेत्य जनः पुनरन्यत्र याचितुं नार्हतीत्यादि स्वाम्याविष्कारणवचनम् । तथा च साहङ्कारं वदन्नयं त्वन्मायामोहित एवातः कृपयैव बलिं विमुच्य पालय ॥ २० ॥ अथ प्रह्लादविन्ध्यावल्योः परमार्थोक्त्या प्रसन्नं विभुं लोकदृष्ट्यैव ब्रह्माह—भूतेति ॥ हे भूतभावनेत्याद्याः सम्बुद्ध यः । हृतं स्वीकृतं सर्वस्वं यस्मात्तमेनं बलिं मुञ्च । अयं निग्रहं

विन्ध्यावलिरुवाच॥क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः॥कर्तुःप्रभोस्तव किमस्य त आवहन्ति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥२० ॥ ब्रह्मोवाच ॥ भूतभावन भूतेश देवदेव जगन्मय ॥ मुञ्चैनं हृतसर्वस्वं नायमर्हति निग्रहम् ॥२१॥ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ॥ निवेदितं च सर्वस्वमात्माऽविक्लवया धिया ॥ २२ ॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ॥ अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् ॥ २३ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहम् ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥ २४ ॥ यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः ॥ नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ॥ २५ ॥

दण्डं नार्हति ॥ २१ ॥ कृत्स्नेति ॥ अविक्लवया अदीनया धिया अनेन बलिना कृत्स्ना भूर्दत्ता ये च कर्मभिरर्जिताः स्वर्गादिलोकास्ते दत्ताः अतः सर्वस्वमेव निवेदितम् । तथा आत्मा देहोऽपि दत्तः ॥ २२ ॥ यदिति ॥ अशठधीः निष्कपटबुद्धिः यस्य तव पादयोः सलिलं प्रदाय अर्घ्यजलं समर्प्य दूर्वाङ्कुरैरपि सतीं सपर्यां पूजां विधायापि उत्तमां वैकुण्ठादिप्राप्तिलक्षणां गतिं भजते जनः प्राप्नोति।असौ बलिस्तु अविक्लवमनाः स्थिरचित्त एव तुभ्यं त्रिलोकीं दाश्वान् दत्तवान् "दाश्वान् साह्वान्" इति छान्दसो निपातः।अतः कथमार्तिमृच्छेत् प्राप्नुयात् तस्मादेनं विमुञ्चेत्यर्थः ॥ २३ ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् अहं तावद्यमनुगृह्णामि अनुग्रहीतुमिच्छामि तस्य विशो धनैश्वर्यादि विधुनोमि ततो वियोजयामि यैर्धनादिभिर्मदो यस्य सः अत एव स्तब्धः अनम्रः सन् पुरुषो लोकं मां चावमन्यते तिरस्करोति ॥ २४ ॥ न च सर्वस्यैव धनमपहराम्येव किन्तु व्यवस्थयैवेत्याह—यदेति ॥ अनीशः कर्मवशः अयं जीवात्मा निजकर्मभिर्नानायोनिषु कीटपतङ्गादिषु संसरन् यदा कदाचित्सुकृतवशात्पौरुषीं गतिं मनुष्यजन्म आव्रजेत् प्राप्नुयात् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

जन्मेति ॥ तत्र पौरुष्यां गतौ यद्यस्य जीवस्य जन्मकर्मादिभिः स्तम्भो गर्वो न भवेत् तदायं स्तम्भाभावो मदनुग्रहः तथा च गर्वाभावे धनं नापहरामि ॥ २६ ॥ केभ्यश्चित् ध्रुवादिभ्यः सम्पदो ददामीत्याह--मानेति ॥ मानो गर्वः स्तम्भः तत्कार्यम् अनम्रता तयोर्निमित्तानां समन्ततः सर्वतः सर्वेषां श्रेयसां प्रतीपानां विनाशकानां जन्मादीनां तृतीयार्थे षष्ठी। हन्तेत्यवधारणे । जन्मादिभिर्मत्परः मम भक्तो न मुह्येत् गर्ववान् नैव भवति अतः क्वचिद्भक्तेभ्यः तदिच्छया सम्पदोऽपि ददामीति । अभक्तस्तु मुह्येत् अतस्तदपहारमेवानुग्रहं करोमि तथा च गर्वसम्भवे धनहरणरूपमनुग्रहं करोमि तदसंभवे तन्न करोमि क्वचित्तु धनं ददामीति ॥२७॥ ननु बलौ तव कीदृशोऽनुग्रहस्तत्राह—एष इति ॥ एष बलिर्दानवानां दैत्यानां च अग्रणीः अधिपतिः कीर्त्तिवर्धनश्च अतः अजयां दुर्जयामपि मम मायामजैषीत् जितवान् यतः सर्वस्वापहारेण सीदन्नपि न मुह्यति ॥ २८ ॥ क्षीणेति ॥ क्षीणं रिक्थं धनं यस्य सः स्थानाच्च्युतः ऐन्द्राधिपत्यात् भ्रष्टः शत्रुभिरस्माभिः क्षिप्तो वचनैस्तिरस्कृतो बद्धश्च ज्ञातिभिः परित्यक्तश्च तेषां रसातलप्रवेशस्योक्तत्वात् यातनां पीडामनुयापितः प्रापितः ॥२९॥ गुरुणेति ॥ गुरुणा शुक्रेण भर्त्सितः शप्तश्च तथापि सुव्रतः दृढसङ्कल्पः सन् सत्यं न जहौ प्रतिश्रुतं नान्यथा कृतवान् । यथा च न

जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवेत्स्तम्भस्तत्रायं मदनुग्रहः ॥ २६ ॥ मानस्तम्भनिमित्तानां जन्मादीनां समन्ततः ॥ सर्वश्रेयःप्रतीपानां हन्त मुह्येन्न मत्परः ॥ २७ ॥ एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः ॥ अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥ २८ ॥ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः ॥ २९ ॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ॥ ३० ॥एष मे प्रापितः स्थानं दुष्प्रापममरैरपि ॥ सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः ॥ ३१ ॥तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितम् ॥ यन्नाधयो व्याधयश्च क्लमस्तन्द्रा पराभवः ॥नोपसर्गा निवसतां संभवन्ति ममेक्षया ॥ ३२ ॥

ह्येतस्मिन् कुले कश्चिन्निःसत्वः कृपणः पुमानित्यादिना छलैरेव प्रायेणाधर्मोऽपि धर्म उक्तः तथैवान्ते विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिनेत्यादिना धर्मोऽप्यधर्म उक्तस्तथाप्ययं सत्यवाक् तं धर्मं न त्यजति तृतीयं पदं मे शिरसि कुर्वित्युक्तेः । अन्यस्त्वेवंविधेऽर्थे शठे शाठ्यं प्रकुर्वीतेति नीत्या शाठ्यमेव कुर्यात् ॥ ३० ॥ एष इति ॥ अहमेवाश्रयो यस्य तादृक् एष बलिर्मे मया अमरैरपि दुष्प्रापं स्थानं प्रापितः प्रापितप्रायः । इन्द्रपदाभिलाषित्वात्ततः पूर्वं सावर्णेर्मनोरन्तरस्यायमिन्द्रो भविता ॥ ३१ ॥ तावदिति सार्द्धम् ॥ तावत् सावर्णिमन्वन्तरपर्यन्तं विश्वकर्मणा देवशिल्पिना विनिर्मितं स्वर्गादपि चमत्कृतं सुतलमध्यास्तामधिपतिर्भूत्वा निवसत्वित्यर्थः । यत् यत्र निवसतां ममेक्षया मम कृपावलोकनेनाध्यादयो न सम्भवन्ति । उपसर्गाः उपद्रवाः स्वर्गादपि सुतलस्याधिक्यं तु तदानीमेव हरेः प्रसादाज्जातं श्रीकृष्णदत्तसुदामधामवदिति ज्ञेयम् । इन्द्रपदमपि तस्य भविष्यत्येवेति तदपि प्राप्तमेव । वर्त्तमानेन्द्रादृष्टस्य प्राबल्यादधुनैव भगवता न दत्तम् ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं ब्राह्मणं प्रत्युक्त्वा कृपापरवशो भगवान् साक्षाद्बलिं प्रत्याह—इन्द्रसेनेति ॥ हे इन्द्रसेन भो महाराज ज्ञातिभिः परिवारितः परिवृतस्त्वं स्वर्गिभिरपि प्राथ्यं सुतलं लोकं याहि तत्र ते तव भद्रमेवास्तु॥३३॥नेति ॥ तत्र वसन्तं त्वां लोकेशा इन्द्रादयोऽपि नाभिभविष्यन्ति अपरे नाभिभविष्यन्तीति किमु वक्तव्यम् । ये च तत्र त्वच्छासनातिगा आज्ञोल्लङ्घिनो दैत्यास्तान् मम चक्रं सुदर्शनं सूदयिष्यति हनिष्यति ॥ ३४ ॥ रक्षिष्य इति ॥ हे वीर सर्वतः सर्वेभ्योऽप्युपद्रवेभ्यः सानुगं भृत्यादिसहितं सहपरिच्छदं भोगोपकरणसहितं च त्वामहं रक्षिष्ये । तङ्गार्थः । तत्र सुतले सदा संनिहितं द्वार्यवस्थितं मां भवान् द्रक्ष्यते । तङ्गार्थः ॥३५॥ तत्रेति ॥ दानवदैत्यानां सङ्गाद्धेतोर्यस्तवासुरो भावः स तत्र मदनुभावं मम प्रभावं दृष्ट्वा कुण्ठः प्रतिहतः सन् सद्यो विनङ्क्ष्यति ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य द्वाविंशे निरमादिमाम् ॥ २२॥ त्रयोविंशे बलौ याते सुतलं वासवो दिवम् ॥ बुभुजे वामनेनेति तत्र श्लोका महीगुणाः ॥ उवाचेत्यष्टकं सार्द्धश्चैतुस्त्रिंशदनुष्टुभः ॥२३॥ इतीति ॥ इत्येवमुक्तवन्तं पुरातनं पुरुष

इन्द्रसेन महाराज याहि भो भद्रमस्तु ते ॥ सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥ ३३ ॥ न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे ॥ त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ॥ ३४ ॥ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम् ॥ सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान्॥३५॥ तत्र दानवदैत्यानां सङ्गात्ते भाव आसुरः ॥ दृष्ट्वा मदनुभावं वै सद्यः कुण्ठो विनङ्क्ष्यति ॥३६॥ इति श्रीभा०म०अ० बलिवामनसंवादो नाम द्वाविंशोऽध्यायः ॥२२॥ श्रीशुक उवाच॥इत्युक्तवन्तं पुरुषं पुरातनं महानुभावोऽखिलसाधुसंमतः ॥ बद्धाञ्जलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत्॥१॥बलिरुवाच॥अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः॥यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥२॥ श्रीशुक ॥ उवाच इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥ ३ ॥

श्रीवामनं महानुभावः अत एवाखिलेषु साधुतया संमतः अत एव भक्त्या बाष्पस्य कलाभिः बिन्दुभिराकुले ईक्षणे नेत्रे यस्य सः अत एव भक्त्योद्गलः उद्गतं बाष्पं गले यस्य सः बाष्पनिरुद्धगल इत्यर्थः । बद्धाञ्जलिः स बलिर्गद्गदया स्खलिताक्षरया गिरा अब्रवीत् ॥ १ ॥ अहो इति ॥ अहो त्वत्प्रणामस्य प्रभावो यस्मै प्रणामाय कृतः समुद्यम एव प्रपन्नानां शरणमागतानां भक्तानां योऽर्थोऽभिमतः पुरुषार्थस्तस्य विधौ अभक्तेऽपि तस्य संपादने समाहितः सावधानतया स्थितः येन प्रणामोद्यमेन लोकपालैरिन्द्रादिभिरमरैर्देवैः सत्वप्रधानैरप्यलब्धपूर्वो योऽनुग्रहः सोऽपसदे नीचे असुरे राजसे मय्यर्पितः त्वत्सर्वस्वमपहर्तुं विष्णुरयमागत इति यदाहं गुरुमुखादश्रौषं तदा त्वत्प्रणामार्थमुद्यममकार्षम् । किन्त्वसुराणां गुरोश्च चित्तखेदभयात् प्रणामं नाकार्षं तस्य प्रणामोद्यमस्यैवेदं फलमिति ॥ २ ॥ इतीति ॥ इत्येवमुक्त्वा हरिमानम्य प्रणम्य तथा सभवं शिवसहितं ब्रह्माणं प्रणम्य पाशेभ्यो मुक्तः प्रीतश्च सन् असुरैः सह बलिः सुतलं विवेश सुतललोकं प्रवेष्टुमुद्युक्तो बभूवेत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवमिति ॥ एवं बलेर्गृहीतं त्रिविष्टपं स्वर्गमिन्द्राय प्रत्यानीय समर्थ अदितेः कामं पूरयित्वा भगवान् सकलं जगदशासत् स्वयमुपेन्द्रः सन् पालयामास । शब्लुगभावश्छान्दसः
॥ ४ ॥ लब्धेति ॥ लब्धो भगवत्प्रसादो येन तं पाशेभ्यो निर्मुक्तं वंशधरं वंशवर्धनं पौत्रं बलिं निशाम्य दृष्ट्वा भक्तिप्रवणः भक्तितत्परः प्रह्लाद इदं वक्ष्यमाणमब्रवीत् ॥ ५ ॥ नेति ॥ विश्वाभिवन्द्यैः सकलजगत्पूज्यैर्ब्रह्मादिभिरप्यभिवन्दिताङ्घ्रिः यस्य स त्वं नोऽस्माकमसुराणां दुर्गपालो जातोऽसीति यत् यः प्रसादस्तमिमं प्रसादं विरिञ्चो ब्रह्मा श्रीर्लक्ष्मीः शर्वो रुद्रश्च न लभते न लेभे । अपरे ते इन्द्रादयो न लेभिरे इति किमु वक्तव्यम् ॥ ६ ॥ यत्पादेति ॥ हे शरणद आश्रयप्रद ब्रह्मादयो यस्य तव पादपद्मयोर्यो मकरन्दस्तस्य नितरां सेवनेन साधनेन विभूतीः सृष्ट्यादिसामर्थ्यान्यैश्वर्याणि अश्नुवते प्राप्नुवन्ति तस्य भगवतो ये वयं कुसृतयः दुर्वृत्ताः खलयोनयः उग्रजातयस्ते दाक्षिण्यदृष्टिपदवीं बहुमानेन चित्तानुवर्तनं दाक्षिण्यं तेन या दृष्टिस्तद्विषयतां कस्माद्धेतोः प्रणीताः अन्यहेतोरदर्शनात् केवलं कृपयैवेत्याशयः ॥ ७ ॥ चित्रमिति ॥ अमिता अचिन्त्या

एवमिन्द्राय भगवान्प्रत्यानीय त्रिविष्टपम् ॥ पूरयित्वादितेः काममशासत्सकलं जगत् ॥४॥ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम् ॥ निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥५॥ प्रह्लाद उवाच ॥ नेमं विरिञ्चो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ॥ यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरपि वन्दिताङ्घ्रिः ॥ ६ ॥ यत्पादपद्ममकरन्दनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः ॥ कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥ चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ॥ सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥ श्रीभगवानुवाच॥ वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम्॥मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ९ ॥ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम् ॥ मद्दर्शनमहाह्लादध्वस्तकर्मनिबन्धनः ॥ १० ॥

योगमाया सङ्कल्परूपा तया या लीला तया विसृष्टानि विरचितानि भुवनानि येन तस्य विशारदस्य निपुणस्य सर्वात्मनः समदृशोऽपि तव विषमः स्वभावः भक्तानामेव कामपूरणं न त्वभक्तानाम् इति यत् तत् तव ईहितं चेष्टितम् अहो चित्रम् । सन्धिरार्षः । तथापि तद्दोषाय नेत्याह । यद् यस्मात् कल्पतरोरिव समः स्वभावो यस्य तथाभूतः सन्नेव
भक्ताः प्रिया यस्य तथाभूतोऽसीति नहि कल्पतरुराश्रितानामेव कामान् पूरयन्नन्येषामपूरयन्नपि विषमो गण्यत इत्यर्थः ॥ ८ ॥ वत्सेति ॥ हे वत्स प्रह्लाद ते तव भद्रमस्तु त्वं सुतलाख्यमालयं स्थानं प्रयाहि गच्छ तत्र स्वपौत्रेण बलिना सह मोदमानो ज्ञातीनां सुखमावह प्रापय ॥ ९ ॥ नित्यमिति ॥ तत्र सुतले गदापाणिं द्वार्यवस्थितं मां नित्यं द्रष्टासि द्रक्ष्यसि मद्दर्शनेन यो महाह्लादस्तेन ध्वस्तं कर्मनिबन्धनमज्ञानं यस्य तादृशो भविष्यसीति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आज्ञामिति युग्मम् ॥ हे राजन् एवंविधां भगवत आज्ञां मूर्ध्ना नमस्कारपूर्वकं बाढं तथास्त्विति वचसाऽप्याधायाङ्गीकृत्य अमलप्रज्ञः सर्वासुरचमूपतिः स प्रह्लादः कृताञ्जलिः संस्तमादिपुरुषं परिक्रम्य प्रदक्षिणीकृत्य प्रणतः पुनश्च कृतप्रणामस्तेन भगवतानुज्ञातश्च सन् बलिना सह महाविलं सुतलं प्रविवेश ॥ ११ ॥ १२ ॥ अथेति ॥ अथ हे राजन् ब्रह्मवादिनां सदसि सभायां तत्रापि ऋत्विजां मध्ये अन्तिके स्वसमीप आसीनमुपविष्टमुशनसं शुक्रं हरिराह स्म ॥१३॥ ब्रह्मन्निति ॥ कर्म वितन्वतः यज्ञं प्रकुर्वतः स्वशिष्यस्य यत् छिद्रं तत्र न्यूनं तत्संतनु विस्तारय पूरयेत्यर्थः । यजमानं विना कथं पूरणमिति न वाच्यमित्याह । कर्मसु यद्वैषम्यं वैगुण्यं तद्ब्राह्मणैर्दृष्टमेव समं पूरितं भवेत् किं पुनरनुष्ठितमित्यर्थः ॥ १४ ॥ कुत इति ॥ यस्येति कर्त्तरि षष्ठी । येन बलिना सर्वभावेन सर्वस्वार्पणेन परमया भक्त्या कर्मेश्वरः कर्मप्रवर्तकः शास्त्रकर्ता यज्ञेशो यज्ञफलदाता यज्ञपुरुषः यज्ञरूपेणोपास्यो भवान् पूजितः तस्य बलेः कर्मणो वैगुण्यं कुतः न कस्यापि तत्र न्यूनता सम्भवतीत्यर्थः ॥१५॥ मन्त्रत इति ॥ मन्त्रतः स्वरादिभ्रंशेन तन्त्रतः

श्रीशुक उवाच ॥ आज्ञां भगवतो राजन् प्रह्लादो बलिना सह ॥ बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृताञ्जलिः ॥ ११ ॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ॥ प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम् ॥ १२ ॥ अथाहोशनसं राजन् हरिर्नारायणोऽन्तिके ॥ आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥ १३ ॥ ब्रह्मन् संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ॥ यत् तत् कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ॥ १४ ॥ शुक्र उवाच ॥ कुतस्तत् कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ॥ यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥ १५ ॥ मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रं नामसंकीर्तनं तव ॥ १६ ॥ तथाऽपि वदतो भूमन् करिष्याम्यनुशासनम् ॥ एतच्छ्रेयः परं पुंसां यत्तवाज्ञाऽनुपालनम् ॥१७॥ श्रीशुक उवाच ॥ अभिनन्द्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥ १८ ॥ एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः ॥ ददौ भ्रात्रे महेन्द्राय त्रिदिवं यत्परैर्हृतम् ॥ १९ ॥

अनुष्ठानव्युत्क्रमादिना देशतः कालतश्च यथोक्तदेशकालोल्लङ्घनेन अर्हतः पात्रतः यथोक्तसम्प्रदानाभावेन वस्तुतः दक्षिणादिवैषम्येण कर्मसु यच्छिद्रं वैगुण्यं तत्सर्वं तवानुसङ्कीर्तनमात्रमेव निश्छिद्रं संपूर्णं करोति ॥ १६ ॥ तथापीति ॥ हे भूमन् यद्यप्यस्मिन् कर्मणि त्वदनुगृहीतत्वात् वैषम्यं नास्त्येव तथापि वदतस्तवानुशासनमाज्ञां करिष्यामि । यतो यत्तवाज्ञानुपालनं तदेतत्पुंसां परं श्रेयः ॥ १७ ॥ अभिनन्द्येति ॥ इत्येवं हरेराज्ञामभिनन्द्य अङ्गीकृत्य भगवान् उशनाः शुक्रः बलेर्यज्ञस्य च्छिद्रमवशिष्टं विप्रर्षिभिः सह समाधत्त समादधे अनुष्ठितवानित्यर्थः । समाधायेति पाठे समाधाय तामाज्ञां संपादितवानिति शेषः ॥१८॥ एवमिति ॥ हे राजन् वामनरूपो हरिरेवं महीं बलेः सकाशात् भिक्षित्वा याचित्वा परैः शत्रुभिरसुरैर्यत् हृतं तत् त्रिदिवं स्वर्गं भ्रात्रे महेन्द्राय ददौ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजापतीति युग्मम् ॥ तदा प्रजापतीनां पतिर्ब्रह्मा देवैः ऋषिभिः पितृभिः भूमिपैः मनुतत्पुत्रैर्दक्षादिभिश्च सह कश्यपस्यादितेश्च प्रीत्यै सर्वभूतानां भवाय योगक्षेमनिर्वाहाय च लोकानां तत्पालानां च वा वामनं पतिमकरोत् ॥२०॥२१॥ ननु लोकादीनां पतिरिन्द्रोऽस्त्येवेति चेत्तत्राह—वेदानामिति सार्द्धम् ॥ तथा च सर्वेषां विभूतये ब्रह्मा वेदादीनां षष्ठ्यन्तबोध्यानां कल्पं रक्षायां प्रदाने च समर्थमुपेन्द्रं पतिं कल्पयांचक्रे यौवराज्यपदे स्थापयामास ॥ २२ ॥ तदेत्यर्द्धम् स्पष्टम् ॥ २३ ॥ तत इति ॥ ततस्तु ब्रह्मणानुमोदितो लोकपालैः सहित इन्द्रो देववाह्येन इन्द्रयोग्येन यानेन वामनं पुरस्कृत्य दिवं स्वर्गं निन्ये॥२४॥ प्राप्येति ॥ इन्द्रश्च उपेन्द्रभुजाभ्यां पालितम् । पालित इति पाठे इन्द्रविशेषणम् । त्रिभुवनं प्राप्य गतसाध्वसः निर्भयः परमया श्रिया जुष्टः संपन्नः मुमुदे ॥ २५ ॥ ब्रह्मेति युग्मम् ॥ हे नृप ब्रह्मादयः ये वैमानिकाः अन्येऽपि विमानारूढास्ते च सुमहत् इतरासाधारणं तत् भूमियाचनमारभ्य बलिद्वारपालकत्वपर्यन्तं विष्णोः परमाद्भुतमत्याश्चर्यकरं कर्म गायन्तःस्वानि धिष्ण्यानि स्थानानि जग्मुः। अदितिं च शशंसिरे

प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः॥ दक्षभृग्वङ्गिरोमुख्यैः कुमारेण भवेन च॥२०॥कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च॥ लोकानां लोकपालानामकरोद्वामनं पतिम् ॥ २१ ॥ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः॥ मङ्गलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥ उपेन्द्रं कल्पयांचक्रे पतिं सर्वविभूतये ॥ २२ ॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥ २३ ॥ ततस्त्विन्द्रः पुरस्कृत्य देवयानेन वामनम् ॥ लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥ २४ ॥ प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः॥ श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥२५॥ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥ २६ ॥ सुमहत् कर्म तद्विष्णोर्गायन्तः परमाद्भुतम् ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥ २७ ॥ सर्वमेतन्मयाख्यातं भवतः कुलनन्दन ॥ उरुक्रमस्य चरितं श्रोतॄणामघमोचनम् ॥ २८ ॥ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान उत जात उपैति मर्त्य इत्याह मन्त्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥

तुष्टुवुः । तङार्षः ॥२६॥२७॥ सर्वमिति ॥ हे कुलनन्दन श्रोत्रादीनामघमोचनं दोषनिवर्तकमुरुक्रमस्य वामनस्यैतत्सर्वं चरितं मया भवत आख्यातम् । एतदित्युक्त्या अन्यान्यपि चरितानि सन्तीत्युक्तम् ॥२८॥ पारमिति ॥ उरु बहुधा विक्रमतः । शता आर्षः । तत्र च दीर्घाभाव आर्षः । विष्णोर्महिम्नः पारं निःशेषं यो गृणानो ब्रुवाणो भवति ।शानजार्षः । स मर्त्यः पार्थिवानि रजांस्यपि विममे गणितवान् । यथा पार्थिवपरमाणुगणनमशक्यं तथा विष्णोर्गुणगणनमशक्यमित्यर्थः।तथा च मन्त्रः।" विष्णोर्नुकं वीर्याणि प्रवोचम् । " इत्यादि । एतदेव मन्त्रान्तरार्थं सूचयन्नाह—किमिति । उतेति वार्थे । जायमानो जातो वा मर्त्यः मनुष्यः यस्य पुरुषस्य पूर्णस्य भगवतो महिम्नः पारं किमुपैति प्राप्नोति नैव प्राप्नोतीत्येवं मन्त्रदृक् ऋषिर्वसिष्ठ आह स्मेति । तथा च मन्त्रः " न ते विष्णो जायमानो न जातो देव महिम्नः परमं तमाप " इति ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ यः पुमान् इदं देवदेवस्याद्भुतकर्मणो हरेर्वामनस्यावतारानुचरितं शृण्वन् कीर्तयन् स्मरन् वा भवति स परां सर्वोत्कृष्टां भगवत्संबन्धिनीं गतिं याति ॥ ३० ॥ क्रियमाण इति॥ अथेति वार्थे । दैवे यज्ञादौ पित्र्ये श्राद्धादौ मानुषे गुर्वर्चनादौ कर्मणि क्रियमाणे यत्र यत्र इदं श्रीवामनचरितं कीर्त्येत तत्तेषां कर्तृणां तत्कर्म वृद्धाः सुकृतं यथावत् कृतं विदुः ॥३१॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य त्रयोविंशे व्यधादिमाम् ॥ २३ ॥ चतुर्विंशे हरिर्मत्स्यो भूत्वा सत्यव्रतं नृपम् ॥ ररक्ष सागरं तत्र श्लोकाः सार्द्धाः कुषर्ण्मितीः ॥ उवाचसतँकमथो सर्तँषँष्टिरनुष्टुभः ॥ २४ ॥ पूर्वं तनुरूपं ततो महद्रूपमिति वामनावतारचरितसाम्यान्मत्स्यावतारं पृच्छति—भगवन्निति ॥ हे भगवन् मायया यन्मत्स्यविडम्बनं मत्स्यरूपानुकरणं तत् यस्यां निरूप्यते तामाद्याम् अद्भुतकर्मणः हरेः अवतारकथामहं श्रोतुमिच्छामि ॥ १ ॥ यदर्थमिति ॥ स्वयमीश्वरः कालकर्मादिनियन्तापि कर्मग्रस्तः कर्मपरवश इव यदर्थं लोके जुगुप्सितं निन्दितमिव तमः प्रकृतिः स्वभावो यस्य तत् इव दुर्मर्षं दुःसहम् । इवेति । इवशब्दः एतेषु सर्वेषु

य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन् याति परां गतिम् ॥ ३० ॥ क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ॥ यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ॥ ३१ ॥ इति श्रीभागवते महापुराणेऽष्टमस्कन्धे वामनावतारचरिते त्रयोविंशतितमोऽध्यायः ॥ २३ ॥
राजोवाच ॥ भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मायामत्स्यविडम्बनम् ॥ १ ॥ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितम् ॥ तमःप्रकृति दुर्मर्षं कर्मग्रस्तमिवेश्वरः ॥२ ॥ एतन्नो भगवन् सर्वं यथावद्वक्तुमर्हसि ॥ उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥ सूत उवाच ॥ इत्युक्तो विष्णुरातेन भगवान् बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतम् ॥ ४ ॥ श्रीशुक उवाच ॥ गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥ उच्चावचेषु भूतेषु चरन् वायुरिवेश्वरः ॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥ ६ ॥ आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ॥ ७ ॥

सम्बध्यते । मात्स्यं रूपमदधात् जुगुप्सितमपि याचकरूपं बलेरनुग्रहाय धृतवानिति युक्तम् । मात्स्यं तु कस्यानुग्रहायेति ॥ २ ॥ एतदिति ॥ हे भगवन् एतत् सर्वं लोकसुखावहमुत्तमश्लोकचरितं नोऽस्मान् यथावद्वक्तुमर्हसि ॥ ३॥ इतीति ॥ विष्णुरातेन परीक्षितेत्येवमुक्तः पृष्टो भगवान् सर्वज्ञो बादरायणिः शुकः मत्स्यरूपेण यत्कृतं तद्विष्णोश्चरितमुवाच ॥ ४ ॥ आदौ सामान्येनावतारप्रयोजनमाह—गोविप्रेति ॥ ईश्वरः स्वतन्त्रोऽपि गवादीनां रक्षामिच्छन्नेव तदनुकूला मत्स्यादीस्तनूर्धत्ते ॥ ५ ॥ जुगुप्सितत्वं परिहरति उच्चेति ॥ उत्कृष्टापकृष्टेषु देवमनुष्यतिर्यगादिषु अन्तर्यामितया चरन्नपि ईश्वरः निर्गुणत्वात् धियः प्रकृतेर्गुणैः प्राप्तमुच्चावचत्वं न भजते । यथा वायुरुच्चावचेषु विचरन्नपि नोच्चावचत्वं भजते तथेत्यर्थः । कुतः । पुनः शुद्धसत्वमयैर्मत्स्यादिरूपैरुच्चावचत्वशङ्केति भावः॥६॥ विशेषतो मत्स्यावतारप्रयोजनमाह—आसीदिति ॥ हे नृप अतीतस्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिक्रान्तस्य कल्पस्यान्ते ब्रह्मणो निद्रायां भवो ब्राह्मः तेनैव निमित्तेन जातो नैमित्तिकः प्रलय आसीत् । तत्र तदा भूरादयस्त्रयो लोकाः समुद्रे उपप्लुतानिमग्ना आसन् । अत्र प्रलयविषये सारार्थसन्दर्शिनी । यद्यप्ययं ब्रह्मदिनगतचाक्षुषमन्वन्तरमध्य एव भगवदिच्छयैवाकस्मिकप्रलयोऽभूत् तथापि त्रैलोक्यमज्जनात् दैनंदिनप्रलयसाम्यदृष्ट्या भगवत्क्रीडेच्छामनुस्मृत्य निद्राकुलो ब्रह्मापि कञ्चित् कालं सुष्वाप।तदनुसारेणैव गौण्या वृत्त्या ब्राह्मी निशेत्युक्तमिति भागवतामृतानुसारी सन्दर्भः । तच्च भागवतामृतं यथा।"मध्ये मन्वन्तरस्यैव मुनेः शापान्मनुं प्रति। प्रलयोऽसौ बभूवेति पुराणे क्वचिदीर्यते ॥ अयमाकस्मिको जातश्चाक्षुषस्यान्तरे मनोः। प्रलयः पद्मनाभस्य लीलयेति च कुत्रचित्"इति । किंच दक्षस्य मानसकायिकप्रजासृष्ट्यन्यथानुपपत्तेरेव प्रलयोऽयमवश्यं मन्तव्य एव । यदुक्तं चतुर्थे "चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते । यः ससर्ज प्रजा इष्टाः स दक्षः कालचोदितः॥"इति।प्रलयस्य चातुर्विध्यमपि नानुपपन्नम्।अस्य क्षुद्रप्रलयस्य नैमित्तिक एवान्तर्भावात् अत एव पृथिव्युद्धरणहिरण्याक्षवधावपि श्रीवराहदेवेन चाक्षुषप्रलयान्त एव कृतौ । स्वायम्भुवमन्वन्तरारम्भे हि पृथिव्युद्धरणे हिरण्याक्षसम्भवाभावात् । यदुक्तं तत्रैव।"उत्तानपादवंश्यानां तनयस्य प्रचेतसाम्।दक्षस्यैव दितिः पुत्री हिरण्याक्षो दितेः सुतः॥कल्पारम्भे तदा नास्ति सुतोत्पत्तिर्मनोरपि। क्वासौ प्राचेतसो दक्षः क्व दितिः क्व दितेः सुतः॥अतः कालद्वयोद्भूतं श्रीवराहस्य चेष्टितम्।एकत्रैवाह मैत्रेयः क्षत्तुः प्रश्नानुसा-

कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ॥ मुखतो निःसृतान् वेदान् हयग्रीवोऽन्तिकेऽहरत् ॥ ८ ॥
ज्ञात्वा तद्दानवेन्द्रस्य हयग्रीवस्य चेष्टितम् ॥ दधार शफरीरूपं भगवान् हरिरीश्वरः ॥ ९ ॥

रतः॥"इति।एवमिहापि कालद्वयोद्भूतं मत्स्यचेष्टितं स्पष्टमविविच्य खल्वेकीकृत्यैवाह स्म।श्रीमान् मुनीन्द्रः वस्तुतस्तु"आसीदतीतकल्पान्ते"इत्यादिनोक्ता या शफरी वेदानयनार्था साऽन्या सत्यव्रताञ्जलिगता तु चाक्षुषमन्वन्तरीया अन्यैवेति ज्ञेयम्। श्रीसूतस्तु चाक्षुषीयमत्स्यमेवावतारगणमध्ये गणितवान्।तथा हि"रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे। नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्॥"इति।श्रीस्वामिचरणास्तु अत्रेदं चिन्त्यमित्युक्त्वा ब्राह्मो लय इति"योऽसावस्मिन् महाकल्पे"इति चोक्तेरयं महाप्रलय इति प्राप्तम्। तत्तु न । महाप्रलये पृथिव्यादीनामवशेषासंभवात् यावद्ब्राह्मी निशेत्युक्तिविरोधाच्च । नन्वस्तु दैनन्दिन एवेति चेन्न । सांवर्तकैरनावृष्ट्यादिभिर्विना अकस्मादेव सप्तमेऽहनि त्रैलोक्यं निमङ्क्ष्यतीति मत्स्योक्तेरनुपपत्तेः । तस्मात् सत्यव्रतस्य ज्ञानाद्युपदेशार्थमाविर्भूतो भगवान् वैराग्यार्थं माययैव मार्कण्डेयमिव तं प्रलयं दर्शयामासेत्याहुः ॥ ७ ॥ कालेनेति ॥ कालेन दिनावसानकालेन निमित्तेन आगता निद्रा यस्य तस्य अत एव शिशयिषोः शयनं कर्त्तुमिच्छोर्धातुर्ब्रह्मणो मुखतो निःसृतान् शयनसमये आवर्त्यमानान् वेदान् अन्तिके तत्समीपे आगत्य बली हयग्रीवाख्यो दानवः योगबलेन अहरत् ॥८॥ ज्ञात्वेति ॥ तदा दानवेन्द्रस्य हयग्रीवस्य तत् वेदहरणरूपं चेष्टितं ज्ञात्वा ईश्वरः भगवान् हरिः शफरीरूपं मत्स्यरूपं दधारेति । अत्राहुः । ततस्तं दैत्यं हत्वा वेदानादाय समुद्रे विजहार । द्वितीये तथोक्तेरग्रे वक्ष्यमाणत्वाच्च । तेन मत्स्यरूपं विना वेदानां प्रत्याहरणासम्भवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मादिस्वभक्तहितार्थं मत्स्यरूपं दधारेति प्रथमो मत्स्यावतार उक्तः इति ॥ ९ ॥ तत्रेति ॥ तत्र तस्मिन्नेवातीते कल्पे महान् धैर्यादिगुणैर्वृद्धः नारायणपरः नाम्ना सत्यव्रतः कश्चित् राजर्षिरासीत् । स च सलिलमेवाशनं यस्य तथाभूतः संस्तपोऽतप्यत् । अवतारद्वयमतेऽस्य पद्यस्यावतरणं यथा पुनरपि मत्स्यः सत्यव्रताख्यनिजभक्तानुग्रहार्थमवतीर्ण इत्याह । तत्रेति ॥ १० ॥ य इति ॥ योऽतीते कल्पे सत्यव्रताख्यस्तपोऽतप्यत्स एवासावस्मिन् महाकल्पे विवस्वतः सूर्यस्य तनयः श्राद्धदेव इति ख्यातः प्रसिद्धः हरिणा मनुत्वे मनोरधिकारे अर्पितः स्थापितः । अत्राहुः । दैनन्दिनकल्पोऽप्ययं महाकल्पशब्देनोक्तः तादात्विकसत्यव्रतमनोरादरविशेषार्थ इति सन्दर्भः । एतन्महाकल्पान्तर्गतब्रह्मदिने स विवस्वत्तनयो मनुर्नान्यत्रेत्यपरे इति ॥ ११ ॥ एकदेति ॥ तस्य सत्यव्रतस्य एकदा पूर्वस्मिन्नेव कल्पे कदाचित् कृतमालायां नद्यां जलतर्पणं कुर्वतोऽञ्जल्युदके काचिदेका शफरी अभ्यपद्यत प्राप्ता अदृश्यत ॥ १२ ॥ सत्यव्रत इति ॥ हे भारत द्रविडेश्वरः द्रविडदेशाधिपतिः सत्यव्रतः तामञ्जलिगतां शफरीमञ्जलि-

तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ॥ नारायणपरोऽतप्यत् तपः स सलिलाशनः॥१०॥योऽसावस्मिन् महाकल्पे तनयः स विवस्वतः॥ श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ॥ ११ ॥ एकदा कृतमालायां कुर्वतो जलतर्पणम् ॥ तस्याञ्जल्युदके काचिच्छफर्येकाऽभ्यपद्यत ॥ १२ ॥ सत्यव्रतोऽञ्जलिगतां सह तोयेन भारत॥ उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः ॥१३॥ तमाह साऽतिकरुणं महाकारुणिकं नृपम् ॥ यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥ कथं विसृजसे राजन् भीतामस्मिन् सरिज्जले ॥ १४ ॥ तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम् ॥ अजानन् रक्षणार्थाय शफर्याः समनो दधे ॥ १५ ॥ तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम् ॥ १६ ॥ सा तु तत्रैकरात्रेण वर्धमाना कमण्डलौ॥ अलब्ध्वात्मावकाशं वा इदमाह महीपतिम् ॥ १७॥ नाहं कमण्डलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे॥ कल्पयौकः सुविपुलं यत्राहं निवसे सुखम् ॥ १८ ॥

गततोयेन सह नदीतोये उत्ससर्ज तत्याज त्यक्तुमुद्यत इत्यर्थः ॥१३॥ तमिति सार्द्धम् ॥ तमात्मानं त्यजन्तं महाकारुणिकं नृपमतिकरुणं यथा भवति तथा सा शफरी आह स्म । हे राजन् हे दीनवत्सल ज्ञातीनेव घातयन्ति तेभ्यो यादोभ्यो जलचरेभ्यो भीतामत एव दीनां मामस्मिंस्तैर्व्याप्ते सरिज्जले कथं विसृजसे त्यजसि । तङार्षः ॥१४॥ तमिति ॥ स एवमुक्तः सत्यव्रतः आत्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरं तं भगवन्तमजानन् शफर्या रक्षार्थं मनो दधे ॥१५॥ तस्या इति ॥ तथा च तस्याः शफर्याः दीनतरं वाक्यमाश्रुत्य स दयालुर्महीपतिः एनां शफरीं कलशाप्सु कमण्डलुजले । समासान्ताभाव आर्षः । निधाय स्वाश्रमं प्रति निन्ये ॥ १६ ॥ सेति ॥ सा तु शफरी एकरात्रेणैव तत्र कमण्डलौ अलब्धात्मावकाशं यथा भवति तथा वर्धमाना सती । क्त्वान्तपाठे आत्मावकाशमलब्ध्वा महीपतिं सत्यव्रतमिदं वक्ष्यमाणमाह स्म ॥ १७ ॥ नेति ॥ अस्मिन् कमण्डलावहं कृच्छ्रं कष्टं यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवति तथा वस्तुं वासं कर्तुं नोत्सहे । इह एवं सति यत्राहं सुखं यथा तथा निवसामि तादृशमोकः स्थानं कल्पय ॥ १८ ॥ स इति ॥ स एवमुक्तः सत्यव्रतः कमण्डलोः सकाशादेनां शफरीमादाय निष्कास्य औदञ्चनोदके मणिकोदके विपुलकटाहोदके इत्येके । कूपोदक इति परे । न्यधात् निहितवान् । तत्रौदञ्चनोदके क्षिप्ता सा मुहूर्तमात्रेण कालेन हस्तत्रयमवर्धत ॥ १९ ॥ न म इति ॥ हे राजन् मे मम सुखं यथा तथा वस्तुमेतदुदञ्चनमलं पर्याप्तं न भवति अतो मह्यं पृथु विपुलं पदं स्थानं देहि । यस्मादहं त्वां शरणं गता ॥ २० ॥ तत इति ॥ एवमुक्तेन राज्ञा तत उदञ्चनात् आदाय निष्कास्य सा शफरी सरोवरे क्षिप्ता ततोऽपि हे राजन् परीक्षित् सोऽयं महामीनः आत्मना स्वदेहेन तत् सरोवरमावृत्य अभिव्याप्यान्ववर्धत ॥ २१ ॥ नेति ॥ हे राजन् सलिलमेवौकः विहारस्थानं यस्य तस्य मे मम एतत् सरोवरोदकमपि स्वस्तये सुखाय न भवति अतो रक्षायोगेन रक्षोपायेन यथा महाह्रदप्राप्तेरर्वाक् जलं विना न शुष्येयम् तथा अविदासिनि अनुपक्षये जले महाह्रदे मां निधेहि स्थापय ॥ २२ ॥ इतीति ॥ इत्युक्तः स

स एनां तत आदाय न्यधादौदञ्चनोदके ॥ तत्र क्षिप्ता मुहूर्त्तेन हस्तत्रयमवर्धत ॥ १९ ॥ न म एतदलं राजन् सुखं वस्तुमुदञ्चनम् ॥ पृथु देहि पदं मह्यं यत्त्वाऽहं शरणं गता ॥ २० ॥ तत आदाय सा राज्ञा क्षिप्ता राजन् सरोवरे ॥ तदावृत्त्यात्मना तोयं महामीनोऽन्ववर्धत ॥ २१ ॥ नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ॥ निधेहि रक्षायोगेन ह्रदे मामविदासिनि ॥ २२ ॥ इत्युक्तःसोऽनयत् मत्स्यं तत्र तत्राविदासिनि ॥ जलाशये संमितं तं समुद्रे प्राक्षिपज्झषम् ॥ २३ ॥ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ॥ अदन्त्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥ २४ ॥ एवं विमोहितस्तेन वदता वल्गुभारतीम् ॥ तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् ॥ २५ ॥ नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि च ॥ यो भवान् योजनशतमह्नाऽभिव्यानशे सरः ॥ २६ ॥ नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोऽव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥ २७ ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानांनः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २८ ॥

सत्यव्रतस्तं मत्स्यमविदासिनि उत्तरोत्तरविपुलजले तत्र तत्र जलाशये अनयत् । ततश्च तज्जलाशयेन संमितं तं झषं मत्स्यं समुद्रे प्राक्षिपत् ॥ २३ ॥ क्षिप्यमाण इति ॥ समुद्रे च क्षिप्यमाणो झषस्तं सत्यव्रतमिदमाह स्म । हे वीर इह समुद्रे प्रक्षिप्तं माममतिबला मकरादयः अदन्ति अत्स्यन्ति अतो मामिह उत्स्रष्टुं प्रक्षेप्तुं त्वं नार्हसि ॥ २४ ॥ एवमिति ॥ एवं वल्गुभारतीं सुन्दरवाचं वदता तेन मत्स्यरूपेण भगवता विमोहितः सत्यव्रतस्तमाह स्म । भवान् मत्स्यरूपेणास्मान् मोहयन् कः ॥ २५ ॥ नेति ॥ एवंवीर्यः एवंप्रभाववान् कश्चिदपि जलचरोऽस्माभिर्न दृष्टो न वा श्रुतः । यो भवान् अह्ना एकदिवसमात्रेण कालेन योजनशतं सरोऽभिव्यानशे अभितो व्याप्तवान् ॥ २६ ॥ नूनमिति ॥ नूनं हरिर्नारायणोऽव्ययः साक्षाद्भगवानेव त्वं भूतानां भक्तानामस्माकमनुग्रहाय जलौकसां मत्स्यानां रूपं धत्से ॥ २७ ॥ नम इति ॥ हे पुरुषश्रेष्ठ हे विभो ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुभ्यं नमः । हि यस्मात् त्वं स्थित्युत्पत्त्यप्ययानामीश्वरः कर्त्ता निमित्तं प्रपन्नानां भक्तानां नोऽस्माकं मुख्यः सत्यः आत्मा गतिः आश्रयश्च भवानेव ॥ २८ ॥ सर्वे इति ॥ यद्यपि ते तव लीलावताराः सर्वे एव भूतानां भूतिहेतवः विभवप्रयोजनका इति सामान्यतस्तावज्जानामि तथापि यदर्थं भवता अदो मात्स्यं रूपं धृतं तत्प्रयोजनविशेषं ज्ञातुमिच्छामि ॥ २९ ॥ नेति ॥ हे अरविन्दाक्ष पृथगात्मनां देहाद्यात्माभिमानवतां सतां त्वदितरेषां पदोपसर्पणं शरणगमनं यथा मृषा व्यर्थं भवेत् तथा सर्वसुहृत्प्रियात्मनः तव पदोपसर्पणं मृषा न भवेत् । यत् यस्मात् हि सतां स्वभक्तानां नोऽस्माकमेतदद्भुतं वपुरदीदृशो दर्शितवानसि । पृथगात्मना सतामिति पाठे तु पृथगात्मनो देहाद्यात्मदर्शिनः पुरुषस्य असतां परिच्छिन्नानां पदोपसर्पणं यथा मृषा भवेत्तथेत्यर्थः ॥ ३० ॥ इतीति ॥ इत्येवं ब्रुवाणं नृपतिं सत्यव्रतं प्रति एकान्ताः स्वैकाश्रयाः जनाः प्रिया यस्य स जगत्पतिर्भगवान् युगक्षये कल्पक्षये प्रलयार्णवे विहर्तुकामः सत्यव्रतस्य प्रियं चिकीर्षुः अब्रवीत् ॥ ३१ ॥ सप्तम इति ॥ हे अरिन्दम अद्यतनादह्न आरभ्य

सर्वे लीलाऽवतारास्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ २९ ॥ न तेऽरविन्दाक्ष पदोपसर्पणं मृषा भवेत् सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ ३० ॥ श्रीशुक उवाच ॥ इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकान्तजनप्रियः प्रियम् ॥३१॥ श्रीभगवानुवाच ॥ सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिन्दम ॥ निमङ्क्ष्यत्यप्ययाम्भोधौ त्रैलोक्यं भूर्भुवादिकम् ॥ ३२ ॥ त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ ३३ ॥ त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ॥ सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ॥ ३४ ॥ आरुह्य महतीं नावं विचरिष्यस्यविक्लवः ॥ एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३५ ॥ दोधूयमानां तां नावं समीरेण बलीयसा ॥ उपस्थितस्य मे शृङ्गे निबध्नीहि महाहिना ॥ ३६ ॥

सप्तमेऽहनि एतत् भूर्भुवादिकं त्रैलोक्यमप्ययाम्भोधौ प्रलयसमुद्रे निमङ्क्ष्यति निमग्नं भविष्यति ॥ ३२ ॥ त्रिलोक्यामिति ॥ संवर्ताम्भसि प्रलयोदके त्रिलोक्यां लीयमानायां सत्यां तदैव काचिन्मयेरिता प्रेरिता विशाला नौर्नौका त्वां प्रत्युपस्थास्यति उपस्थिता भविष्यति ॥ ३३ ॥ त्वमिति युग्मम् ॥ त्वं च तावत्तदा सर्वा ओषधीः उच्चावचानि विविधानि बीजानि चादायेति शेषः । सप्तऋषिभिः परिवृतः सहितः सर्वैः सत्वैर्जन्तुभिश्चोपबृंहितः संवर्धितमहत्त्वः बृहतीं विपुलां नावमारुह्याविक्लवो दैन्यरहितः एकार्णवे निरालोके सूर्याद्यालोकरहितेऽपि ऋषीणामेव वर्चसा प्रकाशेनैव विचरिष्यसि ॥ ३४ ॥ ३५ ॥ दोधूयमानामिति ॥ बलीयसा प्रचण्डेन समीरेण प्रबलवायुना दोधूयमानामतिशयेन कम्पमानां नावमुपस्थितां संनिहितस्य मम शृङ्गे महाहिना उपस्थितेन वासुकिना निबध्नीहि निबधानश्नः शानजभाव आर्षः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अहमिति ॥ अहं च ऋषिभिः सहितं सहनावं नौसहितं च त्वामुदन्वति प्रलयार्णवे विकर्षन् यावद्ब्राह्मी ब्रह्मसम्बन्धिनी निशा तावद्विचरिष्यामि ॥ ३७ ॥ मदीयमिति ॥ परं ब्रह्मेति शब्दितं कथितं मदीयं महिमानं स्वरूपं त्वत्कृतैः संप्रश्नैर्मे मया हृदि विवृतमुपदेशेन प्रकाशितमनुग्रहेण दत्तमिवापरोक्षं वेत्स्यसि।इडभाव आर्षः।विन्दतेर्वा रूपम् ॥३८॥ इत्थमिति॥राजानं सत्यव्रतमेवमादिश्य हरिर्मत्स्यमूर्तिस्तत्रैवान्तरधीयत ।"धीङ् आधारे" दिवादिः।ततः सत्यव्रतो यं कालं सप्तमेऽद्यतनादिति हृषीकेशः भगवानादिशत्तं काल-मन्ववैक्षत प्रतीक्षितवान् ॥ ३९ ॥ आस्तीर्येति ॥ प्राक् पूर्वस्यां कूलमग्रभागो येषां तथाभूतान् दर्भान् कुशानास्तीर्य तेषु प्रागुदङ्मुखः प्रागुत्तरयोरन्तराले मुखं यस्य सः ईशानदिगभिमुख इत्यर्थः । राजर्षिः सत्यव्रतः मत्स्यरूपिणो हरेः पादौ चिन्तयन् निषसाद उपविष्टवान् ॥ ४० ॥ तत इति ॥ ततश्च वर्षद्भिः महामेघैर्वर्द्धमानः अत एवोद्वेलः

अहं त्वामृषिभिः साकं सहनावमुदन्वति ॥ विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ॥ ३७॥ मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ ३८॥ इत्थमादिश्य राजानं हरिरन्तरधीयत ॥ सोऽन्ववैक्षत तं कालं यं हृषी-केश आदिशत् ॥ ३९ ॥ आस्तीर्य दर्भान् प्राक्कूलान् राजर्षिः प्रागुदङ्मुखः ॥ निषसाद हरेः पादौ चिन्तयन् मत्स्यरूपिणः ॥ ४० ॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन् महीम् ॥ वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ४१ ॥ ध्यायन् भगवदादेशं ददृशे नावमागताम् ॥ तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः॥४२॥ तमूचुर्मुनयः प्रीता राजन् ध्यायस्व केशवम् ॥ स वै नः संकटादस्मादविता शं विधास्यति ॥ ४३ ॥ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ॥ एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः ॥४४॥ निबध्य नावं तच्छृङ्गे यथोक्तो हरिणा पुरा ॥ वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम् ॥ ४५ ॥ राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥ ४६ ॥

उल्लङ्घितमर्यादः अत एव सर्वतो महीं प्लावयन् निमज्जयन् समुद्रः समदृश्यत ॥ ४१ ॥ ध्यायन्निति ॥ ततश्च सत्यव्रतो भगवतो मत्स्यरूपिणः आदेशं ध्यायन् आगतां नावं ददृशे दृष्टवान् । तङार्षः । ततश्च ओषधीः वीरुधः बीजानि चादाय विप्रेन्द्रैः सप्तऋषिभिः सहितां नावमारुरोह ॥४२॥ तमिति ॥ ततस्तं सत्यव्रतं मुनयः सप्तर्षयः ऊचुः । हे राजन् केशवं भगवन्तं ध्यायस्व । तङार्षः। स वै केशव एव नोऽस्मान् अस्मात् सङ्कटात् अविता रक्षिष्यति शं सुखं च विधास्यति करिष्यति॥४३॥स इति॥ तत एवमुक्तेन राज्ञानुध्यातः एकशृङ्गधरो हैमः स्वर्णाभः नियुतयोजनः लक्षयोजनपरिमितकायः मत्स्यः मत्स्यरूपः स भगवान् तत्र महार्णवे प्रादुरासीत् ॥४४ ॥ निबध्येति ॥ हरिणा पूर्वं यथोक्तस्तथैव वरत्रेण दोरकरूपेण अहिना वासुकिना नावं तस्य मत्स्यस्य शृङ्गे निबध्य सन्तुष्टचित्तस्तं मधुसूदनं भगवन्तं तुष्टाव ॥ ४५ ॥ अनादीति ॥ अनादिर्या अविद्या

CC-0. In Public Domain. Digitization by eGangotri

तया उपहता आत्मसंवित् स्वतत्वज्ञानं येषां ते अत एव तन्मूलैः अनाद्यविद्यामूलैः संसारपरिश्रमैः आतुराः व्याकुला जना इह संसारे यदृच्छया आकस्मिक्या यत्कृपया उपसृताः यमाश्रिताः सन्तो यमेवाप्नुयुः स मुक्तिदो भवानेव परमः सर्वत उत्कृष्टो नोऽस्माकं गुरुर्भूयात् ॥ ४६ ॥ जन इति ॥ निजकृतानि कर्माणि एव बन्धनानि यस्य सः अबुधोऽयं जनः असुखं दुःखं यथा भवति तथा सुखेच्छया कर्म समीहते करोति । यस्य तव सेवया त्वत्प्रसादेनाज्ञाननिवृत्त्यात्मज्ञानेन तां सुखेच्छाम् असन्मतिं देहाद्यात्माध्यासरूपां च विधुनोति निरस्यति ततश्च बन्धहेतुकर्माभावाद्विमुक्तो भवति स भगवान्नोऽस्माकं हृदयरूपं ग्रन्थिं बन्धनं भिद्यात् यतः स एव गुरुः ॥ ४७ ॥ ननु कर्मभिः सत्वशुद्धिं विना कथं ग्रन्थिभेदस्तत्राह—यत्सेवयेति ॥ पुमान् मुमुक्षुः पुरुषो यस्य तव सेवया एव आत्मनो मनसो मलं तमः विजह्यात् । त्यजेत् यथा रुद्ररोदनं रजतं सुवर्णं च यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रु व्यशीर्यत । " तद्रजतं हिरण्यमभवत् " इति श्रुतेः । यद्यथाग्नेः सम्पर्कादेवात्मनो निरवशेषं मलं जहाति निजं वर्णं शुद्धं स्वरूपं भजते ननु क्षालनादिभिः तथा न यज्ञादिभिर्मलत्यागः किंतु त्वत्सेवयैव स एष अव्ययः ईशः गुरोरपि परमः पूज्यो नो गुरुर्भूयात् ॥ ४८ ॥ नेति ॥ पुंसो भगवद्विमुखतयान्यो-

जनोऽबुधोऽयं निजकर्मबन्धनः सुखेच्छया कर्म समीहतेऽसुखम् ॥ यत्सेवया तां विधुनोत्यसन्मतिं ग्रन्थिं स भिद्याद्धृदयं स नो गुरुः ॥ ४७ ॥ यत्सेवयाऽग्नेरिव रुद्ररोदनं पुमान् विजह्यान्मलमात्मनस्तमः ॥ भजेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ॥ ४८ ॥ न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ॥ कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥ अचक्षुरन्धस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः ॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥ ५० ॥ जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः ॥ त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम् ॥ ५१ ॥

पासकस्य देवाः गुरवोऽन्ये च जनाः समेताः सर्वे मिलिता अपि स्वयं तन्निरपेक्षाः सन्तो यस्य तव प्रसादस्यायुतसङ्ख्याकानां भागानां मध्ये एकभागस्य लेशमात्रमपि कर्तुं न प्रभवन्ति तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥ अचक्षुरिति ॥ यथा अचक्षुः चक्षुर्हीनः स्वयमन्ध एवान्धस्य पुरुषान्तरस्याग्रणीः मार्गप्रदर्शने नेता कृतश्चेत् तर्हि तदन्नादिकं भक्षयंस्तमादाय स्वयमपि मार्गगर्ते पतति । अन्धत्वाविशेषात् । तथा अविदुषः अज्ञस्य जनस्य अबुधः अज्ञ एव गुरुः कृतश्चेत् स्वयं नरके पतति शिष्यमपि पातयति त्वं तु अर्कदृक् सूर्यादीनामपि प्रकाशकः सर्वदृशां सर्वनेत्राणां सर्वेन्द्रियाणामन्तःकरणादीनां सर्वज्ञानानां च समीक्षणः प्रकाशकः सर्वज्ञ इत्यर्थः । यद्वा । अर्कदृक् अर्कप्रकाशवत् स्वत एव दृक् ज्ञानं यस्य सः । यद्वा । अर्कवद् दृश्य इत्यर्थः । सर्वत्र अत एव स्वगतिमात्मतत्वं बुभुत्सतां बुभुत्साद्भिः । शता आर्षः । नोऽस्माभिस्त्वं गुरुतया वृतोऽसि । कर्तरि षष्ठी ॥ ५० ॥ जन इति ॥ जनः अज्ञो जनः गुरुत्वाभिमानवान् अज्ञस्य जनस्य असतीमर्थकामाद्युपायविषयां मतिमादिशते । तङार्षः । यया मत्या स दुरत्ययमन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिक्रमणीयं तमः नरकादि संसारं प्रपद्येत प्राप्नोति त्वं तु अव्ययमविनाशि अमोघं मोक्षाविनाभूतं ज्ञानमात्मतत्त्वमुपदिशसि । येन ज्ञानेनाञ्जसानायासेन जनो निजं पदं स्वरूपं प्रपद्यते प्राप्नोति ॥ ५१ ॥ त्वमिति ॥ त्वं सर्वलोकस्य सुहृत् प्रिय ईश्वरश्च आत्मा गुरुः ज्ञानप्रदः ज्ञानं च अभीष्टसिद्धिः तद्रूपः तथापि हृदि सन्तमपि भवन्तम् अन्धधीरविवेकी हृदि बद्धकामः विषयासक्तः अयं लोको न जानाति ॥ ५२ ॥ तमिति ॥ तमुक्तविधं देववरं देवानामपि पूज्यं वरेण्यमाश्रयतया वरणीयम् ईशं त्वां प्रतिबोधनाय तत्वोपदेशाय प्रपद्ये शरणं व्रजामि अतो हे भगवन् अर्थदीपैः परमात्मार्थप्रकाशकैः स्ववचोभिर्हृदय्यान् हृदये भवान् ग्रन्थीन् ग्रन्थिवद्दुःखनिर्मोच्यान् अहङ्कारादीन् छिन्धि अपाकुरु । स्वं स्वकीयमोकः स्वरूपं विवृणु प्रकाशय ॥ ५३ ॥ इतीति ॥ इत्येवमुक्तवन्तं प्रार्थितवन्तं नृपतिं सत्यव्रतं प्रति महाम्भोधौ विहरन्मत्स्यरूपी भगवानादिपूरुषस्तत्त्वमब्रवीत् ॥ ५४ ॥ पुराणेति ॥ दिव्यां स्वेन प्रणीतां साङ्ख्यं प्रकृतिपुरुषविवेकं योगो भक्तियोगः क्रिया च त एते प्रतिपाद्यतयाऽस्यां सन्तीति तथा तां पुराणसंहितां

त्वं सर्वलोकस्य सुहृत् प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ॥ तथापि लोको न भवन्तमन्धधीर्जानाति सन्तं हृदि बद्धकामः ॥५२॥
तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ॥ छिन्ध्यर्थदीपैर्भगवन् वचोभिर्ग्रन्थीन् हृदय्यान् विवृणु स्वमोकः ॥ ५३ ॥ श्रीशुक
उवाच ॥ इत्युक्तवन्तं नृपतिं भगवानादिपूरुषः ॥ मत्स्यरूपी महाम्भोधौ विहरंस्तत्त्वमब्रवीत् ॥५४॥ पुराणसंहितां दिव्यां सांख्ययोग-
क्रियावतीम् ॥ सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥ ५५ ॥ अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम् ॥ नाव्यासीनो भगवता प्रोक्तं
ब्रह्म सनातनम् ॥ ५६ ॥ अतीतप्रलयापाय उत्थिताय स वेधसे ॥ हत्वाऽसुरं हयग्रीवं वेदान् प्रत्याहरद्धरिः ॥ ५७ ॥ स तु सत्यव्रतो
राजा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादात् कल्पेऽस्मिन् आसीद्वैवस्वतो मनुः ॥ ५८ ॥

मत्स्यपुराणं तदेव अशेषतः कात्स्न्र्येनात्मनो गुह्यं रहस्यं राजर्षेः सत्यव्रतस्य अब्रवीत् ॥ ५५ ॥ अश्रौषीदिति ॥ तदेतत् भगवता प्रोक्तमात्मनः प्रत्यगात्मनस्तत्वं परमार्थभूतं सनातनं ब्रह्म ऋषिभिः सह नाव्यासीनः सत्यव्रतो निःसंशयं यथा भवति तथा अश्रौषीत् शुश्राव ॥५६॥ अतीतेति ॥ स हरिः मत्स्यमूर्तिः प्रथममेव हयग्रीवमसुरं हत्वा ततो वेदानादाय प्रलयार्णवे विजहार । यथोक्तं द्वितीये ब्रह्मणा। "विस्रंसितानुरुभये सलिले मुखान् मे आदाय तत्र विजहार ह वेदमार्गान्" इति ततश्चातीतः पूर्वो यः प्रलयस्तस्यापायेऽवसाने शयनादुत्थिताय वेधसे ब्रह्मणेऽदात् प्रत्याहरत् समर्पयामास ॥५७॥ स इति ॥ स तु सत्यव्रताख्यो राजा विष्णोः प्रसादात् शास्त्रोक्तं ज्ञानमपरोक्षं विज्ञानं ताभ्यां संयुतोऽस्मिन् कल्पे वैवस्वतः सूर्यपुत्रः श्राद्धदेवाख्यो मनुरासीत् । उक्तश्लोकद्वये चक्रवर्ती मत्स्यावतारद्वयसमयद्वयं प्रयोजनद्वयं चाह।अतीतप्रलयस्यापाये स्वायम्भुवमन्वन्तरारम्भे इत्यर्थः। तुर्भिन्नक्रमे। सत्यव्रतस्तु चाक्षुषमन्वन्तरमध्य इति शेषो बोध्यः। "चाक्षुषोदधिसम्प्लुवे अपाद्वैवस्वतं मनुम्" इति वाक्यानुरोधात् विष्णोर्मत्स्यरूपस्य प्रसादात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानसंयुत इति चाक्षुषीयमत्स्यावतारप्रयोजनमुक्तम् इत्याह ॥ ५८॥ सत्येति ॥ सत्यव्रतस्य राजर्षेः मायया मत्स्यमूर्तेः शार्ङ्गिणो भगवतश्च संवादात्मकं महदाख्यानं श्रुत्वा जनः किल्बिषात्सर्वपापाद्विमुच्यते ॥ ५९ ॥ अवतार इति ॥ योऽयं हरेः अवतारस्तं यो नरोऽन्वहमहरहः कीर्तयेत् तस्येह जीवतः सर्वे सङ्कल्पाः सिध्यन्ति देहावसाने तु सः परमां भागवतीं गतिं मुक्तिं याति ॥ ६० ॥ प्रलयेति ॥ यः प्रलयपयसि प्रलयार्णवे विहरन् सुप्ता लीना शक्तिः सृष्टिसामर्थ्यं यस्य निद्राभिभूतस्य धातुर्ब्रह्मणो मुखेभ्योऽपनीतं निःसृतं हयग्रीवेण हृतं श्रुतिगणं दितिजं दैत्यं हत्वा प्रत्युपादत्त तत आदाय ब्रह्मणे ददौ तथा सत्यव्रतानां सत्यव्रतस्य ऋषीणां च"छत्रिणो यान्ति"इतिवल्लिङ्गसमवायाद्बहुवच-

सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥ ५९ ॥ अवतारो हरेर्योऽयं कीर्तयेद-न्वहं नरः ॥ संकल्पास्तस्य सिध्यन्ति स याति परमां गतिम् ॥ ६० ॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमुपनीतं प्रत्युपाद-त्त हत्वा ॥ दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥ ६१ ॥ इति श्रीमद्भागवते महापुराणे अष्टम-स्कन्धे मत्स्यावतारचरितानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ इति अष्टमस्कन्धः समाप्तः ॥

नम् । ब्रह्म ब्रह्मप्रतिपादकं पुराणमकथयत् । तमखिलहेतुं सर्वकारणभूतं जिह्ममीनं कपटेन मीनरूपं भगवन्तमहं नतोऽस्मि । चक्रवर्तीत्वाह समासेन प्रयोजनद्वयं पुनः स्पष्ट-माह । प्रलयेति । दितिजं हत्वा सत्यव्रतानामिति गौरवेण बहुवचनम् । जिह्ममीनं कुटिलाकारं मीनं यस्य शृङ्गे नौर्निबद्धा स तु मीनः कुटिलाकारः आडीसंज्ञकः प्रसिद्ध एव लोके इति तथोक्तम् ॥ ६१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टमस्य चतुर्विंशे व्यधादिमाम् ॥ २४ ॥ हे मुक्तिदेवि बहुजन्मभिरप्यलभ्यान-र्घ्यापि गोपशिशुकस्य करङ्गतासि ॥ पर्णस्य[1] खण्डमपि हन्त निवेद्य यस्मै क्रीणन्ति मङ्क्षु भवतीं बत भिक्षवोऽपि ॥ १ ॥

१ तुलस्यादिपत्रस्य ।

अयं श्रीमद्भागवतस्य अष्टमः स्कन्धः बून्दीनगरनिवासिपण्डितगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्या-ख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वीये "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितः।वैशाखकृष्ण ११ शकाब्दाः १८२३, संवत् १९५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

॥ श्रीमद्भागवते अष्टमस्कन्धः ॥

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते अष्टमस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

॥ श्रीमद्भागवते नवमस्कन्धः ॥

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनामिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं सञ्चिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयाय कुरुते नवमे प्रयत्नम् ॥ ३ ॥ प्रथमे सूर्यजे वंशे सुद्युम्नस्त्रीत्वमीरितम् ॥ सोमवंशप्रवेशोक्त्यै तत्र श्लोका द्विर्वोर्द्वयः॥ अनुष्टुभोऽपि तावत्यं उवाचेति च पञ्चकम् ॥१॥ मन्वन्तराणीति॥सर्वाणि चतुर्दशापि मन्वन्तराणि मन्वादिषट्कानि त्वयोक्तानि तथा तत्र तेषु मन्वन्तरेषु कृतानि अनन्तं वीर्यं यस्य तस्य हरेर्वीर्याणि च त्वयोक्तानि मे मया श्रुतानि च ॥ १ ॥ य इति ॥ योऽसौ द्रविडदेशानामीश्वरः सत्यव्रतो नाम राजर्षिः पुरुषस्य मत्स्यरूपिणो भगवतः सेवयातीतकल्पान्ते अतीतमन्वन्तरान्ते ज्ञानं लेभे ॥ २ ॥ स इति ॥ स वै अस्मिन् कल्पे विवस्वतः पुत्रः

॥ श्रीगणेशाय नमः ॥ राजोवाच ॥ मन्वन्तराणि सर्वाणि त्वयोक्तानि श्रुतानि मे ॥ वीर्याण्यनन्तवीर्यस्य हरेस्तत्र कृतानि च ॥ १ ॥ योऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ॥ ज्ञानं योऽतीतकल्पान्ते लेभे पुरुषसेवया ॥ २ ॥ स वै विवस्वतः पुत्रो मनुरासीदिति श्रुतम् ॥ त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥ ३॥ तेषां वंशं पृथक् ब्रह्मन्वंश्यानुचरितानि च ॥ कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥ ४ ॥ ये भूता ये भविष्याश्च भवन्त्यद्यतनाश्च ये ॥ तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥ ५॥ सूत उवाच ॥ एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् ॥ पृष्टः प्रोवाच भगवान् शुकः परमधर्मवित् ॥ ६ ॥ श्रीशुक उवाच ॥ श्रूयतां मानवो वंशः प्राचुर्येण परंतप ॥ न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥ ७ ॥ परावरेषां भूतानामात्मा यः पुरुषः परः ॥ स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किंचन ॥ ८ ॥

सन् मनुरासीदिति त्वत्त एव मया श्रुतमेव । ये च तस्य मनोः सुता इक्ष्वाकुप्रमुखा नृपास्त्वया प्रोक्तास्तेऽपि श्रुताः ॥३ ॥ तेषामिति ॥ हे ब्रह्मन् हे महाभाग तेषां वंशं वंश्यानां वंशजानामनुचरितानि च नित्यं शुश्रूषतां श्रोतुमिच्छताम् । शता आर्षः । नोऽस्माकं कीर्तयस्व ॥ ४ ॥ ये इति ॥ तस्य मनोर्वंशे ये भूताः ये च भविष्या ये चाद्यतना वर्तमाना भवन्ति तेषां सर्वेषां पुण्या कीर्तिर्येषां ते विक्रमान् चरितानि नोऽस्माकं वद ॥ ५ ॥ एवमिति ॥ एवं परीक्षिता राज्ञा ब्रह्मवादिनां सदसि सभायां पृष्टः भगवान् परमधर्मवित् शुकः प्रोवाच ॥ ६ ॥ श्रूयतामिति ॥ हे परन्तप मानवो वैवस्वतमनुसम्बन्धी वंशः प्राचुर्येण प्राधान्यतः सङ्क्षेपेण कथ्यमानस्त्वया श्रूयताम् । स्पष्टमन्यत् ॥७॥ परावरेषामिति ॥ यः परावरेषामुच्चावचानां भूतानामात्मा उपादानभूतः परः पुरुषः श्रीनारायणः स एव कल्पान्ते प्रलयदशायामिदं विश्वमासीत् तत्रैवेदं सर्वं लीनमासीत् अतोऽन्यत् किञ्चनापि नासीत् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति ॥ हे महाराज तस्य पुरुषस्य नाभेः सकाशात् हिरण्मयः प्रकाशमानः पद्मकोशः समभवत् । तस्मिन् पद्मकोशे चतुराननः चतुर्मुखः स्वयम्भूः ब्रह्मा जज्ञे जातः ॥९॥ मरीचिरिति ॥ तस्य ब्रह्मणो मनसः सकाशान्मरीचिर्जज्ञे । तस्यापि मरीचेः कश्यपः पुत्रो जज्ञे । ततः कश्यपात् दाक्षायण्यामदित्यां विवस्वान् सुतोऽभवत् ॥१०॥ तत इति ॥ हे भारत ततस्तस्मात् विवस्वतः संज्ञायां भार्यायां श्राद्धदेवाख्यो मनुरास जातः । स चात्मवान् प्रशस्तमनस्को मनुः श्रद्धाख्यायां स्वभार्यायां दश पुत्रान् जनयामास । अत्र "इक्ष्वाकुर्घ्राणत" इत्यग्रे कथनादिक्ष्वाकुर्घ्राणादेव पत्युः पुत्रस्तत्पत्न्या अपिपुत्र एवेति दशानामपि श्रद्धायां जननमुक्तम् । क्षुवत इति श्लोके बाहुल्याभिप्रायेणेति स्वामिपादोक्तेरपि वस्तुतोऽयमेवाशयः ॥ ११ ॥ इक्ष्वाकिति ॥ तान् इक्ष्वाकित्यादीन् विदुः विभुरिति पाठे विभुर्मनुः इक्ष्वाकादीन् अजनयत् इति । नाभागं चेति पाठे नभग एव नाभागः ॥ १२ ॥ अप्रजस्येति ॥ पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् अप्रजस्य अप्रजसः । असिजभाव आर्षः । मनोः प्रजार्थं मित्रावरुणदेवताकामिष्टिं मनोराचार्यो भगवान्

तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ॥ तस्मिन् जज्ञे महाराज स्वयंभूश्चतुराननः ॥ ९ ॥ मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः ॥ दाक्षायण्यां ततोऽदित्यां विवस्वानभवत् सुतः ॥१०॥ ततो मनुः श्राद्धदेवः संज्ञायामास भारत ॥ श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ॥११॥ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ॥ नरिष्यन्तं पृषध्रं च नभगं च कविं विभुः॥१२॥ अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान् किल॥ मित्रावरुणयोरिष्टिं प्रजार्थमकरोत्प्रभुः ॥१३॥ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत ॥ दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥१४॥ प्रेषितोऽध्वर्युणा होता यत्तया सुसमाहितः ॥ हविषि व्यचरत्तेन वषट्कारं गृणन्द्विजः ॥ १५ ॥ होतुस्तद्व्यभिचारेण कन्येला नाम साऽभवत् ॥ तां विलोक्य मनुः प्राह नातिहृष्टमना गुरुम् ॥१६॥ भगवन् किमिदं जातं कर्म वो ब्रह्मवादिनाम् ॥ विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया॥१७॥

प्रभुर्वसिष्ठः अकरोत् अकारयत्॥१३॥तत्रेति ॥ तत्र तस्मिन् यागे क्रियमाणे सति पयोव्रता पय एव व्रतं नियत आहारो यस्याः तथाभूता श्रद्धाख्या मनोः पत्नी होतारमुपागम्य तं प्रणिपत्य च दुहित्रर्थं समयाचत।मम कन्या यथा भवेत्तथा यजेति प्रार्थितवतीत्यर्थः॥१४॥ प्रेषित इति॥ततोऽध्वर्युणा होतर्यजेति प्रेषितो होता द्विजः हविषि गृहीते सति सुसमाहितः एकाग्रचित्तः सन् यत्तया प्रार्थितं तत् ध्यायन् वषट्कारं गृणन् वौषडित्युच्चारयन् तेन गृहीतेन हविषा व्यचरत् अयजत् । अध्यायत्तदिति वाचेति च पाठे ॥ १ ॥ वाचा वषट्कारं गृणन् तत् राज्ञीप्रार्थितम् अध्यायत्॥१५॥ होतुरिति ॥ तत्तेन होतुर्व्यभिचारेण दोषेण इलेति नाम प्रसिद्धा कन्या साऽभवत् राज्ञैव तत्क्षणे नाम कृतमिति ज्ञेयम् । तां कन्यां विलोक्य नातिहृष्टं मनो यस्य सः मनुर्गुरुं वसिष्ठं प्राह स्म । नातीति अप्रजस्त्वापगमात्सामान्यतो हर्ष उत्पन्न एव ॥१६॥ भगवन्निति ॥ हे भगवन् ब्रह्मवादिनां वो युष्माकं युष्माभिरनुष्ठितमिदं कर्म विपर्ययोऽस्यास्तीति विपर्ययं विपरीतफलम् । अर्श आद्यच् । तेन नपुंसलिङ्गता किं जातम् । अहो कष्टं ब्रह्मविक्रिया मन्त्रफलवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्यास एवं मा स्यात् भवितुं नार्हेत् ॥ १७ ॥ यूयमिति ॥ यूयं मन्त्रविदः मन्त्रस्वरूपतदर्थतत्प्रयोगविदः युक्ताः जितचित्ताः तपसा दग्धं किल्बिषं येषां ते तदेवंभूतानां युष्माकं सङ्कल्पवैषम्यं कुतः कस्माद्धेतोर्बभूव । यथा विबुधेषु देवेषु अनृतं नार्हति तथेति ॥ १८ ॥ तदिति ॥ तदुक्तं तस्य मनोर्वचो निशम्य भगवान् प्रपितामहो वसिष्ठः होतुर्व्यतिक्रमं सङ्कल्पविपर्ययं ज्ञात्वा रविनन्दनं श्राद्धदेवं प्रति बभाषे ॥ १९ ॥ एतदिति ॥ यद्यपि होतुः व्यभिचारतस्ते तवैतत्सङ्कल्पस्य वैषम्यं विपरीतं फलं जातं तथापि स्वतेजसा स्वतपोबलेन तव सुप्रजस्त्वं साधयिष्ये । कन्याया एव पुत्रत्वं साधयिष्ये इत्यर्थः ॥२०॥ एवमिति ॥ हे राजन् एवं व्यवसितः कृतनिश्चयः भगवान् महायशाः स वसिष्ठ इलायाः कन्यायाः पुंस्त्वकाम्यया पुंस्त्वसम्पादनेच्छया आदिपुरुषं भगवन्तमस्तौषीत् । अनिडार्षः ॥ २१ ॥ तस्मै इति ॥ ईश्वरो भगवान् हरिः तत्कृतेन स्तोत्रेण तुष्टस्तस्मै वसिष्ठाय कामवरं कामितमिलायाः पुंस्त्वरूपं वरं ददौ । तेन वरेण सा इला सुद्युम्नाख्यः पुरुषश्रेष्ठः अभवत् ॥२२॥ स इति युग्मम् ॥ हे महाराज स वीरः सुद्युम्नः

यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः ॥ कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥ १८ ॥ तन्निशम्य वचस्तस्य भगवान्प्रपितामहः ॥ होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ॥ १९ ॥ एतत् संकल्पवैषम्यं होतुस्ते व्यभिचारतः ॥ तथाऽपि साधयिष्ये ते सुप्रजस्त्वं स्वतेजसा ॥ २० ॥ एवं व्यवसितो राजन् भगवान् सुमहायशाः ॥ अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥ २१ ॥ तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः ॥ ददाविलाऽभवत्तेन सुद्युम्नः पुरुषर्षभः ॥२२॥ स एकदा महाराज विचरन् मृगयां वने ॥ वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥ २३ ॥ प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ॥ दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥ २४ ॥ स कुमारो वनं मेरोरधस्तात्प्रविवेश ह ॥ यत्रास्ते भगवान् रुद्रो रममाणः सहोमया ॥ २५ ॥ तस्मिन् प्रविष्ट एवासौ सुद्युम्नः परवीरहा ॥ अपश्यत् स्त्रियमात्मानमश्वं च वडवां नृप ॥ २६ ॥ तथा तदनुगाः सर्वे आत्मलिङ्गविपर्ययम् ॥ दृष्ट्वा विमनसोऽभूवन् वीक्ष्यमाणाः परस्परम् ॥ २७ ॥

एकदा वने मृगयां विचरन् कर्त्तुं दंशितो बद्धकवचः कतिपयैरमात्यैः सेनापतिभिः परिवृतः रुचिरं चापं धनुस्तथा परमाद्भुतान् निशितान् शरांश्च प्रगृह्य सैन्धवं सिन्धुदेशोद्भवमश्वमारुह्य उत्तरां दिशं प्रति अनुमृगं मृगस्य पश्चात् जगाम ॥ २३ ॥ २४ ॥ स इति ॥ स कुमारो मनुपुत्रः सुद्युम्नो यत्र भवान् शर्वो रुद्रः उमया सह रममाण आस्ते तन्मेरोरधस्ताद्वर्तमानं वनं प्रविवेश ॥ २५ ॥ तस्मिन्निति ॥ हे नृप परान् शत्रून् वीरान् हन्तीति तथाभूतोऽसौ सुद्युम्नस्तस्मिन् वने प्रविष्ट एव प्रवेशमात्रेणैवात्मानं स्त्रियमपश्यत् । अश्वं च वडवामपश्यत् ॥ २६ ॥ तथेति ॥ तथा तस्य सुद्युम्नस्यानुगाः सर्वे आत्मलिङ्गस्य पुंस्त्वस्य विपर्ययं स्त्रीत्वं दृष्ट्वा परस्परं वीक्षमाणाः विमनसः खिन्नचित्ता अभूवन् ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमिति ॥ हे भगवन् एवंविधः प्रवेशमात्रेण स्त्रीसम्पादकत्वलक्षणो गुणः स्वभावो यस्य तथाविधो देशः कथं सम्भवति केन वा तथाविधः कृतः एनं मया कृतं प्रश्नं समाचक्ष्व समाधत्स्व । हि यस्मात् एतच्छ्रवणे नोऽस्माकं परं कौतूहलमतीवौत्सुक्यं वर्तते ॥२८॥ एकदेति ॥ एकदा कदाचित् स्वदीप्त्या दिशो वितिमिराभासाः विगतं तिमिरमाभासः अन्यप्रकाशश्च यासु तथाभूताः कुर्वन्तः सुव्रताः तपस्विनः ऋषयः गिरिशं द्रष्टुं तत्रेलावृतस्थवने समुपागमन् ॥२९॥ तानिति ॥ तान् समागतान् ऋषीन् विलोक्याम्बिका देवी विवासा वस्त्ररहिता अतः भृशं व्रीडिता सती अथ तद्दर्शनानन्तरमेव भर्तुः रुद्रस्याङ्कात् उत्थायाशु नीवीं वस्त्रं पर्यधात् धृतवती ॥३०॥ ऋषय इति ॥ तथा ऋषयोऽपि रममाणयोस्तयोः शिवभवान्योः प्रसङ्गं रत्यभिनिवेशं वीक्ष्य स्त्रीसङ्गदर्शनकलुषितचित्तत्वात् तस्मात्स्थानान्निवृत्तास्तत्प्रसङ्गरहितं नरनारायणाश्रमं ययुः ॥३१॥ तदिति ॥ तत्तदा प्रियायाः प्रियकाम्यया प्रियं कर्तुमिच्छया भगवान् रुद्र इदं वक्ष्यमाणमाह स्म।यः कश्चित्पुमान् एतत्स्थानं प्रविशेत् स वै निश्चयेन योषिद् भवेदिति ॥३२॥ तत इति

॥ राजोवाच ॥ कथमेवंगुणो देशः केन वा भगवन् कृतः ॥ प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥ २८ ॥ श्रीशुक उवाच ॥ एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ॥ दिशो वितिमिराभासाः कुर्वन्तः समुपागमन् ॥ २९ ॥ तान् विलोक्याम्बिका देवी विवासा व्रीडिता भृशम् ॥ भर्तुरङ्कात् समुत्थाय नीवीमाश्वथ पर्यधात् ॥ ३० ॥ ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ॥ निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम् ॥ ३१ ॥ तदिदं भगवानाह प्रियायाः प्रियकाम्यया ॥ स्थानं यः प्रविशेदेतत् स वै योषिद्भवेदिति ॥ ३२ ॥ तत ऊर्ध्वं वनं तद्वै पुरुषा वर्जयन्ति हि ॥ सा चानुचरसंयुक्ता विचचार वनाद्वनम् ॥३३॥ अथ तामाश्रमाभ्याशे चरन्तीं प्रमदोत्तमाम् ॥ स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः ॥३४॥ सापि तं चकमे सुभ्रूः सोमराजसुतं पतिम् ॥ स तस्यां जनयामास पुरूरवसमात्मजम्॥३५॥एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ॥ सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम ॥ ३६ ॥ स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ॥ सुद्युम्नस्याशयन् पुंस्त्वमुपाधावत शङ्करम् ॥ ३७ ॥

अर्द्धम् ॥ तत ऊर्द्ध्वं रुद्रशापादनन्तरं तद्वनं पुरुषा वर्जयन्ति स्त्रीत्वप्राप्तिभयात्तत्र न प्रविशन्तीत्यर्थः । सा चेत्यर्द्धम् । सा च सुद्युम्नरूपा स्त्रीत्वं प्राप्ता । अनुचरेति पुंस्त्वं तु पूर्वावस्थाभिप्रायेण । अनुचरीभिः संयुक्ता वनाद्वनं वनान्तराद्वनान्तरं विचचार ॥ ३३ ॥ अथेति ॥ अथ तां स्त्रीभिः परिवृतां स्वाश्रमस्याभ्याशे समीपे चरन्तीं प्रमदोत्तमां स्त्रीश्रेष्ठां दृष्ट्वा भगवान् बुधः सोमपुत्रः चकमे ॥ ३४ ॥ सेति ॥ सापि सुभ्रूः स्त्री तं सोमराजसुतं पतिं चकमे । एवं परस्परकामनया मिथुनीबभूवतुः । स च बुधस्तस्यां पुरूरवसंज्ञकमात्मजं जनयामास ॥ ३५ ॥ एवमिति ॥ हे नृप मानवो मनुपुत्रः सुद्युम्न एवं स्त्रीत्वमनुप्राप्तः सन् स्वकुलाचार्यं वसिष्ठं सस्मारेति वयं शुश्रुम ॥ ३६ ॥ स इति ॥ स तेन स्मृतो वसिष्ठस्तत्रागत्य तस्य तां दशां स्त्रीत्वप्राप्तिं दृष्ट्वा कृपया भृशमत्यन्तं पीडितः सन् पुनः सुद्युम्नस्य पुंस्त्वमाशयन् इच्छन् आशाशब्दात् "तत्करोति" इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिच् ततः शता । शङ्करमुपाधावत अस्तावीत् ॥ ३७ ॥ तुष्ट इति ॥ हे विशांपते राजन् स भगवान् शङ्करस्तदुपधावनेन तुष्टः सन् तस्मै ऋषये वसिष्ठाय प्रियमावहन् तस्य प्रीतिं कुर्वन् " योऽत्र प्रविशेत् स योषिद् भवेत् " इति स्वां वाचं च ऋतां यथार्थां कुर्वन्निदं वक्ष्यमाणमाह स्म ॥३८॥ मासमिति ॥ तव गोत्रजः क्षत्रियाणां पुरोहितगोत्रेणैव गोत्रवत्त्वात् वसिष्ठेन पुत्रतयांगीकृतत्वाद्वाऽयं सुद्युम्नो मासं पुमान् भविता मासं स्त्री भविता इत्थं व्यवस्थया कामं यथेच्छं मेदिनीं पृथिवीमवतु॥३९॥ आचार्येति ॥ एवमाचार्यस्य वसिष्ठस्यानुग्रहात् काममिष्टं पुंस्त्वं व्यवस्थया लब्ध्वा सुद्युम्नो जगतीं भूमिं पालयामास तथापि मासं स्त्रीत्वेन लज्जया संलीयावस्थानात्तं प्रजा नाभ्यनन्दन् स्म ॥४०॥ तस्येति ॥ हे राजन् तस्य सुद्युम्नस्य उत्कलादयस्त्रयः सुताः बभूवुः । ते च दक्षिणापथराजानः दक्षिणदेशाधिपतयः । टजभाव आर्षः । धर्मवत्सलाः धर्मे प्रीतियुक्ताश्च बभूवुः ॥ ४१ ॥ तत इति ॥ ततः काले परिणते व्यतीते सति कालवशाज्जरायां प्राप्तायां सत्यां प्रतिष्ठानं सुद्युम्नस्य राजधानी तत्पतिः प्रभुः सुद्युम्नः । केचित्तु प्रतिति-

तुष्टस्तस्मै स भगवानृषये प्रियमावहन् ॥ स्वां च वाचमृतां कुर्वन्निदमाह विशां पते ॥ ३८ ॥ मासं पुमान् स भविता मासं स्त्री तव गोत्रजः ॥ इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीम् ॥ ३९ ॥ आचार्यानुग्रहात् कामं लब्ध्वा पुंस्त्वं व्यवस्थया ॥ पालयामास जगतीं नाभ्यनन्दन् स्म तं प्रजाः ॥४०॥ तस्योत्कलो गयो राजन् विमलश्च सुतास्त्रयः ॥ दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ॥४१॥ ततः परिणते काले प्रतिष्ठानपतिः प्रभुः ॥ पुरूरवस उत्सृज्य गां पुत्राय गतो वनम् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे इलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥

श्रीशुक उवाच ॥ एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते ॥ पुत्रकामस्तपस्तेपे यमुनायां शतं समाः॥१॥ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम् ॥ इक्ष्वाकुपूर्वजान् पुत्रान् लेभे स्वसदृशान् दश ॥२॥ पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ॥ पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥३॥

ष्ठन्त्यस्मिन्निति प्रतिष्ठानं भूमण्डलं तस्य पतिः इत्याहुः । पुरूरवसे स्वपुत्राय गां भूमिमुत्सृज्य दत्त्वा स्वयं तपः कर्तुं वनं ययौ ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमस्यादिमे निरमादिमाम् ॥ १ ॥ द्वितीये मनुपुत्रेषु द्वावपुत्रौ ततोन्वयः ॥ करूषकादिपञ्चानां तत्र श्लोकाः षडग्रैः ॥ उर्वाचेत्येकमर्द्धाढ्याः षट्त्रिंशच्चाप्यनुष्टुभः ॥ २ ॥ एवमिति ॥ एवं सुते सुद्युम्ने गते सति सुद्युम्नस्य पुत्रत्वे निष्फलप्राये सति अथ वैवस्वतो मनुः पुत्रकामः सन् यमुनातीरे शतं समाः तपस्तेपे ॥१॥ तत इति ॥ ततस्तपश्चर्यादशायां मनुरपत्यार्थं देवं प्रभुं हरिं भगवन्तमेवायजत् आराधितवान् । ततस्तत्प्रसादात् स्वसदृशान् स्वतुल्यान् इक्ष्वाकुः पूर्वजो येषु तान् दशपुत्रान् लेभे ॥ २ ॥ पृषध्रस्य वंशो नाभवदित्याह—पृषध्र इति ॥ मनोः पुत्रः पृषध्रस्तु गुरुणा पित्रा वसिष्ठेन वा गोपालः कृतः गवां पालने अधिकृतः अतः खड्गपाणेः सततस्तिष्ठतो जागरणं वीरासनं तदेव व्रतं नियमो यस्य सः यत्तः सावधानः सन् रात्र्यां गाः पालयामास व्याघ्रादिभ्यो रक्षितवान् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकदेति ॥ एकदा निशि रात्र्यां पर्जन्ये वर्षति सति शार्दूलो व्याघ्रो गोष्ठं गवामुपवेशनस्थानं प्राविशत् । तदा तं दृष्ट्वा ताः शयाना उपविष्टा गावो भीता उत्थाय व्रजे गोष्ठे बभ्रमुः ॥ ४ ॥ एकामिति ॥ तत्र बलवान् व्याघ्रः एकां गां जग्राह । सा च गौर्भयेनातुरा विवशा सती चुक्रोश आक्रन्दितवती । तस्यास्तत्क्रन्दितं शब्दं श्रुत्वा पृषध्रः अभिससार तत्समीपं जगाम ॥ ५ ॥ खड्गमिति ॥ स च निशि तत्रापि मेघावृतत्वात् प्रलीना उडुगणा यस्मिंस्तत्समये खड्गमादाय तरसा वेगेन समागत्य अजानन् शार्दूलशङ्कया बभ्रोः कपिलाया गोः शिरोऽहनत् चिच्छेद । शब्लुगभाव आर्षः ॥ ६ ॥ व्याघ्र इति ॥ निस्त्रिंशः खड्गस्तस्याग्रेणाहतः व्याघ्रोऽपि वृक्णश्रवणश्छिन्नकर्णः सन् भृशं भीतः पथि मार्गे रक्तं रुधिरं समुत्सृजन् त्यजन् ततो गोष्ठान्निश्चक्राम निर्गतः ॥ ७ ॥ मन्यमान इति ॥ परवीरहा शत्रुहन्ता पृषध्रो रात्रौ व्याघ्रं हतं मन्यमानोऽपि निशि व्युष्टायामतीतायां सत्यां प्रभाते स्वेन हतां बभ्रुं गामद्राक्षीत् ततश्च दुःखितो बभूव ॥ ८ ॥ तमिति ॥ अकामतः अज्ञानतः कृतमागः गोवधरूपं पापं येन तं पृषध्रं

एकदा प्राविशद्गोष्ठं शार्दूलो निशि वर्षति ॥ शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥ ४ ॥ एकां जग्राह बलवान् सा चुक्रोश भयातुरा ॥
तस्यास्तत्क्रन्दितं श्रुत्वा पृषध्रोऽभिससार ह ॥ ५ ॥ खड्गमादाय तरसा प्रलीनोडुगणे निशि ॥ अजानन्नहनद्बभ्रोः शिरः शार्दूलशङ्कया ॥ ६ ॥
व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः ॥ निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥ ७ ॥ मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा ॥
अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥ ८ ॥ तं शशाप कुलाचार्यः कृतागसमकामतः ॥ न क्षत्रबन्धुः शूद्रस्त्वं कर्मणा भवितामुना
॥ ९ ॥ एवं शप्तस्तु गुरुणा प्रत्यगृह्णात्कृताञ्जलिः ॥ अधारयद् व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥ १० ॥ वासुदेवे भगवति सर्वात्मनि परेऽमले॥
एकान्तित्वं गतो भक्त्या सर्वभूतसुहृत्समः ॥ ११ ॥ विमुक्तसङ्गः शान्तात्मा संयताक्षोऽपरिग्रहः ॥ यदृच्छयोपपन्नेन कल्पयन् वृत्तिमात्मनः
॥ १२ ॥ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः ॥ विचचार महीमेतां जडान्धबधिराकृतिः ॥ १३ ॥

कुलाचार्यो वसिष्ठः शशाप न तु प्रायश्चित्तमुपदिदेश । अतिकोपेन विचारापगमात् त्वं क्षत्रबन्धुः क्षत्रियाधमोऽपि न भवितासि किं त्वमुना पापकर्मणा शूद्र एव भविता । प्रथमपुरुष आर्षः ॥९॥ एवमिति ॥ एवं गुरुणा शप्तोऽपि पृषध्रः कृताञ्जलिः संस्तं शापं प्रत्यगृह्णात् न तु किमपि प्रत्युवाचेति । ततश्च स वीरः ऊर्ध्वरेताः जितेन्द्रियः सन् मुनीनां प्रियव्रतं ब्रह्मचर्यमधारयत् ॥ १० ॥ वासुदेव इति ॥ सर्वभूतानां सुहृत् समश्च सर्वात्मनि परे अमले भगवति वासुदेवे भक्त्या एकान्तित्वं तदेकचित्तत्वं गतः प्राप्तः॥११॥ विमुक्तेति ॥ विमुक्तः भोगेषु सङ्गः आसक्तिर्येन सः शान्तः रागादिरहित आत्मा यस्य सः संयतानि वशीकृतानि अक्षाणीन्द्रियाणि येन न विद्यते देहतदुपयुक्तान्नाद्यतिरिक्तपरिग्रहो यस्य सः यदृच्छयोपपन्नेन प्राप्तेनैवान्नादिना आत्मनो देहस्य वृत्तिं कल्पयन्नभूत् ॥ १२ ॥ आत्मनीति ॥ आत्मनि भगवति आत्मानं मन आधाय निश्चलं संस्थाप्य

`Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानेन तृप्तः समाहितः तत्र प्रयत्नवान् अत एव जडादीनामाकृतिरिवाकृतिराकारो यस्य स तथाभूत एतां महीं विचचार ॥१३॥ एवमिति ॥ यावत्प्रारब्धमेवंविधं वृत्तं वृत्तिर्यस्य स प्रारब्धावसाने कदाचिद्वनं गत्वा तत्रोत्थितं प्रज्वलन्तं दावाग्निं दृष्ट्वापि तेनोपयुक्तानि दग्धानि करचरणादीनि यस्य स तादृशो मुनिः गृहीतमौनः पृषध्रः परं ब्रह्म प्राप ॥ १४ ॥ कवेरपि वंशो नाभवदित्याह—कविरिति ॥ कनीयान् इक्ष्वाक्वादिभ्यः कनिष्ठोऽपि कविः कैशोरवया अप्रौढ एव विषयेषु निस्पृहः अतो बन्धुभिः सह एव राज्यं विसृज्य स्वरोचिषं स्वप्रकाशं पुरुषं भगवन्तं स्वचित्ते निवेश्य ध्यायन् वनं गतः ततश्च प्रारब्धावसाने तमेव परं पुरुषं विवेश ॥ १५ ॥ करूषादिति ॥ मानवात् मनुपुत्रात्करूषात् कारुषसंज्ञका उत्तरापथगोप्तारः उत्तरदेशाधिपतयः ब्रह्मण्या ब्राह्मणभक्ताः धर्मवत्सलाः क्षत्रजातयः आसन् ॥ १६ ॥ धृष्टादिति ॥ धृष्टान्मनुपुत्रात् धार्ष्टसंज्ञं क्षत्रमभूत् । क्षत्रजात्यापन्नानि कानिचिदपत्यान्यभूवन् तच्च क्षत्रं क्षितौ ब्रह्मभूयं ब्राह्मणत्वं गतं प्राप्तं चाभूत् । नृगस्य वंशः पुत्रः सुमतिरभूत्ततो भूतज्योतिस्ततश्च वसुरभवत्

एवं वृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितम् ॥ तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥ १४ ॥ कविः कनीयान् विषयेषु निःस्पृहो विसृज्य राज्यं सह बन्धुभिर्वनम् ॥ निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥ १५ ॥ करूषान्मानवादासन् कारूषाः क्षत्रजातयः ॥ उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥ १६ ॥ धृष्टाद्धार्ष्टमभूत् क्षत्रं ब्रह्मभूयं गतं क्षितौ ॥ नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः ॥१७॥ वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता ॥ कन्या चौघवती नाम सुदर्शन उवाह ताम् ॥ १८ ॥ चित्रसेनो नरिष्यन्तादृक्षस्तस्य सुतोऽभवत् ॥ तस्य मीढ्वांस्ततः कूर्च इन्द्रसेनस्तु तत्सुतः ॥ १९ ॥ वीतिहोत्रस्त्विन्द्रसेनात्तस्य सत्यश्रवा अभूत् ॥ उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥ २० ॥ ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत् सुतः ॥ कानीन इति विख्यातो जातूकर्ण्यो महानृषिः ॥२१॥ ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप ॥ नरिष्यन्तान्वयः प्रोक्तो दिष्टवंशमतः शृणु ॥ २२ ॥

॥१७॥ वसोरिति ॥ वसोः पुत्रः प्रतीकः तस्य पुत्र ओघवान् स च ओघवतः पिता तत्पुत्रोऽप्योघवानित्यर्थः । ओघवतः कन्या च ओघवती नाम प्रसिद्धा तां च सुदर्शन उवाह उपयेमे ॥ १८ ॥ चित्रसेन इति ॥ मनुपुत्रान्नरिष्यन्तात् चित्रसेनः सुतोऽभवत् । तस्य ऋक्षसंज्ञः सुतोऽभवत् । तस्य मीढ्वांस्ततो मीढुषः कूर्चः तस्य सुतः इन्द्रसेनः ॥ १९ ॥ वीतिहोत्र इति ॥ इन्द्रसेनात् वीतिहोत्रसंज्ञोऽभवत् । तस्य सत्यश्रवाः अभूत् । तस्य उरुश्रवाः सुतः ततश्च देवदत्तोऽभवत् ॥ २० ॥ तत इति ॥ ततो देवदत्तात् भगवानग्निः स्वयमेवाग्निवेश्याख्यः सुतोऽभूत् । स एव महान् ऋषिः कानीन इति जातूकर्ण्य इति च विख्यातः ॥ २१ ॥ तत इति ॥ ततोऽग्निवेश्यात् अग्निवेश्यायनाख्यम् । नडादित्वात्फक् । ब्रह्मकुलं ब्राह्मणगोत्रं जातं स्पष्टं शेषम् ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाभाग इति ॥ दिष्टस्य मनुपुत्रस्य नाभागाख्यः पुत्रोऽभूत् । स च वक्ष्यमाणान्नाभागादन्य इति स्वरूपकथनमात्रं स च कृषिगोरक्षवाणिज्यादिकर्मणा वैश्यतां गतः तस्य सुतो भलन्दनः । हलन्दन इति पाठान्तरम् । भलन्दनात् वत्सप्रीतिनामाऽभूत् ॥२३॥ वत्सेति ॥ तस्मात् खनित्रात् चाक्षुषः । अथ तस्मात् चाक्षुषात् विविंशतिरभवत् । स्पष्टं शेषम् ॥२४॥ विविंशतीति ॥ हे महाराज विविंशतेः सुतो रम्भः तस्यास्य खनिनेत्रः सुतः सोऽपि धार्मिको जातः तस्यात्मजः करन्धमाख्यो नृपः आसीत्॥२५॥ तस्येति ॥ तस्य करन्धमस्य अवीक्षिदाख्यः सुतोऽभूत् । तस्य चक्रवर्ती मरुत्तः अभूत् । यं वै मरुत्तम् अङ्गिरसः सुतो महायोगी संवर्तोऽयाजयत् ॥२६॥मरुत्तस्येति ॥ मरुत्तस्य यथा यादृशो यज्ञोऽभूत् तथा तादृशः कश्चनाप्यन्यस्य यज्ञो नाभूत्।अस्य यत् किं च यत् किञ्चिद्यज्ञोपकरणपात्रादिकमपेक्षितम् तत्सर्वं तत्कृते यज्ञे शोभनं हिरण्मयमेवासीत् ॥२७॥अमाद्यदिति ॥ तथा तद्यज्ञे इन्द्रः सोमेन सोमरसेनामाद्यत् द्विजातयः ऋत्विगादयः दक्षिणाभिरमाद्यन् तृप्ता जाताः । किं च तत्र यज्ञे मरुतः परिवेष्टारः अर्थिनां भो-

नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः ॥ भलन्दनः सुतस्तस्य वत्सप्रीतिर्भलन्दनात् ॥ २३ ॥ वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः ॥ खनित्रः प्रमतेस्तस्माच्चाक्षुषोऽथ विविंशतिः ॥ २४ ॥ विविंशतिसुतो रम्भः खनिनेत्रोऽस्य धार्मिकः ॥ करंधमो महाराज तस्यासीदात्मजो नृपः ॥ २५ ॥ तस्यावीक्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् ॥ संवर्तोऽयाजयद्यं वै महायोग्यङ्गिरःसुतः ॥ २६ ॥ मरुत्तस्य यथा यज्ञो न तथाऽन्यस्य कश्चन ॥ सर्वं हिरण्मयं त्वासीद्यत्किंचिच्चास्य शोभनम् ॥ २७ ॥ अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥ २८ ॥ मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्धनः ॥ सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥ २९ ॥ तत्सुतः केवलस्तस्माद्बन्धुमान् वेगवांस्ततः ॥ बन्धुस्तस्याभवद्यस्य तृणबिन्दुर्महीपतिः ॥ ३० ॥ तं भेजेऽलम्बुषा देवी भजनीयगुणालयम् ॥ वराप्सरा यतः पुत्राः कन्या चेलविलाऽभवत् ॥ ३१ ॥ तस्यामुत्पादयामास विश्रवा धनदं सुतम् ॥ प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ॥ ३२ ॥

जनपात्रेष्वन्नादिप्रदातारः आसन्। विश्वेदेवाः सभायां सीदन्त्युपविशन्तीति सभासदः सभ्या आसन्॥२८॥ मरुत्तस्येति ॥ सुधृतेः सुतो नरः अतः सौधृतेय इत्यप्युच्यते। स्पष्टं शेषम्॥२९॥ तदिति ॥ तस्य नरस्य सुतः केवलस्तस्माद्बिन्दुमान् । बन्धुमानिति पाठान्तरम् । ततो बिन्दुमतो वेगवान् तस्य वेगवतो बन्धुरभवत् । यस्य बन्धोस्तृणबिन्दुर्महीपतिरभवत् ॥३०॥ तमिति ॥ भजनीयाः समाश्रयणोपयुक्ता ये गुणास्तेषामालयं स्थानं तं तृणबिन्दुं वराप्सराः अप्सरःश्रेष्ठा देवी द्योतमाना अलम्बुषा भेजे । यतः यस्यां तस्मात् पुत्राः वक्ष्यमाणा विशालादयः अभवन् इलविलाख्या कन्या चाभवत् । इडविडेति पाठान्तरम् ॥ ३१ ॥ तस्यामिति ॥ तस्यामिलविलायां विश्रवाः पुलस्त्यपुत्रो धनदं कुबेरं सुतमुत्पादयामास स कुबेरः ऋषिः सूक्ष्मबुद्धिः योगेश्वरात् पितुः सकाशात् । परमामुत्कृष्टामन्तर्धानलक्षणां विद्यामवाप । प्रादायेति पाठे ऋषिर्विश्रवाः पितुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सकाशात् विद्यां प्रादाय गृहीत्वा सुतमुत्पादयामास ॥ ३२ ॥ विशाल इति ॥ विशालादयः पूर्वसूचिताः तस्य तृणबिन्दोः सुता आसन् । तत्र विशालो वंशकृत् वंशवर्धनो राजा वैशालीं पुरीं निर्ममे । स्पष्टं शेषम् ॥ ३३ ॥ हेमेति ॥ तस्य विशालस्य सुतो हेमचन्द्रः तस्य चात्मजो धूम्राक्षस्तस्य सुतात्संयमात् सहदेवजः देवजेन सहितः कृशाश्व आसीत् । धूम्राक्षस्य संयमः संयमस्य कृशाश्वो देवजश्चेति द्वावित्यर्थः ॥३४॥ कृशाश्वादिति ॥ कृशाश्वात्सोमदत्ताख्यः पुत्रोऽभूत् ।यः सोमदत्तः अश्वमेधैः इडस्पतिं यज्ञाराध्यं तत्फलदातारं पुरुषमिष्ट्वा आराध्य योगेश्वरो भगवांस्तदाश्रितः तदेकशरणः सन् अग्र्यामुत्तमां भागवतीं गतिमाप । मुक्तोऽभूदित्यर्थः ॥ ३५ ॥ सौमदत्तिरिति ॥ सौमदत्तिः सोमदत्तस्य पुत्रः सुमतिरभवत् । तस्य सुतो जनमेजयः एते वैशालभूपालाः विशालस्यान्वये जाताः । तृणबिन्दोर्यशोधराः तद्वंशजत्वेन तत्कीर्तिविस्तारकाः ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो द्वितीये नवमस्य व्यधादिमाम् ॥ २ ॥ तृतीये शर्यातिवंशः सौकन्याख्यानमत्र च ॥ रेवतं चाख्यानमत्र सार्द्धाः श्लोका

विशालः शून्यबन्धुश्च धूम्रकेतुश्च तत्सुताः ॥ विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीम् ॥३३॥ हेमचन्द्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः॥ तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ॥ ३४ ॥ कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधैरिडस्पतिम् ॥ इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ॥ ३५ ॥ सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः ॥ एते वैशालभूपालास्तृणबिन्दोर्यशोधराः ॥ ३६ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभूव ह ॥ यो वा अङ्गिरसां सत्रे द्वितीयमह ऊचिवान् ॥ १ ॥ सुकन्या नाम तस्यासीत् कन्या कमललोचना ॥ तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमम् ॥ २ ॥ सा सखीभिः परिवृता विचिन्वन्त्यङ्घ्रिपान्वने ॥ वल्मीकरन्ध्रे ददृशे खद्योते इव ज्योतिषी ॥ ३ ॥ ते दैवचोदिता बाला ज्योतिषी कण्टकेन वै ॥ अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहु ॥४॥ शकृन्मूत्रनिरोधोऽभूत् सैनिकानां च तत्क्षणात् ॥ राजर्षिस्तमुपालक्ष्य पुरुषान् विस्मितोऽब्रवीत् ॥ ५ ॥

[३६॥] रसार्द्धयः ॥ उवाचेत्येकमर्द्धाढ्या [३७॥] सप्तत्रिंशदनुष्टुभः ॥ ३ ॥ शर्यातिरिति ॥ मानवो मनुपुत्रः शर्यात्याख्यो राजा ब्रह्मिष्ठो वेदार्थतत्वज्ञः संबभूव । यो वै शर्यातिः अङ्गिरसां सत्रे द्वितीयमहः द्वितीयेऽह्नि क्रियमाणं कर्मोचिवान् । तत्र व्यवस्थाम् उवाच तस्य वंशमुत्तानबर्हिरानर्त्त इत्यादिना वक्ष्यति ॥ १ ॥ सुकन्येति ॥ तस्य शर्यातेः कमललोचना सुकन्या नाम कन्यासीत् । तया सार्द्धं सह शर्यातिः वनं गतः सन् च्यवनस्य ऋषेराश्रममगमत् ॥ २ ॥ सेति ॥ सा सुकन्या सखीभिः परिवृता वने अङ्घ्रिपान् द्रुमान् विचिन्वन्ती विपश्यन्ती । नुमार्षः । वल्मीकस्य रन्ध्रे बिले खद्योते इव द्वे ज्योतिषी ददर्श ॥ ३ ॥ ते इति ॥ तत्तदा दैवेन प्रारब्धेन चोदिता मुग्धभावेन मौढ्येन च सा बाला कन्या कण्टकेन ते ज्योतिषी अविध्यत् ततश्च वल्मीकरन्ध्रात् । बहु असृक् रुधिरं सुस्राव ॥४॥ शकृदिति ॥ तत्क्षणात् तस्मिन्नेव क्षणे सैनिकानां शकृन्मूत्रयोर्निरोधोऽभूत् । तं मल-

CC-0. In Public Domain. Digitization by eGangotri

मूत्रनिरोधमालक्ष्य विस्मितो राजर्षिः शर्यातिः स्वपुरुषान् अब्रवीत् ॥५॥ अपीति ॥ अपि किं युष्माभिर्भार्गवस्य च्यवनस्य अभद्रं विचेष्टितं किं कश्चिदपराधः कृत इत्यर्थः । नोऽस्माकं सम्बन्धिना केनापि प्राणिना तस्य किञ्चिदाश्रमस्य दूषणं कृतमिति तु व्यक्तं निश्चितमन्यथैवमुपद्रवो न स्यादिति भावः॥६॥ सुकन्येति ॥ एवं शर्यातौ पृच्छति सति सुकन्या भीता सती मया किञ्चिदभद्रं कृतमिति पितरं प्रति प्राह स्म । वल्मीकरन्ध्रे दृष्टे द्वे ज्योतिषी तत्वमजानन्त्या मया । नुमार्षः । कण्टकेन निर्भिन्ने ॥ ७॥ दुहितुरिति ॥ एवं तस्या दुहितुर्वचः श्रुत्वा जातं साध्वसं भयं यस्य स शर्यातिर्वल्मीकान्तर्हितं मुनिं च्यवनं शनैः प्रसादयामास ॥ ८ ॥ तदिति ॥ ततः मुग्धेयं मम कन्या क्षन्तव्यं भगवतेति राज्ञा प्रोक्ते कियद्वर्षेयं कन्या अस्या विवाहः कृतो न वेत्यादिवचनैस्तस्य च्यवनस्याभिप्रायं विवाहसङ्कल्पमाज्ञाय तस्य मुनेः तस्मै मुनये । शेषे षष्ठी । दुहितरं प्रादात् । ततश्च कृच्छ्रात् स्वसैनिकादिमलमूत्रनिरोधक्लेशाच्च मुक्तः अतः समाहितः सावधानः संस्तं मुनिमामन्त्र्य पृष्ट्वा स्वपुरं प्रायात् ॥ ९ ॥ सुकन्येति ॥ सुकन्या परमकोपनं च्यवनं पतिं

अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् ॥ व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ॥६॥ सुकन्या प्राह पितरं भीता किंचित् कृतं मया ॥ द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै ॥ ७ ॥ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः ॥ मुनिं प्रसादयामास वल्मीकान्तर्गतं शनैः ॥ ८ ॥ तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः ॥ कृच्छ्रान्मुक्तस्तमामन्त्र्य पुरं प्रायात्समाहितः ॥९॥ सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् ॥ प्रीणयामास चित्तज्ञा अप्रमताऽनुवृत्तिभिः ॥ १० ॥ कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ ॥ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥११॥ ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः॥ क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम्॥१२॥ बाढमित्यूचतुर्विप्रमभिनन्द्य भिषक्तमौ ॥ निमज्जतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते ॥१३॥ इत्युक्त्वा जरया ग्रस्तदेहो धमनिसन्ततः ॥ ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविग्रहः॥१४॥

प्राप्य अप्रमत्ता सावधाना तच्चित्तज्ञा तदभिप्रायानुसारेणानुवृत्तिभिः सेवाप्रकारैः प्रीणयामास सन्तुष्टमकरोत् ॥ १० ॥ कस्येति ॥ अथ कस्यचित् कालस्य कस्मिंश्चित्काले तु गते सति स्वाश्रमं प्रत्यागतौ नासत्यौ अश्विनौ पूजयित्वा तौ च्यवनः प्राह स्म । हे ईश्वरौ यौवनदाने समर्थौ युवां मे जरया ग्रस्ताय मह्यं वयस्तारुण्यं दत्तं प्रयच्छतमिति ॥ ११ ॥ ग्रहमिति ॥ यज्ञे असोमपोः सोमपानरहितयोर्वां युवयोः सोमस्य ग्रहं ग्रहीष्ये सोमपूर्णं पात्रं दास्यामि युवां । सोमेन यक्ष्यामीत्यर्थः । ऐन्द्रं वायवं गृह्णातीत्यादिषु द्रव्यदेवतासम्बन्धानुपपत्त्या गृह्णातेर्यागपर्यवसायित्वात् । अतः प्रमदानामुत्तमस्त्रीणां यदीप्सितं मनोहरं तादृशं मे मम वयस्तारुण्यं रूपं सौन्दर्यं च युवाभ्यां क्रियतां सम्पाद्यताम् ॥ १२ ॥ बाढमिति ॥ भिषक्तमौ देववैद्यावश्विनौ तद्वचनं बाढमित्यभिनन्द्य अङ्गीकृत्य अस्मिन् सिद्धैर्विनिर्मिते ह्रदे भवान्निमज्जताम् । तङार्षः । इति विप्रं च्यवनं प्रत्यूचतुः ॥ १३ ॥ इतीति ॥ इत्येवमुक्तो जरया ग्रस्तदेहः अत एव धमनीभिर्नाडीभिः सन्ततः देहोपरि दृश्यमानाभिर्व्याप्तः तथा वलीभिः पलितेन च उपलक्ष्यमाणो विग्रहो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहो यस्य स च्यवनोऽश्विभ्यां ह्रदे प्रवेशितः तावपि तमतिवृद्धं गृहीत्वा स्वयं प्रविष्टावित्यर्थः ॥ १४ ॥ पुरुषा इति ॥ ततो ह्रदात् अपीच्याः अतिकमनीयाः अत एव वनितानां प्रियाः पद्मस्रजः कुण्डलिनः तुल्यरूपाः पृथक् परिचेतुमशक्याः सुवाससश्च त्रयः पुरुषाः उत्तस्थुः ॥ १५ ॥ तानिति ॥ साध्वी पतिव्रता वरारोहा सुकन्या सूर्यस्येव वर्चो येषां तान् समानरूपांस्तान् पुरुषान् निरीक्ष्य तेषां मध्ये स्वं पतिमजानती अश्विनौ शरणं ययौ । युवामेव पृथक् स्थित्वा मम पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः ॥ १६ ॥ दर्शयित्वेति ॥ तत्पातिव्रत्येन तोषितावश्विनौ तस्यै सुकन्यायै पतिं दर्शयित्वा ऋषिं पृष्ट्वा विमानेन त्रिविष्टपं ययतुः ॥ १७ ॥ यक्ष्यमाण इति ॥ अथ कदाचित् यक्ष्यमाणो यागं करिष्यमाणः शर्यातिः च्यवनस्याश्रमं गतस्तत्र च दुहितुः पार्श्वे सूर्यवर्चसम् अन्यादृशं पुरुषं ददर्श ॥ १८ ॥ राजेति ॥ नातिप्रीतमना इव राजा कृतपादाभिवन्दनामपि दुहितरमाशिषश्चाप्रयुञ्जानः प्राह स्म । व्यभिचारशङ्काद्योतनायातिशब्दः । तथापि दुहितृस्नेहस्य दुस्त्यजत्वद्योतनार्थ इवशब्दः एवार्थो वा ॥ १९ ॥ चिकीर्षितमिति ॥

पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः ॥ पद्मस्रजः कुण्डलिनस्तुल्यरूपाः सुवाससः ॥ १५ ॥ तान्निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः ॥ अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥ १६ ॥ दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ॥ ऋषिमामन्त्र्य ययतुर्विमानेन त्रिविष्टपम् ॥ १७ ॥ यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः ॥ ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसम् ॥ १८ ॥ राजा दुहितरं प्राह कृतपादाभिवन्दनाम् ॥ आशिषश्चाप्रयुञ्जानो नातिप्रीतमना इव ॥ १९ ॥ चिकीर्षितं ते किमिदं पतिस्त्वया प्रलम्भितो लोकनमस्कृतो मुनिः ॥ त्वं यज्जराग्रस्तमसत्यसंमतं विहाय जारं भजसेऽमुमध्वगम् ॥ २० ॥ कथं मतिस्तेऽवगतान्यथा सतां कुलप्रसूते कुलदूषणं त्विदम् ॥ बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः ॥ २१ ॥ एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता ॥ उवाच तात जामाता तवैष भृगुनन्दनः ॥ २२ ॥ शशंस पित्रे तत्सर्वं वयोरूपाभिलम्भनम् ॥ विस्मितः परमप्रीतस्तनयां परिषस्वजे ॥ २३ ॥

हे असति मुनिः सर्वलोकनमस्कृतः सर्वपूज्यः स्वपतिश्च्यवनस्त्वया प्रलम्भितो वञ्चित इति ते त्वया किमिदं चिकीर्षितं कृतमित्यर्थः । सन्नर्थस्तु न विवक्षितः । यतः यस्मात् जराग्रस्तं तं मुनिमसंमतमनभीष्टं मत्वा विहाय कञ्चिदध्वगं पान्थं जारममुं त्वं भजसे अनुवर्तसे ॥ २० ॥ कथमिति ॥ हे सतां कुलप्रसूते कथं ते तव मतिरन्यथाभूता सती अवगता अवसन्ना अध्यवसिता अधः पतिता वा यदपत्रपा निर्लज्जा सती जारं बिभर्षि तदिदं कुलदूषणं यतस्तेन पितुर्भर्तुश्च कुलमधस्तमो नरकं नयसि ॥ २१ ॥ एवमिति ॥ एवं ब्रुवाणं पितरं स्मयमाना स्मयेन पातिव्रत्यगर्वेण मानश्चित्तोन्नतिर्यस्याः । यद्वा । तच्छङ्कावाक्येन विस्मययुक्ता शुचिस्मिता मन्दस्मितयुक्ता च सती सुकन्या उवाच । तदेवाह । हे तात एष मत्पार्श्ववर्ती तव जामाता भृगुनन्दनश्च्यवन एव ॥ २२ ॥ शशंसेति ॥ तत्सर्वं वयोरूपप्राप्तिकरणं पित्रे शशंसेति । अन्यत् स्पष्टम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोमेनेति ॥ च्यवनो वीरं शर्यातिं सोमेनायाजयत् सोमयागं कारितवान् । तस्मिंश्च यागे च्यवनः स्वेन तेजसा स्वतपोबलेन असोमपोः सोमपानरहितयोरप्यश्विनोः सोमस्य ग्रहमग्रहीत् दत्तवान् । अश्विनावुद्दिश्य सोमेन राजानं याजयामासेत्यर्थः ॥ २४ ॥ हन्तुमिति ॥ सद्यस्तत्क्षणं मन्युर्यस्य स इन्द्रः अमर्षितः असहमानस्तं यजन्तं शर्यातिं हन्तुं वज्रमाददे तदा च स भार्गवश्च्यवनः सवज्रं वज्रेण सहितम् इन्द्रस्य भुजं स्तम्भयामास प्रतिबबन्ध ॥२५॥ अन्विति ॥ यौ चाश्विनौ भिषजौ वैद्यौ अतो न योग्याविति मत्वा पूर्वं सोमाहुत्या बहिष्कृतौ तयोरश्विनोस्ततः प्रभृति सर्वे देवादयः सोमस्य ग्रहमन्वजानन् अनुज्ञातवन्तः ॥२६॥ उत्तानेति ॥ स्पष्टम् ॥ २७ ॥ स इति ॥ हे अरिन्दम सविसर्गपाठे शत्रुनिग्राही स रेवतः समुद्रमध्ये कुशस्थलीसंज्ञां पुरीं निर्माय तस्या एवाधुना द्वारावतीति व्यवहारः । तस्यामास्थितः अधिवसन् आनर्तादीन् विषयान् देशान् अभुङ्क्त तदैश्वर्यभोगं कृतवान् ॥ २८ ॥ तस्येति ॥ ककुद्मी ज्येष्ठो यस्मिन् तत् तस्य रेवतस्य पुत्रशतं जज्ञे । रेवती कन्या चेति द्रष्टव्यम् । ततश्च स कन्यामादाय ब्रह्माणं

सोमेनायाजयद् वीरं ग्रहं सोमस्य चाग्रहीत् ॥ असोमपोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥ २४ ॥ हन्तुं तमाददे वज्रं सद्यो मन्युरमर्षितः ॥ सवज्रं स्तम्भयामास भुजमिन्द्रस्य भार्गवः ॥ २५ ॥ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ॥ भिषजाविति यत्पूर्वं सोमाहुत्या बहिष्कृतौ ॥ २६ ॥ उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः ॥ शर्यातेरभवन् पुत्रा आनर्ताद्रेवतोऽभवत् ॥ २७ ॥ सोऽन्तः समुद्रे नगरीं विनिर्माय कुशस्थलीम् ॥ आस्थितोऽभुङ्क्त विषयानानर्तादीनरिन्दम ॥२८॥ तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमम् ॥ ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः॥ कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतम् ॥ २९ ॥ आवर्तमाने गान्धर्वे स्थितोऽलब्धक्षणः क्षणम् ॥ तदन्त आद्यमानम्य स्वाभिप्रायं न्यवेदयत्॥ ॥ ३० ॥ तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ॥ अहो राजन् निरुद्धास्ते कालेन हृदि ये कृताः ॥३१ ॥ तत्पुत्रपौत्रनप्तृणां गोत्राणि च न शृण्महे ॥ कालोऽभियातस्त्रिणवचतुर्युगविकल्पितः ॥ ३२ ॥

तस्याः वरं परिप्रष्टुमपावृतं रजस्तमोगुणावरणशून्यं ब्रह्मलोकं गतः ॥ २९ ॥ आवर्तमान इति ॥ तत्र ब्रह्मणः सन्निधौ गान्धर्वे गाने आसमन्तात् वर्तमाने सति अलब्धः न प्राप्तः क्षणः प्रश्नावसरो येन स रेवतः क्षणमात्रं तूष्णीं स्थितः तदन्ते गानावसाने आद्यं ब्रह्माणमानम्य स्वाभिप्रायं को वाऽस्याः पतिर्युक्त इत्येवं न्यवेदयत् अपृच्छत्॥ ३०॥ तदिति ॥ तद्रेवतवचः श्रुत्वा प्रहस्य भगवान् ब्रह्मा हेत्याश्चर्यं द्योतयंस्तमुवाच । अहो राजन् आगमनसमये ये त्वया हृदि कृताः अस्या वरतया मनसा चिन्तितास्ते सर्वे कालेन निरुद्धा उपसंहृताः ॥ ३१ ॥ तदिति ॥ तेषां ये पुत्रादयस्तेषामपि गोत्राणि वंशान् अधुना न शृण्महे त्रिणवसप्तविंशतिः चतुर्युगानि तैर्विशेषतः कल्पितो गणितः कालोऽभियातो व्यतीत इत्यर्थः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ तत्तस्मात्वच्चिन्तितानामिदानीमभावात् भो राजन् भूलोकं त्वं गच्छ तत्र महाबलः देवदेवस्य नारायणस्यांशः सङ्कर्षणाख्यो बलदेवोऽवतीर्णोऽस्ति तस्मै नररत्नायेदं कन्यारत्नं देहि ॥ ३३ ॥ भुव इति ॥ भूतभावनः पुण्ये श्रवणकीर्तने यस्य सः भगवानपि तेन निजांशेन बलदेवेन सह भुवो भारावताराय स्वयमवतीर्णः ॥ ३४ ॥ इतीति ॥ इत्येवमादिष्टः ब्रह्मणा नियुक्तो नृपो रेवतः अजं ब्रह्माणमभिवन्द्य स्वागमनात् पूर्वमेव पुण्यजनत्रासाद्विपक्षभयात् दिक्षु तत्र तत्रावस्थितैर्भ्रातृभिस्त्यक्तं स्वपुरमागतः ॥३५॥ सुतामिति ॥ ततश्चानवद्याङ्गीं शोभनाङ्गीं स्वसुतां बलेन शालते शोभते तस्मै बलाय दत्वा राजा रेवतस्तपस्तप्तुं बदर्याख्यं नरनारायणाश्रमं ययौ ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये नवमस्य व्यधादिमाम् ॥३॥ नाभागस्य कथा तुर्येऽम्बरीषस्यापि सा यतः ॥ कृत्या प्रतिहता तत्र श्लोकाः सार्द्धैकसप्ततिः षड्वर्गाचेति सार्द्धाः स्युःसप्तशैला अनुष्टुभः ॥ ४ ॥ नाभाग इति ॥ नभगस्यापत्यं पुत्रो नाभागोऽभूत् ब्रह्मचारिणं । बहुकालं गुरुकुले वसन्तं नैष्ठिकोऽसाविति मत्वा विभागसमये तस्मै भागमप्रकल्प्यैव भ्रातरः सर्वं दायं विभज्य गृहीत्वा पश्चाद् गुरुकुलादागतं यं भागार्थिनं कविं विद्वांसं यविष्ठं प्रति ततं तातं पितरं दायं व्यभजन्नित्यर्थः।ततशब्दश्छन्दसि

तद्गच्छ देवदेवांशो बलदेवो महाबलः ॥ कन्यारत्नमिदं राजन् नररत्नाय देहि भोः ॥ ३३ ॥ भुवो भारावताराय भगवान् भूतभावनः ॥ अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः॥३४॥ इत्यादिष्टोऽभिवन्द्याजं नृपः स्वपुरमागतः॥ त्यक्तं पुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ॥ ३५ ॥ सुतां दत्त्वाऽनवद्याङ्गीं बलाय बलशालिने ॥ बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमम् ॥३६॥ इति श्रीभागवते महापुराणे नवमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

श्रीशुक उवाच ॥ नाभागो नभगापत्यं यं ततं भ्रातरः कविम् ॥ यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतम् ॥ १ ॥ भ्रातरोऽभाक्त किं मह्यं भजाम पितरं तव ॥ त्वां ममार्यास्तताभाङ्क्षुर्मा पुत्रक तदादृथाः ॥२॥ इमे अङ्गिरसः सत्रमासतेऽद्य सुमेधसः ॥ षष्ठं षष्ठमुपेत्याहः कवे मुह्यन्ति कर्मणि ॥३॥

प्रसिद्धः ॥ १ ॥ एतदेव प्रश्नोत्तराभ्यां दर्शयति तत्र नाभागो भ्रातॄन् पृच्छति—भ्रातर इति ॥ हे भ्रातरो मह्यं किमभाङ्क्त व्यभजत कं भागं मदर्थं यूयं कल्पितवन्तः नुमार्षः। भञ्जेर्वा रूपम्।धातूनामनेकार्थत्वात् एवमभाङ्क्षुरित्यत्रापि अभाक्त इति पाठस्तु साधुरेवा । भ्रातर आहुः । भजामेति । विभागकालेऽस्माभिर्विस्मृतं तदानीं तव वैराग्यं श्रुत्वा तव भागो न कल्पित इति वा।इदानीं तु तव भागं पितरं विभजामः त्वद्भागत्वेन पितरं कल्पयामः त्वं स्वभागतया पितरं गृहाणेत्यर्थः । स च पितरं प्रति गत्वाह । तत हे तात आर्याः ज्येष्ठा भ्रातरो मम त्वामभाङ्क्षुः भागं चक्रुः।मदीयभागतया त्वां दत्तवन्त इत्यर्थः।किं ममार्या इति पाठे तु हे तात किमिदमार्या ममाभाङ्क्षुः भजाम पितरं तवेत्युक्त्वा त्वां मह्यं किमर्थं ददुरित्यर्थः । एवमुक्तः पिता प्राह स्म । हे पुत्रक तत् तैरुक्तं मा आदृथाः प्रतारणमेव तैः कृतमतस्तद्वाक्ये आदरं मा कार्षीः । न ह्यहं दाय इव भोगसाधनमित्यर्थः ॥ २ ॥ तथापि तव जीवनोपायमुपदेक्ष्यामीत्याह—इमे इति ॥ हे कवे विद्वन् इमे सन्निकृष्टाः अङ्गिरसः अङ्गिरोगोत्रोत्पन्ना ब्राह्मणा अद्य द्वादशाहाख्यं सत्रमासते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुतिष्ठन्ति। तत्र अभिप्लवः षडहो भवतीति पृष्ठ्यः षडहो भवतीति विहितेषु षडहेष्वावर्त्यमानेषु षष्ठं षष्ठमहः कर्मोपेत्य प्राप्य तस्मिन् कर्मणि तदनुष्ठाने ते सुमेधसो विद्वांसोऽपि सूक्तविशेषाज्ञानेन मुह्यन्ति ॥ ३ ॥ तानिति युग्मम् ॥ तान् महात्मनो ब्राह्मणांस्त्वं वैश्वदेवे विश्वेदेवदेवताप्रकाशके "इदमित्था रौद्रमिति, ये यज्ञेन दक्षिणया" इति च द्वे सूक्ते शंसय पाठय ततश्च कर्मणि समाप्ते सति ते स्वर्यन्तः स्वर्गं गच्छन्तः स्वसत्रे परिशेषितमवशिष्टमात्मनो धनं तुभ्यं दास्यन्ति। अथ तस्मात्त्वं तान् गच्छ। श्रीशुक आह। ततस्तदनन्तरं स नाभागो यथा पित्रोक्तं तथैव कृतवान् ततश्च सत्रसमाप्त्यनन्तरं ते अङ्गिरसः सत्रपरिशेषितं धनं तस्मै नाभागाय दत्त्वा स्वर्गं ययुः ॥ ४ ॥ ५ ॥ तमिति ॥ ततस्तद्धनं स्वीकरिष्यन्तं तं नाभागं दृश्यत इति दर्शनं शरीरं कृष्णं दर्शनं यस्य सः कश्चित् पुरुषः श्रीरुद्रः उत्तरतो दिश आगत्येदं वास्तुकं यज्ञभूमिगतं वसु धनं मम मदीयमित्युवाच ॥ ६ ॥ ममेति ॥ एवमुक्तस्तर्हि स्म तदैव मानवो नाभाग ऋषिभिर्मह्यं दत्तमितीदं धनं ममेत्युवाच। पुनश्च रुद्र उवाच। नौ आवयोरस्मिन् विवादे ते तव पितरि प्रश्नः स्यादिति स्वपितरं पृष्ट्वैव ममेदं त्वदीयं वेति निश्चयं कुर्वित्यर्थः। इत्युक्तो नाभागः स्वपितरमेत्य तथा पृष्टवान् इति शुकोक्तिः ॥७॥ तथा पृष्टः पिताऽऽह—यज्ञेति ॥

तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः॥ते स्वर्यन्तो धनं सत्रपरिशेषितमात्मनः॥४॥दास्यन्त्यथ ततो गच्छ तथा स कृतवान् यथा॥तस्मै दत्त्वा ययुः स्वर्गं ते सत्रपरिशेषितम्॥५॥तं कश्चित्स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः॥ उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु॥६॥ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः॥ स्यान्नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा॥७॥यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित्॥ चक्रुर्विभागं रुद्राय स देवः सर्वमर्हति॥८॥नाभागस्तं प्रणम्याह तवेश किल वास्तुकम्॥ इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये॥९॥यत्ते पिताऽवदद्धर्मं त्वं तु सत्यं प्रभाषसे॥ददामि ते मन्त्रदृशे ज्ञानं ब्रह्म सनातनम् ॥ १० ॥ गृहाण द्रविणं दत्तं मत्सत्रे परिशेषितम् ॥ इत्युक्त्वान्तर्हितो रुद्रो भगवान् सत्यवत्सलः॥११॥

यज्ञवास्तुगतं यज्ञभूमिगतम् उच्छिष्टम् अवशिष्टं सर्वं हि क्वचित् दक्षाध्वरे ऋषयो रुद्राय भागं चक्रुः ।"उच्छेषणभागो वै रुद्रः" इति श्रुतेः। अतः स देवो रुद्रस्तत्सर्वमप्यर्हति किं पुनर्यज्ञावशिष्टम् ॥ ८ ॥ नाभाग इति ॥ एवं पित्रोक्तो नाभागस्तं रुद्रं प्रणम्याह। हे ईश इदं वास्तुकं वसु तव किल तवैवेति मे मम पिताऽऽह। अतो हे ब्रह्मन् शिरसा प्रणम्य त्वां प्रसादये त्वदीयग्रहणे प्रवृत्तस्य ममापराधं क्षमस्वेति भावः ॥ ९ ॥ श्रीरुद्र आह—यदिति ॥ यत् यस्मात्ते तव पिता तव पक्षपातं विहाय धर्मं यथार्थमवदत्। त्वमपि लोभं विहाय सत्यं यथोक्तमेव प्रभाषसे तस्मान्मन्त्रदृशे मन्त्रज्ञायापि ते तुभ्यं सनातनब्रह्मात्मकं ज्ञानं ददामि। मदनुग्रहात्तव ब्रह्मसाक्षात्कारो भवितेत्यर्थः ॥ १० ॥ गृहाणेति ॥ तथा यदिदं सत्रे परिशेषितं द्रविणं धनं तदपि मया दत्तं जीविकार्थं गृहाण इत्युक्त्वा सत्यवत्सलः सत्यवचसा प्रसन्नः भगवान् रुद्रोऽन्तर्हितः इदमाख्यानं श्रुतिप्रसिद्धम्। तथा हि बह्वृचब्राह्मणम्। "नाभागोपदिष्टं वै मानवं ब्रह्मचार्यं वसन्तं भ्रातरो निरभजन् सोऽब्रवीत्" इत्यादि ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ यः पुमान् समाहितचित्तः सन्नेतदाख्यानं सायं प्रातश्च संस्मरेत्स कविर्मन्त्रज्ञश्च भवति तथात्मनः गतिं प्राप्नोति न पुनः संसरतीत्यर्थः ॥ १२ ॥ नाभागादिति ॥ नाभागात् महाभागवतः कृती अम्बरीषोऽभूत् । यः क्वचिदपि न प्रतिहतः स ब्रह्मशापो ब्राह्मणेन दुर्वाससा निर्मितकृत्योत्पादनरूपो यमम्बरीषं नास्पृशत् ॥ १३॥ भगवन्निति॥ हे भगवन् हे सर्वज्ञ यत्राम्बरीषे निर्मुक्तः प्रयुक्तो दुरत्ययो दुरतिक्रमोऽपि ब्रह्मदण्डो न प्रादुरभूत् स्वप्रभावं कर्तुं नाशक्नोत्तस्य धीमतः राजर्षेः चरितं श्रोतुमिच्छामि ॥ १४ ॥ अम्बरीष इति युग्मम् ॥ यस्माद्विभवसङ्गात् पुमांस्तमो नरकं मोहं वा विशति तस्य विभवस्य निर्वाणं फलं तमः प्रवेशरूपं विद्वान् । यद्वा । विभवस्य निर्वाणं नाशं विद्वान् महाभागोऽम्बरीषः सप्तद्वीपयुक्तां महीम् । अव्ययां निरुपद्रवां श्रियं सम्पदम् अतुलम् अनुपमं विभवं भोगोपकरणमैश्वर्य्यं भुवि पुंसामतिदुर्लभमपि लब्ध्वा तत्सर्वं स्वप्नसंमितं स्वप्नदृष्टवस्तुतुल्यमनुपादेयं मेने ॥ १५ ॥ १६ ॥ वासुदेव इति ॥ वासुदेवे भगवति तथा साधुषु तस्य भगवतो भक्तेषु च परं सर्वत उत्कृष्टं भावं स्नेहं प्राप्तोऽभूत् येन भावेनेदं

य एतत् संस्मरेत् प्रातः सायं च सुसमाहितः ॥ कविर्भवति मन्त्रज्ञो गतिं चैव तथात्मनः ॥१२॥ नाभागादम्बरीषोऽभून्महाभागवतः कृती ॥ नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित् ॥१३॥ राजोवाच ॥ भगवन् श्रोतुमिच्छामि राजर्षेस्तस्य धीमतः ॥ न प्राभूद्यत्र निर्मुक्तो ब्रह्मदण्डो दुरत्ययः ॥ १४ ॥ श्रीशुक उवाच ॥ अम्बरीषो महाभागः सप्तद्वीपवतीं महीम् ॥ अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥ १५ ॥ मेनेऽतिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतम् ॥ विद्वान् विभवनिर्वाणं तमो विशति यत्पुमान् ॥१६ ॥ वासुदेवे भगवति तद्भक्तेषु च साधुषु ॥ प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतम् ॥ १७ ॥ स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ॥ करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ १८ ॥ मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गम् ॥ घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥ १९ ॥

विश्वं तेन लोष्टवत् मत्पिण्डवत् स्मृतं दृष्टम् ॥ १७ ॥ सर्वेन्द्रियाणां भगवत्परत्वोक्त्या भक्तिं प्रपञ्चयति—स वा इति ॥ सः प्रसिद्धः अम्बरीषः कृष्णस्य पदारविन्दयोरेव मनश्चकार नान्यत्र । वै इत्यवधारणार्थकम् अग्रेऽप्यन्वेति । तथा वैकुण्ठस्य तस्य भगवतो गुणानामनुवर्णने एव वचांसि चकार । हरेर्मन्दिरमार्जनादिव्यापारेष्वेव हस्तौ चकार । अच्युतस्य सतीनां कथानामुदये श्रवणे एव श्रुतिं श्रोत्रेन्द्रियं चकार । इन्द्रियत्वविवक्षयैकत्वमेवं घ्राणेऽपि ॥ १८॥ मुकुन्देति ॥ मुकुन्दस्य भगवतो लिङ्गानि विग्रहाः आलयाः स्थानानि च तेषां दर्शने एव दृशौ नेत्रे चकार । तस्य मुकुन्दस्य ये भृत्या भक्तास्तेषां गात्राणां स्पर्शे एव अङ्गसङ्गमं सकलाङ्गव्यापि त्वगिन्द्रियं चकार । श्रीमत्यास्तुलस्या यत्तस्य पादसरोजसम्बन्धेन सौरभं सुगन्धस्तस्मिन् एव घ्राणेन्द्रियं चकार । तदर्पिते तस्मै निवेदितेऽन्नादौ एव रसनेन्द्रियं चकार ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादाविति ॥ हरेः क्षेत्राणि मथुरादीनि पदानि अन्यानि च स्थानानि तेष्वनुसर्पणे पुनः पुनर्गमने एव पादौ चकार । हृषीकेशस्य हरेः पदयोरभिवन्दने एव शिरो मूर्द्धानं चकार । कामं तदर्पितस्रक्चन्दननैवेद्यादिग्रहणाभिलाषं तु तस्य दास्ये निमित्ते सति तत्प्रसादस्वीकाराभिप्रायेण एव चकार न तु कामकाम्यया विषयभोगेच्छयेत्यर्थः। किं बहुना । उत्तमश्लोकस्य हरेः जनाः भक्तास्तदाश्रया तद्विषया रतिर्भक्तिर्यथा भवति तथा सर्वं चकारेत्यर्थः ॥२०॥ एवमिति ॥ सदा प्रतिदिनमात्मनः स्वस्याधिकारप्राप्तं कर्मकलापं कर्मसमूहं तथा एवमुक्तप्रकारेण परे परमेश्वरे अधियज्ञे यज्ञादिकर्मफलप्रदे अधोक्षजे भगवति सर्वात्मभावम् "तन्मनस्कास्तदालापा" इत्यादिलक्षणं च विदधत्कुर्वंस्तन्निष्ठैर्भगवद्भक्तैर्विप्रैर्वसिष्ठादिभिरभिहितः एवं कुर्वेवं मा कार्षीरिति शिक्षितः इमां सप्तद्वीपवतीं महीं शशास पालयामास ॥ २१ ॥ ईजे इति ॥ महाविभूत्या उपचितानि विपुलीकृतानि अङ्गानि दक्षिणाश्च येषु तैर्वसिष्ठादिभिर्हेतुभूतैः सरस्वतीमभिस्रोतं तस्याः प्रवाहाभिमुखं यथा भवति तथा धन्वनि निरुदके धन्वदेशे ततैर्विस्तृतैरश्वमेधैरधियज्ञं यज्ञाधिष्ठातारमीश्वरमी-

पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ॥ कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥ २० ॥
एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ॥ सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥ २१ ॥
ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचिताङ्गदक्षिणैः॥ ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीम् ॥२२॥ यस्य क्र-
तुषु गीर्वाणैः सदस्या ऋत्विजो जनाः ॥ तुल्यरूपाश्चानिमिषा व्यदृश्यन्त सुवाससः ॥ २३ ॥ स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः॥
शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् ॥ २४ ॥ समर्धयन्ति तान्कामाः स्वाराज्यपरिभाविताः ॥ दुर्लभा नापि सिद्धानां मुकुन्दं हृदि
पश्यतः ॥ २५ ॥ स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः ॥ स्वधर्मेण हरिं प्रीणन् सङ्गान्सर्वान् शनैर्जहौ ॥ २६ ॥

जे आराधयामास ॥२२॥ यस्येति ॥ यस्याम्बरीषस्य क्रतुषु अश्वमेधेषु सदस्याः सभ्याः ऋत्विजो जनाश्च सुवाससो भूषणादिभिश्च गीर्वाणैर्देवैः सह तुल्यरूपा अनिमिषाः आश्चर्यदर्शनेन निमेषरहिताः व्यदृश्यन्त देवा अप्यनिमिषा भवन्ति ॥ २३ ॥ स्वर्ग इति ॥ उत्तमश्लोकस्य चेष्टितं शृण्वद्भिरुपगायद्भिश्च यदीयैर्मनुजैरप्यमरप्रियोऽपि स्वर्गो न प्रार्थितस्तस्य तु निस्पृहत्वस्य का वार्तेत्यर्थः ॥ २४ ॥ समर्धयन्तीति ॥ स्वाराज्येन स्वरूपसुखेन परिभावितान् अतिशयेन व्याप्तान् हृदि मुकुन्दं पश्यतः विलोकमानान् तान् जनान् योगादिसिद्धानामपि दुर्लभाः कामाः अणिमाद्यैश्वर्याण्यपि न समर्द्धयन्ति न हर्षयन्ति। " ऋधु वृद्धौ " तैः कर्मिजनप्राप्यः स्वर्गो न प्रार्थ्य इति किं वक्तव्यमित्यर्थः । यानित्यत्र यदिति पाठे यस्मादित्यर्थः । यमिति पाठे अम्बरीषमित्यर्थः । परिभाविता इति पाठे कामविशेषणम् । पश्यतामिति पाठे सिद्धानां विशेषणम् ॥ २५ ॥ स इति ॥ स पार्थिवोऽम्बरीषः इत्थं भक्तियोगेन तपोयुक्तेन स्वधर्मेण च हरिं प्रीणन् प्रसादयन् शनैः सर्वान् ऐहिकामुष्मिकान् सङ्गान् अभिलाषान् जहौ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहेष्विति ॥ गृहादिषु असन्मतिमपुरुषार्थत्वबुद्धिमकरोत्। द्विपोत्तमा गजश्रेष्ठाः स्यन्दनानि रथाः वाजिनः अश्वाः अन्यानि च वस्तूनि अनन्तकोशाः अक्षय्यधनगृहाः ॥ २७ ॥ तस्मा इति ॥ प्रत्यनीकाः स्वाश्रितप्रतिपक्षास्तेषां भयमावहतीति तथाभूतं भक्ताभिरक्षणं चक्रं सुदर्शनं तस्यै कान्तभक्तिभावेन प्रीतः सन् हरिस्तस्मा अम्बरीषाय अदात् ॥ २८ ॥ आरिराधयिषुरिति ॥ कृष्णमारिराधयिषुः आराधयितुमिच्छुर्वीरोऽम्बरीषस्तुल्यं शीलं यस्यास्तया महिष्या भार्यया सह युक्तः संवत्सरपर्यन्तं द्वादशीव्रतं दधार चकार ॥ २९ ॥ व्रतेति ॥ स च कदाचित् कार्त्तिके मासि दशमीद्वादश्योर्विहितेतरभोजनाभावात् एकादश्यां निराहारत्वाच्च त्रिरात्रं समुपोषितः कर्त्तव्यतया प्राप्तोपोषणः स व्रतान्ते एकादश्यनन्तरं कालिन्द्यां स्नातः मधुवने हरिमर्चयत् । आडभाव आर्षः ॥ ३० ॥ महेति युग्मम् ॥ सर्वेषामुपकरणानां चन्दनपुष्पादीनां सम्पत्समृद्धिर्यस्मिंस्तेन महाभिषेकविधिनाभिषिच्य तद्गतान्तरभावेन तदेकचित्तत्वेन अम्बरादिभिः अम्बराभ्यां वस्त्राभ्याम् आकल्पैः आभरणैः गन्धैश्चन्दनादिभिः माल्यैः पुष्पैः अर्हणैः अर्घ्योदकैः

गृहेषु दारेषु सुतेषु बन्धुषु द्विपोत्तमस्यन्दनवाजिपत्तिषु ॥ अक्षय्यरत्नाभरणायुधादिष्वनन्तकोशेष्वकरोदसन्मतिम् ॥ २७ ॥ तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहम् ॥ एकान्तभक्तिभावेन प्रीतो भृत्याभिरक्षणम् ॥ ५८ ॥ आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया ॥ युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतम् ॥ २९ ॥ व्रतान्ते कार्तिके मासि त्रिरात्रं समुपोषितः ॥ स्नातः कदाचित्कालिन्द्यां हरिं मधुवनेऽर्चयत् ॥ ३० ॥ महाभिषेकविधिना सर्वोपस्करसम्पदा ॥ अभिषिच्याम्बराकल्पैर्गन्धमाल्यार्हणादिभिः ॥ ३१ ॥ तद्गतान्तरभावेन पूजयामास केशवम् ॥ ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ॥ ३२ ॥ गवां रुक्मविषाणीनां रूप्याङ्घ्रीणां सुवाससाम् ॥ पयःशीलवयोरूपवत्सोपस्करसंपदाम् ॥ प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् ॥ ३३ ॥ भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमम् ॥ लब्धकामैरनुज्ञातः पारणायोपचक्रमे ॥ ३४ ॥ तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् ॥ ३५ ॥

आदिपदात् धूपदीपनैवेद्यादिभिश्च केशवं पूजयामास। तथा महाभागान् भगवद्भक्तान् अत एव सिद्धार्थान् प्राप्तकामान् पूजानपेक्षानपि ब्राह्मणांश्च भक्तितः पूजयामास ॥ ३१ ॥ ॥ ३२ ॥ गवामिति सार्द्धम् ॥ तथा रुक्मविषाणीनां हेमाच्छादितशृङ्गाणां रूप्याङ्घ्रीणां रजताच्छादितखुराणां शोभनानि वासांसि यासां तासां पयआदिः सम्पद्यासां तासां गवां षट् न्यर्बुदानि न्यर्बुदं दशकोटयः षष्टिकोटीः साधुविप्रेभ्यः दत्त्वा गृहेषु प्राहिणोत् स्वमनुष्यैः प्रेषयामास ॥ ३३ ॥ भोजयित्वेति ॥ साधु मृष्टं स्वाद्वन्नमित्यपि पाठः । गुणवत्तमं षड्रसोपेतमन्नमग्रे प्रथमतो द्विजान् ब्राह्मणान् भोजयित्वा लब्धाः कामाः दक्षिणादयो यैस्तैर्ब्राह्मणैरनुज्ञातः पारणायोपचक्रमे उद्यतोऽभूत् ॥ ३४ ॥ तस्येत्यर्द्धम् ॥ तर्हि तदैव तस्याम्बरीषस्य भगवान् दुर्वासा अतिथिः साक्षात् प्रत्यक्षोऽभूत् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ भूपस्तमागतमतिथिं प्रत्युत्थानादिभिरानर्च पूजयामास । ततश्च तत्पादमूलमुपागतः प्रणतः सन् अभ्यवहाराय ययाचे भगवताऽत्र भोक्तव्यमिति प्रार्थयामास ॥ ३६ ॥ प्रतिनन्द्येति ॥ स च दुर्वासास्तस्याम्बरीषस्य याच्ञां प्रार्थनां प्रतिनन्द्य अङ्गीकृत्यावश्यकं माध्याह्निकं कर्तुं गतः शुभे शुद्धे कालिन्द्याः सलिले बृहद् ब्रह्म ध्यायन् निममज्ज ॥ ३७॥ मुहूर्तेति ॥ तत्तदा द्वादश्यां मुहूर्तार्धेन घटिकामात्रेणावशिष्टायां सत्यां धर्मसंकटे च प्राप्ते सति धर्मज्ञोऽम्बरीषो द्विजैः सह पारणं प्रति चिन्तयामास ॥ ३८ ॥ सङ्कटप्रदर्शनपूर्वकं तत्प्रश्नमेवाह—ब्राह्मणेति ॥ ब्राह्मणातिक्रमे अतिथितया निमन्त्र्य तमसंभोज्यभोजने दोषः । तथा द्वादश्यामपारणेऽपि व्रतवैगुण्यरूपो दोषो यत् यस्मादेवं तस्मात् यत्कृत्वा यस्मिन् कृते सति मे मम साधु भद्रं भूयात् अधर्मश्च मां न स्पृशेत्तथा ब्रूतेति शेषः ॥३९॥ द्विजैः सहैवं विचार्य निश्चित्य च स्वगतमाह—अम्भसेति ॥ हि यस्मात् यदपां भक्षणं तदशितं नाशितं चेति विप्राः प्राहुरथ तस्मात् केवलेनाम्भसा जलेन व्रतस्य पारणं समाप्तिं करिष्ये। तथा च श्रुतिः । "अपोऽश्नाति तन्नै-

तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः ॥ ययाचेऽभ्यवहाराय पादमूलमुपागतः ॥ ३६ ॥ प्रतिनन्द्य स तद्याच्ञां कर्तुमावश्यकं गतः ॥ विममज्ज बृहद्ध्यायन्कालिन्दीसलिले शुभे ॥ ३७ ॥ मुहूर्तार्धावशिष्टायां द्वादश्यां यदपारणे ॥ चिन्तयामास धर्मज्ञो द्विजैस्तद्धर्मसङ्कटे ॥ ३८ ॥ ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ॥ यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ॥ ३९ ॥ अम्भसा केवलेनाथ करिष्ये व्रतपारणम् ॥ प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत्॥४०॥इत्यपः प्राश्य राजर्षिश्चिन्तयन्मनसाऽच्युतम् ॥ प्रत्याचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ॥४१॥ दुर्वासा यमुनाकूलात्कृतावश्यक आगतः ॥ राज्ञाऽभिनन्दितस्तस्य बुबुधे चेष्टितं धिया॥४२॥मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः ॥ बुभुक्षितश्च सुतरां कृताञ्जलिमभाषत ॥४३॥ अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत ॥ धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ॥ ४४ ॥

वाशितं नैवानशितम् " इति । तथा च न व्रतवैगुण्यं नाप्यतिथ्यतिक्रमापराध इति ॥ ४० ॥ इतीति ॥ हे कुरुश्रेष्ठ राजर्षिः सोऽम्बरीषः इत्येवं निश्चित्य भगवन्तं चिन्तयन् अपः प्राश्य पीत्वा द्विजस्य दुर्वाससः आगमनमेव प्रत्याचष्ट प्रत्यैक्षत ॥ ४१ ॥ दुर्वासा इति ॥ कृतमावश्यकं माध्याह्निकं कर्म येन स दुर्वासा यमुनायाः कूलात्तीरादागतः राज्ञाम्बरीषेणाभिनन्दितोऽपि ऋषित्वात् धिया योगजसूक्ष्मया बुद्ध्या तस्य राज्ञश्चेष्टितम् अवशनरूपं बुबुधे ज्ञातवान् ॥ ४२ ॥ मन्युनेति ॥ सुतरां भृशं बुभुक्षितः अत एव मन्युना क्रोधेन प्रचलत् कम्पमानं गात्रं यस्य सः अत एव भृकुटिभ्यां कुटिलमाननं यस्य सः दुर्वासाः कृताञ्जलिमम्बरीषमुद्दिश्य अन्यान् प्रत्यभाषत ॥४३॥ अहो इति ॥ अहो जनाः नृशंसस्य क्रूरस्य श्रिया सम्पदा उन्मत्तस्य विष्णोरभक्तस्य ईशमानिन इति आत्मानमीशं स्वतन्त्रं मन्यमानस्य अस्याम्बरीषस्य धर्मव्यतिक्रमम् अन्यायं पश्यत । वस्तुतः नृभिर्लोकैः शंसः स्तुतिर्यस्य श्रियापि मत्तं मदस्तत उत्तीर्णस्य नास्ति भक्तो यस्मात्तस्य ईशैरिन्द्राद्यैरपि मान्यस्य व्यतिक्रमम् । विर्नञर्थे। अनतिक्रमं पश्यत॥४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अम्बरीषमाह–य इति ॥ यस्त्वमागतमतिथिमातिथ्येन भोजनार्थं निमन्त्र्यापि मह्यं भोजनमदत्त्वा स्वयं भुक्तवांस्तस्य ते तवैतद्धर्मव्यतिक्रमस्य फलं सद्य इदानीमेव दर्शये वस्तुतः अत्तीत्यदः पचाद्यच् । अदत्त्वेन भुक्तवत्त्वेनापि न भुक्तवान् तस्य द्वादशीब्राह्मणयोरनतिक्रमस्य फलं मत्कृतया वैयर्थ्यं मम चक्रेण दह्यमानत्वमित्यादि दर्शये ॥४५॥ एवमिति ॥ एवं ब्रुवाणः रोषेण विदीपितः प्रज्वलितः स दुर्वासाः स्वजटामुत्कृत्य उत्पाट्य तया जटया तस्मै तमम्बरीषं हन्तुं कालानलोपमां प्रलयाग्नितुल्यां कृत्यां मारिकां देवीं निर्ममे ॥ ४६ ॥ तामिति ॥ असिः खड्गः हस्ते यस्यास्तां पदा भुवं वेपयन्तीं कम्पयमानां ज्वलन्तीं प्रदीप्ताम् । नुमभाव आर्षः । आपतन्तीं तां कृत्यां सम्यगुद्वीक्ष्याऽपि नृपोऽम्बरीषः पदात्स्थानात्किञ्चिदपि न चचाल ॥ ४७ ॥ प्रागिति ॥ तदा च भृत्यस्य अम्बरीषस्य रक्षायां रक्षार्थं ततः प्रागेव महात्मना पुरुषेण भगवता दिष्टं नियुक्तं चक्रं सुदर्शनं तां कृत्यां पावकोऽग्निर्यथा क्रुद्धमहिं सर्पं दहेत्तथा ददाह ॥ ४८ ॥ तदिति ॥ ततश्च दुर्वासाः स्वप्रयासं कृत्योत्पादनं निष्फलमुद्वीक्ष्य तथा कृत्यां दग्ध्वापि अभि स्वा-

यो मामतिथिमायातमातिथ्येन निमन्त्र्य च ॥ अदत्त्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ॥४५॥ एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः ॥
तया स निर्ममे तस्मै कृत्यां कालानलोपमाम् ॥ ४६ ॥ तामापतन्तीं ज्वलतीमसिहस्तां पदा भुवम् ॥ वेपयन्तीं समुद्वीक्ष्य न चचाल पदान्नृपः
॥४७॥ प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ॥ ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः॥४८॥ तदभीद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलम्॥
दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ॥ ४९ ॥ तमन्वधावद्भागवद्रथाङ्गं दावाग्निरुद्धूतशिखो यथाऽहिम् ॥ तथानुषक्तं स निरीक्षमाणो गुहां
विविक्षुः प्रससार मेरोः ॥ ५० ॥ दिशो नभः क्ष्मां विवरान् समुद्रान् लोकान् सपालान् त्रिदिवं गतः सः ॥ यतो यतो धावति तत्र तत्र सुदर्शनं
दुष्प्रसहं ददर्श ॥५१॥ अलब्धनाथः स यदा कुतश्चित्संत्रस्तचितोऽरणमेषमाणः॥ देवं विरिञ्चं समगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसो माम् ॥५२॥

भिमुखं द्रवत् आगच्छत्तद्वरेश्चक्रं चोद्वीक्ष्य भीतः प्राणपरीप्सया प्राणान् प्राप्तुमिच्छया जीवनेच्छया दिक्षु दुद्रुवे पलायितवान् । तङार्षः ॥ ४९ ॥ तमिति ॥ तं धावन्तं दुर्वाससं भगवतो रथाङ्गं चक्रमन्वधावत्।उद्धूता ऊर्ध्वं वेपमाना शिखा यस्य स दावाग्निर्वनाग्निर्यथा अहिमनुधावेत्तद्वदित्यर्थः । तदा तथानुषक्तं पृष्ठतः संलग्नं चक्रमीक्षमाणो मुनिर्दुर्वासा मेरोः पर्वतस्य गुहां विविक्षुः प्रवेष्टुमिच्छुः सन् प्रससार दुद्राव ॥ ५० ॥ दिश इति ॥ एवं पलायमानो दुर्वासा दिशो नभः इत्यादिस्थानविशेषान् यथाशक्ति गतः परन्तु यतो यतो यत्र यत्र स धावति तत्र तत्र दुष्प्रसहम् असह्यतेजस्कं सुदर्शनं चक्रं ददर्श । नभः अन्तरिक्षं विवरान् पर्वतगुहाः तत्तल्लोकपालसहितान् अतलादिलोकांश्च ॥ ५१ ॥ अलब्धेति ॥ ततश्च स दुर्वासाः यदा कुतश्चित् कुत्रचित् चापि न लब्धो नाथो रक्षको येन तथाभूतस्तदा सन्त्रस्तं चित्तं यस्य तथाभूतः सन् अरणं रक्षकमेषमाणः अन्वेषमाणो देवं विरिञ्चं ब्रह्माणं समगात् गत्वा च हे विधातः हे आत्मयोने अजितस्य विष्णोस्तेजसश्चक्ररूपान्मां त्राहि पालयेति विज्ञापयामासेति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तङ्भावादिरार्षः ॥ ५२ ॥ स्थानमिति ॥ द्विपरार्द्धसंज्ञे काले जगज्जननादिव्यापाररूपक्रीडाया अवसाने सति एतत्सन्दिधक्षोः जगद्दग्धुमिच्छोः कालात्मनो यस्य भ्रूभङ्गमात्रेण सह विश्वं विश्वसहितं मदीयं स्थानं तिरोभविष्यति नाशमेष्यति तस्य तेजसस्त्रातुमहं न प्रभुरिति शेषः ॥ ५३ ॥ अहमिति ॥ अहं ब्रह्मा भवो रुद्रः दक्षभृगू प्रधानौ मुख्यौ येषां स्ववंश्यानां स्वनियोज्यानां च ते तथा प्रजेशा मरीच्यादयः भूतेशा एकादशरुद्रप्रभृतयः सुरेशा इन्द्रादयः ते मुख्या येषां स्वसन्तानप्रभवाणां स्वनियोज्यानां च ते च ते सर्वेऽपि वयं यस्य भगवतो नियममाज्ञां प्रपन्नाः प्राप्ताः सन्तस्तेन मूर्ध्न्यर्पितं भारमिव लोकहितं वहामः कुर्मः। अतस्तत्तेजसस्त्वां त्रातुं न शक्ता इति शेषोऽत्रापि ज्ञेयो यत्तदो-र्नित्यसम्बन्धात् ॥५४॥ प्रतीति ॥ एवं विरिञ्चेन प्रत्याख्यातो भगवच्चक्रेणोपतापितश्च दुर्वासाः कैलासवासिनं शर्वं रुद्रं शरणं यातः चक्रान्मां त्रायस्वेति प्रार्थितवान् ॥५५॥ वयमिति ॥ हे तात यत्र येषु ब्रह्माण्डेषु वयं लोकेशाभिमानिनो भ्रमामः ते ईदृशा दृश्यमानब्रह्माण्डसदृशाः सहस्रशोऽन्येऽपि अजाः ब्रह्माणः जीवाश्च तेषां कोशाः निवासभूताः

ब्रह्मोवाच ॥ स्थानं मदीयं सहविश्वमेतत् क्रीडावसाने द्विपरार्धसंज्ञे ॥ भ्रूभङ्गमात्रेण हि संदिधक्षोः कालात्मनो यस्य तिरोभविष्यति ॥ ५३ ॥ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ॥ सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ॥ ५४ ॥ प्रत्याख्यातो विरिञ्चेन विष्णुचक्रोपतापितः ॥ दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ॥ ५५ ॥ श्रीरुद्र उवाच ॥ वयं न तात प्रभवाम भूम्नि यस्मिन् परेऽन्येऽप्यजजीवकोशाः ॥ भवन्ति काले न भवन्ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥ ५६ ॥ अहं सनत्कुमारश्च नारदो भगवानजः ॥ कपिलोऽपान्तरतमो देवलो धर्म आसुरिः ॥ ५७ ॥ मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शनाः ॥ विदाम न वयं सर्वे यन्मायां मायया वृताः ॥ ५८ ॥ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ॥ तमेव शरणं याहि हरिस्ते शं विधास्यति ॥ ५९ ॥ ततो निराशो दुर्वासाः पदं भगवतो ययौ ॥ वैकुण्ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥ ६० ॥

ब्रह्माण्डविग्रहाः यस्मिन् भूम्नि परे परमेश्वरे "एकोऽहं बहु स्याम्" इत्युक्तसिसृक्षाकाले भवन्ति उत्पद्यन्ते पुनश्च सञ्जिहीर्षाकाले न भवन्ति तस्मिन्नेव लीयन्ते तस्मिन्वयं न प्रभवामः तच्चक्रात्त्रातुं न शक्नुमः ॥ ५६ ॥ अहमिति युग्मम् ॥ तन्मायया वृता मोहिता अहं रुद्रः इत्याद्या तथान्ये च सिद्धेशाः विद्यातपोयोगनिष्ठाः पारदर्शनाः सर्वज्ञा अपि वयं सर्वे यस्य मायां न विदाम । आर्षः प्रयोगः ॥ ५७ ॥ ५८ ॥ तस्येति ॥ हि यस्मात्तस्य विश्वेश्वरस्येदं सुदर्शनाख्यं शस्त्रं चक्रं नोऽस्माकं सर्वेषां दुर्विषहम् असह्यतेजस्कं ततो रक्षा तु दूरतः अतो यस्य शस्त्रं तमेव शरणं याहि स हरिस्ते तव शं सुखं विधास्यति ॥५९॥ तत इति ॥ इत्युक्तो दुर्वासाः निराशः स्वसंरक्षणाशारहितः सन् ततः कैलासात् श्रिया लक्ष्म्या सह श्रीनिवासो विष्णुर्यदध्यास्ते तद्वैकुण्ठाख्यं भगवतः पदं स्थानं ययौ ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समिति ॥ तत्र गतोऽपि अजितस्य शस्त्रवह्निना चक्रज्वालया सन्दह्यमानः अत एव सवेपथुः कम्पमानदेहः तस्य भगवतः पादमूले पतितः सन्नाह स्म। हे अच्युत हे अनन्त हे सतामीप्सित हे प्रभो हे विश्वभावन कृतागसं कृतत्वद्भक्तापराधमपि मा माम् अव पाहि ॥ ६१ ॥ अजानतेति ॥ हे विधातः ते तव परममनुभावमजानता मया भवतः प्रियाणां भक्तानामघं दुःखं कृतं तस्यापचितिं निष्कृतिं विधेहि कुरु। युक्तं चैतत् यस्य तव नाम्न्यप्युदिते नामोच्चारणमात्रेणापि नारको नरकस्थोऽपि नरकान्मुच्येत तस्य तव किमशक्यम् इत्याशयः ॥ ६२ ॥ अहमिति ॥ हे द्विज अहं भक्तैः साधुभिर्निरपेक्षैः भक्तैर्ग्रस्तं प्रेम्णा वशीकृतं हृदयं यस्य सः अतः भक्तजनाः प्रिया यस्य तादृशोऽस्मि तस्मात् अस्वतन्त्रः परतन्त्र इव भक्तानां पराधीनोऽस्मि। द्विज इति सविसर्गपाठे अस्वतन्त्रो द्विजः पक्षी शुकादिरिवेत्यर्थः ॥ ६३ ॥ नाहमिति ॥ हे ब्रह्मन् येषामहं परा गतिः परमः आश्रयस्तैः साधुभिर्भक्तैर्विना तत्प्रतिकूलमात्मानं स्वविग्रहं तथा तत्प्रतिकूलाम् आत्यन्तिकीम् अव्यभिचारिणीं श्रियं लक्ष्मीं चापि न आशासे न स्पृ-

संदह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः ॥ आहाच्युतानन्त सदीप्सित प्रभो कृतागसं माऽव हि विश्वभावन ॥ ६१ ॥
अजानता ते परमानुभावं कृतं मयाघं भवतः प्रियाणाम् ॥ विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥ ६२ ॥ श्रीभगवानुवाच ॥ अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ॥ साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ ६३ ॥ नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ॥ श्रियं चात्यन्तिकीं ब्रह्मन् येषां गतिरहं परा ॥ ६४ ॥ ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम् ॥ हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ ६५ ॥ मयि निर्बद्धहृदयाः साधवः समदर्शनाः ॥ वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ६६ ॥ मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् ॥ नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतम् ॥ ६७ ॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ॥ मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ॥ ६८ ॥

हयामि। अन्यस्य का वार्त्ता ॥ ६४ ॥ य इति ॥ दारान् स्त्रियः अगारान् गृहान् पुत्रान् आप्तान् सत्पुरुषतया मान्यान् प्राणान् जीवहेतून् वित्तं धनम् इमं लोकं परं च लोकं हित्वा तदासक्तिं त्यक्त्वा ये मां शरणं यातास्तानहं कथं त्यक्तुमुत्सहे शक्नोमि। अत्र भक्तप्रतिपक्षस्य दुर्वाससो रक्षा एव भक्तपरित्यागः अतः कथं त्यक्तुमुत्सहे इत्युक्तम् ॥ ६५ ॥ मयीति ॥ मयि निर्बद्धं स्थिरीकृतं हृदयं यैस्ते अत एव समदर्शनाः सदात्मकत्वदर्शिनः साधवो मद्भक्ता भक्त्या मां वशीकुर्वन्ति। यथा सत्यः स्त्रियः सत्पतिं वशे कुर्वन्ति तथेत्यर्थः ॥ ६६ ॥ मदिति ॥ मत्सेवयैव पूर्णाः सन्तुष्टा ये मेऽनन्यभक्तास्ते मत्सेवया प्रतीतम् उपस्थितं सालोक्यमादिर्यस्य तत् चतुष्टयं सालोक्यसामीप्यसायुज्यसार्ष्टिरूपमपि नेच्छन्ति। कालेन विद्रुतम् अनुगतं विनश्वरमन्यदिन्द्रादिपदं नेच्छन्तीति कुतः किं वक्तव्यम्। कुत इच्छन्तीतिवा ॥ ६७ ॥ साधव इति ॥ किं बहुना साधवो मद्भक्ताः मह्यं मम हृदयम् अत्यन्तप्रियाः साधूनां तु अपि हृदयमहमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतः ते मद्भक्ता मत्तोऽन्यत् प्रियं वस्तु किमपि न जानन्ति तथाहमपि तेभ्योऽन्यन्मनाक् ईषदपि किञ्चित्प्रियं वस्तु न जानामि ॥ ६८ ॥ उपायमित्यर्द्धम् ॥ हे विप्र तव निर्मुक्त्युपायं कथयिष्यामि तच्छृणुष्व । तङार्षः ॥६९॥ अयं हीति ॥ ते तवायमात्मनस्तवैव अभिचारः पीडात्मको यतो निमित्तादभूत् तमम्बरीषमेव भवान् शरणं यातु। साधुषु मद्भक्तेषु प्रहितं प्रयुक्तं तेजः सामर्थ्यं प्रहर्तुरेवाशिवमनर्थं कुरुते ॥ ७० ॥ तप इति ॥ तपोऽनशनादिविद्या उपासना चैते उभे विप्राणां विनयादिगुणयुक्तानां निःश्रेयसकरे कल्याणकरे अपि ते एव तपोविद्ये दुर्विनीतस्य निरपराधिष्वपराधकर्तुर्विप्रस्य तु अन्यथा कर्तुं कल्पेते अनर्थायैव भवेतामित्यर्थः ॥ ७१ ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् तत्तस्मात् मयाऽपि तव रक्षां कर्तुमशक्यत्वात् महाभागं नाभागतनयमम्बरीषं प्रति गच्छ गत्वा च तं नृपं क्षमापय । आपुगार्षः । यद्वा । क्षमामामोतीति क्षमापः तादृशं कुरु । "तत्करोति" इति णिच् । ततस्तत्क्षमापणात्ते तव भद्रं सुखं शान्तिः तापनिवृत्तिश्च भविष्यतीत्यर्थः ॥ ७२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥

उपायं कथयिष्यामि तव विप्र शृणुष्व तत् ॥६९॥ अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ॥ साधुषु प्रहितं तेजः प्रहर्तुः कुरुतेऽशिवम् ॥ ७० ॥ तपो विद्या च विप्राणां निःश्रेयसकरे उभे ॥ त एव दुर्विनीतस्य कल्पेते कर्तुमन्यथा ॥ ७१ ॥ ब्रह्मंस्तद्गच्छ भद्रं ते नाभागतनयं नृपम् ॥ क्षमापय महाभागं ततः शान्तिर्भविष्यति ॥ ७२ ॥ इति श्रीभागवते नवमस्कन्धे अम्बरीषचरिते चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ एवं भगवतादिष्टो दुर्वासाश्चक्रतापितः ॥ अम्बरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ॥ १ ॥ तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः ॥ अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥ २ ॥ अम्बरीष उवाच ॥ त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः ॥ त्वमापस्त्वं क्षितिर्व्योमवायुर्मात्रेन्द्रियाणि च ॥ ३ ॥ सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय ॥ सर्वास्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते ॥ ४ ॥

गङ्गासहायश्चतुर्थे नवमस्य व्यधादिमाम्॥४॥ पञ्चमे विष्णुचक्रं तु प्रसाद्य प्राणसङ्कटात् ॥ दुर्वासा रक्षितो राज्ञा श्लोकास्तत्रैर्क्षसंमिताः ॥ पञ्चोवाचेति पादाब्धास्त्रिंशत्संङ्ख्या अनुष्टुभः ॥ ५ ॥ एवमिति ॥ चक्रतापितः अतो दुःखितो दुर्वासाः एवं भगवता आदिष्टः सन् अम्बरीषं प्रत्युपावृत्य आगत्य तस्य पादावग्रहीत् ॥ १ ॥ तस्येति ॥ सः अम्बरीषस्तस्य दुर्वाससः उद्यमनं पादग्रहणादिक्षमापणोद्यमं वीक्ष्य तेन ब्राह्मणेन कृतो यः स्वपादस्पर्शस्तेन विलज्जितः कृपया भृशं पीडितश्च तद्विमुक्त्यर्थं तत् हरेरस्त्रं सुदर्शनमस्तावीत् । सोद्यमनमिति "सोऽचि लोपे" इति सोर्लोपः ॥२॥ त्वमिति ॥ अग्न्यादिरूपस्त्वमसि भगवानिति सूर्यस्य ज्योतिषां नक्षत्राणां पतिरिति सोमस्य विशेषणम्। मात्राः शब्दादयः त्वच्छक्त्यैवाग्न्यादयः स्वं स्वं कार्यं कुर्वन्तीत्यर्थः ॥ ३ ॥ सुदर्शनेति ॥ हे सुदर्शन हे सहस्रमारा यस्य तादृश हे अच्युतप्रिय हे सर्वास्त्रघातिन् हे इडस्पते पृथ्वीपते । छान्दसः प्रयोगः । ते तुभ्यं नमः विप्रस्यास्य स्वस्ति भूयाः कल्याणरूपो रक्षको भव ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति ॥ त्वं धर्मादिरूपोऽसि । तत्र " ऋतं च सूनृता वाणी सत्यं च समदर्शनम् ।" पौरुषं पुरुषस्य भगवतः परं तेजः सामर्थ्यरूपम् । अयं भावः।"स ऐक्षत " इत्यादिश्रुतिप्रसिद्धं भगवतः शोभनं दर्शनं सुदर्शनं तत एव सर्वं जातमतस्त्वमेव सर्वात्मेति ॥ ५ ॥ नम इति ॥ शोभना नाभिर्यस्य तत्सम्बुद्धौ हे सुनाभ अखिलानां धर्माणां सेतवे मर्यादारूपाय अत एवाधर्मशीलानामसुराणां धूमकेतवे धूमकेतुरग्निस्तद्वद्दाहकायेत्यर्थः । त्रैलोक्यं गोपायतीति तथा विशुद्धमत्युज्ज्वलं वर्चस्तेजो यस्य तस्मै मनस इव जवो वेगो यस्य तस्मै अद्भुतकर्मणे तुभ्यं नमः नमस्कारं गृणे करोमि । तङार्षः ॥ ६ ॥ त्वदिति ॥ हे गिरां पते धर्ममयेन धर्मरूपेण त्वत्तेजसा महात्मनां सतां दृशः स्वरूपज्ञानस्यावरकं तमोऽज्ञानं संहृतं निरस्तं प्रकाशश्च धृतः कृतः किं च सदसत् कार्यकारणात्मकं परावरम् उत्कृष्टापकृष्टमेतज्जगत् त्वद्रूपं त्वयैव रूप्यते सूर्यादिद्वारा प्रकाश्यते इति तथाभूतम्। एवंभूतस्य ते तव महिमा दुरत्ययः अपार इत्यर्थः ॥७॥ यदेति ॥ हे अजित अनञ्जनेन अञ्जनम् अविद्यादिदोषस्तद्रहितेन भगवता यदा त्वं विसृष्टो निर्मुक्तस्तदैव दैत्यदानवानां

त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् ॥ त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ॥ ५ ॥ नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे ॥ त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ॥ ६ ॥ त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनाम् ॥ दुरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत् सदसत्परावरम् ॥ ७ ॥ यदा विसृष्टस्त्वमनञ्जनेन वै बलं प्रविष्टोऽजित दैत्यदानवम् ॥ बाहूदरोर्वङ्घ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने विराजसे ॥ ८ ॥ स त्वं जगत्त्राणखलप्रहाणये निरूपितः सर्वसहो गदाभृता ॥ विप्रस्य चास्मत्कुलदैवहेतवे विधेहि भद्रं तदनुग्रहो हि नः ॥ ९ ॥ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः ॥ कुलं नो विप्रदैवं चेद्द्विजो भवतु विज्वरः ॥ १० ॥

बलं सेनां प्रविष्टः सन् अजस्रं निरन्तरं तेषां बाह्वादीन् वृश्चन् छिन्दन् । वृक्णन्निति पाठस्त्वार्षः । भिन्दन्निति पाठान्तरम् । प्रधने युद्धे विशेषेण राजसे । प्रविष्टोर्जितेति पाठे तु ऊर्जिता महाबलपराक्रमा दैत्या दानवाश्च यस्मिंस्तद्बलमित्यर्थः । पूर्वपदेन सन्धिरार्षः । प्रविश्योर्जितेत्यपि पाठान्तरम् ॥ ८ ॥ त्वया खला एव दण्ड्याः साधवस्तु रक्ष्या अतोऽपि विप्रं पाहीत्याह–स इति ॥ स सर्वसहः युद्धे सर्वारीन् सोढुं शक्तस्त्वं जगतः त्राणं च खलानां प्रहाणिर्विनाशश्च तदर्थमेव गदाभृता भगवता निरूपितः नियुक्तः । यद्वा । हे जगत्त्राणेति सम्बोधनम् । यत एवं तस्मात् अस्मत्कुलस्य दैवहेतवे भाग्यलाभाय अस्य विप्रस्य भद्रं मङ्गलं प्राणरक्षणरूपं विधेहि कुरु । हि यस्मात्तत् विप्ररक्षणमेव नोऽस्माकं त्वत्कृतोऽनुग्रहः अन्यथा ब्राह्मणहत्यादिकमस्माकं स्यात् ॥ ९ ॥ यदीति ॥ नोऽस्माकं यदि दत्तं दानम् इष्टं यज्ञादि सुसम्यगनुष्ठितः स्वधर्मश्चास्ति तथा कुलं च विप्रदैवतं देववत्पूज्यं यस्य तथाभूतं यद्यस्ति तर्हि विप्रो विज्वरो भवतु अस्मदीयदत्तादिपुण्येन दुर्वासाः सुदर्शनतापाद्विमुच्यतामित्यर्थः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यदीति ॥ सर्वेषु भूतेषु आत्मनस्तस्यैव यो भावो भावना तेन यदि नोऽस्माकम् एक एव सर्वेषां गुणानामाश्रयः धारको भगवान् प्रीतोऽस्ति तर्हि द्विजो विज्वरः तापरहितो भवतु ॥ ११ ॥ इतीति ॥ इत्येवं शपथपूर्वकं राज्ञोऽम्बरीषस्य सम्यक् स्तुवतः सतः सर्वतो विप्रं प्रदहत्स्थितं सुदर्शनाख्यं विष्णुचक्रं राज्ञो यच्ञया अशाम्यत् शान्तमभूत्॥ १२॥ स इति ॥ ततोऽस्त्राग्नेः सुदर्शनाग्नेस्तापेन मुक्तः स दुर्वासाः स्वस्तिमान् सन्तापरहितस्तमुर्वीशं राजानं परमा आशिषो युञ्जानः प्रशशंस तुष्टाव ॥ १३ ॥ अहो इति ॥ हे राजन् अनन्तस्य भगवतो दासानां युष्माकमहो आश्चर्यभूतं महत्त्वमद्य मे मया दृष्टं यत् कृतागसः कृतापराधस्यापि मम त्वं मङ्गलानि सुखान्येव समीहसे इच्छसीति ॥ १४ ॥ दुष्करमिति ॥ साधूनां किन्तु अनुग्रहादिकं दुष्करं कर्तुमशक्यं किंवा मदपराधादि दुस्त्यजं त्यक्तुमशक्यम् । को नु दुष्करो दुस्त्यज इति पुँल्लिङ्गपाठो भूयान् । यैः सात्वतां भक्तानामृषभः पालको हरिर्भगवान् संगृहीतः सम्यक् प्रेम्णा हृदि स्थापितः ॥ १५ ॥ यन्नामेति ॥ तीर्थपदः गङ्गादितीर्थाश्रयभूतौ पादौ यस्य तस्य भगवतो नाम्नः श्रवणमा-

यदि नो भगवान् प्रीत एकः सर्वगुणाश्रयः ॥ सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥ ११ ॥ श्रीशुक उवाच ॥ इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम् ॥ अशाम्यत् सर्वतो विप्रं प्रदहद्राजयाच्ञया ॥१२॥ स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः ॥ प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः ॥ १३ ॥ दुर्वासा उवाच ॥ अहो अनन्तदासानां महत्त्वं दृष्टमद्य मे ॥ कृतागसोऽपि यद्राजन्मङ्गलानि समीहसे ॥ १४ ॥ दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम् ॥ यैः संगृहीतो भगवान् सात्वतामृषभो हरिः ॥ १५ ॥ यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः ॥ तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ १६ ॥ राजन्ननुगृहीतोऽहं त्वयाऽतिकरुणात्मना ॥ मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः ॥१७॥ राजा तमकृताहारः प्रत्यागमनकाङ्क्षया ॥ चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥१८॥ सोऽशित्वाऽऽहृतमानीतमातिथ्यं सार्वकामिकम् ॥ तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम् ॥ १९ ॥ प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै ॥ दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥२०॥

त्रेणापि पुमान् निर्मलो रागलोभादिरहितो भवति तस्य दासानां किं वावशिष्यते दुर्लभं भवति किंतु सर्वमेव सुलभमित्यर्थः ॥ १६ ॥ राजन्निति ॥ हे राजन् अतिकरुणात्मना त्वया अहमनुगृहीतोऽस्मि यत् ममाघमपराधं पृष्ठतः कृत्वा विस्मृत्य मे प्राणा अभिरक्षिता इति ॥ १७ ॥ राजा तमित्यादिश्लोकद्वयं शुकोक्तिः ॥ द्विजस्य प्रत्यागमनप्रतीक्षया न कृत आहारो भोजनं येन स राजा तस्य चरणावुपसंगृह्य अभिवाद्य प्रसाद्य च समभोजयत् ॥१८॥ स इति ॥ आहृतं सादरं सार्वकामिकं सर्वोत्तमरसादिसम्पन्नम् आनीतम् आतिथ्यमन्नादि अशित्वा उपयुज्य तृप्तात्मा स दुर्वासा नृपतिं प्रति भुज्यतामिति सादरं प्राह स्म ॥१९॥ अथान्यदप्याह—प्रीतोऽस्मीति ॥ भागवतस्य तव दर्शनस्पर्शनालापैः प्रीतोऽस्मि तथा आत्मनि भगवति मेधा येन तेन आतिथ्येन च प्रीतोऽस्मि तैरेव कर्तृभिरनुगृहीतोऽस्मि ॥ २० ॥

CC-0. In Public Domain. Digitization by eGangotri

कर्मेति ॥ एतन्मत्प्राणरक्षणादि ते तवावदातं विशुद्धं कर्म स्वः स्वर्गे स्त्रियो मुहुर्गायन्ति गास्यन्ति तथा तव परमपुण्यां कीर्तिमियं भूः भूलोकस्थो जनश्च कीर्तयिष्यति ॥ २१ ॥ एवमिति ॥ राज्ञा परितोषितो दुर्वासा एवं राजानं सङ्कीर्त्य प्रशस्य तमामन्त्र्य पृष्ट्वा विहायसा मार्गेण तद्गुणान् वक्तुं हेतुकाः शुष्कतर्कनिष्ठास्ते न विद्यन्ते यत्र तं ब्रह्मलोकं ययौ। तत्रत्यान् स्वबन्धून् प्रति स्ववृत्तं कीर्त्तयितुमिति भावः ॥ २२ ॥ संवत्सर इति ॥ स्वरक्षार्थं ब्रह्मादीन् गतो मुनिः यावता कालेन नागतस्तावत्संवत्सरात्मकः कालोऽत्यगात् व्यतीयाय । राजा तु तस्य दर्शनमाकाङ्क्षंस्तावत्कालपर्यन्तमब्भक्षो बभूव । अप एव भक्षयन् स्थितः इति धैर्यातिशयः ॥ २३ ॥ गत इति ॥ दुर्वाससि गते सति सोऽम्बरीषः द्विजस्योपयोगेन भोजनेन हेतुना तदवशिष्टमतिपवित्रमन्नमाहरत् बुभुजे । ऋषेर्दुर्वाससो व्यसनं सुदर्शनजं सङ्कटं तस्माद्विमोक्षं च तथा स्ववीर्यं धैर्यादिकं च सर्वं परस्य भगवतोऽनुभावं प्रभावं मेने न तु स्वस्य ॥ २४ ॥ एवमिति ॥ एवमुक्तविधा अनेके गुणा यस्य स राजाम्बरीषः परात्मनि ब्रह्मणि वासुदेवे क्रियाकलापैः समर्पितैः

कर्मावदातमेतत्ते गायन्ति स्वः स्त्रियो मुहुः ॥ कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियम् ॥ २१ ॥ श्रीशुक उवाच ॥ एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ॥ ययौ विहायसाऽऽमन्त्र्य ब्रह्मलोकमहैतुकम् ॥ २२ ॥ संवत्सरोऽत्यगात्तावद्यावता नागतो गतः ॥ मुनिस्तद्दर्शनाकाङ्क्षी राजाऽब्भक्षो बभूव ह ॥ २३ ॥ गते च दुर्वाससि सोऽम्बरीषो द्विजोपयोगातिपवित्रमाहरत् ॥ ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च परानुभावम् ॥ २४ ॥ एवं विधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ॥ क्रियाकलापैः समुवाह भक्तिं ययाऽऽविरिञ्चान्निरयांश्चकार ॥ २५ ॥ अथाम्बरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ॥ वनं विवेशात्मनि वासुदेवे मनो दधत् ध्वस्तगुणप्रवाहः ॥ २६ ॥ इत्येतत्पुण्यमाख्यानमम्बरीषस्य भूपतेः ॥ संकीर्तयन्ननुध्यायन् भक्तो भगवतो भवेत् ॥ २७ ॥ इति श्रीभागवते म० नवमस्कन्धे अम्बरीषचरिते पञ्चमोऽध्यायः ॥ ५ ॥ श्रीशुक उवाच ॥ विरूपः केतुमान् शंभुरम्बरीषसुतास्त्रयः ॥ विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः ॥ १ ॥

स्ववर्णाश्रमधर्मसमूहैः सह श्रवणादिभक्तिमुवाह चकार । यया भक्त्या जातेन वैराग्येण आविरिञ्च्यान् विरिञ्चपदपर्यन्तभोगान् निरयांश्चकार नरकतुल्यान् अमन्यत॥ २५॥ अथेति ॥ अथ धीरोऽम्बरीषः समानशीलेषु स्वतनयेषु राज्यं विसृज्य वनं विवेश तत्र च विक्षेपाभावात् आत्मनि वासुदेवे मनो दधत्सन् ध्वस्तो गुणप्रवाहः संसारो यस्य तथाभूतो मुक्तो जातः ॥ २६ ॥ इतीति ॥ इत्येवंभूतं पुण्यमेतदम्बरीषस्य भूपतेराख्यानं सङ्कीर्तयन्ननुध्यायंश्च पुमान् भगवतो भक्तो भवेत् ॥ २७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ पञ्चमे गङ्गासहायो नवमस्य व्यधादिमाम् ॥ ५ ॥ षष्ठे वंशोऽम्बरीषस्य प्रोक्तो मान्धातुरप्यसौ ॥ आरभ्यते तत्र सार्द्धाः श्लोकाः स्युः पञ्चमार्गणाः ॥ उवाचेत्येकं सपादा अष्टभूर्तीन्यनुष्टुभः ॥ ६ ॥ विरूप इति ॥ विरूपादयस्त्रयोऽम्बरीषस्य सुता आसन् । तत्र विरूपात् पृषदश्वः पुत्रोऽभूत् । तस्य तु रथीतरः पुत्रोऽभूत् ॥ १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रथीति ॥ अप्रजस्य असिजभाव आर्षः । तस्य रथीतरस्य तन्तवे सन्तानार्थमर्थितः सन्नङ्गिरा ऋषिस्तस्य भार्यायां वेदाध्ययनादिजं तेजः ब्रह्मवर्चसं तदेषामस्तीति तथाभूतान् ब्रह्मवर्चस्विनः । आर्षे समासान्तभावे विन् । सुतान् जनयामास ॥ २ ॥ एत इति ॥ ये आङ्गिरसाः जनितास्त एते रथीतरस्य क्षेत्रप्रसूतत्वेन रथीतरगोत्राः सन्तोऽप्यङ्गिरसो वीर्यप्रसूतत्वेन पुनराङ्गिरसाः स्मृताः। ते च रथीतराणामन्येषां जातानां तत्सन्तानप्रसूतानां च प्रवराः श्रेष्ठाः। तत्र हेतुमाह । क्षत्रोपेताः क्षत्रत्वयुक्ता द्विजातयो ब्राह्मणा इत्यर्थः ॥३॥ तदेवं मनोर्दशसु पुत्रेषु पृषध्रः कविश्च विरक्तत्वान्न वंशप्रवर्तकौ । करूषादीनां च सप्तानां वंशास्तारतम्यक्रमेण निरूपिताः । इदानीं त्वतिविस्तृतमिक्ष्वाकोर्वंशमाह—क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावः क्षुवतः क्षुतं कुर्वतो मनोर्वैवस्वतस्य घ्राणादिक्ष्वाकुः सुतो जज्ञे । पूर्वं तु "श्रद्धायां जनयामास दश पुत्रान्" इति बाहुल्याभिप्रायेणोक्तमिति स्वामिपादाः । तदाशयस्तत्रैवोक्तः । तस्येक्ष्वाकोः पुत्रशतं बभूव । तत्र विकुक्षिनिमिदण्डकास्त्रयः पुत्रशते ज्येष्ठाः ॥ ४ ॥ तेषामिति ॥ हे नृप तेषां शतसङ्ख्यपुत्राणां मध्ये पञ्चविंशतिसङ्ख्याकाः आर्यावर्ते "आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः।" इत्युक्तदेशविशेषे । पुरस्तात्पूर्वस्यां दिशि समुद्रपर्यन्तं मण्डलविभागेन नृपा अभवन् । तथार्यावर्तस्य पश्चात्पश्चिमायां दिशि समुद्रपर्यन्तं मण्डलविभागेन पञ्चविंशतिर्नृपा अभवन् । तथा त्रयो ज्येष्ठा विकुक्ष्यादयः आर्यावर्तमध्ये नृपा अभवन् । अपरे अवशिष्टास्तु अन्यतरततो दक्षिणोत्तरादिदेशेषु नृपा अभवन् ॥५॥ विकुक्षिरेव शशाद इति वक्ष्यते तत्र हेतुमाह—स एकदेति ॥ कदाचिदिक्ष्वाकुः अष्टकाश्राद्धे निमित्ते हे विकुक्षे शीघ्रं गच्छ मेध्यं श्राद्धार्हं मांसमानीयतां चिरं विलम्बं मा कार्षीरिति सुतमादिशत् आदिष्टवान् । अष्टकास्तु " सप्तम्यादित्रयं चैव तथा चैव त्रयोदशी । चतस्रस्त्वष्टकाः प्रोक्ताः सर्वपक्षाद्विशेषतः ॥ " इत्युक्ता ज्ञेयाः ॥ ६ ॥ तथेति ॥ ततः स वीरो विकुक्षिस्तथास्तु आनेष्यामीत्युक्त्वा वनं प्रति गत्वा क्रियार्हणान् श्राद्धयोग्यान् मृगान् हत्वा श्रान्तो बुभुक्षितश्चातोऽपगता स्मृतिरेतद्भक्षणमयुक्तमिति ज्ञानं यस्य तादृशः तान् तन्मध्यतः शशमादत् अभक्षयत् ॥ ७ ॥ शेषमिति ॥ ततश्च स शेषं भुक्तावशिष्टं मांसं स्वपित्रे निवेदयामास । ततस्तेनेक्ष्वाकुणा प्रोक्षणाय श्राद्धोचितसंस्काराय चोदितस्त्विक्ष्वाकोर्गुरुर्वसिष्ठस्तद्दृष्ट्वा तत् अकर्मकं श्राद्धकर्म योग्यं न भवति यतो दुष्टम् अग्रतो भुक्तत्वादुच्छेषणदोषयुक्त-

रथीतरस्याप्रजस्य भार्यायां तन्तवेऽर्थितः ॥ अङ्गिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥ २ ॥ एते क्षेत्रे प्रसूता वै पुनस्त्वाङ्गिरसाः स्मृताः ॥
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ ३ ॥ क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ॥ तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ॥ ४ ॥
तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप ॥ पञ्चविंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ॥ ५ ॥ स एकदाऽष्टकाश्राद्ध इक्ष्वाकुः सुतमादिशत् ॥
मांसमानीयतां मेध्यं विकुक्षे गच्छ मा चिरम् ॥ ६ ॥ तथेति स वनं गत्वा मृगान्हत्वा क्रियार्हणान् ॥ श्रान्तो बुभुक्षितो वीरः शशं चाददपस्मृतिः ॥ ७ ॥ शेषं निवेदयामास पित्रे तेन च तद्गुरुः ॥ चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्याह स्म ॥ ८ ॥ ज्ञात्वेति ॥ ततो गुरुणाऽभिहितं कथितं पुत्रस्य तत्कर्म ज्ञात्वा नृप इक्ष्वाकुः त्यक्तो विधिः शास्त्रीयनियमो येन तं सुतं विकुक्षिं रुषा देशान्निःसारयामास ॥९॥ स इति ॥ स तु इक्ष्वाकुः जापकेन ज्ञानदायिना गुरुणा विप्रेण वसिष्ठेन सह संवादं तत्त्वविचारं समाचरत् अकरोत् । ततस्तेन तत्त्वविचारेण स इक्ष्वाकुः योगी ज्ञानयोगनिष्ठः सन् कलेवरं त्यक्त्वा यत्परं ब्रह्म तदवाप॥ १० ॥पितरीति॥ एवं पितरि इक्ष्वाकौ उपरते मृते सति पुनर्विकुक्षिरभ्येत्य गृहमागत्येमां पृथिवीं शासत् पालयन् सन् । अभ्यस्तत्वाच्छुभभावः । यज्ञैर्हरिमीजे । स च शशादनेन कर्मणा शशाद इति विश्रुतः प्रसिद्धो जातः ॥ ११ ॥ पुरञ्जय इति ॥ तस्य विकुक्षेः सुतः पुरञ्जयः स एव इन्द्रवाहः इतीरित उक्तः ककुत्स्थ इति चापीरितः उक्तः । यैः कर्मभिरेतानि नामानि जातानि तानि शृणु ॥ १२॥ कृतान्त इति ॥ कृतं विश्वमन्तयतीति कृतान्तः प्रलयसदृशः दानवैः सह देवानां समर आसीत् तदा दैत्यपराजितैर्देवैः स वीरः पुरञ्जयः पार्ष्णिग्राहो वृतः सहायत्वेन प्रार्थितः ॥ १३॥ वचनादिति ॥ एवं सहायत्वेन वृतेन यदीन्द्रो मम वाहनं स्यात्तर्हि

ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाऽभिहितं नृपः ॥ देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ॥ ९ ॥ स तु विप्रेण संवादं जापकेन समाचरन् ॥ त्यक्त्वा कलेवरं योगी स तेनावाप यत्परम् ॥ १० ॥ पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् ॥ शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥ ११ ॥ पुरंजयस्तस्य सुत इन्द्रवाह इतीरितः ॥ ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥ १२ ॥ कृतान्त आसीत्समरो देवानां सह दानवैः ॥ पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥ १३ ॥ वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः ॥ वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः ॥ १४ ॥ स संनद्धो धनुर्दिव्यमादाय विशिखान् शितान् ॥ स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥ १५ ॥ तेजसाऽऽप्यायितो विष्णोः पुरुषस्य परात्मनः ॥ प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरम् ॥ १६ ॥ तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणम् ॥ यमाय भल्लैरनयद्दैत्यान् येऽभिययुर्मृधे ॥ १७ ॥ तस्येषुपाताभिमुखं युगान्ताग्निमिवोल्वणम् ॥ विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम् ॥ १८ ॥

दैत्यान् हनिष्यामीति वाहनत्वेन वृतः सन्निन्द्रो लज्जया तदनङ्गीकुर्वन् देवदेवस्य विश्वात्मनः प्रभोर्विष्णोर्वचनात् तस्य वाहनरूपो महावृषो बभूव ॥१४॥ स इति युग्मम् ॥ ततः सः पुरञ्जयः युयुत्सुः योद्धमिच्छुः सन् सन्नद्धः कवचितः दिव्यं धनुः निशितान् विशिखान् बाणांश्चादाय बन्दिभिः स्तूयमानः परात्मनः पुरुषस्य विष्णोस्तेजसा आप्यायितः उपबृंहितस्तं महान्तं वृषमारुह्य तत्रापि तत् ककुदि स्कन्धस्थमांसपिण्डसमीपे स्थितस्त्रिदशैर्देवैः सहितः प्रतीच्यां दिशि दैत्यानां पुरं न्यरुणत् निरुद्धवान् ॥१५॥१६॥ तैरिति ॥ तैर्दैत्यैः सह तस्य पुरञ्जयस्य तुमुलम् अतिसङ्कीर्णं भयंकरम् अत एव रोमहर्षणं प्रधनं युद्धमभूत्तत्र मृधे युद्धे ये एतस्याभिमुखं ययुस्तान् दैत्यान् भल्लैर्बाणैर्यमाय यमं दर्शयितुं सदेहानेवानयत् ॥ १७ ॥ तस्येति ॥ केचित्तु दैत्याः सायकैस्तेन हन्यमानास्तस्येषुपाताभिमुखं युगान्ते प्रलये यो विश्वविनाशकोऽग्निस्तमिव उल्बणं दुःसहमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यर्थः । रणं विसृज्य त्यक्त्वा स्वमालयं पातालं प्रति दुद्रुवुः ॥१८॥ जित्वेति ॥ इत्येवं स राजर्षिः दैत्यान् जित्वा तेषां सश्रीकं सगोभं पुरं धनं च सर्वं वज्रपाणये इन्द्राय प्रत्ययच्छत् प्रददौ । अतो दैत्यपुरजयात् पुरञ्जयः इन्द्रस्यैव वाहनत्वेन परिगृहीतत्वात् इन्द्रवाहः ककुदि स्थितत्वात्ककुत्स्थ इति त्रिभिर्नामभिराहूतो व्यवहृत इत्यर्थः । आहुत इति पाठान्तरम् ॥१९॥ पुरञ्जयस्येति ॥ पुरञ्जयस्य अनेना इति पुत्रोऽभूत् । तस्य सुतः पृथुरभूत् । ततश्च विश्वरन्धिः पुत्रोऽभून् । तस्य चन्द्रः पुत्रोऽभूत् । तस्य च सुतो युवनाश्वोऽभूत् ॥२०॥ शावस्त इति ॥ तस्य युवनाश्वस्य सुतः शावस्तः येन शावस्तेन शावस्त्याख्या पुरी निर्मिता । शावस्तिः शावस्तस्य सुतो बृहदश्वः ततश्च कुवलयाश्वकः पुत्रो जातः ॥ २१ ॥ य इति ॥ यः कुवलयाश्वको बली बलवान् अत उतङ्कस्य ऋषेः प्रियार्थं प्रियं कर्तुं स्वसुतानामेकविंशत्या सहस्रैः एकविंशतिसहस्रसङ्ख्याकैर्वृतो युद्धे धुन्धुनामासुरमहनत् । शब्लुगभाव आर्षः ॥ २२ ॥ धुन्धु इति सार्द्धम् ॥ हे भारत अतो धुन्धोर्मारणात्स कुवलयाश्व एव धुन्धुमार इति चाख्यातः लोके

जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये ॥ प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः ॥ १९ ॥ पुरंजयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः ॥ विश्वरन्धिस्ततश्चन्द्रो युवनाश्वश्च तत्सुतः ॥२०॥ शावस्तस्तत्सुतो येन शावस्ती निर्ममे पुरी ॥ बृहदश्वस्तु शावस्तिस्ततः कुवलयाश्वकः ॥ २१ ॥ यः प्रियार्थमुतङ्कस्य धुन्धुनामाऽसुरं बली ॥ सुतानामेकविंशत्या सहस्रैरहनद् वृतः ॥ २२ ॥ धुन्धुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः ॥ धुन्धोर्मुखाग्निना सर्वे त्रय एवावशेषिताः ॥ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत ॥ २३ ॥ दृढाश्वपुत्रो हर्यश्वो निकुम्भस्तत्सुतः स्मृतः ॥ २४ ॥ बर्हिणाश्वो निकुम्भस्य कृशाश्वोऽथास्य सेनजित् ॥ युवनाश्वोऽभवत्तस्य सोऽनपत्यो वनं गतः ॥ २५ ॥ भार्याशतेन निर्विण्ण ऋषयोऽस्य कृपालवः ॥ इष्टिं स्म वर्तयांचक्रुरैन्द्रीं ते सुसमाहिताः ॥ २६ ॥ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ॥ दृष्ट्वा शयानान् विप्रांस्तान् पपौ मन्त्रजलं स्वयम् ॥ २७ ॥

कथितः । ये चैकविंशतिसहस्रसङ्ख्याकास्तस्य सुतास्ते सर्वे धुन्धोर्मुखान्निःसृतेनाग्निना जज्वलुः दग्धा बभूवुः । तेषां मध्ये दृढाश्व इत्यादयः त्रय एव सुता अवशेषिताः ॥२३॥ दृढाश्वपुत्र इति अर्द्धम् ॥ स्पष्टम् ॥२४॥ बर्हिणेति युग्मम् ॥ निकुम्भस्य सुतो बर्हिणाश्वोऽथ तस्य सुतः कृशाश्वः अस्य सुतः सेनजित् तस्य युवनाश्वः सुतोऽभवत् । तस्य च भार्याशतमासीत् तथापि तास्वपत्यं न जातम् अतः सोऽनपत्यः सन्तानरहितः अत एव निर्विण्णः खिन्नमनास्तेन भार्याशतेन सह वनम् ऋषीणामाश्रमं गतः । ते च कृपालवस्तस्मिन् कृपायुक्ताः ऋषयः सुसमाहिताः देवाराधन एकाग्रचित्ताः सन्तोऽस्य पुत्रलाभाय ऐन्द्रीम् इन्द्रदेवताकामिष्टिं प्रवर्तयाञ्चक्रुः । स्मेत्याश्चर्ये ॥ २५ ॥२६॥ राजेति ॥ राजा युवनाश्वः तर्षितः पिपासुः सन् निशि रात्रौ तद्यज्ञसदनं प्रविष्टः तत्र तान् विप्रान् शयानान् दृष्ट्वा अतस्तान् अपृष्ट्वैव मन्त्रजलं पुंसवनमन्त्राभिमन्त्रितं पत्न्यै देयं जलं

CC-0. In Public Domain. Digitization by eGangotri

स्वयमेव पपौ ॥ २७ ॥ उत्थिता इति ॥ तत उत्थितास्ते विप्राः कलशं निरुदकं निशाम्य दृष्ट्वा हे प्रभो यत् पुंसवनं पुत्रोत्पत्तिकरं जलं पीतमिति तदिदं कस्य कर्मेति राजानं पप्रच्छुः ॥ २८ ॥ राज्ञेति ॥ अथ ईश्वरप्रहितेन ईश्वरप्रेरितेन राज्ञैव जलं पीतमिति विदित्वा ते ऋषयः अहो आश्चर्यं दैवस्य बलमेव मुख्यं बलं पुरुषबलं तु न किञ्चिदिति वदन्त ईश्वराय नमश्चक्रुः ॥ २९ ॥ तत इति ॥ ततः काले पुत्रोत्पत्तिसमय उपावृत्ते प्राप्ते सति युवनाश्वस्य दक्षिणं कुक्षिं निर्भिद्य तनयो जजान । "जन जनने" इति जुहोत्यादिश्छान्दसो धातुः दिवादेर्वा। तङभाव आर्षः । स च चक्रवर्त्ती राजा बभूव ॥ ३० ॥ कमिति ॥ अयं कुमारो बुभुक्षितो भृशं रोरूयते अतिरोदिति अतः स्तन्यं दुग्धं प्रति कं धास्यति पास्यतीति दुःखितैर्विप्रादिभिरुक्ते सति तस्यामिष्ट्यामाराधित इन्द्रो मां धाता मां पास्यतीत्युक्त्वा हे वत्स मा रोदीरिति बालकं प्रति वदन् देशिनीमदात् अमृतस्राविणीं स्वतर्जनीं कुमारस्य मुखे निहितवान् ॥ ३१ ॥ नेति ॥ एवमिन्द्रेण मान्धातेत्युक्तत्वात्स नाम्नाऽपि मान्धातेति प्रसिद्धो जातः । कुक्षिभेदान्मरणे प्राप्तेऽपि तस्य

उत्थितास्ते निशम्याथ व्युदकं कलशं प्रभो ॥ पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलम् ॥ २८ ॥ राज्ञा पीतं विदित्वाथ ईश्वरप्रहितेन ते ॥
ईश्वराय नमश्चक्रुरहो दैवबलं बलम् ॥ २९ ॥ ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणम् ॥ युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥ ३० ॥
कं धास्यति कुमारोऽयं स्तन्यं रोरूयते भृशम् ॥ मां धाता वत्स मा रोदीरितीन्द्रो देशिनीमदात् ॥ ३१ ॥ न ममार पिता तस्य विप्रदेवप्रसादतः ॥ युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ॥ ३२ ॥ त्रसद्दस्युरितीन्द्रोऽङ्ग विदधे नाम तस्य वै ॥ यस्मात्त्रसन्ति ह्युद्विग्ना दस्यवो रावणादयः ॥३३॥ यौवनाश्वोऽथ मांधाता चक्रवर्त्यवनीं प्रभुः ॥ सप्तद्वीपवतीमेकः शशासाच्युततेजसा॥३४॥ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः॥
सर्वदेवमयं देवं सर्वात्मकमतीन्द्रियम् ॥ ३५ ॥ द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः ॥ धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकम् ॥ ३६ ॥

बालस्य पिता युवनाश्वो विप्राणां देवानां च प्रसादतो न ममार । अथानन्तरं युवनाश्वस्तत्र वन एव निवसंस्तपसाऽनुष्ठितेन सिद्धिं मुक्तिमन्वगात् प्राप ॥ ३२ ॥ त्रसदिति ॥ अङ्ग हे राजन् हि यतः यस्मान्मान्धातुः सकाशात् उद्विग्नाः कम्पितहृदयाः दस्यवः परोपद्रवकारिणो दुष्टा रावणादयः त्रसन्ति बिभ्यति तस्मात् इन्द्रस्तस्य कुमारस्य त्रसद्दस्युरिति नाम विदधे चकार ॥ ३३ ॥ यौवनाश्व इति ॥ अच्युतस्य तेजसा प्रभुः समर्थः स यौवनाश्वः युवनाश्वस्य पुत्रो मान्धाता चक्रवर्ती सार्वभौमः एक एव सप्तद्वीपवतीमवनीं शशास ॥ ३४ ॥ ईज इति ॥ आत्मवित्स मान्धाता भूरयो बह्व्यो दक्षिणा येषु तैः क्रतुभिः यज्ञैः सर्वदेवमयं सर्वात्मकमतीन्द्रियं देवं यज्ञं विष्णुम् ईजे ॥ ३५ ॥ सर्वात्मकत्वं स्पष्टयति–द्रव्यमिति ॥ द्रव्यं चरुपुरोडाशादिकं मन्त्रो द्रव्यदेवताप्रकाशको वेदभागः विधिश्चोदनात्मको वेदभागः यज्ञो विष्णुः यजमानः कर्ता ऋत्विजो ब्राह्मणाः धर्मोऽपूर्वाख्यः देशो भूमिः कालो वसन्तादिः किं बहुना सर्वमेवैतद्विश्वं यदात्मकं तमीज इत्यनुषङ्गः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावदिति ॥ यावत् यत्र सूर्य उदेति यावत् यत्र च प्रतितिष्ठति अस्तमेति तदवधीकृत्य सर्वमेतद्भूमण्डलं यौवनाश्वस्य मान्धातुः क्षेत्रं पालितं स्थानमुच्यते ॥३७॥ शशबिन्दोरिति ॥ स नृपो मान्धाता शशबिन्दोर्दुहितरि बिन्दुमत्याख्यायां स्वभार्यायां पुरुकुत्सुमम्बरीषं योगिनं मुचुकुन्दं चेति त्रीन् पुत्रान् अधात् उत्पादयामास ॥ ३८ ॥ तेषामित्यर्द्धम् ॥ तेषां पुरुकुत्सादीनां पञ्चाशत्सङ्ख्याकाः स्वसारो भगिन्यः सौभरिमृषिं पतिं वव्रिरे परिजगृहुः॥ ३९ ॥यमुनेति ॥ लोकासक्तिभिया यमुनायामन्तर्जले योगबलेन जलमध्ये मग्नः स्थितः परममुत्कृष्टं तपस्तप्यमानः कुर्वाणः विप्रः सौभरिः कदाचिन्मैथुनमेव धर्मोऽस्यास्ति तस्य मीनराजस्य मत्स्यश्रेष्ठस्य निर्वृतिं मैथुनसुखं वीक्ष्य तस्मिन् जाता उत्पन्ना स्पृहा यस्य सः नृपं मान्धातारं प्रत्यागत्यैकां कन्यामयाचत ॥ ४० ॥ स इत्यर्द्धम् ॥ सोऽपि मान्धाताऽस्य वैरूप्यमालक्ष्याह स्म । हे ब्रह्मन् कामं कन्येच्छानुरोधेन स्वयं वरे कन्या गृह्यताम् अन्तःपुरं गत्वा तत्र या कन्या स्वयं त्वां वृणीते सा परिगृह्यतामिति ॥४१॥ स इति ॥ जरठो वृद्धः वलिभिर्युक्तः पलितश्च एजत्कः कम्पमान

यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति ॥ सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ॥ ३७ ॥ शशबिन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः ॥ पुरुकुत्समम्बरीषं मुचुकुन्दं च योगिनम् ॥३८॥ तेषां स्वसारः पञ्चाशत्सौभरिं वव्रिरे पतिम्॥३९॥यमुनाऽन्तर्जले मग्नस्तप्यमानः परंतपः॥ निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ॥ जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ॥ ४० ॥ सोऽप्याह गृह्यतां ब्रह्मन्कामं कन्या स्वयंवरे ॥ ४१ ॥ स विचिन्त्याप्रियं स्त्रीणां जरठोऽयमसंमतः ॥ वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ॥ ४२ ॥ साधयिष्ये तथात्मा नं सुरस्त्रीणामपीप्सितम् ॥ किं पुनर्मनुजेन्द्राणामिति व्यवसितः प्रभुः ॥ ४३ ॥ मुनिः प्रवेशितः क्षत्रा कन्यान्तःपुरमृद्धिमत् ॥ वृतश्च राजकन्याभिरेकः पञ्चाशता वरः ॥ ४४ ॥ तासां कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदम् ॥ ममानुरूपो नायं व इति तद्गतचेतसाम् ॥ ४५ ॥

शिराः अतोऽयं स्त्रीणामसंमतः इति हेतोः स्त्रीणामप्रियं मां विचिन्त्यानेन राज्ञाऽहं प्रत्युदाहृतः स्वयं वरमिषेण प्रत्युक्तः इति स सौभरिरचिन्तयत् इति शेषः ॥ ४२ ॥ साधयिष्य इति ॥ अतः यथा सुराणां याः स्त्रियस्तासामप्यभीप्सितम् अभिलषणीयं मनुजेन्द्राणां राज्ञां यास्त्रियस्तासामभीप्सितमिति तु किं पुनर्वक्तव्यमिति तथा इत्येवं रूपम् आत्मानं साधयिष्ये इति स प्रभुर्योगी सौभरिः व्यवसितः कृतनिश्चयो भूत्वा तथैव कृतवानिति शेषः ॥४३॥ मुनिरिति ॥ स मुनिः सौभरिः ऋद्धिमत् सर्वसमृद्धियुक्तं कन्यान्तःपुरं क्षत्रा प्रतिहारेण राजाज्ञया प्रवेशितः सन् पञ्चाशता पञ्चाशत्सङ्ख्याकाभिः राजकन्याभिः सर्वाभिरेक एव वरो वृतः वरतयाङ्गीकृतः ॥ ४४ ॥ तासामिति ॥ तदा तदर्थे वरनिमित्तं सौहृदं सौन्दर्यप्रयुक्तस्नेहमपोह्य त्यक्त्वा तस्मिन्नेवातिसुन्दरे गतमासक्तं चेतो यासां तासां कन्यानाम् अयं ममैवानुरूपो योग्यो वरः वो युष्माकं योग्यो नैव भवतीति भूयान् महान् कलिः कलहोऽभूत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति युग्मम् ॥ स बह्वृचः ऋग्वेदाध्यायी सौभरिः महार्हशय्याऽऽसनादिभिरुपलक्षितः सन् ताभिः स्त्रीभिः सह अपारणीयं दुरन्तं यत्तपस्तस्य श्रिया समृद्ध्या हेतुभूतया अनर्घ्याः अमूल्याः परिच्छदाः उपकरणानि येषु तथा स्वलंकृताः स्त्रियः पुरुषाश्च येषु तेषु अनुगायन्तो द्विजाः पक्षिणो भृङ्गाश्च बन्दिनश्च येषु तेषु गृहेषु गृहोपलक्षितेषु पुरेषु वा। तथा सौगन्धिकानां कह्लारादीनां काननानि येषु तेषु नानाविधानि यान्युपवनानि तत्सम्बन्धीनि अमलान्यम्भांसि येषु तथाभूतानि यानि सरांसि तेषु च रेमे ॥ ४६ ॥ ॥ ४७ ॥ यदिति ॥ सप्तद्वीपवत्याः भूमेः पतिः अत एव सार्वभौमश्रियान्वितो युक्तो मान्धाताऽपि यस्य सौभरेः गार्हस्थ्यं संवीक्ष्य विस्मितः सन् स्तम्भं गर्वमजहात् ॥४८॥ एवमिति ॥ एवं गृहेष्वभिरतः आसक्तः सौभरिः विविधैः स्वस्वविषयोन्मुखैरिन्द्रियैर्विषयान् शब्दादीन् सेवमानोऽपि न चातुष्यत् अलमिति नैवामन्यत । तत्र दृष्टान्तमाह । अनलः यथा आज्यस्तोकैर्घृतबिन्दुभिर्न तुष्यति तद्वदिति । विविधैः सुखैरिति पाठे युक्त इति शेषः ॥ ४९ ॥ स इति ॥ बह्वृचानामाचार्यः स सौभरिः कदाचिदुपासीनः

स बह्वृचस्ताभिरपारणीयतपःश्रियाऽनर्घ्यपरिच्छदेषु ॥ गृहेषु नानोपवनामलाम्भःसरस्सु सौगन्धिककाननेषु ॥ ४६ ॥ महाऽर्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ॥ स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्विजभृङ्गवन्दिषु ॥ ४७ ॥ यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः॥ विस्मितः स्तम्भमजहात्सार्वभौमश्रियान्वितम् ॥ ४८ ॥ एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः ॥ सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ॥ ४९ ॥ स कदाचिदुपासीन आत्मापह्नवमात्मनः ॥ ददर्श बह्वृचाचार्यो मीनसङ्गसमुत्थितम् ॥ ५० ॥ अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ॥ अन्तर्जले वारिचरप्रसङ्गात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥ ५१ ॥ सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिन्द्रियाणि ॥ एकश्चरन्रहसि चित्तमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः ॥ ५२ ॥ एकस्तपस्व्यहमथाम्भसि मत्स्यसङ्गात्पञ्चाशदासमुत पञ्चसहस्रसर्गः ॥ नान्तं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥ ५३ ॥

उपविष्टः आत्मनः स्वमनसो मीनस्य सङ्गात् मैथुनदर्शनात्समुत्थितं विवाहादिद्वारा जातमात्मनोऽपह्नवं तपोलोपं ददर्श ॥ ५० ॥ अहो इति ॥ अहो हे लोकाः तपस्विनस्तपोनिष्ठस्य तथा संश्वासौ चरितानि व्रतानि येन स च तथाभूतस्यापि मे ममेमं विनाशं पश्यत यत् अन्तर्जले वारिचरो मीनस्तत्प्रसङ्गाद्धेतोर्यच्चिरं धृतं ब्रह्म तपः तत्प्रच्यावितं नाशितमिति ॥ ५१ ॥ सङ्गमिति ॥ सर्वात्मना निश्चितेन मनसा मुमुक्षुः पुरुषो मिथुनव्रतिनां दाम्पत्यधर्मवतां सङ्गं त्यजेत। तदर्थः । इन्द्रियाणि च बहिः शब्दादिविषयेषु न विसृजेत् न प्रवर्तयेत् । एकोऽसहाय एव चरन् रहसि एकान्ते स्थितः सन्ननन्ते ईशे सर्वनियन्तारि भगवति चित्तं नियुञ्जीत भगवन्तं ध्यायेदित्यर्थः । चेत् यदि प्रसङ्गः तर्हि तद्व्रतिषु तस्य भगवतो व्रतमुपासनमस्ति येषां तेषु साधुषु एव कार्यः ॥ ५२ ॥ एक इति ॥ प्रथममेकोऽसहायस्तपस्वी तपोनिष्ठ एवाहमासम् । अथानन्तरमम्भसि यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्स्यस्य सङ्गस्तस्मात् पञ्चाशदासम्। पञ्चाशद्भार्याभिः सहैकदा संबन्धाय पञ्चाशच्छरीरविशिष्टोऽभवम्। ततश्च तासु प्रत्येकं पुत्रशतरूपेण जातत्वात्पञ्चसहस्रसर्गरूप। आसम् अधुनापि मायागुणैः हृता मतिर्यस्य अतः विषय एवार्थभावः पुरुषार्थबुद्धिर्यस्य सोऽहम् उभयकृत्यानि स्त्रीपुंसकर्माणि ऐहिकपारलौकिककर्माणि वा तद्विषयाणां मनोरथानामन्तं न व्रजामि॥५३॥ एवमित्यादि शुकोक्तिः॥ एवं बहुकालं गृहे वसंस्तत्र विरक्तः संन्यासं सङ्गत्यागं वानप्रस्थधर्ममाश्रितः तपः कर्तुं वनं जगाम। तं गच्छन्तं पतिदेवताः पतिव्रताः तत्पत्न्योऽप्यनुययुः सहैव जग्मुः ॥ ५४ ॥ तत्रेति ॥ तत्र वने स आत्मवान् जितचित्तः सौभरिस्तीक्ष्णं तीव्रम् अत एवात्मकर्शनं शरीरकार्श्यकरं तपस्तप्त्वा कृत्वा आहवनीयादिभिरग्निभिः सह प्रत्यगात्मानं परमात्मनि युयोज लीनं कृतवान् मुक्तिमवापेत्यर्थः ॥५५॥ ता इति ॥ हे महाराज ताः सौभरिपत्न्यः स्वपत्युराध्यात्मिकीं परमात्मनि लयरूपां गतिं निरीक्ष्य तस्यैव तपउपासनादिप्रभावेण तमेवान्वयुः मुक्ता बभूवुः। शान्तं निरन्धनमग्निं यथार्चिषो ज्वाला अनुलीना भवन्ति तद्वदित्यर्थः। स्वपत्युरित्यार्षम् ॥५६॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमषष्ठेऽध्याये व्यधादिमाम् ॥६॥ सप्तमे मान्धातृवंशे पुरुकुत्सकथोच्यते ॥ हरिश्चन्द्रस्य चाप्यत्र श्लोकाः सार्द्ध

एवं वसन्गृहे कालं विरक्तो न्यासमास्थितः ॥ वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥ ५४ ॥ तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्षणमात्मवान् ॥ सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥ ५५ ॥ ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिम् ॥ अन्वीयुस्तत्प्रभावेण अग्निं शान्तमिवार्चिषः ॥ ५६ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ मांधातुः पुत्रप्रवरो योऽम्बरीषः प्रकीर्तितः ॥ पितामहेन प्रवृत्तो यौवनाश्वश्च तत्सुतः ॥ हारीतस्तस्य पुत्रोऽभून्मांधातृप्रवरा इमे ॥१॥ नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः ॥ तया रसातलं नीतो भुजगेन्द्रप्रयुक्तया ॥ २ ॥ गन्धर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक् ॥ नागाल्लब्धवरः सर्पादभयं स्मरतामिदम् ॥ ३ ॥

भसंमिताः ॥ अनुष्टुभोऽपि तावंत्य उवाचेत्येकमेव तु ॥ ७ ॥ मान्धातुरिति सार्द्धम्॥ मान्धातुः पुत्राणां पुरुकुत्सादीनां मध्ये प्रवरः श्रेष्ठो योऽम्बरीष इति प्रकीर्तितः स च पितामहेन युवनाश्वेन तस्य पुत्रतया प्रवृत्तः स्वीकृतः अत एव तस्य मान्धातृप्रवरत्वं तस्य चाम्बरीषस्य सुतो यौवनाश्वोऽभूत् तस्य। यौवनाश्वस्य हारीत इति पुत्रोऽभूत्। इमेऽम्बरीषयौवनाश्वहारीताः मान्धातृप्रवराः मान्धातृवंशस्यावान्तरोत्कर्षप्रवर्तका इत्यर्थः। यद्वा। यौवनाश्वविशेषणम्। पितामहेन मान्धात्रा सह आर्षेयवरणे प्रवृत्तः मान्धाता प्रवरो येषां ते इमे अम्बरीषयौवनाश्वहारीताः। यथाहाश्वलायनः। "हरितकुत्सपिङ्गदर्भभैमगवानामाङ्गिरसाम्बरीषयौवनाश्वेति मान्धातारं हैके ब्रुवते अतीत्याङ्गिरसं मान्धात्राम्बरीषयौवनाश्व" इति ॥ १ ॥ नर्मदेति ॥ भ्रातृभिरुरगैर्नागैर्या नर्मदाख्या नागकन्या पुरुकुत्साय दत्ता भुजगेन्द्रैर्भ्रातृभिः प्रयुक्तया प्रेरितया तया नर्मदया स पुरुकुत्सो रसातलं नीतः ॥ २ ॥ गन्धर्वानिति ॥ विष्णुशक्तिधृक् भगवता प्राप्तबलः सः पुरुकुत्सः तत्र रसातले वध्यान् नागारित्वेन दुष्टत्वेन च वधार्हान् गन्धर्वान् अवधीत् ततश्च इदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नर्मदया रसातलनयनाद्याख्यानं स्मरतां सर्पादभयं तद्रूपं वरं वृण्वान इति शेषः। नागाल्लब्धवरो जातः पूर्वोक्तं वरं लब्धवानित्यर्थः ॥ ३॥ त्रसदिति ॥ पुरुकुत्सस्यापत्यं त्रसद्दस्युरभूत्। यत्त्रसद्दस्युरनरण्यस्य देहकृत् पिता त्रसद्दस्योः पुत्रः अनरण्योऽभूदित्यर्थः। तस्य सुतो हर्यश्वः तस्मात् अरुणो जज्ञे। अथ तस्मादरुणात् निबन्धनः॥ ४ ॥ तस्येति युग्मम् ॥ तस्य निबन्धनस्य पुत्रः सत्यव्रतः स एव दोषत्रययुक्तत्वात् त्रिशङ्कुरिति। ते च दोषा हरिवंशे उक्ताः। "पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च। अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः॥" इति। स च गुरोर्वसिष्ठस्य शापाच्चाण्डालतां प्राप्तः। यद्वा। परिणीयमानविप्रकन्यापहरणात् क्रुद्धस्य पितुः शापात् पुनश्च कौशिकस्य विश्वामित्रस्य तेजसा तपःप्रभावेण सशरीर एव स्वर्गं गतस्ततश्च तत्रत्यैर्देवैरर्वाक्शिराः पातितः पात्यमानः पुनस्तेन विश्वामित्रेणैव बलात्स्तम्भितः स्वतेजसा स्वर्गान्तरनिर्माणे प्रवृत्ते विश्वामित्रे भीतैर्देवैः पुनस्तत्रैव स्थापितोऽद्यापि दिवि नक्षत्रमण्डले नक्षत्ररूपेण दृश्यते॥ ५ ॥ ६ ॥ त्रैशङ्कव इति॥ त्रैशङ्कवः त्रिशङ्कुपुत्रो हरिश्चन्द्रोऽभूत्। यो हरिश्चन्द्रो निमित्तं कारणं

त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् ॥ हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ निबन्धनः ॥ ४ ॥ तस्य सत्यव्रतः पुत्रस्त्रिशङ्कुरिति विश्रुतः॥ प्राप्तश्चाण्डालतां शापाद्गुरोः कौशिकतेजसा॥ ५ ॥ सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ॥ पातितोऽवाक्शिरा देवैस्तेनैव स्तम्भितो बलात्॥ ६ ॥ त्रैशङ्कवो हरिश्चन्द्रो विश्वामित्रवसिष्ठयोः॥ यन्निमित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकम् ॥ ७ ॥ सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः॥ वरुणं शरणं यातः पुत्रो मे जायतां प्रभो॥ ८॥ यदि वीरो महाराज तेनैव त्वां यजे इति॥ तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः॥ ९ ॥ जातः सुतो ह्यनेनाङ्ग मां यजस्वेति सोऽब्रवीत्॥ यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति॥१०॥

यस्य तद्बहुवार्षिकं बहुवर्षपर्यन्तं पक्षिणोः पक्षित्वं प्राप्तयोर्विश्वामित्रवसिष्ठयोर्युद्धमभूत्। विश्वामित्रो राजसूयदक्षिणाच्छलेन हरिश्चन्द्रस्य सर्वस्वमपहृतवान्। तच्छ्रुत्वा च कुपितो हरिश्चन्द्रगुरुर्वसिष्ठो विश्वामित्रं त्वमाडिर्भवेति शशाप। आडिश्च बलाका। विश्वामित्रोऽपि वसिष्ठं त्वं बको भवेति शशाप। तयोश्च युद्धमभूदिति पुराणान्तरे प्रसिद्धम् ॥ ७॥ "हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजा पुत्र आस" इत्यादिश्रुतिप्रसिद्धं हरिश्चन्द्रचरितमाह—स इति ॥ स हरिश्चन्द्रोऽनपत्यः पुत्ररहितः अत एव विषण्णात्मा सुदुःखितचित्तः स नारदस्योपदेशात् वरुणं शरणं गतः वरुणमुपगम्य चोवाच। हे प्रभो मे मम पुत्रो जायताम् ॥ ८ ॥ यदीति ॥ यदि मे मम वीरः पुत्रो जायेत तर्हि तेनैव पुरुषपशुना त्वां यजे यक्ष्यामीति भाषाबन्धनं चकार। ततस्तथास्त्वित्युक्तवता वरुणेन निमित्तेनास्य हरिश्चन्द्रस्य रोहिताख्यः पुत्रो जातः ॥ ९ ॥ जात इति ॥ अङ्ग हे राजन् यदा हि पुत्रे जाते वरुण आगत्य तव पुत्रो जातोऽनेन मां यजस्वेत्यब्रवीत् तदा स हरिश्चन्द्रोऽपि यदा पशुः पुत्रो निर्दशो निर्गतदशदिनः स्यात्। अथ तदनन्तरं मेध्यः पवित्रो यागयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्यो भवेदित्यब्रवीद् ॥१०॥ निर्दशे चेति ॥ स तद्वचनमङ्गीकृत्य वरुणो निर्दशे दशस्वहःसु व्यतीतेषु सत्सु पुनरागत्य यजस्वेत्याह स्म । तदा स हरिश्चन्द्रो यत् यदा पुरुषपशोर्दन्ता जायेरन्नथ तदा मेध्यो भवेदित्यब्रवीत् ॥ ११ ॥ जाता इति ॥ ततश्च दन्तेषु जातेषु पुनः स वरुणः आगत्य दन्ता जाता अतो यजस्वेति राजानं प्रत्याह स्म । अथानन्तरं स हरिश्चन्द्रो यदास्य पुरुषपशोः प्रथमजाता दन्ताः पतन्त्यथ तदायं मेध्यो भवेदित्यब्रवीत् ॥१२॥ पशोरिति ॥ दन्तेषु पतितेषु सत्सु पुनरागत्य वरुणः पुरुषपशोः दन्ता निपतिता अतो मां यजस्वेत्याह स्म तदा स हरिश्चन्द्रो यदा पशोः पुनर्दन्ता जायन्ते अथ तदा पशुः शुचिर्भवतीत्यब्रवीत् ॥ १३ ॥ पुनरिति ॥ पुनर्दन्तेषु जातेषु स वरुण आगत्य राजानं प्रति पुनर्दन्ता जाता अतो मां यजस्वेत्याह स्म तदा पुनः स हरिश्चन्द्रो हे राजन् वरुण राजन्यः पुरुषपशुर्यदा सान्नाहिकः कवचबन्धनार्हः युद्धयोग्यो भवेत्तदा शुचिः यागार्हो भवेदित्यब्रवीत् ॥ १४ ॥ इतीति ॥ पुत्रे अनुरागः यस्य तेन अत एव तस्मिन् यः स्नेहस्तेन यन्त्रितं वशीकृतं चेतो यस्य तेन तं तं निर्दशादिरूपं

निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् ॥ दन्ताः पशोर्ज्जायेरन्नथ मेध्यो भवेदिति ॥ ११ ॥ जाता दन्ता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति ॥ १२ ॥ पशोर्निपतिता दन्ता यजस्वेत्याह सोऽब्रवीत् ॥ यदा पशोः पुनर्दन्ता जायन्तेऽथ पशुः शुचिः ॥ १३ ॥ पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ सान्नाहिको यदा राजन्राजन्योऽथ पशुः शुचिः ॥१४॥ इति पुत्रानुरागेण स्नेहयन्त्रितचेतसा ॥ कालं वञ्चयता तं तमुक्तो देवस्तमैक्षत ॥ १५ ॥ रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितम् ॥ प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत॥१६॥पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम्॥रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत॥१७॥भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः॥रोहितायादिशच्छक्रः सोऽप्यरण्येऽवसत्समाम्॥१८॥एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा॥अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा ॥१९॥

कालं वञ्चयता प्रतिक्षिपता हरिश्चन्द्रेणेत्येवमुक्तः प्रार्थितो वरुणस्तं तं कालमैक्षत प्रत्यैक्षत ॥ १५ ॥ रोहित इति ॥ रोहितोऽपि प्राप्तावबोधावस्थः पितुश्चिकीर्षितं कर्तुमिष्टं तत् आत्मना पशुना वरुणयजनरूपं कर्माभिज्ञाय प्राणप्रेप्सुर्जिजीविषुः धनुः पाणौ यस्य तथाभूतः सन्नरण्यं प्रत्यपद्यत जगाम ॥ १६ ॥ पितरमिति ॥ तस्मिन् वनं गते सति यागाशाया विच्छेदात्कुपितेन वरुणेन ग्रस्तं पीडितम् अत एव जातं महदुदरं यस्य तथाभूतं पितरं श्रुत्वा रोहितो ग्राममेयाय आगन्तुमुद्यतो जातः तदा तमिन्द्रः प्रत्यषेधत । तङ्गार्थः । गृहं मा गाः कथंचन गमने प्राणहानिरवश्यं स्यादित्युक्तवानित्यर्थः ॥ १७ ॥ भूमेरिति ॥ तीर्थानां क्षेत्राणां च निषेवणैः पुण्यं पुण्यजनकं भूमेः पर्यटनं शक्रो रोहितायादिशत् । स रोहितोऽपि तीर्थादिपर्यटनं कुर्वन् समामेकवर्षमरण्येऽवसत् ॥ १८ ॥ एवमिति ॥ एवं द्वितीयादिवर्षेष्वपि स्थविरो वृद्धो विप्रो भूत्वा वृत्रहा इन्द्रः अभ्येत्याभ्येत्य आगत्यागत्य ग्रामं मागास्तीर्थादिपर्यटनं कुर्विति रोहितायाह स्म उक्तवान् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठमिति ॥ ततश्च पितृदयापरवशो रोहितः षष्ठं संवत्सरं वने चरित्वा पुरीमुपव्रजन्नागच्छन् भार्गववंशजादजीगर्त्तात्तस्य मध्यमं सुतं शुनःशेपाख्यमक्रीणात् ॥२०॥ शुन इति सार्द्धम् ॥ तं च शुनःशेपाख्यं पशुं पित्रे प्रदाय स्वप्रतिनिधितया यागार्थं समर्प्य समवन्दत प्रणनाम । ततश्च हरिश्चन्द्रः पुरुषमेधेन यज्ञेन वरुणादीन् देवानजयत् । ततश्च मुक्तं वरुणेन त्यक्तमुदरं यस्य सः हरिश्चन्द्रः महायशाः महत्सु यशःकथा यस्य तादृशो बभूव ॥२१॥ विश्वामित्र इति ॥ तास्मिन् पुरुषमेधे विश्वामित्रो होता अभवत् । आत्मवान् आत्मतत्वज्ञो जमदग्निश्चाध्वर्युरभूत् । वसिष्ठो ब्रह्माऽभूत् । अयास्याख्यो मुनिः सामगः उद्गाताऽभूत् । उद्देश्यविधेयभावे समास आर्षः ॥ २२ ॥ तस्मै इति अर्द्धम् ॥ एवं संतुष्टः इन्द्रस्तस्मै हरिश्चन्द्राय शातकौम्भमयं स्वर्णविरचितं रथं ददौ । ब्राह्मणपुत्रशुनःशेपस्यालम्भनं तु नाभूत् किन्तु सः जीवन्नेव विमुक्तः तस्य माहात्म्यमुपरिष्टात् विश्वामित्रसुताख्यानप्रसङ्गे प्रवक्ष्यते ॥ २३ ॥ सत्येति ॥ हृतसर्वस्यापि सभार्यस्य भूपतेर्हरिश्चन्द्रस्य सत्यं सत्यप्रतिज्ञत्वमेव सारो बलं यस्यास्तां धृतिं दृष्ट्वा विश्वामित्रो भृशम-

षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीम् ॥ उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतम् ॥ २० ॥ शुनः शेपं पशुं पित्रे प्रदाय समवन्दत ॥ ततः पुरुषमेधेन हरिश्चन्द्रो महायशाः ॥ मुक्तोदरोऽयजद् देवान् वरुणादीन् महत्कथः॥२१॥ विश्वामित्रोऽभवत् तस्मिन् होता चाध्वर्युरात्मवान् ॥ जमदग्निरभूद्ब्रह्मा वसिष्ठोऽयास्यसामगः ॥ २२॥ तस्मै तुष्टो ददाविन्द्रः शातकौम्भमयं रथम् ॥ शुनःशेपस्य माहात्म्यमुपरिष्टात् प्रवक्ष्यते ॥ २३ ॥ सत्यसारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥ विश्वामित्रो भृशं प्रीतो ददावविहतां गतिम् ॥ २४ ॥ मनः पृथिव्यां तामद्भिस्तेजसाऽऽपोऽनिलेन तत् ॥ खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि ॥ तस्मिन् ज्ञानकलां ध्यात्वा तयाऽज्ञानं विनिर्दहन्॥२५॥हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा ॥ अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबन्धनः ॥ २६ ॥ इति श्रीभागवते म०नवमस्कन्धे हरिश्चन्द्रोपाख्यानं नाम सप्तमोऽध्यायः ॥७॥

तिशयेन प्रीतस्तस्मै अविहतां परमार्थविषयां गतिं ज्ञानं ददौ ॥२४॥ तां गतिमेवाह—मन इति सार्द्धयुग्मम् ॥ "मनोमूलो हि संसारः" मनश्चान्नमयम् "अन्नमयं हि सोम्य मनः" इति श्रुतेः । अतोऽन्नशब्दवाच्यायां पृथिव्यां मनो धारयन् एकीकुर्वन् तां पृथिवीमद्भिस्तत्कारणभूताभिः सहैकीकुर्वंस्ता अपस्तेजसैकीकुर्वन् तत्तेजः अनिलेनैकीकुर्वन् तं वायुं खे आकाशे धारयन् तच्च खं भूतादौ तामसाहङ्कारे धारयन् तमहङ्कारं महात्मनि महत्तत्वे धारयन् तस्मिन् महत्तत्वात्मके चित्ते विषयाकारं व्यावर्त्य ज्ञानकलां ज्ञानांशमात्मत्वेन ध्यात्वा तया ध्यानवृत्तिरूपया आत्मावरकमज्ञानं विनिर्दहन् निरवशेषं निरसन् निर्वाणसुखसंविदा तामपि ध्यानात्मिकां वृत्तिं हित्वा मुक्तबन्धनः देहादावात्माध्यासरहितः सन् अनिर्देश्येन गुणजात्यादिविशिष्टतया निर्देष्टुमनर्हेण । तत्र हेतुः अप्रतर्क्येण मनसा तर्कागोचरेण स्वेन भावेन परमार्थनिजस्वरूपेण तस्थौ जीवन्मुक्तो बभूव ॥ २५ ॥ २६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ सप्तमे गङ्गासहायो नवमस्य व्यधादिमाम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमे रौहिते वंशे सगरो यस्य सूनवः ॥ कपिलस्यागसा दग्धास्तत्र श्लोकाः कुवल्लयः ॥ चत्वार्युवाचेति सार्द्धास्त्रयस्त्रिंशदनुष्टुभः ॥८॥ हरित इति ॥ रोहितस्य सुतो हरितः तस्मात् चम्पो जातः । येन चम्पेनेति शेषः । चम्पापुरी विनिर्मिता अतः चम्पात् सुदेवो जातः यस्य च सुदेवस्यात्मजः पुत्रो विजयो जातः ॥ १ ॥ भरुक इति ॥ तस्य सुतो भरुकस्तस्मात् वृकः तस्यापि बाहुकः पुत्रो जातः । तद्वृत्तान्तमाह । स बाहुको राजा अरिभिः शत्रुभिर्हृता भूर्यस्य तथाभूतः स सभार्यो वनमाविशत् ॥ २ ॥ वृद्धमिति ॥ तत्र वृद्धं पञ्चतां मरणं प्राप्तं तं बाहुकं तत्पत्नी अनुमरिष्यती अनुमरणं कर्तुमुद्यता सती आत्मानं तद्देहं प्रजावन्तं सगर्भं जानता और्वेण ऋषिणा मरणान्निवारिता ॥ ३ ॥ आज्ञायेति ॥ अतस्तामन्तर्वत्नीमाज्ञाय तत्सपत्नीभिरमर्षेणान्धसा अन्नेन सह अस्यै गरो विषं दत्तः ततश्च सगर्भस्तेन गरेण सहैव सञ्जातः अतः स महायशाः सगराख्यो नृप आसीत् ॥४॥ सगर इति अर्द्धम् ॥ स च सगरश्चक्रवर्ती आसीत् । यस्य सुतैः सागरः समुद्रः कृतः खनितः ॥ ५ ॥ य इति सार्द्धम् ॥ यः सगरस्तालजङ्घादिसंज्ञान् क्षत्रियान् यवनान्

श्रीशुक उवाच ॥ हरितो रोहितसुतश्चम्पस्तस्माद्विनिर्मिता ॥ चम्पापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥ १ ॥ भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि बाहुकः ॥ सोऽरिभिर्हृतभू राजा सभार्यो वनमाविशत् ॥२॥ वृद्धं तं पञ्चतां प्राप्तं महिष्यनुमरिष्यती ॥ और्वेण जानताऽऽत्मानं प्रजावन्तं निवारिता ॥ ३ ॥ आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धसा सह ॥ सह तेनैव संजातः सगराख्यो महायशाः ॥ ४ ॥ सगरश्चक्रवर्त्यासीत् सागरो यत्सुतैः कृतः ॥ ५ ॥ यस्तालजङ्घान् यवनान् शकान् हैहयबर्बरान् ॥ नावधीद् गुरुवाक्येन चक्रे विकृतवेषिणः ॥ मुण्डान् श्मश्रुधरान् कांश्चिन्मुक्तकेशार्धमुण्डितान् ॥ अनन्तर्वाससः कांश्चिदबहिर्वाससोऽपरान् ॥६॥ सोऽश्वमेधैरयजत सर्ववेदसुरात्मकम् ॥ और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम् ॥ ७ ॥ तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः ॥ ८ ॥ सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः ॥ हयमन्वेषमाणास्ते समन्तान्न्यखनन् महीम् ॥ ९ ॥ प्रागुदीच्यां दिशि हयं ददृशुः कपिलान्तिके ॥ १० ॥

म्लेच्छान् गुरोः और्वस्य वाक्येन नावधीत् किंतु विकृतवेषिणश्चक्रे । तत्र कांश्चिन्मुण्डान्मुण्डितान् कांश्चित् श्मश्रुधरान् कांश्चिन्मुक्तकेशान् कांश्चिदर्द्धमुण्डितान् कांश्चिन्न विद्यतेऽन्तर्वासोऽन्तरीयं वस्त्रं येषां तान् तथा न विद्यते बहिर्वासो बहिः परिधानीयं वासो येषां तथाभूतांश्चक्रे ॥ ६ ॥ स इति ॥ स च सगरः और्वेणोपदिष्टः यो योगः अनुष्ठानप्रकारस्तेनाश्वमेधैः सर्वे वेदाः सुराश्च तदात्मकम् आत्मानमीश्वरं हरिम् अयजत ॥ ७ ॥ तस्येति अर्द्धम् ॥ तस्य सगरस्य यज्ञे उत्सृष्टं मुक्तं पशुमश्वं पुरन्दराख्य इन्द्रो जहार हृतवान् ॥ ८ ॥ सुमत्या इति ॥ सगरस्य द्वे भार्ये सुमतिः केशिनी च तत्र सुमत्यास्तनयाः षष्टिसहस्रसङ्ख्या दृप्ताः बलेन गर्विताः पितुरादेशकारिणस्तदायज्ञा हयमन्वेषमाणाः समन्तात् महीं न्यखनन् ॥ ९ ॥ प्रागिति अर्द्धम् ॥ एवं महीं खनन्तः प्रागुदीच्याम् ऐशान्यां दिशि रसातलस्थस्य कपिलस्यान्तिके इन्द्रेण स्थापितमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषः । हयमश्वं ते ददृशुः ॥ १० ॥ एष इति सार्द्धम् ॥ ततश्चैष एव वाजिहरः अश्वापहर्ता चोरः सन्निमीलिते लोचने येन तथाभूत आस्ते अतोऽयं पापात्मा हन्यतां हन्यतामिति वदन्तः षष्टिसहस्रिणः षष्टिसहस्रसंख्यापरिच्छेदकतयाऽस्ति येषां ते उद्यतानि आयुधानि यैस्तथाभूताः सन्तोऽभिययुः हन्तुं तत्संमुखं जग्मुः तदा च मुनिः कपिल उन्मिमेष लोचनोन्मीलनं चकार ॥ ११ ॥ स्वेति ॥ महेन्द्रेण हृतं स्वमायया मोहितं चेतो येषांते इन्द्रेणैव एष चौर इति ज्ञापनात् महतः कपिलस्य यो व्यतिक्रमः अपराधस्तेन हताः मुनिलोचनोन्मीलनमात्रेण स्वशरीरस्थेनैवाग्निना तत्क्षणादेव भस्मसादभवन् ॥ १२ ॥ केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयन्ति तन्निराकरोति—नेति ॥ नृपेन्द्रस्य सगरस्य पुत्राः मुनेः कपिलस्य कोपाग्निना भर्जिता दग्धा इति न साधुवादः यतः सत्वधामनि शुद्धसत्वमूर्तौ जगतः पवित्रकर आत्मा यस्य तस्मिन् श्रीकपिले रोषात्मकं तमो गुणोऽज्ञानं वा कथं विभाव्यते संभाव्यते । यथा भुवः रजः खे आकाशे न संभाव्यते तथेत्यर्थः । यथा अलिप्तमप्याकाशं भ्रान्त्या रजस्वलं प्रतीयते तथा स्वापराध-

एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥ हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः ॥ उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥ ११ ॥ स्वशरीराग्निना तावन्महेन्द्रहृतचेतसः ॥ महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ॥ १२ ॥ न साधुवादो मुनिकोपभर्जिता नृपेन्द्रपुत्रा इति सत्वधामनि ॥ कथं तमोरोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ॥ १३ ॥ यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययम्॥ भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः ॥ १४ ॥ योऽसमञ्जस इत्युक्तः सकेशिन्यां नृपात्मजः ॥ तस्य पुत्रोंऽशुमान् नाम पितामहहिते रतः ॥ १५ ॥ असमञ्जस आत्मानं दर्शयन्नसमञ्जसम् ॥ जातिस्मरः पुरा सङ्गाद्योगी योगाद्विचालितः ॥ १६ ॥ आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियम् ॥ सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयन् जनम् ॥ १७ ॥

मृताः भ्रान्त्या मुनिकोपमृताः प्रतीयन्ते अत इयं प्रतीतिर्भ्रान्तिरेव ॥ १३ ॥ यस्य इति ॥ यस्य येन श्रीकपिलेनेह लोके साङ्ख्यमयी साङ्ख्यात्मिका दृढा यदाश्रितानां न पुनः संसारार्णवे निमज्जनं तथाभूता नौरीरिता प्रवर्त्तिता । यया नावा मुमुक्षुः मृत्युपथं मृत्योर्मार्गभूतं दुरत्ययं दुस्तरं भवार्णवं संसारसागरं तरते । तङ्गार्षः। तस्य विपश्चितः सर्वज्ञस्य परात्मभूतस्य परमात्मभूतस्य पृथङ्मतिः शत्रुमित्रादिभेदबुद्धिः कथं सम्भाव्यते ॥ १४ ॥ य इति ॥ योऽसमञ्जस इत्युक्तः लोके प्रसिद्धः सोऽपि केशिन्यां तन्नाम्न्यां भार्यायां जातो नृपस्य सगरस्यात्मजः पुत्र एव तस्य पुत्रोंऽशुमानिति नाम्ना प्रसिद्धः पितामहस्य सगरस्य हिते रतोऽभूत् ॥ १५ ॥ असमञ्जस इति युग्मम् ॥ असमञ्जसः पुरा पूर्वजन्मनि योगी स सङ्गाद्धेतोर्योगाद्विचालितः भ्रष्टः अत इदानीं पौर्वदैहिकयोगप्रभावेण जातिस्मरः पूर्वजन्मवृत्तस्मृतिभान् अतः पुनः सङ्गपरिहारायात्मानमसमञ्जसं प्रतिकूलं यथा तथा लोके दर्शयन् दर्शयितुं गर्हितं निन्दितमत एव ज्ञातीनामप्रियं कर्माचरन् कुर्वन् जनमुद्वेजयन् भीषयन् क्रीडतो बालानादाय सरय्वां नद्यां प्रास्यत् प्राक्षिपत् ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ यत एवंविधं वृत्तं कर्म यस्य अतः स पुत्रस्नेहमपोह्य त्यक्त्वा पित्रा परित्यक्तः निर्यापित एव। वै अवधारणे। स च स्वयोगप्रभावेण तान् सरय्वां प्रक्षिप्तान् बालान् पुनः दर्शयित्वा ततः पुरात् वनं ययौ ॥१८॥ अयोध्येति ॥ हे राजन् तदा पुनरागतान् बालकान् दृष्ट्वा अयोध्यावासिनः सर्वे जना विसिस्मिरे विसिस्मियिरे आश्चर्यं प्रापुः। यिवर्णलोप आर्षः। राजा सगरश्चापि तान् बालानागतान् श्रुत्वा अन्वतप्यत। अहो अज्ञानेन मया ईदृक्प्रभावः पुत्रो वृथैव निर्वासित इत्यनुतापं कृतवान् ॥१९॥ अंशुमानिति ॥ राज्ञा सगरेण चोदित आदिष्टोंऽशुमांस्तुरङ्गान्वेषणार्थं पितृव्यखातमनु यः पन्थास्तं ययौ। ततश्च भस्मान्ति भस्मसमीपे हयं ददृशे। तङ्‌ार्षः॥२०॥तत्रेति ॥ महान् विवेकी अंशुमान् तत्रैवासीनं कपिलाख्यमधोक्षजं भगवन्तं मुनिं वीक्ष्य प्रथमं प्रणतस्ततः प्राञ्जलिः समाहितमनाश्च भूत्वा अस्तौत् ॥ २१ ॥ नेति ॥ अजनः अजो ब्रह्मापि आत्मनः स्वस्मात् परं परमेश्वरं त्वामद्यापि समाधियुक्तिभिः न पश्यति न च बुध्यते समाधिनाऽप्यपरोक्षं न पश्यति तथा युक्तिभिः शास्त्रोक्तैर्विविधतर्कैः

एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै ॥ योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ ॥ १८ ॥ अयोध्यावासिनः सर्वे बालकान् पुनरागतान्॥ दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत ॥ १९ ॥ अंशुमांश्चोदितो राज्ञा तुरङ्गान्वेषणे ययौ ॥ पितृव्यखातानुपथं भस्मान्ति ददृशे हयम् ॥ २० ॥ तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजम् ॥ अस्तौत् समाहितमनाः प्राञ्जलिः प्रणतो महान् ॥ २१ ॥ अंशुमानुवाच ॥ न पश्यति त्वां परमात्मनोऽजनो न बुध्यतेऽद्यापि समाधियुक्तिभिः ॥ कुतोऽपरे तस्य मनःशरीरधीविसर्गसृष्टा वयमप्रकाशाः ॥ २२ ॥ ये देहभाजस्त्रिगुणप्रधाना गुणान् विपश्यन्त्युत वा तमश्च ॥ यन्मायया मोहितचेतसस्ते विदुः स्वसंस्थं न बहिः प्रकाशाः ॥ २३ ॥ तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः ॥ सनन्दनाद्यैर्मुनिभिर्विभाव्यं कथं हि मूढः परिभावयामि ॥ २४ ॥

परोक्षमपि यथावन्न बुध्यते न जानाति तदा अपरे ततोऽर्वाचीनाः तस्य ब्रह्मणो मनश्च शरीरं च धीश्च सत्त्वतमोरजःकार्याणि ताभिर्ये विविधा देवतिर्यङ्नृणां सर्गाः तेषु सृष्टाः अप्रकाशाः अज्ञाः वयं कुतः पश्याम कुतो बुध्यामहे ॥ २२ ॥ य इति ॥ यस्य तव मायया मोहितचेतसः त्रिगुणप्रधानाः गुणत्रयाधीनाः बहिर्विषयेष्वेव प्रकाशो ज्ञानं येषां ते ये देहभाजो देवमनुष्यादयस्ते स्वस्मिन् आत्मनि सम्यक् स्वरूपैश्वर्यादिप्रच्युतिराहित्येनैव स्थितमपि त्वां न विदुः किंतु जाग्रत्स्वप्नयोर्गुणान् गुणकार्याणि शब्दादिविषयान् उत वा अथवा सुषुप्तौ च तमः अज्ञानमेव पश्यन्ति ॥ २३ ॥ तमिति ॥ ज्ञानघनं शुद्धचैतन्यं स्वस्य भावोऽनुभवस्तेनैव ध्वस्तौ मायागुणनिमित्तौ भेदमोहौ येषां तैः सनन्दनाद्यैरपि केवलं विभाव्यं विचिन्तनीयं तं त्वां विमूढोऽहं कथं परिभावयामि मनसा विचारयामि। अयं भावः। ज्ञानघनत्वान्न तावज्ज्ञानविषयस्त्वं विचारविषयत्वेऽपि मायागुणैरभिभूतोऽहं न विचारे समर्थः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रशान्तेति ॥ हे भगवन् प्रशान्ताः अविद्यमानाः मायागुणाः सत्वादयस्तत्प्रयुक्तानि कर्माणि तत्प्रयुक्तानि लिङ्गानि देहा यस्य तम् अनामरूपं सदसद्भ्यां पुण्यपापाभ्यां विमुक्तम् । तर्हि कथं तथात्वेन प्रतीतिस्तत्राह । ज्ञानोपदेशाय गृहीतः स्वेच्छयैव स्वीकृतो देहो येन तं पुराणं पुरुषं त्वां नमाम । यद्वा । हे प्रशान्त मायायाः गुणाः कर्माणि सृष्ट्यादीनि लिङ्गानि ब्रह्मादिरूपाणि यस्य तम् । यद्वा । हे प्रशान्तमाय हे अगुण कर्मभिः सृष्ट्यादिकार्यैः लिङ्गानि यस्येति योज्यम् ॥२५॥ त्वन्मायेति ॥ कामलोभेर्ष्यामोहैर्विभ्रान्तं चेतो येषां ते त्वन्मायारचिते लोके गृहादिषु वस्तुबुद्ध्या परमार्थदृष्ट्या भ्रमन्ति आसक्ता भवन्ति अतस्त्वामेव नमाम इत्यनुषङ्गः ॥ २६ ॥ अद्येति ॥ हे सर्वभूतात्मन् हे भगवन् अद्य तव दर्शनात् नोऽस्माकं कामो विषयभोगाभिलाषः तत्प्रयुक्तानि कर्माणि इन्द्रियाणि तत्र कारणभूतानि तेषामाशयः मूलभूतो दृढः उपायान्तरैर्दुर्निर्मोच्योऽपि मोहो देहेन्द्रियाद्यभिमानस्तद्रूपः पाशः छिन्नो निरस्तः ॥२७॥ इत्थमिति ॥ हे नृप इत्थं गीतः संस्तुतोऽनुभावो यस्य स भगवान् कपिलो मुनिः परोपकारतत्परस्तमंशुमन्तं

प्रशान्तमायागुणकर्मलिङ्गमनामरूपं सदसद्विमुक्तम्॥ ज्ञानोपदेशाय गृहीतदेहं नमामहे त्वां पुरुषं पुराणम्॥२५॥ त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु ॥ भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः॥२६॥ अद्य नः सर्वभूतात्मन्॥ कामकर्मेन्द्रियाशयः ॥ मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥ २७ ॥ श्रीशुक उवाच ॥ इत्थं गीतानुभावस्तं भगवान् कपिलो मुनिः ॥ अंशुमन्तमुवाचेदमनुगृह्य धिया नृप ॥ २८ ॥ श्रीभगवानुवाच ॥ अश्वोऽयं नीयतां वत्स पितामहपशुस्तव ॥ इमे च पितरो दग्धा गङ्गाऽम्भोऽर्हन्ति नेतरत् ॥ २९ ॥ तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ॥ सगरस्तेन पशुना क्रतुशेषं समापयत् ॥ ३० ॥ राज्यमंशुमति न्यस्य निःस्पृहो मुक्तबन्धनः ॥ और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमाम् ॥ ३१ ॥ इति श्रीभा० म० नवमस्कन्धे सगरोपाख्यानेऽष्टमोऽध्यायः ॥ ८ ॥

धियाऽनुगृह्येदं वक्ष्यमाणमुवाच ॥ २८ ॥ अश्व इति ॥ हे वत्स अयमश्वस्तव पितामहस्य यज्ञियः पशुर्नीयताम् । इमे दग्धास्तव पितरः पितृव्याः गङ्गाम्भ एवार्हन्ति नेतरत् । एषामुद्धारार्थं गङ्गामानीय तदम्भसैव क्रिया कार्या नेतरेणेत्यर्थः ॥ २९ ॥ तमिति शुकोक्तिः ॥ तमेवमुक्तवन्तं कपिलं परिक्रम्य प्रदक्षिणीकृत्य शिरसा प्रणामेन प्रसाद्य अंशुमान् हयमानयत् । सगर इति स्पष्टम् ॥३०॥ राज्यमिति ॥ भोगेषु निःस्पृहः सागरोंऽशुमति राज्यं न्यस्य और्वेणोपदिष्टो मुक्तिमार्गो भक्त्यादिलक्षणस्तेन मुक्तं निरस्तं बन्धनमविद्यादेहाध्यासादिरूपं यस्य तादृशः सन् अनुत्तमां न विद्यते उत्तमा यदपेक्षया तां गतिं मुक्तिं लेभे ॥ ३१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमस्याष्टमे निरमादिमाम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमेंऽशुमतः पौत्रस्तपः कृत्वा भगीरथः ॥ धरणीमानयद्गङ्गां तत्र श्लोकाः खर्मार्मणाः ॥ चत्वारियुवाचेति सार्द्धाः स्युः पंचत्रिंशदनुष्टुभः ॥ अंशुमांश्चेति ॥१॥ यथा सगरः पौत्रे राज्यं न्यस्य तपस्तेपे तथा अंशुमांश्चेति चकारार्थः । गङ्गानयनकाम्यया स्वपुत्राय राज्यं दत्त्वा स्वयं महान्तं कालं तपस्तेपे तथापि तामानेतुं नाशक्नोत् किंतु ततस्तदनन्तरं महता कालेन स्वयमेव संस्थितो मृतः ॥१॥ दिलीप इति ॥ अथ तस्यांशुमतः सुतो दिलीपोऽपि तद्वत् पितृवत् पुत्राय राज्यं दत्त्वा तपः कुर्वन् गङ्गामानेतुमशक्त एव कालं मृत्युमेयिवान् प्राप । अथ तस्य दिलीपस्य पुत्रो यो भगीरथः सोऽपि गङ्गामानेतुं सुमहत्तपश्चक्रे ॥ २ ॥ दर्शयामासेति ॥ तेन तपसा प्रसन्ना गङ्गा तमात्मानं दर्शयामास । ततश्च ते तुभ्यं वरदाऽस्मीति तयोक्तो नृपो भगीरथोऽवनतः सन् स्वमभिप्रायं पूर्वजानामुद्धारार्थं भूम्यागमनं शशंस प्रार्थितवान् ॥ ३ ॥ तं च गङ्गोवाच—को न्विति ॥ हे नृप महीतले पतन्त्या मे मम वेगं को नु धारयिता धारयिष्यति । कोऽपीति पाठान्तरम् । अन्यथा धारकाभावे तु भूतलं भित्त्वा रसातलं यास्ये । तङ्गार्षः ॥ ४ ॥ किं चेति ॥ हे राजन् किं चाहं भुवं भूलोकं न यास्ये यतः भूमिष्ठा नराः अघं स्वकृतं पापं मयि आमृजन्ति स्नानादिसंबन्धेन स्थापयिष्यन्ति तदघं तत्पापमहं कुत्र मृजामि प्रक्षेप्स्यामि ।

श्रीशुक उवाच ॥ अंशुमांश्च तपस्तेपे गङ्गानयनकाम्यया ॥ कालं महान्तं नाशक्नोत् ततः कालेन संस्थितः ॥ १ ॥ दिलीपस्तत्सुतस्तद्वद्-शक्तः कालमेयिवान् ॥ भगीरथस्तस्य पुत्रस्तेपे स सुमहत् तपः ॥ २ ॥ दर्शयामास तं देवी प्रसन्ना वरदाऽस्मि ते ॥ इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ॥ ३ ॥ को नु धारयिता वेगं पतन्त्या मे महीतले ॥ अन्यथा भूतलं भित्त्वा नृप यास्ये रसातलम् ॥ ४ ॥ किं चाहं न भुवं यास्ये नरा मय्यामृजन्त्यघम् ॥ मृजामि तदघं कुत्र राजंस्तत्र विचिन्त्यताम् ॥ ५ ॥ भगीरथ उवाच ॥ साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः ॥ हरन्त्यघं तेऽङ्गसङ्गात् तेष्वास्ते ह्यघभिद्धरिः ॥ ६ ॥ धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् ॥ यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु ॥ ७ ॥ इत्युक्त्वा स नृपो देवं तपसाऽतोषयच्छिवम् ॥ कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ॥ ८ ॥

मृजेस्तुदादित्वमार्षम् । तत्रोपायो विचिन्त्यताम्॥५॥साधव इति ॥ साधवः न्यासिनः शान्ताः ब्रह्मिष्ठाः ब्रह्मोपासकाः ते लोकानां पावनाः अतः अङ्गसङ्गात्ते तव अघं हरन्ति हरिष्यन्ति । हि यस्मात् तेषु अघभित् पापनाशकः हरिः आस्ते अतः स एव तदघं हरति ॥६॥ धारयिष्यतीति ॥ ते तव वेगं तु शरीरिणामात्मा रुद्रो धारयिष्यति । यस्मिन् रुद्रे इदं सर्वं विश्वम् ऊर्ध्वतन्तुषु शाटीव पट इव ओतं ग्रथितं तिर्यक् तन्तुषु शाटीव प्रोतं च अतः सर्वाधारत्वाद्वेगं धारयिष्यतीत्यर्थः । अधुनापि च देवीरूपा त्वं तच्छिरसि तिष्ठस्येवेति ॥ ७॥ इतीति ॥ इत्येवमुक्त्वा गङ्गानुमतिं चालक्ष्येति शेषः । तच्छ्रुत्वेति पाठे श्रावयित्वेत्यर्थः । स नृपो भगीरथस्तपसा देवं शिवमतोषयत् । हे राजन् तस्य तपसाल्पीयसैव कालेनेशो रुद्रः समतुष्यत । तङ्गार्षः । अत्र च कचिन्मूले " इति तद्वच आकर्ण्य " इत्यादिः श्लोकोऽस्ति स तु प्रक्षिप्तः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेति ॥ तदा च राज्ञाभिहितं गङ्गावेगधारणं तथास्तु । यत्र यत्र गङ्गा यास्यति तत्र तत्र भूरूपः स्थित एवास्मि इति मच्छिरसि सा सुखेन यातु इत्येवमङ्गीकृत्य सर्वलोकहितः शिव अवहितः सन् हरेः पादाभ्यां पूतं जलं यस्याः तां गङ्गां दधार ॥ ९ ॥ भगीरथ इति ॥ ततः स राजर्षिर्भगीरथो यत्र भस्मीभूताः स्वपितॄणां देहाः शेरते स्म स्थितास्तत्र भुवनपावनीं गङ्गां निन्ये ॥१०॥ रथेनेति ॥ सा च वायोरिव वेगो यस्य तेन रथेन प्रयान्तं भगीरथमनुधावती अनुगच्छन्ती । नुमभाव आर्षः। गङ्गा मार्गस्थान् देशान् पुनन्ती । नुमार्षः । निर्दग्धान् सगरात्मजान् आसिञ्चत् तद्भस्मनि प्लावयामासेत्यर्थः ॥ ११ ॥ यदिति ॥ केवलं देहस्य भस्मभिरेव नतु साक्षात् यस्या गङ्गाया जलस्य स्पर्शमात्रेण ब्रह्मदण्डेन ब्रह्मणि श्रीकपिले यो दण्डः स्वकृतोऽपराधस्तेन हता दग्धा अपि सगरात्मजा यदि दिवं स्वर्गं जग्मुस्तदा ये श्रद्धया नित्यं सेवन्ते तेषां फलं किं वक्तव्यमिति शेषः ॥ १२ ॥ भस्मीति ॥ भस्मीभूतं यदङ्गं तेन यः सङ्गः तेनापि सगरात्मजाः स्वः स्वर्गं याताः तदा ये धृतव्रताः सन्तो देवीं गङ्गां नित्यं सेवन्ते ते स्वर्यान्तीति किं

तथेति राज्ञाभिहितं सर्वलोकहितः शिवः ॥ दधारावहितो गङ्गां पादपूतजलां हरेः ॥ ९ ॥ भगीरथः स राजर्षिर्निन्ये भुवनपावनीम् ॥
यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते ॥ १० ॥ रथेन वायुवेगेन प्रयान्तमनुधावती ॥ देशान्पुनन्ती निर्दग्धा नासिञ्चत्सगरात्मजान् ॥ ११ ॥ यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि ॥ सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥ १२ ॥ भस्मीभूताङ्गसङ्गेन स्वर्याताः सगरात्मजाः ॥ किं पुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥ १३ ॥ न ह्येतत् परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ॥ अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ॥१४॥ संनिवेश्य मनो यस्मिन् श्रद्धया मुनयोऽमलाः ॥ त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम् ॥ १५ ॥ श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् ॥ सिन्धुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥ १६ ॥ ऋतुपर्णो नलसखो योऽश्वविद्यामयान्नलात् ॥ दत्त्वाऽक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः ॥ १७ ॥

पुनर्वक्तव्यम् इति पूर्वोक्तस्य प्रपञ्चः ॥ १३॥ न हीति ॥ अनन्तस्य चरणाम्भोजात्प्रसूतायाः भवच्छिदः संसारदुःखनिवर्तकायाः स्वर्धुन्याः गङ्गाया यदिह अत्र स्वर्गप्रापकत्वरूपं माहात्म्यमुदितमुक्तं तदेतत्परमाश्चर्यं न हि भवति ॥ १४ ॥ सन्निवेश्येति ॥ यस्मिन्ननन्ते मुनयः अमलं मनः श्रद्धया संनिवेश्य दुस्त्यजमपि त्रैगुण्यं देहसम्बन्धं सद्यः शीघ्रमेव हित्वा त्यक्त्वा तदात्मतामनन्तात्मतां याताः प्राप्ता विमुक्ता जाता इत्यर्थः ॥ १५ ॥ श्रुत इति ॥ भगीरथात् श्रुताख्यः पुत्रो जज्ञे । तस्य श्रुतस्य नाभो नाम अपरः पुत्रोऽभवत् । तस्मात् सिन्धुद्वीपः सुतोऽभवत् । ततश्च अयुतायुः पुत्रोऽभवत् ॥१६॥ ऋत्विति ॥ ततः नलस्य सखा ऋतुपर्णो नाम पुत्रो जातः । य ऋतुपर्णः अस्मै नलाय अक्षहृदयं द्यूतशास्त्ररहस्यं दत्त्वा शिक्षयित्वा तस्मान्नलात्स्वयमश्वशिक्षाविद्यामयात् प्राप्तवान् । तस्य ऋतुपर्णस्य सुतः सर्वकामाख्यो जज्ञे ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति सार्द्धम् ॥ हे नृप ततः सर्वकामात् सुदासो जज्ञे । तस्य पुत्रस्तु मदयन्त्याः पतिः सौदासः जज्ञे । यं सौदासं जनाः मित्रसहमाहुः उत वा कल्माषाङ्घ्रिं च आहुः । वै चकारार्थे । स एव क्वचित् कदाचित् वसिष्ठस्य शापात् रक्षो राक्षसोऽभूत् । स्वकर्मणा दोषेणानपत्य औरसपुत्ररहितश्चाभूत् ॥ १८ ॥ किमिति ॥ तस्य महात्मनः सौदासस्य गुरोः शापः किंनिमित्तः तच्छापे निमित्तं किं तदेतच्छापनिमित्तं वेदितुमिच्छामि । तद्यदि न रहो रहस्यं गोप्यं न भवेत् तर्हि कथ्यताम् ॥ १९ ॥ सौदास इति ॥ सौदासो मृगयां चरन् किंचित् रक्षो कश्चित् राक्षसं जघान । तस्य भ्रातरं तु पलाय्य गतं मुमोच । तदा स भ्राता अथानन्तरं प्रतिचिकीर्षया भ्रातृवैरप्रतिकारेच्छया राज्ञो गृहं गतः ॥ २० ॥ स इति ॥ स च पलाय्य गतो राक्षसभ्राता राज्ञः अघं भ्रातृहननं चिन्तयन् राज्ञो गृहे सूदः पाचकस्तद्रूपधरः सन् नरस्य आमिषं मांसं पक्त्वा भोक्तुकामाय गुरवे वसिष्ठाय आनिन्ये ॥ २१ ॥ परीति ॥ स भगवान् वसिष्ठः परिवेक्ष्यमाणं नरामिषमत एवाभक्ष्यं भक्षणानर्हमञ्जसा आशु विलोक्य ज्ञात्वा क्रुद्धः सन्नेवं नरमांसव्यव-

ततः सुदासस्तत्पुत्रो मदयन्तीपतिर्नृप ॥ आहुर्मित्रसहं यं वै कल्माषाङ्घ्रिमुत क्वचित् ॥ वसिष्ठशापाद् रक्षोऽभूदनपत्यः स्वकर्मणा ॥ १८ ॥
राजोवाच ॥ किंनिमित्तो गुरोः शापः सौदासस्य महात्मनः ॥ एतद्वेदितुमिच्छामः कथ्यतां न रहो यदि ॥ १९ ॥ श्रीशुक उवाच ॥ सौदासो
मृगयां किंचिच्चरन्रक्षो जघान ह ॥ मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥ २० ॥ स चिन्तयन्नघं राज्ञः सूदरूपधरो गृहे ॥ गुरवे भोक्तु-
कामाय पक्त्वा निन्ये नरामिषम् ॥ २१ ॥ परिवेक्ष्यमाणं भगवान् विलोक्याभक्ष्यमञ्जसा ॥ राजानमशपत्क्रुद्धो रक्षो ह्येवं भविष्यसि ॥ २२ ॥
रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकम् ॥ सोऽप्यपोऽञ्जलिनादाय गुरुं शप्तुं समुद्यतः ॥ २३ ॥ वारितो मदयन्त्यापो रुशतीः पादयोर्जहौ ॥
दिशः खमवनीं सर्वं पश्यञ्जीवमयं नृपः ॥ २४ ॥ राक्षसं भावमापन्नः पादे कल्माषतां गतः ॥ व्यवायकाले ददृशे वनौकोदम्पती द्विजौ ॥ २५ ॥

हारदोषेण त्वं रक्ष एव भविष्यसीति राजानं मित्रसहमशपत् ॥ २२ ॥ रक्ष इति ॥ पुनस्तदामिषपरिवेषणं सूदरूपधरेण रक्षसा कृतं न तु राज्ञा कारितमिति विदित्वा स वसिष्ठ एव स्ववाक्यानृतत्वपरिहाराय तमेव शापं द्वादशवर्षावधिकं चक्रे । तदा स्वदोषाभावात् स सौदासोऽप्यञ्जलिना अपो जलमादाय गुरुं वसिष्ठं शप्तुं समुद्यतो जातः॥ २३॥ वारित इति ॥ गुर्वपमानेनानर्थान्तरं शङ्कमानया मदयन्त्या भार्यया वारितः स नृपः सौदासो दिगादि सर्वमपि स्थानं जीवमयं पश्यंस्तत्र शापार्थं गृहीतजलप्रक्षेपे तेषां विनाशेन पापाशङ्कया ता रुशतीः क्रोधाग्निरूपाः तीक्ष्णाः अपः स्वपादयोरेव जहौ त्यक्तवान् । एवमनेन कल्माषपादस्य मित्रसहत्वं च दर्शितं मित्रस्य कलत्रस्य वाचः सहनात्॥ २४॥ राक्षसमिति ॥ ततश्च शापजलस्य पादे प्रक्षेपात् स्वपादे कल्माषतां गतः स गुरुशापात् राक्षसं भावमापन्नः स च कदाचित् व्यवायकाले मैथुनकाले वनमोको निवासो ययो-स्तौ वनौकसौ तौ च तौ दम्पती च भार्यापुरुषौ द्विजौ ब्राह्मणौ ददृशे ददर्श । तङ्गार्षः । वनौकाविति पृथक्पदपाठे तु सकारलोप आर्षः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधेति अर्द्धम् ॥ तदा च क्षुधा आर्तः पीडितः राक्षसरूपः सौदासो विप्रं भक्षयितुं जगृहे । अकृतार्थवत् दीनवत् तस्य पत्नी आह स्म ॥२६॥ नेति सार्द्धम् ॥ भवान् साक्षात् राक्षसकुलोत्पन्नः नास्ति किंतु इक्ष्वाकूणां तत्कुलोत्पन्नानां महारथः श्रेष्ठः मदयन्त्याः पतिः अतो हे वीर अधर्मं विप्रहननरूपं पापं कर्तुं नार्हसि अतः अपत्यकामाया मे मह्यं अकृतार्थम् अनुत्पन्नपुत्रम् असमाप्तरतिं वा द्विजं पतिं देहि ॥२७॥ देह इति ॥ हे राजन् अयं मानुषो देहः पुरुषस्याखिलानां पुरुषार्थानां साधनभूतः तस्मात् हे वीर अस्य ब्राह्मणदेहस्य वधः सर्वपुरुषार्थवध उच्यते ॥२८॥ एष इति सार्द्धम् ॥ एष हि ब्राह्मणो विद्वान् तपआदिभिर्गुणैरन्वितो युक्तः सर्वभूतेषु स्थितमपि गुणैः गुणकार्यैरहङ्कारादिभिरन्तर्हितमलक्ष्यं महापुरुषसंज्ञं परं ब्रह्म सर्वभूतेषु य आत्मभावः तेन प्रकारेण आरिराधयिषुरस्ति । अन्तर्हित इति पाठे सोऽयमित्युत्तरेणान्वयः ॥२९॥ स इति ॥ सोऽयमेवंभूतो ब्रह्मर्षिवर्यस्ते त्वत्तः राजर्षिप्रवरात्कथं वधमर्हति । तत्र दृष्टान्तमाह । यथा पितुः सकाशादात्मजो वधं नार्हति तद्वत् ॥३०॥ तस्येति ॥ हे धर्मज्ञ सतां मतो भवान्

क्षुधार्तो जगृहे विप्रं तत्पत्न्याऽऽहाऽकृतार्थवत् ॥ २६ ॥ न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥ मदयन्त्याः पतिर्वीर नाधर्मं कर्तुमर्हसि ॥ देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजम् ॥ २७ ॥ देहोऽयं मानुषो राजन्पुरुषस्याखिलार्थदः ॥ तस्मादस्य वधो वीर सर्वार्थवध उच्यते ॥ २८ ॥ एष हि ब्राह्मणो विद्वांस्तपःशीलगुणान्वितः ॥ आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् ॥ सर्वभूतात्मभावेन भूतेष्वन्तर्हितं गुणैः ॥ २९ ॥ सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद्विभो ॥ कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः ॥ ३० ॥ तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ॥ कथं वधं यथा बभ्रोर्मन्यते सन्मतो भवान् ॥ ३१ ॥ यद्ययं क्रियते भक्षस्तर्हि मां खाद पूर्वतः ॥ न जीविष्ये विना येन क्षणं च मृतकं यथा ॥ ३२ ॥ एवं करुणभाषिण्या विलपन्त्या अनाथवत् ॥ व्याघ्रः पशुमिवाखादत्सौदासः शापमोहितः ॥ ३३ ॥ ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् ॥ शोचन्त्यात्मानमुर्वीशमशपत्कुपिता सती ॥ ३४ ॥

साधोः अपापस्य निर्दोषस्य ब्रह्मवादिनः भ्रूणस्य श्रोत्रियस्येति स्वामिपादाः । यद्वा । ब्रह्मवादिनो भ्रूणस्य पुत्रस्य अस्य पितापि ब्रह्मवादीत्यर्थः । "भ्रूणोऽर्भके बालगर्भे" इत्यमरः । तस्यैवंविधस्य वधं कथं साधु मन्यते । यथात्मजः पितुर्वधं साधु न मन्यते तथास्यापीत्यर्थः ॥३१॥ यदीति ॥ येन विनाऽहं क्षणमपि न जीविष्ये । तङ्गर्भः । सोऽयं यदि त्वया भक्ष्यः क्रियते तर्हि पूर्वतस्तद्भक्षणात्प्रागेव मृतकं यथा मृतप्रायां मामेव खाद ॥ ३२ ॥ एवमिति ॥ एवं तस्याः करुणभाषिण्याः दैन्यं वदन्त्या अनाथवद्विलपन्त्याश्च सत्याः तामनादृत्य शापेन मोहितः सौदासो व्याघ्रः पशुमिव द्विजमखादत् भक्षितवान् ॥ ३३ ॥ ब्राह्मणीति ॥ एवं दिधिषुं गर्भाधानकर्तारं पतिं पुरुषादेन राक्षसेन भक्षितं वीक्ष्य ब्राह्मणी आत्मानं शोचन्ती कुपिता च सती उर्वीशं सौदासमशपत् ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मादिति ॥ हे पाप हे अकृतप्रज्ञ हे दुर्बुद्धे यस्मात्कामार्ता या मे मम पतिस्त्वया भक्षितस्तस्मात्तवाप्याधानात् मैथुनादेव मया मृत्युर्दर्शितः । यदैव त्वं मैथुने प्रवृत्तो भविष्य-
सि तदैव तव मरणं भविष्यतीत्यर्थः ॥ ३५ ॥ एवमिति ॥ एवं मित्रसहं शप्त्वा पतिलोकपरायणा पतिलोकं गन्तुकामा सा तस्यास्थीनि समिद्धेऽग्नौ प्रास्य प्रक्षिप्य तत्र स्वदेहं
निपात्य भर्तुर्गतिं तत्प्राप्तलोकं गता॥ ३६॥विशाप इति ॥ ततो द्वादशानामब्दानामन्ते विगतशापः सौदासो मैथुनायोद्यतस्तदा महिष्या मदयन्त्या ब्राह्मणीशापं विज्ञाय निवारितः
॥ ३७ ॥ तत इति ॥ तत ऊर्ध्वमनन्तरं स सौदासः स्त्रीसम्भोगसुखं तत्याज । एवं ब्राह्मणभक्षणेन कर्मणा शापेन सः अप्रजः अभूत् । असिजभाव आर्षः । तदा तेनानुज्ञातः
प्रजोत्पादनाय प्रार्थितो वसिष्ठो मदयन्त्यां प्रजामधात् गर्भाधानमकरोत् ॥ ३८ ॥ सेति ॥ ततः सा वै मदयन्ती सप्त समाः वत्सरान् गर्भमबिभ्रत् दधार । आर्षः प्रयोगः ।
तदपि पुत्रो न व्यजायत न जातः तदा वसिष्ठस्तस्या मदयन्त्या उदरमश्मना पाषाणेन जघ्ने। तङार्षः । तेनाश्मघातेन निमित्तेन स ततो जातः पुत्रोऽश्मक इति कथ्यते॥३९॥

यस्मान्मे भक्षितः पाप कामार्तायाः पतिस्त्वया ॥ तवापि मृत्युराधानादकृतप्रज्ञदर्शितः ॥ ३५ ॥ एवं मित्रसहं शप्त्वा पतिलोकपरायणा ॥
तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ॥ ३६ ॥ विशापो द्वादशाब्दान्ते मैथुनाय समुद्यतः ॥ विज्ञाय ब्राह्मणीशापं महिष्या स निवा-
रितः ॥३७॥ तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाऽप्रजः ॥ वसिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात् ॥ ३८ ॥ सा वै सप्त समा गर्भमबिभ्रन्न
व्यजायत ॥ जघ्नेऽश्मनोदरं तस्याः सोऽश्मकस्तेन कथ्यते ॥ ३९ ॥ अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ॥ नारीकवच इत्युक्तो
निःक्षत्रे मूलकोऽभवत् ॥ ४० ॥ ततो दशरथस्तस्मात् पुत्र ऐडविडस्ततः ॥ राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्यभूत् ॥ ४१ ॥ यो देवैर-
र्थितो दैत्यानवधीद् युधि दुर्जयः ॥ मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ॥ ४२ ॥ न मे ब्रह्मकुलात्प्राणाः कुलदैवान्न चात्मजः ॥ न श्रियो न
मही राज्यं न दाराश्चातिवल्लभाः ॥ ४३ ॥ न बाल्येऽपि मतिर्मह्यमधर्मे रमते क्वचित् ॥ नापश्यमुत्तमश्लोकादन्यत्किंचन वस्त्वहम् ॥ ४४ ॥

अश्मकादिति ॥ अश्मकात् मूलको जज्ञे स च परशुरामेण निःक्षत्रे क्षत्रोत्पाटने क्रियमाणे यतः स्त्रीभिः कवचवत् संवेष्ट्य परशुरामात् परितो रक्षितो नारीकवच इत्युक्तः
अत एव पुनः क्षत्रकुलस्य मूलत्वान्मूलकाख्योऽभवत् ॥ ४० ॥ तत इति ॥ ततो राजा विश्वसहो जज्ञे । ततश्चक्रवर्ती सार्वभौमः खट्वाङ्गोऽभूत् ॥ ४१ ॥ य इति ॥ यः ॥ २२ ॥
खट्वाङ्गो युधि युद्धे दुर्जयो जेतुमशक्यः अत एव देवैरर्थितः सहायत्वेन प्रार्थितः सन् दैत्यानवधीत् । ततश्च प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते खट्वाङ्गेनोक्तं प्रथमं तावन्ममायुः
कथ्यतां ततस्तदनुरूपं वरं गृहीष्यामीति देवैश्चोक्तं तत्तु मुहूर्तमात्रमिति तज्ज्ञात्वा देवदत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरे सन्दधे ॥ ४२ ॥ नेति ॥ कुलदेवात्
कुलपूज्यात् ब्रह्मकुलात् सकाशात् मे मम प्राणात्मजादयोऽतिवल्लभाः अतिप्रिया न भवन्ति ॥ ४३ ॥ नेति ॥ मह्यं मे मतिः बाल्येऽपि क्वचित् आपद्यप्यधर्मे न रमते स्म ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तमश्लोकात् भगवतः सकाशादन्यद्वस्तु परमार्थभूतमहं किंचनापि नापश्यं न दृष्टवानस्मि ॥ ४४ ॥ देवैरिति ॥ यद्यपि त्रिभुवनेश्वरैर्देवैर्मह्यं कामवरः इच्छानुगुणो वरो दत्तस्तथापि भूतभावनो भगवान् तत्रैव भावना यस्य तथाभूतोऽहं तं कामं न वृणे॥ ४५॥ये इति ॥ ये सात्विकत्वेन प्रसिद्धा देवाः तेऽपि विक्षिप्तानि विषयैराकृष्टानीन्द्रियाणि धीश्च येषां ते शश्वत् सर्वदा स्वहृदि स्थितमपि प्रियमात्मानं भगवन्तं न विदन्ति न जानन्ति । अपरे राजसतामसस्वभावा मनुष्यादयो न जानन्तीति किमुत वक्तव्यम् ॥ ४६ ॥ अथेति ॥ अथ तस्मात् ईशस्य भगवतो मायारचितेषु अत एव गन्धर्वपुरोपमेषु आशु विनाशित्वेन गन्धर्वनगरतुल्येषु गुणेषु विषयेषु प्रकृत्या स्वभावेन आत्मनि रूढं सङ्गमासक्तिं विश्वकर्तुर्भगवतो भावेन भक्त्या हित्वा तं विश्वकर्तारमेवाहं प्रपद्ये शरणं व्रजामि । यद्वा । आत्मनि स्वस्मिन्नेव रूढं सन्तमिति विश्वकर्तुर्विशेषणम् ॥ ४७॥ इतीति॥ इति नारायणोऽन्तर्यामी तेन गृहीतयात्मानं प्रत्याकृष्टया बुद्ध्या इत्येवमुक्तप्रकारेण व्यवसितः कृतनिश्चयः सन् अज्ञानं तत्कार्यमन्यभावं देहादावात्माभिमानं च हित्वा ततस्तदन-

देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ॥ न वृणे तमहं कामं भूतभावनभावनः ॥ ४५ ये विक्षिप्तेन्द्रियधियो देवास्ते स्वहृदि स्थितम् ॥ न विदन्ति प्रियं शश्वदात्मानं किमुतापरे ॥ ४६ ॥ अथेशमायारचितेषु सङ्गं गुणेषु गन्धर्वपुरोपमेषु ॥ रूढं प्रकृत्याऽऽत्मनि विश्वभर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥ ४७ ॥ इति व्यवसितो बुद्ध्या नारायणगृहीतया ॥ हित्वाऽन्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥ ४८ ॥ यत्तद्ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितम् ॥ भगवान्वासुदेवेति यं गृणन्ति हि सात्वताः ॥ ४९ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे सूर्यवंशानुवर्णने नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ खट्वाङ्गाद्दीर्घबाहुश्च रघुस्तस्मात्पृथुश्रवाः ॥ अजस्ततो महाराज तस्माद्दशरथोऽभवत् ॥ १ ॥ तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः ॥ अंशांशेन चतुर्धाऽगात्पुत्रत्वं प्रार्थितः सुरैः ॥ रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ॥ २ ॥

न्तरमेव स्वं भावं स्वं परमार्थरूपं भगवन्तमेवाश्रितः अवाप ॥ ४८ ॥ यत्तदिति ॥ परं ब्रह्मेति वेदान्तेषु यत्प्रसिद्धमतः प्रमाणसिद्धत्वादशून्यं शशविषाणादिवत्तुच्छं न भवति तथापि वागाद्यविषयत्वात् शून्यवत्कल्पितं सूक्ष्मं यं च सात्वताः सत्वप्रधाना भागवताः भगवता अनुगृहीता भगवानिति वासुदेव इति च गृणन्ति तदाश्रित इत्यनुषङ्गः । वासुदेवेति इत्यत्र सुप्सुपेति समासः ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमे नवमस्य व्यधादिमाम् ॥ ९ ॥ श्रीरामो दशमे हत्वा रावणं सीतया सह ॥ स्वपुरीमागमत्तत्र श्लोकाः पर्वतमार्गणाः ॥ उवाचेति द्वे सपादा द्वासप्ततिरनुष्टुभः॥ १०॥खट्वाङ्गादिति ॥ खट्वाङ्गाच्च दीर्घबाहुस्तस्मात् पृथुश्रवाः विपुलकीर्तिः रघुस्ततो महाराजः अजस्तस्माद्दशरथोऽभवत् ॥ १ ॥ तस्येति सार्द्धम् ॥ तस्य दशरथस्यापि सुरैर्देवैः प्रार्थितः सन् साक्षात् ब्रह्ममयः हरिः एषः त्वया स्वमातृगर्भे दृष्टः भगवान् स्वांशांशेन अंशाः भरतलक्ष्मणशत्रुघ्नाः आंशं अंशसमूहः पूर्णो रामश्च तद्रूपेण रामादिसंज्ञया चतुर्धा पुत्रत्वमगात् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति ॥ हे राजन् यद्यपि तस्य सीतापतेः श्रीरामस्यानुचरितं तत्त्वदर्शिभिः परमार्थज्ञैर्वाल्मीक्यादिभिः ऋषिभिर्भूरि विस्तृतं यथा भवति तथा वर्णितं त्वया च मुहुः श्रुतमेव तथापि संग्रहेण कथयामीति शेषः ॥ ३ ॥ इदानीमध्यायद्वयेन श्रीरामचरितं विवर्णयिषुस्तावदेकेन श्लोकेन संगृह्णंस्तत्कर्तृकामात्मरक्षां प्रार्थयते—गुर्वर्थ इति ॥ यः गुर्वर्थे त्यक्तराज्यः गुरुः पिता दशरथस्तस्य वचः सत्यतापालनार्थे त्यक्तं राज्यं येन तथाभूतः सन् प्रियायाः सीतायाः पाणिना स्पर्शेऽपि नास्ति क्षमा सहिष्णुता ययोस्ताभ्यां पद्मवदतिसुकुमाराभ्यां पद्भ्यामनुवनं प्रतिवनं व्यचरत्। हरीणां वानराणामिन्द्रः सुग्रीवः अनुजो लक्ष्मणस्ताभ्यां मृजाऽस्याः सञ्जाता मृजिता अपनीता पथरुजा मार्गश्रमो यस्य सः शूर्पणख्याः राक्षस्याः वैरूप्यात्कर्णनासिकाच्छेदाद्धेतोस्तया प्रलोभितेन रावणेनापहारात् प्रियेण कलत्रेण यो विरहस्तेन या रुट् तया आरोपितयोः कुटिलीकृतयोर्भ्रुवोर्विजृम्भणेनैव त्रस्तो भीतोऽब्धिः समुद्रो यस्मात्सः ततस्तद्विज्ञापनेन बद्धः समुद्रे सेतुर्येन सः खला दुरात्मानो रावणादय एव दवो वनं तस्य दहनः स एवंभूतः कोशलेन्द्रः

तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः ॥ श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः॥३॥गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्याम् ॥ वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा रोपितभ्रूविजृम्भत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोशलेन्द्रोऽवतान्नः ॥ ४ ॥ विश्वामित्राध्वरे येन मारीचाद्या निशाचराः ॥ पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुङ्गवाः ॥ ५ ॥ यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतम् ॥ आदाय बालगजलील इवेक्षुयष्टिं सज्जीकृतं नृप विकृष्य बभञ्ज मध्ये ॥ ६ ॥ जित्वानुरूपगुणशीलवयोऽङ्गरूपां सीताऽभिधां श्रियमुरस्यभिलब्धमानान् ॥ मार्गे व्रजन्भृगुपतेर्व्यनयत्प्ररूढं दर्पं महीमकृत यस्त्रिरराजबीजाम् ॥७॥

श्रीरामो नोऽस्मान् अवतात् पातु । स्रग्धरा छन्दः ॥ ४ ॥ विश्वामित्रेति ॥ विश्वामित्रस्याध्वरे यज्ञे येन लक्ष्मणस्य पश्यत एव तमप्यनपेक्ष्यैव निशाचराः निशाविहाराः नैर्ऋतपुङ्गवाः राक्षसश्रेष्ठा मारीचादयो हताः स कोशलेन्द्रो नोऽवतादिति पूर्वेणान्वयः । एवमग्रे यच्छब्दानां पूर्वेणैवान्वयः ॥ ५ ॥ य इति ॥ हे नृप बालगजस्येव लीला यस्य सः श्रीरामः सीतायाः स्वयंवरगृहे लोके ये वीरास्तेषां समितौ समाजे उग्रं कठिनं गरिष्ठं च अत एव वाहकानां त्रिभिः शतैः उपनीतम् ऐशं श्रीरुद्रसम्बन्धि धनुः आदाय गृहीत्वा सज्जीकृतमारोपितज्यं विकृष्येक्षुयष्टिमिव मध्ये बभञ्ज भग्नमकरोत्॥६॥जित्वेति॥अनुरूपाणि स्वयोग्यानि गुणशीलवयोङ्गरूपाणि यस्याः ताम्।उरसि वक्षसि अभिलब्धो मानः सत्कारो यया तां सीताभिधां सीतासंज्ञां श्रियं लक्ष्मीं जित्वा प्राप्य धनुर्भञ्जनेन स्वाधीनां कृत्वा मार्गे व्रजन् धनुर्भङ्गमहानादश्रवणक्षुभितस्य आगतस्य भृगुपतेर्भार्गवमुख्यस्य परशुरामस्य प्ररूढमतिवृद्धं दर्पं गर्वं व्यनयत् अपनीतवान् । य इति । त्रिरित्युपलक्षणम् । यो रामः त्रिःसप्तकृत्वो महीमराजबीजां राजबीजशून्यामकृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकरोत् ॥ ७ ॥ य इति ॥ कदाचित् कैकेय्यास्तुष्टेन दशरथेन त्वदपेक्षितं वरद्वयं दास्यामीति प्रतिश्रुतं तत्र श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य वनवासश्चेति वरद्वयं प्रार्थितं तया सत्यरूपेण पाशेन परिवीतस्य परिवृतस्य अत एव स्त्रिया वश्यस्य स्त्रियै हितस्य वा स्त्रैणस्य पितुर्निदेशं वनवासाज्ञां शिरसा जगृहे बहुमानपुरःसरमङ्गीकृतवान् ततश्च । सभार्यः सीतासहितः राज्यं राजाधिकारं श्रियं राजसम्पदं प्रणयिनः प्रेमवतो मात्रादीन् सुहृदो मित्राणि निवासं स्थानमयोध्यां च त्यक्त्वा वनं ययौ दुस्त्यजस्यापि सहर्षत्यागे दृष्टान्तमाह। असूनिवेति । मुक्तसङ्गो विरक्तो योगी यथासून् प्राणांस्त्यजति तद्वदित्यर्थः ॥ ८ ॥ रक्ष इति ॥ अशुद्धबुद्धेरिति सीतां जिघृक्षोः कामातुरतया सीतायास्तिरस्कारे प्रवृत्ताया वा रक्षःस्वसुः रावणभगिन्याः शूर्पणखाया रूपं व्यकृत कर्णनासाच्छेदनेन विकृतमकरोत् । तस्या रक्षःस्वसुः खरत्रिशिरोदूषणमुख्या बन्धवो येषु तांश्चतुर्दशसहस्रं राक्षसान् जघान । त्रिशिरेत्यार्षम् । तथा अपारणीयमलङ्घ्यमसह्यं कोदण्डं धनुः पाणौ यस्य सः अटमान इतस्ततो वने सञ्च-

यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ॥ राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसङ्गः ॥ ८ ॥ रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्यबन्धून् ॥ जघ्ने चतुर्दशसहस्रमपारणीयकोदण्डपाणिरटमान उवास कृच्छ्रम् ॥ ९ ॥ सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते दशकन्धरेण ॥ जघ्नेऽद्भुतैणवपुषाऽऽश्रमतोऽपकृष्टो मारीचमाशु विशिखेन यथा कमुग्रः ॥ १० ॥ रक्षोऽधमेन वृकवद्विपिने समक्षं वैदेहराजदुहितर्यपयापितायाम् ॥ भ्रात्रा वने कृपणवत् प्रियया वियुक्तः स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार ॥ ११ ॥ दग्ध्वात्मकृत्यहतकृत्यमहन् कबन्धं सख्यं विधाय कपिभिर्दयितागतिं तैः ॥ बुद्ध्वाथ वालिनि हते प्लवगेन्द्रसैन्यैर्वेलामगात्स मनुजोऽजभवार्चिताङ्घ्रिः ॥ १२ ॥

रन् । शानजार्षः चानश् वा । जनशिक्षार्थं कृच्छ्रं कष्टं यथा भवति तथा उवास ॥ ९ ॥ सीतेति ॥ हे नृपते शूर्पणखामुखात् सीतायाः कथाश्रवणेन दीपितो हृच्छयः कामो यस्य तेन दशकन्धरेण रावणेन सीतां जिघृक्षुणा स्वयं तत्र गन्तुं भीतेन सृष्टं प्रेषितं मारीचं विलोक्य अद्भुतं स्वर्णमयमेणस्य हरिणस्येव वपुर्यस्य तेन सीतायाः क्रीडार्थम् अपेक्षितेन मारीचेनाश्रमतोऽपकृष्टः सन् विशिखेन बाणेन तं मारीचमाशु जघ्ने हतवान् । तङार्षः । अद्भुतैणवपुषा उपलक्षितं मारीचमिति वान्वयः । यथा कं दक्षमुग्रो वीरभद्रो जघान तथेत्यर्थः ॥ १० ॥ रक्ष इति ॥ रक्षोऽधमेन रावणेन विपिने वने असमक्षं रामलक्ष्मणयोरसन्निधाने वृकवत् मेषं वृको यथापहरति तद्वत् वैदेहराजदुहितरि सीतायामपयापितायामपहृतायां सत्यां तया प्रियया भार्यया वियुक्तो भ्रात्रा लक्ष्मणेन सहेत्यनेन प्रकारेण स्त्रीसङ्गिनां दुःखोदर्कां गतिं प्रथयन् प्रख्यापयन् कृपणवद्दुःखिवच्चचार वस्तुतः दुःखाभावाद्वतिप्रयोगः ॥ ११ ॥ दग्ध्वेति ॥ मनुजाकारोऽप्यजभवाभ्यामर्चिताङ्घ्रिः स रामः आत्मनः स्वस्य कृत्यं प्रयोजनं सीतानिर्मोचनरूपं तदर्थं रावणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सह युद्धे हतं कृत्यं पौरुषं यस्य तं गृध्रं जटायुषं पुत्र इव दग्ध्वा तस्य पारलौकिकीं दाहादिक्रियां कृत्वा कबन्धं स्वग्रहणाय प्रसारितबाहुं राक्षसमहन् । ततः कपिभिः सह सख्यं विधायाथानन्तरं वालिनि हते सति तैः कपिभिः दयितायाः सीतायाः गतिं बुद्ध्वा स श्रीरामः प्लवगेन्द्राणां वानरश्रेष्ठानां सैन्यैः सह वेलां समुद्रस्य तीरमगात्॥ १२ ॥ यदिति ॥ त्रिरात्रमुपवासेन प्रतीक्षणेऽपि लङ्कामार्गस्याप्रदात् यस्य रामस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन सम्भ्रान्ता नक्रा मकराश्च यस्मिन् सः अतो भयेन गीर्णः स्तम्भितो घोषो येन सः सिन्धुः रूपी मूर्तिमान् सन्नर्हणमर्घादिपूजोपहारं स्वशिरसि परिगृह्य निधाय तत्पादारविन्दमुपगम्य शरणमागत्य एतद्वक्ष्यमाणं बभाषे ॥ १३ ॥ नेति ॥ हे भूमन् जडा मोहिता धीर्येषां ते वयं कूटस्थं निर्विकारम् आदिपुरुषं जगतामधीशं त्वां नानुविदाम न जानीमः । आर्षः प्रयोगः । यदिति लुप्तषष्ठ्यन्तं पृथक् पदम् । यस्य तवाधीनात्सत्त्वतः सत्वगुणात् सुरगणा जाताः रजसो गुणात् प्रजेशाः प्रजापतयो जाताः मन्योस्तमोगुणात् भूतपतयो रुद्रादयो जाताः।स गुणेशः सत्वादिगुणानामीशो नियन्ता भवानेव ॥ १४ ॥ काममिति ॥ हे वीर कामं यथेष्टं जलमाक्रम्यापि प्रयाहि गच्छ । विश्रवसः प्रजापतेरवमेहं पुरीषतुल्यं त्रैलोक्यं रावयत्याक्रन्दयती-

यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रान्तनक्रमकरोभयगीर्णघोषः ॥ सिन्धुः शिरस्यर्हणं परिगृह्य रूपी पादारविन्दमुपगम्य बभाष एतत् ॥१३॥ न त्वां वयं जडधियोऽनुविदाम भूमन् कूटस्थमादिपुरुषं जगतामधीशम् ॥ यत्सत्त्वतः सुरगणा रजसः प्रजेशा मन्योश्च भूतपतयः स भवान् गुणेशः॥१४॥ कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीर पत्नीम् ॥ बध्नीहि सेतुमिह ते यशसो वितत्यै गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥ १५ ॥ बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपीन्द्रकरकम्पितभूरुहाङ्गैः ॥ सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लङ्कां बिभीषणदृशाऽविशदग्रदग्धाम् ॥ १६ ॥ सा वानरेन्द्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटङ्का ॥ निर्भज्यमानधिषणध्वजहेमकुम्भशृङ्गाटका गजकुलैर्ह्रदिनीव घूर्णा ॥१७॥

ति तथा तं दशकन्धरं जहि पत्नीं सीतामवाप्नुहि । यद्यपि मदीयं जलं तव प्रतिबन्धकं न भवति तथापि ते तव यशसो वितत्यै विस्तारायेह जले सेतुं बध्नीहि बधान । शानज्भाव आर्षः । यं सेतुमुपेत्य दुष्करं त्वत्कर्म दिग्विजयिनो भूपास्त्वद्यशो गायन्ति गास्यन्ति ॥ १५ ॥ बद्ध्वेति ॥ कपीन्द्राणां कूटैः शिखरैः उदधौ सेतुं बद्ध्वा रघुपतिः श्रीरामः सुग्रीवादयः प्रमुखाः मुख्या येषु तैरनीकैः सैन्यैः सह अग्रे सीतान्वेषणसमये हनुमतैव दग्धां लङ्कां बिभीषणदृशा तत्प्रदर्शितमार्गेण आविशत् प्रविवेश ॥ १६ ॥ सेति ॥ वानरेन्द्राणां बलैः सैन्यैः रुद्धाः विहारादयो यस्यां सा तत्र विहारः क्रीडास्थानं कोष्ठं धान्यागारादि श्रीः कोशः द्वारं गृहादीनां गोपुरं पुरद्वारं सदः सभा वलभी प्रासादादिपुरोभागाच्छादिनी विटङ्कः कपोतपालिका निर्भज्यमाना धिषणादयो यस्याः सा तत्र धिषणं वेदिकादिस्थानं शृङ्गाटकं चतुष्पथं सा ससैन्येन श्रीरामचन्द्रेण प्रविष्टा लङ्का यथा गजकुलैर्विलोडिता ह्रदिनी नदी सङ्क्षोभिता भवति तथा प्रचलिता घूर्णा व्याकुला जाता ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्ष इति ॥ रक्षःपतिः रावणः। रक्षस्पतिरिति सत्ववान् पाठस्तु प्रामादिक आर्षो वा। तद्वानरैर्लङ्काविनाशं विलोक्य निकुम्भादीन् पुत्रमिन्द्रजितं प्रहस्तादींश्च सर्वाननुगान् भृत्यान् समहिनोत् प्रायुङ्क्त। अथ तेषां मरणानन्तरं कुम्भकर्णं च समहिनोत् ॥१८॥ तामिति ॥ तामसिशूलादिभिर्दुर्गां दुर्गमां यातुधानानां पृतनां सेनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात्। मरुत्सुतो हनुमान् ऋक्षो जाम्बवान् ॥ १९ ॥ ते इति ॥ ते सर्वे रघुपतेरनीकपाः सेनापतयोऽङ्गदाद्या इभादिभिर्यद्वरूथं रावणसैन्यं तद्द्वन्द्वं यथा भवति तथाभिपत्य सङ्गम्य सीताया अभिमर्शः स्पर्शस्तेन हतं मङ्गलं यस्य स रावण ईशो येषां तान् राक्षसान् द्रुमैर्गिरिभिर्गदाभिरिषुभिश्च जघ्नुः ॥ २० ॥ रक्ष इति ॥ रक्षस्पती रावणः। सत्ववान् पाठः प्राग्वत्। स्वबलस्य नष्टिं विनाशमवेक्ष्य रुष्टः क्रुद्धः सन् यानकं पुष्पकाख्यं विमानमारुह्य श्रीराममभिससार योद्धुमाजगाम। अथ मातलिना इन्द्रसारथिना उपनीते समानीते द्युमति दीप्तियुते स्वःस्यन्दने इन्द्रथे विभ्राजमानं श्रीरामं क्षुरप्रैः क्षुरधारातुल्याग्रैः निशितैः शरैरहनत् अहन्। शब्लुगभावश्छान्दसः॥२१॥राम इति॥

रक्षःपतिस्तदवलोक्य निकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन्॥ पुत्रं प्रहस्तमतिकायविकम्पनादीन् सर्वानुगान्समहिनोदथ कुम्भकर्णम् ॥ १८ ॥ तां यातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गाम् ॥ सुग्रीवलक्ष्मणमरुत्सुतगन्धमादनीलाङ्गदर्क्षपनसादिभिरन्वितोऽगात् ॥ १९ ॥ तेऽनीकपा रघुपतेरभिपत्य सर्वे द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधैः ॥ जघ्नुर्द्रुमैर्गिरिगदेषुभिरङ्गदाद्याः सीताऽभिमर्शहतमङ्गलरावणेशान् ॥ २० ॥ रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार रामम् ॥ स्वःस्यन्दने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥ २१ ॥ रामस्तमाह पुरुषादपुरीष यन्नः कान्ताऽसमक्षमसताऽपहृता श्ववत् ते ॥ त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल इव कर्तुरलङ्घ्यवीर्यः ॥ २२ ॥ एवं क्षिपन् धनुषि सन्धितमुत्ससर्ज बाणं स वज्रमिव तद् हृदयं बिभेद ॥ सोऽसृग्वमन् दशमुखैर्न्यपतद् विमानाद् हा हेति जल्पति जने सुकृतीव रिक्तः ॥ २३ ॥

तमेवं प्रहरन्तं रावणं श्रीराम आह स्म। तद्दर्शयति। हे पुरुषादपुरीष पुरुषादा राक्षसास्तेषां पुरीषतुल्य नोऽस्माकमसमक्षम् असता दुरात्मना त्वया श्ववत् शुना यथा असमक्षं गृहं प्रविश्य वस्तु ह्रियते तद्वत् यत्कान्ता अपहृता तस्य जुगुप्सितस्य कर्मणः फलमद्यैव त्यक्तत्रपस्य निर्लज्जस्य तव यच्छामि ददामि। यथा अधर्मकर्तुः पुंसः तत्फलम् अलङ्घ्यवीर्यः कालो यच्छति तथेत्यर्थः ॥२२॥ एवमिति ॥ एवमधिक्षिपन् धनुषि सन्धितं सन्धा सन्धानं सास्य सञ्जाता तम्। इतच्। बाणमुत्ससर्ज प्रायुङ्क्त। स च बाणो वज्रमिव तस्य रावणस्य हृदयं बिभेद।स रावणो दशभिर्मुखैरसृक् रुधिरं वमन् तत्रत्ये जने हा हेति जल्पति सति विमानात् पुष्पकादपतत्। यथा रिक्तः क्षीणपुण्यः सुकृती स्वर्लोकात्पतति तद्वदित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति॥ततो मन्दोदर्या रावणभार्यया सह प्ररुदन्त्यः।नुमार्षः।सहस्रशो यातुधान्यो लङ्काया निष्क्रम्य यत्र रावणः पतितस्तस्मिन् देश उपाद्रवन् आजग्मुः॥२४॥स्वानिति॥ तत्र लक्ष्मणस्येषुभिरर्दितान् हतान् स्वान् स्वान् बन्धून् पतीन् परिष्वज्य आत्मना स्वेनैव आत्मानं देहं घ्नन्त्योः । नुमार्षः । दीनाः दुःखिताः सुस्वरं रुरुदुः॥२५॥हा इति॥हे नाथ लोकानां रावण आक्रन्दनकारक रावण वयं हा हताः स्म परैः शत्रुभिरर्दिता पीडिता त्वद्विहीना त्वया रहिता लङ्का लङ्कास्थो जनः कं शरणं यायात्॥२६॥नेति॥हे महाभाग कामवशं गतो भवान् सीतायास्तेजसः अनुभावं प्रभावं नैव वेद नैव ज्ञातवान्।येन तेजोनुभावेनेमां दशां मरणावस्थां नीतः प्राप्तोऽसि॥२७॥कृतेति॥हे कुलनन्दन एषा लंका त्वया प्राणत्यागेन विधवा कृता तथा वयं च विधवाः कृता इति वचनविपरिणामः।स्वदेहो गृध्राणामन्नं भक्ष्यः कृतः। आत्मा जीवस्तु नरकहेतवे नरकभोगाय कृतः॥२८॥स्वानामिति॥कोशलेन्द्रेण श्रीरामेणानुमोदितः आज्ञप्तो बिभीषणः स्वानां मृतानां रावणादीनां पितृमेधविधानेन साम्परायिकमौर्ध्वदेहिकं यत्कर्मोक्तं तच्चक्रे॥२९॥तत इति युग्मम्॥

ततो निष्क्रम्य लङ्काया यातुधान्यः सहस्रशः ॥ मन्दोदर्या समं तस्मिन् प्ररुदत्य उपाद्रवन् ॥ २४ ॥ स्वान् स्वान् बन्धून् परिष्वज्य लक्ष्मणेषुभिरर्दितान् ॥ रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानमात्मना ॥ २५ ॥ हा हताः स्म वयं नाथ लोकरावण रावण ॥ कं यायाच्छरणं लङ्का त्वद्विहीना परार्दिता ॥ २६ ॥ नैवं वेद महाभाग भवान् कामवशं गतः ॥ तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥ २७ ॥ कृतैषा विधवा लङ्का वयं च कुलनन्दन ॥ देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥ २८ ॥ श्रीशुक उवाच ॥ स्वानां बिभीषणश्चक्रे कोशलेन्द्रानुमोदितः ॥ पितृमेधविधानेन यदुक्तं साम्परायिकम् ॥ २९ ॥ ततो ददर्श भगवानशोकवनिकाश्रमे ॥ क्षामां स्वविरहव्याधिं शिंशपामूलमास्थिताम् ॥ ३० ॥ रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत ॥ आत्मसंदर्शनाह्लादविकसन्मुखपङ्कजाम् ॥ ३१ ॥ आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ॥ बिभीषणाय भगवान् दत्त्वा रक्षोगणेशताम् ॥ लङ्कामायुश्च कल्पान्तं ययौ चीर्णव्रतः पुरीम् ॥ ३२ ॥

ततो भगवान् श्रीरामः अशोकवने य आश्रमस्तस्मिन् शिंशपावृक्षस्य मूलमाश्रितां मूले स्थितां स्वस्य श्रीरामस्य विरहो विश्लेष एव व्याधिर्यस्याः ताम् अत एव क्षामां कृशां पारवश्येन दीनामात्मनः स्वस्य सन्दर्शनेन य आह्लादः तेन विकसन्मुखं पङ्कजमिव यस्यास्तां प्रियतमां भार्यां सीतां ददर्श । वीक्ष्य चान्वकम्पत कृपां कृतवान् ॥३०॥३१॥ आरोप्येति सार्द्धम्॥ततश्च तां यानं पुष्पकमारोप्य भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां सह सख्युरपि भ्रातृत्वात् हनुमता च युतः रामः स्वयमपि यानमारुरुहे । तङ्गर्षः । चक्रवर्ती तु सीतामारोप्य भ्रातृभ्यां रामलक्ष्मणाभ्यामारुरुहे हनुमद्युतः हनुमता सह युतः साहित्यं प्राप्य "यु मिश्रणे" भावक्विबन्तात् "ल्यब्लोपे पञ्चमी" इति व्याख्यातवान् । तन्मते कर्मणि लिट् । बिभीषणायेति । ततश्च चीर्णव्रतः चरितचतुर्दशवर्षवनवासव्रतः भगवान् रामः बिभीषणाय रक्षोगणानामीशितां लङ्कां कल्पान्तपर्यन्तमायुश्च दत्वा पुरीमयोध्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ययौ प्रतस्थे इत्यर्थः ॥ ३२ ॥ अवेति ॥ ततः पथि लोकपालैरिन्द्रादिभिरर्पितैः कुसुमैरवकीर्यमाणः आच्छाद्यमानः तथा शतधृत्यादिभिर्ब्रह्मादिभिर्मुदा हर्षेण उपगीयमानं चरितं यस्य तथाभूतो बभूव । यद्वा । अयं श्लोको रामविशेषणतया पूर्वश्लोक एव योज्यः ॥३३॥ गोमूत्रेति ॥ भ्रातरं भरतं गोमूत्रयावकं गोमूत्रपक्वयवान्नभोजिनं वल्कलमेवाम्बरं यस्य तं जटिलं जटाधरं तथा स्थण्डिले दर्भैरास्तीर्णे भूतले शेत इति तथाभूतं श्रुत्वा महाकारुणिकः श्रीरामः अतप्यत ॥ ३४ ॥ भरत इति चतुष्कम् ॥ भरतः अग्रजं ज्येष्ठभ्रातरं श्रीरामं प्राप्तं पुरीमागच्छन्तमाकर्ण्य तत्पादुके स्वशिरसि न्यस्य निधाय स्वशिबिरात् नन्दिग्रामात् भरतो हि रामं विना अयोध्यामप्रविशन् नन्दिग्रामे वासमकल्पयत्।तस्मादेव स्वसैन्यनिवेशस्थानात् पौरादिभिः सहितः सन् तथा गीतैर्वादित्राणां मृदङ्गादीनां निस्वनैः शब्दैः ब्रह्म वेदं घोषेण उच्चस्वरेण मुहुः पठद्भिर्ब्रह्मवादिभिश्च सह स्वर्णरसाक्ताः कक्षाः प्रान्ताः यासां ताभिः पताकाभिर्हैमैः स्वर्णरचितैः चित्रा ध्वजा येषु तैः सन्तोऽश्वा येषु तैः रुक्मनिर्मिताः सन्नाहाः आच्छादनानि येषु तैर्वि-

अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ उपगीयमानचरितः शतधृत्यादिभिर्मुदा ॥ ३३ ॥ गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरम् ॥
महाकारुणिकोऽतप्यत् जटिलं स्थण्डिलेशयम् ॥ ३४ ॥ भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः॥पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम्
॥ ३५ ॥ नन्दिग्रामात् स्वशिबिराद् गीतवादित्रनिस्वनैः ॥ ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ॥ ३६ ॥ स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै
रथैः ॥ सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ॥ ३७॥ श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः॥पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च॥३८॥
पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्नहृदयेक्षणः॥पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः ॥ ३९ ॥ तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः ॥
रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः ॥ तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ ४० ॥

शेषणचतुष्टयोपेतै रथैः पुरटवर्मभिः स्वर्णकवचधारिभिर्भटैश्च सह । श्रेणीभिः ताम्बूलिकादिभिः तत्तद्वस्तुविक्रयपरैः वराणां समूहो वारः स एव मुख्यो जीविकासाधनं यासां ताभिर्वेश्याभिः पदानुगैः पादचारिभिः भृत्यैश्च सह पारमेष्ठ्यानि महाराजार्हाणि छत्रचामरादीनि उच्चावचानि पण्यानि बहुमूल्यानि रत्नादीन्युपायनानि चादाय प्रत्युद्यतः अभिमुखः ययौ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ पादयोरिति ॥ रामं प्राप्य प्रेम्णा प्रक्लिन्नमार्द्रीभूतं हृदयमीक्षणे नेत्रे च यस्य सः भरतः पुरतः पादुके न्यस्य निधाय पादयोर्न्यपतत् । ततः प्राञ्जलिः बाष्पलोचनश्च सन्नग्रे तस्थाविति शेषः ॥ ३९ ॥ तमिति सार्द्धम् ॥ श्रीरामस्तं भरतं चिरं यथा भवति तथा आश्लिष्य नेत्रजैर्जलैरानन्दबिन्दुभिश्च स्नापयन् लक्ष्मणसीताभ्यां सह विप्रेभ्यो ये चार्हत्तमा नमस्कार्याः कुलवृद्धास्तेभ्यश्च स्वयं नमश्चक्रे प्रजाभिश्च स्वयं नमस्कृतो बभूव ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धुन्वन्त इति ॥ उत्तराः कोशलाः उत्तरकोशलदेशस्थाः जनाः चिरादागतं पतिं श्रीराममवलोक्य मुदा हर्षेण माल्यैः पुष्पैः किरन्तः उत्तरासङ्गान् उत्तरीयान् विधुन्वन्तश्चालयन्तो ननृतुः ॥ ४१ ॥ अयोध्याप्रवेशप्रकारमाह—पादुके इति ॥ भरतः अग्रवर्ती पादुके अगृह्णात् । विभीषणः सुग्रीवश्च पार्श्ववर्त्तिनौ चामरव्यजनोत्तमे अगृह्णीताम् मरुत्सुतो हनुमान् पृष्ठवर्त्ती श्वेतछत्रमगृह्णात् ॥४२॥ धनुरिति ॥ हे नृप धनुश्च निषङ्गौ च तान् शत्रुघ्नोऽगृह्णात् । तीर्थजलभृतं कमण्डलुं सीता अगृह्णात् । खड्गमङ्गदो बिभ्रत् । आर्षः प्रयोगः । हैमं स्वर्णखचितं चर्म खेटं च ऋक्षराट् जाम्बवान् अबिभ्रत् ॥४३॥ पुष्पकेति ॥ हे राजन् स्त्रीभिः पूर्वोक्ताभिर्वारमुख्याभिरन्वितः । यद्वा । स्त्रीभिः सीतया आदरार्थं बहुवचनम् । बन्दिभिश्च स्तूयमानः पुष्पकस्थो भगवान् रामः उदितः ग्रहैर्गुरुशुक्रादिभिर्वृतश्चन्द्र इव विरेजे ॥४४॥ भ्रातृभिरिति अर्द्धम् ॥ भ्रातृभिः भरतादिभिश्च नन्दितः अनुमोदितः सोऽपि रामः सोत्सवां मार्जनादिपूर्वकध्वजादिभिरलंकृतां प्रमुदितां प्रमुदितजनपूर्णां पुरीमयोध्यां प्राविशत् ॥४५॥ प्रविश्येति ॥ राजभवनं प्रविश्य गुरुपत्नीः कैकेय्याद्याः

धुन्वन्त उत्तरासङ्गान् पतिं वीक्ष्य चिरागतम् ॥ उत्तराः कोशला माल्यैः किरतो ननृतुर्मुदा ॥४१॥ पादुके भरतोऽगृह्णात चामरव्यजनोत्तमे ॥ विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥ ४२ ॥ धनुर्निषङ्गान् शत्रुघ्नः सीता तीर्थकमण्डलुम् ॥ अविभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराट् नृप ॥ ४३ ॥ पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च बन्दिभिः ॥ विरेजे भगवान् राजन् ग्रहैश्चन्द्र इवोदितः ॥ ४४ ॥ भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत् पुरीम् ॥ ४५ ॥ प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् ॥ गुरून् वयस्यावरजान् पूजितः प्रत्यपूजयत् ॥ ४६ ॥ वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ॥ ४७ ॥ पुत्रान्स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः ॥ आरोप्याङ्केऽभिषिञ्चन्त्यो बाष्पौघैर्विजहुः शुचः ॥ ४८ ॥ जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः ॥ अभ्यषिञ्चद्यथेवेन्द्रं चतुःसिन्धुजलादिभिः ॥ ४९ ॥ एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलङ्कृतः ॥ स्वलङ्कृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥ ५० ॥

स्वमातरं कौसल्यां गुरून्वसिष्ठादीन् वयस्यान्समानवयस्कानवरजान् कनिष्ठांश्च यथोचितं तैः पूजितः सत्कृतः सन् प्रत्यपूजयत् सम्मानितवान् इत्यर्थः ॥४६॥ वैदेहीत्यर्द्धम् ॥ तथा वैदेही लक्ष्मणश्च यथावद्यथायोग्यं पूजितौ तान् पूजितवन्तौ च समुपेयतुः सम्यक् राजभवनं विविशतुः ॥ ४७ ॥ पुत्रानिति ॥ स्वमातरः कौशल्यादयः प्राणरहिताः मूर्छिता तन्वः देहा यथा प्राणान् प्राप्योत्थिता भवन्ति तथा पुत्रान् समीक्ष्योत्थिताः सत्यः अङ्के आरोप्य बाष्पौघैः हर्षजन्याश्रुसङ्घैरभिषिञ्चन्त्यः शुचस्तद्विरहशोकान् विजहुः त्यक्तवत्यः ॥४८॥ जटा इति ॥ गुरुर्वसिष्ठः कुलवृद्धैः समं सह रामस्य जटा जटिलीभूतकेशान् निर्मुच्य नापितैः दूरीकृत्य चतुःसिन्धुजलादिभिर्विधिवद्राममभ्यषिञ्चत् राज्येऽभिषिक्तवान् । यथा पूर्वमृषयो यथैवेन्द्रं राज्येऽभ्यषिञ्चंस्तथैवेत्यर्थः । आदिशब्देन गङ्गायमुनादिजलग्रहणम् ॥४९॥ एवमिति ॥ एवं कृतं शिरःस्नानं येन सः शोभने वाससी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मालाधारी अन्यैश्च भूषणैरलंकृतः तथा सुवासोभिः सुष्ठ्वलंकृतैश्च भ्रातृभिः अलंकृतया भार्यया सीतया च सह श्रीरामो बभौ अत्यशोभत ॥ ५० ॥ अग्रहीदित्यर्द्धम् ॥ ततो भ्रात्रा भरतेन प्रणिपत्य प्रसादितः प्रार्थितः सन् राजाऽऽसनमग्रहीत् ॥ ५१ ॥ श्रीरामराज्यगुणान्वर्णयति—प्रजा इति ॥ स्वधर्मनिरताः वर्णानामाश्रमाणां च ये गुणाः पञ्च महायज्ञादयस्तैरन्विताः स्वविषयवासिनीः प्रजा यथा पिता पुत्रान् पाति तथा रामो जुगोप ताश्च तं रामं पितरं मेनिरे ॥ ५२ ॥ त्रेतायामिति ॥ धर्मज्ञे सर्वभूतसुखावहे रामे राजनि सति त्रेतायां वर्तमानायां त्रिपाद्धर्मयुक्ते त्रेतायुगे वर्तमानेऽपि चतुष्पाद्धर्मयुक्तकृतयुगसमः कालोऽभवत् ॥ ५३ ॥ वनानीति ॥ हे भरतर्षभ रामे राजनि सति इत्यनुषज्यते । वनादयः सर्वे प्रजानां कामदुघाः मनोरथपूरका आसन् ॥ ५४ ॥ नेति ॥ अधोक्षजे भगवति रामे राजनि सति प्रजानाम् आधिव्याध्यादयो न आसन् । अनिच्छतां मृत्युश्च नासीत् ॥ ५५ ॥ एकेति ॥ एकपत्नीव्रतस्य धरः धारकः राजापि ऋषीणामिव चरितं सत्यभाषणादि यस्य सः गृहमेधीयं गृहस्थैरनुष्ठेयं स्वधर्मं लोकान् शिक्षयन्

अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः ॥ ५१ ॥ प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः ॥ जुगोप पितृवद्रामो मेनिरे पितरं च तम् ॥५२॥ त्रेतायां वर्त्तमानायां कालः कृतसमोऽभवत् ॥ रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ॥ ५३ ॥ वनानि नद्यो गिरयो वर्षाणि द्वीपसिन्धवः ॥ सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ॥ ५४ ॥ नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ॥ मृत्युश्चानिच्छतां नासीद्रामे राजन्यधोक्षजे ॥ ५५ ॥ एकपत्नीव्रतधरो राजर्षिचरितः शुचिः ॥ स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरन् ॥ ५६ ॥ प्रेम्णानुवृत्त्या शीलेन प्रश्रयावनता सती ॥ धिया ह्रिया च भावज्ञा भर्तुः सीताऽहरन्मनः ॥ ५७ ॥ इति श्रीभा० म० नवमस्कन्धे श्रीरामचरिते दशमोऽध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ भगवानात्मनात्मानं राम उत्तमकल्पकैः ॥ सर्वदेवमयं देवमीज आचार्यवान्मखैः ॥१॥ होत्रेऽददाद् दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः ॥ अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥२॥ आचार्याय ददौ शेषां यावती भूस्तदन्तरा ॥ मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥ ३ ॥

शिक्षयितुम् । हेतौ शता । स्वयमाचरत् ॥ ५६ ॥ प्रेम्णेति ॥ प्रश्रयेण विनयेनावनता नम्रा धिया सूक्ष्मबुद्ध्या भावज्ञा अभिप्रायज्ञा च सती सीता प्रेमादिभिर्भर्तुः श्रीरामस्य मनोऽहरत् वशीकृतवती । तत्र प्रेमा प्रीत्यतिशयः अनुवृत्तिः परिचर्या शीलं सुस्वभावो ह्रीर्लज्जा ॥ ५७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे नवमस्य व्यधादिमाम् ॥ १० ॥ एकादशे त्वयोध्यायां वसन् रामो मखादि यत् ॥ चक्रे तदुच्यते तत्र श्लोकाः सार्द्धाः षडेमेयः ॥ उवाचत्रयमर्द्धाढ्या नागरैर्मी अनुष्टुभः ॥ ११ ॥ भगवानिति ॥ भगवान् रामः आचार्यवान् सन् उत्तमकल्पकैः उत्तमसाधनैः मखैरात्मना स्वयमेव सर्वदेवमयं देवमात्मानमेव ईजे यज्ञसाधनस्य यजनीयस्य च स्वभिन्नत्वाभावात् ॥ १ ॥ होत्रे इति युग्मम् ॥ इदं कृत्स्नं भूमण्डलं ब्राह्मणः प्रतिग्रहीतुमर्हतीति मन्यमानो निःस्पृहो रामः होत्रादिभ्यः प्राच्यादिदिशो ददौ । तदन्तरा तासां दिशामन्तरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्ये यावती भूरवशिष्टा तामाचार्याय ददौ ॥२॥३॥ इतीति ॥ इत्येवं दानेनायं श्रीरामस्तदा शरीरस्यालङ्कारवासोभ्यामेवावशेषितः तद्व्यतिरिक्तं सुवर्णादि सर्वं ददावित्यर्थः । तथा रामवत् राज्ञी सीताऽपि सौमङ्गल्यमात्रेण नासाभरणवस्त्राद्यावश्यकेनावशेषिता बभूव॥४॥ते इति॥ते होत्रादयो ब्राह्मणा एव देवा देववदाराध्या यस्य तस्य श्रीरामस्य सत्सु सदाचारनिष्ठेषु स्तुतं तद्वदान्यत्वयुक्तं संस्तुतमिति च पाठः । वात्सल्यं प्रीतिं वीक्ष्य प्रीताः प्रसन्नचित्ताः क्लिन्नधियः स्नेहार्द्रचित्तास्तस्मै रामाय प्रत्यर्प्य वयं भूमिपालनेऽसमर्थाः अतस्त्वमेव पालयेति विज्ञाप्येदं वक्ष्यमाणं बभाषिरे ॥५॥ अप्रत्तमिति ॥ हे भगवन् हे भुवनेश्वर त्वया नोऽस्मभ्यं किन्वप्रत्तं किं न दत्तमपि तु सर्वमेव दत्तमित्यर्थः । यस्मान्नोऽस्माकमन्तर्हृदयं विश्य प्रविश्य । ल्यबार्ष । स्वरोचिषा स्वप्रकाशेन तमः अज्ञानं हंसि नाशयसि ॥ ६ ॥ नम इति ॥ ब्रह्मण्येषु देवाय श्रेष्ठाय अकुण्ठा मेधा ज्ञानं यस्य तस्मै । असिजार्षः । उत्तमः श्लोको यशो येषां तेषां धुर्याय मुख्याय न्यस्तदण्डैः भूतद्रोहरहितैः सर्वभूतसुहृद्भिरर्पितौ चित्ते निहितावङ्घ्री यस्य तस्मै तेष्वर्पिताविङ्घ्री येनेति वा श्रीरामाय

इत्ययं तदलंकारवासोभ्यामवशेषितः ॥ तथा राज्ञ्यपि वैदेही सौमङ्गल्यावशेषिता ॥ ४ ॥ ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतम् ॥ प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥ ५ ॥ अप्रत्तं नस्त्वया किन्तु भगवन् भुवनेश्वर ॥ यन्नोऽन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ॥६॥ नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे ॥ उत्तमश्लोकधुर्याय न्यस्तदण्डार्पिताङ्घ्रये ॥ ७ ॥ कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः ॥ चरन् वाचोऽशृणोद् रामो भार्यामुद्दिश्य कस्यचित् ॥ ८ ॥ नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ॥ स्त्रीलोभी बिभृयात् सीतां रामो नाहं भजे पुनः ॥ ९ ॥ इति लोकाद् बहुमुखाद् दुराराध्यादसंविदः ॥ पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ॥ १० ॥ अन्तर्वत्न्यागते काले यमौ सा सुषुवे सुतौ ॥ कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ॥ ११ ॥ अङ्गदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ॥ तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥ सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ॥ १२ ॥

नमः॥७॥कदाचिदिति॥कदाचिल्लोकजिज्ञासुर्लोकः किं वदतीति ज्ञातुमिच्छुः अत एव गूढः प्रच्छन्नवेषः अत एवेतरैरलक्षितः रात्र्यां तत्र पुर्यां चरन् कस्यचित्पुरुषस्य स्वभार्यामुद्दिश्योच्यमाना वाचोऽशृणोत्॥८॥नेति॥ अहं दुष्टाम् असतीं व्यभिचारिणीं परपुरुषवेश्मगतां त्वां न बिभर्मि न धारयामि न च पुष्णामि स्त्रीलोभी कामपारवश्याद्रामः परवेश्मगामपि सीतां बिभृयात् । अहं तु पुनः स्त्रीपारवश्यरहितस्त्वां न भजे नाङ्गीकुर्यामित्यर्थः ॥९॥ इतीति ॥ इत्येवं बहुमुखात् नानाविधवादिनः तथापि दुराराध्यात् प्रबोधयितुमशक्यात् असंविदः अतत्वज्ञात् लोकात् जनाद्भीतेन पत्या श्रीरामेण त्यक्ता सीता प्राचेतसस्य वाल्मीकेराश्रमं प्राप्ता ॥१०॥ अन्तरिति ॥ अन्तर्वत्नी गर्भिणी प्रसवकाले आगते सति यमौ सहजौ द्वौ कुशो लव इति ख्यातौ लोकप्रसिद्धौ सुतौ सुषुवे । तयोः सुतयोः क्रिया जातकर्मादिरूपाः मुनिर्वाल्मीकिश्चक्रे॥११॥अङ्गद इति सार्द्धम् ॥ स्पष्टम्॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्धर्वानिति ॥ दिशां विजये भरतः कोटिशो गन्धर्वान् जघ्ने। तङार्षः। तदीयं धनमानीय सर्वं राज्ञे श्रीरामाय न्यवेदयत् ॥ १३ ॥ शत्रुघ्न इति ॥ शत्रुघ्नो मधोरसुरस्य पुत्रं लवणं नाम राक्षसं हत्वा तस्मिन् मधुवने मथुरां नाम प्रसिद्धां पुरीं निर्ममे ॥ १४ ॥ मुनाविति ॥ सीता यतोऽन्तर्वत्नी भर्त्रा विवासिताऽभूत् अतः प्रसूतिपर्यन्तं स्थित्वा ततस्तनयोत्पत्तौ सत्यां तौ तनयौ मुनौ निक्षिप्य रामचरणावेव ध्यायन्ती रामवियोगमसहिष्णुः विवरं प्रविवेश। ह हेति खेदे ॥ १५ ॥ तदिति ॥ ईश्वरोऽपि भगवान् रामः तस्या विवरप्रवेशं श्रुत्वा शुचः जातानि शोकाश्रूणि धिया विवेकेन रुन्धन्नपि तस्यास्तांस्तान् सौशील्यादिगुणान् स्मरन् शुचः रोद्धुं नाशक्नोत् ॥१६॥ स्त्रीपुमिति ॥ एतादृक् अधिकः स्त्रीपुंसयोः प्रसङ्ग आसक्तिः। समासान्ताभाव आर्षः। ईश्वराणामपि सर्वत्र त्रासस्यावहः। द्वितीया त्वार्षी। ग्राम्यस्य गृहचेतसः त्रासावह इति किमु वक्तव्यम्। किमुतेति प्रसङ्गोक्तिः सर्वत्रैव। भयावह इत्यपि पाठः ॥१७॥ तत इति ॥ तत ऊर्ध्वं ब्रह्मचर्यं धारयन् स्त्र्यन्तरपरिग्रहं वर्जयन् प्रभुः श्रीरामः त्रयोदशाब्दानां साहस्रमखण्डितम-

गन्धर्वान् कोटिशो जघ्ने भरतो विजये दिशाम् ॥ तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ॥ १३ ॥ शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ॥
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥१४॥ मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता ॥ ध्यायन्ती रामचरणौ विवरं प्रविवेश ह॥१५॥
तच्छ्रुत्वा भगवान् रामो रुन्धन्नपि धिया शुचः ॥ स्मरंस्तस्या गुणांस्तांस्तान् नाशक्नोद् रोद्धुमीश्वरः ॥ १६ ॥ स्त्रीपुंप्रसङ्ग एतादृक् सर्वत्र त्रास-
मावहः ॥ अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥ १७ ॥ तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत् प्रभुः ॥ त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम्
॥ १८ ॥ स्मरतां हृदि विन्यस्य विद्धं दण्डककण्टकैः ॥ स्वपादपल्लवं राम आत्मज्योतिरगात् ततः ॥१९॥ नेदं यशो रघुपतेः सुरयाच्ञयात्तली-
लातनोरधिकसाम्यविमुक्तधाम्नः ॥ रक्षोवधो जलधिबन्धनमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः ॥ २० ॥ यस्यामलं नृपसदस्सु
यशोऽधुनापि गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् ॥ तं नाकपालवसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥ २१ ॥

विच्छिन्नं यथा स्यात्तथाऽग्निहोत्रमजुहोत् ॥ १८ ॥ स्मरतामिति ॥ रामः पूर्वं दण्डकारण्ये विचरणात् दण्डककण्टकैर्विद्धं स्वपादपल्लवं स्मरतां भक्तानां हृदि विन्यस्य ध्येयत्वेनावलम्बं विधाय स्वयमात्मज्योतिः निजं धाम अगात् ॥ १९ ॥ नेदमिति ॥ सुराणां याच्ञया आत्ता स्वीकृता लीलार्था तनुर्येन तस्य अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य यत्तुल्यो यदधिकश्च नास्ति तादृक्प्रभाववतः तस्य रघुपतेः अस्त्रपूगै रक्षसां वधः जलधेर्बन्धनं चेतीदमाश्चर्यरूपमपि यशो न भवति लीलालेशमात्रत्वात् किं तस्य शत्रुहनने कपयः सहायाः नैवेत्यर्थः। अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तथा रक्षोवधादिकमपीति ॥२०॥ यस्येति ॥ अमलम् अघघ्नं दिगिभेन्द्राणां दिग्गजानां पट्टवदाभरणरूपं तत्पर्यन्तं व्याप्तं यद्वा पट्टशब्द आरूढवाची। दिग्गजेन्द्रारूढमित्यर्थः। यस्य श्रीरामस्य यशः अधुनाऽपि नृपाणां युधिष्ठिरादीनां सदस्सु सभासु ऋषयो मार्कण्डे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यादयो गायन्ति तं नाकपाला देवाः वसुपालाः कुबेरादयः वसुधापालाश्च तेषां किरीटैर्जुष्टं पादाम्बुजं यस्य तं रघुपतिं शरणं प्रपद्ये । जुष्टमिति रघुपतेरिति च पाठे तत्तस्य रघुपतेर्नाकपालादिजुष्टं पादाम्बुजं प्रपद्ये इत्यर्थः ॥ २१ ॥ यैरिति ॥ तदानीं यैर्जनैः श्रीरामः संस्पृष्टः अभिदृष्टः संविष्टः उपवेशितः अनुगतोऽपि वा ते सर्वे कौशलदेशवासिनो यत्र यत्स्थानं योगिनो गच्छन्ति तत्स्थानं ययुः मुक्ता बभूवुरित्यर्थः ॥२२॥ पुरुष इति ॥ हे राजन् आनृशंस्यपरः क्रौर्यादिदोषरहितः उपशमनिष्ठः पुरुषः रामचरितं श्रवणैः श्रोत्रेन्द्रियवृत्तिभिरुपधारयन् हृदि स्थापयन् कर्मबन्धैः संसारहेतुभिः पुण्यपापात्मकैर्विमुच्यते ॥२३॥ कथमिति॥स भगवान् रामः आत्मनः आत्मरूपान् स्वस्य अंशभूतान्वा भ्रातॄन् प्रति कथमवर्तत तथा स्वयं वा कथमवर्त्तत तथा तस्मिन्नीश्वरे ते भ्रातरः प्रजाः पौराश्च कथमन्ववर्तन्त इति प्रश्नत्रयम् ॥२४॥ तत्र भ्रात्रादिषु तस्य प्रवृत्तिमाह— अथेति ॥ अथ त्रिभुवनेश्वरः श्रीरामो दिग्विजये भ्रातॄन् भरतादीन् आदिशत् अनेनैव भ्रातॄणामपि तदाज्ञानुसारित्वं सूचितम् । स्वानां पौरादीनामात्मानं दर्शयन् सानुगः पुरीम-

यैः संस्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा ॥ कोशलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः ॥२२॥ पुरुषो रामचरितं श्रवणैरुपधारयन् ॥ आनृशंस्यपरो राजन्कर्मबन्धैर्विमुच्यते ॥ २३ ॥ राजोवाच ॥ कथं स भगवान् रामो भ्रातॄन्वा स्वयमात्मनः ॥ तस्मिन्वा तेऽन्ववर्तन्त प्रजाः पौराश्च ईश्वरे ॥ २४ ॥ श्रीशुक उवाच ॥ अथादिशद् दिग्विजये भ्रातॄंस्त्रिभुवनेश्वरः ॥ आत्मानं दर्शयन् स्वानां पुरीमैक्षत सानुगः ॥ २५ ॥ आसिक्तमार्गां गन्धोदैः करिणां मदसीकरैः ॥ स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥२६ ॥ प्रासादगोपुरसभाचैत्यदेवगृहादिषु ॥ विन्यस्तहेमकलशैः पताकाभिश्च मण्डिताम् ॥२७॥ पूगैः सवृन्दै रम्भाभिः पट्टिकाभिः सुवाससम् ॥ आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥ २८ ॥ तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ॥ आशिषो युयुजुर्देव पाहि मां प्राक् त्वयोद्धृताम् ॥ २९ ॥

योध्यां सर्वत ऐक्षत ॥२५॥ आसिक्तेति ॥ गन्धोदैः चन्दनादिसुगन्ध्युदकैः करिणां हस्तिनां मदशीकरैर्मदबिन्दुभिश्च सिक्ता मार्गा यस्यां तां स्वामिनं श्रीरामं प्राप्तमालोक्य सुतरां मत्तामिव समृद्धाम् । जनैरालोकनं पुर्यामुपचर्यत इति सूचनार्थं इवशब्दः । वेति वितर्के । वासितगामिवेति पाठे कामोन्मत्तां गामिवेत्यर्थः । टजभाव आर्षः ॥ २६ ॥ प्रासादेति ॥ प्रासादगोपुरादिषु विन्यस्तैः हेमकलशैः पताकाभिश्च मण्डिताम् ॥ २७॥ पूगैरिति ॥ सवृन्दैः पुष्पफलादियुक्तैः पूगै रम्भाभिः सुष्ठुवाससां पट्टिकाभिर्ध्वजविशेषैश्च मण्डितामिति । आदर्शैर्दर्पणैः अंशुकैः स्रग्भिश्च कृतानि कौतुकेन उत्साहेन तोरणानि यस्यां तां पुरीमैक्षतेति पूर्वेणैवान्वयः ॥२८ ॥ तस्मिन्पौराणां वृत्तिमाह—तमिति ॥ अर्हणानि पूजासाधनानि पाणिषु येषां ते पौरास्तत्र तं राममुपेयुः उपजग्मुः । ततश्च हे देव प्राग् वराहावतारे त्वयोद्धृतामिमां भूमिं पाहीति प्रार्थयमाना आशिषो युयुजुश्च ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ चिरादागतं पतिं श्रीरामं वीक्ष्य श्रुत्वा वनवासादागमनसमयभवश्रवणमिदं दिदृक्षया द्रष्टुमिच्छया उत्सृष्टा गृहा गृहकार्याणि याभिस्ताः स्त्रियो नराश्च प्रजा हर्म्याण्यारुरुहुः तमरविन्दलोचनं वीक्ष्य न तृप्तानि नेत्राणि यासां ताः कुसुमैरवाकिरन् आच्छादितवत्यः ॥ ३० ॥ स्वयं कथमवर्त्ततेत्यस्योत्तरमाह—अथेति चतुष्कम् ॥ अथ पूर्वराजभिः इक्ष्वाकुप्रभृतिभिः। टजभावः आर्षः। जुष्टं सेवितमत एवानन्ता निरवधिका ये अखिला रत्नादीनां कोशास्तैराढ्यं समृद्धम् अनर्घ्या उरवः परिच्छदा यस्मिन् तत् विद्रुममया उदुम्बरा देहल्यो येषु तैर्द्वारैरित्यादितृतीयान्तानां मण्डितमिति तृतीयेनान्वयः। वैदूर्यमणिमयस्तम्भानां पङ्क्तिभिः स्वच्छैः भ्राजन्तो ये स्फटिकास्तन्मयीभिः भित्तिभिश्च चित्राभिः स्रग्भिः पट्टिकाभिर्ध्वजविशेषैः वाससां मणिगणानां चांशुकैर्दीप्तिभिः चित् चैतन्यं तद्वदुल्लासैरुज्ज्वलैर्मुक्ताफलैः। यद्वा। चिदिति क्वचिदर्थेऽव्ययम्। क्वचित् वैदूर्यस्तम्भादिषु यथा शोभमुज्ज्वलैर्मुक्ताफलैर्मण्डितमित्यर्थः।चक्रवर्ती तु चितश्चिच्छकैरुल्लासैर्विलासैश्चिन्मयैरिति सर्वेषां विशेषणं पुर्या अप्राकृतत्वात् इत्याह कान्ताः कम-

ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ॥ आरुह्य हर्म्याण्यरविन्दलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ॥ ३० ॥ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ॥ अनन्ताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥ ३१ ॥ विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपङ्क्तिभिः ॥ स्थलैर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ॥ ३२॥चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः॥मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ॥३३ ॥ धूपदीपैः सुरभिभिर्मण्डितं पुष्पमण्डितैः ॥ स्त्रीपुम्भिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥ तस्मिन् स भगवान्रामः स्निग्धया प्रिययेष्टया ॥ रेमे स्वारामधीराणामृषभः सीतया किल ॥ ३५॥ बुभुजे च यथाकालं कामान्धर्ममपीडयन् ॥ वर्षपूगान्बहून् नृणामभिध्याताङ्घ्रिपल्लवः ॥ ३६ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे श्रीरामोपाख्यान एकादशोऽध्यायः ॥ ११ ॥

नीयाः कामोपपत्तयो भोगसाधनानि ताभिः सुरभिभिर्धूपैर्दीपैश्च पुष्पाणां मण्डनैरलङ्कारैश्च मण्डितं तथा भूषणानामपि भूषणभूतैः शोभातिशययुक्तैः अत एव सुरसङ्काशैर्देवतुल्यैः स्त्रीपुंभिः स्त्रीपुंसैश्च जुष्टम्। समासान्ताभाव आर्षः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ तस्मिन्निति ॥ स्वस्मिन्नात्मन्येवारमन्तीति स्वारामास्ते च ते धीरा विनिर्जितेन्द्रियाश्च तेषामृषभः श्रेष्ठः भगवान् रामः तस्मिन् गृहे स्निग्धया अत एव प्रिया चेष्टा आचारो यस्यास्तया सीतया रेमे ॥ ३५ ॥ बुभुजे इति ॥ नृणां नृभिः अभिध्यातावङ्घ्रिपल्लवौ यस्य सः श्रीरामः धर्ममपीडयन् विषयासक्त्या स्वधर्ममसङ्कोचयन् बहून् वर्षपूगान् संवत्सरसमूहान् यथाकामं यथेष्टं कामान् विषयांश्च बुभुजे ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्विनार्थप्रकाशिकाम् ॥ नवमस्य व्यधादेकादशे गङ्गासहायकः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशे राघवेक्ष्वाकोः सून्वोः कुशशशादयोः ॥ वंशोऽभिधयिते तत्र श्लोकाः षोडश[१६]संमिताः ॥ षोडशै[१६]र्वानुष्टुभोऽपि तत्रोवाचेति चैकं[१]कम् ॥ १ २॥ कुशस्येति ॥ कुशस्य चातिथिः सुतोऽभवत्। तस्मान्निषधस्तस्य नभः। अथानन्तरं तत्पुत्रः पुण्डरीकः ततश्च क्षेमधन्वाऽभवत् ॥ १ ॥देवेति ॥ ततः क्षेमधन्वनः देवानीकः। अथ ततः अनीहः तत्सुतः पारियात्रः ततो बलः तस्मात्स्थलः तस्माद्वज्रनाभोऽभूत्। स चार्कसम्भवः अर्कस्यांशात्सम्भूतः ॥ २॥ स्वगण इति युग्मम् ॥ तत्सुतो वज्रनाभसुतः स्वगणः तस्माद्विधृतिः सुतोऽभवत् । ततो हिरण्यनाभाख्योऽभूत्।स च जैमिनेः शिष्यः सन् योगाचार्योऽभूत्।यतो हिरण्यनाभात् कौसल्यः इति ख्यातः याज्ञवल्क्य ऋषिर्महानुदयोऽभ्युदयो यस्मात्तं तथा हृदयग्रन्थिमज्ञानं भिनत्तीति तथाभूतम् आध्यात्मम् आत्मनि इत्यध्यात्मम् । तत्र भवमाध्यात्मम् आर्षोऽण् । योगमध्यगात् अधिगतवान् ॥ ३॥ ४॥ पुष्य इति ॥ हिरण्यनाभस्य सुतः पुष्योऽभूत् । ततो ध्रुवसन्धिरभवत् । अथ तस्मात्सुदर्शनोऽभवत् । तस्मात् अग्निवर्णः तस्य पुत्रः शीघ्रः तस्य सुतो मरुः ॥ ५ ॥ य इति ॥ योऽसौ मरुः प्रसुश्रुतं

श्रीशुक उवाच ॥ कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ॥ पुण्डरीकोऽथ तत्पुत्रः क्षेमधन्वाऽभवत् ततः ॥ १ ॥ देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ॥ ततो बलः स्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः ॥ २ ॥ स्वगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः ॥ ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥ ३ ॥ शिष्यः कौशल्य अध्यात्मं याज्ञवल्क्योऽध्यगाद्यतः ॥ योगं महोदयमृषिर्हृदयग्रन्थिभेदकम् ॥ ४ ॥ पुष्यो हिरण्यनाभस्य ध्रुवसन्धिस्ततोऽभवत् ॥ सुदर्शनोऽग्निवर्णश्च शीघ्रस्तस्य मरुः सुतः ॥ ५ ॥ योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः ॥ कलेरन्ते सूर्यवंशं नष्टं भावयिता पुनः ॥ ६ ॥ तस्मात्प्रसुश्रुतस्तस्य सन्धिस्तस्याप्यमर्षणः ॥ महस्वांस्तत्सुतस्तस्मात् विश्वसाह्वोऽन्वजायत ॥ ततः प्रसेनजित् तस्मात् तक्षको भविता पुनः ॥ ७ ॥ ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥ ८ ॥ एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ॥ बृहद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥ ९ ॥ उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति ॥ प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥ १० ॥

पुत्रमुत्पाद्य योगेन सिद्धः विनिर्जितमृत्युः कलापग्रामवासिभिः सह तत्रास्ते । कलेर्युगस्यान्तेऽवसाने नष्टं सूर्यवंशं पुनर्भावयिता स्वपुत्रपौत्रादिपरम्परया प्रवर्तयिष्यत इत्यर्थः ॥ ६ ॥ तस्मादिति ॥ तस्मान्मरोः प्रसुश्रुतस्तस्य सुतः सन्धिः तस्याप्यमर्षणः तत्सुतो महस्वान् तस्माद्विश्वबाहुरजायत ॥ ७॥ तत इति अर्द्धम् ॥ ततो विश्वबाहोः प्रसेनजित्तस्मात् पुनस्तक्षको भविता ततो बृहद्बलः । यस्तु बृहद्बलः समरे युद्धे ते तव पित्रा अभिमन्युना हतः ॥ ८ ॥ एते इति ॥ एते हि इक्ष्वाकुवंशजा भूपाला अतीताः । अथ अनागतान्मया कथयिष्यमाणान् शृणु । बृहद्बलस्य पुत्रो नाम्ना बृहद्रणो भविता ॥ ९ ॥ उरुक्रिय इति ॥ तस्य बृहद्रणस्य च उरुक्रियः । उरःक्षत इति पाठान्तरम् । तस्य वत्सवृद्धो भविष्यति । वत्सप्रीत इति पाठान्तरम् । ततः प्रतिव्योमः ततो भानुः ततो दिवाकः स च वाहिन्याः देवसेनायाः पतिः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहदेव इति ॥ ततो वीरः सहदेवः ततो बृहदश्वः । अथ तस्माद् भानुमान् भानुमतः पुत्रः प्रतीकाश्वः । अथानन्तरं तत्सुतः सुप्रतीकः ॥ ११ ॥ भवितेति ॥ अथ तस्मात् मरुदेवः सुतो भविता । तस्मात्सुनक्षत्रः । सुरक्षत्र इति पाठान्तरम् । अथ तस्मात् पुष्करः । ऋक्षकः इति पाठान्तरम् । तस्य पुत्रोऽन्तरिक्षः तस्य पुत्रः सुतपाः । सुतप्त इति पाठान्तरम् । तत् तस्मादमित्रजित् ॥ १२ ॥ बृहदिति ॥ तस्य बृहद्राजः । बृहद्वाज इति पाठान्तरम् । तस्यापि पुत्रो बर्हिः तस्मात्कृतञ्जयः । धनञ्जय इति पाठान्तरम् । तस्य सुतो रणञ्जयः ततः तस्मात्सञ्जयो भविता ॥ १३ ॥ तस्मादिति अर्द्धम् ॥ तस्मात् शाक्यः । शक्य इत्यपि पाठः । अथ तस्मात् शुद्धोदः तत्सुतो लाङ्गलः स्मृतः ॥१४॥ तत इति सार्द्धम् ॥ प्रथमः श्लोको यथान्वयमेव । तदन्ते च तत इत्यस्य सुमित्र इत्यनेनान्वयः । रुणक इत्यत्र रणकः कुणकः इति पाठौ । तस्मात् सुरथात् सुमित्रो नाम प्रसिद्धः स च निष्ठान्तः निष्ठा वंशस्य स्थितिस्तस्या अन्तोऽवधिभूतः । यद्वा । नामनिष्ठयोर्वाच्यवाचकयोरन्तो नाशो यस्मात् सः तस्मादन्यो न भविष्यतीत्यर्थः । एते

सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान् ॥ प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ॥ ११ ॥ भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः ॥ तस्यान्तरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥१२॥ बृहद्राजस्तु तस्यापि बर्हिस्तस्मात्कृतञ्जयः ॥ रणञ्जयस्तस्य सुतः संजयो भविता ततः ॥१३॥ तस्माच्छाक्योऽथ शुद्धोदो लाङ्गलस्तत्सुतः स्मृतः ॥ १४ ॥ ततः प्रसेनजित् तस्मात्क्षुद्रको भविता ततः ॥ रणको भविता तस्मात्सुरथस्त-नयस्ततः ॥ सुमित्रो नाम निष्ठान्त एते बार्हद्बलान्वयाः ॥ १५ ॥ इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ॥ यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ १६ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ निमिरिक्ष्वाकुतनयो-वसिष्ठमवृतर्त्विजम् ॥ आरभ्य सत्रं सोऽप्याह शक्रेण प्राग् वृतोऽस्मि भोः ॥ १ ॥ तं निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय ॥ तूष्णीमासीद् गृहपतिः सोपीन्द्रस्याकरोन्मखम् ॥ २ ॥

बृहद्बलस्य भवितेत्यादिनोक्ता बार्हद्बलान्वयाः बृहद्बलगोत्रजा भवितारः ॥१५॥ इक्ष्वाकूणामिति ॥ अयमिक्ष्वाकूणां वंशः सुमित्रोऽन्तोऽवधिर्यस्य तथाभूतो भविष्यति । यतः यस्मात्तं राजानं सुमित्रं प्राप्य कलौ युगे संस्थामुच्छेदमेव प्राप्स्यति ॥ १६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमद्वादशे निरमादिमाम् ॥ १२ ॥ त्रयोदशे तथेक्ष्वाकुसूनोर्वंशो निमेः स्मृतः ॥ ब्रह्मज्ञा यत्र राजानः श्लोकास्तत्राद्रिबाँहवः ॥ अनुष्टुभोऽपि तावन्त्यँ उवाचेति द्वयं तथा ॥ १३ ॥ निमेरौरसः पुत्रो नाभूदित्याह— निमिरिति ॥ इक्ष्वाकुतनयो निमिः कदाचित्सत्रमारभ्य वसिष्ठम् ऋत्विजमवृत वव्रे तदा स वसिष्ठोऽपि भो हे निमे त्वद्वरणात्प्रागेवाहं शक्रेण वृतोऽस्मि इत्याह स्म ॥ १ ॥ तमिति ॥ तं शक्रमखं निर्वर्त्य समाप्याहमागमिष्यामि तावत्पर्यन्तं त्वं प्रतिपालय यज्ञानुष्ठानप्रतिरोधं कृत्वा मां प्रतीक्षस्वेति चाह स्मेति पूर्वस्यानुषङ्गः । ततो गृहपतिर्निमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तूष्णीमासीत् । स वसिष्ठोऽपि इन्द्रस्य मखमकरोत् ॥ २ ॥ निमिरिति ॥ इदं जीवितं चलमनित्यं विद्वान् जानन् आत्मवान् विवेकी निमिश्च यावद्गुरुर्वसिष्ठो नागतस्तावदन्यैरेव ऋत्विग्भिः सत्रमारभत ॥ ३॥ शिष्येति ॥ तत इन्द्रस्य यज्ञं निर्वर्त्य समाप्यागतो गुरुर्वसिष्ठः शिष्यस्य व्यतिक्रमं स्वाज्ञोल्लङ्घनं वीक्ष्य पण्डितमानिनः आत्मानं पण्डितं मन्यमानस्य निमेरयं देहः पततादित्यशपत् ॥४॥ निमिरिति ॥ तदाकर्ण्य निमिरपि लोभात् इन्द्रतः मत्तश्च वित्तग्रहणाभिलाषरूपाद्धर्ममजानतः देहस्य नश्वरत्वे धर्मे विलम्बो न कार्य इति सिद्धान्तमुपेक्षमाणस्य तवापि देहः पततादित्यधर्मवर्तिने गुरवे प्रतिशापं ददौ ॥ ५ ॥ इतीति ॥ इत्येवमुक्त्वा अध्यात्मकोविदः आत्मविद्यायां निपुणः निमिः स्वदेहमुत्ससर्ज तत्याज। तथा अस्मत्प्रपितामहो वसिष्ठोऽपि त्यक्तदेहः पुनर्मित्रावरुणयोः पुत्रतया उर्वश्यां जज्ञे।उर्वशीदर्शनात् स्कन्नं रेतस्ताभ्यां कुम्भे निषिक्तं तस्मात् कुम्भाज्जज्ञ इत्यर्थः ॥ ६ ॥ गन्धेति ॥ मुनिसत्तमाः निमेः ऋत्विजस्तं निमिना त्यक्तं देहं गन्धवस्तुषु सुगन्धितैलेषु निधाय अथानन्तरं सत्रयागे समाप्ते सति तत्र समागतान् देवान्

निमिश्चलमिदं विद्वान् सत्रमारभतात्मवान् ॥ ऋत्विग्भिरपरैस्तावन्नागमद् यावता गुरुः ॥ ३ ॥ शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः ॥
अशपत्पतताद् देहो निमेः पण्डितमानिनः ॥ ४ ॥ निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने तवापि पतताद् देहो लोभाद् धर्ममजानतः ॥ ५ ॥
इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः ॥ मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ॥ ६ ॥ गन्धवस्तुषु तद्देहं निधाय मुनिसत्तमाः ॥ समाप्ते
सत्रयागेऽथ देवानूचुः समागतान् ॥ ७ ॥ राज्ञो जीवतु देहोऽयं प्रसन्नाः प्रभवो यदि ॥ तथेत्युक्ते निमिः प्राह मा भून्मे देहबन्धनम् ॥ ८ ॥ यस्य
योगं न वाञ्छन्ति वियोगभयकातराः॥ भजन्ति चरणाम्भोजं मुनयो हरिमेधसः ॥ ९ ॥ देहं नावरुरुत्सेहं दुःखशोकभयावहम् ॥ सर्वत्रास्य यतो
मृत्युर्मत्स्यानामुदके यथा ॥ १० ॥ देवा ऊचुः ॥ विदेह उष्यतां कामं लोचनेषु शरीरिणाम् ॥ उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः॥ ११ ॥

ऊचुः ॥ ७ ॥ राज्ञ इति ॥ यदि यूयं प्रभवो वरदाने समर्थाः प्रसन्नाश्च तर्हि राज्ञो निमेरयं देहः जीवत्विति ततो देवैस्तथेत्युक्ते जीवत्वित्युक्ते सति निमिराह स्म । मे मम देहबन्धनं देहसम्बन्धो मा भूत् ॥ ८ ॥ यस्येति ॥ मुनयो विवेकिनो वियोगभयकातराः देहयोगे सति तद्वियोगस्य मरणस्यावश्यंभावित्वात्ततो भीताः सन्तः यस्य देहस्य योगं सम्बन्धं न वाञ्छन्ति किंतु हरति देहसंयोगवियोगादिसंसारदुःखमिति तथाभूता मेधा यस्य तस्य भगवतश्चरणारविन्दमेव देहयोगादिनिवृत्त्यर्थं भजन्ति ॥ ९ ॥ देहमिति ॥ दुःखादिनिमित्तभूतं देहमहं नावरुरुत्से अवरोद्धुं ग्रहीतुं नेच्छामि । यतो देहग्रहणात् अस्य देहिनः सर्वत्र मृत्युर्भवति न कुत्रापि ततो निस्तारः । तत्र दृष्टान्तमाह । यथा उदके वसतां मत्स्यानां सर्वत्रैव मृत्युस्तथेति ॥ १० ॥ विदेहेति ॥ एवमुक्ता देवा ऊचुः । निमिर्विदेह एव सन् शरीरिणां लोचनेषु कामं यथेष्टमुष्यतां वसतु । भाव आर्षो लोट् । एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सति युष्माभिः प्रार्थितमस्य जीवितमनेनोक्तो देहसम्बन्धाभावश्च भविष्यति इति भावः । स च निमिरध्यात्मसंस्थितो लोचनयोः स्थितः सन्नुन्मेषणनिमेषाभ्यां तत्प्रवर्तकत्वेन लक्षितोऽवर्त्तत इति शेषः ॥ ११ ॥ अराजकेति ॥ नृणामराजकत्वनिमित्तं भयं मन्यमानाः सम्भावयन्तो महर्षयः सर्वथा राजोत्पादने समर्था निमेर्देहं ममन्थुस्ततः कुमारः समजायत ॥ १२ ॥ जन्मनेति ॥ जन्मना असाधारणेन स जन एव जनकोऽभूत् । यद्वा । जन्मना अग्रे वंशोत्पादनेन स जनकशब्दाभिधेयोऽभवत् । विदेहो निमिस्तद्वंशजत्वात् स एव वैदेहशब्दवाच्योऽभूत् यतो मथनाज्जातोऽतो मिथिलशब्दवाच्योऽभूत् । येन मिथिला पुरी निर्मिता अतोऽपि सः मिथिलोऽभूदिति व्युत्पत्त्यन्तरम् । यद्वा । मिथिलेन निर्मितत्वात् पुरी अपि मिथिलाख्या जातेत्यर्थः ॥१३॥ तस्मादिति ॥ तस्मान्मिथिलादुदावसुर्जातः । तस्य नन्दिवर्द्धनः पुत्रोऽभूत् । ततः सुकेशोऽभूत् । तस्यापि हे महीपते देवरातः पुत्रोऽभूत् ॥ १४ ॥ तस्मादिति ॥ तस्माद्देवरातात् बृहद्रथः तस्य महावीर्यः । तं विशिनष्टि सुधृत्पितेति । तत्पुत्रः सुधृत्संज्ञकोऽभूदित्यर्थः । सुधृदेव सुधृतिः

अराजकभयं नृणां मन्यमाना महर्षयः ॥ देहं ममन्थुः स्म निमेः कुमारः समजायत ॥ १२ ॥ जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः ॥ मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥ १३ ॥ तस्मादुदावसुस्तस्य पुत्रोऽभून्नन्दिवर्धनः ॥ ततः सुकेतुस्तस्यापि देवरातो महीपते ॥ १४ ॥ तस्माद्बृहद्रथस्तस्य महावीर्यः सुधृत्पिता ॥ सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ॥ १५ ॥ मरोः प्रतीपकस्तस्माज्जातः कृतिरथो यतः ॥ देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः ॥ १६ ॥ कृतिरातस्ततस्तस्मान्महारोमाथ तत्सुतः ॥ स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥ १७ ॥ ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम् ॥ सीता सीराग्रतो जाता तस्मात्सीरध्वजः स्मृतः ॥ १८॥ कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः ॥ धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥ १९॥ कृतध्वजात्केशिध्वजः खाण्डिक्यस्तु मितध्वजात् ॥ कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥ २० ॥

सुधृतेर्धृष्टकेतुरभूत् । अथ तस्मात् हर्यश्वो जातः ततो मरुर्जातः ॥ १५ ॥ मरोरिति ॥ मरोः पुत्रः प्रतीपकः । प्रदीपक इत्यपि पाठः । तस्मात्कृतरथो जातः यतः कृतरथाद्देवमीढो जातः । तस्य सुतो विश्रुतः अथ तस्मात् महाधृतिः ॥१६॥ कृतीति ॥ ततः कृतिरातः तस्मान्महारोमा । अथानन्तरं तस्य सुतः स्वर्णरोमा तस्य सुतो ह्रस्वरोमा व्यजायत ॥ १७ ॥ तत इति ॥ ततः सीरध्वजो जज्ञे । यस्मात् तस्य यज्ञार्थं महीं कर्षतः सतः सीराग्रात् लाङ्गलाग्रात् सीता जाता प्रादुर्भूता । तस्मात् स सीरध्वजो सीर एव ध्वजवत्कीर्तिकरो यस्य स तथा स्मृतः कथितः ॥१८॥ कुशेति ॥ तस्य सीरध्वजस्य कुशध्वजः पुत्रः ततो हे नृप धर्मध्वजो जातः । धर्मध्वजस्य कृतध्वजमितध्वजौ द्वौ पुत्रौ बभूवतुः॥ १९॥कृतेति ॥ कृतध्वजात्केशिध्वजो जातः।मितध्वजात्तु खाण्डिक्यः पुत्रो जातः। हे राजन् कृतध्वजसुतः केशिध्वजः आत्मविद्यायां विशारदो निपुणः जातः॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खाण्डिक्य इति ॥ खाण्डिक्यस्तु कर्मतत्वज्ञः कर्मविद्यायां निपुणः स च केशिध्वजाद्भीतः सन् गतो गृहान्निर्गतः । द्रुत इति पाठे पलायितः । तस्य केशिध्वजस्य भानुमान्पुत्रोऽभूत् । तस्य सुतस्तु क्रतद्युम्नोऽभूत् ॥ २१ ॥ शुचिरिति ॥ तस्य तनयः शुचिः तस्मात्सनद्वाजोऽभूत् । ततः सनद्वाजादूर्ध्वकेतुः । अथ तस्मादजः तस्य पुरुजित् सुतः ॥ २२ ॥ अरिष्टेति ॥ तस्य पुरुजितोऽपि सुतोऽरिष्टनेमिः तस्यापि श्रुतायुः ततः सुपार्श्वकः ततश्चित्ररथः यस्य सुतः क्षेमधिः मिथिलाधिपः । इदं पूर्वेषामपि विशेषणम् ॥ २३ ॥ तस्मादिति ॥ तस्मात् क्षेमधेः हेमरथः सुतो जातः । समरस इति पाठान्तरम् । तस्य सुतः सत्यरथः ततस्तस्मात् उपगुरुरासीत् । तस्मादुपगुप्तः आसीत् । स चाग्निसम्भवः अग्नेरंशात्सम्भूतः ॥ २४ ॥ श्वसन इति ॥ अथ तत उपगुप्तात् श्वसनः । वस्वनन्त इति पाठान्तरम् । तत्पुत्रः सुवर्चाः । युयुध इति पाठान्तरम् । यत् यस्मात् सुभाषणो जज्ञे । ततः श्रुतः ततो जयः तस्माद्विजयः अस्मात् धृतः सुतो जातः । ऋत इति पाठान्तरम् ॥ २५ ॥ शुनक इति ॥ तस्य शुनकः सुतो जज्ञे । ततो वीतिहव्यः

खाण्डिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजात् द्रुतः ॥ भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु सत्सुतः ॥ २१ ॥ शुचिस्तत्तनयस्तस्मात्सनद्वाजस्ततोऽभवत् ॥ ऊर्ध्वकेतुः सनद्वाजादयोऽथ पुरुजित्सुतः ॥ २२ ॥ अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ॥ ततश्चित्ररथो यस्य क्षेमधिर्मिथिलाधिपः ॥ २३ ॥ तस्मात्समरथस्तस्य सुतः सत्यरथस्ततः ॥ आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः ॥ २४ ॥ श्वसनोऽथ च तत्पुत्रो युयुधानः सुभाषणः ॥ श्रुतस्ततो जयस्तस्माद् विजयोऽस्माद्दतः सुतः ॥ २५ ॥ शुनकस्तत्सुतो जज्ञे वीतहव्यो दृतिस्ततः ॥ बहुलाश्वो दृतेस्तस्य कृतिरस्य महावशी ॥ २६ ॥ एते वै मिथिला राजन्नात्मविद्याविशारदाः ॥ योगेश्वरप्रसादेन द्वन्द्वैर्मुक्ता गृहेष्वपि ॥ २७ ॥ इति श्रीभागवते म० नवमस्कन्धे निमिवंशानुवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ श्रीशुक उवाच ॥ अथातः श्रूयतां राजन् वंशः सोमस्य पावनः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्तयः ॥ १ ॥ सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् ॥ जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः ॥ २ ॥

ततो धृतिः धृतेः पुत्रो बहुलाश्वः । विपुलाश्व इति पाठान्तरम् । तस्य कृतिः तस्य महावशी जज्ञे ॥ २६ ॥ एते इति ॥ हे राजन् एते पूर्वोक्ता मिथिला मिथिलवंशजा राजानो योगेश्वराणां याज्ञवल्क्यादीनां प्रसादेन प्रीत्योपदेशेन आत्मविद्यायां विशारदा निपुणाः अत एव गृहे स्थिता अपि द्वन्द्वैर्दुःखसुखहर्षशोकादिभिः विमुक्ता एव जाताः ॥ २७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो निरमान्नवमस्य त्रयोदशे ॥ १३ ॥ चतुर्दशादासमाप्ति सोमवंशो निगद्यते ॥ यस्मिन्नैलादयो भूपाः श्लोकास्तत्र खमार्गणाः ॥ तावत्योऽनुष्टुभोऽप्यत्रोवाचवाक्यचतुष्टयम् ॥ १४ ॥ अथेति ॥ हे राजन् अथ अग्रे मया कथ्यमानः पावनः पावित्र्यकरः सोमस्य वंशः त्वया श्रूयताम् । यस्मिन् सोमवंशे पुण्या पावनी कीर्त्तिर्यशो येषां ते तथाभूता ऐलादयो भूपाः कीर्त्यन्ते ॥ १ ॥ सहस्रशिरस इति ॥ सहस्रं शिरांसि यस्य तस्य पुंसो गर्भोदके शयानस्य श्रीनारायणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाभिरेव ह्रदस्तस्मिन्नेव यदुत्पन्नं सरोरुहं जगदात्मकं पद्मं तस्माज्जातस्य धातुश्चतुर्मुखस्य सुतोऽत्रिरासीत् । स च गुणैः सत्यादिभिः पितृसम आसीत् ॥२॥ तस्येति ॥ तस्यात्रेर्दृग्भ्यः आनन्दाश्रुभ्यः अमृतमयः सोमश्चन्द्रः पुत्रोऽभवत् । दृश इति पाठे तु नेत्रादित्यर्थः । " अत्रेः पत्न्यनसूया त्रीन् " इत्यादिचतुर्थस्कन्धेऽनसूयापुत्रत्वकथनात्सा पुनस्तं गर्भे दधारेति केचित् । सङ्गकाले आनन्दाश्रूण्यपि तस्यामाधत्तेत्यन्ये पत्युः सुतस्तस्याः सुत एवेति परे । भगवन्मनोभवस्य चन्द्रस्यैवांशोऽयं स च ब्रह्मणा विप्रादीनां पतिः कल्पितः ॥ ३ ॥ स इति ॥ स सोमो भुवनत्रयं विजित्य राजसूययागेनायजत् गुरोर्बृहस्पतेः पत्नीं तारां नाम दर्पात् विप्रादिपतित्वजन्यगर्वाद्धेतोर्बलात् अहरत् ॥ ४ ॥ यदेति॥ स सोमो यदा देवानां गुरुणा बृहस्पतिना अभीक्ष्णशः पुनः पुनः याचितोऽपि मदात् गर्वात् तारां नात्यजन् न प्रददौ तदा तत्कृते एतन्निमित्तं सुराणां दानवानां च विरोधो विग्रहो जज्ञे जातः ॥ ५ ॥ शुक्र इति ॥ बृहस्पतेर्द्वेषाद्धेतोः सासुरः असुरैः सहितः शुक्रः उडुपं सोममग्रहीत् । स्वपक्षपातिनमकरोदित्यर्थः । सन्धिरार्षः । तथा सर्वैर्भूतगणैरावृतः हरः गुरोराङ्गिरसः सुतं बृहस्पतिं स्नेहादग्रहीत् । अङ्गिरसः सकाशात् प्राप्तविद्यो हर इति प्रसिद्धिः ॥ ६ ॥ सर्वदेवेति ॥ सर्वैर्देवगणैरुपेतो युक्तो महेन्द्रो गुरुं

तस्य दृग्भ्योऽभवत्पुत्रः सोमोऽमृतमयः किल ॥ विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः॥३॥ सोऽयजद् राजसूयेन विजित्य भुवनत्रयम् ॥ पत्नीं बृहस्पतेर्दर्पात् तारां नामाहरद् बलात्॥४॥यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात्॥ नात्यजत् तत्कृते जज्ञे सुरदानवविग्रहः॥५॥शुक्रो बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपम् ॥ हरो गुरुसुतं स्नेहात् सर्वभूतगणावृतः ॥६॥ सर्वदेवगणोपेतो महेन्द्रो गुरुमन्वयात् ॥ सुरासुरविनाशोऽभूत्समरस्तारकामयः॥७॥निवेदितोऽथाङ्गिरसा सोमं निर्भर्त्स्य विश्वकृत् ॥तारां स्वभर्त्रे प्रायच्छदन्तर्वत्नीमवैत्पतिः॥८॥गर्भं त्यजाशु दुष्प्रज्ञे मत्क्षेत्रादाहितं परैः॥ नाहं त्वां भस्मसात्कुर्यां स्त्रियं सान्तानिकः सति ॥९॥ तत्याज व्रीडिता तारा कुमारं कनकप्रभम् ॥ स्पृहामाङ्गिरसश्चक्रे कुमारे सोम एव च ॥१०॥

बृहस्पतिमन्वयात् अनुससार । एवं सति तदा सुराणामसुराणां च विनाशो यत्र तथाभूतः तारकामयः तारानिमित्तः समरः सङ्ग्रामोऽभूत्॥ ७॥ निवेदित इति ॥ अथ चाङ्गिरसा निवेदितो विज्ञापितवृत्तान्तो विश्वकृत् ब्रह्मा सोमं निर्भर्त्स्य तारां स्वभर्त्रे बृहस्पतये प्रायच्छत् अदापयत् तदा च पतिर्बृहस्पतिस्तां स्वभार्यामन्तर्वत्नीमवैत् गर्भिणीमबुध्यत । आह स्म चेति शेषः ॥ ८ ॥ गर्भमिति ॥ हे दुष्प्रज्ञे मत्क्षेत्रभूतायां त्वयि परैः शत्रुभिराहितं स्थापितं गर्भमाशु शीघ्रं मत्क्षेत्रात्त्यज निष्कासय । त्यज त्यजेति पाठान्तरम् । तत्र गर्भमित्यध्याहारः । यद्यपि त्वं भस्मीकरणदण्डयोग्यासि तथापि हे असति अहं सान्तानिकः सन्तानाभिलाषी त्वयि सन्तानमुत्पादयितुमिच्छुरस्मि । अतः स्त्रियं सन्तानहेतुभूतां त्वां न भस्मसात्कुर्याम् । सान्तानिके इति पाठे तु सम्बोधनम् । यद्वा । सान्तानिके सन्तत्याधायके सत्पुत्रेऽसति अविद्यमाने सति अन्यत् समानम् ॥ ९ ॥ तत्याजेति ॥ ततो व्रीडिता लज्जिता तारा जनकस्य सोमस्येव प्रभा यस्य तं कुमारं तत्याज असूत । कनकप्रभमिति पाठान्तरम् । तस्मिन्नेव कुमारे क्षेत्रजत्वादाङ्गिरसो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतिः स्पृहां चक्रे वीर्यजत्वात् सोमश्च स्पृहां चक्रे ॥ १० ॥ ममेति ॥ एवं स्पृहया ममैवायं पुत्रो न तवेत्येवं तस्मिन् पुत्रनिमित्ते उच्चैराङ्गिरससोमयोर्विवदमानयोः सतोर्देवा ऋषयश्च तारां पप्रच्छुः । सा तारा तु व्रीडिता सती बृहस्पतेः सोमस्य वा पुत्र इति नैवोचे न उवाच ॥ ११ ॥ कुमार इति ॥ तदा च कुपितः सन् कुमारो मातरं प्राह स्म । हे असद्वृत्ते दुश्चरिते अलीकलज्जया व्यर्थया लज्जया किं न वोचसि न वदसि । अडं विनाप्युम् शबलुक् चार्षः । वोचधातुर्वा कल्प्यः । यथा मां नातिवोचन्तीतिवत् । आत्मनः स्वस्यावद्यं दुष्कर्म कुतो गर्भधारणं कृतं तदाशु शीघ्रं मे मह्यं वदेति ॥१२॥ ब्रह्मेति ॥ एवं पृष्टापि सा यदा नोक्तवती तदा ब्रह्मा तां रहः एकान्ते आहूय सान्त्वयन् आश्वासयन् समप्राक्षीत् । सा च शनकैः सोमस्य पुत्र इत्याह स्म । तावत्ततस्तु तं कुमारं सोमोऽग्रहीत् ॥१३॥ तस्येति ॥ हे नृप आत्मयोनिर्ब्रह्मा तस्य कुमारस्य बुध इत्यभिधां नाम अकृत कृतवान् । गम्भीरया सूक्ष्मया बुद्ध्या युक्तेन येन पुत्रेण उडुराट् चन्द्रो मुदं हर्षमाप ॥ १४॥ तत इति युग्मम् ॥ ततो बुधात् य इलायामुदाहृतः सुद्युम्नरूपं

ममायं न तवेत्युच्चैस्तस्मिन् विवदमानयोः ॥ पप्रच्छुर्ऋषयो देवा नैवोचे व्रीडिता तु सा ॥ ११ ॥ कुमारो मातरं प्राह कुपितोऽलीकलज्जया ॥ किं न वोचस्यऽसद्वृत्ते आत्मावद्यं वदाऽऽशु मे ॥ १२ ॥ ब्रह्मा तां रह आहूय समप्राक्षीच्च सान्त्वयन् ॥ सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥ १३ ॥ तस्यात्मयोनिरकृत बुध इत्यभिधां नृप ॥ बुद्ध्या गम्भीरया येन पुत्रेणापोडुराण्मुदम् ॥ १४ ॥ ततः पुरूरवा जज्ञे इलायां य उदाहृतः ॥ तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥ १५ ॥ श्रुत्वोर्वशीन्द्रभवने गीयमानान् सुरर्षिणा ॥ तदन्तिकमुपेयाय देवी स्मरशरार्दिता ॥ १६ ॥ मित्रावरुणयोः शापादापन्ना नरलोकताम् ॥ निशम्य पुरुषश्रेष्ठं कन्दर्पमिव रूपिणम् ॥ धृतिं विष्टभ्य ललना उपतस्थे तदन्तिके ॥ १७ ॥ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ॥ उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥ १८ ॥

विहाय स्त्रीरूपेण स्थितायां जात इति पूर्वमुक्तः स पुरूरवा जज्ञे । तस्य पुरूरवसः रूपगुणादीन् इन्द्रभवने सुरर्षिणा नारदेन गीयमानान् श्रुत्वा स्मरशरार्दिता कामपीडिता देवी अप्सराः उर्वशी तस्य पुरूरवसोऽन्तिकं समीपमुपेयाय आजगाम ॥ १५ ॥ १६ ॥ मित्रेति सार्द्धम् ॥ मित्रावरुणयोः तद्दर्शनजनितकामविकारयोः तयोः शापात् उर्वशि त्वं मानुषीव मनुष्यभक्ता भवत्येवंरूपात् नरलोकतां मनुष्यलोकतां मनुष्यभावमापन्ना प्राप्ता इति भूतलागमने हेतुः । सा ललना उर्वशी कन्दर्पमिव रूपिणमतिसुन्दरं पुरुषश्रेष्ठं पुरूरवसं निशाम्य दृष्ट्वा धृतिं धैर्यं विष्टभ्य अवलम्ब्य तस्य पुरूरवसः अन्तिक उपतस्थे स्थितवती ॥ १७ ॥ स इति ॥ स नृपतिस्तां विलोक्य हर्षेणोत्फुल्ले लोचने यस्य सः तथा हृष्टानि उदञ्चितानि तनूरुहाणि रोमाणि यस्य तथाभूतः सन् श्लक्ष्णया मधुरया वाचा देवीं तामुर्वशीम् उवाच ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वागतमिति ॥ हे वरारोहे ते तव स्वागतं सुष्ठु आगमनं जातम् । आस्यतामत्रोपविश्यताम् । किं त्वदभिलषितं वयं करवाम तदभिधेहि मया साकं सह त्वं संरमस्व । नौ आवयो रतिः शाश्वतीः समाः बहून् संवत्सरानस्तु ॥१९॥कस्या इति ॥ हे सुन्दर कस्याः स्त्रियाः मनो दृष्टिश्च त्वयि न सज्जेत अपि तु सर्वस्यापि । यस्य तवाङ्गान्तरं वक्षः आसाद्य दृष्ट्या प्राप्य दृष्ट्वा रिरंसया रन्तुमिच्छया विवेकधैर्यादिकं सर्वं च्यवते अपयातीत्यर्थः । ह इत्याश्चर्ये । यद्वा । अङ्ग हे राजन् यस्य अन्तरं रहसि अवकाशमासाद्य प्राप्य रिरंसया मनश्च्यवते विकृतीभवति अर्थान्तरं त्वश्लीलम् ॥ २० ॥ शापावसानमिषेण स्वर्गं जिगमिषोस्तस्या भाषाबन्धमाह—एताविति ॥ हे राजन् हे मानद एतौ द्वौ उरणकौ मेषौ मया पुत्रतया पालितौ न्यासौ निक्षेपरूपौ मया त्वदन्तिके निहितौ त्वं रक्षस्व । तद्भावः । यावदिमौ भवान् रक्षिता तावद् भवता सहाहं रंस्ये रमणं करिष्ये । यतो रूपौदार्यादिगुणैः श्लाघ्यः स एव स्त्रीणामप्सरसामस्माकं वरः पतिः स्मृतः कथितः अतो विजातीयत्वं न दोष इति भावः ॥ २१ ॥ घृतमिति ॥ हे वीर घृतं मे भक्ष्यं स्यात् ।

राजोवाच ॥ स्वागतं ते वरारोहे आस्यतां करवाम किम् ॥ संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥१९॥ उर्वश्युवाच ॥ कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर ॥ यदङ्गान्तरमासाद्य च्यवते ह रिरंसया ॥ २० ॥ एतावुरणकौ राजन् न्यासौ रक्षस्व मानद ॥ संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥ २१ ॥ घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वाऽन्यत्र मैथुनात् ॥ विवाससं तत्तथेति प्रतिपेदे महामनाः ॥ २२ ॥ अहो रूपमहो भावो नरलोकविमोहनम् ॥ को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥२३॥ तया स पुरुषश्रेष्ठो रमयन्त्या यथार्हतः ॥ रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥ २४ ॥ रममाणस्तया देव्या पद्मकिञ्जल्कगन्धया ॥ तन्मुखामोदमुषितो मुमुदेऽहर्गणान्बहून् ॥ २५ ॥ अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान्समनोदयत् ॥ उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥ २६ ॥

" अमृतं वा आज्यम् " इति श्रुतेः । देवानां चामृताशित्वात् मैथुनादन्यत्र त्वां विवाससं नग्नं नेक्षे नेक्षिष्ये । मैथुनादन्यत्र नग्नदर्शने गमिष्यामीत्यर्थः । एवमुक्तः पुरूरवा महामनाः हृष्टचेताः सन् तत्तदुक्तं भाषाबन्धनं तथास्त्विति एवं प्रतिपेदे अङ्गीचकार॥२२॥ तदेवाह—अहो इति ॥ अहो तवेदं रूपं सौन्दर्यमहो भावः भावहावादिः उभयमपि नरलोकं विमोहयतीति तथाभूतम् अतः स्वयमागतां देवीं देवभोग्यां त्वां मनुजः को वा न सेवेतेति सर्वोऽपि त्वत्कृपया सेवतैवेति भावः ॥२३॥ तयेति ॥ यथार्हतः यथापेक्षं रमयन्त्या क्रीडन्त्या तया उर्वश्या सह स पुरुषश्रेष्ठः पुरूरवाः सुरा देवा विहरन्ति येषु तेषु सुरविहारेषु चैत्ररथादिषूपवनेषु कामं यथेष्टं रेमे ॥ २४ ॥ रममाण इति ॥ पद्मकिञ्जल्कस्य गन्ध इव गन्धो यस्यास्तया देव्या उर्वश्या सह नित्यं रममाणः तस्या मुखामोदेन मुषितः प्रलोभितः सन् बहूनहर्गणान् मुमुदे ॥ २५ ॥ अपश्यन्निति ॥ कदाचिदुर्वशीमपश्यन्निन्द्रः उर्वशीरहितं मह्यं ममाऽऽस्थानं सभा नातीव शोभत इति मन्यमानस्तामानेतुं गन्धर्वान् समनोदयत् प्रेरयामास ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त इति ॥ ततस्ते गन्धर्वा महारात्रेः " महानिशा द्वे घटिके रात्रौ मध्यमयामयोः । " इति स्मृतेः । मध्यरात्रे अत एव तमसि अन्धकारे प्रत्युपस्थिते सम्प्राप्ते सति उपेत्य आगत्य राजनि पुरूरवसि जायया उर्वश्या न्यस्तौ निक्षेपतया स्थापितौ उर्वश्या उरणौ मेषौ जह्रुः अपहृतवन्तः ॥ २७ ॥ निशम्येति ॥ तदा नीयमानयोः पुत्रयोः पुत्रवत्पालितयोर्मेषयोराक्रन्दितं रोदनं निशम्य श्रुत्वा देवी उर्वशी उवाचेति शेषः । नपुंसा नपुंसकेन पुरुषार्थहीनेन वीरमानिना वृथैवात्मानं वीरं मन्यमानेन कुत्सितेन नाथेन स्वामिनाऽहं हताऽस्मि ॥ २८ ॥ यदिति ॥ यस्य विश्रम्भात् वीरोऽयं मत्पुत्रौ रक्षिष्यतीति विश्वासादहं नष्टा तथा दस्युभिः हृते अपत्ये यस्यास्तादृशी जाता यो निशि नारीवत् त्रस्तो भीतः सन् शेते दिवा दिवसे तु पुमान् पुरुषवद्व्यवहरति । यद्वा । दिवैव पुमान् इति य इत्यस्य विशेषणम् ॥२९॥ इतीति ॥ इत्येवंभूतैर्वाग्रूपैः सायकैरिषुभिर्विद्धः पुरूरवा निस्त्रिंशं खड्गमादाय रुषा क्रोधेन विवस्त्रो नग्न एव निशि रात्रौ अभ्यद्रवत् गन्धर्वाननुजगामेत्यर्थः । प्रतोत्त्रैरङ्कुशैः कुञ्जरो यथा विद्धः सन् क्रुद्धो भवति तथेति ॥ ३० ॥ ते इति ॥ तदा च ते गन्धर्वा उरणौ तत्रैव विसृज्य त्यक्त्वा विद्युतः तडितो व्यद्योतन्त प्रकाशितवन्तः । एतेन स्वकार्य्यार्थं विद्युतोऽपि सहैवानीतवन्तः इति सूचितम् । यद्वा । विद्युतः

त उपेत्य महारात्रे तमसि प्रत्युपस्थिते ॥ उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥२७॥ निशम्याक्रन्दितं देवी पुत्रयोर्नीयमानयोः ॥ हतास्म्यहं कुनाथेन न पुंसा वीरमानिना ॥ २८ ॥ यद्विश्रम्भादहं नष्टा हृतापत्या च दस्युभिः ॥ यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥ २९ ॥ इति वाक्सायकैर्विद्धः प्रतोत्त्रैरिव कुञ्जरः ॥ निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद्रुषा ॥ ३० ॥ ते विसृज्योरणौ तत्र व्यद्योतन्त स्म विद्युतः ॥ आदाय मेषावायान्तं नग्नमैक्षत सा पतिम् ॥ ३१ ॥ ऐलोऽपि शयने जायामपश्यन्विमना इव ॥ तच्चित्तो विह्वलः शोचन्बभ्रामोन्मत्तवन्महीम् ॥ ३२ ॥ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः ॥ पञ्च प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥ ३३ ॥ अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ॥ मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥ ३४ ॥

विशिष्टद्युतिमन्तो गन्धर्वा व्यद्योतन्त नग्नस्य राज्ञो दर्शनाय प्रकाशमकुर्वत तदा च मेषावादायायान्तं पतिं पुरूरवसं सा उर्वशी नग्नमैक्षत ददर्श।ततश्च भाषाभङ्गात् सा निर्जगामेति ज्ञेयम् ॥ ३१ ॥ ऐल इति ॥ तत ऐलः पुरूरवाः शयने शय्यायां जायामुर्वशीमपश्यन् विमनाः खिन्नो जातः । ततश्च तस्यामेव चित्तं यस्य तथाभूतः अतस्तां विना विह्वलो व्याकुलचित्तः तत्प्राप्तिः कथं स्यादिति शोचन् उन्मत्तवन्महीं बभ्राम ॥ ३२ ॥ स इति ॥ एवं पृथ्वीं पर्यटन् स पुरूरवाः कुरुक्षेत्रे सरस्वतीतीरे तामुर्वशीं प्रहृष्टानि वदनानि यासां तथाभूतास्तत्सखीश्च पञ्च वीक्ष्य सूक्तं वेदप्रसिद्धसूक्तार्थभूतं वचनं प्राह स्म ॥ ३३ ॥ अहो इति ॥ अयीति पाठान्तरम् । हे जाये अद्याप्यनिर्वृत्य मत्कृतां निर्वृतिमनवाप्य । अनिर्वर्त्येति पठे तु मां स्वकृतां निर्वृतिमगमयित्वा स्वभोगजन्यसुखेन तृप्तमकृत्वा घोरे विरहदुःखे त्यक्तुं पातयितुं त्वं नार्हसीत्यन्वयः । अतस्तिष्ठ तिष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचांसि मिथः संलापान् कृणवावहै करवावहै । वीप्सादरार्था । तथा च सूक्तम् । " ह ये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै तम् " इति ॥ ३४ ॥ सुदेह इति ॥ हे देवि त्वया दूरं हृतस्त्यक्तः अयं मदीयः सुष्ठु कमनीयो देहोऽत्रास्मिन्नेव स्थाने पतति त्वत्प्रसादस्यास्पदं विषयो न भविष्यति चेत्तर्ह्येनमत्र पतितं देहं वृका गृध्राश्च खादन्ति खादिष्यन्ति ॥ ३५ ॥ एवमुक्तोर्वशी आह–मेति ॥ मा मृथाः न म्रियस्व यतस्त्वं पुरुषोऽसि अतो धैर्यमावह । अत इमे प्रसिद्धा इन्द्रियरूपाः वृकास्त्वां मा स्म अद्युः न भक्षयेयुः अजितेन्द्रियो मा भूः । वृकास्तु न वृकाः किन्त्विन्द्रियाण्येव । स्त्रीणां क्वापि सख्यं नैवास्ति । यथा क्रूरं वृकाणां हृदयं तथैव स्त्रीणां हृदयमिति ॥ ३६ ॥ स्त्रिय इति ॥ अकरुणाः कृपारहिताः क्रूराः क्रूरस्वभावाः दुर्मर्षाः क्षमारहिताः प्रिये निमित्ते साहसं स्वसामर्थ्यं लोकपरलोकहान्यादिकमविचार्यैव प्रवृत्तिर्यासां ताः अतोऽल्पार्थे स्वल्पप्रयोजनेऽपि निमित्ते विस्रब्धं विश्वासप्राप्तं पतिं भ्रातरमपि घ्नन्ति अन्यान् घ्नन्तीति किमुत वक्तव्यम् ॥ ३७ ॥ विधायेति ॥ अज्ञेषु स्त्रीस्वभावानभिज्ञेषु अलीक-

सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया ॥ खादन्त्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥ ३५ ॥ उर्वश्युवाच ॥ मा मृथाः पुरुषोऽसि त्वं मा स्म त्वाद्युर्वृका इमे ॥ क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥ ३६ ॥ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ॥ घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥ ३७ ॥ विधायालीकविश्रम्भमज्ञेषु त्यक्तसौहृदाः ॥ नवं नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥ ३८ ॥ संवत्सरान्ते हि भवानेकरात्रं मयेश्वर ॥ वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भोः ॥ ३९ ॥ अन्तर्वत्नीमुपालभ्य देवीं स प्रययौ पुरम् ॥ पुनस्तत्र गतोऽब्दान्ते उर्वशीं वीरमातरम् ॥ उपलभ्य मुदा युक्तः समुवास तया निशाम् ॥ ४० ॥ अथैनमुर्वशी प्राह कृपणं विरहातुरम् ॥ गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति ॥ ४१ ॥ तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ॥ उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन् वने ॥ ४२ ॥

विश्रम्भं कपटेन विश्वासं विधाय अतस्त्यक्तसौहृदाः स्नेहरहिताः पुंश्चल्यः व्यभिचारिण्यः नवं नवं कान्तमभीप्सन्त्यः कामयमानाः स्वैरं यथेच्छं वृत्तिर्यासां तथा भवन्ति अतो मत्सख्यं त्यजेत्याशयः ॥ ३८ ॥ संवत्सरान्त इति ॥ भो ईश्वर समर्थ तव धैर्यमेव युक्तं संवत्सरान्ते एकरात्रं भवान् मया सह वत्स्यति तथा सति ते तवापराण्यपि अपत्यानि भविष्यन्ति ॥ ३९ ॥ अन्तर्वत्नीमिति सार्द्धम् ॥ ततः अपराण्यपत्यानि भविष्यन्तीति वचनात् तां देवीमुर्वशीमन्तर्वत्नीं गर्भिणीमुपालक्ष्य ज्ञात्वा स पुरूरवाः स्वपुरं प्रययौ । ततः पुनः अब्दान्ते संवत्सरावसाने ततः कुरुक्षेत्रे स गतः सन् वीरमातरं पुत्रेण सहागताम् उर्वशीं उपलभ्य दृष्ट्वा मुदा हर्षेण युक्तस्तया सह तां निशां सम्यगुवास ॥ ४० ॥ अथेति ॥ अथ निशावसाने स्वविरहेण स्वविश्लेषेण आतुरं व्याकुलमत एव कृपणं दीनमेनं पुरूरवसमुर्वशी प्राह स्म । त्वमिमान् गन्धर्वान् उपाधाव स्तुत्यादिना प्रीतान्कुरु । ते च तुभ्यं मां दास्यन्तीति ॥ ४१ ॥ तस्येति ॥ हे नृप तस्य पुरूरवसः संस्तुवतः सन्तस्तुष्टाः प्रीता गन्धर्वास्तस्मै अनेनाग्निनोर्वशीलोकप्राप्तिसाधनं कर्म कृत्वा ततः उर्वशीं प्राप्स्यसीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिप्रायेणाग्निस्थालीं पात्रविशेषं ददुः । ततः स तु कामान्धतया तां स्थालीमेवोर्वशीं मन्यमानस्तया सहितो वने विचरन् सङ्गमसमये नेयमुर्वशी किंतु अग्निस्थालीत्यबुध्यत ॥ ४२ ॥ स्थालीमिति ॥ ततश्च तां स्थालीं वन एव न्यस्य निधाय गृहे गत्वा निशि नित्यं तामेव ध्यायतस्तस्य मनसि त्रेतायां सम्प्रवृत्तायां त्रेतायुगारम्भे त्रय्यवर्त्तत कर्मबोधकं वेदत्रयं प्रादुरभूदित्यर्थः ॥ ४३ ॥ स्थालीति युग्मम् ॥ ततश्च स स्थालीस्थापनस्थलं गतः सन् शम्या गर्भे जातमश्वत्थं विलक्ष्य दृष्ट्वास्मिन्नग्निरस्तीति च ज्ञात्वा तेनाश्वत्थेन द्वे अरणी मथनकाष्ठे कृत्वा उर्वशीलोकप्राप्तिकाम्यया अधरारणिमुर्वशीं ध्यायन् उत्तरामरणिं चात्मानं ध्यायन् उभयोर्मध्ये यत्काष्ठं तत्प्रजननं पुत्रं ध्यायन् प्रभुः पुरूरवाः मन्त्रतः अग्निमन्थनप्रकाशकमन्त्रप्रयोगपूर्वकमग्निं ममन्थेति शेषः । तथा च मन्त्रः । " उर्वश्यस्यायुरसि पुरूरवा " इति ॥ ४४ ॥ ४५ ॥ तस्येति ॥ तस्य तेन कृतान्निर्मन्थनात् जातवेदा जातं वेदो धनं भोग्यं यस्मात्तथाभूतः विभावसुरग्निर्जातः स च त्रय्या विद्यया तद्विहितेनाधानसंस्कारेण त्रिवृत् आहवनीयः गार्हपत्यः

स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि ॥ त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्तत ॥ ४३ ॥ स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः ॥ तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥ ४४ ॥ उर्वशीं मन्त्रतो ध्यायन्नधरारणिमुत्तराम् ॥ आत्मानमुभयोर्मध्ये यत् तत् प्रजननं प्रभुः ॥ ४५ ॥ तस्य निर्मन्थनाज्जातो जातवेदा विभावसुः ॥ त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥ ४६ ॥ तेनायजत यज्ञेशं भगवन्तमधोक्षजम् ॥ उर्वशीलोकमन्विच्छन् सर्वदेवमयं हरिम् ॥ ४७ ॥ एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ॥ देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥ ४८ ॥ पूरूरवस एवासीत् त्रयी त्रेतामुखे नृप ॥ अग्निना प्रजया राजा लोकं गान्धर्वमेयिवान् ॥ ४९ ॥ इति श्रीभागवते म० नवमस्कन्धे ऐलोपाख्याने चतुर्दशोऽध्यायः ॥ १४ ॥

दक्षिणाग्निरिति त्रिरूपः सन् पुण्यलोकप्रापकत्वात् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः ॥ ४६ ॥ तेनेति ॥ उर्वशीलोकमन्विच्छन् पुरूरवास्तेन साधनभूतेनाग्निना यज्ञेशं यज्ञफलदातारं भगवन्तमधोक्षजं सर्वदेवमयं हरिम् अयजत ॥ ४७ ॥ एक इति ॥ अनादिवेदबोधितकर्ममार्गस्य अनादित्वेऽपि पुरूरवसः पूर्वं न प्रवृत्तः किंतु पुरा कृतयुगे सर्वासां वाचां बीजभूतः प्रणव एक एव वेद आसीत् तथा देवोऽप्येको नारायण एवासीत् नान्यः । अग्निश्चैको लौकिक एव वर्णश्चैको हंसाख्य एव ॥ ४८ ॥ पुरूरवस इति ॥ हे नृप त्रयी वेदत्रयं तु त्रेतामुखे पुरूरवसः सकाशादेवासीत् ततो राजा पुरूरवाः अग्निना प्रजया परलोकसाधनभूतेन पुत्रतयाङ्गीकृतेन गान्धर्वं लोकमेयिवान् जगाम । अयं भावः । कृतयुगे सत्वप्रधानाः प्रायशः सर्वेऽपि ध्याननिष्ठाः रजःप्रधाने तु त्रेतायुगे वेदादिविभागेन कर्ममार्गः प्रकटो बभूवेति । एवं स्वायंभुवमन्वन्तरादावपि बहुचतुर्युगव्यापकराज्यवद्भ्यः प्रियव्रतादिभ्य एव तत्र तत्र त्रेतामुखे कर्मप्रादुर्भाव इत्यपि ज्ञेयम् ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमान्नवमस्य चतुर्दशे ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशे गाधिरैलवंशेऽभूद् यस्य नप्तृजः ॥ रामोऽर्जुनमहांस्तत्र श्लोकाः सार्द्धाः कुसिन्धवः ॥ उवाचेति त्रयं सार्द्धश्चतुर्वेदा अनुष्टुभः ॥ ।५॥ ऐलस्येति ॥ हे नृप ऐलस्य पुरूरवसः उर्वशीगर्भात् आयुरित्यादयः षट् आत्मजा आसन् ॥ १ ॥ श्रुतायोरिति ॥ श्रुतायोः पुत्रो वसुमान् सत्यायोः पुत्रश्च श्रुतञ्जयः । धनञ्जय इति पाठान्तरम् । यस्य सुतः एक एकसंज्ञः । श्रुत इति पाठे तु श्रुतसंज्ञः एकसंज्ञश्चेति द्वौ पुत्रौ । जयस्य तनयो विभुः । अमित इति पाठान्तरम् ॥ २ ॥ भीम इति ॥ विजयस्य पुत्रो भीमः । अथ तस्य तु काञ्चनः । ततश्च होत्रको जातः तस्य सुतो जह्नुः तं विशिनष्टि यो जह्नुर्गङ्गां गण्डूषीकृत्य अपिबत् सः ॥३॥ जह्नोरिति सार्द्धम् ॥ जह्नोस्तु पुत्रः पूरुः तस्य पुत्रो बलाकः तस्य चात्मजः पुत्रः अजकः ततः कुशो जातः कुशस्यापि कुशाम्बुः मूर्तयो वसुः कुशनाभश्चेति चत्वारः पुत्रा जाताः । कुशाम्बुतो गाध्याख्यः पुत्र आसीत् ॥ ४ ॥ गाधेः पुत्रो विश्वामित्रोऽभूदित्युत्तराध्यायान्ते वक्ष्यति तस्य कन्यावंशप्रसङ्गेन परशुरामावतारं वक्ष्यन्नाह—तस्येति ॥ तस्य गाधेः सत्यवत्याख्यां कन्यामृचीकाख्यो द्विजो ब्राह्मणो-

श्रीशुक उवाच ॥ ऐलस्य चोर्वशीगर्भात् षडासन्नात्मजा नृप ॥ आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥ १ ॥ श्रुतायोर्वसुमान् पुत्रः सत्यायोश्च श्रुतञ्जयः ॥ रयस्य सुत एकश्च जयस्य तनयोऽमितः ॥ २ ॥ भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः ॥ तस्य जह्नुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत् ॥ ३ ॥ जह्नोस्तु पूरुस्तत्पुत्रो बलाकश्चात्मजोऽजकः ॥ ततः कुशः कुशस्यापि कुशाम्बुर्मूर्तयो वसुः ॥ कुशनाभश्च चत्वारो गाधिरासीत् कुशाम्बुजः ॥ ४ ॥ तस्य सत्यवतीं कन्यामृचीकोऽयाचत द्विजः ॥ वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ॥ ५ ॥ एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम् ॥ सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम् ॥ ६ ॥ इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणान्तिकम् ॥ आनीय दत्त्वा तानश्वानुपयेमे वराननाम् ॥ ७ ॥ स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया ॥ श्रपयित्वोभयैर्मन्त्रैश्चरुं स्नातुं गतो मुनिः ॥८॥

ऽयाचत। गाधिस्तं वरं विसदृशं कन्याया अननुरूपं मत्वा भार्गवमृचीकमब्रवीत् ॥५॥ एकत इति ॥ दक्षिणवामपार्श्वयोर्मध्ये एकतः एकस्मिन् पार्श्वे श्यामः कर्णो येषां तेषां तथा सर्वत्र देहे चन्द्रस्येव वर्चो येषां तेषां हयानां सहस्रं मे कन्यायाः शुल्कं विवाहोचितं देयं दीयतां तर्हि कन्यां दास्यामि यतो वयं कुशिकाः अतिकुलीनाः अतोऽस्मत्कन्या दुर्लभा इत्यर्थः ॥६॥ इतीति ॥ इत्येवं गाधिनोक्तः स ऋचीकः तस्य गाधेर्मतं मामननुरूपं मत्वेवं वदतीति ज्ञात्वा वरुणस्यान्तिकं गतः । ततो याचित्वा तांस्तदुक्तविधानश्वान् आनीय दत्त्वा वराननां सत्यवतीमुपयेमे विवाहितवान् ॥ ७ ॥ स इति ॥ कदाचित् स ऋषिः ऋचीक अपत्यकाम्यया आत्मनः पुत्रेच्छया पत्न्या सत्यवत्या श्वश्र्वा तन्मात्रा च प्रार्थितः उभयैर्मन्त्रैश्चरुं श्रपयित्वा तत्र स्वपत्न्यर्थं ब्राह्मैः श्वश्र्वर्थं क्षात्रैरिति स्वयं तु मुनिः स्नातुं गतः ॥ ८ ॥

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावदिति ॥ यावत्स्नात्वा मुनिर्निर्गतस्तावत् भार्यायां भर्तुः स्नेहाधिक्यात् सत्यवत्याश्चरुं श्रेष्ठं मत्वा तया मात्रा याचिता सती सत्यवती ब्रह्ममन्त्राभिमन्त्रितं स्वचरुं स्वमात्रे अयच्छत् । मातुस्तु चरुं क्षात्रमन्त्राभिमन्त्रितं स्वयमदत् आदत् भक्षितवती । आडभाव आर्षः ॥ ९ ॥ तदिति ॥ ततः स्नात्वा आगतो मुनिः तच्चरुविपर्ययरूपं कर्म ज्ञात्वा पत्नीं प्राह स्म । त्वं चरुविनिमयरूपं कष्टं जुगुप्सितं कर्म अकार्षीः कृतवत्यसि । अकाराधिक्यमार्षम् । अतस्तव पुत्रो दण्डधरः शस्त्रधारी घोरः क्रूरस्वभावश्च भविता । तव भ्राता तु ब्रह्मवित्तमो भविता । स च विश्वामित्र इत्युत्तराध्याये वक्ष्यते ॥ १० ॥ प्रसादित इति ॥ ततश्चैवं मा भूदित्येवं सत्यवत्या प्रसादितः प्रार्थितो भार्गवः ऋचीकः अथ यद्येवं पुत्रो न भविता तर्हि तव पौत्रस्तथाविधो भवेदित्याहेति शेषः । ततश्च सत्यवत्यां जमदग्निः शान्तस्वभावोऽभवत् ॥ ११ ॥ सेति युग्मम् ॥ सा च सत्यवती लोकानां

तावत् सत्यवती मात्रा स्वचरुं याचिता सती ॥ श्रेष्ठं मत्वा तयाऽयच्छन्मात्रे मातुरदत्स्वयम् ॥ ९ ॥ तद्‍ विज्ञाय मुनिः प्राह पत्नीं कष्टमकार्षीः ॥ घोरो दण्डधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ॥ १० ॥ प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः ॥ अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् ॥ ११ ॥ सा चाभूत्सुमहापुण्या कौशिकी लोकपावनी ॥ रेणोः सुतां रेणुकां वै जमदग्निरुवाह याम् ॥ १२ ॥ तस्यां वै भार्गवऋषेः सुता वसुमदादयः ॥ यवीयाञ्जज्ञ एतेषां राम इत्यभिविश्रुतः ॥ १३ ॥ यमाहुर्वासुदेवांशं हैहयानां कुलान्तकम् ॥ त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥ १४ ॥ दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् ॥ रजस्तमोवृतमहन्फल्गुन्यपि कृतेंऽहसि ॥ १५ ॥ राजोवाच ॥ किं तदंहो भगवतो राजन्यैरजितात्मभिः ॥ कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥ १६ ॥ श्रीशुक उवाच ॥ हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः ॥ दत्तं नारायणस्यांशमाराध्य परिकर्मभिः ॥ १७ ॥ बाहून्दशशतं लेभे दुर्धर्षत्वमरातिषु ॥ अव्याहतेन्द्रियौजः श्रीस्तेजो वीर्यं यशो बलम् ॥ १८ ॥ योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः ॥ चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥ १९ ॥

पावनी महापुण्या कौशिकी नदी अभूत् । जमदग्निर्या रेणोः सुतां रेणुकाख्यामुवाह तस्यां वै रेणुकायां भार्गवऋषेर्जमदग्नेर्वसुमदादयः सुता आसन् । एतेषां वसुमदादीनां यः यवीयान् कनीयान् स राम इत्यभिविश्रुतः प्रख्यातः ॥ १२ ॥ १३ ॥ यमिति ॥ हैहयानां सहस्रार्जुनादीनां कुलस्य अन्तं नाशं करोतीत्यन्तकरतं यम् रामं वासुदेवस्यांशमंशावतारमाहुः । यो राम इमां महीं त्रिःसप्तकृत्वः एकविंशतिवारान् निःक्षत्रियां क्षत्रबीजरहितां चक्रे ॥ १४ ॥ दुष्टमिति ॥ भुवो भारभूतम् अब्रह्मण्यं ब्राह्मणेष्वसाधु रजस्तमोभ्यां वृतं दुष्टं क्षत्रं फल्गुनि स्वल्पेऽप्यंहसि अपराधे कृते व्यनीनशत् ॥ १५ ॥ किमिति ॥ अकृतात्मभिः अवशीकृतान्तःकरणै राजन्यैस्तस्य भगवतः किमंहः कृतं येन हिंसाहेतुनाऽभीक्ष्णशः पुनः पुनः क्षत्रियाणां कुलं नष्टम् ॥ १६ ॥ हैहयानामिति त्रयम् ॥ हैहयानां यादवविशेषाणाम् अधिपतिः क्षत्रियेषु ऋषभः श्रेष्ठः अर्जुनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्त्तवीर्यः परिकर्मभिः परिचर्यादिभिः नारायणस्यांशं दत्तं दत्तात्रेयमाराध्य दशशतं सहस्रं बाहून् तथा अरातिषु शत्रुषु दुर्धर्षत्वं शत्रुभिरपराजितत्वमव्याहतमिन्द्रियौजआदिकं च लेभे। इन्द्रियादीनां समाहारद्वन्द्वः ततो व्याहतशब्देन कर्मधारयः। तथा यत्र यस्मिन्नैश्वर्ये अणिमादयो गुणाः सन्ति तद् ऐश्वर्यं च लेभे लब्धवान् अतो यथा पवनः तथा अव्याहतगतिर्लोकेषु चचार ॥ १७ ॥ १८ ॥ १९ ॥ स्त्रीरत्नैरिति ॥ स च मदोत्कटः कदाचित् स्त्रिय एव रत्नानि तैरावृतः परिवेष्टितः वैजयन्तीं नवरत्नरचितां स्रजं मालां बिभ्राणः रेवाम्भसि नर्मदाजले क्रीडन् भुजैः सरितं रुरोध ॥ २० ॥ विप्लावितमिति ॥ तत्र च वीरमानी आत्मानं वीरं मन्यमानः दशाननो रावणः दिग्विजये माहिष्मत्याः समीपे देवपूजां कुर्वन् प्रवाहस्यावरोधात् प्रतिस्रोतसः परावृत्तप्रवाहायाः सरितो नर्मदाया जलैः स्वशिबिरं स्वसेनानिवासस्थानं विप्लावितमालक्ष्य तस्य तद्वीर्यं नद्यवरोधसामर्थ्यं नामृष्यन्न सेहे। तेन सार्द्धं योद्धुमगमदित्यर्थः ॥ २१ ॥ गृहीत इति ॥ ततश्च कृतकिल्बिषः क्रीडन्तमभिभवितुं प्रवृत्तः सन् स्त्रीणां समक्षं येनार्जुनेन लीलया-

स्त्रीरत्नैरावृतः क्रीडन्नेवाम्भसि मदोत्कटः ॥ वैजयन्तीं स्रजं बिभ्रद् रुरोध सरितं भुजैः ॥ २० ॥ विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः ॥ नामृष्यत् तस्य तद्वीर्यं वीरमानी दशाननः ॥२१॥ गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः ॥ माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथा ॥ २२ ॥ स एकदा तु मृगयां विचरन्विपिने वने ॥ यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥ २३ ॥ तस्मै स नरदेवाय मुनिरर्हणमाहरत् ॥ ससैन्यामात्यवाहाय हविष्मत्यास्तपोधनः ॥ २४॥ स वीरस्तत्र तद् दृष्ट्वा आत्मैश्वर्यातिशायनम् ॥ तन्नाद्रियताग्निहोत्र्यां साभिलाषः सहैहयः॥ ॥ २५ ॥ हविर्धानीमृषेर्दर्पान्नरान्हर्तुमचोदयत् ॥ ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥ २६ ॥ अथ राजनि निर्याते राम आश्रम आगतः ॥ श्रुत्वा तत् तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥ २७ ॥

ऽनायासेनैव गृहीतो माहिष्मत्यां स्वपुर्यां सन्निरुद्धः पश्चान्मुक्तश्च। यथा कपिः स्वेच्छया गृह्यते विमुच्यते च तद्वदित्यर्थः ॥ २२ ॥ स इति ॥ सोऽर्जुन एव कदाचित् गहने गह्वरे वने मृगयां विचरन् कुर्वन् यदृच्छया जमदग्नेराश्रमपदं स्थानमुपाविशत् ॥ २३ ॥ तस्मै इति ॥ तपोधनः स मुनिस्तस्मै आगताय नरदेवायार्जुनाय सैन्यामात्यवाहनसहिताय हविष्मत्या कामधेन्वा हेतुभूतया अर्हणमातिथ्यमहरत् चक्रे ॥ २४ ॥ स इति ॥ तत्र सहैहयः हैहयैः स्वकुल्यैः सह वर्तमानः अग्निहोत्र्यां होमधेनौ साभिलाषः स वीरः अर्जुनस्तत्र मुन्याश्रमे आत्मन ऐश्वर्य्यादप्यतिशायनमतिशययुक्तं तत्कामधेन्वा सम्पादितमैश्वर्य्यं दृष्ट्वा तन्मुनिकृतमातिथ्यं नाद्रियत तस्मिन्नातुष्यत् ॥२५॥ हविरिति ॥ अतो दर्पादेव ऋषेः सकाशात् हविर्धानीं कामधेनुं हर्त्तुं नरान् स्वभटान् अचोदयत्। ते च भटाः सवत्सां क्रन्दतीं ताम्। नुमभाव आर्षः। बलात् माहिष्मतीं पुरीं प्रति निन्युः ॥ २६ ॥ अथेति ॥ अथानन्तरं राजनि अर्जुने निर्याते गते सति पूर्वं क्वचिद् गतो रामः पितुराश्रममागतः तस्यार्जुनस्य तद्धोहरणरूपं दौरात्म्यं दौर्जन्यं श्रुत्वा आहतस्ताडि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोऽहिः सर्प इव चुक्रोध ॥ २७ ॥ घोरमिति ॥ दुर्धर्षः स रामः घोरं भीषणं परशुं सतूणं कार्मुकं चादाय गृहीत्वा तमन्वधावत् । मृगेन्द्रः सिंहो यूथपं गजं यथाऽनुधावति तद्वदित्यर्थः ॥ २८ ॥ तमिति ॥ धनुर्धरं बाणपरश्वधौ आयुधे यस्य तम् ऐणेयं चर्म कृष्णाजिनमम्बरं यस्य अर्कस्येव धाम तेजो यासां ताभिर्जटाभिर्युतं तं भृगुवर्यं राममोजसा वेगेनापतन्तं तमागच्छन्तं पुरीं विशन्नर्जुनो ददर्श ॥ २९ ॥ अचोदयत् इति ॥ ततोऽर्जुनो हस्त्यादिभिर्गदादिशस्त्रविशेषैश्चातिभीषणाः सप्तदशाक्षौहिणीः सेना अचोदयत् प्रेषितवान् । तास्तु भगवान् रामः एकः असहाय एवासूदयत् जघान ॥ ३० ॥ यत इति ॥ प्रहरन् परश्वधो यस्य सः मनश्च अनिलश्च तयोरिव ओजः वेगो यस्य सः परेषां शत्रूणां चक्रं सैन्यं सूदयति नाशयति इति तथा स रामो यतो यत्र यत्र सैन्ये विचक्रमे ततस्ततस्तत्र तत्र उर्व्यां रणभूमौ छिन्ना भुजा उरवः कन्धराश्च येषां तथा हताः सूता वाहनानि च येषां ते वीरा निपेतुः ॥ ३१ ॥दृष्ट्वेति ॥ रुधिरौघस्य कर्दमो यत्र तस्मिन् रणाजिरे युद्धाङ्गणे रामस्य कुठारेण परशुना सायकैश्च विवृक्णाः छिन्ना

घोरमादाय परशुं सतूणं चर्म कार्मुकम् ॥ अन्वधावत दुर्धर्षो मृगेन्द्र इव यूथपम् ॥२८॥ तमापतन्तं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधम् ॥ ऐणेयचर्माम्बरमर्कधामभिर्युतं जटाभिर्ददृशे पुरीं विशन् ॥ २९ ॥ अचोदयद् हस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः ॥ अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवानसूदयत् ॥ ३० ॥ यतो यतोऽसौ प्रहरत्परश्वधो मनोनिलौजाः परचक्रसूदनः ॥ ततस्ततश्छिन्नभुजोरुकन्धरा निपेतुरुर्व्यां हतसूतवाहनाः ॥ ३१ ॥ दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे रणाजिरे रामकुठारसायकैः ॥ विवृक्णवर्मध्वजचापविग्रहं निपातितं हैहय आपतद् रुषा ॥ ३२ ॥ अथार्जुनः पञ्चशतेषु बाहुभिर्धनुःषु बाणान्युगपत्स संदधे ॥ रामाय रामोऽस्त्रभृतां समग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समम् ॥ ३३ ॥ पुनः स्वहस्तैरचलान्मृधेऽङ्घ्रिपानुत्क्षिप्य वेगादभिधावतो युधि ॥ भुजान्कुठारेण कठोरनेमिना चिच्छेद रामः प्रसभं त्वहेरिव ॥ ३४ ॥ कृत्तबाहोः शिरस्तस्य गिरेः शृङ्गमिवाहरत् ॥ हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ॥ ३५ ॥

वर्मादयो यस्य तत् स्वसैन्यं निपातितं दृष्ट्वा हैहयोऽर्जुनो रुषा क्रोधेन आपतत् स्वयमेव योद्धुमाजगाम ॥ ३२ ॥ अथेति ॥ अथ स सहस्रभुजोऽर्जुनः पञ्चशतेषु धनुष्षु पञ्चशतसङ्ख्याकैर्बाहुभिः पञ्चशतसङ्ख्याकान् बाणान् रामाय रामं हन्तुं युगपत्सन्दधे । ततः अस्त्रभृतां समग्रणीः मुख्यः एकं धनुरेव सहायभूतं यस्य सः एकधन्वा रामस्तानि धनूंषि इषुभिः स्वप्रयुक्तबाणैः समं सहितान्येकदैव तत्क्षणमेवाच्छिनत् । एकबन्धेषुभिरिति पाठे एक एव बन्धः सन्धानं येषां तैरिषुभिः ॥ ३३ ॥ पुनरिति ॥ पुनः स्वहस्तैः अचलान् पर्वतान् अङ्घ्रिपान् वृक्षांश्चोत्क्षिप्य उपादाय मृधे सङ्ग्रामभूमौ वेगादभिधावतस्तस्यार्जुनस्य भुजान् अहेः फणानिव कठोरनेमिना तीक्ष्णधारेण कुठारेण रामः प्रसभं बलात् युधि चिच्छेद ॥ ३४ ॥ कृत्तेति ॥ कृत्ताः छिन्ना बाहवो यस्य तस्यार्जुनस्य शिरः गिरेः सकाशात् शृङ्गमिवेति आहरत् चिच्छेद एवं । पितरि अर्जुने हते सति अयु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तसङ्ख्याकारस्तस्यार्जुनस्य पुत्रा भयात् दुद्रुवुः पलायिता जाताः॥३५॥ अग्नीति ॥ परवीरहा रामः परिक्लिष्टां पराकर्षणेनातिदुःखितां सवत्सामग्निहोत्रीं घृताद्यग्निहोत्रसाधनहेतु-धेनुमुपावर्त्य परावर्त्य स्वाश्रमं समुपेत्य आगत्य पित्रे समर्पयत् समार्पयत्। आडभाव आर्षः॥३६॥ स्वकर्मेति ॥ रामः तदर्जुनवन्धादिकृतं स्वकर्म पित्रे भ्रातृभ्यश्च शशंस वर्ण-यामास । तद्रामवर्णितमर्जुनवधं श्रुत्वा जमदग्निस्तमभाषत ॥३७॥ रामेति ॥ हे राम हे राम हे महाबाहो भवान् यत्सर्वं देवमयं नरदेवं वृथा अवधीत् तत् पापमकार्षीत् । अका राधिक्यमार्षम् ॥३८ ॥ नन्वाततायिवधे दोषो नास्तीति चेत् तत्राह—वयमिति ॥ हे तात वयं हि ब्राह्मणाः सर्वोत्कृष्टाः क्षमयैवार्हणतां पूज्यतां गताः प्राप्ताः । यया क्षमया सर्वलोकानां गुरुः पूज्यो देवो ब्रह्मा पारमेष्ठ्यं पदं स्थानमगात् प्राप्तवान् ॥ ३९ ॥ क्षमयेति ॥ क्षमयैव ब्राह्मी ब्राह्मणकुलसम्बन्धिनी लक्ष्मीः शमदमादितेजो रोचते प्रकाशते । यथा सौरी सूर्यस्य प्रभा रोचते तथा किं बहुना भगवानीश्वरो हरिः क्षमिणां क्षमावतामेवाशु तुष्यते प्रसन्नो भवति । तङार्षः॥४०॥ राज्ञ इति ॥ अङ्ग हे राम यतो मूर्द्धाभिषि-

अग्निहोत्रीमुपावर्त्य सवत्सां परवीरहा ॥ समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्पयत्॥३६॥स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च ॥ वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥ ३७॥ राम राम महाबाहो भवान्पापमकारषीत्॥ अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ॥३८॥ वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः ॥ यया लोकगुरुर्देवः पारमेष्ठ्यमियात्पदम् ॥ ३९ ॥ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा ॥ क्षमिणामाशु भगवां-स्तुष्यते हरिरीश्वरः ॥ ४० ॥ राज्ञो मूर्धाऽवसिक्तस्य वधो ब्रह्मवधाद् गुरुः ॥ तीर्थसंसेवया चांहो जह्यङ्गाच्युतचेतनः ॥ ४१ ॥ इति श्रीभाग वते महापुराणे नवमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ पित्रोपशिक्षितो रामस्तथेति कुरुनन्दन ॥ संवत्सरं तीर्थयात्रां चरित्वा-श्रममाव्रजत् ॥ १ ॥ कदाचिद्रेणुका याता गङ्गायां पद्ममालिनम् ॥ गन्धर्वराजं क्रीडन्तमप्सरोभिरपश्यत ॥ २ ॥ विलोकयन्ती क्रीडन्तमुदकार्थं नदीं गता ॥ होमवेलां न सस्मार किंचिच्चित्ररथस्पृहा ॥ ३ ॥

क्तस्य अभिषेकपूर्वकं राज्ये स्थापितस्य राज्ञो वधो ब्रह्मवधादपि गुरुः उत्कटपापजनकः तस्मात्त्वमच्युते भगवति चेतना चित्तं यस्य तथाभूतः संस्तीर्थानां गङ्गादीनां सम्यक् सेवया चकाराद्यमनियमादिभिश्च अंहोऽर्जुनवधपापं जहि अपाकुरु ॥ ४१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमस्येमां पञ्चदशे व्यधात् ॥१५॥ षोडशे तु हते ताते रामः क्षत्रवधं व्यधात् ॥ विश्वामित्रान्वयश्चात्र श्लोकाः सार्द्धा नगाग्नयः ॥ उवाचेत्येकमेवाथ श्लोकैस्तुल्या अनुष्टुभः ॥ १६ ॥ पित्रेति ॥ हे कुरुनन्दन एवं पित्रोपशिक्षित आदिष्टो रामस्तथास्त्विति अङ्गीकृत्य संवत्सरपर्यन्तं तीर्थचर्यां चरित्वा कृत्वा पुनराश्रममाययौ ॥ १ ॥ कदाचिदिति ॥ कदाचित् रेणुका गङ्गायां याता सती तत्र अप्सरोभिः सह क्रीडन्तं पद्ममालिनं गन्धर्वराजं चित्ररथाख्यमपश्यत् ॥ २ ॥ विलोकयन्तीति ॥ उदकार्थं नदीं गङ्गां गता तं गन्धर्वराजं क्रीडन्तं विलोकयन्ती सती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चिदीषच्चित्ररथे स्पृहा यस्याः सा रेणुका होमवेलां न सस्मार विस्मृतवती किञ्चिन्न सस्मारेति वा। चक्रवर्त्ती तु रेणुकादोषाभावाय चित्रमये गन्धर्वराजस्य रथे दर्शनकौतुकार्थं स्पृहा यस्या इति व्याचष्टे ॥ ३ ॥ कालेति ॥ ततश्च तं कालात्ययं विलोक्य मुनेः जमदग्नेः शापाद्विशङ्किता भीता सा रेणुका आगत्य मुनेः पुरोऽग्रे जलकलशं निधाय कृताञ्जलिः संयोजिताञ्जलिः सती तस्थौ ॥४॥ व्यभीति ॥ ततो मुनिः योगप्रभावेणैव पत्न्या रेणुकाया व्यभिचारं मानसं चित्ररथस्पृहात्मकं ज्ञात्वा। चक्रवर्ती तु होमवेलायाः प्रागेव जलमानेष्यामीति वचनस्य व्यभिचारं ज्ञात्वेति व्याचष्टे। प्रकुपितः सन् पुत्रानब्रवीत्। हे पुत्रकाः पापां परपुरुषे दत्तचित्तामेनां स्वमातरं घ्नत मारयत। ते पुत्रा इत्येवमुक्ता अपि मातृवधं न चक्रिरे ॥ ५ ॥ राम इति ॥ ततः रामः पित्रा सञ्चोदितः आज्ञोल्लङ्घिनां भ्रातॄणां मातुश्च वधे प्रेरितो रामः भ्रातॄन्मात्रा सह अवधीत् यतः सः रामः मुनेः पितुः समाधेस्तपसश्च सम्यक् प्रभावज्ञः आसीत्। यदि न हन्यां तर्हि मामपि शप्तुं शक्तः यदि हन्यां तदा प्रसादितः सन् मृतानपि पुनर्जीवयितुं शक्त इति जानन्नासीदिति ॥ ६ ॥ वरेणेति ॥ ततः प्रीतः सन् सत्यवतीसुतः जमदग्निस्तं वरेण छन्दयामास वरं वृणीष्वेति चोदयामास तदा रामोऽपि हतानां भ्रात्रादीनां पुनर्जीवनं तेषामात्मवधे अस्मृतिं च वव्रे ॥७॥ उत्तस्थुरिति ॥ ततस्ते भ्रातरः निद्रान्त इवाञ्जसा अनायासेन कुशलिनः पुनर्जीवन्तः सन्तः उत्तस्थुः। एवं पितुस्तपो वीर्यं विद्वान् रामः सुहृदां भ्रात्रादीनां वधं चक्र इति ॥ ८ ॥ सर्वक्षत्रवधे कारणं वक्तुमाह—ये इति ॥ हे राजन् अर्जुनस्य ये सुताः रामवीर्येण पराभूताः पलायितास्ते स्वपितुर्वधं रामकृतं स्मरन्तः कचिदपि शर्म्म सुखं न लेभिरे ॥ ९ ॥ एकदेति ॥ एकदा तु सभ्रातरि भ्रातृभिः सहिते रामे स्वाश्रमाद्वनं गते सति लब्धं च्छिद्रं जमदग्निवधावसरो यैस्ते वैरं सिसाधयिषवः तद्वधेन प्रतिकर्त्तुमिच्छवोऽर्जुनसुतास्तदाश्रममुपागमन् ॥ १० ॥ दृष्ट्वेति ॥ पापे तद्धनने एव निश्चयो येषां ते तत्राग्न्यगारे अग्निशालायामासीनमुत्तमश्लोके भगवति आवेशिता स्थिरीकृता धीर्येन तं मुनिं जमदग्निं दृष्ट्वा जघ्नुः हतवन्तः ॥ ११ ॥

कालात्ययं तं विलोक्य मुनेः शापविशङ्किता ॥ आगत्य कलशं तस्थौ पुरोधाय कृताञ्जलिः ॥ ४ ॥ व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् ॥ घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ॥ ५ ॥ रामः संचोदितः पित्रा भ्रातॄन् मात्रा सहावधीत् ॥ प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ॥ ६ ॥ वरेण छन्दयामास प्रीतः सत्यवतीसुतः ॥ वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ॥ ७ ॥ उत्तस्थुस्ते कुशलिनो निद्रापाय इवाञ्जसा ॥ पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ॥ ८ ॥ येऽर्जुनस्य सुता राजन् स्मरन्तः स्वपितुर्वधम् ॥ रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ॥ ९ ॥ एकदाऽऽश्रमतो रामे सभ्रातरि वनं गते ॥ वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् ॥ १० ॥ दृष्ट्वाग्न्यगार आसीनमावेशितधियं मुनिम् ॥ भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याच्यमाना इति ॥ तदा च कृपणया दीनया राममात्रा रेणुकया याच्यमानाः मैनं मारयतेति प्रार्थ्यमाना अपि अतिदारुणाः क्षत्रबन्धवः क्षत्राधमास्ते प्रसह्य बलात् तस्य शिर उत्कृत्य छित्त्वा निन्युः स्वपुरीं नीतवन्तः ॥१२॥ रेणुकेति ॥ दुःखशोकाभ्यामार्त्ता पीडिता अत एवात्मनाऽत्मानं हस्ताभ्यां शिरआदि निघ्नती ताडयन्ती सती रेणुका हे राम हे राम हे तात एहि शीघ्रमागच्छ ओमाङोश्चेति पररूपे गुणः । इत्येवमुच्चकैः चुक्रोश आजुहाव॥१३॥ तदिति ॥ ततस्तस्याः हा रामेत्यार्तवत्स्वनं पीडोपलक्षितं शब्दं दूरस्थो रामः उपश्रुत्य त्वरयाश्रममासाद्य हतं पितरं ददर्श । तङार्षः ॥१४॥ तदिति युग्मम् ॥ तत्तदा दुःखरोषादीनां वेगेन विमोहितो रामः हा तात हे साधो हे धर्मिष्ठ अस्मान् त्यक्त्वा भवान् स्वर्गत एवं विलप्य रक्षार्थं पितुर्देहं भ्रातृषु निधाय स्वयं परशुं प्रगृह्य क्षत्रान्ताय क्षत्रियकुलविनाशाय मनो दधे सङ्कल्पं कृतवान् ॥१५॥१६॥ गत्वेति सार्द्धम्॥

याच्यमानाः कृपणया राममात्राऽतिदारुणाः ॥ प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबन्धवः ॥ १२ ॥ रेणुका दुःखशोकार्ता निघ्नन्त्यात्मानमात्मना ॥ राम रामेहि तातेति विचुक्रोशोच्चकैः सती ॥ १३ ॥ तदुपश्रुत्य दूरस्थो हा रामेत्यार्तवत् स्वनम् ॥ त्वरयाऽऽश्रममासाद्य ददृशे पितरं हतम् ॥ १४ ॥ तद्दुःखरोषामर्षार्तिशोकवेगविमोहितः ॥ हा तात साधो धर्मिष्ठ त्यक्त्वाऽस्मान् स्वर्गतो भवान् ॥१५॥ विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् ॥ प्रगृह्य परशुं रामः क्षत्रान्ताय मनो दधे ॥ १६ ॥ गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियम् ॥ तेषां स शीर्षभी राजन् मध्ये चक्रे महागिरिम् ॥ तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहाम् ॥१७॥ हेतुं कृत्वा पितृवधं क्षत्रेऽमङ्गलकारिणि ॥ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ॥ स्यमन्तपञ्चके चक्रे शोणितोदान् ह्रदान् नव ॥१८॥ पितुः कायेन सन्धाय शिर आदाय बर्हिषि ॥ सर्वदेवमयं देवमात्मानमयजन्मखैः ॥ १९ ॥ ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम् ॥ अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् ॥ २० ॥ अन्येभ्योऽवान्तरदिशः कश्यपाय च मध्यमाम् ॥ आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परम् ॥ २१ ॥

हे राजन् ततश्च स रामः ब्रह्मघ्नैर्निमित्तभूतैः विहता श्रीर्यस्यास्तां माहिष्मतीं पुरीं गत्वा तन्मध्ये तेषां क्षत्रियाधमानां शीर्षभिश्छिन्नैः शिरोभिः । आर्षः शीर्षन् शब्दः । महागिरिं चक्रे । तथा तेषां रक्तेन अब्रह्मण्यानां भयावहां घोरां भयङ्करीं नदीं चक्रे ॥१७॥ हेतुमिति सार्द्धम् ॥ क्षत्रे अमङ्गलकारिणि अन्यायवर्तिनि सति पितृवधं हेतुं निमित्तं कृत्वा प्रभुर्भगवान् रामः त्रिःसप्तकृत्वः एकविंशतिवारान् पृथ्वीं निःक्षत्रियां क्षत्रियबीजरहितां कृत्वा स्यमन्तपञ्चकाख्ये देशे शोणितोदान् ह्रदान् चक्रे । ह्रदान्नृपेति ह्रदान्नवेति च पाठौ । त्रिःसप्तकृत्वो रेणुकया दुःखावेशादुरस्ताडनं कृतं ततो रामस्तावत्कृत्वः क्षत्रमुदसादयदिति प्रसिद्धिः ॥ १८ ॥ पितुरिति ॥ ततः पितुः शिर आदाय आनीय बर्हिषि यज्ञे तत्पितुः कायेन सह सन्धाय संयोज्य मखैः सर्वदेवमयं देवम् आत्मानं विष्णुमयजत् ॥१९॥ ददाविति ॥ स्पष्टम् ॥२०॥ अन्येभ्य इति ॥ अन्येभ्य ऋत्विग्भ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवान्तरदिशः आग्नेय्यादिदिशो ददौ। तन्मध्यतो भूमिं कश्यपाय ददौ। आर्यावर्त्तं विन्ध्याचलहिमागयोर्मध्यप्रदेशमुपद्रष्ट्रे ददौ ॥२१॥ ततश्चेति ॥ ततश्च ब्रह्मनद्यां सरस्वत्यामवभृथस्नानेन विधूतानि निवृत्तानि अशेषाणि किल्बिषाणि यस्य सः व्यभ्रः मेघानन्तरितः अंशुमान् सूर्य इव रेजे ॥ २२ ॥ स्वदेहमिति ॥ स जमदग्निस्तु संज्ञानं स्मृतिं चैतन्यं तदेव लक्षणं चिह्नं यस्य तथाभूतं स्वदेहं लब्ध्वा रामेण पूजितः सन् ऋषीणां सप्तर्षीणां कश्यपादिकानां मण्डले सप्तमः एकतमः अभूत् ॥ २३ ॥ जामदग्न्य इति ॥ हे राजन् कमललोचनः जामदग्न्यो रामोऽपि आगामिनि मन्वन्तरे बृहत् ब्रह्म वेदं वर्त्तयिष्यति वै। वेदप्रवर्त्तकेषु सप्तर्षिष्वेकतम एष भविष्यतीत्यर्थः ॥२४॥ आस्ते इति ॥ न्यस्तस्त्यक्तो दण्डः क्षत्रियवधादिरूपो येन प्रशान्तधीः सिद्धगन्धर्वचारणैर्देवविशेषैरुपगीयमानं चरितं यस्य स रामः महेन्द्रसंज्ञकेऽद्रौ अद्यापि आस्ते ॥ २५ ॥ एवमिति ॥ एवं विश्वस्यात्मा भगवान् ईश्वरो हरिः भृगुषु अवतीर्य भुवः परं भारं विपुलभारभूतान् नृपान् बहुशोऽहन् ॥२६॥ प्रसक्तानुप्रसक्तं समाप्य प्रस्तुतमाह—गाधेरिति ॥ समिद्धः

ततश्चावभृथस्नानविधूताशेषकिल्बिषः ॥ सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥२२॥ स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणम् ॥ ऋषीणां मण्डले सोऽभूत् सप्तमो रामपूजितः ॥२३॥ जामदग्न्योऽपि भगवान् रामः कमललोचनः ॥ आगामिन्यन्तरे राजन् वर्तयिष्यति वै बृहत् ॥२४॥ आस्तेऽद्यापि महेन्द्राद्रौ न्यस्तदण्डः प्रशान्तधीः ॥ उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥ २५ ॥ एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः ॥ अवतीर्य परं भारं भुवोऽहन् बहुशो नृपान् ॥२६॥ गाधेरभून्महातेजाः समिद्ध इव पावकः ॥ तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥ २७ ॥ विश्वामित्रस्य चैवासन् पुत्रा एकशतं नृप ॥ मध्यमस्तु मधुच्छन्दा मधुच्छन्दस एव ते ॥ २८ ॥ पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवम् ॥ आजीगर्तं सुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥ २९ ॥

प्रदीप्तः पावक इव महातेजाः विश्वामित्रो गाधेरभूत्। यो विश्वामित्रस्तपसा हेतुभूतेन क्षात्रं क्षत्रजातिमुत्सृज्य त्यक्त्वा ब्रह्मवर्चसं लेभे ब्रह्मर्षितां प्रापेत्यर्थः॥२७॥ विश्वेति ॥ हे नृप विश्वामित्रस्य चैकशतम् एकाधिकं शतं पुत्रा आसन् तेषु मध्यमः एकपञ्चाशत्तमः पुत्रो मधुच्छन्दा नाम अभूत्। तथापि ते सर्वे विश्वामित्रपुत्राः लिङ्गसमवायन्यायेन प्राणभृत उपदधातीतिवत् मधुच्छन्दस एवोच्यन्ते। इष्टकाचयने यागे प्राणप्रसिद्धमन्त्रेण संस्कृता एकैवेष्टिका प्राणभृदुच्यते तत्र पुनस्तत्प्राधान्येनान्या अपीष्टका प्राणभृत उच्यन्ते तथैवेति। छत्रिणो यान्तीति लौकिकन्यायेन समानोऽयं वैदिकन्यायः। श्रुतिर्विश्वामित्रपुत्रसङ्ख्यामाह। तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसः" इत्यादि ॥ २८ ॥ पुत्रमिति ॥ विश्वामित्रो भार्गवं भृगुवंशोत्पन्नमाजीगर्त्तमजीगर्त्तस्य सुतं देवरातापरनामानं शुनःशेपं पुत्रं कृत्वा स्वपुत्रतयाङ्गीकृत्य हे पुत्राः एष शुनःशेपः ज्येष्ठः प्रकल्प्यतां युष्माभिः स्वज्येष्ठभ्रातृत्वेनाङ्गीक्रियतामिति स्वसुतानाह स्म ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु कोऽसौ शुनः शेपस्तत्राह—य इति ॥ यः शुनः शेपः हरिश्चन्द्रस्य मखे निमित्ते पितृभ्यां स्नेहं विहाय विक्रीतः पुरुषरूपः पशुः हरिश्चन्द्रपुत्रेण रोहितेनानीतो यज्ञयूपे बद्धो विश्वामित्रं शरणं गतस्तदा तदुपदिष्टमन्त्रेण प्रजेशादीन् देवान् स्तुत्वा पाशबन्धनान्मुमुचे अमुच्यत । तत्स्तुत्या प्रसन्ना देवास्तन्मारणं विनैव यज्ञपूर्तिमङ्गीकृत्य जीवन्तमेव तं मोचयामासुरित्यर्थः ॥ ३० ॥ य इति ॥ य एवं देवयजने वरुणयज्ञे देवै रातो जीवन्नेव विमुक्तः अत एव गाधिषु गाधिवंशेषु देवरात इति ख्यातः प्रसिद्धस्तापसस्तपोनिष्ठः स एव भार्गवः शुनःशेप इत्यन्वयः ॥ ३१ ॥ शुनःशेपपरिचयमुक्त्वा प्रकृतमनुसरति—ये इति ॥ ज्येष्ठ एष प्रकल्प्यतामिति पित्रोक्ता ये विश्वामित्रसुताः मधुच्छन्दसस्तेषु ये ज्येष्ठा पञ्चाशत् ते तत् पित्रोक्तं शुनःशेपस्य ज्येष्ठत्वं कुशलं भद्रं न मेनिरे नाङ्गीकृतवन्तः । ततश्च क्रुद्धो मुनिर्विश्वामित्रस्तान् हे दुर्जनाः म्लेच्छा भवतेत्यशपत् ॥ ३२ ॥ स हेति ॥ पञ्चाशता कनिष्ठैः सह स मध्यमो मधुच्छन्दास्तत्तदनन्तरं हर्षपूर्वकं पितरमुवाच भवान् पिता नोऽस्मान् पुत्रान् यत् शुनःशेपस्य ज्येष्ठत्वाङ्गीकरणं संजानीते आज्ञा-

यो वै हरिश्चन्द्रमखे विक्रीतः पुरुषः पशुः ॥ स्तुत्वा देवान् प्रजेशादीन् मुमुचे पाशबन्धनात् ॥ ३० ॥ यो रातो देवयजने देवैर्गाधिषु तापसः ॥ देवरात इति ख्यातः शुनःशेपः स भार्गवः ॥ ३१ ॥ ये मधुच्छन्दसो ज्येष्ठाः कुशलं मेनिरे न तत् ॥ अशपत तान् मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ॥ ३२ ॥ स होवाच मधुच्छन्दाः सार्धं पञ्चाशता ततः ॥ यन्नो भवान् संजानीते तस्मिंस्तिष्ठामहे वयम् ॥ ३३ ॥ ज्येष्ठं मन्त्रदृशं चक्रुस्त्वामन्वञ्चो वयं स्म हि ॥ विश्वामित्रः सुतानाह वीरवन्तो भविष्यथ ॥ ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त माम् ॥ ३४ ॥ एष वः कुशिका वीरो देवरातस्तमन्वित ॥ अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥ ३५ ॥ एवं कौशिकगोत्रं तु वैश्वामित्रैः पृथग्विधम् ॥ प्रवरान्तरमापन्नं तद्धि चैवं प्रकल्पितम् ॥ ३६ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥

पयति तस्मिंस्तवादेशे वयं तिष्ठामहे तदर्थः ॥ ३३ ॥ ज्येष्ठमिति सार्द्धम् ॥ एवमुक्त्वा ते मन्त्रदृशं कस्य नूनं कतमस्यामृतानामित्यादिमन्त्राणां द्रष्टारं देवरातं ज्येष्ठं चक्रुः तत्र शुनःशेपमाहुः स्म । त्वामिति । वयं सर्वे त्वामन्वञ्चः स्म हि अनुगन्तारः स्म तव कनिष्ठा भवाम इत्यर्थः । ततः प्रसन्नो विश्वामित्रस्तान्सुतानाह स्म । ये यूयं मे मानं पूज्यत्वमनुगृह्णन्तः अनुवर्त्तमानाः सन्तोऽस्य ज्येष्ठत्वाङ्गीकारेण मां वीरवन्तं पुत्रवन्तमकर्त कृतवन्तः । आर्षप्रयोगः । ते यूयं वीरवन्तः पुत्रवन्तो भविष्यथ ॥ ३४ ॥ एष इति ॥ हे कुशिकाः एष वीरः देवरातो वो युष्मदीयः कौशिक एव अतस्तमेनमन्वित अनुगच्छत ततोऽन्ये चाष्टकादयस्तस्य विश्वामित्रस्य पुत्रा आसन् ॥ ३५ ॥ एवमिति ॥ एके शप्ता एकेऽनुगृहीता अन्यस्तु पुत्रत्वेन स्वीकृत इत्येवं वैश्वामित्रैर्विश्वामित्रपुत्रैः कौशिकगोत्रं पृथग्विधं नानाप्रकारं जातं तच्च प्रवरान्तरमापन्नं कुतः यस्माद्देवरातज्येष्ठत्वेन तद्देवरातप्रवरं प्रकल्पितम् । तथा च आश्वलायनबौधायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तम् । प्रवरश्च तस्मिन्नेव वंशेऽवान्तरभेदो न तु वंशान्तरम् । तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च स्मृतिः । “ एक एव ऋषिर्यावत् प्रवरेष्वनुवर्त्तते । तावत्समानगोत्रत्वं विना भृग्वङ्गिरोगणात् ॥ ” इति ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ षोडशे गङ्गासहायो नवमस्य व्यधादिमाम् ॥ १६ ॥ सप्तदशे त्वैलसूनोरायोः सूनुषु कीर्त्यते ॥ अन्वयः क्षत्रवृद्धादेस्तत्र सार्द्धा गजेन्द्रवः ॥ श्लोका अनुष्टुभश्चापि तत्रोवाचेति चैककम् ॥ १७ ॥ य इति सार्द्धम् ॥ यः पुरूरवसः पुत्रः आयुः तस्य नहुषादयः अनेनोन्ताः पञ्च सुता अभवन्। अत्र तावत् क्षत्रवृधोऽन्वयं शृणु। क्षत्रवृध इति हलन्तस्य षष्ठी ॥ १ ॥ क्षत्रवृद्धेति सार्द्धम् ॥ क्षत्रवृद्धस्य यः सुतः होत्रस्तस्य काश्यः कुशो गृत्समदः इति त्रय आत्मजा आसन् । गृत्समदात् शुनकोऽभूत् । यस्य शुनकस्य बह्वृचेषु प्रवरः श्रेष्ठो मुनिः शौनकः पुत्रोऽभूत् ॥ २ ॥ काश्यस्येति सार्द्धम् ॥ काश्यस्य पुत्रः काशिस्तस्य पुत्रो राष्ट्रः स च दीर्घतमसः पिता तस्य पुत्रो दीर्घतमा जातः । दैर्घतमः दीर्घतमसः पुत्रो धन्वन्तरिः स चायुर्वेदप्रवर्त्तकः । अयं च धन्वन्तरिः समुद्रमथनजाताद्धन्वन्तरेरन्यो भगवदंशावतारभूत इति ज्ञेयम् । यज्ञभुक् यज्ञभागभोक्ता स्मृतमात्र एवार्त्तिं रोगपीडां

श्रीशुक उवाच ॥ यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः ॥ नहुषः क्षत्रवृद्धश्च रजीरम्भश्च वीर्यवान् ॥ अनेना इति राजेन्द्र शृणु क्षत्रवृधोऽन्वयम् ॥ १ ॥ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः ॥ काश्यः कुशो गृत्समद इति गृत्समदादभूत् ॥ शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ॥ २ ॥ काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता ॥ धन्वन्तरिर्दैर्घतम आयुर्वेदप्रवर्तकः ॥ यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः ॥ ३ ॥ तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ॥ दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः ॥ ४ ॥ स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः ॥ तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥ ५ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ नालर्कादपरो राजन्मेदिनीं बुभुजे युवा ॥ ६ ॥ अलर्कात्संततिस्तस्मात्सुनीथोऽथ सुकेतनः ॥ धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ॥ ७ ॥ धृष्टकेतुः सुतस्तस्मात्सुकुमारः क्षितीश्वरः ॥ वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृप ॥ ८ ॥ इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः ॥ ९ ॥

नाशयतीति तथा ॥ ३ ॥ तत्पुत्र इति युग्मम् ॥ तस्य पुत्रः केतुमान् अस्य पुत्रो भीमरथः ततो भीमरथात् दिवोदासः तस्मात् द्युमान् जातः । स एव प्रतर्दनः स्मृतः । हे वत्स स एव शत्रुजित् ऋतध्वज इति चेरितः कथितः । तथा कुवलयाश्वेत्यपि स एव प्रोक्तः । ततः प्रतर्दनादिशब्दवाच्याद् द्युमतः अलर्कादयो जज्ञिरे ॥ ४ ॥ ५ ॥ षष्टीति ॥ षट्सहस्राधिकषष्टिसहस्रवर्षाणि अलर्क एव युवा सन् मेदिनीं भूमिं बुभुजे भूमिराज्यसुखानुभवं कृतवान् तन्मध्ये ततः अपरस्तु न तत्कृतवान् ॥ ६ ॥ अलर्कादिति ॥ अलर्कात्सन्ततिसंज्ञकः तस्मात् सुनीथः अथ तस्मात्सुकेतनः तस्माद्धर्मकेतुः सुतो जातः ततः सत्यकेतुरजायत ॥ ७ ॥ धृष्टेति ॥ तस्य धृष्टकेतुः सुतो जातः तस्मात्सुकुमाराख्यः क्षितीश्वरः भूमिपो जातः सुकुमारात् वीतिहोत्रः तस्य पुत्रो भर्गः अतो भर्गात् हे नृप भार्गभूमिः पुत्रोऽभूत् ॥ ८ ॥ इतीति अर्द्धम् ॥ इतीमे उक्ताः काशयः काशिवंशजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृपाः काशेः प्रपितामहस्य क्षत्रवृद्धस्यान्वयमयन्ति यान्तीति तथा एवं क्षत्रवृद्धान्वय उक्तः ॥ ९ ॥ रम्भस्येति ॥ रम्भस्य रभसो गभीरश्च द्वौ पुत्रौ । ततो रभसात् क्रतुः । अक्रिय इति पाठान्तरम् । तस्य क्रतोः क्षेत्रे भार्यायां ब्रह्म ब्रह्मकुलं जज्ञे । अथ अनेनसः आयोः कनीयसः पुत्रस्य वंशं शृणु ॥ १० ॥ शुद्ध इति ॥ ततः अनेनसः शुद्धः तस्माच्छुचिः तस्मात् त्रिककुप् । स एव धर्मसारथ्यपरनामधेयः । विककुदिति पाठान्तरम् । ततः त्रिककुपः शान्तरयो जज्ञे स च कृतकृत्यः आत्मवान् ज्ञानी च अतोऽपत्योत्पादनं न कृतवानिति भावः ॥ ११ ॥ रजेरिति ॥ रजेः अमितौजसां महाबलपराक्रमयुक्तानां पुत्राणां पञ्चशतान्यासन् । स च रजिर्देवैरभ्यर्थितः प्रार्थितः सन् दैत्यान् हत्वा तैर्हृतां दिवं स्वर्गं पुनरिन्द्रायाददात् ॥ १२ ॥ इन्द्र इति ॥ इन्द्रस्तु प्रह्लादादिभ्यः अरिभ्यः शङ्कितो भीतो दिवं तस्मै रजये दत्त्वा तस्य चरणौ गृहीत्वाऽत्मानमर्पयामास स्वरक्षाभारं तस्मिन्निहितवानित्यर्थः ॥ १३ ॥ पितरीति ॥ रजेः पुत्रास्तु पितरि रजावुपरते मृते सति याचमानाय महेन्द्राय त्रिविष्टपं स्वर्गं नो ददुः किं च

रम्भस्य रभसः पुत्रो गम्भीरश्चाक्रियस्ततः ॥ तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ॥ १० ॥ शुद्धस्ततः शुचिस्तस्मात् त्रिककुद्धर्मसारथिः ॥
ततः शान्तरयो जज्ञे कृतकृत्यः स आत्मवान् ॥ ११ ॥ रजेः पञ्च शतान्यासन्पुत्राणाममितौजसाम् ॥ देवैरभ्यर्थितो दैत्यान्हत्वेन्द्रायाददाद्दिवम्
॥ १२ ॥ इन्द्रस्तस्मै पुनर्दत्त्वा गृहीत्वा चरणौ रजेः ॥ आत्मानमर्पयामास प्रह्लादाद्यरिशङ्कितः ॥ १३ ॥ पितर्युपरते पुत्रा याचमानाय नो ददुः ॥
त्रिविष्टपं महेन्द्राय यज्ञभागान्समाददुः ॥ १४ ॥ गुरुणा हूयमानेऽग्नौ बलभित्तनयान्रजेः ॥ अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः ॥ १५ ॥ कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ॥ ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः ॥ १६ ॥ सहदेवस्ततोऽहीनो जयसेनस्तु तत्सुतः ॥ संकृतिस्तस्य
च जयः क्षेत्रधर्मा महारथः ॥ क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषात् ॥ १७ ॥ इति श्रीभा॰म॰ नव॰ चन्द्रवंशानुवर्णने सप्तदशोऽध्यायः ॥ १७ ॥

यज्ञभागानपि समाददुः स्वयमेव गृहीतवन्तः । तङभाव आर्षः ॥ १४ ॥ गुरुणेति ॥ अथ गुरुणा बृहस्पतिना तेषां मतिभ्रंशायाभिचारविधिनाग्नौ हूयमाने सति मार्गात् इन्द्राधिपत्यानुकूलबुद्धिरूपाद् भ्रंशितान् रजेः पुत्रान् सर्वानेव बलभित् इन्द्रोऽवधीत् कश्चिदेकोऽपि नावशेषितः ॥ १५ ॥ कुशादिति ॥ क्षात्रवृद्धात् क्षत्रवृद्धपौत्रात् कुशात् प्रतिसंज्ञः पुत्रो जातः ततः सञ्जयः तस्य सुतो जयः ततः कृतः हे नृप तस्यापि हर्यश्वकः सुतः जज्ञे ॥ १६ ॥ सहदेव इति सार्द्धम् ॥ ततः सहदेवः ततो भीमः तस्य सुतो जयसेनः तस्य सुतः संकृतिः तस्य जयः स च क्षत्रधर्मनिष्ठः महारथश्चेति क्षत्रवृद्धस्यान्वये जाता भूपा उक्ताः । अथ नाहुषान् वंशान् शृणु । " शृणु वंशं च नाहुषात् " इति पाठे तु नहुषपुत्राज्जातं वंशं शृणु इत्यर्थः ॥ १७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमस्येमां सप्तदशे व्यधात् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशे ययातेस्तु चरिते तत्सुतः पितुः ॥ जरां जग्राह पूरुस्तच्छ्लोकाः सार्द्धाः कुंभमार्गणाः ॥ अनुष्टुभोऽपि तौर्वेत्य उवाचेति गिरस्तु षट् ॥ १८ ॥ यतिरिति ॥ यतिरित्यादयः इमे षट् नहुषस्य सुता आसन् । यथा देहिनो जीवस्य षडिन्द्रियाणि वशवर्त्तीनि कार्यकारीणि च तथेत्यर्थः ॥१॥ राज्यमिति ॥ पित्रा नहुषेण दत्तमपि राज्यं तस्य राज्यस्य परिणाममनर्थावहत्वं वेत्तीति स यतिर्ज्येष्ठपुत्रः नैच्छत् । यत्र राज्ये प्रविष्टः पुरुषः आत्मानं नावबुध्यते ॥ २ ॥ पितरीति ॥ इन्द्राण्याः शच्याः धर्षणात् भोगाभिलाषदोषात् द्विजैरगस्त्यादिभिः पितरि नहुषे स्थानात् स्वर्गाद्यधिकाराद् भ्रंशिते अजगरत्वं प्रापिते च सति ययातिरेव नृपोऽभवत् । नहुषस्याजगरभावः षष्ठस्कन्धे व्याख्यातः ॥३॥चतसृ-ष्विति ॥ स भ्राता ज्येष्ठो ययातिः यवीयसः कनिष्ठान् चतुरो भ्रातॄन् संयातिप्रभृतीन् चतसृषु दिक्षु आदिशत् । पालनार्थं नियुक्तवान् इत्यर्थः । स्वयं च काव्यस्य शुक्रस्य वृषपर्वणो दानवस्य च कन्याभ्यां कृतदारः सन्नुर्वीं पृथ्वीं मध्यवर्तिनीं जुगोप ॥ ४॥ ब्रह्मर्षिरिति ॥ भगवान् काव्यो ब्रह्मर्षिर्नाहुषो ययातिस्तु क्षत्रबन्धुः राजन्यविप्रयोः प्रति-

श्रीशुक उवाच ॥ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः ॥ षडिमे नहुषस्यासन्निन्द्रियाणीव देहिनाम् ॥ १ ॥ राज्यं नैच्छद् यतिः पित्रा दत्तं तत्परिणामवित् ॥ यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ॥ २ ॥ पितरि भ्रंशिते स्थानादिन्द्राण्या धर्षणाद् द्विजैः ॥ प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ॥ ३॥ चतसृष्वादिशद् दिक्षु भ्रातॄन् भ्राताय वीयसः ॥ कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥४॥ राजोवाच ॥ ब्रह्मर्षिर्भगवान् काव्यः क्षत्रबन्धुश्च नाहुषः ॥ राजन्यविप्रयोः कस्माद् विवाहः प्रतिलोमकः ॥ ५ ॥ श्रीशुक उवाच ॥ एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका ॥ सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥६॥ देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले ॥ व्यचरत् कलगीतालीनलिनीपुलिनेऽबला ॥ ७ ॥ ता जलाशयमासाद्य कन्याः कमललोचनाः ॥ तीरे न्यस्य दुकूलानि विजह्रुः सिञ्चतीर्मिथः ॥ ८ ॥ वीक्ष्य व्रजन्तं गिरिशं सह देव्या वृषस्थितम् ॥ सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥ ९ ॥

लोमको विपरीतो विवाहः कस्माद्धेतोर्जातः अत्र ब्राह्मणकन्याग्रहणश्रवणात् ययातिः क्षत्रबन्धुत्वेन निर्दिष्टो राज्ञा अज्ञातत्वेनैवेति ॥ ५ ॥ एकदेति युग्मम् ॥ दानवेन्द्रस्य वृषपर्वणः कन्या अबला भामिनी किंचित्तारुण्यमापन्ना शर्मिष्ठेति नाम्ना प्रसिद्धा एकदा सखीनां सहस्रेण गुरोः काव्यस्य पुत्र्या देवयान्या च संयुक्ता सती पुष्पितैर्द्रुमैः सङ्कुले व्याप्ते कलमव्यक्तं मधुरं गीतं येषां ते अलयो भृङ्गा येषु तानि नलिनीपुलिनानि यस्मिंस्तस्मिन् पुरोद्याने व्यचरत् ॥ ६ ॥ ७ ॥ ता इति ॥ ताः शर्मिष्ठादयः कमललोचनाः कन्या जलाशयमासाद्य आगत्य तत्तीरे दुकूलानि न्यस्य तस्मिन्प्रविश्य मिथः सिञ्चतीः सिञ्चन्त्यः । पूर्वसवर्णदीर्घ आर्षः । विजह्रुः विहारं चक्रुः ॥ ८ ॥ वीक्ष्येति ॥ तदा ताः स्त्रियः देव्या उमया सह वृषे स्थितं व्रजन्तं गिरिशमवलोक्य व्रीडिताः सत्यः सहसा आशु उत्तीर्य तीरमारुह्य वासांसि पर्यधुः धृतवत्यः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शर्मिष्ठेति ॥ शर्मिष्ठा अजानती गुरुपुत्र्या देवयान्याः वासः स्वीयं मत्वा समव्ययत् पर्यधात् । ततो देवयानी शर्मिष्ठया धृतं वासः स्वकीयं मत्वा प्रकुपिता सतीदं वक्ष्यमाणमब्रवीत् ॥ १० ॥ अहो इति ॥ अस्याः दास्याः असाम्प्रतमयुक्तं कर्म निरीक्ष्यताम् । यदस्मद्धार्य्यं वासस्तद्धृतवती यथाऽध्वरे यज्ञे शुनी हविर्ग्रहीतुमनर्हा तद्वदियमप्यस्मद्धार्यं वस्त्रं परिधातुमनर्हेत्यर्थः ॥ ११ ॥ यैरिति ॥ यैर्ब्रह्मादिभिः प्रजापतिभिर्ब्राह्मणैरिदं विश्वं तपसा तपोबलेन सृष्टम् । ये च ब्राह्मणाः परस्य पुंसो भगवतो मुखं मुखादुत्पन्नत्वेन तृप्तिद्वारत्वेन च श्रेष्ठा इत्यर्थः । इह संसारे यैर्ब्राह्मणैः ज्योतिः स्वयंप्रकाशरूपं परं ब्रह्म उपास्यतया हृदि धार्यते यैश्च शिवः क्षेमकरः पन्था वैदिकमार्गश्च दर्शितः प्रवर्त्तित इत्यर्थः ॥ १२ ॥ यानिति ॥ यान् ब्राह्मणान् सुरेश्वराः इन्द्रादयः लोकनाथाः पातालादितत्तल्लोकाधिपतयश्च वन्दन्ति प्रणमन्ति । तङ्भाव आर्षः । उपतिष्ठन्ते स्तुवन्ति च किं बहुनोक्तेन । विश्वात्मा पावनः श्रीनिकेतनः भगवानपि प्रणमत्युपतिष्ठते ॥ १३ ॥ वयमिति ॥ तत्र तेष्वपि सर्वपूज्येष्वपि ब्राह्मणेषु वयं भृगवः सर्वब्राह्मणश्रेष्ठाः एवमप्यस्याः

शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् ॥ स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥ १० ॥ अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसाम्प्रतम् ॥ अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥ यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये ॥ धार्यते यैरिह ज्योतिः शिवः पन्थाश्च दर्शितः ॥ १२ ॥ यान् वदन्त्युपतिष्ठन्ते लोकनाथाः सुरेश्वराः ॥ भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥ १३ ॥ वयं तत्रापि भृगवः शिष्योऽस्या नः पिताऽसुरः ॥ अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती ॥ १४ ॥ एवं शपन्तीं शर्मिष्ठा गुरुपुत्रीमभाषत ॥ रुषा श्वसन्त्युरङ्गीव धर्षिता दष्टदच्छदा ॥ १५ ॥ आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि ॥ किं न प्रतीक्षसेऽस्माकं गृहान् बलिभुजो यथा ॥ १६ ॥ एवंविधैः सुपरुषैः क्षिप्त्वाचार्यसुतां सतीम् ॥ शर्मिष्ठा प्राक्षिपत् कूपे वास आदाय मन्युना ॥ १७ ॥ तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ॥ प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ १८ ॥

पिता असुरः नोऽस्माकं शिष्यः असती तत्पुत्रीयमस्माभिः सर्वोत्कृष्टैर्द्धार्य्यं वस्त्रं यद्धृतवती तदयुक्तमेव कृतवती यथा त्रिवर्णहीनो नाधिकारी शूद्रस्तद्धार्य्यं वेदं धारयेत्तद्वदित्यर्थः ॥ १४ ॥ एवमिति ॥ एवं शपन्तीं तिरस्कुर्वतीं गुरुपुत्रीं देवयानीं धर्षिता तिरस्कृता दष्टो दच्छदोऽधरोष्ठो यया सा शर्मिष्ठा पादाक्रान्ता उरङ्गी सर्पीव रुषा क्रोधेन श्वसन्ती । नुमार्षः । अभाषत ॥ १५ ॥ आत्मवृत्तमिति ॥ हे भिक्षुकि त्वमात्मवृत्तं भिक्षुत्वमविज्ञाय अननुसन्धायैव बहु कत्थसे आत्मानं श्लाघसे । यथा बलिभुजो वायसाः श्वानो वा तथा त्वमस्माकं गृहान् जीवनार्थं किं न प्रतीक्षसे ॥ १६ ॥ एवमिति ॥ एवंविधैरन्यैरपि परुषैर्वचोभिराचार्यसुतां सतीं पूज्यां देवयानीं शर्मिष्ठा क्षिप्त्वा उपालभ्य मन्युना क्रोधेन तत्परिधृतं वासो वस्त्रमादाय आच्छिद्य तां कूपे प्राक्षिपत् पातयामास ॥ १७ ॥ तस्यामिति ॥ अथ तस्यां शर्मिष्ठायां स्वगृहं प्रति गतायां सत्यां मृगयां चरन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलार्थी ययातिर्यदृच्छया अकस्मादेव तत्र कूपे प्राप्तः संस्तत्र कूपे तां देवयानीं नग्नां ददर्श ॥ १८ ॥ दत्त्वेति ॥ दृष्ट्वा च दयापरो राजा विवाससे तस्यै देवयान्यै स्वमुत्तरीयं वासो दत्त्वा पाणिना तत्पाणिं गृहीत्वा तां कूपादुज्जहार निःसारितवान् ॥१९॥ तमिति सार्द्धम् ॥ तमात्मानमुद्धृतवन्तं वीरं ययातिमौशनसी काव्यकन्या देवयानी प्रेम्णा निर्भरया पूर्णया गिरा आह स्म । हे राजन् परपुरञ्जय हि यतः त्वया मे मम पाणिर्गृहीतः तस्मात्त्वया गृहीताया मे हस्तग्राहकस्त्वत्तोऽपरो मा भूत् त्वमेव मामुद्वहेत्यर्थः ॥२०॥ एष इति ॥ हे वीर नौ आवयोरेष भर्तृभार्याभावरूपः सम्बन्ध ईश्वरकृत इति न पौरुषः न पुरुषसम्पादितः अतो न प्रातिलोम्यदोष इत्यर्थः । यत् यस्मात् कूपमग्नाया ममेदमसम्भावितं भवतो दर्शनं जातं तस्मादावयोरयं सम्बन्ध ईशेच्छया कृत इत्यनुमयित इत्यर्थः ॥ २१ ॥ नेति ॥ हे महाभुज यं कचमहं पुरा अशपं तस्य बार्हस्पत्यस्य बृहस्पतिसुतस्य कचस्य शापात् मे मम हस्तग्राहो भर्त्ता ब्राह्मणो न भविता न भविष्यति । बृहस्पतेः सुतः कचः शुक्रान्मृतसञ्जीवनीं विद्यामध्यगात् तदा देवयानी तं पतिं

दत्त्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे ॥ गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥१९॥ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ॥ राजंस्त्वया गृहीतो मे पाणिः परपुरञ्जय ॥ हस्तग्राहोऽपरो मा भूद् गृहीतायास्त्वया हि मे ॥ २० ॥ एष ईशकृतो वीर संबन्धो नौ न पौरुषः ॥ यदिदं कूपलग्नाया भवतो दर्शनं मम ॥ २१ ॥ न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ॥ कचस्य बार्हस्पत्यस्य शापाद् यमशपं पुरा ॥ २२ ॥ ययातिरनभिप्रेतं दैवोपहृतमात्मनः ॥ मनस्तु तद्गतं बुद्ध्वा प्रतिजग्राह तद् वचः ॥२३ ॥ गते राजनि सा वीरे तत्र स्म रुदती पितुः ॥ न्यवेदयत् ततः सर्वमुक्तं शर्मिष्ठया कृतम् ॥ २४ ॥ दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ॥ स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ॥२५॥ वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् ॥ गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि ॥ २६ ॥

चकमे । स च गुरुपत्नी त्वं मम पूज्येत्युक्त्वा न तामुपयेमे। ततः सापि कुपिता सती तवेयं विद्या निष्फला भवत्विति शशाप । स च तव पतिर्ब्राह्मणो न भविष्यतीति शशापेति कथात्रानुसन्धेया ॥ २२ ॥ ययातिरिति ॥ ततो ययातिरशास्त्रीयत्वात् अनभिप्रेतमपि दैवोपहृतमीश्वरेच्छया प्रापितं बुद्ध्वा तथा तद्गतं तस्यामासक्तमात्मनो मनश्च बुद्ध्वा न त्वधर्मे मदीयं मनः प्रवर्त्तत इति निश्चित्य तस्या वचो जग्राह पिता दास्यति चेत्तर्ह्यहं त्वामङ्गीकरिष्यामीत्युक्तवानित्यर्थः ॥ २३ ॥ गत इति ॥ वीरे राजनि ययातौ गते सति सा देवयानी तत्र ततो रुदती पितुः समीपमेत्येति शेषः । ततः शर्मिष्ठा या भिक्षुकीत्यादि यदुक्तं यच्च कूपप्रक्षेपादि कृतं तत्सर्वं न्यवेदयत् ॥ २४ ॥ दुर्मना इति ॥ तच्छ्रुत्वा भगवान् काव्यः शुक्रः दुर्मनाः दुःखिताचित्तः सन् पुरोहितवृत्तिं विगर्हयन् कापोतीमुञ्छवृत्तिं स्तुवंश्च दुहित्रा सह वृषपर्वणः पुरात् ययौ निश्चक्राम ॥२५॥ वृषपर्वेति ॥ ततः वृषपर्वा प्रत्यनीका देवास्ते विवक्षिता जयं प्रापणीया इत्यभिप्रेतं यस्य प्रत्यनीकानां विवक्षितं वा प्रत्यनीकेषु देवेषु विवक्षितम् असुरांस्त्यक्त्वा युष्मानेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयं प्राप्स्यामीत्यादिकं वक्तुमिष्टं यस्येति वा तथाभूतं गुरुमाज्ञाय ज्ञात्वा पथि गच्छन्तं प्रसादयन् मूर्ध्ना तस्य पादयोः पतितः ॥२६॥ क्षणार्द्धमन्युरिति ॥ क्षणार्धमेव मन्युः क्रोधो यस्य स भगवान् भार्गवः काव्यः शिष्यं वृषपर्वाणमाचष्ट अब्रवीत् । हे राजन् अस्याः देवयान्याः कामः क्रियतां मनोरथः सम्पाद्यताम् । एतां देवयानीं त्यक्तुमु- दासीनां कर्त्तुं नोत्सहे ॥ २७ ॥ तथेति ॥ तथैवास्त्वित्यङ्गीकृत्य वृषपर्वणि अवस्थिते सति देवयानी स्वमनोगतं प्राह स्म । पित्रा दत्ता सत्यहं यतो यत्र यास्ये गमिष्यामि। तङार्षः । तत्रेयं शर्मिष्ठा सानुगा सखीसहिता मामनुयातु मद्दास्यं कर्त्तुमनुगच्छतु ॥ २८ ॥ स्वानामिति ॥ शर्मिष्ठा च तत् तस्माद्देवयान्या दौर्मनस्यात् तस्मान्निर्गताच्छु- क्राद्वा स्वानां पित्रादीनां च सङ्कटं वीक्ष्य तत् तस्माद्देवयानीसंमानात्तस्मादवस्थिताच्छुक्राद्वा अर्थस्य कार्यस्य गौरवं वीक्ष्य स्त्रीसहस्रेण सह दासीवत् देवयानीं पर्यचरत् । यद्वा । तत् ततः कुपिताच्छुक्रादसुराणां सङ्कटं वीक्ष्य तथा प्रसन्नात्ततः प्रयोजनस्य गौरवं वीक्ष्य वृषपर्वा स्वस्त्रीसहस्रेण दासवत् देवयानीं पर्यचरत् । अत्रार्थे दासवदित्यस्य

क्षणार्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः ॥ कामोऽस्याः क्रियतां राजन् नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥ तथेत्यवस्थिते प्राह देवयानी मनो- गतम् ॥ पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥ २८ ॥ स्वानां तत् संकटं वीक्ष्य तदर्थस्य च गौरवम् ॥ देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् ॥ २९ ॥ नाहुषाय सुतां दत्त्वा सह शर्मिष्ठयोशना ॥ तमाह राजन् शर्मिष्ठामाऽऽधास्तल्पे न कर्हिचित् ॥ ३० ॥ विलोक्यौशनसीं राजन् शर्मिष्ठा सप्रजां क्वचित् ॥ तमेव वव्रे रहसि सख्याः पतिमृतौ सति ॥ ३१ ॥ राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् ॥ स्मरन् शुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥ ३२ ॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत ॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥ गर्भसंभवमासुर्या भर्तुर्विज्ञाय मानिनी ॥ देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ॥ ३४ ॥

दासीवदिति क्लेशोऽपि न ॥ २९ ॥ नाहुषायेति ॥ ततश्च उशना शुक्रः शर्मिष्ठया सह सुतां देवयानीं नाहुषाय ययातये दत्त्वा हे राजन् तल्पे शय्यायां शर्मिष्ठां कर्हिचिदपि मा धाः नोपगच्छेरिति तं ययातिमाह स्म ॥ ३० ॥ विलोक्येति ॥ ततश्च हे राजन् कदाचित् शर्मिष्ठा औशनसीं देवयानीं सप्रजां पुत्रवतीं विलोक्य स्वयमपि ऋतौ सति सख्या देवयान्याः पतिं तं ययातिमेव वव्रे । अपत्यार्थं सङ्गमं प्रार्थितवतीत्यर्थः । सतीति दीर्घपाठे पुरुषान्तरसम्बन्धरहितेत्यर्थः ॥ ३१ ॥ राजेति ॥ एवमपत्ये अपत्यार्थं राजपुत्र्या शर्मिष्ठया च अर्थितः धर्मवित् ययातिः धर्ममवेक्ष्यापत्यार्थमृतुकाले प्रार्थयमानायाः कामपूरणं धर्म एवेति विचार्य भृगुवचः " शर्मिष्ठां कर्हिचित्तल्पे मा धाः " इति वचः स्मरन्नपि काले ऋतुकाले दिष्टं दैवप्रापितं तत्सङ्गममभ्यपद्यत प्राप न तु कामत इत्यर्थः ॥ ३२ ॥ यदुमिति ॥ तत्र देवयानी यदुं तुर्वसुं च द्वौ पुत्रौ व्यजायत सुषुवे । वार्षपर्वणी वृषपर्वणो दुहिता शर्मिष्ठा तु द्रुह्युमनुं पूरुं चेति त्रीन् सुतान् व्यजायत ॥ ३३ ॥ गर्भेति ॥ ततो भामिनी देवयानी स्वभर्तुः सकाशादेवासुर्याः शर्मिष्ठाया गर्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्भवं विज्ञाय क्रोधेन विमूर्च्छिता व्याप्ता सती पितुर्गेहं ययौ ॥ ३४ ॥ प्रियामिति ॥ यतः कामी अतो ययातिरपि तां प्रियां देवयानीमेवानुगतः सन् मार्गे पादसंवाहनादिभिः पादस्पर्शादिकायिकव्यापारैर्वचोभिश्चोपमन्त्रयन् प्रसादयन्नपि तां प्रसादयितुं न शेके ॥ ३५ ॥ शुक्र इति ॥ ततश्च देवयान्या निवेदितवृत्तान्तः कुपितः शुक्रः राजानं प्रत्याह स्म । हे स्त्रीकाम स्त्रीलोभिन् हे अनृतप्रतिज्ञ पुरुष हे मन्द मन्दबुद्धे नृणां विकृतं रूपं करोतीति विरूपकरणी जरा त्वां विशतां प्रविशत्विति । तङार्षः ॥३६॥ अतृप्त इति ॥ एवं शुक्रशापं श्रुत्वा ययातिरुवाच । हे ब्रह्मन् ते तव दुहितरि कामानां कामभोगैरहमद्यपर्यन्तमप्यतृप्तोऽस्मीति । एवमुक्तः शुक्र आह । यद्येवं तर्हि यः कश्चित्तव स्नेही पुत्रादिर्जरामभिधास्यति धारयिष्यति धारयेत्तस्य वयसा यौवनेन कामं यथेच्छं शापेन त्वया प्राप्ता जरा त्वया व्यत्यस्यताम् व्यत्ययं नीयताम् । यद्वा । व्यत्यस्येति च्छेदः । तां जरां त्वं व्यत्यस्य व्यत्यासं गमयेति ॥३७॥ इतीति युग्मम् ॥ इत्येवं लब्धं व्यवस्थानं जराव्यवस्थितिर्येन स ययातिः ज्येष्ठं पुत्रं यदुमवोचत । हे यदो हे तात वत्स इमां

प्रियामनुगतः कामी वचोभिरुपमन्त्रयन् ॥ न प्रसादयितुं शेके पादसंवाहनादिभिः ॥३५॥ शुक्रस्तमाह कुपितः स्त्रीकामानृत पूरुष ॥ त्वां जरा विशतां मन्द विरूपकरणी नृणाम् ॥ ३६ ॥ ययातिरुवाच ॥ अतृप्तोऽस्म्यद्य कामानां ब्रह्मन् दुहितरि स्म ते व्यत्यस्यतां यथाकामं वयसा योऽभिधास्यति ॥ ३७ ॥ इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत ॥ यदो तात प्रतीच्छेमां जरां देहि निजं वयः ॥ ३८ ॥ मातामहकृतां वत्स न तृप्तो विषयेष्वहम् ॥ वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥ ३९ ॥ यदुरुवाच ॥ नोत्सहे जरसा स्थातुमन्तरा प्राप्तया तव ॥ अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥ ४० ॥ तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ॥ प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥ ४१ ॥

तव मातामहेन कृतां प्रापितां जरां त्वं प्रतीच्छ गृहाण । निजं त्वदीयं वयः यौवनं मह्यं देहि । यतो विषयभोगेष्वहं न तृप्तोऽस्मि अतः भवदीयेनैव वयसाऽहं कतिचित्समाः संवत्सरान् रंस्ये विषयसुखमनुभविष्यामि ॥ ३८ ॥ ३९ ॥ नेति ॥ तवान्तरा वयोमध्ये एव प्राप्तया जरसा स्थातुमहं नोत्सहे । यतो ग्राम्यं सुखमविदित्वा अननुभूय पूरुषः वैराग्यं न प्राप्नोति अतोऽहमपि तथाविधत्वेन वैराग्याभावान्न यौवनं दातुमुत्सहे इत्याशयः । अस्याशयं चक्रवर्त्ती प्राह स्म । मम भगवद्भजनविलम्बो दुःसहः भजने च विषयवैतृष्ण्यमपेक्षितं तच्च प्रायो भोगबाहुल्यं विना न भवेत् अतो विलम्बकारि जराग्रहणं कर्तुं नेच्छामि इति मम श्रीपितृचरणाः श्रीरामधनाख्यास्तु प्राहुः । स्ववयसा स्वमातृभोगानौचितीपर्यालोचननिबन्धनमिदं प्रत्याख्यानमिति ॥ ४० ॥ तुर्वसुरिति ॥ हे भारत पित्रा ययातिना तुर्वस्वादयस्त्रयः पुत्रा अपि चोदिता यौवनदानायानुज्ञाताः सन्तो यदुवत्प्रत्याचख्युः । यतः ते अधर्मज्ञा इति पित्राज्ञानुसरणं परो धर्म इत्यजानन्तः अनित्ये देहे यौवनादौ च नित्यबुद्धय इति इदं चाधर्मज्ञा इत्यादि कथनं तुर्वस्वादी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुद्दिश्यैव यदोश्च धर्मशीलस्येत्यादिविरोधात् ॥ ४१ ॥ अपृच्छदिति ॥ ततश्च यदुप्रभृतिभ्यः वयसा ऊनं कनिष्ठं विद्याविनयादिभिर्गुणैरधिकं स्वतनयं पूरुं हे वत्स किं त्व मज्जरां गृहीत्वा स्वयौवनं दास्यसीत्यपृच्छत् । ततश्चाग्रजवत्त्वं मां प्रत्याख्यातुं नार्हसीत्याह स्म॥४२॥क इति ॥ हे मनुष्येन्द्र यस्य प्रसादादनुग्रहात् परमैहिकामुष्मिकपुरुषार्थं विन्दते लभते तस्य आत्मकृतः देहोत्पादकस्य पितुः प्रतिकर्त्तुं प्रत्युपकारं कर्त्तुं लोके को नु पुमान् क्षमः समर्थः ॥ ४३ ॥ उत्तम इति ॥ प्रतिक्रियायामसामर्थ्येऽपि यः पुत्रः पितुश्चिन्तितमभिप्रेतं कुर्यात् स उत्तमः । यस्तु प्रोक्तकारी स मध्यमः । यस्त्वश्रद्धया कुर्यात् सोऽधमः । यस्तु प्रोक्तोऽप्यश्रद्धयाप्यकर्त्ता स पितुरुच्चरितं पुरीषप्रायः ॥ ४४ ॥ इतीति ॥ हे नृप इत्येवमुक्त्वा प्रमुदितः हर्षयुक्तः पूरुः स्वीयं यौवनं दत्त्वा पितुर्जरां प्रत्यगृह्णात् । ततः स ययातिरपि तद्दत्तेन वयसा यौवनेन यथावत् यथासुखं कामान् विषयान् जुजुषे सेवितवान् ॥ ४५ ॥ सप्तेति ॥ सप्तद्वीपपतिः ययातिः भारतवर्षवर्त्तिनो ये नव द्वीपास्तेष्वाद्यन्तौ विहाय सप्तानां द्वीपानां पतिरिति व्याख्येयम् । अग्रिमग्र-

अपृच्छत् तनयं पूरुं वयसोनं गुणाधिकम् ॥ न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ॥ ४२ ॥ पूरुरुवाच ॥ को नु लोके मनुष्येन्द्र पितुरात्मकृतः पुमान् ॥ प्रतिकर्तुं क्षमो यस्य प्रसादाद्विन्दते परम् ॥ ४३ ॥ उत्तमश्चिन्तितं कुर्यात्प्रोक्तकारी तु मध्यमः ॥ अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥४४॥ इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ॥ सोऽपि तद्वयसा कामान्यथावज्जुजुषे नृप ॥ ४५ ॥ सप्तद्वीपपतिः सम्यक् पितृवत्पालयन्प्रजाः ॥ यथोपजोषं विषयाञ्जुजुषे व्याहतेन्द्रियः ॥४६॥ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ॥ प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥ ४७ ॥ अयजद् यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः ॥ सर्वदेवमयं देवं सर्ववेदमयं हरिम् ॥ ४८ ॥ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ॥ नानेव भाति नाभाति स्वप्नमायामनोरथः ॥ ४९ ॥ तमेव हृदि विन्यस्य वासुदेवं गुहाशयम् ॥ नारायणमणीयांसं निराशीरयजत् प्रभुम् ॥ ५० ॥

न्थानुरोधात् । अव्याहतानि अश्रान्तानि दृढानीन्द्रियाणि यस्य तथाभूतः सम्यक् पितृवत् प्रजाः पालयन् यथोपजोषं यथाप्रीति विषयान् जुजुषे ॥ ४६ ॥ देवयानीति ॥ तत्प्रेयसी भार्या देवयान्यप्यनुदिनं मनसा स्नेहातिशयेन वाचा मधुरभाषणेन देहेन परिचर्यादिना अभीष्टवस्तुसमर्पणेन च रहः एकान्ते प्रेयसो भर्त्तुस्तस्य परमां प्रीतिं प्रसन्नतामुवाह ॥४७॥ अयजदिति ॥ तथा भूरिदक्षिणैः क्रतुभिःसर्ववेदमयं देवं सर्ववेदमयं च हरिमयजत् ॥४८॥ यस्मिन्निति ॥ स्वप्नः माया इन्द्रजालादिः ताभ्यां सहितो मनोरथः तद्रूपमेवेदं जगत् यस्मिन् हरौ व्योम्नि आकाशे जलदावलिः मेघपङ्क्तिरिव व्यवहारदशायां यावदिन्द्रियप्रवृत्तिस्तावन्नानादेहेन्द्रियविषयादिभेदभिन्नमेव भाति । सुषुप्तौ प्रलये इन्द्रियवृत्त्युपरमे तु न भाति ॥ ४९ ॥ तमिति ॥ तमेव वासुदेवं गुहाशयम् अणीयांसं अतिसूक्ष्मं प्रभुं नारायणं हृदि विन्यस्य निराशीर्निष्कामः सन् अयजत् ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं पूर्वोक्तप्रकारेण मनः षष्ठं येषां तैः कुत्सितैर्विषयासक्तैरिन्द्रियैर्वर्षसहस्राणि मनःसुखं कामभोगं विदधानः कुर्वन्नपि सार्वभौमोऽपि ययातिर्नातृप्यत् ॥ ५१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमस्येमामष्टादशे व्यधात् ॥१८॥ ऊनविंशे ययातिस्तु छागोक्त्या चरितं निजम् ॥ उक्त्वा मुक्तिमगात्तत्र श्लोकाः सार्द्धास्तु गोदृशैः ॥ उवाचेत्येकमङ्घ्यूना अत्र त्रिंशदनुष्टुभः ॥ १९ ॥ स इति ॥ इत्थं पूर्वोक्तप्रकारेण स्त्रैणः स्त्रीवश्यः स ययातिः कामान् विषयान् आचरन्नुपभुञ्जानः भोगेनात्मनः अपह्नवं तिरस्कारमन्यथाभावं बुद्ध्वा निर्विण्णो भोगाद्विरक्तः प्रियायै देवयान्यै एतां वक्ष्यमाणां गाथां कथामगायत कथयामास । तद्गार्षः ॥ १ ॥ शृण्विति ॥ हे भार्गवि यस्य ग्रामनिवासिनो मद्विधस्य गृहस्थस्य चरितमनुभूय वने स्थिता धीरा जितेन्द्रियाः कथमस्य भद्रं स्यादित्यनुशोचन्ति । तेन भुवि मद्विधस्याचरितमिवाचरितं यस्यांताममूं वक्ष्यमाणां गाथां शृणु । समासे गुणीभूतस्यापि मद्विधस्य यच्छब्देन परामर्श औचित्यात् ॥ २ ॥ बस्त इति ॥ एकोऽसहायः कश्चिद्बस्तः छागः वने आत्मनः

एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखम् ॥ विदधानोऽपि नातृप्यत् सार्वभौमः कदिन्द्रियैः ॥ ५१ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे अष्टादशोऽध्यायः ॥ १८ ॥ श्रीशुक उवाच ॥ स इत्थमाचरन् कामान् स्त्रैणोपह्नवमात्मनः ॥ बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥१॥ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ॥ धीरा यस्यानुशोचन्ति वने ग्रामनिवासिनः ॥२॥ बस्त एको वने कश्चिद् विचिन्वन् प्रियमात्मनः ॥ ददर्श कूपे पतितां स्वकर्मवशगामजाम् ॥ ३ ॥ तस्या उद्धरणोपायं बस्तः कामी विचिन्तयन् ॥ व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ॥४॥ सोत्तीर्य कूपात् सुश्रोणी तमेव चकमे किल ॥ तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः ॥ पीवानं श्मश्रुलं श्रेष्ठं मीढ्वांसं याभकोविदम् ॥ ५ ॥ स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः ॥ रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥ ६ ॥

स्वस्य प्रियं विचिन्वन् कूपे पतितां कर्मवशगां काञ्चिदजां ददर्श । अत्र बस्ताजाशब्दाभ्यामतिशयोक्त्या अप्रस्तुतप्रशंसया वा स्वस्य देवयान्याश्च वृत्तान्तो वर्ण्यते । क्वचित्कथासौष्ठवार्थं न्यूनाधिकमपि ॥ ३ ॥ तस्या इति ॥ तस्या अजायाः कामी स बस्तः उद्धरणोपायं विचिन्तयन् रोधसि कूपतटे विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थनिर्गमाय मार्गं व्यधत्त कृतवान् ॥४॥ सेति सार्द्धम् ॥ ततः सा सुश्रोणी अजा । ह्रस्वान्तः शब्दः दीर्घान्तस्तु गौरादिकल्पनया दीर्घान्तश्रोणीशब्देन विग्रहे कप्प्रत्ययापत्तिः कूपादुत्तीर्य निःसृत्य तमेव पीवानं श्मश्रुलं युवानं श्रेष्ठं मीढ्वांसं रेतःसेक्तारम् । क्वस्वन्तो निपातश्छान्दसः । याभे मैथुने कोविदं तमेव बस्तं पतिं चकमे । तया अजया वृतं बस्तं समुद्वीक्ष्य ततोऽन्या अपि बह्व्योऽजाः कान्तकामिनीः तं कान्तं प्रति कामवत्यो जाताः पतिं वृतवत्य इत्यर्थः । पूर्वसवर्णदीर्घ आर्षः ॥ ५ ॥ स इति ॥ स एक एव अजवृषः बस्तश्रेष्ठस्तासां बह्वीनामजानां रतिवर्धनः प्रीतिजनकः स्वयं च काम एव ग्रहः पिशाचस्तेन ग्रस्तश्च संस्ताभी रेमे । आत्मानं च नावबुध्यत नानुसंहितवान् । अडभाव आर्षः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तमेव प्रेष्ठतमं स्वपतिमन्ययाजया सह रममाणं विलोक्य कूपसंविग्ना या पूर्वं कूपे पतिता भीता बस्तेन समुद्धृता सा अजा तत् अजान्तरेण सह रमणरूपं बस्तस्य कर्म नामृष्यत् नासहत ॥ ७ ॥ तमिति ॥ तं बस्तं दुर्हृदं कपटयुक्तं सुहृद्रूपं क्षणमात्रं स्वार्थमेव सौहृदं स्नेहो यस्य तम् इन्द्रियारामम् इन्द्रियवशं कामिनम् उत्सृज्य विहाय दुःखिता सती स्वस्वामिनं प्रति ययौ । अत्र प्रकृतपक्षे तादृशं स्वामिनं विहाय पितृगृहं ययौ इति योज्यम् । अन्यथा स्वामिनमिति शुकाभिप्रायेणोक्तौ विरुद्धमतिकृद्दोषः स्यात् ॥ ८ ॥ स इति ॥ स्त्रैणः स्त्रीवश्यः कृपणो दीनः स बस्तोऽपि तां प्रसादितुम् । णिलोप आर्षः । इडविडाकारं बस्तजातिशब्दं कुर्वन्ननुगतः तथापि पथि तां सन्धितुं सन्धातुं प्रसादयितुम् । इडार्षः । नाशक्नोत् ॥ ९ ॥ तस्या इति ॥ तत्र तत्स्वामिगृहे तस्या अजायाः स्वामी कश्चन द्विजः प्रकृते च द्विजः शुक्रः अजा शुक्रस्त्री तस्याः स्वामी स एव तस्याजस्य लम्बन्तम् । शता आर्षः । वृषणमण्डं रुषा क्रोधेन अच्छिनत् । भूयः पुनः अर्थाय स्वाजायाः कामोपभोगाय प्रयोजनाय योगवित् सर्वोपायज्ञः

तमेव प्रेष्ठतमया रममाणमजाऽन्यया ॥ विलोक्य कूपसंलग्ना नामृष्यद् बस्तकर्म तत्॥७॥ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् ॥इन्द्रियारा-
मसुत्सृज्य स्वामिनं दुःखिता ययौ ॥ ८ ॥ सोऽपि चानुगतःस्त्रैणःकृपणस्तां प्रसादितुम् ॥ कुर्वन्निडविडाकारं नाशक्नोत्पथि सन्धितुम् ॥ ९ ॥
तस्यास्तत्र द्विजः कश्चिदजास्वाम्यच्छिनद् रुषा ॥ लम्बन्तं वृषणं भूयः संदधेऽर्थाय योगवित्॥१०॥ संबद्धवृषणः सोऽपि ह्यजया कूपलब्धया ॥
कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥११॥ तथाहं कृपणःसुभ्रूर्भवत्याःप्रेमयन्त्रितः॥आत्मानं नाभिजानामि मोहितस्तव मायया ॥१२॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवःस्त्रियः ॥ न दुह्यन्ति मनःप्रीतिं पुंसःकामहतस्य ते ॥१३॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १४ ॥ यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् ॥ समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः॥ १५ ॥

स एव तस्य वृषणं सन्दधे ॥ १० ॥ सम्बद्धेति ॥ हे भद्रे सम्बद्धं वृषणं यस्य सोऽजोऽपि कूपलब्धयाजया सह बहुतिथं कालं भोगान् भुञ्जानः तैः कामैर्विषयभोगैरद्यापि न तुष्यति अलमिति न मन्यते ॥ ११ ॥ तथेति ॥ हे सुभ्रूः तथा बस्तवदहमपि भवत्यास्तव प्रेम्णा यन्त्रितो वशीकृतस्तव मायया विभ्रमादिरूपया मोहितोऽधुनाप्यात्मानं स्वपरमार्थरूपं नाभिजानामि ॥ १२ ॥ यदिति ॥ यत्पृथिव्यां व्रीहियवं हिरण्यादयश्च विषयास्ते सर्वेऽपि कामहतस्य तृष्णाग्रस्तस्य पुंसो मनसः प्रीतिं सन्तोषं न दुह्यन्ति न पूरयन्ति न कुर्वन्ति । श्यन्नार्षः ॥ १३ ॥ नेति ॥ जातु कदाचिदपि कामानां विषयाणामुपभोगेन कामो विषयभोगतृष्णा न शाम्यति किन्तु हविषा घृतेन कृष्णवर्माग्नि-र्यथा वर्धते तथा भूयोऽधिकमभिवर्धत एव ॥१४॥ यदेति॥ यदा भूतेषु पदार्थमात्रेष्वमङ्गलम् इदं शोभनमिदमशोभनमिति वैषम्यं भावं न कुरुते तदा समदृष्टेःप्राकृतत्वेन सर्वत्र दुःखहेतुत्वं पश्यतः पुंसः सर्वदुःखहेतोस्तृष्णाया निवृत्तत्वात् सर्वा एव दिशः सुखमयाः सुखमय्यः । ङीबभाव आर्षः । यत्र क्वापि गतस्य सर्वत्र सुखमेवेत्यर्थः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येति ॥ या तृष्णा दुर्मतिभिः अविवेकिभिः दुस्त्यजा जीर्यतो वयोहानिं प्राप्नुवतोऽपि पुंसो या तृष्णा न जीर्यते जीर्णतां न प्राप्नोति तङार्षः। जीर्यतीत्यपि पाठः ।तां दुःखानि नितरां वहतीति तथाभूतां तृष्णां शर्मकामः दुःखासम्भिन्नसुखं कामयमानो द्रुतं शीघ्रमेव त्यजेत् ॥१६॥ मात्रेति ॥ मात्रादीनामन्यतमयाऽ ः विविक्तं सङ्कीर्णमपृथग्भूतमासनं यस्य तथाभूतो न भवेत् । यतः बलवानिन्द्रियाणां ग्रामः समूहो विद्वांसं विवेकिनमपि कर्षति स्त्रीसन्निधाने तद्दर्शनस्पर्शनादौ प्रवर्त्तयतीत्यर्थः ॥ १७ ॥ पूर्णमिति ॥ असकृत् पुनः पुनर्विषयाननुसेवतो भुञ्जानस्यापि । शता आर्षः । मे मम वर्षसहस्रं पूर्णमभूत्तथापि अनुसवनं तत्तद्विषयानुभवयोग्यसमयमनतिक्रम्य तेषु विषयेषु तृष्णैवोपजायते न तु शाम्यति ॥ १८ ॥ तस्मादिति ॥ तस्माद् निर्द्वन्द्वः निरहङ्कारश्चाहम् एतां विषयभोगतृष्णां त्यक्त्वा मानसं मनो ब्रह्मणि आधाय स्थिरीकृत्य मृगैः सह मृगवद्वने विचरिष्यामि ॥ १९ ॥ ब्रह्मणि मनःस्थिरीकरणप्रकारमाह—दृष्टमिति ॥ दृष्टमैहिकं श्रुतमामुष्मिकं च विषयजातं तदुभयमप्यसत् तुच्छमपुरुषार्थरूपं बुद्ध्वा तथा तत्र विषयध्यानादौ सति

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ॥ तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥ मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ॥ बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ १७ ॥ पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् ॥ तथाऽपि चानुसवनं तृष्णा तेषूपजायते ॥ १८ ॥ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ॥ निर्द्वन्द्वो निरहंकारश्चरिष्यामि मृगैः सह ॥ १९ ॥ दृष्टं श्रुतमसद् बुद्ध्वा नानुध्यायेन्न संविशेत् ॥ संसृतिं चात्मनाशं च तत्र विद्वान् स आत्मदृक् ॥ २० ॥ इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः ॥ दत्त्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥२१॥ दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुम् ॥ प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरम् ॥२२॥ भूमण्डलस्य सर्वस्य पूरुमर्हत्तमं विशाम् ॥ अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥२३॥ आसेवितं वर्षपूगान् षड्वर्गं विषयेषु सः ॥ क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥२४॥

जन्ममरणादिरूपां संसृतिमात्मनः स्वरूपस्य नाशं तिरोधानं च विद्वान् जानन् यः पुमान् दृष्टश्रुतं विषयं नानुध्यायेत् न संविशेत् न चोपभुञ्जीत स एव तृष्णां हित्वा आत्मदृग्भवति ॥२०॥ इतीति ॥ विगतभोगस्पृहः नाहुषो ययातिर्जायां देवयानीं प्रतीत्येवमुक्त्वा पूरवे तदीयं वयो यौवनं दत्त्वा तस्मात्स्वकीयां जरसमाददे जग्राह ॥ २१ ॥ दिशीति ॥ ततो दक्षिणपूर्वस्यामाग्नेय्यां दिशि द्रुह्युं दक्षिणतो दक्षिणस्यां दिशि तुर्वसुम् उदीच्यां दिशि अनुं चेश्वरमधिपतिं चक्रे ॥ २२ ॥ भूमण्डलस्येति ॥ अर्हत्तमं श्रेष्ठं पूरुं कनिष्ठमपि सर्वस्य भूमण्डलस्याधिपतिमभिषिच्य अभिषेकपूर्वकं कृत्वा तदग्रजान् यदुप्रभृतीन् तस्य पूरोर्वशे स्थाप्य स्वयं वनं ययौ । समासाभावेऽपि ल्यबादेश आर्षः ॥ २३ ॥ आसेवितमिति ॥ स ययातिः वर्षपूगान् वर्षसमूहान् अभिव्याप्य विषयेषु शब्दादिषु आसेवितमनुभूतं षड्वर्गं षडिन्द्रियसुखं क्षणेन मुमुचे । यद्वा । विषयेषु आसेवितं सेवां कारितं षडिन्द्रियवर्गं मुमुचे उपैक्षत । यद्वा । विषयेषु आ सम्यक् सेवितमासक्तिर्यस्येति । भावे क्तः । तादृशमपि षड्वर्गं मुमुचे इन्द्रियाधीनो न बभूवेत्यर्थः । जातौ पक्षौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य स द्विजो विहङ्गमो यथा स्वनीडं त्यजति तद्वदित्यर्थः ॥ २४ ॥ सं इति ॥ निर्मुक्तस्त्यक्तः समस्तो देहतदनुबन्ध्यादिसङ्गो येन सः आत्मनोऽनुभूत्या स्वरूपसाक्षात्कारेण विधुतं निरस्तं त्रिलिङ्गं त्रिगुणकार्य्यं लिङ्गं येन सः प्रतीतः प्रख्यातः ययातिः तत्र वने परे अमले ब्रह्मणि वासुदेवाख्ये सायुज्यरूपां भागवतीं भगवदुपासनैकलभ्यां गतिं मुक्तिं लेभे ॥ २५ ॥ श्रुत्वेति ॥ देवयानी तु तां भर्त्रा कथितां गाथां छागेतिहासं श्रुत्वा तयात्मनः प्रस्तोभम् उपालम्भं निवृत्तिमार्गे प्रोत्साहनं वा मेने । यतः स्त्रीपुंसोः स्त्रीपुंसयोः समासान्ताभाव आर्षः । यः स्नेहस्ततो यद्वियोगावस्थायां वैक्लव्यं तस्माद्धेतोस्तत्परिहाराय परिहासमिवेरितं कथितं तेन हे देवयानि मया कृपया यत्त्वं पानीयकूपादुद्धृताभूस्तस्य प्रत्युपकारस्त्वया सम्यक् कृतः । यत्त्वयाहमेतावन्तं कालं विषयमहान्धकूपे निपातित इति ययातिर्मामवोचदिति देवयानी जानाति स्मेति॥ २६ ॥सेति युग्मम् ॥ ततश्च सा भार्गवी देवयानी। सा इत्यत्र या इत्यपि पाठः। ईश्वरतन्त्राणां परमेश्वराधीनानां सुहृदां पतिपुत्रादीनां सन्निवासं सहवासं गच्छतां पान्थानां प्रपायां पानीयशालायामि-

स तत्र निर्मुक्तसमस्तसङ्ग आत्मानुभूत्या विधुतत्रिलिङ्गः ॥ परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥ २५ ॥ श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः ॥ स्त्रीपुंसोः स्नेहवैक्लव्यात् परिहासमिवेरितम् ॥ २६ ॥ सा सन्निवासं सुहृदां प्रपायामिव गच्छताम् ॥ विज्ञायेश्वरतन्त्राणां मायाविरचितं प्रभोः ॥ २७ ॥ सर्वत्र सङ्गमुत्सृज्य स्वप्नौपम्येन भार्गवी ॥ कृष्णे मनः समावेश्य व्यधुनोल्लिङ्गमात्मनः ॥ २८ ॥ नमस्तुभ्यं भगवते वासुदेवाय वेधसे ॥ सर्वभूताधिवासाय शान्ताय बृहते ॥ २९ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

वास्थिरमतः प्रभोर्हरेर्मायाविरचितं त तत्कर्मानुसारेणेश्वरेच्छाधीनं विज्ञाय स्वप्नौपम्येन स्वप्नदृष्टपदार्थदृष्टान्तेन सर्वस्यापुरुषार्थत्वं च विज्ञाय सर्वत्र देहतदनुबन्ध्यादिषु सङ्गमासक्तिमुत्सृज्य श्रीकृष्णे स्वमनः समावेश्य आत्मनो लिङ्गं शरीरं व्यधुनोत् तत्याज सापि पतिवन्मुक्ता जाता ॥ २७ ॥ २८ ॥ मनआवेशनं च नमस्कारादिभिरित्याह—नम इति ॥ भगवते वासुदेवाय वेधसे जगत्कारणाय सर्वभूताधिवासाय अन्तर्यामिणे शान्ताय बृहते महते तुभ्यं नमो नमः । शुकस्य वेयमुक्तिः । अत्र यदा अम्बरीषश्चक्रवर्ती सर्वभूम्यधिपतिस्तदैव ययातिस्तन्मण्डलाधिपतिः प्रायो जम्बूद्वीपाधिपतिरभूदित्यूह्यम् । ब्रह्मा मरीचिः कश्यपो विवस्वान् श्राद्धदेवो नभगो नाभागोऽम्बरीष इति । तथा ब्रह्मात्रिश्चन्द्रो बुधः पुरूरवा आयुर्नहुषो ययातिरिति च ब्रह्मणस्तयोरष्टमत्वात् । एवमेव यदा यदा सूर्यवंशभवश्चक्रवर्ती तदा सोमवंशभवो मण्डलेशः सोमवंशभवश्चक्रवर्ती चेत्सूर्यवंशभवो मण्डलेश इति व्यवस्थामाहुः ॥ २९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमान्नवमस्योनविंशके ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशे पूरोरन्ववाये दौष्यन्तेर्भरतस्य च ॥ यशो निगद्यते तत्र श्लोकाः सार्द्धा नवाग्नैयैः[३९॥] ॥ तैर्विंत्योऽनुष्टुभोऽप्यत्र[३९॥] त्रीण्युवाचवचांसि च ॥ २० ॥ पूरोरिति ॥ हे भारत यत्र यस्मिन् वंशे त्वं जातोऽसि यत्र च वंश्याः वंशे साधवो वंशाविवर्धना राजर्षयः क्षत्रियश्रेष्ठाः ब्रह्मवंश्या वंशवर्धना ब्राह्मणाश्च जज्ञिरे तं पूरोर्वंशं प्रवक्ष्यामि॥१॥जन्मेजय इति ॥ जनमेजयः पूरोः पुत्रोऽभूत् । जनेत्यह्लोप आर्षः । तस्य सुतः प्रचिन्वानभूत् । प्रध्वनेति पाठान्तरम् । ततः प्रवीरो जातः । अथ तस्मात् मनस्युरभूत् । तस्मात् वै चकारार्थे । चारुपदोऽभवत् । चारुः सुत इति पाठान्तरम् ॥ २ ॥ तस्येति ॥ स्पष्टम् । रौद्रातिरिति पाठान्तरम् ॥ ३ ॥ ऋतेयुरिति युग्मम् ॥ तस्य रौद्राश्वस्य जगत आत्मभूतस्य मुख्यस्य प्राणस्य इन्द्रियाणीव घृताच्यामप्सरसि एते ऋतेयुप्रभृतयः दश पुत्रा जाताः । अत्रेयुपदस्य धर्मादिभिः प्रत्येकं सम्बन्धः । द्वन्द्वान्ते श्रुतत्वात् । ततश्च धर्मेयुः सत्येयुः व्रतेयुश्चेति फलितम् । अप्सरस इति षष्ठी सप्तम्यर्थे । पुत्राणां मध्ये वनेयुरवमः कनीयान् स्मृतः ॥ ४ ॥ ५ ॥ ऋतेयोरिति ॥ तत्र ऋतेयोः पुत्रः रन्तिभारोऽभूत् ।

श्रीशुक उवाच ॥ पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत ॥ यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥१॥ जन्मेजयो ह्यभूत् पूरोः प्रचिन्वांस्तत्सुतस्ततः ॥ प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥२॥ ततः सुद्युरभूत्पुत्रस्तस्माद् बहुगवस्ततः॥ संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥ ३ ॥ ऋतेयुस्तस्य कुक्षेयुः स्थण्डिलेयुः कृतेयुकः ॥ जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥ दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ॥ घृताच्यामिन्द्रियाणीव मुख्यस्य जगदात्मनः ॥ ५ ॥ ऋतेयो रन्तिभारोऽभूत् त्रयस्तस्यात्मजा नृप ॥ सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥ ६ ॥ तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः ॥ पुत्रोऽभूत्सुमते रैभ्यो दुष्यन्तस्तत्सुतो मतः ॥ ७ ॥ दुष्यन्तो मृगयां यातः कण्वाश्रमपदं गतः ॥ तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥ विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ॥८॥ बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥ ९ ॥ तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः ॥ पप्रच्छ कामसंतप्तः प्रहसन् श्लक्ष्णया गिरा ॥ १० ॥

रन्तिनार इति पाठान्तरम् । हे नृप तस्य सुमतिर्ध्रुवो प्रतिरथ इति त्रय आत्मजा जाताः । स्मृतिरिति पाठान्तरम् । तत्राप्रतिरथस्यात्मजः कण्वः ॥ ६ ॥ तस्येति ॥ तस्य मेधातिथिः तस्मात्प्रस्कण्वप्रभृतयो द्विजातयो ब्राह्मणा जज्ञिरे । सुमते रैभ्यः पुत्रोऽभूत् । तस्य सुतो दुष्यन्तो मतः प्रख्यातः । दुष्मन्त इति पाठान्तरम् ॥ ७ ॥ दुष्यन्त इति सार्द्धम् ॥ कदाचित् दुष्यन्तो मृगयां यातः वने मृगहननविहारं कुर्वन् यदृच्छया कण्वस्य ऋषेराश्रमं गतः तत्राश्रमे आसीनामुपविष्टां स्वप्रभया तमाश्रमं मण्डयन्तीं शोभयन्तीं देवस्य मायां मोहिनीशक्तिमिव स्त्रियं शकुन्तलां विलोक्य तत्क्षणमेव मुमुहे । तङार्षः ॥ ८ ॥ बभाष इति अर्द्धम् ॥ कतिपयैर्भटैर्वृतः सन् तां वरारोहां सुन्दरीं बभाषे ॥ ९ ॥ तदिति ॥ तस्यादर्शनेन प्रमुदितो हृष्टोऽत एव सन्निवृत्तः परिश्रमः मृगयायासो यस्य स कामेन संतप्तश्च प्रहसन् श्लक्ष्णया मधुरया गिरा तां पप्रच्छ ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का त्वमिति ॥ हे कमलपत्राक्षि हे हृदयङ्गमे मनोहरे त्वं केति जातिप्रश्नः । कस्यासीति पित्रादिसम्बन्धप्रश्नः । अत्र तु निर्जने भवत्या त्वया किं चिकीर्षितं कर्त्तुमिष्टमस्ति ॥११॥व्यक्तमिति ॥ हे सुमध्यमे त्वामहं राजन्यतनयां व्यक्तं स्पष्टं वेद्मि । तत्र हेतुमाह । हि यतः पौरवाणां पुरुवंशजानां चेतः अधर्मे क्वचिदपि न रमते । यदि त्वं राजतनया न स्यास्तदा मच्चेतस्त्वयि सक्तं न स्यात् इति ॥ १२ ॥ विश्वेति ॥ विश्वामित्रस्य क्षत्रियस्यैवात्मजा कन्याहं मेनकायामप्सरसि जाता तया च स्वर्गं गच्छन्त्या वने त्यक्ता एतद्वृत्तं च भगवान् कण्वो वेद जानाति ततो मया श्रुतम् । अहं तु मातापितरौ न परिचिनोमीति भावः । अतो हे वीर ते तव वयं किं करवाम ॥ १३ ॥ आस्यतामिति ॥ हे अरविन्दाक्ष हि यथासुखं त्वयात्रास्यतां स्थीयतां नोऽस्माकमर्हणं जलासनादिकं गृह्यताम्। अत्र नीवाराः आरण्यकव्रीहयः सन्ति अतोऽत्र नीवारसिद्ध वस्तु भुज्यताम् । क्वचिद्बहुवचनपाठः सुगम एव । यदि रोचते तर्हि उष्यताम् ॥ १४॥ किं करवामेत्यादि सकामं वचः श्रुत्वाह—उपपन्नमिति ॥ हे सुभ्रु । ह्रस्वत्वमपाणिनीयम् । कुशिकान्वये

का त्वं कमलपत्राक्षि कस्यासि हृदयंगमे ॥ किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥११॥ व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ॥ न हि चेतः पौरवाणामधर्मे रमते क्वचित् ॥१२॥ शकुन्तलोवाच ॥ विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ॥ वेदैतद् भगवान् कण्वो वीर किं करवाम ते ॥१३॥ आस्यतां ह्यरविन्दाक्ष गृह्यतामर्हणं च नः॥ भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥१४॥ दुष्यन्त उवाच ॥ उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये ॥ स्वयं हि वृणुते राज्ञां कन्यका सदृशं वरम् ॥ १५ ॥ ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम् ॥ गान्धर्वविधिना राजा देशकालविभागवित्॥१६॥ अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे ॥ श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम्॥१७॥ कण्वः कुमारस्य वने चक्रे समुदिताः क्रियाः ॥ बद्ध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः ॥१८॥ तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ॥ हरेरंशांशसंभूतं भर्तुरन्तिकमागमत् ॥१९॥

जातायास्तवेदं किं करवामेत्यादिवचनमुपपन्नं युक्तमेव । हि यस्मात् राज्ञां कन्यका स्वयमेव सदृशं वरं पतिं वृणुते ॥१५॥ ओमिति ॥ ततश्च तया दुष्यन्तोक्ते शकुन्तलया मौनेनैव ओमित्यङ्गीकृते सति देशकालविभागवित् राजा दुष्यन्तो गान्धर्वविधिना मिथः समयपूर्वकेण यथाधर्मं शकुन्तलामुपयेमे स्वीकृतवान् ॥ १६ ॥ अमोघेति ॥ अमोघमवितथं वीर्यं यस्य स राजर्षिर्दुष्यन्तो महिष्यां तस्यां शकुन्तलायां वीर्यं रेतः आदधे निहितवान् । ततः श्वोभूतेऽह्नि प्रभाते जाते सति स्वपुरं यातः । ततः कालेन प्राप्तेन प्रसूतिसमयेन सा शकुन्तला सुतमसूत सुषुवे ॥ १७ ॥ कण्व इति ॥ तस्य कुमारस्य समुचिताः जातकर्मादिक्रियाः कण्वो वन एव चक्रे । स च बालकः तरसा बलेन मृगेन्द्रान् सिंहान् बद्ध्वा तैः क्रीडति स्म । बाल्य एवातिचलोऽभूत् ॥ १८ ॥ तमिति ॥ दुरत्ययमप्रतिहतं विक्रान्तं विक्रमणं यस्य तम् तत्र हेतुः हरेर्भगवतोंशांशेन संभूतं तं कुमारमादाय गृहीत्वा सा प्रमदोत्तमा शकुन्तला भर्त्तुर्दुष्यन्तस्यान्तिकं समीपमागमत् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ तौ भार्यापुत्रावनिन्दितौ निर्दुष्टावपि जनापवादभयात् यदा राजा दुष्यन्तो न जगृहे स्वकीयत्वेन न स्वीकृतवांस्तदा सर्वेषां भूतानां जनानां शृण्वतामेव सतां खे आकाशे अशरीरिणी अदृष्टवक्तृका वागाह स्म । अश्रूयतेत्यर्थः ॥२०॥ मातेति ॥ हे दुष्यन्त । क्वापि दुष्यन्ते त्यत्र भरतामिति पाठः । माता भस्त्रा चर्ममयं पात्रं तद्वदाधारमात्रमेव पुत्रस्तु पितुरेव येन पित्रा जात उत्पादितः स पुत्रः स एव पितृरूप एव । "आत्मा वै पुत्रनामासि" इति श्रुतेः । अतः पुत्रं भरस्व अङ्गीकुरु हे दुष्यन्त शकुन्तलां मावमंस्थाः तदवमानं त्वया न कर्त्तव्यम् । भरस्वेति अनेनैव भरतनामनिरुक्तिः ॥ २१ ॥ रेतोधा इति ॥ रेतोधा रेतःसेक्ता वंशकर्त्ता इत्यर्थः । यद्वा । पितू रेतः स्वदेहोपादानत्वेन धत्त इत्यौरसः इत्यर्थः । पुत्रो यमस्य क्षयात् स्थानात् पितरं नयति तारयति । पुत्रमिति पाठे तु मातापित्रोः पुत्रं प्रति विवादे यमक्षयाद्धर्मनिर्णेतुर्यमस्य सभायाः सकाशाद्रेतोधा रेतःसेक्ता पितैव धर्मेण विजित्य पुत्रं नयति न तु मातेत्यर्थः । तस्य गर्भस्य त्वमेव धाता धारक इति तु शकुन्तला सत्यमेवाह । एवमुक्तो राजा भार्यापुत्रौ स्वीकृतवानित्यर्थाज्ज्ञेयम् ॥२२॥ पितरीति ॥ ततश्च पितरि दुष्यन्ते उपरते सति स भरतोऽपि चक्रवर्ती सप्तद्वीपाधिपतिर्महायशाः विपुलकीर्तिश्च बभूवेति शेषः । हरेरंशभुव-

यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ ॥ शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥२०॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥ भरस्व पुत्रं दुष्यन्त माऽवमंस्थाः शकुन्तलाम् ॥ २१ ॥ रेतोधाः पुत्रो नयति नरदेव यमक्षयात् ॥ त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ २२ ॥ पितर्युपरते सोऽपि चक्रवर्ती महायशाः ॥ महिमा गीयते तस्य हरेरंशभुवो भुवि ॥२३॥ चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ॥२४॥ ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः ॥ पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः ॥ २५ ॥ मामतेयं पुरोधाय यमुनायामनु प्रभुः ॥ अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद्वसु ॥ २६ ॥ भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः ॥ सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे ॥ २७ ॥

स्तस्य भरतस्य भुवि महिमा "तदप्येते श्लोका अभिगीता" इत्यादिबह्वृचश्रुत्या गीयते ॥२३॥ तत्र लिङ्गमाह—चक्रमिति अर्द्धम् ॥ अस्य भरतस्य दक्षिणहस्ते चक्रं चक्राकारा रेखा च वर्त्तत इति शेषः। अस्य पादयोः पद्मकोशाकाररेखा वर्त्तते ॥२४॥ ईज इति युग्मम् ॥ स च महाभिषेकेण विधिना राज्येऽभिषिक्तः स्थापितः अधिराट् सार्वभौमः अत एव विभुः सर्वतो महान् प्रभुः समर्थो भरतो मामतेयं ममताया अपत्यं दीर्घतमसम् ऋषिं पुरोधाय पुरोहितं कृत्वा गङ्गायामनु गङ्गातीरेऽनुलोमं पञ्चपञ्चाशता मेध्यैः पवित्रैर्वाजिभिः अश्वैः अश्वमेधैर्भगवन्तमीजे आराधितवानित्यर्थः । तथा वसु धनं प्रददत् प्रयच्छन् सन् यमुनायामनु यमुनातीरे तदनुलोमम् अष्टाधिकसप्ततिसङ्ख्याकान् मेध्यान् अश्वान् बबन्ध । तद्बन्धनपूर्वकं तावद्भिरश्वमेधैः हरिमीज इत्यर्थः ॥२५॥२६॥ भरतस्येति ॥ दौष्यन्तेः दुष्यन्तपुत्रस्य साचीगुणे प्रकृष्टगुणवति देशेऽग्निश्चितोऽभूत् । यस्मिन्नग्निचयनस्थले सहस्रं ब्राह्मणाः भरतेन भूरिदानेन दत्ता गा बद्वशः प्रत्येकं बद्वं बद्वं विभेजिरे । विभज्य जगृहुरित्यर्थः । चतुरशीत्यधिकैः त्रयोदशसहस्रैरेकं बद्वं भवति ॥२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रय इति ॥ त्रयस्त्रिंशच्छतसङ्ख्याकान् अश्वान् स्वारोहणार्थं बद्ध्वा स्वैश्वर्येण नृपान् अन्यान् पार्थिवान् विस्मापयन् आश्चर्यविशिष्टान् कुर्वन् मायानां वैभवानां समूहो मायं तद्वतां श्रेष्ठो मायवत्तरः दौष्यन्तिर्भरतो देवानामपि मायां वैभवमत्यगात् । अत्यशेत गुरुमाययाविति पाठे तु देवानामपि गुरुं पूज्यं भगवन्तमेव आययौ प्राप्तः तदंशभवत्वात् ॥ २८ ॥ मृगानिति ॥ शुक्लदतः शुक्लदन्तविशिष्टान् हिरण्येन परिवृतान् भूषितान् चतुर्दश नियुतानि लक्षाणि कृष्णान् मृगान् भद्रमन्द्रमृगादिजातिविशिष्टान् गजश्रेष्ठान् मष्णारे मष्णाराख्ये तीर्थविशेषे कर्मणि यज्ञकर्मणि मष्णाराख्ये कर्मविशेषे वाददात् प्रायच्छत् । अनेन बद्धसङ्ख्या प्रदर्शिता । तथा हि " हिरण्येन परिवृतान् कृष्णान् शुक्लदतो मृगान् । मष्णारे भरतो ददाच्छतं बद्धानि सप्त च ।" इति श्रुत्युक्तानि सप्ताधिकशतं बद्धान्येव चतुर्दश लक्षाणि भवन्तीति श्रीशुकविवरणम् । तथा च चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्धमित्युक्तं भवति । तथा च पूर्वोक्ता सङ्ख्या बद्धमिति सिद्धम् । सा च सङ्ख्या श्लोकेन संगृह्यते । " चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः । बद्धं चतुरशीत्यग्रसहस्राणि त्रयोदश ॥" बद्धशब्दोन्तस्थोपधः॥२९॥भरतस्येति ॥ भरतस्य महत् अद्भुतं कर्म पूर्वे नृपा न चक्रुरिति शेषः । अपरे भाविनो नृपाः न करिष्यन्तीति

त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन् नृपान् ॥ दौष्यन्तिरत्यगान्मायां देवानां गुरुमाययौ ॥ २८ ॥ मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान् ॥ अदात् कर्मणि मष्णारे नियुतानि चतुर्दश ॥२९ ॥ भरतस्य महत् कर्म न पूर्वे नापरे नृपाः ॥ नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ॥ ३० ॥ किरातहूणान् यवनानन्ध्रान् कङ्कान् कशाञ्छकान् ॥ अब्रह्मण्यान् नृपांश्चाहन् म्लेच्छान् दिग्विजयेऽखिलान् ॥ ३१ ॥ जित्वा पुराऽसुरा देवान् ये रसौकांसि भेजिरे ॥ देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ॥३२॥ सर्वकामान् दुदुहतुः प्रजानां तस्य रोदसी ॥ समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत् ॥ ३३ ॥ स सम्राट् लोकपालाख्यमैश्वर्यमधिराड्श्रियम् ॥ चक्रं चास्खलितं प्राणान् मृषेत्युपरराम ह ॥३४ ॥

शेषः । यथा बाहुभ्यां त्रिदिवं केऽपि न प्रापुर्नैव च प्राप्स्यन्ति । अत्र नञ्द्वयसङ्गतये चक्रुः करिष्यन्तीति क्रियाद्वयाध्याहारः ॥३०॥ किरातेति ॥ अब्रह्मण्यान्वेदब्राह्मणादिषु प्रतिकूलान् किरातादीन् हीनजातीन् नृपांश्च तादृशान् सर्वान् दिग्विजये भरतोऽहन् ॥३१॥ जित्वेति ॥ ये असुराः पुरा पूर्वकाले देवान् जित्वा रसौकांसि रसातलस्थानानि भेजिरे प्राप्ताः तैश्च प्राणिभिर्बलिभिर्या देवस्त्रियो रसां रसातलं नीताः प्रापितास्ताः पुनराहरत् भरत आनीतवान् । प्राणिभिरसुरैर्नीतैः मनुष्यादिभिः सह ताः आनीतवान् इति वा । पणिभिरिति पाठे पणयोऽसुरास्तैर्नीताः । यद्वा । पणयो दूताः तैः दूतान् प्रस्थाप्याहरत् इत्यर्थः ॥ ३२ ॥ सर्वेति ॥ भरते राजनि सति तस्य प्रजानां तद्विषयस्थानां जनानां सर्वान् कामान् अभिलषितान् पदार्थान् रोदसी द्यावापृथिव्यौ दुदुहतुः पूरयामासतुः । एवं स भरतः त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्रसंवत्सरान् दिक्षु सर्वासु चक्रमाज्ञामवर्त्तयत् ॥ ३३ ॥ स इति ॥ सम्राट् भरतो लोकपालाख्यं लोकपालेषु आख्या समन्तात् ख्यातिर्यस्मात्तथाभूतमैश्वर्यं गजरथतुरङ्गादिरूपं तथा अधि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राज्ञां श्रियं धनमस्खलितमव्याहतं चक्रमाज्ञारूपं प्राणात् इन्द्रियाणि च मृषा इति निश्चित्य तेभ्य उपरराम विरक्तो बभूव ॥ ३४ ॥ तस्येति ॥ हे नृप तस्य भरतस्य सुसंमताः प्रिया विदर्भस्य सुतास्तिस्रः पत्न्यः आसंस्ताश्च जातान् पुत्रान् नानुरूपा मम सदृशा इमे न भवन्तीति भर्त्रा ईरिते अभिहिते सति पुनरेषां वैसादृश्यदर्शनेन व्यभिचाराशङ्कयास्मांस्त्यजेदिति त्यागभयादेकैकं जघ्नुः हतवत्य इत्यर्थः ॥ ३५ ॥ तस्येति ॥ एवं तस्य भरतस्य वंशे व्यर्थे सति तदर्थं पुत्रार्थं मरुत्स्तोमाख्येन यागेन यजतः स्वाराधनं कुर्वतस्तस्य प्रसन्नाः सन्तो मरुतो भरद्वाजाख्यं पुत्रमुपाददुः समर्पयामासुः ॥ ३६ ॥ कोऽसौ भरद्वाज इत्यपेक्षायामाह—अन्तर्वत्न्यामिति ॥ कदाचिद्बृहस्पतिरन्तर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां चौर्येण मैथुनाय प्रवृत्तः तदा द्वितीयस्य गर्भस्यावकाशाभावात् आक्रोशपूर्वकं वारितः । ततश्च क्रुद्धो बृहस्पतिस्त्वमन्धो भवेति तं गर्भं शप्त्वा बलाद्वीर्यम् अवासृजत् न्यषिञ्चत् । ततो बृहस्पतेः शापात् गर्भस्थो दीर्घतमा अन्धो बभूव । तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं सद्य एव कुमारोऽभवत् ॥ ३७ ॥ तमिति ॥ तं परवीर्यजं पुत्रं त्यक्तुकामां तत्र हेतुमाह । भर्तुस्त्यागाद्विशङ्कितां ममतामुद्दिश्य सुरास्तस्य बालस्य नाम निरुच्यते येन तथाभूतमेनं

तस्यासन् नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसंमताः ॥ जघ्नुस्त्यागभयात् पुत्रान् नानुरूपा इतीरिते ॥ ३५ ॥ तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ॥ मरुत्सोमेन मरुतो भरद्वाजमुपाददुः ॥ ३६ ॥ अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः ॥ प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥ ३७ ॥ तं त्यक्तुकामां ममतां भर्तृत्यागविशङ्किताम् ॥ नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ॥ ३८ ॥ मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते ॥ यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३९ ॥ चोद्यमाना सुरैरेवं मत्वा वितथमात्मजम् ॥ व्यसृजन्मरुतोऽबिभ्रन् दत्तोऽयं वितथेऽन्वये ॥ ४० ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे विंशोऽध्यायः ॥ २० ॥

वक्ष्यमाणं बृहस्पतिममतयोर्विवादरूपम् । बालकपोषणप्रेरणात्मकं वा श्लोकं जगुः । ममतापदं बृहस्पतेरप्युपलक्षणम् ॥ ३८ ॥ मूढे इति ॥ तत्र पुत्रं त्यक्त्वा यान्तीं ममतां बृहस्पतिराह । हे मूढे द्वाजं द्वाभ्याम् एकस्य क्षेत्रेऽन्यस्य वीर्यादिति द्वाभ्यां जातमिमं त्वं भर पुषाण अतस्त्वद्भर्तुरप्ययं पुत्रस्तस्मान्न भयशङ्केत्यर्थः । एवमुक्तोऽपि भर्तृत्यागभयात्तदनङ्गीकुर्वती ममताह । हे बृहस्पते द्वाभ्यामावाभ्यामन्यायतो जातं तत्रापि मय्यकामायां तव बलात्काराज्जातत्वात्तवैवायं पुत्रो न ममातस्त्वमेवैनं द्वाजं भर इति परस्परमुक्त्वा यत् यस्मात् पितरौ यातौ पुत्रं त्यक्तवन्तौ ततस्तस्मात् भर द्वाजमिति पुनः पुनः कथनादयं पुत्रस्तु भरद्वाजसंज्ञोऽभूत् । यदुक्त्वा इत्यत्र यद्दुःखादिति पाठे यस्य पुत्रस्य त्यागदुःखात् पितरौ यातौ ॥ ३९ ॥ चोद्यमानेति ॥ एवं नामनिर्वचनेनैव भर्तुस्त्यागशङ्कापाकरणेन बालकपोषणे सुरैश्चोद्यमाना प्रेर्यमाणा । यद्वा । हे ममते बृहस्पतेरुपपतेराज्ञां पालयेति सोपहासमुच्यमाना ममता तमात्मजं वितथं व्यभिचारजत्वेनापवादहेतुत्वान्निरर्थकं मत्वा व्यसृजत् तत्याज । इदं बृहस्पतेरप्युपलक्षणम् । आदिजमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाठे तु प्रथमजं स्वभर्तुर्वीर्याज्जातमेवावितथं मुख्यं पुत्रं मत्वा बृहस्पतेर्जातं तत्याजेत्यर्थः । एवं ताभ्यां त्यक्तं मरुतो बिभ्रन् अबिभरुः । आर्षः प्रयोगः । तैः मरुद्भिश्चैवं प्राप्तोऽयं भरद्वाजो भरतस्यान्वये वितथे सति भरताय दत्तः ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमविंशेऽध्याये व्यधादिमाम् ॥ २० ॥ एकविंशे तु दौष्यन्तेरन्वये वर्ण्यते यशः ॥ रन्तिदेवाजमीढादेः श्लोकाः सार्द्धाः षडर्भयः ॥ उवाचेत्येकं सपादाः सप्तत्रिंशदनुष्टुभः ॥ २१ ॥ वितथस्येति ॥ भरतस्यान्वये वितथे सति मरुद्भिर्दत्तत्वात्स भरद्वाज एव वितथसंज्ञः । स च ब्राह्मणोऽपि भरतस्य दत्तपुत्र इति तद्वंशोऽनुक्रम्यते । वितथस्य सुतो मन्युस्तस्मात् बृहत्क्षत्रादयो गर्गान्ताः पञ्च पुत्रा जज्ञिरे । तत इति । बृहत्क्षत्रादनन्तरं तदनुजो जय इत्यर्थः । तस्य नरस्यात्मजः संकृतिः ॥ १ ॥ गुरुरिति ॥ हे पाण्डुनन्दन संकृतेस्तु गुरुः रन्तिदेवश्चेति द्वौ पुत्रौ बभूवतुः । तत्र रन्तिदेवस्य तु यशः इहास्मिन् लोके अमुत्र स्वर्गादिलोके च जनैर्गीयते ॥ २ ॥ वियदिति त्रयम् ॥ वियत् व्ययं प्राप्नुवद्वित्तं भोग्यं यस्य । यद्वा । वियतो गगनादिवो-द्यमं विना दैवादुपस्थितमेव वित्तं यस्य तस्य बुभुक्षतो भोक्तुमिच्छतोऽपि सतो लब्धं लब्धं सर्वं ददतः अत एव निष्किञ्चनस्य सायन्तनश्वस्तनभोजनाद्यर्थमप्यन्नादिपरिग्रह-

श्रीशुक उवाच ॥ वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः ॥ महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥ १ ॥ गुरुश्च रन्तिदेवश्च संकृतेः पाण्डुनन्दन ॥ रन्तिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ॥ निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः ॥ ३ ॥ व्यतीयुरष्टचत्वारिंशदहान्यपि गतः किल ॥ घृतपायससंयावं तोयं प्रातरुपस्थितम् ॥ ४ ॥ कृच्छ्रप्राप्तकुटुम्बस्य क्षुत्तृड्भ्यां जातवेपथोः ॥ अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ॥ ५ ॥ तस्मै संव्यभजत् सोऽन्नमादृत्य श्रद्धयान्वितः ॥ हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ॥ ६ ॥ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते ॥ विभक्तं व्यभजत् तस्मै वृषलाय हरिं स्मरन् ॥ ७ ॥

रहितस्य अत एव सकुटुम्बस्य कुटुम्बसहितस्य सीदतः क्लिश्यतः कृच्छ्रं क्लेशं प्राप्तः कुटुम्बो यस्य तस्य क्षुत्तृड्भ्यां जातो वेपथुः शरीरे कम्पो यस्य तस्य तथाऽपि धीरस्य एवं बहिः क्लेशसत्वेऽपि जितेन्द्रियत्वेनान्तःक्लेशरहितस्येत्यर्थः । अपिबतः जलपानमप्यकुर्वतः जलमात्रमप्यप्राप्नुवतः अष्टचत्वारिंशदहानि व्यतीयुः अतिक्रान्तानि बभूवुः । तदा च प्रातःकाले घृतादि त्रयं तोयं जलं च उपस्थितं प्रारब्धवशात् कुतश्चित्प्राप्तं घृतादीनां द्वन्द्वैक्यम् । तदा च भोक्तुकामस्य तस्य भोजनकाले भगवन्मायानिर्मितो रन्तिदे-वधैर्यपरीक्षार्थं कश्चिद्ब्राह्मणोऽतिथिरागमत् ॥ ३ ॥ ४ ॥ ५ ॥ तस्मै इति ॥ स रन्तिदेवः आदृत्य तस्यादरं कृत्वा श्रद्धयान्वितः दानेच्छायुक्तः सर्वत्र भूतेषु हरिं सम्पश्यं-स्तस्मा अतिथयेऽन्नं घृतपायससंयावं संव्यभजत् विभज्य ददौ । स च द्विजस्तदन्नं भुक्त्वा प्रययौ ॥ ६ ॥ अथेति ॥ हे महीपते इति विसर्गान्तपाठे रन्तिदेवविशेषणम् । अथानन्तरं विभक्तस्य द्विजभुक्तावशिष्टमन्नादिकं स्वकुटुम्बार्थं विभक्तवतो भोक्ष्यमाणस्य सतः अन्यः भगवन्मायानिर्मितः कश्चिद्वृषलोऽतिथिरागमत् । तदा तत्र हरिं स्मरन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्यन् स रन्तिदेवः कुटुम्बार्थं विभक्तं व्यभजत् विभज्य ददौ ॥ ७ ॥ याते इति ॥ तस्मिन् शूद्रे याते सति श्वभिरावृतः कश्चिदन्योऽतिथिरगात् । स च तं राजानं प्रत्याह स्म । हे राजन् बुभुक्षते क्षुधार्दिताय । शता आर्षः । सगणाय श्वयूथसहिताय मे मह्यमन्नं दीयतामिति ॥ ८ ॥ स इति ॥ तदा च स विभुः रन्तिदेवस्तमादृत्य अङ्गीकृत्य बहुमानपुरःसरं बहुसंमानपूर्वकं यथा भवति तथा यद्ब्राह्मणाद्यातिथ्यादवशिष्टमन्नं तच्च सर्वं तेभ्यो दत्त्वा श्वभ्यः श्वपतये च नमश्चक्रे ॥ ९ ॥ पानीयेति ॥ ततश्च पानीयमात्रं जलमात्रमुच्छेषमुर्वरितं तच्च तदपि एकपरितर्पणमेकपुरुषतृप्तिजननयोग्यं तत्पास्यतः सतः कश्चित् पुल्कसः चाण्डालो भगवन्मायानिर्मितः अभ्यगात् आह स्म चेति शेषः । अशुभाय नीचाय मे मह्यमपो जलं देहीति ॥ १० ॥ तस्येति ॥ तस्य कृपणां दैन्ययुक्तां विपुलः श्रमः पिपासाजन्यो यतोऽवगम्यते तथाभूतां तां वाचं निशम्य श्रुत्वा कृपयातितरां सन्तप्तो रन्तिदेवः इदं वक्ष्यमाणममृतं तत्तुल्यं मधुरं वच आह स्म ॥ ११ ॥ नेति ॥ परां सर्वतः उत्कृष्टामणिमाद्यष्टैश्वर्ययुक्तां गतिं स्थितिं तथा

याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः ॥ राजन् मे दीयतामन्नं सगणाय बुभुक्षते ॥ ८ ॥ स आदृत्यावशिष्टं यद् बहुमानपुरस्कृतम् ॥ तच्च दत्त्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥९ ॥ पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम् ॥ पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे ॥१०॥ तस्य तां करुणां वाचं निशम्य विपुलश्रमाम् ॥ कृपया भृशसंतप्त इदमाहामृतं वचः ॥११॥ न कामयेऽहं गतिमीश्वरात् परामष्टर्द्धियुक्तामपुनर्भवं वा ॥ आर्तिं प्रपद्येऽखिलदेहभाजामन्तःस्थितो येन भवन्त्यदुःखाः ॥ १२ ॥ क्षुत्तृट्श्रमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः ॥ सर्वे निवृत्ताः कृपणस्य जन्तोर्जिजीविषोर्जीवजलार्पणान्मे ॥ १३ ॥ एवं प्रभाष्य पानीयं म्रियमाणः पिपासया ॥ पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः ॥ १४ ॥ तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् ॥ आत्मानं दर्शयांचक्रुर्माया विष्णुविनिर्मिताः ॥ १५ ॥

अपुनर्भवं मोक्षं वाहमीश्वरान्न कामये नेच्छामि किन्तु अखिलदेहभाजां सर्वप्राणिनामन्तःकरणे दुःखभोक्तृरूपेण स्थितः सन् तेषामार्त्तिं दुःखमहं प्रपद्ये प्राप्नुयाम् । येन मत्कर्तृकेन दुःखभोगेन सर्व एव अदुःखा दुःखरहिता भवन्ति भवेयुरिति कामये ॥ १२ ॥ परदुःखनिवृत्त्यैव मम सर्वदुःखनिवृत्तिरित्याह—क्षुदिति ॥ कृपणस्य दीनस्य जीवितुमिच्छोर्जन्तोर्जीवनहेतोर्जलस्यार्पणेन मे मम क्षुत्तृडादयः सर्वे क्लेशा निवृत्ताः ॥ १३ ॥ एवमिति ॥ निसर्गकरुणः स्वाभाविककृपावान् धीरः नृपः रन्तिदेवः पिपासया म्रियमाणोऽप्येवं प्रभाष्य पुल्कसाय पानीयमदात् ॥ १४ ॥ तस्येति ॥ फलमिच्छतां प्राणिनां फलदाः मायया विष्णुना भगवता विनिर्मिताः मायाः प्रथमं रन्तिदेवधैर्यपरीक्षार्थमतिथ्यादिरूपेण प्रतीतया मायारूपाः सन्तः त्रिभुवनस्य भुवनत्रयस्याधीशाः ब्रह्मादयस्तस्य रन्तिदेवस्य धैर्यादिना सन्तुष्टाः सन्तः आत्मानं दर्शयाञ्चक्रुः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ निःसङ्गः अनासक्तः विगतवरस्पृहश्च वै स रन्तिदेवः परं केवलं वासुदेवे भगवति भक्त्या तेभ्यो ब्रह्मादिभ्यो नमश्चक्रे न तु किमपि याचितवान् ॥ १६ ॥ ईश्वरेति ॥ हे राजन् अनन्यराधसः ईश्वरातिरिक्तफलाकाङ्क्षारहितस्य अत ईश्वरालम्बनं निरन्तरं भगवदेकनिष्ठं चित्तं कुर्वतस्तस्य गुणमयी त्रिगुणात्मिका माया स्वप्नवत् प्रत्यलयित आत्मन्येव लीना बभूव । रन्तिदेवो जीवन्मुक्तो बभूवेत्यर्थः ॥१७॥ तदिति ॥ तत्तेन प्रकृष्टः सङ्गः तस्यानुभावेन रन्तिदेवमनुवर्त्तमानाः सर्वे नारायणपरायणाः योगिनोऽभवन् ॥ १८ ॥ नरस्य वंशमुक्त्वा तद्भ्रातृणां वंशमाह—गर्गादित्यर्द्धम् ॥ गर्गात्सिनिः पुत्रो जातः । शील इति पाठान्तरम् । ततस्तस्मात् गार्ग्यसंज्ञः पुत्रो जातः क्षत्रात् क्षत्रियादपि तस्माद्ब्रह्मकुलमवर्त्तत । पुत्रादिपरम्परया प्रावर्त्तत । दुरितेति ॥ महावीर्यात् दुरितक्षयसंज्ञकः पुत्रो जातः । तस्य तु त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्रा जाताः । तान् विशिनष्टि । येऽत्र क्षत्रियवंशे जाता अपि ब्राह्मणगतिं गताः ब्राह्मणतां प्राप्ताः ॥१९॥ बृहदिति अर्द्धम् ॥ बृहत्क्षत्रस्य हस्ती पुत्रोऽभूत् । यत् येन

स वै तेभ्यो नमस्कृत्य निःसङ्गो विगतस्पृहः ॥ वासुदेवे भगवति भक्त्या चक्रे नमः परम् ॥ १६ ॥ ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः ॥ माया गुणमयी राजन् स्वप्नवत् प्रत्यलीयत ॥ १७ ॥ तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्तिनः ॥ अभवन् योगिनः सर्वे नारायणपरायणाः ॥ १८ ॥ गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद् ब्रह्म ह्यवर्तत ॥ दुरितक्षयो महावीर्यात् तस्य त्रय्यारुणिः कविः॥ पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः॥१९॥ बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरम् ॥ २० ॥ अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ॥ अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥ २१ ॥ अजमीढाद् बृहदिषुस्तस्य पुत्रो बृहद्धनुः ॥ बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥ २२ ॥ तत्सुतो विशदस्तस्य सेनजित् समजायत ॥ रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः ॥ २३ ॥ रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः ॥ पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ॥ २४ ॥ स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥ स योगी गवि भार्यायां विष्वक्सेनमधात् सुतम् ॥ २५ ॥

हस्तिना पुरं निर्मितमिति शेषः ॥२०॥ अजमीढ इति ॥ हस्तिनश्च अजमीढादयस्त्रयः पुत्रा जाताः । अजमीढस्य वंश्याः वंशजाः प्रियमेधादयो द्विजाः स्युः ब्राह्मणा बभूवुः ॥ २१ ॥ अजमीढादिति ॥ अजमीढादेवान्यः पुत्रो बृहदिषुरभवत् तस्य पुत्रो बृहद्धनुः ततो बृहत्कायस्तस्य पुत्रो बृहद्रथ आसीत् । जयद्रथ इति च पाठः ॥ २२ ॥ तदिति ॥ तस्य सुतो विशदः तस्य सुतः सेनजित् समजायत । फेनजिदिति पाठान्तरम् । तस्य रुचिराश्वादयश्चत्वारः सुता जाताः ॥ २३ ॥ रुचिरेति ॥ रुचिराश्वस्य सुतः प्राज्ञः तस्यात्मजः पृथुसेनः तस्य तनयः पारः तस्य पुत्रः नीपः तस्य तु पुत्रशतमभूत् । प्राज्ञस्थाने पार इति पाठे पारस्य पृथुसेनस्तस्यैव द्वितीयो नीपः ॥ २४ ॥ स इति ॥ स नीप एव कृत्वीसंज्ञायां शुकस्य अरणीसम्भवस्य कन्यायां ब्रह्मदत्ताख्यं पुत्रमजीजनत् । यद्यपि शुक उत्पत्त्यैव विमुक्तसङ्गो निर्गतस्तथापि विरहातुरं व्यासमनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यान्तं दृष्ट्वा छायाशुकं निर्माय गतवांस्तदभिप्रायेणैवायं गार्हस्थ्यादिव्यवहार इति न विरोध इति श्रीधरस्वामिनः । परे तु अरणिसंभूताच्छुकादन्य एव शुको भागवतवक्ता व्यासपुत्र इत्याहुः । तथा च ब्रह्मवैवर्ते कथा ।" भारतरचनानन्तरं व्यासो जाबालिकन्यामुवाह । सा च गर्भवती एकादश वर्षाणि न प्रासूत । ततो व्यासेन गर्भस्थं पुत्रं प्रति गर्भान्निःसरेत्युक्तं गर्भश्चाह । गर्भान्निःसृतं मां मायाभिभविष्यतीत्यतो न निःसर्त्तुमिच्छामि । यदि च मायायाः स्वाम्येव मायाभिभवाभावे प्रतिभूः स्यात्तदा निःसरेयम् । तच्छ्रुत्वा व्यासः द्वारकातः श्रीकृष्णमानिनाय । श्रीकृष्णेन मायाभिभवाभावे प्रतिज्ञाते गर्भाच्छुको निःससार । " इति । स च ब्रह्मदत्तो योगी गवि सरस्वत्यां भार्यायां विष्वक्सेनाख्यं सुतमधात् अजीजनत् ॥२५॥ जैगीषव्य इति ॥ स च जैगीषव्यस्यर्षेरुपदेशेन योगतन्त्रं योगशास्त्रं चकार । ततो विष्वक्सेनात् उदक्स्वनस्तस्मात् भल्लादो जातः । इमे सर्वे बार्हदीषवाः बृहदिषोर्वंशजाः । दीर्घत्वमार्षम् ॥ २६ ॥ यवीति ॥ द्विमीढस्य सुतो यवीनरः तस्य सुतो धृतिमान् । कृतिमानिति पाठान्तरम् । तस्य सुतो नाम्ना

जैगीषव्योपदेशेन योगतन्त्रं चकार ह ॥ उदक्स्वनस्ततस्तस्माद् भल्लादो बार्हदीषवः ॥ २६ ॥ यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ॥ नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् ॥ २७ ॥ सुपार्श्वात् सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः ॥ कृती हिरण्यनाभाद् यो योगं प्राप्य जगौ स्म षट् ॥ संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः ॥ २८ ॥ तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः ॥ २९ ॥ ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् ॥ नलिन्यामजमीढस्य नीलः शान्तिसुतस्ततः ॥ ३० ॥ शान्तेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् ॥ भर्म्याश्वस्तनयस्तस्य पञ्चासन्मुद्गलादयः ॥ यवीनरो बृहदिषुः काम्पिल्यः सृञ्जयः सुताः ॥ ३१ ॥

शतधृतिः यस्य पुत्रो दृढनेमिः स च सुपार्श्वकृत् तस्य पुत्रः सुपार्श्व इत्यर्थः ॥२७॥ सुपार्श्वादिति सार्द्धम् ॥ सुपार्श्वात्सुमतिः पुत्रोऽभूत् । तस्य सन्ततिमान् पुत्रः ततश्च कृतिसंज्ञः जातः । तं विशिनष्टि । यः कृती हिरण्यनाभात् योगं प्राप्य प्राच्यसाम्नां षट् संहिताश्च प्राप्य जगौ विभज्याध्यापितवान् । तस्य कृतिसंज्ञस्य नीपः ततः नीपात् उग्रायुधः ॥ २८ ॥ तस्येत्यर्द्धम् ॥ तस्य पुत्रः क्षेम्यः । अथ तस्मात् सुवीरः सुवीरस्य रिपुञ्जयः ॥२९॥ तत इति ॥ तस्य बहुरथो नाम पुत्रो जातः पुरुमीढस्त्वप्रजोऽभवत् इति । असिजभाव आर्षः । अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः । केचिद्बृहदिषुप्रभृतयः क्षत्रियाश्चेति वंशद्वयमुक्तम् । तस्यैवेदं वंशान्तरमाह । नलिन्यामित्यादिना यावदध्यायसमाप्तिः । अजमीढस्य नलिन्यां भार्यायां नीलः पुत्रो जातः तस्य सुतः शान्तिः ॥३०॥ शान्तेरिति सार्द्धम् ॥ शान्तेः सुतः सुशान्तिः तस्य पुत्रः पुरुजः । पुरुष इति पाठान्तरम् । ततः अर्कः सुतोऽभवत् । तस्य तनयो भर्म्याश्वः तस्य मुद्गल एको यवीनरादयश्च चत्वार इत्येवं मुद्गलादयः पञ्च सुता आसन् ॥३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्म्याश्व इति ॥ भर्म्याश्वः प्राह स्म । पुत्रानिति शेषः । तदेवाह । हे पुत्रा मे मम पञ्चानां विषयाणां शब्दस्पर्शरूपरसगन्धानां रक्षणाय सम्पादनाय पञ्चानां देशानां रक्षणाय वा इमे यूयमलं समर्था इति हि यस्मादित्याह तस्मात्ते पञ्चालसंज्ञिताः जाताः ॥ ३२ ॥ मुद्गलादिति अर्द्धम् ॥ तत्र मुद्गलात् मौद्गल्यसंज्ञितं ब्रह्मगोत्रं ब्राह्मणकुलं निर्वृत्तमुत्पन्नम् ॥३३॥मिथुनमिति ॥ भार्म्यात् भर्म्याश्वसुतान्मुद्गलात् मिथुनं स्त्रीपुरुषद्वयमभूत्।तत्र पुमान् दिवोदासः कन्या त्वहल्या जाता। यस्यां गोतमात् भर्त्तुः शतानन्दो जातः॥ ३४॥ तस्येति सार्द्धम् ॥ तस्य शतानन्दस्य पुत्रः सत्यधृतिः स च धनुर्वेदे शस्त्रास्त्रविद्यायां विशारदोऽतिनिपुणः तस्य सुतः शरद्वान् जातः । यस्मात् उर्वश्या अप्सरसो दर्शनाद्धेतोः रेतः शरस्तम्बे न्यपतत् अतः शरद्वान्नाम बभूवेति भावः । तच्च पतितं रेतः शुभं शुभाचारं मिथुनं स्त्रीपुंसमभूत् ॥ ३५ ॥ तदिति ॥ मृगयां चरन् शन्तनू राजा तन्मिथुनं दृष्ट्वा कृपया गृह्णात् गृहीतवान् गृहीत्वा ररक्षेत्यर्थः । तत्र मिथुने कुमारः कृपः कृपाचार्यः कन्या तु कृपी सा च द्रोणाचार्यस्य पत्न्यभवत् ॥ ३६ ॥ इति श्रीकृष्णसेवार्थम-

भर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि ॥ विषयाणामलमिमे इति पञ्चालसंज्ञिताः ॥ ३२ ॥ मुद्गलाद्ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ॥ ३३ ॥ मिथुनं मुद्गलाद् भार्म्याद् दिवोदासः पुमानभूत् ॥ अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात् ॥ ३४ ॥ तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ॥ शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात् किल ॥ शरस्तम्बेऽपतद्रेतो मिथुनं तदभूच्छुभम् ॥३५॥ तद् दृष्ट्वा कृपयाऽगृह्णाच्छन्तनुर्मृगयां चरन् ॥ कृपः कुमारः कन्या च द्रोणपत्न्यभवत् कृपी ॥३६ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥ श्रीशुक उवाच ॥ मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप ॥ सुदासः सहदेवोऽथ सोमको जन्तुजन्मकृत् ॥ १ ॥ तस्य पुत्रशतं तेषां यवीयान् पृषतः सुतः ॥ द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥ २ ॥ धृष्टद्युम्नाद् धृष्टकेतुर्भार्म्याः पञ्चालका इमे ॥ ३ ॥ योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ॥ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः ॥ ४ ॥

न्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमस्यैकविंशे व्यधादिमाम् ॥२१॥ द्वाविंशे तु दिवोदासवंशोऽथर्क्षस्य चान्वये ॥ जरासन्धार्जुनमुखाः श्लोकाः सार्द्धा नवाब्धयः ॥ एता-वंत्यो ऽनुष्टुभोऽपि तत्रोवाचेति चैककम् ॥२२॥ एवं मुद्गलस्य दुहितृसन्तानमभिधायाथ पुत्रसन्तानमाह—मित्रायुश्चेति ॥ मौद्गल्याद्दिवोदासात् मित्रायुः सुतो जातः । तस्य तु हे नृप च्यवनादयश्चत्वारः सुता जाताः । तत्र सोमको जन्तुजन्मकृदिति सोमकस्य सुतो जन्तुरित्यर्थः॥१॥ तस्येति ॥ न केवलं जन्तुरेव तत्पुत्रः किन्तु जन्तुज्येष्ठं तस्य पुत्रशतं जातं तेषां पुत्राणां पृषतो यवीयान् कनिष्ठः तत्र पृषतात् द्रुपदः पुत्रः । परे तु सोमकस्यैव मध्यमो द्रुपद इत्याहुः । तस्य च द्रौपदी कन्या धृष्टद्युम्नादयः सुताश्च जाताः ॥ २ ॥ धृष्टेति अर्द्धम् ॥ धृष्टद्युम्नाद्धृष्टकेतुः पुत्रोऽभूत् । इमे भार्म्या भर्म्यवंशप्रसूताः सर्वे पाञ्चालसंज्ञकाः ॥३॥ य इति सार्द्धम् ॥ अजमीढस्यान्यो यः सुतः ऋक्षाख्यस्ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवरणाख्यः सुतो जातः । ततश्च तपत्याख्यायां सूर्यकन्यायां कुरुक्षेत्रस्य पतिः कुरुर्जातः । तस्य च परीक्षिदादयश्चत्वारः सुता जाताः ॥ ४ ॥ सुहोत्र इति सार्द्धम् ॥ तत्र सुधनुषः सुहोत्रोऽभूत् । अथ तस्माच्च्यवनः ततः कृती ततः कृतिनः उपरिचरो वसुः पुत्रोऽभूत् । ततो वसोः बृहद्रथो मुखमादिर्येषां ते पुत्रा जज्ञिरे । तेषु च कुशाम्बाद्या-श्चत्वारः चेदिपाः चेदिदेशाधिपतयः ॥ ५ ॥ बृहद्रथादिति सार्द्धम् ॥ बृहद्रथात्कुशाश्वोऽभूत् । कुशाग्र इति पाठान्तरम् । तस्य सुत ऋषभः तस्य सुतः सत्यहितः तस्याप-त्यं पुष्पवान् तस्य सुतो जहुः । तस्य बृहद्रथस्यैको वंशो निरूपितः । अथान्यस्यामपि भार्यायां बृहद्रथात् द्वे शकले एकस्यैव शरीरस्य मध्यतो विभागे यथा द्विधाभूते बभूवतुः ॥ ६ ॥ ते इति ॥ ते च शकले मात्रा बहिरुत्सृष्टे परित्यक्ते तत्र जीव जीवेति वदन्त्या क्रीडन्त्या जरया हेतुभूतया राक्षस्या अभिसन्धिते सञ्जातसन्धाने । अङ्-प्रत्ययान्तादभिसन्धाशब्दादितच् । ततः अभिसन्धानात् ससुतो जरासन्धनामकोऽभवत् ॥ ७ ॥ तत इति ॥ ततश्च सहदेवोऽभूत् । ततश्च सोमापिः । यत् यस्मात् सोमापेः

सुहोत्रोऽभूत् सुधनुषश्च्यवनोऽथ ततः कृती ॥ वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ॥ कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ॥ ५ ॥ बृह-द्रथात् कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ॥ जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः ॥ अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ॥ ६ ॥ ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ॥ जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत् सुतः ॥७॥ ततश्च सहदेवोऽभूत् सोमापिर्यच्छ्रुतश्रवाः ॥ परीक्षिदनपत्योऽभूत् सुरथो नाम जाह्नवः ॥ ८ ॥ ततो विदूरथस्तस्मात् सार्वभौमस्ततोऽभवत् ॥ जयसेनस्तत्तनयो राधिकोऽतोऽयुतो ह्यभू-त् ॥ ९ ॥ ततश्च क्रोधनस्तस्माद्देवातिथिरमुष्य च ॥ ऋष्यस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ॥ १०॥ देवापिः शन्तनुस्तस्य बाह्लीक इति चात्मजाः ॥ पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥ ११ ॥ अभवच्छन्तनू राजा प्राङ्महाभिषसंज्ञितः ॥ यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥ शान्तिमाप्नोति चैवाग्र्यां कर्मणा तेन शन्तनुः ॥ १२ ॥

श्रुतश्रवाः कुरुपुत्रः परीक्षित्त्वनपत्योऽभूत् । यश्च सुरथो नाम प्रसिद्धः स जाह्नवः कुरुपुत्रस्य जह्नोः पुत्रः ॥ ८ ॥ तत इति ॥ ततः सुरथात् विदूरथः तस्मात्सार्वभौमाख्यः ततस्तस्माज्जयसेनः तस्य तनयो राधिकः अतो राधिकात् द्युमानभूत् । अतोऽयुतो ह्यभूदिति पाठान्तरम् ॥ ९ ॥ ततश्चेति ॥ ततश्च द्युमतः क्रोधनः तस्माद्देवातिथिः अमुष्य ऋक्षः । ऋष्य इति पाठान्तरम् । तस्य पुत्रो दिलीपः तस्य चात्मजः पुत्रः प्रतीपः॥१०॥ देवापिरिति ॥ तस्य देवापिः शन्तनुर्बाह्लीकश्चेति त्रयः पुत्रा जाताः । तत्र देवापिस्तु पितृराज्यं परित्यज्य वनं गतः अत इदानीमप्रजा इत्याशयः॥११॥ अभवदिति सार्द्धम् ॥ अतस्ततः कनिष्ठः शन्तनुरेव राजाभवत् । स च प्राक् पूर्वजन्मनि महा-भिष इति संज्ञास्य सञ्जातेति तथाभूतोऽभूत् । स च शन्तनुर्यं यं जीर्णं कराभ्यां स्पृशति स वृद्धो यौवनमेति प्राप्नोति । तथाग्र्यां मुख्यां शान्तिमारोग्यजनितं सुखं चाप्नोति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनैव कर्मणा शन्तनुसञ्ज्ञकः शं सुखं तनुत इति शन्तनुरिति निरुक्तिर्ज्ञेया ॥ १२ ॥ समा इति सार्द्धम् ॥ तत्र राज्ये यदा द्वादश समा वर्षाणि विभुः पर्जन्यो न ववर्ष तदा शन्तनुस्तत्र निमित्तं ब्राह्मणानपृच्छत् ब्राह्मणैस्त्वेवमुक्तः । " दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ " इति स्मृतेः । योऽग्रभुक् भुवमग्रजे तिष्ठति सति भुनक्ति एवं त्वादृशोऽपि परिवेत्तैव भवति अनेन दोषेणैव वृष्टिर्न भवति अत एव दोषपरिहारेण वृष्ट्या पुरराष्ट्रयोर्विशेषतो वृद्ध्यर्थमग्रजाय त्वं राज्यं देहि ततो वृष्टिर्भविष्यतीति ॥ १३ ॥ एवमिति सार्द्धम् ॥ द्विजैर्ब्राह्मणैरेवमुक्तः शन्तनुर्वनं गत्वा ज्येष्ठं भ्रातरं देवापिं छन्दयामास । राज्ञः प्रजापालनादिः परो धर्मः अतस्त्वं राज्यं स्वीकुर्विति प्रार्थितवान् । परं तु शन्तनुप्रार्थनातः पूर्वमेव तस्य शन्तनोर्मन्त्रिणा अश्मरावसंज्ञेन देवापिं पाखण्डीकृत्य राज्यानर्हं कर्तुं शन्तनुप्रभृत्यलक्षितमेव ये प्रहिता विप्रास्तैः पाखण्डमताश्रयया गिरा वेदाद्विभ्रंशितः ततोऽनन्तरं शन्तनुना प्रार्थितः स देवापिः वेदवादस्यातिवादान् निन्दावचनानि अब्रवीत् । ततश्च वेदनिन्दया देवापेः पाति-

समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥ शन्तनुर्ब्राह्मणैरुक्तः परिवेत्ता त्वमग्रभुक् ॥ राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥ १३ ॥ एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत् ॥ तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥ वेदवादातिवादान्वै तदा देवो ववर्ष ह ॥ १४ ॥ देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥ सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥ १५ ॥ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥ शलश्च शन्तनोरासीद्गङ्गायां भीष्म आत्मवान् ॥ १६ ॥ सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥ वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ॥१७॥ शन्तनोर्दाशकन्यायां जज्ञे चित्राङ्गदः सुतः ॥ विचित्रवीर्यश्चावरजो नाम्ना चित्राङ्गदो हतः ॥ १८ ॥

त्येन राज्यानर्हत्वे जाते शन्तनो राज्ये दोषाभावात् तदैव देवो ववर्ष ॥१४॥ देवापिरिति ॥ ततो वेदनिन्दया अनुतप्तः देवापिः योगमास्थाय कलापग्रामम् आश्रितो वर्त्तते । स च कलौ सोमवंशे नष्टे सति पुनः कृतयुगस्यादौ पुनः सोमवंशं स्थापयिष्यति ॥ १५ ॥ बाह्लीकादिति द्वयम् ॥ बाह्लीकात् सोमदत्तः पुत्रोऽभूत् । ततश्च भूरिर्भूरिश्रवाः शलश्चेति त्रयः पुत्रा जज्ञिरे । शन्तनोस्तु ब्रह्मशापात् मानुषत्वं प्राप्य स्वयंवरेणागतायां गङ्गायां भार्यायां भीष्मो जातः । स च आत्मवान् निर्जितमनाः सर्वेषां धर्मविदां श्रेष्ठः महाभागवतः परमभक्तः अत एव कविः आत्मज्ञः वीराणां योधानां यूथस्य सैन्यस्याग्रणीः नायकः येन युधि युद्धे जामदग्न्यो रामोऽपि स्वबलेन तोषितः ॥१६॥१७॥ शन्तनोरिति ॥ शन्तनोर्दाशकन्यायामुपरिचरस्य वसोः पतितेन वीर्येण तद्भक्षितवत्या मत्स्या उदराद्दाशैः कैवर्त्तैरुद्धृतायां तैः पालितायां मत्स्यगन्धियोजनगन्धिसत्यवत्याख्यायां चित्राङ्गदः सुतो जज्ञे । अवरजस्ततः कनीयान् विचित्रवीर्यश्च सुतो जज्ञे । तत्र चित्राङ्गदो नाम्ना तत्समाननामवता चित्राङ्गदाख्येन गन्धर्वेण युद्धे हतः ॥ १८ ॥

Nepal Sanskrit University, Baliyadi Collection

CC-0. In Public Domain. Digitization by eGangotri

यस्यामिति ॥ यस्यां सत्यवत्यां शन्तनुपरिग्रहात्पूर्वमेव वेदा गुप्ताः विभागपूर्वकप्रवर्त्तनेन लोके संरक्षिता येन सः कृष्णद्वैपायनाख्यः हरेः कलावतारः मुनिर्व्यासो जातः यतोऽहं शुकः जातः सन्निदं श्रीभागवतमध्यगाम् अधीतवान् ॥१९॥ हित्वेति ॥ भगवान् बादरायणो व्यासः पैलादीन् स्वशिष्यान् हित्वा तेभ्योऽनुपदिश्य इदं गुह्यं सर्ववेदेतिहासानां सारभूतं भागवतं शान्ताय कामादिदोषरहिताय पुत्राय मह्यं जगौ उपदिदेश ॥ २०॥ विचित्रेति ॥ विचित्रवीर्यः काशिराजस्य सुते बलाद्भीष्मेण स्वयंवरादुपानीते अम्बिकाम्बालिके उवाह ॥ २१ ॥ तयोरिति अर्द्धम् ॥ तयोरम्बिकाम्बालिकयोरासक्तं हृदयं यस्य स विचित्रवीर्यः यक्ष्मणा यक्ष्मरोगेण क्षयेण गृहीतः सन् मृतः ॥ २२ ॥ क्षेत्रे इति ॥ ततो मात्रा सत्यवत्योक्तः आदिष्टो बादरायणोऽप्रजस्य अपुत्रस्य । असिजभाव आर्षः । भ्रातुर्विचित्रवीर्यस्य क्षेत्रे कलत्रत्रये धृतराष्ट्रादिपुत्रत्रयमजीजनत् जनयामास । तत्राम्बिकायां धृतराष्ट्रम् । अम्बालिकायां पाण्डुं दास्यां विदुरमिति विवेकः । न च शास्त्रविरोधः शङ्कनीयः । "अपतिरपत्यलिप्सुर्देवराद्गुरुप्रयुक्तादृतुमतीयात्" इति । शास्त्रस्य

यस्यां पराशरात्साक्षादवतीर्णो हरेः कला ॥ वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम् ॥ १९ ॥ हित्वा स्वशिष्यान्पैलादीन् भगवान्बादरायणः ॥ मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ॥ २० ॥ विचित्रवीर्योऽथोवाह काशिराजसुते बलात् ॥ स्वयंवरादुपानीते अम्बिकाऽम्बालिके उभे ॥ २१ ॥ तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ॥ २२ ॥ क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ॥ धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत् ॥ २३ ॥ गान्धार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृपः ॥ तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥ २४ ॥ शापान्मैथुनरुद्धस्य पाण्डोः कुन्त्यां महारथाः ॥ जाता धर्मानिलेन्द्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥ २५ ॥ नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः ॥ द्रौपद्यां पञ्च पञ्चभ्यः पुत्रास्ते पितरोऽभवन् ॥ २६ ॥ युधिष्ठिरात् प्रतिविन्ध्यः श्रुतसेनो वृकोदरात् ॥ अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥ सहदेवसुतो राजन् श्रुतकर्मा तथाऽपरे ॥ २७ ॥

तदानीमविगीतत्वात् ॥ २३ ॥ गान्धार्यामिति ॥ तत्र हे नृप धृतराष्ट्रस्य गान्धार्यां पुत्रशतं दुःशलाख्या कन्यका च जज्ञे । तत्र तेषु पुत्रेषु दुर्योधनो ज्येष्ठ आसीत् ॥२४॥ शापादिति ॥ अरण्ये मृगरूपिणो रममाणयोः ऋष्योः शापाद्धेतोर्मैथुने कर्मणि प्रतिरुद्धस्य पाण्डोर्भार्यायां कुन्त्यां धर्मानिलेन्द्रेभ्यो युधिष्ठिरः मुखमादिर्येषां ते त्रयः युधिष्ठिरभीमार्जुना महारथाः पुत्रा जाताः ॥ २५ ॥ नकुल इति ॥ तथान्यस्यामपि पाण्डोर्भार्यायां माद्र्यां नासत्यदस्रयोः नासत्यदस्राभ्यामश्विनीकुमाराभ्यां नकुलः सहदेवश्चेति द्वौ सुतौ जातौ । तेभ्यः पञ्चभ्यो युधिष्ठिरादिभ्यो द्रौपद्यामेकस्यां भार्यायां पञ्च पुत्रा अभवन् । ते च ते तव पितरः पितृव्याः ॥२६॥ युधिष्ठिरादिति सार्द्धम् ॥ नाकुलिर्नकुलपुत्रः स्पष्टं शेषम् । तथा अपरेऽपि युधिष्ठिरादिभ्योऽन्यासु भार्यासु जाता इत्यर्थः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान् दर्शयति—युधिष्ठिरादिति सार्द्धम् ॥ युधिष्ठिरात्तु पौरव्यां देवको जातः। भीमसेनात् हिडिम्बायां घटोत्कचो जातः । काली चान्या तस्यैव भार्या तस्यां तत एव सर्वगतो नाम पुत्रोऽभवत् । पार्वती पर्वतस्य पुत्री विजया नाम सहदेवात् सुहोत्रं पुत्रमसूत ॥२८॥ करेण्विति सार्द्धम् ॥ करेणुमत्यां भार्यायां तु नकुलः वीरमित्रं पुत्रं जनयामास । निरमित्रमिति पाठान्तरम् । तथार्जुनोऽपि उलूप्यां नागकन्यायामिरावन्तमिरावत्संज्ञकं जनयामास । अर्जुन एव मणिपूराख्यदेशविशेषपतेः सुतायां तु बभ्रुवाहनं जनयामास । स च बभ्रुवाहनः तस्यार्जुनस्य पुत्रः सन्नपि पुत्रिकासुतः मातामहसुतः । "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलं कृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥" इति भाषाबन्धरूपपुत्रिकाधर्मेण कन्याप्रदानात् स मातामहेन गृहीत इत्यर्थः॥२९॥ तवेति ॥ तव तातः पिताभिमन्युरर्जुनात् सुभद्रायामजायत । स च सर्वानतिरथान् जयतीति तथाभूतो वीरोऽभूत् । ततश्च सकाशादुत्तरायां भवान् जातः॥३०॥ परीति ॥ कुरुषु दुर्योधनादिषु परिक्षीणेषु नष्टेषु सत्सु क्रुद्धस्य द्रौणेर्ब्रह्मास्त्रतेजसा दग्धोऽपि त्वं कृष्णस्य

युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ॥ भीमसेनाद्धिडिम्बायां काल्यां सर्वगतस्ततः ॥ सहदेवात्सुहोत्रं तु विजयाऽसूत पार्वती ॥२८॥ करेणुमत्यां नकुलो निरमित्रं तथार्जुनः ॥ इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम्॥ २९ ॥ मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ॥ तव तातः सुभद्रायामभिमन्युरजायत॥ सर्वातिरथजिद् वीर उत्तरायां ततो भवान् ॥ ३० ॥ परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा ॥ त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ॥३१॥ तवेमे तनयास्तात जनमेजयपूर्वकाः॥ श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ॥३२॥ जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् ॥ सर्पान् वै सर्पयागाग्नौ स होष्यति रुषाऽन्वितः ॥ ३३ ॥ कावषेयं पुरोधाय तुरं तुरगमेधयाट् ॥ समन्तात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ॥ ३४ ॥ तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन् ॥ अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ॥ ३५ ॥

भगवतोऽनुभावेन सजीव एवान्तकात् मृत्योः सकाशान्मोचितोऽसि ॥ ३१ ॥ तवेति ॥ हे तात तव तनयास्त्विमे जनमेजयः पूर्वो ज्येष्ठो येषां ते । वीर्यवानिति सर्वेषां विशेषणम् । श्रुतसेनो भीमसेनः उग्रसेनश्चेति जनमेजयेन सह चत्वारः ॥ ३२ ॥ जनमेजय इति ॥ तक्षकान्निधनं गतं मरणं प्राप्तं त्वां विदित्वा स त्वत्पुत्रो जनमेजयो रुषान्वितः सन् सर्पविनाशकयागसम्बन्धिन्यग्नौ सर्पान् होष्यति ॥ ३३ ॥ कावषेयमिति ॥ कावषेयं कवषापत्यं तुरं तुरसंज्ञं पुरोधाय पुरोहितं कृत्वा समन्तात्सर्वतः पृथिवीं पृथिव्यां स्थितान्नृपान् जित्वाऽध्वरैः अश्वमेधैः यक्ष्यति भगवन्तमाराधयिष्यति अत एव तुरगमेधयाडिति प्रसिद्धो भविष्यति । यजेर्ण्विश्छान्दसः ॥ ३४ ॥ तस्येति ॥ तस्य जनमेजयस्य पुत्रः शतानीकाख्यो भविता । स च याज्ञवल्क्यात् त्रयीमृगादिवेदत्रयीं पठन् अस्त्रज्ञानं कृपाचार्यादिति शेषः । " याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्य " इति वैष्णवोक्तेः । क्वचित्तु अस्त्रज्ञानं कृपादित्येव पाठः । शौनकात् यज्ञादिक्रियाज्ञानं परं परमात्मज्ञानं च एष्यति ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

सहस्रेति ॥ तस्य शतानीकस्य पुत्रः सहस्रानीकः ततस्तस्माच्च अश्वमेधजः तस्यापि असीमकृष्णः तस्य सुतो नेमिचक्रो भविता ॥३६॥ गजेति ॥ स तु गजाह्वये हस्तिनापुरे नद्या गङ्गया हृते प्लाविते सति ततो निष्क्रम्य कौशाम्ब्यां पुर्यां साधु यथा भवति तथा वत्स्यति निवासं करिष्यति ततो जातः सुतश्चित्ररथ उक्तः । तस्मात्कविरथः सुतो भाव्यः । स्मृत इति पाठान्तरम् ॥३७॥ तस्मादिति ॥ तस्माच्च वृष्टिमान् भविता । अथ तस्य पुत्रः सुषेणः महीपतिर्भविता । तस्य पुत्रः सुनीथः तस्य पुत्रः नृचक्षुः । यत् यस्मान्नृचक्षुषः सुखीनलः पुत्रो भविता॥३८॥ पारीति ॥ तस्मात् पारिप्लवः सुतः तस्मान्मेधावी स च सुनय आत्मजो यस्य तथाभूतः । यद्वा । पारिप्लवात्सुनयः तस्यात्मजो मेधावीत्यर्थः । ततो नृपंजयः तस्माच्च दूर्वः तस्मात्तिमिर्जनिष्यति । तङ्भाव आर्षः ॥३९॥ तिमेरिति ॥ तिमेर्बृहद्रथः तस्माच्छतानीकः । स च सुदासजः बृहद्रथात्सुदासः तस्माच्छतानीको जनिष्यत इत्यर्थः । शतानीकाद्दुर्दमनः तस्यापत्यं तु अहीनरः । बहीनर इति पाठान्तरम् ॥ ४० ॥ दण्डेति अर्द्धम् ॥ तस्य दण्डपाणिः तस्य निमिः तस्य

सहस्रानीकस्ततपुत्रस्ततश्चैवाश्वमेधजः ॥ असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ॥३६॥ गजाह्वये हृते नद्यां कौशाम्ब्यां साधु वत्स्यति ॥ उक्तस्ततश्चित्ररथस्तस्मात्कविरथः सुतः ॥ ३७ ॥ तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः ॥ सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ॥३८॥ पारिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः ॥ नृपञ्जयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ॥३९॥ तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः ॥ शतानीकाद् दुर्दमनस्तस्यापत्यं बहीनरः ॥४०॥ दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृपः ॥४१॥ ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः ॥ क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥४२॥ अथ मागधराजानो भवितारो वदामि ते ॥४३॥ भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ॥ ४४ ॥ ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः ॥ सुनक्षत्रः सुनक्षत्राद् बृहत्सेनोऽथ कर्मजित् ॥ ४५ ॥ ततः सृतंजयाद् विप्रः शुचिस्तस्य भविष्यति ॥ क्षेमोऽथ सुव्रतस्तस्माद् धर्मसूत्रः शमस्ततः ॥ ४६ ॥

क्षेमको नृपो भविता ॥ ४१ ॥ ब्रह्मेति ॥ ब्रह्मक्षत्रकुलयोः कारणभूतः अत एव देवैर्ऋषिभिश्च सत्कृतोऽयं वंशो मया प्रोक्तः । कलौ युगे क्षेमकं राजानं प्राप्य संस्थां समाप्तिं प्राप्स्यति ॥४२॥ अथेत्यर्द्धं स्पष्टम् ॥ राजान्तात् टजभाव आर्षः ॥ ४३ ॥ भवितेति अर्द्धम् ॥ सहदेवस्य जरासन्धपुत्रस्य पुत्रो मार्जारिर्भविता । अस्यैव पूर्वोक्तं सोमापिरिति नामान्तरं ज्ञेयम् । यत् यतो मार्जारेः श्रुतश्रवाः पुत्रो भविता ॥ ४४॥ ततोऽयुतायुरिति ॥ ततः अयुतायुः तस्यापि निरमित्रः । अथ तस्य सुतः सुनक्षत्रः सुनक्षत्राद्बृहत्सेनः । अथ तस्मात् कर्मजित् ॥ ४५ ॥ तत इति ॥ ततः श्रुतञ्जयः तस्य शुचिसंज्ञो विप्रो भविष्यति । अथ तस्मात् क्षेमः तस्मात्सुव्रतः तस्मात् धर्मनेत्रः । धर्मसूत्र इति वा पाठः । ततश्च श्रुतसंज्ञो भविता । समस्त इति पाठान्तरम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्युमदिति ॥ ततः द्युमत्सेनः अथ तस्मात् सुमतिः ततश्च सुबलो जनिता ॥ ४७ ॥ सुनीथ इति ॥ सुनीथः अथ तस्मात् सत्यजित् तस्माद्विश्वजित् यद्यस्मात् रिपुञ्जयः एते सर्वे बार्हद्रथाः बृहद्रथवंश्याः साहस्रवत्सरं सहस्रसंवत्सरं भाव्याः भाविनो भूपालाः कथिताः । अस्य विचारो द्वादशस्कन्धे भविष्यति । ततः परं भाव्यांस्तु द्वादशस्कन्धे वक्ष्यतीति ज्ञेयम् ॥ ४८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वाविंशे नवमस्य व्यधादिमाम् ॥ २२ ॥ त्रयोविंशे त्वनोर्द्रुह्योस्तुर्वसोश्चान्वयः क्रमात् ॥ ज्यामघान्तं यदोर्वंशः श्लोकाः सार्द्धा नवाग्नयः ॥ एकमेवास्त्युवाचेति श्लोकैस्तुल्या अनुष्टुभः ॥ २३ ॥ अनोरिति सार्द्धम् ॥ अनोः ययातिचतुर्थपुत्रस्य सभानरादयस्त्रयः पुत्रा जाताः । सभानरात्कालनरः सुतः तस्य सुतः सञ्जयाख्यः जातः । ततो जनमेजयः तस्य पुत्रो महाशीलः तस्य महामनाः ॥ १ ॥ उशीनर इति ॥ महामनसः उशीनरस्तितिक्षुश्चेति द्वावात्मजौ बभूवतुः । तत्रोशीनरस्यात्मजाः शिबिप्रभृतयश्चत्वारः । सन्धिरार्षः ॥२॥ वृषेति ॥ तत्रापि शिबेरपि वृषादर्भादयश्चत्वार एव आत्मजा आसन् । तितिक्षोश्च

द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः ॥ ४७ ॥ सुनीथः सत्यजिदथ विश्वजिद् यद्रिपुञ्जयः ॥ बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥ ४८ ॥ इति श्रीभागवते महापुराणे नवमस्कन्धे द्वाविंशोऽध्यायः ॥२२॥ श्रीशुक उवाच ॥ अनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः ॥ सभानरात् कालनरः सञ्जयस्तत्सुतस्ततः ॥ जनमेजयस्तस्य पुत्रो महाशीलो महामनाः ॥१ ॥ उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः ॥ २ ॥ वृषादर्भः सुवीरश्च मद्रः कैकेय आत्मजाः ॥ शिबेश्चत्वार एवासंस्तितिक्षोश्च वृषद्रथः ॥ ३ ॥ ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥ ४ ॥ अङ्गवङ्गकलिङ्गाद्याः सुह्मपुण्ड्रान्ध्रसंज्ञिताः ॥ जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥ ५ ॥ चक्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते ॥ खनपानोऽङ्गतो जज्ञे तस्माद्दिविरथस्ततः ॥ सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजः ॥ ६ ॥ रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥ शान्तां स्वकन्यां प्रायच्छदृष्यशृङ्ग उवाह ताम् ॥ ७ ॥

वृषद्रथः । उशद्रथ इति पाठान्तरम् ॥३॥ तत इति अर्द्धम् ॥ ततश्च हेमः अथ तस्य सुतपाः जातः । सुतपसो बलिः सुतोऽभवत् ॥ ४ ॥ अङ्गेति ॥ महीक्षितः पृथिवीपतेर्बलेः क्षेत्रे भार्यायां दीर्घतमसः उतथ्यपुत्रात् सकाशात् अङ्गादिसंज्ञकाः षट् पुत्रा जज्ञिरे । महीक्षित इति बहुवचनं पुत्राणां वा विशेषणम् ॥ ५ ॥ चक्रुरित्यर्द्धम् ॥ ते च इमान् स्वस्वनाम्ना प्रसिद्धान् प्राच्यकान् पूर्वदिग्वर्त्तिनः विषयान् देशान् चक्रुः । खनेति ॥ अत्र अङ्गतः खनपानाख्यः सुतो जज्ञे । तस्माद्दिविरथः ततश्च धर्मरथः सुतो जज्ञे । यस्य धर्मरथस्य चित्ररथो जातः । स चाप्रजाः पुत्ररहितो बभूव ॥६ ॥ रोमपाद इति ॥ स एव रोमपाद इति ख्यातः प्रसिद्धः । तस्मै तस्य सखा दशरथः शान्ताख्यां स्वकन्यां प्रायच्छत् प्रादात् । तां च शान्तामृष्यशृङ्गाख्यो मुनिरुवाह ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव इति ॥ रोमपादस्य देशे देवे पर्जन्ये अवर्षति सति ऋष्यशृङ्गस्य स्वदेशं प्रत्यागमनमात्रेणैव वृष्टिर्भविष्यतीति ब्राह्मणादिभिः निश्चये कृते यं हरिणीसुतं हरिण्यां विभाण्डकादृषेरुत्पन्नं रामा गणिका नाट्यादिभिरुपायैरानिन्युः । वनात् रोमपादनगरं प्रत्यानीतवत्यः स ऋष्यशृङ्ग इत्यर्थः ॥ ८ ॥ स त्विति ॥ स तु ऋष्यशृङ्गः मरुत्वतः इन्द्रस्य सम्बन्धिनीं तद्देवताकामिष्टिं निरूप्य कृत्वा अनपत्यस्य राज्ञो रोमपादस्य प्रजामदात् । येन ऋष्यशृङ्गानुष्ठितयागविशेषेण अप्रजाः अनपत्यः दशरथोऽपि प्रजाः श्रीरामादीन् चतुरः पुत्रान् लेभे ॥ ९ ॥ चतुरङ्ग इति ॥ रोमपादाच्चतुरङ्गाख्यः सुतो जातः । तस्य सुतः पृथुलाक्षः । बृहद्रथादयस्त्रयस्तस्य पृथुलाक्षस्य सुताः ॥ १० ॥ आद्यादिति ॥ तत्राद्याद्बृहद्रथात् बृहन्मना जातः । तस्माज्जातः सुतः जयद्रथ इत्युदाहृतः कथितः । तस्य जयद्रथस्य संभूत्यां संभूत्याख्यायां भार्यायां विजयः सुतो जातः । ततो धृतिसंज्ञकोऽजायत ॥ ११ ॥ तत इति युग्मम् ॥ ततो धृतेर्धृतव्रतः तस्य सत्कर्मा ततश्च अधिरथो जातः । योऽसावधिरथो गङ्गातटे क्रीडन् कुन्त्या अपविद्धं

देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतम् ॥ नाट्यसङ्गीतवादित्रैर्विभ्रमालिङ्गनार्हणैः ॥८॥ स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥ प्रजामदाद्दशरथो येन लेभेऽप्रजाः प्रजाः ॥ ९ ॥ चतुरङ्गो रोमपादात्पृथुलाक्षस्तु तत्सुतः ॥ बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः ॥ १० ॥ आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥ विजयस्तस्य संभूत्यां ततो धृतिरजायत ॥ ११ ॥ ततो धृतव्रतस्तस्य सत्कर्माऽधिरथस्ततः ॥ योऽसौ गङ्गातटे क्रीडन्मञ्जूषाऽन्तर्गतं शिशुम् ॥१२॥ कुन्त्यापविद्धं कानीनमनपत्योऽकरोत् सुतम् ॥ वृषसेनः सुतस्तस्य कर्णस्य जगतीपतेः ॥१३॥ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ आरब्धस्तस्य गान्धारस्तस्य धर्मसुतो धृतः ॥ १४ ॥ धृतस्य दुर्मनास्तस्मात्प्रचेताः प्राचेतसाः शतम् ॥ म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ॥ १५ ॥ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥ त्रिभानुस्तत्सुतोऽस्यापि करंधम उदारधीः ॥ १६ ॥ मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥ दुष्यन्तः स पुनर्भेजे स्ववंशं राज्यकामुकः ॥ १७ ॥

परित्यक्तं कानीनं कन्यकावस्थायां जातं मञ्जूषान्तर्गतं पेटिकायां स्थितं कर्णाख्यं शिशुं लब्ध्वा स्वयमनपत्यस्तं सुतमकरोत्तस्य जगतीपतेः भूपालस्य कर्णस्य सुतो वृषसेनोऽभवत् ॥ १२ ॥ १३ ॥ द्रुह्योरिति ॥ द्रुह्योर्ययातितृतीयपुत्रस्य तनयो बभ्रुः तस्य बभ्रोरात्मजः सेतुर्जातः । ततः आरब्धः तस्य गान्धारः सुतः तस्य धर्मसुतः तस्य धृतः ॥ १४ ॥ धृतस्येति ॥ धृतस्य दुर्मनाः तस्मात् प्रचेताः जज्ञे । प्राचेतसाः प्रचेतःपुत्रास्तु शतं जाताः । ते च उदीचीं दिशमाश्रिताः सन्तो म्लेच्छानामधिपतयोऽभूवन् ॥ १५ ॥ तुर्वसोरिति ॥ तुर्वसोर्ययातिद्वितीयपुत्रस्य सुतो वह्निर्वह्नेश्च सुतो भर्गः । भर्ग इति वा पाठः । अथ तस्माद्भानुमान् तस्य सुतः सुभानुः । त्रिभानुरित्यपि पाठः । तस्यापि सुतः करन्धमः स च उदारधीः महादानी ॥१६॥ मरुत इति ॥ तस्य सुतो मरुतः स चापुत्रः सन् पौरवं पूरोर्वंशे जातं दुष्यन्तमेव पुत्रमन्वभूत् स्वीकृतवानित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स च राज्यकामुको दुष्यन्तस्तत्पुत्रः सन्नपि पुनः स्वं वंशं भेजे न्यवर्तत । पुरुवंश्यानामेव नृपासनाधिकारात् ॥ १७ ॥ ययातेरिति ॥ हे नरर्षभ नृणां सर्वपापहरं महापुण्यं ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं वर्णयामि ॥ १८ ॥ यदोरिति ॥ स्पष्टम् ॥ १९ ॥ यदोरिति ॥ यदोः सहस्रजित् क्रोष्टा नलो रिपुः इति श्रुताः विश्रुताश्चत्वारः सूनवो जाताः । तत्र चतुर्णां मध्ये प्रथमस्य सहस्रजितः आत्मजः शतजित् ॥ २० ॥ महेति ॥ तस्य महाहयादयस्त्रयः सुताः जाताः । तत्र हैहयस्य सुतः धर्मः ततस्तु नेत्रसंज्ञकः स च कुन्तेः पिता ॥ २१ ॥ सोहञ्जिरिति ॥ कुन्तेः सोहञ्जिरभवत् ततो महिष्मान् ततो भद्रसेनः । स्वार्थे कन् । भद्रसेनस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ । धनकश्च कृतवीर्यसूः तस्य पुत्रः कृतवीर्य इत्यर्थः ॥ २२ ॥ कृताग्निरिति सार्द्धम् ॥ न केवलं कृतवीर्य एव तत्पुत्रः किंतु कृताग्न्यादयोऽपि त्रयो धनकस्यैवात्मजाः । अर्जुन इति ॥ तत्र कृतवीर्यस्य सुतोऽर्जुनः स च सप्तद्वीपानामीश्वरः । ननु ययातिशप्तयदुकुलजोऽसौ कथं सप्तद्वीपेश इत्याशङ्क्याह । हरेरंशात् दत्तात्रेयात् प्राप्तो योगः महागुणा अणिमादयश्च येन तादृशश्चा-

ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ॥ वर्णयामि महापुण्यं सर्वपापहरं नृणाम् ॥ १८ ॥ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ यत्रावतीर्णो भगवान् परमात्मा नराकृतिः ॥ १९ ॥ यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति स्मृताः ॥ चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः ॥ २० ॥ महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥ धर्मस्तु हैहयसुतो नेत्रः कुन्तेः पिता ततः ॥ २१ ॥सोहञ्जिरभवत्कुन्तेर्महिष्मान्भद्रसेनकः ॥ दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः ॥२२॥ कृताग्निः कृतवर्मा च कृतौजा धनकात्मजः ॥ अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् ॥ दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः ॥ २३ ॥ न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ॥ यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः ॥२४॥ पञ्चाशीतिसहस्राणि ह्यव्याहतबलः समाः ॥ अनष्टवित्तस्मरणो बुभुजेऽक्षय्यषड्वसु ॥ २५ ॥ तस्य पुत्रसहस्रेषु पञ्चैवोर्वरिता मृधे ॥ जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥ २६ ॥ जयध्वजात् तालजङ्घस्तस्य पुत्रशतं त्वभूत् ॥ क्षत्रं यत् तालजङ्घाख्यमौर्वतेजोपसंहृतम् ॥ २७ ॥

भवत् ॥ २३ ॥ न नूनमिति ॥ नूनमन्ये पार्थिवाः यज्ञदानादिभिः कार्तवीर्यस्य गतिं साम्यं नैव यास्यन्ति ॥ २४ ॥ पञ्चाशीतीति ॥ स च पञ्चाशीति सहस्राणि समा वर्षाणि न व्याहतं बलं शरीरेन्द्रियादिसामर्थ्यं यस्य तथाभूतः तथा अनष्टवित्तस्मरणः अनष्टम् अविनाशं वित्तं येन तथाविधं स्मरणं यस्य । यद्वा । न नष्टं भवति वित्तं स्मरणाद्यस्य । यद्वा । नास्ति नष्टवित्तस्य स्मरणमपि यस्य कदाचिदप्यपेक्षितवित्तालाभस्मरणरहितः अत एव अक्षय्यं षड्वसु षडिन्द्रियविषयं बुभुजे ॥ २५ ॥ तस्येति ॥ तस्यार्जुनस्य पुत्राणां सहस्रमध्ये जयध्वजादयः पञ्चैव मृधे परशुरामेण सह युद्धे उर्वरिताः अवशिष्टाः अन्ये तु मृताः ॥ २६ ॥ जयध्वजादिति ॥ पूर्वार्द्धं स्पष्टम् । यत्तालजङ्घापत्याख्यं क्षत्रं क्षत्रियजातिकं पुत्रशतं तत्तु और्वतेजोपसंहृतं और्वस्य ऋषेस्तेजोयुक्तेन सगरेण विनाशितमित्यर्थः ॥ २७ ॥

Nepal Sanskrit University, Dang

CC-0. In Public Domain. Digitization by eGangotri

तेषामिति अर्द्धम् ॥ तेषां तालजङ्घपुत्राणां ज्येष्ठः पुत्रो वीतिहोत्रः अर्जुनपुत्रस्य मधोः पुत्रो वृष्णिः स्मृतः कथितः ॥ २८ ॥ । येति ॥ न केवलं तस्य मधोर्वृष्णिरेव पुत्र आसीत् किंतु वृष्णिर्ज्येष्ठो यस्मिन् तथाभूतं पुत्रशतमासीत् । यतो येभ्यः मधोर्वृष्णेर्यदोश्च हेतोः इदं कुलं प्रवृत्तम् । मध्वादयः कुलप्रवर्त्तकाः मधुवंशो वृष्णिवंशो यदुवंश इति प्रसिद्धेः । एतत्स्पष्टयति । हे राजन् मधोरर्जुनपुत्रात् प्रसूतत्वात् माधवाः वृष्णितः प्रसूतत्वाद् वृष्णयः यदुप्रसूतत्वात् सर्व एव यादवाश्चेति संज्ञिताः कथिताः ॥ २९ ॥ यद्विति युग्मम् ॥ यदुपुत्रस्य क्रोष्टोः पुत्रो वृजिनवानभूत् । ततश्चाहिस्ततो वै रुशेकुस्तस्य पुत्रश्चित्ररथः ततश्च शशबिन्दुरभूत् । स च महान् योगोऽस्यास्तीति महायोगी महान् भोगोऽस्यास्तीति महाभोगः । महाभोज इति च पाठः । तथा सत्यसङ्कल्पादिभिर्गुणैश्च महान् अभूत् । चतुर्दश महारत्नानि तज्जातिश्रेष्ठानि यस्य सः तानि च मार्कण्डेयपुराणे दर्शितानि । " गजवाजिरथस्त्रीषुनिधिमाल्याम्बरद्रुमाः । शक्तिपाशमणिच्छत्रविभागानि चतुर्दश ॥ इति । " चक्रवर्ती सार्वभौमः अपराजितः सर्वविजयी ॥ ३० ॥ ३१ ॥ तस्येति ॥

तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ॥ २८ ॥ तस्य पुत्रशतं त्वासीद् वृष्णिज्येष्ठं यतः कुलम् ॥ माधवा वृष्णयो राजन् यादवाश्चेति संज्ञिताः ॥२९॥ यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ॥ श्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः ॥३०॥ शशबिन्दुर्महायोगी महाभोजो महानभूत् ॥ चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ॥३१॥ तस्य पत्नीसहस्राणां दशानां सुमहायशाः ॥ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ॥ ३२ ॥ तेषां तु षट् प्रधानानां पृथुश्रवस आत्मजः ॥ धर्मो नामोशना तस्य हयमेधशतस्य याट् ॥ ३३॥ तत्सुतो रुचकस्तस्य पञ्चासन्नात्मजाः शृणु ॥ पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ॥ ३४ ॥ ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् ॥ नाविन्दच्छत्रुभवनाद्भोज्यां कन्यामहारषीत् ॥ ३५ ॥ रथस्थां तां निरीक्ष्याह शैब्या पतिममर्षिता ॥ केयं कुहक मत्स्थानं रथमारोपितेति वै ॥ ३६ ॥

पत्नीसहस्राणामिति षष्ठी सप्तम्यर्थे । तस्य शशबिन्दोः सम्बन्धिषु दशसु पत्नीसहस्रेषु तासु स सुमहायशाः शशबिन्दुः प्रत्येकं लक्षं लक्षमित्येवं पुत्राणां दशलक्षसहस्राणि अजीजनत् ॥ ३२ ॥ तेषामिति ॥ पृथुश्रवाः पृथुकीर्त्तिः पृथुयशा इत्यादयः षट् प्रधानानि श्रेष्ठा येषां तेषां मध्ये पृथुश्रवसः आत्मजो धर्मो नाम तस्य सुत उशना स च हयमेधशतस्य याट् यष्टा । ण्विश्छान्दसः ॥ ३३ ॥ तदिति ॥ तस्य सुतो रुचकः तस्य पञ्चात्मजा आसन् तान् शृणु । ते च पुरुजित् इत्यादिसंज्ञिताः ॥ ३४ ॥ ज्यामघ इति ॥ तत्र शैब्यापतिर्ज्यामघस्त्वप्रजः अपुत्रोऽपि सन् असिजभाव आर्षः । भार्याभयात् अन्यां भार्यां नाविन्दत् न लेभे न स्वीकृतवान् । कदाचिच्छत्रून्विजित्य तेषां भवनात्काश्चिद्भोज्यामुपभोगार्थामिति यावत् कन्यामहारषीत् आनिन्ये । अकाराधिक्यमार्षम् ॥ ३५ ॥ रथस्थामिति ॥ रथे स्थितां तां कन्यां निरीक्ष्य अमर्षिता रथमारोप्य तदानयनमसहमाना सती शैब्या पतिमाह स्म । तद्वचनमाह । हे कुहक वञ्चक मत्स्थानं मदुपवेशनयोग्यं स्थानमारोपितेयं केति ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नुषेति ॥ ततश्च तस्या भयात् ज्यामघेन तव स्नुषेयमानीतेत्यभिहिते उक्ते सति स्मयन्ती हसन्ती सती । शता आर्षः । शैब्या पतिं प्रत्यब्रवीत् तदाह । अहं वन्ध्या असपत्नी च अविद्यमाना सपत्नी यस्यास्तथाभूता चास्मि । कबभाव आर्षः । यद्वा । नञ्तत्पुरुषः । कस्या अपि सपत्नी नास्मीति कप्प्राप्तिरपि नास्ति । सपत्न्याः पुत्रोऽपि मत्पुत्रः स्यात्तदापि स्नुषा भवेत्साऽपि मम नास्ति अतो मे मम स्नुषा कथं युज्यत उपपद्यत इति ॥ ३७ ॥ जनयिष्यसीति ॥ ततो भीतः सन् ज्यामघस्तामाह । हे राज्ञि यं पुत्रं त्वं जनयिष्यसि तस्य भार्यार्थमियमुपयुज्यत उपयुक्ता भविष्यति तथा तव स्नुषा भविष्यतीति वदतो भार्याभयेन प्रकम्पमानस्य स्विन्नसर्वाङ्गस्य राज्ञः प्राणसङ्कटमालोक्यानुकम्पितास्तेन पूर्वं बहुकालमाराधिता देवाः पितरश्च तदेव जनयिष्यसीति वचनमेवान्वमोदन्त तथास्त्वित्युक्तवन्तः ॥ ३८ ॥ शैब्येति ॥ ततश्च देवादिप्रसादेन निवृत्तरजस्काऽपि शैब्या गर्भमधात् । प्रसवकाले सम्प्राप्ते शुभलक्षणयुक्तं कुमारं सुषुवे । स च कुमारो विदर्भ इति प्रोक्तः । स्नुषां शैब्ययापि स्नुषात्वेनाङ्गीकृतां स्नुषां सतीं

स्नुषा तवेत्यभिहिते स्मयन्ती पतिमब्रवीत् ॥ अहं वन्ध्याऽसपत्नी च स्नुषा मे युज्यते कथम् ॥३७॥ जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते ॥ अन्वमोदन्त तद् विश्वेदेवाः पितर एव च ॥ ३८॥ शैब्या गर्भमधात् काले कुमारं सुषुवे शुभम् ॥ स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ॥३९॥ इति श्रीभागवते महापुराणे नवमस्कन्धे यदुवंशानुवर्णने त्रयोविंशोऽध्यायः ॥२३॥ श्रीशुक उवाच ॥ तस्यां विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ ॥ तृतीयं रोमपादं च विदर्भकुलनन्दनम् ॥ १ ॥ रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ॥ उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृप ॥ २ ॥ क्रथस्य कुन्तिः पुत्रोऽभूद् धृष्टिस्तस्याथ निर्वृतिः ॥ ततो दशार्हो नाम्नाऽभूत् तस्य व्योमः सुतस्ततः ॥ ३ ॥ जीमूतो विकृतिस्तस्य यस्य भीमरथः सुतः ॥ ततो नवरथः पुत्रो जातो दशरथस्ततः ॥ ४ ॥

विद्यमानां तामेव कन्यकामुपयेमे । "भार्यावश्यास्तु ये केचिद्भविष्यन्त्यथवा मृताः । तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभून्नृपः ॥" इति पराशराद्याः ॥३९॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमत्रयोविंशे व्यधादिमाम् ॥ २३ ॥ चतुर्विंशे विदर्भस्य पुत्राणामन्वयाः पृथक् ॥ श्रीकृष्णरामजन्मान्तं श्लोकास्तत्र्यद्रिषण्मिताः ॥ उवाचेत्येकं सपादा नन्दतर्का अनुष्टुभः ॥२४॥ तस्यामिति ॥ तस्यां विदर्भो नाम्ना कुशक्रथौ पुत्रौ अजनयत् । तृतीयं विदर्भकुलनन्दनं रोमपादं पुत्रमजनयत् ॥१॥ रोमेति ॥ रोमपादस्य सुतो बभ्रुः तस्माद्बभ्रोस्तु कृतिरजायत । तस्य सुतः कुशिकः तस्माच्चेदिः ततश्च चैद्यादयो दमघोषादयो नृपा जज्ञिरे ॥ २ ॥ क्रथस्येति ॥ क्रथस्य तु पुत्रः कुन्तिरभूत् । तस्य पुत्रो धृष्टिरभूत् । अथ तस्मान्निवृत्तिः ततश्च नाम्ना दशार्होऽभूत् । तस्य सुतः व्योमः ॥ ३ ॥ जीमूत इति ॥ ततश्च जीमूतः तस्य विकृतिः यस्य सुतो भीमरथः ततो नवरथः ततश्च दशरथः पुत्रो जातः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करम्भिरिति ॥ ततश्च शकुनिस्तस्माच्छकुनेः करम्भिः पुत्रोऽभूत्। तस्यात्मजो देवरातः तस्य देवक्षेत्रः तस्य मधुः ततः कुरुवशः कुरुवशात् अनुसंज्ञकः ॥५॥ पुरुरिति सार्द्धम् ॥ अनोस्तु पुत्रः पुरुहोत्रः तस्यायुसंज्ञकः ततश्च सात्वताख्यः। हे मारिष आर्य सात्वतस्य तु भजमानादयः सप्त सुता बभूवुः ॥ ६ ॥ भजमानस्येति सार्द्धम् ॥ प्रभो हे राजन् भजमानस्यैकस्यां भार्यायां निम्लोच्यादयस्त्रय आत्मजाः अन्यस्यां च शताजिदादयस्त्रयः सुता जाताः। सर्वत्र "अन्येषामपि दृश्यते" इति दीर्घः॥७॥ बभ्रुरिति ॥ देवावृधस्य सुतो बभ्रुः तयोर्देवावृधबभ्र्वोर्माहात्म्यसूचकौ अमू श्लोकौ पठन्ति वृद्धा इति शेषः ॥८॥ तौ श्लोकौ दर्शयति—यथेति॥यथा यादृशगुणविशिष्टौ देवावृधबभ्रू दूरात् शृणुमस्तथैव तादृशावेवान्तिकात् समीपेऽपि सम्पश्यामः अतः मनुष्याणां मध्ये बभ्रुः श्रेष्ठः देवावृधस्तु देवैः समः ॥ ९ ॥ पुरुषा इति ॥ बभ्रोर्देवावृधादप्यनु पश्चाद्ये तद्वंशजाः पञ्चषष्टयधि-

करम्भिः शकुनेः पुत्रो देवरातस्तदात्मजः ॥ देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ॥५॥ पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः ॥ भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ॥ सात्वतस्य सुताः सप्त महाभोजश्च मारिष ॥ ६ ॥ भजमानस्य निम्लोचिः किंकिणो वृष्णिरेव च ॥ एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः॥ शताजिच्च सहस्राजिदयुताजिदिति प्रभो ॥ ७॥ बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यमू ॥ ८ ॥ यथैव शृणुमो दूरात् संपश्यामस्तथाऽन्तिकात् ॥ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ ९ ॥ पुरुषाः पञ्चषष्टिश्च षट्सहस्राणि चाष्ट च ॥ येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ १० ॥ महाभोजोऽपि धर्मात्मा भोजा आसंस्तदन्वये ॥ वृष्णेः सुमित्रः पुत्रोऽभूद् युधाजिच्च परंतप ॥ ११ ॥ शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ॥ सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतौ ॥ १२ ॥ अनमित्रसुतो योऽन्यः शिनिस्तस्याथ सत्यकः ॥ युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ॥ १३ ॥ युगन्धरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः ॥ श्वफल्कश्चित्ररथश्च गान्दिन्यां च श्वफल्कतः ॥ अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः ॥ १४ ॥

कचतुर्दशसहस्रसङ्ख्याकास्ते सर्वे तयोः प्रभावादेवामृतत्वं मुक्तिं प्राप्ताः ॥ १० ॥ महाभोज इति ॥ महाभोजस्त्वतिधर्मात्मा तस्यान्वये वंशे भोजाख्या नृपा आसन् । हे परन्तप वृष्णेस्तु सात्वतपुत्रस्य सुमित्रो युधाजिच्चाभूत् ॥ ११ ॥ शिनिरिति ॥ तस्य युधाजितः शिनिरनमित्रश्चेति द्वौ पुत्रौ जातौ । तत्र अनमित्रात् निम्नोऽभूत् । निम्नस्य तु सत्राजितः प्रसेनश्चेति द्वौ पुत्रौ आसतुः दिदीपाते ॥ १२ ॥ अनमित्रेति ॥ तथानमित्रस्यैव योऽन्यः सुतः शिनिः तस्याथ सत्यकः पुत्रः सात्यकिः सत्यकपुत्रस्तु युयुधानः तस्य जयः ततश्च कुणिः ॥ १३ ॥ युगमिति सार्द्धम् ॥ युगन्धरः कुणेः पुत्रः अनमित्रस्यैवापरः पुत्रो वृष्णिनामकः ततः श्वफल्कः चित्ररथश्चेति द्वौ पुत्रौ । ततः श्वफल्कात् गान्दिन्यां भार्यायां तु अक्रूरः प्रमुख आदिर्येषामासज्ञादीनान्त इत्यतद्गुणसंविज्ञानो बहुव्रीहिः । अतोऽक्रूरातिरिक्ता द्वादश पुत्रा विश्रुताः प्रख्याता आसन् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान् दर्शयति—आसङ्ग इति सार्द्धम् स्पष्टम् ॥१५॥ तेषामिति द्वयम् ॥ तेषामासङ्गादीनां स्वसा भगिनी सुचीराख्या तत्र देववानुपदेवश्चेति द्वावप्यक्रूरस्य सुतौ । तथा चित्ररथस्य श्वफल्कभ्रातुः आत्मजाः पृथुरेको विदुरथाद्याः अन्ये च बभूवुः ॥ पृथुर्विपृथुधामाद्याः इति पाठे तु आद्यशब्देन विदूरथोऽप्युक्तो ज्ञेयः । शूरो विदूरथादासीदिति वक्ष्यमाणत्वात् । एते वृष्णिनन्दना वृष्णिवंशजा बहवो बभूवुः । कुकुरादयश्चत्वारोऽन्धकस्य सात्वतपुत्रस्य पुत्राः कुकुरंभजमानशुचिकम्बलबर्हिषास्तथान्धकस्य पुत्राः इति पराशरवचनादिति स्वामिपादाः । चक्रवर्ती तु कुकुरादयः वृष्णेरनमित्रपुत्रस्य नन्दना इति व्याख्याय विष्णुपुराणे त्वन्धकस्य पुत्राः कुकुरादयो दृष्टा इत्याह ॥१६॥ १७ ॥ कुकुरस्येति ॥ कुकुरस्य सुतो वह्निः ततो विलोमाख्यस्तनयो जातः । तस्य कपोतरोमा तस्यानुः यस्यानोः तुम्बुरुः सखाऽभूत् ॥ १८ ॥ अन्धक इति युग्मम् ॥ अनोश्चान्ध-

आसङ्गः सारमेयश्च मृदुरो मृदुविद्गिरिः ॥ धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः ॥ शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश ॥ १५ ॥ तेषां स्वसा सुचीराख्या द्वावक्रूरसुतावपि ॥ देववानुपदेवश्च तथा चित्ररथात्मजाः ॥१६॥ पृथुर्विदूरथाद्याश्च बहवो वृष्णिनन्दनाः ॥ कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः ॥१७॥ कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः ॥ कपोतरोमा तस्यानुः सखा यस्य च तुम्बुरुः ॥१८॥ अन्धको दुन्दुभिस्तस्मादरिद्योतः पुनर्वसुः ॥ तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ ॥ १९ ॥ देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ देववानुपदेवश्च सुदेवो देववर्धनः ॥ २० ॥ तेषां स्वसारः सप्तासन् धृतदेवादयो नृप ॥ २१ ॥ शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता ॥ सहदेवा देवकी च वसुदेव उवाह ताः ॥ २२ ॥ कंसः सुनामा न्यग्रोधः कङ्कः शङ्कः सुहुस्तथा ॥ राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥ २३ ॥ कंसा कंसवती कङ्का शूरभूराष्ट्रपालिका ॥ उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥ २४ ॥ शूरो विदूरथादासीद् भजमानः सुतस्ततः ॥ शिनिस्तस्मात् स्वयंभोजो हृदीकस्तत्सुतो मतः ॥ २५ ॥

कोऽन्धकात् दुन्दुभिरित्यपि पराशरवचनाज्ज्ञेयम् । तस्य दुन्दुभेररिद्योतः तस्य पुनर्वसुः तस्याहुकः पुत्रः आहुकी कन्या च । आहुकस्य आत्मजौ द्वौ देवकश्चोग्रसेनश्चेति देववदादयश्चत्वारो देवकस्यात्मजाः ॥१९॥२०॥ तेषामित्यर्द्धम् ॥ हे नृप तेषां देववदादीनां स्वसारो भगिन्यो धृतदेवादयः सप्तासन् ॥२१॥ धृतदेवात्तोऽन्याः षट् दर्शयति—शान्तिदेवेति ॥ ताः धृतदेवाद्याः सप्तापि वसुदेव उवाह ॥२२॥ कंस इति ॥ कंसादयो नव औग्रसेनयः उग्रसेनस्य पुत्राः ॥२३॥ कंसेति ॥ कंसप्रभृतयश्च पञ्च उग्रसेनस्य दुहितरस्ताश्च वसुदेवस्यानुजानां देवभागादीनां स्त्रियो भार्याः ॥ २४ ॥ कुकुरस्य वंशमुक्त्वा तद्भ्रातुर्भजमानस्य वंशमाह—शूर इति ॥ भजमानाद्विदूरथः पुत्रोऽभूत् विदूरथाच्च शूर इति पराशरवचनाज्ज्ञेयम् । यद्वा । चित्ररथात्मजात् विदूरथात् शूरो जज्ञे । ततो भजमानः सुतः आसीत् । ततः शिनिः ततश्च स्वयंभोजः तत्सुतो हृदीको मतः ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेति ॥ देवबाह्वादयस्त्रयस्तस्य हृदीकस्य सुताः । देवमीढोऽपि हृदीकस्यैव सुतः । यथाह पराशरः । " तस्यापि कृतवर्मशतधनुदेवमीढाद्याः पुत्रा बभूवुः " तथा च देवमीढस्य यः शूरो नाम पुत्रस्तस्यापि मारिषा नाम पत्न्यभूत् ॥ २६ ॥ तस्यामिति सार्द्धम् ॥ स तस्यां वसुदेवादीन् अकल्मषान् अनृतादिदोषहीनान् दश पुत्रानजीजनत् ॥ २७॥ देवेति ॥ तत्र यस्य जन्मनि प्रादुर्भावकाले देवानां दुन्दुभयः आनकाश्च नेदुः दध्वनुः । तं हरेः अवतरिष्यतः श्रीकृष्णस्य अवतारयोग्यं स्थानं वसुदेवमानकदुन्दुभिं वदन्ति ॥ २८ ॥ पृथेति ॥ पृथाप्रभृतयः शूरस्य पञ्च कन्यकाः तेषां वसुदेवादीनां भगिन्य आसन् ॥२९॥ कुन्तेरित्यर्द्धम् ॥ तत्र पृथायाः पिता शूरः । कुन्तेरित्यादयश्चतुर्थ्यर्थे षष्ठ्यः । तथा च कुन्तिनामकाय अपुत्राय सख्ये तवैषा पुत्री भवतु इति पुत्रीत्वेन पृथाम् अदात् अत एव पृथायाः कुन्तीति नामान्तरम् । हीति प्रसिद्धौ ॥ ३० ॥ सेति ॥ कदाचित्स्वगृहमागतं दुर्वाससं सा पृथा परिचर्यादिना परितोष्य तस्मात् प्रतोषितात् देवहूतिं देवा आहूयन्तेऽनयेति तथा तां विद्यामाप । तस्या विद्याया वीर्यस्य सामर्थ्यस्य

देवबाहुः शतधनुः कृतवर्मेति तत्सुताः ॥ देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥ २६ ॥ तस्यां स जनयामास दश पुत्रानकल्मषान् ॥
वसुदेवं देवभागं देवश्रवसमानकम् ॥ सृञ्जयं श्यामकं कङ्कं शमीकं वत्सकं वृकम् ॥ २७ ॥ देवदुन्दुभयो नेदुरानका यस्य जन्मनि ॥ वसुदेवं
हरेः स्थानं वदन्त्यानकदुन्दुभिम् ॥ २८ ॥ पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ॥ राजाधिदेवी चैतेषां भगिन्यः पञ्च कन्यकाः ॥ २९ ॥
कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥ ३० ॥ साऽऽप दुर्वाससो विद्यां देवहूतिं प्रतोषितात् ॥ तस्या वीर्यपरीक्षार्थमाजुहाव रविं
शुचिः ॥ ३१ ॥ तदैवोपागतं देवं वीक्ष्य विस्मयमानसा ॥ प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥ ३२ ॥ अमोघं दर्शनं देवि आधत्से
त्वयि चात्मजम् ॥ योनिर्यथा न दुष्येत कर्ताऽहं ते सुमध्यमे ॥ ३३ ॥ इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः ॥ सद्यः कुमारः संजज्ञे
द्वितीय इव भास्करः ॥३४॥ तं साऽत्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती ॥ प्रपितामहस्तामुवाह पाण्डुर्वै सत्यविक्रमः ॥ ३५ ॥

परीक्षार्थं सा स्नानादिना शुचिः सती रविमाजुहाव ॥ ३१ ॥ तदेति ॥ तदैवोपागतं देवं रविं वीक्ष्य विस्मितं मानसं यस्याः सोवाचेति शेषः । तदुक्तिमाह । प्रत्ययार्थं यथार्थत्वपरीक्षार्थं मे मया विद्या प्रयुक्ता न त्वया किंचित्कार्यमस्त्यतस्त्वं याहि वृथाह्वानापराधं मे मम क्षमस्वेति ॥ ३२ ॥ एवमुक्तो रविराह—अमोघमिति ॥ हे देवि मम दर्शनममोघं फलाविनाभूतम् अतोऽहं त्वय्यात्मजं पुत्रमाधास्ये उत्पादयिष्यामि हे सुमध्यमे यथा ते तव योनिर्न दुष्येत न विदीर्येत तथाहं कर्ता करिष्यामि ॥ ३३॥ इतीति ॥ इत्युक्त्वा स सूर्यः तस्यां गर्भमाधाय दिवं स्वर्गं गतः ततः द्वितीयो भास्कर इवातितेजस्वी कुमारः सद्यः तत्क्षण एव सम्यक् कष्टं विनैव संजज्ञे जातः ॥ ३४ ॥ तमिति ॥ लोकस्य अपवादाद्बिभ्यती सा पृथा कृच्छ्रात् पुत्रस्नेहकष्टात् तं बालं नदीतोये अत्यजत् चिक्षेप । पेटिकायां संस्थाप्येति शेषः । पूर्वं तथोक्तत्वात् तां च पृथां सत्यविक्रमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्ये यथार्थधर्म एव विक्रमः प्रयत्नो यस्य स तव प्रपितामहः पूर्वजः पाण्डुरुवाह उपयेमे ॥३५॥ श्रुतदेवामिति ॥ श्रुतदेवां तु कारूषः करूषदेशाधिपतिः वृद्धशर्मासमग्रहीत् उपयेमे। यस्यां तु यः पूर्वमृषिभिः शप्तो भगवद्द्वारपालो विजयाख्यो दितेः सुतो हिरण्याक्षोऽभूत् स इदानीं दन्तवक्रोऽभूदित्यर्थः॥३६॥ कैकेय इति ॥ कैकेयः कैकेयदेशाधिपतिः धृष्टकेतुस्तु श्रुतिकीर्त्तिमविन्दत उपयेमे। तस्यां तु कैकयाः सन्तर्दनादयः पञ्च सुता आसन् ॥ ३७ ॥ राजेति ॥ राजाधिदेव्यां तु जयसेनः आवन्त्यौ अवन्तिराजौ विन्दानुविन्दौ द्वौ पुत्रौ अजनिष्ट जनयामास। ह प्रसिद्धौ। चेदिदेशाधिपतिर्दमघोषश्च श्रुतश्रवसमग्रहीत् उपयेमे ॥ ३८ ॥ शिशुपाल इत्यर्द्धम् ॥ तस्याः सुतः शिशुपालो जातः। तस्य शिशुपालस्य सम्भव उत्पत्तिप्रकारस्तु सप्तमस्कन्ध उक्तः॥३९॥ वसुदेवभ्रातृणां पत्नीः पुत्रांश्चाह—देवेति सार्द्धम् ॥ देवभागस्य कंसायां भार्यायां चित्रकेतुः

श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् ॥ यस्यामभूत् दन्तवक्त्र ऋषिशप्तो दितेः सुतः ॥ ३६ ॥ कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविन्दत ॥ सन्तर्दनादयस्तस्यां पञ्चासन् कैकयाः सुताः ॥ ३७ ॥ राजाधिदेव्यामावन्त्यौ जयसेनोऽजनिष्ट ह ॥ दमघोषश्चेदिराजः सुतश्रवसमग्रहीत् ॥ ३८ ॥ शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः ॥ ३९ ॥ देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ॥ कंसावत्यां देवश्रवसः सुवीर इषुमांस्तथा ॥ कङ्कायामानकाज्जातौ सत्यजित् पुरुजित् तथा ॥ ४० ॥ सृञ्जयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् ॥ हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ॥ ४१ ॥ मिश्रकेश्यामप्सरसि वृकादीन् वत्सकस्तथा ॥ तक्षपुष्करशालादीन् दुर्वाक्ष्यां वृक आदधे ॥ ४२ ॥ सुमित्राऽर्जुनपालादीन् शमीकात्तु सुदामिनी ॥ कङ्कश्च कर्णिकायां वै ऋतधामजयावपि ॥ ४३ ॥ पौरवी रोहिणी भद्रा मदिरा रोचना इला ॥ देवकीप्रमुखा आसन् पत्न्य आनकदुन्दुभेः ॥ ४४॥ बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् ॥ वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥ ४५ ॥ सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च ॥ पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥ ४६ ॥

बृहद्बलश्चेति द्वौ पुत्रौ जातौ। स्पष्टमेवमग्रेऽपि ॥ ४०॥ सृञ्जय इति ॥ पूर्वार्द्धं स्पष्टम्। जनयामासेति शेषः। श्यामकस्तु शूरभूम्यां हरिकेशहिरण्याक्षौ द्वौ जनयामास ॥४१॥ मिश्रेति ॥ तथा वत्सको मिश्रकेश्यामप्सरसि वृकादीन् पुत्रान् जनयामास। वृकस्तु दुर्वाक्ष्यां भार्यायां तक्षपुष्करशालादीन् आदधे उत्पादयामास ॥ ४२ ॥ सुमित्रेति ॥ शमीकात्तु तद्भार्यासु दामिनी मित्रादीन् उत्पादयामास। कङ्कश्च कर्णिकायां भार्यायां ऋतधामजयौ द्वावपि पुत्रौ जनयामास ॥ ४३ ॥ वसुदेवस्य पत्नीः पुत्रांश्चाह—पौरवीति ॥ देवकी प्रमुखा प्रधाना यासां ता धृतदेवादयः पौरव्यादयश्च आनकदुन्दुभेर्वसुदेवस्य पत्न्य आसन् ॥ ४४ ॥ बलमिति ॥ तत्र वसुदेवो रोहिण्यां तु भार्यायां बलादीन् कृतादींश्च उदपादयत् जनयामास ॥४५॥ सुभद्र इति ॥ भूत आदिर्येषां ते हि प्रसिद्धा एते सुभद्रादयो द्वादश पौरव्यास्तनया अभवन्। आद्यशब्दादुक्तसङ्ख्यापूर्तिर्ज्ञेया ॥४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्देति ॥ तथा नन्दादयो मदिराया आत्मजा आसन् । कौशल्या भद्राख्या वसुदेवभार्या तु केशिनमेकमेव कुलनन्दनं पुत्रमसूत ॥ ४७ ॥ रोचनायामिति ॥ रोचनायां तु हस्तहेमाङ्गदादयो वसुदेवात्सुता जाताः । इलायां तु भार्यायां वसुदेव उरुवल्कलादीन् यदुमुख्यांश्च पुत्रान् अजीजनत् ॥ ४८ ॥ विपृष्ट इति ॥ धृतदेवायां भार्यायामानकदुन्दुभेर्विपृष्टाख्य एक एव पुत्रो जातः।हे राजन् शान्तिदेवायास्तद्भार्याया आत्मजास्तु श्रमप्रतिश्रुतादयः जाताः । प्रशमप्राश्रितादय इति पाठान्तरम् ॥४९॥ राजान इति ॥ कल्पवर्षाद्या राजानस्तु उपदेवाया दश सुताः। श्रीदेवायास्तु वस्वाद्याः षट् सुताः जाताः ॥५०॥ देवेति सार्द्धम् ॥ देवरक्षितया तु भार्यया वसुदेवस्य गदादयो नव पुत्रा लब्धाः प्रसूता इत्यर्थः । तथा वसुदेवः सहदेवया साधनभूतया भार्यया पुरुविश्रुतमुख्यांस्त्वष्टौ सुतानादधे अजीजनत् । साक्षाद्धर्मो यथाष्टौ वसून् द्रोणादीनजीजनत् तद्वदित्यर्थः

नन्दोपनन्दकृतकशूराद्या मदिरात्मजाः ॥ कौशल्या केशिनं त्वेकमसूत कुलनन्दनम्॥४७॥ रोचनायामतो जाता हस्तहेमाङ्गदादयः ॥ इलाया-मुरुवल्कादीन् यदुमुख्यानजीजनत् ॥४८॥ विपृष्टो धृतदेवायामेक आनकदुन्दुभेः ॥ शान्तिदेवात्मजा राजन् श्रमप्रतिश्रुतादयः॥४९॥ राजानः कल्पवर्षाद्या उपदेवासुता दश ॥ वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः॥५०॥ देवरक्षितया लब्धा नव चात्र गदादयः॥ वसुदेवः सुतानष्टावादधे सहदेवया ॥ पुरुविश्रुतमुख्यांस्तु साक्षाद् धर्मो वसूनिव ॥५१॥ वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् ॥ कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ॥ ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरम् ॥ ५२ ॥ अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ॥ सुभद्रा च महाभागा तव राजन् पितामही ॥ ५३ ॥ यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः ॥ तदा तु भगवानीश आत्मानं सृजते हरिः ॥ ५४ ॥ न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ॥ आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥ ५५॥

॥ ५१ ॥ वसुदेव इति सार्द्धम् ॥ देवक्यामपि वसुदेवः कीर्त्तिमदादीन् अष्ट पुत्रानजीजनत् । तत्र षट् पुत्रास्तु जीवविशेषाः सप्तमस्तु अहीनामीश्वरः सङ्कर्षणो भगवान् शेषः ॥ ५२ ॥ अष्टम इति ॥ तयोर्देवकीवसुदेवयोरष्टमः पुत्रस्तु स्वयं साक्षात् हरिरेवासीत् । श्रीकृष्णरूपेणावतीर्णः सुभद्राख्यैका महाभागा कन्या च तयोर्जज्ञे। सा हे राजन् तव पितामही ॥ ५३ ॥ यदेति ॥ यदा यदैव यस्मिन् यस्मिन्नेव काले धर्मस्य क्षयो विनाशः पाप्मनो वृद्धिश्च भवति तदा तु भगवान् हरिः ईशः दुष्कृतां विनाशाय साधूनां संरक्षणेन धर्मसंस्थापनायात्मानं सृजते अवतारयति । तद्भावार्थः ॥ ५४ ॥ न हीति ॥ हे महीपते ईशस्य मायानियन्तुः परस्य असङ्गस्य द्रष्टुः साक्षिणः आतमनः सर्वगस्य अस्य भगवतः आत्ममायां विना ततोऽन्यः कालकर्मस्वभावादिजन्मनः कर्मणो वा हेतुर्नास्त्येव ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिति॥यस्य मायाचेष्टितं पुंसः प्राणिमात्रस्य स्थित्युत्पत्त्यप्ययाय पालनजन्मसंहाराय भवति तथा यस्यानुग्रहः कृपा प्राणिनस्तन्निवृत्तेः जन्मादिसंसारनिवृत्तितः आत्मलाभाय मोक्षाय चेष्यते पर्यवस्यति । यद्वा । यस्य मायाचेष्टितं पुंसो जीवस्यानुग्रहः । हि यस्मात् तत् चेष्टितं स्थित्युत्पत्तिलयायेष्यते प्रलये धर्माद्यसम्भवात्सर्गपालनादौ तु धर्मादि-सम्पादनद्वारेणानुग्रहः तथा तेनैव श्रूयमाणेन तस्य स्थित्यादिनिवृत्तेर्हेतोः आत्मलाभाय मोक्षाय चेष्यते। तस्य जन्मादौ आत्ममायां विनाऽन्यो हेतुर्नास्तीति पूर्वेणैवान्वयः॥५६॥ अक्षौहिणीनामिति युग्मम् ॥ नृपाणां क्षत्रियाणामिव लाञ्छनानि चिह्नानि येषां तैर्नृपवदाभासमानैर्वस्तुतस्तु असुरैरासुरसम्पत्त्या जातैरनेकाक्षौहिणीसङ्ख्यानां सेनानां पतिभिः शिशुपालजरासन्धकंसादिभिराक्रम्यमाणाया भुवः पृथ्व्या अभाराय भारावताराय कृत उद्यमो येन सः सङ्कर्षणेन रामेण सहितो भगवान् मधुसूदनः सुरेश्वरैरिन्द्रादिभिरपि मनसाऽप्यपरिमेयानि सङ्कल्पयितुमशक्यानि पूतनाकंसमागधशिशुपालादिसंहाररूपाणि कर्माणि चक्रे ॥ ५७ ॥ ५८ ॥ कलाविति ॥ कलौ युगे जनिष्यमाणानां भक्ताना-

यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ॥ अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥ ५६ ॥ अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः ॥ भुव आक्रम्यमाणाया अभाराय कृतोद्यमः ॥ ५७ ॥ कर्माण्यपरिमेयानि मनसाऽपि सुरेश्वरैः ॥ सहसंकर्षणश्चक्रे भगवान् मधुसूदनः ॥ ५८ ॥ कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ॥ अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद् यशः ॥५९॥ यस्मिन् सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ॥ श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥ ६० ॥ भोजवृष्ण्यन्धकमधुशूरसेनदशार्हकैः ॥ श्लाघनीये हितः शश्वत् कुरुसृञ्जयपाण्डुभिः ॥ ६१ ॥ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ॥ नृलोकं रमयामास मूर्त्या सर्वाङ्गरम्यया ॥ ६२ ॥ यस्याननं मकरकुण्डलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासम् ॥ नित्योत्सवं न ततृपुर्दृशिभिः पिबन्त्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ६३ ॥

मनुग्रहाय सुपुण्यं पुण्यजनकं दुःखशोकतमसामपनुदं नाशकम् । " इगुपध " इति कः । यशो व्यतनोत् ॥ ५९ ॥ यस्मिन्निति ॥ सतां कर्णयोः पीयूषे अमृततुल्ये यस्मिन् यशोरूपे तीर्थश्रेष्ठे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य स पुरुषः सकृदपि किं पुनर्वारंवारं तत्राप्युपस्पृश्याचम्य आचमनवत्किंचिच्छ्रुत्वा किं पुनः पानवद्बहु श्रुत्वा कर्मवासनां मोक्षप्रतिबन्धकीभूतां धुनुते क्षपयतीत्यर्थः ॥ ६० ॥ भोजेति युग्मम् ॥ भोजवृष्ण्यादिभिः कुरुसृञ्जयाद्यैश्च श्लाघनीयमीहितं लीला यस्य स कृष्णः स्निग्धं स्नेहपूर्वकं स्मितं यत्र तथाभूतं यदीक्षितमवलोकनं तेनोदारैः शोभनैर्वाक्यैर्विक्रमः पराक्रमस्तत्पूर्विकया गोवर्द्धनोद्धारणादिलीलया च सर्वैरङ्गै रम्यया मूर्त्या च भूलोकं रमयामास आनन्दितं चकार ॥ ६१ ॥ ६२ ॥ यस्येति ॥ मकराकृतिकुण्डलाभ्यां चारुकर्णौ भ्राजन्तौ कपोलौ च तैः सुभगं सुन्दरं सविलासो हासो यस्मिंस्तत् यस्य श्रीकृष्णस्याननं दृशिभिर्नेत्रैः पिबन्त्योऽतितृष्णया पश्यन्त्यो मुदिता नार्यो नराश्च न ततृपुः तृप्ता न जाताः अलं न अमन्यन्त । किंबहुना निमेषोन्मेषव्यवधानमप्यसहमाना

निमेषोन्मेषकर्त्तुर्निमेश्च कुपिता बभूवुः । इक्ष्वाकुतनयस्य निमेर्निमेषादिकर्तृत्वं पूर्वमेवोक्तम् ॥ ६३ ॥ जात इति ॥ पुरुषः पुरुषोत्तमः जातः सन् पितृगृहात् कारागाराद्व्रजं गतः तत्र व्रजवासिनामेधिताः संवर्द्धिता अर्थाः येन सः रिपून् पूतनादीन् हत्वा कृताः स्वीकृताः उरवः षोडशसहस्रैकशताष्टसङ्ख्याकाः दाराः कलत्राणि येन सः तेषु दारेषु सुतानां शतानीति बहुत्वोपलक्षणं प्रत्येकं दशपुत्रैककन्योत्पादनस्य वक्ष्यमाणत्वात् । तथा चाशीत्यधिकैकषष्टिसहस्रोत्तरैकलक्षसङ्ख्याकान् पुत्रान् अष्टोत्तरैकशताधिकषोडश-सहस्रसङ्ख्याकाः कन्याश्चोत्पाद्यात्मनिगमं स्वकीयं वेदमार्गं जनेषु प्रथयन् प्रथयितुं क्रतुभिर्नानाविधैर्यागैरात्मानमेव समीजे सम्यगाराधितवान् ॥ ६४ ॥ पृथ्व्या इति ॥ स

जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः ॥ उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे आत्मानमात्मनिगमं प्रथयञ्जनेषु ॥ ६४ ॥ पृथ्व्याः स वै गुरुभरं क्षपयन्कुरूणामन्तः समुत्थकलिना युधि भूपचम्वः ॥ दृष्ट्या विधूय विजये जयमुद्विघोष्य प्रोच्योद्धवाय च परं समगात्स्वधाम ॥ ६५ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायामष्टादशसाहस्र्यां वैयासिक्यां नवमस्कन्धे श्रीसूर्यसोमवंशानुकीर्तने यदुवंशानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ नवमस्कन्धः समाप्तः ॥

भगवान् श्रीकृष्णः कुरूणामन्तः परस्परं समुत्थेन कलिना कलहेन निमित्तेन पृथिव्याः गुरुमधिकं भारं क्षपयन् युधि सङ्ग्रामे भूपानां चम्वः चमूः सेनाः । यणार्षः । स्वदृष्ट्यैव विधूय निरस्य विजयेऽर्जुने जयमुद्विघोष्य अर्जुनेन जितमिति लोके प्रख्यातं कृत्वा परं तत्वमुद्धवाय प्रोच्योपदिश्य च स्वं धाम वैकुण्ठं जगाम ॥ ६५ ॥ शत्रुघ्नलक्ष्मणयुतो दलितोग्रधन्वाऽऽगोवर्द्धनोद्धरणकृत् कृतधर्मजश्रीः ॥ सम्पादितार्जुनयशाश्चतुराकृतिर्वः श्रेयः प्रभुर्दिशतु कोऽपि मनुष्यमूर्त्तिः ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशि-काम् ॥ गङ्गासहायो नवमचतुर्विंशे व्यधादिमाम् ॥ २४ ॥

१ शत्रुघ्नलक्ष्मणाभ्यां भ्रातृभ्यां शत्रुकर्मकहननकर्तृत्वसूचकैर्लक्ष्मणैरंकुशादिचिह्नैश्च युतः दलितमुग्रस्य शिवस्य क्रूरस्य कंसस्य च धनुर्येन आगसो वर्द्धना रावणाद्यास्तेषा मुद्धरणकृत् नाशकः गोवर्द्धनपर्वतस्योत्पाटकश्च कृता धर्मजा धर्मजस्य युधिष्ठिरस्य च श्रीर्येन सम्पादितमर्जुनं शुक्लम् अर्जुनस्य पाण्डवस्य च यशो येन चतुराकृतिः चतुराकारः भ्रातृचतुष्करूपो वा वासुदेवादिचतुर्व्यूहरूपश्च मनुष्यमूर्तिः श्रीरामः श्रीकृष्णश्चेति ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते नवमस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते दशमस्कन्धपूर्वार्द्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दशमस्कन्ध पूर्वार्धम्

CC-0. In Public Domain. Digitization by eGangotri



CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीपरमात्मने नमः ॥ आनन्द[१]धामनि चिदेकरसेऽद्वितीये तस्मिन्पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥१॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि निखिले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्वयाय कुरुते दशमे प्रयत्नम् ॥ ३ ॥ प्रथमे देवकीसूनोः कंसः स्वमरणं विदन् ॥ तस्याः षड्बालान् जघान श्लोकास्तत्र तु नंदर्षट्[६९] ॥ उवाचेत्यष्टौ सपादाश्चतुःशैलौ[७४] अनुष्टुभः ॥ १ ॥ श्रीराजोवाचेति । श्रीशब्दः मङ्गलार्थो राज्ञः स्तुत्यर्थश्च । आर्षत्वान्न टच् । क्वापि पाठे श्रीशब्दो न दृश्यते । कथित इति सार्द्धम् ॥ हे मुनिसत्तम भवता सोमसूर्ययोः वंशानां पौत्रादीनां विस्तारः कथितः स्वकुलरक्षकश्रीकृष्णावतारेण सूर्यपितृव्यत्वेन चाभ्यर्हितत्वात् सोमस्य पूर्वनिपातः । तथा उभयोः सोमसूर्ययोः वंश्यानां वंशभवानां राज्ञां पुरूरवःककुत्स्थादीनामुर्वशीपतित्वेन्द्रारोहादिना परमाद्भुतं चरितं च कथितम् । धर्मे शीलं यस्य तस्य यदोर्वंशविस्तारस्तच्चरितं च नितरां सम्यक्कथितम् । यदोः पित्राज्ञोल्लङ्घित्वेऽपि स्ववयसा मातृभोगानौचिती-

श्रीगणेशाय नमः ॥ ॥ राजोवाच ॥ ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः ॥ राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ॥ १ ॥ तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥ २ ॥ अवतीर्य यदोर्वंशे भगवान्भूतभावनः ॥ कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् ॥ ३ ॥ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात् ॥ क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ॥ ४ ॥

पर्यालोचनादेकादशेऽवधूतसंवादे यदोः सन्निष्ठावर्णनाच्च धर्मशीलत्वम् ॥१॥ तत्रेत्यर्द्धम् ॥ तत्र यदुवंशे अंशेन बलदेवेन सहावतीर्णस्य विष्णोः अवतीर्णत्वेऽपि व्यापकत्वच्युतिरहितस्य दामबन्धनादौ तथा व्यक्तेः वीर्याणि नोऽस्मभ्यं शंस स्वसङ्ख्यपेक्षया बहुत्वम् । सा च कृपया विनयेन वा सर्ववर्णनस्याशक्यत्वादंशेन शंसेत्यन्वयो वा । "कृष्णस्तु भगवान् स्वयम्" इति वाक्य विरोधादंशेनैकदेशेनावतीर्णस्येति तु नार्थः ॥२॥ अवतीर्येति ॥ भूतानां भावनः पालकः विश्वस्य आत्मा भगवान् यदोर्वंशे अवतीर्य यानि कर्माणि कृतवान् तानि नवमेऽतिसंक्षेपेण सूचितान्यपि नोऽस्मभ्यं विस्तराद्वद वर्णय । अस्मदादिमन्दबुद्धिसुगमत्वार्थं शब्दविस्तरं कृत्वा वर्णय । यद्वा । सर्ववर्णनाशक्यत्वेऽपि लालसयोक्तिः ॥३॥ लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयिणश्च । तेषां मध्ये कस्यापि अलं प्रत्ययोऽत्र नास्तीत्याह—निवृत्तेति ॥ पशुघ्नात् हिंसाव्यापृतात् सर्वनिन्द्याद्व्याधात् स्वर्गप्राप्त्यै यज्ञेषु पशुघातकात् कर्मासक्तात् वा "अनचि च" इति द्वित्वे गकाराधिकः पाठः । अपगता शुक् यस्मात् सोपशुक् तमात्मानं हन्ति तस्माद्वा विना निवृत्तास्तर्षा

१ अस्य टिप्पणमुपोद्घातारम्भे द्रष्टव्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

वासना येषां तैर्मुक्तैरपि उप आधिक्येन गीयमानात् मुमुक्षूणां च भवस्य संसारव्याधेरौषधात् निवर्तकात् विषयिणामपि श्रोत्रमनसोरभिरामात् सुखप्रदात् उत्तमश्लोकस्य गुणानामनुवादात् पुनः पुनः कथनात् कः पुमान् जीवमात्रं विरज्येत विरक्तो भवेत् न कोऽपीत्यर्थः ॥ ४ ॥ पितामहा इति ॥ यः श्रीकृष्ण एव प्लवस्तरणसाधनं येषां ते मे मम पितामहाः युधिष्ठिरादयः समरे युद्धे अमरान् जयन्ति तैरमरंजयैः संज्ञाभावेऽपि खच् आर्षः । देवव्रतः भीष्म आद्यो येषां ते च तेऽतिरथा अमितैः सह योद्धारस्तैरेव तिमिङ्गिलैः महामत्स्यैः दुरत्ययं दुस्तरं कौरवाणां सैन्यमेव सागरं दुष्पारमपि वत्सपदमिवातितुच्छं कृत्वा अतरन् । तस्य वीर्याणि वदस्वेति तृतीयेनान्वयः । स्मेति पादपूर्तौ । तद्योगस्याविवक्षणान्न लट् । एतेन मत्कुलदैवतं कृष्णस्ततोऽपि तद्वीर्याणि श्रव्याणीत्युक्तम् ॥ ५ ॥ मदेकरक्षकत्वेनापीत्याह—द्रौण्यस्त्रेति ॥ आत्तं गृहीतं चक्रं येन सः चक्रायुधो यः श्रीकृष्णः शरणंगतायाः मे मम मातुः कुक्षिंगतः सन् द्रौणेः द्रोणापत्यस्याश्वत्थाम्नोऽस्त्रेण ब्रह्मास्त्रेण विप्लुष्टं दग्धं कुरूणां पाण्डवानां च सन्तानस्य वंशस्य बीजमिव रक्षणीयम् इदं मदङ्गं "भ्रामयन्तं गदां मुहुः" इत्युक्त्या गदया जुगोप । चकारान्मातुरङ्गं च जुगोप । पाण्डवानां

पितामहा मे समरेऽमरञ्जयैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः ॥ दुरत्ययं कौरवसैन्यसागरं कृत्वाऽतरन्वत्सपदं स्म यत्प्लवाः ॥ ५ ॥ द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं संतानबीजं कुरुपाण्डवानाम् ॥ जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥ ६ ॥ वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः ॥ प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ॥ ७ ॥ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया ॥ देवक्या गर्भसंबन्धः कुतो देहान्तरं विना ॥ ८ ॥

कुरुत्वेऽपि पृथगुक्तिः प्राधान्याय ॥ ६ ॥ सर्वगतित्वेनाऽपि श्रव्याणीत्याह—वीर्याणीति ॥ हे विद्वन् ! अखिलानां देहभाजां मध्ये अन्तर्बहिर्दृष्टीनां पूरुषकालरूपैः अंशाभिप्रायेण बहुत्वम् । यथायोग्यम् अमृतम् उत तथा मृत्युं प्रयच्छतः तत्रान्तर्दृष्टीनां पुरुषाख्यान्तर्यामिरूपेणामृतं मोक्षं प्रयच्छतः बहिर्दृष्टीनां च कालरूपेण मृत्युं संसरणं प्रयच्छतः अन्तः अन्तरङ्गा भक्ताः बहिर्बहिरङ्गा अभक्तास्तेभ्यः पुरुषाकाररूपैः कालरूपेण च अमृतं मृत्युं च प्रयच्छत इति वा । पूरुषकालरूपैरन्तर्बहिः स्थितस्येति वा । मायया स्वशक्त्या भक्तेषु कृपया वा । "माया दम्भे कृपायां च" इति विश्वः । मनुष्यरूपस्य तस्य हरेर्वीर्याणि वदस्व प्रकाशय । "भासनोपसंभाषा०" इति तङ् । अतोऽन्तर्दृष्ट्या तद्वीर्याण्येव श्रोतव्यानि ॥ ७ ॥ रोहिण्या इति ॥ यः संकर्षणाख्यो रामः स त्वया पूर्वं नवमस्कन्धे "बलं गदं सारणं च" इत्यादिना रोहिण्यास्तनयः प्रोक्तः । तस्यैव च संकर्षणमहीश्वरमिति देवकीपुत्रेष्वपि गणनात् । देवक्या गर्भस्य संबन्धः प्रोक्तः सगर्भसंबन्धः देहान्तरमन्यदेहं विना कथं घटते । यद्वा । यो रामः संकर्षणस्त्वया रोहिण्यास्तनयः प्रोक्तः स एव देवक्या अपि तनयः । अतो देहान्तरं विना द्वयोर्गर्भसंबन्धः कथं घटते ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्मादिति ॥ मुकुन्दः मुक्तिदः सात्वतां पतिर्भगवान् पितुर्गेहात् व्रजं महावनं कस्माद्धेतोर्गतः । भगवतः कंसभयशङ्काया असंभवादिति भावः । तथा ज्ञातिभिर्यादवैः सार्द्धम् सह क्व वासं कृतवान् । यद्वा । व्रजं गतोऽपि ज्ञातिभिर्मित्रादिभिः गोपैः क्व वासं कृतवान् ॥ ९ ॥ व्रज इति ॥ केशवः व्रजे वसन् किम् अकरोत् । मधूनां पुर्य्यां मथुरायां द्वारकायां च वसन् किमकरोत् । तं वधमर्हतीति तदर्हणः न तदर्हणः अतदर्हणः वधानर्हस्तं मातुर्भ्रातरं कंसम् । अद्धा साक्षात् स्वयमेव कस्मादवधीत् ॥ १० ॥ देहमिति ॥ मानुषं मनुष्याकारं देहमाश्रित्य प्रकाश्य यदूनां पुर्य्यां मथुरायां द्वारकायां च वृष्णिभिः सह कति वर्षाणि अवात्सीत् । मधुपुर्यामिति पाठेऽप्ययमेवार्थः । तथा प्रभोः श्रीकृष्णस्य पत्न्यः कति अभवन् ॥ ११ ॥ एतदिति ॥ हे मुने हे सर्वज्ञ श्रद्दधानाय मे मह्यम् एतत्पृष्टम् अन्यत् अपृष्टं च कृष्णस्य विविधं चेष्टितं सर्वं विस्तृतं च वक्तुमर्हसि ॥ १२ ॥ नैषेति ॥ या ब्रह्मण्येनापि मया मुनिगले सर्पं न्यधापयत् एषा अतिशयेन दुस्सहाऽपि क्षुत् त्यक्तमुदकं येन तं त्यक्तोदमपि त्वन्मुखमेवाम्भोजं ततश्च्युतं हरिकथामे-

कस्मान्मुकुन्दो भगवान्पितुर्गेहाद्व्रजं गतः ॥ क्व वासं ज्ञातिभिः सार्धं कृतवान्सात्वतां पतिः ॥ ९ ॥ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः ॥ भ्रातरं चावधीत्कंसं मातुरद्धाऽतदर्हणम् ॥ १० ॥ देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः ॥ यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥ ११ ॥ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितम् ॥ वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतम् ॥ १२ ॥ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते ॥ पिबन्तं त्वन्मुखाम्भोजच्युतं हरिकथामृतम् ॥ १३ ॥ सूत उवाच ॥ एवं निशम्य भृगुनन्दन साधुवादं वैयासकिः स भगवानथ विष्णुरातम् ॥ प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥ १४ ॥ श्रीशुक उवाच ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥ १५ ॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि ॥ वक्तारं प्रच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ १६ ॥

वामृतं पिबन्तं मां न बाधते । संज्ञां विनाऽपि उदकस्योद आर्षः उदशब्द उदकार्थो वा । कथाश्रवणोपरमे तु जीवितं न स्यादिति भावः ॥ १३ ॥ एवमिति ॥ हे भृगुनंदन शौनक सः भागवतेषु प्रधानः श्रेष्ठः पुंस्त्वमार्षम् । अर्द्धर्चादित्वेन वा । भागवता भागवतशास्त्रं वा प्रधानं यस्य स इति वा । भगवान् वैयासकिर्व्यासपुत्रः शुकः एवं साधुवादं समीचीनं प्रश्नं निशम्य अथ विष्णुरातं परीक्षितं प्रत्यर्च्य प्रशस्य कलौ जनिष्यमाणानामपि जनानां कल्मषाणां नाशकं कलिरूपकल्मषनाशकं वा कृष्णस्य चरितं व्याहर्तुं वक्तुम् आरभत ॥ १४ ॥ अत्र क्वचिच्छुक उवाचेत्यस्ति क्वचिन्नास्ति । सम्यगिति ॥ हे राजर्षिषु सत्तम तव बुद्धिः सम्यग् व्यवसितं निश्चयो यस्याः तादृशी अस्ति । यत् यतो बुद्धेः ते तव वासुदेवकथायां नैष्ठिकी निश्चला रतिः प्रीतिर्जाता ॥ १५ ॥ त्वया वयमपि पाविता इत्याह—वासुदेवेति ॥ यथा तस्य भगवतः पादयोः सलिलं गङ्गा पृथिव्यादित्रीन् लोकान् पुनाति

Nepal Sanskrit University, Belmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा वासुदेवस्य कथायाः अपि प्रश्नः किं पुनः स्वरूपप्रश्नः वक्तारं प्रच्छकं श्रोतॄंश्च इति त्रीनपि पुरुषान् पुनाति ॥१६॥ भूमिरिति ॥ दृप्ताः गर्विता ये नृपास्तेषां व्याजो मिषं येषां ते च ते दैत्याश्च दितिवंशजत्वाभावेपि कर्मणैव दैत्याः नृपरूपा दैत्यास्तेषामनीकशतानामयुतैः यो भूरिभारस्तेनाक्रान्ता भूमिः ब्रह्माणं प्रति शरणं ययौ । भूमिर्हरेः पत्नी ब्रह्मा च तत्पुत्रः अतः पुत्रद्वारा स्वपतिं प्रति दुःखसूचनं योग्यं नतु धाष्टर्येन स्वयमेव । अत्र ब्रह्मा सुमेरौ स्थित एव ग्राह्यो नतु सत्यलोकस्थः । कृष्णावतारादतिपूर्वमेव ककुद्मीरेव-तीवरप्रश्नार्थं तत्र गतः तेन सहित एव ब्रह्मक्षणानन्तरं तं प्रत्याह । संप्रति अवतीर्णाय बलाय कन्यादेयेति अतः सत्यलोकेशस्य तन्मध्ये क्षीरोदतीरगमनं न वृत्तम् " जगाम धरणी मेरोः समाजे त्रिदिवौकसाम् " इति पराशरेणाप्युक्तमित्याहुः ॥ १७ ॥ गौरिति ॥ कृपाजननार्थं गौर्भूत्वा खिन्ना दुःखिता करुणं शोकसहितं यथा स्यात्तथा क्रन्दन्ती रुदती अश्रुमुखी सा भूमिः विभोः ब्रह्मणः अन्तिके समीपे उपस्थिता सती स्वं स्वीयं व्यसनं कष्टम् अवोचत । समवोचतेति वा पाठः ॥ १८ ॥ ब्रह्मेति ॥ ब्रह्मा तत् भूमेः कष्टम् उपधार्य ज्ञात्वा अथानन्तरमेव सत्रिनयनः शिवसहितः सन् देवैः सह तया भूम्या च सह क्षीरपयोनिधेः क्षीरसमुद्रस्य तीरं जगाम । अत्र हि कार्यद्वयमुपस्थितं

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ॥ आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १७ ॥ गौर्भूत्वाऽश्रुमुखी खिन्ना क्रन्दन्ती करुणं विभोः ॥ उपस्थिताऽन्तिके तस्मै व्यसनं स्वमवोचत॥ १८ ॥ ब्रह्मा तदुपधार्याऽथ सह देवैस्तया सह ॥ जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥ १९ ॥ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ॥ पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥ २० ॥ गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ॥ गां पौरुषीं मे शृणुताऽमराः पुनर्विधीयतामाशु तथैव मा चिरम् ॥२१॥ पुरैव पुंसाऽवधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ॥ स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥ २२ ॥

पृथ्वीपालनं दैत्यसंहरणं च । तत्राद्यार्थमिन्द्रं वा आज्ञापयेत् द्वितीयार्थं रुद्रं वेति देवै रुद्रेण च सहितो जगामेति ॥ १९ ॥ तत्रेति ॥ तत्र गत्वा समाहितः एकाग्रचित्तः सन् जगतां नाथं देवानां देवं पूज्यं वर्षति कामानिति वृषः आकम्पयति क्लेशानित्याकपिः वृषश्चासावाकपिश्चेति तं पुरुषं भगवन्तं पुरुषसूक्तेन सहस्रशीर्षेत्यादिकेन उपतस्थे तुष्टाव ॥२०॥ गिरमिति ॥ वेधाः ब्रह्मा गगने समीरिताम् अदृष्टवक्तृकां गिरं वाचं समाधौ निशम्य श्रुत्वा समाधिरूपे गगने समीरितामिति वा । त्रिदशान् देवान् उवाच हे अमराः ह स्फुटं पौरुषीं पुरुषस्य भगवत इयं पौरुषी तां गां वाचं मे मत्तः आशु शृणुत पुनः मा चिरमविलम्बितं तथैव युष्माभिर्विधीयतां चेति ॥ २१ ॥ पुरैवेति ॥ पुंसा भगवता पुरैव विज्ञापनात्पूर्वमेव धरायाः ज्वरस्तापः अवधृतः निश्चितः अतः ईश्वराणामपीश्वरः स यावत् स्वस्य कालशक्त्या यथाकालमित्यर्थः । उर्व्याः भरं क्षपयन् हरन् भुवि चरेत् प्रकटो वर्तेत तावत् भवद्भिः कर्तृभिः अंशैः सह यदुषु उपलक्षणतया कुरुष्वपि उपजन्यताम् । पुरैवेत्यादिचतुःश्लोकी क्षीरोदशायिनो हरेर्वचसोऽनुवादः इति भक्ताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र पुंसा परमव्योमाधिनाथेन वासुदेवेनेत्यर्थः ॥ २२ ॥ वसुदेवेति ॥ वसुदेवस्य गृहे परः पुरुषः भगवान् साक्षात् स्वयमेव जनिष्यते प्रादुर्भविष्यति अतस्तत्प्रियार्थं सेवया प्रीतिजननार्थं सुरस्त्रियोऽपि संभवन्तु ॥ २३ ॥ वासुदेवेति ॥ वासुदेवस्य भगवतः कला अनन्तः बलदेवः देवः स्वेन स्वरूपेण स्वेन भ्रात्रा श्रीकृष्णेन वा राजते स्वराट् सहस्रवदनः संकर्षणः हरेः प्रियचिकीर्षया अग्रतः ज्येष्ठभ्रातृत्वेन भविता प्रादुर्भविष्यति ॥ २४ ॥ विष्णोरिति ॥ यया जगत् संमोहितं सा भगवती विष्णोर्माया प्रभुणा तेन भगवता आदिष्टा सती अंशेन कलया भगवदिच्छारूपेण वा युक्ता । कार्य्यार्थे देवकीगर्भसंकर्षणयशोदामोहनादिकार्य्यार्थे यशोदायां संभविष्यति ॥ २५ ॥ इतीति ॥ प्रजापतीनां पतिर्विभुः ब्रह्मा इति प्रागुक्तवचनेन अमराणां गणान् आदिश्य महीं गीर्भिः आश्वास्य च परमं स्वस्य धाम मेरुस्थं स्थानं ययौ ॥ २६ ॥ शूरसेन इति ॥ पुरा यदूनां पतिः शूरसेनो नाम राजा मथुरां पुरीम् आवसन् मथुरायां वसन् माथुरान् मथुरामण्डलसम्बन्धिनः शूरसेनाख्यांश्च विषयान् देशान् बुभुजे ॥ २७ ॥

वसुदेवगृहेसाक्षाद्भगवान्पुरुषः परः ॥ जनिष्यते तत्प्रियार्थं संभवन्तु सुरस्त्रियः ॥२३॥ वासुदेवकलानन्तः सहस्रवदनः स्वराट् ॥ अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥ २४ ॥ विष्णोर्माया भगवती यया संमोहितं जगत् ॥ आदिष्टा प्रभुणांऽशेन कार्यार्थे संभविष्यति ॥२५॥ श्रीशुक उवाच ॥ इत्यादिश्याऽमरगणान्प्रजापतिपतिर्विभुः ॥ आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ॥ २६ ॥ शूरसेनो यदुपतिर्मथुरामावसन्पुरीम् ॥ माथुराञ्छूरसेनांश्च विषयान्बुभुजे पुरा ॥ २७ ॥ राजधानी ततः साऽभूत्सर्वयादवभूभुजाम् ॥ मथुरा भगवान्यत्र नित्यं संनिहितो हरिः ॥ २८ ॥ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः ॥ देवक्या सूर्यया सार्धं प्रयाणे रथमारुहत् ॥ २९ ॥ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया ॥ रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः ॥ ३० ॥ चतुःशतं पारिबर्हं गजानां हेममालिनाम् ॥ अश्वानामयुतं सार्धं रथानां च त्रिषट्शतम् ॥ ३१ ॥ दासीनां सुकुमारीणां द्वे शते समलंकृते ॥ दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ॥ ३२ ॥

राजधानीति ॥ यस्यां मथुरायां भगवान् हरिः नित्यं सन्निहितः एव वर्त्तते सा मथुरा ततः शूरसेननिवासकालादारभ्य सर्वे यादवाः यदुवंशजाः भूभुजः राजानस्तेषां राजधानी अभूत् । ययातिशापेऽपि शूरसेनादीनां महाप्रभावत्वेन राजत्वम् ॥ २८ ॥ तस्यामिति ॥ तस्यां मथुरायां कर्हिचित् काले कृतोद्वहः कृतविवाहः शौरिः शूरसुतः वसुदेवः प्रयाणे विवाहोत्तरदिने स्वगृहं प्रति प्रयाणार्थं सूर्यया नवोढया देवक्या सार्द्धं रथम् आरुहत् । "कृमृदृरुहिभ्यः०" इति च्छान्दसश्च्लेरङ् ॥ २९ ॥ उग्रसेनेति ॥ रौक्मैः स्वर्णभूषितै रथानां शतैर्वृतः उग्रसेनस्य सुतः कंसः स्वसुर्देवक्याः भग्न्या इत्यपि पाठः । "भग्नी भगिनी च" इति द्विरूपकोशः । प्रियचिकीर्षया हयानां रश्मीन् प्रग्रहाऽन् जग्राह स्वयं सारथिरभूत् । इत्यादि सर्वं तस्य सद्यः स्नेहत्यागेन खलत्वसूचनाय ॥ ३० ॥ चतुःशतमिति द्वयम् ॥ दुहितृवत्सलः देवकः देवक्याः पिता याने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवकीयानसमये दुहित्रे देवक्यै हेममालिनां स्वर्णमालाभूषितानाम् एतच्च गजादित्रयेन्वेति । गजानां चतुर्गुणं शतं चत्वारि शतानीत्यर्थः । अश्वानां सार्द्धम् अयुतं रथानां च त्रिगुणाः षट् त्रिषट् त्रिषड्गुणं शतं त्रिषट्शतम् अष्टादशशतानीत्यर्थः । सम्यगलंकृते सुकुमारीणां दासीनां द्वे शते पारिबर्हं विवाहे देयं यौतकाख्यं प्रादात् ॥ ३१ ॥ ॥ ३२ ॥ शङ्खेति ॥ तावद्वाक्यालंकारे । वरवध्वोः प्रयाणस्य प्रक्रमे आरम्भे शङ्खतूर्यमृदङ्गाः दन्दुभयश्च समं युगपत् सुमङ्गलं यथा स्यात्तथा नेदुः । भाविमङ्गलसूचनार्थं स्वयमवाद्यन्त ॥ ३३ ॥ पथीति ॥ पथि प्रग्रहिणं गृहीताश्वरश्मिं कंसमाभाष्य रे कंसेति संबोध्य अशरीरा अलक्षितशरीरा वाक् वक्ष्यमाणं वच आह स्म । हे अबुध यां त्वं वहसे भर्तृगृहं प्रापयसि अस्याः अष्टमो गर्भः अपत्यं त्वां हन्ता हनिष्यति । पुत्र इत्यनुक्तिस्तु अग्रे कन्यादर्शने कंसस्य संदेहाभावाय देवक्यां स्वजनन्यामतिस्निग्धं मातुलं कंसं कथं हन्यादिति शङ्कया कंसस्यापराधोत्पादनार्थं देवानामियमाकाशवाक् देवकीं हन्तुं त्वयं न शक्त इति तेषां निश्चय एव ॥ ३४ ॥ इत्युक्त इति ॥ इत्युक्तः खलः दुर्बुद्धिः पापमूर्तिः भोजानां कुलस्य पांसुं करोतीति पांसनः कुलदूषणः पांसुशब्दात् तत्करोतीति णिच् ल्युट् कर्त्तरि । सः कंसः भगिनीं हन्तुम् आरब्धः

शङ्खतूर्यमृदङ्गाश्च नेदुर्दुन्दुभयः समम् ॥ प्रयाणप्रक्रमे तावद्वरवध्वोः सुमङ्गलम् ॥३३॥ पथि प्रग्रहिणं कंसमाभाष्याऽऽहाऽशरीरवाक् ॥
अस्यास्त्वामष्टमो गर्भो हन्ता यां वहसेऽबुध ॥ ३४ ॥ इत्युक्तः स खलः पापो भोजानां कुलपांसनः ॥ भगिनीं हन्तुमारब्धः खड्गपाणिः
कचेऽग्रहीत् ॥ ३५ ॥ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम् ॥ वसुदेवो महाभाग उवाच परिसान्त्वयन् ॥ ३६ ॥ वसुदेव उवाच ॥
श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः ॥ स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ॥ ३७ ॥

प्रवृत्तः । आदिकर्मणि कर्त्तरि क्तः । खड्गपाणिः सन् कचे केशबन्धेऽग्रहीत् ॥ ३५ ॥ तमिति ॥ महाभागः भाविश्रीकृष्णजन्मना गाम्भीर्यादिगुणैश्च महाभाग्यः वसुदेवः जुगुप्सितं निन्द्यं कर्म यस्य तं नृशंसं क्रूरं निरपत्रपं निर्लज्जं तं कंसं परिसान्त्वयन् स्तुत्यादिना साममार्गेण बोधयन् उवाच ॥ ३६ ॥ तत्र पञ्चविधं सामाह—श्लाघनीय इति ॥ यो भवान् शूरैः श्लाघनीया गुणा यस्य सः भोजानां यशस्करश्च सत्त्वियं तत्रापि भगिनीं तत्रापि उद्वाहरूपे पर्वणि कथं हन्यात् । अत्र श्लाघनीयेति गुणकीर्त्तनं भोजेति संबन्धः । भगिनीमित्यभेदः स्त्रिया अवधेन धार्मिकत्वयशोलाभः मम भार्याशाह्या परोपकारश्चेति पञ्चविधमपि साम दर्शितम् । यशस्वीति स्त्रीहनने इह दुर्यशोऽपरत्र नरक इति द्विविधो भेदो दर्शितः । यदुक्तम् । “ सम्बन्धलाभावुपकृत्य भेदौ, गुणकीर्त्तनम् । साम पञ्चविधं भेदो दृष्टादृष्टभयं वचः ” इति । वाग्देवी तु कंसं निन्दत्येव तथा हि शूरैः श्लाघनीयेषु मध्ये गुणः न्यूनः भोजाः कलहवत्त्वेन प्रसिद्धास्तेषां यशः कलहाधिक्यं तस्य कारकः । यद्वा भोजा महान्तस्तेष्वयमेकः पाप इति तेषां यशस्करः स कथमेकां भगिनीं हन्यात् अपि तु सर्वमेव कुलम् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरणभयेन हन्मीत्याशङ्क्याह—मृत्युरिति ॥ हे वीर भयानर्ह जन्ममृत्युरहितानामपि जीवानां देहेनैव हेतुना जन्मवतां देहसंबन्धनिमित्तो मृत्युर्देहेन सहैव जायते भाल एव लिखितत्वात् । वै प्रसिद्धौ । अवश्यं मर्तव्ये विलम्बमात्राय पापं न कार्यमित्याह । अद्यैव वा अब्दशतान्ते वा प्राणिनां मृत्युः ध्रुव एव ॥ ३८ ॥ यद्वा देहप्राप्तित्यागावेव जन्ममृत्यू तौ त्वावश्यकावेवेत्याह—देह इति ॥ कर्मानुगः कर्मानुसारः अवशः देही देहे पञ्चत्वं मृत्युम् आपन्ने आपन्नप्राये सति देहान्तरं प्राप्य अनु पश्चात्प्राक्तनं वपुस्त्यजते त्यजति । तङार्षः ॥ ३९ ॥ अस्मिन् देहे मृते पुनरपि देहान्तरमपि लभ्यतैवेति देहपालनार्थमपि पापं न कार्यमित्याह—व्रजन्निति ॥ यथा व्रजन् गन्ता पुरुषः एकेनाग्रतो निहितेन पदा तिष्ठन्भुवमवष्टभ्य देहं बिभ्रत् पश्चादन्येन पूर्वप्रदेशादुत्थाप्य पुरो निहितेन गच्छति नतु द्वाभ्यामेव युगपत् एवं कर्मगतिं कर्ममार्गं गतः देही जीवोऽपि देहान्तरं प्राप्य प्राक्तनं वपुस्त्यजति । अत्र स्वीकारपरित्यागौ नात्यन्तभिन्नावित्याशङ्क्य स्पष्टं दृष्टान्तमाह । यथा वा तृणजलौका सा हि यथा तृणान्तरमवष्टभ्य पूर्वं तृणं त्यजति । जलूकेति षष्ठस्वरमध्योऽपि पाठः । एवं कर्मगतिं गतः अन्यो देही अपि ॥ ४० ॥ देहविषयावेव स्वीकारपरित्यागौ दर्शयितुं

मृत्युर्जन्मवतां वीर देहेन सह जायते ॥ अद्य वाऽब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३८ ॥ देहे पञ्चत्वमापन्ने देही कर्मानुगोऽवशः ॥ देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥ ३९ ॥ व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति ॥ यथा तृणजलूकैवं देही कर्मगतिं गतः ॥ ४० ॥ स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाऽभिनिविष्टचेतनः ॥ दृष्टश्रुताभ्यां मनसाऽनुचिन्तयन्प्रपद्यते तत्किमपि ह्यपस्मृतिः ॥ ४१ ॥ यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पञ्चसु ॥ गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ॥ ४२ ॥

पुनर्द्वौ दृष्टान्तावाह—स्वप्न इति ॥ यथा स्वप्ने स्वापावस्थायां वर्तमानः यथा वा मनोरथेन अभिनिविष्टा अभिनिवेशवती चेतना बुद्धिर्यस्य सः स्वप्नावस्थागतो मनोरथाविष्टो वेत्यर्थः । देही दृष्टं राजादिदर्शनं श्रुतमिन्द्रादिश्रवणं ताभ्यामाहितसंस्कारेण मनसा तदेवानुचिन्तयन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमपि अनिरुक्तं पश्यति । यः क्षणान्तरे च तदेवाहमिति प्रपद्यते मन्यते ततश्च जाग्रद्देहादपगतस्मृतिर्भवति । पुरुषो यथेति । इममेवार्थमेकादशे द्वाविंशेऽध्याये वक्ष्यति " जन्तोर्वै कस्यचिद्धेतोः " इत्यारभ्य " स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ । " इत्यादिकेन केचित्त्वत्र मनोरथेनाभिनिविष्टचेतनः पुरुषः स्वप्ने ईदृशं देहं पश्यति । इत्येकदृष्टान्तत्वेन व्याचक्षते इति । तद्वदत्रापि कर्मवशादेहान्तरं प्राप्य प्राक्तनं त्यजतीति ॥ ४१ ॥ यतो यत इति ॥ देहस्य पञ्चत्वसमये दैवेन फलाभिमुखेन कर्मणा चोदितं नानाविकारात्मकं मनो मायारचितेषु मायया नानादेहरूपेण रचितेषु पञ्चसु गुणेषु भूतेषु मध्ये यं यं देहं देवतिर्यगादिरूपं प्रतिधावति धावच्च सद्यं यमाप अभिनिवेशेन प्राप्तं भवति तमेव प्रपद्यमानः तदेवाहमिति मन्यमानः असौ देही तेन मनसा सहैव तत्र जायते । यद्वा । तेन विषयाभिनिविष्टेन मनसा सह साहित्याद्धेतोः तं तं विषयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रपद्यमानो जायते भुञ्जानो भवति इत्यर्थः ॥ ४२ ॥ ततश्च मनःसहितस्य जीवस्य मनोधर्मप्राप्तिं सदृष्टान्तमाह—ज्योतिरिति ॥ यथा उदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिम्बतया स्थितम् अदः प्रसिद्धं ज्योतिश्चन्द्रादि समीरस्य वायोर्वेगमनुगतं कम्पादियुक्तं विभाव्यते प्रतीयते । एवं स्वस्य मायया अविद्यया रचितेषु गुणेषु देहेषु असौ पुमान् रागेणानुगतः प्रविष्टो मुह्यति अभिनिवेशं प्राप्नोति अयं भावः । आत्मनो देहाद्यध्यासाज्जन्मोच्यते । अन्योन्याध्यासाच्च देहादिधर्माः कार्श्यादयः आत्मनि प्रतीयन्ते । एवं प्रेयस्त्वादय आत्मधर्मा देहादौ इति व्यर्थो मृत्युप्रतीकारः ॥ ४३ ॥ उक्तं सामोपसंहरन् दृष्टादृष्टभयलक्षणं भेदं दर्शयति-तस्मादिति ॥ तस्मात् मृत्योरपरिहार्यत्वादिहेतोः तथाविधः मृत्युपरिहाराशक्तः स जनः आत्मनः क्षेममन्विच्छन् हेतौ शता । हेतुरत्र फलम् इहामुत्र क्षेमार्थमित्यर्थः । कस्यचिदपि द्रोहं नाचरेत् वै यस्माद्धेतोः द्रोग्धुः जनस्य परतः अभिद्रुह्यमाणात्तत्संबन्धिनश्च यमादपि इहामुत्र च भयमिति ॥ ४४ ॥ अत्युग्रं स्तुतिभिरिति न्यायेन पुनः सामैवाह—एषेति ॥ एषा तव अनुजा भगिनी बाला कृपणा दीना पुत्रिकोपमा कन्यातुल्या दारुमयपुत्तलिका इवाचेतनप्राया वा अतः दीनवत्सलः त्वं कल्याणीं

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ॥ एवं स्वमायारचितेष्वसौ पुमान्गुणेषु रागानुगतो विमुह्यति ॥४३॥ तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः ॥ आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयम् ॥ ४४ ॥ एषा तवानुजा बाला कृपणा पुत्रिकोपमा ॥ हन्तुं नार्हसि कल्याणीमिमांत्वं दीनवत्सलः ॥ ४५ ॥ ॥ श्रीशुक उवाच ॥ ॥ एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः ॥ न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ॥ ४६ ॥ निर्बन्धं तस्य तं ज्ञात्वा विचिन्त्यानकदुन्दुभिः ॥ प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४७ ॥ मृत्युर्बुद्धिमताऽपोह्यो यावद्बुद्धिबलोदयम् ॥ यद्यसौ न निवर्तेत नापराधोऽस्ति देहिनः ॥ ४८ ॥

निरपराधामिमां हन्तुं नार्हसि । इमामित्यनुवादरूपत्वान्नान्वादेशता । वस्तुतः शिरश्चालनेन दीनादपि वत्समपि करत्वेन लातीति दीनवत्सलो निर्दयस्त्वं हन्तुं नार्हसि काकाहस्येवेति ॥ ४५ ॥ एवमिति ॥ हे कौरव्य एवम् इत्यादिभिः सामभिः सान्त्वैर्भेदैश्च बोध्यमानः उपदिश्यमानः स्वयं दारुणः पुनः पुरुषादान् रक्षोदैत्यादीननुव्रतोऽनुसृतः स कंसः स्वसुर्वधान्न न्यवर्त्तत ॥ ४६ ॥ निर्बन्धमिति ॥ आनकदुन्दुभिर्वसुदेवः तस्य कंसस्य तं निर्बन्धं देवकीवधे हठं ज्ञात्वा प्राप्तं कालं समयं मृत्युं वा प्रतिव्योढुं वञ्चयितुं प्रतिविपूर्वाद्वहेस्तुमुन् वस्य ओत्वमार्षम् । यद्वा प्रतिविपूर्वात् ऊहेस्तुमुन् इडभावगुणौ आर्षौ । विचिन्त्य विचार्य तत्र इदं वक्ष्यमाणमपत्यार्पणमुपायत्वेन अन्वपद्यत निश्चितवान् ॥ ४७ ॥ स्वमनोविचारमाह—मृत्युरिति ॥ बुद्धिमता यावान् बुद्धिबलयोरुदयो यत्र तत् यथा स्यात्तथा मृत्युः अपोह्यः प्रतीकार्यः । तत्र कंसविषये बलोदयो निष्फल एव बुद्धेरुदयस्तु सफलतामर्हति । तत्र यथा बुद्धियत्ने कृतेऽपि यदि असौ मृत्युर्न निवर्त्तेत तदा देहिनः मनुष्यस्य अपराधः उपेक्षादोषः नास्ति ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदायेति अर्द्धम् ॥ मृत्यवे कंसाय पुत्रान् प्रदाय देयत्वेन प्रतिज्ञाय कृपणां दीनामिमां देवकीं मोचये । तत्राकाशवाण्यां कल्पितत्वशङ्कायां विचारयति सुता इत्यर्द्धम् । यदि मे सुता जायेरन् यदि च तावत्पर्यन्तं मृत्युः कंसो न म्रियेत तदा कंसाय पुत्रान् दत्त्वा इमां मोचयिष्यामि इति पूर्वार्द्धमनुवर्त्य व्याख्येयम् । अर्थसामञ्जस्यात्र वाक्यभेददोषः । तदा सुतमरणदोषे सत्यपि देवकी तु संप्रति जीवेत् यदि सुता न जायेरन् जाता वा कंसमेव हन्युः जननात्प्राक्कंसो वा म्रियेत इति पक्षत्रये तु न कोऽपि दोषः ॥ ४९ ॥ आकाशवाण्याः सत्यत्वनिश्चये विचारयति—विपर्यय इति ॥ बालेन मत्पुत्रेण प्रौढस्याप्यस्य मृत्युरिति विपर्ययोऽपि किं न स्यात् चरमाद्यपेक्षया प्रथमादेरप्यष्टमत्वात् अष्टानामपि सहैव मरुद्गणवदुत्पत्तिसंभवाच्च । अतोऽपि इदानीमपत्यार्पणप्रतिज्ञैव मन्त्रः । यतो धातुः अष्टमो गर्भो हन्ता इत्युक्तवतः गतिरिच्छा दुरत्यया दुर्बोधा तया च उपस्थितो देवक्या मृत्युस्तावन्निवर्त्तेत मत्पुत्रार्पणप्रतिज्ञया निवृत्तोऽपि कंसस्य मृत्युः पुनरापतेत् प्राप्तो भवेत् । यद्वा । गतिर्धातुर्दुरत्यया इत्यस्य प्रपञ्च उपस्थित इत्यादि ॥ ५० ॥ अग्नेरिति ॥ यथा अग्नेर्वृक्षान् गृहान्वा प्रदहतो दारुणः काष्ठस्य यौ वियोगयोगौ कदाचित् सन्निहितस्यापि वियोगः कदाचित् विप्रकृष्ट-

प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमाम् ॥ सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ॥ ४९ ॥ विपर्ययो वा किं न स्याद्गतिर्धातुर्दु-
रत्यया ॥ उपस्थितो निवर्तेत निवृत्तः पुनरापतेत् ॥ ५० ॥ अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ॥ एवं हि जन्तो-
रपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥ एवं विमृश्य तं पापं यावदात्मनिदर्शनम् ॥ पूजयामास वै शौरिर्बहुमानपुरःसरम्
॥ ५२ ॥ प्रसन्नवदनाम्भोजो नृशंसं निरपत्रपम् ॥ मनसा दूयमानेन विहसन्निदमब्रवीत् ॥ ५३ ॥ ॥ वसुदेव उवाच ॥ ॥ न ह्यस्यास्ते
भयं सौम्य यद्वै साहाशरीरवाक् ॥ पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमुत्थितम् ॥ ५४ ॥

स्यापि योगः तयोः अदृष्टतः वृक्षाणां गृहस्वामिनां वा भाग्यात् अन्यत् निमित्तं कारणं नास्ति । एवं हि एवमेव जन्तोरपि शरीराणां संयोगवियोगयोर्जन्ममरणयोर्हे-तुर्दुर्विभाव्यः अचिन्त्यः ॥ ५१ ॥ एवमिति ॥ शौरिर्वसुदेवः यावत् यत्प्रमाणकम् आत्मना बुद्ध्या निदर्शनं ज्ञानं यत्र तद्यथा स्यात्तथा आत्मप्रज्ञावधीत्यर्थः । एतेन सम्भ्रमे प्रतिभातिशयः सूचितः । विमृश्य तं पापं कंसं बहुमानपुरस्सरं बह्वादरपूर्वकं पूजयामास बहिस्तुष्टाव ॥ ५२ ॥ प्रसन्नेति ॥ दूयमानेन संतप्यमानेन मनसा युक्तोऽपि कंसविश्वासाय प्रसन्नं वदनाम्भोजं यस्य विहसन्निव च सः नृशंसं क्रूरं निरपत्रपं निर्लज्जं कंसम् इदमब्रवीत् पुनरब्रवीदित्यपि पाठः ॥ ५३ ॥ न हीति ॥ हे सौम्य यद्यथा अशरीरिणी वागाह तथा हि निश्चितम् अस्याः सकाशात्ते भयं नास्ति अष्टमगर्भादेव मरणोक्तेः । तत्र यद्यपि अष्टमादेव मरणमुक्तं तथापि अष्टमो हन्ता इत्युक्तेऽन्योन्यापेक्षया सर्वेऽप्यष्टमा भवेयुरिति तव शङ्का चेदतः येभ्यः पुत्रेभ्यः ते तव भयमुत्थितं तानन्यानपि अस्या उद्भूतान् पुत्रान्समर्पयिष्ये । वस्तुतोऽकारप्रश्लेषात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येभ्यस्तवाभयं तानेवार्पयिष्ये इति नानृतोक्तिदोषः । प्राणसंकटेऽनृतोक्तेरपि निषेधाभावाच्च ॥ ५४ ॥ स्वसुरिति ॥ तस्य वसुदेवस्य वाक्ये सारः सत्यत्वं तद्वित् वसुदेवो मिथ्या न वदतीति जानन् कंसः स्वसुर्वधात् निववृते निवृत्तोऽभूत् । वधनिवृत्त्या प्रीतो वसुदेवोऽपि तं कंसं प्रशस्य गृहं प्राविशत् ॥ ५५ ॥ अथेति ॥ अथ कतिपये काले उपावृत्ते गते सति विष्णुपुराणे वसुदेवस्य वार्द्धके भगवदवतारोक्तेः सर्वेषां देवादीनामपि देवता पूज्या देवकी वसुदेवस्य विशुद्धसत्त्वरूपत्वेन देवक्यास्तत्सम्पत्तिरूपत्वात् अनुवत्सरम् अष्टसु वत्सरेषु विभक्त्यर्थेऽव्ययीभावः । अष्टौ पुत्रान् कन्यां सुभद्रां च प्रसुषुवे ॥ ५६ ॥ कीर्त्तिमन्तमिति ॥ अनृतात् अतिविह्वलः भीतः सः कृतप्रतिज्ञः आनकदुन्दुभिः प्रथमजं कीर्त्तिमन्तं जन्मसमय एव कृतनामकरणं पुत्रं कंसायातिकृच्छ्रेण अर्पयामास ॥ ५७ ॥ किं दुःसहमिति ॥ साधूनां सत्यसन्धानां पुत्रत्यागादिकमपि किं दुःसहं शेषे षष्ठी । विदुषां भगवानेव तत्त्वमिति जानतां पुत्रलालनादिकं किमपेक्षितम् इति वसुदेवमुद्दिश्योक्तिः । कदर्याणां दुष्टानां भागिनेयवधादि-

॥ श्रीशुक उवाच ॥ ॥ स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् ॥ वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद्गृहम् ॥ ५५ ॥ अथ काल उपावृत्ते देवकी सर्वदेवता ॥ पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् ॥ ५६ ॥ कीर्तिमन्तं प्रथमजं कंसायानकदुन्दुभिः ॥ अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ॥ ५७ ॥ किं दुःसहं नु साधूनां विदुषां किमपेक्षितम् ॥ किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनाम् ॥ ५८ ॥ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिम् ॥ कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत् ॥५९॥ प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयम् ॥ अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल ॥ ६० ॥ तथेति सुतमादाय ययावानकदुन्दुभिः ॥ नाभ्यनन्दत तद्वाक्यमसतो विजितात्मनः ॥ ६१ ॥ नन्दाद्या ये व्रजे गोपा याश्चामीषां च योषितः ॥ वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥ ६२ ॥

कमपि किमकार्यम् इति कंसमुद्दिश्य । धृतात्मनां चित्ते धृत आत्मा हरिर्यैस्तेषां पुत्रादिकमपि किं दुस्त्यजम् इति देवकीमुद्दिश्य ॥ ५८ ॥ दृष्ट्वेति ॥ हे राजन् शौरेस्तत्समत्वं पुत्रार्पणेन हर्षशोकयोः साम्यं सत्ये च व्यवस्थितिं निष्ठां दृष्ट्वा तुष्टमनाः कंसः प्रहसन् इदम् अब्रवीत् ॥ ५९ ॥ प्रतियात्विति ॥ अयं कुमारः प्रतियातु हि यतः अस्मात् प्रथमपुत्रात् मे मम भयं नास्ति किल यतः युवयोः अष्टमाद् गर्भात् मे मम मृत्युर्विहितः ॥ ६० ॥ तथेति ॥ आनकदुन्दुभिः तथा इति उक्त्वा सुतम् आदाय स्वगृहं ययौ असतः मृषा सौहार्दं दर्शयतः अविजितात्मनः अस्थिरचित्तस्य कंसस्य तद्वाक्यं नाभ्यनन्दत विश्वासाभावात् । तङ्गर्षः ॥ ६१ ॥ कंसस्य शान्तिर्देवकार्यानुगुणा न भवतीति नारदस्य प्रत्यवस्थानं तदाह—नन्दाद्या इति । अत्रादिद्वयं नारदवाक्यं तृतीयं शुकवाक्यं हे भारत कंस व्रजे ये नन्दाद्याः गोपाः याश्च अमीषां गोपानां योषितः यशोदाद्याः ये च वसुदेवाद्याः वृष्णयः याश्च देवक्याद्याः यदुस्त्रियः सन्ति ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्व इति ॥ ये च उभयोर्नन्दवसुदेवकुलयोः ज्ञातयः सकुल्याः बन्धवः सुहृदश्च ये च कंसमनुव्रताः ते सर्वे वै निश्चितं देवताप्रायाः प्रायेण देवतांशाः । प्रायग्रहणात्कंसादीनां दैत्यांशत्वम् ॥ ६३ ॥ एतदिति ॥ भगवान्नारदः अभ्येत्य कंसाय एतत्पूर्वोक्तं वचः शशंस तथा भूमेर्भारायमाणानां भारभूतानां दैत्यानां वधोद्यमं पृथ्वीप्रार्थनया ब्रह्माद्यैः कृतमपि शशंस । नारदेन कंसकर्त्तृकवैष्णवद्रोहप्रवर्त्तनं शीघ्रं भगवत्प्रादुर्भावाय ॥ ६४ ॥ ऋषेरिति ॥ इत्येवमुक्तवतः ऋषेर्नारदस्य विनिर्गमे सति तद्वचनात् कंसः यदून् सुरान् मत्वा तथा विष्णुर्देवक्यामाविर्भूय त्वां वधिष्यतीति नारदवचनादेव स्ववधं प्रति स्ववधार्थं देवक्या गर्भे संभूतमाविर्भूतं विष्णुं च मत्वा संभूतमिति सामीप्याद् भविष्यत्यपि क्तः । गर्भे संभूतं सम्भवो यस्येति वा त्वत्पूर्वशत्रुर्विष्णुर्देवक्यामाविर्भूय त्वां वधिष्यतीति नारदोक्तं तत्सर्व एव शुश्रुवुश्चेत्यपि ज्ञेयम्। गृहे देवकीं वसुदेवं च निगडैः शृङ्खलैर्निगृह्य अजनो विष्णुस्तच्छङ्कया जातं जातं तयोः पुत्रम् अहन् ॥ ६५ ॥ ६६ ॥ मातरमिति ॥ ये भुवि प्रायशः प्रायेण असुतृपः स्वप्राणमात्रतर्पका लुब्धाश्च

सर्वे वै देवताप्राया उभयोरपि भारत ॥ ज्ञातयो बन्धुसुहृदो ये च कंसमनुव्रताः ॥ ६३ ॥ एतत्कंसाय भगवाञ्छशंसाभ्येत्य नारदः ॥ भूमेर्भारायमाणानां दैत्यानां च वधोद्यमम् ॥ ६४ ॥ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति ॥ देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ॥ ६५ ॥ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ॥ जातं जातमहन्पुत्रं तयोरजनशङ्कया ॥ ६६ ॥ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नन्ति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥ ६७ ॥ आत्मानमिह संजातं जानन्प्राग्विष्णुना हतम् ॥ महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ ६८ ॥ उग्रसेनं च पितरं यदुभोजान्धकाधिपम् ॥ स्वयं निगृह्य बुभुजे शूरसेनान्महाबलः ॥ ६९ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे श्रीकृष्णावतारोपक्रमे प्रथमोऽध्यायः ॥ १ ॥ ॥ शुक उवाच ॥ ॥ प्रलम्बबकचाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ॥ यदूनां कदनं चक्रे बली मागधसंश्रयः ॥ २ ॥

भवन्ति ते राजानः मातरं पितरमित्यादीन् घ्नन्ति ॥ ६७ ॥ आत्मानमिति ॥ सः कंसः आत्मानं च प्राग्[illegible]नि कालनेमिं नाम महासुरं विष्णुना हतम् इह सञ्जातं जानन् भूतपूर्वं च तत्स्मरेति नारदोक्त्या पूर्वजन्मस्मरणात् यदुभिर्व्यरुध्यत वैरं कृतवान् ॥ ६८ ॥ उग्रसेनमिति ॥ महाबलः सः यदुभोजान्धकानामधिपं पितरम् उग्रसेनं निगृह्य वशीकृत्य शूरसेनान् देशान् उपलक्षणतया माथुरानपि बुभुजे ॥ ६९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्यादिमे निरमादमूम् ॥ १ ॥ द्वितीये देवकीगर्भगतो विष्णुः सुरैः स्तुतः ॥ देवकी सान्त्विता तत्र श्लोकाः सार्द्धाः द्विसिन्धवः ॥ द्वे उवाचेति पादाढ्या द्वापञ्चाशदनुष्टुभः ॥ २ ॥ यदुभिः स व्यरुध्यत इत्युक्तं विरोधं प्रपञ्चयति—प्रलम्बेति द्वयम् ॥ प्रलम्बादिभिः मुष्टिकादिभिश्च वृतः अत्र महाशनोऽघासुरः अन्यैश्च बाणभौमादिभिः असुरभूपालैर्दैत्यराजैर्वृतः बली मागधसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रयः जरासन्धाख्यस्वश्वशुरसाहाय्यवान् बली सः कंसः यदूनां कदनं नाशं चक्रे ॥ १ ॥ २ ॥ ते पीडिता इति ॥ ते च यादवाः पीडिताः सन्तः कुरुपाञ्चालादिदेशान् निविविशुः निभृतं हलिकगोपादिवेषेण गुप्ताः विविशुः। तङ्भाव आर्षः ॥ ३ ॥ एके इत्यर्द्धम् ॥ एके केचित् ज्ञातयः अक्रूराद्याः अनुरुन्धानाः अनुवर्त्तमानाः सन्तः तं कंसमेव पर्युपासत अवतारदर्शनापेक्षया ॥४॥ हतेष्विति सार्द्धम् ॥ औग्रसेनिना कंसेन देवक्याः षट्सु बालेषु हतेषु सत्सु वैष्णवं धाम विष्णोः कला एव देवक्या हर्षशोक विवर्द्धनः सप्तमो गर्भो बभूव । आनन्दरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारणदृष्ट्या शोकः यं गर्भगतं सात्वताः अनन्तं प्रचक्षते ॥५॥ भगवानिति ॥ विश्वस्यात्मा भगवानपि निजा वसुदेवादयो नाथा येषां निजेषु भक्तेषु नाथानां श्रेष्ठानामिति वा । निजः भगवानेव नाथो येषामिति वा । यदूनां कंसजं भयं ज्ञात्वा योगमायां विमलादीनां नवानां चिच्छक्तीनां पञ्चमीं समादिशत् ॥ ६ ॥ गच्छेति ॥ हे देवि भद्रे मङ्गले गोपैर्गोभिश्चालंकृतं व्रजं गच्छ । वसुदेवस्य भार्या रोहिणी नन्दगोकुले आस्ते । षड्गर्भवधानन्तरं रोहिण्या अपि जातं गर्भमालक्ष्य रहसि लोकद्वारा वसुदेवेनैव सा प्रेषिता इति सारार्थसंदर्शिनी ॥ ७ ॥ अन्या इति सार्द्धम् ॥ न केवलं रोहिण्येव गता किन्तु कंसात्

ते पीडिता निविविशुः कुरुपाञ्चालकेकयान् ॥ शाल्वान्विदर्भान्निषधान्विदेहान्कोसलानपि ॥ ३ ॥ एके तमनुरुन्धाना ज्ञातयः पर्युपासत ॥ ४ ॥ हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते ॥ गर्भो बभूव देवक्या हर्षशोकविवर्धनः ॥ ५ ॥ भगवानपि विश्वात्मा विदित्वा कंसजं भयम् ॥ यदूनां निजनाथानां योगमायां समादिशत् ॥ ६ ॥ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतम् ॥ रोहिणी वसुदेवस्य भार्याऽऽस्ते नन्दगोकुले ॥ ७ ॥ अन्याश्च कंससंविग्ना विवरेषु वसन्ति हि ॥ देवक्या जठरे गर्भं शेषाख्यं धाम मामकम् ॥ तत्संनिकृष्य रोहिण्या उदरे सन्निवेशय ॥ ८ ॥

संविग्ना भीताः अन्या अपि हि वसुदेवभार्याः विवरेषु अलक्ष्यस्थानेषु वसन्ति । देवक्या इति । देवक्या गर्भे विद्यमानं गर्भं शेषाख्यं मामकं धाम अंशं कर्म तत् ततो देवकीजठरात् सन्निकृष्य रोहिण्या उदरे सन्निवेशय । कंसकर्तृकषड्गर्भवधादिलीला च जनेषु भक्तिपरिपाटीप्रदर्शनार्था । तथा हि । मरीचिर्मनसोऽभवदिति श्रवणान्मरीचेर्मनोऽवतारत्वम् । तत्पुत्राणां षण्णां शब्दादिषड्विषयावतारत्वं देवक्या भगवत्प्रादुर्भावकत्वाद् भक्त्यवतारत्वम् । भयात् कंस इति श्रवणात् भयमयत्वेन कंसस्य भयावतारत्वम्। अतो भक्तिगर्भगतानां षड्विषयाणां यथा संसारभयमेव निवर्त्तकं तथैव देवकीषड्गर्भाणां कंसो हन्ता विषयनिवृत्तौ सत्यां यथा भक्तिगर्भे भगवद्यशःपरिचर्यादिमयी प्रेमभक्तिरेव भवेत् तथैव देवक्यां षड्गर्भनिवृत्त्यनन्तरं सप्तमो गर्भो भगवद्यशोनिवासशय्यासनच्छत्रादिरूपोऽनन्तः ततः प्रेमभक्त्याविर्भावानन्तरं यथा भगवत्साक्षात्कारो भक्तेरष्टमो गर्भस्तथैव देवक्याश्चाष्टमो गर्भो भगवानिति तत्त्वं द्रष्टव्यम् ॥ ८ ॥ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ हे शुभे अथ गर्भसंनिकर्षणानन्तरम् अहम् अंशभागेन अंशैर्ज्ञानबलादिभिर्भजनमनुवर्त्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणेति विवक्षितम् । "कृष्णस्तु भगवान् स्वयम् " इत्युक्तत्वादिति । अंशानां ब्रह्मादीनां तत्समयजातानां मनुष्यादीनां वा भागेन भाग्येन हेतुना इति वा । देवक्याः पुत्रतां प्राप्स्यामि त्वं तु नन्दपत्न्यां यशोदायां भविष्यसि । गूढार्थस्तु अंशानां ज्ञानैश्वर्यादीनां भागो भेदस्तेन रूपभेदेनेत्यर्थः । तत्रैकेन रूपेण देवक्याः पुत्रतामपरेण यशोदायाः पुत्रतां प्राप्स्यामि । त्वं तु नन्दपत्न्यां भविष्यसि सत्तामात्रं प्राप्स्यसि न पुत्रीत्वम् । यशोदादेवक्योर्मम मातृत्वानुभवः तयोश्च मयि पुत्रतानुभवः अन्यथा अग्रे रूपभेदाभावेनान्यतरस्याः पुत्रत्वाभावनिश्चयेनानर्थः स्यात् इत्याहुः ॥ ९ ॥ अर्चिष्यन्तीति ॥ मनुष्याः सर्वान् पुत्रादीन् कामयन्ते ये तेषां वरामीश्वरीं श्रेष्ठां नियन्त्रीम् अर्चकानां सर्वान् कामवरान् प्रददाति या तां त्वां धूपैः उपहारैः पुष्पाद्यैः बलिभिः भोज्याद्यैः अर्चिष्यन्ति ॥ १० ॥ नामधेयानीति द्वयम् ॥ नरा भुवि दुर्गा इति भद्रकालीत्यादीनि चकारात् महिषमर्दिनी इत्यादीनि च तव नामधेयानि स्थानानि विन्ध्यादीनि च कुर्वन्ति करिष्यन्ति ॥११॥१२॥ गर्भेति ॥ वै एवार्थे । तं रोहिणीपुत्रं गर्भस्य संकर्षणादेव अत्र जन्मनि संकर्षणं

अथाऽऽहमंशभागेन देवक्याः पुत्रतां शुभे ॥ प्राप्स्यामि त्वं यशोदायां नन्दपत्न्यां भविष्यसि ॥ ९ ॥ अर्चिष्यन्ति मनुष्यास्त्वां सर्वकामवरेश्वरीम् ॥ धूपोपहारबलिभिः सर्वकामवरप्रदाम् ॥१०॥ नामधेयानि कुर्वन्ति स्थानानि च नरा भुवि ॥ दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥ ११ ॥ कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च ॥ माया नारायणीशानी शारदेत्यम्बिकेति च ॥ १२ ॥ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि ॥ रामेति लोकरमणाद्बलं बलवदुच्छ्रयात् ॥१३॥ संदिष्टैवं भगवता तथेत्योमिति तद्वचः ॥ प्रतिगृह्य परिक्रम्य गां गता तत्तथाऽकरोत् ॥ १४ ॥ गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया ॥ अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः ॥ १५ ॥

प्राहुर्वक्ष्यन्ति ननु प्रलये जगदाकर्षणात् । लोकस्य रमणात् प्रीत्युत्पादनात् रामेति वक्ष्यन्ति । सुप्सुपेति समासः । रामेति संबोधयिष्यन्ति इति वा । बलवत्सु उच्छ्रयात् आधिक्याद्धेतोः बलं वक्ष्यन्ति ॥ १३ ॥ संदिष्टेति ॥ एवं भगवता संदिष्टा आज्ञप्ता देवी तस्य भगवतः वचः वचनं तथा इति पुनः ओमिति च आदरेण प्रतिगृह्य परिक्रम्य प्रदक्षिणीकृत्य गां पृथ्वीं गता सती तद् भगवद्वचनं यथा आदिष्टं तथा अकरोत् ॥ १४ ॥ गर्भे इति ॥ योगनिद्रया कर्त्र्या देवक्याः गर्भे रोहिणीं प्रति प्रणीते प्रापिते सति अहो गर्भः विस्रंसितः कंसभयाद्विस्रस्तः कंसेनैव औषधादिना पातित इति वा । लोकाः स्नेहाकुलाः विचुक्रुशुर्विलेपुः नतु तत्कारणं विविदुरित्यर्थः । अत्र हरिवंशे देवक्याः सप्तमगर्भसंभवोत्तरमपि किंचित्कालं रोहिणी मथुरायामवात्सीत् पश्चाद् गोकुलं गतायां तस्यां सप्तमासिको गर्भ आकृष्य प्रवेशितः तस्याः पूर्वस्थितो गर्भश्च तावन्मासिक एवापसारित इत्युक्तम् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवानिति ॥ विश्वस्यात्मा भक्तानामभयंकरो भगवानपि अंशभागेन पूर्णस्वरूपेणेति पूर्ववदर्थः । आनकदुन्दुभेर्मनः कर्म आविवेश । मन इत्यनेनान्येषामिव धातुसंबन्धनिरासः अत एव काष्ठेत्यनुरूपो दृष्टान्तः । भगवानपीत्यर्द्धं चित्सुखाचार्याणामसम्मतम् । पौरुषं धाम मन आविवेशेति तद्व्याख्यानात् ॥ १६ ॥ स इति ॥ पौरुषं भगवत्संबन्धि धाम श्रीमूर्तिरूपं तेजः बिभ्रत् अत एव रविर्यथा भ्राजमानः स वसुदेवः ह स्फुटं भूतानां दुरासदः प्राणिभिरासन्नीभवितुमशक्यः अतिदुर्द्धर्षः कंसादिवैरिभ्यभिभवितुमशक्यश्च बभूव ॥ १७ ॥ तत इति ॥ ततः देवी शुद्धसत्त्वरूपतया द्योतमाना देवकी जगन्मङ्गलं जगतो मूर्तिमन्मङ्गलम् अच्युतांशम् अच्युताश्च्युतिरहिताः अंशा ऐश्वर्यादयो यस्य तम् । यद्वा । अच्युतस्यांश इवांशः भक्तानुग्रहाय परिच्छिन्नवपुः शूरसुतेन वसुदेवेन सम्यग्भूतमेवाहितम् अर्पितं सर्वात्मकं सर्वस्यात्मानम् अत एवात्मभूतं स्वस्मिन्नादावेव सन्तं भगवन्तं काष्ठा पूर्वा दिक् आनन्दकरं चन्द्रं यथा धरति तथा मनस्तः मनसैव दधार । यथा दीक्षाकाले गुरुः शिष्याय ध्यानमुपदिशति शिष्यश्च ध्यानोक्तां मूर्तिं हृदि निवेशयति तथा वसुदेवो देवकीदृष्टौ स्वदृष्टिं निदधौ । दृष्टिद्वारा च हरिः संक्रामन् देवकीगर्भे आविर्बभूव । एतेन रेतोरूपेणाधानं

भगवानपि विश्वात्मा भक्तानामभयंकरः ॥ आविवेशांशभागेन मन आनकदुन्दुभेः ॥ १६ ॥ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः ॥
दुरासदोऽतिदुर्धर्षो भूतानां संबभूव ह ॥१७॥ ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी ॥ दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनन्दकरं मनस्तः ॥ १८ ॥ सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे ॥ भोजेन्द्रगेहेऽग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती
॥ १९ ॥ तां वीक्ष्य कंसः प्रभया जितान्तरां विरोचयन्तीं भवनं शुचिस्मिताम् ॥ आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी
॥ २० ॥ किमद्य तस्मिन्करणीयमाशु मे यदर्थतन्त्रो न विहन्ति विक्रमम् ॥ स्त्रियाः स्वसुर्गुरुमत्या वधोऽयं यशः श्रियं हन्त्यनुकालमायुः ॥ २१ ॥

निरस्तम् ॥ १८ ॥ सा देवकीति ॥ सर्व जगतां निवासस्य श्रीहरेर्निवासभूता सत्यपि भोजेन्द्रस्य कंसस्य गेहे रुद्धा सा देवकी घटादिषु रुद्धा अग्नेः दीपस्य शिखा इव नगरं न प्रकाशयति । सती शोभमाना सरस्वती ज्ञानखले ज्ञानवञ्चके रुद्धा यथान्येषामनुपकारिणी न राजते तद्वत् नितरां सर्वजनाह्लादकतया न रेजे किंतु स्वयमेवानन्दमन्वभवत् । यथाग्निशिखा प्रबला गृहं दहति सरस्वती च परवञ्चनापापेन ज्ञानखलं च नाशयति तथेयं कंसं धक्ष्यतीति उपमाद्वयेन व्यङ्ग्यम् ॥१९॥ तां वीक्ष्येति ॥ अजितो भगवान् आन्तरः कुक्षिगतो यस्यास्तां प्रभया भवनं विरोचयन्तीं शुचि स्मितं यस्यास्तां देवकीं वीक्ष्य कंस आह स्म । यत् यतः इयं पुरा ईदृशी न आसीत् अतः एष तेजोतिशयेन प्रत्यक्षायमाणः मे मम गजस्येव प्राणहरः हरिर्भगवान् सिंहश्च गुहां गर्भं दरीं च ध्रुवं निश्चितं श्रितः ॥ २० ॥ किमद्येति ॥ तस्मिन्मद्वैरिणि हरौ आशु इदानीमेव मे मम कर्त्तरि षष्ठी । किं करणीयं किं कर्त्तुं शक्यम् । गर्भस्थस्य हननं न योग्यं यद्यस्मात् अर्थतन्त्रो देवकार्यप्रधानः हरिः जातमात्रोऽपि विक्रमं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहन्ति । मद्वधे पराक्रमं करिष्यत्येवेत्यर्थः । यद्वा । अर्थतन्त्रः स्वकार्यसाधकः अपि मादृशः विक्रमं न विहन्ति न नाशयति । स्त्रीवधे तु विक्रमनाशः स्यादेवेत्यर्थः । तदेवाह । यतः तं जीवन्तमेव मनुजाः शपन्ति धिक्कुर्वन्ति स च देहे मृते तनुमानिनः पापिनो नरस्य भोग्यम् अन्धंतमो नरकं गन्ता । यद्वा । अयं स्वदेहरक्षार्थं चिन्त्यमानः स्त्रियास्तत्रापि स्वसुः तत्रापि गुरुमत्या गर्भिण्या वधः यशः श्रियं कालस्य योग्यमनुकालं यथार्थेऽव्ययीभावः । आयुश्च हन्ति योग्यकालात्पूर्वमेव शीघ्रमेव आयुर्हन्ति इत्यर्थः । यद्वा । गर्भस्थस्य वधे मम वीरत्वव्यञ्जको विक्रमो नङ्क्ष्यति यतः जातप्रवृद्धतरुणीभूतेनानेन संग्रामे जये पराजये वा विक्रमः स्थास्यत्येव । गर्भवधे तु को विक्रमः किञ्च न विक्रममात्रहानिरपि तु धर्मादिहानिरपीत्याह । स्त्रिया इति । अत्र भयेनैव स्वदौरात्म्यं स्तब्धं तदपि मद्विवेकेनैवेति स्वस्मिन्नभिमानसुखं कंसेन कल्पितम् ॥ २१ ॥ स एष इति ॥ यः अत्यन्तं नृशंसितेन क्रौर्येण वर्त्तेत स एष खलु नूनं जीवन्नपि सम्परेतः मृत एव तनुमानिनः प्राण्यन्तरहिंसया स्वतनुं मानयतो लालयतोऽस्य देहे मृते अयं ध्रुवमन्धंतमो नरकं गन्ता गमिष्यतीति वाक्यैः तं मनुजाः शपन्ति । यद्वा । यद्यपि जीवति तस्मिन् लोका बिभ्यति तथापि देहे मृते तं क्रूरं

स एष जीवन्खलु संपरेतो वर्तेत योऽत्यन्तनृशंसितेन ॥ देहे मृते तं मनुजाः शपन्ति गन्ता तमोऽन्धं तनुमानिनो ध्रुवम् ॥ २२ ॥ इति घोरतमाद्भावात्स निवृत्तः स्वयं प्रभुः ॥ आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबन्धकृत् ॥ २३ ॥ आसीनः संविशंस्तिष्ठन् भुञ्जानः पर्यटन्महीम् ॥ चिन्तयानो हृषीकेशमपश्यत्तन्मयं जगत् ॥२४ ॥ ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः ॥ देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयन् ॥ २५ ॥
॥ देवा ऊचुः ॥ ॥ सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ॥ सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥२६॥

मनुजाः शपन्ति। रे पाप नरके पतेति क्रोशन्ति शेषं प्रथमव्याख्यावत् ॥ २२ ॥ इतीति ॥ इत्येवं विचार्य घोरतमादत्यन्तभयंकराद् भावात् गर्भपातनाभिप्रायात् स्वयमेव निवृत्तोऽपि हरेः वैरस्यानुबन्धमनुवृत्तिं करोति तादृशः प्रभुः स्वरक्षणसमर्थः स कंसः तस्य हरेर्जन्म प्रतीक्षन् प्रतीक्षमाणः आर्षः शता । आस्ते स्म ॥ २३ ॥ आसीन इति ॥ आसीनः संविशन् शयानः तिष्ठन् भुञ्जानः महीं पर्यटन् भ्रमंश्चापि हृषीकेशं हरिमेव चिन्तयानः मुगभाव आर्षः । सर्वं जगत् तन्मयं हरिरूपमेव अपश्यत् ॥ २४ ॥ ब्रह्मेति ॥ ब्रह्मा भवः शिवश्च नारदादिभिः मुनिभिः सानुचरैः गन्धर्वाद्यनुचरसहितैः देवैः साकं तत्र सूतिगृहे एत्य आगत्य तौ च देवाश्च गीर्भिः वृषणं कामवर्षणं भगवन्तम् ऐडयन् तुष्टुवुः । अत्रेड् चुरादिः । बहुत्वं सर्वदेवाभिप्रायम् आर्षमित्येके ॥ २५ ॥ सत्यव्रतमिति ॥ सत्यं व्रतं संकल्पो यस्य तं सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्य त्रिष्वपि कालेषु सृष्टिस्थितिलयकाले तेभ्यः प्रागनन्तरं च सत्यमव्यभिचारेण वर्तमानं सत् पृथिव्यप्तेजांसि त्यत् वाय्वाकाशौ एवं सच्च त्यच्च सत्त्यं भूतपञ्चकम् “ तत्सत्त्यमित्याचक्षते ” इति श्रुतेः । तस्य सत्यस्य योनिं कारणम् । एतेनप्राग्विद्यमानतोक्ता । सत्त्ये तस्मिन्नेवान्तर्यामितया निहितं स्थितम् । एतेन स्थिति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समये सत्यत्वमुक्तम् । तथा सत्यस्य तस्यैव सत्यं पारमार्थिकं रूपं तन्नाशेऽप्यवशिष्यमाणरूपम् । एतेन प्रलयेप्यवधित्वेन सत्वं दर्शितम् । ऋतं सूनृता वाक् सत्यं समदर्शनं तयोर्नेत्रं प्रवर्तकम् एवं सत्यात्मकं सत्यस्वरूपं त्वां शरणं प्रपन्नाः स्मः ॥ २६ ॥ एकायन इति ॥ एकं प्रकृतिरूपमयनमाश्रयो यस्य । द्वे सुखदुःखे फले यस्य । त्रीणि सत्वरजस्तमांसि मूलानि यस्य । चत्वारो धर्म्मार्थकाममोक्षा वर्णधर्मा वा आश्रमधर्मा वा रसा यस्य । पञ्च इन्द्रियाणि विधा ज्ञानप्रकारा यस्य । षट् जायतेऽस्ति वर्द्धते विपरिणमति अपक्षीयते नश्यति इति भावविकाराः बुभुक्षा पिपासा शोकमोहजरामृत्युरूपाः षडूर्मयः त्वङ्मांसरुधिरमेदोमज्जास्थीनि षट् कोषा वा आत्मानः स्वभावा यस्य । सप्त रसासृङ्मांसमेदोस्थिमज्जाशुक्ररूपा रसस्थाने त्वचमपि पठन्ति तद्रूपा वा धातवः मह्यादिसप्तावरणरूपा वा त्वचो यस्य । अष्ट पञ्चभूतानि मनोबुद्ध्यहंकाराश्चेति । विटपाः शाखा विस्तारा यस्य । नव शरीरच्छिद्राणि अक्षाः कोटराणि यस्य । दश प्राणापानव्यानसमानोदाननागकूर्मकृकलदेवदत्तधनञ्जयाः प्राणाश्छदाः पत्राणि विद्यन्तेऽस्य । दशभिः प्राणैश्छदी पत्रवान् इति वा । द्वौ जीवेश्वरौ खगौ यत्र ईदृशो योऽसौ समष्टिव्यष्टिदेहरूपः आदिश्चासौ वृक्षः उपलभ्यते ॥ २७ ॥ त्वमिति ॥ अस्य

एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पञ्चविधः षडात्मा ॥ सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः ॥ २७ ॥ त्वमेक एवास्य सतः प्रसूतिस्त्वं सन्निधानं त्वमनुग्रहश्च ॥ त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितो ये ॥ २८ ॥ बिभर्षि रूपाण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य ॥ सत्त्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानाम् ॥ २९ ॥ त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनावेशितचेतसैके ॥ त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम् ॥ ३० ॥

सतः कार्यस्य पूर्वश्लोके वृक्षत्वेन वर्णितस्य विश्वस्य त्वमेक एव प्रसूतिः कारणं त्वमेव सन्निधानं लयस्थानम् । त्वमेवानुगृह्णातीत्यनुग्रहः पालकश्चासि अतः प्रपञ्चस्त्वद्भिन्नो न । नन्वेवंविधा ब्रह्मादयः प्रसिद्धा इति चेत्तत्राहुः । ये त्वन्मायया संवृतं पिहितं चेतो ज्ञानं येषां ते त्वामेव नाना पश्यन्ति ये तु विपश्चितः ते तु तथा न पश्यन्ति । यद्वा । ये त्वन्मायया न संवृतं चेतो येषां ते विपश्चितः त्वां नाना न पश्यन्तीत्येकमेव वाक्यम् । ब्रह्मादीनामपि त्वदवतारत्वात् ॥ २८ ॥ अन्येऽपि तेऽवताराः सन्तीत्याहुः—बिभर्षीति ॥ अवबोधः ज्ञानस्वरूप आत्मा त्वमेव चराचरस्य लोकस्य क्षेमाय सत्वेन सच्चिदानन्दघनरूपत्वेनोपपन्नानि श्रुतियुक्तिसिद्धानि सतां सुखावहानि खलानाम् अभद्राणि नाशकानि रूपाणि मुहुर्मुहुर्बिभर्षि लोकदृष्टौ प्रकटयसि ॥ २९ ॥ त्वयीति ॥ हे अम्बुजाक्ष एके मुख्या विवेकिनः अखिलसत्वधाम्नि शुद्धसत्वमूर्तौ त्वयि समाधिना आवेशितं स्थिरीकृतं यच्चेतस्तेनैव निमित्तेन महद्भिः कृतेन सेव्यतया संपादितेन इदमेव महदिति सादरं स्वीकृतेन वा । महद्भिः भवाब्धेः पोततुल्यीकृतेन वा त्वत्पादरूपेण पोतेन महानौकया भवाब्धिं संसारसमुद्रं गोवत्सपदमिव तुच्छं कुर्वन्ति । भवाब्धेरस्तित्वमपि न जानन्ति । अनायासेन तेषां मुक्तिरित्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्येषां का गतिरिति चेत्तत्राहुः—स्वयमिति ॥ हे द्युमन् स्वयंप्रकाश अदभ्रम् अनल्पं सौहृदं दीनेषु कृपा येषां ते पूर्वोक्ताः विवेकिनः अन्येषां सुदुस्तरं भीमं भयंकरं च भवार्णवं स्वयं समुत्तीर्य अदभ्रसौहृदत्वात् भवत्पदाम्भोरुहरूपां नावमत्रैव निधाय भक्तिमार्गसंप्रदायं प्रवर्त्यैत्यर्थः । पद्भ्यामिवानायासेन पारं याताः यत् यतः कारणात् भवान् सदनुग्रहः सतो भक्तान् अनुगृह्णाति तादृशोऽस्ति ॥ ३१ ॥ य इति ॥ हे अरविन्दाक्ष ये केचित् विमुक्तमानिनः केवलं ज्ञानमेवाश्रित्य विमुक्ता वयमिति मन्यमानाः त्वयि अस्तो निरस्तोऽत एवासन् यो भावः तस्मात् भक्तेरभावादित्यर्थः । न विशुद्धा बुद्धिर्येषां ते तथा । यद्वा । त्वयि अस्तभाः इति च्छेदः । अस्तमतयः वादेष्वेव विशुद्धबुद्धयः अत एव न आदृतौ युष्मदङ्घ्री यैस्ते युष्मदिति बहुत्वं भक्तसंग्रहाय । ईदृशाः सन्तः कृच्छ्रेण बहुजन्मतपसा परं पदं मोक्षसन्निहितं सत्कुलतपःश्रुतादि आरुह्य प्राप्यापि ततः अधः पतन्ति विघ्नैरभिभूयन्ते । तिर्यगादियोनिं वा प्रपद्यन्ते त्वदनादरणदोषान्नरके पतन्तीति वा । भक्तिरसिकास्तु शमदमादिकृच्छ्रजनितेन विज्ञानेन परं पदं जीवन्मुक्तदशामारुह्यापि भगवच्चरणानादरेण कर्मणां पुनः प्ररोहात्पुनः संसरन्ति जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्मभिः यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिन

स्वयं समुत्तीर्य सुदुस्तरं द्युमन्भवार्णवं भीममदभ्रसौहृदाः ॥ भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥३१॥ येऽन्येऽरविन्दाक्ष-विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ॥ आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधो नादृतयुष्मदङ्घ्रयः ॥ ३२ ॥ तथा न ते माधव ताव-काः क्वचिद् भ्रश्यन्ति मार्गात्त्वयि बद्धसौहृदाः ॥ त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्धसु प्रभो ॥ ३३ ॥ सत्त्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेय उपायनं वपुः ॥ वेदक्रिया योगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ॥ ३४ ॥

इत्युक्तेरिति यथाश्रुतार्थमेवाहुः ॥ ३२ ॥ तथेति ॥ हे माधव हे प्रभो यथा त्वद्विमुखाः स्वाधिकाराद् भ्रश्यन्ति तथा त्वयि बद्धं सौहृदं प्रेमातिशयो यैस्ते तावकास्त्वद्-भक्ताः क्वचित्कदाचिदपि तत्त्वज्ञानाभावेऽपि स्वधर्मत्यागेऽपि पातकसंभवेऽपि च मार्गात् मार्गणीयात् भजनाधिकारान्न भ्रश्यन्ति । भरतचित्रकेतु गजेन्द्रप्रह्लादादीनां जन्मान्तरेऽपि भक्तिसद्भावदर्शनात् । किन्तु त्वया अभि सर्वतः गुप्ताः रक्षिता अत एव निर्भयाः कालकर्मादिभयरहिताः सन्तः विनायका विघ्नकर्तारस्तेषामनीकानि सेना-स्तासां पालकानां मूर्द्धसु विचरन्ति । विघ्नकरणार्थमागतानां देवादीनां मूर्द्धपरम्परां सोपानीकृत्य त्वत्पदमारोहन्तीत्यर्थः ॥ ३३ ॥ बिभर्षि रूपाण्युक्तानां रूपाणां केन प्रकारेण सुखावहत्वमित्याशङ्क्याह—सत्वमिति ॥ भवान् स्थितिः पालनं तस्यां निमित्तभूतायां जगत्पालनार्थमिति यावत् । विशुद्धं रजस्तमोभ्यामननुविद्धं सत्वं सत्वमयं शरीरिणां श्रेयसः कर्मफलस्य उपायनं प्रापकं वपुः श्रयते बिभर्त्ति । येन वपुषा हेतुना जनः ब्रह्मचार्यादिः वेदाश्च क्रियायोगाश्च तपश्च समाधिश्च तैः क्रमेण चतुराश्रमधर्मै-रित्यर्थः । तव अर्हणं पूजनं सम्यक् ईहते करोति । वपुषोऽनाश्रयणेऽर्हणासम्भवान्न कर्मफलसिद्धिः स्यादिति ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्वं न चेदिति ॥ हे धातः निजं भवदीयं सत्त्वं विशुद्धसत्वमयमिदं वपुश्चेत् यदि प्रकटितं न भवेत् तदा तद्भजनाभावेन अज्ञानं च तत्कृता भिदा भेदबुद्धिश्च तयोरपमार्जनं निवर्त्तकं विज्ञानं तव तत्त्वसाक्षात्कारात्मकमपि न भवेदित्यनुषङ्गः । यद्वा । चेद्यदि सत्वमयमिदं तव निजं वपुर्न भवेत् तर्हि अज्ञानभित् अज्ञाननिवर्त्तकं विज्ञानमपरोक्षज्ञानं मार्जनं नाशम् आप प्राप्तमेव तदा अपरोक्षज्ञानस्य नाश एव भवेदित्यर्थः । ननु जडानां बुद्ध्यादीनां यतः प्रकाशस्तद्ब्रह्मेति ज्ञानं स्यादेवेति चेत्तत्राहुः । गुणे ति । तदा हि यस्य संबन्धी अयं बुद्ध्यादिगुणः प्रकाशते यो गुणसाक्षीत्येवं येन वा बुद्ध्यारूढेन प्रमात्रा बुद्ध्याद्यधिष्ठात्रा बाह्यो गुणः प्रकाशते इत्येवं गुणप्रकाशैः गुणावच्छिन्नैः प्रकाशैर्भवान् सर्वसाक्षी परिपूर्णः केवलमनुमीयते कल्प्यते नतु साक्षात्क्रियत इत्यर्थः । अनुमानप्रयोगश्च बुद्ध्यादयः प्रकाशकसापेक्षाः जडत्वात् घटादिवत् इति । अतः भवता शुद्धसत्वमूर्त्तिः धार्या एवेत्यर्थः । ततः शुद्धसत्ववपुषि त्वयि सेव्यमाने तु तदाकारेन्तःकरणे त्वत्प्रसादेन साक्षात्कारो भवेदिति भावः ॥ ३५ ॥ यानि रूपाणि त्वं बिभर्षि तान्यपि भजनीयान्येव नतु ज्ञातुं शक्यानि अनन्तत्वादिहेतोरित्याहुः—न नामरूपे इति ॥ अनुमेयं महता प्रयत्नेन सूक्ष्मया बुद्ध्या विज्ञेयं वर्त्म प्राप्तिसाधनं यस्य तस्येत्यर्थः । तस्य मनइन्द्रियादिसंघातस्य साक्षिणः तव गुणजन्मकर्मभिः स्वीकृते नामरूपे मनोवचोभ्यां न निरूपितव्ये मनसा चिन्तनार्हे वचसा कीर्त्त-

सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम् ॥ गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च येन वा गुणः ॥ ३५ ॥ न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः ॥ मनोवचोभ्यामनुमेयवर्त्मनो देवक्रियायां प्रतियन्त्यथापि हि ॥ ३६ ॥ शृण्वन्गृणन्संस्मरयंश्च चिन्तयन्नामानि रूपाणि च मङ्गलानि ते ॥ क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते ॥ ३७ ॥

नार्हे च न भवतः । तत्र गुणैर्नामरूपे दीनवत्सलादि श्यामसुन्दरादि । कर्मभिर्गोवर्द्धनधरादि त्रिभङ्गाकृत्यादि । जन्मभिर्देवकीनन्दनादि मत्स्यादि । यद्वा । मनः मननं युक्तिः वचः आप्तवाक्यं ताभ्यामप्यनुमेयं नत्वनुभाव्यं वर्त्म गुणादिरूपं यस्य तस्य । तव नामरूपे गुणैः शास्त्राभ्यासाद्यैः कर्मभिः नियमादिभिः जन्मभिः सत्कुलादिभिर्हेतुभिरपि न निरूपितव्ये निरूपणार्हे न भवतः । अनित्यण्यन्ताश्शुरादयः । हे देव अथापि तथापि क्रियायां भवदुपासनायां वर्त्तमाना भक्ताः प्रतियन्ति नामानि कीर्त्तयन्ति रूपाणि च पश्यन्तीत्यन्वयः । "यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय।" इति तृतीयोक्तेः ॥ ३६ ॥ तस्माद् भक्त्यैव मोक्ष इत्युपसंहरन्ति—शृण्वन्निति ॥ मङ्गलानि पुण्यावहानि ते तव नामानि रूपाणि चकारात्कर्माणि शृण्वन् गृणन् स्वयं स्मरन् अन्यांश्च सोत्कण्ठं संस्मारयन् चिन्तयंश्च श्रवणादीनां विकल्पो ज्ञेयो नतु समुच्चयः । क्रियासु लौकिकालौकिकव्यापारेषु वर्त्तमानोऽपि क्रियासु देवार्चनादिष्विति स्वामिपादाः । युष्मच्चरणारविन्दयोराविष्टमासक्तं चित्तं यस्य । यद्वा । क्रियासु त्वल्लीलासु त्वच्चरणारविन्दयोश्चाविष्टचित्तः स पुनर्भवाय संसारप्राप्तये न कल्पते न योग्यो भवतीत्यर्थः। प्रयत्नं विना मानसिकव्यापारः स्मरणं स प्रयत्नश्च सचिन्तनमिति भेदः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिष्ट्येति ॥ हे हरे ईशितुः ईश्वरस्य तव जन्ममात्रेण भवतः पदः पदजातत्वेन तदभेदात् पादभूताया अस्या भारार्त्ताया भुवो दैत्यादिजनितो भारोऽपनीतो दूरीकृत एवेति दिष्ट्या भद्रं जातम्। किंच सुशोभनैर्वज्राङ्कुशादिभिः शुभलक्षणैः त्वत्पदकैः अल्पार्थे अनुकम्पायां वा कन्। कोमलैः पदैरित्यर्थः । अङ्कितां तव त्वयानुकम्पितां कृपादृष्ट्याऽवलोकितां गां पृथ्वीं द्यां स्वर्गं च वयं द्रक्ष्यामेत्यपि दिष्ट्या भद्रमेव। सलोप आर्षः । अदित्याः कुण्डलदानाद्यर्थं स्वर्गे गमनात्तत्रापि पादाङ्कितत्वं बोध्यम् ॥ ३८ ॥ जन्मनेत्युक्त्या प्रसक्तं संसारित्वकथनापराधं मार्जन्ति—न ते इति ॥ हे ईश हे अभय भयरहित हे आश्रय यद्वा । अभयाश्रय अभवस्य असंसारिणः तव भवस्य जन्मनः कारणं विनोदं क्रीडासंकल्पं विनान्यन्न तर्कयामहे। लीलार्थमेव जन्म कंसवधादि त्वतितुच्छम् यतः आत्मनि जीवात्मन्यपि भवो जन्म निरोधः मरणं स्थितिश्चेत्येते त्रयो यतस्त्वयि विषये अविद्याकृता न परमार्थतः सन्तीति। तव तु जन्मादि तद्वत्कथं स्यात्। यद्वा। प्रपञ्चस्य सृष्ट्यादिका अपि त्वदाश्रितया अविद्ययैव कृताः। तत्र कंसवधादेः का वार्त्ता ॥ ३९ ॥ मत्स्याश्वेति ॥ हे ईश अन्यसमये यथा मत्स्यादिषु कृतावतारः सन् त्वं नः अस्मान् देवान् त्रिभुवनं त्रिभुवनस्थान्साधुजनांश्च पासि

दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोपनीतस्तव जन्मनेशितुः ॥ दिष्ट्याङ्कितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकम्पिताम् ॥ ३८ ॥ न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ॥ भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि ॥ ३९ ॥ मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः ॥ त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वन्दनं ते ॥ ४० ॥ दिष्ट्याम्ब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः ॥ मा भूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ॥ ४१ ॥ ॥ श्रीशुक उवाच ॥ इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ॥ ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवम् ॥ ४२ ॥

तथाऽधुना भुवो भारं हरेत्यन्वयः। अधुना भूभारहरणमेवास्माकं पालनम् इत्याशयः। तत्र अश्वो हयग्रीवः राजन्यः श्रीरामः विप्रः परशुरामः विबुधो वामनः। हे यदूत्तम ते वन्दनमिति वदन्तः सर्वे प्रणमन्ति। तवोपकारस्य प्रणाम एव प्रत्युपकार इत्याशयः ॥ ४० ॥ देवकीं प्रत्याहुः—दिष्ट्येति ॥ अम्ब हे मातः नः अस्माकं भवाय परः पुमान् भगवान् एव अंशेन बलदेवेन सह साक्षात्पूर्णरूपेणैव ते तव कुक्षिंगतः इति दिष्ट्या भद्रमेव जातम्। मुमूर्षोः आसन्नमृत्योः भोजपतेः कंसात् भयं मा भूत् अन्येषामपि कुक्षिं हृदयं गतो हरिर्भवति तेषां भयं न भवतीति कुतस्तव भयं तव आत्मजः सर्वेषां यदूनां गोप्ता रक्षको भविता किं पुनर्युवयोः स्वस्य वा रक्षणे संदेहः ॥ ४१ ॥ इत्यभिष्टूयेति ॥ यस्य रूपं यथा यथावत् अनिदमिदं दृश्यं विश्वं तस्माद्विलक्षणं सर्वप्रत्यग्भूतं भवति तं पुरुषं सर्वान्तर्यामिणं भगवन्तमित्येवमुक्तप्रकारेणाभिष्टूय स्तुत्वा दैर्घ्यमार्षं ततस्तुगभावः । ब्रह्मेशानौ देवश्रेष्ठत्वात् पुरोधाय अग्रतः कृत्वा देवाः दिवं प्रति ययुः। यद्वा । अस्मान् वञ्चयित्वा एताविह किमपि रहस्यमद्भुतं मा द्राष्टामिति ब्रह्मे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शानौ पुरोधाय अग्रे कृत्वा पुरोऽव्ययमिति गतित्वात्समासे क्त्वो ल्यप् ॥४२॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्य द्वितीयके ॥ २ ॥ तृतीये स्वयमुद्भूतः पितृभ्यां च स्तुतो हरिः ॥ गोकुलं प्रापितः पित्रा श्लोकाः सार्द्धास्त्रिमार्गणाः ॥ षड्वाचेति पादाढ्यास्त्रयःषष्टिरनुष्टुभः ॥ ३ ॥ अथेति ॥ अथेति मंगलार्थम् । यर्हि सर्वगुणोपेतः कालो बभूव तदा देवक्यां विष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः । अन्येप्यन्वयप्रकाराष्टीकान्तरेषु ज्ञेयाः । यद्वा । यर्ह्येव शान्तानि ऋक्षाण्यश्विन्यादीनि ग्रहाश्च तारकाश्च यस्मिंस्तत् अजनस्य जन्मरहितस्य भगवतो जन्मनक्षत्रं रोहिणी अभूत् । यद्वा । अजनान्नारायणाज्जन्म यस्य तस्य प्रजापतेर्ऋक्षं रोहिण्यभूत् । अथ तदैव सर्वगुणोपेतः परमशोभनः कालोऽभूदिति सारार्थसंदर्शिन्यां सर्वेभ्यो लघुः प्रकारो भाति ॥ १ ॥ सर्वगुणोपेतत्वं सर्वतत्त्वानां प्रसादादिनाह—दिश इति ॥ तत्र दिशः प्रसेदुः निर्मला जाताः इति वर्षासु शरद्गुणः गगनं च निर्मलानामुडुगणानां नक्षत्रादीनामुदयो यस्मिंस्तथाभूतं बभूव । मही च मङ्गलानि पुत्रजन्मादीनि भूयिष्ठानि येषु तथाभूताः पुरादयो यत्र तादृशी बभूव । तत्र पुराणि हट्टादिमन्ति तद्रहिता ग्रामाः गोगोपनिवासस्थानं व्रजः आकरः सुवर्णमण्याद्युत्पत्तिस्थानम् ॥ २ ॥

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे गर्भगतविष्णोर्ब्रह्मादिकृतस्तुतिर्नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीशुक उवाच ॥ ॥

अथ सर्वगुणोपेतः कालः परमशोभनः ॥ यर्ह्येवाजनजन्मर्क्षं शान्तर्क्षग्रहतारकम् ॥ १ ॥ दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् ॥ मही मङ्गलभूयिष्ठपुरग्रामव्रजाकरा ॥ २ ॥ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः ॥ द्विजालिकुलसन्नादस्तबका वनराजयः ॥ ३ ॥ ववौ वायुः सुखस्पर्शः पुण्यगन्धवहः शुचिः ॥ अग्नयश्च द्विजातीनां शान्तास्तत्र समिन्धत ॥ ४ ॥ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहाम् ॥ जायमानेऽजने तस्मिन्नेदुर्दुन्दुभयो दिवि ॥ ५ ॥

नद्य इति ॥ नद्यः प्रसन्नानि पङ्करहितानि सलिलानि यासां तथाभूता बभूवुः । ह्रदाश्च जलरुहैः विकसितकमलैः श्रीर्येषां तथाभूता बभूवुः । इति रात्रावपि दिवसगुणः । वनानां राजयः द्विजानां पक्षिणामलीनां भ्रमराणां च कुलानां सङ्घानां गन्धमत्तानां सन्नादो मनोहरशब्दो येषु ते स्तबकाः पुष्पगुच्छाः यासां तास्तथाभूता बभूवुः इति वर्षासु वसन्तगुणः । सर्वमेतत् भगवत्प्रादुर्भावमहिम्नैवेति बोध्यम् ॥३॥ ववाविति ॥ तत्र काले सुखः शीतः स्पर्शो यस्य सः पुण्यः सुरभिर्यो गन्धस्तस्य वहः प्रापकः शुचिर्यमुनासङ्गी वायुर्ववौ । द्विजातीनां ब्राह्मणादीनामग्नयः शान्ताः कंसपापप्राबल्येन निर्वाणप्राया अपि समिन्धत । सम्यग् दक्षिणावर्त्तत्वेन उद्दीप्ता बभूवुः यद्वा । शान्ताः धूमादिरहिताः सन्तः समिन्धत आडागमाभाव आर्षः ॥४॥ मनांसीति ॥ असुरद्रुहां सुरद्रुहः कंसाद्यास्तद्भिन्ना असुरद्रुहस्तेषां सर्वप्राणिनां देवानां च । यद्वा । असुराद्द्रुहो द्रोहकर्त्तारो येषां तेषामसुरकर्तृकद्रोहखिन्नानां साधूनां मनांसि पूर्वमप्रसन्नानि तदा तु प्रसन्नानि आसन् एतत्पर्यन्तमष्टम्यां सूर्योदयादेवाभूत् । अथ तस्मिन् अजने श्रीकृष्णे जायमाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसन्नप्रादुर्भावे सति दिवि दुन्दुभयः स्वयमेव नेदुः । “अनाहता दुन्दुभयो देवानां प्राणदंस्तदा ।” इति हरिवंशे ॥ ५ ॥ जगुरिति ॥ तदा किन्नराः गन्धर्वाश्च भगवद्गुणान् जगुः । सिद्धाश्चारणाश्च भगवन्तं तुष्टुवुः । अप्सरोभिः समं सह विद्याधर्यश्च ननृतुः ॥ ६ ॥ मुमुचुरिति ॥ मुदा हर्षेणान्विताः एकत्र मिलिता इति तोषिणी । मुनयो देवाश्च सुमनांसि पुष्पाणि मुमुचुः क्लैब्यमार्षम् । जलधरा मेघाः अनुसागरम् अनुकृतः सागरो यत्र तत्र कर्मणि तथा समुद्रवदित्यर्थः । यद्वा । सागरगर्जनसहितं यथा भवति तथा मन्दं मन्दं जगर्जुः गम्भीरशब्दं कृतवन्तः । तथोक्तं विष्णुपुराणे । “ सिन्धवो निजशब्देन वाद्यं चक्रुर्मनोहरम् । ” इति । न च दिशः प्रसेदुरित्यस्य जलधरा जगर्जुरित्येन विरोधः शङ्क्यः प्रावृट्कालानुगुण्येन मेघगर्जनस्यापि गगनदेशकालभेदेनोचितत्वात् ॥ ७ ॥ निशीथ इति सार्द्धम् ॥ तमसा उद् उत्कर्षेण भूते व्याप्ते निशीथे यद्वा अतिशयिनि निशीथे निशीथे तमे उद्भूते जाते सति “ घकालतनेषु ” इति सप्तम्या अलुक् । जनानां भक्तादीनाम् अर्दने भगवन्नाविर्भव इति याचने जायमाने सति जनानां पीडाकरे निशीथे जायमाने इति केचित् । सर्वेषां गुहास्वन्तःकरणेषु शेते सः विष्णुः देवस्येव रूपं विद्यतेऽस्याः तस्यां देवमात्रदित्य-

जगुः किन्नरगन्धर्वास्तुष्टुवुः सिद्धचारणाः ॥ विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ॥ ६ ॥ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः ॥
मन्दं मन्दं जलधरा जगर्जुरनुसागरम् ॥ ७ ॥ निशीथे तमउद्भूते जायमाने जनार्दने ॥ देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ॥
आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥ ८ ॥ तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदार्युदायुधम् ॥ श्रीवत्सलक्ष्मं
गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौभगम् ॥ ९ ॥

वतारभूतायां देवक्यां विष्णुरूपिण्यामित्यपि पाठः । प्राच्यां दिशि पुष्कलः पूर्ण इन्दुरिव यथा यथावत्पूर्णरूपेण आविरासीत् । यद्वा । तद्दिने निशीथे प्राच्यां दिशि अष्टम्या इन्दुरपुष्टोऽपि मद्वंशं मत्प्रभुर्जन्मनालंचकारेत्यानन्दोद्रेकेण पुष्कलः पूर्णिमाया इन्दुरिव पूर्णकलः सन् यथा आविरासीत्तथैव देवक्यां विष्णुरपि सर्वांशकलापरिपूर्ण आवि-

रासीदिति दृष्टान्तदार्ष्टान्तिकयोर्यौगपद्यम् । आविर्भावश्च कंसवचनार्थमष्टमे मासि यदुक्तं हरिवंशे । “गर्भकाले त्वसंपूर्णे अष्टमे मासि ते स्त्रियौ । देवकी च यशोदा च सुषुवाते समं तदा ॥ ” इति । खमाणिक्यनाम्नि ज्योतिर्ग्रन्थे जन्मपत्री चोक्ता ॥ “ उच्चस्थाः शशिभौमचान्द्रिशनयो लग्नं वृषो लाभगो जीवः सिंहतुलालिषु क्रमवशात् पूषोशनोराहवः । नैशीथः समयोऽष्टमी बुधदिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमम्बुजेक्षणमभूदाविः परं ब्रह्म तत् ॥” इति । तथा च जन्मकुंडली ॥ ८ ॥ तमद्भुतमिति द्वयम् ॥ अम्बुजेक्षणं चतुर्भुजं शङ्खो गदा आरि चक्रम् एतददीन्युद्यतानि उत्कृष्टानि वा आयुधान्यस्य श्रीवत्सं वक्षसि रोमावर्त्तरूपं लक्ष्म चिह्नं यस्य अदन्तत्वमार्षम् । गले गलेन वा शोभते तादृक् कौस्तुभो यस्य पीताम्बरं सान्द्रो यः पयोदो मेघस्तस्येव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौभगं सौन्दर्यं यस्य महार्हाण्युत्कृष्टानि वैदूर्याणि नीलपीतरक्तच्छविरत्नविशेषा यत्र तादृक् यत्किरीटं मुकुटं त्रिकोणपत्रावलिरूपमिति च चक्रवर्त्ती । तच्च कुण्डले च तेषां त्विषा प्रभया परिष्वक्तानि अनुविद्धानि सहस्रमपरिमितानि कुन्तलानि केशा यस्य तं त्विषेत्यावन्तं वा । उपरि किरीटत्विषा अधः कुण्डलत्विषा कुन्तलानां परिष्वङ्गः उद्दामैरत्युत्कृष्टैः काञ्च्यादिभिर्विरोचमानमतिशयेन शोभमानम् तत्र काञ्ची कटिसूत्रम् अङ्गदानि बाहुभूषणानि कङ्कणानि करभूषणानि आदिपदेन भूषणान्तराणि सर्वाणि संगृहीतानि तम् अद्भुतं बालकं वसुदेव ऐक्षत ॥ ९ ॥ १० ॥ स इति ॥ आनकदुन्दुभिर्वसुदेवस्तदा हरिं सुतं विलोक्य विस्मयेनाश्चर्येण अहो अविद्यया बद्धस्य बहिः कंसेन च बद्धस्य च गृहे सर्वबन्धनमोचको विष्णुरवतीर्णः । सर्वव्यापकोऽपि गर्भादजनिष्टेत्यादिरूपेण उत्फुल्ले विकसिते विलोचने यस्य सः कृष्णावतारनिमित्तः कर्त्तव्यो य उत्सवस्तत्र संभ्रमस्त्वरा यस्य सः मुदा हर्षेण आप्लुतः व्याप्तः सन् हर्षजलेनैव स्नात इति वा द्विजेभ्यो ब्राह्मणेभ्यो गवामयुतं दशसहस्रमस्पृशत् । कंसनिगृहीतत्वेन तदा दानस्याशक्यत्वात् मनसा दानं संकल्पितवानित्यर्थः ॥ ११ ॥ अथेति ॥ हे भारत स्वस्य रोचिषा प्रकाशेन सूतिकागृहं विरोचयन्तम् एनं बालं परं पूरुषं भगवन्तम्

महार्हवैदूर्यकिरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम् ॥ उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥ १० ॥ स
विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुन्दुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम्
॥ ११ ॥ अथैनमस्तौदवधार्य पूरुषं परं नताङ्गः कृतधीः कृताञ्जलिः ॥ स्वरोचिषा भारत सूतिकागृहं विरोचयन्तं गतभीः प्रभाववित्
॥ १२ ॥ वसुदेव उवाच ॥ विदितोऽसि भवान्साक्षात्पुरुषः प्रकृतेः परः ॥ केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥ १३ ॥ स एव
स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् ॥ तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥ १४ ॥

अवधार्य निश्चित्य प्रभाववित् भगवत्प्रभाववेदी अत एव गता कंसजा भीर्भयं यस्य सः कृतधीः शुद्धबुद्धिः वसुदेवः नताङ्गः कृतदण्डवत्प्रणामः ततश्चोत्थाय कृताञ्जलिः सन् अस्तौत् ॥ १२ ॥ विदित इति ॥ भवान् प्रकृतेः परः पुरुषः केवलो निरुपाधिकश्चासावनुभवः चिद्रूपश्चासावानन्दश्च तदेव स्वरूपं यस्य सः सर्वेषां बुद्धीः पश्यतीति सर्वबुद्धिसाक्षी इत्येवंरूपतया साक्षात् प्रत्यक्षतः विदितोऽसि । न ह्येवंभूतो दृश्यो भवति चक्षुषा साक्षात्कारस्तु महावाक्येनेव वृत्तिव्याप्तत्वमात्रेण फलव्याप्तत्वं तु अत्रापि नास्ति स्वयंप्रकाशत्वसाम्यात् । सच्चिदानन्दरूपे स्वप्रकाशे भगवति न विवदितव्यम् । बहुवाक्यप्रामाण्यात् इति तोषिणी ॥ १३ ॥ ननु देवकीजठरे ॥ ११ ॥
प्रविष्टस्य किमियमतिस्तुतिः क्रियत इत्याशङ्क्य अनावृतस्याप्रच्युतस्य तव मुख्यप्रवेशः क्वापि नास्ति सर्वकारणतया वर्त्तनरूपो गौण एव प्रवेशस्तथैव देवकीजठरे प्रवेश इति प्रतिपादयति—स एवेति ॥ सः सच्चिदानन्दस्वरूप एव त्वमग्रे सृष्ट्यादौ स्वशक्तिरूपया प्रकृत्या त्रिगुणात्मकमिदं विश्वं सृष्ट्वा तदनु ततः पश्चात् अप्रविष्टोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविष्ट इव भाव्यसे । प्रत्यक्षतो वा सद्रूपेण वा प्रविष्ट इव लक्ष्यसे । "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुत्या निरूप्यसे इत्यर्थः । हि इत्यप्यर्थे । एवमेव देवकीजठरे प्रविष्ट इव भाव्यसे ॥ १४ ॥ अत्र दृष्टान्तः—यथेति युग्मकेन ॥ अत्र तथा इत्यन्तं दशाक्षरं भिन्नं वाक्यम् । अग्रे च तद्विवरणं यथा इमे अविकृता भावाः महदादयः विराडादिषु कार्येषु अप्रविष्टा अपि प्रविष्टा इव दृश्यन्ते तथा त्वम् अप्रविष्टोऽपि प्रविष्ट इव भाव्यसे । एतदेव विवृणोति ते इति । ते महदादयः महदहङ्कारशब्दादि पञ्च तन्मात्राः सप्त हि यतः पृथग्भूताः सन्तो नानावीर्याः विशिष्टकार्यजनने असमर्थाः भवन्ति अतो विकृतैः पृथिव्यादिपञ्चमहाभूतानि एकादशेन्द्रियाणि चेत्येवं षोडशभिः विकारैः सह सन्निपत्य संभूय विराजं ब्रह्माण्डं जनयन्ति । यद्वा । नानावीर्याः परस्परविसदृशा अपि पृथग्भूता अपि च चैतन्यप्रेरणया सन्निपत्य विराजं जनयन्तीति एवं विराजं समुत्पाद्याऽनुगताः प्रविष्टा इव दृश्यन्ते न पुनः प्रविष्टाः । उत्पत्तेः प्रागेव कारणतया विद्यमानत्वात् तेषामिह सृष्टे कार्ये पश्चात् संभवः प्रवेशो न इत्यर्थः ॥ १५ ॥ ॥ १६ ॥ दार्ष्टान्तिकेऽतिदिशति—एवं भवानिति ॥ एवं भवानपि अप्रविष्टोऽपि प्रविष्ट इव भाव्यसे । ननु यद्यहमप्रच्युतस्वरूप एव कारणतया कार्येषु वर्ते तर्हि तेष्विन्द्रियैः गृह्यमाणेषु मम ग्रहणं किं नास्ति तत्राह बुद्ध्यनुमेयलक्षणैरिति । बुद्ध्या रूपादिज्ञानेनानुमेयं लक्षणं स्वरूपं येषां तैर्गुणैः इन्द्रियैः ग्राह्यैर्गुणैः सह सन्नपि वर्त्तमानोऽपि

यथेमे विकृता भावास्तथा ते विकृतैः सह ॥ नानावीर्याः पृथग्भूता विराजं जनयन्ति हि ॥ १५ ॥ संनिपत्य समुत्पाद्य दृश्यन्तेनुगता इव ॥ प्रागेव विद्यमानत्वान्न तेषामिह संभवः ॥ १६ ॥ एवं भवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः ॥ अनावृतत्वाद्बहिरन्तरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः ॥ १७ ॥

तद्गुणाग्रहः तैर्गुणैः सह न गृह्यसे अयं भावः । न हि ग्राह्यैः सह भावमात्रं ग्रहणे कारणं किन्तु इन्द्रियाणां शक्तिः सा च कार्यैकसमधिगम्या । यथा कार्यमेव कल्प्यते अतो यथा चक्षुषा रूपग्रहणेऽपि रसादिग्रहणं नास्ति एवं सहभावेऽपि जिह्वया रस एव गृह्यते नतु रूपं तथैव विषयग्रहणे त्वद्ग्रहणमपीति अविषयत्वेन च ग्रहणानर्हत्वम् । यद्वा । एवं भवान् स्वप्रकृत्या सृष्टे जगति प्रविष्टोऽपि बुद्ध्यानुमेयमेव लक्षणं येषां तैः स्वप्रकाशत्वानन्दादिभिर्ग्राह्यैः सह सन्नपि तस्याः प्रकृतेर्गुणान् दुःखात्मकान्न गृह्णातीति तद्गुणाग्रहः अस्ति । यद्वा । ग्राह्यैः प्राप्यैः उपादेयैः गुणैः प्रेमवश्यत्वादिभिः सह सन्नपि नित्यं वर्त्तमानोऽपि तेषु गुणेषु आग्रहः पुनः पुनरासक्तिर्यस्य तथाभूतो भवान् भवति तानेव गुणान् गर्भप्रवेशादिभिर्व्यञ्जयसीत्यर्थः । किञ्च अपरिच्छिन्नत्वात् नीडे पक्षिण इव तव प्रवेशोऽपि न संभवति इत्याह । सर्वस्य सर्वरूपस्य सर्वेषामात्मनोन्तर्यामिणः आत्मा चासौ वस्तु च तस्य व्यापकस्य परमार्थवस्तुनश्च ते तव अनावृतत्वात् परिच्छेदरहितत्वात् बहिरन्तरं बहिरन्तर्भेदो नास्ति । न हि सर्वस्वरूपस्य सर्वात्मनो व्यापकस्य चावरणं घटते नापि भेदः कुतः प्रवेश इत्यर्थः । तस्मात्तवान्तर्यामितयापि प्रवेशो न मुख्योऽस्ति कुतस्तरां गर्भे प्रवेशः अतः केवलानुभवानन्दरूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव त्वं विदितोऽसीत्याश्चर्यं मम भाग्यमित्यर्थः ॥ १७ ॥ य इति ॥ यः पुमान् आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यतिरेकतः आत्मव्यतिरेकेण पृथक् सन्नयं देहादिरिति व्यवस्यते निश्चिनोति तद्भावार्थः । सः अबुधः अविद्वान् यतः मनीषितं विचारितं सत् देहादि सर्वम् अनुवादं वाचारम्भणं विना न सम्यग्भवति अतोऽवस्तुत्वेन त्यक्तं बाधितमेव वस्तु बुद्ध्या उपाददत् स्वीकृतवान् । अतः सः अबुध एव " दद, दाने " लङ् परस्मैपदमार्षम् डुदाञो रूपं चेत् ह्रस्वत्वमप्यार्षम् । यद्वा । यः आत्मनः स्वस्य गुणेषु भोग्येषु स्रक्चन्दनादिषु सन्निति व्यवस्यते सः स्वस्मिन् तेषां व्यतिरेकतः सदा संयोगाभावाद्धेतोः शोकादिप्रदत्वात् अबुधः नु निश्चितं वादं विना तस्य मनीषितं सम्यक् नास्ति वाद एव तत्रास्ति न तु विचारः इति भावः । यतः स पुमान् त्वद्भक्तैः त्यक्तं घृणयोत्सृष्टमेव भोग्यं वस्तु उपाददत् । यद्वा । यः आत्मनो दृश्याः गुणाः सौन्दर्यप्रभावादयो येषु तेषु देवादिषु मध्ये स्वव्यतिरेकतस्तद्व्यतिरेकेण अयं देवः सन्निति यो व्यवस्यते सः अबुधः । यतस्तस्य जनस्य मनीषितं ह्यसिद्धार्थानुवादं विना नास्ति । अन्धपरम्परोपदेशेन प्रमाणत्वाभावात् । अतः सम्यङ् न भवति यतः स पुमान् सूरिभिः अपुरुषार्थतया त्यक्तमेवोपाददत् । यद्वा । दृश्या रम्या ये गुणास्तेषु मध्ये

य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोबुधः ॥ विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥ १८ ॥ त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदन्त्यनीहादगुणादविक्रियात् ॥ त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदाश्रयत्वादुपचर्यते गुणैः ॥ १९ ॥ सत्त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ॥ सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये ॥ २० ॥

स्वव्यतिरेकतः स्वरूपभूताधिष्ठानं त्वां विनान्यत्र देवादिषु अयं गुणः सन्निति यो निश्चिनोति सः अबुधः समानमन्यत् ॥१८॥ त्वत्त इति ॥ हे विभो अनीहात् ईहा चेष्टा कामना वा तद्रहितात् अगुणात् निर्गुणात् अविक्रियात् निर्विकाराच्चापि त्वत्तः अस्य जगतः जन्मस्थितिसंयमान् वदन्ति ब्रह्मणि निर्विकारादिरूपेऽपि ईश्वरे ईशनाद्यचिन्त्यशक्तिमति त्वयि एतन्न विरुध्यते ब्रह्मत्वादविकारित्वमीश्वरत्वात् कर्तृत्वमिति न विरोधः । चिन्तामण्ययस्कान्तादीनामविकारित्वकार्यकारित्वयोर्दर्शनात् उभयविधश्रुतिसद्भावात् उपपत्त्यन्तरमाह । तदाश्रयत्वात् जगदाकारपरिणतानां तेषां गुणानामाश्रयत्वात् गुणैः कुर्वद्भिर्जगज्जन्मादि कर्तृत्वं त्वय्युपचर्यते । यथा भृत्यकर्तृत्वं तत्स्वामिनीत्यर्थः । आध्यासिकसंबन्धेन परिणममानगुणाधिष्ठानत्वात् ॥१९॥ सत्त्वमिति ॥ स खलु स एव सच्चिदानन्दात्मकः परमेश्वरः त्वमेव त्रिलोकस्थितये त्रयाणां लोकानां पालनाय स्वमायया स्वेच्छयैव सत्वेन गुणेनात्मनः स्वस्य शुक्लं स्वच्छं शान्तवर्णं विष्णुरूपं बिभर्षि धारयसि तथा त्रयाणां लोकानां सर्गाय रजसा उपबृंहितं प्रकटितं रक्तं रागयुक्तं ब्रह्मस्वरूपं बिभर्षि तथा जनानामत्यये च संहाराय तमसा तमःकार्ययुक्तं कृष्णं वर्णं रुद्ररूपं बिभर्षि ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति ॥ हे विभो अखिलेश्वर त्वम् अस्य लोकस्य साधुजनस्य शेषे षष्ठी । रिरक्षिषू रक्षितुमिच्छुः सन् मम गृहेऽवतीर्णोऽसि अतः राजन्या इति संज्ञामात्रं येषां वस्तुतस्त्वसुरा एव तेषां कोटिशो यूथानि तानि ये पान्ति तैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेनाः साधुरक्षार्थं निहनिष्यसे संहरिष्यसि । तङार्षः ॥ २१ ॥ एवं ज्ञाततत्वोऽपि भगवता प्रेममोहित आह–अयमिति ॥ हे सुरेश्वर असभ्यः खलः अयं कंसस्तु नौ आवयोर्देवकीवसुदेवयोर्गृहे तव जन्म भविष्यतीति श्रुत्वा त्वच्छङ्कया ते तवाग्रजान्मम षट्पुत्रानवधीत् हतवान् । सोऽतिक्रूरः कंसः पुरुषैः समर्पितं श्रावितं ते तवावतारं श्रुत्वा उदायुधः गृहीतखङ्गः सन्नधुनैवाभिसरति आगच्छन्नेव वर्तते अतः शीघ्रमेतत् रूपमुपसंहरेति ॥ २२ ॥ अथेति ॥ अथ कंसाद् भीता देवकी एनमात्मजं स्वसकाशात्प्रादुर्भूतं महापुरुषस्य भगवतो विष्णोर्लक्षणानि चतुर्भुजत्वादीन्यसाधारणचिह्नानि यस्य तथाभूतं वीक्ष्य महापुरुषं ज्ञात्वा भयनिवृत्त्या शुचिस्मिता सती उपाधावत् अस्तौत्। अत्रात्मजत्वदर्शनं भयहेतुः महापुरुषत्वदर्शनं स्मिते स्तुतौ च तत्रापि भयस्थितिः पुत्रस्नेहप्राबल्यं व्यनक्ति ॥ २३ ॥ रूपमिति ॥ अव्यक्तमतीन्द्रियम् आद्यं कारणं ब्रह्म व्यापकं नतु परमाणवस्तार्किकाणामिव तथा ज्योतिश्चिद्रूपं नतु प्रधानं सांख्यानामिव

त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेवतीर्णोऽसि ममाखिलेश्वर ॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमूः ॥ २१ ॥ अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाऽग्रजांस्ते न्यवधीत्सुरेश्वर ॥ स तेऽवतारं पुरुषैः समर्पितं श्रुत्वाऽधुनैवाभिसरत्युदायुधः ॥ २२ ॥ श्रीशुक उवाच ॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणम् ॥ देवकी तमुपाधावत्कंसाद्भीता शुचिस्मिता ॥ २३ ॥ देवक्युवाच ॥ ॥ रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् ॥ सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥ २४ ॥ नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु ॥ व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यतेऽशेषसंज्ञः ॥ २५ ॥

निर्गुणं नतु तार्किकाणामिव ज्ञानगुणं निर्विकारं नतु मीमांसकानामिव ज्ञानपरिणामि सत्तामात्रं नतु पुष्कराक्षादीनामिव शक्तिविक्षेपपरिणामि निर्विशेषं जातिगुणादिविशेषरहितं निरीहं सन्निधिमात्रेण कारणं नतु सक्रियं यत्तत् किमपि कार्यकल्प्यस्वरूपं परमार्थवस्तु वेदाः प्राहुः प्रतिपादयन्ति सः साक्षादध्यात्मदीपः देहेन्द्रियान्तःकरणादिसङ्घातप्रकाशको विष्णुः त्वमेव ॥ २४॥ महाप्रलयेऽपि शिष्यमाणस्य तव कुतो भयमित्याह–नष्टे इति ॥ कालवेगेन हेतुना द्विपरार्धस्य ब्रह्मायुषोऽवसाने समाप्तौ सत्यां लोके चतुर्दशभुवनात्मके नष्टे महाभूतेषु लीने सति तथा महाभूतेषु इन्द्रियदेवतासहितेषु आदिभूतं भूतसूक्ष्मं भूतानामादिमहङ्कारं वा गतेषु कारणपरम्परया लीनेषु तस्मिन्नपि व्यक्ते महत्तत्वे लीने महत्तत्वेऽपि अव्यक्तं प्रधानं याते प्रधाने लीने सति प्रधानेऽपि त्वयि लीने सतीति शेषः । अशेषे अशेषात्मके प्रधाने संज्ञा प्रज्ञा यस्य एवं मयि लीनमिदमस्ति पश्चादेवमुद्बोधनीयमिति सोऽशेषसंज्ञ इति । यद्वा । शिष्यते इति शेषः अतः शेषत्वादेव शेषसंज्ञः शेषशब्दाभिधेयः भवानेक एव शिष्यते ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालवेगेनेत्युक्त्या प्राप्तं कालस्वातन्त्र्यं वारयति। योऽयमिति॥ हे अव्यक्तस्य प्रधानस्य बन्धो प्रवर्त्तक योऽयमुत्पत्तिप्रलयादिहेतुः निमेषः आदिः सूक्ष्मावस्था यस्य सः वत्सरान्तः संवत्सरपर्यन्तस्थूलस्तदावृत्त्या च द्विपरार्धलक्षणो महीयान् कालः येन कालेन सर्वमपि विश्वं चेष्टते विपरिवर्त्तते तस्य प्रलयावधिभूतस्य ते तव चेष्टां शक्तिविशेषमाहुः महान्तो वर्णयन्ति। तमीशानं प्रकृतिकालादिनियन्तारमत एव क्षेमधाम अभयस्थानं त्वा त्वां प्रपद्ये शरणं व्रजामि ॥ २६ ॥ मर्त्य इति ॥ मर्त्यः मरणशीलः इदं जन्मादीनामप्युपलक्षणं जन्ममरणादिमान् संसारी जनः मृत्युरेव व्यालः महासर्पः तस्माद् भीतः सर्वान् लोकान् पलायन् पलायमानः आर्षः शता। तत्तल्लोकं मृत्युभयरहितं श्रुत्वा तत्र लोकप्राप्तिसाधनान्यनुष्ठाय तं तं लोकं गच्छन्नपि निर्भयं स्थानं नाध्यगच्छत् न प्राप। हे आद्य यदृच्छया केनापि सुकृतविशेषपरिपाकेन त्वत्कृपया त्वत्पादाब्जं सेव्यतया प्राप्य स्वस्थः निर्भय एव शेते तिष्ठति। तत्र हेतुमाह। अस्मात्प्राप्तत्वच्चरणकमलात् पुरुषात् मृत्युरपैति निवर्त्तत इति। यद्वा। अद्याधुना त्वयि प्रादुर्भूते सति

योयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् ॥ निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥ २६ ॥ मर्त्यो मृत्युव्यालभीतः पलायँल्लोकान्सर्वान्निर्भयं नाध्यगच्छत् ॥ त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥ २७ ॥ स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान् भृत्यवित्रासहाऽसि ॥ रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः ॥ २८ ॥ जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन ॥ समुद्विजे भवद्धेतोः कंसादहमधीरधीः ॥ २९ ॥ उपसंहर विश्वात्मन्नदो रूपमलौकिकम् ॥ शङ्खचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् ॥ ३० ॥ विश्वं यदेतत्स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान् ॥ बिभर्ति सोयं मम गर्भगोभूदहो नृलोकस्य विडम्बनं हि तत् ॥ ३१ ॥

सर्वोऽपि स्वस्थः शेते शयिष्यते॥२७॥स त्वमिति ॥ स उक्तविधः परमेश्वरस्त्वं घोरात् क्रूरस्वभावत्वेन भयंकरात् उग्रसेनात्मजात् कंसात् त्रस्तान्भीतान्नोऽस्मान् त्वत्सेवकान् त्राहि पाहि परस्मैपदमार्षम्। "बहुलं छन्दसि" इति शब्लुक् आत्वम्। यतो भृत्यानां विशिष्टं महान्तं त्रासं हन्तीति तथाभूतोऽसीत्यर्थः। किंच पौरुषम् ऐश्वरं ध्यानधिष्ण्यं मुमुक्षूणां ध्यानयोग्यमिदं रूपं मांसदृशां मांसचक्षुषामज्ञानां प्रत्यक्षं मा कृषीष्ठाः आशीर्लिङार्षः ॥ २८ ॥ जन्मेति ॥ हे मधुसूदन असौ पापः कंसो मयि ते तव जन्म मा विद्यात् न जानातु यतः अधीरा धैर्यरहिता धीर्यस्याः सा अहं भवत एव हेतोः निमित्तात् कंसात् समुद्विजे बिभेमि ॥ २९ ॥ उपसंहरेति ॥ हे विश्वस्यात्मन् अलौकिकं दिव्यं शङ्खचक्रगदापद्मानां श्रिया जुष्टं चतुर्भुजम् अदः इदं रूपम् उपसंहर गोपाय उपसंहृत्य च बालकाकारो भवेत्यर्थः ॥ ३० ॥ विश्वमिति ॥ यत् यतः परः पुरुषो भवान् निशान्ते प्रलयावसाने सृष्टिस्थितिसमये एतदसंख्यातब्रह्माण्डात्मकं विश्वं स्वतनौ स्वशरीरे यद्वा स्वतनुरूपे निशान्ते गृहे " निशान्तपस्त्यसदनभवनागारमन्दिरम् "

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यमरः । यथावकाशमसंकीर्णं यथा भवति तथा बिभर्ति धारयति सोऽयं मम गर्भगोऽभूदिति यत्तद् हि यस्मात् नृलोकस्याहो विडम्बनमनुकरणमुपहासास्पदम् ॥ ३१ ॥ त्वमेवेति ॥ पूर्वसर्गे इतस्तृतीये पूर्वजन्मनि स्वायंभुवे मन्वन्तरे सति विद्यमाने त्वमेव पृश्निर्नाम अभूः तदायं वसुदेवः अकल्मषः सर्वदोषरहितः सुतपा नाम प्रजापतिरभूत् ॥ ३२ ॥ युवामिति ॥ वै निश्चितम् । युवां यदा ब्रह्मणा प्रजासर्गे निमित्ते आदिष्टौ ततः तदा इन्द्रियग्रामं सम्यक् नियम्य वशीकृत्य परमं तपस्तेपाथे कृतवन्तावित्यर्थः । तपस्तपःकर्म कस्यैवेति कर्मकर्त्तरि लिट् ॥ ३३ ॥ वर्षेति द्वयम् ॥ वर्षं वृष्टिः वातः आतपः सूर्यकिरणतापः हिमं शैत्यं घर्मः ग्रीष्मज ऊष्मा एतान् कालगुणान् अनु अनुक्रमेण निरन्तरं वा सहमानौ श्वासरोधेन प्राणायामेन विनिर्धूता निवृत्ता मनोमलाः कामक्रोधादयो ययोस्तौ ॥ ३४ ॥ शीर्णेति ॥ शीर्णानि वृक्षेभ्यः स्वयं पतितानि शुष्कानि पर्णानि अनिलश्चाहारो ययोस्तौ मत्तः सकाशात्कामान् पितृभावोचितसुखानि अभीप्सन्तौ सन्तौ उपशांतेन रागादिभिरकलुषितेन चेतसा मदाराधनमीहतुः । आम्-

श्रीभगवानुवाच ॥ ॥ त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति ॥ तदायं सुतपा नाम प्रजापतिरकल्मषः ॥ ३२ ॥ युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः ॥ सन्नियम्येन्द्रियग्रामं तेपाथे परमं तपः ॥ ३३ ॥ वर्षवातातपहिमघर्मकालगुणाननु ॥ सहमानौ श्वासरोधविनिर्धूतमनोमलौ ॥ ३४ ॥ शीर्णपर्णानिलाहारावुपशान्तेन चेतसा ॥ मत्तः कामानभीप्सन्तौ मदाराधनमीहतुः ॥ ३५ ॥ एवं वां तप्यतोर्भद्रे तपः परमदुष्करम् ॥ दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ॥ ३६ ॥ तदा वां परितुष्टोहमसुना वपुषानघे ॥ तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ॥ प्रादुरासं वरदराड् युवयोः कामदित्सया ॥ ३७ ॥ व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥ ३८ ॥ अजुष्टग्राम्यविषयावनपत्यौ च दम्पती ॥ न वव्राथेपवर्गं मे मोहितौ देवमायया ॥ ३९ ॥

तङोरभाव आर्षः ॥ ३५ ॥ एवमिति ॥ हे भद्रे मय्येवात्मा मनो ययोस्तयोर्वां युवयोरेवमुक्तप्रकारेण परमदुष्करमतितीव्रं तपस्तप्यतोः कुर्वतोः सतोः कर्मकर्त्तरि लट् परस्मैपदमार्षम् । दिव्यानां देवमानपरिमितानां वर्षाणां द्वादशसहस्राणि ईयुर्गतानि ॥ ३६ ॥ तदेति सार्द्धम् ॥ हे अनघे तदा तपसा श्रद्धया भक्त्या च हृदि भावितश्चिन्तितः अतः वाम् युवयोः परितुष्टः वरदराट् वरप्रदेषु श्रेष्ठोऽहमपि एतच्च सकृद्वरेऽपि वारंवारं प्रादुर्भावे कारणं युवयोः कामस्य दित्सया दातुमिच्छया अमुना चतुर्भुजादिमता वपुषा प्रादुरासं प्रकटोऽभवम् ॥ ३७ ॥ व्रियतामित्यर्द्धम् ॥ तदा वरो व्रियतामिति मयोक्ते सति वां युवाभ्यां युवाभ्यामित्यर्थेऽयं कर्त्तरि शेषे षष्ठी वा । मादृशः मत्सदृशः सुतो वृतः याचितः ॥ ३८ ॥ अजुष्टेति ॥ न जुष्टाः न सेविताः ग्राम्याः गृहसंबन्धिनः विषयाः याभ्यां तौ तथा न विद्यते अपत्यं ययोस्तौ दम्पती युवाम् अजुष्टेत्यादिविशेषणान् मोक्षयोग्यावपीत्याशयः । मम मायया लीलासम्पादिकया मदिच्छया देवमाययेत्यपि पाठः मोहितौ सन्तौ मे मत्तः अपवर्गं मोक्षं न वव्राथे न वृतवन्तौ संधिरार्षः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गते इति ॥ तथास्तु इति वरं दत्त्वा मयि गते सति युवां मत्सदृशं सुतं वरं लब्ध्वा तत्प्राप्तिनिश्चयं कृत्वा आप्तप्रायमनोरथौ सन्तौ मादृशपुत्रोत्पत्तीच्छया ग्राम्यान् भोगान् अभुञ्जाथाम् ॥ ४० ॥ अदृष्ट्वेति ॥ शीलं सच्चरित्रम् औदार्यं महत्त्वं गुणाः करुणादयः तैः समं स्वसदृशं लोकेऽन्यतममदृष्ट्वा अहमेव पृश्निगर्भ इति श्रुतः प्रसिद्धः वां युवयोः सुतः अभवम् अयमवतारस्त्रेतायां " विष्णुर्यज्ञः पृश्निगर्भ " इति एकादशे त्रेताप्रसङ्गोक्तेः ॥ ४१ ॥ तयोरिति ॥ तयोरेव वां युवयोः कश्यपादितिरूपाभ्यां स्थितयोर्यः कश्यपाददित्यामास जातः इन्द्रानुजत्वादुपेन्द्र इति वामनत्वात् ह्रस्वाङ्गत्वाच्च वामन इति च विख्यातः प्रसिद्धः सोऽपि पुनरहमेवासम् । यद्वा । तयोरेव युवयोः पुनरहमेव सुतपोवतारात्कश्यपात् पृश्न्यवतारभूतायामदित्यामास जातः सच उपेन्द्र इति वामनत्वाच्च वामन इति विख्यातः ॥ ४२ ॥ तृतीये इति ॥ हे सति कोविदे तयोः कश्यपादित्योरेव युवां युवयोरस्मिंस्तृतीये भवे जन्मनि तेन प्राक्प्रदर्शितेनैव चतुर्भुजादिविशिष्टेन वपुषाऽहं भूयो जातः पुनः प्रादुर्भूतः तेन मे व्याहृतं सत्यमेव जातम् ॥ ४३ ॥

गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतम् ॥ ग्राम्यान् भोगानभुञ्जाथां युवां प्राप्तमनोरथौ ॥ ४० ॥ अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समम् ॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥ ४१ ॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ॥ उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ॥ ४२ ॥ तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषाऽथ वाम् ॥ जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥ ४३ ॥ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ॥ नान्यथा मद्भवं ज्ञानं मर्त्यलिङ्गेन जायते ॥ ४४ ॥ युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् ॥ चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं पराम् ॥ ४५ ॥ (यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय ॥ मन्मायामानयाशु त्वं यशोदागर्भसंभवाम् ॥ १ ॥) श्रीशुक उवाच ॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥ ४६ ॥ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ॥ यदा वहिर्गन्तुमियेष तर्ह्यजा या योगमायाऽजनि नन्दजायया ॥ ४७ ॥

एतदिति ॥ प्राक् प्रथमं मे मम भगवतो जन्मनः स्मरणाय ज्ञानाय एतच्चतुर्भुजादिविशिष्टं रूपं वां युवयोर्दर्शितम् । अन्यथा मर्त्यस्य लिङ्गेन शरीरेण मयि भवतीति मद्भवं मद्विषयकं ज्ञानं न जायते अनन्तरं त्वदिच्छया बालरूपमपि ग्रहीष्यामीति भावः ॥ ४४ ॥ युवामिति ॥ इदानीं तु पुत्रभावेन ब्रह्मभावेन चासकृत् पुनः पुनर्मां चिन्तयन्तौ मयि कृतस्नेहौ च युवां परां सर्वत उत्कृष्टां मम लोकप्राप्तिरूपां गतिं मोक्षं यास्येथे तङर्थः ॥ ४५ ॥ इतीति ॥ इत्युक्त्वा हरिस्तूष्णीमासीत् । अत्र " यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय । मन्मायामानयाशु त्वं यशोदागर्भसंभवाम् ॥ " इत्ययं श्लोकः शेषो ज्ञेयः । भगवत्प्रचोदित इति लिङ्गात् । ततश्च पित्रोर्देवकीवसुदेवयोः संपश्यतोरेव सतोर्भगवानात्ममायया स्वेच्छया सद्य एव प्राकृतः शिशुरिव बभूव ॥ ४६ ॥ ततश्चेति ॥ ततश्च भगवता प्रचोदितः स शौरिः वसुदेवः स्वपादनिगडं स्रस्तं वीक्ष्य सुतं सम्यक् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदाय आस्तृतकोमलवस्त्रे पात्रे संस्थाप्य गृहीत्वा यदा सूतिकागृहाद्बहिर्गन्तुमियेष ऐच्छत् तर्ह्येव या अजाशब्दवाच्यत्वेन प्रसिद्धा योगमाया सा नन्दजायया यशोदया निमित्तभूतया अजनि जाता। अत्र हरिवंशे तु, "देवकी च यशोदा च सुषुवाते समं तदा।" इत्युक्तं तत उभयोरेकवाक्यतायै इदमवसीयते। यदैव देवकी कृष्णं सुषुवे तदैव यशोदापि कृष्णं सुषुवे। तदनन्तरसमये योगमायां च सुषुवे इति कालभेदेन तस्याः द्विःप्रसव एवेति। अत एव "अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा।" इति वक्ष्यते। किंच यशोदाप्रसूतस्य कृष्णस्य चतुर्भुजत्वाद्यनुक्तेः। नराकृतिपरब्रह्मत्वाच्च द्विभुजत्वमेव बुद्ध्यत इति टीकान्तरम् ॥ ४७॥ तयेति द्वयम् ॥ अथान्तरमेव तया योगमायया हृताः प्रत्ययार्थाः ज्ञानहेतुभूताः सर्वा वृत्तयश्चक्षुरादिवृत्तयो येषां जाग्रतामपि तथाभूतेषु द्वाःस्थेषु द्वारपालेषु सत्सु तथा पौरेषु पुरवासिजनेष्वपि शायितेषु सत्सु या बृहद्भिः कपाटैः आयसैर्लोहमयैः कीलश्रृङ्खलैश्च पिहिता आच्छादिता अत एव दुरत्यया बृहद्भिः कपाटादिभिर्दुरत्यया इति वा। ताः द्वारस्तु सर्वाः कृष्णवाहे वसुदेवे आगते रवेः सूर्यस्यागमने तमोन्धकारो यथा विशीर्य्यते तथा स्वयं व्यवर्यन्त व्यव्रियन्ते विवृता जाताः। गुण आर्षः कर्मकर्त्तरि लङ्। अनेनैव वसुदेवपादनिगडोऽपि

तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ ॥ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलश्रृङ्खलैः ॥ ४८ ॥ ताः कृष्णवाहे वसुदेव आगते स्वयं व्यवर्तन्त यथा तमो रवेः ॥ ववर्ष पर्जन्य उपांशुगर्जितः शेषोन्वगाद्वारि निवारयन्फणैः ॥ ४९ ॥ मघोनि वर्षत्यसकृद्यमानुजा गम्भीरतोयौघजवोर्मिफेनिला ॥ भयानकावर्तशताकुला नदी मार्गं ददौ सिन्धुरिव श्रियः पतेः ॥ ५० ॥ नन्दव्रजं शौरिरुपेत्य तत्र तान्गोपान्प्रसुप्तानुपलभ्य निद्रया ॥ सुतं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ॥ ५१ ॥

स्वयमेव पतित इति ज्ञेयम्। उपांशु मन्दं मन्दं गर्जितं यस्य तथाभूतः पर्जन्यो मेघो ववर्ष। तदा च छत्रीकृतैः फणैर्वारि निवारयन् शेषः अनन्तः अन्वगात् वसुदेवस्य पृष्ठतो जगाम ॥ ४८ ॥ ४९ ॥ मघोनीति ॥ मघोनि इन्द्रे असकृत्पुनः पुनः वर्षति सति अत्र वर्षणं लोकानां वसुदेवदर्शनं मा भूदिति असकृत्त्वं च तत् क्लेशशङ्कया मध्ये मध्ये विच्छेदात् गम्भीरोऽगाधो यस्तोयौघो जलपूरस्तस्य वेगेन ये ऊर्मयस्तरङ्गास्तैः फेनिला फेनव्याप्ता आवर्ता भ्रमाः तेषां शतैराकुला व्याप्ता अत एव भयानका अपि यमानुजा यमुना नदी श्रियः पतेः सीतापतेः श्रीरामस्य समुद्र इव वसुदेवाय मार्गं ददौ। तदा जानुमात्रजला जाता इत्यर्थः ॥ ५० ॥ नन्दव्रजमिति ॥ शौरिर्वसुदेवः नन्दव्रजमुपेत्य संप्राप्य तत्र निद्रया योगमायया तान् नन्दादीन् गोपान् प्रसुप्तानुपलभ्य दृष्ट्वा तं सुतं यशोदायाः शयने शय्यायां निधाय संस्थाप्य तस्याः सुतामुपादाय गृहीत्वा स्वगृहात् पुनरगात्। द्वारविवृतिरत्रापि बोध्या। कंसात्स्वपुत्ररक्षणे मित्रपुत्र्या वधं जानता धार्मिकेणापि वसुदेवेन भगवन्मायामोहितेनैवेदं कृतमिति न वसुदेवस्य दोष इति ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवक्या इति ॥ वसुदेवः ततस्तां दारिकां कन्यां देवक्याः शयने शय्यायां न्यस्य विधाय अथानन्तरं पदोः पादयोः लोहं निगडं प्रतिमुच्य बद्ध्वा आवृतः पिहितकपाटः सन् पूर्ववदास्ते स्म ॥ ५२ ॥ यशोदेति ॥ नन्दस्य पत्नी यशोदा तु पूर्वं प्रसवपीडया परिश्रान्ता प्रसवानन्तरं तु निद्रया योगमायया अपगता स्मृतिः विवेको यस्याः सा तथा सती परं केवलं मयि किंचिज्जातमित्येवाबुध्यत तस्य लिङ्गं कन्या पुत्रो वेति तु नाबुध्यत । परिजना अपि मायामोहिता वसुदेवागमनं नाविदुरिति ज्ञेयम् । किं च व्याख्यान्तरम् । चकारः समुच्चये यथा वसुदेवपत्नी तथा नन्दपत्नी च जातं स्वगर्भादुत्पन्नं यत्परं सर्वोत्कृष्टम् अबुध्यत नतु परमेश्वरोऽयमिति तल्लिङ्गमबुध्यत । यशोदा इति नन्दपत्नी-विशेषणम् । तद्यशो ददाति देवक्यै सखीभावात् । " द्वे नाम्नी नन्दभार्याया यशोदा देवकीति च । अतः सख्यमभूत्तस्य देवक्या शौरिजायया ॥ " इत्यादिपुराणवचनादिति शेषं समानम् ॥ ५३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्य तृतीयके ॥ ३ ॥ तुर्ये चण्डीगिरो भीतः कंसो बालादिहिंसनम् ॥ दुर्मन्त्र्युक्तं

देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकाम् ॥ प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ॥ ५२ ॥ यशोदा नन्दपत्नी च जातं परमबुद्ध्यत ॥ न तल्लिङ्गं परिश्रान्ता निद्रयाऽपगतस्मृतिः ॥ ५३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे कृष्णजन्मनि तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ बहिरन्तः पुरद्वारः सर्वाः पूर्ववदावृताः ॥ ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥ १ ॥ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् ॥ आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥ २ ॥ स तल्पात्तूर्णमुत्थाय कालोऽयमिति विह्वलः ॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्धजः ॥ ३ ॥ तमाह भ्रातरं देवी कृपणा करुणं सती ॥ स्नुषेयं तव कल्याण स्त्रियं मा हन्तुमर्हसि ॥ ४ ॥

हितं मेने श्लोकास्तत्राद्रिर्वार्द्धयः ॥ चत्वार्युवाचेति सार्द्धाः सप्तवेदाः अनुष्टुभः ॥४॥ बहिरिति द्वयम् ॥ बहिर्द्वारः पुरद्वारः अन्तः पुरद्वारश्च सर्वाः पूर्ववदेवावृताः मायाप्रभावेण स्वयमेव पिहिता जाताः ततः बालध्वनिं कन्यारोदनं श्रुत्वा समुत्थिताः वसुदेवाधिष्ठितगृहपालाः तूर्णं शीघ्रमुपव्रज्य कंससमीपं गत्वा यत् गर्भजन्म उद्विग्नो भीतः सन् प्रतीक्षते तत् देवक्या अष्टमगर्भजन्म भोजराजाय कंसाय आचख्युः ॥ १ ॥ २ ॥ स तल्पादिति ॥ स कंसः तल्पात् शयनात् तूर्णमुत्थाय बालं हन्तुमयमेव काल इति । यद्वा । अयं बालः मम कालो मृत्युरस्तीति एवं विह्वलः व्याकुलः प्रस्खलन् विक्षिप्तगतिः सन् मुक्ताः विक्षिप्ता मूर्द्धजाः केशा यस्य सः तादृशः सन् तूर्णमेव सूतीगृहमगात् ॥ ३ ॥ तमाहेति ॥ कृपणा दीना सती सद्बुद्धिः देवी देवकी तं भ्रातरं करुणं दैन्यसहितं यथा स्यात्तथा आह स्म हे कल्याण अष्टमगर्भे कन्योत्पत्त्या कल्याण इयं तव स्नुषा पुत्रवधूर्भविष्यति स्नुषावत् पाल्या वा अतः स्त्रियम् असमर्थामवध्यां चेत्यर्थः । एतां हन्तुं मा अर्हसि ॥ ४ ॥ ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहव इति ॥ हे भ्रातः दैवनिसृष्टेन अस्मत्प्रारब्धप्रेरितेन अत्र तवापि दोषो नास्तीत्यनुनयार्थम् । त्वया पावकोपमाः वह्निवदुज्ज्वलवर्णा बहवः शिशवः हिंसिताः अतः इयमेका पुत्रिका प्रदीयताम् ॥ ५ ॥ नन्वहमिति ॥ अङ्ग हे भ्रातः हे प्रभो ननु हेतौ यतः अहं ते अवरजा कनिष्ठा भगिनी हतसुता अत एव दीना तस्मात् मन्दायै मन्दभाग्यायै मह्यम् इमां चरमामन्तिमां प्रजां दातुमर्हसि वार्द्धकस्य जातत्वात् । इतोऽग्रे सन्तानोत्पत्त्याशाया अभावात् ॥६ ॥ उपगुह्येति ॥ एवं देवक्या याचितोऽपि खलः क्रूरः कंसस्तां विनिर्भर्त्स्य वचसा तिरस्कृत्य आत्मजां कन्यामुपगुह्य उरसि बाहुभ्यां संवेष्ट्य दीनादपि दीनवद्रुदन्त्याः नुमार्षः । वत्प्रयोगान्न तथा रोदनं पुत्रस्यान्यत्र प्रेषितत्वात् । तस्याश्च योगमायात्वेन ज्ञातत्वात् मायात्वेन ज्ञातत्वेऽपि स्नेहस्वभावाद्वा रोदनम् । दीनसदृशवदिति वा । " प्रकारे गुणवचनस्य " इति द्वित्वम् । तस्या हस्तात्तामाचिच्छिदे बलादाकृष्य जग्राह ॥ ७ ॥ तां गृहीत्वेति ॥ स्वार्थं स्वप्रयोजनमुद्दिश्योन्मूलितं त्यक्तं सौहृदं स्नेहो येन सः कंसः जातमात्रां गर्भजलादिक्लिन्नां " गर्भाम्बुक्लिन्न-

बहवो हिंसिता भ्रातः शिशवः पावकोपमाः ॥ त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयताम् ॥ ५ ॥ नन्वहं ते ह्यवरजा दीना हतसुता प्रभो ॥ दातुमर्हसि मन्दाया अङ्गेमां चरमां प्रजाम् ॥ ६ ॥ श्रीशुक उवाच ॥ उपगुह्यात्मजामेवं रुदन्त्या दीनदीनवत् ॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥ ७ ॥ तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुताम् ॥ अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ॥ ८ ॥ सा तद्धस्तात्समुत्पत्य सद्यो देव्यम्बरं गता ॥ अदृश्यतानुजाविष्णोः सायुधाष्टमहाभुजा ॥ ९ ॥ दिव्यस्रगम्बरालेपरत्नाभरणभूषिता ॥ धनुःशूलेषुचर्मासिशङ्खचक्रगदाधरा ॥ १० ॥ सिद्धचारणगन्धर्वैरप्सरःकिन्नरोरगैः ॥ उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥ ११ ॥

मूर्धजाम् " इति हरिवंशोक्तेः । स्वसुः सुतां तां कन्यां चरणयोर्विपरीततया गृहीत्वा अङ्गणे स्नानाद्यर्थं स्थापितायाः शिलायाः पृष्ठे उपरि अपोथयत् बलात्प्रक्षिप्तवान् ॥८॥ सा तद्धस्तादिति ॥ विष्णोरनुजा सा कन्या नीचैः क्षिप्यमाणापि तस्य हस्तान्न शिलापृष्ठे पतिता किंतूत्पत्य ऊर्ध्वं गत्वा कंसशिरसि पादं दत्त्वा " कंसासुरस्योत्तमाङ्गे पादं दत्त्वा गता दिवम् । " इति भविष्योत्तरम् । सद्य एव देवीभूत्वा अम्बरम् आकाशं गत्वा तत्र स्थिता सती कंसभयार्थं स्ववचोविश्वासार्थं च सायुधा आयुधैः सहिताः अष्टौ महान्तो भुजा यस्याः तथाविधा कंसादिभिः सर्वैरदृश्यत ॥ ९ ॥ दिव्येति ॥ दिव्याः स्रजो मालाः अम्बराणि वस्त्राणि आलेपश्चन्दनादिः रत्नयुक्तान्याभरणानि च तैर्भूषिता धनुः शूलम् इषुर्बाणः चर्म फलकम् असिः शङ्खः चक्रं गदा एषां धरा धारिका ॥ १० ॥ सिद्धेति ॥ उपाहृताः समर्पिता उरवो बलयः पूजासाधनानि यैस्तैः सिद्धचारणादिभिः स्तूयमाना सा इदं वक्ष्यमाणं वचनं कंसं प्रत्यब्रवीत् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

किं मयेति ॥ मन्द हे मन्दबुद्धे हतयापि मया यद्यहं हताप्यभविष्यं तदापि तव किं प्रयोजनं सिद्ध्यति न किमपि । खलु हेतौ यतः तवान्तकृत् नाशकर्त्ता पूर्वशत्रुः पूर्वजन्मनि यस्त्वां हतवान् स यत्र क्व वा वक्तुमनर्हे प्रदेशे जात एव अतः कृपणान् दीनानन्यान्वृथा प्रयोजनं विना मा हिंसीः मा जहीति अन्यशिशून् हनिष्यति इति । वारयति कृपणामित्येकवचनपाठे मा मां वृथा अहिंसीः हिंसितवानसीति ॥१२॥ इतीति ॥ इत्येवं तं कंसं प्रभाष्य सा भगवती माया भुवि बहुनामनिकेतेषु नानासंज्ञकस्थानेषु वाराणसी विन्ध्यादिषु बहूनि दुर्गासङ्कटादीनि नामानि यस्यास्तथाभूता देवी स्तुत्या बभूव ह स्फुटार्थे ॥ १३ ॥ तयेति ॥ तया माययाभिहितं कथितमाकर्ण्य कंसः परमविस्मितः कथं देवकीगर्भे दुर्गा देवी जाता कथं वा देववाण्यन्यथा जातेत्याश्चर्ययुक्तः अभूत् । शत्रोरन्यत्र जातत्वाद्देवकीवसुदेवयोर्निबन्धस्य व्यर्थत्वं मत्वा तौ विमुच्य प्रश्रितो विनीतः सन्नब्रवीत् ॥ १४ ॥ अहो इति ॥ अहो हे भगिनि अहो हे भाम भगिनीभर्त्तः पुरुषान् अत्तीति पुरुषादो राक्षसः स यथा स्वापत्यमेव हिनस्ति तद्वत् पाप्मना

किं मया हतया मन्द जातः खलु तवान्तकृत् ॥ यत्र क्व वा पूर्वशत्रुर्मा हिंसीः कृपणां वृथा ॥ १२ ॥ इति प्रभाष्य तं देवी माया भगवती भुवि ॥ बहुनामनिकेतेषु बहुनामा बभूव ह ॥ १३ ॥ तयाऽभिहितमाकर्ण्य कंसः परमविस्मितः ॥ देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् ॥ १४ ॥ अहो भगिन्यहो भाम मया वां बत पाप्मना ॥ पुरुषाद इवापत्यं बहवो हिंसिताः सुताः ॥ १५ ॥ स त्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः ॥ काँल्लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन् ॥ १६ ॥ दैवमप्यनृतं वक्ति न मर्त्या एव केवलम् ॥ यद्विश्रम्भादहं पापः स्वसुर्निहतवाञ्छिशून् ॥ १७ ॥ मा शोचतं महाभागौ स्वात्मजान्स्वकृतं भुजः ॥ जन्तवो न सदैकत्र दैवाधीनाः सहाऽऽसते ॥ १८ ॥

पापरूपेण मया वां युवयोः बहवः सुताः हिंसिताः राक्षसा हि पुरा स्वापत्यादा आसन् । तत्रैकां राक्षसीं स्वापत्यादां दृष्ट्वा देव्या कृपयोक्तं "बालाः स्युर्जन्मतो वृद्धा इतः प्रभृति रक्षसाम् ।" इति । ततः प्रभृति स्वापत्यान् खादितुं न शक्नुवन्ति ॥ १५ ॥ स त्वहमिति ॥ त्यक्तं कारुण्यं दया येन त्यक्ता उपेक्षिता ज्ञातयः सुहृदश्च येन श्वसन् जीवन्नपि मृतः सोऽहं खलः ब्रह्महा इव कान् अतिदुःखकरान् लोकान् गमिष्यामीति न वेद्मि ॥१६॥ दैवमिति ॥ केवलं मर्त्या मनुष्या एव अनृतं न वदन्ति किन्तु दैवं देवसमूहोऽपि अनृतं वक्ति अत एवाकाशवाक् मिथ्या भूता । यस्य अष्टमो गर्भस्त्वा हन्तेति वचनस्य विश्रम्भात् विश्वासात् पापोऽहं स्वसुः शिशून् निहतवान् ॥१७॥ मा शोचतमिति ॥ हे महाभागौ स्वकृतं स्वप्रारब्धफलं भुजः भोक्तॄन् स्वात्मजान् मा शोचतम्।भुज इति क्विबन्तम् । स्वकृतमिति कृद्योगे पृष्ठ्यभाव आर्षः।तदर्हमिति ज्ञापकाद्वा । क्वचित् "धायैरामोदमुत्तमम्"इति भट्टिः । यतो हेतोः दैवाधीनाः जन्तवः सदा न आसते तत्रापि एकत्र नासते तत्रापि सह संभूय नासते । समासत इत्यपि पाठः॥ १८॥ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुवीति ॥ यथा भुवि आधारभूतायां भौमानि घटादीनि आयान्ति अपयान्ति च भवन्ति न भवन्ति च तथात्मन्याधारभूते भूतानि देहा एवायान्ति अपयान्ति च । यथा चैतेषु भौमेषु विक्रियमाणेष्वपि भूर्न विक्रियते । तथैव देहेषु जन्ममरणादिभिर्विक्रियमाणेष्वप्ययमपरोक्षतया प्रत्यभिज्ञायमान आत्मा जीवो न विपर्येति एकरूप एव वर्त्तते । जन्मादिविकारं न प्राप्नोतीत्यर्थः । देहानामेव जन्मादिकं नत्वात्मन इत्यर्थः । एवं विचार्यमाणे न शोकावकाशः ॥ १९ ॥ अज्ञानिनस्तु न निवर्त्तत इत्याह—यथेति ॥ यथा यथावत् अनेवंविदः एवमजानतः आत्मविपर्ययः देहादावात्मबुद्धिर्भवति यतो विपर्ययाद्भेदो भवति देहाहङ्कारेण ह्यात्मनि परिच्छिन्ने सति इदङ्कारास्पदं भिन्नं भवति यतो भेदात् पुत्रादिदेहैर्योगो वियोगश्च भवति ततः संसृतिः सुखदुःखे इति यावदज्ञानं न निवर्त्तते ॥ २० ॥ तस्मादिति ॥ हे भद्रे यतः सर्वोऽपि प्राणी अवशः सन् स्वकृतं स्वकृतकर्मफलं जन्ममरणादि विन्दते तस्मात् यद्यप्येवं परमार्थतो नैते तव पुत्राः नाप्यहं तान् घातितवान् तथापि हे भद्रे अज्ञानदृष्ट्या मया व्यापादितानपि स्वतनयान्मानुशोच॥ २१ ॥ कथं तर्हि ब्राह्मणादिहन्तुः प्रायश्चित्तमिति चेत् तदप्यज्ञानमूलकमेवेत्याह—यावदिति ॥ अस्वदृक् न स्वरूपभूतमात्मानं पश्यति स तदभिमानी देहात्माभिमानी अज्ञः यावद्धतो-

भुवि भौमानि भूतानि यथा यान्त्यपयान्ति च ॥ नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥ १९ ॥ यथाऽनेवंविदो भेदो यत आत्मविपर्ययः ॥ देहयोगवियोगौ च संसृतिर्न निवर्तते ॥ २० ॥ तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि ॥ माऽनुशोच यतः सर्वः स्वकृतं विन्दतेऽवशः ॥ २१ ॥ यावद्धतोस्मि हन्तास्मीत्यात्मानं मन्यते स्वदृक् ॥ तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् ॥ २३ ॥ मोचयामास निगडाद्विस्रब्धः कन्यकागिरा ॥ देवकीं वसुदेवं च दर्शयन्नात्मसौहृदम् ॥ २४ ॥

ऽस्मि हन्तास्मीत्यात्मानं मन्यते देहगतमेव हननस्य कर्मत्वं कर्तृत्वं चात्मगतं मन्यते तावत् बाध्यबाधकतामियात् तज्जनितं पापं तत्फलं दुःखं च प्राप्नुयात् ॥ २२ ॥ क्षमध्वमिति ॥ मम दौरात्म्यं पुत्रहननरूपं दुष्टत्वं यूयं क्षमध्वं यतो भवादृशाः साधवो दीनवत्सलाः नरकदुःखभागितया दीनेषु मादृशेषु वत्सलाः प्रीतियुक्ता भवंति । इत्येवमुक्त्वा अथानन्तरमेवं वदन्नेव अश्रूणि मुखे यस्य तथाभूतः श्यालो वसुदेस्य पत्नीभ्राता कंसः स्वस्रोर्वसुदेवदेवक्योः प्रत्येकं पादावग्रहीत् पादग्रहणपूर्वकं प्रणामं कृतवान् । स्वस्रोरिति द्विवचनान्यथानुपपत्त्या एकः स्वसृशब्दः स्वसृपत्युर्लक्षकः अन्यः स्वसुर्वाचकः तयोरेकशेषः इति सुगमः पन्थाः । एवमध्यात्मज्ञानादिकमपि कंसस्येव भगवद्विमुखानां क्रूरतापोषायैव भवतीति प्रकरणतात्पर्यम् ॥ २३ ॥ मोचयामासेति ॥ कन्यकाया योगमायाया गिरा विश्रब्धः एतौ निर्दोषाविति जातविश्वासः कंसः आत्मनः सौहृदं प्रेम पादग्रहणादिना दर्शयन् देवकीं वसुदेवं च निगडात् लोहशृङ्खलात् मोचयामास ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रातुरिति ॥ देवकी सम्यगनुतप्तस्य भ्रातुर्दौरात्म्यं क्षान्त्वा क्षमां कृत्वा रोषं च व्यसृजत् तत्याज । वसुदेवश्च क्षमां कृत्वा ह स्फुटं भगवन्मायामाहात्म्यस्मरणेन प्रहस्य तं कंसमुवाच । क्षान्तरोषेति पाठे क्षान्तः रोषो यया सा देवकी व्यसृजत् शोकमिति शेषः । यद्वा वाचमिति शेषः । "कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः" इति वक्ष्यमाणत्वात् । अयं च पाठष्टीकाकृतामसम्मत इति तोषणी ॥ २५ ॥ एवमिति ॥ हे महाभाग नञ्प्रश्लेषाद् दुर्भाग्येति वास्तवोर्थः । यथा त्वं वदसि तदेतत् एवमेव देहिनां देहादावात्मधीः अज्ञानप्रभवा एव यतः अहंधियः स्वः पर इति भिदा भेददृष्टिर्भवति स्वपरेति सुप्सुपेति समासः ॥ २६ ॥ शोकेति ॥ पृथग्दृशः भेददर्शिनो जनाः शोकहर्षादिभिरान्विताः सन्तः भावैर्देवदैत्यादिभिर्निमित्तभूतैर्भावं देवदैत्यादिरूपं मिथः परस्परं घ्नन्तमपि कालरूपं परमेश्वरं न पश्यन्ति किं त्वहमेव ह हन्ता हतो वेत्यादि मन्यन्ते इत्यर्थः ॥ २७ ॥ कंस इति ॥ एवं प्रसन्नाभ्यां देवकीवसुदेवाभ्यां विशुद्धं निष्कपटं यथा स्यात्तथा । विश्रब्धमित्यपि पाठः । प्रतिभाषितोऽनुज्ञातश्च कंसो गृहमविशत्

भ्रातुः समनुतप्तस्य क्षान्तरोषा च देवकी ॥ व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह ॥ २५ ॥ एवमेतन्महाभाग यथा वदसि देहिनाम् ॥ अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः ॥ २६ ॥ शोकहर्षभयद्वेषलोभमोहमदान्विताः ॥ मिथो घ्नन्तं न पश्यन्ति भावैर्भावं पृथग्दृशः ॥ २७ ॥ श्रीशुक उवाच ॥ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः ॥ देवकीवसुदेवाभ्यामनुज्ञातोविशद् गृहम् ॥ २८ ॥ तस्यां रात्र्यां व्यतीतायां कंस आहूय मन्त्रिणः ॥ तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया ॥ २९ ॥ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः ॥ देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ॥ ३० ॥ एवं चेत्तर्हि भोजेन्द्र पुरग्रामव्रजादिषु ॥ अनिर्दशान्निर्दशांश्च हनिष्यामोद्य वै शिशून् ॥ ३१ ॥ किमुद्यमैः करिष्यन्ति देवाः समरभीरवः ॥ नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥ ३२ ॥

॥ २८ ॥ तस्यामिति ॥ तस्यां रात्र्यां व्यतीतायां सत्यां कंसः मन्त्रिण आहूय यद्योगनिद्रयाऽन्यत्र शत्रुजन्मादिकमुक्तं तत्सर्वं तेभ्य आचष्ट कथितवान् ॥ २९ ॥ आकर्ण्येति ॥ देवानां शत्रवः अत एव देवान् प्रतिकृतोऽमर्षो यैस्ते नातिकोविदाः विचारे नैपुण्यरहिता दृष्टमात्रमतयः दैतेयाः भर्तुः कंसस्य गदितं वचनमाकर्ण्य तं कंसं प्रत्यूचुः ॥ ३० ॥ एवं चेदिति ॥ हे भोजेन्द्र राजेन्द्रेत्यपि पाठः । एवं योगनिद्रयोक्तं चेत्तर्हि पुरग्रामादिषु वर्त्तमानान् अनिर्दशान् अनिर्गतदशदिनान् निर्दशान् निर्गतदशदिनांश्च शिशून् अद्य वै अविलम्बेनैव हनिष्यामः । एवं च बालेषु सर्वेषु हतेषु सत्सु सोऽपि हत एव स्यादिति भावः ॥ ३१ ॥ किमुद्यमैरिति ॥ समरे भीरवः अत एव तव धनुषो ज्याघोषैर्नित्यमुद्विग्नं भीतं मनो येषां ते देवाः उद्यमैः किं करिष्यन्ति ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यत इति ॥ अस्यतो विध्यतस्ते तव शरव्रातैः शरसमूहैः समंततः हन्यमानाः अतो जिजीविषवो जीवितुमिच्छवः अत एव पलायनं परं जीवनोपायो येषां तथाभूताः सन्तो रणभूमिमुत्सृज्य परित्यज्य ययुरिति अनेन कदाचित्कंसस्य देवगणजयो विष्णुपुराणोक्तः सूचितः॥ ३३॥ केचिदिति ॥ दीना भयेन प्रकम्पितगात्राः अत एव न्यस्तानि त्यक्तानि शस्त्राणि यैस्तथाभूताः केचिद्दिवौकसो देवाः प्राञ्जलयः मूर्द्धनि बद्धाञ्जलिपुटा जाताः। केचिच्च मुक्ताः कच्छाः वस्त्रग्रन्थयः शिखाश्च यैस्तथाभूताः सन्तोभीताः स्म इति वादिनो जाताः ॥ ३४॥ न त्वमिति ॥ विस्मृतानि शस्त्राणि अमन्त्राणि अस्त्राणि समन्त्राणि च यैस्तान् विरथान् रथहीनान् भयेन संनतान् शरणागतान् संवृतानित्यपि पाठः अन्यासक्तान् अन्येन युद्धकर्त्रा सहागतान् अन्येन सह युध्यमानान्वा अन्यत्र विषये व्यग्रान्वा विमुखान् युद्धात्पराङ्मुखान् भग्नचापान् अयुध्यतः युद्धमवाञ्छतः न युधमिच्छन्तीति क्यच् । त्वं न हंसि ॥ ३५ ॥ किं क्षेमेति सार्द्धम् ॥ क्षेमे स्त्रीसंनिधानादिनिर्भयप्रदेशे शूरैः असंयुगे संयुगादन्यत्रैव विकत्थनं प्रौढिवादो येषां तैः विबुधैर्देवैः किं किमनिष्टं कर्त्तुं शक्यं न किमपीत्यर्थः । एवमग्रेऽपि रहो गुप्तमन्तःकरणं जुषत इति क्षीरोदादि दूरं विजनं वा सेवमानेन हरिणा किं यदि बलमस्ति तदा किमिति प्रकटी-

अस्यतस्ते शरव्रातैर्हन्यमानाः समन्ततः ॥ जिजीविषव उत्सृज्य पलायनपरा ययुः ॥ ३३ ॥ केचित्प्राञ्जलयो दीना न्यस्तशस्त्रा दिवौकसः ॥ मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ॥ ३४ ॥ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान् ॥ हंस्यन्यासक्तविमुखान्भग्नचापानयुद्ध्यतः ॥ ३५ ॥ किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः ॥ रहोजुषा किं हरिणा शंभुना वा वनौकसा ॥ किमिन्द्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता ॥ ३६ ॥ तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ॥ ततस्तन्मूलखनने नियुङ्क्ष्वास्माननुव्रतान् ॥ ३७ ॥ यथाऽऽमयोऽङ्गे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम् ॥ यथेन्द्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ॥ ३८ ॥

भूय न युद्ध्येतेति भावः । गुप्तं सर्वजनहृदयं प्रविष्टेनेति वास्तवोर्थः । पुरुषप्रवेशहीनमिलावृतवनमोको यस्य तेन शम्भुना वा किं निर्वैरतया वने स्थितेनेति तत्त्वार्थः । अल्पवीर्येण इन्द्रेण वा तपस्यता तपोनिष्ठेन ब्रह्मणा वा किम् । सर्वक्षेमार्थं तपस्यतेति तत्त्वार्थः ॥ ३६ ॥ तथापीति ॥ तथापि अकिञ्चित्करत्वेपि सापत्न्यात् शत्रुत्वाद्धेतोः देवाः न उपेक्ष्याः किन्तु शत्रुतया योद्धव्या इत्यर्थः । इति वयं मन्महे । ततः अनुव्रतान् स्वसेवकानस्मान् तेषां देवानां मूलखनने मूलभूतस्य बालकरूपगुप्तस्य विष्णोः हनने नियुङ्क्ष्व आज्ञापय ॥ ३७ ॥ यथेति ॥ यथाङ्गे शरीरे उत्पन्नः आमयो ज्वरादिरोगो नृभिर्यथेष्टस्नानभोजनादि कुर्वद्भिः प्रथमं समुपेक्षितः अचिकित्सितः अत एव यदा रूढपदः बद्धमूलस्तदा चिकित्सितुमौषधादिप्रयोगेण निवर्तयितुं न शक्यते । यथा चेन्द्रियग्रामः इन्द्रियसमूहः प्रथमत उपेक्षितः असंनियमितो यदा विषयासक्तो भवति तदा संयमितुं न शक्यते तथा उपेक्षितो रिपुरपि यदा बद्धबलो महान् भवति तदा न चाल्यते स्थानाचालयितुमपि न शक्यते तद्धननं तु दूरत इत्यर्थः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूलमिति ॥ हि निश्चये स विष्णुरेव देवानां मूलं सच यत्र सनातनो धर्मस्तत्र तिष्ठति तस्य धर्मस्य च ब्रह्म वेदः गावः विप्राः तपः सदक्षिणा यज्ञाश्च मूलम् ॥ ३९ ॥ तस्मादिति॥ तस्माद् विष्णोराविर्भावहेतुत्वात् हे राजन् ब्रह्मवादिनः वेदोपदेशकर्तॄन् ब्राह्मणान् तपस्विनश्च धर्मशीलान् यज्ञाद्यनुष्ठातॄन् यज्ञशीलानित्यपि पाठः । हविर्दुघा होमसाधनघृतादिप्रदाः गाश्च सर्वात्मना सर्वप्रयत्नेन वयं हन्मः ॥ ४० ॥ विप्रा इति॥ विप्रा गावश्च वेदाश्चेत्यादयः हरेस्तनूः शरीरम् एकत्वं समुदायाभिप्रायमिति ऋजुः पन्थाः यद्वा एताः हरेस्तनूहॅन्यः ॥ ४१ ॥ सहीति सार्द्धम् ॥ हि यस्मात् स एव असुरद्विट् गुहाशयः अन्तःकरणस्थः अलक्षितः सर्वेषां सुराणामध्यक्षः स्वामी सेश्वराः सशिवाः सचतुर्मुखाश्च सर्वा देवताः स विष्णुरेव मूलं यासां तथाभूताः सन्ति अतो देवतामूलं विष्णुस्तन्मूलं च ब्राह्मणादयस्तेष्वपि ब्राह्मणो मुख्यः अतः यत् ऋषीणां विहिंसनम् अयमेव मुख्यः तस्य विष्णोर्वधस्य

मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः ॥ तस्य च ब्रह्मगोविप्रास्तपोयज्ञाः सदक्षिणाः ॥ ३९ ॥ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः ॥ तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ॥ ४० ॥ विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ॥ श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥ ४१ ॥ स हि सर्वसुराध्यक्षो ह्यसुरद्विड् गुहाशयः ॥ तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ॥ अयं वै तद्वधोपायो यदृषीणां विहिंसनम् ॥ ४२ ॥ श्रीशुक उवाच ॥ एवं दुर्मन्त्रिभिः कंसः सह संमन्त्र्य दुर्मतिः ॥ ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ॥ ४३ ॥ संदिश्य साधुलोकस्य कदने कदनप्रियान् ॥ कामरूपधरान्दिक्षु दानवान्गृहमाविशत् ॥ ४४ ॥ ते वै रजःप्रकृतयस्तमसा मूढचेतसः ॥ सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥ ४५ ॥ आयुः श्रियं यशो धर्मं लोकानाशिष एव च ॥ हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे कंसोद्यमनिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

उपायः ॥ ४२ ॥ एवमिति ॥ कालस्य पाशेनावृतः आसन्नमृत्युः असुरः मुरविरोधी स्वयं दुर्मतिः कंसः दुर्मन्त्रिभिः सहैवं संमन्त्र्य ब्रह्मणां ब्राह्मणानां हिंसां हितं मेने । हितं हितामिति पाठद्वयम् ॥ ४३ ॥ संदिश्येति ॥ कदनं परदुःखोत्पादनं प्रियं येषां तान् कामरूपधरान् यथेष्टवेषधारिणः दानवान् सर्वदिक्षु साधुलोकस्य सदाचारजनस्य कदने संदिश्य गृहमाविशत् ॥ ४४ ॥ ते वै इति ॥ रजःप्रकृतयः रजोगुणेन विक्षिप्तस्वभावाः तमसा मूढचेतसः आरात्समीपमागतो मृत्युर्येषां ते दानवाः सतां विद्वेषमाचेरुः कृतवन्तः ॥ ४५ ॥ आयुरिति ॥ महतामतिक्रमोऽनादरः पुंस आयुः श्रियं यशः धर्मं लोकान् स्वर्गादीन् आशिषः कामितान् पुत्रादीन् किंबहुना सर्वाणि श्रेयांसि हन्ति । अतोऽसौ न मृत्युमात्रहेतुः किंतु बह्वनर्थकारी ॥ ४६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे दशमस्य व्यधादिमाम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमे तूत्सवं सूनोर्नन्दः कृत्वा प्रसन्नधीः ॥ मथुरां गतवांस्तत्र श्लोका द्वात्रिंशदीरिताः[३२] ॥ चर्त्वार्युवाचेति पादहीना देवी[३२] ''' अनुष्टुभः ॥ ५ ॥ नन्दस्त्विति द्वयम् ॥ आत्मजे उत्पन्ने श्रीकृष्णे पुत्ररूपेण प्रादुर्भूते सति जाताह्लादः अत एव महामनाः दानादावत्युदारचित्तो नन्दस्तु दैवज्ञान् ज्योतिर्विदो विप्रान् आहूय स्वयं स्नातः अत एव शुचिः ततोऽलंकृतश्च सन् ब्राह्मणैः स्वस्त्ययनं वाचयित्वा स्वस्तिवाचनं कारयित्वा आत्मजस्य पुत्रस्य जातकर्माख्यं संस्कारविशेषं विधिवत्कारयामास । तथा ततः पूर्वं विधिवत् पितृदेवार्चनं नान्दीश्राद्धादिकं च कारयामास । अर्थक्रमेण पाठक्रमत्यागात् विधिवदित्यस्य अग्रेऽपि यथोचितं संबन्धः । अत्र प्रेमभक्ताः । यशोदाया द्विभुजः श्रीकृष्णः प्रादुर्भूतः स एव वासुदेवावतारः अत एवात्र आत्मज उत्पन्न इत्युक्तम् अन्यथा " नन्दस्तमात्मजं मत्वा " इति ब्रूयात् । एवं स्थिते चतुर्भुजरूपाच्छादनाय देवक्या प्रार्थिते यशोदाहृदयस्थद्विभुजस्य तद्रूपाच्छादनपूर्वकं तत्रैवाविर्भाव आसीत् । स एवानीय वसुदेवेन पुनर्यशोदाशयने निहितः । स एव च व्रजादौ मधुपुर्यादौ च विजहार । देवकीहृदयस्थचतुर्भुजरूपस्य तु तत्प्रार्थनयान्तर्धानमेवासीत् । कृष्णस्य यशोदानन्दपुत्रत्वे खलु नैकशः प्रयोगाः किंतु बहव एव । न ते सर्वे एवामुख्यार्थाभवितुमर्हन्ति । तथाहि " अदृश्यतानुजा

॥ श्रीशुक उवाच ॥ नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ॥ आहूय विप्रान्दैवज्ञान्स्नातः शुचिरलंकृतः ॥ १ ॥ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै ॥ कारयामास विधिवत्पितृदेवार्चनं तथा ॥ २ ॥ धेनूनां नियुते प्रादाद्विप्रेभ्यः समलंकृते ॥ तिलाद्रीन्सप्त रत्नौघशातकौम्भाम्बरावृतान् ॥ ३ ॥ कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया ॥ शुद्ध्यन्ति दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया ॥ ४ ॥ सौमङ्गल्यगिरो विप्राः सूतमागधवन्दिनः ॥ गायकाश्च जगुर्नेदुर्भेर्यो दुन्दुभयो मुहुः ॥ ५ ॥

विष्णोः " इति । " प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः । " इति नौमीड्यत इत्यादौ पशुपाङ्गजायेति " देहिनां गोपिकासुतः " इति । गौतमीये " बल्लवीनन्दनं वन्दे " इति क्रमदीपिकायामपि देवतासकललोकमङ्गलो नन्दगोपतनयः समीरित इति । मन्त्रेपि नन्दपुत्रत्वसुबलसखत्वगोपीकान्तत्वादीनि परःसहस्राणि वचनानीति प्राहुः ॥ १ ॥ २ ॥ धेनूनामिति ॥ सम्यगलंकृते धेनूनां नवप्रसूतानां गवां नियुते द्वे लक्षे नियुतं दशलक्षमिति मते विंशतिर्लक्षाणि तथा रत्नौघैः रत्नसमूहैः शातकौम्भैः सुवर्णरसाक्तैः अम्बरैश्चावृतान् इदं च मेरुसाम्याय सप्तसंख्याकान् तिलाद्रींश्च विप्रेभ्यः प्रादात् । उत्तमस्तिलाद्रिर्दशद्रोण इत्यादि ज्ञेयम् ॥ ३ ॥ संस्कारैरेव गर्भशुद्धिरित्यत्र दृष्टान्तानाह—कालेनेति ॥ कालेन भूम्यादिनूतनजलादिद्रव्याणि स्नानेन देहादि शौचेन क्षालनेन वस्त्रादि संस्कारैर्गर्भादि तपसेन्द्रियादि इज्यया ब्राह्मणादि दानैर्धनधान्यादि सन्तुष्ट्या मनो द्रव्यम् एवमेतानि द्रव्याणि कालादिभिः शुध्यन्ति आत्मा तु आत्मविद्ययैव ॥ ४ ॥ सौमङ्गल्येति ॥ तदा विप्राः सूतमागधवन्दिनश्च मुहुः सुमङ्गलमेव सौमङ्गल्यं तद्बोधिका गिरो येषां ते सौमङ्गल्यगिरः बभूवुः । गायकाश्च मुहुर्जगुः भेर्यः दुन्दुभयश्च मुहुः नेदुः । " सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ " ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रज इति ॥ पूर्वं सम्यक् मृष्टानि मार्जन्यादिभिर्मार्जितानि ततः चन्दनादिजलैः संसिक्तानि च द्वाराणि अजिराणि अङ्गणानि गृहान्तराणि गृहमध्यानि च यस्मिंस्तथाभूतो व्रजः चित्राभ्यां ध्वजपताकाभ्यां तथाचित्राणां स्रजां चैलानां चैलखण्डानां पल्लवानां चेति त्रिविधैस्तोरणैर्विभूषितोऽभूदिति शेषः । यद्वा । चित्रध्वजेषु पताकानां स्रजश्चैलपल्लवतोरणानि च तैर्भूषितः ॥ ६ ॥ गाव इति ॥ गावः वृषा वत्सतराः त्रिहायना वत्साः वृषाश्च वत्साश्चेति पाठे चकारौ महिष्यादिग्रहणार्थौ एते हरिद्रायुक्ततैलेन रूषिताः लिप्ताः विचित्रा धातवो गैरिकादयश्च बर्हाणि मयूरपिच्छानि च स्रजः पुष्पमालाश्च वस्त्राणि च काञ्चनमालाश्चालंकारतया विद्यन्ते येषां तथा गवादयो बभूवुः ॥ ७ ॥ महार्हेति ॥ हे राजन् महम् उत्सवम् अर्हन्ति महार्हाणि उत्तमानि वस्त्राणि आभरणानि कञ्चुकाः उष्णीषाः शिरोवेष्टनानि तैर्विभूषिताः नानाविधान्युपायनानि प्रदेयानि वस्त्राभरणादीनि पाणौ येषां ते गोपाः सम्यक् सादरा हृष्टाः स्वगृहे ध्वजादि मङ्गलं प्रवर्त्य आययुः ॥ ८ ॥ गोप्य इति ॥ यशोदायाः सुतोद्भवमाकर्ण्य प्रमु-

व्रजः संमृष्टसंसिक्तद्वाराजिरगृहान्तरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥ ६ ॥ गावो वृषा वत्सतरा हरिद्रातैलरूषिताः ॥ वि-
चित्रधातुबर्हस्रग्वस्त्रकाञ्चनमालिनः ॥ ७ ॥ महार्हवस्त्राभरणकञ्चुकोष्णीषभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥ ८ ॥
गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम् ॥ आत्मानं भूषयांचक्रुर्वस्त्राऽऽकल्पाञ्जनादिभिः॥९॥ नवकुङ्कुमकिञ्जल्कमुखपङ्कजभूतयः॥
बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥ १० ॥ गोप्यः सुमृष्टमणिकुण्डलनिष्ककण्ठ्यश्चित्राम्बराः पथि शिखाच्युतमाल्य-
वर्षाः ॥ नन्दालयं सवलया व्रजतीर्विरेजुर्व्यालोलकुण्डलपयोधरहारशोभाः ॥ ११ ॥ ता आशिषः प्रयुञ्जानाश्चिरं पाहीति बालके ॥
हरिद्राचूर्णतैलाद्भिः सिञ्चन्त्यो जनमुज्जगुः ॥ १२ ॥

(दिताः प्रहृष्टा गोप्यश्चात्मानं वस्त्राणि आकल्पाः अलंकारा अञ्जनानि तैः आदिना मालादिभिश्च भूषयांचक्रुः ॥ ९ ॥ नवकुङ्कुमेति ॥ नवकुङ्कुमस्य किञ्जल्कात् केसरादपि नवकुङ्कुमकिञ्जल्कैर्वा मुखपङ्कजेषु भूतिः शोभा यासां ताः पृथुश्रोण्योऽपि कवभाव आर्षः। हर्षवेगवशात् चलत्कुचाः ता गोप्यः बलिभिः स्वर्णमुद्रारत्नहारवस्त्रफलदूर्वाद्यैः सह त्वरितं यथा स्यात्तथा नन्दगृहं जग्मुः ॥ १० ॥ पुनर्भक्तिवशाद्गोपीर्वर्णयति—गोप्य इति ॥ सुमृष्टानि निर्मलीकृतानि मणिमयानि कुण्डलानि यासां ताश्च निष्काः पदकाख्यभूषणानि कण्ठेषु यासां ताः चित्राण्यम्बराणि यासां ताः शिखाभ्यो धम्मिल्लेभ्यश्च्युतानि पतितानि माल्यानि तेषां वर्षाणि वृष्टयो यासु ताः वलयैः कङ्कणैः सहिता भूषिता इति सवलयाः व्यालोलैर्गतिवशेन प्रचलद्भिः कुण्डलैश्च पयोधरेषु हारैश्च शोभा यासां ताः इति चलत्कुचा इत्यनेन न पौनरुक्त्यम् । गोप्यः नन्दालयं प्रतिव्रजतीः व्रजन्त्यः पथि विशेषतो रेजुः व्रजतीरिति नुमभावः पूर्वसवर्णदीर्घश्चार्षः ॥ ११ ॥ ता आशिष इति ॥ ता गोप्यो बालके श्रीकृष्णे चिरं पाहि हे परमेश्वर एनं बालं चिरं पाहि इत्येवं राजपुत्रत्वेन युवराजो भूत्वाऽस्मान्पाहीति वा आशिषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयुञ्जानाः सत्यः चिरं जीवेत्यपि पाठः । हरिद्राचूर्णतैलाद्भिर्मिलितैर्जनं सिञ्चन्त्यश्च उच्चैर्जगुः अद्भिरिति समासान्ताभाव आर्षः । मिथः सिञ्चन्त्यः अजनं हरिमुज्जगुरिति वा ॥ १२ ॥ अवाद्यन्तेति ॥ विश्वस्य सर्वस्येश्वरे अनन्ते श्रीकृष्णे नन्दस्य व्रजं प्रत्यागते अवतीर्णे सति यो महानुत्सवस्तस्मिन्विचित्राणि नानाविधानि वादित्राणि सर्वत्र त्रैलोक्ये अवाद्यन्त ॥ १३ ॥ गोपा इति ॥ हृष्टाः गोपाः दधिक्षीरघृताम्बुभिः परस्परमासिञ्चन्तः नवनीतैर्मुखं विलिम्पन्तश्च चिक्षिपुः । परिहासार्थं दध्यादि पङ्के पातयामासुरित्यर्थः ॥ १४ ॥ नन्द इति द्वयम् ॥ महामनाः अत्युदारचित्तः अदीनात्मा प्रहृष्टचित्तः नन्दश्च विष्णोः आराधनस्यार्थो विष्णुतोषः तस्मै तथा स्वपुत्रस्य उदयाय समृद्धये च तेभ्यः गोपेभ्यः गोपीभ्यः सूतमागधवन्दिभ्यश्च वासोऽलंकारगोधनं दत्तवान् इति शेषः । तथा येऽन्ये च विद्योपजीविनो गायकाः वादकाः वैद्याः ज्योतिर्विदो नर्त्तकाः शाकुनिकाश्च ते यान् यान् कामान् अयाचन्त तांस्तैस्तैः कामैः पदार्थैः यथोचितं जातिविद्याद्यनुरूपं यथा स्यात्तथा अपूजयत् । स तत्तत्प्रदानेन स्रक्चन्दना-

अवाद्यन्त विचित्राणि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरेऽनन्ते नन्दस्य व्रजमागते ॥ १३ ॥ गोपाः परस्परं हृष्टा दधिक्षीरघृताम्बुभिः ॥ आसिञ्चन्तो विलिम्पन्तो नवनीतैश्च चिक्षिपुः ॥ १४ ॥ नन्दो महामनास्तेभ्यो वासोलंकारगोधनम् ॥ सूतमागधवन्दिभ्यो येऽन्ये विद्योपजीविनः ॥ १५ ॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ॥ विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥ रोहिणी च महाभागा नन्दगोपाभिनन्दिता ॥ व्यचरद्दिव्यवासःस्रक्कण्ठाभरणभूषिता ॥ १७ ॥ तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥ १८ ॥ गोपान् गोकुलरक्षायां निरूप्य मथुरां गतः ॥ नन्दः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥ १९ ॥ वसुदेव उपश्रुत्य भ्रातरं नन्दमागतम् ॥ ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनम् ॥ २० ॥

दिभिश्च सत्कृतवान् इत्यर्थः ॥ १५ ॥ १६ ॥ रोहिणीति ॥ महाभागा सर्वाभ्यो वसुदेवपत्नीभ्योप्यधिकभाग्या श्रीकृष्णबाललीलोत्सवलाभात् तथा नन्दगोपेन नन्देन गोपैश्चेति वा । अभिनन्दिता त्वदागमनमङ्गलेनैव पुत्रो जातः इत्यादिना प्रोत्साहिता दिव्यैः वासस्स्रक्कण्ठाभरणैः भूषिता रोहिणी विशेषेण श्रीकृष्णजन्मोत्सवानन्देन पत्युर्बन्धनादिदुःखं विस्मृत्येव गृहस्वामिनीवाचरत् समागतस्त्रीजनसम्मानादिकर्त्री जाता ॥ १७ ॥ तत इति ॥ हे नृप ततो भगवत्प्रादुर्भावादारभ्य नन्दस्य व्रजो धनपुत्रपश्वादिसर्वसमृद्धिमान् जातः । यतः हरेर्निवासेन हेतुना ये आत्मनो व्रजस्य गुणाः सर्वप्रियत्वादयस्तैः रमायाः आक्रीडं विहारस्थानमभूत् ॥ १८ ॥ गोपान् इति ॥ हे कुरूद्वह नन्दः एवं श्रीकृष्णजन्ममहोत्सवं कृत्वा गोकुलरक्षायां गोपान् निरूप्य आदिश्य कंसस्य वार्षिक्यं प्रतिवर्षं देयं करं स्वामिग्राह्यं भागं वार्षिकं तत्र साधुरत्नाद्युपायनयुक्तं दातुं मथुरां गतः ॥ १९ ॥ वसुदेव इति ॥ वसुदेवः भ्रातरं सन्मित्रं नन्दम् आगतमुपश्रुत्य राज्ञे दत्तः करो येन तथाभूतं ज्ञात्वा च तस्य नन्दस्यावमोचनम् अवमुच्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शकटादि यत्र तत् स्थानं ययौ। भ्रातरमित्यत्र वैश्यकन्यायां शूरपत्नीभ्रातृजातत्वेन मातुलपुत्रत्वात् । अत एवाग्रे भ्रातरिति मुहुरुक्तिः । मध्वाचार्याश्च वैश्यकन्यायां शूरवैमात्रेयभ्रातुर्जातत्वादिति ब्रह्मवाक्यं च। "तस्मै मया स वरः सन्निसृष्टः स चास नन्दाख्य उतास्य भार्या। नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोऽथ गोपः॥" इति प्राहुः । एवमन्येऽपि गोपा यादवविशेषा एव वैश्यकन्योद्भवत्वात् परं वैश्यत्वम् । अत एव स्कान्दे मथुराखण्डे। "रक्षिता यादवाः सर्वे इन्द्रवृष्टिनिवारणात्।" इति। "यादवानां हितार्थाय धृतो गोवर्द्धनो मया।" इति च हरिवंशेऽपि। "यादवेष्वपि सर्वेषु भवन्तो मम बान्धवाः।" इति रामवाक्यम् ॥ २० ॥ तं दृष्ट्वेति ॥ तं प्रियतममागतं वसुदेवं दृष्ट्वा प्रीतः प्रसन्नचित्तः प्रेम्णा विह्वलो व्याकुलश्च नन्दः देहो मूर्छितो यथा प्राणे समागते शीघ्रमेवोत्तिष्ठति तथेत्यर्थः । सहसा झटिति उत्थाय दोर्भ्यां भुजाभ्यां सस्वजे आलिङ्गितवान्। नतु नमश्चकार वयसा ज्येष्ठत्वात्। प्रेमवैवश्याद्वा ॥ २१ ॥ पूजित इति ॥ हे विशांपते राजन् ततश्च नन्देन स्ववासे समागतत्वात् पूजितः पाद्यासनादिना सत्कृतः अनामयं कुशलं पृष्ट्वा आदृतश्च अतः सुखं यथा स्यात्तथा आसने आसीनः उपविष्टः आत्मजयो रामकृष्णयोः प्रसक्ता धीर्यस्य

तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतम् ॥ प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः ॥ २१ ॥ पूजितः सुखमासीनः पृष्ट्वाऽनामयमादृतः ॥ प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते ॥ २२ ॥ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥ २३ ॥ दिष्ट्या संसारचक्रेऽस्मिन्वर्तमानः पुनर्भवः ॥ उपलब्धो भवानद्य दुर्लभं प्रियदर्शनम् ॥ २४ ॥ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् ॥ ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥ २५ ॥

सः वसुदेवो नन्दं प्रतीदं वक्ष्यमाणमाह स्म ॥ २२ ॥ दिष्ट्येति ॥ हे भ्रातः अप्रजस्य सन्तानरहितस्य असिजभाव आर्षः। प्रवयसः वृद्धस्य प्रजायाः आशाया निवृत्तस्य च ते तवेदानीं यत्प्रजा समपद्यत प्राप्ता तत् दिष्ट्या भद्रं जातम्। पुत्रो जात इत्युक्ते मिथ्योक्तिः। कन्येत्युक्ते नन्दस्याऽप्रीतिः । अतः प्रजेति सामान्यापत्यवाचकशब्दप्रयोगः। मत्पुत्रन्यासं स्वकन्याचौर्यं च नन्दो जानाति न वेत्ति शङ्कया वा प्रजाशब्दप्रयोगः । नन्दस्य प्रवयस्त्वादिकं पुत्रे स्नेहाधिक्यसूचनार्थम् ॥ २३ ॥ दिष्ट्येति ॥ अस्मिन् संसारचक्रे वर्त्तमानः भवान् अद्य पुनर्भवः पुनर्जात इव उपलब्धो दृष्टः इत्यपि दिष्ट्या। यतः प्रियदर्शनं दुर्लभं यद्वा बन्धनादिक्लिष्टस्य मम पुनर्भवो जन्मैव वर्त्तमानः पुनर्जन्मैवाद्याभूदित्यर्थः। यतो भवानुपलब्ध इत्येतावत्कालपर्य्यन्तमहं भवदनुपलम्भान्मृत इवासमिति भावः ॥२४॥ नैकत्रेति । हे प्रिय चित्रकर्मणां नानाविधकर्मवशवर्तिनां सुहृदां स्रोतसो नद्या ओघेण प्रवाहेण व्यूह्यमानानां नीयमानानां प्लवन्ते प्लवाः तृणकाष्ठादयस्तेषां क्षणमात्रं मिलितानामपि यथैकत्र स्थितिर्न भवति तद्वत् एकत्र संवासो न भवति । प्रियश्चासौ संवास इत्येकं पदं वा ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कच्चिदिति ॥ यत्र सुहृद्भिर्वृतः त्वम् अधुना आस्से तत् बृहद्वनं कच्चित् इति प्रश्ने । पशव्यं पशूनां हितं निरुजं नीरोगं ह्रस्वत्वं छन्दोनुरोधात् । रुजा टावन्तः । भूरीणि अम्बूनि तृणानि वीरुधो लताश्च यस्मिंस्तादृशमस्ति । अत्र पशव्यादिरूपे तस्मिन्वने निर्दोषगोपयोदध्यादिप्रभूतगोपिकास्तन्यादिना स्वपुत्रक्षेमजिज्ञासया प्रश्नः । "प्रसक्तधीः स्वात्मजयोः" इत्युक्तत्वात् ॥ २६ ॥ भ्रातरिति ॥ हे भ्रातः मात्रा सह मम सुतो भवन्तं तातं पितरं मन्वान इति वर्त्तमानसामीप्यान्मंस्यमान इत्यर्थः । भवद्भ्यां दम्पतिभ्यामुपलालितो भवद्व्रजे कच्चित्कुशलमास्त इति रामकृष्णयोर्जन्माप्यल्पकालान्तरमेव । अत एवैतयोर्युगपद्रिङ्गणादि वक्ष्यते ॥ २७ ॥ पुत्रादर्शनक्लेशानाह— पुंस इति ॥ हि यस्मात् पुंसस्त्रिवर्गो धर्मार्थकामाख्यः सुहृदो भ्रातृपुत्रादिबन्धून् प्रत्यनुभावितः संपादित एव विहितो युक्तः वृद्धैः शास्त्रेण चानुज्ञातो वा नतु स्वमात्रपर्यवसितः । अतस्तेषु सुहृत्सु क्लिश्यमानेषु सत्सु त्रिवर्गोऽर्थाय न कल्पते सुखाय न भवति ॥ २८ ॥ मम व्रजादिकुशलं किं ब्रवीमि अहं तव दुःखेनैव दुःखितोऽस्मीत्याह अहो इति ॥ अहो इति खेदे । कंसेन दुष्टतया ते तव भार्याया देवक्याः पुत्रा बहवो हताः एका अवरजा पश्चाज्जाता कन्यावशिष्टा तन्मारणादुर्वरिता सापि दिवं स्वर्गं

कच्चित्पशव्यं निरुजं भूर्यम्बुतृणवीरुधम् ॥ बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ २६ ॥ भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे ॥
तातं भवन्तं मन्वानो भवद्भ्यामुपलालितः ॥ २७ ॥ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावितः ॥ न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय
कल्पते ॥ २८ ॥ नन्द उवाच ॥ अहो ते देवकीपुत्राः कंसेन बहवो हताः ॥ एकाऽवशिष्टाऽवरजा कन्या साऽपि दिवं गता ॥ २९ ॥ नूनं
ह्यदृष्टनिष्ठोयमदृष्टपरमो जनः ॥ अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति ॥ ३० ॥ वसुदेव उवाच ॥ करो वै वार्षिको दत्तो राज्ञे दृष्टा
वयं च वः ॥ नेह स्थेयं बहुतिथं सन्त्युत्पाताश्च गोकुले ॥ ३१ ॥

गता ततश्च मत्पुत्रन्यासादिकमस्य न विदितमिति ज्ञात्वा वसुदेवोन्तरानन्दितो बभूवेति ज्ञेयम् ॥ २९ ॥ नूनमिति ॥ निश्चितमयं जनः अदृष्टनिष्ठः अदृष्टे प्राक्तनपुण्यपापकर्मणि एव निष्ठा स्थितिर्यस्य तथाविधः अदृष्टाधीन इत्यर्थः । तथा अदृष्टपरमः अदृष्टमेव परमं नियामकं यस्य सः यदैव सुतादिप्रदमदृष्टं हीयते तदैव पुत्रादयो न भवन्ति वियुक्तानपि चादृष्टमेव संगमयति । अतः अदृष्टमेव आत्मनः स्वस्य तत्त्वं वियोग संयोगदुःखसुखादिष्वव्यभिचारिकारणं यो वेद जानाति स न मुह्यति तस्मादिदानीं दुःखं न भावनीयम् । मृतानां वियुक्तानां चापि कालान्तरे मेलसम्भवात् अस्माकमपि मेलो यथा जातस्तथा इति नन्दस्य दैवी वागेषा भाविसूचिका ॥ ३० ॥ कर इति ॥ वो युष्माकं युष्माभिः शेषे षष्ठी । वार्षिकः करो राज्ञे दत्तः वयं च दृष्टाः अतः कार्यस्य जातत्वादिह स्थाने लोभिनः कंसस्य समीपे भवद्भिर्धनिकत्वेन ख्यातैः बहुतिथं बहुकालं न स्थेयम् । यतः गोकुलेऽपि उत्पाताः सन्ति । चोप्यर्थे ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ शौरिणा वसुदेवेनेत्येवं प्रोक्ताः नन्दादयो गोपास्तं वसुदेवमनुज्ञाप्य पृष्ट्वा अनडुद्युक्तैर्वृषयोजितैरनोभिः शकटैर्गोकुलं ययुः ॥३२॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायां ॥ गङ्गासहायो दशमपञ्चमे निरमादिमाम् ॥५॥ षष्ठे कृष्णेन निहता पूतना स्तनपानतः॥ गोपीभिः कृष्णरक्षा च श्लोका वेदैर्कृता इह ॥ अनुष्टुभस्तु पञ्चाशद् द्वे उवाचेति कीर्त्तिते ॥ ६ ॥ नन्द इति ॥ शौरेर्वसुदेवस्य वचो न मृषेति विचिन्तयन् उत्पातागमेन शङ्कितः शङ्कायुक्तो नन्दः पथि मार्गे एव हरिं शरणं जगाम ॥ १ ॥ कंसेनेति ॥ कंसेन प्रहिता प्रेषिता घोरा भीषणा बालघातिनी पूतना पुरग्रामव्रजादिषु शिशून् निघ्नन्ती चचार । नुमार्षः ॥ २ ॥ अविषये प्रवृत्ता सैव मरिष्यतीति सूचयति—न यत्रेति ॥ यत्र पुरादिषु स्वकर्मसु दृष्टादृष्टफलकेषु वर्तमाना जनाः रक्षोघ्नानि सात्वतां भक्तानां भर्तुः पालकस्य भगवतः श्रवणादीनि न कुर्वन्ति तत्रैव यातुधान्यो राक्षस्यः चकारादन्येऽपि विघ्नकर्तारः प्रभवन्ति विघ्नान् कुर्वन्ति च । यत्र साक्षादेव भगवान् विद्यते तत्र तासां कुतो बलमिति ॥ ३ ॥ सा खेचरीति ॥ कामचारिणी

श्रीशुक उवाच ॥ इति नन्दादयो गोपाः प्रोक्तास्ते शौरिणा ययुः ॥ अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलम् ॥ ३२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे नन्दवसुदेवसंगमो नाम पञ्चमोऽध्यायः ॥ ५ ॥ श्रीशुक उवाच ॥ नन्दः पथि वचः शौरेर्न मृषेति विचिन्तयन् ॥ हरिं जगाम शरणमुत्पातागमशङ्कितः ॥ १ ॥ कंसेन प्रहिता घोरा पूतना बालघातिनी ॥ शिशूंश्चचार निघ्नन्ती पुरग्रामव्रजादिषु ॥ २ ॥ न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु ॥ कुर्वन्ति सात्त्वतां भर्तुर्यातुधान्यश्च तत्र हि ॥ ३ ॥ सा खेचर्येकदोपेत्य पूतना नन्दगोकुलम् ॥ योषित्वा माययाऽऽत्मानं प्राविशत्कामचारिणी ॥४॥ तां केशबन्धव्यतिषक्तमल्लिकां बृहन्नितम्बस्तनकृच्छ्रमध्यमाम् ॥ सुवाससं कम्पितकर्णभूषणत्विषोल्लसत्कुन्तलमण्डिताननाम् ॥ ५ ॥ वल्गुस्मितापाङ्गविसर्गवीक्षितैर्मनो हरन्तीं वनितां व्रजौकसाम् ॥ अमंसताम्भोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिम् ॥ ६ ॥

यथेष्टरूपधारणादौ समर्था अनिवार्यगृहप्रवेशा खेचरी आकाशचारिणी सा पूतना एकदा रात्रौ इति पराशरवैशम्पायनाविति तोषणी । मायया आत्मानं योषित्वा वरां नारीं कृत्वा योषिच्छब्दाद्योषाशब्दाद्वा तत्करोतीति णिजन्तात् क्त्वा इटि णिलोप आर्षः । आकाशमार्गेण नन्दगोकुलमुपेत्यागत्य उत्पत्येत्यपि पाठः । गृहं प्राविशत् ॥ ४ ॥ तामिति द्वयम् ॥ केशबन्धे धम्मिल्ले व्यतिषक्ता संसक्ता मल्लिका तत् कुसुमानि यस्यास्तां बृहद्भ्यां नितम्बाभ्यां स्तनाभ्यां च बृहद्भ्यामुभयत आक्रान्तमिव कृच्छ्रं कृशं मध्यमुदरं यस्यास्तां सुवाससं सुष्ठु रमणीये वाससी यस्यास्तां कम्पितयोः कर्णभूषणयोस्त्विषा दीप्त्या उल्लसद्भिः कुन्तलैर्मण्डितमाननं यस्यास्तां वल्गु रम्यं स्मितं येषु तथाभूताः अपाङ्गविसर्गाः कटाक्षमोक्षा येषु तैर्वीक्षितैर्व्रजौकसां मनो हरन्तीं पदद्वयं मनोहरवदाचरन्तीमिति वा आचारे क्विप् । अतोन्तःपुरं प्रविशत्यपि गोपैरपि न वारिता तां वनितां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनितानुरागां स्त्रियम् " वनिता जनितात्यर्थानुरागायां च योषिति " इत्यमरः । पतिं स्वामिनं महाधनवन्तं द्रष्टुमागताम् अम्भोजयुक्तकरेण उपलक्षितां रूपिणीं श्रियं मूर्तिमतीं रत्नादिधनसम्पत्तिमिव अमंसत । अतो गोप्यः श्रियं मत्वा न वारितवत्यः पतिं द्रष्टुमागतां श्रियम् इव वरस्त्रियममंसत इत्यपि कश्चित् । पतिशब्दः स्वामिपर्यायः धवपर्यायस्तु अत्र न वक्ष्यमाणमातृभावविरोधात् ॥ ५ ॥ ६ ॥ बालग्रह इति ॥ शिशून् विचिन्वती बालग्रहः सा पूतना अजहल्लिङ्गं विशेषणम् । विशेष्यन्तु पूतनैव अतो विचिन्वतीति स्त्रीत्वम् । तत्र नन्दगृहे यदृच्छया स्वमरणहेतुप्रारब्धेन प्रविष्टा तल्पे शय्यायां शयानमसतां दुष्टानामन्तकं मारकं बालनाट्येन प्रतिच्छन्नं तिरोधापितं निजमुरु अधिकं तेजो येन तं बालकं श्रीकृष्णं भसि भस्मन्याहितं स्थापितं भस्मच्छन्नमग्निमिव ददर्श ॥ ७ ॥ विबुद्ध्येति ॥ चराचराणाम् आत्मा साक्षी भगवान् तां बालकानां मारिका मारणं तत्कर्तारं ग्रहं विबुद्ध्य बालनाट्येन निमीलितेक्षणः आस दिदीपे । निजात्यन्तबालत्वभीरुत्वज्ञापनाय तादृशामङ्गलदर्शनाभावाय मातृभावदर्शिकायास्तस्याः स्वकर्तृकवधे लज्जानुत्पत्त्यै च नेत्रनिमीलनम् । ततः सा अबुद्धिश्चासौ रज्जुधीश्च सः यथा कश्चिदज्ञानतो रज्जुबुद्ध्या सुप्तमुरगं गृह्णाति तद्वत् अन्तकं कालरूपम् अनन्तम्

बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नन्दगृहेऽसदन्तकम् ॥ बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि ॥ ७ ॥ विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः ॥ अनन्तमारोपयदङ्कमन्तकं यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ ८ ॥ तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यान्तरा कोशपरिच्छदासिवत् ॥ वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी ह्यतिष्ठताम् ॥ ९ ॥ तस्मिन्स्तनं दुर्जरवीर्यमुल्वणं घोराङ्कमादाय शिशोर्ददावथ ॥ गाढं कराभ्यां भगवान्प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत् ॥ १० ॥

अपरिच्छिन्नमपि अङ्कम् आरोपयत् इति शाब्दो विरोधः ॥ ८ ॥ तामिति ॥ तीक्ष्णं क्रूरं चित्तं यस्यास्तामतिशयेन वामं जनन्या इव मनोहरं चेष्टितं यस्यास्ताम् अयं चित्सुखसम्मतः पाठः । वल्गुचेष्टितामिति वा पाठः । वरस्त्रियं सहसैव कोशपरिच्छदासिवदिति मृदुचित्रचर्ममयः कोशः परिच्छदः आवरणं यस्य स चासौ असिः खड्गः तद्वत् इति अन्तस्तैक्ष्ण्ये बहिर्मार्दवे दृष्टान्तः । अन्तरा गृहमध्ये एव वीक्ष्य तस्याः प्रभया धर्षिते अभिभूते मत्पुत्रस्याभ्युदयाय स्वयमिंद्राणीसम्पत्तिर्वा वात्सल्येन स्तनं पाययतीति मोहिते सत्यौ जननी जनन्यौ निरीक्षमाणे हि एव अतिष्ठताम् नतु निवारितवत्यौ । जननी इति पूर्वसवर्णदीर्घ आर्षः ॥९॥ तस्मिन्निति ॥ सा घोराऽतिक्रूरस्वभावा श्रीकृष्णमङ्कमादाय तस्मिन् स्थाने शिशोर्मुखे इति शेषः । दुर्जरं विषरूपं वीर्यं यस्य तथाभूतम् अत एव उल्बणं प्राणहरत्वेन भयंकरं स्तनं ददौ । अथानन्तरमेव मदीयव्रजबालकानियं जिघांसतीति रोषसमन्वितो भगवान्गाढं दृढं तया त्याजयितुमशक्यं यथा भवति तथा कराभ्यां तत् तं तस्याः स्तनं प्रपीड्य अप्रसूतायास्तस्यास्तस्मिन् स्तन्याभावात् केवलं विषमपथ्यं मत्वा प्राणैः समं सह अपिबत् । अत्र रोषमयी दुष्टसंहारिका शक्तिरेव तस्याः अपवित्रान् प्राणानशोषयत् । नतु सः कुठारसमन्वितो वृक्षमच्छिनदितिवत् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा मुञ्च मुञ्चेति ॥ सा पूतना भगवतो ग्रहणेन स्तनपानेन चाखिलं यज्जीवस्य मर्म यस्मिन् किंचिदपि प्रहारमात्रेण जीवो देहं त्यजति तस्मिन्निष्पीड्यमाना अतएव मुञ्च मुञ्चालमिति प्रभाषिणी नेत्रे विवृत्य चरणौ भुजौ च मुहुः पुनः पुनः क्षिपती चालयन्ती निःस्विन्नानि स्वेदयुक्तानि गात्राणि यस्यास्तथाभूता च सती रुरोद आर्तनादं चकार ॥ ११ ॥ तस्या इति ॥ तस्याः पूतनायाः अतिगभीररंहसा महावेगवता स्वनेन साद्रिः पर्वतसहिता मही सग्रहा आदित्यादिग्रहसहिता द्यौश्च चचाल । रसाः रसातलानि अधोलोकाश्चेलुः प्रतिनेदिरे च दिशश्च प्रतिनेदिरे एव । कर्मव्यतिहारे तङ् आर्षो वा । वज्रनिपातशङ्कया भयेन जनाश्च क्षितौ पेतुः ॥ १२ ॥ निशाचरीति ॥ हे नृप इत्थं प्रपीडनेन व्यथितस्तना निशाचरी पूतना मुखं व्यादाय उद्घाट्य निजरूपम् उलूकपक्षिणीरूपं राक्षसीरूपं वा आस्थिता मृत्युसमये पीडितया तया स्वमायां रक्षितुमशक्यत्वात् व्यसुः प्राणविहीना केशान् चरणौ भुजावपि प्रसार्य वज्रेण हतो वृत्रासुर इव गोष्ठे व्रजे तत्समीपदेशे अपतत् ॥ १३ ॥ पतमानोऽपीति ॥ हे राजेन्द्र पतमानः पीडावेशाद् ग्राममप्युल्लङ्घ्य

सा मुञ्च मुञ्चालमिति प्रभाषिणी निष्पीड्यमानाखिलजीवमर्मणि ॥ विवृत्य नेत्रे चरणौ भुजौ मुहुः प्रस्विन्नगात्रा क्षिपती रुरोद ह ॥ ११ ॥ तस्याः स्वनेनातिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा ॥ रसा दिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वज्रनिपातशङ्कया ॥ १२ ॥ निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि ॥ प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप ॥ १३ ॥ पतमानोऽपि तद्देहस्त्रिगव्यूत्यन्तरद्रुमान् ॥ चूर्णयामास राजेन्द्र महदासीत्तदद्भुतम् ॥ १४ ॥ ईषामात्रोग्रदंष्ट्रास्यं गिरिकन्दरनासिकम् ॥ गण्डशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजम् ॥ १५ ॥ अन्धकूपगभीराक्षं पुलिनारोहभीषणम् ॥ बद्धसेतुभुजोर्वङ्घ्रि शून्यतोयह्रदोदरम् ॥ १६ ॥ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरम् ॥ पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥ १७ ॥

तद्वहिः पतन्नपि आर्षः शानच् चानश् वा तस्या देहः त्रिगव्यूत्यन्तरद्रुमान् षट्क्रोशमध्यवर्तिनो वृक्षान् चूर्णयामास । तत् चूर्णनं महत् अद्भुतम् आश्चर्यमासीत् । द्रुमाश्च ते कंसारामस्था स्तद्भोग्यफला इति तोषणी । दुष्टः स्वयं म्रियमाणोऽपि परान् मारयति इति सूच्यते ॥ १४ ॥ ईषामात्रेति त्रयम् ॥ ईषा लाङ्गलदण्डस्तत्प्रमाणा उग्रा दंष्ट्रा यस्मिंस्तदास्यं यस्मिंस्तत् गिरेः कन्दरे इव नासिके यत्र तत् गण्डशैलौ गिरेश्च्युतौ स्थूलोपलौ ताविव स्तनौ यस्मिंस्तत् प्रकीर्णा अरुणा मूर्धजाः केशा यस्मिंस्तत् । उलूकपक्षिणीपक्षे केशस्तनादिमत्त्वम् उलूकस्य प्रायो नरसाम्यात्स्यादिति काशीनाथोपाध्यायः । अन्धकूपाविव गभीरे अक्षिणी यस्मिंस्तत् पुलिनवदारोहौ जघने ताभ्यां भीषणं बद्धाः सेतव इव भुजौ ऊरू अङ्घ्री च यस्मिंस्तत् शून्यतोयह्रद इव उदरं यस्मिंस्तत् रौद्रम् उग्रं तत्कलेवरं वीक्ष्य गोपा गोप्यश्च तत्रसुः । पूर्वं तु तस्याः निःस्वनितेन शब्देन भिन्नानि हृत्कर्णमस्तकानि येषां तादृशा अभूवन् । पूर्वं तु तन्निष्ठुरनादेन तत्रसुरधुना च बालवृत्ताज्ञानेन तादृक् देहवीक्षणेन च सम्यक् त्रस्ता इत्यर्थः । स्म प्रसिद्धौ ॥ १५ ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालं चेति ॥ तस्याः पूतनायाः उरसि अकुतोभयं निर्भयं यथा स्यात्तथा क्रीडन्तं हस्तपादादिचालयन्तम् । प्रवेष्टुं सूतिकागारमनीशानां वनौकसां दिदृक्षापूर्त्तय इव विनिष्क्रान्तं पुराद्बहिः बालं च वीक्ष्य यशोदारोहिण्यौ च विह्वले दृष्ट्वा जातः सम्भ्रमः स्नेहौत्कण्ठ्येन त्वराविशेषो यासां ताः गोप्यस्तूर्णमेव समभ्येत्य समीपं गत्वा जगृहुः ॥१८॥ यशोदेति ॥ ताः गोप्यो यशोदारोहिणीभ्यां समं सह बालस्य सर्वशः सर्वेष्वङ्गेषु बह्वर्थान् मङ्गलार्थे शस् इति तोषिणी । बहिरन्तश्चेति गोपुच्छभ्रमणादिभिः आदिना सर्षपनिर्मञ्छनशूर्पकोणस्पर्शनादिभिः सम्यक् रक्षां विदधिरे । अत्र यशोदारोहिण्योः शोकव्यग्रतया प्राधान्याभावः ॥ १९ ॥ गोमूत्रेणेति ॥ अर्भकं बालं गोमूत्रेण स्नापयित्वा पुनर्गोखुररजसा च स्नापयित्वा शकृता गोमयेन केशवादिभगवन्नामभिश्च द्वादशाङ्गेषु तिलकस्थानेषु रक्षां चक्रुः । केशवादिनामानि च पाद्मे । "ललाटे केशवं ध्यायेन्नारायणमथोदरे । वक्षःस्थले माधवं तु गोविन्दं कण्ठकूबरे ॥ विष्णुं च दक्षिणे कुक्षौ बाहौ च मधुसूदनम् । त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके ॥ श्रीधरं वामबाहौ तु हृषीकेशं तु कन्धरे । पृष्ठे च पद्मनाभं च कट्यां दामोदरं न्यसेत् ॥" इति । एतेन गोपीनां वैष्णवत्वं बोधितम् ॥ २० ॥ गोप्य इति ॥ प्रथममतिसंभ्रमेण अनाचान्ता

बालं च तस्या उरसि क्रीडन्तमकुतोभयम् ॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः ॥ १८ ॥ यशोदारोहिणीभ्यां ताः समं बालस्य सर्वतः ॥ रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः ॥१९॥ गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम् ॥ रक्षां चक्रुश्च शकृता द्वादशाङ्गेषु नामभिः ॥ २० ॥ गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक् ॥ न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत ॥ २१ ॥ अव्यादजोऽङ्घ्रिमणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः ॥ हृत्केशवस्तदुर ईश इनस्तु कण्ठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ॥ २२ ॥

एव रक्षां कृत्वा ततः किञ्चिदाश्वस्ताः संस्पृष्टसलिलाः आचान्ताः आत्मनीति षष्ठ्यर्थे सप्तमी । प्रथमं स्वयोग्यत्वार्थमात्मनः स्वस्याङ्गेषु करयोश्च पृथगजाद्येकादशबीजानि न्यस्य अथ अनन्तरं बालस्याङ्गेषु तथैव बीजन्यासमकुर्वत । तत्र अजादिनाम्नाम् आद्याक्षराणि सानुस्वाराणि नमोन्तानि न्यास्थन् तच्चेत्थम् । अं नमो दक्षिणकरतले । अं नमो वामकरतले । एवं यं उभयोः करपृष्ठयोः । अं दक्षिणाङ्गुलिसन्धौ । हं दक्षिणमणिबन्धे । कें दक्षिणकूर्परे । ईं दक्षिणबाहुमूले । इं वामाङ्गुलिसंधौ । विं वाममणिबन्धे । उं वामकूर्परे । ईं वामबाहुमूले । एवं अं पादयोः । अं जानुनोः । यं ऊर्वोः । अं कट्योः । हं उदरे । कें हृदये । ईं उरसि । इं कण्ठे । विं भुजयोः । उं मुखे । ईं मूर्ध्नीति । यद्वा । अङ्गेषु करयोश्च न्यस्य अङ्गन्यासकरन्यासौ कृत्वेत्यर्थः । अथ अनन्तरं बालस्याङ्गेष्वङ्घ्र्यादिषु बीजस्याजादिनामाद्येकैकाक्षरस्य सानुस्वारस्य नमःशब्दान्तस्य न्यासम् अकुर्वत तेन अं नमोऽजस्तवाङ्घ्री अव्यात् । अं नमः अणिमांस्तव जानुनी अव्यादित्येवं प्रयोगः इत्येके ॥२१॥ ततो वक्ष्यमाणैः पद्यैः रक्षामकुर्वन्नित्याह—अव्यादिति ॥ अजः भगवान् ते तव अङ्घ्रिम् अङ्घ्री अव्यात् रक्षतु । तवेत्यस्य अव्यादित्यस्य च सर्वत्रान्वयः । तव जानु जानुनी अणिमान् तन्नामा व्यक्तिविशेषो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवान् अव्यात् । अथ ऊरू यज्ञः कटितटमच्युतः जङ्घेऽच्युत इति पाठे सन्धिरार्षः । जठरं नाभेरुपरिभागं हयास्यः हयग्रीवः हृत् हृदयं जीवाधारपद्मं केशवः त्वदुरः तव वक्षः ईशः कण्ठमिनः सूर्यान्तःस्थितो नारायणः भुजं भुजौ विष्णुः मुखम् उरुक्रमो वामनः कं शिरः ईश्वरोऽव्यात् । अङ्घ्रिजान्विति सुपो लुक् । भुजमित्यत्र "सुपां सुप" इति औङः अम् इति तोषणी । तन्मते मणिमानित्येव नत्वणिमान् ॥ २२ ॥ चक्रीति ॥ चक्री चक्रधरो हरिस्त्वदग्रतोऽस्तु रक्षतु । सहगदो गदाधरो हरिस्तव पश्चात् रक्षतु धनुरसी बिभ्रदिति शेषः । तेन धनुर्धरः असिधरश्चेति तेन धनुर्धरो मधुहा मधुदैत्यनिहन्ता भगवांस्तवैकपार्श्वतो रक्षतु । असिधरः अजनः भगवानन्यपार्श्वतो रक्षतु । शङ्खधरः उरुगायो विपुलकीर्तिर्भगवान् कोणेषु उक्तावशिष्टशरीरचतुर्दिग्भागेषु रक्षतु । उपेन्द्रो वामनः उपरि रक्षतु । तार्क्ष्यः गरुडारूढः क्षितौ रक्षतु । हलधरः संकर्षणः क्षितावधस्ताद्रक्षतु । पुरुषः सर्वान्तर्यामी समन्तात् चराचरेभ्यः सर्वतो रक्षतु ॥ २३ ॥ बही रक्षां कृत्वान्तरङ्गरक्षामाह—इन्द्रियाणीति ॥ हृषीकाणि इन्द्रियाणि तेषामीशः तवेन्द्रियाणि अवतु । नारायणस्तव प्राणान् प्राणापानादीन् अवतु । अन्तःकरणचतुष्टयरक्षामाहुः । श्वेतद्वीपपतिः वासुदेवश्चित्तमवतु । योगेश्वरो योगिभिः संराध्योऽनिरुद्धो मनोऽवतु

चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसी मधुहा जनश्च ॥ कोणेषु शङ्ख उरुगाय उपर्युपेन्द्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात्
॥ २३ ॥ इन्द्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु ॥ श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोवतु ॥२४॥ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः॥
क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः ॥ २५ ॥ व्रजन्तमव्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः ॥ भुञ्जानं यज्ञभुक्पातु सर्वग्रहभयङ्करः
॥२६॥ डाकिन्यो यातुधान्यश्च कूष्माण्डा येऽर्भकग्रहाः ॥ भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ २७ ॥ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः ॥ उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः ॥ २८ ॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये ॥ सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ॥ २९॥

॥ २४ ॥ पृश्निगर्भ इति ॥ पृश्निगर्भः ॥ प्रद्युम्नस्तु ते बुद्धिमवतु । परः सर्वसंहर्ता संकर्षणः भगवानात्मानमहङ्कारमवतु । क्रीडन्तं त्वां गोविन्दः गोषु क्रीडापरः पातु । शयानं त्वां माधवो लक्ष्मीसंवाहितपादः शेषशायी पातु ॥२५॥ व्रजन्तमिति ॥ बाललीलया व्रजन्तं गच्छन्तं त्वां वैकुण्ठः वैकुण्ठवासी सनकाद्यर्थं पादव्रज्यया धावन् भगवान्व्यात् । आसीनं त्वां श्रियो लक्ष्म्याः पतिः सिंहासनस्थो नारायणः अव्यात् । सर्वे ये दुःखप्रदा ग्रहास्तेषां भयङ्करः यज्ञभुक् यज्ञभोक्ता विष्णुर्भुञ्जानं त्वां पातु ॥ २६ ॥ डाकिन्य इति त्रयम् ॥ डाकिन्यो दुष्टाः स्त्रिय एव तथा यातुधान्यः यक्षराक्षसादिस्त्रियः कूष्माण्डाश्च ये तु अर्भकानेव गृह्णन्ति ते अर्भकग्रहाः । यद्वा । अर्भकरूपा ग्रहाः तेन बालग्रहा इति न पुनरुक्तिः । भूताः प्रेताद्याः कोटराद्या बालग्रहाः उन्मादाः अपस्माराश्च चित्तभ्रान्तिकर्तारो ग्रहविशेषाः स्वप्ने दृष्टा महोत्पाताः भाविदुःखमहोत्पातादिसूचकाः । तथा ये वृद्धग्रहाः बालग्रहाश्च ये डाकिन्यादयो देहप्राणेन्द्रियद्रुहः विष्णोर्नामग्रहणभीरवः ते सर्वे नश्यन्तु । पूतना मृताऽपि ताभिः पूतनात्वेनाऽज्ञानादेव मुक्तिः२७।२८।२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं कृष्णे प्रणयेन प्रेमातिशयेन बद्धाभिर्यशोदागृह एव स्थिताभिः गोपीभिः कृतं रक्षणं यस्य तमात्मजं माता यशोदा स्तनं पाययित्वा स्तनपानेन स्वास्थ्यं ज्ञात्वा स्वयमपि स्वस्थचित्ता सती संन्यवेशयत् शनैः शाययामास ॥ ३० ॥ तावदिति ॥ तावत्काले नन्दादयो गोपाः मथुरायाः सकाशाद्व्रजं व्रजदर्शनयोग्यं देशमागताः सन्तः पूतनाया देहं विलोक्यातिविस्मिता बभूवुः ॥ ३१ ॥ नूनमिति ॥ बतेति विस्मये । नूनं निश्चितम् आनकदुन्दुभिः पूर्वजन्मनि ऋषिः तपस्वी सन्निह सञ्जातः अथ वा पूर्वजन्मनि योगेशोऽष्टाङ्गयोगवान् समास सम्यग्दीप्यते स्म । कुतः हि यस्मात् स वसुदेवः "सन्त्युत्पाताश्च गोकुले" इति यदाह स एवोत्पातो दृष्ट इत्यर्थः ॥ ३२॥ कलेवरमिति ॥ यावन्नन्दादयो निकटमायान्ति तावदेव हीनजातयः तादृशकर्मणि प्रसिद्धा उपनन्दादिभिरादिष्टाः व्रजौकसस्तत्पूतनाकलेवरम् अवयवशः परशुभिश्छित्त्वा दुर्गन्धभयात् दूरे क्षिप्त्वा काष्ठाधिष्ठितं काष्ठैर्वेष्टितं च कृत्वा न्यदहन् पुनर्विषसंचारभयान्निःशेषेणादहन् । ददहुरिति पाठे एत्वाभ्यासलोपाभाव आर्षः ॥ ३३ ॥ दह्यमानस्येति ॥ कृष्णेन निर्भुक्तः स्तनः प्राणाश्च यस्य स कृष्णनिर्भुक्तः अतः सपदि भोगसमय एव आसमन्तात् हतः पाप्मा यस्य तस्य दह्यमानस्य देहस्य संबन्धी अगरुण इव

॥ श्रीशुक उवाच ॥ इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम् ॥ पाययित्वा स्तनं माता संन्यवेशयदात्मजम् ॥ ३० ॥ तावन्नन्दादयो गोपा मथुराया व्रजं गताः ॥ विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ॥ ३१ ॥ नूनं बतर्षिः संजातो योगेशो वा समास सः ॥ स एव दृष्टो ह्युत्पातो यदाहानकदुन्दुभिः ॥ ३२ ॥ कलेवरं परशुभिश्छित्त्वा तत्ते व्रजौकसः ॥ दूरे क्षिप्त्वावयवशो न्यदहन्काष्ठवेष्टितम् ॥ ३३ ॥ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः ॥ उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥ पूतना लोकबालघ्नी राक्षसी रुधिराशना ॥ जिघांसयापि हरये स्तनं दत्त्वाऽऽप सद्गतिम् ॥ ३५ ॥ किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ॥ यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ॥ ३६ ॥

सौरभं यस्य तथाभूतो धूम उत्थितः भगवत्संबन्धादेव शवधूमः सुगन्धिर्जातः ॥ ३४ ॥ पूतनेत्यादिषट्श्लोकीं केचित् प्रक्षिप्तामाहुः । लोकबालघ्नी राक्षसी रुधिराशना पूतना जिघांसया अपि हरये स्तनं दत्त्वा सद्गतिम् आप ॥ ३५ ॥ किमिति ॥ पुनस्तदा श्रद्धया भक्त्या परमात्मने कृष्णाय अनुरक्ताः प्रीत्यतिशययुक्तास्तस्य कृष्णस्य मातरो यथा प्रियतमं वस्तु तस्मै प्रयच्छन्ति स्म तथा किंचित् प्रियतमं वस्तु दत्त्वा सद्गतिम् आनुयात् । इत्यत्र किं नु वक्तव्यम् । अत्र जिघांसया किमुतौदासीन्येन किमुततरां श्रद्धया भक्त्या चेत्यर्थः । हरये भगवत्प्रादुर्भावमात्राय किमुत कृष्णाय परमात्मने सर्वपरमस्वरूपायावतारिणे विषस्तनमपि किमुत विषेतरद्वस्तु किमुततरां प्रियं किमुततमां प्रियतरं किमुतातितमां प्रियतमं पूतनानाम्ना प्रसिद्धा राक्षस्यपि किमुत मानुषः किमुततरां भक्ताः किमुततमां रक्ताः अनुरागयुक्ताः । तत्रापि किमुततमां तन्मातरोऽतिवत्सलाः वत्साहरणलीलागतास्तास्वप्यतितमामनिर्वाच्यत्वात् । श्रीयशोदा तु दूरत एव प्रणति पात्रीकृत्यैव स्थापिता नतूल्लिखितेति करणसंप्रदानकर्मकर्तृपदेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैमुत्यमण्डलीमातर इति बहुत्वं वत्साहरणाभिप्रायमिति स्वामिपादाः । एतेन द्वादशाद्यध्यायत्रयी न स्वामिसम्मतेति परास्तम् ॥ ३६ ॥ पद्भ्यामिति ॥ भगवान् श्रीकृष्णः भक्तहृदिस्थाभ्यां लोकवन्दितैर्ब्रह्मादिभिरपि वन्द्याभ्यां पद्भ्यां यस्याः पूतनाया अङ्गं देहं समाक्रम्य स्तनमपिबत् ॥ ३७ ॥ सेति ॥ सा यातुधानी राक्षसी वैरिण्यपि यदि जनन्योर्देवकीयशोदयोरुचितां गतिं स्वर्गं वैकुण्ठाख्यम् अवाप स्वर्वासं मेऽभिकाङ्क्षिण इति वैकुण्ठेऽपि स्वर्गपदप्रयोगदर्शनात् । जनन्याः श्रीयशोदायाः प्रकाशभेदेन गतिर्यत्र इति जननीगतिम् इत्यपि व्याख्यान्तरम् । तदा कृष्णेन भुक्तं स्तनक्षीरं यासां ताः गावो मातरश्च तां गतिमनुप्राप्ता इति किमु वक्तव्यम् ॥ ३८ ॥ पयांसीति ॥ हे राजन् देवकीपुत्रः कैवल्यादिकम् अखिलं पुरुषार्थजातं प्रददाति सः भगवान् पुत्रस्नेहेन पुत्रदृष्ट्या यः स्नेहस्तेन स्नुतानि अवगलितानि यासां गवां गोपीनां च पयांस्यलं सन्तोषपूर्वकमपिबत् ॥ ३९ ॥ तासामिति ॥ तासामविरतं निरन्तरं कृष्णे सुते क्षणं पुत्रदृष्ट्या स्नेहं कुर्वतीनां पुनः अज्ञानेन सम्यक् भवतीति अज्ञानसंभवः संसारो न कल्पते न

पद्भ्यां भक्तहृदिस्थाभ्यां वन्द्याभ्यां लोकवन्दितैः ॥ अङ्गं यस्याः समाक्रम्य भगवानपिबत्स्तनम् ॥ ३७ ॥ सा यातुधान्यपि स्वर्गमवाप जननीगतिम् ॥ कृष्णभुक्तस्तनक्षीराः किमु गावो नु मातरः ॥ ३८ ॥ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलम् ॥ भगवान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥ ३९ ॥ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम् ॥ न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ॥ ४० ॥ कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः ॥ किमिदं कुत एवेति वदन्तो व्रजमाययुः ॥ ४१ ॥ ते तत्र वर्णितं गोपैः पूतनागमनादिकम् ॥ श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ॥ ४२ ॥ नन्दः स्वपुत्रमादाय प्रेत्यागतमुदारधीः ॥ मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ॥ ४३ ॥

योग्यो भवति ॥ ४० ॥ कटधूमस्येति ॥ कटस्य श्मशानस्य चितायाः संबन्धिनो धूमस्य सौरभ्यमगरुधूमसुगन्धतुल्यसुगन्धं ये पूतनागमनात् पूर्वमेव गोचरणार्थं दूरं गतास्ते व्रजौकसो व्रजवासिनो नन्दादयोऽन्ये च अवघ्राय किमिदमाश्चर्यं कुतो वा गन्ध आयातीति वदन्तो व्रजमाययुः ॥ ४१ ॥ ते तत्रेति ॥ ते आगताः गोपास्तत्र स्थितैर्गोपैर्वर्णितं पूतनागमनमादिपदेन तत्स्वरूपचेष्टादिकं तस्या निधनं मरणं शिशोः कृष्णस्य स्वस्ति सुखेन स्थितिं च श्रुत्वा सुविस्मिता आसन् ॥ ४२ ॥ नन्द इति ॥ हे कुरूद्वह प्रोष्य मथुरायामुषित्वा आगतः उदारधीः नन्दः पाठान्तरे प्रेत्य मृत्वा पुनरागतमिव स्वपुत्रं श्रीकृष्णमादायाङ्कमारोप्य मूर्धन्युपाघ्राय परमां मुदं लेभे । एतदारभ्यैव व्रजे भगवतोऽधोक्षजाख्याभूदिति हरिवंशे । अधः अक्षशब्दोपलक्षितशकटगतेन पूतनामारणान् ततश्च गोपैः पुनर्जातोयमित्युक्तेश्चेति ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य एतदिति ॥ कृष्णस्य भगवतोऽद्भुतमार्भकं बालचरितमेतत्पूतनामोक्षाख्यं यो मर्त्यो मनुष्यः श्रद्धया आदरेण शृणुयात् श्रवणकीर्तनादिना धारयेत् स गोविन्दे तस्मिन्नेव रतिं लभते ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमषष्ठेऽध्याये व्यधादिमाम् ॥ ६ ॥ सप्तमे शकटोत्क्षेपस्तृणावर्त्तवधस्तथा । मुखे विश्वेक्षणं तत्र श्लोकाः सिन्धुरवह्नयः ॥ उवाचयुग्मं च चतुश्चत्वारिंशदनुष्टुभः ॥ ७ ॥ बालचरितसमापनमिवाशङ्क्य पुनः प्रेरयति—येन येनेति द्वयम् ॥ हे प्रभो यद्यपि भगवान् ईश्वरः हरिः येन येन मत्स्याद्यवतारेण यानि यानि कर्माणि करोति तानि नोऽस्माकं श्रोतणां कर्णयोः रम्याणि शब्दत एव सुखावहानि तथा मनोज्ञानि अर्थतो मनसो हर्षकराणि च भवन्त्येव । तथापि मन्यसे चेत् मद्भृत्योऽयं श्रवणेन कृतार्थो भवतु इति यदि मन्यसे तर्हि यच्छृण्वतः पुंसः पुंमात्रस्य अरतिर्मनोग्लानिः वितृष्णा विविधा तृष्णा च अपैति अपगच्छति । यद्वा । वितृष्णा तृष्णाया अभावः अपैति रुचिरुत्पद्यत इति । सत्वम् अन्तःकरणं च शुद्ध्यति हरौ भक्तिः प्रेमातिशयः तत्पुरुषे भगवद्भक्ते सख्यं चेति सर्वमचिरेणैव युगपत् भवति तदेव हारं हरेश्चरितं मनोहरं हारवद्धृदये धार्यं वा वद । यद्वा । येन येनावतारेण हरिर्यानि कर्माणि करोति तानि सर्वाण्यपि मनोज्ञान्येव । किंच

य एतत्पूतनामोक्षं कृष्णस्याऽऽर्भकमद्भुतम् ॥ शृणुयाच्छ्रद्धया मर्त्यो गोविन्दे लभते रतिम् ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे पूतनामोक्षनिरूपणं नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ राजोवाच ॥ ॥ येन येनावतारेण भगवान् हरिरीश्वरः ॥ करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो ॥ १ ॥ यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्त्वं च शुद्ध्यत्यचिरेण पुंसः ॥ भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत् ॥ २ ॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम् ॥ मानुषं लोकमासाद्य तज्जातिमनुरुन्धतः ॥ ३ ॥ श्रीशुक उवाच ॥ कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषिताम् ॥ वादित्रगीतद्विजमन्त्रवाचकैश्चकार सूनोरभिषेचनं सती ॥ ४ ॥

यत्किंचिदपि हरिचरितं शृण्वतः पुंसः अरतिनिवृत्त्यादिफलं भवत्येव तथापि बालचरितमल्पमेव कथितमतः पुनरपि तदेव बाल्ये कृतमेव हारं हरेश्चरितं वदेति । शेषं प्राग्वत् ॥१॥२॥ अथेति ॥ अथ तस्मात् मानुषं लोकं भूलोकमासाद्य तज्जातिं मनुष्यजातिम् अनुरुन्धतः अनुकुर्वतः श्रीकृष्णस्य पूर्वोक्तात् अन्यत् अपि अद्भुतमाश्चर्यजनकं तोकाचरितं बालचरितं वद ॥३॥ कदाचिदिति ॥ त्रैमासिकस्य च पदा शकटोऽपवृत्त इति ज्ञापकात्तादृशस्यैवोत्थानसंभवाच्च कदाचित् मासत्रयवयसि सति "मास्यस्य चरणावुदक्" इत्यत्र तु मासा परिच्छेदका यस्येति व्याख्येयम् । उत्थानं शिशोरङ्गपरिवर्त्तनमिति स्वामिपादाः । उत्तानशायिनः शिशोस्तिर्यक्छयनसामर्थ्योद्गम इति चक्रवर्त्ती । बहिर्निष्क्रमणमित्यन्ये । तस्मिन्सति करणीये औत्थानिके कौतुकाप्लुवे उत्सवाभिषेके तस्मिन्नेव दिने जन्मर्क्षस्य रोहिणी नक्षत्रस्य योगे च सति नाक्षत्रमासारम्भे इति तोषणी । महोत्सवे समवेतानां मिलितानां योषितां व्रजस्त्रीणां मध्ये सती यशोदा वादित्रैर्गीतैः द्विजानां ब्राह्मणानां मन्त्रवाचकैश्च सह ब्राह्मणैः क्रियमाणं प्रोक्षणरूपं सूनोरभिषेचनं चकार ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

नन्दस्येति ॥ कृतं मज्जनादि स्नानादि यस्य तम् आदिशब्देन वस्त्राभरणकस्तूरीतिलकादि गृह्यते । अन्नं च आद्यम् अदनीयं तदुपकरणं च । अन्नाज्येति पाठे तु अन्नं च आज्यं घृतं च वासांसि च स्रक् माला च अन्यच्चाभीष्टं प्रार्थितं धेनवश्च तैः अन्नादिभिः सुपूजितैः सत्कृतैर्विप्रैः कृतस्वस्त्ययनं कृतरक्षाबन्धनादिकं संजातनिद्राक्षं सञ्जातनिद्रे अक्षिणी यस्य तं बालं नन्दस्य पत्नी यशोदा शनैर्निद्राभङ्गो यथा न स्यात्तथा अशीशयत् शकटस्याधस्तात्प्रेङ्खे पर्यङ्के वा शायितवती ॥ ५ ॥ औत्थानिकेति ॥ औत्थानिके उत्थानोत्सवे औत्सुक्यमुत्साहस्तद्युक्तं मनो यस्याः मनस्विनी उदारचित्ता सा यशोदा बालान् स्वपुत्रपार्श्वे संस्थाप्येति ज्ञेयम् । समागतान् व्रजौकसो वस्त्रालङ्कारादिना पूजयती सतीनुमभाव आर्षः । तद्व्यापारासक्ता सुतस्य रुदितं नैवाशृणोत् । भगवांस्तु स्तनार्थी सन् रुदन् चरणावुदक्षिपत् ऊर्ध्वं चालितवान् । यदि मद्रोदनशब्देन नावदधासि तर्हि शकटस्फोटनशब्देनावधापयामि इति कुप्यन्निव शकटं भङ्क्तुं तथा कृतवान् ॥ ६ ॥ अधः इति ॥ तदा शकटस्याधः शयानस्य शिशोरल्पकः अल्पप्रमाणश्चासौ प्रवालवन्मृदुश्च योऽङ्घ्रिस्तेन हतमत एव विध्वस्तानि नानारसवन्ति कुप्यभाजनानि स्वर्णरजतातिरिक्तकांस्यादिमयानि पात्राणि यथा भवन्ति तथा । चक्रे च अक्षश्च

नन्दस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः ॥ ५ ॥ औत्थानिकौत्सुक्यमना मनस्विनी समागतान् पूजयती व्रजौकसः ॥ नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत् ॥ ६ ॥ अधःशयानस्य शिशोरनोऽल्पकप्रवालमृद्वङ्घ्रिहतं व्यवर्तत ॥ विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम् ॥ ७ ॥ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः ॥ नन्दादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ॥ ८ ॥ इति ब्रुवन्तोतिविषादमोहिता जनाः समन्तात्परिवव्रुरार्तवत् ॥ ऊचुरव्यवसितमतीन्गोपान्गोपीश्च बालकाः ॥ रुदतानेन पादेन क्षिप्तमेतन्न संशयः ॥ ९ ॥

चक्राक्षाः व्यत्यस्ताश्चक्राक्षा यस्मिन् विभिन्नः कूबरो युगन्धरो यस्मिंस्तच्च तच्च यथा भवति तथा अनः शकटं व्यवर्तत विपरीतमपतत् । शकटासुरभञ्जन इति ब्रह्माण्डपुराणगतभगवन्नामशतकस्तोत्रवचनात् । असुरावेशेनैव भूमौ प्रविशच्चक्रत्वादुच्चस्यापि शकटस्याल्पकेन चरणेन स्पर्शः दैत्यश्चान्तर्हित एव ममारेति ॥ ७ ॥ दृष्ट्वेति ॥ यशोदाप्रमुखा यासां ताः या औत्थानिके कर्मणि समागताः पर्वणीत्यपि पाठः । व्रजस्त्रियः नन्दादयो गोपाश्च सर्वेऽपि जनाः तत्पतितं शकटं दृष्ट्वा तत्पतनमद्भुतमाश्चर्यजनकमतस्तस्य दर्शनेनाकुलाः संभ्रान्ताः तथोत्पातशङ्कयातिविषादेन दुःखेन मोहिताश्च सन्तः कथं वै शकटं स्वयमेव विपर्यगात् विपरीतमपतदिति ब्रुवन्तः शकटं बालं च समन्तात् सर्वतः आर्तवत्परिवव्रुः परिवेष्टितवन्त इति सार्धान्वयः । क्वचिदिति ब्रुवन्त इति श्लोकार्द्धं नास्ति तत्र विपर्यगात् इत्यूचुरिति क्रियाशेषेणान्वयः ॥ ८ ॥ ऊचुरिति ॥ तदा अव्यवसिता किं कश्चिदुत्पातः किंवा स्वाभाविकमस्य पतनमित्यत्रानिश्चिता मतिर्येषां तान् गोपान् तथाभूता गोपीश्च प्रति रुदता अनेन बालेन पादेनैतच्छकटमाक्षिप्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातितमत्र संशयो नास्तीति तत्र क्रीडन्तो बालका ऊचुः ॥ ९ ॥ न ते इति ॥ ते एवमुक्ता नन्दादयो गोपाः बालभाषितमिति कृत्वा उत इति वितर्के एतत् न संभवति एते बालाः किं जानन्ति इति तर्कयन्तः न श्रद्दधिरे तद्वाक्ये विश्वासं न जग्मुः । यस्मादप्रमेयममितमतर्क्यं बलं यत्तस्य बालकस्यास्ति तत् ते न विदुः ॥ १० ॥ रुदन्तमिति ॥ ग्रहशङ्किता अस्मिन्प्रविष्टः कश्चित् ग्रहो रोदनं कारयतीति शङ्कायुक्ता यशोदा रुदन्तं सुतमादाय प्रथमं स्तनं न दत्तवती किंतु प्रथमं सूक्तैः रक्षोघ्नैर्मन्त्रैः कृत्वा विप्रैः कृतस्वस्त्ययनं कृतरक्षाबन्धनादिकं सन्तं स्तनमपाययत् ॥ ११ ॥ पूर्ववदिति ॥ बलिभिर्बलवद्भिर्गोपैः । यद्वा । अष्टसु दिक्षु स्थापितैर्दध्यादिबलिभिः सहितं सपरिच्छदं परिच्छदा अवयवाः तत्सहितं गोपैः पूर्ववत्स्थापितं महान्तं शकटं विप्राः हुत्वा ग्रहादिशान्त्यर्थं होमं विधाय दध्यक्षतकुशाम्बुभिरर्चयांचक्रुः । स्वाश्रयधनत्वात् लक्ष्म्यधिष्ठानत्वाच्च शकटस्य पूजनम् ॥ १२ ॥ येऽसूयेति ॥ ये ब्राह्मणाः असूया परगुणेषु दोषाविष्करणम् अनृतं मिथ्याभाषणं दम्भः परवञ्चनाय धर्मानुष्ठानम्

न ते श्रद्दधिरे गोपा बालभाषितमित्युत ॥ अप्रमेयं बलं तस्य बालकस्य न ते विदुः ॥ १० ॥ रुदन्तं सुतमादाय यशोदा ग्रहशङ्किता ॥ कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥ ११ ॥ पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदम् ॥ विप्रा हुत्वाऽर्चयांचक्रुर्दध्यक्षतकुशाम्बुभिः ॥ १२ ॥ येऽसूयानृतदम्भेर्ष्याहिंसामानविवर्जिताः ॥ न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥ १३॥ इति बालकमादाय सामर्ग्यजुरुपाकृतैः ॥ जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥ १४ ॥ वाचयित्वा स्वस्त्ययनं नन्दगोपः समाहितः ॥ हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणम् ॥ १५ ॥ गावः सर्वगुणोपेता वासःस्रग्रुक्ममालिनीः ॥ आत्मजाभ्युदयार्थाय प्रादात् ते चान्वयुञ्जत ॥ १६ ॥

ईर्ष्या परगुणासहनं हिंसा परपीडनं मानः अभिमान एतैर्दोषैर्विवर्जितास्तेषां सत्ये यथार्थभाषणे शीलं येषां तेषां कृताः । तैः प्रयुक्ताः शेषे षष्ठी आशिषो विफला न भवन्तीति ॥ १३ ॥ इतीति द्वयम् ॥ इति एवं समाहितः कृतनिश्चयो नन्दगोपो बालकमादाय सामर्ग्यजुर्भिर्मन्त्रैः उपाकृतैः अभिमन्त्रितैः पवित्राः सर्वारिष्टनिवर्तकाः ओषधयो येषु तैर्जलैः साधनभूतैः द्विजोत्तमैः कर्तृभिः अभिषिच्य अभिषेकं कारयित्वा द्विजैः स्वस्त्ययनं पुण्याहं वाचयित्वा अग्निं हुत्वा ग्रहादिशान्त्यर्थं हावयित्वा आत्मजस्याभ्युदयः सर्वोपद्रवशान्तिपूर्विकाभिवृद्धिः स एवार्थः प्रयोजनं तदर्थं महागुणं षड्रससुगन्धादियुक्तमन्नं द्विजातिभ्यः प्रादात्तान्भोजितवानित्यर्थः अभिषिच्य हुत्वा इत्यन्तर्भावितण्यर्थौ ॥ १४ ॥ १५ ॥ गाव इति ॥ तथा सर्वगुणोपेता बहुदोग्ध्रीः सुन्दरीः साध्वीश्च अलङ्कारार्थं वासः स्रक् पुष्पमाला रुक्ममयी माला च विद्यते यासां ता गावः गाश्च प्रादात् । ते च द्विजातयः अनु अनन्तरमेव आशिषः अयुञ्जत योजितवन्तः । गाव इति प्रथमा आर्षी ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विप्रा इति ॥ ते च विप्राः मन्त्रविदो युक्ताः योग्याश्च अतस्तैर्या आशिषः प्रोक्तास्तास्तस्मिन्कदाचिदपि निष्फला अन्यथा न भविष्यन्ति किन्तु तथैव जाता इति स्फुटं निश्चितमेवैतत् ॥ १७ ॥ एकदेति ॥ एकहायन आसीन इति षड्विंशाध्याये वक्ष्यमाणत्वात् एकदा एकाब्दवयसि सति आरोहमुत्सङ्गमारूढं सुतं लालयन्ती सती यशोदा गिरिकूटवत् गिरिसमूहवत् गिरिशिखरवद्वा शिशोर्गरिमाणं भारं वोढुं न सेहे । अत्रास्या एकाकित्वं दासीनां कर्मान्तरनियुक्तत्वम् । अत्र यदि यशोदा कृष्णं नावतारयेत् तदा यशोदया सह तृणावर्त्तः कृष्णं नयेत् अतः उत्सङ्गादुत्तारणार्थं भगवान् गुरुर्बभूव इति ज्ञेयम् ॥ १८ ॥ भूमौ इति ॥ एवं भारेण पीडिता विस्मिता च सती गोपी यशोदा पर्यङ्के स्थापने पर्यङ्कभङ्गभयात् तं बालं सास्तरणायां भूमौ निधाय उत्पातशङ्कया जगतां महापुरुषं भगवन्तमादध्यौ । त्वया दत्तः पुत्रस्त्वयैव संरक्षणीय इति प्रार्थितवती । ततश्च तत्स्वस्त्ययनाद्यर्थं कर्मसु ब्राह्मणाह्वानादिषु आस बभूव । भगवदुदरवर्तिनां जगतां भारेण पीडिता इति वान्वयः ॥ १९ ॥ दैत्य इति द्वयम् ॥ कंसस्य

विप्रा मन्त्रविदो युक्तास्तैर्याः प्रोक्तास्तथाशिषः ॥ ता निष्फला भविष्यन्ति न कदाचिदपि स्फुटम् ॥ १७ ॥ एकदाऽऽरोहमारूढं लालयन्ती सुतं सती ॥ गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् ॥ १८ ॥ भूमौ निधाय तं गोपी विस्मिता भारपीडिता ॥ महापुरुषमादध्यौ जगतामास कर्मसु ॥ १९ ॥ दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रणोदितः ॥ चक्रवातस्वरूपेण जहारासीनमर्भकम् ॥ २० ॥ गोकुलं सर्वमावृण्वन् मुष्णंश्चक्षूंषि रेणुभिः ॥ ईरयन्सुमहाघोरशब्देन प्रदिशो दिशः ॥ २१ ॥ मुहूर्त्तमभवद्गोष्ठं रजसा तमसावृतम् ॥ सुतं यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः ॥ २२ ॥ नापश्यत्कश्चनात्मानं परं चापि विमोहितः ॥ तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः ॥२३ ॥ इति खरपवनचक्रपांसुवर्षे सुतपदवीमबलाऽविलक्ष्य माता ॥ अतिकरुणमनुस्मरन्त्यशोचद्भुवि पतिता मृतवत्सका यथा गौः ॥ २४ ॥

भृत्यः प्रणोदितः कंसेन प्रेषितः नाम्ना तृणावर्त्तः तृणवत् सकलं विश्वमावर्तयति इति व्युत्पत्त्यातिदुष्टः दैत्यः रेणुभिः गोकुलं सर्वमावृण्वन् जनानां चक्षूंषि च मुष्णन् दर्शनायोग्यानि कुर्वन् महाघोरेण शब्देन प्रदिशः विदिशः दिशश्च ईरयन् निनादयन् चक्रवातो वातमण्डली तेन स्वरूपेण आसीनम् अर्भकं जहार । हरणसमये च भगवान् पुनर्लघुर्जातोऽन्यथा सोऽपि तं हर्तुं न शक्नुयादिति ज्ञेयम् ॥ २० ॥ २१ ॥ मुहूर्तमिति ॥ गोष्ठं व्रजं मुहूर्त्तमात्रं रजसा रेणुना तमसा अन्धकारेण चावृतमभवत्- यशोदा यतो यत्र सुतं न्यस्तवती स्थापितवती तस्मिन् स्थाने तं नापश्यत् ॥ २२ ॥ नापश्यदिति ॥ तृणावर्तेन निसृष्टाभिः प्रक्षिप्ताभिः शर्करादिभिः सिकताभिरुपद्रुतः अतो मोहितः व्याकुलचित्तः कश्चनापि जनः आत्मानं परं चकारात् घटपटादिकं च नापश्यत् चान्नाशृणोच्च ॥ २३ ॥ इति खरेति ॥ इत्येवं खरात्तीक्ष्णात् पवनचक्रात् पांसुवर्षे सति सुतस्य पदवीं मार्गमविलक्ष्य अदृष्ट्वा अबला तद्दर्शनोपाये असमर्था माता यशोदा अतिकरुणमतिदैन्यं यथा भवति तथा तमनुस्मरन्ती अकृतार्थाहमित्यात्मा-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमशोचत् । तथा मृतवत्सका गौर्यथा भुवि पतति तथा भुवि पतिता ॥२४॥ रुदितमिति ॥ तृणावर्त्तवात्याशब्दे यशोदारोदनं गोपीभिर्न श्रुतम् अनु पश्चात् उपारतो निवृत्तः पांशुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तस्या रुदितं निशम्य तत्रागत्य नन्दसूनुमनुपलभ्य अदृष्ट्वा भृशमनुतप्ता धीर्यासां ताः अत एवाश्रुभिः पूर्णानि मुखानि यासां ता गोप्यो रुरुदुः ॥ २५ ॥ तृणावर्त्त इति ॥ वात्यारूपधरः तृणावर्तः प्रथमं बालकान्तरमिव कृष्णं हरन् नभः अत्यूर्ध्वं गतः ततस्तस्य मारणाय पुनर्भगवता धृतं भूरि भारं बिभर्त्तीति तादृशः । अत एव भारवशाच्छान्तरयो निवृत्तवेगोऽभूत् । ततश्च वोढुमशक्तस्ततोऽग्रे गन्तुं नाशक्नोत् ॥ २६ ॥ तमश्मानमिति ॥ आत्मनः गुरुमत्तया अतिगौरवेण तमद्भुतार्भकं श्रीकृष्णम् अश्मानं नीलपर्वतप्रायं मन्यमानस्त्यक्तवात्यारूपः कृष्णेन बाललीलया गले गृहीतः बालो हि पतनभयाज्जनं गाढं गले गृह्णाति तद्वत् अत उत्स्रष्टुं त्यक्तुमिच्छन्नपि नाशक्नोत् । अश्मानम् अश्मन्तमश्माणमिति पाठाः । पूर्वयोः क्रमान्मतुब्लोपवलोपौ छान्दसौ । अन्ते च अर्णशब्देन वर्णार्थेन प्रप्रोच्यते अश्मपदेन

रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ॥ रुरुदुरनुपलभ्य नन्दसूनुं पवन उपारतपांसुवर्षवेगे॥२५॥ तृणावर्तः शान्तरयो वात्यारूपधरो हरन् ॥ कृष्णं नभोगतो गन्तुं नाशक्नोद्भूरिभारभृत् ॥ २६ ॥ तमश्मानं मन्यमान आत्मनो गुरुमत्तया ॥ गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकम् ॥ २७ ॥ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ॥ अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे ॥ २८ ॥ तमन्तरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालम् ॥ पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः समेताः ॥ २९ ॥ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लम्बमानम् ॥ तं स्वस्तिमन्तं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तम् ॥ गोप्यश्च गोपाः किल नन्दमुख्या लब्ध्वा पुनः प्रापुरतीव मोदम् ॥ ३० ॥

लक्षणादिना पर्यन्तः । यद्वा । अश्मार्णं शिलासमुद्रमिव इति टीकाकृतः ॥२७॥ गलग्रहणेति ॥ गलग्रहणेनैव निश्चेष्टोऽत एव निर्गते लोचने यस्य सः अव्यक्तः बोधायोग्यो रावः शब्दो यस्य सः व्यसुः प्राणहीनः दैत्यस्तृणावर्त्तः व्रजे दोहानुसन्धानायोपवेशार्थं स्थापितायां महत्यां शिलायां न्यपतत् नितरां पृष्ठतः सर्वाङ्गपातमपतत् । पूतनाशब्दादिभिरिव व्रजवासिनां भयं मा भूदिति गलग्रहणेन नभस्येव मारणम् ॥ २८ ॥ तमन्तरिक्षादिति ॥ रुद्रस्य शरेण विद्धं पुरं यथा तद्वत् अन्तरिक्षान्निरालम्बादाकाशात् शिलायां पतितम् अत एव विशीर्णसर्वावयवं करालं भयङ्कररूपं तं तृणावर्त्तं समेता मिलिता रुदत्यः स्त्रियो ददृशुः रुदत्य इति नुम्रहितः शुद्धः पाठः ॥२९॥ प्रादायेत्यर्द्धम् ॥ तस्योरसि लम्बमानम् आघाताभावेन निर्व्यथं श्रीकृष्णं च दृष्ट्वा तं प्रादाय गृहीत्वा मात्रे यशोदायै प्रतिहृत्य समर्प्य विस्मिताश्च बभूवुः । तृणावर्तशरीरं च गोपैर्यमुनायां वाहितमिति ज्ञेयम् । तमिति । विहायसा आकाशमार्गेण पुरुषादेन रक्षसा नीतमपि मृत्युमुखात् प्रमुक्तमिति ल्यब्लोपे पञ्चमी । मृत्युमुखं प्राप्येव प्रकर्षेण तं मारयित्वा

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

मुक्तमित्यर्थः । तं श्रीकृष्णं स्वस्तिमन्तं पुनर्लब्ध्वा नन्दमुख्याः नन्दादयो गोपा गोप्यश्चातीव मोदं हर्षं प्रापुः । किल प्रसिद्धौ । पुनरिति पूतनापेक्षया ॥ ३० ॥ तेषां मिथो हर्षकथामाह—अहो इति ॥ बतेति हर्षे । अहो आश्चर्यम् अतिबलेन रक्षसा एष बालो निवृत्तिं मृत्युं गमितः प्रापितोऽपि अमङ्गलभयात् विनाशादिशब्दानुपादानं स्वयमेव पुनरभ्यगात् अभिमुखमगात् । अभिभयरहितं यथा स्यात्तथा अगादिति वा इति अत्यद्भुतम् । अयं खलः क्रूरस्वभावः अत एव हिंस्रः परहिंसापरायणः अतो हिंसाजनितेन स्वपापेनैव हिंसितः साधुः सदाचारनिष्ठश्च समत्वेन समदृष्ट्या भयाद्विमुच्यते वयं साधवोऽतोऽस्मद्बालोयं विमुक्त इति भावः ॥ ३१ ॥ किं न इति ॥ यत् यस्मात् तपआदिपुण्यविशेषात् परेतोऽपि मृत्युंगतोऽपि बालकः स्वबन्धून् अस्मान् प्रणयन् हर्षयन् उज्जीवयन् पुनरुपस्थितः समागतः तद्दिष्ट्या भद्रं जातम् । अत्र विषये किं नोऽस्माभिः तपः कृच्छ्रचान्द्रायणादि अधोक्षजस्य भगवतोऽर्चनं पूर्तं वापीकूपतडागादिनिर्माणम् इष्टं पञ्चयज्ञादि अग्निहोत्रादि दत्तं तुलापुरुषादि दानं भूतसौहृदं सर्वप्राणिषु भगवद्बुद्ध्या सम्माननं चीर्णमाचरितमिति न जानीमः । चीर्णमिति पृषोदरादित्वात् ॥ ३२ ॥ दृष्ट्वेति ॥ एवंविधानि बहुशः अद्भुतानि चरितानि

अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः ॥ हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते ॥ ३१ ॥
किं नस्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तमुत भूतसौहृदम् ॥ यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबन्धून्प्रणयन्नुपस्थितः ॥ ३२ ॥ दृष्ट्वाद्भुता-
नि बहुशो नन्दगोपो बृहद्वने ॥ वसुदेववचो भूयो मानयामास विस्मितः ॥ ३३ ॥ एकदार्भकमादाय स्वाङ्कमारोप्य भामिनी ॥ प्रस्नुतं पाय-
यामास स्तनं स्नेहपरिप्लुता ॥ ३४ ॥ पीतप्रायस्य जननी सा तस्य रुचिरस्मितम् ॥ मुखं लालयती राजन् जृम्भतो ददृशे इदम् ॥ ३५ ॥

बृहद्वने महावनाख्ये नन्दगोपो दृष्ट्वा विस्मितः सन् भूयः पुनः पुनर्वसुदेवस्य "सन्त्युत्पाताश्च गोकुले" इति वचः मानयामास सत्यममन्यत । बहुश इति । अन्यान्यपि माथुरलोकप्रसिद्धानि चरितानि सूचितानि । शुकस्तु सप्तदिनावधित्वात्तानि नोचे ॥ ३३ ॥ एकदेति ॥ एकदा अर्भकं बालकमादाय क्रीडन्तं गृहीत्वा स्वाङ्कमारोप्य भामिनी परमसौभाग्यवती स्नेहेन परिप्लुता व्याप्ता यशोदा प्रस्नुतं स्रवत्पयस्कं स्तनं पाययामास ॥ ३४ ॥ पीतेति ॥ हे राजन् पीता गावो विभक्ता भ्रातर इतिवत् कर्माविवक्षया कर्तरि क्तः । प्रायेण पीतः पीतप्रायः यद्वा पीतं पानं प्रायमीषन्न्यूनं यस्य तस्य श्रीकृष्णस्य रुचिरं स्मितं यत्र तत् मुखं लालयती लालयन्ती नुमभाव आर्षः । ॥ २७ ॥ सा जननी यशोदा जृम्भतः जृम्भमाणस्य आर्षः शता । तस्य कृष्णस्य मुखे इति शेषः । इदं वक्ष्यमाणं खादिकं ददृशे तङार्षः । कृष्णस्य मुखं लालयन्ती तद्द्वारा जठरे ददर्शेति वा । "कृत्स्नस्य चान्तर्जठरे जनन्या" इत्युक्तेः । मुखे इत्यपि पाठः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खमिति ॥ खमाकाशं रोदसी द्यावापृथिव्यौ ज्योतिरनीकं तारादिसमूहम् आशा दिशः सूर्यम् इन्दुं वह्निं श्वसनं वायुम् अम्बुधीन् समुद्रान् द्वीपान् जम्ब्वादीन् नगान् द्वीपाख्याकरान् जम्ब्वादिवृक्षान् पर्वतान् वा तदुहितॄः नदीः वनानि स्थिराणि स्थावराणि जङ्गमानि च यानि भूतानि तानि च ददृशे ॥ ३६ ॥ सा वीक्ष्येति ॥ हे राजन् सा यशोदा सहसा अकस्मादेकदैवैवं पुत्रमुखे विश्वं वीक्ष्य भीता मृगशावस्येव त्रस्ते अक्षिणी यस्याः तादृशी अत एव जातवेपथुः सञ्जातकम्पा सती भयादेव एतद्दर्शनं मा भूदित्यभिप्रायेण नेत्रे संमील्य सुविस्मिता किमिदं मया दृश्यत इत्याश्चर्ययुक्ता आसीत् । यद्वा । विस्मिता भगवद्ध्यानार्थं नेत्रे निमील्य भगवन्नस्मादुत्पातान्मत्पुत्रं पाहीति चिन्तयन्ती आसीत् ॥ ३७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ गङ्गासहायो निरमाद्दशमस्कन्धसप्तमे ॥ ७ ॥ अष्टमे नामकरणं तथा मृज्जग्धियोगतः ॥ मुखे विश्वनिरीक्षात्र श्लोकाः सार्द्धा द्विमार्गणाः ॥ संतोवाचेति पादोना एकषष्टिरनुष्टुभः ॥ ८ ॥ असुरवधप्रसङ्गात्तृणावर्त्तवधमुक्त्वा तत्प्राचीनानि नामकरणादीन्युपक्रमते इदं च नामकरणं जन्मतः शततमे दिने शकटोच्चाटनानन्तरं गर्गागमे कृतं शततमे दिनेऽपि विधानात् । गर्ग इति ॥ हे राजन् सुमहत्तपो यस्य तादृशः यदूनां

खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनाम्बुधींश्च ॥ द्वीपान्नगांस्तदुहितॄर्वनानि भूतानि यानि स्थिरजङ्गमानि ॥ ३६ ॥ सा वीक्ष्य विश्वं सहसा राजन्संजातवेपथुः ॥ संमील्य मृगशावाक्षी नेत्रे आसीत्सुविस्मिता ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे तृणावर्तमोक्षो नाम सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ गर्गः पुरोहितो राजन्यदूनां सुमहातपाः ॥ व्रजं जगाम नन्दस्य वसुदेवप्रचोदितः ॥ १ ॥ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृताञ्जलिः ॥ आनर्चाधोक्षजधिया प्रणिपातपुरःसरम् ॥ २ ॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिम् ॥ नन्दयित्वाऽब्रवीद् ब्रह्मन्पूर्णस्य करवाम किम् ॥३॥ महद्विचलनं नृणां गृहिणां दीनचेतसाम्॥निःश्रेयसाय भगवन्कल्पते नान्यथा क्वचित् ॥४॥

पुरोहितः अत एव पुत्रयोर्नामकरणार्थं वसुदेवेन प्रचोदितो गर्गो नन्दस्य व्रजं जगाम आगतः ॥ १ ॥ तं दृष्ट्वेति ॥ तं गर्गं दृष्ट्वा नन्दः परमप्रीतः प्रत्युत्थाय कृताञ्जलिश्च सन् प्रणिपातपुरःसरं यथा भवति तथा अधोक्षजधिया भगवानेवागत इति बुद्ध्या आनर्च ॥२॥ सूपविष्टमिति ॥ नन्दः एवं कृतमतिथेर्हितमातिथ्यं पादप्रक्षालनादिभोजनान्तं यस्मै तम् अत एव सूपविष्टं सुष्ठु सुखेन मार्गश्रमराहित्येन उपविष्टं मुनिं गर्गं सूनृतया मधुरया गिरा नन्दयित्वा हर्षयित्वा हे ब्रह्मन् पूर्णस्य निजानन्दपूर्णस्य तव वयं किं करवाम कमप्युपकारं कर्तुं न समर्था इत्यब्रवीत् ॥ ३ ॥ महदिति ॥ हे भगवन् महतां भवादृशानामाप्तकामानां विचलनं स्वाश्रमात्परगृहे गमनं दीनचेतसां व्याकुलचित्तानां गृहिणां गृहस्थानां क्षणमपि गृहं त्यक्तुमशक्तानां नृणां मादृशानां निःश्रेयसाय मङ्गलायैव कल्पते घटते । अन्यथा स्वप्रयोजनाय क्वचित् न घटते वामनसनत्कुमारादीनामाप्तकामानामपि बलिपृथुप्रभृतिगृहगमनदर्शनात् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्योतिषामिति ॥ यत् यस्मादतीन्द्रियवस्तुविषयकं ज्ञानं भवति तत् ज्योतिषां ग्रहादीनामयनं फलद्योतकं ज्योतिःशास्त्रं भवता साक्षात् प्रणीतम् अन्यनिरपेक्षेण रचितं येन शास्त्रेण अन्योऽपि पुमान् परं पूर्वजन्मकृतं कर्म अवरम् एतज्जन्मनि सुखादिकं च वेद जानाति अतोऽनयोर्बालयोरपि जन्मफलं कथयेत्यर्थः ॥ ५ ॥ किञ्च—त्वमिति ॥ त्वं न केवलं ज्योतिर्विदेव किंतु ब्रह्मविदां वेदज्ञानामपि श्रेष्ठः अतस्त्वमनयोर्बालयोर्नामकरणादिसंस्कारान् कर्तुमर्हसि कुरु । नन्वेतद्गुरुः कुर्यादिति चेदाह । हि यस्मात् जन्मना उत्पत्तिमात्रेणैव ब्राह्मणो नृणां मनुष्यमात्रस्य गुरुः किं पुनस्त्वादृशो विद्यादिमान् ॥ ६ ॥ नामकरणं गुप्तं कारयितुं युक्त्या प्रत्याचक्षाण इवाह—यदूनामिति ॥ यतोऽहं यदूनां यदुकुलोद्भवानामाचार्यो भुवि सर्वदा ख्यातश्चास्मि भवतां यदुत्वेऽपि क्षत्रियत्वाभावान्न यदुत्वख्यातिः । अतः मया संस्कृतं ते तव सुतं लोकः कंसो वा देवकीसुतं मन्यते मंस्यते ॥ ७ ॥ कंस इति द्वयम् ॥ पापमतिः कंसः “ किं मया हतया मन्द जातः खलु तवान्तकृत् । ” इति देवक्या दारिकाया वचः श्रुत्वा देवक्या

ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतीन्द्रियम् ॥ प्रणीतं भवता येन पुमान्वेद परावरम् ॥ ५ ॥ त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान्कर्तुमर्हसि ॥ बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ॥ ६ ॥ गर्ग उवाच ॥ यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा ॥ सुतं मया संस्कृतं ते मन्यते देवकीसुतम् ॥७॥ कंसः पापमतिः सख्यं तव चानकदुन्दुभेः ॥ देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥ ८ ॥ इति संचिंतयञ्छ्रुत्वा देवकीदारिकावचः ॥ अपि हन्ता गताशङ्कस्तर्हि तन्नोऽनयो भवेत् ॥ ९ ॥ नन्द उवाच ॥ अलक्षितोऽस्मिन्रहसि मामकैरपि गोव्रजे ॥ कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकम् ॥१०॥ श्रीशुक उवाच ॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् ॥ चकार नामकरणं गूढो रहसि बालयोः॥११॥ गर्ग उवाच॥ अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः ॥ आख्यास्यते राम इति बलाधिक्याद्बलं विदुः ॥ यदूनामपृथग्भावात्संकर्षणमुशन्त्युत ॥ १२ ॥

अष्टमो गर्भोऽपि स्त्रीभवितुं नार्हतीति नित्यं चिन्तयन् क्वचिदस्तीति विचार्य तव आनकदुन्दुभेश्च सख्यं चिन्तयन् त्वद्गृहे स्यादिति संभाव्य हन्त खेदे अपि यदि मत्संस्कारलिङ्गेन आगता आशङ्का तव गृहे देवक्यष्टमसुतस्थितिसंभावना यस्य तथाविधः स्यात् तर्हि तत् मत्कर्तृकसंस्कारकरणं नोऽस्माकम् अनयः अनर्थः भवेत् । न इति नन्दादीनपि क्रोडीकरोति । यद्वा । आगताशङ्कः अपि यदि हन्ता कृष्णादीन् हनिष्यति तर्हि तत् नोऽनयो भवेदित्यन्वयः ॥ ८ ॥ ९ ॥ अलक्षित इति ॥ मामकैर्मदन्तरङ्गैरपि गोपैरलक्षितः अज्ञात एवास्मिन् गोव्रजे गोशालायां रहसि एकान्ते स्थितः सन्स्वस्तिवाचनपूर्वकं द्विजातीनामावश्यकं संस्कारमात्रमेव त्वं कुरु । उत्सवादिकं तु कालान्तरे कारयिष्यामीत्याशयः । गोशालात्वेन शुद्धतादिने सपालानां गवां वने गमनादेकान्तता ॥ १० ॥ एवमिति ॥ एवं नन्देन संप्रार्थितो विप्रो गर्गस्तत् गुप्ततया संस्कारकरणं तु स्वस्य चिकीर्षितं कर्तुमिष्टमेवातो गूढः सन् रहसि बालयोर्नामकरणं चकार ॥ ११ ॥ अयं हीति सार्द्धम् ॥ अयं हि रोहिणीपुत्रः सुहृदः सर्वान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसंबन्धिनः स्वगुणैः सुशीलतादिभिः रमयन् लोके स्वयमेव लोकैः राम इति आख्यास्यते विख्यातः करिष्यते । मत्कर्तृकत्वं तु व्याजमात्रम् एवमग्रेपि । अस्य बलाधिक्यात् बलिष्ठत्वादेनं जना बलं विदुः बल इति व्यवहरिष्यन्तीत्यर्थः । कुतश्चिद्धेतोः विप्रतिपद्यमानानांयदूनामपृथग्भावात् परस्परशिक्षया सर्वैकमत्यकरणात् सम्यक् कर्षति एकीकरोतीति संकर्षणमुत अपि उशन्ति मन्यन्ते वक्ष्यन्तीत्यर्थः । यद्वा । यदूनां भवदादीनां वसुदेवादीनाम् अपृथग्भावान्निर्विशेषपितृत्वादिभावात् स्वस्मिन्नुभयकुलस्याकर्षणात् संकर्षणमुशन्ति । " यादवेष्वपि सर्वेषु भवन्तो मम वल्लभाः । " हरिवंशे रामवचनात् । गर्भसंकर्षणं तु न प्रकाशनीयमत इदं नामान्यथोक्तम् ॥ १२ ॥ आसन्निति ॥ अनुयुगं युगे युगे तत्तन्मूर्तीर्गृह्णतोऽस्य तव पुत्रस्य शुक्लो रक्तस्तथा पीतश्चेति त्रयो वर्णा आसन् इदानीं तु द्वापरस्यान्ते कृष्णतां गतः अतः कृष्णनाम भविष्यति । यद्यपि पीतवर्णावतारस्य युगप्रकरणेऽन्यत्र च न प्रसिद्धिः कृते शुक्ल इत्यादिष्वनुक्तेः तथापि " सुवर्णवर्णो हेमाङ्गः " इति भारतादौ दर्शनादवताराणामनन्तत्वात्कचित्पीतवर्णत्वसंभवः । नन्दस्तु मत्पुत्रस्य जन्मान्तरवृत्तमिति मन्यते स्म ॥ १३ ॥ प्रागिति अयं श्रीमांस्तवात्मजः क्वचित् प्राक्समये

आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १३ ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥ १४ ॥ बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १५ ॥ एष वः श्रेय आधास्यद्गोपगोकुलनन्दनः ॥ अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ १६॥ पुरानेन व्रजपते साधवो दस्युपीडिताः॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥ १७ ॥

वसुदेवस्य सुतो जातः अतः अभिज्ञाः ये अभितोऽस्य स्वरूपं जानन्ति त एनं वासुदेव इति संप्रचक्षते कथयन्ति । वासुदेवशब्दस्य वास्तवार्थे भगवतः प्रकटनभयादन्यथा प्रदर्शनम् । प्रागिति सामान्योक्त्या जन्मान्तरवृत्तमेतदिति नन्दो मन्यते स्म ॥ १४ ॥ बहूनीति ॥ गुणानुरूपाणि सर्वेश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोवर्धनोद्धरणः कालियदमनइत्यादीनि तव सुतस्य बहूनि नामानि रूपाणि च सन्ति तानि च सर्वाणि अहं दैवज्ञोऽपि नो वेद न जानामि । किम्पुनर्जना न विदुरिति । नन्दस्तु मत्पुत्रस्य जन्मान्तरगतमेतदिति मन्यते स्म ॥ १५ ॥ जातकफलमाह—एष इति ॥ गोपान् गोकुलं च नन्दयति तथाभूतः गोपेति संबुद्धिर्वा । एष वो युष्माकं सर्वेषां श्रेयः सुखम् आधास्यत् करिष्यतीति इलोप आर्षः । अनेनैव रक्षकेण सर्वाणि दुर्गाणि महतोऽप्युपद्रवान् अञ्जः अनायासेनैव यूयं तरिष्यथ अतिक्रमिष्यथ ॥ १६ ॥ पुरेति ॥ हे व्रजपते पुरा अराजके दस्युभिश्चौरैः पीडिताः साधवः अनेन रक्ष्यमाणाः समेधिताः संवर्धिताश्च सन्तस्तान् दस्यून् जिग्युः निर्जितवन्तः । अत्र पुरा जन्मान्तरे साधवो देवाः दस्युभिर्दैत्यैः पीडिताः अराजके इन्द्रपदच्युतौ इति गूढोऽर्थः ॥ १७ ॥

Nepal Sanskrit University, Beldanga

CC-0. In Public Domain. Digitization by eGangotri

य एतस्मिन्निति ॥ ये महाभागाः मानवाः एतस्मिन् त्वत्पुत्रे प्रीतिं कुर्वन्ति विष्णुः पक्षे येषां तान् देवान् असुरा इव एतान् अरयः शत्रवो न अभिभवन्ति न तिरस्कुर्वन्ति ॥ १८ ॥ तस्मादिति ॥ हे नन्द यस्मादेवं तस्मादयं तवात्मजो गुणैर्भक्तवात्सल्यादिभिः श्रिया ऐश्वर्येण कीर्त्या यशसा अनुभावेन प्रभावेण च नारायणस्य समः नारायणेन कृपया स्वतुल्यः पुत्रस्तुभ्यं दत्तः । त्वं च सुष्ठु समाहितः एकाग्रचित्तः सन्नेनं गोपाय रक्ष गोपायस्वेति पाठे तदर्थः । यद्वा । अयं त्वत्पुत्रः गोपानाम् आये लाभे अये शुभावहे विधौ वा सुसमाहितः पाठान्तरे स्वेनात्मना समाहितो भविता । नारायणसम इति श्रुत्वैव मुकुन्दइत्यादीनि नामानि नन्देन स्थापितानि गोपादिभिर्व्यवह्रियन्ते स्म ॥ १९ ॥ इत्यात्मानमिति ॥ इत्येवम् आत्मानं नन्दं प्रति समादिश्य सम्यगुपदिश्य गर्गे स्वगृहं गते सति नन्दः प्रमुदितः सन्नात्मानमाशिषामाशीर्भिः शेषे षष्ठी । अभिमतार्थैः पूर्णं मेने । एतदनन्तरं स्वपुरोहितादीनानाय्य प्रकटमेव नामकर्मोत्सवं चकारेति बोध्यते ॥ २० ॥ कालेनेति ॥ रामकेशवौ व्रजता गच्छताल्पेनैव कालेन नामकरणानन्तरमल्पे

य एतस्मिन्महाभागाः प्रीतिं कुर्वन्ति मानवाः ॥ नारयोऽभिभवन्त्येतान्विष्णुपक्षानिवासुराः ॥१८॥ तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ॥ श्रिया कीर्त्याऽनुभावेन गोपायस्व समाहितः ॥१९॥ श्रीशुक उवाच ॥ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते ॥ नन्दः प्रमुदितो मेने आत्मानं पूर्णमाशिषाम् ॥ २० ॥ कालेन व्रजताऽल्पेन गोकुले रामकेशवौ ॥ जानुभ्यां सहपाणिभ्यां रिङ्गमाणौ विजह्रतुः ॥ २१ ॥ तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ घोषप्रघोषरुचिरं व्रजकर्दमेषु ॥ तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरन्ति मात्रोः ॥ २२ ॥ तन्मातरौ निजसुतौ घृणया स्नुवन्त्यौ पङ्काङ्गरागरुचिरावुपगुह्य दोर्भ्याम् ॥ दत्त्वा स्तनं प्रपिबन्तोः स्म मुखं निरीक्ष्य मुग्धस्मितालपदशनं ययतुः प्रमोदम् ॥ २३॥

काले गते तृणावर्त्तवधात्प्रागेव जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ शानजार्षः चानश् वा । गोकुले व्रजे विजह्रतुः विहारं चक्रतुः ॥ २१ ॥ ताविति ॥ तौ रामकृष्णौ घोषाः कटिपादभूषणकिङ्किण्यस्तेषां प्रघोषेण प्रकृष्टनादेन यद्वा घोषाणां घोषस्थानां गोपगोपीनां प्रघोषः हो हो हो इति मुखेन करतालिकया च शब्दः तेन रुचिरं यथा स्यात्तथाङ्घ्रियुग्ममनुकृष्य व्रजकर्दमेषु गोरसादिकर्दमयुक्तव्रजाङ्गणेषु सरीसृपन्तौ द्रुतं कुटिलं गच्छन्तौ अभ्यस्ताच्छतुर्नुमार्षः । ततश्च तेषां घोषाणां नादेन हृष्टं मनो ययोस्तौ लोकं जनमितस्ततो गच्छन्तमनुसृत्य त्रीणि चत्वारि वा पदान्यनुगम्य पश्चात्तेन परावृत्य दृष्टे सति तन्मुखं दृष्ट्वा तं परकीयं ज्ञात्वा मुग्धप्रभीतवत् मात्रोः रोहिणीयशोदयोः अन्ति समीपम् उपेयतुः झटिति आजग्मतुः ॥ २२ ॥ तन्मातराविति ॥ तदा च घृणया कृपया स्नुवन्त्यौ स्तनाभ्यां पयः स्रवन्त्यौ नुमार्षः । तयोर्मातरौ पङ्केन लिप्तेन कर्दमेन अङ्गरागेण चन्दनेन च रुचिरौ । यद्वा । "सुन्दरे किं सुन्दरम्" इति न्यायेन पङ्क एवाङ्गरागस्तेन रुचिरौ निजसुतौ दोर्भ्यां भुजाभ्यामुपगुह्य संवेष्ट्य स्तनं दत्त्वा स्तनं प्रपिबतोस्तयोः मुग्धं मन्दं स्मितं यस्मिंस्तच्चासावल्पाः सूक्ष्मा दशना यस्मिंस्तच्चेति मुखं निरीक्ष्य प्रकृष्टं मोदं ययतुः प्रापतुः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यर्हीति ॥ यर्हि अङ्गनानां दर्शनीया दर्शनयोग्याः कुमारलीला ययोस्तथा भूतौ जातौ । तदा अन्तर्व्रजे व्रजस्य मध्ये सर्वदर्शनयोग्ये स्थाने ताभ्यामेव गृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणावुभावपि रामकृष्णौ कर्मभूतौ उज्झितगृहाः त्यक्तगृहकार्याः तदबला व्रजाङ्गनाः प्रेक्षन्त्यो निरीक्षमाणाः शतार्षः । हसन्त्यो जहृषुः हृष्टा बभूवुः । शयानानां वत्सानां पुच्छानि जानुचङ्क्रमणेन प्राप्य गृहीत्वा यदा मुष्टिं दृढं बध्नीतस्तदोत्थाय पलायमानैर्वत्सैराकृष्यमाणौ रुदतः बालभावात्पुच्छानि न त्यजतस्तदा सहन्त्यो गोप्यः पुच्छानि त्याजयामासुरिति पुच्छैरिति बहुत्वम् एकं त्यक्त्वान्यग्रहणादेकदैव बहुपुच्छग्रहणाद्वा ॥ २४ ॥ किंचिदधिकवयसोर्लीलामाह— शृङ्ग्यग्नीति ॥ तयोः रामकृष्णयोः जनन्यौ यशोदारोहिण्यौ यत्र यदा क्रीडापरौ क्रीडासक्तौ अतिचलौ चपलौ स्वसुतौ शृङ्गिणो गवादयः दंष्ट्रिणः कुक्कुरादयः असिः खड्गः द्विजाः पक्षिणः काकगृध्रादयः स्पष्टं शेषम् । असिस्थाने अहीति वा पाठः । एतेभ्यो निषेद्धुं निवारयितुं गृह्याणि गृहोचितानि कार्याणि अपिशब्दात् स्नानभो-

यर्ह्यङ्गनादर्शनीयकुमारलीलावन्तर्व्रजे तदबलाः प्रगृहीतपुच्छैः॥ वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षन्त्य उज्झितगृहा जहृषुर्हसन्त्यः ॥२४॥ शृङ्ग्यग्निदंष्ट्र्यसिजलद्विजकण्टकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुम् ॥ गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थाम् ॥ २५ ॥ कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले ॥ अघृष्टजानुभिः पद्भिर्विचक्रमतुरञ्जसा ॥ २६ ॥ ततस्तु भगवान्कृष्णो वयस्यैर्व्रजबालकैः ॥ सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम् ॥ २७ ॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम् ॥ शृण्वन्त्याः किल तन्मातुरिति होचुः समागताः ॥ २८ ॥ वत्सान्मुञ्चन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः ॥ मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भाण्डं भिनत्ति द्रव्यालाभे स गृहकुपितो यात्युपक्रोश्य तोकान् ॥ २९ ॥

जनदेवार्चनादीनि च कर्तुं न शेकाते । प्रकृतिभावाभाव आर्षः । तदा मनसोऽलमतिशयेनानवस्थां चापलाख्यं वात्सल्यपोषकसंचारिभावमापतुः गृहसौख्यस्य पराकाष्ठा दर्शिता ॥ २५ ॥ कालेनेति ॥ हे राजर्षे अल्पेनैव कालेन गच्छता रामः कृष्णश्च अघृष्टानि भूमिघर्षणमप्राप्तानि जानूनि येषु तैः पद्भिरञ्जसा श्रमं विनैव गोकुले विचक्रमतुः विशेषेण सर्वत्र गमनं चक्रतुः तङभाव आर्षः ॥२६॥ तत इति ॥ ततस्तदनन्तरं तु वयस्यैः समानवयस्कैर्व्रजबालकैः सह तथा सहरामो रामेण च सहितो भगवान् कृष्णो व्रजस्त्रीणां मुदं हर्षं जनयन् चिक्रीडे । कर्मव्यतिहारे तङ् ॥ २७ ॥ कृष्णस्येति ॥ गोप्यः कृष्णस्य रुचिरं कौमारचापलं वीक्ष्य समागताः सत्यः स्वयमनुभूतं लीलानन्दं यशोदामनुभावयितुं तस्य कृष्णस्य मातुर्यशोदायाः शृण्वन्त्याः नुमार्षः । ह स्फुटं यथा भवति तथैवेति वक्ष्यमाणमूचुः ॥ २८ ॥ वत्सानिति ॥ क्वचित् अस्माकमनवधानदशायाम् असमये अदोहकाले वत्सान्मुञ्चन् भवति तेन वत्सा एव पिबन्तीति भावः । यद्वा । शून्ये गृहे चौर्यं सुकरमिति गृहजनान्निःसारयितुमसमय एव वत्सान्मुञ्चति ततो वत्सान्

Nepal Sanskrit University - Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

परावर्त्तयितुं गृहजनेषु गतेषु दधि चोरयति ततः पलायते । अन्यस्मिन् दिने अये चौर इति क्रोशे जनैराक्रोशे कृते सञ्जातहासो भवति नतु बिभेतीत्यर्थः । अथ कल्पितैः स्तेययोगैः चौर्योपायैरर्जितं स्वादु दधि पयश्च अत्ति । चोरितमेवास्मै दध्यादि रोचत इत्यर्थः । तथा भोक्ष्यन् भोक्ष्यमाणः शतार्षः । प्रथमतो मर्कान् मर्कटान् प्रतिविभजति विभज्य ददाति तेषां मध्ये तृप्ततया स कश्चिन्मर्कटो नात्ति चेत्तर्हि विमनाः सन् दध्यादिपूर्णं भाण्डं भिनत्तीति द्रव्यस्य दध्यादेरलाभे सति सः गृहाय कुपितः गृहान् धक्ष्यामि इति कथयन् याति । यद्वा । गृहाः गृहस्थाः तेभ्यः कुपितः सन् तोकान् प्रसुतान् बालानुपक्रोश्य नखाघातादिना रोदयित्वा यातीति ॥ २९ ॥ हस्ताग्राह्य इति ॥ दध्यादिपदार्थे उत्तुङ्गशिक्यस्थत्वेन हस्ताग्राह्ये सति पीठकोलूखलाद्यैः पीठकं संस्थाप्य तदुपर्युलूखलमारोप्य आदिपदेन तदुपरि बालमारोप्य तत्स्कन्धारोहणादिना विधिं तदवतारणोपायं रचयति । यदि च तथाप्यवतारयितुं न शक्नोति तदा अन्तर्गृहभाण्डादिषु निहिते दध्यादौ वयुनं ज्ञानं यस्य सः तद्वित् छिद्रादिकरणकुशलः स शलाकादिना शिक्यस्थेषु भाण्डेषु धारापातनार्थं छिद्रं रचयति । तेनान्यान्पाययति स्वयं च पिबतीति । ध्वान्तयुक्ते अगारे तु धृता मणिगणा यस्मिंस्तत्स्वा-

हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्वित् ॥ ध्वान्तागारे धृतमणिगणं स्वाङ्गमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ॥ ३० ॥ एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ॥ इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी नह्युपालब्धुमैच्छत् ॥ ३१ ॥ एकदा क्रीडमानास्ते रामाद्या गोपदारकाः ॥ कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥ ३२ ॥

ङ्गमेवार्थस्य दध्यादिपदार्थस्य प्रदीपं प्रकाशकं रचयति । यर्हि यस्मिन् काले गोप्यो गृहकार्येषु सुव्यग्रचित्ता भवन्ति तदैवमुपद्रवं करोति ॥ ३० ॥ एवमिति ॥ हे उशति कमनीये यशोदे एवं रे चौर इत्याक्षिप्तः संस्त्वमेव चौर इत्यादीनि बहूनि धार्ष्ट्यानि कुरुते । यद्वा । उशति कमनीये सुसंस्कृते वास्तौ गृहे मेहनादीनि मूत्रोत्सर्गादीनि कुरुते आदिना उत्तरीयाकर्षणपादप्रहारादीनि । एवंविधानि बहूनि धार्ष्ट्यानि प्रागल्भ्यानि कुरुते । एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः त्वत्समीपे तु सुप्रतीकः साधुर्यथा तथास्ते सभये नयने यस्मिंस्तच्च तच्छ्रीयुक्तं च यच्छ्रीकृष्णस्य मुखं तदालोकिनीभिः पश्यन्तीभिः स्त्रीभिः एतेन गोपीभिर्यशोदामानन्दयितुमेव कृष्णचापलं कथितं नतु कोपयितुम्। इत्थं व्याख्यातः कथितोऽर्थः स्वगृहे कृतः कृष्णोपद्रवो यस्याः सा यशोदा बालप्रागल्भ्यश्रवणात् प्रहसितमुखी सती तं सुतमुपालब्धुम् आक्षेप्तुं नैवैच्छत् इच्छामपि नाकरोत् । किंतु वत्स एतास्विमं व्यवहारं कथं करोषीति सलालनमुवाचेत्याशयः ॥ ३१ ॥ अपराधउपालम्भे त्वाश्चर्यमभूदित्याह—एकदेति ॥ ते क्रीडमानाः कर्मण्यतिहारे शानच् । रामाद्या गोपानां दारका बालाः एकदा आगत्य कृष्णो मृदं भक्षितवान् इति मात्रे यशोदायै न्यवेदयन् ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा इति ॥ हितैषिणी सा यशोदा भयेन सम्भ्रान्तप्रेक्षणे चपलनिरीक्षणे अक्षिणी यस्य तं कृष्णं पलायनाशङ्कया करे गृहीत्वा उपालभ्य निर्भर्त्स्य अभाषत ॥ ३३ ॥ कस्मादिति ॥ अदान्तः अवशीकृत आत्मा यस्य हे चपलगात्र चञ्चलचित्त वा रहः एकान्ते भवान् मृदं कस्माद्धेतोर्भक्षितवान् । हि यतः एते तावकाः तव हितैषिणः कुमारा वदन्ति तथा अयं ते अग्रजो रामोऽपि वदति ॥ ३४ ॥ श्रीकृष्णस्तु न बाह्यं किंचिन्मया भक्ष्यते आदावेव सर्वं मम कुक्षावस्तीति पश्येत्याह स्म—नाहमिति ॥ हे अम्ब मातः अहं मृदं न भक्षितवान् एते तु सर्वे मिथ्याभिशंसिनः अनृतमेव वदन्ति । यदि ते सर्वे सत्यगिरः यथार्थवक्कार इति त्वं मन्यसे तर्हि मे मम मुखं समक्षं प्रत्यक्षं पश्य ॥ ३५ ॥ यद्येवमिति ॥ यद्येवं त्वया मृन्न भक्षिता चेत्तर्हि व्यादेहि मुखं प्रसारय आस्यविहरणत्वान्न तङ् इति तयोक्तःअव्याहतमप्रतिहतमैश्वर्यं यस्य सः भगवान् ऐश्वर्यादिषड्गुणपूर्णः अपि क्रीडार्थमेव मनुजबालकः स हरिः व्यादत्त मुखं प्रसारितवान् ॥ ३६ ॥ सा तत्रेति ॥ सा यशोदा तत्र

सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी ॥ यशोदा भयसंभ्रान्तप्रेक्षणाक्षमभाषत ॥ ३३ ॥ कस्मान्मृदमदान्तात्मन्भवान्भक्षितवान्रहः ॥ वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययम् ॥ ३४ ॥ नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥ ३५ ॥ यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान्हरिः ॥ व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥ ३६ ॥ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः ॥ साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकम् ॥ ३७ ॥ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च ॥ वैकारिकाणीन्द्रियाणि मनोमात्रा गुणास्त्रयः ॥ ३८ ॥ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिङ्गभेदम् ॥ सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शङ्काम् ॥ ३९ ॥

विवृते मुखे जगत् जङ्गमं स्थास्नु स्थावरं खम् अन्तरिक्षलोकं दिशः साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूलोकं वायुः प्रवहः अग्निर्वैद्युतः इन्दुः चन्द्रः तारकाश्च तत्सहितं विश्वं ददृशे । तङार्षः ॥ ३७ ॥ ज्योतिरिति ॥ ज्योतिश्चक्रं स्वर्लोकं जलं तेजोऽग्निः नभस्वान् वायुः वियत् आकाशः वैकारिकाणि सात्विकाहङ्कारकार्यभूता इन्द्रियाभिमानिन्यो देवताः इन्द्रियाणि राजसाहङ्कारकार्याणि मन इति वैकारिकेष्वन्तर्भूतमपि देवतावैलक्षण्यज्ञापनाय पृथगुक्तम् मात्राः तामसाहङ्कारकार्यभूताः शब्दस्पर्शरूपरसगन्धाः त्रयो गुणाः एतान्यपि ददर्श । अत्रातीन्द्रियाणामपि दर्शनं भगवद्दत्तसामर्थ्यादेव ज्ञेयम् ॥ ३८ ॥ एतदिति ॥ एवं सूनोर्बालस्य तनौ शरीरे तत्रापि विदारिते आस्ये मुखे अल्प एव जीवो भोक्ता कालो गुणक्षोभकः स्वभावश्च परिणामहेतुः कर्म च जन्महेतुः आशयश्च कर्मवासनाप्रवृत्तिहेतुः एतैर्लिङ्गानां चराचरशरीराणां भेदो यस्मिंस्तत् एतद्विचित्रं विश्वं वीक्ष्य तत्र क्वचिद्देशे सहात्मानमात्मना यशोदया कृष्णेन च सहितं व्रजं च सह एकदैव वीक्ष्य शङ्कामवाप ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

शङ्कामेवाह—किमिति ॥ यन्मया दृष्टं तदेतत् किं स्वमः परितो विलोक्य नायं स्वम इत्याह । उत अथवा देवस्य हरेर्माया तर्हि कुतोऽन्ये न पश्यन्ति तत्राह । किंवा अथवा बत खेदे मदीय एव कश्चिद्बुद्धिमोहो विपर्यासः दर्पणे मुखमिव पश्यामि तर्हि कृष्णोऽपि कथमन्तः प्रतीयते तत्राह । अथो अथवा अमुष्य ममार्भकस्यैव "नारायणसमो गुणैः" इति गर्गोक्तिगम्यः यः कश्चनौत्पत्तिकः स्वाभाविकः आत्मयोगः स्वीयमैश्वर्यम् ॥ ४० ॥ चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्याह—अथो इति ॥ अथो अतः कारणात् चेतोमनःकर्मवचोभिः यथावत् याथातथ्येन अञ्जसा अनायासेन यत्स्वरूपं विनेति यावत् । न वितर्कगोचरं तर्कागोचरमिदं विश्वं यदाश्रयं यदधिष्ठानं येन कारणाधिष्ठात्रा यतो बुद्धिवृत्त्यभिव्यक्तात् प्रकाशकात् प्रतीयते । सुदुर्विभाव्यम् अचिन्त्यं तत्पदं वस्तु परमात्मरूपं प्रणतास्मि ॥ ४१ ॥ अहमिति ॥ अहं यशोदा अमुष्य व्रजेश्वरस्य नन्दस्याखिलवित्तया सकलधनाद्यधिष्ठात्री सती जाया असौ नन्दः मम पतिः एष कृष्णो मे सुतः सहगोधनाः गोधनादिसहिताः गोप्यो गोपाश्च मे मदीया इत्थं

किं स्वप्न एतदुत देवमाया किंवा मदीयो बत बुद्धिमोहः ॥ अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥ ४० ॥ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरञ्जसा ॥ यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणताऽस्मि तत्पदम् ॥ ४१ ॥ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती ॥ गोप्यश्च गोपाः सह गोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ॥ ४२ ॥ इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः ॥ वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥ ४३ ॥ सद्यो नष्टस्मृतिर्गोपी साऽऽरोप्यारोहमात्मजम् ॥ प्रवृद्धस्नेहकलिलहृदयाऽऽसीद्यथा पुरा ॥ ४४ ॥ त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः ॥ उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम् ॥४५॥ राजोवाच ॥ नन्दः किमकरोद्ब्रह्मञ्छ्रेय एवं महोदयम् ॥ यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥ ४६ ॥

यस्य मायया मे मम अभिमानरूपा कुमतिः कुत्सिता मतिरस्ति स एव भगवान् मे गतिः मायातो रक्षकोऽस्तु ॥ ४२ ॥ इत्थमिति ॥ गोपिकायां यशोदायाम् इत्थं विदितं तत्वं यया तथाभूतायां सत्यां विभुः समर्थः ईश्वरः सः श्रीकृष्णः पुत्रस्नेहमयीं वैष्णवीं स्वशक्तिरूपां मायां व्यतनोत् । तस्याः संमोहनार्थं विस्तारितवान् ॥ ४३ ॥ सद्य इति ॥ सद्य एव नष्टा स्मृतिः पूर्वोक्तं परमेश्वरज्ञानं यस्याः सा गोपी यशोदा आत्मजमारोहमङ्कमारोप्य यथा पुरा पूर्ववत् प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्यास्तथा आस आसीत् ॥ ४४ ॥ त्रय्येति ॥ त्रय्या वेदपूर्वभागेन कर्मकाण्डेन इन्द्रादिरूपेण उपनिषद्भिर्वेदोत्तरभागेन ब्रह्मरूपेण सांख्यैः पुरुषरूपेण योगैः परमात्मरूपेण सात्वतैः पञ्चरात्रादिवैष्णवतन्त्रैर्भगवद्रूपेण चकारात् पशुपतिमते शिवादिरूपेण चोपगीयमानं माहात्म्यं यस्य तं हरिं सा यशोदात्मजममन्यत ॥ ४५ ॥ नन्द इति ॥ हे ब्रह्मन् नन्दः तथा यस्याः स्तनं हरिः पपौ सा महाभागा यशोदा च एवं महोदयं महाफलम् एवंविधं श्रेयःसाधनं किम् अकरोत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितराविति ॥ ययोः प्रसन्नः सन्नवतीर्णस्तौ पितरौ देवकीवसुदेवावपि यत् कृष्णस्योदारं महत् अर्भकेहितं बालचरितं न अन्वविन्देतां नानुभूतवन्तौ यत् लोकानां श्रोत्रादीनां शमलापहं पापनाशकं यत् कवयो व्यासादयः अद्यापि गायन्ति तच्चरितं योऽनुभूतवान् या चानुभूतवती सः नन्दो यशोदा च किं श्रेयोऽकरोत् इत्यनुषङ्गः ॥ ४७ ॥ द्रोण इति ॥ वसूनां मध्ये प्रवरो द्रोणः द्रोणाख्यो वसुः धरया धराख्यया भार्यया सह ब्रह्मणः आदेशान् गोपालनादीन् करिष्यमाणस्तं प्रसन्नतापन्नं ब्रह्माणमुवाच ॥ ४८ ॥ जातयोरिति ॥ भुवि जातयोर्नौ आवयोर्दम्पत्योः महादेवे विश्वेश्वरे हरौ परमा भक्तिः स्यात् । लोके विद्यमानो जनो यया भक्त्या अञ्जः अनायासेन दुर्गतिं तरेत् ॥ ४९ ॥ अस्त्विति ॥ एवमस्त्विति ब्रह्मणा उक्तः सन्स द्रोणो व्रजे जज्ञे स एव भगवान् ऐश्वर्यादिमान् महायशानन्द इति ख्यातः प्रसिद्धः अभवत् । सा च धरा यशोदाऽभवत् ॥५०॥ तत इति ॥ हे भारत ततो ब्रह्मणो वरात् गोपगोपीषु मध्ये एकशेषाकरणं स्पष्टप्रतिपत्त्यर्थम् । अत एव " नौवयोधर्मविषमूलमूल० " इति सूत्रे

पितरौ नान्वविन्देतां कृष्णोदारार्भके हितम् ॥ गायन्त्यद्यापि कवयो यल्लोकशमलापहम् ॥ ४७ ॥ श्रीशुक उवाच ॥ द्रोणो वसूनां प्रवरो धरया सह भार्यया ॥ करिष्यमाण आदेशान्ब्रह्मणस्तमुवाच ह ॥ ४८ ॥ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ ॥ भक्तिः स्यात्परमा लोके ययाऽञ्जो दुर्गतिं तरेत् ॥ ४९ ॥ अस्त्वित्युक्तः स भगवान्व्रजे द्रोणो महायशाः ॥ जज्ञे नन्द इति ख्यातो यशोदा सा धराऽभवत् ॥ ५० ॥ ततो भक्तिर्भगवति पुत्रीभूते जनार्दने ॥ दम्पत्योर्नितरामासीद्गोपगोपीषु भारत ॥ ५१ ॥ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः ॥ सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥ ५२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे विश्वरूपदर्शनेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ श्रीशुक उवाच ॥ एकदागृहदासीषु यशोदा नन्दगेहिनी ॥ कर्मान्तरनियुक्तासु निर्ममन्थ स्वयं दधि ॥ १ ॥

मूलस्य नैकशेषः । तयोर्दम्पत्योस्तस्मिन् पुत्रीभूते जनार्दने भगवति नितरां निष्कामा अनवच्छिन्ना भक्तिरासीत् । गोपगोपीनामपि स्वभावाद् भक्तिरासीदेवेति ॥ ५१ ॥ कृष्ण इति ॥ विभुः कृष्णः ब्रह्मण आदेशं युवयोर्भगवति भक्तिरस्तु इति वचनं सत्यं कर्तुं रामेण सह व्रजे वसन् स्वस्य बाललीलया बालभावानुकारिण्या तेषां नन्दादीनां प्रीतिं चक्रे ॥ ५२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याष्टमे निरमादिमाम् ॥ ८ ॥ नवमे पय उत्सिक्ते भग्ने कृष्णेन भाजने ॥ माता बबन्ध तं दाम्ना तत्र श्लोकास्त्रिविंशाहवः ॥ उवाचेत्येकमर्द्धाढ्याः सैंत्तवेदा अनुष्टुभः ॥ ९ ॥ एकदेति ॥ एकदा तृतीयवर्षे दीपमालिकामहोत्सवदिने इति तोषणी । गृहदासीषु कर्मान्तरे इन्द्रयागकार्ये नियुक्तासु सतीषु नन्दस्य गेहिनी यशोदा दधि स्वयं निर्ममन्थ । अत्र श्यामैककर्णवदनन्तासु गोषु याः पद्मगन्धाख्या अतिस्वादुसुगन्धिदुग्धाः सत्ताढ्या एव गावः तासामेव दुग्धदध्यादिकं कृष्णस्य योग्यमिति मत्वा दासीः कर्मान्तरे नियुज्य दधि स्वयं निर्ममन्थ । उपलक्षणत्वाद्दुग्धमप्यावर्त्तयत् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यानीति ॥ तदा च दधिनिर्मन्थने काले गृहान्तःशायितो यः सः प्रसिद्धो बालस्तद्बालस्तस्य यानि यानि बालचरितानि इह व्रजे गीतानि कविभिर्गीतेषु निबद्धानि तानि स्मरन्ती गृहान्तःसुप्तकृष्णादर्शनोत्थस्वान्तःक्षोभस्य शान्तये अगायत । तङ्गार्षः ॥ २ ॥ क्षौममिति ॥ शोभने भ्रुवौ यस्याः सा सुभ्रूः । कबरात्केशबन्धात् विगलन्त्यो मालत्यो यस्याः सा । कबभाव आर्षः । यशोदापृथुकटितटे सूत्रनद्धं काञ्चीबद्धं क्षौमं कौशेयं वासो वस्त्रं बिभ्रती तथा जातकम्पं पुत्रस्नेहेन स्नुतं दुग्धस्रावि कुचयुगं च बिभ्रती चकाराज्जातकम्पं शिरश्च बिभ्रती रज्ज्वोराकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलन्तौ कङ्कणौ बिभ्रती कर्णयोः कुण्डले च बिभ्रती स्विन्नं स्वेदयुक्तं वक्रं बिभ्रती दधि निर्ममन्थ । यशोदायाः श्यामो वर्णः क्रमदीपिकायाम् सुवर्णतुल्यो गौतमीयतन्त्रे । पञ्च बिभ्रतीति व्याख्या निस्सारा ॥ ३ ॥ तामिति ॥ प्रातरन्तर्गृहात्प्रबुद्धय बहिर्निःसृत्य स्तन्यकामः दुग्धपानेच्छुः हरिः तां तदधि मथ्नतीं जननीं प्रत्यासाद्य आगत्य दधिमन्थानं मन्थनदण्डं गृहीत्वा प्रीतिमावहन् यथा प्रीतिः स्यात्तथा चेष्टां कुर्वन्नित्यर्थः ।

यानि यानीह गीतानि तद्बालचरितानि च ॥ दधिनिर्मन्थने काले स्मरन्ती तान्यगायत ॥ २ ॥ क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकम्पं च सुभ्रूः ॥ रज्ज्वाकर्षश्रमभुजचलत्कङ्कणौ कुण्डले च स्विन्नं वक्रं कबरविगलन्मालती निर्ममन्थ ॥ ३ ॥ तां स्तन्यकाम आसाद्य मथ्नतीं जननीं हरिः ॥ गृहीत्वा दधिमन्थानं न्यषेधत्प्रीतिमावहन् ॥ ४ ॥ तमङ्कमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखम् ॥ अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ॥ ५ ॥ स जातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमण्डभाजनम् ॥ भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयङ्गवमन्तरं गतः ॥ ६ ॥ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकम् ॥ भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥ ७ ॥

न्यषेधत् मन्थननिषेधं कृतवान् ॥ ४ ॥ तमङ्कमिति ॥ तदा सा यशोदा तस्य सस्मितं मुखमीक्षती सती आर्षः शता । अङ्कमारूढं तं स्नेहेन स्नुतं स्तनमपाययत् । तदा च अधिश्रिते चुल्लीमारोपिते पयस्युत्सिच्यमाने अतितापेनोद्रिच्यमाने सति तं कृष्णमतृप्तमेवोत्सृज्य त्यक्त्वा जवेन वेगेन ययौ तदुत्तारणार्थं जगाम । न चैतेन कृष्णादपि दुग्धे प्रीतिरधिकेति शङ्क्यम् । कृष्णार्थमेव तत्पय आवर्त्तितं तस्याधःपाते कृष्णस्यैव भोजने विलम्बसम्भावनात् प्रेमाधिक्यमेव कृष्णे ॥ ५ ॥ स जातकोप इति ॥ जातः कोपो यस्य सः कृष्णः कोपेन स्फुरितमरुणमधरं दद्भिः संदश्य तथा दृषदश्मना दृषत्संबन्धिकुट्टनपाषाणेन शिलापुत्रेण दधिमण्डः तक्रं तदाधारभूतं भाजनं दधिमन्थभाजनमिति पाठान्तरम् । निःशब्दं छिद्रेण तत्तले भित्त्वा मृषादुःखासंभवात् मिथ्यैवाश्रूणि यस्य तथाभूतोन्तरं गृहमध्यं गतश्च सन् रहः एकान्ते हैयंगवं नवनीतं जघास अभक्षयत् ॥ ६ ॥ उत्तार्येति ॥ ततश्च गोपी यशोदा सुशृतं सुपक्कं पय उत्तार्य चुल्लीतः अवतार्य पुनर्दधिमन्थनस्थानं प्रविश्य तत्र च दध्यमत्रकं दधिभाजनं भग्नं संदश्य तच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसुतस्य कर्म विलोक्य ज्ञात्वा जहास । तत्र च तं कृष्णमपश्यती अन्वेषयामास इति शेषः । नुमभाव आर्षः ॥७॥ अथ किङ्किणीशब्दादिना कृष्णं गृहान्तर्गतमनुमाय यशोदा यावत्तत्र यियासीत तावत्यक्षद्वारेण निःसृत्य कृष्णः प्राङ्गणं जगाम । यशोदा चान्तर्गृहात्तं निरीक्ष्य प्राङ्गणं गता तद्वृत्तमाह—उलूखलेति । नवनीतं गृहान्निष्कास्य बहिर्गत्वा उलूखलाङ्घ्रेः परिवर्तितस्योलूखलस्योपरि व्यवस्थितं शिचि शिक्ये स्थितं हैयंगवं नवनीतं कामं यथेष्टं मर्काय वानराय ददतं चौर्येण विशङ्किते चञ्चले यशोदागमनानुसन्धानपरे ईक्षणे यस्य तं सुतं दूरतो निरीक्ष्य शनैर्यथा पादाघातजनितशब्दं स न शृणुयात्तथा पश्चात् पृष्ठत आगमत् ॥ ८ ॥ तामिति ॥ आत्ता भीषणार्थं गृहीता यष्टिर्यया तां जननीमागच्छन्तीं प्रसमीक्ष्य सत्वरः त्वरया शैघ्र्येण युक्तः कृष्णः ततः उलूखलादवरुह्य भीतवत् अपससार पलायितवान् । तपसा विशुद्धमत एव प्रवेष्टुं क्षमं योग्यम् ईरितं तदेकाकारतां नीतमपि योगिनां मनो यं नाप तमपसरन्तं गोपी यशोदा ग्रहीतुमन्वधावत् ॥ ९ ॥ अन्वञ्चमानेति ॥ बृहत्योश्चलन्त्योः श्रोण्योर्भरेणाक्रान्ता स्तब्धा गतिर्यस्याः सा शोभनो मध्यमः प्रदेशो यस्याः सा जवेन वेगेन हेतुना विस्रंसितात्केशबन्धनाच्च्युतैः प्रसूनैरनुगतिर्गमनं यस्याः सा अन्वञ्चमाना श्रीकृष्णमनुगच्छन्ती जननी यशोदा तं परा पृष्ठतः अमृशत् धृतवती ॥ १० ॥ कृतागसमिति ॥ कृतम् आगः अपराधो भाण्डस्फोटनादि येन प्ररुदन्तम् अञ्जती सर्वतः प्रसरन्ती मषी कज्जलं ययोस्ते अक्षिणी स्वपाणिना कषन्तं संमर्दयन्तं भयेन विह्वले ईक्षणे नेत्रे यस्य तं भयभावनया उद्वीक्षमाणं उद्वीक्षमाण इति च पाठः । तं कृष्णं हस्ते गृहीत्वा भिषयन्ती भीषयन्ती भयमुत्पादयन्ती ह्रस्वः शता च आर्षौ । यष्ट्या इत्यध्याहारे तु ह्रस्वषुकावार्षौ । यशोदा अवागुरत् यष्ट्युत्थापनेन ताडनोद्यमं कृतवती नतु ताडयामास ॥ ११ ॥ त्यक्त्वेति ॥ अर्भकवत्सला बालके प्रेमयुक्ता अतद्वीर्यकोविदा तत्प्रभावानभिज्ञा यशोदा सुतं ताडनाद्भीतं विज्ञाय यष्टिं त्यक्त्वा तं दाम्ना बद्धुमियेष ऐच्छत् । बद्धुमित्यनकारः पाठश्चेदार्षः ॥ १२ ॥

उलूखलाङ्घ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितम् ॥ हैयङ्गवं चौर्यविशङ्कितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ॥ ८ ॥ तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्यापससार भीतवत् ॥ गोप्यन्वधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ॥ ९ ॥ अन्वञ्चमाना जननी बृहच्चलच्छ्रोणीभराक्रान्तगतिः सुमध्यमा ॥ जवेन विस्रंसितकेशबन्धनच्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥ कृतागसं तं प्ररुदन्तमक्षिणी कषन्तमञ्जन्मषिणी स्वपाणिना ॥ उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयन्त्यवागुरत् ॥ ११ ॥ त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला ॥ इयेष किल तं बद्धुं दाम्नाऽतद्वीर्यकोविदा ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकोविदत्वमाह—न चेति द्वयम् ॥ यस्य अन्तर्मध्यं न बहिर्न पूर्वं न अपरमपि च न यश्च जगतः पूर्वापरम् अन्तर्बहिश्च वर्त्तते यश्च जगद्रूपोऽपि अयं भावः । बन्धनं हि बहिः परिवृतेन दाम्ना अन्तरावृतस्य भवति तथा पूर्वापरविभागवतो वस्तुनः पूर्वतो दाम धृत्वा परितः परिवेष्टनेन भवति न त्वेतदस्ति इत्युक्तं न चान्तरिति व्याप्यस्य व्यापकेन बन्धो भवति । अत्र तु विपरीतमित्युक्तं पूर्वापरमिति । किञ्च तद्व्यतिरिक्तस्याभावान्न बन्ध इत्युक्तं जगदिति । तमधोक्षजम् अधः अक्षजम् इन्द्रियजन्यं ज्ञानं यस्य अत एव अव्यक्तं मर्त्यलिङ्गं मनुष्यमूर्तिं तं श्रीकृष्णमात्मजं मत्वा गोपिका यशोदा यथा प्राकृतं बालकं तन्माता बध्नाति तथा दाम्नोलूखले बबन्ध बन्द्धुमारभत ॥ १३ ॥ १४ ॥ तद्दामेति ॥ कृतागसः कृतापराधस्य तस्य स्वार्भकस्य बद्ध्यमानस्य सतस्तत् बन्धनसाधनभूतं दाम द्व्यङ्गुलोनं द्वाभ्यामङ्गुलाभ्यामपूर्णमभूत्तदा सा गोपिका यशोदा तेन दाम्ना सहान्यदपि दाम सन्दधे ग्रथितवती ॥१५॥ यदासीदिति ॥ एवमुभयसन्धानेन यदेकं दामासीत्तदपि द्व्यङ्गुलन्यूनं जातं तदा तेनाऽपि सहान्यद्दाम

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ॥ पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः ॥ १३ ॥ तं मत्वाऽऽत्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम् ॥ गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥ १४ ॥ तद्दामबद्ध्यमानस्य स्वार्भकस्य कृतागसः ॥ द्व्यङ्गुलोनमभूत्तेन संदधेऽन्यच्च गोपिका ॥ १५ ॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे ॥ तदपि द्व्यङ्गुलं न्यूनं यद्यदादत्तबन्धनम् ॥ १६ ॥ एवं स्वगेहदामानि यशोदा संदधत्यपि ॥ गोपीनां सुस्मयन्तीनां स्मयन्ती विस्मिताऽभवत् ॥ १७ ॥ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयाऽऽसीत्स्वबन्धने ॥ १८ ॥ एवं संदर्शिता ह्यङ्ग हरिणा भक्तवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥ नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥ २० ॥

सन्दधे तदा तदपि द्व्यंगुलं न्यूनं जातमेवं यद्यदादत्तसन्धानं कृत्वा गृहीतवती तत्तद्बन्धनं द्व्यङ्गुलोनमेवाभूत् । एतेन कृष्णस्य परिच्छिन्नायमानस्यापि विभुत्वं व्यञ्जितम् ॥१६॥ एवमिति ॥ एवं स्वगेहस्थानि सर्वाणि दामानि सन्दधत्यपि यशोदा तत्प्रयासं निष्फलं दृष्ट्वा सुस्मयन्तीनां स्मितं कुर्वतीनां गोपीनां मध्ये स्वयमपि स्मयन्ती विस्मिताऽभवत् । शता आर्षः॥१७॥ स्वमातुरिति॥ तदा च कृष्णः स्विन्नं स्वेदयुक्तं गात्रं देहो यस्यास्तस्याः विस्रस्ताः कबरात्केशबन्धात् स्रजो यस्यास्तस्याः स्वमातुः परिश्रममितस्ततो रज्ज्वन्वेषणतत्परिवेष्टनजन्यं दृष्ट्वा कृपया स्वयमेव स्वबन्धने आसीत् ॥ १८ ॥ न चैवं स्वातन्त्र्यभङ्ग इत्याह—एवमिति ॥ अङ्ग हे राजन् हि निश्चये सेश्वरमीश्वरैर्लोकनाथैर्ब्रह्मादिभिः सहितमिदं विश्वं यस्य वशे वर्तते तेन स्ववशेन स्वाधीनेनापि कृष्णेन हरिणा आत्मनः भक्तवश्यता सम्यक् दर्शिता ॥१९॥ नेममिति ॥ विमुक्तिदात् भगवतः सकाशात् यत् यं प्रसादं स्वबन्धनादिकं गोपी यशोदा प्राप तत् तम् इमं प्रसादं विरिञ्चो ब्रह्मा पुत्रोऽपि न लेभे भवः पौत्रोऽपि न लेभे । अङ्गसंश्रया उरसि लब्धपदा श्रीः पत्न्यपि न लेभे । एवमेते त्रयोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न लेभिरे । अत्र लेभिरे इति क्रियापदं बहुवचनान्तम् एकवचनान्तैर्विरिञ्चादिभिरन्वयमलभमानं प्रत्येकसहपठितनकारयोगाय स्वावयवभूतलेभेपदेन योगं प्रकल्पयति ततः समुदितपरामर्शकत्वयाऽध्याहृतैतच्छब्देन नकारत्रयस्थानापन्नैकनकारेण च योगान्न लेभिर इत्यन्वयः । न चैत्रो न मैत्रो न देवदत्तोऽत्रागच्छन्ति इतिवत् । भागवत एव प्रागपि "नाहं न यज्ञो नच यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम् । विदुः प्रमाणम्" इत्यादि । "नाहं न यूयं यद्दतां गतिं विदुर्न वामदेवः" इत्यादि । "न प्रद्युम्नो नानिरुद्धो न रामो नच केशवः । यस्य शेकुः परित्रातुं" इत्यादि च एतेन "न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥" इत्यादिकमपि व्याख्यातम् । अत एव चात्र श्रीस्वामिपादैरपि अन्वययोजनचिन्तापि न कृता । केचित्तु विरिञ्च्यादयो भगवत्प्रसादं न लेभिरे इति न अपि तु लेभिरे परंतु गोपी यं प्रसादं प्राप तं तु न लेभिरे । यद्वा । इमं प्रसादं ब्रह्मादयो न लेभिरे न लेभिरे न लेभिरे इति नञ्त्रयप्रयोगवशात् क्रियापदावृत्तिरिति । परे तु विरिञ्च्यादयो भक्तिरूपं प्रसादं लेभिर एव किन्तु यद्गोपी प्राप तत्तु विरिञ्चो न प्राप भवोऽपि न प्राप श्रीरपि न प्रापेत्याहुः । तत्सर्वं नात्यावश्यकम् ॥ २० ॥ नायमिति ॥

नायं सुखापो भगवान्देहिनां गोपिकासुतः ॥ ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ २१ ॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ॥ अद्राक्षीदर्ज्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ॥ २२ ॥ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् ॥ नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ ॥ २३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे गोपीप्रसादोलूखलबन्धनं नाम नवमोऽध्यायः ॥ ९ ॥ ॥ राजोवाच ॥ ॥ कथ्यतां भगवन्नेतत्तयोः शापस्य कारणम् ॥ यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः ॥ १ ॥

अयं गोपिकासुतः भगवान् इह संसारे वर्तमानानां देहिनां मध्ये यथा भक्तिमतां सुखापः सुखेनाप्यत इति सुखापः सुलभः तथा आत्मभूतानाम् "ज्ञानी त्वात्मैव मे मतः" इत्यात्मरूपतयोक्तानां ज्ञानिनामपि सुखापो न भवति । चोप्यर्थे । देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां निवृत्ताभिमानानामपीति स्वामिपादाः । गोपिकासुत इत्यनेन यशोदायास्तु सुत एवेति तया तु प्राप्य एवेति उपलक्षणमेतन्नन्दादेः ॥ २१ ॥ भक्तैर्बद्धस्याप्यन्यमोचकत्वमाह—कृष्ण इति द्वयम् ॥ प्रभुः कृष्णस्तु मातरि गृहकृत्येषु व्यग्रायां सत्यां यौ पूर्वं पूर्वजन्मनि गुह्यकौ यक्षौ धनदात्मजौ कुबेरपुत्रौ नलकुबरमणिग्रीवौ इति नामभ्यां ख्यातौ श्रियान्वितौ अभूतां तावेव पुरा मदाद्धेतोर्नारदस्य शापेन वृक्षतां प्रापितौ अतोऽर्जुनौ तन्नामवृक्षौ जातौ तौ अद्राक्षीत् ॥ २२ ॥ २३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याध्याये नवमे व्यधात् ॥ ९ ॥ दशमेऽपातयद्दिङ्गन्नर्जुनौ मध्यगो हरिः ॥ स्तुतस्तज्जातदेवाभ्यां तत्र श्लोकास्त्रिवार्द्धयः ॥ उवाँचसप्तकं साङ्घ्रिपञ्चवेदाँ अनुष्टुभः ॥ १० ॥ कथ्यतामिति ॥ हे भगवन् येन कर्मणा देवर्षेर्भागवतोत्तमस्यापि तमः क्रोधोऽभूत् तादृशं तयोर्नलकूबरमणिग्रीवयोर्यद्विगर्हितं निन्दितं शापस्य कारणं कर्म तत्कथ्यताम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रस्येति द्वयम् ॥ रुद्रस्यानुचरौ सेवकौ भूत्वाऽपि सुदृप्तौ अतिगर्वितौ मदो हर्ष उत्कटो ययोस्तौ धनदात्मजौ वारुणीं वरुणनिर्मितामतिमदहेतुं मदिरां पीत्वा तन्मदेन आघूर्णिते लोचने ययोस्तादृशौ भूत्वा रम्ये कैलासस्योपवने प्रवहन्ती या मन्दाकिनी तस्यां सामीप्ये सप्तमी । गङ्गासमीपे पुष्पिते वने अनुगायद्भिः स्त्रीजनैः सह चेरतुः ॥२॥३॥ अन्तरिति ॥ अम्भोजवनानां राजयो यत्रेति । यद्वा। अम्भोजवने राजते ताच्छील्ये णिनिः । तादृशे गङ्गायामन्तर्मध्ये अव्ययविशेषणत्वात् क्लीबत्वम् । प्रविश्य करेणुभिः सह गजाविव युवतिभिः सह चिक्रीडतुः ॥ ४ ॥ यदृच्छयेति ॥ हे कौरव यदृच्छयाऽकस्मादेव तत्रागतो भगवान् देवर्षिर्नारदः तौ देवौ देवयोनी गुह्यकौ अपश्यत् । दृष्ट्वा च क्षीबाणौ मत्तौ समबुध्यत ॥ ५ ॥ तं दृष्ट्वेति ॥ देव्यः अप्सरसो यतो विवस्त्रा अतस्तं नारदं दृष्ट्वा व्रीडिताः शापशङ्किताश्च शीघ्रं वासांसि पर्यधुः । विवस्त्रौ तौ गुह्यकौ तु नैव वस्त्रं पर्यधातामिति एवकारेण देवीभिः प्रेरितावपि न पर्यधाताम् ॥ ६ ॥ ताविति ॥ सुरस्य देवसत्वस्य कुबेरस्यात्मजौ अपि श्रीमदेनान्धौ अतः

श्रीशुक उवाच ॥ ॥ रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ ॥ कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ ॥ २ ॥ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ॥ ३ ॥ अन्तः प्रविश्य गङ्गायामम्भोजवनराजिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ॥ ४ ॥ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव ॥ अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ॥ ५ ॥ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशङ्किताः ॥ वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ॥ ६ ॥ तौ दृष्ट्वा मदिरामत्तौ श्रीमदान्धौ सुरात्मजौ ॥ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥ ७ ॥ नारद उवाच ॥ न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः ॥ श्रीमदादाभिजात्यादिर्यत्र स्त्रीद्यूतमासवः ॥ ८ ॥ हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः ॥ मन्यमानैरिमं देहमजरामृत्यु नश्वरम् ॥ ९ ॥

मदिरामत्तौ तौ दृष्ट्वा नारदस्तयोरनुग्रहार्थाय अनुग्रहो मदनाशः अर्थः श्रीकृष्णदर्शनं तस्मै शापं दास्यन्निदं वक्ष्यमाणं जगौ ॥७॥ न हीति ॥ जोष्यान् तर्पकान् विषयान् जुषतः सेवमानस्य पुंसो यथा श्रीमदो बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति यथा विवेकनाशको भवति तथा श्रीमदादन्यः आभिजात्यादिः अभिजातिः सत्कुलजन्म तदुद्भवः आभिजात्यो मदः आदिशब्दात् ऐश्वर्यविद्याकुलादिजनितो मदः तथान्यो वा रजोगुणः रजःकार्यभूतो हास्यहर्षादिरूपो बुद्धिभ्रंशकरो न हि भवति । किन्तु श्रीमद एवेति तदाह । यत्र यस्मिन् श्रीमदे स्त्रीद्यूतम् आसवश्चेत्याद्याः भवन्ति जोष्यानिति "जुष परितर्पण" इति चुरादेर्ज्ञेयम् अतो न क्यप्शङ्क्यः । जुषत इति शता आर्षः ॥ ८ ॥ हन्यन्त इति ॥ यत्र च श्रीमदे सति इमं नश्वरमपि देहमजरामृत्यु अजरं क्षयशून्यं च तदमृत्यु च वस्तु इति मन्यमानैः निर्दयैः अजितात्मभिश्च जनैः भक्षणाद्यर्थं पशवो हन्यन्ते ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेति ॥ यत् प्रथमं नरदेवभूदेवसंज्ञितमपि शरीरमन्ते श्वादिभिर्भक्षितं विट्संज्ञितं पुत्रादिभिर्दग्धं भस्मसंज्ञितमन्यथा त्यक्तं च कृमिसंज्ञितं भवति तत्कृते तत्सुखार्थं यो भूतध्रुक् प्राणिद्रोहकर्ता स स्वार्थं स्वहितं किं वेद नैव वेद मूर्ख एव स इत्यर्थः। यतो भूतद्रोहान्निरयो नरकयातना भवतीति ॥ १० ॥ देहे ममतापि न घटत इत्याह— देह इति ॥ अयं देहः किमन्नदातुः स्वं धनम् अस्ति तदन्नेन पाल्यमानत्वात् किंवा निषेक्तुः पितुः तद्वीर्योद्भवत्वात् किंवा मातुरेव तदुदरोद्भवत्वात् किंवा मातुः पितुर्मातामहस्य तत्कन्यापुत्रत्वात् पुत्रिकाकरणाद्वा उपलक्षणमेतत्। पितामहादिसर्वसंबन्धिनां तेषामपि स्वकीयाभिमानस्य सत्त्वात् किंवा बलिनः राजादेः तेनापि बलाद्विष्टिग्रहणस्य प्रसिद्धत्वात्। किंवा क्रेतुः तेनापि द्रव्यदानेन स्वीकरणात् किंवाग्नेः अन्ते तेन भस्मीकरणात् किंवा शुनः अन्ते तेन भक्षणात् अपिशब्दादन्येऽपि काकादयो भक्षका ग्रहीतव्याः ॥ ११ ॥ एवमिति ॥ एवं निर्धारयितुमशक्यत्वात् अन्नदात्रादिसाधारणमव्यक्तं प्रधानं तत एव प्रभवस्तस्मिन्नेवाप्ययो लयश्च यस्य तं देहमात्मसात्कृत्वा आत्मेति मत्वा तत्सुखार्थमसतो मूढादृते विना को वा विद्वान् जन्तून् हन्ति न कोऽपीत्यर्थः ॥ १२ ॥ असत इति ॥ असतः अजितेन्द्रियस्य अत एव

देवसंज्ञितमप्यन्ते कृमिविट्भस्मसंज्ञितम् ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ १० ॥ देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव च ॥ मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ॥ ११ ॥ एवं साधारणं देहमव्यक्तप्रभवाप्ययम् ॥ को विद्वानात्मसात्कृत्वा हन्ति जन्तूनृतेऽसतः ॥ १२ ॥ असतः श्रीमदान्धस्य दारिद्र्यं परमाञ्जनम् ॥ आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥ १३ ॥ यथा कण्टकविद्धाङ्गो जन्तोर्नेच्छति तां व्यथाम् ॥ जीवसाम्यं गतो लिङ्गैर्न तथाऽविद्धकण्टकः ॥ १४ ॥ दरिद्रो निरहंस्तम्भो मुक्तः सर्वमदैरिह ॥ कृच्छ्रं यदृच्छयाऽऽप्नोति तद्धि तस्य परं तपः ॥ १५ ॥

श्रीमदेनान्धस्य कर्तव्यमकर्तव्यं चापश्यतः दारिद्र्यं परं केवलमञ्जनं दृष्टिप्रसादकम्। यतः परं केवलं दरिद्र एव भूतानि उपमैव औपम्यं स्वार्थे ष्यञ्। आत्मना औपम्यं तेन आत्मौपम्येन स्वसादृश्येन ईक्षते ततश्च न द्रुह्यति प्रत्युत परेषामुपकारे प्रवर्त्तते ॥ १३ ॥ यथेति ॥ कण्टकेन विद्धमङ्गं यस्य सः यथा लिङ्गैर्मुखम्लान्यादिभिश्चिह्नैर्जीवसाम्यं गतः यथा मम कण्टकवेधजं दुःखं जातं तथान्यस्यापीति परस्मिन्नपि जीवे स्वसाम्यं प्राप्तः तत्रापि व्यथामनुमिमानः जन्तोर्जीवान्तरस्य तां कण्टकवेधजन्यां व्यथां नेच्छति तन्निवृत्त्यर्थं यतते च तथा अविद्धकण्टकः न कदापि विद्धः लग्नः कण्टको यस्य स तां व्यथां नेच्छति इति न किन्तु उदासीनो भवति तदुद्धारप्रयत्नं च न करोतीति। कण्टकेनाविद्धः अविद्धकण्टकः इति राजदन्तादिर्वा ॥ १४ ॥ दारिद्र्यं मोक्षमपि साधयतीत्याह—दरिद्र इति ॥ इह संसारे दरिद्र एव सर्वैर्विद्याधनादिजैर्मदैर्मुक्तः दरिद्रस्य सर्वैरनादृतत्वात्। सत्कुलमदादयोऽपि प्रायो नश्यन्तीति भावः। अत एव निरहंस्तम्भः निर्गतोऽहंकाररूपः स्तम्भो यस्मात्सः स च यदृच्छया प्रारब्धवशेन यत्किंचित्कृच्छ्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कष्टमनशनादि प्राप्नोति तद्धि तच्च तस्य परं तप एव भवति कष्टसहनसाम्यात् भोगस्य पापनिवर्त्तकत्वाच्च ॥ १५ ॥ नित्यमिति ॥ नित्यं क्षुधाक्षामः क्षीणो देहो यस्य तस्य अन्नकाङ्क्षिणो दरिद्रस्य इन्द्रियाण्याशु प्रतिक्षणं शुष्यन्ति ततश्च नरकहेतुभूता हिंसापि विनिवर्त्तते ॥ १६ ॥ या च दरिद्रस्य सर्वानर्थमूलं तृष्णा भवति तस्या अपि प्रतीकारसंभवमाह—दरिद्रस्येति ॥ समदर्शिनः साधवः दरिद्रस्यैव दरिद्रेणैव तृतीयार्थे षष्ठी । युज्यन्ते यत्नं विनैव संगच्छन्ते ननु मदान्धेन धनिना इति ततश्च सद्भिः सङ्गतः स दरिद्रः तं तर्षमन्नादितृष्णां क्षिणोति त्यजति ततश्च आरात् शीघ्रं विशुद्ध्यति मोक्षयोग्यो भवति ॥ १७ ॥ ननु साधुभिरपि योगक्षेमार्थं धनिनः सेव्या एवेत्यत आह—साधूनामिति ॥ समचित्तानां मुकुन्दचरणैषिणां साधूनाम् उपेक्ष्यैः उपेक्षायोग्यैः धनेन स्तम्भो गर्वो येषां तैः असतो विषयानाश्रयन्ति तैर्विषयासक्तैः असद्भिः असाधुभिः किं प्रयोजनं न किमपि ॥ १८ ॥ तदहमिति ॥ तत्तस्मात् असतो मदनाशस्यैव पुरुषार्थहेतुत्वात् श्रीमदेनान्धयोर्विवेकचक्षुः शून्ययोः माध्व्या मधुमय्या

नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकाङ्क्षिणः ॥ इन्द्रियाण्याशुशुष्यन्ति हिंसाऽपि विनिवर्तते ॥ १६ ॥ दरिद्रस्यैव युज्यन्ते साधवः समदर्शिनः ॥ सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति ॥ १७ ॥ साधूनां समचित्तानां मुकुन्दचरणैषिणाम् ॥ उपेक्ष्यैः किं धनस्तम्भैरसद्भिरसदाश्रयैः ॥ १८ ॥ तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदान्धयोः ॥ तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः ॥ १९ ॥ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ ॥ न विवाससमात्मानं विजानीतः सुदुर्मदौ ॥ २० ॥ अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः ॥ स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥ २१ ॥ वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ॥ वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः ॥ २२ ॥

"ऋत्व्यवास्त्व्यवास्त्वमाध्वी" इति छान्दसो निपातः । वारुण्या सुरया मत्तयोः स्त्रैणयोः अजितात्मनोः अनयोस्तमोमदमज्ञानकृतं मदं हरिष्यामि ॥ १९ ॥ यदिमाविति द्वयम् ॥ यत् यस्मात् इमौ नलकूबरमणिग्रीवौ लोकपालस्य कुबेरस्य महतः पुत्रौ भूत्वा तमःप्लुतौ अज्ञानव्याप्तौ अतएव सुष्ठु दुष्टः अत्यन्तदुष्टो मदो ययोस्तथाभूतौ च सन्तौ आत्मानं विवाससं वस्त्ररहितं न विजानीतः शपति । अत इति अतस्तस्मात् स्थावरतां वृक्षतामर्हतः निरावरणयोः स्तब्धयोरब्रुवाणयोर्वृक्षतैव योग्येति भावः । अनुगृह्णाति मत्प्रसादेन यथा पुनरेवं मदान्धौ न स्यातां तथा तत्र स्थावरत्वेऽपि मदनुग्रहात् स्मृतिः स्वापराधस्मरणपूर्वकं विवेकः स्यात् ॥ २० ॥ २१ ॥ वासुदेव-
स्येति ॥ ततश्च दिव्यशरच्छते वृत्ते देवानां संवत्सरशते अतीते सति वासुदेवस्य श्रीकृष्णस्य सान्निध्यं लब्ध्वा ततश्च भूयः पुनः स्वर्लोकतां देवत्वं नलकूबरमणिग्रीवस्वरूपं च लब्ध्वा तस्मिन्भगवति लब्धा भक्तिर्याभ्यां तथाभूतौ भविष्यतः केचित्तु लब्धभक्ती सन्तौ स्वर्लोकतां भविष्यतः प्राप्स्यतः "भू, प्राप्तौ" परस्मैपदमार्षमित्याहुः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ स देवर्षिरेवमुक्त्वा भगवतो नारायणस्याश्रमं गतः नलकूबरमणिग्रीवौ तु यमलावेकत्र सहोत्पन्नौ अर्जुनवृक्षौ व्रजे आसतुः दिदीपाते ॥ २३ ॥ ऋषेरिति ॥ भागवतेषु मुख्यस्य ऋषेर्नारदस्य अक्षराधिक्यं सोढव्यम् । वचः सत्यं कर्तुं हरिः उलूखले निबद्धः कृष्णो यत्र यमलार्जुनावास्तां तत्र शनकैर्जगाम । शनकैरिति मातुरागमनशङ्कया तत उलूखलपतनाभावश्च ॥ २४ ॥ देवर्षिरिति ॥ यद्यस्माद्देवर्षिर्मे प्रियतमः तत्तस्मात्तेन महात्मना यद्गीतं तदेव तत्तथा तेन प्रकारेण इमौ धनदात्मजौ साधयिष्यामि करिष्यामि ॥ २५ ॥ इतीति ॥ इत्येवमभिप्रेत्य श्रीकृष्णो यमयोर्यमलयोः सहजातयोरर्जुनवृक्षयोरन्तरेण मध्ये ययौ तदा तु आत्मनः कृष्णस्य मध्ये निर्वेशमात्रेणोलूखलं तिर्यक्गतमभूत् । मात्रपदेन यत्नाभावः ॥२६॥ बालेनेति ॥ अनु अञ्चति पश्चाद्गच्छति इत्यन्वक् तथाभूतमुलूखलं निष्कर्षयता आकर्षता दाम बन्धनरज्जुरुदरे यस्य तेन दामोदरेण बालेन कृष्णेन तरसा वेगेन उत्कलितः उत्पाटितः अङ्घ्रिबन्धो मूलबन्धो ययोस्तौ परमस्य परमेश्वरस्य कृष्णस्य विक्रमितं विक्रमस्तेन अतिवेपः कम्पो

श्रीशुक उवाच ॥ एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमम् ॥ नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ ॥ २३ ॥ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः ॥ जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ॥ २४ ॥ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ ॥ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥ २५ ॥ इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ ॥ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् ॥ २६ ॥ बालेन निष्कर्षयताऽन्वगुलूखलं तद्दामोदरेण तरसोत्कलिताङ्घ्रिबन्धौ ॥ निष्पेततुः परमविक्रमितातिवेपस्कन्धप्रवालविटपौ कृतचण्डशब्दौ ॥ २७ ॥ तत्र श्रिया परमया ककुभः स्फुरन्तौ सिद्धावुपेत्य कुजयोरिव जातवेदाः ॥ कृष्णं प्रणम्य शिरसाऽखिललोकनाथं बद्धाञ्जली विरजसाविदमूचतुः स्म ॥ २८ ॥ कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः ॥ व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ॥ २९ ॥

येषु ते स्कन्धप्रवालविटपा ययोस्तौ अत एव कृतश्चण्डो महान् शब्दो याभ्यां तौ द्वावर्जुनवृक्षौ निशेषेण पेततुः उदरे दामबन्धनादेव दामोदर इति नाम ॥२७॥ तत्रेति ॥ तत्र कुजयोर्वृक्षयोः स्थितः जातवेदाः मिथो ज्योतिर्मेलनादेक एव अग्निर्मूर्तिमान् सन् यथा प्रकाशयन्नागच्छेत् तथा परमया श्रिया कान्त्या ककुभो दिशो व्याप्य स्फुरन्तौ । यद्वा । अन्तर्भावितण्यर्थतया दिशः प्रकाशयन्तौ विरजसौ गतमदौ सिद्धौ प्राप्तपूर्वस्वरूपौ नलकूबरमणिग्रीवौ अखिललोकानां नाथं कृष्णमुपेत्य शिरसा प्रणम्य च बद्धाञ्जली सन्ताविदं वक्ष्यमाणमूचतुः स्मेति प्रसिद्धौ ॥ २८ ॥ कृष्णेति ॥ हे कृष्ण हे कृष्ण हे महायोगिन् त्वं न गोपालः किं तु आद्यः सर्वजगद्धेतुः परः पुरुषः असि । व्यक्ताव्यक्तं स्थूलसूक्ष्ममिदं सर्वं विश्वं ते तव रूपमिति ब्राह्मणाः वेदतत्त्वज्ञाः विदुर्जानन्ति ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमेक इति ॥ सर्वेषां भूतानां प्राणिनां ये देहा असवः प्राणाः आत्मा अहंकारः इन्द्रियाणि च तेषामीश्वर एकस्त्वमेव । कालो भगवान् वष्णुः अव्ययः अपक्षयशून्यः ईश्वरः नियन्ता त्वमेव ॥ ३० ॥ त्वमिति ॥ रजःसत्वतमोमयी तदात्मिका सूक्ष्मा प्रकृतिस्त्वमेव तव शक्तिरेव तत्क्षोभकः कालोऽपि त्वमेव तव चेष्टारूपः एवेति पूर्वत्रोक्तम् प्रकृतिकार्यं महानपि त्वमेव प्रकृतिप्रवर्त्तकः पुरुषोऽपि त्वदंशत्वात्त्वमेव अध्यक्षः सर्वसाक्षी सर्वेषां यानि क्षेत्राणि देहेन्द्रियान्तःकरणानि तेषां ये विकारा रोगरागादयस्तान् वेत्तीति तथा त्वमेव ॥ ३१ ॥ नन्वहमेव चेत्सर्वं तर्हि तत्तत्पदार्थज्ञाने जातेऽपि मम ज्ञानं किं न भवतीत्याशङ्क्याहतुः—गृह्यमाणैरिति ॥ गृह्यमाणैर्दृश्यैः प्राकृतैर्गुणैः प्रकृतिगुणकार्यैर्विकारैः बुद्ध्यहङ्कारेन्द्रियादिभिः कार्यैस्त्वं द्रष्टा अग्राह्यो न गृह्यसे नहि दृश्यैर्ग्राहको द्रष्टा गृह्यते जीवस्याप्राकृतत्वेऽपि प्राकृतगुणैर्देहादिभिः संवृतत्वात्स्वोत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं वर्तमानं त्वामिह संसारे को नु जीवो विज्ञातुमर्हति ॥ ३२ ॥ तस्मा इति ॥ भगवते वासुदेवाय वसुदेवाख्यचित्ताधिष्ठात्रे वेधसे जगज्जन्मा-

त्वमेकः सर्वभूतानां देहास्वात्मेन्द्रियेश्वरः ॥ त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः॥३०॥ त्वं महान्प्रकृतिः साक्षाद्रजःसत्त्वतमोमयी ॥ त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ॥ ३१ ॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ॥ कोन्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ॥ ३२ ॥ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे ॥ आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥ ३३ ॥ यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसङ्गतैः ॥ ३४ ॥ स भवान्सर्वलोकस्य भवाय विभवाय च ॥ अवतीर्णोऽंशभागेन साम्प्रतं पतिराशिषाम् ॥ ३५ ॥ नमः परमकल्याण नमः परममङ्गल ॥ वासुदेवाय शान्ताय यदूनां पतये नमः ॥३६॥ अनुजानीहि नौ भूमंस्तवानुचरकिंकरौ ॥ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ॥ ३७ ॥

दिविधात्रे आत्मनः स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैः सत्वादिभिश्छन्नो महिमा तत्वं यस्याभ्रैरिव रवेः तस्मै ब्रह्मणे परमात्मने तुभ्यं नमः ॥ ३३ ॥ यस्येति ॥ नास्ति तुल्यमतिशय आधिक्यं च येभ्यस्तैरतुल्यातिशयैः अत एव देहिषु प्राकृतेषु असङ्गतैः अनुपपन्नैस्तैस्तैर्वीर्यैः पराक्रमैर्लिङ्गैः शरीरिषु प्राकृतेषु अशरीरिणः यस्य तवावतारा ज्ञायन्ते ॥ ३४ ॥ स भवानिति ॥ स शास्त्रप्रसिद्धः आशिषां धर्मादिपुरुषार्थानां पतिः भवान् साम्प्रतमिदानीं सर्वलोकस्य यथाधिकारं भवाय उद्भवाय विभवाय विगतो भवः संसारो यस्मिंस्तस्मै मोक्षाय च अंशभागेन अंशावताराणां भागः प्रादुर्भावो यस्मात्तेन परिपूर्णेन रूपेण अवतीर्णः असि ॥ ३५ ॥ नम इति ॥ हे परमकल्याण तुभ्यं नमः । हे परममङ्गल तुभ्यं नमः । वासुदेवाय शान्ताय यदूनां पतये नमः । " षष्ठीयुक्तश्छन्दसि वा " इति पत्युर्घिसंज्ञा छान्दसी ॥ ३६ ॥ अन्विति ॥ हे भूमन् तवानुचरः शिवः रुद्रस्यानुचरौ इत्युक्तेः । कुबेरो नारदो वा तस्य किंकरौ नौ आवाम् अनुजानीहि स्वस्थानं गन्तुमनुमन्यस्व नौ आवयोर्भगवतस्तव दर्शनमृषेर्नारदस्यानुग्रहादासीत् ॥ ३७ ॥

॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाणीति ॥ चकार एवकारार्थः । तस्य सर्वत्र संबन्धः । न इति । स्वगृहं गतयोरपि आवयोरस्मत्संबन्धिनां चेत्यभिप्रायेण बहुवचनम् । अस्माकं वाणी तव गुणानुकथन एवास्तु । श्रवणौ तव कथायामेव स्ताम् । हस्तौ तव कर्मसु मन्दिरमार्जनादिसेवास्वेव स्ताम् । मनस्तव पादयोः स्मृत्यामेवास्तु । शिरस्तव निवासभूतं यज्जगत्तस्य प्रणाम एवास्तु । दृष्टिर्भवतस्तनूनां मूर्तीनां सतां भक्तानां च दर्शन एवास्तु । भवत्तनूनामिति सतां विशेषणं वा ॥ ३८ ॥ इत्थमिति ॥ इत्थं ताभ्यां नलकूबरमणिग्रीवाभ्यां संकीर्तितः संस्तुतो दाम्ना उलूखले बद्धः गोकुलेश्वरो भगवान् गुह्यकौ प्राप्तगुह्यकरूपौ तौ प्रति प्रहसन्नाह स्म ॥ ३९ ॥ ज्ञातमिति ॥ श्रीमदान्धयोः युवयोः करुणात्मना कृपालुना ऋषिणा नारदेन यत् स्यातान्नैवं यथा पुनरित्यादिवाग्भिर्विभ्रंशः श्रीमदभ्रंशरूपोऽनुग्रहः विभ्रंशः मद्दर्शनभक्तिलाभरूपोऽनुग्रहश्चेति वा । कृतस्तदेतत्पुरा युवयोर्विज्ञापनात्पुरा पूर्वमेव

वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः ॥ स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥ ३८ ॥ श्रीशुक उवाच ॥ इत्थं संकीर्तितस्ताभ्यां भगवान्गोकुलेश्वरः ॥ दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥ ३९ ॥ श्रीशुक उवाच ॥ ज्ञातं मम पुरैवैतदृषिणा करुणात्मना ॥ यच्छ्रीमदान्धयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ॥ ४० ॥ साधूनां समचित्तानां सुतरां मत्कृतात्मनाम् ॥ दर्शनान्नो भवेद्बन्धः पुंसोऽक्ष्णोः सवितुर्यथा ॥ ४१ ॥ तद्गच्छतं मत्परमौ नलकूबरसादनम् ॥ संजातो मयि भावो वामीप्सितः परमो भवः ॥ ४२ ॥ श्रीशुक उवाच ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ॥ बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम् ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे नारदशापोद्धारो नाम दशमोऽध्यायः ॥ १० ॥

मम ज्ञातम् ॥ ४० ॥ साधूनामिति ॥ साधूनां स्वधर्मवर्तिनां समचित्तानामात्मविदां सुतरामतिशयेन मत्कृतात्मनां मय्यर्पितचित्तानां दर्शनमात्रात् सवितुः सूर्यस्य दर्शनाद्यथाक्ष्णोर्बन्धोन्धकारो निवर्तते तथा पुंसः संसारबन्धो न भवेत् निवर्त्तत इत्यर्थः ॥ ४१ ॥ तदिति ॥ हे नलकूबर प्राधान्यादेकस्य संबोधनम् । तस्मात् मद्भक्तनारदानुग्रहेणैव कृतार्थत्वात् मत्परमौ अहमेव परमः सेव्यो ययोस्तथाभूतौ सन्तौ सदनमेव सादनम् अण् । स्वनिकेतनं गच्छतं यतः न भवः संसारो यस्मात्सः अभवो यो मयि परमः भावः प्रेमातिशयो वां युवयोरीक्षितोऽपेक्षितः स तु सम्यग्जात एव ॥ ४२ ॥ इत्युक्ताविति ॥ इत्येवं भगवता उक्तौ तौ नलकूबरमणिग्रीवौ बद्धमुलूखलं यस्मिंस्तं कृष्णम् । यद्वा । उलूखले बद्धम् इति बद्धोलूखलमाहिताग्न्यादित्वात् पुनः पुनः परिक्रम्य प्रणम्य आमन्त्र्य पृष्ट्वा च उत्तरां दिशं जग्मतुः ॥ ४३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याध्याये दशमे व्यधात् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशे प्राप्य वृन्दावनं वत्सांश्च पालयन् ॥ बकवत्सावहन्कृष्णः श्लोकाः सार्द्धा गजेषवं": ॥ द्वे उवाचेत्येकषष्टिरनुष्टुभ उदाहृताः ॥ ११ ॥ गोपा इति ॥ हे कुरुश्रेष्ठ नन्दादयो गोपाः पततोर्द्रुमयोः रवं शब्दं श्रुत्वा निर्घातो निरभ्रगर्जितरूपोत्पातस्तद्भयेन शङ्कितचित्तास्सन्तस्तत्र तयोः पतनस्थाने आजग्मुः ॥१॥ भूम्यामित्यर्द्धम् ॥ आगताश्च तत्र भूम्यां निपतितौ यमलार्जुनौ ददृशुः ॥ २ ॥ बभ्रमुरिति सार्द्धम् ॥ दृष्ट्वा च तत्पतनस्य कारणं दाम्ना बद्धम् उलूखलं विकर्षन्तं बालकं लक्ष्यं लक्षयितुं शक्यं प्रत्यक्षतः सिद्धमप्यविज्ञाय कस्य राक्षसादेरिदं वृक्षपातनं कर्म कुतो वा कारणादिदमाश्चर्यं जातमिति वदन्तः अयं दैत्यादिकृतः कश्चिदुत्पात इति भयेन कातरा व्याकुलाः सन्तो बभ्रमुः निश्चयं न जग्मुः ॥ ३ ॥ बाला इति ॥ तिरश्चीनं तिर्यक्पतितं तिर्यग्गतमिति वा पाठः । उलूखलं विकर्षता वृक्षयोर्मध्यगेनानेन कृष्णेन वृक्षौ पातिताविति वयमचक्ष्महि दृष्टवन्तः । तथा वृक्षाभ्यां निर्गतौ दिव्यौ पुरुषावपि दृष्टवन्त इति नन्दादीन् प्रति बाला ऊचुः । यद्वाः । अत्र विकर्षता मध्यगेनेत्यन्तमेव वाक्यं बाला ऊचुः । सम्भ्रान्तत्वेन पूर्णवचनाशक्तेरेतावुत्पादिता इति नोचुः । अविश्वसतस्तान् पुनरूचुः पुरुषावप्यचक्ष्महीति ॥ ४ ॥ न ते इति ॥ तत्र ये केचित्तर्कनिष्ठा गोपास्ते

श्रीशुक उवाच ॥ गोपा नन्दादयः श्रुत्वा द्रुमयोः पततो रवम् ॥ तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशङ्किताः ॥ १ ॥ भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ ॥ २ ॥ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणम् ॥ उलूखलं विकर्षन्तं दाम्ना बद्धं च बालकम् ॥ कस्येदं कुत आश्चर्यमुत्पात इति कातराः ॥ ३ ॥ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलम् ॥ विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ॥ ४ ॥ न ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् ॥ बालस्योत्पाटनं तर्वोः केचित्संदिग्धचेतसः ॥ ५ ॥ उलूखलं विकर्षन्तं दाम्ना बद्धं स्वमात्मजम् ॥ विलोक्य नन्दः प्रहसद्वदनो विमुमोच ह ॥ ६ ॥ गोपीभिः स्तोभितोऽनृत्यद्भगवान्बालवत्क्वचित् ॥ उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयन्त्रवत् ॥ ७ ॥

तस्य बालस्येदृशोस्तर्वोरुत्पाटनं न घटेतेति तर्केण तदुक्तं तैर्बालैर्यदुक्तं तन्न जगृहुर्नाङ्गीकृतवन्तः । केचित्तु पूतनातृणावर्त्तादिनाशं श्रीकृष्णकृतं संस्मृत्य " नारायणसमो गुणैः " इति गर्गोक्तिं वा संस्मृत्य इदमपि कृष्णस्यैव कर्म भवेद्वा इति संदिग्धचेतसो बभूवुः ॥ ५ ॥ उलूखलमिति ॥ दाम्नोलूखले बद्धमत एव उलूखलं विकर्षन्तं स्वं स्वकीयमात्मजं पुत्रं विलोक्य प्रहसद्वदनो नन्दस्तं विशेषेण स्नेहपरवशः शीघ्रं मुमोच । नन्दस्य प्रहासस्तु तादृग्भयेऽपि कृष्णं निर्भयं प्रहसन्तं च दृष्ट्वा ॥ ६ ॥ गोपीभिरिति ॥ यदि त्वं नृत्येस्तर्हि लड्डुकानि दास्याम इत्यादिवचनेन हस्ततालादिना च गोपीभिः स्तोभितः प्रोत्साहितो भगवान् तद्वशस्तासां प्रेम्णा वशः सन् प्राकृतबालवत् क्वचिदनृत्यत् । तथैव गानार्थं गोपीभिः स्तोभितः क्वचिन्मुग्धः मुग्ध इव सुन्दरो वा । भगवान् दारुयन्त्रवत् काष्ठनिर्मितपुत्तलिकावत् तद्वशो गोपीवशः सन् उद्गायति उच्चैः यथा तासां हास्यहर्षादिकं स्यात्तथा गायति स्म ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिभर्त्तीति ॥ कचिद्गोपीभिरिदमानयेत्याज्ञप्तः पीठकादि आनेतुमसमर्थ इव केवलं बिभर्ति तत्रापि आदौ पीठकं तदशक्तौ उन्मानं मानपात्रं प्रस्थादि तदशक्तौ पादुकां काष्ठमयीम् इति ज्ञेयम् । समाहारद्वन्द्वोयम् । स्वानां व्रजभक्तानां चकारादन्येषामपि द्रष्टृश्रोतृवक्तॄणां प्रीतिमावहन् सम्पादयितुं हेतौ शता । युद्धारम्भाभिनयं कुर्वन् बाहुक्षेपं भुजास्फोटनादि कुरुते स्म ॥ ८ ॥ दर्शयन्निति ॥ लोके ये तद्विदः तदैश्वर्याभिज्ञास्तेषां वै निश्चयार्थमात्मनो भृत्यवश्यतां दर्शयन् भगवान् बालचेष्टितैर्व्रजस्थजनस्य हर्षमुवाह अकरोत् ॥ ९ ॥ क्रीणीहीत्यादिश्लोकद्वयम् ॥ बहुष्वदृष्टमपि कचिदुपलभ्यते । भो लोक फलानि क्रीणीहीति फलविक्रयिण्या वचनं श्रुत्वा सर्वेषां फलप्रदोऽच्युतः फलार्थी सन् धान्यमादाय सत्वरं शीघ्रं ययौ ॥ १० ॥ फलविक्रयिणीति ॥ तस्य त्वरया बहिर्निर्गच्छतोऽच्युतस्य च्युतानि मार्गे एव पतितानि धान्यानि यस्मात्तथाभूतमपि करद्वयं तत्सौन्दर्यादिविमोहिता फलविक्रयिणी फलैरपूरयत् तदाच्युतेनापि करस्थेनावशिष्टेन तद्भाण्डे प्रक्षिप्तेन धान्येन तस्याः फलभाण्डं रत्नैर्माणिक्यादिभिरपूरि

विभर्ति कचिदाज्ञप्तः पीठकोन्मानपादुकम् ॥ बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ॥८॥ दर्शयंस्तद्विदां लोक आत्मनो भृत्यवश्यताम् ॥ व्रजस्योवाह वै हर्षं भगवान्बालचेष्टितैः ॥ ९ ॥ क्रीणीहि भोः फलानीति श्रुत्वा सत्वरमच्युतः ॥ फलार्थी धान्यमादाय ययौ सर्वफलप्रदः ॥ १० ॥ फलविक्रयिणी तस्य च्युतधान्यं करद्वयम् ॥ फलैरपूरयद्रत्नैः फलभाण्डमपूरि च ॥ ११ ॥ सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् ॥ जन्मर्क्षमद्य भवतो विप्रेभ्यो देहि गाः शुचिः ॥ १२ ॥ नोपेयातां यदाहूतौ क्रीडासङ्गेन पुत्रकौ ॥ यशोदां प्रेषयामास रोहिणी पुत्रवत्सलाम् ॥ १३ ॥ क्रीडन्तं सा सुतं बालैरतिवेलं सहाग्रजम् ॥ यशोदाऽऽजोहवीत्कृष्णं पुत्रस्नेहस्नुतस्तनी ॥ १४ ॥ कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब ॥ अलं विहारैः क्षुत्क्षामः क्रीडाश्रान्तोऽसि पुत्रक ॥ १५ ॥

पूरितम् ॥ ११ ॥ सरिदिति ॥ यमलार्जुनभङ्गदिनभवलीला विशेषप्रतिपादिका सरिदित्याद्यष्टश्लोकी कैश्चिदनादृतापि सर्वत्रोपलभ्यमानत्वाद्व्याख्यायते । अथेति । लीलान्तरे भग्नावर्जुनौ येन तं कृष्णं सरितो यमुनायास्तीरं गतं बालैः सह भृशं क्रीडन्तम् इति शेषः । आह्वयत् आजुहाव । यशोदाप्रेरिता रोहिणीति शेषः । अद्य भवतो जन्मर्क्षम् अतः शुचिः सन् विप्रेभ्यः गाः देहि । अत्र रामाह्वानमपि ज्ञेयम् ॥१२॥ नोपेयातामिति ॥ एवमाहूतावपि पुत्रकौ क्रीडायामासङ्गेन आसक्त्या यदा नोपेयातां स्वसमीपं नागच्छतां तदा तावानेतुं रोहिणी कर्त्री पुत्रयोर्वत्सलां यशोदां प्रेषयामास ॥१३॥ क्रीडन्तमिति ॥ पुत्रस्नेहेन स्नुतौ स्तनौ यस्याः सा यशोदा बालैः सह क्रीडन्तम् अतिवेलं भोजनादिवेलामतिक्रान्तं सहाग्रजं बलभद्रसहितं स्वसुतं कृष्णमाजोहवीत् मुहुर्मुहुराह्वयत् । आङ्पूर्वात् ह्वेञः यङ्लुगन्ताल्लङ् । "अभ्यस्तस्य च" इति संप्रसारणम् ॥१४॥ कृष्ण कृष्णेति ॥ हे कृष्ण कृष्ण अरविन्दाक्ष हे पुत्रक अनुकम्पायां कन् । हे तात एहि आगच्छ स्तनं पिब यतः क्षुधा क्षामोऽसि विहारैरलं पूर्णं यतः क्रीडया श्रान्तोऽसि ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे रामेति ॥ हे राम हे कुलनन्दन हे तात सानुजः कृष्णेन सहितः तमपि गृहीत्वाशु आगच्छ । तत्र हेतुमाह । यस्माद्भवान् प्रातःकाल एव कृताहारस्तस्माद्भोक्तुमर्हतीति ॥ १६ ॥ प्रतीक्षत इति ॥ हे । दाशार्ह कुलोत्पन्न व्रजाधिपो नन्दो भोक्ष्यमाणो वां युवां प्रतीक्षते युवयोरागमनं प्रतीक्षते त्वामित्यपि पाठः । अत एहि आवयोः प्रियं धेहि सुखं संपादय । हे बालकाः यूयमपि स्वस्वगृहान् यात ॥ १७ ॥ पश्य पश्येति ॥ मातृभिर्मृष्टाः स्नापनादिना निर्मलीकृताश्च ते सुष्ठु अलंकृताश्च तान् ते तव वयस्यान् सखीन् पश्य पश्य । अतस्त्वमपि स्नातः कृताहारः स्वलंकृतश्च सन् विहरस्व ॥ १८ ॥ इत्थमिति ॥ हे नृप पुत्रस्नेहेन तस्मिन्निबद्धा धीर्यस्याः सा इत्थं वदन्ती यशोदा शनैरुपसंगम्य तमशेषाणां सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां शेखरं चूडामणिं पूज्यमप्यच्युतं श्रीकृष्णं सुतं मत्वा हस्ते गृहीत्वा सहरामं रामेण सहितं स्ववाटं स्वगृहं नीत्वा

हे रामागच्छ ताताशु सानुजः कुलनन्दन ॥ प्रातरेव कृताहारस्तद्भवान् भोक्तुमर्हति ॥ १६ ॥ प्रतीक्षते वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः ॥ एह्यावयोः प्रियं धेहि स्वगृहान्यात बालकाः ॥ १७ ॥ पश्य पश्य वयस्यांस्ते मातृमृष्टान्स्वलंकृतान् ॥ त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः ॥ १८ ॥ श्रीशुक उवाच ॥ ॥ इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप ॥ हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयम् ॥ १९ ॥ गोपवृद्धा महोत्पातानुनुभूय बृहद्वने ॥ नन्दादयः समागम्य व्रजकार्यममन्त्रयन् ॥ २० ॥ तत्रोपनन्द-नामाह गोपो ज्ञानवयोधिकः ॥ देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः ॥ २१ ॥ उत्थातव्यमितोऽस्माभिर्गोकुलस्य हितैषिभिः ॥ आयान्त्यत्र महोत्पाता बालानां नाशहेतवः ॥ २२ ॥ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ ॥ हरेरनुग्रहान्नूनमनश्चोपरि नापतत् ॥ २३ ॥ चक्रवातेन नीतोऽयं दैत्येन विपदं वियत् ॥ शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः ॥ २४ ॥

अथान्तरम् उदयं " जन्मर्क्षमद्य भवतः " इति सूचितम् । स्नपनगोदानभोजनालङ्कारादि मङ्गलं कृतवती ॥ १९ ॥ गोपवृद्धा इति ॥ नन्दादयो गोपवृद्धाः बृहद्वने महोत्पातान् पूतनागमनादीननुभूय समागम्य एकत्र मिलित्वा व्रजकार्यं व्रजस्य हितममन्त्रयन् विचारितवन्तः ॥ २० ॥ तत्रेति ॥ तत्र तेषु मिलितेषु मध्ये ज्ञानेन वयसा चाधिकः । देशेति । यस्मिन्देशे यस्मिन् काले च योऽर्थः प्रयोजनं यथा सिध्यति तस्य तत्त्वं निदानं जानातीति तथा रामकृष्णयोश्च प्रियकृत् उपनन्दनामा गोप आह स्म । अयं च नन्दस्य ज्येष्ठो भ्राता मुख्यो मन्त्री च अनेनैव कनिष्ठायापि नन्दाय राज्यं दत्तमिति प्राहुः ॥ २१ ॥ उत्थातव्यमिति ॥ गोकुलस्य हितैषिभिरस्माभिः इतः स्थानात् उत्थातव्यम् अन्यत्र गन्तव्यम् । यतोऽत्र बालानां नाशहेतवः महोत्पाताः आयान्ति ॥ २२ ॥ मुक्त इति ॥ बालघ्न्या राक्षस्या पूतनायाः असौ बालकः कृष्णः कथ-ञ्चित्साक्षात्कारणस्यादर्शनात्केनाप्यनिर्वचनीयेनैव कारणेन मुक्तः नूनं हि निश्चयेन हरेरनुग्रहादेवास्योपरि अनः शकटं च नापतत् ॥ २३ ॥ चक्रवातेनेति ॥ चक्रवातस्वरूपेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्येन तृणावर्तेन वीनां पक्षिणां पदं विहारस्थानं विगतप्रतिष्ठं वेति विपदं वियत् आकाशं प्रति नीतोऽसौ बालकः शिलायां पतितस्तत्रापि सुरेश्वैररस्मत्संराधितैर्देवैरेव परित्रातः संरक्षितः ॥ २४ ॥ यन्नेति ॥ द्रुमयोरन्तरं प्राप्याप्यसौ कृष्णोऽन्यतमो वापि कश्चिद्बालको यन्न म्रियेत न मृतस्तदप्यच्युतेनैव रक्षणमासीत् ॥ २५ ॥ यावदिति ॥ यावत् औत्पातिकः उत्पातजनितः अरिष्टः अरिष्टकारी बालविनाशाद्यनर्थः व्रजं नाभिभवेन्न स्पृशेत् तावत् ततः पूर्वमेव बालानुपादाय गृहीत्वा सानुगा गोधनभृत्यादिसहिता वयमितः स्थानादन्यत्र यास्यामः ॥२६॥ वनमिति ॥ पशव्यं पशुभ्यो हितं नवानि काननान्यवान्तरवनानि यस्मिंस्तत् गोपगोपीगवाम् एकशेषाभाव आर्षः।स्पष्टार्थो वा।प्रागुक्तरीत्या सेव्यं पुण्याः पवित्रा दर्शनस्पर्शादिना पुण्यजनका अद्र्यादयो यस्मिंस्तत् वृन्दायाः पाद्मकार्तिकमाहात्म्योक्ताया वनं वृन्दावनाख्यं सर्वक्षेमकरं वनमस्ति। वीरुधशब्दाट्टाप् ततः समासः ॥२७॥ तत्त्रेति ॥ यस्मात्सर्वसुखावहं तत्तस्मात् यदि भवतां भवद्भ्यः शेषे षष्ठी। तत्र गमनं रोचतेः तर्हि तत्राद्यैव यास्यामः शकटान् युङ्क्त बलीवर्दयुक्तान्

यन्न म्रियेत द्रुमयोरन्तरं प्राप्य बालकः ॥ असावन्यतमो वापि तदप्यच्युतरक्षणम् ॥ २५ ॥ यावदौत्पातिकोऽरिष्टो व्रजं नाभिभवेदितः ॥ तावद्बालानुपादाय यास्यामोऽन्यत्र सानुगाः ॥२६॥ वनं वृन्दावनं नाम पशव्यं नवकाननम् ॥ गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधम् ॥ २७ ॥ तत्तत्राद्यैव यास्यामः शकटान्युङ्क्त मा चिरम् ॥ गोधनान्यग्रतो यान्तु भवतां यदि रोचते ॥ २८ ॥ तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः ॥ व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिच्छदाः ॥ २९ ॥ वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानि च ॥ अनस्स्वारोप्य गोपाला यत्ता आत्तशरासनाः ॥३०॥ गोधनानि पुरस्कृत्य शृङ्गाण्यापूर्य सर्वतः ॥ तूर्यघोषेण महता ययुः सहपुरोहिताः ॥ ३१ ॥ गोप्यो रूढरथा नूतनकुचकुङ्कुमकान्तयः ॥ कृष्णलीला जगुः प्रीता निष्ककण्ठ्यः सुवाससः ॥ ३२ ॥

कुरुत। युङ्क्ष्वेति एकवचनपाठे नन्दं प्रत्युक्तिः। मा चिरं विलम्बो न कर्तव्यः गोधनान्यग्रतो यान्तु ॥ २८ ॥ तच्छ्रुत्वेति ॥ तदुपनन्दवचः श्रुत्वा एकधियः विप्रतिपत्तिरहिताः साधु साधु इति वादिनः गोपा नन्दादयः स्वान् स्वान् व्रजान् शकटादियूथान् समायुज्य रूढाः शकटे आरोपिताः परिच्छदा उपकरणानि यैस्ते ययुः ॥ २९ ॥ वृद्धानिति द्वयम् ॥ हे राजन् यत्ताः कृतप्रयत्नाः आत्तानि गृहीतानि शरासनानि यैः ते गोपालाः वृद्धान् बालान् स्त्रियः सर्वाण्युपकरणानि च अनःसु शकटेष्वारोप्य गोधनानि पुरस्कृत्य अग्रतः कृत्वा सर्वतः शृङ्गाण्यापूर्य निर्गमनज्ञापनार्थं महान्तं शृङ्गशब्दं कृत्वा महता तूर्यघोषेण सह महान्तं तूर्यशब्दं कुर्वन्तः पुरोहितैर्ब्राह्मणैः सह ततो निर्ययुः ॥ ३० ॥ ३१ ॥ गोप्य इति ॥ रूढा रोहणकर्मीकृताः रथा यैः रथान् अरूढा इति। नूत्नैः कुचगतैः कुङ्कुमैः कान्तिर्यासां ताः प्रीताः निष्ककण्ठ्यः उपलक्षणतया सर्वाभरणभूषिताः सुष्टुवासांसि यासां ताः एवंभूताः गच्छन्त्यो गोप्यः कृष्णलीलां जगुः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेति ॥ तथा तयोः कृष्णरामयोः कथानां श्रवणे उत्सुके उत्कण्ठिते यशोदारोहिण्यौ कृष्णरामाभ्यां सहैकं शकटमास्थिते आरुह्य स्थिते रेजतुः ॥ ३३ ॥ वृन्दावनमिति ॥ एवं सर्वेषु कालेषु ग्रीष्मादिष्वपि सुखमेवावहति प्रापयति तत् वृन्दावनं संप्रविश्य गोपास्तत्र शकटैः प्रथमदिने शकटैरेव अर्द्धचन्द्रवत् धनुराकारं व्रजावासं गोकुलस्य वसतिस्थानं चक्रुः । दिनान्तरे तु "कण्टकीभिः प्रवृद्धाभिस्तथा कण्टकिभिर्द्रुमैः । निपातोच्छ्रितशाखाभिरभिगुप्तं समंततः ॥" इति हरिवंशरीत्या चक्रुः । धनुराकारताच पश्चाद्भागे स्वद्रव्यस्थापनार्थमग्रभागे विस्तीर्णे गवादीनां सुखनिर्गमार्थं च ॥ ३४ ॥ वृन्दावनमिति ॥ हे नृप वृन्दावनं गोवर्द्धनं गिरिं यमुनायाः पुलिनानि जलोत्थिततटानि च वीक्ष्य राममाधवयोः उत्तमा प्रीतिः आसीत् प्रथमं पूतनानाशस्ततः शकटभञ्जनं नाम कर्माघृष्टजानुरिङ्गणं च ततो वधः तृणावर्तस्याथ विश्वदर्शनं प्रथमं ततः गोपीभिस्तोभितेत्यादि वत्सपुच्छग्रहस्ततः मृत्तिकाभक्षणं तत्र द्वितीयं विश्वर्शनं दधिक्षीरा दि चौर्यं चोलूखले बन्धनं ततः सरित्तीरेत्यादि वृन्दावने रम्ये प्रवेशनं बृहद्वनस्थलीलानां क्रमोऽयं तोषणीमतः ॥ ३५ ॥ वृन्दावनलीलामुपक्रमते—एवमिति ॥ एवमुक्तप्रकारेण बालचेष्टितैः कलवाक्यैर्मधुरभाषितैश्च व्रजौकसां प्रीतिं यच्छन्तौ

तथा यशोदारोहिण्यावेकं शकटमास्थिते ॥ रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ॥ ३३ ॥ वृन्दावनं संप्रविश्य सर्वकालसुखावहम् ॥
तत्र चक्रुर्व्रजावासं शकटैरर्धचन्द्रवत् ॥ ३४ ॥ वृन्दावनं गोवर्द्धनं यमुनापुलिनानि च ॥ वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ॥ ३५ ॥
एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः ॥ कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ॥ ३६ ॥ अविदूरे व्रजभुवः सह गोपालदारकैः ॥
चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ॥ ३७ ॥ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ॥ क्वचित्पादैः किङ्किणीभिः क्वचित्कृत्रिमगोवृषैः ॥ वृषायमाणौ नर्दन्तौ युयुधाते परस्परम् ॥ ३८ ॥ अनुकृत्य रुतैर्जन्तूंश्चेरतुः प्राकृतौ यथा ॥ ३९ ॥

कुर्वन्तौ रामकृष्णौ स्वकालेन वत्सपालनयोग्यकालेन कौमारे वयसीत्यर्थः । अपवर्गे तृतीया । वत्सपालौ वत्ससंचारणयोग्यवयस्कौ बभूवतुः ॥ ३६ ॥ अविदूर इति ॥ व्रजभुवः अविदूरे नातिदूरे गोपालानां दारकैर्बालैः सह नानाविधाः वेणुवेत्रशृङ्गकन्दुकादयः क्रीडापरिच्छदाः क्रीडासाधनानि ययोस्तौ तानि गृहीत्वा क्रीडन्तौ वत्सांश्चारयामासतुः ॥ ३७ ॥ क्वचिदिति सार्द्धम् ॥ क्वचिद्देशे काले वा वेणून् वादयतः सामीप्ये भूते लट् । अत एव वेणुवादनारम्भः क्वचित् क्षेपणे रज्जुनिर्मितैः क्षेपणसाधनैः बिल्वामलकादीनि क्षिपतः क्वचित् किङ्किणीयुक्तैः पादैर्नृत्यत इति शेषः । यद्वा । क्षिपत इत्यस्यैवानुषङ्गः वृक्षादींस्ताडयत इत्यर्थः । क्वचित्कृत्रिमगोवृषैः कम्बलादिभिः पिहितैर्बालकैरेव स्वीकृतवृषाकारैः सह स्वयमपि तथैव वृषायमाणौ नर्दन्तौ वृषजात्यनुकारिशब्दान् कुर्वाणौ परस्परं युयुधाते ॥ ३८ ॥ अनुकृत्येत्यर्द्धम् ॥ रुतैः तत्तज्जातिशब्दैर्जन्तून् हंसमयूरादीन् अनुकृत्य यथा प्राकृतौ बालकौ तथा चेरतुः विजहृतुः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचिदिति ॥ कदाचिद्यमुनातीरे स्वकैः वयस्यैः स्वप्रीतियुक्तैः सखिभिः सह वत्सांश्चारयतोः कृष्णबलयोः शेषे षष्ठ्यौ । जिघांसुः हन्तुमिच्छुः दैत्य आगमत् ॥ ४० ॥ तमिति ॥ तं वत्सयूथगतं वत्सरूपिणं दैत्यं वीक्ष्य बलदेवाय दर्शयन् भ्रूसंज्ञया ज्ञापयन् मुग्ध इव अजानन्निव हरिः शनैरासदत् तत्समीपमागमत् । अत्र वत्सरूपेण वत्सेषु गमनं पूतनादिवधेन भयात् आगमनं च कंसाग्रहात् ॥ ४१ ॥ गृहीत्वेति ॥ अच्युतः अपरपादाभ्यां सह तस्य लाङ्गूलं गृहीत्वा भ्रामयित्वा च मित्त्वेऽपि ह्रस्वाभाव आर्षः । भ्रमणेनैव गतजीवितं निर्गतप्राणं तं कपित्थाग्रे कपित्थवृक्षस्य उपरि प्राहिणोत् चिक्षेप । स्वक्रीडोपयोगिकपित्थफलपातनार्थमिति भावः ॥ ४२ ॥ स इति सार्द्धम् ॥ पात्यमानैः कपित्थैः कपित्थफलैः सह महाकायः सः दैत्योऽपि पपात । मरणसमये मायापगमेन प्रकटितनिजरूपत्वात् । हेत्याश्चर्ये । तं पतितं वीक्ष्य सर्वे बाला विस्मिताः सन्तः साधु कृतं साधु कृतमित्येवं कृष्णं शशंसुः । देवाश्च परिसंतुष्टाः कृष्णस्योपरि पुष्पवर्षिणो बभूवुः ॥ ४३ ॥ ताविति ॥ सर्वेषां लोकानामेकौ मुख्यौ

कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः ॥ वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥४०॥ तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः ॥ दर्शयन्बलदेवाय शनैर्मुग्ध इवासदत् ॥ ४१ ॥ गृहीत्वाऽपरपादाभ्यां सह लाङ्गूलमच्युतः ॥ भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितम् ॥ ४२ ॥ स कपित्थैर्महाकायः पात्यमानैः पपात ह ॥ तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ॥ देवाश्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ॥ ४३ ॥ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ॥ सप्रातराशौ गोवत्सांश्चारयन्तौ विचेरतुः ॥ ४४ ॥ स्वं स्वं वत्सकुलं सर्वे पाययिष्यन्त एकदा ॥ गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलम् ॥ ४५ ॥ ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ॥ तत्रसुर्वज्रनिर्भिन्नं गिरेः शृङ्गमिव च्युतम् ॥ ४६ ॥ स वै बको नाम महानसुरो बकरूपधृक् ॥ आगत्य सहसा कृष्णं तीक्ष्णतुण्डोऽग्रसद्बली ॥ ४७ ॥ कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ॥ बभूवुरिन्द्रियाणीव विना प्राणं विचेतसः ॥ ४८ ॥

पालकावपि तौ रामकृष्णौ वत्सपालकौ भूत्वा प्रातराशः प्रातर्भोज्यमन्नं तत्सहितौ तद्गृहीत्वा वत्सांश्चारयन्तौ वने विचेरतुः ॥ ४४ ॥ स्वं स्वमिति ॥ ते सर्वे रामकृष्णादयो गोपबाला एकदा स्वं स्वं वत्सकुलं वत्ससमूहं पाययिष्यन्तस्तावज्जलाशयस्याभ्याशं समीपं गत्वा वत्सान् जलं पाययित्वा स्वयमपि पपुः ॥ ४५ ॥ ते तत्रेति ॥ ते च बालास्तत्र जलाशयतीरे अवस्थितम् इन्द्रवज्रेण निर्भिन्नम् अत एव च्युतं भूमौ पतितं गिरेः शृङ्गमिव महासत्त्वं स्थूलबकविशेषं ददृशुः । दृष्ट्वा च तत्रसुः त्रासं जग्मुः ॥ ४६ ॥ स वै इति ॥ बकरूपं धर्जति गच्छति बकरूपधृक् गत्यर्थात् धृजेः क्विप् । तीक्ष्णतुण्डः बली च बको नाम महान् असुरः सहसा आशु चागत्य कृष्णमग्रसत् । तङभाव आर्षः ॥ ४७ ॥ कृष्णमिति ॥ कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः प्राणं विना इन्द्रियाणि इव विचेतसः ज्ञानरहिता मूर्च्छिता बभूवुः । रामः आदिर्येषामित्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्गुणसंविज्ञानः । तेन रामो विचेता नाभूदिति स्वामिपादाः । भ्रातृस्नेहादिति परे ॥ ४८ ॥ तमिति ॥ जगद्गुरोः ब्रह्मणः अपि पितरं गोपालस्य सूनुम् अग्निवत् तालुमूलं प्रदहन्तं तं कृष्णं बकः सद्यः एव चच्छर्द बाहुलकात् णिजभावः । तं च अक्षतं व्रणरहितं दृष्ट्वातिरुषा महता क्रोधेन पुनस्तुण्डेन चञ्च्वा हन्तुमभ्यपद्यत संमुखमाजगाम ॥ ४९ ॥ तमिति ॥ सतां गतिः साधूनां रक्षकः दिवौकसां मुदावहः आनन्दप्रापकः सः कृष्णः आपतन्तं वेगेनागच्छन्तं कंससखं तं बकं दोर्भ्यां भुजाभ्यां तुण्डयोर्निगृह्य बालेषु पश्यत्सु सत्सु लीलया अनायासेनैव वीरणवत् तृणविशेषवत् ददार ॥ ५० ॥ तदेति ॥ तदा सुरलोकवासिनो देवादयो नन्दनवनोद्भूतैर्मल्लिकादिभिः पुष्पैर्बकारिं श्रीकृष्णं समाकिरन् आच्छादितवन्तः । तथा आनकैः शङ्खैश्च वाद्यैः सहितैः संस्तवैः सम्यक्स्तुतिभिः समीडिरे तुष्टुवुः । आमभाव आर्षः । तत् देवैः कृतं भगवत्पूजनं वीक्ष्य गोपालसुता विसिस्मिरे विसिस्मियिरे आश्चर्यं प्राप्तवन्तः । इरे च इलोप आर्षः ॥ ५१ ॥ मुक्तमिति ॥ पूर्वं विचेतसो रामादयः दारकाः बालकाः बकस्यास्यान्मुखान्

तं तालुमूलं प्रदहन्तमग्निवद्गोपालसूनुं पितरं जगद्गुरोः ॥ चच्छर्द सद्योऽतिरुषाक्षतं बकस्तुण्डेन हन्तुं पुनरभ्यपद्यत ॥ ४९ ॥ तमापतन्तं स निगृह्य तुण्डयोर्दोर्भ्यां बकं कंससखं सतां गतिः ॥ पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसाम् ॥ ५० ॥ तदा बकारिं सुरलोकवासिनः समाकिरंश्चन्दनमल्लिकादिभिः ॥ समीडिरे चानकशङ्खसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ॥ ५१ ॥ मुक्तं बकास्यादुपलभ्य दारका रामादयः प्राणमिवैन्द्रियो गणः ॥ स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ॥ ५२ ॥ श्रुत्वा तद्विस्मिता गोपा गोप्यश्चातिप्रियादृताः ॥ प्रेत्यागतमिवौत्सुक्यादैक्षन्त तृषितेक्षणाः ॥५३॥ अहो बतास्य बालस्य बहवो मृत्यवोऽभवन् ॥ अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयम् ॥ ५४ ॥ अथाप्यभिभवन्त्येनं नैवैते घोरदर्शनाः ॥ जिघांसयैनमासाद्य नश्यन्त्यग्नौ पतङ्गवत् ॥ ५५ ॥

मुक्तङ्कृष्णमुपलभ्य ततः स्वस्थानमागतं तं परिरभ्य समाश्लिष्य प्राणं प्राप्य ऐन्द्रियः इन्द्रियसंबन्धी गणः इव निर्वृताः स्वस्थाः स्वव्यापारयोग्याश्च बभूवुः । ततश्च सायंकाले वत्सान् प्रणीय एकीकृत्य व्रजमेत्य आगत्य तत् बकवधादिकं जगुः उच्चैः कथितवन्तः ॥५२॥ श्रुत्वेति ॥ तत् गोपबालवर्णितं श्रुत्वा गोपा गोप्यश्च विस्मिता आश्चर्याक्रान्ताः अतिप्रियेण प्रीत्या आदृताः सादराः तृषितानि अतृप्तानि अमृतं पिबन्तीवेक्षणानि नेत्राणि येषां ते प्रेत्य परलोकं प्राप्य पुनरागतमिवौत्सुक्यादैक्षन्त अपश्यन् ॥ ५३ ॥ अहो बतेति ॥ अहो आश्चर्ये बतेति खेदे । अस्य बालस्य कृष्णस्य बहवो मृत्यवो मृत्युहेतवोऽभवन् अपि तथापि तेषामेव विप्रियमनिष्टमासीत् । यतस्तैः पूर्वमन्येषां भयं कृतम् ॥ ५४ ॥ अथेति ॥ यद्यपि एते घोरदर्शनाः भयङ्करस्वरूपदर्शनमात्रेणापि प्राणहारका अथापि तथाप्येनं बालमपि नैवाभिभवन्ति किञ्चिन्मात्रमप्यस्य पराभवं कर्तुं न शक्नुवन्ति नै वंते इत्यपि पाठः । प्रत्युत जिघांसया हन्तुमिच्छया एनमासाद्य प्राप्य स्वयमेव अग्नौ पतङ्गवत् नश्यन्ति ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहो इति ॥ अहो ब्रह्मविदां वेदोक्तपरमार्थज्ञानां वाचः कर्हिचिदप्यसत्या न सन्ति । भगवान् गर्गः "तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ।" इत्यादि यदाह उक्तवांस्तत्तथैवान्वभावि अनुभूतं दृष्टमित्यर्थः ॥ ५६ ॥ इतीति ॥ इत्येवं अहो बतेत्यादिवचोभिः नन्दादयो गोपाः कृष्णरामकथां कुर्वन्तस्ताभ्यां सह रममाणाश्च मुदा तज्जनितपरमानन्देन निमित्तेन भववेदनां दैहिकदैविकभौतिकसंसारतापं नाविन्दन् तदनुसंधानं न कृतवन्तः । क्षुधार्त्ता इदमब्रुवन्निति क्षुधादिकथनं तु तल्लीलाङ्गत्वान्न दोषाय ॥ ५७ ॥ एवमिति ॥ अयं श्लोको न सार्वत्रिकः क्वचिदग्रेपि पठ्यते । संबन्धोक्तिटीकायामुभयत्र व्याख्यातः । एवमुक्तप्रकारकैः निलायनैः निलीयस्थितिभिः निपूर्वाल्लीधातोर्णिजन्ताल्ल्युट् । सेतुबन्धैः मर्कटवदुत्प्लवनं शाखातः शाखान्तरगमनम् इत्यादिभिः कौमारैः कुमारावस्थायां योग्यैर्विहारैः कृत्वा कौमारं कुमारावस्थां रामकृष्णौ व्रजे जहतुः त्यक्तवन्तौ ॥ ५८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्यैकादश इमां व्यधात् ॥ ११ ॥ द्वादशेऽघं महासर्पं वत्सपालगिलं

अहो ब्रह्मविदां वाचो नासत्याः सन्ति कर्हिचित् ॥ गर्गो यदाह भगवानन्वभावि तथैव तत् ॥ ५६ ॥ इति नन्दादयो गोपाः कृष्णरामकथां मुदा ॥ कुर्वन्तो रममाणाश्च नाविन्दन्भववेदनाम् ॥ ५७ ॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः ॥ ५८ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे वत्सबकवधो नामैकादशोऽध्यायः ॥ ११ ॥ श्रीशुक उवाच ॥ ॥ क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्सपान् ॥ प्रबोधयन् शृङ्गरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः ॥ १ ॥ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः ॥ स्वान्स्वान्सहस्रोपरिसंख्ययाऽन्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा ॥ २ ॥

गले ॥ प्रविश्याहन्हरिस्तत्र श्लोका वेदपयोर्धयः ॥ चैत्वार्युवाचेत्यङ्ग्यूनाः पञ्चवर्णा अनुष्टुभः ॥ १२ ॥ केचित् द्वादशादिकमध्यायत्रयं प्रक्षिप्तमाहुस्तत्खण्डनं टीकाशेषभागे ज्ञेयम् । क्वचिदिति ॥ कचित्कदाचित् वनाशाय वन एव प्रथमं भोजनं कर्तुं मनः दधत् । दृढेच्छां कुर्वन् प्रातः समुत्थाय चारुणा मनोहरेण शृङ्गरवेण सुखेन निद्राभङ्गसाधनेन वयस्याश्च ते वत्सपाश्च तान् स्वसखीन् प्रबोधयन् अहं वनं गच्छामि यूयं सर्वे आगच्छतेति ज्ञापयन् वत्साः पुरःसरा यस्य स हरिर्व्रजाद्विनिर्गतः । बलदेवस्तु मात्रा जन्मर्क्षशान्तिकस्नानार्थं गृह एव रक्षित इति ज्ञेयम् ॥ १ ॥ तेनैवेति ॥ तदा तेन श्रीकृष्णेन साकमेव स्निग्धाः श्रीकृष्णे प्रेमयुक्ताः सुष्ठु रम्याः शिकु शिक्यं दध्यादिपूर्णं भोजनार्थं वेत्रं गोचारणार्थं विषाणवेणूवादनार्थौ येषां ते सहस्रशः पृथुकाः गोपबालाः सहस्रसंख्यातः उपरि या संख्या लक्षकोट्यादिः तयान्वितान् स्वकान् स्वकान् वत्सान् पुरस्कृत्य अग्रतः कृत्वा मुदा हर्षेण विनिर्ययुर्विनिःसृताः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णवत्सैरिति ॥ असंख्यातैः कृष्णवत्सैः सह स्ववत्सकान् यूथीकृत्य एकीकृत्य चारयन्तोर्भलीलाभिस्तत्र तत्र वने ह हर्षेण विजन्हुः । अत्र तोषण्याम् असंख्यातैः असंख्यसंज्ञसंख्यैरित्यर्थः । असंख्यसंज्ञा च क्षीरस्वामिना परार्धपर्यन्ताष्टादशसंख्या दशगुणोत्तरा उक्त्वा दर्शिता ॥ स्वहतं परार्धममितं तत्स्वहतं भूर्यतोऽसंख्यमिति स्वहतं स्वेन गुणितमित्यर्थः । अत्र बालैः पाल्यमानानां वत्सानामसंख्यत्वं किं पुनर्व्रजस्थतर्पणका गोसङ्गतवत्सा वत्सतर्यो वत्सतरा वृषाश्च गोपालदेवदृशा वर्धमाना असंख्येया इति महिष्यादयश्च पशवः केन गण्याः । एवं गोपा गोप्यश्चानन्ता इत्युक्तम् । अत्रैव तेषां व्रजमण्डलेऽपि मातुमशक्यत्वं किं पुनर्वृन्दावनादिसीमामात्रमध्ये इति तु न शङ्क्यम् । भगवच्छक्त्यैव मातुं शक्यत्वात् । एवमग्रे यादवादीनां विषयेऽपि बोध्यम् ॥ ३ ॥ फलेति ॥ पूर्वं मातृभिः काचगुञ्जामणिस्वर्णैर्भूषिता अपि फलैः प्रवालैर्नवपल्लवैः स्तबकैः पुष्पादिगुच्छैः सुमनोभिः पुष्पैः पिच्छैर्बर्हैः धातुभिर्गैरिकाद्यैः पुनरपि आत्मानमभूषयन् । तत्र काचगुञ्जे बालानामाग्रहात् मणिस्वर्णे मातॄणामाग्रहात्

कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान् ॥ चारयन्तोऽर्भलीलाभिर्विजह्रुस्तत्र तत्र ह ॥ ३ ॥ फलप्रवालस्तवकसुमनःपिच्छधातुभिः ॥ काचगुञ्जामणिस्वर्णभूषिता अप्यभूषयन् ॥ ४ ॥ मुष्णन्तोऽन्योन्यशिक्यादीञ्ज्ञातानाराच्च चिक्षिपुः ॥ तत्रत्याश्च पुनर्दूराद्धसन्तश्च पुनर्ददुः ॥ ५ ॥ यदि दूरं गतः कृष्णो वनशोभेक्षणाय तम् ॥ अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे॥६॥ केचिद्वेणून्वादयन्तो ध्मान्तः शृङ्गाणि केचन ॥ केचिद्भृङ्गैः प्रगायन्तः कूजन्तः कोकिलैः परे ॥७॥ विच्छायाभिः प्रधावन्तो गच्छन्तः साधुहंसकैः ॥ बकैरुपविशन्तश्च नृत्यन्तश्च कलापिभिः ॥ ८ ॥

भूषणे ज्ञेये । यद्वा । काचगुञ्जासदृशैर्मणिस्वर्णैः ॥ ४ ॥ मुष्णन्त इति ॥ अन्योन्यस्य शिक्यादीन् मुष्णन्तश्चोरयन्तः ततोऽनेन मदीयमपहृतमिति स्वामिना ज्ञातान् आराद्दूरादेव चिक्षिपुः प्रक्षिप्तवन्तः । ततः शिक्यादि स्वामिनि तत्रैव विद्रुत्य नेतुं प्रस्थिते तत्रत्या बाला येषु शिक्यादयः पतितास्ते पुनस्तांस्ततोऽपि दूराच्चिक्षिपुः । एवमनवस्थया स्ववस्त्वप्राप्नुवतो बालान् रुदन् मुखानवलोक्य हसन्तः पुनर्ददुः ॥ ५ ॥ यदीति ॥ यदि वनशोभाया ईक्षणाय कृष्णो दूरं गतो भवति तर्हि ते बाला अहं पूर्वं स्प्रक्ष्याम्यहं पूर्वं स्प्रक्ष्यामीति वदन्तोऽनुद्रुत्य तं संस्पृश्य आश्लिष्य रेमिरे ॥ ६ ॥ केचिदिति ॥ केचिद्वेणून् वादयन्तो रेमिरे इति चतुःश्लोक्यामनुषङ्गः । केचन शृङ्गाणि ध्मान्तः मुखवायुपूरणेन वादयन्तः धमाभाव आर्षः । केचिद्भृङ्गैः सह प्रगायन्तोऽपरेऽन्ये कोकिलैः सह कूजन्तो रेमिरे ॥ ७ ॥ विच्छायाभिरिति ॥ उपरि गच्छतां वीनां पक्षिणां छायाभिः सह प्रधावन्तो रेमिरे । "छायाबाहुल्ये" इति क्लीबत्वाभाव आर्षः । वेरिति जात्येकवचनान्तेन समासो वा । हंसकैः ह्रस्वहंसैः सह साधु यथा स्यात्तथा गच्छन्तः रेमिरे । बकैः सह तद्वज्जलतीरे उपविशन्तश्च रेमिरे । कलापिभिर्मयूरैः सह नृत्यन्तश्च रेमिरे ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकर्षन्त इति ॥ कीशानां वानराणां बालान् शाखासु लम्बमानानि लाङ्गूलानि । यद्वा । वानरबालकान् कर्षन्तः लाङ्गूलममुञ्चन्त एव तैः सह द्रुमान् आरोहन्तश्च तैर्वानरैः साकं विकुर्वन्तो दन्तप्रदर्शनभ्रूविजृम्भादिविकारान् कुर्वन्तः शता आर्षः । पलाशिषु वृक्षेषु प्लवन्तः शाखायाः शाखान्तरमुद्गच्छन्तश्च शता आर्षः । रेमिरे ॥ ९ ॥ साकमिति ॥ सरित्प्रस्रवे नदीतटात् परिस्रुतजले संप्लुताः निमग्नाः सन्तो भेकैः मण्डूकैः साकं विलङ्घन्तः आर्षः शता । सरितः स्रवेति पाठे स्रवेण नद्यादिघट्टेभ्यः परिस्रुतजलेन संप्लुताः पूरिताः सरितः सरित्क्षुद्रधारा विलङ्घन्तः प्रतिच्छायाः प्रतिबिम्बानि हसन्तः प्रतिस्वनान् सरोवरकूपादिषु स्वकृतशब्दसदृशान् शब्दाञ्छपन्तश्च रेमिरे । रे कस्त्वं ब्रूषे इति स्वेनोक्ते तत्प्रतिध्वानिं तथैव श्रुत्वा किमरे रेकारेणाक्षिपसि इति अनवस्थया शपन्तो रेमिरे ॥ १० ॥ इत्थमिति ॥ सतां तत्वज्ञानां ब्रह्मसुखानुभूत्या ब्रह्म च तत्सुखं च सानुभूतिश्चेति कर्मधारयः सदानन्दचिद्रूपेण स्फुरतेत्यर्थः । दास्यं गतानां तु परदैवतरूपेण स्फुरता मायाश्रितानां विषयिणां तु नरदारकरूपेण स्फुरता भगवता साकं कृतः पुण्यानां पुञ्जो यैस्ते गोपबालाः विजह्रुः अयं भावः । ज्ञानिनां सच्चिदानन्दत्वेनानुभवमात्रं नत्वेवं विहारः भक्तिमतां देवतारूपेण भजनमात्रं विष-

विकर्षन्तः कीशबालानारोहन्तश्च तैर्द्रुमान् ॥ विकुर्वन्तश्च तैः साकं प्लवन्तश्च पलाशिषु ॥९॥ साकं भेकैर्विलङ्घन्तः सरित्प्रस्रवसंप्लुताः ॥
विहसन्तः प्रतिच्छायाः शपन्तश्च प्रतिस्वनान् ॥ १० ॥ इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ॥ मायाश्रितानां नरदार-
केण साकं विजह्रुः कृतपुण्यपुञ्जाः ॥११॥ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यः ॥ स एव यद्दृग्विषयः स्वयं स्थितः
किं वर्ण्यते दिष्टमतो व्रजौकसाम् ॥ १२ ॥ अथाघनामाऽभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः ॥ नित्यं यदन्तर्निजजीवितेप्सु-
भिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥ १३ ॥

यिणां तत्संबन्ध एव नास्ति कुतो विहारः अतो भगवता सहैवं विहारो ज्ञानिप्रभृत्यपेक्षयाधिकपुण्यपुञ्जवतां प्रेमवतामेव पुण्येत्यपि लोकदृष्ट्या पुण्यशब्देन वा भगवत्प्रीतिकरमाचरणं लक्षणीयम् ॥ ११ ॥ यदिति ॥ यस्य भगवतः पादपांशुः पादसंबन्धिरजः । यद्वा । यस्य पादपानां विहारास्पदवृन्दावनवृक्षाणामेकः अंशुः शोभाकणः पत्रादिः बहुजन्मस्वनुष्ठितेन कृच्छ्रतरतपःसमाध्यादिकष्टेन धृतो वशीकृत आत्मा मनो यैस्तैर्योगिभिरप्यलभ्यः अगम्य इत्यपि पाठः । अहो आश्चर्ये । अत इति च पाठः । स एव येषां व्रजवासिनां स्वयं साक्षादेव दृग्विषयः सन् स्थितस्तेषां दिष्टं भाग्यं किं वर्ण्यते तत्तु वाङ्मनसयोरगोचर इति भावः । दिष्टस्य भाग्यस्य महस्तेजो महत्त्वम् इति वा ॥ १२ ॥ अथेति ॥ अथ तेषां रामकृष्णादीनां यत्सुखेन क्रीडनं तस्य वीक्षणे नास्ति क्षमा सहनं यस्य सः अघनामा महासुरोऽभ्यपतत् अकस्मादेवाजगाम । यद्वा । अघनामा महासुरोऽभ्यपतत् तेषां सुखक्रीडनवीक्षणाक्षमश्च आसीत् इत्यन्वयः । यत्तेषां क्रीडनं पीतामृतैरपि निजजीवितेप्सुभिः भगवल्लीलास्मरणेन स्वजीवनसफलत्वेच्छु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

भिरमरैरन्तर्मनसि नित्यं प्रतीक्ष्यते चिन्त्यते न ह्यमृतपानेन जीवनसाफल्यमपि तु भगवत्स्मरणेनेत्याशयः । यद्वा । यस्याघासुरस्यान्तः छिद्रं मरणोपायः पीतामृतैर्दैवैरपि निजजीवितेप्सुभिः नित्यं प्रतीक्ष्यते कथं कदा वा मरिष्यतीति ॥१३॥ दृष्ट्वेति ॥ कंसेन कृष्णादिहननार्थमनुशिष्टः प्रेरितः बकी पूतना बकश्च तयोरनुजः एकशेषाभाव आर्षः । स्पष्टार्थो वा । खलो दुष्टः सः अघासुरः तदा कृष्णो मुखं प्रधानं येषां तानर्भकान् दृष्ट्वा अचिन्तयत् । अयं तु अयं कृष्ण एव मे सोदरयोर्भ्रातृभगिन्योर्नाशकृत् अतः मम तयोर्द्वयोः स्थाने तद्वैरनिमित्तं वा तत् पिण्डदानार्थं वा सबलं ससैन्यं वत्सपालसहितमेनं हनिष्ये हनिष्यामि । तङार्षः ममेति वाक्यभेदान्न पौनरुक्त्यदोषः। अथैनमित्यपि पाठः । ॥१४॥ एते इति ॥ एते बालवत्साः यदा मम सुहृदोः भ्रातृभगिन्योस्तिलापःकृताः मृतयोस्तिलोदकवत्तृप्तिहेतवः कृता हता इत्यर्थः । तदा व्रजौकसः एतेभ्योऽतिरिक्ता व्रजगता अपि नन्दादयः सर्वे नष्टसमाः मृतप्राया एव । यतः प्राणे निर्गते सति वर्ष्मसु देहेषु का नु चिन्ताऽस्ति स्वत एव ते नश्यन्तीत्यर्थः । यस्मात् ये प्राणभृतस्ते सर्वेऽपि प्रजा अप-

दृष्ट्वाऽर्भकान्कृष्णमुखानघासुरः कंसानुशिष्टः सबकीबकानुजः ॥ अयं तु मे सोदरनाशकृत्तयोर्द्वयोर्ममैनं सबलं हनिष्ये ॥१४॥ एते यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौकसः ॥ प्राणे गते वर्ष्मसु का नु चिन्ता प्रजासवः प्राणभृतो हि ये ते ॥ १५ ॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाममहाद्रिपीवरम् ॥ धृत्वाऽद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया खलः ॥ १६ ॥ धराधरोष्ठो जलदोत्तरोष्ठो दर्याननान्तो गिरिशृङ्गदंष्ट्रः ॥ ध्वान्तान्तरास्यो वितताध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः ॥ १७ ॥ दृष्ट्वा तं तादृशं सर्वे मत्वा वृन्दावनश्रियम् ॥ व्यात्ताजगरतुण्डेन ह्युत्प्रेक्षन्ते स्म लीलया ॥ १८ ॥

त्यानि असवः प्राणतुल्या येषां तथाभूताः भवन्ति ॥ १५ ॥ इतीति ॥ स खलः अघासुरः इत्येवं व्यवस्य निश्चित्य व्यवसायेति वाच्य आलोप आर्षः । तदा योजनप्रमाणेन आयामेन दैर्घ्येण युक्तं च तन्महाद्रिरिव पीवरं च तदित्यर्थः।व्यात्तं प्रसारितं गुहातुल्यमाननं यस्मिंस्तत् बृहत् अद्भुतम् अजगरं वपुर्धृत्वा तेषां बालानां ग्रसनाशया पथि व्यशेत शयान इवातिष्ठत् ॥ १६ ॥ अद्भुतत्वमाह—धरेति ॥ स च धरायामधरोष्ठो यस्य सः जलदेषु उत्तरोष्ठो यस्य सः दर्याविवाननस्यान्तौ सृक्किणी यस्य सः गिरेः शृङ्गाणीव दंष्ट्रा यस्य सः ध्वान्तोऽन्धकारस्तद्युक्तमन्तरास्यं मुखमध्यं यस्य सः वितताध्ववत् विस्तृतमार्गवत् जिह्वा यस्य सः परुषानिलवच्छ्वासो यस्य सः दववदीक्षणयोरुष्णः दावतुल्यदृष्टिरित्यर्थः । परुषानिलश्वासश्वासौ दवेक्षणोष्णः स तथा अभूत् ॥ १७ ॥ दृष्ट्वेति ॥ तादृशं तमसुरं ते सर्वे गोपाः दृष्ट्वापि भ्रान्त्या वृन्दावनस्य श्रीः सम्पदेवैषा नतु महासर्पः इति मत्वा व्यात्ताजगरतुण्डेन प्रसारिताजगरमुखसादृश्येन लीलया विशेषत उत्प्रेक्षन्ते स्म उत्प्रेक्षितवन्तः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र केचित्स्वोत्प्रेक्षां स्वसखीन् पृच्छन्ति—अहो इति ॥ अहो आश्चर्यं हे मित्राणि पुरः स्थितमिदं सत्वकूटं प्राण्याभासमिवास्ति न वा यद्वा सत्वकूटं निश्चलः प्राणिविशेषः कूटोऽस्त्री निश्चले राशौ " इति मेदिनी । यद्वा । सत्वं कूटं गिरिशृङ्गमिवेति समासः । तत्राप्यस्मत्संग्रसनाय व्यात्तं विदारितं यद् व्यालतुण्डं सर्पमुखं तद्वदाचरति न वा तद्वदत ॥ १९ ॥ तान्सखायः प्रत्याहुः स्म—सत्यमिति ॥ सत्यं निश्चितमर्ककरैः सूर्यकिरणैः आरक्तं घनमुत्तराहनुवत् लक्षणया उपरितनोष्ठवत् पश्यत । पुं वद्भावाभाव आर्षः । एतेन तस्य पूर्वमुखस्थितिः सूच्यते । तस्य रक्तघनस्य प्रतिच्छायया अरुणं रोधो नदीकूलमधराहनुवदधरोष्ठवत् पश्यत ॥ २० ॥ प्रतिस्पर्द्धेते इति ॥ सव्यासव्ये वामदक्षिणयोर्मध्ये वर्तमाने नगोदरे गिरिदर्यौ सृक्किभ्यामोष्ठप्रान्ताभ्यां प्रतिस्पर्द्धेते तुल्यतया वर्तेते इति पश्यत । एतास्तुङ्गाः शृङ्गाणामालयः पङ्क्तयोऽपि तस्याजगरस्य दंष्ट्राभिः स्पर्द्धमानाः पश्यत ॥ २१ ॥ आस्तृतेति ॥ अयमास्तृतायाममार्गः विस्तृतो दैर्घ्यवान् मार्गस्तस्य रसनां प्रतिगर्जति स्पर्धते एषां शृङ्गाणामन्तर्गतमेतद्ध्वान्त-

अहो मित्राणि गदत सत्त्वकूटं पुरःस्थितम् ॥ अस्मत्संग्रसनव्यात्तव्यालतुण्डायते न वा ॥ १९ ॥ सत्यमर्ककरारक्तमुत्तराहनुवद्घनम् ॥ अधराहनुवद्रोधस्तत्प्रतिच्छाययारुणम् ॥ २० ॥ प्रतिस्पर्धेते सृक्किभ्यां सव्यासव्ये नगोदरे ॥ तुङ्गशृङ्गालयोप्येतास्तद्दंष्ट्राभिश्च पश्यत ॥ २१ ॥ आस्तृतायाममार्गोऽयं रसनां प्रतिगर्जति ॥ एषामन्तर्गतं ध्वान्तमेतदप्यन्तराननम् ॥ २२ ॥ दावोष्णखरवातो यं श्वासवद्भाति पश्यत ॥ तद्दग्धसत्त्वदुर्गन्धोऽप्यन्तरामिषगन्धवत् ॥ २३ ॥ अस्मान्किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनङ्क्ष्यति ॥ क्षणादनेनेति बकार्युशन्मुखं वीक्ष्योद्धसन्तः करताडनैर्ययुः ॥ २४ ॥ इत्थं मिथो तथ्यमतज्ज्ञभाषितं श्रुत्वा विचिन्त्येत्यमृषा मृषायते ॥ रक्षो विदित्वाऽखिलभूतहृत्स्थितः स्वानां निरोद्धुं भगवान्मनो दधे ॥ २५ ॥

मन्धकारमपि कर्तृ अन्तराननमाननमध्यं प्रतिगर्जति पश्यत नीलत्वसाम्यात् ॥ २२ ॥ दावोष्णेति ॥ दावाग्निनोष्णः खरोऽयं वातः श्वासवद् भाति पश्यत । तेन दावाग्निना दग्धानां सत्त्वानां यो दुर्गन्धः सोऽपि सर्पस्यान्तर्गतामिषगन्धवद् भाति पश्यत । इदं दृश्यमानं महासर्पवत्प्रतीयते नतु महासर्प इति प्रकरणार्थः ॥ २३ ॥ मिलिताः सर्वे किञ्चित्सभयमाहुः—अस्मानिति ॥ यदि वा सत्यमयं सर्पोऽस्तु तथापि किमत्र निविष्टानस्मान् ग्रसिता ग्रसिष्यते तथा चेद् ग्रसिष्यते चेत्तदा तेन श्रीकृष्णेन हन्त्रा हेतुना यमपि बकवत् क्षणादेव विनङ्क्ष्यति इति परस्परमुक्त्वा बकारेः श्रीकृष्णस्य उशत् अतिकमनीयं मुखं वीक्ष्य अस्मद्दृग्गोचर एव कृष्ण आस्ते कात्र चिन्ता इति लब्धविश्वासा उच्चैर्हसन्तः करताडनैः सह वीरत्वादिप्रकाशकैर्बाहुस्फोटादिभिः सर्पापसारणाय वा कृतैः सह ययुः । वत्सा अपि अनुययुरित्यपि ज्ञेयम् ॥ २४ ॥ इत्थमिति ॥ इत्थम् अतज्ज्ञानामजगररूपो राक्षसोऽयमित्यजानतां बालानामित्थमतथ्यमसत्यं मिथो भाषितं श्रुत्वा अमृषा वस्तुतोऽजगररूपभागसुर एवैषां मृषायते अजगरसदृशवृन्दा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनश्रीतया प्रतीयते इति विचिन्त्य यतो भगवान् अखिलभूतहृत्स्थितः सर्वप्राणिनां हृदये स्थितः साक्षी अतस्तत् न सर्पमात्रं किन्तु अघनामकं रक्ष इति विदित्वा स्वानां स्वीयान् शेषे षष्ठी । निरोद्धुं निवारयितुं मनो दधे ॥२५॥ तावदिति ॥ यावद्भगवान् बालान्निवारयितुमियेष तावत् ते सवत्साः शिशवः असुरोदरस्य अन्तरे मध्ये परं केवलं प्रविष्टाः बकारेः श्रीकृष्णस्य वेशनं प्रवेशनं प्रतीक्षमाणेन हतयोः स्वकीययोः पूतनाबकयोरन्तं स्मरतीति तथा तेन रक्षसा नतु गीर्णाः मुखसङ्कोचनेन न गिलिताः । जीर्णा इति पाठेऽप्ययमेवार्थः ॥२६॥ तानिति ॥ सकललोकस्याभयप्रदः घृणया दयया अर्दितः कृष्णः अनन्यनाथान् नान्यः स्वव्यतिरिक्तो नाथो रक्षको येषां तान् स्वकरात् महामणीनिवावच्युतान् मृत्योरघस्य जठराग्नेर्घासान् ग्रासभूतान् तृणतुल्यान् वा तत्र पतनोन्मुखान् दीनान् तान् वत्सान् पालकांश्च वीक्ष्य दिष्टकृतेन प्रारब्धकृतेन अघासुरमुखप्रवेशेन विस्मित इवाभूत् ॥ २७ ॥ कृत्यमिति ॥ अत्र विषये किं कृत्यं किं करणीयं यतः अस्य खलस्य दुष्टस्याघस्य जीवनं न स्यात् तथामीषां सतां मद्भक्तानां

तावत्प्रविष्टास्त्वसुरोदरान्तरं परं न गीर्णाः शिशवः सवत्साः ॥ प्रतीक्षमाणेन बकारिवेशनं हतस्वकान्तस्मरणेन रक्षसा ॥ २६ ॥ तान्वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान्स्वकरादवच्युतान् ॥ दीनांश्च मृत्योर्जठराग्निघासान्घृणार्दितो दिष्टकृतेन विस्मितः ॥ २७ ॥ कृत्यं किमत्रास्य खलस्य जीवनं न वा अमीषां च सतां विहिंसनम् ॥ द्वयं कथं स्यादिति संविचिन्त्य तज्ज्ञात्वाऽविशत्तुण्डमशेषदृग्घरिः ॥ २८ ॥ तदा घनच्छदा देवा भयाद्धा हेति चुक्रुशुः ॥ जहृषुर्ये च कंसाद्याः कौणपास्त्वघबान्धवाः ॥ २९ ॥ तच्छ्रुत्वा भगवान्कृष्णस्त्वव्ययः सार्भवत्सकम् ॥ चूर्णीचिकीर्षोरात्मानं तरसा ववृधे गले ॥ ३० ॥ ततोऽतिकायस्य निरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः ॥ पूर्णोऽन्तरङ्गे पवनो निरुद्धो मूर्द्धन्विनिष्पाट्य विनिर्गतो बहिः ॥ ३१ ॥

विहिंसनं मरणं च न स्यात् इति द्वयं वै निश्चितं कथं स्यात् इति संविचिन्त्य तत् तदुपायं ज्ञात्वा अशेषदृक् सर्वज्ञः हरिः तस्य तुण्डं मुखमविशत् ॥ २८ ॥ तदेति ॥ तदा भगवतो मुखप्रवेशकाले कंसस्याघासुरस्य च भयात् घनच्छदा मेघान्तरिताः देवाः भगवतोऽपि मरणमाशङ्क्य भयात् हा हा इति चुक्रुशुः । ये च चारचक्षुः कंस आद्यो मुख्यो नियन्ता येषां ते अघस्य बान्धवाः तद्भ्रातुः पुत्रादयः कौणपा राक्षसास्ते तु जहृषुः ॥ २९ ॥ तच्छ्रुत्वेति ॥ तत् हा हेत्याक्रोशं श्रुत्वा अव्ययो भगवान् कृष्णः सार्भकवत्सकं बालवत्ससहितम् आत्मानं मुखसंवरणगात्रपरिवर्तनादिना चूर्णीचिकीर्षोस्तस्य गले आदावेव तरसा वेगेन झटिति ववृधे ॥ ३० ॥ तत इति ॥ ततः तस्माद्वर्द्धनादेव निरुद्धमार्गिणो निरुद्धः प्राणमार्गः कण्ठो यस्यास्ति तस्य अत एव उद्गीर्णदृष्टेर्बहिर्निर्गतलोचनस्य इतस्ततो भ्रमतो देहं चालयतः अतिकायस्य स्थूलशरीरस्याघस्यान्तरङ्गे देहमध्ये निरुद्धः अत एव पूर्णः पवनः प्राणवायुः मूर्धन् मूर्द्धनि स्थितं ब्रह्मरन्ध्रं विनिष्पाट्य विनिर्भिद्य बहिर्निर्गतः । मूर्द्धन्निति ङिलुक् छान्दसः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनैवेति ॥ तेनैव मार्गेण सर्वेषु प्राणेषु इन्द्रियेषु वहिर्गतेषु सत्सु परेतान् रक्षोजठराग्नेर्मूर्च्छितान् वत्सान् सुहृदो बालांश्च स्वयामृतवर्षिण्या दृष्ट्या चेतनान् कृत्वोत्थाप्य तदन्वितस्तैः सहितो मुकुन्दो भगवान् पुनस्तस्य वक्त्राद्विनिर्ययौ ॥ ३२ ॥ पीनेति ॥ तदा च पीनः स्थूलो योऽहेर्भोगो देहस्तस्मादुत्थितं निःसृतं पीनाहिभोगे स्थितमिति स्वामिसम्मतः पाठः । अद्भुतं महत्प्रकाशबहुलं शुद्धसत्वमयं ज्योतिः स्वधाम्ना स्वप्रकाशेन दश दिशः ज्वलयत् प्रकाशयत् खेऽवस्थितं सत् ईशस्य श्रीकृष्णस्य ततो निर्गमं प्रतीक्ष्य निर्गते तस्मिन् भगवति दिवौकसां मिषतां पश्यतामेव विवेश ॥ ३३ ॥ तत इति ॥ ततोऽघासुरवधादतिहृष्टाः सुरादयः स्वकृतः स्वस्य देवसमूहस्य तत्कार्यं कृतवतः स्वस्रष्टुर्वा । श्रीकृष्णस्यार्हणं सत्कारमकृत अकुर्वन् एकत्वमार्षम् । तत्र सुरा देवाः पुष्पैरर्हणमकृतेति सर्वत्रान्वयः । अप्सरसश्च नर्तनैः सुष्ठु गायन्तीति सुगाः गन्धर्वादयो गीतैः वाद्यधरा विद्याधरादयो वाद्यकैः विप्रा वसिष्ठादय ऋषयः स्तवैः गणाः पार्षदाः भक्तजनाश्च जयेति निस्वनैः शब्दैरर्हणमकृत ॥ ३४ ॥ तदद्भु-

तेनैव सर्वेषु वहिर्गतेषु प्राणेषु वत्सान्सुहृदः परेतान् ॥ दृष्ट्या स्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुन्दो भगवान्विनिर्ययौ ॥ ३२ ॥ पीनाहि-
भोगोत्थितमद्भुतं महज्ज्योतिः स्वधाम्ना ज्वलयद्दिशो दश ॥ प्रतीक्ष्य खेऽवस्थितमीशनिर्गमं विवेश तस्मिन्मिषतां दिवौकसाम् ॥ ३३ ॥
ततोऽतिहृष्टाः स्वकृतोऽकृतार्हणं पुष्पैः सुरा अप्सरसश्च नर्तनैः ॥ गीतैः सुगा वाद्यधराश्च वाद्यकैः स्तवैश्च विप्रा जयनिस्वनैर्गणाः ॥ ३४ ॥
तदद्भुतस्तोत्रसुवाद्यगीतिकाजयादिनैकोत्सवमङ्गलस्वनान् ॥ श्रुत्वा स्वधाम्नोऽन्त्यज आगतोचिराद्दृष्ट्वा महीशस्य जगाम विस्मयम् ॥ ३५ ॥
राजन्नाजगरं चर्म शुष्कं वृन्दावनेऽद्भुतम् ॥ व्रजौकसां बहुतिथं बभूवाक्रीडगह्वरम् ॥ ३६ ॥ एतत्कौमारजं कर्म हरेरात्माहिमोक्षणम् ॥ मृत्योः
पौगण्डके बाला दृष्ट्वोचुर्विस्मिता व्रजे ॥ ३७ ॥

तेति ॥ तेषां देवादीनामद्भुतस्तोत्राणि च सुवाद्यानि च गीतिकाः सुकुमारा गीतयश्च जयो जयशब्द आदिर्येषां ते तान् नैकोत्सवान् नृत्याद्यनेकोत्सवेन जातान्मङ्गलस्वनान् हस्तकिङ्किण्यादिशब्दान् स्वधाम्नः सत्यलोकस्यान्ति समीपे भगवदिच्छाबलात् दूरतोऽपि श्रुत्वा अजो ब्रह्मा अलक्षित एवाचिरात् शीघ्रमागतः सन् ईश्वरस्य महि महिमानमघासुरस्यापि मोक्षप्रदानं मुखप्रवेशेन ततो बालादीनां विमोचनं च दृष्ट्वा विस्मयं जगाम ॥ ३५ ॥ राजन्निति ॥ हे राजन् तदद्भुतमाजगरं चर्म वृन्दावने शुष्कं सत् व्रजौकसां बहुतिथं बहुकालमाक्रीडगह्वरं क्रीडार्थे महाबिलं बभूव ॥ ३६ ॥ एतदिति ॥ " कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशाद्यौवनं तु ततः परम् ॥ " इति वचनात् एतन्मृत्योरात्मनाम् अहेश्च मोक्षणं तत्रात्मनां बालादीनां प्रसिद्धान्मृत्योर्मोक्षणम् अहेरघासुरस्य ज्योतिषः कृष्णे प्रवेशस्य दृष्टत्वात्संसारलक्षणान्मृत्योर्मोक्षणम् । यद्वा । मृत्योः अहिमरणाद्धेतोः आत्मनाम् अहेः सकाशात् मोक्षणं हरेः कौमारजं पञ्चमाब्दकृतं कर्म तदैव दृष्ट्वा पौगण्डके षष्ठेऽब्देऽद्यैव तत् वृत्तमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

विस्मिताः सन्तो बाला व्रजे ऊचुः । अन्ये तु श्रीकृष्णे कालेनाल्पेनेत्युक्तदिशा पञ्चमाब्दारम्भे पौगण्डप्रवेशः तथा च चतुर्थाब्दकृतं पञ्चमेऽब्दे कृतं प्रोचुरित्याहुः ॥ ३७ ॥ नैतदिति ॥ मनुजार्भमायिनः धृतमनुष्यबालभावस्य वस्तुतस्तु परमस्य परमेश्वरस्य परे ब्रह्मादयः अवरे स्थावरादयस्तेषां वेधसः स्रष्टुर्भगवतः स्पर्शनेन धौतपातको निवृत्तकर्मबन्धनः सन्नघोऽप्यसतां विषयाविष्टचित्तानां भगवद्विमुखानां सुदुर्लभमपि आत्मसाम्यं भगवत्समानरूपतां यत्प्राप तदेतच्चित्रमाश्चर्यं न भवति ॥ ३८ ॥ सकृदिति ॥ अङ्ग हे राजन् यस्याङ्गं मूर्तिस्तस्या अपि प्रतिमा प्रतिकृतिः सापि मनोमयी मनसा चिन्तिता तत्रापि बलादन्तर्हिता हृदये स्थापिता सती खट्वाङ्गादिभ्यो भागवतीं गतिं मुक्तिं ददौ । स एव नित्या चासावात्मसुखानुभूतिश्च तया नित्यस्वानन्दानुभवेनाभिव्युदस्ता दूरतोऽपसारिता माया येन स परमो भगवान् स्वयं साक्षादेव यस्यान्तर्गतः सः तस्मै किं पुनर्न दद्यात् सर्वमपि श्रेयो दद्यादेव ॥ ३९ ॥ इत्थमिति ॥ हे द्विजाः यादवदेवेन श्रीकृष्णेन युधिष्ठिरादिभ्यो दत्तः परीक्षित् राजा स्वरातुः

नैतद्विचित्रं मनुजार्भमायिनः परावराणां परमस्य वेधसः ॥ अघोऽपि यत्स्पर्शनधौतपातकः प्रापात्मसाम्यं त्वसतां सुदुर्लभम् ॥ ३८ ॥ सकृद्यदङ्गप्रतिमान्तराहिता मनोमयीं भागवतीं ददौ गतिम् ॥ स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायोऽन्तर्गतो हि किं पुनः ॥ ३९ ॥ सूत उवाच ॥ ॥ इत्थं द्विजा यादवदेवदत्तः श्रुत्वास्वरातुश्चरितं विचित्रम् ॥ पप्रच्छ भूयोऽपि तदेव पुण्यं वैयासकिं यन्निगृहीतचेताः ॥ ४० ॥ राजोवाच ॥ ॥ ब्रह्मन्कालान्तरकृतं तत्कालीनं कथं भवेत् ॥ यत्कौमारे हरिकृतं जगुः पौगण्डकेऽर्भकाः ॥ ४१ ॥ तद् ब्रूहि मे महायोगिन्परं कौतूहलं गुरो ॥ नूनमेतद्धरेरेव माया भवति नान्यथा ॥ ४२ ॥ वयं धन्यतमा लोके गुरोऽपि क्षत्रबन्धवः ॥ यत्पिबामो मुहुस्त्वत्तः पुण्यं कृष्णकथामृतम् ॥ ४३ ॥

स्वदातुः स्वरक्षकस्य विचित्रमघमोक्षादिचरितमित्थं श्रुत्वा येन श्रीकृष्णचरितेन नितरां गृहीतं वशीकृतं चेतो यस्य सः परीक्षित् भूयः पुनरपि तदेव पुण्यं पवित्रं श्रीकृष्णचरितं वैयासकिं शुकं प्रति पप्रच्छ ॥ ४० ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् यत् आत्माहिमोक्षलक्षणं कर्म कौमारावस्थायां हरिणा कृतं तत् अर्भका बालाः पौगण्डावस्थायां व्रजे जगुरिति यद् भवतोक्तं तत्कालान्तरे कौमारे कृतं तत्कालीनं पौगण्डकालीनं कथं भवेत् ॥ ४१ ॥ तद् ब्रूहीति ॥ हे महायोगिन् गुरो नूनं निश्चितमेवं वैपरीत्यकथनस्य कारणं हरेर्मायैव भवति अन्यथा प्रकारान्तरेण तु न घटत इति तथापि विशेषतस्तद्धेतुं ब्रूहि तच्छ्रोतुं मम परं कौतूहलं महानुत्साहो वर्तत इति ॥ ४२ ॥ वयमिति ॥ हे गुरो क्षत्रबन्धवोऽपि वयं लोके धन्यतमाः कृतार्थाः स्मः यद्यस्मात्पुण्यं श्रीकृष्णस्य कथारूपममृतं त्वत्तः मुहुः पिबामः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमिति ॥ हे भागवतोत्तमोत्तम शौनक स्मेत्यवधारणे। स बादरायणिः शुकः इत्थमेव पृष्टः अतस्तेन प्रश्नेन स्मारितो योऽनन्तः कृष्णस्तेन हृतान्यखिलानि इन्द्रियाणि यस्य सः तदेकाकारचित्तत्वेन निवृत्तसर्वेन्द्रियवृत्तिः अयं प्रलयाख्यसात्विकभावः कृच्छ्रात् व्यासादिकृतात् शङ्खादिवाद्ययुतस्तोत्रादिप्रयासात् पुनः शनैः लब्धा बहिर्दृशिः जगदनुसन्धानं येन सः शुकः तं राजानं प्रति भगवच्चरितमाह स्म ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमद्वादशे निरमादिमाम् ॥ १२ ॥ त्रयोदशेऽहरद्ब्रह्मा वत्सादीनथ तद्वपुः ॥ भूत्वाब्दं चिक्रीड हरिः श्लोकास्तत्राब्धिषण्मिताः ॥ उवाचेत्येकं सपादा पञ्चशैलौ अनुष्टुभः ॥ १३ ॥ साध्विति ॥ हे महाभाग हे भागवतोत्तम त्वया साधु पृष्टं यद्यस्मात् त्वमीशस्य कथां मुहुः शृण्वन्नपि नूतनयसि श्रुतामप्यश्रुतचरीमिव प्रश्नेन नव्यामिव करोषि। नूतनशब्दात् "तत्करोति०" इति णिच् ॥ १ ॥ सतामिति ॥ विटानां कामुकानां समाजे यथा स्त्रियाः कामिन्या वार्ता नव्यवद् भवति तृष्णाधिक्यादपूर्ववज्ज्ञायते इति

सूत उवाच ॥ इत्थं स्म पृष्टः स तु बादरायणिस्तत्स्मारितानन्तहृताखिलेन्द्रियः ॥ कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तमम् ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धेऽघासुरवधो नाम द्वादशोऽध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ ॥ साधु पृष्टं महाभाग त्वया भागवतोत्तम ॥ यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः ॥ १ ॥ सतामयं सारभृतां निसर्गो यदर्थवाणी श्रुतिचेतसामपि ॥ प्रतिक्षणं नव्यवदच्युतस्य यत्स्त्रिया विटानामिव साधु वार्ता ॥ २ ॥ शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ३ ॥ तथाऽघवदनान्मृत्यो रक्षित्वा वत्सबालकान् ॥ सरित्पुलिनमानीय भगवानिदमब्रवीत् ॥ ४ ॥ अहोऽतिरम्यं पुलिनं वयस्याः स्वकेलिसंपन्मृदुलाच्छवालुकम् ॥ स्फुटत्सरोगन्धहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलम् ॥ ५ ॥

तदेकलाम्पट्ये दृष्टान्तः। तथा या अच्युतवार्तैव अर्थो विषयो येषां तानि वाणी वाक् श्रुती श्रोत्रे चेतोन्तःकरणमेतानि येषां तथाभूतानामपि सारभृतां सारग्राहिणां सतां समाजे यत् अच्युतस्य वार्ता साधु सम्यक् प्रतिक्षणं नव्यवद् भवति सोऽयं तेषां सतां निसर्गः स्वभाव एव ॥ २ ॥ शृणुष्वेति ॥ हे राजन् अवहितः सावधानः संस्त्वं शृणुष्व तदर्थः। गुह्यमतिरहस्यमपि ते त्वदर्थं वदामि। उत यस्मात् स्निग्धस्य स्वस्मिन्भगवति च स्नेहवतः शिष्यस्य गुरवो गुह्यमपि ब्रूयुर्वदन्ति ॥ ३ ॥ तथेति ॥ तथोक्तप्रकारेणाघवदनरूपान्मृत्योः सकाशात् भगवान् वत्सान् बालकांश्च रक्षित्वा सरित्पुलिनं यमुनान्तस्तटमानीयाब्रवीत् ॥ ४ ॥ अहो इति ॥ हे वयस्याः अहो इदं पुलिनमतिरम्यमतिमनोहरं सन्धिरार्षः। यतः स्वीयानां केलीनां बहुपङ्क्तिमद्भोजनानि युद्धादिक्रीडानां सम्पदो विद्यन्ते यत्र तत् इति स्थानविस्तीर्णत्वं मृदुला अच्छाः स्वच्छा वालुका यस्मिन् तत् इत्युपवेशनसुखम्। स्फुटत् विकसत्सरः सरोजबाहुल्येनोपचारतः सर एव विकसदित्युक्तम्। तस्य गन्धेन हृता आकृष्टाः ये अलयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्रिणः पक्षिणश्च तेषां के उदके ध्वनयस्तेषां प्रतिध्वानास्तैर्लसन्तो ये द्रुमाः तैराकुलं व्याप्तम् इति भोजनसमयापेक्षणीयविषयसम्पत्तिः ॥ ५ ॥ अत्रेति ॥ क्षुधार्दितैः पीडितैरस्माभिरत्रैव भोक्तव्यम् । यतः दिवा दिनमपि आरूढम् अधिकं व्यतीतं भोजनवेलातीतेत्यर्थः । क्षुधार्दिता इति पाठे यतो वयं क्षुधार्दिताः दिवा चारूढम् अतोऽस्माभिरत्रैव भोक्तव्यम् । वत्साः अपः जलं पीत्वा समीपे शनकैस्तृणं चरन्तु ॥ ६ ॥ तथेति ॥ तथास्त्वित्युक्त्वा अर्भा गोपबालाः वत्सान् जलं पाययित्वा शाद्वले हरिततृणप्रदेशे आरुध्य संरुध्य शिक्यानि मुक्त्वा मुदा हर्षेण भगवता समं सह बुभुजुः बुभुजिरे । तङ्भाव आर्षः । शिक्यानि अघोदरे प्रवेशात्पूर्वमेव वृक्षेषु स्थापितानि क्रीडासौकर्यार्थमिति ज्ञेयम् ॥ ७ ॥ कृष्णस्येति ॥ कृष्णस्य विष्वक् परितः पुरुराजिमण्डलैर्बहुपङ्क्तिमण्डलैः सह नैरन्तर्येण विपिने उपविष्टाः अभ्यानना भगवतोऽभिमुखान्याननानि येषां ते भगवतैव सर्वतोमुखप्रदर्शनं ज्ञेयम् । तत्प्रभावादेव बालाः स्वं स्वमात्मानं श्रीकृष्णनिकटस्थं मेनिरे । अतश्च " सर्वतः पाणिपादं तत् " इति

अत्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः ॥ वत्साः समीपेऽपः पीत्वा चरन्तु शनकैस्तृणम् ॥ ६ ॥ तथेति पाययित्वाम्भो वत्सानारुध्य शाद्वले ॥ मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा ॥ ७ ॥ कृष्णस्य विष्वक्पुरुराजिमण्डलैरभ्याननाः फुल्लदृशो व्रजार्भकाः ॥ सहोपविष्टा विपिने विरेजुश्छदा यथाम्भोरुहकर्णिकायाः ॥ ८ ॥ केचित्पुष्पैर्दलैः केचित् पल्लवैरङ्कुरैः फलैः ॥ शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥ ९ ॥ सर्वे मिथो दर्शयन्तः स्वस्वभोज्यरुचिं पृथक् ॥ हसन्तो हासयन्तश्चाभ्यवजह्रुः सहेश्वराः ॥ १० ॥ बिभ्रद्वेणुं जठरपटयोः शृङ्गवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यङ्गुलीषु ॥ तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलिः ॥ ११ ॥

श्रुत्यर्थो दर्शितः । अत एव फुल्लदृशः विकसितनयना व्रजार्भकाः यथाम्भोरुहकर्णिकायाः सर्वतश्छदाः पत्राणि तिष्ठन्ति तथा रेजुः ॥ ८ ॥ केचिदिति ॥ केचित्पुष्पैः कृतभाजना बुभुजुरित्याद्यन्वयः । केचिद्दलैः पत्रैः पल्लवैः नवपत्रैः अङ्कुरैः फलैः शिग्भिः शिक्यैः वृक्षाणां त्वग्भिः दृषद्भिः पाषाणैश्च कृतभाजनाः सन्तो बुभुजुः । तङ्भाव आर्षः ॥ ९ ॥ सर्व इति ॥ सहेश्वराः श्रीकृष्णसहिताः सर्वे स्वस्वभोज्यस्य व्यञ्जनादे रुचिं स्वादुविशेषं पृथक् दर्शयन्तः मम शाकं स्वादु ननु त्वदीयमिति वाक्यैर्हसन्तो हासयन्तश्चाभ्यवजह्रुः बुभुजिरे ॥ १० ॥ ध्यानार्थं तत्कालिकं भगवद्रूपं विशेषतो वर्णयति—बिभ्रद्वेणुमिति ॥ जठरपटयोः उदरवस्त्रयोर्मध्ये वेणुं बिभ्रत् दधत् एतच्च दक्षिणकुक्षावेवेति वामे कक्षे शृङ्गवेत्रे च बिभ्रत् वामे पाणौ मसृणं स्निग्धं दध्योदनकवलं बिभ्रत् अङ्गुलीषु अङ्गुलीसन्धिषु तत्फलानि सधानीकृतकरीरलवलीप्रभृतिफलानि बिभ्रत् अम्भोरुहकर्णिकेव सर्वाभिमुखो मध्ये तिष्ठन् स्वपरित उपविष्टान् सुहृदो वयस्यान्बालान्स्वैर्नर्मभिः परिहासवाक्यैर्हासयन् स्वर्गे लोके स्वर्गवासिनि जने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिषति आश्चर्येण पश्यति सति बालानामिव केलिः लीलामात्रं यस्य सः वस्तुतस्तु यज्ञभुक् यज्ञैराराध्यो भगवान् बुभुजे ॥ ११ ॥ भारतेति ॥ हे भारत एवम् अच्युते श्रीकृष्ण एवात्मा मनो येषां तेषु वत्सपेषु भुञ्जानेषु सत्सु ब्रह्मणा नेतुं तृणेन लोभिता वत्सास्त्वन्तर्वने वनमध्ये दूरं विविशुः ॥ १२ ॥ तानिति ॥ अस्य विश्वस्य या भीः मृत्युस्तस्यापि भयरूपः कृष्णः यद्वा भीभयं भयहेतुभ्यो भयम् अस्य अपास्य ल्यबार्षः । वत्सादर्शनजेन भयेन संत्रस्तान् बालान् दृष्ट्वा ऊचे उक्तवान् । हे मित्राणि आशाद् भोजनान्मा विरमत भोजनविरामं मा कुरुत तान् वत्सकान् अहम् इहानेष्ये । भक्तास्त्वाहुः । वस्तुतो वत्सकान् योगमायाद्वारा ब्रह्मद्वारा वा अहमेव नेष्ये इति इसंबुद्धौ हा खेदे । इति श्लोकोऽयं नवाक्षरैकपादोऽनुष्टुब्भेद इति प्राञ्चः ॥ १३ ॥ इत्युक्त्वेति ॥ इत्युक्त्वा अद्रिषु तद्दरीषु कुञ्जेषु लतापिहितोदरविवरेषु गह्वरेषु संकटस्थानेषु आत्मनो वत्सकान् विचिन्वन् अन्वेषितुं सपाणिकवलः पाणौ स्थापितकवल एव भगवान् कृष्णः ययौ । आत्मपदेन सर्वेषां वत्सेषु आत्मीयत्वं द्योतयति ॥ १४ ॥ अम्भोजन्मेति ॥ हे कुरूद्वह यो ब्रह्मा पुरा प्रथमं खे आकाशेऽवस्थितः सन् प्रभवतः श्रीकृष्णात् अघासुरस्यात्यधमस्यापि मोक्षणं दृष्ट्वा परं विस्मयं प्राप्तः सः अम्भोजन्म पद्मं

भारतैवं वत्सपेषु भुञ्जानेष्वच्युतात्मसु ॥ वत्सास्त्वन्तर्वने दूरं विविशुस्तृणलोभिताः ॥ १२ ॥ तान्दृष्ट्वा भयसंत्रस्तानूचे कृष्णोऽस्य भीभयम् ॥ मित्राण्याशान्मा विरमतेहानेष्ये वत्सकानहम् ॥ १३ ॥ इत्युक्त्वाऽद्रिदरीकुञ्जगह्वरेष्वात्मवत्सकान् ॥ विचिन्वन्भगवान्कृष्णः सपाणिकवलो ययौ ॥१४॥ अम्भोजन्मजनिस्तदन्तरगतो मायार्भकस्येशितुर्द्रष्टुं मञ्जु महित्वमन्यदपि तद्वत्सानितो वत्सपान् ॥ नीत्वाऽन्यत्र कुरूद्वहान्तरदधात्खेऽवस्थितो यः पुरा दृष्ट्वाऽघासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयम् ॥ १५ ॥ ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् ॥ उभावपि वने कृष्णो विचिकाय समन्ततः ॥ १६ ॥

तस्माज्जनिर्यस्य स ब्रह्मा जडवंशभवत्वादिव भगवन्मोहनरूपं जाड्यं कर्तुमुद्यत इत्यर्थः । तदनन्तरे तस्मिन् अवसरे गतः आगतः संस्तस्य मायार्भकस्य स्वेच्छया स्वीकृतबालनाट्यस्य वस्तुतस्तु ईशितुः भगवतः अन्यदपि मञ्जु महित्वं भक्तजनाह्लादकमहिमानं द्रष्टुं वत्सान् वत्सपांश्चेतः स्थानादन्यत्र नीत्वा स्वयमन्तरदधात् तिरोबभूव । अत्र भक्ताः । नित्यज्ञानानन्दस्य भगवतः सखीनां ब्रह्ममायामोहनमसमञ्जसमतः यावद्ब्रह्मा बालान् वत्सांश्च चोरयितुमुद्यतस्तावदेव भगवान् स्वयोगमायया सत्यान् बालान् वत्सांश्च योगमाययाच्छाद्य बहिरङ्गमायया बालादीन् सद्यः कल्पयित्वा ब्रह्माणमदर्शयत् । तानेव ब्रह्मा नीतवानिति प्राहुः ॥ १५ ॥ तत इति ॥ ततोद्रिकुञ्जादिषु वत्सानदृष्ट्वा ब्रह्ममोहार्थम् अदर्शनमभिनीय पुलिनमेत्य आगत्य तत्र च वत्सपानप्यदृष्ट्वा तद्वददर्शनमभिनीय पुनः श्रीकृष्णः समन्ततः सर्वतोऽपि वने उभौ वत्सान् वत्सपालांश्च विचिकाय अन्वेषणमभिनीतवान् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वापीति ॥ विश्ववित् सर्वज्ञः कृष्णः हेत्याश्चर्ये । अन्तर्विपिने वनमध्ये क्वापि वत्सान् वत्सपालांश्चादृष्ट्वा इव स्थितः नतु अदृष्ट्वा यतः सहसा चोरणसमय एव ब्रह्मणाप्यतर्कितं यथा स्यात्तथा सर्वं वत्सादिहरणं विधिकृतं ब्रह्मणा कृतमवजगाम ज्ञातवान् अतः वत्साद्यदर्शनमभिनय एव "अतर्किते तु सहसा" इत्यमरः ॥ १७ ॥ तत इति ॥ ततो विश्वकृदीश्वरः कृष्णः तन्मातॄणां वत्सवत्सपमातॄणां कस्य ब्रह्मणश्च मुदं कर्तुम् आत्मानम् उभयायितं बालरूपेण वत्सरूपेण च वर्तमानम् उभयशब्दादाचारे क्यङ् ततः क्तः । चक्रे यद्वा उभयं वत्सत्वं बालकत्वं च अयितं प्राप्तम् अयं भावः । तूर्ष्णींभावे बालवत्समातॄणां विषादः स्यात् ब्रह्महृतानामानयने ब्रह्मणो मोहो न स्यादित्युभयप्रीतये तथा कृतवान् ॥ १८ ॥ यावदिति ॥ यावत्संख्याकानि वत्सपानां वत्सानामल्पकानि अल्पप्रमाणानि कोमलानि वपूंषि इति सर्वत्र "यावदवधारणे" इति समासः । यावत्प्रमाणानि तेषां कराङ्घ्र्यादीनि देहावयवाः यावन्ति यत्प्रकारकाणि यष्टयः विषाणानि वेणवः दलानि पुष्पपत्राणि शोभार्थं शिरआदिषु धृतानि स्वामिनस्तु दलं पर्णरूपो वाद्यविशेषो वेणुखण्डं वेत्याहुः । शिचः शिक्यानि च यावन्ति यत्प्रकारकाणि विभूषाः भूषणानि अम्बराणि च यावन्ति यत्प्रकाराणि शीलानि

क्वाप्यदृष्ट्वान्तर्विपिने वत्सान् पालांश्च विश्ववित् ॥ सर्वं विधिकृतं कृष्णः सहसावजगाम ह ॥१७॥ ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च ॥
उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥१८॥ यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषाम्बरम् ॥
यावच्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोऽङ्गवदजः सर्वस्वरूपो बभौ ॥ १९ ॥ स्वयमात्माऽऽत्मगोवत्सान्प्रतिवार्यात्मवत्सपैः ॥ क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद्व्रजम् ॥ २० ॥

स्वतःसिद्धस्वभावाः गुणाः शिक्षिताः विनयादयः अभिधा वाणी तत्तन्नामाभिनिवेशो वा आकृतिराकारः वयोऽवस्था च यावन्ति विहारादीनि आदिना मात्रादिषु व्यवहरणं पूर्वाचरितस्मरणादिकं च तावत्सर्वस्वरूपः सन्नजः श्रीकृष्ण एव । "सर्वं विष्णुमयं जगत्" इति या गीः श्रुतिवाक्यं तस्या अङ्गवत् सा गीरेवार्थस्वरूपेण प्रत्यक्षा यथा भवति तथा बभावित्यर्थः । यद्वा । यावद्वत्सकेत्यादिकं तावत्सर्वं सर्वस्वरूपभूतः अजो भगवानेव बभौ यतः सर्वं जगत् गिरः अङ्गवत् विष्णुमयमेवास्ति । यथा पदरूपाया वाक्यरूपाया वा गिरः अङ्गं वर्णपदरूपं पदात् वाक्याद्वा न भिद्यते तथा जगद्विष्णुतो न भिन्नम् । तथा च शाब्दिकाः । "पदेन वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात्पदानामत्यन्तं प्रविभागो न कश्चन ॥ अखण्डं वाचकं वाक्यं विभज्य पदकल्पना ।" इत्यादि ॥ १९ ॥ स्वयमिति ॥ एवं स्वयमेवात्मा प्रयोजकः कर्ता आत्मरूपान् गोवत्सान् कर्माणि आत्मस्वरूपैर्वयस्यैर्वत्सपैः प्रयोज्य कर्तृभिः प्रतिवार्य वनान्निवर्त्य आत्मरूपैर्विहारैः क्रीडनक्रियातत्साधनैः क्रीडन् एवं सर्वात्मा सन् व्रजं प्राविशत् । अत्र भगवतः प्रयोजकप्रयोज्योभयकर्तृकर्मकारकक्रियारूपता दर्शिता ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तदिति ॥ हे राजन् स भगवान् येषां येषां गोपानां ये ये वत्साः यद्यद् गोष्ठं यद्यच्च सद्म तेषां तेषां गोपानां रूपेण तेषां तेषां वत्सान् पृथक् नीत्वा कृत्वा तेषां तेषां गोष्ठे निवेश्य स्वयमपि तेषां तेषां सद्म गृहं प्रविष्टवान् । एवं श्रीकृष्णस्तत्तदात्माऽभवत् ॥ २१ ॥ गोपिकामोहमाह—तन्मातर इति ॥ तेषां बालानां मातरो वेणुरवेण वेणुशब्दश्रवणेन त्वरया उत्थिताः सत्यः परं ब्रह्म श्रीकृष्णमेव स्वीकृततत्तद्बालकरूपं स्वसुतान्मत्वा दोर्भिर्भुजैरुत्थाप्य उद्धृत्येति क्वाचित्कः पाठः । निर्भरं स्नेहातिशयं यथा भवति तथा परिरभ्य आलिङ्ग्य सुधावत्स्वादु आसवस्तालादिरसस्तद्वत् मादकं च स्नेहेन स्नुतं स्तन्यं पयः अपाययन् । मुक्तस्तना एवैते भगवद्रूपभूता बालास्तेभ्य एव स्तनपानम् ॥ २२ ॥ तत इति ॥ हे नृप यामानां दिवसप्रहराणां यमेन तत्तत्क्रीडया उपरमेण तत्क्रीडानियमेन वा यामोन्त्यप्रहरस्तत्र यो गृहागमननियमस्तेन वा सायंकाले स्वाचरितैर्वेणुवादनादिभिर्मातॄः प्रहर्षयन् माधवः स्वीकृततत्तद्बालरूपः श्रीकृष्णः स्वगृहं गतस्ततश्च ताभिरुन्मर्दनादिभिरुपलालितः सत्कृतो बभूवेत्यर्थः । तत्र प्रथममुन्मर्दनं तैलपिष्टादिनोद्वर्त्तनं ततो मज्जः स्नपनं ततश्चन्दनादिलेपनम् अलङ्कारः भूषणवस्त्रादिना रक्षागोपुच्छभ्रमणादिना तिलकं गोरोचनादि अशनं भोजनं आदिपदेन शयनम्

तत्तद्वत्सान्पृथङ्नीत्वा तत्तद्गोष्ठे निवेश्य सः ॥ तत्तदात्माऽभवद्राजंस्तत्तत्सद्म प्रविष्टवान् ॥ २१ ॥ तन्मातरो वेणुरवत्वरोत्थिता उत्थाप्य दोर्भिः परिरभ्य निर्भरम् ॥ स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन् ॥ २२ ॥ ततो नृपोन्मर्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः ॥ संलालितः स्वाचरितैः प्रहर्षयन्सायं गतो यामयमेन माधवः ॥ २३ ॥ गावस्ततो गोष्ठमुपेत्य सत्वरं हुंकारघोषैः परिहूतसङ्गतान् ॥ स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहन्त्यः स्रवदौधसं पयः ॥ २४ ॥ गोगोपीनां मातृताऽस्मिन्सर्वा स्नेहर्द्धिकां विना ॥ पुरोवदास्वपि हरेस्तोकता मायया विना ॥ २५ ॥

॥२३॥ गवां मोहमाह—गाव इति ॥ या गावश्चरणार्थं वनं गतास्तास्ततः सत्वरं गोष्ठमुपेत्य आगत्य हुंकारघोषैः परिहूतान् सङ्गतांश्च स्वकान्स्वकान्वत्सतरान् मुक्तस्तनान् त्रिवर्षवत्सान् अपि मुहुर्लिहन्त्यो नुमार्षः । स्रवत् औधसम् ऊधसो जातं पयः अपाययन् ॥ २४ ॥ एतावत्तु वैषम्यं श्रीकृष्णस्यापि दुर्वारमासीदित्याह—गोगोपीनामिति ॥ गवां गोपीनां चास्मिन्पुत्रीभूते कृष्णे मातृता उपलालनादिरूपा सर्वापि पुरोवत् पूर्वपुत्रेष्विवैवासीत् पुरावदिति च पाठः । किंतु स्नेहर्धिकां विना स्नेहाधिक्यं त्विदानीमस्मिन्विशेष इत्यर्थः । तथा आसु गोगोपीषु हरेस्तोकता बालभावनापि पूर्ववदेवासीत् किंतु मायया विना ममेयं माता अहमस्याः पुत्र इति मोहं विनेत्यर्थः । अत्रोत्तरार्द्धे तोषणी । पुरोवत् पूर्वमातरि यशोदायामिव आस्वपि तोकता बालभाव एवासीत् किंतु मायया यशोदायां कृष्णेऽहमिति सत्योक्तिः । तद्रूपतया प्रकाशनं चेति न माया । आसु तु श्रीद ामाहमिति छद्मोक्तिस्तद्वत्प्रकाशनं मायेत्येतावद्वैलक्षण्यमित्यर्थः इति । यद्वा । मायया विना पूर्वं मायया उपचारेणैव पुत्रतुल्यत्वात् पुत्रत्वमासीत् । इदानीं तु कृष्ण एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुदामादिरूपस्तासां पुत्रोऽभूत् इति ॥ २५ ॥ व्रजौकसामिति ॥ व्रजौकसां कृष्णे यशोदानन्दने स्वपुत्रेभ्योऽपि यथा स्नेहाधिक्यं पूर्वमासीत्तथेदानीं स्वतोकेषु स्वपुत्रेष्वप्यपूर्ववत् पूर्वतो विलक्षणं निःसीमनिरवधिकं यथा भवति तथा स्नेहवल्ली स्नेहसंततिः अन्वहं प्रतिदिनं शनैः आब्दं संवत्सरपर्यन्तं ववृधे। यद्वा। स्वापत्यतया ज्ञातेष्वपि तोकेषु अब्दपर्यन्तं स्नेहवल्ली शनैः लालनक्रमेण यथा कृष्णे तथैव तेषु ववृधे। कृष्णे तु अपूर्ववत् पूर्वविलक्षणानिःसीम ववृधे ॥ २६ ॥ इत्थमिति ॥ इत्थमेवमात्मा सर्वात्मा स श्रीकृष्ण एव वत्सानां पालानां च मिषेण वत्सपो भूत्वा आत्मना बालरूपेण आत्मानं वत्सरूपिणं पालयन् वर्षं संवत्सरपर्यन्तं वनगोष्ठयोश्चिक्रीडे। कर्मण्यतिहारे तङ् ॥ २७ ॥ एकदेति ॥ एकदा पञ्चषासु पञ्चसु वा षट्सु वा त्रियामासु रात्रिषु हायनापूरणीषु हायनस्य संवत्सरस्यापूरकतयावशिष्टासु सतीष्वित्यर्थः। सरामो रामेण सहितोऽजः श्रीकृष्णः वत्सान् चारयन् वनमाविशत् ॥ २८ ॥ तत इति ॥ गोवर्द्धनपर्वतस्य शिखरे चरन्त्यो गावस्ततः विदूरादेव उपव्रजं व्रजसमीपे गोवर्द्धनेशानकोणस्था-

व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् ॥ शनैर्निःसीमववृधे यथा कृष्णे त्वपूर्ववत् ॥ २६ ॥ इत्थमात्माऽऽत्मनाऽऽत्मानं वत्सपालमिषेण सः ॥ पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः ॥ २७ ॥ एकदा चारयन्वत्सान्सरामो वनवाविशत् ॥ पञ्चषासु त्रियामासु हायनापूरणीष्वजः ॥ २८ ॥ ततोविदूराच्चरतो गावो वत्सानुपव्रजम् ॥ गोवर्धनाद्रिशिरसि चरन्त्यो ददृशुस्तृणम् ॥ २९ ॥ दृष्ट्वाथ तत्स्नेहवशोऽस्मृतात्मा स गोव्रजोऽत्यात्मपदुर्गमार्गः ॥ द्विपात्ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुंकृतैरास्नुपया जवेन ॥ ३० ॥ समेत्य गावोऽधो वत्सान्वत्सवत्योऽप्यपाययन् ॥ गिलन्त्य इव चाङ्गानि लिहन्त्यः स्वौधसं पयः ॥ ३१ ॥

रिष्टासुरमर्दनकुण्डसमीपे तृणं चरतो वत्सान्ददृशुः ॥ २९ ॥ दृष्ट्वेति ॥ दृष्ट्वा चाथानन्तरमेव स गोव्रजो गवां समूहस्तत्स्नेहवशस्तेषां वत्सानां स्नेहेनाकृष्ट अतएवाऽस्मृतः विस्मृतः आत्मा देहो येन सः अत एवात्यात्मपदुर्गमार्गः अतिक्रान्ता अगणिताः आत्मपाः गोपा दुर्गमार्गः कण्टकादिभ्योऽगम्यप्रदेशश्च येन सः तथा युक्ताभ्यां पद्भ्यां धावन् द्विपादवत् प्रतीयमानः ककुदि आकुञ्चिता ग्रीवा यस्य उदास्यपुच्छः उन्नमितानि आस्यानि मुखानि पुच्छानि च येन सः आस्नुपयाः आसर्वतः स्नुवन्ति पयांसि यस्य सः आस्नुपया इति पाठेऽप्ययमेवार्थः। उभयत्र धातोः क्विपि तुगभाव आर्षः। आसमन्तात् स्नौ पर्वतसानौ पतत् पयो यस्येति वा। अत्र आसमंतात् क्षरन्ति स्नेहाश्रूणि पयांसि च यस्येति चक्रवर्ती तालव्यशकारमप्यभिप्रैति। हुंकृतैः हुंकारशब्दान् कुर्वन् जवेन वेगेनागात् वत्ससमीपं जगामेति। गोव्रज इत्यनेन वृषादयोप्यगुरित्युक्तम् ॥ ३० ॥ समेत्येति ॥ गोवर्द्धनस्याधोदेशे चरतो वत्सान्समेत्य तेषामङ्गानि गिलन्त्य इव लिहन्त्यो नुमार्षः। वत्सवत्यः पुनः प्रसूता अपि गावः स्वौधसं पयः अपाययन् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोपा इति ॥ तासां गवां रोधने य आयासः श्रमस्तस्य मौघ्यं निष्फलत्वं तेन जातया लज्जया सह य उरुर्मन्युस्तेन दुर्गाध्वकृच्छ्रतः दुर्गमार्गजनितक्लेशेन च युक्ता गोपा अभ्येत्य आगत्य गोवत्सैः सह सुतान्ददृशुः ॥ ३२ ॥ तदीक्षणेति ॥ ततश्च तेषामीक्षणेनोद्भूतो यः प्रेमरसस्तस्मिन्नाप्लुताः निमग्नाः आशयाः अन्तःकरणानि येषां ते अरे अनभिज्ञाः अत्र परमवत्सलगवीगणदृष्टिपथे वत्साः किमित्यानीता इति तानपि ताडयितुमागतास्तथापि गतमन्यवः प्रत्युत जातोऽनुरागो येषां तथाभूताः सन्तस्तानर्भकान्दोर्भिरुदुह्य उत्थाप्य दीर्घपाठ आर्षः । परिरभ्य आश्लिष्य तेषां मूर्ध्नि घ्राणैरवघ्राणैः परमां मुदमवापुः ॥ ३३ ॥ तत इति ॥ ततश्च तोकानां बालानामाश्लेषेण सुनिर्वृताः तेषां सुतानां अनुस्मृत्या उद्गच्छन्ति अश्रूणि येषां ते प्रवयसः वृद्धा गोपाः कृच्छ्रात् मनोनिरोधकष्टात् ततः शनैरपगताः ॥ ३४ ॥ व्रजस्येति ॥ मुक्तस्तनेष्वप्यपत्येषु बालवत्सेषु व्रजस्य गोपीगवादेरनुक्षणं प्रेमर्द्धः औत्कव्यमाधिक्यम् औत्कण्ठ्यमिति पाठे प्रेमर्द्धेः हेतोः औत्कण्ठ्यं वीक्ष्य अहेतुवित् तत्र हेतुमजानन् रामोऽचिन्तयत् एतावत्पर्यन्तं

गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना ॥ दुर्गाध्वकृच्छ्रतोऽभ्येत्य गोवत्सैर्ददृशुः सुतान् ॥ ३२ ॥ तदीक्षणोत्प्रेमरसाप्लुताशया जातानुरागा गतमन्यवोऽर्भकान् ॥ उदुह्य दोर्भिः परिरभ्य मूर्धनि घ्राणैरवापुः परमां मुदं ते ॥ ३३ ॥ ततः प्रवयसो गोपास्तोकाश्लेषसुनिर्वृताः ॥ कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रव ॥३४॥ व्रजस्य रामः प्रेमर्धेर्वीक्ष्यौत्कण्ठ्यमनुक्षणम् ॥ मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिन्तयत् ॥३५॥ किमेतदद्भुतमिव वासुदेवेऽखिलात्मनि ॥ व्रजस्य सात्मनस्तोकेष्वपूर्वं प्रेम वर्धते॥३६॥ केयं वा कुत आयाता दैवी वा नार्युतासुरी ॥ प्रायो मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनी॥ ३७॥ इति संचिन्त्य दाशार्हो वत्सान्सवयसानपि ॥ सर्वानाचष्ट वैकुण्ठं चक्षुषा वयुनेन सः ॥ ३८॥

रामस्यापि मोह एवाभवदिति भावः । अन्येऽपि तत्रत्या विवेकिनोऽपि मुक्तस्तनेष्वपत्येष्वपि विपुलतमस्नेहं दृष्ट्वाऽपि नातर्कयन्निति भगवदिच्छैव हेतुः ॥ ३५ ॥ किमेतदिति ॥ अखिलस्यात्मनि वासुदेवे श्रीकृष्णे यथा सर्वस्य प्रेमासीत्तथा सात्मनो मत्सहितस्य व्रजस्य गोपीगवादेस्तोकेषु स्वापत्येष्वपूर्वं पूर्वमविद्यमानं प्रेम वर्द्धते तदद्भुतमाश्चर्यं किम् । तत्रापि मम तेषु कृष्णवत् प्रेमकारणं किम् इति भावः ॥ ३६ ॥ केयमिति ॥ इयं माया का कुतो वा आयाता किं दैवी अस्मत्परीक्षार्थं देवैः प्रयुक्ता अथवा नारी नरैः ऋष्यादिभिः प्रयुक्ता उत अथवा आसुरी असुरैः कंसाद्यैः प्रयुक्ता प्रायशः इयं माया मम भर्तुः स्वामिनः श्रीकृष्णस्यैवास्तु एवमेव संभवति । संभावनायां लोट् । अन्या माया न संभवति यतो मे ममापि विमोहिनी ॥ ३७ ॥ इति संचिन्त्येति ॥ स दाशार्हो बलभद्र इति संचिन्त्य वयुनेन ज्ञानमयेन चक्षुषा सर्वान् वत्सान् सवयसानपि समानवयस्कान् अदन्तत्वमार्षम् । गोपांश्च वैकुण्ठं श्रीकृष्णमेवाचष्ट अपश्यत् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैत इति ॥ हे ईश वत्सपाः देवांशास्तत्पाल्यमाना वत्साश्च ऋषीणामंशा इत्यहं जानामि तत्रैवं भिदाश्रयेऽपि भेदविषयेऽपि इदानीमेते सुरेशा ऋषयश्च न भवन्ति किंतु त्वमेव सर्वं भासि परन्तु कथमेतद्वृत्तं तत् पृथक् विविच्य त्वं वदेत्युक्तेन बलभद्रपृष्टेन प्रभुणा श्रीकृष्णेन निगमात्संक्षेपात् उक्तं वृत्तं ब्रह्ममोहनाद्युक्तसर्वरूपधारणान्तं बलः अवैत् ज्ञातवान् अवपूर्वादिणो लङ् ॥ ३९ ॥ तावदिति ॥ तावत् वर्षे गतेऽप्यात्मनः स्वस्य ब्रह्मणः मानेन त्रुट्यनेहसा त्रुटिमात्रकालेन शीघ्रमेत्य आगत्य आत्मभूः ब्रह्मा सकलं वत्सपालादिसर्वरूपं हरिं पुरोवत् हरणात्प्राग्वत् प्रथमवत् अब्दपर्यन्तं क्रीडन्तं ददृशे ददर्श । तङ् आर्षः । रामस्तु तत्र दिने भगवदाज्ञया गृह एवाभूदिति ज्ञेयम् ॥ ४० ॥ यावन्त इति ॥ गोकुले यावन्तो बालास्ते सर्वे एव सवत्साः अतः स्थानान्मयान्यत्र नीता इति शेषः । हि निश्चितम् अत्र सन्देहो नास्ति ते मे मायारूपे शये शय्यायां शयाना मन्मायामोहिताः अद्यापि पुनर्नोत्थिताः न सावधाना जाताः ॥ ४१ ॥ अत इति ॥ अतो मन्मायामोहितेभ्यः इतरे तावन्त एव तत्रापि आब्दं वर्षपर्यन्तं विष्णुना समं कृष्णेन सह क्रीडन्तोऽत्र एते कुत्रत्याः कुत आगताः ॥ ४२ ॥ एवमिति ॥ एतेषु बालवत्सादिषु भेदेषु एवं चिरं ध्यात्वाऽपि स आत्मभूर्ब्रह्मा सत्याः पूर्वसिद्धाः

नैते सुरेशा ऋषयो न चैते त्वमेव भासीश भिदाश्रयेऽपि ॥ सर्वं पृथक्त्वं निगमात्कथं वदेत्युक्तेन वृत्तं प्रभुणा बलोऽवैत् ॥ ३९ ॥ तावदेत्यात्मभूरात्ममानेन त्र्युट्यनेहसा ॥ पुरोवदब्दं क्रीडन्तं ददृशे सकलं हरिम् ॥ ४० ॥ यावन्तो गोकुले बालाः सवत्साः सर्व एव हि ॥ मायाशये शयाना मे नाद्यापि पुनरुत्थिताः ॥ ४१ ॥ अत एतेऽत्र कुत्रत्या मन्मायामोहितेतरे ॥ तावन्त एव तत्राब्दं क्रीडन्तो विष्णुना समम् ॥ ४२ ॥ एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः ॥ सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंचन ॥ ४३ ॥ एवं संमोहयन् विष्णुं विमोहं विश्वमोहनम् ॥ स्वयैव माययाऽजोऽपि स्वयमेव विमोहितः ॥ ४४ ॥ तम्यां तमोवन्नैहारं खद्योतार्चिरिवाहनि ॥ महतीतरमायैश्यं निहन्त्यात्मनि युञ्जतः ॥ ४५ ॥

के मया नीतास्तेवात्रत्या वा कतरेन इदानीं सृष्टाः के ये मया नीतास्ते वा अत्रत्या वा इति ज्ञातुं निश्चेतुं कथंचनापि नेष्टे न शशाक ॥ ४३ ॥ एवमिति ॥ एवं विमोहं सर्वदा मोहरहितं विश्वमोहनं च विष्णुं संमोहयन् संमोहयितुं प्रवृत्तोऽजो ब्रह्मापि स्वयैव मायया स्वयमेव विष्णौ प्रयुक्तया हेतुना स्वयमेव विमोहितः ॥ ४४ ॥ ब्रह्मणो माया स्वाश्रयं ब्रह्माणमेव कथं मोहितवतीत्यत्र आह—तम्यामिति ॥ महामायाविनि भगवत्यन्यमायाया आवरणविक्षेपकत्वाभावे स्वाश्रयतिरस्कारे च दृष्टान्तद्वयमिदम् । तम्यां तमिस्रायां रात्रौ नैहारं हिमप्रभवं तमोवत् तद्यथा तमीं नावृणोति किंतु तत्र लीनं सत् तत्तमः सान्द्रीकृत्य तेन स्वयमेव वृतं भवति यथा च खद्योतार्चिः अहनि इव अहः स्थितं सूर्यविषयं तस्य सूर्यस्यार्चिः प्रकाशयितुं न शक्तं किंतु तेनैव प्रतिहतप्रभं सञ्जायते तद्वन्महति मायां युञ्जतः पुंसः स्वा इतरा नीचा माया तत्र न किंचित् करोति किंतु आत्मनि स्वाश्रये यदैश्यं तदेव निहन्ति तद्धितोपसर्जनस्य तमसो नैहारमिति विशेषणं छान्दसम् इति स्वामिपादाः । परे तु अव्ययमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वच्छब्दोऽस्ति । " इववद्वा च सादृश्ये " इति कोशात् । तेन तम इवेत्यर्थः । एतेन प्रातिपदिकेषु तद्धितस्य वतेः पाठो नोचित इत्यादि मनोरमोक्तं प्रत्युक्तमिति प्राहुः ॥४५॥ तावदिति ॥ यावदयं विचारयति तावदेवाजस्य ब्रह्मणः पश्यत एव सतस्तत्क्षणात् अविलम्बेनैव वत्साः पालाश्च सर्वे घना इव श्यामाः पीते कौशेये वाससी येषां ते तथा भगवद्रूपा ब्रह्मणा व्यदृश्यन्त इति सर्वत्रान्वेति ॥ ४६ ॥ चतुरिति ॥ प्रत्येकं चत्वारो भुजा येषां ते शङ्खादीनि प्रत्येकं पाणिषु येषां ते तत्र राजीवं कमलं ते सर्वे किरीटिनः कुण्डलिनः हारिणः वनमालिनश्चेति ॥ ४७ ॥ श्रीति ॥ श्रीवत्सो दक्षिणस्तनोर्ध्वं रोम्णामावर्तो लक्ष्मविशेषः तत्प्रभायुक्तान्यङ्गदानि दोःषु येषाम् । यद्वा । श्रीयुक्तं वत्सं वक्षो येषाम् " उरो वत्सं च वक्षश्च " इत्यमरः अङ्गदानि दोःषु येषां रत्नमयानि कम्बुवत्रिधाराणि कङ्कणानि पाणिषु येषां ते च ते च तथा नूपुरैः कटकैः पादवलयैः पारिशेष्यात् कटिसूत्रैः अङ्गुलीयकैश्च भाताः शोभिताः ॥ ४८ ॥ आङ्घ्रीति ॥ सर्वगात्रेषु भूरिपुण्यवद्भिः बहुजन्मोपार्जितपुण्यवद्भिर्भक्तजनैरर्पितैः कोमलैस्तुलसीनवदामभिराङ्घ्रि-

तावत्सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् ॥ व्यदृश्यन्त घनश्यामाः पीतकौशेयवाससः ॥ ४६ ॥ चतुर्भुजाः शङ्खचक्रगदाराजीवपाणयः ॥
किरीटिनः कुण्डलिनो हारिणो वनमालिनः ॥ ४७ ॥ श्रीवत्साङ्गददोरत्नकम्बुकङ्कणपाणयः ॥ नूपुरैः कटकैर्भाताः कटिसूत्राङ्गुलीयकैः ॥४८॥
आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः ॥ कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः ॥ ४९ ॥ चन्द्रिकाविशदस्मेरैः सारुणापाङ्गवीक्षितैः ॥ स्वका-
र्थानामिव रजःसत्त्वाभ्यां स्रष्टृपालकाः ॥ ५० ॥ आत्मादिस्तम्बपर्यन्तैर्मूर्तिमद्भिश्चराचरैः ॥ नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिताः ॥ ५१ ॥
अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः ॥ चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभिः ॥ ५२ ॥

मस्तकं चरणमारभ्य मस्तकपर्यन्तमासमन्तात् पूर्णाः ॥ ४९ ॥ चन्द्रिकेति ॥ स्वकानां भक्तानां येऽर्था मनोरथास्तेषां चन्द्रिका इव विशदं स्मयन्ते इति मृदुपाचकवत्स-मासः । भावप्राधान्येन मन्दहासाः तैः तथा अरुणापाङ्गेन सहितैर्वीक्षितैश्च रजःसत्वाभ्यां स्वकार्थानां स्वभक्तमनोरथानां स्रष्टृपालका इव व्यदृश्यन्त तत्र सत्त्वतुल्यविशद-स्मितेन स्वकार्थानां पालका इव रजोवदरुणगुणेन च तेषां स्रष्टार इव वचेति तादृक्कटाक्षैर्द्योतमानाः ॥ ५० ॥ आत्मेति ॥ आत्मा ब्रह्मा स्तम्बस्तृणगुच्छः ब्रह्मादितृणपर्य-न्तैर्मूर्तिमद्भिश्चराचरैः प्राणिभिः स्वस्वाधिकारभेदेन नृत्यगीताद्यनेकार्हैः अनेकैरर्हणसाधनैः पृथक् पृथगुपासिताः एतेन तेषां प्रत्येकमेकैकब्रह्माण्डेशत्वमुक्तम् ॥ ५१ ॥ अणिमेति ॥ अणिमाद्यैर्महिमाभिः अष्टभिरैश्वर्यैः मूर्तिमद्भिरिति सर्वत्र ज्ञेयम् । अजाद्याभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिः महदादिभिः चतुर्विंशतिभिस्तत्वैः जगत्कारणैः परीताः महत्सूत्रयोः पृथक् तत्त्वविवक्षया चतुर्विंशतित्वं बहुत्वमार्षम् । तथा च महत् सूत्रमहङ्कारः मनो दशेन्द्रियाणि पञ्च भूतानि पञ्च तन्मात्राणि चेति तत्त्वानि ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेति ॥ “ स्वमहिध्वस्तमाहिभिः ” इति भगवन्महिम्ना तिरस्कृतस्वातन्त्र्यैरित्यर्थः । पूर्वोक्ततत्वसहकारिभिः कालादिभिश्च मूर्तिमद्भिरुपासिताः तत्र कालो गुणक्षोभकः स्वभावः परिणामहेतुः संस्कारः कामोद्बोधकः कामश्च भोगेच्छाकर्मलौकिकवैदिकव्यापारः गुणाः सत्वादय उपादानमादिपदेन जात्यादिग्रहणम् ॥ ५३ ॥ सत्येति ॥ सत्यं परमार्थभूतं ज्ञानं चैतन्यरूपमनन्तमविनाशि आनन्दरूपं प्राकृतसंबन्धनिरासार्थं मात्रपदम् सत्यज्ञानादिमात्रैकरसं यद् ब्रह्म तदेव मूर्तिर्येषां ते सत्यज्ञानादिमात्रा एकरसा सदा एकरूपा मूर्तयो येषामिति वा अत एव भक्तिहीनानां केवलमुपनिषदमेव पश्यन्ति ये केवलं ज्ञानिनः दार्शनिकाः तेषामपि अस्पृष्टं स्पर्शायोग्यं भूरि माहात्म्यं येषां तथाभूताः व्यदृश्यन्त ॥ ५४ ॥ एवमिति ॥ यस्य परब्रह्मात्मनो भासा प्रकाशेनेदं सचराचरं विश्वं विभाति तत्परब्रह्मात्मरूपान् अखिलान् वत्सवत्सपालादीन् सकृत् एकदैवाजो ब्रह्मा एवमुक्तप्रकारेण ददर्श ॥ ५५ ॥ तत इति ॥ अतिकुतुकेन अत्याश्चर्येण उद्धृत्य दृशीः परावृत्य हंसपृष्ठे निपत्य वा कुतुकशब्दे च तृतीयायाश्छान्दसो लुक् यद्वा अतिकुतुकेन उद्वृत्यः कोऽहमित्यनुसन्धानरहितः सन् अत्र “ खर्परे० ” इति विसर्गलोपः । कुतुकोद्वृत्तः इति पाठान्तरे तु कुतुकेन उद्वृत्तः क्षुभितः तथा तेषां भगवद्विग्रहाणां धाम्ना तेजसा

कालस्वभावसंस्कारकामकर्मगुणादिभिः ॥ स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः ॥ ५३ ॥ सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तयः ॥ अस्पृष्टभूरिमाहात्म्या अपि ह्युपनिषद्दृशाम् ॥५४॥ एवं सकृद्ददर्शाजः परब्रह्मात्मनोऽखिलान् ॥ यस्य भासा सर्वमिदं विभाति सचराचरम् ॥५५॥ ततोऽतिकुतुकोद्वृत्तस्तिमितैकादशेन्द्रियः ॥ तद्धाम्नाऽभूदजस्तूष्णीं पूर्देव्यन्तीव पुत्तिका ॥ ५६ ॥ इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ ॥ अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा सपदि परमोऽजाजवनिकाम् ॥ ५७ ॥

स्तिमितानि स्तब्धानि एकादशेन्द्रियाणि यस्य सः अजो ब्रह्मा तूष्णीमभूत् किमपि वक्तुं न समर्थोऽभूत् निश्चलोऽभूदिति वार्थः । अत्र दृष्टान्तः पूर्देवी व्रजाधिष्ठात्री काचिद्देवी तस्या अन्ति समीपे पुत्तिका चतुर्मुखप्रतिमेव ॥ ५६ ॥ इतीति ॥ इत्येवं दृष्ट्वा अतर्क्ये तर्कागोचरे निजः असाधारणो महिमा यस्य तस्मिन् स्वप्रमितिः स्वप्रकाशं च तत्कं सुखं च तस्मिन्स्वप्रकाशसुखरूपे अजातः प्रकृतेः परत्र परस्मिन् अतन्निरसनमुखेन “ अथात आदेशो नेति नेति ” अस्थूलमनण्वह्रस्वमित्येवं ब्रह्मव्यतिरिक्तनिरासप्रकारेण ब्रह्मकैः श्रुतिशिरोभिर्मितिर्ज्ञानं यस्मिन् तस्मिन् भगवति विषये इरेशे इरा सरस्वती तस्या ईशे भर्तरि महाबुद्धिमत्यपीत्यर्थः । ब्रह्माणि किमिदं दृश्यत इति मुह्यति सति पश्चात्तद्द्रष्टुमप्यनीशे असमर्थे च सति परमोऽजः श्रीकृष्णस्तस्य मोहादिक्लेशं ज्ञात्वा अजाजवनिकां मायारूपां तिरस्करिणीं चच्छाद अपसारितवान् तुगभाव आर्षः । “ छद, अपवारणे ” आधृषीयः तत्तद् वत्सबालकान् चतुर्भुजादित्वेन दर्शयन्मायामन्तरधापयत् । यद्वा । अयं लोकाधिपत्याभिमानी ममैश्वर्यं द्रष्टुमयोग्य इति कृत्वा सपदि झटिति तस्योपरि प्रसारितवान् अनेन स्वैश्वर्यदर्शनार्थं पूर्वं भगवता स्वमाया न प्रसारितान्यथा तद्दर्शनं न स्यात् इति ज्ञेयम् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततो मायाप्रसारणानन्तरम् अर्वाक् बहिः प्रतिलब्धानि अक्षाणि इन्द्रियाणि येन सः को ब्रह्मा परेतवत् मृतो यथाऽमृतसेकेन कथंचित्पुनरुत्तिष्ठेत्तथोत्थितः कृच्छ्राच्छनैर्दृष्टीर्नेत्राणि उन्मील्यात्मना देहादिना सह इदं विश्वम् अचष्ट अपश्यत् ॥ ५८ ॥ सपदीति ॥ सपदि एव अभितः सर्वतः सर्वा दिशः पश्यन् जनानामाजीव्याजीविकारूपा ये द्रुमास्तैराकीर्णं व्याप्तं समाप्रियं सन्ततानि आसमन्तात् प्रियाणि वस्तूनि यत्र मा लक्ष्मीस्तत्प्रियो भगवान् तेन सहितं वा तद्वृन्दावनं पुरतः स्थितमपश्यत् ॥ ५९ ॥ यत्रेति ॥ यत्र वृन्दावने नैसर्गदुर्वैराः स्वाभाविकाप्रतिकार्यवैरवन्तोपि नरव्याघ्रादयः मित्राणीव सहैवासन् यतस्तद्वृन्दावनमजितस्य श्रीकृष्णस्य आवासेन द्रुताः पलायिता रुट् तर्षादयः क्रोधलोभादयः आदिपदेन भयादयश्च यस्मात्तादृशमस्ति अतस्तत्र विरोधाभाव एव ॥ ६० ॥ तत्रेति ॥ तत्र वृन्दावने परमेष्ठी ब्रह्मा पुरेव पूर्ववदेव पशुपवंशशिशुत्वनाट्यं नन्दपुत्रत्वानुकरणमुद्वहन् दधत् अद्वयं परम् अनन्तम् अगाधबोधं परितः वत्सान् सखींश्च विचिन्वत् एकं सपाणि-

ततोऽर्वाक्प्रतिलब्धाक्षः कः परेतवदुत्थितः ॥ कृच्छ्रादुन्मील्य वै दृष्टीराचष्टेदं सहात्मना ॥ ५८ ॥ सपद्येवाभितः पश्यन्दिशोऽपश्यत्पुरः स्थितम् ॥ वृन्दावनं जनाजीव्यद्रुमाकीर्णं समाप्रियम् ॥ ५९ ॥ यत्र नैसर्गदुर्वैराः सहासन्नृमृगादयः ॥ मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम् ॥ ६० ॥ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनन्तमगाधबोधम् ॥ वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ॥ ६१ ॥ दृष्ट्वा त्वरेण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदण्डमिवाभिपात्य ॥ स्पृष्ट्वा चतुर्मुकुटकोटिभिरङ्घ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभिषेकम् ॥ ६२ ॥ उत्थायोत्थाय कृष्णस्य चिरस्य पदयोः पतन् ॥ आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ॥ ६३ ॥

कवलं हस्तगतग्रासेन सहितं ब्रह्म श्रीकृष्णाख्यमचष्ट अपश्यत् नाट्यं च विरोधवशात् तथाहि अद्वयमपि वत्सान्विचिन्वत् स्वभावत एकमपि सखीन् विचिन्वत् अगाधबोधमपि विचिन्वत् अनन्तमपि परितो विचिन्वत् परमपि शिशुत्वमुद्वहत् ब्रह्म अपि सपाणिकवलम् इति ॥ ६१ ॥ दृष्ट्वेति ॥ एवं दृष्ट्वा च त्वरेण वेगेन निजधोरणतः स्ववाहाद्धंसादवतीर्य देवाभिमानापगमाद्भूमिमेव स्पृशन् पृथ्व्यां कनकदण्डवद्वपुरभिपात्य नत्वा परिवर्तनेन चतुर्णां मुकुटानां कोटिभिरग्रैः तदङ्घ्रियुग्मं स्पृष्ट्वा मुदश्रुसुजलैः आनन्दाश्रुरूपैः सुजलैस्तत्पादयोरभिषेकमकृत अकार्षीत् ॥ ६२ ॥ उत्थायेति ॥ प्राक् दृष्टं कृष्णस्य महित्वं महिमानं स्मृत्वा स्मृत्वा पुनः पुनः उत्थायोत्थाय चिरस्य चिरकालं पदयोः पतन्नास्ते स्म ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शनैरिति ॥ अथानन्तरमुत्थाय अष्टनेत्रोऽपि कृष्णदर्शनाय सम्मुखस्थे द्वे लोचने विमृज्य मुकुन्दमुद्वीक्ष्य सम्यग्दृष्ट्वा लज्जया विशेषेण नम्रा कन्धरा यस्य सः आदरेण कृतः संयोजितः अञ्जलिर्येन सः प्रश्रयवान् विनयवान् भयेन सवेपथुः सञ्जातकम्पः तथापि समाहितः स्वशक्त्यनुरूपं मनःसमाधानं कृत्वा गद्गदयास्खलिताक्षरया इलया वाण्या ऐलत अस्तौत् । "ईड्, स्तुतौ" शपो लुगभावश्छान्दसः । डस्य लकारो गद्गदभावानुकरणार्थः ॥ ६४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्य त्रयोदशे ॥ १३ ॥ चतुर्दशे विस्मितस्तु कर्मणा तेन पद्मजः ॥ भक्त्या श्रीकृष्णमस्तावीत्तत्र श्लोकाः कुषण्मिताः ॥ उवाचेति चतुःसंख्या एकाशीतिरनुष्टुभः॥ १४॥नौमीति ॥ हे ईड्य स्तुत्य अभ्रमिव श्यामं वपुर्यस्य तस्मै तडिदिव पीते दीप्ते च अम्बरे यस्य गुञ्जानिर्मितौ यौ अवतंसौ कर्णभूषणे परितः पिच्छानि यस्य तत् परिपिच्छं बर्हापीडं तैर्लसत् शोभमानं मुखं यस्य तस्मै वन्याः वनपुष्पपत्रमय्यः स्रजो यस्य कवलो ग्रासः वेत्रविषाणवेणवश्च लक्ष्म श्रीवत्साख्यं तैः श्रीः शोभा यस्य कवलादिभिर्लक्ष्मभिः श्रीर्यस्येति वा । मृदू पादौ यस्य पशुपस्य नन्दस्य अङ्गजाय पुत्राय ते तुभ्यं त्वां प्रसादयितुं "क्रियार्थोपपदस्य" इति चतुर्थी । पत्ये शेते इतिवद्वा नौमि स्तौमि॥ १॥ अस्यापीति ॥ हे देव

शनैरथोत्थाय विमृज्य लोचने मुकुन्दमुद्वीक्ष्य विनम्रकन्धरः ॥ कृताञ्जलिः प्रश्रयवान्समाहितः सवेपथुर्गद्गदयैलतेलया ॥६४॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे त्रयोदशोऽध्यायः ॥ १३ ॥ ब्रह्मोवाच ॥ नौमीड्य तेऽभ्रवपुषे तडिदम्बराय गुञ्जावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ॥१॥ अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि ॥ नेशे महि त्ववसितुं मनसान्तरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः ॥ २ ॥ ज्ञाने प्रयासमुदपास्य नमन्त एव जीवन्ति सन्मुखरितां भवदीयवार्ताम् ॥ स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजितजितोऽप्यसितैस्त्रिलोक्याम् ॥ ३ ॥

ममानुग्रहो यस्मात् तस्य स्वेच्छामयस्य स्वेच्छया प्रकटितस्य स्वेषां भक्तानामिच्छामयस्य भक्तेच्छानुसारेणाविर्भवतः नतु भूतमयस्य शुद्धसत्वस्य रूपस्य अस्य प्रकटितकौमारस्यापि वपुषः कोऽपि को ब्रह्माहमपि आन्तरेण अन्तर्मुखीकृतेनापि मनसा महि महिमानमवसितुं ज्ञातुं इकार आर्षः ॥ अवसातुमित्यर्थः । नेशे न समर्थोऽस्मि यद्वा भूतमयस्य विराड्रूपस्यापि महिमानं ज्ञातुं नेशे तदा तु साक्षात् आत्मसुखानुभूतेः आत्मपदेन सत्ता सच्चिदानन्दात्मकस्यैव तव महिमानमवसितुं नेशे इति तु किमुत वक्तव्यमित्यर्थः । नतु इत्यत्र ननु इति पाठे भूतमयस्य विराड्रूपस्येत्यर्थः । तनुभूतेति चित्सुखसम्मतपाठे तनु सूक्ष्मं यद् भूतं शुद्धसत्वात्मकं तद्रूपस्य " अस्य महतो भूतस्य" इति श्रुतौ "लोकनाथं महद्भूतम् "इति स्मृतौ च परमात्मनि भूतशब्दः इत्याद्यन्यत्र ज्ञेयम् ॥ २ ॥ ज्ञान इति ॥ ज्ञाने ज्ञाननिमित्तं प्रयासं श्रममुदपास्य दूरतस्त्यक्त्वा स्थाने सतां निवासस्थाने स्थिताः सद्भिर्भगवद्भक्तैः मुखरितां स्वभावत एव नित्यं प्रकटितां श्रुतिगतां श्रवणं प्राप्तां भवदीयां वार्तां कथां ये तनुवाङ्मनोभिर्नमन्तः सत्कुर्वन्त एव जीव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्ति। हे अजित कालकर्मादिभिरजितोऽपि प्रायशस्त्रिलोक्यां तैस्त्वं जितोऽसि वशीकृतोऽसि अतः किं ज्ञानप्रयासैः ॥ ३ ॥ श्रेय इति ॥ हे विभो श्रेयसां धर्मार्थकाममोक्षाणां स्रुतिः सरसो निर्झराणामिव स्रवणं यस्यास्तां सृतिमिति पाठे श्रेयोमार्गभूतां ते तव भक्तिमुदस्य त्यक्त्वा ये केवलं बोधलब्धये ज्ञानप्राप्त्यर्थं क्लिश्यन्ति शास्त्राभ्यासादिक्लेशं कुर्वन्ति तेषाम् अल्पप्रमाणं धान्यपुञ्जमुज्झित्वा बहुप्रमाणस्थूलतुषावघातिनां स्थूलतुषानेवावघ्नतां यथा स्थूलतुषः क्लेशल एव शिष्यते तथा असौ बोधः क्लेशं लाति इति क्लेशलः क्लेशजनक एवावशिष्यते नान्यत् ॥ ४ ॥ पुरेति ॥ हे भूमन् हे अच्युत इह लोके बहवोऽपि पुरा प्रथमं योगिनो भक्तिव्यतिरिक्तानेकोपायवन्तोऽपि सन्तस्ते ज्ञानम-प्राप्य पश्चात्त्वदर्पितेहाः त्वय्यर्पिताः लौकिक्यो वैदिक्यश्चेहाः कर्मणि यैस्ते निजकर्मलब्धया तैस्त्वदर्पितैर्निजकर्मभिर्लब्धया चित्तशुद्धिद्वारा कथाश्रवणादरादिरूपया भक्त्या ततश्च कथोपनीतया कथाश्रवणजनितप्रेमलक्षणया च भक्त्यैव अञ्जः सुखेनैव ते तव परां गतिं परं तत्त्वं विबुध्य प्रपेदिरे प्राप्ताः त्वदर्पितया ईहया निजकर्मभिश्च लब्धये-त्येकं पदं वा ॥५॥ यद्यपि सगुणनिर्गुणयोरुभयोरपि ज्ञानं दुर्घटं तथापि निर्गुणस्य ज्ञानं कथंचिद्भवेदपि ननु सगुणस्यानन्ताचिन्त्यगुणस्येत्याह—तथापीति ॥ हे भूमन् तथापि अगुणस्य निर्गुणस्य ते महिमा तत्त्वम् अमलैः शुद्धचित्तैः अन्तरात्मभिः अन्तर्मुखतया प्रत्याहृतेन्द्रियैः पुरुषैः स्वानुभवात् आत्माकारान्तःकरणसाक्षात्कारात् विबोद्धुं

श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये ॥ तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥ ४ ॥ पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ॥ विबुद्ध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥ ५ ॥ तथापि भूमन्महिमाऽगुणस्य ते विबोद्धुमर्हत्यमलान्तरात्मभिः ॥ अविक्रियात्स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा ॥ ६ ॥

बोधगोचरीभवितुम् अर्हति इदमग्रेपि प्रत्येकं सम्बध्यते। अथवा विबोद्धुं ज्ञातुमर्हति शक्यत इत्यर्थः। नन्वन्तःकरणं सविकारमेव विषयीकरोति तत्कथमात्माकारता तस्ये-त्यत आह। अविक्रियात् इति। विक्रिया विशेषाकारः तद्रहितात् विशेषपरित्याग एवात्माकारतेत्यर्थः। नन्वन्तःकरणविषयत्वेऽनात्मत्वप्रसङ्ग इत्याशङ्क्याह अरूपतः रूपं विषयः फलव्याप्यता तद्भिन्नत्वात् वृत्तिविषयत्वमेवात्मनो न फलविषयत्वमतो न दोषः इत्येतैर्हेतुभिः विबोद्धुमर्हति कथं तर्हि स्फूर्त्तिः अनन्यबोध्यात्मतया अन्यैरिन्द्रिया-दिभिर्न बोध्यः आत्मा स्वरूपं यस्य सः अनन्यबोध्यात्मा तस्य भावस्तत्ता तया स्वप्रकाशतयेत्यर्थः। नच ननु अन्यथा घटादिवदेवंभूतमिति विबोद्धुं नैवार्हति वृत्तिफलव्या-प्योरस्तु अयं पन्थाः घटादिजडवस्तुज्ञानविषये अन्तःकरणं चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटाद्याकारेण परिणमते स एव परिणामो वृत्तिरित्युच्यते वृत्तिप्रति-बिम्बितचिदाभासः फलमित्युच्यते तत्र वृत्त्या घटाद्यावरकमज्ञानं नाश्यते चिदाभासेन फलाख्येन घटः प्रकाश्यते ततोऽयं घट इत्यादि ज्ञानं जायते अतो घटादिस्फुरणार्थं फलव्याप्तिरपेक्ष्यते ब्रह्मविषये तु आवरकाज्ञाननाशाय वृत्तिव्याप्तिमात्रमपेक्ष्यते ब्रह्माकारवृत्तौ जातायां ब्रह्मस्फुरणार्थन्तु रविदर्शनार्थं दीपापेक्षेव चिदाभासापेक्षा नास्ति ब्रह्मणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयंप्रकाशत्वात् एतदर्थसंग्रहश्लोकौ च । " बुद्धितत्स्थचिदाभासौ द्वावपि व्यामुतो घटम्।तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता । स्वयं स्फुरणरूपत्वान्नाभासस्तत्र युज्यते ॥ " यद्वा । अगुणस्य महिमा विबोद्धुमर्हतीत्यत्र हेतवः अविक्रियात् इत्यादौ भावप्राधान्यम् । विविधा क्रिया विक्रिया तद्रहितत्वात् सगुणस्तु सृष्ट्यादिविविधक्रियावान् अनन्तलीलाचरितनिधिश्च स्वानुभवात् स्वाकारानुभवरूपत्वात् सगुणस्तु न केवलं स्वानुभवरूपः किन्तु ब्रह्मादिनानानन्तरूपः मत्स्यादिरूपोऽपि च अरूपतः उपलक्षणतया रूपादिगुणवत्त्वाभावात् सगुणस्तु अचिन्त्यानन्तकल्याणगुणः अनन्यबोध्यात्मतया स्वप्रकाशतया सगुणस्तु न केवलं स्वप्रकाशः किन्तु अनन्तचरितरूपगुणवत्त्वात् तद्बोधकानन्तश्रुत्यादिशास्त्रभक्तजनेन्द्रियादिबोध्योऽपि अतः अगुणस्य महिमा कथंचित् बोद्धुमर्हति । ननु सगुणस्य अन्यथा इयत्तया इदन्तया च अगुणस्यापि महिमा बोद्धुं नार्हति कुतः सगुणस्य ॥ ६ ॥ अतः सगुणस्य महिमा बोद्धुमशक्य इत्याह—गुणात्मन इति ॥ यैः सुकल्पैः अतिनिपुणैः जनैः बहुजन्मकालेन भूपांसवः भूपरमाणवः तथा खे आकाशे मिहिका हिमकणास्तथा द्युभासः दिवि नक्षत्रादिकिरणपरमाणवश्च विमिताः विशेषेण गणिता भवेयुः तेऽपि गुणात्मनः गुणानामात्मनो-

गुणात्मनस्तेऽपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेऽस्य ॥ कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः खे मिहिका द्युभासः ॥ ७ ॥ तत्तेऽनुकम्पां सुसमीक्षमाणो भुञ्जान एवात्मकृतं विपाकम् ॥ हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ ८ ॥ पश्येश मेऽनार्यमनन्त आद्ये परात्मनि त्वय्यपि मायिमायिनि ॥ मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियानैच्छमिवार्चिरग्नौ ॥ ९ ॥ अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः ॥ अजावलेपान्धतमोऽन्धचक्षुष एषोऽनुकम्प्यो मयि नाथवानिति ॥ १० ॥

[illegible] अस्य विश्वस्य हिताय पालनाय बहुधा गुणाविष्कारेणावतीर्णस्य तव गुणान् विमातुमेतावन्त इति गणयितुमपि के ईशिरे समर्था बभूवुः दूरतस्तद्विशेषबोधः आमभाव आ[illegible] ॥७॥ तदिति ॥ यस्माज्ज्ञानं सुदुर्घटं तत्तस्मात् हे भगवन् यः प्राणी ते तवानुकम्पां कृपां सुसमीक्षमाणः कदा भगवत्कृपा भविष्यतीति प्रतीक्षमाणस्तावदात्मकृतं विपाकं स्वार्जितं कर्मफलमनासक्तः सन् भुञ्जानो नातीव तपआदिना क्लिश्यन् हृद्वाग्वपुभिस्ते तुभ्यं नमो विदधत् उपलक्षणतया नमनश्रवणादिषु भक्तिषु यथासंभवं भक्तिं कुर्वन्नेव जीवेत तङार्षः । समुक्तिपदे मुक्तिरूपे फले दायभाग् भवति भक्तस्य जीवनव्यतिरेकेण दायप्राप्ताविव मुक्तौ नान्यदुपयुज्यत इति भावः । जीवनं चात्र भक्तौ स्थितिरेव ॥८॥ पश्येति ॥ हे ईश स्वामिन् मे मम अनार्यं दौर्जन्यं मूढत्वं पश्य योऽहम् अनन्ते आद्ये सर्वकारणे परात्मनि सर्वनियन्तरि मायिनामपि मायिनि त्वय्यपि स्वमायां वितत्य प्रसार्यात्मवैभवं स्वप्रभावमीक्षितुं द्रष्टुमैच्छमभिलषितवान् । अग्नौ अर्चिरिव यथा अग्नेरुद्भूता अर्चिः ज्वाला अग्नौ न कमपि स्वप्रभावं कर्तुं शक्नोति तथा एवं कर्तुं त्वदग्रेऽहं कियान् न किञ्चित् ॥९॥ अत इति ॥ हे अच्युत अतः रजोभुवः रजोगुणादुत्पन्नस्य त्वत्तः पृथक् अहमेवेश इति अभिमानवतः हि यस्मात् त्वत्प्रभावमजानतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजा त्वन्माया तस्या योऽवलेपः संवन्धस्तेन यत् अन्धंतमः गाढमज्ञानं तेन अधं चक्षुः विवेकहेतुरन्तःकरणं यस्य तस्य अजो जगत्कर्ताहमिति योऽवलेपो मदः स एवान्धंतमः समासान्ताभाव आर्षः । तेनान्धीभूते चक्षुषी यस्येति वा ममापराधम् अन्यत्र प्रभुत्वेन वर्त्तमानोऽपि मयि नाथे स्वामिनि सति नाथवान् मम भृत्यो मयानुकम्प्यः मत्कृपायोग्य इति मत्वा क्षमस्व ॥ १० ॥ क्वाहमिति ॥ तमःप्रकृतिः महान् महत्तत्त्वम् अहमहंकारः खमाकाशं चरो वायुः अग्निः वार्जलं भूश्च एतैः प्रकृत्यादिपृथिव्यन्तैः संवेष्टितो योण्डघटः ब्रह्माण्डरूपो घटः नश्वरत्वज्ञापनाय घटपदप्रयोगः स एव तस्मिन्वा स्वमानेन सप्तवितस्तिमात्रः कनिष्ठपरिमाणः कायो यस्य सोऽहं क्व ईदृग्विधानि एवंप्रकारकाणि यानि अगणितान्यण्डानि तान्येव परमाणवस्तेषां चर्या परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य ते तव महित्वं च क्व । अतोऽतितुच्छत्वात्त्वयानुकम्प्योऽहमिति भावः ॥ ११ ॥ उत्क्षेपणमिति ॥ हे अधोक्षज गर्भगतस्य शिशोः पादयोः उत्क्षेपणं किं मातुरागसे कल्पते अपराधाय भवति न भवत्येवेत्यर्थः । अस्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां स्थूलसूक्ष्मकार्यकारणशब्दैर्वा भूषितम् एतेषां शब्दानां भुवि विषये

क्वाहं तमो महदहंखचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः ॥ क्वेदृग्विधाऽविगणिताण्डपराऽणुचर्यावाताध्वरोमविवरस्य च ते महित्वम् ॥ ११ ॥ उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे ॥ किमस्तिनास्तिव्यपदेशभूषितं तवास्ति कुक्षेः कियदप्यनन्तः ॥१२॥ जगत्त्रयान्तोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् ॥ विनिर्गतोऽजस्त्विति वाङ्न वै मृषा किं त्वीश्वरत्वन्न विनिर्गतोऽस्मि ॥ १३ ॥ नारायणस्त्वं न हि सर्वदेहिनामात्माऽस्यधीशोऽखिललोकसाक्षी ॥ नारायणोऽङ्गं नरभूजलायनात्तच्चापि सत्यं न तवैव माया ॥ १४ ॥

उषितम् अभिहितं सर्वं वस्तु तव कुक्षेरनन्तः बहिः कियदपि किंचिन्मात्रमपि किमस्ति न किंचिन्मात्रमपि बहिरस्ति किंतु सर्वं तदन्तरेवास्तीत्यर्थः । अतः अहमपि कुक्षिगत एव तेन पुत्रस्य मात्रेव त्वया ममापराधः सोढव्यः ॥ १२ ॥ जगत्त्रयेति ॥ जगत्त्रयस्यान्ते प्रलये य उदधीनां संप्लवः संश्लेषः तस्मिन्नुदे उदके शयानस्य नारायणस्य उदरे या नाभिस्ततो जातं यन्नालं कमलं "नलिने तु नलं मतम्" इति विश्वः । स्वार्थेऽण् । तस्मादजो ब्रह्मा विनिर्गत इति वाक् सा तु तावन्मृषा नैवं भवति । वै इत्यवधारणे । तथापि तु हे ईश्वर त्वमेव वद किं त्वत् त्वत्तोऽहं न विनिर्गतः नोत्पन्नोऽस्मि अपि तु त्वत्त एवोत्पन्नोऽस्मीत्यर्थः ॥ १३ ॥ यस्मादहं जातः स नारायणस्त्वमेवेति नानाव्युत्पत्तिभिराह—नारायण इति ॥ त्वं किं नारायणो न हि अपि तु त्वमेव नारायण इत्यर्थः । यतः सर्वदेहिनामात्माऽसि नारं जीवसमूहोऽयनं यस्येति व्युत्पत्त्या त्वमेव नारायणः अधीशः प्रवर्त्तकः ततश्च नारस्यायनं प्रवृत्तिर्यस्मात्तथेति त्वमेव नारायणः । क्वचिदधीशेति संबुद्धिपाठः । तथा अखिललोकसाक्षी च त्वमसि अतः नारं जीवसमूहमयते जानातीति व्युत्पत्त्या त्वमेव नारायणः नरः परमात्मा तस्माद्भवन्तीति नरभुवः पदार्थाः नरभूजलं च तदयनाद्वः प्रसिद्धो नारायणः सोऽपि तवैवाङ्गं मूर्तिर्न त्वद्भिन्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"नराज्जातानि तत्वानि नाराणीति विदुर्बुधाः। तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥" इति जलाश्रयत्वेन प्राप्तं परिच्छेदं निरस्यति। तच्चापि जलायनत्वेन परिच्छिन्नत्वमपि सत्यं न भवति किन्तु तव मायैव लीलार्थमेव तद्रूपं वस्तुतो व्यापकमेव॥ १४॥ अपरिच्छेदमुपपादयति—तच्चेदिति॥ चेद्यदि संद्विद्यमानं जगत् यस्मिंस्तत् जगदाश्रयभूतं तव तद्वपुर्नारायणस्वरूपं जलस्थं परिच्छिन्नमित्येवं यदि सत् सत्यं तर्हि हे भगवन् अचिन्त्यैश्वर्य मे मया तदा कमलनालमार्गेणान्तःप्रवेशान्वेषणसमय एव किं न दृष्टं तदा तपःकरणानन्तरं हृदि स्वहृदय एव किं वा सुदृष्टं सम्यक् दृष्टं पुनश्च सपदि तत्क्षणमेव तत्रापि नो व्यदर्शि नैव दृष्टम् अतो व्यापकस्यैव तवेच्छया तथा दर्शनं न परिच्छिन्नत्वमिति भावः॥ १५॥ वस्तुतो जलादिप्रपञ्चस्यावास्तवात्तेन तव कथं परिच्छेद इत्याह—अत्रैवेति॥ हे मायाधमन मायोपशमन धमतेः सौत्राल्ल्युः अत्र अस्मिन्नेवावतारे अस्य बहिःस्फुटस्य प्रत्यक्षसिद्धस्य कृत्स्नस्यापि प्रपञ्चस्य अन्तर्जठरे स्वजठरमध्ये जनन्याः यशोदायाः प्रदर्शनेन मायामात्रत्वमेव ते त्वया प्रकटीकृतम्॥ १६॥ ननु बहिस्थस्य जठरे प्रतिबिम्बोऽस्तु नतु मायेत्यत आह—

तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव॥ किं वा सुदृष्टं हृदि मे तदैव किन्नो सपद्येव पुनर्व्यदर्शि॥ १५॥ अत्रैव मायाधमनाऽवतारे ह्यस्य प्रपञ्चस्य बहिः स्फुटस्य॥ कृत्स्नस्य चान्तर्जठरे जनन्या मायात्वमेव प्रकटीकृतं ते॥ १६॥ यस्य कुक्षाविदं सर्वं सात्मं भाति यथा तथा॥ तत्त्वय्यपीह तत् सर्वं किमिदं मायया विना॥ १७॥ अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शितमेकोऽसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि॥ तावन्तोऽसि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावन्त्येव जगन्त्यभूस्तदमितं ब्रह्माद्वयं शिष्यते॥ १८॥

यस्येति॥ यस्य तव कुक्षौ इदं सर्वं सात्मम् आत्मना त्वया सहितम् आत्मानमपरित्यज्य सात्मं साकल्येऽव्ययीभावः। अनश्चेति टच्।"अव्ययीभावे चाकाले" इति सहस्य सः। यथा भाति तथैव तत्सर्वमपि इह बहिरपि भाति तदिदं भानं त्वयि मायया विना किं कथं घटते अयं भावः। त्वयि प्रतिबिम्बश्चेत् बाह्याद्विलोमतया प्रतीयेत नतु तथास्ति तव चादर्शस्थानीयस्य त्वयि प्रतीतिर्न स्यात्। नहि दर्पणे दर्पणो दृश्यते अतो मिथ्यात्वमेवेति॥ १७॥ अद्यैवेति॥ त्वदृते त्वां विना अस्य विश्वस्य मायात्वं ते त्वया अद्यैव किं मम नादर्शितम् न दर्शितमपि तु प्रदर्शितमेव। तथाहि प्रथमं यदा मया वत्सादयो नापहृतास्तदा त्वमेकः श्रीकृष्णरूपोऽसि ततो वत्सबालादिहरणानन्तरं व्रजसंबन्धिनः सुहृदो बालाः वत्साः समस्ता वेणुविषाणादयश्च सर्वेऽपि त्वमेवाभूः। ततो मया साकं सहाखिलैस्तत्वादिभिरुपासिताः सेवितास्तावन्तस्तावत्संख्याकाश्चतुर्भुजाः त्वमसि अभूः ततश्च तावन्त्येव जगन्ति ब्रह्माण्डानि त्वमभूः तस्मात् अमितमद्वयं ब्रह्मैव त्वत्स्वरूपमवशिष्यते। ब्रह्माण्डदर्शनं पूर्वमनुक्तमप्यत्रत्योक्त्यैव ज्ञेयम्॥ १८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मया दर्शितं शुद्धमेव चैतन्यं कथं प्रपञ्चवन्मायेत्युच्यते सत्यं किन्त्वद्वितीये त्वयि नानात्वं गुणावतारमत्स्यादिष्विव कार्यवशेन स्वतन्त्रमायानिबन्धनमपीत्याह– अजानतामिति ॥ त्वत्पदवीं तव परमस्वरूपमजानतामेव अनात्मनि प्रकृतौ स्थितः आत्मा त्वमेव आत्मना स्वातन्त्र्येण मायां वितत्य विस्तार्य भासि तत्र जगतः सृष्टौ निमित्तभूतायां रजसाऽहं ब्रह्मेवेति भासि जगतः विधाने पालने सत्वेन एष त्वं विष्णुरिवेति भासि जगतोऽन्ते प्रलये तमसा त्रिनेत्रो रुद्र इव भासि ॥ १९ ॥ सुरेष्विति ॥ हे प्रभो हे विधातः हे ईश अजनस्य जन्मरहितस्यापि ते तव असतां दुर्मदनिग्रहाय सतामनुग्रहाय च सुरेषु वामनरूपेण ऋषिषु परशुरामादिरूपेण नृषु रामकृष्णादिरूपेण तिर्यक्षु वराहादिरूपेण यादःसु जलचरेषु मत्स्यादिरूपेण जन्म स्वेच्छया प्रादुर्भावो भवति ॥२०॥ को वेत्तीति ॥ हे भूमन् हे भगवन् हे परात्मन् हे योगेश्वर अहो आश्चर्यरूपां योगमायां विस्तारयन् यदा त्वं क्रीडसि तदा त्रिलोक्यां भवतः ऊतीः लीलाः क्व देशे भवन्ति कथं वा भवन्ति कति वा भवन्ति कदा वा काले भवन्ति इति को वेत्ति न

अजानतां त्वत्पदवीमनात्मन्यात्मात्मना भासि वितत्य मायाम् ॥ सृष्टाविवाहं जगतो विधान इव त्वमेषोऽन्त इव त्रिनेत्रः ॥ १९ ॥ सुरेष्वृषिष्वीश तथैव नृष्वपि तिर्यक्षु यादस्स्वपि तेऽजनस्य ॥ जन्माऽसतां दुर्मदनिग्रहाय प्रभो विधातः सदनुग्रहाय च ॥ २० ॥ को वेत्ति भूमन् भगवन् परात्मन् योगेश्वरोतीर्भवतस्त्रिलोक्याम् ॥ क्व वा कथं वा कति वा कदेति विस्तारयन् क्रीडसि योगमायाम् ॥ २१ ॥ तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ॥ त्वय्येव नित्यसुखबोधतनावनन्ते मायात उद्यदपि यत् सदिवावभाति ॥ २२ ॥ एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनन्त आद्यः ॥ नित्योऽक्षरोऽजस्रसुखो निरञ्जनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः ॥२३ ॥ एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते ॥ गुर्वर्कलब्धोपनिषत्सु चक्षुषा ये ते तरन्तीव भवानृताम्बुधिम् ॥ २४ ॥

कोऽपीत्यर्थः ॥ २१ ॥ तस्मादिति ॥ तस्माद्धेतोः अनन्ते नित्यसुखबोधतनौ नित्यानन्दज्ञानरूपे त्वयि एव स्वप्नपदार्थवदाभा यस्य तत् अस्ताधिषणा प्रतिभासो यस्य पुरु बहुलं दुःखानन्तरं दुःखं यत्र इदमज्ञदृष्ट्या प्रतीयमानं जगत् अशेषमसत्स्वरूपमेव मायातः उद्यत् उद्गच्छत् अपि यन्नश्यत् अपि पूर्वादिणः शता इणो यण्। सदिव उपलक्षणतया नित्यमिव सुखमिव चेतनमिव अधिष्ठानभूतस्य तव गुणैरवति ॥ २२ ॥ एक इति ॥ त्वम् एकः आत्मा पुराणः पुरुषः सत्यः स्वयंज्योतिः स्वयंप्रकाशः अनन्तः आद्यः नित्यः अक्षरः अपक्षयहीनः अजस्रसुखः नित्यानन्दः निरञ्जनः निर्मलः पूर्णः अद्वयः उपाधितो मुक्तः अमृतः नाशरहितश्च ॥ २३ ॥ एवंविधमिति ॥ गुरुरेवाऽर्कः परमार्थप्रकाशकस्तस्माल्लब्धा उपनिषत् उपनिषज्जन्यं ज्ञानमेव चक्षुस्तेन ये एवंविधमुक्तप्रकारकं स्वात्मानं स्वरूपभूतं सकलात्मनां सर्वजीवानामप्यात्मानं त्वामात्मात्मतया स्वाभेदेन विचक्षते पश्यन्ति ते भवानृताम्बुधिं भवतीति भवः स एव मिथ्यात्वात् दुस्तरत्वाच्चानृताम्बुधिस्तं तरन्तीवेत्यन्वयः। भवाम्बुधेरनृतत्वात् तत्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणमपि तथैवेत्याशयेनेवशब्दप्रयोगः ॥ २४ ॥ अत्र ज्ञानेन तरन्ति तच्च तरन्तीव तच्चात्मात्मतया ज्ञानेनेत्यर्थत्रयं प्रतिज्ञातं तत्राद्यमुपपादयति—आत्मानमिति ॥ आत्मानमात्मतया याथातथ्येन अजानतामेव तेनैव तदज्ञानेन निखिलं प्रपञ्चितं प्रपञ्चः जातम् तच्च यथा रज्ज्वज्ञानजौ अहेर्भोगस्य शरीरस्य भवाभवौ रज्ज्वां रज्जुतत्वज्ञानादेव लीयेते तथा आत्मज्ञानेन भूयः पुनरपि तत्प्रपञ्चितं प्रलीयते ॥ २५ ॥ द्वितीयमुपपादयति—अज्ञानेति ॥ नाम प्रसिद्धौ । भवो बन्धस्ततो मोक्षश्च तौ द्वावपि नाम अज्ञानेनैव संज्ञामात्रं ययोस्तौ अजस्रचिति नित्यज्ञानरूपे केवले अद्वितीये परे शुद्धे आत्मनि विचार्यमाणे सति तरणौ सूर्ये अहनी लक्षणया रात्रिदिने इव ऋतः अबाधितश्चासौ ज्ञश्चिदात्मकश्च यो भावः परमार्थभूतः आत्मा तस्मादन्यौ न स्तः यथा सूर्ये विचार्यमाणे तत्र न रात्रिर्न दिवसः एवमात्मनि न बन्धो न मोक्षः इति ॥ २६ ॥ तृतीयमाह—त्वामिति॥ स्वात्मानं त्वां परं स्वतो भिन्नं मत्वा परं स्वतो भिन्नं देहादिं चात्मानं मत्वा आत्मा परमात्मा पुनः स्वस्माद्बहिरेव मृग्यः अन्वेषणीय इति जनानां समूहः

आत्मानमेवात्मतयाऽविजानतां तेनैव जातं निखिलं प्रपञ्चितम् ॥ ज्ञानेन भूयोऽपि च तत् प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा ॥ २५ ॥
अज्ञानसंज्ञौ भवबन्धमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात् ॥ अजस्रचित्याऽऽत्मनि केवले परे विचार्यमाणे तरणाविवाहनी ॥ २६ ॥
त्वामात्मानं परं मत्वा परमात्मानमेव च ॥ आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताऽज्ञता ॥ २७ ॥ अन्तर्भवेऽनन्त भवन्तमेव ह्यऽतत्त्यजन्तो मृगयन्ति सन्तः ॥ असन्तमप्यन्त्यहिमन्तरेण सन्तं गुणं तं किमु यन्ति सन्तः ॥२८॥ अथापि ते देव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि ॥ जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन् ॥ २९ ॥

जनता अज्ञा चासौ जनता तस्या अज्ञता अहो आश्चर्यं नहि गृहे नष्टं वस्तु वने सुज्ञैर्मृग्यते इति मृग्य अहो इत्यत्र मृग्योहो इत्यकरणम् अहोज्ञेति संधिश्चार्षः ॥२७॥ अन्तर्भव इति ॥ हे अनन्त भवः चिज्जडात्मकं शरीरं तस्य अन्तः तन्मध्य एव अतत् त्वदतिरिक्तमात्मतयाध्यस्तं प्राकृतं देहादिकं त्यजन्तः अपवदन्त एव सन्तो विवेकिनो भवन्तं भवद्भिन्नमात्मानं मृगयन्ति अन्विष्य जानन्ति असन्तमप्यविद्यमानमपि अहिमन्तरेण तदपवादं विना अन्ति समीपे सन्तं विद्यमानमपि तं गुणं रज्जुं सन्तो विवेकिनोऽपि किमुपयन्ति जानन्ति नैव जानन्ति अतः असतोऽपवादं विनाऽधिष्ठानतत्त्वं न ज्ञायते ॥ २८ ॥ अथापीति ॥ यद्यपि ज्ञानं सुलभमिवोक्तमथापि हे देव ते तव पदाम्बुजद्वयस्य यः प्रसादलेशस्तेनानुगृहीत एव पुमान् भगवतस्तव महिम्नस्तत्त्वं हे भगवन्निति संबुद्धिर्वा जानाति अन्यस्त्वद्भक्तिहीनस्तु एकोऽपि निर्जने देशे एकाकी स्थितोऽपि चिरं बहुकालं विचिन्वन् अतदंशापवादेन शास्त्रबलेन विचारयन्नपि तन्नैव जानाति ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदस्तु इति ॥ हे नाथ यस्मात्त्वद्भक्तिहीनस्य न पुरुषार्थसिद्धिस्तत्तस्मादत्र भवे अस्मिन् ब्रह्मजन्मनि कर्मवशात्तिरश्चां पश्वादीनामपि मध्ये यज्जन्म तस्मिन्वापि जन्मनि स एव मे भूरिभागो महद्भाग्यमस्तु येन भाग्येनाहं भवज्जनानां मध्ये एको यः कश्चिदपि भूत्वा तव पादपल्लवं नितरां सेवे ॥३०॥ अहो इति ॥ हे विभो यस्य तव तृप्तयेऽद्यापि अनादिकालतः प्रवृत्ता अद्यपर्यन्तमपि सर्वेप्यध्वरा यज्ञा नालं न समर्था जाताः तेन ते त्वया वत्सतरात्मजात्मना वत्सतराणामात्मनां बालानां च स्वरूपेण यासां गोगोपीनां स्तन्यं दुग्धम् अमृतमिव स्वादु अतीव अत्यर्थं संतोषपूर्वकं मुदा हर्षेण स्वाग्रहेण पीतम् अहो ताः व्रजस्थाः गावो रमण्यो गोप्यश्चाहो अतिधन्या अतिकृतार्थाः । सन्धिरार्षः ॥ ३१ ॥ अहो भाग्यमिति ॥ परमानन्दं क्लैब्यमार्षं पूर्णं सनातनं ब्रह्म यन्मित्रं येषां मित्रतया वर्त्तते तेषां नन्दगोपस्य यो व्रजस्तदोकसां सर्वेषामहो भाग्यमहो-भाग्यमिति ॥३२॥ एषामिति ॥ हे अच्युत एषां घोषनिवासिनां व्रजवासिनां भाग्यस्य महिमा तावदास्तां कस्तं वक्तुं शक्नोति । बतेति हर्षे । शर्वो रुद्रः आदिर्येषां ते एकादशेन्द्रियाधिष्ठातृदेवता एव वयं भूरिभागाः महाभाग्यवन्तः यतः एतेषां व्रजवासिनां हृषीकाणि इन्द्रियाणि एव चषकाणि पानपात्राणि तैस्ते तव चतुर्दशस्य चित्ताधिष्ठातुः

तदस्तु मे नाथ स भूरिभागो भवेऽत्र वाऽन्यत्र तु वा तिरश्चाम् ॥ येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवम् ॥ ३० ॥
अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा ॥ यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि न चालमध्वराः ॥ ३१ ॥ अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ॥ यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥ ३२ ॥ एषां तु भाग्यमहिमाऽच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः ॥ एतद्धृषीकचषकैरसकृत् पिबामः शर्वादयोऽङ्घ्युदजमध्वमृतासवं ते ॥ ३३ ॥ तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि कतमाङ्घ्रिरजोभिषेकम् ॥ यज्जीवितं तु निखिलं भगवान् मुकुन्दस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥ ३४ ॥

अङ्घ्रीएव उदजे कमले तयोर्मधु मकरन्दस्तदेवामृतं तद्वत्स्वादु आसवमन्यविस्मृतिकारकं मादकमसकृत् पिबामः । तत्र शर्वः अहङ्कारस्याधिष्ठाता ब्रह्मा बुद्धेः चन्द्रो मनसः दिशः श्रोत्रयोः वातस्त्वचः अर्कश्चक्षुषोः वरुणः रसनायाः अश्विनीकुमारौ नासिकयोर्द्वयोरेकत्वेन ग्रहणं वह्निर्वाचः इन्द्रो हस्तयोः उपेन्द्रः पादयोः मित्रः पायोः ब्रह्मैव उपस्थस्यापि इत्येवं त्रयोदश । तत्र पायूपस्थयोः सेवायामुपयोगाभावात्तयोर्देवते विहायैकादशेत्युक्तम् । यदा प्रत्येकमिन्द्रियाभिमानिनो वयं कीर्त्तिसौन्दर्यसौगन्ध्याद्येकदेश-सेविनोऽपि कृतार्थाः तदा सर्वेन्द्रियैः सर्वसेविनामेषां भाग्यं किमुच्यते ॥ ३३ ॥ "तदस्तु मे नाथ स भूरिभाग" इति यत्प्रार्थितं तदिदमेवेत्याह—तद्भूरिभाग्यमिति ॥ तादृशं भूरिभाग्यमस्तु येन इह मनुष्यलोके तत्रापि गोकुले तत्राप्यटव्यां वृन्दावने किमपि पशुपक्षिवृक्षलताकीटादीनां मध्ये जन्मास्तु तत्रापि कतमस्य यस्य कस्यापि अङ्घ्रिरजसाभिषेको यस्मिन् तत् जन्मास्तु गोकुलवासिनां चरणरजःसम्बन्ध एव महाँल्लाभः । येषां जीवितं निखिलं गृहवित्तपुत्रादिसर्वस्वं च भगवान्मुकुन्द एव यतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अद्यापि अनादिकालमारभ्याद्यपर्यन्तमपि यस्य तु भवतः पदरजः श्रुतिभिरपि मृग्यत एव नतु दृश्यत इत्यर्थः ॥ ३४ ॥ किमेषां धन्यता वर्ण्यते येषां भवानपि ऋणीवास्ते इत्याह–एषामिति ॥ उत अपि हे देव एषां घोषनिवासिनां संप्रदानस्य शेषत्वविवक्षया षष्ठी । भवान् सर्वप्रकारेण सर्वं कर्तुं सर्वं दातुं च समर्थोऽपि किं राता किं दास्यति इति विश्वफलात् सर्वफलात्मकात्त्वत्तोऽपि अपरम् अन्यत्फलं कुत्रापि देशे काले वा नयत् अयत् बुद्ध्या बहुधा अन्विष्याप्यप्राप्नुवत् “ इण्, गतौ ” शत्रन्तं नञ्समासः । नोऽस्माकं मम रुद्रस्य सनकादीनां च चेतो मुह्यति । ननु मामेव दत्त्वानृणी स्यां तत्राह । यतः हे देव सद्वेषादिव मातृतुल्यवेषादेव सकुला प्राक्तनजन्मकुलसहितापि बकाघासुरयोस्तु स्वतन्त्र एव भगवत्स्पर्शोऽस्ति ततस्तौ न गण्यौ दुष्टा पूतनापि त्वत्कृपया त्वामेवापिता प्रापिता अत एषां तत उत्कृष्टं फलमपेक्षितमित्याशयः । येषां घोषनिवासिनां तु धाम गृहम् अर्थो धनं सुहृदो मित्राणि प्रियाः प्रीतिविषयाः स्त्र्यपत्यादयो ये के च पदार्थाः आत्मा देहः तनयाः पुत्राः प्राणाः इन्द्रियाणि मुख्यप्राणाश्च तेन जीवितमाशयोन्तःकरणम् एते सर्वे त्वत्कृते त्वदर्थमेव । तथा च य आत्मा पापिष्ठायै पूतनायै दत्तः स एव चेदतिप्रकृष्टेभ्यो दीयेत तदा नौचिती एव भवेदतः एषामृणित्वस्वीकार एव

एषां घोषनिवासिनामुत भवान् किं देवरातेति नश्चेतो विश्वफलात् फलं त्वदपरं कुत्राप्ययन्मुह्यति॥ सद्वेषादिव पूतनापि सकुला त्वामेव देवाऽऽपिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥ ३५ ॥ तावद्रागादयः स्तेनास्तावत् कारागृहं गृहम् ॥ तावन्मोहोऽङ्घ्रिनिगडो यावत् कृष्ण न ते जनाः ॥ ३६ ॥ प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयसि भूतले ॥ प्रपन्नजनताऽऽनन्दसंदोहं प्रथितुं प्रभो ॥ ३७ ॥ जानन्त एव जानन्तु किं बहूक्त्या न मे प्रभो ॥ मनसो वपुषो वाचो वैभवं तव गोचरः ॥ ३८ ॥

तव निष्कृतिः ॥ ३५ ॥ यतीनामिव मुक्तिस्त्वेषामतितुच्छं दानं त्वदीयत्वसंकल्पमात्रेण लभ्यत्वादित्याह–तावदिति ॥ हे कृष्ण यावज्जनाः जीवास्ते त्वदीया न भवन्ति स्वस्मिन् त्वदीयत्वं न संकल्पयन्ति तावदेव रागादयः आदिशब्देन द्वेषादयः स्तेनाश्चौराःपरमार्थमोषका भवन्ति तावदेव गृहं कारागारं बन्धनागारतुल्यं भवति तावदेव मोहोऽप्यङ्घ्रिनिगडः पादबन्धनशृङ्खला भवति त्वदीयत्वाभिमानिनां तु रागादयोऽपि त्वन्निष्ठामोचका एवेति न यतिषु विशेषः भजनं त्वधिकमिति भावः ॥ ३६ ॥ पुत्रादिरूपतया वर्त्तनमप्यानृण्यकरं न भवतीत्याह–प्रपञ्चमिति ॥ हे प्रभो निष्प्रपञ्चः प्रपञ्चातीतोऽपि प्रपन्ना शरणमागता या जनता जनसमूहस्तस्यानन्दानां संदोहं समूहं प्रथितुं प्रथयितुं विस्तारयितुमिह भूतले प्रपञ्चं विडम्बयसि बहूनां पुत्रादिरूपेणानुकरोषि अतस्तेनैषां कथमानृण्यं स्यात् ॥ ३७ ॥ एवं भगवतो दुर्ज्ञेयत्वमुक्तं ये भगवत्तत्वं जानीम इति मन्यन्ते तान् मानिनो जनानुपहसति–जानन्त इति ॥ ये जानन्तः वयं भगवत्तत्वं जानीम इति वदन्तः सन्ति त एव जानन्तु बहूक्त्या तेषां बहुनिन्दावचनेन किं प्रयोजनम् । हे प्रभो तव वैभवं मे मम मनसः वपुषश्चक्षुरादेः वाचश्च गोचरो विषयो न भवति अहं तव वैभवज्ञाने मूर्खः अन्ये पाण्डितम्मन्यास्तु मूर्खतमा इत्याशयः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुजानीहीति ॥ हे कृष्ण त्वं मामनुजानीहि सत्यलोकं गन्तुमनुज्ञां देहि सर्वदृक् त्वं सर्वमपि वेत्सि त्वमेव जगतां नाथः अतः मया ममतास्पदमेतत् जगत् शरीरं च तव अर्पितम् ॥ ३९ ॥ श्रीकृष्णेति ॥ हे श्रीकृष्ण वृष्णयो यादवः तेषां कुलमेव पुष्करं कमलं तस्य जोषो विकासः तद्दायिन् इति सूर्योपमा । तथा क्ष्मा पृथ्वी च निर्जरा देवा द्विजा ब्राह्मणाश्च पशवो गावश्च ते एव उदधयस्तेषां वृद्धिकारिन्निति चन्द्रोपमा । तथा उद्धर्मः पाखण्डधर्मः तदेव शार्वरं तमः तद्धरतीति तथा तत्सम्बोधनेन चन्द्रसूर्ययोर्द्वयोरुपमा । क्षितौ ये राक्षसाः कंसादयस्तेभ्य उद्यन्नेव द्रुह्यतीति तथा तत्संबोधनेन पुनरपि सूर्योपमा आर्कमर्कमभिव्याप्य सर्वेषामर्हन् हे पूज्य हे भगवन् आकल्पं कल्पपर्यन्तं ते तुभ्यं नमोऽस्तु ॥ ४० ॥ इतीति ॥ जगद्धाता ब्रह्मा इत्येवं भूमानं व्यापकं श्रीकृष्णम् अभिष्टूय स्तुत्वा दैर्घ्यमार्षम् । त्रिः परिक्रम्य तत्पादयोर्नत्वा अभीष्टं स्ववाञ्छितं पूजितं वा स्वधाम सत्यलोकं प्रत्यपद्यत जगाम ॥ ४१ ॥ तत इति ॥ भगवानेवं स्वयंभुवं ब्रह्माणं सत्यलोकगमनाय अनुज्ञाप्य

अनुजानीहि मां कृष्ण सर्वं त्वं वेत्सि सर्वदृक् ॥ त्वमेव जगतां नाथो जगदेतत् तवार्पितम् ॥ ३९ ॥ श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् ॥ उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्पमार्कमर्हन् भगवन् नमस्ते ॥४०॥ श्रीशुक उवाच ॥ इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः ॥ नत्वाऽभीष्टं जगद्धाता स्वधाम प्रत्यपद्यत ॥ ४१ ॥ ततोऽनुज्ञाप्य भगवान्स्वभुवं प्रागवस्थितान् ॥ वत्सान् पुलिनमानिन्ये यथापूर्वसखं स्वकम् ॥ ४२ ॥ एकस्मिन्नपि यातेऽब्दे प्राणेशं चान्तरात्मनः ॥ कृष्णमायाहता राजन्क्षणार्धं मेनिरेऽर्भकाः ॥४३॥ किं किं न विस्मरन्तीह मायामोहितचेतसः ॥ यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मृतात्मकम् ॥ ४४ ॥ ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा ॥ नैकोऽप्यभोजि कवल एहीतः साधु भुज्यताम् ॥ ४५ ॥

ततः प्राक् प्रागवदेव तृणचरणादिचेष्टाभिरवस्थितान् वत्सान् यथापूर्वं पूर्वोपवेशनादिकमनतिक्रम्य अपरित्यज्य वर्तमानाः सखायो यस्मिन् यत्र तत् समासान्त आर्षः । सखीति शुद्धः पाठः । यद्वा । यथा यथावस्थिताः पूर्वसखाः पूर्वं सखायो यत्र तत् स्वकं स्वभोजनस्थानं पुलिनमानिन्ये । एवं च प्रथमं बालान् पुलिनमानीय ततस्तत्र वत्सानानिन्ये इति भावः ॥ ४२ ॥ एकस्मिन्निति ॥ हे राजन् आत्मनः स्वस्य प्राणेशमन्तर्यामिणं प्रियतमं यं विना क्षणमपि वर्षायते तं कृष्णमन्तरा विना एकस्मिन्नब्दे याते व्यतीतेऽपि कृष्णस्य मायया हताः मोहितास्तेऽर्भकाः क्षणार्द्धं मेनिरे ॥ ४३ ॥ किं किमिति ॥ मायया मोहितं चेतो येषां ते प्राणिन इह संसारे किं किं न विस्मरन्ति सर्वमेव पर्यायेण विस्मरन्तीत्यर्थः । किं बहुनोक्तेन । सर्वमेव जगत् प्राणिमात्रं यया मायया मोहितं सत् अभीक्ष्णं पुनः पुनः शास्त्राचार्यैः प्रबोधितमपि विस्मृतः आत्मा स्वरूपमपि येन तथा भवति ॥ ४४ ॥ ऊचुरिति ॥ मोहेन क्षणार्द्धाभिमानादेव ते सुहृदः गोपबालास्तं कृष्णं ते त्वयातिरंहसातिवेगेन स्वागतं सम्यगागतमस्माभिस्तु ताव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देकोऽपि कवलो ग्रासस्त्वां विना नाभोजि न भुक्तोऽत इतः अस्मिन्स्वोपवेशस्थाने एहि उपविश । साधु यथा भवति तथा वत्सानां प्राप्तत्वादपि क्षेमेण भुज्यतामित्यूचुश्च ॥ ४५ ॥ तत इति ॥ ततः हृषीकेशः हसन् तैरर्भकैः सहाभ्यवहृत्य भुक्त्वा आजगरमघासुरशरीरजं चर्म तेषां दर्शयन् वनात् व्रजं प्रति न्यवर्तत । आजगरचर्मदर्शनं च व्रजे प्रख्यापनाय योगमायया तत्कालपर्यन्तमाच्छादितत्वान्न नन्दादिभिर्दृष्टमिति ॥ ४६ ॥ बर्हेति ॥ बर्हो मयूरपिच्छं च प्रसूनानि च नवधातवो गैरिकादयश्च तैर्विचित्रितान्यङ्गानि यस्य सः प्रोद्दामा ये वेणुदलशृङ्गाणां रवास्तैर्य उत्सवस्तेनाढ्यः सम्पन्नः वत्सान् गृणन् उपलालनैराह्वयन् अनुगैर्गीता पवित्रा कीर्तिर्यस्य स गोपीनां दृशामुत्सवरूपा दृशिर्दर्शनं यस्य सः कृष्णः गोष्ठं व्रजं प्रविवेश ॥ ४७ ॥ अद्येति ॥ यशोदानन्दसूनुनेति बहूनामुक्तिः सहैव दर्शिता । तत्र केचिद्यशोदासूनुनेत्याहुः । परे नन्दसूनुनेति । यद्वा । यशोदान्नन्दयति यशोदानन्दः स चासौ सूनुः यशोदाया आनन्दरूपः सूनुर्वा तेन अनेनाद्य वने महाव्यालो हतोऽस्माच्च व्यालाद्वयमविता रक्षिता इति

ततो हसन्हृषीकेशोऽभ्यवहृत्य सहार्भकैः ॥ दर्शयंश्चर्माजगरं न्यवर्तत वनाद्व्रजम् ॥ ४६ ॥ बर्हप्रसूननवधातुविचित्रिताङ्गः प्रोद्दामवेणुदलशृङ्गरवोत्सवाढ्यः ॥ वत्सान् गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम् ॥ ४७॥ अद्यानेन महाव्यालो यशोदानन्दसूनुना ॥ हतोऽविता वयं चास्मादिति बाला व्रजे जगुः ॥ ४८ ॥ राजोवाच ॥ ब्रह्मन् परोद्भवे कृष्णे इयान् प्रेमा कथं भवेत् ॥ योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥ ४९ ॥ श्रीशुक उवाच ॥ सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः ॥ इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥ ५० ॥ तद्राजेन्द्र यथा स्नेहः स्वस्वकात्मनि देहिनाम् ॥ न तथा ममतालम्बिपुत्रवित्तगृहादिषु ॥ ५१ ॥

गोपबाला व्रजे जगुः कथितवन्तः ॥ ४८ ॥ व्रजौकसां स्वतोकेषु इत्यादिना स्वपुत्रेभ्योऽपि परपुत्रे कृष्णे स्नेहाधिक्यमुक्तं तत्पृच्छति—ब्रह्मन्निति ॥ हे ब्रह्मन् यः प्रेमा स्वोद्भवेषु तोकेषु स्वस्वपुत्रेष्वपि अभूतपूर्वः ब्रह्ममोहनात्पूर्वं नाभूत् स इयान् अत्युत्कटः प्रेमा परोद्भवे कृष्णे श्रीदामादिरूपे कथं भवेत् तत्रोपपत्तिः कथ्यताम् । लोके गुणवत्तमादपि परपुत्रादतिनिर्गुणेऽपि स्वपुत्रे स्नेहदर्शनादिदं लोकविरुद्धम् ॥ ४९ ॥ आत्मीयेभ्योऽप्यात्मनि स्नेहोऽधिको भवति कृष्णश्च साक्षादात्माऽतस्तत्र स्नेहाधिक्यमिति प्रकरणेनोत्तरयति—सर्वेषामिति ॥ हे नृप सर्वेषामपि भूतानां प्राणिनां स्वात्मैव वल्लभः निरुपाधिकातिशयप्रीतिविषयः तदितरेऽपत्यवित्ताद्यास्तु तद्वल्लभतयैव तस्यात्मनः सुखसाधनतयैव वल्लभा न स्वत इति ॥ ५० ॥ तदिति ॥ हे राजेन्द्र तत्तस्मात् देहिनां प्राणिनां यथा निरुपाधिकः स्वस्वकात्मनि अहङ्कारास्पदे स्नेहस्तथा ममतालम्बिषु ममेदमिति ममकारास्पदेषु पुत्रवित्तगृहादिषु स्नेहो न भवति ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यासतारतम्येन प्रेमतारतम्यं दर्शयति—देहेति ॥ हे राजन्येषु सत्तम देह एवात्मेति वदितुं शीलं येषां तेषामपि यथा देहः प्रियतमस्तथा तं देहमनु ये गृहापत्यादयस्ते प्रियतमा न भवन्ति ॥ ५२ ॥ देहोऽपीति ॥ अहंतास्पदीभूतोऽपि देहो यदि ईषद्विवेकेन ममताभाक् आत्मभिन्नत्वेन ज्ञातो भवेत् तर्ह्यसौ देहः आत्मवत् प्रियो नैव भवेत् किन्त्वात्मानुरोधेनैव प्रियो भवेत् । यद्यतः अस्मिन् देहे जीर्यत्यपि जीर्णत्वेन प्रीतेरविषयेऽपि न जीविष्यतीति निश्चयेऽपि च देहत्यागे आत्मनोऽतिकष्टं दृष्ट्वा ममात्मनः कष्टं माभूदिति बुद्ध्यैव जीविताशा बलीयसी अधिका भवति । यद्वा । यद्यस्माज्जीर्यति रोगादिपीडितेऽस्मिन् विवेकिनां ममतास्पदे देहे जीविताशा तिष्ठत्वयं देह इति वाञ्छापि अबलीयसी पूर्वापेक्षया स्वल्पा भवति । विवेकेनात्मत्वाभिमानापगमे नातिप्रियत्वाभावात् ॥ ५३ ॥ तस्मादिति ॥ हे भारत तस्मात्सर्वेषामपि देहिनां स्वात्मैव प्रियतमः चरं पुत्रकलत्रादि अचरं गृहधनादि सकलमप्येतज्जगत् तदर्थमेव आत्मसुखार्थमेव प्रियं भवति ॥५४ ॥ कृष्णमिति ॥ एनं कृष्णमखिलात्मनां सर्वप्राणिनामात्मानं त्वमवेहि जानी-

देहात्मवादिनां पुंसामपि राजन्यसत्तम ॥ यथा देहः प्रियतमस्तथा न ह्यनु ये च तम् ॥ ५२ ॥ देहोऽपि ममताभाक्चेत्तर्ह्यसौ नात्मवत्प्रियः ॥ यज्जीर्यत्यपि देहेऽस्मिञ्जीविताशा बलीयसी ॥ ५३ ॥ तस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनाम् ॥ तदर्थमेव सकलं जगदेतच्चराचरम् ॥ ५४ ॥ कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ॥ जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥ ५५ ॥ वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च ॥ भगवद्रूपमखिलं नान्यद्वस्त्विह किंचन ॥५६॥ सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः ॥ तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम् ॥५७॥ समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः ॥ भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषाम् ॥ ५८ ॥

हि । जगद्धितायावतीर्णः स कृष्णोऽपि अत्र लोके मायया देहीव आभाति तत्तच्चरितैर्लोकास्तत्प्रवणाः स्युरिति लीलाप्रकटीकरणम् ॥ ५५ ॥ न केवलमात्मनामात्मा अपि तु जडानामपि मूलमित्याह—वस्तुत इति ॥ वस्तुतः परमार्थतः श्रीकृष्णं जगत्कारणं जानतां पुंसामत्र संसारे स्थास्नु स्थावरं चरिष्णु जङ्गमं च अखिलं वस्तु भगवद्रूपं भाति ततोऽन्यदिह जगति किंचनापि नावशिष्यते ॥ ५६ ॥ सर्वेषामिति ॥ सर्वेषामपि स्थावरादिवस्तूनां भवत्यस्मादिति भावः कारणं प्रधानं तद्रूपोऽर्थः स्थितः स्थिरो भवति तस्यापि भावस्य भावः कारणं भगवान् कृष्ण एव । यद्वा । भावार्थः सद्रूपार्थः परमार्थ इत्यर्थः । भवतीति भवत् परिणामं प्राप्नुवत् कारणं तस्मिन् भवति परिणामिनि स्थितः तस्यापि भवतः कारणस्यापि भगवान् कृष्णो भवत्कारणम् अतः अतत् कृष्णव्यतिरिक्तं किं वस्तु अस्तीति रूप्यतां निरूप्यताम् ॥ ५७ ॥ समाश्रिता इति ॥ महतां ब्रह्मशिवादीनाम् अपि पदमाश्रयभूतं महच्च तत्पदं चेति वा पुण्यं मनःशोधकं यशो यस्य स पुण्ययशाः स चासौ मुरारिश्च तस्य पदपल्लव एव प्लवः संसारसिन्धुतरणे नौस्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये सम्यक् निष्कपटमाश्रिताः तेषां भवाम्बुधिः वत्सपदमिव सुतरो भवति परं पदं श्रीवैकुण्ठाख्यं पदं स्थानं भवति विपदां दुःखानां यत्पदं स्थानं संसारस्तत्पुनः कदापि न भवति न ततः पुनरावर्तन्ते इत्यर्थः ॥ ५८ ॥ एतदिति ॥ यत्त्वयाहमिह भगवल्लीलायामाश्चर्येण पृष्टस्तदेतत्प्रश्नस्योत्तरं सर्वं मया ते तुभ्यमाख्यातं प्रकथितम् । यत्कौमारावस्थायामघासुरवधादि हरिणा कृतं तद्यथा तत्पौगण्डावस्थायां बालैर्व्रजे परिकीर्त्तितमिति ॥ ५९ ॥ एतदिति ॥ एतन्मुरारेः सुहृद्भिश्चरितं मुष्णन्तोऽन्योऽन्यशिक्यादीनि इत्यादिनोक्तम् । अघार्दनमघासुरमोक्षणं च शाद्वले हरिततृणे सखिभिः सह जेमनं भोजनं च व्यक्केतरत् व्यक्ताज्जडात् प्रपञ्चादितरत् व्यक्केतरमिति अड्डादेशाभाववान् पाठस्त्वार्षः । स एव तोषणीसारार्थसंदर्शिनीभ्यां स्वीकृतः शुद्धानन्दात्मकं वत्सवत्सपालादिरूपञ्च । यद्वा । व्यक्केतरचिद्विलासस्तदेव रूप्यत इति रूपम् अजेन ब्रह्मणा कृतमुरु महान्तमभिष्टवं स्तोत्रं च शृण्वन् गृणन् नरोऽखिलार्थान् सर्वपुरुषार्थान् एति प्राप्नोति ॥६०॥ एवमिति ॥ एव मुक्तप्रकारैरन्यैरपि निलायनादिभिः कौमारैः कुमारावस्थायां योग्यैर्विहारैः कृत्वा व्रजे स्थितौ रामकृष्णौ कौमारं कुमारावस्थां जहतुस्त्यक्तवन्तौ इत्यर्थः । निलायनं निलीय स्थितिः सेतुबन्धः नद्यादिषु सेतुबन्धः श्रीरामलीलानुकरणं वा मर्कटवदुत्प्लवनं शाखातः शाखान्तरगमनम् आदिपदेनानेकविधलीलान्तरग्रहणं तैः ॥ ६१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्य चतुर्दशे ॥ १४ ॥ गोपालत्वं पञ्चदशे धेनुकस्य विनाशनम् ॥ विषाद्रक्षा च गोपानां श्लोकास्तत्र द्विमार्गणाः ॥ त्रीण्युवाचेति पादोना ऊनषष्टिरनुष्टुभः ॥ १५ ॥ पञ्चमवर्षलीलामाह ततश्चेति ॥ ततः कौमारानन्तरं यदा तौ रामकृष्णौ व्रजे पौगण्डवयःश्रितौ अत एव पशूनां गवादीनां पाले पालने चारणसंयोजनबन्धनादौ नन्दादीनां संमतौ बभूवतुः ईषद्वयोबलातिरेकमनुकृतवन्तौ इत्यर्थः । स्वधर्मे गोचारणे प्रातिनिधिना पुत्रेणारब्धे नन्दो निवृत्त इति ज्ञेयम् । तदा सखिभिः सह गाश्चारयन्तौ पदैः ध्वजादिभिश्चरणाचिह्नैः सर्वतः प्रसर्पणेन वृन्दावनमतीव पुण्यं पवित्रं चक्रतुः । पूर्वं तु बालत्वेन सूक्ष्माणां चरणचिह्नानामप्रकटत्वात् एतत् गोचारणारम्भदिनं तु " शुक्लाष्टमी कार्तिकस्य स्मृता गोपाष्टमी बुधैः ॥ तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्वन्तु वत्सपः ॥ " इति पाद्मे ॥ १ ॥

एतत् ते सर्वमाख्यातं यत् पृष्टोऽहमिह त्वया ॥ यत् कौमारे हरिकृतं पौगण्डे परिकीर्तितम् ॥ ५९ ॥ एतत् सुहृद्भिश्चरितं मुरारेरघार्दनं शाद्वलजेमनं च ॥ व्यक्तेतरद्रूपमजोर्वभिष्टवं शृण्वन् गृणन्नेति नरोखिलार्थान् ॥ ६० ॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः ॥ ६१ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे ब्रह्मस्तुतिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ ततश्च पौगण्डवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ ॥ गाश्चारयन्तौ सखिभिः समं पदैर्वृन्दावनं पुण्यमतीव चक्रतुः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्माधव इति ॥ विहर्तुकामो वेणुमुदीरयन् वादयन्स्वयशो गृणद्भिर्गायद्भिर्गोपैर्वृतः बलेन चान्वितः पशून् गाः पुरस्कृत्य माधवो लक्ष्मीपतिः श्रीकृष्णः श्लेषेण वसन्त इव तदुल्लासकः पशव्यं तृणजलच्छायादिबाहुल्येन पशुभ्यो हितं कुसुमानामाकरं तद्वृन्दावनम् आविशत् ॥ २ ॥ तन्मञ्ज्विति ॥ मञ्जुघोषा मधुरनादा ये अलिमृगद्विजाः भ्रमरहरिणपक्षिणस्तैराकुलं व्याप्तमिति श्रोत्राह्लादकत्वमुक्तम् । महतां योगिनां मनसा प्रख्यं सदृशं शीतलं मधुरं स्वच्छं च पयो यस्मिंस्तत् सर आश्रयत्वेन विद्यते यस्य तेन शतपत्रगन्धिना कमलगन्धवता वातेन जुष्टमिति रसनात्वग्घ्राणाह्लादकता। अग्रिमश्लोके तु नेत्राह्लादकता । तद्वृन्दावनं निरीक्ष्य भगवान् रन्तुं मनो दधे । अत्र वातेनेति शैत्यं शतपत्रेऽतिपरिमलवत्त्वं जुष्टं वनमिति पवनमान्द्यम् ॥ ३ ॥ स तत्रेति ॥ स आदिपूरुषः श्रीकृष्णस्तत्र तत्र वने अरुणाः ये पल्लवास्तेषां श्रिया फलानां प्रसूनानां चोरुभरेण पादयोः स्पृशन्त्यः शिखाः शाखा येषां तान् वनस्पतीन् वृक्षान् वीक्ष्य मुदा हर्षेण स्मयन् स्मयमानः आर्षः शता । यद्वा । आश्चर्यं कुर्वन्निव अग्रजं बलभद्रमाह स्म

तन्माधवो वेणुमुदीरयन् वृतो गोपैर्गृणद्भिः स्वयशोबलान्वितः ॥ पशून् पुरस्कृत्य पशव्यमाविशद् विहर्तुकामः कुसुमाकरं वनम् ॥ २ ॥
तन्मञ्जुघोषालिमृगद्विजाकुलं महन्मनः प्रख्यपयः सरस्वता ॥ वातेन जुष्टं शतपत्रगन्धिना निरीक्ष्य रन्तुं भगवान् मनो दधे ॥ ३ ॥
स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृशच्छिखान् वीक्ष्य वनस्पतीन् मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥ ४ ॥
श्रीभगवानुवाच ॥ अहो अमी देववरामरार्चितं पादाम्बुजं ते सुमनःफलार्हणम् ॥ नमन्त्युपादाय शिखाभिरात्मनस्तमोऽपहत्यै तरुजन्म यत्कृतम् ॥ ५ ॥ एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायन्त आदिपुरुषानुपदं भजन्ते ॥ प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेऽपि न जहत्यनघात्मदैवम् ॥ ६ ॥

॥ ४ ॥ अहो इति ॥ अत्र बाल्ये सख्यांशप्राबल्येन अग्रजत्वस्य गौणत्वात्तादृशान्येव वचांसि सख्ये नर्मापि स्तुतिरीत्यैव अग्रजांशसद्भावात् । अहो हे देववर अमी-वृक्षाः यत् येन तमसा पापेन तरुजन्म कृतं तस्य आत्मनः तमसः अपहत्यै शिखाभिः शाखाभिः सुमनः फलार्हणं पुष्पफलादिपूजोपकरणमुपादाय समर्प्य अमरैर्ब्रह्मा-दिदेवैरप्यर्चितं ते तव पदाम्बुजं नमन्ति । यद्वा । यद्यस्मात् अमीषां तमसः अज्ञानस्य पापस्य वापहत्यै विनाशाय ब्रह्मादिदुर्लभं वृन्दावने भवता तरुजन्म कृतमित्यर्थः ॥ ५ ॥ एते इति ॥ हे आदिपुरुष एते अलिनो भ्रमराः झङ्कारं कुर्वन्तोऽपि वस्तुतः अखिललोकस्य तीर्थं शोधकं तव यशो गायन्तोऽनुपदं पथि पथि त्वां भजन्ते । हि यतः अमी भ्रमराः प्रायः भवदीयेषु भवत्सेवकेषु मुख्याः मुनिगणा एव अतः हे अनघ वने गूढमपि आत्मनो दैवं त्वां न जहति अलिवेषेण निगूढास्त्वां भजन्ति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृत्यन्तीति ॥ हे ईड्य गृहमागताय गृहमागतं त्वं प्रसादयितुं "क्रियार्थे" ति चतुर्थी । अमी शिखिनो मयूराः मुदा नृत्यन्ति तथा हरिण्योऽपि गोप्य इव ईक्षणेन प्रियं कुर्वन्ति तथा कोकिलगणाः सूक्तैर्मधुरशब्दैः प्रियं कुर्वन्ति । अत एते वनौकसो वनवासिनो निकृष्टजातयोऽपि भ्रमरादयो धन्याः कृतार्थाः । हि यस्मात् इयान् गृहागतसत्काररूपः सतां निसर्गः स्वतः सिद्धः स्वभावः ॥ ७ ॥ धन्येति ॥ तव पादस्पर्शादियं धरण्यद्य धन्या तथा त्वत्पादौ स्पृशन्तीति त्वत्पादस्पृशस्तृणवीरुधश्च धन्याः । तथा पुष्पादित्रोटनार्थं तव करजैर्नखैरभिमृष्टाः द्रुमलताश्च धन्याः । तथा दयासहितावलोकनैर्नद्योद्रयः खगा मृगाश्च धन्या । तथा श्रीरपि यद्भुजान्तरं स्पृहयति इति यत्स्पृहा भवति तेन तव भुजयोरन्तरेण कृत्वा भुजमध्ये वक्षस्थले आलिङ्गनं प्राप्य गोप्योऽपि धन्याः । अत्र पौगण्डेऽपि कदाचित्कैशोराविर्भावाद्रहसि व्रजबालाभी रेमे इति सूचितम् । अग्रिमश्लोके सानुग इत्यस्य अनुगाभिः सहित इति ॥ ८ ॥ एवमिति ॥ एवं श्रीमत् शोभायुक्तं वृन्दावनं स्तुत्वा तत् प्रति वा प्रीतमनाः कृष्णः अद्रेः सानुषु रम्यसमस्थानेषु

नृत्यन्त्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वन्ति गोप्य इव ते प्रियमीक्षणेन ॥ सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान् हि सतां निसर्गः ॥ ७ ॥ धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः ॥ नद्योऽद्रयः खगमृगाः सदयावलोकैर्गोप्योऽन्तरेण भुजयोरपि यत्स्पृहा श्रीः ॥ ८ ॥ श्रीशुक उवाच ॥ एवं वृन्दावनं श्रीमत् कृष्णः प्रीतमनाः पशून् ॥ रेमे संचारयन्नद्रेः सरिद्रोधस्सु सानुगः ॥ ९ ॥ क्वचिद् गायति गायत्सु मदान्धालिष्वनुव्रतैः ॥ उपगीयमानचरितः स्रग्वी संकर्षणान्वितः ॥ १० ॥ क्वचिच्च कलहंसानामनुकूजति कूजितम् ॥ अभिनृत्यति नृत्यन्तं बर्हिणं हासयन् क्वचित् ॥ ११ ॥ मेघगम्भीरया वाचा नामभिर्दूरगान् पशून् ॥ क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ॥ १२ ॥ चकोरक्रौञ्चचक्राह्वभारद्वाजांश्च बर्हिणः ॥ अनुरौति स्म सत्त्वानां भीतवद् व्याघ्रसिंहयोः ॥ १३ ॥

सरितो रोधःसु तटेषु च पशून् गाश्चारयन् रेमे । सानुग इति पाठे अद्रेः समीपवर्त्तिषु सरिद्रोधस्सु सानुगः गोपैः सहितः कृष्णः रेमे ॥ ९ ॥ क्वचिदिति ॥ अनुव्रतैः अनुगैर्देवादिभिर्गोपैर्वा उपगीयमानं चरितं यस्य सः संकर्षणेनाऽन्वितः स्रग्वी श्रीकृष्णः मधुपानमदेनान्धा येऽलयो भृङ्गास्तेषु क्वचिद् गायत्सु सत्सु स्वयमपि गायति ॥ १० ॥ क्वचिच्चेति ॥ क्वचित् हासयन् सखीनिति शेषः । कलहंसानां कूजितमनुकृत्य स्वयं कूजति तथा नृत्यन्तं बर्हिणमभिसंमुखं नृत्यति बर्हिणमेव वा हासयन् उल्लासयन् ॥ ११ ॥ मेघेति ॥ गवां गोपालानां च मनोज्ञया मनोहरया मेघस्येव गम्भीरया वाचा सङ्केतनामभिः दूरगान् पशून् प्रीत्या क्वचिदाह्वयति ॥ १२ ॥ चकोरेति ॥ चकोरक्रौञ्चादीन् पक्षिणः अनुरौति तत्तज्जातिशब्दानामनुकरणं करोति । सत्वानां प्राणिनां मध्ये व्याघ्रसिंहयोः शब्देन भीतवद् भवति सखिषु पलायमानेषु पलायते वस्तुतो भयाभावाद्वतिः प्रत्ययः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वचिदिति ॥ क्वचित् क्रीडया परिश्रान्तमतो गोपस्योत्सङ्गमुपबर्हणमुच्छीर्षकं यस्य तमार्यमग्रजं सुप्तं पादसंवाहनादिभिः पादसंमर्दनादिभिः स्वयं कृष्णः विश्रमयति विगतश्रमं करोति ॥ १४ ॥ नृत्यत इति ॥ क्वापि मिथो नृत्यतः गायतः वल्गतः धावतः युध्यतः युधमिच्छतः क्यजन्तम् । गोपालान् गृहीतहस्तौ हसन्तौ रामकृष्णौ अहो यूयं नृत्येन विद्याधरान् गानेन गन्धर्वान् वल्गनेन मल्लवरान् युद्धेन शूरांश्च जयथ इत्येवं प्रशशंसतुः ॥१५॥ क्वचिदिति ॥ नियुद्धं बाहुयुद्धं तेन यः श्रमस्तेन कर्शितः श्रान्त इव गोपोत्सङ्गोपबर्हणः वृक्षमूलाश्रयः वृक्षच्छायाश्रितः सन् कृष्णः पल्लवतल्पेषु गोपै रचितेषु शेते ॥ १६ ॥ पादेति ॥ हतः पाप्मा पापं येषां ते केचिद् गोपास्तस्य महात्मनः श्रीकृष्णस्य पादसंवाहनं चक्रुः । अपरे तु गोपा व्यजनैः पल्लवादिनिर्मितैः समवीजयन् ॥१७॥ अन्ये इति ॥ हे महाराज अन्ये तत् स्नेहेन क्लिन्ना आर्द्रा धियो येषां ते तदनुरूपाणि हरिगुणानुसारीणि अत एव मनोज्ञानि रुचिराणि महात्मनो हरेर्यशांसि इति शेषः । शनैर्गायन्ति स्म । यद्वा । तदनुरूपाणि पूर्वोक्तशयनस्यानुरूपाणि अतो महात्मनः

क्वचित् क्रीडापरिश्रान्तं गोपोत्सङ्गोपबर्हणम् ॥ स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः ॥१४॥ नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः॥ गृहीतहस्तौ गोपालान् हसन्तौ प्रशशंसतुः ॥ १५ ॥ क्वचित् पल्लवतल्पेषु नियुद्धश्रमकर्शितः ॥ वृक्षमूलाश्रयः शेते गोपोत्सङ्गोपबर्हणः॥१६॥ पादसंवाहनं चक्रुः केचित् तस्य महात्मनः ॥ अपरे हतपाप्मानो व्यजनैः समवीजयन् ॥ १७ ॥ अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः ॥ गायन्ति स्म महाराज स्नेहक्लिन्नधियः शनैः ॥ १८ ॥ एवं निगूढात्मगतिः स्वमायया गोपात्मजत्वं चरितैर्विडम्बयन् ॥ रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः ॥ १९ ॥ श्रीदामा नाम गोपालो रामकेशवयोः सखा ॥ सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् ॥ २० ॥ राम राम महाबाहो कृष्ण दुष्टनिबर्हण ॥ इतोऽविदूरे सुमहद्वनं तालालिसंकुलम् ॥ २१ ॥

कृष्णस्य मनोज्ञानि सुखकराणि गीतानि शनैः निद्राभङ्गो यथा न स्यात्तथा गायन्तिस्म ॥ १८ ॥ एवमिति ॥ स्वचरितैर्गोपात्मजत्वं विडम्बयन् अनुकुर्वन् स्वमायया निगूढा आच्छादितात्मनो गतिस्तत्त्वं येन सः तादृशोऽपि क्वचिदन्तरान्तरा ईशस्येवैश्वर्यमयं चेष्टितं यस्य सः रमया लक्ष्म्या लालितौ पादपल्लवौ यस्य स भगवान् ग्राम्यैर्गोपैः समं सह ग्राम्यवदेवमुक्तप्रकारेण रेमे ॥ १९ ॥ ईशचेष्टितत्वं दर्शयति—श्रीदामेति ॥ रामकेशवयोः सखा श्रीदामा नाम गोपालः तथा अन्येऽपि तयोः सखायः सुबलः स्तोककृष्णश्चेत्याद्या गोपाः प्रेम्णा स्वव्याजेन रामकृष्णावेव तालफलानि भोजयितुमित्यर्थः । इदं वचनमब्रुवन् ॥ २० ॥ राम रामेति ॥ हे राम राम महाबाहो हे कृष्ण दुष्टानां निबर्हण नाशक इतः अस्मात् क्रीडास्थानात् अविदूरे समीपे एव तालालिभिः तालानां पङ्क्तिभिः संकुलं व्याप्तं सुमहद्वनमस्तीति एतच्च गोवर्द्धनाद्योजनान्तरे मथुरायां नैर्ऋत्यां तारफरा इति तालस्रीति च ख्यातप्रदेशेऽस्तीति इयं क्रीडा ग्रीष्मर्तुकृतकालियदमनानन्तरवर्षासु भाद्रपदे ज्ञेया । पुराणान्तरात् तत्रैव तालफलपाकाच्च ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलानीति ॥ तत्र वने पतन्ति शश्वत्तम् पतितानि च भूरीणि बहूनि फलानि सन्ति किंतु दुरात्मना धेनुकेन तन्नाम्ना दैत्येन अवरुद्धानि ॥ २२ ॥ स इति ॥ हे राम हे कृष्ण सः असुरः सुरविरोधी धेनुकः अतिवीर्यः खररूपं धर्जति इति धृक् धृजेः क्विप् । तथा आत्मतुल्यबलैर्बहुभिरन्यैर्ज्ञातिभिः खरैर्वृतश्चास्ति ॥ २३ ॥ तस्मादिति ॥ हे अमित्रहन् कृतो नराणामाहारो येन तस्मान्मनुष्यभुजः धेनुकात् भीतैर्नृभिः पशुगणैः पक्षिसङ्घैश्च न सेव्यते अत एव तैः विवर्जितम् ॥ २४ ॥ विद्यन्त इति ॥ अभुक्तपूर्वाणि याणि पूर्वं कदापि न भुक्तानि तथाविधानि सुरभीणि सुगन्धीनि च फलानि तत्र विद्यन्ते विषूचीनः सर्वतः प्रसृतः एष तेषामेव सुरभिर्गन्धो भाद्रमासीयप्राच्यसमीरणेनानीतः अवगृह्यते तेन गन्धेन तथा त्वं ज्ञायते ॥ २५ ॥ प्रयच्छेति ॥ हे कृष्ण हे राम तानि फलानि गन्धेन लोभितानि चेतांसि येषां तेषां नोऽस्माकं प्रयच्छ देहि यतोऽस्माकं महती वाञ्छास्ति अतः यदि रोचते तदागम्यताम् ॥ २६ ॥ एवमिति ॥ एवं सुहृदां मित्राणां गोपानां वचः श्रुत्वा प्रहस्य सुहृदां तेषां प्रियचिकीर्षया तैर्गोपैर्वृतौ प्रभू राम-

फलानि तत्र भूरीणि पतितानि पतन्ति च ॥ सन्ति किं त्ववरुद्धानि धेनुकेन दुरात्मना ॥ २२ ॥ सोऽतिवीर्योऽसुरो राम हे कृष्ण खररूपधृक् ॥ आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः ॥ २३ ॥ तस्मात् कृतनराहाराद् भीतैर्नृभिरमित्रहन् ॥ न सेव्यते पशुगणैः पक्षिसङ्घैर्विवर्जितम् ॥ २४ ॥ विद्यन्तेऽभुक्तपूर्वाणि फलानि सुरभीणि च ॥ एष वै सुरभिर्गन्धो विषूचीनोऽवगृह्यते ॥ २५ ॥ प्रयच्छ तानि नः कृष्ण गन्धलोभितचेतसाम् ॥ वाञ्छास्ति महती राम गम्यतां यदि रोचते ॥ २६ ॥ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया ॥ प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू ॥ २७ ॥ बलः प्रविश्य बाहुभ्यां तालान् संपरिकम्पयन् ॥ फलानि पातयामास मतङ्गज इवौजसा ॥ २८ ॥ फलानां पततां शब्दं निशम्यासुररासभः ॥ अभ्यधावत् क्षितितलं सनगं परिकम्पयन् ॥ २९ ॥ समेत्य तरसा प्रत्यक् द्वाभ्यां पद्भ्यां बलं बली ॥ निहत्योरसि काशब्दं मुञ्चन्पर्यसरत्खलः ॥ ३० ॥ पुनरासाद्य संरब्ध उपक्रोष्टा पराक् स्थितः ॥ चरणावपरौ राजन्बलाय प्राक्षिपद्रुषा ॥ ३१ ॥

कृष्णौ तालवनं जग्मतुः ॥ २७ ॥ बल इति ॥ तद्वनं प्रविश्य बलः बाहुभ्याम् ओजसा बलेन तालवृक्षान् संपरिकम्पयन् मतङ्गज इव तत्फलानि पातयामास ॥ २८ ॥ फलानामिति ॥ असुरो रासभः धेनुकः पततां फलानां शब्दं निशम्य श्रुत्वा नगा वृक्षास्तैः सहितं कुलाचलसहितं वा क्षितितलं परिकम्पयन् अभ्यधावत् हन्तुं संमुखमाजगाम ॥ २९ ॥ समेत्येति ॥ तरसा वेगेन समेत्य समागत्य प्रत्यग् द्वाभ्यां पश्चिमाभ्यां पद्भ्यां बलमुरसि निहत्य बली खलश्च सः काशब्दं कुत्सितं गर्दभजातिशब्दम् आर्षः कादेशः । मुञ्चन् पुनरपि हननावकाशं पर्यालोचयन् पर्यसरत् परितोऽधावत् ॥ ३० ॥ पुनरिति ॥ हे राजन् संरब्धः संक्रुद्धः उपक्रोष्टा गर्दभरूपोऽसुरः पुनरासाद्य समीपमागत्य पराक्स्थितः पृष्ठीकृत्य स्थितः रुषा क्रोधेन बलाय बलं हन्तुमपरौ पश्चिमौ चरणौ प्राक्षिपत् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स तमिति ॥ स बलस्तमसुरमेकेनैव पाणिना प्रपदोः पादाग्रयोर्गृहीत्वा प्रपदोरित्यार्षः पाठः । पदयोरिति साधुः पाठः इति तोषणी । भ्रामयित्वा च भ्रामणेनैव त्यक्तं जीवितं येन तं तृणराजाग्रे तालमूले चिक्षेप । भ्रामयित्वेति मित्त्वेपि ह्रस्वाभाव आर्षः ॥३२॥ तेनेति ॥ तेन श्रीरामोत्सृष्टखरदेहेन आहतः अत एव वेपमानः बृहच्छिरा विस्तृताग्रिमभागो महातालः पार्श्वस्थं तालान्तरं कम्पयन् भग्नः पतितः स च तेन कम्पितस्तालोऽपि पार्श्वस्थं तालान्तरं कम्पयन् भग्नः सोऽपि चापरं तालं कम्पयन् भग्नः ॥३३॥ बलस्येति ॥ बलस्य लीलयोत्सृष्टेन प्रक्षिप्तेन खरदेहेन यो हतस्तेनाहतोऽन्यस्तेनान्य इत्येवं हताहताः सर्व एव तालाः महावातेन ईरिताः इव चकम्पिरे ॥ ३४ ॥ नैतदिति ॥ अङ्ग हे राजन् यस्मिन्निदं विश्वम् ओतमूर्ध्वतन्तुषु पट इव ग्रथितं प्रोतं तिर्यक्तन्तुषु पट इव संग्रथितं तस्मिन् जगदीश्वरे भगवति अनन्ते बलदेवे एतत् हस्तव्यापारेणासुरमारणवनप्रकम्पनादि चित्रमाश्चर्यं नैव भवति ॥३५ ॥ तत इति ॥ ततो धेनुकवधानन्तरं हतो बान्धवो धेनुको येषां ते धेनुकस्य ज्ञातयः क्रोष्टारो गर्दभास्ते

स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना ॥ चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितम् ॥ ३२ ॥ तेनाहतो महातालो वेपमानो बृहच्छिराः ॥ पार्श्वस्थं कम्पयन्भग्नः स चान्यं सोऽपि चापरम् ॥ ३३ ॥ बलस्य लीलयोत्सृष्टखरदेहहताहताः ॥ तालाश्चकम्पिरे सर्वे महावातेरिता इव ॥ ३४ ॥ नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ॥ ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः ॥ ३५ ॥ ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये ॥ क्रोष्टारोऽभ्यद्रवन्सर्वे संरब्धा हतबान्धवाः ॥ ३६ ॥ तांस्तानापततः कृष्णो रामश्च नृपलीलया ॥ गृहीतपश्चाच्चरणान्प्राहिणो-त्तृणराजसु ॥ ३७ ॥ फलप्रकरसंकीर्णा दैत्यदेहैर्गतासुभिः ॥ रराज भूः सतालाग्रैर्घनैरिव नभस्तलम् ॥ ३८ ॥ तयोस्तत् सुमहत् कर्म निशम्य विबुधादयः ॥ मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ॥ ३९ ॥

सर्वे संरब्धाः क्रुद्धाः सन्तः कृष्णं रामं च चकारात् गोपांश्च हन्तुमभ्यद्रवन् ॥ ३६ ॥ तांस्तानिति ॥ हे नृप आपततः वेगादागच्छतः गृहीतौ पश्चाच्चरणौ येषां तथाभूतान् तान् तान् दैत्यान् कृष्णो रामश्च तृणराजसु तालमूलेषु टजभाव आर्षः । प्राहिणोत् प्राक्षिपत् प्रत्येकाभिप्रायकमेकवचनम् ॥ ३७ ॥ फलप्रकरेति ॥ फलप्रकरैः फलसमूहैः संकीर्णा संकीर्णमिति पाठे भूरिति विशेष्यमव्ययं क्रियाविशेषणं वा । सतालाग्रैः भग्नतालशाखाभिः सहितैर्गतासुभिः प्राणरहितैर्दैत्यदेहैश्च संकीर्णा व्याप्ता भूः घनैर्नभस्तलमिव रराज । तत्र फलप्रकरसंकीर्णेति दैत्यदेहैः फलैः तालाग्रैश्चेति अरुणश्वेतनीलघनसादृश्यसंपादनम् ॥ ३८ ॥ तयोरिति ॥ अन्यैर्दुष्करं धेनुकवधेन तालवनस्य निर्भयत्वसंपादनरूपं सुमहत् कर्म निशम्य दृष्ट्वा विबुधादयः आदिपदेन गन्धर्वादयः तत्र देवाः पुष्पवर्षाणि मुमुचुः गन्धर्वा गानपूर्वकं वाद्यानि चक्रुः मुनयस्तुष्टुवुः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति॥अथानन्तरं हतो धेनुको यस्मिंस्तस्मिन् कानने गतसाध्वसा निर्भया मनुष्यास्तालफलानि आदन् अभक्षयन् तथा पशवश्च गोमहिषादयस्तृणं चेरुः । अत्र मनुष्याः पुलिन्दादयो नतु गोपाः गर्दभरक्तोक्षितत्वेन घृणोत्पत्तेरिति चक्रवर्ती ॥ ४० ॥ कृष्ण इति ॥ ततश्च साग्रजः अनुगैर्देवर्ष्यादिभिर्गोपैश्च स्तूयमानः कमलपत्रवदक्षिणी यस्य पुण्यजनकं श्रवणं कीर्तनं च यस्य सः कृष्णः व्रजमाव्रजदागमत् ॥ ४१ ॥ तमिति ॥ दिदृक्षिता दर्शनोत्कण्ठायुक्ता दृशो यासां ता अत एव समेताः परस्परं मिलिता गोप्यः गोरजोभिः छुरितेषु व्याप्तेषु कुन्तलेषु केशेषु बद्धं बर्हं मयूरपिच्छं वन्यानि प्रसूनानि च यस्य तथा रुचिरमीक्षणं चारुर्मनोहरो हासश्च यस्य वेणुं क्वणन्तं वादयन्तमनुगैर्देवादिभिरुपगीता कीर्तिर्यस्य तं वनादागच्छन्तं कृष्णमभ्यगमन् द्रष्टुमग्रतः संमुखं जग्मुः ॥ ४२ ॥ पीत्वेति ॥ व्रजयोषितः व्रजकुमार्यः मुकुन्दस्य मुखमेव पद्मं तद्गतं सारघं मधु अक्षिभृङ्गैर्नेत्ररूपैर्भ्रमरैः पीत्वा मुखसौन्दर्यं नयनैर्दृष्ट्वा अह्नि यस्तेन विरहस्तज्जं तापं जहुः श्रीकृष्णस्तु सव्रीडं सहासं सविनयं च यथा स्यात्तथा

अथ तालफलान्यादन् मनुष्या गतसाध्वसाः ॥ तृणं च पशवश्चेरुर्हतधेनुककानने ॥ ४० ॥ कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः ॥ स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत् ॥ ४१ ॥ तं गोरजश्छुरितकुन्तलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासम् ॥ वेणुं क्वणन्तमनुगैरनुगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन् समेताः ॥ ४२ ॥ पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गैस्तापं जहुर्विरहजं व्रजयोषितोऽह्नि ॥ तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहाससविनयं यदपाङ्गमोक्षम् ॥ ४३ ॥ तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले ॥ यथाकामं यथाकालं व्यधत्तां परमाशिषः ॥ ४४ ॥ गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः ॥ नीवीं वसित्वा रुचिरां दिव्यस्रग्गन्धमण्डितौ ॥ ४५ ॥ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ ॥ संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे ॥ ४६ ॥

यदपाङ्गमोक्षं कटाक्षदर्शनं तद्रूपां तासां सत्कृतिं सम्मानं समधिगम्य प्राप्य गोष्ठं विवेश ॥ ४३ ॥ तयोरिति ॥ तयोर्वनादागतयोः पुत्रयो रामकृष्णयोः पुत्रवत्सले यशोदारोहिण्यौ यथाकामं तदिच्छानुसारेण यथाकालमृतुमासप्रभातादिकालानुसारेण च परमा उत्कृष्टा आशिषः भक्ष्यपरिधेयादिविषयान् व्यधत्तां सम्पादितवत्यौ ॥ ४४ ॥ गतेति द्वयम् ॥ तत्र व्रजे नन्दभवने मज्जनं जलेन स्नानम् उन्मर्दनं सुगन्धितैलादिना आदिपदेन रजोदूरीकरणकेशप्रसाधनादिग्रहणम् । क्रमोऽत्र न विवक्षितः । न श्रमः अश्रमः श्रमाभावस्तस्याभावस्त्वनश्रमः श्रम एव गतोध्वनोऽनश्रमो ययोस्तौ गताध्वानश्रमौ द्वौ नञौ प्रकृतमर्थं गमयतः । रुचिरां मनोज्ञां नीवीं वस्त्रं वसित्वा दिव्याभ्यां स्रग्गन्धाभ्यां पुष्पमालाचन्दनाभ्यां मण्डितौ अलंकृतौ जननीभ्यामुपहृतमानीतं स्वाद्वन्नं प्राश्य भुक्त्वा ताभ्यां ताम्बूलाद्यर्पणवीजनपादसंवाहनप्रियगानादिभिरुपलालितौ महाप्रासादे वरशय्यायां पुष्पास्तरणादिना रचितायां संविश्य स्वगात्रं प्रसार्य सुखं यथा सुषुपतुः ॥ ४५ ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं कार्तिकगोपाष्टमीदिनलीलां समाप्य तद्वर्षीयनिदाघगतस्य कस्यचिद्दिनस्य लीलामाह–एवमिति ॥ हे राजन् एवं पूर्वोक्तगोचारणप्रकारेण क्वचित् निदाघे वृन्दावनचरः सन् राममृते विना अन्यैश्च सखिभिर्वृतः स भगवान् कृष्णः कालिन्दीं यमुनां ययौ जलपानार्थमिति शेषः ॥ ४७ ॥ अथेति ॥ अत्र शनैर्गच्छन्तं श्रीकृष्णं परित्यज्य निदाघस्य ग्रीष्मस्यातपेन पीडिताः अतः तृषार्ता गावश्च गोपाश्च शीघ्रं गत्वा कालियविषेषण दूषितं तस्या यमुनाया जलं पपुः ॥ ४८ ॥ विषाम्भ इति ॥ हे कुरूद्वह जलेन पीतेऽपि दैवेन प्रारब्धविशेषेण उपहतं मोहितं चेतो येषां ते तद्विषयुक्तमम्भ उपस्पृश्य स्नानाचमनादिकं कृत्वापि सर्वे व्यसवः प्राणरहिताः सलिलस्यान्ते तीरे निपेतुः ॥ ४९ ॥ वीक्ष्येति ॥ योगेश्वराणामपीश्वरः कृष्णः स्वनाथान् स्व एव नाथो येषां तान् गोपान् तथाभूतान् निर्गतप्राणत्वेन पतितान् वीक्ष्य अमृतवर्षिण्या ईक्षया समजीवयत्॥५०॥ त इति ॥ सम्प्रति सद्य एव इता प्राप्ता स्मृतिर्यैस्ते संप्रतीतस्मृतयः । यद्वा । सम्यक् प्रतीता प्रतिप्राप्ता स्मृतिर्यैस्ते सर्वे गवादयो जलान्तिकात् जलसमीपात् समुत्थाय परस्परं

एवं स भगवान् कृष्णो वृन्दावनचरः क्वचित् ॥ ययौ राममृते राजन् कालिन्दीं सखिभिर्वृतः ॥४७॥ अथ गावश्च गोपाश्च निदाघातपपीडिताः ॥ दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितम् ॥ ४८ ॥ विषाम्भस्तदुपस्पृश्य दैवोपहतचेतसः ॥ निपेतुर्व्यसवः सर्वे सलिलान्ते कुरूद्वह ॥ ४९ ॥ वीक्ष्य तान् वै तथाभूतान् कृष्णो योगेश्वरेश्वरः ॥ ईक्षयाऽमृतवर्षिण्या स्वनाथान् समजीवयत् ॥ ५० ॥ ते संप्रतीतस्मृतयः समुत्थाय जलान्तिकात् ॥ आसन् सुविस्मिताः सर्वे वीक्षमाणाः परस्परम् ॥ ५१ ॥ अन्वमंसत तद्राजन् गोविन्दानुग्रहेक्षितम् ॥ पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ॥ ५२ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे धेनुकवधो नाम पञ्चदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः ॥ तस्या विशुद्धिमन्विच्छन् सर्पं तमुदवासयत् ॥ १ ॥ राजोवाच ॥ कथमन्तर्जलेऽगाधे न्यगृह्लाद् भगवानहिम् ॥ स वै बहुयुगावासं यथाऽसीद् विप्र कथ्यताम् ॥ २ ॥

वीक्षमाणाः सुविस्मिताः आसन् ॥ ५१ ॥ अन्वमंसतेति ॥ हे राजन् ते गोगोपाः विषं पीत्वा परेतस्य मृतस्यात्मनः स्वदेहस्य पुनरुत्थानं तत् गोविन्दस्य अनुग्रहेक्षितमनुग्रहेक्षणकृतमन्वमंसत ॥ ५२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्कन्धे पञ्चदशे व्यधात् ॥ १५ ॥ षोडशे कालियदमे तत्पत्नीभिः स्तुतो हरिः ॥ अनुजग्राह तं तत्र श्लोकाः स्युः षष्टिरिष्ट च ॥ सप्तोवाचेति सार्द्धास्तु पञ्चाशीतिरनुष्टुभः ॥ १६ ॥ विलोक्येति ॥ कृष्णाहिना कालियेन दूषितां कृष्णां यमुनां विलोक्य तस्याः विशुद्धिमन्विच्छन् विभुः कृष्णस्तं सर्पमुदवासयत् ततो निःसारितवान् ॥ १ ॥ कथमिति ॥ हे विप्र भगवान् अगाधे गम्भीरेन्तर्जले जलमध्ये अहिं कालियं कथं केन प्रकारेण न्यगृह्लात् निगृहीतवान् तथा स वै अजलचरोऽपि कालियः तस्मिन्नन्तर्जले बहूनि युगानि बहुयुगपर्यन्तमावासो यथा स्यात्तथा तत्र यथा येन कारणे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासीत् तदेतत् कथ्यताम् । बहूनि युगानि आवासो यस्येत्यहिविशेषणं वा ॥२॥ ब्रह्मन्निति ॥ हे ब्रह्मन् भूम्नः महत्तमस्य स्वच्छन्दवर्तिनः स्वतन्त्रस्य भगवतः अमृतम् अमृततुल्यं गोपालोदारचरितं गोपालरूपेण कृतं यदुदारं चरितं तत् जुषन् सेवमानः आर्षः शता । कस्तृप्येत तङार्षः सकर्मस्य तृप्यतेः कर्मकर्त्तरि वा ॥ ३ ॥ कालिन्द्यामिति ॥ विषाग्निना श्रप्यमाणं पच्यमानं पयो यस्य अत एव उपरि गच्छन्तः खगाः पक्षिणो यस्मिन्ह्रदे पतन्ति स्म पेतुः एवंभूतः कालियस्य निवासरूपः कालिन्द्यां कश्चित् ह्रदः कालिन्दीप्रवाहेन अस्पृष्ट एव यमुनादक्षिणभागे योजनप्रमाणः आसीत् । प्रवाहेण तज्जलस्पर्शे तु यमुना तद्देशे अव्यवहार्यैवाभविष्यदिति ज्ञेयम् ॥४॥ विप्रुडिति ॥ यस्य विप्रुष्मता अम्बुबिन्दुयुक्तेन विषोदोर्मिमारुतेन विषोदकस्पार्शि वायुना अभिमर्शिताः स्पृष्टास्तीरगाः स्थिरा वृक्षादयः जङ्गमाः पश्वादयश्च प्राणिनो म्रियन्ते स्म ॥ ५ ॥ तमिति ॥ चण्डोऽपरिहार्यो वेगो यस्य तद्विषमेव वीर्यं बलं यस्य तथाभूतं तं कालिय मवेक्ष्य तथा नदीं यमुनां च तेन दुष्टामवेक्ष्य ततस्तन्निःसारणार्थं गाढा दृढं बद्धा रशना कटिवस्त्रम्

ब्रह्मन् भगवतस्तस्य भूम्नः स्वच्छन्दवर्तिनः ॥ गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ॥ ३ ॥ श्रीशुक उवाच ॥ कालिन्द्यां कालियस्यासीद्
ह्रदः कश्चिद् विषाग्निना ॥ श्रप्यमाणपया यस्मिन् पतन्त्युपरिगाः खगाः ॥ ४ ॥ विप्रुष्मता विषोदोर्मिमारुतेनाभिमर्शिताः ॥ म्रियन्ते
तीरगा यस्य प्राणिनः स्थिरजङ्गमाः ॥ ५ ॥ तं चण्डवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ॥ कृष्णः कदम्बमधिरुह्य ततोऽ-
तितुङ्गमास्फोट्य गाढरशनो न्यपतद्विषोदे ॥६॥ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसिताम्बुराशिः ॥ पर्यक् प्लुतो विषकषाय-
विभीषणोर्मिर्धावन् धनुःशतमनन्तबलस्य किं तत् ॥ ७ ॥ तस्य ह्रदे विहरतो भुजदण्डघूर्णवार्घोषमङ्ग वरवारणविक्रमस्य ॥ आश्रुत्य तत
स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः समसरत् तदमृष्यमाणः ॥ ८ ॥

उपलक्षणतया कुन्तलोष्णीषादयोऽपि येन खलानां संयमो निग्रहस्तदर्थमवतारो यस्य स कृष्णः अतितुङ्गमत्युच्चं कदम्बवृक्षमधिरुह्य आस्फोट्य करतलेन बाहुमाहत्य ततः कदम्बात् तस्मिन् विषोदे विषयुक्तमुदं यस्मिंस्तस्मिन्ह्रदे न्यपतत्। अत्र भाविश्रीकृष्णचरणस्पर्शभाग्यवशादेकः स कदम्ब वृक्ष एव न शुष्क इति बोध्यम् । अथवा अमृतमाहरता गरुत्मताक्रान्तत्वात्स न शुष्कः ॥ ६ ॥ सर्पह्रद इति ॥ पुरुषसारस्य पुरुषोत्तमस्य श्रीकृष्णस्य निपातवेगेन निपतनभरेण संक्षोभितानामुरगाणां विषेण युक्त उच्छ्वसित उच्छूलितोम्बुराशिर्यस्य सः विषेण कषायीकृताः क्वथिताः रक्तपीतादिवर्णीकृता वा "निर्यासेऽपि कषायोऽपि" इत्यत्र क्षीरस्वामिव्याख्यानात् । विभीषणा भयंकरा ऊर्मयो यस्य सः सर्पस्य ह्रदः धावन् पर्यक् सर्वतः धनुःशतं चतुर्हस्तो धनुः तच्छतं हस्तचतुःशतीं प्रसृतः तत् धनुःशतधावनम् अनन्तबलस्य भगवतः किमाश्चर्यम् ॥ ७ ॥ तस्येति ॥ अङ्ग हे राजन् वरवारणः गजश्रेष्ठः तद्वद्विक्रमो विहारो यस्य तस्य ह्रदे विहरतः जलवाद्यादिक्रीडां कुर्वतः कृष्णस्य भुजदण्डाभ्यां हततया घूर्णं घूर्णनं यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यद्वार्जलं तस्य घोषं नादमाश्रुत्य तत् तस्मात् तद्विहारात् स्वसदनस्याभिभवं च निरीक्ष्य तदुभयममृष्यमाणः असहमानः चक्षुःश्रवाः सर्पः समसरत् समीपमाजगाम ॥८॥ तमिति ॥ प्रेक्षणीयश्च सुकुमारश्च घन इव अवदातः स्वच्छश्यामश्च तं जलविहारात् श्रीवत्सेन सह संश्लिष्टं पीतं वसनं यस्य । यद्वा । श्रिया लक्ष्मीरेखया युक्तं वत्सं वक्षो यस्य स चासौ पीतवसनश्च तम् । "उरो वत्सं च वक्षश्च" इत्यमरः । स्मितेन सुन्दरं मनोहरमास्यं यस्य तम् अप्रतिभयं निर्भयं यथा स्यांत्तथा क्रीडन्तं कमलोदरे इव रक्तौ कोमलौ चाङ्घ्री यस्य तं श्रीकृष्णं रुषा क्रोधेन मर्मसु प्राणहानिकरेषु कण्ठाद्यवयवेषु संदश्य भुजया स्वदेहेन चच्छाद आवेष्टितवान् । "छे च" इति तुगभाव आर्षः ॥ ९ ॥ तमिति ॥ तं कृष्णं नागभोगेन परिवीतं परिवेष्टितमत एवादृष्टचेष्टमालोक्य भृशार्ताः अतिपीडिताः ततोऽपि दुःखश्च तदनु दुःखानन्तरमपि वारंवारं शोकश्च अनेन विना किं करिष्याम इति कथं जीविष्याम इति भयं च तैर्मूढा मूर्छिता विवेकरहिता धीर्येषां ते स भगवानेव प्रियो येषां ते तत्प्रियास्ते च ते सखायश्चेति कृष्णेऽर्पिता

तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुन्दरास्यम् ॥ क्रीडन्तमप्रतिभयं कमलोदराङ्घ्रिं संदश्य मर्मसु रुषा भुजया चच्छाद ॥ ९ ॥ तन्नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्ताः ॥ कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥ गावो वृषा वत्सतर्यः क्रन्दमानाः सुदुःखिताः ॥ कृष्णे न्यस्तेक्षणा भीता रुदन्त्य इव तस्थिरे ॥ ११ ॥ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः ॥ उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥

आत्मा सुहृदः अर्था धनानि कलत्राणि कामा भोगाश्च यैस्ते पशुपा गोपा निपेतुः । अत एव मूढधीत्वात्कृष्णनिःसारणार्थं यत्नं कर्तुमपि नाशकन् । यद्यपि तीरगाणामपि विषवेगेन मरणं संभावितं तथापि भगवत्कृपया नाभूत् ॥ १० ॥ गाव इति ॥ गावः वृषाः वत्सतर्यः त्रिवर्षा वत्स्यः कृष्णे न्यस्तेक्षणा दत्तदृष्टयः अतस्तस्य नागवेष्टनेन निश्चेष्टत्वं वीक्ष्य सुदुःखिताः स्वरक्षकाभावं मत्वा मृत्योर्भीताश्च अत एव क्रन्दमानाः आर्तनादमुच्चैः कुर्वत्यः रुदन्त्यः । इव एवार्थे नुमार्षः । अश्रूणि विमुञ्चन्त्य एव भयवैयग्र्येणाश्रूणां शोषाद्वा रुदन्त्य इवेति तस्थिरे स्थिता बभूवुः । क्रन्दमाना तस्थिरे इति च कर्मव्यतिहारे विवक्षिते आत्मनेपदम् ॥ ११ ॥ अथेति ॥ अथ हि अनन्तरमेवातिदारुणाः आसन्नं समीपमागतं भयं शंसितुं शीलं येषां ते भगवतो मङ्गलरूपत्वेऽपि गोगोपानां दुःखसूचनार्थाः भुवि भूकम्पादयः दिवि उल्कादयः आत्मनि वामाङ्गस्फुरणादयः इति त्रिविधाः महोत्पाताः व्रजे उत्पेतुः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिति त्रयम् ॥ अङ्ग हे राजन् तान् उत्पातान् आलक्ष्य दृष्ट्वा भयेन उद्विग्ना व्याकुलाः भयहेतुभ्यो भीता वा भयेन कम्पमाना वा अतद्विदः हरिप्रभावानभिज्ञाः सः हरिरेव प्राणा येषां तस्मिन् हरौ मनो येषां ते दुःखशोकभयैः आतुराः बालान् वृद्धान् वनिताश्चाभिव्याप्य पञ्चम्यभावः आर्षः। यद्वा। रक्षणीयत्वात् आवृताः बालवृद्धवनिताः यैः "प्रादिभ्यो धातुजस्य" इति समासः। पशूनामिव विवेकशून्या अतिवत्सला वा वृत्तिर्येषां ते दीनाः कृष्णदर्शनलालसाः सर्वे नन्दपुरोगमाः नन्दाद्याः गोपाः कृष्णं रामेण विना गाः चारयितुं गतं ज्ञात्वा तैर्दुर्निमित्तैः उत्पातैः हरिं निधनमिव प्राप्तं मत्वा नितरां धनं यमुनाह्रदरूपं स्वविहारास्पदमिति भारती। गोकुलान्निर्जग्मुः त्रयं भिन्नान्वयं वा। तत्राद्ये भयोद्विग्नाः बभूवुः द्वितीये दुःखाद्यैरातुरा बभूवुः तृतीये पशुवृत्तयः गोपा इति विशेष्यम् ॥ १३॥ १४॥ १५ ॥ तानिति ॥ तान्नन्दादीन् तथा कातरान् व्याकुलान् भीतान्वा वीक्ष्य माधवः मधुवंशप्रभवः अनुजस्य कृष्णस्य प्रभावं जानाति तादृशः स प्रसिद्धः भगवान् बलः प्रहस्य मत्स्वरूपेण शेषनागेन क्रीडा न रोचते किन्तु क्षुद्रेण कालियेनेतिहा-

तानालक्ष्य भयोद्विग्ना गोपा नन्दपुरोगमाः ॥ विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतम् ॥ १३ ॥ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः ॥ तत्प्राणास्तन्मनस्कास्ते दुःखशोकभयातुराः ॥ १४ ॥ आबालवृद्धवनिताः सर्वेऽङ्ग पशुवृत्तयः ॥ निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्शनलालसाः ॥ १५ ॥ तांस्तथा कातरान् वीक्ष्य भगवान् माधवो बलः ॥ प्रहस्य किंचिन्नोवाच प्रभावज्ञोऽनुजस्य सः ॥१६॥ तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः ॥ भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटम् ॥१७॥ ते तत्र तत्राब्जयवाङ्कुशाऽशनिध्वजोपपन्नानि पदानि विश्पतेः ॥ मार्गे गवामन्यपदान्तरान्तरे निरीक्षमाणा ययुरङ्ग सत्वराः ॥ १८ ॥ अन्तर्ह्रदे भुजगभोगपरीतमारात् कृष्णं निरीहमुपलभ्य जलाशयान्ते ॥ गोपांश्च मूढधिषणान् परितः पशूंश्च संक्रन्दतः परमकश्मलमापुरार्ताः ॥१९॥

सपूर्वकं लीलानाट्यं स्मृत्वा किञ्चिदपि नोवाच। किन्तु शोकान्धानां तेषां वारणमशक्यं मत्वा स्वप्रकाशशक्त्या अनिष्टाभावमूहयित्वा प्राणजिहासां शिथिलयामास ॥ १६ ॥ ते इति ॥ भगवन्तं लक्षयन्ति ज्ञापयन्ति यानि वज्राङ्कुशादियुक्तानि पदानि तैः पदैः सूचितया ज्ञापितया पदव्या मार्गेण दयितं प्रियं कृष्णमन्वेषमाणाः मृगयमाणाः "एष्टृ, गतौ" ते गोपादयो यमुनातटं जग्मुः ॥ १७ ॥ ते तत्र तत्रेति ॥ अङ्ग हे राजन् ते गोपाः गवां मार्गे तत्र तत्रान्येषां गोपादीनां पदानामन्तरान्तरे मध्ये मध्ये अब्जं कमलं यवः अङ्कुशः अशनिर्वज्रं ध्वजश्च तैः उपपन्नानि युक्तानि विश्पतेर्वैश्यानां गोपानामधिपस्य श्रीकृष्णस्य षत्वाद्यभाव आर्षः। पदानि निरीक्षमाणाः सत्वराः यमुनातटं ययुः ॥ १८ ॥ अन्तरिति ॥ आरात् दूरादेव अन्तर्ह्रदे ह्रदमध्ये भुजगस्य सर्पस्य भोगेन देहेन परीतं वेष्टितमत एव निरीहं निश्चेष्टं तं कृष्णं जलाशयस्यान्ते तीरे मूढधिषणान् मूर्च्छया पतितान् कृष्णस्य ह्रदे पतनकारणं वक्तुमक्षमान्वा गोपान् तथा परितः संक्रन्दतः आर्तनादं प्रकुर्वतः पशून् गवादींश्च निरीक्ष्यार्ताः अतिपीडिताः सन्तः परमं कश्मलं मूर्छामापुः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुरक्तानां गोपीनां वैक्लव्यमाह—गोप्य इति ॥ अनन्ते भगवति कृष्णे अनुरक्तं मनो यासां ताः तस्य सौहृदं प्रेम स्मितं च विलोकं च गिरः प्रियवचनानि च स्मरन्त्यः गोप्यः तस्मिन् प्रियतमे कृष्णे अहिना ग्रस्ते गृहीते सति भृशदुःखतप्ताः अत्यन्तदुःखेन सन्तप्ताः सत्यः प्रियेण कृष्णेन व्यतिहृतं विरहितं व्यतिकृतमिति पाठेऽपि स एवार्थः । त्रिलोकं त्र्यवयवं लोकं त्रैलोक्यं शून्यं ददृशुः ॥ २० ॥ अनुरागवतीनां वैक्लव्यमाह—ता इति ॥ ताः गोप्यः अपत्यं श्रीकृष्णमनुलक्ष्यीकृत्य प्रविष्टां तदेकचित्तां विस्मृतस्वरूपाम् यद्वा । अपत्यमनुहृदं प्रविशन्तीम् आदिकर्मणि क्तः । यद्वा । अपत्य एव लीनतां प्राप्तां मूर्छितामित्यर्थः । प्रतप्तामिति वा पाठः। कृष्णमातरं समनुगृह्य हस्तेन धृत्वा तत्तुल्या व्यथा यासां ताः अत एव शुचः अश्रूणि स्रवन्त्यः उद्गिरन्त्यः शुचामश्रूणां नदीभूता वा । " स्रवन्ती निम्नगापगा " इत्यमरः । तस्याः प्रतिबोधार्थे व्रजप्रियस्य कृष्णस्य तास्ताः पूतनानिधनयमलार्जुनभङ्गादिकथाः कथयन्त्यः परिणामे तु कृष्णस्यानन एवार्पिता स्थापिता दृक् दृष्टिर्याभिस्ता मृतकप्रतीकाः शवतुल्या

गोप्योऽनुरक्तमनसो भगवत्यनन्ते तत्सौहृदस्मितविलोकगिरः स्मरन्त्यः ॥ ग्रस्तेऽहिना प्रियतमे भृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकम् ॥ २० ॥ ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवन्त्यः ॥ तास्ताः प्रियव्रजकथाः कथयन्त्य आसन् कृष्णाननेऽर्पितदृशो मृतकप्रतीकाः ॥ २१ ॥ कृष्णप्राणान् निर्विशतो नन्दादीन् वीक्ष्य तं ह्रदम् ॥ प्रत्यषेधत् स भगवान् रामः कृष्णानुभाववित् ॥ २२ ॥ इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः ॥ आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरङ्गबन्धात् ॥ २३ ॥ तत्प्रथ्यमानवपुषा व्यथितात्मभोगस्त्यक्त्वोन्नमय्य कुपितः स्वफणान् भुजङ्गः ॥ तस्थौ श्वसन् श्वसनरन्ध्रविषाम्बरीषस्तब्धेक्षणोल्मुकमुखो हरिमीक्षमाणः ॥ २४ ॥

मूर्च्छिता आसन् ॥ २१ ॥ कृष्णेति ॥ कृष्णस्यानुभावं वेत्ति तादृक् स भगवान् रामः कृष्ण एव प्राणा येषां तान् कालियहृदं निर्विशतो नन्दादीन् वीक्ष्य प्रत्यषेधत् । "नारायणसमो गुणैः" इति " अनेन सर्वदुर्गाणि " इत्यादिभिश्च कृष्णानुभावस्मारिकाभिरुपपत्तिभिर्निवारितवान्॥ २२॥ इत्थमिति ॥ इत्थम् एवं मर्त्यपदवीं मनुष्यरीतिम् अनुवर्तमानः हरिः एवं मुहूर्तमात्रं बन्धने स्थित्वा अनन्यगतिं नान्या गतिर्यस्य तथाभूतं पुंस्त्वमार्षम् । आत्महेतोः स्ववियोगात् सस्त्रीकुमारं स्त्रीभिः कुमारैश्च सहितं स्वगोकुलं गोकुलवासिजनमतिदुःखितम् आज्ञाय निरीक्ष्य उरङ्गबन्धात् कालियकृतपरिवेष्टनरूपादुदतिष्ठत् निःसरणार्थं स्वदेहं प्रथयन्नुत्थितवान् ॥२३॥ तदिति ॥ तस्य कृष्णस्य प्रथ्यमानेन संवर्ध्यमानेन वपुषा व्यथितः आत्मनः स्वस्य भोगो देहो यस्य श्वसनरन्ध्रेषु नासाविवरेषुविषं यस्य तथा अम्बरीषो भ्राष्टस्तद्वत्संतप्तानि स्तब्धानि ईक्षणानि यस्य तथोल्मुकानि मुखेषु यस्य स स च भुजङ्गः कालियः कुपितोऽपि कुण्डलीमुन्मुच्य तं त्यक्त्वा श्वसन् श्वासान् विमुञ्चन् फणान् उन्नमय्य उत्थाप्य हरिमीक्षमाणस्तस्थौ ॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ हरिश्च क्रीडन् प्रतिमुखं द्विशिखया जिह्वया द्वे सृक्किणी ओष्ठप्रान्तौ लेलिहानमास्वादयन्तमतिकराला विषाग्नियुक्ता दृष्टिर्यस्य तम् अमुं सर्पं खगेन्द्रो गरुडो यथा गरुड इव परिससार सर्वतो बभ्राम सोऽपि सर्पो दशनावसरं प्रसमीक्षमाणस्तमनुबभ्राम ॥ २५ ॥ एवमिति ॥ एवं परिभ्रमेणैव हतमोजो देहेन्द्रियादिसामर्थ्यं यस्य तं तथाप्युन्नता अंसाः फणा यस्य तं समानम्य हस्तेन नम्रं कृत्वा तस्य पृथुशिरःस्वधिरूढः अत एव तस्य मूर्धसु ये रत्ननिकरा रत्नसमूहास्तेषां स्पर्शेनातिताम्रमत्यरुणं पादाम्बुजं यस्य अखिलानां कलानां नृत्यादिकौशलानामादिगुरुः प्रवर्तकः चञ्चलेष्वपि शिरस्सु नर्त्तनकुशलः आद्यः कृष्णः ननर्त ॥ २६ ॥ तं नर्तुमिति ॥ तदा तं कृष्णं नर्तुं नर्तितुम् इडभाव आर्षः । उद्यतमवेक्ष्य ज्ञात्वा तदीयास्तत्सेवका गन्धर्वादयः प्रीत्या हर्षेण मृदङ्गादिभिः सहसा झटिति उपसेदुः सेवितवन्तः । तत्र गन्धर्वा गायका गीतैः सिद्धाः पुष्पवृष्टिभिः उपहारैः ताम्बूलादिभिश्च मुनयः स्तुतिभिः चारणा मृदङ्गादिवाद्यैः देववध्वः अप्सरसः सह नर्तनैः ॥ २७ ॥ यद्यदिति ॥ अङ्ग हे राजन् शतमेकानि मुख्यानि

तं जिह्वया द्विशिखया परीलेलिहानं द्वे सृक्किणी ह्यतिकरालविषाग्निदृष्टिम् ॥ क्रीडन्नमुं परिससार यथा खगेन्द्रो बभ्राम सोऽप्यवसरं प्रसमीक्षमाणः ॥ २५ ॥ एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरःस्वधिरूढ आद्यः ॥ तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादाम्बुजोऽखिलकलादिगुरुर्ननर्त ॥ २६ ॥ तं नर्तुमुद्यतमवेक्ष्य तदा तदीयगन्धर्वसिद्धसुरचारणदेववध्वः ॥ प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥ २७ ॥ यद्यच्छिरो न नमतेऽङ्ग शतैकशीर्ष्णस्तत् तन्ममर्द खलदण्डधरोऽङ्घ्रिपातैः ॥ क्षीणायुषो भ्रमत उल्बणमास्यतोसृङ्नस्तो वमन् परमकश्मलमाप नागः ॥ २८ ॥ तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्समुन्नमति निःश्वसतो रुषोच्चैः ॥ नृत्यन् पदाऽनुनमयन् दमयाम्बभूव पुष्पैः प्रपूजित इवेह पुमान् पुराणः ॥ २९ ॥

शीर्षाणि यस्य तस्य शतैकशीर्ष्णः शीर्षन्नार्षः । अत्र शतस्य शिरसां मुख्यत्वम् अन्यशिरोपेक्षया अग्रे सहस्रफणत्वोक्तेः । क्षीणायुषः क्षीणबलतया मृतप्रायस्यापि क्रोधवशाद् भ्रमतः कालियस्य यद्यच्छिरो न नमते कर्मकर्तरि लट् । "न दुहस्नुनमाम्" इति यङ् न । तत्तच्छिरः कर्म खलानां दण्डधरो हरिः नृत्यच्छलेनाङ्घ्रिपातैर्ममर्द तदा च स नागः आस्यतो मुखेभ्यो नस्तो नासाविवरेभ्यश्चोल्बणं विषमिश्रत्वेन भयंकरमसृक् रुधिरं वमन् परमकश्मलं महतीं मूर्छामाप ॥ २८ ॥ तस्येति ॥ रुषा उच्चैः निश्वसतः श्वासान् विमुञ्चतः अक्षिभिर्गरलं विषमुद्वमतस्तस्य कालियस्य शिरःसु यद्यच्छिरः समुन्नमति उच्चीभवति तत्तत् नृत्यन् पदा पादाघातेनानुनमयन् प्रह्वीकुर्वन् भगवान् दमयांबभूव दमनं चकार । इहास्मिन्नवसरे पुराणः पुमान् हरिः कालियेन पुष्पैः प्रपूजित इव लक्षितः । यद्वा । इहास्मिन्नवसरे हृष्टैर्गन्धर्वादिभिः शेषासनः पुराणपुरुष इव यशोदानन्दनः प्रपूजितः । यद्वा । तदा गन्धर्वादिभिःपुष्पैः प्रपूजितो गोपैः पुराणः पुमानिव दृष्टः । यद्वा । पुष्पैः प्रपूजित इव प्रसन्नः सन् दमयांबभूव दण्डव्याजेन हितं कृतवान् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्चित्रेति ॥ हे नृप तस्य श्रीकृष्णस्य चित्रेणालौकिकेन ताण्डवेन विशेषतो रुग्णानि संजातव्रणानि फणातपत्राणि यस्य सः विरुग्णफणासहस्र इति पाठान्तरम् । तत्प्रथ्यमानवपुषा च भग्नानि गात्राणि यस्य सः मुखैरुरु रक्तं बहु रुधिरं वमन् उद्गिरन् बलातिरेकेण कृष्णचरणस्पर्शमहिम्ना जातज्ञानतया वा चराचरगुरुं पुराणं पुरुषं श्रीनारायणं स्मृत्वा ज्ञात्वा मनसा तमेव अरणं शरणं जगाम ॥ ३० ॥ कृष्णस्येति ॥ गर्भे जगन्ति ब्रह्माण्डानि यस्य तस्य कृष्णस्यातिभरेण अवसन्नमाक्रान्तम् । तस्यैव पार्ष्णिः पादपृष्ठं तत्प्रहारेण परिरुग्णफणातपत्रं चाहिं दृष्ट्वाऽमुष्य पत्न्यः आर्ताः अत एव श्लथन्तो विस्रंसमाना वसनादयो यासां ताः आद्यं श्रीकृष्णम् उपसेदुः तत्समीपं जग्मुः ॥ ३१ ॥ ता इति ॥ अथानन्तरं भर्तुर्यच्छमलमपराधस्तस्य मोक्षेप्सवः क्षमामिच्छन्त्यः अत एव तदपराधात् स्वयमपि सुविग्नमनसो विह्वलितचित्ताः साध्व्यः पतिव्रताः भगवतोदयोत्पादनार्थं पुरोग्रे कृता अर्भाः बाला याभिस्ताः नागपत्न्योऽपि शरणदमाश्रयप्रदं भूतानां पतिं पालकं श्रीकृष्णं शरणं प्रपन्नाः कृताञ्जलिपुटाश्च सत्यो

तच्चित्रताण्डवविरुग्णफणातपत्रो रक्तं मुखैरुरु वमन् नृप भग्नगात्रः ॥ स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम ॥ ३० ॥ कृष्णस्य गर्भजगतोऽतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रम् ॥ दृष्ट्वाऽहिमाद्यमुपसेदुरमुष्य पत्न्य आर्ताः श्लथद्वसनभूषणकेशबन्धाः ॥ ३१ ॥ तास्तं सुविग्नमनसोऽथ पुरस्कृतार्भाः कायं निधाय भुवि भूतपतिं प्रणेमुः ॥ साध्व्यः कृताञ्जलिपुटाः शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः ॥ ३२ ॥ नागपत्न्य ऊचुः ॥ न्याय्यो हि दण्डः कृतकिल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय ॥ रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन् ॥ ३३ ॥ अनुग्रहोऽयं भवता कृतो हि नो दण्डोऽसतां ते खलु कल्मषापहः ॥ यद्दन्दशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव संमतः ॥ ३४ ॥

भुवि जलादधस्तात्तस्मिन्स्थाने तीरे वा कायं निधाय दण्डवच्छरीरं निपात्य प्रणेमुः कृताञ्जलित्वमिच्छारूपधारणसामर्थ्यात् अत्र ह्रदस्य मध्ये कश्चिद्द्वीपो बुद्ध्यते यत्रैव स्थितः कृष्णः कालियवेष्टितो गोपैरदृश्यतेति ज्ञेयमिति चक्रवर्ती ॥ ३२ ॥ तत्र दण्डानुमोदनेन कोपं शमयन्त्यः स्तुवन्ति-न्याय्य इति ॥ कृतं किल्बिषमपराधो येन तस्मिन् अस्मिन् सर्पे दण्डो न्याय्यो हि युक्त एव । यतः रिपोः सुतानाम् अपि रिपौ स्वसुतेषु चेत्यर्थः । सप्तम्यर्थे षष्ठ्यौ । यद्वा । रिपुसुतेषु अपिना स्वसुतेषु च तुल्या दृष्टिर्यस्य रिपुसुतस्यापि प्रह्लादस्य शिष्टस्य पालनात् स्वसुतस्यापि दुष्टस्य नरकासुरस्य वधकरणाच्चेति तस्य तवावतारः खलानां निग्रहायास्ति तथा खलं दुष्टमेव अनुशंसन् आलोचयन् दमं दण्डं धत्से । फलमिति पाठे पापनिवृत्त्यादि इत्यर्थः ॥ ३३ ॥ अनुग्रह इति ॥ भवता नोऽस्माकमयं दण्डरूपोऽनुग्रह एव कृतः खलु निश्चयेन असतां दुष्टानां कल्मषापहः यत् यस्मात् कल्मषात् अमुष्य एतच्छरीरान्तःस्थितस्य देहिनोऽनेकदेहं प्राप्नुवत इदानीं दन्दशूकत्वं सर्पयोनित्वं दृश्यते अतः तत्कल्मषनिवर्तकत्वात् ते क्रोधो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपि क्रोधत्वेन प्रतीयमानोऽपि अनुग्रह एव सम्मतः ॥ ३४ ॥ तप इति ॥ स्वयं निरस्तमानेन निरभिमानेन अन्येषां सर्वेषां मानदेन सत्कर्त्रा अनेन सर्पेण पूर्वं प्राग् जन्मनि किं तपः सुतप्तं सम्यगनुष्ठितं तथा सर्वेषु जनेषु अनुकम्पया धर्मोऽथवानुष्ठितः यतः याभ्यां तपोधर्माभ्यां सर्वान् जीवयति स सर्वजीवः भगवान् तुष्यति ॥ ३५ ॥ कस्येति ॥ हे देव अस्य नीचस्यापि तवाङ्घ्रिरेणुस्पर्शेऽधिकारः । कस्य तपआदेः सुकृतस्यानुभावः फलमिति विशेषतो न विद्महे । तङ्गार्षः । यस्य त्वदङ्घ्रिरेणुस्पर्शाधिकारस्य वाञ्छया ललना उत्तमा स्त्री श्रीर्लक्ष्मीरपि सर्वान् कामान् विहाय धृतव्रता गृहीतनियमा सती सुचिरं तपः अचरत् ॥ ३६ ॥ न नाकेति ॥ यस्य तव पादरजःप्रपन्नाः शरणं प्राप्ताः भक्तजनाः नाकपृष्ठं स्वर्गस्थानं न वाञ्छन्ति इति सर्वत्रान्वयः । नच सार्वभौमं सर्वभूमिराज्यं न पारमेष्ठ्यं ब्रह्मपदं न च रसाधिपत्यं पातालादिराज्यं नच योगसिद्धीः अणिमाद्याः अपुनर्भवं मोक्षमपि न वाञ्छन्ति ॥ ३७ ॥ तदेष इति ॥ हे नाथ संसारचक्रे भ्रमतः शरीरिणः प्राणिमात्रस्य यत्पादरजः इच्छतः

तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन ॥ धर्मोऽथ वा सर्वजनानुकम्पया यतो भवांस्तुष्यति सर्वजीवः ॥ ३५ ॥ कस्यानुभावोऽस्य न देव विद्महे तवाङ्घ्रिरेणुस्पर्शाधिकारः ॥ यद्वाञ्छया श्रीर्ललनाचरत् तपो विहाय कामान् सुचिरं धृतव्रता ॥ ३६ ॥ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति यत्पादरजःप्रपन्नाः ॥३७॥ तदेष नाथाऽऽप दुरापमन्यैस्तमोजनिः क्रोधवशोऽप्यहीशः ॥ संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्विभवः समक्षः ॥३८॥ नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ भूतावासाय भूताय पराय परमात्मने ॥ ३९ ॥ ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तये ॥ अगुणायाविकाराय नमस्ते प्राकृताय च ॥४०॥ कालाय कालनाभाय कालावयवसाक्षिणे ॥ विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥ ४१ ॥

विभवः सम्पत् समक्षः प्रत्यक्षः स्वयमेव स्यात् । अन्यैर्ब्रह्मादिभिरपि दुरापं तत् पादरजःकर्म तमोजनिः तमोगुणप्रभवः क्रोधवशश्च एषः अहीशः कालियः आप ॥ ३८ ॥ अथ नमस्कारात्मिका दशश्लोकी स्तुतिष्टीकाकृद्भिरनेकधा व्याख्याताप्यार्जवेनैकधैव व्याख्यायते—नम इति ॥ भगवते पुरुषाय महात्मने भूतानामावासाय आधारभूताय भूताय च पराय परमात्मने तुभ्यं नमः ॥ ३९ ॥ ज्ञानेति ॥ ज्ञानं शास्त्रीयं विज्ञानमनुभवस्तयोर्निधये कारणाय ब्रह्मणे व्यापकाय अनन्ताः शक्तयो यस्य अगुणाय निर्गुणाय अविकाराय प्राकृताय प्रकृतिप्रवर्तकाय अप्राकृतायेति वा छेदः । ते तुभ्यं नमः ॥ ४० ॥ कालायेति ॥ कालाय कालरूपाय कालनाभाय कालशक्त्याश्रयाय समासान्त आर्षः । कालस्यावयवानां निमेषादीनां साक्षिणे विश्वाय तद्रूपाय तस्य विश्वस्य उपद्रष्ट्रे साक्षिणे तत्कर्त्रे विश्वकर्त्रे विश्वहेतवे करणादिसर्वकारणरूपाय तुभ्यं नमः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतेति ॥ भूतानि आकाशादीनि मात्राः शब्दादयः पञ्च प्राणाश्च दशविधाः इन्द्रियाणि ज्ञानकर्मोभयात्मकानि दश मनश्च बुद्धिश्च आशयश्चित्तं च आत्माहङ्कारश्च तद्रूपाय त्रिगुणेन गुणत्रयहेतुकेनाभिमानेन देहाद्यात्माभिमानेन गूढा आच्छन्ना स्वांशभूतानामात्मनां जीवानामनुभूतिर्विवेकज्ञानं येन तस्मै तुभ्यं नमः ॥ ४२ ॥ नम इति ॥ अनन्ताय सूक्ष्माय कूटस्थाय निर्विकाराय विपश्चिते साक्षिणे नानावादान् तत्तन्मतप्रसिद्धान् शरीरी अशरीरी सर्वज्ञः किंचिज्ज्ञः इत्यादीन् अनुरुणद्धि अनुवर्तते यस्तस्मै वाच्यानामर्थानां वाचकानां शब्दानां च शक्तयो यस्मात्तस्मै तुभ्यं नमः ॥ ४३ ॥ नम इति ॥ प्रमाणानां चक्षुरादीनां मूलाय प्रकाशकाय कवये शास्त्रस्य वेदस्य योनये कारणाय स्वतःप्रवृत्ताय प्रवर्तकाय विधिरूपाय निवृत्ताय निवर्तकाय निषेधात्मकाय एवमुभयात्मकाय निगमाय वेदरूपाय तुभ्यं नमः ॥ ४४ ॥ नम इति ॥ कृष्णाय रामाय वसुदेवसुताय नमः प्रद्युम्नाय अनिरुद्धाय सात्वतां पतये भक्तपालकाय नमः प्रद्युम्नानिरुद्धयोः नित्यसिद्धयोरनुवादः। भगवत्प्रसादाद्धाविज्ञानेन वा ॥ ४५ ॥ नम

भूतमात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने ॥ त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ॥ ४२ ॥ नमोऽनन्ताय सूक्ष्माय कूटस्थाय विपश्चिते ॥ नानावादानुरोधाय वाच्यवाचकशक्तये ॥ ४३ ॥ नमः प्रमाणमूलाय कवये शास्त्रयोनये ॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ॥ ४४ ॥ नमः कृष्णाय रामाय वसुदेवसुताय च ॥ प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ ४५ ॥ नमो गुणप्रदीपाय गुणात्मच्छादनाय च ॥ गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ ४६ ॥ अव्याकृतविहाराय सर्वव्याकृतसिद्धये ॥ हृषीकेश नमस्तेऽस्तु मुनये मौनशीलिने ॥ ४७ ॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः ॥ अविश्वाय च विश्वाय तद्द्रष्ट्रेऽस्य च हेतवे ॥ ४८ ॥ त्वं ह्यस्य जन्मस्थितिसंयमान् प्रभो गुणैरनीहोऽकृतकालशक्तिधृक् ॥ तत्तत्स्वभावान् प्रतिबोधयन् सतः समीक्षयाऽमोघविहार ईहसे ॥ ४९ ॥

इति ॥ गुणानामन्तःकरणादीनां प्रदीपाय प्रकाशकाय गुणैरहंकारादिभिरात्मनश्छादनं यस्य तस्मै गुणानां वृत्तिभिरुपलक्ष्याय गुणानां द्रष्ट्रे स्वसंविदे स्वप्रकाशरूपाय नमः ॥ ४६ ॥ अव्याकृतेति ॥ अव्याकृते प्रकृतौ विहारो यस्य सर्वेषां व्याकृतानां तत्त्वानां ब्रह्माण्डानां च सिद्धिरुत्पत्तिः प्रकाशश्च यस्मात्तस्मै। हे हृषीकेश हृषीकाणीन्द्रियाणि तेषामीश प्रवर्तक ते तुभ्यं नमः। मुनये मननशीलाय मौनशीलिने तुभ्यं नमोऽस्तु ॥ ४७ ॥ परावरेति ॥ परे ब्रह्मादयोऽवरेऽस्मदादयस्तेषां गतिमवस्थां जानाति तस्मै सर्वेषामध्यक्षाय साक्षिणे विश्वाय विश्वरूपायापि अविश्वाय विश्वधर्मविकाररहिताय तद्द्रष्ट्रे विश्वसाक्षिणे अस्य विश्वस्य हेतवे च तुभ्यं नमः अयमर्थः पूर्वमुक्तोऽपि विह्वलतावशात् प्रेमवशाद्वा पुनरुक्तः अन्यत्राप्येवम् ॥ ४८ ॥ त्वं हीति ॥ हे प्रभो त्वं हि अनीहः इच्छारहितोऽपि अकृता अनादिसिद्धा या कालरूपा शक्तिस्तां धर्जति प्राप्नोति तथा अमोघो जीवानां चतुर्विधपुरुषार्थहेतुर्विहारः सृष्ट्यादिलीला यस्य सत्वं समीक्षया ईक्षणमात्रेण सतः संस्काररूपेण विद्यमानान् प्राणिनां तत्तत्स्वभावान् घोरत्वादीन् प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोधयन् गुणैः कृत्वा अस्य विश्वस्य जन्मस्थितिसंयमान् ईहसे करोषि। अत्र त्वमस्य जन्माद्यकृतेति स्वामिनां प्रथमव्याख्याने प्रथमपुरुष आर्षः ॥ ४९ ॥ तस्यैवेति ॥ त्रिलोक्यां ये शान्ताः सात्विकाः अशान्ता राजसाः मूढयोनयस्तामसा उत अपि तस्य जगत्कर्तुः ते तवैव तनवः देहाः क्रीडोपस्कराः तथापि हिरवधारणे सतां धर्मपरीप्सया धर्मपरिपालनेच्छया ईहतः प्रवर्तमानस्य कृतावतारस्येति शतार्षः । अत एव तान् अवितुं स्थातुः स्थितस्य तव अधुना शान्ता एव प्रियाः नेतरे ॥ ५० ॥ अपराध इति ॥ हे शान्तात्मन् यतः स्वप्रजाकृतः अपराधो भर्त्रा स्वामिना सकृत्सोढव्यः अतः मूढस्य त्वामजानतश्चास्य त्वत्प्रियभूतशान्तलोकविप्रियकारित्वलक्षणमपराधं क्षन्तुमर्हसि सर्वभर्तृत्वात् ॥ ५१ ॥ अनुगृह्णीष्वेति ॥ हे भगवन् यस्मादयं पन्नगः प्राणांस्त्यजति अतोऽनुगृह्णीष्व अनुग्रहं कृत्वैनं मुञ्चेत्यर्थः । किंच । पराधीनतया साधुभिः शोच्यानां स्त्रीणां नोऽस्माकं पतिः पतिरूपः प्राणः जीवनहेतुः प्रदीयताम् ॥ ५२ ॥ युष्मदनुग्रहेऽन्येषां मृत्युरिति चेत्तत्राहुः—विधेहीति ॥ ते तव किङ्करीणामाज्ञाकरीणामस्माकं यदनुष्ठेयं

तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शान्ता अशान्ता उत मूढयोनयः ॥ शान्ताः प्रियास्ते ह्यधुनाऽवितुं सतां स्थातुश्च ते धर्मपरीप्सयेहतः ॥५०॥ अनुगृह्णीष्व भगवन् प्राणांस्त्यजति पन्नगः ॥ स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयताम् ॥ ५१ ॥ अपराधः सकृद् भर्त्रा सोढव्यः स्वप्रजाकृतः ॥ क्षन्तुमर्हसि शान्तात्मन् मूढस्य त्वमजानतः ॥ ५२ ॥ विधेहि ते किङ्करीणामनुष्ठेयं तवाज्ञया ॥ यच्छ्रद्धयाऽनुतिष्ठन् वै मुच्यते सर्वतो भयात् ॥५३॥ श्रीशुक उवाच ॥ ॥ इत्थं स नागपत्नीभिर्भगवान् समभिष्टुतः ॥ मूर्छितं भग्नशिरसं विससर्जाङ्घ्रिकुट्टनैः ॥ ५४ ॥ प्रतिलब्धेन्द्रियप्राणः कालियः शनकैर्हरिम् ॥ कृच्छ्रात् समुच्छ्वसन् कृष्णं दीनः प्राह कृताञ्जलिः ॥ ५५ ॥ वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः ॥ स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ॥ ५६ ॥

कर्तव्यं तद्विधेहि आज्ञापय । त्वदाज्ञया प्राणिनो नाद्याम इत्याशयः । यत् यस्मात्तवाज्ञया श्रद्धयानुतिष्ठन् कर्माणि कुर्वन्नेव जनः सर्वतोभयं यस्मिंस्तस्मात् सर्वतोभयात्संसाराद्विमुच्यते ॥ ५३ ॥ इत्थमिति ॥ स भगवान् नागपत्नीभिरित्थं समभिष्टुतः संस्तुतिपूर्वकं प्रार्थितः अङ्घ्रिकुट्टनैः पादप्रहारैर्भग्नानि शिरांसि यस्य तमत एव मूर्छितं कालियं विससर्ज तत्याज । तच्छिरोभ्योऽवप्लुत्याग्रे तस्थावित्यर्थः ॥ ५४ ॥ प्रतिलब्धेति ॥ शनकैः प्रतिलब्धानीन्द्रियाणि प्राणाश्च येन सः तथापि कृच्छ्रात् कष्टात् समुच्छ्वसन् ऊर्ध्वं श्वासान् विमुञ्चन् अत एव दीनः कृतः संयोजितोऽञ्जलिर्येन । यद्वा । कृच्छ्रादेव कृतोऽञ्जलिर्येन सर्वाङ्गव्यथावत्त्वान्न दण्डवत्प्रणन्तुं शक्तः स कालियः कृष्णं प्राह स्म ॥ ५५ ॥ वयमिति ॥ हे नाथ वयं सहोत्पत्त्या जन्मनैव खलाः परोद्वेजकाः तामसाः दीर्घमन्यवः महाक्रोधाः अतः स्वभावः सहजो धर्मो दुस्त्यजः लोकानां प्राणिनां यत् यस्मात् स्वभावात् असन् असमीचीनो ग्रहः अहंताममतारूपो देहादावाग्रहो भवति ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वयेति ॥ हे धातः नानाविधः स्वभावः शान्तघोरत्वादिः वीर्यं देहशक्तिः ओजः इन्द्रियशक्तिः योनिर्मातृशक्तिः बीजं शुक्रं पितृशक्तिः आशयो वासना आकृतिः स्वरूपं यस्य तत् गुणैर्विविधप्रकारेण सृज्यत इति गुणविसर्जनमिदं विश्वं त्वया सृष्टम् ॥ ५७ ॥ वयमिति ॥ तत्र तस्मिंश्च वयं जात्या जन्मनैव उरुर्मन्युर्येषां ते तथाभूताः सर्पाः स्मः । अतो हे भगवन् दुस्त्यजां ब्रह्मादिभिरपि दुर्जयां त्वन्मायां तया मोहिताः स्वयं भवदनुग्रहमन्तरेण कथं त्यजामः ॥ ५८ ॥ भवानिति ॥ तत्र घोरत्वादिस्वभावे सर्वज्ञो जगदीश्वरश्च भवानेव कारणम् अतो यदि अस्मान्परतन्त्रान्मन्यसे तदा नोऽस्माकमनुग्रहं विधेहि । यदि स्वतन्त्रान्मन्यसे तदा निग्रहं दण्डं विधेहि ॥ ५९ ॥ इतीति सार्द्धम् ॥ कार्यार्थं मानुषरूपो भगवान् इत्येवं कालियवचनमाकर्ण्य प्राह स्म । हे सर्प यतो गोभिर्नृभिश्च नदी यमुना भुज्यते भुज्यतामित्यपि पाठः । अतस्त्वया विषधरेणात्र नदीसमीपे ह्रदे न स्थेयं मा चिरं शीघ्रमेव स्वज्ञात्यपत्यदारैराढ्यो युक्तस्त्वं समुद्रं समुद्रमध्यस्थं रमणकं द्वीपं याहि ॥ ६० ॥ य इति ॥ यदेतत् नात्र स्थेयमित्यादि

त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनम् ॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृति ॥ ५७ ॥ वयं च तत्र भगवन् सर्पा जात्युरुमन्यवः ॥ कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयम् ॥ ५८ ॥ भवान् हि कारणं तत्र सर्वज्ञो जगदीश्वरः ॥ अनुग्रहं निग्रहं वा मन्यसे तद् विधेहि नः ॥ ५९ ॥ श्रीशुक उवाच ॥ ॥ इत्याकर्ण्य वचः प्राह भगवान् कार्यमानुषः ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरम् ॥ स्वज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यतां नदी ॥ ६० ॥ य एतत् संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनम् ॥ कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ॥ ॥ ६१ ॥ योऽस्मिन् स्नात्वा मदाक्रीडे देवादींस्तर्पयेज्जलैः ॥ उपोष्य मां स्मरन्नर्चेत् सर्वपापैः प्रमुच्यते ॥ ६२ ॥ द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः ॥ यद्भयात् स सुपर्णस्त्वां नाद्यान्मत्पादलाञ्छितम् ॥ ६३ ॥

तुभ्यं यन्मदनुशासनं ममाज्ञा तदुभयोः सन्ध्योः प्रातःकाले सायंकाले च स्मरेत् कीर्तयंश्च भवति । स युष्मद् युष्मत्तः भयं नाप्नुयात् युष्माभिस्तस्य भयं नोत्पादनीयमिति आज्ञा । तेन पद्यद्वयमिदं सर्पोच्चाटने मन्त्र एव ज्ञेयः तथा ऋग्वेदस्य मन्त्रान्तरं "कालिको नाम सर्पो नवनागसहस्रबलः । यमुनाह्रदे हि सो यातो यो नारायणवाहनः ॥ यदि कालिकदन्तस्य यदि वा कालिकाद्भयम् । जन्मभूमिपरित्रातो निर्विषयो याति कालिकः ॥" इति ॥ ६१ ॥ य इति॥ यः प्राणी उपोष्य तीर्थोपवासं कृत्वा मम आक्रीडा यस्मिन् तस्मिन् अस्मिन् तीर्थवरे स्नात्वा मां स्मरन् एतज्जलैर्देवादींस्तर्पयेत् मां चार्चेत्स सर्वैः पापैः प्रमुच्यते । अत्र त्वयि स्थिते एतन्न स्यादतोऽपि गन्तव्यमिति भावः ॥६२॥ द्वीपमिति ॥ यस्य भयात्स्वस्थानं रमणकाख्यं द्वीपं हित्वा एतं ह्रदं त्वमुपाश्रितोऽसि स सुपर्णो गरुडः मत्पादेन वज्रादियुक्तेन लाञ्छितं त्वां नाद्यात् न खादेत्॥६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति द्वयम् ॥ कलियाद्व्रजस्थजीवानां त्राणं कालियस्यापि गरुडात्त्राणमिति हिंस्यहिंसकयोरुभयोरपि कल्याणम् । इत्यद्भुतकर्मणा भगवता कृष्णेनैव मुक्तः कालियो मुदा हर्षेण सादरं सप्रेम तं श्रीकृष्णं दिव्यैरम्बरैर्मणिभिः स्रग्भिश्च परार्ध्यैरमूल्यैर्भूषणैः दिव्यैर्गन्धैरनुलेपैश्च महत्या उत्पलानां मालया च पूजयामास । तथा नागपत्न्यश्च पूजयामासुः । प्रायस्तेषां संकल्पसिद्धमिदम् ॥ ६४ ॥ ६५ ॥ पूजयित्वेति सार्द्धम् ॥ एवं कलत्रसुहृत्पुत्रसहितः कालियो गरुडध्वजं जगतां नाथं कृष्णं पूजयित्वा प्रसाद्य प्रसन्नं च कृत्वा तेनाभ्यनुज्ञातः सुखं गच्छेति दत्ताज्ञः स्वयमपि प्रीतस्तं परिक्रम्याभिवन्द्य च ततः स्थानात् अब्धेः समुद्रस्य मध्यस्थं रमणकं द्वीपं जगाम ॥ ६६ ॥ तदैवेति ॥ तदैव तत्क्षणमेव क्रीडार्थं मानुषरूपिणः भगवतः कृष्णस्यानुग्रहात् सा यमुना निर्विषा विषसंबन्धरहिता अमृतजला अमृतवत्स्वादु जलं यस्याः तादृशी अभवत् । ह्रददेशाभिप्रायमिदम् ॥ ६७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्कन्धषोडशे ॥ १६ ॥ नागनिस्सारणं बन्धुमेलनं रक्षणं

श्रीशुक उवाच ॥ ॥ एवमुक्तो भगवता कृष्णेनाद्भुतकर्मणा ॥ तं पूजयामास मुदा नागपत्न्यश्च सादरम् ॥ ६४ ॥ दिव्याम्बरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः ॥ दिव्यगन्धानुलेपैश्च महत्योत्पलमालया ॥ ६५ ॥ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजम् ॥ ततः प्रीतोऽभ्यनुज्ञातः परिक्रम्याभिवाद्य तम् ॥ सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह ॥ ६६ ॥ तदैव साऽमृतजला यमुना निर्विषाऽभवत् ॥ अनुग्रहाद् भगवतः क्रीडामानुषरूपिणः ॥ ६७ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे कालियनिर्यापणं नाम षोडशोऽध्यायः ॥ १६ ॥
राजोवाच ॥ ॥ नागालयं रमणकं कस्मात् तत्याज कालियः ॥ कृतं किं वा सुपर्णस्य तेनैकेनासमञ्जसम् ॥ १ ॥ श्रीशुक उवाच ॥ ॥ उपहार्यैः सर्पजनैर्मासि मासीह यो बलिः ॥ वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः ॥ २ ॥

दवात् ॥ प्रोक्तं सप्तदशे तत्र श्लोकाः पञ्चार्द्धचैर्विंशतिः । द्वे उवाचेति वाक्ये च षड्विंशतिरनुष्टुभः ॥ १७ ॥ नागालयमिति ॥ कालियो नागानामालयं स्थानं रमणकं कस्मात् हेतोः तत्याज तेन कालियेनैकेन सुपर्णस्य गरुडस्यासमञ्जसमप्रियं किं कृतम् ॥ १ ॥ उपहार्यैरिति ॥ हे महाबाहो उपहार्यैः गरुडस्य भक्ष्यत्वेनोपहारीक्रियमाणैः सर्पजनैः सर्पायत्तैर्जनैः सर्परूपैर्जनैर्वा मासि मासि वानस्पत्यः वनस्पतेर्मूले देयः पत्युत्तरपदलक्षणो ण्यः । यो बलिः भक्ष्यविशेषः नागैः स्वबाधापरिहाराय कल्पितत्वात् नागानां सबन्धी यस्मिन्नेकैको नागो भागो दीयते स बलिरिति वा । इह रमणकद्वीपे प्राक् पूर्वं निरूपितः उपकल्पितः । अत्रैवं ह्याख्यायिका । गरुडः सर्वानेव सर्पान् सर्वदा भक्षयति मातृवैरमनुस्मरन् वृथैव कांश्चिन्मारयति च । ततो वासुकिप्रमुखा नागाः गरुडाद्भीता ब्रह्माणं शरणं गताः । ततो ब्रह्मा गरुडं समाहूय सन्धिं कारयित्वा नियमेन बलिं कल्पितवान् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमिति ॥ ततः प्रभृति गरुडाद्भीताः सर्वे ते नागाः स्वं स्वं जनैर्दत्तं स्वयं देयतया स्वीकृतं वा भागमात्मनो गोपीथाय संरक्षणाय पर्वणि पर्वणि मासि मासि प्रत्येकामावास्यायां महात्मने महाशरीराय मर्यादानुल्लङ्घकाय वा सुपर्णाय गरुडाय प्रयच्छन्ति ॥ ३ ॥ विषेति ॥ विषवीर्याभ्यां यो मदस्तेनाविष्टो व्याप्तः काद्रवेयः कद्रूपुत्रः मातृवैरप्रयुक्तश्चेत्याशयः । कालियस्तु गरुडं कदर्थीकृत्य तुच्छीकृत्य अविगणय्य स्वयं तस्मै बलिं न प्रायच्छत् । प्रत्युतान्यदत्तमपि तं बलिं बुभुजे ॥४॥ तदिति ॥ हे राजन् तत् कालियकृतं बलिभक्षणं तत्रत्यकर्णेजपसर्पमुखात् श्रुत्वा कुपितः भगवान् समर्थः भगवतः प्रियः महावेगः स गरुडः कालियं विजिघांसुः सन् उपाद्रवत् वेगेन आययौ ॥ ५ ॥ तमिति ॥ विषमायुधं यस्य सः दूरात्फूत्कारेण विषं मुञ्चन् उत्थितनैकमस्तकः उन्नमितानेकफणः उच्छ्रितेत्यपि पाठः । निकटात्तुदतः दन्ता आयुधं यस्य सः दन्तैर्दशन्नित्यर्थः । कराला जिह्वा यस्य स चासौ उच्छ्वसितानि उज्जृम्भितानि उग्राणि लोचनानि यस्य स कालियोऽपि तं सुपर्णम् आपतन्तं वेगेनागच्छन्तं तरसा, वेगेन

स्वं स्वं भागं प्रयच्छन्ति नागाः पर्वणि पर्वणि ॥ गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ॥ ३ ॥ विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ॥ कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिम् ॥ ४ ॥ तच्छ्रुत्वा कुपितो राजन् भगवान् भगवत्प्रियः ॥ विजिघांसुर्महावेगः कालियं समुपाद्रवत् ॥ ५ ॥ तमापतन्तं तरसा विषायुधः प्रत्यभ्ययादुच्छ्रितनैकमस्तकः ॥ दद्भिः सुपर्णं व्यदशद्द् ददायुधः करालजिह्वोच्छ्वसितोग्रलोचनः ॥ ६ ॥ तं तार्क्ष्यपुत्रः स निरस्य मन्युमान् प्रचण्डवेगो मधुसूदनासनः ॥ पक्षेण सव्येन हिरण्यरोचिषा जघान कद्रूसुतमुग्रविक्रमः ॥ ७ ॥ सुपर्णपक्षाभिहतः कालियोऽतीवविह्वलः ॥ ह्रदं विवेश कालिन्द्यास्तदगम्यं दुरासदम् ॥ ८ ॥ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितम् ॥ निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत् ॥ ९ ॥ मीनान् सुदुःखितान् दृष्ट्वा दीनान् मीनपतौ हते ॥ कृपया सौभरिः प्राह तत्रत्यं क्षेममाचरन् ॥ १० ॥

प्रत्यभ्ययात् योद्धुं सम्मुखं गतवान् । दद्भिर्व्यदशच्च ॥ ६ ॥ तमिति ॥ मन्युमान् प्रचण्डवेगः मधुसूदनस्य हरेरासनमुपवेशनं यस्मिन् स उग्रविक्रमः तृक्षो मरीचिः ततोऽपत्ये शिवाद्यण् । तार्क्ष्यस्य कश्यपस्य पुत्रः गरुडः । सयकारपाठे तु गर्गादिगोत्रापत्यविवक्षया “ गरुत्मान् गरुडस्तार्क्ष्य ” इति । तं कद्रूसुतं कालियं निरस्य क्षिप्त्वा हिरण्यस्येव रोचिः कान्तिर्यस्य तेन सव्येन वामेन पक्षेण जघान ॥ ७ ॥ सुपर्णेति ॥ सुपर्णस्य पक्षेणाभिहतः अत एवातीवविह्वलः व्याकुलः कालियस्तदगम्यं तेन गरुडेन गन्तुमशक्यं दुरासदमगाधजलतया दुष्प्रवेशं च कालिन्द्या ह्रदं विवेश ॥ ८ ॥ गरुडागम्यत्वे हेतुमाह—तत्रेति ॥ तत्र यमुनायामेकदा मान्धातरि पृथिवीं शासति सौभरिणा ऋषिणा निवारितोऽपि गरुडः क्षुधितः सन् कञ्चिज्जलचरं मत्स्यम् ईप्सितं भक्ष्यं प्रसह्य बलादाहरत् ॥ ९ ॥ मीनानिति ॥ मीनपतौ हते सति तदधीनान्मीनान् सुदुः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खितान् अत एव दीनांश्च दृष्ट्वा कृपया तत्रत्यं क्षेमं निर्भयत्वमाचरन् कुर्वन्सौभरिः प्राह स्म ॥ १० ॥ अत्रेति ॥ अत्र यमुनायां प्रविश्य स गरुडो यदि मत्स्यान् खादति भक्षयिष्यति तदा सद्य एव प्राणैर्वियुज्येत म्रियेत एतत्सत्यमेवाहं ब्रवीमि । मत्स्यानिति जन्तुमात्रोपलक्षणम् । अन्यथा कालियग्रहणनिषेधो न स्यात् ॥ ११ ॥ तमिति ॥ तं सौभरिशापं परं केवलं कालिय एव वेद अन्यः कश्चनापि लेलिहः सर्पो न वेद स्म । यदि विद्यात्तदा सोऽपि तत्रागच्छेत् अतः कालिय एव गरुडाद्भीतः तत्रावात्सीत् स च कृष्णे नच विवासितः निष्कासितः ॥ १२ ॥ कृष्णमिति द्वयम् ॥ दिव्यानि स्रजः गन्धाः वासांसि च यस्य तं महतामनर्घ्याणां मणीनां गणैराकीर्णं सर्वतः समलङ्कृतं तथा जाम्बूनदेन सुवर्णेन परिष्कृतमलङ्कृतं ह्रदाद्विनिष्क्रान्तं निर्गच्छन्तं तद्दत्तवस्त्रगन्धाद्यक्लेदाय जलोपरि पादव्रज्ययेत्यर्थः । कृष्णम् उपलभ्य दृष्ट्वा लब्धाः प्राणा यैस्ते असवः इन्द्रियाणीव उत्थिताः प्रमोदेन निभृताः पूर्णा आत्मानो मनांसि येषां ते सर्वे गोपाः प्रीत्या अभिरेमिरे सर्वत आलिङ्गितवन्तः ॥ १३ ॥ १४ ॥

अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति ॥ सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहम् ॥ ११ ॥ तं कालियः परं वेद नान्यः कश्चन लेलिहः ॥ अवात्सीद् गरुडाद् भीतः कृष्णेन च विवासितः ॥ १२ ॥ कृष्णं ह्रदाद्विनिष्क्रान्तं दिव्यस्रग्गन्धवाससम् ॥ महामणिगणाकीर्णं जाम्बूनदपरिष्कृतम् ॥ १३ ॥ उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः ॥ प्रमोदनिभृतात्मानो गोपाः प्रीत्याऽभिरेमिरे ॥ १४ ॥ यशोदा रोहिणी नन्दो गोप्यो गोपाश्च कौरव ॥ कृष्णं समेत्य लब्धेहा आसन् लब्धमनोरथाः ॥ १५ ॥ रामश्चाच्युतमालिङ्ग्य जहासास्यानुभाववित् ॥ नगा गावो वृषा वत्सा लेभिरे परमां मुदम् ॥ १६ ॥ नन्दं विप्राः समागत्य गुरवः सकलत्रकाः ॥ ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः ॥ १७ ॥ देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे ॥ नन्दः प्रीतमना राजन् गाः सुवर्णं तदाऽदिशत् ॥ १८ ॥ यशोदापि महाभागा नष्टलब्धप्रजा सती ॥ परिष्वज्याङ्कमारोप्य मुमोचाश्रुकलां मुहुः ॥ १९ ॥

यशोदेति ॥ हे कौरव यशोदादयः कृष्णं समेत्य सङ्गत्य लब्धेहा लब्धचेष्टा लब्धमनोरथाश्चासन् ॥ १५ ॥ राम इति ॥ अस्य अच्युतस्यानुभाववित् रामश्चाच्युतं कृष्णमालिङ्ग्य जहास । नगा गावो वृषाः वत्साश्च परमां मुदं लेभिरे । तत्र नगा वृक्षाः पूर्वं शुष्काः अपि सद्य एव प्ररोहमापुरित्यर्थः ॥ १६ ॥ नन्दमिति द्वयम् ॥ हे राजन् ये सकलत्रकाः स्त्रीसहिताः गुरवः भागुर्यादयः पुरोहिताश्च विप्रास्ते समागत्य नन्दं प्रत्यूचुः तदाहुः । कालियेन ग्रस्तस्तवात्मजोऽयं दिष्ट्या भाग्येनैव मुक्तः अतः कृष्णस्य कालियाद्या निर्मुक्तिस्तत्र हेतुर्ब्राह्मणसन्तोषस्तस्मै द्विजातीनां दानं देहि । तदा प्रीतमना नन्दो ब्राह्मणेभ्यो गाः सुवर्णं च अदिशत् ददौ ॥ १७ ॥ १८ ॥ यशोदेति ॥ महाभागा नष्टा अदर्शनं गता पुनर्लब्धा प्रजा यया तथाभूता सती यशोदा च तं कृष्णं परिष्वज्याङ्कमारोप्याश्रुकलामानन्दाश्रुकलां मुहुर्मुमोच ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामिति ॥ हे राजेन्द्र क्षुत्तृड्भ्यां रोदनपरिधावनादिजनितेन श्रमेण च कर्शिताः व्रजौकसः गावश्च तां कालियविवासनादिनसंबन्धिनीं रात्रिं तत्रैव कालिन्द्या उपकूलतः कूलप्रान्ते यद्वा उपकूलतः विषजलादिभयात्कूलसमीपं परित्यज्येति "ल्यब्लोपे पञ्चमी" अन्यथा दावाग्निना सर्वत आवरणासिद्धेः । ऊषुः वासं चक्रुः । धेन्वादीनां सत्वेऽपि तासां विषसम्पर्कशङ्कया क्षीराद्यग्रहणात् क्षुदादि ॥ २० ॥ तदेति ॥ तस्यां रात्रौ तत्रापि निशीथे अर्धरात्रिसमये शुचिः ग्रीष्मस्तत्संबन्धि यद्वनं शुष्कं तत उद्भूतो दावाग्निः सुप्तं व्रजं गवादिसहितं व्रजजनं सर्वत आवृत्य प्रदग्धुमुपचक्रमे प्रक्रान्तवान् । दावाग्निरयं कंसानुचरः कालियसखः कश्चिदसुर इति केचिदाहुः ॥ २१ ॥ तत इति ॥ ततो दह्यमानाः व्रजौकस उत्थाय संभ्रान्ता दिग्देशकालादिज्ञानरहिताः सन्तः कालियविषनिष्फलीकरणशक्तिदर्शनेन कृष्णे नारायणावेशमवगच्छन्तो मायया मनुष्याकारमपि ईश्वरं कृष्णं शरणं ययुः ॥ २२ ॥ कृष्णेति ॥ रामकृष्णयोरभेदारोपेण एकत्वे तवकादेशात्तावकानिति स्पष्टं शेषम् ॥ २३ ॥ सुदुस्तरादिति ॥ हे प्रभो सुदुस्तरात्

तां रात्रिं तत्र राजेन्द्र क्षुत्तृड्भ्यां श्रमकर्षिताः ॥ ऊषुर्व्रजौकसो गावः कालिन्द्या उपकूलतः ॥ २० ॥ तदा शुचिवनोद्भूतो दावाग्निः सर्वतो व्रजम् ॥ सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे ॥ २१ ॥ तत उत्थाय संभ्रान्ता दह्यमाना व्रजौकसः ॥ कृष्णं ययुस्ते शरणं मायामनुजमीश्वरम् ॥ २२ ॥ कृष्ण कृष्ण महाभाग हे रामामितविक्रम ॥ एष घोरतमो वह्निस्तावकान् ग्रसते हि नः ॥ २३ ॥ सुदुस्तरान्नः स्वान् पाहि कालाग्नेः सुहृदः प्रभो ॥ न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयम् ॥ २४ ॥ इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः ॥ तमग्निमपिबत् तीव्रमनन्तोऽनन्तशक्तिधृक् ॥ २५ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे कालियदमनो नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ श्रीशुक उवाच ॥ ॥ अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः ॥ अनुगीयमानो न्यविशद्व्रजं गोकुलमण्डितम् ॥ १ ॥

दुर्निवारात् कालाग्नेर्मृत्युरूपादग्नेः स्वान् स्वकीयान् सुहृदः नोऽस्मान्पाहि मृत्योर्न बिभीमः । किन्तु अकुतोभयं सर्वभयनिवर्त्तकं त्वच्चरणं सन्त्यक्तुं न शक्नुमः । भक्तानामग्निभयाभावेऽपि व्याकुलत्वात्प्रार्थना सङ्गच्छते ॥२४॥ इत्थमिति ॥ अनन्ताभिः शक्तिभिर्धृष्णोति इति अनन्तशक्तिधृक अनन्तो भगवान् इत्थं स्वजनानां वैक्लव्यं व्याकुलतां निरीक्ष्य तमतितीव्रं सुदुःसहमप्यग्निमपिबत् ॥ २५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्यामूं सप्तदशे व्यधात् ॥१७॥ ग्रीष्मोऽप्यष्टादशे जातो वसन्तगुणलक्षितः ॥ जघ्ने प्रलम्बो रामेण श्लोकास्तत्र द्विवर्ह्नयः ॥ उवाचेत्येकमर्द्धाढ्याः पञ्चत्रिंशदनुष्टुभः ॥ १८ ॥ अथेति ॥ अथ प्रातः मुदितात्मभिः ज्ञातिभिर्गोपैः परिवृतस्तैरेवानुगीयमानः कृष्णः गोकुलेन गवां समूहेन मण्डितं व्रजं न्यविशत् । तङभाव आर्षः । प्रथमं गोगणप्रवेशात् गोकुलमण्डितं क्रियाविशेषणं वा ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रजे इति ॥ गोपालनमेव च्छद्म व्याजमात्रं यस्यां तया मायया एवं व्रजे विक्रीडतोः सतोः रामकृष्णयोः ग्रीष्माख्यः ऋतुरभवत् । सच शरीरिणां नातिप्रेयान् जलकेल्यादिना किञ्चित्प्रियत्वान्नातिप्रेयानिति ॥२॥ स चेति ॥ स च प्राणिनामनतिप्रियोऽपि ग्रीष्मो वक्ष्यमाणैर्वृन्दावनगुणैर्वसन्त इव लक्षितस्तत्रत्यैर्जनैर्दृष्टः । यत्र वृन्दावने रामेण सह केशवः भगवान् साक्षादास्ते ॥३॥ वसन्तसाम्यमाह—यत्रेति ॥ यत्र ग्रीष्मे वृन्दावनेऽपि निर्ह्रादेन घोषेण निवृत्तस्वनाः प्रच्छन्नध्वनयो झिल्लिकाः कठोरध्वनयः सूक्ष्माः कीटविशेषा यस्मिन् शश्वत्तेषां निर्झराणां शीकरैः अम्बुकणैः ऋजीषाः स्निग्धा ये द्रुमास्तेषां मण्डलैः समूहैर्मण्डितं स्थलं भवतीति शेषः । मण्डितं मण्डनं भवतीति भावे क्तो वा ॥ ४ ॥ सरिदिति ॥ अतिशाद्वले अतिहरिततृणाकीर्णे यत्र ग्रीष्मे वृन्दावने वा कह्लारकञ्जोत्पलानि यथाक्रमेण सन्ध्यादिनरात्रिविकासीनि तेषां रेणून् चौरवच्छनैर्हरति तेन सुगन्धिना मन्देन च सरितो नद्यः सरांसि सरोवराणि प्रस्रवाः निर्झराः तेषामूर्मिसंबन्धेन शीतलेन वायुना हेतुना निदाघो ग्रीष्मस्तेन तत्कालिकवह्न्यर्काभ्यां च भवतीति तथाभूतो

व्रजे विक्रीडतोरेवं गोपालच्छद्ममायया ॥ ग्रीष्मो नामर्तुरभवन्नातिप्रेयान् शरीरिणाम् ॥ २ ॥ स च वृन्दावनगुणैर्वसन्त इव लक्षितः ॥ यत्रास्ते भगवान् साक्षाद्रामेण सह केशवः ॥ ३ ॥ यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकम् ॥ शश्वत्तच्छीकरर्जीषद्रुममण्डलमण्डितम् ॥ ४ ॥ सरित्सरःप्रस्रवणोर्मिवायुना कह्लारकञ्जोत्पलरेणुहारिणा ॥ न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोतिशाद्वले ॥ ५ ॥ अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समन्ततः ॥ न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृह्णते ॥ ६ ॥ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजम् ॥ गायन्मयूरभ्रमरं कूजत्कोकिलसारसम् ॥ ७ ॥ क्रीडिष्यमाणस्तत् कृष्णो भगवान् बलसंयुतः ॥ वेणुं विरणयन् गोपैर्गोधनैः संवृतोविशत् ॥ ८ ॥

यो दवस्तापः स वनौकसां न विद्यते ॥५॥ ननु ग्रीष्मे शाद्वलमेव कुतस्तत्राह अगाधेति ॥ यत्र वृन्दावने अगाधानि तोयानि यासां तासां ह्रदिनीनां नदीनां तटस्पर्शिभिरूर्मिभिः पुलिनैः सह समंततः सर्वतोद्रवत् । आर्द्रं पुरीषं पङ्को यस्यास्तस्या गौरादित्वात् ङीष् इत्याहुः । वस्तुतो ङीषार्षः । भुवो रसं शाद्वलितं शाद्वलयुक्तीकृतं शाद्वलवच्छब्दात्तत्करोतीति णिजन्तात् क्तः । इष्टवद्भावात् " विन्मतोर्लुक् " इति मतुपो लुक् । ग्रीष्मकालीना विषमिवोल्बणा अतितीक्ष्णा अपि चण्डांशुकराः सूर्यरश्मयो न गृह्णते न हरन्ति ॥ ६ ॥ वनमिति ॥ यत्र पुनर्वनं कुसुमितं पुष्पितवृक्षव्याप्तं श्रीमत् बहुशोभायुक्तं नदन्तः चित्रा मृगा द्विजाः पक्षिणश्च यस्मिंस्तत् गायन्तो मयूरा भ्रमराश्च यस्मिन् कूजन्तः कोकिलाः सारसाश्च यस्मिंस्तादृशमस्ति ॥ ७ ॥ क्रीडिष्यमाण इति ॥ क्रीडिष्यमाणः क्रीडां करिष्यमाणः कर्मव्यतिहारविवक्षया शानच् । बलेन संयुतो गोपैर्गोधनैश्च संवृतो वेणुं विशेषेण रणयन् वादयन् भगवान् कृष्णस्तद्वनमविशत् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवालेति ॥ सुवर्णरत्नादिभिर्मातृभिर्भूषिता अपि प्रवालबर्हस्तवकस्रग्धातुभिः कृतानि भूषणानि यैस्तथाभूता रामकृष्णादयो गोपाः रामस्यापि गोपालनात् गोपत्वाभिमानाद्वा गोपत्वं ननृतुः मिथो युयुधुः । तङभाव आर्षः । जगुश्च ॥ ९ ॥ कृष्णस्येति ॥ नृत्यतः कृष्णस्य अग्रे केचिद्गोपा जगुः केचिद्वेणुपाणितलैः शृङ्गैश्च अवादयन् । कर्मणः करणत्वविवक्षा । अथ अपरे च प्रशशंसुः ॥ १० ॥ गोपेति ॥ हे नृपति गोपजातिषु भगवता लक्षितेषु प्रतिच्छन्नाः तद्वेषेणावतीर्णाः गोपालरूपिणः देवा नटाः नटमिव कृष्णरामौ गोपालरूपौ कर्मभूतौ ईडिरे । आमभाव आर्षः ॥ ११ ॥ भ्रामणैरिति ॥ काकपक्षाश्चूडाकरणात्प्राक्तनकेशाः कर्णालम्बिवक्रालका वा केशगुम्फितवेणीत्रयमिति केचित् तद्धरौ तौ क्वचित् परस्परकरग्रहणेन भ्रामणैर्गर्तादिलङ्घनैः क्षेपैः प्रतिलोमप्रेरणैः आस्फोटनैः करतलेन भुजमूलाघातैः विकर्षणैः नियुद्धेन बाहुयुद्धेन च चिक्रीडतुः ॥१२॥ क्वचिदिति ॥ हे महाराज क्वचिदन्येषु गोपेषु नृत्यत्सु सत्सु स्वयं गायकौ वादकौ च भूत्वा साधु साध्विति वादिनौ सन्तौ शशंसतुः ॥१३॥ क्वचिदिति ॥

प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः ॥९॥ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् ॥ वेणुपाणितलैः शृङ्गैः प्रशशंसुरथापरे ॥ १० ॥ गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणः ॥ ईडिरे कृष्णरामौ च नटा इव नटं नृप ॥ ११ ॥ भ्रामणैर्लङ्घनैः क्षेपैरास्फोटनविकर्षणैः ॥ चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् ॥ १२ ॥ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् ॥ शशंसतुर्महाराज साधु साध्विति वादिनौ ॥ १३ ॥ क्वचिद् बिल्वैः क्वचित् कुम्भैः क्व चामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबन्धाद्यैः क्वचिन्मृगखगेहया ॥ १४ ॥ क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः ॥ कदाचित् स्पन्दोलिकया कर्हिचिन्नृपचेष्टया ॥ १५ ॥

क्वचिद्बिल्वैर्बिल्वफलैः क्वचित् कुम्भैः कुम्भवृक्षफलैः क्व च क्वचित् आमलकफलपूर्णैर्मुष्टिभिश्चिक्रीडतुः । एषां फलानां यन्त्रमुष्ट्यादिना प्रक्षेपेण क्रीडा । प्रक्षिप्यमाणफलयोर्मिथ आघातश्च अस्पृश्यनेत्रबन्धाद्यैरिति स्पर्शस्य अदित्साचिकीर्षाभ्यां क्रीडा । तत्र स्पर्शकर्त्तुर्जयः स्पृष्टस्य पराजयः इत्यस्पृश्यत्वक्रीडा । अलक्षितमेव पृष्ठदेशमासाद्य पाणितलाभ्यां नेत्रबन्धकं परिचिनोति चेत् परिचितस्य पराजयः इति नेत्रबन्धक्रीडा । केचित्तु स्वयं द्वौ मुख्यौ अन्यस्य नेत्रपिधानकर्तारौ ततोऽन्ये निलीय स्थिता भवन्ति तत्रोद्घाटितनेत्रेणास्पृष्टा एव ये रामं कृष्णं वा मुख्यं स्पृशन्ति तेषां न पराजयः । यस्तु तेन स्पृष्टस्तस्य पराजयः यः स्पृशति तस्य जय इत्याहुः । एवंविधाभिः क्रीडाभिश्चिक्रीडतुः सर्वत्र जयपराजये मुरलीवेत्रादिर्ग्लहः क्वचिन्मृगाणां खगानां च ईहया चेष्टया चिक्रीडतुः ॥१४॥ क्वचिच्चेति ॥ क्वचिच्च दर्दुरप्लावैर्मण्डूकप्लुतिभिः विविधैरुपहासकैः उपहासजनकविचित्रानुकरणैः कदाचित् स्पन्दोलिकया दोलायामारोहणेन कर्हिचित् नृपलीलया चेष्टयेत्यपि पाठः । सिंहासने उपविश्य राजवद्दण्डाद्याज्ञापनलीलया चिक्रीडतुः ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं तौ रामकृष्णौ लोकसिद्धाभिः क्रीडाभिः नद्यद्रिद्रोणिकुञ्जेषु काननेषु सरस्सु च वने च चेरतुः । द्रोणी उभयतः पर्वतमध्ये निम्ना भूमिः पर्वतसन्धिरित्यप्याहुः । कुञ्जानि लतापिहितगह्वरस्थानानि ॥ १६ ॥ पशूनिति ॥ तस्मिन्वने गोपैः सह पशून् चारयतोः सतोः रामकृष्णयोस्तयोर्जिहीर्षया हर्तुमिच्छया गोपरूपी कश्चिद्गोपस्तद्दिने वनं नागतस्तद्रूपी सन् प्रलम्बाख्योऽसुरोऽगात् ॥ १७ ॥ तमिति ॥ भगवान् सर्वदर्शनः दाशार्हः श्रीकृष्णस्तं प्रलम्बासुरं विद्वानपि जानन्नपि क्रीडयैव तस्य वधं विचिन्तयन् तेन सह सख्यमन्वमोदत ॥ १८ ॥ तत्रेति ॥ विहारवित् क्रीडाभिज्ञः कृष्णः तत्र गोपान् उपाहूय हे गोपाः यथायथं वयोबलाद्यनुरूपं द्वन्द्वीभूय वयं विहरिष्याम इति प्राह स्म ॥ १९ ॥ तत्रेति ॥ तत्र एवं कृष्णेनोक्ते सति गोपा रामजनार्दनावेव परिवृढौ नायकौ चक्रुः । तत्र संघट्टो यूथः केचित्कृष्णस्य संघट्टिनः यूथगताः

एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ॥ नद्यद्रिद्रोणिकुञ्जेषु काननेषु सरस्सु च ॥ १६ ॥ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः गोपरूपी प्रलम्बोऽगादसुरस्तज्जिहीर्षया ॥ १७ ॥ तं विद्वानपि दाशार्हो भगवान् सर्वदर्शनः ॥ अन्वमोदत तत्सख्यं वधं तस्य विचिन्तयन् ॥ १८ ॥ तत्रोपाहूय गोपालान् कृष्णः प्राह विहारवित् ॥ हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥ १९ ॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ॥ कृष्णसंघट्टिनः केचिदासन् रामस्य चापरे ॥२०॥ आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ॥ यत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥ २१ ॥ वहन्तो वाह्यमानाश्च चारयन्तश्च गोधनम् ॥ भाण्डीरकं वटं नाम जग्मुः कृष्णपुरोगमाः ॥ २२ ॥ रामसंघट्टिनो यर्हि श्रीदामवृषभादयः ॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥ २३ ॥ उवाह कृष्णो भगवान् श्रीदामानं पराजितः ॥ वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥ २४ ॥

आसन् तथा अपरे रामस्य संघट्टिन आसन् ॥ २० ॥ आचेरुरिति ॥ यत्र यासु क्रीडासु जेतारः आरोहन्ति पराजिताश्च तान् वहन्तिताः वाह्यवाहकेति भावप्रधानो निर्देशः । वाह्यत्वं वाहकत्वं च लक्षणं फलं यासु तथा विविधाः क्रीडा आचेरुः ॥ २१ ॥ वहन्त इति ॥ एवं वहन्तो वाह्यमानाः पृष्ठेनोह्यमानाश्च स्वार्थे णिच् । गोधनं चारयन्तश्च कृष्णपुरोगमाः कृष्णादयो गोपाः भाण्डीरकं नाम वटं जग्मुः । यतः स एव वटोऽवरोहणस्थानत्वेन कल्पितः तत्समीपवर्त्येवारोहणस्थानमपि ज्ञेयम् ॥ २२ ॥ ॥ ६८ ॥
रामेति ॥ हे नृप यर्हि क्रीडायां रागसंघट्टिनः श्रीदामवृषभादयः जयिनो जातास्तदा तान् कृष्णादय ऊहुः ॥ २३ ॥ उवाहेति ॥ पराजितो भगवान् कृष्णः श्रीदामानम् उवाह । भद्रसेनस्तु वृषभनामानम् उवाह । प्रलम्बो रोहिणीसुतमुवाह ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आविषह्यमिति ॥ तदा दानवेषु पुङ्गवः श्रेष्ठः प्रलम्बः कृष्णमविषह्यं प्रबलत्वेन सोढुमशक्यं मन्यमानः अत एव रामं हर्तुं कृष्णपक्षेऽभूत् । ततश्च कृष्णदृष्टिपथवञ्चनाय रामं वहन् अवरुह्यतेऽस्मिन्नित्यवरोहणं स वट एव ततः परं दूरं द्रुततरं शीघ्रमेव प्रागात् ॥ २५ ॥ तामिति ॥ पुरटस्य सुवर्णस्य परिच्छदा अलङ्कारा यस्य तथाभूतः स महासुरः धरणिधरेन्द्रो मेरुस्तद्वद्गौरवं यस्य तं राममुद्वहन् शीघ्रतया नयन् रामभारं वोढुमशक्नुवन् यदा विगतरयो वेगरहितो जातस्तदा गोपवपुषा रामवहनं दुर्घटं मन्यमानो निजमासुरं वपुरास्थितः सन् तडिद्द्युमान् विद्युत्तुल्यदीप्तिमान् इत्यलङ्काराणामुपमा । उडुपतिं चन्द्रं वहति इति उडुपतिवाट् अम्बुद इव बभौ । यदि यथोचितस्थानेषु स्थिता विद्युतो भवन्ति उपरि चोडुपतिर्भवति तदा सोम्बुदो यथा भाति तद्वद्बभौ ॥ २६ ॥ निरीक्ष्येति ॥ अलमतिवेगेनाम्बरे आकाशे चरत् प्रदीप्ते दृशौ नेत्रे यस्मिंस्तत् भ्रूकुटितटे संलग्ना उग्रा दंष्ट्रा यस्मिंस्तत् प्रदीप्तदृक् प्रदीप्तनेत्रं भ्रूकुटितटे यस्मिंस्तत् उग्रा दंष्ट्रा यस्मिंस्तच्च तच्चेति वा । ज्वलन्त्य इव रक्ताः शिखाः केशा यस्मिंस्तत् कटककिरीटकुण्डलत्विषाद्भुतं

अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः ॥ वहन् द्रुततरं प्रागादवरोहणतः परम् ॥ २५ ॥ तमुद्वहन् धरणिधरेन्द्रगौरवं महासुरो विगतरयो निजं वपुः ॥ स आस्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपतिवाडिवाम्बुदः ॥ २६ ॥ निरीक्ष्य तद्वपुरलमम्बरे चरत् प्रदीप्तदृग् भ्रुकुटितटोग्रदंष्ट्रकम् ॥ ज्वलच्छिखं कटककिरीटकुण्डलत्विषाऽद्भुतं हलधर ईषदत्रसत् ॥ २७ ॥ अथाऽऽगतस्मृतिरभयो रिपुं बलो विहायसाऽर्थमिव हरन्तमात्मनः ॥ रुषाऽहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा ॥ २८ ॥ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन् रुधिरमपस्मृतोऽसुरः ॥ महारवं व्यसुरपतत् समीरयन् गिरिर्यथा मघवत आयुधाहतः ॥ २९ ॥ दृष्ट्वा प्रलम्बं निहतं बलेन बलशालिना ॥ गोपाः सुविस्मिता आसन् साधु साध्विति वादिनः ॥ ३० ॥

तद्वपुर्निरीक्ष्य हलधर ईषदत्रसत् ॥ २७ ॥ अथेति ॥ अथानन्तरमेवागता स्मृतिः "किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते सर्वात्मन् सर्वगुह्यानां गुह्यगुह्यात्मना त्वया ॥" इति विष्णुपुराणोक्तकृष्णवाक्याल्लब्धं निजैश्वर्यज्ञानं यस्य सः अत एवाभयो भयरहितः सन् बल आत्मनः सार्थं गोपसमूहं विहाय हरन्तमग्रे नयन्तम् । यद्वा । विहायसा आकाशमार्गेण आत्मनः अर्थं प्राप्तमिव हरन्तं रिपुं स्वशत्रुं प्रलम्बं सुराधिप इन्द्रो गिरिमिव रुषा क्रोधेन दृढेन वज्रस्येव रंहो वेगो यस्य तेन मुष्टिना शिरस्यहनत् अहन् । शब्लुगभाव आर्षः । मुष्टिर्द्विलिङ्गः । इन्द्रो वज्रस्य रंहसा गिरिमिवेति वाऽन्वयः ॥ २८ ॥ स इति ॥ एवमाहतः अतः सपदि शीघ्रमेव विशीर्णं मस्तकं यस्य सः अत एवापगतं स्मृतं स्मृतिर्यस्य सः अपस्मारग्रस्त इवेत्याशयः । मुखाद्रुधिरं वमन् महारवमीरयन् महान्तं शब्दं विमुञ्चन् व्यसुः प्राणरहितः सोऽसुरः प्रलम्बः मघवत इन्द्रस्य आयुधेन वज्रेण आहतो गिरिरिव अपतत् ॥ २९ ॥ दृष्ट्वेति ॥ बलशालिना बलेन रामेण प्रलम्बं निहितं दृष्ट्वा साधु कृतं साधु कृतमिति वादिनो गोपाः सुविस्मिताः आसन् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशिष इति ॥ तं रामं प्रेत्य परलोकं गत्वाऽऽगतमिवालिङ्ग्य प्रेम्णा विह्वलानि चेतांसि येषां ते आशिषः अभिगृणन्तः प्रयुञ्जानाः तदर्हणं प्रशंसायोग्यं तं प्रशशंसुः ॥ ३१ ॥ पाप इति ॥ पापे सर्वोपद्रवकारिणि प्रलम्बे निहते सति देवाः परमनिर्वृताः परमानन्दं प्राप्ताः सन्तो माल्यैः कुसुमैर्बलमभ्यवर्षन् साधु साध्विति प्रशशंसुश्च ॥ ३२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमाष्टादशे व्यदधादिमाम् ॥ १८ ॥ मुञ्जाटव्यामूनविंशे निविष्टं गोपगोकुलम् ॥ तद्वह्निं पीत्वा जुगोप तत्र श्लोकास्तु षोडश ॥ द्वे उवाचेति पादोना दशसप्तेत्यनुष्टुभः ॥ १९ ॥ क्रीडेति ॥ गोपेषु क्रीडायामासक्तेषु सत्सु तेषां गावः टजभाव आर्षः । दूरचारिणीः दूरचारिण्यः पूर्वसवर्णदीर्घ आर्षः । स्वैरं यथेष्टं चरन्त्यस्तृणलोभेन गह्वरं दुष्प्रवेशं वनं विविशुः ॥ १ ॥ अजा इति ॥ अजाः गावः महिष्यश्च वनाद्वनान्तरं निर्विशन्त्यो दावेन ग्रीष्मतापेन तर्षिताः तृष्णां प्रापिताः तृषेर्णिजन्तात् क्तः । अत एव क्रन्दन्त्यः इषीकाटवीमत्युच्छ्रितघनतृणविशेषारण्यं विविशुः ॥ २ ॥ ते इति ॥ तदा कृष्णरामौ आदी येषां ते

आशिषोऽभिगृणन्तस्तं प्रशशंसुस्तदर्हणम् ॥ प्रेत्यागतमिवालिङ्ग्य प्रेमविह्वलचेतसः ॥ ३१ ॥ पापे प्रलम्बे निहते देवाः परमनिर्वृताः ॥ अभ्यवर्षन् बलं माल्यैः शशंसुः साधु साध्विति ॥ ३२ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे प्रलम्बवधो नामाष्टादशोऽध्यायः ॥ १८ ॥

श्रीशुक उवाच ॥ ॥ क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः ॥ स्वैरं चरन्त्यो विविशुस्तृणलोभेन गह्वरम् ॥ १ ॥ अजा गावो महिष्यश्च निर्विशन्त्यो वनाद्वनम् ॥ इषीकाटवीं विविशुः क्रन्दन्त्यो दावतर्षिताः ॥ २ ॥ तेऽपश्यन्तः पशून् गोपाः कृष्णरामादयस्तदा ॥ जातानुतापा न विदुर्विचिन्वन्तो गवां गतिम् ॥ ३ ॥ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरङ्कितैर्गवाम् ॥ मार्गमन्वगमन् सर्वे नष्टाऽऽजीव्या विचेतसः ॥ ४ ॥ मुञ्जाटव्यां भ्रष्टमार्गं क्रन्दमानं स्वगोधनम् ॥ संप्राप्य तृषिताः श्रान्तास्ततस्ते संन्यवर्तयन् ॥ ५ ॥ ता आहूता भगवता मेघगम्भीरया गिरा ॥ स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ॥ ६ ॥

नतु तौ अतद्गुणसंविज्ञानात् गोपाः पशून् अपश्यन्तः जातानुतापा गवां गवादीनां गतिं पदवीं विचिन्वन्तोऽपि न विदुः न विविदुः । सामीप्यविवक्षया लट् ॥ ३ ॥ तृणैरिति ॥ नष्टा आजीव्याः जीविकासाधनानि येषां ते अत एव विचेतसः व्याकुलचित्ताः सर्वे गोपाः तासां गवादीनां खुरैर्दद्भिश्च च्छिन्नैस्तृणैः गोष्पदैः गोसेवितैः गोष्पदं सेवितेति सुट् । खुरादिभिरङ्कितैश्च भूप्रदेशैस्तृणैर्वा गवां मार्गमन्वगमन् ॥ ४ ॥ मुञ्जेति ॥ मुञ्जाटव्यामिषीकाटव्यां तत्रैव शरवणे भ्रष्टो विच्छिन्नस्ततोऽग्रे प्रवेष्टुमशक्यो मार्गो यस्य तत् अत एव क्रन्दमानं शानजार्षः । स्वगोधनं संप्राप्य स्वयमपि ग्रीष्मातपेन धावनेन च तृषिताः श्रान्ताश्च ते ततः गाः संन्यवर्त्तयन् परावर्त्तयामासुः ॥ ५ ॥ ता इति ॥ कृष्णस्तु आत्मानं दर्शयन् ता आहूतवान् ततः ता गवादयो भगवता मेघगम्भीरया गिरा आहूताः स्वनाम्नां निनदं ध्वनिं श्रुत्वा प्रहर्षिताः सत्यः प्रतिनेदुः उत्तर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानवत्प्रतिशब्दं कृतवत्यः ॥ ६ ॥ तत इति ॥ ततः अनन्तरं सारथिना वायुना समीरितः प्रेरितः अत एव उल्बणैरतितीव्रैरुल्मुकैः स्थिरजङ्गमान् विलेलिहानः ग्रसमानः वनौकसां गोपालानां च क्षयकृन्नाशकः महान्समन्तात् सर्वतो यदृच्छया केनापि प्राणिदुर्भाग्येन वनधूमकेतुः दावानलः प्रादुरभूत् । अयं दवाग्निरपि कश्चित्प्रलम्बसखो दैत्य इत्याहुः ॥७॥ तमिति ॥ तं दवाग्निं परितः सर्वतः आपतन्तमागच्छन्तं प्रसमीक्ष्य गोपा गावश्च । अत्र गोपाश्च गाव इति गोपाः स्म गाव इति पाठौ । गोपाः सगाव इति पाठे तु गोस्त्रियोरिति ह्रस्वाभाव आर्षः । भीताः सबलं बलेन सहितं श्रीकृष्णं प्रपन्नाः शरणं गताः सन्तः मृत्युभयेनार्दिताः पीडिता जनाः हरिं शरणागता यथा प्रार्थयन्ते तथा ऊचुश्च रक्षां प्रार्थयामासुः ॥ ८ ॥ कृष्णेति ॥ स्पष्टम् ॥ ९ ॥ नूनमिति ॥ हे कृष्ण हे सर्वधर्मज्ञ नूनं निश्चितमेतत् त्वद्बान्धवास्त्वत्संबन्धिनोऽस्मदाद्या अवसीदितुं दुःखमनुभवितुं नार्हन्ति इट्सीदौ आर्षौ । सादितुमिति पाठे अव समन्तात्सादो येषां तेऽवसादास्तद्वदाचरितुमपि नार्हन्ति । आचारक्विबन्तात्तुमुन् । वयं हि त्वन्नाथाः त्वमेव

ततः समन्ताद् वनधूमकेतुर्यदृच्छयाभूत् क्षयकृद् वनौकसाम् ॥ समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजङ्गमान् महान् ॥ ७ ॥ तमापतन्तं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः ॥ ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ॥ ८ ॥ कृष्ण कृष्ण महावीर्य हे रामामितविक्रम ॥ दावाग्निना दह्यमानान् प्रपन्नांस्त्रातुमर्हथः ॥ ९ ॥ नूनं त्वद्बान्धवाः कृष्ण न चार्हन्त्यवसीदितुम् ॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः ॥ १० ॥ श्रीशुक उवाच ॥ वचो निशम्य कृपणं बन्धूनां भगवान् हरिः ॥ निमीलयत मा भैष्ट लोचनानीत्यभाषत ॥ ११ ॥ तथेति मीलिताक्षेषु भगवानग्निमुल्बणम् ॥ पीत्वा मुखेन तान् कृच्छ्राद् योगाधीशो व्यमोचयत् ॥ १२ ॥ ततश्च तेऽक्षीण्युन्मील्य पुनर्भाण्डीरमापिताः ॥ निशम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ॥ १३ ॥

नाथो रक्षको येषां तथाभूताः तत्र हेतुः त्वमेव परायणमाश्रयो येषां ते अतः कथमवसीदितुमर्हाम इति ॥ १० ॥ वच इति ॥ भगवान् हरिः बन्धूनां गोपानां कृपणं दीनतरं वचो निशम्य श्रुत्वा मा भैष्ट अयमग्निर्धक्ष्यतीति भयं न कुरुत । किंतु लोचनानि संमीलयतेत्यभाषत । यद्येषां प्रत्यक्षेऽग्निं पास्यामि तर्हि एते मां बलान्निवार्याग्निमेव प्रवेक्ष्यन्तीति नेत्रनिमीलनोक्तिः ॥११॥ तथेति ॥ अयं कृष्णो मन्त्रादिना वह्निं शमयिष्यति तत्र रहः संपादनमुचितं मत्वा तथास्त्वित्युक्त्वा तेषु मीलिताक्षेषु सत्सु योगस्य योगमायाया अधीशः भगवानुल्बणमप्यग्निं मुखेन पीत्वा तान् भाण्डीरं नीत्वा कृच्छ्रात् अग्निभयात् व्यमोचयत् ॥ १२ ॥ ततश्चेति ॥ ततश्च ते गोपाः पुनर्भाण्डीरमापिताः भगवदाज्ञया अक्षीण्युन्मील्य आत्मानं प्रत्येकाभिप्रायेणैकवचनम् । गाश्च दावाग्नेर्मोचिताः निशाम्य दृष्ट्वा विस्मिता आसन् । अयं भाण्डीरो मुञ्जाटव्याः क्रोशपञ्चके स्थितो ज्ञेयः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णस्येति ॥ योगमायया‌ऽनुभावितं संपादितं दावाग्नेः आत्मनः क्षेमं क्षेमकरं क्षेमशब्दात्तत्करोतीति णिजन्तादच् । तत् कृष्णस्य योगवीर्यं वीक्ष्य ते गोपाः तं श्रीकृष्णममरं देवं मेनिरे ॥ १४ ॥ गा इति ॥ सहरामो रामेण सहितो गोपैरेवमभिष्टुतो जनार्दनः कृष्णः गाः सन्निवर्त्य सायाह्ने सायंकाले वेणुं विरणयन् गोष्ठं व्रजमगात् ॥ १५ ॥ गोपीनामिति ॥ यासां गोपीनां येन श्रीकृष्णेन विना क्षणमपि क्लैब्यमार्षम् । युगशतमिव अभवत् तासां गोपीनां गोविन्ददर्शने सति परम आनन्द आसीत् ॥ १६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्योनविंशके ॥ १९ ॥ विंशे प्रावृट्शरच्छोभा दृष्टान्तैश्चानुवर्णिता ॥ प्रावृट्क्रीडोच्यते तत्र श्लोका नवपयोर्धैयः ॥ एकमेवास्त्युवाचेति श्लोकतुल्या अनुष्टुभः ॥ २० ॥ तयोरिति ॥ दावाग्नेरात्मनो मोक्षं कृष्णस्य कर्म प्रलम्बवधं च रामस्य कर्म इति तयोः तत् अद्भुतं कर्म गोपाः स्त्रीभ्यः स्वस्य मातृभ्यो यशोदादिगोपीभ्यश्च ताः श्रावयितुं गोपवृद्धान् समाचख्युः उत्तरश्लोकस्वारस्यात् ॥ १ ॥ गोपेति ॥ तद्गोपैर्वर्णितं तयोः कर्म

कृष्णस्य योगवीर्यं तद् योगमाया‌ऽनुभावितम् ॥ दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरे‌ऽमरम् ॥ १४ ॥ गाः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः ॥ वेणुं विरणयन् गोष्ठमगाद् गोपैरभिष्टुतः ॥ १५ ॥ गोपीनां परमानन्द आसीद् गोविन्ददर्शने ॥ क्षणं युगशतमिव यासां येन विना‌ऽभवत् ॥ १६ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे दावाग्निपानं नामैकोनविंशो‌ऽध्यायः ॥ १९ ॥ श्रीशुक उवाच ॥ ॥ तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः ॥ गोपाः स्त्रीभ्यः समाचख्युः प्रलम्बवधमेव च ॥ १ ॥ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः ॥ मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥ २ ॥ ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥ ३ ॥ सान्द्रनीलाम्बुदैर्व्योम सविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ॥ ४ ॥

उपाकर्ण्य श्रुत्वा विस्मिताः गोपवृद्धा गोप्यश्च व्रजं गतौ व्रजे‌ऽवतीर्णौ कृष्णरामौ देवप्रवरौ मेनिरे ॥२॥ तत इति ॥ ततो ग्रीष्मानन्तरं सर्वेषां सत्वानां प्राणिनां समुद्भवः वृद्धिः उत्पत्तितो जीवनसाधनतश्च यस्यां विद्योतमानाः परिधयः परिवेषा दिशो वा यस्यां विस्फूर्जितं विक्षुभितं गर्जनयुक्तं वा नभस्तलं यस्यां सा प्रावृट् प्रावर्तत ॥ ३ ॥ सान्द्रेति ॥ तदा विद्युद्भिः स्तनयित्नुभिः गर्जितैश्च सहितैः सान्द्रैः निबिडैर्नीलैश्चाम्बुदैर्मेघैराच्छन्नमत एवास्पष्टं ज्योतिश्चन्द्रसूर्यादिरूपं यत्र तादृशं सद्व्योम सगुणं ब्रह्मजीवाख्यं यथा सत्त्वादिभिराच्छन्नमस्पष्टज्योतिर्भाति तथा बभौ । विद्युद्गर्जिताम्बुदानां सत्वादिभिः सादृश्यम् । अत्राध्याये बह्व्य उपमास्तत्र काश्चिदुपादेयविषयाः काश्चिद्धेयविषयाश्च । यथा सान्द्रे त्युपमा ध्येयविषयतया उपादेयविषया अष्टावित्यादिका राजभिरुपादेयविषया ॥ आसन्नुत्पथवाहिन्य इत्यादिका हेयविषया इत्याद्यूह्यम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टाविति ॥ पर्जन्यः सूर्यः स्वस्य गोभिः किरणैः टजभाव आर्षः । अष्टौ मासान् कार्तिकमारभ्य ज्येष्ठपर्यन्तं यद्भूम्याः उदमयं जलरूपं वसु धनं निपीतं तत्पुनर्वर्षाकाले आगते सति मोक्तुमारेभे । अत्र करमादाय समये पुनः प्रतिदानाद्राजोपमा सूचिता ॥ ५ ॥ ताडित्त्वन्त इति ॥ यथा करुणा दयालवः दुःखितं जनं वीक्ष्य तत्सुखाय स्वजीवनमपि त्यजन्ति तथा महामेघा अपि तडित्त्वन्तस्ताभिर्नेत्रस्थानीयाभिस्ताडिद्भिस्तप्तं विश्वं निरीक्ष्य चण्डश्वसनेन खरतरपवनेन वेपिताः कम्पिताः अस्य विश्वस्य प्राणनमाप्यायनकरं प्रीणनमित्यपि पाठः । जीवनसाधनभूतं जलं मुमुचुः ॥६॥ तप इति ॥ तपसा ग्रीष्मतापेन सान्तत्वमार्षमिति तोषणी । "तपःकृच्छ्रादिकर्मणि घर्मे लोकप्रभेदे च" इति हैमादौ । सान्तोपि तपःशब्दो धर्मवाची मेदिन्यां दृश्यते । कृशा सर्वजलाहरणात् शुष्का पुनर्देवेन पर्जन्येन मीढा सिक्ता सती मही वर्षीयसी पुष्टाङ्गासीत् । यथा काम्यं कामप्राप्त्यर्थं तपो यस्य तस्य तपस्विनस्तनुः प्रथमं तपसा शुष्का भवति पश्चात्तस्य तपसः फलं प्राप्य यथेष्टभोजनपानादिना पुष्टा भवति तथैवेति ॥ ७ ॥ निशेति ॥ निशामुखेषु रात्रिषु प्रकाशग्रहाव्याच्छादकमेघजनितेन तमसा खद्योताः कीटविशेषाः भान्ति प्रकाशन्ते नित्यसिद्धा ग्रहाश्चन्द्रगुरुशुक्रादयस्तु न भान्ति । यथा कलौ युगे विवेकावरकाज्ञानजनितेन पापेन

अष्टौ मासान् निपीतं यत् भूम्याश्चोदमयं वसु ॥ स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ॥ ५ ॥ तडित्त्वन्तो महामेघाश्चण्डश्वसनवेपिताः ॥
प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव ॥ ६ ॥ तपः कृशा देवमीढा आसीद् वर्षीयसी मही ॥ यथैव काम्यतपसस्तनुः संप्राप्य तत्फलम्
॥ ७ ॥ निशामुखेषु खद्योतास्तमसा भान्ति न ग्रहाः ॥ यथा पापेन पाखण्डा नहि वेदाः कलौ युगे ॥ ८ ॥ श्रुत्वा पर्जन्यनिनदं मण्डूका
व्यसृजन् गिरः ॥ तूष्णीं शयानाः प्राग् यद्वत् ब्राह्मणा नियमात्यये ॥ ९ ॥ आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः ॥ पुंसो यथाऽ-
स्वतन्त्रस्य देहद्रविणसंपदः ॥ १० ॥ हरिता हरिभिः शष्पैरिन्द्रगोपैश्च लोहिताः ॥ उच्छिलीन्ध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ॥ ११ ॥

पाखण्डा वेदविरुद्धपाखण्डशास्त्राणि भान्ति । नित्यसिद्धा वेदास्तु नैव भान्ति ॥८॥ श्रुत्वेति ॥ प्राक् प्रथमं तूष्णीं शयानाः स्थिता मण्डूकाः पर्जन्यस्य मेघस्य निनदं श्रुत्वा गिरो व्यसृजन् । यद्वत् यथा प्रथमं तूष्णीं स्थिता ब्राह्मणाः शिष्या गुरोर्नियमात्यये नित्यकर्मपरिसमाप्तौ तदाह्वानवचनं शुत्वा गिरो विसृजन्ति अधीयते॥९॥आसन्निति ॥ क्षुद्रनद्यः प्रथमं वृष्टिजलैरुत्पथे वहन्ति तच्छीला अपि अनु पश्चात् वृष्ट्यभावे शुष्यतीः शुष्यन्त्यः आसन् पूर्वसवर्णदीर्घ आर्षः । यथा अस्वतन्त्रस्य इन्द्रियाधीनस्य । यद्वा । स्वतन्त्रस्य निरङ्कुशस्य शास्त्राज्ञोल्लङ्घिनः पुंसो देहद्रविणयोः सम्पदः यौवनादयः धनपशुगृहादयश्च पुण्यलेशेन वर्द्धमाना अपि पापाधिक्याद्विनश्यन्ति तथा ॥ १० ॥ हरिता इति ॥ हरिभिर्हरितैः शष्पैः कोमलतृणैः क्वचिद्धरिता इन्द्रगोपैः लोहितवर्णकीटविशेषैः क्वचिल्लोहिता उच्छिलीन्ध्रैः छत्राकारैरुद्भिज्जविशेषैः कृतच्छाया श्वेतवर्णा च भूः नृणां राज्ञां श्रीः सेना सम्पत् यथा नानावर्णवस्त्रादिना नानावर्णा भवति तथाऽभूत् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्राणीति ॥ क्षेत्राणि कर्तॄणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः । दैवाधीनं सर्वं लाभालाभादिकमित्यजानतां धनिनां धनाद्यभिमानवताम् उपतापं कष्टं ददौ । अत्र वृष्ट्या लसद्भिः सस्यैर्मोदः वृष्टेर्विच्छेदेन सस्यशोषणादुपताप इत्याशयमाहुः । परे तु कर्षकाणां सस्यसम्पत्त्या मोदः कृषिं निकृष्टं कर्म मत्वा पूर्वं ताम् अकुर्वाणानां मानिनां धनिनां वा चित्ते कृषित्यागात्स्वस्य तत् सम्पदलाभेनानुताप इत्याहुः ॥ १२ ॥ जलेति ॥ यथा सर्वेऽपि हरिनिषेवणाद्रुचिरं रूपं बिभ्रति परमधर्मत्वात् परमसुखदत्वाच्च तथा जलौकसो मीनादयः स्थलौकसो गोवृक्षादयश्च नववारिनिषेवणात् रुचिरं रूपमबिभ्रन् अबिभरुः । जुसभाव आर्षः । निषेवयेति निषेवणादिति च पाठौ ॥ १३ ॥ सरिद्भिरिति ॥ यथा कामेन भोगवासनयाक्तं युक्तं गुणयुक् विषयासक्तम् अपक्वयोगिनश्चित्तं क्षुभ्यति तथा श्वसनः पवनस्तेन जाता ये ऊर्मयस्तद्वान् सरिद्भिः सङ्गतश्च सिन्धुर्नदविशेषः समुद्रो वा चुक्षुभे अतिचञ्चलतां प्राप । अत्र सिन्धुर्नदीविशेषः पाश्चात्यः । विशेषणे पुंस्त्वमार्षम् इति चक्रवर्ती । तोषणी तु समुद्रपरतया व्याचष्टे

क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः ॥ धनिनामुपतापं च दैवाधीनमजानताम् ॥ १२ ॥ जलस्थलौकसः सर्वे नववारिनिषेवया ॥ अबिभ्रद्रुचिरं रूपं यथा हरिनिषेवया ॥ १३ ॥ सरिद्भिः सङ्गतः सिन्धुश्चुक्षुभे श्वसनोर्मिमान् ॥ अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा ॥ १४ ॥ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः ॥ अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ॥ १५ ॥ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः ॥ नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ॥१६॥ लोकबन्धुषु मेघेषु विद्युतश्चलसौहृदाः ॥ स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥ १७ ॥ धनुर्वियति माहेन्द्रं निर्गुणं च गुणिन्यभात् ॥ व्यक्ते गुणव्यतिकरेऽगुणवान् पुरुषो यथा ॥ १८ ॥

॥ १४ ॥ गिरय इति ॥ यथा अधोक्षजचेतसः भगवच्चित्ता जनाः व्यसनैः कष्टैः अभिभूयमाना बाध्यमाना अपि न व्यथन्ते तथा वर्षधाराभिर्हन्यमाना अपि गिरयो न विव्यथुः पीडां न प्रापुः । तङभाव आर्षः ॥ १५ ॥ मार्गा इति ॥ यथा द्विजैः पठिता अपि श्रुतयो नाभ्यस्यमानाः लुप्तसंस्काराः कालहता विस्मृताः सत्यः संदिग्धाः भवन्ति तथा तृणैश्छन्नाः असंस्कृताश्च मार्गाः अयं मार्गोऽस्ति न वेति सन्दिग्धाः बभूवुः ॥ १६ ॥ लोकेति ॥ यथा चलमस्थिरं सौहृदं प्रेम यासां ताः कामिन्यः पुंश्चल्यः यथा गुणिषु रूपादिमत्स्वपि पुरुषेषु पतिषु स्थैर्यं न कुर्वन्ति तथा लोकबन्धुषु जीवनहेतुजलप्रदानेन सर्वप्राण्युपकारिषु मेघेषु विद्युतः स्थैर्यं नियतदेशे चिरकालं सङ्गं न चक्रुः ॥ १७ ॥ धनुरिति ॥ यथा वस्तुतः अगुणवानपि पुरुषः गुणव्यतिकरे गुणकार्ये व्यक्ते प्रपञ्चे भाति तथा गुणिनि गर्जितशब्दगुणवति वियति आकाशे निर्गुणं ज्यारहितं माहेन्द्रं धनुरभात् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ यथा स्वभासा भासितया अहंमत्या स्वचैतन्येनैव प्रकाशितेनाहंकारेण च्छन्नः पुरुषो जीवो न राजते । यद्वा । अहं विद्वान् दाता शूर इति स्वप्रतीत्यैवारोपितया अहम्मत्येति तथा स्वज्योत्स्नया राजितैः प्रकाशितैरपि मेघैराच्छन्न इव प्रतीयमानः उडुपश्चन्द्रो न रराज न प्रचकाशे ॥ १९ ॥ मेघेति ॥ यथा गृहेषु स्थिताः अतः तापत्रयेण तप्ता अत एव निर्विण्णाः श्रान्ता विरक्ताश्च जना अच्युतजनस्य भगवद्भक्तस्यागमे सति प्रत्युत्थानादिभिः प्रतिनन्दन्ति तथा पूर्वं ग्रीष्मतापेन तप्ता निर्विण्णाः अत एव मेघागमेनोत्सवो येषां ते हृष्टाः शिखण्डिनो मयूराः प्रत्यनन्दन् मेघानां नादं श्रुत्वा स्वयमपि नादपूर्वकमनृत्यन् ॥ २० ॥ पीत्वेति ॥ प्राक् प्रथमं ग्रीष्मतापेन क्षामाः शुष्काः पादपा वृक्षाः पद्भिर्मूलैरपः जलानि पीत्वा नानात्ममूर्तयः नवाङ्कुरपत्रपुष्पपल्लवफलादिनानेकरूपदेहा आसन् । यथा पूर्वं तपसा क्षामा दुर्बलाः श्रान्ताः शिथिलेन्द्रियाः पश्चात्कामानामनुसेवया नानात्ममूर्त्तयः स्थूलादिदेहा भवन्ति तथा ॥ २१ ॥ सरस्स्विति ॥ अङ्ग हे राजन् अशान्तानि पङ्ककण्टकादियुक्तानि मुहुः पतन्ति वा

न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः ॥ अहंमत्या भासितया स्वभासा पुरुषो यथा ॥ १९ ॥ मेघागमोत्सवाहृष्टाः प्रत्यनन्दन् शिखण्डिनः ॥ गृहेषु तप्ता निर्विण्णा यथाऽच्युतजनाऽऽगमे ॥ २० ॥ पीत्वाऽपः पादपाः पद्भिरासन् नानात्ममूर्तयः ॥ प्राक् क्षामास्तपसा श्रान्ता यथा कामानुसेवया ॥ २१ ॥ सरस्स्वशान्तरोधस्सु न्यूषुरङ्गापि सारसाः ॥ गृहेष्वशान्तकृत्येषु ग्राम्या इव दुराशयाः ॥ २२ ॥ जलौघैर्निरभिद्यन्त सेतवो वर्षतीश्वरे ॥ पाखण्डिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥ २३ ॥ व्यमुञ्चन् वायुभिर्नुन्ना भूतेभ्योथामृतं घनाः ॥ यथाऽऽशिषो विश्पतयः काले काले द्विजेरिताः ॥ २४ ॥ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजम्बुमत् ॥ गोगोपालैर्वृतो रन्तुं सबलः प्राविशद्धरिः ॥ २५ ॥

रोधांसि तटानि येषां तेष्वपि सरस्सु सारसाः पक्षिणः न्यूषुः न्यवसन् । यथा अशान्तानि दुःखोदर्काणि कृत्यानि कर्माणि येषु तेष्वपि गृहेषु दुराशया विषयाविष्टचित्ता ग्राम्याः गृहस्था निवसन्ति तथा ॥ २२ ॥ जलौघैरिति ॥ ईश्वरे इन्द्रे वर्षति वर्षोपद्रवं कुर्वति सति जलौघैर्जलप्रवाहैः सेतवो जलनिरोधार्थं पारगमनार्थं च क्षेत्रनद्यादिषु पाषाणादिभिर्विनिर्मिता निरभिद्यन्त । यथा पाखण्डिनां वेदविद्वेषिणामसद्वादैः कुतर्कैर्वेदमार्गा वेदप्रतिपादितवर्णाश्रमधर्माः कलौ युगे भिद्यन्ते तथा ॥ २३ ॥ व्यमुञ्चन्निति ॥ वायुभिर्नुन्नाः प्रेरिता घना भूतेभ्यः दुःखितेभ्यः प्राणिभ्यः अमृतम् अमृतवज्जीवनहेतुं जलं व्यमुञ्चन् । यथा द्विजैः पुरोहितादिभिः ईरिताः प्रेरिताः विश्पतयः विशां प्रजानां पतयो राजानः वणिजां पतयो वा । षत्वाद्यभाव आर्षः । काले काले दुःखितेभ्यः प्राणिभ्यः आशिषः कामान् प्रयच्छन्ति तथा ॥ २४ ॥ एवमिति ॥ एवं वर्षिष्ठं समृद्धं पक्वखर्जूरजम्बुमत् तत् वृन्दावनं गोगोपालैर्वृतः सबलो हारिः रन्तुं प्राविशत् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धेनव इति ॥ भूयसा महता ऊधोभारेण मन्दगामिन्योऽपि धेनवो भगवता आहूताः स्नुतस्तनीः स्नुतस्तन्यः सत्यः पूर्वसवर्णदीर्घ आर्षः । स्नुतस्तना इत्यपि पाठः । प्रीत्या द्रुतं ययुः॥ २६॥ वनौकस इति ॥ तदा वनौकसः पुलिन्दमृगपक्ष्यादयः सर्वे प्रमुदिता आसन् तथा गिरेः सकाशात् जलधारा आसन् तदा श्रीकृष्णोऽपि वनराजीर्मधुच्युतो मधुस्रुत आ सर्वतः ददृशे । तङ्गर्षः । गिरिगुहाश्च रम्या आ ददृशे तथा धाराणां कीचकपक्ष्यादीनां चानेकविधान् नादान्मनोहरशब्दांश्च शुश्राव । अत्र यथोचितशेषेण सर्वत्रान्वयः । यद्वा । तत्र कृष्णो वनौकसः पुलिन्दीः प्रमुदिताः ददृशे । वनराजीर्मधुच्युतो ददृशे । गिरेः सकाशाज्जलधारा दूरवर्तिनीरपि नादाद्धेतोरासन्ना निकटवर्तिनीः ददृशे । गुहाश्च ददृशे । अयं च नादादिति पञ्चम्यन्तपाठेऽर्थः । नादानिति पाठे जलधाराः आसन्नाः गिरेर्गुहाश्च ददृशे । धाराणां गुहानां च नादान् शुश्रावेति शेषः ॥२७॥ क्वचिदिति ॥ कन्दमूलफलाशनः भगवान् देवे वर्षति सति क्वचित्कदाचित् वनस्पतिक्रोडे कदाचिद्गिरिगुहायां वा निर्विशन् निर्विश्येति च पाठः । रेमे । कन्दो वर्त्तुलो मूलं दीर्घम् ॥ २८ ॥

धेनवो मन्दगामिन्य ऊधोभारेण भूयसा ॥ ययुर्भगवताऽऽहूता द्रुतं प्रीत्या स्नुतस्तनीः ॥ २६ ॥ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः ॥ जलधारा गिरेर्नादानासन्ना ददृशे गुहाः ॥ २७ ॥ क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति ॥ निर्विश्य भगवान् रेमे कन्दमूलफलाशनः ॥ २८ ॥ दध्योदनं समानीतं शिलायां सलिलान्तिके ॥ संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः ॥ २९ ॥ शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान् ॥ तृप्तान् वृषान् वत्सतरान्गाश्च स्वोधोभरश्रमाः ॥ ३० ॥ प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहाम् ॥ भगवान् पूजयाञ्चक्रे आत्मशक्त्युपबृंहिताम् ॥ ३१ ॥ एवं निवसतोस्तस्मिन् रामकेशवयोर्व्रजे ॥ शरत् समभवद् व्यभ्रा स्वच्छाम्ब्वपरुषानिला ॥ ३२ ॥ शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः ॥ भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥ ३३ ॥

दधीति ॥ सङ्कर्षणेनान्वितः सहितः श्रीकृष्णः संभोजनीयैः सह भोजनयोग्यैः सखिभिर्गोपैः सह सलिलस्यान्तिके समीपे शिलायामुपविश्य गृहादुपानीतं दध्योदनं बुभुजे । अद्यापि कुण्डतटे भोजनस्थल्यो लोकैर्दृश्यन्ते ॥ २९ ॥ शाद्वलेति द्वयम् ॥ शाद्वलं हरिततृणविशिष्टो देशः तदुपरि संविश्य तृणं रोमन्थेन चर्वतः तृप्तान् मीलितेक्षणान् वृषान् वत्सतरान् दम्यान् स्वस्य ऊधसो भारेण श्रमो यासां ताः गाश्च वीक्ष्य तथा सर्वभूतानां मुदावहाम् आत्मनः शक्त्या आह्लादनीनाम्न्या उपबृंहितां संवर्द्धितां तां प्रावृट्श्रियं च वीक्ष्य भगवान् तां पूजयांचक्रे बहुमन्यत ॥ ३० ॥ ३१ ॥ एवमिति ॥ एवं क्रीडापरत्वेन तस्मिन् व्रजे रामकेशवयोर्निवसतोः सतोः विगतानि अभ्राणि यस्यां स्वच्छानि अम्बूनि यस्याम् अपरुषः शान्तः अनिलो यस्यां सा च सा च शरत्समभवत् ॥ ३२ ॥ शरदेति ॥ नीरजानां कुमुदादीनामुत्पत्तिर्यया तया शरदा हेतुना नीराणि प्रकृतिं स्वच्छतां मधुरतां च निजस्वभावं ययुः । यथा दुःसङ्गेन योगभ्रष्टानां चेतांसि पुनर्योगस्य भक्तियोगस्य नितरां सेवया प्रकृतिं स्वच्छतां यान्ति तद्वत् ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्योम्न इति ॥ यथा चतुर्णामाश्रमिणामशुभं कष्टं श्रीकृष्णे जाता भक्तिः हरति "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥" इत्याद्युक्तेः । तथा व्योमादीनां चतुर्णां मेघादिचतुरो मलान् शरदहरदित्यन्वयः । तथा हि यथा ब्रह्मचारिणो गुर्वर्थजलाहरणादिश्रमं भक्तिर्हरति तया परिपूर्णस्य कृतार्थस्य गुरुणा प्रयोजनाभावात् गुरुभिरपि तथाभूतस्यानियोगात् । एवं व्योम्नोऽब्दमावरकं मेघं शरज्जहार । अभ्रमित्यपि पाठः । यथा च गृहिणोऽपत्यादिसाङ्कर्यं श्राद्धादौ प्राप्तबन्धुसाङ्कर्यं च भक्तिर्हरति तत्साङ्कर्यस्य भजनविरोधित्वेन विविक्तवासरुच्युत्पत्तेः । तथाभूतानां शावल्यं संमर्दं शरदहरत् । वर्षासु वृष्टिभयेन सङ्कुला लोका वसन्ति । शरदि तु व्यवहर्तॄणां भिक्षूणां चैकत्रस्थितानां यथेष्टगमनात् । यथा च वनस्थस्य मलं केशनखादिधारणक्लेशं भक्तिर्हरति तद्रसिकस्य तत्राग्रहाभावात् तथा भुवः पङ्कं शरदहरत् । यथा च यतीनां कामादिवासनामलं तद्दूरीकरणार्थप्रयत्नं च भक्तिर्हरति तथा शुद्धचित्तस्य विरक्तस्य कृतकृत्यस्य कर्तव्याभावात् तथापां मलं शरदहरत् ॥३४॥

व्योम्नोऽब्दं भूतशावल्यं भुवः पङ्कमपां मलम् ॥ शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथाऽशुभम् ॥ ३४ ॥ सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ॥ यथा त्यक्तैषणाः शान्ता मुनयो मुक्तकिल्बिषाः ॥ ३५ ॥ गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम् ॥ यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥ ३६ ॥ नैवाविदन् क्षीयमाणं जलं गाधजलेचराः ॥ यथायुरन्वहं क्षय्यं नरा मूढाः कुटुम्बिनः ॥ ३७ ॥ गाधवारिचरास्तापमविन्दन् शरदर्कजम् ॥ यथा दरिद्रः कृपणः कुटुम्ब्यविजितेन्द्रियः ॥ ३८ ॥ शनैः शनैर्जहुः पङ्कं स्थलान्यामं च वीरुधः ॥ यथाहंममतां धीराः शरीरादिष्वनात्मसु ॥ ३९ ॥

सर्वस्वमिति ॥ जलदा मेघाः सर्वस्वं सर्वं जलं हित्वा शुभ्रं शुक्लं वर्चः कान्तिः येषां ते तथा सन्तो विरेजुः । यथा मुक्तं किल्बिषं कर्मवासनारूपं येषां ते मुनयः त्यक्ता पुत्रवित्तलोकैषणा यैस्ते अत एव शान्ता अक्षुभितचित्ताः राजन्ते तथा ॥३५॥ गिरय इति ॥ गिरयः शिवं तोयं निर्मलं जलं क्वचिन्मुमुचुः क्वचिच्च न मुमुचुः न पुनः प्रावृषीव सर्वतः । तथा ज्ञानिनो ज्ञानामृतं मोक्षसाधनं तत्त्वज्ञानं कस्मिंश्चिदेव काले कस्मैचिदधिकारिणे ददते । उपाध्यायाः कर्मविद्यामिव नहि सर्वेभ्यो ददते ॥३६॥ नेति ॥ गाधजलेचराः क्षुद्रजले वर्तमानाः अपि मत्स्यादयो जलमन्वहं क्षीयमाणं नैवाविदन् नैव ज्ञातवन्तः । "विद्लृ लाभे" लुङ् । औचित्यात् ज्ञाने वृत्तिः वेत्तेर्लङि जुसोऽभाव आर्षो वा । यथा मूढाः कुटुम्बिनो नराः आयुः अन्वहं क्षय्यं क्षीयमाणं न जानन्ति तथा ॥ ३७ ॥ गाधेति ॥ गाधे क्षुद्रे वारिणि चरन्तीति गाधवारिचरा मीनादयः शरदर्कजं तापमविन्दन् लेभिरे । यथा पूर्वं सम्पन्नः पश्चात् दरिद्रः कृपणः दीनः कुटुम्बी अविजितेन्द्रियश्च जनः संसारतापं लभते तथा ॥ ३८ ॥ शनैरिति ॥ यथा धीराः पुरुषाः शनैः शनैः अनात्मसु शरीरादिषु अहन्तां त्यजन्ति तथा वीरुधः आमतामपक्वतां जहुः । यथा ममतां जहति तथा स्थलानि पङ्कं जहुः ॥ ३९ ॥

१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निश्चलेति ॥ आत्मनि मनसि सम्यगुपरते विरक्ते सति मुनिर्यथा व्युपरतागमो निवृत्तवेदघोषो भवति ततः परमध्ययनाभावात्तथा शरदागमे सति निश्चलाम्बुः समुद्रस्तूष्णीमभूत् ॥ ४० ॥ केदारेभ्य इति ॥ केदारेभ्यः शालिक्षेत्रेभ्यः क्षरन्तीः अपो दृढैः सेतुभिः तन्निर्गममार्गनिरोधेन कर्षका अगृह्णन् ततः परं वृष्ट्यभावात् अरक्षन् । यथा प्राणैरिन्द्रियैः क्षुभितैर्द्वारभूतैः खेभ्यः स्रवज्ज्ञानं तन्निरोधेन इन्द्रियप्रत्याहारेण योगिनो रक्षन्ति तथा ॥ ४१ ॥ शरदिति ॥ यथा देहाभिमानजं तापमाध्यात्मिकादि त्रिविधं दुःखं बोधो हरति । यथा च स्वविरहजं योषितां तापं मुकुन्दो हरति तथा शरदर्कांशुजांस्तापान्भूतानां कर्षकादीनामुडुपश्चन्द्रोऽहरत् ॥ ४२ ॥ खमिति ॥ शब्दब्रह्मणो वेदस्यार्थान् पूर्वोत्तरमीमांसानिर्णीतान् दर्शयतीति तथा तत्सत्त्वयुक्तं चित्तं यथा शोभते तथा शरदा विमलाः तारका यस्मिंस्तत् निर्गता मेघा यस्मिंस्तत् खमाकाशमशोभत ॥ ४३ ॥ अखण्डेति ॥ यथा वृष्णिचक्रेण यादवसमूहेनावृतो यदुपतिः कृष्णो भुवि सुधर्मायां सभायां रराज तथा उडुगणैः सह अखण्डमण्डलः शशी पूर्णश्चन्द्रो

निश्चलाम्बुरभूत् तूष्णीं समुद्रः शरदागमे ॥ आत्मन्युपरते सम्यङ् मुनिर्व्युपरतागमः ॥ ४० ॥ केदारेभ्यस्त्वपोऽगृह्णन् कर्षका दृढसेतुभिः ॥ यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥ ४१ ॥ शरदर्कांशुजांस्तापान् भूतानामुडुपोऽहरत् ॥ देहाभिमानजं बोधो मुकुन्दो व्रजयोषिताम् ॥ ४२ ॥ खमशोभत निर्मेघं शरद्विमलतारकम् ॥ सत्त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम् ॥ ४३ ॥ अखण्डमण्डलो व्योम्नि रराजोडुगणैः शशी ॥ यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ॥ ४४ ॥ आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम् ॥ जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ॥ ४५ ॥ गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाऽभवन् ॥ अन्वीयमानाः स्ववृषैः फलैरीशक्रिया इव ॥ ४६ ॥ उदहृष्यन् वारिजानि सूर्योत्थाने कुमुद्विना ॥ राज्ञा तु निर्भया लोका यथा दस्यून् विना नृप ॥ ४७ ॥

व्योम्नि रराज ॥ ४४ ॥ आश्लिष्येति ॥ समः अन्यूनाधिकः शीतश्चोष्णश्च यस्तं प्रसूनपरिपूरितस्य वनस्य मारुतमाश्लिष्य जना घर्मजनितं तापं जहुः । गोप्यस्तु कृष्णेन हृतानि चेतांसि यासां तादृश्यः अतस्तं मारुतमाश्लिष्य तापं न जहुः । यद्वा नकार उपमार्थः । " तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ " इत्युक्तेः । तदा कृष्णहृतचेतसः चेतसा कृष्णमाश्लिष्य गोप्य इवेत्यर्थः । नेति काकुर्वा जहुरेवेत्यर्थः ॥ ४५ ॥ गाव इति ॥ गावो मृगाः मृग्यः पुंस्त्वमार्षम् । खगाः खग्यो नार्यश्च अनिच्छन्त्योऽपि शरदा निमित्तेन स्ववृषैः स्वपतिभिरन्वीयमाना संभोगार्थं बलादनुगम्यमानाः पुष्पिण्यो गर्भिण्योऽभवन् । यथा ईश्वराराधनार्थाः क्रियाः पतिस्थानीयेश्वरसंबन्धात् फलैः भोगादिभिः पुष्पिण्यो भवन्ति धर्मादिसर्वपुरुषार्थजनिका भवन्ति ॥ ४६ ॥ उदहृष्यन्निति ॥ हे नृप वारिजानि कमलानि सूर्योत्थाने सूर्य उदिते सति उदहृष्यन् प्रफुल्लितानि जातानि परंतु कुमुत् कुमुदं विना यथा धर्मात्मना राज्ञा सर्वे लोका जनाः निर्भया हृष्टा भवन्ति परंतु दस्यून् विना कुत्सिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुद्धरंयेति व्युत्पत्त्या रात्रौ विकासेन वा दस्युसाम्यम् ॥४७॥ पुरेति ॥ पुरेषु ग्रामेषु च आग्रयणैर्नवान्नप्राशनार्थैर्वैदिकैर्यज्ञैः । अत्र "नवान्नं नैव नन्दायां न प्रसुप्ते जनार्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत् ॥" इति निषेधात् प्रबोधिन्यन्तरवृश्चिके ज्ञेयम् । शरदनन्तरत्वात् शरद्व्यवहारः इन्द्रियैरिन्द्रियार्थैर्लौकिकैश्च महोत्सवैः हरेः कलाभ्याम-वलाराभ्यां रामकृष्णाभ्यां च दर्शनादिमहोत्सवैः पक्वसस्यैराढ्या संपन्ना भूः नितरामतिशयेन बभौ अशोभत । यद्वा । इन्द्रियैः इन्द्रदेवताकैः इन्द्रमखभङ्गात्पूर्वस्याः शरदो वर्णनमिदम् । कीदृशी भूः हरेः कला शक्तिः आभ्यां रामकृष्णाभ्यां हरेश्चन्द्रस्य कलाभ्यां शुक्लद्वितीया सायमुदिताभ्याम् उत्सवैः लोककृतैः यथा सैव भूरिति यथा शेषेण व्याख्याप्रक्रमस्वारस्यात् । " हरिश्चन्द्रार्कवाताश्च " इत्यादि मेदिनी ॥ ४८ ॥ वणिगिति ॥ वणिजो मुनयो नृपाः स्नातका वेदव्रतानुष्ठानोत्तरं कृतसमावर्त्तनाश्च वर्षेण वर्षा-कालेन रुद्धाः सस्यादिना मार्गप्रतिरोधेन हिंसाबाहुल्येन च प्रवृत्तौ प्रतिबद्धाः शरत्काले आगते सति स्वस्थानान्निर्गम्यार्थान् यथाक्रमेण वाणिज्यस्वाच्छन्द्यदिग्विजय-

पुरग्रामेष्वाग्रयणैरिन्द्रियैश्च महोत्सवैः ॥ बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ॥ ४८ ॥ वणिङ्मुनिनृपस्नाता निर्गम्याऽर्थान् प्रपे-दिरे ॥ वर्षरुद्धा यथा सिद्धाः स्वपिण्डान् काल आगते ॥ ४९ ॥ इति श्रीभागवते दशमस्कन्धे प्रावृट्शरद्वर्णनं नाम विंशोऽध्यायः ॥ २० ॥ श्रीशुक उवाच ॥ इत्थं शरत्स्वच्छजलं पद्माकरसुगन्धिना ॥ न्यविशद् वायुना वातं सगोगोपालकोऽच्युतः ॥ १ ॥ कुसुमि-तवनराजिशुष्मिभृङ्गद्विजकुलघुष्टसरःसरिन्महीध्रम् ॥ मधुपतिरवगाह्य चारयन् गाः सहपशुपालबलश्चुकूज वेणुम् ॥ २ ॥

विवाहोद्यमादीन् प्रपेदिरे प्राप्नुवन्त । यथा मन्त्रयोगादिसिद्धाः आयुषा प्रतिरुद्धाः अन्तकाले आगते स्वपिण्डान् स्वयोग्यान् देवादिदेहान् प्राप्नुवन्ति तथेति । वर्षशब्दः कालस्यापि वाची ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमविंशेऽध्याये व्यधादिमाम् ॥ २० ॥ एकविंशे हरेर्वेणुगीतं श्रुत्वा च गोपिकाः ॥ गीतेन तत्स्तुतिं चक्रुस्तत्र श्लोकास्तु विंशतिः ॥ उवाचेति द्वयं सार्द्धा एकत्रिंशदनुष्टुभः ॥ २१ ॥ इत्थमिति ॥ इत्थमेवंभूतं शरदा स्वच्छानि जलानि यस्मिन् तत् पद्माकरस्य तडागस्य सुगन्धिना वायुना वातं व्याप्तं वनं गावः गोपालकाश्च तत्सहितोऽच्युतो न्यविशत् । तङ्भाव आर्षः ॥ १ ॥ कुसुमितेति ॥ कुसुमितासु वनराजिषु ये शुष्मिणो मत्ताः भृङ्गाः द्विजाः पक्षिणश्च तेषां कलैर्मधुरध्वनिभिः कुलेति च पाठः समूहार्थः । घुष्टा नादिताः सरांसि सरितो महीध्राः पर्वताश्च यस्मिंस्तद्वनं पशुपालैर्बलेन च सहितो मधुपतिः श्रीकृष्णोऽवगाह्य प्रविश्य गाः चारयन् वेणुं चुकूज । अन्तर्भावितण्यर्थतया अवादयत् । वनावगाहे गोचारणे च पशुपालादिसाहित्यं नतु वेणुकूजने उत्तरपद्ये कृष्णस्य वेणुगीतमित्युक्तेः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ स्मरस्योदयो यस्मात् तत् कृष्णस्य वेणुगीतमाश्रुत्य तत्समीपं गत्वा तत्रत्यं वृत्तमनुभूयागत्य काश्चित् स्त्रियः परोक्षं यथा भवति तथा स्वसखीभ्योऽन्ववर्णयन्। यद्वा। परोक्षमिति तासां व्रजे स्थितत्वात् ॥ ३ ॥ तदिति ॥ हे नृप स्मरस्य वेगेन विक्षिप्तं व्याकुलं मनो यासां ताः कृष्णस्य चेष्टितं स्मरन्त्यः ता गोप्यः तत् कृष्णचेष्टितं वर्णयितुमारब्धाः आरब्धवत्योऽपि आदिकर्मणि कर्तरि क्तः। वर्णनं कर्तुं नाशकन् ॥ ४ ॥ मनःक्षोभहेतुं कृष्णं वर्णयति—बर्हापीडमिति ॥ द्वितीयान्तानां पदानां बिभ्रदित्यनेन संबन्धः । बर्हाणां मयूरपिच्छानाम् आपीडं शिरोभूषणं बिभ्रत् बर्हमापीडं यत्रेति वपुर्विशेषणं वा । नटवरम् इव वपुः बिभ्रत् कर्णयोः कर्णिकारं पद्माभं पीतपुष्पं बिभ्रत् । एकमेव कदाचिद्वामे कदाचिद्दक्षिणे इति यौवनमत्ततोक्ता । कनकमिव कपिशं पीतं वासः बिभ्रत् वैजयन्तीं पञ्चवर्णपुष्पग्रथितां मालां च बिभ्रत् अधरसुधया मुखवायुना वेणो रन्ध्रान् वंशीच्छिद्राणि पूरयन् वेणुं वादयन्नित्यर्थः । नूनमधरसुधा एव पूर्णाद्वेणोरुच्चलन्ती गीतवद्भाति इत्युत्प्रेक्षा सुधाशब्देन व्यज्यते । गोपानां

तद् व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम् ॥ काश्चित् परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥ ३ ॥ तद्वर्णयितुमारब्धाः स्मरन्त्यः कृष्णचेष्टितम् ॥ नाशकन् स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥ बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम् ॥ रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैर्वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ॥ ५ ॥ इति वेणुरवं राजन् सर्वभूतमनोहरम् ॥ श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेभिरे ॥ ६ ॥ गोप्य ऊचुः ॥ अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः ॥ वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ ७ ॥

वृन्दैः समूहैर्गीता कीर्तिर्यशो दैत्यवधस्वरक्षादिरूपा यस्य सः कृष्णः स्वपदैस्तत्र तत्राङ्कितैः रमणं रम्यं वृन्दारण्यं प्राविशत् ॥५॥ इतीति ॥ हे राजन् ततः स्मरवैयग्र्ये किंचिच्छान्ते एवंभूतं सर्वभूतानां मनोहरं वेणुरवं व्रजे स्थिताः सर्वाः स्त्रियः श्रुत्वा श्रीकृष्णगुणान्वर्णयन्त्यः अभिरेभिरे । पदे पदे परमानन्दमूर्तिं तं मनसा परिरब्धवत्यः । यद्वा । भगवद्ध्यानानन्दव्याप्ताः मिथः परिरेभिरे तन्मयतयाऽन्योन्यं कृष्णं मत्वा वा ॥ ६ ॥ अत्र गोप्य ऊचुरिति स्वामिपादानां न सम्मतम् । भावगोपनाय रामसहितं वर्णयन्ति—अक्षण्वतामिति ॥ हे सख्यः अनुवेणु वेणुमनुवर्तमानं वेणुं वादयत् इत्यर्थः । तथा अनुरक्तेषु कटाक्षाणां मोक्षो यस्मात् तत् वयस्यैः सखिभिः सह पशूननुनिवेशयतोर्व्रजेशस्य नन्दस्य सुतयो रामकृष्णयोर्वक्त्रं मुखं यैर्निपीतम् अक्षिभृङ्गैस्तन्माधुर्यमनुभूतं वाऽवधारणे तैर्यज्जुष्टं सेवितं प्राप्तं यत् इदमेव अक्षण्वतां चक्षुष्मतां चक्षुषो मुख्यं फलम् । छन्दस्यपीति टाद्यचं विनापि अक्ष्णोऽनङ् अनो नुडिति नुट् । अतः परमन्यदुत्कृष्टं फलं वयं न विदामः न विद्म इत्यर्थः । शबलुगभाव आर्षः । "तातं भवन्तं मन्वानः" इति वसुदेवोक्तेः । "रामोऽभिवाद्य पितरौ" इति शुकोक्तेश्च द्वयोरेव व्रजेशसुतत्वं तयोः प्रसिद्धमासीत् । व्रजेशसुतयोर्मध्येऽनु पश्चाद्वर्तिनः कृष्णस्येति वार्थः॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्या आहुः—चूतेति ॥ अत्र सर्वत्र वक्रीणीं भेदात् पूर्वापरसङ्गतिर्नापेक्षिता। चूतस्याम्रस्य प्रवालाः बर्हं पिच्छं स्तबकाः पुष्पगुच्छाः एतानि शिरसि उत्पले तदन्तःकोषौ कर्णयोः अब्जं लीलाकमलं दक्षिणकरे माला कण्ठे तैरनुपृक्ते ईषदन्तरान्तरतः मिलिते परिधाने नीलपीताम्बरे ताभ्यां विचित्रो वेषो ययोस्तौ रामकृष्णौ क्व च कदाचित् पशुपालानां गोष्ठ्यां सभायां मध्ये गायमानौ आर्षः शानच् चानश् वा। अथवा गाये गाने मानः गर्वो ययोः अलमत्यर्थं विरेजतुः। यथा रङ्गे मल्लयुद्धस्थानविशेषे नटसभायां यथा गायमानौ नटवरौ राजेते तथा अहो गोपानां पुण्यमिति भावः ॥ ८ ॥ गोप्य इति ॥ हे गोप्यः अयं वेणुः किं कुशलं पुण्यमाचरत् कृतवान्। यत् यस्मात् गोपिकानामपि दुर्लभां दामोदरस्याधरसुधां स्वयं स्वातन्त्र्येण अवशिष्टरसं सुधाभुक्त्वैव केवलं रसमात्रमार्द्रत्वमवशिष्टं यथा भवति तथा। यद्वा। न वशिष्टो रसोऽपि यत्र भागुरिमतेऽवस्याल्लोपः। यथेष्टं भुङ्क्ते। यासां पयसा पुष्टस्ता मातृतुल्या ह्रदिन्यः हृष्यत्त्वचो विकसितकमलवदनमिषेण रोमाञ्चिता इव लक्ष्यन्ते। यद्वा।

चूतप्रवालबर्हस्तवकोत्पलाब्जमालाऽनुपृक्तपरिधानविचित्रवेषौ ॥ मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रङ्गे यथा नटवरौ क्व च गायमानौ ॥ ८ ॥ गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम् ॥ भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथाऽऽर्याः ॥ ९ ॥ वृन्दावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदाम्बुजलब्धलक्ष्मि ॥ गोविन्दवेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्त्वम् ॥ १० ॥ धन्याः स्म मूढमतयोऽपि हरिण्य एता या नन्दनन्दनमुपात्तविचित्रवेषम् ॥ आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥ ११ ॥

यस्य वेणोरवशिष्टरसं ह्रदिन्योऽपि भुञ्जते अतो हृष्यत्त्वचः तथा येषां वंशे जातस्ते तरवोऽपि मधुधारामिषेण आनन्दाश्रु मुमुचुः मुञ्चन्त इव दृश्यन्ते। यथा आर्याः कुलवृद्धाः स्ववंशे भगवत्सेवकं लब्धतत्प्रसादं दृष्ट्वा यथा हृष्यत्त्वचोऽश्रु मुञ्चन्ति तथेत्यर्थः ॥ ९ ॥ वृन्दावनमिति ॥ हे सखि वृन्दावनं भुवः कीर्तिं यशः स्वर्गादिभ्योऽपि विशेषतः आधिक्येन तनोति विस्तारयति। यत् यस्मात् देवकीसुतस्य पदाम्बुजैस्तत्र तत्राङ्कितैर्लब्धा लक्ष्म्यः शोभाः येन तत् बहुवचने उरआदित्वाभावान्न कप्। अत्र यशोदैव देवकीनाम्ना गृह्यते। "द्वे नाम्नी नन्दजायाया यशोदा देवकीत्यपि।" इति बृहद्विष्णुपुराणात्। किंच। गोविन्दस्य वेणुमनु वेणुनिनादं श्रुत्वानन्तरं मन्दगर्जितं नीलमेघं तं मत्वा मत्ता ये मयूरास्तेषां नृत्यं प्रेक्ष्य सङ्घशस्तत्र तत्राद्रिसानुष्वपरतानि उपरतव्यापाराणि अन्यानि समस्तानि सत्वानि जन्तवो यस्मिंस्तादृशं भवति। नैतदन्यत्र विद्यतेऽतो भुवः कीर्तिं वितनोति ॥ १० ॥ धन्या इति ॥ हे सखि मूढमतयः तिर्यक्जातित्वेन विवेकहीना अप्येता हरिण्यो धन्याः कृतार्था एव। या वेणुरणितं वेणुनादमाकर्ण्य श्रुत्वा। रिफितमित्यपि पाठः। उपात्तः बर्हापीडादिना विचित्रो वेषो येन तं नन्दनन्दनं प्रति प्रणयसहितैरवलोकैर्विरचितां पूजां सम्मानं कृष्णसारैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वपतिभिः सहैव दधुः । अस्मत्पतयस्तु गोपाः क्षुद्राः तथा पूजां समक्षं न सहन्ते इत्याशयः ॥ ११ ॥ कृष्णमिति ॥ वनितानामुत्सवो यस्मात्तथाभूतं रूपं शीलं च यस्य तं श्रीकृष्णं निरीक्ष्य तेन क्वणितस्य वादितस्य वेणोर्विचित्रं गीतं च श्रुत्वा विमानगतयो विमानैर्गच्छन्त्यो देवाङ्गना अर्थात्पतिसहचरा अपि स्मरेण नुन्नः परिक्षिप्तः सारो धैर्यं यासां ताः भ्रश्यत्प्रसूनाः गलत्पुष्पाः कबराश्चूडा यासां ताः विगता नीव्यो वासांसि यासां ताः विगलद्वस्त्रानुसन्धानरहिताः सत्यः क्वभाव आर्षः । मुमुहुः ॥ १२ ॥ गावश्चेति ॥ गोविन्दं दृशा नेत्रमार्गेण आत्मनि मनसि स्पृशन्त्यः आलिंगन्त्य इति अत एव अश्रूणां कला बिन्दवो लोचनयोर्यासां ताः गावश्च । चकारादिदं विशेषणद्वयं वत्सानामपि लिङ्गविपरिणामेन कृष्णमुखान्निर्गतं वेणुगीतमेव पीयूषममृतं क्षरणशङ्कया इव उत्तभितैरुन्नमितैः कर्णरूपैः पुटैः पानपात्रैः पिबन्त्यस्तस्थुः । तथा स्तन्यपाने प्रवृत्ताः शावा वत्साश्च तद्गीतामृतमुत्तभितकर्णपुटैः पिबन्तः स्नुतपयःकवलाः स्तनेभ्यः क्षरितदुग्धग्रासमुखा एव तस्थुः विस्मृतपानक्रिया बभूवुः ॥ १३ ॥

कृष्णं निरीक्ष्य वनितोत्सवरूपवेषं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ॥ देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ १२ ॥ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबन्त्यः ॥ शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविन्दमात्मनि दृशाऽश्रुकलाः स्पृशन्त्यः ॥ १३ ॥ प्रायो बताऽम्ब विहगा मुनयो वनेऽस्मिन् कृष्णेक्षितं तदुदितं कलवेणुगीतम् ॥ आरुह्य ये द्रुमभुजान् रुचिरप्रवालान् शृण्वन्तिमीलितदृशो विगतान्यवाचः ॥ १४ ॥ नद्यस्तदा तदुपधार्य मुकुन्दगीतमावर्तलक्षितमनोभवभग्नवेगाः ॥ आलिङ्गनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णन्ति पादयुगलं कमलोपहाराः ॥ १५ ॥

प्राय इति ॥ हे अम्ब मातः इदं सखीः प्रत्यपि संबोधनम् । भावाविष्टप्रमदानां स्वभाव एवैषः अस्मिन्वने ये विहगाः पक्षिणस्ते प्रायेण मुनय एव भवितुमर्हन्ति ये विहगा रुचिराः प्रवालाः पल्लवा येषां तान् द्रुमभुजान् तरुशाखा आरुह्य स्वभोग्यफलादावनासक्ताः कृष्णस्येक्षितं दर्शनं यथा भवति तथान्यदर्शनवर्जनार्थं मीलितदृशः सङ्कुचितनेत्राः त्यक्तान्यवाचश्च सन्तस्तेनोदितं मधुरं वेणुगीतमेव शृण्वन्ति । मुनयोऽपि वेदद्रुमशाखामारुह्य तदुक्तकर्मफलपरित्यागेन रुचिरप्रवालस्थानीयानि कर्माणि एवोपाददानाः श्रीकृष्णदर्शनं यथा भवति तथा मीलितदृशश्च सन्तः श्रीकृष्णगीतमेव शृण्वन्ति । अत एते त एव भवितुमर्हन्ति ॥ १४ ॥ नद्य इति ॥ आस्तां चेतनानां कथा । नद्योऽपि तदा वेणुनादसमये मुकुन्दस्य वेणुगीतमुपधार्य श्रुत्वा आवर्त्तैः परिभ्रमैर्लक्षितेन सूचितेन मनोभवेन कामेन भग्नो वेगो यासां ताः आलिङ्गनेन स्थगितमाच्छादितं यथा भवति तथा ऊर्मय एव भुजाः तैः कमलोपहाराः कमलान्युपहरन्त्यः मुरारेः श्रीकृष्णस्य पादयुगलं गृह्णन्ति धारयन्ति । त्यक्तलज्जाधैर्यतया समुद्रं स्वं पतिं प्रत्यपि न गच्छन्ति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टेति ॥ आतपे घर्मे रामेण गोपैश्च सह व्रजपशून् सञ्चारयन्तमनु गवां पश्चाद्भागे वेणुमुदीरयन्तं श्रीकृष्णं दृष्ट्वा विद्युन्नयनैरिति शेषः । प्रथमं तदुपरि उदितः पुनः प्रेम्णा प्रवृद्धश्च अम्बुदो मेघः कुसुमावलीभिः पुष्पवृष्टिभिः सह सख्युः कृष्णस्योपरि स्वस्य वपुषा आतपत्रं व्यधात् छत्रं विहितवान् । लोकतापहरणादिसाम्यात् मेघस्य कृष्णसखत्वम् । देवैः कृता पुष्पवृष्टिर्मेघकृतत्वेनोक्ता । यद्वा । "मेघपुष्पं घनरसः" इति जलस्य मेघपुष्पत्वकथनात् जलकणा एव पुष्पत्वेनोक्ताः ॥ १६ ॥ पूर्णा इति ॥ पुलिन्द्यः शबराङ्गनाः पूर्णाः कृतार्थाः यतः प्रथमं दयितायाः प्रियाया गोप्याः स्तनयोर्मण्डितेन लिप्तेन ततश्च रतिसमये पादाभ्यां स्तनौ स्पृशतः । उरुगायस्य हरेः पदाब्जयो रागेणारुण्येन श्रीर्यस्य तादृशेन कुङ्कुमेन ततश्च हरेर्वनेषु चङ्क्रमणात् तृणरूषितेन तृणेषु लग्नेन तेन कुङ्कुमेन तस्य तृणलग्नकुङ्कुमस्य दर्शनेन स्मररुग् यासां ताः पुलिन्द्यः आननकुचेषु तत्कुङ्कुमं लिम्पन्त्यः तदाधिं तस्य स्मरस्याधिं व्यथां जहुः । अतः पुलिन्द्य एव कृतार्थाः । मादृश्यस्तु तादृशमाधिशसनमलभमानाः तदपेक्षयापि शोच्याः ॥ १७॥

दृष्ट्वाऽऽतपे व्रजपशून् सह रामगोपैः संचारयन्तमनुवेणुमुदीरयन्तम् ॥ प्रेमप्रवृद्ध उदितः कुसुमावलीभिः सख्युर्व्यधात् स्ववपुषाऽम्बुद आतपत्रम् ॥ १६ ॥ पूर्णाः पुलिन्द्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमण्डितेन ॥ तद्दर्शनस्मररुजस्तृणरूषितेन लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥ १७ ॥ हन्तायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः ॥ मानं तनोति सहगोगणयोस्तयोर्यत् पानीयसूयवसकन्दरकन्दमूलैः ॥ १८ ॥ गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ॥ अस्पन्दनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ १९ ॥

हन्तेति ॥ हन्तेति हर्षे हे अबलाः अयमद्रिर्गोवर्धनो ध्रुवं हरिदासेषु श्रेष्ठः यद्यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः तृणाद्युद्गमामिषेण रोमहर्षदर्शनात् । यस्माच्च गोभिर्गणेन सखिसमूहेन च सह वर्तमानयोस्तयो रामकृष्णयोः पानीयैः जलैः सूयवसैः शोभनतृणैः सुशब्दे दैर्घ्यमार्षम् । यद्वा । पानीयं सूयन्ते पानीयस्वः निर्झराः तैः कन्दरैः कन्दैर्मूलैश्च मानं सत्कारं तनोति करोति ॥ १८ ॥ गा इति ॥ हे सख्यः गोपकैः सह प्रतिवनं गाः नयतोश्चारयतोः निर्युज्यन्ते गावः आभिरिति निर्योगा दोहनवेलायां गवां पादबन्धनार्था रज्जवः पाशास्तु दुष्टगवामाकर्षणार्था रज्जवः तैः कृतं लक्षणं चिह्नं ययोः शिरसि निर्योगवेष्टनेन स्कन्धयोः पाशधारणेन च गोपपरिवृढश्रिया विराजमानयो रामकृष्णयोः कलानि मधुराणि पदानि येषु तैः अत एव उदारैः श्रोतृणां परमानन्दप्रदैर्वेणुस्वनैः तनुभृत्सु शरीरिषु ये गतिमन्तस्तेषाम् आ अस्पन्दनम् ईषदप्यचलनं स्थावरधर्मः अस्पन्दनमित्यपि पाठः । तथा तरूणां पुलको रोमाञ्चश्च जङ्गमधर्म इति इदं विचित्रमाश्चर्यम् । चक्रवर्ती तु निर्योगाख्यः पाशो निर्योगपाशः सच चपलानां वत्सानां दोहसमये गोवामजङ्घासङ्गता गलबन्धनरज्जुः तत्सदृशत्वादुष्णीषबन्धवस्त्रमत्र निर्योगपाशः सच मुक्तास्तबकजुष्टाग्रद्वयः पीतपटमयो गोपालधार्यः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवंविधा अन्याश्च वृन्दावनचारिणः भगवतः क्रीडास्ताश्च मिथः परस्परं वर्णयन्त्यो गोप्यस्तन्मयतां श्रीकृष्णैकानुसन्धानपरतां ययुः । यद्वा । क्रीडाः वर्णयन्त्यः क्रीडामयतां क्रीडाप्राचुर्यं प्रापुः रहसि भगवता रेमिरे । अस्यां व्याख्यायां मूलं तु अग्रिमग्रन्थे यर्ह्यम्बुजाक्षेति श्लोके त्वयाभिरमिता इत्युक्तिः ॥ २० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्यैकविंशे व्यधादिमाम् ॥ २१ ॥ द्वाविंशे गोपकन्यानां वासो हृत्वा वरप्रदः ॥ यज्ञशालामगात्कृष्णः श्लोकाः सार्द्धा गजाग्नयः ॥ त्रीण्युवाचेति वाक्यानि चत्वारिंशदनुष्टुभः ॥ २२ ॥ व्यूढानां गोपीनां कृष्णेऽनुरागमुक्त्वाऽनूढानामप्याह । वर्गद्वयं चेदम् "युवतीर्गोपकन्याश्च रात्रौ संकल्प्य कालवित् ।" इत्यादिना हरिवंशे स्पष्टम् । हेमन्त इति ॥ हेमन्ते ऋतौ तस्यापि मासद्वयात्मकत्वात् प्रथमे मार्गशीर्षे मासि नन्दस्य व्रजराजस्य ये वशवर्तिनो गोपास्तेषां कुमारिकाः सगोत्रत्वादिसंबन्धहीनाः कन्याः । नन्दव्रजेत्यपि पाठः । हविष्यान्नं नीवारान् भुञ्जानाः स्वीकृताहारादिनियमाः सत्यः कात्यायन्या देव्या अर्चनं

एवंविधा भगवतो या वृन्दावनचारिणः ॥ वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ २० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे एकविंशतितमोऽध्यायः ॥ २१ ॥ श्रीशुक उवाच ॥ ॥ हेमन्ते प्रथमे मासि नन्दव्रजकुमारिकाः ॥ चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम् ॥ १ ॥ आप्लुत्याम्भसि कालिन्द्या जलान्ते चोदितेऽरुणे ॥ कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीम् ॥२॥ गन्धैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः ॥ उच्चावचैश्चोपहारैः प्रवालफलतण्डुलैः ॥३॥ कात्यायनि महामाये महायोगिन्यधीश्वरि ॥ नन्दगोपसुतं देवि पतिं मे कुरुते नमः ॥ इति मन्त्रं जपन्त्यस्ताः पूजां चक्रुः कुमारिकाः ॥४॥ एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः ॥ भद्रकालीं समानर्चुर्भूयान्नन्दसुतः पतिः ॥ ५ ॥

व्रतं चेरुः ॥ १ ॥ आप्लुत्येति द्वयम् ॥ हे नृप अरुणे उदिते अरुणोदयवेलायां कालिंन्द्याः अम्भसि आप्लुत्य स्नात्वा जलान्ते जलस्य तीरे सैकतीं वालुकामयीं प्रतिकृतिं कात्यायनीप्रतिमां कृत्वा तां देवीं सुरभिभिरिति यथोचितं सर्वत्रान्वेति । गन्धैश्चन्दनादिभिः माल्यैः पुष्पैः बलिभिरिति यान् अग्रे निधाय प्रणामः क्रियते तैर्नालिकेरादिभिः धूपदीपकैश्च उच्चावचैरुत्तममध्यमैरन्यैश्च यथासम्भवप्राप्तैर्वस्त्राभरणादिभिः उपहारैर्नैवेद्यैः प्रवालैर्नवपल्लवैः फलैः तण्डुलैश्च आनर्चुः पूजयामासुः ॥ २ ॥ ३ ॥ कात्यायनीति सार्द्धम् ॥ हे कात्यायनि महामाये महायोगिनि अधीश्वरि देवि नन्दगोपसुतं मे मम पतिं कुरु ते तुभ्यं नमः । मे इति प्रत्येकं पाठाभिप्रायेणैकत्वम् । एभिर्विशेषणैस्त्वं कृष्णेन सह गान्धर्वं विवाहं कारय पित्रादयो यथा न जानीयुस्तथा नित्यमङ्गसङ्गं च सम्पादयेति बोध्यते । इति एवं प्रार्थनापूर्वकनमस्कारात्मकं मन्त्रं जपन्त्यस्ताः कुमारिकाः पूजां चक्रुः ॥ ४ ॥ एवमिति ॥ कृष्णे चेतांसि यासां ताः कुमार्यः एवं मासपर्यन्तं व्रतमाहारादिनियमं चेरुः चक्रुः । नन्दसुतोऽस्माकं पतिर्भूयादिति वाञ्छन्त्यः इति संकल्प्येति शेषो वा । भद्रकालीं कात्यायन्यपरनाम्नीमानर्चुश्च ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतस्य पूर्वाङ्गमाह—उषसीति ॥ अन्वहं प्रतिदिनमुषसि प्रातःकाले उत्थाय स्वैः गोत्रैस्तत्तन्नामभिरन्याः प्रतिबोध्येति शेषः । यद्वा स्वैः गोत्रवर्गैः सह अन्योन्या बद्धबाहवः परस्परं गृहीतहस्ताः कालिन्द्यां स्नातुं यान्त्यो गच्छन्त्यः उच्चैः कृष्णं जगुः ॥ ६ ॥ नद्यामिति ॥ कदाचिदिति व्रतपूर्तिदिने पौर्णमास्यां पूजासमाप्त्यनन्तरमवभृथस्नानदिनस्यायं जलविहारः पूर्ववन्नद्यामागत्य तत्तीरे वासांसि निक्षिप्य मुदा कृष्णमेव गायन्त्यः सलिले विजह्रुः ॥ ७ ॥ भगवानिति ॥ योगेश्वरेश्वरो भगवान् कृष्णः तत् तासां स्वप्राप्त्यर्थं देव्याराधनमभिप्रेत्य ज्ञात्वा तासां कर्मणः सिद्धये फलदानाय वयस्यैर्वृतस्तत्रागतः वयस्या अत्र हसद्भिः प्रहसन् बालैरित्युत्तरश्लोकोक्ता बाला एव द्वित्रिवर्षवयस्काः स्त्रीपुंसभेदविवेकशून्या दिग्वाससः गोचारणे प्रेम्णा कृष्णसङ्गमत्यजन्तो ज्ञेयाः । यदुक्तं क्रमदीपिकायाम् । " जङ्घान्तपीवरकटीरतटीनिबद्धव्यालोलकिङ्किणिघटाघटितै रटद्भिः । मुग्धैस्तरक्षुनखकल्पितकण्ठभूषैरव्यक्तमञ्जुवचनैः पृथुकैः परीतम् ॥ " इति । तोषण्यां तु श्रीकृष्णस्यान्तःकरणरूपाः दामसुदामवसुदामकिङ्कणयो

उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः ॥ कृष्णमुच्चैर्जगुर्यान्त्यः कालिन्द्यां स्नातुमन्वहम् ॥ ६ ॥ नद्यां कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् ॥ वासांसि कृष्णं गायन्त्यो विजह्रुः सलिले मुदा ॥ ७ ॥ भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः ॥ वयस्यैरागतस्तत्र वृतस्तत्कर्मसिद्धये ॥ ८ ॥ तासां वासांस्युपादाय नीपमारुह्य सत्वरः ॥ हसद्भिः प्रहसन् बालैः परिहासमुवाच ह ॥ ९ ॥ अत्रागत्याबलाः कामं स्वं स्वं वासः प्रगृह्यताम् ॥ सत्यं ब्रुवाणि नो नर्म यद्यूयं व्रतकर्शिताः ॥ १० ॥ न मयोदितपूर्वं वा अनृतं तदिमे विदुः ॥ एकैकशः प्रतीच्छध्वं सहैवोत सुमध्यमाः ॥ ११ ॥ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः ॥ व्रीडिताः प्रेक्ष्य चान्योऽन्यं जातहासा न निर्ययुः ॥ १२ ॥

गौतमीयतन्त्रोक्ताः इत्युक्तम् ॥ ८ ॥ तासामिति ॥ तत्रागत्य च तासां वासांस्युपादाय सत्वरः नीपं कदम्बमारुह्य हसद्भिः बाल्यान्निष्कारणहास्यवद्भिः बालैः सह स्वयमपि प्रहसन् परिहासवचनमुवाच ॥ ९ ॥ अत्रेति ॥ हे अबलाः अनेन मद्वचनाकरणे युष्माभिः किं कर्तुं शक्यमित्युक्तम् । अत्रागत्य कामं यथेष्टं स्वं स्वं वासः प्रगृह्यताम् । इदं सत्यमेव ब्रुवाणि । उकारस्वरवानार्षः पाठः । ब्रवाणीत्यपि पाठः । नो नर्म नेदं परिहासवाक्यम् । यत् यस्मात् यूयं व्रतेन कर्शिताः श्रान्ताः एवंभूतासु नर्मवचनं नोचितमित्याशयः ॥ १० ॥ नेति ॥ हे सुमध्यमाः मया अनृतं नोदितपूर्वं मया पूर्वं कदाप्यनृतं नोक्तमित्यर्थः । उदितपूर्वमित्यत्र सुप्सुपेति समासः । तत् अनृतस्यानुक्तपूर्वत्वम् । इमे गोपा विदुर्जानन्ति । बालानां यथा दृष्टग्राहिस्वभावत्वादेते पृच्छ्यन्ताम् अतो यदि मत्तः शङ्कध्वे तर्हि एकैकशोऽत्रागत्य वासांसि प्रतीच्छध्वं तङार्षः स्वीकुरुत । प्रथममवरा काचिदागच्छतु ततः क्रमेणान्या इति यदि प्रथमायै न दद्यां तर्ह्यन्याभिर्नागन्तव्यमिति । उत अथवा सहैवागत्येति अत्र नास्माकमाग्रहः ॥ ११ ॥ तस्येति ॥ तत् वस्त्रहरणादिरूपं तस्य क्ष्वेलितं परिहासं दृष्ट्वा प्रेम्णा परिप्लुताः व्याप्ताः अन्योन्यं प्रेक्ष्य व्रीडिताश्च जातो हासो यासां ता गोप्यो जलाद्बहिर्न निर्ययुः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ गोविन्दे श्रीकृष्णे एवं मुहुर्ब्रुवति सति नर्मणा तत्परिहासवाक्येन आक्षिप्तम् आकृष्टं चेतो यासां ताः शीतोदके आकण्ठं मग्नाः अत एव वेपमानाः गोप्यस्तं कृष्णमब्रुवन् ॥१३॥ मा इति ॥ तत्र मुग्धाः प्राहुः स्म । यद्वा । प्रथमं साम्ना प्राहुः स्म । अङ्ग भोः कृष्ण अनयमन्याय्यं मा कृथाः । नन्दगोपसुतं प्रियं व्रजे श्लाघ्यं त्वां तु वयं जानीमः अतोऽस्मद्वासांसि देहि यतो वयं शीतेन वेपिताः स्मः ॥ १४ ॥ श्यामेति ॥ हे श्यामसुन्दर वयं ते दास्यः स्मः दन्त्यसकारवान् पाठश्चित्सुखसम्मतस्तत्र हे सुंदर ते दास्यः स्यामेति स्वात्मार्पणं कृतवत्यः अतः तवोदितं करवाम एव । अतो हे धर्मज्ञ स्त्रीधनहरणे तवाधर्मो भवितेत्याशयः । "न नग्नां स्त्रियमीक्षेत" इति निषेधाच्चेति । अतः वासांसि देहि काश्चित्प्रौढा आहुः । यद्वा । भयं दर्शयन्ति हे इत्यव्ययम् । चेद्यदि वासांसि नो दास्यसि तर्हि राज्ञे कंसाय नन्दाय वा इदं वृत्तं ब्रुवाम कथयाम । उकारवान् पाठस्त्वार्ष एव ॥ १५ ॥ तदुक्त्यैव ता निरुत्तरयति—भवत्य इति ॥ हे शुचिस्मिताः भवत्यः यदि सत्यमेव मे दास्यः स्थ मदुक्तं च सत्यमेव करिष्यथ तदा अत्रागत्य

एवं ब्रुवति गोविन्दे नर्मणाऽऽक्षिप्तचेतसः ॥ आकण्ठमग्नाः शीतोदे वेपमानास्तमब्रुवन् ॥ १३ ॥ माऽनयं भोः कृथास्त्वां तु नन्दगोपसुतं प्रियम् ॥ जानीमोऽङ्ग व्रजश्लाघ्यं देहि वासांसि वेपिताः ॥ १४ ॥ श्यामसुन्दर ते दास्यः करवाम तवोदितम् ॥ देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे ॥ १५ ॥ श्रीभगवानुवाच ॥ भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ ॥ अत्रागत्य स्ववासांसि प्रतीच्छन्तु शुचिस्मिताः ॥ १६ ॥ ततो जलाशयात् सर्वा दारिकाः शीतवेपिताः ॥ पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्शिताः ॥ १७ ॥ भगवानाहता वीक्ष्य शुद्धभावप्रसादितः ॥ स्कन्धे निधाय वासांसि प्रीतः प्रोवाच सस्मितम् ॥ १८ ॥ यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनम् ॥ बद्ध्वाञ्जलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमोऽधो वसनं प्रगृह्यताम् ॥ १९ ॥

स्ववासांसि प्रतीच्छन्तु गृह्णन्तु । एतेनैव भवतीनां सत्यपरीक्षा भविष्यति सत्यं त्यजन्तीभ्यस्तु न दास्य इत्याशयः । शुचिस्मिताः भूत्वा प्रतीच्छन्तु मुखे म्लाने तु न दास्यामीति च ॥ १६ ॥ तत इति ॥ ततः कृष्णस्याग्रहं दृष्ट्वेत्यर्थः । मनुष्यान्तरागमनशङ्कयापिचेति । बहिः शीतेन वेपिताः अन्तश्च शीतेन कर्शिताः क्लिष्टाः सर्वा दारिकाः स्वस्वपाणिभ्यां योनिमाच्छाद्य ततो जलाशयात् प्रोत्तेरुः निर्जग्मुः ॥ १७ ॥ भगवानिति ॥ ततस्तासां शुद्धभावेन प्रसादितः अत एव तासु प्रीतः भगवान् आहताः हन्तेर्गत्यर्थकत्वात् । आगताः कुमारिका वीक्ष्य वासांसि कदम्बादादाय स्वस्कन्धे निधाय भवतीनामधो वस्त्राण्यप्यहं स्कन्धे निदधामीति दर्शयन् सस्मितं यथा तथा न्यायनिष्ठुरमिद प्रोवाच । आहता लज्जात्यागेन आ सम्यक् मृता इव वीक्ष्येति परे । अर्थान्तरं त्वश्लीलम् ॥ १८ ॥ यूयमिति ॥ धृतव्रताः सत्योऽपि यूयं विवस्त्राः सत्यो यदपो व्यगाहत विशेषेण आलोडितवत्यः तङ्भाव आर्षः । तदेतत् देवस्य हेलनं व्रतवैगुण्यसम्पादकः जलाधिष्ठातुर्वरुणस्य अपराध एव । उ एवार्थे । तस्य प्रायश्चित्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिवाह । अतः अंहसः पापस्यापनुत्तये निवृत्त्यर्थं मूर्ध्न्यञ्जलिं बद्ध्वा अधो नमः प्रणामं कृत्वा वसनं प्रगृह्यताम् । यद्वा । नमः कृत्वा अधोवसनं प्रगृह्यताम् उत्तरीयाणि तु स्वयं धारयिष्यामीति हासः । मूर्ध्नीति अञ्जलिमिति च एक हस्तमात्रेण केवलमूर्ध्ना च प्रणामं निरस्यति । अधो नम इति लज्जाहापनप्रह्वीकाराद्यर्थम् । यद्यपि देशाचाराद्बाल्याद्वा दोषाभावस्तथापि व्रतभङ्गदोषनिवृत्तिः कार्यैव ॥ १९ ॥ इतीति ॥ इत्येवं दोषत्वेन अच्युतेनाभिहितं कथितं विवस्त्राप्लवनं नग्नस्नानं व्रतस्य च्युतिं च्युतिहेतुं मत्वा तस्य व्रतस्य पूर्तिकामाः तस्य व्रतस्य अशेषाणामन्येषां च कर्मणां साक्षात्कृतं फलरूपं तं कृष्णमेव नेमुः । यतो यस्मात् अवद्यमृक् सर्वदोषमार्जनं भवति भावे क्विप् । मृजेः षत्वाभाव आर्षः । स एवावद्यमृक् दोषमार्जक इति कर्त्तरि वा क्विप् ॥ २० ॥ ता इति ॥ तथा स्वोक्तप्रकारेणावनतास्ताः कुमारिका दृष्ट्वा तेन प्रणामेन तोषितः करुणो दयालुर्भगवान् देवकीसुतः कृष्णो नीपादवरुह्य प्रेम्णा सम्बोध्य ताभ्यो वासांसि प्रायच्छत् प्रददौ ॥ २१ ॥ दृढमिति ॥ यद्यपि दृढमत्यर्थं प्रलब्धाः यूयं विवस्त्राः इत्या-

इत्यच्युतेनाभिहितं व्रजाबला मत्वा विवस्त्राऽऽप्लवनं व्रतच्युतिम् ॥ तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः ॥ २० ॥
तास्तथावनता दृष्ट्वा भगवान् देवकीसुतः ॥ वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः ॥ २१ ॥ दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तो-
भिताः क्रीडनवच्च कारिताः ॥ वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन् प्रियसङ्गनिर्वृताः ॥ २२ ॥ परिधाय स्ववासांसि प्रेष्ठसङ्गमस-
ज्जिताः ॥ गृहीतचित्ता नो चेलुस्तस्मिँल्लज्जायितेक्षणाः ॥२३॥ तासां विज्ञाय भगवान् स्वपादस्पर्शकाम्यया ॥ धृतव्रतानां संकल्पमाह दामो-
दरोऽबलाः ॥ २४ ॥ संकल्पो विदितः साध्व्यो भवतीनां मदर्चनम् ॥ मयाऽनुमोदितः सोऽसौ सत्यो भवितुमर्हति ॥ २५ ॥

दिनाधिक्षिप्ताः त्रपया लज्जया अवहापिताः त्याजिताः अत्रागत्य स्ववासांसि प्रतीच्छन्त्वित्यादिना ग्रहेण प्रस्तोभिताः सत्यं ब्रवाणि नो नर्मेत्यादिना उपहसिताः क्रीडनवच्च कारिताः बद्ध्वाञ्जलिमित्यादिना प्रायश्चित्तव्याजेन वासांसि च तासाम् अपहृतानि तथापि प्रियस्य कृष्णस्य सङ्गेन निर्वृताः परमानन्दयुक्तास्ताः कुमारिकाः अमुं कृष्णं नाभ्यसूयन् उक्तदोषदृष्ट्या नापश्यन् । प्रियकृतं दुःखदानमपि सुखत्वेनैवानुभूयते ॥ २२ ॥ परिधायेति ॥ ततः स्वस्ववासांसि परिधाय तस्मिन् श्रीकृष्णविषये लज्जायितं लज्जाविलसितमीक्षणं यासां तथाभूता । लज्जायितमिति लज्जतेः पचाद्यजन्तात् क्यङ् क्तः । कृष्णेन गृहीतचित्ताः प्रेष्ठस्यातिप्रियस्य कृष्णस्य सङ्गमेन सज्जिता वशीकृतास्ताः ततः स्थानान्नो चेलुः यथा कृष्णेन तासां स्वस्मिन्नासक्तिर्ज्ञाता तथा ताभिरपि आत्मसु कृष्णस्याप्यासक्तिः कात्यायनीप्रसादात् ज्ञातेति लज्जोत्पत्तिः ॥ २३ ॥ तासामिति ॥ दामोदरो भक्तवत्सलो भगवान् पतिभावेन स्वपादस्पर्शकाम्यया तदिच्छया धृतव्रतानां तासां सङ्कल्पमभीष्टं विज्ञाय ताः अबलाः प्रति प्राह स्म ॥ २४ ॥ संकल्प इति ॥ हे साध्व्यः मदर्चनं मदङ्गसङ्गरूपो भवतीनां सङ्कल्पः । युष्माभिर्लज्जया अकथितोऽपि मया विदितः मयानुमोदितः अङ्गीकृतश्च । अतः सोऽसौ सङ्कल्पः सत्यः सफलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवितुमर्हति । अर्हतीति सम्भावनोक्त्या आत्यन्तिको न भविष्यति इति सूचितम् ॥ २५ ॥ न मयीति ॥ मयि आवेशिता धीर्यैस्तेषां कामः विषयभोगसङ्कल्पः कामाय पुनः संसारविषयभोगाय न कल्पते विषयमहिम्ना कामस्यापि शान्तिहेतुत्वात् । यथा भर्जिता दग्धाक्कथिता रन्धिता वा पूर्वं भर्जिता ततो रन्धिता वा धाना यवादिरूपा यथा प्रायो बीजाय पुनरङ्कुरोत्पादनाय नेष्यते नाङ्गीक्रियते किं त्वास्वादमात्रार्था भवति । धाना इत्येकत्वमार्षमाहुः । धाना इति नेशते इति च बहुवचनपाठे नेशते न समर्था भवन्ति । प्राय इति स्वेच्छया प्ररोहमपि सूचयति ध्रुवादीनां तथादर्शनात् इति स्वामिपादाः ॥२६॥ यातेति ॥ हे अबलाः हे सतीः सत्यः पूर्वसवर्णदीर्घ आर्षः । यूयं सिद्धाः पूर्णमनोरथाः स्थ यत् मया सह रमणमुद्दिश्य संकल्प्य भवत्य इति शेषः । आर्यायाः कात्यायन्या अर्चनरूपम् इदं व्रतं चेरुः कृतवत्यस्तत इमा आगामिनीः शरद्रात्रीर्मया सह रंस्यथ रमणं प्राप्स्यथ रासानन्तरमेव तासां सायुज्यं बोध्यम् ॥ २७ ॥ इतीति ॥ इत्येवं भगवता आदिष्टा आज्ञप्ताः लब्धकामाः प्राप्तमनोरथाश्च कुमारिकाः तत्पार्श्वस्य

न मय्यावेशितधियां कामः कामाय कल्पते ॥ भर्जिताः क्वथिता धानाः प्रायो बीजाय नेष्यते ॥ २६ ॥ याताऽबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः ॥ यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः ॥ २७ ॥ श्रीशुक उवाच ॥ इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः ॥ ध्यायन्त्यस्तत्पदाम्भोजं कृच्छ्रान्निर्विविशुर्व्रजम् ॥ २८ ॥ अथ गोपैः परिवृतो भगवान् देवकीसुतः ॥ वृन्दावनाद्गतो दूरं चारयन् गाः सहाग्रजः ॥ २९ ॥ निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः ॥ आतपत्त्रायितान् वीक्ष्य द्रुमानाह व्रजौकसः ॥ ३० ॥ हे स्तोक कृष्ण हे अंशो श्रीदामन् सुबलार्जुन ॥ विशालर्षभ तेजस्विन् देवप्रस्थ वरूथप ॥ ३१ ॥ पश्यतैतान्महाभागान् परार्थैकान्तजीविनः ॥ वातवर्षातपहिमान् सहन्तो वारयन्ति नः ॥ ३२ ॥

दुस्त्यजत्वात् कृच्छ्रात् महता कष्टेन तस्य पदाम्भोजं ध्यायन्त्यो व्रजं निर्विविशुः ॥ २८ ॥ अथेति ॥ अथ हेमन्तादिऋतुत्रयात्परं ग्रीष्मे आगते गोपैः परिवृतः सहाग्रजश्च भगवान् देवकीसुतः कृष्णो गाश्चारयन् वृन्दावनाद्दूरङ्गतः काम्यकवने गाश्चारयित्वा गवां जलपानार्थं व्रजोत्तरभागे यमुनां गतः तच्च मध्याह्ने व्रजादानेयभोज्यवञ्चनार्थं तदपि यज्ञपत्नीनामनुग्रहार्थम् ॥ २९ ॥ निदाघेति ॥ तिग्मे अत्युष्णे निदाघार्कस्यातपे स्वाभिः छायाभिरात्मनः स्वस्य आतपत्रायितान् छत्राकारेण स्थितान् वृक्षान् वीक्ष्य भगवान् व्रजौकसो गोपान् प्रत्याह स्म ॥३०॥ हे स्तोकेति ॥ हे स्तोक कृष्ण इत्यादि दश संबोधनानि । अत्र स्तोककृष्णादयोऽष्टावष्टसु दिक्षु कृष्णरक्षणे स्थिताः देवप्रस्थवरूथपौ छत्रधारकवर्त्मशोधकौ एकादशो भद्रसेनस्तु गोपसेनाध्यक्षः सर्वावेक्षकस्तदा दूरे स्थित इति ॥ ३१ ॥ वक्ष्यमाणानां यज्ञस्थविप्राणां दौष्ट्यमभिप्रेत्य वृक्षान् स्तौति—पश्यतेति ॥ परार्थमेवैकान्तेन निश्चयेन जीवितं येषां तान् एतान् महाभागान् वृक्षान् यूयं पश्यत एते स्वयं वातवर्षातपहिमान् पुंस्त्वमार्षम् । सहन्तोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोऽस्माकं वातादीन् वारयन्ति ॥ ३२ ॥ अहो इति ॥ अहो सर्वप्राणिनामुपजीवनं जीवनसाधनमेषां जन्म वरम् । जीविनामिति पाठे ण्यन्ताण्णिनिः । यथा सुजनस्य कृपालोर्गृहे आगताः अर्थिनो जना विमुखा निष्फला न यान्ति तथा येषां वृक्षाणां स्थाने आगता जना विमुखा नैव यान्ति ॥ ३३ ॥ पत्रेति ॥ एते वृक्षाः पत्रपुष्पादिभिर्जनानां कामान् मनोरथान् वितन्वते पूरयन्ति । निर्यासो घनीभूतो रसः अस्थिसारांशः तोक्माः पल्लवाद्यङ्कुराः ॥ ३४ ॥ एतावदिति ॥ यत्सदा प्राणैः अर्थैः धिया हितचिन्तनेन वाचा च देहिषु श्रेय एवाचरेत् । एतावत् एवेह संसारे देहिनां जन्मनः साफल्यम् ॥ ३५ ॥ इतीति ॥ इत्येवं वृक्षानभिनन्दन् भगवान् प्रवालादीनामुत्करैः समूहैर्नम्राः शाखा येषां तेषां तरूणां मध्येन एतेन आतपाभावः सूचितः । यमुनां गतः तत्र प्रवालाः पल्लवाः स्तबकाः पुष्पादिगुच्छाः फलपुष्पाणि तथा दलानि पुष्पपत्राणि ॥ ३६ ॥

अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ॥ सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥ ३३ ॥ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ॥ गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते ॥ ३४ ॥ एतावज्जन्मसाफल्यं देहिनामिह देहिषु ॥ प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत् सदा ॥ ३५ ॥ इति प्रवालस्तवकफलपुष्पदलोत्करैः ॥ तरूणां नम्रशाखानां मध्येन यमुनां गतः ॥३६॥ तत्र गाः पाययित्वाऽपः सुमृष्टाः शीतलाः शिवाः ॥ ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलम् ॥ ३७ ॥ तस्या उपवने कामं चारयन्तः पशून्नृप ॥ कृष्णरामावुपागम्य क्षुधार्ता इदमब्रुवन् ॥ ३८ ॥ इति श्रीभागवते दशमस्कन्धे पूर्वार्धे कृष्णयमुनागमनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ गोपा ऊचुः ॥ ॥ राम राम महावीर्य कृष्ण दुष्टनिबर्हण ॥ एषा वै बाधते क्षुन्नस्तच्छान्तिं कर्तुमर्हथः ॥ १ ॥ श्रीशुक उवाच ॥ ॥ इति विज्ञापितो गोपैर्भगवान् देवकीसुतः ॥ भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् ॥ २ ॥

तत्रेति ॥ हे नृप तत्र यमुनायां गोपाः सुमृष्टाः स्वच्छाः शीतलाः शिवाः आरोग्यकरीः अपः गाः पाययित्वा ततस्तदनन्तरं स्वयमपि स्वादु जलं कामं यथेष्टं पपुः । पुनर्विशेषयितुं जलस्यपुनरुक्तिर्न दोषः ॥ ३७ ॥ तस्या इति ॥ हे नृप तस्या यमुनाया उपवने कामं यथेच्छं पशून् चारयन्तः क्षुधार्ता गोपाः कृष्णरामावुपागम्य इदं वक्ष्यमाणमब्रुवन् । कुमारिकाभ्यः पूर्वमेवागृहीतभोज्यानामेव गृहान्निर्गमात् अत्रानवसरेऽध्यायसमाप्तिः श्रीशुकस्योत्तरलीलास्मरणेन स्तब्धीभावात् । एवमन्यत्रापि ॥ ३८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमद्वाविंशे निरमादिमाम् ॥ २२ ॥ त्रयोविंशे यज्ञपत्न्यनुग्रहोऽन्नार्थनामिषात् ॥ अनुतापस्तत्पतीनां तत्र श्लोका भुजेषवः ॥ उवाचपर्श्वकं सार्द्धाः शरवीर्णा अनुष्टुभः ॥ २३ ॥ रामेति ॥ हे रामेत्यादिसम्बुद्धयः । एषा क्षुत् नोऽस्मान् बाधते अतस्तस्याः शान्तिं कर्तुं युवामर्हथ ॥ १ ॥ इतीति ॥ इत्येवं गोपैर्विज्ञापितः प्रार्थितो भगवान् देवकीसुतः भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् । एकत्वं जात्यभिप्रायेण सद्यःसायुज्याभिप्रायेण वा । एकस्यास्तु भवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यन्तीं दशमीं दशामनुस्मृत्य प्रकर्षेण सीदन्निति द्वितीयस्याप्यर्थस्य लाभाय एकत्वमिति केचित् ॥ २ ॥ प्रयातेति ॥ हे गोपाः यत्र ब्रह्मवादिनः ब्राह्मणाः स्वर्गकाम्यया स्वर्गप्राप्तीच्छया आङ्गिरसं नाम सत्रं यागमासते अनुतिष्ठन्ति तत् देवयजनं यज्ञवाटं प्रयात गच्छत ॥ ३ ॥ तत्रेति ॥ हे गोपाः आवाभ्यां विसर्जिताः प्रहिताः अतो युष्माकं का लज्जा यूयं तत्र गत्वा भगवत आर्यस्य बलदेवस्य मम च अभिधां नाम कीर्त्तयन्तः सन्तः ओदनं याचत ॥ ४ ॥ इतीति ॥ इत्येवं भगवता आदिष्टा आज्ञप्तास्ते गोपास्तत्र गत्वा कृताञ्जलिपुटा भूत्वा प्रथमं दण्डवत् भुवि पतितास्ततस्तथा भगवदुक्तप्रकारेण विप्रान् अयाचन्त ॥ ५ ॥ हे इति ॥ हे भूमिदेवाः शृणुत वो युष्माकं भद्रं भूयात् । कृष्णस्यादेशः आज्ञा तत्कारिणः कृष्णस्य नन्दराजपुत्रत्वात् तदाज्ञाकारिणः ततोऽप्यभ्यर्हितेन रामेण चोदितान् युष्मत्सन्निधौ प्राप्तान् नोऽस्मान् गोपान् जानीत ॥ ६ ॥ गा इति ॥ हे धर्मवित्तमाः धर्मविदां श्रेष्ठाः हे द्विजाः इतः अविदूरे निकट एव वर्त्तमानौ बुभुक्षितौ "अन्नस्य क्षुधितः पात्रम्" इत्युक्तेर्ब्राह्मणापेक्षया

प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः ॥ सत्त्रमाङ्गिरसं नाम ह्यासते स्वर्गकाम्यया ॥ ३ ॥ तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः ॥ कीर्तयन्तो भगवत आर्यस्य मम चाभिधाम् ॥ ४ ॥ इत्यादिष्टा भगवता गत्वाऽयाचन्त ते तथा ॥ कृताञ्जलिपुटा विप्रान् दण्डवत् पतिता भुवि ॥ ५ ॥ हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः ॥ प्राप्तान् जानीत भद्रं वो गोपान् नो रामचोदितान् ॥ ६ ॥ गाश्चारयन्तावविदूर ओदनं रामाच्युतौ वो लषतो बुभुक्षितौ ॥ तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ॥ ७ ॥ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ॥ अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति ॥ ८ ॥

प्रथमं दानेऽपि दोषाभाव इत्याशयः । गाश्चारयन्तौ रामाच्युतौ वो युष्माकमोदनमन्नं लषतः अभिलषतः अतो वो युष्माकं यदि ओदनं श्रद्धा चास्ति तर्हि अन्नार्थिनोस्तयो रामकृष्णयोर्यच्छत । यदि क्षुधितयोरपि तयोरन्नं न दास्यथ तर्हि यूयं द्विजाः पितृद्वयजाता इत्याक्षेपः सूच्यते । तत्र धर्मवित्तमा इति विपरीतलक्षणा ॥ ७ ॥ ननु दीक्षितान्नं न भुञ्जीतेति निषेधात् दीक्षिता वयमभोज्यान्ना इति चेत्तत्राहुः—दीक्षाया इति ॥ हे सत्तमाः दीक्षायाः दीक्षणीयेष्टिमारभ्य पशुसंस्थायाः अग्निषोमीयपश्वालम्भपर्यन्तम् अन्नमश्नन् दुष्यति अन्यत्र पशुसंस्थानन्तरं दीक्षितस्याप्यन्नमश्नन्न दुष्यति । पशुसंस्था च जातैवातो दोषाभावः । तथा सौत्रामण्याश्चान्यत्र दीक्षितस्याप्यन्नमश्नन्न दुष्यति । सौत्रामण्यास्तु सर्वथान्नमश्नन्दुष्यतीत्यर्थः । अत्र सौत्रामण्यभावान्न दोषः इति अत्र शुष्कयाज्ञिकेभ्यो वैदिकेभ्यो भियं दधाना अपि क्लिष्टकल्पनानिवृत्तये वयमित्थं व्याचिख्यासामः । हे सत्तमाः हिंसादिपराङ्मुखाः पशुसंस्थायाः दीक्षायाः यस्यां यज्ञदीक्षायां पशुर्हन्यते तस्या दीक्षायाः अन्यत्र विषये दीक्षितस्याप्यन्नमश्नन्न दुष्यति एवं सौत्रामण्या अन्यत्रापि इति । पशुहिंसायुक्तयागानुष्ठातुः सौत्रामण्यनुष्ठातुश्च दीक्षितस्यान्नभक्षणे दोषः । युष्माकं सत्तमानां तु पशुहिंसा सौत्रामणी च नास्त्यतो न दोषः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ क्षुद्रे स्वर्गादावेव आशामात्रं येषां भूरीणि क्लेशाधिकानि कर्माणि येषां ते बालिशा मूर्खा अपि आत्मानं वृद्धं मन्यन्ते तादृशास्ते ब्राह्मणाः इत्येवं गोपमुखेन भगवद्याच्ञां शृण्वन्तोऽपि न शुश्रुवुः ॥ ९ ॥ ननु शास्त्रक्रममुल्लङ्घ्य अन्यस्मै देयमन्यस्मै कथं देयमत आह—देश इति द्वयम् ॥ देशः कालः पृथक् चरुपुरोडाशादि द्रव्यं मन्त्राः तन्त्रं प्रयोगः ऋत्विजः अग्नयः देवता यजमानः क्रतुर्धर्मः अपूर्वात्मकश्च प्रत्येकं यन्मयः यद्विभूतिरूपस्तं साक्षात् परमं ब्रह्म अधोक्षजं भगवन्तं दुष्प्रज्ञाः दुर्बुद्धयः मर्त्यात्मानः मर्त्ये शरीरे ब्राह्मणा वयमित्यात्माभिमानवन्तः ते ब्राह्मणा मनुष्योऽयमिति दृष्ट्या न मेनिरे नादृतवन्तः ॥ १०॥ ११ ॥ नेति ॥ हे परन्तप यदा ते ब्राह्मणाः ॐ दास्याम इति नोचुः तथा न दास्याम इत्यपि च नोचुः । “ ओमाङोश्च ” इति पररूपम् । तदा अन्नालाभे निराशा गोपा रामकृष्णयोः शेषे कर्मणि षष्ठी कृष्णरामयोरिति च पाठः । तौ प्रत्येत्य

इति ते भगवद्याच्ञां शृण्वन्तोऽपि न शुश्रुवुः ॥ क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः ॥ ९ ॥ देशः कालः पृथक् द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥ १० ॥ तं ब्रह्म परमं साक्षाद्भगवन्तमधोक्षजम् ॥ मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मेनिरे ॥ ११ ॥ न ते यदोमिति प्रोचुर्न नेति च परन्तप ॥ गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ॥ १२ ॥ तदुपाकर्ण्य भगवान् प्रहस्य जगदीश्वरः ॥ व्याजहार पुनर्गोपान् दर्शयन् लौकिकीं गतिम् ॥ १३ ॥ मां ज्ञापयत पत्नीभ्यः ससंकर्षणमागतम् ॥ दास्यन्ति काममन्नं वः स्निग्धा मय्युषिता धिया ॥ १४ ॥ गत्वाऽथ पत्नीशालायां दृष्ट्वाऽऽसीनाः स्वलंकृताः ॥ नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् ॥ १५ ॥ नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः ॥ इतोऽविदूरे चरता कृष्णेनेहेषिता वयम् ॥ १६ ॥

आगत्य तथा यथा तत्र वृत्तं तत् ऊचुः ॥ १२ ॥ तदिति ॥ तत् रामकृष्णौ प्रति गोपैर्वर्णितं ब्राह्मणदुश्चेष्टितमुपाकर्ण्य रामे क्रोधात्तूष्णीं स्थिते जगदीश्वरः कृष्णः अज्ञविप्रेषु कोपानौचित्यात् प्रहस्य लौकिकीं गतिं को वा याचको न पराभूयते तथापि कार्यार्थिनो न निर्विद्यन्ते । विवेकहीनाः पण्डिता अपि मुह्यन्तीत्येवमादिकां लोकस्थितिं दर्शयन् गोपान् प्रति पुनर्व्याजहार उक्तवान् ॥ १३ ॥ मामिति ॥ अत्रागतं ससंकर्षणं मां ब्राह्मणपत्नीभ्यो ज्ञापयत नतु तत्र क्षुदादिकथनमावश्यकम् । ताश्च मयि स्निग्धाः देहमात्रेण गृहे वसन्त्योऽपि धिया बुद्ध्या मय्येव उषिताः अतो वो युष्मभ्यं कामं यथेष्टमन्नं दास्यन्ति ॥ १४ ॥ गत्वेति ॥ अथ गोपाः पुनर्यज्ञवाटं गत्वा तत्र पत्नीशालायामासीना उपविष्टाः स्वलङ्कृताः द्विजसतीः ब्राह्मणपत्नीर्दृष्ट्वा नत्वा प्रश्रिता नम्रीभूताश्च सन्त इदं वचनमब्रुवन् ॥ १५ ॥ नम इति ॥ विप्रपत्नीभ्यो वो युष्मभ्यं नमः । नोऽस्माकं वचांसि निबोधत शृणुत । इतः अविदूरे समीपे विचरता कृष्णेन वयमिह युष्मन्निकटे ईषिताः प्रेषिताः स्मः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गा इति ॥ स कृष्णः गोपालैः रामेण च सहितो गाश्चारयन् गृहात् दूरमागतः अतः सानुगस्य अस्मदादनुगैः सहितस्य बुभुक्षितस्य तस्यान्नं प्रदीयताम् ॥ १७ ॥ श्रुत्वेति ॥ नित्यं तस्य हरेः दर्शने उत्सुकाः तस्य हरेः कथाश्रवणेनाक्षिप्तमाकृष्टं मनो यासां ताः द्विजपत्न्यः अच्युतम् उपायातं समीपमागतं श्रुत्वा पूर्वमनुरक्ता एव बुभुक्षाश्रवणेन अधिकं जातसम्भ्रमाः अनवस्थितचित्ता बभूवुः ॥१८॥ चतुर्विधमिति द्वयम् ॥ बहुगुणं संस्कारविशेषैर्बहवो रससौरभ्यादयो गुणा यस्मिंस्तत् भक्ष्यभोज्यलेह्यचूष्यभेदैश्चतुर्विधमन्नं भाजनैः पृथक् पात्रैरादाय पतिभिर्भ्रातृभिर्बन्धुभिः सुतैः निषिध्यमाना वार्यमाणा अपि उत्तमश्लोके भगवति दीर्घं बहुकालं श्रुतेन यशःश्रवणेन धृतः आशयश्चित्तं याभिस्ताः सर्वा द्विजपत्न्यः समुद्रं निम्नगा इवेति प्रतिबन्धकागणने दृष्टान्तः । प्रियं श्रीकृष्णम् अभिसस्रुः अभिजग्मुः तदानीं सर्वासां कृष्णं प्रति नायिकात्वाभिमानमालक्ष्येदम् । यत्र

गाश्चारयन् स गोपालैः सरामो दूरमागतः ॥ बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयताम् ॥ १७॥ श्रुत्वाऽच्युतमुपायातं नित्यं तद्दर्शनोत्सुकाः ॥ तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः ॥ १८ ॥ चतुर्विधं बहुगुणमन्नमादाय भाजनैः ॥ अभिसस्रुः प्रियं सर्वाः समुद्र-मिव निम्नगाः ॥ १९ ॥ निषिध्यमानाः पतिभिर्भ्रातृभिर्बन्धुभिः सुतैः ॥ भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः ॥ २० ॥ यमुनोपवने-ऽशोकनवपल्लवमण्डिते ॥ विचरन्तं वृतं गोपैः साग्रजं ददृशुः स्त्रियः ॥ २१ ॥ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवे-षमनुव्रतांसे ॥ विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासम् ॥ २२ ॥ प्रायः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन् निमग्नमनसस्तमथाक्षिरन्ध्रैः ॥ अन्तः प्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेन्द्र ॥ २३ ॥

दन्तानां विनियोगो नापेक्ष्यते तद्भोज्यमोदनादि शेषं भक्ष्यं लड्डुकादि लेह्यं दध्यादि चूष्यम् इक्षुदाडिमाम्रादि ॥ १९ ॥ २० ॥ यमुनेति ॥ अशोकवृक्षाणां नवपल्लवैर्मण्डिते शोभिते यमुनाया उपवने गोपैर्वृतं साग्रजं विचरन्तं कृष्णं ताः स्त्रियो ददृशुः ॥ २१ ॥ हरिं विशिनष्टि—श्याममिति ॥ मेघमिव श्यामवर्णं हिरण्यमिव हिरण्यरसाक्तो वा परिधिः परिधानं यस्य तं पीताम्बरं वनमाल्यैः पत्रपुष्पमयैरापादलम्बिभिः कण्ठस्थितैः बर्हैः शिरसि धारितैः मयूरपिच्छैः धातुभिरङ्गरागतया कृतैर्गैरिकादिभिः प्रवालैः शिरस्येवोभयतो धारितैः कोमलपत्रैश्च नटवद्वेषो यस्य तमनुव्रतस्य सख्युः अंसे स्कन्धे विन्यस्तः हस्तो येन तम् । इतरेण हस्तेन लीलया अब्जं धुनानं भ्रमयन्तं कर्णयो-रुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तं च ॥२२॥ वृत्तेरपि लयेन सामरस्यमाह—प्राय इति ॥ हे नरेन्द्र प्रायः बहुशः श्रुता ये प्रियतमस्य कृष्णस्य उदया उत्कर्षास्त एव कर्णपूराः सतां कर्णाभरणभूतास्तैर्यस्मिन् श्रीकृष्णे निमग्नमनसः आविष्टचित्ताः विप्रभार्याः । अथ दर्शनानन्तरमक्षिरन्ध्रैः द्वारभूतैर्लोचनच्छिद्रैस्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णमन्तःकरणे प्रवेश्य सुचिरं परिरभ्य उपगुह्य अभिमतयोऽहंवृत्तयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथा तापं त्यजन्ति तथा संसारतापं जहुस्त्यक्तवत्यः ॥२३॥ ता इति ॥ त्यक्ताः सर्वा गृहापत्यपत्यादिविषया आशा याभिस्ताः स्त्रियः केवलमात्मनः स्वस्य दिदृक्षयैव प्राप्ताः तथा प्राप्ता तथा विज्ञाय अखिलदृग्द्रष्टा सर्वबुद्धिसाक्षी प्रहसिताननः भगवानाह स्म ॥ २४ ॥ स्वागतमिति ॥ हे महाभागाः वो युष्माकं स्वागतं शुभागमनम् आस्यतामत्र क्षणं विश्रम्यताम् । अन्यच्च युष्माकं कार्यं वयं किं करवाम तदुच्यताम् । हि यस्मात् प्रतिबन्धतिरस्कारेण यत् नोऽस्माकं दिदृक्षया प्राप्तास्तदिदं वो युष्माकमुपपन्नं युक्तमेव ॥ २५ ॥ नन्विति ॥ ननु निश्चितम् स्वार्थं सम्यक् पश्यन्ति ते कुशला निपुणाः आत्मा चासौ प्रियश्च तस्मिन् मयि यथा यथोचितम् अद्धा साक्षादेव अहैतुकी चासावव्यवहिता चेति फलेच्छारहितामन्तररहितां च । " न कोपधाया " इति पुंवद्भावाभावः । भक्तिं कुर्वन्ति केचित्तु आत्मप्रिये पुत्रमित्रादौ यथेति दृष्टान्तत्वेन व्याचक्षते ॥ २६ ॥ आत्मनः सर्वतः प्रेष्ठत्वमुपपाद-

तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया ॥ विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसिताननः ॥ २४ ॥ स्वागतं वो महाभागा आस्यतां करवाम किम् ॥ यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः ॥ २५ ॥ नन्वद्धा मयि कुर्वन्ति कुशलाः स्वार्थदर्शनाः ॥ अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा ॥ २६ ॥ प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ॥ यत्संपर्कात् प्रिया आसंस्ततः कोन्वपरः प्रियः ॥ २७ ॥ तद्यात देवयजनं पतयो वो द्विजातयः ॥ स्वसत्रं पारयिष्यन्ति युष्माभिर्गृहमेधिनः ॥ २८ ॥ पत्न्य ऊचुः ॥ मैवं विभोऽर्हति भवान् गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलम् ॥ प्राप्ता वयं तुलसिदाम पदावसृष्टं केशैर्निवोढुमतिलङ्घ्य समस्तबन्धून् ॥ २९ ॥ गृह्णन्ति नो न पतयः पितरौ सुता वा न भ्रातृबन्धुसुहृदः कुत एव चान्ये ॥ तस्माद्भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद्गतिररिन्दम तद्विधेहि ॥ ३० ॥

यति—प्राणेति ॥ प्राणादयः यस्यात्मनः सम्पर्कात् अध्याससंबन्धादेव प्रिया आसंस्ततः सकाशादपरः को नु प्रियः स्यात् । स्वाः ज्ञातयः आत्मा देहः ॥ २७ ॥ तदिति ॥ तत् तस्माद्यूयं देवयजनं यज्ञवाटं यात गच्छत द्विजातयः गृहमेधिनः वो युष्माकं पतयो युष्माभिस्तत्र गताभिः सह स्वसत्रं पारयिष्यन्ति समापयिष्यन्ति अतस्तदनुग्रहाय मदनुरोधेनैव यात । युष्मान् विना तेषामधिकाराभावात् ॥ २८ ॥ मैवमिति ॥ हे विभो एवं नृशंसं परुषं वचो भवान् गदितुं मार्हति परमाप्तत्वात् । अतः स्वाज्ञारूपं निगमं " न पुनरावर्त्तते " इति वेदवाक्यं सत्यं कुरुष्व । यतः समस्तबन्धून् पतिपुत्रादीन् अतिलङ्घ्य तिरस्कृत्य त्वया पदावसृष्टमवज्ञयापि दत्तं तुलसिदाम बहुमानेन केशैर्निवोढुं दासीभवितुं वयं तव पादमूलं प्राप्ताः ॥ २९ ॥ गृह्णन्तीति ॥ हे अरिन्दम शत्रुनाशक नोऽस्मान्पतयः पितरौ सुता वा न गृह्णन्ति न ग्रहीष्यन्ति तथा भ्रातृबन्धुसुहृदश्च न गृह्णन्ति अन्ये अपरिचिता जनाः गृहाद्विनिःसृता अस्मान् कुत एव गृह्णीयुः तस्मात् भवतः प्रपदयोः पादाग्रयोः पतितात्मनां पतितदेहानां नोऽस्माकं त्वत्तोन्या स्वर्गादिरपि गतिर्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेत् मा भूत् नास्त्येव वा अतस्तत् स्वदास्यमेव विधेहि सम्पादय ॥ ३० ॥ पतय इति ॥ मयोपेताः भक्तयाङ्गीकृताः वो युष्मान् पतयः पितृभ्रातृसुतादयश्च ये चान्ये लोकाः जनास्ते केऽपि नाभ्यसूयेरन् दोषारोपेण न पश्येयुः । प्रत्यक्षं देवान् प्रदर्श्याह । इमे यज्ञभागिनो देवा अप्यनुमन्वते निर्दोषतयाङ्गीकुर्वन्ति । अन्यस्य तु का वार्तेत्यर्थः । एवं हि लट्प्रयोगस्वारस्यम् ॥ ३१ ॥ अङ्गसङ्गाभिलाषं दृष्ट्वाह—नेति ॥ हि यस्मात् इह संसारे ब्राह्मणीभिर्युष्माभिः मम अङ्गसङ्गः नृणां प्रीतये सुखं सम्पादयितुं न स्यात् नतराम् अनुरागाय स्नेहं वर्द्धयितुं च भवति । लोकविद्विष्टत्वेन अनादरहेतुत्वात् तस्मान्मयि मनः एव युञ्जानाः सत्यः अचिरात् मामवाप्स्यथ ॥ ३२ ॥ श्रवणादिति ॥ श्रवणादित्यसार्वत्रिकः श्लोकः । यथा श्रवणात् दर्शनात् ध्यानात् अनुकीर्त्तनात् च मयि भावः स्यात् तथा बहुकालं सन्निकर्षेण न स्यात् ततो हेतोर्यूयं गृहान्

श्रीभगवानुवाच ॥ ॥ पतयो नाभ्यसूयेरन् पितृभ्रातृसुतादयः ॥ लोकाश्च ये मयोपेता देवा अप्यनुमन्वते ॥ ३१ ॥ न प्रीतयेऽनुरागाय ह्यङ्गसङ्गो नृणामिह ॥ तन्मनो मयि युञ्जाना अचिरान्मामवाप्स्यथ ॥ ३२ ॥ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ॥ न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ ३३ ॥ श्रीशुक उवाच ॥ ॥ इत्युक्ता मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ॥ ते चानसूयवः स्वाभिः स्त्रीभिः सत्त्रमपारयन् ॥ ३४ ॥ तत्रैका विधृता भर्त्रा भगवन्तं यथा श्रुतम् ॥ हृदोपगुह्य विजहौ देहं कर्मानुबन्धनम् ॥ ३५ ॥ भगवानपि गोविन्दस्तेनैवान्नेन गोपकान् ॥ चतुर्विधेनाऽऽशयित्वा स्वयं च बुभुजे प्रभुः ॥ ३६ ॥ एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमे गोगोपगोपीनां रमयन् रूपवाक्कृतैः ॥ ३७ ॥

प्रतियात ॥ ३३ ॥ इतीति ॥ इत्युक्तास्ता यज्ञपत्न्यः पुनर्यज्ञवाटं गताः ते ब्राह्मणा अनसूयवः स्वाज्ञोल्लङ्घनादिदोषदृष्टिरहिता एव स्वाभिः स्त्रीभिः सह ताभिरित्यपि पाठः । सत्रं यज्ञम् अपारयन् समापितवन्तः ॥ ३४ ॥ तत्रेति ॥ तत्र यज्ञवाटे एका ब्राह्मणी भर्त्रा विधृता बलाद् गृहीत्वा रुद्धा सती यथाश्रुतं भगवन्तं हृदा मनसोपगुह्य कर्मानुबन्धनं यस्य तथाभूतं पतिस्वत्वभूतं देहं विजहौ विहाय च शुद्धस्वरूपेण भगवन्तं प्राप्ता ॥ ३५ ॥ भगवानिति ॥ भगवान् प्रभुरपि गोविन्दः तेनैव द्विजपत्नीभिरानीतेनैव चतुर्विधेनान्नेन गोपकान् आशयित्वा स्वयं च तदेव बुभुजे ॥ ३६ ॥ एवमिति ॥ लीलार्थं स्वीकृतनरवपुः श्रीकृष्णः एवं नृलोकमनुशीलयन् अनुकुर्वन् रूपवाक्कृतैः रूपसौन्दर्येण वाङ्माधुर्येण च कृतैर्नानाविधचरितैश्च गोगोपगोपीनामिति कर्मणि शेषे षष्ठी । “ नौ वयोधर्मे ” इति सूत्रे मूलमूलेति निर्देशादेकशेषशास्त्रमनित्यम् । गोपादीन् रमयन् रमयितुं रेमे हेतौ शता । ब्राह्मणीरमणे लीलासौष्ठवाभावान्न रेमे । एतेन रासात्पूर्वमपि गोपीभिः रमणं सूचितम् ॥ ३७ ॥ ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ अथान्तरं यत् यस्मात् नृविडम्बयोः नरानुकरणवतोर्विश्वेश्वरयोर्याच्ञामहन्म वयं हतवन्तः अतः कृतागसो वयमित्यनुस्मृत्य ते विप्रा अन्वतप्यन् ॥ ३८ ॥ दृष्ट्वेति ॥ स्त्रीणां भगवति कृष्णे अलौकिकीमत्युत्कटां भक्तिं दृष्ट्वा आत्मानं च तया भक्त्या हीनं दृष्ट्वा अनुतप्ताः सन्तः आत्मानं व्यगर्हयन् अनिन्दन् ॥ ३९ ॥ धिगिति ॥ अधोक्षजे कृष्णे ये तु वयं विमुखास्तेषां नोऽस्माकं यत्त्रिवृत् शौक्लं सावित्रं दैक्ष्यं चेति त्रिगुणितं जन्म धिक् विद्यां वेदविद्यां व्रतं ब्रह्मचर्यं बहुज्ञतां चातुर्यं कुलं प्रसिद्धं क्रियायां कर्मणि दाक्ष्यं चातुर्य्यं क्रियाः दाक्ष्यं चेति पदद्वयं वा । तत्सर्वं धिक् ॥ ४० ॥ नूनमिति ॥ हे इति मिथस्संबोधयन्ति । नूनं भगवतो माया योगिनामपि मोहिनी । यत् यस्मात् वयं द्विजाः अतएव नृणां गुरवः उपदेशकर्तारोऽपि स्वार्थे स्वप्रयोजने मुह्याम ॥ ४१ ॥ अहो इति ॥ अहो नारीणामपि जगद्गुरौ कृष्णे दुरन्तं सर्ववाधकं भावं भक्तिं पश्यत । यो भावः गृहाभिधान् गृहनाम्नः मृत्युपाशान् अविध्यत् अच्छिनत् ॥ ४२ ॥ नेति ॥ आसां द्विजातिसंस्कारः उपनयनं न गुरौ निवासोऽपि

अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहन्म नृविडम्बयोः ॥ ३८ ॥ दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीम् ॥ आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥ ३९ ॥ धिग् जन्म नस्त्रिवृद्विद्यां धिग् व्रतं धिग् बहुज्ञताम् ॥ धिक् कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥ ४० ॥ नूनं भगवतो माया योगिनामपि मोहिनी ॥ यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ॥ ४१ ॥ अहो पश्यत नारीणामपि कृष्णे जगद्गुरौ ॥ दुरन्तभावं योऽविध्यन्मृत्युपाशान् गृहाभिधान् ॥ ४२ ॥ नासां द्विजातिसंस्कारो न निवासो गुरावपि ॥ न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ॥ ४३ ॥ अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे ॥ भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ॥ ४४ ॥ ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया ॥ अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ॥ ४५ ॥ अन्यथा पूर्णकामस्य कैवल्याद्याशिषांपतेः ॥ ईशितव्यैः किमस्माभिरीशस्यैतद्विडम्बनम् ॥ ४६ ॥

न तपो न आत्ममीमांसा न शौचं न शुभाः क्रिया संध्योपासनादयश्च न अत्र शौचं सामान्यधर्मः द्विजातिसंस्कारो धर्माधिकारहेतुः गुरुवासादयः क्रमाद्ब्रह्मचारिवनस्थयतिगृहस्थधर्माः ॥ ४३ ॥ अथापीति ॥ यद्यप्यासां संस्कारादयो न सन्ति अथापि उत्तमश्लोके योगेश्वराणामीश्वरे कृष्णे दृढा भक्तिरस्ति । अस्माकं तु संस्कारादिमतामपि भक्तिर्नास्ति ॥ ४४ ॥ नन्विति ॥ अहो सतां गतिः भगवान् स्वार्थे विमूढानां गृहस्येहया व्यापारेण प्रमत्तानां विचारेप्यसमर्थानां नोऽस्माकं परमफलभूतमात्मानं गोपवाक्यैः स्मारयामास ॥ ४५ ॥ अन्यथेति ॥ अन्यथा उक्तास्मत्प्रयोजनं विना पूर्णकामस्य कैवल्याद्याशिषां पतेः "षष्ठीयुक्तश्छन्दसि वा" इति पत्युर्घिसंज्ञा । ईशस्येश्वरस्य ईशितव्यैः ईशनकर्मीभूतैः अधीनैः अस्माभिः किं फलं साध्यम् तथा एतदन्नयाच्ञादिकर्मापि विडम्बनं लोकानुकरणमात्रम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हित्वेति ॥ अन्यान् ब्रह्मादीन् हित्वा तथा स्वात्मनः दोषाः चाञ्चल्यगर्वादयस्तेषाम् अपवर्गेण त्यागेन यस्य पादस्पर्शाशया यम् असकृत् श्रीर्लक्ष्मीर्भजते तस्य या ओदनयाच्ञा सा जनानां विज्ञजनानामपि मोहिनी ॥ ४७ ॥ देश इति ॥ प्राग्व्याख्यातम् ॥ ४८ ॥ स इति ॥ स एषः साक्षात्पूर्णो भगवान् योगेश्वराणामीश्वरो विष्णुः यदुषु जात इति अश्रृण्म सर्वत्र श्रुतवन्तोऽपि वयं मूढा मूर्खा न विद्महे न ज्ञातवन्तः । आर्षः प्रयोगः ॥ ४९ ॥ अहो इति ॥ अहो येषामस्माकं स्त्रियः तादृशीः तादृश्यो विष्णुभक्ताः पूर्वसवर्णदीर्घ आर्षः । सन्ति ते वयम् अहो धन्यतमाः । यासां स्त्रीणां भक्त्या हेतुना अस्माकमपि हरौ निश्चला मतिर्जाता ॥ ५० ॥ नम इति ॥ भगवते न कुण्ठा मेधा यस्य तस्मै असिजार्षः । तुभ्यं कृष्णाय नमः । यस्य मायया मोहिता विवेकरहिता धीर्येषां ते वयं कर्ममार्गेषु भ्रमाम इति ॥ ५१ ॥ स इति ॥ सर्वप्रसिद्धः आद्यः पुरुषः कृष्णः स्वमायया मोहिता आत्मानो येषां तेषाम् अत एव न विज्ञातस्तस्यानुभावो यैस्तेषां नोऽस्माकमतिक्रमं स्वाज्ञोल्लंघनापराधं क्षन्तुमर्हति ॥ ५२ ॥ इतीति ॥

हित्वाऽन्यान् भजते यं श्रीः पादस्पर्शाशयाऽसकृत् ॥ आत्मदोषापवर्गेण यद्याच्ञा जनमोहिनी ॥ ४७ ॥ देशः कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः ॥ देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥ ४८ ॥ स एष भगवान् साक्षाद्विष्णुर्योगेश्वरेश्वरः ॥ जातो यदुष्वित्यश्रृण्म ह्यपि मूढा न विद्महे ॥ ४९ ॥ अहो वयं धन्यतमा येषां नस्तादृशीः स्त्रियः ॥ भक्त्या यासां मतिर्जाता ह्यस्माकं निश्चला हरौ ॥ ५० ॥ नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे॥ यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु ॥५१॥ स वै न आद्यः पुरुषः स्वमायामोहितात्मनाम्॥ अविज्ञातानुभावानां क्षन्तुमर्हत्यतिक्रमम् ॥ ५२ ॥ इतिं स्वाघमनुस्मृत्य कृष्णे ते कृतहेलनाः ॥ दिदृक्षवोऽप्यच्युतयोः कंसाद्भीता न चाऽचलन् ॥ ५३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे यज्ञपत्न्युद्धरणं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीशुक उवाच ॥ ॥ भगवानपि तत्रैव बलदेवेन संयुतः ॥ अपश्यन्निवसन् गोपानिन्द्रयागकृतोद्यमान् ॥ १ ॥

कृष्णे कृतं हेलनमवज्ञानं यैस्ते ब्राह्मणाः इत्येवं स्वाघं स्वापराधमनुस्मृत्य अच्युतयोः शेषे षष्ठी । अशोकवनस्थौ रामकृष्णौ दिदृक्षवो द्रष्टुमिच्छवोऽपि कंसाद्भीताः नाचलन् कृष्णदर्शनार्थं सायाह्ने व्रजमपि नैवागमन् । तत्रस्था एवाभजन् यदि ब्राह्मणा वयं तद्दर्शनार्थं व्रजेम तदा कंसः श्रीकृष्णं विष्णुं मत्वा कमपि मन्तुं कुर्यात्तस्य हेतवो वयं स्यामेति ॥ ५३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमत्रयोविंशे व्यधादिमाम् ॥ २३ ॥ चतुर्विंशे शक्रयागव्यावृत्तिर्हेतुकल्पनैः ॥ गोवर्द्धनमखोत्पत्तिस्तत्र श्लोका गजाग्नयः ॥ अनुष्टुभोऽपि तावत्यस्तथोवाचेति पञ्चकम् ॥ २४ ॥ अथ गोवर्द्धनपूजोत्सवः स चायं कार्तिकशुक्लप्रतिपदि प्रवृत्तोऽपि आश्विनपूर्णिमाप्रवृत्तरासक्रीडायाः पूर्वभावी ज्ञेयः । रासलीलायां गोपीभिरनुकृतत्वात् । रासश्च वस्त्राहरणानन्तरशरदन्तराव्यवहितशरदि इमा रंस्यथ क्षपा इत्यव्यवधानोक्तेः । तथा चायं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रमः । अष्टमवर्षस्याश्विने वेणुगीतम् । कार्तिके गोवर्द्धनोद्धरणम् । कार्त्तिकशुक्लैकादश्यां गोविन्दाभिषेकः । द्वादश्यां वरुणलोकगमनम् । तत्पूर्णिमायां ब्रह्महदावगाहः । ततो हेमन्ते वस्त्राहरणलीला । तत्रैव निदाघे यज्ञपत्नीप्रसादः । नवमवर्षस्य शरदि रासलीलेति वैपरीत्योक्तिः प्रेमावेशात् । भगवानिति ॥ बलदेवेन संयुतः भगवान् कृष्णस्तत्रैव गोकुले निवसन् इन्द्रयागाय कृत उद्यमो यैस्तान् गोपान् अपश्यत् ॥ १ ॥ तदिति ॥ सर्वात्मा सर्वदर्शनः सर्वज्ञः भगवान् कृष्णः तदभिज्ञोऽपि इन्द्रयागार्थोऽयमुद्यम इति जानन्नपि प्रश्रयेण विनयेनावनतः सन्नन्दपुरोगमान् नन्दादीन् वृद्धानपृच्छत् ॥ २ ॥ कथ्यतामिति ॥ हे पितः वो युष्माकम् अयं संभ्रमः उत्सवः वैयग्र्यहेतुः कः उपागतः स मे मह्यं कथ्यताम् अस्य किं फलम् अत्र कस्य देवस्य उद्देशः कं देवमुद्दिश्यैतत् कर्म प्रवृत्तमिति देवताप्रश्नः । केन साधनेन अधिकारिणा वायं मखः साध्यते ॥३॥ एतदित्यर्द्धम् ॥ हे पितः मम महान् कामः श्रवणे महतीच्छा वर्तते । यद्वा । भवतामपि महान् कामो दृश्यते अतः शुश्रूषवे मह्यं मां बोधयितुमेतन्मत्पृष्टं ब्रूहि

तदभिज्ञोऽपि भगवान् सर्वात्मा सर्वदर्शनः ॥ प्रश्रयावनतोपृच्छत् वृद्धान्नन्दपुरोगमान् ॥ २ ॥ श्रीभगवानुवाच ॥ कथ्यतां मे पितः कोऽयं संभ्रमो व उपागतः ॥ किं फलं कस्य चोद्देशः केन वा साध्यते मखः ॥३॥ एतद्ब्रूहि महान् कामो मह्यं शुश्रूषवे पितः ॥४॥ नहि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ॥ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषाम् ॥ उदासीनोरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ॥ ५ ॥ ज्ञात्वाऽज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ॥ विदुषः कर्मसिद्धिः स्यात् तथा नाविदुषो भवेत् ॥ ६ ॥ तत्र तावत् क्रियायोगो भवतां किं विचारितः ॥ अथवा लौकिकस्तन्मे पृच्छत साधु भण्यताम् ॥ ७ ॥

॥ ४ ॥ नहीति सार्द्धम् ॥ हि यस्मात् इह सर्वात्मनां सर्वत्रात्मदर्शिनाम् अविद्यमाना सः पर इति दृष्टिर्येषामतो न विद्यन्ते मित्राणि उदास्ताः उदासीनाः इडभाव आर्षः । विद्विषश्च येषां तेषां साधूनां कृत्यं गोप्यं नहि अस्ति नहीत्येकं पदं निषेधे तथापि मन्त्रकार्ये उदासीनो जनः अरिवत् वर्ज्यः मन्त्रभङ्गभयात् । यद्वा । यः अरिवत् अरिणा तुल्यः उदासीनः सोऽपि वर्ज्यः यस्तु उदासीनो नारिणा तुल्यो न सुहृत्तुल्यः सतु न वर्ज्यो नाप्युपादेयः अत एवासौ नोट्टङ्कितः सुहृत्तु आत्मवदुच्यते । अहं तु पुत्रत्वात्सुहृदपेक्षयाप्यन्तरङ्गः ॥ ५ ॥ ज्ञात्वेति ॥ तत्र अयं कश्चिज्जनः ज्ञात्वा सम्यग्विचार्य कर्माण्यनुतिष्ठति कश्चिच्च अज्ञात्वैव गतानुगतिकत्वमात्रेणानुतिष्ठति । तत्र यथा विदुषः कर्मसिद्धिः फलं स्यात्तथा अविदुषः क्वचित् फलं न भवेत् ॥ ६ ॥ तत्रेति ॥ तत्र विषयेऽयं भवतां क्रियारूपो योग उपायः किं सुहृद्भिः सह शास्त्रतो विचारितः अथवा लौकिकः लोकव्यवहारत एव प्राप्तस्तदेतत्पृच्छतो मम साधु सोपपत्तिकं भण्यतां कथ्यताम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचारप्राप्त इत्याह—पर्जन्य इति ॥ भगवान् इन्द्रः पर्जन्यो वर्षाधिपतिः यतो मेघास्तस्येन्द्रस्यात्मवत्प्रिया मूर्त्तयः स्वरूपाणि ते भूतानां प्रीणनमाप्यायनकरं जीवनकरं च पयो जलमभिवर्षन्ति ॥ ८ ॥ तमिति ॥ हे तात वयं वैश्याः अन्ये च ब्राह्मणाद्यास्तं वार्मुचां मेघानां पतिमीश्वरमिन्द्रं तस्य रेतसा जलेन सिद्धैः द्रव्यैः अन्नादिभिः सम्पादितैः क्रतुभिर्यज्ञैर्यजन्ते आराधयन्ति प्रथमपुरुष आर्षः । यजामह इत्यर्थः ॥ ९ ॥ तदिति ॥ तच्छेषेण इन्द्रयागावशिष्टेनान्नादिना त्रिवर्गफलहेतवे धर्मादिसिद्धये नरा उपजीवन्ति उपजीविकां कल्पयन्ति यतः पुंसां पुरुषकाराणां कृष्यादिव्यापाराणां पर्जन्य इन्द्र एव वृष्टिद्वारा फलभावनः फलसाधकः अन्यथा वृष्टिं विना कृष्यादिवैफल्यदर्शनात् ॥ १० ॥ य इति ॥ अतः यो नरः एवं पारंपर्येण परम्परया आगतम् इमं धर्मं कामात् भोगसङ्गात् लोभात् भयात् तद्द्वेषिभयात् द्वेषान्नास्तिक्यप्र-

नन्द उवाच ॥ ॥ पर्जन्यो भगवानिन्द्रो मेघास्तस्यात्ममूर्तयः ॥ तेऽभिवर्षन्ति भूतानां प्राणनं जीवनं पयः ॥ ८ ॥ तं तात वयमन्ये च वार्मुचां पतिमीश्वरम् ॥ द्रव्यैस्तद्रेतसा सिद्धैर्यजन्ते क्रतुभिर्नराः ॥ ९ ॥ तच्छेषेणोपजीवन्ति त्रिवर्गफलहेतवे ॥ पुंसां पुरुषकाराणां पर्जन्यः फलभावनः ॥ १० ॥ य एवं विसृजेद्धर्मं पारम्पर्यागतं नरः ॥ कामाल्लोभाद्भयाद्द्वेषात् स वै नाप्नोति शोभनम् ॥ ११ ॥ श्रीशुक उवाच ॥ ॥ वचो निशम्य नन्दस्य तथान्येषां व्रजौकसाम् ॥ इन्द्राय मन्युं जनयन् पितरं प्राह केशवः ॥ १२ ॥ श्रीभगवानुवाच ॥ कर्मणा जायते जन्तुः कर्मणैव विलीयते ॥ सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥१३॥ अस्ति चेदीश्वरः कश्चित् फलरूप्यन्यकर्मणाम् ॥ कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः ॥ १४ ॥ किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम् ॥ अनीशेनान्यथा कर्तुं स्वभावविहितं नृणाम् ॥ १५ ॥

युक्तदेवताद्वेषादनादरात् हेतोः विसृजेत् स शोभनं सुखं नाप्नोति ॥ ११ ॥ वच इति ॥ केशवः नन्दस्य वचो निशम्य तथा अन्येषां व्रजौकसां च वचो निशम्य इन्द्राय इन्द्रस्य मन्युं जनयन् पितरं नन्दं प्राह स्म । एतेन इन्द्रस्य गर्वापहाराय कोपजनन एव तात्पर्यम् । नतु देवतानिराकरण इति सूचितम् ॥ १२ ॥ कर्मणेति ॥ जन्तुर्जीवमात्रं कर्मणा जायते कर्मणैव लीयते म्रियते सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते । मीमांसाशास्त्रप्रामाण्याज्जडादपि कर्मणः फलाङ्गीकारः ॥ १३ ॥ केचित् कर्मफलदमीश्वरं मन्यन्ते तान्निराकरोति—अस्तीति॥ स्वयं कर्मभिरलिप्तोऽप्यन्यस्य कर्मणां फलं रूपयति ददाति तादृशः ईश्वरः कश्चिदस्ति चेत् तर्हि सोऽपि कर्त्तारमेव भजते यो यत्कर्म करोति तस्मा एव तत्फलं ददाति । हि यतः स ईश्वरः कर्माकर्तुः प्रभुः फलदाता तु नहि नैव भवति ॥ १४ ॥ किमिति ॥ अतः स्वं स्वं कर्मानुवर्त्तिनां भूतानामिह लोके नृणां स्वभावेन पूर्वसंस्कारेणैव विहितं कारितं कर्म तदधीनं सुखदुःखादिकं चान्यथा कर्तुं विपरिवर्तयितुमनीशेनासमर्थेन इन्द्रेण किं प्रयोजनं सिद्ध्यति न किमपीत्यर्थः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्विवृणोति—स्वभावेति ॥ अयं जनः प्राणिमात्रं स्वभावतन्त्रः स्वभावाधीन एव हीति एवार्थे । अतः स्वभावमनुवर्त्तते अनुसरति अतः सदेवासुरमानुषं देवादिसहितमिदं सर्वं जगत् स्वभावस्थं स्वभावाधीनम् । प्रवृत्तेः संस्काराधीनत्वात् किमन्तर्यामिणापि इति भावः ॥ १६ ॥ देहानिति ॥ जन्तुः जीवः कर्मणा उच्चावचान् उत्कृष्टापकृष्टान् देहान् प्राप्य कर्मसमाप्तौ तान् उत्सृजति परित्यजति तथा शत्रुर्मित्रमुदासीन इति त्रयमपि कर्मैव तेषामपि स्वदुरितपुण्यमिश्रकर्मप्रयुक्तत्वात् । एवं गुरुरीश्वरश्च कर्मैव तत् कृपायाः पुण्यकर्मायत्तत्वात् ॥ १७ ॥ तस्मादिति ॥ तस्माज्जन्मादेः कर्माधीनत्वात् कर्मैव संपूजयेत् सम्मानयेत् अतः स्वभावे तत्स्वभावाधीने वर्णाश्रमादौ स्थितः सन् स्वानुरूपकर्मकृद्भवेत् । एवं च देवताऽपि कर्मण एवाङ्गं न स्वतन्त्रा । यदि तु देवतैवाराध्येत्याग्रहस्तत्रापि नेंद्रस्योपास्यत्वमित्याह । अञ्जसेति । हि यस्मात् येन दैवतविशेषेणाञ्जसा सुखेनासौ जनो वर्तेत जीवेत्तदेवास्य दैवतं सेव्यम् ॥ १८ ॥ आजीव्येति ॥ यस्तु पुरुष एकतरं भावं देवताविशेषमाजीव्य जीवनोपायत्वेनोपसेव्य तत्रापरितो-

स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते ॥ स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ॥ १६ ॥ देहानुच्चावचात् जन्तुः प्राप्योत्सृजति कर्मणा ॥ शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः ॥ १७ ॥ तस्मात् संपूजयेत्कर्म स्वभावस्थः स्वकर्मकृत् ॥ अञ्जसा येन वर्तेत तदेवास्य हि दैवतम् ॥ १८ ॥ आजीव्यैकतरं भावं यस्त्वन्यमुपजीवति ॥ न तस्माद्विन्दते क्षेमं जारं नार्यसती यथा ॥ १९ ॥ वर्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः ॥ वैश्यस्तु वार्तया जीवेच्छूद्रस्तु द्विजसेवया ॥ २० ॥ कृषिवाणिज्यगोरक्षाः कुसीदं तुर्यमुच्यते ॥ वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम् ॥ २१ ॥ सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ॥ रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत् ॥ २२ ॥

षात् अन्यमुपजीवति सेवते स विश्वासाभावात् तस्मात् भावात्सुखं न विन्दते । यथा असती पुंश्चली नारी जारमुपसेव्य सुखं न प्राप्नोति तथा । जारादिति क्वाचित्कः पाठः ॥ १९ ॥ वर्तेतेति ॥ विप्रो ब्रह्मणा वेदाध्ययनादिना वर्तेत जीविकां सम्पादयेत् । एवं राजन्यः क्षत्रियो भुवः रक्षया वर्तेत । वैश्यस्तु वार्तया जीवेत् वर्तेत । शूद्रस्तु द्विजसेवया जीवेत् । एतेन ब्राह्मणस्य वेदादिशास्त्राण्येव देवता क्षत्रियस्य भूरेव वैश्यस्य वार्तैव शूद्रस्य द्विजा एव देवता इत्युक्तम् ॥ २० ॥ कृषीति ॥ कृषिवाणिज्याभ्यां सहिता गोरक्षा इति त्रयं बहुत्वपाठे द्वन्द्व एव । कुसीदं वृद्धिजीवनं चतुर्थमेवं वार्ता चतुर्विधोच्यते । तत्र तासु वार्तासु वयम् अनिशं सर्वदैव गोवृत्तयः गोपालनमेव वृत्तिर्येषां तथाविधाः स्मः । अतो गाव एवास्माकं दैवत वत्पूज्याः गोपत्वाच्च नास्माकं कृष्यादिर्वृत्तिः ॥ २१ ॥ ननु गवां वृत्तिरपीन्द्राधीनैवेत्याशङ्क्य निरीश्वरसाङ्ख्यमताश्रयेण निराकरोति—सत्त्वमिति ॥ सत्त्वं रजस्तम इति त्रयोगुणाः यथाक्रमं जगतः स्थित्युत्पत्त्यन्तहेतवः । तत्र रजसा गुणेन हेतुभूतेनान्योन्यं स्त्रीपुरुषयोगेन विविधं देवमनुष्यतिर्यगादिरूपं विश्वं सर्वं जगदुत्पद्यते ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजसेति ॥ रजसा रजःस्वभावेन प्रेरिता मेघाः सर्वतः सर्वत्र नदीसमुद्रोषरपर्वतादिषु जलप्रयोजनरहितेषु देशेष्वप्यम्बूनि वर्षन्ति अतो न प्रेक्षावत्प्रवृत्तिपूर्वकत्वं वृष्टेरिति भावः। तैरम्बुभिरेव प्रजाः सिध्यन्ति सम्पादितान्नादिप्रयोजना भवन्ति। एवं सति महेन्द्रः किं करिष्यति। यदीन्द्रेण बुद्धिपूर्वकं वृष्टिः कृता स्यात्तदा तदाराधकानां देश एव सा स्यान्न सर्वत्रेति भावः ॥ २३ ॥ नेति ॥ हे तात नोऽस्माकं पुरः नगराणि न सन्ति नच जनपदाः देशाः नापि ग्रामा नापि गृहाः यतो वयं नित्यं वनौकसः अतो वनशैलनिवासिनः अतोऽस्माकं योगक्षेमहेतवो वनशैलादयः गोवर्द्धनसमीपे वासश्च व्यज्यते ॥२४॥ तस्मादिति ॥ तस्मात् जीवनहेतूनां गवां प्रत्यक्षभूदेवानां सर्वकर्मकाण्डसंपादकानां च ब्राह्मणानां कन्दमूलफलतृणजलादिभिर्नित्यं योगक्षेमनिर्वाहकस्याद्रेर्गोवर्धनस्य च मखो यागः अद्यप्रभृति आरभ्य ताम् वनस्यात्रानुक्तिर्देवतात्वाप्रसिद्धेः अतस्त्रयाणामयं मखः तत्रापि शैलो मुख्यः शैलोऽस्मीत्याद्युक्तेः। तत्रापि गोवर्धनो मुख्यः इन्द्रयागस्य ये संभाराः साधनानि तैरेवायं मखः साध्यताम् ॥२५॥ पच्यन्तामिति ॥ सूपोन्ते येषां ते

रजसा चोदिता मेघा वर्षन्त्यम्बूनि सर्वतः ॥ प्रजास्तैरेव सिध्यन्ति महेन्द्रः किं करिष्यति ॥ २३ ॥ न नः पुरो जनपदा न ग्रामा न गृहा वयम् ॥
नित्यं वनौकसस्तात वनशैलनिवासिनः ॥ २४ ॥ तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः ॥ य इन्द्रयागसंभारास्तैरयं साध्यतां मखः ॥ २५ ॥
पच्यन्तां विविधाः पाकाः सूपान्ता पायसादयः ॥ संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यताम् ॥ २६ ॥ हूयन्तामग्नयः सम्यग् ब्राह्मणैर्ब्रह्मवादिभिः ॥
अन्नं बहुगुणं तेभ्यो देयं वो धेनुदक्षिणाः ॥ २७ ॥ अन्येभ्यश्चाश्वचाण्डालपतितेभ्यो यथार्हतः ॥ यवसं च गवां दत्त्वा गिरये दीयतां बलिः
॥ २८ ॥ स्वलंकृता भुक्तवन्तः स्वनुलिप्ताः सुवाससः ॥ प्रदक्षिणं च कुरुत गोविप्रानलपर्वतान् ॥ २९ ॥

सूपस्योष्मत्वमपेक्षितमित्यर्थः। पायसमादौ येषां ते पायसस्य शैत्यमपेक्षितम् इत्यर्थः। विविधाः पाकाः भोजनार्हद्रव्याणि पच्यन्तां संयावा अपूपाः शष्कुल्यश्च पच्यन्तां दोहो दुग्धदध्यादिः सर्वो गृह्यतां विक्रयादिविनियोगो न कर्तव्यः। अत्र सूपं मौद्गं पायसं केवले पयसि पक्वं संयावः मोहनभोग इति प्रसिद्धः अपूपः मालपुवा इति ख्यातः। शष्कुली सुहाली पूरी मठडी इत्यादि संज्ञा अन्ये तु कर्णाकारा मध्ये द्रव्यान्तरैः पूरिता गूंजा इति ख्याता इत्याहुः। क्रमश्च सूपपायसयोः श्रुत्या दोहस्य यत्र यत्रोपयोगे इत्यर्थतोऽन्येषां पाठतः ॥ २६ ॥ हूयन्तामिति ॥ ब्रह्मवादिभिर्वेदज्ञैर्ब्राह्मणैरग्नयः आहवनीयादयः सम्यक् हूयन्तां वो युष्माभिस्तेभ्यो ब्राह्मणेभ्यो बहुगुणं षड्रसोपेतमन्नं देयं धेनुसहिता दक्षिणास्ता एव वा दक्षिणाश्च देयाः ॥ २७ ॥ अन्येभ्य इति ॥ अन्येभ्यः आश्वचाण्डालपतितेभ्यः। श्वचाण्डालपतितपर्यन्तेभ्यः यथार्हतः यथायोग्यमन्नादिकं देयं तथा गवां गोभ्यः यवसं तृणं च दत्त्वा गिरये गोवर्धनाय बलिर्नैवेद्यं पक्वान्नादिकं सर्वं दीयताम् ॥ २८ ॥ स्वलङ्कृता इति ॥ सुष्ठु अलङ्कृताः भुक्तवन्तः सुष्ठु चन्दनाद्यैः अनुलिप्ताः सुवाससश्च यूयं गोविप्रानलपर्वतान् प्रदक्षिणं कुरुत ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदिति ॥ हे तात एतत् मम मतं कर्त्तव्यत्वेन संमतम् अतो यदि भवतां भवद्भ्यः शेषे षष्ठी । रोचते तर्हि गोब्राह्मणाद्रीणां मह्यं मम च दयितः प्रियोऽयं मखः क्रियताम् ॥ ३० ॥ कालेति ॥ शक्रस्य दर्पं जिघांसता कालात्मना भगवता प्रोक्तं वचनं निशम्य श्रुत्वा नन्दाद्याः साधु सादरं यथा भवति तथा तद्वचः अगृह्णन्त अङ्गीकृतवन्तः ॥ ३१ ॥ तथा चेति त्रयम् ॥ ततश्च यथा मधुसूदन आह स्म तथा सर्वं व्यदधुः कृतवन्तः । तथा स्वस्त्ययनं पुण्याहं ब्राह्मणैर्वाचयित्वा तद्द्रव्येण इन्द्रयागार्थसम्पादितपक्वान्नादिना गिरिं द्विजांश्च प्रतिबलीन् नैवेद्यानि तथा गवां यवसं तृणं चोपहृत्य समर्प्य आदृताः आदरयुक्ताः सद्विजाशिषः लब्धब्राह्मणाशीर्वादास्ते नन्दादयो गोपास्तथा स्वलङ्कृताः कृष्णवीर्याणि गायन्त्यो गोप्यश्च गोधनानि पुरस्कृत्य अग्रे कृत्वा अनडुद्भिर्वृषैर्युक्तानि अनांसि शकटान्यारुह्य गिरिं प्रदक्षिणं चक्रुः ॥ ३२ ॥ ३३ ॥

एतन्मम मतं तात क्रियतां यदि रोचते ॥ अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥ ३० ॥ श्रीशुक उवाच ॥ कालात्मना भगवता शक्रदर्पं जिघांसता ॥ प्रोक्तं निशम्य नन्दाद्याः साध्वगृह्णन्त तद्वचः ॥ ३१ ॥ तथा च व्यदधुः सर्वं यथाह मधुसूदनः ॥ वाचयित्वा स्वस्त्ययनं तद्द्रव्येण गिरिद्विजान् ॥ ३२ ॥ उपहृत्य बलीन् सर्वानादृता यवसं गवाम् ॥ गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ॥ ३३ ॥ अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः ॥ गोप्यश्च कृष्णवीर्याणि गायन्त्यः सद्विजाशिषः ॥ ३४ ॥ कृष्णस्त्वन्यतमं रूपं गोपविश्रम्भणं गतः ॥ शैलोऽस्मीति ब्रुवन् भूरि बलिमादद् बृहद्वपुः ॥ ३५ ॥ तस्मै नमो व्रजजनैः स चक्रे आत्मनाऽत्मने ॥ अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ॥ ३६ ॥ एषोऽवजानतो मर्त्यान् कामरूपी वनौकसः ॥ हन्ति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवाम् ॥ ३७ ॥

॥ ३४ ॥ कृष्ण इति ॥ कृष्णस्तु गोपानां विश्रम्भणं गोवर्धने दैवतत्वविश्वासकरमन्यतमम् अन्येषु भगवद्रूपेषु अतिशयितं रूपान्तरं गतः प्राप्तः अत एव बृहद्वपुश्च सन् गिरेर्मूर्ध्नि स्थितः शैलः शैलाभिमानी देवोऽस्मीति ब्रुवन् गोपैरर्पितं बलिमादत् अभक्षयत् । बृहद्वपुरिति दूरतोऽपि तत्तद्ग्रामवासिभिर्दत्तं दूरादेवादाय अभक्षयदिति ॥ ३५ ॥ तस्मै इति द्वयम् ॥ अहो आश्चर्यं पश्यत युष्माभिर्बहुकालमिन्द्रपूजा कृता परंतु कदापि प्रत्यक्षः स नाभूत् । असौ शैलस्तु रूपी प्रत्यक्षस्वरूपः सन् नः अनुग्रहं व्यधात् अनुग्रहेणास्मद्दत्तं बलिं बुभुजे । एष गिरिः कामरूपी यथेष्टरूपग्रहणसमर्थोऽतोऽवजानतः अवज्ञां कुर्वाणान् वनौकसो मर्त्यान् मनुष्यान् सिंहव्याघ्रसर्पादिरूपेण हन्ति । हि यस्मादेवं तस्मादात्मनः गवां च शर्मणे क्षेमायास्मै गोवर्धनदेवाय वयं नमस्यामः इति सार्द्धश्लोकं वदन् व्रजजनैः सह श्रीकृष्णः आत्मना स्वयमेव तस्मै गृहीताभिनवस्वरूपाय आत्मने नमश्चक्रे । सह चक्रेऽऽत्मनेति पाठे मन्त्रेष्वाङ्यादेरात्मन इत्यालोपः । स चक्रे आत्मनेति पाठेऽपि सन्ध्यभाव आर्षः ॥ ३६ ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं वासुदेवेन कृष्णेन प्रणोदिताः प्रेरितास्ते नन्दादयो गोपा अद्र्यादीनां मखं यथावद्विधाय कृष्णेन सहिता व्रजं ययुः । यन्निरीश्वरमीमांसासांख्ययोरुररीकृतिः तदिन्द्रमखभङ्गाय नतु ते सम्मते सताम् ॥ ३८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमचतुर्विंशे व्यधादिमाम् ॥ २४ ॥ पञ्चविंशेतिवर्षेण पीडितं गोकुलं हरिः ॥ जुगोप गोवर्द्धनेन तत्र श्लोकास्त्रिवह्नयः ॥ अनुष्टुभश्चतुस्त्रिंशदुवाचेति वचोद्वयम् ॥ २५ ॥ इन्द्र इति ॥ हे नृप तदा स इन्द्रः आत्मनः पूजां गोपैर्विहितां त्यक्तां विज्ञाय कृष्णो नाथो येषां तेभ्यो नन्दादिभ्यो गोपेभ्यश्चुकोप ॥ १ ॥ गणमिति ॥ क्रुद्धः उत यस्मात् ईशमानी आत्मानमीशं मन्यमानः इन्द्रः सांवर्तकं संवर्तः प्रलयस्तत्कर्तारं नाम प्रसिद्धम् । तत्र हेतुः अन्तो विनाशस्तत्कारिणां मेघानां गणं प्राचोदयत् व्रजनाशाय प्रेषयामास प्रेरणवाक्यं चाह स्म ॥ २ ॥ अहो इति ॥ अहो काननौकसां वनवासिनामपि गोपानां श्रीमदस्य माहात्म्यं पश्यत । ये गोपा मर्त्यं मनुष्यमात्रं मरणधर्माणं कृष्णमुपाश्रित्य देवस्य मम हेलनमवज्ञाश्चक्रुः ।

इत्यद्रिगोद्विजमखं वासुदेवप्रणोदिताः ॥ यथा विधाय ते गोपाः सहकृष्णा व्रजं ययुः ॥ ३८ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीशुक उवाच ॥ इन्द्रस्तदात्मनः पूजां विज्ञाय विहतां नृप ॥ गोपेभ्यः कृष्णनाथेभ्यो नन्दादिभ्यश्चुकोप सः ॥१॥ गणं सांवर्तकं नाम मेघानां चान्तकारिणाम् ॥ इन्द्रः प्राचोदयत् क्रुद्धो वाक्यं चाहेशमान्युत ॥ २ ॥ अहो श्रीमदमाहात्म्यं गोपानां काननौकसाम् ॥ कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनम् ॥ ३ ॥ यथा दृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः ॥ विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवम् ॥ ४ ॥ वाचालं बालिशं स्तब्धमज्ञं पण्डितमानिनम् ॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियम् ॥ ५ ॥

वस्तुतः श्रीश्च मदो हर्षश्च माहात्म्यं च तेषां द्वन्द्वैक्यम् । मर्त्येभ्यो हितं मर्त्यं देवस्य मत्तस्य दुष्टस्य मम हेलनमित्यर्थः ॥ ३ ॥ यथेति युग्मम् ॥ यथा केचित् आन्वीक्षिकीम् आत्मबोधविद्यां हित्वा अदृढैर्नश्वरैः कर्ममयैः क्रियासम्पादितैः नाममात्रेण नौनिभैः नौकावत्संसारतारकत्वेनाभिमतैः क्रतुभिरेव भवार्णवं तितीर्षन्ति तथैव वाचालं बहुभाषिणं बालिशं शिशुं स्तब्धं स्वपितुरग्रेऽपि धाष्टर्याद् दुर्विनीतम् अज्ञं तथापि वृथैव पण्डितमानिनं पण्डितंमन्यं मर्त्यं कृष्णमुपाश्रित्य गोपा मे देवस्याप्रियमपमानं चक्रुः । वास्तवोऽर्थस्तु वाचा अलं पूर्णं शास्त्रयोनित्वात् बालिशं शिशुमिव निरभिमानिनम् । यद्वा । वाचया सरस्वत्यालं पूर्णो बालिशोऽपि यस्मात् तमित्येकं पदं स्तब्धमनम्रमन्यस्य वन्द्यस्याभावात् । अज्ञं नास्ति ज्ञो यस्मात्तं सर्वज्ञं पण्डितैर्ब्रह्मविद्भिः कृतो मानो यस्यास्ति तं पण्डितमानिनं कृष्णं सदानन्दरूपं परं ब्रह्म तथापि भक्तवात्सल्येन मर्त्यं मनुष्यतया प्रतीयमानम् ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषामिति ॥ श्रिया सम्पदाऽवलिप्तानां गर्वितानां कृष्णेनाध्मायिताः संवर्धिता आत्मानो मनांसि येषां तेषां पुग्युक्तः साधुः पाठः। युक्त्युक्तस्त्वार्षः एषां गोपानां श्रीमदप्रयुक्तं स्तम्भं गर्वं धुनुत अपनयत तद्धेतून् पशून् संक्षयं नयत। वस्तुतः श्रिया शोभया अवलिप्तानां व्याप्तानां श्रीमान् यः अस्तम्भः जाड्याभावः औष्ण्यं तं धुनुत। वृष्ट्या शीतजननेनौष्ण्यं निवर्त्तयत संक्षयं सम्यङ्निवासं नयतेति ॥ ६ ॥ अहमिति ॥ अहं च ऐरावतं नागं हस्तिनमारुह्य महावीर्यैः असह्यवेगैर्मरुद्भिः देवैः वातैर्वा सह नन्दगोष्ठस्य जिघांसया हननार्थं व्रजमनुव्रजे युष्मत् पृष्ठत एवागमिष्यामि। तङ्गार्षः ॥ ७ ॥ इत्थमिति ॥ इत्थं मघवता इन्द्रेणाज्ञप्ताः प्रलयकर्तृत्वात्ततः प्राक् ते बद्धा भवंति तदा तु निर्मुक्तं बन्धनं येषां तथाभूता मेघा नन्दगोकुलमासाद्य आसारैः जलधारासम्पातैः ओजसा बलेन पीडयामासुः ॥ ८ ॥ विद्योतमाना इति ॥ विद्युद्भिर्विद्योतमानाः स्तनयित्नुभिः अशनिभिस्तनन्तः गर्जन्तः तीव्रैर्महावेगैर्मरुद्गणैः आवहप्रवहादिवायुसमूहैः नुन्नाः प्रेरिताः सन्तो मेघा जलशर्करा जलोपलान् ववृषुः ॥ ९ ॥ स्थूणेति ॥

एषां श्रियावलिप्तानां कृष्णेनाध्मायितात्मनाम् ॥ धुनुत श्रीमदस्तम्भं पशून् नयत संक्षयम् ॥ ६ ॥ अहं चैरावतं नागमारुह्यानुव्रजे व्रजम् ॥ मरुद्गणैर्महावीर्यैर्नन्दगोष्ठजिघांसया ॥ ७ ॥ श्रीशुक उवाच ॥ ॥ इत्थं मघवताऽऽज्ञप्ता मेघा निर्मुक्तबन्धनाः ॥ नन्दगोकुलमासारैः पीडयामासुरोजसा ॥ ८ ॥ विद्योतमाना विद्युद्भिः स्तनन्तः स्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ॥ ९ ॥ स्थूणास्थूला वर्षधारा मुञ्चत्स्वभ्रेष्वभीक्ष्णशः ॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतम् ॥ १० ॥ अत्यासारातिवातेन पशवो जातवेपनाः ॥ गोपा गोप्यश्च शीतार्ता गोविन्दं शरणं ययुः ॥ ११ ॥ शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः ॥ वेपमाना भगवतः पादमूलमुपाययुः ॥ १२ ॥ कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो ॥ त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल ॥ १३ ॥ शिलावर्षनिपातेन हन्यमानमचेतनम् ॥ निरीक्ष्य भगवान् मेने कुपितेन्द्रकृतं हरिः ॥ १४ ॥

अभीक्ष्णशः पुनः पुनः स्थूणाः स्तम्भा इव स्थूला वर्षधाराः अभ्रेषु मुञ्चत्सु सत्सु जलस्य ओघैः प्रवाहैः प्लाव्यमाना सती भूः नतोन्नतं नतं निम्नमुन्नतं तद्विपरीतञ्च यथा भवति तथा नादृश्यत ॥ १० ॥ अत्यासारेति ॥ पशवो गोपा गोप्यश्च अत्यन्तासारेणातिवातेन शीतेन चार्त्ताः पीडिता अत एव जातवेपनाः जातकम्पाः सन्तो गोविन्दं शरणं ययुः ॥ ११ ॥ शिर इति ॥ आसारैः पीडिताः अतो वेपमानाः ते शिरः शिरांसि जात्यामेकत्वं सुतांश्च कायेन प्रच्छाद्य "नारायणसमो गुणैः। अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ" इति गर्गोक्तिमनुस्मृत्य भगवतः पादमूलमुपाययुः ॥ १२ ॥ कृष्ण कृष्णेति ॥ हे कृष्ण कृष्ण हे महाभाग हे प्रभो हे भक्तवत्सल त्वमेव नाथो यस्य तादृशं गोकुलं गोसमूहं नोऽस्मांश्च कुपिताद्देवादिन्द्रात् त्रातुमर्हसि ॥ १३ ॥ शिलेति ॥ शिलावर्षस्य निष्ठुरपातेन हन्यमानमत एवाचेतनं जडीकृतं गोकुलं निरीक्ष्य भगवान् हरिः कुपितेनेन्द्रेण कृतमुपद्रवं विज्ञापनात्पूर्वमेव मेने ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपर्त्विति ॥ अपगत ऋतुर्यस्य तत् अपर्तु अति उल्बणं भयङ्करमतिशयितो वातो यस्मिंस्तदतिवातम् । शिलामयं शिलाप्रचुरं वर्षमस्माभिः स्वयागे निहते सति व्रजनाशायेन्द्रो वर्षति ॥ १५ ॥ तत्रेति ॥ तत्रैवं सति प्रतिविधिं वर्षप्रयुक्तपीडाप्रतीकारमात्मयोगेन स्वसामर्थ्येन सम्यक् साधये साधयिष्यामि । तेन च मौढ्याल्लोकेशमानिनामिन्द्रादीनां श्रीमदरूपं तमस्तमः कार्यं हनिष्ये हरिष्यामि । बहुवचनमिन्द्रगर्वनाशे वरुणादीनां गर्वनाशसूचनार्थम् ॥ १६ ॥ न हीति ॥ सद्भावः सत्त्वं सद्भाव इति पाठे मद्भक्तिस्तद्युक्तानां सुराणामीशा वयमिति विशिष्टः स्मयो गर्वो हि यस्मान्न युक्तोऽतस्तन्मानभङ्गो युक्त एवेति शेषः । यद्वा । तेषामीशविस्मयो न घटते अतस्ते असन्त एव अतः तेषाम् असतामीशाभिमानिनां यो मत्तो मानभङ्गः स प्रशमायोपकल्पते सर्वानर्थनिवृत्तये पर्यवस्यति अतस्तेषां मानभङ्गस्तेषामपि श्रेयसे ॥ १७ ॥ तस्मादिति ॥ तस्मात् मच्छरणम् अहमेव शरणं रक्षको यस्य । यद्वा । मम शरणं गृहरूपम् अहमेव नाथः स्वामी यस्य तं मम परिग्रहं कुटुम्बमिव सर्वतो रक्ष्यं गोष्ठं व्रजं स्वात्मयोगेन स्वसामर्थ्येन

अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयम् ॥ स्वयागे निहतेऽस्माभिरिन्द्रो नाशाय वर्षति ॥ १५ ॥ तत्र प्रतिविधिं सम्यगात्मयोगेन साधये ॥ लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः ॥ १६ ॥ नहि सद्भावयुक्तानां सुराणामीशविस्मयः ॥ मत्तोऽसतां मानभङ्गः प्रशमायोपकल्पते ॥ १७ ॥ तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ॥ गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥ १८ ॥ इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् ॥ दधार लीलया कृष्णश्छत्राकमिव बालकः ॥ १९ ॥ अथाह भगवान् गोपान् हेऽम्ब तात व्रजौकसः ॥ यथोपजोषं विशत गिरिगर्तं सगोधनाः ॥ २० ॥ न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातने ॥ वातवर्षभयेनालं तत्त्राणं विहितं हि वः ॥ २१ ॥

गोपाये रक्षामि । तङार्षः । सोयं व्रजरक्षाविषयको व्रतः संकल्पः नियमो वा मे मया आहितः गृहीतः अत्र महामेघारम्भ एव गिरिसमीपे सर्वानयनं गम्यते ॥ १८ ॥ इतीति ॥ इति स्वमनस्युक्त्वा कृष्णः लीलया अनायासेनैवैकेनैव हस्तेन गोवर्धनाचलं कृत्वा उत्कृत्य बालको यथा छत्राकं शिलीन्ध्रमनायासेन धरति तथा वामेन हस्तेन दधार । " गिरिः सव्येन पाणिना " इति हरिवंशोक्तेः ॥ १९ ॥ अथेति ॥ अथ धारणानन्तरं भगवान् हे अम्ब हे तात हे व्रजौकसः यथोपजोषं यथासुखं सगोधनाः सर्वे यूयं गिरिगर्तं विशतेति गोपान् प्रत्याह स्म । स्वल्पे गोवर्द्धनगर्त्ते सर्वव्रजस्थितियोग्यता तु भगवत्प्रभावादेव । " शैलोत्पाटनभूरेषा महती निर्मिता मया । त्रैलोक्यमुत्सहेऽनेन रक्षितुं किं पुनर्व्रजम् ॥ " इति हरिवंशोक्तेः ॥ २० ॥ नेति ॥ इह गिरिगर्ते स्थितानां युष्माकं कर्त्तरि षष्ठी । मद्धस्तादद्रेर्निपातने निपतने स्वार्थे णिच् । तन्निपातनिमित्तं त्रासो न कार्यः तथा वातवर्षाभ्यां यद्भयं तेनाप्यलं तदपि न कर्तव्यम् । हि यस्मात् मया वो युष्माकं तत्ततो भयात्त्राणं रक्षणं विहितम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेति ॥ तथोक्तप्रकारेण कृष्णेन आश्वासितं मानसं येषां ते गावश्च धनानि च गाव एव धनानि वा तत्सहिताः सगोधनाः सव्रजाः शकटारोपितोपकरणसहिताः सोपजीविनः भृत्यपुरोहितादिवर्गसहिताः सर्वे व्रजौकसो यथावकाशमसंकीर्णं यथा भवति तथा गिरिगर्तं निर्विविशुः ॥ २२ ॥ क्षुदिति ॥ तद्दर्शनानन्देन क्षुतृड्व्यथां निद्रादिसुखापेक्षां च हित्वा विस्मृत्य तैर्व्रजवासिभिर्वीक्ष्यमाणो भगवान् सप्ताहमद्रिं दध्रौ दधार । पदात् तदुद्धारसमये यत्रैव पादौ न्यस्तौ ततः स्थानान्नाचलत् । अत्र सप्ताहव्यापिन्या सांवर्त्तकवृष्ट्या माथुरं मण्डलं न ममज्ज । तद्भगवच्छक्त्यैव जलशोषणात् सप्ताहगणनापि भगवतैव कृता । अन्येषां रात्रिदिनज्ञानस्याप्यभावात् भगवत्प्रभावाद्गोवर्द्धनोपरिस्थहरिणादीनामपि कष्टं नाभूदित्यपि ज्ञेयम् ॥ २३ ॥ कृष्णेति ॥ तं श्रीकृष्णस्य योगानुभावं सामर्थ्यं स्वानुचरमेघद्वारा निशम्यातिविस्मितः निस्तम्भः गतमदः भ्रष्टो व्रजविनाशविषयकः संकल्पो यस्य सः इन्द्रः स्वान् स्वकीयान्मेघान् वर्षातः संन्यवारयत् ॥ २४ ॥ खमिति ॥ दारुणं वातवर्षमुपरतं निवृत्तं दृष्ट्वा अत एव विगतानि अभ्राणि यस्मात्

तथा निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः ॥ यथावकाशं सधनाः सव्रजाः सोपजीविनः ॥२२॥ क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः ॥ वीक्ष्यमाणो दधावद्रिं सप्ताहं नाचलत् पदात् ॥ २३ ॥ कृष्णयोगानुभावं तं निशम्येन्द्रोऽतिविस्मितः ॥ निस्तम्भो भ्रष्टसंकल्पः स्वान् मेघान् संन्यवारयत् ॥ २४ ॥ खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणम् ॥ निशाम्योपरतं गोपान् गोवर्धनधरोऽब्रवीत् ॥ २५ ॥ निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः ॥ उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः ॥ २६ ॥ ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनम् ॥ शकटोढोपकरणं स्त्रीबालस्थविराः शनैः ॥ २७ ॥ भगवानपि तं शैलं स्वस्थाने पूर्ववत् प्रभुः ॥ पश्यतां सर्वभूतानां स्थापयामास लीलया ॥ २८ ॥ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरम्भणादिभिः ॥ गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥ २९ ॥

अत एव उदितः प्रकाशमानः आदित्यो यस्मिंस्तथाभूतं खमाकाशं च निशाम्य दृष्ट्वा गोवर्धनधरो भगवान् गोपानब्रवीत् ॥ २५ ॥ निर्यातेति ॥ हे गोपाः स्त्रीभिर्धनैरर्भकैश्च सहिता निर्यात गोवर्धनगर्तादितो निर्यात निर्गच्छत त्रासं वर्षभयं त्यजत । यतो वातवर्षमुपारतं निवृत्तं निम्नगा नद्योऽपि व्युदप्रायाः निरुदकप्रायाः स्वल्पजलाः सन्तीत्यर्थः । एतस्यातिवृष्टिजलस्य सद्यःशोषणमपि हरेः प्रभावादेव ॥ २६ ॥ तत इति ॥ ततस्ते सर्वे गोपाः स्त्रियो बालाः स्थविरा वृद्धाश्च शकटैरूढमुपकरणं यथा भवति तथा स्वं स्वं गोधनमादाय शनैः सुखेन निर्ययुः गिरिगर्त्तान्निर्जग्मुः ॥ २७ ॥ भगवानिति ॥ प्रभुर्भगवान् अपि सर्वेषां भूतानां जनानां पश्यतामेव लीलया अनायासेनैव तं शैलं पूर्ववत् पूर्वं यथासीत्तथैव स्वस्थाने स्थापयामास ॥ २८ ॥ तमिति ॥ तं कृतरक्षं कृष्णं प्रेमवेगात् निभृताः पूर्णाः व्रजौकसः यथा यथोचितं परिरम्भणादिभिः समीयुः सम्यक् मिलिताः । आदिना मस्तकाघ्राणादिभिः गोप्यश्च सस्नेहं मुदा दध्यक्षताद्भिः अपूजयन् समासान्ताभाव आर्षः । सतीः आशिषश्च युयुजुः दध्ना तिलकम् अक्षतानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुपरिस्थापनमपां तदुपरि भ्रमणेनाधःपातनं ज्ञेयम् ॥२९॥ यशोदेति ॥ स्नेहेन कातराः व्याकुलचित्ताः अत एव क्वचित्प्राचीनगिरिधरमूर्तौ मातृभ्यां नवनीतादिदानं पित्रादिभिर्गिर्यवष्टम्भश्च दृश्यन्ते । यशोदा रोहिणी नन्दो बलिनां वरो रामश्च कृष्णमालिङ्ग्याशिषो युयुजुः ॥ ३० ॥ दिवीति ॥ हे पार्थिव दिवि स्वर्गे नष्टमददोषेण प्रसन्नचेतसा इन्द्रेण प्रेरिताः देवगणादयः तुष्टाः सन्तो भगवन्तं तुष्टुवुः पुष्पवर्षाणि च मुमुचुः ॥ ३१ ॥ शङ्खेति ॥ हे नृप दिवि देवैः प्रणोदिताः शङ्खदुन्दुभयो नेदुः तुम्बुरुप्रमुखा गन्धर्वपतयो जगुः ॥ ३२ ॥ तत इति ॥ हे राजन् ततः अनुरक्तैः पशुपैर्गोपैः परिश्रितो युक्तः बलेन च सहितः स हरिः गोष्ठमव्रजत् । गोपिकाश्चास्य कृष्णस्य तथाविधानि गोवर्धनोद्धरणतुल्यान्यन्यान्यपि कृतानि कर्माणि गायन्त्यः मुदिताः हृदिस्पृशः प्रेम्णा कृष्णस्य हृदि स्पृशन्तीति तथाभूताः प्रेष्ठत्वेन तासां हृदि स्पृशतीति । तस्येति कृष्णविशेषणं वा । गोष्ठमीयुः जग्मुः ॥ ३३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमपञ्चविंशे व्यधादिमाम् ॥ २५ ॥ षड्विंशेऽबोधयद्गोपान् कृष्णाचरितविस्मितान् ॥ नन्दो गर्गोक्तिभिस्तत्र श्लोकाः सार्द्धेषुबाहवः ॥ द्वे उवाचेति पादोनाः सप्तहस्ता अनुष्टुभः ॥ २६ ॥ एवमिति ॥ एवंविधानि गोवर्द्धनोद्धरणादन्यितमानुषाणि कृष्णस्य कर्माणि ते गोपा वीक्ष्य अनुस्मृत्य सुविस्मिताः आश्चर्ययुक्ताः अतद्वीर्यविदः तस्य वीर्यं प्रभावमजानन्तः नन्दं समभ्येत्य समधिगम्य प्रोचुः ॥ १ ॥ बालकस्येति ॥ वै अवधारणे यत् । यस्मात् बालकस्य सत एतानि कर्माणि अत्यद्भुतान्येव तस्मात् असौ आत्मनः स्वस्य जुगुप्सितमयोग्यं ग्राम्येषु गोपेष्वस्मासु जन्म कथमर्हति । असाविति विप्रकृष्टार्थकादःशब्दप्रयोगात्तदा कृष्णो वनं गतो ज्ञेयः । प्रशंसानां परोक्षे औचित्यात् ॥ २ ॥ य इति ॥ यः सप्तहायनः सप्तवर्षमात्रवयाः बालः सर्वथा असमर्थः स कथमेकेन करेण लीलया अनायासेन पुष्करं कमलं बिभ्रत् गजराडिव गिरिवरं बिभ्रत् स्थितः ॥ ३ ॥

यशोदा रोहिणी नन्दो रामश्च बलिनां वरः ॥ कृष्णमालिङ्ग्य युयुजुराशिषः स्नेहकातराः ॥ ३० ॥ दिवि देवगणाः साध्याः सिद्धगन्धर्वचारणाः ॥ तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि पार्थिव ॥ ३१ ॥ शङ्खदुन्दुभयो नेदुर्दिवि देवप्रणोदिताः ॥ जगुर्गन्धर्वपतयस्तुम्बुरुप्रमुखा नृप ॥ ३२ ॥ ततोऽनुरक्तैः पशुपैः परिश्रितो राजन् स्वगोष्ठं सबलोऽव्रजद्धरिः ॥ तथाविधान्यस्य कृतानि गोपिका गायन्त्य ईयुर्मुदिता हृदिस्पृशः ॥ ३३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पञ्चविंशोऽध्यायः ॥ २५ ॥ श्रीशुक उवाच ॥ एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते ॥ अतद्वीर्यविदः प्रोचुः समभ्येत्य सुविस्मिताः ॥ १ ॥ बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै ॥ कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितम् ॥ २ ॥ यः सप्तहायनो बालः करेणैकेन लीलया ॥ कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोकेनेति ॥ तनोः शरीरस्य वयो यौवनमायुर्वा यथा कालेन पीयते तथा आसमन्ताव् मीलिताक्षेण तोकेनातिबालेन महौजसो महाबलायाः पूतनायाः प्राणैः सह स्तनः पीतः । अत्र स्तनः कथं पीत इत्यादि सर्वत्र कथंशब्दं स्वामिचरणाद्याः अन्वषञ्जयन् ॥ ४ ॥ हिन्वत इति ॥ शकटस्याधःशयानस्य मास्यस्य मासान् भूतो मास्यः त्रिमासवयस्कः । "तमधीष्ट" इत्यधिकारे "मासाद्वयसि यत्खञौ" इति यत् । त्रैमासिकस्य च पदा शकटोऽपवृत्त इति प्रागुक्तेः । तस्यासमर्थस्य अत एव रुदतः उदक् ऊर्ध्वं चरणौ हिन्वतः प्रक्षिपतः प्रपदेन पादाग्रेण आहतमत एव विपर्यस्तं सत् अनः शकटमपतत् ॥५॥ एकेति ॥ यः एकहायनः एकवार्षिकः अत एव आसीनः उपविष्टः चलनेऽप्यसमर्थः अत एव दैत्येन तृणावर्तेन विहायसा आकाशमार्गेण ह्रियमाणः तृणावर्तं कण्ठग्रहणेनातुरं कृत्वा अहन् ॥ ६ ॥ क्वचिदिति ॥ क्वचित् कदाचित् हैयङ्गवस्तैन्ये

तोकेनामीलिताक्षेण पूतनाया महौजसः ॥ पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ॥ ४ ॥ हिन्वतोऽधः शयानस्य मास्यस्य चरणावुदक् ॥ अनोऽपतद्विपर्यस्तं रुदतः प्रपदा हतम् ॥५॥ एकहायन आसीनो ह्रियमाणो विहायसा ॥ दैत्येन यस्तृणावर्तमहन् कण्ठग्रहातुरम् ॥६॥ क्वचिद्धैयङ्गवस्तैन्ये मात्रा बद्ध उलूखले ॥ गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ॥७॥ वने संचारयन् वत्सान् सरामो बालकैर्वृतः ॥ हन्तुकामं बकं दोर्भ्यां मुखतोऽरिमपाटयत् ॥८॥ वत्सेषु वत्सरूपेण प्रविशन्तं जिघांसया ॥ हत्वा न्यपातयत् तेन कपित्थानि च लीलया ॥९॥ हत्वा रासभदैतेयं तद्बन्धूंश्च बलान्वितः ॥ चक्रे तालवनं क्षेमं परिपक्वफलान्वितम् ॥ १० ॥ प्रलम्बं घातयित्वोग्रं बलेन बलशालिना ॥ अमोचयद्व्रजपशून् गोपांश्चारण्यवह्नितः ॥ ११ ॥ आशीविषतमाहीन्द्रं दमित्वा विमदं ह्रदात् ॥ प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकाम् ॥ १२ ॥

नवनीतचौर्ये सति क्रुद्धया मात्रा उलूखले बद्धो बाहुभ्यामर्जुनयोर्मध्ये गच्छन् रिङ्गन् तावर्जुनौ अपातयत् ॥ ७ ॥ वन इति ॥ रामेण सहितो बालकैश्च वृतो वने वत्सान् संचारयन् आत्मानं हन्तुकाममत एवारिं शत्रुं बकं बकवेषमसुरं दोर्भ्यां भुजाभ्यां मुखतो मुखं चञ्चुं प्रगृह्यापाटयत् विदारितवान् ॥ ८ ॥ वत्सेष्विति ॥ जिघांसया हन्तुमिच्छया वत्सरूपेण वत्सेषु प्रविशन्तं प्रविष्टं वत्सासुरं लीलया भ्रमणरूपया हत्वा तेन मृतदैत्यशरीरेण कपित्थानि न्यपातयत् ॥ ९ ॥ हत्वेति ॥ बलदेवद्वारा रासभदैतेयं धेनुकं हत्वा घातयित्वा अन्तर्भावितण्यर्थो हनिः बलदेवेनान्वितः तस्य धेनुकासुरस्य बन्धूंश्च हत्वा परिपक्वैः फलैरन्वितं तालवनं क्षेमं निर्भयत्वेन सर्वैः प्रवेष्टुं योग्यं चक्रे ॥ १० ॥ प्रलम्बमिति ॥ उग्रमतिभयङ्करं प्रलम्बं बलशालिना बलेन घातयित्वा स्वयं व्रजपशून् गोपांश्च आरण्यवह्नितः अमोचयत् ॥ ११ ॥ आशीविषेति ॥ असौ आशीविषतमः अतिक्रूरविषश्वासावहीन्द्रश्च तं प्रसह्य बलात् दमित्वा ततो विगतमदं तं ह्रदादुद्वास्य निष्कास्य यमुनां निर्विषोदकां चक्रे ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुस्त्यज इति ॥ हे नन्द सर्वेषां पशुपक्ष्यादिसहितानां नोऽस्माकं व्रजौकसामस्मिन् ते तव तनये कृष्णे दुस्त्यजोऽनुरागस्तथाऽस्मासु तस्यापि औत्पत्तिकः स्वाभाविकोऽनुरागः कथं किं सर्वेषामयमात्मा स्यात् ॥ १३ ॥ उक्तमप्यतिविस्मयेन पुनः वदन्ति--क्वेति ॥ क्व सप्तहायनो बालः क्व च महाद्रेर्विधारणं ततः तस्मात् सर्वात्मसर्वशक्ति विनोक्तप्रभावस्यासंभवात् हे व्रजनाथ तवात्मजे नोऽस्माकं परमेश्वरत्वशङ्का जायते ॥ १४ ॥ श्रूयतामिति ॥ हे गोपाः एनं कुमारं बालमुद्दिश्य गर्गो मे मह्यं यद्वचः उवाच तत् मे मम वचः श्रूयताम् ॥ तेन वचःश्रवणेन ममार्भके बालके या वो युष्माकं शङ्का सा व्येतु अपगच्छतु ॥ १५ ॥ तान्येव गर्गवाक्यान्यनुवदति--वर्णा इति ॥ अनुयुगं युगे युगे तनूर्मूर्तीर्गृह्णतोऽस्य तव पुत्रस्य शुक्लो रक्तस्तथा पीतश्चेति त्रयो वर्णा आसन् । इदानीं तु द्वापरस्यान्ते कृष्णतां गतः अतः कृष्णनामा भविष्यति ॥ १६ ॥ प्रा-

दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम् ॥ नन्द ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ॥ १३ ॥ क्व सप्तहायनो बालः क्व महाद्रिविधारणम् ॥ ततो नो जायते शङ्का व्रजनाथ तवात्मजे ॥ १४ ॥ नन्द उवाच ॥ ॥ श्रूयतां मे वचो गोपा व्येतु शङ्का च वोर्भके ॥ एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥ १५ ॥ वर्णास्त्रयः किलास्यासन् गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥१६॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥ १७ ॥ बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १८ ॥ एष वः श्रेय आधास्यद्गोपगोकुलनन्दनः ॥ अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ १९ ॥ पुराऽनेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून् समेधिताः ॥ २० ॥ य एतस्मिन् महाभागाः प्रीतिं कुर्वन्ति मानवाः ॥ नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः ॥ २१ ॥

गिति ॥ अयं श्रीमांस्तवात्मजः क्वचित् प्राक्समये वसुदेवस्य सुतो जातः अतः अभिज्ञा ये अभितोऽस्य स्वरूपं जानन्ति त एनं वासुदेव इति संप्रचक्षते कथयन्ति ॥ १७ ॥ बहूनीति ॥ गुणानुरूपाणि सर्वेश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोवर्द्धनोद्धरणः कालियदमन इत्यादीनि तव सुतस्य वहूनि नामानि सन्ति तानि च सर्वाणि जना न विदुः । अहमपि नो वेद न जानामि ॥ १८ ॥ एष इति ॥ गोपान् गोकुलं च नन्दयति तथाभूतः एष वो युष्माकं सर्वेषां श्रेयः सुखम् आधास्यत् आधास्यति । इलोप आर्षः । अनेनैव रक्षकेण सर्वाणि दुर्गाणि महतोप्युपद्रवान् अञ्जः अनायासेनैव यूयं तरिष्यथ अतिक्रमिष्यथ ॥ १९ ॥ पुरेति ॥ हे व्रजपते पुरा अराजके दस्युभिश्चौरैः पीडिताः साधवः अनेन रक्ष्यमाणाः समेधिताः संवर्धिताश्च सन्तस्तान् दस्यून् जिग्युः निर्जितवन्तः ॥ २० ॥ य इति ॥ ये महाभागा मानवाः एतस्मिन् त्वत्पुत्रे प्रीतिं कुर्वन्ति । विष्णुः पक्षे येषां तान् देवान् असुरा इव एतान् अरयः शत्रवो न अभिभवन्ति न तिरस्कुर्वन्ति ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ तस्मात् हे नन्द अयं ते कुमारो गुणैः श्रिया कीर्त्यानुभावेन च नारायणसमः इत्यन्तं गर्गवाक्यमाश्राव्याह । यस्मात् गर्गो नारायणसमत्वेनोक्तवान् तत् तस्मात् तस्य कर्मसु विस्मयो नास्ति अतो युष्माभिर्विस्मयो न कार्यः । यद्यपि गर्गवाक्यं गोपैः पूर्वं ज्ञातमेव बकवधानन्तरं तद्वचनात् तथापीदानीं समग्रतया श्रावितमिति विशेषः ॥ २२ ॥ इतीति ॥ इत्येवमद्धा साक्षात् मां प्रति समादिश्य कृष्णप्रभावं निरूप्य गर्गे स्वगृहं गते सति तदानीं तथा अमन्यमानोऽपि इदानीम् अहम् अक्लिष्टानि क्लेशापहानि कर्माणि करोति अस्मान् अक्लिष्टान् क्लेशरहितान् करोति इति वा । तादृशं कृष्णं नारायणस्यांशं मन्ये ॥ २३ ॥ इतीति सार्द्धम् ॥ अमिततेजसः अचिन्त्यप्रभावस्य कृष्णस्य दृष्टाः श्रुताश्चानुभावा यैस्ते व्रजौकसः इत्येवं प्रागुक्तं गर्गगीतं तत्कर्मसु न विस्मय इत्यादि नन्दवचश्च श्रुत्वा गतविस्मयाः आश्चर्यरहिताः मुदिताश्च सन्तः नारायणपितृबुद्ध्या नन्दमानर्चुः । ततो वनादागतं श्रीकृष्णं नारायणबुद्ध्या आनर्चुः ॥२४॥ देव इति ॥ स्वयज्ञस्य विप्लवेन प्रतिरोधेन या रुट् क्रोधस्तया देवे इन्द्रे नाशाय वर्षति सति वज्रादशनि-

तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ॥ श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः ॥ २२ ॥ इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते ॥ मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणम् ॥ २३ ॥ इति नन्दवचः श्रुत्वा गर्गगीतं व्रजौकसः ॥ दृष्टश्रुतानुभावास्ते कृष्णस्यामिततेजसः ॥ मुदिता नन्दमानर्चुः कृष्णं च गतविस्मयाः ॥ २४ ॥ देवे वर्षति यज्ञविप्लवरुषा वज्राश्मवर्षानिलैः सीदत्पालपशुस्त्रि आत्मशरणं दृष्ट्वानुकम्प्यु-त्स्मयन् ॥ उत्पाट्यैककरेण शैलमबलो लीलोच्छिलीन्ध्रं यथा बिभ्रद्गोष्ठमपान्महेन्द्रमदभित् प्रीयान्न इन्द्रो गवाम् ॥ २५ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे षड्विंशतितमोऽध्यायः ॥ २६ ॥ श्रीशुक उवाच ॥ ॥ गोवर्धने धृते शैल आसाराद्रक्षिते व्रजे ॥ गोलोकादाव्रजत् कृष्णं सुरभिः शक्र एव च ॥ १ ॥

भिः अश्मभिः जलशर्कराभिः परुषानिलैश्च परुषेति वर्षति च पाठः । सीदत्पालपशुस्त्रि सीदन्तः पालाः पशवः स्त्रियश्च यस्मिन् तत् कबभाव आर्षः। आत्मा स्वयं शरणं रक्षको यस्य तत् गोष्ठं व्रजं दृष्ट्वा अनुकम्पी भूरिदयः णिनिप्रत्ययान्तम् । उत्स्मयन् प्रहसन्नेव आर्षः शता । अबलो बालो लीलार्थमुच्छिलीन्ध्रं छत्राकं यथा बिभर्ति तथा शैलं गोवर्द्धनमु-त्पाट्य उत्कृत्य एकेन करेण बिभ्रत् दधत् यो गोष्ठमपात्पालितवान् स इन्द्रमदभित् गवामिन्द्रः इत्युत्तराध्यायार्थं स्मरति। श्रीकृष्णो नोऽस्मान् वक्तृश्रोत्रादीन् प्रति प्रीयात् प्रीयताम् एतान् प्रीणातु वा ॥ २५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षड्विंशे दशमस्य व्यधादिमाम् ॥२६॥ सप्तविंशे स्तुतिः शक्रसुरभिभ्यां हरेः कृता ॥ अभिषेकोत्सवश्चास्य श्लोकास्तत्राष्टर्वाहवः ॥ षड्वाचेत्यर्द्धयुक्ता एकत्रिंशदनुष्टुभः ॥ २७ ॥ गोवर्द्धन इति ॥ गोवर्द्धने शैले कृष्णेन धृते सति तस्य परिश्रममाशङ्क्य भयात्तं क्षमयितुं शक्रः आव्रजत् आसारात् धारापातात् व्रजे गोकुले रक्षिते सति हर्षाच्छ्रीकृष्णाभिषेकार्थं सुरभिः कामधेनुश्च गोलोकादाव्रजत् । एव पादपूर्तौ । गोलो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्चायं स्वर्गविशेषो ननु वैकुण्ठविशेषः । तत्सुरभेरिन्द्रसाहित्यानुपपत्तेः । ब्रह्ममन्त्रितः शक्रो ब्रह्माज्ञया गोलोकं गत्वा गवा सहागत इति ज्ञेयम् ॥ १ ॥ विविक्त इति ॥ कृतहेलनः अतो व्रीडित इन्द्रो विविक्ते उपसंगम्य एकान्ते श्रीकृष्णसमीपं गत्वा व्रजे प्रकटगमनव्यवहाराभावात् एकान्ते क्षमापनौचित्याच्च भगवानपि नभस्यागच्छन्तं शक्रं दृष्ट्वा केनापि व्याजेन रहस्यागत इति । अर्कः सूर्यस्तद्वद्वर्चो यस्य तेन किरीटेनैनं कृष्णं पादयोः पस्पर्श नमश्चकार ॥ २ ॥ दृष्टेति ॥ अमितं तेजः प्रभावो यस्य तस्य अस्य कृष्णस्य दृष्टः गोवर्धनोद्धरणव्रजरक्षादिरूपः श्रुतश्च पूतनानिधनादिरूपोऽनुभावो येन सः श्रुतश्चासावनुभावश्च दृष्टः श्रुतानुभावो येनेति स्वामिपादाः । नष्टस्त्रिलोकेशोऽहमिति मदो यस्य स इन्द्रः कृताञ्जलिः सन्नाह स्म ॥ ३ ॥ विशुद्धेति ॥ तव धाम स्वरूपं विशुद्धसत्त्वं शान्तं निर्विकारं तपोमयं ज्ञानप्रचुरं सर्वज्ञं ध्वस्ते अविद्यमाने रजस्तमसी यत्र तत् अत एव ग्रहणेन देहादावात्माध्यासेनैवानुबध्यते इति अग्रहणेन अज्ञानेनेति वा । तथा अयं दृश्यमानः मायामयः गुणसंप्रवाहो गुणैः संप्रोह्यते इति । स संसारस्ते

विविक्त उपसंगम्य व्रीडितः कृतहेलनः ॥ पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥ २ ॥ दृष्टश्रुतानुभावोऽस्य कृष्णस्यामिततेजसः ॥ नष्टत्रिलोकेशमद इन्द्र आह कृताञ्जलिः ॥ ३ ॥ इन्द्र उवाच ॥ ॥ विशुद्धसत्त्वं तव धाम शान्तं तपोमयं ध्वस्तरजस्तमस्कम् ॥ मायामयोऽयं गुणसंप्रवाहो न विद्यते तेऽग्रहणानुबन्धः ॥ ४ ॥ कुतो नु तद्धेतव ईश तत्कृता लोभादयो येऽबुधलिङ्गभावाः ॥ तथाऽपि दण्डं भगवान् बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय ॥ ५ ॥ पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदण्डः ॥ हिताय स्वेच्छातनुभिः समीहसे मानं विधुन्वन् जगदीशमानिनाम् ॥ ६ ॥ ये मद्विधाज्ञा जगदीशमानिनस्त्वां वीक्ष्य कालेऽभयमाशु तन्मदम् ॥ हित्वाऽऽर्यमार्गं प्रभजन्त्यपस्मया ईहा खलानामपि तेऽनुशासनम् ॥ ७ ॥

सर्वज्ञस्य तव न विद्यते ॥ ४ ॥ कुत इति ॥ हे ईश गुणसम्प्रवाहाभावे तद्धेतवः जन्ममरणहेतवः देहान्तरहेतवश्च तत्कृता देहाध्यासकृताः अबुधानाम् अज्ञानिनां लिङ्गभूताः यावल्लोभादिमत्त्वं तावज्ज्ञानित्वमसिद्धम् । अतो अज्ञानिनां लक्षणभूताः भावाः लोभादयस्तव कुतः स्युः तथापि लोभाद्यभावेऽपि भगवान् धर्मस्य गुप्त्यै खलानामस्मादृशां निग्रहाय च दण्डं बिभर्त्ति ॥ ५ ॥ पितेति ॥ जगतां प्राणिनां त्वं पिता जनकः गुरुरुपदेष्टा अधीशः नियन्ता चेति दण्डधारणे हेतुत्रयम् । दुरत्ययः प्रबलः कालः तस्मादुपात्तदण्डः संकल्पितदण्डः सन् जगदीशमानिनामस्माकं हिताय मानं विधुन्वन् दूरीकुर्वन् स्वेच्छातनुभिः लीलावतारैः समीहसे चेष्टसे । तव समीहा लीलैव जगदीशमानिनामस्माकं मानविधूननमित्यर्थः ॥ ६ ॥ य इति ॥ ये मद्विधाश्च ते अज्ञाश्च अत एवात्मानं जगदीशं मन्यमानास्ते भयकालेऽपि यथाधुनैवातिवृष्टौ त्वामभयं भयमगणयन्तं दण्डधरं वीक्ष्य तन्मदं जगदीशाभिमानप्रयुक्तं मदमाशु हित्वा अपस्मयाः अपगतगर्वाः सन्तः आर्यमार्गं सतां वर्त्म त्वद्भक्तिं प्रभजन्ति अनुवर्तन्ते । अतस्ते तवेहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीला एव खलानामप्यनुशासनं शिक्षा दण्डो वा ॥ ७ ॥ स इति ॥ हे प्रभो हे ईश स सर्वेश्वरस्त्वम् ऐश्वर्यं देवस्वामित्वं तेन यो मदस्तेन प्लुतस्य व्याप्तस्य कृतागसः ते तव प्रभावम् अविदुषः मूढचेतसो मम क्षन्तुमर्हसि । अथ इतोऽनन्तरमपि एवं मे ममासती दुष्टा त्रिलोकेशत्वाभिमानरूपा मतिर्माभूत् । इदं च नातिशुद्धेन चेतसा प्रार्थितम् अत एव पारिजातहरणादौ विस्मरिष्यते ॥ ८ ॥ तवेति ॥ हे अधोक्षज हे देव एवंविधस्य तवेह भूमावयमवतारः स्वयंभराणां स्वप्राणमात्रपोषकाणां स्वयंभाररूपाणां वा । अत एव उरुभारजन्मनां बहूनां भाराणां जन्म येभ्यस्तेषां चमूपतीनां राज्ञामभवाय विनाशाय युष्मच्चरणसेविनां तु भवाय पुरुषार्थलाभाय अस्ति ॥ ९ ॥ नम इति ॥ स्पष्टम् ॥ १० ॥ स्वच्छन्देति ॥ स्वच्छन्देन स्वेच्छया गृहीतदेहायेत्यादि स्पष्टम् ॥ ११ ॥ मयेति ॥ हे भगवन् यज्ञे विहते सति मानिना तीव्रमन्युना च मया आसारवायुभिः

स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्तेऽविदुषः प्रभावम् ॥ क्षन्तुं प्रभोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश मेऽसती ॥ ८ ॥ तवावतारोऽयमधोक्षजेह स्वयंभराणामुरुभारजन्मनाम् ॥ चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनाम् ॥ ९ ॥ नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ वासुदेवाय कृष्णाय सात्त्वतां पतये नमः ॥ १० ॥ स्वच्छन्दोपात्तदेहाय विशुद्धज्ञानमूर्तये ॥ सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ ११ ॥ मयेदं भगवन् गोष्ठनाशासारवायुभिः ॥ चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना ॥ १२ ॥ त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तम्भो हतोद्यमः ॥ ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः ॥ १३ ॥ श्रीशुक उवाच ॥ ॥ एवं संकीर्तितः कृष्णो मघोना भगवानमुम् ॥ मेघगम्भीरया वाचा प्रहसन्निदमब्रवीत् ॥ १४ ॥ श्रीभगवानुवाच ॥ ॥ मया तेऽकारि मघवन् मखभङ्गोऽनुगृह्णता ॥ मदनुस्मृतये नित्यं मत्तस्येन्द्र श्रिया भृशम् ॥ १५ ॥ मामैश्वर्यश्रीमदान्धो दण्डपाणिं न पश्यति ॥ तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहम् ॥ १६ ॥

गोष्ठनाशायेदमकृत्यं चेष्टितं कृतम् ॥ १२ ॥ त्वयेति ॥ हे ईश ध्वस्तः स्तम्भः अविनयो यस्य हतो निष्फल उद्यमो व्रजनाशार्थो यस्य सोऽहं स्तम्भादिध्वंसात् त्वयानुगृहीतोऽस्मि अतः ईश्वरं गुरुमात्मानं च त्वां शरणं गतः ॥ १३ ॥ एवमिति ॥ मघोना इन्द्रेण एवं संकीर्तितः संस्तुतो भगवान् कृष्णो मेघवत् मेघस्येव गम्भीरया मधुरया वाचा अमुम् इन्द्रं हर्षयन् स्वयमपि प्रहसन् इदं वक्ष्यमाणमब्रवीत् ॥ १४ ॥ मयेति ॥ हे मघवन् इन्द्रश्रिया देवेन्द्रत्वसम्पदा भृशं मत्तस्य ते तव नित्यं मम अनुस्मृतये अनुगृह्णता अनुजिघृक्षता मया तव मखभङ्गः अकारि कृतः ॥ १५ ॥ मामिति ॥ ऐश्वर्यश्रीभ्यामाधिपत्यसंपद्भ्यां यो मदस्तेनान्धो विवेकहीनो जनः दण्डपाणिं दण्डधरं कालयमादिरूपं मां न पश्यति अतः यस्य चानुग्रहमिच्छामि तं सम्पद्भ्यो भ्रंशयामि । अत्रेदं बोध्यम् । यत्रैश्वर्यसत्वे मदस्तद्भ्रंशदशायां च भगवद्भजनपरता तत्र सम्पद्भ्रंशो भगवदनुग्रहः । यत्र त्वैश्वर्यसत्वेऽपि मदत्यागपूर्वकं भगवद्भजनपरता तत्राम्बरीषादाविव सम्पद्भ्रंशो न क्रियते । यत्र त्वैश्वर्यसत्वे तदभावे वा त्रिवर्गसाधने प्रवृत्तिरेव तत्र स्वकर्मभोग एव भगवद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुग्रहः । इन्द्रे तु पूर्णानुग्रहाभावान्न स ऐश्वर्याद्भ्रंशितः अत एव वक्ष्यमाणं पारिजातापहरणे मदेन पुनर्भगवता सह युद्धं संगच्छते ॥ १६ ॥ गम्यतामिति ॥ हे शक्र स्वर्गं गम्यतां गत्वा च मे अनुशासनं क्रियतां तेन वो युष्माकं भद्रमेव भविष्यति । अतः स्तम्भवर्जितैः गर्वरहितैः युक्तैः स्वकर्तव्ये सावधानैर्वो युष्माभिः स्वाधिकारेषु स्थीयताम् ॥१७॥ अथेति ॥ अथ मनस्विनी प्रशस्तमनस्का सुरभिः स्वसन्तानैर्गोभिः सह गोपरूपिणमीश्वरं कृष्णमुपामन्त्र्य संबोध्य साधु रक्षा कृतेत्यभिनन्द्य चाह स्म अभिवाद्येत्यपि पाठः ॥ १८ ॥ हे कृष्ण कृष्णेति सम्बुद्धयः । इन्द्रेण हता अपि लोकनाथेन भवता वयं सनाथाः रक्षिताः ॥ १९ ॥ त्वमिति ॥ हे जगत्पते यतस्त्वं नोऽस्माकं परमकं सर्वोत्कृष्टं दैवमतस्त्वं गवां विप्राणां देवानां ये चान्ये साधवस्तेषां च नोऽस्माकं भवाय अभ्युदयायेन्द्रो भव ॥ २० ॥ इन्द्रमिति ॥ ब्रह्मणा तदधिकारप्रदेन नोदिता वयं त्वा

गम्यतां शक्र भद्रं वः क्रियतां मेऽनुशासनम् ॥ स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तम्भवर्जितैः ॥ १७ ॥ अथाह सुरभिः कृष्णमभिवाद्य मनस्विनी ॥ स्वसंतानैरुपामन्त्र्य गोपरूपिणमीश्वरम् ॥ १८ ॥ सुरभिरुवाच ॥ ॥ कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वसंभव ॥ भवता लोकनाथेन सनाथा वयमुच्युत ॥ १९ ॥ त्वं नः परमकं दैवं त्वं न इन्द्रो जगत्पते ॥ भवाय भव गोविप्रदेवानां ये च साधवः ॥ २० ॥ इन्द्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा नोदिता वयम् ॥ अवतीर्णोऽसि विश्वात्मन् भूमेर्भारापनुत्तये ॥ २१ ॥ श्रीशुक उवाच ॥ ॥ एवं कृष्णमुपामन्त्र्य सुरभिः पयसात्मनः ॥ जलैराकाशगङ्गाया ऐरावतकरोद्धृतैः ॥ २२ ॥ इन्द्रः सुरर्षिभिः साकं नोदितो देवमातृभिः ॥ अभ्यषिञ्चत दाशार्हं गोविन्द इति चाभ्यधात् ॥ २३ ॥ अहमिन्द्रो हि देवानां त्वं गवामिन्द्रतां गतः ॥ गोविन्द इति लोके त्वां गास्यन्ति भुवि मानवाः ॥ २४ ॥ तत्रागतास्तुम्बुरुनारदादयो गन्धर्वविद्याधरसिद्धचारणाः ॥ जगुर्यशो लोकमलापहं हरेः सुराङ्गनाः संननृतुर्मुदान्विताः ॥ २५ ॥ तं तुष्टुवुर्देवनिकायकेतवो व्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन् पयोद्रुताम् ॥ २६ ॥

त्वामेव नोऽस्माकमिन्द्रमभिषेक्ष्यामः । अलं पुरन्दरस्यास्मद्गोत्रदुःखदस्येन्द्रतया हे विश्वात्मन् सर्वेश्वर त्वं भूमेर्भारापनुत्तयेऽवतीर्णोऽसीति ॥ २१ ॥ एवमिति द्वयम् ॥ एवं सुरभिः कृष्णमुपामन्त्र्य संप्रार्थ्य आत्मनः पयसाऽभ्यषिञ्चत् तथेन्द्रोऽपि देवैर्मातृभिरदित्यादिभिश्च नोदितः प्रेरितः सुरैः ऋषिभिश्च सहितः ऐरावतस्य हस्तिनः करेण शुण्डयोद्धृतैराकाशगङ्गाया जलैर्दाशार्हं कृष्णमभिषिक्तवान् गोविन्द इति चाभ्यधात् अभिधां चकार । गवामिन्द्रो गोविन्दः पृषोदरादिः । गाः विन्दतीति गवादिषु विन्देरिति शोवा ॥ २२ ॥ २३ ॥ अहमिति ॥ क्वाचित्कः श्लोकः ॥ २४ ॥ तत्रेति ॥ तत्राभिषेकस्थाने शक्रकुण्डं गोविन्दकुण्डमिति च प्रसिद्धे । आगताः तुम्बुरुनारदादयः गन्धर्वाश्च लोकानां मलस्यापहं हरेर्यशो जगुः तथा सुराङ्गना रम्भादयः अप्सरसो मुदान्विता ननृतुः । नारदश्चायं गन्धर्वविशेषः । पार्षदभूतस्य देवर्षेर्नारदस्यावतारभूतः । यथा नित्यपार्षदगरुडस्य विनतासुतः ॥ २५ ॥ तमिति ॥ तं श्रीकृष्णं देवानां निकायेषु समूहेषु ये केतव इव दर्शनीया मुख्यास्ते तुष्टुवुः तथाद्भुतानां पुष्पाणां वृष्टिभिः हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसिद्धं यथा तथा अवाकिरन् आच्छादितवन्तश्च । तथा त्रयो लोकाः त्रिलोकस्था जनाः परां निर्वृतिं परमानन्दमाप्नुवन् । तदा गावो गां पृथ्वीं पयोभिर्द्रुतां सिक्तामार्द्रामनयंश्चक्रुः ॥ २६ ॥ नानेति ॥ सरितो नानारसौघाः क्षीरादिवाहिन्यो जाताः । वृक्षाश्च मधूनि स्रवन्तीति तथाभूता आसन् । अकृष्टपच्याः कर्षणं विनैव पक्का औषधयो व्रीह्याद्याः आसन् । तथा गिरयः उन्मणीन् गर्भगतान्मणीन् उत् उद्गतान् बहिः प्रकटान् अविभ्रत् अबिभरुः । आर्षः प्रयोगः । अकृष्टपच्योषधय इति समासः सन्धिर्वार्षः यद्वा । अकृष्टपच्या ओषधयो येष्विति गिरिविशेषणम् ॥ २७ ॥ कृष्ण इति ॥ हे कुरुनन्दन हे तात कृष्णे इन्द्रतयाऽभिषिक्ते सति निसर्गतः स्वभावतः क्रूराण्यप्येतानि सर्पव्याघ्रादीनि सत्वानि भूतानि निर्वैराण्यभवन् ॥ २८ ॥ इतीति ॥ इत्येवं गवां गोकुलस्य व्रजस्य च पतिं कृष्णं गोविन्दनामधारणपूर्वकमभिषिच्य कृष्णेनानुज्ञातः स शक्रो देवादिभिर्वृतो दिवं स्वर्गं ययौ ॥ २९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमसप्तविंशे व्यधादिमाम् ॥ २७ ॥ अष्टाविंशे तु नन्दस्यानयनं

नानारसौघाः सरितो वृक्षा आसन् मधुस्रवाः ॥ अकृष्टपच्यौषधयो गिरयोऽबिभ्रदुन्मणीन् ॥ २७ ॥ कृष्णेऽभिषिक्त एतानि सत्त्वानि कुरुनन्दन ॥ निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥ २८ ॥ इति गोगोकुलपतिं गोविन्दमभिषिच्य सः ॥ अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवम् ॥ २९ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे इन्द्रस्तुतिर्नाम सप्तविंशोऽध्यायः ॥ २७ ॥ श्रीशुक उवाच ॥ ॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ॥ स्नातुं नन्दस्तु कालिन्द्या द्वादश्यां जलमाविशत् ॥ १ ॥ तं गृहीत्वाऽनयद्भृत्यो वरुणस्यासुरोऽन्तिकम् ॥ अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ॥ २ ॥ चुक्रुशुस्तमपश्यन्तः कृष्ण रामेति गोपकाः ॥ भगवांस्तदुपश्रुत्य पितरं वरुणाहृतम् ॥ तदन्तिकं गतो राजन् स्वानामभयदो विभुः ॥ ३ ॥

वरुणालयात् ॥ वैकुण्ठेक्षा च गोपानां श्लोकाः सार्द्धा गिरिः[१७] क्षमाः[॥] ॥ तावत्यो[१७]ऽनुष्टुभः प्रोक्तास्तत्रोवाचेति च त्रयम्[३] ॥ २८ ॥ एकादश्यामिति ॥ नन्दस्तु कदाचिदेकादश्यां निराहारः सन् जनार्दनं सम्यगभ्यर्च्य कलामात्रावशिष्टायां द्वादश्यां पारणादरेण अरुणोदयात्पूर्वमेव कालिन्द्यां स्नातुं जलमाविशत् ॥ १ ॥ तमिति ॥ तमासुरीमसुरसंचारविशिष्टां वेलामविज्ञाय अनादृत्य “ कलार्द्धां द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि । आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शम्भुशासनात् ॥ ” इति शास्त्रमनुसृत्य निशि उदकं प्रविष्टं नन्दं गृहीत्वा असुरः भगवद्धर्मानभिज्ञः वरुणस्य भृत्यो रात्रौ जलरक्षापरः वरुणस्यान्तिकं समीपमनयत् ॥ २ ॥ चुक्रुशुरिति सार्द्धम् ॥ ततः प्रभाते तं नन्दमपश्यन्तो गोपकाः स्नानार्थं गतस्य नन्दस्य रक्षकाः हे कृष्ण हे राम स्नातुं गतो नन्दो न मिलतीति चुक्रुशुः । भगवानिति । हे राजन् स्वानामभयदो ज्ञातीनामभयं दास्यन् विभुः भगवानपि तदाक्रोशनमुपश्रुत्य पितरं नन्दं च वरुणेनाहृतं ज्ञात्वा तस्य वरुणस्यान्तिकं गतः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तमिति ॥ स्वान्तिकं प्राप्तं हृषीकेशं कृष्णं वीक्ष्य तस्य दर्शनेन महानुत्सवो यस्य स लोकपालो वरुणो महत्या सपर्यया पूजासाधनेन पूजयित्वा आह स्म ॥ ४ ॥ अद्येति ॥ हे प्रभो हे भगवन् अद्य अधुना मे मया देहो निभृतः धृतः । त्वद्दर्शनात् देहधारणसाफल्यं जातमित्यर्थः । यद्वा । निभृतः पूर्णमनोरथः जातः अद्यैवार्थः परमं फलमधिगतः प्राप्तः सर्वरत्नाकरपतिनापि एवंविधोऽर्थः पूर्वं न प्राप्तः । त्वत्पादभाजः त्वत्पादयोर्भक्ताः अध्वनः संसारमार्गस्य पारं त्वामवापुः प्रापुः ॥५॥ नम इति ॥ भगवते ब्रह्मणे परमात्मने तुभ्यं नमः । यत्र भवति लोकानां सृष्टेः कल्पना यस्याः सा माया न श्रूयते अविद्यमानेव तिष्ठति ॥ ६ ॥ अजानतेति ॥ अजानता पूर्वोक्तं शास्त्रवचनं तव पितेति वा अजानता मूढेन अकार्यवेदिना कर्त्तव्यमजानता मामकेन मद्भृत्येनायं तव पिता आनीत इति यत् तत् मद्भृत्यकृतत्वान्मदपराधं भवान् क्षन्तुमर्हति ॥ ७ ॥ गोविन्देति अर्द्धम् ॥ हे

प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया ॥ महत्या पूजयित्वाऽऽह तद्दर्शनमहोत्सवः ॥ ४ ॥ वरुण उवाच ॥ ॥ अद्य मे निभृतो देह अद्यार्थोऽधिगतः प्रभो ॥ त्वत्पादभाजो भगवन्नवापुः पारमध्वनः ॥ ५ ॥ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ॥ न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥ ६ ॥ अजानता मामकेन मूढेनाकार्यवेदिना ॥ आनीतोऽयं तव पिता तद्भवान् क्षन्तुमर्हति ॥ ७ ॥ गोविन्द नीयतामेष पिता ते पितृवत्सल ॥ ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक् ॥ ८ ॥ श्रीशुक उवाच ॥ एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः ॥ आदायागात् स्वपितरं बन्धूनां चावहन्मुदम् ॥ ९ ॥ नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयम् ॥ कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥ १० ॥ ते त्वौत्सुक्यधियो राजन् मत्वा गोपास्तमीश्वरम् ॥ अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥ ११ ॥ इति स्वानां स भगवान् विज्ञायाखिलदृक् स्वयम् ॥ संकल्पसिद्धये तेषां कृपयैतदचिन्तयत् ॥ १२ ॥

गोविन्द हे पितृवत्सल एष ते पिता त्वया नीयताम् ।ममेत्यर्द्धमसार्वत्रिकं स्पष्टं च ॥ ८ ॥ एवमिति ॥ एवं वरुणेन प्रसादित ईश्वरेश्वरो भगवान् कृष्णः स्वपितरं नन्दमादाय बन्धूनां व्रजवासिनां मुदं हर्षमावहन् व्रजमगात् । सूर्योदयात् पूर्वमेवेति ज्ञेयम् ॥ ९ ॥ नन्द इति ॥ नन्दस्त्वतीन्द्रियमदृष्टपूर्वं लोकपालस्य वरुणस्य महोदयमैश्वर्यं दृष्ट्वा तेषां वरुणादीनां कृष्णे संनतिं नम्रतां भृत्यतां च दृष्ट्वाऽतीव विस्मितः सन् आस्थान्यामुपविश्य ज्ञातिभ्यः उपनन्दादिभ्यस्तदब्रवीत् अवर्णयत् ॥ १० ॥ ते इति ॥ ततस्ते तु गोपाः कृष्णमीश्वरं मत्वा तद्वैभवदर्शनाय औत्सुक्ययुक्ता धीर्येषां तथाभूताः सन्तः अयमधीश्वरः अपि किं सूक्ष्मामदृष्टपूर्वां स्वगतिं स्वस्थानं सूक्ष्मां ब्रह्माख्यां च नोऽस्माकमुपाधास्यत् दर्शयिष्यतीति मनोरथं कृतवन्तः । दिदृक्षा चेयं प्रेम्णैव नतु मुमुक्षया । ऐश्वर्यज्ञानेऽपि पुत्रज्ञानानुपमर्दात् ॥ ११ ॥ इतीति ॥ अखिलदृक् हरिः इत्येवं स्वानां तेषां ज्ञातीनामभिप्रायं स्वयमेव विज्ञाय तेषां सङ्कल्पस्य मनोरथस्य सिद्धये कृपया एतद् वक्ष्यमाणमचिन्तयत् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन इति ॥ अविद्या देहाद्यहंबुद्धिः ततः कामः ततः कर्माणि तैः एतस्मिन् लोके उच्चावचासूत्तमाधमासु गतिषु देवतिर्यगादियोनिषु भ्रमन् जनः व्रजवासी स्वां स्वीयां गतिं न वेद। अत एषां सा दर्शनीयेति शेषः ॥ १३ ॥ इतीति ॥ इत्येवं संचिन्त्य महाकारुणिको भगवान् हरिः गोपानां तमसः प्रकृतेः परं स्वं ब्रह्मस्वरूपं लोकं वैकुण्ठाख्यं च दर्शयामास ॥ १४ ॥ देहादिविहितानां दर्शनमशक्यमिति प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामास तदाह—सत्यमिति ॥ यत् सत्यमबाध्यं ज्ञानमजडमनन्तमपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं शश्वत्सिद्धं ब्रह्मगुणापाये गुणापोहे समाहिताः समाधिनिष्ठा मुनयो ज्ञानिनो यत्पश्यन्ति तद्रूपस्यैव दर्शयामास ॥ १५ ॥ त इति ॥ एवं ब्रह्महृदं ब्रह्मैव ह्रदवत् ह्रदः तत्र निमग्नस्य विशेषविज्ञानाभावात् तं ब्रह्महृदं ते तु नीताः प्रापितास्तस्मिन्मग्नाश्च कृष्णेनोद्धृताः समाधेरिवोत्थापिताः सन्तः ब्रह्मणस्तस्यैव लोकं वैकुण्ठाख्यं ददृशुः। यत्र यस्मिन् कृष्णे निमित्ते सति पूर्वमक्रूरोऽध्यगात् दृष्टवान् । शुकपरीक्षित्संवादात्प्राक्तनत्वाद्भूतनिर्देशः । अथवा अक्रूरो यत्र दृष्टवान् तस्य यमुना-

जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः ॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥ १३ ॥ इति संचिन्त्य भगवान् महाकारुणिको हरिः ॥ दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ १४ ॥ सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम् ॥ यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥ १५ ॥ ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः ॥ ददृशुर्ब्रह्मणो लोकं यत्राऽक्रूरोऽध्यगात् पुरा ॥ १६ ॥ नन्दादयस्तु तद्दृष्ट्वा परमानन्दनिर्वृताः ॥ कृष्णं च तत्र च्छन्दोभिः स्तूयमानं सुविस्मिताः ॥ १७ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धेऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥ श्रीशुक उवाच ॥ ॥ भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ॥ वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः ॥ १ ॥

ह्रदस्य ब्रह्महृद इति नाम। तं ह्रदं नीताः सन्तो ब्रह्मणो लोकं ददृशुः। पुनश्च कृष्णेनोद्धृताः पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुः। व्यवहितान्वयोऽप्रसिद्धकल्पना च सोढव्येति॥१६॥ नन्दादय इति ॥ नन्दादयो गोपास्तु तं लोकं दृष्ट्वा तथा तत्र लोके छन्दोभिः मूर्तिमद्भिर्वेदैः स्तूयमानं श्रीकृष्णं च दृष्ट्वा परमानन्देन निर्वृताः पूर्णा अभवन्। पुनश्च पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुः ॥१७॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याष्टाविंशे व्यधादिमाम्॥२८॥ ऊनत्रिंशे तु गोपीभिः संवादो रासवर्णनम् ॥ अन्तर्द्धानं च कृष्णस्य तत्र श्लोका गजार्द्धयः॥ अनुष्टुभः सार्द्धषष्टिरुवाचेति च सप्तकम् ॥२९॥ इह सप्तमवर्षे भगवता कार्त्तिकामावास्यायां कर्मवादोत्थापनेन इन्द्रमखभङ्गः कृतः। तच्छुक्लप्रतिपदि गोवर्द्धनमखोत्सवः । द्वितीयायां यमुनातीरे भ्रातृद्वितीयाभोजनोत्सवः श्रीशुकेनावर्णितोऽपि ज्ञेयः । तत्रैव वर्णिता इन्द्रकोपोक्तयश्च । तृतीयामारभ्य नवमी-पर्यन्तं गोवर्द्धनधारणम् । दशम्यां गोपानां विस्मयकथाबाहुल्यम् । एकादश्यां गोविन्दाभिषेकः । द्वादश्यां वरुणलोकगमनम् । पौर्णमास्यां ब्रह्मलोकगमनम् । ततश्च शरदः समाप्तत्वादष्टमे वर्षे सत्याश्विनपूर्णिमायां रासोत्सवः पूर्वं नवमवर्षोक्तिष्टीकान्तरानुसारेणेति । तं वर्णयति—भगवानिति ॥ प्रकटितकिशोरवया भगवानपि योगमायां स्वशक्तिमुपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रितः सन् शरदा हेतुना उत्फुल्ला मल्लिकाः या सुताः रात्रीः "मयेमा रंस्यथ क्षपाः" इति पूर्वं प्रतिश्रुताः वीक्ष्य रन्तुं मनश्चक्रे । शरदि मल्लिकाविकासाभावेऽपि भगवत्प्रभावात्त-थात्वम् । एवमग्रेऽपि । कुन्दस्य रात्रौ कमलादेश्च विकासः । रात्रीरिति बह्वीषु रात्रिषु रमणं सूचितम् । एकस्या रात्रेर्बहुरात्रितुल्यत्वापादनं वा भगवत्प्रभावात् ॥ १ ॥ तदेति ॥ यदैव भगवान् रन्तुं मनश्चक्रे तदैव उडुराजश्चन्द्रः दीर्घकालेन दर्शनं यस्य स प्रोष्यागतः । प्रियो भर्ता यथा प्रियाया भार्याया मुखमरुणेन कुङ्कुमेन विलिम्पति तथा अरुणेन उदयरागेण प्राच्याः ककुभो दिशः इन्द्रसम्बन्धिन्या नायिकायाश्च मुखमारम्भभागमाननं च विलिम्पन् अरुणीकुर्वन् तथा शन्तमैः सुखतमैः करैः किरणै-र्हस्तैश्च चर्षणीनाम् अर्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः । "यत्र वै मानुषी जातिर्ब्रह्मणा परिकल्पिता ।" इति षष्ठस्कन्धोक्तेर्मानुषजातीनां शुचस्तापान् ग्लानी-र्मृजन् अपनयन् भगवत्प्रीतये उदगात् उदितो जातः अयमर्थः । श्रीकृष्णस्य कुलस्यादिपुरुषो द्विजराजोऽपि परभार्याया रमणं करोति तदा कृष्णस्य यूनो गोपजातेर्गो-पस्त्रीरमणे कः खलु दोषः ॥ २ ॥ दृष्ट्वेति ॥ अखण्डं संपूर्णं मण्डलं यस्य तं रमाया लक्ष्म्या आननस्य आभा इव आभा यस्य तं नवकुङ्कुममिवारुणं कुमुद्वन्तं चन्द्रं दृष्ट्वा तथा

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शंतमैः ॥ स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥
दृष्ट्वा कुमुद्वन्तमखण्डमण्डलं रमाननाभं नवकुङ्कुमारुणम् ॥ वनं च तत् कोमलगोभिरञ्जितं जगौ कलं वामदृशां मनोहरम् ॥ ३ ॥
निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ॥ आजग्मुरन्योऽन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलाः ॥ ४ ॥
दुहन्त्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः ॥ पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ५ ॥

तस्य कोमलैः स्वल्पप्रकाशैः गोभिः किरणैः अभितो रञ्जितं रमणीयं कृतं वनं च दृष्ट्वा वामदृशां स्त्रीणां मनोहरणं कलं मधुरं जगौ । वेणुमवादयदित्यर्थः । कोमलगोभिरिति तृतीयान्तत्वस्वीकारे दीर्घाभाव आर्षः । अञ्जितमिति वा पदच्छेदः । गोन्तादजभावस्तु सर्वत्रार्षः । यद्वा । कलं ककारलकारात्मकं वामदृशा ईकारेण साक्षात्पठितेनानुस्वारेण च सहितं क्लीमिति कामबीजं सर्ववशीकरणमन्त्रं जगौ इत्यर्थः ॥ ३ ॥ निशम्येति ॥ अनङ्गस्य कामस्य वर्धनमुद्दीपकं तस्य गीतं निशम्य कृष्णेन गृहीतमाकृष्टं मानसं मनः गृहीतानि मानसानि मनःसंबन्धीनि धृतिलज्जादीनि वा यासां ताः असापत्न्याय अन्योन्यमलक्षितो न ज्ञापितो गमनोद्यमो याभिस्ताः जवेन वेगेन लोलानि चञ्चलानि कुण्ड-लानि यासां ताः व्रजस्त्रियो गोप्यः यत्र स्थाने वने स कान्तः श्रीकृष्णोऽभूत् तत्रैव गीतध्वनिमार्गेण आजग्मुः । जग्मुरिति वक्तव्ये आजग्मुरिति वदन् श्रीशुकः श्रीकृष्णा-न्तिकस्थमिवात्मानं मन्यते स्म ॥ ४ ॥ अथ तत्क्षण एव गोपीनां त्रैवर्गिककर्मनिवृत्तिं वदन् आदौ जातिकर्मत्यागमाह—दुहन्त्य इति ॥ कृष्णसमीपे गन्तुं समुत्सुकाः का-श्चिद्गोप्यो गा दुहन्त्यः नुमार्षः । दोहमर्द्धदुग्धं पात्रं दोहनकर्म वा हित्वा अभिययुः । काश्चित् पयो दुग्धम् अधिश्रित्य चुल्ल्यामारोप्य तत्त्यक्त्वा ययुः । अपरास्तु संयावं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुडघृतमिश्रितं गोधूमकणं पक्वं थूलीति प्रसिद्धम् । यद्वा । पयसि पच्यमानाः गोधूमकणा एव संयावस्तमनुद्वास्य चुल्ल्या अनवतार्य अभिययुः ॥ ५ ॥ बन्ध्वादित्यागमाह—परीति ॥ काश्चित्तु परिवेषयन्त्यः पुत्रादीन् भोजयितुं पात्रेष्वन्नं ददत्यः तत्परिवेषणं हित्वा तथा काश्चित् पयः शिशून् पाययन्त्यस्तद्धित्वा । धर्मत्यागमाह । तथा काश्चित् पतीन् शुश्रूषन्त्यः सेवमानाः शता आर्षः । तां शुश्रूषां हित्वा अभिययुः । दैहिकत्यागमाह । काश्चिच्चाश्नन्त्यो भोजनमपास्य त्यक्त्वाभिययुः नुमार्षः ॥ ६ ॥ स्वाङ्गवेषस्य त्यागमाह—लिम्पन्त्य इति ॥ अन्यास्तु लिम्पन्त्यः शरीरे चन्दनादिलेपनं कुर्वत्यो लेपनं हित्वा कृष्णान्तिकं ययुः । तथान्याः प्रमृजन्त्यः अङ्गोद्वर्तनादिकं कुर्वत्यः तद्धित्वा ययुः । काश्चित् लोचने अञ्जन्त्यः अञ्जनं हित्वा ययुः नुमार्षः । व्यत्यस्तानि स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राणि आभरणानि च यासां ताः काश्चित् कृष्णस्यान्तिकं ययुः ॥ ७ ॥ ता इति ॥ पतिभिः पितृभिर्भ्रातृभिर्बन्धुभिश्च वार्यमाणा अपि गोविन्देन अपहृत आत्मा यासाम्

परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशून् पयः ॥ शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम् ॥ ६ ॥
लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने ॥ व्यत्यस्तवस्त्राभरणाः काश्चित् कृष्णान्तिकं ययुः ॥ ७ ॥
ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबन्धुभिः ॥ गोविन्दापहृतात्मानो न न्यवर्तन्त मोहिताः ॥ ८ ॥
अन्तर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ॥ कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥

अतो मोहिताः सत्यः न न्यवर्तन्त अपि तु कृष्णान्तिकं ययुरेव । अत्र पत्यादिभिर्वारणं लीलाप्रदर्शनार्थं गोपीनां प्रेमोत्कर्षोद्भावनार्थं च । वस्तुतो मन्यमानाः स्वपार्श्वस्थान् इत्यादियोगमायावलमेव सर्वत्र समाधानम् ॥ ८ ॥ अन्तरिति ॥ गोप्यः कृष्णप्रेयस्योऽनेकविधाः तत्र गोलोकादिवासिन्यो भगवता सहावतारभाजो नित्यसिद्धाः काश्चित् अपराः साधनसिद्धाः । यथा पाद्मोत्तरखण्डे । "तदा महर्षयः सर्वे दण्डकारण्यवासिनः । दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् स्वविग्रहैः ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले । ह[illegible]संप्राप्य कामेन ततो मुक्ता भवार्णवात् ॥" इति । बृहद्वामनपुराणोक्ताः काश्चन श्रुतिरूपाः । "संभवन्तु सुरस्त्रियः" इति प्रागुक्तेर्देवकन्या अपि काश्चित् । उक्तं च पाद्मे । "[illegible]गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः । देवकन्याश्च राजेन्द्र न मानुष्यः कथंचन ॥" तत्र ऋषिजानां साधनवशाच्छ्रीकृष्णे सिद्धभावानां प्राकृतदेहवतीनां मध्ये कासांचिदवस्थेयमुच्यते । काश्चिद्गोप्यः अन्तर्गृहे गृहस्यान्तर्गता अतः पत्यादिभिर्द्वारपिधानान्न लब्धो विशेषो भगवदभिसरणयोग्यो निर्गमो याभिस्ताः पूर्वासामिव नासां भावः पक्वः । दुःखेन मीलिते लोचने याभिस्ताः प्रागपि तस्य कृष्णस्य भावनया युक्ताः तदा कृष्णं नितरां दध्युः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःसहेति युग्मम् ॥ दुःखेनापि सोढुमशक्यो दुःसहो यः प्रेष्ठस्य कृष्णस्य विरहरूपोऽग्निः तस्य यस्तीव्रस्तापः अनेकजन्मस्वनेकविधनरकादिभोग्यं दुःखं तेन धुतानि विनष्टानि अशुभानि पापानि यासां ताः तथा ध्यानेन प्राप्तो यः अच्युतस्याश्लेषस्तेन या निर्वृतिः आनन्दस्तया क्षीणानि मङ्गलानि अनेकजन्मसु साम्राज्यादिसुखजनकानि पुण्यानि यासां ताः अतस्तीव्रदुःखसुखभोगेन समस्तप्रारब्धपापपुण्यनाशेन सद्यः प्रक्षीणं बन्धनं यासां ताः गोप्यः तदानीं तमेव परमात्मानं कृष्णं जारबुद्ध्याऽपि संगता ध्यानतः प्राप्ताः सद्यः गुणमयं देहं जहुः । नहि वस्तुशक्तिर्बुद्धिमपेक्षते । अन्यथा मत्वापि पीतामृतवत् अत्र प्रारब्धकर्मनाश उक्तः । सञ्चितक्रियमाणकर्मनाशस्तु श्रीकृष्णाख्यब्रह्मसाक्षात्कारेण ध्यानमहिम्ना तदैवोत्पन्नब्रह्मसाक्षात्कारेण वा ज्ञेयः ॥ १० ॥ ११ ॥ ननु पत्यादीनां वस्तुतो ब्रह्मत्वेऽपि यथा ब्रह्मत्वज्ञानाभावान्न तद्भजनान्मोक्षस्तथा कृष्णेऽपि ब्रह्मबुद्ध्यभावात्कथं मोक्ष इति शङ्कते—कृष्णमिति ॥ हे मुने ज्ञानेन भक्त्या वा मोक्षः इति हि शास्त्रम् । गोप्यस्तु कृष्णं परं केवलं कान्तं जारबुद्ध्या कमनी-

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृत्त्या क्षीणमङ्गलाः ॥ १० ॥ तमेव परमात्मानं जारबुद्ध्याऽपि संगताः ॥ जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ॥ ११ ॥ राजोवाच ॥ कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने ॥ गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥१२॥ श्रीशुक उवाच ॥ ॥ उक्तं पुरस्तादेतत् ते चैद्यः सिद्धिं यथा गतः ॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ॥ अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥

यमेव विदुः । निर्गुणब्रह्मतया तु न विदुः । अतः गुणधियां तासां गुणप्रवाहस्य उपरमो निवृत्तिः कथं जाता ॥ १२ ॥ जीवस्यावृतं ब्रह्मत्वं कृष्णस्य हृषीकेशत्वादनावृतं ब्रह्मत्वमतो न तत्र बुद्ध्यपेक्षेत्युत्तरयति—उक्तमिति ॥ यदत्रोत्तरं वक्तव्यं तदेतत्ते तुभ्यं पुरस्तात्सप्तमस्कन्ध एवोक्तम् । "गोप्यः कामाद्भयात्कंस" इत्यादिना । यदि हृषीकेशं द्विषन्नपि चैद्यः शिशुपालो यथा यथावत् सिद्धिं भगवत्सायुज्यं गतः प्राप्तस्तदा अधोक्षजस्य प्रियाः प्रीतिविषया गोप्यः सायुज्यं गतास्तत्र किमुत किमाश्चर्यमित्यर्थः । निर्गुणज्ञानभक्त्योर्भगवत्प्रादुर्भाव एवोपयोगः तत्र ज्ञानेन भक्त्या स्वेच्छया वा यदि भगवान् प्रादुर्बभूव तदा तत्सम्बन्धमात्रेणैव मोक्षो न ज्ञानादेरावश्यकत्वम् । नहि वस्तुशक्तिर्ज्ञानादिकमपेक्षते अन्यथाबुद्ध्याग्निस्पर्शेऽपि दाहदर्शनात् ॥ १३ ॥ ननु देही कथमनावृतः स्यात्तत्राह—नृणामिति ॥ हे नृप अव्ययस्य निर्विकारस्याप्रमेयस्य बुद्ध्यगोचरस्य निर्गुणस्यैव गुणात्मनो गुणनियन्तुर्भगवतः घृतस्येव कठिनीभावः अनावृतब्रह्मरूपा व्यक्तिः प्राकट्यं नृणां निःश्रेयसार्थाय मोक्षार्थमेव अन्यथा न भवेत् । भूभारहरणादिकं त्वन्यथापि भवति अतो न देहित्वादृश्यमत्र वक्तुं युक्तम् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काममिति ॥ अतो गोप्य इव कामं शिशुपालादिवत् क्रोधं वा कंसादिवद्भयं वा यशोदादिवत्स्नेहं वा पाण्डवादिवत् ऐक्यं सम्बन्धं वा ज्ञानिवदभेदं वा नारदादिवत्सौहृदं भक्तिं वा नित्यं निरन्तरं ये हरौ विदधतः कुर्वाण भवन्ति ते हि तन्मयतां यान्ति तत्सायुज्यं प्राप्नुवन्त्येव । प्रत्ययान्तरस्य प्रतिबन्धकत्वमाशङ्क्य नित्यमित्युक्तम् ॥ १५ ॥ न चेति ॥ यतः कृष्णात् एतत्कृपापात्रं स्थावरजङ्गमप्राणिमात्रं विमुच्यते तस्मिन् अजे योगेश्वरेश्वरे कृष्णे भगवति भवता एवं मोक्षदाने असंभावनारूपो विस्मयो नैव कार्यः ॥ १६ ॥ प्रस्तुतमाह– ता इति ॥ वेणुनादश्रवणेन निजान्तिकमायाताः ताः व्रजयोषितो दृष्ट्वा वाचः पेशैः अवयवैः विलासैरिति यावत् । “ पिश, अवयवे ” घञन्तः । विमोहयन् स्वविषयकं भावं दृढीकर्तुं वदतां मध्ये श्रेष्ठो भगवान् स्वागतमित्यादि वक्ष्यमाणमवदत् । तत्र वाग्विलासाश्च द्विधा । शाब्दिका आर्थिकाश्च । शाब्दिका ललितवर्णविन्यासादयः । आर्थिका उपेक्षाप्रार्थनामयत्वेन द्विधा । उपेक्षामया अप्युत्कण्ठावृद्धये नतूपेक्षार्थम् ॥ १७ ॥ स्वागतमिति ॥ तत्रोपेक्षापक्षे हे महाभागाः कच्चित्प्रश्ने

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ॥ नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ १५ ॥ न चैवं विस्मयः कार्यो भवता भगवत्यजे ॥ योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥ १६ ॥ ता दृष्ट्वान्तिकमायाता भगवान् व्रजयोषितः ॥ अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् ॥ १७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥ व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम् ॥ १८ ॥ रजन्येषा घोररूपा घोरसत्त्वनिषेविता ॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥ मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ॥ विचिन्वन्ति ह्यपश्यन्तो मा कृध्वं बन्धुसाध्वसम् ॥ २० ॥

वो युष्माकं स्वागतं शोभनमागमनं वो युष्माकं किं प्रियं करवाणि कच्चित् व्रजस्यानामयमस्ति असमये भवतीनामागमादनिष्टं शङ्के अन्यद्वा आगमनकारणं ब्रूत । प्रार्थनापक्षे हे गोप्यः कच्चिद्वः स्वागतं सुष्ठु रमणार्थमागमनं यूयं महाभागाः ज्योत्स्नादिविलाससामग्रीसम्पत्तेः अतोऽनुवर्ती प्रियोऽहं वः किं प्रियं करवाणि तदेव ममापि प्रियमिति व्रजस्यानामयमस्तीति जानामि । भवतीनाम् आगमनकारणं ज्ञातमपि मत्प्रीतये स्फुटं ब्रूत मा लज्जध्वमित्यर्थः । अग्रेऽपि प्रथममुपेक्षामयस्ततः प्रार्थनामयोऽर्थो ज्ञेयः ॥ १८ ॥ रजनीति ॥ हे सुमध्यमाः एषा रजनी घोररूपा घोरैः सत्त्वैर्व्याघ्रादिभिः निषेविता अतः इदानीं व्रजं प्रति यात इह स्त्रीभिर्न स्थेयम् । अथ च एषा उदितचन्द्रा रजनी अघोररूपा अघोरैरेव सत्त्वैर्भृङ्गकोकिलाद्यैर्निषेविता नतु व्याघ्राद्यैः वृन्दावनमाहात्म्यात् । अतः व्रजं प्रति मा यात स्त्रीभिः इहैव स्थेयम् ॥ १९ ॥ मातर इति ॥ वो युष्माकं मातरः पितरः पुत्रा भ्रातरः पतयश्च युष्मानपश्यन्तो विचिन्वन्ति मृगयन्ते अतस्तेषां बन्धूनां साध्वसमदर्शनजन्यं भयं मा कृध्वं नोत्पादयत । ढत्वाभाव आर्षः । अथ च युष्माकं मात्रादयः गहनेऽस्मिन् वने अन्धा इव अपश्यन्त एव विचिन्वन्ति नतु द्रक्ष्यन्ति । हिरेवार्थे । अतो बन्धुभ्यः भयं मा कुरुत ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टमिति ॥ यदि यूयं वनशोभेक्षणायागताः तर्हि कुसुमितं नानाविधसुगन्धिपुष्पयुक्तं राकेशः पूर्णचन्द्रस्तस्य करैः किरणैरञ्जितं प्रकाशितं यमुनास्पर्शिनोऽनिलस्य लीलामन्दगतिस्तया एजन्तः कम्पमानास्तरूणां पल्लवास्तैः शोभितं वनं दृष्टम् अतो वनशोभेक्षणायागतानां वः कार्यं सम्पन्नमेवातो व्रजं यात । अथ च सर्वगुणयुक्तं कामोद्दीपकं वनं दृष्टमेवातो व्रजं मा यात ॥ २१ ॥ तदिति ॥ तत्तस्माद् वनदर्शनरूपकार्यस्य जातत्वात् गोष्ठं व्रजं यात मा चिरं विलम्बो न कार्यः । हे सतीः सत्यः आर्षः । पतीन् शुश्रूषध्वं वत्सा बालाश्च क्षुधार्ताः क्रन्दन्ति तान् दुग्धं पाययत गाश्च दुह्यत श्यन्नार्षः । अत्रेदं तत्वमाहुः । "युवतीर्गोपकन्याश्च" इति हरिवंशोक्त्या कात्यायनीव्रतलब्धवराणां पत्यन्तरैर्न विवाह इत्युक्तम् । अन्यासामुत्कण्ठावर्धनार्थं पत्यन्तरैर्विवाहप्रतीतावपि न संभोगः किंतु मन्यमानाः स्वपार्श्वस्थान्स्वान्दारानिति वक्ष्यमाणरीत्या तासां पतीनां ताभिरङ्गसङ्गभ्रममात्रम् अत एव तासां न जातापत्यत्वमपि स हि वो स्वामीति तापिनीश्रुतेः । कृष्णवध्व इति अत्रैवोक्तेः । श्रियः कान्तः " कान्तः परमपुरुषः " इति ब्रह्मसंहितोक्तेश्च । भगवत्पत्नीत्वेनोक्तानां रासात्पूर्वं पश्चाद्वा पत्यन्तरसंभोगानौचित्यात् जातापत्यानां जघन्यनायिकात्वेन पुरुषोत्तमे नायके आलम्बनविभावत्वे वर्णनीयरसवैरस्या-

दृष्टं वनं कुसुमितं राकेशकररञ्जितम् ॥ यमुनाऽनिललीलैजत्तरुपल्लवशोभितम् ॥ २१ ॥
तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः ॥ क्रन्दन्ति वत्सा बालाश्च तान् पाययत दुह्यत ॥ २२ ॥

पातात् न ह्येतस्मात्परो वर्णनीयः शृङ्गारोऽस्ति । " सर्वाः शरत्काव्यकथारसाश्रयाः " इति वक्ष्यमाणात् । अतो देवरादिपुत्रा एव पुत्रत्वेनोक्ताः । पानं च गोदुग्धस्यैव न स्तन्यस्य । अत एव पूर्वमपि " पाययन्त्यः शिशून्पयः " इत्युक्तम् । नतु सुतान्स्तनमिति तस्मात्पतयो लोके तथा प्रतीताः पुत्राश्च गौणार्थाः । परे तु नित्यसिद्धास्तु भगवद्रमणाय तत्र प्रथमेमवागन्तुं प्रवृत्ताः गोकुले जनितानां मुनिचरीणां मध्ये या प्राकृतगुणमयशरीरतां परित्यज्य प्रथममेव शुद्धचिन्मयभूतशरीरा अजनिषत ताः पुरुषान्तरासंस्पृष्टा योगमायया नित्यसिद्धाभिः गोपीभिः सहैवाभिसारिताः । यास्तु बहिर्गुणमयशरीरवत्यस्ता अपि श्रीकृष्णविरहौष्ण्यप्रापणया गुणमयशरीरभावत्याजनयैव विनष्टपुरुषान्तरस्पर्शदोषाश्चिन्मयीभूतशरीराः काश्चित्तस्यां रात्रावेव सर्वासां पश्चादभिसारिताः काश्चिदीषन्मात्रास्थितकषायाः प्रेक्ष्यविरहौष्ण्येनैव तन्निवर्तनार्थं रात्र्यन्तरेष्वेवाभिसारिताः प्राप्तरासादिविलासाः रात्र्यन्ते नित्यसिद्धादिगोपीभिः सह पतिगृहमागतास्तदारभ्य पतिसङ्गतो योगमाययैव रक्ष्यमाणाः पत्यपत्यादिषु ममताशून्याः कृष्णप्रेमातिभरपारिप्लुताः शुष्कपयःस्तन्यः स्वापत्यादीन्यपुष्णत्यो ग्रहग्रस्तत्वेनैव तद्बन्धुभिः प्रतीयन्ते स्मेत्याहुः । अथ च तत्तस्मात् अचिराच्छीघ्रं गोष्ठं मा यात किन्तु रासानन्तरं यास्यथ । माशब्दस्याग्रेऽप्यनुषङ्गः । पतीन् मा शुश्रूषध्वं वत्सा बालाश्च मा क्रन्दन्ति तत्तन्मातॄणां दासादीनां च सत्वात् । तस्मान्मा पायत मा च दुह्यत ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्वन्ति इति ॥ कुशलाः शास्त्रज्ञाः नित्यप्रिये स्वे आत्मनि त्वय्येव रतिं कुर्वन्ति अतः आर्तिदैः पतिसुतादिभिः किं प्रयोजनम् । तथा च श्रुतिः । "किं प्रजया करिष्यामो येषान्नोयमात्मायंलोकः" इति । तत्तस्मात् हे परमेश्वर हे अरविन्दनेत्र प्रसीद प्रसन्नो भव । चिरात् बहुकालादारभ्य त्वयि भृतां निबद्धां नोऽस्माकं रमणाशां मा स्म च्छिन्द्या विफलां न कुरु ॥३३॥ द्वितीयदिक्स्थिता आहुः—चित्तमिति ॥ यदस्माकं चित्तं गृहेषु निर्विशति तत् सुखात्मकेन भवतापहृतं सुखेन अनायासेन वेणुफूत्कारमात्रेणापहृतमिति वा । उत अपि तथा यौ करौ गृह्यकृत्ये गृहकार्ये निविष्टौ तावपि भवता हृतौ व्यापाररहितौ कृतौ । तथा पादावपि तव पादमूलात्पदमात्रमपि न चलतः । अतः व्रजं कथं यामः कथंचिच्छकटादिसाधनेन गत्वापि अनन्तरं तत्र किं करवाम । चित्तादिसङ्घातस्य त्वया स्तब्धीकरणात् ॥ ३४ ॥ सिञ्चेति ॥ अङ्ग हे सखे त्वदधरामृतस्य पूरकेण प्रवाहेण स्वार्थे कन् । नोऽस्माकं तव हासपूर्वकोऽवलोकः कलगीतं मधुरवेणुनादश्च ताभ्यां जातो यो हृच्छयः कामः स एवाग्निस्तं सिञ्च प्रशमय । नो चेत् यद्येवं न

कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किम् ॥ तन्नः प्रसीद परमेश्वर मा स्म छिन्द्या आशां भृतां त्वयि चिरादरविन्दनेत्र ॥ ३३ ॥ चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ॥ पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा ॥३४॥ सिञ्चाङ्ग नस्त्वधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निम् ॥ नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ॥ ३५ ॥ यर्ह्यम्बुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ॥ अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग स्थातुं त्वयाभिरमिता बत पारयामः ॥ ३६ ॥ श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वाऽपि वक्षसि पदं किल भृत्यजुष्टम् ॥ यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरजःप्रपन्नाः ॥ ३७ ॥

करोषि तर्हि कामाग्निना शुष्कदेहा वयं त्वद्विरहेण जनिष्यते यो परोऽग्निस्तेनोपयुक्तदेहा दग्धशरीराः सत्यः त्वद्ध्यानेन योगिवत्तव पादयोः पदवीं सन्निधानं याम प्राप्नुयाम । मृत्वापि त्वां न त्यक्ष्यामः ॥ ३५ ॥ कामाग्निशान्त्यै पतीनेवोपसीदतेति चेत्तृतीयदिक्स्थिता आहुः—यर्हीति ॥ अङ्ग हे अम्बुजाक्ष यर्हि यदा क्वचित् अरण्ये अरण्यजनाव्रजवासिनः प्रिया यस्य तस्य तव रमायाः लक्ष्म्या अपि सेवावशात् क्वचिदेव नतु सर्वदा दत्तः क्षणो रमणावसरो येन तथाभूतं दुर्लभं पादतलं त्वत्कृपया अस्प्राक्ष्म स्पृष्टवत्यः तत्र त्वया चाभिरमिता आनन्दिताः सत्यः तत्प्रभृति तदारभ्य अन्यस्य पत्युः समक्षं संमुखमपि स्थातुं न पारयामः समर्था न भवामः । अतितुच्छास्ते न रोचन्ते क्वचिदिति देहलीदीपन्यायेनोभयत्रान्वितम् ॥ ३६ ॥ श्रीरिति ॥ यस्याः श्रियः स्ववीक्षणकृते श्रीरस्मान् कृपया विलोकयत्वित्येतदर्थमन्येषां ब्रह्मादिसुराणां तपआदिभिराराधनप्रयासः सा श्रीर्यथाताननादृत्य भगवद्वक्षसि पदमेकान्तस्थानं लब्ध्वापि तुलस्या सह सापत्न्यमङ्गीकृत्य बहुभिर्भृत्यैर्जुष्टं सेवितं ससङ्घर्षमपि यस्य तव पदाम्बुजयोः रजश्चकमे इयेष तद्वद्वयमपि सर्वं त्यक्त्वा तव पादरजःप्रपन्नाः त्वत्प्राप्त्यर्थमागताः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ हे वृजिनार्दन पापनिवर्तक हे पुरुषभूषण यस्मात्त्वदुपासने त्वत्सेवने एव आशा अभिलाषो यासां ताः तथाभूताः सत्यो वयं वसतीः पतिसुतादिसाहितान् गृहान् विसृज्य त्यक्त्वा ते तवाङ्घ्रिमूलं प्राप्तास्तत्तस्मात्तव यत्सुन्दरस्मितं तद्विलसितं यन्निरीक्षणं तेन जातो यस्तीव्रो दुःसहवेगः कामस्तेन तप्तः आत्मा अन्तःकरणं यासां तासां नोऽस्माकं प्रसीद प्रसन्नो भव। प्रसन्नश्च सन् दास्यं देहि। त्वद्दास्यपूर्वकं रमणं सम्पादय ॥ ३८ ॥ चतुर्थदिक्स्था आहुः—वीक्ष्येति ॥ अलकैः केशैरावृतं मुखं तथा कुण्डलयोः श्रीः शोभा ययोस्ते गण्डस्थले यस्मिन् अधरे सुधा यस्मिंस्तच्च हसितयुक्तोवलोको यत्र तत् तव मुखं वीक्ष्य दत्तं भक्तेभ्यः संसारादभयं येन तथाभूतं च भुजदण्डयुगं विलोक्य श्रियो लक्ष्म्या एकं मुख्यं रमणं रतिजनकं तव वक्षश्च विलोक्य दास्यो भवामेति। श्रियैकेति सन्धिरार्षः तृतीया वा ॥ ३९ ॥ काश्त्रीति ॥ अङ्ग हे प्रभो ते तव कलानि मधुराणि पदानि यस्मिंस्तच्च तत् आयतं दीर्घं मूर्च्छितं स्वरारोहावरोह कलपदायतवेणुगीतेत्यपि पाठः। तेन

तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ॥ त्वत्सुन्दरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यम् ॥३८॥ वीक्ष्यालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुधं हसितावलोकनम् ॥ दत्ताभयं च भुजदण्डयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥ ३९ ॥ काश्त्र्यङ्ग ते कलपदायतवेणुगीतसंमोहिताऽऽर्यचरितान्न चलेत् त्रिलोक्याम् ॥ त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥ ४० ॥ व्यक्तं भवान् व्रजभयार्तिहरोऽभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता ॥ तन्नो निधेहि करपङ्कजमार्तबन्धो तप्तस्तनेषु च शिरस्सु किंकरीणाम् ॥ ४१ ॥ श्रीशुक उवाच ॥ इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥ प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥ ४२ ॥

संमोहिता आकृष्टचित्ता सती त्रैलोक्ये लोकत्रये सौभगं सौन्दर्यातिशययुक्तमिदं रूपं च निरीक्ष्य त्रिलोक्यां का सा स्त्री या आर्यचरितात् सदाचारात्स्वधर्मान्न चलेत्। यत् याभ्यां वेणुगीतश्रवणरूपदर्शनाभ्यां गवादयः पुलकान्यबिभ्रन् अबिभरुरित्यर्थे जुसभाव आर्षः। त्वद्द्योतकशब्दश्रवणमात्रेण धर्मत्यागो भवति किं पुनस्त्वदनुभवेन ॥४०॥ व्यक्तमिति ॥ हे आर्तबन्धो आदिपुरुषो देवो भगवान् यथा सुरलोकस्य गोप्ता रक्षार्थमुपेन्द्रादिरूपेणावतरति तथा भवानपि व्रजस्य सर्वस्य भयार्तिहरो भयार्तिहरणार्थमभिजातोऽसीति व्यक्तं यस्मात् निश्चितमेव तस्मात् तव किङ्करीणां नोऽस्माकं स्मरतापतप्तेषु स्तनेषु शिरस्सु च निजं करपङ्कजं निधेहि स्थापय ॥ ४१ ॥ इतीति ॥ इत्येवं तासां विक्लवितं पारवश्यप्रलपितं श्रुत्वा योगेश्वराणामीश्वरः आत्मारामो निजानन्दपूर्णोऽपि भगवान् सदयं यथा भवति तथा कृपया तदार्तिहरणार्थं प्रहस्य गोपीररीरमत् रमयामास। सदयमित्युक्त्या दयैव हेतुर्न कामुकतेति सूचितम् ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेति ॥ दृष्टं वनमिति पक्षापेक्षया पक्षान्तरे अथवा मयि योऽभितः स्नेहः तस्माद्यन्त्रितः वशीकृतः आशयोन्तःकरणं यासां ताः तथा सत्यो भवत्यः आगतास्तर्हे- तद्वो युष्माकमुपपन्नं युक्तमेव। हि यस्मान्मयि जन्तवः सर्वेऽपि प्राणिनः प्रीयन्ते प्रीतियुक्ता भवन्ति मद्दर्शनमपि जातमेवेत्यतो व्रजं यात । अथ च मत्स्नेहादागताः अतोऽधुना मया सह रमध्वम् ॥ २३ ॥ भर्तुरिति ॥ हे कल्याण्यः अमायया कपटपरित्यागेन भर्तुः शुश्रूषणं तस्य भर्तुर्बन्धूनां पित्रादीनां च शुश्रूषणं तत्प्रजानां पुत्रभृत्यादीनां चानुपोषणं स्त्रीणां पर उत्कृष्टो धर्मः । अथ च अमायया कन्याभावादारभ्य वृतो यो भर्ता नतु पित्रादिभिर्बलादापादितस्तस्यैव शुश्रूषणं परो धर्मः । तथा तद्बन्धूनां चेत्यादि प्राग्वत् भीष्मेणाम्बायाः परित्यागेन बलादापादितस्य धर्मतो भर्तृत्वासिद्धेः । अतस्ते कपटेन भर्तारः सद्भाववृत्तत्वेन त्वहमेव सत्यभर्ता वः शुश्रूषणीयः ॥ २४ ॥ दुःशील इति ॥ दुष्टशीलं यस्य सः द्यूतस्तेयादिव्यसनवान् दुर्भगो निष्फलोद्यमः वृद्धः विकलेन्द्रियः जडो मूर्खः रोगी महारोगग्रस्तः अधनो दरिद्र एवं भूतोऽपि पतिः अपातकी महापातकर-

अथवा मदभिस्नेहाद्भवत्यो यन्त्रिताशयाः ॥ आगता ह्युपपन्नं वः प्रीयन्ते मयि जन्तवः ॥ २३ ॥ भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया ॥ तद्बन्धूनां च कल्याण्यः प्रजानां चानुपोषणम् ॥ २४ ॥ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा ॥ पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २५ ॥ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् ॥ जगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः ॥ २६ ॥ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ॥ न तथा संनिकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥ श्रीशुक उवाच ॥ इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ॥ विषण्णा भग्नसंकल्पाश्चिन्तामापुर्दुरत्ययाम् ॥ २८ ॥

हितश्चेत् लोकेप्सुभिः पुण्यलोकेच्छुभिः स्त्रीभिर्न हातव्यः । अतः व्रजं गत्वा पतीन् शुश्रूषध्वम् । अथ च वस्तुतोऽहमेव पतिरिति स्थिते दुःशीलतादियुक्तोऽपि पतिर्न हेयः किं पुनः सर्वगुणसम्पन्नोऽहमिति अतोऽत्रैव मया सह रमध्वम् ॥२५॥ अस्वर्ग्यमिति ॥ कुलस्त्रियाः औपपत्यम् उपपतिर्जारः तत्संबन्धाज्जातं सुखमौपपत्यं पत्युत्तरपदाण्ण्यः । सर्वत्र अस्वर्ग्यं स्वर्गाप्तौ प्रतिकूलम् अयशस्यं यशोलोपकं फल्गु तुच्छं कृच्छ्रं कष्टहेतुः इहामुत्र च भयावहं सर्वत्र जुगुप्सितं च । अथ च मम मुख्यपतित्वात् तेषामेवोपपतित्वम् अतोऽहमेव सेव्यः ॥२६॥ श्रवणादिति ॥ यतो यथा श्रवणात् दर्शनात् ध्यानात् अनुकीर्तनाच्च मयि भावः स्नेहाधिक्यं भवति तथा तादृशः सन्निकर्षेण अङ्गसंबन्धेन न भवति ततस्तस्मात् गृहान्प्रतियात । अथ च श्रवणादिना मयि भावो न स्यात् यथा सन्निकर्षेण स्यात् ततो गृहान् प्रति न यातेति नञोऽनुषङ्गः । यद्वा । अगृहानिति अकारस्य निषेधार्थकाव्ययस्य च्छेदः । " अभावे न ह्य नो नापि " इत्यमरोक्तेः । अयात न यातेत्यर्थः ॥ २७ ॥ इतीति ॥ इत्येवंभूतं विप्रियं गोविन्दस्य भाषितं श्रुत्वा अनेकार्थत्वेनाशयानिश्चयात् उत्कण्ठास्वभावेनोपेक्षार्थस्यैव स्फुरणाच्च गोप्यो विषण्णाः विषादं प्राप्ताः भग्नः भगवता सह रमणविषयकः संकल्पो यासां तादृश्यः सत्यो दुरत्ययां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवदनुग्रहं विना अनिवर्त्यां चिन्तामापुः ॥ २८ ॥ कृत्वेति ॥ शुचः शोकादुद्गतेन श्वसनेनोष्णवातेन शुष्यन्तो बिम्बफलसदृशा अधरा येषु तानि मुखानि अव अवा-
ञ्चिकृत्वा तथा चरणेन पादांगुष्ठेन विवरं प्रार्थयन्त्य इव भुवं महीं लिखन्त्यः तथा उपात्तमषिभिर्गृहीतकज्जलैरस्रैरश्रुभिः कुचगतानि कुङ्कुमानि मृजन्त्यः क्षालयन्त्यः
नुमार्षः । उरुर्दुःखभरो यासां ताः तूष्णीमेव तस्थुः ॥ २९ ॥ प्रेष्ठमिति ॥ प्रेष्ठं प्रियतममपि कृष्णं प्रियेतरं प्रियसामान्यादपि भिन्नमिव प्रतिभाषमाणं प्रत्याचक्षाणमवबुद्ध्य
तदर्थं तत्प्राप्त्यर्थम् एव विशेषेण निश्चयेन निवर्तितास्त्यक्ताः सर्वे कामाः विषया याभिस्ताः कृष्णे अनुरक्ताश्च गोप्यः किञ्चित् संरम्भेण कोपावेशेन गद्गदाः स्खलिताक्षरा
गिरो यासां तादृश्यः सत्यः रुदितेन रोदनेनोपहते शोकाश्रुपूर्णतया लुप्तदर्शने नेत्रे प्रमृज्य प्रोञ्छनेन शोधयित्वा तं प्रति अब्रुवत स्म ॥ ३० ॥ अत्र सर्वासामुक्तौ कोला-
हलेन रसानाधायकत्वान्मुख्यानामेवोक्तिः । सा च तन्नः प्रसीदेति सिञ्चाङ्गेति तन्नः प्रसीद वृजिनेति तन्नो निधेहीति च चतुःकृत्व उपसंहारानुसाराद्यूथशो दिक्चतुष्टय-

कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्बिम्बाधराणि चरणेन भुवं लिखन्त्यः ॥ अस्रैरुपात्तमषिभिः कुचकुङ्कुमानि तस्थुर्मृजन्त्य उरुदुःखभराः स्म तूष्णीम् ॥ २९ ॥ प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः ॥ नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरम्भगद्गदगिरोऽब्रुवतानुरक्ताः ॥ ३० ॥ गोप्य ऊचुः ॥ ॥ मैवं विभोऽर्हति भवान् गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलम् ॥ भक्ता भजस्व दुरवग्रह मा त्यजास्मान् देवो यथादिपुरुषो भजते मुमुक्षून् ॥ ३१ ॥ यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ॥ अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ ३२ ॥

स्थितानां तासां क्रमेणेति ज्ञेयम् । मैवमिति ॥ हे विभो हे दुरवग्रह दुराग्रह स्वच्छन्द वा । एवं प्रत्याख्यानात्मकं नृशंसं क्रूरं घातुकं वचनं गदितुं व्यक्ततया वक्तुं भवान् मा नैवार्हति अतः यथा देवः आदिपुरुषः सर्वभजनीयोऽपि मुमुक्षून् भजते अभिलषितसम्पादनेन सेवते तथा सर्वविषयान् संत्यज्य तव पादमूलं भक्ताः सेवितुमारब्धवत्यः आदिकर्मणि विवक्षिते कर्तरि क्तः । अतः पादमूलमिति द्वितिया प्राप्ता इति पाठान्तरम् । अस्मान् मा त्यज किन्तु भजस्व ॥ ३१ ॥ यदिति ॥ अङ्ग हे प्रभो पतिः अपत्यानि सुहृदस्तद्बन्धवस्तेषामनुवृत्तिः स्त्रीणां स्वधर्म इति यत् धर्मविदा त्वयोक्तं तत् उपदेशपदे उपदेष्टरि ईशे त्वय्येवास्तु अन्य एव भवता उपदेष्टव्यो न वयमिति । यद्वा । शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादीनां पदे अधिष्ठाने ईश्वरे त्वय्येवास्तु । सकलधर्मोपदेशानामीश्वराराधनार्थत्वात् । तं त्वां विहाय पत्याद्याराधनेन किमतः साक्षात्त्वाराधनमेव योग्यम् । किल हेतौ भवान् सर्वेषां तनुभृतां प्रेष्ठो बन्धुरात्मा चेति । यद्वा । बन्धुरः सुन्दर आत्मा यस्य सः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताभिरिति ॥ प्रियस्य कृष्णस्येक्षणेन कृपादृष्ट्या उत्फुल्लानि मुखानि यासां ताभिः समेताभिर्मिलिताभिस्ताभिर्गोपीभिर्वृतः उदारं गोपीनां मनोरथपूरकं चेष्टितं यस्य उदारेण महता तासां सुखप्रदेन वा हासेन द्विजेषु दन्तेषु कुन्दकुसुमवद्दीधितिः प्रकाशो यस्य सः अच्युतो हरिः उडुभिस्ताराभिर्वृतः एणाङ्कश्चन्द्रो यथा विरोचते तथा व्यरोचत अशोभत ॥ ४३ ॥ उपगीयमान इति ॥ वनितानां शतयूथानि पातीति तथा सः कृष्णस्ताभिः उप आधिक्येन गीयमानः स्वयं चोद्गायन् वैजयन्तीं पञ्चवर्णपुष्पग्रथितां मालां बिभ्रत् वनं मण्डयन् अलंकुर्वन् व्यचरत् ॥४४॥ नद्या इति ॥ तस्या यमुनायास्तरलैस्तरङ्गैरानन्दः शैत्येनानन्ददायकश्चासौ कुमुदानामामोदो यस्मिन्स च तेन वायुना हिमाः शैत्ययुक्ताः वालुका यस्मिन् तथाभूतं नद्यास्तस्याः पुलिनमाविश्य गोपीभिः सह रेमे। तत्तरलानन्दीति वा पाठः। यद्वा। हिमवालुका कर्पूरः स इव वालुका यत्र तत् तत्तरलानन्दिकुमुदामोदवायुना उपलक्षितं नद्याः पुलिनमाविश्य रेमे। रेमे इत्यत्र जुष्टमिति पाठे अग्रेतनेन सह युग्मकम् ॥ ४५ ॥ बाह्विति ॥ दूरे स्थितानां ग्रहणार्थं

ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्विजकुन्ददीधितिर्व्यरोचतैणाङ्क इवोडुभिर्वृतः ॥ ४३ ॥ उपगीयमान उद्गायन् वनिताशतयूथपः ॥ मालां बिभ्रद्वैजयन्तीं व्यचरन्मण्डयन् वनम् ॥ ४४ ॥ नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम् ॥ रेमे तत्तरलानन्दकुमुदामोदवायुना ॥ ४५ ॥ बाहुप्रसारपरिरम्भकरालकोरुनीवीस्तनाऽऽलभननर्मनखाग्रपातैः ॥ क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥ ४६ ॥ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥ आत्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥ ४७ ॥ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥ प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥ ४८ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां कृष्णान्तर्धानं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

बाहुप्रसारणं परिरम्भः बलादाकृष्यालिङ्गनं कराः अलकाः ऊरवः नीव्यः स्तनाः एषामालभनं स्पर्शश्च नर्माणि परिहासवचनानि नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया अवलोकाश्च हसितानि च तैश्च व्रजसुन्दरीणां रतिपतिं काममुत्तम्भयन्नुद्दीपयन् रमयांचकार ता रमयामास। अत्र भगवत्प्रभावादेव पुलिनभूमेरसङ्ख्यगोपीसुरतपर्याप्तत्वं सावरणविविधकुञ्जवत्त्वं गन्धताम्बूलादिसुरतसामग्रीवत्त्वं च सम्पन्नमिति बोध्यम् ॥ ४६ ॥ अथ न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुत इति रसरीत्यनुसारेण विप्रलम्भबीजमाह—एवमिति ॥ एवं भगवतः महात्मनः गम्भीरचित्तात् कृष्णाल्लब्धमानाः आप्तमनोरथास्ता गोप्यो भुवि वर्तमानानां स्त्रीणां मध्ये आत्मानमभ्यधिकमतिश्रेष्ठं मेनिरे अतो मानिन्यो जाताः। नह्यस्मत्सदृश्योऽन्याः सन्ति इति प्रत्येकमभिमानयुक्ताः जाताः ॥४७॥ तासामिति ॥ तासां गोपीनां स पूर्वोक्तश्चासौ सौभगेन सौन्दर्येण श्रीकृष्णकर्तृकप्रेमातिशयेन वा मदः अस्वाधीनता च तं वीक्ष्य तथा तत्प्रयुक्तं मानं गर्वं च वीक्ष्य केशवः को ब्रह्मा ईशश्च तौ वशयतीति तादृशः कृष्णः प्रशमाय गर्वविनाशाय प्रसादाय अनुग्रहाय च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र पुलिन एव अन्तरधीयत अन्तर्हितवान् । रतवन्यत्र गच्छन्दृष्टः । "धीङ् आधारे" दिवादिः ॥४८॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो, दशमस्यो- नत्रिंशे व्यधादिमाम् ॥ २९ ॥ कृष्णस्य मार्गणं त्रिंशे गोपीनामुन्मदिष्णुता ॥ कृष्णलीलानुकारार्द्यैस्तत्र श्लोकाः कृतार्द्धयः ॥ उवाचेत्येकमर्द्धाब्धि गँजँवेदा अनुष्टुभः ॥३०॥ अन्तर्हिते इति ॥ एवं सहसैव अकस्मादेव झटिति भगवति कृष्णेन्तर्हिते सति तमचक्षाणाः अपश्यन्त्यो व्रजाङ्गनाः यूथपं गजराजमपश्यन्त्यः करिण्यो यथा तप्यन्ते तथा अतप्यन् ॥ १ ॥ गत्येति ॥ रमापतेर्गत्या अनुरागः प्रेम स्मितं च ताभ्यां विभ्रमेक्षितानि सविलासनिरीक्षणानि तैर्मनोरमा आलापाश्च विहाराश्च क्रीडाविभ्रमाः अन्याश्च विविधाः मोहिकाश्चेष्टाः तैः आक्षिप्तानि आकृष्टानि चित्तानि यासां ताः प्रमदा गोप्यः तदात्मिकाः प्राप्ततदभेदाभिमानाः सत्यः तस्य रमापतेः तास्ता विविधाश्चेष्टाः पूतनापयः- पानादिलीला जगृहुः कृतवत्यः ॥२॥ गतीति ॥ प्रियस्य कृष्णस्य गतिस्मितादिषु प्रतिरूढाः आविष्टाः मूर्त्तयो यासां ताः आदौ प्रियस्य गतिस्मितादय आसां मूर्त्तौ चित्ता-

श्रीशुक उवाच ॥ ॥ अन्तर्हिते भगवति सहसैव व्रजाङ्गनाः ॥ अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥ गत्यानुरागस्मितविभ्रमेक्षि- तैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥ गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ॥ असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥ गायन्त्य उच्चैरमुमेव संहता विचिक्युरुन्म- त्तकवद्वनाद्वनम् ॥ पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥ दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥ नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥ कच्चित् कुरुबकाशोकनागपुन्नागचम्पकाः ॥ रामानुजो मानिनीनां गतो दर्पहरस्मितः ॥ ६ ॥

दिभ्यामारूढास्ततस्तेषु गत्यादिषु आसां मूर्तिश्च प्रत्यारूढा इत्यर्थः । कृष्णस्येवविहारविभ्रमाः क्रीडाविलासा यासां ताः तदात्मिकाः कृष्णतादात्म्यं प्राप्ताः कृष्णस्य प्रियाः अबला गोप्यः असौ कृष्णोऽहमेव इति न्यवेदिषुः ज्ञातवत्यः परस्परं निवेदितवत्यो वा ॥ ३ ॥ गायन्त्य इति ॥ संहता मिलिताः सत्य उच्चैर्गायन्त्यः वनाद्वनान्तरं गच्छन्त्योऽमुं श्रीकृष्णमेव उन्मत्तकवद्विचिक्युरमृगयन्त । आकाशवत्सर्वभूतेषु चराचरेषु बहिरन्तर्व्याप्य सन्तं वर्तमानमत एव पुरुषं पूर्णं श्रीकृष्णं वनस्पतीन् पप्रच्छुः ॥ ४ ॥ महत्त्वादेते पश्येयुरित्यश्वत्थादीन् पृच्छन्ति—दृष्ट इति ॥ हे अश्वत्थ हे प्लक्ष हे न्यग्रोध वट वो युष्माभिः कच्चिन्नन्दसूनुर्दृष्टः स प्रेमहासविलसितैरवलोकनैर्नोऽ- स्माकं मनो हृत्वा चोर इव गतः ॥ ५ ॥ पुष्पैर्बहूपकारिण एते इति कुरबकादीन् पृच्छन्ति—कच्चिदिति ॥ हे कुरबकादयः मानिनीनां गर्ववतीनामस्माकं दर्पहरं स्मितं यस्य सः रामानुजः कृष्णः इतः एतन्मार्गेण गतः कच्चित् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कच्चिदिति ॥ हे कल्याणि हे गोविन्दचरणप्रिये गुरुचरणाइतिवच्चरणशब्द आदराय गोविन्दप्रिये इत्यर्थः बहुव्रीहिर्वा । हे तुलसि अलिकुलैः सह त्वा त्वां बिभ्रत् तेऽतिप्रियः अच्युतः कच्चित्त्वया दृष्टः ॥ ७ ॥ मालतीति ॥ हे मालत्यादयः वो युष्माभिः कच्चित् माधवः कृष्णः अदर्शि दृष्टः । पुष्पग्रहणार्थं कराभ्यां स्पर्शेन वो युष्माकं प्रीतिं जनयन् कच्चित् यातः गतः । मालतीजात्योरवान्तरभेदो ज्ञेयः ॥ ८ ॥ चूतेति ॥ हे चूत प्रियालादयः चूताम्रयोर्मधुराम्लप्रकृतितो लतावृक्षजातितो वा भेदः । कदम्बः क्षुद्रपुष्पोऽतिसुगन्धः नीपो वृहत्पुष्पः अन्ये च परार्थभवकाः परार्थमेव भवो जन्म येषां ते । भविका इतीकारमध्यपाठे परार्थं भविकं मङ्गलमभ्युदयो येषां ते उप समीपे कूलं येषां ते उपकूलाः यमुनायाः उपकूलास्तत्तटस्थिताः वृक्षास्तीर्थवासित्वेन सत्यवादिनः ते भवन्तो रहितात्मनां कृष्णाकृष्टत्वेन शून्यचेतसां नोऽस्माकं कृष्णपदवीं कृष्णप्राप्तिमार्गं शंसंतु कथयन्तु ॥ ९ ॥ किन्त इति ॥ हे क्षिति क्षितेः क्तिन्नन्तादपि ङीषार्षः बताश्चर्ये । ते त्वया किं तपः कृतं यतः त्वं केशवस्याङ्घ्रिस्पर्शेन उत्सवो

कच्चित् तुलसि कल्याणि गोविन्दचरणप्रिये ॥ सह त्वाऽलिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥ मालत्यदर्शि वः कच्चिन्मल्लिके जाति यूथिके ॥ प्रीतिं वो जनयन् यातः करस्पर्शेन माधवः ॥ ८ ॥ चूतप्रियालपनसाऽसनकोविदारजम्ब्वर्कबिल्वबकुलाम्रकदम्बनीपाः ॥ येऽन्ये परार्थभवका यमुनोपकूलाः शंसन्तु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥ किं ते कृतं क्षिति तपो बत केशवाङ्घ्रिस्पर्शोत्सवोत्पुलकिताङ्गरुहै-र्विभासि ॥ अप्यङ्घ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरम्भणेन ॥१०॥ अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन् दृशां सखि सुनि-र्वृतिमच्युतो वः ॥ कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः कुन्दस्रजः कुलपतेरिह वाति गन्धः ॥ ११ ॥ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुज-स्तुलसिकालिकुलैर्मदान्धैः ॥ अन्वीयमान इह वस्तरवः प्रणामं किं वाऽभिनन्दति चरन् प्रणयावलोकैः ॥ १२ ॥

यस्यास्तथाभूता विभासि तथा अङ्गरुहैर्हरिततृणादिभिरुत्पुलकिता रोमाञ्चिता विभासि शोभसे किमयमुत्सवः अङ्घ्रिसम्भवः इदानीं तवैकदेशतदङ्घ्रिस्पर्शसम्भूतः । यद्वा । उरुक्रमविक्रमात् पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् आहो अथवा नैतावत् अपि तु ततोऽपि पूर्वं वराहावतारस्य तस्य वपुषः परिरम्भणेन ॥१०॥ अपीति ॥ प्रश्ने हे सखि एणपत्नि हरिणि वो युष्माकं दृशां स्वगात्रैर्बाह्वादिभिः सुनिर्वृतिं सुखं वितन्वन् अच्युतः इह प्रियया सह त्वया उपगतः प्राप्तः अपि यतः इह कुलपतेः गोकुलपतेः श्रीकृष्णस्य कान्ताया अङ्गसङ्गेन आलिङ्गनेन तत्कुचकुङ्कुमेन रञ्जितायाः कुन्दकुसुमस्रजो गन्धः वाति आगच्छति ॥ ११ ॥ बाहुमिति ॥ हे तरवः दक्षिणपाणिना गृहीतं पद्मं लीलापद्मं येन सः तुलस्यामोदमदेनान्धैस्तुलसिकायाः अलिकुलैरन्वीयमानः अनुगम्यमानः रामानुजः श्रीकृष्णः प्रियाया अंसे स्कन्धे वामं बाहुमुपधाय इह विचरन् प्रणयसहितैरवलोकैः वो युष्माकं प्रणामं किमभिनन्दति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृच्छतेति ॥ अहो हे सख्यः इमा लताः पृच्छत यत एताः वनस्पतेः स्वपतेर्बाहून् स्कन्धानाश्लिष्टा अप्येता अहो नूनं निश्चितं तस्य कृष्णस्य करजैः पुष्पावचयं कुर्वतो नखैः स्पृष्टाः यतः उत्पुलकानि अङ्कुरमिषेण उद्गतपुलकान्यङ्गानि बिभ्रति स्वपति स्पर्शमात्रेण ईदृक् पुलकासम्भवात् ॥ १३ ॥ इतीति॥ इत्येवमुन्मत्तस्येव वचांसि यासां ताश्च गोप्यश्च ताः कर्मधारयः कृष्णान्वेषणेन कातराः अतिविह्वलास्तदात्मिकास्तदभेदाभिमानवत्यः सत्यश्च तास्ता भगवतो लीला अनुचक्रुः अनुकृतवत्यः ॥ १४ ॥ कस्या इति ॥ कृष्णायन्ती कृष्णवदाचरन्ती काचित् गोपी पूतनायन्त्याः पूतनावदाचरन्त्याः कस्याश्चित्स्तनमपिबत् । तोकायित्वा शिशुवत् आत्मानं कृत्वा रुदती सती अन्या गोपी शकटवदाचरन्तीं गोपीं पदाऽहन् अताडयत् । आचरणं चात्र किञ्चिच्छरीरचेष्टया किञ्चित् वचनमात्रेण किञ्चिद्भावनामात्रेण च बोध्यम् । अत्र पूतनायन्त्यादिष्वाचारे क्यङ् । आत्मनेपदाभावस्तु आर्षः ॥ १५ ॥ दैत्यायित्वेति ॥ दैत्यायित्वा तृणावर्तदैत्यवदात्मानं कृत्वा एका कृष्णार्भभावनां कृष्णस्यार्भ बाल्यं भावयति या तामन्यां

पृच्छतेमा लता बाहूनप्याऽऽश्लिष्टा वनस्पतेः ॥ नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ॥ लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥ १४ ॥ कस्याश्चित् पूतनायन्त्याः कृष्णायन्त्यपिबत् स्तनम् ॥ तोकायित्वा रुदत्यन्या पदाऽहन् शकटायतीम् ॥ १५ ॥ दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनाम् ॥ रिङ्गयामास काऽप्यङ्घ्री कर्षन्ती घोषनिस्वनैः ॥ १६ ॥ कृष्णरामायिते द्वे तु गोपायन्त्यश्च काश्चन ॥ वत्सायन्तीं हन्ति चान्या तत्रैका तु बकायतीम् ॥ १७ ॥ आहूय दूरगा यद्वत् कृष्णस्तमनुकुर्वतीम् ॥ वेणुं क्वणन्तीं क्रीडन्तीमन्याः शंसन्ति साध्विति ॥ १८ ॥ कस्यांचित् स्वभुजं न्यस्य चलन्त्याहापरा ननु ॥ कृष्णोहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥

जहार । घोषाः किङ्किण्यस्तासां निःस्वनैः सहितौ अङ्घ्री कर्षन्ती काचित् रिङ्गयामास जानुपाणिना चचाल ॥ १६ ॥ कृष्णेति ॥ द्वे तु गोप्यौ कृष्णरामायिते कृष्णरामवत् जाते । काश्चन गोप्यो गोपायन्त्यो गोपबालवज्जाताः । तत्र तासु गोपीषु मध्ये वत्सायतीं वत्सासुरवच्चरन्तीमन्यां कृष्णवद्वर्तमाना घ्नन्ती जाता । चकारात्कपित्थानि च पातयामास । तथा एका तु कृष्णरूपा बकायतीं बकासुरवदाचरन्तीं घ्नन्ती जाता हन्तीति वा पाठः ॥ १७ ॥ आहूयेति ॥ यद्वत् यथा कृष्णो गाः आह्वयति तथा दूरगाः दूरे वर्तमानाः गाः टजभाव आर्षः । आहूय तं कृष्णमनुवर्ततीम् अनुवर्तमानाम् अनुकुर्वतीमिति पाठान्तरम् । वेणुं क्वणन्तीं क्रीडन्तीं ताम् अन्याः गोपबालभावनायुक्ताः साधु साध्विति शंसन्ति प्रशशंसुः ॥ १८ ॥ कस्याश्चित् इति ॥ काचित्तु तन्मनाः कृष्णाभेदाभिमानयुक्ता कस्याश्चित्स्वभुजमन्यस्या भुजे न्यस्य निधाय प्रचलन्ती पादन्यासं कुर्वती । ननु सम्बोधने । हे सख्यः अहं कृष्णः मम ललितां सुन्दरां गतिं पश्यतेत्याह स्म ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा भैष्टेति ॥ काचित्तन्मनाः वातवर्षाभ्यां मा भैष्ट भयं मा कार्ष्ट यतः तत् ताभ्यां वातवर्षाभ्यां त्राणं रक्षणं मया विहितमित्युक्त्वा यतन्ती प्रयत्नं कुर्वती शता आर्षः । एकेन हस्तेन अम्बरमुत्तरीयं वस्त्रमुन्निदधे वितत्य ऊर्ध्वं धृतवती ॥२०॥ आरुह्येति ॥ हे नृप एका कृष्णवद्वर्तमाना पदा शिरस्याक्रम्य आरुह्य अपरां तां कालियवद्वर्तमानां प्रति हे दुष्ट अहे सर्प गच्छ इतो ह्रदात् अपसर। ननु निश्चयेन खलानां परोद्वेजकानां दण्डधृक् दण्डार्थमेवाहं जातोऽस्मि । धृजेः क्विप् ॥२१॥ तत्रेति ॥ तत्र गोपीषु मध्ये एका कृष्णवद्वर्तमाना गोपवद्वर्तमानाः प्रति हे गोपाः उल्बणं भयंकरं दावाग्निं पश्यत आशु चक्षूंषि अपिदध्वं निमीलयत । धद्ध्वमिति भ्रष्भाववान्साधुः पाठः । दकारवांस्त्वार्षः । वो युष्माकं क्षेमं निर्भयत्वमहमञ्जसा अनायासेनैव विधास्ये करिष्यामीत्युवाच ॥ २२ ॥ बद्धेति ॥ तत्र गोपीषु काचित्तन्वी कोमलाङ्गी कृष्णवद्वर्तमाना अन्यया यशोदावद्वर्तमानया स्रजा मालया नवनीतचौर्यनिमित्तेन बद्धा अत एव भीता सुदृक् शोभने दृशौ नेत्रे यस्मिंस्तत् आस्यं मुखं पिधाय हस्ताभ्यामाच्छाद्य सुदृक् वराक्षीति वा । भीतिविडम्बनं भयानुकरणं भेजे चकार ॥ २३ ॥ एवमिति ॥ एवं श्रीकृष्णलीलाः कुर्वत्यः पुनश्च वृन्दावनलतास्तरूंश्च कृष्णं पृच्छमानाः शता आर्षः । वनोद्देशे वनप्रदेशे

मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ॥ इत्युक्त्वैकेन हस्तेन यतन्त्युन्निदधेऽम्बरम् ॥ २० ॥ आरुह्यैका पदाक्रम्य शिरस्याह्यपरां नृप ॥ दुष्टाहे गच्छ जातोहं खलानां ननु दण्डधृक् ॥ २१ ॥ तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणम् ॥ चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममञ्जसा॥२२॥बद्धाऽन्यया स्रजा काचित् तन्वी तत्र उलूखले ॥ भीता सुदृक् पिधायास्यं भेजे भीतिविडम्बनम् ॥२३॥ एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून् ॥ व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ २४ ॥ पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः ॥ लक्ष्यन्ते हि ध्वजाम्भोजवज्राङ्कुशयवादिभिः ॥ २५ ॥

परमात्मनः कृष्णस्य पदानि भूमौ रजसि चिह्नतयोद्बुद्धानि व्यचक्षत अपश्यन् ॥ २४ ॥ पदानीति ॥ महात्मनः उदारचित्तस्यात्ममनोरथपूरकस्य नन्दसूनोरेतानि पदानि इति व्यक्तं निश्चितम् । हि यस्मात् ध्वजाम्भोजादिभिर्लक्ष्यन्ते आदिना चक्रादिग्रहणम् । तथा हि स्कान्दे । "दक्षिणस्य पदोङ्गुष्ठमूले चक्रं बिभर्त्यजः । तत्र नम्रजनस्यारिषड्वर्गच्छेदनाय सः ॥ मध्यमाङ्गुलिमूले च धत्ते कमलमच्युतः । ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम् २ ॥ पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् ३ । कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ४ ॥ पार्ष्णिमध्येङ्कुशं भक्तचित्तेभवशकारिणम् ५ । भोगसंपन्मयं धत्ते यवमङ्गुष्ठपर्वणि ६ ॥" तथान्यान्यपि चिह्नानि वैष्णवतोषण्यामुक्तानि । तथा हि । अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्धचरणमूर्ध्वरेखा ७ । चक्रस्य तले छत्रम् ८ । अर्धचरणतले चतुर्दिगवस्थितं स्वस्तिकचतुष्टयम् ९ । स्वस्तिकस्य चतुर्षु सन्धिषु जम्बूफलचतुष्टयम् १० । स्वस्तिकमध्ये अष्टकोणमित्येवं दक्षिणचरणे एकादश चिह्नानि ११ । तथा वामपादाङ्गुष्ठमूले भक्तोन्मुखं दरं सर्वविद्याप्रकाशाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दधाति भगवानसाविति १। मध्यमामूले बरमन्तर्बाह्यमण्डलद्वयात्मकम् २। तदधः कार्मुकं विगतज्यम् ३। तदधो गोष्पदम् ४। तत्तले त्रिकोणम् ५। तदभितः कलशानां चतुष्टयं कचित्रितयमित्युक्तम् ६। त्रिकोणतलेऽर्धचन्द्राग्रद्वयस्पृष्टं त्रिकोणद्वयम् ७। तदधो मत्स्यः ८। एवं वामपादेऽष्टौ मिलित्वा ऊनविंशतिः ॥ २५ ॥ तैस्तैरिति ॥ एवं तैस्तैर्ध्वजादिचिह्नितैः पदैस्तस्य कृष्णस्य पदवीं स्थितिमन्विच्छन्त्यः अन्वेषयन्त्योऽबला गोप्यः अग्रतः कस्याश्चिद्वध्वाः पदैः सुपृक्तानि अन्तरान्तरासम्मिलितानि तत्पदानि विलोक्यार्ताः अतिदुःखिताः सत्यः समब्रुवन् परस्परमूचुः। इयं च श्रीराधेत्याहुः। तस्याश्च वामचरणे अङ्गुष्ठमूले यवः १। तत्तले चक्रम् २। तत्तले छत्रम् ३। तत्तले वलयम् ४। अङ्गुष्ठतर्जनीसन्धिमारभ्य यावदर्धचरणमूर्ध्वरेखा ५। मध्यमातले कमलम् ६। तत्तले सपताको ध्वजः ७। तत्तले पुष्पं वल्ली च ८। ९। कनिष्ठातलेऽङ्कुशः १०। पार्ष्णावर्द्धचन्द्रः ११। एवं इत्येकादश दक्षिणचरणे। अङ्गुष्ठमूले शङ्खः १। तत्तले गदा २। कनिष्ठातले वेदिः ३। तत्तले कुण्डलम् ४। तत्तले शक्तिः ५। तर्जन्याद्यङ्गुलितले पर्वतः ६। तत्तले रथः ७। पार्ष्णौ मत्स्यः ८। इत्यष्टौ मिलित्वैकोनविंशतिः ॥ २६ ॥ कस्या इति ॥ करिणा

तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः ॥ वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥ २६ ॥ कस्याः पदानि चैतानि यातायाः नन्दसूनुना ॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥ २७ ॥ अनया राधितो नूनं भगवान्हरिरीश्वरः ॥ यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥ २८ ॥ धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः ॥ यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥ २९ ॥

सह गच्छन्त्याः करेणोरिव नन्दसूनुना सह यातायाः तेनांसे स्कन्धे न्यस्तः स्थापितः प्रकोष्ठो यस्यास्तस्याः कस्या एतानि पदानि ॥ २७ ॥ अनयेति ॥ अनया कृष्णेन सहागतया नूनं निश्चयेन भगवान् ईश्वरः हरिः भक्तदुःखहर्ता आराधितः। यत् यस्मात् नोऽस्मान् विहाय प्रीतः सन् गोविन्दो यां रह एकान्तमनयत्। केचित्तु राधित इत्यपि छित्त्वा इतच्प्रत्ययेन व्याचक्षते। अनया गोप्या हरिः राधितः सञ्जातराधो राधाविशिष्टो जातः। पुष्पेण पुष्पित इतिवत्। राधा इति भगवत्प्रीतगोप्या नाम। अत्र ब्रह्मवैवर्तादौ प्रसिद्धमाहात्म्यायाः श्रीराधाया नाम्नोऽप्यकथनं तत्प्रतिपक्षाणां गोपीनां संकोचात् मुनिनापि तन्नाम्ना स्पष्टमनुक्तिर्देवस्य परोक्षप्रियत्वादिति तोषण्यामुक्तम्। वस्तुतो यथा गोपालतापिन्यां तदनुसारिणि गौतमीयतन्त्रे विष्णुपुराणे हरिवंशे च राधानामाकथनं तथा तापिन्यनुसारिणि श्रीभागवतेऽपि तदकथनं शैलीविशेष एव। नत्वकथने तात्पर्यविशेषकल्पना युक्ता ॥ २८ ॥ धन्या इति ॥ हे आल्यः सख्यः अमी गोविन्दस्य अङ्घ्रिरेवाब्जं तद्रेणवः अहो धन्याः। अतिपुण्याः यान् रेणून् अघनुत्तये ब्रह्मा ईशश्च देवी रमा चेत्येतेऽपि मूर्ध्नि दधुः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्या इति ॥ सर्वासां गोपीनां सर्वस्वमच्युताधरं कृष्णाधरामृतमेकैवापहृत्य रहः एकान्ते या भुङ्क्ते तस्याः यत् यानि अमूनि पदानि तानि नोऽस्माकमुच्चैः भृशं क्षोभं दुःखं कुर्वन्ति ॥ ३० ॥ नेति ॥ अत्र तस्याः वध्वाः पदानि न लक्ष्यन्ते न दृश्यन्ते अतो नूनं निश्चितं तृणाङ्कुरैः खिद्यन्ती शतार्षः । सुजाते सुकुमारे अङ्घ्रितले यस्यास्तां प्रेयसीं तस्याः प्रियः कृष्णः उन्निन्ये स्कन्धमारोपितवान् ॥ ३१ ॥ इमानीति ॥ असार्वत्रिकं पद्यम् । हे गोप्यो वधूं वहतः भाराक्रान्तस्य कामिनः कृष्णस्याधिकमग्नानि भूमावधिकं प्रविष्टानि इमानि पदानि पश्यत ॥ ३२ ॥ अत्रेत्यर्द्धम् ॥ असार्वत्रिकम् । अत्र महात्मना कृष्णेन पुष्पावचयहेतोः । कान्ता अवरोपिता अवतारिता ॥ ३३ ॥ अत्रेति ॥ अत्र प्रेयसा कृष्णेन प्रियार्थे प्रसूनानां पुष्पाणामवचयः कृतः अत एव उच्चपुष्पावचयार्थं प्रपदाभ्यां पादाग्राभ्यामाक्रमणं क्षोणिमर्दनं ययोः ते असकले पादाग्रमात्रत्वादसम्पूर्णे पदे कर्मणी यूयं पश्यत । जातौ द्वित्वं । पदानीत्यर्थः ॥ ३४ ॥ कृष्णपदान्त उपविष्टायाश्चिह्नं पर्युषितपुष्पपतनं च दृष्ट्वाहुः—केशेति ॥ अत्र तु कामिना कृष्णेन

तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैः पदानि यत् ॥ यैकापहृत्य गोपीनां रहो भुङ्क्तेच्युताधरम् ॥ ३० ॥ न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः ॥ खिद्यत्सुजाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ ३१ ॥ इमान्यधिकमग्नानि पदानि वहतो वधूम् ॥ गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः ॥ ३२ ॥ अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना ॥ ३३ ॥ अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ॥ प्रपदाक्रमणे एते पश्यताऽसकले पदे ॥ ३४ ॥ केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ॥ तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ॥ ३५ ॥ रेमे तया चात्मरत आत्मारामोप्यखण्डितः ॥ कामिनां दर्शयन् दैन्यं स्त्रीणां चैव दुरात्मताम् ॥ ३६ ॥ इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः ॥ ३७ ॥ यां गोपीमनयत् कृष्णो विहायान्याः स्त्रियो वने ॥ सा च मेने तदात्मानं वरिष्ठं सर्वयोपिताम् ॥ हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥ ३८ ॥

कामिन्यास्तस्याः केशानामितस्ततो विश्लथतां प्रसाधनं पुनः सीमन्तसमीकरणाभ्यां बन्धनं कृतम् । अन्या आहुः । कान्तामधिकृत्य तानि प्रसूनानि चूडयता चूडानुकरणेन बध्नता चूडाशब्दात्तत्करोतीति ण्यन्ताच्छता कृष्णेनेह ध्रुवं निश्चितमुपविष्टम् । भावे क्तः ॥ ३५ ॥ रेम इति ॥ शुकोक्तिः आत्मन्येव रतः अतः आत्मारामः स्वक्रीडः अखण्डितः स्त्रीभिरनाकृष्टो भगवान् कामिनां विषयिणां दैन्यं पारवश्यं स्त्रीणां दुरात्मतां दौर्जन्यं च दर्शयन् दर्शयितुमेव तया सह रेमे ॥ ३६ ॥ इत्येवमिति अर्द्धम् ॥ इदं पद्यं च स्वामिनो न सम्मतमिति तोषणी । एवं प्रलपन्त्यः अनर्थकं वदन्त्यः दर्शयन्त्य इति पाठे मिथस्तच्चिह्नानि दर्शयन्त्यो विचेतस उन्मत्तसदृश्यो गोप्यः विचेरुः ॥ ३७ ॥ स्त्रीणां दुरात्मतामाह—यामिति सार्द्धम् ॥ अन्याः स्त्रियो वने विहायानादृत्य यां स्त्रियं कृष्णोऽनयत् सा च तदा सर्वयोषितां मध्ये आत्मानं वरिष्ठं मेने । सा चैवं मेने यत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामयानाः कामयमानाः " आगमशास्त्रमनित्यम् " इति मुगभावः । कामयानशब्दः सिद्धोऽनादिश्चेति वामनसूत्रम् । " कामयानसमवस्थया तुलाम् " इति कालिदासोऽपि प्रायुङ्क्त । कामो यानमागमसाधनं यासामिति वा गोपीर्हित्वा त्यक्त्वा असौ प्रियो मामेव भजते अनुवर्त्ततेऽतोऽहं सर्वाभ्यः श्रेष्ठेति ॥३८॥ तत इति ॥ ततः दृप्ता सा वनस्य उद्देशं कञ्चित्प्रदेशं गत्वा केशवं प्रति इतोऽग्रेऽहं चलितुं न पारये न शक्नोमि अतः यत्र ते मनः अस्ति तत्र मां स्कन्धादिना नय इत्यब्रवीत् ॥ ३९ ॥ कामिनां दैन्यं दर्शयति—एवमिति ॥ एवमुक्तः स भगवान् एवं चेत्तर्हि त्वया स्कन्धेऽधिकरणे स्कन्धः कर्म वा आरुह्यतामिति तां प्रियां प्रत्याह स्म । ततस्तस्यां स्कन्धारोहणोद्यतायां सत्यां कृष्णोन्तर्दधे । ततश्च सा वधूरन्वतप्यत ॥ ४० ॥ अनुतापमाह—हा नाथेति ॥ हा खेदे । हे नाथ हे रमण हे प्रेष्ठ हे महाभुज हे सखे त्वं कासि कासि कृपणायाः त्वद्वियोगेन दीनाया दास्याः मे स्वसन्निधिं दर्शय इति विलप्य मुमूर्च्छ अग्रे मोहितामित्युक्तेः ॥ ४१ ॥ अन्विच्छन्त्य इति ॥ भगवतो मार्गमन्विच्छन्त्यो मृगयमाणा गोप्यः एवं प्रियस्य विश्लेषेण

ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥ न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥ ३९ ॥ एवमुक्तः प्रियामाह स्कन्धमारुह्यतामिति ॥ ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ॥ ४० ॥ हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ॥ दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥ ४१ ॥ श्रीशुक उवाच ॥ अन्विच्छन्त्यो भगवतो मार्गं गोप्यो विदूरतः ॥ ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीम् ॥ ४२ ॥ तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ॥ अवमानं च दौरात्म्याद् विस्मयं परमं ययुः ॥ ४३ ॥ ततोऽविशन् वनं चन्द्रज्योत्स्ना यावद्विभाव्यते ॥ तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः ॥४४॥ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥ तद्गुणानेव गायन्त्यो नात्मागाराणि सस्मरुः ॥ ४५ ॥

मोहितां मूर्छितां दुःखितां सखीम् अविदूरतः समीप एव ददृशुः ॥ ४२ ॥ तयेति ॥ ततश्च मूर्छानिवृत्तौ माधवान् मानप्राप्तिं स्वसम्मानप्राप्तिं तथा आत्मनः दौरात्म्यात् दौर्जन्यात् हेतोरन्तर्धानेन परित्यागात्मकमवमानं च ततः प्राप्तं चकारात् स्वविलापदुःखादिकं च तया कथितमाकर्ण्य तस्याद्भुतचरितेन परमं विस्मयमाश्चर्यं ययुः ॥ ४३ ॥ तत इति ॥ ततश्च यावच्चन्द्रस्य ज्योत्स्ना विभाव्यते लक्ष्यते तावद्गोप्यः तया सहिताः कृष्णान्वेषणार्थं वनमविशन् । ततोऽग्रे तमः प्रविष्टमालक्ष्य हरेरन्वेषणान्निववृतुः निवृत्ताः । तङ्भाव आर्षः । हरेरित्यत्र स्त्रिय इत्यपि पाठः ॥ ४४ ॥ तन्मनस्का इति ॥ तस्मिन् कृष्ण एव मनो यासां ताः तस्यैव आलापो भाषणं यासां तास्तदालापाः यत एवंभूतास्तस्मात्तस्य कृष्णस्येव विविधाश्चेष्टा यासां तास्तद्विचेष्टाः स एवात्मा यासां तास्तदात्मिकास्तदैक्याभिमानवत्यः तस्य गुणान् एव गायन्त्यः नतु स्वत्यागादिदोषान् ततस्तन्मग्नाता अपि आत्मानं देहमगारं गृहं बहुवचनात् पतिपुत्रोपकरणादीनि च न सस्मरुः ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनरिति ॥ समवेताः संमिलिताः सर्वा एव गोप्यः यत्र पूर्वं कृष्णेन सङ्गतास्तदेव कालिन्द्याः पुलिनं पुनरागत्य कृष्णभावनाः कृष्णध्यानपराः तदागमनं काङ्क्षितं यासां तादृश्यः सत्यः कृष्णमेव जगुः ॥ ४६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमत्रिंशेऽध्याये व्यधादिमाम् ॥ ३० ॥ एकत्रिंशे तु गायन्त्यः कृष्णं गोप्यो दिदृक्षवः ॥ तदागमं प्रार्थयन्त श्लोकास्तत्रोनविंशतिः ॥ उवाचेत्येकमर्द्धाढ्याः षड्विंशतिरनुष्टुभः ॥ ३१ ॥ जयतीति ॥ एषु श्लोकेषु प्रायश्चतुर्णां पादानां द्वितीयाक्षरहलैक्यम् । केषुचित्पादेषु प्रथमसप्तमहलैक्यम् । तत्र क्वचिद्बवशसादीनामालङ्कारिकसमयसिद्धसावर्ण्यादैक्यम् । हे दयित ते तव जन्मना निमित्तेन व्रजो वैकुण्ठादिलोकादप्यधिकं यथा भवति तथा जयति उत्कर्षेण वर्तते । हि यस्मात्तव जन्मना त्वदनुयायिनी इन्दिरा लक्ष्मीः सम्पद्रूपेण श्रीनामसाफल्याय शश्वत् नित्यमत्र व्रजे श्रयते व्रजमलङ्कृत्य वर्तते । एवं सर्वव्रजप्रमोदे सति त्वयि त्वदर्थमेव कथञ्चित् त्वत्प्राप्त्याशयैव धृता असवो यैस्ते तावका गोपीजनास्त्वां दिक्षु विचिन्वते अतः त्वया दृश्यतां

पुनः पुलिनमागत्य कालिन्द्याः कृष्णभावनाः ॥ समवेता जगुः कृष्णं तदागमनकाङ्क्षिताः ॥ ४६ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडायां त्रिंशत्तमोऽध्यायः ॥ ३० ॥ गोप्य ऊचुः ॥ जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि ॥ दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥ शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ॥ सुरतनाथ ते शुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ २ ॥ विषजलाप्ययाद् व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ॥ वृषमयात्मजाद्विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ॥ ३ ॥

प्रत्यक्षीभूयताम् । प्रेरणांशत्यागेऽकर्मकत्वाद्भावे लोट् । यद्वा । अस्माभिर्भवान् दृश्यताम् । यद्वा । एतास्त्वां विचिन्वत इति त्वया दृश्यताम् । अष्टादशसु श्लोकेषु राजहंसीछन्दः ललितमिति केचित् ॥ १ ॥ शरदिति ॥ हे सुरतनाथ सम्भोगपते हे वरद शरत्कालिको योऽयमुदाशयः पुष्करिणी तत्र साधु सम्यक् प्रकारेण जातं यत्सत् सुविकसितं सुन्दरं सरसिजं कमलं तस्योदरे या श्रीः शोभा तां मुष्णाति हरति । यादृक् तया चोररूपया दृशा नेत्रेण अशुल्कदासिकाः अमूल्यदासीर्नो निघ्नतः प्राणापहारेण मारयतस्ते तव त्वया क्रियमाण इह लोकेऽयं किं वधो न भवति किं शस्त्रेणैव वधो भवति । दृशा वधो न भवति किंतु भवत्येव । चोरेणेव गुप्तवधो लोकैर्मा ज्ञायतां नाम । हत्यादोषस्तु स्यादेव अतोऽस्मज्जीवनार्थं दृश्यतामित्याशयः ॥ २ ॥ विषजलेति ॥ हे ऋषभ विषजलं कालियह्रदजलं तस्मात् योऽप्ययो नाशस्तस्मात् व्यालराक्षसात् अघासुरात् इन्द्रकृताद्वर्षात् मारुतात् वैद्युतानलात् विद्युत्पातजादग्नेः वृषः अरिष्टस्तस्मात् मयात्मजात् व्योमासुरात् विश्वतोऽन्यस्मादपि सर्वतोभयात् कालियदमनादिभिर्मुहुर्मुहुः पुनस्त्वया वयं रक्षिताः स्मः । इदानीं मन्मथेन हन्यमानान् किमुपेक्षसे । तथा रक्षितानां वधः सर्वथा अयोग्यः । अत्रारिष्टव्योमवधस्य भावित्वेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तज्ज्ञानं श्रुत्यवतारत्वात् भगवदाविष्टत्वाच्च अन्यत्राप्येवं ज्ञेयम् । तोषिण्यां तु वृषात्मजो वत्सासुरः वराहतोको निरगादितिवत् व्योमवधोऽग्रे वर्ण्यमानोऽपि रासात्पूर्वभावीत्युक्तम् । परे तु गर्गादिमुखाच्छ्रुतस्य भूतत्वेन निर्देश इत्याहुः ॥ ३ ॥ ननु तर्हि विश्वस्तघाती असंव्यवहार्योऽहं किमर्थं प्रार्थ्यें तत्राहुः—न खल्विति ॥ हे सखे भवान् गोपिकानन्दनो यशोदासुतो नैव भवति किं त्वखिलदेहिनां सर्वप्राणिनां योन्तरात्मा अंतःकरणं तं पश्यतीति तथा साक्ष्येव अतोऽस्मद्दुःखमपि जानासि इति भावः । विखनसा ब्रह्मणा प्रार्थितः सन् विश्वस्य गुप्तये पालनाय सात्वतां यादवानां कुले उदेयिवान् स्वेच्छया त्वमवतीर्णोऽसि । आङ्पूर्वाद्दिणः क्वसुः । अतो विश्वगोप्त्रा त्वया वयमपि गोप्याः । यद्वा । सेर्ष्यमाहुः नञः प्राङ्निर्दिष्टस्याग्रेऽप्यनुषङ्गः । तथा च निर्दयः त्वं यशोदासुतो नासि नाप्यन्तरसाक्षी ब्रह्मणा प्रार्थितो विश्वेगुप्तयेऽपि नावतीर्णः कथमन्यथाऽस्मान्मारयसि इति ॥ ४ ॥ विरचितेति ॥ हे वृष्णिधुर्य हे कान्त संसृतेर्भयात् चरणमीयुषां शरणागतानां भक्तानां विरचितं दत्तमभयं येन तत् कामदं श्रियः

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ॥ विखनसाऽर्थितो विश्वगुप्तये सख उदेयिवान् सात्त्वतां कुले ॥ ४ ॥ विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ॥ करसरोरुहं कान्त कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥ व्रजजनार्तिहन् वीरयोषितां निजजनस्मयध्वंसनस्मित ॥ भज सखे भवत्किङ्करीः स्म नो जलरुहाननं चारु दर्शय ॥ ६ ॥ प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ॥ फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥ मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ॥ विधिकरीरिमा वीर मुह्यतरिधरसीधुनाऽऽप्याययस्व नः ॥ ८ ॥

करं गृह्णाति तादृशं तव करसरोरुहं नोऽस्माकं शिरसि धेहि स्थापय ॥ ५ ॥ व्रजेति ॥ हे व्रजजननामार्तिहन् हे वीर हे निजजनानां स्मयो गर्वस्तं ध्वंसयतीति तथाभूतं स्मितमपि यस्य तत्सम्बुद्धिः अतोऽस्माकं गर्वनाशो जात एव किमन्तर्धानेन । हे सखे भवतः किङ्करीः दासीः नोऽस्मान् भज । चारु मनोहरं जलरुहाननं मुखकमलं योषितामस्माकं दर्शय ॥ ६ ॥ प्रणतेति ॥ अविशेषेण प्रणतानां शरणागतानां देहिनां पापकर्शनं पापहन्तृ तथा कृपया तृणचरान् गवादीन् पशूनप्यनुगच्छतीति तथा तत् सौभाग्येन श्रियो निकेतनमाश्रयं वीर्यातिरेकेण फणिनः कालियस्य फणास्वर्पितं ते पदाम्बुजं नोऽस्माकं कुचेषु कृणु स्थापय । "कृञ्, हिंसायाम्" सुनोत्यादिः । अनेकार्थत्वात्करणे वृत्तिः । यद्वा । "कृ विहिंसाकरणयोः" "धिन्विकृण्व्योरच" इति तेन हृच्छयं कामं कृन्धि छिन्धि "कृती वेष्टने" रुधादिः । अनेकार्थत्वात् छेदेऽपि ॥ ७ ॥ ॥१०१॥
मधुरयेति ॥ हे पुष्करेक्षण हे वीर कोकिलवत् मधुरया वल्गूनि मनोहराणि वाक्यानि यस्यां तया बुधानामपि मनोज्ञया हृद्यया गम्भीरयेत्यर्थः । तव गिरा वाण्या विमुह्यतीः नुमभाव आर्षः । विधिकरीः किङ्करीरिमा नः अस्मान् अधरसीधुना अधरामृतेन आप्यायस्व संजीवयस्वेत्यर्थः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवेति ॥ ये जनाः तप्तानां त्रिविधतापवतां जीवनं कविभिर्विद्वद्भिरपीडितं स्तुतं कल्मषापहं श्रवणमात्रेण मङ्गलकरं श्रीमत् सुशान्तं तव कथारूपममृतं भुवि आततं विस्तृतं यथा स्यात्तथा गृणन्ति ते भूरिदाः पूर्वजन्मसु बहुदानादिपुण्यवन्तः अमृतं तु देहखेदमात्रनिवर्तकं ब्रह्मविद्भिस्तुच्छीकृतं पापानामनाशकं पानापेक्षं मादकमिति देवभोग्यादमृतात्कथाया उत्कर्षार्थं विशेषणानि ते इत्यत्र ये इत्यपि पाठः ॥९॥ तर्हि यूयं मत्कथां श‍ृण्वन्तु किं दर्शनेन तत्राहुः—प्रहसितमिति ॥ हे प्रिय हे कुहक ध्यानमात्रेण मङ्गलप्रदं ते प्रहसितं प्रेम्णा वीक्षणं विहरणं विहारः याश्च हृदिस्पृशो हृदयङ्गमाः रहसि संविदः संकेतनर्माणि ताश्च नोऽस्माकं मनो हि यस्मात् क्षोभयन्ति अतः कथामात्रेण नास्माकं शान्तिः ॥ १० ॥ चलसीति ॥ हे नाथ हे कान्त यत् यदा पशूंश्चारयन् व्रजाच्चलसि तदा नलिनमिव सुन्दरं कोमलं ते पदं शिलैः शूकधान्यकणिशैस्तृणैरङ्कुरैश्च सीदति क्लिश्येदिति नो मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति ॥ ११ ॥ दिनेति ॥ हे वीर त्वं दिनस्य परिक्षये सायंकाले नीलकुन्तलैरावृतं घनरजस्वलं गोरजश्छुरितं वनरुहा-

तव कथाऽमृतं तप्तजीवनं कवीभिरीडितं कल्मषापहम् ॥ श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥ ९ ॥ प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमङ्गलम् ॥ रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥१०॥ चलसि यद्व्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम् ॥ शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति ॥ ११ ॥ दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतम् ॥ घनरजस्वलं दर्शयन् मुहुर्मनसि न स्मरं वीर यच्छसि ॥ १२ ॥ प्रणतकामदं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि ॥ चरणपङ्कजं शन्तमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥ सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ॥ इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥ अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ॥ कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद् दृशाम् ॥ १५ ॥

ननम् अलिमालाकुलपरागच्छुरितपद्मतुल्यमाननं बिभ्रत् मुहुर्दर्शयन् नो मनसि केवलं स्मरं यच्छसि अर्पयसि न तु सङ्गं ददासीति कपटपटुता ॥१२॥ प्रणतेति ॥ हे रमण हे आधिहन् मनोदुःखप्रशमक प्रणतानां कामदं पद्मजेन ब्रह्मणाऽर्चितं धरणेर्मण्डनमलङ्कारभूतम् आपदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शन्तमं सेवनेऽप्यानन्दजनकं ते चरणपङ्कजं नोऽस्माकं कामशान्तये स्तनेष्वर्पय ॥१३॥ सुरतेति ॥ हे वीर सुरतस्य सम्भोगसुखस्य वर्द्धनं शोकस्य नाशनं स्वरितेन नादितेन स्वनितेत्यपि पाठः । वेणुना सुष्ठु चुम्बितं नादामृतवासितं नृणां नृजातीनामस्माकम् इतरेषु पुत्रधनादिषु रागस्य विस्मारकं ते तवाधरामृतं नोऽस्मभ्यं वितर देहि ॥ १४ ॥ सर्वं त्यक्त्वा यतय इव वयं त्वामागतास्त्वं कथमस्मांस्त्यक्तुमुत्सहसे इत्याहुः—अटति इति ॥ यत् यदा अह्नि दिने भवान् काननं वृन्दावनं प्रति अटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः युगायते अत्यल्पः कालः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सारार्थसंदर्शिनीसम्मते त्रुटीति सुलुक् पाठे क्लैब्यमार्षम् । सुवत्पाठे छन्दोभङ्ग आर्षः । युगाय ते तस्मात् हे अच्युत पुनश्च कथंचिद्दिनान्ते कुटिलाः कुन्तलाः केशा यस्मिंस्तत् श्रीमत् शोभातिशययुक्तं ते तव मुखम् । उदीक्षताम् उच्चैरीक्षमाणानाम् आर्षः शता । तेषां जनानां दृशां पक्ष्मकृत् ब्रह्मा जड एवेति निमेषमात्रमप्यन्तरमसह्यम् । यद्वा । दृशां पक्ष्मकृत् पक्ष्मच्छेत्ता " कृती च्छेदने " क्विप् । निर्निमेषप्रेक्षी अजडश्चतुरो जनः तव रूप उदीक्षतां पश्यतु नतु वयं मूर्खा हतभाग्याश्च ॥ १५ ॥ पतीति ॥ हे अच्युत हे कितव गतिविदः गीतगतिम् अस्मदागमनं वा जानतः गतिविदो वयं वा तवोद्गीतेन उच्चैर्गीतेन मोहिताः त्वयैव गीतेन बलादाकृष्टाः वयं पतीन् सुतान् अन्वयान् तत्संबन्धिनो भ्रातॄन् बान्धवांश्चातिविलङ्घ्य अनादृत्य तेऽन्ति त्वत्समीपमागताः अतोऽस्मान् गृहाणेति । त्वामृते को नाम जनः निशि स्वयमागता योषितस्त्यजेत् । कितवोऽपि कैतवेन लब्धं न त्यजतीति ॥ १६ ॥ रहसीति ॥ तव रहसि संविदं साङ्केत्येन चेष्टितं हृच्छयस्य कामस्य उदयो यस्मात् तत् प्रहसितमाननं च प्रेम्णा वीक्षणं च श्रियो लक्ष्म्याः धाम स्थानभूतं बृहद्विशालमुरो वक्षश्च वक्ष्य त्वत्संबन्धे अतिस्पृहा भवति । यद्वा । अतिस्पृहा अत्यन्तया स्पृहया स्पृहेः क्विप् भावे । मुहुः पुनः पुनश्च मनो मुह्यते

पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ॥ गतिविदस्तवोद्गीतमोहिता कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥ रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ॥ बृहदुरःश्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥ व्रजवनौकसां व्यक्तिरङ्ग ते वृजिनहन्त्र्यलं विश्वमङ्गलम् ॥ त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥ यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु ॥ तेनाटवीमटसि तद्व्यथते न किं स्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ १९ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे गोपीकृतकृष्णस्तुतिर्नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

मोहं प्राप्नोति तङार्षः । अतस्त्वत्सङ्गनिदानकस्य हृद्रोगस्य त्वत्सङ्ग एव चिकित्सा । विषस्य विषमौषधम् इति न्यायात् ॥ १७ ॥ व्रजेति ॥ अङ्ग हे प्रभो तव व्यक्तिः अभिव्यक्तिरवतारो व्रजस्य व्रजवासिजनस्य वनौकसां मुनीनां च वृजिनहन्त्री पापनिरसनी दुःखनिरसनी वा । तथा अलमतिशयेन विश्वस्य मङ्गला वहा च अतस्त्वत्स्पृहात्मनां त्वत्संबन्धस्पृहारूढमनसां नोऽस्माकं स्वजनानां हृद्रुजां हृदयरोगाणां कामादिरूपाणां यन्निषूदनं विनाशकं त्वत्संबन्धरूपं गूढं त्वदेकवेद्यमौषधं तन्मनाक् ईषदपि त्यज कार्पण्यमकुर्वन् देहीति ॥ १८ ॥ यदिति ॥ हे प्रिय ते तव यत्सुजातं सुकुमारं चरणाम्बुजं कर्कशेषु कठिनेषु स्तनेषु भीताः संमर्दनशङ्किताः सत्यो वयं शनैः शनैर्दधीमहि धारयेम । धर्तुं योग्यमित्यर्थः । " अर्हे कृत्यतृचश्च " इति चाल्लिङ् । तेन चरणेनाटवीमटसि विचरसि । नयसीति पाठे तु अटवीं प्रति काञ्चिदन्यां वा आत्मानमेव वा नयसि तदा तत् पदाब्जं कूर्पादिभिस्तीक्ष्णाग्रसूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते कथं तु नाम न व्यथते इति भवानेवायुर्जीवनं यासां तासां नोऽस्माकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धीर्भ्रमति चाञ्चल्यं गच्छति ॥ १९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्यैकत्रिंशे व्यधादिमाम् ॥ ३१ ॥ द्वात्रिंशे कृपया कृष्ण आविर्भूय च गोपिकाः ॥ असान्त्वयच्चाद्रियत श्लोका द्वाविंशतिर्मताः ॥ उवाचत्रयमङ्कन्यूनास्तत्त्वसंख्या अनुष्टुभः ॥ ३२ ॥ इतीति ॥ हे राजन् कृष्णदर्शने लालसा अतिस्पृहा यासां ता गोप्य इत्येवमुक्तप्रकारेण चित्रधा अनेकप्रकारेण । धा आर्षः । प्रगायन्त्यः प्रलपन्त्यः वदन्त्यश्च सुस्वरं यथा भवति तथा उच्चै रुरुदुः ॥ १ ॥ तासामिति ॥ तासां रुदतीनां मध्ये एव स्मयमानं प्रहसन् मुखाम्बुजं यस्य सः पीताम्बरधरः स्रग्वी मालाधारी साक्षान्मन्मथमन्मथः जगन्मोहकस्य कामस्यापि मोहकस्वरूपधरः शौरिः कृष्णः आविरभूत् ॥ २ ॥ तमिति ॥ प्रेष्ठं प्रियतमं तं कृष्णम् आगतं विलोक्य प्रीत्या उत्फुल्ला विकसिताः दृशो नेत्राणि यासां ताः अबलाः गोप्यः यथा प्राणमागतं प्राप्य तन्वः करचरणादयः उत्तिष्ठन्ति तथा सर्वा युगपदेव उत्तस्थुः ॥ ३ ॥ अथ तासु गोपीषु मुख्यानां चेष्टाविशेषमाह अत्र तोषिण्यनुसारेण तासां नामानि लिख्यन्ते—काचिदिति ॥ काचिद्गोपी मुदा

॥ श्रीशुक उवाच ॥ इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ॥ रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ १ ॥ तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ॥ पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥ तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युगपत् सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥ काचित् कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चन्दनभूषितम् ॥ ४ ॥ काचिदञ्जलिनाऽगृह्णात् तन्वी ताम्बूलचर्वितम् ॥ एका तदङ्घ्रिकमलं सन्तप्ता स्तनयोरधात् ॥ ५ ॥ एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला ॥ घ्नन्तीवैक्षत् कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥ अपराऽनिमिषद्दृग्भ्यां जुषाणा तन्मुखाम्बुजम् ॥ आपीतमपि नातृप्यत् सन्तस्तच्चरणं यथा ॥ ७ ॥

हर्षेण अञ्जलिना संहतहस्तद्वयेन शौरेः कृष्णस्य कराम्बुजं जग्राह । इयं चन्द्रावली राधाप्रतिस्पर्द्धिनी मृदुश्चेति काचित्तु चन्दनेन भूषितं रूषितमिति पाठान्तरम् लिप्तं तस्य बाहुमात्मनोंऽसे स्कन्धे दधार । इयं राधासुहृत् श्यामला ॥ ४ ॥ काचिदिति ॥ काचित्तन्वी योषित् अञ्जलिना तस्य ताम्बूलचर्वितमगृण्हात् एका तु तद्विरहेण सन्तप्ता सती तस्याङ्घ्रिकमलं कमलमिव सुकुमारं तापनाशकं चाङ्घ्रिं स्वस्तनयोरधात् इमे चन्द्रावलीसख्यौ शैब्यापद्मानाम्न्यौ ॥५॥ एकेति ॥ एका तु भ्रूकुटिं भ्रुवः कुटिलतामाबध्य कृत्वा प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला अत एव सन्दष्टो दशनच्छदः अधरोष्ठो यया सा कटाः कटाक्षास्तेषामाक्षेपैः सम्पातैः घ्नन्तीव ताडयन्तीव नुमार्षः । ऐक्षत् ददर्श । तङ्भाव आर्षः । इयं राधिका इयमेव गोपालतापिन्यां गान्धर्वेति प्रसिद्धेत्याहुः ॥ ६ ॥ अपरेति ॥ अपरा तु अनिमिषन्तीभ्यामनिमीलन्तीभ्यां दृग्भ्यामापीतमपि सम्यग्दृष्टमपि तन्मुखाम्बुजं पुनः पुनर्जुषाणा जुषमाणा मुमभाव आर्षः । सेवमानापि तस्य हरेः चरणं सेवमानाः सन्तो यथा न तृप्यन्ति तथा नातृप्यत् । इयं राधासखी ललितानाम्नी ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ काचित्तु नेत्ररन्ध्रेण तं कृष्णं हृदि कृत्य हृदये निधाय ल्यबार्षः। उपगुह्य आलिङ्ग्य नेत्रे निमील्य च पुलकानि रोमाञ्चितानि अङ्गानि यस्याः सा आनन्देन संप्लुता व्याप्ता योगीवास्ते स्म। इयं विशाखानाम्नी राधासखी अष्टमी भद्रानाम्नी अत्र नोक्ता। अत्र त्रिंशत्कोट्यो गोप्यस्तासां षोडशसहस्राणि गोप्यो मुख्यास्तासां मध्येऽष्टौ मुख्यतमाः तासामपि द्वे राधाचन्द्रावल्यौ अतिमुख्यतमे। तयोरपि श्रीराधा सर्वमुख्यतमेति सारार्थसन्दर्शिनी ॥८॥ सर्वा इति ॥ ताः सर्वा गोप्यः केशवस्यालोको दर्शनमेव परम उत्सवस्तेन निर्वृताः आनन्दिताः प्राज्ञमीश्वरं प्राप्य मुमुक्षवो यथा। यद्वा। प्राज्ञं ब्रह्मज्ञं प्राप्य संसारिणो जना यथा। यद्वा। प्राज्ञं सुषुप्तिसाक्षिणं प्राप्य विश्वतैजसा जीवा यथा। "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" इति श्रुतेः। तद्वद्विरहजं तापं जहुः ॥ ९ ॥ ताभिरिति ॥ पुरुषः परमात्मा शक्तिभिः सत्वादिभिर्विमलोत्कर्षिण्यादिभिर्वा। यद्वा। उपासकः पुरुषो ज्ञानबलवीर्यादिभिः यद्वा पुरुषोऽनुशायी प्रकृत्याद्युपाधिभिर्यद्वा पुरुषः सर्वेन्द्रियशक्तिभिर्वृतोऽधिकं यथा रोचते तथा विधूतशोकाभिर्निवृत्तशोकाभिः

तं काचिन्नेत्ररन्ध्रेण हृदि कृत्य निमील्य च ॥ पुलकाङ्ग्युपगृह्यास्ते योगीवानन्दसंप्लुता ॥ ८ ॥ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ॥ जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥ ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥ व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ १० ॥ ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः ॥ विकसत्कुन्दमन्दारसुरभ्यनिलषट्पदम् ॥ ११ ॥ शरच्चन्द्रांशुसन्दोहध्वस्तदोषातमः शिवम् ॥ कृष्णाया हस्ततरलाऽऽचितकोमलवालुकम् ॥१२॥ तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथान्तं श्रुतयो यथा ययुः ॥ स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे ॥ १३ ॥ तत्रोपविष्टो भगवान् स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः ॥ चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥ १४ ॥

ताभिर्गोपीभिर्वृतः अच्युतो भगवान् अधिकं व्यरोचत ॥ १० ॥ ता इति द्वयम् ॥ विभुः कृष्णस्ताः गोपीः समादाय विकसद्भिः कुन्दैर्मन्दारैश्च सुरभिर्यो मन्दानिलस्तस्मात् षट्पदा भ्रमराः यस्मिन् तत् शरत्कालिको यो निर्मलश्चन्द्रस्तस्यांशूनां किरणानां संदोहैः समूहैर्ध्वस्तं दोषा तमोरात्रेर्ध्वान्तं यस्मिन् तत् अत एव शिवं सुखकरं कृष्णाया यमुनाया हस्ततुल्यैस्तरलैस्तरङ्गैराचिता आस्तृता कोमला वालुका यस्मिन् तत् कालिन्द्या पुलिनमाविश्य ताभिः परिवृतो व्यरोचतेति पूर्वस्यानुषङ्गः ॥ ११ ॥ १२ ॥ तदिति ॥ तस्य हरेर्दर्शनेन य आह्लादस्तेन विधूता निरस्ता हृद्रुजः तद्विश्लेषजा मनःपीडा यासां ता गोप्यो यथा कर्मकाण्डेष्वपूर्णाः श्रुतयो ज्ञानकाण्डे ईश्वरं प्रतिपाद्याभिप्रायपर्यवसानात्पूर्णमनोरथा भवन्ति तथा मनोरथस्यान्तं ययुः पूर्णमनोरथाजाताः। आत्मबन्धवेऽन्तर्यामिणे हरये कुचकुङ्कुमैरङ्कितैः स्वैः स्वकीयैरुत्तरीयवस्त्रैरासनमचीक्लृपन् रचयामासुः ॥ १३ ॥ तत्रेति ॥ भगवान् ईश्वरः योगेश्वराणां सिद्धयोगानामन्तर्हृदि हृदयकमलमध्ये कल्पितमासनं यस्य त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रयभूतं वपुर्दधत् बिभ्राणो दर्शयन् सः श्रीकृष्णस्तत्र गोपीकुचकुङ्कुमाङ्कितोत्तरीयकल्पितासने उपविष्टः गोपीनां परिषद्गतः सभागतस्ताभिः सभाजितः संमानितश्च संश्चकास शुशुभे । गत्यर्थककसधातोर्लिट् धातूनामनेकार्थता ॥ १४ ॥ सभाजयित्वेति ॥ अनङ्गस्य दीपनं वर्द्धनं तं कृष्णं सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा सभाजयित्वा अनुरज्य अङ्ककृतौ स्वोरौ स्थापितौ यौ भगवतोऽङ्घ्रिहस्तौ तयोः संस्पर्शनेन संमर्दनेन निमित्तेन संस्तुत्य अहो शैत्यमहो सौकुमार्यं यत्स्पर्शेनैवास्मत्सन्ताप निवृत्तिस्त्वन्तु सन्तापदुःखानभिज्ञ एव अतोऽस्मान्विहाय गतवानित्यादिव्याजस्तुतिं कृत्वा अन्तर्द्धानेन ईषत्कुपिताः सत्यो बभाषिरे ॥ १५ ॥ तत्र भगवतः अकृतज्ञतां तद्वचनेनैव प्रकटयितुं लोकवृत्तान्तमिव पृच्छन्ति—भजत इति ॥ भोः कृष्ण एके जनाः भजतः प्राणिनः अनु अनन्तरं तद्भजनानुसारेण भजन्ति । एके त्वेतद्विपर्ययं कुर्वन्ति अभजतोऽपि भजन्तीत्यर्थः । अन्ये तूभयान् भजतः अभजतश्च न भजन्ति। एतत् भजतां गुणदोषफलादिकं सर्वं साधु सम्यक् यथा भवति तथा नोऽस्मान् प्रति ब्रूहि॥१६॥

सभाजयित्वा तमनङ्गदीपनं सहासलीलेक्षणविभ्रमभ्रुवा॥ संस्पर्शनेनाङ्ककृताङ्घ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥१५॥ गोप्य ऊचुः ॥ भजतोनुभजन्त्येक एक एतद्विपर्ययम् ॥ नोभयांश्च भजन्त्यन्य एतन्नो ब्रूहि साधु भोः ॥ १६ ॥ श्रीभगवानुवाच ॥ ॥ मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते ॥ न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥ भजन्त्यभजतो ये वै करुणाः पितरो यथा ॥ धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८ ॥ भजतोऽपि न वै केचित् भजन्त्यभजतः कुतः ॥ आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥ १९ ॥ नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्ति वृत्तये ॥ यथाऽधनो लब्धधने विनष्टे तच्चिन्तयाऽन्यन्निभृतो न वेद ॥ २० ॥

अभिप्रायं विद्वानुत्तरमाह—मिथ इति ॥ हे सख्यः ये मिथः परस्परमुपकारप्रत्युपकारापेक्षया भजन्ति ते स्वात्मानमेव भजन्ति नान्यम् । ते हि यस्मात् स्वार्थे स्वप्रयोजन एव एकान्तो नियत उद्यमो येषां तथाभूताः अतस्तेषां तत् भजनं स्वार्थार्थं स्वप्रयोजनार्थमेव नान्यथा न परार्थम् अतस्तत्र भजने तत्फलं सौहृदं प्रेमधर्मो वा नोत्पद्यते ॥ १७॥ भजन्तीति ॥ हे सुमध्यमाः ये वै अभजतोऽपि भजन्ति किं पुनर्भजतः ते पितरौ यथा मातापितराविव करुणाः कृपालवः सुस्निग्धाश्च अत्र निरपेक्षभजने निरपवादो निर्बाधो धर्मो भवति सौहृदं स्नेहश्चोत्पद्यते ॥ १८ ॥ भजत इति ॥ केचित्तु भजतोऽपि न भजन्ति अभजतस्तु कुतो भजेयुः । ते हि उत्तरोत्तरन्यूनाः चतुर्विधाः । एके आत्मारामाः बहिर्दर्शनरहिताः केचिदाप्तकामाः पूर्णकामत्वेन परभजने प्रवृत्तिरहिताः । अन्ये च अकृतज्ञाः परकृतोपकारानुसन्धानरहिताः मूर्खाः । केचित्तु गुरुद्रुहः परकृतोपकारं जानन्तोऽपि दुष्टचित्तत्वात् गुरुतुल्यमुपकारकं द्रुह्यन्ति तादृशा भवन्ति कृतघ्ना इत्यर्थः ॥ १९ ॥ आत्मानं चरमकोटिगतं मत्वा सस्मितमुखीस्ता दृष्ट्वाह—नाहमिति ॥ हे सख्यः अहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु चतुर्षु न कोऽपि किन्तु परमकारुणिकः परमसुहृच्च । यतः अमीषां मां भजतां जन्तूनामनुवृत्तेरनुवर्तनस्य ध्यानरूपस्यानुवृत्तये अविच्छेदाय भजतोऽपि जन्तून्न भजामि प्रत्यक्षतो निरन्तरं नानुवर्ते । यथेति । यथा अधनो निर्धनः पुमान् कदाचिल्लब्धधने विनष्टे सति तस्य धनस्य चिन्तया निभृतो व्याप्तः अन्यत् न वेद क्षुत्पिपासादिकमपि न जानाति तथा मद्भक्तोऽपि कदाचिन्मां प्रत्यक्षतो दृष्ट्वा पुनर्मय्यन्तर्हिते सति मच्चिन्तया व्याप्तोऽन्यद्देहादिकमपि नानुसन्धत्ते ॥ २० ॥ एवमिति ॥ हे अबलाः हे प्रियाः मदर्थं मत्प्राप्त्यर्थमुज्झिताः त्यक्ताः लोकाः युक्तायुक्ताप्रतीक्षणात् वेदाः धर्माधर्मानवेक्षणात् स्वाः ज्ञातयः तत्स्नेहपरित्यागात् याभिस्तासां वो युष्माकमप्यनुवृत्तये परोक्षमदर्शनं यथा भवति तथा भजता युष्मत्प्रियालापान् शृण्वतैव मया तिरोहितं तत्रैवान्तर्द्धानेन स्थितं भावे क्तः । तत्तस्मात् प्रियं मा मामसूयितुं दोषदृष्ट्या द्रष्टुं नार्हथ न योग्याः स्थ ॥२१॥ आस्तामिदं परमार्थं तु शृणुत—नेति ॥ निरवद्यसंयुजां निरवद्या निष्कपटा संयुक् संयोगो भजनं यासां भावे क्विबन्तं तासां वो युष्माकं स्वसाधुकृत्यं स्वीयसाधुकृत्येन प्रत्युपकारं कर्तुमहं विबुधायुषापि न पारये न शक्नोमि । या भवत्यो दुर्जरा अजरा या गेहरूपाः शृङ्खलास्ताः संवृश्च्य निःशेषं छित्त्वा मा माम् अभजन् मदेक-

एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥ मया परोक्षं भजता तिरोहितं माऽसूयितुं मार्हथ तत् प्रियं प्रियाः ॥ २१ ॥ न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः ॥ या माभजन् दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥ २२ ॥ इति श्रीभागवते दशमस्कन्धे पूर्वार्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥ श्रीशुक उवाच ॥ ॥ इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ॥ जहुर्विरहजं तापं तदङ्गोपचिताशिषः ॥ १ ॥ तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ॥ स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥

चित्ता अभूवंस्तासामिति । मम चित्तं तु बहुषु प्रेमयुक्ततया नैकनिष्ठं तस्माद्वो युष्माकमेव साधुना साधुकृत्येन तत् युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवत्वित्यर्थः । युष्मत्सौशील्येनैव ममानृण्यं नतु मत्कृतप्रत्युपकारेण ॥ २२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वात्रिंशे दशमस्य व्यधादिमाम् ॥ ३२॥ रासक्रीडा त्रयस्त्रिंशे गोपीभी रमणं हरेः ॥ ह्रदिनीवनकेलीभिः श्लोकास्तत्रेन्दुसिंधवः ॥ उवाचेति त्र्यं सार्द्धा गँजँ वेदा अनुष्टुभः ॥ ३३ ॥ इत्थमिति ॥ इत्थं भगवतः सुपेशलाः मनोहरा वाचः श्रुत्वा तस्याङ्गैः करचरणाद्यवयवैः स्पृष्टैः उपचिताः समृद्धाः आशिषो मनोरथा यासां ता गोप्यस्तद्विरहजं तापं जहुः । एतेन प्रश्नोत्तरसमाप्तावालिङ्गनादिविलासा आसन्निति ज्ञापितम् ॥ १ ॥ तत्रेति ॥ तत्र यमुनापुलिने अनुव्रतैर्वशवर्त्तिभिः प्रीतैः अन्योन्यमाबद्धाः गृहीता बाहवो यैस्तैः स्त्रीरत्नैरन्वितो गोविन्दो रासक्रीडां रसानां नृत्यगीतालिङ्गनादीनां समूहो रासः बहुनर्त्तकीयुतो नृत्यविशेषो वा । " नटैर्गृहीतकण्ठानामन्योन्यात्तकरश्रियाम् । नर्तकीनां भवेद्रासो मण्डलीभूय नर्तनम् ॥ " इति नाट्यशास्त्रम् । तत् क्रीडामारभत ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रासोत्सव इत्यादि ॥ यं मन्येरन्नित्यन्तं चतुरक्षराधिकं सार्द्धम् ॥ यं कृष्णं सर्वाः स्त्रियः स्वस्वनिकटस्थं मामेवासावाश्लिष्टवानिति मन्येरंस्तेन तासां मण्डलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये एकैकरूपेण प्रविष्टेन योगेश्वरेण अचिन्त्यशक्तिना बहुरूपेण कृष्णेन कण्ठे गृहीतानामुभयतः आलिङ्गितानां गोपीनां मण्डलैर्मण्डितः शोभमानो रासोत्सवः संप्रवृत्तः । गोपीतिवृत्तिगतस्यापि औचित्याद्विशेषणयोग आर्थिकः । अत्र एको मध्ये कर्णिकावत्स्थितो हरिः वेगनृत्यवशाद्विद्विगोपीमध्ये प्रतीतोऽभूत् इति केचित् । रूपबहुत्वेन तथेत्यन्ये गोप्यश्चैवममंसत । कयाचिन्नाट्यविद्यया गोप्यादिषु स्वतुल्यबहुवेशादिरूपतया बहुत्र भाति अस्ति तु ममैव निकट इति मध्यकेन्द्रे तु राधायुतः कृष्ण इति प्राहुः ॥ ३ ॥ यं मन्येरन्निति पूर्वान्वयि । नभ इति ॥ यदा रासोत्सवः संप्रवृत्तस्तावत् तत्क्षणमेव तद्दर्शनौत्सुक्येन अपहृतात्मनां व्याकुलमनसां सस्त्रीकाणां देवानां विमानशतैर्नभः संकुलं संकीर्णं बभूव । अत्र ब्रह्मादीनामौत्सुक्यादि कृष्णनृत्यांश एव नतु रहस्यविलासे दासत्वेनायोग्यत्वात् । तद्योषितां तु अयोग्यत्वाभावात् सर्वत्रैव । अत एव रासे पुंसां दिवि कृष्णदर्शनमेव न गोपीदर्शनं योगमायया आवरणात् इति ज्ञेयम् ॥ ४ ॥ तत इति ॥ ततस्तद्रासारम्भे देवैर्वादिता दुन्दुभयो नेदुः दुन्दुभिनादश्चायं

रासोत्सवः संप्रवृत्तो गोपीमण्डलमण्डितः ॥ योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ॥ ३ ॥ यं
मन्येरन् नभस्तावद्विमानशतसङ्कुलम् ॥ दिवौकसां सदाराणामौत्सुक्यापहृतात्मनाम् ॥ ४ ॥ ततो दुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः ॥ जगुर्ग-
न्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥ वलयानां नूपुराणां किङ्किणीनां च योषिताम् ॥ स प्रियाणामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥
तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः ॥ मध्ये मणीनां हैमानां महामारकतो यथा ॥ ७ ॥ पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भ-
ज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ॥ स्विद्यन्मुख्यः कवररशनाग्रन्थयः कृष्णवध्वो गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ ॥

मङ्गलार्थं स्ववर्ग्यमेलनार्थं च । तैः कृताः पुष्पवृष्टयश्च निपेतुः । सस्त्रीकाः स्त्रीभिः सहिताः गन्धर्वपतयो विश्वावसुप्रभृतयः अमलं तस्य हरेर्यशो जगुः ॥ ५ ॥ वलयानामिति ॥ रासमण्डले सप्रियाणां कृष्णसहितानां योषितां गोपीनां वलयानां नूपुराणां किङ्किणीनां तुमुलः संकीर्णः शब्दोऽभूत् ॥ ६ ॥ तत्रेति ॥ तत्र रासमण्डले हैमानां सुवर्णरचितानां मणीनां मालावयवानां द्वयोर्द्वयोर्मध्ये महामरकत इव ताभिः स्वर्णवर्णाभिराश्लिष्टः श्यामस्वरूपो भगवान् देवकीसुतः अतीव शुशुभे । अत्र इन्द्रनीलमणिवर्णोऽपि कृष्णस्तासां गौरकान्तिमिश्रणान् मरकतवर्णोऽभूत् । मरकतशब्दोऽयमिन्द्रनीलवाचीत्यपरे ॥ ७ ॥ पादन्यासैरिति ॥ पादानां न्यासैर्विक्षेपैर्भुजविधुतिभिः अन्योन्यावद्धबाहुत्वमुत्सृज्याभिनयार्थं कृतैः करचालनैः स्मितेन सहितैर्भ्रुवो विलासैश्च भज्यद्भिर्भज्यमानैर्मध्यैः शता आर्षः । कटिभागैश्चलैः कुचैः पटैश्च गण्डेषु लोलैश्चञ्चलैः कुण्डलैश्चोपलक्षिताः स्विद्यन्मुख्यः स्विद्यन्ति स्वेदमुद्गिरन्ति मुखानि यासां ताः कवरेषु कचेषु रशनासु च दृढा ग्रन्थयो यासां ताः । यद्वा । तेषु तासु च नृत्यवशात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्रन्थयो निर्मुक्तग्रन्थयः तं श्रीकृष्णं गायन्त्यस्ताः कृष्णवध्वः कृष्णप्रिया गोप्यो मेघचक्रे मेघसमूहे तडित इव विरेजुः । तत्र नानामूर्तिः श्रीकृष्णो मेघचक्रमिव तास्तु बहुविधास्तडित इव स्वेदस्तुषार इव गीतं गर्जितमिवेति ॥ ८ ॥ उच्चैरिति ॥ यासां गीतेन इदं विश्वमावृतं ता नृत्यमानाः नृत्यशीलाः ताच्छील्ये चानश् । रक्तकण्ठ्यः नानारागैरनुरञ्जितकण्ठ्यः रतिः कृष्णप्रीतिरेव प्रिया यासां ताः कृष्णस्याभिमर्शेन स्पर्शेन मुदिता गोप्यः उच्चैर्जगुः ॥ ९ ॥ काचिदिति सार्द्धम् ॥ काचिद्गोपी मुकुन्देन कृष्णेन समं सह अमिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः स्वरजातीः उन्निन्ये उन्नीतवती: तदा प्रीयता प्रीयमाणेन शता आर्षः।तेन कृष्णेन साधु साधु इति वचनेन पूजिता स्वीयोत्तरीयादिभिः सम्मानिता जाता विशाखेयमिति प्राञ्चः । तदाऽन्या काचिद्गोपी तदेव जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये । तस्यै गोप्यै पूर्वगोपीतोऽपि कृष्णो मानमादरं रत्नमालादिरूपम् अदात् । इयं ललिता गीतिनिपुणा । स्वराश्च " षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसंभवाः ॥ मयूरचातकच्छाग-क्रौञ्चकोकिलदर्दुराः । मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥" तेषां जातीरष्टादश यदुक्तम् । " रागस्तु जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति

उच्चैर्जगुर्नृत्यमाना रक्तकण्ठ्यो रतिप्रियाः ॥ कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥ ९ ॥ काचित् समं मुकुन्देन स्वरजातीरमिश्रिताः ॥ उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति ॥ तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥ १० ॥ काचित् रासपरिश्रान्ता पार्श्वस्थस्य गदा-भृतः ॥ जग्राह बाहुना स्कन्धं श्लथद्वलयमल्लिका ॥ ११ ॥ तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् ॥ चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह ॥ १२ ॥ कस्याश्चिन्नाट्यविक्षिप्तकुण्डलत्विषमण्डितम् ॥ गण्डं गण्डे संदधत्या अदात् ताम्बूलचर्वितम् ॥ १३ ॥

सा द्विधा परिकीर्तिता ॥ शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः । ता एव विकृताः सत्यो जाता विकृतसंज्ञया ॥" इत्यादि गानशास्त्रे ज्ञेयम् ॥१०॥ काचिदिति ॥ रासेन परिश्रान्ता श्लथन्ति हस्ताभ्यां वलयानि शिरसः मल्लिकाकुसुमानि यस्याः सा एवंभूता काचिद्गोपी स्वपार्श्वस्थस्य गदाभृतः कृष्णस्य स्कन्धं स्वबाहुना जग्राह । इयं राधा ॥ ११ ॥ तत्रेति ॥ तत्र तासां मध्ये एका गोपी अंसगतं स्वस्कन्धे निहितमुत्पलस्य सौरभमिव सौरभं यस्य तं चन्दनेनानुलिप्तं कृष्णस्य बाहुमाघ्राय हृष्टानि पुलकितानि रोमाणि यस्यास्तथाभूता सती चुचुम्ब । इयं श्यामला ॥ १२ ॥ कस्याश्चिदिति ॥ नाट्येन नृत्येन विक्षिप्तयोश्चञ्चलयोः कुण्डलयोस्त्विषेण त्विषा मण्डितं शोभमानं स्वगण्डं कपोलं कृष्णगण्डे सन्दधत्याः संयोजयन्त्याः कस्याश्चिद्गोप्याः कृष्णस्ताम्बूलचर्वितं स्वमुखं तन्मुखेन संयोज्य प्रकर्षेण अदात्। त्विषशब्दे स्त्रीत्वाभाव आर्षः । घञर्थे कविधानं वा । यद्वा । नाट्यविक्षिप्तकुण्डले च स्वाभाविकी त्विट् च तेषां समाहारः । "द्वन्द्वाच्चुदषहान्तात्" इति टच् । यद्वा । नाट्यविक्षिप्तयोः कुण्डलयोः त्विषा कान्तिर्यत्र स चासौ मण्डितश्चेति तम् । इयं शैब्या ॥ १३ ॥ ॥१०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृत्यन्तीति ॥ कूजन्ती नूपरे मेखला च यस्याः सा काचिन्नृत्यन्ती काचिद्गायती गायन्ती नुमभाव आर्षः । श्रान्ता सती शिवं श्रमनिवर्त्तकं पार्श्वस्थस्य अच्युतस्य हस्ताब्जम् अधात् अञ्जलिना जग्राह । काचित्तु स्तनयोरधात् स्थापितवती । तोषिण्यादावनुरोधात्काचित्पदावृत्त्या गोपीद्वयविषयतया व्याख्यातम् । पूर्वा चन्द्रावली । अपरा तत्सखी पद्मा । एवं सप्त सख्य उक्ताः । अष्टमी भद्रा तु ऊह्या ॥ १४ ॥ अन्या अप्येवं विजह्रुरित्याह—गोप्य इति ॥ श्रियो लक्ष्म्याः एकान्तवल्लभमतिप्रियमच्युतं कृष्णं कान्तं पतिं लब्ध्वा तस्य दोर्भ्यां गृहीताः कण्ठा यासां ताः गोप्यस्तमेव गायन्त्यो यथेष्टं विजह्रिरे ॥ १५ ॥ कर्णेति ॥ कर्णोत्पलैः कर्णावतंसैश्च अलकविटङ्कैः अलकालंकृतैः कपोलैश्च घर्मैः स्वेदबिन्दुभिश्च वक्त्रे श्रीः शोभा यासां ताः वलयनूपुरैः तद्घोषैः किङ्किणीभिरन्यैश्च वाद्यैर्वादित्रैरुपलक्षिताः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः गोप्यः एतेन तालगतिसंतुष्टाः केशाः पुष्पवृष्टिमकुर्वन्निति । उत्प्रेक्षितमिति स्वामिपादाः । भ्रमरा अपि गायकाः यस्यां तस्यां रासगोष्ठ्यां राससभायां भगवता समं ननृतुः ॥ १६ ॥

नृत्यन्ती गायती काऽपि कूजन्नूपुरमेखला ॥ पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताऽधात् स्तनयोः शिवम् ॥ १४ ॥ गोप्यो लब्ध्वाऽच्युतं कान्तं श्रिय एकान्तवल्लभम् ॥ गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥ १५ ॥ कर्णोत्पलालकविटङ्ककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः ॥ गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥ एवं परिष्वङ्गकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमे रमेशो व्रजसुन्दरीभिर्यथाऽर्भकः स्वप्रतिबिम्बविभ्रमः ॥ १७ ॥ तदङ्गसङ्गप्रमदाकुलेन्द्रियाः केशान् दुकूलं कुचपट्टिकां वा ॥ नाञ्जः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह ॥ १८ ॥ कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ॥ कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् ॥ १९ ॥

एवमिति ॥ एवं रमेशो भगवानपि परिष्वङ्ग आलिङ्गनं कराभिमर्शः करेण स्तनोर्वादीनां स्पर्शः स्निग्धेक्षणं सानुरागावलोकनम् उद्दामः श्रेष्ठो विलासः हासश्च तैः व्रजसुन्दरीभिः रेमे । यथा स्वप्रतिबिम्बैर्विभ्रमः क्रीडा यस्य सोऽर्भको यथा स्वालङ्कारवस्त्राद्यलङ्कृतैः प्रतिबिम्बैः सह रमते तथा भगवानपि स्वभूताभिस्ताभिः रेमे । एतेन भगवतो गोपीषु स्वीयकलाकौशललावण्यसंचारकत्वं स्वयं तद्विलासानभिभूतत्वं गोपीनां भगवच्छक्तिभूतत्वं चोक्तम् ॥ १७ ॥ तदङ्गेति ॥ हे कुरूद्वह तस्य भगवतः अङ्गसङ्गेन प्रकृष्टा या मुत् हर्षस्तया आकुलानि अवशानीन्द्रियाणि यासां ता अत एव विस्रस्ता माला आभरणानि च यासां ता व्रजस्त्रियः विश्लथद्बन्धनान् केशान् दुकूलं कुचपट्टिकां कञ्चुलिकां च अञ्जः अनुसन्धानपूर्वकं प्रतिव्योढुं वोढुम् । यकाराधिक्यमार्षम् । यथा पूर्वं धर्तुं नालं न समर्था बभूवुः ॥ १८ ॥ कृष्णेति ॥ न केवलं गोप्यः किन्तु एवं कृष्णस्य विक्रीडितं वीक्ष्य कामेनार्दिताः पीडिताः खेचराणां देवानां स्त्रियोऽपि मुमुहुः । सगणः तारासहितः शशाङ्कश्च विस्मितोऽभवत् । आश्चर्यं प्राप कामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्दित इति पाठे शशाङ्कोऽपि स्त्रीभावं प्राप्तः कृष्णविषयककामार्दित इत्यर्थः । तारागणसहितस्य शशाङ्कस्य गतिविस्मरणाद्रात्रे रतिदैर्घ्यं व्यज्यते ॥ १९ ॥ कृत्वेति ॥ यावतीर्यावत्यो गोपयोषितः पूर्वसवर्णदीर्घ आर्षः । लीलया अनायासेनैवात्मानं तावन्तं तावत्संख्याकं कृत्वा स शास्त्रप्रसिद्धो भगवान् आत्मारामोऽपि प्रत्येकं ताभिः सह रेमे । रमणं चेदं पृथक् कुञ्जादिषु पूर्ववज्ज्ञेयम् ॥ २० ॥ तासामिति ॥ अङ्ग हे राजन् अतिविहारेण श्रान्तानां तासां गोपीनां प्रस्विन्नानि वदनानि सकरुणः कृपावान् कृष्णः शन्तमेन निरतिशयसुखकरेण पाणिना प्रेम्णा आमृजत् परिमृष्टवान् उपलक्षणतया वीजनानुलेपनभूत्यङ्गप्रसाधनवीटिकाप्रदानान्यपि चक्रे । मृजेस्तुदादित्वमार्षम् ॥ २१ ॥ ततः कुञ्जेभ्यो विनिःसृत्य मिलितारासोत्सवसमाप्तिसूचकं मङ्गलं जगुरित्याह–गोप्य इति ॥ तस्य भगवतः कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ताः गोप्यः स्फुरतां पुरटस्य सुवर्णस्य कुण्डलानां कुन्तलानां च त्विषा गण्डेषु या श्रीः तथा सुधितेन अमृतायितेन हासयुक्तनिरीक्षणेन च ऋषभस्य भर्तुः कृष्णस्य मानं विदधत्यः संमानं कुर्वत्यः पुण्यानि श्रवणकीर्तनादिपराणां पापनिवर्तकानि कृतानि तत्कर्माणि जगुः । सुधितेत्याचारक्विबन्तात् क्तः ॥२२॥ ततो रासोत्सवावभृथमिव जलविहारमाह–ताभिरिति ॥ तासां स्वकुचकुङ्कुमेन रञ्जितायाः तासामङ्गसङ्गेन घृष्टा संमर्दिता चासौ स्रक् तस्याः स्रजः संबन्धिभिर्गन्धर्वपालिभिः गन्धर्वपाः गन्धर्वपतय इव गायन्तो ये अलयस्तैरनुद्रुतः अनुगतः विहारेण श्रान्तः श्रममपोहितुमपाकर्तुं ताभिर्युतः कृष्णो वार्जलमाविशत् । भिन्नसेतुः विदारितवप्रः इभराट् गजश्रेष्ठो यथा गजीभिः सह श्रमनिरासार्थं जलं प्रविशति तथा अतिक्रान्तलोकवेदमर्यादो भगवानपि । यद्वा । याः गोप्यः स्वकुचकुङ्कुमैरेव रञ्जिताः अङ्गसङ्गेनैव घृष्टाः स्रजो यासां ताभिर्युतः कृष्णः स कुचेति पाठे स कृष्णः शेषं समम् ॥ २३ ॥ स इति ॥ अङ्ग हे राजन् प्रहसतीभिः प्रहसन्तीभिः नुमभाव आर्षः । युवतिभिरितस्ततः सर्वतः अलम् अतिशयेन परिषिच्यमानः प्रेम्णेक्षितः कुसुमवर्षिभिर्वैमानिकैर्देवैरीड्यमानः स्तूयमानः स्वयं स्वरतिः आत्मारामोऽपि गजेन्द्रस्य लीलेव लीला यस्य स भगवानत्राम्भसि गोपीमण्डले वा रेमे ॥२४॥

कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः ॥ रेमे स भगवांस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥ तासामतिविहारेण श्रान्तानां वदनानि सः ॥ प्रामृजत् करुणः प्रेम्णा शन्तमेनाङ्ग पाणिना ॥ २१ ॥ गोप्यः स्फुरत्पुरटकुण्डलकुन्तलत्विड्गण्डश्रिया सुधितहासनिरीक्षणेन ॥ मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥२२॥ ताभिर्युतः श्रममपोहितुमङ्गसङ्गघृष्टस्रजः स कुचकुङ्कुमरञ्जितायाः ॥ गन्धर्वपालिभिरनुद्रुत आविशद्वाः श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥ सोऽम्भस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग ॥ वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थलजलक्रीडे दर्शिते वनक्रीडामाह—ततश्चेति ॥ जलक्रीडानन्तरं चकारेणाङ्गमार्जनवनदेवतानीततादात्विकवस्त्रालङ्कारपरिधापनानन्तरं च जलस्थलप्रसूनानां गन्धो यस्मिंस्तेनानिलेन जुष्टानि व्याप्तानि दिशां तटानि अन्ता यस्मिंस्तस्मिन् कृष्णाया यमुनाया उपवने भृङ्गाणां प्रमदानां च गणैरावृतः कृष्णश्चचार । यथा मदच्युत् मदस्रावणः द्विरदो गजः करेणुभिर्वृतो वने चरति तथेति ॥ २५ ॥ एवमिति ॥ एवं सत्यकामः अनुरतः प्रीतियुक्तोऽबलागणो यस्मिन्निति आत्मन्येवावरुद्धः सौरतश्चरमधातुर्नतु स्खलितो यस्य सः इति कामविजय उक्तः । यद्वा । आत्मनि मनसि अवरुद्धा स्थापिताः आध्याता इति यावत् । सौरता सुरतसंबन्धिनो हावभावादयो येन स कृष्णः शशाङ्कस्यांशुभिर्विराजिताः उज्ज्वलीकृताः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूतास्ताः सर्वा एव निशाः सिषेवे । यद्वा । निशा इत्यत्यन्तसंयोगे द्वितीया । शृङ्गाररसाश्रयाः शरदि प्रसिद्धा याः काव्येषु कथास्ताः सिषेवे । अन्ये तु एवं योगमायाप्रभावात् सर्वा द्वादशमासिकीः कृष्णाः शुक्लाश्च शशाङ्कांशुविराजिता निशाः सिषेवे । ताश्च शरदि वर्षमध्ये ऋत्वादिकमधिकृत्य ये काव्यकथासुरसाः संभवन्ति तेषामाश्रयाः श्रीकृष्णक्रीडाधिकरणीभूता आश्रित्य सत्कवयः प्राञ्चोऽवाञ्चश्च व्यासपराशरजयदेवादयः स्वकाव्येषु वर्णयित्वापि नान्तं प्रापुरिति ॥ २६ ॥

ततश्च कृष्णोपवने जलस्थलप्रसूनगन्धानिलजुष्टदिक्तटे ॥ चचार भृङ्गप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः ॥ २५ ॥ एवं शशाङ्कांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ॥ सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥ राजोवाच ॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥ अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥ स कथं धर्मसेतूनां वक्ता कर्त्ताऽभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन् परदाराभिमर्शनम् ॥ २८ ॥ आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितम् ॥ किमभिप्राय एतं नः संशयं छिन्धि सुव्रत ॥ २९ ॥ श्रीशुक उवाच ॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ ३० ॥

अथ परीक्षित्सभोपविष्टानां विविधवासनावतां कर्मिज्ञानिप्रभृतीनां हृदये सन्देहमुद्भूतमालक्ष्य तन्निवृत्तये पृच्छति—संस्थापनायेति ॥ हि यस्मात् जगदीश्वरो भगवान् धर्मस्य संस्थापनाय इतरस्याधर्मस्य प्रशमाय निरासाय च अंशेन बलरामेण सहः अवतीर्णः ॥ २७ ॥ स इति ॥ हे ब्रह्मन् स कृष्णो धर्मसेतूनां धर्ममर्यादानां वक्ता उपदेशेन प्रवर्तकः कर्ता स्वयमप्यनुष्ठाता । विरोधिनिरसनेनाभितो रक्षिता च सन् परदाराभिमर्शनं परस्त्रीसंभोगात्मकं महासाहसं प्रतीपं धर्मप्रतिकूलमधर्मं कथमाचरत् कृतवान् ॥ २८ ॥ आप्तेति ॥ हे सुव्रत अनाप्तकामः कामाप्तये पापमाचरेदपि यदुपतिः कृष्णस्त्वाप्तकामोऽपि किमभिप्रायः सन् केनाभिप्रायेणैतज्जुगुप्सितं परदारसम्भोगात्मकं निन्दितं कर्म कृतवान् । अतः नोऽस्माकम् एतं संशयं छिन्धि निराकुरु ॥ २९ ॥ धर्मेति ॥ ईश्वराणां समर्थानां प्रजापतीन्द्रसोमविश्वामित्रादीनां धर्मव्यतिक्रमो धर्ममर्यादोल्लङ्घनं साहसं परदाराभिमर्शनाद्यर्थं हठात्प्रवृत्तिरूपं च दृष्टं परंतु तेजीयसामतितेजस्वित्वेन कर्मफलास्पर्शिनां तेषां दोषाय पापाय न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवति । यथा सर्वभुजः विष्ठादिसर्वममेध्यं प्रदहतोऽपि वह्नेर्यथा तद्दोषसंबन्धोऽपि न भवति तथेत्यर्थः ॥ ३० ॥ तर्हि " यद्यदाचरति श्रेष्ठः " इति न्यायादन्योऽपि कुर्यात्तत्राह—नैतदिति ॥ अनीश्वरः कर्मपरवशस्तेजोहीनो जातु कदाचिदपि एतच्छास्त्रविरुद्धं मनसाऽपि नाचरेत् तच्चिकीर्षामपि न कुर्यात् । हि यतो मौढ्यात् अज्ञत्वात् ईश्वरत्वाभिमानमात्राच्छास्त्रविरुद्धमाचरन्ननीश्वरो विनश्यति । यथा अरुद्रो रुद्रव्यतिरिक्तः अनीश्वरः अब्धिजं विषं भक्षयन् विनश्यति तथेत्यर्थः । रुद्रस्तु परमेश्वरत्वात् जनोपकाराय भक्षितवान् । न तेन तस्य किमपि वैगुण्यं जातं प्रत्युत शोभैव जाता ॥ ३१ ॥ कथं तर्हि सदाचारस्य प्रामाण्यं तदाह—ईश्वराणामिति ॥ ईश्वराणां ज्ञानवैराग्यादिभिस्तेजयिसां वचः आज्ञारूपं सत्यं सद्भ्यो हितं प्रमाणं च तदपि तैस्तात्पर्यवृत्त्योक्तं चेत् अन्यथा परीक्षाद्यर्थमुक्तमश्वत्थामवधमकुर्वतोऽर्जुनस्य गृहपरिवर्तनमकुर्वतीनां गोपीनां चेश्वराज्ञोल्लङ्घनदोषप्रसङ्गादिति ज्ञेयम् । तेषामाचरितं तु क्वचिदेव किञ्चिदेव तथैव प्रमाणमित्यर्थः । तेषामीश्वराणां यदाचरितं स्ववचोयुक्तं तात्पर्यवृत्त्योपदे-

नैतत्समाचरेज्जातु मनसाऽपि ह्यनीश्वरः ॥ विनश्यत्याचरन्मौढ्याद्यथा रुद्रोऽब्धिजं विषम् ॥ ३१ ॥ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥ तेषां यत् स्ववचो युक्तं बुद्धिमांस्तत् समाचरेत् ॥ ३२ ॥ कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥ विपर्ययेण वाऽनर्थो निरहङ्कारिणां प्रभो ॥ ३३ ॥ किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम् ॥ ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥ यत्पादपङ्कजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबन्धाः ॥ स्वैरं चरन्ति मुनयोऽपि न नह्यमानास्तस्येच्छयाऽऽत्तवपुषः कुत एव बन्धः ॥ ३५ ॥

शात्मकेन स्ववचनेनाविरुद्धं बुद्धिमांस्तत्तदेव सम्यगादरेणाचरेत् ॥ ३२ ॥ कुशलेति ॥ हे प्रभो निरहङ्कारिणामध्यासरहितानाम् एषामीश्वराणां कुशलाचरितेन जनसंग्रहार्थं धर्मानुष्ठानेन इह लोके चकारात्परलोके च अर्थः फलं सुखं न विद्यते नैव भवति अतस्तेषां तादृशं चरितं " यस्य नाहंकृतो भावः " इत्यादिवचांसि प्रमाणयितुमेवेति भावः । तथा विपर्ययेण अधर्मानुष्ठानेनैषां लोकद्वये अनर्थो दुःखमपि न भवति ॥ ३३ ॥ किमुतेति ॥ यदि ईशितव्यानां नियम्यानां निरहंकारिणां जीवानामपि कुशलाकुशलान्वयो न भवति तदा तिर्यगादिरूपेण अवस्थितानामखिलानां सत्वानां जीवानाम् ईशितुः नियन्तुः श्रीकृष्णस्य कुशलाकुशलान्वयः पुण्यपापसंबन्धो न भवतीति किमुत वक्तव्यम् ॥ ३४ ॥ यत्पादेति ॥ यस्य भगवतः पादपङ्कजपरागस्य निषेवेण निषेवणेन तृप्ता निवृत्तविषयाभिलाषा भक्ताः तथा योगस्य प्रभावेण विधुता निवृत्ताः अखिलाः कर्मात्मका बन्धा येषां ते योगिनः तथा मुनयो ब्रह्मात्मैक्यमननशीला ज्ञानिनश्च न नह्यमानाः बन्धनमप्राप्नुवन्तः स्वैरं चरन्ति । यथेच्छं शास्त्रोल्लङ्घनेनापि कर्म कुर्वन्ति तस्य स्वेच्छया आत्तवपुषः स्वीकृतदेहस्यैव विहरतोऽपि कुत एव हेतोर्बन्धः स्यात् इति गोपीनां परदारत्वमङ्गीकृत्य समाधानम् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्तुतो जारकुलटादिव्यवहारयोग्या भगवतः परदारसेवा नाम न कापीत्याह–गोपीनामिति ॥ गोपीनां तासां पतीनां च तथा सर्वेषामपि देहिनां योन्तश्चरति नियन्तृतया वर्त्तते सोऽध्यक्षः सर्वबुद्ध्यादिसाक्षी तथा च योन्तश्चरति तस्य बहिरालिङ्गने को दोषः यश्च बुद्ध्यादिद्रष्टा रहसि बहिर्गात्रदर्शने च को दोष इति भावः । क्रीडनेन हेतुना इह लोके देहभाक् देहं स्वीकृतवानिति न तस्य केनापि भेदो येन तासां परदारत्वं स्यात् । यद्वा । यः सर्वेषां देहिनामन्तश्चरति स परमात्मैव गोपीनां सुराङ्गनावतारत्वेनोक्तानां संमान्यानां तथा तत्पतीनां तासु मुख्यानां तद्विशेषाणां राधाद्यानां चाध्यक्षः मुख्यः पतिः नतु लोके पतित्वेन प्रसिद्धास्ते ते इत्यर्थः । ताभिस्तेषां मनसा वृतत्वाभावात्तैः सह सम्भोगाभावस्योपपादितत्वाच्च न ते पतयः नहि बलाद्विवाहितानामसंभुक्तानां दारत्वसिद्धिः । अन्यस्मै दानविधानात् अतो न तासां परदारत्वम् एवं व्रतप्राप्तवराणामनूढानां तु नतरामिति भावः । तेषां तासु व्यूढता भ्रममात्रमिति प्रकारान्तरं तु परतरे पद्ये स्पष्टं भविष्यति । नच तथापि विण्मूत्रपूरितत्वग्रक्तमांसास्थिमयदेहासु तासु चिदानन्दमूर्तेस्तस्य रतिर्जुगुप्सितेति वाच्यं मुकुन्दस्पर्शनात्सद्यो बभूव प्रमदोत्तमेत्युक्तरीत्या तत्स्पर्शनादिना तदैव स्पर्शमणिलोहन्यायेन तद्रतियोग्यदेहत्वलक्षणं प्रमदोत्तमात्वं प्राप्य तत्क्रीडायोग्यता जातेति सिद्धान्तात् ॥ ३६ ॥ आप्तकामो यदुपतिरित्यस्योत्तरमाह–अनुग्रहायेति ॥ भगवानाप्तकामोऽपि भूतानामनुग्रहाय भूतानि

गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ॥ योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥ ३६ ॥
अनुग्रहाय भक्तानां मानुषं देहमास्थितः ॥ भजते तादृशीः क्रीडा याः स्मृत्वा तत्परो भवेत् ॥ ३७ ॥
नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ॥ मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ॥ ३८ ॥

जीवान् अनुग्रहीतुं यथाकथंचित् स्वैकपरान्कृत्वा उद्धर्तुमेव मानुषं देहमाश्रितः स्वीकृतवान् अतस्तादृशीरेव क्रीडा भजते करोति । याः श्रुत्वा तत्परो भवेत् स्वैकपरो भवेत् । यद्वा । याः श्रुत्वा मानुषं देहमाश्रितो जीवस्तत्परो भगवत्परो भवेत् तादृशीः क्रीडा भगवान् भजते । यथा कर्मज्ञानयोगाधिकारिणः कर्मज्ञानादिषु प्रवर्त्तयितुं कर्मानुष्ठानादिकं कृतवांस्तथा विषयिणो बहिर्मुखान् अपि स्वपरान् कर्तुं रासलीलामपि कृतवान् । इयं हि रसमयी क्रीडा सर्वेषां मनुष्याणां चेतो भगवन्तं प्रति बलान्नयतीति ॥ ३७ ॥ नासूयन्निति ॥ तस्य हरेर्मायया मोहिताः अतः स्वान् स्वान् दारान् दारदुहितृस्वस्रादीन् स्वपार्श्वस्थान् मन्यमानाः व्रजौकसः तासां पतिपित्रादयः कृष्णाय नासूयन् । ननु तथापि जानतामजानतामपि तेषां दारभोगो न समञ्जस इत्याशङ्कायाम् आवृत्त्या वाक्यभेदेनानेनैवोत्तरं तस्य दारान् स्वान् स्वान् स्वस्वदारान्मन्यमाना इत्यर्थः । उभयत्र हेतुः योगमायया मोहिता इति अयं भावः । भगवत्प्रेयस्यस्ताः न तेषां भार्याः विवाहकाले योगमायाकल्पितानामन्यासां तत्सदृशीनां तैः पाणिग्रहणात् अतस्तासु तेषामूढात्वभ्रान्त्या भार्यात्वमननमात्रं रासलीलानिशासु तत्पूर्वापरनिशासु च संज्ञाकल्पितछायाख्यसूर्यभार्यावद्योगमाया कल्पिता अन्या एव स्वपार्श्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्था अनुभूय ता एवेमा इति मेनिरे इति न किञ्चिदसमञ्जसम् ॥ ३८ ॥ ब्रह्मरात्र इति ॥ ब्रह्मरात्रे ब्राह्मे मुहूर्त्ते समासान्त आर्षः । उपावृत्ते प्राप्ते सति । यद्वा । युगसहस्रप्रमाणे ब्रह्मणो रात्रिसमये उप आधिक्येन आवृत्ते एकामावृत्तिं गते एकस्यामेव रजन्यां नृत्यगीतादिविलासैर्युगसहस्रं पूर्णं बभूव तथा पञ्चयोजनात्मकवृन्दावनप्रदेशैकदेश एवासंख्यानां गोपीनां विलासपर्याप्तावकाशलाभादिकं भगवत्प्रभावात् वासुदेवेनानुमोदिता अनुमोदनपूर्वकमाज्ञापिताः भगवत्प्रिया गोप्यो गन्तुमनिच्छन्त्योऽपि स्वगृहान् प्रति ययुः ॥ ३९ ॥ कामजयार्थाया रासलीलायाः कामजयमेव फलमाह—विक्रीडितमिति ॥ व्रजवधूभिः साकमिदं विष्णोः कृष्णस्य विक्रीडितं श्रद्धान्वितो यः पुमान् अनुक्रमेण शृणुयात् अथवा वर्णयेत् श्रावयेत् स तस्मिन् भगवति परामुत्कृष्टां भक्तिं प्रतिलभ्य प्राप्य अचिरेण जीवदशायामेव धीरः जितेन्द्रियः सन् हृद्रोगं हृत्स्थरोगवदनर्थकरं काममाशु अपहिनोति निरस्यति ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमत्रयस्त्रिंशे व्यधादिमाम् ॥ ३३ ॥ चतुस्त्रिंशे त्वहेर्नन्दशापाद्विद्याधरं

ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः ॥ अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥ ३९ ॥ विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोनुशृणुयादथ वर्णयेद् यः ॥ भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे रासक्रीडावर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ श्रीशुक उवाच ॥ एकदा देवयात्रायां गोपाला जातकौतुकाः ॥ अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकावनम् ॥ १ ॥ तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुम् ॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेऽम्बिकाम् ॥ २ ॥ गावो हिरण्यं वासांसि मधुमध्वन्नमादृताः ॥ ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥ ३ ॥ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः ॥ रजनीं तां महाभागा नन्दसुनन्दकादयः ॥ ४ ॥

हरिः ॥ त्रात्वावधीच्छङ्खचूडं श्लोकास्तत्रार्धयुग्यदाः ॥ उवाचेति त्रयमथ त्रयस्त्रिंशदनुष्टुभः ॥ ३४ ॥ एकदेति ॥ एकदा रासानन्तरशिवचतुर्दश्यां देवस्य महादेवस्य पूजार्थं यात्रागमनं देवयात्रा तस्यां जातं कौतुकमुत्साहो येषां ते गोपाला नन्दादयः अनुडुद्भिर्वृषैर्युक्तैरनोभिः शकटैरम्बिकावनं ययुः । तच्च मथुरातः वायव्यदिशि स्थितं सरस्वतीतीरस्थं श्रीशिवोमामूर्तिभूषितं तीर्थविशेषं प्राहुः । केचित्तु गुर्जरदेशप्रसिद्धं शिवक्षेत्रं सिद्धपुरनिकटस्थं वदन्ति ॥ १ ॥ तत्रेति ॥ हे नृप ते तत्र वने सरस्वत्यां नद्यां स्नात्वा अर्हणैः पूजासाधनैः गन्धपुष्पादिभिः देवं प्रभुं पशुपतिं शिवमम्बिकां देवीं च भक्त्या आनर्चुः पूजयामासुः ॥ २ ॥ गाव इति ॥ ततश्च महादेवो नोऽस्माकं प्रीयतां प्रीतो भवत्वित्यभिप्रायेण आदृताः आदरयुक्ताः तत्तीर्थस्थैर्मानिता वा सर्वे गोपाः गावः गाः प्रथमाऽऽर्षी । हिरण्यं वासांसि मधु मधुरं शिवाभिषेकावशिष्टमधुसहितमन्नं च ब्राह्मणेभ्यो ददुः ॥ ३ ॥ ऊषुरिति ॥ ततश्च ते महाभागाः नन्दादयो जलमात्रं प्राश्य पीत्वा धृतव्रताः गृहीतब्रह्मचर्यादिनियमास्तां रजनीं शिवरात्रिं तत्र सरस्वतीतीरे ऊषुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यवसन् । सुनन्दो नन्दानुजः संज्ञायां कन् ॥ ४ ॥ कश्चिदिति ॥ तस्मिन् विपिने यदृच्छया अकस्मादेवागतः अतिबुभुक्षितः उरगः उरसा गच्छन् अनेनालक्षितत्वमुकम् । कश्चिन्महान् अहिः अजगरः शयानं नन्दम् अग्रसीत् तङभाव आर्षः । इदं च वृत्तं शिवरात्रिजागरणानन्तरं पारणदिनस्य रात्रौ श्रान्ते गाढं निद्राणे नन्दे ज्ञेयम् । शिवरात्रौ तु जागरणमेव नतु निद्रा ॥ ५ ॥ स इति ॥ अहिना ग्रस्तः स नन्दश्चुक्रोश । अनेन सर्वदुर्गाणीति गर्गोक्तिमनुस्मृत्येति भावः । हे कृष्ण कृष्ण हे तात अयं महान् सर्पो मां ग्रसते अतः प्रपन्नं शरणागतं मां सर्पात्त्वं परिमोचय ॥ ६ ॥ तस्येति ॥ तस्य नन्दस्यातिक्रन्दितं दीनवचनं श्रुत्वा चकाराद्रोदनं च श्रुत्वा गोपालाः सहसा आशु उत्थिताः नन्दं च सर्पग्रस्तं दृष्ट्वा सम्भ्रान्ताः व्याकुलचित्ताः अजगरो ग्रस्तं न त्यजतीति स्वभावशङ्कया उल्मुकैः ज्वलत्काष्ठैरेव तं सर्पं विव्यधुः विविधुः ताडयामासुः । प्रथमं संप्रसारणाभाव आर्षः ॥ ७ ॥ अलातैरिति ॥ एवमलातैरुल्मुकैर्दह्यमानोऽप्युरङ्गमः सर्पः तं नन्दं यदा नामुञ्चत् न तत्याज तदा सात्वतांपतिः भगवान् अभ्येत्य

कश्चिन्महानहिस्तस्मिन् विपिनेऽतिबुभुक्षितः ॥ यदृच्छयाऽऽगतो नन्दं शयानमुरगोऽग्रसीत् ॥ ५ ॥ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयम् ॥ सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥ ६ ॥ तस्य चाक्रन्दितं श्रुत्वा गोपालाः सहसोत्थिताः ॥ ग्रस्तं च दृष्ट्वा विभ्रान्ताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥ अलातैर्हन्यमानोऽपि नामुञ्चत्तमुरङ्गमः ॥ तमस्पृशत् पदाऽभ्येत्य भगवान् सात्त्वतां पतिः ॥ ८ ॥ स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ॥ भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम् ॥ ९ ॥ तमपृच्छद् हृषीकेशः प्रणतं समुपस्थितम् ॥ दीप्यमानेन वपुषा पुरुषं हेममालिनम् ॥ १० ॥ को भवान् परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥ ११ ॥ सर्प उवाच ॥ अहं विद्याधरः कश्चित्सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसम्पत्त्या विमानेनाचरं दिशः ॥ १२ ॥

आगत्य तं सर्पं पदा स्पृशत् ॥ ८ ॥ स इति ॥ स सर्पः भगवतः श्रीमान् यः पादस्तस्य स्पर्शेन हतमशुभं सर्पयोनिहे कारणं शापरूपं यस्य तथाभूतः सन् सर्पवपुर्हित्वा विद्याधरैरर्चितं संमाननीयं विद्याधररूपं भेजे प्राप ॥ ९ ॥ तमिति ॥ ततश्च प्रणतं कृतप्रणामं दीप्यमानेन वपुषा शरीरेण पुरतः समवस्थितं पुरुषं पुरुषाकारं हेममालिनं सुवर्णमालाधरं तं हृषीकेशः लोकेष्वैश्वर्यं प्रकाशयितुं बहुग्रामनगरेभ्य आगतान् यात्रिकानपि लोकान् ब्राह्मणानादरतो भीषयितुं च अविद्वानिवापृच्छत् ॥ १० ॥ क इति ॥ य इदानीमद्भुतदर्शनः परया लक्ष्म्या शोभया रोचते प्रकाशते स भवान् कः कथमवशः सन्नेतां जुगुप्सितां निन्दितां सर्पगतिं केन वा प्रापितोऽसि ॥ ११ ॥ अहमिति ॥ सुदर्शन इति विश्रुतः प्रसिद्धः कश्चिद्विद्याधरः देवयोनिविशेषोऽहं श्रिया कान्त्या सुरूपसम्पत्त्या सौन्दर्यसमृद्ध्या चोपलक्षितः कदाचिद्विमानेन सर्वा दिशः अचरं भ्रमन्नासम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषीनिति ॥ रूपेण दर्पितः अहं विरूपान् कुरूपान् अङ्गिरसः अङ्गिरोगोत्रोत्पन्नान् ऋषीन् प्राहसं प्रहसितवानस्मि । प्रलब्धैः उपहसितैः तैर्ऋषिभिः स्वेन मदीयेनैव पाप्मना पापेन निमित्तेन अहम् इमां सर्पयोनिं शापेन प्रापितः ॥ १३ ॥ शाप इति ॥ करुणात्मभिर्दयालुभिः तैः ऋषिभिः शापस्तु मे ममानुग्रहायैव कृतः । यद्यस्माच्छापाद्धेतोः त्रिलोकगुरुणा सर्वपूज्येन त्वयाहं पदा पादेन स्पृष्टः तेन तव पादस्पर्शेन हतमशुभं पापं यस्य तथा जात इति ॥ १४ ॥ तमिति ॥ हे अमीवहन् दुःखनाशक तव पादस्पर्शाद्धेतोः शापान्निर्मुक्तोऽहं भवात् संसारात् भीतानामत एव प्रपन्नानां शरणागतानां भयमपहन्तीति तथा तं त्वाम् आपृच्छे स्वलोकं गन्तुमनुज्ञां याचे ॥ १५ ॥ प्रपन्न इति ॥ हे महायोगिन्नित्यादीनि पञ्च संबोधनानि । अहमपि त्वां प्रपन्नः शरणमागतः अस्मि ॥१६॥ ब्रह्मेति अर्द्धम् ॥ हे अच्युत ते तव दर्शनादेव हेतोः सद्य एव ब्रह्मदण्डात् ब्राह्मणशापादहं विमुक्तः ॥ १७ ॥ यदिति ॥ यस्य तव नाममात्रमेव गृह्णन् उच्चारयन्नेव पुमान् अखिलान् इत्यधिकारानपेक्षा श्रोतॄन् किमुतात्मानं चात्तत्संबन्धिनोऽपि सद्य

ऋषीन् विरूपानङ्गिरसः प्राहसं रूपदर्पितः ॥ तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥ १३ ॥ शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ॥ यदहं लोकगुरुणा पदा स्पृष्टो हताशुभः ॥ १४ ॥ तं त्वाहं भवभीतानां प्रपन्नानां भयापहम् ॥ आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥ १५ ॥ प्रपन्नोऽस्मि महायोगिन् महापुरुष सत्पते ॥ अनुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥ १६ ॥ ब्रह्मदण्डाद्विमुक्तोऽहं सद्यस्तेऽच्युतदर्शनात् ॥१७॥ यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥१८॥ इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवन्द्य च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः ॥ १९ ॥ निशम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ॥ समाप्य तस्मिन् नियमं पुनर्व्रजं नृपा ययुस्तत् कथयन्त आदृताः ॥ २० ॥ कदाचिदथ गोविन्दो रामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषिताम् ॥ २१ ॥

एवेति कालानपेक्षा पुनाति । तस्य तव पदा स्पृष्टोऽहं पूत इति किं पुनर्वक्तव्यम् ॥ १८ ॥ इतीति ॥ इत्येवं सुदर्शनो विद्याधरः दाशार्हं कृष्णमनुज्ञाप्य पृष्ट्वा परिक्रम्याभिनन्द्य च दिवं स्वर्गं यातः नन्दश्च कृच्छ्रात्कष्टान्मोचितो बभूव ॥ १९ ॥ निशम्येति ॥ हे नृप व्रजौकसो गोपाः तत्पादस्पर्शमात्रेण सर्पान्नन्दस्य शापात्सुदर्शनस्य च मोक्षलक्षणं कृष्णस्यात्मवैभवं स्वकीयमसाधारणं प्रभावं निशम्य दृष्ट्वा विस्मितं चेतो येषां ते तथाभूतास्तस्मिन्नम्बिकावने नियमं तीर्थे त्रिरात्रवासपूजादिकं समाप्यादृता आदरयुक्तास्तदेव वैभवं कथयन्तस्तत्स्थानात्पुनर्व्रजं प्रत्याययुः ॥ २० ॥ कदाचिति ॥ अथ कदाचित् शिवरात्र्यनन्तरं होलिकापूर्णिमायाम् अद्भुतविक्रमः गोविन्दो रामश्च वने रात्र्यां व्रजयोषितां मध्यगौ सन्तौ विजह्रतुः । एतेन बलदेवस्यापि पृथक् प्रेयसीगणोऽभूदिति सूचितम् । सर्वमेलस्तु होलिकावसरे तथा व्यवहारात् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपगीयमानाविति त्रयम् ॥ बद्धं सौहृदं प्रेम यैस्तैः स्त्रीजनैर्ललितं यथा तथा उपगीयमानाविति स्वलङ्कृतौ च तौ चन्दनेनानुलिप्तानि अङ्गानि ययोस्तौ च स्रग्विणौ वनमालाधरौ विरजसी विरजस्के निर्मले अम्बरे वाससी ययोस्तौ ॥ २२ ॥ निशेति ॥ उदितः उडुपश्चन्द्रः तारकाश्च यस्मिंस्तत् वसन्तप्रवेशात् मल्लिकानां गन्धेन मत्तैर-लिभिर्जुष्टं सेवितं सहचरितमित्यर्थः । कुमुदगन्धयुक्तेन वायुना च जुष्टम् यद्वा । मल्लिकागन्धेन मत्ता अलयो यत्रेति भिन्नं पदम् । निशामुखं निशाप्रवेशं मानयन्तौ प्रशंसन्तौ ॥२३॥ जगतुरिति ॥ तौ रामकृष्णौ अनिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि स्वरमण्डलस्य स्वरसमूहस्य मूर्छितम् एकविंशतिभेदम् आरोहणावरोहणप्रकारं युगपत्कल्पयन्तौ सर्वभूतानां श्रोतृणां मनःश्रवणयोर्मङ्गलं सुखं यथा भवति तथा जगतुः अगायताम् ॥ २४ ॥ गोप्य इति ॥ हे नृप तयोस्तद्गीतमाकर्ण्य श्रुत्वा मूर्च्छिताः तद्गीतलीनचित्त-त्वात् मोहं गता गोप्यस्ततस्तस्मात् मोहात् हे नृप स्रंसत् भ्रश्यत् दुकूलं यस्मात् शतार्षः । श्लथदित्यपि पाठः । त्रस्ताः भ्रष्टा केशेभ्यः स्रजस्तथाभूतमात्मानं देहं च

उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्ताङ्गौ स्रग्विणौ विरजोम्बरौ ॥ २२ ॥ निशामुखं मानयन्तावुदितोडुपतारकम् ॥ म-ल्लिकागन्धमत्तालिजुष्टं कुमुदवायुना ॥ २३ ॥ जगतुः सर्वभूतानां मनःश्रवणमङ्गलम् ॥ तौ कल्पयन्तौ युगपत् स्वरमण्डलमूर्च्छितम् ॥ २४ ॥ गोप्यस्तद्गीतमाकर्ण्य मूर्च्छितानाविदन्नृप ॥ स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २५ ॥ एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् ॥ शङ्खचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २६ ॥ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनम् ॥ क्रोशन्तं कालयामास दिश्युदीच्यामश-ङ्कितः ॥ २७ ॥ क्रोशन्तं कृष्ण रामेति विलोक्य स्वपरिग्रहम् ॥ यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ॥ २८ ॥ मा भैष्टेत्यभयाऽऽ-रावौ शालहस्तौ तरस्विनौ ॥ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ॥ २९ ॥

नाविदन् । देहात्पतद्वस्त्राद्यनुसन्धानं न लेभिरे विद्‌लृ लुङ् ॥ २५ ॥ एवमिति ॥ एवं स्वैरं यथेष्टं होलिकासमयोचितं संप्रमत्तवद्रामकृष्णयोर्विक्रीडतोर्गायतोश्च सतोः शङ्खचूड इति नाम्ना ख्यातः कथितो धनदस्य कुबेरस्यानुचरोऽभ्यगात् ॥ २६ ॥ तयोरिति ॥ हे राजन् अशङ्कितः स शङ्खचूडः तयो रामकृष्णयोर्निरीक्षतोरेव सतोः शतार्षः । तावनादृत्य तौ नाथौ स्वामिनौ यस्य तं क्रोशन्तं रोदनपूर्वकमाह्वयन्तं प्रमदाजनमुदीच्यां दिशि कालयामास हठात्प्रेरयामास ॥ २७ ॥ क्रोशन्तमिति ॥ तं स्वपरिग्रहं स्वकी-यत्वेन परिगृहीतं स्त्रीजनं हे कृष्ण हे रामेत्येवं क्रोशन्तं रोदनपूर्वकमाह्वयन्तं विलोक्य भ्रातरौ रामकृष्णौ यथा दस्युना व्याघ्रेण ग्रस्ताः । यद्वा । चौरेण ग्रस्ताः आत्म-सात्कर्तुं विद्राव्य स्वदेशं प्रति चालिताः गाः दृष्ट्वा तद्विमोचनार्थं यथा कश्चिद्धावेत्तथा अन्वधावताम् ॥ २८ ॥ मेति ॥ मा भैष्ट भयं मा कार्ष्ट इत्येवंभूतः अभयः गोपीनां भयनिवर्तकः आरावः शब्दः ययोस्तौ शालहस्तौ हस्ते गृहीतशालवृक्षौ तरस्विनौ अतिवेगवन्तौ अत एव तरसा वेगेन त्वरितं यथा भवति तथा गुह्यकेष्वधमं नीचं तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शङ्खचूडम् आसेदतुः आप्तवन्तौ ॥ २९ ॥ स इति ॥ मूढः स शङ्खचूडः कालः प्रेरकः मृत्युः प्रेर्यस्ताविव शीघ्रं जहीति रामः प्रेरकः शीघ्रमिमं हन्मीति प्रेर्यः कृष्णः तौ रामकृष्णौ अनुप्राप्तौ वीक्ष्य उद्विजन् बिभ्यत् तङभाव आर्षः । जीवितेच्छया स्त्रीजनं विसृज्य त्यक्त्वा प्राद्रवत् पलायितः ॥ ३० ॥ तमिति ॥ स शङ्खचूडो यत्र यत्र धावति तस्य शङ्खचूडस्य शिरोरत्नं जिहीर्षुः हर्तुमिच्छुः गोविन्दोऽपि तत्र तत्र तमन्वधावत् । बलो रामस्तु स्त्रियो रक्षन् तत्रैव तस्थौ ॥ ३१ ॥ अविदूर इति ॥ अङ्ग हे राजन् विभुः कृष्णः अविदूर इव समीप एवाभ्येत्य तदभिमुखमागत्य मुष्टिनैव दुरात्मनः तस्य शङ्खचूडस्य शिरः चूडामणिं च सह एकदैव जहार ॥ ३२ ॥ शङ्खचूडमिति ॥ एवं शङ्खचूडं निहत्य भास्वरं तेजोयुक्तं तच्छिरोमणिमादायागत्य योषितां पश्यन्तीनां सतीनां प्रीत्या अग्रजाय रामाय अददत् अददात् । ह्रस्वत्वमार्षम् । ददधातोश्चेत्तङभाव आर्षः क्वचित् अददादिति शुद्धोपि पाठः । एकस्यै प्रेयस्यै तद्दानेऽपरासां वैमनस्यं विचार्याग्रजायादात् । अग्रजश्च महाविज्ञः कृष्णाभीष्टस्थल एव न्यधात् इति ज्ञेयम् ॥ ३३ ॥

स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ॥ विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥ ३० ॥ तमन्वधावद् गोविन्दो यत्र यत्र स धावति॥ जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥ ३१ ॥ अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ॥ जहार मुष्टिनैवाङ्ग सहचूडामणिं विभुः ॥ ३२ ॥ शङ्खचूडं निहत्यैवं मणिमादाय भास्वरम् ॥ अग्रजायाददात् प्रीत्या पश्यन्तीनां च योषिताम् ॥ ३३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे शङ्खचूडवधो नाम चतुस्त्रिंशोऽध्यायः ॥३४॥ श्रीशुक उवाच ॥ गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः॥ कृष्णलीलाः प्रगायन्त्यो निन्युर्दुःखेन वासरान् ॥ १ ॥ गोप्य ऊचुः ॥ वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ॥ कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥ २ ॥

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमचतुस्त्रिंशे व्यधादिमाम् ॥ ३४ ॥ पञ्चत्रिंशे वनं याते युग्मश्लोकैर्व्रजाङ्गनाः ॥ प्रेम्णा कृष्णं जगुस्तत्र श्लोकाः षड्विंशतिर्मताः ॥ उवाचवाचां त्रितयं पञ्चत्रिंशदनुष्टुभः ॥३५॥ गोप्य इति ॥ कृष्णे वनं याते सति तं कृष्णमनुद्रुतं तस्मिन्नासक्तं चेतो यासां ताः गोप्यः कृष्णलीला एव प्रगायन्त्यो दुःखेन वासरान् निन्युः ॥१॥ वामेति ॥ अत्र द्वयोर्द्वयोः श्लोकयोरेकं वाक्यम् । तादृशानि द्वादश युग्मानि । तत्र पूर्वपद्ये लीला उत्तरपद्ये तत्पोष्यवर्गः । पोष्यवर्गं विना लीला नोल्लसति ता विना पोष्यवर्गोऽपीति युग्मप्रयोजनम् । तत्र प्रातरारभ्य क्रमेण सायंकालपर्यन्तं लीला गीयते । आदौ प्रातर्बहिरागत्य कृष्णेन रात्रिशेषे वेणौ वादिते तद्गीतं शृण्वतीनां सिद्धवनितानां मोह उपवर्ण्यते ।अत्र गीतेऽपि प्रथमद्वितीययोः तृतीयचतुर्थयोश्च पादयोराद्यक्षरैक्यं सावर्ण्यं वा । हे गोप्यः वामे बाहौ तन्मूले कृतः अर्पितो वामकपोलो येन सः गीतस्यारोहावरोहयोर्गमकमयीकरणं तेनैव प्रकारेण संभवेत् तथा वामजङ्घोपरि दक्षिणजङ्घाग्रस्तटन्यासोऽपि ज्ञेयः । तेन त्रिभङ्गललितस्तिर्यग्ग्रीव इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैलोक्यमोहनमूर्तिरभूत् । वल्गिते नर्त्तिते भ्रुवौ येन हस्वमार्षम्। मुकुन्दः कोमलाभिरङ्गुलिभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तम् अधरे अर्पितं वेणुं यत्र यदा ईरयति वादयति स्वागताश्चतुर्विंशतिः ॥ २ ॥ तदा सिद्धैः स्वपतिभिः सह वर्तमाना अपि व्योम्नि यानं गमनं येषां तेषां सिद्धानां वनितास्तत् वेणुगीतमुपधार्य श्रुत्वा प्रथमं विस्मिताः आश्चर्यं प्राप्तास्ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्ताः कामव्रणपीडिताः अतः अपस्मृताः विस्मृता नीव्यो वस्त्रग्रन्थयो याभिस्ता भ्रश्यद्वस्त्रानुसन्धानरहिताः कबभाव आर्षः । पतिसान्निध्यात्सलज्जाश्च सत्यः कश्मलं मोहं ययुः । ईदृशस्य कृष्णस्य विरहं कथं सहामह इति सर्वत्र वाक्यशेषः ॥ ३ ॥ अथ वनान्तिकं गत्वा गोगोपालमेलनाय गोपीनिवर्तनाय वेणौ वादिते व्रजवनस्थाः पशवोऽपि मुमुहुरित्याहुः—हन्तेति ॥ हे अबलाः इदमस्माभिः कथ्यमानं हन्त चित्रम् अतिचित्रं शृणुतेति हारहासः हार इव विशदो वक्षसि शोभमानो हासो यस्य । यद्वा । अधोवदनेन हसतः हारेषु स्फुरन् हासो यस्य । यद्वा। हाराणां हासः विशदा स्फूर्तिर्यत्र तस्मिन्नुरसि इति उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः अयं नन्दसूनुः कृष्णो यर्हि आर्तजनानां तद्विरहपीडितानामस्मदादीनां नर्मदः सन् सुखयितुं कूजितो वादितो वेणुर्यस्य तथाभूतो भवति ॥ ४ ॥

व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ॥ काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥ हन्त चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् ॥ नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥४॥ वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ॥ दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥ बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडम्बः ॥ कर्हिचित् सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुन्दः ॥ ६ ॥

तदा व्रजे गोष्ठे ये वृषाः वने मृगा गावश्च ते आरात् दूरादेव वेणुवाद्येन वेणुनादश्रवणेन हृतानि चेतांसि येषां ते वृन्दशः समुदिताः । सर्व एव दन्तैर्दष्टा एव नतु चर्विता कवलास्तृणग्रासायैस्ते धृताः श्रवणोन्मुखीकृताः उत्तम्भिताः कर्णा यैस्ते निद्रिताः सञ्जातनिद्रा इव लिखितचित्रम् इव च आसन् तस्थुः । देववनितानां विदग्धानां का वार्ता अविदुषां तिरश्चामपि मोह इतीदमतिचित्रं पश्यतेति ॥ ५ ॥ ततो वनं प्रविष्टे जलपानार्थं गवाह्वानाय वेणौ वादिते वृत्तमाह—बर्हिणेति ॥ हे आलि हे सखि बर्हिणो मयूरस्तस्य स्तबकाः पिच्छगुच्छाः । यद्वा । बर्हिणशब्देन लक्षणया बर्हिपिच्छानि स्तबकाः पुष्पगुच्छाः धातवो गैरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरश्च तं विडम्बयति अनुकरोति तथा सबलः बलेन सहितो गोपैश्च सह वर्तमानो मुकुन्दः कर्हिचित् यदा कदाचित् यत्र देशे वेणुना गाः समाह्वयति कालिन्दि गङ्गे इत्यादिगोनामभिराकारयति ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

तदा तर्हि वेणुध्वनिश्रवणात् यमुनामानसगङ्गाद्याः अचेतना अपि सरितोऽपि स्वाह्वानमिव मन्यमानाः भग्ना गतिर्यासां ताः स्तिमिता निश्चला आपो यासां ताः समासान्ताभाव आर्षः । तदालिङ्गनलाभाय प्रेम्णा वेपिताः कम्पिताः भुजाः भुजस्थानीयास्तरङ्गा यासां तास्तथाभूताः सत्यः आलिङ्गनमप्राप्य अनिलेनानीतं तस्य पदाम्बुजरजः स्पृहयतीः स्पृहयन्त्यो वयं गोप्य इव अबहुपुण्याः एव यथा वयम् अबहुपुण्याः पुण्यप्रचयाभावात् तत्पदाम्बुजरजः स्पृहयन्त्यः भग्नैहिकलौकिकगतयः प्रेमकम्पित भुजा नेत्रयोः स्तिमितजलाश्च भवामो न तल्लभामहे । स्पृहयतीरित्यत्र नुमभावपूर्वसवर्णदीर्घावार्षौ। अतिशयविवक्षया संप्रदानसंज्ञायाः कर्मसंज्ञया बाधः अत्रैवं क्रमः । आदौ नादश्रवणं ततो गतिभङ्गः ततस्तदालिङ्गनेच्छया भुजकम्पः ततो रजोमात्रस्पृहा ततस्तदप्राप्त्या निश्चेष्टत्वम् ॥ ७ ॥ अथ जलं पीत्वा तृणं चरन्तीषु गोषु दूरगतासु तदाह्वानाय वेणौ वादिते वृत्तमाह—अनुचरैरिति ॥ आदिपूरुषः पुरुषोत्तम इवानुचरैर्गोपैः देवादिभिश्च सम्यगनुवर्णितं वीर्यं यस्य सः अचला भूतिः सम्पत् लक्ष्मीश्च यस्य सः वनचरः सन् स कृष्णो गिरितटेषु चरन्तीर्गा यदा हि वेणुना तत्तन्नामोपेतेन वेणुगीतेनाह्वयति ॥ ८ ॥ तदा सस्त्रीका मुनय इवाऽऽत्मनि स्वस्मिन् विष्णुं पूर्णानन्दं

तर्हि भग्नगतयः सरितो वै तत्पदाम्बुजरजोऽनिलनीतम् ॥ स्पृहयतीर्वयमिवाऽबहुपुण्याः प्रेमवेपितभुजास्तिमितापः ॥ ७ ॥ अनुचरैः समनुवर्णितवीर्यं आदिपूरुष इवाचलभूतिः ॥ वनचरो गिरितटेषु चरन्तीर्वेणुनाऽऽह्वयति गाः स यदा हि ॥ ८ ॥ वनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः ॥ प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ ९ ॥ दर्शनीयतिलको वनमालादिव्यगन्धतुलसीमधुमत्तैः ॥ अलिकुलैरलघु गीतमभीष्टमाद्रियन् यर्हि सन्धितवेणुः ॥ १० ॥ सरसि सारसहंसविहङ्गाश्चारुगीतहृतचेतस एत्य ॥ हरिमुपासत ते यतचित्ता हन्त मीलितदृशो धृतमौनाः ॥११॥

व्यञ्जयन्त्य इव पुष्पैः फलैश्चाढ्याः युक्ताः अत एव भारेण प्रणताः प्रणतभाराः राजदन्तादिः तादृशाः विटपाः शाखा यासां ताः प्रेम्णा हृष्टा रोमाञ्चिता इव तनवो यासां ताः वनलताः तरवश्च तथाभूताः तत्पतीनामपि तथैवानन्द इति भावः । अश्रुधारा इव मधुधाराः ससृजुः ववृषुः स्म । मुमुचुरित्यपि पाठः । एतानि विष्णुभक्तिलक्षणानि ॥ ९ ॥ अथ स्नात्वा भूषितो भुक्त्वा गोसंभालनाय सखीन्प्रस्थाप्य भ्रमरमात्रसहायो वेणुं वादयति तद्वृत्तमाह—दर्शनीयेति ॥ दर्शनीयस्तिलको यस्य दर्शनीयानां सुन्दराणां मध्ये तिलक इव मुख्यो वा वनमालासु पञ्चवर्णपत्रपुष्पमयीषु या दिव्यगन्धा तुलसी तस्याः मधुना मत्तैः अलिकुलैः अलघु उच्चैः क्रियमाणमभीष्टमनुकूलं गीतमाद्रियन् आदरेण गृह्णन् शतार्षः । कृष्णः यर्हि अधरे सन्धानं सन्धा सास्य जाता स सन्धितो वेणुर्येन तादृशो भवति ॥ १० ॥ तर्हि ये सरसि सारसा हंसाः अन्ये च विहङ्गास्ते चारुगीतेन हृतं शब्दादिविषयेभ्यः प्रत्याहृतं चेतो येषामत एव यतम् एकाग्रीकृतं चित्तं यैस्ते गीताभिमुखम् एत्य आगत्य धृतं मौनं तूष्णींभावो यैस्ते श्रवणसुखेन मीलिते दृशौ यैस्तथाभूताश्च सन्तो हरिमुपासत तत्समीपे उपविविशुः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ मध्याह्नवृत्तमाह—सहबल इति ॥ भो व्रजदेव्यो गोप्यः स्रग्भिर्निर्मिताभ्याम् अवतंसाभ्यां कर्णभूषणाभ्यां विलासः शोभातिशयो यस्य सः सहबलः बलेन सहितः क्षितिभृतः गोवर्धनगिरेः सानुषु प्रस्थाख्येषु समभूभागेषु वर्तमानः स्वयं जातहर्षः श्रीकृष्णो यर्हि यदा विश्वं हर्षयन् वेणुरवेण उपरम्भति निनादयति नादेनापूरयति तङ्भाव आर्षः ॥ १२ ॥ तदा महतः ब्रह्मादिपूज्यस्य कृष्णस्यातिक्रमणे शङ्कितं चेतो यस्य स मेघस्तदुपरि न अतियाति न पुरतो याति न चोच्चैर्गर्जति किंतु तत्रैव स्थितः सन् वेणुरवमनु मन्दं मन्दं गर्जति । किञ्च । विश्वतापनिवर्तकत्वश्यामत्वादिसाम्यात् सुहृदं सखायं श्रीकृष्णं स्वच्छायया प्रतपत्रं प्रतपात् आतपात् त्रायत इति प्रतपत्रं छत्रं विदधत् कुर्वन् सुमनोभिरभ्यवर्षत् अदृश्यैर्देवैः क्रियमाणकुसुमवर्षमेव कल्पयित्वेदमुक्तम् । विरलजलवृष्टिर्वा कुसुमतया कल्पिता मेघ एव देवरूपो वा कुसुमान्यभ्यवर्षत् ॥ १३ ॥ अथ मध्याह्नोत्तरवृत्तं वर्णयन्त्यः यशोदासमीपं गत्वा कृष्णप्रत्यागमनवर्णनेन यशोदां प्रीणयन्त्य आहुः—विविधेति ॥ हे सति यशोदे विविधेषु गोपचरणेषु गोपक्रीडासु विदग्धो निपुणः तव सुतः कृष्णः अधरबिम्बे बिम्बतुल्ये रक्ते अधरे दत्तो निहितो वेणुर्येन तथाभूतः सन् वेणुवाद्यविषये उरुधा बहुप्रकारा निजैव शिक्षा यासु ता न त्वन्यतः

सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ॥ हर्षयन् यर्हि वेणुरवेण जातहर्ष उपरम्भति विश्वम् ॥ १२ ॥ महदतिक्रमणशङ्कितचेता मन्दमन्दमनुगर्जति मेघः ॥ सुहृदमभ्यवर्षत्सुमनोभिश्छायया च विदधत्प्रतपत्रम् ॥१३॥ विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः ॥ तव सुतः सति यदाऽधरबिम्बे दत्तवेणुरनयत् स्वरजातीः ॥१४॥ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥ कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥ निजपदाब्जदलैर्ध्वजवज्रनीरजाङ्कुशविचित्रललामैः ॥ व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥ १६ ॥ व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥ कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ १७ ॥

शिक्षिताः स्वरजातीः निषादर्षभादिस्वरालापभेदान् मुख्यानष्टादश अन्यान्याः सहस्रशः यदा अनयत् ॥ १४ ॥ तदा शक्रशर्वपरमेष्ठिपुरोगाः शक्रप्रभृतयो गानतानाद्याचार्या अपि सुरेशाः तत् ताः स्वरजातीः सवनशः समये समये मुहुर्मुहुर्वा मन्द्रमध्यतारभेदेन क्रमशः यतो गीतध्वनिरागतस्ततः आनता कन्धरा ग्रीवा चित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः अतिनिपुणा अपि न निश्चितं तत्त्वं तद्भेदो यैस्ते कश्मलं मोहं ययुः ॥ १५ ॥ तृतीययामेऽपि नागते कृष्णे आहुः—निजपदेति ॥ ध्वजवज्रनीरजाङ्कुशानि विचित्राणि ललामानि चिह्नानि येषां तैः निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं गोखुराक्रमणव्यथां शमयन् । वर्ष्मणा धुर्यो महान् गजस्तद्वत् गतिर्यस्य स कृष्णः ईरितवेणुः वादितवेणुः सन् यद्व्रजति तेन निमित्तेन सविलासवीक्षणेन चार्पितो मनोभवस्य कामस्य वेगो यासु ता वयं कुजानां वृक्षाणां गतिं दशां निश्चेष्टतां गमिताः सत्यः कश्मलेन मोहेन वसनं कबरं वा न विदामः न विद्मः । शब्लुगभाव आर्षः ॥ १६ ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थयामारम्भे कृष्णस्य व्रजं प्रत्यागमने गोगणनादिकमाहुः—मणिधर इति ॥ मणीन् ग्रथितान् गोलकान् गोगणनार्थं धारयतीति मणिधरः । तथा हि शुक्लरक्तश्यामपीतादीनां वर्णानां भेदैरष्टोत्तरशतमणिगोलकैर्गोगणनार्थं कृष्णस्य मालाभूत् तां गृहीत्वैवासंख्यानामपि गवामष्टोत्तरशतं यूथान् पृथग्वर्णान् कृष्णो गणयति स्म । तथा हि । ही ही धवलीत्याह्वानेन धवलीयूथो यथा आयाति तथा हंसी चन्दनी गङ्गे इति अरुणी कुङ्कुमी सरस्वतीति श्यामला धूमला यमुनेति पीता पिङ्गला हरितालिकेत्यादिसंज्ञाश्च यूथाः स्वस्वनामभिराहूता आयान्त्यतो वनाद्गोष्ठगमनसमये काश्चनापि गावो विस्मृता मा भवेयुः । इत्येकैकमणिगोलकावर्तनेन गवां गणनम् । तथा दयितः प्रियो गन्धो यस्यास्तस्यास्तुलस्या मालयोपलक्षितः क्वचिद्देशे तैर्मणिभिर्गाः आसमन्तात् गणयन् प्रणयिनः प्रियस्य अनुचरस्य सख्युरंसे स्कन्धे स्वभुजं प्रक्षिपन् स्थापयन् यत्र यदा कदाचिदगायत । तङ्गर्षः ॥१८॥ तदा तत्र क्वणितस्य वादितस्य वेणो रवेण वञ्चितानि अपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहीण्यो भार्या हरिण्यः गोपिका इव विमुक्तगृहाशाः सत्यः गुणगणार्णं माधुर्यादिगुणगणसमुद्रम् अर्णवेव लोप आर्षः । तं कृष्णमनुगत्य प्राप्य अन्वसत अन्वासत ह्रस्वमार्षम् ॥१९॥ अथ कृष्णगमनविलम्बकारणं कथयन्ति—

मणिधरः क्वचिदागणयन् गा मालया दयितगन्धतुलस्याः ॥ प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र॥१८॥क्वणितवेणुरववञ्चितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥ १९ ॥ कुन्ददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ नन्दसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥२०॥ मन्दवायुरुवात्यनुकूलं मानयन् मलयजस्पर्शेन॥ बन्दिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥२१॥ वत्सलो व्रजगवां यदगध्रो वन्द्यमानचरणः पथि वृद्धैः ॥ कृत्स्नगोधनमुपोह्य दिनान्ते गीतवेणुरनुगेडितकीर्तिः ॥२२॥

कुन्देति ॥ हे अनघे यशोदे सहैव बह्व्यः कथयन्त्यः काश्चित्तव वत्सः पुत्र इति काश्चिन्नन्दसूनुरिति चाहुः । कुन्ददामभिः कुन्दपुष्परचिताभिः मालाभिः कृतः कौतुकेन उत्सवेन वेषोऽलङ्कारो येन सः गोपैर्गोधनैश्च वृतः प्रणयिनां प्रेमवतां गोपानां नर्मदः हर्षदः तव वत्सः नन्दसूनुः यदा यमुनायां विजहार क्रीडति स्म ॥ २० ॥ तदा मलयजस्य चन्दनस्येव सुरभिः शीतश्च यः स्पर्शस्तेन तं कृष्णं मानयन् मन्दो वायुः अनुकूलं यथा भवति तथा उपवाति वीजयति । यद्वा । मलयजो दक्षिणो वायुः । " खर्परे शरि वा" विसर्गलोपः । यद्वा । मलयजस्य कृष्णेन स्वाङ्गेऽनुलिप्तस्य स्पर्शेन मानयन् किं च बन्दिन इव स्तावकाः सन्तः ये उपदेवगणाः गन्धर्वादिगणास्ते वाद्यादिभिस्तं कृष्णं परिवव्रुः परित उपासत । अत उपदेवाद्यनुमोदन एव विलम्बः ॥ २१ ॥ अद्य कृष्णागमं वर्णयन्ति—वत्सल इति ॥ व्रजस्य गवां च यद्वा व्रजे स्थितानां गवामिवानुकम्पानामस्माकम् अत्र पक्षे टजभाव आर्षः । वत्सलः हितकृत् तत्र ज्ञापकमाहुः । यत् यस्मात् अगध्रः अस्मद्रक्षार्थं गोवर्धनमुद्धृतवान् एतच्च बहुशो रक्षणस्योपलक्षणम् । वृद्धैर्ब्रह्मादिभिः पथि मार्गे वन्द्यमानचरणः अनुगैर्गोपैरीडिता कीर्तिर्यस्य सः गीतयुक्तो वेणुर्यस्य सः दिनान्ते सायंकाले कृत्स्नं गोधनमुपोह्य एकीकृत्य ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रमरुचा श्रमयुक्तयापि कान्त्या दृशीनामस्मन्नेत्राणामुत्सवं हर्षमुन्नयन् उच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य अङ्गात्तु सखिभिः स्वोत्तरीयै रजोपसारितमिति भावः। देवक्या यशोदाया जठरे भवतीति देवकीजठरभूः "द्वे नाम्नी नन्दजायाया यशोदा देवकीति च।" इति प्रागुक्तादिपुराणात्। स एव उडुराजः निर्वृत्तिहेतुत्वाच्चन्द्रः सुहृदामस्माकमाशिषः मनोरथस्य दित्सया दातुमिच्छया एष एति आगच्छति इति गोरजआदिभिः कृष्णागमनं निश्चीयते इत्यङ्गुल्या निर्दिशन्ति ॥ २३ ॥ आयात्येव कृष्ण इत्याहुः—मदेति ॥ ईषन्मदेन विघूर्णिते विह्वलिते लोचने यस्य सः बदरपाण्डुवदनः ईषत्पक्वबदरमिव पाण्डुरं वदनं यस्य सः अत्र हेतुमाह। मृदू गण्डौ यस्मिंस्तद्वदनं कनककुण्डलयोर्लक्ष्म्या कान्त्या मण्डयन् शोभयन् वनमाली वनपुष्पमालाधृत् स्वसुहृदां निजस्नेहवतां भक्तानां मानदः सम्मानकर्ता ॥२४॥ द्विरदराजो गजश्रेष्ठः। तद्वद्विहारो गतिर्यस्य स मुदितवक्त्रः प्रसन्नवदनः दिनान्ते सायङ्काले यामिनीपतिश्चन्द्रः यथा दिनतापं मोचयन्नायाति तद्वद्व्रजस्य गवामिवास्माकं टजभाव आर्षः। दुरंतम् एतद्दर्शनं विना दुर्निवारं दिनविरहजं तापं मोचयन्नेष यदुपतिः उपयाति समीपमायाति । गोपानां यादवत्वं प्रतिपादितमेव ॥ २५ ॥ एवमिति ॥ हे राजन् तस्मिन् कृष्ण एव चित्तं

उत्सवं श्रमरुचाऽपि दृशीनामुन्नयन् खुररजश्छुरितस्रक् ॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ ॥ मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ॥ बदरपाण्डुवदनो मृदुगण्डं मण्डयन् कनककुण्डललक्ष्म्या ॥ २४ ॥ यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनान्ते ॥ मुदितवक्त्र उपयाति दुरन्तं मोचयन् व्रजगवां दिनतापम् ॥ २५ ॥ श्रीशुक उवाच ॥ एवं व्रजस्त्रियो राजन् कृष्णलीलानुगायतीः ॥ रेमिरेऽहस्सु तच्चित्तास्तन्मनस्का महोदयाः ॥२६॥ इति श्रीभागवते मा० द० पू० वृन्दावनक्रीडागोपिकागीतं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ श्रीशुक उवाच ॥ ॥ अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः ॥ महीं महाककुत्कायः कम्पयन् खुरविक्षताम् ॥ १ ॥

चेतना जीवितं यासां ताः तथा तस्मिन्नेव मनः संकल्पात्मकं यासां ताः अत एव महानुदय उत्सवो यासां ताः व्रजस्त्रियः अहःसु तद्विरहेऽपि एवं कृष्णलीला एवानुगायतीः गायन्त्यो नुमभावः पूर्वसवर्णदीर्घश्चार्षः रेमिरे ॥ २६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमपञ्चत्रिंशे व्यधादिमाम् ॥ ३५ ॥ षट्त्रिंशे तु हतेऽरिष्टे ज्ञात्वा तौ वसुदेवजौ ॥ अक्रूरं प्रादिशत्कंसस्तत्र श्लोकाः कुँसिन्धवः। उवाचेति द्वयं च द्वाचत्वींरिंशदनुष्टुभः ॥ ३६ ॥ एवं नवमदशमैकादशवर्षेषु नानालीलाविधानमुक्तम्। एकादशे वर्षे चैत्रपौर्णमास्यां कृतमरिष्टवधमाह—अथेति ॥ यत्तदोर्नित्यसंबन्धात् यदा गोष्ठं प्रविष्टस्तदुत्तरं भोजनादि विधाय गोष्ठाद्बहिर्निर्गत्य भगवान् पुनः रासार्थमुद्यतस्तर्हि सूर्यास्तोत्तरं घटीत्रयेऽतिक्रान्ते महती ककुत् कायश्च यस्य सः अरिष्टनामा वृषभाकृतिरसुरः स्वखुरैर्विक्षतां विदारितां महीं कम्पयन् गोष्ठं व्रजमागत इत्यन्वयः। एवं चोक्तं विष्णुपुराणे। "प्रदोषार्द्धे कदाचित्तु रासासक्ते जनार्दने ॥ त्रासयन्समदो गोष्ठमरिष्टः समुपागतः ॥ १ ॥"

CC-0. In Public Domain. Digitization by eGangotri

रम्भमाण इति सार्द्धम् ॥ हे राजन् स्तब्धे क्रोधावेशात् निश्चले लोचने यस्य सः खरतरं कर्कशं यथा भवति तथा रम्भमाणः वृषजातिशब्दं कुर्वन् पदा महीं विलिखन् विदारयन् पुच्छमुद्यम्य ऊर्ध्वं कृत्वा विषाणाग्रेण वप्राणि उन्नतस्थलानि चोद्धरन् उत्क्षिपन् किञ्चित् किञ्चित् ईषदीषत् शकृत् पुरीषं मुञ्चन् तथा मूत्रयन्मूत्रमुत्सृजन् आगत इत्यनुषङ्गः ॥ २ ॥ यस्येति सार्द्धम् ॥ अङ्ग हे राजन् यस्य निष्ठुरेण भयङ्करेण निर्ह्रादितेन शब्देन गवां नृणां नारीणां च अकालतः प्रसूतिसमयं विनैव भयेन गर्भाः स्रवन्ति पतन्ति च " आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः । " यस्य ककुदि गलपृष्ठमांसपिण्डे अचलशङ्कया पर्वतभ्रान्त्या घना निर्विशन्ति इति घनपथपर्यन्तोच्छ्रायो विवक्षितः ॥ ३ ॥ तमिति ॥ हे राजन् तीक्ष्णशृङ्गं तमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः । हे राजन् पशवश्च तं वीक्ष्य भीताः सन्तो गोकुलं संत्यज्य दुद्रुवुः पलायिताः ॥ ४ ॥ कृष्णेति अर्द्धम् ॥ हे कृष्ण हे कृष्ण रक्ष रक्षेति वदन्तस्ते गोपादयः सर्वे गोविन्दं शरणं ययुः॥५॥ भगवानिति ॥ अथ भयेन विह्वलं व्याकुलं विद्रुतमित्यपि पाठः । तद्गोकुलं वीक्ष्य

रम्भमाणः खरतरं पदा च विलिखन् महीम् ॥ उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् ॥ किञ्चित्किञ्चित् शकृन्मुञ्चन् मूत्रयन् स्तब्धलोचनः ॥ २ ॥ यस्य निर्ह्रादितेनाङ्ग निष्ठुरेण गवां नृणाम् ॥ पतन्त्यकालतो गर्भाः स्रवन्ति स्म भयेन वै ॥ निर्विशन्ति घना यस्य ककुद्यचलशङ्कया ॥ ३ ॥ तं तीक्ष्णशृङ्गमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ॥ पशवो दुद्रुवुर्भीता राजन् सन्त्यज्य गोकुलम् ॥ ४ ॥ कृष्ण कृष्णेति ते सर्वे गोविन्दं शरणं ययुः ॥ ५ ॥ भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतम् ॥ मा भैष्टेति गिराऽऽश्वास्य वृषासुरमुपाह्वयत् ॥६॥ गोपालैः पशुभिर्मन्द त्रासितैः किमसत्तम ॥ बलदर्पहाऽहं दुष्टानां त्वद्विधानां दुरात्मनाम् ॥ ७ ॥ इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ॥ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥ ८ ॥ सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥

मा भैष्ट भयं मा कार्ष्टेति गिरा आश्वास्य भगवान् वृषासुरमुपाह्वयत् स्वसमीपमाकारितवान् । आङ्भावात्स्पर्द्धायामपि नतङ् ॥६॥ गोपालैरिति ॥ मन्द हे मन्दबुद्धे असत्तम हे दुष्ट वृषरूपिणोऽपि तव मारणे दोषो नास्तीति भावः । शब्देनैव त्वया त्रासितैर्गोपालैः पशुभिश्च तव किं फलं न किमपि यतस्त्वद्विधानां दुष्टानां परोद्वेजकानां दुरात्मनां दुर्बुद्धीनां यो बलप्रयुक्तो दर्पः गर्वस्तं हन्तीति तथाभूतोऽहं तिष्ठामि । त्वं बलगर्वितश्चेत्तर्हि ममाग्रे आगच्छ ॥ ७ ॥ इतीति ॥ हरिर्दुःखहर्ता अच्युतः इत्येवं वदन् आस्फोट्य करतलेन बाहुमाहत्य तेन तलशब्देन स्वशौर्यद्योतकेन तमरिष्टं कोपयन् भुजा भुजः स एव भोगः सर्पदेहस्तं सर्पदेहाकारं भुजं सख्युः सुबलस्य श्रीदाम्नो वा अंसे स्कन्धे प्रसार्य संस्थाप्यावस्थितः ॥ ८ ॥ सोऽपीति ॥ एवमाक्षेपवचनेन कोपितः अतः क्रुद्धः सोऽरिष्टोऽपि खुरेण अवनिमुल्लिखन् विदारयन् उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमन्तो मेघा येन सः अरिष्टः हन्तुं प्रहर्त्तुं कृष्णमुपाद्रवत् आजगाम ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्रेति ॥ अग्रे न्यस्ते विषाणाग्रे येन सः स्तब्धे असृक्तुल्ये रक्ते लोचने यस्य सः कटा कटाक्षेण इनाभाव आर्षः । आक्षिप्य तिर्यङ् निरीक्ष्य इन्द्रेण मुक्तः अशनिर्वज्रं यथा आगच्छेत्तथा अच्युतं कृष्णं प्रति तूर्णं शीघ्रमाद्रवत् ॥ १० ॥ गृहीत्वेति ॥ स भगवान् तं शृङ्गयोर्गृहीत्वा गजश्रेष्ठो यथा गजं प्रति नुदेत् तथा अष्टादश पदानि प्रत्यपोवाह प्रतिलोमं व्यनुदत् ॥ ११ ॥ स इति ॥ ततश्च सोऽरिष्टो भगवता अपविद्धः अपक्षिप्तः क्रोधेन मूर्च्छितो व्याप्तः अतः स्विन्नानि स्वेदयुक्तानि सर्वाङ्गानि यस्य सः निश्वसन् श्वासानुच्चैर्मुञ्चन् पुनः सत्वरः शीघ्रमुत्थाय आपतत् वेगेन कृष्णाभिमुखमाजगाम ॥ १२ ॥ तमिति ॥ स श्रीकृष्णः आपतन्तं तमरिष्टं शृङ्गयोर्निगृह्य नितरां गृहीत्वा भूतले निपात्य पदा समाक्रम्य यथा रजकादिर्जनः अम्बरमार्द्रं वस्त्रं पदा समाक्रम्य हस्तेन निष्पीड्य ततो जलं निस्सारयति तथा निष्पीडयामास निष्पीडनेन रोमच्छिद्रेभ्यो रुधिरं निस्सारितवान् । ततश्च तद्विषाणं कृत्वा उत्पाट्य तेन विषाणेन तं जघान । सच तेन हननेनापतत् ॥ १३ ॥ असृगिति ॥ ततश्च स मुखतोऽसृक् रुधिरं

अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् ॥ कटाक्षिप्याऽद्रवत् तूर्णमिन्द्रमुक्तोऽशनिर्यथा ॥ १० ॥ गृहीत्वा शृङ्गयोस्तं च अष्टादश पदानि सः ॥ प्रत्यपोवाह भगवान् गजं प्रति गजो यथा ॥ ११ ॥ सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः ॥ आपतत् स्विन्नसर्वाङ्गो निःश्वसन् क्रोधमूर्छितः ॥ १२ ॥ तमापतन्तं स निगृह्य शृङ्गयोः पदा समाक्रम्य निपात्य भूतले ॥ निष्पीडयामास यथाऽऽर्द्रमम्बरं कृत्वा विषाणेन जघान सोऽपतत् ॥ १३ ॥ असृग्वमन् मूत्रशकृत् समुत्सृजन् क्षिपंश्च पादाननवस्थितेक्षणः ॥ जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरन्तो हरिमीडिरे सुराः ॥ १४ ॥ एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः ॥ विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥ १५ ॥ अरिष्टे निहते दैत्ये कृष्णेनाद्भुतकर्मणा ॥ कंसायाथाह भगवान् नारदो देवदर्शनः ॥ १६ ॥

वमन् मूत्रं शकृच्च एकवद्भावः । तदुभयं समुत्सृजन् विमुञ्चन् पादांश्च क्षिपन् इतस्ततश्चालयन् अनवस्थिते चलिते ईक्षणे नेत्रे यस्य सः कृच्छ्रं कष्टं जगाम प्राप । अथ निर्ऋतेर्मृत्योः सकाशात् क्षयं वधं जगाम निर्ऋतिरेवागत्य तं जघान नतु कृष्ण इत्युत्प्रेक्षा । यद्वा । कृच्छ्रं यथा भवति तथा निर्ऋतेर्मृत्योः हेतोः क्षयं हरेर्निवासं जगाम इत्येव विवक्षितम् नतु यमस्थानगमनं दर्दुरकेश्यरिष्टेति पूर्वं हरिनिलयगमोक्तेः । अथानन्तरं सुरा देवाः पुष्पैः हरिं किरन्तः आच्छादयन्तः ईडिरे तुष्टुवुः । आमभाव आर्षः ॥ १४ ॥ एवमिति ॥ एवं ककुद्मिनं वृषभासुरं हत्वा स्वज्ञातिभिर्गोपैः स्तूयमानः गोपीनां मूर्त्तिमान् नयनयोरुत्सवः सबलः बलेन सहितः युद्धं श्रुत्वा बलस्य तत्रागमनात् श्रीकृष्णः गोष्ठं विवेश ॥ १५ ॥ अरिष्ट इति ॥ एवम् अद्भुतकर्मणा कृष्णेन अरिष्टे दैत्ये वसन्तर्त्तौ निहते सति अथानन्तरं माघमास आगते भगवान् देवदर्शनः देवर्षिः । यद्वा एवं कथिते एवं भविष्यतीति साक्षाद्देववद्दर्शनं ज्ञानं यस्य सः नारदः कंसायाह स्म ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

यशोदाया इति सार्द्धम् ॥ देवक्या अष्टमगर्भतया प्रसिद्धां कन्यां यशोदायाः सुतामाह स्म । यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह स्म । रोहिणीपुत्रं रामं च देवक्याः सप्तमं सुतमाह स्म । यद्वा । नन्दसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्याया रोहिण्याः सुतमाह स्म । याभ्यां रामकृष्णाभ्यां ते तव पुरुषाः उपलक्षणतया पूतनादयोऽपि हताः तौ रामकृष्णौ त्वत्तो बिभ्यता वसुदेवेन स्वमित्रे नन्दे न्यस्तौ गुप्ततया स्थापितौ इति चाह स्म ॥ १७ ॥ निशम्येति ॥ तन्नारदेन वर्णितं निशम्य श्रुत्वा कोपात्प्रचलितानि व्याकुलानीन्द्रियाणि यस्य सः भोजपतिः कंसः वसुदेवजिघांसया निशातं तीक्ष्णं खड्गमादत्त गृहीतवान् । वसुदेवस्य परोक्षमेव ॥ १८ ॥ निवारित इति ॥ तदा च वसुदेवे हते सति तच्छ्रुत्वा तौ पलायेतां किंच वसुदेवस्तज्जिघांसामपि न ज्ञापनीयस्तथा सति नन्दः श्रुत्वा तत्सुतसहितः पलायेत तदा शत्रुभूतयोस्तयोर्वधो न स्यादतो वसुदेवं बद्ध्वा प्रथमं तयोर्वधोपायः कर्तव्य इति मन्त्रं वदता नारदेन निवारितः । नच नारदेन देवकीवसुदेवयोरप्रियं कृतमिति वाच्यं तस्य शीघ्रं कंसहननसंपादनेन

यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च ॥ रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ॥ न्यस्तौ स्वमित्रे नन्दे वै याभ्यां ते पुरुषा हताः ॥१७॥
निशम्य तद्भोजपतिः कोपात् प्रचलितेन्द्रियः ॥ निशातमसिमादत्त वसुदेवजिघांसया ॥ १८ ॥ निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ॥
ज्ञात्वा लोहमयैः पाशैर्बबन्ध सह भार्यया ॥१९॥ प्रतियाते तु देवर्षौ कंस आभाष्य केशिनम् ॥ प्रेषयामास हन्येतां भवता रामकेशवौ ॥ २०॥
ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥ अमात्यान् हस्तिपांश्चैव समाहूयाह भोजराट् ॥२१॥ भो भो निशम्यतामेतद्वीर चाणूरमुष्टिकाः ॥
नन्दव्रजे किलासाते सुतावानकदुन्दुभेः ॥ २२ ॥ रामकृष्णौ ततो मह्यं मृत्युः किल निदर्शितः ॥ भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया ॥२३॥

पुत्रदर्शनप्रापकत्वात् । एवं च नारदवाक्येन तस्य वसुदेवस्य सुतौ आत्मनः स्वस्य मृत्युं मृत्युरूपौ ज्ञात्वा लोहमयैः पाशैः भार्यया देवक्या सह वसुदेवं बबन्ध ॥ १९ ॥ प्रतीति ॥ देवर्षौ नारदे प्रतियाते तु कंसः केशिनमाभाष्य हे केशिन्निति संबोध्य गोकुलं गत्वा राममाधवौ भवता हन्येतामित्याज्ञाप्य तं व्रजे प्रेषयामास । वस्तुतः हन्येतां प्राप्येतां तत्र लीयतामित्यर्थः ॥ २० ॥ तत इति ॥ ततः केशिप्रेषणानन्तरं भोजराट् कंसः मुष्टिकचाणूरादिकान् समाहूयाह स्म ॥ २१ ॥ भो भो इति द्वयम् ॥ वीर इति सामान्यसंबोधनम् । चाणूरमुष्टिकौ इति मुख्यसम्बोधनम् । हे वीराः हे चाणूरमुष्टिकाविति द्वन्द्वः । एतन्मदाज्ञावचनं निशम्यतां श्रूयताम् । नन्दव्रजे रामकृष्णौ आनकदुन्दुभेः सुतावासाते । किलेति ततस्ताभ्यां सकाशात् मम मृत्युर्नारदेन निदर्शितः अतः इह संप्राप्तौ तौ भवद्भ्यां चाणूरमुष्टिकाभ्यां मल्ललीलया हन्येताम् । वास्तवोऽर्थः प्राग्वत् ॥ २२ ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमात्यानाह—मञ्चा इति ॥ मल्लरङ्गपरिश्रिताः मल्लयुद्धभूमिं सर्वतः संलग्नाः मञ्चाः उत्तुङ्गाः स्तम्भादिरचितस्थानानि क्रियन्तां विरच्यन्ताम् पौराः पुरवासिनः जानपदाः बहिर्देशवासिनश्च सर्वे तत्रोपविष्टाः स्वैरं यथेष्टं संयुगं युद्धं पश्यन्त्विति पौरवञ्चनप्रकारः ॥ २४ ॥ हस्तिपमाह—महामात्रेति ॥ हे महामात्र हे भद्र त्वया कुवलयापीडो द्विपो हस्ती रङ्गद्वार्युपनीयतां तेन हस्तिना ममाहितौ शत्रुभूतौ इहागतौ रामकृष्णौ जहि मारय । राजद्वारे हस्तिस्थापनरीतिः प्रसिद्धेति तयोर्वञ्चनं स्यात् ॥ २५ ॥ पुनरमात्यानाह—आरभ्यतामिति ॥ चतुर्दश्यां शिवस्य तिथौ धनुर्यागः शत्रुविजयफलकः धनुषि शिवपूजनरूपः शैवतन्त्रप्रसिद्धः यथाविधि आरभ्यताम् । एतदुत्सवव्याजेन तयोरानयनं सुकरमिति भावः । तत्र च मीढुषे कामपूरकाय भूतराजाय भूतेश्वरनाम्ने मथुराक्षेत्रपालकाय शिवाय तं प्रसादयितुं मेध्यान् तद्यागयोग्यान् पशून् विशसन्तु मारयन्तु ॥ २६ ॥ इतीति ॥ अर्थतन्त्रज्ञः स्वकार्यसाधनमात्रविज्ञः नतु धर्मज्ञः कंस इत्येवं मल्लादीन् आज्ञाप्य यदुपुङ्गवमक्रूरमाहूय सम्माननार्थं पाणिना पाणिं गृहीत्वा ततो

मञ्चाः क्रियन्तां विविधा मल्लरङ्गपरिश्रिताः ॥ पौरा जानपदाः सर्वे पश्यन्तु स्वैरसंयुगम् ॥ २४ ॥ महामात्र त्वया भद्र रङ्गद्वार्युपनीयताम् ॥ द्विपः कुवलयापीडो जहि तेन ममाहितौ ॥ २५ ॥ आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि ॥ विशसन्तु पशून् मेध्यान् भूतराजाय मीढुषे ॥ २६ ॥ इत्याज्ञाप्यार्थतन्त्रज्ञ आहूय यदुपुङ्गवम् ॥ गृहीत्वा पाणिना पाणिं ततोऽक्रूरमुवाच ह ॥ २७ ॥ भो भो दानपते मह्यं क्रियतां मैत्रमादृतः ॥ नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ॥ २८ ॥ अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनम् ॥ यथेन्द्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ॥ २९ ॥ गच्छ नन्दव्रजं तत्र सुतावानकदुन्दुभेः ॥ आसाते ताविहानेन रथेनानय मा चिरम् ॥ ३० ॥

हेति हर्षेण उवाच ॥ २७ ॥ भो भो इति ॥ हे दानपते अक्रूर मह्यं मम मैत्रं मित्रकृत्यं त्वया क्रियतां यस्मात्त्वत्तोऽन्यो भोजवृष्णिषु मध्ये आदृतः आदरयुक्तः हिततमश्च न विद्यते ॥ २८ ॥ अत इति ॥ अतः कारणात् हे सौम्य हे प्रिय कार्यगौरवस्य गुरुतरकार्यस्य साधने निमित्तेऽहं त्वामाश्रितः । साधनमिति पाठे कार्यं गौरवेण गुरुतया साधयतीत्यक्रूरविशेषणम् । यथा विभुर्महानपि इन्द्रो यथा विष्णुं कनिष्ठमपि वामनमाश्रित्य स्वार्थमभ्यगमत् बलिनापहृतां त्रिलोकीं पुनः प्राप्तवान् ॥ २९ ॥ गच्छेति ॥ नन्दस्य व्रजं त्वं गच्छ तत्र च आनकदुन्दुभेर्वसुदेवस्य सुतावासाते तौ अनेन अङ्गुलिनिर्दिष्टेन बालमनोमोहकेन मदीयेन रथेनेहाऽऽनय मा चिरं विलम्बो न कार्यः । नवीनं चित्रं रथं दृष्ट्वा तौ शीघ्रमायास्यतः इति भावः ॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

निसृष्ट इति ॥ वैकुण्ठः संश्रयः आश्रयो येषां तैर्देवैरेताभ्यां मे मम मृत्युर्निसृष्टः प्रकल्पितः अतः साभ्युपायनैः उपायनसहितैः नन्दाद्यैर्गोपैः समन्तावानय एकमात्राह्वाने शङ्का स्यात् ॥ ३१ ॥ घातयिष्य इति ॥ इहानीतौ तौ कालकल्पेन मृत्युतुल्येन हस्तिना घातयिष्ये । यदि कथञ्चित्ततो हस्तितो मुक्तौ भविष्यतस्तर्हि वैद्युतोपमैः अशनितुल्यैर्मल्लैः चाणूरादिभिर्घातये घातयिष्ये । वास्तवोऽर्थस्तु यदि पुर्यामानीतौ भवतस्तर्हि हस्तिना हेतुना घातयिष्ये रङ्गान्तः प्रापयिष्यामि । गजो हि पराभूतस्तयो-रुत्साहवर्द्धनेन अन्तः प्रवेशे हेतुः ततः मुक्तौ स्वमुक्तिनिमित्तं वैद्युतोपमैः क्रममुक्तिमार्गस्थआतिवाहिकतेजोमयनेतृदेवतुल्यैर्मल्लैः स्वस्वसमीपं प्रापयिष्ये ॥ ३२ ॥ तयो-रिति ॥ तयो रामकृष्णयोर्निहतयोः सतोस्ततो वसुदेवपुरोगमान् तद्वधशोकतप्तान् तद्बन्धून् वृष्णिभोजदशार्हकान् हनिष्यामि । वास्तवोऽर्थस्तु मुक्तौ तयोः निहतयोः प्राप्तयोः तप्तान् मम वधं दृष्ट्वा सौशील्येन मद्विषयकानुतापयुतान् तद्बन्धूनपि प्राप्स्यामि ॥ ३३ ॥ उग्रसेनमिति ॥ स्थविरं वृद्धमपि राज्यकामुकं स्वपितरं तद्भ्रातरं देवकं

निसृष्टः किल मे मृत्युर्देवैर्वैकुण्ठसंश्रयैः ॥ तावानय समं गोपैर्नन्दाद्यैः साभ्युपायनैः ॥ ३१ ॥ घातयिष्य इहानीतौ कालकल्पेन हस्तिना ॥ यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ॥ ३२ ॥ तयोर्निहतयोस्तप्तान् वसुदेवपुरोगमान् ॥ तद्बन्धून् निहनिष्यामि वृष्णिभोजदशार्हकान् ॥ ३३ ॥ उग्रसेनं च पितरं स्थविरं राज्यकामुकम् ॥ तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ॥ ३४ ॥ ततश्चैषा मही मित्र भवित्री नष्टकण्टका ॥३५॥ जरासन्धो मम गुरुर्द्विविदो दयितः सखा ॥ शम्बरो नरको बाणो मय्येव कृतसौहृदाः ॥ तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ॥ ३६ ॥ एतज्ज्ञात्वाऽऽनय क्षिप्रं रामकृष्णाविहार्भकौ ॥ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियम् ॥३७॥ अक्रूर उवाच ॥ राजन् मनीषितं सम्यक् तव स्वावद्यमार्जनम् ॥ सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलसाधनम् ॥ ३८ ॥

च ये चान्ये मम विद्विषस्तांश्च सर्वान् हनिष्यामि ॥ ३४ ॥ ततश्चेत्यर्द्धम् ॥ ततश्च हे मित्र एषा मही नष्टकण्टका शत्रुभी रहिता भवित्री भविष्यति ॥ ३५ ॥ जरासन्ध इति सार्द्धम् ॥ जरासन्धो मम गुरुः पूज्यश्च श्वशुरत्वात् । द्विविदाख्यो वानरो मम दयितः सखा । शम्बरो नरकः बाणश्चैते दैत्याः सर्वे मय्येव कृतं सौहृदं स्नेहो यैस्तथाभूताः अतस्तैर्जरासन्धादिभिः सहितोऽहं सुरपक्षीयान् नृपान् हत्वा सर्वां महीं भोक्ष्ये ॥ ३६ ॥ एतदिति ॥ एतन्मच्चिकीर्षितं रहस्यं ज्ञात्वापि तत्रैवं न वाच्यं किन्तु धनुर्म-खनिरीक्षणार्थं तथा यदुपुरस्य मथुरायाः श्रियं शोभां द्रष्टुं च राजाहूतवानित्युक्त्वा अर्भकौ वसुदेवपुत्रौ रामकृष्णाविह क्षिप्रमानय ॥ ३७ ॥ राजन्निति ॥ हे राजन् स्वावद्यस्य स्वमरणस्य मार्जनं परिहारः सम्यक् मनीषितं विचारितं तथापि फलसिद्धौ तदसिद्धौ वा जनश्चित्तं समं कुर्यात् । हि यस्मात् दैवमेव फलस्य भावनं साधकं परमेश्वराधीनमेव हि फलम् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोरथानिति ॥ अयं जनः प्राणी निकृष्टलोको नतु भवानिति प्रकटोऽर्थः । वस्तुतस्तस्यैव निकृष्टत्वं व्यङ्ग्यम् । दैवहतान् एकदा दैवेन प्रारब्धफलदात्रेश्वरेण हतान् विघ्नितानपिशब्दाद्दैवपालितानपि मनोरथान्कृत्वा तदुपायेषु प्रवर्त्तते ततश्च फललाभे हर्षेण तदलाभे शोकेन च युज्यते तथापि ते तवाज्ञां करोमि फलं तु दैवाधीनम् ॥ ३९ ॥ एवमिति ॥ एवमक्रूरं चात्केश्यादींश्चादिश्य मन्त्रिणश्च विसृज्य गृहं प्रस्थाप्य स कंसः स्वगृहं प्रविवेश तथाक्रूरोऽपि स्वमालयं गृहं गतः ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षट्त्रिंशे दशमस्य व्यधादिमाम् ॥ ३६ ॥ सप्तत्रिंशे हतः केशी नारदेन स्तुतो हरिः ॥ अवधीद्व्योमासुरं च श्लोकास्तत्र त्रिवह्नयः[३३] ॥ उवाचवाचोर्द्वितय[२]मष्टत्रिंशदनुष्टुभः[३८] ॥ ३७ ॥ माघकृष्णद्वादश्यां प्रातः केश्यागमनमाह—केशीति द्वयम् ॥ सतु कंसेन प्रहितः प्रेषितः केशी महाहयः सन् मनोजवः महावेगः नभ आकाशं सटाभिः स्कन्धकेशैः अवधूतानि इतस्ततः क्षिप्तानि यानि अभ्राणि विमानानि च तैः संकुलं संकीर्णं कुर्वन् हेषितैः अश्वजातिशब्दैर्भीषितमखिलं विश्वं येन स

मनोरथान् करोत्युच्चैर्जनो दैवहतानपि ॥ युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ॥ ३९ ॥ एवमादिश्य चाक्रूरं मन्त्रिणश्च विसृज्य सः ॥ प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयम् ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे अक्रूरसम्प्रेषणं नाम षट्त्रिंशोऽध्यायः ॥३६॥ श्रीशुक उवाच ॥ केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन् मनोजवः ॥ सटावधूताऽभ्रविमानसङ्कुलं कुर्वन् नभो हेषितभीषिताखिलः ॥ १ ॥ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाघनोपमः ॥ दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन् ॥ २ ॥ तं त्रासयन्तं भगवान् स्वगोकुलं तद्धेषितैर्वालविघूर्णिताम्बुदम् ॥ आत्मानमाजौ मृगयन्तमग्रणीरुपाह्वयत् स व्यनदन्मृगेन्द्रवत् ॥ ३ ॥

विशाले नेत्रे यस्य सः विकटमास्यकोटरं मुखच्छिद्रं यस्य सः बृहत्पीनो दीर्घश्च गलो यस्य सः नीलो महांश्च अम्बुदो मेघ उपमा यस्य सः कंसहितं कृष्णरामवधं चिकीर्षुः कर्तुमिच्छुः तत्र हेतुमाह दुराशयः दुष्टचित्तः सः महीं कम्पयन् खुरैर्निर्जरयन् निःशेषतो जीर्णां कुर्वन् विदारयन्नित्यर्थः । जीर्यतेर्मितो णिच् । नन्दस्य व्रजं जगाम निवृत्तप्रेषणाण्णौ शुद्धेन तुल्योऽर्थः इति वा ॥ १ ॥ २ ॥ तमिति ॥ तद्धेषितैः तैरतिनिष्ठुरैर्हेषितैः स्वगोकुलं स्वकीयं गोकुलवासिजनं त्रासयन्तं वालैः पुच्छरोमभिः विघूर्णिताः परिभ्रमिताः अम्बुदाः येन तमाजौ संग्रामार्थमात्मानं कृष्णं मृगयन्तमन्वेषयन्तं शता आर्षः । केषुचित्पुस्तकेषु विशालनेत्र इति श्लोको नास्ति । तत्र यः केशी कंसप्रहितस्तं भगवानुपाह्वयदित्यग्रेतनेनान्वयः । नन्दव्रजं जगामेति शेषो वा देयः । तं केशिनमग्रणीः पुरो यमुनातटे केशिघट्टत्वेन केशिमथनतीर्थत्वेन च प्रसिद्धेनिर्गतः सन् भगवान् कृष्ण उपाह्वयत् स्वसमीपमाजुहाव । सच केशी तन्निशम्य मृगेन्द्रवत् व्यनदत् नादमकरोत् ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ ततश्च दुरासदः समीपमपि गन्तुमशक्यः किम्पुनरतिक्रमितुं शक्यः चण्डजवः महावेगः दुरत्ययः अन्यैरत्येतुमशक्यः स केशी तं कृष्णं निशम्य दृष्ट्वा अत्यमर्षणः तदुत्कर्षमत्यन्तमसहमानः अभिमुखः सन् मुखेन खमाकाशं पिबन्निव मुखं व्यादाय अभ्यद्रवत् आजगाम । ततः प्रत्यक् पद्मचामरविन्दलोचनं कृष्णं जघान ताडयामास ॥ ४ ॥ तदिति ॥ अधोक्षजः भगवान् तत्तस्य हननं वञ्चयित्वा रुषा तं केशिनं हननाय प्रसारितयोः पादयोः दोर्भ्यां हस्ताभ्यां प्रगृह्य तार्क्ष्यस्य कश्यपस्य सुतो गरुडः उरगं यथा भ्रमयति तथा परिविध्य भ्रमयित्वा धनुःशतान्तरे तत्परिमितदेशे सावज्ञं सावहेलम् उत्सृज्य प्रक्षिप्य व्यवस्थितः यथासुखं स्थितो बभूव ॥ ५ ॥ स इति ॥ एवं हरिणा क्षिप्तः केशी प्रथमं मूर्छितः पुनश्च लब्धा संज्ञा चेतना येन सः पुनरुत्थितः सन् रुषा क्रोधेन मुखं व्यादाय तरसा वेगेन हरिं ग्रसितुमापतत् आजगाम। स हरिरपि स्मयन् हसन्नेव शतार्षः । यथा कश्चित् मूषकं घातयितुं तद्बिले उरगं सर्पं प्रवेशयति तथा केशिप्राणग्रहणाय अस्य वक्त्रे उत्तरं वामं भुजं प्रवेशयामास । एवमुरगो यथासुखं

स तं निशम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः ॥ जघान पद्मचामरविन्दलोचनं दुरासदश्चण्डजवो दुरत्ययः ॥ ४ ॥ तद् वञ्चयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः ॥ सावज्ञमुत्सृज्य धनुःशतान्तरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ॥ ५ ॥ स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसाऽपतद्धरिम् ॥ सोऽप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ॥ ६ ॥ दन्ता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशो यथा ॥ बाहुश्च तद्देहगतो महात्मनो यथाऽऽमयः संववृधे उपेक्षितः ॥ ७ ॥ समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् ॥ प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेण्डं व्यसृजत् क्षितौ व्यसुः ॥ ८ ॥ तद्देहतः कर्कटिकाफलोपमाद् व्यसोरपाकृष्य भुजं महाभुजः ॥ अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनवर्षैर्दिविषद्भिरीडितः ॥ ९ ॥

प्रविशति तथा भुजोऽपि प्रविवेश ॥ ६ ॥ दन्ता इति ॥ तंतश्चर्वणाय भगवद्भुजं स्पृशन्तीति तथा ते केशिनो दन्ताः तप्तमयो लोहपिण्डं स्पृशन्तो यथा पतन्ति तथा निपेतुः । कृद्योगे कर्मणि षष्ठ्यभाव आर्षः । तदर्हमिति निर्देशेन तत्षष्ठ्या अनित्यत्वादित्येके । " धार्यै रामोदमुत्तमम् " इति भट्टिश्चाह । तस्य देहगतो महात्मनो हरेः बाहुश्च उपेक्षितः अचिकित्सितः आमयो जलोदरादिरोगो यथा वर्धते तथा संववृधे असन्धिः संहिताया अविवक्षणात् ॥ ७ ॥ समिति ॥ सम्यगेधमानेन कृष्णबाहुना निरुद्धः प्राणवायुर्यस्य स केशी चरणान् विक्षिपन् इतस्ततश्चालयन् प्रस्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः परिवृत्ते परिभ्रान्ते लोचने यस्य सः लेण्डं पुरीषं विसृजन् व्यसुः प्राणरहितः सन् क्षितौ भूमौ पपात ॥८॥ तदिति ॥ व्यसोः विगतप्राणात् कर्कटिकाफलोपमात् कर्कटिकाफलं हि पक्वमत्यन्तं विदीर्णं भवति तद्वद्विदीर्णात् केशिनो देहात् अयत्नेनैव हतोऽरिर्येन सः महाभुजः स कृष्णः स्वभुजमपाकृष्य निःसार्य अविस्मितो गर्वेणाश्चर्येण च रहित एवावस्थितः तदा उत्स्मयैः तादृशदैत्यस्यानायासेनैव वधादाश्चर्ययुक्तैः प्रसूनवर्षैः पुष्पा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णि वर्षद्भिः श्रमहरणाय जलकणानि च वर्षद्भिः दिविषद्भिर्देवैरीडितः स्तूयमानो बभूव । प्रसूनवर्षैर्दिविजैरभिष्टुत इति पाठान्तरम् ॥ ९ ॥ देवर्षिरिति ॥ हे नृप भागवतेषु सर्वभूतसुहृत्सु प्रवरो देवर्षिः नारदः एतेन तस्य पिशुनत्वं निरस्तम् । रहसि एकान्ते अक्लिष्टेन क्लेशराहित्येनैव कर्माणि केशिवधादीनि यस्य तं कृष्णमुपसंगम्य एतद्वक्ष्यमाणमभाषत ॥ १० ॥ कृष्णेति द्वयम् ॥ हे कृष्णेत्यादीनि संबोधनानि । न प्रमेय आत्मा यस्य अपरिच्छिन्नरूपत्वमेक एव सर्वभूतानामात्मा अन्तर्यामी एधसां काष्ठानामन्तर्ज्योतिरग्निरिव गूढः गुहाशयः साक्षी महापुरुषः विराडन्तर्यामी ईश्वरो महदादिस्रष्टा चासि एतेन विष्णोस्तु त्रीणि रूपाणि इत्युक्तं रूपत्रयमुक्तम् ॥ ११ ॥ १२ ॥ आत्मनेति ॥ आत्माश्रयः स्वतन्त्रः सत्यसङ्कल्पः कारकापेक्षारहितः संकल्पमात्रेण सृष्ट्यादिकरः ईश्वरः त्वम् आत्मना स्वाभिन्नया मायया शक्त्या पूर्वं गुणान् ससृजे तङार्षः । तैर्गुणैश्च इदं विश्वं सृजासि अवसि अत्सि चेति ॥ १३ ॥ स इति ॥ स परमेश्वर एव त्वं भूधरभूतानां भुवं धरन्तीति भूधरा राजानः तद्रूपाणां दैत्यादीनां विनाशाय सेतूनां धर्ममर्या-

देवर्षिरुपसंगम्य भागवतप्रवरो नृप ॥ कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत ॥१०॥ कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर ॥ वासुदेवाखिलावास सात्त्वतां प्रवर प्रभो ॥ ११ ॥ त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम् ॥ गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ॥ १२ ॥ आत्मनाऽत्माश्रयः पूर्वं मायया ससृजे गुणान् ॥ तैरिदं सत्यसङ्कल्पः सृजस्यत्स्यवसीश्वरः ॥१३॥ स त्वं भूधरभूतानां दैत्यप्रमथरक्षसाम् ॥ अवतीर्णो विनाशाय सेतूनां रक्षणाय च ॥ १४ ॥ दिष्ट्या ते निहतो दैत्यो लीलयायं हयाकृतिः ॥ यस्य हेषितसंत्रस्तास्त्यजन्त्यनिमिषा दिवम् ॥ १५ ॥ चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनम् ॥ कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ॥ १६ ॥ तस्यानु शङ्खयवनमुराणां नरकस्य च ॥ पारिजातापहरणमिन्द्रस्य च पराजयम् ॥ १७॥ उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणम् ॥ नृगस्य मोक्षणं पापाद् द्वारकायां जगत्पते ॥१८॥

दारूपाणां साधूनां क्वचित्साधूनामित्येव पाठः । रक्षणाय चावतीर्णोऽसि॥ १४॥दिष्ट्येति ॥ यस्य हेषितेन शब्दमात्रेण संत्रस्ता भीताः सन्तः अनिमिषा देवाः दिवं स्वर्गं त्यजन्ति स्म सोऽयं हयाकृतिर्दैत्यः केशी ते त्वया लीलया निहतः तद्दिष्ट्या भद्रं जातम् । दिष्ट्या लोकानां भाग्येन निहत इति वा ॥ १५ ॥ चाणूरमिति ॥ हे विभो अद्यैवाक्रूर एष्यति श्वो मथुरां गन्तासि परश्वः अहनि चाणूरं मुष्टिकम् अन्यान् मल्लान् शलादीन् हस्तिनं कंसं च ते त्वया निहतं द्रक्ष्ये । तङार्षः ॥ १६ ॥ तस्येति ॥ तस्यानु पश्चात् शङ्खयवनमुराणां नरकस्य च वधं द्रक्ष्ये । शङ्खः पञ्चजनः पारिजातस्यापहरणं तत्रेन्द्रस्य पराजयं च द्रक्ष्ये । अत्र भाविसङ्ग्रहमात्रं नतु क्रमः ॥१७॥ उद्वाहमिति ॥ वीर्यं पराक्रमप्रदर्शनमेव शुल्कादिलक्षणं प्रदेयद्रव्यादिरूपं यस्मिंस्तथाभूतं वीरकन्यानामुद्वाहं द्रक्ष्ये । हे जगत्पते पापात् ब्राह्मणगवीहरणजनितात् कृकलासयोनिनिमित्तात् पापात् द्वारकायां नृगस्य मोक्षणं द्रक्ष्ये ॥ १८ ॥

CC-0. In Public Domain. Digitization by eGangotri

स्यमन्तकस्येति ॥ भार्यया जाम्बवत्या सह स्यमन्तकस्य मणेः आदानं द्रक्ष्ये । स्वधामतः महाकालपुरात् आनीय ब्राह्मणमृतपुत्रस्य प्रदानं च द्रक्ष्ये ॥ १९ ॥ पौण्ड्रकस्येति ॥ पौण्ड्रकस्य वधं द्रक्ष्ये । पश्चात् काशिपुर्याः दीपनं दाहं द्रक्ष्ये । दन्तवक्रस्य निधनं द्रक्ष्ये । महाक्रतौ युधिष्ठिरराजसूये चैद्यस्य शिशुपालस्य च निधनं द्रक्ष्ये ॥ २० ॥ यानीति ॥ भवान् द्वारकामावसन् सन् यानि प्रोक्तेभ्यो अन्यानि कविभिर्भुवि गेयानि वीर्याणि कर्त्ता करिष्यति तानि अहं द्रक्ष्यामि ॥ २१ ॥ अथेति ॥ अथ कालरूपस्य अर्जुनसारथेः अमुष्य भूभारस्य शेषे षष्ठी । भूभारं क्षपयिष्णोः अपजिहीर्षोस्ते तव अक्षौहिणीनां निधनं विनाशरूपं कर्म द्रक्ष्यामि ॥ २२ ॥ विशुद्धेति ॥ वयं भक्ताः विशुद्धं वृत्त्याद्युपाधिरहितं यत् विज्ञानं तदेव घनं सान्द्रीभूतम् अत एव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव चिच्छक्त्या निरतिशयानन्दरूपया सम्यगाप्ताः प्राप्ताः सर्वे अर्थाः कामा येन तममोघं वाञ्छितं यस्य तं स्वतेजसा चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो गुणप्रवाहः संसारो यस्मात्तं भगवन्तं त्वाम् ईमहि शरणं व्रजेम आर्षः ॥ २३ ॥

स्यमन्तकस्य च मणेरादानं सह भार्यया ॥ मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः ॥ १९ ॥ पौण्ड्रकस्य वधं पश्चात् काशिपुर्याश्च दीपनम् ॥ दन्तवक्रस्य निधनं चैद्यस्य च महाक्रतौ ॥ २० ॥ यानि चान्यानि वीर्याणि द्वारकामावसन् भवान् ॥ कर्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि ॥ २१ ॥ अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै ॥ अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥ २२ ॥ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवाञ्छितम् ॥ स्वतेजसा नित्यनिवृत्तमायया गुणप्रवाहं भगवन्तमीमहि ॥२३॥ त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनम् ॥ क्रीडार्थमद्याऽऽत्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्त्वताम् ॥ २४ ॥ श्रीशुक उवाच ॥ एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः ॥ प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः ॥ २५ ॥ भगवानपि गोविन्दो हत्वा केशिनमाहवे ॥ पशूनपालयत् पालैः प्रीतैर्व्रजसुखावहः ॥ २६ ॥ एकदा ते पशून् पालाश्चारयन्तोऽद्रिसानुषु ॥ चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः ॥ २७ ॥

त्वामिति ॥ ईश्वरम् अन्यस्य वशयितारं स्वाश्रयमन्यस्य अवशम् आत्मनः अधीनया मायया विनिर्मिता ये अशेषाः सर्वे विशेषाः महदादयस्तैः कल्पना देवादिसृष्टिर्येन तम् । अद्य क्रीडार्थमात्तः स्वीकृतो मनुष्यविग्रहो येन तम् अभ्यात्तेति वा पाठः । यदुवृष्णिसात्वतां धुर्यं श्रेष्ठं त्वामहं नतोऽस्मि ॥ २४ ॥ एवमिति ॥ तस्य कृष्णस्य दर्शनेनोत्सव आनन्दो यस्य स भागवतप्रवरो मुनिर्नारद एवं यदुपतिं कृष्णं प्रणिपत्य तेनाभ्यनुज्ञातो ययौ ॥ २५ ॥ भगवानिति ॥ व्रजजनस्य सुखमावहति स गोविन्दो भगवानपि आहवे युद्धे केशिनं हत्वा प्रीतैः पालैर्गोपैः सह पशून् गाः अपालयत् ॥ २६ ॥ अथ व्योमवधः सच बकवधोत्तरमेव कृतोपि वेषधारिप्रसङ्गादत्रोक्तः । अत एव नारदेन भावितया नोक्तः । किंचेयं लीला कौमारे एव शोभते अत एव वृषभयात्मजादिति गोप्युक्तिरपि सङ्गच्छते इति तोषणी । प्रातरेव केशिवधानन्तरं नारदोक्तमङ्गीकृत्य पुनस्तथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पशून्पालयता व्योमो हत इति समाधानान्तरं स्वामिपादाः प्राहुः । एकदेति ॥ एकदा बकवधोत्तरकाले ते रामकृष्णादयो गोपालाः अद्रेः गोवर्धनस्य सानुषु समप्रदेशेषु पशून् चारयन्तः चोरपालापदेशतः चोरपालव्याजेन निलीय चोरयित्वा स्थापनं यासु ता निलायनाख्याः क्रीडाश्चक्रुः । निलायनं चोरितवस्तुतिरोधापनम् अपदेशोऽभिनय इति चक्रवर्ती ॥ २७ ॥ तत्रेति ॥ हे नृप तत्र तेषु गोपेषु कतिचित् केचिच्चौरा आसन् कतिचित् रामकृष्णादयो मुख्याः पालाः स्वामिनः आसन् । एके च दुर्बला मेषायिताश्चासन् तत्र चौरा मेषायितांश्चोरयन्ति पालाश्च तान् विचिन्वते एवमकुतोभया निर्भयाः सन्तः सर्वे विजह्रुः ॥ २८ ॥ मयेति ॥ तदा च महामायो महामायस्य च मयस्य पुत्रो व्योमाख्योऽसुरो गोपालवेषधरः स्वयं प्रायशश्चोरायितः सन् मेषायितान् बहून् गोपान् अपोवाह अपकृष्य निनाय ॥ २९ ॥ गिरीति ॥ एवं स महासुरो निर्दयो व्योमो नीतं नीतं गोपं गिरेर्दर्यां गुहायां विनिक्षिप्य तस्या द्वारं शिलया पिदधे आच्छादितवान् । ततश्च मेषायिताः गोपाश्चत्वारः पञ्च वा चतुष्पञ्चाः वशेषिताः बहुव्रीहौ डच् । वष्टिभागु-

तत्रासन् कतिचिच्चौराः पालाश्च कतिचिन्नृप ॥ मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ॥ २८ ॥ मयपुत्रो महामायो व्योमो गोपालवेषधृक् ॥ मेषायितानपोवाह प्रायश्चोरायितो बहून् ॥ २९ ॥ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः ॥ शिलया पिदधे द्वारं चतुःपञ्चावशेषिताः ॥ ३० ॥ तस्य तत् कर्म विज्ञाय कृष्णः शरणदः सताम् ॥ गोपान् नयन्तं जग्राह वृकं हरिरिवौजसा ॥ ३१ ॥ स निजं रूपमास्थाय गिरीन्द्रसदृशं बली ॥ इच्छन् विमोक्तुमात्मानं नाशक्नोत् ग्रहणातुरः ॥ ३२ ॥ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले ॥ पश्यतां दिवि देवानां पशुमारममारयत् ॥ ३३ ॥ गुहापिधानं निर्भिद्य गोपान् निःसार्य कृच्छ्रतः ॥ स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ॥ ३४ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे व्योमासुरवधो नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

रिरित्यवस्य अकारलोपः । चतुष्पञ्चावशेषपर्यन्तं पालकगोपानामज्ञानं च स्वीयैरेव चोरायितगोपालैरपहृता इति भ्रमात् ॥ ३० ॥ तस्येति ॥ तस्य व्योमस्य तत् गोपपिधानरूपं कर्म विज्ञाय गोपान्नयन्तं तं व्योमं सतां निजभक्तानां शरणदः रक्षकः कृष्णः वृकं यथा हरिः सिंहः ओजसा बलेन गृह्णाति तथा जग्राह ॥ ३१ ॥ स इति ॥ तदा बली बलवानपि गोपरूपं विहाय गिरीन्द्रसदृशं पर्वतश्रेष्ठतुल्यं निजरूपमास्थाय स्वीकृत्यापि कृष्णकर्तृकग्रहणेन आतुरः स व्योम आत्मानं विमोक्तुं विमोचयितुमिच्छन्नपि मोचयितुं नाशक्नोत् ॥ ३२ ॥ तमिति ॥ अच्युतस्तं व्योमं दोर्भ्यां भुजाभ्यां निगृह्य भूतले पातयित्वा दिवि अन्तरिक्षे स्थितानां देवानां पश्यतां पशुमारं यज्ञियं पशुमिव श्वासं रुद्ध्वा मुष्टिभिरमारयत् । "उपमाने कर्मणि च" इति णमुल् । तस्यां क्रीडायां धृतचोरस्य क्षणं दण्डोऽप्यनुक्रियते तद्व्याजेनामारयत् । श्वासरोधनं च तेनानुच्छ्वासरोधनात् गोपानाम् ॥ ३३ ॥ गुहेति ॥ ततश्च भगवान् गुहायाः पिधानमाच्छादनशिलां निर्भिद्य कृच्छ्रतः तन्निरोधजात् कष्टात् गोपान्निःसार्य भुवि गोपैः दिवि सुरैश्च

CC-0. In Public Domain. Digitization by eGangotri

स्तूयमानः स्वगोकुलं प्रविवेश ॥ ३४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमसप्तत्रिंशे व्यधादिमाम् ॥ ३७ ॥ अष्टत्रिंशे पथि ध्यायन्नक्रूरो गोकुलं गतः ॥ सत्कृतो रामकृष्णाभ्यां तत्र श्लोकास्त्रिवेर्द्धयः ॥ उवाचद्वयमर्द्धाव्या द्विपञ्चाशर्द्दनुष्टुभः ॥ ३८ ॥ अक्रूर इति ॥ यस्यां रात्रौ कंसेन समादिष्टस्तामेकादशी-रात्रिं जागरणाद्यर्थं मधुपुर्यामेवोषित्वा महामतिः सोऽक्रूरोऽपि अकृतपारण एव प्रातःकाले रथमास्थाय नन्दस्य गोकुलं प्रति ययौ प्रतस्थे। इयं माघकृष्णद्वादशी फाल्गुनद्वादशी वा ॥ १ ॥ गच्छन्निति ॥ पथि गच्छन् अम्बुजेक्षणे भगवति परां भक्तिमुपगतः अत एव महाभागोऽक्रूरः एवं वक्ष्यमाणप्रकारेण एतद्वक्ष्यमाणमचिन्तयत् ॥ २ ॥ किमिति ॥ मया भद्रं यज्ञादि किमाचरितं किंवा परमं तपः व्रतोपवासादि तप्तं कृतम् वा अथवा किम् अर्हते पूज्याय पात्राय दत्तं यद्यस्मादद्य केशवं द्रक्ष्यामि ॥ ३ ॥ ममेति ॥ यथा शूद्राज्जन्म यस्य तस्य जनस्य ब्रह्मणो वेदस्य कीर्तनं दुर्लभं तथा एतदुत्तमश्लोकस्य हरेः दर्शनं विषयात्मनो विषयाविष्टचित्तस्य मम शेषे षष्ठी।

श्रीशुक उवाच ॥ अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः ॥ उषित्वा रथमास्थाय प्रययौ नन्दगोकुलम् ॥ १ ॥ गच्छन् पथि महाभागो भगवत्यम्बुजेक्षणे ॥ भक्तिं परामुपगत एवमेतदचिन्तयत् ॥ २ ॥ किं मयाचरितं भद्रं किं तप्तं परमं तपः ॥ किं वाऽथाऽप्यर्हते दत्तं यद् द्रक्ष्याम्यद्य केशवम् ॥ ३ ॥ ममैतत् दुर्लभं मन्य उत्तमश्लोकदर्शनम् ॥ विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ॥ ४ ॥ मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनम् ॥ ह्रियमाणः कालनद्या क्वचित् तरति कश्चन ॥ ५ ॥ ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः ॥ यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम् ॥ ६ ॥ कंसो बताद्याऽकृत मेऽत्यनुग्रहं द्रक्ष्येऽङ्घ्रिपद्मं प्रहितोऽमुना हरेः ॥ कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन् यन्नखमण्डलत्विषा ॥७॥ यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्त्वतैः ॥ गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुचकुङ्कुमाङ्कितम् ॥८॥

दुर्लभं मन्ये ॥ ४ ॥ मैवमिति ॥ दर्शनं न स्यादिति न किं त्वधमस्य विषयाविष्टचित्तत्वेन नीचस्यानधिकारिणोऽपि ममाच्युतस्य दर्शनं स्यादेव। यथा नद्या ह्रियमाणानां तृणादीनां किंचित्कदाचित्तरति कूलं प्राप्नोति तथा कर्मवशेन कालेन ह्रियमाणानां जीवानां मध्ये ह्रियमाणोऽपि कश्चित्तरेदिति ममापि संसारसागरतरणं संभवति ॥ ५ ॥ ममेति ॥ अद्य ममामङ्गलं संसारदुःखकारणं पापं नष्टम्। अयं च मे मम भवो जन्म फलवान् परमफलमोक्षवान् यत् यस्मात् योगिभिरपि केवलं ध्येयमेव नतु दृश्यं भगवतोऽङ्घ्रिपङ्कजं नमस्ये नमस्करिष्यामि। तदार्षः ॥ ६ ॥ कंस इति ॥ बतेत्याश्चर्यं भगवद्भक्तद्रोह्यपि कंसोऽद्य मे ममात्यनुग्रहमकृत कृतवान्। यत् यस्मात् यस्य चरणकमलस्य नखमण्डलस्य त्विषा नखसमूहकान्त्या हृदि ध्यायमानया पूर्वे ध्यातारोम्बरीषादयः दुरत्ययं तमः दुस्तरं संसारमतरन् तत्कृतावतारस्य हरेरङ्घ्रिपद्ममुना कंसेन प्रहितः प्रस्थापितोऽहं द्रक्ष्ये। तदार्षः ॥७॥ यदिति ॥ यच्चरणकमलं ब्रह्मभवादिभिः सुरैः अर्चितमिति परमैश्वर्यम्। "मतिबुद्धि" इति वर्त्तमाने क्तः। सुरैरिति षष्ठ्यभाव आर्षः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रिया देव्या इति सौभाग्यातिशयः सात्वतैर्भक्तसहितैर्मुनिभिः अर्चितम् इति परमपुरुषार्थता । यच्च अनुचरैः सखिभिः सह गोचारणाय वनेऽचरत् इति कृपालुता । "यद्गोपिकानां कुचकुङ्कुमाङ्कितम्" इति प्रेममात्रसुलभम् । तच्चरणकमलं द्रक्ष्ये । इदं च नारदादिमुखाद्रासादि श्रुत्वा प्रेम्णा चिन्तितमिति न दासभावविरोधः । बालकृष्णमुरस्याधाय लालयन्तीनां गोपीनामिति वार्थः ॥ ८ ॥ द्रक्ष्यामीति ॥ वै प्रसिद्धौ । यतो मृगा मे मम प्रदक्षिणं यथा भवति तथा प्रचरन्ति गच्छन्ति ततो नूनं निश्चितं नात्र संदेहः । "प्रदक्षिणगताः श्रेष्ठा यात्रायां मृगपक्षिणः ।" इत्युक्तेः । शोभनौ कपोलौ तथाभूता नासिका च यस्मिंस्तत् स्मितसहितः अवलोकश्च यस्मिन् अरुणे कञ्जे इव लोचने यस्मिंस्तच्च तच्च गुडालकैर्वक्रकेशैर्वृतं मुकुन्दस्य मुखं द्रक्ष्यामि ॥ ९ ॥ अप्यद्येति ॥ भुवो भारावताराय निजेच्छया मनुजत्वमीयुषो मनुष्यनाट्यं स्वीकृतवतो लावण्यस्य सौन्दर्यातिशयस्य धाम्नः आश्रयस्य विष्णोः यद्वा विष्णोर्लावण्ययुक्तं यद्धाम वपुस्तस्य अपि यदि अद्य उपलम्भनं दर्शनं भविता भविष्यति तर्हि मह्यं मम दृशो लोचनस्य फलं न स्यादिति न अपि तु स्यादेव ॥ १० ॥ अथ श्रीकृष्णस्य परमेश्वरत्वं त्रिभिः प्रतिपादयति—य इति ॥ यः असत्सतोः कार्यकारणयोः

द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकञ्जलोचनम् ॥ मुखं मुकुन्दस्य गुडालकावृतं प्रदक्षिणं मे प्रचरन्ति वै मृगाः ॥ ९ ॥ अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया ॥ लावण्यधाम्नो भवितोपलम्भनं मह्यं न न स्यात् फलमञ्जसा दृशः ॥१०॥ य ईक्षिताऽहंरहितोऽप्यसत्सतोः स्वतेजसापास्ततमोभिदाभ्रमः ॥ स्वमाययाऽऽत्मन् रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ॥ ११ ॥ यस्याखिलाऽमीवहभिः सुमङ्गलैर्वाचो विमिश्रा गुणकर्मजन्मभिः ॥ प्राणन्ति शुम्भन्ति पुनन्ति वै जगद् यास्तद्विरक्ता शवशोभना मताः ॥ १२ ॥

ईक्षिता ईक्षणमात्रेण कर्तापि अहंरहितः तत्राहंममाभिमानरहितः स्वतेजसा चिच्छक्त्या सच्चिदानन्दस्वरूपप्रकाशेनैवापास्ताः तमोभिदा भ्रमा येन सः तमः मूलाविद्याद्यं स्वरूपाज्ञानं भिदा तत्कृतो भेदः भ्रमः अनात्मन्यात्मबुद्धिः एवंभूतोऽपि सदनेषु वृन्दावनतरुषु गोपीगृहेषु च विहरंस्तदीक्षया तेषां जीवानां दृष्ट्या स्वमायया आत्मन् आत्मनि स्वस्मिन् रचितैः प्रकाशितैः प्राणाक्षधीभिर्युक्तोस्मदादिवदभीयते प्रतीयते । अत्रार्थे रचितैरिति सामान्ये नपुंसकमार्षं वा । यद्वा । एवंभूतोऽपि स्वाधीनया मायया तदीक्षया तस्यैव ईक्षया प्राणाक्षधीभिः सहितैः आत्मन् आत्मनि स्वस्मिन्नेव रचितैः जीवैः सदनेषु गोपीगृहादिषु लीलया कर्माणि कुर्वन् सक्तवत् अभीयते प्रतीयते । यद्वा । स्वीयया आत्मनि जीवेऽधिकरणे रचिताः सृष्टा याः प्राणेन्द्रियधियस्ताभिस्तासां स्रष्टा सः अभीयते अनुमीयते । तथा तदीक्षया तासां प्राणादीनामीक्षया प्रकाशेन तासां प्रकाशकः सः सदनेषु समष्टिव्यष्टिदेहेषु इति वा सर्वभूतहृदयेषु वा अनुमीयते ॥ ११ ॥ यस्येति ॥ अखिलानि अखिलानां वा अमीवानि पापानि घ्नन्ति तैः अखिलामीवहभिः सुमङ्गलैः यस्य भगवतो गुणैर्दयाद्यैः कर्मभिर्गोवर्द्धनोद्धरणादिभिः जन्मभिरवतारैः विमिश्रा युक्तास्तत्प्रतिपादिका वाचो जगत् वक्तृश्रोत्रादि प्राणिमात्रं प्राणन्ति जीवयन्ति

CC-0. In Public Domain. Digitization by eGangotri

सफलजीवनं कुर्वन्ति शुम्भन्ति सज्जनसभासु शोभयन्ति पुनन्ति पवित्रयन्ति । या वाचः तैर्भगवद्गुणादिभिर्विरिक्ताः शून्यास्तत्प्रतिपादनरहिताः विरक्ता इति वा पाठः । तास्तु विचित्रैः पदैः रागादिभिश्च स्वलङ्कृता अपि वस्त्राद्यलङ्कृतशववच्छोभमाना मताः संमताः यथा शवः व्यर्थः अशोभनः अपवित्रश्च तद्वत्ता इति ॥ १२ ॥ स इति ॥ स्वान् स्वयं रचितान् सेतून् वर्णाश्रमधर्मान् पालयतानमरवर्याणां शर्मकृत् यशः वितन्वन् स ईश्वरः सात्वतान्वये यादवकुले श्रीकृष्णरूपेणावतीर्णः सन् व्रजे आस्ते । अशेषाणां सर्वेषां श्रोत्रादीनां मङ्गलं वाञ्छितं फलं यस्मात्तत् यद्यशो देवा गायन्ति ॥ १३ ॥ तमिति ॥ त्रैलोक्ये एकमेव कान्तं सुन्दरं दृशिमतां चक्षुष्मतां महान् उत्सवो यस्मात्तत् महोत्सवरूपं वा श्रियो लक्ष्म्या ईप्सितमास्पदमाश्रयभूतं रूपं दधानं त्रैलोक्येत्यादिरूपविशेषणम् । महतां साधूनां गतिं प्राप्य गुरुं तं भगवन्तमद्य नूनं द्रक्ष्ये तङर्षः । यतः उषसः प्रभातसमयाः पुंस्त्वमार्षम् । मम सुदर्शनाः शुभसूचका आसन् ॥१४॥ अथेति ॥ अथ दर्शनानन्तरं सपदि झटित्येव रथादवरूढः अवतीर्णोऽहं स्वलब्धये स्वरूपज्ञानप्राप्तये योगिभिरपि धिया धृतं चिन्तितं नतु साक्षाद्दृष्टम् ईशयोः प्रधानयोः पुंसोः पुरुषोत्तमयोः रामकृष्णयोश्चरणं तथा आभ्यां सह अनयोः सखीन् वनौकसो

स चावतीर्णः किल सात्त्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् ॥ यशो वितन्वन् व्रज आस्त ईश्वरो गायन्ति देवा यदशेषमङ्गलम् ॥ १३ ॥ तं

त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकान्तं दृशिमन्महोत्सवम् ॥ रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममाऽऽसन्नुषसः सुदर्शनाः ॥ १४ ॥

अथावरूढः सपदीशयो रथात् प्रधानपुंसोश्चरणं स्वलब्धये ॥ धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन् वनौकसः ॥ १५ ॥

अप्यङ्घ्रिमूले पतितस्य मे विभुः शिरस्यऽधास्यन्निजहस्तपङ्कजम् ॥ दत्ताभयं कालभुजङ्गरंहसा प्रोद्वेजितानां शरणैषिणां नृणाम् ॥ १६ ॥

समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेन्द्रताम् ॥ यद्वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगन्धिकगन्ध्यपानुदत् ॥ १७ ॥

व्रजवासिनश्च ध्रुवं निश्चितं नमस्ये नमस्कारं करिष्यामि । वर्तमानसामीप्ये लट् तङार्षः ॥ १५ ॥ अपीति ॥ स्वाङ्घ्रिमूले पतितस्य मे शिरसि विभुर्हरिः काल एव भुजगः अजगरस्तस्य रंहसा वेगेन प्रोद्वेजितानामत्यन्तभीतानाम् अत एव शरणैषिणां स्वरक्षकत्वेनाङ्गीकृतानां नृणां दत्तमभयं येन तादृशं निजहस्तपङ्कजम् अधास्यत् धास्यति लृङर्षः ॥ १६ ॥ हस्तपङ्कजं विशिनष्टि—समर्हणमिति ॥ कौशिकः कौशिकगोत्रः कश्चित् इन्द्रः तथा बलिर्वैरोचनिश्च पदत्रयपरिमितभूतलदानसमये यत्र यस्मिन् हस्तकमले अर्हणं जलमात्रं निधाय समर्प्य जगत्त्रयेन्द्रतामवाप । अत्र कौशिक इन्द्रतामवाप बलिस्त्ववाप्स्यति यौगपद्योक्त्यात्र द्वयोः भूतनिर्देशः कौशिकेन किंचित्कदाचिद्भगवद्धस्ते दत्तं येनेन्द्रत्वं लब्धमिति पुराणान्तरात् ज्ञेयम् । सार्वभौमावतारे पुरन्दरेण भगवतो हस्ते उदकं दत्तमिति चक्रवर्ती । यच्च हस्तपङ्कजं वा आश्चर्ये वितर्के वा सौगन्धिकस्य कमलविशेषस्य गन्ध इव गन्धो यस्य तथाभूतं यत् विहारे रासक्रीडायां व्रजयोषितां विहारजं श्रमं स्पर्शेनापानुदत् दूरीचकार तासां रतिविहारेण श्रान्तानां वदनानि सः प्रामृजत्करुणः प्रेम्णा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शन्तमेनाङ्गपाणिना इति प्रागुक्तेः । तेन यथा तस्या पादपङ्कजं ब्रह्माद्यर्चितमपि गोपीकुचोच्छिष्टकुङ्कुमधारकमुक्तं तथा हस्तपङ्कजमिन्द्राद्यर्हितमपि तासां श्रमाम्बुमार्जकमित्यहो गोपीनां सौभाग्यम् इति ध्वनिः ॥ १७ ॥ नेति ॥ यद्यप्यहं कंसेन प्रहितः प्रेषितस्तथाप्यच्युतः श्रीकृष्णो मयि अयं कंसस्य दूतः कार्यसाधकः इत्यरिबुद्धिं नोपैष्यति न करिष्यति इत्यर्थः । यतो विश्वदृक् सर्वसाक्षी यः क्षेत्रज्ञः साक्षी अमलेन यथार्थग्रहणसमर्थेन चक्षुषा चिच्छक्त्या चेतसोन्तर्बहिश्च स्थितस्य प्राणिजातस्येहितं चेष्टितमीक्षति । ईक्षते तङ्भाव आर्षः ॥ १८ ॥ अप्यीति ॥ अतोऽपि यदिअङ्घ्रिमूले चरणोपान्ते अवहितं संयतं कृताञ्जलिं मां सस्मितं यथा भवति तथा कृपामृतेनार्द्रया दृशा दृष्ट्या ईक्षिता द्रक्ष्यति तर्हि सपदि तत्क्षण एवापध्वस्तं विनष्टं समस्तं किल्बिषं यस्य वीता निवृत्ता पुनर्जन्मादिशङ्का यस्य तथाभूतश्च सन्नहमूर्जितां प्रवृद्धां मुदं वोढा प्राप्तिशीलः तृन्नन्तम् भविष्यामि वोढा प्राप्स्यामीति वदतां स्वाम्यादीनामपि तृन्नन्त एव तात्पर्यम् नतु लुटि उत्तमपुरुषे वोढास्मीत्यापत्तेः ॥ १९ ॥ सुहृत्तममिति ॥ अथानन्तरं सुहृत्तममतिशयेन सुष्ठु हृदयं ज्ञातिं पितृव्यं न विद्यते यस्मात् अन्यद्दैवतं यस्य तमनन्यभक्तं च मां हरिः यदि बृहद्भ्यां दोर्भ्यां भुजाभ्यां मां परिरप्स्यते आलिङ्गिष्यति

न मय्युपैष्यत्यरिबुद्धिमच्युतः कंसस्य दूतः प्रहितोऽपि विश्वदृक् ॥ योऽन्तर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥ १८ ॥ अप्यङ्घ्रिमूलेऽवहितं कृताञ्जलिं मामीक्षिता सस्मितमार्द्रया दृशा ॥ सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशङ्क ऊर्जिताम् ॥१९॥ सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ माम् ॥ आत्मा हि तीर्थीक्रियते तदैव मे बन्धश्च कर्मात्मक उच्छ्वसित्यतः ॥ २० ॥ लब्धाङ्गसङ्गं प्रणतं कृताञ्जलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः ॥ तदा वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥ २१ ॥ न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा ॥ तथाऽपि भक्तान् भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २२ ॥

तदैव मे ममात्मान्तःकरणविशिष्टो जीवस्तीर्थीक्रियते । स्वयं पवित्रोऽन्यपवित्रीकरश्च करिष्यते अतः अस्माद् आलिङ्गनाद्धेतोः अतो देहाद्वा कर्मात्मको बन्धश्च उच्छ्वसिति शिथिलीभविष्यति ॥ २० ॥ लब्धेति ॥ यदा उरुश्रवाः महायशाः श्रीकृष्णः लब्धोङ्गसङ्गः परिरम्भो येन तं प्रणतं कृताञ्जलिं च मां हे अक्रूर हे ततेति तातेति च वक्ष्यते प्रेम्णा सम्बोधयिष्यति तदा वयं जन्मभृतः सफलजन्मानो भविष्यामः । स्वकुटुम्बाभिप्रायेण बहुवचनम् । यस्तु पुमान् महीयसा सर्वपूज्येन भगवता नैवादृतः स्वकीयत्वेन न गृहीतः अमुष्य पुंसः तज्जन्म धिक् निन्द्यमित्यर्थः ॥ २१ ॥ नेति ॥ यद्यपि तस्य कश्चिदपि दयितः प्रियः सुहृत्तमः हितकृत् नास्ति नच अप्रियः प्रीत्यविषयः द्वेष्यः द्वेषविषयः उपेक्ष्यश्च नैव अस्ति तथापि ये भक्तास्तं यथा भजन्ते तान्भक्तान् सोऽपि तथैव भजतेऽतो न वैषम्यमित्यन्वयः । तत्र दृष्टान्तमाह । सुरद्रुमः कल्पतरुः यद्वत् यथा उपाश्रितो भजतामेवार्थदः फलप्रदो भवति न सर्वेषां न ह्येतावता तस्य वैषम्यं भवति तद्वदित्यर्थः ॥ २२ ॥

CC-0. In Public Domain. Digitization by eGangotri

किञ्चेति ॥ यदूत्तमः अग्रजो रामः स्मयन् हसन् शता आर्षः । अवनतं कृतप्रणामं मां परिष्वज्य तदा यो मयाञ्जलिः करिष्यते तस्मिन्नेव गृहीतं मां गृहं प्रवेश्य तत्राप्तानि लब्धानि समस्तानि सत्कृतानि अर्घ्यादीनि येन तं मां प्रति स्वबन्धुषु कंसकृतमपकारादिकं संप्रक्ष्यते तङार्षः ॥ २३ ॥ इतीति ॥ हे नृप इत्येवं श्वफलकतनयोऽक्रूरः अध्वनि मार्गे कृष्णमेवानुचिन्तयन् रथेन गोकुलं प्राप्तः सूर्यश्चास्तंगिरिं प्राप्तः । यद्यपि प्रातः मथुरातः क्रोशत्रयमेव गोकुलं व्रजतः शीघ्रमागमनं युक्तं तथापि मनोरथमग्नः सतु मार्गमपि न वेदेति शनैरेवाजगामेति ॥ २४ ॥ पदानीति ॥ तत्र च गोष्ठे क्षितेः कौतुकानि अलङ्काररूपाणि अब्जयवाङ्कुशाद्यैः रेखाकारैः विलक्षितानि अङ्कितानि अखिलैर्लोकपालैः किरीटेषु जुष्टाः सेविताः अमलाः पादरेणवो यस्य तस्य भगवतः संबन्धीनि पदानि ददर्श ॥ २५ ॥ तदिति ॥ तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः संभ्रमो व्याकुलत्वं यस्य सः तथा प्रेम्णा ऊर्ध्वानि उदश्वितानि रोमाणि यस्य सः तथा अश्रूणां हर्षजानां कलाभिर्लेशैराकुले ईक्षणे यस्य सोऽक्रूरः अश्रूणां कलनमतिक्षरणं

किं चाऽग्रजो माऽवनतं यदूत्तमः स्मयन् परिष्वज्य गृहीतमञ्जलौ ॥ गृहं प्रवेश्याप्तसमस्तसत्कृतं सम्प्रक्ष्यते कंसकृतं स्वबन्धुषु ॥ २३ ॥ श्रीशुक उवाच ॥ इति सञ्चिन्तयन् कृष्णं श्वफल्कतनयोऽध्वनि ॥ रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ॥ २४ ॥ पदानि तस्याखिललोकपालकिरीटजुष्टामलपादरेणोः ॥ ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यऽब्जयवाङ्कुशाद्यैः ॥ २५ ॥ तद्दर्शनाह्लादविवृद्धसम्भ्रमः प्रेम्णोर्ध्वरोमाऽश्रुकलाकुलेक्षणः ॥ रथादवस्कन्द्य स तेष्वचेष्टत प्रभोरमून्यङ्घ्रिरजांस्यहो इति ॥ २६ ॥ देहंभृतामियानर्थो हित्वा दम्भं भियं शुचम् ॥ सन्देशाद्यो हरेर्लिङ्गदर्शनश्रवणादिभिः ॥ २७ ॥ ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ ॥ पीतनीलाम्बरधरौ शरदम्बुरुहेक्षणौ ॥ २८ ॥

कलिवली कामधेनू इति चक्रवर्ती । अहो इति दुर्लभतां द्योतयति । ब्रह्मादीनामपि दुर्लभानि अमूनि प्रभोः कृष्णस्याङ्घ्रिरजांसीति विभावयन् रथादवस्कन्द्य अवप्लुत्य तेषु पादरजस्सु अचेष्टत व्यलुठत् ॥ २६ ॥ देहमिति ॥ कंसस्य संदेशादनन्तरं हरेर्लिङ्गानां मूर्तीनां दर्शनं गुणानां श्रवणमादिपदेन कीर्तनस्मरणादिग्रहणं तैः गोपालस्य पदधूलौ कथं लुठामीति दम्भं तेन लोठनेन कंसाद्भयं कुपितकंसकृतानिष्टेषु शुचं च हित्वा योऽयमक्रूरस्य भगवच्चरणाङ्करेणुषु लुठनादिभक्तिप्रकर्षो जातः देहंभृतां जीवानां इयान् एव अर्थः पुरुषार्थः । देहमिति द्वितीया आर्षी तदर्हमिति निर्देशात्षष्ठी अनित्या वा । दम्भं भियं शुचमिति सर्वजीवसाधारण्येन वा योज्यम् । यद्वा । सन्देश आद्यो यस्य सः यावान् अर्थोऽक्रूरस्य जातः ॥ २७ ॥ ददर्शेति ॥ अक्रूरः रामं कृष्णं च ददर्श तौ विशिनष्टि षड्भिः गावो दुह्यन्तेऽस्मिन्निति गोदोहनं दोहस्थानं गतौ प्राप्तौ पीताम्बरधरः कृष्णः नीलाम्बरधरः रामः शरत्कालिकाम्बुरुहे इवेक्षणे ययोस्तौ ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किशोरौ श्यामलश्वेतौ क्रमेण तद्वर्णौ श्रियो लक्ष्म्याः शोभायाश्च निकेतौ आश्रयभूतौ बृहद्भुजौ पीनवर्तुलदीर्घभुजयुक्तौ सुमुखौ सुन्दरेषु वरौ बालो द्विरदो गजस्तद्वद्विक्रमो गतिर्ययोस्तौ ॥ २९ ॥ ध्वजवज्राङ्कुशाम्भोजैस्तद्रेखाभिश्चिह्नितैरङ्घ्रिभिर्व्रजं शोभयन्तौ महात्मानौ सुस्वभावौ अनुक्रोशोनुकम्पा तद्विलसितस्मितयुक्तमीक्षणं ययोस्तौ ॥ ३० ॥ उदाराः श्रेष्ठाः रुचिराः मनोहराः क्रीडा ययोस्तौ स्नातौ स्रग्विणौ रत्नादिमालाधरौ वनमालिनौ पुष्पमालाधरौ पुण्यः सुष्ठु गन्धो यस्य तेन चन्दनेनानुलिप्तानि अङ्गानि ययोस्तौ विरजे निर्मले वाससी ययोस्तौ ॥ अदन्तोऽपि रजशब्द इति तोषणी ॥ ३१ ॥ प्रधानपुरुषौ पुरुषोत्तमौ प्रकृतिपुरुषात्मकौ वा आद्यौ जगतो हेतू जगतः पती अतो जगत्यर्थे जगत्पालनार्थं स्वांशेन मूर्तिभेदेनावतीर्णौ ॥ ३२ ॥ हे राजन् यथा कनकाचितौ सुवर्णेन व्याप्तौ इति सालङ्कारयोः शैलसादृश्यार्थमुक्तम् । मारकत इन्द्रनीलपर्वतः तथाभूतो रौप्यपर्वत इति तथा स्वया प्रभया दिशो विगततिमिराः कुर्वाणौ बलकेशवौ ददर्शेत्यनुषङ्गः ॥ ३३ ॥ रथादिति ॥ तदा स्नेहेन विह्वलः स्वपितृव्यत्वानुसन्धानशून्यः सोऽ-

किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ॥ सुमुखौ सुन्दरवरौ बालद्विरदविक्रमौ ॥ २९ ॥ ध्वजवज्राङ्कुशाम्भोजैश्चिह्नितैरङ्घ्रिभिर्व्रजम् ॥ शोभयन्तौ महात्मानौ सानुक्रोशस्मितेक्षणौ ॥ ३० ॥ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ॥ पुण्यगन्धानुलिप्ताङ्गौ स्नातौ विरजवाससौ ॥ ३१ ॥ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ॥ अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥ ३२ ॥ दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया ॥ यथा मारकतः शैलो रौप्यश्च कनकाचितौ ॥ ३३ ॥ रथात् तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः ॥ पपात चरणोपान्ते दण्डवद्रामकृष्णयोः ॥ ३४ ॥ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः ॥ पुलकाचिताङ्ग औत्कण्ठ्यात्स्वाख्याने नाशकन्नृप ॥ ३५ ॥ भगवांस्तमभिप्रेत्य रथाङ्गाङ्कितपाणिना ॥ परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३६ ॥

क्रूरः तूर्णं शीघ्रमेव रथादवप्लुत्य रामकृष्णयोश्चरणोपान्ते दण्डवत्पपात ॥ ३४ ॥ भगवदिति ॥ हे नृप भगवद्दर्शनेन यः आह्लादस्तेन यद्बाष्पं तेन परितः आकुले ईक्षणे यस्य सः पुलकैरुत्थितरोमभिराचितं व्याप्तमङ्गं यस्य सः अक्रूरः औत्कण्ठ्यात् बाष्पेन कण्ठनिरोधात् स्वाख्याने अक्रूरोऽहं नमस्करोमीति कथनेऽपि नाशकत् न प्रबभूव । किं पुनरष्टाङ्गत्वसम्पादने ॥ ३५ ॥ भगवानिति ॥ प्रणतवत्सलः भगवान् तमभिप्रेत्य अक्रूरोऽस्मदानयनार्थमागत इति ज्ञात्वा प्रीतः सन् कंसहननसामर्थ्यं द्योतयन् रथाङ्गेन चक्रेणाङ्कितस्तत्किणयुक्तो यः पाणिस्तेन तमभ्युपाकृष्य संमुखं समीपमाकृष्य परिरेभे आलिङ्गितवान् नतु पितृव्यव्यवहारेण नमस्कृतवान् । अक्रूरस्य दास्यभावाभिलाषित्वात् । " ये यथा मां प्रपद्यन्ते " इति गीतोक्तेः ॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri

संकर्षण इति ॥ ततः सङ्कर्षणोऽपि प्रणतं कृतप्रणतिमक्रूरमुपगुह्याश्लिष्य महामनाः हृष्टमनाः स्वपाणिना तस्य पाणीअञ्जलिरूपेण संहतौ हस्तौ गृहीत्वा गृहीतमञ्जलाविति तथैव तन्मनोरथात् सानुजः कृष्णेन सहितो गृहमनयत् ॥ ३७ ॥ पृष्ट्वेति ॥ अथ ततः स्वागतं पृष्ट्वा तस्मै अक्रूराय वरं श्रेष्ठमासनं निवेद्य समर्प्य यथाविधि पादौ प्रक्षाल्य मधुपर्कमेवार्हणं मधुपर्के उचितमर्हणं वाहरत् आनीय समर्पितवान् ॥ ३८ ॥ निवेद्येति ॥ ततश्च आदृतः आदरयुक्तो विभुः रामः अतिथये तस्मै अक्रूराय गां समर्प्य गवोपस्थानमेको मङ्गलोपचार इति मधुपर्काङ्गभूतां गामाचारप्राप्तां दर्शयित्वा वा ततश्च अक्रूरेण उत्सृजत यत्तृणान्यत्तु इति तस्या उत्सर्जनेऽनुज्ञाते श्रान्तं तं संवाह्य पाद-संवाहनादिना तच्छ्रममपनीय मेध्यं विशुद्धं द्वादशीपारणविहितम् । "न रात्रौ पारणं कुर्यात्" इति नियमातिक्रमस्तु कृष्णगृहान्नप्राप्तिलोभात् बहुगुणोपेतं षड्रसयुक्तमन्नं श्रद्धयोपाहरत् समर्पयामास ॥ ३९ ॥ तस्मै इति ॥ भुक्तवते कृतभोजनाय तस्मै अक्रूराय परमधर्ममतिथिपूजनादि वेत्ति स रामः प्रीत्या मुखवासैः कर्पूरताम्बूलादिभिः

सङ्कर्षणश्च प्रणतमुपगुह्य महामनाः ॥ गृहीत्वा पाणिना पाणी अनयत् सानुजो गृहम् ॥ ३७ ॥ पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनम् ॥ प्रक्षाल्य विधिवत् पादौ मधुपर्कार्हणमाहरत् ॥ ३८ ॥ निवेद्य गां चातिथये संवाह्य श्रान्तमादृतः ॥ अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ॥ ३९ ॥ तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् ॥ मुखवासैर्गन्धमाल्यैः परां प्रीतिं व्यधात् पुनः ॥ ४० ॥ पप्रच्छ सत्कृतं नन्दः कथं स्थ निरनुग्रहे ॥ कंसे जीवति दाशार्ह सौनपाला इवावयः ॥ ४० ॥ योऽवधीत् स्वस्वसुस्तोकान् क्रोशन्त्या असुतृप् खलः ॥ किं नु स्वित् तत्प्रजानां वः कुशलं विमृशामहे ॥ ४२ ॥ इत्थं सूनृतया वाचा नन्देन सुसभाजितः ॥ अक्रूरः परिपृष्टेन जहावध्वपरिश्रमम् ॥ ४३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे अक्रूरागमनं नामाऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥

गन्धमाल्यैश्च पुनः परां निर्वृतिं तदागमनजन्यं सुखं मत्वा प्रीतिं व्यधात् उदपादयत् । इदं द्वादश्यां वृत्तम् । चतुर्दश्यां कंसमारणात् ॥ ४० ॥ पप्रच्छेति ॥ सत्कृतमक्रूरं नन्दः पप्रच्छ । हे दाशार्ह निरनुग्रहे अतिक्रूरे कंसे जीवति सति सौनपालाः सौनः पशुघाती पालो येषां तादृशा अवयः मेषा इव यूयं कथं केन प्रकारेण स्थ जीवथ यथा सौनसन्निधाववीनां जीवनं दुर्घटं तथा कंसनिकटे भवताम् । अतो न जाने कस्मिंश्चन दिने युष्मान् स हन्यात् इति भयम् ॥ ४१ ॥ य इति ॥ असुतृप् स्वप्राणमात्रतर्पकः यः खलः कंसः क्रोशन्त्या रुदत्याः स्वस्य स्वसुर्भगिन्यास्तोकान् तोकानि अपत्यानि अवधीत् तस्य प्रजानां वो युष्माकं तावज्जीवनमेव दुर्लभं कुशलं सुखं तु किंस्वि-द्विमृशामहे विचारयाम तङ्गार्षः । हे इति संबोधने पृथक्पदं वा ॥ ४२ ॥ इत्थमिति ॥ प्रथमं कुशलं परिपृष्टेन नन्देनेत्थं सूनृतया मधुरया वाचा पृष्टः सुसभाजितः सत्कृत-श्चाक्रूरः अध्वपरिश्रमं जहौ ॥ ४३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याष्टत्रिंशे व्यधादिमाम् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवत्रिंशेऽरुदन् गोप्योऽथाक्रूरो यमुनाजले ॥ ददर्श वैकुण्ठमत्र श्लोकाः सार्द्धा नगेषवः ॥ उवाचपञ्चैकं सार्द्धाश्चतुःषष्टिरनुष्टुभः ॥ ३९ ॥ सुखेति ॥ एवं पृष्ट्वा नन्देन्तर्गृहं गते सति रामकृष्णाभ्यामुरु अधिकं यथा तथा मानितः अत एव सुखं यथा स्यात्तथा पर्यङ्के उपविष्टः सोऽक्रूरो यान्मनोरथान् पथि चकार तान्सर्वान् लेभे ॥१॥ किमिति ॥ हे राजन् श्रीनिकेतने भगवति प्रसन्ने सति किमलभ्यं तथापि तत्पराः तद्भक्ताः किंचनापि न हि वाञ्छन्ति ॥२॥ सायंतनेति ॥ देवकीसुतो भगवान् कृष्णः सायन्तनाशनं सायं-कालोचितं भोजनं कृत्वा स्वसुहृत्सु वसुदेवादिषु कंसस्य वृत्तं वर्तनप्रकारम् । अन्यच्च याच्चिकीर्षितं तत्पप्रच्छ ॥ ३ ॥ तातेति ॥ हे तात हे सौम्य कच्चिदिति परिप्रश्ने । स्वागतं निर्विघ्नमागमनं यथा तथा त्वमागतः कच्चित् तदस्मदिष्टं वो युष्माकं भद्रमस्तु सदा स्वीयानामात्मीयानां सुहृदां ज्ञातीनां सपिण्डानां बन्धूनामसपिण्डानां सम्बन्धिनां च अपि किमनमीवं दुष्टकंसकृतपापाचरणराहित्यं तथा अनामयमारोग्यमस्ति ॥ ४ ॥ किं न्विति ॥ अङ्ग हे अक्रूर मातुलनाम्नि नाममात्रेण मातुले वस्तुतस्तु नोऽस्माकं कुलस्यामये

श्रीशुक उवाच ॥ सुखोपविष्टः पर्यङ्के रामकृष्णोरुमानितः ॥ लेभे मनोरथान् सर्वान् पथि यान् स चकार ह ॥ १ ॥ किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने ॥ तथाऽपि तत्परा राजन् न हि वाञ्छन्ति किञ्चन ॥ २ ॥ सायन्तनाशनं कृत्वा भगवान् देवकीसुतः ॥ सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥३॥ श्रीभगवानुवाच ॥ तात सौम्यागतः कच्चित् स्वागतं भद्रमस्तु वः ॥ अपि स्वज्ञातिबन्धूनामनमीवमनामयम् ॥४॥ किं नु नः कुशलं पृच्छे एधमाने कुलामये ॥ कंसे मातुलनाम्न्यङ्ग स्वानां नस्तत्प्रजासु च ॥ ५ ॥ अहो अस्मदभूत् भूरि पित्रोर्वृजिनमार्ययोः ॥ यद्धेतोः पुत्रमरणं यद्धेतोर्बन्धनं तयोः ॥ ६ ॥ दिष्ट्याऽद्य दर्शनं स्वानां मह्यं वः सौम्य काङ्क्षितम् ॥ सञ्जातं वर्ण्यतां तात तवागमनकारणम् ॥ ७ ॥ श्रीशुक उवाच ॥ पृष्टो भगवता सर्वं वर्णयामास माधवः ॥ वैरानुबन्धं यदुषु वसुदेववधोद्यमम् ॥ ८ ॥

रोगतुल्ये कंसे एधमाने सति नोऽस्माकं स्वानां ज्ञातीनां तत्प्रजासु च किं नु कुशलं पृच्छे । तङार्षः ॥ ५ ॥ अहो इति ॥ अहो खेदे । अस्मत् अस्मत्तो निमित्तात् आर्ययोः पूज्ययोः निरपराधयोः पित्रोर्मातापित्रोः भूरि वृजिनं दुःखमभूत् । यत् यस्मात् अस्मत्तो हेतोः तयोः पुत्राणां मरणं जातं यस्माच्चास्मत्तो हेतोस्तयोर्बन्धनं प्राप्तम् ॥ ६ ॥ दिष्ट्येति ॥ हे सौम्य हे प्रिय मह्यं मम स्वानां स्वकीयानां वो युष्माकं दर्शनं तत्रत्यवृत्तपरिज्ञानार्थं बहुकालतः कांक्षितं यदेवकारणीकृत्य तत्र गत्वा कंसं हनि-ष्यामि तदद्य इदानीं सञ्जातमिति दिष्ट्या महानानन्दो ममाभूत् अन्यथा परमस्निग्धपित्रनुमतिं विना कंसहननाय गमनं न भवेत् । अतो हे तात तवागमनस्य कारणं वर्ण्यतां तस्मिन् ज्ञाते आयति चिन्तां करिष्ये ॥ ७ ॥ पृष्ट इति ॥ एवं भगवता पृष्टो माधवो मधुवंशप्रभवोऽक्रूरः यदुषु विषयभूतेषु कंसस्य वैरानुबन्धं वैररीत्यनुवर्त्तनं तथा वसुदेववधस्य उद्यमं प्रयत्नं चेति सर्वं वर्णयामास ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

यदिति ॥ यः धनुर्यागच्छद्मा संदेशो यस्य स यदर्थं चाणूरादिभिर्घातनार्थं सोपायनसमानयनार्थं स्वयं दूतः दूतीकृतः कंसेन व्रजे सम्प्रेषितश्च यच्चानकदुन्दुभेः सकाशात् स्वस्य कृष्णस्य जन्म नारदेनोक्तं तत्सर्वमस्य कृष्णस्याग्रे वर्णयामासेत्यनुषङ्गः ॥ ९ ॥ श्रुत्वेति ॥ इत्यक्रूरस्य वचः श्रुत्वा परवीरहा कृष्णो बलश्च प्रहस्य अहो स्वमृत्युमपि कंसो निमन्त्रयतीति प्रहासं कृत्वा राज्ञादिष्टं स्ववधादि राज्ञोऽभिप्रेतं संगोप्य धनुर्यागनिरीक्षणार्थं वयं राज्ञाहूता इति पितरं नन्दं प्रति तत्समीपं गत्वा विजज्ञतुः विशेषेण विज्ञापयामासुः । अन्तर्भावितण्यर्थो ज्ञाधातुः ॥ १० ॥ गोपानिति ॥ स नन्दोऽपि गोपान्समादिशत् आज्ञापयामास । गोरसः क्षीरादि गृह्यतां तथोपायनानि राज्ञे दातुं योग्यानि उत्तमवस्तूनि गृह्णीध्वं शकटानि च वृषभैर्युज्यन्ताम् ॥ ११ ॥ यास्याम इति ॥ श्वः समनन्तरदिने मधुपुरीं प्रति यास्यामः गमिष्यामः नृपतेः कंसस्य रसान् क्षीरघृतादीन् दास्यामः अचिकित्स्यरोगस्य चिकित्सार्थं रसान् दास्याम इति ध्वननीयोऽर्थः । सुमहत्पर्व धनुर्यागं द्रक्ष्यामः । जानपदाः सर्वदेशनिवासिनो निमन्त्रिता यान्ति

यत्सन्देशो यदर्थं वा दूतः संप्रेषितः स्वयम् ॥ यदुक्तं नारदेनास्य स्वजन्मानकदुन्दुभेः ॥ ९ ॥ श्रुत्वाऽक्रूरवचः कृष्णो बलश्च परवीरहा ॥ प्रह-
स्य नन्दं पितरं राज्ञाऽऽदिष्टं विजज्ञतुः ॥ १० ॥ गोपान् समादिशत् सोऽपि गृह्यतां सर्वगोरसः ॥ उपायनानि गृह्णीध्वं युज्यन्तां शकटानि च
॥ ११ ॥ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ॥ द्रक्ष्यामः सुमहत् पर्व यान्ति जानपदाः किल ॥१२॥ एवमाघोषयत् क्षत्त्रा नन्दगोपः
स्वगोकुले ॥ गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशम् ॥ रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ॥ १३ ॥ काश्चित् तत्कृतहृत्तापश्वासम्लान-
मुखश्रियः ॥ स्रंसद्दुकूलवलयकेशग्रन्थ्यश्च काश्चन ॥ १४ ॥ अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः ॥ नाभ्यजानन्निमं लोकमात्मलोकं गता
इव ॥ १५ ॥ स्मरन्त्यश्चापराः शौरेरनुरागस्मितेरिताः ॥ हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः ॥ १६ ॥

गच्छन्ति किल ॥ १२ ॥ एवमिति सार्द्धम् ॥ एवं नन्दगोपः क्षत्त्रा व्रजरक्षाधिकृतेन गोकुले आघोषयत् सर्वत्र घोषितवान् । गोप्य इति। तत्तदा ताः कृष्णैकजीवना गोप्यो रामकृष्णौ पुरीं प्रति नेतुमक्रूरं व्रजमागतमुपश्रुत्य भृशमत्यन्तं व्यथिता बभूवुः ॥ १३ ॥ काश्चिदिति ॥ काश्चिद्गोप्यस्तेन श्रवणेन कृतो यो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ताः तथाभूता बभूवुः । काश्चन गोप्यस्तु दुकूलानि च वलयानि च केशग्रन्थयश्च स्रंसिताः दुकूलादयो यासां तथाभूता बभूवुः । ग्रन्थ्य इत्यार्षम् ॥ १४ ॥ अन्या इति ॥ अन्यास्तु गोप्यस्तस्य भगवतोऽनुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ता इमं लोकं स्वदेहमपि नाभ्यजानन् । तत्र दृष्टान्तमाह । आत्मैव लोकस्तं गता आत्मसाक्षात्कारिणो योगारूढाश्च यथा देहानुसन्धानमपि न कुर्वन्ति तथेति ॥ १५ ॥ स्मरन्त्य इति ॥ अपराः स्त्रियः अनुरागेण यत्स्मितं तेनेरिताः हृदि स्पृशन्तीति तथा मनोज्ञाः विचित्राणि पदानि यासु तथाभूताः शौरेः कृष्णस्य गिरः स्मरन्त्यो मुमुहुः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं रात्रिं कथंचिद्गमयित्वा प्रातर्नन्दद्वार एवागता संहत्य विलेपुरित्याह–गतिमिति द्वयम् ॥ मुकुन्दस्य सुललितां सुन्दरतरां गतिं तथाभूतां चेष्टां रासक्रीडाद्यात्मिकां स्निग्धो यो हासस्तद्युक्तमवलोकनं च शोकमपघ्नन्तीति तथाभूतानि नर्माणि परिहासवाक्यानि प्रोद्दामानि अत्युन्नतानि गोवर्धनोद्धरणादीनि चरितानि च चिन्तयन्त्यः स्वभावतो निमेषविरहादपि भीताः अधुना तु भाविना विरहेण कातरा विह्वला अत एवाश्रूणि मुखेषु यासां ताः अच्युते श्रीकृष्ण एवाशयो यासां ताः गोप्यः सङ्घशः स्वस्वसमुदायेन समेताः मिलिताः सत्यः प्रोचुः एतच्च तासां परिदेवनं प्रादोषिकघोषणादारभ्य तत्प्रस्थानपर्यन्तं ज्ञेयम् ॥ १७ ॥ १८ ॥ अहो इति ॥ अहो खेदे । हे विधातस्तव क्वचित्काप्यंशे दया नास्ति यतः मैत्र्या हिताचरणेन प्रणयेन स्नेहेन च देहिनो जनान्संयोज्य अकृतार्थान् अपूर्णमनोरथानेव तान् वियुनङ्क्षि वियोजयसि । चकार एवार्थे । अतः अर्भकस्य चेष्टितं यथा भवति तथा तवेदं विक्रीडितम् । अपार्थकं प्रयोजनशून्यम् एव ॥ १९ ॥ य इति ॥ असितैर्नीलैः कुन्तलैरावृतं शोभनौ कपोलौ य-

गतिं सुललितां चेष्टां स्निग्धहासावलोकनम् ॥ शोकापहानि नर्माणि प्रोद्दामचरितानि च ॥ १७ ॥ चिन्तयन्त्यो मुकुन्दस्य लीलाविरहकातराः ॥
समेताः सङ्घशः प्रोचुरश्रुमुख्योऽच्युताशयाः ॥ १८ ॥ गोप्य ऊचुः ॥ अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः ॥
तांश्चाकृतार्थान् वियुनङ्क्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा ॥ १९ ॥ यस्त्वं प्रदर्श्यासितकुन्तलावृतं मुकुन्दवक्त्रं सुकपोलमुन्नसम् ॥
शोकापनोदस्मितलेशसुन्दरं करोषि पारोक्ष्यमसाधु ते कृतम् ॥ २० ॥ क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत् ॥ येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः ॥ २१ ॥ न नन्दसूनुः क्षणभङ्गसौहृदः समीक्षते नः स्वकृतातुरा बत ॥ विहाय गेहान् स्वजनान् सुतान् पतींस्तद्दास्यमद्धोपगता नवप्रियः ॥ २२ ॥

स्मिंस्तत उन्नता नासिका यस्मिंस्तत् शोकमपनुदति इति शोकापनोदस्तथाभूतो यः स्मितलेशः गूढहासस्तेन सुन्दरं मुकुन्दस्य वक्त्रमस्माकं प्रदर्श्य यस्त्वं पुनस्तस्य पारोक्ष्यमदृश्यतां करोषि । यद्वा । पारोक्ष्यमिति स्वार्थे ष्यञ् परोक्षं करोषीति तस्य ते तव कृतं कर्म असाधु निन्द्यम् ॥ २० ॥ नन्वक्रूरः कृष्णं नयति नाहमिति चेत्तत्राहुः–क्रूर इति ॥ हि यस्मात् त्वयैव दत्तं नोऽस्माकं चक्षुः कर्म दत्तापहारीत्वम् अज्ञवत् परदुःखानभिज्ञमूर्खवद्धरसि अतः क्रूरस्त्वमेव । विपरीतलक्षणया अक्रूरसमाख्यया अक्रूर इति नाम्ना आगतः न ह्येवमन्यः कर्तुं शक्नोति स्म एवार्थे । ननु कृष्णं हरामि नतु चक्षुरित्याशङ्क्याहुः । बत खेदे । येन त्वद्दत्तेन चक्षुषा मधुद्विषः श्रीकृष्णस्यैकदेशे नेत्रवक्त्रादौ त्वदीयम् अखिलसर्गसौष्ठवं सर्वसृष्टिनैपुण्यं वयमद्राक्ष्म अत एव तद्वियोगे अन्यस्य दर्शनीयस्याभावात् अस्मानन्धीकरोषीति मम सर्वरहस्यमाभिर्ज्ञातमित्यमर्षेणेवेत्यर्थः ॥ २१ ॥ नेति ॥ बत खेदे । गेहान् स्वजनान् सुतान् पतींश्च विहाय अद्धा साक्षात् तस्यैव दास्यं गताः स्वकृतातुराः स्ववियोगेनैव व्याकुलाः तत्कृतेन स्मितादिना वा

CC-0. In Public Domain. Digitization by eGangotri

परवशा अपि नोऽस्मान् क्षणभङ्गमस्थिरं सौहृदं यस्य सः नवः नवीनः स्त्रीजनः प्रियो यस्य सः वयं त्वधुना पुरातन्य इति भावः। नन्दसूनुरेव न समीक्षते अतस्तस्यैव दोषः। किं विधातुरुपालम्भेन ॥२२॥ सेर्ष्यमाहुः—सुखमिति ॥ पुरयोषितां मथुरापुरस्थस्त्रीणामियं रजनी रात्रिः सुखं प्रभाता सुखसूचकानि शकुनानि प्रभातकाले यस्यास्तथा बभूव। व्रजाङ्गनानां तु दुष्प्रभाता इत्यर्थः। तथा तासामाशिषः मनोरथाः विप्रादिदत्ताः आशिषो वा सत्या बभूवुः निश्चितत्वात्। भाविवृत्तस्यापि सत्यत्वद्योतनार्थं भूतत्वेन निर्देशः। याः पुरयोषितः अपाङ्गेन नेत्रप्रान्तेन उत्कलितमुज्जृम्भितं स्मितमेव आसवो मादकत्वात् रसविशेषो यस्मिंस्तत् पुर्यां प्रविष्टस्य व्रजस्पतेः श्रीकृष्णस्य सुडागमः आर्षः। मुखं पास्यन्ति पानं चात्र सादरं दर्शनमेव। यद्वा। अपाङ्गोत्कलितस्मितेन आसवरूपं यन्मुखं ततश्च पानं मुख्यमेव सम्भावयन्ति ॥ २३ ॥ तासामिति ॥ हे अबलाः स्वतो मनस्वी धीरोऽपि परवान् नन्दादिपरवशोऽपि मुकुन्दस्तासां पुरस्त्रीणां मधुवन्मनोहरैर्मञ्जुभिर्भाषितैर्गृहीतचित्तः वशीकृतचित्तस्तथा तासां सलज्जस्मितैर्विभ्रमै रम्यैश्च विलासैर्भ्रमन् तास्वेवासक्तिं कुर्वन् ग्राम्याः अविदग्धा नोऽस्मान् कथं पुनः प्रतियास्यते प्रत्येष्यति न कथंचिदित्यर्थः। तङार्षः ॥ २४ ॥ व्रजस्थाना-

सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम्। ॥ याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यन्त्यपाङ्गोत्कलितस्मितासवम् ॥ २३ ॥
तासां मुकुन्दो मधुमञ्जुभाषितैर्गृहीतचित्तः परवान् मनस्व्यपि ॥ कथं पुनर्नः प्रतियास्यतेऽबला ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् ॥ २४ ॥
अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजान्धकवृष्णिसात्वताम्। ॥ महोत्सवः श्रीरमणं गुणास्पदं द्रक्ष्यन्ति ये चाध्वनि देवकीसुतम् ॥ २५ ॥
मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीवदारुणः ॥ योऽसावनाश्वास्य सुदुःखितं जनं प्रियात् प्रियं नेष्यति पारमध्वनः ॥ २६ ॥ अनार्द्र-
धीरेष समास्थितो रथं तमन्वमी च त्वरयन्ति दुर्मदाः ॥ गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोऽद्य प्रतिकूलमीहते ॥ २७ ॥

मानन्दं पुरस्थाः प्राप्स्यन्तीत्याहुः—अद्येति ॥ तत्र पुरे अध्वनि मार्गे गच्छन्तं श्रीरमणं लक्ष्मीकान्तं गुणास्पदं सौन्दर्यमाधुर्यादिगुणानामाश्रयभूतं देवकीसुतं यशोदासूनुं ये द्रक्ष्यन्ति तेषां दाशार्हाणां तत्प्रभृतीनां दृशो दृष्टेरद्य महानुत्सवो भविष्यति आत्मनेपदमार्षम्। अत्र संदेहो नास्तीत्याहुः ध्रुवमिति। यद्वा। दृश इति द्वितीयाबहुवचनम्। दृशो नेत्राणि प्रति महानुत्सवः प्राप्स्यते इत्यर्थः। प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २५ ॥ मेति ॥ एषा दुष्टा विधा विधानं कर्म यस्य तस्याकरुणस्य कृपारहितस्य अक्रूर इत्येतत् शोभनं नाम माभूत् न युक्तम्। यतोऽयमतीव दारुणः अस्ति योऽसावक्रूरः सुतरां दुःखितं जनमस्मत्समुदायात्मकमनाश्वास्य असान्त्वयित्वा ॥१२३॥
प्रियात् प्राणादपि प्रियं कृष्णमध्वनः पारम् अस्मद्दृग्गोचरमतिदूरदेशं प्रति नेष्यति ॥ २६ ॥ अनार्द्रधीरिति ॥ अनार्द्रा स्नेहरहिता धीर्यस्य स एष कृष्णो रथं समास्थितः गन्तुं रथमधिरूढः तमनुसृत्य दुर्मदाः उत्साहयुक्ताः अनोभिः शकटैः उपलक्षिताः अमी गोपाः त्वरयन्ति शीघ्रं गन्तव्यमिति वदन्ति। स्थविरैर्वृद्धैरपि उपेक्षितम् उपेक्षणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतम् भावे निष्ठा । दैवमपि अद्य नोऽस्माकं प्रतिकूलं यथा स्यात्तथा ईहते चेष्टते अन्यथा गमने कश्चिदपि विघ्नः स्यात् ॥ २७ ॥ निवारयाम इति ॥ माधवं कृष्णं सम्यक् विनयपूर्वकमुपेत्य हस्तग्रहादिना गमनान्निवारयामः । यतः निमिषार्द्धमपि दुस्त्यजान् मुकुन्दस्य सङ्गाद् दैवेन विध्वंसितानि वियोजितानि अत एव दीनानि चेतांसि यासां तासां नोऽस्माकं मृत्युतोऽपि भयाभावात्कुलवृद्धा बान्धवाः अन्ये च संबन्धिनोऽपि किमकरिष्यन् किमनिष्टं करिष्यन्ति अयं भावः । यदि कृष्णो निवर्तेत तदा बान्धवैस्त्यक्ता अपि कृष्णमेव भजेम न चेन्मरणं सिद्धमेव अतो निवारयामः ॥ २८ ॥ अथ निवारणोद्यता अपि जनसंमर्दे प्रवेष्टुमशक्ता आहुः—यस्येति ॥ हे गोप्यः ललितं सुन्दरं स्मितं च वल्गु मन्त्रः मनोहररहः संलापश्च लीलावलोकः कटाक्षनिरीक्षणं च परिरम्भणं च यस्यानुरागेण ललितस्मितादीनि यस्यां तस्यां रासगोष्ठ्यां रासक्रीडासभायां नोऽस्माभिः क्षणदा बह्व्यो रात्रयः क्षणमिव नीतास्तममुं कृष्णं विना दुरन्तं तमः दुःसहं विरहदुःखं कथं न्वतितरेम न कथञ्चिदपि तत्सोढुं शक्यम्

निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धबान्धवाः ॥ मुकुन्दसङ्गान्निमिषार्धदुस्त्यजाद् दैवेन विध्वंसितदीनचेतसाम् ॥ २८ ॥ यस्यानुरागललितस्मितवल्गुमन्त्रलीलावलोकपरिरम्भणरासगोष्ठ्याम् ॥ नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरन्तम् ॥ २९ ॥ योऽह्नः क्षये व्रजमनन्तसखः परीतो गोपैर्विशन् खुररजश्छुरितालकस्रक् ॥ वेणुं क्वणन् स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम ॥ ३० ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ॥ विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ॥ ३१ ॥ स्त्रीणामेवं रुदन्तीनामुदिते सवितर्यथ ॥ अक्रूरश्चोदयामास कृतमैत्रादिको रथम् ॥ ३२ ॥ गोपास्तमन्वसज्जन्त नन्दाद्याः शकटैस्ततः ॥ आदायोपायनं भूरि कुम्भान् गोरससंभृतान् ॥ ३३ ॥

॥ २९ ॥ य इति ॥ अनन्तबलतयाऽनन्तो बलः तस्य सखा सहचरो गोपैश्च परीतः परिवृतः गवां खुररजोभिश्छुरिताः धूसरा अलकाः स्रजश्च यस्य सः यः श्रीकृष्णः अह्नः क्षये दिनावसाने सायंकाले व्रजं विशन् वेणुं क्वणन् वादयन् सन् स्मितपूर्वककटाक्षनिरीक्षणेन नोऽस्माकं चित्तं क्षिणोति अपहरति तममुं कृष्णमृते विना कथं नु भवेम जीवेम ॥ ३० ॥ एवमिति ॥ एवं परस्परं ब्रुवाणा भृशमत्यन्तं कृष्णे विषक्तानि मानसानि यासां ताः अत एव भावितद्विरहभयेनातुरा विवशाः पदमपि गन्तुं वक्तुं वा असमर्था व्रजस्त्रियो लज्जां विसृज्य त्यक्त्वा सुस्वरमुच्चैर्हे गोविन्द हे दामोदर हे माधवेति संबोधयन्त्यो रुरुदुः स्म ॥ ३१ ॥ स्त्रीणामिति ॥ एवं स्त्रीणां रुदन्तीनां सतीनाम् अनादरे षष्ठी नुमार्षः । कृतं मैत्रं मित्रदेवताकं सन्ध्योपासनादिकं कर्म येन सोऽक्रूरः सवितर्युदिते सति अथानन्तरं रथं चोदयामास ॥ ३२ ॥ गोपा इति ॥ ततः भूरि उपायनं देयमुत्तमं वस्तु तथा गोरससम्भृतान् कुम्भांश्चादाय नन्दाद्या गोपाः शकटैस्तं कृष्णरथमन्वसज्जन्त पृष्ठतो ययुः ॥ ३३ ॥

CC-0. In Public Domain. Digitization by eGangotri

गोप्य इति ॥ तदा गोप्यश्च दयितं प्रियं कृष्णमनुव्रज्य तेनानुरञ्जिताः परावृत्य दर्शनादिना किञ्चिदानन्दिताः भगवतः प्रत्यादेशं गमनप्रत्याख्यानं काङ्क्षन्त्य एवावतस्थिरेस्थिताः ॥३४॥ ता इति ॥ तदा यदूत्तमो भगवान् कृष्णः स्वप्रस्थाने निमित्ते ता गोपीस्तथा तप्यतीर्दुःखिताः वीक्ष्य सप्रेमैः प्रेमसहितैः बहुप्रकारैः सशपथैः अदन्तत्वमार्षम् । आयास्ये शीघ्रमागमिष्यामि तद्भार्षः । इति दौत्यकैर्दूतवाक्यैः कर्मणि ष्यञ् । अनुकम्पायां कन् सान्त्वयामास। आगमनं चेदं दन्तवक्रवधानन्तरं भविष्यति तत्रैव भगवता स्थायिष्यते चेति न भक्तवञ्चकत्वं हरेः ॥३५॥ यावदिति ॥ तदा च श्रीकृष्णमनुप्रस्थापिताः आत्मानश्चित्तानि याभिस्ता गोप्यो यावद्रथस्य केतुः आ ईषदपि लक्ष्यते यावच्च रेणुरालक्ष्यते तावत्कालं लेख्यानीव चित्रलिखितप्रतिमा इव तत्रत्यैः उपलक्षिताः तत्रैवोपतस्थिरे ॥३६॥ ता इति॥ ततो गोविन्दस्य विनिवर्त्तने निराशाः सत्यस्ता गोप्यो निववृतुः न्यवर्तन्त। प्रियस्य कृष्णस्य चेष्टितं गायन्त्यः आयास्य इति कृष्णवचसा विगतशोकाः सत्यः अहनी जात्यभिप्रायेण द्विवचनं रात्रिदिनानि निन्युः अतिक्रान्तवत्यः । अहनी इति द्विव-

गोप्यश्च दयितं कृष्णमनुव्रज्यानुरञ्जिताः ॥ प्रत्यादेशं भगवतः काङ्क्षन्त्यश्चावतस्थिरे ॥ ३४ ॥ तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ॥ सान्त्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥ ३५ ॥ यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च ॥ अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः ॥ ३६ ॥ ता निराशा निववृतुर्गोविन्दविनिवर्तने ॥ विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितम् ॥ ३७ ॥ भगवानपि संप्राप्तो रामाक्रूरयुतो नृप ॥ रथेन वायुवेगेन कालिन्दीमघनाशिनीम् ॥३८॥ तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम् ॥ वृक्षखण्डमुपव्रज्य सरामो रथमाविशत् ॥ ३९ ॥ अक्रूरस्तावुपामन्त्र्य निवेश्य च रथोपरि ॥ कालिन्द्या ह्रदमागत्य स्नानं विधिवदाचरत् ॥ ४० ॥ निमज्ज्य तस्मिन् सलिले जपन् ब्रह्म सनातनम् ॥ तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ॥ ४१ ॥

चनाभिप्रायो नन्दस्य मथुरातः प्रत्यागमनसमयप्रकरणव्याख्यायां स्फुटीभविष्यति ॥३७॥ भगवानिति ॥ हे नृप रामाक्रूराभ्यां युक्तो भगवान् कृष्णोऽपि तद्दुःखदर्शनाक्षमतया शीघ्रप्रेरणात् वायोरिव वेगो यस्य तेन रथेन अघनाशिनीं पापनाशिनीं कालिन्दीमनन्ताख्यतीर्थावच्छिन्नां मध्याह्ने प्राप्तः ॥ ३८ ॥ तत्रेति ॥ तत्र कालिन्द्यां मणिप्रभं इन्द्रनीलमणिमिव मृष्टं निर्मलं पानीयं जलमुपस्पृश्य तेन हस्तपादमुखानि प्रक्षाल्य पीत्वा च वृक्षाणां खण्डं समूहमुपव्रज्य सरामः कृष्णो रथमाविशत् ॥ ३९ ॥ अक्रूर इति ॥ तदा च अक्रूरस्तौ रामकृष्णौ शत्रुभ्यः शङ्कितः सन् इति स्वामिपादाः । रथोपरि निवेश्यामन्त्र्य पृष्ट्वा च माध्याह्निकार्थं कालिन्द्या ह्रदमनन्ततीर्थाख्यं तीरमित्यपि पाठः । आगत्य तत्र यथाविधि स्नानमाचरत् कर्तुमारेभे ॥ ४० ॥ निमज्ज्येति ॥ निमज्ज्य स्नात्वा सनातनं ब्रह्म गायत्रीरूपं जपन् अक्रूरः तस्मिन् यमुनासलिले तावेव समन्वितौ सहितौ रामकृष्णौ ददृशे । तद्भार्षः । एवशब्दः प्रतिबिम्बव्यावृत्त्यर्थः । एतद्दर्शनं च कंसमल्लेभ्यस्तयोर्भयं नास्तीत्यक्रूराय दर्शयितुम् ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावीति ॥ एवं दृष्ट्वा च सोऽक्रूरस्तौ रथस्थौ आनकदुन्दुभेः सुताविह कथं स्तो यदि रथादवरुह्यात्रागतौ तर्हि स्यन्दने रथे न स्त इति वितर्क्य उन्मज्ज्य व्यचष्ट ददर्श ॥४२॥ तत्रेति ॥ तत्रापि रथेऽपि यथा पूर्वमासीनौ ददर्श दृष्ट्वा च सलिले यत्तयोर्ममत्कर्तृकं दर्शनं तत्किं मृषा एवं चेत्तर्ह्यत्र दर्शनं न स्यादित्याशयेन सोऽक्रूरः पुनः सलिले न्यमज्जत् ॥४३॥भूय इति ॥ तत्रापि जले भूयः पुनः अहीश्वरं शेषमद्राक्षीत् तं शेषं वर्णयति । नता कन्धरा ग्रीवायेषां तैः सिद्धादिभिः स्तूयमानम् ॥४४॥ सहस्रेति ॥ सहस्रं शिरांसि फणा यस्य तं देवं देदीप्यमानं सहस्रं फणा मौलयश्च यस्य सन्तीति तथा तं व्रीह्यादित्वादिनिः । नीलमम्बरं यस्य तं तं बिसम्मृणालं तदिव श्वेतं तत्र दृष्टान्तमाह । शृङ्गैः हिरण्मयैः शिखरैः श्वेतं कैलासमिव स्थितम् ॥४५॥ तस्येति ॥ तस्याहीश्वरस्योत्सङ्गे कुण्डलीकृतदेहार्धे पुरुषमद्राक्षीत् । तं वर्णयति घनमिव श्यामं पीते कौशेये कीटरचितकोशजनिततन्तुनिर्मिते वाससी यस्य तं चत्वारो भुजा यस्य तं शान्तं प्रसन्नं पद्मपत्रे इवारुणे ईक्षणे यस्य तम् ॥ ४६ ॥ प्रसन्नेति ॥ चारु सुन्दरं प्रसन्नं च वदनं यस्य तं

तौ रथस्थौ कथमिह सुतावानकदुन्दुभेः ॥ तर्हि स्वित् स्यन्दने न स्त इत्युन्मज्ज्य व्यचष्ट सः ॥४२॥ तत्रापि च यथापूर्वमासीनौ पुनरेव सः ॥ न्यमज्जद्दर्शनं यन्मे मृषा किं सलिले तयोः ॥ ४३ ॥ भूयस्तत्रापि सोऽद्राक्षीत् स्तूयमानमहीश्वरम् ॥ सिद्धचारणगन्धर्वैरसुरैर्नतकन्धरैः ॥ ४४ ॥ सहस्रशिरसं देवं सहस्रफणमौलिनम् ॥ नीलाम्बरं विसश्वेतं शृङ्गैः श्वेतमिव स्थितम् ॥ ४५ ॥ तस्योत्सङ्गे घनश्यामं पीतकौशेयवाससम् ॥ पुरुषं चतुर्भुजं शान्तं पद्मपत्रारुणेक्षणम् ॥४६॥ प्रसन्नचारुवदनं चारुहासनिरीक्षणम् ॥ सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरम् ॥४७॥ प्रलम्बपीवरभुजं तुङ्गांसोरःस्थलश्रियम् ॥ कम्बुकण्ठं निम्ननाभिं वलिमत्पल्लवोदरम् ॥ ४८ ॥ बृहत्कटितटश्रोणिकरभोरुद्वयान्वितम् ॥ चारुजानुयुगं चारुजङ्घायुगलसंयुतम् ॥ ४९ ॥ तुङ्गगुल्फारुणनखव्रातदीधितिभिर्वृतम् ॥ नवाङ्गुल्यङ्गुष्ठदलैर्विलसत्पादपङ्कजम् ॥ ५० ॥

चारुहासेन युक्तं निरीक्षणं यस्य तं शोभने भ्रुवौ उन्नता नासिका च यस्य तं चारू कर्णौ यस्य तं शोभनौ कपोलौ यस्य अरुणः अधरः यस्य स चासौ स च तम् ॥४७॥ प्रलम्बेति ॥ प्रलम्बा आजानुलम्बिनः पीवराश्च भुजा यस्य तं तुङ्गावुन्नतौ अंसौ स्कन्धौ यस्य स चासावुरस्थले श्रीर्यस्य तं च तं द्वयोः कर्मधारयेणैकपद्यम् । कम्बुः शङ्खस्तद्वद्रेखात्रयोपेतो नातिदीर्घो नातिह्रस्वश्च कण्ठो यस्य तं निम्ना नाभिर्यस्य तं वलयः तिर्यक्निम्ना रेखा यस्य सन्ति तद्वलिमत् तच्च तत्पल्लवमिव अश्वत्थदलसदृशं च उदरं यस्य तम् ॥ ४८ ॥ बृहदिति ॥ बृहद्भ्यां कटितटश्रोणिभ्यां करभसदृशेन हस्तिशुण्डासदृशेन चारुणा ऊरुद्वयेन चान्वितं कटितटं नितम्बः श्रोणिः कटिः चारु जानुयुगं यस्य तं चारुजङ्घायुगलेन संयुतम् ॥ ४९ ॥ तुङ्गेति ॥ तुङ्गावीषदुन्नतौ गुल्फौ च अरुणनखानां व्रातः समूहश्च तेषां दीधितिभिर्वृतं नवाः कोमलाः अङ्गुल्यः नवौ अङ्गुष्ठौ च तान्येव दलानि तैर्विलसन्ती शोभमाने पादपङ्कजे यस्य तम् । तुङ्गेत्यत्र लक्षणयौचित्येन गूढत्वं वा व्याख्येयम् । तथैव सामुद्रिकस्वारस्यात् ॥ ५० ॥

CC-0. In Public Domain. Digitization by eGangotri

सुमहार्हेति ॥सुमहार्हा बहुमूल्या उत्तमा मणिव्राताः येषु तैः किरीटादिभिः कुण्डलान्तैः भ्राजमानं पद्मं करे दक्षिणे यस्य तम् । अवशिष्टैस्त्रिभिः करैः शङ्खचक्रगदा धरतीति तथा तं श्रीवत्सो दक्षिणावर्त्तरोमरेखाविशेषो वक्षसि यस्य तं भ्राजन् कौस्तुभो यस्य तं शता आर्षः । वनमालिनम् ॥५१॥५२॥ सुनन्देति ॥ अमलात्मभिः शुद्धचित्तैः सुनन्दादिभिः पृथक् पृथग्भावोऽभिप्रायो येषां तैः वचोभिः पार्षदविशेषणं वा स्तूयमानम् । तत्र पार्षदैः स्वामीति स्तूयमानं सनकादिभिः ब्रह्मेति ब्रह्मरुद्राद्यैः सुरेशैर्महेश्वर इति मरीच्याद्यैर्नव-भिर्मरीच्यत्र्यङ्गिरःपुलस्त्यपुलहक्रतुभृगुवसिष्ठदक्षैर्द्विजोत्तमैः परः प्रजापतिरिति प्रह्लादनारदौ वसुरुपरिचरस्ते प्रमुखा मुख्या येषां तैः परं दैवतमिति च । अत्र पार्षदाः पूर्वा-द्यष्टदिक्षु सनकाद्याः पश्चात् ब्रह्माद्या दक्षिणे भागे मरीच्याद्या वामे प्रह्लादाद्याः सम्मुखे इति आगमानुसारेण ज्ञेयम् ॥५३॥५४॥ आवरणशक्तीः स्वरूपभूता आह—श्रियेति ॥ श्रीपुष्ट्यादिभिर्द्वादशभिः शक्तिभिर्निषेवितं श्रीर्लक्ष्मीः सर्वसम्पदधिष्ठात्री पुष्टिर्यया स्वल्पाहारा अपि पुष्टा भवन्ति तत्प्रवेशाभावे तु बह्वाहारा अपि न पुष्टा भवन्ति एवमग्रेऽपि

सुमहार्हमणिव्रातकिरीटकटकाङ्गदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुण्डलैः ॥ ५१ ॥ भ्राजमानं पद्मकरं शङ्खचक्रगदाधरम् ॥ श्रीवत्सवक्षसं भ्राज-त्कौस्तुभं वनमालिनम् ॥ ५२ ॥ सुनन्दनन्दप्रमुखैः पार्षदैः सनकादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥ ५३ ॥ प्रह्लादनार-दवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ॥ ५४ ॥ श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया ॥ विद्ययाऽ-विद्यया शक्त्या मायया च निषेवितम् ॥ ५५ ॥ विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः ॥ हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥५६॥ गिरा गद्गदयाऽस्तौषीत् सत्त्वमालम्ब्य सात्वतः ॥ प्रणम्य मूर्ध्नावहितः कृताञ्जलिपुटः शनैः ॥ ५७ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धेऽक्रूरप्रतियाने एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

सर्वत्र ज्ञेयम् । गीः सरस्वती कान्तिः काचित्प्रभा राज्याभिषेकादिना प्रकटा भवति कीर्तिः यशः तुष्टिः संतोषः यदभावे महानपि तृणवद्भवति । यद्वा । श्रीरैश्वर्यं पुष्टिर्बलं गीर्ज्ञानं कान्तिः श्रीः कीर्तिर्यशः तुष्टिर्वैराग्यमिति षड्भगशब्दवाच्याः । इला भूमिः ऊर्जा सर्वसामर्थ्यरूपा विद्या ज्ञानोपासनारूपा मोक्षोपकारिणी अविद्या बन्धकरी अज्ञानं निद्रादयोऽपि तद्भेदा एव । शक्तिः सर्वप्रधानभूता ह्लादिनी संविद् मायातोन्तरङ्गा चिच्छक्तिरिति व्यवह्रियते । इयमेव महालक्ष्मीरित्यन्ये । माया विद्याविद्ययो-र्हेतुः चकारेण अन्याभिश्चाणिमादिभिर्निषेवितम् ॥ ५५ ॥ विलोक्येति द्वयम् ॥ एवंभूतं विलोक्य अस्मत्कृष्णोऽसावेवंभूतः परमेश्वर इति ज्ञात्वा सुभृशमत्यन्तं प्रीतः परमया उत्कृष्टया च भक्त्या युक्तः अत एव हृष्यन्तः उदञ्चितास्तनूरुहाः लोमानि यस्य सः भावेन प्रीत्यतिशयेन परिक्लिन्नः आर्द्रः आत्मा चित्तं लोचने च यस्य सः ॥ ५६ ॥ सात्वतः अक्रूरः शनैः सत्वं धैर्यमवलम्ब्य मूर्ध्ना भगवन्तं प्रणम्य कृताञ्जलिपुटः अवहितः सावधानश्च सन् गद्गदया स्खलिताक्षरया गिरा वाण्या अस्तौषीत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तावीत् । इडभाव आर्षः ॥ ५७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमोनचत्वारिंशके व्यधात् ॥ ३९ ॥ चत्वारिंशे कृष्णमीशं मत्वाऽक्रूरः प्रणम्य च ॥ सगुणं निर्गुणं चास्तौत्तत्र श्लोकाः खवह्नयः ॥ उवाचेत्येकमङ्घ्र्यूनाश्चतुस्त्रिंशदनुष्टुभः ॥ ४० ॥ नतोऽस्मीति ॥ अखिलस्य प्रपञ्चस्य ये हेतवो महदादयस्तेषामपि हेतुं कारणं नारायणं पुरुषम् आद्यमव्ययं ज्ञात्वा त्वामहं नतोऽस्मि यस्य नाभेर्जातादरविन्दकोशात् ब्रह्मा आविः आसीत् यतो ब्रह्मणः सकाशात् एष परिदृश्यमानो व्यष्ट्यात्मको लोकः प्राणिसमूहो जातः ॥ १ ॥ अखिलहेतुत्वं प्रपञ्चयति—भूरिति ॥ भूः तोयम् अग्निः पवनः खम् आदिः खस्यापि कारणमहङ्कारः महान्महत्तत्वम् अजा मूलप्रकृतिः तथा आदिः वस्तुतस्तस्या अप्यादिभूतस्तदवच्छिन्नः पुरुषः मनः इन्द्रियाणि चक्षुरादीनि दश सर्वेन्द्रियाणामर्थाः शब्दस्पर्शरूपरसगन्धाः विबुधाश्च सर्वेन्द्रियाधिष्ठातारो " दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः " इत्युक्ताः । एते ये सर्वे जगतो हेतवस्ते तवाङ्गात् श्रीमूर्तेः भूता जाताः उपसर्जनभूता वा ॥ २ ॥ नेति ॥ अनात्मतया जडत्वेन हेतुना तथा गृहीताः प्रत्यक्षादिभिर्दृष्टा एते अजा प्रकृतिः आदिर्येषां ते आत्मनः स्वस्य ते तव स्वरूपं नैव विदुः । सः अजो जीवः ब्रह्मा भवन्नपि अजाया

अक्रूर उवाच ॥ नतोऽस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययम् ॥ यन्नाभिजातादरविन्दकोशाद्ब्रह्माविरासीद्यत एष लोकः ॥ १ ॥ भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इन्द्रियाणि ॥ सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः ॥ २ ॥ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोऽनात्मतया गृहीताः ॥ अजोऽनुबद्धः स गुणैरजाया गुणात् परं वेद न ते स्वरूपम् ॥ ३ ॥ त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ॥ साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ४ ॥ त्रय्या च विद्यया केचित् त्वां वै वैतानिका द्विजाः ॥ यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ॥ ५ ॥

गुणैः रजआदिभिरनुबद्धः आवृतः अतो गुणात्परं गुणातीतं ते तव स्वरूपं न वेद अर्वाचीनोऽन्यः कुतो ज्ञास्यतीति । यद्वा । प्रकृत्यादय आत्मनः स्वरूपं तव स्वरूपं च न विदुः जडत्वादेव जीवस्तु तानात्मानं च वेत्ति न पुनस्त्वत्स्वरूपमिति अयमेवार्थः षष्ठे स्कन्धे हंसगुह्यस्तोत्रे देही स बोक्षा इति श्लोके उक्तः । यद्वा । अनात्मतया जाड्येन गृहीता व्याप्ताः ग्रस्ताः ॥ ३ ॥ त्वामिति ॥ साधवः योगिनो हैरण्यगर्भादयः साध्यात्ममात्मनि शरीरे भवमध्यात्मं तेन सहितं साधिभूतं सर्वभूतस्थं सर्वशरीरकं साधिदैवम् आदित्यादिदेवसहितं तथा चाध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तदन्तर्यामिणमीश्वरं नियन्तारं चेत्येवमादिरूपेण त्वामद्धा साक्षादेव यजन्ति ध्यायन्ति इति सांख्ययोगावेकीकृत्योक्तम् ॥ ४ ॥ त्रय्येति ॥ केचिद्वैतानिकाः कर्मयोगिनो द्विजाः त्रय्या ऋग्यजुःसामात्मकवेदत्रयरूपया विद्यया बोधितैर्विततैर्यज्ञैस्त्वां वै त्वामेव नानारूपा ये अमरा देवास्तेषामाख्यया नाम्ना यजन्ते अयं भावः । ऐन्द्रादिसूक्तैरिन्द्रादयः सर्वेश्वरत्वेन प्रकाश्यन्ते नच सर्वेश्वरा बहवः सम्भवन्ति अतो नामभेदेन त्वामेव यजन्ते त्व-

मेवेन्द्रादिरूप इति भावः । तथा च श्रुतिः । "स प्रथमः स प्रकृतिर्विश्वकर्मा स प्रथमो मित्रावरुणोऽग्निः स प्रथमो बृहस्पतिश्चिकित्वान् । तस्मा इन्द्राय हविराजुहोति" इति ॥ ५ ॥ एक इति ॥ एके मुख्याः ज्ञानिनः उपशमं विषयवैतृष्ण्यं गताः अत एवाखिलानि कर्माणि लौकिकवैदिकव्यापारान् संन्यस्य त्यक्त्वा ज्ञानयज्ञेन समाधिलक्षणेन ज्ञानविग्रहं चिन्मात्राकारं ब्रह्माख्यं चिद्घनमूर्तिं भगवदाख्यं वा यजन्ति ध्यायन्ति ॥ ६ ॥ अन्ये चेति ॥ अन्ये च ते त्वयाभिहितेन विधिना पञ्चरात्राद्युक्तप्रकारेण संस्कृत आ... देहो येषां ते त्वन्मयाः त्वन्मयत्वेनात्मानं चिन्तयन्तस्त्वदेकप्रधाना इति वा वासुदेवसंकर्षणप्रद्युम्नानिरुद्धादिमत्स्यादिभेदेन बहुमूर्तिकं महानारायणरूपेणैकमूर्तिकं च त्वामेव यजन्ति ॥७॥ त्वामेवेति ॥ हे भगवन् अन्ये च शिवोक्तेन मार्गेण तत्रापि बहूनामाचार्याणां विभेदेन तत्तदाचार्योक्तावान्तरप्रकारपाशुपतादिभेदेन त्वामेव शिवरूपिणं समुपासते । भगवन्तमुपासत इति वा पाठः ॥ ८ ॥ सर्व इति ॥ हे प्रभो स्वामिन् येऽप्यन्यक्षुद्रदेवता भक्तास्ते यद्यप्यन्यदेवतासु धीर्येषां ते तथापि ते सर्वे बुद्धिमात्रभेदेन वास्तवभेदाभावात् सर्वदेवमयमीश्वरं त्वामेव यजन्ति सर्वदेवमयेति संबोधनं वा ॥९॥ यथेति ॥ हे प्रभो अद्रिभ्यः सकाशात् सर्वतः प्रभवत्युत्पद्यन्ते इति नद्यः पुनः पर्जन्ये-

एके त्वाऽखिलकर्माणि संन्यस्योपशमं गताः ॥ ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहम् ॥ ६ ॥ अन्ये च संस्कृतात्मानो विधिनाऽभिहितेन ते ॥ यजन्ति त्वन्मयास्त्वां वै बहुमूर्त्यैकमूर्तिकम् ॥ ७ ॥ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ॥ बह्वाचार्यविभेदेन भगवन् समुपासते ॥ ८ ॥ सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम् ॥ येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥ ९ ॥ यथाऽद्रिप्रभवा नद्यः पर्जन्याऽऽपूरिताः प्रभो ॥ विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोन्ततः ॥ १० ॥ सत्त्वं रजस्तम इति भवतः प्रकृतेर्गुणाः ॥ तेषु हि प्राकृताः प्रोक्ता आब्रह्मस्थावरादयः ॥ ११ ॥ तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे ॥ गुणप्रवाहोऽयमविद्यया कृतः प्रवर्तते देवनृतिर्यगात्मसु ॥१२॥

नापूरिता अभिवृष्टाः बहुस्रोतसो भूत्वा यथा सर्वतः सर्वासु दिक्षु सिन्धुमेव विशन्ति तद्वत् बहुमुनिदृष्टविचारात् वेदेभ्य उद्भूताः पुनर्मुनिविचारोपबृंहिताः गतयो भजनमार्गा अपि अन्ततः विचारावसाने त्वामेव विशन्ति विषयीकुर्वन्ति ॥१०॥ सत्वमिति ॥ सत्त्वादयो भवतः शक्तिरूपायाः प्रकृतेः गुणाः तेषु हि प्राकृताः प्रकृतिपरिणामदेहाद्युपाधयो ब्रह्मपर्यन्ताः स्थावरादयो जीवाः स्वोपाधिद्वारा तेषु गुणेषु प्रोताः प्रविष्टास्ते च प्रकृतौ सा च त्वयीति अतः क्रमेणोपाधिलयात् सर्वेऽपि त्वामेव प्रविशन्तीति । यद्वा । भगवतः प्रकृतेर्गुणेषु प्रोताः ब्रह्मादयो भवतो भिन्ना न सन्त्यतस्त्वमेव सर्वदेवमयः ॥११॥ ननु भवतः प्रकृतेरिति ममापि प्रकृतेः संबन्धे जीवेभ्यो मम को विशेषः इत्याशंक्य विशेषमाह–तुभ्यमिति ॥ अविषक्ता अप्रतिहता दृष्टिर्यस्य तस्मै तत्र हेतुः । सर्वेषामात्मने सर्वधियां साक्षिणे च तुभ्यं नमोस्तु अतः प्रकृतिसंबन्धेऽपि न जीवस्येव तव दृग्विषङ्गः त्वत्तः इतरे तु संसरन्तीत्याह । गुणैः सत्वादिभिः प्रकर्षेणोह्यत इति गुणप्रवाहो जन्ममरणाद्यात्मकः संसारो यमसकृत् पुनः पुनरविद्यया स्वरूपावरकत्वच्छक्त्या कृतः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवनृतिर्यञ्च आत्मानो येषां तेषु देवादिशरीराभिमानिषु प्रवर्तते अतो महान् विशेषः ॥ १२ ॥ अग्निरिति ॥ योऽयमग्निः स ते मुखम् अवनिः ते अङ्घ्रिः सूर्यः ईक्षणं चक्षुः सर्वत्रैकवचनं जात्यभिप्रायेण । नभः नाभिः अथ अपि च दिशः श्रुतिः श्रोत्रं द्यौः सत्यलोकस्तव कं मूर्धा सुरेशाः इन्द्रादयस्तव बाहवः अर्णवाः समुद्रास्तव कुक्षिः मरुद्वायुस्तव प्राणः बलं च तत् उपासकैर्ध्यानार्थं कल्पितम् ॥ १३ ॥ रोमाणीति ॥ वृक्षा ओषधयश्च तव रोमाणि मेघास्तु तव शिरोरुहाः केशाः अद्रयः पर्वताः परस्य परमेश्वरस्य तवास्थीनि नखानि च रात्रिश्चाहश्च तव निमेषणं तत्र रात्रिर्निमीलनम् अहश्चोन्मीलनं प्रजापतिर्ब्रह्मा तव मेढ्रः गुह्यमिन्द्रियं वृष्टिस्तु तव वीर्यं रेतः प्रामाणिकैः इष्यते ॥ १४ ॥ त्वयीति ॥ हे अव्ययात्मन् लुप्तसप्तम्यन्तं वा । बहुभिर्जीवैः सङ्कुलाः व्याप्ताः सपालाः पालकैः सहिताः सर्वे लोकाः अनन्तानि ब्रह्माण्डानि पुरुषे पूर्णरूपे मनोमये मनःप्रधाने विशुद्धमनोवृत्तिग्राह्ये त्वयि कल्पिताः सन्तः यथा जले जलौकसः सूक्ष्मप्राण्यण्डराशयः यथा वा उदुम्बरे फले मशकास्तथा परस्परवार्त्त-

> अग्निर्मुखं तेऽवनिरङ्घ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ॥ द्यौः कं सुरेन्द्रास्तव बाहवोऽर्णवाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितम् ॥ १३ ॥ रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः ॥ निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते ॥ १४ ॥ त्वय्यव्ययात्मन् पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसंकुलाः ॥ यथा जले संजिहते जलौकसोऽप्युदुम्बरे वा मशका मनोमये ॥ १५ ॥ यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ॥ तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ॥ १६ ॥ नमः कारणमत्स्याय प्रलयाब्धिचराय च ॥ हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥ १७ ॥ अकूपाराय बृहते नमो मन्दरधारिणे ॥ क्षित्युद्धारविहाराय नमः सूकरमूर्तये ॥ १८ ॥ नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ॥ वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ॥ १९ ॥

नभिज्ञा एव यथावकाशं संजिहते प्रचरन्ति । तत्र ब्रह्माण्डानि सृष्टिप्रलययोरन्तर्बहिर्भवन्ति सपाला ब्रह्मादयोऽप्यधिकाराधिकारयोरारोहन्ति पतन्ति च । बहवोऽन्ये जीवाश्च इहामुत्र गतागतं कुर्वन्ति इति न हि तैस्तव कोऽपि विकारः ॥ १५ ॥ यानीति ॥ इह लोके क्रीडनार्थं त्वं यानि यानि मत्स्यादिरूपाणि बिभर्षि तैरनुचिन्तितै रूपैरामृष्टाः परिमार्जिताः शुचः शोकमोहादयो येषां ते लोका जनाः मुदा तव यशो गायन्ति ॥ १६ ॥ तानि रूपाणि कथयन्नमस्यति—नम इति ॥ वेदोद्धारादिकारणेन स्वीकृतमत्स्यरूपाय प्रलयाब्धौ चरति तथा तस्मै मधुकैटभयोर्मृत्यवे हन्त्रे हयशीर्ष्णे तुभ्यं नमः ॥ १७ ॥ अकूपारायेति ॥ मन्दरपर्वतधारिणे बृहते अकूपाराय कूर्मरूपाय नमः । “ अकूपारः समुद्रे स्यात्कूर्मराजेऽपि कीर्तितः । ” इति विश्वः । क्षित्युद्धारो विहारो यस्य तस्मै सूकरमूर्तये नमः ॥ १८ ॥ नम इति ॥ हे साधुलोकभयापह अद्भुतसिंहाय

CC-0. In Public Domain. Digitization by eGangotri

नरसिंहाय ते तुभ्यं नमः । क्रान्तं त्रिभुवनं येन तस्मै तुभ्यं वामनाय नमः ॥ १९ ॥ नम इति ॥ दृप्तं गर्वितं क्षत्रकुलमेव कुठारच्छेद्यत्वात् वनं तच्छिनत्ति तस्मै भृगूणां पतये परशुरामाय नमः । रावणस्यान्तं करोति तस्मै रघुकुले वर्याय श्रेष्ठाय श्रीरामाय ते नमः ॥ २० ॥ नम इति ॥ स्पष्टम् । अनाविर्भूतावपि प्रद्युम्नानिरुद्धौ तापिन्यादिश्रुतिप्रामाण्यान्नमस्कृतौ ॥ २१ ॥ नम इति ॥ शुद्धाय वेदनिन्दातात्पर्यरहिताय दैत्यदानवानां मोहिने बुद्धाय नमः । म्लेच्छप्रायाणां क्षत्राणां क्षत्रियाणां म्लेच्छा एव प्रायेण राज्यकारित्वसाम्येन क्षत्रियास्तेषां वा हन्त्रे कल्किरूपिणे ते तुभ्यं नमः ॥ २२ ॥ भगवन्निति ॥ हे भगवन् अयं सर्वोऽपि जीवलोकस्तव मायया मोहितः अतोऽहं ममेत्यसति तुच्छे देहे तदनुबन्धिधनपुत्रादौ च ग्राहः आग्रहः यस्य असन् ग्राहो यस्येति वा सः कर्मवर्त्मसु विषयावापेषु भ्राम्यते भ्रमति । तङार्षः । मायया भ्राम्यते वा । अत्र मित्त्वेपि ह्रस्वाभाव आर्षः ॥ २३ ॥ अहमिति ॥ हे विभो मूढः अहं च स्वप्नतुल्येषु क्षणभङ्गुरेषु आत्मा देहः आत्मजाः अगारं दाराः अर्थो धनं स्वजनाश्चैतेषु सत्यधिया

नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे ॥ नमस्ते रघुवर्याय रावणान्तकराय च ॥ २० ॥ नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ॥ प्रद्युम्नायाऽनिरुद्धाय सात्त्वतां पतये नमः ॥ २१ ॥ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ॥ म्लेच्छप्रायक्षत्रहन्त्रे नमस्ते कल्किरूपिणे ॥ २२ ॥ भगवन् जीवलोकोऽयं मोहितस्तव मायया ॥ अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ २३ ॥ अहं चात्मात्मजागारदारार्थस्वजनादिषु ॥ भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ॥ २४ ॥ अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ॥ द्वन्द्वारामस्तमोविष्टो न जाने त्वात्मनः प्रियम् ॥ २५ ॥ यथाऽबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ॥ अभ्येति मृगतृष्णां वै तद्वत् त्वाऽहं पराङ्मुखः ॥ २६ ॥ नोत्सहेऽहं कृपणधीः कामकर्महतं मनः ॥ रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥ २७ ॥ सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥ २८ ॥

नित्यत्वबुद्ध्या भ्रमामि ॥ २४ ॥ मूढत्वं स्फुटयति—अनित्येति ॥ देहादिषु अनित्येषु नित्या इति अनात्मसु आत्मान इति दुःखेषु दुःखप्रदेषु सुखप्रदा इति विपर्यया मतिर्यस्य सः । हि यस्मात् एवंभूतोऽहं तस्मात् द्वन्द्वेषु सुखदुःखादिषु आरमति क्रीडतीति द्वन्द्वारामः तमोविष्टः अविद्याप्राप्तः अतः आत्मनः प्रियं निरुपाधिकप्रीतिविषयं त्वां न जाने ॥ २५ ॥ यथेति ॥ अबुधः अज्ञो जनो यथा तदुद्भवैः तस्मात् जलादुद्भवन्तीति तथा तैस्तृणशैवालादिभिश्छन्नं जलं हित्वा मृगतृष्णां जलवदाभासमानां मरीचिकामभ्येति अनुधावति तद्वत् मायाच्छन्नं त्वा त्वामहं हित्वा पराङ्मुखः देहाद्यभिमुखो वर्त्ते ॥ २६ ॥ नेति ॥ कृपणा वासनायुक्ता धीर्यस्य अहं कामकर्मभ्यां हतं क्षुभितं प्रमाथिभिः प्रबलैरक्षैरिन्द्रियैश्चेतस्ततो ह्रियमाणं विषयं प्रत्याकृष्यमाणं मनः रोद्धुं वशीकर्तुं नोत्सहे न शक्नोमि ॥ २७ ॥ सोऽहमिति ॥ हे ईश सः इन्द्रियपरतन्त्रोऽहम् असतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयाकृष्टमनसां दुरापं तवाङ्घ्रिं तवाङ्घ्रिं " सुपां सुलुग् " इति छान्दसोऽमो लुक् । उपगतः शरणं प्राप्तोऽस्मि तत्प्राप्त्युपगमनं भवदनुग्रह एवेत्यहं मन्ये । इतिशब्दाध्याहारेण कथंचित्प्रथमा समर्थनीया । अनुग्रहे सत्येवेति वा यतः यर्हि पुंसः संसारिणः संसरणस्यापवर्गः समाप्तिः संभाविता स्यात् । तदा हे अब्जनाभ सतां त्वद्भक्तानामुपासनया तस्य त्वद्विषयिका मतिः स्यात् भवति त्वत्कृपयैव सदुपासना तयैव त्वयि मतिर्भवेत् । त्वत्कृपां विना न सत्सेवा नतरां त्वन्मतिः नतमां मुक्तिः तेन सत्कृपासंसारनाशारम्भः । सदुपासना कृष्णे मतिरिति क्रमोऽप्युक्तः । मम तु दर्शनादिलाभान्मोक्षे कः सन्देहः ॥ २८ ॥ नम इति ॥ विज्ञानं चैतन्यमेव मात्रा मूर्तिर्यस्य तस्मै तुभ्यं नमः । अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय पुरुषस्येशाः दुःखसुखप्रापकाः कालकर्मादयस्तेषां प्रधानाय नियन्त्रे । यद्वा । पुरुषः प्रकृतिप्रवर्तकः ईशः कालः प्रधानं प्रकृतिरेतत्त्रियात्मने वक्ष्यति भगवान् प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः इत्यादि अनन्ताः शक्तयो यस्य । यद्वा । अनन्ता मायाख्या शक्तिर्यस्य तस्मै ब्रह्मणे नमः ॥ २९ ॥ नमस्त इति ॥ हे हृषीकेश हे प्रभो वासुदेवाय सर्वभूतानां क्षयो लयो निवासो वा यस्मिन् तस्मै ते नमः । प्रपन्नं मां पाहि व्याख्यान्तरं क्लिष्टत्वात्त्यक्तम् ॥ ३० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमचत्वारिंशे व्यधादिमाम् ॥ ४० ॥ रजकस्य वधः प्रीतिः सुदाम्नो वायकस्य च ॥ एकचत्वारिंश एतत्तत्र श्लोका द्विमार्गणाः ॥ पञ्चोर्वाचेति पादोनाः सप्तवर्णार्णा अनुष्टुभः ॥ ४१ ॥ स्तुवत इति ॥ कृष्णो भगवानेवं जले आत्मनो वपुः रूपं दर्शयित्वा तस्य अक्रूरस्य स्तुवत एव सतो भूयस्तद्रूपं समाहरत् उपसंहृतवान् । नटो यथा नाट्यं यथेष्टं रूपं दर्शयित्वोपसंहरति तथा ॥ १ ॥ सोऽपीति ॥ सोऽक्रूरोऽपि तमन्तर्हितं वीक्ष्य ज्ञात्वा जलादुन्मज्ज्य सत्वरः त्वरया युक्तः आवश्यकं माध्याह्निकं सर्वं कर्म कृत्वा विस्मितः सन् रथं प्रत्यागमत् ॥ २ ॥ तमिति ॥ तमागतमक्रूरं हृषीकेशः अपृच्छत् । इह अस्मिन् काले भूमौ वियति आकाशे तोये जले वा ते त्वया किमद्भुतमाश्चर्यं दृष्टं तथादृष्टाद्भुतं त्वां लक्षयामहे चिह्नैरनुमिनुमः । तव नेत्रे सास्रे प्रोत्फुल्ले एवात्र प्रमाणमित्यर्थः ॥ ३ ॥ अद्भुतानीति ॥ इह भूमौ वियति जले वा यावन्ति अद्भुतानि सन्ति तानि सर्वाणि विश्वात्मके त्वय्येव सन्ति अतः त्वां विशेषेण पश्यतः मे मम शेषे षष्ठी । मया किमदृष्टं सर्वमेवाद्भुतं दृष्टम् ॥ ४ ॥

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ॥ पुरुषेशप्रधानाय ब्रह्मणेऽनन्तशक्तये ॥ २९ ॥ नमस्ते वासुदेवाय सर्वभूतक्षयाय च ॥ हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ॥ ३० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धेऽक्रूरस्तुतिर्नाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ श्रीशुक उवाच ॥ स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः ॥ भूयः समाहरत् कृष्णो नटो नाट्यमिवात्मनः ॥ १ ॥ सोऽपि चान्तर्हितं वीक्ष्य जलादुन्मज्ज्य सत्वरः ॥ कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् ॥ २ ॥ तमपृच्छद् हृषीकेशः किं ते दृष्टमिहाद्भुतम् ॥ भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥ अक्रूर उवाच ॥ अद्भुतानीह यावन्ति भूमौ वियति वा जले ॥ त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

यत्रेति ॥ हे ब्रह्मन् यत्र त्वयि सर्वाण्यद्भुतानि सन्ति तं त्वां पश्यतो मे इह भूम्यादौ किमद्भुतं दृष्टं त्वां विना न किंचिदद्भुतं दृष्टं त्वमेवाद्भुतरूपो दृष्टः । ब्रह्मेति पाठे ब्रह्मरूपं त्वाम् एतेन यान्यद्भुतानि पूर्वं दृष्टानि तानि त्वद्रूपे दृश्यमाने नाद्भुतत्वाय कल्पन्ते इति भावः ॥ ५ ॥ इतीति ॥ गान्दिनीसुतः अक्रूरः इत्येवमुक्त्वा स्यन्दनं रथं चोदयामास । ततो दिनात्यये दिनस्योत्तरभागे अथापराह्णे इति वक्ष्यमाणात् रामं कृष्णं चैव मथुरामनयत् । तत्रापराह्णस्त्रेधा विभक्तदिनान्त्यभागः । इत्थं च वक्ष्यमाणलीलानामवकाशलाभः अक्रूरतीर्थादतिनिकटपुरोपवनस्य दिनात्यये प्राप्तिरक्रूरस्याश्चर्यदर्शनादिना तत्रैव चिरं विलम्बात् ॥ ६ ॥ मार्गे इति ॥ हे राजन् तत्र तत्र मार्गे ग्रामजना उपसङ्गता मिलिता वसुदेवसुतौ रामकृष्णौ वीक्ष्य च प्रीताः सन्तो दृष्टिं न आददुः न प्रत्याजह्रुः पश्यन्त एव निष्पन्दाः स्थिताः । तद्भाव आर्षः ॥ ७ ॥ तावदिति ॥ अक्रूरस्य स्नानादिक्रियया विलम्बो जातः नन्दादयश्च रथवर्त्म परित्यज्य ऋजुमार्गेणैवाग्रतो ययुः । अतो यावद्रामकृष्णौ अक्रूरः मथुरामनयत् तावत्ततः पू-

यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ॥ तं त्वाऽनुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतम् ॥ ५ ॥ इत्युक्त्वा नोदयामास स्यन्दनं गान्दिनीसुतः ॥ मथुरामनयद् रामं कृष्णं चैव दिनात्यये ॥ ६ ॥ मार्गे ग्रामजना राजंस्तत्र तत्रोपसङ्गताः ॥ वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाऽऽददुः ॥७॥ तावद् व्रजौकसस्तत्र नन्दगोपादयोऽग्रतः ॥ पुरोपवनमासाद्य प्रतीक्षन्तोऽवतस्थिरे ॥८॥ तान् समेत्याह भगवानक्रूरं जगदीश्वरः ॥ गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥ भवान् प्रविशतामग्रे सहयानः पुरीं गृहम् ॥ वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीम् ॥ १० ॥ अक्रूर उवाच ॥ नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो ॥ त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥ ११ ॥ आगच्छ याम गेहान्नः सनाथान् कुर्वधोक्षज ॥ सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम ॥ १२ ॥

र्वमेव नन्दादयो गोपाः पुरोपवनमासाद्य आगत्य रामकृष्णागमनं प्रतीक्षन्तः । शता आर्षः । अवतस्थिरे स्थिताः ॥ ८ ॥ तानिति ॥ तान्नन्दादीन् समेत्य जगदीश्वरो भगवान् कृष्णः स्वपाणिनाऽक्रूरपाणिं गृहीत्वा प्रहसन् प्रश्रितं विनीतमक्रूरमाह स्म । इवशब्दो हास्ये ईषत्त्वार्थः ॥ ९ ॥ भवानिति ॥ अग्रे मत्प्रवेशात्पूर्वमेव कंसं प्रत्यस्मदानयनविज्ञापनार्थं सहयानो रथसहितो भवान् पुरीं प्रविशतां ततो गृहं च प्रविशताम् । तङार्षः । वयं तु इह उपवने अवमुच्य वस्तून्युत्तार्य विश्रम्य ततोऽथ तदनन्तरं पुरीं द्रक्ष्यामहे । तङार्षः ॥ १० ॥ नाहमिति ॥ हे प्रभो हे नाथ हे भक्तवत्सल अहं भवद्भ्यां रहितः मथुरां न प्रवेक्ष्ये तङार्षः । अतः ते भक्तं मां त्यक्तुं नार्हसि ॥ ११ ॥ आगच्छेति ॥ हे अधोक्षज हे सुहृत्तम साग्रजः सुहृद्भिर्गोपालैश्च सह आगच्छयाम सर्वे वयं सहैव गमिष्यामः । गमनेन नोऽस्मान् गेहांश्च सनाथान् कुरु स्वकीयत्वेनाङ्गीकुरु । कंसमावेदयितुं प्रथमं तत्समीपगमनमपि नावश्यकम् । श्वो मरिष्यन्स मे किं करिष्यतीति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनीहीति ॥ स्वपादरजसा नोऽस्माकं गृहमेधिनां गृहान् पुनीहि यस्य तव पादस्य शौचेन गृहाङ्गणस्थितेन पादक्षालनोदकेन गङ्गारूपेण वा तर्पिताः पितरः साग्नयः सुराश्चानुक्षणं तृप्यन्ति अतस्तद्रजसा गृहपावित्र्ये कः संदेहः ॥ १३ ॥ अवनिज्येति ॥ तवाङ्घ्रियुगलमवनिज्य प्रक्षाल्य बलिः श्लोक्यो विपुलकीर्तिर्यैर्हि गुणैः महांश्चासीत् स च अतुलं पूर्वेन्द्रापेक्षयाधिकमैश्वर्यं भूतले भाविन्यैन्द्रपदे च लेभे तथा एकान्तिनां निष्कामभक्तानां या त्वत्प्राप्तिरूपा गतिस्तां च लेभे ॥ १४ ॥ आप इति ॥ तवाङ्घ्र्योरवनेजन्यः क्षालनाच्छुचयः पवित्रा आपः गङ्गा त्रीन् लोकान् त्रिलोकस्थजनान् अपुनन् पवित्रितवत्यः तत्पावित्र्ये किं वक्तव्यं या आपः ईश्वरोऽपि शर्वः शिरसा धृतवान् अस्थिभिर्यत्स्पर्शमात्रेण सगरात्मजाः स्वर्याताः स्वर्गं ब्रह्मलोकं गताः ॥ १५ ॥ देवेति ॥ हे देवदेव हे जगन्नाथ पुण्यं पुण्यजननं श्रवणं कीर्तनं च यस्य तथाभूत-यदुषु उत्तम उत्तमः श्लोको यशो यस्य तथाभूत हे नारायण ते तुभ्यं नमोऽस्तु ॥ १६ ॥ आयास्य इति ॥ यदुचक्राय यदुवंशसमूहाय द्रुह्यतीति तथा तं कंसं हत्वा आर्यसम-

पुनीहि पादरजसा गृहान्नो गृहमेधिनाम् ॥ यच्छौचेनानुतृप्यन्ति पितरः साग्नयः सुराः ॥ १३ ॥ अवनिज्याङ्घ्रियुगलमासीत् श्लोक्यो बलिर्महान् ॥ ऐश्वर्यमतुलं लेभे गतिं चैकान्तिनां तु या ॥ १४ ॥ आपस्तेऽङ्घ्र्यवनेजन्यस्त्रीँल्लोकाञ्छुचयोऽपुनन् ॥ शिरसाऽधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥ १५ ॥ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन ॥ यदूत्तमोत्तमश्लोक नारायण नमोऽस्तु ते ॥ १६ ॥ श्रीभगवानुवाच ॥ आयास्ये भवतो गेहमहमार्यसमन्वितः ॥ यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥ १७ ॥ एवमुक्तो भगवता सोऽक्रूरो विमना इव ॥ पुरीं प्रविष्टः कंसाय कर्माऽऽवेद्य गृहं ययौ ॥ १८ ॥ अथापराह्णे भगवान् कृष्णः सङ्कर्षणाऽन्वितः ॥ मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः ॥ १९ ॥ ददर्श तां स्फाटिकतुङ्गगोपुरद्वारां बृहद्धेमकपाटतोरणाम् ॥ ताम्राऽऽरकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभिताम् ॥ २० ॥

न्वितः बलभद्रसहितोऽहं भवतो गेहमायास्ये आगमिष्यामि। तत्रार्थः। अन्येषामपि सुहृदां प्रियं वितरिष्ये करिष्यामि। तत्रार्थः। अत्र कंसं हत्वेत्युक्तिः संकेतेनैव मन्त्रभङ्गभयादिति ज्ञेयम् ॥ १७ ॥ एवमिति ॥ एवं भगवता उक्तः सोऽक्रूरो विमना इव आयास्ये इति स्वीकारेऽपि संप्रति अनागमेन किंचिद्विमनाः सन् पुरीं प्रविष्टः कंसाय रामकृष्णानयनरूपं स्वकृतं कर्मावेद्य स्वगृहं ययौ ॥ १८ ॥ अथेति ॥ अथ पुरीं दिदृक्षुः गोपैः परिवारितः सङ्कर्षणान्वितश्च भगवान् कृष्णः अपराह्णे मथुरां प्राविशत् ॥ १९ ॥ ददर्शेति ॥ स्फाटिकानि स्फटिकमयानि तुङ्गान्युच्छ्रितानि गोपुराणि पुरद्वाराणि अन्यानि च गृहादिद्वाराणि यस्यां तां गोपुरद्वारेषु बृहन्ति हेममयानि कपाटानि तोरणानि बहिर्द्वाराणि च यस्यां सा। ताम्रं च आरः आरकूटः पित्तलाख्यः तन्मयानि कोष्ठानि धान्यागाराश्वशालादयो यस्यां तां परिखाः परितः खाता गर्तास्ताभिर्दुरासदां दुर्गमामुद्यानानि दूरस्थानि वनानि रम्याण्युपवनानि तु निकटानि तैरुपशोभितां तां पुरीं भगवान् ददर्श ॥ २० ॥

CC-0. In Public Domain. Digitization by eGangotri

सौवर्णेति द्वयम् ॥ सौवर्णानि सुवर्णरचितवस्तुसमूहशोभितानि शृङ्गाटकानि चतुष्पथानि हर्म्याणि धनिनां गृहाश्च निष्कुटा गृहोचिता आरामाश्च तैः श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशनस्थानैश्च तथाऽन्यैश्च भवनैर्गृहैरुपस्कृताम् अलङ्कृतां वैदूर्यवज्रामलनीलविद्रुमैस्तथा मुक्ताहरिद्भिश्च जुष्टेषु इति वलभ्यादिकुट्टिमान्तविशेषणम्। "नपुंसकमनपुंसके नैकवच्चास्यान्यतरस्याम्" वलभीषु वेदिषु जालामुखरन्ध्रकुट्टिमेषु च आविष्टैः उपविष्टैः पारावतैर्बर्हिभिर्मयूरैश्च नादितामित्यन्वयः। तत्र अमलः स्फटिकः हरितो मरकताः वलभ्यो गृहपुरोभागवक्रदारुच्छादनानि उपवेशनोच्चस्थानानि वा। उपरितनगृहाणि वा गृहचूडेति स्वामी। "आच्छादनं स्याद्वलभी गृहाणाम्" इति हलायुधः। "वलभी चन्द्रशालिका" इति त्रिकाण्डशेषः। वेदयो गृहाग्रे इष्टकादिबद्धा विश्रामभूमयः। जालेषु गवाक्षेषु आ समन्तात् मुखानीव रन्ध्राणि जालामुखरन्ध्राणि गवाक्षछिद्राणि। "जालं तु गवाक्षे क्षारके गणे" इति हैमः। कुट्टिमानि मणिबद्धभूमयः संसिक्तानि रथ्यादीनि यस्यां तां रथ्या राजमार्गाः आपणाः पण्यवीथयः मार्गाः प्रसिद्धाः।

सौवर्णशृङ्गाटकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृताम् ॥ वैदूर्यवज्राऽमलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥ २१ ॥ जुष्टेषु जालामुखरन्ध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ॥ संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्याङ्कुरलाजतण्डुलाम् ॥ २२ ॥ आपूर्णकुम्भैर्दधिचन्दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः ॥ सवृन्तरम्भाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां सपट्टिकैः ॥ २३ ॥ तां सम्प्रविष्टौ वसुदेवनन्दनौ वृतौ वयस्यैर्नरदेववर्त्मना ॥ द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥

चत्वराणि अङ्गणानि प्रकीर्णानि माल्यानि पुष्पाणि अङ्कुराः यवाङ्कुराः लाजाः भ्रष्टधान्यानि तण्डुलाश्च यस्यां तां पुरीं ददर्शेत्यनुषङ्गः ॥ २१ ॥ २२ ॥ आपूर्णेति ॥ दध्ना चन्दनेन च उक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो येषु तैः सपल्लवैर्वृन्दैः फलगुच्छैरुपलक्षिताः रम्भाः क्रमुकाश्च तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः जलेनापूर्णैः कुम्भैः स्वलङ्कृतानि द्वाराणि येषां ते गृहा यस्यां ताम्। तत्रेयं रीतिः। द्वारेषूभयतस्तण्डुलानामुपरि कुम्भास्तत्परितः प्रसूनावलयः कण्ठे पट्टिका मुखे चूतादिपल्लवाः तदुपरि पात्रान्तरे दीपावलयः तत्सन्निधौ रम्भाः क्रमुकाः केतवस्तोरणानि चेति ॥ २३ ॥ तामिति ॥ हे नृप तामेवंभूतां पुरीं वयस्यैः सखिभिर्वृतौ नरदेववर्त्मना राजमार्गेण संप्रविष्टौ वसुदेवनन्दनौ कर्मभूतौ द्रष्टुमुत्सुकाः उत्साहयुक्तास्त्वरिताः त्वरायुक्ताश्च पुरस्त्रियः याः काश्चित्साधारण्यस्ताः समीयुर्गृहान्निःसृत्य सम्मुखमाजग्मुः। याश्च न बहिर्निर्गमनयोग्याः कुलस्त्रियस्ताश्च हर्म्याण्यारुरुहुरिति विवेकः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काश्चिदिति ॥ निस्वनं भगवदागमे लोकैः कृतं कोलाहलं निशम्य सोत्सवाः भगवद्दर्शनोत्कण्ठिताः काश्चित् इति सर्वत्र सम्बध्यते । विपर्यक् पादाभरणं हस्ते हस्ताभरणं च पादे तथाधोधार्यं वस्त्रमुपरि उपरिधार्यं वस्त्रं चाध इत्येवं विपरीतं यथा भवति तथा धृतानि वस्त्राणि भूषणानि च याभिस्तथाभूताः काश्चित्समीयुरिति पूर्वस्यैवानुषङ्गः श्लोकद्वये सर्वत्र । अथ तथा अपरास्तु युगलेषु धार्येषु कुण्डलकङ्कणादिषु एकं विस्मृत्यैकमेव धृत्वा समीयुः । अन्यास्तु कृतं निहितं एकमेव पत्रं ताटङ्कं ययोस्ते श्रवणे कर्णौ यासां एकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च समीयुः । अपरास्तु द्वितीयं स्वलोचनं नाङ्क्त्वा अनङ्क्त्वा एकस्मिन्नेव वामे लोचने कज्जलं निधाय समीयुः । एकाः काश्चित्तु अश्नन्त्यः भुञ्जानाः नुमार्षः तत् भोजनमपास्य समीयुः । एकास्तु अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यङ्गाः अभ्यङ्गमपास्य समीयुः । काश्चित् स्नान्त्यः अकृतोपमज्जनाः अकृतस्नानाः क्लिन्नगात्र्य एव समीयुः । काश्चित्तु स्वपन्त्यः शयानाः नुमार्षः उत्थाय समीयुः । तथा काश्चित् बालानां मातरः अर्भं बालं स्तनं प्रपाययन्त्यः अपोह्य

काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ॥ कृतैकपत्त्रश्रवणैकनूपुरा नाङ्क्त्वा द्वितीयं त्वपराश्च लोचनम् ॥ २५ ॥
अश्नन्त्य एकास्तदपास्य भोजनमभ्यज्यमाना अकृतोपमज्जनाः ॥ स्वपन्त्य उत्थाय निशम्य निःस्वनं प्रपाययन्त्योऽर्भमपो ह्यमातरः ॥ २६ ॥
मनांसि तासामरविन्दलोचनः प्रगल्भलीलाहसितावलोकनैः ॥ जहार मत्तद्विरदेन्द्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवम् ॥ २७ ॥
दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः ॥ आनन्दमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनन्तमरिन्दमाधिम् ॥ २८ ॥ प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखाम्बुजाः ॥ अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ ॥ २९ ॥

बालं निरस्य समीयुः । केचित्तु सोत्सवा इत्यत्र विवाहादिकर्मपरास्तत्तत्कर्म त्यक्त्वा परिणीयमानाः कन्याश्च पतिपरिक्रमणमसमाप्य समीयुरित्याहुः ॥ २५ ॥ २६ ॥ मनांसीति ॥ मत्तद्विरदेन्द्रो मत्तगजस्तद्वद्विक्रमो गतिर्यस्य सः अरविन्दलोचनः भगवान् प्रगल्भा उत्कटा लीलास्ताभिः हसितानि अवलोकनानि च तैः तथा श्रियं लक्ष्मीं रमयतीति श्रीरमणस्तेनात्मना वपुषा च तासां स्त्रीणां दृशामुत्सवं हर्षं ददत् मनांसि जहार अपहृतवान् ॥ २७ ॥ दृष्ट्वेति ॥ हे अरिन्दम मुहुः श्रुतत्वात्तमनुद्रुतचेतसस्तास्तं दृष्ट्वा तस्य प्रेक्षणपूर्वकं यदुत्स्मितं तदेव सुधा तयोक्षणं सेचनं तेन लब्धो मानः सत्कारो याभिस्ताः दृशा उद्घाटितनेत्रद्वारा आत्मनि अन्तःकरणे लब्धं प्राप्तम् आनन्दमूर्तिं श्रीकृष्णमुपगुह्य आलिङ्ग्य हृष्यत्त्वचस्तदप्राप्तिजमनन्तमाधिं मनोव्यथां जहुः ॥ २८ ॥ प्रासादेति ॥ प्रासादशिखरारूढाः प्रीत्या उत्फुल्लानि मुखाम्बुजानि यासां ताः प्रमदाः सौमनस्यैः पुष्पसमूहैः । यद्वा । सुमनसां तासां कर्म्माणि भावेङ्गितानि सौमनस्यानि तैर्हेतुभिः बलकेशवावभ्यवर्षन् पुष्पाणि स्मितानि चेति शेषः ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

दध्यक्षतैरिति ॥ तत्र तत्र मिलिताः प्रमुदिताः द्विजातयो दध्यादिभिस्तौ रामकृष्णौ आनर्चुः । तत्र दधि अक्षताश्च तिलकार्थं शुभसूचका उदकपात्रं पादप्रक्षालनार्थं स्रक् पुष्पमाला गन्धः चन्दनम् अभ्युपायनानि मिष्टान्नफलादीनि ॥ ३० ॥ ऊचुरिति ॥ पौराः पुरवासिनः स्त्रीजनाः एतादृशवचसः स्त्रीष्वौचित्यात् ऊचुश्च किं तदाह । अहो आश्चर्यं गोप्यः । किं महत्तपः अचरंश्चक्रुः । या गोप्यो नरलोकस्य महानुत्सवो याभ्यां तौ रामकृष्णावनुक्षणं पश्यन्ति ॥ ३१ ॥ रजकमिति ॥ गदाग्रजो भगवान् वस्त्ररञ्जनस्थानात् पुरस्यान्तः आयातं कश्चित् दैत्यस्वभावं कंसभृत्यं रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रङ्गमपि कुर्वन् रङ्गकारस्तं दृष्ट्वा धौतानि निर्णिक्तानि अत्युत्तमानि च वासांसि अयाचत । गदाग्रज इति श्रीकृष्णसापत्नभ्रातृगणमुख्यस्य गदनाम्नो जन्म भगवति व्रजं गते कंसभीत्युचितवसुदेवाज्जातमिति सूचनाय । "देवरक्षितया लब्धा नव चात्र गदादयः" इत्युक्तो दैवरक्षिते योऽयं गदः नतु रौहिणेयः बलानुजस्य तस्य भाविजननत्वात् ॥ ३२ ॥ देहीति ॥ अङ्ग हे रजक आवयोः अर्हतोः दानपात्रतया योग्ययोः समुचितानि योग्यानि वासांसि देहि । दातुस्ते तव परमुत्कृष्टं श्रेयो भविष्यति अत्र संदेहो नास्ति । अदातुस्तु मरणमित्यर्थः ॥ ३३ ॥ स इति ॥ राज्ञः कंसस्य

दध्यक्षतैः सोदपात्रैः स्रग्गन्धैरभ्युपायनैः ॥ तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥ ३० ॥ ऊचुः पौरा अहो गोप्यस्तपः किमचरन् महत् ॥ या ह्येतावनुपश्यन्ति नरलोकमहोत्सवौ ॥ ३१ ॥ रजकं कञ्चिदायातं रङ्गकारं गदाग्रजः ॥ दृष्ट्वाऽयाचत वासांसि धौतान्यत्युत्तमानि च ॥ ३२ ॥ देह्यावयोः समुचितान्यङ्ग वासांसि चार्हतोः ॥ भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥ ३३ ॥ स याचितो भगवता परिपूर्णेन सर्वतः ॥ साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥ ३४ ॥ ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ॥ परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सत ॥ ३५ ॥ याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ॥ बध्नन्ति घ्नन्ति लुम्पन्ति दृप्तं राजकुलानि वै ॥ ३६ ॥

भृत्यः सुदुर्मदः स रजकः सर्वतः परिपूर्णेन भगवता याचितः रुषितः सन् साक्षेपम् आक्षेपगर्भं यथा स्यात्तथा प्राह स्म ॥ ३४ ॥ ईदृशानीति ॥ हे उद्वृत्ताः उत्सृष्टं त्यक्तं वृत्तं सदाचारो यैः ते गिरेर्गोवर्द्धनस्य वनेचराः "तत्पुरुषे कृति०" इत्यलुक् । ये यूयं राज्ञो द्रव्याणि वस्त्राण्यभीप्सथ ते यूयं किमीदृशानि उत्तमान्येव वासांसि परिधत्त सम्भावनायां लोट् । यद्यपि भगवता परिहितं स्वीयं वस्त्रमप्युत्तममेवाभूत् तथाप्यासुरैस्तैस्तदुत्तमतया न दृष्टम् । भारतीपक्षे हे उद्वृत्ताः उत्कृष्टचरिताः "वृत्तं पद्ये चरित्रे च" इत्यमरः । नित्यमेव गोवर्धनवनविहारिणः किमीदृशान्येव तुच्छानि परिधत्त अपि तु परमदिव्यानि राजद्रव्याणि चाभीप्सथ किं नैवेत्यर्थः । व्याजमात्रमिदं याचनमिति भावः ॥ ३५ ॥ यातेति ॥ हे बालिशाः हे अज्ञाः इतः स्थानादाशु यात शीघ्रं स्थानान्तरं गच्छत तत्रापि यदि जिजीविषा जीवितुमिच्छा तर्ह्येवं नैव प्रार्थनीयम् हि यस्माद्राजकुलानि राजकीयाः पुरुषाः युष्मद्विधं दृप्तमुद्धतं जनं बध्नन्ति घ्नन्ति लुम्पन्ति निःस्वं कुर्वन्ति । पक्षे यातः प्राप्तः आशुश्चपलो मादृशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालिशो मूर्खो यैस्ते इति तत्संबुद्धिः यदि जिजीविषा बलप्रकटनेच्छा " जीव बलप्राणनयोः "। तर्हि नैवं प्रार्थ्यं बलाद्वस्त्राणि ग्राह्यानि । हि यस्मात् राजकुलानि राजवंशजा भवादृशाः दृप्तं मादृशं जनं बध्नन्ति घ्नन्ति लुम्पन्ति च ॥ ३६ ॥ एवमिति ॥ एवं विकत्थमानस्य असंबद्धं भाषमाणस्य रजकस्य शिरः कुपितो देवकीसुतः कराग्रेण नखैनैव कायादपातयत् ॥ ३७ ॥ तस्येति ॥ ततस्तस्य रजकस्यानुजीविनः सर्वे वासःकोशान् वस्त्रपुटकान् विसृज्य त्यक्त्वा मार्गं सर्वतो मार्गस्य सर्वा दिशः " उभसर्वतसोः " इति द्वितीया । दुद्रुवुः पलायितवन्तः ततो वासांसि अच्युतः कृष्णः जगृहे आदत्त । इदं च मखोत्सवाय रञ्जितानां वाससां लुण्ठनं मखोत्सवविघ्नाय ॥ ३८ ॥ वसित्वेति ॥ कृष्णः संकर्षणश्चात्मनः प्रिये पीतनीले स्वाभीष्टे वस्त्रे वसित्वा परिधाय शेषाणि गोपेभ्यः अदत्त दत्तवान् । कानिचित्तु शेषाण्यनभिप्रेतानि वासांसि भुवि विसृज्य त्यक्त्वा ततोऽगात् ॥ ३९ ॥ तत इति ॥ ततस्तु वायकः तन्तुवायकः प्रीतियुक्तः विचित्रवर्णैश्चैलेयैर्वस्त्रमयैराकल्पैर्भूषणैर्वलयादिभिर्यथानुरूपं तयो रामकृष्णयोर्वेषमकरोत्

एवं विकत्थमानस्य कुपितो देवकीसुतः ॥ रजकस्य कराग्रेण शिरः कायादपातयत् ॥ ३७ ॥ तस्यानुजीविनः सर्वे वासःकोशान् विसृज्य वै ॥ दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ॥ ३८ ॥ वसित्वात्मप्रिये वस्त्रे कृष्णः सङ्कर्षणस्तथा ॥ शेषाण्यदत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥ ३९ ॥ ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् ॥ विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ॥ ४० ॥ नानालक्षणवेशाभ्यां कृष्णरामौ विरेजतुः ॥ स्वलङ्कृतौ बालगजौ पर्वणीव सितेतरौ ॥ ४१ ॥ तस्य प्रसन्नो भगवान् प्रादात् सारूप्यमात्मनः ॥ श्रियं च परमां लोके बलैश्वर्यस्मृतीन्द्रियम् ॥ ४२ ॥ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः ॥ तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥ ४३ ॥ तयोरासनमानीय पाद्यं चार्थार्हणादिभिः ॥ पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ॥ ४४ ॥

अलङ्कारमकल्पयत् । मल्ललीलायां गात्रातोदकत्वेन चैलजानामानुरूप्यात् ॥ ४० ॥ नानेति ॥ तदा पर्वणि उत्सवे स्वलङ्कृतौ सितेतरौ गौरश्यामौ बालगजौ यथा राजेते तथा नानाविधलक्षणैः चैलेयैः रचितौ यौ वेषौ अलङ्कारौ ताभ्यां रामकृष्णौ विरेजतुः ॥ ४१ ॥ तस्येति ॥ ततः प्रसन्नो भगवान् तस्य वायकस्य देहावसाने आत्मनः स्वस्य सारूप्यं समानरूपतां प्रादात्सङ्कल्पितवान् तथास्मिन्लोके जीवदशायामपि परमामुत्कृष्टां श्रियं सम्पदं बलं शारीरम् ऐश्वर्यं भावं . स्वविषयिकां स्मृतिम् इन्द्रियं तत्पाटवं चादात् ॥ ४२ ॥ तत इति ॥ ततश्च तौ सुदामाख्यस्य मालाकारस्य भवनं जग्मतुः । सः तौ दृष्ट्वा समुत्थाय भुवि शिरसा ननाम ॥ ४३ ॥ तयोरिति ॥ सानुगयोर्गोपैः सहितयोः तयोः आसनं पाद्यं च समर्प्य स्रक्ताम्बूलानुलेपनैः अर्हणादिभिरन्यैश्च पूजासाधनैः पूजां चक्रे ॥ ४४ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्राहेति ॥ सः प्राह स्म हे प्रभो हि यस्माद् वां युवयोरागमनेन मह्यं मां प्रति मदर्थं पित्रादयस्तुष्टास्तेषामृणाद्वयं विमुक्ताः नोऽस्माकं कुलं च पावितम् उद्धृतमतोऽस्माकं जन्म सार्थकं सफलं जातम् ॥ ४५ ॥ भवन्ताविति ॥ किलेत्यवधारणे । विश्वस्य कृत्स्नस्य जगतो भवन्तावेव परं कारणं साधूनां क्षेमाय पालनाय भवाय उद्भवाय च अंशेन स्वसंकल्पेन मूर्तिभेदेनेह भूलोकेऽवतीर्णौ ॥ ४६ ॥ न हीति ॥ सुहृदोः सर्वमित्रयोः समयोः जगत आत्मनोरुपादानभूतयोर्भजन्तं भजतोरपि सुरतरुवद्वां युवयोः रजकवधवा-यकानुग्रहाभ्यां कल्प्यमाना सर्वभूतेषु विषमा दृष्टिरनीश्वरत्वद्योतिका नैवास्ति ॥ ४७ ॥ ताविति ॥ तौ जगदीश्वरौ भवन्तौ भृत्यं मा माज्ञापयतम् वां युवयोः किं दास्यमहं करवाणि । यत् भवद्भिः स्वकीयत्वेनाङ्गीकृत्य कार्येषु नियुज्यते तदेष हि एष नियोग एव पुंसोऽत्यनुग्रहः ॥४८॥ इतीति ॥ हे राजेन्द्र इति एवं विज्ञापयन् अभिप्रेत्य भगवद-भिप्रायं ज्ञात्वा प्रीतमानसः सुदामा प्रशस्तैः सुगन्धिभिः कुसुमैर्विरचितां मालां जात्यैकतया मालाः ददौ ॥ ४९ ॥ ताभिरिति ॥ अनुगैर्गोपैः सह ताभिर्मालाभिः स्वलङ्कृतौ

प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो॥पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम्॥४५॥ भवन्तौ किल विश्वस्य जगतः कारणं परम्॥ अवती-र्णाविहांशेन क्षेमाय च भवाय च ॥ ४६ ॥ न हि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः ॥ समयोः सर्वभूतेषु भजन्तं भजतोरपि ॥४७॥ तावाज्ञा-पयतं भृत्यं किमहं करवाणि वाम् ॥ पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥४८॥ इत्यभिप्रेत्य राजेन्द्र सुदामा प्रीतमानसः ॥ शस्तैः सुगन्धैः कुसुमैर्मालां विरचितां ददौ॥४९॥ताभिः स्वलङ्कृतौ प्रीतौ कृष्णरामौ सहानुगौ ॥ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥५०॥ सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ॥ तद्भक्तेषु च सौहार्दं भूतेषु च दयां पराम् ॥५१॥ इति तस्मै वरान् दत्त्वा श्रियं चान्वयवर्धिनीम् ॥ बलमायुर्यशः कान्तिं निर्जगाम सहाग्रजः ॥५२॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे पुरप्रवेशो नामैकचत्वारिंशोऽध्यायः ॥४१॥श्रीशुक उवाच॥ अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीताङ्गविलेपभाजनाम् ॥ विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यान्तीं प्रहसन् रसप्रदः ॥ १ ॥

अत एव प्रीतौ वरदौ कृष्णरामौ प्रणताय प्रपन्नाय शरणागताय तस्मै वरान् ददतुः वरान् वृणीष्वेत्युक्तवन्तौ ॥ ५० ॥ सोऽपीति ॥ स सुदामापि अखिलात्मनि तस्मिन् श्रीकृष्ण एवामलां भक्तिं तद्भक्तेषु च सौहार्दं मित्रताम् अन्येषु च भूतेषु प्राणिमात्रेषु परां दयां स्वार्थनिरपेक्षपरदुःखप्रहाणेच्छारूपां वव्रे वृतवान् ॥ ५१ ॥ इतीति ॥ इत्येवं तद्याचितं वरं तस्मै दत्त्वा अन्वयवर्द्धिनीं वंशे वृद्धिमतीं श्रियं बलं शरीरसामर्थ्यमायुः प्रसिद्धं यशः सुकान्तिं तेजः स्वयमेव भक्तवात्सल्येन दत्त्वा सहानुगः कृष्णस्ततो निर्जगाम ॥ ५२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमैकचत्वारिंशके व्यधात् ॥ ४१ ॥ द्विचत्वारिंशके कुब्जर्जुत्वं चापस्य भेदनम् ॥ रक्षिनाशः कंसभीश्च श्लोकास्तत्राष्टवह्नयः ॥ द्वे उवाचेति पादोनाश्चन्द्रवेदाः अनुष्टुभः ॥४२॥ अथेति ॥ राजपथेन राजमार्गेण व्रजन् रसप्रदः सुखप्रदः यद्वा रसं कुब्जायां शृङ्गारं स्वस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खेषु हास्यं सर्वत्राद्भुतं च प्रददाति सः माधवः गृहीतानि अङ्गविलेपानां चन्दनादीनां भाजनानि पात्राणि यया तां वरं सुंदरम् आननं यस्यास्तां कुब्जां युवतीं स्त्रियं यान्तीं गच्छन्तीं विलोक्य प्रहसन् पप्रच्छ इयं भूमिशक्तिरूपायाः सत्यभामाया अंशभूता अत एव भूम्या सहैक्येनेयं परः सहस्रदुष्टासुरभारभुग्नत्वं स्वकुब्जेन दर्शयन्ती स्वीयं गन्धगुणं चन्दनादिमिषेणोपहरन्ती भूमिरेव पथि सङ्गताभूत् । भगवांश्च भारापनयनं ज्ञापयन् भुग्नतानिवृत्तिमेव ऋजुत्वं चकारेति प्रकरणार्थः ॥ १ ॥ का त्वमिति ॥ हे वरोरु हे अङ्गने चेति सोपहाससम्बोधनम् । उ हेति प्रक्षेपयुक्ते वितर्के । अस्यां पुर्यां त्वं का एतदनुलेपनं कस्य कस्मै नयसीत्यर्थः । साधु यथार्थं नोऽस्मान्प्रत्येतत्कथयस्व। उत्तममिदमङ्गविलेपनम् आवयोर्देहि तेनानुलेपनदानेन हेतुना ते तव नचिरादेव श्रेयः उत्तमं फलं भविष्यति ॥ २ ॥ दासीति ॥ हे सुन्दर तिस्रो ग्रीवोरःकट्यो वक्रा यस्याः सा त्रिवक्रेति अन्वर्थं नाम यस्याः साहं पुंवद्भाव आर्ष इति तोषिण्यादयः । हि प्रसिद्धा अनुलेपसाधनक्रियायां कंसस्य सम्मता दास्यस्मि मद्भावितं मया साधितमनुलेपनं भोजपतेः

का त्वं वरोर्वेतदु ह्यनुलेपनं कस्याङ्गने वा कथयस्व साधु नः ॥ देह्यावयोरङ्गविलेपमुत्तमं श्रेयस्ततस्तेन चिराद् भविष्यति ॥ २ ॥
सैरन्ध्र्युवाच ॥ दास्यस्म्यहं सुन्दर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि ॥ मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ॥ ३ ॥
रूपपेशलमाधुर्यहसितालापवीक्षितैः ॥ धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम् ॥ ४ ॥ ततस्तावङ्गरागेण स्ववर्णेतरशोभिना ॥ संप्राप्तपरभागेन शुशुभातेऽनुरञ्जितौ ॥ ५ ॥ प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम् ॥ ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलम् ॥ ६ ॥ पद्भ्यामाक्रम्य प्रपदे व्यङ्गुल्युत्तानपाणिना ॥ प्रगृह्य चुबुकेऽध्यात्ममुदनीनमदच्युतः ॥ ७ ॥

कंसस्यातिप्रियं भवति युवां विनान्यतमस्तदनुलेपनं स्वीकर्तुं कोऽर्हतीति ॥ ३ ॥ रूपेति ॥ एवमुक्त्वा भगवतो रूपं पेशलं सौकुमार्यं माधुर्यं च रसिकता हसितं च आलापश्च भाषणं च वीक्षितं च तैः धर्षितः मोहित आत्मा चित्तं यस्याः सा सान्द्रं घनम् अनुलेपनम् उभयो रामकृष्णयोर्ददौ ॥ ४ ॥ तत इति ॥ ततश्च स्ववर्णेतरशोभिन. रामकृष्णयोः सितासितवर्णाभ्याम् इतरौ श्यामपीतौ वर्णौ ताभ्यां शोभितुं शीलमस्य तेन संप्राप्तपरभागेन सम्प्राप्तः परो नाभेरुपरितनो भागो येन सम्प्राप्तः परभागः शोभातिशयो येनेति वा तेन अङ्गरागेणानुरञ्जितौ तौ रामकृष्णौ शुशुभाते । सन्धिरार्षः । नु इति च्छेदो वा । रञ्जितौ नु वस्तुतस्तु स्वत एव शुशुभाते इत्यर्थः ॥५ ॥ प्रसन्न इति ॥ स्वदर्शनस्य फलं लोकस्य दर्शयन् अङ्गरागार्पणभक्त्या प्रसन्नः भगवान् रुचिराननां त्रिवक्रां कुब्जामृज्वीमवक्रां कर्तुं मनश्चक्रे॥६॥पद्भ्यामिति ॥ अच्युतः कृष्णः तस्या प्रपदे पादाग्रद्वयं निजपद्भ्यामाक्रम्य आक्रमणेनावष्टभ्य द्वे अङ्गुली उत्ताने उन्नते यस्मिंस्तेन पाणिना तस्याश्चिबुके मुखस्याधोभागे प्रगृह्य अध्यात्मं देहम् उदनीनमत् उन्नमयामास ॥७॥

CC-0. In Public Domain. Digitization by eGangotri

सेति ॥ सा कुब्जा मुकुन्दस्पर्शनादेव हेतोः चिबुकग्रहणादि तु विनोदमात्रम् । तदा सद्य एव ऋजु समानं योग्यावयवमङ्गं यस्याः सा बृहत्यौ श्रोणी पयोधरौ च यस्या स्तथाभूता प्रमदोत्तमा बभूव ॥८॥ तत इति ॥ ततः रूपं गुणाः औदार्यं दक्षत्वं तैः सम्पन्ना रूपगुणयोरौदार्येण महत्त्वेन सम्पन्ना वा जातो हृच्छयः कामो यस्याः सा कुब्जा स्मयन्ती हसन्ती। शता आर्षः। तस्योत्तरीयान्तमाकृष्य तं केशवं प्राह स्म ॥ ९ ॥ एहीति ॥ हे वीर एहि अस्मद्गृहं प्रत्यागच्छयामः त्वया सहैव गृहं गच्छामः इह स्थाने त्वां त्यक्तुं नोत्सहे न शक्नोमि । हे पुरुषर्षभ त्वया निमित्तेन उन्मथितं कामक्षोभितं चित्तं यस्यास्तस्या मम प्रसीद ॥ १० ॥ एवमिति ॥ रामस्य पश्यतः सतः स्त्रिया एवं याच्यमानः कृष्णोऽनुगानां गोपानां चकाराद्बलस्य च मुखं विलोक्य एतच्च रामादीन्प्रति एतां वञ्चयामीति वञ्चनाय प्रहसन्हर्षेण तामुवाच ॥ ११ ॥ एष्यामीति ॥ हे सुभ्रूः साधितः कंसादिवधरूपोऽर्थो येन तथाभूतः सन् पुंसामाधिविकर्षणं मनोदुःखनिवर्तकं ते गृहम् एष्यामि । यतः अगृहाणां दाररहितानां निवासरहितानां वा पान्थानां नोऽस्माकं

सा तदर्जुसमानाङ्गी बृहच्छ्रोणिपयोधरा ॥ मुकुन्दस्पर्शनात् सद्यो बभूव प्रमदोत्तमा ॥८॥ ततो रूपगुणौदार्यसंपन्ना प्राह केशवम् ॥ उत्तरीयान्तमाकृष्य स्मयन्ती जातहृच्छया ॥ ९ ॥ एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे ॥ त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ॥१०॥ एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः ॥ मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह॥११॥ एष्यामि ते गृहं सुभ्रूः पुंसामाधिविकर्शनम् ॥ साधितार्थो गृहाणां नः पान्थानां त्वं परायणम् ॥ १२ ॥ विसृज्य माध्व्या वाण्या तां व्रजन् मार्गे वणिक्पथैः ॥ नानोपायनताम्बूलस्रग्गन्धैः साग्रजोऽर्चितः ॥ १३ ॥ तद्दर्शनस्मरक्षोभादात्मानं नाविदन् स्त्रियः ॥ विस्रस्तवासःकबरवलयालेख्यमूर्तयः ॥ १४ ॥ ततः पौरान् पृच्छमानो धनुषः स्थानमच्युतः ॥ तस्मिन् प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतम् ॥ १५ ॥

त्वमेव परायणमाश्रयः । अत्र कुब्जां प्रति प्रियोऽयं मां स्वीकरोतीति गोपान् प्रति तु सामान्यवनितेयं ग्राम्या वा इमां कृष्णो वञ्चयतीति द्योतितम् ॥१२॥ विसृज्येति ॥ एवं-विधया माध्व्या मधुरया "ऋत्व्यवास्त्व्यवास्त्व०" इत्यादिना छान्दसो निपातः । वाण्या तां विसृज्य तत उत्तरीयान्तं त्याजयित्वा प्रस्थाप्य मार्गे व्रजन् साग्रजो रामेण सहितः कृष्णः वणिग्जनैः वणिक्पथैरिति पाठे वाणिज्यमार्गवर्तिभिर्नानाजातिभिरित्यर्थः । नानाविधैरुपायनैः श्रेष्ठवस्तुभिस्ताम्बूलस्रग्गन्धैश्चार्चितो बभूव ॥ १३ ॥ तद्दर्शनेति ॥ तस्य भगवतो दर्शनेन यः स्मरस्य क्षोभस्तस्माद्धेतोः स्त्रिय आत्मानं देहं नाविदन् । का वयं क्व वर्तामहे किं कुर्मह इत्यनुसंधातुमक्षमाअभूवन् । ततश्च विस्रस्ताः स्थानात्प्रचलि- ॥१३२॥
ता वासःकबरवलया यासां ता लेख्याः लिखितप्रतिमा इव निश्चला मूर्तयो यासां तादृश्यो बभूवुः ॥ १४ ॥ तत इति ॥ ततश्च पौरान्प्रति धनुषः स्थानं धनुर्मखशालां पृच्छमानः शानजार्षः । अच्युतः कृष्णः तस्मिन् धनुषः स्थाने प्रविष्टः सन्नैन्द्रं धनुरिवाद्भुतं महत्त्वेन पूजितत्वेन च सत्कृतं धनुर्ददर्श ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुषैरिति ॥ बहुभिः पुरुषैर्गुप्तं रक्षितम् अर्चितं च परमा ऋद्धिः स्वर्णालंकारादिसमृद्धिरस्यास्तीति तथा तद्धनुर्दृष्ट्वा नृभिश्च तद्रक्षकैर्बहुधा वार्यमाणोऽपि कृष्णः प्रसह्य बलाद्धनुराददे गृहीतवान् ॥ १६ ॥ करेणेति ॥ उरुक्रमो महाबलपराक्रमो भगवान् सलीलं यथा भवति तथानायासेनैव वामेन करेणोद्धृतं धनुः सज्यं समारोपितज्याकं कृत्वा नृणां पश्यतामेव सतां निमिषमात्रेणैव कालेन विकृष्य यथा मदकरी मत्तहस्ती इक्षुदण्डं मध्यतो भनक्ति तद्वत् मध्यतो बभञ्ज ॥ १७ ॥ धनुष इति ॥ तदा भज्यमानस्य धनुषः ध्वनिः खमाकाशं रोदसी द्यावापृथिव्यौ दिशश्च पूरयामास सर्वत्र व्याप्तो जातः । यं शब्दं श्रुत्वा कंसस्त्रासं भयमुपागमत् ॥ १८ ॥ तद्रक्षिण इति ॥ तस्य धनुषो रक्षिणः सानुचराः आततायिनः जिघांसया गृहीतशस्त्राः जिघृक्षवः जीवन्नेव गृह्यतां ततो राज्ञा बध्यतामिति वदन्तः । भारतीपक्षे त्वनयोरपकर्ता मादृशो जनो गृह्यतां बध्यतामिति वदन्तः आवव्रुः तावावृतवन्तः ॥ १९ ॥ अथेति ॥ अथानन्तरमेव तान् दुरभिप्रायान् जिघांसून् विलोक्य क्रुद्धौ बभूवतुः ततश्च धनुषः शकले आदाय ताभ्यां

पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् ॥ वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥ १६ ॥ करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यताम् ॥ नृणां विकृष्य प्रबभञ्ज मध्यतो यथेक्षुदण्डं मदकर्युरुक्रमः ॥ १७ ॥ धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ॥ पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥ १८ ॥ तद्रक्षिणः सानुचराः कुपिता आततायिनः ॥ ग्रहीतुकामा आवव्रुर्गृह्यतां बध्यतामिति ॥ १९ ॥ अथ तान् दुरभिप्रायान् विलोक्य बलकेशवौ ॥ क्रुद्धौ धन्वन आदाय शकले तांश्च जघ्नतुः ॥ २० ॥ बलं च कंसप्रहितं हत्वा शालामुखात्ततः ॥ निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसम्पदः ॥ २१ ॥ तयोस्तदद्भुतं वीर्यं निशम्य पुरवासिनः ॥ तेजः प्रागल्भ्यरूपं च मेनिरे विबुधोत्तमौ ॥ २२ ॥ तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान् ॥ कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः ॥ २३ ॥ गोप्यो मुकुन्दविगमे विरहातुरा या आशासताशिष ऋता मधुपुर्यभूवन् ॥ संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान्नु भजतश्चकमेऽयनं श्रीः ॥ २४ ॥

तान् जघ्नतुः । वाक्यभेदात्तानिति पुनरुक्तिर्न दोषः ॥ २० ॥ बलमिति ॥ तदा कंसेन प्रहितं प्रेषितं बलं सैन्यं च हत्वा ततस्तस्मात् शालामुखात् बहिर्निष्क्रम्य तत्र तत्र पुरसम्पदो निरीक्ष्य हृष्टौ चेरतुः ॥ २१ ॥ तयोरिति ॥ तयो रामकृष्णयोस्तद्धनुर्भञ्जनादिलक्षणमद्भुतं वीर्यं कर्म निशम्य श्रुत्वा तेजः पराभिभवनसामर्थ्यं प्रागल्भ्यं धृष्टतां रूपं सौन्दर्यं च दृष्ट्वा पुरवासिनस्तौ विबुधेषु उत्तमौ शिवविष्णू वासुदेवसंकर्षणौ वा मेनिरे अमन्यन्त ॥ २२ ॥ तयोरिति ॥ स्वैरं यथेष्टं यथा तथा तयोर्विचरतोः सतोः सूर्योऽस्तंगिरिमुपेयिवान् प्राप्तवान् । ततश्च गोपैर्वृतौ रामकृष्णौ पुरात् शकटं शकटावमोचनस्थानं नन्दादिसमीपमीयतुः आजग्मतुः ॥ २३ ॥ गोप्य इति ॥ मुकुन्दस्य विगमे व्रजान्निर्गमनवेलायां तद्विरहेणातुरा विवशा गोप्यः या आशिषः आशासत सुखं प्रभाता रजनीयमित्यादिना पुरयोषितामाशिषः सत्या भविष्यन्तीति उक्तवत्यस्ताः सर्वा मधुपुर

CC-0. In Public Domain. Digitization by eGangotri

मथुरायां समासान्ताभाव आर्षः । पुरुषभूषणस्य पुरुषोत्तमस्य कृष्णस्य गात्रलक्ष्मीं देहशोभां पश्यतां जनानाम् ऋताः सत्या बभूवुः। भजतः सेवमानान् इतरान् ब्रह्मादीन् हित्वा श्रीर्महालक्ष्मीः सर्वशोभाधिष्ठात्री वा यत् गात्रमयनं चकमे स्वाश्रयतया स्वीकृतवती यां गात्रलक्ष्मीमिति वा ॥ २४ ॥ अवनिक्तेति ॥ अवनिक्तं क्षालितमङ्घ्रियुगलं ययोस्तौ रामकृष्णौ क्षीरोपसेचनं क्षीरेण उपसिच्यते तत् क्षीरमिश्रमन्नं भुक्त्वा तच्च सायमाशाय मात्राशकटस्थाग्निधानीस्थितभाण्डवृन्दे निक्षिप्तम् कंसचिकीर्षितं परेद्युः कर्तुमिष्टं स्ववधोद्योगं च ज्ञात्वा तां रात्रिं सुखं यथा स्यात्तथा ऊषतुः ॥ २५ ॥ कंस इति द्वयम् ॥ धनुषो भङ्गं रक्षिणां वधं स्वबलस्य च वधं निशम्य तच्च गोविन्दरामयोः परं केवलं विक्रीडितम् अनायासेनैवं कृतं ननु पराक्रमरूपम् इति च निशम्य दुर्मतिः कंसः भीतः अत एव दीर्घप्रजागरः अलब्धनिद्रः उभयथा स्वप्नजागरितप्रकारेण मृत्योर्दौत्यकराणि आगमनसूचकानि चकारात् लोके दुष्कीर्तिसूचकानि च बहूनि दुर्निमित्तानि अपशकुनान्यचष्ट ददर्श ॥ २६ ॥ २७ ॥ जागरजान्याह—अदर्शनमिति ॥ दर्पणज-

अवनिक्ताङ्घ्रियुगलौ भुक्त्वा क्षीरोपसेचनम् ॥ ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितम् ॥ २५ ॥ कंसस्तु धनुषो भङ्गं रक्षिणां स्वबलस्य च ॥ वधं निशम्य गोविन्दरामविक्रीडितं परम् ॥ २६ ॥ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ॥ बहून्याचष्टोभयथा मृत्योर्दौत्यकराणि च ॥ २७ ॥ अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि ॥ असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा ॥ २८ ॥ छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः ॥ स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनम् ॥२९॥ स्वप्ने प्रेतपरिष्वङ्गः खरयानं विषादनम् ॥ यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगम्बरः ॥ ३० ॥ अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च ॥ पश्यन् मरणसंत्रस्तो निद्रां लेभे न चिन्तया ॥ ३१ ॥ व्युष्टायां निशि कौरव्य सूर्ये चाद्भ्यः समुत्थिते ॥ कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ॥ ३२ ॥

लादौ प्रतिरूपे सत्यपि दृश्यमानेऽपि तत्र स्वशिरस अदर्शनं तथा द्वितीये असत्यपि अक्षिनिकोचनादिद्वित्वदर्शननिमित्ताभावेऽपि ज्योतिषां चन्द्रादीनां द्वैरूप्यं द्वित्वं च ददर्श ॥ २८ ॥ छिद्रेति ॥ स्वच्छायायां छिद्रप्रतीतिः कर्णरन्ध्रयोः पिहितयोः सतोरन्तः श्रूयमाणो यो ध्वनिः स प्राणघोषः तस्यानुपश्रुतिः अश्रवणं वृक्षेषु स्वर्णवर्णप्रतीतिः रजः-कर्दमादिषु स्वपदानामदर्शनम् ॥ २९ ॥ स्वप्नजान्याह—स्वप्न इति ॥ प्रेतैः मृतैः भ्रातृबन्धुभिः स्वप्ने परिष्वङ्गः आलिङ्गनं खरमारुह्य यानं विषस्यादनं भक्षणं नलदमाली जपाकु-सुममालावान् तैलेनाभ्यक्तः दिगम्बरो नग्नश्चैको यायात् गच्छेत् इति यत्तदपि एकं दुर्निमित्तं ददर्शेत्याशयः ॥ ३० ॥ अन्यानीति ॥ इत्थंभूतानि मृत्युसूचकानि स्वप्नजाग-रितानि तत्संबन्धीनि चान्यान्यपि दुर्निमित्तानि पश्यन् मरणात्सन्त्रस्तः कंसश्चिन्तया निद्रां न लेभे ॥ ३१ ॥ व्युष्टायामिति ॥ हे कौरव्य निशि व्युष्टायां प्रभातायां सत्यां सूर्ये चाद्भ्यः समुत्थिते उदिते सति " अद्भ्यः प्रातरुदेत्यपः सायं प्रविशति " इत्यादिश्रुतेः । कंसः मल्लानां क्रीडारूपं महोत्सवं कारयामास ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनर्चुरिति ॥ पुरुषाः कंसभृत्याः रङ्गमल्लक्रीडास्थानम् आनर्चुः मार्जनचन्दनाम्भःसेचनमालादिभिरलंकृतवन्तः तूर्याणि भेर्यश्च जघ्निरे अवाद्यन्त। मञ्चाः दिदृक्षूणामुपवेशनार्थं मुच्चानि स्थानानि स्रगादिभिः स्वलंकृता जाताः ॥ ३३ ॥ तेष्विति ॥ तेषु मञ्चेषु पौराः पुरवासिनो जानपदा बहिर्देशवासिनश्च ब्राह्मणक्षत्रियादयो जनाः तथाकृतानि मञ्चोपरि स्थापितानि आसनानि सिंहासनानि येषां ते राजानश्च यथोपजोषं यथासुखं विविशुः उपविष्टवन्तः ॥ ३४ ॥ कंस इति ॥ कंसस्तु अमात्यैर्मन्त्रिभिः परिवृतः मण्डलेश्वरा ये राजानस्तन्मध्यस्थः दुर्निमित्तदर्शनादिना विदूयता उपतप्यमानेन शता आर्षः। हृदयेन युक्तो राजोचितं मञ्चमुपाविशत् ॥ ३५ ॥ वाद्यमानेष्विति ॥ तदा मल्लानां तालः करतलैर्भुजताडनशब्दः उत्तरः उच्चैः श्रूयमाणो येषु तेषु तूर्येषु वाद्यमानेषु सत्सु स्वलंकृताः दृप्ताः सोपाध्यायाः मल्लाचार्यैः सहिताः मल्ला रङ्गभूमिं समाविशन् समागताः ॥ ३६ ॥ चाणूर इति ॥ वल्गुवाद्यैः मनोहरतूर्यादिघोषैः प्रहर्षिताश्चाणूरादयो मल्ला उपस्थानं स्वक्रीडास्थानं मल्लरङ्गमासेदुः आजग्मुः ॥ ३७ ॥ नन्देति ॥ पूर्वं धनुर्भङ्ग-

आनर्चुः पुरुषा रङ्गं तुर्यभेर्यश्च जघ्निरे ॥ मञ्चाश्चालङ्कृताः स्रग्भिः पताकाचैलतोरणैः ॥ ३३ ॥ तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः ॥
यथोपजोषं विविशू राजानश्च कृतासनाः ॥ ३४ ॥ कंसस्तु संवृतोऽमात्यै राजमञ्च उपाविशत् ॥ मण्डलेश्वरमध्यस्थो हृदयेन विदूयता ॥ ३५॥
वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च ॥ मल्लाः स्वलङ्कृता दृप्ताः सोपाध्यायाः समागताः ॥ ३६ ॥ चाणूरो मुष्टिकः कूटः शलस्तोशल एव च ॥
त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ ३७ ॥ नन्दगोपादयो गोपा भोजराजसमाहुताः ॥ निवेदितोपायनास्ते एकस्मिन् मञ्च आविशन्
॥ ३८ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे मल्लरङ्गोपवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥४२ ॥ श्रीशुक उवाच ॥ अथ कृष्णश्च
रामश्च कृतशौचौ परन्तप ॥ मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥ १ ॥

दिकृष्णापराधभयाद्रङ्गमप्रविष्टाः ततश्च वञ्चनाय भोजराजेन कंसेन समाहुताः समाहूताः ह्रस्वमार्षम् । निवेदितानि समर्पितान्युपायनानि यैस्ते नन्दश्चासौ गोपो राजा च तदादयो गोपाश्चैकस्मिन्मञ्चे आविशन् ते च गजवधानन्तरं प्रवेष्टुमिच्छता कृष्णेनाऽग्रे प्रेषिता इति ज्ञेयम् ॥ ३८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमद्विचत्वारिंशके व्यधात् ॥ ४२ ॥ त्रिचत्वारिंशके नागघातो रङ्गप्रवेशनम् ॥ चाणूरभाषणं तत्र श्लोकाः सार्द्धाः खसिन्धवः ॥ उवाचद्वितयं तत्र वह्निवेदा अनुष्टुभः ॥ ४३ ॥ अथेति ॥ अथ हे परन्तप कृतं शौचं दन्तधावनादि याभ्यां तौ। यद्वा। पूर्वेद्युरेव कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्याम् अयं भावः । धनुर्भङ्गादिना आवाभ्यां निजैश्वर्ये सूचितेऽपि पितरौ न मुञ्चति आवां च पुनर्जिघांसति अतोऽत्र मातुलस्याप्यस्य वधे नावयोर्दोष इति कृतलोकापवादपरिहारौ रामः कृष्णश्च तौ मल्लतालानां दुन्दुभीनां च निर्घोषं श्रुत्वा तदुत्सवं द्रष्टुमुपेयतुः आजग्मतुः । अत्र प्रातः पितरमपृष्ट्वैवालक्षितौ सवयस्यौ रामकृष्णौ उत्सवं द्रष्टुमागताविति ज्ञेयम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

रङ्गेति ॥ कृष्णो रङ्गस्य मल्लक्रीडास्थानस्य द्वारमासाद्य आगत्य तस्मिन् द्वारे अम्बष्ठेन हस्तिपेन प्रचोदितं कुवलयापीडं नागं गजमवस्थितमपश्यत् ॥२॥ बद्ध्वेति ॥ शौरिः कृष्णः परिकरं बद्ध्वा युद्धोचितं दृढं परिधानं कृत्वा कुटिलान् वक्रान् विकीर्णान् अलकान् समुह्य निबध्य समूह्येति दीर्घपाठश्छेदार्षः । मेघनादतुल्यगम्भीरया पूर्णाक्षरया वाचा हस्तिपमुवाच ॥ ३ ॥ अम्बष्ठेति ॥ हे अम्बष्ठ हे अम्बष्ठ द्विरुक्तिः क्रोधात् । नौ आवयोः मार्गं देहि अपक्रम अपक्राम मार्गं त्यज दीर्घाभाव आर्षः । मा चिरं विलम्बं मा कार्षीः । नो चेत् मार्गं न दास्यसि चेत् अद्यैव सकुञ्जरं त्वां यमस्य सादनं सदनं स्वार्थेऽण् । नयामि नेष्यामि । वस्तुतः यमेन मनोरोधेन साद्यते प्राप्यते तं मोक्षं नयामि ॥ ४ ॥ एवमिति ॥ एवं निर्भर्त्सितोऽत एव कुपितोम्बष्ठोऽङ्कुशादिना कोपितमतः अन्तको मृत्युः कालस्तन्निमितं यमस्तु मृत्युनियन्ता तैरुपमा यस्य । यद्वा । कालेन अन्त आयुःशेषो येषां तेषां मनुष्यादीनां यो यमः प्रसिद्धः तेनोपमा यस्य तमतिभयङ्करं गजं कृष्णाय कृष्णं हन्तुं चोदयामास । यद्वा । कालेन अन्तो नाशो येषां तेषां मनुष्यादीनामुपमा यस्य तम् । एतेन कृष्णे तत्पराक्रमप्राप्त्यभावः सूचितः ॥ ५ ॥ करीन्द्र इति ॥ करीन्द्रो हस्ती तरसा वेगेनाभिद्रुत्य सम्मुखमागत्य तं कृष्णमग्रहीत् तदा स कृष्णोऽपि अमुं

रङ्गद्वारं समासाद्य तस्मिन्नागमवस्थितम् ॥ अपश्यत् कुवलयापीडं कृष्णोम्बष्ठप्रचोदितम् ॥ २ ॥ बद्ध्वा परिकरं शौरिः समुह्य कुटिलालकान् ॥
उवाच हस्तिपं वाचा मेघनादगभीरया ॥ ३ ॥ अम्बष्ठाम्बष्ठ मार्गं नौ देह्यपक्रम मा चिरम् ॥ नो चेत् सकुञ्जरं त्वाद्य नयामि यमसादनम् ॥ ४ ॥
एवं निर्भर्त्सितोऽम्बष्ठः कुपितः कोपितं गजम् ॥ चोदयामास कृष्णाय कालान्तकयमोपमम् ॥ ५ ॥ करीन्द्रस्तमभिद्रुत्य करेण तरसाऽग्रहीत् ॥
कराद्विगलितः सोऽमुं निहत्याङ्घ्रिष्वलीयत ॥६॥ संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवम् ॥ परामृशत् पुष्करेण स प्रसह्य विनिर्गतः ॥ ७ ॥
पुच्छे प्रगृह्याऽतिबलं धनुषः पञ्चविंशतिम् ॥ विचकर्ष यथा नागं सुपर्ण इव लीलया ॥ ८ ॥

हस्तिनं मुष्टिना निहत्य मुष्टिप्रहारशिथिलात् तस्य करात् शुण्डाग्रतो विगलितो विच्युतः सन् तस्य गजस्य अङ्घ्रिषु चरणानां मध्ये अलीयत अदृश्यो बभूवेत्यर्थः । अङ्घ्रिष्विति बहुवचनेन एकस्मिन् पादे प्राक् कृष्णोऽलीयत । तत्र गजे ग्रहीतुमुद्यते द्वितीयपादेऽलीयतेत्याद्यपि सूचितम् ॥ ६ ॥ संक्रुद्ध इति ॥ संक्रुद्धः घ्राणदृष्टिरिति घ्राणमवघ्राणं तेन दृष्टिर्दर्शनं यस्य सः पशवो हि लोचनागोचरमपि घ्राणेन जानन्तीति प्रसिद्धम् स गजः तं केशवं श्रीकृष्णमचक्षाणः अपश्यन् पुष्करेण शुण्डाग्रेण परामृशत् अन्वेषणं कृत्वा तं धृतवान् इत्यर्थः । स च कृष्णः प्रसह्य बलात्पुनस्तत्ग्रहणाद्विनिर्गतः ॥ ७ ॥ पुच्छे इति ॥ तमतिबलं गजं पुच्छे प्रगृह्य नागं सर्पं सुपर्ण इव यावद्धनुषः धनुषां पञ्चविंशतिस्तावन्तं देशं लीलया अनायासेनैव यथा यथावत् अविच्छेदेन विचकर्ष । धनुषः प्रमाणं हि हस्तचतुष्टयं तेन हस्तशतपर्यन्तं आकृष्य नीतवान् । स्वामिपादास्तु यथा नागं सर्पवद्वर्त्तमानं गजं सुपर्ण इव स्वयमिति इत्याहुः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ सः अच्युतः सव्यदक्षिणतः पर्यावर्तमानेन परिवर्त्तमानेनकरिणा सह बभ्राम अयं भावः । पुच्छग्राहिणमात्मानं ग्रहीतुं यदि स गजः दक्षिणतःपरिवर्तते तर्हि तं सव्यतो भ्रमयति । यदा च सव्यतः परिवर्तते तदा तं बलाद्दक्षिणतो भ्रमयति । मितोऽपि ह्रस्वाभाव आर्षः । तत्र दृष्टान्तः बलवान् बालो यथा गृहीतपुच्छेन भ्राम्यमाणेन गोवत्सेन सह भ्राम्यति तद्वदिति ॥९॥ तत इति ॥ ततः पुच्छं त्यक्त्वा अभिमुखमभ्येत्य समागत्य स्वपाणिना वारणं तमाहत्य ईषदेव सन्ताड्य तेन पदे पदे स्पृश्यमानः स यथा पतेत्तथा वञ्चयन् प्रकर्षेण आ सर्वतो द्रवन् धावंस्तं गजं पातयामास गजपातनार्थमेव धावनेन वञ्चनम् ॥ १० ॥ स इति ॥ स भगवान् धावन् क्रीडयैव गजवञ्चनार्थमेव भूमौ पतित्वा सहसा झटिति तदलक्षित एवोत्थितः उत्थायान्यत्र स्थितः स गजः तं कृष्णं पतितं मत्वा क्रुद्धः सन् दन्ताभ्यां क्षितिमहनत् अहन् ।शब्लुगभाव आर्षः। कृष्णः पतनं दर्शयित्वै-वापक्रान्तः तमेवोद्दिश्य प्रहरतो गजस्य तमप्राप्यातिवेगवैवश्यात् कृष्णपतनस्थलशिलायामेव दन्तौ पतितौ तेनापि गजस्यैव व्यथाऽभूत् ॥११॥ स्वेति ॥ एवं स्वविक्रमे प्रतिहते

स पर्यावर्तमानेन सव्यदक्षिणतोऽच्युतः ॥ बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ॥ ९ ॥ ततोऽभिमुखमभ्येत्य पाणिनाऽऽहत्य वारणम् ॥ प्राद्रवन् पातयामास स्पृश्यमानः पदे पदे ॥ १० ॥ स धावन् क्रीडया भूमौ पतित्वा सहसोत्थितः ॥ तं मत्वा पतितं क्रुद्धो दन्ताभ्यां सोऽहनत् क्षितिम् ॥ ११ ॥ स्वविक्रमे प्रतिहते कुञ्जरेन्द्रोऽत्यमर्षितः ॥ चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा ॥ १२ ॥ तमापतन्तमासाद्य भगवान् मधुसूदनः ॥ निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥ पतितस्य पदाक्रम्य मृगेन्द्र इव लीलया ॥ दन्तमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्द्धरिः ॥ १४ ॥ मृतकं द्विपमुत्सृज्य दन्तपाणिः समाविशत् ॥ अंसन्यस्तविषाणोऽसृङ्मदबिन्दुभिरङ्कितः ॥ विरूढस्वेदकणिकावदनाम्बुरुहो बभौ ॥ १५ ॥ वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ ॥ रङ्गं विविशतू राजन् गजदन्तवरायुधौ ॥ १६ ॥

क्षीयमाणे सति कुञ्जरेन्द्रोत्यमर्षितः कृष्णपराक्रममसहमानः महामात्रैः हस्तिपैश्च चोद्यमानः रुषा क्रोधेन कृष्णं हन्तुमभ्यद्रवत् वेगेन सम्मुखमधावत् ॥१२॥ तमिति ॥ सच मधुसूदनो भगवान् तं गजमापतन्तं वेगेनागच्छन्तमासाद्य तस्य हस्तं शुण्डां पाणिना निगृह्य भूतले पातयामास ॥ १३ ॥ पतितस्येति ॥ हरिः गजेन्द्रं पदाक्रम्य पादाक्रान्तं कृत्वा मृगेन्द्रः सिंह इव पतितस्य तस्य लीलया अनायासेनैव दन्तमुत्पाट्य तेन दन्तेनैव इभं हस्तिनं हस्तिपांश्चाहनत् अहन् । शब्लुगभाव आर्षः ॥ १४ ॥ मृतकमिति सार्द्धम् ॥ हरिः मृतकं द्विपमुत्सृज्य दन्तपाणिः सन् रङ्गं समाविशत् । द्वितीयो दन्तो रामेण गृहीत इति ज्ञेयम् । अंसेति । अंसे स्कन्धे न्यस्तो निहतो विषाणो गजदन्तो येन सः असृजः रुधिरस्य मदस्य च बिन्दुभिः अङ्कितः नीहारकणाङ्कितवत् विरूढाः उद्गताः स्वेदकणिका यस्मिंस्तद्वदनाम्बुरुहं यस्य सः कृष्णो मूर्तया वीररसश्रियेव बभौ शुशुभे ॥ १५ ॥ वृताविति ॥ हे राजन् गजदन्तावेव वरे श्रेष्ठे आयुधे ययोस्तौ कतिपयैः सवयोभिरेव गोपैर्वृतौ बलदेवजनार्दनौ रङ्गमल्लक्रीडास्थानं विविशतुः ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

मल्लानामिति ॥ मल्लानां द्रष्टॄणामशनिर्वज्र इति विदितः ज्ञायमानः सन् साग्रजो हरिः रङ्गं गतः इत्यादिरन्वयः । यद्वा । साग्रजो रङ्गं गतो हरिर्मल्लानां गिरिसमानशरीराणामशनिरिति विदितोऽभूत् इत्यादि "मतिबुद्धी०" इति वर्तमाने क्तः । अतः कर्तरि षष्ठी शेषे वा । अत्र रौद्रादयो रसा ज्ञेयाः । तत्र मल्लानामशनिरिति क्रोधोदयात् रौद्रो रसः । एवं नृणां पौरादीनां नरवरः अत्र विलासादिदर्शनेनाद्भुतः स्त्रीणां पूज्यः व्यतिरिक्तानां मूर्तिमान् स्मरः इति शृङ्गारः । गोपानां स्वजनः इति सख्यरसो मदविन्द्वादिदर्शनात् हास्यरसश्च । असतां क्षितिभुजां राज्ञां वस्तुतस्तु पृथिवीमेव भक्षयतां राज्ञां शास्ता इति वीररसः । स्वपित्रोः देवकीवसुदेवयोः शिशुः तेन च वात्सल्यं मल्लादिशङ्कया च शोकस्फुरणात्करुणश्च । भोजपतेः कंसस्य मृत्युरिति भयानकरसः । अविदुषां कंसपुरोहितादीनां विराट् प्राकृतो मनुष्यो गजरुधिराक्ततया बीभत्सरसः । योगिनां ज्ञानिनां भक्तानां च परं तत्वमिति शान्तरसः । वृष्णीनां परदेवता उपास्यः इति सप्रेमभक्तिरसः । संग्रहपद्यं च । "रौद्रोऽद्भुतः शुचिः सखिहास्यं वीरः सवत्सलः करुणः । प्रभयानकबीभत्सौ शान्तः सप्रेमभक्तिकश्च रसः ॥" इति तोषिणी । अयं रससङ्करः इत्याहुः । रसानां विगलितवेद्यान्तरस्फूर्तिरूपत्वाद्भावसंकर एवायमिति साहित्यतत्त्वविदः । इदं च नाट्यादिरूपकावलोकिषु सहृदयेषु सामाजिकेष्वेव रस इति साहित्यसिद्धान्तानुसारेण । अत्र तु नाट्याभावेऽपि सकलमाधुर्यादिगुणनिधावलौकिकचमत्कारात्मनि भगवति

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥ १७ ॥

रङ्गङ्गते तत्रत्यानामपि प्रतिव्यक्तितत्तद्रसास्वादेऽपि न किंचिद्बाधकम् । अत्र चक्रवर्तिमते मल्लानामशनिरित्यत्र वीरः । क्षितिभुजां शास्तेति रौद्रः । स्वपित्रोः शिशुरिति भयानकः । अत्र वीररौद्रभयानकबीभत्साः । रसाभासाः अनौचित्या प्रवृत्तत्वात् रसप्रक्रिया चैवम् । रत्यादिः स्थायीभावः विभावानुभावसात्विकसञ्चारिभावैरुत्कर्षं नीतो रसः तत्र विभावाः कारणानि द्विधा । आलम्बना उद्दीपनाश्च । आद्या द्विधा । यथा भक्तिरसे विषयतया कृष्णः आश्रयतया भक्ताः उद्दीपनाश्च श्रीकृष्णस्मरणदर्शनादयः रसस्य ज्ञापकाः अनुभावाः । ते सात्विका आङ्गिकाश्चेति द्विधा । स्तम्भस्वेदादयः सात्विकाः नृत्यगानादय आङ्गिकाः स्थायिनां पोषकाः निर्वेदचिन्तादयः संचारिभावाः । तत्र भक्तिरसउदाहरणं स्मरन्तः स्मारयन्तश्चेत्यारभ्य परमेत्य निर्वृता इति पद्यद्वयम् । अत्र हरिर्विषयालम्बनं स्मरणमुद्दीपनः पुलकः सात्विकः नृत्यादिकमाङ्गिकम् । चिन्तादयः सञ्चारिणः प्रेमभक्तिः स्थायिभावः इत्यादिः । प्रकृते तु सर्वरसालम्बनं कृष्णः तत्तदभिप्रायानुरूपाः विलासा उद्दीपना मल्लादिषु चानुभावाः सञ्चारिणश्च तत्तदनुगुणा ऊह्या इति संक्षेपः । शेषं साहित्येषु ज्ञेयम् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हतमिति ॥ हे नृप तदा कुवलयापीडाख्यं गजं हतं श्रुत्वा तौ रामकृष्णावपि दुर्जयौ दृष्ट्वा मनस्वी धीरोऽपि कंसो भृशमत्यन्तम् उद्विविजे भीतो बभूव ॥ १८॥ ताविति ॥ महाभुजौ विचित्रो वेष आभरणानि स्रजश्चाम्बरं च ययोस्तौ रङ्गगतौ रामकृष्णौ प्रभया स्वकान्त्या निरीक्षतां जनानां शता आर्षः । मल्लादीनां प्रभया अशनित्वादिरूपेण स्वतेजसा मनः क्षिपन्तौ क्षोभयन्तौ उत्तमवेषधारिणौ नटौ यथा तथा रेजतुः । एतेन निर्भयत्वं दर्शितम् ॥ १९ ॥ निरीक्ष्येति ॥ हे नृप मञ्चे स्थिताः नागराः पौराः राष्ट्रका जानपदाश्च जनास्तावुत्तमपूरुषौ निरीक्ष्य प्रहर्षवेगेनोत्कलितानि उज्जृम्भितानि ईक्षणानि आननानि च येषां तथाभूताः नयनैर्लावण्यपानपात्रैस्तयोराननं पपुः । आननगतं लावण्यरसं पीतवन्तः परन्तु न तृप्ता निराकाङ्क्षा न बभूवुः ॥ २० ॥ तदेवाह—पिबन्त इवेति ॥ चक्षुर्भ्यां पिबन्तः इव जिह्वया लिहन्त इव नासाभ्यां जिघ्रन्त इव बाहुभिः श्लिष्यन्त इव लक्षिताः । चक्षुर्भ्यां नासाभ्यामित्यत्र जातौ द्वित्वम् । लोकेऽप्येवं तथा च माघः । "प्रकाशकार्कश्यगुणौ दधानास्तनौ तरुण्यः परिवव्रुरेनम् ।" इति ॥ २१ ॥ ऊचु-

हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ॥ कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ॥ १८ ॥ तौ रेजतू रङ्गगतौ महाभुजौ विचित्रवेषाभरणस्रग-म्बरौ ॥ यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षताम् ॥ १९ ॥ निरीक्ष्य ता उत्तमपूरुषौ जना मञ्चस्थिता नागरराष्ट्रका नृप॥ प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननम् ॥ २० ॥ पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया ॥ जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः ॥ २१ ॥ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतम् ॥ तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥२२॥ एतौ भगवतः साक्षाद्धरेर्नाराय-णस्य हि ॥ अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ २३ ॥ एष वै किल देवक्यां जातो नीतश्च गोकुलम् ॥ कालमेतं वसन् गूढो ववृधे नन्दवेश्मनि ॥ २४ ॥ पूतनानेन नीतान्तं चक्रवातश्च दानवः ॥ अर्जुनौ गुह्यकः केशी धेनुकोन्ये च तद्विधाः ॥ २५ ॥

रिति ॥ तयो रूपं गजदन्तायुधादियुक्तं गुणाः शौर्यादयः माधुर्यं हसितालापादिगतं प्रागल्भ्यं धाष्टर्यं तैः स्मारिताः स्मरणं प्रापिता इव यथादृष्टं धनुर्भङ्गादि यथाश्रुतं गोवर्द्धनोद्धरणादि तदनतिक्रम्य तदनुरूपमित्यर्थः । ते जना वै प्रसिद्धतया परस्परमूचुः ॥ २२ ॥ एतौ इति ॥ एतौ रामकृष्णौ साक्षाद्भगवतः हरेः नारायणस्य अंशेन इह लोके वसुदेवस्य वेश्मन्यवतीर्णौ बलस्यांशावतारत्वाच्छत्रिन्यायेन उभयोरंशत्वं कथितम् । तेषां तथैव प्रतीत्या वा तदुक्तिः ॥ २३ ॥ एष इति ॥ एष श्रीकृष्णो वसुदे-वाद्देवक्यां जातः तेन च बिभ्यता गोकुलं नीतः किलेति सर्वत्रान्वयः । एतम् एतावन्तं कालं नन्दगृहे गूढः इतरैरज्ञातो वसन्ववृधे एधांचक्रे ॥ २४ ॥ पूतनेति ॥ अनेनैव कृष्णेन पूतना अन्तं मृत्युं नीता प्रापिता चक्रवातस्तृणावर्तः दानवश्चान्तं नीतः अर्जुनवृक्षौ च पातिताविति शेषः । धेनुकः केशी गुह्यकः शङ्खचूडः तथाविधाः महाबल-पराक्रमवन्तोऽन्ये बकाघासुरादयश्चान्तं नीताः ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

गाव इति ॥ एतेनैव गोपालैः सहिता गावश्च दावाग्नेः सकाशात्परिमोचिताः कालियाख्यः सर्पश्चानेनैव दमितो वशीकृत्य निष्कासितः । इन्द्रश्च विगतो मदो यस्य तथाभूतः कृतः ॥ २६ ॥ सप्ताहमिति ॥ अद्रिप्रवरो गोवर्धनोऽमुना कृष्णेन कर्त्रा सप्ताहं सप्तदिनपर्यन्तमेकहस्तेन धृतः वर्षवाताशनिभ्यः गोकुलं च परित्रातम् ॥ २७ ॥ गोप्य इति ॥ नित्यप्रमुदितं हसितमीक्षणं च यस्मिंस्तदस्य मुखं मुदा पश्यन्त्यो गोप्यो विविधान् तापान् दैत्यादिकृतदुःखसंबन्धजान् कामादीन् वा । पतिश्वश्रूतर्जनादीनिति तु चक्रवर्ती । दुःखानि अश्रमं यथा भवति तथा श्रमं विनैव तरन्ति स्म अतिवर्तन्ते स्म । आश्रममिति वा छेदः । ईषच्छ्रमयुक्तं मुखम् अश्रमं मुखमिति वा ॥ २८ ॥ वदन्तीति ॥ अनेन परिरक्षितोऽयं यदोर्वंशः सुबहुविश्रुतः प्रसिद्धः श्रियं सम्पदं यशः कीर्तिं महत्त्वं पूज्यत्वं च लप्स्यते इति प्रामाणिका वदन्ति ॥ २९ ॥ अयमिति ॥ अयं च कमललोचनः श्रीमान् रामोऽस्य कृष्णस्याग्रजो येन प्रलम्बः वत्सकः वत्सप्रतिकृतिः " इवे प्रतिकृतौ " इति कन् । तद्वधे दोषाभावाय निहतः ये च बकादयः ते च

गावः सपाला एतेन दावाग्नेः परिमोचिताः ॥ कालियो दमितः सर्प इन्द्रश्च विमदः कृतः ॥ २६ ॥ सप्ताहमेकहस्तेन धृतोद्रिप्रवरोमुना ॥ वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥ २७ ॥ गोप्योस्य नित्यमुदितहसितप्रेक्षणं मुखम् ॥ पश्यन्त्यो विविधांस्तापांस्तरन्ति स्माश्रमं मुदा ॥ २८ ॥ वदन्त्यनेन वंशोऽयं यदोः सुबहुविश्रुतः ॥ श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः ॥ २९ ॥ अयं चास्याग्रजः श्रीमान् रामः कमललोचनः ॥ प्रलम्बो निहतो येन वत्सको ये बकादयः ॥ ३० ॥ जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च ॥ कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥ ३१ ॥ हे नन्दसूनो हे राम भवन्तौ वीरसंमतौ ॥ नियुद्धकुशलौ श्रुत्वा राज्ञाऽऽहूतौ दिदृक्षुणा ॥ ३२ ॥ प्रियं राज्ञः प्रकुर्वत्यः श्रेयो विन्दन्ति वै प्रजाः ॥ मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥ ३३ ॥ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटम् ॥ वनेषु मल्लयुद्धेन क्रीडन्तश्चारयन्ति गाः ॥ ३४ ॥

निहताः । अत्र बकवत्सयोर्बलदेवकर्तृकवधोक्तिर्जनवादेष्वनिश्चयात् ॥ ३० ॥ जनेष्विति ॥ जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु ध्वनत्सु जनोक्तं रामकृष्णोत्कर्षमसहमानश्चाणूरः कृष्णरामौ समाभाष्य संबोध्य वाक्यमब्रवीत् । यद्वा । अवाक्यं धर्मापेतं वाक्यम् ॥ ३१ ॥ हे नन्देति ॥ हे नन्दसूनो कृष्ण हे राम भवन्तौ वीर्यवत्त्वेन सर्वसम्मतौ अतो नियुद्धे मल्लयुद्धे कुशलौ श्रुत्वा तन्नियुद्धं दिदृक्षुणा राज्ञा आहूतौ ॥ ३२ ॥ प्रियमिति ॥ वै प्रसिद्धौ । मनसा कर्मणा वाचा च राज्ञः प्रियं प्रकर्षेण कुर्वत्यः प्रजाः श्रेय उत्तमं फलं धनादिकं विन्दन्ति अतः प्रियाचरणादन्यथा अप्रियं कुर्वत्यस्तु विपरीतं दण्डादिकं प्राप्नुवन्ति ॥ ३३ ॥ नित्यमिति ॥ वत्सपाला गोपाः प्रमुदिता वनेषु नित्यं मल्लयुद्धेन क्रीडन्त एव गाश्चारयन्तीति यथा तथा स्फुटं लोके प्रसिद्धमेव ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ तस्मात् यूयं वयं च राज्ञः प्रियं नियुद्धं करवामहे। एवं राज्ञि प्रीते सति सर्वाणि भूतानि नोऽस्माकं प्रसीदन्ति प्रसीदेयुः । कुतो यतो नृपः सर्वभूतमयः ॥ ३५ ॥ तदिति ॥ तच्चाणूरवाक्यं निशम्य श्रुत्वा नियुद्धमात्मनोभीष्टमभिमतं मन्यमानः कृष्णस्तद्वचोऽभिनन्द्य तस्मिन्देशे काले च यदुचितं तदब्रवीत् । आशयस्त्वन्य एवेति भावः ॥ ३६ ॥ प्रजा इति ॥ अस्य भोजपतेः कंसस्य वनेचराः वयं चाद्यूयं च प्रजाः अतस्तस्य प्रियं नित्यं करवाम । ततश्च नोऽस्माकं तत्कृतः परमः अनुग्रहः महानुग्रहो भविष्यत्यत्र न संदेहः ॥ ३७ ॥ बाला इति ॥ तथापि वयं बालाः अतस्तुल्यबलैर्बालैः सह क्रीडिष्यामो न त्वधिकबलैर्भवद्भिः । यथा नियुद्धमुचितं भवेत् तथा मल्लसभासदः मल्लसभाधिकृतान् अधर्मो यथा न स्पृशेत् । मल्लेति संबुद्धिर्वा ॥३८॥ नेति ॥ त्वं न बालः नापि किशोरः येन त्वया बलेन च सहस्रसंख्यद्विपानां सत्वं बलं बिभर्तीति तथाभूत इभो गजो लीलया अनयासेनैव हतः । द्वयोः स्कन्धे गजदन्तदर्शनाद्वाभ्यां हत इत्यनुमानेनैवमुक्तिः ॥ ३९ ॥ तस्मादिति ॥ तस्माद्बलवत्त्वात्

तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे ॥ भूतानि नः प्रसीदन्ति सर्वभूतमयो नृपः ॥ ३५ ॥ तन्निशम्याब्रवीत् कृष्णो देशकालोचितं वचः ॥ नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनन्द्य च ॥ ३६ ॥ प्रजा भोजपतेरस्य वयं चापि वनेचराः ॥ करवाम प्रियं नित्यं तन्नः परमनुग्रहः ॥ ३७ ॥ बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् ॥ भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः ॥ ३८ ॥ चाणूर उवाच ॥ न बालो न किशोरस्त्वं बलश्च बलिनां वरः ॥ लीलयेभो हतो येन सहस्रद्विपसत्त्वभृत् ॥ ३९ ॥ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नाऽनयोऽत्र वै ॥ मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे कुवलयापीडवधो नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ श्रीशुक उवाच ॥ एवं चर्चितसङ्कल्पो भगवान् मधुसूदनः ॥ आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः ॥ १ ॥ हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ॥ विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया ॥ २ ॥

भवद्भ्यां सह बलिभिरस्माभिर्योद्धव्यम् । अत्र युद्धे अनयः अधर्मो नास्त्येव अतः हे वार्ष्णेय कृष्ण त्वं मयि विक्रमं मद्धनने पराक्रम कुरु तथा बलेन रामेण सह मुष्टिको विक्रमतु दीर्घाभाव आर्षः ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे त्रिचत्वारिंशके व्यधात् ॥ ४३ ॥ चतुश्चत्वारिंशके तु मल्लकंसादिमर्दनम् ॥ पित्रोश्च दर्शनं तत्र श्लोकाः प्रोक्ता महीर्षिवः ॥ उवाचेति द्वयं सार्द्धाः पञ्चबाणी अनुष्टुभः ॥ ४४ ॥ एवमिति ॥ एवमुक्ते चर्चितः विचारेण निश्चितश्चाणूरादिवधविषयकः संकल्पो येन "चर्चा संख्या विचारणा" इत्यमरः । भगवान् मधुसूदनः अथानन्तरमेव चाणूरमाससाद योद्धुमाजगाम । तथा मुष्टिकं रोहिणीसुत आससाद ॥ १ ॥ हस्ताभ्यामिति ॥ तदा कृष्णचाणूरौ राममुष्टिकौ च हस्तयोर्हस्ताभ्यां पादयोः पादाभ्यां बद्ध्वा विजिगीषया विजेतुमिच्छया प्रसह्य बलादन्योन्यं विचकर्षतु-

CC-0. In Public Domain. Digitization by eGangotri

राकृष्टवन्तौ । गुण आर्षः ॥ २ ॥ अरत्नी इति ॥ अरत्निभ्यां कूर्पराभ्यां द्वे अरत्नी कूर्परौ जानुभ्यां जानुनी शीर्ष्णा शिरसा आर्षः शीर्षन् शिरः उरसा उरश्चाभिजघ्नतुः । "अरत्निः कफणौ हस्ते" इत्यादि विश्वः । निष्कनिष्टमुष्टिहस्तपरत्वेनारत्निशब्दं परे व्याचक्षते । तदपि कलानिधौ भगवति नासमञ्जसम् ॥ ३ ॥ परिभ्रामणेति ॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं मितो ह्रस्वाभाव आर्षः । विक्षेपो नोदनं दूरे प्रक्षेपो वा । परिरम्भो बाहुभ्यां निष्पीडनम् अवपातनम् । अधःक्षेपः उत्सर्पणं पुरतोऽपि कर्षणम् अपसर्पणं पश्चात्सारणम् एतैस्तौ कृष्णचाणूरौ राममुष्टिकौ चान्योन्यं प्रत्यरुन्धतां स्थगितोद्यमतां चक्रतुः । लुङि श्नमार्षः ॥ ४ ॥ उत्थापनैरिति ॥ जिगीषन्तौ जेतुमिच्छन्तौ तौ उत्थापनं पादौ जानुनी च पिण्डीकृत्योत्थापनम् उन्नयनं हस्ताभ्यामुद्धृत्य ऊर्ध्वं नयनं चालनं कण्ठादिलग्नस्य विश्लेषणं स्थापनं पाणिपादादेः पिण्डीकरणम् एभिः परस्परमात्मनो देहस्यापचक्रतुः अपकृतवन्तौ ॥५॥ तदिति ॥ हे राजन् वरूथशः सङ्घशः समेताः सानुकम्पाः कृष्णविषयकानुकम्पायुक्ताः सर्वयोषितस्तद्बलाबलवत्

अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी ॥ शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ॥ ३ ॥ परिभ्रामणविक्षेपपरिरम्भावपातनैः ॥ उत्सर्पणापसर्पणैश्च अन्योन्यं प्रत्यरुन्धताम् ॥ ४ ॥ उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि ॥ परस्परं जिगीषन्तावपचक्रतुरात्मनः ॥ ५ ॥ तद्बलाबलवद्युद्धं समेताः सर्वयोषितः ॥ ऊचुः परस्परं राजन् सानुकम्पा वरूथशः ॥ ६ ॥ महानयं बताऽधर्म एषां राजसभासदाम् ॥ ये बलाबलवद्युद्धं राज्ञोऽन्विच्छन्ति पश्यतः ॥ ७ ॥ क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ॥ क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥ ८ ॥ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ॥ यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥ न सभां प्रविशेत् प्राज्ञः सभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥

एकतो बलवन्तौ अन्यतः अबलवन्तौ तद्युक्तं विषमं युद्धं पश्यन्तः परस्परमूचुः । यद्वा । ता इदं युद्धं बलाबलवत् विषममित्यूचुः ॥ ६ ॥ महानिति ॥ बालयोर्बलवतोश्च युद्धं राजापि चेत्पश्येत् तदा सभासद्भिः स्वयं वारणीयः । बत खेदे । ये सभासदः राज्ञः पश्यतः सतः स्वयं बलाबलवद्युद्धं तद्दर्शनमन्विच्छन्ति अनुमन्यन्ते तत् एषां राजसभासदामयं महान् अधर्मः ॥ ७ ॥ क्वेति ॥ वज्रसाराणि वज्रतुल्यकठिनानि सर्वाङ्गानि करचरणादीनि ययोस्तौ शैलेन्द्रो मेरुस्तत्सन्निभौ तत्सदृशौ मल्लौ क्व क्व च अतिसुकुमाराण्यङ्गानि ययोस्तौ नाप्तं यौवनं याभ्यां तौ किशोरौ॥८॥धर्मेति॥ अस्य समाजस्य सभायाः धर्मव्यतिक्रमः पूर्वसिद्धस्य धर्मस्य विनाशोऽपि ध्रुवं भवेत् अतो यत्राधर्मः समुत्तिष्ठेत् उद्भवेत् प्रवर्तेत तत्र कर्हिचिदपि न स्थेयम् । अतोऽस्माभिर्गन्तव्यमिति भावः ॥९॥ नेति ॥ सभ्यानां दोषाननुस्मरन् प्राज्ञो बुद्धिमान् सभां न प्रविशेत् । यतः अब्रुवन् दोषं ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् तेषां प्रीत्यर्थं धर्मपक्षाद्विपरीतं ब्रुवन् तथा अज्ञः पृष्टो जानन्नप्यहं न जानामीति च ब्रुवन्नरः किल्बिषमश्नुते पापं प्राप्नोति ॥१०॥ ॥१३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु रामकृष्णौ बलवन्तावेव श्रमादर्शनादतो नोक्तदोष इत्याशङ्क्य श्रमं दर्शयति—वल्गत इति ॥ शत्रुमभितः शत्रोः सर्वतो वल्गतो धावतः कृष्णस्य श्रमवारिभिरुतं व्याप्तं वदनाम्बुजम् अम्बुभिरुतं पद्मकोशमिव वीक्ष्यतां कर्मणि लोट् । " दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव । " इतिवत् प्रयोगः । चक्रवर्ती तु वदनाम्बुजं मुखचन्द्रः क्लीवत्वमार्षमित्याह ॥ ११ ॥ किमिति ॥ आताम्रे ईषद्रक्ते लोचने यस्मिन् तत् मुष्टिकं प्रति सामर्षं सक्रोधं हाससंरम्भेण हासावेशेन शोभितं रामस्य मुखं किं न पश्यत ॥ १२ ॥ पुण्या इति ॥ बत आश्चर्ये । व्रजभुवः पुण्याः यत् यासु नृलिङ्गेन मनुष्यनाट्येन गूढः आच्छादितैश्वर्यः पुराणपुरुषः गिरित्ररमाभ्यां शिवलक्ष्मीभ्यामर्चितावङ्घ्री यस्य सोऽयं श्रीकृष्णः सहबलः रामेण सहितः वनसंबन्धीनि चित्राणि माल्यानि यस्य सः गाः पालयन् चारयन् हर्षेण वेणुं क्वणयन्वादयन् क्वणेर्मित्त्वमार्षम् । विक्रीडया अञ्चति अटति अतो धिगिमां सभां यस्यामयं पराभूयते व्रजभुवस्तु धन्याः । अञ्चतीति वर्तमानसामीप्ये भूते लट् । लीलानां नित्यत्वद्योतनार्थं वा ॥ १३ ॥ गोप्य इति ॥ गोप्यः किं तपः

वल्गतः शत्रुमभितः कृष्णस्य वदनाम्बुजम् ॥ वीक्ष्यतां श्रमवार्युतं पद्मकोशमिवाम्बुभिः ॥ ११ ॥ किं न पश्यत रामस्य मुखमाताम्रलोचनम् ॥ मुष्टिकं प्रति सामर्षं हाससंरम्भशोभितम् ॥ १२ ॥ पुण्या बत व्रजभुवो यदयं नृलिङ्गगूढः पुराणपुरुषो वनचित्रमाल्यः ॥ गाः पालयन् सहबलः क्वणयंश्च वेणुं विक्रीडयाऽञ्चति गिरित्ररमार्चिताङ्घ्रिः ॥ १३ ॥ गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ॥ दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ऐश्वरस्य ॥१४॥ या दोहनेऽवहनने मथनोपलेपप्रेङ्खेङ्खनार्भरुदितोक्षणमार्जनादौ ॥ गायन्ति चैनमनुरक्तधियोऽश्रुकण्ठ्यो धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ॥ १५ ॥

समचरन् समाचरन् ताभिराचरितं तपोऽतिशायितमेवास्ति । यस्मात् लावण्यस्य सारम् असमोर्द्धम् इति नास्ति सममूर्ध्वमधिकं च यस्य तत् अनन्यसिद्धम् । अन्येन आभरणादिना न सिद्धं किन्तु स्वत एव अनुसवं सर्वदा अभिनवं दुरापं दुर्लभं च यशसः श्रियः लक्ष्म्या ऐश्वरस्य ईश्वरसंबन्धिगुणस्य ऐश्वर्यस्य च ईश्वरस्येति पाठे अमुष्येश्वरस्येत्यन्वयः । एकान्तधाम अव्यभिचारि स्थानम् । अमुष्य कृष्णस्य रूपं दृग्भिर्नेत्रैः पिबन्ति अत्यासक्त्या पश्यन्ति । वयन्त्वल्पपुण्या यदस्माभिरनवसरे दृष्टोऽयम्॥ १४॥ या इति ॥ उरुक्रमे यच्चित्तं तेनैव यानं सर्वविषयप्रवृत्तिर्यासां ताः अनुरक्तधियः अश्रुकण्ठ्यश्च या व्रजस्त्रियः दोहनं गवाम् अवहननं व्रीह्यादेः मथनं नवनीतादेः उपलेपो गृहाणा प्रेङ्खनं दोलान्दोलनम् अर्भरुदितं रुददर्भकसान्त्वनम् उक्षणं सेचनं गृहसंमार्जनं तदादिषु कार्येषु एनं कृष्णं गायन्ति ता व्रजस्त्रियो धन्याः कृतार्थाः । उरुक्रमचिन्तयाना इति पाठे उरुक्रमं चिन्तयन्त्यः । समासो मुमभावश्चार्षः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रातरिति ॥ या अबलाः गोभिः सह प्रातर्व्रजान्निर्गच्छतः सायं व्रजमाविशतश्च वेणुं क्वणयतोऽस्य वेणुरवमाकर्ण्य गृहात्तूर्णं निर्गत्य पथि तस्य सदयोवलोको यस्मिन् तत्स्मितयुक्तं मुखं पश्यन्ति ता भूरिपुण्याः । क्वणेर्मित्त्वमार्षम् ॥ १६ ॥ एवमिति ॥ हे भरतर्षभ एवं स्त्रीषु सभयं प्रभाषमाणासु सतीषु योगेश्वरो हरिः भक्तदुःखहर्ता भगवान् कृष्णः तासां भयनिवृत्तये शत्रुं हन्तुं मनश्चक्रे ॥ १७ ॥ सभया इति ॥ तदा पितरौ देवकीवसुदेवौ नन्दवसुदेवौ वा । पुत्रयो रामकृष्णयोर्बलमबुधौ अजानन्तौ । द्वितीया तदर्हमिति निर्देशात् आर्षत्वाद्वा । सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया आकुलौ आतुरौ अन्वतप्येताम् । कथं व्रजे गमिष्यन्नक्रूर एव प्रथमन्न शिक्षितो यथा नैवानेष्यदित्याद्यनुतापं कृतवन्तौ ॥ १८ ॥ तैरिति ॥ एवं यथा अच्युतेतरौ कृष्णचाणूरौ नानाविधैः परिभ्रमणादिभिस्तैस्तैर्नियुद्धविधिभिर्युयुधाते तथैव बलमुष्टिकावपि अन्योन्यं युयुधाते ॥ १९ ॥ भगवदिति ॥ वज्रस्य निष्पेषः तीव्रप्रहारस्तद्वन्निष्ठुरैर्भगवतो गात्राणामरत्निजान्वादीनां निष्पातैः प्रहारैर्भज्यमानाङ्गः श्ल-

प्रातर्व्रजाद् व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ॥ निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यन्ति सस्मितमुखं
सदयावलोकम् ॥ १६ ॥ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ॥ शत्रुं हन्तुं मनश्चक्रे भगवान् भरतर्षभ ॥ १७ ॥ सभयाः स्त्रीगिरः श्रुत्वा
पुत्रस्नेहशुचातुरौ ॥ पितरावन्वतप्येतां पुत्रयोरबुधौ बलम् ॥१८॥ तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ॥ युयुधाते यथान्यायं तथैव बलमुष्टिकौ
॥ १९ ॥ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह ॥ २० ॥ स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ॥
भगवन्तं वासुदेवं क्रुद्धो वक्षस्यबाधत ॥ २१ ॥ नाचलत् तत्प्रहारेण मालाहत इव द्विपः ॥ बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन् हरिः ॥
भूपृष्ठे पोथयामास तरसा क्षीणजीवितम् ॥ २२ ॥ विस्रस्ताऽऽकल्पकेशस्रगिन्द्रध्वज इवापतत् ॥ २३ ॥

थद्गात्रश्चाणूरः मुहुर्ग्लानिमवाप ॥२०॥ स इति ॥ श्येनस्येव वेगो यस्य स क्रुद्धश्चाणूर उभौ करौ मुष्टीकृत्य उत्पत्य उत्प्लुत्य भगवन्तं वासुदेवं वक्षस्यबाधत अताडयत् ॥ २१ ॥ नेति सार्द्धम् ॥ एवं ताडने कृतेऽपि यथा मालया हतो द्विपो न चलति तथा तत्प्रहारेण भगवान्नाचलत् ईषदपि नाकम्पत । बाह्वोरिति । तरसा झटिति चाणूरं बाह्वोर्निगृह्य गृहीत्वा बहुशो भ्रामयन् ह्रस्वाभाव आर्षः । हरिः तरसा भ्रामणवेगेनैव क्षीणं जीवितं यस्य तम् आकाश एव मृतं भूपृष्ठे पोथयामास वेगेन पातयामास ॥ २२ ॥ विस्रस्तेत्यर्द्धम् ॥ स च तेन पातितश्चाणूरो विस्रस्तानि निक्षिप्तानि आकल्पानि आभरणानि केशाः स्रजश्च यस्य तथाभूतः सन् इन्द्रध्वजो वज्रम् इवापतत् । यद्वा । इन्द्रध्वजो नाम गौडेषु प्रसिद्धः कस्मिंश्चिदुत्सवे महास्तंभो ध्वजादिभिरलङ्कृतः पुरुषाकृती रज्ज्वाकृष्ट उच्छ्रीयते उत्सवान्ते च रज्जुशैथिल्येन पतति ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथेति द्वयम् ॥ तथैव मुष्टिकोऽपि तावत्स्वमुष्टिनाभिहतेन ताडितेन बलिना बलभद्रेण कर्त्रा तलेनैव साधनेनाभिहतः अतो भृशमत्यन्तम् अर्दितः पीडितः अतः प्रवेपितः कम्पितः मुखतो रुधिरमुद्वमन्नुद्गिरन् व्यसुः गतप्राणो वातेन प्रचण्डमारुतेन आहत उन्मूलितोङ्घ्रिपो वृक्ष इवोर्व्युपस्थे भूपृष्ठे पपात। श्लेषेण गालिप्रदानं चेति चक्रवर्ती हसति ॥ २४ ॥ २५ ॥ तत इति ॥ हे राजन् ततः अनु अनन्तरमेव प्राप्तः प्रहरतां योद्धॄणां वरः श्रेष्ठः बलवान् रामः कूटाख्यं मल्लं सावज्ञं सावहेलनं यथा स्यात्तथा लीलयानायासेनैव वाममुष्टिनाऽवधीत् ॥ २६ ॥ तर्हीति ॥ तर्ह्येव हि प्रसिद्धतया शलः कृष्णस्य प्रपदेन पादाग्रेण हतशीर्षको जातः तोशलकश्च द्विधा विदीर्णो जातः एवमुभावपि मृतौ भूमौ निपेततुः ॥ २७ ॥ चाणूर इति ॥ एवं चाणूरे मुष्टिके कूटे शले तोशलके च हते सति प्राणपरीप्सवः जीवितुमिच्छवः शेषाः अवशिष्टाः सर्वे मल्लाः प्रदुद्रुवुः पलायितवन्तः ॥ २८ ॥ गोपानिति ॥ ततश्च तूर्येषु वाद्यमानेषु सत्सु रुते शब्दयुक्ते नूपुरे ययोस्तौ रामकृष्णौ प्रेक्षकजनहर्षाय कंसक्रोधाय च वयस्यान् सखीन् गोपान् हस्ते

तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहतेन वै ॥ बलभद्रेण बलिना तलेनाभिहतो भृशम् ॥ २४ ॥ प्रवेपितः स रुधिरमुद्वमन्मुखतोऽर्दितः ॥ व्यसुः पपातोर्व्युपस्थे वाताहत इवाङ्घ्रिपः ॥ २५ ॥ ततः कूटमनुप्राप्तो रामः प्रहरतां वरः ॥ अवधील्लीलया राजन् सावज्ञं वाममुष्टिना ॥ २६ ॥ तर्ह्येव हि शलः कृष्णपदापहतशीर्षकः ॥ द्विधा विदीर्णस्तोशलक उभावपि निपेततुः ॥ २७ ॥ चाणूरे मुष्टिके कूटे शले तोशलके हते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥ २८ ॥ गोपान् वयस्यानाकृष्य तैः संसृज्य विजह्रतुः ॥ वाद्यमानेषु तूर्येषु वल्गन्तौ धृतनूपुरौ ॥ २९ ॥ जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ॥ ऋते कंसं विप्रमुख्याः साधवः साधु साध्विति ॥ ३० ॥ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ॥ न्यवारयत् स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ ३१ ॥ निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ॥ धनं हरत गोपानां नन्दं बध्नीत दुर्मतिम् ॥ ३२ ॥

गृहीत्वा आकृष्य तैः सह संसृत्य संगम्य वल्गन्तौ नृत्यादिकुर्वन्तौ विजह्रतुः युद्धादि कृतवन्तौ ॥ २९ ॥ जना इति ॥ तदा कंसं विना तत्पुरोहितादीन् विना च विप्रमुख्याः सर्वे साधुजनाः साधु साध्विति वदन्तः रामकृष्णयोर्युद्धात्मकेन कर्मणा प्रजहृषुः ॥ ३० ॥ हतेष्विति ॥ एवं मल्लवर्येषु चाणूरादिषु हतेषु अवशिष्टेषु विद्रुतेषु पलायितेषु च सत्सु भोजराट् कंसः स्वतूर्याणि स्वेनाज्ञप्तानि तूर्यादिवाद्यानि न्यवारयत्। निवारणे च्छलं दर्शयति भृत्यान् प्रति इदं वक्ष्यमाणं वाक्यं चाह स्म स्फुटमुवाच तथा च स्वाज्ञाश्रावणार्थमिव वाद्यानि न्यवारयत् ॥ ३१ ॥ निस्सारयतेति ॥ विनोदयुद्धे मल्लहननात् दुर्वृत्तौ वसुदेवात्मजौ वध्यावपि भागिनेयत्वाज्जीवन्तावेव पुरात् निस्सारयत गोपानां च धनं हरत रामकृष्णयोर्गुप्ततया पालनात् दुर्मतिं नन्दं बध्नीत। भारतीपक्षे दुर्गमं वृत्तं चरितं ययोस्तौ पुरात् पुरमध्यास्य निःशेषेण सारं श्रेष्ठं कुरुत। "तत्करोति०" इति णिजन्तः। गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत दुर्गमा मतिर्यस्य तं नन्दं प्रेमरशनया बध्नीत अतिप्रसन्नं कुरुत ॥ ३२ ॥

CC-0. In Public Domain. Digitization by eGangotri

वसुदेव इति ॥ दुर्मेधाः प्रतिज्ञाभङ्गेन पुत्रयोरन्यत्र स्थापनात् असत्तमः वसुदेवस्तु आशु हन्यताम् । परपक्षगः अस्मच्छत्रुपक्षं प्राप्तः पिता उग्रसेनः सानुगः भृत्यादिसहितः हन्यताम् । भारतीपक्षे दुर्मेधा दुर्गमबुद्धिः नास्ति सत्तमो यस्मात् स परस्येश्वरस्य पक्षं गच्छति सः वसुदेवः हन्यतां गम्यतां सर्वैराश्रीयताम् ॥ ३३ ॥ एवमिति ॥ एवं कंसे विकत्थमाने सगर्वं वदति सत्येव प्रकुपितः सन्नव्ययः अप्रक्षीणबलः श्रीकृष्णो लघिम्ना लाघवेन उत्पत्य तरसा झटिति उत्तुङ्गमपि कंसमञ्चमारुहत् । " कृमृदृरुहिभ्यः " इति छान्दसश्च्लेरङ् ॥ ३४ ॥ तमिति ॥ तमाविशन्तं स्वमञ्चमारोहन्तं श्रीकृष्णमात्मनो मृत्युमालोक्य मनस्वी धीरः कंसः सहसा त्वरया आसनादुत्थाय तं हन्तुमसिचर्मणी जगृहे ॥ ३५ ॥ तमिति ॥ दुर्विषहम् अविषह्यम् उग्रं तेजो यस्य स भगवान् खड्गः पाणौ यस्य तं दक्षिणतो वामतश्च अम्बरे ऊर्ध्वं च श्येनमिव विचरन्तं कंसमाशु झटिति समग्रहीत् । तत्र दृष्टान्तमाह । तार्क्ष्यस्य कश्यपस्य सुतो गरुडः प्रसह्य बलादुरगं सर्पं यथा गृह्णाति तद्वदिति ॥ ३६ ॥ प्रगृह्येति ॥ विश्वस्याश्रयः आत्मतन्त्रश्च अब्जनाभः

वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ॥ उग्रसेनः पिता चापि सानुगः परपक्षगः ॥ ३३ ॥ एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ॥ लघिम्नोत्पत्य तरसा मञ्चमुत्तुङ्गमारुहत् ॥ ३४ ॥ तमाविशन्तमालोक्य मृत्युमात्मन आसनात् ॥ मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥ ३५ ॥ तं खड्गपाणिं विचरन्तमाशु श्येनं यथा दक्षिणसव्यमम्बरे ॥ समग्रहीद् दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥ ३६ ॥ प्रगृह्य केशेषु चलत्किरीटं निपात्य रङ्गोपरि तुङ्गमञ्चात् ॥ तस्योपरिष्टात् स्वयमब्जनाभः पपात विश्वाश्रय आत्मतन्त्रः ॥ ३७ ॥ तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ॥ हा हेति शब्दः स महांस्तदाऽभूदुदीरितः सर्वजनैर्नरेन्द्र ॥ ३८ ॥ स नित्यदोद्विग्नधिया तमीश्वरं पिबन् वदन्वा विचरन् स्वपन् श्वसन् ॥ ददर्श चक्रायुधमग्रतो यथा तदेव रूपं दुरवापमाप ॥ ३९ ॥

ततो ग्रहणादेव चलत् विक्षिप्तं किरीटं यस्य तं कंसं केशेषु प्रगृह्य दृढं गृहीत्वा तुङ्गात् मञ्चाद्रङ्गोपरि रङ्गभूमौ निपात्य तस्योपरि स्वस्य भूतलाघाताभावार्थं स्वयं पपात । विश्वाश्रय इति भाराधिक्येन प्राणहरणार्थम् ॥ ३७ ॥ तमिति ॥ जगतः प्राणिसमूहस्य पश्यतः सतः स्वभक्तद्रोहस्य फलं प्रदर्शयंस्तं सम्परेतं मृतमपि कंसं लोकानां मूर्छितभ्रान्तिनिवृत्तये कंसेन पूर्वं पीडितानां सन्तोषाय च भूमौ विचकर्ष । हरिः सिंहो यथा मृतमिभं हस्तिनं विकर्षति तथेति । हे नरेन्द्र तदा तत्रत्यै राजकीयैः सर्वजनैरुदीरित उच्चारितः सुमहान् हा हेति शब्दोऽभूत् । यद्वा । हा हेति विस्मये महाशूरस्याप्यवज्ञया वधात् ॥ ३८ ॥ स इति ॥ यतः स कंसो नित्यदा दा आर्षः । उद्विग्नया भीतया धिया चक्रायुधं तमीश्वरं श्रीकृष्णमेव पिबन् वदन्नित्यादिपानभोजनाद्यवस्थास्वप्यग्रतो ददर्श । ततो योगिभिरपि दुरवापः तदेवरूपमवाप सारूप्यलक्षणां मुक्तिं प्राप । इयं माघकृष्णचतुर्दशी भगवतश्च द्वादशोऽब्दः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति ॥ तस्य कंसस्य भ्रातरः कङ्कादयोऽष्टौ भ्रातुर्मृतस्य कंसस्य निर्वेशमानृण्यं तत्कारिणः तत्कर्तुमतिक्रुद्धाः सन्तः अभ्यधावन् हन्तुं संमुखमागताः ॥ ४० ॥ तथेति ॥ अतिरभसो वेगो येषां तान् संयत्तान् उद्युक्तान् रोहिणीसुतः रामः परिघमुद्यम्य तथैवानायासेन अहन् जघान । तत्र दृष्टान्तमाह मृगाधिपः सिंहः पशूनिवेति परिघं तदाकारं गजदन्तमिति तोषणी ॥ ४१ ॥ नेदुरिति ॥ व्योम्नि देवैर्वादिता दुन्दुभयो नेदुः ब्रह्मरुद्रादयो भगवद्विभूतयः पुष्पैः किरन्तः शशंसुः तुष्टुवुः स्त्रियोऽप्सरसश्च ननृतुः ॥४२॥ तेषामिति ॥ हे महाराज तेषां कंसकङ्कादीनां स्त्रियः सुहृदां तेषां स्वभर्तॄणां मरणेन हेतुना दुःखिताः अतः स्वशीर्षाणि विनिघ्नन्त्यः नुमार्षः। अश्रूणि विलोचनेषु यासां तास्तत्र भर्तृसन्निधौ ईयुः आजग्मुः ॥ ४३ ॥ शयानानिति ॥ वीरशय्यायां युद्धभूमौ शयानान् स्वभर्तॄनालिङ्ग्य शोचतीः शोचन्त्यः पूर्वसवर्णदीर्घो नुमभावश्चार्षः । मुहुः शुचोऽश्रूणि विसृजन्त्यश्च तानार्यः सुस्वरं यथा भवति तथा विलेपुः ॥ ४४ ॥ तत्र सुभगा आहुः—हा इति ॥ हा नाथ प्रियधर्मज्ञ करुणादयायुक्त अनाथवत्सल निहतेन

तस्याऽनुजा भ्रातरोऽष्टौ कङ्कन्यग्रोधकादयः ॥ अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्वेशकारिणः ॥ ४० ॥ तथाऽतिरभसांस्तांस्तु संयत्तान् रोहिणीसुतः ॥ अहन् परिघमुद्यम्य पशूनिव मृगाधिपः ॥ ४१ ॥ नेदुर्दुन्दुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः ॥ पुष्पैः किरन्तस्तं प्रीत्या शशंसुर्ननृतुः स्त्रियः ॥ ४२ ॥ तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः ॥ तत्राभीयुर्विनिघ्नन्त्यः शीर्षाण्यश्रुविलोचनाः ॥ ४३ ॥ शयानान् वीरशय्यायां पतीनालिङ्ग्य शोचतीः ॥ विलेपुः सुस्वरं नार्यो विसृजन्त्यो मुहुः शुचः ॥ ४४ ॥ हा नाथ प्रिय धर्मज्ञ करुणा-नाथ वत्सल ॥ त्वया हतेन निहता वयं ते सगृहप्रजाः ॥ ४५ ॥ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ ॥ न शोभते वयमिव निवृत्तो-त्सवमङ्गला ॥ ४६ ॥ अनागसां त्वं भूतानां कृतवान् द्रोहमुल्बणम् ॥ तेनेमां भो दशां नीतो भूतध्रुक् को लभेत शम् ॥ ४७ ॥ सर्वेषा-मिह भूतानामेष हि प्रभवाप्ययः ॥ गोप्ता च तदवध्यायी न क्वचित् सुखमेधते ॥ ४८ ॥

त्वया सहैव सगृहाः प्रजाश्च ते त्वदीया वयमपि निहता निहतप्रायाः धर्मज्ञेत्यादीनि विलापे प्रेमसंबोधनानि ॥ ४५ ॥ त्वयेति ॥ हे पुरुषर्षभ पत्या स्वामिना त्वया विरहिता अतः निवृत्ताः उत्सवाः प्राणिनां हासादिरूपा मङ्गलानि सुखानि च यस्यां तथाभूता इयं पुरी वयमिव न शोभते इति स्वदृष्टयाभिधानम् । यद्वा । न शोभते काका शोभत एव । वयमेव केवलं न शोभामहे ॥ ४६ ॥ दुर्भगा आहुः—अनागसामिति ॥ तुशब्दोऽप्यर्थे । भो भर्त्तः अनागसां निरपराधानामपि भूतानामुल्बणं दुःसहं द्रोहं त्वं कृतवां-स्तेन कारणेनेमां दशां नीतो मृत्युं प्राप्तः यतः भूतध्रुक् प्राणिद्रोहकर्ता को नाम शं सुखं लभेत ॥ ४७ ॥ सर्वेषामिति ॥ एष श्रीकृष्णः सर्वेषां भूतानां प्रभवः प्रभवन्त्यस्मादिति प्रभवः स्रष्टा तथा अपियन्ति लीयन्तेऽस्मिन्नित्यप्ययः संहर्ता तथा गोप्ता रक्षिता च अतः तदवध्यायी तस्मिन् विषये अवध्यानमपमानं कर्तुं शीलं यस्य

CC-0. In Public Domain. Digitization by eGangotri

स क्वचिदपि देशे काले च सुखं यथा स्यात्तथा नैधते न वर्धते किंतु दुःखमेवानुभवन्नश्यति ॥ ४८ ॥ राजेति ॥ इत्थं शोचन्तीस्ता राजयोषितो लोकभावनः भगवान्सान्त्वयित्वा हतानां लौकिकीं परलोकसंबन्धिनीं संस्थां दाहादिक्रियां यां मन्वादय आहुस्तां समकारयत् ॥ ४९ ॥ मातरमिति ॥ अथ कृष्णरामौ मातरं देवकीं पितरं वसुदेवं च बन्धनात् मोचयित्वा शिरसा पादयोः आस्पृश्य सर्वतः स्पृष्ट्वा ववन्दाते । अत्र तोषणी । बन्धनात् बन्धनागारं नयद्भ्यः कंसदूतेभ्य इत्यर्थः । एतच्च रङ्गभूमावेव योषिद्विलापसमाश्वासौ तु एतदनन्तरं पुनराकृष्य नीतस्य कंसस्यान्तिके विश्रान्ततीर्थे इति ॥५०॥ देवकीति ॥ देवकी वसुदेवश्च लोकमर्यादासंरक्षणार्थं कृतं संवन्दनं याभ्यां तौ पुत्रौ कंसवधादिप्रभावेण जगदीश्वरौ विज्ञाय ईश्वरालिङ्गनं कथं कर्तव्यमिति शङ्कितौ न सस्वजाते लोकव्यवहारदृष्टिमग्नतया न नमश्चक्रतुः किन्तु तूष्णीं स्तब्धावेव स्थितौ ॥ ॥ ५१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽत्र चतुश्चत्वारिंशे व्यधादिमाम् ॥ ४४ ॥ पञ्चचत्वारिंशके तु पितृनन्दादिसान्त्वनम् ॥ गुरुभ्यः शिक्षा वरोत्र श्लोकाः सार्द्धा नभःशैरीः ॥ उवाचपश्चैकं सार्द्धा भूमिर्वीणा अनुष्टुभः ॥ ४५ ॥ पितराविति ॥ उपलब्धः विज्ञातः अर्थः स्वयाथात्म्यम् ईश्वरत्वं याभ्यां तथाभूतौ

॥ श्रीशुक उवाच ॥ राजयोषित आश्वास्य भगवाँल्लोकभावनः ॥ यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ॥ ४९ ॥ मातरं पितरं चैव मोचयित्वाऽथ बन्धनात् ॥ कृष्णरामौ ववन्दाते शिरसास्पृश्य पादयोः ॥ ५० ॥ देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ॥ कृतसंवन्दनौ पुत्रौ सस्वजाते न शङ्कितौ ॥ ५१ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे कंसवधो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ श्रीशुक उवाच ॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ॥ मा भूदिति निजां मायां ततान जनमोहिनीम् ॥१॥ उवाच पितरावेत्य साग्रजः सात्वतर्षभः ॥ प्रश्रयावनतः प्रीणन्नम्ब तातेति सादरम् ॥ २ ॥ नास्मत्तो युवयोस्तात नित्योत्कण्ठितयोरपि ॥ बाल्यपौगण्डकैशोराः पुत्राभ्यामभवन् क्वचित् ॥३ ॥

पितरौ विदित्वा पुरुषोत्तमः श्रीकृष्णः माभूत् मयि प्रसन्ने सति मद्विषयकं ज्ञानं न दुर्लभं किंतु मयि पुत्रबुद्ध्या मल्लीलानुभवानन्द एव दुर्लभः मज्ज्ञाने स्थिरे सति तु मनुष्यनाट्यलीलापि न सिध्येत् अत इदानीमेव ज्ञानं माभूदिति कृत्वा निजानन्दमोहिनीं मायां ततान तयोरुपरि मोहनार्थं प्रसारितवान् ॥ १ ॥ उवाचेति ॥ साग्रजः सात्वतर्षभो भगवान् मोहितौ पितरौ प्रति एत्य पूर्वं मोचयित्वा रङ्गभूमित एव गृहं प्रस्थापितौ तौ प्रति आगत्येत्यर्थः । कंसादिसंस्कारार्थमन्यान्नियुज्येति भावः । प्रश्रयेण विनयेनावनतः नम्रः सादरं यथा स्यात्तथा हे तात हे अम्बेति संबोधनेन प्रीणयन् प्रीतिं जनयन्नुवाच ॥ २ ॥ नेति ॥ हे तात अस्मत्तः अस्मन्निमित्तं नित्यमुत्कण्ठितयोस्तदनुभवाकाङ्क्षावतोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बाल्यपौगण्डकैशोरा बाल्याद्यवस्थानुभवसुखानि क्वचित्कदाचिदपि नाभवन् । अस्मत्तः पुत्राणामिति सामानाधिकरण्यं वा । कैशोरा इति पुंस्त्वमार्षम् । ननु किशोरावस्थायाः पञ्चदशवर्षावधित्वात् गतैकादशवर्षस्य किशोरावस्थातिक्रमः कथमुक्तः । "एकादशसमास्तत्र गूढार्चिः सबलोऽवसत् ।" इत्युद्धवोक्तेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति चेत् " कालेनाल्पेन राजर्षे रामः कृष्णश्च गोव्रजे । अघृष्टजानुभिः पद्भिर्विचक्रमतुरञ्जसा ॥ " इत्युक्ते राजकुमारादावपि क्वचित् क्वचिदतिसुखिनि पौगण्डवयस्यपि शरीरवृद्धिमतिकैशोरचेष्टादर्शनात् । कृष्णे तु कैमुत्यप्राप्तेर्वैष्णवतोषणीभक्तिरसामृतानन्दवृन्दावनादिमतमनुसृत्यैवं व्यवस्थापनीयम् मासचतुष्टयाधिकवर्षत्रयस्यैव कृष्णे पञ्चवर्षीयमाणत्वात् तत्प्रमाणं प्रथमं वय एव कौमारं तत्र कृष्णस्य महावने स्थितिः । ततः परमष्टमासाधिकषड्वर्षपर्य्यन्तं वयः पौगण्डं तत्र वृन्दावने स्थितिः । ततः परमेकादशवर्षपर्य्यन्तं कैशोरं तत्र नन्दीश्वरे स्थितिः । ततः सप्तमे मासि माघे फाल्गुने कृष्णत्रयोदश्यां मथुरागमनं चतुर्दश्यां कंसवध इति । तत्रैकादशवर्षे तु शेषकैशोरं तत्रैव नित्यस्थितेरतस्तदनन्तरसर्वकालमेव तस्य कैशोरमेव ज्ञेयम् । "कृष्णं मत्वा स्त्रियो ह्रीणा निलिल्युस्तत्र तत्र ह । " इति किशोरस्य प्रद्युम्नस्यागमने तत्साम्यावगमात् " सन्तं वयसि कैशोरे" इति सामान्योक्तेश्च । आगमादिष्वपि विंशत्यक्षरादिमन्त्राणां द्वारकालीलामयध्यानेष्वपि तथादृष्टेश्च तस्मात् कंसवधदिने तस्य कैशोरापगमः कैशोरानपगमश्चेति नास्मत्त इति कृष्णस्य वाक्यं " किशोरौ नाप्तयौवनौ " इति पुरस्त्रीणां च वाक्यं संगच्छते । परे तु चैत्रं मासं मन्यन्ते एकादशमेव वर्षं च ॥ ३ ॥ नेति ॥ दैवहतयोः नौ

न लब्धौ दैवहतयोर्वासो नौ भवदन्तिके ॥ यां बालाः पितृगेहस्था विन्दन्ते लालिता मुदम् ॥ ४ ॥ सर्वार्थसंभवो देहो जनितः पोषितो यतः ॥ न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥ यस्तयोरात्मजः कल्प आत्मना च धनेन च ॥ वृत्तिं न दद्यात् तं प्रेत्य स्वमांसं खादयन्ति हि ॥ ६ ॥ मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् ॥ गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रत् श्वसन् मृतः ॥ ७ ॥ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ॥ मोघमेते व्यतिक्रान्ता दिवसा वामनर्चतोः ॥ ८ ॥

इति तृतीयार्थे षष्ठ्यौ । प्रारब्धहीनाभ्यामावाभ्यामित्यर्थः । भवतोरन्तिके समीपे वासो न लब्धः अतः पितृगेहस्थाः पितृभ्यां लालिता बाला यां मुदं विन्दन्ते सा भवद्भ्यां सकाशादावाभ्यां न लब्धेति शेषः ॥ ४ ॥ युष्मत्सेवालोपादावयोर्धर्मोऽपि लुप्त इत्याहतुः—सर्वेति ॥ सर्वेषां धर्मादीनां पुरुषार्थानां संभवो यस्मिन्स देहो यतः याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृतिमानृण्यं मर्त्यः शतवर्षेणाप्यायुषा तावत्पर्यन्तं निरन्तरपरिचर्ययापि न याति ॥ ५ ॥ य इति ॥ यः आत्मजः पुत्रः पितुरपेक्षया कल्पः समर्थः सन् अपि आत्मना देहेन धनेन च तयोः पित्रोर्वृत्तिमन्नवस्त्रादिजीविकां न दद्यात् न कल्पयेत् । तं प्रेत्य यमलोके यमदूताः स्वस्य तस्यैव मांसं तमेव खादयन्ति ॥ ६ ॥ मातरमिति ॥ कल्पः सन् मातरं पितरं वृद्धं साध्वीं भार्यां शिशुं सुतं गुरुं विप्रं प्रपन्नं शरणागतं च यथोचितम् अबिभ्रत् अपुष्णन् भवति । स श्वसन्नपि मृतप्राय एव निष्फलजीवन इति ॥ ७ ॥ तदिति ॥ तत् ततो हेतोः अकल्पयोः असमर्थयोः कंसान्नित्यमुद्विग्नं भीतं चेतो ययोस्तयोः वां युवामनर्चतोर्नौ आवयोरेते एकादशवर्षात्मका दिवसाः मोघं व्यर्थमेवातिक्रान्ता गताः । वास्तवोऽर्थस्तु न विद्यते कल्पो याभ्यां तयोः कंसात् कंसमाकर्ण्य युद्धोत्साहवशात् नित्यं मुद् ययोस्तयोः नित्यमुदोः अत एव

CC-0. In Public Domain. Digitization by eGangotri

विग्नं पुरीं प्रति चलितं चेतो ययोः " ओविजी भयचलनयोः " मोघमित्यादि काकूक्तिः ॥ ८ ॥ तदिति ॥ हे तात हे मातर्दुर्हृदा दुर्बुद्धिना कंसेन भृशं क्लिष्टयोः परतन्त्रयो-र्बन्दिगृहेष्ववरुद्धयोर्वां युवयोः शुश्रूषावसरेऽपि शुश्रूषामकुर्वतोः नौ आवयोः तत् तं शुश्रूषाभावप्रयुक्तापराधं पितृत्वात्क्षन्तुमर्हथ । परतन्त्रयोरिति नौ इत्यस्यापि विशेषणम् ॥ ९ ॥ इतीति ॥ मायया मनुष्यस्य विश्वात्मनो हरेः इत्येवंभूतया गिरा मोहितौ देवकीवसुदेवौ अत एव तौ पुत्रौ मत्वाङ्कमारोप्य परिष्वज्य च मुदं आपतुः ॥ १० ॥ सिञ्चन्ताविति ॥ हे राजन् अश्रुधाराभिः सिचन्तौ स्नेहपाशेन आवृतौ बाष्पकण्ठौ विमोहितौ तौ मातापितरौ किंचन न ऊचतुः ॥ ११ ॥ एवमिति ॥ भगवान् देवकीसुतः पितरावेवमाश्वास्य सान्त्वयित्वा मातामहमुग्रसेनं तु यदूनां पतिं नृपमधिपतिमकरोत् । एवमाश्वास्येत्यादिकं नन्दस्य परोक्षमेव । नन्दस्तु मत्पुत्रं युद्धश्रान्तमेते परमानन्दमत्ताः भोजयितुं काममन्तःपुरं नयन्तु । अहं पुत्रार्थे गतभीः स्वावतरणस्थानं यामीत्युक्त्वा पूर्वमेव गतवान् ॥ १२ ॥ आह चेति ॥ तमुग्रसेनमाह स्म च । हे महाराज अस्मान्

तत् क्षन्तुमर्हथस्तात मातर्नौ परतन्त्रयोः ॥ अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशम् ॥ ९ ॥ श्रीशुक उवाच ॥ इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ॥ मोहितावङ्कमारोप्य परिष्वज्यापतुर्मुदम् ॥ १० ॥ सिञ्चन्तावश्रुधाराभिः स्नेहपाशेन चावृतौ ॥ न किञ्चिदूचतू राजन् बाष्पकण्ठौ विमोहितौ ॥ ११ ॥ एवमाश्वास्य पितरौ भगवान् देवकीसुतः ॥ मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥ आह चास्मान् महाराज प्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नासितव्यं नृपासने ॥ १३ ॥ मयि भृत्य उपासीने भवतो विबुधादयः ॥ बलिं हरन्त्यवनताः किमुतान्ये नराधिपाः ॥ १४ ॥ सर्वान् स्वज्ञातिसंबन्धान् दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यन्धकमधुदाशार्हकुकुरादिकान् ॥ १५ ॥ सभाजितान् समाश्वास्य विदेशावासकर्शितान् ॥ न्यवासयत् स्वगेहेषु वित्तैः सन्तर्प्य विश्वकृत् ॥ १६ ॥

भृत्यादीन्प्रजाश्च आज्ञप्तुमर्हसि । मम तु राज्यं न योग्यमित्याह ययातिशापाद्यदुभिर्नृपासने नासितव्यं तव तु यादवत्वेऽपि ममाज्ञया राज्यस्थितौ न कश्चिद्दोषः इति भावः । किं च । भवतां भोजयदूनां राज्यं परम्पराप्राप्तं नास्माकं वृष्णियादवानामित्यतोऽपि भवानेव राजा योग्यः ॥ १३ ॥ मयीति ॥ मयि भृत्ये उपासीने त्वां सेवमाने सति विबुधादयोऽप्यवनताः सन्तो भवतो बलिं हरन्ति प्रापयिष्यन्ति तर्हि अन्ये नराधिपाः बलिमर्पयिष्यन्तीति किमुत वक्तव्यम् ॥ १४ ॥ सर्वानिति द्वयम् ॥ विश्वकृत् भगवान् कंसभयाद्गतान् पलायितान्यदुभेदान् वृष्ण्यन्धकादीन् सर्वान् स्वान् स्वकीयान् ज्ञातीन् संबन्धान् संबन्धिनश्च दिग्भ्यः समानाय्येति शेषः । विदेशावासेन कर्शितान् समाश्वास्य सान्त्वयित्वा सभाजितान् संमानितान् वित्तैः संतर्प्य स्वगृहेषु न्यवासयत् । नन्दगमनोत्तरं रोहिणीं व्रजादानेष्यतीति ज्ञेयम् ॥ १५ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेति ॥ कृष्णसङ्कर्षणभुजैर्गुप्ताः शत्रुभ्यो रक्षिता अत एव ताभ्यामेव गतो निवृत्तः ज्वरः तापो येषां ते लब्धमनोरथाः आप्तकामाः अत एव सिद्धाः कृतार्थाः सन्तो यादवा गृहेषु रेमिरे ॥ १७ ॥ वीक्षन्त इति ॥ नित्यं प्रमुदितं श्रीमत्सौन्दर्यातिशययुक्तं दयास्मिताभ्यां सहिते वीक्षणे यस्मिंस्तत् मुकुन्दस्य वदनाम्बुजम् अहरहः वीक्षन्तः शता आर्षः । प्रीताश्च सन्तो गृहेषु रेमिरे इत्यनुषङ्गः ॥ १८ ॥ तत्रेति ॥ तत्र मधुपुर्यां मुकुन्दस्य मुखाम्बुजसुधां मुखमाधुर्यं नेत्रैर्भृङ्गैर्मुहुः पिबन्तः प्रवयसो वृद्धा अपि युवानः अतिशयितं बलम् ओजश्च येषां तथा आसन् ॥ १९ ॥ अथ बहुदिवसकथानन्तरं कंसवधदिवसस्य परेद्यवि कस्याश्चिदतिमुख्याया दुरधिगमार्थायाः कथायाः उपक्रमः । अथेति ॥ हे राजेन्द्र भगवान् देवकीसुतः संकर्षणश्च नन्दं समासाद्य तत्समीपमागत्य परिष्वज्य प्रणामावसरमप्राप्य प्रेमवेगात् आलिङ्ग्यैवेदं वक्ष्यमाणमूचतुः ॥ २० ॥ पितरिति ॥ हे पितः स्निग्धाभ्यामनुरक्ताभ्यां युवाभ्याम् आवां भृशमात्मनोऽप्याधिक्येन पोषितौ लालितौ च यतः आत्मनः स्वदेहादपि आत्मजेषु मातापित्रोरभ्यधिका प्रीतिर्भवति । यद्वा । प्रेमानुकूल्येन व्याख्यान्तरम् । तत्र प्रथमं बलदेव आह । पितरिति । तथा च यथा मित्रपुत्रे मयि स्वपुत्रे कृष्णे च युवयोः समं

कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः ॥ गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ १७ ॥ वीक्षन्तोऽहरहः प्रीता मुकुन्दवदनाम्बुजम् ॥ नित्यं प्रमुदितं श्रीमत् सदयस्मितवीक्षणम् ॥ १८ ॥ तत्र प्रवयसोऽप्यासन् युवानोऽतिबलौजसः ॥ पिबन्तोऽक्षैर्मुकुन्दस्य मुखाम्बुजसुधां मुहुः ॥ १९ ॥ अथ नन्दं समासाद्य भगवान् देवकीसुतः ॥ सङ्कर्षणश्च राजेन्द्र परिष्वज्येदमूचतुः ॥ २० ॥ पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् ॥ पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ २१ ॥ स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून् बन्धुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ २२ ॥ यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन् वो द्रष्टुमेष्यामो विहाय सुहृदां सुखम् ॥ २३ ॥

वात्सल्यमतो ममापि युवां पितरौ तस्माद्युवां कृष्णं च विनात्र पुर्यां नाहं स्थातुं शक्नोमीत्याशयः ॥ २१ ॥ युवां वसुदेवसुतावित्यपि न वाच्यमित्याहतुः—स इति ॥ स एव पालकः पिता सैव च जननी चेति यौ पोषणे रक्षणे चाकल्पैरसमर्थैर्बन्धुभिः पित्रादिभिरुत्सृष्टांस्त्यक्तान् शिशून् स्वपुत्रवत् पुष्णीतान् शिशून् इति बहुवचनमन्येऽपि वसुदेवपुत्रा अन्यत्र गता आसंस्तदभिप्रायेण प्रेमव्याख्याने तु पोषकावेव मातापितरावधिकमान्यौ अतो मया भवता सहैव गन्तव्यमित्याशयः ॥ २२ ॥ यातेति ॥ हे तात यूयं संप्रति व्रजं यात वयमित्यहं बलदेवादयश्च सुहृदां वसुदेवादीनां सुखं विधाय स्नेहदुःखितान् वो ज्ञातीन् द्रष्टुमेष्यामः । यद्यत्र मम कश्चिद्विलम्बोऽपि भवेत्तदापि न व्याकुलीभवनीयमिति अत्र व्रजमागत्य श्रीकृष्णस्य नित्यस्थितिश्च दन्तवक्रवधानन्तरमिति तोषणी । श्रीकृष्णस्येममभिप्रायं नन्दस्तदैव न ज्ञातवान् किन्तु क्रमेणैव । प्रेमव्याख्याने तु बलदेववचसि नन्दे तूष्णीं स्थिते कृष्ण आह । यातेति । तथा च यद्यधुनैव सहैव राममपि नेष्यसि चेद्वसुदेवस्य महादुःखं भविष्यतीत्याशयः ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं सव्रजं व्रजवासिभिः सहितं नन्दम् अच्युतः भगवान् कृष्णः सान्त्वय्य ल्यबार्षः। सादरं यथा स्यात्तथा वासोलङ्कारकुप्याद्यैरर्हयामास । तत्र कुप्यानि गोदोहनाद्यर्थं कांस्यादिपात्राणि आदिना यानरत्नादिभिः ॥ २४ ॥ इतीति ॥ इत्येवमुक्तोऽत एव प्रणयेन स्नेहेन विह्वलो नन्दस्तौ रामकृष्णौ परिष्वज्य अश्रुभिर्नेत्रे पूरयन् गोपैः सह व्रजं प्रति ययौ । अत्र पितर्युवाभ्यामित्यादिश्लोकद्वयं बलदेववचस्त्वेन यातेति कृष्णवचस्त्वेन काञ्चित्प्रेमानुकूलां रीतिमनुसृत्य यथाश्रुतार्थस्य किञ्चिद्वैपरीत्येन व्याख्यातम् । तत्रापि प्रेमरसज्ञाः प्रेम्णोणुमात्रमप्यपचयमसहमानाः पञ्चश्लोक्या व्याख्यान्तरं प्रणयन्ति । तत्रैवं शङ्का पितर्युवाभ्यामित्यादेर्यथाश्रुतार्थः । प्रेमप्रतिकूल एव पूर्वलिखितोऽप्यर्थः । प्रेमप्रतिकूल एव नन्दकृष्णयोर्मिथस्त्यागात् कृष्णो नन्दं त्यक्त्वा तिष्ठतु । नन्दस्तु प्राणाधिकं कृष्णं कथं त्यक्तुमशकत् मथुरायामेव किन्नावसत् किंच पूर्वं सान्त्वयामास । सप्रेमैरायास्ये इति दौत्यकैरिति शुकवाक्ये दौत्यकैरिति बहुवचनेन भूयः कथनं सप्रेमैरिति च तेषां प्रेमसहितत्वमुक्तम् । श्रीकृष्णो गोपीनामाश्वासनाय वदतु वा । श्रीशुकः सप्रेमैरिति कथं विशिनष्टि तस्माद्यदि कंसवधानन्तरमेव कृष्ण आगच्छेत्तदैव सप्रेमत्वं स्यादन्यथा सप्रेमैरित्यलीकमेव स्यात् । तत्रैवमुन्नीयते वसुदेवादीनां नन्दादीनां चोपेक्षानुचिता । जरासन्धादिदुष्टनिग्रहाद्यं दशमस्कन्धोक्तमवतारप्रयोजनं च सम्पाद्य गोपीषु प्रतिश्रुतमागमनं च सम्पाद्यम् । अतः निखिलकृत्यसमाधात्रीमतर्क्यैश्वर्य्यां स्वीययोगमाया-

एवं सान्त्वय्य भगवान् नन्दं सव्रजमच्युतः ॥ वासोऽलङ्कारकुप्याद्यैरर्हयामास सादरम् ॥ २४ ॥

इत्युक्तस्तौ परिष्वज्य नन्दः प्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥ २५ ॥

शक्तिमाश्रित्य बलदेवसहित एव कृष्णः श्रीनन्दं पितरमासाद्य तदैव तेषां नन्दादीनां स्वस्य च द्वौ द्वौ प्रकाशावाविर्भाव्य प्रथमेन प्रकाशेन श्रीनन्दं प्रति पितर्युवाभ्यामिति श्लोकत्रयं यदुवाच तस्य एवं सान्त्वय्येति तदुत्तरस्य श्लोकद्वयस्य च व्याख्याकृतैव तत्रैव प्रकाशान्तरेण वर्तमानौ कृष्णरामावाहतुः । पितरिति । युवाभ्यां स्निग्धाभ्याम् आवां कृष्णरामौ द्वावपि पोषितौ लालितौ चेति अत्रत्या यादवाः आवां भवतः पोष्यपुत्रावेव वदन्ति । तत्र कृष्ण आह । पित्रोः खल्वात्मजेष्वेव पुत्रेषु आत्मनो देहान् जीवात्मनश्चापि सकाशादभ्यधिका प्रीतिर्भवेत् अतोऽहम् आत्मज एव नतु पोष्यपुत्रः । बलदेव आह । स पितेत्यादि । तस्मादहं वसुदेवस्य गृहे त्वां कृष्णं च हित्वा नैव स्थास्यामि । तत उभावाहतुः । यातेति । हे तात यूयं व्रजं यात वयं च व्रजं यामः । ततश्च तत्रत्यानां सुहृदां जनानां स्वदर्शनदानादिना सुखं विधाय पश्चात् वो युष्माकं यादवत्वेन ज्ञातीन् वसुदेवादीन् द्रष्टुमेष्याम इति ताभ्यामुक्तो नन्दः प्रणयानन्दविवशः अश्रुभिरानन्दधाराभिर्नेत्रे पूरयन्नेव शकटमारुह्य व्रजं ययौ अतो योगमायाप्रभावात् परस्परालक्षित एको नन्दः कृष्णवियुक्त एव व्रजं ययावन्यस्तु कृष्णसंयुक्त इति । एवं च व्रजस्थानामपि सर्वेषां गोपीगोपपश्वादिप्रकाशद्वयीकरणादेके कृष्णवियुक्तेन नन्देन सह दुःखसमुद्रेनिमग्ना अन्ये कृष्णसंयुक्तेन नन्देन सहानन्दसमुद्रे निमग्ना व्रज एव तत्र परस्परमलक्षिता असम्पृक्ता एव वर्तन्ते स्म । यथा द्वारकायां नारददृष्टप्रकाशेषु एकत्र कृष्णं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लालयन्ती भोजयन्ती देवकी परमानन्दनिमग्ना तदैवान्यत्र कृष्णवियुक्ता हन्त हन्त मृगयां कृत्वा अधुनाऽपि मत्पुत्रो नायातः क्षुधातृषाव्याकुल इति वदन्ती परमदुःखे निमग्नैवेति। यदुक्तं भागवतामृते । " आश्चर्य्यमेकदैकत्र वर्तमानान्यपि ध्रुवम् । परस्परमसंपृक्तस्वरूपाण्येव सर्वथा ॥ " इति । यद्यपि " प्रकाशस्तु न भेदेषु गण्यते स हि नो पृथक् । " इत्युक्तेर्वस्तुतो न प्रकाशानां भेदस्तदप्यभिमानचेष्टितादीनां लीलाशक्तिप्रभावाद्भेदस्तिष्ठत्येवेति योगमायाविभूत्यध्याये बहुलाश्वश्रुतदेवोपाख्याने च व्यक्तीभविष्यतीति। स्वीयकनकस्यानर्घ्यस्वरूपज्ञापनार्थमेव यथा वह्निना तत्संदह्यते तथैव स्वीयसर्वप्रेमपरिकरमुख्यमप्युद्धवं दिव्योन्मादचित्रजल्पादिभिर्महाचमत्कारमयं व्रजप्रेम्ण उत्कर्षं ज्ञापयितुमेव प्रथमो वियोगमयः प्रकाशः प्रकाशितः । अत एव व्रजं प्रत्युद्धव एव प्रस्थापयिष्यते । स च प्रायस्तमेव वियोगमयं प्रकाशं दृष्ट्वा महाप्रेमचमत्कारमाप्नुवन्नेताः परं तनुभृतो भुवीति नायं श्रियोङ्गेति आसामहो चरणरेणुजुषामित्यादिपद्यैस्तत्प्रेम्ण एव सर्वोत्कर्षमुद्घोषयिष्यति । स एव प्रकाशः कुरुक्षेत्रं गत्वा देवकीवसुदेवादीन् रुक्मिण्यादींश्च स्वं दर्शयित्वा महाप्रेमचमत्कारं प्रापयिष्यति । बलभद्रोऽपि व्रजं गतस्तमेव प्रकाशं प्रेमोन्मादमयं दृष्ट्वा चमत्कारं प्राप्स्यतीति व्रजविषयकं स्वाश्रयकं प्रेमाणं निश्चलमेव ज्ञापयितुं द्वितीयः संयोगमयः प्रकाशः । अत एव "विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितम् । " इत्यत्राहनी इति द्विवचनेन द्वे अहनी व्याप्यैव विच्छेदो न । तत इति ।

अथ शूरसुतो राजन् पुत्रयोः समकारयत् ॥ पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृतिम् ॥ २६ ॥
तेभ्योऽदाद्दक्षिणा गावो रुक्ममाल्यः स्वलंकृताः ॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः ॥ २७ ॥
याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ॥ ताश्चाददद्नुस्मृत्य कंसेनाधर्मतो हृताः ॥ २८ ॥

ज्ञापितम् उद्धवेनापि हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्वता यदाह वः समागत्य कृष्णः सत्यं करोति तदिति । तदा वर्तमानकाल एव प्रयुक्तः तथा तेन व्रजप्रवेशे प्रथमं ससंयोगमय एव प्रकाशः सामान्यतो द्रक्ष्यते यद्वक्ष्यते । "वासितार्थेऽभियुद्धचद्भिर्नादितं शुष्मिभिर्वृषैः । " इति गोदोहशब्दाभिरवं वेणूनां निःस्वनेन चेति स्वलङ्कृताभिर्गोपीभिर्गोभिश्च सुविराजितमिति । "ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूविकर्ष द्भुजकङ्कणस्रजः चलन्नितम्बस्तनहारकुण्डलत्विषत्कपोलारुणकुङ्कुमाननाः ॥ " इति सामान्यतो वक्ष्यते । "उद्गायतीनामरविन्दलोचनम् " इत्यादि कृष्णसंयोगानन्दलक्षणमित्येवं प्रकाशद्वयस्य प्रयोजनं प्रमाणं चोक्तम् ॥ २५ ॥ अथेति ॥ अथ हे राजन् शूरसुतो वसुदेवः पुरोधसा गर्गाचार्येण ब्राह्मणैश्च यथाविधि पुत्रयो रामकृष्णयोर्द्विजसंस्कृतिं द्विजत्वापादकसंस्कारमुपनयनं सम्यगकारयत् ॥ २६ ॥ तेभ्य इति ॥ ततश्च विप्रान्संपूज्य सुष्ठ्लङ्कृतेभ्यस्तेभ्यो ब्राह्मणेभ्यो दक्षिणां रुक्मस्य सुवर्णस्य माला आसां सन्तीति तथा सुष्ठु अलङ्कृताः क्षौममालिनीः क्षौमवस्त्रमालावतीर्गावो गाश्चादात् । प्रथमार्षी ॥२७॥ या इति ॥ रामकृष्णयोर्जन्मर्क्षे जन्मनक्षत्रे या गावो मनोदत्ताः मनसा संकल्पितास्ताश्चानुस्मृत्य तदानीमधर्मतः कंसेन हृताः। इदानीं तद्गोष्ठादाच्छिद्य महामतिर्वसुदेवः विप्रेभ्यो ददौ ॥२८॥

CC-0. In Public Domain. Digitization by eGangotri

ततश्चेति ॥ ततश्च लब्धः संस्कार उपनयनाख्यो याभ्यां तौ द्विजत्वं प्राप्य सुव्रतौ दृढसङ्कल्पौ यदुकुलाचार्याद्गायत्रं गायत्रप्राजापत्यब्राह्माख्यं व्रतं गर्गोपदिष्टमास्थितौ गृहीतवन्तौ तत्र गायत्रं गायत्रीमध्येतुस्त्रिरात्रं ततः प्राजापत्यं वेदारम्भपर्यन्तं ततो ब्राह्मं तत्समाप्तिपर्यन्तम् ॥ २९ ॥ प्रभवाविति द्वयम् ॥ अथो सर्वविद्यानां प्रभवौ उत्पादकौ सर्वज्ञौ जगदीश्वरावपि तौ अनन्यसिद्धं गुरूपदेशं विना स्वतःसिद्धममलमप्रतिहतं ज्ञानं नरेहितैः नरचेष्टितैर्गूहमानौ प्रच्छादयन्तौ लोकसङ्ग्रहार्थं विद्याग्रहणार्थं गुरुगृहे वासमिच्छन्तौ काश्यं काशगोत्रजं काश्यां जातं वा अवन्तीपुरवासिनं सान्दीपन्याख्यं गुरुं हीति प्रसिद्धतया उपजग्मतुः ॥ ३० ॥ ३१ ॥ यथेति ॥ तौ गुरुयथावत् समित्पाणित्वादिप्रकारेण तं गुरुमुपसाद्य प्राप्य दान्तौ जितेन्द्रियौ सन्तौ अनिन्दितां निर्दुष्टां गुरौ वृत्तिं ग्राहयन्तौ अन्यान् शिक्षयन्तौ आदृतौ आदरयुक्तौ गुरुणापि बुद्धिप्रकर्षात्सम्मानितौ वा देवमिव भक्त्या गुरुमुपेतौ स्म सेवितवन्तौ ॥ ३२ ॥ तयोरिति ॥ शुद्धः छलहीनो भावः स्नेहो यासु ताभिरनुवृत्तिभिः सेवाभिस्तयोस्तुष्टो द्विजवरो गुरुरङ्गैः

ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ॥ गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ ॥ २९ ॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ॥ नान्यसिद्धामलज्ञानं गूहमानौ नरेहितैः ॥ ३० ॥ अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः ॥ काश्यं सान्दीपनिं नाम ह्यवन्तिपुरवासिनम् ॥ ३१ ॥ यथोपसाद्य तौ दान्तौ गुरौ वृत्तिमनिन्दिताम् ॥ ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ॥ प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः ॥ ३३ ॥ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ॥ तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥ ३४ ॥ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ॥ सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ॥ ३५ ॥ अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ॥ गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप ॥ ३६ ॥

" शिक्षाकल्पो व्याकरणं छन्दो ज्योतिर्निरुक्तयः । " इत्यङ्गानि एभिरुपनिषद्भिश्च ब्रह्मप्रतिपादकभागैः सहितान् निखिलान् ऋगादिवेदान् प्रोवाच ॥ ३३ ॥ सरहस्यमिति ॥ क्षत्रियाणामावश्यकं सरहस्यं मन्त्रदेवताज्ञानसहितं धनुर्वेदं धर्मान् मन्वाद्युक्तधर्मशास्त्राणि न्यायपथान् मीमांसादिन्यायमार्गान् साङ्ख्ययोगादींश्च आन्वीक्षिकीं तर्कविद्यां षड्विधां सन्धिविग्रहयानासनद्वैधीभावसमाश्रयरूपां राजनीतिं च प्रोवाच ॥ ३४ ॥ सर्वमिति ॥ हे नृप सर्वविद्याप्रवर्तकौ नरवरेषु श्रेष्ठौ तौ रामकृष्णौ सकृदेकदा निगदमात्रेण गुरोरुच्चारणमात्रेणेव तद्गुरूपदिष्टं सर्वं जगृहतुः सम्यग् गृहीतवन्तौ ॥ ३५ ॥ अहोरात्रैरिति अर्द्धम् ॥ संयत्तौ वशीकृतचित्तौ रामकृष्णौ चतुःषष्टिसङ्ख्यायुक्तैरहोरात्रैस्तावतीश्चतुःषष्टिः कला संज्ञा विद्याः संजगृहतुः । वेदादिग्रहणे एतदन्ये अहोरात्रा ज्ञेयाः । यद्वा । पूर्वोक्तं सर्वं कलाश्च चतुःषष्ट्याहोरात्रैर्जगृहतुरित्यन्वयः । " सरहस्यधनुर्वेदं ससंग्रहमधीयताम् । अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज ॥ " इति वैष्णवोक्तेः । " चतुःषष्टिः शैवतन्त्रात्कलाः स्वामिभिरुद्धृताः । स्फुटीक्रियन्ते क्रमतो बालानां बोधहे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवे ॥ गानशिक्षा गायकत्वं तालरागस्वरज्ञता। स्वरादिमेलनमिति गीताख्या षड्विधा कला ।१। ततं वीणादिकं ज्ञेयमानद्धं मुरजादिकम् । वंशादिकं च सुषिरं कांस्यतालादिकं घनम् ॥ वाद्येष्वेतेषु वाद्याख्या गीतवत्षड्विधा कला । २ । अङ्गविक्षेपणं नृत्यं षोढा प्राग्वच्च तत्कला । ३ । नटक्रिया नाट्यकला नाटकाभिनयात्मिका । ४ । चित्राणां पुस्तकानां च लेख आलेख्यजा कला । ५ । विशेषकच्छेद्यकलास्तनादौ कुङ्कुमादिभिः । मत्स्याद्याकाररचना तिलकस्य विधिस्तथा । ६ । पूजाप्रकारादिकला कुसुमैस्तण्डुलादिभिः ।७। शय्यादे रचना पुष्पादिभिरास्तरणे कला । ८ । दशने वसनेऽङ्गे च रञ्जनं रागजा कला । ९। पाण्डवादिसभातुल्यमणिभूरचना कला । १० । मञ्चकादिकंनिर्माणं कला शयनकल्पना । ११ । जलस्तम्भो जले यानं जलवाद्यं च तत्कला । १२ । चित्रयोगकलानेकाद्भुतदर्शनवेदिता । १३ । पुष्पैर्हारादिरचना माल्यग्रथनजा कला ।१४। पुष्पादिभिः कला तद्वत् शेखरापीडयोजने । १५ । नेपथ्यस्य कला भूषा वस्त्राद्यैरङ्गसंस्कृतिः ।१६। कर्णादौ पत्रभङ्ग्यादिनिर्मितिस्तत्कलामता । १७। सुगन्धियोजनकला पटवासादिषु स्मृता । १८ । भूषादियोजनकला स्वर्णकारक्रिया भवेत् । १९ । ऐन्द्रजालकला ख्याता मृदादेः स्वर्णतादिका । २० । कुचुमारर्षिकथिता कौचुमारकलात्र तु । धारणं भूरिवेषाणां पटूनामपि मोहनम् । २१ । शरादौ वस्तुगुत्थादौ हस्तलाघवजा कला । २२ । सूदशास्त्रं चित्रशाकापूपभक्ष्यादिकृत्कला । २३ । पानकादिकला नानापेयमद्यादियोजनम् । २४ । स्यूतिर्वानं चित्रकृतिरित्यादिः सूचिजा कला । २५ । सूत्रक्रीडा कलासूत्रैः पुत्तल्यादिकचालनम् । २६ । वीणाडमरुवाद्यादिकला तद्यन्त्रनिर्मितिः । २७ । प्रहेलिका कला कूटवाक्यार्थज्ञानिता यथा, पानीयं पातुमिच्छामि त्वत्तः कमललोचने । यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् । २८ । प्रतिमाला कला नानाप्रतिमानां विनिर्मितिः । च्छायया चित्रनिर्माणमपि केचित्प्रचक्षते । २९ । दुर्वञ्चककला दुष्टलोकानां वञ्चनं यया । उपाया दुर्वचं वक्तुमिति त्वन्ये प्रचक्षते । ३० । पुस्तकवाचनकला शीघ्रं पुस्तकवाचनम् । यद्वा दृष्ट्वा हस्तचेष्टां लिखतोऽक्षरवाचनम् । ३१ । नाटकाख्यायिकादीनां निर्माणं तत्कला मता ।३२। समस्यापूरणकला श्लोकपादादिपूरणम् । यथा, शतचन्द्रं नभस्तलम् । तत्पूरणं, दामोदरकराघातविह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् ।३३। पट्टिकावेत्रबाणादिकला तद्रचना भवेत् । ३४ । तर्कुकर्मकला सूत्रैर्नानावस्त्रादिनिर्मितिः । ३५ । तक्षणस्य कला काष्ठादिभिः स्तम्भादिकल्पनम् । ३६ । वास्तुविद्याकला गेहप्रासादादिविनिर्मितिः । ३७ । सुवर्णरूप्यरत्नादेः परीक्षायाः कला स्फुटा । ३८ । धातुवादकला ख्याता ताम्रादेः स्वर्णकारिका । ३९ । मणिरागज्ञानकला रत्नरञ्जनकौशलम् । ४० । आकरस्य कला स्वर्णरत्नादिखनिभूज्ञता । ४१ । वृक्षरक्षाचिकित्सादिर्वृक्षायुर्वेदजा कला । ४२ । मेषकुक्कुटलावादियुद्धरीतिस्तु तत्कला । ४३ । शुकसारिकयोः पाठकला तच्छिक्षणे विधिः । ४४ । उत्सादनकला शत्रोर्मन्त्रैरुच्चाटनाविधिः । उद्वर्त्तनं शरीरस्य संस्कारमपरे जगुः । ४५ । स्यात्केशमार्जनकला रचना मार्जनादिका । ४६ । लुप्ताक्षराणां मुष्टिस्थवस्तूनां कथने कला । ४७ । म्लेच्छितादिकला तत्तद्भाषाशास्त्रेषु कौशलम् । ४८ । देशभाषाकला तत्तद्देशभाषणकौशलम् । ४९ । कलापु

CC-0. In Public Domain. Digitization by eGangotri

ष्पशकट्याख्या सदसत्फलधीस्ततः । ५० । पूजायन्त्रादिनिर्माणं कला स्याद्यन्त्रमातृका । ५१ । मातृकासंवाच्यकला नानाभाषाविनिर्मितिः । हीरकादेरवेध्यस्य वेधादिरपि सा मता । ५२ । परचित्तार्थकविता कलामानसकाव्यजा । ५३ । कलाभिधानकोषस्य बहुकोशप्रवीणता । ५४ । छन्दोज्ञानकला नानाच्छन्दोविषयनैपुणम् । ५५ । नानोपायैरेकवस्तु भूरीण्येकेन कर्मणा । कुर्यात्क्रिया विकल्पाख्या सा कला भूरिपाटवा ।५६। क्रिया च्छलितयोगाख्या चोरणावञ्चनादिका ।५७। वस्त्रगुप्तिकला तूलवस्त्रादौ पट्टतादिका । ५८ । स्फुटा द्यूतकला । ५९ । कर्षक्रीडा ख्यातुकला परा । यत्र दूरस्थवस्तूनामाकर्षैः क्रीडनं भवेत् । ६० । बालक्रीडाकला स्पष्टा क्रीडनं कन्दुकादिभिः । ६१ । वैनायिकी कला भूतचेटादेर्मन्त्रसाधनम् । ६२ । कला वैजयिकी यत्र वादादौ ज्ञायते जयः । ६३ । वैतालिकी कला सिद्ध्यै वेतालादेरुपासनम् । ६४ । इति स्वामिक्रमोद्दिष्टकलानामर्थवर्णनम् ॥" गुरु इत्यर्द्धम् ॥ हे नृप गुरुदक्षिणया गुरवे देयदक्षिणार्थम् आचार्यं तमेव गुरुं छन्दयामासतुः स्वाभीष्टं वरयेति इच्छां कारितवन्तौ "अभिप्रायवशौ छन्दौ" इत्यमरः । छन्दशब्दात्तत्करोतीति णिच् । ततो हेतुमण्णिच् ॥ ३६ ॥ द्विज इति ॥ हे राजन् सद्द्विजः सान्दीपनिः तयो रामकृष्णयोस्तमनाया-

द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिम् ॥ संमन्त्र्य पत्न्या स महार्णवेमृतं बालं प्रभासे वरयाम्बभूव ह ॥३७॥ तथेत्यथा-
रुह्य महारथौ रथं प्रभासमासाद्य दुरन्तविक्रमौ ॥ वेलामुपव्रज्य निषीदतुः क्षणं सिन्धुर्विदित्वाऽर्हणमाहरत्तयोः ॥ ३८ ॥ तमाह भगवानाशु गुरु-
पुत्रः प्रदीयताम् ॥ योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥ समुद्र उवाच ॥ नैवाहार्षमहं देव दैत्यः पञ्चजनो महान् ॥ अन्तर्ज-
लचरः कृष्ण शङ्खरूपधरोऽसुरः ॥ ४० ॥ आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः ॥ जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकम् ॥ ४१ ॥

सेनैव सर्वविद्याग्रहणात्मकमद्भुतं श्रोतृजनाश्चर्यजनकं महिमानं तथा अतिमानुषीं मनुष्येष्वसंभावितां ह्रस्वाभाव आर्षः । मतिं च संलक्ष्य महापुरुषाविमाविति निश्चित्येति शेषः । पत्न्या सह संमन्त्र्य विचार्य प्रभासे क्षेत्रे महार्णवे तत्र महाशिवक्षेत्रे बालतया जले क्रीडतस्तस्य शङ्खासुरेण ग्रसनात् निमज्ज्य मृतं स्वपुत्रं वरयांबभूव दक्षिणारूपेण याचितवान् ॥ ३७ ॥ तथेति ॥ महारथौ दुरन्तोऽपारो विक्रमो ययोस्तौ रामकृष्णौ तथास्त्विति गुरुयाच्ञामङ्गीकृत्य रथमारुह्य प्रभासाख्यं तीर्थमासाद्य प्राप्य तत्र वेलां समुद्रस्य तीरमुपव्रज्य क्षणं निषेदतुः निषीदतुरिति त्वार्षः पाठः । समुद्रश्च परमेश्वराविमाविति विदित्वा तयोरर्हणमाहरत् यथावत्पूजनं कृतवान् ॥ ३८ ॥ तमिति ॥ इह स्थाने महता ऊर्मिणा तरङ्गेण योऽसौ बालकस्त्वया ग्रस्तः अन्तर्धापितः सोऽस्मद्गुरुपुत्रः अत आशु प्रदीयतामिति तं समुद्रं भगवानाह स्म ॥ ३९ ॥ नैवेति द्वयम् ॥ हे देव तं द्विजपुत्रमहं नैवाहार्षं नापहृतवान् किंतु अन्तर्जलचरः जलान्तर्वर्ती पञ्चजनाख्यो दैत्य आस्ते तेन तव गुरुपुत्र आहृतः नूनम् अत्र संदेहो नास्ति । स च महान् अस्मदसाध्यः स च असुरोऽपि शङ्खरूपधरः तत् सिन्धुवचनं श्रुत्वा प्रभुः समर्थः श्रीकृष्णः सत्वरं शीघ्रमेव जलमाविश्य तं दैत्यं हत्वा तस्योदरे अर्भकं बालकं नापश्यत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः । " इत्यर्द्धं काचित्कमिति तोषिणी ॥४०॥४१॥ तदिति सार्द्धम् ॥ तस्य पञ्चजनस्याङ्गात्प्रभवो यस्य तं पाञ्चजन्याख्यं शङ्खमादाय रथं प्रत्यागमत् । रथस्थं बलदेवं च तीरे स्थापयित्वैव स्वयमेकाक्येव कृष्णः सर्वज्ञत्वात्तत्र गुरुपुत्राप्राप्तिं जानन्नपि तदन्वेषणमिषेण स्वीयं शङ्खमानैषीदिति ज्ञेयम् । तदङ्गप्रभवमिति चिन्मयत्वान्नित्यस्यापि पाञ्चजन्यस्य जयविजयवदसुरत्वमिति केचिदाहुः । महानपि शङ्खः स्वेच्छया वाद्ययोग्यः सूक्ष्माकारः कृत इति ज्ञेयम् । तत इति । ततश्च सहलायुधः बलभद्रेण सहितो जनार्दनः श्रीकृष्णो यमस्य दयितां प्रियां संयमनीं नाम पुरीं गत्वा शङ्खं पाञ्चजन्यं प्रदध्मौ ध्वनयामास । तद्ध्वनिं श्रावयित्वा सर्वानेव नारकान् जीवान् कृपासिन्धुः संसारादुद्दधरेत्यवन्तीखण्डे दृष्टम् । यथा " असिपत्रवनं नाम शीर्णपत्रमजायत । रौरवं नाम नरकमरौरवमभूत्तदा ॥ अभैरवं भैरवाख्यं कुम्भीपाकमपाचकम् । " इत्यादि । अन्ते च " पापक्षयात्ततः सर्वे विमुक्ता नारका नराः । पदमव्ययमासाद्य " इत्यादिना वैकुण्ठं च तान् प्रस्थापयामासेत्यपि दृष्टम् ॥ ४२ ॥

तदङ्गप्रभवं शङ्खमादाय रथमागमत् ॥ ततः संयमनीं नाम यमस्य दयितां पुरीम् ॥ गत्वा जनार्दनः शङ्खं प्रदध्मौ सहलायुधः ॥ ४२ ॥ शङ्खनिर्ह्लादमाकर्ण्य प्रजासंयमनो यमः ॥ तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहिताम् ॥ ४३ ॥ उवाचावनतः कृष्णं सर्वभूताशयालयम् ॥ लीलामनुष्य हे विष्णो युवयोः करवाम किम् ॥ ४४ ॥ भगवानुवाच ॥ गुरुपुत्रमिहानीतं निजकर्मनिबन्धनम् ॥ आनयस्व महाराज मच्छासनपुरस्कृतः ॥ ४५ ॥ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ ॥ दत्त्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४६ ॥ सम्यक् संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः ॥ को नु युष्मद्विधगुरोः कामो नामावशिष्यते ॥ ४७ ॥

शङ्खेति ॥ तदा च प्रजानां शास्त्रमर्यादातिलङ्घिनां संयमनः शास्ता यमः शङ्खस्य निर्ह्लादं ध्वनिमाकर्ण्य श्रुत्वा आगत्य भक्त्योपबृंहितां युक्तां तयोर्महतीं सपर्यां पूजां चक्रे ॥ ४३ ॥ उवाचेति ॥ सर्वेषां भूतानाम् आशयाः हृदयानि आलयानि यस्य तं सर्वान्तर्यामिणं कृष्णमवनतः सन्नुवाच । हे लीलार्थं मनुष्यविग्रह हे विष्णो युवयोः किं कार्यं करवाम ॥ ४४ ॥ गुरुपुत्रमिति ॥ हे महाराज मच्छासनेन पुरस्कृतः प्रेरितः त्वं इह त्वत्समीपे त्वद्भृत्यैरानीतं निजं कर्मैवावश्यभोग्यं निबन्धनं यस्य तं मम गुरुपुत्रमानयस्व । तव तु दोषो नास्तीति भावः ॥ ४५ ॥ तथेति ॥ तथेत्यङ्गीकृत्य तेन यमेनोपानीतं गुरुपुत्रमादाय यथा मृतस्तादृशशरीरं निर्माय जीवयित्वा चागत्य यदूत्तमौ रामकृष्णौ स्वगुरवे दत्त्वा समुद्राहृतरत्नादिकं च दत्त्वा "सह रत्नैरुदारधीः" इति हरिवंशात् पुनर्वरान्तरं वृणीष्वेति तमूचतुः ॥ ४६ ॥ सम्यगिति ॥ हे वत्स मुख्यतया कृष्णस्यैव सम्बोधनम् । भवद्भ्यां गुरुनिष्क्रयः गुरुदक्षिणा सम्यक् सम्पादितः अतो युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोऽपि अतो न वरान्तरमपेक्षितम् ॥ ४७॥

CC-0. In Public Domain. Digitization by eGangotri

गच्छतमिति ॥ हे वीरौ स्वगृहं गच्छतं वां युवयोः कीर्तिः पावनी श्रोत्रादिजनपावनकरी अस्तु । तथेह परत्र च युवयोरधीतानि छन्दांसि अयातयामानि अगतसाराणि नित्योपस्थितानि भवन्तु ॥ ४८ ॥ गुरुणेति ॥ हे तात गुरुणा एवमनुज्ञातौ रामकृष्णौ अनिलस्येव रंहो वेगो यस्य तेन तथा पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन रथेन वै प्रसिद्धतया स्वपुरं प्रत्यायातौ आजग्मतुः ॥ ४९ ॥ समिति ॥ बहून्यहान्यपश्यन्त्यस्तदा रामजनार्दनौ दृष्ट्वा सर्वाः प्रजाः नष्टमदर्शनं गतं तत्पुनर्लब्धं दृष्टं धनं याभिस्ता यथा परमानन्दयुक्ता भवन्ति तद्वत् समनन्दन् परमानन्दयुक्ता जाताः ॥५०॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽत्र पञ्चचत्वारिंशे व्यधादिमाम्॥४५॥ षट्चत्वारिंशके कृष्णगिरा नन्दयशोदयोः ॥ उद्धवः सान्त्वनं चक्रे तत्र श्लोका नवार्ग्धयः ॥ चत्वार्युवाचवाक्यानि नेत्रबाणा अनुष्टुभः ॥ ४६ ॥ अत्र आयास्य इति " दौत्यकैर्द्रष्टुमेष्यामः " इत्युक्त्वापि भगवान् व्रजं यन्न जगाम तत्र दुर्जयजरासन्धजयादिकृत्यशेषः स्वस्य तदुपद्रवशङ्कया व्रजं गतो नन्दादिप्रेमबद्धो नागच्छेदिति शङ्कया वा वसुदेवाद्यननुज्ञा चेति हेतुद्वयं लक्ष्यते । तच्छत्रुजयो दुर्गादिमत्यां पुर्यामेव स्यान्न व्रजे इति विचार्यैव नन्देनापि साक्षात्सन्देशैर्वा व्रजागमनाय न प्रार्थितः । भगवानपि शत्रून्प्र-

गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ छन्दांस्ययातयामानि भवन्त्विह परत्र च ॥ ४८ ॥ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ॥ आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ॥ ४९ ॥ समनन्दन् प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ ॥ अपश्यन्त्यो बह्वहानि नष्टलब्धधना इव ॥ ५० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ श्रीशुक उवाच ॥ वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥

त्यौदासीन्यव्यञ्जनाय नन्दादीन्निकटे नाजुहाव । तथात्वे यदूनां गोपानां च युगपदुपद्रवः स्यात् किंच युगपदुभयत्र पितृव्यवहारस्तदुचितगोचारणादियुद्धादिलीलानामन्योन्यविरोधाद्दुर्घटः अत एव वयमेव द्रष्टुमेष्यामो नतु यूयमत्रागच्छतेति भगवता व्यञ्जितम् । तत्स्मृत्वैव चोत्कण्ठिता अपि निकटादपि व्रजान्नन्दादयो नागताः । पुरे व्रजे च युगपत् स्थितिरस्तु न युक्ता।तज्ज्ञाने ऐश्वर्यज्ञानेन पुत्रादिभावमयप्रेमहान्यापत्तेः । किंच।" भक्तानां नित्यसंयोगे प्रेमेशाय न रोचते।यथोत्कण्ठामयं प्रेम तल्लोभः परमो हरेः॥"तस्मात् दन्तवक्त्रवधान्ते गन्तुमना भगवान् नन्दाश्वासनार्थं गोपीविरहपीडानिवृत्त्यर्थं चोद्धवं प्रेषयामासेति तोषिणी । वृष्णीनामिति ॥ वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयितः सखा बृहस्पतेः साक्षाच्छिष्यः बुद्ध्या सत्तमः अतिश्रेष्ठः उद्धवः आसीत्।अयं च वसुदेवभ्रातुर्देवभागस्य पुत्रः।"उद्धवो देवभागस्य महाभागः सुतोऽभवत्।"इति हरिवंशात्।एभिर्विशेषणैरुद्धवस्य रहस्यकथनयोग्यत्वमुक्तम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ प्रपन्नानामार्त्तिहरः हरिः तमेकान्तिनमनन्यभक्तम् अत एव प्रेष्ठमतिप्रियं क्वचिदेकान्ते पाणिना पाणिं गृहीत्वा भगवानाह स्म ॥ २ ॥ गच्छेति ॥ हे उद्धव हे सौम्य त्वं व्रजं गच्छ नौ आवयोः पित्रोर्नन्दयशोदयोः प्रीतिमावह । तथा गोपीनां मद्वियोगाद्धेतोर्य आधिः मनःपीडा तं मत्सन्देशैर्विमोचय ॥ ३ ॥ ता इति ॥ ताः गोप्यः मय्येव मनो यासां ताः मदर्थमेव प्राणाः प्राणधारणं यासां ताः मदर्थे मत्प्राप्तिप्रतिबन्धकतया त्यक्ता दैहिकाः देहसंबन्धिनः पतिपुत्रभोजनशयनादयश्च याभिः तथाभूताः सन्तीति मामेव दयितं प्रेष्ठमात्मानं मनसा गता इत्यर्द्धं न सार्वत्रिकमिति तोषणीसारे । ये इत्यर्द्धम् । ये जनाः मदर्थे मत्प्रसादार्थे त्यक्तो लोकः इहामुत्र सुखं धर्मस्तत्साधनं च यैः य एवंविधा भवन्ति तानहं बिभर्मि पालयामि सुखयामीत्यर्थः ॥ ४ ॥ मयीति ॥ अङ्ग हे उद्धव प्रेयसामपि प्रेष्ठे मयि दूरस्थे सति ता गोकुलस्त्रियो मां स्मरन्त्यो विरहौत्कण्ठ्येन विह्वलाः परवशाः सत्यो विमुह्यन्ति देहं तद्धर्मादींश्च नानुस्मरन्ति ॥ ५ ॥ धारयन्तीति ॥ गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीत्यादयो ये प्रत्यागमनसंदेशास्तैः मदात्मिका मय्येवात्मा यासां ताः मे मदीया बल्लव्यः गोप्यः कथंचन अतिकृच्छ्रेण क्लेशेन प्राणानेव

तमाह भगवान् प्रेष्ठं भक्तमेकान्तिनं क्वचित् ॥ गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह ॥ गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय ॥ ३ ॥ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ॥ ये त्यक्तलोकधर्मांश्च मदर्थे तान् बिभर्म्यहम् ॥ ४ ॥ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥ स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ॥ ५ ॥ धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथंचन ॥ प्रत्यागमनसन्देशैर्बल्लव्यो मे मदात्मिकाः ॥ ६ ॥

धारयन्ति प्रायःशब्दो मूर्छासूचकः । तासामात्मा यदि स्वदेहे स्यात्तदा विरहाग्निना दह्येतैव मयि वर्तमानत्वात् । कथंचिज्जीवन्तीति भावः । प्राय इत्यनेन काश्चिन्नापि जीवन्तीति संभाव्यते । यद्यपि सर्वे व्रजवासिनः कृष्णैकजीवनाः सान्त्वनार्हाः " दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् । " इत्याद्युक्तेः । तथापि तेषामनुल्लेखादिदं गम्यते । व्रजे खलु त्रिविधः प्रेमा उत्कण्ठाप्रधानो विश्रम्भप्रधानो विवेकशून्यश्च । तत्रोत्कण्ठाप्रधानानां साक्षात्कारेऽपि परोक्षतावभासः यथा द्वारकाजलविहारे पट्टस्त्रीणाम् अत उत्कण्ठाप्रधानप्रेमाणः पितरौ प्रेयस्यश्च वियोगमानिन इवेति तयोस्तासां च सान्त्वमेव सान्त्वनम् अन्यथा समाधानासम्भवात् विश्रम्भप्रेमवतां सखिश्रीदामादीनां च श्लिष्यति । " चुम्बति जलधरकल्पं हरिरुपगत इति तिमिरमनल्पम् " इति न्यायेन विरहाद्दनादौ तत् स्फूर्त्यादिनामामेकान्ते मथुरात आगत्य मिलति संवदतीत्यादिविश्वासेन संयोगिताभिमानादसान्त्वनमेव सान्त्वनं सान्त्वने संदेहापत्तेः । विवेकशून्यप्रेम्णां गवादीनां स्वानुभवेनैव संयोगितानिश्चयः अत एवैषां हर्षो वर्णयिष्यते । वासितार्थेऽभियुध्यद्भिरित्यादिना उपनन्दादीनां तु पित्राद्यन्तःपातिसान्त्वनम् । एवं त्रैविध्ये अक्रूर आगतः किं वेत्यादिना कासांचिद्दुःखम् । गोप्यः समुत्थायेत्यादिना कासांचित् सुखं वृक्ष-

CC-0. In Public Domain. Digitization by eGangotri

पक्ष्यादीनां च सुखं तथा तथा वक्ष्यमाणं तत्र तत्रान्तर्भावाभिप्रायेण व्यवस्थापनीयमिति सर्वसामञ्जस्यम् । पूर्वं प्रकाशद्वयतया व्याख्यानमप्यत्रानुकूल्येन बोध्यम् ॥ ६ ॥ इतीति ॥ हे राजन् इत्येवं भगवता उक्तः आदृतश्चोद्धवः "भवतीनां वियोगो मे नहि सर्वात्मना क्वचित्।" इत्यादिना वक्ष्यमाणं भर्तुः स्वामिनः श्रीकृष्णस्य संदेशमादाय स्वीकृत्य रथमारुह्य नन्दस्य गोकुलं प्रययौ ॥ ७ ॥ प्राप्त इति ॥ विभावसौ सूर्ये निम्लोचति अस्तं गच्छति सति प्रविशतां पशूनां खुररेणुभिश्छन्नं यानं रथो यस्य स उद्धवः श्रीमत् सर्वसम्पद्युक्तं नन्दस्य व्रजं प्राप्तः श्रीमानिति वा पाठः । छन्नयान इति तदा गोपीभिरज्ञातत्वेन नन्दसङ्गं लब्धवानिति सूचितम् ॥ ८ ॥ व्रजं विशिनष्टि—वासितार्थे इति पञ्चभिः ॥ वासिताः पुष्पिण्यो गावस्तदर्थे तत्संबन्धनिमित्तम् अभितः परस्परं युध्यद्भिः आर्षः शता । शुष्मिभिर्मत्तैर्वृषैर्नादितम् ऊधोभारैरुपलक्षिताभिः स्ववत्सान् प्रति धावन्तीभिः वास्राभिर्धेनुभिश्च मण्डितम् । तथा इतस्ततो विलङ्घद्भिः शता आर्षः । सितैः श्वेतवर्णैर्गोवत्सैश्च मण्डितम् । तथा गोदोहशब्दैः सहाभितोरवाः मुञ्च मा मुञ्च

श्रीशुक उवाच ॥ इत्युक्त उद्धवो राजन् संदेशं भर्तुरादृतः ॥ आदाय रथमारुह्य प्रययौ नन्दगोकुलम् ॥ ७ ॥ प्राप्तो नन्दव्रजं श्रीमान् निम्लोचति विभावसौ ॥ छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ८ ॥ वासितार्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः ॥ धावन्तीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ॥ ९ ॥ इतस्ततोऽविलङ्घद्भिर्गोवत्सैर्मण्डितं सितैः ॥ गोदोहशब्दाभिरवैर्वेणूनां निस्वनेन च ॥ १० ॥ गायन्तीभिश्च कर्माणि शुभानि बलकृष्णयोः ॥ स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितम् ॥ ११ ॥ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ॥ धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ॥ १२ ॥ सर्वतः पुष्पितवनं द्विजालिकुलनादितम् ॥ हंसकारण्डवाकीर्णैः पद्मखण्डैश्च मण्डितम् ॥ १३ ॥ तमागतं समागम्य कृष्णस्यानुचरं प्रियम् ॥ नन्दः प्रीतः परिष्वज्य वासुदेवधियाऽऽर्चयत् ॥ १४ ॥

नय आनय देहि गृहाणेत्यादयो यस्मिंस्तत् तथा वेणूनां निस्वनेन च मण्डितम् ॥९॥१०॥ बलकृष्णयोः शुभानि कर्माणि गायन्तीभिः स्वलङ्कृताभिर्गोपीभिस्तथाविधैर्गोपैश्च सुविराजितम् ॥ ११ ॥ अग्न्यर्काद्यर्चनान्वितैः गोपगृहैश्च धूपादिभिश्च मनोरमम् ॥ १२ ॥ सर्वतः पुष्पितानि वनानि यस्मिंस्तत् द्विजानां पक्षिणाम् अलीनां भ्रमराणां च कुलैः समूहैर्नादितं हंसैः कारण्डवैर्जलकुक्कुटैश्चाकीर्णैर्व्याप्तैः पद्मखण्डैः पद्मसमूहैश्च मण्डितम् । हंसकारण्डवाद्याकीर्णपद्मखण्डमण्डितसरःप्रान्तवर्तिद्विजालिकुलनादितपुष्पितवनमण्डितमिति समुदितार्थः ॥ १३ ॥ तमिति ॥ तं कृष्णस्य प्रियमनुचरं सेवकमुद्धवमागतमाकर्ण्य प्रीतः सन्नन्दः आगत्य तं परिष्वज्य वासुदेवधियार्चयत् कृष्णमेवागतं मत्वा सत्कारं कृतवान् । यद्वा । वैष्णवस्य वासुदेवपूजाधिष्ठानत्वात्तदभेदेनापूजयत् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजितमिति ॥ परमेणोत्कृष्टेनान्नेन पायसादिना भोजितं कर्मणः करणत्वविवक्षया तृतीया । परमान्नं भोजितं कशिपौ पर्यङ्के सुखं यथा भवति तथा संविष्टं सेवकैः कृतैः पादसंवाहनादिभिर्गतमार्गश्रममुद्धवं नन्दः पर्यपृच्छत् ॥ १५ ॥ कच्चिदिति ॥ अङ्ग हे महाभाग सविसर्गपाठे वसुदेवविशेषणम् । नोऽस्माकं सखा शूरनन्दनो वसुदेवो बन्धान्मुक्तः सुहृद्भिर्बन्धुभिर्मित्रैर्वृतोऽपत्याद्यैर्युक्तश्च कच्चित् कुशली सुखी आस्ते ॥ १६ ॥ दिष्ट्येति ॥ यः कंसः साधूनां धर्मशीलानां यदूनां सदा द्वेष्टि अद्वेट् शेषे षष्ठी । स पापः पापाचारः कंसः स्वेन स्वकीयेनैव पाप्मना दुरितेन हेतुना सानुगः भ्रातृमल्लादिसहितो हत इति दिष्ट्या ॥ १७ ॥ अपीति ॥ कृष्णः नोऽस्मान् सुहृदः पित्रादिरूपान् प्रेमवतः मातरं यशोदां सखीन् गोपांश्च आत्मा स्वयमेव नाथो रक्षको यस्य तं व्रजं गावो गाः प्रथमार्षी । वृन्दावनं गिरिं गोवर्धनं चापि किं स्मरति ॥ १८ ॥ अपीति ॥ अपि किं स्वजनानस्मानीक्षितुं गोविन्दः सकृदेकदापि आयास्यति खलु यदि आयास्यति तर्हि सुनसं शोभननासिकं स्मितपूर्वकमीक्षणं यस्मिंस्तत् तस्य वक्त्रं द्रक्ष्यामः सलोप

भोजितं परमान्नेन संविष्टं कशिपौ सुखम् ॥ गतश्रमं पर्यपृच्छत् पादसंवाहनादिभिः ॥ १५ ॥ कच्चिदङ्ग महाभाग सखा नः शूरनन्दनः ॥
आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥ १६ ॥ दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना ॥ साधूनां धर्मशीलानां यदूनां
द्वेष्टि यः सदा ॥ १७ ॥ अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ॥ गोपान् व्रजं चात्मनाथं गावो वृन्दावनं गिरिम् ॥ १८ ॥
अप्यायास्यति गोविन्दः स्वजनान् सकृदीक्षितुम् ॥ तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणम् ॥ १९ ॥ दावाग्नेर्वातवर्षाच्च विषसर्पाच्च
रक्षिताः ॥ दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥ २० ॥ स्मरतां कृष्णवीर्याणि लीलापाङ्गनिरीक्षितम् ॥ हसितं भाषितं चाङ्ग
सर्वा नः शिथिलाः क्रियाः ॥ २१ ॥ सरिच्छैलवनोद्देशान् मुकुन्दपदभूषितान् ॥ आक्रीडानीक्षमाणानां मनो याति तदात्मताम् ॥ २२ ॥
मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा ॥ २३ ॥

आर्षः ॥ १९ ॥ दावाग्नेरिति ॥ दावाग्नेर्वातयुक्तवर्षाच्च वृषात् अरिष्टात् सर्पात् अघासुरात् कालियात्सुदर्शनाच्च अन्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः सुमहात्मना कृष्णेन वयं रक्षिताः ॥ २० ॥ स्मरतामिति ॥ अङ्ग हे उद्धव कृष्णस्य वीर्याणि गोवर्धनोद्धरणादिपराक्रमान् तथा तस्य लीलया अपाङ्गेन निरीक्षितं च हसितं च भाषितं च स्मरतां नोऽस्माकं सर्वा एव क्रियाः भोजनाद्यावश्यकव्यापारा अपि शिथिला जाताः ॥ २१ ॥ सरिदिति ॥ मुकुन्दस्य पदैश्चिह्नैर्भूदेव्या तथैव रक्षितैर्भूषितान् सरिच्छैलवनोद्देशान् आक्रीडानि क्रीडास्थानानि ईक्षमाणानां नोऽस्माकं मनस्तदात्मतां कृष्णाकारतां याति गच्छति ॥ २२ ॥ मन्य इति ॥ सुराणामर्थाय असुरादिसंहारेण यज्ञादिप्रवर्तनेन च भोगसिद्धये रामं च कृष्णं च सुरोत्तमौ वासुदेवसंकर्षणाविह लोके प्राप्ताववतीर्णौ मन्ये अतः महत् गम्भीरं गर्गस्य वचनं “ नारायणसमो गुणैः ” इत्यादि ।

CC-0. In Public Domain. Digitization by eGangotri

यथा यथार्थमेव महदित्यर्थविशेषणत्वेन समासे आत्वापत्तिः ॥ २३ ॥ कंसमिति ॥ नागायुतस्य हस्तिदशसहस्रस्य प्राणो बलं यस्य तं कंसं तथा मल्लौ चाणूरमुष्टिकौ महाबलौ गजपतिं सहस्रद्विपसत्वभृदित्युक्तविधं कुवलयापीडं च लीलया अनायासेनैव मृगाधिपः सिंहः इतरान्पशून्यथा हन्ति तद्वत् अवधिष्टां हतवन्तौ ॥ २४ ॥ तालत्रयमिति ॥ तालस्तालवृक्षः षष्टिहस्तदैर्घ्यः तत्रयपरिमितं महासारम् अयोवदतिदृढं धनुर्यष्टिमिक्षुदण्डम् इभराट् गजेन्द्रो यथा भनक्ति तथा बभञ्जेत्यन्वयः । तथैकेन वामेन हस्तेन सप्ताहं सप्तदिनपर्यन्तं गिरिं गोवर्धनमधात् दधार ॥ २५ ॥ प्रलम्ब इति ॥ येन कृष्णेन प्रलम्बादयः बकादयश्च सुरासुरजितः दैत्या लीलया हताः प्रलम्बस्योक्तिः कृष्णप्राधान्यसूचनाय ॥ २६ ॥ इतीति ॥ इत्येवं कृष्णं संस्मृत्य संस्मृत्य अश्रुकण्ठः अश्रुभिर्निरुद्धकण्ठः अत्युत्कण्ठ इति वा पाठः । प्रेम्णः प्रसरेण उद्रेकेण विह्वलो व्याकुलः कृष्णेऽनुरक्ता धीर्यस्य स नन्दः तूष्णीं बभूव किंचिदपि वक्तुं न शशाक ॥ २७ ॥ यशोदेति ॥ स्नेहेन स्नुतौ प्रस्नुतौ पयोधरौ यस्याः सा यशोदा भर्त्रा वर्ण्यमानानि पुत्रस्य

कंसं नागायुतप्राणं मल्लौ गजपतिं तथा ॥ अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥ २४ ॥ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ॥ बभञ्जैकेन हस्तेन सप्ताहमदधाद्गिरिम् ॥ २५ ॥ प्रलम्बो धेनुकोऽरिष्टस्तृणावर्तबकादयः ॥ दैत्याः सुरासुरजितो हता येनेह लीलया ॥२६॥ श्रीशुक उवाच ॥ इति संस्मृत्य संस्मृत्य नन्दः कृष्णानुरक्तधीः ॥ अत्युत्कण्ठोऽभवत् तूष्णीं प्रेमप्रसरविह्वलः ॥ २७ ॥ यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ॥ शृण्वन्त्यश्रूण्यवास्राक्षीत् स्नेहस्नुतपयोधरा ॥ २८ ॥ तयोरित्थं भगवति कृष्णे नन्दयशोदयोः ॥ वीक्ष्यानुरागं परमं नन्दमाहोद्धवो मुदा ॥ २९ ॥ उद्धव उवाच ॥ युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ॥ ३० ॥ एतौ हि विश्वस्य च वीजयोनी रामो मुकुन्दः पुरुषः प्रधानम् ॥ अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ॥ ३१ ॥

चरितानि शृण्वन्ती नुमार्षः । अश्रूणि नेत्रजलबिन्दून् एव केवलम् अवास्राक्षीत् ववर्ष नतु प्रष्टुं वक्तुं वा शशाक ॥ २८ ॥ तयोरिति ॥ इत्थं तयोर्नन्दयशोदयोर्भगवति कृष्णे परममनुरागं वीक्ष्य मुदा युक्त उद्धवो नन्दम् आह स्म ॥ २९ ॥ युवामिति ॥ हे मानद युवां यशोदानन्दादिह लोके देहिनां मध्ये श्लाघ्यतमौ अतिशयेन प्रशंसायोग्यौ यत् यस्मात् अखिलस्य सर्वस्य ब्रह्मादेरपि गुरौ पूज्ये नारायणे कृष्णे ईदृशी अनुरागयुक्ता मतिः युवाभ्यां कृता ॥ ३० ॥ अखिलगुरुत्वमेव जनकत्वेन नियन्तृत्वे चाह—एताविति ॥ रामो मुकुन्दश्च इत्येतौ एकरूपौ विश्वस्य बीजमुपादानं योनिर्निमित्तकारणं च । ननु पुरुषप्रधानयोर्बीजयोनित्वं प्रसिद्धं तत्राह । पुरुषः अंशः प्रधानं प्रकृतिश्चाप्येतावेव पुराणौ अनादी इमौ भूतेषु स्थावरजङ्गमशरीरेषु अन्वीय अनुप्रविश्य तेषां भूतानां च तदुपहितस्य च विलक्षणस्य नानाभेदस्य ज्ञानस्य चैतन्यात्मकस्य जीवस्य च ईशाते ईशौ नियन्तारौ भवतः सन्धिरार्षः । यद्वा । विलक्षणस्य निर्द्धर्मकस्य निर्गुणब्रह्मज्ञानस्यापि ईशाते तत्प्रकाशाप्रकाशयोः समर्थौ भवतः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन्निति ॥ जनः प्राणी प्राणवियोगकाले क्षणं क्षणमात्रमपि विशुद्धं विषयान्तरचिन्तारहितं मनो यस्मिन् रामकृष्णरूपे एकत्वमभेदाभिप्रायेण समावेश्य स्थिरीकृत्य तेन कर्माशयं कर्मवासनां निर्हृत्य दग्ध्वा ब्रह्ममयः प्राप्तनिजानन्दस्वरूपः अर्कवर्णः शुद्धसत्त्वप्रकाशमूर्तिश्च सन् आशु शीघ्रम् परां गतिं तत्पदं याति ॥ ३२ ॥ तस्मिन्निति ॥ भवन्तौ अखिलस्य चिदचिदात्मकस्य जगतः आत्मा उपादानं हेतुर्निमित्तं स च तस्मिन् कारणेन भूभारहरणादिनिमित्तेन मर्त्यस्येव मूर्तिर्यस्य तस्मिन् महात्मन् महात्मनि " सुपां सुलुक् " इति ङेश्छान्दसो लुक् संबोधनं वा। तस्मिन् नारायणे भावं निरतिशयानुरागं नितरां निरन्तरं विधत्ताम् अकुरुताम् अडभाव आर्षः। अतो युवयोः सुकृत्यं श्रेष्ठं कर्त्तव्यं किमवशिष्टं न किञ्चिदपि ॥ ३३ ॥ आगमिष्यतीति ॥ भगवान् सात्वतां पतिः अच्युतः अदीर्घेण स्वल्पेन कालेन व्रजमागमिष्यति पित्रोर्युवयोः प्रियं दर्शनादिमनोरथं विधास्यते पूर्णं करिष्यति ॥ ३४ ॥ हत्वेति ॥ रङ्गमध्ये मल्लयुद्धभूमौ सर्वसात्वतां प्रतीपं शत्रुं कंसं हत्वा वो युष्मान् प्रति समागत्य कृष्णः ज्ञातीन् वो द्रष्टुमेष्याम इति यदाह स्म

यस्मिन् जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धम् ॥ निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ॥ ३२ ॥ तस्मिन् भवन्तावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ ॥ भावं विधत्तां नितरां महात्मन् किं वाऽवशिष्टं युवयोः सुकृत्यम् ॥ ३३ ॥ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ॥ प्रियं विधास्यते पित्रोर्भगवान् सात्त्वतांपतिः ॥ ३४ ॥ हत्वा कंसं रङ्गमध्ये प्रतीपं सर्वसात्त्वताम् ॥ यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ ३५ ॥ मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमन्तिके ॥ अन्तर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३६ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वाऽस्त्यमानिनः ॥ नोत्तमो नाधमो वाऽपि समानस्य समोऽपि वा ॥ ३७ ॥ न माता न पिता तस्य न भार्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥ ३८ ॥ न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु ॥ क्रीडार्थं सोऽपि साधूनां परित्राणाय कल्पते ॥ ३९ ॥

तत्सत्यं करोति करिष्यत्येव। वस्तुतो वर्तमाननिर्देशात्प्रकाशान्तरेण कृष्णस्तत्रास्त्येवेति प्रागुक्तमनुसन्धेयम् ॥ ३५ ॥ मा इति ॥ हे महाभागौ मा खिद्यतं खेदं मा कुरुतम् तङ्भाव आर्षः। अन्तिके इदानीमेव समीपे वा कृष्णं द्रक्ष्यथः यतः स कृष्णः एधसि काष्ठे ज्योतिः अग्निरिव सर्वभूतानामन्तर्हृदि आस्ते अतो मथनं विना यथाग्निर्न दृश्यते तथा भक्तिं विना कृष्णः युवयोस्तु पूर्णा भक्तिरतो द्रक्ष्यथः ॥ ३६ ॥ न हीति ॥ अमानिनः देहादावहंममाभिमानशून्यस्य समानस्य समदृष्टेरस्य कृष्णस्य कश्चित् प्रियो नास्ति अप्रियो वा कश्चिन्नास्ति एवं कश्चित् उत्तमो नास्ति नाप्यधमः नाप्यसमः ॥ ३७ ॥ नेति ॥ तस्य माता नैवास्ति नैव च पिता नापि भार्या नापि सुतादयः नाप्यात्मीयः न चापि परः न देहः नापि तस्य जन्म ॥ ३८ ॥ न चेति ॥ लोके प्राणिसमूहे जन्मादिहेतुः पुण्यपापात्मकं यत्कर्म तदपि नास्ति स कर्माद्यनधीनोऽपि क्रीडार्थः, क्रीडाप्रयोजनः सन् साधूनां परित्राणाय च सदसन्मिश्रयोनिषु सात्विकराजसतामसेषु देवादिमत्स्यादिनृसिंहादियोनिषु वा कल्पते स्वेच्छया आविर्भवति ॥ ३९ ॥

CC-0. In Public Domain. Digitization by eGangotri

सत्वमिति ॥ निर्गुणः सत्वादिप्राकृतगुणपारवश्यरहितोऽपि भगवान् सत्वादिगुणान् भजते स्वक्रीडोपकरणतया स्वीकरोति। संसारातीतः अजः कर्माधीनजन्मरहितोऽपि क्रीडन् सत्त्वादिभिस्त्रिभिर्गुणैर्विश्वं सृजति अवति हन्ति च ॥४०॥ अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टान्तीकुर्वन् तस्या विद्ययैव कर्तृत्वमित्याह—यथेति ॥ भ्रमरिका परिभ्रमणं तयोपलक्षितया दृष्ट्या यथा मही भ्राम्यतीव ईयते प्रतीयते तथा स्वचित्ते कर्तरि सति तत्राहंधिया चित्तमेवाहमिति अध्यासेन भ्रान्तस्य जनस्य स्वदोषेण आत्मापि कर्तेव स्मृतः प्रतीतो भवति। तद्वदीश्वरोऽपि गुणैरेव स्रष्टा प्रतीयते इति ॥ ४१ ॥ युवयोरिति ॥ युवयोरेवायमात्मजो नैव भवति किन्तु सर्वेषामपि आत्मजः न केवलमात्मजः किन्तु आत्मा पिता माता ईश्वरः स्वामी च स एव उपलक्षणतया शत्रुमित्रादिरूपोऽपीति संबन्धमनैकान्तिकं करोति ॥ ४२ ॥ दृष्टमिति ॥ दृष्टं श्रुतं भूतं भवत् वर्तमानं भविष्यत् स्थास्नुः स्थावरः चरिष्णुः चरः महत् अल्पकं च वस्तु वस्तुमात्रम् अच्युताद्विना तद्भिन्नतया नतरां वाच्यं निर्वचनार्हं नैव भवति तरां नितरान्नैव वाच्य-

सत्त्वं रजस्तम इति भजते निर्गुणो गुणान्॥ क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हन्त्यजः ॥ ४० ॥ यथा भ्रमरिका दृष्ट्या भ्राम्यतीव महीयते ॥
चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥४१॥ युवयोरेव नैवायमात्मजो भगवान् हरिः॥ सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥४२॥
दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च ॥ विनाऽच्युताद्वस्तुतरां न वाच्यं स एव सर्वं परमार्थभूतः ॥४३ ॥ एवं निशा सा ब्रुवतोर्व्यतीता नन्दस्य कृष्णानुचरस्य राजन् ॥ गोप्यः समुत्थाय निरूप्य दीपान् वास्तून् समभ्यर्च्य दधीन्यमन्थन् ॥ ४४ ॥ ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकङ्कणस्रजः ॥ चलन्नितम्बस्तनहारकुण्डलत्विषत्कपोलारुणकुङ्कुमाननाः ॥ ४५ ॥

मिति वा प्रकृतिप्रत्ययपौर्वापर्यमार्षम्। यतः परमार्थभूतः परमार्थसत्यः स एव सर्वमपि ॥ ४३ ॥ एवमिति ॥ हे राजन् कृष्णानुचरस्योद्धवस्य नन्दस्य च परस्परमेवं ब्रुवतोः सतोः सा निशा एव केवलं व्यतीता न च नन्दस्य शोको व्यतीतो नाप्युद्धवस्य सान्त्ववाक्प्रयोगो विरतः ततः प्रातः कृत्यार्थमुद्धवो बहिर्गतः कृताह्निक इति वक्ष्यमाणात् तदा गोप्यः समुत्थाय दीपान्निरूप्य प्रज्वाल्य वास्तून्देहल्यादीन् समभ्यर्च्य गन्धादिभिः संपूज्य दधीन्यमन्थन् इमा विश्रम्भप्रधानप्रेमवत्यः ॥ ४४ ॥ ता इति ॥ मन्थनरज्जूर्विकर्षत्सु भुजेषु कङ्कणानां स्रजः श्रेण्यो यासां ताः रज्जुरिति व्यस्तमार्षम् क्वचित्समस्तोऽपि पाठः। चलन्तो नितम्बा स्तना हाराश्च यासाम्। कुण्डलैस्त्विषन्तः कपोला यासां गुणाभाव आर्षः। त्विष्यदिति पाठे श्यन्नार्षः। दिवादेराकृतिगणत्वाद्वा। अरुणानि कुङ्कुमानि येषु तान्याननानि यासां ताश्च ताश्च ताश्च गोप्यो दीपैर्दीप्ता ये काञ्च्यादिस्थिता मणयस्तैर्विरेजुः ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्गायतीनामिति ॥ तदा दध्नो निर्मन्थनजन्यशब्देन मिश्रितः अरविन्दलोचनं श्रीकृष्णमुच्चैर्गायतीनां नुमभाव आर्षः । व्रजाङ्गनानां ध्वनिर्दिवमस्पृशत् व्याप्तवान् । येन ध्वनिना दिशाममङ्गलं निरस्यते अपनुद्यते ॥ ४६ ॥ भगवतीति ॥ भगवति सूर्ये उदिते सति व्रजौकसो व्रजवासिगोपीजनाः नन्दद्वारि शातकौम्भं सुवर्णालङ्कृतं रथं दृष्ट्वा अयं रथः कस्येति चकारात् वक्ष्यमाणं च अब्रुवन् ॥ ४७ ॥ उत्कण्ठाप्रधानाः काश्चिदाहुः—अक्रूर इति ॥ यः कंसस्यार्थस्य साधकः अतः येन कमललोचनः कृष्णः मधुपुरीं नीतः सः अक्रूर एव वागतः किम् ॥ ४८ ॥ किमिति ॥ साधितेन कार्येण प्रीतस्य तुष्टस्य प्रेतस्येति पाठे मृतस्य भर्तुः कंसस्य निष्कृतिमौर्ध्वदैहिकं किमस्माभिः कृत्वा साधयिष्यति किमस्मन्मांसैः पिण्डान् कृत्वा तस्मै दास्यतीत्यर्थः । इत्येवं स्त्रीणां वदन्तीनां सतीनां तस्मिन्नेव समये कृताह्निकः कृतस्नानादिनियमः उद्धवः गोपीनां समीपमगात् ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमषट्चत्वारिंशके व्यधात् ॥ ४६ ॥ सप्तचत्वारिंशकेऽथोद्धवो गोपीरसान्त्वयत् ॥

उद्गायतीनामरविन्दलोचनं व्रजाङ्गनानां दिवमस्पृशद्ध्वनिः ॥ दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममङ्गलम् ॥ ४६ ॥ भगवत्युदिते सूर्ये नन्दद्वारि व्रजौकसः ॥ दृष्ट्वा रथं शातकौम्भं कस्यायमिति चाब्रुवन् ॥ ४७ ॥ अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः ॥ येन नीतो मधुपुरीं कृष्णः कमललोचनः ॥ ४८ ॥ किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निष्कृतिम् ॥ इति स्त्रीणां वदन्तीनामुद्धवोऽगात् कृताह्निकः ॥ ४९ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे नन्दशोकापनयनं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ श्रीशुक उवाच ॥ तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलम्बबाहुं नवकञ्जलोचनम् ॥ पीताम्बरं पुष्करमालिनं लसन्मुखारविन्दं परिमृष्टकुण्डलम् ॥ १ ॥ शुचिस्मिताः कोऽयमपीच्यदर्शनः कुतश्च कस्याच्युतवेषभूषणः ॥ इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदाम्बुजाश्रयम् ॥ २ ॥

मथुरामागमत्तत्र श्लोकाः सार्द्धा नवांरयः ॥ उवाचनवकं साङ्घ्रिवेदनागा अनुष्टुभः ॥ ४७ ॥ तमिति द्वयम् ॥ व्रजस्त्रियः कृष्णास्यानुचरं प्रलम्बौ आजानुलम्बिनौ बाहू यस्य तं नवकञ्जे सद्यो विकसितपद्मदले इव लोचने यस्य तं पीते अम्बरे यस्य तम् । पुष्करस्य कमलस्य मालास्यास्तीति पुष्करमालिनं लसत् शोभमानं मुखारविन्दं यस्य मणियुक्ते मृष्टे परिशुद्धे उज्ज्वले कुण्डले यस्य तम् उद्धवं वीक्ष्य सुविस्मिता बभूवुः । शुचिस्मिता इति पाठेऽपि विस्मयेन शुचिस्मिता बभूवुः । ततश्च अपीच्यं मनोहरं दर्शनं यस्य अच्युतस्य कृष्णस्येव वेषः पीताम्बरादिभूषणानि च यस्य योऽयं कः कुतश्च देशादागतः कस्य पुत्रभृत्यादिरूपः स्मेति वितर्के । इत्येवं तत्परिज्ञाने उत्सुकाः सत्यः उत्तमश्लोकस्य हरेः पदाम्बुजमेवाश्रयो यस्य तमुद्धवं परिवव्रुः ॥ १ ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तं रमापतेः श्रीकृष्णस्य सन्देशहरं विज्ञाय रहसि एकान्ते आनीय सव्रीडेन हासेन प्रसादेन सहेक्षणेन सूनृतेन मधुरभाषणेन आदिशब्देनार्घ्यादिभिश्च सत्कृतम् आसने उपविष्टम् अवनताः कृतप्रणामाः सत्यः प्रश्रयेण विनयेनापृच्छन् ॥ ३ ॥ जानीम इति ॥ यदुपतेः कृष्णस्य पार्षदं सेवकं समुपागतं त्वां जानीमः भर्त्रा त्वत्स्वामिना तेन स्वपित्रोर्नन्दयशोदयोः प्रियं कर्तुमिच्छया भवानिह प्रेषितः प्रस्थापितः ॥ ४ ॥ अन्यथेति ॥ पित्रोः प्रियचिकीर्षामन्तरेण तस्य कंसं हत्वा वशीकृतराज्यस्य यदुपतेर्गोव्रजे पशुपयोग्ये स्थाने स्मरणीयमपि किञ्चिन्न चक्ष्महे न पश्यामः किं पुनः प्रियचिकीर्षया दूतं प्रेषयितुम् । यतः बन्धूनां पित्रादीनां संबन्धी यः स्नेहरूपोऽनुबन्धः पाशः स सहजत्वान्मुनेः विरक्तस्यापि शेषे षष्ठी आर्षी वा । दुस्त्यजस्त्यक्तुमशक्यः ॥ ५ ॥ अन्येष्विति ॥ बन्धुव्यतिरिक्तेषु मैत्री स्नेहः अर्थकृता प्रयोजनप्रयुक्ता अतः सा तु यावत् अर्थः प्रयोजनं तावत् विडम्बनं स्नेहानुकरणमात्रं नतु तात्विकः स्नेहः । तत्र द्वौ दृष्टान्तौ यद्वत् यथा पुंभिः स्त्रीषु कृता कामनिमित्ता मैत्री

तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यऽपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः ॥ ३ ॥ जानीमस्त्वां यदुपतेः पार्षदं समुपागतम् ॥ भर्त्रेह प्रेषितः पित्रोर्भवान् प्रियचिकीर्षया ॥४॥ अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे ॥ स्नेहानुबन्धो बन्धूनां मुनेरपि सुदुस्त्यजः ॥ ५ ॥ अन्येष्वर्थकृता मैत्री यावदर्थविडम्बनम् ॥ पुम्भिः स्त्रीषु कृता यद्वत् सुमनस्स्विव षट्पदैः ॥ ६ ॥ निःस्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः ॥ अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥ ७ ॥ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ॥ दग्धं मृगास्तथारण्यं जारो भुक्त्वा रतां स्त्रियम् ॥ ८ ॥ इति गोप्यो हि गोविन्दे गतवाक्कायमानसाः ॥ कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ॥ ९ ॥ गायन्त्यः प्रियकर्माणि रुदन्त्यश्च गतह्रियः ॥ तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥

कामे निवृत्ते निवर्त्तते सुमनस्सु पुष्पेषु षट्पदैरिव कृता मैत्री मकरन्दग्रहणानन्तरं तदभावदशायां वा निवर्त्तते ॥ ६ ॥ निस्स्वमिति ॥ गणिकाः पूर्वं सेवितमपि निस्स्वं निर्द्धनं सन्तं त्यजन्ति तेन यावद्धनप्राप्तिस्तावन्न त्यजन्तीत्येवमग्रेऽपि व्याख्येयम् । प्रजाः अकल्पं राज्यच्युतं पूर्वं पालकं नृपतिं त्यजन्ति शिष्या अधीता विद्या यैस्तादृशाः सन्तः पूर्वमध्यापकम् आचार्यं त्यजन्ति ऋत्विजः दत्ता दक्षिणा येन तादृशं पूर्वं धनदं यजमानं त्यजन्ति ॥ ७ ॥ खगा इति ॥ खगाः वीतफलं नष्टफलं वृक्षं त्यजन्ति ॥१४९॥ अतिथयः भुक्त्वा गृहं त्यजन्ति मृगाः दग्धमरण्यं त्यजन्ति जाराः स्त्रियं भुक्त्वा रतां प्रीतियुक्तामतृप्तामपि तां त्यजन्ति अतस्तत्रार्थकृतैव मैत्री । अत्र पुंस्सु जारपदं दत्तं न स्त्रीषु पुंश्चल्यादिपदम् । तेन वयमुत्पत्तित एव तं वृतवत्यः स तु अस्मान् भुक्त्वा त्यजन् जारायमाण एव जातः जारा इति स्त्रियमिति बहुत्वैकत्वाभ्यां जारपरायाः स्त्रियाः बहुजारत्वमपि स्यादिति स्वेषां ततो वैलक्ष्यण्यं व्यज्यते ॥ ८ ॥ इतीति द्वयम् ॥ तस्य श्रीकृष्णस्य कैशोरबाल्ययोरवस्थयोर्यानि प्रियाणि कर्माणि तानि संस्मृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्मृत्य गायन्त्यो रुदन्त्यश्च नुमार्षः । गोविन्द एव गतानि वाक्कायमानसानि तद्व्यापारा यासां ताः गतह्रियः त्यक्तलज्जा गोप्यः कृष्णदूते उद्धवे व्रजं याते आगते सति त्यक्तो लौकिको याभिः लोकानुसन्धानरहिताः आसन्निति शेषः । यद्वा । प्रियस्य कर्माणि गायन्त्यः तथा तस्य बाल्यकैशोरयोः कर्माणि संस्मृत्य संस्मृत्य गतह्रियः सत्यो रुदन्त्यश्च तमपृच्छन्निति संबन्धः ॥ ९ ॥ १० ॥ काचिदिति ॥ कृष्णसङ्गमं ध्यायन्ती काचिद्गोपी पीतपरागपिङ्गश्मश्रुं मधुकरं भ्रमरं दृष्ट्वा तं प्रियेण श्रीकृष्णेन प्रेषितं प्रस्थापितं दूतं कल्पयित्वाब्रवीत् । यद्वा । साक्षादुद्धवं प्रत्येवं कथनस्यानुचितत्वात्तस्मिन्नुद्धवे प्रियप्रस्थापितो दूत इति दूतदृष्टिं कृत्वा भ्रमरापदेशेनोद्धवमेवेदं वक्ष्यमाणं मानभङ्गीमयं वचनमब्रवीत् । इयं श्रीराधेति तोषण्यादयः ॥ ११ ॥ मधुपेति ॥ हे मधुप भ्रमर मद्यपेति व्यङ्ग्यम् । हे कितवस्य धूर्तस्य वञ्चकस्य बन्धो कार्यसाधक मित्र अस्मत्सपत्न्याः कुचाभ्यां विलुलिता आलिङ्गनदशायां सम्मर्दिता या कृष्णस्य वनमाला तस्याः कुचसंबन्धात्ततो मालायां प्राप्तं यत्कुङ्कुमं तद्येषु एतच्च कृष्णवर्णस्य भ्रमरस्य रक्तत्वे कारणमुत्प्रेक्षितं तैः श्मश्रुभिर्नोऽस्माकमङ्घ्रिं मा स्पृश मां मा नमस्कारेण प्रार्थयस्वेत्यर्थः । तथा मधुपस्य तवानुरूपः स्वामी मधुपतिः श्रीकृष्णः तासां मानि-

काचिन्मधुकरं दृष्ट्वा ध्यायन्ती कृष्णसंगमम् ॥ प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ११ ॥ गोप्य ऊचुः ॥ मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ॥ वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥ सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ॥ परिचरति कथं तत्पादपद्मं तु पद्मा ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥ १३ ॥ किमिह बहु षडङ्घ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ॥ विजयसखसखीनां गीयतां तत्प्रसङ्गः क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥ १४ ॥

नीनां पुरस्त्रीणामेव प्रसादं वहतु करोतु। किमस्मत्प्रसादनेन तस्य यस्य दूतस्त्वमीदृक् स्त्रीकुचकङ्कुमयुक्तश्मश्रुमान् व्यक्ततदीयसुरतचिह्नधारी तस्य यदुसदसि विडम्ब्यम् उपहास्यास्पदत्वमेव स्यात् ॥ १२ ॥ सकृदिति ॥ स मधुपतिः सकृदेकदैव मोहिनीं स्वामधरसुधामस्मान्पाययित्वा भवादृक् त्वादृशः कृतघ्नो दुर्मनाः भ्रमरो यथा रसं पीत्वा सुमनसः कुसुमानि त्यजति तद्वत् शोभनमनसोऽस्मान् सद्य एव तत्यजे तद्भावः। किञ्च सुमनसो देवश्रेणीरिव विष्णुः कृष्णोऽस्मान् सुधां पाययित्वा सुमनसो मालतीर्भवादृक् भ्रमर इवास्मांस्तत्याजेति पायनत्यागयोः कर्मणि कर्त्तरि च पृथग्दृष्टान्तः । देवपक्षे अधरनिकृष्टेति सम्बोधनम् । पद्मा परमचतुरा लक्ष्मीस्तस्य कृतघ्नस्य पादपद्मं कथन्नु परिचरति सेवते । अपि संभावनायाम् । बत वितर्के एवमेव संभवतीत्यर्थः । उत्तमश्लोकाः पुण्यकीर्तिमन्तो ये तद्भक्ता नारदादयस्तेषां जल्पैः श्लाघावचनैः उत्तमश्लोकस्य कृष्णस्य जल्पैः मिथ्याप्रलापैर्वा हृतमाकृष्टं चेतो यस्यास्तथाभूता सत्येव तत्पादपद्मं सेवते । वयं तु न लक्ष्मीरिवाविचक्षणाः इति भावः ॥ १३ ॥ किमिति ॥ हे षडङ्घ्रे सार्द्धपशो त्वम् इह अगृ-

CC-0. In Public Domain. Digitization by eGangotri

हाणां गृहादिरहितानां नोऽस्माकम् अग्रतः पुराणं बहुशः पूर्वानुभूतकपटगुणं यदूनामधिपतिं कृष्णं किं किमर्थं बहु गायसि अतः विजयस्यार्जुनस्य सखा श्रीकृष्णः यद्वा विजयत इति विजयः कृष्णः स चासौ सखा त्वद्बन्धुः तस्य सखीनां पुरस्त्रीणामग्रे तस्य हरेः प्रसङ्गो गीयताम् । ताश्च तदालिङ्गनेन क्षपिता कुचरुग्यासां ता इष्टाः कृष्ण-प्रियाः तेन पूजिता वा तत्सौभाग्यवर्णनप्रसन्नाः सत्यः ते तव इष्टं कल्पयन्ति शीघ्रं सम्पादयिष्यन्ति ॥ १४ ॥ दिवीति ॥ दिवि स्वर्गे भुवि भूलोके रसायां रसातले अधोलोके च याः स्त्रियः स्युस्तासां मध्ये कपटपूर्वको यो रुचिरो मनोहरो हासस्तत्पूर्वको भ्रूविजृम्भः भोगादिसूचको भ्रूविलासो यस्य तत् तस्य श्रीकृष्णस्य तदिति तस्येत्यर्थे तेनेत्यर्थे वा । पृथक् पदमव्ययम् । दुरापा दुर्लभाः का स्युः न का अपीत्यर्थः । भूतिः सर्वोत्तमापि लक्ष्मी. यस्य चरणरज उपास्ते तस्य वयं का नाम अभिलषणीयाः अपि च किन्तु उत्तमस्त्रीणां तत्सुलभत्वेऽपि कृपणपक्षे दीनानुकम्पिनि पुरुषे एव यत उत्तमश्लोकशब्दः प्रवर्तते महायशा इति व्यवहारो भवतीति तथा कथनीयं त्वयेति भावः।यद्वा। स्वयशोवि-स्तारायैवास्मानङ्गीकृतवान्नास्मत्सुखार्थम् अन्यथा त्यक्त्वा न गच्छेदित्याशयः । यद्वा । अपि च किंच उत्तमश्लोकशब्दः कृपणपक्षे दीनानुकम्पिनि पुरुषे प्रवर्त्तते । तस्य तु

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ॥ चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ १५ ॥ विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात् ॥ स्वकृत इह विसृष्टापत्यपत्यन्यलो-का व्यसृजदकृतचेताः किं नु सन्धेयमस्मिन् ॥ १६ ॥ मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ॥ बलिमपि बलिमत्त्वाऽवेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १७ ॥

अस्मादृशीषु दीनास्वनुकम्पाभावान्न उत्तमश्लोकता ॥ १५ ॥ विसृजेति ॥ कपटेन शिरसि न्यस्तं मम पादं विसृज त्यज मुकुन्दादभ्येत्य शिक्षित्वा आगतस्य दौत्यैर्दूतकर्मभिः दूत्यैरित्यार्षः पाठ इति तोषणी । वृत्तिमते साधुरेव चाटुकारैः प्रियवचनैश्चानुनयविदुषः प्रार्थनाचतुरस्य ते सर्वं कपटमहं वेद्मि । मुकुन्द इव त्वमप्यविश्वसनीय इति भावः । नास्ति कृते उपकारे चेतो यस्य स अकृतचेताः कृतघ्नः चञ्चलचित्तो वा स्वकृते कृष्णार्थमेव विसृष्टानि उपेक्षितानि अपत्यानि पतयोऽन्ये च लोका धर्मसाध्याः स्वर्गादयो याभि-स्ता अस्मान् इह व्रजे व्यसृजत्तत्याज अतोऽस्मिन् किं नु सन्धेयं सन्धिना साध्यं नहि कृतघ्ने सन्धिरुचितः ॥ १६ ॥ पूर्वजन्मस्वपि तस्य तादृशमेव चरितमित्याह यद्वा ॥१५०॥
श्यामवर्णाः सर्वे निष्ठुरा एवेत्याह—मृगयुरिवेति ॥ रामावतारे स्वधर्मं त्यक्त्वा लुब्धस्य मांसभक्षकस्येव धर्मः स्वभावो यस्य । अकारप्रश्लेषेण लुब्धकधर्मरहितोऽपि लुब्धको हि तन्मांसमत्तुकामो विध्यति अयं तु न तथा अतो वृथा प्राणहरो यः मृगयुर्व्याध इव सुग्रीवमग्रे कृत्वा स्वयं विलीनः सन् कपीन्द्रं स्वापराधरहितं वालिनं विव्यधे जघान तद् । तत्र द्वित्वात्पूर्वं सम्प्रसारणाभावश्च आर्षः । तथा स्त्रीजितः सीतापरतन्त्रः सन् कामयानां कामो यानं प्राप्तिसाधनं यस्यास्तां कामयानां कामयमानामिति वा मुगभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगमस्यानित्यत्वात् कामयानशब्दः सिद्धोऽनादिश्चेति वामनः । स्त्रियं शूर्पणखां विरूपां कर्णनासाच्छेदनेन विकृतरूपाम् अकृत तथा वामनरूपेणापि बलिं भूम्यादिपूजाम् अत्त्वा परिगृह्य तं बलिं वैरोचनिमावेष्टयत् पाशैर्बबन्ध । बलिमत्त्वाऽधोऽक्षिपद्विष्टपादिति पाठे बलिं पूजां गृहीत्वा विष्टपात्स्वर्गादधोऽक्षिपत् ध्वाङ्क्षः काकः स यथा किञ्चिद्भुक्त्वापि स्वामिनं पुनरावेष्टयति स्त्रीजनं कदर्थयति च तद्वदित्यर्थः । य इत्थंदुःख दस्तत्तस्य असितस्य कृष्णवर्णस्य सख्यैर्मैत्रीभिरलं पूर्णं न किञ्चित्प्रयोजनम् । कृष्णवर्णा ईदृशा एव भवन्ति तथापि तस्य कथारूपोऽर्थो दुस्त्यजः त्यक्तुमशक्यः ॥ १७ ॥ यदिति ॥ न केवलं वयमेव तत्कथया विक्षिप्ताः किंतु बहवो जना यस्यानुचरितमेव लीलापरमानन्दजनकम् अत एव कर्णयोः पीयूषममृतं शब्दमात्रेण किम्पुनरर्थतः तस्यापि विप्रुट् कणिका तस्याः अपि सकृत् अपि अदनं किंचित्स्वादनं तेनापि विधूता निरस्ता द्वन्द्वधर्मा पतिपत्न्यादिस्नेहरूपा येषां पतिश्चेच्छृणोति पत्नीं त्यजति पत्नी चेत्पतिम् एवं पिता चेच्छृणोति पुत्रं त्यजतीत्यादि । अत एव परस्परत्यागाद्विनष्टाः असत्तुल्या अचेतनप्रायाः सपदि शीघ्रमेव दीनं दुःखितमपि गृहे स्थितं कुटुम्बं विहाय दयारहिताः स्वयमपि दीना भोगहीना विहङ्गाः पक्षिण इव इह लोके भिक्षुचर्यां चरन्ति प्राणवृ-

यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ॥ सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना बहव इह विहङ्गा भिक्षुचर्यां चरन्ति ॥ १८ ॥ वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः ॥ ददृशुरसकृदेतत् तन्नखस्पर्शतीव्रस्मररुज उपमन्त्रिन् भण्यतामन्यवार्ता ॥ १९ ॥

त्तिमात्रं कुर्वन्तीत्यर्थः । अतो यद्यपि त्याज्य एव तत्कथार्थस्तथापि त्यक्तुं न शक्नुमः किं कुर्मः इति निन्दापक्षेऽर्थः । वास्तवस्तु द्वन्द्वधर्मा इत्यन्तः समासः प्राग्वत् । ततस्ते च ते अविनष्टाश्चेति समासः । इतरे पुनर्द्वन्द्वधर्माणो विनष्टा एव सपदि दीनं तुच्छं गृहसहितकुटुम्बं विहाय दीना इव अकिञ्चना धीरा इति वा पाठः । बहवो विहङ्गा हंसा इव विवेकचतुराः भिक्षुचर्यां पारमहंस्यं चरन्ति अतः तत्कथार्थः परमपुरुषार्थत्वाद्दुस्त्यजः ॥ १८ ॥ वयमिति ॥ हे उपमन्त्रिन् दूत आस्तामियं वार्ता अज्ञाः मुग्धाः कृष्णस्य कृष्णसारहरिणस्य वध्वो हरिण्यो यथा कुलिकस्य व्याधस्य रुतं मधुरगानं श्रुत्वा मोहितास्तत्समीपं गता बाणवेधादिदुःखमेव ददृशुः तथा जिह्मस्य कुटिलस्य तस्य व्याहृतं न मयोदितपूर्वं वा अनृतमिति साधनकाले " न पारयेऽहं निरवद्यसंयुजाम् " इति फलकाले च वाक्यद्वयं वस्तुतोऽनृतमपि ऋतं सत्यमिति श्रद्दधानाः विश्वसत्यः स्पृहयन्त्यो वा वयं तस्य नखस्पर्शैर्नखक्षतैस्तीव्रा स्मररुक् स्मरपीडा यासां तथाभूताः असकृत् पुनः पुनरेव दुःखमेव ददृशिमेति । यद्वा । अनृतमपि सत्यमिति श्रद्दधाना वयम् असकृत् तन्नखस्पर्शेन तीव्राः स्मरस्य रुजः पीडा एव ददृशिमेति । अतः तद्वार्ताया दुःखहेतुत्वादन्यवार्ता भण्यतां कथ्यताम् ॥ १९ ॥

CC-0. In Public Domain. Digitization by eGangotri

परावृत्य पुनरागतं प्रत्याह—प्रियसखेति ॥ अङ्ग हे प्रियस्य कृष्णस्य सखे प्रेयसा प्रियतमेन कृष्णेन प्रेषितस्त्वं किं मद्वाक्शरैस्ताडितोऽपि पुनरागाः आगतः तर्हि मे मम त्वं माननीयः असि अतः यत् किञ्चिदवरुन्धे भवान् प्राप्तुमिच्छति तद्वरय वृणीष्व। यदि अस्मान्नेतुमिच्छसि तर्हि इहास्मिन् अपि काले दुस्त्यजं द्वन्द्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपमस्मान् कथं नयसि नेष्यसि । हे सौम्य यतः श्रीर्लक्ष्मीर्नाम वधूः साकं सहैव तत्राप्युरस्येव सततं निरन्तरमास्ते ॥ २० ॥ अपीति ॥ अपि बत प्रश्ने । हे सौम्य आर्यस्य पूज्यस्य नन्दस्य पुत्रः उपनीतः सन् विद्याग्रहणार्थं गत इति श्रुतं ततो गुरुगृहादागत्याधुना किं मधुपुर्यामास्ते पितृभ्यां गेहैश्च सहितान् बन्धून् गोपान् किं स्मरति यद्वा सः पितरौ तद्गेहांश्च स्मरति किम् । पितुर्गेहानिति वा अत्र गेहस्य पुंस्त्वमार्षम् । वाक्यभेदात्स इति पौनरुक्त्यं न दोषः । क्वचित्कदाचिदपि सः किङ्करीणां नोऽस्माकं कथां वार्तां गृणीते । एवं वृत्तं पृष्ट्वा मनोरथं करोति कदा वा अगुरुमिव अगुरुतोऽपि वा सुगन्धं स्वभुजं नो मूर्ध्नि आध्यास्यत् निधास्यति । अत्र कृष्ण एव भ्रमररूपेण

प्रियसख पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ॥ नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥२०॥ अपि बत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते स्मरति स पितृगेहान् सौम्य बन्धूंश्च गोपान् ॥ क्वचिदपि स कथा नः किङ्करीणां गृणीते भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु ॥ २१ ॥ श्रीशुक उवाच ॥ अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ॥ सान्त्वयन् प्रियसन्देशैर्गोपीरिदमभाषत ॥ २२ ॥ उद्धव उवाच ॥ अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ॥ वासुदेवे भगवति यासामित्यर्पितं मनः ॥२३॥ दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥ २४ ॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ॥ भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा ॥२५॥ दिष्ट्या पुत्रान् पतीन् देहान्स्वजनान् भवनानि च॥ हित्वाऽवृणीत यूयं यत् कृष्णाख्यं पुरुषं परम् ॥२६॥

अत्रागादिति केचित् ॥२१॥ अथेति ॥ एवं कृष्णस्य दर्शने लालसा औत्सुक्यं यासां तथाभूता गोपीर्निशम्य दृष्ट्वा अथ गोपीवाक्यश्रवणानन्तरं प्रियस्य कृष्णस्य सन्देशैस्ताः सान्त्वयन्नुद्धव इदं वक्ष्यमाणमभाषत ॥ २२ ॥ अहो इति ॥ अहो स्म नूनं यूयं पूर्णार्थाः कृतकृत्याः तथा भवत्यो लोकेषु पूजिताः पूजायोग्याः यासां युष्माकं वासुदेवे भगवति इत्येवमनन्यवृत्तिकं मनोऽर्पितं स्थिरीकृतम् ॥ २३ ॥ दानेति ॥ हि यतः दानव्रतादिभिः अन्यैर्विविधैः श्रेयोभिः तीर्थसेवादिभिः श्रेयःसाधनैः कृष्णे भक्तिः साध्यते ॥२४॥ भगवतीति ॥ भवतीभिस्तु भगवति उत्तमश्लोके अनुत्तमा सर्वोत्तमा मुनीनामपि दुर्लभा भक्तिः प्रवर्तिता इति दिष्ट्या आनन्दो जात इत्यर्थः ॥ २५ ॥ दिष्ट्येति ॥ यद्यूयं पुत्रान् पतीन् देहान् स्वजनान् भवनानि चेति पुत्रादिंमन्यान् अवास्तवधिया हित्वा कृष्णाख्यं परं पुरुषं पतित्वेन अवृणीत वृतवत्यः तदपि दिष्ट्या ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेति ॥ हे महाभागाः अधोक्षजे श्रीकृष्णे भवतीनां सर्वात्मभावः सर्वतोऽधिकस्नेहरूप एकान्तभक्तियोगः अधिकृतः प्राप्तः विरहेण हेतुना स्वसर्वात्मभावप्रदर्शनेन भवतीभिर्मे ममापि महाननुग्रहः कृतः तेनाहमपि कृतार्थो जातः ॥ २७ ॥ श्रूयतामिति ॥ हे भद्राः कृतार्थाः भर्तुः श्रीकृष्णस्य रहस्करः रहस्यकार्यकर्ताहं यं सन्देशमादाय आगतोऽस्मि स भवतीनां सुखावहः प्रियस्य श्रीकृष्णस्य संदेशः श्रूयताम् ॥ २८ ॥ भवतीनामित्यर्द्धकम् ॥ अत्रैको ज्ञानोपदेशरूपोऽर्थः द्वितीयस्तु प्रेमभक्तैर्ग्राह्यः प्रेममयोऽर्थः । तत्र सर्वात्मना भावप्राधान्यात् सर्वोपादानकारणत्वेन हेतुना भवतीनां मे मया सह वियोगः क्वचित् कस्मिन्नपि देशे काले च नहि नास्त्येव । पक्षे मया सह भवतीनां वियोगः सर्वेणात्मना नास्ति किन्त्वेकेन देहेनैव अत्र मम आत्मशब्दवाच्या मनोबुद्ध्यादयो भवतीष्वेव स्थिताः देहः केवलम्मथुरामानीतः भवतीनामपि देहा एव केवलं तत्र स्थिता मनोबुद्ध्यादयस्तु मय्येवेति ॥ २९ ॥ यथेति ॥ यथा भूतेषु चराचरेषु खं वायुसहितः अग्निर्जलं मही इति महाभूतानि तदाश्रयतया स्थितानि तथाहमपि मनःप्राणभूतेन्द्रियाणि कार्याणि गुणाः कारणं तदात्मना तेषामाश्रयतया स्थित्वानुगतो वर्ते । पक्षे मां सदा प्रेम्णा ध्यायन्तीनां भवतीनां मनःप्राणबुद्धीन्द्रियगणान् शब्दादीन् आश्र-

सर्वात्मभावोऽधिकृतो भवतीनामधोक्षजे ॥ विरहेण महाभागा महान् मेऽनुग्रहः कृतः ॥ २७ ॥ श्रूयतां प्रियसन्देशो भवतीनां सुखावहः ॥ यमादायागतो भद्रा अहं भर्तू रहस्करः ॥ २८ ॥ श्रीभगवानुवाच ॥ भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् ॥ २९ ॥ यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ॥ तथाहं च मनःप्राणभूतेन्द्रियगुणात्मना ॥ ३० ॥ आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालये ॥ आत्ममायानुभावेन भूतेन्द्रियगुणात्मना ॥ ३१ ॥ आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ॥ सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३२ ॥

यामीति सः तान् आश्रित्य तत्र तत्र स्फुरन्नेवाहं वर्ते इत्यर्थः ॥ ३० ॥ आत्मन्येवेति ॥ आत्मनो मायाया अनुभावेन कार्येण भूतेन्द्रियगुणात्मना आत्मन्येवाधारे आत्मनैव साधनान्तररहितेन आत्मानमेव जगद्रूपं सृजे सृजामि तङार्षः। तदनु अनन्तरं पालये पालयामि हन्मि चेत्यन्वयः । बुद्धीन्द्रियगुणाश्रय इति पाठान्तरम् । पक्षे भवतीनामात्मनि मनसि आत्ममायाप्रभावेण तद्रूपेण आत्मना यत्नेन भूतान्यङ्गानि इन्द्रियाणि चक्षुरादीनि गुणाः सौन्दर्यादयः आत्मानो बुद्ध्यादयस्तेषां द्वन्द्वैक्यं तत्सहितम् आत्मानं स्वं सृजाम्याविर्भावयामि हन्मि अन्तर्द्धापयामि संभोगादिलीलार्थं मुहूर्त्तमनुपालयामि ॥ ३१ ॥ आत्मेति ॥ आत्मा तु ज्ञानमयः ज्ञानस्वरूपः शुद्धः गुणकार्येभ्यो व्यतिरिक्तः न गुणेषु अन्वेति इति तथा सुषुप्तिस्वप्नजाग्रद्भिः मायावृत्तिभिः ईयते विश्वतैजसप्राज्ञरूपेण प्रतीयते न स्वतः पक्षे आत्माहंज्ञानमयः न कदाचिद्युष्मान् विस्मरामि शुद्धो मथुराङ्गनासङ्गदोषरहितः व्यतिरिक्तः युष्मद्वियोगखिन्नः गुणान्वयः युष्मद्गुणान्सौन्दर्यादीन् अन्वेमि सुषुप्त्यादिभिर्मायावृत्तिभिः सुषुप्तेन सामान्यतो रूपादिगुणसामान्यं स्वप्नेन तद्विशेषः जागरेण तु नानामाधुर्यमयः साक्षादात्मैव ईयतेऽनुभूयत एव ॥ ३२ ॥

CC-0. In Public Domain. Digitization by eGangotri

येनेति ॥ यथा स्वापादुत्थितः पुमान् मृषा मिथ्याभूतमेव स्वमं ध्यायति तथा स्वमवत् बाधितानपि इन्द्रियार्थान् शब्दादीन् येन मनसा ध्यायेत ध्यायेच्चिन्तयेत् तङ्नार्षः । ध्यायंश्च येन इन्द्रियाणि उपलक्षणतया देहेन्द्रियादीन् प्रत्यपद्यत प्राप तन्मनः कर्म विनिद्रः अनलसः सन् निरुन्ध्यात् नियच्छेत् विनिद्रः स्वापादुत्थित इति पूर्वत्रान्वयो वा । पक्षे उत्थितः मूर्च्छातः प्रबुद्धो भवद्विधो जनः इन्द्रियार्थान् मद्दर्शनस्पर्शनादीन् सत्यानेव येन मनसा स्वमवन्मृषाभूतानेव ध्यायेत् तन्मनो निरुन्ध्यात् अप्रामाण्यात्तिरस्कुर्वीत । यतः विनिन्द्रः निद्रारहित एव भवदादिः इन्द्रियाणि प्रत्यपद्यत प्रत्यक्षतो ज्ञातवानेव युष्माभिरनुरागान्धाभिर्मत्संयोगोऽपि मृषैव मन्यते अत एव तत्सत्यज्ञापनार्थमेतत्सन्देशप्रेषणमिति भावः ॥ ३३ ॥ एतदिति ॥ मनीषिणां समाम्नायो वेदोक्तसाधनकलापः एतदन्तः एतन्मनोनिरोधनमेव अन्तः अवधिः फलभूतं यस्य तथाभूतः अस्ति । मनोनिग्रह एव पर्यवस्यति इत्यर्थः । एवं योगोष्टाङ्गः साङ्ख्यमात्मानात्मविवेकः त्यागः संन्यासः तपः स्वधर्मः दम इन्द्रियदमनं सत्यमित्येतेऽपि मनोनिरोधफला इति मार्गभेदेप्येकत्र पर्यवसाने दृष्टान्तः आपगा नद्यो यथा समुद्रान्ताः पक्षे यथा मनोनिरोधे सत्येव संसारतरणं तथैव भवतीनामपि मद्विरहतरणं मनोनिरोधादेव

येनेन्द्रियार्थान् ध्यायेत मृषा स्वप्नवदुत्थितः ॥ तन्निरुन्ध्यादिन्द्रियाणि विनिद्रः प्रत्यपद्यत ॥ ३३ ॥ एतदन्तः समाम्नायो योगः सांख्यं मनीषिणाम् ॥ त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ॥ ३४ ॥ यत् त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशाम् ॥ मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ॥ ३५ ॥ यथा दूरचरे प्रेष्ठे मन आविश्य वर्तते ॥ स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षगोचरे ॥ ३६ ॥ मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत् ॥ अनुस्मरन्त्यो मां नित्यमचिरान्मामुपैष्यथ ॥३७॥ या मया क्रीडता रात्र्यां वनेऽस्मिन् व्रज आस्थिताः॥ अलब्धरासाः कल्याण्यो माऽऽपुर्मद्वीर्यचिन्तया ॥३८॥श्रीशुक उवाच ॥ एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः ॥ ता ऊचुरुद्धवं प्रीतास्तत्सन्देशाऽऽगतस्मृतीः ॥ ३९ ॥

अर्थस्तूभयत्र तुल्यः ॥ ३४ ॥ यदिति ॥ यत्तु प्रियः अहं भवतीनां दृशां दूरे वर्ते तन्मदनुध्यानकाम्यया तच्च ध्यानं मनसः सन्निकर्षार्थमेव ॥ ३५ ॥ यथेति ॥ यथा स्त्रीणां चकारादन्येषां च मनो यथा दूरचरे प्रेष्ठे आविश्य निश्चलं सद्वर्तते तथा सन्निकृष्टेऽक्षगोचरे न वर्तते सदा सन्निधानस्यानादरकारणत्वात् ॥ ३६ ॥ मयीति ॥ विमुक्ता अशेषा वृत्तयो व्यापारा यस्मात् तत् अत एव कृत्स्नं संपूर्णं मनो मय्यावेश्य स्थिरीकृत्य मामेव नित्यमनुक्षणं स्मरन्त्यः अचिराच्छीघ्रमेव मामुपैष्यथ प्राप्स्यथ ॥ ३७ ॥ या इति ॥ हे कल्याण्यः या गोप्यः भर्त्रादिप्रतिबन्धात् व्रज एवास्थिता अत एव अस्मिन्वृन्दावने रात्र्यां क्रीडता मया सह अलब्धरासास्ता गोप्यः मद्वीर्याणां मल्लीलानां चिन्तया मामेवापुः ॥ ३८ ॥ एवमिति ॥ एवं प्रियतमस्य कृष्णस्यादिष्टं श्रुत्वा तस्य संदेशेनागता तल्लीलाविषयिका स्मृतिर्यासां ताः गुणाभाव आर्षः । व्रजयोषितः प्रीता सत्य उद्धवं प्रत्यूचुः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिष्ट्येति ॥ अहितः यदूनामघकृद् दुःखदः सानुगो भ्रातृमल्लादिसहितः कंसो हत एतद् दिष्ट्या । लब्धा अर्था धनादिसम्पदो यैस्तैराप्तैः प्राप्तैर्हितैर्वृद्धैर्वसुदेवादिभिः सहाच्युतः कृष्णोऽधुना कुशल्यास्त एतदपि दिष्ट्या ॥ ४० ॥ कच्चिदिति ॥ हे सौम्य कच्चित् प्रश्ने । किं पृच्छाम इत्यर्थः । नोऽस्माकं गदाग्रजः श्रीकृष्णः पुरयोषितां स्निग्धं च तत्सव्रीडहासेनोदारं मनोरथपूरकं च यदीक्षणं तेनार्चितः सत्कृतः संस्तासां प्रीतिं करोति । यद्वा । नोऽस्माकं करणीयां प्रीतिं पुरयोषितां करोति स्निग्धसव्रीडहासोदारेक्षणेन ताभिरस्माभिर्वार्चितः ॥ ४१ ॥ कथमिति ॥ रतिविशेषं जानातीति रतिविशेषज्ञः अत एव च पुरयोषितां प्रियः अत एव तासां मधुरवाक्यैर्विभ्रमैर्नानाविलासैश्चानुभाजितः सत्कृतः कथं नानुवध्येत वशवर्ती न भवेत् ॥ ४२ ॥ अपीति ॥ हे साधो पुरस्त्रीणां गोष्ठीमध्ये सभामध्ये तत्रापि स्वैरकथान्तरे यथेष्टविहारकथामध्ये प्रस्तुते कस्मिंश्चित्प्रसङ्गे क्वचिदपि ग्राम्या अविदग्धानः अस्मान् गोविन्दः अपि किं स्मरति ॥ ४३ ॥ ता इति ॥ ब्रह्मादिभिः कविभिः ईडिता स्तुता मनोज्ञा मनोहरा कथा यस्य

गोप्य ऊचुः ॥ दिष्ट्याऽहितो हतः कंसो यदूनां सानुगोऽघकृत् ॥ दिष्ट्याऽऽप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥ ४० ॥ कच्चिद्गदाग्रजः सौम्य करोति पुरयोषिताम् ॥ प्रीतिं नः स्निग्धसव्रीडहासोदारेक्षणार्चितः ॥ ४१ ॥ कथं रतिविशेषज्ञः प्रियश्च वरयोषिताम् ॥ नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानुपूजितः ॥ ४२ ॥ अपि स्मरति नः साधो गोविन्दः प्रस्तुते क्वचित् ॥ गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वैरकथान्तरे ॥ ४३ ॥ ताः किं निशाः स्मरति यासु सदा प्रियाभिर्वृन्दावने कुमुदकुन्दशशाङ्करम्ये ॥ रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ॥ ४४ ॥ अप्येष्यतीह दाशार्हस्तप्ताः स्वकृतया शुचा ॥ संजीवयन्नु नो गात्रैर्यथेन्द्रो वनमम्बुदैः ॥ ४५ ॥ कस्मात् कृष्ण इहायाति प्राप्तराज्यो हताऽहितः ॥ नरेन्द्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ॥ ४६ ॥ किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ॥ श्रीपतेराप्तकामस्य क्रियेताऽर्थः कृतात्मनः ॥ ४७ ॥

सः हरिः तदा व्रजस्थितिकाले कुमुदैः कुन्दैः शशाङ्केन च रम्ये वृन्दावने क्वणन्ति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां राससभायामस्माभिः प्रियाभिः सह यासु निशासु रेमे ताः किं कदाचिदनुस्मरति । प्रियाभिरस्माभिरीडितमनोज्ञकथ इति वाऽन्वयः ॥ ४४ ॥ अपीति ॥ किं स्मरणप्रश्नेन स्वकृतया शुचा स्वनिमित्तशोकेन सन्तप्ताः नोऽस्मान् गात्रैर्मुखकरप्रदर्शनस्पर्शादिभिः सञ्जीवयन् सम्यक् जीवयितुं दाशार्हः कृष्णः अपि किन्नु इह व्रजे एष्यति आगमिष्यतीति । यथेति । इन्द्रो यथाम्बुदैर्मेघैः शुष्कं वनं संजीवयन्नायाति तद्वत् ॥ ४५ ॥ कस्मादिति ॥ अनन्यगतित्वात्पूर्वमत्रावसत् अधुना तु प्राप्तं राज्यं येन सः हताः अहिताः शत्रवः कंसादयो येन तादृशः सन् कृष्णः इह कस्मात् हेतोः आयाति आगमिष्यति ततश्च नरेन्द्रकन्या उद्वाह्य सर्वैः सुहृद्भिः पितृपुत्रपौत्रादिभिर्वृतः प्रीतश्च भविष्यति ॥ ४६ ॥ किमिति ॥ महात्मनः श्रीपतेः आप्तकामस्य कृतात्मनः वशीकृतचित्तस्य पूर्णस्य वा हरेः वनौकोभिः वनवासिनीभिरस्माभिरनिपुणाभिरन्याभिर्विदग्धाभिः पुरवासिनीभिर्वा किं को वार्थः क्रियेत ॥ ४७ ॥

CC-0. In Public Domain. Digitization by eGangotri

परमिति॥ स्वैरिणी कामचारिणी अपि पिङ्गलानाम वेश्यापि नैराश्यम् आशाराहित्यमेव परं सौख्यं सुखसाधनम् आह स्म। तत् आशायाः दुःखहेतुत्वं जानतीनामपि नोऽस्माकं कृष्णे आशा दुरत्यया दुस्त्यजा ॥४८॥ क इति ॥ उत्तमश्लोकस्य हरेः संविदम् एकान्तवार्तां संत्यक्तुं कः प्राणी उत्सहेत न कोऽपीत्यर्थः। अनिच्छतोऽपि तामकामयमानस्यापि यस्योत्तमश्लोकस्य अङ्गात् उरःस्थलात् श्रीः लक्ष्मीः क्वचित्कदाचिदपि न च्यवते न प्रचलति ॥४९॥ सरिदिति द्वयम् ॥ हे प्रभो सङ्कर्षणसहायेन रामसहितेन कृष्णेन आचरिताः सेविताः इमे सरिच्छैलवनोद्देशाः गावः वेणुरवाश्च श्रियः निकेतैराश्रयैस्तस्य पदकैस्तत्तद्देशे चिह्नतया स्थितैः नन्दगोपसुतं पुनः पुनः स्मारयन्ति अतस्तं विस्मर्तुं नैवशक्नुमः ॥५०॥५१॥ गत्येति ॥ हे उद्धव ललितया गत्या उदारेण मनोरथपूरकेण हासेन लीलया कटाक्षेण अवलोकनैर्माध्व्या मधुरया "ऋत्व्यवास्त्व्य" इति छान्दसो निपातः। गिरा वाण्या च हृता आकृष्टा धीर्येषां तथाभूताः वयम् अतः तं कृष्णं कथं विस्मरामेति तदिति पाठे तद् गत्यादिकम् ॥५२॥ उद्धवोपदेशमनादृत्य मथुराभिमुखीभूयोच्चैः क्रन्दन्ति

परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिङ्गला ॥ तज्जानतीनां नः कृष्णे तथाऽप्याशा दुरत्यया॥४८॥ क उत्सहेत संत्यक्तुमुत्तमश्लोकसंविदम् ॥ अनिच्छतोऽपि यस्य श्रीरङ्गान्न च्यवते क्वचित् ॥४९॥ सरिच्छैलवनोद्देशा गावो वेणुरवा इमे ॥ सङ्कर्षणसहायेन कृष्णेनाऽऽचरिताः प्रभो ॥ ५० ॥ पुनः पुनः स्मारयन्ति नन्दगोपसुतं बत ॥ श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ॥५१॥ गत्या ललितयोदारहासलीलावलोकनैः ॥ माध्व्या गिरा हृतधियः कथं तद् विस्मरामहे ॥५२॥ हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ॥ मग्नमुद्धर गोविन्द गोकुलं वृजिनार्णवे ॥५३ ॥ श्रीशुक उवाच ॥ ततस्ताः कृष्णसन्देशैर्व्यपेतविरहज्वराः ॥ उद्धवं पूजयाञ्चक्रुर्ज्ञात्वात्मानमधोक्षजम् ॥ ५४ ॥ उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः ॥ कृष्णलीलाकथां गायन् रमयामास गोकुलम् ॥५५॥ यावन्त्यहानि नन्दस्य व्रजेऽवात्सीत् स उद्धवः ॥ व्रजौकसां क्षणप्रायाण्यासन् कृष्णस्य वार्तया ॥५६॥ सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितान् द्रुमान् ॥ कृष्णं संस्मारयन् रेमे हरिदासो व्रजौकसाम् ॥ ५७ ॥

हे नाथेति ॥ हे नाथेत्यादिसम्बुद्धयः। वृजिनार्णवे दुःखसमुद्रे मग्नं गोकुलवासिजनं तस्मादुद्धर ॥ ५३ ॥ तत इति ॥ ततस्ताः कृष्णसंदेशैः भवतीनां वियोगो मे इत्यादिभिः श्रीकृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा व्यपेतः अपगतो विरहकृतो ज्वरः सन्तापो यासां ता गोप्यो गुरुतयोद्धवमेव पूजयांचक्रुः ॥ ५४ ॥ उवासेति ॥ गोपीनां शुचः शोकान् विनुदन् अपनेतुं कतिचिन्मासान् स उद्धवो व्रजे उवास। कृष्णलीलाकथाः गायन् गोकुलं गोकुलवासिजनं रमयामास सुखयामास ॥५५॥ यावन्तीति ॥ उद्धवो यावन्त्यहानि नन्दस्य व्रजेऽवात्सीत्तावन्त्यहानि कृष्णस्य वार्तया कालाद्यनुसन्धानाभावाद् व्रजौकसां व्रजवासिजनानां क्षणप्रायाणि क्षणतुल्यानि आसन् बभूवुः ॥ ५६ ॥ सरिदिति ॥ सरित् वनगिरीन् द्रोणीः पर्वतान्तःसमप्रदेशान् कुसुमितान् द्रुमांश्च वीक्षन् पश्यन् शता आर्षः। तेषु कृष्णलीलाप्रश्नादिभिर्व्रजौकसां कृष्णं संस्मारयन् हरिदास उद्धवो रेमे स्वयमप्यानन्दानुभवं कृतवान्॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वेति ॥ एवं प्रदर्शितप्रकारम् आदिर्यस्य तद् गोगोपीनां कृष्णावेशेनात्मनो मनसो विक्लवं व्याकुलतां दृष्ट्वा परमप्रीत उद्धवस्ता गोपीर्नमस्यन् वन्दे । नन्दव्रजस्त्रीणामित्यादिभिर्नमस्करिष्यन् इदं वक्ष्यमाणं वचनं जगौ॥५८॥ एता इति ॥ निखिलात्मनि गोविन्दे एव रूढो भावो यासां ता एता गोपवध्वः एव परं केवलं भुवि तनुभृतः सफलजन्मानः यत् यं रूढं भावं सामान्ये क्लैब्यं भवात् भीर्येषां ते मुमुक्षवो मुनयश्च वाञ्छन्ति तथा वयं भक्ता अपि वाञ्छामः । अनन्तस्य भगवतः कथासु रसो रागो यस्य तस्य प्राणिनो ब्रह्मजन्मभिः ब्राह्मणसंबन्धिभिः शौक्लसावित्रयाज्ञिकैस्त्रिविधैरपि जन्मभिः । यद्वा । चतुर्मुखजन्मभिरपि किं कोऽतिशयः यत्र तत्रापि जातो भगवद्भक्तिमानेव सर्वोत्तमः ॥ ५९ ॥ क्वेति ॥ स्त्रियो जन्मतो दुष्टाः वनचरीः वनचर्यः पूर्वसवर्णदीर्घ आर्षः । स्थानतोऽपि दुष्टाः सत्सङ्गरहिताश्च।व्यभिचारो नाम कामसङ्कल्पस्तेनापि लोकदृष्ट्या शास्त्रदृष्ट्या च दुष्टाः इमा क्व एषोऽतिदुर्लभ परमात्मनि कृष्णे रूढभावः निश्चलस्नेहश्च क्व । असम्भावित एव ननु निश्चितम् । ईश्वरः सर्वं कर्तुं समर्थः अनु निरन्तरं भजतो जनस्य अविदुषः स्वप्रभावमजानतोऽपि साक्षात्स्वयमेव श्रेयःफलं तनोति विस्तरतो ददात्येव । अगदराजः ओषधिश्रेष्ठः अमृतम् उपयुक्तः उपभुक्तः स्वप्रभावमजानतोऽपि

दृष्ट्वैवमादि गोपीनां कृष्णाऽऽवेशात्मविक्लवम् ॥ उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥ ५८ ॥ एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः ॥ वाञ्छन्ति यद्भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥ ५९ ॥ क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः ॥ नन्वीश्वरोऽनुभजतो विदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ ६० ॥ नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ॥ रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद् व्रजवल्लवीनाम् ॥६१॥

यथा आरोग्यं तनोति तद्वत् अत्रोद्धवे गोपीः स्तुवति । काश्चित्पुलिन्द्यस्तत्रागतास्तासामपि कृष्णे प्रेमोत्कर्षं वीक्ष्य ता उद्दिश्येदमुद्धववचःपूर्णाः पुलिन्द्य उरुगायपदाब्जेत्यादिना वेणुगीतेऽप्येता वर्णिताः तद्विषय एव व्यभिचारदुष्टा इति साधारण्येन स्त्रीस्वभावबोधकं विशेषणं नतु भगवत्प्रेयसीषु गोपीषु तासामव्यभिचारस्य प्रतिपादितत्वात् । अथवा व्यभिचारस्त्रिधा । पतिमुपपतिं च रमयन्त्या एकः सतु लोकशास्त्रविगीतः । पतिं त्यक्त्वोपपतिं रमयन्त्या अन्यः स तु विगीतोऽपि रसशास्त्रे सङ्गीतः । उपपतिबुद्ध्या भगवन्तमेव रमयन्त्या अपरः स तु अनभिज्ञविगीतोऽपि शास्त्रे परमार्हणीयत्वान्न व्यभिचारस्तथापि गौण्या व्यभिचार इवेति व्याख्येयम् ॥ ६० ॥ नायमिति ॥ रासोत्सवे रासक्रीडायामस्य कृष्णस्य भुजदण्डाभ्यां गृहीत आलिङ्गितः कण्ठस्तेन लब्धा आशिषो मनोरथा याभिस्तासां व्रजसुन्दरीणां गोपीनां योऽयं भगवत्प्रसादः उदगात् आविर्बभूव सोऽयं प्रसादः नलिनस्येव गन्धो रुक् कान्तिश्च यासां तासां स्वर्योषितामपि न उदगात् किं बहु वक्तव्यम् । उ आश्चर्ये । अङ्गे वक्षसि नितान्तरतेः एकान्तरतिमत्याः श्रियो लक्ष्म्या अप्ययं प्रसादो नोदगात् अन्याः स्त्रियस्तु कुत एवं प्रसादविषयाः स्युः ॥ ६१ ॥

CC-0. In Public Domain. Digitization by eGangotri

आसामिति ॥ अहो आसां गोपीनां चरणरेणुजुषां गुल्मलतौषधीनां मध्येऽहं किमपि वृन्दावने स्यां भवेयम् । याः गोप्यः दुस्त्यजं स्वजनं पतिपुत्रादिरूपमार्याणां पन्थानं धर्मं च हित्वा श्रुतिभिर्विमृग्यामतिदुर्लभां मुकुन्दस्य पदवीं प्रातिमार्गं भेजुः कृष्णैकचिन्तनपरा बभूवुः ॥ ६२ ॥ या वै इति ॥ वै निश्चितं श्रिया लक्ष्म्यार्चितं पूजितं तथा आप्तकामैः प्राप्तैश्वर्यैरजादिभिश्चतुर्मुखादिभिरपि पूजितं तथा योगेश्वरैः सिद्धैरप्यात्मनि मनसि चिन्तितं यद् भगवतः कृष्णस्य चरणारविन्दं तत्तेनैव रासगोष्ठ्यां स्तनेषु न्यस्तं या गोप्यः परिरभ्य आलिङ्ग्य कामसन्तापं विजहुः परितत्यजुः ॥ ६३ ॥ वन्दे इति ॥ यासां हरिकथया सहोत्कर्षेण गीतं चरितं भुवनत्रयं भूरादिलोकत्रयस्थान् श्रवण-कीर्तनादिपरान् जनान्पुनाति तासां नन्दव्रजस्त्रीणां पादरेणुमहमभीक्ष्णशः पुनः पुनर्वन्दे ॥ ६४ ॥ अथेति ॥ अथ दाशार्ह उद्धवो गोपीः यशोदां नन्दं च अनुज्ञाप्य अनुज्ञां संप्रार्थ्य गोपांश्चामन्त्र्य पृष्ट्वा यास्यन् मथुरां गन्तुं रथमारुरुहे । तङार्षः ॥ ६५ ॥ तमिति ॥ नानाविधानि उपायनानि रामकृष्णार्थ्यर्हाणि वस्तूनि पाणिषु येषां ते तथानु-

आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम्।या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥ ६२ ॥ या वै श्रियाऽर्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ॥ कृष्णस्य तद् भगवतश्चरणारविन्दं न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥ ६३ ॥ वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ॥ यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ६४ ॥ श्रीशुक उवाच ॥ अथ गोपीरनुज्ञाप्य यशोदां नन्दमेव च ॥ गोपानामन्त्र्य दाशार्हो यास्यन्नारुरुहे रथम् ॥ ६५ ॥ तं निर्गतं समासाद्य नानोपायनपाणयः ॥ नन्दादयो-ऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥ ६६ ॥ मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रयाः ॥ वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥ ६७ ॥ कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ॥ मङ्गलाचरितैर्दानैर्मतिर्नः कृष्ण ईश्वरे ॥ ६८ ॥

रागेण अश्रूणि लोचनयोर्येषां ते नन्दादयो गोपा निर्गतं व्रजान्निष्क्रान्तं तमुद्धवं समासाद्य सादरमागत्य प्रावोचन् । उपायनं च नन्दादीनां रत्नहारादि सखीनां वन्यहारादि व्रजेश्वर्याः सुधाधिकस्वादुमोदकादि गोपीनां चूडारत्नादि एवं रामादिभ्योऽपि कल्प्यम् ॥ ६६ ॥ मनस इति ॥ नोऽस्माकं मनसो वृत्तयः कृष्णपादाम्बुजाश्रयास्तद्विषयाः स्युः वाचस्तु तन्नाम्नामभिधायिनीः अभिधायिन्यः स्युः पूर्वसवर्णदीर्घ आर्षः । कायो देहस्तु तत्प्रह्वणादिषु तन्नमस्कारादिष्वस्तु । प्रह्वणे इति प्रह्वशब्दादाचारक्विबन्ता-ल्ल्युट् प्रह्वाणशब्दे ह्रस्व आर्षो वा। पृषोदरादित्वं वा ॥६७॥ कर्मभिरिति॥कर्मभिः पुण्यपापात्मकैस्तदनुगुणया ईश्वरेच्छया च यत्र क्वापि भ्राम्यमाणानां देवमनुष्यादिषु जाय-मानानां मितो ह्रस्वाभाव आर्षः । नोऽस्माकं मङ्गलाचरितैर्दानैस्तज्जनितैः पुण्यैरीश्वरे कृष्णे रतिरनुरागोऽस्तु ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ हे नराधिप एवं कृष्णभक्त्या गोपैः सभाजितः संपूजितः संप्रार्थित इति तु पाठान्तरम् । उद्धवः कृष्णपालितां मथुरां पुनरागच्छत् ॥ ६९ ॥ कृष्णायेति ॥ प्रथमं कृष्णाय प्रणिपत्य यथोचितं मथुरावास्यपेक्षया व्रजौकसां भक्त्युद्रेकं तेषां त्वद्दर्शनादेव प्रीतिः शोकनिवृत्तिश्च स्यान्नतु मच्चातुर्येण संदेशैर्वेति आह स्म । यशोदा तु तारस्वरं रुरोदैव न किमपि वक्तुं शशाकेति गोपीनां सन्देशं रहस्येवाश्रावयत् उपायनानि च अदात् । ततश्च वसुदेवाय रामाय राज्ञे च प्रणिपत्य व्रजौकसां भक्त्युद्रेकं प्रीत्यतिशयमाह उपायनानि च अदात् ॥ ७० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽत्र सप्तचत्वारिंशे व्यधादिमाम् ॥ ४७ ॥ अष्टचत्वारिंशके तु कुब्जां रन्त्वा गजाह्वयम् ॥ कृष्णोऽक्रूरं प्रहितवान् श्लोकाः सार्द्धाः षडङ्ग्नयः ॥ उवाचद्वयमङ्घ्र्यूनाश्चतुर्वेदा अनुष्टुभः ॥४८॥ अथेति ॥ अथ सर्वात्मा सर्वदर्शनः भगवान् उद्धवोक्तं विज्ञाय कुब्जागृहगमनं प्रतिश्रुतं स्मृत्वा वा कामतप्तायाः सैरन्ध्र्याः कुब्जायाः प्रियं सुखमिच्छन् तस्या गृहं ययौ ॥ १ ॥ गृहं विशिनष्टि—महार्हेति सार्द्धम् ॥ महार्हैरमूल्यैरुपस्करैः

एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप ॥ उद्धवः पुनरागच्छन्मथुरां कृष्णपालिताम् ॥ ६९ ॥ कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसाम्॥ वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ ७० ॥ इति श्रीभागवते महापुराणे पूर्वार्धे उद्धवप्रतियाने सप्तचत्वारिंशोऽध्यायः ॥ ४७॥ श्रीशुक उवाच ॥ अथ विज्ञाय भगवान् सर्वात्मा सर्वदर्शनः ॥ सैरन्ध्र्याः कामतप्तायाः प्रियमिच्छन् गृहं ययौ ॥ १ ॥ महार्होपस्करैराढ्यं कामोपायोपबृंहितम् ॥ मुक्तादामपताकाभिर्वितानशयनादिभिः ॥ धूपैः सुरभिभिर्दीपैः स्रग्गन्धैरपि मण्डितम् ॥ २ ॥ गृहं तमायान्तमवेक्ष्य साऽऽसनात् सद्यः समुत्थाय हि जातसंभ्रमा ॥ यथोपसंगम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः ॥ ३ ॥ तथोद्धवः साधुतयाऽभिपूजितो न्यषीददुर्व्यामभिमृश्य चासनम् ॥ कृष्णोऽपि तूर्णं शयनं महाधनं विवेश लोकाचरितान्यनुव्रतः ॥ ४ ॥

पात्रादिभिराढ्यमन्वितं कामोपायैः कामशास्त्रोक्तैः कामोद्दीपकैः सुरतबन्धादिलेख्यैरौषधविशेषैः पेयताम्बूलादर्शादिभिश्चोपबृंहितं समृद्धं मुक्तादामभिः पताकादिभिर्ध्वजैः वितानैश्चन्द्रातपत्रैः शयनैः शय्याभिरासनैरुपवेशनार्थं सुखस्पर्शास्तरणैः सुरभिभिरगरुसम्भवैर्धूपैर्दीपैश्च मणिमयैः स्रग्भिर्गन्धैश्चन्दनादिभिश्च मण्डितमलङ्कृतम् ॥ २ ॥ गृहमिति ॥ एवंविधं गृहं प्रत्यायान्तं तम् अच्युतं कृष्णमवेक्ष्य जातः सम्भ्रमो यस्याः सा सैरन्ध्री सद्यस्तत्क्षण एव आसनात्समुत्थाय सखीभिः सह यथा यथोचितम् उपसङ्गम्य सम्यग् अभिमुखमागत्य सद्भिः समीचीनैरासनादिभिः आदिशब्दादर्घ्यादिभिश्च सभाजयामास पूजयामास ॥ ३ ॥ तथेति ॥ तथोद्धवश्च साधु सम्यक् भवति तथा तया सैरन्ध्र्याभिपूजितस्तत्र भगवता साम्यस्यानुचितत्वं मत्वा तया दत्तमासनं हस्तेनाभिमृश्य संस्पृश्य उर्व्यामेव न्यषीदत् उपविवेश । लोकानां चरितानि चेष्टितान्यनुव्रतः अनुसरन् कृष्णोऽपि नूनं नवीनं कैश्चिदप्यनधिरूढं तूर्णमित्यपि पाठः । महाधनमनर्घ्यं शयनं पर्यङ्कं विवेश अतो लोकानुसरणादिदं रात्रावेवेति ज्ञेयम् ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

सेति ॥ मज्जनम् आलेपश्चन्दनपङ्कः दुकूलभूषणस्रजश्च गन्धो धूपाद्यामोदः ताम्बूलं च सुधासवः अमृतसदृशं पानं तदादिभिः प्रसाधितः भगवता सह रमणयोग्यतामापा-
दितः आत्मा देहो यया तथाभूता सती एतच्च प्रसाधनमुद्धवसन्देशेन कृष्णागमनात्पूर्वमेवेति ज्ञेयम् । सव्रीडं लीलया उद्गतं स्मितं येषु विभ्रमेषु तद्युक्तैरीक्षितैरवलोकनै-
रुपलक्षिता सा कुब्जा माधवमुपससार उपजगाम ॥ ५ ॥ आहूयेति ॥ नवसङ्गमे विषये या ह्रीर्लज्जा तया शङ्कितां स्वयमागमनमकुर्वतीं तां कान्तां सुन्दरीमाहूय कङ्कणेन
भूषिते हस्ते प्रगृह्य शय्यामधिवेश्य अनुलेपार्पणमेव पुण्यलेशो यस्यास्तया रामया स्त्रिया सह भवान् रेमे । अनुलेपार्पणादन्यत्तस्याः पुण्यं नास्ति इति दर्शयितुं लेशशब्दो नतु
पुण्यस्याल्पत्वविवक्षया । यद्वा । अनुलेपार्पणपुण्यं लान्ति गृह्णन्ति तेषां भक्तानामीशया श्रेष्ठया नवसङ्गमेति विशङ्कितेति पदाभ्यां तस्या अनन्यभुक्तत्वं ज्ञापितम् । तत्र तस्या
महासुन्दर्या अपि कुब्जत्वमेव रक्षकमासीदिति भावः ॥ ६ ॥ सेति ॥ सा अनन्तस्य कृष्णस्य चरणं जिघ्रन्ती च अनङ्गेन कामेन तप्तयोः कुचयोस्तादृशस्योरसस्तथा
तादृशयोरक्ष्णोश्चेति रुजः कामपीडाः कुचादिषु चरणनिधानेन मृजन्ती अपनयन्ती नुमार्षः । स्तनान्तरगतं कुचमध्यगतम् आनन्दमूर्तिं कान्तं प्रियं कृष्णं दोर्भ्यां भुजाभ्यां

सा मज्जनालेपदुकूलभूषणस्रग्गन्धताम्बूलसुधासवादिभिः ॥ प्रसाधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः ॥ ५ ॥ आहूय कान्तां
नवसङ्गमह्रिया विशङ्कितां कङ्कणभूषिते करे ॥ प्रगृह्य शय्यामधिवेश्य रामया रेमेऽनुलेपार्पणपुण्यलेशया ॥ ६ ॥ साऽनङ्गतप्तकुचयोरुरसस्त-
थाक्ष्णोर्जिघ्रन्त्यनन्तचरणेन रुजो मृजन्ती ॥ दोर्भ्यां स्तनान्तरगतं परिरभ्य कान्तमानन्दमूर्तिमजहादतिदीर्घतापम् ॥ ७ ॥ सैवं कैवल्यनाथं तं
प्राप्य दुष्प्रापमीश्वरम् ॥ अङ्गरागार्पणेनाहो दुर्भगेदमयाचत ॥ ८॥ आहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया ॥ रमस्व नोत्सहे त्यक्तुं सङ्गं तेऽ-
म्बुरुहेक्षण ॥ ९ ॥ तस्यै कामवरं दत्त्वा मानयित्वा च मानदः ॥ सहोद्धवेन सर्वेशः स्वधामागमदर्चितः ॥ १० ॥

परिरभ्य आलिङ्ग्य अतिदीर्घं बहुकालानुवृत्तं कामसन्तापमजहात् तत्याज ॥ ७ ॥ सेति ॥ अहो दुर्भगा निर्भाग्या सा कुब्जा कैवल्यनाथं मोक्षप्रदम् ईश्वरम् दुष्प्रापमपि तं
हरिम् एवमङ्गरागार्पणमात्रेण प्राप्य इदं वक्ष्यमाणमयाचत प्राकृतदृष्ट्या काममेवायाचत नतु गोप्य इव सा तन्निष्ठेति दुर्भगेत्युक्तम् । कृतार्थत्वे तु तस्या न सन्देहः ॥ ८ ॥
आहेति ॥ हे प्रेष्ठ प्रियतम हे अम्बुरुहेक्षण कमलनेत्र ते तव सङ्गमहं त्यक्तुं नोत्सहे न प्रभवामि अतो मया सह कतिचिद्दिनानि रमस्व अत इह मद्गृहे एव त्वया उष्यता-
मित्याह स्म ॥ ९ ॥ तस्यै इति ॥ एवं याचितो मानदो भक्तसम्मानप्रदः सर्वेशः हरिः तस्यै याचमानायै सैरन्ध्र्यै कामवरं दत्वा आगत्यागत्य रंस्ये इत्युक्त्वा मानयित्वा
च मधुरभाषणभूषणदानरमणादिभिस्तन्मनोरथं पूरयित्वोद्धवेन सह अर्चितं सर्वसम्पत्समृद्धं स्वधाम आगमत् । अत्र चक्रवर्ती । मया सहैव रमस्व नान्यया सहेति सा
वृतवती तद्प्रदानाद्दुर्भगेत्युक्तं कामवरं दत्त्वेति मत्कर्तृकपूर्णसम्भोग एव तवेष्टः सतु ममान्यस्त्रीसत्त्वेऽपि तव सेत्स्यति इति प्रतिश्रुत्येत्यर्थः । मानयित्वा तत्र तां सम्मतां कार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यित्वा निरन्तररमणं तु त्वदिष्टं न सम्भवेत् किंवदन्तीभयादिति चोक्त्वा अगमत् गमनागमनयोरुद्धवसाहित्यं लोकवितर्काभावाय तस्य शिष्टशिरोमणित्वेन ख्यातत्वात् । कुब्जेय भूशक्तेरंश इति प्राग्व्याख्यातम् ॥ १० ॥ दुराराध्यमिति ॥ यः कश्चित् भक्तिं विना दुराराध्यं सर्वेश्वरेश्वरं विष्णुं समाराध्यापि मनोग्राह्यं मनःप्रियं विषयमेव वृणीते असत्त्वात् तुच्छत्वात् असौ जनः कुमनीषी कुबुद्धिमानेव ॥ ११ ॥ अक्रूरेति ॥ किञ्चिच्चिकीर्षयन् हस्तिनापुरप्रस्थानं कारयितुमिच्छन्नक्रूरस्य प्रियकाम्यया प्रियं कर्तु-मिच्छया च रामोद्धवाभ्यां सहितः प्रभुः कृष्णः अक्रूरभवनं प्रागात् । अहमार्यसमन्वित इति प्रतिश्रुतत्वाद्रामसाहित्यम् । मन्त्रित्वादुद्धवसाहित्यम् ॥ १२ ॥ स इति द्वयम् ॥ तान् नरवरेभ्यः श्रेष्ठान् स्वबान्धवान् रामकृष्णोद्धवान् आराद्दूरादेव वीक्ष्य प्रमुदितः सोऽक्रूरः प्रत्युत्थाय प्रत्युद्गम्य चेति ज्ञेयम् । तथा परिष्वज्य तदागमनम-भिनन्द्य च भगवदैश्वर्यस्फूर्त्या पितृव्यत्वमात्मनो विस्मृत्य रामं कृष्णं च ननाम । ततश्च तै रामकृष्णादिभिरपि पितृव्यत्वादभिवादितः कृतप्रणामः सोऽक्रूरः कृतः आसनस्य

दुराराध्यं समाराध्य विष्णुं सर्वेश्वरेश्वरम् ॥ यो वृणीते मनोग्राह्यमसत्त्वात् कुमनीष्यसौ ॥ ११ ॥ अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः ॥
किञ्चिच्चिकीर्षयन् प्रागादक्रूरप्रियकाम्यया ॥ १२ ॥ स तान् नरवर श्रेष्ठानाराद्वीक्ष्य स्वबान्धवान् ॥ प्रत्युत्थाय प्रमुदितः परिष्वज्या-
भिनन्द्य च ॥ १३ ॥ ननाम कृष्णं रामं च स तैरप्यभिवादितः ॥ पूजयामास विधिवत् कृतासनपरिग्रहान् ॥ १४ ॥ पादावनेजनीरापो
धारयञ्छिरसा नृप ॥ अर्हणेनाम्बरैर्दिव्यैर्गन्धस्रग्भूषणोत्तमैः ॥ १५ ॥ अर्चित्वा शिरसानम्य पादावङ्कगतौ मृजन् ॥ प्रश्रयावनतोऽक्रूरः
कृष्णरामावभाषत ॥ १६ ॥ दिष्ट्या पापो हतः कंसः सानुगो वामिदं कुलम् ॥ भवद्भ्यामुद्धृतं कृच्छ्राद्दुरन्ताच्च समेधितम् ॥ १७ ॥
युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ॥ भवद्भ्यां न विना किञ्चित् परमस्ति न चापरम् ॥ १८ ॥

परिग्रहः स्वीकारो यैस्तान् रामादीन् विधिवत्पूजयामास ॥ १३ ॥ १४ ॥ पादेति द्वयम् ॥ हे नृप आ अपः इति च्छेदः । पादाववनिज्येते प्रक्षाल्येते याभिस्ता अपः आ सर्वतः शिरसा धारयन् अर्हणेन अर्घ्यादिना दिव्यैः अम्बरस्रगादिभिश्चार्चित्वा शिरसा आनम्य अङ्कगतौ उत्सङ्गे निधापितौ पादौ मृजन् सम्मर्दयन् प्रश्रयेणावनतः अक्रूरः कृष्णरामावभाषत ॥ १५ ॥ १६ ॥ दिष्ट्येति ॥ भवद्भ्यां सानुगो मल्लादिसहितः पापात्मा कंसो हतः वां युवयोरिदं कुलं दुरन्तादपारात् कृच्छ्रात् दुःखादु-द्धृतं समेधितं सम्यग्वर्धितं चेति दिष्ट्या तेन महानन्दो जातः इति व्यवहारदृष्ट्योक्तम् ॥ १७ ॥ परमार्थमाह—युवामिति ॥ युवां प्रधानपुरुषौ पुरुषोत्तमौ प्रकृतिपुरुषात्मकौ वा जगतो हेतू निमित्तकारणे जगन्मयौ उपादानकारणे च अतः परं कारणम् अपरं कार्यं च भवद्भ्यां विना व्यतिरिक्तं किञ्चिदपि नास्तीति ॥ १८ ॥

CC-0. In Public Domain. Digitization by eGangotri

आत्मेति ॥ हे ब्रह्मन् रजआदिभिः स्वशक्तिभिरात्मनैव सृष्टमिदं विश्वमन्वाविश्य कारणत्वादननुप्रविष्टोऽप्यनुप्रविश्येव स्थितः श्रुतं प्रत्यक्षं च गोचरो यथा यत्र तत् यथा भवति तथा बहुधा भवानेव ईयते प्रतीयते ॥ १९ ॥ यथा हीति ॥ हीति प्रसिद्धमेतत् । योनिषु स्वस्यैव रूपान्तरेणाभिव्यक्तिस्थानेषु चराचरेषु भूतेषु यथा मह्यादयः कारणान्येव नाना तत्तद्रूपेण भान्ति एवं केवलः शुद्धो निर्विकार एव आत्मा आत्मतन्त्रो भवान् आत्मयोनिषु स्वकारणकेषु भूतभौतिकेषु कार्यमात्रेषु बहुधा तत्तद्रूपेण भाति जीवोऽपि नरमृगादिशरीरेषु तथा प्रतीयते इति तद्व्यवच्छेदार्थमात्मतन्त्रग्रहणम् ॥ २० ॥ सृजसीति ॥ स्वशक्तिरूपैः रजस्तमःसत्वगुणैर्विश्वं सृजसि अथानन्तरं पासि लुम्पसि संहरसि च तथापि तै रजआदिगुणैः सृष्ट्यादिकर्मभिर्वा न बध्यसे । तत्र हेतुमाह । ज्ञानात्मनस्ते क्व च कदाचिदपि बन्धहेतुरविद्या नैवास्ति ज्ञानात्मन इति हेतुगर्भं विशेषणम् । मायायाः स्वाश्रयानावरकत्वादिति भावः ॥ २१ ॥ कुतस्तव बन्धशङ्का यतो जीवस्यापि वस्तुतो बन्धो नास्ति इत्याह—देहादीति ॥ देहेन्द्रियाद्युपाधे-

आत्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभिः ॥ ईयते बहुधा ब्रह्मन् श्रुतप्रत्यक्षगोचरम् ॥ १९ ॥ यथा हि भूतेषु चराचरेषु मह्यादयो यो-
निषु भान्ति नाना ॥ एवं भवान् केवल आत्मयोनिष्वात्मात्मतन्त्रो बहुधा विभाति ॥ २० ॥ सृजस्यथो लुम्पसि पासि विश्वं रजस्तमः-
सत्त्वगुणैः स्वशक्तिभिः ॥ न बध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बन्धहेतुः ॥ २१ ॥ देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न
भिदाऽऽत्मनः स्यात् ॥ अतो न बन्धस्तव नैव मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः ॥ २२ ॥ त्वयोदितोऽयं जगतो हिताय यदा यदा
वेदपथः पुराणः ॥ बाध्येत पाखण्डपथैरसद्भिस्तदा भवान् सत्त्वगुणं बिभर्ति ॥ २३ ॥

रनिरूपितत्वात् अनिर्वचनीयत्वने मिथ्यात्वात् आत्मनो भवो जन्म तन्मूला भिदा च साक्षात्स्वरूपतो न स्यादेवेति । एवं बन्धाभावे मोक्षोऽपि नास्ति मोक्षस्यापि बन्धपूर्वकत्वादित्याह । यतो नाविद्या अतस्तव न बन्धो मोक्षश्च एवमुभौ न स्याताम् । ननु उलूखले बन्धमोक्षौ दृष्टावेव तत्राह । निकाम इति । लोकैः प्रतीयमानो बन्धः मोक्षश्च निकामः स्वाभिप्रायानुरूपः त्वयि विषये नोऽस्माकमविवेक एव न वस्तुतः । भक्तास्तु त्वयि तादृशो बन्धो मोक्षश्च नोऽस्माकं भक्तानां नितरां काम एव ध्येयत्वादभीष्ट एव यतः सः बन्धो मोक्षश्च विवेकः ज्ञानस्वरूप एव नतु मायिक इत्यर्थ इति व्याचक्षते ॥ २२ ॥ तवावतारास्तच्चरितादिकं च नाविद्याकल्पितं किन्तु तव लीला एवेत्याह—त्वयेति ॥ जगतः प्राणिमात्रस्य हिताय त्वयोदितो योऽयं पुराणः चिरन्तनो वेदपथः वेदबोधितो धर्ममार्गः स यदा यदा असद्भिः नरकादिदुःखहेतुभूतैः पाखण्डपथैर्वेदविरुद्धमार्गैर्बाध्येत पीड्यते तदा तदा भवान् सत्वगुणं शुद्धसत्त्वमयं विग्रहं बिभर्ति ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स त्वमिति ॥ हे प्रभो स विश्वपालनादिकर्त्ता त्वं सुरेतराणामसुराणामंशभूता ये राजानः कंसादयस्तेषाम् रजभाव आर्षः अक्षौहिणीनां यानि शतानि तेषां वधेन हेतुना भूमेर्भारमपनेतुं निराकर्त्तुं तथा अमुष्य यादवकुलस्य यशो वितन्वन् विस्तारयितुं चेह भूलोके वसुदेवगृहे स्वांशेन बलभद्रेण सहावतीर्णोऽसि ॥ २४ ॥ अद्येति ॥ हे ईश हे अधोक्षज सर्वे देवाः ब्रह्मरुद्रेन्द्रादयश्च पितरश्च भूतानि च नृदेवा राजानश्च मूर्तयो यस्य सः यस्य च तव पादयोः शौचसलिलं क्षालनोदकं गङ्गारूपं त्रिजगत् त्रिलोकीं पुनाति स जगतां गुरुः पूज्यस्त्वं याः वसतीः कर्माणि प्रविष्टः ता नोऽस्माकं वसतयो गृहास्तद्वासिनोऽपि च अद्य खलु निश्चितं भूरिभागाः महाभागाः तपोवनादपि महापुण्याः ॥ २५ ॥ आयास्ये भगवतो गेहमिति वचः सत्यं कृतमिति परितुष्यन्नाह—क इति ॥ कः पण्डितो विवेकी भक्ताः प्रियाः यस्य तस्मात् ऋता सत्या गीर्यस्य तस्मात् सुहृदो हितकारिणः कृतज्ञात् कृतं भक्तकृतं भजनं दुष्कृतं द्रोहं वा जानाति स्मरतीति तथा तस्मात् त्वत् त्वत्तः अपरं शरणं समीयात् व्रजेत् । किंच सुहृदः शुद्धान्तःकरणस्य भजतो

स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः ॥ अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २४ ॥ अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः ॥ यत्पादशौचसलिलं त्रिजगत् पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥ २५ ॥ कः पण्डितस्त्वदपरं शरणं समीयाद्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ॥ सर्वान् ददाति सुहृदो भजतोऽभिकामा नात्मानमप्युपचयापचयौ न यस्य ॥ २६ ॥ दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ॥ छिन्ध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायाम् ॥ २७ ॥ इत्यर्चितः संस्तुतश्च भक्तेन भगवान् हरिः ॥ अक्रूरं सस्मितं प्राह गीर्भिः संमोहयन्निव ॥ २८ ॥ श्रीभगवानुवाच ॥ त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बन्धुश्च नित्यदा ॥ वयं तु रक्ष्याः पोष्याश्च अनुकम्प्याः प्रजा हि वः ॥ २९ ॥

भक्तस्य सर्वानभिकामान् वाञ्छितान् धर्मादीन् ददाति । किं बहुना आत्मानमपि तदधीनं करोतीति एतावतापि यस्य तव उपचयापचयौ उत्कर्षापकर्षौ न स्तः ॥ २६ ॥ दिष्ट्येति ॥ हे जनार्दन योगेश्वरैः सनकादिभिः सुरेशैरिन्द्रादिभिरपि दुरापा दुर्लभा दुर्बोधा वा गतिर्यस्य स भवान् नोऽस्माकमविवेकिनाम् इह गृह एव प्रतीतः चक्षुर्विषयो जात इति दिष्ट्या । सुतकलत्रधनानि आप्ता मातापित्रादयः गेहदेहादयश्च तेषु मोहः आसक्तिरेव रसनापाशः तद्रूपां भवदीयां मायां नोऽस्माकं त्वमाशु छिन्धि विनाशय ॥ २७ ॥ इतीति ॥ इत्येवं भक्तेनाक्रूरेणार्चितः संस्तुतश्च भगवान्हरिः सस्मितं स्मितेन सहितं यथा भवति तथा गीर्भिरक्रूरं संमोहयन्निव प्राह स्म ॥ २८ ॥ त्वमिति ॥ त्वं नोऽस्माकं गुरुः पूज्यः यतः पितृव्यः पितुर्भ्राता च श्लाघ्यः प्रशंसनीयो बन्धुश्च । वयं तु नित्यदा दा आर्षः । भवता रक्ष्याः । कुमार्गतः शत्रुभ्यश्च निवर्तनीयाः पोष्या वर्धनीयाः अनुकम्प्याः कृपायोग्याश्च । हि यस्माद् वो युष्माकं प्रजाः पुत्रादिरूपाः स्मः ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

भवदिति ॥ श्रेयस्कामैः मोक्षादिफलार्थिभिर्नृभिर्भवादृशाः अर्हसत्तमाः उत्कृष्टतमा महाभागाश्च नित्यं सेव्याः । देवास्तु स्वार्थाः स्वः स्वीयोऽर्थो येषां यज्ञादिकमपेक्ष्योपकारकाः । साधवस्तु न तथा स्वार्थमनपेक्ष्यैवोपकारकाः अतो देवापेक्षया साधवः सेव्याः । वस्तुतः साधव एव देवास्त एव सेव्याः ॥ ३० ॥ न हीति ॥ अम्मयानि तीर्थानि पुनन्ति किन्तु शीघ्रं न पुनन्ति एवं मृच्छिलामयाः देवा अपि शीघ्रं न पुनन्ति ते उरुकालेन पुनन्ति । साधवस्तु दर्शनादेव शीघ्रं पुनन्ति । यद्वा । अम्मयानि तीर्थानि मृन्मया देवाश्च न भवन्तीति न परंतु साधुभ्यस्तेषां महदन्तरमित्याह ते इति । यद्वा । अम्मयानि तीर्थानि साधुभ्यो नोत्कृष्टानीत्यादि तानि च ते चेति । एकशेषे क्लीबत्वाभाव आर्षः ॥ ३१ ॥ स इति ॥ स उक्तविधः साधुर्भवान् नोऽस्माकं ये सुहृदस्तेषां मध्ये श्रेष्ठः अस्ति अतः पाण्डवानां श्रेयश्चिकीर्षया तद्वृत्तजिज्ञासार्थं गजसाह्वयं हस्तिनापुरं गच्छस्व गच्छ तङार्षः । यद्वा । हे स्व स्वीयेति पृथक्पदम् ॥ ३२ ॥ पितरीति ॥ पितरि पाण्डावुपरते मृते सति बालास्तत्पुत्रा युधिष्ठिरादयो राज्ञा धृतराष्ट्रेण स्वपुरं प्रत्यानीतास्तत्र

भवद्विधा महाभागा निषेव्या अर्हसत्तमाः ॥ श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥ ३० ॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ३१ ॥ स भवान् सुहृदां वै नः श्रेयान् श्रेयश्चिकीर्षया ॥ जिज्ञासार्थं पाण्डवानां गच्छस्व त्वं गजाह्वयम् ॥ ३२ ॥ पितर्युपरते बालाः सह मात्रा सुदुःखिताः ॥ आनीताः स्वपुरं राज्ञा वसन्त इति शुश्रुम ॥ ३३ ॥ तेषु राजाऽम्बिकापुत्रो भ्रातृपुत्रेषु दीनधीः ॥ समो न वर्तते नूनं दुष्पुत्रवशगोऽन्धदृक् ॥ ३४ ॥ गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ॥ विज्ञाय तद् विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥ इत्यक्रूरं समादिश्य भगवान् हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धेऽष्टचत्वारिंशोऽध्यायः ॥ ४८॥

मात्रा पृथया सहातिदुःखिताः वसन्तो निवसन्तः सन्ति इति शुश्रुम श्रुतवन्तो वयम् ॥ ३३ ॥ तेष्विति ॥ दुष्टो यः पुत्रो दुर्योधनस्तस्य वशेनेच्छया गच्छति तादृशः यतः अन्धा दृक् यस्य दीना विवेकहीना धीर्यस्य सः अम्बिकापुत्रो राजा धृतराष्ट्रः तेषु भ्रातृपुत्रेषु अलुगभावः । प्रजावती भ्रातृजाया इत्यादि लोकेऽपि प्रयुज्यते आर्षो वा । समः स्वपुत्रतुल्यतया न वर्तते नूनं निश्चितमेतत् ॥ ३४ ॥ गच्छेति ॥ अतस्त्वं हस्तिनापुरं गच्छ अधुना तेषां पाण्डवानां वृत्तं वर्तनं साध्वसाधु वेति जानीहि । तद्वृत्तं विज्ञाय सुहृदां तेषां शं सुखं यथा भवेत्तथोपायं विधास्यामः करिष्यामः ॥ ३५ ॥ इतीति ॥ इत्येवमक्रूरं समादिश्याज्ञाप्य सङ्कर्षणोद्धवाभ्यां सहितः भगवान् ईश्वरः हरिः ततोऽक्रूरभवनात्स्वभवनं ययौ ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽष्टचत्वारिंशे दशमगे व्यधात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊनपञ्चाशत्तमे त्वक्रूरो ज्ञात्वा नृपाशयम् ॥ मथुरामागमत्तत्र श्लोकाश्चन्द्राग्नयो मताः ॥ पञ्चोवाचेति पादोनाः स्युर्द्वात्रिंशदनुष्टुभः ॥ ४९ ॥ स इति द्वयम् ॥ सोऽक्रूरः पौरवेन्द्राणां यशोभिः यशोहेतुभिः तत्कृतदेवायतनाद्यैरङ्कितं हास्तिनपुरं गत्वा तत्र भीष्मेण सहितमाम्बिकेयं धृतराष्ट्रं विदुरं पृथां कुन्तीं सहपुत्रं सोमदत्तसहितं बाह्लीकं सगौतमं कृपाचार्यसहितं भारद्वाजं द्रोणं कर्णं सुयोधनं द्रौणिमश्वत्थामानं पाण्डवान् अपरांश्च सुहृदो मित्राणि ददर्श ॥ १ ॥ २ ॥ यथावदिति ॥ गान्दिनीसुतोऽक्रूरो यथावत् यथायोग्यं हास्यहस्तग्रहणालिङ्गननमस्कारादिपूर्वकं बन्धुभिः सह उपसंगम्य मिलित्वा तैश्च सुहृद्वार्तां संपृष्टः स्वयमपि तेषामव्ययं कुशलमपृच्छत् ॥ ३ ॥ उवासेति ॥ दुष्टाः प्रजाः पुत्राः दुर्योधनादयो यस्य तस्य असिजभाव आर्षः । अल्पो मन्दः सारः बुद्धिर्यस्य तस्य तथा खला दुष्टाः कर्णादयस्तेषां छन्दमिच्छामनुवर्त्तितुं शीलमस्य तस्य राज्ञो धृतराष्ट्रस्य वृत्तस्य विवित्सया लब्धुमिच्छया "विद्लृ लाभे" कतिचिन्मासांस्तत्रोवास ॥ ४ ॥ तेज इति द्वयम् ॥ तेजः पराभिभवसामर्थ्यम् ओजः शस्त्रशास्त्रनैपुण्यं बलं

श्रीशुक उवाच ॥ स गत्वा हास्तिनपुरं पौरवेन्द्रयशोऽङ्कितम् ॥ ददर्श तत्राम्बिकेयं सभीष्मं विदुरं पृथाम् ॥ १ ॥ सहपुत्रं च बाह्लीकं भारद्वाजं सगौतमम् ॥ कर्णं सुयोधनं द्रौणिं पाण्डवान् सुहृदोऽपरान् ॥ २ ॥ यथावदुपसंगम्य बन्धुभिर्गान्दिनीसुतः ॥ संपृष्टस्तैः सुहृद्वार्त्तां स्वयं चापृच्छदव्ययम् ॥ ३ ॥ उवास कतिचिन्मासान् राज्ञो वृत्तविवित्सया ॥ दुष्प्रजस्याल्पसारस्य खलच्छन्दानुवर्तिनः ॥ ४ ॥ तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ॥ प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितम् ॥ ५ ॥ कृतं च धार्तराष्ट्रैर्यद्गरदानाद्यपेशलम् ॥ आचख्यौ सर्वमेवास्मै पृथा विदुर एव च ॥ ६ ॥ पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तम् ॥ उवाच जन्मनिलयं स्मरन्त्यश्रुकलेक्षणा ॥ ७ ॥ अपि स्मरन्ति नः सौम्य पितरौ भ्रातरश्च मे ॥ भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ॥ ८ ॥ भ्रात्रेयो भगवान् कृष्णः शरण्यो भक्तवत्सलः ॥ पैतृष्वसेयान् स्मरति रामश्चाम्बुरुहेक्षणः ॥ ९ ॥

शारीरं वीर्यं शौर्यं प्रश्रयः विनयः पार्थानां तेजआदीन्सद्गुणांस्तथा तेषु प्रजानामनुरागं च न सहद्भिरसहमानैः आधृषीयस्य सहेर्णिजभावे रूपम् । धार्तराष्ट्रैर्दुर्योधनादिभिर्यद्गरदानादि विषप्रदानादिकमपेशलं दुष्टं कर्म कृतं यच्चाग्रे चिकीर्षितं लाक्षागृहदाहादि तत्सर्वमस्मै अक्रूराय पृथा विदुरश्चैव आचख्यौ ॥ ५ ॥ ६ ॥ तत्कथनात्पूर्वतरं पृथाया वृत्तमाह–पृथा त्विति ॥ पृथा तु जन्मनि लयं पितृगृहं स्मरन्ती अश्रूणां कला बिन्दवो ययोस्ते ईक्षणे यस्यास्तादृशी अश्रूणि कलयतः मुञ्चतः ते ईक्षणे यस्याः इति वा सती भ्रातरमक्रूरं प्राप्तमाश्रुत्य तमुपसृत्य तत्समीपं गत्वा उवाच ॥ ७ ॥ अपीति ॥ हे सौम्य अपीति प्रश्ने । पितरौ भ्रातरश्च भगिन्यो भ्रातृपुत्राश्च जामयः कुलस्त्रियः देवक्याद्याः सख्य एव च मे मम स्मरन्ति किम् । अधीगर्थेति षष्ठी ॥ ८ ॥ भ्रात्रेय इति ॥ भगवान् शरण्यो भक्तवत्सलः अम्बुरुहेक्षणः भ्रात्रेयो मम भ्रातुष्पुत्रः कृष्णो

CC-0. In Public Domain. Digitization by eGangotri

रामश्च पैतृष्वसेयान् पितृभगिन्या मम सुतान् युधिष्ठिरादीन् किं स्मरति ॥ ९ ॥ सपत्नेति ॥ वृकाणां घातकानां मध्ये हरिणीमिव सपत्नानां शत्रूणां दुर्योधनादीनां मध्ये शोचन्तीं मां पितृहीनान् बालकान् मत्पुत्रांश्च किं वाक्यैः सान्त्वयिष्यति ॥ १० ॥ अथ प्रेमवेगेन कृष्णं समीपमागतमिव मन्यमानाह—कृष्णेति ॥ हे कृष्ण कृष्णेत्यादयः सम्बुद्धयः । अत्र शिशुभिर्बालकैः सहावसीदतीं क्लिश्यन्तीं प्रपन्नां शरणागतां मां पाहि ॥ ११ ॥ नेति ॥ मृत्योः संसारात् उत्पत्तेश्च बिभ्यतां नृणाम् आपवर्गिकात् मोक्षप्रदानार्हात् ईश्वरस्य तव पदाम्भोजादन्यत् शरणं रक्षकं न पश्यामि ॥ १२ ॥ नम इति ॥ शुद्धाय धर्मात्मने ब्रह्मणे अपरिच्छिन्नाय परमात्मने जीवसखाय योगेश्वराय अणिमादियुक्ताय योगाय ज्ञानात्मने कृष्णाय नमः अहं त्वां शरणं गता ॥ १३ ॥ इतीति ॥ हे राजन् भवतां प्रपितामही कुन्ती इत्येवं स्वजनं वसुदेवादिबन्धुवर्गं जगदीश्वरं कृष्णं चानुस्मृत्य तद्वियोगादिदुःखिता सती प्रारुदत् ॥ १४ ॥ समेति ॥ कुन्त्या सह समं दुःखं सुखं च यस्य सोऽक्रूरो महायशाः प्रख्यातकीर्तिर्विदुरश्च तस्याः पुत्रोत्पत्तिहेतुभिः

सपत्नमध्ये शोचन्तीं वृकाणां हरिणीमिव ॥ सान्त्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥ कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वभावन ॥ प्रपन्नां पाहि गोविन्द शिशुभिश्चावसीदतीम् ॥ ११ ॥ नान्यत्तव पदाम्भोजात्पश्यामि शरणं नृणाम् ॥ बिभ्यतां मृत्युसंसारादीश्वरस्याऽऽपवर्गिकात् ॥ १२ ॥ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ॥ योगेश्वराय योगाय त्वामहं शरणं गता ॥ १३ ॥ श्रीशुक उवाच ॥ इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरम् ॥ प्रारुद्दुःखिता राजन् भवतां प्रपितामही ॥ १४ ॥ समदुःखसुखोऽक्रूरो विदूरश्च महायशाः ॥ सान्त्वयामासतुः कुन्तीं तत्पुत्रोत्पत्तिहेतुभिः ॥ १५ ॥ यास्यन् राजानमभ्येत्य विषमं पुत्रलालसम् ॥ अवदत् सुहृदां मध्ये बन्धुभिः सौहृदोदितम् ॥ १६ ॥ अक्रूर उवाच ॥ भो भो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्धन ॥ भ्रातर्युपरते पाण्डावधुनाऽऽसनमास्थितः ॥ १७ ॥ धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रञ्जयन् ॥ वर्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥ १८ ॥

धर्मानिलेन्द्रादिभ्यो जाता महाप्रभावास्तव पुत्राः केनाभिभवितुं शक्याः अतस्त्वया खेदो न कार्य इति कथनैः कुन्तीं सान्त्वयामासतुः ॥ १५ ॥ यास्यन्निति ॥ यास्यन् मथुरां प्रति गमिष्यन् अक्रूरः विषमं भ्रातुः स्वस्य च पुत्रेषु विषमबुद्धिं पुत्रलालसं स्वपुत्रेष्वासक्तं राजानं धृतराष्ट्रमभ्येत्य सुहृदां बन्धूनां मध्ये बन्धुभिः कृष्णरामादिभिः यत्सौहृदेन प्रेम्णा उदितं कथितं तदवदत् ॥ १६ ॥ भो भो इति ॥ भो भो वैचित्रवीर्य विचित्रवीर्यस्य पुत्र हे कुरूणां कीर्तेर्वर्द्धन श्लेषेण छेदकेत्यपि भ्रातरि पाण्डौ उपरते मृते सति त्वमधुना नृपासनमास्थितः अधिष्ठितवान् पाण्डुपुत्रेषु सत्स्वपीति कटाक्षः ॥ १७ ॥ धर्मेणेति ॥ धर्मेण उर्वीं पृथ्वीं पालयन् शीलेन सुस्वभावेन प्रजा रञ्जयन् स्वर्मिंस्तासां रागमुत्पादयन् स्वेषु भ्रातृपुत्रेषु स्वपुत्रेषु च समतया वर्तमानः श्रेयो धर्मार्थादिफलं कीर्तिं चावाप्स्यसि ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथेति ॥ अन्यथा उक्तविपरीतमाचरन् कुर्वंस्तु इहैव लोके जनैर्गर्हितो निन्दितः तमो नरकं महद्दुःखं यास्यसे प्राप्स्यसि । तङार्षः । यस्मादेवं तस्मात् पाण्डवेषु आत्मजेषु च विषये समत्वे वर्तस्व ॥ १९ ॥ आत्मजत्वादिकमपि न स्थिरमित्याह—नेहेति ॥ हे राजन् इह लोके कर्हिचित् क्वापि काले कस्यचित्केनचित् साकमत्यन्तं नित्यं संवासः सम्यक् स्थितिर्नास्ति किं बहुना स्वेन देहेन सहापि नात्यन्तसंवासः जायात्मजादिभिः सहात्यन्तसंवासो नास्तीति किमु वक्तव्यमित्यर्थः ॥ २० ॥ एक इति ॥ जन्तुः शरीरी एक एव प्रसूयते जायते नतु जायादिभिः सहितः तथा एक एव प्रलीयते म्रियते नहि म्रियमाणेन सह तत्पुत्रादयोऽपि म्रियन्ते । तथा एक एव सुकृतं स्वकृतपुण्यफलं सुखं भुङ्क्ते तथा एक एव च दुष्कृतं पापफलं दुःखं भुङ्क्ते ॥ २१ ॥ वस्तुतः क्लेशोपार्जितवित्तहारितया पुत्राद्या अपि शत्रव एवेत्याह—अधर्मेति ॥ सम्भोजनीयाः पोष्याः पुत्रादय इति व्यपदेशैः कथनैरल्पमेधसः मूढस्यआसिजार्षः । अधर्मणार्जितं वित्तं ते हरन्ति । यथा जलौकसो मत्स्यस्य जीवनहेतुभूतानि जलानि तत्पुत्रादयो हरन्ति

अन्यथा त्वाचरँल्लोके गर्हितो यास्यसे तमः ॥ तस्मात् समत्वे वर्तस्व पाण्डवेष्वात्मजेषु च ॥ १९ ॥ नेह चात्यन्तसंवासः कर्हिचित्केनचित्सह ॥ राजन् स्वेनापि देहेन किमु जायात्मजादिभिः ॥२०॥ एकः प्रसूयते जन्तुरेक इव प्रलीयते ॥ एको नु भुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥२१॥ अधर्मोपचितं वित्तं हरन्त्यन्येऽल्पमेधसः ॥ संभोजनीयापदेशैर्जलानीव जलौकसः ॥ २२ ॥ पुष्णाति यानधर्मेण स्वबुद्ध्या तमपण्डितम् ॥ ते कृतार्थं प्रहिण्वन्ति प्राणा रायः सुतादयः ॥ २३ ॥ स्वयं किल्बिषमादाय तैस्त्यक्तो नार्थकोविदः ॥ असिद्धार्थो विशत्यन्धं स्वधर्मविमुखस्तमः ॥ २४ ॥ तस्माल्लोकमिमं राजन् स्वप्नमायामनोरथम् ॥ वीक्ष्यायम्यात्मनात्मानं समः शान्तो भव प्रभो ॥ २५ ॥ धृतराष्ट्र उवाच ॥ यथा वदति कल्याणीं वाचं दानपते भवान् ॥ तथाऽनया न तृप्यामि मर्त्यः प्राप्य यथाऽमृतम् ॥ २६ ॥

स्वत्वेनाश्रयन्ति तद्वत् ॥ २२ ॥ पुष्णातीति ॥ स्वबुद्ध्या यान् अधर्मेणापि पुष्णाति ते प्राणा रायः धनानि सुतादयश्च तमपण्डितं मूर्खम् अकृतार्थमप्राप्तभोगमेव प्रारब्धवशान्मृतं जीवं तमेव वा प्रहिण्वन्ति त्यजन्ति ॥ २३ ॥ स्वयमिति ॥ नार्थकोविदः स्वार्थेऽपि मूढः स्वधर्मविमुखः स जनः स्वयं तु असिद्धार्थः अपूर्णमनोरथ एव तैः पुत्रादिभिस्त्यक्तः किल्बिषं तत्पोषणार्थं कृतं पापमादाय अन्धंतमः घोरतामिस्रादिनरकं प्रविशति ॥ २४ ॥ तस्मादिति ॥ हे राजन् हे प्रभो तस्मात्पुत्राद्यासक्तेरनर्थमूलत्वादिमं लोकं धनपुत्रादि सर्वं स्वप्नश्च माया च मनोरथश्च तत्तेन तुल्यमनित्यं वीक्ष्य निश्चित्य आत्मना बुद्ध्या आत्मानं मन आयम्य वशीकृत्य शान्तः रागद्वेषादिरहितः सन् सर्वत्र समो भव ॥ २५ ॥ यथेति ॥ हे दानपते अक्रूर यथा भवान् कल्याणीं शुभावहां वाचं वदति तथा अनया वाचा न तृप्यामि अलमिति न मन्ये । यथा मर्त्यः अमृतं प्राप्य न तृप्यति तथा ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

तथापीति ॥ हे सौम्य यद्यपि भवतो वाक् सूनृता मधुरा हिता च तथापि पुत्रानुरागेण विषमे चले चञ्चले व्याकुले च मम हृदि न स्थीयते न तिष्ठति आर्षः प्रयोगः । विस्तरस्तु सरस्वती प्रादुरभावि यत्रेति चतुर्थस्कन्धषोडशाध्याये द्रष्टव्यः । यद्वा । तया वाचेति तृतीयाविपरिणामः न स्थीयते न स्थिरीभूयते । सुदामा पर्वतो मेघो वा तेनैकदिक् तत्र भवा वा सौदामनी विद्युत् सा यथा तत्र स्फुरिता झटित्येव लीयते तद्वदित्यर्थः । यद्वा । सुदामा माला तस्या इयं सौदामनी तदाकारा॥२७॥जानन्नप्यहं मुह्यामीत्यत्र कारणमाह—ईश्वरस्येति ॥ ईश्वरस्य विधिं चिकीर्षितं मायां वा को नु पुमान् अन्यथा अन्यथाकृत्वा विधुनोति अतिक्रामति य ईश्वरः भूमेर्भारावताराय यदोः कुलेऽवतीर्णः अस्ति तथा च भूभारहरणाय ईश्वरस्यैवेयमिच्छेति ॥ २८ ॥ य इति ॥ दुर्विमर्शपथया अवितर्क्यमार्गया निजमायया स्वशक्तिरूपया प्रकृत्या इदं ब्रह्मादिशरीरजालं सृष्ट्वा

तथाऽपि सूनृता सौम्य हृदि न स्थीयते चले ॥ पुत्रानुरागविषमे विद्युत् सौदामनी यथा ॥ २७ ॥ ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान् ॥ भूमेर्भारावताराय योऽवतीर्णो यदोः कुले ॥ २८ ॥ यो दुर्विमर्शपथया निजमाययेदं सृष्ट्वा गुणान् विभजते तदनुप्रविष्टः ॥ तस्मै नमो दुरवबोधविहारतन्त्रसंसारचक्रगतये परमेश्वराय ॥ २९ ॥ श्रीशुक उवाच ॥ इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः ॥ सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीमगात् ॥ ३० ॥ शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितम् ॥ पाण्डवान् प्रति कौरव्य यदर्थं प्रेषितः स्वयम् ॥ ३१ ॥ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां दशमस्कन्धे पूर्वार्धे एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ इति पूर्वार्धं समाप्तम् ॥ ॥ ॥ ॥

तस्मिन्नन्तर्यामितया प्रविष्टः सन् गुणान् विभजते सत्वादिगुणकार्यशान्तिरागद्वेषादीनुत्पादयति तत् फलानि च ददाति दुरवबोधो यो विहारः क्रीडा स एव तन्त्रं मुख्यं कारणं यस्य तस्य संसारचक्रस्य गतिर्भ्रमणं यस्मात्तस्मै परमेश्वराय नमः ॥ २९ ॥ इतीति ॥ स यादवोऽक्रूरो नृपतेर्धृतराष्ट्रस्याभिप्रायमित्येवं परस्परं संभाषणेनाभिप्रेत्य ज्ञात्वा सुहृद्भिः पाण्डवादिभिः सम्यगनुज्ञातः पुनर्यदुपुरीं मथुरामगात् ॥ ३० ॥ शशंसेति ॥ हे कौरव्य यदर्थं धृतराष्ट्रवृत्तविज्ञानार्थं भगवता स्वयं प्रेषितस्तत्पाण्डवान् प्रति धृतराष्ट्रस्य विचेष्टितं विषप्रदानादिकृतं सर्वं रामकृष्णाभ्यां शशंस कथयामास ॥३१॥ कान्ते विलासिनि कलावति पद्मनेत्रे नित्यं त्वयि प्रियतमे रमते मनो मे ॥ इत्थं भवन्तमुरुभावनया वदन्तं श्रीकृष्ण मां बुधजना अपि हा हसन्ति ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ दशमस्योनपञ्चाशे व्यधाद्गङ्गासहायकः ॥ ४९ ॥

॥ इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहितश्रीमद्भागवते दशमस्कन्धपूर्वार्द्धः समाप्तः ॥

१ अत्र कान्ते इत्यादीनि सप्तम्यन्तानि भगवद्विशेषणतया प्रयुक्तान्यपि कान्तासंबोधनतया प्रकल्प्य मां हसन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

॥ श्रीमद्भागवते दशमस्कन्धपूर्वार्द्धः ॥

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते दशमस्कंधउत्तरार्द्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

CC-0. In Public Domain. Digitization by eGangotri

दशमस्कंधउत्तरार्धम्



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ कृष्णः पञ्चाशत्तमे तु जित्वा भूरि जरासुतम् ॥ स्वकीयान्द्वारकां निन्ये श्लोकाः सार्द्धा गजेर्षवः ॥ उवाचवाक्त्रयं सार्द्धा त्रयः षष्टिरनुष्टुभः ॥ ५० ॥ अस्तिरिति ॥ हे भरत र्षभ अस्तिः प्राप्तिश्चेति संज्ञिके कंसस्य महिष्यौ भर्तरि कंसे मृते सति दुःखार्ते तद्व्यञ्जकरोदनादियुक्ते सत्यौ पितुर्जरासन्धस्य गृहान् ईयतुः जग्मतुः ॥१॥ पित्रे इति ॥ दुःखिते ते स्वपित्र मगधराजाय जरासन्धाय सर्वं आत्मनो वैधव्यकारणं वेदयाञ्चक्रतुः बोधयांचक्रतुः ॥२॥ स इति ॥ हे नृप अप्रियं जामातृमरणसूचकं तत् वचनमाकर्ण्य कंसे शोकः कृष्णे चामर्षस्ताभ्यां युतः स जरासन्धः महीम् अयादवीं यादवरहिताम् उपसर्जनात् ङीबार्षः । यद्वा । यादवानामियं यादवी न यादवी अयादवी तां यादवसम्बन्धरहिताम् इत्यर्थः । कर्त्तुं परमम् उद्यमं चक्रे ॥ ३ ॥ अक्षौहिणीभिरिति ॥ विंशत्या तिसृभिश्चाक्षौहिणीभिः संवृतः जरासन्धः यदुराजधानीं मथुरां सर्वतोदिशं न्यरुणत् निरुद्धवान्। तत्र कालिङ्गबाह्लीकाद्याः पश्चिमद्वारं रुरुधुः । रुक्मिविदूरथाद्या उत्तरं जयद्रथकेकयाद्याः पूर्वं चैद्यजरासन्धाद्याः दक्षिणमिति हरिवंशात् ज्ञेयम् ।

॥ श्रीगणेशाय नमः ॥ अथोत्तरार्धप्रारम्भः ॥ ॥ श्रीशुक उवाच ॥ अस्तिः प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ ॥ मृते भर्तरि दुःखार्ते ईयतुः स्म पितुर्गृहान् ॥ १ ॥ पित्रे मगधराजाय जरासन्धाय दुःखिते ॥ वेदयाञ्चक्रतुः सर्वमात्मवैधव्यकारणम् ॥ २ ॥ स तदप्रियमाकर्ण्य शोकामर्षयुतो नृप ॥ अयादवीं महीं कर्तुं चक्रे परममुद्यमम् ॥ ३ ॥ अक्षौहिणीभिर्विंशत्या तिसृभिश्चापि संवृतः ॥ यदुराजधानीं मथुरां न्यरुणत् सर्वतो दिशम् ॥ ४ ॥ निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरम् ॥ स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलम् ॥ ५ ॥ चिन्तयामास भगवान् हरिः कारणमानुषः ॥ तद्देशकालानुगुणं स्वावतारप्रयोजनम् ॥ ६ ॥ हनिष्यामि बलं ह्येतद्भुवि भारं समाहितम् ॥ मागधेन समानीतं वश्यानां सर्वभूभुजाम् ॥ ७ ॥ अक्षौहिणीभिः सङ्ख्यातं भटाश्वरथकुञ्जरैः ॥ मागधस्तु न हन्तव्यो भूयः कर्ता बलोद्यमम् ॥ ८ ॥

अक्षौहिणीप्रमाणं प्रथमव्याख्यायां प्रोक्तम् ॥४॥ निरीक्ष्येति द्वयम् ॥ कारणेन भूभारहरणेन मानुषरूपः भगवान् हरिः कृष्णः उद्वेलम् उत्क्रान्तो वेलां तीरमित्युद्वेलः तं लङ्घितमर्यादं सागरमिव स्थितं तस्य जरासन्धस्य बलं तेन निरुद्धं स्वपुरं तथा स्वजनं भयाकुलं निरीक्ष्य तस्य देशस्य कालस्य चानुगुणमनुरूपं स्वावतारस्य प्रयोजनं चिन्तयामास। किं बलमेव हन्यां किंवा मागधसहितं बलमित्यचिन्तयत् ॥ ५ ॥ ६ ॥ चिन्तितमाह—हनिष्यामीति द्वयेन ॥ स्ववश्यानां सर्वभूभुजां राज्ञामेतद् भुवि भाररूपं समाहितं समुदितं मागधेन जरासन्धेन समानीतमत्र प्रापितं भटैः पदादिभिः अश्वै रथैः कुञ्जरैश्च व्याप्तं त्रयोविंशतिसंख्याभिरक्षौहिणीभिः संख्यातं च बलमेव हनिष्यामि । मागधस्तु मया न हन्तव्यः यतोऽसौ भूयः बलस्य सैन्यसम्पादनस्योद्यमं कर्त्ता करिष्यति ततश्च । भूभारभूतदुष्टसमूहस्यैकत्रैव लाभात्तद्धननं सुकरं स्यात् ॥ ७ ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

एतदिति ॥ हि यतः एष एव अर्थः प्रयोजनं यस्य तथाभूतोऽयमवतारो मे मया कृतः । प्रयोजनमाह । भूभारहरणाय साधूनां रक्षणाय अन्येषामसाधूनां वधाय चेति ॥ ९ ॥ अन्य इति ॥ न केवलमयमेवावतार एतदर्थः किं त्वन्योऽपि वराहनृसिंहादिर्देहो दुष्टवधेन धर्मरक्षायै क्वचित्कदाचित्काले प्रभवतः प्रकर्षेण वर्धमानस्याधर्मस्य विरामाय विनाशायैव मया संभ्रियते परिगृह्यते ॥ १० ॥ एवमिति ॥ गोविन्दे एवं ध्यायति सति सद्यस्तत्क्षणमेव ससूतौ सारथिसहितौ सपरिच्छदौ परिच्छदः परिकरः कवचध्वजादिस्तद्युक्तौ सूर्यस्येव वर्चस्तेजो ययोस्तथाभूतौ द्वौ रथौ आकाशात्तदिच्छयैव वैकुण्ठादवतीर्य उप समीपे स्थितौ ॥ ११ ॥ आयुधानीति ॥ यदृच्छयैव पुराणानि सनातनानि दिव्यानि आयुधानि च उपस्थितानि अथ तानि रथादीनि दृष्ट्वा हृषीकेशः संकर्षणमब्रवीत् ॥ १२ ॥ पश्येति ॥ हे आर्य हे प्रभो त्वमवन् रक्षको येषां त्वं नाथत्वेन विद्यसे येषां तेषामिति वा उभयत्रात्वमार्षम् । यद्वा । त्वावतां त्वत्सदृशानां "युष्मदस्मदोः सादृश्ये वतुब्" इति छान्दसवार्तिकात् "आसर्वनाम्नः" इत्यात्वम् । यदूनां प्राप्तं व्यसनं कष्टं

एतदर्थोऽवतारोऽयं भूभारहरणाय मे ॥ संरक्षणाय साधूनां कृतोऽन्येषां वधाय च ॥ ९ ॥ अन्योऽपि धर्मरक्षायै देहः सम्भ्रियते मया ॥ विरामायाप्यधर्मस्य काले प्रभवतः क्वचित् ॥ १० ॥ एवं ध्यायति गोविन्द आकाशात् सूर्यवर्चसौ ॥ रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ ॥ ११ ॥ आयुधानि च दिव्यानि पुराणानि यदृच्छया ॥ दृष्ट्वा तानि हृषीकेशः सङ्कर्षणमथाब्रवीत् ॥१२॥ पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो ॥ एष ते रथ आयातो दयितान्यायुधानि च ॥ १३ ॥ यानमास्थाय जह्येतद्व्यसनात् स्वान् समुद्धर ॥ एतदर्थं हि नौ जन्म साधूनामीश शर्मकृत् ॥ १४ ॥ त्रयोविंशत्यनीकाख्यं भूमेर्भारमपाकुरु ॥ १५ ॥ एवं संमन्त्र्य दाशार्हौ दंशितौ रथिनौ पुरात् ॥ निर्जग्मतुः स्वायुधाढ्यौ बलेनाल्पीयसाऽऽवृतौ ॥ १६ ॥ शङ्खं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः ॥ ततोऽभूत् परसैन्यानां हृदि वित्रासवेपथुः ॥ १७ ॥

पश्य अवधेहि एष ते त्वदर्थं रथ आयातः तथा दयितानि तव प्रियाणि आयुधानि च हलमुसलादीनि आगतानि ॥ १३ ॥ यानमिति ॥ यानं रथमास्थाय आरुह्य एतत्सैन्यं जहि तेन स्वान् स्वकीयान् व्यसनात् समुद्धर । हे ईश साधूनां शर्मकृत् नौ आवयोर्जन्म एतदर्थं हि प्रतिपक्षनिरसनार्थमेव ॥ १४ ॥ त्रयोविंशतीति अर्द्धम् ॥ त्रयोविंशतिः त्रयोविंशत्यक्षौहिणीकमनीकं सैन्यमित्याख्या नाम यस्य तं भूमेर्भारमपाकुरु दूरीकुरु ॥१५॥ एवमिति ॥ एवं संमन्त्र्य मिथः संमतिं कृत्वा दाशार्हौ रामकृष्णौ दंशितौ बद्धकवचौ रथिनौ रथाधिरूढौ स्वैरसाधारणैरायुधैः शोभनायुधैर्वा आढ्यौ युक्तौ अल्पीयसा बलेन सैन्येनावृतौ च भूत्वा पुरात् मथुराया निर्जग्मतुः ॥ १६ ॥ शङ्खमिति ॥ दारुकाख्यः सारथिर्यस्य स हरिर्बहिर्विनिर्गत्य शङ्खं पाञ्चजन्यं दध्मौ वादितवान् । ततः शङ्खध्वनिश्रवणात् परस्य जरासन्धस्य सैन्यानां हृदि वित्रासो भयं तेन वेपथुः प्रकम्पोऽभूत् ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताविति ॥ तौ रामकृष्णौ वीक्ष्य मागधो जरासन्ध आह स्म । हे कृष्ण पुरुषाधम वस्तुतः पुरुषा अधमा यस्मादिति पुरुषोत्तम बालेन एकेन त्वया सह लज्जयाहं योद्धुं नेच्छामिः वस्तुतो महाप्रभावेण त्वया बालेन एकेनापि च पराभवलज्जया न योद्धुमिच्छामि किं पुनः ससैन्येन ॥ १८ ॥ गुप्तेनेत्यर्द्धम् ॥ हे मन्द हे बन्धुहन् मातुलघातिन् गुप्तेन कंसभयेन गोकुले उषितेन त्वया सह न योत्स्ये अतः याहि । वस्तुतः हे अमन्द बध्नातीति बन्धुरविद्यातां हन्तीति हे अविद्यानिरसन गुप्तेन अन्तर्यामितया अदृश्येन कालरूपेण वा न योत्स्ये ॥ १९ ॥ तवेति ॥ हे राम तव यदि मया सह युद्धे श्रद्धा सामर्थ्यमिच्छा वा तर्हि युध्यस्व धैर्यमुद्वह । मच्छरैश्छिन्नं देहं हित्वा स्वः स्वर्गं याहि प्राप्नुहि । समर्थश्चेन्मां जहि वस्तुतः मत् मत्तः पापिनः सकाशादपसृत्य त्वदीयशरैश्छिन्नं मम देहमत्रैव हित्वा प्रक्षिप्य स्वः वैकुण्ठं याहि ॥२०॥ नेति ॥ शूरा नैव विकत्थन्ते आत्मानं नैव श्लाघन्ते किंतु श्लाघाहेतुं पौरुषमेव दर्शयन्तीति अतः हे राजन् आतुरस्य जामातृमरणदुःखितस्य मुमूर्षतः मर्तुमिच्छतः तव गुप्तेनेत्यादिवचः न गृह्णीमः ॥२१॥ जरासुत

तावाह मागधो वीक्ष्य हे कृष्ण पुरुषाधम ॥ न त्वया योद्धुमिच्छामि बालेनैकेन लज्जया ॥ १८ ॥ गुप्तेन हि त्वया मन्द न योत्स्ये याहि बन्धुहन् ॥ १९ ॥ तव राम यदि श्रद्धा युद्धचस्व धैर्यमुद्वह ॥ हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि ॥ २० ॥ श्रीभगवानुवाच ॥ न वै शूरा विकत्थन्ते दर्शयन्त्येव पौरुषम् ॥ न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥ २१ ॥ श्रीशुक उवाच ॥ जरासुतस्तावभिसृत्य माधवौ महाबलौघेन बलीयसाऽवृणोत् ॥ ससैन्ययानध्वजवाजिसारथी सूर्यानलौ वायुरिवाभ्ररेणुभिः ॥ २२ ॥ सुपर्णतालध्वजचिह्नितौ रथावलक्षयन्त्यो हरिरामयोर्मृधे ॥ स्त्रियः पुराट्टालकहर्म्यगोपुरं समाश्रिताः संमुमुहुः शुचार्दिताः ॥ २३ ॥ हरिः परानीकपयोमुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितम् ॥ स्वसैन्यमालोक्य सुरासुरार्चितं व्यस्फूर्जयच्छार्ङ्गशरासनोत्तमम् ॥ २४ ॥

इति ॥ इत्युक्तो जरासुतः सैन्ययानध्वजवाजिसारथिभिः सहितौ तौ माधवौ रामकृष्णौ अभिसृत्य अभिमुखमागत्य बलीयसा महता बलौघेन सैन्यसमूहेनावृणोत् आवृतवान् । तत्र दृष्टान्तः वायुरिव वायुर्यथा अभ्रैः सूर्यं रेणुभिश्चानलमग्निं प्रावृणोति तथा अदर्शनमात्रमेवावरणमिति सूचितम् ॥ २२ ॥ सुपर्णेति ॥ पुरस्य अट्टालकः दुर्गोपर्युच्चगृहाणि हर्म्याणि उच्चप्रासादाः गोपुराणि पुरद्वाराणि च तेषां समूहं समाश्रिताः अधिरूढाः स्त्रियो मृधे युद्धभूमौ सुपर्णध्वजतालध्वजाभ्यां चिह्नितौ हरिरामयो रथौ अलक्षयन्त्यः अपश्यन्त्यः शुचार्पिताः शोकव्याप्ताः सत्यः संमुमुहुः विचित्ता बभूवुः । पुमपेक्षया स्त्रीणामधिककातर्यात् कृष्णे आसक्त्याधिक्याच्च ॥ २३॥ हरिरिति ॥ तदा हरिः परस्यानीकानि सैन्यान्येव पयोमुचो मेघास्तेषां मुहुः शिलीमुखा बाणास्तेषामत्युल्बणं दुःसहं वर्षं तेन पीडितं स्वसैन्यमालोक्य सुरैः असुरैश्च अर्चितं श्रेष्ठत्वेन संमतं शार्ङ्गाख्यं शरासनोत्तमं धनुश्रेष्ठं व्यस्फूर्जयत् सघोषज्यायुक्तमकरोत् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृह्णन्निति ॥ निरन्तरं यथा स्यात्तथा निषङ्गात् तूणीरात् एकैकान् शरान् गृह्णन् धनुषि सन्दधत् । अथ तान् शितबाणपूगान् तीक्ष्णशरसमूहान् विकृष्य मुञ्चन् तैश्च रथान् कुञ्जरान् वाजिनः पत्तीन् पदातीन् निघ्नन् यद्वत् यथा अलातचक्रं पारिभ्रमज्ज्वलत् काष्ठं यथा चक्रवद्भवति तथा मथुरायाः चतुर्दिक्षु सैन्याभिमुखं पारिभ्रमन् समदृश्यत । निरन्तरमिति ग्रहणादिसर्वक्रिया विशेषणंतेन ग्रहणयोजनविकर्षणक्षेपणप्रहरणक्रियाः क्रमेणोद्भूता अपि युगपदेवोद्भवन्त्य इव द्रष्टॄन् प्रतिभाता इति ॥ २५ ॥ निर्भिन्नेति ॥ निर्भिन्नाः कुम्भा मस्तकस्था येषां ते करिणो गजाः निपेतुः तथा शरैर्वृक्णाः च्छिन्नाः कन्धरा ग्रीवा येषां तथाभूता अनेकशोऽश्वाश्च निपेतुः । तथा हता अश्वा ध्वजाः सूताः सारथयः नायकाः रथिनो येषां ते रथा निपेतुः । तथा छिन्ना भुजा उरवः कन्धराश्च येषां तथाभूताः पदातयश्च निपेतुः । निर्भिन्नकुम्भा इत्यादिना तत्तद्योग्यस्थानेष्वेव भेदच्छेदादिप्रदर्शनेन विशेष उच्यत इति न निघ्नन्नित्यादिना पुनरुक्तिः ॥ २६ ॥ संच्छिद्यमानेति सार्द्धद्वयम् ॥ भगवच्छरैः संच्छिद्यमानानां द्विपदेभवाजिनां पदाति-

गृह्णन्निषङ्गादथ संदधच्छरान्विकृष्य मुञ्चन् शितबाणपूगान्॥निघ्नन् रथान् कुञ्जरवाजिपत्तीन् निरन्तरं यद्वदलातचक्रम् ॥२५॥ निर्भिन्नकुम्भाः करिणो निपेतुरनेकशोऽश्वाः शरवृक्णकन्धराः ॥ रथा हताश्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकन्धराः ॥ २६ ॥ संछिद्यमानद्विपदेभवाजिनामङ्गप्रसूताः शतशोऽसृगापगाः ॥ भुजाऽहयः पूरुषशीर्षकच्छपा हतद्विपद्वीपहयग्रहाकुलाः ॥ २७ ॥ करोरुमीना नरकेशशैवला धनुस्तरङ्गायुधगुल्मसंकुलाः ॥ अच्छूरिकावर्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः ॥ प्रवर्तिताभीरुभयावहा मृधे मनस्विनां हर्षकरीः परस्परम् ॥ २८ ॥ विनिघ्नताऽरीन् मुसलेन दुर्मदान् संकर्षणेनापरिमेयतेजसा ॥ बलं तदङ्गार्णवदुर्गभैरवं दुरन्तपारं मगधेन्द्रपालितम् ॥ क्षयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयोः परम् ॥ २९ ॥

गजाश्वानामङ्गेभ्यः प्रसूताः शतशः असृगापगा रुधिरनद्यः भगवता प्रवर्तिता इति तृतीयेनान्वयः । ता वर्णयति भुजा एव अहयः सर्पा यासु ताः पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः हता द्विपा गजा एव द्वीपाः जलान्तर्वर्तितटानि हया अश्वा एव ग्रहा ग्राहास्तैश्चाकुला व्याप्ताः करा ऊरवश्च मीना यासु ताः नराणां केशाः शैवलानि यासु ताः धनूंष्येव तरङ्गास्तैः आयुधरूपैः गुल्मैः अप्रकाण्डवृक्षैश्च संकुला व्याप्ताः अच्छरिकाश्चक्राणि चर्माणि वा ता एव आवर्त्तास्तैर्भयानकाः महामणीनां प्रवेकाः उत्तमाः तन्निर्मितान्याभरणानि च यथायथम् अश्मानः शर्कराश्च यासु ताः भीरूणां भयावहाः मृधे युद्धे मनस्विनां वीराणां तु परस्परं हर्षकरीः हर्षकर्यः । पूर्वसवर्णदीर्घ आर्षः ॥ २७ ॥ २८ ॥ विनिघ्नतेति सार्द्धम् ॥ अङ्ग हे राजन् अपरिमेयमपरिच्छेद्यं तेजः पराभिभवसामर्थ्यं यस्य तेन दुर्मदान् अरीन् शत्रून् मुसलेनायुधेन विनिघ्नता संकर्षणेनापि तन्निहतावशिष्टं मगधेन्द्रेण पालितम् अर्णव इव दुर्गमं दुष्प्रवेशं भैरवं भयानकं च दुरन्तपारं दुःशब्दो निषेधे नास्ति अन्तस्तलं पारोऽवधिश्च यस्य तेन विक्रमे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णागधं देशतोऽप्यवधिरहितं च बलं सैन्यं क्षयं प्रणीतं तत् जरासन्धसैन्यविनाशनं जगदीशयोः वसुदेवपुत्रयोः परं केवलं विक्रीडितं क्रीडामात्रमेव नतु पराक्रमः ॥ २९ ॥ स्थितीति ॥ अनन्तगुणो यो भगवान् एकत्वं द्वयोरैक्याभिप्रायेण स्वलीलया अनायासेनैव भुवनत्रयस्य स्थित्युद्भवान्तं पालनादित्रयं समीहते करोति तस्य पूर्वोक्तोऽयं परपक्षनिग्रहश्चित्रमाश्चर्यविषयो न भवति तथापि चित्रत्वाभावेऽपि मर्त्यान् अनुविधत्ते अनुकरोतीति तथा तस्य मनुष्यदृष्टचैतद्वैचित्र्येण वर्ण्यते ॥३०॥ जग्राहेति ॥ रामः हतान्यनीकानि सैन्यानि यस्य अवशिष्टाः असवः प्राणा एव यस्य स चासौ स च तं विरथं महाबलमपि जरासन्धमोजसा बलेन जग्राह । सिंहो यथा सिंहं गृह्णाति तथेति ॥ ३१ ॥ बध्यमानमिति॥ हता अरातयो येन तं महाबलं हतप्रायमरातिमिति कर्मधारयो वा । वारुणैर्वरुणदेवताकैः पाशैः अत्यन्तापमानार्थं मानुषैश्च पाशैः रामेण बध्यमानं दृष्ट्वा तेन जरासन्धेन कार्यस्य दुष्टसङ्ग्रहस्य चिकीर्षया सम्पादनेच्छया गोविन्दस्तद्बन्धनं वारयामास ॥ ३२ ॥ स इति द्वयम् ॥ व्रीडितः वीरेषु सम्मतः स जरा-

स्थित्युद्भवान्तं भुवनत्रयस्य यः समीहतेऽनन्तगुणः स्वलीलया ॥ न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ॥ ३० ॥ जग्राह विरथं रामो जरासन्धं महाबलम् ॥ हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा ॥ ३१ ॥ बध्यमानं हतारातिं पाशैर्वारुणमानुषैः ॥ वारयामास गोविन्दस्तेन कार्यचिकीर्षया ॥ ३२ ॥ स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमतः ॥ तपसे कृतसङ्कल्पो वारितः पथि राजभिः ॥ ३३ ॥ वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि ॥ स्वकर्मबन्धप्राप्तोऽयं यदुभिस्ते पराभवः ॥ ३४ ॥ हतेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा ॥ उपेक्षितो भगवता मगधान् दुर्मना ययौ ॥ ३५ ॥ मुकुन्दोप्यक्षतबलो निस्तीर्णारिबलार्णवः ॥ विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥ ३६ ॥ माथुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयः सूतमागधबन्दिभिः ॥ ३७ ॥

सन्धः लोकनाथाभ्यां रामकृष्णाभ्यां मुक्तः बालैः पराजितोऽहं क्षात्रधर्मं न करिष्ये इति विचार्य तपसे तपः कर्तुं कृतसंकल्पः पथि तपोवनमार्गे राजभिः शिशुपालादिभिः कर्तृभिः पवित्राणि तत्वभूतानि अर्थाः पदानि च येषु तैर्नयनैः नीतिसंवलितैः प्राकृतैः लौकिकैरपि वाक्यैः वारितः वाक्यान्याहुः अल्पकैरपि यदुभिर्योऽयं ते पराभवः स स्वकर्मबन्धेन प्राप्तः तव ललाट एतल्लिखितमतोऽत्र का लज्जा । इदमेव नीतावपि वाक्यं स्वकर्मप्राप्तत्वात् युद्धे जयः पराजयो वा न नियतः अतः पराजयेऽपि न खेदः कार्यः । प्राकृते तु कः खलु धीमान् यादवेभ्यस्त्वां दुर्बलं मंस्यते अतः कर्मबन्धेन एकदा पराजयेऽपि न लज्जितव्यमित्यादि॥३३॥३४॥ हतेष्विति ॥ सर्वेषु अनीकेषु सैन्येषु हतेषु सत्सु बार्हद्रथो बृहद्रथपुत्रो नृपः जरासन्धः भगवता उपेक्षितो दुर्मनाः संस्तदा मगधान् स्वदेशान् ययौ ॥ ३५ ॥ मुकुन्द इति द्वयम् ॥ न क्षतं बलं सैन्यं यस्य सः तस्यैवामृतदृष्ट्याक्षतप्रतिसन्धानादित्याशयः । निस्तीर्णः अनायासेनैव तीर्णोऽरिबलार्णवो वैरिसैन्यसमुद्रो येन सः त्रिदशैर्देवैः साधुसाध्वित्यनुमोदितः कुसुमैर्विकीर्यमाणः

CC-0. In Public Domain. Digitization by eGangotri

आच्छाद्यमानः सूतमागधवन्दिभिरुपगीयमानो विजयो यस्य स मुकुन्दोऽपि प्रत्यायातैः विज्वरैर्निर्वृत्ततापैर्मुदितात्मभिः प्रसन्नचित्तैर्माथुरैर्मथुरावासिभिरुपसंगम्य मिलित्वा स्वपुरं ययौ इत्यनुषङ्गः ॥३६ ॥३७ ॥ शङ्खेति द्वयम् ॥ सिक्ताश्चन्दनाद्यम्बुभिः मार्गा यस्यां तां हृष्टा जना यस्यां तां पताकाभिरलंकृतां ब्रह्मघोषेण वेदपाठघोषेण निर्घुष्टां निनादितां कौतुकेनोत्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां तां पुरं मथुरां प्रभौ श्रीकृष्णे प्रविशति सति अनेकशः अनेकानि शङ्खदुन्दुभयः भेर्यस्तूर्याणि च वीणावेणुमृदङ्गानि च नेदुः ॥ ३८ ॥ ३९ ॥ निचीयमान इति ॥ नारीभिः कर्त्रीभिः मालामर्हन्ति माल्यानि कुसुमानि तैः दध्यक्षतयवाङ्कुरैश्च करणैर्निचीयमानः विकीर्यमाणः प्रीत्या उत्कलितानि उत्फुल्लानि लोचनानि येषां तैर्जनैः सस्नेहं यथा भवति तथा निरीक्ष्यमाणो मुकुन्दः पुरं प्रविवेशेति शेषः । यद्वा । एवंभूतो मुकुन्दः युद्धलब्धं धनं यदुराजाय प्रादिशादित्युत्तरेणान्वयः ॥४०॥ आयोधनेति ॥ आयोधनं रणभूमिः तद्गतं तत्र पतितम् अनन्तमसंख्यातं वित्तं धनं वीराणां भूषणं गात्रलग्नं च यत् आहृतम् आनीतं तत्सर्वं यदुराजाय उग्रसेनाय प्रभुः श्रीकृष्णः प्रादिशत् समर्पितवान् ॥४१॥ एवमिति ॥ तावत्यः त्रयोविंशतिसंख्याका अक्षौहिण्यः बलं सेना यस्य सः तावतीति पुंवत्त्वाभाव आर्षः । यद्वा । ताव-

शङ्खदुन्दुभयो नेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदङ्गानि पुरं प्रविशति प्रभौ ॥ ३८ ॥ सिक्तमार्गां हृष्टजनां पताकाभिरलंकृताम् ॥ निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणाम् ॥ ३९ ॥ निचीयमानो नारीभिर्माल्यदध्यक्षताङ्कुरैः ॥ निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ॥ ४० ॥ आयोधनगतं वित्तमनन्तं वीरभूषणम् ॥ यदुराजाय तत् सर्वमाहृतं प्रादिशत् प्रभुः ॥ ४१ ॥ एवं सप्तदशकृत्वस्तावत्यक्षौहिणीबलः ॥ युयुधे मागधो राजा यदुभिः कृष्णपालितैः ॥ ४२ ॥ अक्षिण्वंस्तद्बलं सर्वं वृष्णयः कृष्णतेजसा ॥ हतेषु स्वेष्वनीकेषु त्यक्तोऽयादरिभिर्नृपः ॥ ४३ ॥ अष्टादशमसंग्रामे आगामिनि तदन्तरा ॥ नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत ॥ ४४ ॥

तीति च्छेदः तावति पराजयेप्यक्षौहिण्यो बलं यस्येति तथाभूतो भूत्वा तावत्सैन्यमादाय मागधो राजा जरासन्धः कृष्णपालितैर्यदुभिः सह सप्तदशकृत्वः सप्तदशवारान् एवमेव युयुधे ॥ ४२ ॥ अक्षिण्वन्निति ॥ कृष्णतेजसा युक्ता वृष्णयः यादवास्तस्य जरासन्धस्य बलं सर्वम् अक्षिण्वन्नाशितवन्तः एवमेव तेषु सर्वेषु अनीकेषु सैन्येषु हतेषु सत्सु अरिभिः रामकृष्णादिभिस्त्यक्त उपेक्षितो नृपो जरासन्धोऽयात् स्वपुरं जगाम ॥ ४३ ॥ अष्टादशम इति ॥ मडार्षः । अष्टादशे संग्रामे आगामिनि सति तदन्तरा तन्मध्ये अष्टादशसङ्ख्यामात्पूर्वमेव नारदेन प्रेषितः यवनः कालयवनाख्यो वीरः प्रत्यदृश्यत मथुरां प्राप्तस्तत्रत्यैर्जनैर्दृष्टो बभूव । एवं हि विष्णुपुराणे कथा। कदाचित् गार्ग्यस्तस्य शालेन षण्ढ इत्युपहसितः तदा यादवा अपि गार्ग्यमुपजहसुः । ततः गार्ग्यः क्रुद्धः श्रीमहेशं प्रसाद्य यदुभीषणं पुत्रं वरं लब्धवान् । ततश्च यवनेन्द्रेण अपुत्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितः स गार्ग्यः कालयवनमजीजनत् । स च कालयवनो बलोन्मत्तः पृथिव्यां के बलिनो नृपा इति नारदं पप्रच्छ । नारदश्च यदून् प्राह । एवं नारदप्रेषितो यवनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मथुरायां दृष्टः ॥ ४४ ॥ रुरोधेति ॥ नृलोके न विद्यते प्रतिद्वन्द्वस्तुल्यबलो यस्य तथाभूतः कालयवनः स्वतुल्यबलं योद्धारं नारदं पृष्टवांस्तन्मुखाच्च वृष्णीन् आत्मसंमितान् स्वतुल्यबलान् श्रुत्वा तैः सह युद्धार्थं तिसृभिर्म्लेच्छकोटिभिः सह मथुरामेत्यागत्य सर्वतो निरुद्धवान् ॥ ४५ ॥ तमिति ॥ तं कालयवनं दृष्ट्वा संकर्षणेन सहायः सहागस्तनं तद्वान् रामेण सहितः श्रीकृष्णोऽचिन्तयत् । अहो आश्चर्यं यदूनामुभयतः कालयवनाज्जरासन्धाच्च महद्वृजिनं दुःखं प्राप्तम् ॥ ४६ ॥ यवन इति ॥ महाबलोऽयं यवनोऽद्य तावदस्मान्निरुन्धे निरुणद्धि अद्यास्मिन्नहनि वा श्वः परस्मिन्नहनि वा परश्वस्तदनन्तरेऽहनि वा मागधोऽप्यागमिष्यति ॥ ४७ ॥ आवयोरिति ॥ अस्य अनेन सह तृतीयार्थे षष्ठी । आवयोर्युध्यतोः सतोः शता आर्षः । बली जरासुतो यद्यागन्ता आगमिष्यति तर्हि सोऽस्मद्बन्धून् वधिष्यति अथवा तान्स्वपुरं प्रति नेष्यति ॥ ४८ ॥ तस्मादिति ॥ यत एवमुभयतो दुःखं तस्मात् द्विपदैर्मनुष्यैर्दुर्गमं गन्तुमशक्यं दुर्गमद्यैव विधास्यामः करिष्यामः । तत्र दुर्गे ज्ञातीन् यदून् समाधाय यवनं मुचुकुन्दद्वारा

रुरोध मथुरामेत्य तिसृभिर्म्लेच्छकोटिभिः ॥ नृलोके चाप्रतिद्वन्द्वो वृष्णीन् श्रुत्वात्मसंमितान् ॥ ४५ ॥ तं दृष्ट्वाऽचिन्तयत् कृष्णः सङ्कर्षणसहायवान् ॥ अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत् ॥ ४६ ॥ यवनोऽयं निरुन्धेऽस्मानद्य तावन्महाबलः ॥ मागधोऽप्यद्य वा श्वो वा परश्वो वाऽऽगमिष्यति ॥ ४७ ॥ आवयोर्युध्यतोरस्य यद्यागन्ता जरासुतः ॥ बन्धून् वधिष्यत्यथ वा नेष्यते स्वपुरं बली ॥ ४८ ॥ तस्मादद्य विधास्यामो दुर्गं द्विपददुर्गमम् ॥ तत्र ज्ञातीन् समाधाय यवनं घातयामहे ॥ ४९ ॥ इति संमन्त्र्य भगवान् दुर्गं द्वादशयोजनम् ॥ अन्तः समुद्रे नगरं कृत्स्नाद्भुतमचीकरत् ॥ ५० ॥ दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणम् ॥ रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम् ॥ ५१ ॥

घातयामहे । श्रीरुद्रवरपालनाय स्वयं मारणं तु अनुचितम् ॥ ४९ ॥ इतीति ॥ भगवान् सङ्कर्षणेन सहेति संमन्त्र्य विचार्य अन्तःसमुद्रे समुद्रमध्ये दुर्गमचीकरत् कारयामास । तत्र च कृत्स्नमपि वस्तु अद्भुतं सर्वाश्चर्यमयं यत्र तत् द्वादशयोजनविस्तीर्णं नगरं चाचीकरत् । विश्वकर्मणेति शेषः । "अष्टभिर्यवमध्यैः स्यादङ्गुलं द्वादशाङ्गुलः । वितस्तिस्तद्द्वयं हस्तो हस्तौ द्वौ किष्कुरुच्यते ॥ किष्कुद्वयं धनुः प्रोक्तं धनुषो द्विसहस्रकम् । क्रोशः क्रोशौ तु गव्यूतिर्गव्यूती द्वे तु योजनम् ॥ " इति अत्र द्वादशयोजनं नगरं बहिश्च दुर्गमष्टादशयोजनम् । एवं त्रिंशद्योजनं द्वारकापुरम् ॥ ५० ॥ नगरं विशिनष्टि—दृश्यते इति ॥ यत्र नगरे त्वाष्ट्रं त्वष्टा विश्वकर्मा तस्य संबन्धिविज्ञानं ज्ञानसूचकं शिल्पनैपुणं क्रियाकौशलं दृश्यते " रथ्या चत्वरवीथिभिः " रथ्या राजमार्गाः पुरतः वीथ्य उपमार्गाः पश्चिमतः चत्वराण्यङ्गणान्युभयतः रथ्यादिभिर्यथा वास्तु वास्तुगृहादिनिर्माणस्थानं तदनतिक्रम्य निर्मितम् ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरेति॥ सुराणां द्रुमा लताश्च येषु तानि उद्यानानि वाटिकाश्च विचित्राणि उपवनानि समीपवनानि च तैरन्वितं हेममयानि शृङ्गाणि येषां तैर्दिविस्पृग्भिः अत्युच्चैः स्फाटिका अट्टाला उपरिभूमिकाः गोपुराणि पुरद्वाराणि तैश्च निर्मितमित्युत्तरेणान्वयः अन्वितमिति समस्तादपि छित्त्वा वा ॥५२॥ राजतेति ॥ " हेमकुम्भैरलंकृतैः " इति कोष्ठविशेषणम् । राजतारकुटैः रजतं च आरकूटं पित्तलं च तद्विकारैः ताभ्यां निर्मितैः कोष्ठैः अन्नशालाश्वशालादिभिश्च निर्मितं तथा रत्नकूटैः पद्मरागादिशिखरैः हैमैः सौवर्णैः महामरकतमयानि स्थलानि येषु तैर्गृहैश्च विनिर्मितम् ॥५३॥ किंच—वास्तोष्पतीनामिति ॥ नगरगृहादौ वास्तोष्पतीनां देवानां च गृहैर्वलभीभिश्चन्द्रशालिकाभिश्च निर्मितं ब्राह्मणादिचातुर्वर्ण्यजनैराकीर्णं व्याप्तं तथा यदुषु देवाः श्रेष्ठाः कृष्णरामवसुदेवोग्रसेनास्तेषां गृहैरुल्लसत् शोभमानम् । अत्रैवं रचना । परितस्तावत्समुद्रः तदभ्यन्तरे तीरं सुखविहारार्थं परितश्चत्वराणि तदन्तर्दुर्गप्राचीराणि तस्य मध्ये मध्ये रत्नकूटाः तदुपरि हेमशिखराणि तदुपरि हेमकुम्भाः दुर्गचतुर्दिक्षु गोपुराणि तदुपरि स्फाटिकभित्तिमयाट्टालिकाः दुर्गान्तः पुनश्चत्वराणि तत उद्यानोपवने तत्र वापीकूपादि तदन्तः सुरालयाः तदन्तर्यथासन्निधि अश्वान्नगृहाद्याः तदन्तरग्रे विप्राणां गृहाः पश्चाच्छूद्राणां वामे वैश्यानां दक्षिणे

सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् ॥ हेमशृङ्गैर्दिविस्पृग्भिः स्फाटिकाट्टालगोपुरैः ॥५२॥ राजताऽऽरकुटैः कोष्ठैर्हेमकुम्भैरलंकृतैः ॥ रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥ ५३ ॥ वास्तोष्पतीनां च गृहैर्वलभीभिश्च निर्मितम् ॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥ ५४ ॥ सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः ॥ यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्न युज्यते ॥५५॥ श्यामैककर्णान् वरुणो हयाञ्छुक्लान् मनोजवान् ॥ अष्टौ निधिपतिः कोशान् लोकपालो निजोदयान् ॥ ५६ ॥ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये ॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ ५७ ॥

क्षत्रियाणां मध्ये सुधर्मामध्ये मिलित्वा श्रीकृष्णादिचतुर्णां गृहाः गृहमध्ये मरकतस्थल्यः उपरि वलभीहेमकुम्भादय इति ॥ ५४ ॥ सुधर्मामिति ॥ यत्र च अवस्थितो मर्त्यो मनुष्यो मर्त्यधर्मैः क्षुत्पिपासाशोकमोहजरामरणादिभिर्न युज्यते तां सुधर्माख्यां देवताविशेषाधिष्ठितां सभां पारिजातं च हरेः हरये महेन्द्रः प्राहिणोत् त्यक्तवान् शुकपरिक्षित्संवादत्पूर्वभावित्वाद्भूतनिर्देशः । यद्वा । किञ्चिन्न्यूनगुणं पारिजातं प्राहिणोत् प्रास्थापयत् । मुख्यपारिजातं तु हरिर्बलाद्धरिष्यति ॥ ५५ ॥ श्यामेति ॥ वरुणस्तु श्यामः एकः कर्णो येषां तान् सर्वतः शुक्लान् मनोवत् जवो वेगो येषां तान् हयान् प्राहिणोदित्यनुषङ्गः । निधिपतिः कुबेरः अष्टौ कोशान् " पद्मश्चैव महापद्मो मत्स्यः कूर्मस्तथापरः । नीलो मुकुन्दः शङ्खश्च निधयोऽष्टौ प्रकीर्तिताः ॥ " इत्युक्तान् निधीन् प्राहिणोत् । तथाऽन्ये च लोकपाला निजोदयान् निजविभूतीः प्रस्थापितवन्तः लोकपाल इत्येकत्वपाठे अन्यो लोकपाल इति ॥ ५६ ॥ यद्यदिति ॥ हे नृप अन्ये च सिद्धादयः यद्यदाधिपत्यं विभूतिविशेषं भगवता दत्तं तत्सर्वं हरौ भूमिं गते सति स्वसिद्धये स्वाधिकारनिश्चलतासिद्ध्यर्थं तस्मै प्रत्यर्पयामासुः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति सार्द्धम् ॥ यथा कालयवनो माथुराश्च न विदुस्तथा योगस्य योगमायाख्याचिन्त्यशक्तेः प्रभावेण सर्वं स्वकीयं जनं तत्र द्वारकायां नीत्वा प्रापय्य पाद्मोत्तरखण्डे " सुषुप्तान् मथुरायां तु पौरांस्तावज्जनार्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ॥ प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हैमहर्म्यतले विष्टा विस्मयं परमं ययुः ॥ " इति प्रजापालेन रामेण समनुमन्त्रितः त्वमत्र स्थित्वा प्रजाः पालयाहं पलायिष्ये ततो यादवैरवध्यमेनं मुचुकुन्देन घातयिष्यामीति इति कृतानुमन्त्रः पद्ममाली निरायुधः आयुधरहित एव हरिः भक्तदुःखहरः कृष्णः पुरद्वारान्निर्जगाम । पद्ममालावत्त्वं नारदोक्तलक्षणापेक्षया निरायुधत्वं पलायनसौकर्यार्थम् ॥५८॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमपञ्चाशे व्यदधादिमाम् ॥५०॥ एकपञ्चाशत्तमे तु घातनं यवनेशितुः ॥ मुचुकुन्दानुग्रहश्च तत्र श्लोकाः शरारयैः ॥ अष्टोवाचेति पादोना द्वाँसप्ततिरनुष्टुभः ॥ ५१ ॥ तमिति षट्कम् ॥ तदन्तर्गतं वासुदेव इति सार्द्धम् ॥ तं पुराद्विनिष्क्रान्तं निस्सृतम् उज्जिहानम् उद्गच्छन्तमुडुपं चन्द्रमिव दर्शनीयत-

तत्र योगप्रभावेण नीत्वा सर्वजनं हरिः ॥ प्रजापालेन रामेण कृष्णः समनुमन्त्रितः ॥ निर्जगाम पुरद्वारात् पद्ममाली निरायुधः ॥ ५८ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे दुर्गनिवेशनं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥ श्रीशुक उवाच ॥ तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपम् ॥ दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥ १ ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ॥ पृथुदीर्घचतुर्बाहुं नवकञ्जारुणेक्षणम् ॥ २ ॥ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् ॥ मुखारविन्दं बिभ्राणं स्फुरन्मकरकुण्डलम् ॥ ३ ॥ वासुदेवो ह्ययमिति पुमान् श्रीवत्सलाञ्छनः ॥ चतुर्भुजोऽरविन्दाक्षो वनमाल्यतिसुन्दरः ॥ लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति ॥ ४ ॥ निरायुधश्चलन् पद्भ्यां योत्स्येऽनेन निरायुधः ॥ ५ ॥ इति निश्चित्य यवनः प्राद्रवन्तं पराङ्मुखम् ॥ अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनाम् ॥ ६ ॥

ममतिसुन्दरं श्यामं पीते कौशेये वाससी यस्य तं श्रीवत्सो दक्षिणावर्तरोमरेखायां सुवर्णरेखावत्तेजोविशेषो वक्षसि यस्य तं भ्राजत्कौस्तुभेनाऽऽमुक्ता बद्धा अलङ्कृता कन्धरा ग्रीवा यस्य तं पृथवः पीना दीर्घाश्चत्वारो बाहवो यस्य तं नवकञ्जे इवारुणे ईक्षणे यस्य तं नित्यप्रमुदितमित्यादिपञ्चविशेषणविशिष्टं मुखारविन्दं बिभ्राणं तं श्रीकृष्णं विलोक्य श्रीवत्सलाञ्छनः चतुर्भुजः अरविन्दाक्षः वनमाली अतिसुन्दरः अयमेव पुमान् नारदोक्तैर्लक्षणैर्वासुदेवो भवितुमर्हति । ततोऽन्यो न भवितुमर्हति । अयं च निरायुधः पद्भ्यामेव चलति अतोऽहमपि निरायुधः पद्भ्यामेव चलन्ननेन सह योत्स्ये इति निश्चित्य पराङ्मुखं प्राद्रवन्तं योगिनामपि दुरापं तं कृष्णं जिघृक्षुर्यवनः अन्वधावत् श्रीवत्सलाञ्छन इत्यादिद्विरुक्तिर्वक्तृभेदात् क्रियाभेदाच्च न दोषाय ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

हस्तेति ॥ पदे पदे प्रतिपदमात्मानं हस्तप्राप्तमिव दर्शयता हरिणा स यवनेशो दूरमद्रिकन्दरं प्रति नीतः पलायनं चेदं श्रीशिववरपालनाय ॥ ७ ॥ पलायनमिति ॥ यदुकुले जातस्य तव पलायनं न उचितमित्येवं क्षिपन् वचसाभिभवन् वस्तुतस्तु इदं तव पलायनं न भवति किन्तु यदुकुले जातस्य यादवावध्यत्वरूपं महेशवरं पालयतो विधानान्तेरण शत्रुपराभवञ्चिकीर्षतस्तवोचितं संप्रति योग्यमेवेदमिति क्षिपन् द्रुतं गन्तुं प्रेरयन् अनुगतोऽपि न हतमशुभं भगवत्स्पर्शादिलाभप्रतिबन्धकं दुरितं यस्य मुक्तिप्रतिबन्धकं तु दुरितं भगवद्दर्शनादेव नष्टम् । मल्लेभकंसयवना इत्यादिना तन्मुक्तेरुक्तत्वात् । अत एनं भगवन्तं स्प्रष्टुं न प्राप ॥ ८ ॥ एवमिति ॥ एवं क्षिप्तोऽपि भगवान् मुचुकुन्ददृष्ट्या तं भस्मीकर्तुं तूष्णीमेव गिरिकन्दरं प्राविशत् प्रविश्य च मुचुकुन्दशिरःप्रदेशेऽतिष्ठदिति हरिवंशे । स यवनोऽपि तत्र गिरिकन्दरे प्रविष्टः सन्नन्यं शयानं कञ्चिन्नरं ददृशे । तङार्षः ॥ ९ ॥ नन्विति ॥ नन्ववधारणे । असौ वासुदेव एव मां दूरमानीयेह गुहायां साधुवत् शेते इति तं सुप्तं नरमच्युतं कृष्णं मत्वा स मूढः पदा पादेन समताडयत् ॥ १० ॥

हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे ॥ नीतो दर्शयता दूरं यवनेशोऽद्रिकन्दरम् ॥७॥ पलायनं यदुकुले जातस्य तव नोचितम् ॥ इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥ ८ ॥ एवं क्षिप्तोऽपि भगवान् प्राविशद्गिरिकन्दरम् ॥ सोऽपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरम् ॥ ९ ॥ नन्वसौ दूरमानीय शेते मामिह साधुवत् ॥ इति मत्वाऽच्युतं मूढस्तं पदा समताडयत् ॥ १० ॥ स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ॥ दिशो विलोकयन् पार्श्वे तमद्राक्षीदवस्थितम् ॥ ११ ॥ स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत ॥ देहजेनाऽग्निना दग्धो भस्मसादभवत् क्षणात् ॥ १२ ॥ राजोवाच ॥ को नाम स पुमान् ब्रह्मन् कस्य किंवीर्य एव च ॥ कस्माद्गुहां गतः शिश्ये किंतेजो यवनार्दनः ॥ १३ ॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जातो मान्धातृतनयो महान् ॥ मुचुकुन्द इति ख्यातो ब्रह्मण्यः सत्यसङ्गरः ॥ १४ ॥ स याचितः सुरगणैरिन्द्राद्यैरात्मरक्षणे ॥ असुरेभ्यः परित्रस्तैस्तद्रक्षां सोऽकरोच्चिरम् ॥ १५ ॥

स इति ॥ स चिरं सुप्तस्ताडितः पुरुष उत्थाय शनैर्लोचने उन्मील्य सर्वा दिशो विलोकयन् स्वपार्श्वेऽवस्थितं तं कालयवनमद्राक्षीत् ॥ ११ ॥ स इति ॥ हे भारत स यवनः रुष्टस्य निद्राभङ्गात् क्रुद्धस्य तस्य पुंसस्तावद्दृष्टिपातेन सन्दीप्तो यस्तद्देहजोऽग्निस्तेन दग्धः संस्तत्क्षणादेव भस्मसादभवत् ॥ १२ ॥ को नामेति ॥ हे ब्रह्मन् यवनार्दनः यवनहिंसकः स पुमान् कः किंजातीयः नाम च तस्य किं कस्य कुले जातः किंवीर्यः कस्य पुत्रः तस्य किं कीदृक् तेजः प्रभावः कस्मात् कारणात् गुहां गतः प्रविष्टः शिश्ये अशयिष्ट ॥ १३ ॥ स इति ॥ स इक्ष्वाकुकुले जातः मान्धातृतनयः गुणैर्महान् नाम्ना मुचुकुन्द इति ख्यातः ब्रह्मण्यः ब्राह्मणभक्तः सत्यः धर्म्यः सङ्गरो युद्धं प्रतिज्ञा वा यस्य तादृश आसीत् ॥ १४ ॥ स इति ॥ सः मुचुकुन्दः असुरेभ्यः परित्रस्तैः सुरगणैरिन्द्राद्यैः देवैरात्मरक्षणे निमित्ते सहायत्वेन याचितः सन् चिरं तेषां रक्षामकरोत् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लब्ध्वेति ॥ अथ ते देवाः गुहं कार्त्तिकेयं स्वःपालं स्वर्गपालं सेनान्यं लब्ध्वा मुचुकुन्दमब्रुवन् । हे राजन् नोऽस्माकं परिपालनात्मकात् कृच्छ्रात् कष्टात् भवान् विरमतां विरमतु। तङार्षः ॥ १६ ॥ नरेति ॥ हे वीर निहतकण्टकं शत्रुरहितं राज्यं नरलोकं च परित्यज्य केवलमस्मान् पालयतस्ते तव सर्वे कामाः उज्झिता गताः ॥१७॥ सुता इति ॥ भवतः सुताः महिष्यः ज्ञातयः अमात्या मन्त्रिणश्चेत्यमात्यमन्त्रिणोः कर्म मन्त्रसहायतया भेदः कल्प्यः। तुल्यकालीयाः त्वत्समानकाले भवाः आर्षश्छप्रत्ययः। प्रजाश्च कालिताः कालेन चालिताः मृता अतः अधुना न सन्ति ॥ १८ ॥ काल इति ॥ सर्वेषामपि बलिनां मध्ये कालो बलीयान् भगवान् ईश्वरः अव्ययश्च अत एव क्रीडन् अनायासेनैव प्रजाः कालयते चालयति। यथा पशुपालः पशून् कालयते तथेति ॥ १९ ॥ वरमिति ॥ ते तव भद्रं भवतु अद्य नः अस्माकं सकाशात् कैवल्यं मोक्षम् ऋते विना वरं वृणीष्व तस्य मोक्षस्य ईश्वरः दाने समर्थस्तु एको भगवान् अव्ययः विष्णुरेव न वयमिति। अत्र प्रकरणे " स्वपन्तं यस्तु वै मध्ये बोधयेत्त्वामचेतनः। स त्वया दृष्टमात्रस्तु

लब्ध्वा गुहं ते स्वः पालं मुचुकुन्दमथाब्रुवन् ॥ राजन् विरमतां कृच्छ्राद्भवान् नः परिपालनात् ॥ १६ ॥ नरलोके परित्यज्य राज्यं निहतकण्टकम् ॥ अस्मान् पालयतो वीर कामास्ते सर्व उज्झिताः ॥ १७ ॥ सुता महिष्यो भवतो ज्ञातयोऽमात्यमन्त्रिणः ॥ प्रजाश्च तुल्यकालीया नाऽधुना सन्ति कालिताः ॥ १८ ॥ कालो बलीयान् बलिनां भगवानीश्वरोऽव्ययः ॥ प्रजाः कालयते क्रीडन् पशुपालो यथा पशून् ॥ १९ ॥ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः ॥ एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ॥ २० ॥ एवमुक्तः स वै देवानभिवन्द्य महायशाः ॥ अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥२१॥ यवने भस्मसान्नीते भगवान् सात्त्वतर्षभः ॥ आत्मानं दर्शयामास मुचुकुन्दाय धीमते ॥ २२ ॥

भस्मीभवतु तत्क्षणात् ॥ " इति " निद्रामेव ततो वव्रे स राजा श्रमकर्षितः। यः कश्चिन्मम निद्राया भङ्गं कुर्यात्सुरोत्तमाः ॥ स हि भस्मीभवेदाशु तथोक्तश्च सुरैस्तदा" इति च प्रक्षिप्तं सार्द्धश्लोकद्वयम् ॥ २० ॥ एवमिति ॥ एवं देवैरुक्तः स महायशाः मुचुकुन्दः देवानभिवन्द्य निद्रां याचितवानिति शेषः। ततश्च देवदत्तया निद्रया गुहामाविष्टः सन् अशयिष्ट। अत्र निद्राप्रार्थनमिदं वृद्धगर्गोक्तकृष्णदर्शनं यावद्भविष्यति तावन्निद्रैव मम सुखाय न तु जागरः भगवद्दर्शनोत्कण्ठितस्य मम बहुचतुर्युगावच्छिन्नः कालो जागरेण यापयितुमशक्यः। निद्रया तु स कालः क्षणप्राय एव भविष्यतीति जागरयितुर्दाहप्रार्थनं तु शक्रं भीषयितुमेव । अन्यथा पुनरपि दैत्यवधार्थं शक्रो जागरयेत् इति। तच्छयनगुहा तु मथुरामण्डलस्य दक्षिणसीमायां धवलपुरगिरिमध्ये प्रसिद्धा ॥ २१ ॥ यवन इति ॥ एवं यवने भस्मसान्नीते भस्मतां प्रापिते सति कृष्णादियोगं विना सातिरार्षः। सात्वतर्षभः भक्तपालको भगवान् कृष्णः धीमते विवेकिने मुचुकुन्दाय आत्मानं दर्शयामास ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति चतुष्कम् ॥ घनश्यामं पीतकौशेयवाससं श्रीवत्सवक्षसं भ्राजता भ्राजमानेन कौस्तुभेन विराजितं शता आर्षः ॥ २३ ॥ चतुर्भुजं वैजयन्त्या बहुवर्णपुष्पनिर्मितया मालया च रोचमानम् अनुक्ताभरणान्तरसमुच्चयार्थश्चकारः । चारु सुन्दरं प्रसन्नं च वदनं यस्य तं स्फुरती मकाराकारे कुण्डले यस्य तम् ॥ २४ ॥ नृलोकस्य प्रेक्षणीयं दर्शनयोग्यं सानुरागं स्मितमीक्षणं च यस्य तम् अपीच्यम् अतिसुंदरं वयो यस्य तं मत्तस्य मृगेन्द्रस्य सिंहस्येव उदारः श्रेष्ठः विक्रमो गतिर्यस्य तम् ॥ २५ ॥ स्वतेजसा दुर्धर्षम् अभिभवितुमशक्यमेव इवशब्दः एवकारार्थः । तं श्रीकृष्णमालोक्य तस्य तेजसा धर्षितः शङ्कितश्च महाबुद्धी राजा मुचुकुन्दः शनकैः पर्यपृच्छत् ॥ २६ ॥ क इति ॥ यस्त्वं विपिने अरण्ये तत्रापि गिरेर्गह्वरे दुष्प्रवेशस्थाने तत्राप्युरूणि कण्टकानि यस्मिन् तस्मिन् इह स्थाने संप्राप्तः पद्मपलाशसदृशाभ्यां पद्भ्यां विचरसि स भवान् कः ॥ २७ ॥ किं स्विदिति ॥ किंस्विद्वितर्के तेजस्विनां सूर्यादीनां सर्वेषां पुञ्जीभूतं तेजः मूर्तिः प्रभावो दीप्तिर्वा किं तेजोधिष्ठाता भगवान् विभावसुरग्निर्वा किम्

तमालोक्य घनश्यामं पीतकौशेयवाससम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितम् ॥ २३ ॥ चतुर्भुजं रोचमानं वैजयन्त्या च मालया ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुण्डलम् ॥ २४ ॥ प्रेक्षणीयं नृलोकस्य सानुरागस्मितेक्षणम् ॥ अपीच्यवयसं मत्तमृगेन्द्रोदारविक्रमम् ॥ २५ ॥ पर्यपृच्छन्महाबुद्धिस्तेजसा तस्य धर्षितः॥शङ्कितः शनकै राजा दुर्धर्षमिव तेजसा ॥ २६ ॥ मुचुकुन्द उवाच॥ को भवानिह संप्राप्तो विपिने गिरिगह्वरे ॥ पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकण्टके ॥ २७॥ किं स्वित्तेजस्विनां तेजो भगवान् वा विभावसुः ॥ सूर्यः सोमो महेन्द्रो वा लोकपालोऽपरोऽपि वा ॥ २८ ॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभम् ॥ यद्बाधसे गुहाध्वान्तं प्रदीपः प्रभया यथा ॥ २९ ॥ शुश्रूषतामव्यलीकमस्माकं नरपुङ्गव ॥ स्वजन्म कर्म गोत्रं वा कथ्यतां यदि रोचते ॥ ३० ॥ वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्त्रबन्धवः ॥ मुचुकुन्द इति प्रोक्तो यौवनाश्वात्मजः प्रभो ॥ ३१ ॥

एवं सूर्यः सोमो महेन्द्रो वा अपरो लोकपालो वरुणाद्यन्यतमोऽपि वा ॥ २८ ॥ सर्वं विविच्याह—मन्ये इति ॥ देवानामिन्द्रादीनामपि देवा ये ब्रह्मविष्णुरुद्रास्तेषां त्रयाणां मध्ये यः पुरुषर्षभः पुरुषोत्तमो भगवान् विष्णुस्तं त्वामहं मन्ये । यत् यस्मात् गुहाध्वान्तं गिरिगुहागतं हृद्गुहागतं च ध्वान्तं तमो दुःखं च स्वप्रभया तेजसा ज्ञानेन च प्रदीप इव बाधसे विधुनोषि ॥ २९ ॥ शुश्रूषतामिति ॥ हे नरपुङ्गव पुरुषोत्तम यदि रोचते तर्हि शुश्रूषतां श्रोतुमिच्छताम् । आर्षः शता । अस्माकं शेषे षष्ठी । अव्यलीकं निष्कपटं यथा भवति तथा स्वजन्म कर्म गोत्रं च कथ्यताम् ॥ ३० ॥ वयमिति ॥ हे पुरुषव्याघ्र पुरुषश्रेष्ठ हे प्रभो वयं तु क्षत्त्रबन्धवः क्षत्रियाणां बन्धव इति वंश्याभिप्रायेण बहुवचनम् । तत्राप्यैक्ष्वाकाः इक्ष्वाकुवंश्याः “ दाण्डिनायन ” इत्यादिना निपातः । तत्राप्यहं यौवनाश्वात्मजः युवनाश्वस्यापत्यं यौवनाश्वो मान्धाता तस्यात्मजः पुत्रो मुचुकुन्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति नाम्ना प्रोक्तः ॥ ३१ ॥ चिरेति ॥ सोऽहं देवैः प्रार्थितः तेषां रक्षां कुर्वन् चिरप्रजागरेण श्रान्तः निद्रया उपहतान्यभिभूतानीन्द्रियाणि यस्य सोऽस्मिन् विजने देशे कामं यथेच्छं शये शयितवान् केनाप्यधुनोत्थापितोऽस्मि ॥ ३२ ॥ सोऽपीति ॥ यो मामुत्थापितवान् सोऽपि आत्मीयेन स्वीयेनैव पापेन शयानं न प्रबोधयेदिति वाक्योल्लङ्घनजनितेन नूनं भस्मीकृतः मद्दृष्टिप्रपातस्तु निमित्तमात्रमित्याशयः । तदनन्तरं च अमित्राणां शातनो नाशकः श्रीमान् भवान् लक्षितः ॥ ३३ ॥ तेजसेति ॥ हे महाभाग ते तव अविषह्येन सोढुमशक्येन तेजसा हतमोजो दर्शनसामर्थ्यं येषां ते । वयं तु भूरि चिरं त्वां द्रष्टुमपि न शक्नुमः कुतस्तत्त्वतो ज्ञातुं तथापि त्वं देहिनाम्माननीयोऽसीत्येतावदेव ज्ञायते ॥ ३४ ॥ एवमिति ॥ राज्ञा मुचुकुन्देन भूतभावनः भगवानेवं सम्यक् सत्कारपूर्वकं भाषितः पृष्टः सन् प्रहसन् मेघस्य नादो गर्जितं तद्वद् गभीरया वाण्या तं प्रत्याह स्म ॥ ३५ ॥ जन्मेति ॥ अङ्ग हे राजन् मे मम जन्मानि कर्माणि अभिधानानि नामानि च सहस्रशः असंख्यानि सन्ति अतः अनन्तत्वात् मयापि अनुसंख्यातुं गणयितुं नु इति

चिरप्रजागरश्रान्तो निद्रयोपहतेन्द्रियः ॥ शयेऽस्मिन् विजने कामं केनाप्युत्थापितोऽधुना ॥ ३२ ॥ सोऽपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना ॥ अनन्तरं भवान् श्रीमाँल्लक्षितोऽमित्रशातनः ॥ ३३ ॥ तेजसा तेऽविषह्येण भूरि द्रष्टुं न शक्नुमः ॥ हतौजसो महाभाग माननीयोऽसि देहिनाम् ॥ ३४ ॥ एवं संभाषितो राज्ञा भगवान् भूतभावनः ॥ प्रत्याह प्रहसन् वाण्या मेघनादगभीरया ॥ ३५ ॥ श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशः ॥ न शक्यन्तेऽनुसंख्यातुमनन्तत्वान्मयापि हि ॥ ३६ ॥ क्वचिद्र रजांसि विममे पार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ॥ ३७ ॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥ अनुक्रमन्तो नैवान्तं गच्छन्ति परमर्षयः ॥ ३८ ॥ तथाप्यद्यतनान्यङ्ग शृणुष्व गदतो मम ॥ ३९ ॥ विज्ञापितो विरिञ्चेन पुराऽहं धर्मगुप्तये ॥ भूमेर्भारायमाणानामसुराणां क्षयाय च ॥ अवतीर्णो यदुकुले गृह आनकदुन्दुभेः ॥ ४० ॥

च्छेदो वा नैव शक्यन्ते एवकारार्थे हिशब्दः । न चैवं सर्वज्ञत्वहानिः अनन्तानाम् अनन्ततया ज्ञानमेव सर्वज्ञत्वावहं नतु परिच्छिन्नतया ज्ञानं तस्यायथार्थत्वेन अज्ञत्वावहत्वात् ॥ ३६ ॥ क्वचिदिति ॥ क्वचित् कदाचित्कश्चित्सूक्ष्मदर्शी उरुभिर्बहुभिर्जन्मभिः पार्थिवानि पृथिव्याः संबन्धीनि रजांसि विममे गणितवान् गणयेदपि मे मम गुणान् कर्माणि अभिधानानि जन्मानि च कर्हिचिदपि न गणयितुं शक्नुयात् । यद्वा।गुणैः कर्म्मभिश्चाभिधानानि नामानि यत्र तादृशानि जन्मानि ॥ ३७ ॥ कालेति ॥ हे नृप परमर्षयः नारदादयोऽपि कालत्रयोपपन्नानि भूतादिकालत्रयसंबन्धीनि मम जन्मानि कर्माणि चानुक्रमन्तोऽनुक्रमेण वर्णयन्तः दीर्घाभाव आर्षः । अद्याप्यन्तं पारं नैव गच्छन्ति ॥ ३८ ॥ तथापीति अर्द्धम् ॥ अङ्ग हे राजन् तथापि अद्यतनानि आधुनिकानि मम जन्मादीनि गदतो मत्तः शृणुष्व। तङार्षः॥ ३९ ॥ विज्ञापित इति सार्द्धम् ॥ धर्मस्य गुप्तये संरक्षणार्थं

CC-0. In Public Domain. Digitization by eGangotri

तथा भूमेर्भारायमाणानां भारभूतानाम् असुराणां क्षयाय च विरिञ्चेन ब्रह्मणा पुरा विज्ञापितः प्रार्थितोऽहं यदुकुले तत्राप्यानकदुन्दुभेर्वसुदेवस्य गृहेऽवतीर्णोऽस्मि ॥ ४० ॥ वदन्तीति ॥ हि यतः वसुदेवसुतत्वादेव मां वासुदेवेति वदन्ति सुप्सुपेति समासः । तथा मया कंसरूपः कालनेमिः तन्नामा असुरः हतः । सद्द्विषः सतां द्वेषिणः प्रलम्बाद्याश्च हताः ॥ ४१ ॥ अयमिति ॥ हे राजन् अयं च कालयवनस्ते तव तिग्मेन तीक्ष्णेन चक्षुषा निमित्तेन सर्वोपायविदा मयैव दग्धः स ईश्वरोऽहं तवानुग्रहार्थमेतां गुहामुपागतः ॥ ४२ ॥ प्रार्थित इति सार्द्धम् ॥ भक्तवत्सलोऽहं पूर्वं प्रचुरं यथा स्यात्तथा त्वया प्रार्थितः समाराधितः अतः हे राजर्षे त्वं वरान् वृणीष्व अहं ते तुभ्यं सर्वान् कामान् ददामि दास्यामि मां प्रपन्नो यः कश्चित् कोऽपि जनो भूयः अपूर्णोऽहमिति शोचितुं नार्हति । यद्वा । अन्यैर्दत्तेषु वरेषु यथा क्षयवशाच्छोचति तथा मां प्रपन्नः शोचितुं नार्हति । मद्दत्तवराणामक्षयत्वात् ॥ ४३ ॥ इत्युक्त इति ॥ इत्येवं भगवतोक्तः अतस्तद्वचनादेव वृद्धगर्गस्य ऋषेर्वाक्यम् अष्टाविंशतितमे युगे भगवान् वसुदेवगृहेऽ-

वदन्ति वासुदेवेति वसुदेवसुतं हि माम् ॥ कालनेमिर्हतः कंसः प्रलम्बाद्याश्च सद्द्विषः ॥ ४१ ॥ अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ सोऽहं तवानुग्रहार्थं गुहामेतामुपागतः ॥ ४२ ॥ प्रार्थितः प्रचुरं पूर्वं त्वयाऽहं भक्तवत्सलः ॥ वरान् वृणीष्व राजर्षे सर्वान् कामान् ददामि ते ॥ मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुम् ॥ ४३ ॥ श्रीशुक उवाच ॥ इत्युक्तस्तं प्रणम्याह मुचुकुन्दो मुदान्वितः ॥ ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ॥४४॥ मुचुकुन्द उवाच ॥ विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ॥ सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित् पुरुषश्च वञ्चितः ॥ ४५ ॥ लब्ध्वा जनो दुर्लभमत्र मानुषं कथञ्चिदव्यङ्गमयत्नतोऽनघ ॥ पादारविन्दं न भजत्यसन्मतिर्गृहान्धकूपे पतितो यथा पशुः ॥ ४६ ॥

वतरिष्यति तं त्वं द्रक्ष्यसीत्येवंविधमनुस्मरन् तं कृष्णं नारायणं देवं ज्ञात्वा मुदान्वितो हर्षेण पूर्णो मुचुकुन्दस्तं प्रणम्याह स्म ॥ ४४ ॥ भक्तिरेव वरणीया ननु कामा इत्याशयेनाभक्तानां संसारं वदन् स्तौति–विमोहित इति ॥ हे ईश योषित्पुरुषश्चेति द्विविधोऽप्ययं जनः त्वदीयया मायया विमोहितोऽनर्थदृक् अनर्थे संसारे दृक् दृष्टिर्यस्यासौ । यद्वा । अर्थं परमार्थस्वरूपं त्वां न पश्यतीति तथा अतस्त्वां न भजति किं तु परस्परं वञ्चितः सन् सुखाय सुखं लब्धुं दुःखानामेव प्रभवो येषु तेषु गृहेष्वेव सज्जते ॥ ४५ ॥ मानुषं लब्ध्वेति ॥ हे अनघ अयत्नतः अनायासेन कथंचित् भवदनुग्रहेण दुर्लभम् अव्यङ्गम् अविकलाङ्गम् अन्तःकरणेन्द्रियादियुक्तं भजनयोग्यं प्रत्यङ्गमित्यपि पाठः । मानुषं शरीरम् अत्र भूमौ भारते वर्षे लब्ध्वाप्यसन्मतिः असती दुष्टा विषयव्याप्ता मतिर्यस्य स जनो भवत्पादारविन्दं न भजति किंतु गृह एवान्धकूपस्तस्मिन्पतितो भवति । पशुर्यथा तृणलोभेनान्धकारयुक्ते कूपे पतति तद्वत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमहं निन्दामि स चाहमेवेत्याह—ममेति ॥ हे अजित राज्यश्रिया उन्नद्धः प्रभूतो मदो यस्य तस्य भुवः पतेर्मर्त्ये मरणशीले देहे आत्मा इति बुद्धिर्यस्य तस्य दुरन्तया चिन्तया पोषणादिविषयया सुतदारकोशभूषु आसज्जमानस्य आसक्तस्य मम एषः भूतः कालो निष्फल एव गतः ॥ ४७ ॥ कलेवर इति ॥ दृश्यत्वानात्मत्वादिना घटः कुड्यं भित्तिः तेन सन्निभे सदृशेऽस्मिन्कलेवरे देहे नरदेवो राजा इत्येवं निरूढाभिमानोऽहं त्वा त्वां कालरूपमगणयन् रथाश्च इभाश्च गजाश्च अश्वाश्च पदातयश्च तेषामनीकानि सैन्यानि तानि पान्तीति तथा तैर्वृतो गां भूमिं पर्यटन् दुष्टो मदो यस्य तथाभूतो जातः अतो ममैष कालो निष्फलो गतः ॥ ४८ ॥ प्रमत्तमिति ॥ कृत्यचिन्तया इदम् एवं कर्तव्यमित्यादिचिन्तया उच्चैरतिशयेन प्रमत्तं प्रवृद्धलोभं विषयेषु लालसमतिस्पृहावन्तं जनमप्रमत्तः सावधानस्तत्तत्प्राणिकर्मभोगसमाप्तिमनुसन्दधानः अन्तकः कालरूपस्त्वं सहसा अकस्मादेवाभिपद्यसे बलाद् ग्रससे। यथा क्षुधा सृक्किणी लेलिहानोऽहिराखुं मूषकं ग्रसते तद्वत् ॥ ४९ ॥ पुरेति ॥ पुरा जीवदवस्थायां हेमपरिष्कृतैः

ममैष कालोऽजित निष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ॥ मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरन्तचिन्तया ॥ ४७ ॥ कलेवरेऽस्मिन् घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहम् ॥ वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वागणयन् सुदुर्मदः ॥४८ ॥ प्रमत्तमुच्चैरिति कृत्यचिन्तया प्रवृद्धलोभं विषयेषु लालसम् ॥ त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः ॥ ४९ ॥ पुरा रथैर्हेमपरिष्कृतैश्चरन्मतङ्गजैर्वा नरदेवसंज्ञितः ॥ स एव कालेन दुरत्ययेन ते कलेवरो विट्कृमिभस्मसंज्ञितः ॥५०॥ निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवन्दितः ॥ गृहेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पूरुष ईश नीयते ॥ ५१ ॥ करोति कर्माणि तपस्सु निष्ठितो निवृत्तभोगस्तदपेक्षयाददत् ॥ पुनश्च भूयेयमहं स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते ॥ ५२ ॥

सुवर्णालङ्कारालङ्कृतै रथैर्मतङ्गजैर्वा चरन् यो नरदेवसंज्ञितो भवति स एव कलेवरः पुंस्त्वमार्षमिति तोषिणी। दुरत्ययेन दुरतिक्रमणीयेन ते त्वया कालरूपेणाभिपन्नः सृगालादिभिर्भक्षितो विट्संज्ञितः तैरभक्षितो न दग्धश्चेत् कृमिसंज्ञितो दग्धश्चेत् भस्मसंज्ञितो भवति ॥ ५० ॥ निर्जित्येति ॥ हे ईश दिक्चक्रं दिङ्मण्डलं निर्जित्य अभूतः असम्भावितः विग्रहो विरोधी शत्रुवर्गः यस्य तथाभूतः असम्भावितसंग्रामो वा। अत एव वरासनस्थः सार्वभौमासनाधिष्ठितः अत एव पूर्वं समास्तुल्या राजानस्तैरपि वन्दितोऽपि पूरुषः मैथुन्यमेव सुखं येषु तेषु गृहेषु योषितां स्त्रीणां तु क्रीडामृगः वानर इव नीयत इतस्ततश्चाल्यते ॥ ५१ ॥ करोतीति ॥ तपःसु ब्रह्मचर्यव्रतादिषु निष्ठितः नितरां स्थितः अतः निवृत्तभोगः तदपेक्षया भोगापेक्षया ददत् दानादि कुर्वन् जनः कर्माणि करोति ततः पुनश्चाहं स्वराट् इन्द्रः जन्मान्तरे चक्रवर्ती वा भूयेयं भूयासम् आर्षः प्रयोग इति प्रवृद्धतर्षः जनः सुखाय न कल्पते सुखमनुभवितुं न शक्नोति ॥ ५२ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

एवं बहिर्मुखानां संसरणमुक्त्वा तन्निवृत्तिकालमाह—भवेति ॥ हे अच्युत भ्रमतः संसरतो जनस्य यदा सतां समागमो मेलनं भवति तर्हि भवापवर्गः संसारनिवृत्तिर्भवेत् । तत्र हेतुः यतः । यर्हि यदैव सत्सङ्गमो भवति तदैव तदुपदेशादिना सद्गतौ सद्भिः प्राप्ये परे कालादयः अवरे देवाद्यास्तेषामीशे त्वयि मतिः प्रेमभक्तिः जायते ॥ ५३ ॥ मन्य इति॥ हे ईश यदृच्छया अनायासेनैव राज्यरूपो योऽनुबन्धः पाशः तस्यापगमो जात इति मम त्वितः प्रागेव ते त्वया महान् अनुग्रहः कृतः इति मन्ये।यो राज्यानुबन्धापगमः साधुभिः एकचर्यया एकाकिसंचरणपूर्वकं वनं विविक्षद्भिस्तपसे वनं प्रवेष्टुमिच्छद्भिः अखण्डभूमिपैः सार्वभौमैरपि राजभिस्त्वत्तः प्रार्थ्यते॥५४॥नेति॥हे विभो हे हरे अकिञ्चनैः त्यक्तसर्वभोगैरपि प्रार्थ्यतमात् तव पादसेवनात् अत्र प्रार्थ्याभक्तिः प्रार्थ्यतरं दर्शनं प्रार्थ्यतमं साक्षात् पादसेवनं तस्मात् अन्यं वरं न कामये । हि यतः अपवर्गदं मोक्षप्रदं भक्तिप्रदं वा त्वामाराध्य आराधनेन प्रसन्नीकृत्य आर्यो विवेकी चेत्को वा पुमान् आत्मनो बन्धनं त्वया दित्सितमपि विषयजातं वरं वृणीते वृणुयात् । अहं तु मोक्षमप्य-

भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ॥ सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥ ५३ ॥ मन्ये ममा-
नुग्रह ईश ते कृतो राज्यानुबन्धापगमो यदृच्छया ॥ यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिरखण्डभूमिपैः ॥ ५४ ॥ न कामयेऽन्यं तव
पादसेवनादकिञ्चनप्रार्थ्यतमाद्वरं विभो ॥ आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबन्धनम् ॥ ५५ ॥ तस्माद्विसृज्याशिष ईश
सर्वतो रजस्तमःसत्त्वगुणानुबन्धनाः ॥ निरञ्जनं निर्गुणमद्वयं परं त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥ ५६ ॥ चिरमिह वृजिनार्तस्तप्यमानोऽ-
नुतापैरवितृषषडमित्रोऽलब्धशान्तिः कथञ्चित् ॥ शरणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि माऽऽपन्नमीश ॥५७॥ श्रीभगवानु-
वाच ॥ सार्वभौम महाराज मतिस्ते विमलोर्जिता ॥ वरैः प्रलोभितस्यापि न कामैर्विहता यतः ॥ ५८ ॥

निच्छन् कथन्तरां वृणुयाम् ॥ ५५ ॥ तस्मादिति ॥ हे ईश तस्मात् तवैव प्राप्यत्वात् रजस्तमःसत्वैर्गुणैरनुबध्यन्ते संसृज्यन्ते इति तथा आशिषः ऐश्वर्यशत्रुनाशधर्मादिरूपाः सर्वतो विसृज्य इति पादसेवनान्तरायभूतो मोक्षोऽपि निरस्तः । निरञ्जनं निर्गुणम् अद्वयं परं पुरुषमीश्वरं ज्ञप्तिमात्रं ज्ञानघनं त्वां शरणं व्रजामि ॥ ५६ ॥ ननु भुङ्क्ष्व भोगान् प्रेमपादसेवनमपि ते दास्याम्येवेति वरैः प्रलोभयन्तं पादोपसङ्ग्रहेण प्रार्थयते—चिरमिति ॥ शरणं स्वज्ञानं ददातीति हे शरणद हे परात्मन् हे ईश इह संसारे चिरं वृजिनैः कर्मफलैरार्त्तः पुनश्च अनुतापैस्तद्वासनाभिस्तप्यमानस्तथापि अवितृषषडमित्रः तृडेव तृषा तृष्णा न विगततृषाः षडमित्रा शत्रव इन्द्रियलक्षणा यस्य सः अत एवा-लब्धशान्तिः ततः कथञ्चिद्दैववशेन लब्धशान्तिर्वा अहम् अभयम् ऋतं सत्यम् अशोकं त्वत्पदाब्जं समुपेतः अतः आपन्नम् आपद्व्याप्तं मां पाहि ॥ ५७ ॥ सार्वभौमेति ॥ हे सार्वभौम हे महाराज तव मतिर्विमला रागलोभादिमलरहिता अत एव ऊर्जिता परमार्थदर्शने समर्था यतो वरैः प्रलोभितस्यापि तव बुद्धिः कामैः साम्राज्यादिमोक्षान्तैर्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहता नाकृष्टा ॥ ५८ ॥ प्रलोभित इति ॥ यत्त्वं मया वरैः प्रलोभितस्तत् प्रलोभनमप्रमादाय लोके भक्तस्य बुद्धेरप्रमादमनासक्तिं दर्शयितुं विद्धि जानीहि । यतः मय्ये-
कान्तभक्तानां धीः प्राप्ताभिरप्याशीर्भिर्विषयैः क्वचिदपि न भिद्यते नासज्जते ॥ ५९ ॥ युञ्जानानामिति ॥ हे राजन् अभक्तानां तु प्राणायामादिभिर्युञ्जानानां निरोधार्थं
प्रयतमानानामपि मनः यतः अक्षीणवासनम् अतः क्वचिदुत्थितं विषयाभिमुखं दृश्यते ॥ ६० ॥ विचरस्वेति ॥ तुभ्यं तव तु अनपायिनी अव्यभिचारिणी भक्तिर्मयि
नित्यदा सर्वदा दा आर्षः । अस्त्येवातः कृतार्थत्वात् मयि आवेशितं मानसं येन तथाभूतस्त्वं कामं यथेच्छं महीं विचरस्व । तङार्षः ॥ ६१ ॥ क्षात्रेति ॥ क्षात्रधर्मे
राज्ये स्थितः सन् लोकरक्षानुपयुक्तमृगयादिव्यापारैस्त्वं जन्तून्व्यवधीर्हतवान् असि अतः अहमेवाश्रयो यस्य तथाभूतः समाहितो जितेन्द्रियश्च संस्तत् मृगयादिजनितमघं
पापवासनां जहि अपनय ॥ ६२ ॥ जन्मनीति ॥ हे राजन् अनन्तरे एतज्जन्माव्यवहिते जन्मनि त्वं सर्वभूतानां सुहृत्तमः सौहार्दयुक्तो द्विजवरश्च भूत्वा केवलमद्वयं

प्रलोभितो वरैर्यत्त्वमप्रमादाय विद्धि तत् ॥ न धीर्मय्येकभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥ ५९ ॥ युञ्जानानामभक्तानां प्राणायामादि-
भिर्मनः ॥ अक्षीणवासनं राजन् दृश्यते पुनरुत्थितम् ॥ ६० ॥ विचरस्व महीं कामं मय्यावेशितमानसः ॥ अस्त्वेव नित्यदा तुभ्यं
भक्तिर्मय्यनपायिनी ॥ ६१ ॥ क्षात्रधर्मे स्थितो जन्तून्न्यवधीर्मृगयादिभिः ॥ समाहितस्तत्तपसा जह्यघं मदुपाश्रितः ॥ ६२ ॥ जन्मन्य-
नन्तरे राजन्सर्वभूतसुहृत्तमः ॥ भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम् ॥ ६३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे
मुचुकुन्दस्तुतिर्नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ श्रीशुक उवाच ॥ इत्थं सोऽनुगृहीतोऽङ्ग कृष्णेनेक्ष्वाकुनन्दनः ॥ तं परिक्रम्य संनम्य
निश्चक्राम गुहामुखात् ॥ १ ॥ स वीक्ष्य क्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन् ॥ मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तराम् ॥ २ ॥ तपः-
श्रद्धायुतो धीरो निःसङ्गो मुक्तसंशयः ॥ समाधाय मनः कृष्णे प्राविशद्गन्धमादनम् ॥ ३ ॥

मामेवोपैष्यसि तथैव प्रारब्धात् इति भावः ॥ ६३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ दशमस्यैकपञ्चाशे व्यधाद्गङ्गासहायकः ॥ ५१ ॥ द्विपञ्चाशत्तमे कृष्णो
द्वारकां प्राप रुक्मिणीम् ॥ विवोढुं स्वीचकारात्र श्लोका जलधिर्वार्द्धयः ॥ उवाचपञ्चकं साङ्घ्रिर्नववेदा अनुष्टुभः ॥ ५२ ॥ इत्थमिति ॥ अङ्ग हे राजन् स इक्ष्व कुनन्दनो
मुचुकुन्दः इत्थमुक्तप्रकारेण कृष्णेनानुगृहीतः तं कृष्णं परिक्रम्य प्रदक्षिणीकृत्य सन्नम्य प्रणम्य च गुहाया मुखात् द्वाराद्बहिर्निश्चक्राम । भगवन्निर्गमात्पूर्वमेव निर्गतवान्
॥ १ ॥ स इति ॥ स मुचुकुन्दः क्षुल्लकान् अल्पपरिमाणान् मर्त्यादीन् वीक्ष्य ततश्च कलियुगं प्राप्तम् आसन्नत्वेन प्राप्तप्रायं मत्वा उत्तरां दिशं प्रति तपः कर्तुं जगाम
॥ २ ॥ तप इति ॥ तपसि श्रद्धायुक्तः धीरो जितेन्द्रियः देहादिषु निःसङ्गः आसक्तिरहितः मुक्तसंशयः स्वकृतार्थतायां संशयरहितः स्वमनः कृष्णे समाधाय स्थिरीकृत्य

CC-0. In Public Domain. Digitization by eGangotri

गन्धमादनाख्यं पर्वतं प्राविशत् ॥ ३ ॥ बदरीति ॥ बदर्याश्रमं तत्रापि नरनारायणयोरालयं स्थानमासाद्य प्राप्य सर्वाणि द्वन्द्वानि शीतोष्णादीनि सहत इति तथा शान्तः कामक्रोधादिभी रहितः हरिं भगवन्तं तपसाराधयामास ॥ ४ ॥ भगवानिति ॥ भगवान् यवनैरावेष्टितां पुरीं मथुरां पुनरागत्य म्लेच्छानां बलं सैन्यं हत्वा तदीयं धनं भूषणादिकं द्वारकां प्रति निन्ये नेतुमुद्युक्तो बभूव ॥ ५ ॥ नीयमान इति ॥ अच्युतेन कृष्णेन चोदितैर्नृभिः कर्तृभिः गोभिः साधनैर्धने नीयमाने सति त्रयोविंशत्यक्षौहिणीसैन्याधिपतिर्जरासन्ध आजगाम ॥ ६ ॥ विलोक्येति ॥ हे राजन् रिपुसैन्यस्य वेगरभसं वेगोद्रेकम् अवलोक्य मनुष्ययोग्यां चेष्टां चातुर्यक्रियामापन्नौ माधवौ रामकृष्णौ द्रुतं त्वरितं यथा भवति तथा दुद्रुवतुः पलायितवन्तौ । मनुष्यचेष्टामित्यादेर्वस्तुतोऽयं भगवतोऽभिप्रायः येषां रक्षार्थं मया योद्धव्यं ते ज्ञातिसंबन्धिप्रमुखा द्वारकां प्रापिता एव । अधुना केवलाभ्यां मागधबलनाशने कृते हतोत्साहो जरासन्धो रुक्मिणीविवाहे मां योधयितुं नागमिष्यत्येव । अधुना पराजयाभासे प्रदर्शिते तु उत्साहवशाद् रुक्मिणी-

बदर्याश्रममासाद्य नरनारायणालयम् ॥ सर्वद्वन्द्वसहः शान्तस्तपसाऽऽराधयद्धरिम् ॥ ४ ॥ भगवान्पुनराव्रज्य पुरीं यवनवेष्टिताम् ॥ हत्वा म्लेच्छबलं निन्ये तदीयं द्वारकां धनम् ॥ ५ ॥ नीयमाने धने गोभिर्नृभिश्चाच्युतचोदितैः ॥ आजगाम जरासन्धस्त्रयोविंशत्यनीकपः ॥ ६ ॥ विलोक्य वेगरभसं रिपुसैन्यस्य माधवौ ॥ मनुष्यचेष्टामापन्नौ राजन्दुद्रुवतुर्द्रुतम् ॥ ७ ॥ विहाय वित्तं प्रचुरमभीतौ भीरुभीतवत् ॥ पद्भ्यां पद्मपलाशाभ्यां चेलतुर्बहुयोजनम् ॥ ८ ॥ पलायमानौ तौ दृष्ट्वा मागधः प्रहसन्बली ॥ अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥ ९ ॥ प्रद्रुत्य दूरं संश्रान्तौ तुङ्गमारुहतां गिरिम् ॥ प्रवर्षणाख्यं भगवान्नित्यदा यत्र वर्षति ॥ १० ॥ गिरौ निलीनावाज्ञाय नाधिगम्य पदं नृप ॥ ददाह गिरिमेधोभिः समन्तादग्निमुत्सृजन् ॥ ११ ॥

विवाहेऽपि आगमिष्यत्येव । एवं सति तत्र सर्वेषां प्रतिपक्षभूपानां युगपदेव संमेलने एकदैव सर्वान् जेष्यामीति व्यापारलाघवं वीरेषु कीर्तिः मत्पराक्रमदर्शनेन रुक्मिणीहर्षो वैरिणां युगपदुत्साहभङ्गश्चेति कार्यचतुष्कसम्पत्तिः ॥ ७ ॥ विहायेति ॥ नीयमानं यावनं प्रचुरं बहुवित्तं विहाय भीरोरपि भीतवत् अतिभीतवदित्यर्थः । पद्मपलाशसदृशाभ्यां पद्भ्यां बहुयोजनं देशं चेलतुः पलायेताम् ॥ ८ ॥ पलायमानाविति ॥ बली ईशयो रामकृष्णयोः प्रमाणमियत्तां प्रभावं वा न वेत्ति तादृशो मागधः जरासन्धः तौ पलायमानौ दृष्ट्वा प्रहसन् रथानीकैः रथिकसैन्यैः सहान्वधावत् । अस्यानीकैः सह पृष्ठतो धावनात्तद्धनं निर्विघ्नं द्वारकां नीतमिति ज्ञेयम् ॥ ९ ॥ प्रद्रुत्येति ॥ दूरं प्रद्रुत्य पलाय्य सुश्रान्तौ रामकृष्णौ तुङ्गमत्युन्नतं प्रकर्षेण वर्षत्यस्मिन्निति प्रवर्षणाख्यम् अग्निदाहशङ्काशून्यं गिरिमारुहतां छान्दसश्चश्लेरङ् । भगवान् पर्जन्यो यत्र गिरौ नित्यदा वर्षति ॥ १० ॥ गिराविति ॥ हे नृप जरासन्धस्तौ रामकृष्णौ गिरौ निलीनावाज्ञाय तत्र विचिन्वन्नपि तयोः पदं निलयस्थानमनधिगम्य अज्ञात्वा । यद्वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरेरन्यत्र तयोः पदचिह्नं नाधिगम्य अतः गिरावेव क्वचिन्निलीनावन्तर्हिता वाज्ञायेति तद्दाहार्थम् एधोभिः काष्ठैर्गिरिं समन्ताद्वेष्टयित्वा अग्निमुत्सृजन् काष्ठेषु प्रक्षिपन् ददाह ॥ ११ ॥ तत इति ॥ दह्यमानं तटं प्रान्तभागमात्रं यस्य तस्मात् दश चैकं च यानि योजनानि तावदुत्तुङ्गात्ततो गिरेः सकाशात्तरसा वेगेन उत्प्लुत्य मागधसंरोधदेशमतिक्रम्य परतोऽधो भुवि भूमौ निपेततुः ॥ १२ ॥ अलक्ष्यमाणाविति ॥ हे नृप सानुगेन अनुगैः सैन्यैः सहितेन रिपुणा जरासन्धेनालक्ष्यमाणौ यदूत्तमौ रामकृष्णौ समुद्र एव परिखा यस्यास्तां पुरीं द्वारकां प्रति पुनरायातौ ॥ १३ ॥ स इति ॥ स मागधोऽपि बलकेशवौ रामकृष्णौ दग्धाविति मृषैव मन्वानः सुमहत् बलं सैन्यमाकृष्य आदाय मागधान् देशान् प्रति ययौ ॥ १४ ॥ श्रीकृष्णविवाहान् वक्तुं नवमस्कन्धोक्तं रामविवाहं स्मारयति—आनर्तेति ॥ आनर्तदेशाधिपतिः श्रीमान् रैवतः रेवतसुतः ककुद्मी ब्रह्मणा चोदितः सन् स्वसुतां रेवतीं बलाय प्रादात् इति पुरा नवमस्कन्धे उदितम् ॥ १५ ॥ भगवानिति द्वयम् ॥ हे कुरूद्वह भगवान् गोविन्दोऽपि सर्वेषां लोकानां जनानां

तत उत्पत्य तरसा दह्यमानतटादुभौ ॥ दशैकयोजनोत्तुङ्गान्निपेततुरधो भुवि॥१२॥ अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ ॥ स्वपुरं पुनरायातौ समुद्रपरिखां नृप॥ १३ ॥ सोऽपि दग्धाविति मृषा मन्वानो बलकेशवौ ॥ बलमाकृष्य सुमहान्मगधान्मागधो ययौ ॥ १४ ॥ आनर्ताधिपतिः श्रीमान्रैवतो रेवतीं सुताम् ॥ ब्रह्मणा चोदितः प्रादाद्बलायेति पुरोदितम् ॥ १५ ॥ भगवानपि गोविन्द उपयेमे कुरूद्वह ॥ वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे ॥ १६ ॥ प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ॥ पश्यतां सर्वलोकानां तार्क्ष्यपुत्रः सुधामिव ॥१७॥ राजोवाच ॥ भगवान्भीष्मकसुतां रुक्मिणीं रुचिराननाम् ॥ राक्षसेन विधानेन उपयेम इति श्रुतम् ॥ १८ ॥ भगवञ्छ्रोतुमिच्छामः कृष्णस्यामिततेजसः ॥ यथा मागधशाल्वादीञ्जित्वा कन्यामुपाहरत् ॥ १९ ॥ ब्रह्मन्कृष्णकथाः पुण्या माध्वीर्लोकमलापहाः ॥ को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥२०॥

पश्यतामेव सतां चैद्यपक्षगान् शाल्वादीन् राज्ञः तरसा बलेन प्रमथ्य अभिभूय जरासन्धस्य मुख्यत्वेऽपि शाल्वादित्वोक्तिः रुक्मिणीहरणोत्तरं शाल्वेनैव सर्वेषां युद्धे प्रवर्तनमिति हरिवंशोक्तेः । वैदर्भीं विदर्भदेशोत्पन्नां श्रियो लक्ष्म्याः मात्रामवतारभूतां भीष्मकस्य राज्ञः सुतां रुक्मिणीं स्वयंवरे आहृत्य उपयेमे परिणीतवान् । विवाहलीलया नीतवान् इत्यर्थः । तार्क्ष्यस्य कश्यपस्य पुत्रो गरुडो यथा देवानभिभूय सुधाम् आहृतवांस्तथा ॥ १६ ॥ १७ ॥ भगवानिति ॥ रुचिरं सुन्दरमाननं यस्यास्तां भीष्मकसुतां रुक्मिणीं भगवान् राक्षसेन विधानेन " राक्षसो युद्धहरणात् इति स्मृतेः । वीरयोग्येन हरणप्रकारेण उपयेमे इति श्रुतम् त्वत्तः पूर्वमेव वा सामान्यतः श्रुतम् ॥१८॥ भगवन्निति ॥ यथा येन प्रकारेण कृष्णो मागधशाल्वादीन् जित्वा रुक्मिणीं कन्यामुपाहरत् तदमितेतजसो महाप्रभावस्य कृष्णस्य चरितं विशेषतः श्रोतुमिच्छामः ॥ १९ ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् शृण्वतां वदतां च पुण्याः महाफलाः माध्वीः श्रुतिसुखावहाः छान्दसो निपातः । लोकानां मलापहाः पापघ्नीः नित्यनूतनाः प्रतिक्षणमाश्चर्यवत्प्रतीयमानाः कृष्णकथाः

CC-0. In Public Domain. Digitization by eGangotri

श्रृण्वानः श्रृण्वन् शानजार्षः चानश वा । श्रुतज्ञो विवेकी को नाम तृप्येत तङार्षः ॥२०॥ राजासीदिति ॥ विदर्भदेशानामाधिपतिर्गुणैश्च महान् भीष्मको नाम राजासीत् । तस्य वरानना उपलक्षणतया सर्वावयवसुन्दरा एका कन्या पञ्च पुत्राश्चाभवन् ॥२१॥ रुक्मीति ॥ रुक्मी अग्रजो ज्येष्ठः तदनन्तरोऽनुजः रुक्मरथः अनन्तरशब्दोऽग्रेप्यन्येति तस्यानन्तरः अनुजः रुक्मबाहुः तदनुजौ रुक्मकेशो रुक्ममालीति च सती सद्गुणसंपन्ना रुक्मिणी एषां रुक्म्यादीनां स्वसा भगिनी ॥ २२ ॥ सेति ॥ सा रुक्मिणी स्वगृहान् प्रत्यागतैर्जनैः गीयमानाः मुकुन्दस्य रूपं सौन्दर्यं प्रभावः गुणाः अन्ये गाम्भीर्यौदार्यादयः श्रीर्भोग्यभोगोपकरणादिसम्पतिः ता एता उपश्रुत्य तमेव मुकुन्दमात्मनः सदृशमनुरूपं पतिं मेने ॥ २३ ॥ तामिति ॥ कृष्णोऽपि तां रुक्मिणीं गृहागतजनमुखात् बुद्धिलक्षणौदार्यरूपशीलगुणानामाश्रयभूतां स्त्रीत्वमार्षम् तेषामाश्रयो यस्या-मिति वा श्रुत्वा आत्मनः सदृशीं भार्यां मत्वा समुद्वोढुम् उपयन्तुं मनो दधे ॥ २४ ॥ बन्धूनामिति ॥ हे नृप बन्धूनां पित्रादीनां कृष्णाय दातुमिच्छतां सतामपिताननादृत्य

श्रीशुक उवाच ॥ राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ॥ तस्य पञ्चाभवन्पुत्राः कन्यैका च वरानना ॥ २१ ॥ रुक्म्यग्रजो रुक्मरथो रुक्म-बाहुरनन्तरः ॥ रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥ २२ ॥ सोपश्रुत्य मुकुन्दस्य रूपवीर्यगुणश्रियः ॥ गृहागतैर्गीयमानास्तं मेने सदृशं पतिम् ॥ २३ ॥ तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयाम् ॥ कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ॥ २४ ॥ बन्धूनामिच्छतां दातुं कृष्णाय भगिनीं नृप ॥ ततो निवार्य कृष्णद्विड् रुक्मी चैद्यममन्यत ॥ २५ ॥ तदवेत्यासितापाङ्गी वैदर्भी दुर्मना भृशम् ॥ विचिन्त्याऽऽप्तं द्विजं कंचित्कृष्णाय प्राहिणोद् द्रुतम् ॥ २६ ॥ द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः ॥ अपश्यदाद्यं पुरुषमासीनं काञ्चनासने ॥ २७ ॥ दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात् ॥ उपवेश्यार्हयाञ्चक्रे यथात्मानं दिवौकसः ॥ २८ ॥

कृष्णद्विट् रुक्मी ततो दानात् तान्निवार्य भगिनीं रुक्मिणीं दातुं चैद्यं शिशुपालं तस्या वरममन्यत ॥ २५ ॥ तदिति ॥ तत् भ्रातुर्दुराग्रहमनिवार्यमवेत्य ज्ञात्वा असितौ अपाङ्गौ नेत्रप्रान्तौ यस्याः सा वैदर्भी रुक्मिणी भृशं दुर्मनाः सुदुःखितचित्ता सती विचिन्त्य श्रीकृष्णप्राप्त्युपायं विचार्य आप्तं तत्र प्राप्तं सत्यवक्तारं वा कंचिद् द्विजं द्रुतं त्वरितं यथा स्यात्तथा कृष्णाय कृष्णमानेतुं प्राहिणोत् प्रेषयामास ॥ २६ ॥ द्वारकामिति ॥ स द्विजः द्वारकां समभ्येत्य सम्यगागत्य तत्रत्यैः प्रतिहारैः द्वारपालैरन्तः-प्रवेशितः सन् काञ्चनमये सिंहासने आसीनम् आद्यं पुरुषं श्रीकृष्णम् अपश्यत् ॥ २७ ॥ दृष्ट्वेति ॥ ब्रह्माणि ब्राह्मणकुले साधवो भक्ता ब्रह्मण्यास्तेषां मध्ये देवः श्रेष्ठः कृष्णस्तं द्विजं दृष्ट्वा निजासनादवरुह्य अवतीर्य तं तत्रासने उपवेश्य अर्हयांचक्रे । दिवौकसो देवा यथात्मानं श्रीकृष्णं पूजयन्ति तद्वत् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ विश्रान्तं विगताध्वश्रमं भुक्तवन्तं तं द्विजं सतां सदाचारनिष्ठानां गतिः फलभूतो भगवानुपगम्य निकटमागत्य स्वपाणिना तत्पादावभिमृशन् शनैः संमर्दयन् अव्यग्रः विवाहार्थं वैयग्र्यसंभावनायामपि व्यग्रतारहितः सन्नपृच्छत । तङार्षः ॥ २९ ॥ कच्चिदिति ॥ हे द्विजवरश्रेष्ठ नातिकृच्छ्रेण अनायाससिद्धेन सदा संतुष्टं मनो यस्य तस्य ते तव वृद्धानां संमतो धर्मः कच्चिद्वर्तते तन्मदिष्टमित्यर्थः ॥ ३० ॥ सन्तुष्ट इति ॥ यर्हि यदा येन केनाप्ययत्नलब्धेनैव देहधारणोपयुक्तेन सन्तुष्टः स्यात् स्ववर्णाश्रमोचितात् धर्मादहीयमानः अप्रच्यवमानश्च ब्राह्मणो वर्तेत तदा स एव सन्तोषपूर्वकमनुष्ठीयमानः स्वधर्म एवास्य पुरुषस्य अखिलान् कामान् इष्टार्थान् दोग्धीति तथाभूतो भवति । हिरे-वार्थे । यद्वा । स ब्राह्मणः अस्य विश्वस्याखिलकामधुक् ॥ ३१ ॥ असन्तुष्ट इति ॥ सुरेश्वरः इन्द्रोऽप्यसंतुष्टश्चेदसकृल्लोकान् आप्नोति लोकाल्लोकान्तरं सुखलाभार्थं पर्यटति नैकत्र निवृत्तस्तिष्ठतीत्यर्थः । लोकानाप्नोतीति पाठे तूत्तमलोकान् प्राप्तो ॥ प्यप्राप्त इव क्लिश्यतीत्यर्थः । संतुष्टश्चेदकिञ्चनो भोजनाच्छादनोपयुक्तधनादिहीनोऽपि सर्वेष्वङ्गेषु

तं भुक्तवन्तं विश्रान्तमुपगम्य सतां गतिः ॥ पाणिनाऽभिमृशन्पादावव्यग्रस्तमपृच्छत ॥ २९ ॥ कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः ॥ वर्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥ ३० ॥ संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित् ॥ अहीयमानः स्वाद्धर्मात्स ह्यस्याखिलकामधुक् ॥ ३१ ॥ असंतुष्टोऽसकृल्लोकानाप्नोत्यपि सुरेश्वरः ॥ अकिञ्चनोऽपि संतुष्टः शेते सर्वाङ्गविज्वरः ॥ ३२ ॥ विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहङ्कारिणः शान्तान्नमस्ये शिरसाऽसकृत् ॥ ३३ ॥ कच्चिद्वः कुशलं ब्रह्मन्राजतो यस्य हि प्रजाः ॥ सुखं वसन्ति विषये पाल्यमानाः स मे प्रियः ॥ ३४ ॥ यतस्त्वमागतो दुर्गं निस्तीर्येह यदिच्छया ॥ सर्वं नो ब्रूह्यगुह्यं चेत्किं कार्यं करवाम ते ॥ ३५ ॥ एवं संपृष्टसंप्रश्नो ब्राह्मणः परमेष्ठिना ॥ लीलागृहीतदेहेन तस्मै सर्वमवर्णयत् ॥ ३६ ॥

विज्वरस्तापरहितः शेते सुखमास्ते ॥ ३२ ॥ विप्रानिति ॥ स्वलाभेन स्वतः प्राप्तेन अन्नवस्त्रादिना आत्मरूपलाभेन वा स्वस्य मम लाभेन वा सन्तुष्टान् साधून् सदाचारनिष्ठान् भूतसुहृत्तमान् सर्वोपकारिणः शान्तान् रागलोभादिरहितान् तत्र हेतुः निरहङ्कारिणः देहाद्यात्माभिमानरहितान् एवंभूतान् विप्रानहमसकृत् पुनः पुनः शिरसा नमस्ये नमस्करोमि । तङार्षः ॥ ३३ ॥ कच्चिदिति ॥ हे ब्रह्मन् वो युष्माकं राजतः सकाशात् कच्चित्कुशलमस्ति । यस्य राज्ञो विषये देशे पाल्यमानाः प्रजाः सुखं यथा तथा वसंति स राजा मम प्रियो भवति ॥ ३४ ॥ यत इति ॥ यतः स्थानात् यस्य प्रयोजनस्येच्छया दुर्गं समुद्रं निस्तीर्य उल्लङ्घ्येह द्वारकायां त्वमागतोऽसि तद् अगुह्यं चेत् तदा सर्वं नोऽस्मभ्यं ब्रूहि वयं ते किं कार्यं करवाम ॥ ३५ ॥ एवमिति ॥ लीलया हेतुभूतया गृहीतो देहो येन तेन परमेष्ठिना परमेश्वरेण एवं संपृष्टः संप्रश्नः प्रष्टव्योऽर्थो यं सः ब्राह्मणः तस्मै कृष्णाय सर्वं बन्धूनाम् अभिप्रेतं कन्यादानं रुक्मिणा तन्निवारितमित्यादि सर्वमवर्णयत् ॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अनया मे सप्तपद्या जातः सप्तपदीविधिः ध्रुवं भर्तेति बोधाय सप्तश्लोक्यार्थ्यते । हरिः रुक्मिण्या स्वयमेकान्ते लिखित्वा दत्तपत्रिकां प्रदर्श्य तां वाचयति विप्रो भगवदाज्ञया रुक्मिण्युवाचेति द्विजोक्तिः । श्रुत्वेति ॥ हे भुवनसुन्दर हे अच्युत शृण्वतां जनानां कर्णविवरैः कर्णरन्ध्रैरन्तः निर्विश्य प्रविश्याङ्गानां तापं दुःखम् अङ्गेति सम्बोधने वा हरतः ते तव गुणान् तथा दृशिमतां चक्षुष्मतां दृशां चक्षुषां च अखिलार्थानाम् अनुकूलविषयाणां लाभो यस्मात्तथाभूतं तव रूपं च श्रुत्वा क्व तव गुणाः क्वाहमयोग्या तथापि अपत्रपं निर्लज्जं सन्मे चित्तं त्वय्येवाविशति आसज्जते ॥ ३७ ॥ कन्याया मम धाष्टर्यं मा शङ्कीत्याह—केति ॥ हे मुकुन्द हे नृसिंह नरश्रेष्ठ का नाम कन्या कुलवती महती गुणोदारा तथा धीरा वशीकृतचित्ता कुलं महति कुले जन्म शीलं सुस्वभावः रूपं सौन्दर्यं विद्या वैदिकी लौकिकी च वयस्तारुण्यं द्रविणं धनसञ्चयः धाम तेजः तैः आत्मनैव तुल्यं नान्येन निरुपममित्यर्थः । तथा नरलोकस्य मनसामभिरामोऽभिरमणं यस्मात्तमतीव प्रियं त्वा त्वां काले विवाहयोग्यसमये पतिं न वृणीतअपि तु सर्वापि वृणीत अतो मय्येव केयं दोषशङ्केति भावः । या तु त्वां न वृणीत सा नूनं कुरूपा दुःशीला कुबुद्धिरनभिजातैवेति भावः ॥ ३८ ॥ तदिति ॥ अङ्ग हे विभो

रुक्मिण्युवाच ॥ श्रुत्वा गुणान्भुवनसुन्दर शृण्वतां ते निर्विश्य कर्णविवरैर्हरतोऽङ्गतापम् ॥ रूपं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताऽऽविशति चित्तमपत्रपं मे ॥ ३७ ॥ का त्वा मुकुन्द महती कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यम् ॥ धीरा पतिं कुलवती न वृणीत कन्या काले नृसिंह नरलोकमनोऽभिरामम् ॥ ३८ ॥ तन्मे भवान्खलु वृतः पतिरङ्ग जायामात्मार्पितश्च भवतोऽत्र विभो विधेहि ॥ मा वीरभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमम्बुजाक्ष ॥ ३९ ॥ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान्परेशः ॥ आराधितो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोऽन्ये ॥ ४० ॥

हे अम्बुजाक्ष तत्तस्मान्मे मया भवान् खलु निश्चयेन पतिर्वृतः आत्मा स्वदेहादिसङ्घातश्च भवतः भवतेऽर्पितः शेषे षष्ठी । अतस्त्वमत्रागत्य मां भवतो जायां भार्यां विधेहि सम्पादय । वीरस्य तव भागं माम् आरात् शीघ्रमागत्य निकटमागतो वा चैद्यः शिशुपालो माभिमर्शतु मा स्पृशतु । अन्यथा ते लज्जा स्यादिति भावः । गुण आर्षः । तत्र दृष्टान्तः मृगपतेः सिंहस्य बलिं भागं गोमायुः सृगालो यथा स्पृशेत्तथेति ॥ ३९ ॥ पूर्तेति ॥ पूर्त्तं " वापीकूपतटाकादिदेवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥ " इति स्मार्त्तकर्म इष्टम् अग्निहोत्रादि वैदिकं कर्म दत्तं सत्पात्रे हिरण्यादिदानं नियमस्तीर्थस्नानादि व्रतं कृच्छ्रादि देवादीनामर्चनम् आदिशब्देन प्राणिदयादिसंग्रहः एभिर्यदि परेशो गदाग्रजः भगवान् अलमत्यर्थं मयाराधितस्तदा तेन प्रसन्नो गदाग्रजो भवानेवेत्युभयान्वयः एत्य आगत्य मम पाणिं गृह्णातु । अन्ये दमघोषसुतादयः शिशुपालादयस्तु न गृह्णन्तु ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्व इति॥हे अजित उद्वहने विवाहे श्वो भाविनि सति त्वं प्रथमं सैन्यरहित एव गुप्तः अलक्षित एव विदर्भान् देशान् तद्राजधानीं कुण्डिनपुरं समेत्य आगत्य पश्चादेव स्वशोभाख्यापनार्थं पृतनापतिभिः सेनापतिभिः परीतः परिवृतः भव अन्यथैतत्पुरप्रवेशोऽतिदुष्करः अत्रत्यैर्वीरैस्त्वया सह योद्धुं चावश्यं प्रक्रंस्यते । ततश्च मम हरणमन्तारितं स्यात् । सैन्यं विना पुरप्रवेशे तु विवाहप्रेक्षणार्थमागतं त्वां मत्वा वीरैर्न योत्स्यते । ततश्च हरणं सुकरं स्यात् । यदि तु हरणसमये प्रतिपक्षाः चैद्यादिवीरा योद्धुमुद्यता भवेयुस्तदा तु चैद्यमगधेन्द्रादि बलं निर्मथ्य पराभूय यथा समुद्रं निर्मथ्य लक्ष्मीर्गृहीता तथा प्रसह्य बलात् वीर्यं प्रभाव एव शुल्कं विवाहे देयं यस्यास्तां मां राक्षसेन विधिना उद्वह हृत्वा गृहमानीयोद्वह ॥ ४१ ॥ अन्तरिति ॥ ननु अन्तःपुरस्य अन्तरचरीं त्वां बन्धून् पितृभ्रात्रादीन् अनिहत्य कथमुद्वहे तैर्मत्कार्यविघ्ने कृते तद्वधं विना कार्यसिद्ध्यसंभवात् इति शङ्कसे चेत् तत्रोपायं प्रवदामि । विवाहदिनात् पूर्वेद्युः महती कुलदेवदर्शनार्था यात्रास्ति भवति यस्यां यात्रायां नववधूः । पुराद्बहिस्थितां गिरिजामम्बिकां द्रष्टुमुपेयात्

श्वो भाविनि त्वमजितोद्वहने विदर्भान्गुप्तः समेत्य पृतनापतिभिः परीतः॥निर्मथ्य चैद्यमगधेन्द्रबलं प्रसह्य मां राक्षसेन विधिनोद्वह वीर्यशुल्काम् ॥ ४१ ॥ अन्तःपुरान्तरचरीमनिहत्य बन्धूंस्त्वामुद्वहे कथमिति प्रवदाम्युपायम् ॥ पूर्वेद्युरस्ति महती कुलदेवयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ॥ ४२ ॥ यस्याङ्घ्रिपङ्कजरजःस्नपनं महान्तो वाञ्छन्त्युमापतिरिवात्मतमोऽपहत्यै ॥ यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं जह्यामसून्व्रतकृशाञ्छतजन्मभिः स्यात् ॥ ४३ ॥ ब्राह्मण उवाच ॥ इत्येते गुह्यसंदेशा यदुदेव मयाऽऽहृताः ॥ विमृश्य कर्तुं यच्चात्र क्रियतां तदनन्तरम् ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे रुक्मिण्युद्वाहे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ श्रीशुक उवाच ॥ वैदर्भ्याः स तु संदेशं निशम्य यदुनन्दनः ॥ प्रगृह्य पाणिना पाणिं प्रहसन्निदमब्रवीत् ॥ १ ॥

गच्छेत् अतः अम्बिकागृहादेव हरणे बन्धुवधप्रसक्तिर्नास्ति ॥ ४२ ॥ यस्येति ॥ हे अम्बुजाक्ष यस्य भवतोऽङ्घ्रिपङ्कजरजोभिः स्नपनम् आत्मनस्तमसः अज्ञानस्य अपहत्यै निवृत्त्यर्थमुमापतिरिवान्येऽपि महान्तो ब्रह्मादयो वाञ्छन्ति इत्यहमपि तपोलब्धैस्तैरेवं स्नात्वा दुष्कृतानि नाशयिष्यामीति भावः । तस्य भवतः षष्ठी लुगार्षः । प्रसादं यर्हि न लभेय न प्राप्नुयां तर्हि व्रतैरुपवासादिभिः कृशानसून् प्राणान् जह्यां त्यजेयम् । एवं मुहुः प्राणत्यागे शतजन्मभिरपि तु तव प्रसादः स्यादेवेति ॥ ४३ ॥ इतीति ॥ हे यदुदेव इत्येते रुक्मिण्या गुह्यसंदेशा मया आहृता आनीता अत्र यत्कर्तुं योग्यं तद्विमृश्य स्वयमेव विचार्यानन्तरं त्वरितमेव क्रियतां नतु अस्मिन् कार्ये यदुभिरपि मन्त्रणं कार्यम् अतिगुप्तत्वात् ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे द्विपञ्चाशत्तमे व्यधात् ॥ ५२ ॥ त्रिपञ्चाशत्तमे गत्वा विदर्भान् रुक्मिणीं बलात् ॥ जहार भगवांस्तत्र श्लोका अष्टशैरोन्मिताः ॥ उवाचेतित्रयं द्वाभ्यां युक्ता षष्टिरनुष्टुभाम् ॥ ५३ ॥ वैदर्भ्या इति ॥ स तु यदुनन्दनः कृष्णो वैदर्भ्या रुक्मिण्याः संदेशं निश-

CC-0. In Public Domain. Digitization by eGangotri

म्य स्वपाणिना द्विजस्य पाणिं प्रगृह्य प्रहसन् द्विजं प्रतीदमब्रवीत् ॥ १ ॥ तथेति ॥ यथा वैदर्भी व्याकुलचिता तथाहमपि तच्चित्तः सन् व्याकुतया निशि निद्रां न लभे मद्वि-षयकद्वेषादेव रुक्मिणा ममोद्वाहो निवारित इति त्वया अकथितमप्यहं वेद जानामि ॥२॥ तामिति ॥ राजन्येष्वधमान् शिशुपालादीन् मृधे युद्धे उन्मथ्य अभिभूय अहमेव परो भर्तृतया सम्मतो यस्यास्ताम् । अनवद्यानि शोभनात्यङ्गानि यस्यास्तां रुक्मिणीम् एधसः काष्ठात् अग्निशिखां वायुरिव आनयिष्ये आनेष्ये इडार्षः । एधसि वर्त्तमानाऽग्नि-शिखा प्रकटीभूता यथा एधएव ज्वालयति तथा रुक्मिप्रभृतिभिर्दुष्टैरावृता सैव सर्वान् ज्वालयिष्यत्यहं तु निमित्तमात्रं भविष्यामीति भावः ॥ ३ ॥ पृतनापतिभिः परीत इति तया संदिष्टेऽपि गुप्तः समेत्येवानुसर्त्तुं तस्या लज्जावहसंदेशगोपनाय चाग्रजादीन् प्रत्यनुक्त्वैव एकाक्येव प्रस्थित इति वक्तुमाह—उद्वाहेति॥मधुसूदनः रुक्मिण्या उद्वाहार्थं परश्वो रात्रौ विवाहनक्षत्रमिति द्विजमुखात् विज्ञाय हे दारुकाशु रथः संयुज्यताम् अश्वैः संयुक्तः क्रियतामिति सारथिं प्रत्याह स्म ॥ ४ ॥ स इति ॥ स दारुकः शैब्यादिनामकै-

श्रीभगवानुवाच ॥ तथाहमपि तच्चित्तो निद्रां च न लभे निशि ॥ वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः ॥ २ ॥ तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे ॥ मत्परामनवद्याङ्गीमेधसोऽग्निशिखामिव ॥ ३ ॥ श्रीशुक उवाच ॥ उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः ॥ रथः सं-युज्यतामाशु दारुकेत्याह सारथिम् ॥ ४ ॥ स चाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः ॥ युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः ॥ ५ ॥ आरुह्य स्यन्दनं शौरिर्द्विजमारोप्य तूर्णगैः ॥ आनर्तादेकरात्रेण विदर्भानगमद्धयैः ॥ ६ ॥ राजा स कुण्डिनपतिः पुत्रस्नेहवशं गतः ॥ शिशुपालाय स्वां कन्यां दास्यन्कर्माण्यकारयत् ॥ ७ ॥ पुरं संमृष्टसंसिक्तमार्गरथ्याचतुष्पथम् ॥ चित्रध्वजपताकाभिस्तोरणैः समलंकृतम् ॥ ८ ॥

श्चतुर्भिर्युक्ते रथमानीय बद्धाञ्जलिरग्रतस्तस्थौ । शैब्यादीनां वर्णाः पाद्मे । "शैब्यस्तु शुकपत्राभः सुग्रीवो हेमपिङ्गलः । मेघपुष्पस्तु मेघाभः पाण्डुरो हि बलाहकः ॥" इति ॥ ५ ॥ आरुह्येति ॥ सन्ध्यायां रुक्मिणीसंदेशान् श्रुत्वा शौरिः श्रीकृष्णस्तदानीमेव द्विजं स्यन्दनमारोप्य स्वयं चारुह्य तूर्णगैः शीघ्रगामिभिर्हयैस्तै रथयोजितैरश्वैरेकरात्रेण विदर्भान्देशानगमत् । तस्यामेव रात्र्यां प्रस्थाय प्रातर्विदर्भानगमदित्यर्थः । श्वो भाविनि त्वमजितोद्वहन" इत्यादिरुक्मिणीसंदेशात् ॥ ६ ॥ राजेति ॥ स कुण्डिनपुराधिपतिः ॥१७१॥
राजा भीष्मकः कृष्णाय रुक्मिणीं दातुमिच्छन्नपि पुत्रस्नेहेन वशं तदिच्छामनुगतः मरणाय वनवासाय वा तदुद्यमं दृष्ट्वेति भावः । तेन पितुः शिशुपालेऽनभिरुचिं दर्शयति स्वां कन्यां शिशुपालाय दास्यन् दातुं कर्माणि पुरालङ्कारपितृदेवार्चनादीनि अकारयत् ॥ ७ ॥ पुरमिति द्वयम् ॥ पुरं संमृष्टानि संसिक्तानि च मार्गरथ्याचतुष्पथानि यत्र तत् चित्रध्वजेषु याः पताकास्ताभिस्तोरणैश्च सम्यगलंकृतम् अकारयत् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रग्गन्धमाल्यानि आबिभ्रतीति तथा तैः तथा विरजोम्बरैर्भूषितैश्च स्त्रीपुरुषैः जुष्टं तथा श्रीमद्भिः अगुरुणा धूपितैर्गृहैर्जुष्टमकारयत् ॥९॥ पितॄनिति ॥ हे नृप पितॄन् नान्दीमुखान् देवांश्च विधिवत्समभ्यर्च्य तथा यथान्यायं यथायोग्यं विप्रान् भोजयित्वा च रुक्मिणीं प्रति मङ्गलं वाचयामास ॥ १० ॥ सुस्नातामिति ॥ कृतं कौतुकेन विवाहसूत्रेण मङ्गलं यस्यास्तां सुस्नातां सुदतीं कन्याम् अहतयोर्नवीनयोरंशुकयोर्वस्त्रयोर्युग्मेन भूषणोत्तमैश्च भूषिताम् अकारयत् । "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयम्भुवा । शस्तं तन्मङ्गलिक्येषु तावन्मात्रं न सर्वदा ॥" इति स्मृतिः । आहतेति पाठेऽपि स एवार्थः । "आहतं गणितेऽपि स्यात्ताडितेऽपि नवेऽपि च ।" इति विश्वप्रकाशः॥ ११ ॥चक्रुरिति ॥ तदा च द्विजोत्तमाः सामऋग्यजुर्मन्त्रैः वध्वा रुक्मिण्याः रक्षां चक्रुः । अथर्वमन्त्रवित् पुरोहितः प्रतिकूलग्रहशान्तये जुहाव ॥ १२ ॥ हिरण्येति ॥ विधिविदां वरः राजा भीष्मकः विप्रेभ्यः हिरण्यादीनि प्रादात् । स्फुटमन्यत् ॥ १३ ॥ एवमिति ॥ एवं भीष्मकवत् चेदिपतिः राजा दमघोषोऽपि सुताय शिशुपालविवाहार्थं यदभ्युदये विवाहे

स्रग्गन्धमाल्याभरणैर्विरजोम्बरभूषितैः ॥ जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः ॥ ९ ॥ पितॄन्देवान्समभ्यर्च्य विप्रांश्च विधिवन्नृप ॥ भोजयित्वा यथान्यायं वाचयामास मङ्गलम् ॥ १० ॥ सुस्नातां सुदतीं कन्यां कृतकौतुकमङ्गलाम् ॥ अहतांशुकयुग्मेन भूषितां भूषणोत्तमैः ॥ ११ ॥ चक्रुः सामर्ग्यजुर्मन्त्रैर्वध्वा रक्षां द्विजोत्तमाः ॥ पुरोहितोऽथर्वविद्वै जुहाव ग्रहशान्तये ॥१२॥ हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् ॥ प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिविदां वरः ॥ १३ ॥ एवं चेदिपती राजा दमघोषः सुताय वै ॥ कारयामास मन्त्रज्ञैः सर्वमभ्युदयोचितम् ॥१४॥ मदच्युद्भिर्गजानीकैः स्यन्दनैर्हेममालिभिः ॥ पत्त्यश्वसङ्कुलैः सैन्यैः परीतः कुण्डिनं ययौ ॥ १५ ॥ तं वै विदर्भाधिपतिः समभ्येत्याभिपूज्य च ॥ निवेशयामास मुदा कल्पितान्यनिवेशने ॥ १६ ॥ तत्र शाल्वो जरासन्धो दन्तवक्त्रो विदूरथः ॥ आजग्मुश्चैद्यपक्षीयाः पौण्ड्रकाद्याः सहस्रशः ॥ कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुम् ॥ १७ ॥

उचितं कर्म तत्सर्वं मन्त्रज्ञैर्द्विजैः कारयामास ॥ १४ ॥ मदेति ॥ हेम्नो माला येषां सन्तीति तथा तैरिति गजादिसर्वेषां विशेषणम् । मदं च्यवन्त इति मदच्युतस्तैर्गजानामनीकैः रथैः पदातिभिरश्वैश्च सङ्कुलैर्व्याप्तैः सैन्यैः परीतः परिवृतः शिशुपालः कुण्डिनं पुरं ययौ ॥ १५ ॥ तमिति ॥ विदर्भाधिपतिर्भीष्मको मुदा युक्तः तं शिशुपालं सम्यगभ्येत्य अग्रतो मिलित्वाऽभिपूज्य च कल्पितं यदन्यद् वरयोग्यम् अन्येभ्य उत्तमं निवेशनं वासस्थानं तस्मिन्निवेशयामास ॥ १६ ॥ तत्रेति सार्द्धम् ॥ कृष्णरामौ द्विषन्तीति तथा ते चैद्यपक्षीयाः शिशुपालानुवर्त्तिनः यत्ताः युद्धे प्रयत्नवन्तः शाल्वजरासन्धादयः पौण्ड्रकाद्याश्च सहस्रशो राजानश्चैद्याय कन्यां साधितुं साधयितुं णिलोप आर्षः । तत्र कुण्डिनपुरे आजग्मुः ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

यदीति ॥ रामाद्यैर्यदुभिर्वृतः कृष्णो यद्यागत्य कन्यां हरेत्तदा सर्वे वयं संहता मिलिताः सन्तस्तेन सह योत्स्यामः । तङ्भाव आर्षः । इति निश्चितं मानसं येषां ते समग्रबलवा-हनयुक्ताः सर्वे भूभुजो राजानः आजग्मुः । योत्स्याम इति पद्यं स्वामिपादानां न सम्मतम् । हरेदिति शङ्किताः कन्यां साधितुमिति पूर्वान्वयप्रदर्शनात् युक्तं चैतत् ॥१८॥१९॥ श्रुत्वेति द्वयम् ॥ भगवान् रामो विपक्षीयाणां शत्रुपक्षपातिनां नृपाणामेतदुद्यमं प्रयत्नं जनेभ्यः श्रुत्वा तथा एकमसहायमेव कृष्णं कन्यां हर्तुं गतं च तदनुमातुरन्तःपुरजनाच्च श्रुत्वा तत्र कलहो भविष्यतीति शङ्कितचित्तः भ्रातरि कृष्णेयः स्नेहस्तेन परिप्लुतो व्याप्तोऽतो गजाश्वरथिपत्तिभिर्महता बलेन सैन्येन सह कुण्डिनं पुरं त्वरितः प्रागात् । पश्चात्प्र-स्थितोऽपि कुण्डिनपुरे श्रीकृष्णेन सहैव प्राविशदिति भावः ॥ २० ॥ २१ ॥ भीष्मेति ॥ वरौ आरोहौ ऊरू यस्याः सा भीष्मककन्या हरेरागमनं काङ्क्षन्ती तथा प्रेषितस्य द्विजस्य प्रत्यापत्तिं प्रत्यागमनं चापश्यन्ती सती तदा सूर्योदयात् पूर्वमेव औत्सुक्यवशात् अचिन्तयत् ॥२२॥ अहो इति चतुर्भिः ॥ अल्पराधसो मन्दभाग्यायाः मे उद्वाहः

आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः
यद्यागत्य हरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः ॥ १८ ॥ योत्स्यामः संहतास्तेन इति निश्चितमानसाः ॥ १९ ॥ श्रुत्वैतद्भगवान्रामो विपक्षीयनृपोद्यमम् ॥ कृष्णं चैकं गतं हर्तुं कन्यां कलहशङ्कितः ॥ २० ॥ बलेन महता सार्धं भ्रातृस्नेहपरि-प्लुतः ॥ त्वरितः कुण्डिनं प्रागाद्गजाश्वरथपत्तिभिः ॥ २१ ॥ भीष्मकन्या वरारोहा काङ्क्षन्त्यागमनं हरेः ॥ प्रत्यापत्तिमपश्यन्ती द्विजस्या-चिन्तयत्तदा ॥ २२ ॥ अहो त्रियामान्तरित उद्वाहो मेऽल्पराधसः ॥ नागच्छत्यरविन्दाक्षो नाहं वेद्म्यत्र कारणम् ॥ २३ ॥ सोऽपि नावर्ततेऽद्यापि मत्संदेशहरो द्विजः ॥ अपि मय्यनवद्यात्मा दृष्ट्वा किञ्चिज्जुगुप्सितम् ॥ मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः ॥ २४ ॥ दुर्भगाया न मे धाता नानुकूलो महेश्वरः ॥ देवी वा विमुखा गौरी रुद्राणी गिरिजा सती ॥ २५ ॥

त्रियामा अद्यतनी रात्रिः तावन्मात्रान्तारितः श्वस्तन्यां रात्रौ तु विवाहलग्नमेवेति भावः । अरविन्दाक्षः कृष्णोऽधुनापि नागच्छति अत्रानागमने कारणमहं न वेद्मि ॥ २३ ॥ सोऽपीति अर्द्धम् ॥ यश्च मत्सन्देशहरो द्विजः सोऽप्यद्यापि नावर्तते । यदि द्विज आगच्छेत्तदा प्राणरक्षणत्यागयोरेकं निश्चेष्यामीति भावः । अपीति संभावनायाम् । नूनं निश्चितम् अनवद्यात्मा निर्दोषस्वरूपः प्रथममागमनार्थं कृतोद्यमः अतो द्विजं सहैवानेतुं न प्रस्थापितवान् । प्रस्थानावसरे तु मयि किञ्चित् जुगुप्सितं धाष्टर्यादि कं दोषं दृष्ट्वा विचिन्त्य प्रत्याचष्ट । मत्पाणिग्रहणे मत्पाणिग्रहणार्थं कृष्णो नायाति । यद्वा । अतः स द्विजोऽपि नूनमकृतार्थो मम तनुत्यागभयान्नायातीति ॥२४॥ यद्वा तत आगच्छन्नपि मद्भाग्यवैमुख्यात्प्रतिबद्धो भवेदित्याह--दुर्भगाया इति ॥ दुर्भगाया भाग्यहीनाया मे धाता ब्रह्मा महेश्वरः अनुकूलो नास्ति । देवी दाम्पत्यार्थमाराध्या रुद्राणी गिरिजा सती साध्वी गौरी पार्वती वा । इति चार्थे विमुखा । यद्वा । गिरिजा पाषाणपुत्री कथं दयां कुर्यात् इत्यादिदोषसम्भावना ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ एवं चिन्तयती नुमभावः आर्षः । गोविन्देनापहृतं मानसं यस्याः सा बाला रुक्मिणी कालज्ञानाधुनापि कृष्णागमनकाल इति मन्वाना किञ्चिदाश्वस्ता सती चिन्तास्तब्धे अश्रूणां कलाभिर्बिन्दुभिराकुले लोचने न्यमीलयत् ॥ २६ ॥ एवमिति ॥ हे नृप एवं गोविन्दस्यागमनं प्रतीक्षन्त्या शता आर्षः । वध्वाः आसन्नविवाहायाः रुक्मिण्याः प्रियभाषिणः कृष्णागमनरूपप्रियसूचकाः पुंशेष आर्षः । वामा ऊरुः भुजो नेत्रं चैतानि अस्फुरन् ॥ २७ ॥ अथेति ॥ अथ कृष्णेन विनिर्दिष्टः पुरोपवने प्राप्तं मां कथयेति सन्दिश्य प्रस्थापितः स एव सुनन्दनामा संदेशहरो द्विजसत्तमोन्तःपुरचरीं देवीं ध्यानप्राप्तश्रीकृष्णानन्देन दीप्यमानां राजपुत्रीं रुक्मिणीं ददर्श । हेति हर्षे ॥ २८ ॥ सेति ॥ सती लक्षणाभिज्ञा कार्यं कृतवतोऽकृतवतश्च दूतस्य लक्षणानामभिज्ञा सा रुक्मिणी प्रहृष्टं वदनं यस्येति न व्यग्रा न विकृता आत्मनो देहस्य गतिश्चेष्टा यस्य तं कार्यासिद्धावेतद्वैपरीत्यं स्यादित्याशयः । ब्राह्मणमालक्ष्य शुचिस्मिता सती समपृच्छत् । यद्वा । दूतलक्षणज्ञत्वात् अव्यग्रा सती आत्मनो गतिं कृष्णमपृच्छत् । स क्वास्ते किं

एवं चिन्तयती बाला गोविन्दहृतमानसा ॥ न्यमीलयत कालज्ञा नेत्रे चाश्रुकलाकुले ॥ २६ ॥ एवं वध्वाः प्रतीक्षन्त्या गोविन्दागमनं नृप ॥
वाम ऊरुर्भुजो नेत्रमस्फुरन्प्रियभाषिणः ॥ २७ ॥ अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः ॥ अन्तःपुरचरीं देवीं राजपुत्रीं ददर्श ह ॥ २८ ॥
सा तं प्रहृष्टवदनमव्यग्रात्मगतिं सती ॥ आलक्ष्य लक्षणाभिज्ञा समपृच्छच्छुचिस्मिता ॥ २९ ॥ तस्या आवेदयत्प्राप्तं शशंस यदुनन्दनम् ॥
उक्तं च सत्यवचनमात्मोपनयनं प्रति ॥ ३० ॥ तमागतं समाज्ञाय वैदर्भी हृष्टमानसा ॥ न पश्यन्ती ब्राह्मणाय प्रियमन्यन्ननाम सा ॥ ३१ ॥
प्राप्तौ श्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ ॥ अभ्ययात्तूर्यघोषेण रामकृष्णौ समर्हणैः ॥ ३२ ॥

वावददित्याद्यपृच्छत् ॥ २९ ॥ तस्यै इति ॥ तस्यै रुक्मिण्यै यदुनन्दनं कृष्णं प्राप्तमागतमावेदयत् । तथात्मनः रुक्मिण्या उपनयनं समीपप्रापणं प्रति "तामानयिष्ये उन्मथ्य राजन्यापसदान्मृधे" इति यद्भगवता उक्तं सत्यवचनं तच्च शशंस। शशंसेत्यत्र सराममिति पाठान्तरम् ॥ ३० ॥ तमिति ॥ तं श्रीकृष्णमागतं समाज्ञाय हृष्टं मानसं यस्याः सा वैदर्भी रुक्मिणी परमफलभूतं परमानन्दविग्रहं कृष्णमानीय समर्पितवतेऽस्मै ब्राह्मणाय किं पारितोषिकं ददामीति विमृशती प्राणेभ्योऽन्यत्सर्वस्वार्पणमपि तस्य प्रियमपश्यन्ती ये मां नमन्ति ते सर्वसम्पद्भाजो भवन्ति किं पुनर्मयि प्रणतायामिति विचार्य च केवलं ननाम प्रणत्यात्मनस्तदृणित्वं तदुपकारभाराक्रान्तत्वं च व्यञ्जयामास । ब्राह्मणोऽपि सन्तोषशीलः किमपि नाकाङ्क्षत् । लक्ष्म्यवतारभूतरुक्मिणीप्रणामेन तस्य सम्पत्तिरवश्यं बभूव । लक्ष्म्या अपि तदृणित्वादिति सूचितमेव ॥ ३१ ॥ प्राप्ताविति ॥ स्वदुहितुरुद्वाहप्रेक्षणे उत्सुकौ रामकृष्णौ प्राप्तौ आगतौ श्रुत्वा भीष्मकः तूर्यघोषेण समर्हणैः पूजासाधनैश्च सह अभ्ययात् तत्संमुखमाजगाम ॥ ३२ ॥

CC-0. In Public Domain. Digitization by eGangotri

मधुपर्कमिति ॥ स भीष्मकः मधुपर्कं विरजांसि उज्ज्वलानि वासांसि अभीष्टानि उपायनानि उत्तमवस्तूनि उपानीय समर्प्य विधिवत् समपूजयत् । एवं वरोचितमधुपर्कादिना पूजनेन भीष्मकस्यापि अभिप्रायः सूच्यते ॥ ३३ ॥ तयोरिति ॥ महामतिः नूनं श्रीकृष्ण उद्वोढुमेवागत इति विचारवान् भीष्मकः ससैन्ययोः सानुगयोश्च तयो रामकृष्णयोः श्रीमत् भोगोपकरणादिसमृद्धिमन्निवेशनं विश्रामस्थानमुपकल्प्य निवेद्य यथा यथावदातिथ्यं विदधे चक्रे ॥ ३४ ॥ एवमिति ॥ एवमन्येषां समेतानामागतानां राज्ञां कर्मणि शेषे षष्ठी । यथावीर्यं यथावयः यथाबलं यथावित्तं राज्ञां वीर्यवयोबलवित्तयोग्यं यथा स्यात्तथा सर्वैः कामैः समार्हयत् आड्रहितः पाठः प्रायो दृश्यते स त्वार्षः ॥ ३५ ॥ कृष्णमिति ॥ विदर्भपुरवासिनो जनाः कृष्णमागतमाकर्ण्य श्रुत्वा इतस्तत आगत्य नेत्ररूपैरञ्जलिभिस्तस्य मुखपङ्कजं मुखपङ्कजलावण्यसुधां पपुः तल्लावण्यं ददृशुः ॥ ३६ ॥ तद्वचांस्याह—अस्यैवेति ॥ रुक्मिण्येवास्य कृष्णस्य भार्या भवितुमर्हति सौन्दर्यसौशील्यादिगुणपूर्णत्वात् । अपरा कन्या त्वस्य भार्या भवितुं नार्हति एवंविधगुणहीनत्वात् । अनवद्यात्मा निर्दूषणगुणपूर्णः इदं रुक्मिण्या अपि विशेषणम् अपिरेवार्थे । असौ श्रीकृष्ण एव भैष्म्याः समुचितो योग्यः पतिः वस्तुतोऽत्र षडवधारणघटितानां षण्णां

मधुपर्कमुपानीय वासांसि विरजांसि च ॥ उपायनान्यभीष्टानि विधिवत्समपूजयत् ॥ ३३ ॥ तयोर्निवेशनं श्रीमदुपकल्प्य महामतिः ॥
ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ॥ ३४ ॥ एवं राज्ञां समेतानां यथावीर्यं यथावयः ॥ यथाबलं यथावित्तं सर्वैः कामैः समर्ह-
यत् ॥ ३५ ॥ कृष्णमागतमाकर्ण्य विदर्भपुरवासिनः ॥ आगत्य नेत्राञ्जलिभिः पपुस्तन्मुखपङ्कजम् ॥ ३६ ॥ अस्यैव भार्या भवितुं
रुक्मिण्यर्हति नापरा ॥ असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥ ३७ ॥

वाक्यानां तन्त्रेण द्विरुच्चारणम् । नापरेत्येवमेकत्रैवान्यव्यावृत्तिप्रदर्शनमुपलक्षणार्थम् । तथा च रुक्मिणी चेद्भार्या भवितुमर्हति तदास्यैव नान्यस्य । अस्य भार्या भवितुमर्हा रुक्मिण्येव नापरा । अस्य सा भार्या भवितुमर्हत्येव न नार्हति अपिरेवार्थे । भैष्म्याः समुचितः पतिरसावेव नापरः असौ समुचितः पतिर्भैष्म्या एव नापरस्याः । भैष्म्या असौ पतिरुचित एव न नोचितः इति षट्वाक्यानि । तत्र प्रथमे वाक्ये रुक्मिणीनिष्ठं भार्याभवनार्हत्वमुद्दिश्य अस्यैवेतीदमीयत्वं विधीयते । एवमन्येष्वप्युद्देश्यविधेयभेदो बोध्यः न चैवं वाक्यभेदो दोषः ग्रहं सम्मार्ष्टीतिवददोषात् । तत्र हि ग्रहं प्रधानमुद्दिश्य गुणभूतः सम्मार्गसंस्कारो विधीयते अतः प्रतिप्रधानं गुणावृत्तिरिति न्यायेन सर्वग्रहान् प्रति संमार्ग आवृत्त्यानुष्ठेयः इत्येकत्वमविवक्षितं सम्पद्यते । ततश्च प्रतिग्रहं सम्मार्गमनुष्ठापयद्वाक्यमावर्तते । एवमत्रोद्देश्यानां भेदात्तत्र तत्र नियमविधानाय एवादिपदानामावृत्तिर्न दोषाय । चक्रवर्ती त्वत्र वक्तृबाहुल्याद्वाक्यबाहुल्यमत एकवाक्यत्वासंभवादेव वाक्यभेदो न दोषायेत्याह ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चिदिति ॥ नोऽस्माकं यत्किञ्चित्सुचरितं पुण्यमस्ति तेन तुष्टः प्रीतः त्रिलोककृत् भगवाननुगृह्णातु प्रसीदतु तेन च वैदर्भ्याः पाणिमच्युतः श्रीकृष्ण एव गृह्णातु स्वसुकृतमस्माभी रुक्मिण्यै दत्तमिति भावः ॥ ३८ ॥ एवमिति ॥ प्रेम्णः कलया उत्कर्षेण "कलामूले प्रवृद्धौ स्यात्" इति मेदिनी । बद्धाः पुरौकसः एवं वदन्ति स्म । कन्या च भटैर्गुप्ता सती अन्तःपुरान्निर्गत्य अम्बिकालयं प्रागात् ॥ ३९ ॥ पद्भ्यामिति द्वयम् ॥ हे राजन् यतवाक् गृहीतमौना मातृभिः मात्रा तत्तुल्याभिः सखीभिश्च परिवारिता उद्यतानि आयुधानि यैस्तैः सन्नद्धैः बद्धकवचैरायतैः शूरैः राजभटैः कृष्णभिया रुक्मिनियुक्तैः गुप्ता सा मुकुन्दचरणाम्बुजं सम्यक् ध्यायती नुमभाव आर्षः । भवान्याः पादपल्लवं द्रष्टुं पद्भ्यां विनिर्ययौ । स्वपुराद्भवान्यालयपर्यन्तं नरयानेन गत्वा आलयाभ्यन्तरगतांश्चतुष्पञ्चप्रकोष्ठान् पद्भ्यां ययौ ॥ ४० ॥ ॥ ४१ ॥ मृदङ्गेत्यर्द्धम् ॥ मृदङ्गादयो जघ्निरे वादिताः । नानेति द्वयम् ॥ नानाविधैरुपहारैर्नैवेद्यैर्बलिभिरन्यैश्च पूजासाधनैः सह तानि गृहीत्वेत्यर्थः । सहस्रशो वार-

किञ्चित्सुचरितं यन्नस्तेन तुष्टस्त्रिलोककृत् ॥ अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिमच्युतः ॥ ३८ ॥ एवं प्रेमकलाबद्धा वदन्ति स्म पुरौकसः ॥
कन्या चान्तःपुरात्प्रागाद्भटैर्गुप्ताऽम्बिकालयम् ॥ ३९ ॥ पद्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवम् ॥ सा चाऽनुध्यायती सम्यङ् मुकुन्दचरणाम्बुजम् ॥ ४० ॥ यतवाङ् मातृभिः सार्धं सखीभिः परिवारिता ॥ गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥ ४१ ॥ मृदङ्गशङ्खपणवास्तूर्यभेर्यश्च जघ्निरे ॥ नानोपहारबलिभिर्वारमुख्याः सहस्रशः ॥ स्रग्गन्धवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः ॥ ४२ ॥ गायन्तश्च स्तुवन्तश्च गायका वाद्यवादकाः ॥ परिवार्य वधूं जग्मुः सूतमागधवन्दिनः ॥ ४३ ॥ आसाद्य देवीसदनं धौतपादकराम्बुजा ॥ उपस्पृश्य शुचिः शान्ता प्रविवेशाम्बिकाऽन्तिकम् ॥ ४४ ॥ तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः ॥ भवानीं वन्दयांचक्रुर्भवपत्नीं भवान्विताम् ॥ ४५ ॥

मुख्याः सत्कृता वेश्याः तथा स्रग्गन्धवस्त्राभरणैः स्वलङ्कृता द्विजपत्न्यः गायकाः गायन्तः वाद्यानां तूर्यादीनां वादकास्तान् वादयन्तश्चेति शेषः । सूतमागधवन्दिनः स्तुवन्तश्च वधूं कन्यां परिवार्य आवृत्य जग्मुः ॥ ४२ ॥ ४३ ॥ आसाद्येति ॥ देव्याः सदनं मन्दिरं देवसदनमिति पाठे कुक्कुटाण्डवत् पुंवद्भावः । यद्वा । "भवपत्नीं भवान्विताम्" इत्युक्तेः देव्याः देवानां च सदनमासाद्य आगत्य तत्र धौते प्रक्षालिते पादाम्बुजे कराम्बुजे च यस्याः सा उपस्पृश्याचम्य अत एव शुचिः शान्ता समाहितचित्ता चाम्बिकान्तिकं प्रविवेश ॥ ४४ ॥ तामिति ॥ प्रवयसो वृद्धाः विधिज्ञाः पूजाप्रकारज्ञा विप्रयोषितः पुरोहितस्त्रियः भवेन शिवेन नित्यमन्वितां भवस्योपसर्जनत्वं स्त्रीकर्मोचितमुक्तं भवस्य पत्नीं भवानीं पार्वतीं भवपत्नीं भवानीमित्यनयोरैकार्थ्येऽपि पार्वत्याः पतिव्रताशिरोमणित्वप्रदर्शनाय पुनरुक्तिः । तां बालां रुक्मिणीं प्रयोज्यकर्त्रीं वन्दयांचक्रुः । तामिति अणिकर्त्तुः कर्मत्वमार्षम् ॥ ४५ ॥

CC-0. In Public Domain. Digitization by eGangotri

तदैव स्फुरितं मन्त्रमाह—नमस्य इति ॥ हे अम्बिके स्वसंतानयुतां गणेशादिसहितां स्वः स्वार्द्धाङ्गभूतः शिवः सन्तानो गणेशादिस्तद्युतामिति वा देवीप्राधान्यं प्राग्वत् । शिवां मङ्गलरूपां त्वामभीक्ष्णं पुनः पुनर्नमस्ये नमस्करोमि । तदर्थः । भगवान् कृष्णो मे पतिर्भूयात् इति यत्तद् भवती कृष्ण एव वानुमोदतामनुगृह्णातु ॥ ४६ ॥ अद्भिरिति ॥ अद्भिर्जलैर्गन्धादिभूषणान्तैः स्रक् पौष्पी माला रत्नमयी नानोपहारैर्नैवेद्यैः बलिभिश्च प्रदीपावलिभिर्महानीराजनैश्च पृथक् भवानीं भवं गणेशादींश्चापूजयत् इति शेषः ॥ ४७ ॥ विप्रेति ॥ तथा पतिमतीः जीवद्भर्तृका विप्रस्त्रियः कर्माणि तैः अबादिभिः लवणापूपादिभिश्च रुक्मिणी समपूजयत् । लवणापूपः कचोरिका इति केचित् ॥ ४८ ॥ तस्यै इति ॥ ततस्ताः स्त्रियः तस्यै रुक्मिण्यै शेषां पूजोपयुक्तावशिष्टां सामग्रीं निर्माल्यसहितामलङ्काराद्यर्थं प्रददुः आशिषश्च युयुजुः । सा च वधूः रुक्मिणी ताभ्यो देव्यै च नमश्चक्रे शेषां निर्माल्यादिरूपां च जगृहे ॥ ४९ ॥ मुनीति ॥ अथानन्तरं मुनिव्रतं मौनं त्यक्त्वा रत्नमुद्रिकाभिरुपशोभिना पाणिना भृत्यां सखीं प्रगृह्याम्बिकागृहान्निश्चक्राम ॥ ५० ॥ तामिति सार्द्धद्वयम् ॥ देवस्य भगवतो मायामिव वीरान्मोहयतीति तथा तां सुमध्यमां शोभनः कृशो मध्यप्रदेशो यस्यास्तां कुण्डलाभ्यां मण्डितमाननं यस्यास्तां श्यामां "शीतकाले भवेदुष्णा उष्णकाले सुशीतला । स्तनौ सुकठिनौ यस्याः सा श्यामा परिकीर्तिता ॥" इति लक्षणां नितम्बयोः श्रोण्योरर्पिता निबद्धा रत्नमेखला यस्यास्तां व्यञ्जन्तौ यौवनागमं प्रकटयन्तौ प्रकटीभवन्तौ वा स्तनौ यस्यास्तां कुन्तलेभ्यः शंकिते इव चपले ईक्षणे यस्यास्तां शुचि स्मितं यस्यास्तां बिम्बफलमिव योऽधरोष्ठस्तस्य द्युतिभिः कान्तिभिः शोणायमाना द्विजा दन्ता एव कुन्दानां कुड्मलानि मुकुलानि यस्यास्तां कलहंसवद्गच्छतीति कलहंसगामिनी तां कला शोभा तद्युक्तं कला शिल्पं तन्निर्मितं वा नूपुरं कलानूपुरं सिञ्चत् कूजच्च तत्कलानूपुरं च तस्य धाम दीप्तिस्तेन शोभितुं शीलमस्यते न पदा ईदृग्भ्यां पद्भ्यां चलन्तीं तां विलोक्य

नमस्ये त्वाम्बिकेऽभीक्ष्णं स्वसन्तानयुतां शिवाम् ॥ भूयात्पतिर्मे भगवान्कृष्णस्तदनुमोदताम् ॥ ४६ ॥ अद्भिर्गन्धाक्षतैर्धूपैर्वासःस्रङ्माल्यभूषणैः ॥ नानोपहारबलिभिः प्रदीपावलिभिः पृथक् ॥ ४७ ॥ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् ॥ लवणापूपताम्बूलकण्ठसूत्रफलेक्षुभिः ॥ ४८ ॥ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः ॥ ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ॥ ४९ ॥ मुनिव्रतमथ त्यक्त्वा निश्चक्रामाम्बिकागृहात् ॥ प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभिना ॥ ५० ॥ तां देवमायामिव वीरमोहिनीं सुमध्यमां कुण्डलमण्डिताननाम् ॥ श्यामां नितम्बार्पितरत्नमेखलां व्यञ्जत्स्तनीं कुन्तलशङ्कितेक्षणाम् ॥ ५१ ॥ शुचिस्मितां बिम्बफलाधरद्युतिशोणायमानद्विजकुन्दकुड्मलाम् ॥ पदा चलन्तीं कलहंसगामिनीं सिञ्जत्कलानूपुरधामशोभिना ॥ विलोक्य वीरा मुमुहुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समागताः यशस्विनः प्रसिद्धास्तत्कृतेन तद्दर्शनोद्भूतेन हृच्छयेन कामेनार्दिताः पीडिताः वीरा मुमुहुः। यद्वा। तत्कृतो मायाप्रतीतिजनितो यो हृच्छयस्तेनार्दिताः यथा गन्धर्वदत्ताग्निस्थालीमुर्वशीं मत्वा पुरूरवाः कामार्दितोऽभूत्। तथा वीराणां हृच्छयो मायाप्रतीतिजन्य एवेति एवमग्रश्लोकेऽपि तां रुक्मिणीं देवमायामेव वीक्ष्येति ज्ञेयम् ॥ ५१ ॥ ॥५२॥ यामिति ॥ यात्राच्छलेन हरये स्वशोभाम् अर्पयतीं नुमभाव आर्षः। हरिरत्रागतश्चेत् मम शोभां पश्यत्विति दर्शयन्तीं राजभ्यः अदर्शयन्तीमपि यां वीक्ष्य गजरथाश्वगतास्ते जरासन्धाद्या दैत्यांशा नृपतयः तस्या उदारेण सुखदेन हासेन व्रीडापूर्वकावलोकेन च हृतानि चेतांसि येषां ते अत उज्झितास्त्रास्त्यक्तशस्त्राः विमूढाः सन्तः क्षितौ पेतुः। यामिति अग्रिमश्लोकोक्तसेत्यपेक्षया ॥ ५३ ॥ सेति ॥ सा रुक्मिणी तदैवं भगवतः प्राप्तिं प्रसमीक्षमाणा अत एव पद्मकोशतुल्यौ चरणौ शनैश्चलयती नुमभाव आर्षः। वामहस्तस्य करजैर्नखैरलकानुत्सार्य अपाकृत्य ह्रियैव प्राप्तान्नृपान् भुवि पतितान् अपाङ्गैः कटाक्षैः ऐक्षत। तदा च सा अच्युतं कृष्णं च ददर्श ॥ ५४ ॥ तामिति

यां वीक्ष्य ते नृपतयस्तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राः ॥ पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छलेन हरयेऽर्पयतीं स्वशोभाम् ॥ ५३ ॥ सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा ॥ उत्सार्य वामकरजैरलकानपाङ्गैः प्राप्तान्ह्रियैक्षत नृपान्ददृशेऽच्युतं सा ॥ ५४ ॥ तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो द्विषतां समीक्षताम् ॥ रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः ॥ ततो ययौ रामपुरोगमैः शनैः शृगालमध्यादिव भागहृद्धरिः ॥५५॥ तं मानिनः स्वाभिभवं यशःक्षयं परे जरासंधवशा न सेहिरे ॥ अहो धिगस्मान्यश आत्तधन्वनां गोपैर्हृतं केसरिणां मृगैरिव ॥ ५६ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे रुक्मिणीहरणं नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ श्रीशुक उवाच ॥ इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः ॥ स्वैः स्वैर्बलैः परिक्रान्ता अन्वीयुर्धृतकार्मुकाः ॥ १ ॥

सार्द्धम् ॥ तदा माधवः लक्ष्मीपतिः श्रीकृष्णो रथमारोढुमिच्छतीं तां राजकन्यां द्विषतां शत्रूणां चैद्यादीनां समीक्षतां समीक्षमाणानां सतां जहार। शता आर्षः। ततश्च सुपर्णलक्षणं गरुडध्वजं रथं समारोप्य राजन्यानां चक्रं मण्डलं परिभूय तुच्छीकृत्य रामः पुरोगमः अग्रणीर्येषां तैर्यदुभिः सह शनैर्ययौ। तत्र दृष्टान्तः। स्वभागं हृत्वा हरिः सिंहो यथा सृगालमध्यान्निर्भयः शनैर्याति तथा ययौ ॥ ५५ ॥ तमिति ॥ मानिनो दुरहङ्कारिणो जरासन्धवशाः परे शत्रवस्तं कन्याहरणेन स्वाभिभवं स्वयशःक्षयं च न सेहिरे। अहो अस्मान् धिक् यतः केसरिणां सिंहानां यशो मृगैरिव आत्तधन्वनां धनुर्द्धराणामस्माकं यशः गोपैर्हृतम्। गोपै राजभिः मृगैः शरभैरिति वास्तवोर्थः ॥ ५६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमत्रिपञ्चाशत्तमे व्यधात् ॥ ५३ ॥ चतुष्पञ्चाशत्तमेरीञ्जित्वा श्यालं विरूप्य च ॥ रुक्मिणीमूढवांस्तत्र श्लोकानां षष्टिरर्द्धयुक् ॥ उवाचेति चैयं द्वाभ्यां युक्ता षष्टिरनुष्टुभाम् ॥ ५४ ॥ इतीति ॥ अहो धिगस्मान् इत्येवं ब्रुवाणाः सुसंरब्धाः सुतरां क्रोधाविष्टाः गजादिभ्यः पूर्वं पतितास्ते

Nepal Sanskrit University, Balmiki Vidyapeeth Library

CC-0. In Public Domain. Digitization by eGangotri

धाहानारुह्य दंशिताः बद्धकवचाः पूर्वमुज्झितास्त्रत्वात् इदानीं धृतकार्मुकाः स्वैः स्वैर्बलैः सैन्यैः परिक्रान्ताः परिवृताः सर्वे जरासन्धादयः अन्वीयुः कृष्णमन्वधावन् ॥ १ ॥ तानिति ॥ हे राजन् तान् शत्रून् आपततः आगच्छतः आलोक्य ते यादवानीकयूथपाः यादवसैन्याधिपतयः स्वधनूंषि विस्फूर्ज्य टङ्कारयित्वा तेषां सम्मुखाः तस्थुः ॥ २ ॥ अश्वेति ॥ कोविदाः युद्धनिपुणाः जरासन्धादयः अश्वपृष्ठे गजस्कन्धे रथोपस्थे च स्थितेषु यादवेषु शरवर्षाणि मुमुचुः । यथा मेघा अद्रिषु अपो जलानि वर्षन्ति तथेत्यर्थः । तेन यादवानां हानेरभावः सूचितः ॥ ३ ॥ पत्युरिति ॥ तदा सुमध्यमा रुक्मिणी पत्युर्बलं शरासारैः शरवर्षैराच्छन्नं वीक्ष्य भयेन विह्वले लोचने यस्याः तादृशी सती सव्रीडं यथा स्यात्तथा तस्य पत्युर्वक्त्रमैक्षत् ऐक्षत। तङभाव आर्षः ॥४॥ प्रहस्येति ॥ तदा प्रहस्य भगवान् तामाह स्म हे ! वामलोचने त्वं मा स्म भैर्भयं मा कृथाः । " बहुलं छन्दसि"इति सिचः परस्य ईडभावः। " हल्ङ्याप्०" इति लोपः।तावकैः त्वदीयैः सैनिकैः शात्रवं बलम् अधुनैव विनङ्क्ष्यति नाशमेष्यति।स्वेषां तदीयत्वनिर्देशस्तस्यां परमप्र-

तानापतत आलोक्य यादवानीकयूथपाः ॥ तस्थुस्तत्संमुखा राजन्विस्फूर्ज्य स्वधनूंषि ते ॥ २ ॥ अश्वपृष्ठे गजस्कन्धे रथोपस्थे च कोविदाः ॥ मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा ॥ ३ ॥ पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सुमध्यमा ॥ सव्रीडमैक्षत्तद्वक्त्रं भयविह्वललोचना ॥ ४ ॥ प्रहस्य भगवानाह मा स्म भैर्वामलोचने ॥ विनङ्क्ष्यत्यधुनैवैतत्तावकैः शात्रवं बलम् ॥ ५ ॥ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः ॥ अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान्रथान् ॥ ६ ॥ पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि ॥ सकुण्डलकिरीटानि सोष्णीषाणि च कोटिशः ॥ ७ ॥ हस्ताः सासिगदेष्वासाः करभा ऊरवोऽङ्घ्रयः ॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ॥८॥ हन्यमानबलानीका वृष्णिभिर्जयकाङ्क्षिभिः ॥ राजानो विमुखा जग्मुर्जरासन्धपुरःसराः ॥ ९ ॥ शिशुपालं समभ्येत्य हृतदारमिवातुरम् ॥ नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन् ॥ १० ॥

णयव्यञ्जकः ॥ ५ ॥ तेषामिति ॥ तेषां जरासन्धादीनां तत् तदा स चासौ विक्रमश्चेति वा तं विक्रमम् अमृष्यमाणा गदसङ्कर्षणादयो वीराः नाराचैर्बाणैर्हयगजान् रथान् तत्रस्थान् शत्रून् जघ्नुः ॥ ६ ॥ पेतुरिति ॥ रथिनाम् अश्विनां गजिनां रथाद्यारूढानां सकुण्डलकिरीटानि तत्सहितानि उष्णीषाणि शिरोवतंसवस्त्राणि तत्सहितानि सोष्णीषाणि बाणादिभिः छिन्नानि कोटिशः शिरांसि च भुवि पेतुः ॥७॥ हस्ता इति ॥ सासिगदेष्वासैः खड्गगदाधनुर्भिः सहिताः हस्ताश्च करभाः प्रकोष्ठाश्च विस्तृताः कराः ऊरुविशेषणं वा। ऊरवश्चाङ्घ्रयश्च तथा पेतुः अश्वाश्वतरादीनां शिरांसि च पेतुः ॥८॥ हन्यमानेति ॥ जयकाङ्क्षिभिर्वृष्णिभिर्हन्यमानानि बलानीकानि सैन्यसमुदाया येषां ते जरासन्धपुरस्सराः राजानो विमुखाः पराङ्मुखाः सन्तो जग्मुः ॥ ९ ॥ शिशुपालमिति ॥ अप्राप्तदारत्वेऽपि तत्रात्यभिनिवेशात् हृतदारमिवातुरं व्याकुलं नष्टत्विषं निस्तेजस्कं गत उत्साहो यस्मात्तं शुष्यद्वदनं यस्य तं शिशुपालं समभ्येत्य तेऽब्रुवन् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भो भो इति ॥ भो भोः पुरुषशार्दूल हे पुरुषश्रेष्ठ इदं दौर्मनस्यं विवाहनिवृत्तिजनितविषादं त्यज। यतो हे राजन् प्रियाप्रिययोः सुखदुःखयोर्निष्ठा स्थैर्यं देहिषु न दृश्यते ॥ ११ ॥ यथेति ॥ कुहको नर्तकः तस्येच्छया इच्छानुसारेण दारुमयी योषित्प्रतिमा यथा नृत्यते तङ्गार्षः। इतस्ततो गच्छति एवमीश्वरतन्त्रः परमेश्वराधीनत्वादयं जीवोऽप्यात्मनः सुखदुःखयोः ईहते यतते ॥ १२ ॥ शौरेरिति ॥ सप्तदश संयुगानि युद्धानि कृत्वा त्रयोविंशत्यक्षौहिणीकैः सैन्यैः सहितोऽप्यहं शौरेः श्रीकृष्णात्पराजितः सप्तदशकृत्व इति शेषः। परं केवलमत्युग्रं वा अन्तिमं वा एकं संयुगम् अहं जिग्ये जितवानस्मि। तङ्गार्षः ॥१३॥ तथापीति ॥ तथापि दैवमदृष्टं तेन युक्तेन प्रयुक्तेन कालेन कृत्स्नं जगद्विद्रावितम् उपद्रुतं जानन् अहं कर्हिचित् पराजयकाले न शोचामि जयकाले च न हृष्यामि ॥ १४ ॥ अधुनेति ॥ फल्गुतन्त्रैः स्वल्पसैन्ययुक्तैरपि कृष्णपालितैर्यदुभिः वीरयूथपयूथपाः अपि वयं सर्वे अधुना पराजिताः ॥ १५ ॥ रिपव इति ॥ आत्मानुसारिणि यदूनामनुकुले काले प्राप्ते सत्यधुना रिपवो यदवो जिग्युःउत्कर्षं प्रापुः यदा

भो भोः पुरुषशार्दूल दौर्मनस्यमिदं त्यज ॥ न प्रियाप्रिययो राजन्निष्ठा देहिषु दृश्यते ॥ ११ ॥ यथा दारुमयी योषिन्नृत्यते कुहकेच्छया ॥ एवमीश्वरतन्त्रोऽयमीहते सुखदुःखयोः ॥ १२ ॥ शौरेः सप्तदशाहं वै संयुगानि पराजितः ॥ त्रयोविंशतिभिः सैन्यैर्जिग्य एकमहं परम् ॥ १३ ॥ तथाऽप्यहं न शोचामि न प्रहृष्यामि कर्हिचित् ॥ कालेन दैवयुक्तेन जानन्विद्रावितं जगत् ॥ १४ ॥ अधुनापि वयं सर्वे वीरयूथपयूथपाः ॥ पराजिताः फल्गुतन्त्रैर्यदुभिः कृष्णपालितैः ॥ १५ ॥ रिपवो जिग्युरधुना काल आत्मानुसारिणि ॥ तदा वयं विजेष्यामो यदा कालः प्रदक्षिणः ॥ १६ ॥ एवं प्रबोधितो मित्रैश्चैद्योऽगात्सानुगः परम् ॥ हतशेषाः पुनस्तेऽपि ययुः स्वं स्वं पुरं नृपाः ॥ १७ ॥ रुक्मी तु राक्षसोद्वाहं कृष्णद्विडसहन्स्वसुः ॥ पृष्ठतोऽन्वगमत्कृष्णमक्षौहिण्या वृतो बली ॥ १८ ॥ रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजाम् ॥ प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ॥ १९ ॥ अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीम् ॥ कुण्डिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः ॥ २० ॥

चास्माकं प्रदक्षिणः कालः अनुकूलः भावी तदा वयमपि सर्वे विजेष्यामः। तङ्भाव आर्षः ॥ १६ ॥ एवमिति ॥ एवं मित्रैर्जरासन्धादिभिः प्रबोधितः सान्त्वितश्चैद्यः शिशुपालः सानुगः हतावशिष्टैर्भृत्यादिभिः सहितः स्वपुरं प्रति अगात् गतवान् हतशेषास्ते जरासन्धादयो नृपा अपि पुनः स्वं स्वं पुरं प्रति ययुः ॥ १७ ॥ रुक्मीति ॥ बली कृष्णद्विट् च रुक्मी तु स्वसुर्भगिन्या राक्षसोद्वाहं हरणमसहन् असहमान अक्षौहिण्या सेनया वृतः पृष्ठतः कृष्णमन्वगमत् अनुधावितुमैच्छत् ॥ १८ ॥ रुक्मीति ॥ तत्र पूर्वं महाबाहुर्बली अमर्षी तद्धरणमसहमानः सुसंरब्धः संक्रुद्धः दंशितः बद्धकवचः सशरासनः धनुर्धरः रुक्मी सर्वेषां भूभुजां राज्ञां शृण्वतां सतां प्रतिजज्ञे प्रतिज्ञामकरोत् ॥१९॥ अहत्वेति ॥ समरे कृष्णमहत्वा अप्राप्य अज्ञात्वा वेति वास्तवोऽर्थः। रुक्मिणीं च अप्रत्यूह्य अनिवर्त्य कुण्डिनं न प्रवेक्ष्यामि एतदहं वो युष्मान् प्रति सत्यं ब्रवीमि॥२०॥

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्युक्त्वा रथमारुह्य सत्वरः स सारथिमाह स्म यतो यत्र कृष्णोऽस्ति तत्राश्वानाऽऽशु चोदय गमय तेन कृष्णेन सह मे मम संयुगं सङ्ग्रामो भवेत् । तेनेत्यत्र तस्येत्यपि पाठः ॥ २१ ॥ अद्येति ॥ अद्याहं सुदुर्मतेः गोपालस्य वनचरस्य निकृष्टस्य कृष्णस्य वीर्यप्रयुक्तं मदं निशितैस्तीक्ष्णैर्बाणैर्नेष्ये दूरीकरिष्यामि । येन कृष्णेन मम स्वसा भगिनी प्रसभं बलात् हृतेति वस्तुतो गोपालस्य भूम्यादिपालकस्य सुतरां दुःखेन मतिर्ज्ञानं यस्य तस्य बाणैर्मदीयवीर्यं नेष्ये हारयिष्ये ॥ २२ ॥ विकत्थमान इति ॥ विकत्थमानः स्वं श्लाघमानः कुमतिः ईश्वरस्य हरेः प्रमाणं बलस्येयत्तां न वेत्तीति तथा सः रुक्मी अथानन्तरमेवैकेनैव रथेनानुधावन् तिष्ठ तिष्ठेति गोविन्दमाह्वयत् । स्पर्द्धाया अविवक्षणान्न तङ् ॥ २३ ॥ धनुरिति ॥ सुदृढं धनुर्विकृष्य तत्र शरान् सन्धाय अवज्ञयात्मानमनादृत्य यान्तं कृष्णं पृष्ठतः त्रिभिः शरैः जघ्ने आह स्म च । हे अरे शत्रो यदूनां कुलपांसन कुलदूषण कुलं पांसु करोति पांसुशब्दात्तत्करोतीति णिच् । क्षणं ममाग्रे तिष्ठेति । वस्तुतः अरे क्षणं शीघ्रदर्शनं यथा स्यात्तथा तिष्ठ । "अरं द्रुतम्" इत्यमरः । हे यदूनां कुलपते अंसन शत्रुहननचतुर अंस समाघाते नन्द्यादेर्ल्युः ॥ २४ ॥ कुत्रेति ॥ हे मन्द ध्वाङ्क्षः काकः स यथा यज्ञे हविर्हृत्वा याति तथा मम

इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः ॥ नोदयाश्वान्यतः कृष्णस्तस्य मे संयुगं भवेत् ॥ २१ ॥ अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः ॥ नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ॥ २२ ॥ विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् ॥ रथेनैकेन गोविन्दं तिष्ठ तिष्ठेत्यथाह्वयत् ॥ २३ ॥ धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः ॥ आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन ॥ २४ ॥ कुत्र यासि स्वसारं मे मुषित्वा ध्वाङ्क्षवद्धविः ॥ हरिष्येऽद्य मदं मन्द मायिनः कूटयोधिनः ॥ २५ ॥ यावन्न मे हतो बाणैः शयीथा मुञ्च दारिकाम् ॥ स्मयन्कृष्णो धनुश्छित्त्वा षड्भिर्विव्याध रुक्मिणम् ॥ २६ ॥

स्वसारं मुषित्वा त्वं कुत्र यासि । मायिनः कूटयोधिनः कपटेन युद्धकर्त्तुः ते मदमद्य ह हरिष्ये वस्तुतो ध्वाङ्क्षवत् एकाक्षो ध्वाङ्क्षस्तद्विपरीतो नेकाक्षत्वपर्यवसानभूतः इन्द्र इव मुषित्वा स्वभागत्वान्न्यायेनैव लब्ध्वा कुत्र यासि भयाभावान्न काऽपि । किं च । हे मन्द स्थिर महामायाशक्ते कूटान् खलानस्मान् योधयसि पलायनेनास्मत्प्रोत्साहनात् तस्य तव त्वां प्रति मदं हर्षं स्वपराजयेन प्रापयिष्यामि । यद्वा । हविरिव शुद्धां मे स्वसारममुषित्वेति ध्वाङ्क्षवत्क्षुद्रोऽहमिति मदं हरिष्ये इति चान्वयः ॥ २५ ॥ यावदिति ॥ यावत् मम बाणैर्हतो न शयीथास्ततः पूर्वमेव दारिकां कन्यां रुक्मिणीं त्वं मुञ्च त्यज । वस्तुतो मे बाणैर्न हतो न प्राप्तो यावच्छयीथाः स्वस्थो वर्तेथास्तावद्दारिकां बाणैर्मद्विदारणं धात्वर्थनिर्देशे ण्वुल् । मुञ्च त्यज मा कुरु मद्बाणप्राप्त्या तव व्याकुलीभावश्चासम्भवीति मां जहीति भावः । तदा कृष्णोऽपि स्मयन् उपहसन् शता आर्षः । तस्य धनुश्छित्त्वा षड्भिर्बाणै रुक्मिणं विव्याध हस्तद्वयपादद्वयभालहृदयेषु विव्याध ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टभिरिति ॥ कृष्णः अष्टभिः शरैश्चतुरो वाहान् विव्याध ताडयामास । द्वाभ्यां शराभ्यां सूतं विव्याध । त्रिभिः शरैः ध्वजं विव्याध । स रुक्मी च अन्यद्धनुरादाय पञ्चभिः शरैः कृष्णं विव्याध ॥ २७ ॥ तैरिति ॥ तै रुक्मिप्रयुक्तैः शरसमूहैस्ताडितोऽच्युतः कृष्णस्तदपि धनुश्चिच्छेद । ततः पुनरन्यद्धनुः रुक्म्युपादत्त । तदप्यव्ययः कृष्णः अच्छिनत् ॥ २८ ॥ परिघमिति ॥ ततः परिघं पट्टिशं शूलं चर्म असिं शक्तिं तोमरं चेति यद्यदायुधं स रुक्म्यादत्त तत्सर्वं विभुः कृष्णोऽच्छिनत् । हरिरित्यपि पाठः ॥ २९ ॥ तत इति ॥ ततः खड्गपाणिः क्रुद्धो रुक्मी रथादवप्लुत्य जिघांसया हन्तुमिच्छया पतङ्गः पावकमिव कृष्णमभ्यद्रवत् ॥ ३० ॥ तस्येति ॥ आपततः आगच्छतस्तस्य रुक्मिणः खड्गं चर्म खेटं च भगवान् इषुभिस्तिलप्रमाणशः छित्त्वा रुक्मिणं हन्तुमुद्यतः सन् तिग्मं तीक्ष्णमसिमादत्त ॥ ३१ ॥ दृष्ट्वेति ॥ भ्रातृवधार्थमुद्योगं प्रयत्नं दृष्ट्वा भयेन विह्वला सती रुक्मिणी भर्तुः पादयोः पतित्वा करुणं यथा भवति तथोवाच ॥ ३२ ॥ योगेति ॥ हे योगेश्वरेत्याद्याः षट् सम्बुद्धयः । स्वभ्रातुर्निकृष्टत्वसूचनेन वधानर्हत्वपरा तथा

अष्टभिश्चतुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः ॥ स चान्यद्धनुरादाय कृष्णं विव्याध पञ्चभिः ॥ २७ ॥ तैस्ताडितः शरौघैस्तच्चिच्छेद धनुरच्युतः ॥ पुनरन्यदुपादत्त तदप्यच्छिनदव्ययः ॥ २८ ॥ परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ ॥ यद्यदायुधमादत्त तत्सर्वं सोऽच्छिनद्धरिः ॥ २९ ॥ ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया ॥ कृष्णमभ्यद्रवत्क्रुद्धः पतङ्ग इव पावकम् ॥३०॥ तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः ॥ छित्त्वासिमाददे तिग्मं रुक्मिणं हन्तुमुद्यतः ॥ ३१ ॥ दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला ॥ पतित्वा पादयोर्भर्तुरुवाच करुणं सती॥ ३२ ॥ योगेश्वराप्रमेयात्मन्देवदेव जगत्पते॥हन्तुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥ ३३ ॥ श्रीशुक उवाच ॥ तया परित्रासविकम्पिताङ्ग्या शुचाऽवशुष्यन्मुखरुद्धकण्ठया ॥ कातर्यविस्रंसितहेममालया गृहीतपादः करुणो न्यवर्तत ॥ ३४ ॥ चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन्व्यरूपयत् ॥ तावन्ममर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं यथा गजाः ॥ ३५ ॥

च त्वं योगवतामीश्वरः अयमीशितव्येष्वपि निकृष्टः त्वमप्रमेयः अयं कीटतुल्यः त्वं देवदेवोऽयं मनुष्येष्वपि त्वद्वैमुख्यादधमः त्वं जगत्पतिः अयं जगत्यप्यधमः त्वं कल्याणोऽयमकल्याणः त्वं महाभुजोऽयमबलः अत इमं मे भ्रातरं हन्तुं नार्हसि ॥ ३३ ॥ तयेति ॥ परित्रासेन परितो भयेन विकम्पितान्यङ्गानि यस्यास्तया शुचा शोकेनावशुष्यत् मुखं यस्याः रुद्धः कण्ठो यस्याः सा च तया कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्यास्तया रुक्मिण्या गृहीतौ पादौ यस्य सः यतः करुणः कृपापूर्णः अतः रुक्मिवधान्न्यवर्त्तत ॥ ३४ ॥ चैलेनेति ॥ ततः असाधुकारिणमपराधिनं तं रुक्मिणं चैलेन तद्वस्त्रेण गले भुजयोश्च बद्ध्वा वामहस्तेन तच्चैलाग्रद्वयं धृत्वा दक्षिणहस्तधृतेन असिना उष्णीषं दूरीकृत्य सश्मश्रुकेशं सहितानि स्थाने स्थाने अवशिष्टानि श्मश्रूणि श्मश्रुगुच्छाः केशाश्च यथा भवन्ति तथा । यद्वा । सः कृष्णः श्मश्रुकेशमिति

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वन्द्वैक्यम् । तेनैवासिना प्रवपन् मुण्डयन् व्यरूपयत् विकृतरूपमकरोत् । तावत् हस्त्यश्वादिभिरद्भुतम् उद्धतमिति पाठे साहसादियुतमपि परस्य शत्रोस्तस्य सैन्यं यथा नलिनीं गजास्तथा यदुप्रवीरा ममर्दुः । गुण आर्षः ॥ ३५ ॥ कृष्णेति अर्द्धम् ॥ ते यदुप्रवीराः कृष्णान्तिकम् उपव्रज्य तत्र रुक्मिणं ददृशुः । तथाभूतं हतप्रायमित्यनयोरत्राप्यप-कर्षः । तथेति ॥ विभुः करुणः दयालुः भगवान् संकर्षणः तथाभूतं विकृतरूपम् अत एव हतप्रायं मारिततुल्यं रुक्मिणं बद्धं दृष्ट्वा विमुच्य च कृष्णमब्रवीत् ॥ ३६ ॥ वरं वधोऽप्यस्य साधुरभविष्यदिदं खड्गेन मुण्डनं त्वतिबीभत्सितमभूदिति शोचन्त्या रुक्मिण्याः सान्त्वनार्थं बहिः कृष्णं किंचिदुपालभमानः अन्तस्तु समुचितं स्मृत्वा प्रसी-दन्नेवाह—असाध्विति ॥ हे कृष्ण इदं वैरूप्यकर्म त्वया असाधु कृतम् अस्माकं जुगुप्सितं चैतत् । यतः सुहृदः श्मश्रुकेशानां वपनं तज्जन्यं वैरूप्यं च सुहृदो वध एव ॥ ३७ ॥ रुक्मिणीं प्रत्याह—मैवेति ॥ हे साध्वि भ्रातृवैरूप्यप्रयुक्तया चिन्तयास्मान्मैवासूयेथाः दोषारोपेण मा पश्य । सुखदुःखप्रदः अन्यः नास्ति । यतः पुमान् प्राणिमात्रं स्वकृ-

कृष्णान्तिकमुपव्रज्य ददृशुस्तत्र रुक्मिणम् ॥ तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः ॥ विमुच्य बद्धं करुणो भगवान्कृष्णमब्रवीत्
॥ ३६ ॥ असाध्विदं त्वया कृष्ण कृतमस्मज्जुगुप्सितम् ॥ वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः ॥ ३७ ॥ मैवास्मान्साध्व्यसूयेथा
भ्रातुर्वैरूप्यचिन्तया ॥ सुखदुःखदो न चान्योऽस्ति यतः स्वकृतभुक् पुमान् ॥ ३८ ॥ बन्धुर्वधार्हदोषोऽपि न बन्धोर्वधमर्हति ॥ त्याज्यः
स्वेनैव दोषेण हतः किं हन्यते पुनः ॥ ३९ ॥ क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः ॥ भ्राताऽपि भ्रातरं हन्याद्येन घोरतमस्ततः
॥ ४० ॥ राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः ॥ मानिनोऽन्यस्य वा हेतोः श्रीमदान्धाः क्षिपन्ति हि ॥ ४१ ॥ तवेयं विषमा
बुद्धिः सर्वभूतेषु दुर्हृदाम् ॥ यन्मन्यसे सदाऽभद्रं सुहृदां भद्रमज्ञवत् ॥ ४२ ॥

तकर्मफलभुक् अतः स्वयमेव सुखदुःखहेतुः ॥ ३८ ॥ पुनः कृष्णमाह—बन्धुरिति ॥ वधार्हः वधमर्हति येन तथाविधो दोषो यस्य तथाविधोऽपि बन्धुः श्यालः बन्धोः भगिनीपतेः सकाशाद्वधं नार्हति किंतु त्याज्य एव सः । यस्मात्स स्वेन दोषेण हत एव अतः पुनः किं हन्यते । अतोऽस्माकमपि अनेनाकीर्तिरिति ॥ ३९ ॥ पुनर्देवीमाह—क्षत्रियाणामिति ॥ येन धर्मेण हेतुना भ्रातापि युद्धे भ्रातरं हन्यात् घोरतमः अतिदारुणः क्षत्रियाणां धर्मः प्रजापतिनैव विनिर्मितः ततो हेतोर्घोरतरोऽपि स धर्म एवेति वान्वयः । ततो रुक्मिवधप्रवृत्तौ अस्माकं कोऽपराध इति भावः ॥ ४० ॥ पुनः कृष्णमाह—राज्यस्येति ॥ हि यस्मात् श्रीमदेनान्धा विवेकरहिताः अभिमानिनो जनाः एव राज्यादीनामन्यस्य वा हेतोः निमित्तात् बन्धून् क्षिपन्ति तिरस्कुर्वन्ति तस्मादस्माकमेतदनुचितमेव ॥ ४१ ॥ पुनर्देवीमाह—तवेति ॥ सर्वभूतेषु दुर्हृदामहितानामपि स्वसुहृदां भद्रमेव दण्डनरूपं मुण्डनमभद्रं यन्मन्यसे तवेयं बुद्धिः विषमा असमीचीना । यद्वा । सर्वभूतेषु दुर्हृदामपि भ्रातॄणामज्ञवद्यद् भद्रं मन्यसे इच्छसि इयं तव विषमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिः । यतस्तदेव सुहृदामभद्रमिति । यद्वा । यत् सर्वभूतेषु मध्ये दुर्हृदां शत्रूणां सदा अभद्रं मन्यसे इच्छसि सुहृदां च भद्रमिच्छसि सेयम् अज्ञवत् अज्ञानामिव तव विषमा बुद्धिः । यद्वा । सर्वभूतेषु मध्ये दुर्हृत्त्वेन प्रतीतानां केषांचिद्यदभद्रमिच्छसि सुहृत्त्वेन प्रतीतानां च भद्रमिच्छसि परिशेषादन्येष्वौदासीन्यं कुरुषे सेयं तव विषमा बुद्धिः ॥ ४२ ॥ तत्र हेतुः—आत्मेति ॥ देह एवात्मेति अभिमानवतां नृणां प्राणिनां सुहृत् दुर्हृत् उदासीन इत्येष आत्मनो बुद्धेर्मोह एव । देवस्य भगवतो मायया कल्प्यते ॥ ४३ ॥ एक इति ॥ हि निश्चितं परो देहादेर्भिन्नः शुद्धो वा सर्वेषामपि देहिनामेक एवात्मा मूढैर्देहादिभेदेननानेव गृह्यते यथा ज्योतिश्चन्द्रादिरुदकपात्रभेदेन यथा वा नभो घटमठादिभेदेन भिन्नतया व्यवह्रियते तथा प्रतिबिम्बावच्छेदपक्षद्वयानुरोधेन दृष्टान्तद्वयम् ॥ ४४ ॥ देह इति ॥ द्रव्यमधिभूतं प्राणा इन्द्रियाण्यध्यात्मं गुणशब्देनाधिदैवं तत्त्रितयात्मकः अविद्यया शक्त्यात्मनि क्लृप्तः आत्मस्वरूपावरणेन तत्स्थाने प्रकाशितः आद्यन्तवानेष देहो जन्मादिसंसाररहितमपि देहिनं संसारयति देहोपाधिना शुद्धो न प्रतीयते इति भावः ॥४५॥ वस्तुतः शुद्ध एवेत्याह—नेति ॥ हे सति असतात्मातिरिक्तसत्तारहितेनान्येन देहादिनात्मनः संयोगो नास्ति । "असङ्गो ह्ययं पुरुष" इति श्रुतेः । वियोगस्य

आत्ममोहो नृणामेष कल्पते देवमायया ॥ सुहृद्दुर्हृदुदासीन इति देहात्ममानिनाम् ॥ ४३ ॥ एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् ॥ नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥ ४४ ॥ देह आद्यन्तवानेष द्रव्यप्राणगुणात्मकः ॥ आत्मन्यविद्यया क्लृप्तः संसारयति देहिनम् ॥ ४५ ॥ नात्मनोऽन्येन संयोगो वियोगश्चासतः सति ॥ तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ॥ ४६ ॥ जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित् ॥ कलानामिव नैवेन्दोर्मतिर्ह्यस्य कुहूरिव ॥ ४७ ॥

संयोगपूर्वकत्वात् संयोगाभावे वियोगोऽपि नास्ति असत । इति पाठे आत्मव्यतिरेकेण देहादेरसत्त्वात् इत्यर्थः । कुतोऽसत्त्वं तत्राह । तस्य देहादेः प्रसिद्धेः उत्पत्तेः प्रकाशस्य च तद्धेतुत्वात्स आत्मा हेतुर्यस्याः सा तथात्वात् । ननु देवैरधिष्ठितेभ्य इन्द्रियभूतानां प्रतीतिः प्रसिद्धा भूतप्रतीत्या च तत्र सिद्धिर्नान्यथेत्यत इत्यत आह । यथा दृग्रूपाभ्यां प्रकाशकप्रकाश्यतया प्रसिद्धाभ्यां भिन्नादपि रवेः सकाशादेव दृग्रूपयोः प्रसिद्धिः । द्वयोरपि तैजसत्वात्तदभेदश्च । तथा देहेन्द्रियादीनां परस्परं प्रकाश्यप्रकाशकभावेन सिद्धानामप्यात्मचैतन्याधीन एव प्रकाशस्तत्कार्यत्वात् तद्व्यतिरेकेणासत्त्वं चेत्यर्थः । तथा च वक्ष्यति द्वादशे । "दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथक् भवेत् । एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥" इति । यद्वा । रवेः प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्परं प्रसिद्धिर्यथा भवति तद्वदिति ॥४६॥ जन्मेति ॥ जन्मादयो विक्रिया देहस्यैव भवन्ति आत्मनस्तु क्वचिदपि न भवन्ति । देहजन्मादिभिरेवात्मनो जातोऽहं बालोहम् इत्यादिर्जन्मादिव्यवहारः यथा कलानां जन्मवृद्ध्यादयो भवन्ति अस्य जलगोलविशेषस्य इन्दोस्तु न भवन्ति । कलाजन्मवृद्ध्यादिभिरेवेन्दोर्जन्मवृद्ध्यादि व्यवह्रियते एवं कलानामेव क्षयलक्षणा कुहूरमावास्या चन्द्रस्य मृतिः इन्दुक्षय इति व्यपदिश्यते ॥ ४७ ॥

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ देहादिसंबन्धरूपेऽर्थे असति अविद्यमानेऽपि शयानः पुरुषः आत्मानं देहादिविशिष्टं भोक्तारं विषयान् शब्दादीन् भोग्यान् फलं तद्भोगं च यथानुभुङ्क्ते अनुभवति तथाऽबुधः अज्ञो भवं जन्मादिसंसारं प्राप्नोति अनुभवति ॥ ४८ ॥ तस्मादिति ॥ हे शुचिस्मिते यस्मादज्ञानमूलकमेव शोकादि तस्मात् आत्मानमन्तःकरणं शोषयति कृशीकरोति तथा विमोहयति तम् अज्ञानजं शोकम् आत्मतत्वं ज्ञानेन निर्हृत्य अपाकृत्य स्वस्था शान्तचित्ता भव ॥ ४९ ॥ एवमिति ॥ तन्वी सुकुमाराङ्गी रुक्मिणी भगवता रामेण प्रतिबोधिता सती रुक्मिवैरूप्यनिमित्तं वैमनस्यं शोकं परित्यज्य बुध्या विवेकात्मिकया मनः संकल्पविकल्पात्मकं समादधे समाहितवती ॥ ५० ॥ रुक्मिणस्तु एवं श्रुतवतोऽपि नाज्ञानं निवृत्तमित्याह–प्राणेति सार्द्धम् ॥ द्विड्भिः शत्रुभिः कृष्णादियदुभिः हतं बलं प्रभा तेजश्च यस्य सः अत एव प्राणमात्रमवशेषो यस्य सः तैरेव उत्सृष्टः वशीकृत्य त्यक्तः अत एव वितथः अपूर्णः आत्मनो मनोरथो यस्य सः स्वविरूपकरणं स्मरन् तत्रैव विरूपीकरणप्रदेशे भोजकटं नाम महत् विपुलं पुरं स्वनि-

यथा शयान आत्मानं विषयान्फलमेव च ॥ अनुभुङ्क्तेऽप्यसत्यर्थे तथाप्नोत्यबुधो भवम् ॥४८॥ तस्मादज्ञानजं शोकमात्मशोषविमोहनम् ॥ तत्त्वज्ञानेन निर्हृत्य स्वस्था भव शुचिस्मिते ॥ ४९ ॥ श्रीशुक उवाच ॥ एवं भगवता तन्वी रामेण प्रतिबोधिता ॥ वैमनस्यं परित्यज्य मनो बुद्ध्या समादधे ॥ ५० ॥ प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः ॥ स्मरन्विरूपकरणं वितथात्ममनोरथः ॥ चक्रे भोजकटं नाम निवासाय महत्पुरम् ॥ ५१ ॥ अहत्वा दुर्मतिं कृष्णमप्रत्यूह्य यवीयसीम् ॥ कुण्डिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रुषा ॥ ५२ ॥ भगवान्भीष्मकसुतामेवं निर्जित्य भूमिपान् ॥ पुरमानीय विधिवदुपयेमे कुरूद्वह ॥ ५३ ॥ तदा महोत्सवो नृणां यदुपुर्यां गृहे गृहे ॥ अभूदनन्यभावानां कृष्णे यदुपतौ नृप ॥ ५४ ॥ नरा नार्यश्च मुदिताः प्रमृष्टमणिकुण्डलाः ॥ पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ॥ ५५ ॥

वासाय चक्रे। भोजस्य विदर्भराजस्य दुःखभोक्तुर्वा कटः शपथो यत्रेति व्युत्पत्तेः "कटः किलिञ्जे शपथे" इति नानार्थात् ॥५१॥ शपथमाह–अहत्वेति ॥ दुर्मतिं कृष्णमहत्वा यवीयसीं कनिष्ठां रुक्मिणीमप्रत्यूह्य अप्रत्यावर्त्य कुण्डिनं पुरं न प्रवेक्ष्यामीति रुषा उक्त्वा प्रतिज्ञाय वस्तुतः अहत्वा अज्ञात्वा अदुर्मतिमिति च्छेदः अप्रत्यूह्य विघ्निताम‍कृत्वा इत्युक्त्वा तत्रैवावसत् ॥ ५२ ॥ भगवानिति ॥ हे कुरूद्वह परीक्षित् भगवान् कृष्ण एवं युधि भूमिपान् निर्जित्य भीष्मकसुतां रुक्मिणीं स्वपुरमानीय विधिवद्यथाविधानं विवाहहोमादिना उपयेमे विवाहितवान्। यद्वा। भूमिपान् भीष्मकसुतां निर्जित्येति जयतेर्द्विकर्मकत्वात्कर्मद्वयम् ॥५३॥ तदेति ॥ हे नृप तदा विवाहदिने यदुपतौ कृष्णे अनन्यभावानां निरुपाधिस्नेहवतां नृणां यदुपुर्यां द्वारकायां गृहे गृहे महानुत्सवोऽभूत् ॥ ५४ ॥ नरा इति ॥ प्रमृष्टानि निर्मलीकृतानि मणिमयानि कुण्डलानि येषां यासां च ते च ताश्च प्रमुदिता नरा नार्यश्च चित्रे वाससी ययोस्तयोर्वरयोर्वरवध्वोः स्वस्त्रोरितिवत् पारिबर्हं विवाहे देयमुपस्करमुपाजह्रुः समर्पयामासुः ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेतिं ॥ उत्तभितैरुद्धृत्य प्रतिबद्धैः अत्युच्चस्तम्भैरिवोन्नमितैर्वा इन्द्रकेतुभिर्ध्वजविशेषैः इन्द्रपुरस्पर्शिपताकायुक्तैरित्यन्ये । विचित्रैर्माल्यादिभिश्च प्रतिद्वारि गृहाणां द्वारे द्वारे उपक्लृप्तानि स्थापितानि यानि मङ्गलानि लाजाङ्कुरपुष्पपुटकादीनि तैश्च तथा आसमंतात्पूर्णैः कुम्भैरगुरुधूपैश्च दीपैश्च सा वृष्णीनां पुरी द्वारका बभौ ॥ ५६ ॥ सिक्तेति ॥ आहृता आहूता ये प्रेष्ठाः भूभुजो राजानस्तेषां संबन्धिभिर्मदच्युद्भिर्मदोदकं स्रवद्भिर्गजैः सिक्ता मार्गा यस्यां सा तथा । द्वास्सु परामृष्टा उच्छ्रिताः । यद्वा । तैरेव गजैः परामृष्टाः स्पृष्टाः शुण्डाग्रेण धृता वा रम्भाः कदल्यस्ताभिः पूगैश्चोपशोभिता अलंकृता च बभौ । एतेन गजानां मदेऽपि सौम्यता उक्ता ॥ ५७ ॥ कुर्विति ॥ संभ्रमात् औत्सुक्यात् परितो मार्गे धावतां बन्धूनां मध्ये तस्मिन्पुरे कुरुसृञ्जयाद्या बन्धुविशेषाः मिथः समेत्य मुमुदिरे मुदं प्रापुः । अत्र कुरवः भीष्मपाण्डवाद्याः विदर्भा इति रामाद्यैर्मुनिजनादिद्वारा विबोध्यानीताः भीष्मककथकैशिकादयः यदवो नन्दादयोऽपीत्येके । “ नन्दगोपोऽथ गोपालैर्गोपवृद्धैः समागतः । स्वलङ्कृताभिर्गोपीभिर्यशोदापि समागता ॥ ” इति पाद्मात् ॥ ५८ ॥ रुक्मिण्या इति ॥ ततस्ततस्तत्र तत्र देशेषु सूतादिभिर्गीयमानं रुक्मिण्याहरणात्मकं भगवच्चेष्टितं श्रुत्वा राजानः राजकन्याश्च भृशं विस्मिता बभूवुः

सा वृष्णिपुर्युत्तभितेन्द्रकेतुभिर्विचित्रमाल्याम्बररत्नतोरणैः ॥ बभौ प्रतिद्वार्युपक्लृप्तमङ्गलैरापूर्णकुम्भाऽगुरुधूपदीपकैः ॥५६॥ सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजाम् ॥ गजैर्द्वार्षु परामृष्टरम्भापूगोपशोभिता॥५७॥कुरुसृञ्जयकैकेयविदर्भयदुकुन्तयः॥ मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावताम् ॥ ५८ ॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः ॥ राजानो राजकन्याश्च बभूवुर्भृशविस्मिताः ॥ ५९ ॥ द्वारकायामभूद्राजन्महामोदः पुरौकसाम् ॥ रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रियः पतिम् ॥ ६० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे रुक्मिण्युद्वाहोत्सवे चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ श्रीशुक उवाच ॥ कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना ॥ देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ १ ॥

॥५९॥ द्वारकायामिति ॥ हे राजन् रमया लक्ष्म्यवताररूपया रुक्मिण्योपेतं सहितं श्रियः पतिं श्रीकृष्णं दृष्ट्वा द्वारकायां पुरौकसां पुरवासिनां महान्मोदो बभूव ॥ ६० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमचतुष्पञ्चाशके व्यधात्॥५४॥पञ्चपञ्चाशत्तमेहन्प्रद्युम्नः शम्बरासुरम् ॥ द्वारकां रत्या सहागाच्छ्लोकाः सार्द्धाः खसिन्धवः ॥ द्वे उवाचेति पादोना हस्तवेदा अनुष्टुभः ॥५५॥ जाम्बवत्यादिविवाहेभ्यः पूर्वमेव प्रद्युम्नजन्म ततो विवाहः ततः शम्बरागारात्प्रद्युम्नप्रत्यागमनम् अत्र पुत्रकथनप्रस्तावेऽपि जातमात्रस्य प्रद्युम्नस्य शम्बरेण हरणं निरूप्यते । प्रत्यागमनं तु उत्तरकालिकमपि कथापर्यवसानायात्रोक्तम्—काम इति ॥ वासुदेवाधिष्ठितचित्तप्रभवत्वात् सृष्टिहेतुत्वाच्च वासुदेवांशः।यद्वा।वासुदेवस्यांशः प्रद्युम्नरूपो विद्यते यत्र सः प्रद्युम्नविभूतिरूपः कामः इन्द्रभृत्यत्वेन एकादशादिषु प्रसिद्धः प्राकृतकामः प्राक् पूर्वजन्मनि रुद्रस्य मन्युना क्रोधेन दग्धः अनङ्गतां विधाय स्वतो देहप्राप्तावसमर्थः कृतः अतो भूयः पुनर्देहोपपत्तयेऽन्यप्रसङ्गतो देहलाभाय तं वासुदेवं कृष्णमेव तं वासुदेवांशं प्रद्युम्नमेव वा प्रत्यपद्यत प्रविश्या-

CC-0. In Public Domain. Digitization by eGangotri

वतस्थे। तमुपास्य तत्र सायुज्यं प्रापेति वा। अत्र स्वयं भगवतो नित्यलीलापरिकराणां प्रपञ्चे प्राकट्यं खलु भगवदिच्छया स्वस्मिन् प्रविष्टानां स्वविभूतीनामेव प्रथामाश्रित्य दृश्यते नतु साक्षात् स्वस्वप्रथया बहिर्मुखानां नानावादानामुत्खाताभावार्थं भक्तियोगसिद्धान्तस्य रहस्यत्वरक्षणार्थं च परोक्षवादा ऋषयः। "परोक्षं च मम प्रियम्" इति भगवदुक्तेः। द्रोण एव नन्दोऽभूत् धरैव यशोदा वसुरेवोद्धवः इन्द्र एवार्जुनः यम एव विदुरः गुह एव साम्ब इत्येवम्। किं बहुना स्वयं भगवतोऽपि स्वप्रविष्टस्वांशप्रथयैव जन्म। यथा वैकुण्ठनाथ एवागत्य वसुदेवगृहे जातः इत्यादि एवं तस्य तृतीयो व्यूहो यः प्रद्युम्नस्तस्यापि स्वप्रविष्टप्राकृतकन्दर्पाख्यविभूतिप्रथयैवायमाविर्भाव उक्तः नत्वसौ कन्दर्पाख्यः ॥ १ ॥ स इति ॥ य एव कृष्णस्य वीर्यात्सम्यगुद्भवो यस्य सः प्रद्युम्न इति व्यूहेषु विख्यातः कथितः स एव वैदर्भ्यां रुक्मिण्यां जातः प्राकृतकामस्तु सायुज्यादेव जातः इति भावः। तत्र हेतुः सर्वतः सौन्दर्याकृत्यालापादिभिः सर्वैर्गुणैः पितुरनवमः अन्यूनः तुल्यः ॥ २ ॥ तमिति ॥ सः कामशत्रुतया प्रसिद्धः शम्बरः कामरूपी अलक्षितरूपान्तरधारी सन् तं प्रद्युम्नम् आत्मनः शत्रुं कामं शम्बरवधेच्छोर्नारदस्य मुखात् विदित्वा अनिर्दशम् अनतीतदशाहं तोकं शिशुमेव विष्णुपुराणरीत्या जन्मतः षष्ठेऽह्नि हृत्वा उदन्वति समुद्रे प्रास्य

स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ॥ प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः ॥ २ ॥ तं शम्बरः कामरूपी हृत्वा तोकमनिर्दशम् ॥
स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहम् ॥ ३ ॥ तं निर्जगार बलवान्मीनः सोऽप्यपरैः सह ॥ वृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥ ४ ॥ तं शम्बराय कैवर्ता उपाजह्रुरुपायनम् ॥ सूदा महानसं नीत्वाऽवद्यन्स्वधितिनाऽद्भुतम् ॥ ५ ॥ दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् ॥ नारदोऽकथयत्सर्वं तस्याः शङ्कितचेतसः ॥ बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनम् ॥ ६ ॥

क्षिप्त्वा गृहं प्रत्यागात् ॥ ३ ॥ तमिति ॥ तंच शिशुं कश्चिद् बलवान् मीनो मत्स्यो निर्जगार निगीर्णवान् इदमपि विचित्रलीलाचिकीर्षोर्भगवत एवेच्छया नतु मीनोऽपि कामाद्बली ततो मत्स्यजीविभिर्धीवरैः अपरैः मत्स्यैः सह महता जालेन स मत्स्योऽपि वृतो गृहीतश्च ॥ ४ ॥ तमिति ॥ कैवर्तास्ते दाशास्तं महामत्स्यं शम्बराय उपायनमुपाजह्रुः समर्पयामासुः। ततश्च सूदाः पाचकास्तमद्भुतं मत्स्यं महानसं पाकगृहं प्रति नीत्वा स्वधितिना शस्त्रिकयाऽवद्यन् खण्डितवन्तः अडभाव आर्षः। अवाद्यन्निति क्वचित्कः पाठस्तु ॥१७९॥
साधुरेव ॥५॥ दृष्ट्वेति॥तदा तस्य मत्स्यस्योदरेऽद्भुतं बालं दृष्ट्वा प्रगृह्य मायावत्यै न्यवेदयन् समर्पयामासुः। कोऽसावयं बाल इति शङ्कितं चेतो यस्यास्तस्या। मायावत्या नारदो बालस्य तत्वं कामदेवस्वरूपत्वं कृष्णाद्रुक्मिण्यामुत्पत्तिं शम्बराहरणादिकं मत्स्योदरप्रवेशप्रकारं च सर्वमकथयत्। कामोऽयं तव भर्तेति प्रद्युम्नमेव तद्भर्त्रभेदेनाकथयत् सापि स्वपत्यभेदेनैव तमुपासांचक्रे ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा चेति ॥ सा च यशस्विनी पतिव्रता मायावती वै निश्चयेन कामस्य पत्नी रतिर्नाम प्रसिद्धा । रुद्रक्रोधेन निर्दग्धदेहस्य पत्युर्देहोत्पत्तिं प्रतीक्षती प्रतीक्षमाणा आसीत् । शतानुमभावश्चार्षः । एवं हि मात्स्ये कथा । कामस्य देहे भस्मीभूते सति रतिस्तद्देहप्राप्त्यर्थं शिवमाराधयामास । शम्बरश्चगतो वरान्तराय शिवस्तुष्टः प्रथमं वरं वृणु इति शम्बरं प्रत्याह स्म । स च रतिं दृष्ट्वा कामार्तस्तामेव वव्रे । ततः शिवो रुदतीं रतिं साश्वासमाह । या ह्यस्य सङ्गेन तत्रैव ते वाञ्छितसिद्धिर्भविष्यतीति।ततो रतिर्माययैव शम्बरं मोहयित्वा स्पर्शरहितैव तद्गृहे मायावत्यभिधानात्तस्थौ ॥ ७ ॥ निरूपितेति ॥ सा च शम्बरेण सूपौदनसाधने निरूपिता तं शिशुं नारदमुखात्कामदेवं बुध्वा तदा तस्मिन्नर्भके स्नेहं चक्रे ॥ ८ ॥ नेति ॥ नातिदीर्घेण अल्पेनैव कालेन पौगण्ड एवेत्यर्थः । रूढं प्राप्तं यौवनं यस्य सः कार्ष्णिः कृष्णस्यापत्यं प्रद्युम्नः स्वसौन्दर्यादिगुणैः पश्यन्तीनां नारीणां विभ्रमं संमोहं जनयामास ॥ ९ ॥ सेति ॥ अङ्ग हे राजन् पद्मदलवदायते ईक्षणे यस्य तं प्रलम्बौ बाहू यस्य तं नरलोकेषु सुन्दरं तं रूढयौवनं पतिं प्रद्युम्नं व्रीडया सहितो यो

सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ॥ पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ॥ ७ ॥ निरूपिता शम्बरेण सा सूपौदनसाधने ॥ कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं तदाऽर्भके ॥ ८ ॥ नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः ॥ जनयामास नारीणां वीक्षन्तीनां च विभ्रमम् ॥ ९ ॥ सा तं पतिं पद्मदलायतेक्षणं प्रलम्बबाहुं नरलोकसुन्दरम् ॥ सव्रीडहासोत्तभितभ्रुवेक्षती प्रीत्योपतस्थे रतिरङ्ग सौरतैः ॥ १० ॥ तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा ॥ मातृभावमतिक्रम्य वर्तसे कामिनी यथा ॥ ११ ॥ रतिरुवाच ॥ भवान्नारायणसुतः शम्बरेणाहृतो गृहात् ॥ अहं तेऽधिकृता पत्नी रतिः कामो भवान्प्रभो ॥ १२ ॥ एष त्वाऽनिर्दशं सिन्धावक्षिपच्छम्बरोऽसुरः ॥ मत्स्योऽग्रसीत्तदुदरादिह प्राप्तो भवान्प्रभो ॥ १३ ॥

हासस्तेन उत्तभिते भ्रुवौ यस्याः तया दृशा ईक्षती ईक्षमाणा प्राग्वदार्षः । सा मायावत्याख्या रतिः प्रीत्या सौरतैर्भावैरुपतस्थे अभजत् ॥ १० ॥ तामिति ॥ भगवान्सर्वज्ञोऽपि कार्ष्णिः प्रद्युम्नस्तां मायावतीमाह स्म । हे मातस्तव मतिरन्यथा विपरीता दृश्यते मातृभावमतिक्रम्य परित्यज्य कामिनी पुंश्चली यथा तथा वर्तसे। इदं वचश्च लीलानिधेः कृष्णस्येच्छया प्रद्युम्नस्य सर्वज्ञत्वावरणात् । वस्तुतः अतः भावात्ते मतिरन्यथा मा भवतु यतस्त्वं यथा यथावत् कामिन्येव अतः मातृभावमतिक्रम्यैव वर्तसे ॥ ११ ॥ भवानिति ॥ भवान्नारायणस्य कृष्णस्य सुतः शम्बराख्येनासुरेण तद्गृहादाहृतः। हे प्रभो अहं च ते तवाधिकृताधिकारप्राप्ता पत्नी रतिर्नाम भवान्कामश्च अहं पत्नीति तं कामदेवं मत्वोक्तिः । प्रद्युम्नेनापि स्पर्शमणिन्यायेनैव स्वस्पर्शेन सा स्वकान्ता कृता । वस्तुतोऽनिरुद्धमाता तस्य शक्तिरिति तोषिणी ॥ १२ ॥ एष इति ॥ हे प्रभो एष शम्बराख्योऽसुरः अनिर्दशम् अनतीतदशदिनमेव त्वामाहृत्य समुद्रे अक्षिपत् प्रक्षिप्तवान् । तत्र च त्वां मत्स्योऽग्रसीत् । तङ्भाव आर्षः । स मत्स्यो मत्स्यजीविभि-

CC-0. In Public Domain. Digitization by eGangotri

रत्रानीतस्तस्योदरात् भवानिह प्राप्तः ॥ १३ ॥ तमिति ॥ दुर्द्धर्षं दुर्जयं मायाशतविदं च तमिममात्मनः शत्रुं शम्बरं मोहनादिभिर्मायाभिर्मोहयित्वा त्वं जहि ॥ १४ ॥ परिशोचतीति ॥ दीना पुत्रस्नेहेन आकुला गता प्रजा पुत्रो यस्या सा ते तव माता कुररी पक्षिणी इव विवत्सा आतुरा गौरिव च त्वां परिशोचति ॥ १५ ॥ प्रभाष्येति ॥ मायावती एवं प्रभाष्य महात्मने महाप्रभाववतेऽपि प्रद्युम्नाय सर्वासां शत्रोर्मायानां विनाशिनीं महामायारूपां विद्यां ददौ ॥ १६ ॥ स चेति ॥ स च प्रद्युम्नः तं शम्बरमभ्येत्य अविषह्यैः सोढुमशक्यैराक्षेपैस्तिरस्कारवचनैः क्षिपन् अभिभवन् कलिं कलहं च संजनयन् संयुगाय युद्धार्थं समाह्वयत् । स्पर्द्धाया अविवक्षणान्न तङ् ॥ १७ ॥ स इति ॥ दुर्वचोभिरधिक्षिप्तस्तिरस्कृतः अमर्षेण तिरस्कारासहनेन क्रोधेन ताम्रे रक्ते लोचने यस्य सः गदा पाणौ यस्य सः शम्बरः पदाहत उरग इव युद्धार्थं गृहान्निश्चक्राम ॥ १८ ॥ गदामिति ॥ महात्मने प्रद्युम्नाय तरसा वेगेन गदामाविध्य भ्रमयित्वा प्रक्षिप्य वज्रस्याशनेर्निष्पेषे निर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं व्यन-

तमिमं जहि दुर्द्धर्षं दुर्जयं शत्रुमात्मनः ॥ मायाशतविदं त्वं च मायाभिर्मोहनादिभिः ॥ १४ ॥ परिशोचति ते माता कुररीव गतप्रजा ॥ पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा ॥ १५ ॥ प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने ॥ मायावती महामायां सर्वमायाविनाशिनीम् ॥ १६ ॥ स च शम्बरमभ्येत्य संयुगाय समाह्वयत् ॥ अविषह्यैस्तमाक्षेपैः क्षिपन्सञ्जनयन्कलिम् ॥ १७ ॥ सोऽधिक्षिप्तो दुर्वचोभिः पदाहत इवोरगः ॥ निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः ॥ १८ ॥ गदामाविध्य तरसा प्रद्युम्नाय महात्मने ॥ प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरम् ॥ १९ ॥ तामापतन्तीं भगवान्प्रद्युम्नो गदया गदाम् ॥ अपास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप ॥ २० ॥ स च मायां समाश्रित्य दैतेयीं मयदर्शिताम् ॥ मुमुचेऽस्त्रमयं वर्षं कार्ष्णौ वैहायसोऽसुरः ॥ २१ ॥ बाध्यमानोऽस्त्रवर्षेण रौक्मिणेयो महारथः ॥ सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीम् ॥ २२ ॥

दत् । ओदनपाकं पचतीतिवत् वचनमवोचदितिवच्च सामान्यविशेषतयायं निर्देशः । अतः अकरोदित्यर्थः । उक्तार्थानामप्रयोग इति न्यायेन नदतेः कृञर्थमात्रे पर्यवसानात् ॥ १९ ॥ तामिति ॥ भगवान् प्रद्युम्नोऽपि आपतन्तीम् आगच्छन्तीं तां शम्बरप्रयुक्तां गदां स्वगदया अपास्य निरस्य हे नृप क्रुद्धः सन् शत्रवे शम्बराय स्वगदां प्राहिणोत् प्रायुङ्क्त ॥ २० ॥ स चेति ॥ स च शम्बरोऽसुरः दैतेयीम् आसुरीं मयेन दैत्यदानवाचार्येण दर्शितामुपदिष्टां मायामन्तर्धानाद्यात्मिकामाश्रित्य वैहायसः तिरोभूय आकाशे स्थितः सन् कार्ष्णौ प्रद्युम्नेऽश्ममयं शिलामयम् अस्त्रमयमित्यपि पाठः । वर्षं मुमुचे अकरोत् ॥ २१ ॥ बाध्यमान इति ॥ महारथः रौक्मिणेयः प्रद्युम्नः अश्मवर्षेण शिलावर्षेण अस्त्रेति च पाठः । बाध्यमानस्ताड्यमानोऽपि सर्वासुरमायोपमर्दिनीं सत्वात्मिकां महाविद्यां प्रायुङ्क्तेत्युत्तरस्यापकर्षः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ पुनर्दैत्यः शम्बरः गौह्यकगान्धर्वपैशाचोरगराक्षसीः गुह्यकादिसम्बन्धिनीः आदौ गौह्यकादीनां सामान्यतो नपुंसकानां द्वन्द्वः । ततो मायाविशेषणत्वेन समस्तान् ङीप् वस्तुतस्त्वार्षः पुंवद्भावः । शतशो मायाः प्रायुङ्क्त स कार्ष्णिः प्रद्युम्नश्च ताः सर्वा माया व्यधमयत् व्यनाशयत् धमतेः सौत्राण्णिच् अमन्तत्वान् मित्त्वम् ॥ २३ ॥ निशातमिति ॥ निशातं तीक्ष्णमसिमुद्यम्य ताम्राणि रक्तानि श्मश्रूणि यस्मिंस्तत् सकिरीटं सकुण्डलं च शम्बरस्य शिरः कायादोजसा बलेन आहरत् छित्त्वा पातयामासेत्यर्थः ॥ २४ ॥ आकीर्यमाण इति ॥ स्तुवद्भिः दिविजैर्देवैः कुसुमोत्करैः पुष्पाञ्जलिभिराकीर्यमाणः आच्छाद्यमानः प्रद्युम्नः अम्बरे आकाशे स्वयं चरति अन्यांश्च चारयतीति तच्छीलया भार्यया मायावत्या विहायसा आकाशमार्गेण पुरं प्रति नीतः प्रापितः ॥ २५ ॥ अन्तरिति ॥ हे राजन् यथा विद्युता सह बलाहको नीलमेघो गगनादवतीर्य प्रविशेत्तथा पत्न्या सह ललनानामुत्तमस्त्रीणां शतैः सङ्कुलं व्याप्तं श्रीकृष्णस्य अन्तःपुरेषु वरं श्रेष्ठं रुक्मिणीगृहं विवेश ॥ २६ ॥ तमिति द्वयम् ॥ जलदो मेघः तम् इव

ततो गौह्यकगान्धर्वपैशाचोरगराक्षसीः ॥ प्रायुङ्क्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्स ताः ॥ २३ ॥ निशातमसिमुद्यम्य सकिरीटं सकुण्डलम् ॥ शम्बरस्य शिरः कायात्ताम्रश्मश्र्वोजसाहरत् ॥ २४ ॥ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः ॥ भार्ययाम्बरचारिण्या पुरीं नीतो विहायसा ॥ २५ ॥ अन्तःपुरवरं राजँल्ललनाशतसङ्कुलम् ॥ विवेश पत्न्या गगनाद्विद्युतेव बलाहकः ॥ २६ ॥ तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससम् ॥ प्रलम्बबाहुं ताम्राक्षं सुस्मितं रुचिराननम् ॥ २७ ॥ स्वलंकृतमुखाम्भोजं नीलवक्रालकालिभिः ॥ कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्र तत्र ह ॥ २८ ॥ अवधार्य शनैरीषद्वैलक्षण्येन योषितः ॥ उपजग्मुः प्रमुदिताः सस्त्रीरत्नं सुविस्मिताः ॥ २९ ॥ अथ तत्रासितापाङ्गी वैदर्भी वल्गुभाषिणी ॥ अस्मरत्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ॥ ३० ॥ को न्वयं नरवैदूर्यः कस्य वा कमलेक्षणः ॥ धृतः कया वा जठरे केयं लब्धा त्वनेन वा ॥ ३१ ॥

श्यामं पीते कौशेये कीटविशेषरचितकोशजनिततन्तुनिर्मिते वाससी यस्य तं प्रलम्बौ बाहू यस्य तं ताम्राक्षं रक्तनेत्रं सुस्मितं मन्दहासयुक्तं रुचिरं स्वत एवातिसुन्दरमाननं यस्य तं नीला वक्राश्च ये अलकास्त एवालयस्तैः स्वलङ्कृतं मुखाम्भोजं यस्य तं प्रद्युम्नं दृष्ट्वा कृष्णं मत्वा ह्रीता लज्जिताः स्त्रियस्तत्र तत्र निलिल्युरिति ॥ २७ ॥ २८ ॥ अवधार्येति ॥ ता योषितः शनैरीषद्वैलक्षण्येन श्रीवत्सकौस्तुभाद्यभावरूपेणावधार्य कृष्णो न भवतीति निश्चित्य प्रमुदिताश्च सत्यः स्त्रीषु रत्नं श्रेष्ठा रतिस्तत्सहितं प्रद्युम्नमुपाजग्मुः समीपमाजग्मुः ॥ २९ ॥ अथेति ॥ अथ तत्रान्तःपुरे असितापाङ्गी वल्गुभाषिणी स्नेहस्नुतपयोधरा वैदर्भी नष्टं स्वसुतमस्मरत् सादृश्यस्य स्मारकत्वात् ॥ ३० ॥ को न्विति ॥ अयं कमलेक्षणः नरवैदूर्यः पुरुषश्रेष्ठः को नु कस्य वा पुत्रः कया वा जठरे धृतः अनेन लब्धा इयं स्त्री च का वा ॥ ३१ ॥

Nepal Sanskrit University, Balmandir Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममेति ॥ ममापि यः आत्मजः सूतिकागृहात् केनापि बालग्रहेण नीतः अपहृतः अत एव नष्टः अदर्शनं गतः यदि कुत्रचिज्जीवति तदेतेन तुल्यं वयो रूपं च यस्य तथाभूतः स्यात् ॥३२॥ कथमिति ॥ आकृत्या प्रांशुत्वादिकया अवयवैः आजानुबाहुत्वाद्यैः गत्यादिभिश्च शार्ङ्गधन्वनः श्रीकृष्णस्य सारूप्यं समानरूपत्वमनेन कथं संप्राप्तम् ॥३३॥ स इति ॥ योऽर्भको मया गर्भे धृतः स एव वायं नूनं निश्चितं भवेत् यतः अमुष्मिन्मम प्रीतिरधिका भवति तथा मम वामो भुजश्च स्फुरति सञ्चलति ॥ ३४ ॥ एवमिति ॥ वैदर्भ्याम् एवं मीमांसमानायां तर्कयन्त्यां सत्यां देवक्यानकदुन्दुभ्यां देवक्यानकदुन्दुभिभ्यां भिलोप आर्षः । सह उत्तमश्लोकः पुण्यकीर्तिर्देवकीसुतः श्रीकृष्णस्तत्रागमत् ॥ ३५ ॥ विज्ञातेति ॥ विज्ञातोऽर्थः प्रद्युम्नहरणादिरूपो येन तथाभूतोऽपि जनार्दनः भगवान् शम्बरं हत्वा तमानेतुं समर्थोऽपि पूर्वं तूष्णीमास अन्यदेव्यादीनामसूयाऽऽदिभयात्

मम चाप्यात्मजो नष्टो नीतो यः सूतिकागृहात् ॥ एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ॥३२॥ कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः ॥ आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ॥ ३३ ॥ स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः ॥ अमुष्मिन्प्रीतिरधिका वामः स्फुरति मे भुजः ॥ ३४ ॥ एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः ॥ देवक्याऽऽनकदुन्दुभ्यामुत्तमश्लोक आगमत् ॥ ३५ ॥ विज्ञातार्थोऽपि भगवांस्तूष्णीमासीज्जनार्दनः ॥ नारदोऽकथयत्सर्वं शम्बराहरणादिकम् ॥ ३६ ॥ तच्छ्रुत्वा महदाश्चर्यं कृष्णान्तःपुरयोषितः ॥ अभ्यनन्दन्बहूनब्दान्नष्टं मृतमिवागतम् ॥ ३७ ॥ देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः ॥ दम्पती तौ परिष्वज्य रुक्मिणी च ययुर्मुदम् ॥ ३८ ॥ नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः ॥ अहो मृत इवायातो बालो दिष्ट्येति हाऽब्रुवन् ॥ ३९॥ यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन्रहरूढभावाः ॥ चित्रं न तत्खलु रमास्पदबिम्बबिम्बे कामे स्मरेऽक्षिविषये किमुतान्यनार्यः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

ततः तत्समये आगतो नारदः शम्बराहरणादिकं सर्वमकथयत् ॥ ३६ ॥ तदिति ॥ तन्नारदकथितं महदाश्चर्यं मत्स्यभक्षितस्यापि जीवनं संपूर्णावयवत्वं च विशसनेऽप्यक्षतत्वं शम्बरहननादिकं च श्रुत्वा बहूनब्दा न्बहुवर्षपर्यन्तं नष्टमदृष्टं पुनर्मृतमागतमिव प्रद्युम्नं दृष्ट्वा कृष्णान्तःपुरयोषितोऽभ्यनन्दन् ॥ ३७ ॥ देवकीति ॥ देवकी वसुदेवश्चेत्याद्याः तथा अन्याः स्त्रियः तौ दम्पती यथोचितं परिष्वज्य मुदं ययुः ॥ ३८ ॥ नष्टमिति ॥ द्वारकौकसो द्वारकावासिनो जना नष्टं प्रद्युम्नमायातमाकर्ण्य श्रुत्वा अहो आश्चर्यमयं बालो यथा कश्चिन्मृतः पुनरागच्छेत्तथा आयातः दिष्ट्या तेन महानानन्दो जातः इति ह स्पष्टमब्रुवन् ॥ ३९ ॥ यमिति ॥ यं मुहुर्विलोक्य पिता श्रीकृष्णस्तत्सरूपात् समानसौन्दर्याद्धेतोः निजेशो भगवान् तस्य भावो भावना कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वन इत्यादिचिन्तनं यासां तास्तः तन्मातरः प्रद्युम्नमातरः रुक्मिण्याद्याः कृष्णपत्न्योऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रहः रहसि निलीनाः तत्परिचयात्पूर्वमेव च तस्य रूढो भावो वात्सल्यम् अमुष्मिन् प्रीतिरधिकेत्यादिर्यासां ताः ततश्च " स एव वा भवेन्नूनं न्रामः स्फुरति मे भुजः । " इति निश्चये सति यम् अभजन् सास्रावलोकमस्तकघ्राणादिजनन्युचितमकुर्वन्निति यत् तत् तासां मातॄणां तस्मिन् खलु चित्रमाश्चर्यं नैव भवति । एवं सति रमास्पदं श्रीकृष्णः तस्य बिम्बं शरीरं तस्य बिम्बभूते पुत्रे प्रद्युम्ने चित्रन्न भवति तथाभूतस्यान्यस्य त्रिभुवनेऽप्यभावादेव तस्य कृष्णपुत्रत्वनिश्चयात् मातृभिन्नानां स्त्रीणां तु तादृशो भावो न सम्भवतीत्याह । स्मरे स्मर्यमाणत्वेनैव क्षोभके कामे अक्षविषये अक्षाणामिन्द्रियाणां विषये सति उत तथेत्यर्थे अन्यनार्यः किं तथाभवितुं शक्नुवन्ति, अपि तु नैव । यतः क्षोभमेव प्राप्नुवन्ति । ईदृश एवार्थः समञ्जसः । अर्थान्तरं तु वैरस्यावहत्वात्याज्यम् । रहरूढेत्यत्र रेफलोपाद्यार्षं रह ऊढेति च पाठः॥४०॥इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे पञ्चपञ्चाशके व्यधात् ॥ ५५ ॥ षट्पञ्चाशत्तमे प्राप हरिर्मण्यभियोगतः ॥ ऋक्षसत्राजितोः पुत्र्यौ श्लोकाः सार्द्धाः शरेन्धयः ॥ चत्वार्युवाचेति साङ्कितर्कवेदा अनुष्टुभः ॥ ५६ ॥ अथ प्रकृतमनुसरन् प्रद्युम्नजन्मानन्तरभाविजाम्बवत्यादिविवाहप्रस्तावाय स्यमन्तकाख्यानमाह–सत्राजित इति ॥ सत्रा सहैव सर्वेषु जित

श्रीशुक उवाच ॥ सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः ॥ स्यमन्तकेन मणिना स्वयमुद्यम्य दत्तवान् ॥ १ ॥ राजोवाच ॥ सत्राजितः किमकरोद्ब्रह्मन्कृष्णस्य किल्बिषम् ॥ स्यमन्तकः कुतस्तस्य कस्माद्दत्ता सुता हरेः ॥ २ ॥ श्रीशुक उवाच ॥ आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा ॥ प्रीतस्तस्मै मणिं प्रादात्सूर्यस्तुष्टः स्यमन्तकम् ॥ ३ ॥ स तं बिभ्रन्मणिं कण्ठे भ्राजमानो यथा रविः ॥ प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ॥ ४ ॥ तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः ॥ दीव्यतेऽक्षैर्भगवते शशंसुः सूर्यशङ्किताः ॥५॥

उत्कर्षं प्राप्त इति अकर्मकात्कर्तरि क्तः । सत्रविषये अन्यैरजित इति वा सत्राजितशब्दः क्वचिदकारान्तः क्वचित् सत्रा सहैव युगपच्छत्रून् जयतीति क्विपा तकारान्तः । कृतकिल्बिषः कृतापराधः सत्राजितः स्यमन्तकाख्येन मणिना सह स्वतनयां सत्यभामां स्वयमयाचत एव उद्यम्य उद्यमं कृत्वा कृष्णाय दत्तवान् ॥ १ ॥ सत्राजित इति ॥ हे ब्रह्मन् सत्राजितः कृष्णस्य किं किल्बिषमपराधं कृतवानकरोत् तस्य सत्राजितस्य स्यमन्तको मणिः कुतः प्राप्तः तेन हरेः हरये कस्माद्धेतोः सुता दत्ता ॥ २ ॥ आसीदिति ॥ भक्तस्य सत्राजितः परमः पूज्यः स्वाम्यपि सूर्यः प्रीतः प्रियः स्निग्धः सखा इव आसीत् स च सूर्यस्तद्भक्त्या सन्तुष्टस्तस्मै सत्राजिताय स्यमन्तकाख्यं मणिं प्रादात् ॥ ३ ॥ स इति ॥ हे राजन् स च सत्राजितः तं मणिं कण्ठे बिभ्रत् तत्तेजसा रविरिव भ्राजमानः प्रकाशमान अत एव नोपलक्षितः सत्राजित इत्यज्ञात एव द्वारकां प्रविष्टः ॥ ४ ॥ तमिति ॥ तं प्रविष्टं सत्राजितं द्वारकावासिनो जना दूरादेव विलोक्य तस्य तेजसा मुष्टा अभिभूता दृष्टयो येषां ते सूर्योऽयमिति शङ्किताः सन्तः अक्षैर्दीव्यते क्रीडते भगवते श्रीकृष्णाय शशंसुः कथयामासुः ॥ ५ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

नारायणेति॥सूर्यं नमस्कारार्थमागतं मत्वोद्रिक्तभक्तीनां सम्बोधनानि हे नारायणेत्यादीनि ते तुभ्यं नमोऽस्तु ॥६॥ एष इति ॥ हे जगत्पते गभस्तिचक्रेण रश्मिसमूहेन नृणां चक्षूंषि मुष्णन् प्रतिघ्नन् तिग्मास्तीक्ष्णाः दुःसहा गावो रश्मयो यस्य स त्वां दिदृक्षुः द्रष्टुमिच्छुः एष सविता सूर्यः आयाति ॥ ७ ॥ नन्विति ॥ ननु निश्चितम् विबुधर्षभाः देवश्रेष्ठाः ब्रह्मादयस्त्रिलोक्यां तव मार्गं पदवीमन्विच्छन्ति अन्वेषयन्ति अतोऽधुना यदुषु गूढं गृहीतयदुवेषं ज्ञात्वा हे प्रभो अजः सूर्यस्त्वां द्रष्टुमायाति ॥८॥ निशम्येति ॥ बालानामागच्छतस्तत्वमजानतां वचनं निशम्य श्रुत्वाम्बुजलोचनः श्रीकृष्णः प्रहस्य प्राह स्म असौ रविर्देवो न भवति किं तु स्यमन्तकेन मणिना ज्वलन् विद्योतमानः सत्राजित् अस्ति तदा भगवदिच्छया भगवत्कण्ठकौस्तुभप्रकाशसंवरणमभूत् ॥ ९ ॥ सत्राजिदिति ॥ कृतं कौतुकेन मङ्गलं यस्मिन् अत एव श्रीमत्स्वगृहं सत्राजित् प्रविश्य विप्रैः प्रयोज्यकर्तृभिः कृत्वा देवसदने स्वेष्टदेवसूर्यमन्दिरे मणिं न्यवेशयत् पीठे स्थापितवान् ॥ १० ॥ दिने इत्यर्द्धम् ॥ प्रभो राजन् स मणिः दिने दिने अष्टौ स्वर्णभारान्

नारायण नमस्तेऽस्तु शङ्खचक्रगदाधर ॥ दामोदरारविन्दाक्ष गोविन्द यदुनन्दन ॥ ६ ॥ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते ॥ मुष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः ॥ ७ ॥ नन्वन्विच्छन्ति ते मार्गं त्रिलोक्यां विबुधर्षभाः ॥ ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ॥ ८ ॥ श्रीशुक उवाच ॥ निशम्य बालवचनं प्रहस्याम्बुजलोचनः ॥ प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ॥ ९ ॥ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमङ्गलम् ॥ प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥ १० ॥ दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो ॥ दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयोऽशुभाः ॥ न सन्ति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ॥११॥ स याचितो मणिं क्वापि यदुराजाय शौरिणा ॥ नैवार्थकामुकः प्रादाद्याच्ञाभङ्गमतर्कयन् ॥ १२ ॥

सृजति। " चतुर्भिर्व्रीहिभिर्गुञ्जा गुञ्जाः पञ्च पणं पणान् । अष्टौ धरणमष्टौ तान् कर्षं तांश्चतुरः पलम् ॥ तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः । " अत्राष्टगुञ्जो माषो द्वादशमाषस्तोलश्चतुर्विंशतितोलः शेटकश्चत्वारिंशच्छेटको मणक इति महाराष्ट्रादिदेशीयप्राकृतमानरीत्याऽमरसिंहमतेन षण्मणकाः सप्तत्रिंशच्छेटकाः अष्टादश तोलका अष्टौ माषाश्चेति भारप्रमाणम् । स्वामिमते तु सप्तविंशतिर्मणका एकत्रिंशच्छेटकास्तोलद्वयमष्टौ माषाश्चेति । काशीनाथः एवमशीतितोलकात्मकशेटकेन साम्प्रतिकाङ्ग्रेजादिरीतिः कल्प्या । दुर्भिक्षेति ॥ अभ्यर्चितो मणिर्यत्रास्ते तत्र दुर्भिक्षोऽनावृष्टिप्रयुक्तोऽन्नाद्यलाभः मारी बहूनां जनानां नित्यमकालमृत्युः अरिष्टं ग्रहादिपीडा सर्पाः आधिर्मनःपीडा व्याधयो रोगा अशुभाश्चान्येऽपि दुःखहेतवः मायिनो दैत्यादयश्चोराश्च न सन्ति न भवन्ति ॥ ११ ॥ स इति ॥ स सत्राजित् क्वापि कदाचित् शौरिणा श्रीकृष्णेन यदुराजाय ईदृक्प्रभावस्य मणे राजनिकटस्थितिरेव युक्तेति मत्वा उग्रसेनार्थं मणिं प्रतियाचितोऽपि अर्थकामुकः लोभी भगवतो याच्ञा भङ्गमतर्कयन् आज्ञोल्लङ्घनानर्थमननुसंदधानो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मणिं नैव प्रादात् एतेनभगवत्यसमर्प्य स्वयमग्रभोजिनः सर्वानिष्टनिवर्तकमपि अनिष्टहेतुरेव भवतीति सूचितम् ॥ १२ ॥ तदेव दर्शयितुमाह—तमिति ॥ महती प्रभा दीप्तिर्यस्य तं मणिमेकदा प्रसेनः सत्राजिद्भ्राता कण्ठे प्रतिमुच्य बध्वा हयमारुह्य वने मृगयां व्यचरत् ॥ १३ ॥ प्रसेनमिति ॥ कश्चन केसरी सिंहः सहयं प्रसेनं हत्वा मणिमाच्छिद्य आकृष्य गृहीत्वा गिरिं प्रविशन् मणिमिच्छता जाम्बवता ऋक्षराजेन निहतः सिंहेन मणिग्रहणं चोत्तमद्रव्यस्वाभाव्यात् मूषकादौ स्वर्णादिहरणदर्शनात् ॥ १४ ॥ स इति ॥ स जाम्बवानपि बिले स्वनिवासस्थाने गिरिकन्दरायां तं मणिं कुमारस्य कुमाराख्यस्येति तोषणी । क्रीडनकं क्रीडासाधनं चक्रे तदा भ्राता सत्राजित् भ्रातरं समणिं प्रसेनमपश्यन् पर्यतप्यत ॥ १५ ॥ प्राय इति ॥ पूर्वं कृष्णेन मणिर्याचितः मया च न दत्तः इदानीं मणिर्ग्रीवायां यस्य तथाभूत एव मम भ्राता वनं गतः अतो मणिलोभेन प्रायः ध्रुवं कृष्णेनैव निहतः इत्येवंभूतं तस्य सत्राजितः वचः श्रुत्वा द्वारकावासिनो दुर्वासनावन्तः केचित् जनाः कर्णे कर्णे अजपन् उपांश्ववोचन् ॥ १६ ॥ भगवानिति ॥

तमेकदा मणिं कण्ठे प्रतिमुच्य महाप्रभम् ॥ प्रसेनो हयमारुह्य मृगयां व्यचरद्वने ॥ १३ ॥ प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी ॥ गिरिं विशञ्जाम्बवता निहतो मणिमिच्छता ॥ १४ ॥ सोऽपि चक्रे कुमारस्य मणिं क्रीडनकं बिले ॥ अपश्यन् भ्रातरं भ्राता सत्राजित्पर्यतप्यत ॥ १५ ॥ प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः ॥ भ्राता ममेति तच्छ्रुत्वा कर्णे कर्णेऽजपञ्जनाः ॥ १६ ॥ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि ॥ मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः ॥ १७ ॥ हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने ॥ तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः ॥ १८ ॥ ऋक्षराजबिलं भीममन्धेन तमसा वृतम् ॥ एको विवेश भगवानवस्थाप्य बहिः प्रजाः ॥ १९ ॥ तत्र दृष्ट्वा मणिं श्रेष्ठं बालक्रीडनकं कृतम् ॥ हर्तुं कृतमतिस्तस्मिन्नवतस्थेऽर्भकान्तिके ॥ २० ॥ तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् ॥ तच्छ्रुत्वाभ्यद्रवत्क्रुद्धो जाम्बवान्बलिनां वरः ॥ २१ ॥

क्रमेण भगवानपि तद्वच उपश्रुत्य आत्मनि स्वस्मिन् लिप्तं दुर्यशो मार्ष्टुम् अपोहितुं नागरैर्नगरभवैर्जनैः सह प्रसेनस्य पदवीमन्वपद्यत अन्वेषणार्थमन्वगमत् ॥ १७ ॥ हतमिति ॥ वने केसरिणा हतं प्रसेनमश्वं च दृष्ट्वा तं केसरिणं चाद्रिपृष्ठे ऋक्षवन्नाम्नोऽद्रेरुपरि ऋक्षेण जाम्बवता निहतं जना ददृशुः । जनास्तत्रेत्यपवादशुद्धिः ॥ १८ ॥ ऋक्षेति ॥ ततो बहिर्बिलद्वारे प्रजाः नागरान् जनानवस्थाप्य भगवानेक एव अन्धेन गाढेन तमसा वृतमतो भीमम् ऋक्षराजबिलं विवेश ॥ १९ ॥ तत्रेति ॥ तत्र बिले बालस्य क्रीडनकं क्रीडासाधनं कृतं मणिश्रेष्ठं दृष्ट्वा हर्तुं कृता निश्चिता मतिर्येन स भगवान् तस्मिन् बिले अर्भकस्यान्तिके समीपेऽवतस्थे ॥ २० ॥ तमिति ॥ अपूर्वम् अदृष्टपूर्वं नरं तं कृष्णं दृष्ट्वा भीतवत् धात्री तन्माता हरेर्मणिजिहीर्षामालक्ष्य चुक्रोश । तत्तस्या आक्रोशवचनं श्रुत्वा क्रुद्धो बलिनां वरः जाम्बवान् अभ्यद्रवत् अभ्याजगाम ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ स वै प्रसिद्धो जाम्बवान् कुपितः सन् नानुभाववित् तत्प्रभावमजानन् प्राकृतं लौकिकं पुरुषं मत्वा आत्मनः स्वामिना तेन भगवता सह युयुधे जरासन्धादिभिरल्पबलैर्युद्धं सुखं क्वापि नाभूदतः समबलेन स्वभृत्येन युयुत्सोर्भगवतो लीलयैवेदं युद्धम् ॥ २२ ॥ द्वन्द्वेति युग्मम् ॥ विजिगीषतोः विजेतुमिच्छतोः आर्षः शता । उभयोस्तयोः आयुधैर्गदादिभिः अश्मभिः पाषाणैः द्रुमैः दोर्भिर्भुजैः वज्रस्य निष्पेषो निर्घातस्तद्वत्परुषैर्निष्ठुरैः इतरेतरयोर्मुष्टिभिश्चेति अविश्रमं न विद्यते विश्रामो यस्मिंस्तत् अहर्निशम् अष्टाविंशाहम् अष्टाविंशतिदिनपर्यन्तं तिशब्दलोप आर्षः। सुतुमुलम् असङ्कुचितं घोरं द्वन्द्वयुद्धम् आसीत् क्रव्यार्थे मांसार्थं यथा श्येनयोर्युद्धं भवति तथानयोरपि मण्यर्थे युद्धमभूत् ॥ २३ ॥ २४ ॥ कृष्णेति ॥ कृष्णस्य मुष्टीनां विनिष्पातैः आघातैर्निष्पिष्टानि श्लथानि अङ्गानाम् उरूणि बन्धनानि सन्धिस्थानानि यस्य सः अत एव क्षीणं सत्वं बलं धैर्यं च यस्य सः अत एव स्विन्नं प्रस्वेदयुक्तं गात्रं यस्य सः अत एव कदापि मम बलक्षयो न दृष्टः । स इदानीं कथं जात इत्यतीव विस्मितः आश्चर्यं प्राप्तश्च तं

स वै भगवता तेन युयुधे स्वामिनात्मनः ॥ पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित् ॥ २२ ॥ द्वन्द्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः ॥ आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव ॥ २३ ॥ आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः ॥ वज्रनिष्पेषपरुषैरविश्रममहर्निशम् ॥२४॥ कृष्णमुष्टिविनिष्पातनिष्पिष्टाङ्गोरुबन्धनः ॥ क्षीणसत्वः स्विन्नगात्रस्तमाहातीव विस्मितः ॥ २५ ॥ जाने त्वां सर्वभूतानां प्राण ओजः सहो बलम् ॥ विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरम् ॥२६ ॥ त्वं हि विश्वसृजां स्रष्टा सृज्यानामपि यच्च सत् ॥ कालः कलयतामीशः पर आत्मा तथात्मनाम् ॥ २७ ॥ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिङ्गिलोऽब्धिः ॥ सेतुः कृतः स्वयश उज्ज्वलिता च लङ्का रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ॥ २८ ॥

कृष्णमाह स्म ॥ २५ ॥ जाने इति ॥ त्वां सर्वभूतानां यः प्राणः ओजः इन्द्रियशक्तिः सहः अंतःकरणशक्तिः बलं शरीरसामर्थ्यं तत्सर्वं त्वमित्यहं जाने अतः विष्णुं व्यापकं सर्वपालकं च पुराणपुरुषमिति सर्वस्रष्टारं निमित्तकारणमित्यर्थः । प्रभविष्णुं प्रभवनशीलम् । उपादानम् अधीश्वरं सर्वनियन्तारं सर्वोपसंहारकर्तारं च त्वां जाने ॥२६॥ त्वमिति ॥ त्वं हि विश्वसृजां महदादीनां ब्रह्मादीनां च स्रष्टा निमित्तं सृज्यानां महदादीनां यत् सत् परमार्थभूतम् उपादानं तच्च त्वं कलयतां नियामकानां नाशकानामपि ईशो नियन्त्रादिरूपः कालः त्वं तथा आत्मनां जीवानामपि आत्मा उपादानं परः असङ्गश्च॥२७॥यस्येति ॥ यस्य तव ईषदुत्कलित उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिता नक्रा ग्राहास्तिमिङ्गिला महामत्स्याश्च यस्मिन्सोऽब्धिः समुद्रो यस्मै तुभ्यं वर्त्म मार्गमादिशत् दत्तवान् तथापि स्वयशोरूपः तस्मिन्समुद्रे येन त्वया सेतुः कृतः येन च लङ्का उज्ज्वलिता दाहिता यस्य चेषुभिः क्षतानि छिन्नानि रक्षसां रावणादीनां शिरांसि भुवि पेतुः स मम स्वामी श्रीरघुनाथ एव त्वम् । अतो ममापराधं क्षमस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यां सेवां चादिश ॥ २८ ॥ इतीति युग्मम् ॥ हे महाराज इत्येवं विज्ञातं विज्ञानं चिदानन्दरूपं स्वतत्वं येन तं भक्तमृक्षराजानं टजभाव आर्षः । अच्युतः अरविन्दाक्षः भगवान् देवकीसुतः परया कृपया तत्पीडानिवृत्त्यर्थं शङ्करेण सुखकरेण पाणिना तमभिमृश्य संस्पृश्य मेघध्वनिवद् गम्भीरया गिरा वाचा व्याजहार उक्तवान् ॥ २९ ॥ ३० ॥ मणीति ॥ हे ऋक्षपते वयं बहवः मणिहेतोः बिलं बिलद्वारं प्राप्ताः तत्राहमेकः अमुना मणिना हेतुना आत्मनो मम यो मिथ्याभिशापः मिथ्यापवादः प्रसक्तस्तममुनैव प्रमृजन् प्रमार्ष्टुम् इहान्तर्बिलं प्राप्त इति शेषः ॥ ३१ ॥ इतीति ॥ इति भगवता उक्तः स जाम्बवान् अर्हणार्थं मणिना सह जाम्बवत्याख्यां कन्यां स्वां दुहितरं मुदा कृष्णायोपजहार ह समर्पयामास । जाम्बवती च श्रीरामावतार एव जातासीत् । श्रीरामाय दित्सिताप्येकपत्नीव्रतेन तेनास्वीकृता चिरं तपस्तप्त्वेदानीं तं प्रापेति पुराणान्तरे ॥ ३२ ॥ अदृष्ट्वेति ॥ जना द्वादशाहानि प्रतीक्ष्यापि बिलं प्रविष्टस्य शौरेः कृष्णस्य निर्गममदृष्ट्वा दुःखिताः सन्तः स्वपुरं द्वारकां ययुः

इति विज्ञातविज्ञानमृक्षराजानमच्युतः ॥ व्याजहार महाराज भगवान् देवकीसुतः ॥२९॥ अभिमृश्यारविन्दाक्षः पाणिना शङ्करेण तम् ॥
कृपया परया भक्तं प्रेमगम्भीरया गिरा ॥ ३० ॥ मणिहेतोरिह प्राप्ता वयमृक्षपते बिलम् ॥ मिथ्याऽभिशापं प्रमृजन्नात्मनो मणिनामुना
॥ ३१ ॥ इत्युक्तः स्वां दुहितरं कन्यां जाम्बवतीं मुदा ॥ अर्हणार्थं स मणिना कृष्णायोपजहार ह ॥ ३२ ॥ अदृष्ट्वा निर्गमं शौरेः प्रविष्टस्य बिलं जनाः ॥ प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः ॥ ३३ ॥ निशम्य देवकी देवी रुक्मिण्यानकदुन्दुभिः ॥ सुहृदो ज्ञातयोऽशोचन्बिलात्कृष्णमनिर्गतम् ॥३४॥ सत्राजितं शपन्तस्ते दुःखिता द्वारकौकसः ॥ उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ॥३५॥
तेषां तु देव्युपस्थानात्प्रत्यादिष्टाशिषा सह ॥ प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन्हरिः ॥ ३६ ॥ उपलभ्य हृषीकेशं मृत्वा पुनरिवागतम् ॥
सह पत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ॥ ३७ ॥

॥ ३३ ॥ निशम्येति ॥ तेषां मुखात् कृष्णं बिलादनिर्गतं निशम्य देवी देवकी रुक्मिणी आनकदुन्दुभिः सुहृदः ज्ञातयश्च अशोचन् ॥ ३४ ॥ सत्राजितमिति ॥ दुःखिता द्वारकौकसः द्वारकावासिनो म्रियतामयं दुरात्मेति सत्राजितं शपन्तः कृष्णोपलब्धये महामायां भगवच्छक्तिं चन्द्रभागां नाम दुर्गामुपतस्थुः आराधयामासुः । तङ्भाव आर्षः । आशिषासव इति पाठे असव इति हरेर्विशेषणम् । प्राणतुल्य इत्यर्थः । स्वामिनस्तु आसव इति चिच्छिदुः । असव इन्द्रियाणि तेषां प्रेष्ठ इति ॥ ३५ ॥ तेषामिति ॥ तेषां द्वारकावासिनां देव्या उपस्थानात् आराधनात्तया तान्प्रत्यादिष्टा दत्ता या आशीः कृष्णं द्रक्ष्यथेति तया सह झटित्येव सिद्धार्थो लब्धमणिः सदारो जाम्बवतीसहितो हर्षयन् हरिः प्रादुर्बभूव ॥ ३६ ॥ उपलभ्येति ॥ लोके यथा मृतं बन्धुं पुनरागतमुपलभ्य जना जातमहोत्सवा भवन्ति तथा पत्न्या सहागतं मणिग्रीवं हृषीकेशं

Nepal Sanskrit University, Balmeek Campus Collection

CC-0. In Public Domain. Digitization by eGangotri

श्रीकृष्णमुपलभ्य सर्वे द्वारकावासिनो जना जातमहोत्सवा आसन् ॥ ३७ ॥ सत्राजितमिति ॥ भगवान् श्रीकृष्णः सभायां राज्ञ उग्रसेनस्य सन्निधौ सत्राजितं समाहूय प्राप्तिं मणिप्राप्तिप्रकारं चाख्याय तस्मै सत्राजिते मणिं न्यवेदयत् अर्पयामास ॥ ३८ ॥ स चेति ॥ स च सत्राजितः स्वेन पाप्मना भगवदाज्ञोल्लङ्घनमिथ्यापवादापादनरूपेणा-तिव्रीडितः अत एवाऽवाङ्मुखः अनुतप्यमानः रत्नं गृहीत्वा ततः राजसभातः स्वभवनमभ्यगमत् ॥ ३९ ॥ स इति अर्द्धम् ॥ स सत्राजित् तदेवाघं स्वकृतापराधम् अनुध्यायन् बलवता भगवता बलवद्भिर्भगवत्पक्षगैर्वा सह यो विग्रहो विरोधस्तेनाकुलः अभूदिति शेषः ॥ ४० ॥ कथमिति सार्द्धम् ॥ अहम् आत्मरजः स्वापराधं कथं मृजामि कथमपनयामि श आर्षः । अच्युतः कृष्णः कथं वा प्रसीदेत् प्रसन्नो भवेत् किं कृत्वा कस्मिन् कृते मत्वं मम साधु भद्रं स्यात् समानकर्तृकताभावः सोढव्यः अदीर्घदर्शनम् अग्रिमफलानभिज्ञं क्षुद्रं कृपणं मूढं मन्दमतिं द्रविणलोलुपं वित्तसक्तं मां जनो वा यथा न शपेत् न निन्देत् तथा किं कार्यम् ॥ ४१ ॥ दास्य इति ॥ तस्मै

सत्राजितं समाहूय सभायां राजसन्निधौ ॥ प्राप्तिं चाख्याय भगवान्मणिं तस्मै न्यवेदयत् ॥ ३८ ॥ स चातिव्रीडितो रत्नं गृहीत्वाऽवाङ्मुखस्ततः ॥ अनुतप्यमानो भवनमगमत्स्वेन पाप्मना ॥ ३९ ॥ सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः ॥ ४० ॥ कथं मृजाम्यात्मरजः प्रसीदेद्वाऽच्युतः कथम् ॥ किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा ॥ अदीर्घदर्शनं क्षुद्रं मूढं द्रविणलोलुपम् ॥ ४१ ॥ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च ॥ उपायोऽयं समीचीनस्तस्य शान्तिर्न चान्यथा ॥ ४२ ॥ एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभाम् ॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ॥ ४३ ॥ तां सत्यभामां भगवानुपयेमे यथाविधि ॥ बहुभिर्याचितां शीलरूपौदार्यगुणान्विताम् ॥ ४४ ॥ भगवानाह न मणिं प्रतीच्छामो वयं नृप ॥ तवास्तां देवभक्तस्य वयं च फलभागिनः ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

कृष्णाय स्त्रीरत्नं स्वदुहितरं तत्पारिबर्हत्वेन रत्नं स्यमन्तकं च दास्ये दास्यामि अयमेव समीचीनो विरोधशान्त्युऽपायः अन्यथा एतद्दानं विना तस्य विरोधस्य शान्तिर्न भवि-ष्यति ॥ ४२ ॥ एवमिति ॥ बुद्ध्या एवं व्यवसितः कृतनिश्चयः सन् शुभां शुभलक्षणसंपन्नां स्वसुतां सत्यभामां मणिं च स्वयमेव उद्यम्य उद्यमं कृत्वा कृष्णाय उपजहार समर्पयामास ॥ ४३ ॥ तामिति ॥ बहुभिः कृतवर्मशतधन्वादिभिर्याचितामपि शीलरूपौदार्यगुणन्वितां सत्यभामां भगवान् यथाविधि विवाहविधानरीत्या उपयेमे विवाहितवान् । एवं जाम्बवतीमपि गृहमानीयोपयेमे इति ज्ञेयम् ॥ ४४ ॥ भगवानिति ॥ हे नृप भगवान् सत्राजितमाह स्म वयं मणिं न प्रतीच्छामः न स्वीकुर्मः देवः सूर्यस्तद्भक्तस्येति कटाक्षः । तवैव मणिरास्तां तिष्ठतु । तव चापुत्रत्वात् तत्फलभागिनस्तु वयमेवेति ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमषट्पञ्चाशत्तमे व्यधात् ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तपञ्चाशत्तमे तु कृत्वा शतधनोर्वधम् ॥ मणिजं दुर्यशोऽमार्क्षीत् श्लोकाः सार्द्धा द्विर्वा र्द्धयः ॥ उवाचेत्येकं सपादा गुणवेदा अनुष्टुभः ॥५७॥ विज्ञातेति ॥ विज्ञातः पाण्डवा बिलद्वारेण जतुगृहान्निर्गता न दग्धा इत्येवंविधोऽर्थो येन तथाभूतोऽपि गोविन्दो लोकमुखात्पाण्डवान्कुन्तीं च जतुगृहे दग्धानाकर्ण्य श्रुत्वा कुल्यकरणे कुलोचितव्यवहारार्थं रामेण सहितः कुरून्देशान् तन्मध्यस्थहस्तिनापुरं ययौ ॥ १ ॥ भीष्ममिति ॥ भीष्मादिदुःखेन तुल्यं दुःखं ययोस्तेतथाभूतौ भूत्वा रामकृष्णौ दुर्योधनादीनां तद्दाहदुःखाभावात् भीष्मं सविदुरं कृपं गान्धारीं द्रोणं च सङ्गम्य हा कष्टं जातमित्यूचतुः ॥ २ ॥ लब्ध्वेति ॥ हे राजन् श्रीकृष्णोऽधुना नास्त्यतः सत्राजिद्वधः सुकर इत्येतदन्तरं समयं लब्ध्वा अक्रूरकृतवर्माणौ शतधन्वानमूचतुः । तस्य दैत्यांशत्वेन दुःशीलत्वात् सत्राजितः सकाशात् त्वया मणिः कस्मान्न गृह्यते ॥ ३ ॥ य इति ॥ यः सत्राजित् अस्मभ्यं प्रतिश्रुत्य सत्यभामां दास्यामीति प्रतिज्ञाय नोऽस्मान् विगर्ह्य अनादृत्य तत् कन्यारत्नं कृष्णायादात् । स सत्राजित्कस्माद्धेतोः भ्रातरं प्रसेनं नान्वियात् नानुगच्छेत् ।

श्रीशुक उवाच ॥ विज्ञातार्थोऽपि गोविन्दो दग्धानाकर्ण्य पाण्डवान् ॥ कुन्तीं च कुल्यकरणे सहरामो ययौ कुरून् ॥ १ ॥ भीष्मं कृपं सविदुरं गान्धारीं द्रोणमेव च ॥ तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥ २ ॥ लब्ध्वैतदन्तरं राजन् शतधन्वानमूचतुः ॥ अक्रूरकृतवर्माणौ मणिः कस्मान्न गृह्यते ॥ ३ ॥ योऽस्मभ्यं सम्प्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः ॥ कृष्णायादान्न सत्राजित्कस्माद् भ्रातरमन्वियात् ॥ ४ ॥ एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः ॥ शयानमवधील्लोभात्स पापः क्षीणजीवितः ॥ ५ ॥ स्त्रीणां विक्रोशमानानां क्रन्दन्तीनामनाथवत् ॥ हत्वा पशून् सौनिकवन्मणिमादाय जग्मिवान् ॥ ६ ॥ सत्यभामा च पितरं हतं वीक्ष्य शुचाऽर्पिता ॥ व्यलपत्तात तातेति हा हतास्मीति मुह्यती ॥ ७ ॥ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयम् ॥ कृष्णाय विदितार्थाय तप्ताऽऽचख्यौ पितुर्वधम् ॥ ८ ॥

हन्तव्य एव स इत्यर्थः । तत्रास्मदपेक्षया त्वमेव शूर इति त्वयैवायं हन्यताम् अत्र बहुभिर्याचितामिति पूर्वोक्तैरेभिः पूर्वं सा प्रत्येकं प्रार्थिता तेनापि दातुं प्रतिश्रुता आसीदिति गम्यते । अत्र भगवन्मिथ्यापवादके सत्राजिते क्रोधेनैव भक्तप्रवराभ्यामक्रूरकृतवर्मभ्यां तद्वधप्रवर्त्तनार्थमेव तादृशमुक्तमिति प्राञ्चः ॥४॥ एवमिति ॥ एवं ताभ्यामक्रूरकृतवर्मभ्यां भिन्ना धर्मपथाद् भ्रंशिता मतिर्यस्य असत्तमः मूलत एव कुबुद्धिः सत्राजिति बद्धवैरश्च क्षीणजीवितः शतधन्वा लोभात् शयानमेव सत्राजितमवधीत् ॥५॥ स्त्रीणामिति ॥ यथा सौनिकः पशुहिंसकः पशून्हन्ति तद्वत्तं हत्वा अनाथवत् स्त्रीणां विक्रोशमानानां शानजार्षः चानश् वा कर्मण्यतिहारविवक्षा वा । क्रन्दन्तीनां सतीनां मणिमादाय जग्मिवान् जगाम ॥ ६ ॥ सत्यभामेति ॥ सत्यभामा च पितरं हतं वीक्ष्य शुचा शोकेन अर्पिता व्याप्ता मुह्यती मध्ये मध्ये मूर्छां प्राप्नुवती नुमभाव आर्षः । तात तातेति हा हतास्मीति व्यलपत् ॥७॥ तैलेति ॥ ततस्तप्ता दुःखिता सत्यभामा मृतं पितरं तैलद्रोण्यां तैलपूर्णकटाहे प्रास्य निधाय कृष्णो जीवयिष्यतीत्याशया गजसाह्वयं गजेन सहित आह्वयो नाम यस्य तत्

CC-0. In Public Domain. Digitization by eGangotri

हस्तिनापुरं जगाम। विदितार्थाय सर्वज्ञायापि कृष्णाय पितुर्वधमाचख्यौ कथितवती ॥ ८ ॥ तदेति ॥ हे राजन् ततस्त्राजिन्मरणमाकर्ण्य ईश्वरावपि रामकृष्णौ नृलोकतामनुसृत्य नरलीलामभिनयन्तौ अस्राक्षौ अश्रुपूर्णनेत्रौ अहो नोऽस्माकं परमं कष्टं दुःखं प्राप्तमित्येवं विलेपतुः ॥ ९ ॥ आगत्येति ॥ सभार्यः सत्यभामासहितः साग्रजः बलभद्रसहितश्च भगवान् कृष्णस्तस्मात् हस्तिनापुरात् पुरं द्वारकामागत्य ततः शतधन्वनो मणिं हर्तुं तं शतधन्वानं हन्तुं चारेभे उद्युक्तो बभूव ॥ १० ॥ सोऽपीति ॥ स शतधन्वापि कृष्णस्योद्यमं स्ववधोद्योगं ज्ञात्वा प्राणपरीप्सया प्राणरक्षणेच्छया कृतवर्माणं साहाय्ये अयाचत स कृतवर्मा अब्रवीत् ॥ ११ ॥ नाहमिति ॥ अहम् ईश्वरयोः रामकृष्णयोः हेलनं प्रतिकूलं न कुर्यां तयोर्वृजिनमपराधमाचरन् कुर्वन्को नु पुमान् क्षेमाय कल्पेत क्षेमं प्राप्नुयात् अयं भावः। मया सत्राजिद्वध एव भवान् प्रवर्तितो न तु भगवत्प्रातिकूल्ये। त्वं तु यदि तं शरणं न यियाससि तर्हि त्वामिव किमहमपि तत्प्रतिकूलो बुभूषेयम् इति ॥१२॥ कंस इति ॥ यस्य कृष्णस्य द्वेषात् अनुगैर्भ्रातृभिश्च सहितः

तदाकर्ण्येश्वरौ राजन्ननुसृत्य नृलोकताम् ॥ अहो नः परमं कष्टमित्यस्राक्षौ विलेपतुः ॥ ९ ॥ आगत्य भगवांस्तस्मात्सभार्यः साग्रजः पुरम् ॥ शतधन्वानमारेभे हन्तुं हर्तुं मणिं ततः ॥ १० ॥ सोऽपि कृष्णोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया ॥ साहाय्ये कृतवर्माणमयाचत स चाब्रवीत् ॥ ११ ॥ नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः ॥ को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् ॥ १२ ॥ कंसः सहानुगोऽपीतो यद्द्वेषात्त्याजितः श्रिया ॥ जरासन्धः सप्तदश संयुगान् विरथो गतः ॥ १३ ॥ प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत ॥ सोऽप्याह को विरुध्येत विद्वानीश्वरयोर्बलम् ॥ १४ ॥ य इदं लीलया विश्वं सृजत्यवति हन्ति च ॥ चेष्टां विश्वसृजो यस्य न विदुर्मोहिताऽजया ॥ १५ ॥ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना ॥ दधार लीलया बाल उच्छिलीन्ध्रमिवार्भकः ॥ १६ ॥

कंसः राज्यश्रिया त्याजितः सन्नपीतः अप्ययं नाशं प्राप्तः तथा जरासन्धोऽपि सप्तदशसंख्याकान्संयुगान्सङ्ग्रामान् विरथः शरीरमात्रावशिष्टो गतः। अत्र सप्तदशानां संयुगानां समाहारस्तस्मादिति विवृण्वतश्चक्रवर्तिनः पञ्चम्यन्तपाठः सम्मतः ॥ १३ ॥ प्रतीति ॥ एवं कृतवर्मणा प्रत्याख्यातः शतधन्वाऽक्रूरं पार्ष्णिग्राहं साहायमयाचत तदा सोऽक्रूरोऽपि ईश्वरयो रामकृष्णयोर्बलं विद्वान् जानन् को वा पुमांस्ताभ्यां विरुध्येतेत्याह स्म ॥ १४ ॥ य इति ॥ यो लीलया एवेदं विश्वं सृजत्यवति रक्षति हन्ति च यस्य च चेष्टाम् अजया तन्मायया मोहिताः विश्वसृजे ब्रह्मादयोऽपि न विदुः सन्धिरार्षः ॥ १५ ॥ य इति ॥ यश्च सप्तहायनः बाल एव एकेनैव पाणिना शैलं गोवर्धनमुत्पाट्य लीलया एव यथार्भको बाल उच्छिलीन्ध्रं छत्राकं धरति तथा दधार ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम इति ॥ स्पष्टम् ॥ १७ ॥ प्रतीति ॥ तेनाक्रूरेणाप्येवं प्रत्याख्यातः स शतधन्वा महामणिं तस्मिन्नक्रूरे न्यस्य अक्रूराधीनं कृत्वा शतयोजनं गच्छतीति तथाभूतमश्वमारुह्य ययौ पलायत । शतयोजनगामित्वं तदश्वस्य स्वभाव एव । विपदि तु बहुयोजनगमनसामर्थ्यमपि ज्ञेयम् । अतो द्वारकातो मिथिलोपवनपर्यन्तमतिकष्टेन गत्वा श्वो मृत इति वक्ष्यते ॥ १८ ॥ गरुडेति ॥ हे राजन् गरुडो ध्वजे यस्य तं रथमारुह्य रामजनार्दनौ महावेगैरश्वैर्गुरुद्रुहं श्वशुरहन्तारं शतधन्वानम् अन्वयाताम् अन्वगच्छताम् ॥ १९ ॥ मिथिलाया इति ॥ शतयोजनमात्रगामित्वात् । ततः परं गन्तुमशक्तं मिथिलाया उपवने पतितं हयं विसृज्य सन्त्रस्तः शतधन्वा पद्भ्यामधावत् । कृष्णोऽपि रुषा क्रोधेन तमन्वद्रवत् ॥ २० ॥ पदातेरिति ॥ पदातिः पद्भ्यां गच्छन्नेव भगवांस्तस्य पदातेः शतधन्वनस्तिग्मनेमिना तीक्ष्णधारेण चक्रेण शिर उत्कृत्य छित्त्वा तस्य वाससोरन्तरीययोर्मणिं व्यचिनोत् मृगयामास । एतच्च रामवञ्चनाय अयमाशयः । स्वभक्तेऽक्रूरे दुःसङ्गेन दुष्कर्मप्रेरणदर्शनात् कश्चित्कालं त्यागरूपशासनेच्छास्वभक्तत्वान्म-

नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे ॥ अनन्तायादिभूताय कूटस्थायात्मने नमः ॥ १७ ॥ प्रत्याख्यातः स तेनापि शतधन्वा महामणिम् ॥
तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥ १८ ॥ गरुडध्वजमारुह्य रथं रामजनार्दनौ ॥ अन्वयातां महावेगैरश्वै राजन् गुरुद्रुहम् ॥ १९ ॥
मिथिलाया उपवने विसृज्य पतितं हयम् ॥ पद्भ्यामधावत्संत्रस्तः कृष्णोऽप्यन्वद्रवद्रुषा ॥ २० ॥ पदातेर्भगवांस्तस्य पदातिस्तिग्मनेमिना ॥
चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिम् ॥ २१ ॥ अलब्धमणिरागत्य कृष्ण आहाऽग्रजान्तिकम् ॥ वृथा हतः शतधनुर्मणिस्तत्र न
विद्यते ॥ २२ ॥ तत आह बलो नूनं स मणिः शतधन्वना ॥ कस्मिंश्चित्पुरुषे न्यस्तस्तमन्वेष पुरं व्रज ॥ २३ ॥ अहं विदेहमिच्छामि द्रष्टुं
प्रियतमं मम ॥ इत्युक्त्वा मिथिलां राजन्विवेश यदुनन्दनः ॥ २४ ॥

णिदित्सा च भगवत आसीत् तावन्मात्रशासनं विकर्मप्रेरकाय मणिदानं चाग्रजो नानुमन्येतेत्यतो माज्ञासीदेव अयमक्रूरश्च मणिं गृहीत्वा पलायतां ततश्च सर्वं स्वसंकल्पितं भविष्यतीति ॥ २१ ॥ अलब्धेति ॥ न लब्धो मणिर्येन स कृष्णः अग्रजस्य बलभद्रस्यान्तिकमागत्याह स्म । शतधनुर्वृथैव हतः चौरैर्मृषैवोक्तमिति भावः । यतस्तत्र मणिर्न विद्यते ॥ २२ ॥ तत इति ॥ ततश्च बलः सर्वज्ञस्यैवं विचेष्टितं मद्वञ्चनायेति गूढमन्युः कृष्णमाह स्म । शतधन्वना कस्मिंश्चित्पुरुषे स मणिर्न्यस्त इति नूनं निश्चितम् । अतस्तं मणिमन्वेष पुरं व्रज अन्वेष्टुं द्वारकां गच्छ अन्वेषेत्यार्षम् ॥ २३ ॥ अहमिति ॥ अहं तु मम प्रियतरं विदेहं जनकं द्रष्टुमिच्छामि ततश्च हे राजन् यदुनन्दनो बलभद्रः कृष्णं प्रतीत्युक्त्वा मिथिलां पुरीं विवेश ॥ २४ ॥

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तं दृष्ट्वा प्रीतिमानसो मैथिलः सहसोत्थाय अर्हणीयं पूजार्हं तं रामं समर्हणैः पूजासाधनैः पाद्यार्घस्रक्चन्दनादिभिर्यथाविधि पूजयामास ॥२५॥ उवासेति सार्द्धम् ॥ विभुः स्वतन्त्रः सम्मानयोग्यश्च बलभद्रो महात्मना प्रीतियुक्तेन जनकेन मानितः कतिचित्समाः संवत्सरान् तस्यां मिथिलायामुवास ततः रामात् धृतराष्ट्रपुत्रः सुयोधनः तस्मिन् काले लब्धेऽवसरे गदां गदायुद्धमशिक्षत् । तङभाव आर्षः ॥ २६ ॥ केशव इति ॥ प्रियायाः प्रियकृत् तत्पितृहन्तुर्हन्ता केशवः कृष्णो द्वारकामेत्य आगत्य शतधन्वनो निधनं मरणं मणेरप्राप्तिं च प्रियायाः सत्यभामायाः प्राह स्म । आयुरभावादेव त्वत्पिता जीवयितुमशक्यः किन्तु त्वत्पितृहन्ता मया स्वहस्तेन हत इति प्रियां प्रत्युक्तिः ॥ २७ ॥ तत इति ॥ ततश्च याः याः साम्परायिकाः परलोकहितकारिण्यः क्रियाः स्युर्भवन्ति ता हतस्य बन्धोः श्वशुरस्य सत्राजितस्य सुहृद्भिर्भगवान् कारयामास ॥ २८ ॥ अक्रूर इति ॥ प्रयोजकौ सत्राजितवधेन मणिहरणार्थं शतधन्वनः प्रवर्तकौ अक्रूरः कृतवर्मा च द्वौ शतधनुर्वधं श्रुत्वा भयेन संत्रस्तौ द्वारकायाः सकाशात् व्यूषतुः

तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः ॥ अर्हयामास विधिवदर्हणीयं समर्हणैः ॥ २५ ॥ उवास तस्यां कतिचिन्मिथिलायां समा विभुः ॥ ततोऽशिक्षद्गदां काले धार्तराष्ट्रः सुयोधनः ॥ मानितः प्रीतियुक्तेन जनकेन महात्मना ॥ २६ ॥ केशवो द्वारकामेत्य निधनं शतधन्वनः ॥ अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥ २७ ॥ ततः स कारयामास क्रिया बन्धोर्हतस्य वै ॥ साकं सुहृद्भिर्भगवान्या याः स्युः साम्परायिकाः ॥ २८ ॥ अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधम् ॥ व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ ॥ २९ ॥ अक्रूरे प्रोषितेऽरिष्टान्यासन्वै द्वारकौकसाम् ॥ शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ॥ ३० ॥ इत्यङ्गोपदिशन्त्येके विस्मृत्य प्रागुदाहृतम् ॥ मुनिवासनिवासे किं घटेतारिष्टदर्शनम् ॥ ३१ ॥

देशान्तरं गतौ तत्राक्रूरः कृष्णानुमतेनैव गतः। कृतवर्मा तु भक्तपक्षपातप्राकट्यभयादिवोपेक्षितः इति गम्यते । कथमन्यथा सर्वज्ञेश्वरवञ्चनं तयोः सम्भवतीति ॥ २९ ॥ तदेवं वाराणस्यां दानपतिसमाख्यया मणिहस्तेऽक्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णे कर्णे जगति जने सत्यभामारामादीनामप्यविश्वासे जनसंग्रहायाक्रूरं समाहूय साक्षेपं श्रीकृष्णः प्राह स्म । इदं च भगवन्मतं संगोप्य केचन ऋषयोऽन्यत्कारणमक्रूरानयने वदन्ति तद्यथा श्रुतं दूषयितुमनुवदति—अक्रूर इति ॥ वैशब्दोऽवधारणे अक्रूरे प्रोषिते निमित्ते एव द्वारकौकसां द्वारकावासिनामरिष्टानि दुर्निमित्तानि तथा तत्सूचिता शारीरास्तापा व्याधयः मानसाः आधयः दैविका देवकर्तृका अनावृष्ट्यादयः भौतिकाः सर्पमनुष्यादिजन्याश्च तापाः मुहुः आसन् ॥ ३० ॥ तन्मतं दूषयति—इतीति ॥ अङ्ग हे राजन् प्रागुदाहृतं पूर्वं यन्मयोक्तं श्रीकृष्णमाहात्म्यं तद्विस्मृत्यैवमेके वैशम्पायनादयः उपदिशन्ति तत् मुनीनां वासो यस्मिन्सः मुनिवासः श्रीकृष्णस्तस्य निवासे सति एकस्य मुनेर्निवासेऽप्यरिष्टदर्शनं न भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं पुनः सर्वनिवासस्य निवासे सतीत्यर्थः । अक्रूरापगमनमात्रेणारिष्टदर्शनं किं घटेत तदिच्छां विना न घटेत ॥ ३१॥ पुनस्तन्मतमेव दर्शयति—देव इति ॥ काशिषु काशिदेशेषु देवे पर्जन्ये अवर्षति सति काशीशस्तद्देशाधिपतिः तत्रागताय श्वफल्काय स्वसुतां गान्दिनीं प्रादात्ततः कन्यादानात्तद्देशेषु पर्जन्योऽवर्षत् ॥ ३२ ॥ तदिति ॥ असौ तस्य श्वफल्कस्य सुतोऽक्रूरोऽपि तत्तुल्यप्रभावः अतः स यत्र यत्र वसति तत्र देवोऽभिवर्षति । शारीरव्युपतापाः मारिका अकालमृत्युहेतवश्च न भवन्ति अतस्तत्प्रवासेनैवैवमुत्पाता भवन्ति ॥ ३३ ॥ इतीति ॥ इत्येवंभूतम् अक्रूरमहिमप्रतिपादकं वृद्धाभिमानिनां वचः श्रुत्वा सत्यमेवं तथापीह उत्पाते एतावत् अक्रूरापगममात्रं कारणं न भवति किन्तु मणेरप्यपगम इति मत्वेत्येतदन्तं परमतम् इति मत्वा दूतैरक्रूरं समानाय्य जनार्दनः श्रीकृष्णः प्राह स्म ॥ ३४ ॥ पूजयित्वेति ॥ विज्ञातमखिलं येन स विज्ञाताखिलः स चासौ चित्तज्ञः साक्षी चेति स भगवान् अयं भावः । महाभागवतस्यास्य मया दत्तेऽपि मणावपेक्षा नास्त्येव । यत आहूतो मणिना सहैवागतः इति ज्ञात्वा आगतमेनमक्रूरं प्रथमं

देवेऽवर्षति काशीशः श्वफल्कायागताय वै ॥ स्वसुतां गान्दिनीं प्रादात्ततोऽवर्षत्स्म काशिषु ॥ ३२ ॥ तत्सुतस्तत्प्रभावोऽसावक्रूरो यत्र यत्र ह ॥
देवोऽभिवर्षते तत्र नोपतापा न मारिकाः ॥ ३३ ॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणम् ॥ इति मत्वा समानाय्य प्राहाक्रूरं जनार्दनः ॥३४॥
पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः कथाः ॥ विज्ञाताखिलचित्तज्ञः स्मयमान उवाच ह ॥ ३५ ॥ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना ॥ स्यमन्तको मणिः श्रीमान्विदितः पूर्वमेव नः ॥ ३६ ॥ सत्राजितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः ॥ दायं निनीयाऽपः पिण्डान्विमुच्यर्णं च शेषितम् ॥ ३७ ॥ तथापि दुर्धरस्त्वन्यैस्त्वय्यास्तां सुव्रते मणिः ॥ किं तु मामग्रजः सम्यङ् न प्रत्येति मणिं प्रति ॥ ३८ ॥ दर्शयस्व महाभाग बन्धूनां शान्तिमावह ॥ अव्युच्छिन्ना मखास्तेऽद्य वर्तन्ते रुक्मवेदयः ॥ ३९ ॥

पूजयित्वा तथान्याः प्रियाः कथाः कथयित्वा अभिभाष्य संबोध्य स्मयमानः हसन्मुखो हर्षेण उवाच ॥ ३५ ॥ नन्विति ॥ हे दानपते ननु निश्चितं शतधन्वना न्यस्तः श्रीमान् सुवर्णोत्पत्त्यादिप्रभाववान् स्यमन्तको मणिः त्वय्यास्ते स च नोऽस्माकं पूर्वमेव विदितः ॥ ३६ ॥ सत्राजित इति ॥ अनपत्यत्वात् अपुत्रकत्वात् सत्राजितो दुहितुः सत्यभामायाः सुताः अपस्तिलोदकानि पिण्डांश्च निनीय दत्त्वा ऋणं विमुच्य अपाकृत्यावशेषितं दायं धनं गृह्णीयुः । तथा च शास्त्रम् । " पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुता गोत्रजा बन्धुशिष्याः सब्रह्मचारिणः " इति ॥ ३७ ॥ तथापीति ॥ तथापि शास्त्रतो मत्पुत्रग्राह्यत्वेऽपि अन्यैर्दुर्धरः धारणायोग्यः स मणिः सुव्रतधारणया त्वय्येवास्तां किं त्वग्रजो रामो मणिं प्रति मां सम्यक् न प्रत्येति न विश्वसिति अनेन मणिस्तिरोधापित इति शङ्कत इत्यर्थः । शङ्कावचनं च ग्रन्थाद्बहिर्द्रष्टव्यम् ॥ ३८ ॥ दर्शयस्वेति ॥ हे महाभाग अतो मणिं दर्शयस्व तेन बन्धूनां शान्तिं चित्तसमाधानमावह सम्पादय । मणिर्नास्तीति मा वोचः यतः रुक्मवेदयः स्वर्णरचितवेदियुक्ताः अव्युच्छिन्नाः

CC-0. In Public Domain. Digitization by eGangotri

सन्तता मखास्तेऽद्य वर्तन्ते अतो मणिरिदानीमपि त्वय्यस्तीति रामश्वेतः पूर्वं मिथिलातः समानीत इति हरिवंशे ॥ ३९ ॥ एवमिति ॥ एवं सामभिः सामोक्तिभिः आलब्ध उक्तः हृदि स्पृष्टो वा वशीकृतो वा श्वफल्कतनयोऽक्रूरो वाससा च्छन्नं सूर्यसमप्रभं मणिमादाय कृष्णाय ददौ ॥ ४० ॥ स्यमन्तकमिति ॥ प्रभुः श्रीकृष्णः ज्ञातिभ्यो रामादिभ्यः स्यमन्तकमणिं दर्शयित्वा तेन मणिनात्मनो रजः मिथ्याभिशापं प्रमृज्य भूयस्तस्मै अक्रूराय मणिं प्रत्यार्पयत् ददौ ॥ ४१ ॥ यस्त्विति ॥ यस्तु पुमान् भगवतः ईश्वरस्य विष्णोः वीर्यैणाढ्यं वृजिनहरं सुमङ्गलं च एतदाख्यानं पठति शृणोत्यनुस्मरेत् वा सः आत्मनः दुष्कीर्तिं तन्मूलं दुरितं पापं चापोह्य निरस्य शान्तिं याति ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे सप्तपञ्चाशके व्यधात् ॥ ५७ ॥ अष्टपञ्चाशत्तमे तु कालिन्दीप्रमुखा हरिः ॥ पञ्चोदुवाह तच्छ्लोकाः कथिता गर्जर्भार्गणाः ॥ षड्वाचेत्यथो पादयुक्ता षष्टिरनुष्टुभः ॥ ५८ ॥ एकदेति ॥ प्रतीतान् लाक्षागृहे नष्टा इति श्रुतानपि पुनर्द्रुपदगृहे सर्वैर्दृष्टान् पाण्डवान् द्रष्टुं युयुधानः

एवं सामभिरालब्धः श्वफल्कतनयो मणिम् ॥ आदाय वाससा छन्नं ददौ सूर्यसमप्रभम् ॥ ४० ॥ स्यमन्तकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः ॥ विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ॥ ४१ ॥ यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमङ्गलं च ॥ आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्तिं दुरितमपोह्य याति शान्तिम् ॥ ४२ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे स्यमन्तकोपाख्याने सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ श्रीशुक उवाच ॥ एकदा पाण्डवान् द्रष्टुं प्रतीतान् पुरुषोत्तमः ॥ इन्द्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः ॥ १ ॥ दृष्ट्वा तमागतं पार्था मुकुन्दमखिलेश्वरम् ॥ उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतम् ॥ २ ॥ परिष्वज्याच्युतं वीरा अङ्गसङ्गहतैनसः ॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥ ३ ॥ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवन्दनम् ॥ फाल्गुनं परिरभ्याथ यमाभ्यां चाभिवन्दितः ॥ ४ ॥

सात्यकिः आदिर्येषां तैर्यदुभिः परिवृतः श्रीमान् शोभातिशययुक्तः पुरुषोत्तमः कृष्णः एकदा इन्द्रप्रस्थं गतः ॥ १ ॥ दृष्ट्वेति ॥ वीराः पार्थाः तम् अखिलेश्वरं मुकुन्दमागतं दृष्ट्वा युगपदेव उत्तस्थुः तत्र दृष्टान्तः । यथा मुख्यं पञ्चवृत्तिकं प्राणमागतं दृष्ट्वा प्राणा इन्द्रियाणि युगपत्सचेष्टानि भवन्ति तथा ॥ २ ॥ परिष्वज्येति ॥ वीराः पाण्डवाः अच्युतं परिष्वज्य तस्याङ्गस्य सङ्गेन हतान्येनांसि पापानि येषां तादृशाः सन्तः सानुरागं स्मितं यस्मिंस्तत् तस्य अच्युतस्य वक्त्रं वीक्ष्य मुदं ययुः ॥ ३ ॥ युधिष्ठिरस्येति ॥ युधिष्ठिरस्य भीमस्य च ज्येष्ठत्वात्पादाभिवन्दनं कृत्वा फाल्गुस्यार्जुनस्य तुल्यवयस्कत्वात्तं परिरभ्य नकुलसहदेवयोः कनिष्ठत्वात् ताभ्यां यमाभ्यां यमलाभ्यामभिवादितो बभूव । रोहिण्यां श्रीकृष्णः " फल्गुन्यामर्जुनो जातः " इति अष्टभिर्दिनैः श्रीकृष्णस्य ज्यैष्ठ्येऽपि सख्यात्समत्वेन व्यवहारः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमेति ॥ परमासने उत्तमसिंहासने आसीनं कृष्णं शनैरेत्यागत्य बहुभार्यापि अनिन्दिता नवोढा किञ्चिद् व्रीडिता कृष्णा द्रौपदी अभ्यवन्दत ॥ ५ ॥ तथेति ॥ यथा कृष्णः पूजितस्तथैव सात्यकिः पार्थैः पूजितोऽभिवन्दितश्चासने निषसाद । तथान्ये च यदवः पार्थैः पूजिता कृष्णं परित उपासत ॥ ६ ॥ पृथामिति ॥ पृथां कुन्तीं समागत्य कृतम् अभिवादनं येन सः अतिहार्देन स्नेहेन आर्द्रे सजले दृशौ यस्यास्तया पृथया आभिरम्भितः परिष्वक्तः तया परिपृष्टा कुशलप्रश्नविषयीकृताः बान्धवा वसुदेवादयो यस्य सः कृष्णः सहस्नुषां पुत्रभार्यासहितां पितृस्वसारं तां कुन्तीं कुशलमापृष्टवान् ॥ ७ ॥ तामिति ॥ प्रेम्णा वैक्लव्यं व्याकुलत्वं तेन रुद्धः कण्ठो यस्याः सा अश्रूणि लोचनयो यस्याः सा कुन्ती तान् भूतपूर्वान् बहून् क्लेशान् स्मरन्ती क्लेशानामपाये विनाशे आत्मनि दर्शनं यस्य सः क्लेशानामपायो यस्मात्तादृशमात्मनि दर्शनं यस्येति वा भजतां क्लेशापाये क्लेशानामपायाय वा आत्मानं दर्शयतीति तथाभूतं वा तं कृष्णमाह स्म ॥ ८ ॥ तदेति ॥ यदा ज्ञातीन् बन्धून् नोऽस्मान् स्मरता त्वयास्मद्वृत्तज्ञानाय मम भ्राता अक्रूरः

परमासन आसीनं कृष्णा कृष्णमनिन्दिता ॥ नवोढा व्रीडिता किञ्चिच्छनैरेत्याभ्यवन्दत ॥ ५ ॥ तथैव सात्यकिः पार्थैः पूजितश्चाभिवन्दितः ॥ निषसादासनेऽन्ये च पूजिताः पर्युपासत ॥ ६ ॥ पृथां समागत्य कृताभिवादनस्तयातिहार्दार्द्रदृशाऽभिरम्भितः ॥ आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबान्धवः ॥ ७ ॥ तमाह प्रेमवैक्लव्यरुद्धकण्ठाश्रुलोचना ॥ स्मरन्ती तान्बहून्क्लेशान्क्लेशापायात्मदर्शनम् ॥ ८ ॥ तदैव कुशलं नोऽभूत् सनाथास्ते कृता वयम् ॥ ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ॥ ९ ॥ न तेऽस्ति स्वपरभ्रान्तिर्विश्वस्य सुहृदात्मनः ॥ तथापि स्मरतां शश्वत्क्लेशान्हंसि हृदि स्थितः ॥ १० ॥ युधिष्ठिर उवाच ॥ किं न आचरितं श्रेयो न वेदाहमधीश्वर ॥ योगेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसाम् ॥ ११ ॥ इति वै वार्षिकान्मासान्राज्ञा सोऽभ्यर्थितः सुखम् ॥ जनयन्नयनानन्दमिन्द्रप्रस्थौकसां विभुः ॥ १२ ॥

प्रेषितः तदैव नोऽस्माकं कुशलमभूत् तथा ते त्वया वयं सनाथाः सस्वामिनश्च कृताः ॥९॥ नेति ॥ विश्वस्य जगतः सुहृच्चासावात्मा यस्तस्य ते तव स्वः पर इति भ्रान्तिर्नास्ति तथापि स्मरतां भक्तानां हृदि शश्वत् सर्वदा स्थितः सन् क्लेशान् हंसि नाशयसि ॥ १० ॥ किं न इति ॥ हे अधीश्वर नोऽस्माभिः किं श्रेय आचरितं पुण्यं कृतमित्यत्यहं विशेषतो नो वेद न जानामि किंतु सामान्यत एव जानामि । यत् यस्मात् योगेश्वराणामपि दुर्दर्शः त्वं कुमेधसां विषयासक्तचित्तानाम् असिजार्षः । दृष्टोऽसि दृश्यस इत्यर्थः । बुद्ध्यर्थत्वाद्वर्तमाने क्तः । अत एव कर्तरि षष्ठी ॥ ११ ॥ इतीति ॥ इत्येवं राज्ञा युधिष्ठिरेणाभ्यर्थितः सम्प्रार्थितो विभुः स श्रीकृष्णः इन्द्रप्रस्थौकसां तद्वासिनां नयनानन्दं जनयन् वार्षिकान्वर्षोपलक्षितान् चतुरो मासान् सुखं यथा भवति तथा तत्रोवासेति शेषः । सुखमभ्यर्थित इति वा क्रियासमाप्तिः ॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकदेति युग्मम् ॥ एकदा खाण्डवदाहानन्तरं तत्रैवार्जुनस्य गाण्डीवादिलाभात् परवीरहा परशत्रुपक्षनाशकर्त्ता विजयोऽर्जुनः वानरो हनुमत्प्रतिकृतिर्ध्वजे यस्य तथाभूतं रथमारुह्य गाण्डीवाख्यं धनुः अक्षयाः अक्षीणाः सायका ययोस्तौ तूणी इषुधी चादाय सन्नद्धो बद्धकवचः कृष्णेन सहितो विहर्तुं मृगयां कर्तुं बहुव्यालमृगाकीर्णं विपिनं वनं प्राविशत् ॥१३॥१४॥ तत्रेति ॥ तत्र वने व्याघ्रादीन् शरैरविध्यत् जघान । शरभा अष्टापदाः खड्गाः गण्डकाः ॥ १५ ॥ तानिति ॥ तत्र मेध्यान् कर्मार्हान् तान्मृगान् पर्वण्युपागते पर्वयुक्ताष्टकाश्राद्धादिकर्मण्युपस्थिते सति राज्ञे युधिष्ठिराय किङ्करा निन्युः प्रापयामासुः । अमेध्या व्याघ्रादयः परहिंसकत्वाद्धता इति भावः । ततः तृषा पिपासया परितो व्याप्तः परिश्रान्तश्च बीभत्सुः अर्जुनो यमुनामगात् ॥१६॥ तत्रेति ॥ महारथौ कृष्णौ कृष्णार्जुनौ तत्र यमुनायामुपस्पृश्य आचम्य स्नात्वा च विशदं निर्मलं वारि जलं पीत्वा चारु सुन्दरं दृश्यते इति दर्शनं शरीरं यस्यास्तां तत्र तीरे विचरन्तीं कन्यां ददर्शतुः गुण आर्षः । ददृशतुरिति पाठो वा ॥ १७ ॥ तामिति ॥ सख्या श्रीकृष्णेन

एकदा रथमारुह्य विजयो वानरध्वजम् ॥ गाण्डीवं धनुरादाय तूणौ चाक्षयसायकौ ॥ १३ ॥ साकं कृष्णेन संनद्धो विहर्तुं गहनं वनम् ॥ बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा ॥१४॥ तत्राविध्यच्छरैर्व्याघ्रान्सूकरान्महिषान्रुरून् ॥ शरभान्गवयान्खड्गान्हरिणाञ्छशशल्लकान् ॥ १५ ॥ तान्निन्युः किङ्करा राज्ञे मेध्यान्पर्वण्युपागते ॥ तृट्परीतः परिश्रान्तो बीभत्सुर्यमुनामगात् ॥ १६ ॥ तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ ॥ कृष्णौ ददृशतुः कन्यां चरन्तीं चारुदर्शनाम् ॥ १७ ॥ तामासाद्य वरारोहां सुद्विजां रुचिराननाम् ॥ पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमाम् ॥ १८ ॥ का त्वं कस्यासि सुश्रोणि कुतोऽसि किं चिकीर्षसि ॥ मन्ये त्वां पतिमिच्छन्तीं सर्वं कथय शोभने ॥ १९ ॥ कालिन्द्युवाच ॥ अहं देवस्य सवितुर्दुहिता पतिमिच्छती ॥ विष्णुं वरेण्यं वरदं तपः परममास्थिता ॥ २० ॥ नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनम् ॥ तुष्यतां मे स भगवान्मुकुन्दोऽनाथसंश्रयः ॥ २१ ॥

प्रेषितः फाल्गुनः अर्जुनः वरौ श्रेष्ठौ आरोहौ ऊरू यस्यास्तां शोभना द्विजा दन्ता यस्यास्तां रुचिरं सुन्दरमाननं यस्यास्तां प्रमदोत्तमामासाद्य पप्रच्छ ॥ १८ ॥ केति ॥ सुश्रोणि हे शोभने त्वं काऽसि कस्याऽसि कुतो वा आगताऽसि किंच चिकीर्षसि अहं तु त्वां पतिमिच्छन्तीं मन्ये अतः त्वं सर्वं कथय । अत्र वरारोहासुश्रोण्यादिशब्दै- रुढ्या सौन्दर्यस्यैव प्रतीतिर्नतु योगेन भावविरुद्धावयवार्थस्य यथा भगिनीपदे स्वसृमात्रार्थस्य एवं सुभगादिशब्देषूह्यम् ॥ १९ ॥ मदभीष्टादन्योयमिति ज्ञात्वा सहसैव स्वेष्टमाह—अहमिति ॥ अहं देवस्य सवितुः सूर्यस्य दुहिता वरेण्यं वरणीयं वरदं विष्णुं पतिमिच्छती कामयमाना परमं तप आस्थिता ॥ २० ॥ नेति ॥ हे वीर तं श्रीनि- केतनमृते विना अन्यं पतिं न वृणे सः अनाथानां संश्रयः शरणभूतो भगवान्मुकुन्दो मे ममोपरि तुष्यताम् । तङार्षः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालिन्दीति ॥ कालिन्दीति नाम्ना समाख्याता यावदच्युतस्य कृष्णस्य दर्शनं प्राप्तिस्तावद्यमुनाजले तत्रापि पित्रा निर्मिते भवने वसामि ॥ २२ ॥ तथेति ॥ गुडाका निद्रा तस्या ईशो निर्जितनिद्रः अर्जुनः आगत्य यथा कालिन्द्योक्तं तथा वासुदेवायावदत् । स वासुदेवः कृष्णोऽपि आदावेव तद्विद्वान् स्वप्राप्त्यर्थं तप आचरणं जानन् वरेण्यो विष्णुरहमेव स्वपित्रुपदिष्टप्रत्यभिज्ञया ज्ञातुमर्हसीत्युक्तया तया परिचितः सन् तां रथमारोप्य धर्मराजं युधिष्ठिरं प्रति हस्तिनपुरमागमत् ॥ २३ ॥ प्रसङ्गात्तत्कालभवं चरित्रान्तरमाह—यदेति ॥ अत्रायं क्रमः पूर्वं नगररचनं ततः खाण्डवदाहः ततः सभाहरणं ततः कालिन्दीलाभः इति पार्थैः यदैव सन्दिष्टः नगरं नास्ति तत्सम्पादयेति विज्ञापितः श्रीकृष्णः प्रयोजककर्ता तदैव विश्वकर्मणा प्रयोज्यकर्त्रा पार्थानामावासार्थं परमाद्भुतं विचित्रं नानाविधशिल्पोपशोभितं नगरं कारयामास ॥ २४ ॥ भगवानिति ॥ भगवान् स्वानां स्वभक्तानां प्रियचिकीर्षया प्रियं कर्तुमिच्छया तत्र हस्तिनापुरे निवसन् अग्नये खाण्डवं तन्नामकमिन्द्रवनं दातुम् अर्जुनस्य सारथिः साहाय्यकृदास ॥२५॥ स इति ॥

कालिन्दीति समाख्याता वसामि यमुनाजले ॥ निर्मिते भवने पित्रा यावदच्युतदर्शनम् ॥ २२ ॥ तथाऽवदद्गुडाकेशो वासुदेवाय सोऽपि ताम् ॥ रथमारोप्य तद्विद्वान्धर्मराजमुपागमत् ॥ २३ ॥ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भुतम् ॥ कारयामास नगरं विचित्रं विश्वकर्मणा ॥ २४ ॥ भगवांस्तत्र निवसन्स्वानां प्रियचिकीर्षया ॥ अग्नये खाण्डवं दातुमर्जुनस्यास सारथिः ॥ २५ ॥ सोऽग्निस्तुष्टो धनुरदाद्धयाञ्छ्वेतान्रथं नृप ॥ अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः ॥ २६ ॥ मयश्च मोचितो वह्नेः सभां सख्य उपाहरत् ॥ यस्मिन्दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः ॥ २७ ॥ स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः ॥ आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ॥ २८ ॥ अथोपयेमे कालिन्दीं सुपुण्यत्वृक्ष ऊर्जिते ॥ वितन्वन्परमानन्दं स्वानां परममङ्गलम् ॥ २९ ॥

हे नृप स चाग्निः खाण्डवदाहाङ्गीकारेण तुष्टः अर्जुनाय गाण्डीवं धनुः श्वेतान् हयान् रथम् अक्षयौ अक्षयसायकौ तूणौ अस्त्रिभिः अस्त्रधरैरभेद्यं वर्म कवचं चादात् । एतानि खाण्डवदाहात् पूर्वमेवाग्निना दत्तानि ॥ २६ ॥ मय इति ॥ खाण्डववने स्थितो मयाख्यो दानवानां शिल्पाचार्यो वनदाहकाद्वह्नेः सकाशात् मोचितः रक्षितः अतस्तत्र सख्ये खाण्डवदाहकवह्नेः सख्ये वा अर्जुनाय सभां कृत्वा उपाहरत् ददौ । यस्मिन्निति सामान्यतो निर्देशः । यस्यां सभायां दुर्योधनस्य जलस्थलयोर्दृशेर्दृष्टेर्भ्रमः । यद्वा । जले स्थलदृक् स्थलज्ञानं यत्र तत्र सभायां भ्रमः आसीत् ॥ २७ ॥ स इति ॥ तेनार्जुनेन समनुज्ञातः अन्यैः स्वसुहृद्भिः युधिष्ठिरादिभिरनुमोदितः स कृष्णः सात्यकिप्रमुखैर्वृतः सात्यक्यादिभिः सहितो भूयो द्वारकामाययौ । पूर्वं मुहुर्जिगमिषन्नपि क्लेशेनाननुज्ञातत्वान्न ययौ । अधुना कालिन्दीविवाहाद्यावश्यकमालोच्य सम्यगनुज्ञातो ययौ ॥ २८ ॥ अथेति ॥ सुपुण्यो विवाहयोग्यः ऋतुः ऋक्षं नक्षत्रं च यस्मिन् तस्मिन्नूर्जिते ग्रहबलवति मुहूर्ते परममङ्गलरूपो भगवान् स्वानां स्वभक्तानां द्वारकौकसां परमानन्दं

Nepal Sanskrit University, Jamshedpur Collection. Digitized by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

वितन्वन् विस्तारयन् कालिन्दीम् उपयेमे विवाहितवान् ॥ २९ ॥ पञ्चमं विवाहमाह—विन्देति ॥ दुर्योधनस्य भगवद्द्वेषिणः वशानुगौ इच्छानुसारिणौ आवन्त्यौ अवन्तीस्वामिनौ विन्दानुविन्दौ स्वयंवरे कृष्णे सक्तां कृष्णं वरितुमुद्युक्तां स्वभगिनीं न्यषेधताम् ॥ ३० ॥ राजेति ॥ हे राजन् भ्रातृभ्यां कृष्णाय स्वभगिनीदाननिषेधे कृते पितृष्वसुः स्वपितृभगिन्याः राजाधिदेव्यास्तनयां मित्रविन्दां राज्ञां प्रपश्यतामेव सतां प्रसह्य बलात्कृष्णो हृतवान् ॥ ३१ ॥ षष्ठं विवाहमाह—नग्नजिदिति ॥ हे नृप अतिधार्मिकः कौशल्यः कोशलदेशाधिपतिरयोध्यावासी नग्नजिन्नाम राजासीत् । तस्य नाग्नजितीति पितृनाम्ना प्रसिद्धा देवी कान्तिमती सत्यानाम कन्याभवत् ॥ ३२ ॥ नेति ॥ तीक्ष्णशृङ्गान् वीराणां गन्धमपि न सहन्त इति तान् खलान् दुर्वृत्तान् दुर्धर्षान् वशीकर्त्तुमशक्यान् सप्त गोवृषान् वृषश्रेष्ठान् वृषशब्द उत्तरपदे श्रेष्ठवचनः अजित्वा तां सत्यां वोढुं नृपा न शेकुः ॥३३॥ तामिति ॥ वृषान् जयतीति वृषजित् तेन लभ्यां तां श्रुत्वा भगवान् सात्वतां पतिः श्रीकृष्णो महता सैन्येन वृतः सन् कौशल्याः कोशलदे-

विन्दानुविन्दावावन्त्यौ दुर्योधनवशानुगौ ॥ स्वयंवरे स्वभगिनीं कृष्णे सक्तां न्यषेधताम् ॥ ३० ॥ राजाधिदेव्यास्तनयां मित्रविन्दां पितृष्वसुः ॥ प्रसह्य हृतवान्कृष्णो राजन्राज्ञां प्रपश्यताम् ॥ ३१ ॥ नग्नजिन्नाम कौसल्य आसीद्राजातिधार्मिकः ॥ तस्य सत्याऽभवत्कन्या देवी नाग्नजिती नृप ॥ ३२ ॥ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् ॥ तीक्ष्णशृङ्गान्सुदुर्धर्षान्वीरगन्धासहान्खलान् ॥ ३३ ॥ तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतां पतिः ॥ जगाम कौसल्यपुरं सैन्येन महता वृतः ॥ ३४ ॥ स कोसलपतिः प्रीतः प्रत्युत्थानासनादिभिः ॥ अर्हणेनापि गुरुणाऽपूजयत्प्रतिनन्दितः ॥ ३५ ॥ वरं विलोक्याभितं समागतं नरेन्द्रकन्या चकमे रमापतिम् ॥ भूयादयं मे पतिराशिषोमलाः करोतु सत्या यदि मे धृतो व्रतैः ॥ ३६ ॥ यत्पादपङ्कजरजः शिरसा बिभर्ति श्रीरब्जजः सगिरिशः सह लोकपालैः ॥ लीलातनूः स्वकृतसेतुपरीप्सयेशः कालेदधत्स भगवान्मम केन तुष्येत् ॥ ३७ ॥

शराजास्तेषां पुरमयोध्यां जगाम ॥ ३४ ॥ स इति ॥ तदा स कोशलपतिः नग्नजित् तमागतं दृष्ट्वा प्रीतः सन् प्रत्युत्थाय अग्रतो गत्वा समानीय आसनादिभिर्गुरुणा महता अर्हणेन पूजासाधनेन तं पूजयन् प्रतिनन्दितः वाचा सत्कृतो जात इत्यर्थः ॥ ३५ ॥ वरमिति ॥ तदा च नरेन्द्रस्य नग्नजितः कन्या सत्या तं समागतं रमापतिं स्वाभिमतं वरं चन्द्रशालागवाक्षतः विलोक्य चकमे अकामयत । यदि मे मया व्रतैरेतत्सन्तोषहेतुभिर्नियमैः सहायं भगवान् हृदि धृतः सर्वदा चिन्तितस्तदायं मे पतिर्भूयात् पतिश्च सन् अमला उत्कृष्टाः ममाशिषो मनोरथान् सत्याः यथार्थाः करोतु ॥ ३६ ॥ यदिति ॥ श्रीर्लक्ष्मीः गिरिशेन रुद्रेण सहितः लोकपालैरिन्द्रादिभिश्च सहितः अब्जजो ब्रह्मा च यस्य पादपङ्कजरजः शिरसा बिभर्ति स स्वकृतानां सेतूनां धर्ममर्यादानां परीप्सया परित्राणेच्छया काले धर्मग्लानिकाले लीलातनूः दधत् बिभ्राणो भगवानीशो मम केनोपायेनतुष्येत् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्चितमिति ॥ पुनरिति वाक्यालङ्कारे। अर्चितं भगवन्तं राजा हे नारायण हे जगत्पते आत्मानन्देन स्वरूपानन्देनैव पूर्णस्य तवाल्पकः क्षुद्रोऽहं किं करवाणि मत्कर्तृकेन केन कर्मणा तव प्रसन्नता स्यात् तदाज्ञापयेत्याह स्म॥ ३८॥तमिति॥हे कुरुनन्दन हे परीक्षित् कृत आसनपरिग्रहो येन स भगवान् ऐश्वर्यादिपूर्णोऽपि कृष्णः कृपया मेघनादवद् गम्भीरया हर्षजनिकया वाचा सस्मितं यथा भवति तथा राजानं प्रत्याह स्म ॥ ३९ ॥ नरेन्द्रेति ॥ हे नरेन्द्र यद्यपि निजधर्मवर्तिनः राजन्यबन्धोः निकृष्टक्षत्रियस्यापि याच्ञा विगर्हिता लोके शास्त्रे च निन्दिता किं पुनर्ममोत्तमक्षत्रियस्य तस्य हि प्रसभहरणमेव धर्म इति भावः । तथापि तव सौहृदेच्छया बन्धुत्वेन स्नेहेच्छया त्वदीयां कन्यां याचे । शुल्कदा द्रव्यादिप्रदाश्च वयं नैव भवामः ॥ ४० ॥ क इति ॥ हे नाथ ते त्वत्तः अभ्यधिकः उत्कृष्टः कन्याया ईप्सितो वरोऽन्यः को वास्ति गुणानामेकधाम्नः यस्य तवाङ्गे वक्षसि अनपायिनी विश्लेषरहिता सती श्रीः लक्ष्मीर्वसति ॥ ४१ ॥ वयमपि न शुल्कग्राहिण इत्याह—किमिति ॥ हे सात्वतर्षभ किंतु कन्या वरस्य परीप्सया प्राप्तीच्छया पुंसां

अर्चितं पुनरित्याह नारायण जगत्पते ॥ आत्मानन्देन पूर्णस्य करवाणि किमल्पकः ॥३८॥ श्रीशुक उवाच ॥ तमाह भगवान्हृष्टः कृतासनपरिग्रहः ॥ मेघगम्भीरया वाचा सस्मितं कुरुनन्दन ॥ ३९ ॥ श्रीभगवानुवाच ॥ नरेन्द्र याच्ञा कविभिर्विगर्हिता राजन्यबन्धोर्निजधर्मवर्तिनः ॥ तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां नहि शुल्कदा वयम् ॥ ४० ॥ राजोवाच ॥ कोऽन्यस्तेऽभ्यधिको नाथ कन्यावर इहेप्सितः ॥ गुणैकधाम्नो यस्याङ्गे श्रीर्वसत्यनपायिनी ॥ ४१ ॥ किं त्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ ॥ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥ ४२ ॥ सप्तैते गोवृषा वीर दुर्दान्ता दुरवग्रहाः ॥ एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥ ४३ ॥ यदीमे निगृहीताः स्युस्त्वयैव यदुनन्दन ॥ वरो भवानभिमतो दुहितुर्मे श्रियः पते ॥ ४४ ॥ एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः ॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ॥ ४५ ॥

वीर्यस्य बलादिप्रभावस्य या परीक्षा तदर्थमस्माभिरितः पूर्वमेव समयो नियमः कृतः अन्यथा अत्युत्तमगुणाया मत्कन्यायाः बहवो याचकाः स्युस्तत्र के के प्रत्याख्येयाः इति भावः ॥ ४२ ॥ सप्तेति ॥ हे वीर सप्तैते गोवृषाः दुर्दान्ता अशिक्षिताः दुरवग्रहाः अपरायताः एतैस्तु सुबहवो नृपात्मजा भग्ना भङ्गं प्रापिताः तथा भिन्नानि गात्राणि येषां तथाभूताश्च जाताः । एतान् यो निगृह्णाति तस्य कन्येति समयः कृतः ॥ ४३ ॥ यदिति ॥ हे यदुनन्दन हे श्रियः पते यत् यदि इमे त्वया निगृहीताः दमिताः स्युस्तर्हि भवानेव मम दुहितुरभिमतो वरः । यद्वा । यत् यतः त्वयैव निगृहीताः स्युरेव अतः भवानेवाभिमतो वरः ॥४४॥ एवमिति ॥ एवंभूतं समयं प्रतिज्ञामाकर्ण्य श्रुत्वा परिकरम् उत्तरीयादिकं कट्यां बध्वा प्रभुः श्रीकृष्ण आत्मानं सप्तधा कृत्वा प्रकाश्य तान् लीलयानायासेनैव न्यगृह्णात् वशीकृतवान् विद्धनासिकान्कृत्वा बबन्ध । बह्वीनां योषितां पूर्ण एवाहं संभोगयोग्यः स्यामिति सत्यां प्रत्यसापत्न्यदर्शनार्थमात्मनः सप्तधाकरणम् । सप्तधा प्रकाशनं च सत्यां प्रत्येवेति अकृत्वा इति च्छेदो वा सप्तधा अकृत्वा-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

पीत्यर्थः ॥ ४५ ॥ बद्ध्वेति ॥ हतम् ओजो बलं येषान्तान् अत एव भग्नो दर्पो गर्वो येषां तान् शौरिः कृष्णो दामभिर्बध्वा बालो दारुमयान् यथा बध्नाति तथा बद्धांस्तान् लीलया अनायासेनैव व्यकर्षत् । ये च प्रलम्बखरेत्यत्र सप्तोक्षमुक्तिरुक्ता सा त्वेतत्प्रभावादेहान्ते बोध्या ॥ ४६ ॥ तत इति ॥ ततो वृषनिग्रहात् विस्मितः प्रीतश्च राजा स्वसुतां कृष्णाय ददौ तां च सदृशीं स्वानुरूपां सत्यां प्रभुर्भगवान् विधिवत् प्रत्यगृह्णात् उपयेमे ॥ ४७ ॥ राजेति ॥ राजपत्न्यश्च कृष्णं दुहितुः प्रियं पतिं लब्ध्वा परमानन्दं लेभिरे तत्र तदा परमो महानुत्सवश्च जातः ॥ ४८ ॥ शङ्खेति ॥ शङ्खभेर्यानकाः नेदुर्दध्वनुः तथा गीतयुक्तानि वाद्यानि द्विजानामाशिषः आशीर्वादाश्च बभूवुः । तथा प्रमुदिता नरा नार्यश्च शोभनैर्वासोभिः स्रग्भिश्चालंकृता आसन्निति शेषः ॥ ४९ ॥ दशेति ॥ विभुः नग्नजिद्राजा धेनूनां दश सहस्राणि तथा निष्कः ग्रीवायां यासां निष्कमात्रोक्तिः प्राधान्यात् उपलक्षणमिदं सर्वभूषणानाम् । सुष्ठु वासो यासां तासां युवतीनां दासीनां त्रिसाहस्रं पारिबर्हमदात् ॥ ५० ॥ नवेति ॥ नागानां गजानां नव सहस्राणि

बद्ध्वा तान्दामभिः शौरिर्हतदर्पान्हतौजसः ॥ व्यकर्षल्लीलया बद्धान्बालो दारुमयान्यथा ॥ ४६ ॥ ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः ॥ तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ॥ ४७ ॥ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रियं पतिम् ॥ लेभिरे परमानन्दं जातश्च परमोत्सवः ॥ ४८ ॥ शङ्खभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः ॥ नरा नार्यः प्रमुदिताः सुवासःस्रगलंकृताः ॥ ४९ ॥ दश धेनुसहस्राणि पारिबर्हमदाद्विभुः ॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससाम् ॥ ५० ॥ नव नागसहस्राणि नागाच्छतगुणान्रथान् ॥ रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ॥ ५१ ॥ दम्पती रथमारोप्य महत्या सेनया वृतौ ॥ स्नेहप्रक्लिन्नहृदयो यापयामास कोसलः ॥ ५२ ॥ श्रुत्वैतद्रुरुधुर्भूपा नयन्तं पथि कन्यकाम् ॥ भग्नवीर्याः सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥ ५३ ॥ तानस्यतः शरव्रातान्बन्धुप्रियकृदर्जुनः ॥ गाण्डीवी कालयामास सिंहः क्षुद्रमृगानिव ॥ ५४ ॥

नागात् नागेभ्यः जातावेकत्वम् एवमग्रेऽपि । शतगुणान् नव लक्षाणि रथान् रथात् रथेभ्यः शतगुणान् नवकोटिमितान् अश्वान् अश्वादश्वेभ्यः शतगुणान् नव पद्मानि नरान् भृत्यान् पारिबर्हमदादित्यनुषङ्गः ॥ ५१ ॥ दम्पती इति ॥ स्नेहेन प्रक्लिन्नम् आर्द्रं हृदयं यस्य स कौसलो नग्नजित् महत्या सेनया वृतौ दम्पती सत्याकृष्णौ रथमारोप्य यापयामास गमयामास ॥ ५२ ॥ श्रुत्वेति ॥ यदुभिर्गोवृषैश्च पुरा भग्नवीर्या अपि सुदुर्मर्षाः पराजयं कन्यानयनं चासहमानाः भूपाः कृष्णस्य प्रयाणं श्रुत्वा कन्यकां सत्यां नयन्तं कृष्णं पथि मार्गे रुरुधुः ॥ ५३ ॥ तानिति ॥ शरसमूहानस्यतः क्षिपतः प्रयुञ्जानान् तान् भूपान् बन्धोः कृष्णस्य प्रियं करोतीति तथा गाण्डीवी धृतगाण्डीवोऽर्जुनः क्षुद्रमृगान् सिंहः इव कालयामास पलायितान् कृतवान् ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारिबर्हमिति ॥ अथ यदूनामृषभः देवकीसुतः भगवान् कृष्णः श्वशुरदत्तं पारिबर्हम् उपागृह्य द्वारकामेत्य आगत्य सत्यया सह रेमे ॥ ५५ ॥ सप्तमं विवाहमाह—श्रुतकीर्तेरिति ॥ स्वपितृष्वसुः श्रुतकीर्तेः सुतां कैकेयीं केकयदेशोद्भवां सन्तर्दन आदिर्येषां तैर्भ्रातृभिर्दत्तां भद्रां नाम कन्यां कृष्ण उपयेमे ॥ ५६ ॥ अष्टमं विवाहमाह—सुतामिति ॥ मद्रदेशाधिपतेः सुतां शुभलक्षणैर्युतां लक्ष्मणां स्वयंवरे एकः असहायः सः कृष्णः सुपर्णः सुधामिव जहार । मत्स्ययन्त्रे श्रीकृष्णेन विद्धेऽपि दुष्टा राजानो मद्राधिपमूचुः भवत एव मतमिदन्नतु कन्यायाः । ततो राज्ञा स्वयंवरोऽपि कारितः इति कल्प्यम् । तेन कुरुक्षेत्रकथाया न विरोधः ॥ ५७ ॥ अन्या इति ॥ एवंविधाः चारुदर्शनाः अन्याश्च कृष्णस्य सहस्रशः षोडशसहस्राणीत्यर्थः । भार्या आसन् ताश्च भौमं हत्वा तस्य भौमस्य निरोधात् अन्तःपुरात् निरोधनस्थानाद्वा आहृताः भौमश्चायं श्रीवराहतो भूम्यां जातः । “यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना । तत्स्पर्शसंभवः पुत्रस्तदायं मय्यजायत ॥” इति विष्णुपुराणोक्तेः । भैष्मी जाम्बवती भामा सत्या

पारिबर्हमुपागृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान्देवकीसुतः ॥ ५५ ॥ श्रुतकीर्तेः सुतां भद्रामुपयेमे पितृष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥ ५६ ॥ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम् ॥ स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥५७॥ अन्याश्चैवंविधा भार्याः कृष्णस्यासन्सहस्रशः ॥ भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ॥ ५८ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे अष्टमहिष्युद्वाहो नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ राजोवाच ॥ यथा हतो भगवता भौमो येन च ताः स्त्रियः ॥ निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः ॥ १ ॥ श्रीशुक उवाच ॥ इन्द्रेण हृतच्छत्रेण हृतकुण्डलबन्धुना ॥ हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितम् ॥ २ ॥ सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ ॥ गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमम् ॥ मुरपाशयुतैर्घोरैर्दृढैः सर्वत आवृतम् ॥ ३ ॥

भद्रा च लक्ष्मणा कालिन्दी मित्रविन्दा चेत्यष्टौ पट्टमहास्त्रियः ॥ ५८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमेऽष्टपञ्चाशत्तमे व्यधात् ॥ ५८ ॥ ऊनषष्टितमे भौमं हत्वा प्राप नृपात्मजः ॥ दिवोऽहरत्पारिजातं श्लोकाः सार्द्धाः षडर्धयः ॥ चत्वार्युवाचेति पादोनाद्रिर्बाणा अनुष्टुभः ॥ ५९ ॥ यथेति ॥ येन भौमेन ताः स्त्रियो निरुद्धाः स भौमो यथा येन प्रकारेण चकाराद्येन कारणेन च भगवता हतः तदेतत् शार्ङ्गधन्वनः कृष्णस्य विक्रमं चरितमाचक्ष्व आख्याहि ॥ १ ॥ इन्द्रेणेति ॥ हृतं छत्रं यस्य तेन इन्द्रस्य लोकपालप्रधानत्वात् वरुणच्छत्रहरणेऽपि तस्यैव मानभङ्ग इति तथोक्तं हृते कुण्डले यस्याः सा अदितिर्बन्धुर्माता यस्य तेन तथा हृतम् अमराद्रेर्मन्दरस्य स्थानं मणिपर्वतलक्षणं मन्दरशृङ्गं यस्य तेन इन्द्रेण भगवान् भौमचेष्टितं प्रतिज्ञापितः ॥ २ ॥ सभार्य इति सार्द्धम् ॥ ततः सभार्यः सत्यभामासहितः गरुडारूढः सन् सर्वतः स्थितैः गिरिदुर्गैर्गमनप्रतिबन्धकैः गिरिभिः तथा सर्वतः स्थापितैर्भुशुण्ड्यादिशस्त्रदुर्गैश्च दुर्गममिति शेषः । अत एव गरुडारूढो भगवान् ययौ । तथा

CC-0. In Public Domain. Digitization by eGangotri

जलाग्न्यनिलैश्च सर्वतो वर्तमानैर्दुर्गमं तथा घोरैः आगच्छतां शत्रूणां ग्रहणे अव्यभिचारिभिः दृढैश्छेत्तुमशक्यैः मुरस्य दैत्यस्य पाशानामयुतैः सर्वत आवृतं प्राग्ज्योतिषपुरं ययौ । कदाचिद् भगवता भूम्यै त्वत्संमतिव्यतिरेकेण त्वत्पुत्रमेनं न हनिष्यामि इति वरो दत्तः सत्यभामाया भूम्या ऐक्यात्सत्यभामैवात्र भूमिः तत्संमत्यर्थं तामपि सहैव नीतवानिति । यद्वा । सत्यभामागृहगतो भगवानिन्द्रेण च्छत्राद्यर्थं प्रार्थितोऽतः सत्यभामाकौतुकार्थं तामपि सह नीतवान् । यद्वा । नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते कुपितां सत्यभामां सान्त्वयता तुभ्यं पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुतमिति हरिवंशे प्रसिद्धं तदर्थन्तान्नीतवानिति ॥ २ ॥ ३ ॥ गदयेति ॥ अद्रीन् गिरिदुर्गाणि गदया निर्बिभेद शस्त्रदुर्गाणि सायकैः निर्बिभेद अग्निं जलं वायुं च प्रदीप्तेन चक्रेण निर्बिभेद चक्र एवान्तर्भावितवान् । तथा मुररचितान् पाशान् असिना निर्बिभेद ॥ ४ ॥ शङ्खेति ॥ गदाधरः कृष्णः यन्त्राणि प्राकारन्यस्तानि यद्वा शत्रुप्रवेशप्रतिबन्धकतया सर्वतः कारितानि तथा मनस्विनां शूराणां प्रवेशप्रतिरोधकर्तृणां मुरादीनां हृदयानि उत्साहशक्तीश्च यन्त्रतुल्यानि मनस्विनां हृदयानीति वा शङ्खनादेन बिभेद प्राकारं गुर्व्या गदया निर्बिभेद ॥ ५ ॥ पाञ्चजन्येति ॥ युगान्ते प्रलये योऽशनिस्तस्य

गदया निर्बिभेदाद्रीञ्छस्त्रदुर्गाणि सायकैः ॥ चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना ॥ ४ ॥ शङ्खनादेन यन्त्राणि हृदयानि मनस्विनाम् ॥ प्राकारं गदया गुर्व्या निर्बिभेद गदाधरः ॥ ५ ॥ पाञ्चजन्यध्वनिं श्रुत्वा युगान्ताशनिभीषणम् ॥ मुरः शयान उत्तस्थौ दैत्यः पञ्चशिरा जलात् ॥ ६ ॥ त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगान्तसूर्यानलरोचिरुल्बणः ॥ ग्रसंस्त्रिलोकीमिव पञ्चभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः ॥ ७ ॥ आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पञ्चभिः ॥ स रोदसी सर्वदिशोऽम्बरं महानापूरयन्नण्डकटाहमावृणोत् ॥ ८ ॥ तदापतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधौजसा ॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोऽपि रुषा व्यमुञ्चत ॥ ९ ॥

ध्वनिवद् भीषणं पाञ्चजन्यस्य शङ्खस्य ध्वनिं श्रुत्वा परिखा जलेशयानः पञ्चशिरा मुराख्यो दैत्यः ततो जलात् उत्तस्थौ ॥ ६ ॥ त्रिशूलमिति ॥ युगान्ते सूर्यानलयोरिव रोचिर्दीप्तिर्यस्य सः अत एव उल्बणो भयङ्करः अत एव सुदुर्निरीक्षणः सम्यग्द्रष्टुमप्यशक्यो मुरः त्रिशूलमुद्यम्य पञ्चभिर्मुखैः त्रिलोकीं ग्रसन्निव शता आर्षः । उरगः सर्पो यथा तार्क्ष्यसुतं गरुडं हन्तुमापतेत्तथाऽभ्यधावत् मुखानि प्रसार्य भगवन्तं हन्तुं वेगेनागतः ॥ ७ ॥ आविध्येति ॥ सः मुरः शूलम् आविध्य उत्तोल्य गरुत्मते गरुडं हन्तुन्तरसा वेगेन बलेन वा निरस्य प्रक्षिप्य पञ्चभिर्वक्त्रैर्व्यनदत् स नादः रोदसी द्यावापृथिव्यौ खमाकाशं च दिशः अन्तरं पातालं चापूरयन् सर्वदिशोऽम्बरमित्यपि पाठः । कृत्स्नमप्यण्डकटाहमावृणोत् ॥ ८ ॥ तदिति ॥ तिस्रः शिखा यस्य तत्त्रिशिखं त्रिशूलं गरुडाय आपतत् आगच्छदेव हरिः ओजसा झटिति वेगेन शराभ्यां त्रिधा अभिनत् चिच्छेद । तं मुरं चापि मुखेषु शरैरताडयत् स मुरोऽपि रुषा तस्मै कृष्णाय गदां व्यमुञ्चत ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामिति ॥ मृधे युद्धे तां मुरप्रयुक्ताम् आपतन्तीं गदां गदाग्रजो भगवान् स्वगदया सहस्रधा निर्बिभिदे निर्बिभेद ततश्च बाहूनुद्यम्योच्चीकृत्याभिधावतोऽभिमुखमागच्छतो मुरस्य पञ्च शिरांसि अजितः कृष्णः लीलया अनायासेनैव चक्रेण जहार चिच्छेद ॥ १० ॥ व्यसुरिति ॥ कृत्तानि छिन्नानि शीर्षाणि शिरांसि यस्य सः मुरः इन्द्रतेजसा वज्रेण निकृत्तशृङ्गो गिरिः यथा पतति तथा व्यसुर्गतप्राणोम्भसि पपात सप्त संख्याः तस्य मुरस्यात्मजाः पितुर्वधेनातुरा दुःखिताः अत एव प्रतिक्रियायै प्रतिक्रियया हेतुभूतया वा अमर्षजुषः क्रोधाविष्टाः युद्धाय समुद्यता बभूवुः ॥ ११ ॥ ताम्र इति ॥ ताम्रादयः षट् सप्तमोऽरुणश्चेति ते सप्त मुरसुताः मृधे निमित्ते भौमेन प्रयुक्ता अत एव धृतायुधाः चमूपतिं पीठनामानं पुरस्कृत्य पुरान्निरगन् निर्गताः आर्षः ॥ १२ ॥ प्रेति ॥ उल्बणा भयंकरास्ते ताम्रादयः आसाद्य अजितं प्राप्य रुषा क्रोधेनाजिते श्रीकृष्णे शरादीन् प्रायुञ्जत प्रजहुः । ऋष्टिः खड्गभेदः तदा अमोघवीर्यः भगवान् स्वमार्गणैस्तेषां शस्त्रकूटं शस्त्रसमूहं तिलशः तिलप्रमाणतः चकर्त चिच्छेद ॥ १३ ॥ तानित्यर्द्धम् ॥

तामापतन्तीं गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा ॥ उद्यम्य बाहूनभिधावतोऽजितः शिरांसि चक्रेण जहार लीलया ॥ १० ॥
व्यसुः पपाताम्भसि कृत्तशीर्षो निकृत्तशृङ्गोऽद्रिरिवेन्द्रतेजसा ॥ तस्यात्मजाः सप्त पितुर्वधातुराः प्रतिक्रियामर्षजुषः समुद्यताः ॥ ११ ॥
ताम्रोऽन्तरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः ॥ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगन् धृतायुधाः ॥ १२ ॥
प्रायुञ्जतासाद्य शरानसीन् गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः ॥ तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह ॥ १३ ॥
तान्पीठमुख्याननयद्यमालयं निकृत्तशीर्षोरुभुजाङ्घ्रिवर्मणः ॥ १४ ॥ स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः ॥
निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत् ॥ १५ ॥ दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा ॥
कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः ॥ १६ ॥

निकृत्तानि छिन्नानि शीर्षोरुभुजाङ्घ्रिवर्माणि येषां तान् पीठमुख्यान् पीठादीन् यमालयमनयत् भगवता हतानां मृतानां यमयातनाऽसंभवात् तत्र भगवत्पदप्राप्तिकथनाच्चात्र यमालयशब्देन मृत्युमात्रं विवक्षितमिति ज्ञेयम् । यद्वा । यमनियमाद्यष्टाङ्गयोगस्थानम् ॥ १४ ॥ स्वेति ॥ स्वानीकपान् स्वसेनापतीन् अच्युतस्य चक्रसायकैस्तथा निरस्तान् एवं निहतान् निरीक्ष्य दुर्गाद्यारोहणेन वीक्ष्य दुर्मर्षणः असहमानो धरासुतो नरकः जातमात्रेण नरशिरसो मुखेन ग्रहणात्तन्नामा आस्रवन् मदो मदबिन्दुर्येषां तैः पयोधिप्रभवैः ऐरावतकुलोत्पन्नैर्गजैः निराक्रमत् योद्धुं विनिर्गतः । दीर्घाभाव आर्षः ॥ १५ ॥ दृष्ट्वेति ॥ तदा स भौमो गरुडस्योपरि स्थितं सभार्यं कृष्णं दृष्ट्वा तस्मै शतघ्नीं शक्तिविशेषं व्यसृजत् सर्वेऽन्ये योधाश्च युगपत् विव्यधुस्ताडयामासुः । आर्षमिदं स्म पादपूर्त्तौ । गरुडस्थे भगवति दृष्टान्तमाह । सूर्यस्योपरिष्टात्तडिता सहितं घनं नीलमेघं यथा

Nepal Sanskrit University, Balmiki ... Library

CC-0. In Public Domain. Digitization by eGangotri

तथेति तत्र सूर्यस्थानीयो गरुडः तडित्स्थानीया भार्या घनस्थानीयः कृष्णः इति विवेकः ॥ १६ ॥ तदिति ॥ यदा ते तं विव्यधुः तर्ह्येव तस्मिन्नेव क्षणे गदाग्रजो भगवान् कृष्णस्तद् भौमसैन्यं विचित्रा वाजाः पत्राणि येषां तैर्निशितैस्तीक्ष्णैः शिलीमुखैर्बाणैर्निकृत्ता बाहवः ऊरवः शिरोधरा कन्धरा विग्रहा देहाश्च यस्य तथा हता अश्वाः कुञ्जराश्च यस्मिंस्तथाभूतं चकार ॥ १७ ॥ यानीति सार्द्धम् ॥ हे कुरूद्वह तत्सैन्यवधात्पूर्वमेव यानि योधैः प्रयुक्तानि शस्त्राणि हस्तस्थान्येव प्रहरणसाधनानि खड्गादीनि अस्त्राणि प्रक्षेप्याणि शरादीनि तानि पक्षाभ्यां गजान्निघ्नता सुपर्णेन उह्यमानो हरिरेकैकश इति कर्मणः करणस्य च विशेषणम् । त्रिभिस्तीक्ष्णैः शरैरच्छिनत् अयं भावः । योधैर्यानि प्रयुक्तानि तेषां लक्ष्यप्राप्तेः पूर्वमेव तत्प्रयोक्तॄन् प्रथमं छित्वा ततस्तत्प्रयुक्तानि तानि चिच्छेद तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिः शरैश्चिच्छेद । तैरपि त्रिभिः प्रत्येकमेव प्रयुक्तैर्नतु युगपत् प्रयुक्तैरित्याश्चर्येण कुरूद्वहेति भीष्मार्जुनादावपि नैतत्प्रयोगलाघवमिति ॥ १८ ॥ गरुत्मतेति ॥ तदागरुत्मता तुण्डादिभिर्हन्यमाना अत एवार्ता गजाः पुरमेवा-

तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः ॥ निकृत्तबाहूरुशिरोध्रिविग्रहं चकार तर्ह्येव हताश्वकुञ्जरम् ॥ १७ ॥ यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह ॥ हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ॥ उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् ॥ १८ ॥ गरुत्मता हन्यमानास्तुण्डपक्षनखैर्गजाः ॥ पुरमेवाविशन्नार्ता नरको युध्ययुध्यत ॥ १९ ॥ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकम् ॥ तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः ॥ २० ॥ नाकम्पत तया विद्धो मालाहत इवद्विपः ॥ शूलं भौमोऽच्युतं हन्तुमाददे वितथोद्यमः ॥ २१ ॥ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः ॥ अपाहरद्गजस्थस्य चक्रेण क्षुरनेमिना ॥ २२ ॥ सकुण्डलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत् ॥ हा हेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुन्दं विकिरन्त ईडिरे ॥ २३ ॥

विशन् तदैको नरक एव युद्धेऽयुध्यत गजाश्चैते योधैरनारूढा राजवाहका ज्ञेयाः ॥ १९ ॥ दृष्ट्वेति ॥ गरुडेनार्दितं पीडितम् अत एव विद्रावितं पलायितं च स्वकीयं सैन्यं दृष्ट्वा भौमस्तं गरुडं शक्त्या प्राहरत् यतः यया शक्त्या वज्रोऽपि प्रतिहतः आसीत् ॥ २० ॥ नेति ॥ तया शक्त्या विद्धोऽपि गरुडो मालाहतो द्विप इव नाकम्पत । एवं गरुडे वितथोद्यमः स भौमोच्युतं हन्तुं शूलमाददे स्वीकृतवान् ॥ २१ ॥ ततश्चामोघशूलहस्तं भौममालक्ष्य शीघ्रमिमं जहीति सत्यभामयोक्तः कृष्णस्तं जघानेत्याह—तदिति ॥ हरिस्तु तद्विसर्गात् शूलप्रक्षेपात् पूर्वमेव क्षुरस्येव तीक्ष्णा नेमिः धारा यस्य तेन चक्रेण गजस्थस्य नरकस्य शिर अपाहरत् चिच्छेद ॥ २२ ॥ सकुण्डलमिति ॥ कुण्डलाभ्यां सहितं चारु सुन्दरं किरीटं भूषणं यस्य तत् अत एव सम्यक् उज्ज्वलत् प्रकाशमानं तस्य शिरः पृथिव्यां पतितं जातं तदा च तदा नरकसंबन्धिनो हा हेति ऋषयस्तु साधु साध्वित्यूचुः । यद्वा । "हा विषादशुगर्तिषु" इत्यत्र निन्दायां चेति क्षीरस्वामी । हा पापिष्ठेति यत्त्वं मृतस्तत्साध्विति च ऋषय ऊचुरिति । सुरेश्वरास्तु माल्यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुसुमैर्मुकुन्दं विकिरन्त आच्छादयन्तम् ईडिरे तुष्टुवुः । आमभाव आर्षः॥२३॥ ततश्चेति ॥ ततश्च नरकस्य माता भूः कृष्णमुपेत्य प्रतप्ते अत्युज्ज्वलिते जाम्बूनदे स्वर्णे खचितानि यानि रत्नानि तैर्भास्वरे कुण्डले अथो तथा वैजयन्त्या रत्नमिश्रितंबहुगुणकुसुमग्रथितया वनमालया सह प्राचेतसं वारुणं छत्रं महामणिं मेर्वंशभूतमन्दरगिरिशिखरं चार्पयत् ॥ २४ ॥ अस्तौषीदिति ॥ हे राजन् अथानन्तरं प्राञ्जलिः प्रणतमस्तका भक्तिप्रवणया धियोपलक्षिता च देवी भूम्यभिमानिनी देवता देववरैर्ब्रह्मादिभिरभ्यर्चितं विश्वेशं कृष्णमस्तौषीत् । इडभाव आर्षः ॥ २५ ॥ नम इति ॥ हे देव देवेश हे शङ्खचक्रगदाधर हे परमात्मन् देवाद्यन्तर्यामिन् भक्तानामिच्छया उपात्तं रूपं येन तस्मै तुभ्यं नमोऽस्तु ॥ २६ ॥ नम इति ॥ स्पष्टम् ॥ २७ ॥ नम इति ॥ भगवते वासुदेवाय विष्णवे ते तुभ्यं नमः । पुरुषाय आदेर्जगत्कारणस्यापि बीजाय पूर्णबोधाय ते नमः ॥ २८ ॥ अजायेति ॥ हे परावरात्मन् परेषामवरेषां च आत्मभूत हे भूतात्मन् पृथिव्यादिरूप हे परमात्मन् अजाय जन्मरहिताय अस्य विश्वस्य जनयित्रे ब्रह्मणे

ततश्च भूः कृष्णमुपेत्य कुण्डले प्रतप्तजाम्बूनदरत्नभास्वरे ॥ स वैजयन्त्या वनमालयाऽऽर्पयत्प्राचेतसं छत्रमथो महामणिम् ॥ २४ ॥ अस्तौषीदथ विश्वेशं देवी देववरार्चितम् ॥ प्राञ्जलिः प्रणता राजन्भक्तिप्रवणया धिया ॥ २५ ॥ भूमिरुवाच ॥ नमस्ते देवदेवेश शङ्खचक्रगदाधर ॥ भक्तेच्छोपात्तरूपाय परमात्मन्नमोऽस्तु ते ॥ २६ ॥ नमः पङ्कजनाभाय नमः पङ्कजमालिने ॥ नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये ॥ २७ ॥ नमो भगवते तुभ्यं वासुदेवाय विष्णवे ॥ पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥ २८ ॥ अजाय जनयित्रेऽस्य ब्रह्मणेऽनन्तशक्तये ॥ परावरात्मन्भूतात्मन्परमात्मन्नमोऽस्तु ते ॥ २९ ॥ त्वं वै सिसृक्षू रज उत्कटं प्रभो तमोनिरोधाय बिभर्ष्यसंवृतः ॥ स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं पुरुषो भगवान् परः ॥ ३० ॥ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इन्द्रियाणि ॥ कर्ता महानित्यखिलं चराचरं त्वय्यद्वितीये भगवन्नयं भ्रमः ॥ ३१ ॥

अनन्तशक्तये ते तुभ्यं नमः ॥ २९ ॥ त्वमिति ॥ हे प्रभो हे जगत्पते त्वं वै त्वमेव सिसृक्षुः स्रष्टुमिच्छुः सन्नुत्कटं कार्योन्मुखं रजोगुणं बिभर्षि रजःप्रधानब्रह्मादिरूपो भूत्वा सृजसीत्यर्थः । तथा जगतो निरोधाय विनाशायोत्कटं तमोगुणं बिभर्षि तमःप्रधानकालाग्निरुद्रादिरूपो भूत्वा विनाशयसीत्यर्थः । तथा जगतः स्थानाय पालनाय उत्कटं सत्वं गुणं बिभर्षि सत्वप्रधानविष्ण्वादिरूपो भूत्वा पालयसीत्यर्थः । तथा भवान् तमसो धारणेऽप्यसंवृतः स्वतन्त्र एव कालः प्रधानं पुरुषश्च भवानेव तेभ्यः परः व्यतिरिक्तश्च ॥ ३० ॥ अहमिति ॥ हे भगवन् अहं भूमिः पयो जलं ज्योतिरग्निः अथशब्दोऽप्यर्थे । अनिलः पवनः नभः आकाशः मात्राणि शब्दस्पर्शरूपरसगन्धाः देवा इन्द्रियाधिष्ठातारोऽग्न्यादयः मनश्च इन्द्रियाणि च चक्षुरादीनि इति त्रिविधाहङ्कारकार्याणि कर्ता अहङ्कारः महान्बुद्धिः इत्येवम् अखिलं चराचरं प्राकृतं यदद्वितीयेऽपि त्वयि

Nepal Sanskrit University, Balmandir, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीयते सोऽयं प्रतीत्यात्मको जनानां भ्रमः बुद्धिमोह एव। भ्रमे यथा रूप्यादिशुक्त्यादितो नातिरिक्तं शुक्त्यादयस्तु ततोऽतिरिक्ताः अन्यथा रूप्यादिबाधे तद्बाधापत्तेः। तस्मात्सर्वमेव तुच्छं न ते कोपस्य विषयोऽपि तु दयापात्रमेव ॥ ३१ ॥ तस्येति ॥ हे प्रपन्नार्तिहर अयं भगदत्ताख्यः तस्य भौमस्यात्मजो मया तव पदपङ्कजमुपसादितः प्रापितः यस्माद् भीतस्तस्मादेनं पालय तथा अखिलकल्मषापहं स्वहस्तपङ्कजममुष्य शिरसि कुरु निधेहि ॥ ३२ ॥ इतीति ॥ भक्त्या नम्रया प्रणतया भूम्या इत्येवं वाग्भिः प्रार्थितो भगवान् भगदत्तायाभयं दत्त्वा सकला ऋद्धयो भोगोपकरणादिसमृद्धयो यस्मिन् सन्ति तथाभूतं भौमस्य गृहं प्राविशत् ॥ ३३ ॥ तत्रेति ॥ भौमगृहे विक्रम्य पराक्रमं कृत्वा राजभ्यः उपलक्षणतया सिद्धादिभ्यश्च भौमेनाहृतानां राजन्यकन्यानां षट् सहस्राण्यधिकानि यस्मिंस्तदयुतं दशसहस्राणि षोडश सहस्राणि शताधिकानि इत्यपि ज्ञेयम्। हरिर्ददृशे। तथा च पराशरः। "देवसिद्धासुरादीनां नृपाणां च जनार्दन। हृत्वा हि सोऽसुरः कन्या रुरोध निजमन्दिरे" इति। "कन्यापुरे स कन्यानां

तस्यात्मजोऽयं तव पादपङ्कजं भीतः प्रपन्नार्तिहरोपसादितः॥ तत्पालयैनं कुरु हस्तपङ्कजं शिरस्यमुष्याखिलकल्मषापहम् ॥ ३२ ॥ श्रीशुक उवाच ॥ इति भूम्याऽर्थितो वाग्भिर्भगवान्भक्तिनम्रया॥ दत्त्वाऽभयं भौमगृहं प्राविशत्सकलर्द्धिमत् ॥ ३३ ॥ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतम्॥ भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः ॥३४॥ तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः॥ मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितम् ॥ ३५ ॥ भूयात्पतिरयं मह्यं धाता तदनुमोदताम् ॥ इति सर्वाः पृथक् कृष्णे भावेन हृदयं दधुः ॥ ३६ ॥ ताः प्राहिणोद्द्वारवतीं सुमृष्टविरजोऽम्बराः ॥ नरयानैर्महाकोशान्रथाश्वान्द्रविणं महत् ॥ ३७ ॥ ऐरावतकुलेभांश्च चतुर्दन्तांस्तरस्विनः॥ पाण्डुरांश्च चतुःषष्टिं प्रेषयामास केशवः॥ ३८ ॥

षोडशातुल्यविक्रमः। शताधिकानि ददृशे सहस्राणि महामते॥" इति च ॥ ३४ ॥ तमिति ॥ दैवेन भगवदाराधनाष्टावक्रवरदानादिविशेषेण उपसादितं स्वसमीपं प्रापितं भवनं प्रविष्टं नरवीरम् अभीष्टं कृष्णं वीक्ष्य विमोहितास्ताः स्त्रियो मनसा तं पतिं वव्रिरे ॥ ३५ ॥ भूयादिति ॥ अयं मह्यं मम पतिर्भूयात् तदेतन्ममाभिमतं धाता परमेश्वरोऽनुमोदतां सत्यं करोतु सर्वास्ताः पृथक् प्रत्येकम् इत्येवंभूतेन भावेनाभिप्रायेण कृष्णे हृदयं दधुः ॥ ३६ ॥ ता इति ॥ सुमृष्टाः स्नापिताश्च विरजोम्बराश्च कृत्वा ताः स्त्रियो भगवान् नरयानैः शिबिकाभिर्द्वारवतीं प्राहिणोत् प्रस्थापयामास। तथा महाकोषादीनपि प्राहिणोत् ॥ ३७ ॥ ऐरावतेति ॥ चत्वारश्चत्वारो दन्ताः येषां तान् तरस्विनः वेगवत्तरान् पाण्डुरान् श्वेतान् चतुःषष्टिसंख्याकान् ऐरावतकुलोद्भवान् इभांश्च चकारादन्येऽपि गजाश्वादयो हरिवंशात् ज्ञेयाः। केशवः कृष्णो द्वारवतीं प्राहिणोत् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्वेति ॥ स प्रियः सत्यभामासहितः श्रीकृष्णः सुरेन्द्रभवनं गत्वा अदित्यै च कुण्डले दत्त्वा चकारादिन्द्राय छत्रं दत्त्वा तत्र स्थितः त्रिदशेन्द्रेण देवेन सहेन्द्राण्या च पूजितः ॥ ३९ ॥ नोदित इति॥ भार्यया सत्यभामया नोदितः सन् तत्रत्यं पारिजाताख्यं तरुमुत्पाट्य गरुत्मति आरोप्य सेन्द्रान् विबुधान् युद्धे निर्जित्य पुरं द्वारकां प्रत्युपानयत् ॥४०॥ स्थापित इति ॥ सत्यभामाया गृहसमीपस्थमुद्यानमुपशोभयतीति तथा तत्र स्थापितः यद्यपि पारिजातं महेन्द्रः प्राहिणोदिति पूर्वोक्तेः द्वारकायां सोऽस्ति तथापि सोऽन्यत्रास्ति। अयं तु सत्यभामामनोरथेनानीतस्तदुद्याने स्थापित इति ज्ञेयम्। तस्य पारिजातस्य गन्धासवे लम्पटाः आसक्ताः भ्रमराः स्वर्गात्स्वर्गं परित्यज्य तत् पारिजातमन्वगुः ॥ ४१ ॥ ननूपकारकेण कृष्णेन कथमिन्द्रस्य सङ्ग्राम इत्यतः प्राह—ययाच इति ॥ इन्द्रः प्रथमं मूर्द्धानमानम्य किरीटस्य कोटिभिरग्रैर्भगवत्पादौ स्पृशन् तमर्थसाधनं भौमवधादिकार्यसाधकम् अच्युतं ययाचे भौमवधादिकं प्रार्थितवान्। अर्थसाधनमिति याचेः द्विकर्मकस्य कर्म वा पश्चात्सिद्धार्थः निष्पन्नभौमवधादिप्रयोजनः सन्महान् ज्ञानवानपि एतेन दुःसाध्यकार्यसाधकेन स्वामिना सह वृक्षे निमित्ते विगृह्य ते विरोधं कृतवान् आर्षः प्रयोगः। अहो आश्चर्यं सुराणां सात्विकानां चापि तमोऽज्ञानं

गत्वा सुरेन्द्रभवनं दत्त्वादित्यै च कुण्डले ॥ पूजितस्त्रिदशेन्द्रेण सहेन्द्राण्या च सप्रियः ॥ ३९ ॥ नोदितो भार्ययोत्पाट्य पारिजातं गरुत्मति ॥
आरोप्य सेन्द्रान्विबुधान्निर्जित्योपानयत्पुरम् ॥ ४० ॥ स्थापितः सत्यभामाया गृहोद्यानोपशोभनः ॥ अन्वगुर्भ्रमराः स्वर्गात्तद्गन्धासवलम्पटाः
॥ ४१ ॥ ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनम् ॥ सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमो धिगाढ्यताम्
॥ ४२ ॥ अथो मुहूर्त एकस्मिन्नानागारेषु ताः स्त्रियः ॥ यथोपयेमे भगवांस्तावद्रूपधरोऽव्ययः ॥ ४३ ॥ गृहेषु तासामनपाय्यतर्क्यकृन्निरस्त-
साम्यातिशयेष्ववस्थितः ॥ रेमे रमाभिर्निजकामसंप्लुतो यथेतरो गार्हकमेधिकांश्चरन् ॥ ४४ ॥

जातम् अतः आढ्यतां धनिकतां धिक्। यद्वा। सुराणां तमो धिक् आढ्यतां च धिक् ॥ ४२ ॥ अथो इति ॥ अथ द्वारकागमनानन्तरम् एकस्मिन्नेन दैवज्ञोक्ते मुहूर्ते ताः शताधिकषोडशसहस्रसङ्ख्याकाः स्त्रियः स्त्रीः नानागारेषु तावद्रूपधरः अव्ययः सर्वत्र पूर्ण एव नत्वंशेन वर्त्तमानः भगवान् यथा यथोचितमुपयेमे। एतेन देवक्यादिबन्धुजनसमागमोऽपि भगवतः प्रभावात् प्रतिगृहमेव। अत्र चक्रवर्त्यादयः। अत्रैकस्यैव वपुषः रूपाणि प्रकाशभेदा एव नतु कायव्यूहो व्याख्येयः। "चित्रं बतैतदेकेन वपुषा युगपत्पृथक्। गृहेषु द्व्यष्टं साहस्रं स्त्रिय एक उदावहत् ॥" इति वक्ष्यमाणत्वात् देवक्यादीनामपि प्रकाशभेद एव कारित इत्याहुः ॥ ४३ ॥ गृहेषु इति ॥ तासां पत्नीनां निरस्तसाम्यातिशयेष्विति भोग्यपदार्थसमृद्ध्या साम्याधिकरहितेषु गृहेषु अवस्थितः अनपायी विश्लेषरहितः सन् इतरवत् प्राकृतजनवत् गार्हकमेधिकान् गृहस्थधर्मांश्चरन् अनुतिष्ठन् अतर्क्यकृत् अचिन्त्यस्य जगतः कर्ता निजानां भक्तानां कामेन संप्लुतो वशीकृतः स्वानन्दपूर्णो वा भगवान् कृष्णः रमाभिः लक्ष्म्यंशभूताभिः ताभी रेमे ॥ ४४ ॥

CC-0. In Public Domain. Digitization by eGangotri

इत्थमिति द्वयेन ॥ ब्रह्मादयोऽपि यदीयां पदवीं यत्प्राप्तिमार्गमपि न विदुस्तं रमापतिं कृष्णमित्थमुक्तविवाहप्रकारेण पतिमवाप्य अनुरागसहितो हासस्तत्पूर्वकोऽवलोकश्च नवसङ्गमश्च तत्र जल्पा नर्मवचनानि तेषु लज्जाश्च यासां ताः स्त्रियः अविरतं निरन्तरमेधितया वर्धितया मुदा भेजुः तमेव सेवितवत्यः । यद्वा । अनुरागादिलज्जान्तान् कर्मभूतान् भेजुरिति ॥ ४५ ॥ प्रत्युद्गमेति ॥ दासीनां शतानि विद्यन्ते यासां तथाभूता अपि ताः स्त्रियः स्वयमेव विभोर्महत्तमस्य भर्तुः प्रत्युद्गमादिभिर्दास्यं विदधुश्चक्रुः । प्रत्युद्गम आगच्छन्तं दृष्ट्वा तदग्रतो गमनम् आसनम् आसनदानं वरार्हणम् अर्घ्यदानादिसत्कारः पादयोः शौचं प्रक्षालनं ताम्बूलसमर्पणं विश्रमणं पादसंवाहनादिना श्रमापहरणं व्यजनादिभिर्वीजनं गन्धस्य चन्दनादेर्दानं माल्यानि पुष्पाणि तत्समर्पणं केशप्रसारः केशप्रसाधनं शयनं शय्यायाः आस्तरणं स्नपनम् उपहार्याः भक्ष्यभोज्यादयस्तैः एताश्च भगवतः स्वरूपशक्तिभूताः।तथा च स्कान्दे प्रभासखण्डे। "षोडशैव सहस्राणि गोप्यस्तत्र समागताः।हंस एव मतः कृष्णः परमात्मा जनार्दनः॥तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः।चन्द्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः ॥ संपूर्णमण्डला तासां मालिनी षोडशी कला। षोडशैव कला यास्तु गोपीरूपा वरानने ॥ एकैकशस्तास्संभिन्नाः सहस्रेण

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम् ॥ भेजुर्मुदाऽविरतमेधितयाऽनुरागहासावलोकनवसङ्गमजल्पलज्जाः
॥ ४५ ॥ प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगन्धमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म
दास्यम् ॥ ४६ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे पारिजातहरणनरकवधो नामैकोनषष्टितमोऽध्यायः ॥५९॥ श्रीशुक उवाच ॥
कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुम् ॥ पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ॥ १ ॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः ॥ स हि
जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥ २ ॥

पृथक् पृथक् । " इति।पाद्मे कार्तिकमाहात्म्ये च । "कैशोरे गोपकन्यास्ता यौवने राजकन्यकाः।"इति।अतो यथा बाल्ये गोप्यः तथा यौवने पट्टमहिष्यः॥४६॥इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमैकोनषष्टितमे व्यधात् ॥५९॥ कृष्णः षष्टितमे प्रेम कलिं कृत्वाथ रुक्मिणीम् ॥ असान्त्वयत्पुनस्तां च तत्र श्लोका नवैषैवः ॥ उवाचेत्यर्धकं साङ्घ्रिपञ्चशैलाँ अनुष्टुभः ॥ ६० ॥ कर्हिचिदिति ॥ स्वतल्पस्थं तत्रापि सुखं यथा स्यात्तथा आसीनं जगद्गुरुं पतिं कृष्णं सखीजनैः सह भैष्मी रुक्मिणी व्यजनेन पर्यचरत् सेवितवती ॥१॥ रुक्मिण्याः प्रेमसेवारसभञ्जने तस्य लीला एव हेतुर्नान्य इति निदर्शनार्थं विश्वसृष्ट्यादेरपि लीलाहेतुकत्वमभिव्यञ्जयति—यस्त्विति ॥ यस्त्वीश्वरो लीलया निमित्तेनैतद् विश्वं सृजति अत्ति संहरति अवति रक्षति च स एव स्वयमजः स्वसेतूनां स्वकृतधर्ममर्यादानां गोपीथाय परिरक्षणाय यदुषु जातः तेन स्वप्रियजनप्रेममर्यादात्रोटनं न तस्याभीष्टं किंतु तेन दृढीकरणमेवेति भावः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन्निति चतुष्कम् ॥ हे राजन् भ्राजन्ति यानि मुक्तादामानि तेषां विलम्बाः लम्बमाना गुच्छाः सन्ति यस्मिंस्तेन वितानेन चन्द्रातपेन विराजिते तथा मणिमयैर्दीपैरपि विराजिते मल्लिकादामभिरन्यैरपि पुष्पैश्च विराजिते द्विरेफाणां सौरभ्यलोभेनागतानां भ्रमराणां कुलेन समूहेन नादिते जालरन्ध्राणि गवाक्षच्छिद्राणि तन्मार्गैरन्तःप्रविष्टैरमलैः शुद्धै रजोमेघादिकालुष्यरहितैः चन्द्रमसो गोभिः किरणैश्च विराजिते अरुणैः इत्यपि पाठः। तेन उद्यन्मात्रता व्यज्यते तेन प्रदोषान्त इयं क्रीडा ज्ञेया। उद्यानशालिना उद्यानशोभिना पारिजातवनामोदयुक्तेन वायुना सर्वासां पट्टस्त्रीणां गृहेषु पूर्वमिन्द्रेण गौणपारिजातानां प्रस्थापनात्। "सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः।" इति प्रागुक्तेः। मुख्यः पारिजातस्त्वेक एव स एवेन्द्रं जित्वानीतः जालरन्ध्रेभ्यो विनिर्गच्छद्भिरन्तस्थैरगुरुजैर्धूपैश्च विराजिते तस्मिन्नुत्तमत्वेन प्रसिद्धेन्तर्गृहे गृहमध्ये यः पर्यङ्कः तदुपरि स्थापिते पयःफेनवन्मृदुले शुभ्रे धवले कशिपूत्तमे उत्तमशय्यायां सुखं यथा स्यात्तथासीनं जगतामीश्वरं पतिमुपतस्थे सेवितवती ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ तदेवाह—वालेति ॥

तस्मिन्नन्तर्गृहे भ्राजन्मुक्तादामविलम्बिना ॥ विराजितेवितानेन दीपैर्मणिमयैरपि ॥ ३ ॥ मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादिते ॥
जालरन्ध्रप्रविष्टैश्च गोभिश्चन्द्रमसोऽमलैः ॥ ४ ॥ पारिजातवनामोदवायुनोद्यानशालिना ॥ धूपैरगुरुजै राजञ्जालरन्ध्रविनिर्गतैः ॥ ५ ॥
पयःफेननिभे शुभ्रे पर्यङ्के कशिपूत्तमे ॥ उपतस्थे सुखासीनं जगतामीश्वरं पतिम् ॥ ६ ॥ वालव्यजनमादाय रत्नदण्डं सखीकरात् ॥ तेन
वीजयती देवी उपासाञ्चक्र ईश्वरम् ॥ ७ ॥ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेऽङ्गुलीयवलयव्यजनाग्रहस्ता ॥ वस्त्रान्तगूढकुचकुङ्कुमशोणहारभासा नितम्बधृतया च परार्ध्यकाञ्च्या ॥ ८ ॥ तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या लीलया धृततनोरनुरूपरूपा ॥
प्रीतः स्मयन्नलककुण्डलनिष्ककण्ठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ॥ ९ ॥

रत्नानि दण्डे यस्य तद्वालव्यजनं चामरं सख्याः करात् स्वयमादाय गृहीत्वा तेन चामरेण ईश्वरं जगत्पालकं भर्त्तारं वीजयती। नुमभाव आर्षः। देवी अतिदीप्यमाना रुक्मिणी उपासांचक्रे ॥ ७ ॥ सेति ॥ उपाच्युतम् अच्युतसमीपे स्थिता अङ्गुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्याः सा अत एव क्वणयती व्यजनचालनवेगेन सर्वाङ्गप्रकम्पनात् भूषणध्वनिमुत्पादयन्ती। नुमभाव आर्षः। मणिनूपुराभ्यां क्वणयती इति वा। सा रुक्मिणी मणिखचितनूपुराभ्यां वस्त्रान्तेन शाटिकाञ्चलेन गूढयोः गुप्तीकृतयोः कुचयोः कुङ्कुमेन शोणो यो मुक्ताहारस्तस्य भासा दीप्त्या तथा नितम्बयोर्धृतया परार्ध्यया अमूल्यया काञ्च्या च रेजे ॥ ८ ॥ तामिति ॥ या लीलया निमित्तभूतया धृततनोः स्वीकृतमनुष्यरूपस्य भगवतोऽनुरूपं योग्यं रूपं मूर्तिर्यस्याः सा तां रूपिणीं मनुष्यरूपधारिणीं श्रियं लक्ष्मीम् अनन्यगतिम् इति न विद्यते अन्या गतिराश्रयो यस्यास्तां कदापि विश्लेषरहिताम् अलकैः कुण्डलाभ्यां निष्केण पदकाख्यभूषणेनालङ्कृतेन कण्ठेन च चतसृषु दिक्षु शोभिते वक्त्रे उल्लसन्ती स्मितरूपा सुधा यस्यास्तां रुक्मिणीं निरीक्ष्य

CC-0. In Public Domain. Digitization by eGangotri

प्रीतः हरिः स्मयन् शता आर्षः । आबभाषे जगाद । आः इति खेदे तादृग्वक्तुमयोग्यामपि बभाषे इति तोषणी ॥ ९ ॥ अत्र प्रियायाः प्रणये कोपोक्तिश्रवणेनापि कान्तस्यानन्दो भवतीति प्रसिद्धम् । तत्र अस्यै रुक्मिण्यै दत्तैनैकमात्रच्युतरुपुष्पेण सत्यभामाकोपोक्तिरसवर्षिण्यभूत् । इयं तु सत्यभामायै द्रुतरुदानदर्शनेनापि कोपं न चक्रे । तदस्या अतिसौम्यशीलायाः कोपोक्तिमाधुर्यं कथं लभेयेति वक्ष्यमाणोक्तिरेवास्याः कोपाय भविष्यतीत्याशयेन भगवानेवमाहेत्याहुः । गर्वापनोदस्तु न मुख्यः । अन्ये तु प्रेमवृक्षस्योन्मूलने कृते प्रेमवती नायिका कीदृशी स्यादिति दिदृक्षयैव भगवानेवमाहेत्याहुः । तत्र सर्वगुणयुक्ताया अपि ते बुद्धिर्मन्देत्याह—राजेति ॥ हे राजपुत्रि लोकपालानाम् इन्द्रादीनामिव विभूतिरैश्वर्यं येषां तैः महानुभावैः श्रीमद्भिर्धनाढ्यैः तथा रूपं सौन्दर्यम् औदार्यं मुक्तहस्तता बलं शत्रुपरिभवसामर्थ्यं तैरूर्जितैरुत्कृष्टैर्भूपैर्वरणयोग्यैस्त्वमीप्सिता अभीष्टा अभूः ॥ १० ॥ तानिति युग्मम् ॥ हे सुभ्रूः भ्रात्रा स्वपित्रा च तेभ्यो दत्ता अतः अर्थिनो याचमानान् प्राप्तान् नतु दूरे स्थितान् स्मरेण कामेन दुर्मदान् तान् चैद्यादीन् त्यागायोग्यानपि हित्वा असमान् त्वं राज्ञः पुत्री अहं निर्द्धनस्य वसुदेवस्य पुत्र इत्यादिना अननुरूपान् राजभ्यः जरासन्धादिभ्यः बिभ्यतः भयं प्राप्नुवतः अतः

श्रीभगवानुवाच ॥ राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः ॥ महानुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः ॥ १० ॥ तान्प्राप्तानर्थिनो हित्वा चैद्यादीन्स्मरदुर्मदान् ॥ दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषेऽसमान् ॥ ११ ॥ राजभ्यो बिभ्यतः सुभ्रूः समुद्रं शरणं गतान् ॥ बलवद्भिः कृतद्वेषान्प्रायस्त्यक्तनृपासनान् ॥ १२ ॥ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषाम् ॥ आस्थिताः पदवीं सुभ्रूः प्रायः सीदन्ति योषितः ॥ १३ ॥ निष्किञ्चना वयं शश्वन्निष्किञ्चनजनप्रियाः ॥ तस्मात्प्रायेण न ह्याढ्या मां भजन्ति सुमध्यमे ॥ १४ ॥ ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः ॥ तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥ १५ ॥

समुद्रं शरणं गतान् नः बलवद्भिरित्यादि स्पष्टम् । अस्मान् कस्मात्त्वं ववृषे वृतवती । सविशेषणस्य बहुत्वमार्षम् ॥ ११ ॥ १२ ॥ अस्पष्टेति ॥ हे सुभ्रूः अस्पष्टवर्त्मनाम् अविज्ञाताचाराणाम् अलोकं लोकातीतं पथं स्त्रीवश्यताभावमीयुषां गतानामिति एवंभूतानां मादृशानां पुंसां पदवीं मार्गमास्थिताः अनुवर्तमाना योषितः प्रायः सीदन्ति क्लिश्यन्ति काश्चिन्न सीदन्ति तत्तासामेव गुण इति भावः । ऋष्यादिपत्नीनां क्लेशाभावात्प्रायोग्रहणम् ॥ १३ ॥ निष्किञ्चना इति ॥ हे सुमध्यमे वयं शश्वत् सदा निष्किञ्चनाः निर्द्धना निष्किञ्चनजनप्रियाश्च बहुव्रीहिस्तत्पुरुषो वा तस्मात् प्रायेण आढ्याः धनिनो मां न भजन्ति अम्बरीषादिव्यावृत्तये प्रायेणेति ॥ १४ ॥ ययोरिति ॥ ययोः वित्तम् आत्मसमं परस्परानुरूपं इदं जन्मादीनामपि यथोचितं विशेषणम् । जन्म सत्कुलम् ऐश्वरी ऐश्वर्यं ष्यञ् ङीष् च । आकृतिः सौन्दर्यम् ऐश्वर्ययुक्ता कृतिरिति समासो वा । भवः उत्पत्तिर्वय इति यावत् । समृद्धिर्वा एतानि आत्मसमानि स्युः तयोरेव विवाहो मैत्री च युज्यते उत्तमाधमयोस्तु क्वचिदपि न युज्यते ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदर्भीति ॥ हे वैदर्भि एतत्पूर्वोक्तमसाम्यम् अविज्ञाय अदीर्घसमीक्षया दीर्घविचाररहितया त्वया गुणैर्हीना भिक्षुभिर्मुधैव श्लाघिता वयं वृता मुधावृता इति वा ॥ १६ ॥ अथेति ॥ अथ इदानीमपि येन सेव्यमानेन इहास्मिन् लोके अमुत्र परलोके च त्वं सत्याः स्वाभिलषिताः आशिषो विषयान् लप्स्यसे प्राप्स्यसे तमात्मनोऽनुरूपं स्वयोग्यं क्षत्रियश्रेष्ठमेव भजस्व ॥ १७ ॥ तर्हि किमित्यहमानीता तत्राह—चैद्येति ॥ हे वामोरु चैद्यशाल्वादयः नृपाः मम मां शेषे षष्ठी । द्विषन्ति तथा तवाग्रजो रुक्मी चापि मां द्वेष्टि तस्य हतत्वाद्वर्त्तमानसामीप्ये लट् ॥ १८ ॥ तेषामिति ॥ हे भद्रे वीर्यमदेनान्धानां विवेकशून्यानां दृप्तानां गर्वितानां तेषां शिशुपालादीनां स्मयनुत्तये गर्वविनाशाय असतां दुष्टानां तेजोऽपहरता मया त्वमानीतासि नतु कामुकतया उद्वोढुम् ॥ १९ ॥ स्त्रीणां दुःसहमौदासीन्यमकामुकत्वं चाह यद्वा न चान्यभजने मम दुःखलवोपीत्याह—उदासीना इति ॥ वयमुदासीनाः सर्वत्रासक्तिरहिताः अत एव गेहयोर्देहगेहयोरपि देहशब्दसमानार्थतां गेहशब्दस्याश्रित्यैकशेषः । देहस्यापि जीवगेहत्वात् ज्योतिरक्रियाः ज्योतिः प्रदीपादि-

वैदर्भ्यैतदविज्ञाय त्वयाऽदीर्घसमीक्षया ॥ वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥ १६ ॥ अथात्मनोऽनुरूपं वै भजस्व क्षत्रियर्षभम् ॥ येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥ १७ ॥ चैद्यशाल्वजरासन्धदन्तवक्त्रादयो नृपाः ॥ मम द्विषन्ति वामोरु रुक्मी चापि तवाग्रजः ॥ १८ ॥ तेषां वीर्यमदान्धानां दृप्तानां स्मयनुत्तये ॥ आनीतासि मया भद्रे तेजोऽपहरताऽसताम् ॥ १९ ॥ उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्याऽऽस्महे पूर्णा गेहयोर्ज्योतिरक्रियाः ॥ २० ॥ श्रीशुक उवाच ॥ ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव ॥ मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत् ॥ २१ ॥ इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियम् ॥ आश्रुत्य भीता हृदि जातवेपथुश्चिन्तां दुरन्तां रुदती जगाम ह ॥ २२ ॥

स्तद्वत्साक्षिमात्रतया सर्वविक्रियारहिताः । यद्वा । देहगेहयोः उदासीना इत्यन्वयः । आत्मलब्ध्या स्वात्मानन्दानुभवेनैव पूर्णा आस्महे वर्तामहे अतो नूनं निश्चयेन स्त्र्यपत्यार्थकामुकाः न स्त्रीपुत्रधनेच्छारहिताः स्मः ॥ २० ॥ एतावदिति ॥ अविश्लेषाद्धेतोरात्मानमिव आत्मानमेव इवेत्येवार्थे । वल्लभामितरपत्न्यपेक्षया भगवतो निरतिशयप्रीतिविषयं मन्यमानाम् अतो गर्वितां रुक्मिणीं यद्वा सर्ववल्लभासु श्रेष्ठामपि तां परमसुशीलतया स्वस्यायोग्यतामननेन आत्मानं वल्लभासदृशं मन्यमानाम् अथवा अहं कदापि कोपं न करिष्यामीत्यतोऽहं भगवतो वल्लभैव स्यामिति मन्यमानां वल्लभामिति प्रियभार्यायां रूढिं स्वीकृत्य उद्देश्यविधेयभावेनान्वयं स्वीकृत्य वा न पुंस्त्वं तद्दर्पघ्नः तस्या गर्वमपनेतुकामो भगवानेतावदुक्त्वोपारमत् तूष्णीं बभूव ॥ २१ ॥ इतीति ॥ त्रिलोकेशा ब्रह्मादयस्तेषामधिपतेः पालकस्य आत्मनः प्रियस्यैवंभूतम् अश्रुतपूर्वं पूर्वमश्रुतम् अप्रियं वचनम् आश्रुत्य अश्रुतपूर्वत्वात् यथार्थमेव मत्वा त्यागसंभावनया भीता अत एव हृदि जातो वेपथुः कम्पो यस्याः सा अत एव रुदती देवी रुक्मिणी तदा दुरन्ताम्

CC-0. In Public Domain. Digitization by eGangotri

अपारां चिन्तां जगाम ॥ २२ ॥ पदेति ॥ नखैररुणा श्रीः कान्तिर्यस्य तेन सुजातेन सुकोमलेन पदा वामपादाङ्गुष्ठेन भुवं लिखन्ती निखननेन स्वप्रवेशार्थं विवरं सम्पादयन्तीव तथाञ्जनेनासितैः श्यामैरश्रुभिः कुङ्कुमभूषितौ स्तनावासिञ्चती तथा अतिदुःखेन रुद्धा वाग्यस्याः सा रुक्मिणी अधोमुखी सत्येव तस्थौ ॥ २३ ॥ तस्या इति ॥ अप्रियश्रवणजन्यं सुदुःखं त्यागसम्भावनाजन्यं भयं च शोकश्चाग्रे कथं निर्वाह इत्यनुतापात्मकस्तैर्विनष्टा अनुसन्धानरहिता बुद्धिर्यस्याः विक्लवधियः व्याकुलबुद्धेस्तस्याः रुक्मिण्याः श्लथन्ति तात्कालिकदुःखभवकार्श्येन भ्रश्यन्ति पतन्ति वलयानि यस्मात् तस्माद्धस्ताद्व्यजनं पपात । वलयानि पूर्वमेव पेतुरिति भावः । तथा तस्या देहश्च सहसा झटित्येव मुह्यन् मूर्छां प्राप्नुवन् केशान् विकीर्य केशपाशविश्लथनपूर्वकं रम्भेवेति । यथा वातेन प्रचण्डमारुतेन विहता रम्भा कदली पतति तद्वत् पपात ॥ २४ ॥ तदिति ॥ करुणः दयालुः भगवान् स कृष्णः हास्यस्य प्रौढिं गाम्भीर्यमजानन्त्याः नुमार्षः । प्रियायास्तत् पतनं प्रेमबन्धनं प्रेमपाशं च दृष्ट्वा अन्वकम्पत कृपां कृतवान्

पदा सुजातेन नखारुणश्रिया भुवं लिखन्त्यश्रुभिरञ्जनासितैः॥आसिञ्चती कुङ्कुमरूषितौ स्तनौ तस्थावधोमुख्यतिदुःखरुद्धवाक् ॥२३ ॥ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्लथद्वलयतो व्यजनं पपात ॥ देहश्च विक्लवधियः सहसैव मुह्यन्रम्भेव वायुविहता प्रविकीर्य केशान् ॥ २४ ॥ तद्दृष्ट्वा भगवान्कृष्णः प्रियायाः प्रेमबन्धनम् ॥ हास्यप्रौढिमजानन्त्याः करुणः सोऽन्वकम्पत ॥ २५ ॥ पर्यङ्कादवरुह्याशु तामुत्थाप्य चतुर्भुजः ॥ केशान्समुह्य तद्वक्त्रं प्रामृजत्पद्मपाणिना ॥ २६ ॥ प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा ॥ आश्लिषद्बाहुना राजन्ननन्यविषयां सतीम् ॥ २७॥ सान्त्वयामास सान्त्वज्ञः कृपया कृपणां प्रभुः ॥ हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः ॥ २८ ॥ श्रीभगवानुवाच ॥ मा मां वैदर्भ्यसूयेथा जाने त्वां मत्परायणाम् ॥ त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमङ्गने ॥ २९ ॥

॥ २५ ॥ पर्यङ्कादिति ॥ चतुर्भुजः आश्लेषणवक्त्रपरिमार्जनाद्यर्थमाविष्कृतभुजचतुष्कः भगवान् आशु पर्यङ्कात् अवरुह्य पतितां तामुत्थाप्य भूमितः स्वाङ्के निवेश्य तस्याः केशान् समुह्य निबद्ध्य पद्मतुल्यकोमलेन पाणिना तद्वक्त्रं प्रामृजत् । श आर्षः ॥ २६ ॥ प्रमृज्येति युग्मम् ॥ हे राजन् सान्त्वज्ञः सान्त्वनोपायज्ञः सतां गतिः प्रभुर्भगवान् अश्रूणां कला बिन्दवो ययोस्ते अश्रुभिः शोभिते वा अश्रुधरे वा नेत्रे तथा शुचा शोकाश्रुणा उपहतौ आर्द्रीकृतौ स्तनौ च प्रमृज्य बाहुना आश्लिष्य अनन्यविषयां भगवदन्याश्रयरहितां सतीं कृपणां दीनाम् अतः अतदर्हां खेदयितुमयोग्यां किन्तु वदिष्यतीति हासप्रौढ्या भ्रमच्चित्तं यस्यास्तां रुक्मिणीं कृपया सान्त्वयामास ॥ २७ ॥ २८ ॥ मेति ॥ हे वैदर्भि हे अङ्गने सुन्दरि मा मां मा असूयेथाः निर्निमित्तमेव मह्यं दुःखं दत्तवानिति दोषारोपेण मा पश्येत्यर्थः । यतो मत्परायणाम् अहमेव परम् अयनम् आश्रयो यस्यास्तथाभूतां त्वामहं जाने । यतः त्वद्वचः किन्तु वदिष्यतीति श्रोतुकामेन मया क्ष्वेल्या परिहासेनैवमाचरितमुक्तं नतु तत्वतः ॥ २९ ॥

॥१९६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखं चेति ॥ प्रेमसंरम्भेण प्रणयकोपेन आर्षस्तृतीयालोपस्तेन कटेत्यादिकयोरप्यन्वयः । स्फुरितः प्रकम्पितोऽधरो यस्मिंस्तत् कटशब्देन कटाक्षास्तेषामाक्षेपैररुणावपाङ्गौ नेत्रान्तौ यस्मिन् तत् अत एव सुन्दरं भृकुटीतटं यस्मिन् तत् एवंभूतं तव मुखं चेक्षितुमेतदाचरितमिति पूर्वेणैवान्वयः ॥ ३० ॥ अयमिति ॥ हे भीरु हे भामिनि च यत्प्रियया सह नर्मैर्नर्मभिः परिहासवचनैः यामः कालो नीयते तदयमेव गृहेषु दुःखप्रधानेषु वर्तमानानां गृहमेधिनां परमो लाभः सुखरूपं फलमन्यत्तु सर्वं दुःखमेव ॥ ३१ ॥ सेति ॥ हे राजन् सा वैदर्भी रुक्मिणी भगवता एवं परिसान्त्विता अत एव तस्य परिहासोक्तिं परिहासार्थमेवमुक्तं न तात्त्विकमिति ज्ञात्वा प्रियकर्तृकत्यागभयं जहौ तत्याज ॥ ३२ ॥ बभाष इति ॥ हे भारत सव्रीडो यो हासः तेन रुचिरो यः स्निग्धः स्नेहयुक्तोपाङ्गः कटाक्षस्तेन भगवतो मुखं वीक्षन्ती शता आर्षः । रुक्मिणी पुंसामृषभं पुरुषोत्तमं श्रीकृष्णं प्रति बभाषे ॥ ३३ ॥ असाम्यं भूपतिभ्योभीः दुर्गस्याश्रयणं ततः प्रबलैः कलहो राज्याभावश्चास्पष्टवर्त्मता । अलौकिकाचारता च योषितामवसादनम् ॥ निष्कि-

मुखं च प्रेमसंरम्भस्फुरिताधरमीक्षितुम् ॥ कटाक्षेपारुणापाङ्गसुन्दरभ्रुकुटीतटम् ॥ ३० ॥ अयं हि परमो लाभो गृहेषु गृहमेधिनाम् ॥
यन्नर्मैर्नीयते यामः प्रियया भीरु भामिनि ॥ ३१ ॥ श्रीशुक उवाच ॥ सैवं भगवता राजन्वैदर्भी परिसान्त्विता ॥ ज्ञात्वा तत्परि-
हासोक्तिं प्रियत्यागभयं जहौ ॥ ३२ ॥ बभाषे ऋषभं पुंसां वीक्षन्ती भगवन्मुखम् ॥ सव्रीडहासरुचिरस्निग्धापाङ्गेन भारत ॥ ३३ ॥
रुक्मिण्युवाच ॥ नन्वेवमेतदरविन्दविलोचनाऽऽह यद्वै भवान्भगवतोऽसदृशी विभूम्नः ॥ क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं
गुणप्रकृतिरज्ञगृहीतपादा ॥ ३४ ॥ सत्यं भयादिव गुणेभ्य उरुक्रमान्तः शेते समुद्र उपलम्भनमात्र आत्मा ॥ नित्यं कदिन्द्रियगणैः
कृतविग्रहस्त्वं त्वत्सेवकैर्नृपपदं विधुतं तमोऽन्धम् ॥ ३५ ॥

ञ्चनत्वं तत्प्रीतिराढ्यानादरणीयता । अनौचित्यं विवाहस्य निर्गुणत्वं वृथा स्तुतिः ॥ औदासीन्यमकामत्वं स्वदोषान् षोडशासतः । अज्ञत्वादीर्घदर्शित्वे भैष्म्या राज्ञां बहून् गुणान् ॥ कृष्णनर्मोदितान् भैष्मी न्यषेधत्तद्गुणस्तवैः । तत्र असमानित्युक्तं तत्राह—नन्विति ॥ हे अरविन्दविलोचन विभूम्नोऽनन्तगुणपूर्णस्य भगवतः भवतोऽहमसदृशी असमानेति यद् भवानाह तदेतद् भवद्वचनमेवं वै यथार्थमेव यतः स्वे असाधारणे महिम्नि निजानन्दस्वरूपेऽभिरतो भगवान् त्रयाणां गुणानां ब्रह्मादीनां वा अधीशः नियन्ता भवान् क्व अज्ञैः सकामैरेव गृहीतौ पादौ यस्याः सा गुणा एव प्रकृतिः स्वरूपं यस्याः साहं च क्व महद्वैषम्यामिति ॥ ३४ ॥ राजभ्यो बिभ्यत इति इत्यत्र बलवद्भिः कृतद्वेषानित्यत्र प्रायस्त्यक्तनृपासनानित्यत्र चाह—सत्यमिति ॥ हे उरुक्रम गुणाः गुणकार्यभूताः शब्दादय एव राजन्त इति राजानस्तेभ्यो भक्तानां भयमेव तव भयं तस्माद् भयादिव समुद्रे समुद्र इवागाधे भक्तान्तःकरणे उपलम्भनमात्रः चैतन्यघन आत्मा भवान् शेते निश्चलतया तिष्ठतीत्यपि सत्यम् । कुतः कुत्सितैः बहिर्मुखैरिन्द्रियाणां

CC-0. In Public Domain. Digitization by eGangotri

गणैरदान्तैः वृत्त्यभिप्रायेण बहुत्वम् । सह त्वं नित्यं कृतविग्रहोऽसि अन्धं गाढं तमः अज्ञानहेतुः नृपाणां पदमासनं त्वत्सेवकैरपि प्रियव्रतादिभिस्त्यक्तं त्वया त्यक्तमिति पुनः किं वक्तव्यम् ॥ ३५ ॥ अस्पष्टवर्त्मनां पुंसामित्यत्राह—त्वत्पादेति ॥ यस्मात् ये भवन्तमनुवर्तन्ते सेवन्ते तेषां तव पादपद्मयोर्यो मकरन्दः परमानन्दात्मको रसविशेषः तज्जुषां तं सेवमानानां तदनुभवं कुर्वतां मुनीनामेव तावद्वर्त्म मार्गः अस्फुटम् ईहितं चेष्टितं चालौकिकमिव अंत एतदुभयमपि नृपशुभिः पशुतुल्यैरविवेकिभिर्ननु दुर्विभाव्यम् अवितर्क्यं नन्वित्यवधारणे । अथो तस्मात् हे भूमन् तवेश्वरस्य वर्त्माऽस्फुटमीहितं चालौकिकं दुर्विभाव्यं च भवतीति किं वक्तव्यमिति शेषः ॥ ३६ ॥ निष्किञ्चना इति श्लोकोक्तं दोषत्रयं प्रत्याह—निष्किञ्चन इति ॥ नन्विति सम्बोधने। हे प्रभो यतः सकाशात् किञ्चिदपि दुर्लभं नास्ति यस्य तथाभूतो निष्किञ्चनो भवान् नतु दरिद्रता-रूपनिष्किञ्चनत्ववान् यतः बलिं पूजां भुञ्जते स्वीकुर्वन्ति इति बलिभुजः अन्यैः पूज्या अपि अजादयः ब्रह्मादयोऽपि यस्मै तुभ्यं बलिं हरन्ति पूजां समर्पयन्ति तस्य सर्वेश्वरस्य तव दरिद्रता कथं स्यादिति शेषः । निष्किञ्चनजनप्रिया इत्यत्र तत्पुरुषमाश्रित्याह बलिभुजां लोकेश्वराणां ब्रह्मादीनामपि भवान्प्रेष्ठः बहुव्रीहिमाश्रित्याह ते ब्रह्मा-

त्वत्पादपद्ममकरन्दजुषां मुनीनां वर्त्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यम् ॥ यस्मादलौकिकमिवेहितमीश्वरस्य भूमंस्तवेहितमथो अनु ये भवन्तम्
॥ ३६ ॥ निष्किञ्चनो ननु भवान्न यतोस्ति किञ्चिद्यस्मै बलिं बलिभुजोऽपि हरन्त्यजाद्याः ॥ न त्वा विदन्त्यसुतृपोऽन्तकमाढ्यतान्धाः प्रेष्ठो
भवान्बलिभुजामपि तेऽपि तुभ्यम् ॥ ३७ ॥ त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वाञ्छया सुमतयो विसृजन्ति कृत्स्नम् ॥ तेषां विभो समु-
चितो भवतः समाजः पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न ॥ ३८ ॥ त्वं न्यस्तदण्डमुनिभिर्गदितानुभाव आत्मात्मदश्च जगतामिति मे वृतो-
ऽसि ॥ हित्वा भवद्भ्रुव उदीरितकालवेगध्वस्ताशिषोऽब्जभवनाकपतीन्कुतोऽन्ये ॥ ३९ ॥

दयोऽपि तुभ्यं तव प्रेष्ठाः आढ्यतयाभिजनादिभिराढ्यत्वाभिमानेनान्धाः विवेकशून्या अत एव असुतृपः असून् इन्द्रियाण्येव तर्पयन्तीति तथाभूता अन्तकमायुर्हरन्तं कालरूपमपि त्वा त्वां न विदन्ति न जानन्ति अतो न भजन्ति इत्यर्थः ॥ ३७ ॥ ययोरात्मसमं वित्तमित्यत्राह—त्वमिति ॥ समस्तपुरुषार्थमयः धर्मादिप्रदः फलात्मा फलं हि परमानन्दस्तत्स्वरूपश्च यस्य फलरूपस्य तव वाञ्छया प्राप्तीच्छया सुमतयः कृत्स्नं सर्वमपि व्यवहारं विसृजन्ति त्यजन्तीत्यर्थः । हे विभो तेषां विवेकिनां भवतः समाजः सेव्यसेवकलक्षणः सम्बन्धः । यद्वा । भवत्संबन्धिनां भक्तानां तैरेव समाजः उचितः रतयोः परस्परानुरागयुक्तयोः अत एव सुखदुःखिनोः पुंसः स्त्रियाश्च समाजो भवतो भक्तानां च नोचितः ॥ ३८ ॥ भिक्षुभिः श्लाघिता इत्युक्तं तत्र भिक्षुश्लाघैव सर्वोत्कर्ष इत्याह—त्वमिति ॥ न्यस्तस्त्यक्तः दण्डः प्राणिपीडा यैस्ते च ते मुनयश्च त एव भिक्षव उच्यन्ते तैर्गदितः श्लाघितोऽनुभावो यस्य तथाभूतो जगतामात्मा स्वभक्तानामात्मदश्च त्वमिति ज्ञात्वा भवतो भ्रुवः सकाशात् उदीरितो यः कालस्तस्य वेगेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वस्ताः खण्डिताः आशिषो भोगा येषां तान् । अब्जभवो ब्रह्मा नाकपतयः स्वर्गपतयः इन्द्रादयस्तान् हित्वा उपेक्ष्य मे मया वृतोऽसि अन्ये कुतः चैद्यादीनां का गणना । एतेन वैदर्भ्यैतदविज्ञायेत्यपि अदीर्घदर्शित्वमज्ञानं च समाहितम् ॥ ३९ ॥ स्वाज्ञानं परिहृत्य पुरुषान्तरगुणवर्णनप्रदीप्तकोपसंरम्भेण भगवत्येवाज्ञानमापादयन्ती समुद्रं शरणं गतानित्यत्राह–जाड्यमिति ॥ हे ईश हे गदाग्रज सिंहो यथा पशून्महिषादीन् विद्राव्य स्वबलिं स्वभागं हरति तथा यस्त्वं शार्ङ्गधनुर्निनादेनैव भूपान् जरासन्धादीन् विद्राव्य पलायनं कारयित्वा । स्वभागं मां जहर्थ हृतवान् असि तस्य तव तेभ्यो राजभ्यो भयादुदधिं शरणं प्रपन्न इति यद्वचो भाषणं तज्जाड्यसमन्वितमेव । "यत्तु सत्यं भयादिव" इति पूर्वं मया भवद्वचः समाहितं तन्ममापि जाड्यमेवेति भावः ॥ ४० ॥ अस्पष्टवर्त्मनामित्यत्र त्वां भजन्तः सीदन्तीत्युक्तं तदपि मन्दमेवेत्याह–यदिति ॥ हे अम्बुजाक्ष अङ्गो वेनस्य पिता वैन्यः पृथुः जायन्तो भरतः नाहुषो ययातिः गयोऽपि प्रियव्रतवंशजः इत्यादयः नृपशिखामणयो राजोत्तमा ऐकाधिपत्यम् एकः स्वयमधिपतिर्यस्मिंस्तत्तादृशमपि स्वार्थे ष्यञ् । स्वराज्यं विसृज्य त्यक्त्वा यद्वाञ्छया त्वत्प्राप्तिसाधनत्वद्भजनार्थं वनं विविशुरतस्ते तव पदवीं मार्गमास्थिताः किमिह संसारे सीदन्तीति इतरवत् क्लिश्यन्ति न

जाड्यं वचस्तव गदाग्रज यस्तु भूपान्विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वम् ॥ सिंहो यथा स्वबलिमीश पशून्स्वभागं तेभ्यो भयाद्यदुदधिं
शरणं प्रपन्नः ॥ ४० ॥ यद्वाञ्छया नृपशिखामणयोऽङ्गवैन्यजायन्तनाहुषगयादय ऐकपत्यम् ॥ राज्यं विसृज्य विविशुर्वनमम्बुजाक्ष
सीदन्ति तेऽनु पदवीं त इहास्थिताः किम् ॥ ४१ ॥ काऽन्यं श्रयेत तव पादसरोजगन्धमाघ्राय सन्मुखरितं जनताऽपवर्गम् ॥ लक्ष्म्या-
लयं त्वविगणय्य गुणालयस्य मर्त्या सदोरुभयमर्थविविक्तदृष्टिः ॥ ४२ ॥ तं त्वानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च काम-
पूरम् ॥ स्यान्मे तवाङ्घ्रिशरणं सृतिभिर्भ्रमन्त्या यो वै भजन्तमुपयात्यनृतापवर्गः ॥ ४३ ॥

क्लिश्यन्ति तेषां मुक्तेः प्रसिद्धत्वात् ॥ ४१ ॥ अथात्मनोऽनुरूपमित्यत्राह–केति ॥ जनताया जनसमूहस्य श्रवणकीर्तनादिपरस्य अपवर्गरूपं लक्ष्म्या अपि आलयम् आश्रयं सद्भिर्विवेकिभिः मुखरितं कथितं ज्ञानादिगुणानामालयस्य इत्यनेन गुणैर्हीना इत्यपास्तम् । तव पादसरोजगन्धमाघ्राय तव चरणकमलप्रभावं श्रुत्वा अर्थे विविक्ता दृष्टिर्यस्याः सा स्वहिताहितविभागपरिशीलनपरा मर्त्या मानुषस्वभावा अविगणय्य त्वामनादृत्य का स्त्री सदा उरु अधिकं भयं यस्य तम् यद्वा । मर्त्यश्चासावासमन्तात्सदा उरु भयं यस्य स च तमित्येकं पदम् अन्यं पुरुषं श्रयेत भजेत । राक्षसादिस्वभावाविचारान्धा त्वन्यं श्रयेतेति ॥ ४२ ॥ तमिति ॥ अतः जगतामधीशं सर्वस्यात्मानम् । अत्रास्मिन् लोके परत्र परलोके च सर्वान्कामान् विषयान् पूरयति प्रापयतीति तथा तं त्वाम् अनुरूपं योग्यमेवाहमभजम् । अनृतस्य संसारस्यापवर्गो निवृत्तिर्यस्मात् तादृशो यो भवान् तवाङ्घ्रिं भजन्तं पुरुषम् उपयाति आत्मसात्करोति अनायासेन स्वयमेव प्राप्तो भवति तस्य तवाङ्घ्रिः । यद्वा । य इत्यङ्घ्रेरेव परामर्शकः सृतिभिर्जन्मभिः श्रुतिभिरिति पाठे

CC-0. In Public Domain. Digitization by eGangotri

अर्थवादबहुलकर्मश्रवणैः भ्रमन्त्या मे मम अरणं सेव्यतयाश्रयः स्यादित्यनुगृहाणेति शेषः ॥ ४३ ॥ राजपुत्रीप्सिता भूपैरित्यत्र लोकपालविभूतित्वादयो राज्ञां गुणा उक्तास्तत्र सेर्ष्यमाह—तस्या इति ॥ हे अच्युत हे अरिकर्शन ये राजानः स्त्रीणां गृहेषु स्त्रीप्रधानेषु गृहेषु खरा इव तासां भारवाहकाः पादताडिता अप्यनुगन्तारश्च गावो बलीवर्दा इव सर्वदा व्यापारैः परिक्लिष्टाः श्वान इवावमताः गृहादिरक्षणपराश्च बिडाला इव कृपणा हिंस्रा उच्छिष्टभक्षकाश्च भृत्या इवाज्ञानुसारिणः भवतोपदिष्टाः विभूत्यादिगुणवत्त्वेन संस्तुता नृपास्तस्या दुर्भगायाः स्त्रियाः पतयः स्युः यस्याः कर्णमूलं मृडविरिञ्चिसभासु गीता युष्मत्कथा नोपयायात् मम तु न ते वरणयोग्याः ॥४४॥ त्वगिति ॥ या विमूढा स्त्री ते तव पदाब्जमकरन्दमजिघ्रती तव चरणमाहात्म्यं कथायामश्रुतवती नुमभाव आर्षः । सा कान्तः कमनीयोऽयमिति मतिर्यस्यास्तथाभूता सती त्वक्श्मश्रुरोमनखकेशैः पिनद्धं छन्नम् अन्तश्च मांसास्थिरक्तकृमिविट्कफपित्तवाता यस्मिन् तं जीवन्तमपि शवतुल्यं पुरुषं भजति ॥ ४५ ॥ उदासीना वयमित्यत्राह—अस्त्विति ॥ हे अम्बुजाक्ष मयि चापि मय्यपि अनतिरिक्ता नास्त्यतिशयवती दृष्टिर्यस्य तस्य आत्मन् आत्मनि निजरूपानन्दे रतस्येति आत्मन्निति सुपां सुलिति सप्तम्या लुक् यद्यपि त्वं मयि त्वं निरपेक्षः

तस्याः स्युरच्युत नृपा भवतोपदिष्टाः स्त्रीणां गृहेषु खरगोश्वबिडालभृत्याः ॥ यत्कर्णमूलमरिकर्षण नोपयायाद्युष्मत्कथा मृडविरिञ्चसभासु गीता ॥ ४४ ॥ त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तर्मांसास्थिरक्तकृमिविट्कफपित्तवातम् ॥ जीवच्छवं भजति कान्तमतिर्विमूढा या ते पदाब्जमकरन्दमजिघ्रती स्त्री ॥ ४५ ॥ अस्त्वम्बुजाक्ष मम ते चरणानुराग आत्मन्रतस्य मयि चानतिरिक्तदृष्टेः ॥ यर्ह्यस्य वृद्धय उपात्तरजोऽतिमात्रो मामीक्षसे तदु ह नः परमाऽनुकम्पा ॥ ४६ ॥ नैवालीकमहं मन्ये वचस्ते मधुसूदन ॥ अम्बाया इव हि प्रायः कन्यायाः स्याद्रतिः क्वचित् ॥ ४७ ॥ व्यूढायाश्चापि पुंश्चल्या मनोऽभ्येति नवं नवम् ॥ बुधोऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ॥ ४८ ॥

आत्मरतश्चेति तथापि ते तव चरणानुरागो ममास्तु यर्हि अस्य विश्वस्य वृद्धये उपात्ता अङ्गीकृता रजोगुणस्यातिमात्रा औत्कट्यं येन तथाभूतः सन्मां प्रकृतिरूपां त्वमीक्षसे तत् उ तदीक्षणमेव नोऽस्माकं सर्वासां शक्तीनां परमा निरतिशया अनुकम्पा अत्यनुग्रहः ॥ ४६ ॥ एवं सर्वं तदुक्तं प्रतिव्याख्याय प्रसन्नचित्ता प्राह—नेति ॥ हे मधुसूदन अथात्मनोऽनुरूपं भजस्वेपि यत्ते वचस्तदहमलीकमनृतमसत्यं न मन्ये यतः अम्बायाः काशिराजसुतायाः शाल्व इव कन्याया एव क्वचित्पुरुषे रतिर्भवति मम तु रतिस्त्वय्येव पर्यवस्यतीति । अम्बा अम्बिका अम्बालिकेति तिस्रः काशिराजकन्याः भीष्मेण विचित्रवीर्यार्थं स्वयंवरे आहृताः ततो ज्येष्ठा भीष्मं प्रति स्वाभिप्रायमुक्तवती शाल्वे मन्मन इति । ततो भीष्मेण प्रेषिता शाल्वेनान्याहृतेत्यगृहीता पुनर्भीष्मं प्राप्ता परशुरामवाक्यादपि भीष्मेणासङ्गृहीता तपसा देहं त्यक्त्वा शिखण्डीभूत्वा भीष्मवधार्थमुत्पन्नेति भारतकथा ॥ ४७ ॥ व्यूढाया इति ॥ व्यूढायाः पारणीतायाः अपि पुंश्चल्या मनो नवं नवं पुरुषमभ्येति एवं व्यवहारे सत्यपि बुधो विवेकी पुरुषः असतीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंश्चलीं स्त्रियं न बिभृयात् न प्रतिगृह्णीयात् यतः तामसतीं बिभ्रत् पुष्णन् पुरुषः उभयच्युतो भवति। अस्मिन् लोके परलोके च दुःखमेवानुभवति ॥ ४८ ॥ साध्वीति ॥ हे साध्वि हे राजपुत्रि एतत्त्वदुक्तं वचनं श्रोतुकामेन मया त्वं प्रलम्भिता उपहसिता श्रोतुकामैस्त्वामिति बहुवचनपाठे परिहासे रुक्मिणीसख्योऽपि काश्चित् क्रोडीकृताः। ममोदितं यत् अन्वात्थ प्रकारान्तरेणानुव्याख्यातवती तत् सर्वं सत्यं यथार्थमेव ॥ ४९ ॥ यानिति ॥ हे भामिनि हे कल्याणि अकामाय कामनानिरासाय मोक्षे पर्यवसायिन इति भावः। यान्यान्कामान्कामयसे मनोरथान् करोषि ते कामाः मय्येकान्तभक्तायास्तव नित्यदा दा आर्षः। सन्त्येवातो न त्वया प्रार्थ्या न च मया देया इत्यर्थः ॥ ५० ॥ उपलब्धमिति ॥ हे अनघे पत्यौ मयि प्रेम तथा पातिव्रत्यं सर्वोत्कृष्टत्वबुद्ध्या पत्येकनिष्ठत्वं च ते तव उपलब्धं मया दृष्टमेव। यस्माद्वाक्यैः उक्तविधैर्मद्वाक्यैश्चाल्यमानाया अपि ते धीर्मयि वर्त्तमाना न अपकर्षिता नान्यविषया जाता अतः प्रेयसो ममापराधः क्षन्तव्यः इति भावः ॥ ५१ ॥ ये मामिति ॥ कामात्मानः विषयभोगचित्ताः ये जनाः अपवर्गे शं मोक्षदातारमपि मां दाम्पत्ये दम्पत्युपभोगसुखार्थं तपसा व्रतचर्यया च भजन्ति ते मम मायया मोहिताः ॥ ५२ ॥ मामिति ॥ हे मानिनि

श्रीभगवानुवाच ॥ साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्रि प्रलम्भिता ॥ मयोदितं यदन्वात्थ सर्वं तत्सत्यमेव हि ॥ ४९ ॥ यान्यान्कामयसे कामान्मय्यकामाय भामिनि ॥ सन्ति ह्येकान्तभक्तायास्तव कल्याणि नित्यदा ॥ ५० ॥ उपलब्धं पतिप्रेम पातिव्रत्यं च तेऽनघे ॥ यद्वाक्यैश्चाल्यमानाया न धीर्मय्यपकर्षिता ॥ ५१ ॥ ये मां भजन्ति दाम्पत्ये तपसा व्रतचर्यया ॥ कामात्मानोऽपवर्गेशं मोहिता मम मायया ॥ ५२ ॥ मां प्राप्य मानिन्यपवर्गसंपदं वाञ्छन्ति ये सम्पद एव तत्पतिम् ॥ ते मन्दभाग्या निरयेऽपि ये नृणां मात्रात्मकत्वान्निरयः सुसंगमः ॥ ५३ ॥ दिष्ट्या गृहेश्वर्यसकृन्मयि त्वया कृतानुवृत्तिर्भवमोचनी खलैः ॥ सुदुष्करासौ सुतरां दुराशिषो ह्यसुम्भराया निकृतिं जुषः स्त्रियाः ॥ ५४ ॥

अपवर्गो मोक्षः तत्सहिताः सम्पदो यस्मात्तं तत्पतिं तासां सम्पदामपि योऽहमेव पतिः तं मां प्राप्य तपआदिभिः प्रसाद्य ये केवलं सम्पदो विषयान् एव वाञ्छन्ति नतु मामपवर्गं वा ते मन्दभाग्या एव ये विषयाः निरये नरकतुल्ये श्वसूकरादिनीचयोनावपि सुलभा एव तानेव यदि मोक्षयोग्या मनुष्या अपि वाञ्छन्ति तर्हि तेषां नृणां मात्रात्मकत्वात् विषयात्मकत्वात् निरयोऽपि सुसङ्गमः शोभनतयाभिमत एव। यद्वा। ये सम्पद्वाञ्छकाः ते निरये निकृष्टयोनावपि स्युः। तत्र हेतुः विषयवाञ्छकानां निरयोऽपि सुसङ्गमः निरयस्यापि मात्रात्मकत्वात्। अतस्ते मन्दभाग्या एव स्वेनैव स्वानर्थसम्पादनात् ॥ ५३ ॥ दिष्ट्येति ॥ हे गृहेश्वरि त्वया असकृत् निरन्तरं मयि अनुवृत्तिः कृता तद्दिष्ट्या भद्रं जातं यतः असौ अनुवृत्तिः भवमोचनी खलैर्दुर्जनैर्दुष्करा दुःखेनापि कर्तुमशक्या निकृतिंजुषः वञ्चनपरायाः अतिखलायाः विकृतिमिति क्विवन्त योगे द्वितीयाऽऽर्षी तदर्हमिति निर्देशाद्वा असुम्भरायाः केवलं स्वेन्द्रियतर्पणपरायाः दुराशिषो दुरभिप्रायायाः स्त्रियास्तु सर्वत्र शेषे षष्ठी। सुतरां सुदुष्करा ॥ ५४ ॥

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ हे मानिनि यया त्वया स्वविवाहकाले त्वां परिणेतुं प्राप्तान् नृपान् अविगणय्य अनादृत्य उपश्रुताः सत्यः कथा यस्य तस्य मे तं मां प्रति रहोहरो गुह्यसंदेशप्रापको द्विजः प्रस्थापितस्तादृशीं त्वादृशीं प्रणयिनीं प्रेमवतीं गृहिणीं भार्यां गृहेषु बह्वीषु भार्यासु मध्ये न पश्यामि ॥ ५५ ॥ भ्रातुरिति ॥ युधि मया निर्जितस्य भ्रातुः रुक्मिणो विरूपकरणं तथा प्रोद्वाहपर्वणि अनिरुद्धविवाहोत्सवे अक्षगोष्ठ्यां द्यूतसभायां तस्य रुक्मिणो वधं च ततश्च कालान्तरेऽपि समुत्थं तत्स्मरणजं दुःखं चास्मदयोगभीत्या अस्माभिः सह वियोगभयेन हेतुना असहः सोढवत्यसि सहतेराधृषीयस्य णिजभावे रूपम् । तथा किञ्चिदपि कटुवचनं नैवाब्रवीर्नैवोक्तवती । यद्वा । किमपि दुःखं नैवाब्रवीः तेनैवमस्मासु स्नेहाधिक्येनैव ते त्वया वयं सर्वे जिता वशीकृताः । एतेन रुक्मिवधादिकं तत्परिहासात्पूर्वं ज्ञेयम् ॥ ५६ ॥ दूत इति ॥ आत्मनो लभने मत्प्राप्त्यर्थं सुविविक्तः विविच्य ज्ञापितो मन्त्रो यस्य स दूतस्त्वया प्रस्थापितः प्रेषितस्तदा मयि चिरायति ईषद्विलम्बं कुर्वति सति आर्षः प्रयोगः । एतद्विश्वं पित्रादियुतमपि शून्यं मत्वा इदमङ्गमन-

न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामि मानिनि यया स्वविवाहकाले ॥ प्राप्तान्नृपानविगणय्य रहोहरो मे प्रस्थापितो द्विज उपश्रुतसत्कथस्य ॥५५॥ भ्रातुर्विरूपकरणं युधि निर्जितस्य प्रोद्वाहपर्वणि च तद्वधमक्षगोष्ठ्याम् ॥ दुःखं समुत्थमसहोऽस्मदयोगभीत्या नैवाब्रवीः किमपि तेन वयं जितास्ते ॥ ५६ ॥ दूतस्त्वयाऽऽत्मलभने सुविविक्तमन्त्रः प्रस्थापितो मयि चिरायति शून्यमेतत् ॥ मत्वा जिहास इदमङ्गमनन्ययोग्यं तिष्ठेत तत्त्वयि वयं प्रतिनन्दयामः ॥ ५७ ॥ श्रीशुक उवाच ॥ एवं सौरतसंलापैर्भगवाञ्जगदीश्वरः ॥ स्वरतो रमया रेमे नरलोकं विडम्बयन् ॥ ५८ ॥ तथान्यासामपि विभुर्गृहेषु गृहवानिव ॥ आस्थितो गृहमेधीयान्धर्माल्लोकगुरुर्हरिः ॥ ५९ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे कृष्णरुक्मिणीसंवादो नाम षष्टितमोऽध्यायः ॥ ६० ॥

न्ययोग्यमन्ययोग्यं न भवतीति हेतोर्जिहासे त्यक्तुमिच्छामि त्यक्ष्यामीत्येवं निश्चितवती । तङार्षः । यद्वा । अजिहासः त्यक्तुमैच्छः जह्यामसूनिति पूर्वोक्तेः । तत् त्वत्कर्म त्वय्येव तिष्ठेत तङार्षः । वयं तु केवलं प्रतिनन्दयामः प्रतिकर्तुमशक्नुवन्तः केवलं साधु साधु इति स्तुत्या त्वां हर्षयामः ॥ ५७ ॥ एवमिति ॥ स्वरतः आत्मारामः भगवान् जगदीश्वरः नरलोकं विडम्बयन्ननुकुर्वन् एवं सौरतसंलापैः सुरतनर्मगोष्ठीभिः रमया लक्ष्म्यावतारभूतया रुक्मिण्या सह रेमे ॥ ५८ ॥ तथेति ॥ यथा रुक्मिणीगृहे तथान्यासामपि स्वभार्याणां गृहेषु आस्थितः विभुः तावद्रूपधरः लोकगुरुर्हरिर्गृहमेधीयान् गृहस्थैरनुष्ठेयान्धर्माननुतिष्ठंस्ताभिः सह रेमे ॥ ५९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे व्यधात्षष्टितमे सुखम् ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकषष्टितमे शौरेः सन्ताना रुक्मिणो वधः ॥ अनिरुद्धविवाहोऽत्र श्लोकाः प्रोक्ता द्विसिन्धवः ॥ त्रीण्युवाचेत्यर्द्धयुक्ताः पञ्चवेदा अनुष्टुभः ॥६१॥ एकैकश इति ॥ ताः पूर्वोक्ता कृष्णस्याबला भार्या एकैकशः सर्वा या आत्मनि सौन्दर्यादिसम्पत्तया पितुः सकाशात् अनवमान् अन्यूनान् तत्तुल्यान् यद्वा पितुः सर्वात्मभूता स्वरूपभूता या सम्पत्तया अन्यूनान् दश दश पुत्रानजीजनन् ॥१॥ गृहादिति ॥ अच्युतं श्रीकृष्णं स्वस्वगृहादनपगं नापगच्छति तथा तं सर्वदा स्वस्वगृहेऽवस्थितं वीक्ष्य राजपुत्र्यः राजादिपुत्र्यः तस्याच्युतस्य तत्त्वमात्मारामत्वं न विदन्ति तथाभूताः ताः स्त्रियः प्रत्येकं स्वस्वमात्मानं तस्य कृष्णस्य प्रेष्टं प्रियतमं न्यमंसत अहमेवास्य प्रिया नान्या भार्या इति मेनिरे ॥ २ ॥ चार्विति ॥ भगवतश्चार्वब्जकोशतुल्यं वदनं च आयतानि दीर्घाणि बाहुनेत्राणि च प्रेम्णा हासरसेन च सहितानि वीक्षितानि च वल्गुजल्पाः मनोहरवाक्यानि तैः संमोहितास्तत्रासक्तास्ता वनिताः जातानुरागाः स्त्रियः स्वैरनेकैर्विभ्रमैस्तस्य विभून्नः निजानन्दपरिपूर्णस्य मनो विजेतुं वशीकर्तुं न समशकन् सम्यक् प्रकारेणापि शक्ता न बभूवुः ॥ ३ ॥

श्रीशुक उवाच ॥ एकैकशस्ताः कृष्णस्य पुत्रान्दश दशाबलाः ॥ अजीजनन्ननवमान् पितुः सर्वात्मसम्पदा ॥ १ ॥ गृहादनपगं वीक्ष्य राजपुत्र्योऽच्युतं स्थितम् ॥ प्रेष्ठं न्यमंसत स्वं स्वं न तत्तत्त्वविदः स्त्रियः ॥ २ ॥ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ॥ संमोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन्वनिता विभून्नः ॥ ३ ॥ स्मायावलोकलवदर्शितभावहारिभ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः ॥ पत्न्यस्तु षोडशसहस्रमनङ्गबाणैर्यस्येन्द्रियं विमथितुं करणैर्न शेकुः ॥ ४ ॥ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम् ॥ भेजुर्मुदाऽविरतमेधितयाऽनुरागहासावलोकनवसङ्गमलालसाद्यम् ॥ ५ ॥

स्मायेति ॥ स्मयः स्मितमेव स्मायो गूढहसितं तद्युक्तो योऽवलोकलवः कटाक्षस्तेन दर्शितः सूचितो यो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमण्डलं तेन प्रहिताः प्रस्थापिता ये सौरतमन्त्रास्तेषु शौण्डैः प्रगल्भैः। अनङ्गस्य कामदेवस्य बाणैः कामशास्त्रप्रसिद्धैरन्यैश्च करणैरिति स्वामिपादाः। करणैरुपायैः तेषां रूपकम् अनङ्गबाणरूपैरिति स्मायेत्यादिकरणानां विशेषणम्। करणैः नेत्रैरिति चक्रवर्ती। सर्वमिदं करणशब्दप्रतीतग्राम्यतापरिहारायेति यस्य भगवत इन्द्रियं मनः विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यः न शेकुः समर्था न जाताः ॥ ४ ॥ इत्थमिति ॥ ब्रह्मादयोऽपि यदीयां पदवीं यत्प्राप्तिमार्गमपि न विदुस्तमित्थंभूतं रमापतिं विष्णुं पतिमवाप्य ताः स्त्रियः अविरतं निरन्तरमेधितया वर्धितया मुदा हर्षेण अनुरागेण हासोऽवलोकश्च नवसङ्गमे नित्यं नवीनतया प्रतीयमाने तत्सङ्गमे लालसा औत्सुक्यं च ते आद्या यस्य विभ्रमकदम्बस्य तं भेजुः चक्रुः। अनुरागहासावलोकनवसङ्गमलालसाद्यं भेजुः। तथापि तस्य मनो विजेतुं न शेकुरिति वा ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रत्युद्गमेति ॥ दासीनां शतानि विद्यन्ते यासां तथाभूता अपि ताः स्त्रियः स्वयमेव विभोः कृष्णस्य प्रत्युद्गमादिभिः दास्यं विदधुरित्यन्वयः । प्रत्युद्गमः आगच्छन्तं दृष्ट्वा तदग्रतो गमनम् आसनम् आसनदानं वरार्हणम् अर्घ्यदानादिसत्कारः पादयोः शौचं प्रक्षालनं ताम्बूलसमर्पणं विश्रमणं पादसंवाहनादिना श्रमापहरणं व्यजनादिभिर्वीजनं गन्धस्य चन्दनादेः समर्पणं माल्यानां पुष्पाणां समर्पणं केशानां प्रसारः प्रसाधनं शयनं शय्याया आस्तरणं स्नपनम् उपहार्या भक्ष्यभोज्यादयस्तैः अत्र प्रौढभावेऽपि नवसङ्गमाद्य-भिधानमगतसारत्वेनौत्सुक्येन च तथा प्रतीतेः तेषामेव श्लोकानां प्रस्तावान्तरे पुनः पुनरावृत्तिरतिसौन्दर्यात् ॥ ६ ॥ प्रस्तुतमनुसरति—तासामिति ॥ दश दश पुत्रा यासां तासां कृष्णस्त्रीणां मध्ये या अष्टौ रुक्मिण्यादयो महिष्यः पुरोदिताः पूर्वं कथितास्तासामेव पुत्रान् प्रद्युम्नादीन् ते तुभ्यं गृणामि कथयामि । विस्तरभयादिति भावः ॥ ७ ॥ चारुदेष्ण

प्रत्युद्गमासनवरार्हणपादशौचताम्बूलविश्रमणवीजनगन्धमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यम् ॥ ६ ॥ तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदिताः ॥ अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामि ते ॥ ७ ॥ चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् ॥ सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ॥ ८ ॥ चारुचन्द्रो विचारुश्च चारुश्च दशमो हरेः ॥ प्रद्युम्नप्र-मुखा जाता रुक्मिण्यां नावमाः पितुः ॥ ९ ॥ भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा ॥ चन्द्रभानुर्बृहद्भानू रतिभानुस्तथाष्टमः ॥ १० ॥ श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥ साम्बः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥ ११ ॥ विजयश्चित्रकेतुश्च वसु-मान्द्रविडः क्रतुः ॥ जाम्बवत्याः सुता ह्येते साम्बाद्याः पितृसंमताः ॥ १२ ॥ वीरश्चन्द्रोऽश्वसेनश्च चित्रगुर्वेगवान् वृषः ॥ आमः शङ्कु-र्वसुः श्रीमान्कुन्तिर्नाग्नजितेः सुताः ॥ १३ ॥ श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः ॥ शान्तिर्दर्शः पूर्णमासः कालिन्द्याः सोमकोऽवरः ॥ १४ ॥ प्रघोषो गात्रवान्सिंहो बलः प्रबल ऊर्ध्वगः ॥ माद्र्याः पुत्रा महाशक्तिः सह ओजोऽपराजितः ॥ १५ ॥ वृको हर्षोऽनिलो गृध्रो वर्धनोऽन्नाद एव च ॥ महाशः पावनो वह्निर्मित्रविन्दात्मजाः क्षुधिः ॥ १६ ॥

इत्यादयः प्रायो निगदव्याख्याताः ॥ ८ ॥ पितुर्नावमा अन्यूनाः अत्र दशम इत्युक्तिः "दशास्याः पुत्रानाधेही" ति श्रुत्युक्तसङ्ख्यादरः । हरेरिति मनोहरत्वं तेन पुत्राणां तादृशत्वम् । अत्र सर्वत्र चारुपदम् एवमग्रे भानुपदमपि ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ श्रीमानिति वसोः कुन्तेर्वा विशेषणम् । नाग्निजिती कालिन्दी पुत्रयोः वृष इत्ये-कनामत्वं केनचिदपरिहार्यनिमित्तेन । व्यवहारस्तु मात्रादिनामविशेषणेन । एवं वीरादावपि ॥ १३ ॥ एक एव शत्रून् लातीति एकल इति भद्रविशेषणम् अवरः कनीयान् इति सोमकविशेषणम् । एते कालिन्द्याः सुताः ॥ १४ ॥ माद्र्या लक्ष्मणायाः ॥ १५ ॥ वृक उदर्कः सन्धिरार्षः । क्षुधिश्च दशम एते मित्रविन्दात्मजाः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्ग्रामजिदाद्याः सत्यकान्ताः भद्रायाः सुताः भद्रैव शैब्यानाम ॥१७॥ दीप्तिमानिति अर्द्धम् ॥ दीप्तिमान् ताम्रः तप्तः इत्याद्याः हरेः सकाशाद्रोहिण्याः षोडशसहस्रमहिषीषु प्रथमायाः सुताः अन्यासामप्येवं ज्ञेयाः । प्रद्युम्नादिति ॥ हे राजन् नाम्ना भोजकटे पुरे कंचित्कालं द्वारकात आगत्य निवसतः प्रद्युम्नाच्च रुक्मिपुत्र्यां रुक्मवत्यां भार्यायां महाबलः अनिरुद्धाख्यः पुत्रोऽभूत् ॥ १८ ॥ एतेषामिति ॥ एतेषां प्रद्युम्नव्यतिरिक्तानामपि पुत्राणां पुत्राः पौत्राश्च कोटिशो बभूवुः । यतः हे नृप कृष्णाज्जातानां पुत्राणां मातरः षोडशसहस्राणि चकारस्ततोप्यष्टोत्तरशताधिक्यसूचनार्थः ॥ १९ ॥ कथमिति ॥ अरेः कृष्णस्य पुत्राय प्रद्युम्नाय रुक्मी स्वदुहितरं कथं प्रादात् यतो युधि युद्धे कृष्णेन रुक्मी परिभूतोऽवमानितः अतस्तं कृष्णं हन्तुं रन्ध्रमवसरं प्रतीक्षते ॥ २० ॥ एतदिति अर्द्धम् ॥ हे विद्वन् द्विषोः द्वेषयुक्तयोः कृष्णरुक्मिणोर्मिथो यद्वैवाहिकं विवाहनिमित्तं तन्मे मह्यमाख्याहि । अनागतमिति ॥ अनागतं भविष्यत् अतीतं भूतं वर्तमानं च अतीन्द्रियम् अस्मदिन्द्रियागोचरं विप्रकृष्टं दूरस्थं व्यवहितं कुड्याद्यन्तरितं

संग्रामजिद्बृहत्सेनः शूरः प्रहरणोऽरिजित् ॥ जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः ॥ १७ ॥ दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः ॥ प्रद्युम्नाच्चानिरुद्धोऽभूद्रुक्मवत्यां महाबलः ॥ पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे ॥ १८ ॥ एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप ॥ मातरः कृष्णजातानां सहस्राणि च षोडश ॥ १९ ॥ राजोवाच ॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि ॥ कृष्णेन परिभूतस्तं हन्तुं रन्ध्रं प्रतीक्षते ॥ २० ॥ एतदाख्याहि मे विद्वन्द्विषोर्वैवाहिकं मिथः ॥ अनागतमतीतं च वर्तमानमतीन्द्रियम् ॥ विप्रकृष्टं व्यवहितं सम्यक्पश्यन्ति योगिनः ॥ २१ ॥ श्रीशुक उवाच ॥ वृतः स्वयंवरे साक्षादनङ्गोऽङ्गयुतस्तया ॥ राज्ञः समेतान्निर्जित्य जहारैकरथो युधि ॥ २२ ॥ यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः ॥ व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियम् ॥ २३ ॥ रुक्मिण्यास्तनयां राजन्कृतवर्मसुतो बली ॥ उपयेमे विशालाक्षीं कन्यां चारुमतीं किल ॥ २४ ॥

च सर्वं वस्तु योगिनः सम्यक् साक्षात्पश्यन्ति अतः सर्वज्ञत्वात् वद ॥ २१ ॥ वृत इति ॥ रुक्मवत्या स्वयंवरे वृतः अङ्गयुतः मूर्तिमान् साक्षादनङ्गः कामदेवः प्रद्युम्नः एकरथः एकरथमात्रसहायः सन् तत्र समेतान् कन्याप्राप्तिलोभेनागतान् बलात्कन्याग्रहणाय युधि प्रवृत्तान् राज्ञः निर्जित्य कन्यां जहार ॥ २२ ॥ यद्यपीति ॥ यद्यपि कृष्णेनावमानितः वैरं स्मरन्नपि रुक्मी स्वसुः स्वप्राणरक्षिकायाः रुक्मिण्याः प्रियं कुर्वन् भागिनेयाय प्रद्युम्नाय स्वसुतां व्यतरत् प्रददौ । प्रद्युम्नकृतं कन्याहरणमनुमोदितवानिति भावः ॥ २३ ॥ रुक्मिण्या इति ॥ हे राजन् विशालाक्षीं नेत्रादिसौन्दर्यवतीं चारुमत्याख्यां रुक्मिण्यास्तनयां कन्यां तदवस्थां कृतवर्मणः सुतो बलिसंज्ञक उपयेमे उपलक्षणमेतत् । अन्यासामपि एकैकाः कन्या अभूवन् ताश्च वराः उपयेमिरे ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

दौहित्रायेति सार्द्धम् ॥ " द्विषद न्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत् । " इत्युक्त्या व्यवहारविरुद्धं तयोर्नं विवाहसंबन्धम् । "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ।" इति निषेधादधर्ममधर्महेतुं जानन्नपि स्नेह एव पाशस्तेनानुबध्यते इति तथा स इति रुक्मी स्वसुः प्रियचिकीर्षया स्वदौहित्राय हरेः पौत्राय अनिरुद्धाय रोचनाख्यां स्वपौत्रीम् अददात् ॥ २५ ॥ तस्मिन्निति ॥ हे राजन् तस्मिन्नभ्युदये अनिरुद्धविवाहोत्सवनिमित्ते सति रुक्मिणी रामकेशवौ साम्बप्रद्युम्नकादयश्च भोजकटाख्यं पुरं जग्मुः ॥ २६ ॥ लोकविरुद्धाचरणफलं वक्तुमाह–तस्मिन्निति ॥ तस्मिन्नुद्वाहे निवृत्ते सति कालिङ्गः कलिङ्गदेशाधिपतिः प्रमुखो येषां ते दृप्ताः गर्विताः नृपाः रुक्मिणं प्रोचुः । त्वं बलमक्षैः देवनसाधनैर्विनिर्जय । कृष्णस्य द्यूतेऽपि दुर्जयत्वनिश्चयात् ॥ २७ ॥ अनक्षज्ञ इति ॥ हे राजन् हि यस्मात् अयं बलः अनक्षज्ञः द्यूतानभिज्ञः तथापि तद्व्यसनं द्यूतव्यसनं महद्वर्तते । राजभिरित्युक्तो रुक्मी बलमाहूय तेन सहाक्षैरदीव्यत क्रीडितवान् तङार्षः । कर्मव्यतिहारे वा तङ् ॥ २८ ॥ शतमिति ॥ तत्र द्यूते प्रथमं सुवर्णमुद्राणां शतं ततः

दौहित्रायानिरुद्धाय पौत्रीं रुक्म्यददाद्धरेः ॥ रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया ॥ जानन्नधर्मं तद्यौनं स्नेहपाशानुबन्धनः ॥ २५ ॥ तस्मिन्नभ्युदये राजन्रुक्मिणी रामकेशवौ ॥ पुरं भोजकटं जग्मुः साम्बप्रद्युम्नकादयः ॥ २६ ॥ तस्मिन्निवृत्त उद्वाहे कालिङ्गप्रमुखा नृपाः ॥ दृप्तास्ते रुक्मिणं प्रोचुर्बलमक्षैर्विनिर्जय ॥ २७ ॥ अनक्षज्ञो ह्ययं राजन्नपि तद्व्यसनं महत् ॥ इत्युक्तो बलमाहूय तेनाक्षै रुक्म्यदीव्यत ॥ २८ ॥ शतं सहस्रमयुतं रामस्तत्राददे पणम् ॥ तं तु रुक्म्यजयत्तत्र कालिङ्गः प्राहसद्बलम् ॥ दन्तान् संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः ॥ २९ ॥ ततो लक्षं रुक्म्यगृह्णाद्ग्लहं तत्राजयद्बलः ॥ जितवानहमित्याह रुक्मी कैतवमाश्रितः ॥ ३० ॥ मन्युना क्षुभितः श्रीमान्समुद्र इव पर्वणि ॥ जात्यारुणाक्षोऽतिरुषा न्यर्बुदं ग्लहमाददे ॥ ३१ ॥ तं चापि जितवान्रामो धर्मेण च्छलमाश्रितः ॥ रुक्मी जितं मयाऽत्रेमे वदन्तु प्राश्निका इति ॥ ३२ ॥

सहस्रं ततः अयुतं च क्रमेण रामः पणमाददे स्थापितवान् । तं तु पणम् अक्षाणामनुकूलतापतनात् क्रमेण रुक्मी अजयत् । तत्र च दन्तान् संदर्शयन् कालिङ्गो बलमुच्चैः प्राहसत् । हलायुधो बलभद्रस्तु तत्तस्य हसनं नामृष्यत् न सेहे अन्तश्चुकोपेत्यर्थः ॥ २९ ॥ तत इति ॥ ततश्च रुक्मी निष्काणां लक्षं ग्लहं पणम् अगृह्णात् स्थापितवान् । तत्र च तं बलोऽजयत् । कैतवं कपटमाश्रितो रुक्मी त्वहं जितवानित्याह एवमुक्त्वा च पणं गृहीतवानिति ज्ञेयम् ॥ ३० ॥ मन्युनेति ॥ ततः अनृतवच नान्मन्युना क्रोधेन पर्वणि समुद्र इव क्षुभितः जात्या स्वभावेनैवारुणाक्षः श्रीमान् बलः अतिरुषा न्यर्बुदं दशकोटिसंख्याकं ग्लहमाददे ॥ ३१ ॥ तामिति ॥ तं चापि ग्लहं धर्मेण अक्षपतनानुसारेण रामो जितवान् । रुक्मी तु च्छलमाश्रितः सन्मया जितम् अत्रास्मिन्विषये इमे प्राश्निकाः साक्षिणः कालिङ्गादयो वदन्त्वित्याह स्मेति शेषः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेति ॥ तदा प्राश्निकानां दुर्जनत्वेन मौनसमये नभोवाणी अदृष्टवक्तृका आकाशवाणी अब्रवीत् उत्पन्ना तां दर्शयति । धर्मतोऽक्षपतनानुसारेण बलेनैव ग्लहो जितः रुक्मी तु वचनमात्रेण मया जितमिति मृषैव वदति ॥ ३३ ॥ तामिति ॥ दुष्टै राजन्यैः कालिङ्गादिभिश्चोदितः कालेन मरणहेतुना च चोदितः वैदर्भो रुक्मी तां नभोवाणीमनादृत्य सङ्कर्षणं परिहसन् बभाषे ॥ ३४ ॥ नैवेति ॥ यूयमक्षकोविदाः द्यूतकुशला नैव भवथ यतो गोपालाः वनगोचराश्चेति मादृशा राजान एवाक्षैर्बाणैश्च दीव्यन्ति क्रीडन्ति नतु भवादृशाः पशुपाला वस्तुतः यूयम् अक्षकोविदाः द्यूतव्यसनमग्ना इन्द्रियलम्पटाश्च न भवथ किंतु गोपालाः वेदादिपालकाः वनवासिमुन्यादीनां ध्यानगोचराश्च यतः अक्षैरिन्द्रियैर्द्यूतैर्वा बाणैश्च राजाद्या मदमत्ता एव क्रीडन्ति नतु भवादृशाः भगवन्तः ॥ ३५ ॥ रुक्मिणेति ॥ एवं वचनैः रुक्मिणाधिक्षिप्तः तिरस्कृतः राजभिः कालिङ्गादिभिश्च उपहासितः अत एव क्रुद्धो रामः परिघं लोहदण्डमुद्यम्य तं रुक्मिणं नृपसंसदि राजसभायां जघ्ने । नृम्णसंसदीति पाठे उत्सवसभायाम् ॥ ३६ ॥ कलिङ्गेति ॥ यो विवृतैः

तदाऽब्रवीन्नभोवाणी बलेनैव जितो ग्लहः ॥ धर्मतो वचनेनैव रुक्मी वदति वै मृषा ॥ ३३ ॥ तामनादृत्य वैदर्भो दुष्टराजन्यचोदितः ॥ सङ्कर्षणं परिहसन्बभाषे कालनोदितः ॥ ३४ ॥ नैवाक्षकोविदा यूयं गोपाला वनगोचराः ॥ अक्षैर्दीव्यन्ति राजानो बाणैश्च न भवादृशाः ॥३५॥ रुक्मिणैवमधिक्षिप्तो राजभिश्चोपहासितः ॥ क्रुद्धः परिघमुद्यम्य जघ्ने तं नृम्णसंसदि॥३६॥कलिङ्गराजं तरसा गृहीत्वा दशमे पदे ॥ दन्तानपातयत्क्रुद्धो योऽहसद्विवृतैर्द्विजैः ॥ ३७ ॥ अन्ये निर्भिन्नबाहूरुशिरसो रुधिरोक्षिताः ॥ राजानो दुद्रुवुर्भीता बलेन परिघार्दिताः ॥ ३८ ॥ निहते रुक्मिणि श्याले नाब्रवीत्साध्वसाधु वा ॥ रुक्मिणीबलयो राजन् स्नेहभङ्गभयाद्धरिः ॥ ३९ ॥ ततोऽनिरुद्धं सह सूर्यया वरं रथं समारोप्य ययुः कुशस्थलीम् ॥ रामादयो भोजकटाद्दशार्हाः सिद्धाखिलार्था मधुसूदनाश्रयाः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे अनिरुद्धविवाहे रुक्मिवधो नामैकषष्टितमोऽध्यायः ॥ ६१ ॥

प्रकाशितैर्दन्तैरुपलक्षितः सन्नहसत् तं कलिङ्गराजं तु तरसा झटिति पलायमानं दशमे एव पदे पादविन्यासे गृहीत्वा क्रुद्धः संस्तस्य दन्तान् भङ्क्त्वा अपातयत् ॥ ३७ ॥ अन्य इति ॥ अन्ये च रुक्मिपक्षगा राजानो बलेन कर्त्रा परिघेन करणेनार्दितास्ताडिताः अतो निर्भिन्नानि बाह्वादीनि येषां ते अत एव रुधिरेणोक्षिताः भीताश्च दुद्रुवुः पलायितवन्तः ॥ ३८ ॥ निहत इति ॥ एवं स्वश्याले रुक्मिणि हतेऽपि हरिः रुक्मिणीबलयोः स्नेहभङ्गभयात् साधुकृतमित्युक्तौ रुक्मिण्या वैमनस्यं स्यात् असाध्वित्युक्ते तु बलस्येति हेतोः साधु जातमसाधुवेति किमपि नाब्रवीत् ॥ ३९॥ तत इति ॥ ततश्च सिद्धा अखिला अर्था अनिरुद्धविवाहशत्रुवधादिरूपप्रयोजनानि येषां ते मधुसूदनाश्रयाः रामादयो दशार्हा यादवाः सूर्यया नवोढया चारुमत्या सहानिरुद्धं श्रेष्ठं रथं समारोप्य भोजकटाख्यात्पुरात्कुशस्थलीं द्वारकां प्रति ययुः ॥ ४० ॥

CC-0. In Public Domain. Digitization by eGangotri

इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्यैकषष्टितमे व्यधात् ॥ ६१ ॥ द्विषष्टितमके बाणोऽनिरुद्धं चोषया रतम् ॥ नागपाशैर्बबन्धात्र श्लोकाः षट्त्रिंशदीरिताः ॥ चत्वार्युवाचेति सार्द्धा अष्टात्रिंशदनुष्टुभः ॥ ६२ ॥ बाणस्येति सार्द्धम् ॥ यदूत्तमः अनिरुद्धः बाणस्य तनयाम् ऊषाम् उपयेमे तत्र हरिशङ्करयोः महत् घोरं युद्धमभूत् । हे महायोगिन् त्वं एतत्सर्वं समाख्यातुम् अर्हसि । " राजोवाच । बाणस्येति सार्द्धपद्यम् । येन वामनरूपाय " इत्यादिसार्द्धपद्यद्वयं च न सर्वसम्मतमिति तोषिणी ॥ १ ॥ बाण इति ॥ येन वामनरूपाय हरये मेदिनी पृथ्वी अदायि दत्ता तस्य महात्मनः बलेः पुत्राणां शतस्य ज्येष्ठः पुत्रः बाणो नामासीत् ॥ २ ॥ तस्येति ॥ तस्य बलेः औरसः सुतः बाणः मान्यो लोके सम्मानयोग्यः वदान्य उदारचित्तः प्रियवाक् च धीमान् सत्यसन्धः सत्यप्रतिज्ञः धृतव्रतः सः सदाशिवभक्तिरतः आसीत् ॥३॥ शोणितेति ॥ सः पुरा शोणिताख्ये रम्ये पुरे राज्यमकरोत् । ते आराध्यत्वेन प्रसिद्धा अपि अमरा देवाः शम्भोः प्रसादेन वरेण तस्य बाणस्य किङ्करा इव स्थिताः ॥ ४ ॥

राजोवाच ॥ बाणस्य तनयामूषामुपयेमे यदूत्तमः ॥ तत्र युद्धमभूद्घोरं हरिशङ्करयोर्महत् ॥ एतत्सर्वं महायोगिन्समाख्यातुं त्वमर्हसि ॥१॥ श्रीशुक उवाच ॥ बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः ॥ येन वामनरूपाय हरयेऽदायि मेदिनी ॥ २ ॥ तस्यौरसः सुतो बाणः शिवभक्तिरतः सदा ॥ मान्यो वदान्यो धीमांश्च सत्यसन्धो दृढव्रतः ॥३॥ शोणिताख्ये पुरे रम्ये स राज्यमकरोत्पुरा ॥ तस्य शम्भोः प्रसादेन किङ्करा इव तेऽमराः ॥४॥ सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्मृडम् ॥ भगवान्सर्वभूतेशः शरण्यो भक्तवत्सलः ॥ वरेण च्छन्दयामास स तं वव्रे पुराधिपम् ॥ ५ ॥ स एकदाह गिरिशं पार्श्वस्थं वीर्यदुर्मदः ॥ किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम् ॥ ६ ॥ नमस्ये त्वां महादेव लोकानां गुरुमीश्वरम् ॥ पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥ ७ ॥ दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत् ॥ त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम् ॥ ८ ॥

सहस्रेत्यर्द्धम् ॥ सहस्रं बाहवो यस्य स बाणः मृडं श्रीशिवं ताण्डवे नृत्यविशेषे वाद्येन सहस्रबाहुभिर्बहूनि वाद्यानि वादयन् इत्यर्थः । अतोषयत् । भगवानिति ॥ भगवान्सर्वभूतेशः शरण्यः भक्तवत्सलः सन्तोषितो मृडस्तं बाणं वरेण च्छन्दयामास वरं वृणीष्वेत्युक्तवान् वरेण दित्सितेन छन्दयामास वशीचकार ।" अभिप्रायवशौ छन्दौ " इत्यमरः । इत्यन्ये स च बाणस्तं रुद्रं पुराधिपं वव्रे त्वं मत्पुरीं पालयंस्तिष्ठेति वृतवान् इत्यर्थः ॥ ५ ॥ स इति ॥ वीर्येण दुर्मदः स बाणः एकदा अर्कवर्णेन किरीटेन तत्पदाम्बुजं स्पृशन् पार्श्वस्थं गिरिशमाह स्म ॥ ६ ॥ नमस्य इति ॥ हे महादेव लोकानां गुरुम् ईश्वरं न पूर्णः कामो मनोरथो येषां तेषां पुंसां कामान् पूरयतीति तथा स चासावमराङ्घ्रिपः कल्पतरुश्च तं त्वामहं नमस्ये । तङार्षः ॥ ७ ॥ दोरिति ॥ त्वया वरतया यत् दोषां भुजानां सहस्रं दत्तं तन्मे मम परं केवलं भाराय एवाभवत् । यतः त्वदृते त्वां विना त्रिलोक्यां मया समं सह प्रतियोद्धारं बलेन तुल्यं योद्धारं न लभे न प्राप्नोमि अतो यदि त्वमेव योद्धा भवेस्तदा मम मनोरथपूर्तिरिति ध्वन्यते ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कण्डूत्येति ॥ हे आद्य कण्डूत्या रणेच्छाजन्यया कण्डूयया निभृतैः पूर्णैर्दोर्भिर्भुजैः युयुत्सुर्योद्धुमिच्छुः अहम् अद्रीन् चूर्णयन् दिग्गजान् अयाम् अगच्छम् तदा तेऽपि भीताः प्रदुद्रुवुः पलायिताः ॥ ९ ॥ तदिति ॥ तद्बाणवचनं श्रुत्वा भगवान् रुद्रः क्रुद्धः सन्नुवाच । हे मूढ स्वहितज्ञानशून्य यदा ते केतुर्मायूरो ध्वजो भज्यते तदा त्वद्दर्पघ्नं तव गर्वनाशकं मत्समेन सह ते तव संयुगं युद्धं भवेद्भविष्यति । विषवृक्षोऽपि संवर्द्ध्येति न्यायादहं त्वत्प्रतीकारं न करोमि नापि ते नाशमिच्छामीति भावः ॥१०॥ इतीति ॥ हे नृप इत्येवं रुद्रेणोक्तः कुमतिः हृष्टः सन् स्वगृहं प्राविशत् । ततश्च कुधीः सः स्ववीर्यस्य नशनं नाशो यस्मात्तं स्ववीर्यनाशसूचकं गिरिशादेशं गिरिशोक्तं केतुभङ्गं प्रतीक्षन् शता आर्षः । आस्ते स्म तदैव ध्वजो भग्न इति विष्णुपुराणे ॥११॥ तस्येति ॥ तस्य बाणस्य ऊषा नाम दुहिता आसीत् ऊषाशब्दः प्रायो दीर्घादिः । क्वापि ह्रस्वादिः । सा च कन्या विवाहरहितैव प्रागदृष्टश्रुतेन कान्तेन मनोहरेण प्राद्युम्निना अनिरुद्धेन सह स्वप्ने रतिं लेभे । तत्कारणं विष्णुपुराणे । "ऊषा बाणसुता विप्र पार्वतीं शम्भुना सह ।

कण्डूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम् ॥ आद्यायां चूर्णयन्नद्रीन्भीतास्तेऽपि प्रदुद्रुवुः ॥ ९ ॥ तच्छ्रुत्वा भगवान्क्रुद्धः केतुस्ते भज्यते यदा ॥ त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥१०॥ इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप ॥ प्रतीक्षन्गिरिशादेशं स्ववीर्यनशनं कुधीः ॥ ११ ॥ तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम् ॥ कन्याऽलभत कान्तेन प्रागदृष्टश्रुतेन च ॥ १२ ॥ सा तत्र तमपश्यन्ती क्वासि कान्तेति वादिनी ॥ सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम् ॥ १३ ॥ बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता ॥ सख्यपृच्छत्सखीमूषां कौतूहलसमन्विता ॥ १४ ॥ कं त्वं मृगयसे सुभ्रूः कीदृशस्ते मनोरथः ॥ हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये ॥ १५ ॥ ऊषोवाच ॥ दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः ॥ पीतवासा बृहद्बाहुर्योषितां हृदयङ्गमः ॥ १६ ॥

क्रीडन्तीमुपलक्ष्योच्चैः स्पृहां चक्रे तदाश्रयाम् ॥ ततः सकलचित्तज्ञा गौरी तामाह भामिनीम् । अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ॥ वैशाखशुद्धद्वादश्यां स्वप्ने योऽभिभवं तव । करिष्यति स ते भर्त्ता राजपुत्रि भविष्यति ॥" ॥१२॥ सेति ॥ सा ऊषा तत्र स्वप्ने तमनिरुद्धमपश्यन्ती विह्वला सती हे कान्त क्वाऽसि त्वं क्व गतोऽसीति वादिनी वदन्ती सखीनां मध्ये उत्तस्थौ जागरणं प्राप्ता भृशं व्रीडिता च जाता ॥ १३ ॥ बाणस्येति ॥ कुम्भाण्डाख्यश्च बाणस्य मन्त्री तस्य सुता चित्रलेखाख्या सा च ऊषायाः सखी कौतूहलेन आश्चर्येण समन्विता सती तां सखीमूषामपृच्छत् ॥ १४ ॥ कमिति ॥ हे सुभ्रूः हे राजपुत्रि ते तव हस्तग्राहं भर्तारमद्यापि नोपलक्षये न पश्यामि । क्वाऽसि कान्तेति वचनात्त्वं कं मृगयसे । तव मनोरथश्च कीदृशस्तद्वद॥१५॥दृष्ट इति ॥ श्यामः कमललोचनः पीतवासा बृहद्बाहुर्योषितां हृदयंगमः मनोहरः कश्चिन्नरः स्वप्ने दृष्टः ॥१६॥

CC-0. In Public Domain. Digitization by eGangotri

तमिति॥सः आधरम् अधरसम्बन्धि मधु पाययित्वा स्पृहयतीं काङ्क्षन्तीं मां वृजिनार्णवे विरहदुःखसमुद्रे क्षिप्त्वा क्वापि यातस्तं तमहं मृगये विचिनोमि॥१७॥ व्यसनमिति ॥ तव व्यसनं कष्टमपकर्षामि अपनयामि यस्ते मनोहर्ता स यदि मल्लिखितायां त्रिलोक्यां भाव्यते प्राप्यते सोऽयमिति त्वया प्रत्यभिज्ञायते च तर्हि तं नरमानेष्ये अतो मल्लिखितचित्रेषु दृष्ट्वा तमादिश कथय ॥ १८ ॥ इतीति ॥ चित्रलेखा इत्येवमुक्त्वा देवगन्धर्वादीन् तथा मनुजांश्च चित्रपटे यथा यथावद लिखत् ॥ १९ ॥ मनुजेष्विति ॥ सा मनुजेष्वपि वृष्णीन् शूरम् आनकदुन्दुभिम् रामकृष्णौ च व्यलिखत् । ततः प्रद्युम्नं लिखितं वीक्ष्य प्रियसमानरूपत्वात् तदधिकवयस्त्वाच्च श्वशुरोऽयमिति ज्ञात्वा लज्जिता जाता । यद्वा । चित्रपटे अयमस्य पुत्रोऽयं नप्ता इत्याद्यपि साऽलिखत् ॥ २० ॥ अनिरुद्धमिति ॥ हे महीपते अनिरुद्धं लिखितं वीक्ष्य सा ऊषा ह्रिया लज्जया अवाङ्मुखी स्मयमाना सती स मया दृष्टोऽसावसाविति प्राह स्म ॥ २१ ॥ चित्रलेखेति ॥ योगिनी सा चित्रलेखा तमूषया निर्दिष्टं कृष्णस्य पौत्रमनिरुद्धं विज्ञाय कृष्णपालितां द्वारकां विहायसाकाशमार्गेण

तमहं मृगये कान्तं पाययित्वाऽधरं मधु ॥ क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे ॥१७॥ चित्रलेखोवाच ॥ व्यसनं तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते ॥ तमानेष्ये नरं यस्ते मनोहर्ता तमादिश ॥ १८ ॥ इत्युक्त्वा देवगन्धर्वसिद्धचारणपन्नगान् ॥ दैत्यविद्याधरान्यक्षान्मनुजांश्च तथाऽलिखत् ॥ १९ ॥ मनुजेषु च सा वृष्णीञ्छूरमानकदुन्दुभिम् ॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥ २० ॥ अनिरुद्धं विलिखितं वीक्ष्योषाऽवाङ्मुखी ह्रिया ॥ सोऽसावसाविति प्राह स्मयमाना महीपते॥२१॥चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ॥ययौ विहायसा राजन्द्वारकां कृष्णपालिताम् ॥ २२ ॥ तत्र सुप्तं सुपर्यङ्के प्राद्युम्निं योगमास्थिता ॥ गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥ २३ ॥ सा च तं सुन्दरवरं विलोक्य मुदितानना ॥ दुष्प्रेक्षे स्वगृहे पुम्भी रेमे प्राद्युम्निना समम् ॥ २४ ॥ परार्ध्यवासःस्रग्गन्धधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्चितः ॥ २५ ॥ गूढः कन्यापुरे शश्वत्प्रवृद्धस्नेहया तया ॥ नाहर्गणान्स बुबुधे ऊषयाऽपहृतेन्द्रियः ॥ २६ ॥

ययौ ॥ २२ ॥ तत्रेति ॥ योगमास्थिता सा चित्रलेखा द्वारकां प्रवेष्टुमशक्नुवत्यै तस्यै नारदेन योगविद्योपदेशो हरिवंशादौ दृष्टः । चित्रलेखाऽपि योगमायांश इति केचित् । तत्र द्वारकायां शोभने पर्यङ्के सुप्तं प्राद्युम्निमनिरुद्धं गृहीत्वा शोणितपुरं नीत्वा सख्यै ऊषायै प्रियं तमदर्शयत् ॥ २३ ॥ सेति ॥ सा च ऊषा सुन्दरेषु वरं तं विलोक्य मुदितानना सती इतरैः पुंभिर्दुष्प्रेक्षेऽवेक्षितुमप्यशक्ये स्वगृहे तेन प्राद्युम्निना समं सह रेमे ॥२४॥ परार्ध्येति द्वयम् ॥ सोऽनिरुद्धश्च कन्यापुरे गूढः शश्वन्नित्यं प्रवृद्धः स्नेहो यस्यास्तयोषया परार्ध्यैः अमूल्यैर्वासःस्रगादिभिः पानभोजनभक्ष्यैः मधुरवाक्यैश्च शुश्रूषया चार्चितो बहुमतः अत एवापहृतमिन्द्रियं मनो यस्य सः गच्छतोऽहर्गणान्न बुबुधे न ज्ञातवान् ॥ २५ ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामिति ॥ तामूषां यदुवीरेण तथा निगूढतया भुज्यमानाम् अत एवाऽऽप्रीतामतिहृष्टां दुरवच्छदैः छादयितुमशक्यैर्हेतुभिः रतिचिह्नैर्हतं व्रतं पुरुषसम्बन्धराहित्यं यस्यास्तथाभूतां भटाः अन्तःपुरचराः षण्ढाः लक्षयांचक्रुः ॥ २७ ॥ भटा इति ॥ ततश्च ते भटाः राज्ञे बाणायावेदयांचक्रुः । हे राजन् ते दुहितुः कन्यायाः विवाहरहिताया एव कुलं दूषयतीति तथाभूतं परपुरुषसम्बन्धलक्षणं चेष्टितं वयं लक्षयामः ॥ २८ ॥ अनपायिभिरिति ॥ हे प्रभो अनपायिभिः अनपसर्पद्भिः सावधानैरस्माभिर्गृहे गुप्ताया अत एव पुंभिर्दुष्प्रेक्षाया अपि कन्यायास्तैः पुंभिः दूषणं कथं जातं तद्वयं न विद्महे । अतिगुप्तत्वात्प्रत्यक्षीकर्तुं न शक्नुमः । तङार्षः यद्वा हे इति प्रभो इत्यनेनान्वितम् । विद्मेति "विदो लटोवा" इति सोरमादेशेरूपम् । दुष्प्रेष्या इति पाठे दुष्टा योगिनी प्रेष्या सखी यस्याः ॥ २९ ॥ तत इति ॥ दुहितुः श्रुतं दूषणं येन सः अत एव प्रव्यथितः बाणः ततः स्थानात् त्वरितं शीघ्रं कन्यकागारं प्राप्तः संस्तत्र यदूद्वहमनिरुद्धमद्राक्षीत् ॥ ३० ॥ कामेति युग्मम् ॥ कामस्य तदवतारस्य प्रद्युम्नस्यात्मनो देहाज्जातं

तां तथा यदुवीरेण भुज्यमानां हतव्रताम् ॥ हेतुभिर्लक्षयाञ्चक्रुराप्रीतां दुरवच्छदैः ॥ २७ ॥ भटा आवेदयाञ्चक्रू राजंस्ते दुहितुर्वयम् ॥ विचेष्टितं लक्षयामः कन्यायाः कुलदूषणम् ॥ २८ ॥ अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ॥ कन्याया दूषणं पुम्भिर्दुष्प्रेक्षाया न विद्महे ॥ २९ ॥ ततः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः ॥ त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहम् ॥ ३० ॥ कामात्मजं तं भुवनैकसुन्दरं श्यामं पिशङ्गाम्बरमम्बुजेक्षणम् ॥ बृहद्भुजं कुण्डलकुन्तलत्विषा स्मितावलोकेन च मण्डिताननम् ॥ ३१ ॥ दीव्यन्तमक्षैः प्रिययाऽभिनृम्णया तदङ्गसङ्गस्तनकुङ्कुमस्रजम् ॥ बाह्वोर्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः ॥ ३२ ॥ स तं प्रविष्टं वृतमाततायिभिर्भटैरनेकैरवलोक्य माधवः ॥ उद्यम्य मौर्वं परिघं व्यवस्थितो यथाऽन्तको दण्डधरो जिघांसया ॥ ३३ ॥

भुवनेषु एक एव सुन्दरः तथा सुन्दरोऽन्यो नास्ति तमित्यर्थः । श्यामं पिशङ्गं पीतमम्बरं वस्त्रं यस्य तम् । अम्बुजे इव ईक्षणे यस्य तं बृहन्तौ भुजौ यस्य तं कुण्डलयोः कुन्तलानां च त्विषा दीप्त्या स्मितयुक्तेनावलोकनेन च मण्डितमाननं यस्य तम् । अभिनृम्णया सर्वतः कृतमङ्गलया प्रियया ऊषया सह अक्षैः दीव्यन्तं क्रीडन्तं मधुमल्लिका वसंतभवा मल्लिकास्ताभिराश्रितां ग्रथितां तस्या अङ्गसङ्गेन स्तनगतं कुङ्कुमं यस्यां तां स्रजं बाह्वोर्मध्ये दधानं तस्याग्रे तस्या उषाया अग्रे आसीनं ननु बाणभयादुत्थितं सन्धिरार्षः । तमनिरुद्धमवेक्ष्य विस्मितो बभूव ॥ ३१ ॥ ३२ ॥ स इति ॥ स माधवो मधुवंशप्रभवोऽनिरुद्धः आततायिभिः उद्यतशस्त्रैर्भटैः परिवृतं तं बाणं प्रविष्टम् अवलोक्य मौर्वं मूर्वा लोहविशेषस्तन्निर्मितं मुरुर्लोहविशेष इति पठतां तोषिण्यादीनां मते ओर्गुणाभाव आर्षः । परिघं दण्डविशेषम् उद्यम्य गृहीत्वा यथा अन्तको दण्डधरस्तथा जिघांसया तदग्रतो व्यवस्थितः ॥ ३३ ॥

CC-0. In Public Domain. Digitization by eGangotri

जिघृक्षयेति ॥ जिघृक्षया गृहीतुमिच्छया परितः सर्वतः प्रसर्पतः आगच्छतस्तान् आततायिनः सूकराणां यूथं पातीति तथा सूकरश्रेष्ठः शुनो यथा हन्ति तथाहनत् । शबलुगभाव आर्षः । ते च हन्यमानाः निर्भिन्नाः मूर्द्धोरुभुजा येषां ते ऊषाया भुवनाद्विनिर्गताः सन्तः प्रदुद्रुवुः पलायिताः ॥ ३४ ॥ तमिति ॥ तं स्वसैन्यं घ्नन्तमनिरुद्धं कुपितो बली बलिनन्दनो बाणो नागपाशैर्ग्रन्थिविशेषैर्बबन्ध । जामातृवधस्यानुचितत्वात् बन्धश्चायं भगवदिच्छयैव । अन्यथा चतुर्व्यूहान्तर्गतस्य बाणेन बन्धनासम्भवात् तं बद्धं निशम्य दृष्ट्वा अनिष्टं जातमिति शोकः तज्जनितं दुःखं विषादस्ताभ्यां विह्वला अवशा अतः अश्रूणां कला बिन्दवो ययोस्ते अश्रूणि कलयतोऽधत्त इति तथाभूते इति वा अक्षिणी यस्याः सा ऊषा अरौदिषीत् अरोदीत् आर्षः । अरौत्सीदिति वा पाठः सोप्यार्षः ॥ ३५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे द्विषष्टितमके व्यधात् ॥ ६२ ॥ त्रयःषष्टितमे बाणदोश्च्छेदी शम्भुना हरिः ॥ तद्रक्षायै स्तुतस्तत्र श्लोका दहनमार्गणाः ॥ पञ्चोवाचेत्यर्द्धयुक्ताः सप्तबाणा अनु-

जिघृक्षया तान्परितः प्रसर्पतः शुनो यथा सूकरयूथपोऽहनत् ॥ ते हन्यमाना भवनाद्विनिर्गता निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः ॥ ३४ ॥ तं नागपाशैर्बलिनन्दनो बली घ्नन्तं स्वसैन्यं कुपितो बबन्ध ह ॥ ऊषा भृशं शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरोदिषीत् ॥ ३५ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे अनिरुद्धबन्धो नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ श्रीशुक उवाच ॥ अपश्यतां चानिरुद्धं तद्बन्धूनां च भारत ॥ चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥ १ ॥ नारदात्तदुपाकर्ण्य वार्तां बद्धस्य कर्म च ॥ प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥२॥ प्रद्युम्नो युयुधानश्च गदः साम्बोऽथ सारणः ॥ नन्दोपनन्दभद्राद्या रामकृष्णानुवर्तिनः ॥ ३ ॥ अक्षौहिणीभिर्द्वादशभिः समेताः सर्वतो दिशम् ॥ रुरुधुर्बाणनगरं समन्तात्सात्वतर्षभाः ॥ ४ ॥

ष्टुभः ॥ ६३ ॥ अपश्यतामिति ॥ हे भारत अनिरुद्धमपश्यतां चकारात् तद्गमनप्रकारं चाजानताम् अत एवानुशोचतामेव सतां तस्य बन्धूनां वार्षिकाः वर्षोपलक्षिता आषाढाद्याश्विनान्ताश्चत्वारो मासा व्यतीयुरतिक्रान्ताः । ज्येष्ठादिषण्मासेषु व्यतीतेष्वपि चत्वारो वार्षिका अपि तदन्तर्गता व्यतीता इति व्याख्येयम् ॥ १ ॥ नारदादिति ॥ बद्धस्यानिरुद्धस्य वार्तां तद्बन्धनवार्तां चित्रलेखाहरणोपारमणादिरूपां कर्म च युद्धादिरूपं नारदादुपाकर्ण्य श्रुत्वा कृष्णदेवताः वृष्णयः शोणितपुरं प्रययुः ॥ २ ॥ प्रद्युम्न इति युग्मम् ॥ द्वारकातो बहिर्निर्गतौ रामकृष्णौ अनुवर्तन्ते अनुगच्छन्ति तच्छीलाः प्रद्युम्नादयो द्वादशभिरक्षौहिणीभिः सेनाभिः समेता मिलिताः ते सात्व तर्षभा यादवश्रेष्ठाः अत्र नन्दाद्याः पार्षदाः यादवविशेषाः बहिः सर्वतोदिशम् अन्तश्च समन्तात्सर्वतो बाणनगरं रुरुधुः ॥ ३ ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भज्यमानेति ॥ भज्यमानानि पुरोद्यानानि प्राकाराः अट्टालाः प्राकाराद्युपरि उन्नतस्थानानि गोपुराणि पुरद्वाराणि च यस्मिंस्तथाभूतं स्वपुरं प्रेक्षमाणः रुषा क्रोधेन आविष्टो बाणस्तुल्यसैन्यः द्वादशाक्षौहिणीसेनायुक्तः पुराद्योद्धुमभिनिर्ययौ ॥ ५ ॥ बाणेति ॥ बाणार्थे बाणस्य सहायार्थे ससुतः स्कन्दादिसहितः प्रमथैः स्वगणैश्च वृतो भगवान् रुद्रो नन्दिनामानं वृषभमारुह्य रामकृष्णाभ्यां युयुधे । दुष्टस्यापि स्वभृत्यस्य युद्धसंकटे त्यागानौचित्यात् ॥ ६ ॥ आसीदिति अर्द्धम् ॥ सुतुमुलं सङ्कुलं निरन्तरशस्त्रपातलक्षणम् अत एव शृण्वतां पश्यतां च रोमहर्षणं रोमोद्गमकारणमद्भुतं युद्धमासीत् ॥ ७ ॥ कृष्णेति सार्द्धम् ॥ स्फुटम् ॥ ८ ॥ ब्रह्मादय इति ॥ ब्रह्मादयो विमानैर्द्रष्टुमागमन् ॥ ९ ॥ शङ्करेति युग्मम् ॥ शौरिः कृष्णः शार्ङ्गाख्यधनुषश्च्युतैस्तीक्ष्णाग्रैः शरैः भूतादीन् शङ्करानुचरान् शङ्करकिङ्करान्द्रावयामास शङ्करानुचरत्वान्नावधीदित्यर्थः । अत्र भूतप्रे-

भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ॥ प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥ ५ ॥ बाणार्थे भगवान्रुद्रः ससुतैः प्रमथैर्वृतः ॥ आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥ ६ ॥ आसीत्सुतुमुलं युद्धमद्भुतं रोमहर्षणम् ॥ ७ ॥ कृष्णशङ्करयो राजन्प्रद्युम्नगुहयोरपि ॥ कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगः ॥ साम्बस्य बाणपुत्रेण बाणेन सह सात्यकेः ॥ ८ ॥ ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः ॥ गन्धर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥ ९ ॥ शङ्करानुचराञ्छौरिर्भूतप्रमथगुह्यकान् ॥ डाकिनीर्यातुधानांश्च वेतालान्सविनायकान् ॥ १० ॥ प्रेतमातृपिशाचांश्च कूष्माण्डान्ब्रह्मराक्षसान् ॥ द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥ ११ ॥ पृथग्विधानि प्रायुङ्क्त पिनाक्यस्त्राणि शार्ङ्गिणे ॥ प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥ १२ ॥ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतम् ॥ आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥ १३ ॥ मोहयित्वा तु गिरिशं जृम्भणास्त्रेण जृम्भितम् ॥ बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥ १४ ॥ स्कन्दः प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः ॥ असृग्विमुञ्चन्गात्रेभ्यः शिखिनाऽपाक्रमद्रणात् ॥ १५ ॥ कुम्भाण्डः कूपकर्णश्च पेततुर्मुसलार्दितौ ॥ दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः ॥ १६ ॥

तयोरवान्तरजातिभेदः । यद्वा । गौर्यादिमातृभ्योऽन्या भूतमातर इति ॥ १० ॥ ११ ॥ पृथगिति ॥ पिनाकी रुद्रः शार्ङ्गिणे कृष्णाय पृथग्विधानि नानाप्रकाराणि अस्त्राणि प्रायुंक्त प्रयुक्तवान् । शार्ङ्गपाणिः कृष्णः अविस्मितो भयगर्वादिरहित एव तानि प्रत्यस्त्रैः शमयामास ॥ १२ ॥ तदेवाह–ब्रह्मेति ॥ नैजं नारायणास्त्रं शेषं स्फुटम् ॥ १३ ॥ मोहयित्वेति ॥ जृम्भणाख्येनास्त्रेण जृम्भितं यथा स्यात्तथा गिरिशं मोहयित्वा शौरिर्बाणस्य पृतनाम् अरिगदेषुभिर्जघान ॥ १४ ॥ स्कन्द इति ॥ स्कन्दः षण्मुखः प्रद्युम्नबाणौघैः समन्ततः सर्वतः अर्द्यमानस्ताड्यमानः अत एव गात्रेभ्यः असृक् रुधिरं विमुञ्चन् शिखिना मयूरेण वाहनेन रणस्थानात् अपाक्रमत् पलायितः दीर्घाभाव आर्षः ॥ १५ ॥ कुम्भाण्ड इति ॥ बलभद्रप्रयुक्तमुसलेन अर्दितौ ताडितौ कुम्भाण्डकूपकर्णौ पेततुः एवं हतौ नाथौ येषां तानि तयोरनीकानि सर्वतो दुद्रुवुः ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

विशीर्यमाणमिति॥स्वबलं विशीर्यमाणं सर्वतः पलायितं दृष्ट्वा अतिशयेन न मृष्यतीति तथा सः रथी रथस्थो बाणः स्वप्रतियोद्धारं सात्यकिं हित्वा संख्ये युद्धे कृष्णमभ्यद्रवत् ॥ १७ ॥ धनूंषीति ॥ रणे दुर्मदः अतिगर्वितो बाणः युगपदेकदेव सहस्रबाहुत्वात् पञ्चशतैर्भुजैः पञ्च शतानि येषामिति बहुव्रीहिः । धनूंष्याकृष्य गृहीत्वा पञ्चशतैर्भुजैरेकैकस्मिन्धनुषि द्वौ द्वौ शरौ सन्दधे ॥ १८ ॥ तानीति ॥ तत्प्रयोगात्पूर्वमेव तानि धनूंषि भगवान् हरिः सायकैः युगपत् चिच्छेद । ततश्च सारथिं रथमश्वान् हत्वा शङ्खमपूरयत् अवादयत् ॥ १९ ॥ तदिति ॥ तदा च कोटरा नाम तस्य बाणस्य माता तस्य पुत्रस्य प्राणानां रिरक्षया रक्षितुमिच्छया सन्लुगिडभावो वा आर्षः । मुक्ताः शिरोरुहाः केशा यस्याः सा नग्ना सती कृष्णस्य पुरतः अवतस्थे कोटरानाम्नी काचिद्देवी पार्वतीमूर्तिर्दैत्योपास्या बाणस्य मातृत्वेन उक्ता । सैव बाणं ररक्षेति हरिवंशे । इयं कोटरी कोटवी चोच्यते । विष्णुपुराणे तु मन्त्रमयी कुलदेवतेत्युक्तम् ॥ २० ॥ तत इति ॥ ततश्च गदाग्रजः कृष्णः तां नग्नामनिरीक्षन् शतार्षः । तिर्यङ्मुखो बभूव तावत्तदन्तरं

विशीर्यमाणं स्वबलं दृष्ट्वा बाणोऽत्यमर्षणः ॥ कृष्णमभ्यद्रवत्संख्ये रथी हित्वैव सात्यकिम् ॥ १७॥ धनूंष्याकृष्य युगपद्बाणः पञ्चशतानि वै ॥ एकैकस्मिञ्छरौ द्वौ द्वौ सन्दधे रणदुर्मदः ॥ १८॥ तानि चिच्छेद भगवान्धनूंषि युगपद्धरिः ॥ सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत् ॥ १९॥ तन्माता कोटरा नाम नग्ना मुक्तशिरोरुहा ॥ पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥ २०॥ ततस्तिर्यङ्मुखो नग्नामनिरीक्षन्गदाग्रजः ॥ बाणश्च तावद्विरथश्छिन्नधन्वाऽविशत्पुरम् ॥२१॥ विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥ अभ्यपद्यत दाशार्हं दहन्निव दिशो दश ॥ २२ ॥ अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् ॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥२३॥ माहेश्वरः समाक्रन्दन्वैष्णवेन बलार्दितः ॥ अलब्ध्वाऽभयमन्यत्र भीतो माहेश्वरो ज्वरः ॥ शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ॥ २४ ॥

लब्ध्वा विरथश्छिन्नधन्वा च बाणः पुरमविशत् ॥ २१ ॥ विद्राविते इति ॥ एवं भूतगणे भगवता विद्राविते सति गतमोहेन रुद्रेण प्रयुक्तो दश दिशो दहन्निव प्रकाशमानस्त्रिशिरास्त्रिपात् ज्वरो योद्धुं कृष्णमभ्यपद्यत अभ्याजगाम ॥ २२ ॥ अथेति ॥ अथ नारायणो देवस्तं ज्वरं दृष्ट्वा स्वकीयं शीतज्वरं व्यसृजत् । तदा च माहेश्वरो वैष्णवश्चेति उभौ ज्वरौ युयुधाते ॥ २३ ॥ माहेश्वर इत्यर्द्धम् ॥ तत्र च वैष्णवेन ज्वरेण कर्त्रा बलेनार्दितः पीडितो माहेश्वरो ज्वरः समाक्रन्दत् रुरोद । समाक्रन्दन्निति पाठे उच्चैः शब्दं कुर्वन् युयुधे रुदन्नभूद्वा । अलब्ध्वेति ॥ तदान्यत्र भगवतोऽन्यतः अभयमलब्ध्वा भीतः अत एव शरणं रक्षितारमर्थयते इति शरणार्थी प्रयताञ्जलिः कृताञ्जलिश्च सन्माहेश्वरो ज्वरः हृषीकेशं श्रीकृष्णं तुष्टाव ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमामीति ॥ अनन्तशक्तिं परेशं ब्रह्मादीनामीशं सर्वात्मानं केवलम् असङ्गं ज्ञप्तिमात्रं चैतन्यैकरूपं विश्वोत्पत्तिस्थानसंरोधानां हेतुं यत्तत्सर्वस्वरूपं ब्रह्मात्मकं ब्रह्मणा वेदेन लिङ्ग्यते ज्ञायते ब्रह्मैव लिङ्गं मूर्तिर्यस्येति वा तथा तं प्रशान्तं त्वां नमामि ॥ २५ ॥ काल इति ॥ कालः गुणक्षोभकः कर्मनिमित्तमदृष्टं दैवं तदेव फलाभिमुखमभिव्यक्तम् । स्वभावस्तत्संस्कारः जीवस्तद्वान् द्रव्यं शब्दादिभूतसूक्ष्माणि क्षेत्रं शरीरं प्रकृतिः प्राणः सूत्रम् आत्मा अहङ्कारः विकारः पञ्चमहाभूतानि एकादशेन्द्रियाणि चेति षोडशकः तेषां सङ्घातो लिङ्गदेह एतस्य च बीजरोहवत्प्रवाहः रोहोऽङ्कुरः देहाद्बीजरूपं कर्म ततोऽङ्कुररूपो देहस्ततः पुनरेवमिति प्रवाहः । एषा त्वदीया माया तस्या निषेधः अपोहो यस्मिन् तं त्वां निषेधावधिभूतमहं प्रपद्ये शरणमागतोऽस्मि ॥ २६ ॥ नानेति ॥ लीलयैव उपपन्नैः स्वीकृतैः नानाभावैः विविधप्रकारकैर्मत्स्याद्यवतारैर्यथा देवान् साधून्सन्मार्गस्थान् लोकसेतून् वर्णाश्रमादिधर्ममर्यादाश्च सर्वदा बिभर्षि पुष्णासि तदर्थं च हिंसया वर्तमानान् उन्मार्गान् हंसि तथैवैतदपि तव जन्मभूमेर्भारहाराय भारावतारणाय न तु त्वं कस्या-

ज्वर उवाच ॥ नमामि त्वाऽनन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ॥ विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥२५॥ कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥ तत्सङ्घातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥२६॥ नानाभावैर्लीलयैवोपपन्नैर्देवान्साधूँल्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसया वर्तमानाञ्जन्मैतत्ते भारहाराय भूमेः ॥ २७ ॥ तप्तोऽहं ते तेजसा दुःसहेन शान्तोग्रेणात्युल्बणेन ज्वरेण॥ तावत्तापो देहिनां तेऽङ्घ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ २८ ॥ श्रीभगवानुवाच ॥ त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम् ॥ यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ॥२९॥ इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ॥ बाणस्तु रथमारूढः प्रागाद्योत्स्यञ्जनार्दनम् ॥ ३० ॥

पि तनयः ॥ २७ ॥ तप्तोऽहमिति ॥ शान्तोग्रेण प्रथमं शान्तः शीतस्ततश्चोग्रो दाहकस्तेन अत एवात्युल्बणेन भयङ्करेण अत एव दुःसहेन ते तेजसा ज्वररूपेणाहं तप्तोऽस्मि अतः शरणागतं मां ततो रक्षेति शेषः । यावदाशया कामवासनयानुबद्धास्तत्तद्विषयप्राप्त्युपायेषु भ्रमन्तस्तवाङ्घ्रिमूलं नो सेवेरन् शरणं नैवागच्छन्ति तावत्तेषां देहिनां तापो युक्तः । मम तु त्वच्छरणागतस्य दुःखमात्रं न युक्तं किं पुनर्ज्वरमात्रम् ॥२८॥ त्रिशिर इति ॥ हे त्रिशिरः ते तुभ्यमहं प्रसन्नः अस्मि अतः मज्ज्वरात्तव भयं व्येतु अपगच्छतु । यः पुमानावयोः संवादं स्तुतिप्रसादरूपं स्मरति स्मरेदपि किं पुनः शृणुयात्कीर्तयेद्वा तस्य त्वत्तो भयं न भवेत् त्वया भयं नोत्पादनीयमित्यर्थः ॥ २९ ॥ इतीति ॥ इत्येवं भगवतोक्तो माहेश्वरो ज्वरस्तमच्युतमानम्य नमस्कृत्य ततो गतः बाणोऽपि तथा रथं नन्दीश्वरसारथिकं माहेश्वरमिति विष्णुपुराणे । आरूढः सन् योत्स्यन् योद्धुं शता आर्षः । जनार्दनं कृष्णं प्रति प्रागात् ॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततो हे नृप बाहुसहस्रेण नानाविधानि आयुधानि धरतीति तथाभूतोऽपि सोऽसुरो बाणः परमक्रुद्धः संश्चक्रायुधे कृष्णे बाणान्मुमोच प्रायुङ्क्त । चक्रायुध इति प्रथमान्तपाठे चक्रायुधोऽपि च बाणः ॥ ३१ ॥ तस्येति ॥ बाणमोचनानन्तरम् असकृत्पुनः पुनः अस्त्राणि अस्यतः प्रयुञ्जानस्य तस्य बाणस्य बाहून् वनस्पतेः वृक्षस्य शाखा इव चक्रेण भगवान् चिच्छेद ॥ ३२ ॥ बाहुष्विति ॥ एवं बाणस्य बाहुषु छिद्यमानेषु भक्तानुकम्पी भगवान् भव उपव्रज्य समीपमागत्य चक्रायुधमभाषत तुष्टाव ॥ ३३ ॥ अयं भवन्तमज्ञात्वा युद्धयत इत्याशयेनाह—त्वं हीति ॥ यत् वाङ्मये ब्रह्मणि वेदेऽपि गूढं ब्रह्म वाङ्मनसाऽग्राह्यतया प्रतिपादितं परं ज्योतिः ज्ञानरूपं यं च अमलात्मानो विशुद्धमनस आकाशमिव व्याप्तं केवलं सर्वदोषसंश्लेषरहितं पश्यन्ति स त्वम् ॥ ३४ ॥ आस्तां निर्गुणस्य तव ज्ञानं त्वयाधिष्ठितो विराड्विग्रहोऽपि दुर्ज्ञान इत्याशयेनाह—नाभिरिति युग्मम् ॥ यस्य नभो नाभिः अग्निर्मुखम् अम्बु रेतः द्यौः शीर्षम् आशाः दिशः श्रुतिः श्रवणेन्द्रियम् उर्वी भूमिः अङ्घ्रिः चन्द्रो मनः अर्कः दृक् चक्षुः

ततो बाहुसहस्रेण नानायुधधरोऽसुरः ॥ मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ॥ ३१ ॥ तस्याऽस्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ॥ चिच्छेद भगवान्बाहूञ्छाखा इव वनस्पतेः ॥ ३२ ॥ बाहुषु च्छिद्यमानेषु बाणस्य भगवान्भवः ॥ भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥ ३३ ॥ श्रीरुद्र उवाच ॥ त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ॥ यं पश्यन्त्यमलात्मान आकाशमिव केवलम् ॥ ३४ ॥ नाभिर्नभोऽग्निर्मुखमम्बु रेतो द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्वी ॥ चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेन्द्रः ॥ ३५ ॥ रोमाणि यस्यौषधयोऽम्बुवाहाः केशा विरिञ्चो धिषणा विसर्गः ॥ प्रजापतिर्हृदयं यस्य धर्मः स वै भवान्पुरुषो लोककल्पः ॥ ३६ ॥ तवावतारोऽयमकुण्ठधामन्धर्मस्य गुप्त्यै जगतो भवाय ॥ वयं च सर्वे भवतानुभाविता विभावयामो भुवनानि सप्त ॥ ३७ ॥ त्वमेक आद्यः पुरुषोऽद्वितीयस्तुर्यः स्वदृग्घेतुरहेतुरीशः ॥ प्रतीयसेऽथापि यथाविकारं स्वमायया सर्वगुणप्रसिद्ध्यै ॥ ३८ ॥

अहं रुद्रः आत्मा अहङ्कारः समुद्रो जठरं इन्द्रः भुजा बाहुः इन्द्रादयो लोकपाला बाहव इत्यर्थः । एवं सर्वत्रैकवचनं जात्यभिप्रायेण । औषधयो रोमाणि यच्छब्दावृत्तिः स्पष्टार्था । अम्बुवाहा मेघाः केशाः विरिञ्चो धिषणा बुद्धिः प्रजापतिर्ब्रह्मैव विसर्गो मेढ्रं धर्मो हृदयं स भवान् लोकैः कल्प्यते अवयवित्वेन प्रतिपाद्यते इति लोककल्पः पुरुष इति ॥ ३५ ॥ ३६ ॥ तवेति ॥ हे अकुण्ठधामन् अप्रच्युतस्वरूप तवायमवतारो धर्मस्य गुप्त्यै रक्षार्थं जगतः भवाय अभ्युदयाय । वयं च लोकपालाः सर्वे भवता अनुभाविताः प्रभावयुक्ताः कृता एव । सप्त भुवनानि विभावयामः पालयामः न स्वतन्त्रा इत्यर्थः ॥ ३७ ॥ त्वमिति ॥ त्वमेक आद्यः पुरुषोन्तर्यामी अद्वितीयः तुर्यः जाग्रदाद्यवस्थातीतः स्वदृक् स्वप्रकाशः हेतुः सर्वकारणम् अहेतुः स्वहेतुरहितः ईशः स्वतन्त्रः अथापि सर्वगुणानां रजआदीनामैश्वर्यादीनां च प्रसिद्ध्यै स्वमायया यथाविकारं देव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिर्यङ्मनुष्यादिस्वस्वरूपेण प्रतीयसे ॥३८॥ यथेति ॥ हे भूमन् यथा स्वच्छायया स्वकार्यमेघवर्षादिरूपयातुगभाव आर्षः। परदृष्ट्या अपिहितः आच्छादितोऽपि सूर्यस्तां छायां रूपाणि च नीलपीतादिकानि चान्मेघान्तारितान् घटपटादीनपि सञ्चकास्ति प्रकाशयति एवंगुणेन अहंकारेण स्वकार्येण जीवावरकेण तदृदृष्ट्या अपिहित आच्छादितोऽपि त्वं तान् गुणान् देहेन्द्रियान्तःकरणादीन् गुणिनस्तदुपहितान् जीवांश्च प्रकाशयसि। स्वयं च आत्मप्रदीपः स्वप्रकाश एव अतः सर्वसाक्षिणस्तव न संसारः ॥३९॥ यदिति ॥ यस्य मायया मोहितधियः अत एव पुत्रादिषु प्रसक्ता जीवा वृजिनार्णवे दुःखसागरे उन्मज्जन्ति निवृत्तदुःखा भवन्ति निमज्जन्ति पुनः दुःखं प्राप्नुवन्ति ॥ ४० ॥ देवेति ॥ देवेन कर्माध्यक्षेण त्वया दत्तमिमं त्वन्मायातरणसाधनं नृलोकं मनुष्यदेहं लब्ध्वाऽपि यः अजितेन्द्रियः त्वत्पादौ नाद्रियेत सः आत्मनोऽपि वञ्चका शोच्यः ॥ ४१ ॥ य इति ॥ यो मर्त्यो मरणशीलः आत्मानं प्रियम् ईश्वरं त्वां विपर्ययाः विपरीताः अनात्माप्रियानीश्वरा ये इन्द्रियार्थाः पुत्रादयस्तदर्थं विसृजवे न सेवते। तङार्षः। सः अमृतं

यथैव सूर्यः पिहितः स्वछायया छायां च रूपाणि च संचकास्ति॥एवं गुणेनापिहितो गुणांस्त्वमात्मप्रदीपो गुणिनश्च भूमन् ॥३९॥ यन्मायामोहितधियः पुत्रदारगृहादिषु ॥ उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजिनार्णवे ॥४०॥ देवदत्तमिमं लब्ध्वा नृलोकमजितेन्द्रियः॥ यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवञ्चकः ॥४१॥ यस्त्वां विसृजते मर्त्य आत्मानं प्रियदर्शनम् ॥ विपर्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ ४२ ॥ अहं ब्रह्माऽथ विबुधा मुनयश्चामलाशयाः ॥ सर्वात्मना प्रपन्नास्त्वमात्मानं प्रेष्ठमीश्वरम् ॥ ४३ ॥ तं त्वा जगत्स्थित्युदयान्तहेतुं समं प्रशान्तं सुहृदात्मदैवम् ॥ अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवम् ॥४४॥ अयं ममेष्टो दयितोऽनुवर्ती मयाऽभयं दत्तममुष्य देव ॥ सम्पाद्यतां तद्भवतः प्रसादो यथा हि ते दैत्यपतौ प्रसादः ॥ ४५ ॥ श्रीभगवानुवाच ॥ यदात्थ भगवंस्त्वं नः करवाम प्रियं तव ॥ भवतो यद्व्यवसितं तन्मे साध्वनुमोदितम् ॥ ४६ ॥

त्यजन् विषमत्ति ॥ ४२ ॥ अहमिति ॥ अहं शिवः ब्रह्मा विबुधाः मुनयश्च एते अमलाशयाः वयम् आत्मानं प्रेष्ठम् ईश्वरं त्वां सर्वात्मना प्रपन्नाः स्मः ॥ ४३ ॥ तमिति ॥ जगतः स्थित्युदयान्तानां हेतुं समं प्रशान्तं सुहृद्बुद्धिप्रवर्त्तकत्वात्सचासौ आत्मा च सर्वात्मकत्वात् एवंभूतं दैवं च तम् अनन्यमेकं सजातीयासजातीयरहितं जगतः आत्मनां जीवानां च केतनमाश्रयभूतं देवं तं त्वां भवस्य संसरणस्य अपवर्गाय भजाम। प्रार्थने लोट् ॥४४॥ अयमिति ॥ अयं बाणः मम इष्टः चित्ते उषितः दयितः प्रियः अनुवर्ती सेवकः अत एव हे देव मया अमुष्य अभयं दत्तं तत्तस्मात् यथा हि दैत्यपतौ प्रह्लादे ते त्वया प्रसादः कृतः तथास्मिन्नपि प्रह्लादवंशजाते भवतः प्रसादः सम्पाद्यतां मद्दत्तमभयं सत्यं क्रियताम् ॥ ४५ ॥ यदिति ॥ हे भगवन् नोऽस्मान् प्रति त्वं यत् यथा आत्थ कथयसि तथैव तव प्रियमस्याभयं करवाम। बाहुच्छेदनं तु यत् यथा भवता व्यव-

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सितम् " त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते । " इति निश्चयेनोक्तं तत्तथैव मे मया साधुतयानुमोदितं नतु त्वदनिष्टं किंचित्कृतम् ॥ ४६ ॥ अवध्य इति ॥ असुरोऽप्येष ममापि अवध्यः यतः वैरोचनो बलिः मद्भक्तः तत्सुतः किञ्च तव अन्वयः वंशजः स्वजातीय एव तेन बकीबकाद्यसुरादिवधो नायुक्तः इति तोषिणी । मे मम न वध्यः इति मया प्रह्लादाय वरो दत्तः । " भविष्यति च ते वंशो ह्यवध्यो मे सदा किल । " इति टीकाधृतपुराणान्तरवचनात् ॥ ४७ ॥ दर्पेति ॥ त्वदुक्तदर्पनाशायैवास्य बाहवो मया प्रवृक्णाः छिन्नाः यच्च भुवो भारायितं भूरिबलं सैन्यं तच्च सूदितं विनाशितम् ॥ ४८ ॥ चत्वार इति ॥ अवशिष्टाश्चत्वारोऽस्य भुजा अजराः श्रमरहिताः अमरा अच्छेद्याश्च भविष्यन्ति तथायमसुरोऽपि यतो भवतः पार्षदेषु मुख्यः प्रियत्वादतो न कुतश्चिद्भयो निर्भयश्च भविष्यति ॥ ४९ ॥ इतीति ॥ इत्येवं भगवद्वचनादभयं लब्ध्वा सः असुरो बाणः शिरसा कृष्णं प्रणम्य वध्वा ऊषया सह प्राद्युम्निमनिरुद्धं रथमारोप्य सम्यगादरेणानयत् ॥ ५० ॥ अक्षौहिण्या इति ॥ रुद्रेणानुमोदितः तदभिप्रेतस्यैव

अवध्योऽयं ममाप्येष वैरोचनसुतोऽसुरः ॥ प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥ ४७ ॥ दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ॥ सूदितं च बलं भूरि यच्च भारायितं भुवः ॥ ४८ ॥ चत्वारोऽस्य भुजाः शिष्टा भविष्यन्त्यजरामराः ॥ पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुरः ॥ ४९ ॥ इति लब्ध्वाऽभयं कृष्णं प्रणम्य शिरसाऽसुरः ॥ प्राद्युम्निं रथमारोप्य सवध्वा समुपानयत् ॥ ५० ॥ अक्षौहिण्या परिवृतं सुवासः समलंकृतम् ॥ सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥ ५१ ॥ स्वराजधानीं समलंकृतां ध्वजैः सतोरणैरुक्षितमार्गचत्वराम् ॥ विवेश शङ्खानकदुन्दुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥ ५२ ॥ य एवं कृष्णविजयं शंकरेण च संयुगम् ॥ संस्मरेत्प्रातरुत्थाय न तस्य स्यात्पराजयः ॥ ५३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

बाणभुजभङ्गस्य कृतत्वात् कृष्णोऽपि अक्षौहिण्या परिवृतं सुवासः समलंकृतं सपत्नीकमनिरुद्धं पुरस्कृत्य द्वारकां ययौ ॥ ५१ ॥ स्वेति ॥ पौरसुहृद्द्विजातिभिः अभ्युद्यतः अभिमुखमागत्य सत्कृतः श्रीकृष्णः शङ्खानकदुन्दुभिस्वनैः सह सतोरणैर्ध्वजैः समलङ्कृतां तथा उक्षिताः सिक्ताः मार्गाः चत्वराण्यङ्गणानि यस्यां तां स्वराजधानीं द्वारकां विवेश ॥ ५२ ॥ य इति ॥ एवंभूतं कृष्णस्य विजयं शङ्करेण सह संयुगं युद्धं च यः पुमान् प्रातरुत्थाय सम्यक्श्रद्धाभक्तिपूर्वकं स्मरेत् अपि किमुतकीर्तयेत् शृणुयाद्वा । तस्य पराजयः इन्द्रियादिभ्यः बाह्येभ्यश्च शत्रुभ्यः अभिभवो न स्यात् ॥ ५३ ॥ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमत्रयःषष्टितमे व्यधात् ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुःषष्टितमे कृष्णो नृगं शापादमोचयत् ॥ अशिक्षयन्नृपान्दृप्तान् तत्र श्लोकाः ऋतौब्धयः ॥ उवाचत्रितयं सप्तचत्वारिंशदनुष्टुभः ॥ ६४ ॥ एकदेति ॥ हे राजन् साम्बप्रद्युम्नचारुभानुगदादयः यदुकुमारकाः विहर्तुमेकदोपवनं जग्मुः। एकदेत्यनेन क्रमो निरस्तः तेनौचित्यादियं लीला प्रद्युम्नादीनां यौवनारम्भ एवानिरुद्धजन्मतः प्राग्बोध्या इति तोषिणी ॥ १ ॥ क्रीडित्वेति ॥ तत्रोपवने सुचिरं बहुकालं क्रीडित्वा पिपासिताः तृषायुक्ताः जलं विचिन्वन्तः अन्वेषयन्तः कचिन्निरुदके निर्जले कूपे अद्भुतं महत् सत्वं जन्तुं कृकलासं ददृशुः ॥ २ ॥ कृकलासमिति ॥ गिरिनिभं पर्वतसदृशं कृकलासं वीक्ष्य विस्मितं मानसं येषां ते कृपयान्वितास्तस्य कूपादुद्धरणे निमित्ते यत्नं चक्रुः ॥ ३ ॥ चर्मजैरिति॥ते अर्भकास्तं कूपे पतितं कृकलासं चर्मजैश्चर्ममयैः तान्तवैः सूत्रमयैश्च पाशैः रज्जुभिः बद्ध्वा प्रयतमाना अपि अर्भकत्वात् समुद्धर्तुं नाशक्नुवन् तदा चोत्सुकाः उद्धारे उत्साहयुक्ताः कृष्णायाचख्युः कथितवन्तः ॥ ४ ॥ तत्रेति ॥ विश्वभावनः अरविन्दाक्षः भगवान् तत्रागत्य तं कृकलासं वामेन करेण लीलया उज्जहार कूपाद्बहिर्निष्का-

श्रीशुक उवाच ॥ एकदोपवनं राजञ्जग्मुर्यदुकुमारकाः ॥ विहर्तुं साम्बप्रद्युम्नचारुभानुगदादयः ॥ १ ॥ क्रीडित्वा सुचिरं तत्र विचिन्वन्तः पिपासिताः ॥ जलं निरुदके कूपे ददृशुः सत्त्वमद्भुतम् ॥ २ ॥ कृकलासं गिरिनिभं वीक्ष्य विस्मितमानसाः ॥ तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः ॥ ३ ॥ चर्मजैस्तान्तवैः पाशैर्बध्वा पतितमर्भकाः ॥ नाशक्नुवन्समुद्धर्तुं कृष्णायाचख्युरुत्सुकाः ॥४॥ तत्रागत्यारविन्दाक्षो भगवान्विश्वभावनः ॥ वीक्ष्योज्जहार वामेन तं करेण स लीलया ॥ ५ ॥ स उत्तमश्लोककराभिमृष्टो विहाय सद्यः कृकलासरूपम् ॥ संतप्तचामीकरचारुवर्णः स्वर्ग्यद्भुतालंकरणाम्बरस्रक् ॥ ६ ॥ पप्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुन्दः ॥ कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां गणयामि नूनम् ॥७॥ दशामिमां वा कतमेन कर्मणा संप्रापितोऽस्यतदर्हः सुभद्र ॥ आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुम् ॥८॥

सितवान् ॥ ५ ॥ स इति ॥ स उद्धृतो जन्तुः उत्तमश्लोकस्य भगवतः करेणाभिमृष्टः स्पृष्टः अतः पापस्य निवृत्तत्वात् सद्यः कृकलासरूपं विहाय सन्तप्तं यच्चामीकरं सुवर्णं तद्वच्चारुः सुन्दरो वर्णो यस्य सः तथाद्भुता अलङ्करणादयो यस्य स तथा स्वर्गी देवो बभूवेति शेषः ॥ ६ ॥ पप्रच्छेति ॥ तस्य कृकलासजन्मनो निदानं कारणं विद्वान् जानन्नपि मुकुन्दः जनेषु तत्ख्यापयितुं प्रसिद्धीकर्तुं तं पप्रच्छ। हे महाभाग वरेण्यम् अभीष्टं रूपं यस्य स त्वं क इति नूनं निश्चयेनाहं तु त्वां देवोत्तमं गणयामि मन्ये ॥ ७ ॥ दशामिति ॥ हे सुभद्र मङ्गलमूर्ते अतदर्हः एतद्दशाप्राप्त्ययोग्योऽपि त्वमिमां दशां कृकलासयोनिं कतमेन कर्मणा प्रापितस्तत् तथात्मानं स्वप्राक्तनं रूपं च विवित्सतां त्वन्मुखाद्वेदितुमिच्छताम् इडभाव आर्षः। नोऽत्र अस्माकमग्रे शेषे षष्ठी वक्तुं क्षमं यत् यदि मन्यसे तर्हि आख्याहि ॥ ८ ॥

इतीति ॥ अनन्तमूर्तिना पाठान्तरे आनन्दमूर्तिना कृष्णेन प्राक्जन्मनि राजा इत्येवं संपृष्टः अर्कस्येव वर्चो द्युतिर्यस्य तेन किरीटेन तथाभूतकिरीटयुक्तमस्तकेन माधवं प्रणिपत्य नमस्कृत्याह स्म ॥ ९ ॥ नृग इति ॥ हे प्रभो अहं नृगो नाम नरेन्द्रः इक्ष्वाकुपुत्रः नवमस्कन्धोक्तश्राद्धदेवपुत्रादिक्ष्वाकुभ्रातुर्नृगादन्यो नृग इक्ष्वाकुतनयो ज्ञेयः दानिषु दानशीलेषु आख्यायमानेषु प्रशस्यमानेषु सत्सु यदि ते कर्णमस्पृशं यदि वेदाः प्रमाणं स्युरिति वदिदमसंदेहे संदेहवचनं नूनं तव कर्णपथं प्राप्तः स्याम् ॥ १० ॥ किमिति ॥ हे नाथ सर्वभूतानामात्मनो बुद्धेः साक्षिणः कालेन न व्याहता न विलुप्ता दृक् ज्ञानं यस्य तस्य ते तव किमविदितं तत्सर्वं विदितमेव अथापि तवाज्ञया त्वत्पृष्टं वक्ष्ये ॥११॥ यावत्य इति ॥ भूमेर्यावत्यः सिकताः अत्र बहुषु पुस्तकेषु व्यावन्त्य इति नुमृवान् पाठो दृश्यते तत्र तु नुमार्षः । यावत्यः दिवि तारकाः यावत्यो वर्षधाराश्च तावतीः गाः अददम् आलोप आर्षः । स्म पादपूर्तौ अत्रागण्यतायां तात्पर्यमित्याहुः । अन्ये तु कुरुक्षेत्रादिदेशेषु सूर्यग्रहणादिकालेषु च एकस्या अपि कोटिगुणीभूतत्वात्तत्र तत्र देशकालेषु

श्रीशुक उवाच ॥ इति स्म राजा संपृष्टः कृष्णेनानन्तमूर्तिना ॥ माधवं प्रणिपत्याह किरीटेनार्कवर्चसा ॥ ९ ॥ नृग उवाच ॥ नृगो नाम नरेन्द्रोहमिक्ष्वाकुतनयः प्रभो ॥ दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशम् ॥ १० ॥ किं नु तेऽविदितं नाथ सर्वभूतात्मसाक्षिणः ॥ कालेनाव्याहतदृशो वक्ष्येऽथापि तवाज्ञया ॥ ११ ॥ यावत्यः सिकता भूमेर्यावत्यो दिवि तारकाः ॥ यावत्यो वर्षधाराश्च तावतीरददं स्म गाः ॥ १२ ॥ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृङ्गीः ॥ न्यायार्जिता रूप्यखुराः सवत्सा दुकूलमालाभरणा ददावहम् ॥ १३ ॥ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुम्बेभ्य ऋतव्रतेभ्यः ॥ तपःश्रुतब्रह्मवदान्यसद्भ्यः प्रादां युवभ्यो द्विजपुङ्गवेभ्यः ॥ १४ ॥ गोभूहिरण्यायतनाश्वहस्तिनः कन्याश्च दासीस्तिलरूप्यशय्याः ॥ वासांसि रत्नानि परिच्छदान्रथानिष्टं च यज्ञैश्चरितं च पूर्तम् ॥ १५ ॥

प्रतिदिनं च कोटयादिसङ्ख्यानां गवां दातुस्तस्य तावत्सङ्ख्यत्वमपि नानुपपन्नमित्याहुः ॥ १२ ॥ देयवैशिष्टयमाह—पयस्विनीरिति ॥ पयस्विनीः दुग्धाधिक्ययुक्ताः तरुणीः प्रथमप्रसूताः शीलं शान्तस्वभावः रूपं सौन्दर्यं गुणाः सदपत्यत्वदुग्धघृताधिक्यारोग्यत्वादयः तैरुपपन्नाः युक्ताः कपिलाः हेमशृङ्गीः सुवर्णशृङ्गयुक्ताः न्यायार्जिताः स्वधर्मपूर्वव्यापारेण सम्पादिताः रूप्ययुक्तखुराः वत्सैः सहिताः दुकूलादीनां द्वन्द्वस्तद्युक्ताः एवंभूता गा अहं ददौ छन्दसि लिडिति अपरोक्षेऽपि भूतसामान्येऽपि च लिट् ॥ १३ ॥ सम्प्रदानवैशिष्टयमाह—स्वलमिति ॥ मद्दत्तालङ्कारैः स्वलङ्कृतेभ्यः गुणाः सन्तोषादयः शीलं च तद्वद्भ्यः सीदत् क्लिश्यत् कुटुम्बं येषां तेभ्यः ऋतानि सत्यानि दम्भरहितानि व्रतानि धर्मादीनि येषां तेभ्यः तपसा श्रुताः प्रख्यातास्ते ब्रह्माणि वदान्याः अत्युदाराः वेदाध्यापनशीलाश्च ते सन्तः समचित्ताश्च तेभ्यो युवभ्यः धर्माचरणगोपालनादिदक्षेभ्यः द्विजपुङ्गवेभ्यो ब्राह्मणोत्तमेभ्यो गाः प्रादाम् ॥ १४ ॥ देयान्तराण्याह—गविति ॥ गावोत्र वृषाः भूहिरण्यानि आयतनानि गृहान् अश्वान् हस्तिनः सदासीः कन्याः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कवभाव आर्षः । तिलरूप्यशय्याः वासांसि रत्नानि परिच्छदान् रथान् गृहोपकरणानि च प्रादां यज्ञैरिष्टम् अग्निष्टोमादयो यज्ञाश्च कृताः पूर्तं वापीकूपादि चरितं कृतम्॥ १५॥ कस्यचिदिति ॥ कस्यचित् द्विजमुख्यस्य प्रतिग्रहरहितस्य गौः भ्रष्टा स्वबन्धनाद्विमुक्ता सती मम गोधने सम्पृक्ता मिलिता सा चाविदुषा द्विजस्येयमित्यजानता मया द्विजातये अन्यस्मै ब्राह्मणाय दत्ता ॥१६॥ तामिति ॥ तां दत्तां प्रतिग्राहिणा नीयमानां गां तस्याः गोः स्वामी दृष्ट्वा मम मदीयेयमित्युवाच प्रतिग्राही च मदीयेयमित्याह स्म । यतः मे मह्यमधुनैव नृगो दत्तवानिति ॥ १७ ॥ विप्राविति ॥ एवं परस्परं विवदमानौ स्वार्थसाधकौ मन्मुखान्निर्णयेन गोग्रहणोत्सुकौ तौ विप्रौ मामूचतुः । तत्र प्रतिग्राह्याह स्म । भवान्दाता अधुनैवेमां मह्यं दत्तवान् स्वाम्याह स्म । इयं गौर्मदीया तां चेद्भवानस्मै दत्तवान् तदा अपहर्त्ता तद्द्वयोर्वचनं श्रुत्वा मे भ्रमो व्याकुलताभवत् ॥ १८ ॥ अनुनीताविति ॥ एवं धर्मविचारे कृच्छ्रं संकटं प्राप्तेन मया तावुभावपि विप्रावनुनीतौ प्रार्थितौ तदेवाह प्रकृष्टानां श्रेष्ठानां गवां लक्षम् । युवयोरन्यतरस्मै दास्यामि तेनान्यतरेणैषा

कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने ॥ संपृक्ताऽविदुषा सा च मया दत्ता द्विजातये ॥१६॥ तां नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति तम् ॥ ममेति प्रतिग्राह्याह नृगो मे दत्तवानिति ॥ १७ ॥ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ ॥ भवान्दाताऽपहर्तेति तच्छ्रुत्वा मेऽभवद् भ्रमः ॥ १८ ॥ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै ॥ गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयताम् ॥ १९ ॥ भवन्तावनुगृह्णीतां किङ्करस्याविजानतः ॥ समुद्धरत मां कृच्छ्रात्पतन्तं निरयेऽशुचौ ॥ २० ॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत् ॥ नान्यद्गवामप्ययुतमिच्छामीत्यपरो ययौ ॥ २१ ॥ एतस्मिन्नन्तरे याम्यैर्दूतैर्नीतो यमक्षयम् ॥ यमेन पृष्टस्तत्राहं देवदेव जगत्पते ॥ २२ ॥

गौरन्यतरस्मै प्रदीयतामित्यर्थः ॥ १९ ॥ भवन्ताविति ॥ भवन्तौ इयं गौः अन्यस्येत्यविजानतः किङ्करस्य ममोपरि अनुगृह्णीताम् । अनेनापहारदोषेण अशुचौ नरके पतन्तं मां तस्मात्कृच्छ्रात्सङ्कटात् अनेन निष्कृतिग्रहणरूपानुग्रहेण समुद्धरतमिति ॥ २० ॥ नेति ॥ एवमुक्तयोर्द्वयोः मध्ये गोस्वामी हे राजन् यद्यपि त्वं दातुं समर्थोऽसि तथापि गोविक्रयस्य राजप्रतिग्रहस्य च निषिद्धत्वात् त्वया दीयमानं गवां लक्षमप्यहं न प्रतीच्छे न प्रतिगृह्णामि। तङार्षः । इत्युक्त्वा स्वामी स्वकीयां गां विहायैव अपाक्रमत् प्रययौ दीर्घाभाव आर्षः । तथा अपरः प्रतिग्राह्यपि दुराग्रहः विक्रयस्य निषिद्धत्वात्त्वद्वचने विश्वासाभावाचाहमपि यत्त्वया गवां लक्षं प्रतिश्रुतं ततोऽन्यदधिकमपि गवामयुतं यदि त्वं ददासि तदप्येनां विहाय ग्रहीतुं नेच्छामि इत्युक्त्वा ययौ ॥ २१ ॥ एतस्मिन्निति ॥ हे देवदेव जगत्पते एतस्मिन्नन्तरे याम्यैर्दूतैरहं यमक्षयं यमस्थानं संयमनीं प्रति नीतः इतः पूर्वं पापाभावान्नेतुमशक्य इति भावः । अन्तरेऽमितस्यायुषोऽन्ते मरणावकाश इत्यर्थो वा तत्र यमसदने यमेन पृष्टः ॥ २२ ॥

CC-0. In Public Domain. Digitization by eGangotri

पूर्वमिति ॥ हे नृपते पूर्वं त्वं किमशुभं पापम् अजानता विप्रगव्याहरणपापफलं भुङ्क्षे भोक्ष्यसे उताहो अथवा शुभं पुण्यकर्मफलं भोक्ष्यसे दानस्य तज्जन्यस्य धर्मस्य तथा भास्वतः प्रकाशमानस्य स्वर्गादिलोकस्य पुण्यफलस्य अन्तमवधिं न पश्ये न पश्यामि । तङार्षः । उत्तरार्द्धं यमस्य स्वस्य वा वाक्यम् ॥ २३ ॥ पूर्वमिति ॥ तदाहं यमं प्रत्युक्तवान् हे देव यम अहं पूर्वमशुभमेव भुञ्ज इति तदा स यमः पत अपकृष्टां योनिं गच्छेति मां प्राह स्म । ततश्च हे प्रभो पतन् अहं तावत् तत्क्षण एवात्मानं कृकलासरूपमद्राक्षं तत्पापस्य तादृशफलत्वात् । रामायणादौ तु विप्रयोस्तथा शाप उक्तः ॥ २४ ॥ ब्रह्मण्यस्येति ॥ हे केशव ब्रह्मण्यस्य ब्राह्मणभक्तस्य वदान्यस्य दानशूरस्य तव दासस्य भवतः संदर्शनमेवार्थोऽस्ति यस्य तस्य मेऽद्यापि स्मृतिर्न विध्वस्ता न विनष्टेति ॥ २५ ॥ स त्वमिति ॥ हे विभो यः योगेश्वरैः श्रुतिदृशा उपनिषच्चक्षुषा अमले हृदि विभाव्यः केवलं चिन्तनीयः नतु साक्षाद्दर्शनयोग्यः अधः अक्षजं ज्ञानं यस्मात् स परात्मा त्वम् उरुणा व्यसनेन कृकलासयोनिभवदुःखेन अन्धा बुद्धिर्यस्य तस्य मम साक्षात्

पूर्वं त्वमशुभं भुङ्क्षे उताहो नृपते शुभम् ॥ नान्तं दानस्य धर्मस्य पश्ये लोकस्य भास्वतः ॥ २३ ॥ पूर्वं देवाशुभं भुञ्जे इति प्राह पतेति सः ॥ तावदद्राक्षमात्मानं कृकलासं पतन्प्रभो ॥ २४ ॥ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव ॥ स्मृतिर्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिनः ॥ २५ ॥ स त्वं कथं मम विभोऽक्षिपथः परात्मा योगेश्वरैः श्रुतिदृशाऽमलहृद्विभाव्यः ॥ साक्षादधोक्षज उरुव्यसनान्धबुद्धेः स्यान्मेऽनुदृश्य इह यस्य भवापवर्गः ॥ २६ ॥ देवदेव जगन्नाथ गोविन्द पुरुषोत्तम ॥ नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ॥ २७ ॥ अनुजानीहि मां कृष्ण यान्तं देवगतिं प्रभो ॥ यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदम् ॥ २८ ॥ नमस्ते सर्वभावाय ब्रह्मणेऽनन्तशक्तये ॥ कृष्णाय वासुदेवाय योगानां पतये नमः ॥ २९ ॥ इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना ॥ अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणाम् ॥ ३० ॥

अक्षिपथः दर्शनविषयः कथं जातोऽसि । इह संसारे यस्य पुरुषस्य भवस्य संसारस्य अपवर्गः समाप्तिः स्यात् त्वं तस्य अनुदृश्यो भवसि ॥ २६ ॥ देवदेवेति युग्मम् ॥ हे देवेत्यादीनि सम्बोधनानि । हे प्रभो देवगतिं स्वर्गलोकं यान्तं मामनुजानीहि आज्ञां देहि कर्मवशाद्यत्र क्वापि सतो वर्तमानस्यापि मम चेतः त्वत्पदमेवास्पदं स्मरणीयतयाश्रयो यस्य तथाभूतं भूयात् ॥ २७ ॥ २८ ॥ नम इति ॥ सर्वभावाय कार्यरूपाय सर्वस्य भावो जन्म येन तस्मै इति वा ब्रह्मणे कारणरूपाय अनन्तशक्तये ते नमः । कृष्णाय वासुदेवाय योगानां सर्वसाधनानां पतये नमः ॥ २९ ॥ इतीति ॥ इत्येवमुक्त्वा तं श्रीकृष्णं परिक्रम्य स्वमौलिना तत्पादौ स्पृष्ट्वा दण्डवत्प्रणामं कृत्वा तेनानुज्ञातो भोगान्ते मां प्राप्स्यसीत्यादिष्टः नृणां पश्यतामेव सताम् आगतं विमानाग्र्यमारुहत् । छन्दसश्लेरङ् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्ण इति ॥ भगवान् देवकीसुतः ब्रह्मण्यदेवः धर्मात्मा कृष्णः राजन्यान् क्षत्रियाननुशिक्षयन् परिजनं परितो विद्यमानं जनं प्राह स्म ॥ ३१ ॥ दुर्जरमिति ॥ मनाक् ईषत् अपि चौर्यादिना भुक्तं ब्रह्मस्वम् अग्नेः अग्निसदृशस्यातितेजस्विनोऽपि दुर्जरं यद्येवं तदा वृथैवेश्वरमानिनां समर्था वयमित्यभिमानवतां राज्ञां तद्दुर्जरं भवतीति किमुत वक्तव्यम् ॥ ३२ ॥ नाहमिति ॥ यस्य प्रतिक्रिया शिवकर्तृकपानादिर्निवृत्त्युपायोऽस्ति तं हालाहलं विषं मारकत्वाऽव्यभिचारि न मन्ये हि निश्चितम्। ब्रह्मस्वमेव विषं प्रोक्तम् अस्य भुवि प्रतिविधिर्नास्ति ॥ ३३ ॥ हिनस्तीति ॥ विषं कर्तृ अत्तारं भोक्तारमेव हन्ति औषधादिना शाम्यति क्वापि गुणमपि करोति। वह्निश्च अद्भिर्जलैः प्रशाम्यति दहन्नपि मूलमवशेषयति। ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं दहति तदपि समूलमिति ॥ ३४ ॥ ब्रह्मस्वमिति ॥ ब्रह्मस्वं दुरनुज्ञातं सम्यगननुज्ञातं मित्रधनादिबुध्या भुक्तं स्वं पुत्रं पौत्रं चेति त्रिपुरुषं कुलं हन्ति प्रसह्य हठात् बलात् राजाद्याश्रयणात् भुक्तं तु दशपूर्वानिति पितृपितामहादीन् दशापरान् पुत्रपौत्रादींश्च भोक्तारं च हन्ति नरके पातयति ॥ ३५ ॥ राजान इति ॥

कृष्णः परिजनं प्राह भगवान्देवकीसुतः ॥ ब्रह्मण्यदेवो धर्मात्मा राजन्याननुशिक्षयन् ॥३१॥ दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि ॥ तेजीयसोऽपि किमुत राज्ञामीश्वरमानिनाम् ॥३२॥ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया ॥ ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ॥ ३३ ॥ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति ॥ कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३४ ॥ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हन्ति त्रिपूरुषम् ॥ प्रसह्य तु बलाद्भुक्तं दश पूर्वान् दशापरान् ॥ ३५ ॥ राजानो राजलक्ष्म्याऽन्धा नात्मपातं विचक्षते ॥ निरयं येऽभिमन्यन्ते ब्रह्मस्वं साधु बालिशाः ॥ ३६ ॥ गृह्णन्ति यावतः पांसून्क्रन्दतामश्रुबिन्दवः ॥ विप्राणां हृतवृत्तीनां वदान्यानां कुटुम्बिनाम् ॥ ३७ ॥ राजानो राजकुल्याश्च तावतोऽब्दान्निरङ्कुशाः ॥ कुम्भीपाकेषु पच्यन्ते ब्रह्मदायापहारिणः ॥ ३८ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः ॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ ३९ ॥

ये राजलक्ष्म्या अन्धाः बालिशाः मूर्खाः निरयं नरकहेतुं ब्रह्मस्वं साधु समीचीनमभिमन्यन्ते आकाङ्क्षन्ति भुञ्जते च ते आत्मनः पातं नरके पतनं न विचक्षते न पश्यन्ति। साधुबालिशाः अतिमूर्खा इति वा ॥ ३६ ॥ गृह्णन्तीति युग्मम् ॥ हृतवृत्तीनां वदान्यानाम् उदारचित्तानां कुटुम्बिनां विप्राणां क्रन्दतामश्रुबिन्दवो यावतो भुवः पांसून् रेणून् गृह्णन्ति आर्द्रीकुर्वन्ति तावतोऽब्दान् संवत्सरान् निरङ्कुशाः शास्त्राज्ञोल्लङ्घिनः अत एव ब्रह्मदायापहारिणो राजानो राजकुल्याः राजकुलोद्भवा अमात्यभृत्यादयः तत्संबन्धिनश्च कुम्भीपाकेषु अवान्तरभेदभिन्नेषु नरकविशेषेषु प्रति नरकभेदं पच्यन्ते क्लिश्यन्ति। इदं च नरककालसंख्यार्थं रोदनाभावेऽपि नरकावश्यंभावात् ॥ ३७ ॥ ३८ ॥ स्वदत्तामिति ॥ यः स्वदत्तां वा परदत्तां वा ब्रह्मवृत्तिं हरेत् स षष्टिवर्षसहस्राणि विष्ठायां कृमिः जायते ॥ ३९ ॥

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ मे ब्रह्मधनं न भूयात् यद्ब्रह्मधनं गृध्वा अभिकाङ्क्ष्यापि किं पुनर्हृत्वा नराः अल्पमायुर्येषां ते क्षीणायुषो भवन्ति शत्रुभ्यः पराजिता भवन्ति राज्यादैश्वर्यात् च्युता भ्रष्टा भवन्ति मरणानन्तरं च नरके पतित्वा तच्छेषेण उद्वेजिनः परोद्वेगजनकाः अहयः सर्पा भवन्ति ॥ ४० ॥ विप्रमिति ॥ हे मामकाः मदीयाः कृतागसमपि घ्नन्तं ताडयन्तं बहु शपन्तं च विप्रं नैव द्रुह्यत किंतु नित्यशः नमस्कुरुत अन्यथा यूयं मामका नैव स्थ इति भावः ॥ ४१ ॥ यथेति ॥ अनुकालं त्रिसन्ध्यं यथाहं समाहितः विप्रान् प्रणमे नमस्करोमि कर्मकर्त्तरि लट् तङ् च । तथा यूयमपि नमत योऽन्यथा न प्रणमेत्स मे दण्डभाग् भविष्यति ॥ ४२ ॥ नेयं केवलमर्थवादबिभीषिकेत्याह—ब्राह्मणार्थ इति ॥ अपहृतो ब्राह्मणस्यार्थो धनं हर्तारमधो नरके पातयति यथा अजानन्तमप्येनं नृगं ब्राह्मणगौः टजभाव आर्षः । अधो नीचयोनावपातयत्तद्वत् जानन्तं पातयतीति कैमुत्येन सिद्धम् ॥ ४३ ॥ एवमिति ॥ सर्वलोकानां पावनः मुकुन्दो भगवान् द्वारकौकसः प्रत्येवं विश्राव्य निजमन्दिरं विवेश

न मे ब्रह्मधनं भूयाद्यद्गृध्वाऽल्पायुषो नृपाः ॥ पराजिताश्च्युता राज्याद्भवन्त्युद्वेजिनोऽहयः ॥ ४० ॥ विप्रं कृतागसमपि नैव द्रुह्यत मामकाः ॥ घ्नन्तं बहु शपन्तं वा नमस्कुरुत नित्यशः ॥ ४१ ॥ यथाहं प्रणमे विप्राननुकालं समाहितः ॥ तथा नमत यूयं च योऽन्यथा मे स दण्डभाक् ॥ ४२ ॥ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः ॥ अजानन्तमपि ह्येनं नृगं ब्राह्मणगौरिव ॥४३॥ एवं विश्राव्य भगवान्मुकुन्दो द्वारकौकसः ॥ पावनः सर्वलोकानां विवेश निजमन्दिरम् ॥४४॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे नृगोपाख्यानं नाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ श्रीशुक उवाच ॥ बलभद्रः कुरुश्रेष्ठ भगवान् रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कण्ठः प्रययौ नन्दगोकुलम् ॥ १ ॥ परिष्वक्तश्चिरोत्कण्ठैर्गोपैर्गोपीभिरेव च ॥ रामोऽभिवाद्य पितरावाशीर्भिरभिनन्दितः ॥ २ ॥

गीतोपदेशे अर्जुनवद्द्वारकौकस इत्युपलक्षणमात्रम् ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमचतुःषष्टितमे व्यधात् ॥ ६४ ॥ पञ्चषष्टितमे रामो व्रजगोपीररीरमत् ॥ मदाच्चकर्ष यमुनां तत्र श्लोका गुणाग्नयः ॥ उवाचेत्येकमर्द्धाढ्यास्त्रयस्त्रिंशदनुष्टुभः ॥ ६५ ॥ बलभद्र इति ॥ हे कुरुश्रेष्ठ सुहृदो नन्दादीन् बन्धून् द्रष्टुमिच्छुः भगवान् बलभद्र उत्कण्ठः प्रेमयुक्तः अथो रथमास्थितो नन्दगोकुलं प्रययौ अत्रैतावन्तं कालं सहैव स्वगमनेच्छया कृष्णेन नानुज्ञातः कृष्णोऽपि नन्दादिप्रेमबन्धात्तत्रैव तिष्ठेदिति शङ्कया वसुदेवादिभिर्नानुज्ञातः अधुना तु कृष्णेन स्वागमसंदेशगोपनाय एकाकी प्रस्थापित इति ॥ १ ॥ परिष्वक्त इति ॥ चिरोत्कण्ठैः बहुकालं दर्शनादीच्छायुक्तैर्गोपैर्गोपीभिश्च मातृवयस्याभिः परिष्वक्तः आलिङ्गितः रामोऽपि पितरौ यशोदानन्दौ अभिवाद्य प्रणम्य ताभ्यामाशीर्भिरभिनन्दितो बभूव ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदाह–चिरमिति॥हे जगदीश्वर हे दाशार्ह सानुजः अनुजेन कृष्णेन सहितस्त्वं नोऽस्मान् चिरं बहुकालं पाहि पालय इत्येवं शौर्यैश्वर्यादिसूचिकामाशिषमुक्त्वा तमङ्कमारोप्यालिङ्गनं च कृत्वा नेत्रजैर्जलैः आनन्दाश्रुभिः सिषिचतुः ॥३॥ गोपेति त्रयम् ॥ ततो गोपवृद्धांश्च विधिवदभिवन्द्येति शेषः । यविष्ठैर्न्यूनवयस्कैरभिवन्दितो बभूव । ततो द्वितीयदिने हास्यादिभिः आत्मनः स्वस्य वयःसख्यसंबन्धानुरूपं गोपालान् समुपेत्य उपविवेशेति शेषः । आदिपदेन आलिङ्गनादिसङ्ग्रहः । ततश्च विश्रान्तं गतश्रमम् अत एव सुखं यथा भवति तथासीनं रामं कमलपत्राक्षे कृष्णे तत्प्राप्त्यर्थं संन्यस्ताखिलराधसः परित्यक्तसर्वविषया इति तदेकचित्ताः परित उपागतास्तेनानामयं पृष्टाः गोपाः प्रेम्णा गद्गदाक्षरया गिरा स्वेषु यादवेष्वनामयं पप्रच्छुः ॥ ४ ॥ ५ ॥ ६ ॥ वृद्धाः पृच्छन्ति–कच्चिदिति ॥ हे राम नोऽस्माकं बान्धवाः वसुदेवादयः कुशलमासते कच्चित् । समानवयसः पृच्छन्ति हे राम दारैः सुतैश्चान्विताः यूयं नोऽस्माकं स्मरथ कच्चित् । विष्णुपुराणे तु विवाहात्प्रागेव कालयवनवधार्थं तौ मथुरामागतौ तद्वधे कृते कृष्णो द्वारकां

चिरं नः पाहि दाशार्ह सानुजो जगदीश्वरः ॥ इत्यारोप्याङ्कमालिङ्ग्य नेत्रैः सिषिचतुर्जलैः ॥ ३ ॥ गोपवृद्धांश्च विधिवद्यविष्ठैरभिवन्दितः ॥ यथावयो यथासख्यं यथासम्बन्धमात्मनः ॥ ४ ॥ समुपेत्याथ गोपालान्हास्यहस्तग्रहादिभिः ॥ विश्रान्तं सुखमासीनं पप्रच्छुः पर्युपागताः ॥ ५ ॥ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा ॥ कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ॥ ६ ॥ कच्चिन्नो बान्धवा राम सर्वे कुशलमासते ॥ कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः ॥७॥ दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सुहृज्जनाः ॥ निहत्य निर्जित्य रिपून्दिष्ट्या दुर्गं समाश्रिताः ॥ ८ ॥ गोप्यो हसन्त्यः पप्रच्छू रामसंदर्शनादृताः ॥ कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ॥ कच्चित्स्मरति वा बन्धून्पितरं मातरं च सः ॥९॥ अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति ॥ अपि वा स्मरतेऽस्माकमनुसेवां महाभुजः ॥१०॥मातरं पितरं भ्रातॄन्पतीन्पुत्रान्स्वसॄरपि॥यदर्थे जहिम दाशार्ह दुस्त्यजान्स्वजनान्प्रभो॥ता नः सद्यः परित्यज्य गतः संछिन्नसौहृदः॥११॥

गतो रामो व्रजमित्युक्तं तत्कल्पान्तरपरम् ॥ ७ ॥ दिष्ट्येति ॥ पापः कंसो हत इति दिष्ट्या सुहृज्जना वसुदेवादयः कंसकृतोपद्रवाद्विमुक्ता इत्यपि दिष्ट्या । रिपून् यवनजरासन्धादीन् निर्जित्य निहत्य च यूयं दुर्गं द्वारकां समाश्रितास्तत्र निवासं कृतवन्तः एतदपि दिष्ट्या ॥८॥ गोप्य इति सार्द्धम् ॥ रामस्य सम्यक् प्रेम्णा दर्शनेन आदृताः प्राप्तादराः अत एव प्रेमोन्मादेन विरहेऽपि हसन्त्यो गोप्यः कृष्णप्रेयस्यः एकान्ते गत्वा तं पप्रच्छुः । कच्चिदिति पुरस्त्रीजनवल्लभः कृष्णः सुखम् आस्ते कच्चित् । सः बन्धून् पितरं मातरं च स्मरति वा कच्चित् ॥ ९ ॥ अप्यसाविति ॥ महाभुजोऽसौ सकृदपि मातरं द्रष्टुम् आगमिष्यत्यपि किम् । अपि वा अस्माकम् अनुसेवां स्मरते किम् । तङ्गार्षः ॥ १० ॥ मातरमिति सार्द्धम् ॥ हे दाशार्ह हे प्रभो यदर्थं यस्य प्रीत्यर्थं वयं मातरं पितरं भ्रातॄन् पतीन् पुत्रान् स्वसॄरपि दुस्त्यजान् स्वान् जनान् जहिम त्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कवत्यः अनेन तासां प्रायो वन एव वासो गम्यते । अगृहाणामिति भ्रमरं प्रत्युक्तेश्च ताः नोऽस्मान् परित्यज्य संछिन्नं सौहृदं येन तादृशः सन् गतः ॥ ११ ॥ वयं तु तेन विश्वास्य वञ्चिता इत्याहुः—कथं न्विति अर्द्धम् ॥ न पारयेऽहं निरवद्यसंयुजामित्येतादृशं तद्भाषितं स्त्रीभिः सरलस्वभावाभिः अस्माभिः कथं न श्रद्धीयेत न विश्वस्येत अतस्तद्वचनविश्वासाद्वयं वञ्चिता इति भावः । वक्तीणां बहुत्वान्नानाविधानि वाक्यानि ॥ १२ ॥ कथं न्विति ॥ बुधाः निपुणाः पुरस्त्रियस्तु अनवस्थितात्मनश्चलसौहृदस्य कृतघ्नस्य वचः कथं नु गृह्णन्ति विश्वसन्ति अन्या आहुः गृह्णन्तीति । चित्राः नानाविधाः कथाः यस्य नानाकथाकथनकोविदस्य तस्य विविधकथाश्रवणेन अस्मदादिवत् विमोहिताः तथा सुन्दरं स्मितं यस्मिंस्तेनावलोकेन उच्छ्वसित उद्दीपितो यः स्मरः कामस्तेनातुराः विवशाः सत्यस्तद्वचो गृह्णन्ति । वैशब्दो निश्चये नात्र संदेहः ॥ १३ ॥ अपरा मिथ ऊचुः—किं न इति ॥ हे गोप्यः तस्य कृष्णस्य कथया वार्तया नोऽस्माकं किं फलं प्रत्युत तत्स्मृत्या दुःखमेव वर्धते । ननु कथारसाविष्टानां कथं कथां विना स्थितिः अतः आहुः अपराः कथाः कथयत । " गाढशोकप्रहाराणामचिन्तैव महौषधिः । " इति न्यायात् यदि तस्यास्माभिः विनापि कालो याति तर्हि तथैव तेन विना

कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितम् ॥ १२ ॥ कथं नु गृह्णन्त्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः ॥ गृह्णन्ति वै चित्रकथस्य सुन्दरस्मितावलोकोच्छ्वसितस्मरातुराः ॥ १३ ॥ किं नस्तत्कथया गोप्यः कथाः कथयतापराः ॥ यात्यस्माभिर्विना कालो यदि तस्य तथैव नः ॥ १४ ॥ इति प्रहसितं शौरेर्जल्पितं चारु वीक्षितम् ॥ गतिं प्रेमपरिष्वङ्गं स्मरन्त्यो रुरुदुः स्त्रियः ॥ १५ ॥ सङ्कर्षणस्ताः कृष्णस्य संदेशैर्हृदयङ्गमैः ॥ सान्त्वयामास भगवान्नानाऽनुनयकोविदः ॥ १६ ॥ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च ॥ रामः क्षपासु भगवान्गोपीनां रतिमावहन् ॥ १७ ॥

नोऽस्माकमपि कालो यात्येव परंतु तस्य सुखेनास्माकं तु दुःखेनैतावानेव विशेषः ॥ १४ ॥ इतीति ॥ इत्येवं वदन्त्यः शौरेः कृष्णस्य प्रहसितं जल्पितं चारु वीक्षितं गतिं प्रेम परिष्वङ्गं च स्मरन्त्यः ताः स्त्रियः रुरुदुः ॥ १५ ॥ संकर्षण इति ॥ भगवान्संकर्षणश्च नानाविधेष्वनुनयेषु सान्त्वनेषु कोविदो निपुणः अतो युक्तिवचनैः तथा हृदयङ्गमैर्मनोहरैर्विश्वासजनकैः कृष्णस्य सन्देशैश्च ताः गोपीः सान्त्वयामास । अत्र सन्देशप्रेषणेन भगवता रामे सख्यांश एव दर्शितो नत्वग्रजत्वांशस्तासां दशमीं दशां रक्षितुमिति ज्ञेयम् ॥ १६ ॥ द्वाविति ॥ भगवान् रामः क्षपासु रात्रिषु गोपीनां रतिमावहन् प्रीतिं कुर्वन् मधुं चैत्रं माधवं वैशाखं चेत्येतौ द्वौ मासौ तत्र व्रजे अवात्सीदित्यन्वयः शङ्खचूडवधसमये क्रीडायां निर्दिष्टाभिः कृष्णक्रीडितव्यतिरिक्ताभिः गोप्योन्तरेण भुजयोरिति प्राक् सूचिताभिः रामप्रेयसीभिरिति तोषिण्यादयः । कृष्णक्रीडासमयेऽतिबालाभिरनुत्पन्नाभिश्च सहात्र रामविक्रीडनमित्यभियुक्ता वदन्ति इति स्वामिपादाः । बलभद्रद्वारा भगवानेव तासां मनोरथं पूरितवानतो न कश्चन दोष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति केऽप्याहुः ॥ १७ ॥ पूर्णेति ॥ पूर्णचन्द्रस्य कलाभिर्मरीचिभिरामृष्टे उज्वले कुमुदश्चन्द्रस्तत्प्रियात्वात् कौमुदी कुमुद्वती । यद्वा । कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यन्ते तद् गन्धयुक्तवायुना सेविते यमुनाया उपवने श्रीरामघट्टतया प्रसिद्धे स्थले श्रीकृष्णरासस्थलस्यापि रामेण परिहृतत्वात् स्त्रीगणैर्वृतो रामो रेमे ॥ १८ ॥ वरुणेति ॥ वरुणेन रामसेवार्थं प्रेषिता वारुणी तस्य कन्या देवी मदिराधिष्ठात्री देवता सुधया सहोत्पन्ना लौकिकनिषिद्धमदिरा भिन्ना वृक्षकोटरात् पतन्ती धारारूपेण अधः स्रवन्ती स्वगन्धेन सर्वमेव तद्वनमध्यवासयत् सुगन्धीचकारेत्यर्थः ॥ १९ ॥ तमिति ॥ वायुनोपहृतं स्वघ्राणं प्रत्यानीतं तं मधुधाराया गन्धमाघ्राय तत्रागतो बलो रामः ललनाभिः स्त्रीभिः समं सह तां वारुणीं पपौ ॥ २० ॥ उपेति युग्मम् ॥ देवगन्धर्वादिभिरुपगीयमानं चरितं यस्य सः क्षीबो मत्तः मदेन विह्वले लोचने यस्य सः स्रग्वी पुष्पमालापरिवृताङ्ग एकमेव कुण्डलं यस्य सः मत्तः स्वभावतोऽपि मत्तसदृशः वैजयन्त्या नानारत्नरचितया आपादलम्बिन्या मालयालङ्कृत इति शेषः । स्वेद एव प्रालेयं हिमं तेन भूषितं

पूर्णचन्द्रकलामृष्टे कौमुदीगन्धवायुना ॥ यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः ॥१८॥ वरुणप्रेषिता देवी वारुणी वृक्षकोटरात् ॥ पतन्ती तद्वनं सर्वं स्वगन्धेनाध्यवासयत् ॥ १९ ॥ तं गन्धं मधुधाराया वायुनोपहृतं बलः ॥ आघ्रायोपगतस्तत्र ललनाभिः समं पपौ ॥ २० ॥ उपगीयमानचरितो वनिताभिर्हलायुधः ॥ वनेषु व्यचरत्क्षीबो मदविह्वललोचनः ॥ २१ ॥ स्रग्व्येककुण्डलो मत्तो वैजयन्त्या च मालया ॥ बिभ्रत्स्मितमुखाम्भोजं स्वेदप्रालेयभूषितम् ॥ २२ ॥ स आजुहाव यमुनां जलक्रीडार्थमीश्वरः ॥ निजं वाक्यमनादृत्य मत्त इत्यापगां बलः ॥ अनागतां हलाग्रेण कुपितो विचकर्ष ह ॥ २३ ॥ पापे त्वं मामवज्ञाय यन्नायासि मयाऽऽहुता ॥ नेष्ये त्वां लाङ्गलाग्रेण शतधा कामचारिणीम् ॥ २४ ॥ एवं निर्भर्त्सिता भीता यमुना यदुनन्दनम् ॥ उवाच चकिता वाचं पतिता पादयोर्नृप ॥ २५ ॥ राम राम महाबाहो न जाने तव विक्रमम् ॥ यस्यैकांशेन विधृता जगती जगतः पते ॥ २६ ॥

युक्तं स्मितयुक्तं च मुखाम्भोजं बिभ्रत् बिभ्राणः हलायुधः वनिताभिः सह वनेषु व्यचरत् ॥ २१ ॥ २२ ॥ स इति सार्द्धम् ॥ ईश्वरः सबलो जलक्रीडार्थं यमुनां स्थल आजुहाव आहूतवान् तदा च मत्तोऽयमिति मत्वा निजं वाक्यमनादृत्यानागतान्तामापगां नदीं कुपितः सन् हलाग्रेण विचकर्ष । यमुनेयं नदीरूपा समुद्रभार्या छायारूपा कालिन्द्या विभूतिरूपा ननु सैव प्रत्युवाचार्णववधूमिति हरिवंशोक्तेः।पूर्वमुक्ता तु भगवत्पत्नी देवतारूपा मुख्या कालिन्दी ॥२३॥ पापे इति ॥ हे पापे यत् यस्मात् मया आहुता आहूता ह्रस्वमार्षम् । त्वं मामवज्ञाय अनादृत्य न आयासि अतः कामचारिणीम् इच्छाचारिणीं त्वां लाङ्गलाग्रेण शतधा नेष्ये शतकुल्यावतीं करिष्ये इति निर्भर्त्सितवांश्चेति शेषः ॥ २४॥ एवमिति ॥ हे नृप इत्येवं निर्भर्त्सिता अत एव भीता चकिता प्रकम्पिता पादयोः पतिता यमुना यदुनन्दनं बलं प्रति वाचमुवाच ॥ २५ ॥ रामेति ॥ हे राम राम

CC-0. In Public Domain. Digitization by eGangotri

हे महाबाहो हे जगतः पते यस्य एकांशेन शेषाख्येन जगती पृथ्वी विधृता तस्यानन्तमूर्त्तेः तव विक्रमं प्रभावम् अहं न जाने विस्मृतवती ॥ २६ ॥ परमिति ॥ हे भगवन् हे विश्वात्मन् हे भक्तवत्सल भगवतस्तव परं भावं महासङ्कर्षणरूपं त्वत्स्वरूपमजानतीं प्रपन्नां मां मोक्तुमर्हसि ॥२७॥ तत इति ॥ ततः एवं याचितो भगवान् बलः यमुनां व्यमुञ्चत् ततः करेणुभिः इभराट् इव स्त्रीभिः सह जलं विजगाहे प्रविश्य चिक्रीड ॥२८॥ काममिति ॥ कामं यथेच्छं विहृत्योत्तीर्णाय जलाद्बहिर्निर्गताय रामाय असिते नीले अम्बरे महार्हाणि अनर्घ्याणि भूषणानि शुभाम् अम्लानश्रियं स्रजं च कान्तिर्लक्ष्मीमूर्तिविशेषः इयमेव द्वितीयव्यूहस्य सङ्कर्षणस्य स्त्रीति प्राञ्चः ददौ । तथा च वैष्णवे समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छतेति ॥ २९ ॥ वसित्वेति ॥ नीले वाससी वसित्वा परिधाय तथा काञ्चनीं स्वर्णमयीं मालामामुच्य कण्ठे निधाय तथान्यैरपि भूषणैः स्वलङ्कृतस्तथा चन्दनलिप्तो रामः माहेन्द्रो वारण ऐरावतो यथा करेणुभिः सह रमते तथा स्त्रीभिः सह वने रेमे ॥३०॥ अद्यापीति ॥ हे राजन् आकृष्टेन हलखातेन वर्त्मना मार्गेण स्यन्द-

परं भावं भगवतो भगवान्मामजानतीम् ॥ मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल ॥ २७ ॥ ततो व्यमुञ्चद्यमुनां याचितो भगवान्बलः ॥ विजगाहे जलं स्त्रीभिः करेणुभिरिवेभराट् ॥ २८ ॥ कामं विहृत्य सलिलादुत्तीर्णायासिताम्बरे ॥ भूषणानि महार्हाणि ददौ कान्तिः शुभां स्रजम् ॥ २९ ॥ वसित्वा वाससी नीले मालामामुच्य काञ्चनीम् ॥ रेजे स्वलंकृतो लिप्तो माहेन्द्र इव वारणः ॥ ३० ॥ अद्यापि दृश्यते राजन्यमुना कृष्टवर्त्मना ॥ बलस्यानन्तवीर्यस्य वीर्यं सूचयतीव हि ॥ ३१ ॥ एवं सर्वा निशा याता एकेव रमतो व्रजे ॥ रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषिताम् ॥ ३२ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे बलदेवविजये यमुनाकर्षणं नाम पञ्चषष्टितमोऽध्यायः ॥६५॥ श्रीशुक उवाच ॥ नन्दव्रजं गते रामे करूषाधिपतिर्नृप ॥ वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥ १ ॥ त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ॥ इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतम् ॥ २ ॥

माना यमुनाद्यापि अनन्तं वीर्यं यस्य तस्य बलस्य वीर्यं सूचयतीव दृश्यते॥३१॥एवमिति ॥ व्रजयोषितां माधुर्यैर्विलासैः आक्षिप्तं रिरंसाप्रवणं चित्तं यस्य तस्य अत एव एवं व्रजे रमतो रममाणस्य शतार्धः । रामस्य सर्वा निशा एकेव याता एकनिशावद्बभूवुः ॥ ३२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमपञ्चषष्टितमे व्यधात् ॥ ६५ ॥ षट्षष्टितमके मित्रयुक्तपौण्ड्रकमारणम् ॥ सुदक्षिणवधाद्यं च तत्र श्लोकास्त्रिचत्वार्यर्द्धयः ॥ द्वे उवाचेत्यङ्घ्रिपञ्चचत्वारिंशदनुष्टुभः ॥ ६६ ॥ नन्देति ॥ हे नृप रामे नन्दव्रजं गते सति अज्ञः करूषदेशाधिपतिः पौण्ड्रकं वासुदेवोहमिति मत्वा कृष्णं प्रति दूतं प्राहिणोत् प्रेषितवान् ॥ १ ॥ त्वमिति ॥ जगत्पालको भगवान् वासुदेवस्त्वमेवावतीर्ण इत्येवं बालैरज्ञैः प्रस्तोभितः स्तुत्या मुधैव प्रोत्साहितः आत्मानमच्युतं मेने मेनिषे प्रथम आर्षः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूतमिति ॥ यथा अबुधो बालः क्रीडायां बालैरेव कृतो नृपः नृपत्वेन कल्पितः आत्मानं नृपं मन्यते तथेति एवं मत्वा च स मन्दः मन्दबुद्धिर्द्वारकायां वर्तमानाय अव्यक्त-वर्त्मने तेनाविदितमाहात्म्याय कृष्णाय दूतं च प्राहिणोत् ॥ ३ ॥ दूत इति ॥ दूतस्तु द्वारकामेत्य आगत्य सुधर्मायां सभायामास्थितं प्रभुं कमलपत्राक्षं कृष्णं प्रति राज्ञः पौण्ड्रकस्य संदेशमब्रवीत् ॥ ४ ॥ वासुदेव इति ॥ भूतानामनुकम्पार्थं भगवान् वासुदेवोऽहमेवावतीर्णः स च एक एव न चापरः त्वं तु मिथ्यैव वासुदेव इत्यभिधां धत्से अतस्तां त्यज । वस्तुतः अपरः अश्रेष्ठः अहं भूतानामनुकम्पार्थं वासुदेवः न अवतीर्णः किन्त्वेकस्त्वमेवावतीर्णः अतस्तव या मयि मिथ्याभिधा तां त्यज त्याजय । “ त्याजयिष्येऽभिधानं मे ” इति प्रतिवचनात् ॥ ५ ॥ यानीति ॥ हे सात्वत यान्यस्मदसाधारणानि चिह्नानि शङ्खचक्रादीनि मौढ्यात्त्वं बिभर्षि तानि त्यक्त्वा मां शरणमेहि आगच्छ नो चेत् शरणं नाभ्येषि चेत् तर्हि ममाहवं युद्धं देहि युद्ध्यस्व । वस्तुतः मौढ्याद्धेतोर्यान्यस्मच्चिह्नानि अस्माभिः स्वस्मिन् लक्षणतया कल्पितानि चक्रादिरूपाणि

दूतं च प्राहिणोन्मन्दः कृष्णायाव्यक्तवर्त्मने ॥ द्वारकायां यथा बालो नृपो बालकृतोऽबुधः ॥ ३ ॥ दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुम् ॥ कृष्णं कमलपत्राक्षं राजसन्देशमब्रवीत् ॥ ४ ॥ वासुदेवोऽवतीर्णोऽहमेक एव न चापरः ॥ भूतानामनुकम्पार्थं त्वं तु मिथ्याऽभिधां त्यज ॥ ५ ॥ यानि त्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत ॥ त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाहवम् ॥६॥ श्रीशुक उवाच ॥ कत्थनं तदुपाकर्ण्य पौण्ड्र-कस्याल्पमेधसः ॥ उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ॥ ७ ॥ उवाच दूतं भगवान्परिहासकथामनु ॥ उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ॥ ८ ॥ मुखं तदापिधायाज्ञ कङ्कगृध्रवटैर्वृतः ॥ शयिष्यसे हतस्तत्र भविता शरणं शुनाम् ॥ ९ ॥ इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरत् ॥ कृष्णोऽपि रथमास्थाय काशीमुपजगाम ह ॥ १० ॥

त्वं नित्यमेव धारयसि अतस्तानि त्यक्त्वा मयि प्रक्षिप्य शरणं मुक्तिदत्त्वादाश्रयः सन् मामेहि स्वीकुरु । एवन्न करोषि चेन्ममाहवं देहि युद्धेन मोक्षं देहि ॥ ६ ॥ कत्थनमिति ॥ अल्पमेधसः मन्दभाग्यस्य असिजार्षः । पौण्ड्रकस्य तत् दूतोक्तं कत्थनं दुर्वचनमाकर्ण्य श्रुत्वा सभ्याः सभायां स्थिताः उग्रसेनादयस्तदा उच्चैर्जहसुः ॥ ७ ॥ उवाचेति ॥ परिहासकथाम् अनु अनन्तरं भगवान् कृष्णो दूतमुवाच । हे मूढ यैः काशिराजादिभिः सह त्वमेवं विकत्थसे तेष्वपि त्वयि च चिह्नानि चक्रादीनि उत्स्रक्ष्ये प्रक्षेप्स्यामि । यद्वा । यैः कृत्रिमैः धृतैश्चिह्नैस्त्वमेवं विकत्थसे आत्मानं श्लाघसे तानि त्वया धृतानि चिह्नानि उत्स्रक्ष्ये त्याजयिष्यामि ॥ ८ ॥ मुखमिति ॥ हे अज्ञ येन मुखेनैवं विकत्थसे तन्मुखमपिधाय व्यादाय आच्छाद्य वा कङ्कादिभिः पक्षिविशेषैर्वृतो यदा हतः शयिष्यसे तत्र रणभूमौ भवान् शुनां शरणं भविता भविष्यति । मया हतं त्वां श्वसृगालादयः खादिष्यन्तीति भावः । वटोऽप्यत्र पक्षिविशेष एव ॥ ९ ॥ इतीति ॥ इत्येवं तत् भगवदुक्तमाक्षेपवचनं सर्वं दूतः स्वस्वामिने पौण्ड्रकायाहरत् आगत्य निवेदितवान् । कृष्णः

Nepal Sanskrit University

CC-0. In Public Domain. Digitization by eGangotri

अपि रथमास्थाय काशीमुपजगाम । तत्समीपे पौण्ड्रकस्य तदा मित्रपुरे काश्यामेवावस्थानात् काशीकरूषदेशयोः प्रायो नैकट्याद्वा ॥ १० ॥ पौण्ड्रक इति ॥ महारथः पौण्ड्रकोऽपि तस्य कृष्णस्य युद्धोद्योगमुपलभ्य दृष्ट्वा अक्षौहिणीभ्यां संयुक्तो द्रुतं शीघ्रमेव पुरान्निश्चक्राम ॥ ११ ॥ तस्येति त्रयम् ॥ हे नृप तस्य पौण्ड्रकस्य मित्रं काशिपतिः पार्ष्णिग्राहः पृष्ठतो रक्षकः सहायभूतः संस्तिसृभिरक्षौहिणीभिः सह अन्वयात् अनुजगाम तदा हरिः शङ्खादिविशिष्टं पौण्ड्रकं ददर्श । अरि अरयुक्तं चक्रम् अमूल्यः अनर्घ्यो मौलिरन्यानि चाभरणानि यस्य तं स्पष्टं शेषम् । अत्र श्रीवत्सगरुडादीनि कृत्रिमाणि ज्ञेयानि ॥ १२ ॥ १३ ॥ १४ ॥ दृष्ट्वेति ॥ कृत्रिमम् आत्मनः स्वस्य तुल्यं वेषमास्थितं स्वीकृतवन्तं यथा रङ्गे नृत्यस्थाने राजादिवेषधारिणं नटमिति एवंविधं तं पौण्ड्रकं दृष्ट्वा हरिर्भृशं विजहास ॥ १५ ॥ शूलैरिति ॥ ततश्चारयः शत्रवः शूलादिभिः

पौण्ड्रकोऽपि तदुद्योगमुपलभ्य महारथः ॥ अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतम् ॥ ११ ॥ तस्य काशिपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप ॥ अक्षौहिणीभिस्तिसृभिरपश्यत्पौण्ड्रकं हरिः ॥ १२ ॥ शङ्खार्यसिगदाशार्ङ्गश्रीवत्साद्युपलक्षितम् ॥ बिभ्राणं कौस्तुभमणिं वनमालाविभूषितम् ॥ १३ ॥ कौशेयवाससी पीते वसानं गरुडध्वजम् ॥ अमूल्यमौल्याभरणं स्फुरन्मकरकुण्डलम् ॥ १४ ॥ दृष्ट्वा तमात्मनस्तुल्यवेषं कृत्रिममास्थितम् ॥ यथा नटं रङ्गगतं विजहास भृशं हरिः ॥ १५ ॥ शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः ॥ असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिम् ॥ १६ ॥ कृष्णस्तु तत्पौण्ड्रककाशिराजयोर्बलं गजस्यन्दनवाजिपत्तिमत् ॥ गदासिचक्रेषुभिरार्दयद्भृशं यथा युगान्ते हुतभुक्पृथक्प्रजाः ॥ १७ ॥ आयोधनं तद्रथवाजिकुञ्जरद्विपत्खरोष्ट्रैररिणावखण्डितैः ॥ बभौ चितं मोदवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणम् ॥ १८ ॥ अथाह पौण्ड्रकं शौरिर्भो भोः पौण्ड्रक यद्भवान् ॥ दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ॥ १९ ॥ त्याजयिष्येऽभिधानं मे यत्त्वयाऽज्ञ मृषा धृतम् ॥ व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगम् ॥ २० ॥

शस्त्रैर्हरिं प्राहरन् ॥ १६ ॥ कृष्ण इति ॥ कृष्णस्तु गजस्यन्दनवाजिपत्तिरूपचतुरङ्गयुक्तं पौण्ड्रककाशिराजयोस्तद्बलं युगान्ते प्रलयसमये हुतभुक् अग्निः पृथक् प्रजाः जरायुजादिचतुर्विधभूतग्रामान् यथा नाशयति तथा गदासिचक्रेषुभिः भृशमार्दयत् अपीडयत् ॥ १७ ॥ आयोधनमिति ॥ अरिणा चक्रेणावखण्डितैरथादिभिश्चितं व्याप्तं तदायोधनं युद्धस्थलं कल्पाते उल्बणं भयंकरं भूतपतेः रुद्रस्य आक्रीडनं क्रीडास्थानमिव मनस्विनां शूराणां मोदवहं हर्षकरं बभौ ॥ १८ ॥ अथेति ॥ अथ शौरिः कृष्णः पौण्ड्रकमाह स्म । भो भोः पौण्ड्रक दूतमुखेन यान्यस्मदस्त्राणि बिभर्षि तानि त्यजेति यद्भवान् आह स्म तान्यस्त्राणि ते तुभ्यं त्वद्वधार्थमुत्सृजामि प्रक्षिपामि ॥ १९ ॥ त्याजयिष्य इति ॥ हे अज्ञ वासुदेव इति यन्ममाभिधानं मृषैव त्वया धृतं तत्त्याजयिष्ये । अथ यदि भीतः सन् संयुगं नेच्छामि तर्हि अद्य ते शरणं व्रजामि ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य सः हरेः स्वरूपं समानं रूपं चतुर्भुजत्वादि विभ्राणस्तन्मयोऽभवत् ॥ २४ ॥ शिर इति ॥ काश्यां राजद्वारे सकुण्डलं शिरः पतितमालोक्य जनाः प्रथमं किमिदमिति
पश्चात्सकुण्डलत्वात् शिर इति ततः कस्येदं वक्त्रं मुखमिति संशिश्यिरे संशयं प्रापुः । संशयिरे इति बहुषु पुस्तकेषु दृश्यमानः पाठस्त्वार्षः ॥२५॥ राज्ञ इति ॥ काशिपतेः राज्ञ

इति क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौण्ड्रकम् ॥ शिरोऽवृश्चद्रथाङ्गेन वज्रेणेन्द्रो यथा गिरेः ॥ २१ ॥ तथा काशिपतेः कायाच्छिर उत्कृत्य पत्त्रिभिः ॥ न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः ॥ २२ ॥ एवं मत्सरिणं हत्वा पौण्ड्रकं ससखं हरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ २३ ॥ स नित्यं भगवद्ध्यानप्रध्वस्ताखिलबन्धनः ॥ बिभ्राणश्च हरे राजन्स्वरूपं तन्मयोऽभवत् ॥ २४ ॥ शिरः पतितमालोक्य राजद्वारे सकुण्डलम् ॥ किमिदं कस्य वा वक्त्रमिति संशयिरे जनाः ॥ २५ ॥ राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबान्धवाः ॥ पौराश्च हा हता राजन्नाथ नाथेति प्रारुदन् ॥ २६ ॥ सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहन्तारं यास्याम्यपचितिं पितुः ॥ २७ ॥ इत्यात्मनाऽभिसंधाय सोपाध्यायो महेश्वरम् ॥ सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ २८ ॥ प्रीतो विमुक्तो भगवांस्तस्मै वरमदाद्भवः ॥ पितृहन्तृवधोपायं स वव्रे वरमीप्सितम् ॥ २९ ॥

इतीति ॥ इत्येवं वचनैः पौण्ड्रकं क्षिप्त्वा तिरस्कृत्य शितैर्बाणैः विरथीकृत्य च यथेन्द्रो वज्रेण गिरेः शृङ्गं वृश्चति तथा रथाङ्गेन चक्रेण तस्य शिरोऽवृश्चत् चिच्छेद ॥ २१ ॥ तथेति ॥ तथा पौण्ड्रकशिरोवत् तन्मित्रस्य काशिपतेः शिरः पत्त्रिभिर्बाणैः कायादुत्कृत्य च्छित्त्वा काशिपुर्यां न्यपातयत् । यथा अनिलो वायुः पद्मकोशमुत्कृत्य पातयति तथेति ॥ २२ ॥ एवमिति ॥ ससखं काशिराजसहितं बहुव्रीहौ टजार्षः । मत्सरिणं स्वोत्कर्षासहं शत्रुं पौण्ड्रकं हत्वा सिद्धैर्गीयमाना कथैवामृतं यस्य स हरिर्द्वारकामाविशत् आगच्छत् ॥ २३ ॥ स इति ॥ हे राजन् स पौण्ड्रकः नित्यं वैरेणापि भगवतः कृष्णस्य ध्यानेन प्रध्वस्तान्यखिलानि बन्धनानि कर्मवासनारूपाणि अविद्यादीनि यस्य सः हरेः स्वरूपं समानं रूपं चतुर्भुजत्वादि बिभ्राणस्तन्मयोऽभवत् ॥ २४ ॥ शिर इति ॥ काश्यां राजद्वारे सकुण्डलं शिरः पतितमालोक्य जनाः प्रथमं किमिदमिति पश्चात्सकुण्डलत्वात् शिर इति ततः कस्येदं वक्त्रं मुखमिति संशिश्यिरे संशयं प्रापुः । संशयिरे इति बहुषु पुस्तकेषु दृश्यमानः पाठस्त्वार्षः ॥२५॥ राज्ञ इति ॥ काशिपतेः राज्ञ एवेदं शिर इति ज्ञात्वा निश्चित्य तस्य महिष्यो भार्याः पुत्राः बान्धवाश्च हे राजन् हे नाथ नाथ त्वयि हते सति त्वदनुयायिनो वयं सर्व एव हताः स्मेति वदन्तः प्रारुदन् ॥२६॥ तत्पुत्रस्ततोऽपि दुर्बुद्धिरित्याह—सुदक्षिण इति ॥ तस्य काशिराजस्य सुदक्षिणो नाम सुतः आसीत् स च पितुः संस्थाविधिम् उत्तरक्रियां कृत्वा स्वपितृहन्तारं निहत्य पितुरपचितिम् ऋणापनयात्मिकां निष्कृतिं यास्यामि ॥ २७ ॥ इतीति ॥ इत्येवमात्मनाभिसन्धाय बुद्ध्या निश्चित्य सोपाध्यायः उपाध्यायेन सहितः सुदक्षिणः सुष्ठु दक्षिणा यस्य सः अत्युदारः परमेण समाधिना एकाग्रेण चित्तेन महेश्वरं रुद्रमर्चयामास ॥ २८ ॥ प्रीत इति ॥ अविमुक्तः अविमुक्ताख्यकाशीक्षेत्राधीशः भगवान्भवः प्रीतस्तस्मै वरमदात् वरं गृहाणेत्युक्तवान् । सं च सुदक्षिणः स्वेप्सितं पितृहन्तुर्वधोपायं वव्रे नतु वधमिति कुम्भकर्णवद्बुद्धिभ्रंशो व्यज्यते । पूर्वं हि महादेवो ब्रह्मणः पञ्चमं शिरश्छित्त्वा

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्महत्यया व्याप्तः सर्वत्र भ्रमन् बदर्याश्रमे नारायणोपदेशात् अत्र काश्यामागतस्तदा तद्धस्ते लग्नं ब्रह्मशिरः पतितं हत्यया च विमुक्तो जातः ततःप्रभृति काशीस्थं तत्क्षेत्रं शिवः कदापि न मुञ्चति अतस्तत्क्षेत्रम् अविमुक्तं नाम अभूत् सप्तम्यन्तपाठे अविमुक्ते क्षेत्रे ॥ २९ ॥ दक्षिणेति सार्द्धम् ॥ एवं वृतो रुद्र आह स्म । ब्राह्मणैः समं सह अभिचारविधानेन शत्रुमारणोक्तप्रकारेण ऋत्विजं "यज्ञस्य देवमृत्विजम्" इति श्रुतेः ऋत्विजमिव स्वनियोगकारिणं दक्षिणाग्निं त्वं परिचर आराधय स चाग्निः अब्रह्मण्ये प्रयोजितश्चेत् मदनुचरैः प्रमथैर्वृतः तव सङ्कल्पं साधयिष्यति । ब्रह्मण्ये कृष्णे प्रयोजितस्तु विपरीतो भविष्यति इति श्रीरुद्राशयः । वैपरीत्यमेवातो जातं सुदक्षिणस्तु श्रीकृष्णे ब्रह्मण्यत्वं न बुद्धवान् ॥ ३० ॥ इतीति अर्द्धम् ॥ इति आदिष्टः कृष्णाय अभिचरन् जुह्वन् व्रती गृहीताहारादिनियमः सः तथा चक्रे ॥ ३१ ॥ तत इति त्रयम् ॥ ततः कुण्डात् अतिभीषणः तप्तताम्रमिव शिखाः श्मश्रूणि च यस्य सः अङ्गाराणाम् उद्गारिणी लोचने यस्य दंष्ट्राभिरुग्रैः भ्रुकुटीदण्डैश्च कठोरं क्रूरमास्यं यस्य सः स्वजिह्वया

दक्षिणाग्निं परिचर ब्राह्मणैः सममृत्विजम् ॥ अभिचारविधानेन स चाग्निः प्रमथैर्वृतः ॥ साधयिष्यति सङ्कल्पमब्रह्मण्ये प्रयोजितः ॥ ३० ॥ इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन्व्रती ॥ ३१ ॥ ततोऽग्निरुत्थितः कुण्डान्मूर्तिमानतिभीषणः ॥ तप्तताम्रशिखाश्मश्रुरङ्गारोद्गारिलोचनः ॥ ३२ ॥ दंष्ट्रोग्रभ्रुकुटीदण्डकठोरास्यः स्वजिह्वया ॥ आलिहन्सृक्किणी नग्नो विधुन्वंस्त्रिशिखं ज्वलन् ॥ ३३ ॥ पद्भ्यां तालप्रमाणाभ्यां कम्पयन्नवनीतलम् ॥ सोऽभ्यधावद्वृतो भूतैर्द्वारकां प्रदहन्दिशः ॥ ३४ ॥ तमाभिचारदहनमायान्तं द्वारकौकसः ॥ विलोक्य तत्रसुः सर्वे वनदाहे मृगा यथा ॥ ३५ ॥ अक्षैः सभायां क्रीडन्तं भगवन्तं भयातुराः ॥ त्राहि त्राहि त्रिलोकेश वह्नेः प्रदहतः पुरम् ॥ ३६ ॥ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसम् ॥ शरण्यः संप्रहस्याह मा भैष्टेत्यविताऽस्म्यहम् ॥ ३७ ॥

सृक्किणी उत्तरोर्ध्वोष्ठप्रान्तौ आलिहन् नग्नः ज्वलन् त्रिशिखं त्रिशूलं विधुन्वन् मूर्तिमान् अग्निः उत्थितः स चाग्निर्भूतैः प्रमथैर्वृतः सर्वतोदिशः प्रदहन् तालप्रमाणाभ्यां पद्भ्यामवनीतलं कम्पयन् द्वारकामभिमुखीकृत्याधावत् ॥ ३२ ॥ ३३ ॥ ३४ ॥ तमिति ॥ सर्वे द्वारकौकसः तम् आभिचारं दहनम् आयान्तं विलोक्य तत्रसुः । यथा वनदाहे मृगास्त्रसन्ति तथा ॥ ३५ ॥ अक्षैरिति ॥ ततश्च भयातुरा जनाः अक्षैः सभायां क्रीडन्तं भगवन्तं प्रति हे त्रिलोकेश पुरं द्वारकां प्रदहतः वह्नेः सकाशात् अस्मान्त्राहि त्राहि इत्यवदन् । तङभाव आर्षः । बहुलं छन्दसि इत्यदादिभिन्नेऽपि शप्लुक् ऐकारस्याकारः ॥ ३६ ॥ श्रुत्वेति ॥ तत् जनानां वैक्लव्यं व्याकुलतां दृष्ट्वा तथा स्वानां भक्तानां तेषां साध्वसं भयं च दृष्ट्वा शरण्यः समर्थत्वात् रक्षको भगवान् प्रहस्य मा भैष्ट भयं मा कुरुत । अहम् अवितास्मि रक्षिष्यामीत्याह स्म ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्येति ॥ यतो विभुः सर्वत्र व्यापकः अतः स्थावरजङ्गमात्मकस्य जगतोन्तर्बहिः साक्षी साक्षाद्द्रष्टा अत एव तां माहेश्वरीं कृत्यां विज्ञाय तस्य कृत्या नलस्य विघातार्थं स्वपार्श्वस्थं चक्रं सुदर्शनमादिशत् ॥ ३८ ॥ तदिति ॥ सूर्याणां कोटिः प्रतिमा तुल्या यस्य तत् अत एव प्रलयानलस्येवातिशयेन ज्वलन्ती प्रभा यस्य तत् अत एव जाज्वल्यमानम् अत एव स्वतेजसा खमन्तरिक्षं ककुभो दिशः अथ रोदसी द्यावापृथिव्यौ च प्रकाशयत् इति शेषः । यद्वा स्वतेजसा खादीन् प्रति जाज्वल्यमानं तत् मुकुन्दस्यास्त्रं सुदर्शनं चक्रं कर्तृ अग्निमार्दयत् पीडयामास ॥ ३९ ॥ कृत्येति ॥ हे नृप स कृत्यानलः रथाङ्गपाणेः चक्रधरस्यास्त्रौजसा चक्रतेजसा प्रतिहतः अत एव स भग्नमुखः ततो निवृत्तः वाराणसीं परिसमेत्य ऋत्विग्भिरन्यैश्च जनैः सहितं तं सुदक्षिणं सम्यगदहत् यतः सः अभिचारः कृत्यानलः स्वेन प्रयोक्त्रा एव कृतः अतस्तन्नाशहेतुरेवाभूत् ॥ ४० ॥ चक्रमिति ॥ तदनु प्रविष्टं तं कृत्यानलमनुसृत्य प्रविष्टं विष्णोश्चक्रम् अट्टादिभिः सहितां तथा गोपुरैः सहितैरट्टालकादिभिश्च संकुलं तथा कोशहस्त्य-

सर्वस्यान्तर्बहिः साक्षी कृत्यां माहेश्वरीं विभुः ॥ विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥ ३८ ॥ तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभम् ॥ स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुन्दास्त्रमथाग्निमार्दयत् ॥३९॥ कृत्यानलः प्रतिहतः स रथाङ्गपाणेरस्त्रौजसा स नृप भग्नमुखो निवृत्तः ॥ वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोऽभिचारः॥४०॥चक्रं च विष्णोस्तदनु प्रविष्टं वाराणसीं साट्टसभालयापणाम् ॥ सगोपुराट्टालककोष्ठसङ्कुलां सकोशहस्त्यश्वरथान्नशालाम् ॥ ४१ ॥ दग्ध्वा वाराणसीं सर्वां विष्णोश्चक्रं सुदर्शनम् ॥ भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः ॥ ४२ ॥ य एनं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमम् ॥ समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते ॥ ४३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे पौण्ड्रकादिवधो नाम षट्षष्टितमोऽध्यायः ॥६६॥ राजोवाच ॥ भूयोऽहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः ॥ अनन्तस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः ॥ १ ॥

श्वरथान्नशालाभिःसहितां वाराणसीं समदहदित्यनुषङ्गः । अट्टा मञ्चाः सभाः प्रसिद्धाः आलया गृहाश्च आपणाः हट्टा गोपुराणि पुरद्वाराणि अट्टालकाः उपरितनप्रदेशाः कोष्ठानि अन्नसंग्रहस्थानानि ॥ ४१ ॥ दग्ध्वेति ॥ सुदर्शनं चक्रं सर्वां वाराणसीं पुरीं दग्ध्वा भूयः अक्लिष्टकर्मणः उदारचेष्टितस्य कृष्णस्य पार्श्वमुपातिष्ठत् ॥ ४२ ॥ य इति ॥ यः पुमान् एतदुत्तमश्लोकस्य कृष्णस्य चेष्टितं विक्रममिति च पाठः समाहितः एकाग्रचित्तः सन्मर्त्यान् श्रावयेत् स्वयं वा शृणुयात् स सर्वपापैः प्रमुच्यते ॥ ४३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे षड्युक्षष्टितमे व्यधात् ॥ ६६ ॥ सप्तषष्टितमे स्त्रीभिः क्रीडन् रैवतके बलः ॥ अवधीद्द्विविदं तत्र श्लोका विंशतिरर्ष्टयुक् ॥ उवाचेति वचोद्वंद्वं श्लोकतुल्या अनुष्टुभः ॥ ६७ ॥ भूय इति ॥ अद्भुतकर्मणः नद्याकर्षणादिकृतः अनन्तस्याप्रमेयस्य रामस्य चरितं भूयः श्रोतुमिच्छामि अतो विभुः रामो

CC-0. In Public Domain. Digitization by eGangotri

यदन्यत्कर्म कृतवान् तद् ब्रूहीति शेषः ॥ १ ॥ नरकस्येति ॥ द्विविदो नाम कश्चिद्वानरः स च नरकस्य भौमस्य सखा इति वैरहेतुः सुग्रीवस्य सचिव इति मन्त्रबलं मैन्दस्य भ्राता इति रामायणे प्रसिद्ध्या पराक्रमोत्कर्षः स्वयं वीर्यवांश्चाभूत् । श्रीरामावरणपूजायामावरणदेवत्वान्नित्यसिद्धस्यास्य जयविजयवदेकेन प्रकाशेनैव भ्रंशः नतु स्वरूपेण—नरकदुः सङ्गदोषात् तस्यापि कारणं लक्ष्मणे पूर्वमनादरः कल्प्य इति भागवताः ॥२॥ सख्युरिति ॥ स द्विविदो वानरः मृतस्य सख्युर्नरकस्यापचितिम् आनृण्यं कुर्वन् राष्ट्रस्य देशस्य विप्लवो नाशो यथा भवति तथा वह्निमुत्सृजन् प्रक्षिपन् पुरग्रामादीनदहत् ॥३॥ क्वचिदिति ॥ क्वचित्कदाचिन्स द्विविदः शैलानुत्पाट्य तैः शैलैः देशान् समचूर्णयत् आनर्तान् द्वारकासमीपदेशान् एत्य आगत्य तु सुतरां समचूर्णयत् । यत्र येषु आनर्त्तेषु मित्रहा तन्मित्रनरकासुरहन्ता हरिरास्त इति ॥ ४ ॥ क्वचिदिति ॥ नागानां गजानाम् अयुतस्य दशसहस्रस्य प्राणो बलं यस्य सः क्वचित्समुद्रमध्यस्थो दोर्भ्यां बाहुभ्यां तत्सामुद्रं जलमृद्धृत्योत्क्षिप्य वेलासमुद्रजलं तत्कूलभवान् तत्र भव इत्यण् । संज्ञापूर्वकत्वा-

॥श्रीशुक उवाच॥नरकस्य सखा कश्चिद्द्विविदो नाम वानरः ॥ सुग्रीवसचिवः सोऽथ भ्राता मैन्दस्य वीर्यवान्॥२॥सख्युः सोऽपचितिं कुर्वन्वानरो राष्ट्रविप्लवम्॥पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन्॥३॥क्वचित् स शैलानुत्पाट्य तैर्देशान्समचूर्णयत्॥आनर्तान्सुतरामेव यत्रास्ते मित्रहा हरिः॥४॥ क्वचित् समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम् ॥ देशान्नागायुतप्राणो वेलाकूलानमज्जयत् ॥५॥ आश्रमानृषिमुख्यानां कृत्वा भग्नवनस्पतीन्॥ अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः॥६॥पुरुषान्योषितो दृप्तः क्ष्माभृद्द्रोणीगुहासु सः ॥ निक्षिप्य चाप्यधाच्छैलैः पेशस्कारीव कीटकम्॥७॥ एवं देशान्विप्रकुर्वन्दूषयंश्च कुलस्त्रियः ॥ श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥ ८ ॥ तत्रापश्यद्यदुपतिं रामं पुष्करमालिनम् ॥ सुदर्शनीयसर्वाङ्गं ललनायूथमध्यगम् ॥ ९ ॥ गायन्तं वारुणीं पीत्वा मदविह्वललोचनम् ॥ विभ्राजमानं वपुषा प्रभिन्नमिव वारणम् ॥ १० ॥

न्न वृद्धिः । यद्वाऽत्र लक्षणा पुंस्त्वं त्वार्षम् । कूलशब्दादर्श आद्यजित्यन्ये । कूले इत्यपि पाठः । देशान् संन्यमज्जयत् ॥ ५ ॥ आश्रमानिति ॥ खलः सः ऋषिमुख्यानामाश्रमान् भग्ना वनस्पतयो वृक्षा येषां ते तथाभूतान् कृत्वा शकृता मलेन मूत्रैश्च तेषां वैतानिकान् यज्ञियान् आहवनीयादीन् अग्नीनदूषयत् अग्निषु शकृन्मूत्राण्युत्सृष्टवान्॥६॥ पुरुषानिति ॥ स दुष्टो द्विविदः दृप्त इत्यपि पाठः । क्ष्माभृतः पर्वतस्य द्रोणीषु सन्धिषु गुहासु च पुरुषान् योषितश्च निक्षिप्य शैलैः शृङ्गैरप्यधात् पिहितवान् । यथा पेशस्कारी भ्रमरः कीटकमपि दधाति तथा ॥ ७ ॥ एवमिति ॥ एवं देशान् विप्रकुर्वन् पीडयन् तत्र तत्र च कुलस्त्रीर्दूषयन् सुललितं मधुरं बलेन क्रियमाणं गीतं श्रुत्वा रैवतं पर्वतं ययौ ॥ ८ ॥ तत्रेति युग्मम् ॥ तत्र रैवतकोपवने यदुपतिं यादवानां पालकं पुष्करं कमलं तस्य माला अस्यास्तीति तथा तं सुदर्शनीयानि सर्वाण्यङ्गानि यस्य तं ललनायूथस्य मध्यगं वारुणीं मदिरां पीत्वा गायन्तं मदिरामदेन विह्वले घूर्णिते लोचने यस्य तं प्रभिन्नं मत्तं वारणं गजमिव वपुषा विभ्राजमानं राममपश्यत् ॥ ९ ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्ट इति ॥ स दुष्टः शाखामृगो वानरः शाखामारूढः सन् द्रुमान् कम्पयन् तेनात्मानं संप्रदर्शयन् किलकिलेति वानरजातिशब्दं चक्रे ॥ ११ ॥ तस्येति ॥ तस्य द्विविदस्य धाष्टर्यं दृष्ट्वा जात्या स्वभावेनैव चापलं यासां ताः हास्यं प्रियं यासां ता बलदेवस्य परिग्रहो यासां ता अतो निर्भयाः तरुण्यो विजहसुः ॥१२॥ ता इति ॥ स द्विविदः रामस्य निरीक्षतः पश्यत एव सतः अनादराधिक्ये भावलक्षणे षष्ठी शता आर्षः । तासां स्त्रीणां स्वगुदं दर्शयन् भ्रूविक्षेपैः संमुखागमनादिभिः आदिशब्देन दन्तप्रदर्शनादिभिश्च ताः स्त्रीर्हेलयामास अवजज्ञे ॥ १३ ॥ तमिति सार्द्धम् ॥ प्रहरतां वरः बलश्च क्रुद्धस्तं वानरं ग्राव्णा पाषाणेन प्राहरत् । स च धूर्तः कपिः हसन् बलं कोपयन् ग्रावाणं वञ्चयित्वा मदिराकलशं च गृहीत्वा तं बलं हेलयामास अवमतवान् ॥ १४ ॥ निर्भिद्येति ॥ ततश्च दुष्टः बलवान् मदोद्धतः सः मदिराकलशं निर्भिद्य योषितां वासांसि शय्योपरिस्थितानि आस्फालयत् आकृष्य पातितवान् । एवं बलं कदर्थीकृत्य अगणयित्वा विप्रचक्रे तदपकारं कृतवान् ॥१५॥ तमिति ॥ तस्य कपेः तमविनयं दौष्टयं दृष्ट्वा तेनोपद्रुतान्

दुष्टः शाखामृगः शाखामारूढः कम्पयन्द्रुमान् ॥ चक्रे किलकिलाशब्दमात्मानं संप्रदर्शयन्॥११॥तस्य धाष्टर्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः ॥ हास्यप्रिया विजहसुर्बलदेवपरिग्रहाः ॥ १२ ॥ ता हेलयामास कपिर्भ्रूक्षेपैः सम्मुखादिभिः ॥ दर्शयन्स्वगुदं तासां रामस्य च निरीक्षतः ॥१३॥तं ग्राव्णा प्राहरत्क्रुद्धो बलः प्रहरतां वरः ॥ स वञ्चयित्वा ग्रावाणं मदिराकलशं कपिः॥गृहीत्वा हेलयामास धूर्तस्तं कोपयन्हसन्॥१४॥ निर्भिद्य कलशं धृष्टो वासांस्यास्फालयद्बलम् ॥ कदर्थीकृत्य बलवान्विप्रचक्रे मदोद्धतः ॥ १५ ॥ तं तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रुतान् ॥ क्रुद्धो मुशलमादत्त हलं चारिजिघांसया ॥१६॥ द्विविदोऽपि महावीर्यः शालमुद्यम्य पाणिना ॥ अभ्येत्य तरसा तेन बलं मूर्धन्यताडयत्॥१७॥ तं तु सङ्कर्षणो मूर्ध्नि पतन्तमचलो यथा ॥ प्रतिजग्राह भगवान्सुनन्देनाहनच्च तम् ॥ १८ ॥ मुसलाहतमस्तिष्को विरेजे रक्तधारया ॥ गिरिर्यथा गैरिकया प्रहारं नानुचिन्तयन् ॥ १९ ॥ पुनरन्यं समुत्क्षिप्य कृत्वा निष्पत्रमोजसा ॥ तेनाहनत्सुसंक्रुद्धस्तं बलः शतधाऽच्छिनत् ॥ २० ॥

देशांश्च श्रुत्वा क्रुद्धो रामः अरेस्तस्य जिघांसया हलं मुसलं चादत्त ॥१६॥ द्विविद इति ॥ महावीर्यो द्विविदोऽपि पाणिना शालवृक्षमुत्पाट्य उद्यम्येति च पाठः । तरसाभ्येत्य वेगेनागत्य बलं मूर्धन्यताडयत् ॥ १७ ॥ तमिति ॥ स्वमूर्धनि पतन्तं शालं भगवान् संकर्षणः प्रतिजग्राह हस्तेन गृहीतवान् । अचलो यथेति पर्वतवत्तत्प्रहारवेगात् नाचलदित्यर्थः । तं द्विविदं च सुनन्दाख्येन मुसलेनाहनत् शब्लुगभाव आर्षः ॥ १८ ॥ मुसलेति युग्मम् ॥ मुसलेनाहतो मस्तिष्को मस्तकावयवविशेषो यस्य सः अत एव गैरिकया गैरिकधारया यथा गिरिः राजते तथा रक्तधारया रेजे । ततश्च तत्प्रहारं नानुचिन्तयन् सुसंक्रुद्धः पुनरन्यं शालं समुत्क्षिप्य उत्पाट्य तं च निष्पत्रं कृत्वा तेन शालेन ओजसा वेगेन तं बलमहनत् । तं प्रति चिक्षेप शब्लुगभाव आर्षः । तं च शालं बलः शतधाच्छिनत् ॥ १९ ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इत्यर्थम् ॥ ततो द्विविदोऽन्येन शालेन रुषा क्रोधेन तं बलं जघ्ने तडार्षः । तमपि शालं स बलः शतधाच्छिनत् कृतवानित्यर्थः ॥ २१ ॥ एवमिति ॥ एवं भगवता सह युद्धयन् शता आर्षः । प्रयुक्ते प्रयुक्ते अस्त्रे वृक्षे भग्ने भग्ने सति सर्वतो वृक्षानाकृष्य उत्पाट्य प्रक्षिपन् तद्वनं निर्वृक्षमकरोत् ॥ २२ ॥ तत इति ॥ ततश्चामर्षितः क्रुद्धो द्विविदो बलस्योपरि शिलावर्षममुञ्चत् तत्सर्वं शिलावर्षं मुसलायुधः रामो, हलेन लीलया अनायासेनैव चूर्णयामास ॥ २३ ॥ स इति ॥ स कपीश्वरः तालसंकाशौ तालप्रमाणौ बाहू मुष्टीकृत्य बद्धमुष्टी कृत्वा रोहिणीपुत्रं राममासाद्य प्राप्य ताभ्यां मुष्टीकृताभ्यां बाहुभ्यां तस्य वक्षसि अरूरुजत् अताडयत् ॥ २४ ॥ यादवेति ॥ यादवेन्द्रो रामोऽपि द्विविदं निरायुधं दृष्ट्वा स्वयमपि मुसललाङ्गले त्यक्त्वा दोर्भ्यामेव तं कपिं जत्रौ कण्ठबाहुमूले अभ्यार्दयत् अताडयत् आडभाववान्पाठ आर्षः । स कपी रुधिरं वमन् उद्गिरन्नपतत् ॥२५॥ चकम्प इति ॥ हे कुरुशार्दूल पतता तेन द्विविदेन हेतुना टङ्काः सतोयविवराणि इति स्वामिपादाः । यद्वा । टङ्काः रैवतस्य भित्तयः " जंघायाम-

ततोऽन्येन रुषा जघ्ने ते चापि शतधाऽच्छिनत् ॥ २१ ॥ एवं युध्यन्भगवता भग्ने भग्ने पुनः पुनः ॥ आकृष्य सर्वतो वृक्षान्निर्वृक्षमकरोद्वनम् ॥२२॥ततोऽमुञ्चच्छिलावर्षं बलस्योपर्यमर्षितः ॥ तत्सर्वं चूर्णयामास लीलया मुसलायुधः ॥२३॥ स बाहू तालसंकाशौ मुष्टीकृत्य कपीश्वरः ॥ आसाद्य रोहिणीपुत्रं ताभ्यां वक्षस्यरूरुजत् ॥२४॥ यादवेन्द्रोऽपि तं दोर्भ्यां त्यक्त्वा मुसललाङ्गले ॥ जत्रावभ्यार्दयत्क्रुद्धः सोऽपतद्रुधिरं वमन् ॥ २५ ॥ चकम्पे तेन पतता सटङ्कः सवनस्पतिः ॥ पर्वतः कुरुशार्दूल वायुना नौरिवाम्भसि ॥ २६ ॥ जयशब्दो नमःशब्दः साधु साध्विति चाम्बरे ॥ सुरसिद्धमुनीन्द्राणामासीत्कुसुमवर्षिणाम् ॥२७॥ एवं निहत्य द्विविदं जगद्व्यतिकरावहम् ॥ संस्तूयमानो भगवाञ्जनैः स्वपुरमाविशत् ॥ २८ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे द्विविदवधो नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ श्रीशुक उवाच ॥ दुर्योधनसुतां राजँल्लक्ष्मणां समितिंजयः ॥ स्वयंवरस्थामहरत्साम्बो जाम्बवतीसुतः ॥ १ ॥

द्विभित्तौ च खनित्रे ग्रावदारणे । कपित्थे चास्त्रियां टङ्क " इति त्रिकाण्डशेषः । तत्सहितः सवनस्पतिः वृक्षैर्युतः पर्वतो रैवताख्यश्चकम्पे यथा वायुनाम्भसि स्थिता नौः कम्पते तद्वदिति ॥ २६ ॥ जयेति ॥ बलस्योपरि कुसुमानि वर्षन्ति इति तथा तेषां सुरादीनां यथायोग्यम् अम्बरे आकाशे जयशब्दो नमःशब्दः साधु साध्विति च शब्दः आसीत् ॥ २७ ॥ एवमिति ॥ जगतो व्यतिकरं नाशमावहतीति तथा तं द्विविदं निहत्य तेन हेतुना जनैः संस्तूयमानो भगवान् बलः स्वपुरं द्वारकामाविशत् आजगाम ॥ २८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे सप्तषष्टितमे व्यधात् ॥ ६७ ॥ अष्टषष्टितमे साम्बे निरुद्धे कुरुभिर्बलः ॥ गजाह्वयं चकर्षात्र श्लोका जैर्लैधिमार्गणाः ॥ त्रीण्युवाचेत्यङ्घ्रियुक्ताः षट्पञ्चाशदनुष्टुभः ॥ ६८ ॥ हतो यदैव प्रद्युम्नः शम्बरेणात्मघातिना । मासेऽस्मिन्नेव साम्बस्तु जाम्बवत्यामजायत॥" इति हरिवंशोक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रद्युम्नसवयस्त्वात्साम्बविवाहः पूर्ववृत्तोऽपि रामविक्रमप्रसङ्गादत्रोक्तः। स्वामिपादैस्तु यथाश्रुतक्रममनुसृत्य प्रद्युम्नजन्मोत्तरं जाम्बवतीविवाह इति प्रागुक्तम्। दुर्योधनेति ॥ हे राजन् समितिंजयः सङ्ग्रामजित् जाम्बवतीसुतः साम्बो नाम स्वयंवरस्थां दुर्योधनसुतां लक्ष्मणां जहार ॥१॥ कौरवा इति ॥ कौरवाः भीष्मादयः कुपिताः सन्तः परस्परमूचुः यो नोऽस्मान् कदर्थीकृत्य तुच्छान् मत्वा अकामां साम्बवरणमनिच्छन्तीमेवास्माकं कन्यां बलादहरत् अतोऽयमर्भकः साम्बः दुर्विनीतः ॥२॥ बध्नीतेति ॥ इमं दुर्विनीतं बध्नीत वृष्णयो यादवाः किं करिष्यन्ति। ये यादवाः अस्माकं प्रसादेन पराक्रमेणोपचितां समृद्धां नोऽस्माभिर्दत्तां महीं भुञ्जते न ते स्वयं भूपतय इति भावः ॥ ३ ॥ निगृहीतमिति ॥ यदि कदाचित् सुतं निगृहीतं बद्धं श्रुत्वा वृष्णयः युद्धार्थमिह एष्यन्ति तर्हि भग्नो दर्पो गर्वो येषां ते तथाभूताः सुसंयताः प्राणायामादिभिर्दमिताः प्राणा इन्द्रियाणीव शमं शान्तिं यान्ति यास्यन्ति ॥४॥ इतीति ॥ इति निश्चित्य कुरुवृद्धेन भीष्मेणानुमोदिताः तत्सहिताः कर्णादयः इति षडेते साम्बं बद्धुमारेभिरे। बन्द्धुमिति नकारवान्साधुः पाठस्तद्रहि-

कौरवाः कुपिता ऊचुर्दुर्विनीतोऽयमर्भकः ॥ कदर्थीकृत्य नः कन्यामकामामहरद्बलात् ॥२॥ बध्नीतेमं दुर्विनीतं किं करिष्यन्ति वृष्णयः ॥ येऽस्मत्प्रसादोपचितां दत्तां नो भुञ्जते महीम् ॥ ३ ॥ निगृहीतं सुतं श्रुत्वा यद्येष्यन्तीह वृष्णयः ॥ भग्नदर्पाः शमं यान्ति प्राणा इव सुसंयताः ॥ ४ ॥ इति कर्णः शलो भूरिर्यज्ञकेतुः सुयोधनः ॥ साम्बमारेभिरे बद्धुं कुरुवृद्धानुमोदिताः ॥ ५ ॥ दृष्ट्वानुधावतः साम्बो धार्तराष्ट्रान्महारथः ॥ प्रगृह्य रुचिरं चापं तस्थौ सिंह इवैकलः ॥ ६ ॥ तं ते जिघृक्षवः क्रुद्धास्तिष्ठ तिष्ठेति भाषिणः ॥ आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन् ॥ ७ ॥ सोऽपविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनन्दनः ॥ नामृष्यत्तदचिन्त्यार्भः सिंहः क्षुद्रमृगैरिव ॥ ८ ॥ विस्फूर्ज्य रुचिरं चापं सर्वान्विव्याध सायकैः ॥ कर्णादीन्षड्रथान्वीरस्तावद्भिर्युगपत्पृथक् ॥ ९ ॥

तस्त्वार्षः। अत्र शलादयस्त्रयः सोमदत्तस्य पुत्राः यज्ञकेतुर्भूरिश्रवाः यद्वा कुरुवृद्धानुमोदिताः इति कन्यायाः अकामत्वानिश्चयादनेन स्पृष्टतया वरान्तरायोगादयमेव वरो भवेत् परन्त्वेतदन्यायस्वशौर्ययोर्द्योतनार्थमयं बन्धनीय एव नतु वध्य इति भीष्मेण कृतानुमोदनास्तेनापि सहिताः षडित्यर्थः॥५॥ दृष्ट्वेति ॥ महारथः साम्बो धार्तराष्ट्रान् दुर्योधनादीन् अनुधावतः पृष्ठतः आगच्छतः दृष्ट्वा चापं धनुः प्रगृह्य सिंह इव एकल एव तस्थौ ॥६॥ तमिति ॥ क्रुद्धा धन्विनश्च कर्णः अग्रणीः नायको येषां ते जिघृक्षवः तं ग्रहीतुमिच्छन्तः तिष्ठ तिष्ठेति भाषिणश्च सन्तः तमासाद्य प्रत्यागत्य बाणैः समाकिरन् छादितवन्तः॥७॥ स इति ॥ हे कुरुश्रेष्ठ अचिन्त्यस्य भगवतः अर्भः पुत्रः अचिन्त्यश्चासावर्भश्चेति वा कुरुभिरपविद्धः अपकर्मणा अन्यायेन विद्धः स यदुनन्दनः साम्बः तद्वेधनं नामृष्यत् न सेहे। यथा क्षुद्रैर्मृगैः ताडितः सिंहो यथा तन्न सहते तथा ॥८॥ विस्फूर्ज्येति ॥ रुचिरम् आरोपितज्यं चापं विस्फूर्ज्य निधार्ष्य स वीरः सर्वान् षट्संख्यायुक्तान् कर्णादीन् तावतो रथांश्च तावद्भिः सायकैः युगपदेकदैव पृथक् प्रत्येकं विव्याध ॥ ९ ॥

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्रपञ्चयति—चतुर्भिरिति ॥ प्रत्येकं रथानां चतुर्भिश्चतुर्भिः सायकैः चतुरश्चतुरो वाहान् अश्वान् इति वीप्सा ज्ञेया । एकैकेन च सायकेन एकैकान् सारथीन् एकैकेन सायकेन एकैकान् रथिनश्च विव्याध । महेष्वासाः महाधनुर्धरा अपि ते रथिनः कर्णादयस्तस्य साम्बस्य तत्कर्म अपूजयन् स्तुतवन्तः ॥ १० ॥ तमिति ॥ ते तु कर्णादयः सर्वे मिलित्वा तमेकं साम्बं विरथं चक्रुः । तेषु चत्वारस्तु चतुरो हयान् जघ्नुः । एकस्तु सारथिं जघ्ने तङ्कर्षः । अन्यः शरासनं चिच्छेद ॥ ११ ॥ तमिति ॥ एवं युद्धे तं साम्बं कृच्छ्रेण अतिप्रयासेन विरथीकृत्य बद्ध्वा च जयिनः प्राप्तजयाः कुरवस्तं यदुकुमारं स्वकन्यां चादायेति शेषः । स्वपुरमाविशन् एतदपि अनिरुद्धवद्गवदिच्छयैवेति ज्ञेयम् ॥ १२ ॥ तदिति ॥ हे राजन् नारदोक्तेन वाक्येन तत्साम्बस्य बन्धनं श्रुत्वा सञ्जातो मन्युः क्रोधो येषां ते तथोग्रसेनेन प्रचोदिता यादवाः कुरून्प्रति युद्धोद्यमं चक्रुः ॥ १३ ॥ सान्त्वयित्वेति ॥ कलिमलापहः रामः सन्नद्धान् तान् वृष्णिपुङ्गवान् सान्त्वयित्वा कुरूणां वृष्णीनां च कलिं नैच्छत् अतो यादवान्सान्त्वितवान् । कृष्णस्त्वत्र

चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन् ॥ रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्यपूजयन् ॥१०॥ तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान् ॥ एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनम् ॥ ११ ॥ तं बद्ध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि ॥ कुमारं स्वस्य कन्यां च स्वपुरं जयिनोऽविशन् ॥ १२ ॥ तच्छ्रुत्वा नारदोक्तेन राजन्संजातमन्यवः ॥ कुरून्प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः ॥ १३ ॥ सान्त्वयित्वा तु रामस्तान्सन्नद्धान्वृष्णिपुङ्गवान् ॥ नैच्छत्कुरूणां वृष्णीनां कलिं कलिमलापहः ॥ १४ ॥ जगाम हास्तिनपुरं रथेनादित्यवर्चसा ॥ ब्राह्मणैः कुलवृद्धैश्च वृतश्चन्द्र इव ग्रहैः ॥ १५ ॥ गत्वा गजाह्वयं रामो बाह्योपवनमास्थितः ॥ उद्धवं प्रेषयामास धृतराष्ट्रं बुभुत्सया ॥ १६ ॥ सोऽभिवन्द्याम्बिकापुत्रं भीष्मं द्रोणं च बाह्लिकम् ॥ दुर्योधनं च विधिवद्राममागतमब्रवीत् ॥ १७ ॥ तेऽतिप्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमम् ॥ तमर्चयित्वाभिययुः सर्वे मङ्गलपाणयः ॥१८॥ तं संगम्य यथान्यायं गामर्घ्यं च न्यवेदयन् ॥ तेषां ये तत्प्रभावज्ञाः प्रणेमुः शिरसा बलम् ॥ १९ ॥

रामाशयं ज्ञात्वा तूष्णीमेवासीत् ॥ १४ ॥ जगामेति ॥ ततश्च रामः ग्रहैर्वृतश्चन्द्र इव ब्राह्मणैः कुलवृद्धैश्च वृतः आदित्यतुल्यं वर्चस्तेजो यस्य तेन रथेन हास्तिनपुरं जगाम ॥ १५ ॥ गत्वेति ॥ द्विषतां पुरं न प्रवेष्टव्यमिति गजाह्वयं गत्वा रामो बाह्योपवनमाश्रितः ततः बुभुत्सया कौरवाभिप्रायजिज्ञासया धृतराष्ट्रं प्रति उद्धवं प्रेषयामास ॥ १६ ॥ ॥२१७॥
स इति ॥ स उद्धवः अम्बिकापुत्रं धृतराष्ट्रं भीष्मादींश्च विधिवदभिवन्द्य आगतं राममब्रवीत् । युधिष्ठिरादीनामिन्द्रप्रस्थे निवासादनुल्लेखः ॥ १७ ॥ त इति ॥ ते भीष्मादयः सुहृत्तममुपकारिणं दुर्योधनस्य गदादिशिक्षणात् रामं प्राप्तमाकर्ण्य श्रुत्वाऽतिप्रीता जाताः । प्रथमं तमुद्धवम् अर्चयित्वा अर्घ्यपाद्यासनादिभिः सत्कृत्य मङ्गलद्रव्याणि उपायनानि पाणिषु येषु ते तथाभूताः सर्वे राममभिजग्मुः ॥ १८ ॥ तमिति ॥ यथान्यायं स्ववयःसम्बन्धाद्यनुरूपमालिङ्गनादिभिरतं रामं सङ्गम्य गां धेनुं अर्घ्यं च तस्मै न्यवेदयन् तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्ये ये तस्य बलस्य प्रभावं जानन्ति ते भीष्मादयो वृद्धा अपि बलं शिरसा प्रणेमुः ॥१९॥ बन्धूनिति ॥ रामः परस्परं बन्धून् कुशलिनः श्रुत्वा शिवं सुखमनामयम् आरोग्यं च पृष्ट्वा स्थितेषु तेष्विति शेषः । अथानन्तरम् अविक्लवम् अदीनं वचः बभाषे ॥ २० ॥ उग्रसेन इति ॥ क्षितीशानामीशः प्रभुः उग्रसेनो यत् वो युष्मान् आज्ञापयत् तत् अव्यग्रधियः समाहितचित्ताः सन्तो मत्तः श्रुत्वा मा विलम्बितं शीघ्रं कुरुध्वम् ॥ २१ ॥ यदिति॥उग्रसेनवाक्यम् यत्तु यूयं बहव एकं धार्मिकं धर्मयुद्धे वर्त्तमानं बहूनामेकदैवैकप्रहारे प्रवृत्तिरधर्म एव तेन जित्वा अबध्नीत तदपराधमहं बन्धूनामैक्यकाम्यया सौहार्देच्छया मृष्ये सोढवानस्मि । अथानन्तरमाशु तमानीय समर्पयतेति शेषः ॥ २२ ॥ वीर्येति ॥ वीर्यं युद्धे ग्लान्यभावः शौर्यं तत्रोत्साहः बलं शरीरसामर्थ्यं तैरुन्नद्धमुच्छृङ्खलम् आत्मशक्तेः समं योग्यं बलदेवस्य वचो निशम्य तेन वाक्येन प्रकोपिताः कुरव ऊचुः ॥ २३ ॥ अहो इति ॥ अहो कालगत्या हेतुना इदं महच्चित्रं जातं यतः सा कालगतिः दुरत्यया दुरतिक्रमा अस्ति यतः उपानत् चर्ममयी पादरक्षी मुकुटेन

बन्धून्कुशलिनः श्रुत्वा पृष्ट्वा शिवमनामयम् ॥ परस्परमथो रामो बभाषेऽविक्लवं वचः ॥ २० ॥ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः ॥
तदव्यग्रधियः श्रुत्वा कुरुध्वं मा विलम्बितम् ॥ २१ ॥ यद्यूयं बहवस्त्वेकं जित्वाऽधर्मेण धार्मिकम् ॥ अबध्नीताथ तन्मृष्ये बन्धूनामैक्यकाम्यया
॥ २२ ॥ वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमं वचः ॥ कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः ॥ २३ ॥ अहो महच्चित्रमिदं कालगत्या दुरत्यया॥
आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितम् ॥ २४ ॥ एते यौनेन संबद्धाः सहशय्यासनाशनाः ॥ वृष्णयस्तुल्यतां नीता अस्मद्दत्तनृपासनाः ॥ २५॥
चामरव्यजने शङ्खमातपत्रं च पाण्डुरम् ॥ किरीटमासनं शय्यां भुञ्जतेऽस्मदुपेक्षया ॥ २६ ॥ अलं यदूनां नरदेवलाञ्छनैर्दातुः प्रतीपैः फणिनामिवामृतम् ॥ येस्मत्प्रसादोपचिता हि यादवा आज्ञापयन्त्यद्य गतत्रपा बत ॥ २७ ॥

सेवितं शिरो मूर्धानमारुरुक्षति आरोढुमिच्छति उपानह इव यादवाः शिरांसि इवास्मानाज्ञापयन्ति । यद्वा । कालगत्या कालगतिः " सुपां सुलुक्" इति सोडर्यादेशः । यद्वा । कालगत्या हेतुना दुरत्यया उपानदिति ॥ २४ ॥ अस्यैव प्रपञ्चः—एते इति ॥ एते वृष्णयो यौनेन कुन्तीविवाहेन सम्बद्धा अस्माभिः सह शय्या शयनम् आसनम् उपवेशनम् अशनं भोजनम् च येषां ते अस्माभिरेव दत्तं नृपासनम् येभ्यस्ते अतोऽस्माभिः स्वतुल्यतां नीताः ॥ २५ ॥ चामरेति ॥ अतोऽस्मदुपेक्षया अपहरणेच्छाया अभावेन चामरे व्यजने शङ्खं पाण्डुरमातपत्रं चेत्यादिराजचिह्नानि भुजन्त उपभुञ्जते ॥ २६ ॥ अलमिति ॥ दातुरस्मदादेरेव प्रतीपैः प्रतिकूलैः यदूनां नरदेवलाञ्छनैश्चामरादिभिरलं पूर्णम् अतः परं तान्यपहरणीयान्येवेत्याशयः । यथा फणिनां सर्पाणां पोषणाय कृपया दत्तममृतं यथा दातुरेव प्रतीपं भवति तद्वत् ये यादवा नोऽस्माकं प्रसादेनोपचिताः समृद्धाः गतत्रपा निर्लज्जाः सन्तः अस्मानेव आज्ञापयन्ति ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमिति ॥ इन्द्रोऽपि भीष्मादिभिः कुरुभिरदत्तं कथमवरुन्धीत उपयुञ्जीत भोक्तुं समर्थो भवेत् । यथा सिंहेन ग्रस्तं स्वीकृतं वस्तु यथा तद्दानं विना उरणो मेषो भोक्तुं न शक्नोति तथा यत्रेन्द्रोऽपि मेषायते तत्र के वराका यादवा इति भावः ॥२८॥ जन्मेति ॥ हे भरतर्षभ सत्कुलजन्मना बन्धुभिः वीरैर्जुनादिभिश्च युक्तया श्रिया सम्पत्त्या उन्नद्ध उत्कटो मदो येषां ते असभ्याः दुर्जनाः दुर्योधनाद्याः ते कुरवः एवं रामं प्रति दुर्वाच्यं परुषं वाक्यम् आश्राव्य श्रावयित्वा स्वपुरमाविशन् । एतेन भीष्मादयः सभ्यास्तु तत्रैव तस्थुरिति ॥ २९ ॥ दृष्ट्वेति ॥ कुरूणां दौःशील्यं दुष्टत्वं दृष्ट्वा अवाच्यानि दुर्वचनानि च श्रुत्वा कोपेन संरब्धः व्याप्तः अच्युतः पूर्णपराक्रमोऽत एव दुष्प्रेक्ष्यः भयङ्करस्वरूपो रामो मुहुः पुनः पुनः प्रकर्षेण हसन् अवोचत् ॥ ३० ॥ नूनमिति ॥ नानाधनाभिजनादिमदैरुन्नद्धा उत्पथगामिन असाधवः शान्तिं नेच्छन्ति तेषां हि दण्ड एव प्रशमः शान्तिकरः न सान्त्वनं नूनं निश्चितमेव हि प्रसिद्धं च लोके यथा पशूनां लगुडो मार्गे प्रवर्त्तको भवति तद्वत् ॥ ३१ ॥ अहो इति ॥ अहो सुसंरब्धान् क्रोधावेशेन युद्धोन्मुखान्

कथमिन्द्रोऽपि कुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अदत्तमवरुन्धीत सिंहग्रस्तमिवोरणः ॥ २८ ॥ श्रीशुक उवाच ॥ जन्मबन्धुश्रियोन्नद्धमदास्ते भरतर्षभ ॥ आश्राव्य रामं दुर्वाच्यमसभ्याः पुरमाविशन् ॥ २९ ॥ दृष्ट्वा कुरूणां दौःशील्यं श्रुत्वाऽवाच्यानि चाच्युतः ॥ अवोचत्कोपसंरब्धो दुष्प्रेक्ष्यः प्रहसन् मुहुः ॥ ३० ॥ नूनं नानामदोन्नद्धाः शान्तिं नेच्छन्त्यसाधवः ॥ तेषां हि प्रशमो दण्डः पशूनां लगुडो यथा ॥ ३१ ॥ अहो यदून्सुसंरब्धान्कृष्णं च कुपितं शनैः ॥ सान्त्वयित्वाऽहमेतेषां शममिच्छन्निहागतः ॥ ३२ ॥ त इमे मन्दमतयः कलहाभिरताः खलाः ॥ तं मामवज्ञाय मुहुर्दुर्भाषान् मानिनोऽब्रुवन् ॥ ३३ ॥ नोग्रसेनः किल विभुर्भोजवृष्ण्यन्धकेश्वरः ॥ शक्रादयो लोकपाला यस्यादेशानुवर्तिनः ॥ ३४ ॥ सुधर्माऽऽक्रम्यते येन पारिजातोऽमराङ्घ्रिपः ॥ आनीय भुज्यते सोऽसौ न किलाध्यासनार्हणः ॥ ३५ ॥ यस्य पादयुगं साक्षाच्छ्रीरूपास्तेऽखिलेश्वरी ॥ स नार्हति किल श्रीशो नरदेवपरिच्छदान् ॥ ३६ ॥

यदून् कुपितं कृष्णं च सान्त्वयित्वा एतेषां शमं शान्तिमिच्छन्नहमिहागतः ॥ ३२ ॥ त इति ॥ मन्दमतयः कलहे अभिरताः खलाः मानिनस्त इमे उपकारिणमपि मामवज्ञाय मुहुः पुनः दुर्भाषान् दुर्वाक्यानि घ्नन्तोऽयं स्खलन्तो वा अब्रुवन् ॥ ३३ ॥ दुर्भाषान् अनुस्मृत्याह—नेति ॥ शक्रादयो लोकपाला यस्याज्ञानुवर्तिनः स भोजादीनामधिपः उग्रसेनोऽपि न विभुर्भूमिराज्ये समर्थो न । किलेति काका समर्थ एवेति ॥ ३४ ॥ अलं यदूनामित्युक्त्या कृष्णेप्याक्षेपं मत्वाह—सुधर्मेति ॥ येन सुधर्माख्या सभा आक्रम्यते अमराङ्घ्रिपः देवतरुः पारिजात आनीय भुज्यते सोऽसौ कृष्णोऽपि अध्यासनार्हणः मनुष्यराजसिंहासनयोग्यः न किलेति पूर्ववत्काकुः॥३५॥यस्येति ॥ अखिलानां सम्पदामीश्वरी श्रीर्लक्ष्मीः साक्षात् यस्य पादयुगलमुपास्ते स श्रीशः श्रियः पतिः श्रीकृष्णो नरदेवानां परिच्छदान् चामरादिचिह्नानि प्रति नार्हति योग्यो न भवति किल ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्येति ॥ यस्य कलायाः कलाः अंशांशाः ब्रह्मा भवः अहं शेषः श्री लक्ष्मीश्च इति वयं उपासितानि तीर्थानि यैस्तेषां योगिनामपि तीर्थम्।यद्वा।उपासितानां श्रेयोर्थिभिः सेवितानां तीर्थादीनां गङ्गादीनामपि तीर्थं पावनत्वनिमित्तमित्यर्थः । अखिलैः लोकपालैः मौल्युत्तमैर्मौलियुक्तैरुत्तमाङ्गैः शिरोभिः उत्तमैर्मौलिभिर्वा धृतं यस्याङ्घ्रिपङ्कजरजः शिरसा चिरं वहेम तस्यास्य नृपासनं क्व कथं वा न तदधिकारयोग्यतेति काकुः ॥ ३७ ॥ भुञ्जत इति ॥ वृष्णयः किल कुरुभिर्दत्तमेव भूखण्डमेव नतु सर्वां भुवं भुञ्जते इति वयं उपानहः किल । कुरवस्तु स्वयं शिरः किलेति काकवः ॥ ३८ ॥ अहो इति ॥ अहो ऐश्वर्येण मत्तानाम् उन्मादेन मत्तानामिव मानिनाम् आत्मानमेव बहुमन्यमानानां खलानाम् असम्बद्धाः रूक्षाश्च गिरः कर्माणि को नाम अनुशासिता दण्डनसमर्थः सन् सहेत ॥ ३९ ॥ अद्येति ॥ अतोऽद्य पृथ्वीं निष्कौरवीम् उपसर्जनान् ङीबार्षः । करिष्यामीति निश्चित्य जगत्रयं त्रिलोकीं दहन्निव अत्यमर्षित अतिक्रुद्धो हलं गृहीत्वा उत्तस्थौ ॥ ४० ॥ लाङ्गलेति ॥ सः अमर्षितः संक्रुद्धो रामो गजाह्वयं

यस्याङ्घ्रिपङ्कजरजोऽखिललोकपालैर्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ॥ ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥ ३७ ॥ भुञ्जते कुरुभिर्दत्तं भूखण्डं वृष्णयः किल ॥ उपानहः किल वयं स्वयं तु कुरवः शिरः ॥ ३८ ॥ अहो ऐश्वर्यमत्तानां मत्तानामिव मानिनाम् ॥ असंबद्धा गिरो रूक्षाः कः सहेतानुशासिता ॥ ३९ ॥ अद्य निष्कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः ॥ गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयम् ॥ ४० ॥ लाङ्गलाग्रेण नगरमुद्विदार्य गजाह्वयम् ॥ विचकर्ष स गङ्गायां प्रहरिष्यन्नमर्षितः ॥ ४१ ॥ जलयानमिवाघूर्णं गङ्गायां नगरं पतत् ॥ आकृष्यमाणमालोक्य कौरवा जातसंभ्रमाः ॥ ४२ ॥ तमेव शरणं जग्मुः सकुटुम्बा जिजीविषवः ॥ सलक्ष्मणं पुरस्कृत्य साम्बं प्राञ्जलयः प्रभुम् ॥ ४३ ॥ राम रामाखिलाधार प्रभावं न विदाम ते ॥ मूढानां नः कुबुद्धीनां क्षन्तुमर्हस्यतिक्रमम् ॥ ४४ ॥ स्थित्युत्पत्त्यप्ययानां त्वमेको हेतुर्निराश्रयः ॥ लोकान्क्रीडनकानीश क्रीडतस्ते वदन्ति हि ॥ ४५ ॥

नगरं लाङ्गलस्य तदिच्छया वर्द्धितस्याग्रेण दक्षिणतः प्राकारमूले निखातेन उद्विदार्य उत्पाट्य गङ्गायां प्रहरिष्यन् पातयितुं विचकर्षाकृष्टवान् । बलाज्जलान्तिकमानेतुमारभत ॥४१॥ जलेति युग्मम् ॥ आकृष्यमाणमत एव जलयानमुडुपमिवाघूर्णं भ्रमत् गङ्गायां पतच्च नगरमालोक्य जातः सम्भ्रमो येषां ते जिजीविषवः जीवितुमिच्छवः अक्षराधिक्यं सोढव्यं सकुटुम्बाः कौरवाः रामं सद्यः प्रसादयितुं सलक्ष्मणं लक्ष्मणासहितं साम्बं पुरस्कृत्य स्वयं च प्राञ्जलयः सन्तस्तमेव प्रभुं रामं शरणं जग्मुः ॥४२॥४३॥ रामेति ॥ हे राम राम हे अखिलाधार वयं ते प्रभावं न विदाम न विद्मः आर्षः प्रयोगः । मूढानां प्रभावानभिज्ञानां कुबुद्धीनां नः अतिक्रममपराधं क्षन्तुमर्हसि ॥ ४४ ॥ स्थितीति ॥ त्वम् एक एव स्थित्यादीनां हेतुः स्वयं च निराश्रयः हे ईश हि यस्मात् लोकान् क्रीडतः ते तव क्रीडनकान् क्रीडोपकरणभूतान् सर्वज्ञा ऋषयो वदन्ति ॥ ४५ ॥

CC-0. In Public Domain. Digitization by eGangotri

त्वमिति ॥ हे अनन्त हे सहस्रमूर्द्धन् इदं भूमण्डलं लीलयानायासेनैव त्वमेव स्वमूर्ध्नि बिभर्षि धत्से अन्ते प्रलये च स्वात्मनि रुद्धं लीनं विश्वं यस्य सः अत एव परिशिष्यमाणः अत एव चाद्वितियः त्वं शेषे शयनं करोषि। एवंभूतो यः स शेषे शेषपर्यङ्के परिशिष्यमाणो यः स त्वमेवेति वा श्रीनारायणाभेददृष्ट्येदमुक्तम् ॥ ४६ ॥ कोप इति ॥ हे भगवन् सत्वं गुणं बिभ्रतस्ते योऽयं कोपः अखिलानामुत्पथानां प्राणिनां शिक्षार्थं सन्मार्गे प्रवृत्त्यर्थमेव न द्वेषान्न च मत्सरात् न चोत्कर्षासहनात् यतस्त्वं स्थितेः शिष्टमर्यादायाः पालने तत्परः असि। यद्वा। स्थितिपालने तत्परः तात्पर्यवान् कोपः निर्विसर्गपाठे सम्बोधनम् ॥ ४७ ॥ नम इति ॥ हे सर्वभूतानामात्मन् हे सर्वशक्तिधर हे अव्यय ते नमः। हे विश्वं कर्म कृत्यं यस्य ते नमोऽस्तु। वयं त्वां शरणं गताः ॥ ४८ ॥ एवमिति ॥ वेपमानमयनं पुरं येषां तैः अत एव संविग्नैर्भीतैः अत एव प्रपन्नैः कुरुभिः

त्वमेव मूर्ध्नीदमनन्त लीलया भूमण्डलं बिभर्षि सहस्रमूर्धन् ॥ अन्ते च यः स्वात्मनि रुद्धविश्वः शेषेऽद्वितीयः परिशिष्यमाणः ॥ ४६ ॥ कोपस्तेऽखिलशिक्षार्थं न द्वेषान्न च मत्सरात् ॥ बिभ्रतो भगवन्सत्त्वं स्थितिपालनतत्परः ॥ ४७ ॥ नमस्ते सर्वभूतात्मन् सर्वशक्तिधराव्यय ॥ विश्वकर्मन्नमस्तेऽस्तु त्वां वयं शरणं गताः ॥ ४८ ॥ श्रीशुक उवाच ॥ एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः ॥ प्रसादितः सुप्रसन्नो मा भैष्टेत्यभयं ददौ ॥ ४९ ॥ दुर्योधनः पारिबर्हं कुञ्जरान्षष्टिहायनान् ॥ ददौ च द्वादश शतान्ययुतानि तुरङ्गमान् ॥ ५० ॥ रथानां षट् सहस्राणि रौक्माणां सूर्यवर्चसाम् ॥ दासीनां निष्ककण्ठीनां सहस्रं दुहितृवत्सलः ॥ ५१ ॥ प्रतिगृह्य तु तत्सर्वं भगवान्सात्वतर्षभः ॥ ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनन्दितः ॥ ५२ ॥ ततः प्रविष्टः स्वपुरं हलायुधः समेत्य बन्धूननुरक्तचेतसः ॥ शशंस सर्वं यदुपुङ्गवानां मध्ये सभायां कुरुषु स्वचेष्टितम् ॥ ५३ ॥

प्रसादितः अतः सुप्रसन्नश्च बलो मा भैष्ट भयं मा कार्ष्टेत्येवमभयं ददौ। ततः प्राकारमूलाद्धलं निष्कासितवानिति ज्ञेयम् ॥ ४९ ॥ दुर्योधन इति युग्मम् ॥ दुहितृवत्सलः दुर्योधन षष्टिर्हायनाः संवत्सरा येषां तथाभूतान् द्वादशशतसंख्यायुक्तान् कुञ्जरान् द्वादशायुतानि तुरङ्गमांश्च पारिबर्हं ददौ ॥ ५० ॥ रथानामिति ॥ रौक्माणां स्वर्णालंकृतानां सूर्यस्येव वर्चो येषां तेषां रथानां षट् सहस्राणि निष्कः पदकाख्यं भूषणं कण्ठे यासां तासां दासीनां सहस्रं पारिबर्हं ददौ इत्यनुषङ्गः ॥ ५१ ॥ प्रतीति ॥ तत्सर्वं दुर्योधनदत्तमुपायनं प्रतिगृह्य भगवान् सात्वतर्षभो रामः ससुतः साम्बसहितः सस्नुषः स्नुषया लक्ष्मणया च सहितः सुहृद्भिः कौरवैश्चाभिनन्दितः स्वपुरं प्रायात् ॥ ५२ ॥ तत इति ॥ हलायुधो रामः स्वपुरं द्वारकां प्रविष्टः अनुरक्तं चेतो येषां तान् बन्धून् यदून् समेत्य यदुपुङ्गवानां सभायां मध्ये कुरुषु यत्स्वचेष्टितं नगरकर्षणादिकं तत्सर्वं शशंस कथयामास ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्यापीति ॥ अद्याप्येतद्धस्तिनापुरं रामविक्रमं सूचयदेव वर्तते । कथं तत्राह गङ्गायां दक्षिणतः समुन्नतमनु निरन्तरं दृश्यते ॥ ५४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थ-प्रकाशिकाम् ॥ गङ्गासहायो दशमस्याष्टषष्टितमे व्यधात् ॥ ६८ ॥ एकोनसप्ततितमे पश्यन्प्रतिगृहं हरिम् ॥ नारदो विस्मितोऽस्तौत्तं तत्र श्लोकाः शरोऽब्धयः ॥ च-त्वार्युवाचेति साङ्घ्रिद्वीपश्चाशदनुष्टुभः ॥ ६९ ॥ नरकमिति ॥ कृष्णेन नरकं निहतं श्रुत्वा तथा तेनैकेन सह बह्वीनां योषिताम् उद्वाहं च श्रुत्वा नारदस्तत् ताभिः सह तस्य स्थित्यादिकं दिदृक्षुरासीत् । इदं च नारदस्यागमनं षोडशसहस्रविवाहानन्तरमेव । पूर्वमनुक्तिस्तु प्रसक्तानुप्रसक्ततयेति दारैर्वरैस्तत्सदृशैरित्यादिकथनं तु पट्टमहिषी-पुत्राभिप्रायकं योगमायाकल्पितं वेत्याहुः ॥ १ ॥ दिदृक्षामभिनयन्नाह–चित्रमिति ॥ चित्रं बत एतदत्याश्चर्यं किं तत् यदेको भगवानेकेन वपुषावतीर्णः युगपदेक-स्मिन्नेव काले पृथक् गृहेषु योषित्समसंख्याकगृहेषु ह्यष्टसाहस्रं षोडशसहस्रसङ्ख्याका स्त्रियः स्त्रीः उदावहत् तद्वृत्तं प्रष्टव्यमिति शेषः । अत्र कायव्यूहरीत्या परिणयादिकं

अद्यापि च पुरं ह्येतत्सूचयद्रामविक्रमम् ॥ समुन्नतं दक्षिणतो गङ्गायामनुदृश्यते ॥५४॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे हस्ति-नापुरकर्षणसं॰विजयो नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ श्रीशुक उवाच ॥ नरकं निहतं श्रुत्वा तथोद्वाहं च योषिताम् ॥ कृष्णेनैकेन बह्वीनां त-द्दिदृक्षुः स्म नारदः ॥१॥ चित्रं बतैतदेकेन वपुषा युगपत्पृथक् ॥ गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥ २ ॥ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टु-मागमत् ॥ पुष्पितोपवनारामद्विजालिकुलनादिताम् ॥ ३ ॥ उत्फुल्लेन्दीवराम्भोजकह्लारकुमुदोत्पलैः ॥ छुरितेषु सरस्सूच्चैः कूजितां हंससारसैः ॥ ४ ॥ प्रासादलक्षैर्नवभिर्जुष्टां स्फाटिकराजतैः ॥ महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः ॥ ५ ॥ विभक्तरथ्यापथचत्वरापणैः शालासभाभी रु-चिरां सुरालयैः ॥ संसिक्तमार्गाङ्गणवीथिदेहलीं पतत्पताकाध्वजवारितातपाम् ॥ ६ ॥

नास्ति अपि तु एकस्यैव वपुषः सूर्यस्येव प्रकाशभेदरीत्यैवेति भागवताः । सूर्यस्य विभुत्वं नास्ति अस्य विभोरपि सर्वेषामप्रतीतिस्तादृशपुण्याभावात् ॥ २ ॥ इतीति अर्द्धम् ॥ इत्येवमुत्सुक उत्साहयुक्तो देवर्षिस्तं द्रष्टुं द्वारवतीमागमत् । तां विशिनष्टि–पुष्पितेति अर्द्धम् ॥ पुष्पितेषु उपवनेषु आरामेषु उद्यानेषु च द्विजानां पक्षिणाम् अलीनां च कुलैर्नादिताम् ॥ ३ ॥ उत्फुल्लेति ॥ उत्फुल्लैरिन्दीवरादिभिः च्छुरितेषु व्याप्तेषु सरस्सु हंसैः सारसैश्चोच्चैः कूजितां नादिताम् ॥ ४ ॥ प्रासादेति ॥ स्फटिकमयै रजतमयैश्च महामरकतैश्च प्रख्यान्ति प्रकाशन्ते इति तथा तैः स्वर्णमया रत्नमयाश्च परिच्छदाः परिकरा येषु तैः नवभिः प्रासादानां महागृहाणां लक्षैर्जुष्टाम् ॥ ५ ॥ विभक्तेति ॥ विभक्ता रथ्या राजमार्गाः पथा अन्ये च मार्गाः चत्वराणि अङ्गणानि आपणाः पण्यवीथयस्तैः शाला अन्नसङ्ग्रहभोजनादिस्थानानि सभा उपवे-शनस्थानानि ताभिः सुराणां देवानाम् आलया मन्दिराणि तैः रुचिरां शोभमानां संसिक्ता मार्गादयो यस्यां कबभाव आर्षः । पतन्तीभिश्चलन्तीभिः पताकाभिः पतद्भि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वजैश्च वारित आतपो घर्मो यस्यां तां पताकाध्वजश्चयोरल्पत्वमहत्त्वेनावान्तरभेदो ज्ञेयः। पतन्त्यःपताका येषु तैर्ध्वजैरिति व्याख्यातॄणां मते ककारो ह्रस्वः पाठ्यः ॥ ६ ॥ तस्यामिति युग्मम् ॥ तस्यां द्वारकायां यत्र त्वष्ट्रा शिल्पाचार्येण विश्वकर्मणा कार्त्स्न्येन साकल्येन स्वकौशलं शिल्पनैपुण्यं दर्शितम् इति पुरभवनयोर्विशेषणम्। तत् श्रीमत् भोगोपकरणादिसमृद्धिमत् सर्वैर्धिष्ण्यपैर्लोकाधिपतिभिरर्चितं बहुमतं षोडशभिः सद्मनां सहस्रैः समलंकृतं हरेरन्तःपुरं विवेश। तत्रापि शौरेः पत्नीनां भवनेष्वेकतमं भवनं विवेश ॥ ७ ॥ ८ ॥ भवनं विशिनष्टि—विष्टब्धमिति ॥ विद्रुमस्तम्भैः वैदूर्यमयानि फलकोत्तमानि स्तम्भाश्रयाणि छादनानि तैश्च विष्टब्धं प्रतिबद्धम् इन्द्रनीलमयैः कुड्यैर्भित्तिभिः सूर्यादिभिरप्यहता त्विट् यस्यास्तया इन्द्रनीलमय्या जगत्या भूमिकया चालंकृतम् ॥ ९ ॥ वितानैरिति ॥ त्वष्ट्रा विश्वकर्मणा निर्मितैः मुक्तादाम्नां विलम्बाः विविधानि लम्बनानि विद्यन्ते येषु तैर्वितानैर्मण्युत्तमैः परिष्कृतैरलंकृतैर्दान्तैर्हस्तिदन्तनिर्मितैरासनैः पर्यङ्कैश्चालंकृतम् ॥ १० ॥ दासीभिरिति ॥ निष्ककण्ठीभिः सुवासोभिर्दा-

तस्यामन्तःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः ॥ हरेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितम् ॥ ७ ॥ तत्र षोडशभिः सद्मसहस्रैः समलंकृतम् ॥
विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥ ८ ॥ विष्टब्धं विद्रुमस्तम्भैर्वैदूर्यफलकोत्तमैः ॥ इन्द्रनीलमयैः कुड्यैर्जगत्या चाऽहतत्विषा ॥ ९ ॥
वितानैर्निर्मितैस्त्वष्ट्रा मुक्तादामविलम्बिभिः ॥ दान्तैरासनपर्यङ्कैर्मण्युत्तमपरिष्कृतैः ॥ १० ॥ दासीभिर्निष्ककण्ठीभिः सुवासोभिरलंकृतम् ॥
पुम्भिः सकञ्चुकोष्णीषसुवस्त्रमणिकुण्डलैः ॥ ११ ॥ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वान्तं विचित्रवलभीषु शिखण्डिनोऽङ्ग ॥ नृत्यन्ति यत्र
विहितागुरुधूपमक्षैर्निर्यान्तमीक्ष्य घनबुद्धय उन्नदन्तः ॥ १२ ॥ तस्मिन् समानगुणरूपवयःसुवेषदासीसहस्रयुतयाऽनुसवं गृहिण्या ॥ विप्रो ददर्श
चमरव्यजनेन रुक्मदण्डेन सात्वतपतिं परिवीजयन्त्या ॥ १३ ॥

सीभिः अलंकृतम्। तथा शोभनानि कञ्चुकादीनि येषां तैः पुंभिर्दासैश्चालंकृतम् ॥११॥ रत्नेति॥अङ्ग हे राजन् रत्नप्रदीपानां ये निकराः समूहास्तेषां द्युतिभिः निरस्तं ध्वान्तं तमो यस्मिंस्तत् यत्रान्तःपुरे भवने च विचित्रवलभीषु स्तम्भाग्रप्रसारितवक्रदारुविशेषेषु चन्द्रशालोपरि वा स्थिताः शिखण्डिनो मयूराः अक्षैर्गवाक्षमार्गैर्निर्यान्तं विहितागुरुधूममीक्ष्य दृष्ट्वा ल्यबार्षः एक्ष्येति पाठो वा। घनबुद्धयः नीलाम्बुदोऽयमिति बुद्धिर्येषां तथाभूता उन्नदन्तश्च सन्तो नृत्यन्त तत् अनेन रात्रौ मुनेरागमो व्यज्यते। तदैव तस्य युगपत्प्रतिगृहं स्थितिः स्यादित्याशयात् रत्नदीपसद्भावान्निश्यपि शिखण्डिनृत्यादि ॥१२॥ तस्मिन्निति ॥ तस्मिन् भवने अनुसवं सर्वकालम् आत्मना समानानि गुणरूपवयांसि सुवेषः अलङ्कारश्च यस्य तेन दासीनां सहस्रेण युतयापि रुक्ममयो दण्डो यस्य तेन चमरव्यजनेन तं वीजयन्त्या गृहिण्या रुक्मिण्या सहितं सात्वतपतिं श्रीकृष्णं विप्रो नारदो ददर्श ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तं नारदं सम्यक् निरीक्ष्य सकलधर्मभृतां वरिष्ठः भगवान् श्रियो रुक्मिण्याः पर्यङ्कात् सहसा आशु उत्थितः सन् किरीटजुष्टेन शिरसा तस्य पादयुगलं आनम्य साञ्जलिः सन् स्वे स्वकीये आसने अवीविशत् उपवेशयामास ॥ १४ ॥ तस्येति ॥ ब्राह्मणकुले साधवो ब्रह्मण्यास्तेषां देवः प्रवर्तकः फलदश्चेति यद्गुणनाम अन्वर्थं नाम तत्तस्यैव युक्तं समञ्जसं यस्य चरणशौचं गङ्गा अशेषाणां ब्रह्मादीनां सर्वेषां तीर्थं पावित्र्यकरं सः जगतां ब्रह्मादिप्राणिनां गुरुतरोऽपि पूज्यतमोऽपि हि यस्मात् सतां पतिः पालकः अतः तच्छिक्षार्थं नतु स्वपावित्र्यार्थं तस्य नारदस्य चरणौ अवनिज्य प्रक्षाल्य तदपः प्रक्षालनजलानि स्वमूर्ध्ना बिभ्रत् धारयन् उपविवेशेति शेषः। यद्वा। अबिभ्रत् अबिभः दधार आर्षः ॥ १५ ॥ संपूज्येति ॥ पुराणः ऋषिः मन्त्रप्रवर्त्तकः नरस्य सखा नारायणः उदितेन शास्त्रोक्तेन विधिना एवं देवर्षिवर्यं नारदं संपूज्य अमृतेन जुष्टया अमृतवर्षिण्या मिष्टयेति वा पाठः। मितया स्वल्पाक्षरया वाण्या हे प्रभो दिष्ट्या त्वदागमनम् इति तम् अभिभाष्य सम्बोध्य भगवते ऐश्वर्यादिपूर्णाय तुभ्यं किं करवामेति

तं संनिरीक्ष्य भगवान्सहसोत्थितः श्रीपर्यङ्कतः सकलधर्मभृतां वरिष्ठः ॥ आनम्य पादयुगलं शिरसा किरीटजुष्टेन साञ्जलिरवीविशदासने स्वे ॥१४॥ तस्यावनिज्य चरणौ तदपः स्वमूर्ध्ना बिभ्रज्जगद्गुरुतरोपि सतां पतिर्हि ॥ ब्रह्मण्यदेव इति यद्गुणनामयुक्तं तस्यैव यच्चरणशौचमशेषतीर्थम् ॥ १५ ॥ संपूज्य देवऋषिवर्यमृषिः पुराणो नारायणो नरसखो विधिनोदितेन ॥ वाण्याभिभाष्य मितयाऽमृतमिष्टया तं प्राह प्रभो भगवते करवामहे किम् ॥ १६ ॥ नारद उवाच ॥ नैवाद्भुतं तव विभोऽखिललोकनाथ मैत्री जनेषु सकलेषु दमः खलानाम् ॥ निःश्रेयसाय हि जगत्स्थितिरक्षणाभ्यां स्वैरावतार उरुगाय विदाम सुष्ठु ॥ १७ ॥ दृष्टं तवाङ्घ्रियुगलं जनताऽपवर्गं ब्रह्मादिभिर्हृदि विचिन्त्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलम्बं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥ १८ ॥

प्राह स्म। हे इति पृथक् छेदः ॥ १६ ॥ नेति ॥ हे विभो हे उरुगाय सकलेषु साधुजनेषु मैत्री तच्छिक्षार्थमस्मत्सम्माननं खलानां परपीडाकराणां दमो दण्डश्च अखिललोकनाथे त्वयि अद्भुतम् असम्भावितं नैव भवति सामान्ये नपुंसकमेकत्वं च। हि यस्मात् जगतः स्थितिर्धारणं रक्षणं च ताभ्यां सह निःश्रेयसाय साधुजनानां कल्याणाय तवायं स्वैरावतारः स्वेच्छयावतार इति वयं सुष्ठु सम्यक् विदाम विद्मः आर्षः। अतः साधु सम्माननं खलदमश्च युज्यते ॥ १७ ॥ किं करवामेत्युक्तं तत्राह—दृष्टमिति ॥ जनताया अपवर्गः मोक्षो यस्मात् यद्वा जनानां तापस्य वर्गो वर्जनं यस्मात् तत् अत एवागाधबोधैः सर्वज्ञैरपि ब्रह्मादिभिः केवलं हृदि विचिन्त्यं तद्दर्शनं तु दुर्लभमेव। संसार एव दुःखदत्वात् कूपः तस्मिन्निपतितानामुत्तरणायावलम्ब आश्रयणं यस्य तत् व्याख्यानान्तरेपवर्गावलम्बयोः क्लैब्यमार्षमिति वक्तव्यं स्यात्। तवाङ्घ्रियुगलं मया दृष्टम् अतो यद्यपि तद्दर्शनेनैव कृतार्थोऽस्मि तथापि यथा निरन्तरं तत्स्मृतिः स्यात्तद्ध्यायन्नेव च चरामि चरेयं तथानुगृहाण। यद्वा। यथा त्वत्स्मृतिः स्यात्तथानुहाण

Nepal Sanskrit University, Balmiki C...

CC-0. In Public Domain. Digitization by eGangotri

अतस्तद्द्धयायन्नेव चरामीति ॥ १८ ॥ तत इति ॥ अङ्ग हे राजन् भगवतानुगृहीतोऽनुज्ञातश्च ततो गृहाद्विनिःसृतः स नारदः योगेश्वराणामपि ईश्वरस्य श्रीकृष्णस्य योगमायायाः विवित्सया ज्ञातुमिच्छया इडभाव आर्षः । विन्दतेर्वा उपलम्भार्थता कृष्णपत्न्याः अन्यद्गेहं समीपस्थं सत्यभामागृहमाविशत् ॥ १९ ॥ दीव्यन्तमिति सार्द्धम् ॥ तत्रापि गृहे प्रियया भार्यया उद्धवेन च सह अक्षैर्दीव्यन्तं क्रीडन्तं भगवन्तं ददर्शेति सर्वत्र शेषः । इह सर्वत्र विलक्षणस्तादृश एव सन्निवेशो भगवता प्रदर्शितो येन पूर्वदृष्टगृहे स्थितस्य शीघ्रमत्र समागमनशङ्का न स्यादिति ज्ञेयम् । एवं योगमाययैव यौगपद्यं कालभेदक्रियाभेदेष्वपि ज्ञेयम् । यथा मज्जनाय कृतोद्यममिति प्रातः पञ्चभिर्मखैरिति मध्याह्नः भुञ्जानमवशेषितमित्यपराह्णः क्वचिच्छयानमिति रात्रिशेष इत्यादि । ततश्च भगवता नारदः परया भक्त्या प्रत्युत्थानासनादिभिः पूजितः भवान् कदा आयातः इत्यविदुषा अजानतेव भगवताऽसौ नारदः पृष्टश्च ॥ २० ॥ क्रियते इति ॥ अपूर्णैर्धनपुत्रगृहादिष्वासक्तैरस्मदादिभिः पूर्णानां युष्माकं किं नु कार्यं क्रियते कर्तुं शक्यते

ततोन्यदाविशद्गेहं कृष्णपत्न्याः स नारदः ॥ योगेश्वरेश्वरस्याङ्ग योगमायाविवित्सया ॥१९॥ दीव्यन्तमक्षैस्तत्रापि प्रियया चोद्धवेन च ॥ पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥ पृष्टश्चाविदुषेवासौ कदाऽऽयातो भवानिति ॥ २० ॥ क्रियते किं नु पूर्णानामपूर्णैरस्मदादिभिः ॥ अथापि ब्रूहि नो ब्रह्मञ्जन्मैतच्छोभनं कुरु ॥२१॥ स तु विस्मित उत्थाय तूष्णीमन्यदगाद्गृहम् ॥ तत्राप्याचष्ट गोविन्दं लालयन्तं सुताञ्छिशून् ॥ २२ ॥ ततोऽन्यस्मिन्गृहेऽपश्यन्मज्जनाय कृतोद्यमम् ॥ जुह्वतं च वितानाग्नीन्यजन्तं पञ्चभिर्मखैः ॥ २३ ॥ भोजयन्तं द्विजान्क्वापि भुञ्जानमवशेषितम् ॥ क्वापि सन्ध्यामुपासीनं जपन्तं ब्रह्म वाग्यतम् ॥ २४ ॥ एकत्र चासिचर्मभ्यां चरन्तमसिवर्त्मसु ॥ अश्वैर्गजै रथैः क्वापि विचरन्तं गदाग्रजम् ॥ २५ ॥ क्वचिच्छयानं पर्यङ्के स्तूयमानं च बन्दिभिः ॥ मन्त्रयन्तं च कस्मिंश्चिन्मन्त्रिभिश्चोद्धवादिभिः ॥ २६ ॥

तेषामपेक्षारहितत्वादित्याशयः । यद्यप्येवमथापि हे ब्रह्मन् नोऽस्मान् प्रति किंचित्कार्यं ब्रूहि स्वनियोगेन ममैतज्जन्म शोभनं सफलं कुरु इति प्रार्थितश्चेति शेषः ॥ २१ ॥ स इति ॥ स नारदस्तु विस्मितः सन् उत्थाय तूष्णीमन्यद्गृहमगात् तत्रापि गोविन्दं शिशून् बालान् सुतान् लालयन्तम् अचष्ट अपश्यत् ॥ २२ ॥ तत इति ॥ ततः अन्यस्मिन् गृहे मज्जनाय स्नानाय कृतोद्यमम् अपश्यत् क्वचिद् वितानाग्नीन् आहवनीयादीन् जुह्वन्तं नुमार्षः क्वचित् पञ्चभिर्मखैः देवयज्ञादिभिर्महायज्ञैः देवादीन्यजन्तम् अपश्यत् ॥ २३ ॥ भोजयन्तमिति ॥ क्वापि द्विजान् भोजयन्तं क्वापि अवशेषितं ब्राह्मणभोजनावशिष्टं भुञ्जानं क्वापि सन्ध्यामुपासीनं क्वापि ब्रह्मगायत्रीमन्त्रं प्रणवं वा जपन्तं वाग्यतं मौनिनम् अपश्यत् वाचो यतं यमनं यत्रेति जपक्रियाविशेषणं वा ॥ २४ ॥ एकत्रेति ॥ एकत्र क्वचित् असिचर्मभ्यां खड्गखेटाभ्यां सहासिवर्त्मसु खड्गभ्रमणमार्गेषु चरन्तं क्वापि अश्वैः गजैः रथैश्च विचरन्तं गदाग्रजम् अपश्यत् ॥ २५ ॥ क्वचिदिति ॥ क्वचित् पर्यङ्के शयानं बन्दिभिः स्तूयमानं चापश्यत् । कस्मिंश्चित्काले उद्धवादिभिर्म- ॥२२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्त्रिभिर्मन्त्रयन्तम् अपश्यत् शता आर्षः । निवृत्तप्रेषणा ण्णौ वा प्रतिगृहमुद्धवादिभेदो ज्ञेयः ॥ २६ ॥ जलेति ॥ क्वापि वारमुख्याः वेश्याः तासां बलेन गणेनावृतं जलक्रीडारतमपश्यत् । कुत्रचित् द्विजमुख्येभ्यः स्वलंकृताः गाः ददतमपश्यत् ॥ २७ ॥ इतिहासेति ॥ मङ्गलानि शुभावहानि इतिहासादीनि शृण्वन्तं कदाचित्कचित् गृहे प्रियया सह हास्यकथया हसन्तमपश्यत् ॥ २८ ॥ क्वापीति ॥ क्वापि धर्मं सेवमानं कुत्रचित् अर्थं कामं च सेवमानं कुत्रचित् प्रकृतेः परं पुरुषम् एकमात्मनि ध्यायन्तमासीनमपश्यत् ॥ २९ ॥ शुश्रूषन्तमिति ॥ सपर्यया पूजासामग्र्या कामैर्वस्त्रादिविषयैस्तज्जन्यभोगैश्च गुरून् गर्गवसुदेवादीन् शुश्रूषन्तं सेवमानं शता आर्षः । कुत्रचित्कैश्चित्सह विग्रहं विरोधं कुर्वन्तं कर्तुमारभमाणम् अन्यत्र गृहे च कैश्चित्सह सन्धिं कुर्वन्तं केशवमपश्यत् ॥ ३० ॥ कुत्रापीत्यर्द्धम् ॥ कुत्रापि रामेण सह सतां शिवं योगक्षेमं चिन्तयन्तम् अपश्यत् ॥ ३१ ॥ पुत्राणामिति ॥ काले तत्तत्समये पुत्राणां तत्सदृशैर्दारैः दुहितॄणां च तत्सदृशैर्वरैः विधिना उपयापनं प्रापणं विवाहमित्यर्थः । विभूतिभिः विभवैः कल्पयन्तं

जलक्रीडारतं क्वापि वारमुख्याऽबलावृतम् ॥ कुत्रचिद्द्विजमुख्येभ्यो ददतं गाः स्वलंकृताः ॥ २७ ॥ इतिहासपुराणानि शृण्वन्तं मङ्गलानि च ॥
हसन्तं हासकथया कदाचित्प्रियया गृहे ॥ २८ ॥ क्वापि धर्मं सेवमानमर्थकामौ च कुत्रचित् ॥ ध्यायन्तमेकमासीनं पुरुषं प्रकृतेः परम् ॥ २९ ॥
शुश्रूषन्तं गुरून् क्वापि कामैर्भोगैः सपर्यया ॥ कुर्वन्तं विग्रहं कैश्चित्सन्धिं चान्यत्र केशवम् ॥ ३० ॥ कुत्रापि सह रामेण चिन्तयन्तं सतां शिवम्
॥ ३१ ॥ पुत्राणां दुहितॄणां च काले विध्युपयापनम् ॥ दारैर्वरैस्तत्सदृशैः कल्पयन्तं विभूतिभिः ॥ ३२ ॥ प्रस्थापनोपानयनैरपत्यानां महोत्सवान् ॥ वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥ ३३ ॥ यजन्तं सकलान्देवान्क्वापि क्रतुभिरूर्जितैः ॥ पूर्तयन्तं क्वचिद्धर्मं कूपाराममठादिभिः ॥ ३४ ॥ चरन्तं मृगयां क्वापि हयमारुह्य सैन्धवम् ॥ घ्नन्तं ततः पशून्मेध्यान्परीतं यदुपुङ्गवैः ॥ ३५ ॥ अव्यक्तलिङ्गं प्रकृतिष्वन्तःपुरगृहादिषु ॥ क्वचिच्चरन्तं योगेशं तत्तद्भावबुभुत्सया ॥ ३६ ॥

घटयन्तम् अपश्यत् ॥ ३२ ॥ प्रस्थापनेति ॥ वार्षिकोत्सवसमाप्तौ प्रस्थापनं दुहितृजामात्रादीनां स्वगृहात्तद्गृहं प्रति नयनम् उत्सवारम्भे च उपानयनं पुनस्तद्गृहात्स्वगृहानयनं तैर्महोत्सवान् कल्पयन्तं येषां योगेश्वरेशस्य कृष्णस्यापत्यानां महोत्सवान् वीक्ष्य लोकाः सर्वे जना विसिस्मिरे विस्मयं चक्रुः । यिलोपश्छान्दसः ॥ ३३ ॥ यजन्तमिति ॥ क्वापि कुत्रचित् गृहे स्वकलान् स्वस्यैव कला अंशो येषु तान् स्वांशभूतान् सकलान् इति च पाठः । देवानिन्द्रादीन् ऊर्जितैर्बहुदक्षिणैः क्रतुभिर्यजन्तं क्वचिच्च कूपारामादिनिर्माणैः स्मार्तं धर्मं पूर्तयन्तं पूर्ततया सम्पादयन्तम् अपश्यत् ॥ ३४ ॥ चरन्तमिति ॥ यदुपुङ्गवैः परीतं सैन्धवं सिन्धुदेशोद्भवं हयम् अश्वमारुह्य क्वापि मृगयां चरन्तं ततस्तस्यां मृगयायां मेध्यान् श्राद्धादियोग्यान् पशून् घ्नन्तमपश्यत् ॥ ३५ ॥ अव्यक्तेति ॥ प्रकृतिष्वमात्यादिष्वन्तःपुरगृहादिषु च तेषां तेषां भावानां बुभुत्सया बोद्धुमिच्छया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्यक्तं वेषान्तरेण च्छन्नं लिङ्गं स्वासाधारणचिह्नं यस्य तथाभूतं क्वचिच्चरन्तं योगेशं कृष्णमपश्यत् एवमन्यदप्यन्यत्र दृष्टमूह्यम् । यद्वा । एतावद्दृष्ट्वा मोहेणाग्रे निवृत्तः ॥ ३६ ॥ अथेति ॥ मानुषीं गतिं तनुं चेष्टां चेयुषः प्राप्तवतः भगवतो योगमायोदयं वीक्ष्य अथ प्रहसन् इव नारदः हृषीकेशं श्रीकृष्णमुवाच ॥ ३७ ॥ विदामेति ॥ हे योगेश्वर मायिनां ब्रह्मादीनामपि दुर्दर्शा दुर्ज्ञेयास्ते भवत्पादनिषेवया तत्प्रभावेणात्मन् आत्मनि स्वमनसि ङिलुक् छान्दसः । निर्भाताः स्फुरिताः ते तव योगमायाः विदाम विद्मः आर्षः ननु त्वत्स्वरूपमित्यर्थः । यद्वा । प्रार्थनायां लोट् । किमर्थमिमां प्रकटयसीति साक्षादनुभवितुं प्रार्थयामहे ॥३८॥ अनुजानीहीति ॥ हे देव भुवनपावनीस्तव लीला उद्गायन् ते यशसा प्लुतान् व्याप्तान् लोकान् अहं यथा पर्यटामि तथा मामनुजानीहि गमनायानुज्ञां देहि ॥ ३९ ॥ ब्रह्मन्निति ॥ हे ब्रह्मन् अहं धर्मस्य वक्ता उपदेष्टा लोकसङ्ग्रहार्थं स्वयं तस्य कर्ता फलदानादिना तस्य अनुमोदिताप्यहं तत् तस्मात् लोकं शिक्षयन् धर्मं ग्राहयितुमिमं त्वत्सम्माननादिधर्ममहमास्थितः ननु तत्त्वतः अतो

अथोवाच हृषीकेशं नारदः प्रहसन्निव ॥ योगमायोदयं वीक्ष्य मानुषीमीयुषो गतिम् ॥ ३७ ॥ विदाम योगमायास्ते दुर्दर्शा अपि मायिनाम् ॥ योगेश्वरात्मन्निर्भाता भवत्पादनिषेवया ॥३८॥ अनुजानीहि मां देव लोकांस्ते यशसा प्लुतान् ॥ पर्यटामि तवोद्गायँल्लीलां भुवनपावनीम् ॥३९॥ श्रीभगवानुवाच ॥ ब्रह्मन् धर्मस्य वक्ताऽहं कर्ता तदनुमोदिता ॥ तच्छिक्षयँल्लोकमिममास्थितः पुत्र मा खिदः ॥४०॥ श्रीशुक उवाच ॥ इत्याचरन्तं सद्धर्मान्पावनान्गृहमेधिनाम् ॥ तमेव सर्वगेहेषु सन्तमेकं ददर्श ह ॥४१॥ कृष्णस्यानन्तवीर्यस्य योगमायामहोदयम् ॥ मुहुर्दृष्ट्वा ऋषिरभूद्विस्मितो जातकौतुकः ॥ ४२ ॥ इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना ॥ सम्यक् सभाजितः प्रीतस्तमेवानुस्मरन्ययौ ॥ ४३ ॥ एवं मनुष्यपदवीमनुवर्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः ॥ रेमेऽङ्ग षोडशसहस्रवराङ्गनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः ॥ ४४ ॥

हे पुत्र मा खिदं मोहं मा प्राप्नुहि आर्षोऽयं प्रयोगः ॥ ४० ॥ इतीति ॥ इत्येवं गृहमेधिनां पावनान् पावित्र्यकरान् सद्धर्मान् शास्त्रविहितकर्माणि आचरन्तम् अनुतिष्ठन्तं तमेकं कृष्णमेव सर्वेषु गेहेषु सन्तं वर्तमानं ददर्श ॥ ४१ ॥ कृष्णस्येति ॥ एवं जातकौतुकः सञ्जातदर्शनोत्साहः ऋषिर्नारदः अनन्तवीर्यस्यानन्तशक्तेः कृष्णस्य योगमायामहोदयं मुहुः पुनः सर्वत्र गृहेषु दृष्ट्वा विस्मितः आश्चर्ययुक्तोऽभूत् ॥ ४२ ॥ इतीति ॥ इत्येवं लोकप्रवृत्त्यर्थमर्थादिषु श्रद्धितः श्रद्धायुक्तः आत्मा चित्तं यस्य तेन कृष्णेन सम्यक् सभाजितः सत्कृतः अत एव प्रीतो नारदस्तमेव कृष्णमनुस्मरन् ययौ ॥ ४३ ॥ एवमिति ॥ अङ्ग हे राजन् एवं मनुष्याणां पदवीं रीतिमनुवर्त्तमानः अखिलानां प्राणिनां भवाय धर्मादिलाभाय गृहीता नानाविधाः शक्तयो मूर्त्तयो येन षोडशसहस्रं या वराङ्गना उत्तमस्त्रियस्तासां सव्रीडं च तत्सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः सेवितो नारायणो रेमे ॥ ४४ ॥ ॥२२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यानीति ॥ अङ्ग हे राजन् इह अस्मिन् श्रीकृष्णावतारे विश्वस्य विलयः प्रलयः उद्भव उत्पत्तिः वृत्तिः स्थितिः पालनं तद्धेतुर्हरिः अनन्यविषयाणि अन्यैः कर्तुमशक्यानि यानि कर्माणि चकार तानि यस्तु मनुष्यो गायति शृणोति वा अनुमोदते श्रुत्वा प्रशंसति वा तस्य अपवर्गमार्गे मोक्षप्रापके भगवति भक्तिर्भवेत् ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमोनसप्ततितमे व्यधात् ॥ ६९ ॥ आह्निके सप्ततितमे दूतनारदकार्ययोः ॥ विचारणमभूत्तत्र सार्द्धाः श्लोका नगाब्धयः ॥ षड्वाचेति पञ्चाब्ध्याः पञ्चाशैत्स्युरनुष्टुभः ॥ ७० ॥ इत्यर्थधर्मकामेषु कृष्णेन श्रद्धितात्मनेत्युक्तमतः प्रातरारभ्य कृष्णस्याह्निकमाह–अथेति ॥ अथ उषसि प्रभातवेलायाम् उपवृत्तायामासन्नायां सत्यां स्त्रीत्वमार्षम् । भाविना भगवद्विरहेणातुराः पतिभिः कृष्णमूर्तिभिः गृहीताः कण्ठा यासां ता माधव्यः माधवस्य कृष्णस्य स्त्रियः कूजतः शब्दं कुर्वतः कुक्कुटान् अशपन् प्रातःकालसूचनेन कृष्णविरहहेतवो यूयं निर्हेतुदुःखदा इति पतिभिरिति प्रतीतिभेदाद्बहुत्वम् ॥ १ ॥ वयांसीति ॥ मन्दारवनस्य वायुभिः हेतुभिः

यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार॥ यस्त्वङ्ग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥४५॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ श्रीशुक उवाच ॥ अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन् ॥ गृहीतकण्ठ्यः पतिभिर्माधव्यो विरहातुराः ॥ १ ॥ वयांस्यरूरुवन्कृष्णं बोधयन्तीव बन्दिनः ॥ गायत्स्वलिष्वनिद्राणि मन्दारवनवायुभिः ॥ २ ॥ मुहूर्तं तं तु वैदर्भी नामृष्यदतिशोभनम् ॥ परिरम्भणविश्लेषात्प्रियबाह्वन्तरं गता ॥ ३ ॥ ब्राह्मे मुहूर्त उत्थाय वार्युपस्पृश्य माधवः ॥ दध्यौ प्रसन्नकरण आत्मानं तमसः परम् ॥ ४ ॥ एकं स्वयंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषम् ॥ ब्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतिम् ॥ ५ ॥

अलिषु भ्रमरेषु गायत्सु सत्सु अनिद्राणि वयांसि पक्षिणो बन्दिन इव सुप्तं कृष्णं बोधयन्ति सन्ति अरूरुवन् पुनः पुनरकूजन् अरोरवुरिति वक्तव्ये अभ्यासगुणजुसभावार्षौ ॥ २ ॥ मुहूर्त्तमिति ॥ प्रियस्य कृष्णस्य बाह्वोरन्तरं गता परिरम्भिता वैदर्भी रुक्मिणी उपलक्षणतया सत्यभामादिरपि स्नानपूजादियोग्यत्वात् तत्तु मुहूर्त्तमतिशोभनमपि प्रियपरिरम्भणस्य विश्लेषाद्धेतोर्नामृष्यन्न सेहे ॥ ३ ॥ ब्राह्मे इति ॥ माधवः कृष्णो ब्राह्मे मुहूर्त्ते यामार्द्धावशिष्टायां रात्रौ चोत्थाय वारि जलम् उपस्पृश्य हस्तपादादिप्रक्षालनपूर्वकमाचम्य प्रसन्नानि सावधानानि करणानीन्द्रियाणि यस्य स तथाभूतः सन् तमसः प्रकृतेः परं शुद्धमात्मानं दध्यौ ॥ ४ ॥ एकमिति ॥ आत्मानं विशिनष्टि एकं स्वयंज्योतिः अनन्यं निरुपाधिं सर्वात्मकम् अव्ययं स्वसंस्थया स्वरूपसंस्थित्या नित्यं निरस्तं निवृत्तं कल्मषमविद्यादिदोषो यस्मात्तम् अस्य विश्वस्य उद्भवनाशौ उपलक्षणतया पालनमपि तेषां हेतुभिः स्वशक्तिभिः रजस्तमःसत्वगुणैर्लक्षितो भावः जडानां रजआदीनां स्वतः प्रवृत्त्यसंभवात्तदधिष्ठानचैतन्यतया सत्ता यस्य स चासौ निर्वृतिरान-

CC-0. In Public Domain. Digitization by eGangotri

न्दरूपश्च तं ब्रह्माख्यं वेदान्ततात्पर्यगोचरम् आत्मानं दध्यावित्यनुषङ्गः ॥ ५ ॥ अथेति ॥ अथानन्तरं सत्तमः भगवान् अमले शुद्धे अम्भसि जले आप्लुतः स्नातः सन् वाससी परिधाय सन्ध्योपगमादि सन्ध्योपासनादि क्रियाकलापं क्रियासमूहं यथाविधि चकार। तत्र च श्रीकृष्णस्य काण्वशाखावत्त्वात् सूर्योदयात्पूर्वमेव हुतः अनलः आहवनीयो येन सः वाग्यतः मौनी सन् ब्रह्म गायत्रीं जजाप ॥ ६ ॥ क्रियाकलापमाह—उपेति त्रयम् ॥ आत्मवान् सावधानः उद्यन्तमर्कमुपस्थाय अर्घं प्रदायोपस्थानं च कृत्वा आत्मनः कलाः स्वस्यांशभूतान् देवादीन् ददौ तर्पयित्वा कुले वृद्धादींश्चाभ्यर्च्य तेभ्योऽलंकृतेभ्यो विप्रेभ्यः क्षौमं वस्त्रविशेषः अजिनं कृष्णमृगाजिनं तिलाश्च तैः सह रुक्मं सुवर्णं शृङ्गयोर्यासां तासां साध्वीनां सुस्वभावानां मौक्तिकानां स्रजो माला यासां तासां पयस्विनीनां बहुक्षीराणां गृष्टीनां प्रथमप्रसूतानां सवत्सानां वत्सवतीनां शोभनं वासो यासां तासां रूप्यं खुराग्रे यासां तासां धेनूनां बद्वं बद्वं दिने दिने ददौ। बद्वशब्दो वकारोपधो मध्यस्थतवर्गतृतीयश्च दिने दिने इति प्रतिगृहं चेत्यपि ज्ञेयम्। " बद्वं

अथाप्लुतोऽम्भस्यमले यथाविधि क्रियाकलापं परिधाय वाससी ॥ चकार सन्ध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ॥ ६ ॥ उपस्थायार्कमुद्यन्तं तर्पयित्वात्मनः कलाः ॥ देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्य चात्मवान् ॥ ७ ॥ धेनूनां रुक्मशृङ्गीणां साध्वीनां मौक्तिकस्रजाम् ॥ पयस्विनीनां गृष्टीनां सवत्सानां सुवाससाम् ॥ ८ ॥ ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह ॥ अलंकृतेभ्यो विप्रेभ्यो बद्वं बद्वं दिने दिने ॥ ९ ॥ गोविप्रदेवतावृद्धगुरून् भूतानि सर्वशः ॥ नमस्कृत्यात्मसम्भूतीर्मङ्गलानि समस्पृशत् ॥ १० ॥ आत्मानं भूषयामास नरलोकविभूषणम् ॥ वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ॥ ११ ॥ अवेक्ष्याज्यं तथाऽऽदर्शं गोवृषद्विजदेवताः ॥ कामांश्च सर्ववर्णानां पौरान्तःपुरचारिणाम् ॥ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनन्दत ॥ १२ ॥

चतुरशीत्यग्रं सहस्राणि त्रयोदश (१३०८४)। गृहे गृहे तु तद्दानादेकविंशतिकोटयः ॥ सप्तलक्षीसप्तपञ्चाशत्सहस्राणि चाधिका। द्विसप्ततिरिति ज्ञेया गवां संख्या (२१०७५७०७२) दिने दिने ॥ " ॥ ७ ॥ ८ ॥ ९ ॥ गोविप्रेति ॥ आत्मसम्भूतीः स्वविभूतीः गोविप्रादीन् सर्वशः भूतानि च नमस्कृत्य मङ्गलानि कपिलगव्यादिमङ्गलद्रव्याणि समस्पृशत् ॥ १० ॥ आत्मानमिति ॥ नरलोकस्य विभूषणभूतमात्मानं स्वीयैर्वासोभिः पीताम्बरादिभिर्भूषणैश्च कौस्तुभादिभिः दिव्यैः स्रगादिभिश्च भूषयामास ॥ ११ ॥ अवेक्ष्येति सार्द्धम् ॥ आज्यं घृतं तथा आदर्शादीन् अवेक्ष्य मङ्गलार्थं दृष्ट्वा पौरादीनां सर्ववर्णानां कामान् अभिलषितार्थान् प्रदाप्य दापयित्वा दातुमाज्ञाप्य वा। प्रकृतीः अमात्यादीन् कामैस्तदभिलषितविषयैः प्रतोष्य प्रत्यनन्दत। तङार्षः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संविभज्येति ॥ ततोऽग्रतः प्रथमतो विप्रान् सुहृदो मित्राणि प्रकृतीर्दाराश्च स्रगादिभिः संविभज्य तेभ्यस्तानि दत्त्वा स्वयमुपायुङ्क्तभुक्तवान् । गृहस्थस्य शेषभोजित्वात् ॥ १३ ॥ तावदिति ॥ यावत्सर्वजनसम्मानपूर्वकं भोजनं भगवान् कृतवान् तावत्सूतः सुग्रीवाद्यैर्हयैर्युक्तं परमाद्भुतं स्यन्दनं रथमुपानीयाग्रतः प्रणम्यावस्थितः । यद्वा । अग्रतः तत्तत्स्त्रीगृहनिर्गममार्गाणामेकताप्राप्तिस्थाने तद्गोपुराग्रभागे रथमुपानीय ॥ १४ ॥ गृहीत्वेति ॥ स्वदक्षिणपाणिना सारथेः पाणी अञ्जलीभूतौ गृहीत्वा सात्यक्युद्धवसंयुक्तो भगवांस्तं रथमथानन्तरमेवारुहत् । च्लेरङ् छान्दसः । पूर्वाद्रिम् उदयाचलं यथा भास्करः सूर्य आरोहति तथा ॥ १५ ॥ अथ पुनस्तद्रथारोहात्पूर्ववृत्तं सिंहावलोकनन्यायेनाह—ईक्षित इति ॥ अन्तःपुरस्त्रीणां व्रीडा लज्जा प्रेम च ताभ्यां सहितैः वीक्षितैः दृष्टिभिरीक्षितः निरीक्ष्यमाणस्ततश्च ताभिः कृच्छ्रात् क्लेशात् विसृष्टः गन्तुमनुज्ञातः मध्याह्न एव भोजनार्थमेष्याम्येव किमिति तप्यसे इति प्रत्येकं सूचयन् जातहासश्च तासां मनो हरन् गृहान्निरगात् ॥ १६ ॥ सुधर्मेति ॥ अङ्ग हे राजन् एवं सर्वगृहेभ्यः पृथक् पृथक् निर्ग-

संविभज्याग्रतो विप्रान्स्रक्ताम्बूलानुलेपनैः ॥ सुहृदः प्रकृतीर्दारानुपायुङ्क्त ततः स्वयम् ॥ १३ ॥ तावत्सूत उपानीय स्यन्दनं परमाद्भुतम् ॥ सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोऽग्रतः ॥ १४ ॥ गृहीत्वा पाणिना पाणी सारथेस्तमथारुहत् ॥ सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥ १५ ॥ ईक्षितोऽन्तःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः ॥ कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन्मनः ॥ १६ ॥ सुधर्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः ॥ प्राविशद्यन्निविष्टानां न सन्त्यङ्ग षडूर्मयः ॥ १७ ॥ तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभोऽवभासयन् ॥ वृतो नृसिंहैर्यदुभिर्यदूत्तमो यथोडुराजो दिवि तारकागणैः ॥ १८ ॥ तत्रोपमन्त्रिणो राजन्नानाहास्यरसैर्विभुम् ॥ उपतस्थुर्नटाचार्या नर्तक्यस्ताण्डवैः पृथक् ॥ १९ ॥ मृदङ्गवीणामुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुश्च सूतमागधबन्दिनः ॥ २० ॥

त्यानन्तरमेक एव अभिन्नमूर्तिर्दृष्टः । सर्वैर्वृष्णिभिः परिवारितः सुधर्माख्यां सभां प्राविशत् यस्यां सभायां निविष्टानां क्षुत्पिपासे प्राणस्य शोकमोहौ मनसः जरामृत्यू शरीरस्येति षडूर्मयो न सन्ति न भवन्ति ॥ १७ ॥ तत्रेति ॥ तत्र सभायां परमासने उपविष्टः नृसिंहैर्मनुष्यश्रेष्ठैः यदुभिर्वृतः यदूत्तमः विभुः कृष्णः स्वभासा स्वदीप्त्या ककुभो दिशोऽवभासयन् बभौ । यथा दिवि आकाशे स्थितस्तारकागणैः वृतः उडुराजः चन्द्रः सर्वा दिशोऽवभासयन् भाति तथा ॥ १८ ॥ तत्रेति युग्मम् ॥ हे राजन् तत्र सभायामुपमन्त्रिणः परिहासका नानाहास्यरसैर्विभुं कृष्णमुपतस्थुः सेवितवन्तः । तथा मृदङ्गादीनां दरस्य शङ्खस्य च स्वनैः सह नटानामाचार्याः पृथक् स्वस्वसमुदायेन ताण्डवैः नृत्यविशेषैस्तमुपतस्थुः । नर्तक्यश्च पृथक् ननृतुः जगुश्च । तथा सूतमागधबन्दिनः तुष्टुवुः ॥ १९ ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राहुरिति ॥ तत्र सभायामासीनाः केचिद्ब्राह्मणा ब्रह्म आहुः स्म मन्त्रान् व्याचक्षतेत्यर्थः । अन्ये च वादिनो वदनचतुराः सूताः पुण्यं यशो येषां तेषां पूर्वेषां राज्ञां कथाः अकथयन् । तत्राहुरित्यत्र तत्रस्था इति पाठे तु ब्रह्मवादिन इति एकमेव पदम् एकवाक्यता च ॥ २१ ॥ तत्रैक इति ॥ हे राजन् तत्र सभामध्ये न पूर्वं दर्शनं यस्य एवंभूतः कश्चिदेकः पुरुष आगतः । प्रतीहारैः द्वारपालैर्भगवते विज्ञापितः ततस्तदाज्ञयान्तः प्रवेशितश्च ॥ २२ ॥ स इति ॥ स पुरुषः परेषां कालादीनामीशाय नियामकाय कृष्णाय कृष्णमनुकूलयितुं नमस्कृत्य कृताञ्जलिः सन् जरासन्धनिरोधजं राज्ञां दुःखं दुःखसूचकं वचनमावेदयत् ॥ २३ ॥ ये चेति ॥ तस्य जरासन्धस्य दिग्विजये ये नृपाः संनतिं नम्रतां न ययुस्ते द्वे अयुते विंशतिः सहस्राणि शतान्यष्टावित्यपि ज्ञेयम् । अग्रे तथोक्तेः गिरिव्रजसंज्ञके दुर्गे तेन जरासन्धेन प्रसह्य बलान्निरुद्धा आसन् । अत्र लक्षसंख्यराजबलिभिर्महाभैरवपूजाकामनयेति भारतादौ प्रसिद्धम् ॥ २४ ॥ कृष्णेति ॥ हे कृष्णेत्यादीनि सम्बोधनानि भवात्संसारात् भीताः पृथग्धियः पृथग्दर्शिनः वयं त्वां

तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः ॥ पूर्वेषां पुण्ययशसां राज्ञां चाकथयन्कथाः ॥ २१ ॥ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः ॥
विज्ञापितो भगवते प्रतीहारैः प्रवेशितः ॥ २२ ॥ स नमस्कृत्य कृष्णाय परेशाय कृताञ्जलिः ॥ राज्ञामावेदयद्दुःखं जरासन्धनिरोधजम्
॥ २३ ॥ ये च दिग्विजये तस्य संनतिं न ययुर्नृपाः ॥ प्रसह्य रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे ॥ २४ ॥ कृष्ण कृष्णाप्रमेयात्मन्प्रपन्नभय-
भञ्जन ॥ वयं त्वां शरणं यामो भवभीताः पृथग्धियः ॥ २५ ॥ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥
यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥ २६ ॥ लोके भवाञ्जगदिनः कलयावतीर्णः सद्रक्षणाय
खलनिग्रहणाय चान्यः ॥ कश्चित्त्वदीयमतियाति निदेशमीश किं वा जनः स्वकृतमृच्छति तन्न विद्मः ॥ २७ ॥

शरणं यामः ॥२५॥ लोक इति ॥ इह संसारे अयम् अस्मद्विधः लोकः सर्वोऽपि जनो यावत् विकर्मणि निषिद्धे काम्ये च कर्मणि निरतः त्वया उदिते पाञ्चरात्रे " यत्करोषि यदश्नासि " इत्यादि गीतासु चोक्ते भवदर्चने त्वत्पूजनरूपे स्वे स्वकीये कुशले उद्धारहेतुभूते कर्मणि धर्मे प्रमत्तः असावधानो वर्तते तावदेव यो बलवान् कालः सद्य एव अस्य जनस्य जरारोगादिसम्पादनेन जीविताशामपि च्छिनत्ति तस्मै अनिमिषाय कालरूपाय ते तुभ्यं नमोऽस्तु ॥ २६ ॥ लोक इति ॥ हे ईश सतां स्वभक्तानां रक्षणाय तद्रक्षायाः खलनिग्रहं विना असम्भवात्तेषां खलानां निग्रहाय च कलया स्वांशेन सङ्कर्षणेन सह जगतामिनः स्वामी भवान् अस्मिन् लोकेऽवतीर्णः एवं सत्यपि कश्चिदन्यो जरासन्धादिर्जनः त्वदीयं निदेशं शास्त्ररूपं " न मे भक्तः प्रणश्यति, संग्रामे प्रपन्नो न वध्यः " इत्यादिकम् अतियाति उल्लंघयति येन त्वद्भक्तानस्मान् पीडयति किंवा त्वया रक्ष्यमाणोप्यस्मदादिर्जनः स्वकृतमृच्छति स्वकर्मजं दुःखं प्राप्नोत्येव तदेतन्न विद्मः निश्चेतुं न शक्नुमः । उभयत्राप्यसम्भावनासत्वादित्याशयः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नेति ॥ हे ईश तव मायया मोहितत्वात् अतिकृपणाः विषयासक्ताः वयं त्वत् त्वत्तः त्वदनुग्रहात् अनीहैर्निष्कामैर्लभ्यमात्मनि स्वस्मिन्नेव वर्तमानं यत्स्वरूपसुखं तद्धित्वा उपेक्ष्य स्वप्नायितं स्वल्पकालस्थायित्वात् स्वाप्नसुखतुल्यं परतन्त्रं दैव्याद्यधीनं यत् नृपाणां सुखं तदर्थं शश्वद्भयं यस्मिंस्तेन अत एव मृतकतुल्येन देहेन धुरं वहामः। स्त्रीपुत्राणां चिन्ताभारं वहाम इत्यर्थः। अत इह संसारे क्लिश्यामहे ॥ २८ ॥ तदिति ॥ यस्मात् भवान् प्रणतानां शोकहरमङ्घ्रियुग्मं यस्य तथाभूतस्तस्मात्त्वं बद्धान् नोऽस्मान् मगधाह्वयात् जरासन्धाख्यात् कर्मपाशाच्च वियुंक्ष्व वियोजय। अयुतसंख्यानां मतङ्गजानां वीर्यं बिभ्रत् यो जरासन्धः एक एव भूभुजो राज्ञोऽस्मान् मृगराट् सिंहः अवीर्मेषीः इव स्वभवने रुरोध ॥ २९ ॥ य इति ॥ हे अजित हे उदात्तचक्र उद्यतसुदर्शन द्विनवकृत्वः अष्टादश वारान् त्वया सह मृधे युद्धे प्रवृत्ते सति तत्र सप्तदशकृत्वो भग्नः पराजितः पश्चादनन्तं वीर्यं यस्य तथाभूतमपि नृलोकनिरतं मनुष्यचेष्टां स्वीकृतवन्तं भवन्तं सकृदेकदा जित्वा ऊढदर्पः प्राप्तगर्वो यो वै प्रसिद्धो

स्वप्नायितं नृपसुखं परतन्त्रमीश शश्वद्भयेन मृतकेन धुरं वहामः ॥ हित्वा तदात्मनि सुखं त्वदनीहलभ्यं क्लिश्यामहेऽतिकृपणास्तव माययेह ॥ २८ ॥ तन्नो भवान्प्रणतशोकहराङ्घ्रियुग्मो बद्धान्वियुङ्क्ष्व मगधाह्वयकर्मपाशात् ॥ यो भूभुजोऽयुतमतङ्गजवीर्यमेको बिभ्रद्रुरोध भवने मृगराडिवाऽवीः ॥ २९ ॥ यो वै त्वया द्विनवकृत्व उदात्तचक्रभग्नो मृधे खलु भवन्तमनन्तवीर्यम् ॥ जित्वा नृलोकनिरतं सकृदूढदर्पो युष्मत्प्रजा रुजति नोऽजित तद्विधेहि ॥ ३० ॥ दूत उवाच ॥ इति मागधसंरुद्धा भवद्दर्शनकाङ्क्षिणः ॥ प्रपन्नाः पादमूलं ते दीनानां शं विधीयताम् ॥ ३१ ॥ श्रीशुक उवाच ॥ राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः ॥ बिभ्रत्पिङ्गजटाभारं प्रादुरासीद्यथा रविः ॥ ३२ ॥ तं दृष्ट्वा भगवान्कृष्णः सर्वलोकेश्वरेश्वरः ॥ ववन्द उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ॥ ३३ ॥ सभाजयित्वा विधिवत्कृतासनपरिग्रहम् ॥ बभाषे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिम् ॥ ३४ ॥

जरासन्धो युष्मत्प्रजा नोऽस्मान् रुजति पीडयति तत्तस्माद्विमोक्षणं विधेहि ॥ ३० ॥ दूत आह—इतीति ॥ मागधेन संरुद्धा भवद्दर्शनकाङ्क्षिणो राजान इत्येवं ते पादमूलं प्रपन्ना इति अतस्तेषां दीनानां शं सुखं विधीयताम् ॥ ३१ ॥ राजेति ॥ राज्ञां दूते एवं ब्रुवति सति परमा द्युतिर्यस्य स पिङ्गं पीतं जटाभारं बिभ्रत् बिभ्राणः देवर्षिर्नारदः यथा रविस्तथा प्रादुरासीत् ॥ ३२ ॥ तमिति ॥ तमागतं नारदं दृष्ट्वा सर्वेषां लोकेश्वराणामीश्वरो भगवान् कृष्णः सभ्यैः सहितः तथा अनुगैर्भृत्यादिभिः सहितश्च उत्थितः सन् मुदा हर्षेण शीर्ष्णा ववन्दे ॥ ३३ ॥ सभाजयित्वेति ॥ कृत आसनस्य परिग्रहः स्वीकारः येन तं मुनिं श्रद्धया विधिवत्सभाजयित्वा पूजयित्वा सूनृतैर्मधुरैः वाक्यैश्च तर्पयन् प्रीणयन् बभाषे ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अपीति ॥ अद्य अधुना त्रयाणां लोकानां अपिस्वित् किंस्विदकुतोभयम् अभयं कुशलमस्ति तव तु सदैव कुशलवत्त्वात्कुशलं न पृच्छ्यते इति भावः । ननु हे ब्रह्मन् लोकान् पर्यटतो भगवतस्त्वत्तोऽस्माकमयं भूयान् महान्गुणः लाभः यत्सर्वलोकवृत्तान्तज्ञानमिति शेषः ॥ ३५ ॥ नेति ॥ हि यस्मादीश्वरः कर्ता येषां तेषु कबभाव आर्षः । लोकेषु तवाविदितं किंचिन्नास्ति अथ तस्मात् पाण्डवानां यच्चिकीर्षितं तत् युष्मान् प्रति पृच्छामहे तङार्षः । यद्वा । हे इति पृथक् पदं प्रार्थने लोट् ॥ ३६ ॥ सर्वज्ञेनाप्यविदुषेव भगवता पृष्टो नारदो मायेयमिति ज्ञात्वाह—दृष्टेति ॥ हे विभो हे भूमन् सर्वभूतेष्वन्तर्यामितया चरतः विश्वसृजो ब्रह्मणोऽपि मायिनोऽपि मोहकस्य भस्मना वह्नेरिव स्वशक्तिभिः सत्त्वादिगुणैश्च च्छन्ना रुक् प्रकाशो यस्य तस्य ते दुरत्यया अत्येतुमुल्लङ्घयितुं ज्ञातुं वा अशक्या ते तव माया बहुशो मया दृष्टाः । अतः सर्वज्ञस्याप्यज्ञवत् प्रश्नादिकं मे ममाद्भुतमाश्चर्यकरं न भवति ॥ ३७ ॥ तवेति ॥ त्वदनुग्रहं विना तु स्वमायया इदं विश्वं सृजतः पालयतः नियच्छतः संहरतश्च तवेहितं चेष्टितमभिप्रेतं वा साधु सम्यक्

अपि स्विदद्य लोकानां त्रयाणामकुतोभयम् ॥ ननु भूयान्भगवतो लोकान्पर्यटतो गुणः ॥ ३५ ॥ न हि तेऽविदितं किञ्चिल्लोकेष्वीश्वरकर्तृषु ॥
अथ पृच्छामहे युष्मान्पाण्डवानां चिकीर्षितम् ॥ ३६ ॥ नारद उवाच ॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः ॥
भूतेषु भूमंश्चरतः स्वशक्तिभिर्वह्नेरिव च्छन्नरुचो न मेऽद्भुतम् ॥ ३७ ॥ तवेहितं कोऽर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ॥ यद्विद्य-
मानात्मतयाऽवसीयते तस्मै नमस्ते स्वविलक्षणात्मने ॥ ३८ ॥ जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छरीरतः ॥ लीलावतारैः
स्वयशःप्रदीपकं प्राज्वालयत्त्वां तमहं प्रपद्ये ॥ ३९ ॥ अथाप्याश्रावये ब्रह्मन्नरलोकविडम्बनम् ॥ राज्ञः पैतृष्वसेयस्य भक्तस्य च चिकीर्षितम् ॥ ४० ॥
यक्ष्यति त्वां मखेन्द्रेण राजसूयेन पाण्डवः ॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदताम् ॥ ४१ ॥

वेदितुं ज्ञातुं कोऽर्हति अतो यत् इदं जगदसदपि तव मायया विद्यमानात्मतयाऽवसीयते सर्वं सदिति प्रतीयते अवभासते इत्यपि पाठः । तस्मै स्वविलक्षणात्मने स्वेन रूपेण सर्वतो विलक्षणात्मने अचिन्त्याय ते तुभ्यं नमः ॥ ३८ ॥ जीवस्येति ॥ अनर्थं दुःखपरम्परां वहतीति तथाभूतात् शरीरतः स्थूलसूक्ष्मशरीरद्वयात्मकाद्बन्धनात् विमोक्षणं विमुक्त्युपायं स्वभजनमात्मतत्वं च न जानतः अत एव संसरतः जन्ममरणाननुभवतो जीवस्य हेतोर्यो भवाँल्लीलावतारैः स्वयशोरूपं प्रदीपं श्रवणादिभिर्जीवस्य मोक्षार्थम् आवरकाज्ञाननिवर्तकम् आत्मस्वरूपादिप्रकाशं च प्राज्वालयत् दीपितवान् तं त्वामहं शरणं प्रपद्ये ॥ ३९ ॥ अथेति ॥ हे ब्रह्मन् यद्यपि तवाविदितं किंचिन्नास्ति अथापि नरलोकं विडम्बयत्यनुसरतीति तथा तं त्वा प्रति पैतृष्वसेयस्य ढकि लोप इति भ्रान्त्या रकाररहित एव पाठः साधुः । भक्तस्य च राज्ञो युधिष्ठिरस्य चिकीर्षितमाश्रावये श्रावयिष्यामि ॥ ४० ॥ यक्ष्यतीति ॥ पारमेष्ठ्यकामः साम्राज्यकामो नृपतिः पाण्डवः राजा युधिष्ठिरः मखेन्द्रेण यज्ञश्रेष्ठेन राजसूयेन त्वां यक्ष्यति आराधयिष्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तस्याभिप्रेतं भवाननुमोदताम् ॥ ४१ ॥ तत्र भवता गन्तव्यमपीत्याह—तस्मिन्निति ॥ हे देव तस्मिन् क्रतुवरे भवन्तं दिदृक्षवः सुरादयो यशस्विनो राजानश्च समेष्यन्ति आगमिष्यन्ति ॥ ४२ ॥ श्रवणादिति ॥ हे ईश ब्रह्ममयस्य नराकृतिपरब्रह्मघनमूर्त्तेस्तव श्रवणात्कीर्त्तनात् ध्यानात् अन्तेवसायिनश्चाण्डालादयोऽपि पूयन्ते शुद्धा भवन्ति। ईक्षया दृष्ट्या अभिमृशन्ति विषयीकुर्वन्तीति तथाभूता ईक्षा चाभिमर्शश्च तौ विद्येते येषामिति वा वर्णाश्रमादिमन्तः पूयन्ते इति किमु वक्तव्यम् ॥ ४३ ॥ यस्येति ॥ हे भुवनानां मङ्गलरूप यस्य ते तव अमलं पापमलनिवर्तकं यशो दिग्वितानं वितानवत्सर्वदिक्षु व्याप्तं तदलङ्करणभूतम् अत एव दिवि स्वर्गे रसायां पाताले भूमौ च प्रथितं ख्यातं च सद्विश्वं पुनाति तथा दिवि मन्दाकिनीति अधः पाताले भोगवतीति इह भूलोके गङ्गेति त्रिषु लोकेषु स्थितं यस्य चरणाम्बु विश्वं पुनाति तस्य साक्षाद्दर्शनादिभिः पावित्र्ये कः संदेहः ॥४४॥ तत्रेति ॥ तत्र सभायां तेषु श्रुतयुधिष्ठिरवृत्तान्तेषु आत्मपक्षेषु यादवेषु जरासन्धविजिगीषया नारदोक्तं हस्तिनापुरगमनमगृह्णत्सु अमन्यमानेषु सत्सु

तस्मिन्देव क्रतुवरे भवन्तं वै सुरादयः ॥ दिदृक्षवः समेष्यन्ति राजानश्च यशस्विनः ॥ ४२ ॥ श्रवणात्कीर्तनाद्ध्यानात्पूयन्तेऽन्तेऽवसायिनः ॥ तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥ ४३ ॥ यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमङ्गलदिग्वितानम् ॥ मन्दाकिनीति दिवि भोगवतीति चाधो गङ्गेति चेह चरणाम्बु पुनाति विश्वम् ॥ ४४ ॥ श्रीशुक उवाच ॥ तत्र तेष्वात्मपक्षेष्वगृह्णत्सु विजिगीषया ॥ वाचःपेशैः स्मयन्भृत्यमुद्धवं प्राह केशवः ॥ ४५ ॥ श्रीभगवानुवाच ॥ त्वं हि नः परमं चक्षुः सुहृन्मन्त्रार्थतत्त्ववित् ॥ तथाऽत्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥ ४६ ॥ इत्युपामन्त्रितो भर्त्रा सर्वज्ञेनापि मुग्धवत् ॥ निदेशं शिरसाऽऽधाय उद्धवः प्रत्यभाषत ॥ ४७ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे भगवद्याने सप्ततितमोऽध्यायः ॥ ७० ॥ श्रीशुक उवाच ॥ इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत् ॥ सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः ॥ १ ॥

केशवः कृष्णः स्मयन् हासस्य मायात्मकत्वान्मोहयितुं मन्दं हसन् शतार्षः। वाचःपेशैः मधुरैर्वचनैः भृत्यमुद्धवं प्राह स्म ॥ ४५ ॥ त्वमिति ॥ हि यस्मात् त्वं नोऽस्माकं परमं चक्षुः चक्षुर्वदर्थकाशकः मन्त्रार्थानां आलोचनसाध्यफलानां तत्त्वं याथात्म्यं परिणामं वा वेत्तीति तथा सुहृच्च अथ तस्मात् तथेत्यपि पाठः । अत्रेदानीं निवेदितपक्षद्वये यदनुष्ठेयं तद्ब्रूहि तत्त्वदुक्तिमेव श्रद्दध्मः विश्वसिमः करवाम च ॥४६॥ इतीति ॥ सर्वज्ञेनापि भर्त्रा इत्येवं मुग्धवत् अज्ञेनेव उपामन्त्रितः पृष्टः उद्धवः तस्य निदेशमाज्ञां शिरसाऽऽधाय प्रत्यभाषत ॥ ४७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ दशमे सप्ततितमे व्यधाद्गङ्गासहायकः ॥ ७० ॥ अथैकसप्ततितमे इन्द्रप्रस्थं गते हरौ ॥ पार्थनामतिहर्षोऽत्र श्लोकाः सार्द्धाः षडर्ध्वयः ॥ उवाचत्रितयं पञ्चैपञ्चाशचाप्यनुष्टुभः ॥ ७१ ॥ इतीति ॥ इत्येवं देवर्षेर्नारदस्य उदीरितं युधिष्ठिरचिकीर्षितानुमोदनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमिति कथितमाकर्ण्य श्रुत्वा तथा सभ्यानां चा दूतस्य च मतं जरासन्धविजयार्थमेव गन्तव्यमिति कृष्णस्य च मतम् उभयमेव कर्तव्यमिति तदाज्ञाय ज्ञात्वा महामतिः उद्धवः अब्रवीत् ॥ १ ॥ यदुक्तमिति ॥ हे देव ऋषिणा नारदेन यक्ष्यतः यागं करिष्यतः पैतृष्वसेयस्य पितृष्वसुः पुत्रस्य युधिष्ठिरस्य साचिव्यं साहाय्यं कर्तव्यमिति यदुक्तं तत्त्वया कार्यं तथा शरणैषिणां शरणार्थिनां राज्ञां रक्षा च त्वया कार्या ॥ २ ॥ यष्टव्यमिति ॥ हे विभो दिक्चक्रजयिना पुरुषेण राजसूयेन यष्टव्यमतो दिग्विजयप्रसङ्गात् यो जरासुतस्य जयः स उभयार्थः राजसूयार्थः शरणागतरक्षार्थश्च मम सम्मतः । तथा हि दिग्विजयं विना न राजसूयसिद्धिः जरासन्धवधं विना न दिग्विजयः अतः प्रथमं राजसूयनिमन्त्रणमेव ग्राह्यं राजरक्षानिमन्त्रणं तु तदङ्गतयैव सेत्स्यति इति ॥ ३ ॥ अस्माकमिति ॥ हे गोविन्द एतेन राजसूयनिमन्त्रणाङ्गीकारेणैवास्माकमपि महान् अर्थः जरासन्धवधरूपो भविष्यति तथा बद्धान् राज्ञो विमुञ्चतो विमोचयतस्तव यशश्च भविष्यति ॥ ४ ॥ गन्तव्यमिति ॥ प्रक्षिप्तः श्लोकः ॥ ५ ॥ स वै इति ॥ स वै प्रसिद्धो

उद्धव उवाच ॥ यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया ॥ कार्यं पैतृष्वसेयस्य रक्षा च शरणैषिणाम् ॥ २ ॥ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो ॥ अतो जरासुतजय उभयार्थो मतो मम ॥ ३ ॥ अस्माकं च महानर्थो ह्येतेनैव भविष्यति ॥ यशश्च तव गोविन्द राज्ञो बद्धान्विमुञ्चतः ॥४॥ गन्तव्यं पूर्वमस्माभिरिन्द्रप्रस्थमितस्ततः ॥ तत्रैव तेनानुज्ञातस्तदर्थं जहि मागधम् ॥ ५ ॥ स वै दुर्विषहो राजा नागायुतसमो बले ॥ बलिनामपि चान्येषां भीमं समबलं विना ॥ ६ ॥ द्वैरथे स तु जेतव्यो मा शताक्षौहिणीयुतः ॥ ब्रह्मण्योऽभ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित् ॥ ७ ॥ ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः ॥ हनिष्यति न सन्देहो द्वैरथे तव संनिधौ ॥ ८ ॥ निमित्तं परमीशस्य विश्वसर्गनिरोधयोः ॥ हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव ॥ ९ ॥

राजा जरासन्धः बले नागानां गजानामयुतेन समः तुल्यः अतः समं तुल्यं बलं यस्य तं भीमं विना विहायान्येषां बलिनामपि दुर्विषहः दुःखेनापि सोढुमशक्यवेगः भीमादेव तस्य मृत्युर्बृहस्पतिमुखाच्छ्रुत इति भावः ॥६॥ द्वैरथ इति ॥ स तु जरासन्धः भीमेनापि द्वैरथे द्वन्द्वयुद्धे जेतव्यः शतेनाक्षौहिणीभिर्युतो मा जेतव्यः राजवृन्दक्षोभप्रसक्तेः । तद्धाते तु यागशोभाविक्षेपात् स च ब्रह्मण्यः ब्राह्मणभक्तः अतो विप्रैरभ्यर्थितः याचितः कर्हिचिदपि न प्रत्याख्याति न निराकरोति ॥७॥ ब्रह्मेति ॥ ब्राह्मणवेषस्य धरो वृकोदरो भीमस्तं प्रति गत्वा द्वन्द्वयुद्धं भिक्षेत याचतां तव सन्निधौ तवैव प्रभावात्समबलोऽपि भीमस्तं द्वैरथे युद्धे हनिष्यत्येव न जयमात्रम् इत्यत्र सन्देहो नास्ति ॥ ८ ॥ तव सन्निधिमात्रेण कार्यं सेत्स्यतीत्याशयेनाह–निमित्तमिति ॥ यथा विश्वस्य सर्गे हिरण्यगर्भः ब्रह्मा निरोधे प्रलये शर्वः रुद्रश्च परं केवलं निमित्तम् अवान्तरकर्ता वस्तुतस्तु ईशस्य कालस्य अरूपिणस्तवैव कर्तृत्वं तथात्रापि भीमो निमित्तमात्रं वस्तुतो निहन्ता त्वमेव ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गायन्तीति ॥ जरासन्धनिगृहीतानां राज्ञां देव्यः पत्न्यः स्वगृहेषु बालकलालनादौ स्वशत्रोर्जरासन्धस्य वधम् आत्मनां आत्मवत्प्रेष्ठानां पतीनां विमोक्षणं च ते तव विशदं
सत्कीर्तिकरं कर्म हे वत्स मा रोदीः श्रीकृष्ण एवं करिष्यतीति गायन्ति तत्र दृष्टान्तानाह यथा ।गोप्यः स्वशत्रुशङ्खचूडवधं स्वमोक्षणं च गायन्ति । यथा चावतारान्तरगतं
नक्रवधं ततः कुञ्जरपतेर्गजेन्द्रस्य मोक्षणं च यथा च रावणवधं ततो जनकात्मजायाः सीताया विमोक्षणं च यथा च कंसवधं ततः पित्रोर्देवकीवसुदेवयोर्विमोक्षणं च मुनयो
लब्धशरणा वयम् अस्मदादयो भक्ताश्च गायन्ति तथेत्यर्थः । महासभायां गोपीनां प्रस्तावो यशोदादीनामेव सभ्येषु भानान्न दोषायेति ज्ञेयम् ॥ १० ॥ जरेति ॥ हे कृष्ण
जरासन्धस्य वधो भूर्यर्थाय " भक्तद्रोही विनश्यति " इति न मे भक्तः प्रणश्यति " इति । च तव प्रतिज्ञासिद्धिः शरणागतरक्षा राजसूययज्ञः तव सत्कीर्तिः पूर्ववैरप्रतीकारः
भूभारनिवृत्तिश्चेत्यनेकप्रयोजनाय उपकल्पते भविष्यतीति अतो राजसूयार्थमेव प्रथमं गन्तव्यमित्यभिप्रायेणाह । प्राय इति । प्रायः पच्यते इति पाकः पुण्यपापात्मकं कर्म
तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासन्धस्य पापविपाकेन च । यद्वा । पाको राजसूयानुष्ठानं तस्य विपाकः पाण्डवानां निष्कण्टकराज्यप्राप्तिस्तेन हेतुना पाप-

गायन्ति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च ॥ गोप्यश्च कुञ्जरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो
वयं च ॥ १० ॥ जरासन्धवधः कृष्ण भूर्यर्थायोपकल्पते ॥ प्रायः पाकविपाकेन तव चाभिमतः क्रतुः ॥११॥ श्रीशुक उवाच ॥ इत्यु-
द्धववचो राजन्सर्वतोभद्रमच्युतम् ॥ देवर्षिर्यदुवृद्धाश्च कृष्णश्च प्रत्यपूजयन् ॥ १२ ॥ अथादिशत्प्रयाणाय भगवान्देवकीसुतः ॥ भृत्या-
न्दारुकजैत्रादीननुज्ञाप्य गुरून्विभुः ॥ १३ ॥ निर्गमय्यावरोधान्स्वान्ससुतान्सपरिच्छदान् ॥ संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन् ॥
सूतोपनीतं स्वरथमारुहद्गरुडध्वजम् ॥ १४ ॥

विपाकेनेति पाठे तु जरासन्धस्य पापफलेन हेतुना यद्वा पापानां शिशुपालदुर्योधनादीनां विपाकेन नाशरूपेणेत्यर्थः । अयं क्रतुः राजसूयस्तवाप्यभिमतः सम्मतः चकारात्
युधिष्ठिरादेरभिमतः तत्र त्वयि गते सर्वं भविष्यतीति भावः ॥ ११ ॥ इतीति ॥ हे राजन् सर्वतोभद्रं शुभावहम् अच्युतं बाधशून्यं फलाव्यभिचरितमुपपत्त्या वृद्धं वा इत्ये-
वमुक्तप्रकारकमुद्धववचः देवर्ष्यादयः सर्वे प्रत्यपूजयन् साधूक्तमित्यन्वमोदन्त । यदुवृद्धा इत्युक्त्या युयुत्सवस्तु तथा नान्वमोदन्तेत्याशयः । अत्राच्युतमित्यत्र अच्युत इति
कृष्णस्येत्यत्र रामस्येति च पाठभेदः ॥१२॥ अथेति ॥ अथ भगवान् विभुः देवकीसुतः गुरून् वसुदेवादीन् अनुज्ञाप्य अनुज्ञां संप्रार्थ्य दारुकजैत्रादीन् स्वभृत्यान् प्रयाणाय
गमनसाधनसङ्ग्रहाय आदिशत् आज्ञापयामास ॥ १३ ॥ निर्गमय्येति सार्द्धम् ॥ हे शत्रुहन् गरुडध्वजः सङ्कर्षणं यदुराजम् उग्रसेनं चानुज्ञाप्य पृष्ट्वा सुतैः सहितान् सुतपदं
पौत्रकन्यास्नुषाद्युपलक्षणम् । परिच्छदैः शय्यादिपरिकरैश्च सहितान् स्वानवरोधान् अन्तःपुरस्थान् दारान् निर्गमय्य तेषामपि निमन्त्रितत्वात् औत्सुक्याच्च पुराद्बहिर्ग

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

मयित्वा सूतेनोपनीतं स्वरथमारुहत् । च्लेरङ् छान्दसः ॥ १४ ॥ तत इति ॥ ततश्च रथद्विपादिनायकैः करालया परमभयंकर्या आत्मसेनया परिवृतो मृदङ्गादिभिः वाद्यैः यः प्रघोषस्तेन घोषिता या ककुब् दिक् तस्याः सकाशात् यद्वा ककुभाशब्देन टाबन्तेन बहुव्रीहौ भगवद्विशेषणम् । भान्तककुभ्शब्देन बहुव्रीहौ अध्याहृत-पुरीविशेषणं वा निराक्रमत् निष्कान्तवान् दीर्घाभाव आर्षः । रुचिराछन्दःपञ्चकम् ॥ १५ ॥ नृवाजीति ॥ सहात्मजा वराणि श्रेष्ठान्यम्बरादीनि यासां ताः असिचर्मणी पाण्योर्येषां तैः नृभिः सुसम्यक् संवृताः सुव्रताः पतिव्रतारुक्मिण्यादयः प्रयान्तमच्युतं पतिं नृभिः नरवाहनैः वाजिभिरश्वैश्च तद्विशेषैः काञ्चनशिबिकाभिश्च । यद्वा।नर एव वाजिवच्छीघ्रगा यत्र ताभिः काञ्चनशिबिकाभिरनुययुः ॥ १६ ॥ नरेति ॥ कटकुटयः उशीरादितृणमयकटनिर्मितगृहाः कम्बलाम्बरादयश्चोपस्कराः कुड्यादिरूपाः शिबि-रादिसाधनभूता यासां ताः स्वलङ्कृताः परिजनयोषितो वारयोषितो वेश्याश्च सर्वशः सर्वानेवोपस्करान् सर्वत इत्यपि पाठः । अधियुज्य बलीवर्दादिषु तानुपस्करान्

ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया ॥ मृदङ्गभेर्यानकशङ्खगोमुखैः प्रघोषघोषितककुभो निराक्रमत् ॥ १५ ॥
नृवाजिकाञ्चनशिबिकाभिरच्युतं सहात्मजाः पतिमनु सुव्रता ययुः ॥ वराम्बराभरणविलेपनस्रजः सुसंवृता नृभिरसिचर्मपाणिभिः ॥१६॥
नरोष्ट्रगोमहिषखराश्वतर्यनःकरेणुभिः परिजनवारयोषितः ॥ स्वलंकृताः कटकुटिकम्बलाम्बराद्युपस्करा ययुरधियुज्य सर्वतः ॥ १७ ॥
बलं बृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांऽशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिङ्गिलोर्मिभिः ॥ १८ ॥
अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं हृदि विदधद्विहायसा ॥ निशम्य तद्व्यवसितमाहृतार्हणो मुकुन्दसन्दर्शननिर्वृतेन्द्रियः॥१९॥
राजदूतमुवाचेदं भगवान्प्रीणयन्गिरा ॥ मा भैष्ट दूत भद्रं वो घातयिष्यामि मागधम् ॥ २० ॥

दृढं सन्नह्य नरो नरवाह्यं यानम् उष्ट्राद्याः स्फुटाः अश्वतरी गर्दभादश्वायां जाता अनः शकटं करेणुर्गजी इत्यादिभिः यानैर्ययुः ॥१७॥ बलमिति ॥ तुमुलः संकीर्णः रवः स्वनो यस्मिंस्तद्बलं सैन्यं दिवा दिने बृहद्ध्वजपटादिभिः वरायुधादिभिः रवेः सूर्यस्यांशुभिश्च बभौ । पटछत्रेत्यत्र तुगभाव आर्षः । यथा क्षुभितैस्तिमिङ्गिलैः मत्स्यनक्रादिभिरू-र्मिभिश्च यथार्णवः समुद्रो भाति तद्वदिति तत्र हस्त्यश्वनरादीनां मत्स्यादिसाम्यं ध्वजादीनामूर्मिसाम्यं च बोध्यम् ॥ १८ ॥ अथो इति॥अथो निर्गमानन्तरं यदुपतिना कृष्णेन सभाजितः सत्कृतः आहृतं समर्पितम् अर्हणं पूजासाधनं यस्मै सः मुकुन्दस्य संदर्शनेन निर्वृतानि सुखितानीन्द्रियाणि यस्य सः मुनिस्तस्य व्यवसितं राजसूयाद्यर्थगमन-निश्चयं निशम्य आलक्ष्य तं प्रणम्य तमेव हृदि विदधत् ध्यायन् विहायसा आकाशमार्गेण ययौ इति शेषः ॥ १९ ॥ राजेति ॥ ततो भगवान् गिरा प्रीणयन् राजदूत-मिदमुवाच । हे दूत मा भैष्ट वो युष्माकं भद्रं भूयात् बहुत्वं राजाभिप्रायेण । मागधं घातयिष्यामि इति राज्ञः प्रति कथयेति शेषः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं भगवतोक्तः प्रस्थितश्च दूतः नृपान् प्रति यथावत् भगवदुक्तं सर्वमवदत् । तेऽपि च शौरेः कृष्णस्य संदर्शनं प्रत्यैक्षन् प्रतीक्षितवन्तः । तङ्भाव आर्षः । यतो जरासन्धबन्धात् संसाराच्च मुमुक्षवः ॥ २१ ॥ आनर्तेति ॥ हरिः आनर्तादीन् देशान् विनशनं कुरुक्षेत्रं च तीर्त्वा अतिक्रम्य तदतिक्रमणेन तन्मार्गस्थान् गिरिनदीपुरादीन् अतीयाय कुरुक्षेत्रपाञ्चालादीनाममार्गगत्वेपि तत्रत्यभक्तानुग्रहार्थं गमनम् ॥ २२ ॥ तत इति ॥ अथ ततो मुकुन्दः दृषद्वतीं तीर्त्वा अथ सरस्वतीं पाञ्चालान्मत्स्यांश्च तीर्त्वा अथ शक्रप्रस्थमिन्द्रप्रस्थमागमत् ॥ २३ ॥ तमिति ॥ नृणां दुर्लभं दर्शनं यस्य तं श्रीकृष्णमुप समीपमागतमाकर्ण्य श्रुत्वा प्रीतः प्रसन्नचित्तः उपाध्यायेन सहितः सुहृद्भिः वृतः अजातशत्रुर्युधिष्ठिरस्तमानेतुं पुरान्निरगात् ॥ २४ ॥ गीतेति ॥ गीतानि वादित्राणि वाद्यानि च तद्घोषेण तथा भूयसा महता ब्रह्मणः वेदस्य घोषेण च सह स युधिष्ठिरः आदृतः सादरः सन् हृषीकेशं कृष्णमभ्ययात् सम्मुखमाजगाम । यथा मूर्च्छापगमानन्तरं प्राणाः इन्द्रियाणि मुख्यं प्राणमभियान्ति तं च प्राप्य

इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान् ॥ तेऽपि संदर्शनं शौरेः प्रत्यैक्षंश्च मुमुक्षवः ॥ २१ ॥ आनर्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः ॥ गिरीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥ २२ ॥ ततो दृषद्वतीं तीर्त्वा मुकुन्दोऽथ सरस्वतीम् ॥ पाञ्चालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् ॥ २३ ॥ तमुपागतमाकर्ण्य प्रीतो दुर्दर्शनं नृणाम् ॥ अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः ॥ २४ ॥ गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा ॥ अभ्ययात्स हृषीकेशं प्राणः प्राणमिवादृतः ॥ २५ ॥ दृष्ट्वा विक्लिन्नहृदयः कृष्णं स्नेहेन पाण्डवः ॥ चिराद् दृष्टं प्रियतमं सस्वजेऽथ पुनः पुनः ॥ २६ ॥ दोर्भ्यां परिष्वज्य रमाऽमलालयं मुकुन्दगात्रं नृपतिर्हताशुभः ॥ लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥ २७ ॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजवाकुलेन्द्रियः ॥ यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेऽच्युतम् ॥ २८ ॥

सचेष्टानि भवन्ति तथा ॥ २५ ॥ दृष्ट्वेति ॥ स्नेहेन विक्लिन्नम् आर्द्रं हृदयं यस्य स पाण्डवो युधिष्ठिरः प्रियतमं तं चिरात् बहुकालानन्तरं दृष्टं कृष्णं दृष्ट्वाऽथ पुनः पुनः सस्वजे आलिङ्गितवान् ॥ २६ ॥ दोर्भ्यामिति ॥ दोर्भ्यां भुजाभ्यां रमाया अमलं निर्दोषम् आलयं मुकुन्दस्य गात्रं परिष्वज्यालिङ्ग्य हतम् अशुभं पापं यस्य सः अत एव अश्रूणि आनन्दजलानि लोचनयोर्यस्य सः हृष्यन्ती उदञ्चितरोमा तनुर्यस्य सः विस्मृतो लोकविभ्रमो लोकव्यवहारो येन स नृपतिर्युधिष्ठिरः परां निर्वृतिं परमानन्दं लेभे ॥ २७ ॥ तमिति ॥ मातुलेयं मातुलपुत्रं तं कृष्णं परिरभ्य निर्वृतः परमानन्दपूर्णो भीमः स्मयन् स्मितं कुर्वन् शता आर्षः । प्रेमजलैरानन्दाश्रुभिराकुले पिहिते इन्द्रिये लोचने यस्य तथाभूतो बभूवेति शेषः । प्रेमजवेति वा पाठः । तथा यमौ नकुलसहदेवौ किरीटी अर्जुनश्च मुदा हर्षेण प्रवृद्धानि बाष्पाणि आनन्दाश्रूणि येषां तेऽपि सुहृत्तममच्युतं कृष्णं परिरेभिरे ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्जुनेनेति सार्द्धम् ॥ अर्जुनेन केवलं परिष्वक्त एव समवयस्कत्वात् पादौ पतन्नर्जुनस्तेन हस्ताभ्यां धृत इत्याशयः । यमाभ्यां त्वभिवादितश्च भगवान् ब्राह्मणेभ्यो वृद्धेभ्यः वयोधिकेभ्यो युधिष्ठिरादिभ्यो यथार्हतः यथायोग्यं नमस्कृत्य तैः सम्मानितः कुर्वादीन् मानयामास ॥ २९ ॥ सूतेति सार्द्धम् ॥ मृदङ्गादिशब्दैः सह सूतमागधबन्दिनो ब्राह्मणाश्चारविन्दाक्षं तुष्टुवुर्ननृतुर्जगुश्च ॥ ३० ॥ ३१ ॥ एवमिति ॥ पुण्यावहः श्लोको यशो येषां तेषां शिखामणिरिव श्रेष्ठो भगवान् एवं सुहृद्भिर्युधिष्ठिरादिभिः पर्यस्तः परिवृतः सूतादिभिः संस्तूयमानश्चालङ्कृतं हस्तिनापुरं विवेश ॥ ३२ ॥ पुरं विशिनष्टि—संसिक्तेति ॥ करिणां गजानां मदगन्धयुक्तैस्तोयैर्जलैः संसिक्तानि वर्त्मानि पुरवीथयो यस्मिंस्तत् चित्रध्वजैः कनकतोरणैः परिपूर्णकुम्भैः तथा मृष्टः आत्मा शरीरं येषां तैः तथा नवा दुकूलादयो येषां तैर्नृभिः तथाभूताभिर्युवतिभिश्च विराजमानम् उद्दीप्तेति प्रतिसद्म उद्दीप्तैर्दीपैः बलिभिः पुष्पादिप्रकारैश्च जुष्टं जालेभ्यो गवाक्षेभ्यो निर्यातैर्धूपै रुचिरं शोभितं विलसन्त्यः पताका यस्मिंस्तत् मूर्धन्याः मूर्ध्नि भवा हेमकलशा

अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः ॥ ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथाऽर्हतः ॥ मानितो मानयामास कुरुसृञ्जयकेकयान् ॥ २९ ॥ सूतमागधगन्धर्वान्वन्दिनश्चोपमन्त्रिणः ॥३०॥ मृदङ्गशङ्खपटहवीणापणवगोमुखैः ॥ ब्राह्मणाश्चारविन्दाक्षं तुष्टुवुर्ननृतुर्जगुः ॥ ३१ ॥ एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः ॥ संस्तूयमानो भगवान्विवेशाऽलंकृतं पुरम् ॥ ३२ ॥ संसिक्तवर्त्म करिणां मदगन्धतोयैश्चित्रध्वजैः कनकतोरणपूर्णकुम्भैः ॥ मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गन्धैर्नृभिर्युवतिभिश्च विराजमानम् ॥ ३३ ॥ उद्दीप्तदीपबलिभिः प्रतिसद्मजालनिर्यातधूपरुचिरं विलसत्पताकम् ॥ मूर्धन्यहेमकलशै रजतोरुशृङ्गैर्जुष्टं ददर्श भवनैः कुरुराजधाम ॥ ३४ ॥ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबन्धाः ॥ सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेन्द्रमार्गे ॥ ३५ ॥ तस्मिन्सुसङ्कुलइभाश्वरथद्विपाद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः ॥ नार्यो विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन ॥ ३६ ॥

येषां तैः रजतमयानि उरूणि स्थूलानि शृङ्गाणि कलशाधस्तनभूमिका येषां तैर्भवनैश्च जुष्टं कुरुराजस्य युधिष्ठिरस्य धाम अन्तःपुरं भगवान् दूरत एव ददर्श ॥ ३३ ॥ ॥ ३४ ॥ प्राप्तमिति ॥ नराणां सर्वलोकानां यानि लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं कृष्णं प्राप्तं निशम्य श्रुत्वा औत्सुक्याद्विश्लथिताः केशानां दुकूलानां च बन्धा ग्रन्थयो यासां ता युवतयः सद्य एव गृहकर्मतल्पे शय्यायां सुप्तान् पतींश्च विसृज्य त्यक्त्वा नरेन्द्रमार्गे राजमार्गे द्रष्टुं ययुः स्मेति पादपूर्तौ ॥ ३५ ॥ तस्मिन्निति ॥ गृहप्रासादादिषु अधिरूढा नार्यः इभादिभिश्चतुर्भिः सेनाङ्गैः सुसंकुले संकीर्णे तस्मिन्नरेन्द्रमार्गे सभार्यं कृष्णम् उपलभ्य दृष्ट्वा कुसुमैर्विकीर्य मनसा उपगुह्यालिङ्गच उत्स्मययुक्तेन तदीक्षितेनैव सुस्वागतं विदधुः स्वागतप्रश्नं चक्रुः । तासामुत्स्मितवीक्षितं स्वागतप्रश्नं विदधदिवास ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊचुरिति ॥ उडुपं चन्द्रं सहन्ते ताश्चन्द्रसहितास्तारा इव स्थिता मुकुन्दपत्नीः पथि निरीक्ष्य ताः स्त्रिय ऊचुः तदुक्तिमाह । किमिति यासां चक्षुषां पुरुषमौलिः पुरुषोत्तमः उदारः सर्वमनोरथपूरको यो हासस्तद्युक्तो यो लीलावलोकस्तस्य कलया लेशेन उत्सवं सुखमातनोति ताभिरमूभिः मुकुन्दपत्नीभिः किं सुकृतमकारि कृतम् ॥ ३७ ॥ तत्रेति ॥ तत्र तत्र मार्गे हतम् एनः पापं येषां ते मङ्गलानि गन्धपुष्पताम्बूलादिशुभद्रव्याणि पाण्योर्येषां ते पौराः पुरवासिनः श्रेणीषु एकशिल्पोपजीविजनतासु मुख्याश्च उपसङ्गम्य समीपमागत्य कृष्णस्य सपर्यां पूजां चक्रुः कृष्णायेत्यपि पाठः ॥ ३८ ॥ अन्तरिति ॥ संभ्रमेण सहितैः फुल्ले विकसिते लोचने येषां तैरन्तःपुरजनैः प्रीत्याभ्युपेतः अभ्युपगम्य सत्कृतः मुकुन्दो राजमन्दिरं प्राविशत् ॥ ३९ ॥ पृथेति ॥ पृथा कुन्ती त्रिभुवनेश्वरं भ्रात्रेयं भ्रातृपुत्रं कृष्णमवलोक्य प्रीतः आत्मा मनो यस्याः सा पर्यङ्कादुत्थाय स्नुषया द्रौपद्या सह स्थिता सा कुन्त्येव तं परिषस्वजे आलिङ्गितवती । द्रौपदी तु पश्चादेव स्थिता वन्दनादिनादृतवतीत्यग्रे वक्ष्यते।एवं चाध्याहृतायां स्थितिक्रियायामन्वितत्वात्सस्नुषेति

ऊचुः स्त्रियः पथि निरीक्ष्य मुकुन्दपत्नीस्तारा यथोडुपसहाः किमकार्यमूभिः ॥ यच्चक्षुषां पुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ॥ ३७ ॥ तत्र तत्रोपसंगम्य पौरा मङ्गलपाणयः ॥ चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या हतैनसः ॥ ३८ ॥ अन्तःपुरजनैः प्रीत्या मुकुन्दः फुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमन्दिरम् ॥ ३९ ॥ पृथा विलोक्य भ्रात्रेयं कृष्णं त्रिभुवनेश्वरम् ॥ प्रीतात्मोत्थाय पर्यङ्कात्सस्नुषा परिषस्वजे ॥ ४० ॥ गोविन्दं गृहमानीय देवदेवेशमादृतः ॥ पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः ॥ ४१ ॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेऽभिवादनम् ॥ स्वयं च कृष्णया राजन्भगिन्या चाभिवन्दितः ॥४२॥ श्वश्र्वा सञ्चोदिता कृष्णा कृष्णपत्नीश्च सर्वशः ॥ आनर्च रुक्मिणीं सत्यां भद्रां जाम्बवतीं तथा ॥ ४३ ॥ कालिन्दीं मित्रविन्दां च शैब्यां नाग्नजितीं सतीम् ॥ अन्याश्चाभ्यागता यास्तु वासःस्रङ्मण्डनादिभिः ॥ ४४ ॥

समासः ॥ ४० ॥ गोविन्दमिति ॥ प्रमोदेनोपहतः अभिभूत आदृतः आदरयुक्तो नृपो युधिष्ठिरः देवदेवेशं गोविन्दं गृहमानीय तत्पूजायां कृत्यं क्रमविशेषं नाविदत् विस्मृतवान् । विन्दतेर्लुङ् ॥ ४१ ॥ पित्रिति ॥ हे राजन् कृष्णः पितृष्वसुः पृथायाः गुरुस्त्रीणां ब्राह्मणादिपूज्यस्त्रीणां चाभिवादनं चक्रे । स्वयं च कृष्णया द्रौपद्या भगिन्या सुभद्रया च अभिवन्दितो बभूव ॥ ४२ ॥ श्वश्र्वेति युग्मम् ॥ श्वश्र्वा कुन्त्या संचोदिता कृष्णा द्रौपदी रुक्मिण्यादिकाः सर्वशः सर्वाः कृष्णपत्नीः शैब्यामिति मित्रविन्दाया एव विशेषणम् । तथापदेन लक्ष्मणा गृहीता वासःस्रङ्मण्डनादिभिः आनर्च पूजितवती मण्डनं कुङ्कुमादि तथा अन्याश्च या अभ्यागताः स्त्रियस्ताश्च चात् स्नुषाद्याः कन्याश्च वस्त्रादिभिरानर्च ॥ ४३ ॥ ४४ ॥

Nepal Sanskrit University, Balmiki Campus Kathmandu

सुखमिति ॥ धर्मराजो युधिष्ठिरः प्रत्यहं नवं नवं यथा भवति तथा सैन्यादिसहितं जनार्दनं श्रीकृष्णं सुखं तस्य प्रीत्यनुरूपं यथा स्यात्तथा निवासयामास ॥ ४५ ॥ तर्पयित्वेति युग्मम् ॥ फाल्गुनसंयुतः अर्जुनसहायभूतो भगवान् खाण्डवेनेन्द्रोपवनेन वह्निं तर्पयित्वा तथा येनोपकारगुणज्ञेन मयेन युधिष्ठिराय दिव्या सभा कृता अर्पिता इति वा पाठः । तं खाण्डवाग्नौ दह्यमानं मयं दैत्यशिल्पिनं मोचयित्वा राज्ञो युधिष्ठिरस्य प्रियं कर्तुमिच्छया अर्जुनेन रथमारुह्य भटैर्वृतो विहरन् कतिचिन् मासांस्तत्रैवोवास । परे तु तर्पयित्वेति श्लोकस्य यो नित्यं फाल्गुनसंयुतः आसीत् येन च खाण्डवेनाग्निं तर्पयित्वा तत्र मयासुरं मोचयित्वा तद्द्वारा युधिष्ठिराय दिव्या सभा कृता तं तादृशं जनार्दनं निवासयामासेति पूर्वेणान्वयः इत्याहुः । अनेन राज्ञः कृष्णोपकारानुस्मरणम् । दिव्यत्वात्सभाया यथामनोरथं सर्वावकाशसम्पादनं च दर्शितम् । अत्र चक्रवर्ती । तर्पयित्वेत्यादिश्लोकद्वयेनाष्टपञ्चाशत्तमाध्यायप्रोक्तैव कथा पुनस्तत्रावेशादेवानुकथिता ततश्चायं क्रमः इन्द्रप्रस्थे खाण्डवदाहः कालिन्दीप्राप्तिः चातुर्मास्यवासः

सुखं निवासयामास धर्मराजो जनार्दनम् ॥ ससैन्यं सानुगामात्यं सभार्यं च नवं नवम् ॥ ४५ ॥ तर्पयित्वा खाण्डवेन वह्निं फाल्गुनसंयुतः ॥
मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता ॥ ४६ ॥ उवास कतिचिन्मासान्राज्ञः प्रियचिकीर्षया ॥ विहरन्रथमारुह्य फाल्गुनेन भटैर्वृतः ॥४७॥
इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे एकसप्ततितमोऽध्यायः ॥ ७१ ॥ श्रीशुक उवाच ॥ एकदा तु सभामध्य आस्थितो मुनि-
भिर्वृतः ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्ठिरः ॥ १ ॥ आचार्यैः कुलवृद्धैश्च ज्ञातिसंबन्धिबान्धवैः ॥ शृण्वतामेव चैतेषामाभाष्येदमुवाच
ह ॥ २ ॥ युधिष्ठिर उवाच ॥ क्रतुराजेन गोविन्द राजसूयेन पावनीः ॥ यक्ष्ये विभूतीर्भवतस्तत्सम्पादय नः प्रभो ॥ ३ ॥ त्वत्पादुके अविरतं
परि ये चरन्ति ध्यायन्त्यभद्रनशने शुचयो गृणन्ति ॥ विन्दन्ति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥ ४ ॥

द्वारकागमनं कालिन्दीभद्रादिविवाहः नरकवधादिबहुकथान्त एव राजसूयनिमन्त्रणादिः ॥ ४६ ॥ ४७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमैकसप्ततितमे व्यधात् ॥ ७१ ॥ द्वासप्ततितमे राजसूयकार्ये विनिश्चिते ॥ जरासन्धमहन्भीमः श्लोका अत्राङ्कवार्द्धयः ॥ उवाचर्षं पादोनास्त्रिंपञ्चाशदनुष्टुभः ॥ ७२ ॥ एकदेति युग्मम् ॥ एकदा तु सभामध्ये राजासनमास्थितो मुन्यादिभिर्वृतश्च युधिष्ठिर एतेषां मुन्यादीनां शृण्वतामेव सतां कृष्णेन तुल्यः कोऽपि कर्तुं न शक्त इतिताननादृत्य आभाष्य हे प्रभो इत्यादि सप्रेम सम्बोध्य इदं वक्ष्यमाणमुवाच ॥ १ ॥ २ ॥ क्रत्विति ॥ हे गोविन्द क्रतुराजेन राजसूयेन पावनीः पापापहा भवतः विभूतीः अंशान् देवान् अहं यक्ष्ये आराधयिष्यामि । नोऽस्माकं तदभिप्रेतं यजनं संपादय निर्वर्तय इति ॥ ३ ॥ त्वदिति ॥ हे कमलनाभ हे ईश ये जनाः अभद्रस्य नशनं याभ्यां ते पापनाशिके त्वत्पादुके उपानहौ किं पुनः साक्षात्पादौ अविरतं निरन्तरं परिचरन्ति देहेन सेवन्ते परीत्यस्य व्यवहिताश्चेति यच्छब्दव्यवधानं छान्दसम् । मनसा ध्यायन्ति वचसा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृणन्ति त एव शुचयः परिशुद्धान्तःकरणाः सन्तो भवस्यापवर्गं समाप्तिलक्षणं मोक्षं विन्दन्ति ते यदि आशिषः विषयान् आशासते वाञ्छन्ति तदा ता अपि विन्दन्ति नान्ये । चक्रवर्तिनोऽपि अतः त्वत्पादुकासेविनो मम राजसूयो न दुष्करः ॥ ४ ॥ तदिति ॥ हे देवदेव हे विभो इह संसारे एष लोकः प्राणिसमूहः भवतश्चरणारविन्दसेवायाः अनुभावं फलं पश्यतु तथा कुरुसृञ्जयानां मध्ये ये त्वां भजन्ति उत अथवा ये च कर्मप्रधानाः अथवा दुर्योधनाद्याः त्वां न भजन्ति तेषामुभयेषां निष्ठां स्थितिं फलम् अभ्युदयतदभावौ प्रदर्शय ॥ ५ ॥ नेति ॥ यद्यपि ब्रह्मणः निरुपाधेः सर्वस्यात्मनः समदृशः स्वसुखानुभूतेः रागाद्यभावेन आत्मानन्दानुभवरूपस्य तव स्वः पर इति भेदमतिर्न स्यात् नास्ति तथापि संसेवतां त्वां सम्यक् सेवमानानामेव शता आर्षः । त्वत्प्रसादो भवति नान्येषाम् अत्र एवं सत्यपि तव विपर्ययो वैषम्यनैर्घृण्यादिदोषो नास्ति यतः सेवानुरूपमेवोदयः फलं भवति । यथा सुरतरोः कल्पद्रुमस्य गुणदोषादिकमविचारयतः अयं भजत्वयं मा भजत्विति वैषम्यरहितस्य तस्य समत्वेऽपि सेवकेष्वेव फलज-

तद्देवदेव भवतश्चरणारविन्दसेवाऽनुभावमिह पश्यतु लोक एषः॥ये त्वां भजन्ति न भजन्त्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृञ्जयानाम्॥५॥ न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः ॥ संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न विपर्ययोऽत्र ॥६॥ श्रीभगवानुवाच ॥ सम्यग्व्यवसितं राजन्भवता शत्रुकर्शिना ॥ कल्याणी येन ते कीर्तिर्लोकाननुभविष्यति ॥ ७ ॥ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो ॥ सर्वेषामपि भूतानामीप्सितः क्रतुराडयम् ॥ ८ ॥ विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे ॥ संभृत्य सर्वसंभारानाहरस्व महाक्रतुम् ॥ ९ ॥ एते ते भ्रातरो राजँल्लोकपालांशसंभवाः ॥ जितोऽस्म्यात्मवता तेऽहं दुर्जयो योऽकृतात्मभिः ॥ १० ॥

नकत्वं नान्येषां तथापि न वैषम्यं गण्यते तथैव तवापीत्यर्थः । यद्वा । कल्पद्रुमसाम्येऽपि तत्र सेवानुरूपमेवोदयस्त्वत्प्रसादे तु तथा न किन्त्वधिकमपि सेवावैगुण्येऽपि विपर्ययो नास्ति धावन्निमील्य वा नेत्रे इत्याद्युक्तेः ॥ ६ ॥ सम्यगिति ॥ हे राजन् हे शत्रुकर्शन इति संबोधयन् सर्वराजविजयशक्तिं संचारयति भवता सम्यक् व्यवसितं निश्चितं वक्तुमिष्टं वा येन व्यवसितयज्ञानुष्ठानेन कल्याणी पुण्यावहा तव कीर्तिर्लोकाननुभविष्यति सर्वलोकेषु व्याप्ता भविष्यति ॥ ७ ॥ ऋषीणामिति ॥ हे प्रभो ऋष्यादीनां सर्वेषां भूतानां तथा नोऽस्माकं सुहृदामप्ययं क्रतुराट् ईप्सितः इष्टः ॥ ८ ॥ विजित्येति ॥ सर्वान्नृपतीन् विजित्य जगतीं पृथ्वीं सर्वां वशे कृत्वा सर्वसंभारान् यज्ञसाधनानि संभृत्य सम्पाद्य महाक्रतुं राजसूयमाहरस्व अनुतिष्ठ ॥ ९ ॥ एते इति ॥ तव भ्रातरो भीमादयो लोकपालानां वाय्विन्द्रादीनामंशसंभवाः किंच यः अकृतात्मभिरजितेन्द्रियैर्दुःखेनापि जेतुं वशीकर्तुमशक्यः सोहमात्मवता जितेन्द्रियेण ते त्वया जितोऽस्मि वशीकृतोऽस्मि अतोऽपि तव किं दुःसाध्यमित्याशयः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ अहमेव परः उपास्यो यस्य तं मत्परं लोके कश्चित् देवोऽपि तेजसा प्रभावेण यशसा श्रिया शोभया विभूतिभिः सैन्यादिसाधनैः नाभिभवेत् अभिभवितुं न शक्नुयात् पार्थिवो मनुष्यस्तत्र न शक्नुयादिति तु किं वक्तव्यम् ॥११॥ निशम्येति ॥ भगवता गीतमुक्तं निशम्य प्रीतः अत एव फुल्लं विकसितं मुखाम्बुजं यस्य स युधिष्ठिरः दिग्विजये निमित्ते विष्णोः कृष्णस्य तेजसा उपबृंहितान् संवर्धितान् सन्धिरार्षः । तेजःशब्दोऽपि काप्यदन्त इति केप्याहुः । भ्रातॄन् अयुङ्क्त नियुक्तवान्॥१२॥सहदेवमिति सार्द्धम् ॥ सृञ्जयैः सह सहदेवं दक्षिणस्यामादिशत् प्रैषयत् मत्स्यैः सह नकुलं प्रतीच्यां दिशि कैकेयैः सह सव्यसाचिनमर्जुनमुदीच्यां दिशि मद्रकैः सह वृकोदरं भीमं प्राच्यामादिशत् ॥ १३ ॥ ते इति ॥ हे नृप ते भीमादयो वीरा ओजसा स्वपौरुषेण नृपान् विजित्य यक्ष्यते यागं करिष्यमाणाय अजातशत्रवे युधिष्ठिराय राजसूयाङ्गभूतकरग्रहणार्थमेव विजयेन तस्य कुत्रापि दोषाभावात् दिग्भ्यः भूरि बहु द्रविणं धनमाजह्रुः आहृत्य समर्पयामासुः ॥ १४ ॥ श्रुत्वेति ॥ जरासन्धमजितं श्रुत्वा कथं स जेतव्य इति ध्यायतो

न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया ॥ विभूतिभिर्वाऽभिभवेद्देवोऽपि किमु पार्थिवः ॥ ११ ॥ श्रीशुक उवाच ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखाम्बुजः ॥ भ्रातॄन्दिग्विजयेऽयुङ्क्त विष्णुतेजोपबृंहितान् ॥ १२ ॥ सहदेवं दक्षिणस्यामादिशत्सह सृञ्जयैः ॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनम्॥प्राच्यां वृकोदरं मत्स्यैः कैकेयैः सह मद्रकैः ॥१३॥ ते विजित्य नृपान्वीरा आजह्रुर्दिग्भ्य ओजसा॥अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥ १४ ॥ श्रुत्वाऽजितं जरासन्धं नृपतेर्ध्यायतो हरिः ॥ आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥ १५ ॥ भीमसेनोऽर्जुनः कृष्णो ब्रह्मलिङ्गधरास्त्रयः ॥ जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥ १६ ॥ ते गत्वातिथ्यवेलायां गृहेषु गृहमेधिनम् ॥ ब्रह्मण्यं समयाचेरन्राजन्या ब्रह्मलिङ्गिनः ॥ १७ ॥ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् ॥ तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥ १८ ॥ किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः ॥ किं न देयं वदान्यानां कः परः समदर्शिनाम् ॥ १९ ॥

नृपतेर्युधिष्ठिरस्य यमुपायं बलिनामपि चान्येषामित्यादिना उद्धव उवाच तमेवोपायम् आद्यो हरिराह स्म ॥ १५ ॥ भीमेति ॥ हे तात भीमादयस्त्रयो ब्रह्मलिङ्गधरा ब्राह्मणरूपधारिणः सन्तो यतो यत्र बृहद्रथसुतो जरासन्धोऽभूत्तद्गिरिव्रजसंज्ञकं स्थानं जग्मुः ॥ १६ ॥ ते इति ॥ ते ब्रह्मलिङ्गिनः ब्राह्मणवेषधारिणो राजन्यः क्षत्रिया भीमादयः आतिथ्यवेलायां दानसमये तद्गृहेषु गत्वा गृहमेधिनं गृहे वर्त्तमानं ब्रह्मण्यं ब्राह्मणभक्तं जरासन्धं समयाचेरन् समयाचन्त इत्यर्थः । झस्य रन् एत्वं चार्षे ॥ १७ ॥ राजन्निति ॥ हे राजन् दूरमागतानर्थिनोऽस्मान् प्राप्तान् अतिथीन् विद्धि अतो यद्वयं कामयामहे तन्नोऽस्मभ्यं प्रयच्छ देहि ते भद्रं भूयात् जरासन्धस्य मोक्षप्राप्तेः ॥ १८ ॥ ननु विशेषकथनं विना कथमङ्गीकुर्यामन्यथा पुत्रादिकमदेयमपि भवद्भिर्याच्येत तत्राहुः–किमिति ॥ यथा असाधुभिः अकार्यम् अकर्त्तव्यं कि किमपि नास्ति यथा च तितिक्षूणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहनशीलानां दुर्मर्षं दुःसहं किमस्तीति यथा च समदर्शिनां परः शत्रुः परकीयो वा कोऽस्ति तथा वदान्यानाम् अत्युदाराणामदेयं किंचिन्नास्तीत्यर्थः ॥ १९ ॥ य इति ॥ यः प्राणी स्वयं कल्पः समर्थः सन्नपि सतां सद्भिर्गेयं ध्रुवं नित्यं यशो नित्येन शरीरेण नाचिनोति न सम्पादयति स वाच्यः निन्द्य एव साधुभिः शोच्यश्चेत्यर्थः ॥ २० ॥ हरिश्चन्द्र इति ॥ हरिश्चन्द्रो विश्वामित्रार्थानृणभावाय भार्यात्मजादिविक्रीयाप्यनिर्विण्णः स्वर्गं गतः बलिरन्तिदेवयोः कथा भागवत एव स्फुटा । उंछवृत्तिर्मुद्गलः षण्मासं सदित्कुटुम्बोऽप्यतिथ्यादानेन ब्रह्मलोकं गतः शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्त्वा दिवं गतः कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्त्वा विमानेन दिवं गतः व्याधश्च तयोः सत्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थाने वनाग्निना दग्धदेहो निष्कल्मषो दिवमारुरोह । एवमन्ये च बहवः अध्रुवेण शरीरेण ध्रुवं लोकं गताः ॥ २१ ॥ स्वरैरिति ॥ एवमुक्तो जरासुतः स्वरैः दैन्यरहितैः आलापैः याच्ञा पुष्ट्यर्थमङ्गाङ्गिभावेन त्रयाणामुक्तिर्ज्ञेया आकृतिभिः शरीरावयवसंस्थानविशेषैः ज्याहतैः ज्याघातकिणाङ्कितैः

योऽनित्येन शरीरेण सतां गेयं यशो ध्रुवम् ॥ नाऽऽचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः ॥ २० ॥ हरिश्चन्द्रो रन्तिदेव उञ्छवृत्तिः शिबिर्बलिः ॥ व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः ॥ २१ ॥ श्रीशुक उवाच ॥ स्वरैराकृतिभिस्तांस्तु प्रकोष्ठैर्ज्याहतैरपि ॥ राजन्यबन्धून्विज्ञाय दृष्टपूर्वानचिन्तयत् ॥ २२ ॥ राजन्यबन्धवो ह्येते ब्रह्मलिङ्गानि बिभ्रति ॥ ददामि भिक्षितं तेभ्य आत्मानमपि दुस्त्यजम् ॥ २३ ॥ बलेर्नु श्रूयते कीर्तिर्विंतता दिक्ष्वकल्मषा ॥ ऐश्वर्याद् भ्रंशितस्यापि विप्रव्याजेन विष्णुना ॥ २४ ॥ श्रियं जिहीर्षतेन्द्रस्य विष्णवे द्विजरूपिणे ॥ जानन्नपि महीं प्रादाद्वार्यमाणोऽपि दैत्यराट् ॥ २५ ॥ जीवता ब्राह्मणार्थाय कोन्वर्थः क्षत्रबन्धुना ॥ देहेन पतमानेन नेहता विपुलं यशः ॥ २६ ॥

प्रकोष्ठैश्च लिङ्गैस्तान्दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु पूर्वं दृष्टान् राजन्यबन्धून् याचकत्वान्निकृष्टक्षत्रियान् विज्ञाय अनुमायाचिन्तयत् विचारितवान् ॥ २२ ॥ राजन्येति ॥ एते राजन्यबन्धवः भयाद्ब्रह्मलिङ्गानि बिभ्रति अतस्तेभ्यो भिक्षितं दुस्त्यजमात्मानं देहमपि ददामि ॥ २३ ॥ बलेरिति द्वयम् ॥ इन्द्रस्यार्थं श्रियं हर्तुमिच्छता विप्रव्याजेन विष्णुना इन्द्रस्य स्वर्गस्वामिन इति बलिविशेषणं वा । ऐश्वर्याद् भ्रंशितस्य चालितस्यापि बलेः अकल्मषापवित्रा वितता दिक्षु व्याप्ता कीर्तिः श्रूयते यतः शुक्रेण वार्यमाणोऽपि अयं विष्णुर्मदीयं सर्वस्वं हरिष्यतीति जानन्नपि दैत्यराट् बलिर्द्विजरूपिणे विष्णवे महीं प्रादात् ॥ २४ ॥ २५ ॥ जीवतेति ॥ पतमानेन प्रतिक्षणं क्षीयमाणेन शानजार्षः । चानश्र् वा । ब्राह्मणार्थाय विपुलं यशो नेहता असम्पादयता शता आर्षः । क्षत्रबन्धुना देहेन जीवता को न्वर्थः किं प्रयोजनं सिध्यति न किमपीत्यर्थः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवमुदारा दातुमुत्सुका मतिर्यस्य स जरासन्धः कृष्णादीन् प्राह स्म । तदुक्तिमेवाह हे विप्राः कामः स्वाभिलषितः पदार्थो व्रियताम् आत्मनो मम शिरोऽप्यभिलषितं चेत्तर्हि वो युष्मभ्यं ददामि ॥ २७ ॥ युद्धमिति ॥ हे राजेन्द्र यदि मन्यसे यथेष्टं दातुमिच्छसि तर्हि नोऽस्मभ्यं द्वन्द्वशो युद्धं देहि यतो वयं युद्धार्थिनो राजन्याः क्षत्रिया इह प्राप्ताः नत्त्वन्नकाङ्क्षिणो ब्राह्मणाः ॥ २८ ॥ असाविति ॥ स्पष्टम् ते रिपुमिति मयैवैतावानीताविति भावः ॥ २९ ॥ एवमिति ॥ एवमावेदितो भगवता विज्ञापितः स मागधो राजा उच्चैर्जहास । अमर्षितः क्रुद्धः सन्नाह स्म च हे मन्दाः वस्तुतः अमन्दा इति च्छेदः । यदि युद्धमेव काङ्क्षितं तर्हि वो युष्मभ्यं युद्धमेव ददामि ॥ ३० ॥ नेति ॥ भीरुणा अतो युधि विक्लवचेतसा त्वया न योत्स्ये यः त्वं मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणगतोभूः वस्तुतः अभीरुणा बहुशो मां जितवता निर्भयेन त्वया सह युधि विक्लवचेतसा युक्तोऽहं न योत्स्ये यतः मथुरामुपलक्षणतया द्वारकां च स्वपुरीं त्यक्त्वा सैन्यरहित एव त्वं मां हन्तुं समुद्रं प्राकारादिकृतमुद्रणयुक्तं शरणं मदीयं गृहं गतः प्राप्तोऽसि

इत्युदारमतिः प्राह कृष्णार्जुनवृकोदरान् ॥ हे विप्रा व्रियतां कामो ददाम्यात्मशिरोऽपि वः ॥ २७ ॥ श्रीभगवानुवाच ॥ युद्धं नो देहि राजेन्द्र द्वन्द्वशो यदि मन्यसे ॥ युद्धार्थिनो वयं प्राप्ता राजन्या नान्नकाङ्क्षिणः ॥ २८ ॥ असौ वृकोदरः पार्थस्तस्य भ्रातार्जुनो ह्ययम् ॥ अनयोर्मातुलेयं मा कृष्णं जानीहि ते रिपुम् ॥ २९ ॥ एवमावेदितो राजा जहासोच्चैः स्म मागधः ॥ आह चामर्षितो मन्दा युद्धं तर्हि ददामि वः ॥ ३० ॥ न त्वया भीरुणा योत्स्ये युधि विक्लवचेतसा ॥ मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः ॥ ३१ ॥ अयं तु वयसाऽतुल्यो नातिसत्त्वो न मे समः ॥ अर्जुनो न भवेद्योद्धा भीमस्तुल्यबलो मम ॥ ३२ ॥ इत्युक्त्वा भीमसेनाय प्रदाय महतीं गदाम् ॥ द्वितीयां स्वयमादाय निर्जगाम पुराद्बहिः ॥ ३३ ॥ ततः समेखले वीरौ संयुक्ताावितरेतरम् ॥ जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां रणदुर्मदौ ॥ ३४ ॥ मण्डलानि विचित्राणि सव्यं दक्षिणमेव च ॥ चरतोः शुशुभे युद्धं नटयोरिव रङ्गिणोः ॥ ३५ ॥

॥ ३१ ॥ अयमिति ॥ अयमर्जुनस्तु वयसा अतुल्यः न्यूनः नापि अतिसत्वः बलाधिकः अतोऽर्जुनो योद्धा न भवेत् । भीमस्तु मम तुल्यबलः अतो योद्धा भवेत् ॥ ३२ ॥ इतीति ॥ इत्युक्त्वा जरासन्धः स्वकीयामेव महतीं गुर्वीं गदां भीमसेनाय प्रदाय दत्त्वा तथाभूतां द्वितीयां गदां स्वयमादाय युद्धार्थं पुराद्बहिर्निर्जगाम ॥ ३३ ॥ तत इति ॥ ततश्च समे निम्नोन्नतत्वरहिते खले कोमलप्रदेशे यद्वा मेखलाभित्तिविशेषस्तत्सहिते भूमिनिखननादिना युद्धार्थं सम्पादिते युद्धाङ्गणे रणदुर्मदौ वीरौ इतरेतरं परस्परं संयुक्तौ मिलितौ वज्रकल्पाभ्यां गदाभ्यां जघ्नतुः ॥ ३४ ॥ मण्डलानीति ॥ सव्यं दक्षिणं च यथा भवति तथा विचित्राणि मण्डलानि गदायुद्धगतिभेदान् चरतोस्तयोः रङ्गिणो रङ्गभूमिगतयोर्नटयोरिवेति निर्भयत्वेनोपमा युद्धं शुशुभे ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ ततश्च हे राजन् क्षिप्तयोः क्षेपणकर्मीभूतयोर्गदयोः दन्तिनोर्गजयोर्दन्तयोरिव परस्पराव्याघातजन्यो वज्रस्य निष्पेषः सम्पातस्तच्छब्दसदृशोऽतिभयङ्क-रश्चटचटेतिशब्दो बभूवेति शेषः ॥ ३६ ॥ ते इति ॥ अन्योऽन्यतः परस्परं भुज बलेन भुजजवेनेत्यपि पाठः । निपात्यमाने ते गदे अंसादीनुपेत्य प्राप्य चूर्णी-बभूवतुः । अंसः स्कन्धः जत्रु तत्संलग्नास्थिविशेषः जत्रूनित्येकत्वाभाव आर्षः । यथा दीप्तो मन्युः क्रोधो ययोस्तयोरर्कवृक्षशाखाभ्यां संयुध्यतोः शता आर्षः । द्विरदयोर्ग-जयोरङ्गानि प्राप्य यथार्कशाखे चूर्णीभवतस्तथा ॥ ३७ ॥ इत्थमिति ॥ इत्थं तयोर्गदयोः प्रहतयोर्भग्नयोः सत्योः क्रुद्धौ नृवीरौ भीमजरासन्धौ अयोवल्लोहवत्स्पर्शो येषां तैः स्वमुष्टिभिरन्योन्यं शरीरमपिष्टां ताडयामासतुः । एवमिभयोरिव परस्परं प्रहरतोस्तयोस्तलेन ताडनं चपेटस्तत उत्थः शब्दश्च निर्घातो निरभ्रगर्जितं वज्रः वज्रपातस्तच्छ-ब्दवत् परुषः भयङ्करः आसीदित्यन्वयः ॥ ३८ ॥ तयोरिति ॥ हे नृप शिक्षा अभ्यासः बलं शाररिम् ओज इन्द्रियसामर्थ्यं समान्येतानि ययोस्तयोरक्षीणबलयोरेवं

ततश्चटचटाशब्दो वज्रनिष्पेषसन्निभः ॥ गदयोः क्षिप्तयो राजन्दन्तयोरिव दन्तिनोः ॥३६॥ ते वै गदे भुजजवेन निपात्यमाने अन्योऽन्यतोंऽसक-टिपादकरोरुजत्रून् ॥ चूर्णीबभूवतुरुपेत्य यथार्कशाखे संयुध्यतोर्द्विरदयोरिव दीप्तमन्व्योः ॥३७॥ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टि-भिरयःस्पर्शैरपिष्टाम् ॥ शब्दस्तयोः प्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ॥३८॥ तयोरेवं प्रहरतोः समशिक्षाबलौजसोः ॥ निर्वि-शेषमभूद्युद्धमक्षीणजवयोर्नृप ॥३९॥ एवं तयोर्महाराज युध्यतोः सप्तविंशतिः ॥ दिनानि निरगंस्तत्र सुहृद्वन्निशि तिष्ठतोः ॥ ४० ॥ एकदा मा-तुलेयं वै प्राह राजन्वृकोदरः ॥ न शक्तोऽहं जरासन्धं निर्जेतुं युधि माधव ॥ ४१ ॥ शत्रोर्जन्ममृती विद्वाञ्जीवितं च जराकृतम् ॥ पार्थमाप्याय-यन्स्वेन तेजसाऽचिन्तयद्धरिः ॥ ४२ ॥ सञ्चिन्त्यारिवधोपायं भीमस्यामोघदर्शनः ॥ दर्शयामास विटपं पाटयन्निव संज्ञया ॥ ४३ ॥

प्रहरतोर्निर्विशेषं समानं युद्धमभूत् ॥ ३९ ॥ एवमिति ॥ श्लोकद्वयं प्रक्षिप्तमिति काशीनाथः । हे महाराज एवं युद्ध्यतोः शता आर्षः । निशि सुहृद्वत् मित्रवत् तत्र जरा-सन्धगृहे तिष्ठतोस्तयोः सप्तविंशतिर्दिनानि निरगन् व्यतीतानि निरगन्नित्यार्षम् ॥ ४० ॥ एकदेति ॥ हे राजन् एकदा वृकोदरो भीमो मातुलेयं मातुलपुत्रं कृष्णं प्राह स्म । तदाह हे माधव युधि जरासन्धं निर्जेतुमहं न शक्तः ॥ ४१ ॥ शत्रोरिति ॥ शत्रोर्जरासन्धस्य जन्म शकलद्वयरूपेण मृतिश्च पुनः शकलीभावेन ते जरानाम राक्षसी तया शकलसन्धानेन कृतं तज्जीवितं च विद्वान् जानन् हरिः स्वेन तेजसा पार्थं भीममाप्याययन् उपबृंहयन् सन् कथमस्य शकलीभावं भीमो जानीयादित्यचिन्तयत् ॥ ४२ ॥ सञ्चिन्त्येति ॥ अमोघदर्शनः भगवान् संचिन्त्य तदुपायं ज्ञात्वा विटपं शाखां पाटयन्निव यथाहं विटपशाखां पाटयामि तथा त्वमेनं पाटयेति संज्ञया संकेतेनेति अरेः शत्रोर्जरासन्धस्य वधोपायं भीमस्य दर्शयामास ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ महासत्त्वः प्रहरतां वरश्च भीमः तत् भगवता सूचितमुपायं विज्ञाय पादयोः शत्रुं गृहीत्वा भूतले पातयामास ॥ ४४ ॥ एकमिति ॥ पदा स्वपादेनैकं शत्रोः पाद-
माक्रम्य दृढमवष्टभ्यान्यं पादं दोर्भ्यां हस्ताभ्यां प्रगृह्य स भीमः महागजो यथानायासेन शाखां पाटयति तथा तं गुदतः आरभ्य पाटयामास विदारितवान् ॥४५॥ एकेति ॥
एकैकः पादादिस्तथा एकैको बाह्वादिर्ययोस्ते शकले तत्रस्थाः प्रजा ददृशुः ॥ ४६ ॥ हाहेति ॥ एवं मगधेश्वरे निहते सति तत्प्रजाकृतः महान् हाहाकारशब्द आसीत् ।
जयोऽर्जुनः अच्युतः कृष्णः तौ भीमं परिरभ्य पूजयामासतुः स्तुत्यादिना सत्कृतवन्तौ ॥ ४७ ॥ दुर्वृत्तत्वादसौ हतो नतु राज्यलोभेनेति दर्शयन्नाह—सहदेवमिति ॥
भूतभावनः अप्रमेयात्मा प्रभुर्भगवान् तस्य जरासन्धस्य तनयं सहदेवं मगधानां देशानां पतिं पतित्वेन अभ्यषिञ्चत् ॥ ४८ ॥ मोचयामासेत्यर्द्धम् ॥ ये च मागधेन संरुद्धाः
आसन् तान् राजन्यान् मोचयामास ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे द्विसप्ततितमे व्यधात् ॥ ७२ ॥ त्रिसप्ततितमे रुद्धान्मोच-

तद्विज्ञाय महासत्त्वो भीमः प्रहरतां वरः ॥ गृहीत्वा पादयोः शत्रुं पातयामास भूतले ॥४४॥ एकं पादं पदाक्रम्य दोर्भ्यामन्यं प्रगृह्य सः ॥ गुदतः
पाटयामास शाखामिव महागजः ॥ ४५ ॥ एकपादोरुवृषणकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णे शकले ददृशुः प्रजाः ॥ ४६ ॥ हाहाकारो
महानासीन्निहते मगधेश्वरे ॥ पूजयामासतुर्भीमं परिरभ्य जयाच्युतौ ॥४७॥ सहदेवं तत्तनयं भगवान् भूतभावनः ॥ अभ्यषिञ्चदमेयात्मा मग-
धानां पतिं प्रभुः ॥४८॥ मोचयामास राजन्यान्संरुद्धा मागधेन ये ॥४९॥ इति श्रीभा० म० दश० उ० जरासन्धवधो नाम द्विसप्ततितमोऽध्यायः
॥७२॥ श्रीशुक उवाच ॥ अयुते द्वे शतान्यष्टौ लीलया युधि निर्जिताः ॥ ते निर्गता गिरिद्रोण्या मलिना मलवाससः ॥ क्षुत्क्षामाः शुष्कवदनाः
संरोधपरिकर्शिताः ॥१॥ ददृशुस्ते घनश्यामं पीतकौशेयवाससम् ॥ श्रीवत्साङ्कं चतुर्बाहुं पद्मगर्भारुणेक्षणम् ॥२॥ चारुप्रसन्नवदनं स्फुरन्मकर-
कुण्डलम् ॥ पद्महस्तं गदाशङ्खरथाङ्गैरुपलक्षितम् ॥ ३ ॥ किरीटहारकटककटिसूत्राङ्गदाचितम् ॥ भ्राजद्वरमणिग्रीवं निवीतं वनमालया ॥४॥

यित्वा नृपान्हरिः ॥ देशान्प्रस्थाप्यागमच्च तत्र श्लोकाः शराग्नयः ॥ उवाचपञ्चैकं सार्द्धाः स्युः षट्त्रिंशदनुष्टुभः ॥ ७३ ॥ अयुते इति सार्द्धम् ॥ द्वे अयुते अष्टौ शतानि च ये
राजन्या युद्धे जरासन्धेन लीलया निर्जिताः गिरिद्रोण्यां सन्निरुद्धाश्च ते स्वरूपतो मलिनाः अभ्यङ्गोद्वर्तनस्नानाद्यभावात् तथा मलानि मलयुक्तानि वासांसि येषां ते क्षुधा क्षामा
दुर्बलाः शुष्काणि वदनानि येषां ते संरोधेन परिकर्शिता क्लेशिताः गिरिद्रोण्याः निर्गताः ॥ १ ॥ ददृशुरिति त्रिकम् ॥ ते राजानः घनमिव श्यामं पीते कौशेये वाससी यस्य
तम् । श्रीवत्सो रोमरेखाविशेषोऽङ्को वक्षसि चिह्नं यस्य तं चतुर्बाहुं पद्मगर्भतुल्ये अरुणे ईक्षणे नेत्रे यस्य तं चारु सुन्दरं प्रसन्नं च वदनं यस्य तं स्फुरती मकराकारे कुण्डले
यस्य तं पद्महस्तं गदादिभिरुपलक्षितं शोभितं केरीटादिभिरर्चितम् अलंकृतं भ्राजत् भ्राजमानो वरमणिः कौस्तुभो यया सा ग्रीवा यस्य तं वनमालया आपादकण्ठविल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्बितया निवीतं व्याप्तं कृष्णं ददृशुः ॥ २ ॥ ३ ॥ ४ ॥ पिबन्त इति सार्द्धम् ॥ चक्षुर्भ्यां पिबन्त इव जिह्वया लिहन्त इव नासाभ्यां जिघ्रन्त इव बाहुभिः रभन्तः आलिङ्गन्त इव शता नुम् च आर्षौ । भगवद्दर्शनेन हतपाप्मानः ते नृपाः मूर्द्धभिः हरेः पादयोः प्रणेमुः ॥ ५ ॥ कृष्णेति ॥ कृष्णस्य सन्दर्शनादेव यः आह्लादः तेन ध्वस्तो निरस्तः संरोधजनितः क्लमः खेदो येषां ते नृपा बद्धाञ्जलयः सन्तो हृषीकेशं गीर्भिः प्रशशंसुः ॥ ६ ॥ नम इति ॥ हे देवदेवेशेत्याद्याः सम्बुद्धयः ते तुभ्यं नमः । प्रपन्नान् निर्विण्णान् दुःखानुभवेन सर्वतो विरक्तान् संनिरोधाद्विमोचितानस्मान् घोरायाः संसृतेरपि पाहि मोचय ॥ ७ ॥ नेति ॥ हे नाथ हे मधुसूदन हे विभो वयं त्वेनं मागधम् अनुलक्षीकृत्य नासूयामः अस्मिन् राज्यापहारकत्त्वादिदोषान्नारोपयामः । एनादेश आर्षः । यद्यस्मात् जरासन्धात् राज्ञामस्माकं राज्याच्च्युतिः भ्रंशो जातस्ततश्च भवतोऽनुग्रहो जातः ॥ ८ ॥ राज्येति ॥ राज्ये यदैश्वर्यं तेन यः ईश्वरोऽहं यथेष्टं व्यवहरिष्यामीत्याकारको मदस्तेनोन्नद्धः उच्छृङ्खलः नृपः श्रेयो न विन्दते किंतु त्वन्मायामोहितः

पिबन्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया ॥ जिघ्रन्त इव नासाभ्यां रम्भन्त इव बाहुभिः ॥ प्रणेमुर्हतपाप्मानो मूर्धभिः पादयोर्हरेः ॥ ५ ॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः ॥ प्रशशंसुर्हृषीकेशं गीर्भिः प्राञ्जलयो नृपाः ॥६॥ राजान ऊचुः ॥ नमस्ते देवदेवेश प्रपन्नार्तिहराव्यय ॥ प्रपन्नान्पाहि नः कृष्ण निर्विण्णान्घोरसंसृतेः ॥ ७ ॥ नैनं नाथान्वसूयामो मागधं मधुसूदन ॥ अनुग्रहो यद्भवतो राज्ञां राज्यच्युतिर्विभो ॥ ८ ॥ राज्यैश्वर्यमदोन्नद्धो न श्रेयो विन्दते नृपः ॥ त्वन्मायामोहितोऽनित्या मन्यते सम्पदोऽचलाः ॥ ९ ॥ मृगतृष्णां यथा बाला मन्यन्त उदकाशयम् ॥ एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते ॥ १० ॥ वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयाऽस्या इतरेतरस्पृधः ॥ घ्नन्तः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वाऽविगणय्य दुर्मदाः ॥ ११ ॥ त एव कृष्णाद्य गभीररंहसा दुरन्तवीर्येण विचालिताः श्रियः ॥ कालेन तन्वा भवतोऽनुकम्पया विनष्टदर्पाश्चरणौ स्मराम ते ॥ १२ ॥

सन्ननित्या चञ्चलाः अपि सम्पदोऽचलाः शाश्वतीर्मन्यते ॥ ९ ॥ मृगतृष्णामिति ॥ बालाः अज्ञाः यथा मृगतृष्णां मरीचिकाम् उदकाशयं नदीतटाकादिकं मन्यन्ते एवमयुक्तास्त्वत्संबन्धरहिता अविवेकिनो वैकारिकीं विकाराः शब्दादिविषयास्तेभ्य उद्भूतां भोगसम्पदं मायां मायिकीमपि वस्तु चक्षते परमपुरुषार्थतया पश्यन्ति ॥ १० ॥ वयमिति युग्मम् ॥ हे प्रभो हे कृष्ण अस्या भूमेर्जिगीषया इतरेतरस्पृधः परस्परं स्पर्धमानाः स्पर्द्धतेः स्पृधभाव आर्षः । श्रीमदेन नष्टा दृष्टिर्येषां ते मृत्युरूपं त्वा त्वामविगणय्य दुर्मदा ये वयं पुरा राज्यस्थित्यवस्थायां स्वाः स्वकीयाः प्रजा घ्नन्तः युद्धार्थं प्रयुज्य धनाद्यर्थं वा प्रपीड्य नाशयन्तः अतिनिर्घृणाः निर्दयाः अभवाम । त एवाद्य गभीरम् अलक्षितं रंहो वेगो यस्य तेन तथा दुरन्तं वीर्यं पराक्रमो यस्य तेन भवतस्तन्वा मूर्तिविशेषेण कालेन श्रियः सकाशाच्चालिता भ्रंशिताः अतो नष्टदर्पाः गतगर्वाः भवतोऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुकम्पया ते तव चरणौ स्मराम स्मर्तुमाशास्महे प्रार्थने लोट् । अतो राज्यच्युतिर्भवदनुग्रह एवेत्यर्थः ॥ ११ ॥१२॥ अथो इति ॥ अथो तस्मात् मृगतृष्णिर्मृगतृष्णा तया रूपितं तत्सदृशं मृगतृष्णिरूपितमिति बोपदेवसम्मतः पाठः । अर्थः स एव । यद्वा । मृगतृष्णिभिः मृगतृष्णावद्भिरेव रूपितं सुन्दरीकृतं शश्वत्पतता क्षीयमाणेन तत्र हेतुः रुजां रोगाणां भुवा उत्पत्तिस्थानभूतेन देहेन उपासितव्यं संसेवितव्यं राज्यं न स्पृहयामहे । तथा कर्णयो रोचनं रुचिजनकमात्रं प्रेत्य परलोकं स्वर्गादिकं प्राप्य उपासितव्यम् । भोग्यं यत्क्रियाफलं स्वर्गादिसुखं तदपि क्षयातिशयादियुक्तत्वान्न स्पृहयामहे ईप्साप्रकर्षाभावेऽपि तद्विवक्षया द्वितीया ॥ १३॥ तमिति॥ येनोपायेन यथानुष्ठितेनेह संसारे संसरतां भ्रमतामपि नोऽस्माकं ते तव चरणाब्जयोः स्मृतिर्न विरमेत् विच्छिन्ना न भवेत्तमुपायं समादिश आज्ञापय ॥ १४ ॥ कृष्णायेति ॥ प्रणतानां क्लेशं नाशयति तस्मै स्पष्टं शेषम् ॥ १५ ॥ संस्तूयमान इति ॥ हे तात मुक्तं मागधकृतं बन्धनं येषां तै राजभिरेवं संस्तूयमानः शरण्यः करुणश्च भगवान् श्लक्ष्णया मञ्जुलया गिरा तानाह स्म ॥ १६ ॥

अथो न राज्यं मृगतृष्णिरूपितं देहेन शश्वत्पतता रुजां भुवा ॥ उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनम् ॥ १३ ॥ तं नः समादिशोपायं येन ते चरणाब्जयोः ॥ स्मृतिर्यथा न विरमेदपि संसारतामिह ॥ १४॥ कृष्णाय वासुदेवाय हरये परमात्मने ॥ प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥ १५ ॥ श्रीशुक उवाच ॥ संस्तूयमानो भगवान्राजभिर्मुक्तबन्धनैः॥ तानाह करुणस्तात शरण्यः श्लक्ष्णया गिरा ॥१६॥ श्रीभगवानुवाच ॥ अद्य प्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे ॥ सुदृढा जायते भक्तिर्बाढमाशंसितं तथा ॥ १७॥ दिष्ट्या व्यवसितं भूपा भवन्त ऋतभाषिणः ॥ श्रियैश्वर्यमदोन्नाहं पश्य उन्मादकं नृणाम् ॥ १८ ॥ हैहयो नहुषो वेनो रावणो नरकोऽपरे ॥ श्रीमदाद् भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः ॥ १९ ॥ भवन्त एतद्विज्ञाय देहाद्युत्पाद्यमन्तवत् ॥ मां यजन्तोऽध्वरैर्युक्ताः प्रजा धर्मेण रक्षत ॥ २० ॥

अद्येति ॥ हे भूपाः युष्माभिर्यथा आशंसितं प्रार्थितं तथा बाढं निश्चितं वो युष्माकमद्य प्रभृति आत्मनि अखिलेश्वरे मयि सुदृढा भक्तिर्जायते जायताम् । निरन्तरं मत्स्मरणं भवत्वित्यर्थः ॥ १७ ॥ दिष्ट्येति ॥ हे भूपाः भवन्तः ऋतभाषिणः सत्यवचनाः सन्ति अतः भवद्भिः मत्स्मरणादिकं दिष्ट्या व्यवसितं निश्चितं यतः श्रिया धनेन हेतुना ऐश्वर्यमदोन्नाहम् ईश्वरत्वाभिमानाधिक्यं नृणामुन्मादकं श्रेयः प्रतिबन्धकमहं पश्ये पश्यामीति तङार्षः ॥ १८ ॥ हैहय इति ॥ हैययाद्याः अपरे च देवदैत्यनरेश्वराः श्रीमदाद्धेतोः स्थानाद्राज्याद् भ्रंशिताः एतेषां कथा भागवत एव द्रष्टव्या॥१९॥भवन्त इति ॥ अतो हे भवन्त इति सम्बुद्धिः । एतत् यदुत्पाद्यं देहादितदन्तवद्विज्ञाय युक्ताः सावधानचिताः अध्वरैर्यज्ञैर्मां यजन्तः पूजयन्तो धर्मेण प्रजा रक्षथ रक्षिष्यथ । सामीप्ये लट् रक्षतेत्यर्थः । यूयमिति शेषः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तन्वन्त इति ॥ प्रजातन्तून् पुत्रपौत्रादिसन्ततीः संतन्वन्तः विस्तारयन्तः सुखं दुःखं भवाभवौ विभवतद्विनाशौ एतेषु च प्राप्तं प्राप्तं सेवन्तः समत्वेन सेवमानाः शता आर्षः। मयि विषयभूते चित्तं येषां ते मच्चिताः मां स्मरन्तो विचरिष्यथ कालं नेष्यथ ॥ २१ ॥ उदासीना इति ॥ देहधनपुत्रादौ उदासीनाः आत्मन्येवारामो रमणं येषां ते तथा धृतव्रताः गृहीतसन्नियमाः सम्यक् निर्वासनं मनो मय्यावेश्य अन्ते प्रारब्धावसाने परब्रह्मात्मकं मां यास्यथ प्राप्स्यथ ॥ २२ ॥ इतीति ॥ भुवनेश्वरो भगवान् कृष्णः इत्येवं नृपानादिश्य अनुशिष्य तेषां मज्जनकर्माणि अभ्यङ्गस्नानादौ निमित्ते पुरुषान् स्त्रियः स्त्रीश्च न्ययुङ्क्त ॥ २३ ॥ सपर्यामिति ॥ हे भारत सहदेवेन जरासन्धपुत्रेण प्रयोज्यकर्त्रा नरदेवानां राज्ञामुचितैर्योग्यैर्वस्त्रादिभिः साधनैस्तेषां सपर्याम् अलङ्कारं च कारयामास ॥ २४ ॥ भोजयित्वेति ॥ एवं सुस्नातान् समलङ्कृतांश्च तान् वरेण श्रेष्ठेनान्नेन भोजयित्वा ताम्बूलाद्यैरन्यैश्च नृपोचितैर्विविधैर्भोगैर्युक्तान् कारयामास। यद्वा। पूर्वश्लोकेन सह युग्मम् सुस्नातान् समलंकृतान् भोगैश्च युक्तान् वरेणान्नेन भोजयित्वा पुनः

संतन्वन्तः प्रजातन्तून्सुखं दुःखं भवाभवौ ॥ प्राप्तं प्राप्तं च सेवन्तो मच्चित्ता विचरिष्यथ ॥ २१ ॥ उदासीनाश्च देहादावात्मारामा धृतव्रताः ॥ मय्यावेश्य मनः सम्यङ् मामन्ते ब्रह्म यास्यथ ॥ २२ ॥ श्रीशुक उवाच ॥ इत्यादिश्य नृपान्कृष्णो भगवान् भुवनेश्वरः ॥ तेषां न्ययुङ्क्त पुरुषान्स्त्रियो मज्जनकर्मणि ॥ २३ ॥ सपर्यां कारयामास सहदेवेन भारत ॥ नरदेवोचितैर्वस्त्रैर्भूषणैः स्रग्विलेपनैः ॥ २४ ॥ भोजयित्वा वरान्नेन सुस्नातान् समलंकृतान् ॥ भोगैश्च विविधैर्युक्तांस्ताम्बूलाद्यैर्नृपोचितैः ॥ २५ ॥ ते पूजिता मुकुन्देन राजानो मृष्टकुण्डलाः ॥ विरेजुर्मोचिताः क्लेशात्प्रावृडन्ते यथा ग्रहाः ॥ २६ ॥ रथान्सदश्वानारोप्य मणिकाञ्चनभूषितान् ॥ प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान्प्रत्ययापयत् ॥ २७ ॥ त एवं मोचिताः कृच्छ्रात्कृष्णेन सुमहात्मना ॥ ययुस्तमेव ध्यायन्तः कृतानि च जगत्पतेः ॥ २८ ॥ जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितम् ॥ यथाऽन्वशासद्भगवांस्तथा चक्रुरतन्द्रिताः ॥ २९ ॥

सहदेवेन तेषां सपर्यां कारयामास इति ॥ २५ ॥ ते इति ॥ ते राजानो मुकुन्देन क्लेशान् मोचिताः पूजिताः अत एव मृष्टानि शुद्धानि कुण्डलानि येषां ते प्रावृडन्ते शरत्काले ग्रहाश्चन्द्रादयो यथा विराजन्ते तथा विरेजुः ॥ २६ ॥ रथानिति ॥ मणियुक्तैः काञ्चनैर्भूषणैर्भूषितांस्तान् राज्ञः सन्तः समीचीना अश्वा येषु तान् रथानारोप्य रथेषूपवेश्य सूनृतैर्मधुरैर्वाक्यैः प्रीणय्य हर्षयित्वा ल्यबार्षः। स्वस्वदेशान् प्रत्ययापयत् प्रस्थापयामास॥२७॥त इति ॥ ते राजानः सुमहात्मना अत्युदारचित्तेन कृष्णेनैवं कृच्छ्रात् क्लेशान्मोचितास्तं कृष्णमेव ध्यायन्तः तथा जगत्पतेस्तस्य कृतानि कर्माणि च ध्यायन्त एव ययुः॥२८॥जगदुरिति ॥ गृहं गत्वा च ते महापुरुषस्य कृष्णस्य चेष्टितं जरासन्धघातादिप्रकृतिभ्यः अमात्यादिभ्यो जगदुः ऊचुः। भगवान्यथा अन्वशासत् अनुशिक्षितवान् "बहुलं छन्दसि"इति शपो लुक् न। तथा अतन्द्रिताः सावधानाः सन्तश्चक्रुश्च॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जरासन्धमिति ॥ भीमसेनेन प्रयोज्यकर्त्रा जरासन्धं घातयित्वा तत्पुत्रेण सह देवेन पूजितः पार्थाभ्यां भीमार्जुनाभ्यां संयुतश्च केशवः कृष्णः मागधस्य दिव्यं रथमारुह्य इन्द्रप्रस्थं प्रायात् ॥ ३० ॥ गत्वेति ॥ जितारयः स्वसुहृदो हर्षयन्तः दुर्हृदां दुर्योधनादीनाम् असुखं दुःखमावहन्तीति तथा ते कृष्णभीमार्जुनाः खाण्डवप्रस्थम् इन्द्रप्रस्थं गत्वा शङ्खान् दध्मुः ॥ ३१ ॥ तदिति ॥ तच्छङ्खशब्दं श्रुत्वा इन्द्रप्रस्थनिवासिनो जनाः प्रीतं प्रसन्नं मनो येषां ते तथाभूता जाताः यतो मागधं शान्तं मृतं मेनिरे। राजा युधिष्ठिरश्च आप्तः पूर्णो मनोरथो यस्य तथाभूत आसीत् ॥ ३२ ॥ अभीति ॥ अथानन्तरं भीमादयः आगत्य राजानं युधिष्ठिरमभिवन्द्य आत्मना आत्मभिर्यत्कर्मानुष्ठितं कृतं तत्सर्वमाश्रावयामासुः ॥ ३३ ॥ निशम्येति ॥ धर्मराजो युधिष्ठिरः केशवेनानुकम्पितं कृपया सम्पादितं तत्स्वकार्यं जरासन्धवधं निशम्य श्रुत्वा आनन्दजान् अश्रुबिन्दून् मुञ्चन्प्रेम्णा संस्तब्धः किञ्चनापि प्रशंसनाभिनन्दनादिकं नोवाच किंतु तूष्णीमास ॥ ३४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे त्रिसप्त-

जरासन्धं घातयित्वा भीमसेनेन केशवः ॥ पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजितः ॥ ३० ॥ गत्वा ते खाण्डवप्रस्थं शङ्खान्दध्मुर्जितारयः ॥ हर्षयन्तः स्वसुहृदो दुर्हृदां चासुखावहाः ॥ ३१ ॥ तच्छ्रुत्वा प्रीतमनस इन्द्रप्रस्थनिवासिनः ॥ मेनिरे मागधं शान्तं राजा चाप्तमनोरथः ॥ ३२ ॥ अभिवन्द्याथ राजानं भीमार्जुनजनार्दनाः ॥ सर्वमाश्रावयाञ्चक्रुरात्मना यदनुष्ठितम् ॥ ३३ ॥ निशम्य धर्मराजस्तत्केशवेनानुकम्पितम् ॥ आनन्दाश्रुकलां मुञ्चन्प्रेम्णा नोवाच किञ्चन ॥ ३४ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ श्रीशुक उवाच ॥ एवं युधिष्ठिरो राजा जरासन्धवधं विभोः ॥ कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् ॥ १ ॥ युधिष्ठिर उवाच ॥ ये स्युस्त्रैलोक्यगुरवः सर्वे लोकमहेश्वराः ॥ वहन्ति दुर्लभं लब्ध्वा शिरसैवानुशासनम् ॥ २ ॥ स भवानरविन्दाक्षो दीनानामीश मानिनाम् ॥ धत्तेऽनुशासनं भूमंस्तदत्यन्तविडम्बनम् ॥ ३ ॥

तितमे व्यधात् ॥ ७३ ॥ चतुर्युक्सप्ततितमे यज्ञेऽग्रे पूजनं हरेः ॥ शिशुपालवधाव्यत्र श्लोकाः सार्द्धश्चतुःशराः ॥ त्रीण्युवाचेति पादाढ्याः पञ्चर्वाणा अनुष्टुभः ॥ ७४ ॥ एवमिति ॥ राजा युधिष्ठिरो जरासन्धवधं श्रुत्वा तं जरासन्धघातनात्मकं विभोः कृष्णस्यानुभावं प्रभावं च श्रुत्वा एवं पूर्वोक्तप्रकारेण प्रीतः प्रेम्णा विनिमग्नोऽपि पुनः किञ्चिदाश्वासितचित्तः सन्निति शेषः। तं कृष्णमब्रवीत् ॥ १ ॥ ये स्युरिति ॥ ये त्रैलोक्यस्य गुरवः पूज्याः ब्रह्मरुद्रादयः ये च सर्वलोकस्य महेश्वराः पालका इन्द्रादयः स्युः ते सर्वे दुर्लभं लब्ध्वा स्वभाग्यैरेतदुर्लभं लब्धमिति मत्वा यस्य तवानुशासनं शिरसा वहन्ति बहुमानेन पालयन्ति ॥२॥ स इति ॥ हे भूमन् महत्तम सः अरविंदाक्षो नारायणो भवान् दीनानां विषयासक्तचित्तानां वृथैवेशमानिनामस्माकमनुशासनं धत्ते आज्ञामनुसरतीति यत्तदत्यन्तमननुरूपं विडम्बनं मनुष्यचेष्टानुकरणं स्वतेजोहानिप्रसङ्गादित्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्वा । यदस्मदनुशासनं धत्ते तदस्माकं विडम्बनमपकर्ष एव नतूत्कर्षः यतः परमेश्वरमिमे आज्ञापयति इति लोकैर्वयमुपहस्यामहे ॥ ३ ॥ अस्मदनुशासनधारणेन तव तु न काप्यप्रतिष्ठेत्याह—न हीति ॥ तथापि एकस्य मुख्यस्य अद्वितीयस्य समानासमानरहितस्य ब्रह्मणः परमात्मनः सर्वजीवनियन्तुस्तव नियम्यत्वं सुतरां न वास्तवम् अतः परानुग्रहार्थैः एतैः कर्मभिः आज्ञापनादिभिस्तव तेजो नैव वर्धते । तथानुग्रहेण पराज्ञानुसरणादिभिश्च तेजो नैव ह्रसते तङार्षः । यथा उदयास्तमयादिकर्मभिः रवेरुच्चनीचसंबन्धेनापि तेजो न वर्धते न च ह्रसति तद्वत् ॥ ४ ॥ नेति ॥ हे अजित हे माधव वैकृता विकृतदेहादिविषया ङीबभाव आर्षः । क्वचित्तु वैकृतीत्यपि पाठः । ममाहमिति त्वं तव इति च नानाधीः पशूनां यथा भवति तथा ते तव भक्तानां न भवति तव तु कुतो भवेत् अतः ममेदं कर्म योग्यम् इदमयोग्यम् इत्यभिमानस्तव नास्त्येव । अतो नीचो-

न ह्येकस्याद्वितीयस्य ब्रह्मणः परमात्मनः ॥ कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः ॥ ४ ॥ न वै तेऽजित भक्तानां ममाहमिति माधव ॥ त्वं तवेति च नानाधीः पशूनामिव वैकृता ॥ ५ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा यज्ञिये काले वव्रे युक्तान्स ऋत्विजः ॥ कृष्णानुमोदितः पार्थो ब्राह्मणान्ब्रह्मवादिनः ॥ ६ ॥ द्वैपायनो भरद्वाजः सुमन्तुर्गौतमोऽसितः ॥ वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ॥ ७ ॥ विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः ॥ पैलः पराशरो गर्गो वैशम्पायन एव च ॥ ८ ॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः ॥ वीतिहोत्रो मधुच्छन्दा वीरसेनोऽकृतव्रणः ॥ ९ ॥ उपहूतास्तथा चान्ये द्रोणभीष्मकृपादयः ॥ धृतराष्ट्रः सहसुतो विदुरश्च महामतिः ॥ १० ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यज्ञदिदृक्षवः ॥ तत्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप ॥ ११ ॥ ततस्ते देवयजनं ब्राह्मणाः स्वर्णलाङ्गलैः ॥ कृष्ट्वा तत्र यथाम्नायं दीक्षयाञ्चक्रिरे नृपम् ॥ १२ ॥ हैमाः किलोपकरणा वरुणस्य यथा पुरा ॥ १३ ॥

च्चकर्मसु तव प्रवृत्तिर्घटते ॥ ५ ॥ इतीति ॥ स पार्थो युधिष्ठिरः इत्येवमुक्त्वा कृष्णेनानुमोदितः अनुज्ञातः सन् यज्ञिये यज्ञार्हे वसन्ते काले ब्रह्मवादिनः युक्तान् योग्यान् ब्राह्मणान् ऋत्विजो होतृप्रमुखान् वव्रे वृतवान् ॥ ६ ॥ द्वैपायन इति त्रिकम् ॥ द्वैपायनाद्या अकृतव्रणान्ताः ऋत्विजो वृता इति शेषः ॥ ७ ॥ ८ ॥ ९ ॥ उपहूता इति युग्मम् ॥ हे नृप तथा अन्ये च द्रोणादयः शूद्रान्ताः सर्वे राजानः टजभाव आर्षः । राज्ञां प्रकृतयश्च उपहूताः सन्तो यज्ञं द्रष्टुमिच्छवस्तत्रेयुराजग्मुः ॥ १० ॥ ११ ॥ तत इति ॥ ततस्ते ब्राह्मणाः स्वर्णमयैर्लाङ्गलैर्देवयजनं देवा इज्यन्तेऽस्मिन्निति तत् यज्ञभूमिं कृष्ट्वा कर्षणादिभिः संशोध्य तत्र यथाम्नायं विध्यनुसारेण नृपं युधिष्ठिरं दीक्षयांचक्रिरे दीक्षाख्यसंस्कारयुक्तमकुर्वन् ॥ १२ ॥ हैमा इत्यर्द्धम् ॥ पुरा वरुणस्य राजसूये यथा हैमा हेममया उपकरणाः पात्रादयः पुंस्त्वमार्षम् । आसंस्तथात्राप्यासन्नित्यर्थः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रादय इति त्रयम् ॥ विरिञ्चिभवाभ्यां ब्रह्मरुद्राभ्यां संयुताः सगणाः स्वगणेन सहिताश्चेन्द्रादयो लोकपालाः तथा सिद्धादयः मुनयः सनकादयः यक्षरक्षांसि खगाः गरुडादयः ये समाहूता राजानो राजपत्न्यश्च ते सर्वे पाण्डुसुतस्य राज्ञो युधिष्ठिरस्य राजसूयं समीयुः स्मेति पादपूर्त्तौ । आगताश्च ते सर्वे अविस्मिताः आश्चर्यरहिता एव सन्तः कृष्णभक्तस्य तस्य राजसूयं सुसम्यक् उपपन्नं सम्पन्नं मेनिरे ॥१४॥१५॥१६॥ अयाजयन्निति ॥ देवानामिव वर्चस्तेजो येषां ते याजका ऋत्विजो यथाविधि राजसूयेन महाराजं युधिष्ठिरम् अयाजयन् । तत्र दृष्टन्तमाह अमरा देवा यथा प्रचेतसं वरुणमयाजयंस्तथेति ॥ १७ ॥ सुत्येति ॥ सुत्येहनि सोमाभिषवदिने सौत्य इत्यपि पाठः । अवनीपालो राजा युधिष्ठिरः सुसमाहितः सन् याजकान् अन्यांश्च महाभागान् पूजार्हान् सदसस्पतीन् यथावत् अपूजयत् पूजयितुमारभत ॥ १८ ॥ सदसीति ॥ सभासदः सदसि सभायां सदस्या इति दीर्घपाठे सदस्याः सभ्या तेषु अग्र्याहणम् अग्रपूजा तस्यार्हं योग्यं विमृशन्तो विचारयन्तोऽपि अनैकान्त्यात् योग्यानां बहुत्वेनैकस्यानिश्चयात् दृश्यमा-

इन्द्रादयो लोकपाला विरिञ्चिभवसंयुताः ॥ सगणाः सिद्धगन्धर्वा विद्याधरमहोरगाः ॥ १४ ॥ मुनयो यक्षरक्षांसि खगकिन्नरचारणाः ॥ राजानश्च समाहूता राजपत्न्यश्च सर्वशः ॥१५॥ राजसूयं समीयुः स्म राज्ञः पाण्डुसुतस्य वै ॥ मेनिरे कृष्णभक्तस्य सूपपन्नमविस्मिताः ॥१६॥ अयाजयन्महाराजं याजका देववर्चसः ॥ राजसूयेन विधिवत्प्राचेतसमिवामराः ॥१७॥ सुत्येऽहन्यवनीपालो याजकान्सदसस्पतीन् ॥ अपूजयन्महाभागान् यथावत्सुसमाहितः ॥ १८ ॥ सदस्याग्र्यार्हणार्हं वै विमृशन्तः सभासदः ॥ नाध्यगच्छन्ननैकान्त्यात्सहदेवस्तदाब्रवीत् ॥ १९ ॥ अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान्सात्वतां पतिः ॥ एष वै देवताः सर्वा देशकालधनादयः ॥२०॥ यदात्मकमिदं विश्वं क्रतवश्च यदात्मकाः ॥ अग्निराहुतयो मन्त्राः साङ्ख्यं योगश्च यत्परः ॥ २१ ॥ एक एवाद्वितीयोऽसावैतदात्म्यमिदं जगत् ॥ आत्मनाऽऽत्माश्रयः सभ्याः सृजत्यवति हन्त्यजः ॥ २२ ॥

नानां च हेतूनां व्यभिचारित्वात् यदेकत्र श्रेष्ठत्वनिश्चयं नाध्यगच्छंस्तदा माद्रीसुतः सहदेवोऽब्रवीत् अयं भावः । ये साधारण्येन सभासदस्ते स्वयमेव पूर्वमग्र्यपूजार्हं विमृशन्तो नाध्यगच्छन् । सर्वज्ञास्तु द्वैपायनादयः चैद्यादिदुर्जनविवादभयात्तूष्णीमेव स्थिताः तदा पूजायामधिकृतः सहदेवो विशेषज्ञोऽब्रवीत् ॥ १९ ॥ अर्हतीति ॥ सात्वतां नारदादीनां पूज्यानामपि पतिः भगवान् अच्युतः श्रीकृष्ण एव श्रैष्ठ्यम् अग्रपूजामर्हति यतः एष एव सर्वा देवताः देशकालधनादयश्चेति ॥ २० ॥ यदिति ॥ इदं विश्वमपि यदात्मकं क्रतवश्च अग्न्यादयश्च चात् आचार्यादयश्च यदात्मकाः साङ्ख्यं ज्ञानकाण्डं यत्परं यत्प्रतिपादनपरं योगश्चोपासना च यत्परः यदाराधनमार्गः पुंशेष आर्षः । लिङ्गविपरिणामेन वाऽन्वयः ॥ २१ ॥ एक इति ॥ हे सभ्याः यस्मात् असौ अद्वितीयः सजातीयविजातीयभेदरहितः अजः एक इव सृष्टेरग्रे आसीदतः सर्वोपादानत्वादिदं जगदैतदात्म्यम् एष श्रीकृष्ण आत्मा यस्य तत् स्वार्थे ष्यञ् । एष एव च आत्मा स्वयमेवाश्रयो यस्यात्मनः सः स्वरूपस्थः आत्मना उपकरणभूतेन विश्वं सृजत्यवति हन्ति च ॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विविधानीति ॥ यदवेक्षया यस्य प्रेरणया यदनुग्रहेण च अयं सर्वोऽपि नः इह संसारे विविधानि कर्माणि जनयन् कुर्वन् यतः यस्मादेव धर्मादिलक्षणं श्रेयः फलमीहते साधयति प्राप्नोति कर्माणि तत्फलानि यदधीनानि इत्यर्थः ॥२३॥ तस्मादिति ॥ तस्मात्सर्वथा सर्वश्रेष्ठत्वान्महते कृष्णायैव परमार्हणम् अग्रपूजासाधनं दीयताम् । एवं कृष्णः प्रथमं पूज्यते चेत् तेनैव सर्वभूतानामात्मनः पूजकस्य चार्हणं पूजनं भवेत् ॥ २४ ॥ सर्वेति ॥ दत्तस्य दानस्यानन्त्यं फलानन्त्यमिच्छता कामयमानेन पुरुषेण यद्देयं तत् सर्वभूतानाम् आत्मभूताय अनन्यदर्शिने भेददृष्टिरहिताय शान्ताय रागादिरहिताय आत्मलाभेन पूर्णाय कृष्णाय देयम् ॥ २५ ॥ इतीति ॥ कृष्णानुभाववित् सहदेव इत्येवमुक्त्वा तूष्णीं बभूव । तत्सहदेवोक्तं श्रुत्वा सर्वे सत्तमाः श्रेष्ठाः द्वैपायनादयो द्विजाः साधूक्तं साधूक्तमिति तं तुष्टुवुः प्रशशंसुः ॥ २६ ॥ श्रुत्वेति ॥ द्विजेरितं साधु साध्विति वचनं श्रुत्वा सभासदां सभ्यानामपि हार्दम् अभिप्रायं तथैव ज्ञात्वा राजा युधिष्ठिरः प्रीतः प्रसन्नचित्तः प्रणयेन स्नेहेन विह्वलः परवशः हृषीकेशं श्रीकृष्णं सम्यक् आर्हयत् आडभाववान्

विविधानीह कर्माणि जनयन्यदवेक्षया ॥ ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणम् ॥ २३ ॥ तस्मात्कृष्णाय महते दीयतां परमार्हणम् ॥ एवं चेत् सर्वभूतानामात्मनश्चार्हणं भवेत् ॥ २४ ॥ सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने ॥ देयं शान्ताय पूर्णाय दत्तस्यानन्त्यमिच्छता ॥ २५ ॥ इत्युक्त्वा सहदेवोऽभूत्तूष्णीं कृष्णानुभाववित् ॥ तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः ॥ २६ ॥ श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदाम् ॥ समार्हयद्धृषीकेशं प्रीतः प्रणयविह्वलः ॥ २७ ॥ तत्पादाववनिज्यापः शिरसा लोकपावनीः ॥ सभार्यः सानुजामात्यः सकुटुम्बोऽवहन्मुदा ॥ २८ ॥ वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः ॥ अर्हयित्वाऽश्रुपूर्णाक्षो नाशकत्समवेक्षितुम् ॥ २९ ॥ इत्थं सभाजितं वीक्ष्य सर्वे प्राञ्जलयो जनाः ॥ नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः ॥ ३० ॥ इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः ॥ उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन्भगवते परुषाण्यभीतः ॥ ३१ ॥

पाठस्तु आर्षः ॥ २७ ॥ तदिति ॥ तस्य कृष्णस्य पादाववनिज्य प्रक्षाल्य लोकान्पावयन्तीति तथाभूतास्ता अपः मुदा भार्यादिसहितः शिरसावहत् मूर्धनि अधारयत् ॥२८॥ वासोभिरिति ॥ पीतैः कौशेयैर्वासोभिः महाधनैर्बहुमूल्यैः भूषणैश्च कृष्णमर्हयित्वा आनन्दाश्रुभिः पूर्णे अक्षिणी यस्य अतस्तं सम्यक् अवेक्षितुं नाशकत् ॥ २९ ॥ इत्थमिति ॥ इत्येवं कृष्णं सभाजितं संपूजितं वीक्ष्य सर्वे जनाः प्राञ्जलयः सन्तो नमो जयेति वदन्तस्तं नेमुः । खात् आकाशात्पुष्पवृष्टयश्च पेतुः निपेतुः इत्यपि पाठः ॥ ३० ॥ इत्थमिति ॥ इत्थं कृष्णगुणवर्णनं निशम्य कृष्णगुणवर्णनेन जातो मन्युर्यस्य सः अमर्षी अभीतश्च दमघोषसुतः शिशुपालः स्वपीठात् स्वासनादुत्थाय सदसि सभामध्ये बाहुमुत्क्षिप्योद्धृत्य भगवते कृष्णाय परुषाणि निन्दावचनानि संश्रावयन् इदं वक्ष्यमाणमाह स्म । अत्र तोषणी । शिशुपालदन्तवक्रयोः पार्षदत्वाद्धरिवासुरभावानुकरणम् अतः साङ्गोपाङ्गपूजानन्तरमेव कृष्णनिन्दनं तस्मात्तद्वचासि अर्थान्तरं वास्तवम् अन्येषु गीर्देवीप्रेरणात् युद्धरसपोषार्थमेतद्वच इति ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri

ईश इति ॥ काल ईशः सर्वं कर्तुं समर्थः अत एव दुरत्ययः केनाप्यनुल्लङ्घ्यः इति कालमाहात्म्यवादिनी श्रुतिः । सत्यवती यथार्था यत् यस्मात् कालप्रभावात् ज्ञानवयोवृद्धानामपि बुद्धिर्बालस्य न्यूनवयस्कस्याज्ञस्य सहदेवस्य वाक्यैर्विभिद्यते भ्रान्ता भवति ॥ ३२ ॥ यूयमिति ॥ हे सदसस्पतयो यूयं सर्वे पूजापात्रविदां मध्ये श्रेष्ठाः अतः अर्हणे पूजायां कृष्णः सम्मत इति यत् बालस्याज्ञस्य भाषितं तत् मा मन्ध्वं मा गृह्णीत श्यनो लोप आर्षः । कचिन्मा मन्यध्वमिति नवाक्षरपादपाठः । वास्तवार्थस्तु सहदेववचनं बालभाषितं मा मन्यध्वं किन्तु सत्यमेव अतः कृष्णोऽर्हणे सम्मत एव ॥ ३३ ॥ तप इति युग्मम् ॥ तपः अनशनादि विद्याभ्यासः व्रतं कृच्छ्रादि तेषां धरान् धारकान् ज्ञानेन विध्वस्तं कल्मषं पापं येषां तान् परमर्षीन् मन्त्राद्यर्थज्ञान् ब्रह्मणि निष्ठा स्थितिर्येषां तान् अत एव लोकपालादिभिः पूजितान् सदसस्पतीन् अतिक्रम्य अनादृत्य कुलं क्षत्रियकुलं पांसयति पांसुं करोति पांसुशब्दात् तत्करोतीति णिच् ल्युट् । गोपालः सपर्यां पूजां कथमर्हति यथा देवयोग्यं पुरोडाशं काको नार्हति तथा वस्तुतस्तु गोपालो वेदपृथिव्यादिपालकः कुत्सितं वेदविरुद्धं लपन्ति कुलपाः पाखण्डाः तान् अंसयति समाघातयति " अंस समाघाते " । स परमेश्वरः कं सुखं च अकं दुःखं च काके ते न

ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ॥ वृद्धानामपि यद् बुद्धिर्बालवाक्यैर्विभिद्यते ॥३२॥ यूयं पात्रविदां श्रेष्ठा मान्यध्वं बालभाषितम् ॥
सदसस्पतयः सर्वे कृष्णो यत्संमतोऽर्हणे ॥ ३३ ॥ तपोविद्याव्रतधराञ्ज्ञानविध्वस्तकल्मषान् ॥ परमर्षीन्ब्रह्मनिष्ठाँल्लोकपालैश्च पूजितान्
॥ ३४ ॥ सदसस्पतीनतिक्रम्य गोपालः कुलपांसनः ॥ यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥३५॥ वर्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः ॥
स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति ॥ ३६ ॥ ययातिनैषां हि कुलं शप्तं सद्भिर्बहिष्कृतम् ॥ वृथा पानरतं शश्वत्सपर्यां कथमर्हति ॥ ३७ ॥

विद्येते यस्य सः आप्तकाम इत्यर्थः । स यथा देवयोग्यं पुरोडाशमात्रं नार्हति किंतु सर्वस्वमपि । तथायं ब्रह्मर्षियोग्यं सपर्यामात्रं नार्हति किंतु आत्मार्पणमपि अतोऽहमात्मानमेवार्पयिष्यामि ॥ ३४ ॥ ३५ ॥ वर्णेति ॥ वर्णादिभ्यो पेतः भ्रष्टः सर्वधर्मेभ्यो बहिष्कृतः स्वैरवर्ती स्वेच्छाचारः गुणैर्हीनश्च सपर्यां कथमर्हति वस्तुतो ब्रह्मरूपत्वात् वर्णाश्रमादिरहितः "अनामगोत्र" मिति श्रुतेः । अत एवानधिकारित्वात्सर्वैर्धर्मैर्बहिष्कृतः स्वैरवर्ती परमेश्वरत्वात् अतः एव निर्गुणः स जीवयोग्यं तुच्छं सपर्यामात्रं कथमर्हति ॥ ३६ ॥ यादवानपि निन्दति—ययातिनेति ॥ कुलवृद्धेन ययातिना एषां यादवानां कुलं शप्तं राज्यानर्हं कृतमतः सद्भिरपि बहिष्कृतं राज्यान्निराकृतं शश्वत् सदा वृथा पापरतं परपीडाकरं वृथापानरतमिति पाठे तु सौत्रामणीयज्ञादिव्यतिरिक्तेऽपि मद्यपाने रतं तत्र कुले जातः कृष्णः सपर्यां कथमर्हति वस्तुतः ययातिना शप्तमपि सद्भिर्मुनिभिस्तत्तद्यजनादिना तस्माच्छापाद्बहिष्कृतं मोचितम् । यद्वा । ययातिना शप्तमपि किं सद्भिर्बहिष्कृतम् अपि तु शिरसा धृतम् अतः पानं पृथ्वीपालनं तत्र रतमासक्तं वृथा सपर्यां कथमर्हतीति किंतु सफलामेवेत्यर्थः । यद्वा । वृथा स्वार्थानपेक्षमेव पालने रतम् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति ॥ ब्रह्मर्षिसेवितान् मथुरादिदेशान् हित्वा ब्रह्मवर्चसं वेदाध्ययनादिजनितं तेजस्तन्नाशकमब्रह्मवर्चसं दुर्गं दुर्गमं समुद्रं समुद्रमध्यस्थं द्वारकादेशमाश्रित्य दस्यव एते यादवाः प्रजाः कर्मभूताः बाधन्ते वस्तुतः ब्रह्मर्षिसेवितान् देशान् हित्वा "डुधाञ् पोषणे" पोषयित्वेत्यर्थः । तेन ब्रह्मवर्चसं ब्राह्मं तेजश्च संपोष्य अदस्यवः प्रबलशत्रुरहिता अपि लीलया समुद्रं दुर्गमाश्रित्य स्थिता एते यादवाः प्रजा बाधन्ते किं काका नैवेत्यर्थः ॥ ३८ ॥ एवमिति ॥ नष्टं मङ्गलं यस्य स शिशुपालः एवमादीनि अन्यान्यपि अमङ्गलानि भगवन्निन्दावचनानि बभाषे भगवाँस्तु किंचिदपि नोवाच । यथा शिवारुतं शृगालभाषितं श्रुत्वापि सिंहो न किमपि ब्रूते तद्वत् ॥ ३९ ॥ भगवदिति ॥ तद्दुःसहं भगवन्निन्दनं श्रुत्वा सभासदो रुषा क्रोधेन चेदिपं शिशुपालं शपन्तो म्रियतामयं दुरात्मेति वदन्तः कर्णौ पिधाय ततो निर्जग्मुः ॥ ४० ॥ निन्दामिति ॥ भगवतस्तत्परस्य भगवद्भक्तस्य जनस्य वा निन्दां शृण्वन् यः पुमांस्ततः स्थानान्नापैति न निर्गच्छति स श्रोतापि सुकृतात् पुण्यात् च्युतो भ्रष्टोऽधो नरकं याति अपिना निन्दकस्तु

ब्रह्मर्षिसेवितान्देशान्हित्वैतेऽब्रह्मवर्चसम् ॥ समुद्रं दुर्गमाश्रित्य बाधन्ते दस्यवः प्रजाः ॥ ३८ ॥ एवमादीन्यभद्राणि बभाषे नष्टमङ्गलः ॥ नोवाच किंचिद्भगवान्यथा सिंहः शिवारुतम् ॥ ३९ ॥ भगवन्निन्दनं श्रुत्वा दुःसहं तत्सभासदः ॥ कर्णौ पिधाय निर्जग्मुः शपन्तश्चेदिपं रुषा ॥ ४० ॥ निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा ॥ ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥ ४१ ॥ ततः पाण्डुसुताः क्रुद्धा मत्स्यकेकयसृञ्जयाः ॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥ ४२ ॥ ततश्चैद्यस्त्वसंभ्रान्तो जगृहे खड्गचर्मणी ॥ भर्त्सयन्कृष्णपक्षीयान्राज्ञः सदसि भारत ॥ ४३ ॥ तावदुत्थाय भगवान्स्वान्निवार्य स्वयं रुषा ॥ शिरः क्षुरान्तचक्रेण जहारापततो रिपोः ॥ ४४ ॥ शब्दः कोलाहलोऽप्यासीच्छिशुपाले हते महान् ॥ तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ॥ ४५ ॥ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् ॥ पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ॥ ४६ ॥

नरकं यात्येव ॥ ४१ ॥ तत इति ॥ ततः उद्यतान्यायुधानि यैस्तथाभूताः पाण्डुसुताः मत्स्यादयश्च भगवन्निन्दनेन क्रुद्धाः सन्तः शिशुपालं जिघांसवः हन्तुमिच्छवः सन्तः उत्तस्थुः ॥ ४२ ॥ तत इति ॥ हे भारत ततश्च सदसि सभायां कृष्णपक्षीयान् युधिष्ठिरादीन् राज्ञो भर्त्सयन् वचसा तिरस्कुर्वन् असंभ्रान्तो निर्भयश्चैद्यः शिशुपालोऽपि तान् हन्तुं खड्गचर्मणी जग्राह ॥ ४३ ॥ तावदिति ॥ एष मत्पार्षदो महाबलः अत एतान् सर्वानेव हन्यादिति मत्वा तावत्तत्क्षणमेव भगवान् कृष्णः उत्थाय स्वान्पाण्डवादीन्निवार्य रुषा क्षुरस्येवान्तो धारा यस्य तेन चक्रेण स्वयमेव आपततो रिपोः शत्रोस्तस्य शिरो जहार चिच्छेद ॥ ४४ ॥ शब्द इति ॥ एवं शिशुपाले निहते सति महानुच्चैः कोलाहलः महाशब्द आसीत् तस्य चैद्यस्यानुयायिनो जीवितैषिणो भूपा दुद्रुवुः ॥ ४५ ॥ चैद्येति ॥ चैद्यस्य देहादुत्थितं निःसृतं ज्योतिर्जीवात्मकं तेजः पार्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दवपुरेव वा तस्या नश्वरत्वात् सर्वभूतानां पश्यतामेव सतां वासुदेवं श्रीकृष्णमुपाविशत् तत्सायुज्यं प्राप। यथा खात् आकाशात् च्युता उल्का तेजोविशेषो यथा भुवि प्रविशति तद्वत् ॥ ४६ ॥ जन्मेति ॥ हिरण्यकशिपुरावणशिशुपाललक्षणजन्मत्रये अनुगुणितमनुवर्तितं यद्वैरं द्वेषस्तेन संरब्धया आविष्टया धिया कृष्णं ध्यायन् तन्मयतां यातः पुनस्तल्लोके पार्षदो बभूव पार्श्वं जग्मतुरिति सप्तमस्कन्धोक्तेः। हि यस्मात् भावोऽनुचिन्तनमेव भवस्य ध्येयाकारशुभाशुभजन्मनः कारणं पेशस्कारिध्यानेन कीटादौ तत्प्रसिद्धेः ॥ ४७ ॥ ऋत्विग्भ्य इति ॥ दिग्विजयस्य जातत्वात् एक एव राजत इत्येकराट् युधिष्ठिरः सदसि भवाः सदस्यास्तैः सहितेभ्यः ऋत्विग्भ्यः विपुलां महतीं दक्षिणामदात् पूजार्हांश्च सर्वान्संपूज्य विधिवदवभृथं नाम यज्ञान्तस्नानं चक्रे ॥ ४८ ॥ साधयित्वेति ॥ एवं राज्ञो युधिष्ठिरस्य क्रतुं राजसूयं साधयित्वा सुहृद्भिः पृथार्जुनादिभिरभियाचितः प्रार्थितः योगेश्वरेश्वरः कृष्णः कतिचिन्मासांस्तत्रैवोवास ॥ ४९ ॥ तत इति ॥ स्वगमनमनिच्छन्तमपि राजानं युधिष्ठिरमनुज्ञाप्य पृष्ट्वा भार्यादिसहितः ई-

जन्मत्रयानुगुणितवैरसंरब्धया धिया॥ ध्यायंस्तन्मयतां यातो भावो हि भवकारणम् ॥४७॥ ऋत्विग्भ्यः स सदस्येभ्यो दक्षिणां विपुलामदात्॥
सर्वान्संपूज्य विधिवच्चक्रेऽवभृथमेकराट् ॥४८॥ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः ॥ उवास कतिचिन्मासान्सुहृद्भिरभियाचितः ॥४९॥
ततोऽनुज्ञाप्य राजानमनिच्छन्तमपीश्वरः ॥ ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ॥ ५० ॥ वर्णितं तदुपाख्यानं मया ते बहुविस्तरम् ॥
वैकुण्ठवासिनोर्जन्म विप्रशापात्पुनः पुनः ॥ ५१ ॥ राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ॥ ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ॥ ५२ ॥
राज्ञा सभाजिताः सर्वे सुरमानवखेचराः ॥ कृष्णं क्रतुं च शंसन्तः स्वधामानि ययुर्मुदा ॥ ५३ ॥ दुर्योधनमृते पापं कलिं कुरुकुलामयम् ॥
यो न सेहे श्रियं स्फीतां दृष्ट्वा पाण्डुसुतस्य ताम् ॥ ५४ ॥ य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकम् ॥ राजमोक्षवितानं च सर्वपापैः प्रमुच्यते
॥ ५५ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे शिशुपालवधो नाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

श्वरो देवकीसुतः कृष्णः स्वपुरं द्वारकां ययौ ॥ ५० ॥ वर्णितमिति ॥ वैकुण्ठवासिनोर्जयविजयोर्विप्राणां सनकादीनां शापाद्धेतोः पुनः पुनर्यज्जन्म तद्विषयकमुपाख्यानं च तन्मया ते तुभ्यं बहुविस्तरं यथा तथा वर्णितम् ॥ ५१ ॥ राजेति ॥ राजसूयसंबन्धिनावभृतेन स्नातो युधिष्ठिरः राजा ब्राह्मणादिसभामध्ये सुरराट् इन्द्र इव शुशुभे ॥५२॥ राज्ञेति ॥ राज्ञा युधिष्ठिरेण सभाजिताः संपूजिताः सुरा मानवाः खेचराश्च सर्वे कृष्णं क्रतुं च शंसन्तः स्तुवन्तो मुदा हर्षेण स्वस्वधामानि प्रति ययुः ॥ ५३ ॥ दुर्योधनमिति ॥ यो दुर्योधनस्तां सर्वजनानन्दकरीं स्फीतां समृद्धां पाण्डुसुतस्य युधिष्ठिरस्य श्रियं सम्पदं दृष्ट्वा न सेहे तमेकं कुरुकुलस्यामयं रोगवन्नाशकं पापं धर्मद्विषं कलिं कलेरंशं दुर्योधनं विना सर्वे मुदा ययुरिति पूर्वेणैवान्वयः ॥ ५४ ॥ य इति ॥ यः पुमान् इदं चैद्यवधादिकं विष्णोः कर्म राज्ञां जरासन्धनिरुद्धानां ततो मोक्षं वितानं यज्ञमहो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सवं च कीर्तयेत् उपलक्षणतया शृणुयात्स्मरेद्वा । स सर्वपापैः प्रमुच्यते ॥ ५५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽत्र चतुःसप्तते दशमे व्यधात् ॥ ७४ ॥ पञ्चयुक्सप्ततितमे यज्ञस्यावभृथोत्सवः ॥ दुर्योधनापमानोऽत्र श्लोकाः सार्द्धाः खवेदयः ॥ द्वे उवाचेति पादोनास्तर्कवेदा अनुष्टुभः ॥ ७५ ॥ अजातशत्रोरिति युग्मम् ॥ हे ब्रह्मन् एकं दुर्योधनं वर्जयित्वा ये तत्र समागतास्ते सर्वे नृदेवादयः अजातशत्रोर्युधिष्ठिरस्य तं राजसूयस्य महोदयं महान्तमुत्सवं दृष्ट्वा मुमुदिरे इति नोऽस्माभिस्त्वत्तः श्रुतं हे भगवन् तत्र दुर्योधनस्य असंतोषे कारणमुच्यताम् ॥ १ ॥ २ ॥ प्रश्नमुत्तरयिष्यन् पूर्ववर्णितयागमहोत्सवशेषं वर्णयति—पितामहस्येति ॥ महात्मनः ते तव पितामहस्य युधिष्ठिरस्य राजसूये यज्ञे प्रेमबन्धनाः तस्य प्रेमैव बन्धनं येषान्ते तस्य बान्धवाः परिचर्यायामासन् तत्तत्कार्यसाधका बभूवुरित्यर्थः । प्रेमबन्धना इत्यनेन ते स्वयमेव तत्तत्कर्मणि प्रवृत्ताः नतु राज्ञा प्रवर्त्तिताः अतः साभिमानानामशक्ये पादावनेजनकर्मणि कृष्णः स्वयमेव प्रवृत्तः॥ ३॥ भीम इति ॥ भीमो महानसं पाक-

राजोवाच ॥ अजातशत्रोस्तं दृष्ट्वा राजसूयमहोदयम् ॥ सर्वे मुमुदिरे ब्रह्मन्नृदेवा ये समागताः ॥ १ ॥ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः ॥ इति श्रुतं नो भगवंस्तत्र कारणमुच्यताम् ॥ २ ॥ श्रीशुक उवाच ॥ पितामहस्य ते यज्ञे राजसूये महात्मनः ॥ बान्धवाः परिचर्यायां तस्यासन्प्रेमबन्धनाः ॥ ३ ॥ भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः ॥ सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ॥ ४ ॥ गुरुशुश्रूषणे जिष्णुः कृष्णः पादावनेजने ॥ परिवेषणे द्रुपदजा कर्णो दाने महामनाः ॥ ५ ॥ युयुधानो विकर्णश्च हार्दिक्यो विदुरादयः ॥ बाह्लीकपुत्रा भूर्याद्या ये च संतर्दनादयः ॥ ६ ॥ निरूपिता महायज्ञे नानाकर्मसु ते तदा ॥ प्रवर्तन्ते स्म राजेन्द्र राज्ञः प्रियचिकीर्षवः ॥ ७ ॥ ऋत्विक्सदस्यबहुवित्सुसुहृत्तमेषु स्विष्टेषु सूनृतसमर्हणदक्षिणाभिः ॥ चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृथस्नपनं द्युनद्याम् ॥ ८ ॥

शाला तत्र अध्यक्षो नियोक्ता क्वापि पाककर्त्ता च आसीत् इत्यादिर्द्वयोरन्वयः स्फुटः । द्रव्यसाधने नानावस्तुसम्पादने ॥४॥ गुर्विति ॥ गुरूणां शुश्रूषणे चन्दनालेपादौ द्रुपदजा द्रौपदी पुल्लिङ्गपाठे धृष्टद्युम्नः महामनाः कार्यकुशल इति सर्वेषां विशेषणम्॥५॥युयुधान इति॥युयुधानः सात्यकिः विकर्णो दुर्योधनभ्राता हार्दिक्यः कृतवर्मा बाह्लीकपौत्रो भूरि आदिना भूरिश्रवःप्रमुखाः पुत्रा इति पुत्रपौत्रयोरभेदात् ये च सन्तर्दनः पृथाभागिनेयः तद्भ्रातृप्रमुखाः तदादयः स्वस्वकर्मसु आसन्॥६॥निरूपिता इति ॥हे राजेन्द्र एवं भीमादयः तदा महायज्ञे नानाकर्मसु निरूपिताः प्रयुक्ताः सन्तो राज्ञा युधिष्ठिरस्य प्रियं कर्तुमिच्छवो यथा नियोगं प्रवर्तन्ते स्म प्रावर्तन्त भीष्मादयस्तु प्रेमबन्धनत्वात्स्वयं प्रवृत्ता अनुमोदिता एव॥ ७ ॥ ऋत्विगिति ॥ ऋत्विजश्च सदस्याश्च बहुविदः सर्वज्ञाश्च तेषु सुहृत्तमेषु मित्रसंबन्धिबान्धवादिषु च सूनृतं प्रियवचः समर्हणमलंकारादिदक्षिणा च ताभिः यथोचितं स्विष्टेषु सम्यक् पूजितेषु सत्सु चैद्ये सात्वतपतेः श्रीकृष्णस्य चरणं प्रविष्टे सति सर्वे ततो द्युनद्यां गङ्गायामवभृथसंज्ञकस्नपनं चक्रुः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

मृदङ्गेति ॥ अवभृथसंबन्धिनि उत्सवे मृदङ्गादयोऽन्यानि च विचित्राणि वादित्राणि नेदुः । धुन्धुरी आनद्धवाद्यभेदः ॥ ९ ॥ नर्तक्य इति ॥ पूर्वार्द्धं स्पष्टम् स तेषां गायकादीनां वीणादिकानामुन्नादो दिवमन्तरिक्षमस्पृशत् व्याप्तवान् ॥ १० ॥ चित्रेति ॥ रुक्मस्य स्वर्णस्य माला एषां सन्ति ते भूपाः चित्राणि ध्वजपताकाग्र्याणि येषां तैरिभेन्द्रैः स्यन्दनैः रथैः अर्वभिः अश्वैः स्वलंकृतैर्भटैश्च एवं चतुरङ्गसैन्यैर्निर्ययुः ॥ ११ ॥ यद्विति ॥ यजमानो युधिष्ठिरः पुरसरः पुरोयायी येषां ते यादवादयः सैन्यैर्भुवं कम्पयन्तो निर्ययुरित्यनुषङ्गः ॥ १२ ॥ सदस्येति ॥ सदस्याश्च ऋत्विजश्च अन्ये च द्विजश्रेष्ठा भूयसा महता ब्रह्मघोषेण वेदपाठघोषेण सह निर्ययुः । देवादयस्तु पुष्पवर्षिणः सन्तस्तुष्टुवुः ॥ १३ ॥ स्वलंकृता इति ॥ गन्धादिभिः स्वलंकृता नरा नार्यश्च विविधै रसैः परस्परं विलिम्पन्त्योऽभिषिञ्चन्त्यश्च विजह्रुः ॥ १४ ॥ रसानेवाह—तैलेति ॥ पुंभिः कर्तृभिस्तैलादिभिर्लिप्ता वारयोषितो वेश्यास्तैरेव तान् प्रलिम्पन्त्यो विजह्रुः गोरसो दधिक्षीरादिः गन्धोदकं चन्दनाद्युदकम् ॥ १५ ॥ गुप्ता इति ॥ यथा एतदवभृथस्न-

मृदङ्गशङ्खपणवधुन्धुर्यानकगोमुखाः॥ वादित्राणि विचित्राणि नेदुरावभृथोत्सवे॥९॥नर्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः॥वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् ॥ १० ॥ चित्रध्वजपताकाग्रैरिभेन्द्रस्यन्दनार्वभिः ॥ स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ॥ ११ ॥ यदुसृञ्जयकाम्बोजकुरुकेकयकोसलाः ॥ कम्पयन्तो भुवं सैन्यैर्यजमानपुरःसराः ॥ १२ ॥ सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा ॥ देवर्षिपितृगन्धर्वास्तुष्टुवुः पुष्पवर्षिणः ॥ १३ ॥ स्वलंकृता नरा नार्यो गन्धस्रग्भूषणाम्बरैः ॥ विलिम्पन्त्योऽभिषिञ्चन्त्यो विजह्रुर्विविधै रसैः ॥ १४ ॥ तैलगोरसगन्धोदहरिद्रासान्द्रकुङ्कुमैः ॥ पुम्भिर्लिप्ताः प्रलिम्पन्त्यो विजह्रुर्वारयोषितः ॥ १५ ॥ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः ॥ ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः ॥ १६ ॥ ता देवरानुत सखीन्सिषिचुर्दृतीभिः क्लिन्नाम्बरा विवृतगात्रकुचोरुमध्याः ॥ औत्सुक्यमुक्तकवराच्च्यवमानमाल्याः क्षोभं दधुर्मलधियां रुचिरैर्विहारैः ॥ १७ ॥

पनमुपलब्धुं दिवि देव्यो देवाङ्गना विमानवरैर्निरगमन् तथा द्रष्टुं नृभिर्भटैः गुप्ता नृदेव्यो युधिष्ठिरपत्न्यः द्रौपदीयौधेयीप्रभृतयः रथादिभिर्निरगमन् निर्जग्मुः । ताश्च मातुलेयैर्पत्युर्मातुलपुत्रैः कृष्णगदसारणादिभिः सखिभिर्भीमार्जुनादिभिश्च परिषिच्यमानाः सव्रीडेन लज्जासहितेन हासेन विकसन्ति वदनानि यासां ता विरेजुः । अत्र यथा पत्युर्भागिनेये भागिनेयशब्दः प्रयुज्यते तथा पत्युर्मातुलेये मातुलेयशब्दः प्रयुक्तः । तस्य देवरत्वेन परिहासौचित्यात् स्वमातुलेयस्य तु भ्रातृत्वेन परिहासानौचित्यात् ॥ १६ ॥ ता इति ॥ क्लिन्नानि सिक्तानि अम्बराणि यासां ताः अत एव विवृतं व्यक्तं गात्रं शरीरं कुचावूरू मध्यप्रदेशश्च यासां ता औत्सुक्यात्तत्प्रयुक्तजलक्रीडातिशयात् मुक्तेभ्यः श्लथद्बन्धेभ्यः कवरेभ्यः च्यवमानानि गलन्ति माल्यानि पुष्पाणि यासां तादृश्यस्ता दृतीभिरुदकनोदनचर्मयन्त्रैर्देवरान् पतिभ्रातॄन् उत अपि सखीनपि सिषिचुः । एवं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुचिरैर्विहारैः मलधियां काममलवासितान्तःकरणानां दुर्योधनादीनां नतु साधूनां क्षोभं चित्तचाञ्चल्यं कामोद्रेकं दधुः चक्रुः ॥ १७ ॥ स इति ॥ सन्तः समीचीना अश्वा यस्य तं रुक्ममाला अस्य सन्तीति तथा तं रथमारूढः स सम्राट् युधिष्ठिरः स्वपत्नीभिर्द्रौपद्यादिभिः व्यरोचत । क्रियाभिः प्रयाजादिभिर्यथा क्रतुराट् मूर्तिमान् राजसूयो व्यरोचत तथेति ॥ १८ ॥ पत्नीति ॥ पत्नीसंयाजो यागविशेषः अवभृथसंबन्धिकर्माणि आवभृथ्यानि तैश्चरित्वाताननुष्ठाय ते ऋत्विजः आचान्तं कृताचमनं कृष्णया द्रौपद्या सहितं तं राजानं गङ्गायां स्नापयांचक्रुः ॥ १९ ॥ देवेति ॥ नराणां दुन्दुभिभिः समं सह देवानां दुन्दुभयो नेदुः देवादयः पुष्पवर्षाणि मुमुचुः ॥ २० ॥ सस्नुरिति॥ यजमानस्नानानन्तरं चातुर्वर्ण्यचातुराश्रम्यवन्तः सर्वे नरास्तत्र गङ्गायां सस्नुः स्नानं चक्रुः । यतः स्नानात् महापातकी ब्रह्महत्यावानपि किल्बिषात् ततः पातकात्

स सम्राड् रथमारूढः सदश्वं रुक्ममालिनम् ॥ व्यरोचत स्वपत्नीभिः क्रियाभिः क्रतुराडिव ॥ १८ ॥ पत्नीसंयाजावभृथ्यैश्चरित्वा ते तमृत्विजः ॥ आचान्तं स्नापयाञ्चक्रुर्गङ्गायां सह कृष्णया ॥ १९ ॥ देवदुन्दुभयो नेदुर्नरदुन्दुभिभिः समम् ॥ मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः ॥ २० ॥ सस्नुस्तत्र गताः सर्वे वर्णाश्रमयुता नराः ॥ महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् ॥ २१ ॥ अथ राजाऽहते क्षौमे परिधाय स्वलंकृतः ॥ ऋत्विक्सदस्यविप्रादीनानर्चाभरणाम्बरैः ॥ २२ ॥ बन्धुज्ञातिनृपान्मित्रसुहृदोन्यांऽश्च सर्वशः॥ अभीक्ष्णं पूजयामास नारायणपरो नृपः ॥ २३ ॥ सर्वे जनाः सुररुचो मणिकुण्डलस्रगुष्णीषकञ्चुकदुकूलमहार्घ्यहाराः ॥ नार्यश्च कुण्डलयुताऽलकवृन्दजुष्टवक्त्रश्रियः कनकमेखलया विरेजुः ॥ २४ ॥ अथर्त्विजो महाशीलाः सदस्या ब्रह्मवादिनः ॥ ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः ॥ २५ ॥ देवर्षिपितृभूतानि लोकपालाः सहानुगाः ॥ पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप ॥ २६ ॥ हरिदासस्य राजर्षे राजसूयमहोदयम् ॥ नैवातृप्यन्प्रशंसन्तः पिबन्मर्त्योऽमृतं यथा ॥ २७ ॥

सद्यो विमुच्येत अतः पातकनिवृत्त्यर्थं सर्वे सस्नुः ॥ २१ ॥ अथेति ॥ अथ स्नानानन्तरम् अहते नूतने क्षौमे वस्त्रे परिधाय स्वलंकृतो राजा आभरणादिभिः ऋत्विगादीन् आनर्च पूजितवान् ॥ २२ ॥ बन्ध्विति ॥ नारायणपरायणो नृपो युधिष्ठिरः बन्ध्वादीन् सर्वानभीक्ष्णं पुनः पुनः पूजयामास ॥ २३ ॥ सर्वे इति ॥ सुराणामिव रुक् कान्तिर्येषां ते तथा मणिकुण्डलाभ्यां सहिताः स्रगादयो येषां ते सर्वे जना विरेजुः तथा कुण्डलयुगेन अलकवृन्देन च जुष्टस्य वक्त्रस्य श्रीर्यासां ता नार्यश्च कनकमय्या मेखलया कटिसूत्रेण विरेजुः ॥ २४ ॥ अथेति युग्मम् ॥ हे नृप ये समागताः पूजिताश्च ते महाशीलाः सुस्वभावाः महाशाला इति पाठे परमकुलीनाः ऋत्विगादयः अथानन्तरं तं राजानमनुज्ञाप्य पृष्ट्वा स्वधामानि ययुः ॥ २५ ॥ २६ ॥ हरीति ॥ हरिदासस्य राजर्षेः युधिष्ठिरस्य राजसूयमहोत्सवं प्रशंसन्तः सर्वे नैवातृप्यन् यथा मर्त्यो मरण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मको मनुष्यादिरमृतं पिबन् न तृप्यति तद्वत् ॥ २७ ॥ तत इति ॥ ततः त्यागात् विश्लेषात् कातरो भीतः राजा युधिष्ठिरः सुहृदो मित्राणि संबन्धिनो विवाह्याः बान्धवा गोत्रिणः तान् कृष्णं च प्रेम्णा निवासयामास ॥ २८ ॥ भगवानिति ॥ अङ्ग हे राजन् तस्य युधिष्ठिरस्य प्रियंकरः प्रियं चिकीर्षुः भगवानपि कुशस्थलीं द्वारकां प्रति साम्बादीन् यदुवीरान् प्रस्थाप्य स्वयं तत्रैव न्यवात्सीत् ॥ २९ ॥ इत्थमिति ॥ इत्थं धर्मसुतो राजा युधिष्ठिरः अन्यैर्दुस्तरमपि मनोरथं राजसूयसमाप्तीच्छारूपं महार्णवं कृष्णेन कर्णधारस्थानीयेन समुत्तीर्य समाप्य गतज्वरो निश्चिन्त आसीत् ॥ ३० ॥ एकदेति ॥ एकदा अच्युते आत्मा मनो यस्य तस्य युधिष्ठिरस्यान्तःपुरे श्रियं सम्पदं तथा राजसूयस्य महित्वं च वीक्ष्य स्वस्य तदभावात् दुर्योधनः अतप्यत् ॥ ३१ ॥ यस्मिन्निति ॥ यस्मिन्नन्तःपुरे विश्वसृजा विश्वकर्मणा मयेन भगवता वा उपक्लृप्ता रचिता नानाविधा नरेन्द्रादीनां योग्या लक्ष्मीर्लक्ष्म्योर्भोग्या विभूतयो भान्ति पूर्वसवर्णदीर्घ आर्षः । ताभिर्विभूतिभिः सहः द्रुपदराजसुता द्रौपदी पतीन् युधिष्ठिरादीन् उपतस्थे

ततो युधिष्ठिरो राजा सुहृत्संबन्धिबान्धवान् ॥ प्रेम्णा निवासयामास कृष्णं च त्यागकातरः ॥ २८ ॥ भगवानपि तत्राङ्ग न्यवात्सीत्तत्प्रियङ्करः ॥ प्रस्थाप्य यदुवीरांश्च साम्बादींश्च कुशस्थलीम् ॥ २९ ॥ इत्थं राजा धर्मसुतो मनोरथमहार्णवम् ॥ सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ॥ ३० ॥ एकदान्तःपुरे तस्य वीक्ष्य दुर्योधनः श्रियम् ॥ अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥ ३१ ॥ यस्मिन्नरेन्द्रदितिजेन्द्रसुरेन्द्रलक्ष्मीर्नाना विभान्ति किल विश्वसृजोपक्लृप्ताः ॥ ताभिः पतीन्द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ॥ ३२ ॥ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदङ्घ्रिशोभम् ॥ मध्ये सुचारुकुचकुङ्कुमशोणहारं श्रीमन्मुखं प्रचलकुण्डलकुन्तलाढ्यम् ॥ ३३ ॥ सभायां मयक्लृप्तायां क्वापि धर्मसुतोऽधिराट् ॥ वृतोनुजैर्बन्धुभिश्च कृष्णेनापि स्वचक्षुषा ॥ ३४ ॥ आसीनः काञ्चने साक्षादासने मघवानिव ॥ पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च बन्दिभिः ॥ ३५ ॥

सेवितवती राज्ञो देवांशत्वात्तद् यस्यां विभूतियुक्तायां द्रौपद्यां विषक्तं हृदयं यस्य सः कुरुराट् दुर्योधनोऽतप्यत् ॥ ३२ ॥ यस्मिन्निति ॥ यस्मिंश्चान्तःपुरे तदा दुर्योधनपरिहासकाले श्रोणीभरेण नितम्बभरेण च हेतुना शनकैर्गच्छदिति शेषः । क्वणद्भिः आभरणैः शब्दं कुर्वद्भिरङ्घ्रिभिः शोभा यस्य तत् मध्ये सुचारु चारुमध्यमित्यर्थः । कुचकुङ्कुमैः शोणा हारा यस्य तत् श्रीमन्ति मुखानि यस्य तत् प्रचलैः चपलैः कुण्डलैः कुन्तलैश्चाढ्यं सम्पन्नं मधुपतेः श्रीकृष्णस्य महिषीणां सहस्रमशोभतेति शेषः । इदं च बहुत्वोपलक्षणम् ॥ ३३ ॥ सभायामिति युग्मम् ॥ तस्मिन्नन्तःपुरे मयदानवेन क्लृप्तायां सभायां क्वापि कदाचित् अनुजैर्बन्धुभिश्च स्वचक्षुषा चक्षुर्वद्धिता हितज्ञापकेन श्रीकृष्णेनापि परिवृतः पारमेष्ठ्यश्रिया चक्रवर्तियोग्यछत्रचामरादिशोभया जुष्टः सेवितः बन्दिभिश्च स्तूयमानः काञ्चने आसने आसीनः अधिराट् राजा धर्मसुतो युधिष्ठिरः ॥२३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षात् मघवा निन्द्र इव विरेजे ॥ ३४ ॥ ३५ ॥ तत्रेति ॥ मानी साहंकारः भ्रातृभिर्दुःशासनादिभिः परीतः परिवृतः असिहस्तः किरीटं च माला च विद्येते यस्येति किरीटमाली । यद्वा । महार्घ्यकिरीटमालाः किरीटाग्राणि तद्वान् प्रशंसायामिनिः । दुर्योधनः रुषा द्वारपालादीन् क्षिपन् क्रोशन् हे नृप तत्र सभायां न्यविशत् तङभाव आर्षः ॥ ३६ ॥ स्थल इति ॥ सभानिर्माणकर्त्रा मयेन यो हि कश्चिदुष्टचित्तोऽत्र प्रविशेत्स एवं भ्रान्तो भवत्विति काचिन्माया देवतारूपा तत्र स्थापिता तया विमोहितः सः स्थले एव भ्रान्त्या जलं मत्वा तत्रैव स्थलेऽपि वस्त्रान्तम् अभ्यगृह्णात् आकुञ्चितवान् इत्येकवाक्येऽपि स्थलशब्दद्वयान्वयः सह्यः । तथास्थलवद्भ्रान्त्या जलमेव स्थलं मत्वा जले च अपतत् अत्राधिक्षेपभयादेव द्वाःस्थादयो मार्गदर्शनार्थंनागमन्निति ज्ञेयम् ॥ ३७ ॥ जहासेति ॥ अङ्ग हे राजन् तमेवंभूतं दुर्योधनं दृष्ट्वा भीमो जहास तथा स्त्रियः परे नृपतयश्च राज्ञा युधिष्ठिरेण निवार्यमाणा अपि कृष्णेनानुमोदिताः कटाक्षेण प्रेरिताः सन्तो जहसुः ॥ ३८ ॥ स इति ॥ स दुर्योधनः तेनोपहासेन व्रीडितो लज्जितः अत

तत्र दुर्योधनो मानी परीतो भ्रातृभिर्नृप ॥ किरीटमाली न्यविशदसिहस्तः क्षिपन्रुषा ॥ ३६ ॥ स्थलेऽभ्यगृह्णाद्वस्त्रान्तं जलं मत्वा स्थलेऽपतत् ॥ जले च स्थलवद् भ्रान्त्या मयमायाविमोहितः ॥ ३७ ॥ जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोऽपरे ॥ निवार्यमाणा अप्यङ्ग राज्ञा कृष्णानुमोदिताः ॥३८॥ स व्रीडितोऽवाग्वदनो रुषा ज्वलन्निष्क्रम्य तूष्णीं प्रययौ गजाह्वयम् ॥ हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत् ॥३९॥ बभूव तूष्णीं भगवान्भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा ॥४०॥ एतत्तेऽभिहितं राजन्यत्पृष्टोऽहमिह त्वया ॥ सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ॥ ४१ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे दुर्योधनमानभङ्गो नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

एत अवाग्वदनः अधोमुखः रुषा क्रोधाग्निना ज्वलन् तूष्णीं राजानं प्रति स्वगमनप्रश्नादिकमकृत्वैव सभातो निष्क्रम्य गजाह्वयं हस्तिनापुरं ययौ । तस्माद्दुष्टानिष्टशङ्कासूचकः भाव्यनर्थसूचको वा सतां सत्पुरुषाणां हा हेति महान् शब्दोऽभूत् । अजातशत्रुर्युधिष्ठिरः विमना इव इव एवार्थे । अजातशत्रुत्वात्तद्दुःखेन दुःखितः अभवत् ॥ ३९ ॥ बभूवेत्यर्द्धम् ॥ भुवो भरं भारं समुज्जिहीर्षुः अद्य सम्पादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति मत्वा भगवान् श्रीकृष्णस्तु तूष्णीमेव बभूव । यस्य भगवतः दृशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रान्तिं प्राप । मयमाया तु निमित्तमात्रम् । भूभारहरणबीजं दुर्योधनस्य भ्रमं भीमादिहास्येन च तस्य पराभवं विधाय तूष्णीमासीदित्यर्थः ॥ ४० ॥ एतदिति ॥ हे राजन् त्वया यत् इह महाक्रतौ राजसूये दुर्योधनस्यासन्तोषकारणमहं पृष्टस्तदेतत् सुयोधनस्य दौरात्म्यं ते तुभ्यं मयाभिहितं कथितम् ॥ ४१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे व्यदधात्पञ्चसप्तते ॥ ७५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्सप्ततितमे शाल्ववृष्णियुद्धे तु सारथिः ॥ प्रद्युम्नमनयद्युद्धात् तत्र श्लोकास्त्रिवह्नयः ॥ द्वे उवाचेति कथिते श्लोकतुल्या अनुष्टुभः ॥ ७६ ॥ अथेति ॥ हे नृप सौभं नाम पुरं तस्य पतिः शाल्वो यथा हतस्तथा तद्धननात्मकमन्यदपि क्रीडार्थं नरस्येव शरीरं यस्य तस्य कृष्णस्याद्भुतं कर्म शृणु ॥ १ ॥ शिश्विति ॥ रुक्मिण्युद्वाहे आगतः शिशुपालस्य सखा शाल्वः संख्ये युद्धे यदुभिर्निर्जितः तथा जरासन्धादयोऽपि निर्जिताः॥ २॥शाल्व इति ॥ तदा सर्वभूभुजां राज्ञां शृण्वतामेव शाल्वः क्ष्मां भूमिमहमयादवीं यादवरहितां करिष्ये उपसर्जनान्ङीवार्षः । यद्वा । यदूनामियं यादवी यदुसंबन्धवती न यादवी अयादवी तादृशीं करिष्ये । यूयं मम पौरुषं पश्यतेति प्रतिज्ञामकरोत् ॥ ३ ॥ इतीति ॥ हे नृप मूढः सः इत्येवं प्रतिज्ञाय प्रत्यहं सकृत् एकवारं पांसूनां धुलीनामेकं मुष्टिं ग्रसन् शता आर्षः । देवं पशुपतिं प्रभुं शिवम् आराधयामास ॥ ४ ॥ संवत्सरेति ॥ भगवान् आशुतोषोऽपि उमापतिः शिवः श्रीकृष्णद्विषि वरवैफल्यं मन्वानो नतु शीघ्रं प्रादुरभूत् । ततश्चातिनिर्बन्धनेन शरणमागतं शाल्वं संवत्सरान्ते वरेण

श्रीशुक उवाच ॥ अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप ॥ क्रीडानरशरीरस्य यथा सौभपतिर्हतः ॥ १ ॥ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः ॥ यदुभिर्निर्जितः सङ्ख्ये जरासन्धादयस्तथा ॥२॥ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजाम् ॥ अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत ॥ ३ ॥ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुम् ॥ आराधयामास नृप पांसुमुष्टिं सकृद्ग्रसन् ॥ ४ ॥ संवत्सरान्ते भगवानाशुतोष उमापतिः ॥ वरेण च्छन्दयामास शाल्वं शरणमागतम् ॥५॥ देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ॥ अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणम् ॥ ६ ॥ तथेति गिरिशादिष्टो मयः परपुरञ्जयः ॥ पुरं निर्माय शाल्वाय प्रादात्सौभमयस्मयम् ॥ ७ ॥ स लब्ध्वा कामगं यानं तमोधाम दुरासदम् ॥ ययौ द्वारवतीं शाल्वो वैरं वृष्णिकृतं स्मरन् ॥८॥ निरुध्य सेनया शाल्वो महत्या भरतर्षभ ॥ पुरीं बभञ्जोपवनान्युद्यानानि च सर्वशः॥९॥सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः॥विहारान्सविमानाग्र्यान्निपेतुः शस्त्रवृष्टयः॥शिला द्रुमाश्चाशनयः सर्पा आसारशर्कराः॥१०॥

च्छन्दयामास वरं वृणीष्वेति प्रेरितवान् । अन्यथा शरणागतोपेक्षादोषः स्यात् ॥ ५ ॥ देवेति ॥ स शाल्वः देवादीनामभेद्यं भेत्तुमशक्यं कामं यथेष्टं गच्छतीति तथाभूतं वृष्णीनां यादवानां भीषणं भयरङ्कं नतु घातकं शिवेनान्तःप्रेरणात्तथावरणं यानं विमानं वव्रे वृतवान् । भगवांस्तु देवादिभ्यो भिन्नः अतः सौभं भेत्स्यत्येवेति भावः ॥ ६ ॥ तथेति ॥ तथास्त्वित्यङ्गीकृत्य परेषां शत्रूणां पुराणि जयति तथा सः मुमार्षः गिरिशेनादिष्टो मयो दैत्यः अयस्मयं लोहनिर्मितम् । " अयस्मयादीनि छन्दसि " इति भत्वाद्रुत्वाभावः । सौभाख्यं पुरं नगराकारं व्योमगं रथं सौभसंज्ञं निर्माय शाल्वाय प्रादात् ॥ ७ ॥ स इति ॥ स शाल्वः तमसोन्धकारस्य धाम आश्रयम् अत एव अन्यैर्दुरासदं दुष्प्रापं कामगं यानं विमानं लब्ध्वा वृष्णिकृतं वैरं स्मरन्द्वारवतीं ययौ ॥ ८ ॥ निरुद्ध्येति सार्द्धद्वयम् ॥ तत्र बभञ्जेत्यन्तमेकं वाक्यम् । शर्करा इत्यन्तमपरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे भरतर्षभ सः शाल्वो महत्या सेनया पुरीं द्वारवतीं निरुध्य उपवनानि फलप्रधानानि उद्यानानि पुष्पप्रधानानि गोपुराणि पुरद्वाराणि तत्सहितानि द्वाराणि प्रासादाः गृहा अट्टालास्तदुपरितना गृहा तोलिकास्तत्पर्यन्तभित्तीः विहारान् क्रीडास्थानानि च सर्वशः सर्वाणि बभञ्ज भङ्क्तुमारब्धवान् किंच विमानाङ्ग्यात् विमानश्रेष्ठात् तस्मात्सौभात् शस्त्रवृष्टयः शिलादयश्च निपेतुः। आसारो धारासम्पातः शर्कराः सूक्ष्मोपलाः॥ ९ ॥१० ॥ प्रचण्ड इत्यर्द्धम् ॥ प्रचण्डः निष्ठुरश्चक्रवातोऽभूत् दिशश्च रजसाच्छादिता बभूवुः ॥ ११ ॥ इतीति ॥ हे राजन् इत्येवं सौभेन भृशमर्द्यमाना पीड्यमाना कृष्णस्य नगरी द्वारका शं सुखं नाभ्यपद्यत न प्राप यथा त्रिपुरेण पीड्यमाना मही सुखं न प्राप तद्वत् ॥ १२ ॥ प्रद्युम्न इति ॥ भगवान् भगवदंशः वीरो महायशाश्च प्रद्युम्नस्तदा निजाः प्रजा बाध्यमानाः पीड्यमानाः वीक्ष्य मा भैष्टेत्युक्त्वा रथारूढः सन् युद्धप्रदेशमभ्ययात् अभ्यधादित्यपि पाठः। तत्र युद्धदेशमभ्ययाचेति शेषः। अत्र चक्रवर्ती। युद्धार्थं बलभद्रे निर्जिगमिषति सति वयमेव शाल्वं वधिष्यामस्त्वया तु सुखेनात्रैव स्थेयम्

प्रचण्डश्चक्रवातोऽभूद्रजसाऽऽच्छादिता दिशः ॥ ११ ॥ इत्यर्द्यमाना सौभेन कृष्णस्य नगरी भृशम् ॥ नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही ॥ १२ ॥ प्रद्युम्नो भगवान् वीक्ष्य बाध्यमाना निजाः प्रजाः ॥ मा भैष्टेत्यभ्यधाद्वीरो रथारूढो महायशाः ॥ १३ ॥ सात्यकिश्चारुदेष्णश्च साम्बोऽक्रूरः सहानुजः ॥ हार्दिक्यो भानुविन्दश्च गदश्च शुकसारणौ ॥ १४ ॥ अपरे च महेष्वासा रथयूथपयूथपाः ॥ निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः ॥ १५ ॥ ततः प्रववृते युद्धं शाल्वानां यदुभिः सह ॥ यथासुराणां विबुधैस्तुमुलं लोमहर्षणम् ॥ १६ ॥ ताश्च सौभपतेर्माया दिव्यास्त्रै रुक्मिणीसुतः ॥ क्षणेन नाशयामास नैशं तम इवोष्णगुः ॥ १७ ॥ विव्याध पञ्चविंशत्या स्वर्णपुङ्खैरयोमुखैः ॥ शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः ॥ १८ ॥

इत्युक्त्वा साम्बाद्यैः सह प्रद्युम्न एव निर्ययाविति प्राह ॥ १३ ॥ सात्यकिरिति युग्मम् ॥ तथा महान्त इष्वासाः धनूंषि येषां ते रथयूथानि पान्ति ये तेषामपि यूथपाः दंशिताः कवचिताः रथादिभिश्चतुर्भिः सैन्याङ्गैः गुप्ताश्च सात्यकिप्रभृतयोऽपरे निर्ययुः ॥ १४ ॥ १५ ॥ तत इति ॥ ततश्च यथा पूर्वमसुराणां विबुधैः सह युद्धमभूत् तथा तुमुलं व्याकुलं शृण्वतां पश्यतां च रोमहर्षणं रोमोद्गमकरं शाल्वानां शाल्वस्य तदीयानां च यदुभिः सह युद्धं प्रववृते ॥ १६ ॥ ता इति ॥ ताश्च सौभपतेः शाल्वस्य शस्त्रादिवृष्टिरूपाः माया रुक्मिणीसुतः प्रद्युम्नः क्षणमात्रेण दिव्यास्त्रैर्नाशयामास। यथा उष्णगुः सूर्यः नैशं निशायां भवं तमः नाशयति तद्वत् ॥ १७ ॥ विव्याधेति ॥ स्वर्णमयानि पुङ्खानि पृष्ठप्रान्ता येषां तैः अयो लोहं तन्मयानि मुखानि अग्राणि येषां तैः सन्नतानि निम्नानि पर्वाणि ग्रन्थयो येषां पञ्चविंशत्या शरैः शाल्वस्य ध्वजिनीपालं सेनान्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विव्याध ॥ १८ ॥ शतेनेति ॥ शाल्वं तु बाणानां शतेन अताडयत् अस्य शाल्वस्य सैनिकान् भटान् एकैकेन शरेण नेतॄन्सारथीन् दशभिर्दशभिः शरैः वाहनानि गजांश्च रथादीनि त्रिभिस्त्रिभिः शरैरताडयत् ॥ १९ ॥ तदिति ॥ महात्मनः महाशूरस्य प्रद्युम्नस्य तदेकदैवैवं सर्वताडनात्मकं महदतिकौशलयुक्तम् अत एवाद्भुतं कर्म दृष्ट्वा स्वपरसैन्ययोर्वर्तमानाः सर्वे तं प्रद्युम्नं पूजयामासुः प्रशंसितवन्तः ॥ २० ॥ बह्विति ॥ तत् मायामयं मयकृतं सौभं क्वचिद्बहुरूपं क्वचिच्चैकरूपं क्वचिद् दृश्यते क्वचित्तु न दृश्यते एवं परैर्दुर्विभाव्यम् अवितर्क्यमभूत् ॥ २१ ॥ क्वचिदिति ॥ भूम्यादिषु भ्राम्यत् तत्सौभमलातचक्रवत् उल्काभ्रमणवत् दुरवस्थितम् अनवस्थितं चाभूत् ॥ २२ ॥ यत्रेति ॥ सौभेन सहितः सैनिकैः सेनापतिभिश्च सह वर्तमानः शाल्वो यत्र यत्रोपलक्ष्येत उपहीने किञ्चिदपि लक्ष्येत दृश्यते स्म ततस्ततः सात्वतानां यूथपाः मुख्याः शरानमुञ्चन् ॥ २३ ॥ शरैरिति ॥ अग्निवद्दाहकः अर्कवत् युगपत्सर्वतः संस्पर्शो येषां तैः आशीविषवदेकदेशस्पर्शमात्रेणापि मारकत्वात् दुरासदैः सुदुःसहैः परैः शत्रुभिर्यदुभिरीरितैः

शतेनाताडयच्छाल्वमेकैकेनास्य सैनिकान् ॥ दशभिर्दशभिर्नेतॄन्वाहनानि त्रिभिस्त्रिभिः ॥ १९ ॥ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः ॥ दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः ॥ २० ॥ बहुरूपैकरूपं तद्दृश्यते न च दृश्यते ॥ मायामयं मयकृतं दुर्विभाव्यं परैरभूत् ॥ २१ ॥ क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित् ॥ अलातचक्रवद् भ्राम्यत्सौभं तद्दुरवस्थितम्॥२२॥यत्र यत्रोपलक्ष्येत ससौभः सहसैनिकः॥शाल्वस्ततस्ततोऽमुञ्चञ्छरान्सात्वतयूथपः ॥ २३ ॥ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः ॥ पीड्यमानपुरानीकः शाल्वोऽमुह्यत्परेरितैः ॥२४॥ शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः ॥ न तत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः ॥२५॥ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः ॥ आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली ॥ २६ ॥ प्रद्युम्नं गदया शीर्णवक्षःस्थलमरिन्दमम् ॥ अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः ॥ २७ ॥

प्रयुक्तैः शरैः पीड्यमानं पुरं सौभमनीकानि च यस्य सः शाल्वोऽमुह्यत् ॥ २४ ॥ शाल्वेति ॥ शाल्वस्यानीकपानां सैन्यपानां शस्त्रौघैर्भृशम् अर्दिताः पीडिताः अपि लोकद्वयजिगीषवः विजये सत्कीर्तिर्मरणे च स्वर्गप्राप्तिरिति लोकद्वयजयेच्छवः वृष्णिवीराः यदुवीराः स्वं स्वं रणं रणभूमिं न तत्यजुः ॥ २५ ॥ शाल्वेति ॥ बली शाल्वस्यामात्यो मुख्यमन्त्री नाम्ना द्युमान् प्राक् पूर्वं प्रद्युम्नेन प्रपीडितः अतस्तमासाद्य निकटमागत्य मौर्व्या लोहविशेषनिर्मितया गदया व्याहत्य ताडयित्वा व्यनदत् जितं मयेत्युच्चैः शब्दं कृतवान् । प्रद्युम्नं प्रागित्यत्र प्रद्युम्नादिति पाठे प्रद्युम्नाद्धेतोरित्यर्थः ॥ २६ ॥ प्रद्युम्नमिति ॥ अरिन्दमं शत्रुहन्तारं गदाप्रहारेण शीर्णं भग्नं वक्षस्थलं यस्य तं प्रद्युम्नं रणात् रणस्थानात् धर्मवित् दारुकात्मजः सूतः अपोवाह अपसारयामास । अत्र भगवद्व्यूहावतारस्य प्रद्युम्नस्य प्राकृत्या गदया वक्षोविदारणवर्णनं प्रतीतिमात्रम् । यद्वा । प्रद्युम्नं शीर्णवक्षःस्थलं मत्वेति व्याख्येयम् ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लब्ध्वेति ॥ स प्रथमं तावन् मूर्च्छितस्ततो मुहूर्तेन लब्धा संज्ञा चेतना येन सः कार्ष्णिः प्रद्युम्नः सारथिमब्रवीत् । हे सूत रणात् यन्मे ममापसर्पणं पलायनं तदिदमहो असाधु अत्यसमीचीनं जातम् ॥ २८ ॥ नेति ॥ क्लीबमधृष्टं चित्तं यस्य तेन सूतेन त्वया निमित्तभूतेन प्राप्तं कल्मषम् अपयशो येन तस्मात् मत् मत्तो विना अन्यो यदूनां कुले कोऽपि रणाद्विच्युतः पलायितः न श्रूयते ॥ २९ ॥ किमिति ॥ अतः युद्धात् सम्यगपक्रान्तः प्रसिद्धतया पलायितोऽहं रामकेशवौ पितरौ अभिसंगम्य तत्पार्श्वं गत्वा ताभ्यां पृष्टश्च तत्रात्मनः क्षमं योग्यं किं नु वक्ष्यामि ॥ ३० ॥ व्यक्तमिति ॥ हसन्त्यो मे भ्रातृजामयो भ्रातृभार्याः व्यक्तं निश्चितमेतत्कथयिष्यन्ति हे वीर मृधे युद्धे अन्यैः शत्रुभिस्तव क्लैब्यं व्याकुलत्वं कथं जातं येन त्वं पलायितोऽसि तत्कथ्यताम् ॥ ३१ ॥ धर्ममिति ॥ हे आयुष्मन् हे विभो धर्मं विजानता मया एतत् रणादपसारणं कृतं धर्ममाह सूत इति । कृच्छ्रगतं कष्टं प्राप्तं रथिनं सूतो रक्षेत् तथाविधं सारथिं तु रथी रक्षेत् ॥ ३२ ॥ एतदिति ॥ भवान् परेण शत्रुणा गदया आहतः ताडितः अतः मूर्च्छितः

लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् ॥ अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणम् ॥ २८ ॥ न यदूनां कुले जातः श्रूयते रणविच्युतः ॥ विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात्॥ २९ ॥ किं नु वक्ष्येऽभिसंगम्य पितरौ रामकेशवौ ॥ युद्धात्सम्यगपक्रान्तः पृष्टस्तत्रात्मनः क्षमम् ॥ ३० ॥ व्यक्तं मे कथयिष्यन्ति हसन्त्यो भ्रातृजामयः ॥ क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ॥ ३१ ॥ सारथिरुवाच ॥ धर्मं विजानताऽऽयुष्मन्कृतमेतन्मया विभो ॥ सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ॥ ३२ ॥ एतद्विदित्वा तु भवान्मयापोवाहितो रणात् ॥ उपसृष्टः परेणेति मूर्छितो गदया हतः ॥ ३३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ श्रीशुक उवाच ॥ स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः ॥ नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिम् ॥ १ ॥ विधमन्तं स्वसैन्यानि द्युमन्तं रुक्मिणीसुतः ॥ प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् ॥ २ ॥

उपसृष्टः पीडां प्राप्तः इत्येतत् विदित्वैव मया भवान् रणात् अपोवाहितः अपसारितः पकारोत्तर ओकार आर्षः ॥ ३३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे षट्सप्ततितमे व्यधात् ॥ ७६ ॥ सप्तयुक्सप्ततितमे कृष्णेनागत्य चूर्णितम् ॥ सौभं शाल्वश्च निहतस्तत्र श्लोका गर्जाग्नयः ॥ द्वे उवाचेति सार्द्धैकचत्वारिंशदनुष्टुभः ॥ ७७ ॥ स इति ॥ स तु प्रद्युम्नः सलिलमुपस्पृश्य आचमनं कृत्वा दंशितो बद्धकवचः मध्ये सूतेन कवचोत्तारणात् ततो धृतकार्मुकश्च सन् वीरस्य द्युमतः पार्श्वं मां नयेति सारथिं प्राह स्म ॥ १ ॥ विधमन्तामिति ॥ द्युमत्पार्श्वनीतो रुक्मिणीसुतः स्वसैन्यानि विधमन्तं क्षपयन्तं द्युमन्तं प्रतिहत्य प्रतिरुध्य स्मयन् हसन् शता आर्षः । अनायासेनैव अष्टभिः शरैः प्रत्यविध्यत् अताडयत् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टानां विनियोगमाह—चतुर्भिरिति ॥ चतुर्भिः शरैः चतुरो वाहान् अश्वान् अहनत् बहुलं छन्दसीति शब्लुगभावः । एकेन शरेण सूतमहनत् द्वाभ्यां शराभ्यां धनुश्च केतुं ध्वजं च चिच्छेद । अन्येनैकेन शरेण तस्य द्युमतः शिरश्चिच्छेद ॥ ३ ॥ गदेति ॥ गदादयो यादवा अपि सौभपतेः शाल्वस्य बलं सैन्यं जघ्नुः संच्छिन्नाः कन्धरा येषां ते सर्वे सौभेयाः सौभस्थाः समुद्रे पेतुः ॥ ४ ॥ एवमिति ॥ एवम् इतरेतरं परस्परं निघ्नतां यदूनां शाल्वानां च संबन्धि त्रिनवरात्रं नवानां रात्रीणां समाहारो नवरात्रं त्रयाणां नवरात्राणां समाहारस्त्रिणवरात्रं सप्तविंशतिरहोरात्राणीत्यर्थः । तुमुलमाकुलमुल्बणं भयंकरं युद्धमभूत् ॥ ५ ॥ अत्र कैश्चिद्दाषिभिरुक्तं विचारयितु मनुवदति—इन्द्रप्रस्थमित्यादिना ॥ एवं वदन्ति राजर्षे इत्यतः प्राक्तनेन ग्रन्थेन धर्मसूनुना युधिष्ठिरेण आहूतः कृष्णः इन्द्रप्रस्थं गतः अथ शिशुपाले संस्थिते मृते सति राजसूये च निर्वृत्ते परिसमाप्ते सति कतिचिद्दिनानि तत्रैव स्थित इति पूर्वोक्तत्वाच्छेषो ज्ञेयः ॥ ६ ॥ कुरुवृद्धानिति युग्मम् ॥ ततश्चातिघोराणि भयसूचकानि निमित्तानि पश्यन् आर्यो बलभद्रस्स एव मिश्रः

चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत् ॥ द्वाभ्यां धनुश्च केतुं च शरेणान्येन वै शिरः ॥ ३ ॥ गदसात्यकिसाम्बाद्या जघ्नुः सौभपतेर्बलम् ॥ पेतुः समुद्रे सौभेयाः सर्वे सञ्छिन्नकन्धराः ॥ ४ ॥ एवं यदूनां शाल्वानां निघ्नतामितरेतरम् ॥ युद्धं त्रिणवरात्रं तदभूत्तुमुलमुल्बणम् ॥ ५ ॥ इन्द्रप्रस्थं गतः कृष्ण आहूतो धर्मसूनुना ॥ राजसूयेऽथ निर्वृत्ते शिशुपाले च संस्थिते ॥ ६ ॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथाम् ॥ निमित्तान्यतिघोराणि पश्यन्द्वारवतीं ययौ ॥ ७ ॥ आह चाहमिहायात आर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥ ८ ॥ वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणम् ॥ सौभं च शाल्वराजं च दारुकं प्राह केशवः ॥९॥ रथं प्रापय मे सूत शाल्वस्यान्तिकमाशु वै ॥ संभ्रमस्ते न कर्तव्यो मायावी सौभराडयम् ॥ १० ॥ इत्युक्तश्चोदयामास रथमास्थाय दारुकः ॥ विशन्तं ददृशुः सर्वे स्वे परे चारुणानुजम् ॥ ११ ॥

पूज्यस्तेनाभिसङ्गतः सहितोऽहमिहायातः अतश्चैद्यपक्षीयाः राजन्या नूनं मम पुरीं हन्युर्नाशयेयुरिति स्वमनस्याह स्म । ततश्च कुलवृद्धान् भीष्मादीन् ससुतां पृथां कुन्तीं मुनींश्चानुज्ञाप्य पृष्ट्वा द्वारवतीं ययौ ॥ ७ ॥ ८ ॥ वीक्ष्येति ॥ तत्रागत्य च स्वानां प्रजानां तच्छाल्वकदनं पीडां वीक्ष्य तथा सौभं शाल्वराजं च वीक्ष्य रामं पुररक्षणं प्रतिनिरूप्य नियुज्य केशवो दारुकं सूतं प्राह स्म । चक्रवर्ती तु एवं चिन्तयन्नेव द्वारकामागत्य तत्र च स्वानां कदनं वीक्ष्य पुराणामन्तःपुरस्थानां श्रीरुक्मिण्यादीनां रक्षणं निरूप्य ताः सर्वाः महिषीः सेनानीद्वारा गुप्तमार्गेण द्वारकावासमध्यं प्रवेश्येत्यर्थः इत्याह ॥ ९ ॥ रथमिति ॥ हे सूत मे रथं शाल्वस्यान्तिकमाशु प्रापय ते तव संभ्रमो भयं न कर्तव्यः यतोऽयं सौभराट् मायावी ॥ १० ॥ इतीति ॥ भगवता इत्युक्तो दारुकः रथमास्थाय अधिष्ठाय अश्वान् चोदयामास गमयामास ततश्च स्वे यादवाः परे शाल्वपक्षीयाश्चरणे प्रविशन्तम् अरुणानुजं ध्वजे वर्तमानं गरुडं ददृशुः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाल्व इति ॥ हतप्रायस्य बलस्येश्वरः शाल्वो युद्धे कृष्णमवलोक्य भीमो रवो ध्वनिर्यस्यास्तां शक्तिं कृष्णसूताय प्राहरत् ॥ १२ ॥ तामिति ॥ रंहसा वेगेन आकाशे आपतन्तीं महोल्कामिव सर्वा दिशो भासयन्तीं तां शक्तिं शौरिः श्रीकृष्णः सायकैः आकाश एव शतधा अच्छिनत् ॥ १३ ॥ तमिति ॥ तं च शाल्वं षोडशभिर्बाणैर्विद्ध्वा खे आकाशे भ्रमत् भ्राम्यमाणं सौभं च शरसन्दोहैरविध्यत् यथा सूर्यः खं रश्मिभिर्विध्यति तथा सुनीलत्वविपुलत्वादिभिः सौभस्याकाशोपमा । अचिन्त्यवेगबाहुल्यादिभिः शराणां रश्मिसादृश्यम् अयत्नेनैव रश्मिवच्छरजालप्रसारणात् श्रीकृष्णस्य सूर्यसाम्यम् ॥ १४ ॥ शाल्व इति ॥ शाल्वोऽपि शार्ङ्गधन्वनः कृष्णस्य शार्ङ्गसहितं सव्यं वामं दोर्भुजं बिभेद शरेण विव्याध । " दक्षिणं दोर्निशाचर " इति रघुवंशे प्रयोगात् । ककुद्दोषणी इति भाष्यप्रयोगाच्च दोशब्दस्य क्लैब्यमपि ततस्तस्य हस्तात् शार्ङ्गं धनुर्न्यपतत् अभूतपूर्वत्वात् तत्पतनमद्भुतमाश्चर्यकरमासीत् ॥ १५ ॥ हाहेति ॥ तत्र पश्यतां भूतानां महान् हाहाकारः शब्दः आसीत् तदा सौभराट् शाल्वः उच्चैः विनद्य जनार्दनं

शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः ॥ प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे ॥ १२ ॥ तामापतन्तीं नभसि महोल्कामिव रंहसा ॥ भासयन्तीं दिशः शौरिः सायकैः शतधाऽच्छिनत् ॥ १३ ॥ तं च षोडशभिर्विद्ध्वा बाणैः सौभं च खे भ्रमत् ॥ अविध्यच्छरसन्दोहैः खं सूर्य इव रश्मिभिः ॥ १४ ॥ शाल्वः शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्गधन्वनः ॥ बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतम् ॥ १५ ॥ हाहाकारो महानासीद्भूतानां तत्र पश्यताम् ॥ विनद्य सौभराडुच्चैरिदमाह जनार्दनम् ॥ १६ ॥ यत्त्वया मूढ नः सख्युर्भ्रातुर्भार्या हृतेक्षताम् ॥ प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा ॥ १७ ॥ तं त्वाद्य निशितैर्बाणैरपराजितमानिनम् ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥ १८ ॥ श्रीभगवानुवाच ॥ वृथा त्वं कत्थसे मन्द न पश्यस्यन्तिकेऽन्तकम् ॥ पौरुषं दर्शयन्ति स्म शूरा न बहुभाषिणः ॥ १९ ॥

प्रतीदमाह स्म ॥ १६ ॥ यदिति ॥ हे मूढ यत् यस्मान्नोऽस्माकमीक्षतां पश्यतामेव सतां शता आर्षः । सख्युः शिशुपालस्य भार्या त्वया हृता तथा प्रमत्तः अनवहितः सोऽस्माकं सखा सभामध्ये त्वया व्यापादितः निहतः वस्तुतः हे अमूढ नः सख्युरीक्षमाणस्य सतः अस्माकं चेक्षमाणानांताननादृत्य येन त्वया भार्या स्वजायैव हृता गृहीता तथा प्रमत्तः उन्मत्तचेष्टः स व्यापादितः ॥ १७ ॥ तामिति ॥ तु हेतौ तस्मादात्मानमपराजितम् अपरैरजितोऽहमिति मन्यमानं तं सख्युर्हन्तारं त्वा त्वामद्य निशितैस्तीक्ष्णैर्बाणैरपुनरावृत्तिं मृत्युं नयामि । यदि युद्धे ममाग्रतस्तिष्ठेः स्थास्यसि वस्तुतः अपराजितश्चासौ मानी पूजावांश्च तं नास्ति पुनरावृत्तिर्यस्मात् तं त्वां नयामि प्राप्स्यामि यदि मद्भाग्येनाग्रतः तिष्ठेः ॥ १८ ॥ वृथेति ॥ हे मन्द वृथैव मिथ्यैव त्वं विकत्थसे प्रगल्भं भाषसे अन्तिके समीपे समनन्तरे प्राप्तं स्वमृत्युं न पश्यसि ये शूरास्ते बहुभाषिणः आत्मश्लाघिनो न भवन्ति किंतु इह युद्धे स्वपौरुषमेव दर्शयन्ति ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ संरब्धः क्रुद्धः भगवान् इत्युक्त्वा भीमो भयङ्करः वेगो यस्यास्तया गदया जत्रौ कण्ठमूले शाल्वं तताड णिजभाव आर्षः । स च शाल्वः असृक् रुधिरं वमन् उद्गिरन् चकम्पे ॥ २० ॥ गदायामिति सार्द्धम् ॥ गदायां सन्निवृत्तायां निवृत्य भगवद्धस्तं गतायां सत्यां शाल्वस्त्वन्तरधीयत धीङो लङ् ततोऽन्तर्धानानन्तरं मुहूर्त्ते गते सति मुहूर्त्तादिति क्वचित्पाठः । कश्चित् शाल्वप्रेषितः वसुदेवभृत्यरूपधरः पुरुष आगत्य अच्युतं शिरसा नत्वा रुदन् अहं देवक्या प्रहितोऽस्मीति वचः प्राह स्म । वस्तुतस्तु अप्रहित इति च्छेदः ॥ २१ ॥ कृष्णेति ॥ हे कृष्ण कृष्ण सम्भ्रमे द्विरुक्तिः । हे महाबाहो हे पितृवत्सल ते तव पिता वसुदेवः शाल्वेन बद्ध्वा नीतः । यथा सौनिकेन पशुघातिना पशुर्हननार्थं नीयते तथा वस्तुतः अपिता पितृसदशो मायानिर्मित इत्यर्थः ॥ २२ ॥ निशम्येति ॥ विप्रियं तद्वाक्यं निशम्य प्राकृतपुरुष इव स्नेहात् वसुदेवविषयकात् हेतोः मानुषीं प्रकृतिं स्वभावमनुगतः । घृणी दयावान् विमनस्को दुःखितमनाः कृष्णः बभाषे । वस्तुतः विप्रियं निशम्यापि अप्राकृतीमैश्वरीमेव प्रकृतिं गतः

इत्युक्त्वा भगवाञ्छाल्वं गदया भीमवेगया ॥ तताड जत्रौ संरब्धः स चकम्पे वमन्नसृक् ॥ २० ॥ गदायां सन्निवृत्तायां शाल्वस्त्वन्तरधीयत ॥ ततो मुहूर्त आगत्य पुरुषः शिरसाऽच्युतम् ॥ देवक्या प्रहितोऽस्मीति नत्वा प्राह वचो रुदन् ॥२१॥ कृष्ण कृष्ण महाबाहो पिता ते पितृवत्सल ॥ बद्ध्वाऽपनीतः शाल्वेन सौनिकेन यथा पशुः ॥ २२ ॥ निशम्य विप्रियं कृष्णा मानुषीं प्रकृतिं गतः ॥ विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा ॥ २३॥ कथं राममसंभ्रान्तं जित्वाऽजेयं सुरासुरैः ॥ शाल्वेनाल्पीयसा नीतः पिता मे बलवान्विधिः ॥ २४ ॥ इति ब्रुवाणे गोविन्दे सौभराट् प्रत्युपस्थितः ॥ वसुदेवमिवानीय कृष्णं चेदमुवाच सः ॥ २५ ॥ एष ते जनिता तातो यदर्थमिह जीवसि ॥ वधिष्ये वीक्षतस्तेऽमुमीशश्चेत्पाहि बालिश ॥ २६ ॥

अप्राकृतः विशिष्टं श्रेष्ठं मनो यस्य सः महामनाः कृष्णः यथा यथावत् बभाषे ॥ २३ ॥ कथमिति ॥ सुरासुरैरपि अजेयं जेतुमशक्यमसंभ्रान्तं पुरपालकतया स्थापितत्वात्सावधानं रामं जित्वा अल्पीयसा तुच्छेन शाल्वेन मम पिता कथं नीतः अतो विधिर्दैवं बलवान् । वस्तुतः मे पिता कथं नीतः नैव नीत इत्यर्थः । विधिरपि मत्पुरतः अबलवान् अकिंचित्कर इत्यर्थः ॥ २४ ॥ इतीति ॥ गोविन्दे कृष्णे एवं ब्रुवाणे सति स सौभराट् शाल्वः प्रत्युपस्थितः प्रादुर्भूतः सन् वसुदेवमिवानीय प्रदर्श्य कृष्णं प्रतीदमुवाच । वस्तुतो वसुदेवाभावादिवशब्दप्रयोगः ॥ २५ ॥ एष इति ॥ ते तवैष जनिता जनयिता जनितामन्त्रे इति छान्दसो णिलोपः । तातः पिता यदर्थमिह संसारे त्वं जीवसि अतस्ते तव वीक्षतः पश्यत एव सतः शता आर्षः अमुं वधिष्ये तङार्षः । हे बालिश अज्ञ चेत् यदि त्वमीशः समर्थस्तदामुं पाहि । वस्तुतः यदर्थमिह त्वं जीवसि बलं प्रकटयसि एषः ते अजनिता अत एव अतातस्तातसदृशमात्रम् अतस्तव वीक्षत एव कौतुकार्थममुं वधिष्ये बलानां समूहो बालं तदस्ति येषां ते बालिनो महाबलाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान् श्यति । हे बालिश त्वमीश एवासि अतोऽनेन कौतुकेन प्रसन्नश्चेन्मां पाहि संसारादुद्धर ॥ २६ ॥ एवमिति ॥ मायावी शाल्वः एवं कृष्णं निर्भर्त्स्य तिरस्कृत्य आनकदुन्दुभेः शिरः खड्गेन उत्कृत्य च्छित्त्वा तदादाय गृहीत्वा खस्थम् आकाशे स्थितं सौभं समाविशत् ॥ २७ ॥ तत इति ॥ ततश्च कृष्णः स्वजनानां पित्रादीनामनुषङ्गतः आसक्त्या मुहूर्त्तमात्रं प्रकृतौ प्रकृतिकार्ये मनुष्यस्वभावे उपप्लुतो निमग्न आस्ते स्म । ततश्च स्वत एव बोधो ज्ञानं यस्य स महानुभावः भगवान् तत् वसुदेववधादिकं मयोदितां शिक्षितां शाल्वेन प्रसृतां प्रसारितामासुरीं मायामबुध्यत् तङ्भाव आर्षः । वस्तुतः मुहूर्त्तमात्रं स्वजनानुषङ्गतः स्वजनदृष्ट्या उपप्लुतः शोकव्याप्त इवासेत स्म । वस्तुतस्तदापि प्रकृतौ स्वभावभूते स्वबोध एवास्ते स्मेति ॥ २८ ॥ नेति ॥ सदैव प्रबुद्धश्चाच्युतस्तत्राजौ रणाङ्गणे दूतं पितुः कलेवरं च न समपश्यत् । सुप्तप्रबुद्धः पुरुषो यथा स्वप्नदृष्टं वस्तु न पश्यति तद्वदित्यर्थः । ततश्चाम्बरचारिणम् आकाशे विचरन्तं सौभे स्थितं रिपुं शत्रुं शाल्वमालोक्य तं निहन्तुमुद्यतो बभूव ॥ २९ ॥ इत्थमुपन्यस्तं प्रकरणं शोधयति—एवमिति ॥ हे राजर्षे केचित् नान्विताः पूर्वापरानुसन्धानरहिता ऋषयः एवं वदन्ति तत्र यत्स्ववाचो विरुध्येरन् विरोधं प्राप्नुयुः तत्ते नूनं निश्चितं न

एवं निर्भर्त्स्य मायावी खड्गेनानकदुन्दुभेः ॥ उत्कृत्य शिर आदाय खस्थं सौभं समाविशत् ॥ २७ ॥ ततो मुहूर्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषङ्गतः ॥ महानुभावस्तदबुध्यदासुरीं मायां स शाल्वप्रसृतां मयोदिताम् ॥ २८ ॥ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आजौ समपश्यदच्युतः ॥ स्वाप्नं यथा चाम्बरचारिणं रिपुं सौभस्थमालोक्य निहन्तुमुद्यतः ॥ २९ ॥ एवं वदन्ति राजर्षे ऋषयः केचनान्विताः ॥ यत्स्ववाचो विरुध्येत नूनं तन्न स्मरन्त्युत ॥ ३० ॥ क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसम्भवाः ॥ क्व चाखण्डितविज्ञानज्ञानैश्वर्यस्त्वखण्डितः ॥ ३१ ॥

स्मरन्ति नानुसन्दधते । अत्र पूर्वापरविरोधमेवं व्याचक्षते । न तावद्राजसूयार्थं रामेण सह गतः कृष्णः सङ्कर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ततश्चार्यमिश्राभिसङ्गत इति तैरुक्तमसङ्गतं स्यात् । कष्टेन सङ्गतीकरणे कथं राममसम्भ्रान्तमिति नोपपद्यते इति वस्तुतः शुकस्यापि ऋषिवचनखण्डने तात्पर्यं न वर्णनीयम् । तथा हि सङ्कर्षणमनुज्ञाप्येति पूर्वमुक्तम् । आर्यमिश्राभिसङ्गत इत्यस्येन्द्रप्रस्थात्सर्वागमनोत्तरं स्वाह्वानार्थमागतेनार्यमिश्रेण सङ्गत इति व्याख्याने तेन सह न विरोधः । रामस्य च पुररक्षणे नियुक्तत्वात्कथं राममित्यपि सङ्गतमेव एवं क्व शोकमोहावित्यादिश्लोकद्वयोक्तविरोधोऽपि नास्ति । मागधपलायनादि बाह्यलीलावद्भयभक्तचिन्तादेरान्तरलीलाया दामोदरलीलादौ दृष्टत्वात् प्रयोजनं त्वीदृशान्तरलीलायाः सर्वज्ञव्यासादिवर्णनैर्भक्तवात्सल्यादिगुणव्यक्तीभावार्थमेव एवं वदन्ति इति । श्लोकार्थस्तु हे राजर्षे केचन अन्विता योग्या एव ऋषय एवं वदन्ति ये तु भ्रमात् स्ववाचो विरुद्धयेरन् इति तान् प्रति वदन्ति ते नूनं परस्परं विरोधपरिहारं न जानन्तीत्यर्थः ॥ ३० ॥ विरोधमेव दर्शयति—क्वेति ॥ अज्ञेषु संभवो येषां ते शोकादयः क्व अखण्डितानि विज्ञानज्ञानैश्वर्याणि यस्य सः अखण्डितः अविद्यावरणराहित्येन पूर्णानन्दस्वरूपो भगवांश्च क्व तत्र शोकः प्रकृतावुपप्लुत इत्युक्तः । मोहश्च

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

स्वजनानुषङ्गत इत्युक्तः स्नेहाद्भाष इति स्नेह उक्तः । भयं च पश्यन् निमित्तानि घोराणीत्युक्तं तथा स्वबोध इति ज्ञानविज्ञाने उक्ते । तत्र ज्ञानं बाह्यविषयं विज्ञानं स्वरूपविषयम् ऐश्वर्यं तु महानुभाव इत्युक्तं तथा विरोधः स्पष्ट एव ॥ ३१ ॥ यत्पादेति ॥ यस्य पादसेवयोर्जितया पुष्कलया परिनिष्पन्नया आत्मविद्यया आत्मसाक्षात्कारेण अनादिश्चासावात्मनो विपर्ययो देहेन्द्रियादावहङ्कारलक्षणः स एव दुर्निवार्यत्वात् ग्रहः पिशाचस्तं भक्तजना हिन्वन्ति परित्यजन्ति आत्मीयमनन्तमविनाशि ऐश्वरं स्वरूपं च लभन्ते तस्य सतांगतेः फलभूतस्य परमस्य पुरुषोत्तमस्य कुतो नु मोहः स्यात् मोहाभावे च शोकादयो नैव संभवन्ति अतस्तेषां वचनमनन्वितमेव प्रतीयत इत्याशयः ॥३२॥ प्रकृतमनुसरति—तमिति ॥ अमोघः सफलो विक्रमो यस्य सः शौरिः कृष्ण ओजसा बलेन शस्त्रसमूहैः प्रहरन्तं शाल्वं शरैर्विद्ध्वा ताडयित्वा तस्य वर्म कवचं धनुः शिरोमणिं चाच्छिनत् तथा सः कृष्णः शत्रोः शाल्वस्य सौभाख्यं विमानं च गदया रुरोज बभञ्ज ॥ ३३ ॥ तदिति ॥ कृष्णहस्तेनेरितया प्रयुक्तया गदया सहस्रधा विचूर्णितं तत्सौभं

यत्पादसेवोर्जितयाऽऽत्मविद्यया हिन्वन्त्यनाद्यात्मविपर्ययग्रहम् ॥ लभन्त आत्मानमनन्तमैश्वरं कुतो नु मोहः परमस्य सद्गतेः ॥ ३२ ॥ तं शस्त्रपूगैः प्रहरन्तमञ्जसा शाल्वं शरैः शौरिरमोघविक्रमः ॥ विद्ध्वाऽच्छिनद्वर्म धनुः शिरोमणिं सौभं च शत्रोर्गदया रुरोज ह ॥ ३३ ॥ तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा ॥ विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्युतमभ्यगाद्द्रुतम् ॥ ३४ ॥ आधावतः सगदं तस्य बाहुं भल्लेन छित्त्वाऽथ रथाङ्गमद्भुतम् ॥ वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवोदयाचलः ॥ ३५ ॥ जहार तेनैव शिरः सकुण्डलं किरीटयुक्तं पुरुमायिनो हरिः ॥ वज्रेण वृत्रस्य यथा पुरन्दरो बभूव हा हेति वचस्तदा नृणाम् ॥ ३६ ॥ तस्मिन्निपतिते पापे सौभे च गदया हते ॥ नेदुर्दुन्दुभयो राजन्दिवि देवगणेरिताः ॥ सखीनामपचितिं कुर्वन्दन्तवक्त्रो रुषाऽभ्ययात् ॥ ३७ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे शाल्ववधो नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

समुद्रजले पपात ततश्च शाल्वः तत्सौभं विसृज्य त्यक्त्वा भूतलमास्थितः गदामुद्यम्य द्रुतं शीघ्रं यथा भवति तथाच्युतं कृष्णमभ्यगात् ॥ ३४ ॥ आधावत इति ॥ आधावतः अभ्यापततः तस्य शाल्वस्याङ्गदेन सहितं बाहुं भल्लेन बाणविशेषेण छित्त्वाथानन्तरं तस्य वधार्थमद्भुतं लयार्कसंनिभं प्रलयकालिकसूर्यतुल्यं रथाङ्गं चक्रं बिभ्राणः कृष्णो यथा सार्कः सूर्यसहितः उदयाचलो भाति तथा बभौ ॥ ३५ ॥ जहारेति ॥ ततश्च हरिः पुरुमायिनो बहुमायाविदः शाल्वस्य कुण्डलादियुक्तं शिरस्तेनैव चक्रेण जहार । तत्र दृष्टान्तमाह । पुरन्दर इन्द्रो यथा वज्रेण वृत्रस्य शिरो जहार तथेति तदा तत्पश्यतां शाल्वपक्षीयाणां नृणां हा हेति वचो बभूव ॥ ३६ ॥ तस्मिन्निति सार्द्धम् ॥ हे राजन् तस्मिन् पापाचारे शाल्वे निपतिते सति सौभाख्ये पुरे च गदया हते चूर्णिते च सति दिवि स्वर्गे हर्षाद्देवगणैर्वादिता दुन्दुभयो नेदुः सखीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाल्वादीनां मृतानामपचितिं वैरनिर्यातनं कुर्वन् कर्तुं रुषा दन्तवक्रोऽभ्यगात् योद्धुमागतः ॥ ३७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे व्यदधात्सप्तसप्तते ॥ ७७ ॥ अष्टयुक्सप्ततितमे दन्तवक्रविदूरथौ ॥ अहन्हरिर्बलः सूतं तत्र श्लोकाः खवोर्द्धयः ॥ उवाचपश्चैकं चात्र श्लोकर्तुल्या अनुष्टुभः ॥ ७८ ॥ शिशुपालस्येति युग्मम् ॥ हे महाराज परलोकगतानां मृतानामपि शिशुपालादीनां परोक्षमेव पारोक्ष्यं स्वार्थे ष्यञ् । तत्र सौहृदं सुहृत्कृत्यं कुर्वन् कर्तुं दुर्मतिः एकः पदातिः संक्रुद्धः गदापाणिः पद्भ्यामिमां भूमिं प्रकम्पयन् महासत्वो महाबलः दन्तवक्त्रो व्यदृश्यत ॥ १ ॥ २ ॥ तमिति ॥ तं दन्तवक्त्रं तथा क्रोधेन आयान्तमालोक्य स्वयमपि गदामादाय त्वरया सहितः कृष्णः प्रतियोद्धारं पदातिमालक्ष्य रथादवप्लुत्य प्रत्यधात् प्रतिरुरोध वेलातीरं यथा समुद्रं सर्वतः प्रतिरुणद्धि तथेति ॥ ३ ॥ गदामिति ॥ दुर्मदः कारूषो दन्तवक्रोऽपि गदामुद्यम्य मुकुन्दं प्राह स्म । भवानद्य मम दृष्टिपथं गत इति दिष्ट्या दिष्ट्या महानानन्दो जातः । वस्तुतो दुर्मदः गतमदः मुकुन्दं मुक्तिदानायागतं प्राह स्म । जन्मत्रयेऽन्विष्यमाणो ब्रह्मशापावसाने स्वामी दृष्टिपथं गतः ॥ ४ ॥ त्वमिति ॥ हे कृष्ण यद्यपि त्वं नोऽस्माकं शिशुपालादीनां मातुलेयो मातुलपुत्रः अतो

श्रीशुक उवाच ॥ शिशुपालस्य शाल्वस्य पौण्ड्रकस्यापि दुर्मतिः ॥ परलोकगतानां च कुर्वन् पारोक्ष्यसौहृदम् ॥ १ ॥ एकः पदातिः संक्रुद्धो गदापाणिः प्रकम्पयन् ॥ पद्भ्यामिमां महाराज महासत्त्वो व्यदृश्यत ॥२॥ तं तथाऽऽयान्तमालोक्य गदामादाय सत्वरः ॥ अवप्लुत्य रथात्कृष्णः सिन्धुं वेलेव प्रत्यधात् ॥ ३ ॥ गदामुद्यम्य कारूषो मुकुन्दं प्राह दुर्मदः ॥ दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥४॥ त्वं मातुलेयो नः कृष्ण मित्रध्रुङ् मां जिघांससि ॥ अतस्त्वां गदया मन्द हनिष्ये वज्रकल्पया ॥ ५ ॥ तर्ह्यानृण्यमुपैम्यज्ञ मित्राणां मित्रवत्सलः ॥ बन्धुरूपमरिं हत्वा व्याधिं देहचरं यथा ॥ ६ ॥ एवं रूक्षैस्तुदन् वाक्यैः कृष्णं तोत्रैरिव द्विपम् ॥ गदया ताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः ॥ ७ ॥

हननायोग्यः तथापि मित्रं द्रुह्यतीति मित्रध्रुक् शिशुपालं हतवान् मां च यतो जिघांससि अतो हे मन्द वज्रतुल्यया गदया त्वां हनिष्ये वस्तुतः मित्रध्रुक् चासावहं च तं मित्रध्रुङ् मां जिघांससि हन्तुं गन्तुं स्वीकर्तुमिच्छसि अतः हे अमन्द गदया त्वदीयया कौमोदक्या हेतुना त्वां हनिष्ये प्राप्स्यामि ॥ ५ ॥ तर्हीति ॥ हे अज्ञ तर्हि त्वद्वधे कृते यथा देहचरं व्याधिं विनाश्य सुखमाप्नोति एवं मित्रवत्सलोऽहं बन्धुरूपमरिं त्वां हत्वा मित्राणां शिशुपालादीनामानृण्यम् ऋणराहित्यमुपैमि प्राप्स्यामि । वस्तुतः नास्ति ज्ञो यस्मात् हे सर्वज्ञ ब्रह्मशापादरिं शत्रुत्वेन भातं विगत आधिर्येन तं देहचरमन्तर्यामिणं त्वां यथा यथावद् हत्वा ज्ञात्वा मित्राणां तदुपलक्षितपित्रादीनां चानृण्यमुपैमि देवर्षिभूताप्तनृणां पितॄणाञ्च किङ्करो नायमृणी चेत्युक्तेः ॥ ६ ॥ एवमिति ॥ स दन्तवक्रः तोत्रैरङ्कुशादिभिः द्विपं गजमिव एवं रूक्षैः प्रातीतिकार्थेन परुषैर्वाक्यैः कृष्णं तुदन् व्यथयन् मूर्ध्नि गदया अताडयत् ततः सिंहवद्व्यनदच्च ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गदयेति ॥ यदूनुद्वहति पालयतीति तथाभूतः कृष्णः आजौ युद्धे एवं गदयाभिहतोऽपि न चचाल किंतु गुर्व्या कौमोदक्या स्वगदया तमपि स्तनान्तरे अहन् ॥ ८ ॥ गदेति ॥ एवं गदया निर्भिन्नं हृदयं यस्य सः अत एव व्यसुः गतप्राणः मुखात् रुधिरमुद्वमन् केशादीन् प्रसार्य धरण्यां न्यपतत् ॥ ९ ॥ तत इति ॥ हे नृप सर्वभूतानां पश्यतामेव अद्भुतम् अदृष्टपूर्वत्वात् आश्चर्यकरं सूक्ष्मतरं ज्योतिः जीवाख्यं तेजः ततो दन्तवक्त्रशरीरात् निःसृत्य कृष्णमाविशत् । यथेति यथा चैद्यवधे कृते सति तद्देहाज्ज्योतिः निःसृत्य कृष्णमाविशत् तथेत्यर्थः । यद्यप्यतिसूक्ष्मत्वादात्मज्योतिर्द्रष्टुमशक्यं तथापि लोकविश्वासार्थं भगवानचिन्त्यशक्तिस्तथाऽदर्शयत् ॥ १० ॥ विदूरथ इति ॥ ततश्च तस्य दन्तवक्त्रस्य भ्राता विदूरथः भ्रातृविषयकशोकेन परिप्लुतो व्याप्तोऽतस्तस्य कृष्णस्य जिघांसया वस्तुतः प्राप्तीच्छया असिचर्मभ्यां खड्गखेटाभ्यां युक्त उच्छ्वसन्नागच्छत् ॥ ११ ॥ तस्येति ॥ हे राजेन्द्र आपततस्तस्य विदूरथस्य किरीटादिसहितं शिरः क्षुरस्येव नेमिर्धारा यस्य तेन चक्रेण कृष्णो जहार चिच्छेद ॥ १२ ॥

गदयाऽभिहतोऽप्याजौ न चचाल यदूद्वहः ॥ कृष्णोऽपि तमहन्गुर्व्या कौमोदक्या स्तनान्तरे ॥ ८ ॥ गदानिर्भिन्नहृदय उद्वमन्रुधिरं मुखात् ॥ प्रसार्य केशबाह्वङ्घ्रीन्धरण्यां न्यपतद्व्यसुः ॥ ९ ॥ ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम् ॥ पश्यतां सर्वभूतानां यथा चैद्यवधे नृप ॥ १० ॥ विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः ॥ आगच्छदसिचर्मभ्यामुच्छ्वसंस्तज्जिघांसया ॥ ११ ॥ तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना ॥ शिरो जहार राजेन्द्र सकिरीटं सकुण्डलम् ॥ १२ ॥ एवं सौभं च शाल्वं च दन्तवक्त्रं सहानुजम् ॥ हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः ॥ १३ ॥ मुनिभिः सिद्धगन्धर्वैर्विद्याधरमहोरगैः ॥ अप्सरोभिः पितृगणैर्यक्षैः किन्नरचारणैः ॥ १४ ॥ उपगीयमानविजयः कुसुमैरभिवर्षितः ॥ वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीम् ॥ १५ ॥ एवं योगेश्वरः कृष्णो भगवाञ्जगदीश्वरः ॥ ईयते पशुदृष्टीनां निर्जितो जयतीति सः ॥ १६ ॥

एवमिति त्रयम् ॥ अन्यैर्दुर्विषहान् सोढुमशक्यानपि शाल्वादीन् एवमनायासेनैव हत्वा सुरादिभिरीडितः उपगीयमानविजयः कुसुमैरभिवर्षितः आच्छादितः वृष्णिप्रवरैः शाल्वयुद्धार्थमागतैः प्रद्युम्नादिभिस्तदधोत्तरमागतैरुग्रसेनाद्यैश्च वृतः श्रीकृष्णः अलङ्कृतां पुरीं द्वारकां विवेश ॥ १३ ॥ १४ ॥ १५ ॥ एवमिति ॥ एवं योगेश्वरः भगवान् जगदीश्वरः कृष्णः एवमनायासेन महाबलानपि सर्वदा जयत्येव । इतिशब्दोऽवधारणे । पशुदृष्टीनामविवेकिनां तु सः कदाचिज्जरासन्धादिभिः निर्जितोऽपि ईयते प्रतीयते इति पूतनादिविदूरथान्तमामथ्य कृष्णो युद्धादुपरतोऽभूत् इत्याहुः । अत्र तोषण्यां पाद्मोत्तरखण्डोक्तो विशेषः । तथा हि तत्रत्यगद्यानि यथा । अथ शिशुपालं हतं श्रुत्वा दन्तवक्त्रः कृष्णेन योद्धुं मथुरामाजगाम । कृष्णस्तु तच्छ्रुत्वा रथमारुह्य मथुरामाययावित्यादि ततोऽत्रैवं व्याख्येयम् । पौण्ड्रकशिशुपालौ हतौ श्रुत्वा श्रीकृष्णं योद्धुं दन्तवक्त्रः शक्रप्रस्थं प्रति चलितः मार्गे नारदेन द्वारकागतं कृष्णकृतशाल्ववधं बोधितः कृष्णेन गदायुद्धं चिकीर्षुर्मथुरामुपद्रावयितुं तत्रैव तदाह्वानेच्छया ययौ । तच्छ्रुत्वा भगवाने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काकी मथुरां रथेन गत्वा तं सानुजं हतवान् । ततः नन्दव्रजं गत्वा पितरावभिवाद्य कालिन्द्यां गोपीभिः रेमे । इदं व्रजगमनं भागवतसंमतमेव। आयास्य इति दौत्यकैरित्यादि प्रतिज्ञानात् । " कुरून्मधून्वाथ सुहृद्दिदृक्षया " इति प्रथमस्कन्धोक्तेः । मधून् मथुरासुहृदो व्रजस्थान् वेति स्वामिव्याख्यानाच्च सूर्योपरागयात्रायां गतांश्चिरायिता- नित्यादिवाक्यविरोधस्तु नास्ति । तद्यात्रायाः दन्तवक्रवधपूर्वकालिकत्वात् । तत्रैवं क्रमः कंसवधोत्तरं नरकवधान्तलीलाल्पैरेव वत्सरैः ततः सूर्योपरागयात्रा ततो राजसू- यसभा ततः पाण्डवानां द्यूतवनगमने तदैवेतः शाल्वदन्तवक्रवधव्रजगमनानि तेषु रामतीर्थयात्रादिकम् । सूर्योपरागे भीष्माद्यागमोक्त्या रामतीर्थयात्रोत्तरत्वासंभवात् । ततश्च दन्तवक्रादिवधोत्तरं मासद्वयं व्रजे स्थित्वा नन्दगोपादिभ्यः परमं स्वपदं दत्त्वा पश्चाद्द्वारवतीमाजगामेति तत्रोक्तम् । अत्र वाक्यान्तरविरोधसमाधानं तोषण्यां द्रष्टव्यम् ॥ १६ ॥ श्रुत्वेति ॥ कुरूणां पाण्डवैः सह युद्धोद्यमं श्रुत्वा मध्यस्थः एकतरपक्षावलम्बत्यागी रामस्तीर्थस्नानव्याजेन प्रययौ द्वारकातो निर्जगाम ॥ १७ ॥ स्नात्वेति ॥ प्रभासे स्नात्वा तत्र तर्पणब्राह्मणभोजनादिना देवादीन्सन्तर्प्य प्रतिस्रोतं प्रतिलोमं प्रवाहसंमुखं यथा भवति तथा सरस्वतीं तत्तीरं ब्राह्मणसंवृतो ययौ ॥ १८ ॥ पृथूदकमिति ॥

श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः ॥ तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥ १७ ॥ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमा- नवान् ॥ सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः ॥ १८ ॥ पृथूदकं बिन्दुसरस्त्रितकूपं सुदर्शनम् ॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीम् ॥ १९ ॥ यमुनामनु यान्येव गङ्गामनु च भारत ॥ जगाम नैमिषं यत्र ऋषयः सत्रमासते ॥ २० ॥ तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अभिवन्द्य यथान्यायं प्रणम्योत्थाय चाऽऽर्चयन् ॥ २१ ॥ सोऽर्चितः सपरीवारः कृतासनपरिग्रहः ॥ रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥ २२ ॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणाञ्जलिम् ॥ अध्यासीनं च तान्विप्रांश्चुकोपोद्वीक्ष्य माधवः ॥ २३ ॥

पृथूदकादीन् तीर्थविशेषान् ययावित्यन्वयः । पृथूदकं यत्र पृथुनाऽश्वमेधशतेनेष्टं तत्कुरुक्षेत्रवर्त्ति बिन्दुसरः कर्दमाश्रमं गुर्जरदेशे त्रितकूपं सरस्वत्यन्तर्वर्तित्रितसृष्टेस्तीर्थं सुदर्शनतीर्थमपि तत्रैव । विशालं सरस्वत्यन्तर्वर्ति तीर्थं विशालामिति पाठे अवन्तीं ब्रह्मतीर्थं चक्रतीर्थं सरस्वत्यामेव प्राची सरस्वती कुरुक्षेत्रवर्तिनी इदं तीर्थसङ्ग्रहमात्रं नतु मार्ग- क्रमः ॥ १९ ॥ यमुनामिति ॥ यमुनामनु यमुनातीरे यानि तीर्थानि तथा हे भारत गङ्गामनु यानि तीर्थानि तानि गत्वा ततो यत्र ऋषयः शौनकादयः सत्रमासते अनुति- ष्ठन्ति तन्नैमिषारण्यमाजगाम ॥ २० ॥ तमिति ॥ तं बलभद्रमागतमभिप्रेत्य ज्ञात्वा दीर्घं सहस्रसंवत्सरपर्यन्तमनुष्ठेयं सत्रं येषामस्ति ते मुनयः उत्थायाभिनन्द्य सुष्ठु आगमनं जातमिति वचसा अभिनन्दनं कृत्वा शिरसा प्रणम्य च यथान्यायं यथोचितम् आर्चयन् पूजितवन्तः ॥ २१ ॥ स इति ॥ सपरीवारः सहचरविप्रादिसहितोऽर्चितः कृत आसनपरिग्रहो येन स रामः महर्षेर्व्यासस्य शिष्यं रोमहर्षणमासीनमैक्षत ॥ २२ ॥ अप्रतीति ॥ माधवः बलदेवः सूतं प्रति लोमजं ब्राह्मण्यां क्षत्रियाज्जातं तान् विप्रान्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यासीनं तेभ्यो विप्रेभ्योऽप्युच्चासनासीनं स्वं प्रति अप्रत्युत्थायिनं प्रत्युत्थानमकृतवन्तम् अकृतप्रह्वणाञ्जलिं न कृतं प्रह्वणं प्रह्ववदाचरणं प्रणामोऽञ्जलिश्च येन प्रह्वशब्दादाचार-क्विबन्ताल्ल्युट् । तादृशमुद्वीक्ष्य चुकोप कोपपूर्वकमाह स्म ॥ २३ ॥ कस्मादिति ॥ प्रतिलोमजः दुर्मतिः असौ सूतः इमान् धर्मपालान् विप्रान् अस्मांश्च कस्मात् अध्यास्ते उच्चैरासनमधितिष्ठति अतोऽयं वधमर्हति ॥ २४ ॥ न चेदमज्ञानादित्याह—ऋषेरिति ॥ भगवतो वेदव्यासस्य शिष्यो भूत्वा वेदेऽधिकाराभावात् इतिहाससहितानि पुराणानि बहून्यधीत्य तथा सर्वशः कार्त्स्न्येन धर्मशास्त्राणि चाधीत्याप्येवमध्यास्ते ॥ २५ ॥ अदान्तस्येति ॥ अदान्तस्य अविनीतस्य वृथापण्डितमानिनः अजितात्मनः अजित-चित्तस्य अस्य तानीतिहासादीनि गुणाय तात्पर्यज्ञानाय उपशमफलाय वा न भवन्ति स्म । यथा नटेन मायाविना यथा परप्ररोचनार्थं प्रदर्शिता अपि राजविभवाः स्वभोगसुखजनका न भवन्ति तथाऽवशीकृतान्तःकरणेन गृहीतान्युपदिष्टान्यपि शास्त्राणि स्वफलप्रदानि नैव भवन्ति ॥ २६ ॥ एतदिति ॥ हि यस्मात् अस्मिँल्लोके मया

कस्मादसाविमान्विप्रानध्याऽऽस्ते प्रतिलोमजः ॥ धर्मपालांस्तथैवास्मान्वधमर्हति दुर्मतिः ॥ २४ ॥ ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥ २५ ॥ अदान्तस्याविनीतस्य वृथा पण्डितमानिनः ॥ न गुणाय भवन्ति स्म नटस्येवाऽजितात्मनः ॥ २६ ॥ एतदर्थो हि लोकेऽस्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः ॥ २७ ॥ एतावदुक्त्वा भगवान् निवृत्तोऽसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥ २८ ॥ हा हेति वादिनः सर्वे मुनयः खिन्नमा-नसाः ॥ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥ २९ ॥ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनन्दनः ॥ आयुश्चात्माऽक्लमं तावद्यावत्सत्रं समाप्यते ॥ अजानतैवाचरितस्त्वया ब्रह्मवधो यथा ॥ ३० ॥

एतदर्थः दुष्टवधार्थ एवावतारः कृतः अतो धर्मध्वजिनः बहिर्धर्मप्रकाशकाः अपि अन्तः पापिनः ते मम वध्याः । हि यस्मात्ते अधिकाः पापिनः अधर्मिष्ठा हि स्वयमेव नरके पतन्ति । धर्मध्वजिनस्तु अन्यानपि पातयन्ति ॥ २७ ॥ एतावदिति ॥ तीर्थयात्राकारितया असतां वधान्निवृत्तोऽपि भगवान् प्रभुः रामः एतावदुक्त्वा भावित्वाद्भवितव्यस्य केनाप्यपरिहार्यत्वात्तं रोमहर्षणं करस्थेन कुशाग्रेण अहनत् अहन् । " बहुलं छन्दसि " इति शब्लुगभावः ॥ २८ ॥ हा हेति ॥ तदा खिन्नमानसाः हा हेति वादिनः सर्वे मुनयः सङ्कर्षणं देवम् ऊचुः । हे प्रभो एतद्वधरूपः अधर्मः ते त्वया कृतः वस्तुतो नास्ति धर्मो यस्मात्स परमधर्म इत्यर्थः ॥ २९ ॥ अस्येति सार्द्धम् ॥ हे यदुनन्दन यावता कालेन एतत्सत्रं समाप्यते तावत्कालमस्माभिरस्य रोमहर्षणस्य ब्रह्मासनं दत्तम् अतोऽस्याप्रत्युत्थानं युक्तमेवेति सूचितम् तथात्मनो देहस्य न क्लमः श्रमो यस्मिंस्तथाभूतमायुश्च दत्तम् । अत एतत्सर्वमजानतेव त्वया यथा ब्राह्मणवधः क्रियेत तथास्य वध आचरितः कृतः इवशब्देन तव अज्ञातमपि नास्तीति सूच्यते ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगेश्वरस्येति सार्द्धम् ॥ हे लोकपावन आम्नायो ब्राह्मणो न हन्तव्य इत्यादिश्रुतिस्मृत्यात्मको भवतो यद्यपि नियामको नास्ति तथापि यदि अनन्यचोदितः स्वयमेव एतस्या ब्रह्महत्यायाः पावनं प्रायश्चित्तं भवांश्चरिष्यति तदा लोकसङ्ग्रहो लोकानां प्रायश्चित्ते प्रवृत्तिर्भविष्यति नान्यथा । "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनु वर्तते ॥" इति वचनात् ॥३१॥ करिष्ये इति ॥ लोकानुग्रहकाम्यया लोकसंग्रहेच्छयाऽहमेतस्य वधस्य निर्वेशं प्रायश्चित्तं करिष्ये करिष्यामि अतः प्रथमे कल्पे मुख्ये पक्षे यावान्नियमः प्रायश्चित्तं स तु स एवमया विधीयतां करणीयः ॥३२॥ दीर्घमिति ॥ बत तथा एतस्य रोमहर्षणस्य दीर्घमायुः सत्वं बलम् इन्द्रियं इन्द्रियपाटवम् अन्यच्च यद्भवतामाशासितमपेक्षितं तत्सर्वं ब्रूत । अहं योगमायया अचिन्त्यशक्त्या तत्सर्वं साधये सम्पादयिष्यामि ॥ ३३ ॥ अस्त्रस्येति ॥ अस्त्रस्य त्वत्प्रयुक्तस्य कुशस्य तव च वीर्यस्य प्रभावस्य मृत्यो रोमहर्षणमरणस्य च यथा सत्यता स्यात् तथा अस्माकं वचः यावत्सत्रं त्वं दीर्घायुः पुराणवक्ता च भवेत्येवंविधं च यथा सत्यं

योगेश्वरस्य भवतो नाम्ना योऽपि नियामकः ॥ यद्येतद्ब्रह्महत्यायाः पावनं लोकपावनः ॥ चरिष्यति भवांल्लोकसङ्ग्रहोऽनन्यचोदितः ॥ ३१ ॥
॥ श्रीभगवानुवाच ॥ करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया ॥ नियमः प्रथमे कल्पे यावान्स तु विधीयताम् ॥३२॥ दीर्घमायुर्बतैतस्य सत्त्वमिन्द्रियमेव च ॥ आशासितं यत्तद्ब्रूत साधये योगमायया ॥ ३३ ॥ ऋषय ऊचुः ॥ अस्त्रस्य तव वीर्यस्य मृत्योरस्माकमेव च ॥ यथा भवेद्वचः सत्यं तथा राम विधीयताम् ॥ ३४ ॥ श्रीभगवानुवाच ॥ आत्मा वै पुत्र उत्पन्न इति वेदानुशासनम् ॥ तस्मादस्य भवेद्वक्ता आयुरिन्द्रियसत्त्ववान् ॥ ३५ ॥ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ ॥ अजानतस्त्वपचितिं यथा मे चिन्त्यतां बुधाः ॥ ३६ ॥ ऋषय ऊचुः ॥ इल्वलस्य सुतो घोरो बल्वलो नाम दानवः ॥ स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ॥ ३७ ॥

भवेत्तथा हे राम विधीयतां क्रियताम् ॥ ३४ ॥ आत्मेति ॥ "आत्मा वै पुत्रनामासि, संजीव शरदः शतम्" इत्यादिवेदानुशासनं वेदवाक्यमस्ति तस्मादस्य रोमहर्षणस्य पुत्र उग्रश्रवा भवतां पुराणवक्ता भवेत् आयुरादिमांश्च भवेत् अतः साक्षाद्रोमहर्षणस्याजीवनादस्त्रस्य मृत्योश्च सत्यता पुत्ररूपेण चायुरादेः सिद्धेर्भवद्वचनस्यापि सत्यता स्यात् ॥३५॥ किमिति ॥ हे मुनिश्रेष्ठाः सूतवधखेदोपशमनाय मया यूयं प्रसाद्याः प्रायश्चित्तोपदेष्टृभ्यः प्रथमं किंचिद्देयं वा तत्र वो युष्माकं किंविषयकः कामः संकल्पो वर्तते तद्ब्रूत । अहं तत् अथ अनन्तरमेव करवाणि ततस्तु अपचितिं सूतहत्या प्रायश्चित्तमजानतो मे मदर्थं हे बुधाः सर्वज्ञाः यथावत्प्रायश्चित्तं चिन्त्यतां विचार्य कथ्यताम् ॥ ३६ ॥ इल्वलस्येति ॥ इल्वलस्य सुतो बल्वलो नाम दानवोऽस्ति स पर्वणि पर्वणि पूर्णमास्यां पूर्णमास्याम् अमायाममायां च एत्य आगत्य नोऽस्माकं सत्रसंज्ञकं यागं दूषयति । स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च घोरो भयङ्करोऽस्मदसाध्यः ॥ ३७ ॥ तमिति ॥ हे दाशार्ह पूयादीनभितो वर्षति तादृशं तं पापाचारं जहि मारय तद्धननमेव नोऽस्माकं परमुत्कृष्टं शुश्रूषणं सेवनम् ॥ ३८ ॥ ततश्चेति ॥ बल्वलवधानन्तरं सुसमाहितः सन् द्वादशमासान् द्वादशानिति चित्सुखपाठः । भारतं वर्षं परीत्य सर्वत्र भ्रमणं कृत्वा तीर्थस्नायी तत्र तत्र तीर्थस्नानशीलः कृच्छ्राणि चरित्वा विशुद्ध्यसे शुद्धकीर्तिर्भविष्यसि वस्तुतस्तु अन्तर्भूतण्यर्थे लोकान् शोधयिष्यसि शुद्धयशसा पावयिष्यसि तङार्षः । सुसमाधानादिगुणविशेषादेकाब्दमात्रमुक्तमिति स्वामिपादाः । तेन स्मृत्युक्तद्वादशाब्दिकविरोधाभावः । स विंशतिशतयोजनागतस्य भागीरथीस्नानं द्वादश वर्षकृच्छ्रसममित्यादिस्मृतिरीत्या तु बुद्धिपूर्वकब्रह्महत्याप्राप्तप्रायश्चित्ततोऽप्यधिकं कृतमिति ज्ञेयम् । नाप्यसौ सूतः साक्षाद् ब्राह्मणः ॥ ३९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दशमस्याष्टसप्तते ॥ ७८ ॥ ऊनाशीतितमे रामो न्यहन्बल्वलदानवम् ॥ तीर्थस्नानैः सूतहत्यां श्लोकाः सार्द्धाश्चतुर्गुणाः ॥ उवाचेत्येकमेवात्र

तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परम् ॥ पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणम् ॥ ३८ ॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः ॥ चरित्वा द्वादशान्मासांस्तीर्थस्नायी विशुध्यसे ॥ ३९ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे बलदेवचरित्रे बल्वलवधोपक्रमो नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ श्रीशुक उवाच ॥ ततः पर्वण्युपावृत्ते प्रचण्डः पांसुवर्षणः ॥ भीमो वायुरभूद्राजन्पूयगन्धस्तु सर्वशः ॥ १ ॥ ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितम् ॥ अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् ॥२॥ तं विलोक्य बृहत्कायं भिन्नाञ्जनचयोपमम् ॥ तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखम् ॥ ३ ॥ सस्मार मुसलं रामः परसैन्यविदारणम् ॥ हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ॥ ४ ॥ तमाकृष्य हलाग्रेण बल्वलं गगनेचरम् ॥ मुसलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ॥ ५ ॥

श्लोकैस्तुल्या अनुष्टुभः ॥ ७९ ॥ तत इति ॥ एवमृषिभिरुक्तमङ्गीकृत्य रामः तदागमनं प्रतीक्षमाणस्तिष्ठति ततस्तदन्तरं हे राजन् पर्वणि उपावृत्ते प्राप्ते सति प्रचण्डो निष्ठुरः पांसून् वर्षतीति तथा भीमो भयङ्करः पूयगन्धः दुर्गन्धो वायुः सर्वतोऽभूत् ॥ १ ॥ तत इति ॥ ततश्च बल्वलेन विनिर्मितममेध्यमयं विण्मूत्रादिमयं वर्षं यज्ञशालायामभवत् । ततश्च शूलधृक् धृजेः क्विप् स बल्वलोऽन्वदृश्यत दृष्टो बभूव ॥ २ ॥ तमिति युग्मम् ॥ बृहत्कायः शरीरं यस्य तं भिन्नो विदीर्णः अञ्जनचय उपमासदृशो यस्य तमतिकृष्णमित्यर्थः । तप्तताम्रवत् शिखाः श्मश्रूणि च यस्य तं दंष्ट्राभिः उग्राभ्यां भ्रुकुटीभ्यां च युक्तं मुखं यस्य तं बल्वलं विलोक्य रामः परसैन्यं विदारयतीति तथा तत् मुसलं तथा दैत्यान् दमयति विनाशयतीति तथाभूतं हलं च सस्मार । तेच हलमुसले तूर्णं तत्क्षणमेवोपतस्थतुः समीपमाजग्मतुः ॥ ३ ॥४ ॥ तमिति॥ब्रह्मद्रुहं ब्राह्मणद्रोहकर्त्तारं गगनेचरम् आकाशे स्थितं तं बल्वलं हलाग्रेणाकृष्य क्रुद्धो बलः मुसलेन मूर्ध्नि अहनत् शब्लुगभाव आर्षः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ निर्भिन्नं ललाटं यस्य सः बल्वलः असृक् रुधिरं समुत्सृजन् उद्वमन् अतो रुधिरेणारुणः आर्तस्वरं च मुञ्चन् भुवि अपतत् । यथा गैरिकादिभिररुणः इन्द्रवज्रेण हतः शैलः स्वरं शब्दं मुञ्चन् पतति तथेति ॥ ६ ॥ संस्तुत्येति ॥ महाभागा मुनयो रामं संस्तुत्य अवितथाः यथार्थाः आशिषः प्रयुज्य अभ्यषिञ्चन् स्नापयामासुः । यथा वृत्रघ्नमिन्द्रं वृत्रवधेन संतुष्टा विबुधाः अभिषिच्य स्तुत्यादिकं कृतवन्तस्तथेति ॥ ७ ॥ वैजयन्तीमिति ॥ श्रियः शोभाया धामानि अम्लानानि पङ्कजानि यस्यां तां वैजयन्तीं बहुरूपपुष्परचितां मालां दिव्ये वाससी वस्त्रे दिव्यान्याभरणानि च रामाय ददुः ॥ ८ ॥ अथेति ॥ बल्वलवधानन्तरं तैर्मुनिभिरभ्यनुज्ञातो रामो ब्राह्मणैः सह कौशिकीं नदीमेत्य आगत्य तत्र स्नात्वा ततः सरोवरमगात् । यतः सरसः सरयुर्नाम नदी ह्रस्वान्ततार्षी । आस्रवत् उदगात् ॥९॥ अन्विति ॥ स बलभद्रः सरयूमनुस्रोतेन अनुलोमेन

सोऽपतद्भुवि निर्भिन्नललाटोऽसृक्समुत्सृजन् ॥ मुञ्चन्नार्तस्वरं शैलो यथा वज्रहतोऽरुणः ॥ ६ ॥ संस्तुत्य मुनयो रामं प्रयुज्यावितथाशिषः ॥ अभ्यषिञ्चन्महाभागा वृत्रघ्नं विबुधा यथा ॥ ७ ॥ वैजयन्तीं ददुर्मालां श्रीधामाम्लानपङ्कजाम् ॥ रामाय वाससी दिव्ये दिव्यान्याभरणानि च ॥ ८ ॥ अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः ॥ स्नात्वा सरोवरमगाद्यतः सरयुरास्रवत् ॥ ९ ॥ अनुस्रोतेन सरयूं प्रयागमुपगम्य सः ॥ स्नात्वा संतर्प्य देवादीञ्जगाम पुलहाश्रमम् ॥ १० ॥ गोमतीं गण्डकीं स्नात्वा विपाशां शोण आप्लुतः ॥ गयां गत्वा पितॄनिष्ट्वा गङ्गासागरसंगमे ॥ ११ ॥ उपस्पृश्य महेन्द्राद्रौ रामं दृष्ट्वाऽभिवाद्य च ॥ सप्तगोदावरीं वेणां पम्पां भीमरथीं गतः ॥ १२ ॥ स्कन्दं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयम् ॥ द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेङ्कटं प्रभुः ॥ १३ ॥ कामकोष्णीं पुरीं काञ्चीं कावेरीं च सरिद्वराम् ॥ श्रीरङ्गाख्यं महापुण्यं यत्र संनिहितो हरिः ॥ १४ ॥ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा ॥ सामुद्रं सेतुमगमन्महापातकनाशनम् ॥ १५ ॥

प्रयागमुपगम्य तत्र स्नात्वा देवादीन् संतर्प्य पुलहाश्रमं शालग्रामक्षेत्रं हरिक्षेत्रं वा जगाम ॥ १० ॥ गोमतीमिति ॥ क्त्वान्तानां सेतुमगमदित्यनेनान्वयः । गोमत्यां गण्डक्यां विपाशायां च स्नात्वा शोणाख्ये नदे आप्लुतः ततश्च गयां गत्वा तत्र पितॄन् इष्ट्वा जीवत्पितृपितामहकत्वेन श्राद्धाधिकाराभावाद्ब्राह्मणभोजनदानादिना समाराध्य । यद्वा । प्रपितामहादिपितृश्राद्धानि कृत्वा “ वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥ ” इति स्मृतेः । एतदपि वसुदेवाज्ञयैवेति ज्ञेयम् । ततो गङ्गासागरसङ्गमे उपस्पृश्य आचमनपूर्वं स्नात्वा रामं परशुरामं सप्तगोदावरं सप्तधात्मानं यत्र गोदावरी कृत्वा समुद्रं गता तत्तीर्थं सप्तगोदावरमिति पाठः । ङचन्तपाठस्त्वार्षः । वेणाभीमरथ्यौ नद्यौ पम्पाख्यं सरः श्रीशैलाख्यं पर्वतं गिरिशस्य रुद्रस्यालयं श्रीरङ्गाख्यं क्षेत्रं स्पष्टं शेषम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति युग्मम् ॥ तत्र सामुद्रसेतौ ततः कृतमालां ताम्रपर्णीं नदीं मलयं चागमदित्यनुषङ्गः । तत्र मलये ॥ १६ ॥ १७ ॥ दक्षिणमिति सार्द्धम् ॥ दक्षिणमर्णवं गतः सः रामस्तत्रार्णवसमीपे कन्याख्यां दुर्गां देवीं ददर्श । ततः फाल्गुनमनन्तपुरमासाद्य यत्र विष्णुः सदा सन्निहितो वर्तते तत उत्तमं तीर्थं पञ्चाप्सरसं नाम सरः आसाद्य तत्र स्नात्वा गवामयुतमस्पर्शत् ब्राह्मणेभ्यो ददौ आर्षः ॥ १८ ॥ तत इति ॥ ततो भगवान् रामः केरलादीन् देशानभिव्रज्य यत्र धूर्जटेः शिवस्य सान्निध्यमस्ति तद्गोकर्णाख्यं शिवक्षेत्रमगमदिति शेषः ॥१९॥ आर्यामिति युग्मम् ॥ द्वीपमयनं यस्यास्तामार्यां देवीं दृष्ट्वा बलः सूर्पारकाख्यं क्षेत्रमगात् । ताप्यादीर्नदीः उपस्पृश्य तासु स्नात्वा अथ दण्डकारण्यं प्रविश्य रेवां नर्मदां नदीमगमत् । यत्र रेवातीरे माहिष्मती पुरी वर्तते मनुतीर्थं ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वतीति चतुर्थोक्तमुपस्पृश्य स्नात्वा पुनः प्रभासमागमत्

तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः ॥ कृतमालां ताम्रपर्णीं मलयं च कुलाचलम् ॥ १६ ॥ तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च ॥ योजितस्तेन चाशीर्भिरनुज्ञातो गतोर्णवम् ॥ १७ ॥ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः ॥ ततः फाल्गुनमासाद्य पञ्चाप्सरसमुत्तमम् ॥ विष्णुः सन्निहितो यत्र स्नात्वाऽस्पर्शद्गवायुतम् ॥ १८ ॥ ततोऽभिव्रज्य भगवान्केरलांस्तु त्रिगर्तकान् ॥ गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः ॥ १९ ॥ आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः ॥ तापीं पयोष्णीं निर्विन्ध्यामुपस्पृश्याथ दण्डकम् ॥ २० ॥ प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी ॥ मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत् ॥ २१ ॥ श्रुत्वा द्विजैः कथ्यमानं कुरुपाण्डवसंयुगे ॥ सर्वराजन्यनिधनं भारं मेने हृतं भुवः ॥ २२ ॥ स भीमदुर्योधनयोर्गदाभ्यां युध्यतोर्मृधे ॥ वारयिष्यन्विनशनं जगाम यदुनन्दनः ॥ २३ ॥ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि ॥ अभिवाद्याभवंस्तूर्ष्णीं किं विवक्षुरिहागतः ॥ २४ ॥ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ ॥ मण्डलानि विचित्राणि चरन्ताविदमब्रवीत् ॥ २५ ॥ युवां तुल्यबलौ वीरौ हे राजन्हे वृकोदर ॥ एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकम् ॥ २६ ॥

॥ २० ॥ २१ ॥ श्रुत्वेति ॥ तत्र प्रभासे द्विजैः कथ्यमानं कुरुपाण्डवसंयुगे सर्वेषां बहूनां तत्रागतानां राज्ञां निधनं नाशं श्रुत्वा भगवता भुवो भारं हृतं मेने ॥ २२ ॥ स इति ॥ तदा यदुनन्दनः स रामः मृधे गदाभ्यां युध्यतोः शतार्षः । भीमदुर्योधनयोः शेषे षष्ठी । भीमदुर्योधनौ वारयिष्यन् वारयितुं विनशनं कुरुक्षेत्रं जगाम । । यद्वा भीमदुर्योधनयोः विनशनं युद्धं वारयिष्यन् तत्र जगामेत्यन्वयः ॥ २३ ॥ युधिष्ठिर इति ॥ युधिष्ठिरः कृष्णार्जुनौ यमौ नकुलसहदेवौ च तं रामं दृष्ट्वाभिवाद्य किं विवक्षुरिहागत इति संशयमापन्ना भीतास्तूष्णीमभवन् ॥ २४ ॥ गदेति ॥ संरब्धौ क्रुद्धौ अतो नमस्कारमकृतवन्तौ विजयैषिणौ अतो गदापाणी विचित्राणि मण्डलानि गदाप्रहारगतिभेदांश्चरन्तावुभौ भीमदुर्योधनौ दृष्ट्वा इदं वक्ष्यमाणमब्रवीत् ॥ २५ ॥ युवामिति ॥ हे राजन् दुर्योधन हे वृकोदर भीम युवां तुल्यबलौ वीरौ च तत्र एकं भीमं दुर्योधनात् प्राणेन बलेना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकं मन्ये उत अथ चैकं दुर्योधनं भीमात् शिक्षयमया कृतया गदाप्रहारनैपुण्येनाधिकं मन्ये ॥ २६ ॥ तस्मादिति ॥ यस्मादेवं तस्मात् समवीर्ययोर्युवयोरन्यतरस्येह युद्धे जयः अन्यः पराजयो वा भविष्यतीति न लक्ष्यते अतो निष्फलोऽयं रणः युद्धं विरमतु ॥ २७॥ नेति ॥ हे नृप यद्यपि तस्य रामस्य वाक्यम् अर्थवत् क्लेशनिवर्तकं तथापि बद्धवैरौ अन्योन्यं दुरुक्तं दुष्कृतानि च स्मरन्तौ तौ न जगृहतुः ॥ २८ ॥ दिष्टमिति ॥ तत्स्ववाक्याग्रहणं दिष्टं तयोरनिष्टहेतुप्राचनिकर्मप्रयुक्तं मन्वानो रामो द्वारवतीं ययौ । तत्र चोग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः संमिलितो बभूव ॥ २९ ॥ तमिति ॥ एवं तीर्थस्नानादिभिर्निर्वृत्तोऽखिलो विग्रहः कलहः तत्प्रयुक्तो दोषो यस्य तं क्रत्वङ्गं यज्ञमूर्तिं पुनर्नैमिषं प्राप्तं रामम् ऋषयो मुदा हर्षेण सर्वैः क्रतुभिरयाजयन् ॥ ३० ॥ तेभ्य इति ॥ भगवान् विभुः बलदेवः दक्षिणाज्ञानसंदेश इति वाक्यात् तेभ्यः ऋषिभ्यो दक्षिणात्वेन विशुद्धं संशयविपर्ययादिरहितं विज्ञानं व्यतरत् ददौ । येनैव ज्ञानेन आत्मनि अदो विश्वं विदुः तथा विश्वं गच्छति व्याप्य तिष्ठतीति तथाभूतमात्मानं च विदुः

तस्मादेकतरस्येह युवयोः समवीर्ययोः ॥ न लक्ष्यते जयोऽन्यो वा विरमत्वफलो रणः ॥ २७ ॥ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् ॥ अनुस्मरन्तावन्योन्यं दुरुक्तं दुष्कृतानि च ॥ २८ ॥ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ ॥ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ॥ २९ ॥ तं पुनर्नैमिषं प्राप्तमृषयोऽयाजयन्मुदा ॥ क्रत्वङ्गं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहम् ॥३०॥ तेभ्यो विशुद्धविज्ञानं भगवान्व्यतरद्विभुः ॥ येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः ॥ ३१ ॥ स्वपत्न्यावभृथस्नातो ज्ञातिबन्धुसुहृद्वृतः ॥ रेजे स्वज्योत्स्नयेवेन्दुः सुवासाः सुष्ठ्वलंकृतः ॥ ३२ ॥ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः ॥ अनन्तस्याप्रमेयस्य मायामर्त्यस्य सन्ति हि ॥ ३३ ॥ योऽनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः ॥ सायं प्रातरनन्तस्य विष्णोः स दयितो भवेत् ॥३४॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे एकोनाशीतितमोऽध्यायः ॥७९॥ राजोवाच ॥ भगवन्यानि चान्यानि मुकुन्दस्य महात्मनः ॥ वीर्याण्यनन्तवीर्यस्य श्रोतुमिच्छामहे प्रभो ॥ १ ॥

साक्षात्कुर्युः ॥३१॥ स्वेति ॥ स्वपत्न्या रेवत्या सह अवभृथस्नातः कृतावभृथाख्यस्नानः सुवासाः सुष्ठु अलंकृतः ज्ञात्यादिभिर्वृतश्च रामः स्वज्योत्स्नया चन्द्र इव रेजे ॥३२॥ ईदृगिति ॥ बलेन शालते शोभते तस्य अनन्तस्य अप्रमेयस्य मायया मर्त्यरूपस्य बलस्य ईदृग्विधानि कर्म्माण्यसंख्यान्येव सन्ति ॥ ३३ ॥ य इति ॥ अद्भुतानि आश्चर्यकराणि कर्माणि यस्य तस्यानन्तस्य शेषावतारस्य रामस्य कर्माणि यः पुमान् सायं प्रातरनुस्मरेत् स भगवतो विष्णोर्दयितः प्रियो भवेत् ॥३४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकहीनाशीतितमे दशमे निरमादिमाम् ॥७९॥ अथाशीतितमे कृष्णः श्रीदामानं सुसत्कृतम् ॥ उवाच प्राक्कथां तत्र श्लोकाः सार्द्धाः शरर्ष्यः ॥ पञ्चोर्वाचेति पादोनाः सप्तवेदो अनुष्टुभः ॥ ८०॥ भगवन्निति ॥ हे भगवन् हे प्रभो अनन्तवीर्यस्य महात्मनः मुकुन्दस्य यानि चान्यानि वीर्याणि प्रभावसूचकानि कर्माणि तानि वयं सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रोतुमिच्छाम प्रार्थने लोट्॥१॥को न्विति ॥ हे ब्रह्मन् उत्तमः श्लोको यस्य तस्य कृष्णस्य सत्कथाः कर्माणि काममार्गणैः विषयान्वेषणैर्विषण्णो विषादं प्राप्तः को नु विशेषज्ञो विवेकी असकृत् श्रुत्वापि विरमेत । तङार्षः ॥ २ ॥ सेति ॥ यया वाचा तस्य भगवतो गुणान् उपलक्षणतया कर्माणि नामानि च गृणीते पुरुषः कथयति तङार्षः । सैव वाक् सफला तस्यैव कर्मपरिचर्या यज्ञानुष्ठानादिरूपं कुरुत इति तथाभूतावेव करौ सफलावित्यर्थः । स्थिरेषु जङ्गमेषु चान्तरात्मतया वसन्तं भगवन्तमेव यत्स्मरेत्तदेव मनः सफलमित्यर्थः । यः तस्य पुण्यः पुण्यजनिकाः कथाः शृणोति स एव कर्णः श्रोत्रेन्द्रियं सफलः ॥ ३ ॥ शिर इति ॥ उभयं चराचरात्मकं तत्प्रतिमादिरूपं तद्भक्तरूपं चेति तस्यैव लिङ्गं शरीरमिति मत्वा यत् आनमेत् तदेव तु शिरः सफलमित्यर्थः । तदेव तस्य उभयलिङ्गमेव यत्पश्यति तदेव चक्षुः सफलं विष्णोरथवा तज्जनानां तद्भक्तानां पादोदकं नित्यं यानि नाभेरूर्ध्वम् अधोधारणनिषेधात् भजन्ति धारयन्ति तान्येवाङ्गानि सफलानि ॥४॥ विष्णुरातेनेति ॥ भगवति वासुदेवे निमग्नहृदयः भगवान् विष्णुरातेन परीक्षिता

को नु श्रुत्वा सकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः ॥ विरमेत विशेषज्ञो विषण्णः काममार्गणैः ॥२॥ सा वाग्यया तस्य गुणान्गृणीते करौ च तत्कर्मकरौ मनश्च ॥ स्मरेद्वसन्तं स्थिरजङ्गमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥ ३ ॥ शिरस्तु तस्योभयलिङ्गमानमेत्तदेव यत्पश्यति तद्धि चक्षुः ॥ अङ्गानि विष्णोरथ तज्जनानां पादोदकं यानि भजन्ति नित्यम् ॥४॥ सूत उवाच ॥ विष्णुरातेन संपृष्टो भगवान्बादरायणिः ॥ वासुदेवे भगवति निमग्नहृदयोऽब्रवीत् ॥५॥ श्रीशुक उवाच ॥ कृष्णस्यासीत्सखा कश्चिद्ब्राह्मणो ब्रह्मवित्तमः ॥ विरक्त इन्द्रियार्थेषु प्रशान्तात्मा जितेन्द्रियः ॥ ६ ॥ यदृच्छयोपपन्नेन वर्तमानो गृहाश्रमी ॥ तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा ॥ ७ ॥ पतिव्रता पतिं प्राह म्लायता वदनेन सा ॥ दरिद्रा सीदमाना सा वेपमानाभिगम्य च ॥ ८ ॥ ननु ब्रह्मन्भगवतः सखा साक्षाच्छ्रियः पतिः ॥ ब्रह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः ॥ ९ ॥

संपृष्टो बादरायणिः शुकोऽब्रवीत् ॥ ५ ॥ कृष्णस्येति युग्मम् ॥ ब्रह्मवित्तमः ब्रह्मविदां श्रेष्ठः इन्द्रियार्थेषु विषयेषु विरक्तः प्रशान्तात्मा जितेन्द्रियः यदृच्छयोपपन्नेन प्रारब्धवशात्प्राप्तेनान्नादिना वर्तमानो जीवन् तस्य प्रशान्तात्मत्वेऽपि परदृष्ट्या कष्टाधिक्यं गृहाश्रमी कश्चित् ब्राह्मणः कृष्णस्य सखा आसीत्।अस्य श्रीदामेति नाम "श्रीदामभक्तविप्रार्थं भूम्यानीतेन्द्रवैभवः ।" इति बृहद्विष्णुसहस्रनामस्तोत्रवचनात् कुत्सितं चैलं यस्य तस्य श्रीदाम्नः भार्या च तथाविधा तादृशगुणा यदृच्छालब्धमन्नं तस्मै परिविश्य स्वयं क्षुधा सा दुर्बला आसीत् ॥ ६ ॥ ७ ॥ पतिव्रतेति ॥ पतिव्रता सा चैकदा म्लायता शुष्यता वदनेनोपलक्षिता दरिद्रा वेपमाना दुर्बलतया कम्पमानाङ्गी सीदमाना भर्तृभोगसम्पादनाचिन्तयाकुलचित्ता शानजार्षः चानश् वा । सा एकदा दरिद्रं पतिमभिगम्य चाह ॥ ८ ॥ नन्विति ॥ हे ब्रह्मन् ननु भगवतस्तव सखा सात्वतर्षभः यादवश्रेष्ठः साक्षाच्छ्रियः पतिः ब्रह्मण्यः ब्राह्मणभक्तः शरण्यः शरणार्हः भगवान् अस्ति ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति सार्द्धम् ॥ हे महाभाग साधूनां परायणमाश्चर्यभूतं तं कृष्णमुपेहि। स च सीदते कुटुम्बिने ते तुभ्यं भूरि द्रविणं दास्यति स भोजवृष्ण्यन्धकेश्वरः कृष्णोऽधुना द्वारवत्यामेवास्ते ॥ १० ॥ स्मरत इति ॥ स्वपादकमलं स्मरतः पुरुषस्य परमानन्दरूपमात्मानमपि यच्छति तर्हि जगद्गुरुः सः भजतो जनस्य नात्यभीष्टान् अतितुच्छान् अर्थकामान्ददातीति किन्नु वक्तव्यम् । स्मरतो भजत इति चतुर्थ्यर्थे षष्ठ्यौ ॥११॥ स इति सार्द्धम् ॥ स विप्रो भार्यया एवं बहुशो बहुप्रकारेण मृदु कोमलोक्त्या प्रार्थितः सन् अयं हीत्यादि संचिन्त्य गमनाय मतिं दधे स्पष्टं शेषम् ॥१२॥ अपीति अर्द्धम् ॥ हे कल्याणि अपि यदि गृहे किंचिदुपायनं भगवत्समर्पणयोग्यं वस्त्वस्ति तर्हि दीयताम्॥ १३॥याचित्वेति ॥ इत्युक्ता सा चतुरो मुष्टीन् पृथुकतण्डुलान् धान्यचिपिटान् विप्रान् प्रतिवेश्यादिविप्रेभ्यो याचित्वा याचिर्द्विकर्मकः तावतैव चतुर्वर्गसिद्धे न्यूनाधिकवैयर्थ्यात् तांश्च चैलखण्डेन बध्वा भर्त्रे उपायनं प्रादात् ॥ १४ ॥ स इति ॥ स विप्राग्र्यः तान् पृथुकतण्डुलानादाय कृष्णसंदर्शनं मह्यं मम कथं स्यादिति चिन्तयन् किल द्वारकां प्रययौ ॥ १५ ॥ त्रीणि

तमुपेहि महाभाग साधूनां च परायणम् ॥ दास्यति द्रविणं भूरि सीदते ते कुटुम्बिने ॥ आस्तेऽधुना द्वारवत्यां भोजवृष्ण्यन्धकेश्वरः ॥ १० ॥
स्मरतः पादकमलमात्मानमपि यच्छति ॥ किं त्वर्थकामान्भजते नात्यभीष्टाञ्जगद्गुरुः ॥११॥ स एवं भार्यया विप्रो बहुशः प्रार्थितो मृदु ॥ अयं
हि परमो लाभ उत्तमश्लोकदर्शनम् ॥ इति संचिन्त्य मनसा गमनाय मतिं दधे ॥१२॥ अप्यस्त्युपायनं किंचिद्गृहे कल्याणि दीयताम् ॥ १३ ॥
याचित्वा चतुरो मुष्टीन्विप्रान्पृथुकतण्डुलान् ॥ चैलखण्डेन तान्बद्ध्वा भर्त्रे प्रादादुपायनम् ॥१४॥ स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल ॥
कृष्णसंदर्शनं मह्यं कथं स्यादिति चिन्तयन् ॥ १५ ॥ त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च स द्विजः ॥ १६ ॥ विप्रोऽगम्यान्धवृष्णीनां गृहेष्वच्युतधर्मिणाम् ॥ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः ॥ विवेशैकतमं श्रीमद्ब्रह्मानन्दं गतो यथा ॥ १७ ॥

इत्यर्द्धम् ॥ स द्विजः श्रीदामा त्रीणि गुल्मानि अन्तःपुरबहिर्द्वारे रक्षासैन्यानि तथा तिस्रः कक्षाः प्रतोलीश्च पुरान्तर्द्वारदीर्घगृहप्रकोष्ठानिति चक्रवर्ती । अतीयाय अतिक्रान्तवान् । "नवद्विपं नवरथं सप्तविंशतिसप्तिकम् । गुल्मैतज्ज्ञैः स्मृतं पञ्चचत्वारिंशत्पदातिकम् ॥" अत्र त्रीणि इत्यादि सर्वं श्लोकं योजयतां मते तु स द्विजः तत्रत्यद्विजैः सहितः विप्र इत्यन्वयः॥१६॥विप्र इति सार्द्धम् ॥ विप्रः श्रीदामा अच्युतस्यैव धर्मः आराधनम् अच्युतस्य इव धर्मो ब्रह्मण्यतादिर्विद्यते येषामिति वा तेषाम् अगम्यानां दुर्गमानामन्धानामन्धकानां वृष्णीनां च गृहेषु तद्गृहनिकटे हरेर्द्व्यष्टसहस्राणां महिषीणां गृहेषु मध्ये श्रीमदेकतमं मुख्यं श्रीरुक्मिणीगृहं विवेश । तथा च पाद्मोत्तरखण्डगद्यम् । "स तु रुक्मिण्यन्तःपुरद्वारि क्षणं तूर्ष्णीं स्थितः" इत्यादि । तदा च स द्विजो ब्रह्मानन्दं गतो यथा भवति तथा बभूवेति शेषः । अन्वयभेदाद् द्विज इत्यस्य न पुनरुक्तिदोषः ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तं ब्राह्मणं दूरादेव विलोक्य प्रियायाः पर्यङ्कमास्थितः अच्युतः सहसा झटित्युत्थायाभ्येत्य प्राङ्गणमागत्य च मुदा हर्षेण दोर्भ्यां पर्यग्रहीत् आलिङ्गितवान्॥१८॥ सख्युरिति ॥ प्रियस्य सख्युः विप्रर्षेस्तस्याङ्गसङ्गेनालिङ्गनेनातीव निर्वृतः आनन्दितः प्रीतः प्रीतियुक्तश्च पुष्करेक्षणः कृष्णः नेत्राभ्यामब्बिन्दून् आनन्दाश्रुबिन्दून् अमुञ्चत् ॥ १९ ॥ अथेति सार्द्धम् ॥ हे राजन् अनन्तरं लोकपावनोऽपि भगवान् तं स्वपर्यङ्के उपवेश्य समर्हणं पूजासाधनमुपहृत्यानीय स्वयमेवास्य सख्युः पादाववनिज्य प्रक्षाल्य पादावनेजनीरपः पादक्षालनजलानि शिरसा अग्रहीत् दधार ॥ २० ॥ व्यलिम्पदित्यर्द्धम् ॥ चन्दनादिभिः साधितेन दिव्यगन्धेन तं व्यलिम्पत् ॥ २१ ॥ धूपैरिति ॥ मुदा धूपादिभिस्तं मित्रमर्चित्वा ताम्बूलं गां धेनुं च निवेद्य स्वागतमब्रवीत् पप्रच्छ । धूपैरित्यतः पुष्पाण्यूह्यानि मधुपर्कपूजोत्तरं स्नपनपूर्वकं परमान्नादिभोजनं ज्ञेयम् ॥२२ ॥ कुचैलमिति ॥ कुचैलमिति वस्त्रप्रदानं व्यज्यते । मलिनं धमनीभिः शिराभिः सन्ततं व्याप्तं तत्र हेतुमाह क्षामं दुर्बलमिति द्विजं चामरव्यजनेन साक्षान्मुख्या देवी रुक्मिणी

तं विलोक्याच्युतो दूरात्प्रियापर्यङ्कमास्थितः ॥ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा ॥ १८॥ सख्युः प्रियस्य विप्रर्षेरङ्गसङ्गातिनिर्वृतः॥ प्रीतो व्यमुञ्चदब्बिन्दून्नेत्राभ्यां पुष्करेक्षणः ॥ १९ ॥ अथोपविश्य पर्यङ्के स्वयं सख्युः समर्हणम् ॥ उपहृत्यावनिज्यास्य पादौ पादावनेजनीः॥ अग्रहीच्छिरसा राजन्भगवांल्लोकपावनः ॥ २० ॥ व्यलिम्पद्दिव्यगन्धेन चन्दनागुरुकुङ्कुमैः ॥ २१ ॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा ॥ अर्चित्वाऽऽवेद्य ताम्बूलं गां च स्वागतमब्रवीत् ॥२२॥ कुचैलं मलिनं क्षामं द्विजं धमनिसंततम् ॥ देवी पर्यचरच्छैब्या चामरव्यजनेन वै॥२३॥ अन्तःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना ॥ विस्मितोऽभूदतिप्रीत्या अवधूतं सभाजितम् ॥२४॥ किमनेन कृतं पुण्यमवधूतेन भिक्षुणा ॥ श्रिया हीनेन लोकेऽस्मिन्गर्हितेनाधमेन च ॥२५॥ योऽसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः ॥ पर्यङ्कस्थां श्रियं हित्वा परिष्वक्तोऽग्रजो यथा ॥२६॥ कथयाञ्चक्रतुर्गाथाः पूर्वा गुरुकुले सतोः ॥ आत्मनोर्ललिता राजन्करौ गृह्य परस्परम् ॥ २७ ॥

पर्यचरत् वीजयामास । अत्र यदि देवी पर्यचरच्छैब्या इति पाठस्तदा शैब्या लक्ष्मणा रुक्मिणीगृहं कार्यवशादागता इति व्याख्येयम् । पद्योत्तरस्वारस्यात् ॥ २३ ॥ अन्तःपुरेति ॥ अवधूतं मलिनं तम् अमला कीर्तिर्यस्य तेन कृष्णेन अतिप्रीत्या सभाजितं सम्यक् पूजितं दृष्ट्वा अन्तःपुरजनो विस्मितोऽभूत् ॥ २४ ॥ किमिति युग्मम् ॥ योऽसौ त्रिलोकगुरुणा श्रीनिवासेन कृष्णेन पर्यङ्कस्थां श्रियं हित्वा अग्रजो यथा परिष्वक्तः आलिङ्गितः संभृतः संमानितश्च तेन अनेन अवधूतेन मलिनेन भिक्षुणा श्रिया हीनेन दरिद्रेण अस्मिन्लोके गर्हितेन अधमेन नीचवत्प्रतीयमानेन किं पुण्यं कृतम् ॥ २५ ॥ २६ ॥ कथयांचक्रतुरिति ॥ हे राजन् श्रीदामकृष्णौ पुरा गुरुकुले तद्गृहे सतोर्वर्तमानयोरात्मनोर्या ललिता मनोहरा गाथाः कथास्ताः परस्परं करौ गृह्य ल्यबार्षः कथयांचक्रतुः । एतेन मध्ये मध्ये श्रीदामवाक्यमपि ज्ञेयम् ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपीति ॥ हे ब्रह्मन् हे धर्मज्ञ लब्धा दक्षिणा येन तस्मात् गुरुकुलात् समावृत्तेन आगत्य कृतसमावर्तनाख्यकर्मणा भवता अपि किं सदृशी स्वयोग्या भार्या ऊढा परिणीता न वा गृहस्थलिङ्गदर्शनात् भोगादर्शनाच्च संशयादिव प्रश्नः॥२८॥ अप्रतिषेधादुद्वाहमनुमतं मत्वाह—प्राय इति ॥ हे विद्वन् तथा अन्यवत् गृहेषु वर्त्तमानस्यापि ते चित्तं प्रायःकामैर्विषयैर्विहतम् आकृष्टं न भवति इत्यकामविहतम् इति मे विदितम्। कामैर्विहन्तुमशक्यमिति वा अतः धनेषु वस्त्रादिषु त्वं नैवातिप्रीयसे अतिशयप्रीतियुक्तो नैव भवसीति विदुषस्तवैतद्युक्तमिति भावः । एतच्च गृहस्थोप्ययमतिनिस्पृहो न कामयते बलाद्दत्तमपि न गृह्णातीति द्वारकायां तद्गौरवख्यापनार्थमेव तस्य सकामत्वमप्रकटीकृतवान् नापि किंचिद्दत्तवान् इति ज्ञेयम् ॥ २९ ॥ केचिदिति ॥ कामैरहतचेतसोपि केचित् दैवीः देवस्य परमेश्वरस्य सृष्ट्यादिकर्तुरिमाः प्रकृतीः प्रकृतिकार्यभूता नानाविधवासनाः त्यजन्तः निराकर्तुं कर्माणि कुर्वन्ति यथाहं प्रयोजनान्तररहितोऽपि लोकसंग्रहार्थं कर्म करोमि तथा ॥ ३० ॥ कच्चिदिति ॥ हे ब्रह्मन् नौ आवयोः गुरुकुले वासो यस्मिंस्तं ब्रह्मचर्याश्रमव्रतवृत्तं तत्पुरुषो वा "शयवासवासिषु" इति सप्तम्यलुक् । कच्चित्स्मरसि यतो गुरुकुलवासाद्द्विजो विज्ञेयं ज्ञातव्यं धर्मादि विज्ञाय क्रमेण तमसः संसारस्य पारं मोक्षमश्नुते प्राप्नोति

श्रीभगवानुवाच ॥ अपि ब्रह्मन्गुरुकुलाद्भवता लब्धदक्षिणात् ॥ समावृत्तेन धर्मज्ञ भार्योढा सदृशी न वा ॥ २८ ॥ प्रायो गृहेषु ते चित्तमकामविहतं तथा ॥ नैवातिप्रीयसे विद्वन्धनेषु विदितं हि मे ॥ २९ ॥ केचित्कुर्वन्ति कर्माणि कामैरहतचेतसः ॥ त्यजन्तः प्रकृतीर्दैवीर्यथाऽहं लोकसंग्रहम् ॥ ३० ॥ कच्चिद्गुरुकुले वासं ब्रह्मन्स्मरसि नौ यतः ॥ द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ॥ ३१ ॥ स वै सत्कर्मणां साक्षाद्द्विजातेरिह संभवः ॥ आद्योऽङ्ग यत्राश्रमिणां यथाऽहं ज्ञानदो गुरुः ॥ ३२ ॥ नन्वर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ॥ ये मया गुरुणा वाचा तरन्त्यञ्जो भवार्णवम् ॥ ३३ ॥

॥ ३१ ॥ स इति ॥ अङ्ग हे मित्र इह संसारे यत्र संभवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यः द्विजातेः सतः पुंसः सत्कर्मणां यत्र संभवः उपनीय वेदाध्यापकः स द्वितीयो गुरुः यस्त्वाश्रमिणां सर्वेषामपि ज्ञानप्रदः सतु साक्षाद्यथाऽहं गुरुस्तथा गुरुतया संपूज्य इत्यर्थः । यद्वा । यत्र संभवो जन्म सोऽपि आद्यो गुरुः यत्र सत्कर्मणां सम्भवः स वेदाध्यापको गुरुर्यथाहमीश्वरस्तथा पूज्यः ज्ञानदो गुरुस्तु साक्षादहं वै अहमेवेति शेषं प्राग्वत् इति श्रीस्वामिपादादिभिर्गुरुत्रयपरतया व्याख्यातम् । यद्वा । स पूर्वोक्तो गुरुकुले वासो ब्रह्मचर्याश्रमः द्विजातेः सत्कर्मणां च साक्षात् आद्यो मुख्यः सम्भवः । गर्भनिस्सरणं तु शूद्रसाधारणम् । यत्र गुरुकुलवासे आश्रमिणां तत्तदुचितज्ञानप्रदः गुरुः आचार्यः यथाहं तथा तत्तुल्यतया पूज्यः यद्वा सन्ति श्रेष्ठानि कर्माणि येषां तेषाम् आश्रमिणाम् इति ॥ ३२ ॥ नन्विति ॥ हे ब्रह्मन् इह लोके ये मया गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेण अञ्जः सुखेन संसाररूपं महार्णवं तरन्ति त एव सर्वेषां वर्णानामाश्रमिणां च मध्येऽर्थकोविदाः स्वपुरुषार्थे कुशलाः ननु एतेन ज्ञानप्रदाद्गुरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रधिकः सेव्यो नास्तीत्युक्तम् ॥ ३३ ॥ नाहमिति ॥ सर्वभूतानामात्माप्यहम् इज्या पञ्चमहायज्ञादिगृहस्थधर्मः प्रजातिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्म उपलक्ष्यते ताभ्यां तपसा अनशनादिना वनस्थधर्मेण उपशमेन इन्द्रियादिनिग्रहेण यतिधर्मेण चाहं तथा न तुष्येयं प्रीतः न स्यां यथा गुरुशुश्रूषया तुष्येयम् ॥ ३४ ॥ अपीति ॥ हे ब्रह्मन् गुरौ गुरुसमीपे निवसतां क्वचित् कदाचित् इन्धनानयनार्थं गुरुदारैश्चोदितानां नोऽस्माकं च वृत्तं किंचिद्गुरुशुश्रूषणं भाग्यात्सम्पन्नं नन्विति त्वया स्मर्यते । बहुत्वं रामाद्यपेक्षया ॥ ३५ ॥ प्रविष्टानामिति ॥ महारण्यं प्रविष्टानां सताम् अपर्तौ वर्षाकालेऽतीते शीतकाले इत्यर्थः । हे द्विज सुमहद्वातश्च वर्षं च तयोः समाहारः तीव्रं दुःसहमभूत् तथा निष्ठुरा दुःसहाः स्तनयित्नवो गर्जितवन्तो मेघाश्चाभवन् ॥ ३६ ॥ सूर्य इति ॥ तत्र सूर्यस्तावदस्तङ्गतः दिशश्च तमसा आवृताः सर्वं जलमयं जातम् अतः निम्नं कूलं नतमुन्नतं किञ्चनापि स्थानं न प्राज्ञायत ॥ ३७ ॥ वयमिति ॥ अम्बूनां संप्लवः प्रवाहो मिश्रणं वा यस्मिन् तत्र वने महद्भिरनिलैरम्बुभिश्च भृशम् अत्यन्तं

नाहमिज्याप्रजातिभ्यां तपसोपशमेन च ॥ तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ ३४ ॥ अपि नः स्मर्यते ब्रह्मन्वृत्तं निवसतां गुरौ ॥ गुरुदारैश्चोदितानामिन्धनानयने क्वचित् ॥ ३५ ॥ प्रविष्टानां महारण्यमपर्तौ सुमहद्द्विज ॥ वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ॥ ३६ ॥ सूर्यश्चास्तंगतस्तावत्तमसा चावृता दिशः ॥ निम्नं कूलं जलमयं न प्राज्ञायत किंचन ॥३७॥ वयं भृशं तत्र महानिलाम्बुभिर्निहन्यमाना मुहुरम्बुसंप्लवे ॥ दिशोऽविदन्तोऽथ परस्परं वने गृहीतहस्ताः परिबभ्रिमातुराः ॥ ३८ ॥ एतद्विदित्वा उदिते रवौ सान्दीपनिर्गुरुः ॥ अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान् ॥ ३९ ॥ अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः ॥ आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ॥ ४० ॥ एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतम् ॥ यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ॥ ४१ ॥

निहन्यमानाः सम्पीड्यमानाः दिशोऽविदन्तः अत एवातुरा व्याकुलचित्ताः अथ अत एव परस्परं गृहीतहस्ताः मुहुः परिबभ्रिम बभ्रमिम भ्रमेरिट्लोप आर्षः ॥ ३८ ॥ एतदिति ॥ एतत् इन्धनार्थमस्मद्गमनं विदित्वा रवौ सूर्ये उदिते सति आचार्यः सान्दीपनिर्गुरुर्नोऽस्मान् शिष्यान् अन्वेषमाणः एष्टुं गतौ । अथातुरान् अपश्यत् "उपनीय तु यः शिष्यान् वेदानध्यापयेद्द्विजः । सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते ॥" ॥३९॥ दृष्ट्वा चाह—अहो इति ॥ हे पुत्रका यूयमस्मत्प्रयोजनायातिदुःखिताः वै इति निश्चये प्राणिनामात्मा स्वदेहः सर्वतः प्रेष्ठस्तमनादृत्य यूयं मत्पराः मत्सेवारताः ॥ ४० ॥ एतदिति ॥ सच्छिष्यैः गुरोर्निष्कृतम् उपकारः एतदेव कर्तव्यं किं तदाह यद्विशुद्धेन भावेन भक्त्या यथोचितसर्वपदार्थस्यात्मनो देहस्य च गुरावर्पणं तदर्थे विनियोगः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्ट इति ॥ हे द्विजश्रेष्ठा अहं युष्मभ्यं तुष्टः अतः युष्माकं मनोरथाः अपेक्षाः सत्याः सफलाः सन्तु । युष्माभिरधीतानि च्छन्दांसि वेदा इह परत्र चायातयामानि यातो यामो यस्य पक्वान्नस्य तद्गतसारं भवति गौण्या वृत्त्या अन्यदपि गतसारं यातयाममुच्यते । "जीर्णं च परिभुक्तं च यातयाममिदं द्वयम् ।" इत्यमरः । न यातयामानि न जीर्णानि अविस्मृतानि चेति आगतसाराणि इहामुष्मिकापेक्षितफलजननसमर्थानि भवन्तु ॥ ४२ ॥ इत्थमिति ॥ गुरुगृहेषु वसतामेवंविधानि बहूनि वृत्तानि तानि किं त्वया स्मर्यन्त इति शेषः । किं बहुना गुरोरनुग्रहेणैव पुमानिह पूर्णः पूर्णकामः सन् प्रशान्तये संसारदुःखनिवृत्तये मुक्तये समर्थो भवतीति शेषः ॥ ४३ ॥ संक्षेपतः सर्वोत्तरमाह—किमिति॥ हे देवदेव हे जगद्गुरो येषामस्माकं सत्यकामेन भवता सह गुरुसमीपे वासोऽभूत् तैरस्माभिः किं फलमनिर्वृत्तम् अप्राप्तं भगवता पृष्टमपृष्टं वा सर्वं संपन्नम् ॥ ४४ ॥ यस्येति ॥ हे विभो श्रेयसां धर्मादिफलानामावपनम् उत्पत्तिभूमिः छन्दोमयं वेदात्मकं ब्रह्म यस्य देहस्तस्य तव गुरुषु वासोऽत्यन्तविडम्बनम् । अस्मदादिशिक्षा-

तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः सन्तु मनोरथाः ॥ छन्दांस्ययातयामानि भवन्त्विह परत्र च ॥ ४२ ॥ इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु ॥ गुरोरनुग्रहेणैव पुमान्पूर्णः प्रशान्तये ॥ ४३ ॥ ब्राह्मण उवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो ॥ भवता सत्यकामेन येषां वासो गुराव-भूत् ॥ ४४ ॥ यस्य च्छन्दोमयं ब्रह्म देह आवपनं विभो ॥ श्रेयसां तस्य गुरुषु वासोऽत्यन्तविडम्बनम् ॥ ४५ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे अशीतितमोऽध्यायः ॥ ८० ॥ श्रीशुक उवाच ॥ स इत्थं द्विजमुख्येन सह संकथयन्हरिः ॥ सर्वभूतमयोऽभिज्ञः स्मयमान उवाच तम् ॥ १ ॥ ब्रह्मण्यो ब्राह्मणं कृष्णो भगवान्प्रहसन्प्रियम् ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलु सतां गतिः ॥ २ ॥ श्रीभगवानुवाच ॥ किमुपायनमानीतं ब्रह्मन्मे भवता गृहात् ॥ अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ॥ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ ३ ॥

र्थमत्यन्तानुकरणम् ॥ ४५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याशीतितमके व्यधात् ॥ ८० ॥ एकाशीतितमे सख्युस्तण्डुलान् भक्षयन् हरिः ॥ ददावलौकिकीमृद्धिं श्लोकाः सार्द्धाः कुर्वीर्द्वयः ॥ द्वे उवाचेत्यत्र चतुश्चत्वारिंशदनुष्टुभः ॥ ८१ ॥ स इति ॥ स हरिरित्थमुक्तप्रकारेण द्विजमुख्येन श्रीदाम्ना सह संकथयन् सुखगोष्ठीः कुर्वन् सर्वभूतानां मनसोऽभिज्ञः साक्षी भार्याप्रेरणया धनार्थमागतः मदर्थं पृथुकानानीय लज्जया न ददातीति तान् स्मयमानः प्रहसन् तं द्विजं प्रत्युवाच ॥१॥ ब्रह्मण्य इति॥ब्रह्मण्यः सतांगतिः आश्रयः भगवान् कृष्णः प्रहसन् स्वप्रसन्नतां सूचयन् प्रेम्णा युक्तेन निरीक्षणेन नेत्रेणैव प्रियं ब्राह्मणं प्रेक्षन् शतार्षः । उवाचेत्यनुषङ्गः ॥ २ ॥ किमिति सार्द्धम् ॥ हे ब्रह्मन् भवता गृहान्मे मह्यमुपायनं किमानीतं मद्भक्तैः प्रेम्णोपहृतं समर्पितमणु स्वल्पमपि मे भूर्येव भवेत् अभक्तेनानादरादुपहृतं तु भूरि बह्वपि मे सन्तोषाय न कल्पते न भवति ॥ ३ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्रमिति ॥ पत्रपुष्पादीनामन्यतममपि यः पुमान् भक्त्या मे मह्यं प्रयच्छति समर्पयति प्रयतो विशुद्ध आत्मा मनो यस्य तस्य तद्भक्त्या समर्पितमहमश्नामि प्रीत्या स्वीकरोमि ॥ ४ ॥ इतीति ॥ हे राजन् इत्युक्तोऽपि द्विजः श्रियः पतये तस्मै पृथुकप्रसृतिं न प्रायच्छत् न ददौ किंतु व्रीडितः सन्नवाङ्मुखो बभूव ॥ ५ ॥ सर्वेति ॥ तदा च साक्षात् सर्वभूतात्मदृक् अन्तःकरणसाक्षी भगवान् तस्यागमनकारणं विज्ञायात्मना यत्कर्तव्यं तदचिन्तयत् । अयं श्रीकामो धनार्थी सन् मा मां पुरा नाभजत् अतः पृथुकानानीयापि न ददाति नच किंचित् याचनं करोतीति भावः ॥ ६ ॥ पत्न्या इति ॥ अयं सखा पतिव्रतायाः पत्न्याः प्रियचिकीर्षया एव न धनार्थमयं मां प्राप्तः । पतिव्रताया इत्यनेन तस्या अप्येतत् प्रसादानुरोधेनैव सकामत्वम् । स्वतस्तु निस्पृहत्वमेव अतः अमर्त्यानां देवानामपि दुर्लभाः सम्पदो धनादिसमृद्धीरस्य दास्यामीति ॥ ७ ॥ इत्थमिति ॥ इत्थं सञ्चिन्त्य वस्त्रस्यातिजीर्णत्वात्तन्मध्ये चीरेण बद्धान् पृथुकतण्डुलान् इदं किमिति पृच्छन् तद्वसनात् स्वयमेव जहार ॥ ८ ॥ नन्विति ॥ अङ्ग हे सखे

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥४॥ इत्युक्तोऽपि द्विजस्तस्मै व्रीडितः पतये श्रियः ॥ पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः ॥ ५ ॥ सर्वभूतात्मदृक् साक्षात्तस्यागमनकारणम् ॥ विज्ञायाचिन्तयन्नायं श्रीकामो माऽभजत्पुरा ॥ ६ ॥ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्षया ॥ प्राप्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः ॥ ७ ॥ इत्थं विचिन्त्य वसनाच्चीरबद्धान्द्विजन्मनः ॥ स्वयं जहार किमिदमिति पृथुकतण्डुलान् ॥ ८ ॥ नन्वेतदुपनीतं मे परमप्रीणनं सखे ॥ तर्पयन्त्यङ्ग मां विश्वमेते पृथुकतण्डुलाः ॥ ९ ॥ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे ॥ तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः ॥ १० ॥ एतावताऽलं विश्वात्मन्सर्वसंपत्समृद्धये ॥ अस्मिँल्लोके तथाऽमुष्मिन्पुंसस्त्वत्तोषकारणम् ॥ ११ ॥

ननु निश्चितम् उपनीतमुपायनमेतत् पृथुकतण्डुलात्मकं मे मम परमं प्रीणनं तृप्तिकरं यतः एते पृथुकतण्डुला मां मदाश्रितं विश्वं च तर्पयन्ति तृप्तं कुर्वन्ति ॥ ९ ॥ इतीति ॥ इत्युक्त्वा सकृदेकां मुष्टिं जग्ध्वा द्वितीयां मुष्टिं जग्धुम् अत्तुमाददे तावत्तददनात्पूर्वमेव तत्परा भगवदेकनिष्ठा श्रीर्लक्ष्म्यंशभूता रुक्मिणी परमेष्ठिनः कृष्णस्य हस्तं जगृहे ॥ १० ॥ एतावतेति ॥ हे विश्वात्मन् त्वत्तोषस्य कारणं यथा भवति तथा पुंसस्त्वद्भक्तस्यास्मिन् अथवामुष्मिन् लोके सर्वासां सम्पदां समृद्धये यां भक्तसमृद्धिं दृष्ट्वा त्वं तुष्यसि तत एतावता एकमुष्ट्यदनमात्रेणैवालम् । अत्र महाकठोराः पृथुका भगवन्तं व्यथयिष्यन्तीति देव्याः स्वगताऽभिप्रायः स्वयमेव सर्वं भोक्ष्यसे तदाहं तव सख्युरुपायनात् स्वसखीभ्यः पुत्रादिभ्यश्च विभज्य किं दास्यामीति श्रीदामानं ज्ञापयामास । श्रीस्वामिपादास्तु प्राहुः । एतावता पुंस इहामुत्र च मत्कटाक्षविलासभूतानां समृद्धये अलम् । अतः परं द्वितीयमुष्ट्यदनेन मामपि तदधीनां मा कुरु इति । यद्वा । सर्वसम्पत्समृद्ध्यर्थं त्वत्तोष एव कारणं विसर्गलोपस्त्वार्षः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मण इति ॥ ब्राह्मणस्तु अच्युतस्य मन्दिरे स्वाद्वन्नं भुक्त्वा स्वादु पेयं च पीत्वा सुखं यथा स्यात्तथा तां रात्रिमुषित्वा चात्मानं स्वर्गतं स्वर्गवासिनमिव मेने ॥ १२ ॥ श्व इति ॥ हे तात ततः श्वोभूते सूर्ये उदिते सति विश्वभावेन सर्वप्रकारेण स्वसुखेन परमानन्देन भगवता पथ्यनुव्रज्य अनुगम्य गन्तव्यं पुनः कृपया शीघ्रमागन्तव्यमिति विनयोक्त्या नन्दितोऽभिवन्दितश्च स्वालयं स्वगृहं प्रति जगाम ॥ १३ ॥ स इति ॥ स च ब्राह्मणः कृष्णाद्धनमलब्ध्वापि स्वयं व्रीडितः कार्पण्येन लज्जितो न याचितवान् किंतु महतो भगवतो दर्शनेनैव निर्वृतः आनन्दितः स्वगृहान् प्रति आगच्छत् ॥ १४ ॥ अहो इति ॥ ब्रह्मण्यदेवस्य ब्राह्मणभक्तानां फलप्रदस्य कृष्णस्याहो आश्चर्यजनिका ब्रह्मण्यता ब्राह्मणकुले साधुता मया दृष्टा । यत् उरसि लक्ष्मीं बिभ्रतापि तेनाहं दरिद्रतमोऽपि आश्लिष्ट आलिङ्गित इति ॥ १५ ॥ क्वेति ॥ दरिद्रः पापीयान् दारिद्र्यानु-

ब्राह्मणस्तां तु रजनीमुषित्वाऽच्युतमन्दिरे ॥ भुक्त्वा पीत्वा सुखं मेन आत्मानं स्वर्गतं यथा ॥ १२ ॥ श्वोभूते विश्वभावेन स्वसुखेनाभिवन्दितः ॥ जगाम स्वालयं तात पथ्यनुव्रज्य नन्दितः ॥ १३ ॥ स चालब्ध्वा धनं कृष्णान्न तु याचितवान्स्वयम् ॥ स्वगृहान्व्रीडितोऽगच्छन्महद्दर्शननिर्वृतः ॥ १४ ॥ अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ॥ यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥ १५ ॥ क्वाहं दरिद्रः पापीयान्क्व कृष्णः श्रीनिकेतनः ॥ ब्रह्मबन्धुरिति स्माहं बाहुभ्यां परिरम्भितः ॥ १६ ॥ निवासितः प्रियाजुष्टे पर्यङ्के भ्रातरो यथा ॥ महिष्या वीजितः श्रान्तो वालव्यजनहस्तया ॥ १७ ॥ शुश्रूषया परमया पादसंवाहनादिभिः ॥ पूजितो देवदेवेन विप्रदेवेन देववत् ॥ १८ ॥ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदाम् ॥ सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम् ॥ १९ ॥ अधनोऽयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् ॥ इति कारुणिको नूनं धनं मे भूरि नाददात् ॥ २० ॥ इति तच्चिन्तयन्नन्तः प्राप्तो निजगृहान्तिकम् ॥ सूर्यानलेन्दुसंकाशैर्विमानैः सर्वतो वृतम् ॥ २१ ॥ विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः ॥ प्रोत्फुल्लकुमुदाम्भोजकह्लारोत्पलवारिभिः ॥ जुष्टं स्वलंकृतैः पुम्भिः स्त्रीभिश्च हरिणाक्षिभिः ॥ २२ ॥

मितपापातिशयवान् अहं क्व । श्रीनिकेतनः लक्ष्म्याश्रयः कृष्णश्च क्व । तथाप्ययं ब्रह्मबन्धुरिति मत्वा तेन बाहुभ्याम् अहं परिरम्भितः ॥ १६ ॥ निवासित इति ॥ अध्वनि श्रान्तोऽहं भ्रातरो यथा प्रियया जुष्टे सेविते पर्यङ्केहन्निवासितः उपवेशितः तथा वालव्यजनहस्तया महिष्या वीजितश्च ॥ १७ ॥ शुश्रूषयेति ॥ पादसंवाहनमादिर्येषां चन्दनलेपनादीनां तैः परमया शुश्रूषया देवानां देवेनाऽपि विप्रदेवेन ब्राह्मणशुश्रूषकेण कृष्णेन देववदहं पूजितः ॥ १८ ॥ स्वर्गेति ॥ यद्यपि पुंसां रसायां पाताले भुवि च सम्पदां सर्वासां सिद्धीनाम् अणिमादीनां च स्वर्गापवर्गयोः स्वर्गमोक्षयोश्च कारणं तस्य भगवतश्चरणार्चनमेव ॥ १९ ॥ अधन इति ॥ तथापि कारुणिकः कारुणिकत्वात् अधनोऽयं धनं प्राप्योच्चैर्माद्यन् गर्वितः सन्मां न स्मरेत् ततो भ्रश्येदित्यभिप्रेत्याऽभूरि स्वल्पमपि धनं मह्यं नाददात् ॥ २० ॥ इतीति सार्द्धयुग्मम् ॥ स्वान्तःकरणे इत्येवं संचिन्तयन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नतु स्फुटं वदन् सूर्यादिसंकाशैः तद्वद्दीप्यमानैर्विमानैः तत्सदृशगृहभेदैः सर्वतो वृतमिति कूजतां द्विजानां पक्षिणां कुलानि तैराकुलैर्व्याप्तैर्विचित्रैरुपवनैरुद्यानैश्च वृतं तथा प्रोत्फुल्लानि कुमुदादीनि येषु तैर्वारिभिर्जलैश्च जुष्टं युक्तं स्वलङ्कृतैः पुंभिः हरिणानामिवाक्षीणि यासां ताभिः स्त्रीभिश्च जुष्टं निजगृहस्य अन्तिकं समीपं प्राप्तः हरिणाक्षिभिरित्युभयविशेषणत्वान्न समासान्तः इति तोषणी । वस्तुतः " पुमान् स्त्रिया वा इत्यनेन हरिणाक्षैरिति भाव्यम् । अत्रैवं ज्ञेयं श्रीदाम्नो द्वारकावासरात्रौ स्वगृहे सुप्तायां तत्पत्न्यां सर्वस्थानं तद्रूपादिकं च दिव्यमभूत् । प्रातर्दिव्यदास्यादेरुक्त्या स्वभर्तृसङ्गतश्रीकृष्णदत्तं ज्ञात्वा विस्मितया पत्न्यागमनज्ञापका जनास्तन्मार्गे नियुक्ता इति ॥ २१ ॥ २२ ॥ किमिति सार्द्धकम् ॥ प्रथमं तेजःपुञ्जं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्य वेदं स्थानं स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमित्येवंरूपमभूत् । एवं मीमांसमानं विचारयन्तं महाभागं तं द्विजम् अमरप्रभा देवतुल्यकान्तयः नरा नार्यश्च भूयसा गीतवाद्येन प्रत्यगृह्णन् उपायनादिभिरादृतवन्तः इत्यनेन तत्पुरवासिनः सर्वे एव भगवता सर्वसंपद्भिः पूर्णा सुरूपाश्च कृता इति सूचितम् ॥ २३ ॥ २४ ॥ पतिमिति ॥ पतिमागतमाकर्ण्य श्रुत्वा उद्भूतेन हर्षेणातिसम्भ्रमो व्याकुलता यस्याः सा तत्पत्नी तूर्णम् आलयात्

किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् ॥२३॥ एवं मीमांसमानं तं नरा नार्योऽमरप्रभाः ॥ प्रत्यगृह्णन्महाभागं गीतवाद्येन भूयसा ॥२४॥ पतिमागतमाकर्ण्य पत्न्युद्धर्षाऽतिसंभ्रमा ॥ निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात् ॥ २५ ॥ पतिव्रता पतिं दृष्ट्वा प्रेमोत्कण्ठाऽश्रुलोचना ॥ मीलिताक्ष्यनमद्बुद्ध्या मनसा परिषस्वजे ॥ २६ ॥ पत्नीं वीक्ष्य विस्फुरन्तीं देवीं वैमानिकीमिव ॥ दासीनां निष्ककण्ठीनां मध्ये भान्तीं स विस्मितः ॥ २७ ॥ प्रीतः स्वयं तया युक्तः प्रविष्टो निजमन्दिरम् ॥ मणिस्तम्भशतोपेतं महेन्द्रभवनं यथा ॥ २८ ॥ पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः ॥ पर्यङ्का हेमदण्डानि चामरव्यजनानि च ॥ २९ ॥

कमलवनात् रूपिणी श्रीर्लक्ष्मीरिव तूर्णं शीघ्रं गृहान्निश्चक्राम । स्वर्गस्य तत्र भगवता आनीतत्वात् स्वर्गिणामिव वयो रूपं च बभूवेति भावः ॥२५॥ पतिव्रतेति ॥ पतिं दृष्ट्वा प्रेम्ण उत्कण्ठावृद्धिः तया अश्रूणि आनन्दजलबिन्दवो लोचनयोर्यस्याः सा तथाप्यश्रुपातेनास्यापशकुनं मा भूदित्याशयेन मीलिते अक्षिणी यया सा पतिव्रता पतिं दृष्ट्वा अयमेव वन्द्य इति बुद्ध्या निश्चयेन अनमत् मनसा च परिषस्वजे आलिङ्गितवती ॥ २६ ॥ पत्नीमिति ॥ स ब्राह्मणः वैमानिकीं विमानारूढां देवीं देवस्त्रियमिव विस्फुरन्तीं दीप्यमानां निष्कः पदकाख्यभूषणं कण्ठे यासां तासां दासीनां मध्ये अधिकतया भान्तीं शोभमानां पत्नीं वीक्ष्य विस्मितः ॥ २७ ॥ प्रीत इति ॥ प्रीतश्च तया पत्न्या युक्तः स्वयं सः मणीनां स्तम्भशतेनोपेतं युक्तं किं बहुना महेन्द्रस्य भवनं यथा शोभते तथा शोभमानं निजमन्दिरं प्रविष्टः ॥ २८ ॥ पय इति ॥ यत्र मन्दिरे दान्ता हस्तिदन्तनिर्मिताः पयःफेननिभाः दुग्धफेनवन्मृदुलशुभ्रास्तरणयुक्ताः रुक्ममयाः परिच्छदाः पत्रकीलादयो यासां ताः शय्याः सन्तीति सर्वत्र क्रियाशेषः । रुक्ममयाः परिच्छदा येषां ते दान्ताः पर्यङ्काश्च हेममयो दण्डो येषां तानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चामरव्यजनानि सन्ति ॥ २९ ॥ आसनानीति ॥ यत्र मृदूनि तूलादिमयानि उपस्तरणानि येषु तानि हैमानि सुवर्णमयानि आसनानि च मुक्तादाम्नां विलम्बा येषु सन्तीति तथाभूतानि अत एव द्युमन्ति कान्तियुक्तानि च वितानानि सन्ति ॥ ३० ॥ स्वच्छेति ॥ महान्तो मरकता इन्द्रनीलमणयो येषु स्वच्छेषु स्फटिकमयकुड्येषु रत्नान्येव दीपाश्च तथाभूतैः संयुक्ता अत एव भ्राजमाना ललना उत्तमस्त्रियश्च सन्ति ॥ ३१ ॥ विलोक्येति ॥ तत्र भवने एवं सर्वसम्पदां समृद्धिं विलोक्य निर्व्यग्रः सावधानचित्तो ब्राह्मणः अहैतुकीम् आकस्मिकीं स्वस्य समृद्धिं तर्कयामास । कुत एषा समृद्धिरागतेति चिन्तितवानित्यर्थः ॥ ३२ ॥ निश्चिनोति—नूनमिति ॥ बताश्चर्ये नूनं दुर्भगस्य भाग्यहीनस्य शश्वत्सर्वदा दरिद्रस्य एष चासावहं च तस्य मम समृद्धिहेतुर्महाविभूतेः यदूत्तमस्य श्रीकृष्णस्यावलोकतः कृपादृष्टेरन्यो नैवोपपद्येत नैव संभाव्येतेति नूनं निश्चितमेव । सर्वं तत्कृपादृष्ट्यैव जातम् ॥ ३३ ॥ नन्विति ॥ भूरिभोजः बहुभोगवान् लक्ष्मीपतित्वात् आप्तकामत्वाच्च मे मम सखा दाशार्हकाणामृषभः श्रेष्ठः श्रीकृष्णः स्वयं तद्देयमिन्द्रा-

आसनानि च हैमानि मृदूपस्तरणानि च ॥ मुक्तादामविलम्बीनि वितानानि द्युमन्ति च ॥ ३० ॥ स्वच्छस्फटिककुड्येषु महामारकतेषु च ॥ रत्नदीपान्भ्राजमानाँल्ललनारत्नसंयुतान् ॥ ३१ ॥ विलोक्य ब्राह्मणस्तत्र समृद्धिं सर्वसंपदाम् ॥ तर्कयामास निर्व्यग्रः स्वसमृद्धिमहैतुकीम् ॥३२॥ नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः ॥ महाविभूतेरवलोकतोऽन्यो नैवोपपद्येत यदूत्तमस्य ॥३३॥ नन्वब्रुवाणो दिशतेऽसमक्षं याचिष्णवे भूर्यपि भूरिभोजः ॥ पर्जन्यवत्तत्स्वयमीक्षमाणो दाशार्हकाणामृषभः सखा मे ॥ ३४ ॥ किञ्चित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी ॥ मयोपनीतां पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो महात्मा ॥ ३५ ॥ तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि जन्मनि स्यात् ॥ महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसङ्गः ॥ ३६ ॥

दिवैभवमपि पर्जन्यवत् पर्जन्य इव ईक्षमाणः अतितुच्छं मन्वानः श्रीकृष्णोऽपि स्वभोगापेक्षया तद्देयमिन्द्रादिपदमप्यतितुच्छम्मन्वानस्तस्य च भजनं बहु मन्यमानः समक्षमब्रुवाण एव दिशति । यद्वा । मम सखा असौ असमक्षं याचिष्णवे साक्षादयाचकाय गूढेच्छायुक्ताय अब्रुवाणोऽपि असमक्षमपि भूर्यपि ददातीत्यन्वयः । याचिष्णवे याचकाय समक्षमब्रुवाण एव भूरि अपि बह्वपि दिशते ददाति । यथा समुद्रपूरकोऽतिवदान्यः पर्जन्यः कदाचित् बह्वपि वर्षमल्पमेव मन्यमानो लज्जयेव समक्षमवर्षन् यथा कर्षके रात्रौ शयान एव तत्क्षेत्रमाप्लावयति तथा ॥ ३४ ॥ किंचिदिति ॥ यत्र उरु बह्वपि स्वदत्तमैश्वर्यादि किंचित्करोति स्वल्पं मन्यते । सुष्ठु प्रेमयुक्तं हृत् हृदयं यस्य तेन भक्तेन कृतं भजनं फल्गु स्वल्पमपि भूरिकारि बहु करोतीति तथा सः यतः स महात्मा उदारचित्तः मयोपनीतं पृथुकैकमुष्टिं प्रीतियुक्तः प्रत्यग्रहीत् ॥ ३५ ॥ तस्येति ॥ गुणालयेन ऐश्वर्यादिगुणसम्पन्नेन महानुभावेन श्रीकृष्णेनैव प्रेरितस्य विषज्जतः विशेषेण सङ्गं प्राप्नुवतो मम जन्मनि जन्मनि तस्यैव सौहृदादिकं तस्य पुरुषाणां भक्तानां

Nepal Sanskrit University, Baliwada Collection

CC-0. In Public Domain. Digitization by eGangotri

प्रकृष्टसङ्गश्च स्यादित्यन्वयः । तत्र सौहृदं प्रेम सख्यं विश्वासः मैत्री उपकाराशंसनं दास्यं सेवकत्वं च तत्समाहारैकवचनम् ॥ ३६ ॥ ननु तव भक्तिरस्त्येव तत्फलं च सम्पात्तिर्जातेत्याशङ्क्य नास्ति मे भक्तिर्नापि तत्फलं सम्पदित्याह–भक्तायेति ॥ स्वयं विचक्षणः अजः भगवान् धनिनां धनमदेन उद्भवो जन्म यस्य तं नरकादौ निपातं पश्यन् अदीर्घबोधाय अविवेकिने मादृशाय भक्ताय चित्राः सम्पदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रपौत्रादीन् न समर्थयति न प्रयच्छति अपि तु दृढां भक्तिमेव । मम तु भक्त्यभावात्समृद्ध्यादिजातम् अतो भक्तिरेव भवतु समर्थयति इत्यत्र अर्थयतेर्हेतुमण्णिच् । समर्द्धयतीति पाठे ऋध्यतेः ऋध्नोतेर्वा णिच् । उभयथा दानमेव पर्यवसितोऽर्थः ॥३७॥इत्थमिति ॥ बुद्ध्या इत्थं व्यवसितः कृतनिश्चयः तत्र हेतुः जनार्दने अतीव भक्तः अत एव विषयान् त्यक्ष्यन् विषयत्यागमभ्यसन् अत एव नातिलम्पटः तेष्वत्यासक्तिरहितो जायया सह तान् बुभुजे ॥ ३८ ॥ कृष्णस्य ब्रह्मण्यता नातिचित्रम् इत्याह–तस्येति ॥ देवानां देवस्य यज्ञपतेः प्रभोः तस्य हरेर्ब्राह्मणा एव प्रभवः स्वामिनः

भक्ताय चित्रा भगवान्हि संपदो राज्यं विभूतीर्न समर्धयत्यजः ॥ अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं धनिनां मदोद्भवम् ॥ ३७ ॥ इत्थं व्यवसितो बुद्ध्या भक्तोऽतीव जनार्दने ॥ विषयाञ्जायया त्यक्ष्यन् बुभुजे नातिलम्पटः ॥३८॥ तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः ॥ ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परम् ॥३९॥ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यैरजितं पराजितम् ॥ तद्ध्यानवेगोद्ग्रथितात्मबन्धनस्तद्धाम लेभेऽचिरतः सतां गतिम् ॥ ४० ॥ एतद्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः ॥ लब्धभावो भगवति कर्मबन्धाद्विमुच्यते ॥ ४१ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे एकाशीतितमोऽध्यायः ॥ ८१ ॥ श्रीशुक उवाच ॥ अथैकदा द्वारवत्यां वसतो रामकृष्णयोः ॥ सूर्योपरागः सुमहानासीत्कल्पक्षये यथा ॥ १ ॥

दैवं च तेभ्यः परमुत्कृष्टमन्यत्र विद्यते इति ॥ ३९ ॥ एवमिति ॥ भगवतः सुहृत् भक्तः स विप्रः अन्यैरपराजितमपि भगवन्तमेवं स्ववृत्तान्तेन तदा स्वभृत्यैः पराजितं वशीकृतं दृष्ट्वा तस्यैव ध्यानवेगेनोद्ग्रथितमुन्मोचितमात्मनः स्वस्य बन्धनमहंकारो यस्य सः अविरत एव सतां गतिं प्राप्यं तस्य धाम वैकुण्ठाख्यं स्थानं लेभे प्राप्तवान् । गतिमित्यजहल्लिङ्गं धामविशेषणम् ॥ ४० ॥ एतदिति ॥ ब्रह्मण्यदेवस्य श्रीकृष्णस्यैतत् सुदाम्ने सम्पत्प्रतिपादनं ब्रह्मण्यतां ब्राह्मणभक्तिं च श्रुत्वा भगवति तस्मिन् लब्धो भावो भक्तिर्येन तथाभूतः सन्नरः कर्मरूपाद्बन्धाद्विमुच्यते ॥४१॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमस्यैकाशीतितमे व्यधात् ॥ ८१ ॥ द्व्यशीतितमके सूर्यग्रहे राज्ञामभून्मिथः ॥ कुरुक्षेत्रे कृष्णकथा तत्र श्लोका नवाब्धयः ॥ सत्तोवाँचेति पादोनाश्चतुर्वाणा अनुष्टुभः ॥८२॥ अथेति ॥ एकदा युधिष्ठिरराजसूयात्पूर्वं रामव्रजागमनादूर्ध्वं कदाचिन्मथुरां त्यक्त्वा रामकृष्णयोर्द्वारकायां वसतोः सतोः कल्पक्षये कल्पावसाने यथा भवति तथा सुमहान् सर्वग्रासात्मकः सूर्योपरागः सूर्यग्रहणमासीत् ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ हे राजन् तं सूर्योपरागं ज्योतिर्विद्भिः कथ्यमानं ज्ञात्वा पुरस्तात् ततः पूर्वत एव सर्वदेशतो मनुजाः श्रेयोविधित्सया पुण्यार्जनेच्छया स्यमन्तपञ्चकं नाम कुरुक्षेत्रं ययुः ॥२॥ क्षेत्रस्य पापनाशकत्वमाह–निःक्षत्रियामिति ॥ शस्त्रभृतां वरः रामः भार्गवः महीं निःक्षत्रियां कुर्वन् यत्र पापिनां नृपाणां रुधिरौघेण रुधिरधारया महाह्रदान् चक्रे ॥ ३ ॥ ईजे इति ॥ कर्मणा नृपवधप्रयुक्तपापेन अस्पृष्टः अपि भगवान् ईशः रामो लोकस्य ग्राहयन् अन्येऽप्येवं कुर्युरिति शिक्षयितुं यथान्यः प्राकृतपुरुष इव अघापनुत्तये पापविनाशाय यत्र क्षेत्रे ईजे च तत्क्षेत्रं ययुरिति पूर्वेण संबन्धः ॥ ४ ॥ महत्यामिति सार्द्धम् ॥ महत्याम् अतिशयितपुण्यावहायां तीर्थयात्रायां तत्र क्षेत्रे भारतीः भारत्यः भारतवर्षस्थाः पूर्वसवर्णदीर्घ आर्षः । प्रजाः अगन् जग्मुः मलोप आर्षः उपोतोक्तरीत्या वा साध्यम् । तथा अक्रूरादयो वृष्णयश्च स्वं स्वकीयमघं क्षपयिष्णवः निरसितुमिच्छवस्तत् क्षेत्रं ययुः ॥ ५ ॥ गदेति ॥ गदप्रद्युम्नसाम्बाद्याः सुचन्द्राद्याश्च तत् क्षेत्रं ययुः । तथा अनिरुद्धः यूथपः सेनानीः कृतवर्मा च रक्षायां निमित्तभूतायां द्वारकायामास्ते

तं ज्ञात्वा मनुजा राजन्पुरस्तादेव सर्वतः ॥ स्यमन्तपञ्चकं क्षेत्रं ययुः श्रेयोविधित्सया ॥ २ ॥ निःक्षत्रियां महीं कुर्वन्रामः शस्त्रभृतां वरः ॥ नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदान् ॥ ३ ॥ ईजे च भगवान्रामो यत्रास्पृष्टोऽपि कर्मणा ॥ लोकस्य ग्राहयन्नीशो यथाऽन्योऽघापनुत्तये ॥४॥ महत्यां तीर्थयात्रायां तत्राऽगन्भारतीः प्रजाः ॥ वृष्णयश्च तथाऽक्रूरवसुदेवाहुकादयः ॥ ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः ॥ ५ ॥ गदप्रद्युम्नसाम्बाद्याः सुचन्द्रशुकसारणाः ॥ आस्तेऽनिरुद्धो रक्षायां कृतवर्मा च यूथपः ॥ ६ ॥ ते रथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवैः ॥ गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ॥ ७ ॥ व्यरोचन्त महातेजाः पथि काञ्चनमालिनः ॥ दिव्यस्रग्वस्त्रसन्नाहाः कलत्रैः खेचरा इव ॥ ८ ॥ तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥ ब्राह्मणेभ्यो ददुर्धेनूर्वासःस्रग्रुक्ममालिनीः ॥ ९ ॥ रामह्रदेषु विधिवत्पुनराप्लुत्य वृष्णयः ॥ ददुः स्वन्नं द्विजाग्र्येभ्यः कृष्णे नो भक्तिरस्त्विति ॥ १० ॥

सुचन्द्रो रुक्मिणीपुत्रश्चारुचन्द्रनामा शुकसारणौ यादवौ ॥ ६ ॥ ते इति युग्मम् ॥ देवधिष्ण्याभैर्देवविमानसदृशैः रथैः तरलास्तरङ्गास्तद्वत्प्लवो गतिर्येषां तैर्हयैः नदद्भिर्नादं कुर्वद्भिः अभ्राभैः नीलमेघसदृशगर्जितैः विद्याधराणामिव द्युतिर्येषां तैर्नृभिश्च कलत्रैश्च सह काञ्चनमालायुक्ताः दिव्याः स्रगादयो येषां ते महातेजाः महातेजसः तेजशब्दोऽदन्तोऽपि ते यादवाः पथि खेचरा देवा इव व्यरोचन्त ॥७॥८॥ तत्रेति ॥ तत्र तीर्थे स्नात्वा उपोष्य सूर्योपरागनिमित्तमेवोपोषणम् । तीर्थोपवासस्य तत्र निषिद्धत्वात् सावधानाश्च ते ब्राह्मणेभ्यो धेनूर्ददुः स्पष्टं शेषम् ॥ ९ ॥ रामेति ॥ एवं मुख्ये सरसि स्नात्वा वृष्णयः पुनः रामनिर्मितेषु नवस्वपि ह्रदेषु विधिवदाप्लुत्य स्नात्वा कृष्णे नोऽस्माकं भक्तिरस्त्वित्यभिप्रेत्य ब्राह्मणेभ्यः ग्रहणमुक्तिस्नाने कृतेऽन्नं ददुः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमिति ॥ कृष्ण एव देवता येषां ते वृष्णयः तैर्ब्राह्मणैरनुज्ञाताः कामं यथेच्छं भुक्त्वा स्निग्धा सान्द्रा शीतला छाया येषाम् अङ्घ्रिपानां वृक्षाणां तेषामङ्घ्रिषु मूलेषु उपविविशुः ॥ ११ ॥ तत्रेति सार्द्धद्वयम् ॥ ते वृष्णयस्तत्र कुरुक्षेत्रे आगतान् सुहृदादीन् ददृशुरिति सार्द्धद्वयान्वयः । मत्स्यादयः शब्दास्तत्तद्देशवासिजनपराः आरदकेरलान् इति पाठे आरदाः सिन्धुपारीणाः आनर्त्तकेरलानिति स्फुटः पाठः आत्मपक्षीयान् स्वपक्षपातिनः परान् शत्रूंश्च चिरमुत्कण्ठाप्रीतिपूर्वकानुध्यानमासां जातेति तथाभूता गोपीश्च ददृशुः ॥ १२ ॥ १३ ॥ अन्योन्येति ॥ अन्योन्यस्य संदर्शनेन यो हर्षस्तस्य रंहसा वेगेनातिशयेन प्रोत्फुल्लानि हृद्वक्त्राण्येव सरोरुहाणि तैः श्रीः शोभा येषां ते तथा नयनैः स्रवन्ति जलानि येषां ते तथा हृष्यन्त्यः उदञ्चितरोमाणस्त्वचो येषां ते तथा बाष्पेण रुद्धा गद्गदा गिरो येषां ते जना गाढं यथा तथा आश्लिष्य आलिङ्ग्य मुदं हर्षं ययुः ॥ १४ ॥ स्त्रिय इति ॥ तथा स्त्रियश्च संवीक्ष्य अतिसौहृदं प्रेमातिशयः स्मितं मन्दहासः अमलाः अपाङ्गा नेत्रप्रान्ताः तैर्युक्ता दृशो दृष्टयो यासां ताः तथा

स्वयं च तदनुज्ञाता वृष्णयः कृष्णदेवताः ॥ भुक्त्वोपविविशुः कामं स्निग्धच्छायाङ्घ्रिपाङ्घ्रिषु ॥ ११ ॥ तत्रागतांस्ते ददृशुः सुहृत्संबन्धिनो नृपान् ॥ मत्स्योशीनरकौसल्यविदर्भकुरुसृञ्जयान् ॥ १२ ॥ काम्बोजकेकयान्मद्रान्कुन्तीनानर्तकेरलान् ॥ अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो नृप ॥ नन्दादीन्सुहृदो गोपान्गोपीश्चोत्कण्ठिताश्चिरम् ॥ १३ ॥ अन्योऽन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ॥ आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदम् ॥ १४ ॥ स्त्रियश्च संवीक्ष्य मिथोऽतिसौहृदस्मितामलापाङ्गदृशोऽभिरेभिरे ॥ स्तनैः स्तनान्कुङ्कुमपङ्करूषितान्निहत्य दोर्भिः प्रणयाश्रुलोचनाः ॥ १५ ॥ ततोऽभिवाद्य ते वृद्धान्यविष्ठैरभिवन्दिताः ॥ स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथां मिथः ॥ १६ ॥ पृथा भ्रातॄन्स्वसॄर्वीक्ष्य तत्पुत्रान्पितरावपि ॥ भ्रातृपत्नीर्मुकुन्दं च जहौ संकथया शुचः ॥ १७ ॥ कुन्त्युवाच ॥ आर्य भ्रातरहं मन्ये आत्मानमकृताशिषम् ॥ यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः ॥ १८ ॥

प्रणयेन प्रीत्या अश्रूणि लोचनयोर्यासां ताः कुङ्कुममेव पङ्कस्तेन रूषितान् स्तनान् तादृशैरेव स्वस्तनैर्निहत्य सम्पीड्य दोर्भिर्मिथोऽभिरेभिरे परिषस्वजिरे ॥ १५ ॥ तत इति ॥ ततश्च ते यादवा मत्स्यादयश्च यविष्ठैर्न्यूनवयस्कैरभिवादिताः वृद्धान् अधिकवयस्कान् अभिवाद्य स्वगतं कुशलं च पृष्ट्वा मिथः कृष्णकथाश्चक्रुः ॥ १६ ॥ पृथेति॥ तत्र पृथा कुन्ती भ्रात्रादीन् वीक्ष्य संकथया मिथः सप्रेमगोष्ठ्या शुचः क्लेशान् जहौ तत्याज । भ्रातॄन् वसुदेवादीन् स्वसॄः श्रुतदेव्याद्याः तत्पुत्रान् रामादीन् पितरौ शूरं भोजाख्यं मातरं च भ्रातृपत्नीर्देवक्याद्याः ॥ १७ ॥ तत्र पृथाह—आर्येति ॥ हे आर्य भ्रातः अहमात्मानमकृताशिषम् अकृतपुण्यं मन्ये । कुतः यत् यस्मात् सत्तमाः श्रेष्ठा अपि यूयं आपत्स्वपि मद्वार्तां नानुस्मरथ ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुहृद इति ॥ यस्य दैवं प्रारब्धं कर्म अदक्षिणं प्रतिकूलं भवति तं स्वजनमपि सुहृदादयो नानुस्मरन्ति ॥ १९ ॥ अम्बेति ॥ अम्ब हे परमवत्सले कनिष्ठभगिनीत्वेऽपि वात्सल्यसाधर्म्यात् मातृनाम्ना सम्बोधयति । दैवस्य परमेश्वरस्य क्रीडनकान् क्रीडाप्रसाधनभूतान्नरान् अस्मान् मासूयेथाः दोषारोपेण माद्राक्षीः । हि यस्मात् लोकः सर्वोऽपि जनः ईशस्यान्तर्यामिणो वशे भवति अतस्तत् प्रेरित एव कुरुते अथवा तेनैव कार्यते च ॥ २० ॥ कंसेति ॥ हे स्वसः कंसेन प्रतापिताः क्लेशिताः सर्वे वयं दश दिशः दिशं दिशं याताः पलायिताः एतर्ह्येव सम्प्रत्येव दैवेन प्रारब्धफलप्रदेन पुनः स्वस्थानमासादिताः प्रापिताः ॥ २१ ॥ वसुदेवेति ॥ ते समागताः कुरुमत्स्यादयो नृपा वसुदेवादिभिरर्चिताः अच्युतस्य श्रीकृष्णस्य सन्दर्शनजपरमानन्देन निर्वृताः सुखिता आसन् ॥ २२ ॥ भीष्म इति चतुष्कम् ॥ हे राजेन्द्र अम्बिकापुत्रो धृतराष्ट्रः गान्धारी तद्भार्या तत्सुता दुर्यो-

सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि ॥ नानुस्मरन्ति स्वजनं यस्य दैवमदक्षिणम् ॥ १९ ॥ वसुदेव उवाच ॥ अम्ब मास्मानसूयेथा दैवक्रीडनकान्नरान् ॥ ईशस्य हि वशे लोकः कुरुते कार्यतेऽथ वा ॥ २० ॥ कंसप्रतापिताः सर्वे वयं याता दिशो दश ॥ एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥ २१ ॥ श्रीशुक उवाच ॥ वसुदेवोग्रसेनाद्यैर्यदुभिस्तेऽर्चिता नृपाः ॥ आसन्नच्युतसंदर्शपरमानन्दनिर्वृताः ॥ २२ ॥ भीष्मो द्रोणोम्बिकापुत्रो गान्धारी ससुता तथा ॥ सदाराः पाण्डवाः कुन्ती सृञ्जयो विदुरः कृपः ॥ २३ ॥ कुन्तिभोजो विराटश्च भीष्मको नग्नजिन्महान् ॥ पुरुजिद् द्रुपदः शल्यो धृष्टकेतुः सकाशिराट् ॥ २४ ॥ दमघोषो विशालाक्षो मैथिलो मद्रकेकयौ ॥ युधामन्युः सुशर्मा च ससुता बाह्लिकादयः ॥२५॥राजानो ये च राजेन्द्र युधिष्ठिरमनुव्रताः॥श्रीनिकेतं वपुः शौरेः सस्त्रीकं वीक्ष्य विस्मिताः ॥ २६ ॥ अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः ॥ प्रशशंसुर्मुदा युक्ता वृष्णीन्कृष्णपरिग्रहान् ॥ २७ ॥ अहो भोजपते यूयं जन्मभाजो नृणामिह ॥ यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनाम् ॥ २८ ॥ यद्विश्रुतिः श्रुतिनुतेदमलं पुनाति पादावनेजनपयश्च वचश्च शास्त्रम् ॥ भूः कालभर्जितभगापि यदङ्घ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोऽखिलार्थान् ॥ २९ ॥

धनादयः युधिष्ठिरमनुव्रता इति । तदानीं तस्य राज्यार्द्धप्राप्तेः श्रीनिकेतं शोभातिशयाश्रयं सस्त्रीकं स्त्रीभिः सहितं शौरेः श्रीकृष्णस्य वपुर्वीक्ष्य तत्सौन्दर्यातिशयेन विस्मिता जाताः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ अथेति ॥ अथ रामकृष्णाभ्यां सम्यक् प्राप्तं समर्हणमासनभोजनादिसम्माननं यैस्ते मुदा युक्ताः कृष्णेन स्वीयत्वेन परिगृह्यन्ते तान् वृष्णीन् प्रशशंसुः ॥ २७ ॥ अहो इति ॥ अहो भोजपते हे उग्रसेन इह लोके नृणां मध्ये यूयं यादवा एव जन्मभाजः सफलजन्मानः यत् यस्मात् योगिनामपि दुर्दर्शं द्रष्टुमशक्यं श्रीकृष्णमसकृत् निरन्तरं पश्यथ ॥ २८ ॥ यदिति ॥ यदिति पृथक् । पदमव्ययं यस्येत्यर्थकम् श्रुतिभिर्नुता संस्तुता यस्य विश्रुतिः कीर्त्तिरिदं विश्वमलं पुनाति । यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादावनेजनपयः पादप्रक्षालनजलं तदात्मिका गङ्गा च जगत्पुनाति । यस्य च वचो वेदगीताद्यात्मकं शास्त्रं श्रवणकीर्तनानुष्ठानादिना विश्वं पुनाति । किंच कालेन भर्जितं दग्धं विनष्टं भगं माहात्म्यं शक्तिर्यस्याः सा तथाविधापि भूः यस्याङ्घ्रिपद्मस्पर्शेनोत्था पुनराविर्भूता शक्तिर्यस्याः सा नोऽस्माकमखिलान् अर्थानभितो वर्षति ॥ २९ ॥ तदिति ॥ निरयस्य वर्त्मनि मार्गे वर्तता वर्तमानानां शतार्षः । येषां वः तस्य भगवतो दर्शनादिभिः सहितो यौनेन विवाहसंबन्धेन च सहितः सपिण्डबन्धः गोत्रसंबन्धोऽस्ति । येषां च वो गृहे स्वर्गापवर्गाभ्यां विरमयति वितृष्णान् करोतीति तथेति परमफलरूपत्वात् स विष्णुर्भगवान् स्वयमेवास आविरासीत्ते यूयं जन्मभाज इति संबन्धः । दर्शनं च स्पर्शनं च अनुपथः अनुगमनं च प्रजल्पो गोष्ठी च शय्या शयनं च आसनमुपवेशनं च अशनं भोजनं चेतीतरेतरद्वन्द्वः । यद्वा तदिति सामान्यनिर्देशः स इत्यर्थः । स विष्णुः येषां वो निरयवर्त्मनि संसारकारणे वर्त्तमानानामपि बध्यते संबध्यते बन्धः संदर्शनादिभिः संबद्धः सन् स्वर्गापवर्गविरमः परमसुखप्रदः आस ॥ ३० ॥ नन्द इति ॥ नन्दस्तत्र कुरुक्षेत्रे कृष्णपुरोगमान् यदून् प्राप्तान् श्रुत्वा कृष्णादिदर्शनेच्छया गोपैर्वृतः तत्सन्निधौ वासचिकीर्षया अनःसु शकटेषु स्थापितैरर्थैः सहैव तत्रागमत् ॥ ३१ ॥ तमिति ॥

तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिण्डबन्धः ॥ येषां गृहे निरयवर्त्मनि वर्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥ ३० ॥
श्रीशुक उवाच ॥ नन्दस्तत्र यदून्प्राप्ताञ्ज्ञात्वा कृष्णपुरोगमान् ॥ तत्रागमद्वृतो गोपैरनःस्थार्थैर्दिदृक्षया ॥ ३१ ॥ तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः ॥ परिषस्वजिरे गाढं चिरदर्शनकातराः ॥ ३२ ॥ वसुदेवः परिष्वज्य संप्रीतः प्रेमविह्वलः ॥ स्मरन्कंसकृतान्क्लेशान्पुत्रन्यासं च गोकुले ॥ ३३ ॥ कृष्णरामौ परिष्वज्य पितरावभिवाद्य च ॥ न किंचनोचतुः प्रेम्णा साश्रुकण्ठौ कुरूद्वह ॥ ३४ ॥ तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च ॥ यशोदा च महाभागा सुतौ विजहतुः शुचः ॥ ३५ ॥

तं नन्दं दृष्ट्वा वृष्णयो हृष्टा उत्थिताः चिरात् बहुकालानन्तरं यज्जातं दर्शनं तेन कातरा व्याकुला गाढं यथा भवति तथा परिषस्वजिरे । उत्थाने दृष्टान्तमाह । प्रथमं मूर्च्छितास्तन्वः करचरणादयो यथा पञ्चवृत्तिकं मुख्यप्राणमागतं दृष्ट्वा उत्थिताश्चेष्टावन्तो भवन्ति तथेत्यर्थः ॥ ३२ ॥ वसुदेव इति ॥ वसुदेवस्तु कंसकृतान् बन्धनपुत्रमारणादीन् क्लेशान् तथा पुत्रयो रामकृष्णयोर्गोकुले न्यासं स्थापनं नन्दकृतां पुत्रपालनादिमैत्रीं च स्मरन् नन्दं परिष्वज्य संप्रीतः सन् प्रेम्णातिशयितेन विह्वलः व्याकुलो बभूव॥ ३३॥ कृष्णेति ॥ कृष्णरामौ तु पितरौ यशोदानन्दौ अभिवाद्य प्रणम्य परिष्वज्य च हे कुरूद्वह प्रेम्णा साश्रुः कण्ठो ययोस्तौ अतः किंचिदपि नोचतुस्तूष्णीमेवासाते । प्रथममतिद्रुतं पित्रा परिष्वक्तौ ततः पितृत्यागेऽपि सत्वरौ परिष्वज्य प्रणेमतुरिति ॥ ३४ ॥ ततः श्रीवसुदेवेनैव स्वान्तःपटगृहे प्रवेशितौ सपरिजनौ गृहीतरामकृष्णहस्तौ तौ यशोदानन्दौ गत्वा तत्र किं चक्रतुरित्यपेक्षायामाह—ताविति ॥ महाभागा यशोदा चकारान्नन्दश्च तौ द्वौ सुतौ आत्मासनं स्वाङ्कमारोप्य उपवेश्य बाहुभ्यां परिरभ्य च शुचः पुत्रविश्लेषजशो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान् विजहतुः तत्यजतुः । यद्वा । शुचः अश्रूणि मुमुचतुः अत्र कृष्णः मातुरङ्के उपविष्टो गोपवेष एवाभूत् ॥ ३५ ॥ ततो वसुदेवाहूते नन्दे उग्रसेनादिमेलार्थं बहिर्निर्गते रोहिणीदेवकीभ्यां यशोदामेलमाह—रोहिणीति ॥ तत्कृतां यशोदाकृतां पुत्रपालनादिरूपां मैत्रीं स्मरन्त्यौ बाष्पमानन्दाश्रु कण्ठे ययोस्ते रोहिणी देवकी चाथानन्तरं व्रजेश्वरीं यशोदां परिष्वज्य समूचतुः । रामकृष्णौ तु तत्रैव स्थितौ शृणुतः ॥ ३६ ॥ केति ॥ हे व्रजेश्वरि ऐन्द्रमैश्वर्यमवाप्यापि इह लोके यस्या मैत्र्याः प्रतिक्रिया कर्तुं न शक्यते तां अनिवृत्तां प्रत्युपकारेण निवृत्तिरहितां निवृत्तिकारणे सत्यप्यनुवर्त्तमानां वा वां युवयोः मैत्रीं का विस्मरेत तङार्षः ॥ ३७ ॥ तत्कृतां मैत्रीमाहतुः—एताविति ॥ हे भवति न दृष्टौ पितरौ याभ्यां वस्तुतः अजन्मत्वादेवादृष्टपितरौ कवभाव आर्षः तावेतौ रामकृष्णौ अक्ष्णोर्नेत्रयोरक्षकं पक्ष्म यद्वत् यथा तथा रक्षकयोर्युवयोः पित्रोर्न्यस्तौ युवाभ्यामेव सम्प्रीणनमपेक्षितप्रदानेन सन्तर्पणम् अभ्युदयः पर्वसु गोप्रदानादिमहोत्सवः पोषणं नवनीतादिभिः लालनं स्तुतिचुम्बनादिभिः एतानि संप्रीणनादीनि प्राप्य अकुत्र च भयौ क्वचिदपि भयरहितौ भूत्वा ऊषतुर्वासं चक्रतुः । युक्तं चैतत् युवयोर्हि यस्मात् सतां परः स्व इति वैषम्यं नास्ति अत्र देवक्यभिप्रेतोर्थः स्फुट एव । यशोदायास्तु स्ववासनानु-

रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीम् ॥ स्मरन्त्यौ तत्कृतां मैत्रीं बाष्पकण्ठ्यौ समूचतुः ॥ ३६ ॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि ॥ अवाप्याप्यैन्द्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥ ३७ ॥ एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि ॥ प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ न सतां परः स्वः ॥ ३८ ॥ श्रीशुक उवाच ॥ गोप्यश्च कृष्णमुपलभ्य चिराद-भीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति ॥ दृग्भिर्हृदीकृतमलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापम् ॥ ३९ ॥ भगवांस्तास्त-थाभूता विविक्त उपसङ्गतः ॥ आश्लिष्याऽनामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ४० ॥

सार्येवार्थः स्फुरति स्म स चेत्थम् । एतौ युवयोर्युवाभ्यां पितृभ्यां न्यस्तावस्मास्वर्पितौ यौ पूर्वं युवयोरेव संप्रीणनादीनि प्राप्यापि अधुना अदृष्टपितरौ अधुना युवयोः पित्रोरकृतदृष्टी सन्तौ ऊषतुरस्मासु वासं स्वीकृतवन्तौ । अत्र तादृक्सौख्याभावेऽपीति भावः । हेतुमाह नेति । सतां परः पित्रादि भिन्नः स्वःपित्रादिः इत्युक्ता रीतितीस्ति इत्युक्त्वा रामकृष्णौ तल्लालनार्थं तत्रैव त्यक्त्वा रोहिणीदेवक्यौ निष्क्रान्ते इति विज्ञेयम् ॥ ३८ ॥ ततः समीप एव व्यवहितस्थले विरहखिन्ना गोपीः वीक्ष्य रामे निष्क्रान्ते गोपीनां दशामाह—गोप्य इति ॥ यस्य श्रीकृष्णस्य प्रेक्षणे प्रवृत्ता सुदृशिषु नेत्रेषु व्यवधायकपक्ष्मकृतं विधातारं शपन्ति स्म । ताः सर्वाः गोप्यश्च चिरात् बहुकालानन्तरमभीष्टं प्रियतमं कृष्णमुपलभ्य दृष्ट्वा दृग्भिर्नेत्रद्वारैर्हृदीकृतं हृदये प्रवेशितं दीर्घ आर्षः । अलं गाढमाश्लिष्य नित्ययुजामारूढयोगिनां समाधिनिष्ठानामपि यद्वा नित्ययुजां नित्यं संयोगवतीनां रुक्मिण्यादीनामपि दुरापं दुर्लभं तद्भावं भगवदात्मतामापुः ॥ ३९ ॥ ततश्च कृष्णो मातुरुत्सङ्गादुत्थाय विविक्ते ताभिरमिलदित्याह—भगवानिति ॥ भगवांस्तास्तथाभूता आत्मभावमापन्ना गोपीर्विविक्त एकान्त उपसङ्गतः आश्लि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यानामयमारोग्यं दुःखितानां तासां हासमुत्पादयितुं प्रहसन्निदमब्रवीत् ॥ ४० ॥ अपीति ॥ हे सख्यः स्वानां पित्रादीनामर्थं प्रयोजनं कर्तुमिच्छया व्रजाद्गतान् चिरायितान् विलम्बितान् शत्रुपक्षस्य क्षपणे विनाशे चेतो येषां तान्नोऽस्मान् अपि किं स्मरथ ॥ ४१॥ अपीति ॥ अकृतज्ञा एते इति आ ईषत् सर्वतो वाविशङ्कया अपि किंस्विदस्मानवध्यायथ अवजानीथ नाऽस्माकं तत्र दोष इत्याह भूतानि प्राणिनो भगवानन्तर्याम्येव युनक्ति संयोजयति वियुनक्ति वियोजयति चेति नूनं निश्चितम् ॥ ४२ ॥ वायुरिति ॥ घनानीकं मेघसमुदायं तृणादीनि च वायुर्यथा संयोज्य आक्षिपते वियोजयति च तथा भूतकृत् विश्वस्रष्टा भगवानपि कचिद्भूतानि संयोज्य भूयस्तानि वियोजयति ॥ ४३ ॥ मयीति ॥ हि यस्मात् मयिभक्तिर्भूतानाममृतत्वाय अमृतत्वं मोक्षं स च मदात्मकस्तदर्थं तत्प्रापयितुं कल्पते समर्थो भवति अतो मदापनः मत्प्रापकः मत्स्नेहो भवतीनां यदासीत्तदेतत् दिष्ट्या अतिभद्रमेव जातम् ॥४४॥ कीदृशस्त्वं यं स्नेहेन प्राप्स्याम इत्यपेक्षायामाह—अहमिति ॥ हे अङ्गनाः अहमेव सर्वभूतानां जरायुजादिशरीराणां तत्कार-

अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया ॥ गतांश्चिरायिताञ्शत्रुपक्षक्षपणचेतसः ॥ ४१ ॥ अप्यवध्या यथाऽस्मान्स्विदकृतज्ञा विशङ्कया॥ नूनं भूतानि भगवान्युनक्ति वियुनक्ति च ॥४२॥ वायुर्यथा घनानीकं तृणं तूलं रजांसि च ॥ संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत्॥४३॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ॥ दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥ ४४ ॥ अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः ॥ भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरङ्गनाः ॥४५॥ एवं ह्येतानि भूतानि भूतेष्वात्मात्मना ततः ॥ उभयं मय्यथ परे पश्यताभातमक्षरे ॥४६॥ ॥ श्रीशुक उवाच ॥ अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः ॥ तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ॥ ४७ ॥

णानामाकाशादीनां च आदिः कारणम् अन्तो लयाधारश्च अन्तरम् अन्तर्यामी च बहिश्च व्यवस्थितः । यथा भौतिकानां पञ्चमहाभूतान्येवाद्यन्तरूपाणि भवन्ति अतो व्यापकं मां भवत्यः प्राप्ता एवेति ॥ ४५ ॥ ननु जरायुजादीनां भोक्ता आत्मैवाच्छन्नरूपः तत्रैव सर्वभूतानि वर्तन्त इति कुतोऽस्माकं त्वत्प्राप्तिरित्यत आह—एवमिति ॥ यथैतानि घटशरावादीनि चतुर्विधशरीराणि च भूतेषु स्वकारणेष्वाकाशादिषु एव वर्त्तन्ते नतु भोक्तर्यात्मनि । आत्मा जीवात्मा तु तेषु भूतेषु आत्मना भोक्तृस्वरूपेण ततः व्याप्तो वर्तते नतु कारणत्वेन उभयमपि भोग्यं भोक्तारं च जडचेतनात्मकं जगत् परे सर्वकारणभूते अक्षरे निर्विकारे मयि आभातं पश्यत ॥ ४६ ॥ अधीति ॥ अध्यात्मशिक्षया आत्मशिक्षया आत्मतत्वोपदेशेन एवं कृष्णेन शिक्षिता गोप्यस्तस्यात्मतत्वस्यानुस्मरणेनानुध्यानेन ध्वस्तो जीवकोशः कोशवदावरकमज्ञानं यासां तास्तं सर्वात्मकं भगवन्तमध्यगन् प्रापुर्ज्ञातवत्यः । मलोप आर्षः उपोद्घातोक्तरीत्या वा ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहुरिति ॥ आहुश्च हे नलिननाभ अगाधः अपारो बोधो ज्ञानं येषां तैर्योगेश्वरैर्योगारूढैरपि हृदि विचिन्त्यं संसार एव दुस्तरत्वादज्ञानान्धकारव्याप्तत्वाच्च कूपस्तत्र पतितानामुत्तरणायावलम्बनभूतं ते तव पदारविन्दं गेहं जुषां द्वितीया आर्षी। तदर्हमिति ज्ञापकाद्वा। नोऽस्माकं मनसि सदा उदियात् आविर्भवेत्। अत्र श्रीदामादयो गोपा व्रज एव गोरक्षणार्थं स्थिताः अतस्तन्मेलनं न वर्णितमिति ज्ञेयम् ॥ ४८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे द्व्यशीतितमके व्यधात् ॥ ८२ ॥ त्र्यशीतितमके कृष्णभार्याभिः स्वकरग्रहाः ॥ द्रौपद्यै कथितास्तत्र श्लोका दहनवार्द्धयः ॥ द्वादशोवाचेति पादयुक् पञ्चाशदनुष्टुभः ॥ ८३ ॥ तथेति ॥ तथा गोपीनां गुरुरात्मतत्वोपदेष्टा गतिः फलरूपश्च भगवानेवातः यथा ताभिः प्रार्थितं तथास्त्वित्यनुगृह्याथानन्तरं युधिष्ठिरं सर्वान् सुहृदश्च प्रति अव्ययम् अहानिं कुशलमिति यावत् अपृच्छत् ॥ १ ॥ त इति ॥ ते युधिष्ठिरादयो लोकनाथेन श्रीकृष्णेनैवं कुशलं परिपृष्टाः सुसत्कृताश्च तस्य पादयोरीक्षया दर्शनेन हतं निरस्तमंहः पापं येषां ते अत एव

आहुश्च ते नलिननाभपदारविन्दं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलम्बं गेहं जुषामपि मनस्युदियात्सदा नः ॥ ४८ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे वृष्णिगोपसंगमो नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ श्रीशुक उवाच ॥ तथानुगृह्य भगवान्गोपीनां स गुरुर्गतिः ॥ युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोऽव्ययम् ॥ १ ॥ त एवं लोकनाथेन परिपृष्टाः सुसत्कृताः॥ प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः ॥ २ ॥ कुतोऽशिवं त्वच्चरणाम्बुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् ॥ पिबन्ति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृतिच्छिदम् ॥ ३ ॥ हि त्वाऽऽत्मधाम विधुतात्मकृतत्र्यवस्थमानन्दसंप्लवमखण्डमकुण्ठबोधम् ॥ कालोपसृष्टनिगमावनआत्तयोगमायाकृतिं परमहंसगतिं नताः स्मः ॥ ४ ॥

हृष्टं मनो येषां ते तं प्रत्यूचुः ॥ २ ॥ कुत इति ॥ हे प्रभो देहंभृतां देहधारिणां द्वितीया आर्षी। तदर्हमिति ज्ञापकाद्वा। देहकृच्चासावस्मृतिश्च देहकृदस्मृतिः देहसम्पादकमनाद्यज्ञानं तच्छिनत्तीति यथाभूतं देहकृदीश्वरस्तद्विषयाज्ञानं छिनत्तीति वा महतां व्यासादीनां मनसः सकाशात् मुखपङ्कजद्वारा निःसृतं त्वच्चरणाम्बुजासवम् आसववन्मादकत्वान्मधुरत्वाच्च कथामृतं क्वचिदपि ये कर्णपुटैः श्रोत्रचषकैरलं पिबन्ति तेषामशिवममङ्गलं कुतः स्यात् ॥ ३ ॥ हीति ॥ हिशब्दोऽवधारणे। आत्मधाम्ना स्वरूपप्रकाशेन विधुता निरस्ता आत्मकृता बुद्धिनिमित्तास्तिस्रो जाग्रत्स्वप्नसुषुप्तिलक्षणा अवस्था येन तम् आनन्दसंप्लवम् आनन्दप्रवाहरूपं पूर्णानन्दम् अखण्डम् अपरिच्छिन्नम् अकुण्ठः अप्रतिहतो बोधः चिच्छक्तिर्यस्य कालेनोपसृष्टा विप्लुता निगमा वेदास्तेषामवने निमित्ते रक्षार्थम् आत्ता परिगृहीता योगमायया निजाश्चर्यशक्त्या आकृतिर्विग्रहो येन तं परमहंसानां परमविवेकिनां गतिं प्राप्यं फलभूतं त्वा त्वामेव नताः स्मः प्रणमामः। यद्वा। आत्मधाम आत्मानं शरीरं धाम गृहं च हित्वा नताः स्मः। त्वामिति प्रकरणाल्लभ्यम् ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ उत्तमश्लोकः पुण्यकीर्तयोऽम्बरीषबलिप्रह्लादप्रभृतयस्तेषामपि शिखामणिं श्रेष्ठं श्रीकृष्णमेवं जनेष्वभिष्टुवत्सु सत्सु अन्धकादिस्त्रियः समेत्य सङ्गीभूय मिथो गोविन्दस्य कथाः अगृणन् कथयामासुः । ताश्चेदानीं त्रिषु लोकेषु गीताः प्रसिद्धाः अहं ते तुभ्यं वर्णयामि त्वं शृणु ॥ ५ ॥ हे वैदर्भीति युग्मम् ॥ हे वैदर्भि हे रुक्मिणि हे कौसले हे सत्ये शैब्ये मित्रविन्दे रोहिणीनाम भौमाहृता सुमुख्या काचित्पट्टमहिषीतुल्या हे अन्याः कृष्णपत्न्यः अच्युतो भगवान् स्वमायया लोकमनुकुर्वन् यथा वो युष्मानुपयेमे उदूढवांस्तदेतन्नोऽस्मभ्यं ब्रूत ॥ ६ ॥ ७ ॥ चैद्यायेति ॥ मा मां चैद्यायार्पयितुं राजसु शिशुपालपक्षीयेषु जरासन्धादिषु उद्यतकार्मुकेषु धृतचापेषु सत्सु अजेया ये भटास्तेषां शेखरिता मुकुटवत्कृताः अङ्घ्रिरेणवो येन स तेषां मूर्ध्नि पदं निदधत् इत्यर्थः । यः अजा अजाश्छागा अवयो वा तेषां यूथात् सिंहो यथा स्वभागं नयति तद्वत् मां निन्ये आनीतवान् । तस्य श्रीनिकेतस्य लक्ष्म्याश्रयस्य चरणो ममार्चनायास्तु ॥ ८ ॥ य इति ॥ सनाभेर्भ्रातुः प्रसेनस्य सिंहकृतेन वधेन संतप्तं हृदयं यस्य तेन ततेन

ऋषिरुवाच॥इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वन्धककौरवस्त्रियः॥समेत्य गोविन्दकथा मिथोऽगृणंस्त्रिलोकगीताः शृणु वर्णयामि ते॥५॥ द्रौपद्युवाच ॥ हे वैदर्भ्यच्युतो भद्रे हे जाम्बवति कौसले ॥ हे सत्यभामे कालिन्दि शैब्ये रोहिणि लक्ष्मणे ॥ ६ ॥ हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयम् ॥ उपयेमे यथा लोकमनुकुर्वन्स्वमायया ॥ ७ ॥ रुक्मिण्युवाच ॥ चैद्याय माऽर्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरिताङ्घ्रिरेणुः ॥ निन्ये मृगेन्द्र इव भागमजावियूथात्तच्छ्रीनिकेतचरणोऽस्तु ममार्चनाय ॥ ८ ॥ सत्यभामोवाच ॥ यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार ॥ जित्वर्क्षराजमथ रत्नमदात्स तेन भीतः पिताऽदिशत मां प्रभवेऽपि दत्ताम् ॥९॥ जाम्बवत्युवाच ॥ प्राज्ञाय देहकृदमुं निजनाथदेवं सीतापतिं त्रिणवहान्यमुनाऽभ्ययुध्यत् ॥ ज्ञात्वा परीक्षित उपाहरदर्हणं मां पादौ प्रगृह्य मणिनाऽहममुष्य दासी ॥ १० ॥

तातेन मत्पित्रा लिप्तम् आपादितमभिशापं दुर्यशोपमार्ष्टुम् अपनेतुं यः ऋक्षराजं जाम्बवन्तं जित्वा रत्नं स्यमन्तकमुपाजहार आनीतवान् । अथानन्तरं तत् मत्पित्रेऽदात् स च मम पिता तेन मिथ्याभिशापापराधेन भीतः सन् दत्तामक्रूरादिभ्यः प्रतिश्रुतामपि मां प्रभवे कृष्णाय आदिशत् दत्तवान् ॥ ९ ॥ प्राज्ञायेति ॥ देहकृत् मम पिता जाम्बवान् अमुं श्रीकृष्णं निजनाथं स्वस्वामिनं स्वकुलदैवतं च सीतापतिं प्रकर्षेण अविज्ञाय अमुना श्रीकृष्णेन सह त्रिणवहानि त्रिणवाहानि सप्तविंशत्यहानि अह्नः अलोप आर्षः । छन्दोनुरोधेन अभ्ययुध्यत् तङार्षः । “ आसीत्तदाष्टाविंशाहम् ” इति प्रागुक्तिस्तु समाप्तिदिनेन सहेति । ततः परीक्षितः परिक्षास्य सञ्जातेति तथा स मम पिता सीतापतिर्मम स्वाम्येवासाविति ज्ञात्वा तस्य पादौ प्रगृह्य पादग्रहणपूर्वकं प्रसाद्य मणिना सह मामर्हणमुपाहरत् सेवासाधनतया समर्पितवानित्यर्थः । अतोऽहममुष्य भगवतो दासीति इयं च श्रीरामसमय एवोत्पन्ना श्रीरामाय दित्सितापि एकपत्नीव्रतेन तेन नाङ्गीकृता इदानीं कृष्णाय दत्तेति प्रागुक्तम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तप इति ॥ स्वस्य भगवतः पादस्पर्शनाशया पादसंवाहनादिपरिचर्याचिकीर्षया तपः चरन्तीं कुर्वतीं मामाज्ञाय सख्या अर्जुनेन सह उपेत्य समागत्य रथेन नीत्वा यो मम पाणिमग्रहीत्तस्याहं गृहस्य मार्जनी मार्जनकर्त्र्येवास्मि ॥११॥ यो मामिति ॥ मम स्वयंवर उपेत्य आगत्य शुनां यूथगतमात्मबलिं स्वभागं द्विपारिः सिंह इव नृपान् विजित्य तथा अपकुरुतः अपकारं कुर्वतः शतुरलोप आर्षः। मे भ्रातॄंश्च विजित्य श्रियौकः लक्ष्मीपतिः इयङभावोऽप्यार्षः। यो मां स्वपुरं द्वारकां प्रति निन्ये आनीतवान्। श्रियौक इति पुरविशेषणं वा। तस्याङ्घ्र्यवनेजनत्वं चरणक्षालनकर्तृत्वं ममानुभवं प्रति जन्म अस्तु ॥ १२ ॥ सप्तेति ॥ कृष्णाय मां दातुं क्षितिपानां राज्ञां वीर्यस्य परीक्षणाय मम पित्रा नग्नजिता कृतान् सम्पादितान् अतिशयितं बलं वीर्यं प्रभावश्च तीक्ष्णानि शृङ्गाणि च येषां तान् वीराणां दुष्टं मदं घ्नन्तीति तथाभूतान् लोकप्रसिद्धान् सप्त उक्ष्णः वृषभान् उभयत्र अल्लोपाभाव आर्षः। यथा शिशवो बाला बहुत्वं दार्ष्टान्तिके सप्तधा भवनात् अजतोकान् अजापत्यानि बध्नन्ति तथा तरसा झटिति निगृह्य दमयित्वा क्रीडन् अनायासे-

कालिन्द्युवाच ॥ तपश्चरन्तीमाज्ञाय स्वपादस्पर्शनाऽऽशया ॥ सख्योपेत्याग्रहीत्पाणिं योऽहं तद्गृहमार्जनी॥११॥मित्रविन्दोवाच ॥ यो मां स्वयंवर उपेत्य विजित्य भूपान्निन्ये श्वयूथगमिवात्मबलिं द्विपारिः ॥ भ्रातॄंश्च मेऽपकुरुतः स्वपुरं श्रियौकस्तस्यास्तु मेऽनुभवमङ्घ्र्यवनेजनत्वम् ॥ १२ ॥ ॥ सत्योवाच ॥ सप्तोक्षणोऽतिबलवीर्यसुतीक्ष्णशृङ्गान्पित्रा कृतान्क्षितिपवीर्यपरीक्षणाय ॥ तान्वीरदुर्मदहनस्तरसा निगृह्य क्रीडन्बबन्ध ह यथा शिशवोऽजतोकान् ॥ १३ ॥ य इत्थं वीर्यशुल्कां मां दासीभिश्चतुरङ्गिणीम् ॥ पथि निर्जित्य राजन्यान्निन्ये तद्दास्यमस्तु मे ॥ १४ ॥ भद्रोवाच ॥ पिता मे मातुलेयाय स्वयमाहूय दत्तवान् ॥ कृष्णे कृष्णाय तच्चित्तामक्षौहिण्या सखीजनैः ॥ १५ ॥ अस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि ॥ कर्मभिर्भ्राम्यमाणाया येन तच्छ्रेय आत्मनः ॥ १६ ॥

नैव बबन्ध ॥ १३ ॥ य इति ॥ यो भगवान् इत्थं वृषभदमनेन वीर्यं स्वप्रभावदर्शनमेव शुल्कं देयं द्रव्यं यस्यास्तां स्वप्रतिज्ञासिद्धौ पित्रा दत्तां मां दासीभिः सह चतुरङ्गिणीं गजादिसेनां चादाय चतुरङ्गसेनायुक्तामिति मामित्यस्य विशेषणं वा। पथि निरोधं कुर्वतो राजन्यान्निर्जित्य निन्ये द्वारकामानीतवान् तस्य दास्यं ममास्तु ॥१४॥ पितेति ॥ हे कृष्णे द्रौपदि मे मम पिता मम मातुलेयाय मातुः श्रुतकीर्तेर्भ्रातृपुत्राय कृष्णाय स्वयमेव तमाहूय अक्षौहिण्या सखीजनैश्च सह तच्चित्तां कृष्णमनस्कां मां दत्तवान्। कैकेयीं भ्रातृभिर्दत्तामिति पूर्वोक्तौ प्रतिश्रुतामिति व्याख्येयम् ॥ १५ ॥ अस्येति ॥ कर्मभिर्भ्राम्यमाणाया मे ममास्य पादसंस्पर्शः पादसंवाहनादिपरिचर्या प्रति जन्म भवेत् येन पादस्पर्शेन आत्मनो मे तत् कैवल्याख्यं श्रेयो भवेत्। यद्वा। येन हेतुना जीवात्मनः तत्तस्य पादस्पर्शनमेव श्रेयः परमं फलम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताभिः स्वस्वोद्वाहवृत्तं लज्जया संक्षेपेणोक्तं मन्वाना तत्र च द्रौपदी स्वविवाहोद्यमं प्रकृष्टं मत्वा तं कथयन्ती तमसहमाना सत्रानामुक्तिसमाप्त्यवकाशं प्राप्य असंकोचेन स्वोद्वाहवृत्तमाह—ममेति ॥ हे राज्ञि नारदगीतमच्युतस्य जन्म कर्म च श्रुत्वा तथा पद्महस्तया लक्ष्म्या च लोकपान् इन्द्रादीन् विहाय वृत इति कृत्वा सुसंमृश्य सम्यग्विचार्य यथा मित्रविन्दायास्तथा ममापि चित्तं मुकुन्दविषयमास। यद्वा। ममापि चित्तं मुकुन्दे आस ततः लोकपान् राज्ञो विहाय पद्महस्तया मया भगवान् वृतः ॥ १७ ॥ ज्ञात्वेति ॥ हे साध्वि मम मतम् अभिप्रायं ज्ञात्वा दुहितृवत्सलः बृहत्सेन इति ख्यातः प्रथितो मम पिता तत्र श्रीकृष्णप्राप्तावुपायमचीकरत् कारयामास ॥१८॥ यथेति॥ हे राज्ञि यथा तव स्वयंवरे पार्थेप्सया अर्जुनप्राप्तीच्छया त्वत्पित्रा मत्स्यः कृतस्तथा मत्पित्रापि कृतः। पार्थेष्वपाकृत इति पाठे पार्थेषुणापाकृतः अयं तु पार्थेप्सया कृतो मत्स्यो बहिरेवाच्छन्नो नान्तः अतः स्तम्भलग्नयोर्ऊर्ध्वदृष्ट्या संलक्ष्यते मत्पित्रा कृतस्तु न तथा किंतु स्तम्भमूले निहितकलशजले केवलं दृश्यते अतो दृष्टिरधस्तादुपरि च लक्ष्यमिति श्रीकृष्णव्यतिरेकेण न कस्यापि भेद्यः। यद्वा। अयं मत्पित्रा कृतस्तु बहिः सर्वतः आच्छन्नः केवलं स जले स्तम्भस्य परितः स्थितपरिखामण्डले दृश्यते जलगर्त-

लक्ष्मणोवाच ॥ ममापि राज्ञ्यच्युतजन्मकर्म श्रुत्वा मुहुर्नारदगीतमास ह ॥ चित्तं मुकुन्दे किल पद्महस्तया वृतः सुसंमृश्य विहाय लोकपान् ॥ १७ ॥ ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः ॥ बृहत्सेन इति ख्यातस्तत्रोपायमचीकरत् ॥ १८ ॥ यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया कृतः ॥ अयं तु बहिराच्छन्नो दृश्यते स जले परम् ॥ १९ ॥ श्रुत्वैतत्सर्वतो भूपा आययुर्मत्पितुः पुरम् ॥ सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥ २० ॥ पित्रा संपूजिताः सर्वे यथावीर्यं यथावयः ॥ आददुः सशरं चापं वेद्धुं पर्षदि मद्धियः ॥ २१ ॥ आदाय व्यसृजन्केचित्सज्यं कर्तुमनीश्वराः ॥ आकोष्टं ज्यां समुत्कृष्य पेतुरेकेऽमुना हताः ॥ २२ ॥

स्थितस्तम्भमूलस्यागम्यत्वेन साक्षाददर्शनात् स तु स्तम्भमूलादूर्ध्वदृष्ट्यादृश्यः दूरत एवावरणभेदोत्तरं तन्मात्रभेदसंकेतादेव न दुर्भेदः अयं तु सर्वज्ञं श्रीकृष्णं विना सर्वस्यापि सर्वथा दुर्भेद इति भावः ॥ १९ ॥ श्रुत्वेति ॥ एतन्मत्स्ययन्त्रनिर्माणं श्रुत्वा सर्वेषामस्त्राणां समन्त्राणां शस्त्राणां केवलानां च तत्त्वप्रयोगोपसंहारादिकं जानन्तीति तथा उपाध्यायैः शस्त्रप्रयोगादिशिक्षकैः सहिताः सहस्रशः भूपाः सर्वतो दिग्भ्यो मत्पितुः पुरमाययुः। सर्वास्त्रेत्यनेन तेषां बलादपि जिघृक्षा सूचिता ॥ २० ॥ पित्रेति ॥ मद्धियः मदेकचित्ताः ते च सर्वे मम पित्रा यथावीर्यं यथावयः वीर्यवयोनुरूपं संपूजिताः सन्तः पर्षदि सभायां मत्स्यं वेद्धुं सशरं चापं यत्पित्रा स्थापितं चापविशेषमाददुः। तङ्भाव आर्षः। मद्धिय इत्यनेन व्यग्रचित्तत्वाल्लक्ष्यवेधायोग्यता व्यङ्ग्या ॥ २१ ॥ आदायेति ॥ सज्यं कर्तुम् आरोपितज्याकं कर्तुमनीश्वरा असमर्थाः केचित् धनुरादायैव व्यसृजन् तत्यजुः। एके तु आकोटिं द्वितीयकोटौ योजयितुं ज्यां समुत्कृष्य स्थिताः अपि धनुषः योजनसामर्थ्याभावाद्धस्तादिमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केनामुना धनुषा हताः पेतुः । आकोष्ठमिति पाठेऽपि स एवार्थः ॥ २२ ॥ सज्यमिति ॥ अपरे मागधादयः कर्णान्तास्तु वीराः समर्था अतो धनुः सज्यं कृत्वाऽपि तस्य लक्ष्यस्यावस्थितिं नाविन्दन् तेषां क्रियाशक्तिरेव न लक्ष्याभिज्ञतेत्यर्थः ॥ २३ ॥ मत्स्येति ॥ पार्थोऽर्जुनस्तु जले मत्स्याभासं मत्स्यप्रतिबिम्बं वीक्ष्य तस्य मत्स्यस्यावस्थितिम् अवस्थानदेशं ज्ञात्वा यत्तो यत्नवान् बाणमसृजत् मुमोच । बाणस्तु मत्स्यं नाच्छिनत् परं केवलं पस्पृशे पस्पर्श । तङार्षः । अनेन ज्ञानशक्तिपूर्णोऽप्यर्जुनो बलेनापूर्ण इति सूचितम् ॥ २४ ॥ राजन्येष्विति युग्मम् ॥ मानिषु साहङ्कारेषु राजन्येषु मत्स्यभेदसामर्थ्याभावाद्भग्नमानेषु अत एव तद्वेधनप्रयत्नान्निवृत्तेषु च सत्सु सूर्ये च सर्वार्थसाधकेऽभिजिति मुहूर्ते स्थिते मध्याह्नसमये तदा च मत्स्योपरि सूर्य इत्यपि लक्ष्ये अवेध्येऽपि इति भावः । भगवान् कृष्णो धनुरादाय अथ लीलया अनायासेनैव सज्यं कृत्वा तस्मिन्धनुषि विशिखं बाणं सन्धाय सकृदेव जले मत्स्यं वीक्ष्य इषुणा तं छित्त्वा अपातयत् ॥ २५ ॥ २६ ॥ दिवीति ॥ जयशब्देन युता दिवि स्वर्गे देवानां दुन्दुभयो

सज्यं कृत्वाऽपरे वीरा मागधाम्बष्ठचेदिपाः ॥ भीमो दुर्योधनः कर्णो नाविन्दंस्तदवस्थितिम् ॥ २३ ॥ मत्स्याभासं जले वीक्ष्य ज्ञात्वा च तदवस्थितिम् ॥ पार्थो यत्तोऽसृजद्बाणं नाच्छिनत्पस्पृशे परम् ॥ २४ ॥ राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु ॥ भगवान्धनुरादाय सज्यं कृत्वाऽथ लीलया ॥२५॥ तस्मिन्संधाय विशिखं मत्स्यं वीक्ष्य सकृज्जले ॥ छित्त्वेषुणाऽपातयत्तं सूर्ये चाभिजिति स्थिते ॥ २६ ॥ दिवि दुन्दुभयो नेदुर्जयशब्दयुता भुवि ॥ देवाश्च कुसुमासारान्मुमुचुर्हर्षविह्वलाः ॥ २७ ॥ तद्रङ्गमाविशमहं कलनूपुराभ्यां पद्भ्यां प्रगृह्य कनकोज्ज्वलरत्नमालाम् ॥ नूत्ने विनीय परिधाय च कौशिकाग्र्ये सव्रीडहासवदना कबरीधृतस्रक् ॥ २८ ॥ उन्नीय वक्त्रमुरुकुन्तलकुण्डलत्विड्गण्डस्थलं शिशिरहासकटाक्षमोक्षैः ॥ राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया निदधे स्वमालाम् ॥२९॥ तावन्मृदङ्गपटहशङ्खभेर्यानकादयः ॥ निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥ ३० ॥

नेदुः हर्षेण विह्वला देवाश्च भुवि कुसुमानामासारान् वृष्टीर्मुमुचुः ॥ २७ ॥ तत्कालभवं स्वहर्षं स्मरन्ती तदा तात्त्विकं स्वयं वरणं वर्णयन्त्याह—तदिति ॥ तत्तदा विवाहोचिते नूत्ने नवीने कौशिकाग्र्ये उत्तमकौशेये वस्त्रे निवीय प्रावृत्य परिधाय च सव्रीडः सभादिव्रीडासहित आनन्दहेतुको हासो यस्मिंस्तद्वदनं यस्याः सा तथा कबर्यां धृताः स्रजो यया साहं कनकेनोज्ज्वलां रत्नमालां प्रगृह्य कलौ मधुरस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रङ्गं सभास्थानं प्राविशं प्रविष्टवत्यस्मि ॥ २८ ॥ उन्नीयेति ॥ अनुरक्तं कृष्णे आसक्तं हृदयं यस्याः साहं उरवः कुन्तला यस्मिन् कुण्डलयोस्त्विषो ययोस्ते गण्डस्थले यस्मिंस्तच्च तत्स्ववक्त्रमुन्नीय शिशिरः सन्तापहरो हासो येषु तैः कटाक्षमोक्षैरपाङ्गमोक्षणविलासैः शनकैः परितः स्थितान् राज्ञो राजन्यान् अवज्ञया निरीक्ष्य मुरारेरंसे स्कन्धे स्वमालां निदधे निहितवत्यस्मि ॥ २९ ॥ तावदिति ॥ तावत्तदा मृदङ्गादयः नेदुः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ हे याज्ञसेनि द्रौपदि भगवति ईशे एवं मया वृते सति स्पर्द्धन्तः स्पर्द्धमानाः आर्षः शता । हृच्छयातुराः कामपीडिताः नृपयूथपास्तन्न सेहिरे ॥ ३१ ॥ मामिति ॥ हयरत्नानाम् अश्वश्रेष्ठानां चतुष्टयं यस्मिंस्तं रथं मामारोप्य तस्मिन्निधाय सन्नद्धो बद्धकवचश्चतुर्भुजः शार्ङ्गमुद्यम्य आजौ युद्धे तस्थौ । द्वाभ्यां भीरुस्वभावाया ममालिङ्गनं द्वाभ्यां धनुर्बाणधारणमिति चतुर्भुजत्वम् ॥ ३२ ॥ दारुक इति ॥ काञ्चना उपस्करा यस्मिंस्तं रथं दारुको नाम सारथिः चोदयामास तदा च हे राज्ञि यथा क्षुद्राणां मृगाणां पश्यतामेव मृगराट् सिंहस्तान् तिरस्कृत्य स्वयं निर्भयस्तन्मध्यात्स्वभागं गृहीत्वा गच्छति तथा भूभुजां राज्ञां पश्यतामेव भगवान् मामादाय निर्जगामेति शेषः । दारुक एव वा सिंह इवताननादृत्य रथं यापयामास ॥ ३३ ॥ त इति ॥ यथा ग्रामसिंहाः श्वानो हरिं सिंहं निषेद्धुं चापवद्वक्रोद्धृतपुच्छाः प्रवर्तेरंस्तथा संयत्ताः प्रयत्नवन्त उद्धृतेष्वासा उद्धृतकार्मुकास्ते केचन राजन्या हरिं निषेद्धुं पथि मार्गे अन्वसज्जन्त पृष्ठतोऽन्वधावन् ॥ ३४ ॥ त इति ॥ शार्ङ्गधनुषश्च्युतैर्बाणसमूहैः कृत्ताः

एवं वृते भगवति मयेशे नृपयूथपाः ॥ न सेहिरे याज्ञसेनि स्पर्धन्तो हृच्छयातुराः ॥ ३१ ॥ मां तावद्रथमारोप्य हयरत्नचतुष्टयम् ॥ शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावाजौ चतुर्भुजः ॥ ३२ ॥ दारुकश्चोदयामास काञ्चनोपस्करं रथम् ॥ मिषतां भूभुजां राज्ञि मृगाणां मृगराडिव ॥ ३३ ॥ तेऽन्वसज्जन्त राजन्या निषेद्धुं पथि केचन ॥ संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिम् ॥ ३४ ॥ ते शार्ङ्गच्युतबाणौघैः कृत्तबाह्वङ्घ्रिकन्धराः ॥ निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः ॥ ३५ ॥ ततः पुरीं यदुपतिरत्यलंकृतां रविच्छदध्वजपटचित्रतोरणाम् ॥ कुशस्थलीं दिवि भुवि चापि संस्तुतां समाविशत्तरणिरिव स्वकेतनम् ॥ ३६ ॥ पिता मे पूजयामास सुहृत्संबन्धिबान्धवान् ॥ महार्हवासोलंकारैः शय्यासनपरिच्छदैः ॥ ३७ ॥ दासीभिः सर्वसंपद्भिर्भटेभरथवाजिभिः ॥ आयुधानि महार्हाणि ददौ पूर्णस्य भक्तितः ॥ ३८ ॥ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः ॥ सर्वसङ्गनिवृत्त्याऽद्धा तपसा च बभूविम ॥ ३९ ॥

छिन्ना बाह्वादयो येषां ते केचित्प्रधने युद्धदेशे निपेतुः एके सङ्ग्रामं सन्त्यज्य दुद्रुवुः ॥ ३५ ॥ तत इति ॥ ततः यदुपतिः अत्यलङ्कृतां रविं छादयन्तीति रविच्छदाः ध्वजेषु पटा यस्याः चित्राणि तोरणानि यस्यां सैव सा च तामिति भगवन्निवासनेन दिवि भुवि चाभिसंस्तुतां कुशस्थलीं द्वारकां पुरीं तत्रापि स्वकेतनं स्वगृहं च समाविशत् । यथा तरणिः सूर्यः स्वकेतनम् अस्ताचलं प्रविशति तद्वत् । यद्वा । तरणिर्विष्णुनामा सूर्य इव स्वकेतनं स्वमण्डलं स्वयं जाज्वल्यमानस्तत्रत्यांश्च विद्योतयन् प्रविशति तद्वत् ॥ ३६ ॥ पितेति ॥ मे मम पितामहार्हैः अनर्घ्यैर्वस्त्रादिभिः सुहृदादीन् पूजयामास ॥ ३७ ॥ दासीभिरिति ॥ दास्यादिभिः सह महार्हाणि श्रेष्ठानि आयुधानि उपायनतया पूर्णस्यावाप्तसमस्तकामस्यापि भगवतो भक्तितो ददौ ॥ ३८ ॥ एवं द्रौपदीगर्वभङ्गावेशेनात्मविवाहं वर्णयित्वा सलज्जा सती स्वज्येष्ठा रुक्मिण्याद्याः सन्तो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयन्त्युपसंहरति—आत्मेति ॥ इमा वयं जन्मान्तरेषु सर्वसङ्गनिवृत्त्या वैराग्येण तपसा च हेतुना तस्यात्मारामस्य निरवधिकस्वानन्दानुभवशीलस्य भगवतः अद्धा साक्षात् गृहदासिका बभूविम ॥३९॥ भौममिति॥सगणं ससैन्यं भौमं नरकं निहत्य क्षितिविजये युधि जितानां राज्ञां कन्याः तेन भौमेन रुद्धाः नऽस्मान् ज्ञात्वा ततो निर्मुच्य मोचयित्वा यः स्वयमाप्तकामोऽपि संसृतेर्विमोक्षो यस्मात् तत्पदाम्बुजमनुस्मरन्तीः नः अस्मान् परिणिनाय उपयेमे । हे साध्वि वयं साम्राज्यं सार्वभौमपदं स्वाराज्यम् ऐन्द्रपदं भौज्यं तदुभयभोगभाक्त्वम् उत अपि विविधं राजत इति विराट् तस्य भावो वैराज्यम् अणिमादिसिद्धिभाक्त्वं पारमेष्ठ्यं ब्रह्मपदम् आनन्त्यं कैवल्यं मोक्षं हरेः पदं स्वरूपं सायुज्यं न कामयामहे किं त्वेतस्य गदाभृतः श्रियः कुचकुङ्कुमस्य गन्धेनाढ्यं युक्तं श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामहे । यद्वा । बह्वृचब्राह्मणोक्तक्रमेण प्रागादिदिक्चतुष्टयाधिपत्यानि साम्राज्यभौज्यस्वराज्यवैराज्यानि व्याख्येयानि ॥४०॥४१॥४२॥ व्रजस्त्रिय इति ॥ महात्मनः अत्युदारचित्तस्यात एव भक्तवात्सल्येन गावो गाश्चारयतः पादस्पर्शं गोप्याद-

महिष्य ऊचुः ॥ भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाऽथ नः क्षितिजये जितराजकन्याः ॥ निर्मुच्य संसृतिविमोक्षमनुस्मरन्तीः पादाम्बुजं परिणिनाय य आप्तकामः ॥ ४० ॥ न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत ॥ वैराज्यं पारमेष्ठ्यं च आनन्त्यं वा हरेः पदम् ॥ ४१ ॥ कामयामह एतस्य श्रीमत्पादरजः श्रियः ॥ कुचकुङ्कुमगन्धाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥४२॥ व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणवीरुधः ॥ गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥ ४३ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धोत्तरार्धे त्र्यशीतितमोऽध्यायः ॥८३॥ श्रीशुक उवाच ॥ श्रुत्वा पृथा सुबलपुत्र्यथ ज्ञानसेनी माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः ॥ कृष्णेऽखिलात्मनि हरौ प्रणयानुबन्धं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥ १ ॥

यो ग्राम्याजडाश्च यत् यथा वाञ्छन्ति तथा वयमपि कामयामहे अतोऽस्माकमपि तल्लाभः ॥ ४३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे त्र्यशीतितमके व्यधात् ॥ ८३ ॥ चतुर्युताशीतितमे वसुदेवमखोत्सवः ॥ बन्धुप्रस्थापनाद्यं च तत्र श्लोका द्विपर्वताः ॥ दंशोवाचेति पादोनाः सप्तशैला अनुष्टुभः ॥ ८४ ॥ श्रुत्वेति ॥ एवं रुक्मिण्यादीनाम् अखिलात्मनि हरौ दुःखहरे कृष्णे प्रणयानुबन्धं प्रेमपारतन्त्र्ययुक्तं वचनं श्रुत्वा अश्रुकलाभिरानन्दाश्रुबिन्दुभिराकुले व्याप्ते अक्षिणी यासां ताः सर्वाः पृथादयो विसिस्म्युः विसिष्मियिरे । इयङ्तङोरभाव आर्षः । तत्र पृथा कुन्ती सुबलपुत्री गान्धारी अथ तथा याज्ञसेनी द्रौपदी माधवी सुभद्रा अथ तथा अन्याश्च क्षितिपानां राज्ञां पत्न्यश्च उत च स्वगोप्यः कृष्णभक्ता गोप्यश्च अत्र पृथागान्धार्यादीनां वृद्धानां तु परम्परयैव श्रवणं न साक्षात् तासामग्रे द्रौपद्याः कृष्णमहिषीणां च स्वातन्त्र्येण तादृशविनोदवार्त्ताया अनौचित्यात् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं स्त्रीभिः सह स्त्रीषु सम्भाषमाणासु नृभिः सह नृषु च सम्भाषमाणेषु सत्सु कृष्णरामदिदृक्षया तत्र मुनय आययुः ॥ २ ॥ तान्निर्दिशति—द्वैपायन इति त्रयेण ॥ रामः परशुरामः ब्रह्मपुत्राः सनकादयः अपरे निर्दिष्टेभ्योऽन्ये स्पष्टं शेषम् ॥ ३ ॥ ४ ॥ ५ ॥ तानिति ॥ प्राक् प्रथमं तत्रासीनाः नृपादयः पाण्डवादयश्च विश्ववन्दितान् तान् दृष्ट्वा प्रणेमुः ॥ ६ ॥ तानिति ॥ तान् यथास्वागतप्रश्नासनादिभिः सर्वे आनर्चुस्तथा रामेण सहितोऽच्युतः श्रीकृष्णोऽप्यर्चयत् । आडभाव आर्षः ॥ ७ ॥ उवाचेति ॥ यतवाचो मौनी भूतस्य महतो विपुलस्य तस्य सदसः सभायाः अनुश्रृण्वतः सतः सुखमासीनान् द्वैपायनादीन् धर्मगुप् धर्मगोप्त्री तनुर्यस्य सः भगवानुवाच ॥ ८ ॥ अहो इति ॥ आश्चर्ये वयं जन्मभृतः सफलजन्मानः तस्य जन्मनः फलं कात्स्न्येनास्माभिर्लब्धम् यद्यस्मात् देवानामपि दुष्प्रापं योगेश्वराणां दर्शनमस्माभि-

इति संभाषमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु ॥ आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥ २ ॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः ॥ विश्वामित्रः शतानन्दो भरद्वाजोऽथ गौतमः ॥ ३ ॥ रामः सशिष्यो भगवान्वसिष्ठो गालवो भृगुः ॥ पुलस्त्यः कश्यपोऽत्रिश्च मार्कण्डेयो बृहस्पतिः ॥ ४ ॥ द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रस्तथाङ्गिराः ॥ अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥ ५ ॥ तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः ॥ पाण्डवाः कृष्णरामौ च प्रणेमुर्विश्ववन्दितान् ॥ ६ ॥ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत् ॥ स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥ ७ ॥ उवाच सुखमासीनान्भगवान्धर्मगुप्तनुः ॥ सदसस्तस्य महतो यतवाचोऽनुश्रृण्वतः ॥ ८ ॥ श्रीभगवानुवाच ॥ अहो वयं जन्मभृतो लब्धं कात्स्न्येन तत्फलम् ॥ देवानामपि दुष्प्रापं यद्योगेश्वरदर्शनम् ॥ ९ ॥ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषाम् ॥ दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकम् ॥ १० ॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥ ११ ॥ नाग्निर्न सूर्यो न च चन्द्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः ॥ उपासिता भेदकृतो हरन्त्यघं विपश्चितो घ्नन्ति मुहूर्तसेवया ॥ १२ ॥

र्लब्धम् ॥ ९ ॥ किमिति स्वल्पं तपः पुण्यं येषां तेषाम् अर्चायां प्रतिमायामेव देवः देवता इति चक्षुर्बुद्धिर्येषां तेषां नृणामस्माकं वो दर्शनस्पर्शनादिकं किं कथं बभूव प्रह्वः प्रणामः ॥ १० ॥ न हीति ॥ साधून् विहाय अम्मयानि तीर्थानि सेवायोग्यानि न भवन्ति तथा मृन्मयाः शिलामयाश्च देवा अपि न सेवायोग्याः । हि यस्मात् तीर्थादय उरुकालेन सेविताः पुनन्ति साधवस्तु दर्शनादेव भक्त्याद्युपदेशेन पुनन्ति ॥ ११ ॥ नाग्निरिति ॥ बहुकालमुपासिता अग्निसूर्याद्यभिमानिनो भेदकृतः त्वं तव ममाहमिति भेदबुद्धिं कुर्वतः पुंसः अघं पापमूलमज्ञानं शीघ्रं न हरन्ति । विपश्चितो निरस्तभेदा विवेकिनस्तु मुहूर्तमात्रसेवयैव भक्तिज्ञानाद्युपदेशेनाघं घ्नन्तीति तारका ग्रहादिरूपाः " यो वाचं ब्रह्मेत्युपास्ते मनो ब्रह्मेत्युपास्ते " इति श्रुतेर्वाङ्मनसयोरप्युपासनाविषयत्वम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्येति ॥ यस्य प्राणिनः त्रिधातुके वातपित्तश्लेष्माणः त्रयो धातवः प्रकृतयो यस्य तस्मिन् अत एव कुणपे शवतुल्ये जडे शरीरे आत्मबुद्धिः अहमिति बुद्धिः कलत्रपुत्रादिषु स्वधीः स्वकीया इति बुद्धिः भौमे भूविकारे प्रतिमायाम् इज्यधीः देवताबुद्धिः तथा यत् यस्य सलिले तीर्थबुद्धिः अभिज्ञेषु तत्त्वज्ञेषु जनेषु ता बुद्धयः कर्हिचिदपि न भवन्ति तथा तथा बुद्ध्या तत्सम्माननं न करोति स गोष्वपि खरः दारुणः । यद्वा । गौश्चासौ खरश्च एक एव पशुद्वयतुल्यः सिन्धुदेशे गोखराकारो निरर्थः पशुरप्यस्ति । कचित् म्लेच्छविशेषोऽपि । यद्वा । गवां तृणादि भारवाहकगर्दभतुल्य एव भक्तास्तु प्राहुः अत्र भौमे भगवत्प्रतिमाभिन्ने जले च गङ्गायमुनादिभिन्ने इति व्याख्येयम् । अर्चायामेव हरये इत्यादौ अभिज्ञेष्विज्यबुद्ध्यभावेऽपि कनिष्ठभक्तत्वोक्तेः । गङ्गादिजलेष्वपि तादृशवचनसहस्रात् ॥ १३ ॥ निशम्येति ॥ एवंभूतं भगवतः अकुण्ठमेधसः अप्रतिहतबुद्धेः कृष्णस्य दुरन्वयं सर्वोत्कृष्टस्यापि स्वस्यापकर्षपरत्वादननुरूपं वचनं निशम्य भ्रमद्धियस्ते विप्रास्तूष्णीमासन् ॥ १४ ॥ चिरमिति ॥ ततश्च ते मुनयः

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥ १३ ॥ श्रीशुक उवाच ॥ निशम्येत्थं भगवतः कृष्णस्याकुण्ठमेधसः ॥ वचो दुरन्वयं विप्रास्तूष्णीमासन्भ्रमद्धियः ॥ १४ ॥ चिरं विमृश्य मुनय ईश्वरस्येशितव्यताम् ॥ जनसङ्ग्रह इत्यूचुः स्मयन्तस्तं जगद्गुरुम् ॥ १५ ॥ यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः ॥ यदीशितव्यायतिगूढ ईहया अहो विचित्रं भगवद्विचेष्टितम् ॥ १६ ॥ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ॥ भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडम्बनम् ॥ १७ ॥

चिरं विमृश्य विचार्य ईश्वरस्यापीशितव्यतां मुनिसेवकतामन्येऽप्येवं कुर्युरिति जनसंग्रहायेति निश्चित्य स्मयन्तः विस्मयं कुर्वन्तश्शतार्षः तं जगद्गुरुं श्रीकृष्णं प्रत्यूचुः ॥ १५ ॥ यदिति ॥ विश्वसृजां दक्षकश्यपादिप्रजापतीनामप्यधीश्वराः तत्वोपदेशेन नियन्तारः तत्वविदां मध्ये उत्तमा अपि वयं यस्य मायया मोहितास्तदभिप्रायं न जानीमः । ईहया मनुष्यचेष्टया गूढः सन् यत् ईशितव्यायति भवान् सेवकवदाचरति आचारे क्यङ् तङभाव आर्षः । तस्य भगवतो विचेष्टितमहो विचित्रम् अतिदुर्ज्ञेयम् ॥ १६ ॥ अनीह इति ॥ ईहा इच्छा भोगासक्तिः चेष्टा वा तद्रहितोऽपि निरासक्तिर्निष्क्रियो वापि स्वयमेकोऽपि यः आत्मना उपादानभूतेन साधनभूतेन चैतत् जगद्बहुधा सृजति अवति रक्षति अत्ति संहरते च तथापि न बध्यते मया कृतं ममेदमित्यहङ्काराभावात्तत्तत्कर्मणा जीववद्बन्धनं न प्राप्नोतीत्यर्थः । भौमैः स्वकार्यैर्घटादिभिर्भूमिर्यथा बहुनामरूपिणी भवति तथेति तस्य विभूम्नो महत्तमस्येदं मनुष्यभावस्वीकारेण ब्राह्मणसम्माननादिचरितमहो विडम्बनम् अत्यनुकरणमात्रं ननु तत्त्वमित्यर्थः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथापीति ॥ यद्यपि भवान् परः पुरुषः पुरुषोत्तमोऽतस्तव कर्मबन्धनरहितस्याप्तकामस्य स्वप्रयोजनाभावाज्जन्मादि न सम्भवति तथापि स्वजनानां स्वभक्तानामभिगुप्तये परित्राणाय खलानां दुष्कृतानां निग्रहाय च काले तत्तदवसरे सत्वं शुद्धसत्वमयं वपुर्बिभर्षि तथा वर्णाश्रमाभिमानी सन् लोकशिक्षार्थं स्वलीलया स्वाचारेण सनातनं वेदपथं च बिभर्षि वेदोक्तानि कर्माणि चानुतिष्ठसि ॥ १८ ॥ ब्रह्मेति युग्मम् ॥ यत्र ब्राह्मणकुले व्यक्तं कार्यम् अव्यक्तं कारणं सत् सत्तामात्रं ततः कार्यकारणतः परं ब्रह्म चोपलब्धं भवति तत् तपःस्वाध्यायसंयमैः शुक्लं शुद्धं तद्ब्रह्म ब्राह्मणकुलं यस्मात् शास्त्रं वेद एव योनिः प्रमितिकारणं यस्मिंस्तस्य ते तव हृदयम् अन्तरङ्गं तस्मादेव हे ब्रह्मन् तदात्मनः सत् धाम उपलब्धिस्थानं ब्रह्मकुलं त्वं सभाजयसि संपूजयसि तत्तस्माद्ब्राह्मणसंमानात् भवान् ब्रह्मण्यानामग्रणीर्मुख्यः ॥ १९ ॥ २० ॥ अद्येति ॥ सतां गत्या त्वया सङ्गम्य सङ्गं प्राप्य नोऽस्माकमद्य जन्मनः साफल्यं जातं तथा विद्यायास्तपसो दृशो नेत्रस्य अपरोक्षज्ञानस्य वा साफल्यं जातम् । यत् यस्मात् त्वत्सङ्ग एव श्रेयसां परोन्तः

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय ॥ स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान् ॥१८॥ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः ॥ यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परम् ॥ १९ ॥ तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः ॥ सभाजयसि तद्धाम तद्ब्रह्मण्याग्रणीर्भवान् ॥ २० ॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः ॥ त्वया संगम्य सद्गत्या यदन्तः श्रेयसां परः ॥ २१ ॥ नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ॥ स्वयोगमायया च्छन्नमहिम्ने परमात्मने ॥ २२ ॥ न यं विदन्त्यमी भूपा एकारामाश्च वृष्णयः ॥ मायाजवनिकाच्छन्नमात्मानं कालमीश्वरम् ॥ २३ ॥ यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक् ॥ नाममात्रेन्द्रियाभातं न वेद रहितं परम् ॥ २४ ॥ एवं त्वा नाममात्रेषु विषयेष्विन्द्रियेहया ॥ मायया विभ्रमच्चितो न वेद स्मृत्युपप्लवात् ॥ २५ ॥

परमावधिः अत उत्तमं फलान्तरं नास्तीत्यर्थः ॥ २१ ॥ नम इति ॥ तस्मै भगवते अकुण्ठमेधसे अप्रतिहतचिच्छक्तये स्वयोगमायया अचिन्त्यशक्त्या छन्नो गूढो महिमा ऐश्वर्यं यस्य तस्मै परमात्मने अन्तर्यामिणे कृष्णाय नमः ॥ २२ ॥ नेति ॥ मायैव जवनिका तिरस्करिणी तया च्छन्नं सर्वात्मानं कालं सृष्ट्यादिनिमित्तम् ईश्वरं सर्वनियन्तारं यं त्वाम् अमी भूपाः एकस्मिन्नेव स्थाने भगवता सह आरामः भोजनशयनादिभिः सहवासो येषां ते वृष्णयश्च न विदन्ति ॥ २३ ॥ यथेति ॥ यथा गुणं गुणकार्यं देहं तत्वमात्मतत्वतया पश्यतीति गुणतत्वदृक् पुरुषः शयानः स्वप्नान् पश्यन् नाममात्रं मिथ्याभूतमेवेन्द्रियेण मनसा आभातं सिंहव्याघ्रादिरूपमेवात्मानं वेद तदाकाररहितं परं ततो भिन्नं देवदत्तादिरूपं न वेद ॥ २४ ॥ एवमिति ॥ विषयेष्विन्द्रियैर्या ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चितं यस्य सः अत एव स्मृतेर्विवेकस्योपप्लवो नाशस्तस्मात् हेतोर्नाममात्रेषु स्वप्नादितुल्येष्वपि देहादिषु सन्तमपि त्वां स्वात्मानं न वेद किंत्वेवं स्वप्नवद्देहादिकमेवात्मानं मन्यते ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति ॥ अघौघस्य पापसमूहस्य मर्षो नाशो यस्मात्तत्तीर्थं यद्गङ्गारूपं तस्यास्पदं तीर्थत्वकारणमित्यर्थः तीर्थास्पदमिति भिन्नपदपाठो वा । तथा सुपक्कयोगैरपि योगिभिर्हृदि कृतं चिन्तितं तस्य परमपुरुषार्थरूपस्य पुरुषोत्तमस्य ते तवाङ्घ्रिमद्य वयं ददृशिम दृष्टवन्तः अतो वयं कृतार्था इति शेषः । यस्य चरणस्योत्सिक्तया वृद्धया भक्त्या उपहतः निवृत्तः उपहृत इति पाठे समर्पितः । आशयोन्तःकरणरूपो जीवकोशो जीवावरकरूपो येषां ते एव भवद्गतिं फलभूतं भवन्तमापुः अथो तस्मात् अस्मान् भक्तान् कृत्वा अनुग्रहाण अनुग्रहपूर्वकं गमनाज्ञां देहि ॥ २६ ॥ इतीति ॥ इत्येवं दाशार्हं श्रीकृष्णं धृतराष्ट्रं युधिष्ठिरं चानुज्ञाप्य गमनानुज्ञां पृष्ट्वा हे राजर्षे मुनयः स्वाश्रमान् गन्तुं मनो दधिरे ॥२७॥तदिति॥ तन्मुनीनां गमनोद्योगं वीक्ष्य महायशा वसुदेवस्तानुपव्रज्य समीपं गत्वा प्रणम्य उपसंगृह्य पाणिभ्यां चरणौ गृहीत्वा सुयन्त्रितः एकाग्रचित्त इदं वक्ष्यमाणं बभाषे सन्धिरार्षः । बभाष इति तङभाव आर्षो वा ॥२८॥ नम इति ॥ "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः । सर्वे देवा येषु तेभ्यः ऋषिभ्यो वो युष्मभ्यं

तस्याद्य ते ददृशिमाङ्घ्रिमघौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्कयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथोऽनुगृहाण भक्तान् ॥ २६ ॥ श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरम् ॥ राजर्षे स्वाश्रमान्गन्तुं मुनयो दधिरे मनः ॥ २७ ॥ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः ॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयन्त्रितः ॥ २८ ॥ वसुदेव उवाच ॥ नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम् ॥ २९ ॥ नारद उवाच ॥ नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया ॥ कृष्णं मत्वाऽर्भकं यन्नः पृच्छति श्रेय आत्मनः ॥ ३० ॥ संनिकर्षोऽत्र मर्त्यानामनादरणकारणम् ॥ गाङ्गं हित्वा यथाऽन्याम्भस्तत्रत्यो याति शुद्धये ॥ ३१ ॥ यस्यानुभूतिः कालेन लयोत्पत्त्यादिनाऽस्य वै ॥ स्वतोन्यस्माच्च गुणतो न कुतश्चन रिष्यति ॥ ३२ ॥ तं क्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयम् ॥ प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः ॥ ३३ ॥

नमः । हे ऋषयः मद्वचनं श्रोतुमर्हथ योग्याः स्थ येन कर्मणा यथानुष्ठितेन वा कर्मणा कर्मणां निर्हारो निरासः स्यात्तन्नोऽस्मान् प्रति उच्यताम् ॥ २९ ॥ नेति ॥ हे विप्राः कृष्णम् अर्भकं स्वपुत्रम् अज्ञं मत्वा तं विहाय वसुदेव आत्मनः स्वस्य श्रेयःसाधनं बुभुत्सया बोद्धुमिच्छया यन्नोऽस्मान् पृच्छति तदेतदतिचित्रं न भवति ॥ ३० ॥ सन्निकर्ष इति ॥ हि यस्मात् मर्त्यानां सन्निकर्षो निरन्तरं सान्निध्यमनादरस्य गौरवमननाभावस्य कारणं भवति अतो नित्यकृष्णसन्निधानात्तमनादृत्यास्मान् पृच्छतीत्याशयः । यथा तत्रत्यो गङ्गातीरस्थो जनो गाङ्गम् अम्भो हित्वा अनादृत्यात्मनो विशुद्ध्यर्थम् अन्यतीर्थाम्भः प्रतियाति तथेति ॥३१॥ यस्येति युग्मम् ॥ यस्येश्वरस्य अनुभूतिः प्रकाशस्वरूपलक्षणा कालेन कर्कटिकाफलवत् तथा अस्य विश्वस्य लयोत्पत्त्यादिना स्वतश्च विद्युदादिवत् अन्यस्माच्च मुद्गरादेर्घटादिवत् गुणतो रूपाद्यन्तरोत्पत्तेः पूर्वरूपादिना देहादिवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतश्चिदपि न नरिष्यति न नश्यति लयोत्पत्त्योरादिना कारणेनेति कालविशेषणं वा। एवं यथा जीवानां ज्ञानं कालादिना नश्यति तथा अविद्यास्मिता रागद्वेषाभिनिवेशाः पञ्च क्लेशाः तन्निमित्तकानि कर्माणि पुण्यपापात्मकानि तत्परिपाकः फलं च सुखदुःखात्मकं गुणानां सत्वादीनां प्रवाहः पर्यायेण पुनः प्रादुर्भावः तैः क्लेशादिभिरव्याहतानुभवम-द्वितीयमीश्वरमपि अन्यः अन्यो जनः स्वदृष्टान्तेन स्वविभवैः प्राणमनोबुद्धिभिर्लिङ्गशरीरघटकैः स्वकार्यैः प्राणादिभिर्गूढमाच्छन्नं मन्येत मन्यते । यथा मेघहिमोपरागैः अभ्रतु-षारराहुभिः स्वविभवैर्गूढं सूर्यमिवेति मेघस्य सौरज्योतिर्जलात्मकत्वात् जलस्य ज्योतिः कार्यत्वात् हिमस्य च जलविशेषत्वात् राहोर्ध्वान्तखण्डरूपत्वात् ध्वान्तस्य च चक्षुर्ग्राह्यत्वेन पौराणिकमते तैजसत्वात् मेघादीनां सूर्यकार्यत्वम् ॥ ३२ ॥ ३३ ॥ अथेति ॥ अथ हे राजन् सर्वेषां राज्ञां शृण्वतां सतां तथा रामकृष्णयोरपि शृण्वतोः सतोः आनकदुन्दुभिमाभाष्य सम्बोध्य मुनय ऊचुः ॥ ३४ ॥ कर्मणेति ॥ यच्छ्रद्धया मखैर्यज्ञेश्वरं यज्ञफलदातारं विष्णुं यजेत् आराधयेदित्येष एव कर्मणा कर्मनिर्हारः कर्म-निवृत्त्युपायः साधु यथा तथा निरूपितः ॥ ३५ ॥ चित्तस्येति ॥ आत्मनोन्तःकरणस्य मुदमावहति तथा सः चित्तस्योपशमः शान्तिकरः क्षत्रियाणां धर्मश्च शास्त्रमेव

अथोचुर्मुनयो राजन्नाभाष्यानकदुन्दुभिम् ॥ सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः ॥ ३४ ॥ कर्मणा कर्मनिर्हार एष साधु निरूपितः ॥ यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ॥ ३५ ॥ चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा ॥ दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः ॥ ३६ ॥ अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः ॥ यच्छ्रद्धयाऽऽप्तवित्तेन शुक्लेनेज्येत पूरुषः ॥ ३७ ॥ वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम् ॥ आत्मलोकैषणां देव कालेन विसृजेद्बुधः ॥ ३८ ॥ ग्रामे त्यक्तैषणाः सर्वे ययुर्धीरास्तपोवनम् ॥ ऋणैस्त्रि-भिर्द्विजो जातो देवर्षिपितॄणां प्रभो ॥ यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतेत् ॥ ३९ ॥

चक्षुस्तेन कविभिर्विवेकिभिः सुगमः प्रवृत्त्यात्मकत्वात्सुकरो योग उपायोऽयमेव दर्शितः ॥ ३६ ॥ अयमिति ॥ यद्यपि सन्ति तपआदयोऽन्येऽप्युपायास्तथापि द्विजातेस्त्रैव-र्णिकस्य गृहाश्रमिणः स्वस्त्ययनः श्रेयःप्रापकोऽयमेव यत् श्रद्धया शुक्लेन शुद्धेन आप्तेन वित्तेन पूरुषः भगवान् इज्येत इति ॥ ३७ ॥ निष्कामत्वं विना कर्मनिर्हारो न स्यात् निष्कामत्वं चानेन प्रकारेण—वित्तेति ॥ वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां विसृजेत् सम्पादितयज्ञेषु दानेषु किमतः परं वित्तेनेति भावयेत् गृहैर्गृहोचितैर्भो-गैर्दारसुतैषणां स्त्रीभोगवासनां पुत्रवासनां च विसृजेत् तद्वैरस्यानुभवेनैव तदौत्सुक्यनिवृत्तेः । आत्मनः स्वर्गादिलोकैषणां च देवकालेन देवानामपि मृत्युहेतुभूतकालानुसन्धानेन देव हे वसुदेव कालेन क्षयाद्यनुसन्धानेन वा बुधो विवेकी विसृजेत् परित्यजेदित्यर्थः ॥ ३८ ॥ ग्रामे इत्यर्द्धम् ॥ धीरा विवेकिनः सर्वे ग्रामे गृहे त्यक्तैषणाः सन्तस्तपोवनं ययुरिति । ऋणैरिति ॥ हे प्रभो यज्ञानुष्ठाने समर्थ द्विजस्त्रैवर्णिको देवादीनां त्रिभिर्ऋणैः सह जातो जायते अतः क्रमेण यज्ञाध्ययनपुत्रैस्तानि देवर्षिपितॄणामृणान्यनिस्तीर्यानपाकृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहकर्मादि त्यजन् नरके पतेत् ॥ ३९ ॥ त्वमिति ॥ हे महामते द्वाभ्यामृषिपित्रोः ऋणाभ्यां तु त्वमद्य मुक्तः वेदाध्ययनपुत्रोत्पादनयोः कृतत्वात् अतो यज्ञैर्देवर्णमुन्मुच्यापाकृत्य निर्ऋणः सन्नशरणो भव गृहादिकं परित्यज ॥ ४० ॥ लोकरीत्या प्रश्नस्य लोकरीत्यैवोत्तरमस्माभिर्दत्तं वस्तुतः अविशुद्धचित्तानामेवायं क्रमः त्वं तु कृतार्थ एवेत्याहुः—वसुदेवेति ॥ हे वसुदेव भगवान्नूनं परमया प्रेमलक्षणया भक्त्या जगतामीश्वरं हरिं प्रार्चः अर्चितवान् । यत् यस्मात् स हरिः वां युवयोः पुत्रतां गतः ॥ ४१ ॥ इतीति ॥ इत्येवंभूतं तेषां वचनं श्रुत्वा महामनाः हृष्टचित्तो वसुदेवस्तानेव ऋषीन् मूर्ध्ना आनम्य प्रसाद्य च प्रसन्नान् कृत्वा ऋत्विजो वव्रे वृतवान् ॥ ४२ ॥ त इति ॥ हे राजन् ते ऋषय एवं धर्मेण यथाविधि वृतास्तस्मिन् स्यमन्तपञ्चके क्षेत्रे उत्तमकल्पकैर्मन्त्रतन्त्रद्रव्यादिसम्पन्नैर्मखैस्तं धार्मिकं वसुदेवमयाजयन् ॥ ४३ ॥ तदिति युग्मम् ॥

त्वं त्वद्य मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते ॥ यज्ञैर्देवर्णमुन्मुच्य निर्ऋणोऽशरणो भव ॥ ४० ॥ वसुदेव भवान्नूनं भक्त्या परमया हरिम् ॥ जगतामीश्वरं प्रार्चः स यद्वां पुत्रतां गतः ॥ ४१ ॥ श्रीशुक उवाच ॥ इति तद्वचनं श्रुत्वा वसुदेवो महामनाः ॥ तानृषीनृत्विजो वव्रे मूर्ध्नाऽऽनम्य प्रसाद्य च ॥ ४२ ॥ त एनमृषयो राजन्वृता धर्मेण धार्मिकम् ॥ तस्मिन्नयाजयन्क्षेत्रे मखैरुत्तमकल्पकैः ॥ ४३ ॥ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः ॥ स्नाताः सुवाससो राजन्राजानः सुष्ठ्वलंकृताः ॥ ४४ ॥ तन्महिष्यश्च मुदिता निष्ककण्ठ्यः सुवाससः ॥ दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः ॥ ४५ ॥ नेदुर्मृदङ्गपटहशङ्खभेर्यानकादयः ॥ ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः ॥ जगुः सुकण्ठ्यो गन्धर्व्यः संगीतं सहभर्तृकाः ॥ ४६ ॥ तमभ्यषिञ्चन्विधिवदक्तमभ्यक्तमृत्विजः ॥ पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः ॥ ४७ ॥ ताभिर्दुकूलवलयैर्हारनूपुरकुण्डलैः ॥ स्वलंकृताभिर्विबभौ दीक्षितोऽजिनसंवृतः ॥ ४८ ॥

हे राजन् तस्य यज्ञस्य दीक्षायां संप्रवृत्तायां सत्यां पुष्करस्रजः स्नाताः सुवाससः सुष्ठ्वलङ्कृताः वृष्णयः राजानः तथा मुदिताः निष्ककण्ठ्यः सुवाससः चन्दनादिभिरालिप्ताः वस्तूनि अर्हणानि पाण्योर्यासां ताः तस्य वसुदेवस्य महिष्यः पत्न्यश्च दीक्षाशालां यज्ञशालाम् उपाजग्मुः ॥४४॥४५॥ नेदुरिति सार्द्धम् ॥ मृदङ्गादयो नेदुः नटनर्तक्यो ननृतुः सूतमागधास्तुष्टुवुः सहभर्तृकाः सुकण्ठ्यो गन्धर्व्यः सङ्गीतं जगुः॥४६॥ तमिति ॥ अक्तं नेत्रयोरञ्जनेन अभ्यक्तं सर्वाङ्गेषु नवनीतेन लिप्तम् अष्टादशभिः पत्नीभिः सहितं तं वसुदेवम् ऋत्विजो विधिवदभ्यषिञ्चन् । यथा पुरा उडुभिः नक्षत्रैः सहितं सोमराजं चन्द्रमभ्यषिञ्चंस्तथा बहूनां सोमानां यदि कोप्येकोऽप्यधिकतेजा राजा भवति तमिवेत्यर्थः ॥४७॥ ताभिरिति ॥ स च दुकूलादिभिरन्यैश्च विभवैरलङ्कारैः सुष्ठ्वलङ्कृताभिः पत्नीभिः सह दीक्षितः अजिनेन मृगचर्मणा संवृतश्च विरेजे बभौ इत्यपि पाठः ॥४८॥

Nepal Sanskrit University, Balmiki

CC-0. In Public Domain. Digitization by eGangotri

तस्येति ॥ हे महाराज सदस्याः सभ्यैः सहिताः रत्नकौशेयवाससस्तस्य वसुदेवस्य ऋत्विजो विरेजुः । तत्र दृष्टान्तमाह यथेति । वृत्रासुरहननानन्तरम् इन्द्रस्य यज्ञे यथा तस्य ऋत्विजो विरेजुस्तथा ॥ ४९ ॥ तदेति ॥ तदा स्वैः स्वैः बन्धुभिः तथा स्वविभूतिभिः स्वांशभूतैः सुतैर्दारैश्च अन्वितौ जीवानामीशौ रामकृष्णौ च रेजतुः ॥ ५० ॥ ईजे इति ॥ आम्नातसर्वाङ्गाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादयस्तेभ्यश्चोदनालिङ्गादिभिः प्रकृतिवद्विकृतिः कर्तव्येति अतिदेशप्राप्ताङ्गाः वैकृताः सौरसत्रादयस्तैः सर्वैरेवाग्निहोत्रादिनामकैश्च द्रव्यं पुरोडाशादि ज्ञानं मन्त्रः क्रिया कर्म तेषामीश्वरं भगवन्तं विधिना अनुयज्ञं प्रतियज्ञमीजे इष्टवान् ॥ ५१ ॥ अथेति ॥ अथ स वसुदेवः काले तदवसरे स्वलङ्कृतेभ्योऽपि ऋत्विग्भ्यः स्वयमप्यलङ्कृत्य यथाम्नातं यथोक्तं दक्षिणाः तथा महान्ति धनानि यासु ताः स्वलङ्कृता गोभूकन्याश्चाददात् ॥ ५२ ॥ पत्नीति ॥ पत्नीसंयाजो यागविशेषश्च आवभृथ्यान्यवभृथकृत्यानि तैश्चरित्वा तान्यनुष्ठाय ते महर्षयः ऋत्विजो यजमानः पुरःसरो येषां ते विप्रा रामह्रदे परशुरामनिर्मिते ह्रदे सस्नुः

तस्यर्त्विजो महाराज रत्नकौशेयवाससः ॥ ससदस्या विरेजुस्ते यथा वृत्रहणोऽध्वरे ॥ ४९ ॥ तदा रामश्च कृष्णश्च स्वैः स्वैर्बन्धुभिरन्वितौ ॥ रेजतुः स्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः ॥ ५० ॥ ईजेऽनुयज्ञं विधिना अग्निहोत्रादिलक्षणैः ॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ॥ ५१ ॥ अथर्त्विग्भ्योऽददात्काले यथाम्नातं सदक्षिणाः ॥ स्वलंकृतेभ्यो विप्रेभ्यो गोभूकन्या महाधनाः ॥ ५२ ॥ पत्नीसंयाजावभृथ्यैश्चरित्वा ते महर्षयः ॥ सस्नू रामह्रदे विप्रा यजमानपुरःसराः ॥ ५३ ॥ स्नातोऽलंकारवासांसि बन्दिभ्योऽदात्तथा स्त्रियः ॥ ५४ ॥ ततः स्वलंकृतो वर्णानाश्वभ्योऽन्नेन पूजयत् ॥ बन्धून्सदारान्ससुतान्पारिबर्हेण भूयसा ॥ विदर्भकोसलकुरून्काशिकेकयसृञ्जयान् ॥५५॥ सदस्यर्त्विक्सुरगणान्नृभूतपितृचारणान् ॥ श्रीनिकेतमनुज्ञाप्य शंसन्तः प्रययुः क्रतुम् ॥ ५६ ॥ धृतराष्ट्रोऽनुजः पार्था भीष्मो द्रोणः पृथा यमौ ॥ नारदो भगवान्व्यासः सुहृत्संबन्धिबान्धवाः ॥ ५७ ॥ बन्धून्परिष्वज्य यदून्सौहृदाऽऽक्लिन्नचेतसः ॥ ययुर्विरहकृच्छ्रेण स्वदेशांश्चापरे जनाः ॥ ५८ ॥

॥५३॥ स्नात इति अर्द्धम् ॥ स्नातो वसुदेवो बन्दिभ्योऽलङ्कारवासांस्यदात् तथा तस्य स्त्रियोऽपि स्नाता वस्त्रादिकं तेभ्यो ददुः ॥५४॥ तत इति सार्द्धयुग्मम् ॥ ततः स्वलङ्कृतो वसुदेवः शुनोऽभिव्याप्य सर्वानेवान्नेन पूजयत् अपूजयत् अडभाव आर्षः । तथा सदारान् ससुतान् बन्धून् विदर्भादीन् चारणान्तान् भूयसा पारिबर्हेण सम्मानार्थदेयबहुद्रव्येण अपूजयत् ते च सर्वे श्रीनिकेतं लक्ष्मीपतिं श्रीकृष्णमनुज्ञाप्य तदनुज्ञां पृष्ट्वा क्रतुं भगवन्तं च प्रशंसन्तो द्रुतं शीघ्रं स्वाश्रमान् ययुः ॥ ५५ ॥ ५६ ॥ धृतराष्ट्र इति ॥ अनुजो विदुरः पार्था युधिष्ठिरभीमार्जुनाः पृथा कुन्ती यमौ नकुलसहदेवौ सुहृदो मित्राणि संबन्धिनो मातुलश्वशुरादयो विवाहादिना संबद्धाः बान्धवाः गोत्रिणः एतेऽपि ययुः स्पष्टाः शेषाः ॥५७॥ बन्धूनिति ॥ सौहृदेन स्नेहेन आक्लिन्नं चेतो येषां तान् बन्धून् यदून् परिष्वज्य विरहकृच्छ्रेण स्वदेशं ययुः । तथा परे च जनाः ययुः ॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्द इति ॥ कृष्णादिभिः गोपालैः सह बृहत्या महत्या पूजया अन्नवस्त्राद्यपेक्षितया समृद्ध्या अर्चितः सत्कृतः बन्धुवत्सलः नन्दः तत्र न्यवात्सीत् ॥ ५९ ॥ वसुदेव इति ॥ सुहृद्वृतः वसुदेवस्तु यज्ञविषयकमनोरथ एव महार्णवस्तमञ्जसा अनायासेनैवोत्तीर्य अतः प्रीतं मनो यस्य सः करे स्पृशन् करं गृहीत्वा नन्दमाह ॥ ६० ॥ भ्रातरिति ॥ स्नेहसंज्ञितो यो नृणां पाशः स ईशकृतः अतः तमहं शूराणां बलिनामपि दुर्भिदं योगिनां ज्ञानिनामपि च दुस्त्यजं मन्ये ॥ ६१ ॥ अस्मास्विति ॥ यत् यस्मात् कृतमुपकारं न जानन्तीति कृताज्ञास्तेष्वस्मासु सत्तमैर्भवद्भिरकल्पा अनुपमा इयं पुत्रपालनादिस्नेहरूपा मैत्र्यर्पिता कृता अफलाऽपि प्रत्युपकाररहितापि कर्हिचित् न निवर्तेत अधुनाऽपि न निवर्तते । तस्मादीश्वरकृत एवायं भवतां स्नेहरूपः पाश इति निश्चयः ॥ ६२ ॥ अफलत्वमाह—प्रागिति ॥ हे भ्रातः प्राक् कंसकृतबन्धनदशायाम् अकल्पात् सामर्थ्याभावादेव वो युष्माकं कुशलं प्रियं नाचरामहि न कृतवन्तः तङ्गार्षः । अधुना तु श्रीमदेनान्धे अक्षिणी येषां ते वयं पुरः सतः अग्रे विद्यमानानपि युष्मान् न

नन्दस्तु सह गोपालैर्बृहत्या पूजयार्चितः ॥ कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बन्धुवत्सलः ॥ ५९ ॥ वसुदेवोऽञ्जसोत्तीर्य मनोरथमहार्णवम् ॥ सुहृद्वृतः प्रीतमना नन्दमाह करे स्पृशन् ॥ ६० ॥ वसुदेव उवाच ॥ भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः ॥ तं दुस्त्यजमहं मन्ये शूराणामपि योगिनाम् ॥ ६१ ॥ अस्मास्वप्रतिकल्पेयं यत्कृताऽज्ञेषु सत्तमैः ॥ मैत्र्यर्पिताऽफला वापि न निवर्तेत कर्हिचित् ॥ ६२ ॥ प्रागकल्पाच्च कुशलं भ्रातर्वो नाचरामहि ॥ अधुना श्रीमदान्धाक्षा न पश्याम पुरः सतः ॥ ६३ ॥ मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद ॥ स्वगतानुत बन्धून्वा न पश्यति ययान्धदृक् ॥६४॥ श्रीशुक उवाच ॥ एवं सौहृदशैथिल्यचित्त आनकदुन्दुभिः ॥ रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ॥ ६५ ॥ नन्दस्तु सख्युः प्रियकृत्प्रेम्णा गोविन्दरामयोः ॥ अद्य श्व इति मासांस्त्रीन्यदुभिर्मानितोऽवसत् ॥ ६६ ॥

पश्याम किं पुनर्दूरस्थान् ॥ ६३ ॥ मा इति ॥ हे मानद श्रेयस्कामस्य परमपुरुषार्थमिच्छतः पुंसः राज्यश्रीर्मा भूदिति प्रार्थना । अडागमश्छान्दसः । कुतः यया श्रिया अन्धदृक् लुप्तविवेकः पुमान् कृतोपकारान्स्वजनादीन् न पश्यति तत्प्रत्युपकारं न करोति ततः कृतघ्नतादोषेण नरके पततीत्याशयः ॥ ६४ ॥ एवमिति ॥ एवं सौहृदेन प्रेमातिशयेन शैथिल्यं यस्य तच्चित्तं यस्य सः अत एवाश्रूणि विलोचनयोर्यस्य सः आनकदुन्दुभिस्तत्कृतां पुत्रपालनादिमैत्रीं स्मरन् रुरोद । अत्र प्रेमभक्ताः । श्रीकृष्णे स्वपुत्रत्वं व्यञ्जयन्तं वसुदेवं नन्दो न किंचित्प्रत्युवाच न च तस्य श्रीकृष्णे स्वपुत्रत्वाभावसंदेहोऽपि । स्वपुत्रस्य श्रीकृष्णस्य दारसुतादिवैभवैश्वान्तः परमसन्तुष्टो बहिर्वसुदेवोक्तानुसारमेव व्यवजहे ॥ ६५ ॥ नन्द इति ॥ नन्दस्तु सख्युर्वसुदेवस्य रामकृष्णयोश्च प्रेम्णा तेषां प्रियं कर्तुम् अद्य श्व इति अद्य निर्गमे अद्यैवापराह्णे गम्यतामिति अपराह्णे निर्गमे श्वो गम्यतामिति पुनः पुनर्यदुभिर्मानितः त्रीन् मासान् अवसत् ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति युग्मम् ॥ ततो वसुदेवादिभिर्यापितः महासैन्येन प्रस्थापितो ययौ । स्पष्टं शेषम् ॥ ६७ ॥ ६८ ॥ नन्द इति ॥ नन्दादयो गोपाः गोविन्दचरणाम्बुजे क्षिप्तं निहितं मनः पुनर्हर्तुं ततो वियोजयितुमनीशा असमर्थाः सन्तो मथुरां मथुरामण्डलस्थं व्रजं ययुः । अत्र शत्रुपक्षक्षपणकार्यस्यावशिष्टत्वमपादिश्य कृष्णो न ययाविति दन्तवक्त्रवधानन्तरन्तु कृष्णो गमिष्यति इति प्रागुक्तम् ॥ ६९ ॥ बन्धुष्विति ॥ एवं बन्धुषु सर्वेषु प्रतियातेषु प्रस्थितवत्सु कृष्ण एव देवता येषां ते वृष्णयः प्रावृषं वर्षर्तुमासन्नां संनिहितां वीक्ष्य ज्ञात्वा कृष्णाज्ञया पुनर्द्वारवतीं ययुः ॥ ७० ॥ जनेभ्य इति ॥ तीर्थयात्रायां यदुदेवस्य वसुदेवस्य महोत्सवं यज्ञमहोत्सवं तथा यच्च सुहृत्संदर्शनादिकमासीत्तत्सर्वं द्वारकावासिभ्यो जनेभ्यः कथयांचक्रुः ॥ ७१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । गङ्गासहायो दशमे चतुरशीतितमे व्यधात् ॥ ८४ ॥ पञ्चाशीतितमे दाता ज्ञानं पित्रे बलाच्युतौ ॥ मात्रे पूर्वं मृतान्पुत्रान् अत्र श्लोका नवेषवः ॥ नैवोवाचेति वाक्यानि चतुःषष्टिरनुष्टुभः ॥ ८५ ॥ अथेति ॥ अथ कुरुक्षेत्रयात्रा-

ततः कामैः पूर्यमाणः सव्रजः सहबान्धवः ॥ परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥ ६७ ॥ वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिः ॥ दत्तमादाय पारिबर्हं यापितो यदुभिर्ययौ ॥ ६८ ॥ नन्दो गोपाश्च गोप्यश्च गोविन्दचरणाम्बुजे ॥ मनः क्षिप्तं पुनर्हर्तुमनीशा मथुरां ययुः ॥ ६९ ॥ बन्धुषु प्रतियातेषु वृष्णयः कृष्णदेवताः ॥ वीक्ष्य प्रावृषमासन्नां ययुर्द्वारवतीं पुनः ॥ ७० ॥ जनेभ्यः कथयाञ्चक्रुर्यदुदेवमहोत्सवम् ॥ यदासीत्तीर्थयात्रायां सुहृत्संदर्शनादिकम् ॥ ७१ ॥ इति श्रीभागवते म० दशमस्कन्धे उत्तरार्धे तीर्थयात्रानुवर्णनं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ श्रीबादरायणिरुवाच ॥ अथैकदात्मजौ प्राप्तौ कृतपादाभिवन्दनौ ॥ वसुदेवोऽभिनन्द्याह प्रीत्या सङ्कर्षणाच्युतौ ॥ १ ॥ मुनीनां स वचः श्रुत्वा पुत्रयोर्धामसूचकम् ॥ तद्वीर्यैर्जातविश्रम्भः परिभाष्याभ्यभाषत ॥ २ ॥ कृष्ण कृष्ण महायोगिन्सङ्कर्षण सनातन ॥ जाने वामस्य यत्साक्षात्प्रधानपुरुषौ परौ ॥ ३ ॥ यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा ॥ स्यादिदं भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ ४ ॥

नन्तरम् एकदा क्वचित्प्रातर्नित्यवन्दनसमये प्राप्तौ स्वसमीपमागतौ आत्मजौ अत एव कृतं पादाभिवन्दनं याभ्यां तौ सङ्कर्षणाच्युतौ रामकृष्णौ प्रीत्या आशीर्भिरभिनन्द्य वसुदेव आह स्म ॥ १ ॥ मुनीनामिति ॥ पुत्रयोर्धामसूचकं परमेश्वरत्वज्ञापकं मुनीनां वचः स्मृत्वा तथा तयोर्वीर्यैर्गोवर्द्धनोद्धरणादिभिर्जातो विश्रम्भः जगदीश्वरत्वविश्वासो यस्य स वसुदेवः परिभाष्य तौ सम्बोध्य अभ्यभाषत ॥ २ ॥ कृष्णेति ॥ हे कृष्ण कृष्ण महायोगिन् हे सङ्कर्षण सनातन अस्य विश्वस्य यत् यौ साक्षात् स्वरूपेण कारणभूतौ प्रधानपुरुषौ तयोरपि परौ कारणरूपौ साक्षात् परमेश्वरौ वां युवामिति जाने ॥ ३ ॥ यत्रेति ॥ यत्र यस्मिन्नधिकरणे इदं विश्वं स्यात् येन कर्त्रा करणेन चेदं स्यात् यतो वा अपादानसंज्ञकादुपादानकारणादिदं स्यात् यस्य संबन्धि यत्स्वामिकमिदं स्यात् यस्मै संप्रदानाय यद्विहारार्थमिदं स्यात् यत् यः प्रयोज्यकर्ता यच्च कर्म यद्यदिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवानमृतमाशयतीत्यादिकयोः प्रयोज्यकर्मशुद्धकर्मणोः संग्रहः। ननु प्रयोज्यभिन्नं शुद्धं कर्म नास्त्येव तण्डुलं पचति इत्यादौ तण्डुलः पक्को भवति तं पक्कं करोतीत्याद्यर्थात् तदुक्तम्। करोतिः क्रियमाणेन न कश्चित्कर्मणा विना भवत्यर्थस्य कर्त्ता च करोतेः कर्म जायते इति करोत्यर्थस्य यः कर्त्ता भवितुः स प्रयोजकः भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यत इति सत्यम्। अवस्थाभेदेन भेदसद्भावात् तण्डुलः पक्को भवतीत्यादौ हि तण्डुल ओदनो भवति तं तण्डुलम् ओदनं करोति इत्यर्थे न पूर्वावस्थतण्डुलादेः प्रयोज्यकर्मत्वात् उत्तरावस्थौदनादेः शुद्धकर्मत्वात् दृश्यते चावस्थया भेदः तण्डुलानोदनं पचति मृदं घटं करोतीति तदेवं सप्त विभक्त्यर्था दर्शिताः। यथा येन प्रकारेणेति क्रियाविशेषणानां यद्वा स्यादिति तत्तत्कालशक्तेः सङ्ग्रहः स्यादिति सर्वक्रियोपलक्षणम्। एवमधिकरणादिसर्वात्मको भगवान् त्वमेव प्रधानं भोग्यं पुरुषो भोक्ता तयोरपि परस्त्वमेव साक्षादित्यर्थः। रामकृष्णयोरैक्यमभिप्रेत्यैकवचनम् ॥ ४ ॥ एतदिति ॥ हे अधोक्षज आत्मन्निति ङिलुक् छान्दसः। स्वस्मिन्नेवाधारभूते आत्मसृष्टमित्यत्रात्मना आत्मने आत्मनः सम्बन्धि आत्मैव सृष्टमिति समासभेदात्सर्वकारकसङ्ग्रहः। एतन्नानाविधं देवतिर्यगादिदेहरूपं विश्वम् आत्मना अन्तर्यामिरूपेणानुप्रविश्य स्वयं ततः जन्मादिविकाररहितोऽपि क्रियाशक्तिः प्राणः ज्ञानशक्तिर्जीवश्च संस्त्वमेव बिभर्षि धारयसि पोषयसि च ॥ ५ ॥ ननु प्राणादीनामपि कारणत्वात्कथं परमेश्वरस्यैव कारणत्वमित्याशङ्क्य प्राणादीनां शक्तयोऽपि तस्यैवेत्याह—प्राणेति ॥

एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज ॥ आत्मनानुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यजः ॥ ५ ॥
प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥ पारतन्त्र्याद्वैसादृश्याद्द्वयोश्चेष्टैव चेष्टताम् ॥ ६ ॥
कान्तिस्तेजः प्रभा सत्ता चन्द्राग्न्यर्कर्क्षविद्युताम् ॥ यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गन्धोऽर्थतो भवान् ॥ ७ ॥

प्राणः समष्टिप्राणात्मकं सूत्रम् आदिपदेन कालप्रकृतिमहत्तत्त्वाहङ्कारमहाभूतपञ्चकैकाशेन्द्रियसङ्ग्रहः प्राणादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य परमकारणस्येश्वरस्यैव ननु तेषां तत्र हेतुः महाप्राणादीनां पारतन्त्र्यात् यथा बाणादीनां पारतन्त्र्यान्न तेषां वेधशक्तिः किंतु पुरुषस्यैव तद्वदित्यर्थः। तथा द्वयोश्चेतनाचेतनत्वेन विसदृशत्वात् अचेतनस्य प्राणादिवर्गस्य चेतनपारतन्त्र्यमेव युक्तमित्यर्थः। तथा चोक्तम्। यदैते सङ्गता भावा इत्यारभ्य चोभयं ससृजुर्ह्यद इति अन्यच्च नानात्वात् स्वक्रियानीशा इत्यादि ननु प्राणादीनां क्रियाकारित्वं शक्त्यभावे कथं स्यादत आह चेष्टैव चेष्टतामिति। शतार्षः। चेष्टमानानामेषां चेष्टैव न शक्तिः यथा वायोः शक्त्या तृणादीनां चलनं यथा च पुरुषस्य शक्त्या शराणां वेगस्तथेत्यर्थः ॥ ६ ॥ सर्वत्रान्यत्र पारतन्त्र्यं प्रपञ्चयति—कान्तिरिति ॥ चन्द्रस्य कान्तिः अग्नेस्तेजः अर्कस्य प्रभा ऋक्षाणां नक्षत्राणां विद्युतां च सत्ता स्फुरणमात्रेण सत्वं भूभृतां पर्वतानां यत्स्थैर्यं भूमेर्वृत्तिः सर्वाधारतया वर्तनं गन्धश्चेत्येतत्सर्वमर्थतः परमार्थतो भवान् तवैव शक्तिरित्यर्थः। "तमेव भान्तमनुभाति सर्वम्" इत्यादिश्रुतेः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्पणमिति ॥ अपां तर्पणं तृप्तिजनकत्वं प्राणनं जीवनहेतुत्वं देवत्वं शोधकत्वं ता आपश्च तासां रसश्च तथा हे ईश्वर वायोश्च ओजः इन्द्रियसामर्थ्यं सहोन्तःकरणसामर्थ्यं बलं शरीरसामर्थ्यं चेष्टा शरीरव्यापारः गतिश्चेतनाचेतनसाधारणं गमनं च तवैव शक्तिः तथेश्वर इति पाठः ॥ ८ ॥ दिशामिति ॥ दिशामुपाधिकृताकाशप्रदेशानामवकाशो दिशश्च त्वं खं च सामान्याकाशः तदाश्रयश्च स्फोटश्च शब्दतन्मात्रं परावस्था वागित्यर्थः । नादः पश्यन्ती ओङ्कारो वर्णश्च मध्यमा आकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदं वर्णपदाद्यात्मिका वैखरी च त्वमित्यर्थः । तथा च श्रुतिः । " चत्वारि वाक्परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहायां त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ " इति ॥ ९ ॥ इन्द्रियमिति ॥ इन्द्रियाणामपीन्द्रियं विषयप्रकाशने शक्तिः देवाश्चेन्द्रियाधिष्ठातारः तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वंबुद्धे रवबोधः व्यवसायात्मिका शक्तिर्भवान् जीवस्य सती अनुस्मृतिं यथार्थात्मानुसन्धानं च भवान् ॥ १० ॥ भूतानामिति ॥ भूतानामाकाशादीनां कारणं भूतादिस्तामसोऽहंकारस्त्वमसि इन्द्रियाणां कारणं च तैजसः राजसोऽहंकारस्त्वमसि विविधं कल्पनं ज्ञानमेभिस्ते विकल्पा देवा मनश्च तेषां कारणं वैकारिकः सात्विकोऽहंकारस्त्वमसि अनुशा-

तर्पणं प्राणनमपां देवत्वं ताश्च तद्रसः ॥ ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर ॥८॥ दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः ॥ नादो वर्णस्त्वमोङ्कार आकृतीनां पृथक्कृतिः ॥ ९ ॥ इन्द्रियं त्विन्द्रियाणां त्वं देवाश्च तदनुग्रहः ॥ अवबोधो भवान्बुद्धेर्जीवस्यानुस्मृतिः सती ॥१०॥ भूतानामसि भूतादिरिन्द्रियाणां च तैजसः ॥ वैकारिको विकल्पानां प्रधानमनुशायिनाम् ॥ ११ ॥ नश्वरेष्विह भावेषु तदसि त्वमनश्वरम् ॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितम् ॥ १२ ॥ सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः ॥ त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥ १३ ॥ तस्मान्न सन्त्यमी भावा यर्हि त्वयि विकल्पिताः ॥ त्वं चामीषु विकारेषु ह्यन्यदाऽव्यावहारिकः ॥ १४ ॥

यिनाम् अनुशयपदवाच्यकर्मवासनावतां जीवानां संसारकारणं प्रधानं प्रकृतिश्च त्वमित्यर्थः ॥ ११ ॥ नश्वरेष्विति ॥ इह प्रपञ्चे नश्वरेषु भावेषु पदार्थेषु यत्तस्य परमार्थभूतमनश्वरं रूपं तत्वमसि । यथा द्रव्यस्य मृत्सुवर्णादेर्विकारेषु कार्येषु घटकुण्डलादिषु नश्वरेष्वपि द्रव्यमात्रं मृत्सुवर्णादिरूपमनश्वरं निरूपितं भवति तथेत्यर्थः ॥ १२ ॥ ननु कार्यरूपोऽप्यहमुक्तस्तत्कथमनश्वरत्वं तत्राह—सत्वमिति ॥ सत्वादयः प्रकृतिगुणाः गुणकार्यभूता देहेन्द्रियान्तःकरणादयो याश्च तेषां वृत्तयः सुखदुःखरागलोभादयस्ते योगमायया आत्माज्ञानेन अद्धा साक्षात् परे ब्रह्मणि त्वयि कल्पिताः अहं मनुष्यो दुःख्यहं सुख्यहं शृणोम्यहमिति त्वदंशभूते जीवे आरोपिताः ॥ १३ ॥ तस्मादिति ॥ यर्हि यस्मात् त्वयि कल्पिता एव तस्मादमी भावाः दुःखसुखादिविकारास्त्वयि न सन्त्येव । यदा च त्वममीषु विकारेषु स्थितस्तदैव त्वयि प्रतीयन्ते अन्यदा यदा सुषुप्त्यादौ देहेन्द्रियादयो लीना भवन्ति तदा तु त्वमव्यावहारिकः शुद्ध एव प्रतीयसे अतस्ते विकारा आरोपिता एव त्वयि प्रतीयन्ते वस्तुतो न सन्त्येवेत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणप्रवाह इति ॥ गुणप्रवाहे सत्वादिगुणकार्यभूते एतस्मिन्देहादौ अखिलात्मनस्तव सूक्ष्मां गतिं दुर्ज्ञेयं सच्चिदानन्दात्मकं स्वरूपम् अबुधा अजानन्तः अबुध्वेति पाठान्तरम् । अत एव अबोधेन स्वरूपाज्ञाननिबन्धनदेहाद्यभिमानेन कृतैः कर्मभिः पुण्यपापात्मकैरिह संसारे संसरन्ति देवमनुष्यतिर्यगादियोनिं प्राप्नुवन्ति ॥ १५ ॥ यदृच्छयेति ॥ इह लोके दुर्लभां सुकल्पां पटुतरेन्द्रियादिमत्तया पुरुषार्थसाधनसमर्थां नृतां मनुष्यतनुं प्राप्यापि हे ईश्वर त्वन्मायया स्वार्थे स्वपुरुषार्थसाधने त्वत्तत्वानुसन्धानभक्त्यादौ प्रमत्तस्य अनवहितस्य मम वयः आयुर्वृथैव गतम् ॥ १६ ॥ असाविति ॥ देहे असावहम् अस्यान्वयादिषु पुत्रकलत्रादिषु च ममैवैते इत्यभिमानपूर्वकं स्नेहरूपैः पाशैर्भवान् सर्वमेवेदं जगद्बध्नाति ॥१७॥ युवामिति ॥ युवां नोऽस्माकं सुतौ न भवतः किंतु साक्षात्प्रधानपुरुषेश्वरावेव भूभारभूतस्य क्षत्रस्य क्षपणे विनाशार्थमवतीर्णौ तथा स्वयमेव ह स्फुटमात्थ जन्मकाले कथितवानसि ॥ १८ ॥ तदिति ॥ हे आर्त्तबन्धो तत्तस्मात् त्वद्भजनं विना गतस्यायुषो व्यर्थत्वात् अद्य आपन्नानां शरणमागतानां संसृतिभयमपहन्तीति तथाभूतं तव पदारविन्दमरणं शरणं गतोऽस्मि । एतावतैव इन्द्रियलालसेन हेतुना मर्त्ये शरीरे आत्मदृक् आत्मबुद्धिः त्वयि परमेश्वरे चापत्यबुद्धिर्जातोऽस्मि ॥ १९ ॥ ननु मयि अपत्यबुद्धिः सत्यैव त्वत्तो जन्माङ्गीकारादित्याशङ्क्याह—सूतीति ॥ हे उरुगाय ननु अजः जन्मरहितोऽप्यहं निजधर्माणां स्वप्रवर्तितधर्ममर्यादानां गुप्त्यै रक्षणायानुयुगं प्रतियुगं जज्ञे अवतरामीति भवान् सूतीगृहे नौ आवां प्रतिजगाद अतो गगनवत् असङ्गः एव नानातनूः वराहनरादिजातीयाः विदधद्बिभ्राणस्त्वं क्रीडान्ते ताः तनूः जहासि तिरोभावयसि । यथा गगनं घटाद्युपाधिकृतनानातनूः विदधत् उपाधिनाशाच्च ताः परित्यजच्च निर्लेपव्यापकत्वादिनिजस्वभावं न परित्यजति तथा भगवतो नानास्वरूपाणि दधतः परित्यजतश्च न सच्चिदानन्दादिस्वभावत्यागः अतः भूम्नो व्यापकस्य तव विभूतिरूपां मायां को वेद न कोऽपि ज्ञातुं शक्तः अतस्त्वय्यपत्यबुद्धिर्न युक्ता । यत्तु अनुयुगं प्रतियुगं सुतपाः पृश्निरिति युगं कश्यपोऽदितिश्चेति युगं वसुदेवो देवकी चेति युगम् एवं प्रतियुगमहं जज्ञ इति स्वामिपादाः । तत्तु भागवते एवमेवोक्तत्वात्तदभिप्रायेण पुराणेषु पूर्वानुवादस्य किंचिदन्यथापि बहुस्थले दृष्टत्वादत्र तोषण्यादिरीत्या व्याख्यातम् ॥ २० ॥

गुणप्रवाह एतस्मिन्नबुधास्त्वखिलात्मनः ॥ गतिं सूक्ष्मामबोधेन संसरन्तीह कर्मभिः ॥ १५ ॥ यदृच्छया नृतां प्राप्य सुकल्पामिह दुर्लभाम् ॥
स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ॥ १६ ॥ असावहं ममैवैते देहे चास्यान्वयादिषु ॥ स्नेहपाशैर्निबध्नाति भवान्सर्वमिदं जगत् ॥ १७ ॥
युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ ॥ भूभारक्षत्रक्षपण अवतीर्णौ तथात्थ ह ॥ १८ ॥ तत्ते गतोऽस्म्यरणमद्य पदारविन्दमापन्नसंसृतिभयापहमार्तबन्धो ॥ एतावताऽलमलमिन्द्रियलालसेन मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः ॥ १९ ॥ सूतीगृहे ननु जगाद भवानजो नौ संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ॥ नानातनुर्गगनवद्विदधज्जहासि को वेद भूम्न उरुगाय विभूतिमायाम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकर्ण्येति ॥ सात्वतर्षभः भगवान् इत्थं पितुर्वाक्यमाकर्ण्य प्रश्रयेण विनयेनानम्रः प्रहसन् श्लक्ष्णया मधुरया गिरा तं प्रत्याह स्म ॥ २१ ॥ वच इति ॥ हे तात यत् येन वचनेन नः अस्मान् पुत्रानुद्दिश्य शिक्षणार्थं "तत्वमसि श्वेतकेतो" इतिवदुपदेशाविषयीकृत्य तत्वग्रामः तत्वसमूह ईश्वरवैभवरूपः उदाहृतः सम्यङ्निरूपितः तदेतत् वो युष्माकं वचः समवेतार्थं यथार्थमुपमन्महे उपमन्यामहे ॥ २२ ॥ अहमिति ॥ हे यदुश्रेष्ठ अहं यूयमसावार्यः बलभद्रः इमे च सर्वे द्वारकावासिनो जनाः किं बहुना सचराचरं सर्वेऽप्येवं परमात्मात्मकतयैव विमृश्याः विचार्य निश्चेतव्या इत्यर्थः । विमृग्या इत्यपि पाठः । यद्वा । सचराचरमिति क्रियाविशेषणम् ॥ २३ ॥ आत्मेति ॥ आत्मा हि एकः स्वयंज्योतिर्नित्यः अन्यो देहादिभ्यो भिन्नः निर्गुणश्चापि सन् आत्मसृष्टैर्गुणैर्हेतुभिः तैर्गुणैः कृतेषु भूतेषु देवमनुष्यादिषु यथाशयं यथोपाधि बहुधा ईयते प्रतीयते न वस्तुतः । कुतः एको ज्योतिर्दृश्यत्वेन नित्योऽप्यनित्यत्वेन शरीरादिभ्योन्योऽप्यनन्यत्वेन निर्गुणोऽपि सगुणत्वेनेत्यादि

श्रीशुक उवाच ॥ आकर्ण्येत्थं पितुर्वाक्यं भगवान्सात्वतर्षभः ॥ प्रत्याह प्रश्रयाऽऽनम्रः प्रहसन् श्लक्ष्णया गिरा ॥ २१ ॥ श्रीभगवानुवाच ॥ वचो वः समवेतार्थं तातैतदुपमन्महे ॥ यन्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः ॥ २२ ॥ अहं यूयमसावार्य इमे च द्वारकौकसः ॥ सर्वेऽप्येवं यदुश्रेष्ठ विमृश्याः सचराचरम् ॥ २३ ॥ आत्मा ह्येकः स्वयंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः ॥ आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ २४ ॥ खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयम् ॥ आविस्तिरोऽल्पभूर्येको नानात्वं यात्यसावपि ॥ २५ ॥ श्रीशुक उवाच ॥ एवं भगवता राजन्वसुदेव उदाहृतः ॥ श्रुत्वा विनष्टनानाधीस्तूष्णीं प्रीतमना अभूत् ॥ २६ ॥ अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता ॥ श्रुत्वाऽऽनीतं गुरोः पुत्रमात्मजाभ्यां सुविस्मिता ॥ २७ ॥ कृष्णरामौ समाश्राव्य पुत्रान्कंसविहिंसितान् ॥ स्मरन्ती कृपणं प्राह वैक्लव्यादश्रुलोचना ॥ २८ ॥

॥ २४ ॥ एतदेव सदृष्टान्तं दर्शयति—खमिति ॥ यथा खं ज्योतिरापो भूः एतानि भूतानि तत्कृतेषु घटादिषु आविस्तिरोभावादिकं यान्ति तथा असावात्मापि आविस्तिरोल्पभूरिभावप्राधान्येन आविस्तिरोल्पभूरित्वं याति एकोऽपि नानात्वं च याति तत्र मनुष्यादावाविर्भावः वृक्षादौ तिरोभावः मशकादावल्पत्वं गजादौ भूरित्वं महत्त्वं स्वत एकत्वम् उपाधितो नाना ॥ २५ ॥ एवमिति ॥ हे राजन् एवं भगवता उदाहृतं निरूपितमात्मैकत्वं श्रुत्वा विनष्टा नाना धीर्यस्य सः वसुदेवः प्रीतमनास्तूष्णीमभूत् ॥ २६ ॥ अथेति युग्मम् ॥ अथ हे कुरुश्रेष्ठ सर्वदेवतात्मकभगवदाधारत्वात् सर्वदेवतारूपा देवकी आत्मजाभ्यां रामकृष्णाभ्यां गुरोः सान्दीपनेः पुत्रमानीतं श्रुत्वा सुविस्मिता सती स्वपुत्रान् कंसविहिंसितान् स्मरन्ती अत एव वैक्लव्यात् शोकादश्रूणि लोचनयोर्यस्याः सा कृष्णरामौ समाश्राव्य संबोध्य कृपणं दैन्ययुक्तं यथा स्यात्तथा प्राह स्म ॥ २७ ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामेति ॥ हे राम हे राम हे अप्रमेयात्मन् अचिन्त्यरूप हे कृष्ण हे योगेश्वराणामपीश्वर वां युवां विश्वसृजां ब्रह्मादीनाम् ईश्वरौ आदिपुरुषौ जगत्कारणभूतौ अहं वेद वेद्मि ॥ २९ ॥ कालेति ॥ कालेन विध्वस्तं सत्वं सत्वगुणकार्यं विवेकधैर्यादिसाधुत्वं वा येषाम् अत एव उच्छास्त्रवर्तिनां शास्त्रीयमर्यादातिलङ्घिनाम् अत एव भूमेर्भारायमाणानां राज्ञां क्षयाय मे मयि अवतीर्णौं किलाद्य मे इति पाठान्तरे क्षयायेति शेषः ॥ ३० ॥ यस्येति ॥ हे विश्वात्मन् हे आद्य यस्यांशः पुरुषः तस्यांशः प्रकृतिस्तस्या अंशा गुणास्तेषां भागेन परमाणुमात्रलेशेनापि विश्वोत्पत्त्यादयो भवन्ति किलेति शास्त्रप्रसिद्धं तं त्वा त्वामहं गतिं शरणं गतास्मि ॥ ३१ ॥ चिरादिति ॥ चिरात् चिरकालात् मृतस्य सुतस्यादाने आनीय दाने निमित्ते गुरुणा सान्दीपनिना चोदितौ युवां पितृस्थानात् यमसदनात् गुरुदक्षिणारूपं तं गुरुपुत्रमानिन्यथुः ॥ ३२ ॥ तथेति ॥ हे योगेश्वरेश्वरौ यथा गुरोः कामं कृतवन्तौ तथा मे ममापि कामं मनोरथं युवां कुरुतं भोजराजः कंसस्तेन हतान्स्वपुत्रान् युवाभ्यामानीतान्द्रष्टुं कामये इति ॥ ३३ ॥ एवमिति ॥

देवक्युवाच ॥ राम रामाप्रमेयात्मन्कृष्ण योगेश्वरेश्वर ॥ वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ ॥ २९ ॥ कालविध्वस्तसत्त्वानां राज्ञामुच्छास्त्रवर्ति-
नाम् ॥ भूमेर्भारायमाणानामवतीर्णौं किलाद्य मे ॥ ३० ॥ यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः ॥ भवन्ति किल विश्वात्मंस्तं त्वाऽद्याहं गतिं
गता ॥ ३१ ॥ चिरान्मृतसुतादाने गुरुणा किल चोदितौ ॥ आनिन्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणाम् ॥ ३२ ॥ तथा मे कुरुतं कामं युवां योगे-
श्वरेश्वरौ ॥ भोजराजहतान्पुत्रान्कामये द्रष्टुमाहृतान् ॥ ३३ ॥ श्रीशुक उवाच ॥ एवं सञ्चोदितौ मात्रा रामः कृष्णश्च भारत ॥ सुतलं संविविशतुर्यो-
गमायामुपाश्रितौ ॥ ३४ ॥ तस्मिन्प्रविष्टावुपलभ्य दैत्यराड् विश्वात्मदैवं सुतरां यथात्मनः ॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम
सान्वयः ॥ ३५ ॥ तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनस्तयोः ॥ दधार पादाववनिज्य तज्जलं सवृन्द आब्रह्म पुनद्यदम्बु ह ॥ ३६ ॥
समर्हयामास स तौ विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ॥ ताम्बूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥ ३७ ॥

हे भारत मात्रैवं संचोदितौ योगमायामुपाश्रितौ रामकृष्णौ सुतलं संविविशतुः ॥ ३४ ॥ तस्मिन्निति ॥ तस्मिन्सुतले प्रविष्टौ विश्वेषामात्मनां दैवं दैवतभूतौ एकत्वमीश्वरत्वेनैक्यात् तथात्मनः स्वस्य सुतरां दैवतभूतौ रामकृष्णावुपलभ्य दृष्ट्वा तयोर्दर्शनेन य आह्लादस्तेन परिप्लुतो व्याप्तः आशयोन्तःकरणं यस्य स दैत्यराट् बलिः सान्वयः सपरिवारः सद्यस्तदैवोत्थाय ननाम ॥ ३५ ॥ तयोरिति ॥ तयोर्महात्मनोः रामकृष्णयोः श्रेष्ठमासनं समानीय समर्प्य तत्रासने निविष्टयोः पादाववनिज्य प्रक्षाल्य तज्जलं सवृन्दः सपरिवारो मुदा युक्तो बलिः शिरसा दधार । ह हेतौ यस्मात् यदम्बु ययोरवनेजनोदकम् आब्रह्म ब्रह्माणमभिव्याप्य जगत् पुनत्पवित्रयद्वर्त्तते ॥ ३६ ॥ समिति ॥ महार्हैः श्रेष्ठैर्वस्त्रादिभिर्विभूतिभिः ताम्बूलादिभिश्च स्वगोत्रादिसमर्पणेन स तौ समर्हयामास । तत्र अनुलेपनं चन्दनम् अमृतभक्षणम् अमृततुल्यं भक्ष्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वगोत्रं स्वकुलं पुत्रपौत्रकलत्रादि वित्तं धनम् आत्मा देहः ॥ ३७ ॥ स इति ॥ हे नृप स इन्द्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया धिया भगवत्पदाम्बुजं मुहुर्बिभ्रत् धारयन् आनन्दजैर्जलैरश्रुभिराकुले व्याप्ते ईक्षणे अक्षिणी यस्य सः प्रहृष्टानि उदञ्चितानि रोमाणि यस्य सः गद्गदानि कुण्ठितान्यक्षराणि यस्य तादृशः सन् उवाच । गद्गदाक्षरमिति पाठे क्रियाविशेषणम् ॥ ३८ ॥ नम इति ॥ अनन्ताय शेषाय विश्वधारणाद्बृहते नमः । कृष्णाय वेधसे जगद्विधात्रे नमः । साङ्ख्यं ज्ञानशास्त्रं योगः कर्मयोगः भक्तियोगः अष्टाङ्गयोगश्च तयोर्वितानाय प्रवर्तकाय ब्रह्मणे परमात्मने नमः ॥ ३९ ॥ दर्शनमिति ॥ यत् वां युवां नोऽस्माकं रजस्तमःस्वभावानां त्वद्दर्शनाद्ययोग्यानामपि यदृच्छया प्रयत्नं विनैव दर्शनं प्राप्तौ तयोर्वां युवयोर्दर्शनं हि भूतानां स्वप्रयत्नेन दुष्प्रापमपि केषांचित् त्वत्कृपया अदुर्लभं सुप्रापं भवति ॥ ४० ॥ अहो राजसास्तामसाश्च वयं सात्विकेभ्योऽपि देवेभ्यः सभाग्या इत्याह—दैत्येति त्रयम् ॥ दैत्यदानवादयः प्रमथनायकान्ताः विशुद्धं रजस्तमोभ्यां रहितं सत्वमेव धाम मूर्तिर्यस्य तस्मिन्निति

स इन्द्रसेनो भगवत्पदाम्बुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया ॥ उवाच हाऽऽनन्दजलाकुलेक्षणः प्रहृष्टरोमा नृपगद्गदाक्षरम् ॥३८॥ बलिरुवाच ॥ नमोऽनन्ताय बृहते नमः कृष्णाय वेधसे ॥ साङ्ख्ययोगवितानाय ब्रह्मणे परमात्मने ॥ ३९ ॥ दर्शनं वां हि भूतानां दुष्प्रापं चाप्यदुर्लभम् ॥ रजस्तमःस्वभावानां यन्नः प्राप्तौ यदृच्छया ॥ ४० ॥ दैत्यदानवगन्धर्वाः सिद्धविद्याध्रचारणाः ॥ यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ॥ ४१ ॥ विशुद्धसत्त्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि ॥ नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥४२॥ केचनोद्बद्धवैरेण भक्त्या केचन कामतः ॥ न तथा सत्त्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥ ४३ ॥ इदमित्थमिति प्रायस्तव योगेश्वरेश्वर ॥ न विदन्त्यपि योगेशा योगमायां कुतो वयम् ॥ ४४ ॥ तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविन्दधिषणान्यगृहान्धकूपात् ॥ निष्क्रम्य विश्वशरणाङ्घ्र्युपलब्धवृत्तिः शान्तो यथैक उत सर्वसखैश्चरामि ॥ ४५ ॥

शास्त्रोक्तं शरीरमस्यास्तीति तस्मिन्निति त्वयि नित्यं निबद्धं वैरं यैस्तव वयं तथान्ये च बौद्धकाद्या मनुष्या अपि तादृशा एव गन्धर्वादीनां बद्धवैरत्वाप्रसिद्धावपि राजसत्वादिना तत्तुल्यत्वमुक्तम् । तेषु च केचन चैद्यादयः उद्बद्धवैरेण या भक्तिस्तया तव संनिकृष्टाः संनिकर्षं प्राप्ताः केचन कामतो भक्त्या गोप्यादयः सन्निकृष्टाः तथा सत्वसंरब्धाः सत्वाविष्टा अपि सुरादयः न संनिकृष्टाः ॥ ४१ ॥ ४२ ॥ ४३ ॥ इदमिति ॥ हे योगेश्वरेश्वर योगेशा अपि इदमिति स्वरूपतः इत्थमिति प्रकारतश्च तव योगमायां न विदन्ति वयं दैत्याः कुतो विद्मः ॥ ४४ ॥ तन्न इति ॥ निरपेक्षैराप्तकामैरपि विमृग्यं यत् युष्मत् पादारविन्दं तदेव धिषणमाश्रयस्तस्मादन्यत् यद्गृहं तदेवान्धकूपस्तस्मान्निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारो वृक्षास्तेषामङ्घ्रिषु स्वत एव गलितैः फलादिभिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन । यद्वा । विश्वस्य शरणभूतो यस्तवाङ्घ्रिस्तस्यो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पसमीपे लब्धा वृत्तिर्दासोचितवर्तनं येन सोऽहं शान्तः सन् एक एव यथा चरामि उत अथवा सर्वेषां सखायो ये त्वद्भक्तास्तैः सह यथा चरामि तत्तथा नोऽस्मान् प्रसीद अनुगृहाण ॥ ४५ ॥ शाधीति ॥ हे प्रभो हे ईशितव्यानां नियम्यानामस्माकमीश नियन्तः अस्मान् शाधि कैङ्कर्यमादिश नोऽस्मान् निष्पापान् कुरु । यत्त्वदादिष्टमनुतिष्ठन् पुमान् विमुक्तपुण्यपापादिबन्धनः संश्चोदनायाः विधिनिषेधलक्षणाया विमुच्यते न हि त्वद्भक्तो विधिकिङ्करः स्यात् ॥ ४६ ॥ आसन्निति ॥ प्रथमेन्तरे स्वायंभुवे मन्वन्तरे मरीचेः प्रजापतेः ऊर्णायां मरीचये कलां प्रादादित्युक्तत्वात्तस्या एवोर्णेति नामान्तरं तस्यां भार्यायां षट् पुत्रा देवा आसन् ते च सुतां सरस्वतीं यभितुं मैथुनेन रन्तुं इडार्षः उद्यतं कं ब्रह्माणं वीक्ष्य जहसुः ॥४७॥ तेनेति युग्मम् ॥ ते च तेन परिहासात्मकेन दुष्टेन कर्मणा अधुना तत्क्षणम् आसुरीं योनिमगन् अगमन् मलोप आर्षः । अत एव हिरण्यकशिपोः सकाशाज्जाताः यद्यपि प्रह्लादादयस्तत्पुत्रा उक्तास्तथाप्यनयैवोक्त्या एतेऽपि ततो जाता इति ज्ञेयम् । केचित् हिरण्यकशिपोर्वीर्यात्कालनेमिक्षेत्रे जाता

शाध्यस्मानीशितव्येश निष्पापान्कुरु न प्रभो ॥ पुमान्यच्छ्रद्धया तिष्ठञ्चोदनाया विमुच्यते ॥ ४६ ॥ श्रीभगवानुवाच ॥ आसन्मरीचेः षट् पुत्रा ऊर्णायां प्रथमेऽन्तरे ॥ देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतम् ॥ ४७ ॥ तेनासुरीमगन्योनिमधुनाऽवद्यकर्मणा ॥ हिरण्यकशिपोर्जाता नीतास्ते योगमायया ॥ ४८ ॥ देवक्या उदरे जाता राजन्कंसविहिंसिताः ॥ सा तांञ्छोचत्यात्मजान्स्वांस्त इमेऽध्यासतेऽन्तिके ॥ ४९ ॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये ॥ ततः शापाद्विनिर्मुक्ता लोकं यास्यन्ति विज्वराः ॥ ५० ॥ स्मरोद्गीथः परिष्वङ्गः पतङ्गः क्षुद्रभृद् घृणी ॥ षडिमे मत्प्रसादेन पुनर्यास्यन्ति सद्गतिम् ॥ ५१ ॥ इत्युक्त्वा तान्समादाय इन्द्रसेनेन पूजितौ ॥ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छताम् ॥ ५२ ॥

इत्याहुः । ते च योगमायया ततो नीताः सन्तः देवक्या उदरे जाताः हे राजन् बले ते च कंसेन विहिंसिताः सा च देवकी तान् स्वान् स्वकीयानात्मजान् मत्वा शोचति ते चेमेऽधुना तवान्तिकेऽध्यासते इमे इति तत्रैवोपविष्टान् बलिना शापमोचकभगवद्दर्शनार्थं तत्रानीतानङ्गुल्या निर्दिशति ॥ ४८ ॥ ४९ ॥ इत इति ॥ मातुः शोकस्यापनुत्तये निरासार्थम् इतः स्थानादेतान्प्रणेष्यामः ततः शोकापनोदनानन्तरं शापात् प्रजापत्युपहासनिमित्तात्तत्कृतादासुरभावाद्विनिर्मुक्ता अत एव विज्वरा निर्दुःखाः सन्तो लोकं प्रथमं कर्मशेषात् देवलोकं यास्यन्ति ॥ ५० ॥ स्मर इति ॥ स्वर्गभोगानन्तरं च स्मरसहित उद्गीथ इति मध्यमपदलोपी समासः इमे स्मरादयः षट् मत्प्रसादेन पुनः सतां गतिं प्राप्य मम लोकं यास्यन्ति स्मरस्यै व पूर्वं कीर्तिमदिति नाम वस्तुतः स्मरादीनि मरीचिपुत्रत्वदशायां नामानि ॥ ५१ ॥ इतीति ॥ इत्युक्त्वा तान् पुत्रान् समादाय इन्द्रसेनेन बलिना पूजितौ रामकृष्णौ पुनर्द्वारकामागत्य मातुः मात्रे पुत्रान् अयच्छताम् अर्पयामासतुः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तानिति ॥ बालकान् मातृतोषार्थं श्रीकृष्णेच्छया बालकरूपेणाविर्भूतान् तान् कीर्तिमदादीन् दृष्ट्वा तेषां पुत्राणां स्नेहेन स्नुतौ प्रस्रवन्तौ स्तनौ यस्याः सा देवकी तान् परिष्व-ज्याङ्कमारोप्य अभीक्ष्णशो मूर्ध्नि अजिघ्रत् ॥ ५३ ॥ अपाययदिति ॥ यया मायया सृष्टिः प्रवर्तते तया विष्णोर्मायया मोहिता अत एव प्रीता सुतानां स्पर्शेन परिप्लुतं क्षरद् दुग्धं स्तनम् अपाययत् ॥ ५४ ॥ पीत्वेति युग्मम् ॥ गदाभृतो भगवतः पीतशेषमिति बभूव प्राकृतः शिशुरित्युक्तेः । शिशुभवनसमये दूरगमनेन निबन्धनोऽस्य कण्ठशोषो मा भूदिति देवकी स्तन्यं पाययामासेति तत्रानुक्तमप्यनयैवोक्त्या ज्ञेयम् । अमृतमयं तस्याः पयः पीत्वा नारायणस्य श्रीकृष्णस्याङ्गसंस्पर्शात् प्रतिलब्धम् आत्मदर्शनं स्वज्ञानं यैस्ते गोविन्दादीन्नमस्कृत्य सर्वभूतानां मिषतां पश्यतामेव सतां दिवौकसां धाम स्वर्गं ययुः ॥ ५५ ॥ ५६ ॥ तमिति ॥ देवी देवकी तं मृतानां पुत्राणामागमनपूर्वकं निर्गमं दृष्ट्वा सुविस्मिता सती हे नृप अहंताममतात्मिकाम् अपत्यादिरूपां वा कृष्णस्य रचितां मायां मेने ॥ ५७ ॥ एवमिति ॥ हे भारत अनन्तवीर्यस्य परमात्मनः कृष्णस्य एवं

तान्दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी ॥ परिष्वज्याङ्कमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥ ५३ ॥ अपाययत्स्तनं प्रीता सुतस्पर्शपरिप्लुता ॥ मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते ॥ ५४ ॥ पीत्वाऽमृतं पयस्तस्याः पीतशेषं गदाभृतः ॥ नारायणाङ्गसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥ ५५ ॥ ते नमस्कृत्य गोविन्दं देवकीं पितरं बलम् ॥ मिषतां सर्वभूतानां ययुर्धाम दिवौकसाम् ॥ ५६ ॥ तं दृष्ट्वा देवकी देवी मृतागमन-निर्गमम् ॥ मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ॥५७॥ एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः ॥ वीर्याण्यनन्तवीर्यस्य सन्त्यनन्तानि भारत ॥५८॥ सूत उवाच ॥ य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ॥ जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥ ५९ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे मृताग्रजानयनं नाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामः स्वसारं रामकृष्णयोः ॥ यथोपयेमे विजयो या ममासीत्पितामही ॥ १ ॥

विधान्यद्भुतानि अनन्तानि वीर्याणि पराक्रमाः सन्ति ॥ ५८ ॥ य इति ॥ जगतः श्रवणकीर्तनपरस्य जनस्य अघं पापं भिनत्तीति तथा तत् तत्रापि अलं निःशेषं यथा भवति तथा तद्भक्तानां सतां तु कर्णपूरं कर्णयोः परमानन्दजनकम् अत एव व्यासपुत्रैर्वर्णितं बहुवचनं पूजार्थम् अमृतं जन्ममरणादिभयनिवर्तिका श्रवणानन्दजनका च कीर्तिर्यशो यस्य तस्य मुरारेरिदं चरितं यः पुमान् शृणोति श्रावयेद्वा स भगवति स्थिरीकृतं चित्तं येन तथाभूतः संस्तस्य क्षेमं धाम कामादिभयरहितं लोकं याति॥५९॥ इति श्रीकृष्णसे-वार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे पञ्चाशीतितमे व्यधात्॥८५॥षडशीतितमेऽहारि सुभद्राऽथात्र मैथिलौ ॥ हरिर्भक्तावन्वगृह्णात्तत्र श्लोका नवेर्षवः ॥ अंघ्रीवाचेति वाक्यानि स्यार्द्धांषष्टिरनुष्टुभाम् ॥८६॥ अन्येषां विवाहाः श्रुताः सुभद्राविवाहो मज्जन्महेतुः सोऽपि कथ्यतामित्याह—ब्रह्मन्निति ॥ विजयोऽर्जुनो रामकृष्णयोः स्वसारं भगिनीं ॥२६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा येन प्रकारेणोपयेमे तं विवाहप्रकारं वयं वेदितुमिच्छामः । या तयोः स्वसा मम पितामही आसीत् ॥ १ ॥ अर्जुन इति युग्मम् ॥ प्रभुः अर्जुनः तीर्थयात्रायां निमित्तभूतायामवनीं पृथ्वीं पर्यटन् प्रभासं नाम तीर्थं प्रति गतः तत्र सः आत्मनो मातुलेयीं मातुलकन्यां सुभद्रां रामो दुर्योधनाय दास्यति अपरे वसुदेवादयस्तु तां तस्मै न दास्यन्तीत्यश्रृणोत् तल्लिप्सुः शेषषष्ठ्या समासः तां जिहीर्षुरित्यर्थः । अर्जुनः यतिर्भूत्वा रामं वञ्चयितुं भिक्षाव्याजेनान्तःपुरं प्रवेष्टुं च पूज्यतमं त्रिदण्डिवेषं विधाय द्वारकामगात् ॥ २ ॥ ॥ ३ ॥ तत्रेति ॥ पौरैः अजानता रामेण चाभीक्ष्णं सत्कृतः स्वार्थं सुभद्राविवाहं साधयतीति तथाभूतः सोऽर्जुनो वार्षिकान् आषाढाद्याश्विनान्तांश्चतुरो मासांस्तत्र द्वारकायां न्यवात्सीत् ॥ ४ ॥ एकदेति ॥ एकदा तमातिथ्येन निमन्त्र्य गृहमानीय बलेन यच्छ्रद्धयोपहृतं परिविष्टं भैक्षमन्नं तदर्जुनः बुभुजे ॥ ५ ॥ स इति ॥ सोऽर्जुनस्तत्र गृहे महतीं कौमारमतिक्रान्तां वीराणां मनो हरतीति तथा तां कन्यामपश्यत् दृष्ट्वा प्रीत्योत्फुल्ले विकसिते ईक्षणे यस्य सः तस्यां कन्यायां भावेन रत्यभिप्रायेण क्षुब्धं क्षुभितं मनो दधे

श्रीशुक उवाच ॥ अर्जुनस्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः ॥ गतः प्रभासमश्रृणोन्मातुलेयीं स आत्मनः ॥२॥ दुर्योधनाय रामस्तां दास्यतीति न चापरे ॥ तल्लिप्सुः स यतिर्भूत्वा त्रिदण्डी द्वारकामगात् ॥३॥ तत्र वै वार्षिकान्मासानवात्सीत्स्वार्थसाधकः ॥ पौरैः सभाजितोऽभीक्ष्णं रामेणाऽजानता च सः ॥४॥ एकदा गृहमानीय आतिथ्येन निमन्त्र्य तम् ॥ श्रद्धयोपाहृतं भैक्ष्यं बलेन बुभुजे किल ॥५॥ सोऽपश्यत्तत्र महतीं कन्यां वीरमनोहराम् ॥ प्रीत्युत्फुल्लेक्षणस्तस्यां भावक्षुब्धं मनो दधे ॥ ६ ॥ सापि तं चकमे वीक्ष्य नारीणां हृदयङ्गमम् ॥ हसन्ती व्रीडितापाङ्गी तन्न्यस्तहृदयेक्षणा ॥ ७ ॥ तां परं समनुध्यायन्नन्तरं प्रेप्सुरर्जुनः ॥ न लेभे शं भ्रमच्चित्तः कामेनातिबलीयसा ॥ ८ ॥ महत्यां देवयात्रायां रथस्थां दुर्गनिर्गताम् ॥ जहारानुमतः पित्रोः कृष्णस्य च महारथः ॥ ९ ॥ रथस्थो धनुरादाय शूरांश्चाऽरुन्धतो भटान् ॥ विद्राव्य क्रोशतां स्वानां स्वभागं मृगराडिव ॥ १० ॥ तच्छ्रुत्वा क्षुभितो रामः पर्वणीव महार्णवः ॥ गृहीतपादः कृष्णेन सुहृद्भिश्चान्वशाम्यत ॥ ११ ॥

॥ ६ ॥ सापीति ॥ व्रीडितौ व्रीडाप्रयुक्तौ अपाङ्गौ नेत्रान्तौ यस्याः सा तस्मिन्नेव न्यस्तं हृदयमीक्षणे च यस्याः सा तं नारीणां हृदयंगमं मनोहरं वीक्ष्य चकमे पतित्वेन कामितवती ॥७॥ तामिति ॥ परं केवलं तां कन्यामेव समनुध्यायन् अन्तरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः अतिबलीयसा कामेन भ्रमच्चित्तं यस्य सः शं रामादिसम्मानजनितं सुखं न लेभे ॥ ८ ॥ महत्यामिति युग्मम् ॥ कदाचिन्महत्यां देवयात्रायां निमित्तभूतायां पित्रोः देवकीवसुदेवाभ्यां कृष्णेन च शेषे षष्ठ्यौ । अनुमतः महारथो रथस्थोऽर्जुनः धनुरादायार्जुनः आ सर्वतो रुन्धतः शूरान्भटान् विद्राव्य पलायितान् कृत्वा स्वानां यदूनां क्रोशतां सतां दुर्गात् प्राकाराद्बहिर्निर्गतां रथस्थां तस्मै रथसामर्थ्यं दातुं भगवतैव रथमारोपितां कन्यां जहार । यथा मृगराट् सिंहः स्वभागं हरति तद्वत् ॥९॥१०॥ तदिति ॥ तत् हरणं श्रुत्वा रामः क्षुभितः क्रुद्धः ततः सान्त्वयता कृष्णेन सुहृद्भिरन्यैश्च गृहीतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादौ यस्य सोऽन्वशाम्यत शान्तो जातः । तङ्गार्षः ॥ ११ ॥ प्राहिणोदिति सार्द्धम् ॥ कृष्णानुमत्यैव तेन हृतेति न तस्य दोष इति हेतोः मुदा युक्तो बलः पारिबर्हाणि प्रीत्या देयानि श्रेष्ठवस्तूनि तथा महाधना अनर्घ्या उपस्करा अलङ्कारा येषां तान् इभान् गजान् रथान् अश्वान् नरान् योषितो दासीश्च वरवध्वोः प्राहिणोत् । तदा च यदवः पाण्डवाश्च सर्वे प्रीत्या संहृष्टा बभूवुः । इदमर्द्धमसार्वत्रिकम् ॥ १२ ॥ अथ स्वयं प्रत्यक्षतोनुऽभूतं तच्चरितविशेषमपृष्टमपि स्वयमाह शुक उवाचेति । मध्ये पुनरुक्तिः कथान्तरापेक्षया कृष्णस्येति ॥ कृष्णे या एका अनन्यप्रयोजना भक्तिस्तयैव पूर्णार्थः पूर्णमनोरथः शान्तः कविः विवेकी अलम्पटः विषयासक्तिरहितः श्रुतदेव इति श्रुतो नाम्ना प्रसिद्धः द्विजश्रेष्ठः कृष्णस्य भक्त आसीत् ॥ १३ ॥ स इति ॥ स च गृहाश्रमी अपि अनीहया अनुद्यमेनैवागतं यदाहार्यं भोज्यं तेनैव निर्वर्तिता निजाः क्रिया येन सः विदेहेषु विदेहवंशावासदेशेषु तत्रापि मिथिलायां पुर्यामुवास ॥ १४ ॥ यात्रेति ॥ यात्रामात्रं शरीरादिनिर्वाहमात्रं तु दैवात् प्रारब्धात् उपनमत्युत प्रत्यागच्छत्येव अधिकं

प्राहिणोत्पारिबर्हाणि वरवध्वोर्मुदा बलः ॥ महाधनोपस्करेभरथाश्वनरयोषितः ॥ श्रीशुक उवाच ॥ कृष्णस्यासीद्द्विजश्रेष्ठः श्रुतदेव इति श्रुतः ॥ १२ ॥ कृष्णैकभक्त्या पूर्णार्थः शान्तः कविरलम्पटः ॥ १३ ॥ स उवास विदेहेषु मिथिलायां गृहाश्रमी ॥ अनीहयाऽऽगताऽहार्यनिर्वर्तितनिजक्रियः ॥१४॥ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत ॥ नाधिकं तावता तुष्टः क्रियाश्चक्रे यथोचिताः ॥ १५ ॥ तथा तद्राष्ट्रपालोऽङ्ग बहुलाश्व इति श्रुतः ॥ मैथिलो निरहंमान उभावप्यच्युतप्रियौ ॥ १६ ॥ तयोः प्रसन्नो भगवान्दारुकेणाहृतं रथम् ॥ आरुह्य साकं मुनिभिर्विदेहान्प्रययौ प्रभुः ॥ १७ ॥ नारदो वामदेवोऽत्रिः कृष्णो रामोऽसितोऽरुणिः ॥ अहं बृहस्पतिः कण्वो मैत्रेयश्च्यवनादयः ॥ १८ ॥ तत्र तत्र तमायान्तं पौरा जानपदा नृप ॥ उपतस्थुः सार्घहस्ता ग्रहैः सूर्यमिवोदितम् ॥ १९ ॥ आनर्तधन्वकुरुजाङ्गलकङ्कमत्स्यपाञ्चालकुन्तिमधुकेकयकोसलार्णाः ॥ अन्ये च तन्मुखसरोजमुदारहाससस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः ॥ २० ॥

तु प्रयत्नेनापि नागच्छति इति मत्वा तावता अप्रयत्नप्राप्तेनैव संतुष्टो यथोचिताः क्रियाश्चक्रे ॥ १५ ॥ तथेति ॥ अङ्ग हे राजन् तद्राष्ट्रपालः तद्देशाधिपतिः बहुलाश्व इति श्रुतो नाम्ना प्रसिद्धः । मैथिलो मिथिलस्य जनकस्य वंशः मिथिलाया ईश्वरो वा निरहंमानः राजत्वभक्तत्वाहंकाररहितः ज्ञानी तथा श्रुतदेववद्भगवद्भक्तश्चात उभावप्यच्युतस्य प्रियौ ॥१६॥ तयोरिति ॥ तयोः प्रसन्नः सन्भगवान् कृष्णः स्वयं प्रभुरेव दारुकेण सारथिना आहृतमानीतं रथं मुनिभिः साकं सहारुह्य विदेहान्देशान् प्रययौ ॥१७॥ मुनीनां नामान्याह—नारद इति ॥ कृष्णो द्वैपायनः रामो भार्गवः अहं शुकः ॥ १८ ॥ तत्रेति ॥ हे नृप पौराः पुरवासिनः जानपदाः देशवासिनश्च सार्घाः हस्ता येषां ते तत्र तत्र मार्गे आयान्तं तं भगवन्तमुपतस्थुः पूजितवन्तः । ग्रहैः गुरुशुक्रादिभिः सहोदितं सूर्यमिव ॥ १९ ॥ आनर्तेति ॥ आनर्त्ताद्यर्णान्तदेशवर्त्तिनो जनाः तथान्ये च अन्यदेशीया नृनार्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरो नार्यश्च उदारो हासः स्निग्धे ईक्षणे च यस्मिंस्तत्तस्य भगवतो मुखसरोजं दृशिभिः पपुः । मुखगतलावण्यरूपं मकरन्दं नेत्रचषकैः पपुरित्यर्थः । आनर्त्तादयः केचन मार्गस्थाः केचित्पार्श्वस्था अपि तेषां कृपया वक्रेणापि पथा गमनात् अत एवागाच्छनकैर्विदेहान् इति वक्ष्यते ॥ २० ॥ तेभ्य इति ॥ त्रिलोकगुरुः भगवान् स्वदर्शनेन विनष्टं तमिस्रमज्ञानं यासां तादृशो बुद्धयो येषां तेभ्यः । " पुमान् स्त्रिया " इत्येकशेषात् नृभ्यो नारीभ्यश्चेत्यर्थः । अर्थदृशं तत्वज्ञानं तत्फलं क्षेमं भाविनं मोक्षं च स्वकृपादृष्टयैव यच्छन् तथा दिगन्तधवलं दशदिक्षु व्याप्तं विशुद्धं सुरैर्नृभिश्च गीतम् अशुभघ्नं गानकर्त्तॄणां श्रोतॄणां च सर्वपापनिवर्तकं स्वयशः शृण्वन् शनकैर्विदेहान्देशान् अगात् ॥ २१ ॥ ते इति ॥ हे नृप ते वैदेहाः पौरा जानपदाश्च अच्युतं प्राप्तमाकर्ण्य मुदिताः गृहीतमर्हणं यैस्ते पाणयो येषां ते तस्मै भगवते अभीयुः तं प्रत्युज्जग्मुः ॥ २२ ॥ दृष्ट्वेति ॥ उत्तमश्लोकं कृष्णं श्रुतपूर्वान् मुनींश्च दृष्ट्वा प्रीत्योत्फुल्लानि आननानि आशया अन्तःकरणानि च येषां ते विदेहवासिनो जना धृतो बद्धोऽञ्जलिर्येषु तैः कैः शिरोभिस्तान्नेमुः ॥ २३ ॥ स्वे-

तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् ॥ शृण्वन्दिगन्तधवलं स्वयशोऽशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् ॥ २१ ॥ तेऽच्युतं प्राप्तमाकर्ण्य पौरा जानपदा नृप ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥ २२ ॥ दृष्ट्वा त उत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः ॥ कैर्धृताञ्जलिभिर्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥ २३ ॥ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गुरुम् ॥ मैथिलः श्रुतदेवश्च पादयोः पेततुः प्रभोः ॥ २४ ॥ न्यमन्त्रयेतां दाशार्हमातिथ्येन सह द्विजैः ॥ मैथिलः श्रुतदेवश्च युगपत्संहताञ्जली ॥ २५ ॥ भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया ॥ उभयोराविशद्गेहमुभाभ्यां तदलक्षितः ॥ २६ ॥ श्रोतुमप्यसतां दूराज्जनकः स्वगृहागतान् ॥ आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः ॥ २७ ॥ प्रवृद्धभक्त्या उद्धर्षहृदयास्राविलेक्षणः ॥ गत्वा तदङ्घ्रीन्प्रक्षाल्य तदपो लोकपावनीः ॥ २८ ॥ सकुटुम्बो वहन्मूर्ध्ना पूजयाञ्चक्र ईश्वरान् ॥ गन्धमाल्याम्बराकल्पधूपदीपार्घगोवृषैः ॥ २९ ॥

ति ॥ जगद्गुरुं तं श्रीकृष्णं स्वानुग्रहार्थं सम्प्राप्तं मन्वानौ मैथिलः श्रुतदेवश्चेत्येतौ प्रभोस्तस्य पादयोः पेततुः ॥ २४ ॥ न्यमन्त्रयेतामिति ॥ संहतौ संयोजितावञ्जली ययोस्तौ मैथिलः श्रुतदेवश्चेत्येतौ द्विजैः सहितं दाशार्हं कृष्णम् आतिथ्येन पूजार्थं युगपदेव न्यमन्त्रयेताम् ॥ २५ ॥ भगवानिति ॥ तत्तयोर्निमन्त्रणमभिप्रेत्य अङ्गीकृत्य द्वयोः प्रियं कर्तुमिच्छया ताभ्यामलक्षितः मद्गृहादन्यस्य गृहं यातीत्यज्ञात एव भगवान् उभाभ्यां रूपाभ्यामुभयोरपि गेहं मुनिसाहित्यादिनाऽऽविशत् ॥ २६ ॥ श्रोतुमिति त्रयम् ॥ प्रवृद्धया भक्त्या उद्धर्षम् उद्गतहर्षं हृदयं यस्य अस्रैरानन्दाश्रुभिः आविले प्राप्ते ईक्षणे यस्य स चासौ स च अत एव महामना उदारचित्तः जनकः असतां दुराचाराणां श्रोतुमपि दूरान् कृपया स्वगृहागतान् आनीतेषु निवेदितेष्वासनश्रेष्ठेषु सुखं यथा तथा आसीनान् नत्वा तेषामङ्घ्रीन् प्रक्षाल्य लोकपावनीस्तेषामङ्घ्रीणामपो जलानि समासान्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाव आर्षः । सकुटुम्बो मूर्ध्ना वहन् मूर्ध्नि धारयन् ईश्वरं कृष्णं तत्तुल्यान् मुनींश्चेति ईश्वरान् गन्धादिभिः पूजयामास । आकल्पोऽलङ्कारः गोवृषैरिति गवादिनिवेदनमपि कृतवानित्यर्थः । ईश्वरानिति बहुवचनेन मुनिसमूहस्यापि रूपद्वयं जातं भगवानेव वा सर्वस्वरूपो बभूवेति ज्ञेयम् ॥ २७ ॥ २८ ॥ २९ ॥ वाचेति ॥ ततोऽन्नेन तर्पितान् मधुरया गिरा प्रीणन् प्रीणयन् अङ्कगतौ अङ्कीकृतौ विष्णोः कृष्णस्य पादौ शनकैः संस्पृशन् संमर्दयन् मुदा हर्षेणेदं वक्ष्यमाणमाह स्म ॥ ३० ॥ भवानिति ॥ हे प्रभो भवान् हि स्वदृक् स्वप्रकाशः सर्वभूतानामात्मा चेतयिता साक्षी च अथ अतः कारणात् यद्वा त्वमदृश्यः अथापीति त्वत्पदाम्भोजं स्मरतां भक्तानां नोऽस्माकं दर्शनं गतः ॥ ३१ ॥ स्ववच इति ॥ एकान्तभक्तात् अनन्यप्रयोजनभक्तियुक्तात् अनन्तः सङ्कर्षणो बन्धुरपि श्रीर्लक्ष्मीर्भार्यापि अजो ब्रह्मा पुत्रोऽपि मम प्रियो न भवतीति यदात्थ कथयसितत्स्ववचः ऋतं सत्यं कर्तुं भवान् अस्माकं दृग्गोचरो नेत्रविषयो जातः ॥ ३२ ॥ क इति ॥ यस्त्वं निष्किंचनानां सर्वतो विरक्तानां शान्तानां मुनीनाम् आत्मदः

वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान् ॥ पादावङ्कगतौ विष्णोः संस्पृशञ्छनकैर्मुदा ॥ ३० ॥ राजोवाच ॥ भवान्हि सर्वभूतानामात्मा साक्षी स्वदृग्विभो ॥ अथ नस्तत्पदाम्भोजं स्मरतां दर्शनं गतः ॥ ३१ ॥ स्ववचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान् ॥ यदात्थैकान्तभक्तान्मे नानन्तः श्रीरजः प्रियः ॥ ३२ ॥ को नु त्वच्चरणाम्भोजमेवं विद्विसृजेत्पुमान् ॥ निष्किञ्चनानां शान्तानां मुनीनां यस्त्वमात्मदः॥३३॥ योऽवतीर्य यदोर्वंशे नृणां संसरतामिह ॥ यशो वितेने तच्छान्त्यै त्रैलोक्यवृजिनापदम् ॥ ३४ ॥ नमस्तुभ्यं भगवते कृष्णायाकुण्ठमेधसे ॥ नारायणाय ऋषये सुशान्तं तप ईयुषे ॥ ३५ ॥ दिनानि कतिचिद्भूमन्गृहान् नो निवस द्विजैः ॥ समेतः पादरजसा पुनीहीदं निमेः कुलम् ॥ ३६ ॥ इत्युपामन्त्रितो राज्ञा भगवाँल्लोकभावनः ॥ उवास कुर्वन्कल्याणं मिथिलानरयोषिताम् ॥ ३७ ॥ श्रुतदेवोऽच्युतं प्राप्तं स्वगृहाञ्जनको यथा ॥ नत्वा मुनीन्सुसंहृष्टो धुन्वन्वासो ननर्त ह ॥ ३८ ॥

आत्मानमपि ददासि अन्यदानस्य का वार्ता । एवंवित्पुमान् तस्य तव चरणाम्भोजं को नु विसृजेत् परित्यजेत् ॥ ३३ ॥ य इति ॥ इह संसारे संसरतां जन्ममरणाद्यनुभवतां नृणां प्राणिनां तच्छान्त्यै तस्य संसारस्योपशमनाय यस्त्वं यदोर्वंशेऽवतीर्य त्रैलोक्यवृजिनापहं यशो वितेने ॥ ३४ ॥ नम इति ॥ सुशान्तं परोद्वेजनरहितं तपः ईयुषे लोकशिक्षार्थं कुर्वते स्पष्टं शेषम् ॥ ३५ ॥ दिनानीति ॥ हे भूमन् द्विजैर्मुनिभिः समेतस्त्वं नोऽस्माकं गृहान् गृहेषु कतिचिद्दिनानि निवसन् पादरजसा इदं निमेः कुलं पुनीहि पवित्रीकुरु ॥ ३६ ॥ इतीति ॥ राज्ञा जनकेनेत्येवमुपामन्त्रितः संप्रार्थितः यतो लोकभावनः लोकपालकः अतो मिथिलानरयोषितां कल्याणं कुर्वन् कर्तुं भगवांस्तत्रोवास ॥ ३७ ॥ श्रुतेति ॥ यथा जनकस्तथा श्रुतदेवोऽपि स्वगृहान् प्रति प्राप्तमच्युतं मुनींश्च नत्वा सुसंहृष्टः सन् वासो धुन्वन् परिभ्रामयन् ननर्त ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृणेति ॥ स्वगृहाभ्यन्तरात् प्रतिवेशिगृहेभ्यश्च आनीतेषु तृणमयेषु पीठेषु बृसीषु दर्भासनेषु चैतान् मुनीनुपवेश्य स्वागतप्रश्नेनाभिनन्द्य सभार्यः स श्रुतदेवो मुदा हर्षेण तेषामङ्घ्रीनवनिजे अवनिनिजे प्रक्षालितवान् । अभ्यासलोप आर्षः ॥ ३९ ॥ तदिति ॥ महाभागः उद्धर्षः उत्कटहर्षवान् लब्धसर्वमनोरथः स गृहेण अन्वयेन कुटुम्बेन च सहितमात्मानं तदम्भसा पादप्रक्षालनजलेन स्नापयांचक्रे॥४०॥फलेति ॥ फलानि चार्हणानि गन्धपुष्पधूपदीपादीनि च उशीराणि सुगन्धितृणविशेषमूलानि तैः सुवासितानि शिवानि शीतलानि अमृतवत्स्वादूनि अम्बूनि च तैः । यद्वा । शिवामिष्टतार्थं घटनिक्षिप्तपक्वशुष्कामलीसुरभ्या मृदा कयाचित् कस्तूरीतुल्यगन्धया मृदा च तुलस्या कुशैरम्बुजैश्च सत्वविवर्धनान्धसा भूतानुपद्रवलब्धत्वात् सत्वगुणवर्द्धकं यदन्नं तेन च यथोपपन्नया अनायासेन सम्पन्नया सपर्यया पूजयामास श्रुतदेव आराधयामास ॥ ४१ ॥ स इति ॥ गृहमेवान्धकूपस्तस्मिन्पतितस्य मम कृष्णेन तथास्य कृष्णस्यात्मनो मूर्तैर्निकेतैः निवासस्थानभूतैः अत एव सर्वतीर्थानामास्पदभूता पादरेणवो येषां तथाभूतैर्भूसुरैश्च सह

तृणपीठबृसीष्वेतानानीतेषूपवेश्य सः ॥ स्वागतेनाभिनन्द्याङ्घ्रीन्सभार्योऽवनिजे मुदा ॥ ३९ ॥ तदम्भसा महाभाग आत्मानं स सहान्वयम् ॥ स्नापयाञ्चक्र उद्धर्षो लब्धसर्वमनोरथः ॥ ४० ॥ फलार्हणोशीरशिवामृताम्भसा मृदा सुरभ्या तुलसीकुशाम्बुजैः ॥ आराधयामास यथोपपन्नया सपर्यया सत्त्वविवर्धनान्धसा ॥ ४१ ॥ स तर्कयामास कुतो ममान्वभूद्गृहान्धकूपे पतितस्य सङ्गमः ॥ यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन चास्यात्मनिकेतभूसुरैः ॥ ४२ ॥ सूपविष्टान्कृतातिथ्याञ्छ्रुतदेव उपस्थितः ॥ सभार्यस्वजनापत्य उवाचाङ्घ्र्यभिमर्शनः ॥ ४३ ॥ श्रुतदेव उवाच ॥ नाद्य नो दर्शनं प्राप्तः परं परमपूरुषः ॥ यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्मसत्तया ॥ ४४॥ यथा शयानः पुरुषो मनसैवात्ममायया ॥ सृष्ट्वा लोकं परं स्वात्ममनुविश्यावभासते ॥ ४५ ॥

यः सङ्गमः स कुतोन्वभूदिति स श्रुतदेवस्तर्कयामास ॥४२॥ सूपविष्टानिति ॥ भार्या भर्तव्याः स्वजना अपत्यानि च तैः सहितः सभार्य इति सविसर्गपाठे भार्यया सहितः स्वजनामात्य इति पाठे स्वजनाः सुता एवामात्या यस्य सः श्रुतदेवः कृतमातिथ्यं पूजादि येषां तान् सुखेनोपविष्टान् मुन्यादीन् उपस्थितः समीप उपविष्टः कृष्णस्याङ्घ्री अभिमृशति संमर्दयतीत्यङ्घ्र्यभिमर्शनः सन्नुवाच ॥४३॥ नेति ॥ परमपूरुषः पुरुषोत्तमो भवानद्यैव प्राप्तः । यद्वा । यर्हीदं प्रविष्टः तदैव नोऽस्माकं दर्शनं प्राप्तः इति स एव सन्मात्रो भवान्नत्वद्य नाद्यतनीभूतस्त्वमित्यर्थः ॥ ४४ ॥ यथेति ॥ आत्मनस्तव मायया मोहितेन मनसा यथैक एव शयानः पुरुषः परम् अस्माज्जाग्रद्देहाद्विलक्षणं स्वाप्नं लोकं देवतिर्यङ्मनुष्यादिदेहसमूहं सृष्ट्वा तमनुविश्य नानावभासते तद्वत् त्वमपि नानावभासि ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृण्वतामिति ॥ शश्वन्निरन्तरम् एव त्वां गदताम् अर्चतामभिवन्दताम् शतार्षः । अत एवामलात्मनां नृणामपि त्वं हृद्येव भासि मम तु लोचनगोचरोऽपि जात इत्यहो मम भाग्यमिति भावः ॥ ४६ ॥ हृदिस्थोऽपीति ॥ कर्मभिः लौकिकवैदिकव्यापारैर्निक्षिप्तं चेतो येषां तेषां हृदिस्थोऽप्यदिदूरस्थ एव आत्मशक्तिभिरहङ्कारादिभिः अग्राह्यो व्यवहितोऽपि उपेतगुणः प्राप्तश्रवणकीर्तनादिसंस्कारः आत्मान्तःकरणं येषां तेषां तु आच्छादकाहङ्कारादिनिवृत्तेः अन्ति समीपे अव्यवहित एव त्वमित्यर्थः ॥ ४७ ॥ नम इति ॥ अध्यात्मविदां ब्रह्मात्मैकत्वं पश्यतां निवृत्तदेहाद्यहङ्काराणां परमात्मने परमात्मत्वेन प्रकाशमानाय मोक्षप्रदाय अनात्मने देहाद्यभिमानिने जीवाय तु परमात्मत्वेनाप्रकाशमानत्वात् स्वात्मनः सकाशात् विभक्तः समर्पितो मृत्युः मृत्यूपलक्षितः संसारो येन तस्मै सकारणं महदादिकार्यम् अकारणं प्रकृतिः तदुभयं लिङ्गमुपाधिं नियम्यतया ईयुषे प्राप्तवते हे स्वमायया असंवृत अलुप्तैश्वर्यरुद्धा मायावित्वादन्येषामावृता दृष्टिर्येन तस्मै । यद्वा । स्वमायया स्वस्यासंवृता अन्येषां रुद्धा दृष्टिर्येनेत्येकं पदम् ।

शृण्वतां गदतां शश्वदर्चतां त्वाऽभिवन्दताम् ॥ नृणां संवदतामन्तर्हृदि भास्यमलात्मनाम् ॥ ४६ ॥ हृदिस्थोऽप्यतिदूरस्थः कर्मविक्षिप्तचेतसाम् ॥ आत्मशक्तिभिरग्राह्योऽप्यन्त्युपेतगुणात्मनाम् ॥ ४७ ॥ नमोऽस्तु तेऽध्यात्मविदां परात्मने अनात्मने स्वात्मविभक्तमृत्यवे ॥ सकारणाःकारणलिङ्गमीयुषे स्वमाययाऽसंवृतरुद्धदृष्टये ॥ ४८ ॥ स त्वं शाधि स्वभृत्यान्नः किं देव करवामहे ॥ एतदन्तो नृणां क्लेशो यद्भवानक्षिगोचरः ॥ ४९ ॥ श्रीशुक उवाच ॥ ॥ तदुक्तमित्युपाकर्ण्य भगवान्प्रणतार्तिहा ॥ गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह ॥ ५० ॥ श्रीशुक उवाच ॥ ब्रह्मंस्तेऽनुग्रहार्थाय संप्राप्तान्विद्ध्यमून्मुनीन् ॥ संचरन्ति मया लोकान्पुनन्तः पादरेणुभिः ॥ ५१ ॥ देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः ॥ शनैः पुनन्ति कालेन तदप्यर्हत्तमेक्षया ॥ ५२ ॥

यद्वा । स्वमायया संवृतानां मोहितानां रुद्धा स्वविषयिका दृष्टिर्ज्ञानं येन तस्मै तुभ्यं नमः ॥ ४८ ॥ स त्वमिति ॥ स उक्तविधः परमेश्वरस्त्वं स्वभृत्यान्नोऽस्मान् शाधि आज्ञापय । हे देव तवेष्टं वयं किं करवामेति यत् यदा भवानक्षगोचरो भवेत् एतदन्तः एतत्पर्यन्त एव नृणां क्लेशो भवति ॥ ४९ ॥ तदिति ॥ इत्येवं तदुक्तं श्रुतदेवोक्तमुपाकर्ण्य श्रुत्वा प्रणतार्तिहा भगवान् स्वपाणिना तत्पाणिं गृहीत्वा हेति हर्षेण प्रहसंस्तमुवाच ॥ ५० ॥ स्वस्तुतिमाकर्ण्य स्वभक्तानां ब्राह्मणानां स्तुतिमनाकर्ण्य लोकसङ्ग्रहाय ब्राह्मणान् प्रशंसन्नाह—ब्रह्मन्निति ॥ ब्रह्मन् मया हृदि स्थितेन हेतुभूतेन स्वपादरेणुभिर्लोकान्पुनन्तो ये संचरन्ति तानेतान् मुनीन् तवानुग्रहार्थायेह प्राप्तान्विद्धि ॥ ५१ ॥ देवा इति ॥ देवाः प्रतिमाः क्षेत्राणि अयोध्यामथुरादीनि तीर्थानि गङ्गादीनि दर्शनादिभिः शनैर्महता कालेन पुनन्ति एते तु सद्यः किं च देवादीनि यत्पुनन्ति तदपि पावित्र्यमर्हत्तमानामीक्षया दर्शनमात्रेण सद्य एव भवति ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मण इति ॥ इह संसारे सर्वेषां प्राणिनां मध्ये ब्राह्मणो जन्ममात्रेणैव श्रेयान् तप आदिभिर्युक्तो मत् मम कलापरिकलनमुपासना तया युक्तः ब्राह्मणः श्रेयानिति किमु वक्तव्यम् ॥ ५३ ॥ नेति ॥ किं बहुना मदुपासकाद्ब्राह्मणात् एतत् द्विभुजं चतुर्भुजं च रूपं मम दयितं प्रियं न भवति तत्र हेतुः सर्वेति स्पष्टम् । अयं भावः देवाः प्रमेयरूपाः वेदा हि तत्र प्रमाणभूताः प्रमेयसिद्धेः प्रमाणाधीनत्वात् प्रमेयभूतादपि सर्वदेवमयान्मम स्वरूपात् प्रमाणभूतं विप्ररूपं प्रियमित्यर्थः ॥ ५४ ॥ दुष्प्रज्ञा इति ॥ एवं पूर्वोक्तं मम मतमविदित्वैव असूयवः ब्राह्मणेषु दोषदर्शिनः अर्चा प्रतिमा आदिपदेन तीर्थग्रहणं तत्रैवेज्यदृष्टयः पूज्यताबुद्धिमन्तः नतु ब्राह्मणेषु पूज्यबुद्धयः दुष्प्रज्ञा जना गुरुं पूज्यमात्मानं विप्रं विप्ररूपं माम् अवजानन्ति ॥ ५५ ॥ चराचरमिति ॥ मदीक्षया मयैव सर्वत्रेक्षया विप्रः चराचरात्मकमिदं विश्वं तथास्य विश्वस्य हेतवो ये भावाः पदार्था महदादीनि तत्वानि तानि सर्वाणि मद्रूपाणीति चेतसि आधत्ते अतस्तदपमानं सर्वापमाने पर्यवस्यतीति ॥ ५६ ॥ तस्मादिति ॥ तस्मात् मत्सिद्धान्तस्यैवंवि-

ब्राह्मणो जन्मना श्रेयान्सर्वेषां प्राणिनामिह ॥ तपसा विद्यया तुष्ट्या किमु मत्कलया युतः ॥ ५३ ॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् ॥ सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम् ॥ ५४ ॥ दुष्प्रज्ञा अविदित्वैवमवजानन्त्यसूयवः ॥ गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ॥ ५५ ॥ चराचरमिदं विश्वं भावा ये चास्य हेतवः ॥ मद्रूपाणीति चेतस्याऽऽधत्ते विप्रो मदीक्षया ॥ ५६ ॥ तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयाऽर्चय ॥ एवं चेदर्चितोऽस्म्यद्धा नान्यथा भूरिभूतिभिः ॥ ५७ ॥ श्रीशुक उवाच ॥ ॥ स इत्थं प्रभुणाऽऽदिष्टः सहकृष्णान्द्विजोत्तमान् ॥ आराध्यैकात्मभावेन मैथिलश्चाप सद्गतिम् ॥ ५८ ॥ एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान् ॥ उषित्वाऽऽदिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥ ५९ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे श्रुतदेवानुग्रहो नाम षडशीतितमोऽध्यायः ॥ ८६ ॥

धत्वात् हे ब्रह्मन् एतान् ब्रह्मर्षीन् मच्छ्रद्धया मयि या श्रद्धा आदरस्तेनार्चय एवं चेत् तानर्चयसि चेत् अद्धा साक्षादहमर्चितोऽस्मि भवामि अन्यथा एतदर्चनं विना तु भूरिभूतिभिः पुष्कलोपचारैरप्यर्चितो नैव भविष्यामि । एतानिति सर्वभक्तोपलक्षणम् ॥ ५७ ॥ स इति ॥ प्रभुणा श्रीकृष्णेनेत्थमादिष्टः स श्रुतदेवो मैथिलो बहुलाश्वश्च कृष्णेन सहितान् द्विजोत्तमान् एकात्मभावेन अभेददृष्ट्या आराध्य सतां गतिं भगवन्तमेवाप ॥ ५८ ॥ एवमिति ॥ हे राजन् भक्तेषु भक्तिमान् प्रीतियुक्तो भगवान् स्वभक्तयोः श्रुतदेवबहुलाश्वयोः सतां स्वतः प्रमाणभूतानामप्रामाण्यकारणरहितानां वेदानां मार्गं निराकारसाकारोभयविधब्रह्मपरत्वमुपदिश्य कतिपयदिनानि मिथिलायामुषित्वा पुनर्द्वारवतीमगात् ॥ ५९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे षडशीतितमे व्यधात् ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषञ्जरन्तं संचिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोर्वेदस्तुतेर्विवरणं सुगमं तनोति ॥ ३ ॥ सप्ताशीतितमे वेदैः सगुणो निर्गुणो हरिः ॥ बहुधा स्तूयते स्मात्र श्लोकाः सार्द्धाः खमार्गणाः ॥ अष्टौवाचेति सार्द्धा च त्र्यशीतिः स्युरनुष्टुभः ॥ ८७ ॥ पूर्वाध्यायान्ते स्वभक्तयोः सन्मार्गमादिश्येत्युक्तं तत्र नृपः पृच्छति—ब्रह्मन्निति ॥ हे ब्रह्मन् अनिर्देश्ये जात्यादिना निर्देष्टुमशक्ये निर्गुणे सदसतः कार्यात्कारणाच्च परे असङ्गे ब्रह्मणि गुणैर्वृत्तिर्यासां ताः प्राकृतगुणैर्जात्यादिभिः प्रवर्त्तमानाः श्रुतयः साक्षात् मुख्यया वृत्त्या कथं चरन्ति प्रवर्त्तन्ते। साकारे श्रीकृष्णाख्ये ब्रह्मणि च सर्वप्रत्ययरूपत्वादिदन्तया इयत्तया च निर्देष्टुमशक्ये "हरिर्हि निर्गुणः साक्षात्" इत्यादिवक्ष्यमाणात् "सत्वादयो न सन्तीशे यत्र च प्राकृता गुणाः।" इति विष्णुपुराणाच्च प्राकृतगुणरहिते सदसतः परे च कथं प्रवर्त्तन्ते। अयं भावः—श्रुतयो हि शब्दरूपाः। शब्दवृत्तिस्तावत्त्रेधा। मुख्या गौणी लक्षणा च। मुख्यैव शक्तिरभिधा चोच्यते। सा च योगेन रूढ्या योगरूढिभ्यां चेति त्रिधा। तत्र अवयवशक्तिर्योगस्तेन त्रिधा कृत्तद्धितसमासभेदात्। यथा पाचकः दाशरथिः राजपुरुषः समुदायशक्ती रूढिः तया यथा गौः घटः योगरूढिभ्यामपि कृदादिभेदात्त्रिधा। यथा छत्रम्। अत्र छादनरूपयोगार्थेन आतपत्रमर्थः

परीक्षिदुवाच ॥ ब्रह्मन्ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ॥ कथं चरन्ति श्रुतयः साक्षात्सदसतः परे ॥ १ ॥

केवलेनानेन वस्त्रादौ प्रसक्तिवारणाय—रूढिरपि। तद्धिते यथा वर्णी। अत्र योगार्थवर्णवत्त्वाद्ब्रह्मचारी अर्थः॥ गृहस्थादिवारणाय रूढिरपि। समासे—यथा पङ्कजम्। अत्र पङ्कजनिकर्तृरूपयोगार्थेन कमलमर्थः। कुमुदादिवारणाय रूढिरपीति संक्षेपः। परे तु मुख्या वृत्तिः जातिसंकेतयोगैस्त्रेधा। तत्र जातिशब्दाः गौः घटः अश्वकर्ण इत्याद्याः। शुक्लादयो गुणवाचका अपि जातिशब्दा एव। संकेतशब्दाः डित्थः डवित्थ इत्याद्याः। योगस्त्रेधा कृत्तद्धितसमासभेदात्। आद्यौ प्रकृतिप्रत्यययोगौ द्वौ। अन्त्यः पदद्वययोगः। यथा पाठकः औपगवः पङ्कजम् इत्याचक्षते। गौणी तु लक्ष्यमाणगुणयोगात्परशब्दस्य परत्र प्रवृत्तिः। यथा यजमानः प्रस्तरः सिंहो देवदत्तः। अत्र हि यजमानशब्देन लक्ष्यमाणं यजमानगतं क्रतुनिर्वर्त्तकत्वं तत्प्रस्तरेऽप्यस्ति। एवं सिंहवत्क्रौर्यं देवदत्ते। लक्षणाशब्दस्य स्वशक्यसंबद्धवृत्तिः सा द्विधा। केवललक्षणा लक्षितलक्षणा च। आद्या शक्यसाक्षात्संबद्धवृत्तिः। यथा गङ्गायां घोष इत्यत्र गङ्गापदशक्यप्रवाहसाक्षात्संबन्धिनि तीरे लक्षणा। अन्त्या तु शक्यपरम्परासंबद्धवृत्तिः। यथा द्विरेफपदस्य रेफद्वये शक्तस्य भ्रमरघटितपरम्परासंबन्धेन मधुकरे वृत्तिः। परे तु गौणीमपि लक्षितलक्षणामेवाहुः। सिंहशब्दवाच्यसंबन्धिक्रौर्यादिसंबद्धमाणवकप्रतीतेः। पुनर्लक्षणा त्रिधा। जहत्स्वार्थाजहत्स्वार्थाजहदजहत्स्वार्था च। तत्राद्या गङ्गायां घोष इति। अत्र गङ्गापदशक्यप्रवाहस्य घोषाधारत्वासंभवात्तत्सम्बद्धे तीरे गङ्गापदस्य वृत्तिः। द्वितीया तु शोणो धावतीति।

१ अस्य टिप्पणं ग्रन्थारम्भे लिखितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रामूर्त्तस्य शोणगुणस्य धावनासंभवाच्छोणपदं स्वार्थमजहत्तद्वति वर्त्तते । एवं काकेभ्यो दधि रक्ष्यतामित्यत्रापि काकपदं स्वार्थमजहदपि स्वस्वेतरदध्युपघातकमात्रे वर्त्तते ।
सोयं देवदत्त इति तृतीया । अत्र हि तद्देशकालविशिष्टो देवदत्तस्तच्छब्दार्थः । एतद्देशकालविशिष्ट इदंशब्दार्थः । तत्र विशिष्टयोरभेदासंभवादुभयत्र विशेषणांशं त्यक्त्वा विशेष्ये
देवदत्तस्वरूपमात्रे तदिदंशब्दयोर्वृत्तिः । एवं "तत्त्वमसि, अयमात्मा ब्रह्म" इत्यादावप्येषैव लक्षणेति । क्वचिद्वाक्येऽपि लक्षणा भवति । यथा विषं भुङ्क्ष्वेति । अत्र हि विषभो-
जनरूपस्वार्थपरित्यागेन शत्रुगृहे न भोक्तव्यमित्यस्मिन्नर्थे वाक्यं वर्त्तते। मतान्तराणि त्वत्र विस्तरभयान्नोच्यन्ते । तत्र जात्यादिना निर्देष्टुमशक्ये रूढिवृत्तिर्न संभवति। निर्गुणे च
गौणीवृत्तिर्न संभवति सदसद्भ्यामसङ्गे च केनचिदपि सम्बन्धाभावान्न लक्षणायोगवृत्ती संभवतः । एवं च पदार्थत्वायोगादपदार्थस्य च वाक्यार्थत्वायोगात् कथमुभयविधे ब्रह्मणि
श्रुतयः प्रवर्त्तन्ते । अत्र श्रुतय इत्युपलक्षणम् । निर्गुणेऽपि मनश्चरेत् इत्युपसंहारात् । तथा च ये शब्दमनसी अत्यन्तासत्येऽप्यर्थे ज्ञानं जनयितुं प्रभवतस्ते अपि यत्र ब्रह्मणि
कुण्ठीभवतस्तत्र का शङ्काप्यन्यप्रमाणप्रवृत्तेरित्यनुमानादीन्यपि निराकृतानि । अथायमत्र निष्कृष्टार्थः । "निर्गुणं निष्क्रियं शान्तम्, अपाणिपादो जवनो ग्रहीता, पश्यत्यचक्षुः स
शृणोत्यकर्णः" इत्यादिलक्षणं ब्रह्म लौकिकैः प्रत्यक्षादिभिस्तावन्नावगम्यत एव। तादृशे च केवला श्रुतिरेव प्रमाणम् । तत्र नास्तिकैः श्रुतेः प्रामाण्यमेव न स्वीक्रियते । आस्ति-
केष्वपि कर्ममीमांसकाः पूर्वोक्तलक्षणं ब्रह्म नाङ्गीकुर्वते। उपनिषदां च जपोपयोगित्वमात्रं ब्रुवते । नैयायिकादयः परमेश्वरमङ्गीकुर्वन्तोऽपि तत्र निर्गुणत्वादिकं नाङ्गीकुर्वते । एवं

श्रीशुक उवाच ॥ बुद्धीन्द्रियमनःप्राणाञ्जनानामसृजत्प्रभुः ॥ मात्राऽर्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥ २ ॥

विप्रतिपत्तावपि । वयं तु श्रुतौ सम्यक् श्रद्दधानास्तादृशं ब्रह्म निस्संशयं स्वीकुर्म एव।परंतु शब्दरूपा श्रुतिः स्वयमपि तद्ब्रह्मशब्दानिर्देश्यं ब्रुवती केन व्यापारेण बोधयितुं शक्नोति।
यदि च "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ।" इति न्यायमालम्ब्य यथाकथंचिद्बोधकत्वं मन्येमहि तर्हि स्वानुभवेन तादृशत्वं कथं निश्चिन्वीमहि । अन्यथा
श्रुतीनाम् "एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ।" इति वाक्यसाम्यं वारयितुं कथं शक्नुयामेति ॥ १ ॥ उत्तरयति—बुद्धीति ॥ प्रभुः उपाधिपारवश्यरहितः सर्वशक्तिमांश्च
भगवान् जनानां जीवानां मात्रार्थं विषयभोगार्थं भवार्थं जन्मप्रभृतिकर्मकरणार्थम् आत्मने आत्मनस्तत्तल्लोकभोगाय अकल्पनाय कल्पनानिवृत्तिरूपमोक्षाय च अर्थधर्म-
काममोक्षार्थमिति क्रमेणार्थः । जनानां बुद्धीन्द्रियमनःप्राणान् असृजत् । नन्विदमुत्तरमाम्रसंख्याप्रश्ने कोविदारगुणकथनतुल्यं भातीति चेत्सत्यम् । अत्र मात्रार्थमित्यादि-
प्रयोजनचतुष्टयकथनबलात् बुद्धीन्द्रियमनःप्राणानित्यस्य मात्राद्युपयोगियोग्यतारूपनानाशक्तियुक्तानिति विशेषणमपि लभ्यते । तथा च प्रकरणबलादयमर्थः । यथा पर-
मेश्वरः जीवानां चतुर्विधपुरुषार्थप्राप्तये आदौ श्रुतीरसृजत् तथा विषयाद्यनुभवाय श्रुतितात्पर्यबोधाय ब्रह्मानुभवाय च तत्तद्योग्यताख्यशक्तियुक्तान्बुद्ध्यादीनसृजत् । तत्र
रूपशब्दाद्यनुभवायेन्द्रियादिषु तत्तच्छक्तिः स्फुटमनुमीयते । अन्यथा जन्मान्धबधिरादीनामिव रूपशब्दादयोऽपि ब्रह्मवदविषया एव स्युः । तथा प्रकृतेऽपि श्रुतितदर्थश्रवणे

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रियाणां श्रुतस्य मीमांसया मनने मनसः तदर्थनिश्चये ब्रह्मानुभवे च बुद्धेः सर्वमूलभूतजीवने च प्राणानां शक्तिरस्त्येव । तथा च श्रवणादिद्वारा श्रुतितदर्थादि बुद्ध्वा मनसा सम्यङ् मीमांसित्वा बुद्धचा जना ब्रह्मानुभवन्तीति । अतः श्रुतीनां ब्रह्माबोधकत्वन्नासिद्धम् ॥ २ ॥ तदेव स्फुटमाह—सैषेति ॥ सा एषा प्रकृता ब्राह्मी उभयविधब्रह्मप्रतिपादिका उपनिषत् पूर्वेषां पूर्वजैः अतिवृद्धैः सनकादिभिः धृता ब्रह्ममीमांसाप्रणेतृभिर्निर्णीतार्था वा । इदानींतनोऽपि यस्तां श्रद्धया आदरेण श्रवणमनननिदिध्यासनैर्धारयेत्सः अकिञ्चनः निरस्तदेहाद्यभिमानः सर्वतो विरक्तो वा सन् क्षेमं मोक्षं गच्छेत् । श्रुत्युक्तं ब्रह्मानुभवेद्वा तत्रायं ब्रह्ममीमांसानिर्णीतोऽर्थः । "यः सर्वज्ञः सर्ववित्, यस्य ज्ञानमयं तपः, सर्वस्य वशी सर्वस्येशानः, यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः, सोऽकामयत बहुस्याम्, तत्तेजो असृजत, सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादयः श्रुतयः सगुणं गुणैरनभिभूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्वनियन्तारं सर्वोपास्यं कर्मफलदं समस्तकल्याणगुणं भगवन्तं प्रायशः प्रतिपादयन्ति । तादृशं च ध्यानादिभिर्मनो विषयीकरोति । "विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतयस्तापिन्यादिश्रुतयश्च मुख्यवृत्त्या वृत्तिज्ञानादिकं प्राकृतभक्तवात्सल्यादिगुणांश्च प्रतिपादयन्त्यो लक्षणया ज्ञानादिस्वरूपमप्राकृतस्वरूपभूताचिद्रूपगुणं च ब्रह्म प्रतिपादयन्ति । तथाभूतेश्वरतां च संसारिणो जीवस्य तन्निवृत्तये तत्वमसीत्यादिवाक्यानि लक्षणया बोधयन्ति । अस्थूलादिवाक्यानां तु साक्षादुपाधिनिषेधेन तत्पदार्थशोधनउपयोगान्निर्गुण एव पर्यवसानम् । "न चासङ्गो ह्ययं पुरुषः" इति श्रुतेः । ब्रह्मणि केनचिदपि संबन्धाभावात्कथं लक्षणापीति वाच्यम् । श्रुतेः संयोगसमवा-

सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता ॥ श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिञ्चनः ॥ ३ ॥

यादिसंबन्धनिषेधपरत्वेनाध्यासिकसंबन्धस्य सत्वात् तस्याप्यनङ्गीकारे संबन्धहीनस्य बुद्धयादिजगत्कर्तृत्वोपादानत्वाभावेन जगदभावापत्तेः । सत्यसंबन्धाभावेप्याध्यासिकसंबन्धमात्रेण लक्षणया श्रुतीनामद्वितीयब्रह्मबोधनयोग्यतायाः प्रभुणा सृष्टत्वात् । अत्र च प्रमाणम् "तं त्वौपनिषदं पुरुषं पृच्छामि, नावेदविन्मनुते तं बृहन्तम्, वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिस्मृतिवचनान्यथानुपपत्तिरेव । "यतो वाचो निवर्त्तन्ते, विष्णोर्नु कं वीर्याणि प्रवोचम्, भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्" इत्यादिना मुख्यवृत्तेः पराकृतत्वात् । एवं श्रुत्यादिसर्वशब्दप्रमाणजन्यसाक्षात्काररूपवृत्तिव्याप्यतया वृत्तिकृताज्ञाननिवृत्त्यधिकरणताख्यया मनःप्रवृत्तिरप्युपपद्यते मनसैवानु द्रष्टव्यम् । "दृश्यते त्वग्र्यया बुद्धया बुद्धिग्राह्यमतीन्द्रियम् ।" इत्याद्युक्तेः । "यन्मनो न मनुते" इत्यादिश्रुतेस्तु न वृत्तिप्रकाशेन ब्रह्म प्रकाश्यते स्वयं प्रकाशत्वात् । सूर्यादिना दीपादेरिव तत्प्रकाशेन वृत्तिप्रकाशस्य प्रतिहतत्वाचेत्यर्थकत्वात् । श्रीकृष्णाख्यब्रह्मणि तु चक्षुरादिजन्यवृत्तिव्याप्यतापि "विदितोऽसि भवान् साक्षात्, स एव यद् दृग्विषये स्वयं स्थितः" इत्याद्युक्तेः । न च गुणकार्यप्राकृतरूपादिरहितकृष्णब्रह्मविषयकवृत्तिश्चक्षुरादिभिः कथं जन्यत इति वाच्यम् । चक्षुरादेस्तद्योग्यताया अपि भगवता सृष्टत्वात् । अकल्पनं श्रीकृष्णब्रह्म ज्ञापयितुं प्रभुश्चक्षुरादीन्द्रियाणि तद्योग्यतावन्त्यसृजदित्यस्यप्यार्थस्योहनीयत्वात् । अत्र च निर्गुणत्वदृग्विषयत्वबोधकवाक्यद्वयानुपपत्तेरेव मानत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवं सति " स एव यद् दृग्विषये स्वयं स्थितः।" इत्यादेः " न संदृशे तिष्ठति रूपमस्य, पराञ्चि खानि व्यतृणत्" इत्यादिना तत्र तत्रातीन्द्रियत्वोक्त्या चेन्द्रियजन्यज्ञानागोचरत्वार्थकाधोक्षजत्वसमाख्यया च न विरोधः। उक्तविधे वृत्तिव्याप्यत्वे फलव्याप्यत्वाभावे च यथायथं तात्पर्यादिति दिक्॥३॥अत्रेति॥ अत्र विषये नारायणः वक्तृत्वेनान्वितो यस्यां नारायणे ब्रह्मणि अन्वितां वा तां गाथाम् इतिहासरूपां ते तुभ्यं वर्णयिष्यामि। तत्र ऋषेर्नारदस्य नारायणस्य संवादं वर्णयिष्यामि ॥ ४ ॥ एकदेति ॥ लोकान् पर्यटन् भगवत्प्रियो नारद एकदा सनातनं पुरातनमृषिं नारायणं द्रष्टुं तस्याश्रमं बदर्याख्यं ययौ ॥ ५ ॥ य इति ॥ अस्मिन् भारतवर्षे यः श्रीनारायणः नृणां क्षेमाय ऐहिकसुखाय स्वस्तये आमुष्मिकमङ्गलाय लोकशिक्षार्थं धर्मोदयादिरूपः ज्ञानम् आत्मतत्त्वज्ञानं शमो वैराग्यं तैरुपेतं युक्तं तपः आकल्पात् ब्रह्मदिनारम्भप्रभृति स्वयमेव आस्थितः कुर्वन् वर्त्तते ॥ ६ ॥ तत्रेति ॥ हे कुरूद्वह तत्र स्वाश्रमे उपविष्टं कलापग्राम इति तदाश्रमस्य नामान्तरं तद्वासिभिः ऋषिभिः परीतमावृतं नारायणं प्रणतः सन्नारदः इदमेव ब्रह्मणि श्रुतयः कथं चरन्तीति यत्त्वं पृच्छसि तदेव अपृच्छत् ॥ ७ ॥ तस्मै इति ॥ तस्मै पृच्छते नारदाय अन्येषामप्यृषीणां शृण्वतां सतां भगवान्

अत्र ते वर्णयिष्यामि गाथां नारायणान्विताम्॥नारदस्य च संवादमृषेर्नारायणस्य च ॥४॥ एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः॥सनातनमृषिं
द्रष्टुं ययौ नारायणाश्रमम्॥५॥यो वै भारतवर्षेऽस्मिन्क्षेमाय स्वस्तये नृणाम् ॥ धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः॥६॥तत्रोपविष्टमृषिभिः
कलापग्रामवासिभिः ॥ परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वह ॥ ७ ॥ तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिदम् ॥ यो ब्रह्मवादः पूर्वेषां जनलो-
कनिवासिनाम् ॥ ८ ॥ श्रीभगवानुवाच ॥ स्वायंभुव ब्रह्मसत्रं जनलोकेऽभवत्पुरा ॥ तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसाम् ॥ ९ ॥ श्वेत-
द्वीपं गतवति त्वयि द्रष्टुं तदीश्वरम् ॥ ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते ॥ तत्र हाऽयमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि ॥ १० ॥

नारायण इदमवोचत्। किमवोचत्तत्राह य इति। जनलोकनिवासिनां पूर्वेषां वृद्धानां सनकादीनां यः ब्रह्मणि विषये वादः तत्वबुभुत्सुकथारूपः प्रश्नोत्तराभ्यां निर्णयः अभूत्तदिदामिति संबन्धः ॥ ८ ॥ स्वायम्भुवेति ॥ हे स्वायम्भुव पुरा पूर्वं जनलोके तत्रस्थानां मानसानां ब्रह्मणो मनसो जातानामूर्ध्वरेतसां नैष्ठिकब्रह्मचारिणां मुनीनां ब्रह्मसत्रमभवत्। यथा समाना एव यजमाना ऋत्विगादिरूपेण यत्र कर्म कुर्वन्ति फलमपि तेषां तुल्यमेव भवति तत्कर्म सत्रमिति प्रसिद्धम् । तथा यत्र समाना एव साधवः निःसंदिग्धब्रह्मज्ञानार्थं वक्तृश्रोतृभावेन ब्रह्म मीमांसन्ते तत् ब्रह्मसत्रमिति ज्ञेयम् ॥ ९ ॥ श्वेतद्वीपमिति सार्द्धम् ॥ तदीश्वरं श्वेतद्वीपवासिनमीश्वरमनिरुद्धमूर्तिं द्रष्टुं त्वयि श्वेतद्वीपं गतवति सति यत्र विचारे श्रुतयः शेरते अर्थतो निर्णीता भवन्ति स ब्रह्मवादः ब्रह्मविचारः संप्रवृत्तः। तत्र जनलोके यं प्रश्नं मां प्रति त्वं करोषि तदयं प्रश्नोऽभूत् ब्रह्मवाद इत्यर्द्धमसार्वत्रिकमाहुः ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे ॥ ११ ॥
सनन्दन उवाच ॥ स्वसृष्टमिदमापीय शयानं सह शक्तिभिः ॥ तदन्ते बोधयांचक्रुस्तल्लिङ्गैः श्रुतयः परम् ॥ १२ ॥
यथा शयानं सम्राजं बन्दिनस्तत्पराक्रमैः ॥ प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयन्त्यनुजीविनः ॥ १३ ॥
श्रुतय ऊचुः ॥ जय जय जह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः ॥
अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयाऽत्मना च चरतोऽनुचरेन्निगमः ॥ १४ ॥

तुल्येति ॥ तुल्यानि श्रुतानि अध्ययनादीनि तपांसि जितेन्द्रियत्वादीनि शीलानि स्वभावाश्च येषां ते तथा । सर्वत्र ब्रह्मदर्शनेन तुल्याः स्वीयामित्राणि अरयः शत्रवः मध्यमाः उदासीना उपेक्ष्याश्च येषां ते यद्यपि सर्वे प्रवचनयोग्यास्तथापि ब्रह्मविचारार्थमेकं सनन्दनं प्रवचनं प्रवक्तारं चक्रुः । अपरे सनकादयः शुश्रूषवो बभूवुः पप्रच्छुरित्यर्थः॥११॥ अत्र उभयविधब्रह्मविषयकप्रश्नेऽपि प्रायशः साकारब्रह्मविषयकश्रुत्यर्थोदाहरणेनोत्तरयन् सनन्दन उवाच—स्वसृष्टमिति ॥ स्वेन सृष्टमिदं विश्वमापीय संहृत्य शक्तिभिः सूक्ष्मावस्थामापन्नाभिः प्रकृतिपुरुषकालादिभिः सह शयानं निद्राणमिव वर्तमानं परं परमपुरुषं भगवन्तं तदन्ते प्रलयान्ते प्रथमनिश्वासादाविर्भूताः श्रुतयः श्रुत्यधिष्ठात्र्यो देवताः स्वाधिकारकार्यतया तल्लिङ्गैः तत्प्रतिपादकवाक्यैर्बोधयांचक्रुः प्रबोधयामासुः ॥१२॥ यथेति ॥ सम्राजं चक्रवर्तिनं राजानं शयानं प्रत्यूषेऽभ्येत्य प्रातःकाले आगत्य अनुजीविनः बन्दिनः स्तावकाः सुश्लोकैः शोभना श्लोकाः कीर्त्तयो येषु तैः तत्पराक्रमबोधकवचनैर्यथा बोधयन्ति तथा बोधयांचक्रुरिति । अत्र भागवताः । सर्वेश्वरे श्रीकृष्ण एवास्य स्तवस्य समन्वयो ज्ञाप्यते तल्लीलामहाप्रकरणान्तःपातात् निभृतमरुन्मनोक्षेत्यादिलिङ्गात्। कृष्णं च तत्र छन्दोभिः स्तूयमानमित्यन्यत्र वाक्यात्। एतच्छ्रुत्वा नारदेन कृष्णायेति कृष्णपदश्रुत्यैव तस्य नमस्कृतत्वाच्चेति संक्षेपः ॥१३॥ तत्र सर्वाः श्रुतयस्तत्तद्वर्गभेदेनाष्टाविंशतिधा भूत्वाऽष्टाविंशत्या पद्यैः स्तुवन्ति । अत्रैतेष्वेव पद्येषु सर्वासां श्रुतीनां परमेश्वरविषयाणां तात्पर्यसङ्ग्रहः । तत्रादौ बन्दिजनोचित जयाशंसनपूर्वकं सर्वशास्त्रविधेयभूतमविद्यानाशनं प्रार्थयन्ते—जय जयेति ॥ भो अजित हे अगजगदोकसामखिलशक्त्यवबोधक त्वं जय जय दोषगृभीतगुणाम् अगजगदोकसामजां जहि । यत् यतः त्वम् आत्मना समवरुद्धसमस्तभगः असि। क्वचित् अजया आत्मना च चरतस्ते निगमः अनुचरेत् इत्यन्वयः औचित्यादगजगदित्यस्यावृत्तिः । भो अजित अगानि स्थावराणि जगन्ति जङ्गमानि ओकांसि शरीराणि येषां तेषां जीवानां या अखिलाः कर्मज्ञानादिकाः शक्तयस्तासामवबोधकत्वं जय जय उत्कर्षमाविष्कुरु । केन व्यापारेणेत्याशङ्क्याहुः । दोषगृभीतगुणां दोषाय आनन्दाद्यावरणाय गृभीता गृहीता गुणाः सत्वादयो यया तामित्यर्थः । "हृग्रहोर्भश्छन्दसि" इति भकारः । एवंभूताम् अगजगदोकसामजामविद्यां जहि नाशय । यथेयं पुनर्जीवान्न दुनुयात् तथा कुर्वित्यर्थः । अजामात्रहनने हरेस्तवकः प्रयासः निरन्तराह्ला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिसंवित्कामधेनुवृन्दपतेस्तव किं वाजयाकृत्यमित्याहुः । यत् यतः त्वम् आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः सम्प्राप्तसमस्तैश्वर्यादिगुणोऽसि । उक्तेऽर्थे त्वहमेव प्रमाणमित्याहुः । क्वचिदिति क्वचित् कदाचित् सृष्ट्यादिसमये अजया मायया शक्त्या चरन्तं क्रीडन्तं " यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्ब्रह्म " इत्यादिः । तथात्मना स्वरूपेण च वर्तमानम् "सत्यं ज्ञानमनन्तं ब्रह्म, विज्ञानमानन्दं ब्रह्म " इत्यादिर्निगमो वेदसमूहस्त्वामनुचरेत् प्रतिपादयेत् ।ते चरत इति शेषे कर्मणि षष्ठ्यौ । निराकारसाकारब्रह्मणोः समानमिदं पद्यम्।तथा च हे प्रभो स्थावरजङ्गमात्मकानां स्वरूपावरणकरीमविद्यां नाशयित्वा उत्कर्षमाविष्कुरु।इयं हि स्वैरिणी इव परप्रतारणाय गुणान् गृह्णाति अतो गुणवन्त्यपि हन्तव्या । त्वं च स्वरूपेणैवाप्तसमस्तैश्वर्योऽस्यतस्त्वयि दोषं नो वक्ष्यति नापि तवानया कृत्यं नापि तन्नाशे तव प्रयासः । जीवानां च कर्मज्ञानादिशक्तयस्त्वदधीना अतो जीवाः स्वयं तां हन्तुमशक्ताः । अत्र विषये चाहं श्रुतिरेव त्वां प्रतिपादयन्ति प्रमाणमस्मीति स्फुटोऽर्थः । नीलकण्ठचतुर्द्धरास्तु जय जयेत्यादि जीवं सम्बोध्य प्रकल्प्य व्याचक्षते ॥ १४ ॥ ननु कथं श्रुतयो मामेव प्रतिपादयन्ति " यत इन्द्रो जातोवसितस्य राजा अग्निर्मूर्द्धा दिवः सोमः पवते जनिता मर्तानाम् " इत्यादिश्रुतय इन्द्रादीनपि प्रतिपादयन्तीत्याशङ्क्याहुः—बृहदिति ॥ घटादिविकृतिर्मृत् एव इतीव अवशेषतया हेतुना ऋषयः एतदुपलब्धं

बृहदुपलब्धमेतदवयन्त्यवशेषतया यत उदयास्तमयौ विकृतेर्मृदि वाऽविकृतात् ॥
अत ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवन्ति भुवि दत्तपदानि नृणाम् ॥ १५ ॥

बृहदेवेति अवयन्ति अविकृतात् यतो बृहतो विकृतेः उदयास्तमयौ भवतः अतस्ते ऋषयः मेनोवचनाचरितं त्वय्येव दधुः । यतः नृणां कुत्रापि दत्तपदानि भुवि अयथा कथं भवन्ति इत्यन्वयः । यथा लोका अपि घटादिमृद्विकारजातं मृदेव इति जानन्ति तथैव अवशेषतया सर्वनाशेऽप्यवशिष्यमाणतया हेतुना ऋषयो मन्त्रास्तद्द्रष्टारो वा एतदुपलब्धं दृष्टं श्रुतं च स्थावरजङ्गमात्मकमिन्द्रादिकञ्च सर्वं बृहत् ब्रह्मत्वमेवेत्यवयन्ति जानान्ति उपादानत्वेपि अविकृतात् मणिमन्त्रादिवत्स्वयं विकाररहिताद्यत उपादानभूतात् ब्रह्मणो विकृतेः विकारमात्रस्य सर्वस्य कार्यस्योदयास्तमयौ उत्पत्तिप्रलयौ भवतः । अविकृतादित्यनेन विकारवतो मृदादेर्ब्रह्मणो वैलक्षण्यं सूचितम् । अत्र वाशब्द उपमार्थः । यथा घटादेर्मृदि उदयास्तमयौ तद्वदिति स्वामिपादाः । अत्र यत इति तसेः सार्वविभक्तिकत्वात्तन्त्रेण पञ्चमीसप्तम्योरुभयोः प्रयोगो ज्ञेयः।यस्मादुत्पत्तिः यस्मिंश्च प्रलयो भवतीत्यर्थः । तथा च श्रुतिः । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् "एकं सद्विप्रा बहुधा वदन्ति,सर्वं खल्विदं ब्रह्म" इत्यादि ।अत उपादानत्वेन सर्वात्मकत्वादेव ऋषयो मनोवचनाचरितं त्वय्येव दधुः । मनसा आचरितं तात्पर्यं वचनाचरितमभिधानं च धृतवन्तः निश्चितवन्तः न पृथक् विकारेष्वित्यर्थः । " येप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो । सर्व एव भजन्ति त्वां सर्वदेवमयेश्वरम् ॥ " इत्यादिवचनात् सर्वस्य कार्यस्य कारणं त्वां विनात्यन्ताभावात्तत्तद्वर्णनं त्वय्येवपर्यवसितमिति भावः । तत्र दृष्टान्तः कथम-

Nepal Sanskrit University Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेति । नृणां भूचराणां यत्र कुत्रापि दत्तानि निक्षिप्तानि पदानि भुवि अयथा अदत्तानि कथं भवन्ति । तथा च यथा मृत्पाषाणेऽष्टकादिषु दत्तान्यपि पदानि भुवं न व्यभिचरन्ति तथा यत् किमपि इन्द्रादिविकारजातं वदन्तो वेदा त्वामेव सर्वकारणतया परमार्थभूतं प्रतिपादयन्ति ॥१५॥ इतीति ॥ हे त्र्यधिपते इति पूर्वोक्तहेतोः सूरयः तव अखिललोकमलक्षपणकथामृताब्धिम् अवगाह्य तपांसि जहुः । हे परम यदि कथाश्रवणमात्रेणैवं तदा ये पुनः स्वधाम विधुताशयकालगुणाः सन्तः अजस्रसुखानुभवं ते पदं भजन्ति ते तपांसि जहतीति किमुत वक्तव्यमित्यन्वयः । हे त्र्यधिपते त्रिगुणमायामृगीनर्तक त्वमेव सर्वकारणत्वेन परमार्थत्वाद्भजनीय इति कृत्वा सूरयो विवेकिनस्तवाखिलानां लोकानां श्रवणकीर्तनादिपराणां जनानां मलं वासनापर्यन्तं कर्मदोषं क्षपयति नाशयतीति तथाभूता कथैवामृतं तस्याब्धिमवगाह्य निषेव्य तपन्तीति तपांसि आध्यात्मिकानिदुःखानि जहुः त्यक्तवन्तः । यदा त्वदीयकथाश्रवणकीर्त्तनादिमात्रेणापि सर्वसंतापनिवृत्तिस्तदा हे परम ये पुनः स्वधाम्ना स्वरूपसाक्षात्कारेण विधुतास्त्यक्ता आशयगुणाः अन्तःकरणधर्मा रागादयः कालगुणा जरादयः उपलक्षणमेतत् । देहधर्माः कार्श्यादयः प्राणधर्माः क्षुधादयः इन्द्रियधर्माः काणत्वादयश्च यैस्तथाभूतास्तवाजस्रसुखानुभवं नित्यानन्दचिदात्मकं पदं स्वरूपं भजन्ति सेवन्ते ते तपांसि त्यजन्तीति किमुत वक्तव्यमिति । "तद्यथा पुष्करपलाशे आपो न श्लिष्यन्ते एवमेवैवंविदि पापं कर्म न श्लिष्यते"

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथाऽमृताब्धिमवगाह्य तपांसि जहुः ॥ किमुत पुनः स्वधामविधुताशयकालगुणाः परम भजन्ति ये पदमजस्रसुखानुभवम् ॥१६॥ दृतय इव श्वसन्त्यसुभृतो यदि ते नु विधा महदहमादयोऽण्डमसृजन्यदनुग्रहतः ॥ पुरुषविधोऽन्वयोऽत्र चरमोऽन्नमयादिषु यः सदसतः परं त्वमथ यदेष्ववशेषमृतम् ॥ १७ ॥

इत्यादिश्रुतेः । साकारपक्षे स्वधाम्ना स्वप्रभावेणैव यद्वा स्वस्य स्वीयप्रभोस्तव धाम्ना चैतन्यमूर्तिस्फुरणेन विधुताशयकालगुणास्सन्तस्ते पदं चरणकमलं सेवन्ते इत्याद्यपि । अत्र श्रुतयः । "विष्णोर्नु कं वीर्याणि प्रवोचम्, विष्णोः कर्माणि पश्यत" इत्याद्याः ॥ १६ ॥ दृतय इवेति ॥ सर्वे जना दृतय इव वृथा श्वसन्ति । यदि च ते तवानुविधाः स्युस्तदा एव असुभृतः भवन्ति । यस्य तव अनुग्रहतः महदहमादयः अण्डम् असृजन् यः पुरुषविधः अत्रान्नमयादिषु अन्वयश्च अन्नमयादिषूपदिश्यमानेषु चरमः स त्वं तथा । यत् सदसतः परं एष्वन्नमयादिषु अवशेषम् ऋतं च तत् त्वमित्यन्वयः । यद्वा । यदि यद्यपि असुभृतः ते अनुविधास्तथापि दृतय इव पारतन्त्र्येण श्वसन्ति शेषः प्राग्वदेवान्वयः । मनुष्यादयः दृतय इव अग्निज्वलनसाधनभूतचर्माणीव वृथा श्वसन्ति । यदि च ते तवानुविदधत्यनुवर्तन्त इत्यनुविधाभक्ताः स्युस्तदैव ते असुभृतः प्राणभृतः सफलश्वासा भवन्ति इत्यर्थः । स्वामिपादास्तु असुभृतः यदि तेऽनुविधास्तदा सफलं श्वसन्ति अन्यथा दृतय इव श्वसन्तीत्यन्वयमाहुः । यदि च वाक्यद्वयसंभवे वाक्यत्रयकल्पनाक्लेशो विभाव्येत तदा असुभृतो यदि तेऽनुविधा विमुखाः स्युः तदा दृतय इव श्वसन्तीत्यन्वयः । विधीयन्ते शास्त्रेणेति विधाः भगवद्भजना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यास्ताभिर्हीना अनुविधाः प्रादिसमासः । "अनु हीने च सादृश्ये" इति विश्वः । यद्वा । अनुशयिता द्वेषवती विधा कृतिर्येषां तेऽनुविधाः "प्रादिभ्यो धातुजस्य" इति बहुव्रीहिः । "भवेदनुशयो द्वेषे" इति विश्वः । यद्वा । जना यदि ते विधाः भजनादिप्रकारान् अनुलक्षीकृत्य भजनादीनाम् असुभृतो भवन्ति सुष्ठु धारका न भवन्तीत्यर्थः । तदा दृतय इव श्वसन्तीति । नीलकण्ठचतुर्द्धरास्तु महदहमादयस्तवानुग्रहतो यदण्डमसृजन् तदनुविधा यदि असुभृतः स्युस्तर्हि दृतय इव श्वसन्तीत्यन्वयमाहुः । यस्य तवानुप्रवेशलक्षणादनुग्रहाल्लब्धसामर्थ्या महदहमादयश्चित्ताहङ्कारबुद्धिमनःश्रोत्रचक्षुरादयो देहद्वयारम्भकाः जडा अपि अण्डं समष्टिव्यष्टिदेहं ब्रह्माण्डम् असृजन् अतः सर्वकारणस्य तव भजनं विना कृतघ्ना जना वृथा श्वसन्ति । यद्वा । यदीति यद्यपीत्यर्थे । "मन्यसे यद्युपशमं स्नेहपाशनिकृन्तनम् ।" इति षष्ठस्कन्धवत् । तथा च यदि यद्यपि असुभृतः प्राणाद्युपाधयः जीवाः ते तवानुविधाः ज्ञानादिमत्तया त्वदनुकारिणस्तथापि दृतय इव पारतन्त्र्येण श्वसन्ति नतु तेषां कुत्रापि स्वातन्त्र्यं यतः महदहमादयोऽपि तवानुप्रवेशलक्षणानुग्रहत एवाण्डमसृजन् इति यः त्वं चिदेकरसोऽपि पुरुषस्यान्नमयादेर्विधेव विधा आकारो यस्य सः तत्तदाकारः सन् यश्चेतयसे सत्त्वं तत्र हेतुः अत्रान्नमयादिषु कारणत्वेन अन्वेतीत्यन्वयः । अतस्तदाकारता वस्तुतोन्नमयादिषूपदिश्यमानेषु यश्चरमः ब्रह्म पुच्छं प्रतिष्ठा रसो वै स इति पुच्छत्वेन रसत्वेन चोक्तः सत्वं तस्या-

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरम् ॥
तत उदगादनन्त तव धाम शिरः परमं पुनरिह यत्समेत्य न पतन्ति कृतान्तमुखे ॥ १८ ॥

सङ्गत्वमाह । यत् सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तमसङ्गम् एषु अन्नमयादिषु अवशिष्यत इत्यवशेषं परमचरममबाध्यमृतं सत्यं चेति तत् त्वम् । अत्र छन्दः-स्वारस्यमपेक्षमाणाः नीलकण्ठचतुर्द्धराः सदसदतः परं त्वासि यदेष्विति पेठुः।अन्नमयादिष्वन्वयस्तु शाखाचन्द्रवच्छुद्धस्वरूपलक्षणार्थम् । तथा हि तैत्तिरीयाणामुपनिषदि "स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः" इत्यादिना स्थूलसूक्ष्मक्रमेण अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाः क्रमेण पञ्च कोशा उक्ताः । तस्य पुरुषविधतामन्वयं पुरुषविध इति पुनः पुनस्तदन्वितत्वेनालक्ष्य ब्रह्मपुच्छं प्रतिष्ठेति सर्वसा क्षिशुद्धस्वरूपनिरूपणम् । साकारब्रह्मविषये तु पुरुषविधः पुरुषाकारो द्विभुजचतुर्भुजादिः ॥ १७ ॥

उदरमिति ॥ ऋषिवर्त्मसु ये कूर्पदृशस्ते उदरमुपासते । आरुणयस्तु परिसरपद्धतिं हृदयं दहरमुपासते । भो अनन्त ततः परमं तव धाम शिरः प्रतिउदगात् यत्समेत्य पुनरिह कृतान्तमुखेन पतन्तीत्यन्वयः । ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु कूर्पदृशः उदरं ब्रह्मेति शार्कराक्षा उपासते इति श्रुतिस्थशार्कराक्षपदस्य प्रतिपदं कूर्पदृश इति कूर्पं शर्करारजो विद्यते दृक्षु येषां ते तथा रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत् । ते उदरम् उदरालम्बनं मणिपूरकस्थं ब्रह्मोपासते ध्यायन्ति । तेषां स्थूलदृष्टित्वं तु उदरस्य हृदयापेक्षया स्थूलत्वाद्बोध्यम् । यद्वा । कूर्पं सूक्ष्मं सूक्ष्मदृश इत्यर्थः । तदा हृदयस्थं सूक्ष्ममेवालक्ष्य तत्प्रवेशाय प्रथममुदरस्थमुपासत इति भावः । आरुणयः अरुणवदल्पप्रकाशस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनेः पुत्रास्तु ततोऽपि सूक्ष्मदृश इत्यर्थः । ते परितः सरन्ति प्रसर्पन्ति परिसराः नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानम् । यद्वा । त्वन्निकटप्रापकं साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते । हे अनन्त ततो हृदयात् उपासनद्वयाद्वा तव धाम उपलब्धिस्थानं सुषुम्णाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्द्धानं प्रति उदगात् उदसर्पत् । मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरन्ध्रं प्रत्युद्गतम् । सुषुम्णामार्गेण गतिप्रकारो द्वितीयस्कन्धे उक्तः । यत्समेत्य प्राप्य पुनरिह कृतान्तस्य कालस्य मुखे संसारे न पतन्ति । तथा च श्रुतिः । “ उदरं ब्रह्मेति शार्कराक्षा उपासते, हृदयं ब्रह्मेत्यारुणयो, ब्रह्मा हैवैता इत ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत, यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः, शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका, । तयोर्ध्वमायन्नमृतत्वमेति विश्वगन्या उत्क्रमणे भवन्ति ॥ ” इति॥ १८॥ईश्वरस्यापि जीववदुदरादिसंबन्धे तारतम्यमाशङ्क्याहुः—स्वकृतेति॥ स्वकृतविचित्रयोनिषु हेतुतया विशन्निव वर्तमानः स्वकृतानुकृतिः त्वम् अनलवत् तरतमश्चकास्सि । अथ वितथासु अमूषु योनिषु अवितथं समम् एकरसं च तव धाम अभिविपण्यवः विरजधियः अन्वयन्ति इत्यन्वयः । स्वेनैव कृतासु विचित्रासु उच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थानेषु कार्येषु देवतिर्यङ्मनुष्यादिदेहेषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशासंभवाद्विशन्निव वर्तमानः स्वकृताः योनीरनुकरोति इति तथाभूतस्त्वम् अनलवत् अग्निर्यथा स्वतस्ता-

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमश्चकास्स्यनलवत्स्वकृतानुकृतिः ॥ अथ वितथास्वमूष्ववितथं तव धाम समं विरजधियोऽन्वयन्त्यभिविपण्यव एकरसम् ॥ १९ ॥ स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोंऽशकृतम् ॥ इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेऽङ्घ्रिमभवं भुवि विश्वसिताः ॥ २० ॥

रतम्यहीनोऽपि काष्ठानुसारेण दीर्घह्रस्वस्थूलसूक्ष्मरूपोऽवभासते तथा तरतमतः उत्कृष्टापकृष्टभावेन चकास्सि अवभाससे नतु वस्तुतस्तारतम्यम् । तथा च श्रुतिः । “ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥इति, तत्सृष्ट्वा तदेवानुप्राविशत् ” इति च । अथ अत एव वितथासु मिथ्याभूतासु अमूषु योनिषु अवितथं सर्वविकाररहितं सत्यमत एव सममविशेषं सर्वदा एकरसमेकरूपं तव धाम स्वरूपम् अभिविपण्यवः अभितो विगतव्यवहाराः “ पण व्यवहारे ” इत्यस्य धातो रूपं पण्युरिति । ऐहिकामुष्मिककर्मफलरहिता इत्यर्थः । विरजधियो निर्मलमतयोऽन्वयन्ति जानन्ति ॥ १९ ॥ स्वकृतेति ॥ श्रुतयः अबहिरन्तरसंवरणमपि अमीषु स्वकृतपुरेषु वर्त्तमानं पुरुषम् अखिलशक्तिधृतस्तव अंशकृतं वदन्ति वस्तुतः इति नृगतिं विविच्य भुवि वर्तमानाः कवयः विश्वसिताः सन्तः निगमावपनं अभवं भवतः अङ्घ्रिमुपासत इत्यन्वयः । बहिः कार्यमन्तरं कारणं ताभ्यामनावृतमपि अमीषु आध्यासिकसंबन्धेन स्वकृतेषु स्वकर्मोपार्जितेषु पुरेषु देवादिदेहेषु भोक्तृत्वेन वर्तमानं पुरुषं जीवमखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णगुणस्य तवांशकृतम् अंश इवांशः कृत इव कृतः तादृशं त्वद्रूपं श्रुतयो वदन्ति । इत्येवं नृगतिं जीवस्य तत्वं विविच्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निश्चित्य भुवि वर्तमानाः कवयो विवेकिनो विश्वसिताः भगवच्चरणशरणतयैव संसारदुःखनिवृत्तिर्नान्यथेति विश्वासयुक्ताः निगमावपनं निगमोक्तकर्मणामावपनमासमन्तादुप्यन्तेस्मिन्नित्यावपनं क्षेत्रं सर्वकर्मार्पणविषयम् यत्र समर्पितानि कर्माणि विमुक्तिं फलन्ति तम् अत एव अभवं जन्ममरणादिसंसारदुःखनिवर्तकं भवतः अङ्घ्रिमुपासते अर्चनवन्दनादिभिः सेवन्ते । अत्र श्रुतयः । " बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः, य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति, सर्व एवात्मानो व्युच्चरन्ति, यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥"जीवस्य प्रतिबिम्बत्ववादेऽपि बिम्बमेव प्रतिबिम्बात्मना गृह्यते। भेदादिधर्मा एवाध्यस्ता नतु धर्मी इति ॥ २० ॥ दुरवगमेति ॥ हे ईश्वर दुरवगमात्मतत्त्वनिगमायात्ततनोः तव चरितमहामृताब्धिपरिवर्तपरिश्रमणाः तव चरणसरोजहंसकुलसङ्गविसृष्टगृहाः केचित् अपवर्गमपि न परिलषन्ति इत्यन्वयः । हे ईश्वर दुरवगमं दुर्ज्ञेयं यदात्मन स्तव तत्वं तस्य निगमाय ज्ञापनाय आत्ततनोः स्वीकृतमूर्तेस्तव चरितमेव महामृताब्धिस्तस्मिन् परिवर्तोऽवगाहस्तेन परिश्रमणाः परिरत्र वर्जने श्रमणं श्रमः गतश्रमा इत्यर्थः । यद्वा । परिवर्तः आलोडनं तत्र परिश्रमणाः कृतपरिश्रमा इत्यर्थः । तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं समूहस्तेन सङ्गः कथाश्रवणकीर्तनादिना संवन्धस्तेन विसृष्टाः त्यक्ता गृहा यैः अनेन श्रवणकीर्त्तने दर्शिते । तादृशाः भक्तिरसिकाः केचित् अपवर्गं मो-

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ॥ न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरो-
जहंसकुलसङ्गविसृष्टगृहाः ॥ २१ ॥ त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखे त्वयि हिते प्रिय आत्मनि च ॥ न
वत रमन्त्यहो असदुपासनयाऽत्महनो यदनुशया भ्रमन्त्युरुभये कुशरीरभृतः ॥ २२ ॥

क्षमपि न परिलषन्ति नेच्छन्ति इन्द्रादिपदं नेच्छन्तीति तु किं वक्तव्यम् । केचिदित्यनेनैवंभूतानां दुर्लभत्वं सूचितम् । श्रुतिश्च मुक्तितोऽपि भक्तेराधिक्यं दर्शयति "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च " इति व्याख्यातं च । सर्वज्ञैर्भाष्यकृद्भिः मुक्ता अपि लीलाविग्रहं कृत्वा भजन्त इति ॥ २१ ॥ त्वदिति ॥ त्वदनुपथमिदं कुलायम् आत्मसुहृत्प्रियवच्चरति तस्मिंस्त्वयि साक्षादेव आत्मनि हिते प्रिये च सदैवोन्मुखे च अहो बत तथापि ये न रमन्ति ते असदुपासनया आत्महनः यदनुशयाः कुशरीरभृतः सन्तः उरुभये भ्रमन्ति इत्यन्वयः । तव पन्थानमनुगतं जीवाख्यत्वदंशसम्बन्धं प्राप्तं परमात्मनस्तव जीवात्मना संवन्धादेव इदं कुलायं कौ पृथिव्यां लीयत इति तथा नीडरूपं शरीरम् आत्मसुहृत् प्रियवच्चरति भातीत्यर्थः । मृतशरीरे तद्भानाभावात् तत्रात्मवत्वमहंतास्पदत्वात् सुहृद्वत्त्वं विषयार्पणेन हितकारित्वात् प्रियवत्त्वं ततस्ततः प्रीतिविषयत्वात् एवं यत्संबन्धादेव शरीरे तत्तद्भानात्प्रीतिः तस्मिंस्त्वयि साक्षादेव आत्मनि हिते प्रिये च सदोन्मुखे न तु देहवत् विषयवच्च कदाचित्पराङ्मुखेऽपि एवंभूतेऽपि त्वयि अहो आश्चर्यं बत कष्टं तथा देहवदपि ये न रमन्ति तङ्भाव आर्षः । ते असदुपासनया असतो देहादेरुपलालनेन आसक्त्येत्यर्थः । आत्महनः यस्यामसदुपासनाया-

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनुशयो वासना येषां ते कुशरीरभृतः श्वशूकरादिशरीरवन्तः सन्तः उरुभये संसारे भ्रमन्ति परिवर्त्तन्ते इत्यर्थः । तथा च श्रुतिः । "आराममस्य पश्यन्ति न तं पश्यति कश्चन। नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ असुर्या नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ " इति ॥ २२ ॥

निभृतेति ॥ निभृतमरुन्मनोक्षदृढयोगयुजः मुनयः यत्तत्त्वं हृदि उपासते तदेव तत्त्वमरयोऽपि तव स्मरणात् ययुः । तथा उरगेन्द्रभोगभुजदण्डविषक्तधियः स्त्रियो गोप्यः तथा तवाङ्घ्रिसरोजसुधाः समदृशः वयमपि च ते समा एवेत्यन्वयः । निभृतानि संयमितानि मरुत् प्राणः मनश्च अक्षाणि इन्द्रियाणि च यैस्ते च ते दृढं योगं युञ्जन्तीति दृढयोगयुजश्च यद्वा निभृतैर्मरुन्मनोक्षैर्दृढयोगयुजः ते मुनयो यत्तत्वं हृदि शुद्धेन्तःकरणे उपासते ध्यायन्ति ध्यानविषये प्रवर्त्तन्ते तदेव तत्त्वमरयो दुर्भावना अपि तव स्मरणात् ययुः लिट्प्रयोगात् मुनिभ्यः पूर्वमेव ब्रह्मणि अलीयन्त । तथा उरगेन्द्रस्य शेषस्य भोगो देहस्तत्सदृशयोर्भुजदण्डयोर्विषक्ता धीर्यासां ताः परिच्छिन्नदृष्टयः स्त्रियः गोप्योऽपि कामतो ध्यानात्तदेव तत्वं ययुः । तथा अङ्घ्रिसरोजसुधा तवाङ्घ्रिसरोजं सुष्ठु धारयन्त्यो ध्यायन्त्यः वर्णयन्त्यः समदृशः सममपरिच्छिन्नं त्वां पश्यन्त्यो वयं श्रुत्यभिमानिन्यो देवता अपि यद्वा गोपीरूपतां प्राप्ता वयमपि ते तव कृपाविषयतया तत्समा एवेति । इत्थम्भूतस्तव स्मरणानुभावः ये योगिनः त्वां ध्यायन्ति याश्च वयं त्वं समं पश्यामः

निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोऽपि ययुः स्मरणात् ॥ स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः ॥ २३ ॥ क इह नु वेद बतावरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये ॥ तर्हि न सन्नचासदुभयं न च कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा ॥ २४ ॥

याश्च स्त्रियस्त्वां परिच्छिन्नं ध्यायन्ति ये च त्वां द्विषन्ति तान्सर्वानपि त्वामेव प्रापयतीति । अत्र चत्वारो गणा वर्णिताः । पूर्वार्द्धगतौ मुनिदैत्यगणौ यथा समप्राप्यौ तथैवोत्तरार्द्धगतौ गोपीगणश्रुतिगणौ समप्राप्यौ पृथगपिशब्दाभ्यामवगम्येते । श्रुतीनां गोपीरूपत्वं बृहद्वामने । " तुष्टोऽस्मि ब्रूत भो विज्ञा वरं यन्मनसेप्सितम् । " इति । भगवदुक्ताः श्रुतय ऊचुः । " यथा त्वल्लोकवासिन्यः कामतत्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाजनिनस्तथा ॥ " इति प्रार्थितः भगवान् । उवाच व्रजे गोप्यो भविष्यथेति ॥ २३॥

क इहेति ॥ बतेति खेदे इह जगति अग्रसरं त्वाम् अवरजन्मलयः को नु पुमान् वेदयतस्त्वत्तः ऋषिः उदगात् तदनु उभये देवगणा उदगुः यदा तु भवान् सर्वमवकृष्य शयीत तर्हि न सत् शिष्यते न चासत् न चोभयं न च कालजवः न च अन्यत्किमपि शिष्यते न च शास्त्रमप्यवशिष्यत इत्यन्वयः । बत खेदे इह जगति अग्रसरं पूर्वसिद्धं त्वाम् अवरजन्मलयः अर्वाचीनोत्पत्तिविनाशवान् पुमान् को नु वेद जानाति ज्ञानकारणाभावमाहुः । यतस्त्वत्तः ऋषिर्वेदो ब्रह्मा वा उदगात् उत्पन्नः । " यो ब्रह्माणं विदधाति पूर्वम् " इति श्रुतेः । यमनु यदनन्तरम् उभये ज्ञानकर्मोभयेंद्रियाधिष्ठातारो लोकपाश्च उदगुः । यद्वा । निवृत्तिनिष्ठाः सनकादयः प्रवृत्तिनिष्ठा मरीच्यादयश्च देवा उदगुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्ये तु मनुजादयस्ततोऽप्यर्वाचीनाः अतः त्वत्तः पूर्वाभावात्त्वां को वेद। यदा तु भवान् प्रलये सर्वमवकृष्य उपसंहृत्य शयीत तर्हि तदा तत्र न सत् स्थूलम् आकाशादि शिष्यते न चासत् सूक्ष्मं महदादि न च उभयं सदसद्भ्यामारब्धं शरीरं चिदचिदात्मकं मनो वा न कालस्य जवो वेगो नान्यत्किमपि इन्द्रियप्राणादिसृष्ट्यादिव्यापारो वा न च ज्ञापकं शास्त्रं वेदपुराणादि अतो ज्ञानस्य दुर्लभत्वाद्भगवदेकशरणतया श्रवणकीर्तनादिभक्तिरेव सुकरेत्याशयः। तथा च श्रुतिः। "न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव, को अद्धा वेद क इह प्रवोचत्, कुत आजाता कुत इयं विसृष्टिः, अर्वाग् देवा अस्य विसर्जने नाथाः, यतो वाचो निवर्त्तन्ते" इत्याद्याः ॥२४॥ उपदिशतामपि भ्रमबाहुल्याज्ज्ञानन्न सुकरमित्याहुः—जनिमिति ॥ ये असतः जनिं स्मरन्ति ये च सत एव मृतिं स्मरन्ति उत अपि ये च आत्मनि भिदां स्मरन्ति ये च विपणम् ऋतं स्मरन्ति ते सर्वे आरुपितैरेव उपदिशन्ति त्रिगुणमयः पुमानिति हेतुना या भिदा सा यद्यस्मात्त्वयि विषये अवोधकृता ततः अबोधात्परत्र अवबोधरसे त्वयि सः अबोधो न भवेत् इत्यन्वयः। ये पातञ्जलादयः असत एव ब्रह्मत्वस्य जनिमुत्पत्तिं स्मरन्ति। वदन्ति यद्वा ये वैशेषिकाः असतः प्रागविद्यमानस्य जगत्कार्यस्य जनिं स्मरन्ति तथा ये गौतमीयाः सतः सत्यस्यैव एकविंशतिविधस्य दुःखस्य मृतिं विनाशं मुक्तिं स्मरन्ति। ये नैयायिकसांख्यादयः भेदवादिनः आत्मनि भिदां भेदं जीवानामन्योन्यभेदं जीवब्रह्मणोर्जीवजडयोर्ब्रह्म-

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरन्त्युपदिशन्ति त आरुपितैः ॥ त्रिगुणमयः पुमानिति भिदा यदबोधकृता
त्वयि न ततः परत्र स भवेदवबोधरसे ॥ २५ ॥ सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशन्त्यशेषमिदमात्मतयात्मविदः ॥
न हि विकृतिं त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयाऽवसितम् ॥ २६ ॥

जडयोर्जडजडयोश्चेति पञ्चधा भेदं स्मरन्ति उतेत्यप्यर्थे तथा ये कर्मठाः विपणं कर्मफलं व्यवहारम् ऋतं सत्यं स्मरन्ति। "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इति। तदपि ते सर्वे आरुपितैरारोपणैः भावे क्तः। भ्रमैरेवोपदिशन्ति न तत्त्वदृष्ट्या। यद्वा ते आरुपितैः लौकिकारोपैरेव स्मरन्ति न तेषां तत्र मुख्यं तात्पर्यम्। "ब्रह्मैव सन् ब्रह्माप्येति, सदेव सोम्येदमग्र आसीत्, अनीशया शोचति मुह्यमानः अनीशया मायया, एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन, यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिश्रुतिविरोधात्। त्रिगुणमयः पुमानिति हेतुना या भिदा आत्मभेदव्यवहृतिः पञ्चधोक्ता सा यद्यस्मात् त्वयि विषये अबोधकृता त्वद्विषयाज्ञानकल्पिता भवति अतः ततः अबोधात् परत्र असङ्गे अज्ञानविषयत्वाश्रयत्वयोरयोग्ये आवरणरहिते अवबोधरसे ज्ञानैकस्वरूपे त्वयि सः अबोधः न भवेत् नास्त्येव। "आदित्यवर्णं तमसः परस्तात्, स यथा सैन्धवघनोनन्तरो बाह्यः कृत्स्नो रसघन एव स्यादेवं वा, अरेयमात्मानन्तरो बाह्यः, नैषा तर्केण मतिरापनेया" इत्यादिश्रुतेः ॥ २५ ॥ ननु यद्यसन्नोत्पद्यते यदि च त्रिगुणमयः पुरुषो न भवति तर्हीदं प्रपञ्चजातं पुरुषो भोक्ता च पृथक् नास्तीत्युक्तं स्यात् ततः कथं तयोः सत्त्वेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीतिरत आहुः–सदिवेति ॥ मनः मनोमात्रविलसितमिदमशेषं त्रिवृत् आमनुजात् असदपि त्वयि अधिष्ठाने सति सदिव विभाति। आत्मविदस्तु आत्मतया सदभिमृशन्ति। हि यतः कनकार्थिनः तदात्मतया कनकस्य विकृतिन्न त्यजन्ति अतः स्वकृतमिदं विश्वमनुप्रविष्टं पुरुषरूपं च आत्मतयैवावसितमित्यन्वयः। मनः मनोमात्रविलसितमिदं दृश्यमानमशेषं त्रिवृत् त्रिगुणात्मकं प्रपञ्चजातमिदंकारास्पदम् आमनुजात् मनुजं जीवमहङ्कारास्पदमभिव्याप्य असत् तुच्छमपि त्वयि अधिष्ठाने सति सदिव विभाति अधिष्ठानसत्तया सद्वत्प्रतीयते। इदंकारास्पदस्य जगतः अहङ्कारास्पदस्य जीवस्यापि च पृथक् प्रतीतिर्मनोमात्रविलसितेत्याशयः। तथा च श्रुतिः।"असतोऽधि मनोऽसृजत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत, तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंच" इति। ननु आत्मविदामपि विश्वं सदेव स्फुरति ततः कथमसदिति चेत्तत्राह। आत्मविदस्तु अशेषमिदं विश्वं भोक्तृभोग्यात्मकम् आत्मतया आत्मस्वरूपत्वेन सदभिमृशन्ति सदिति जानन्ति आत्मकार्यत्वान्न ततः पृथगित्यर्थः। यथा स्वर्णक्रयिकाः जनाः तदात्मतया कनकरूपत्वेन हेतुना कनकस्य विकृतिं कटककुण्डलादि न हि त्यजन्ति किंतु कनकरूपत्वेनैव स्वीकुर्वन्ति तथा स्वेनोपादानभूतेन कृतं तदनुप्रविष्टं पुरुषरूपञ्च सर्वमिदं भोग्यभोक्तात्मकमात्मतयैवावसितं निश्चितमात्मविद्भिः ॥ २६ ॥ ननु "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिभिरेवंभूतं भगवन्तं श्रुतयः प्रतिपादयन्ति तज्ज्ञानं सुकरमेवेति किं

तव परि च ये चरन्त्यखिलसत्त्वनिकेततया त उत पदाऽऽक्रमन्त्यविगणय्य शिरो निर्ऋतेः ॥
परिवयसे पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनन्ति न ये विमुखाः ॥ २७ ॥

भक्त्येत्यत आह–तवेति॥ये अखिलसत्वनिकेततया तव त्वां परिचरन्ति ते एव अविगणय्य निर्ऋतेः शिरः पदा आक्रमन्ति यतः त्वं तान् प्रसिद्धान् विबुधानपि गिरा पशूनिव परिवयसे अतः तेषु ये त्वयि कृतसौहृदा भवन्ति ते खलु पुनन्ति ये तु त्वत्तो विमुखाः ते तु न पुनन्ति इत्यन्वयः। तवेति कर्मणि शेषे षष्ठी। "छन्दसि व्यवहिताश्च" इति सूत्रात् परीत्यस्य यच्छब्दव्यवधानं न दोषः उतशब्द एवकारार्थे। ये अखिलसत्वनिकेततया अखिलानि सत्वानि प्राणिनो निकेतः निवासस्थानं यस्य स तथा तस्य भावस्तत्ता तद्रूपेण सर्वत्र त्वदृष्ट्या तव त्वां परिचरन्ति सेवन्ते ते एव अविगणय्य तिरस्कृत्य निर्ऋतेर्मृत्योः शिरः मूर्धानं पदा पादेन आक्रमन्ति मृत्योर्मूर्ध्नि पदं दधते मृत्युं तरन्ति विमुच्यन्ते इत्यर्थः। ह्रस्वाभाव आर्षः। तेषां कृतार्थत्वेकः संदेहः तान् प्रसिद्धान् विबुधान् आपाततो वेदार्थज्ञान् पण्डितानपि त्वं गिरा वेदरूपया वाचा पशूनिव परिवयसे तत्तत्कर्माधिकारित्वेन बध्नासि। तथा च श्रुतिः। "तस्य वाक्तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्" इति। अतः त्वयि कृतं सौहृदं प्रेम यैस्ते खलु निश्चितम् आत्मानमन्यानपि च पुनन्ति पवित्रयन्ति विमुक्तियोग्यान् कुर्वन्ति ये तु त्वद्विमुखास्तेनेति आत्मानमपि न पुनन्ति अन्यांस्तु कुतः पुनीयुरित्यर्थः। अयं भावः श्रुतयः सत्यादिरूपमात्मानं प्रतिपादयन्ति तत्र यद्यपि वस्तुनः अपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते तथाप्यसंभावनाविपरीतभावनातिरस्कृतत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मलिनाचित्तेषु परोक्षमेव भवति इति नापरोक्षसंसारभ्रमनिवृत्तिक्षमं भवति । भगवत्परिचर्यया शुद्धे चित्ते तु अपरोक्षमेव भवतीति करतलकलितो मोक्ष इति श्रुतिश्च । " यमेवैष वृणुते तेन लभ्यः, यस्य देवे परा भक्तिः " इत्यादि ॥ २७ ॥ त्वमिति ॥ त्वम् अकरणः अपि अखिलकारकशक्तिधरः स्वराट् च असि अजया युक्ता विश्वसृजः अनिमिषाश्च अखिलक्षितिपतेर्वर्षभुज इव तव बलिमुद्वहन्ति स्वयं च समदन्ति । यत्र तु येऽधिकृतास्ते भवतश्चकिताः सन्तः तत्तत्कार्यं विदधति इत्यन्वयः । त्वम् अकरणः चक्षुरादिरहितोऽपि स्वराट् स्वेन राजते तथाभूतः स्वतन्त्रः करणाद्यनपेक्षश्च अतः अखिलानां प्राणिनां यानि कारकाणि इन्द्रियाणि कर्मधारयो वा तेषां शक्तीर्धारयति प्रवर्तयतीति तथाभूतश्चासि । " अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । " इति श्रुतेः । किं बहुना अजया अविद्यया युक्तास्तया वृताः विश्वसृजो ब्रह्मादयः अनिमिषाः लोकपाला देवा इन्द्रादयश्च करणाधिष्ठातारोऽपि तव बलिमुद्वहन्ति पूजां कुर्वन्ति । यथा सस्त्रीका एव किङ्कराः स्वामिनं सेवन्ते तथा अविद्यायुक्ता देवास्त्वामिति लोकोक्तिः । तथा प्रजाभिर्दत्तं हव्यादिलक्षणं बलिं स्वयमपि समदन्ति भक्षयन्तीत्यर्थः । यथा वर्षभुजः खण्डमण्डलपतयः स्वप्रजादत्तं बलिं भुञ्जाना अपि अखिलक्षितिपतेर्महामण्डलेश्वरस्य बलिमुद्वहन्ति तद्वत् । तथा ये तु यत्र कार्ये अधिकृता नियुक्तास्ते भवतश्चकिता भीताः सन्तस्तत्कार्यं विदधति कुर्वन्तीति त्वदा-

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहन्ति समदन्त्यजयाऽनिमिषाः ॥ वर्षभुजोऽखिलक्षितिपतेरिव विश्व-
सृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः ॥२८॥ स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि
परस्य विमुक्ततः ॥ नहि परमस्य कश्चिदपरो न परश्च भवेद्वियत इवाऽपदस्य तव शून्यतुलां दधतः ॥ २९ ॥

ज्ञापालनमेव बल्युद्वहनमित्यर्थः । " भीषास्माद्वातः पवते भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥ " इति श्रुतेः ॥ २८ ॥ स्थिरेति ॥ हे विमुक्त यदि ततः अजातः परस्य तव अजया विहरः भवति तदा उदीक्षया उत्थनिमित्तयुजः स्थिरचरजातयः स्युः वियत इवापदस्य शून्यतुलां दधतः परमस्य तव कश्चिदपि अपरः न भवेत् परश्च न भवेत् इत्यन्वयः । हे विमुक्त यदि सृष्टिसमये ततः अजातः परस्य दूरे वर्त्तमानस्यासङ्गस्य तत्प्रेरकस्य तव अजया मायया विहरः विहारेच्छा भवति तदा उदीक्षया तवेक्षणमात्रेण उत्थानि उत्थितानि आविर्भूतानि निमित्तानि विचित्रकर्मयुक्तानि लिङ्गशरीराणि तैर्युज्यन्ते ते स्थिरचरजातयः स्थावरजङ्गमशरीरविशिष्टाः प्राणिनः स्युः जायन्ते इत्यर्थः । " यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युचरन्ति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे देवाः सर्वे लोकाः सर्वाणि भूतानि सर्व आत्मानो व्युचरन्ति " इति श्रुतेः । कर्मणां वैचित्र्यमेव सृष्टिवैचित्र्ये हेतुस्तव तु वैषम्यं नास्तीत्याहुः । न हीति । वियत आकाशस्येवापदस्य वाङ्मनसयोरगोचरस्य व्याप्यगतदोषासंश्लिष्टस्य वा शून्यतुलां शून्यसाम्यं दधतः अतिसूक्ष्मस्य नतु शून्यस्यैवेति परमस्य उत्तमस्य परमकारुणिकस्य तव कश्चिदपरः स्वीयः न भवेत् परोऽस्वीयश्च न भवेत् नास्ति । येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषमा सृष्टिः स्यादिति शेषः ॥ २९ ॥ अविद्याकृतकार्योपाधीनामीश्वरस्यांशानां जीवानामुत्पत्तिर्निरूपिता तत्र यद्येकाविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसङ्गः । यदि नानाविद्यास्तर्हि तस्यैवांशान्तरेण संसारानपगमादनिर्मोक्षप्रसङ्ग इत्यादियुक्त्या वस्तुत एव नानात्मानः तत्र च तेषामणुत्वे देहव्यापि चैतन्यं न स्यात् । देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वं स्यात् । तथात्वे च परलोकसाधनानां वैयर्थ्यं स्यात् कृतनाशाकृताभ्यागमापत्तिश्चेति अतः सर्वगता नित्याश्चेति केचन नैयायिकादयो मन्यन्ते तन्मतं दूषयन्ति—अपरिमिता इति ॥ हे ध्रुव यदि तनुभृतः अपरिमिताः ध्रुवाः सर्वगताश्च स्युस्तर्हि तेषां शास्यता इति नियमो न स्यात् । इतरथा तु अयं दोषो न स्यात् अतः यन्मयं जीवाख्यमजनि तद्वस्तु कारणं कारणतया स्वकार्यमविमुच्य स्वकार्यस्य जीवस्य नियन्तृ भवेत् । यत् कारणाख्यं वस्तु समं तन्मतस्य दुष्टतया हेतुना अनुजानताममतमेवेत्यन्वयः । हे ध्रुव यदि तनुभृतो जीवाः अपरिमिता वस्तुत एवासङ्ख्याताः ध्रुवास्तेनैव रूपेण नित्याः सर्वगता व्यापकाश्च स्युस्तर्हि तेषां शास्यता नियम्यता इति नियमो न स्यात् । इतरथा तेषां त्वज्जन्यत्वे अव्यापकत्वे चायं त्वच्छास्यताभावरूपो दोषो न स्यात् । यद्वा । तेषामपि त्वत्समत्वात्त्वया तेषां शास्यता नियम्यता न स्यात् । श्रूयते च । "अन्तः प्रविष्टः शास्ता जनानाम्" इति शास्यता । तथा जीवानां नित्यत्वव्यापकत्वाङ्गीकारे नियमः

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा ॥
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्सममनुजानतां यदमतं मतदुष्टतया ॥ ३० ॥

पुण्यपापादिसाधननियमो दुःखसुखादिफलनियमश्च न स्यात् । व्यापकत्वेन सर्वसंबन्धस्य सर्वत्र विद्यमानत्वात् । इतरथा जीवानां जन्यत्वे अणुत्वे तूभयमपि घटत एवेति शेषः । यन्मयं यस्य ब्रह्मणो विकारप्रायं जीवाख्यमजनि जातं तत्कारणं वस्तु कर्तृकारणतया स्वकार्यमविमुच्य उपादानत्वेनापरित्यज्य तस्य स्वकार्यस्य जीवाख्यस्य नियन्तृ नियामकं भवेत् । किं तत्कारणं वस्त्वित्यपेक्षायामाहुः । यत् कारणं वस्तु समं सर्वानुस्यूतं तत् मतस्य सामान्येन बुद्धिविषयमात्रस्य दुष्टतया हेतुना अनुजानतां वयं जानीम एव ब्रह्मेति वदतामपि वस्तुतः अमतम् अविज्ञातप्रायमेव दुर्ज्ञेयत्वात् । तथा च श्रुतिः । "यस्या मतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्" ॥ इति । न च जीवस्याणुत्वे सर्वदेहव्यापि चैतन्यं न स्यादिति शङ्कनीयं तत्प्रभया व्याप्तत्वेन सर्वदेहचैतन्योपपत्तेः । यथोक्तं गीतासु । "यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥" अद्वैतवेदान्तिमते चायं भावः । अविद्याप्रतिबिम्बो जीवः स चाविद्योपाधिभेदेन भिन्नः प्रतिबिम्बस्य च बिम्बरूपेणैव नित्यत्वादि न तु स्वरूपेण । एवं च बिम्बस्य तव नियन्तृत्वेन जनकत्वे च सिद्धे सिद्धं पूर्वोक्तं भजनीयत्वमिति श्रुत्या च जीवस्य प्रत्यगभिन्नब्रह्मसाक्षात्कारवतः परमेश्वरभावापत्तिरूपा मुक्तिः प्रतिपाद्यते तेन बिम्बचैतन्यरूपत्वं परमेश्वरस्य व्यवस्थाप्यते । प्रतिबिम्बरूपत्वे तु मुक्तजीवसायुज्यास्पदत्वासंभवात् । न हि प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिम्बं स्वोपाधिलये प्रतिबिम्बान्तरे लीयते किंतु बिम्ब एव । तदाहुः कल्पतरुकाराः । " न मायाप्रातिबिम्बस्य निर्मुक्तैरुपसृप्यता । " इति ॥ ३० ॥ ननु परमात्मनो जीवा
जायन्त इत्यङ्गीकारे जीवानामनित्यत्वप्रसङ्गात्पूर्वोक्तदोषप्रसङ्गः । किञ्च तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् न चैतद्युक्तं स्वप्रकाशानन्दात्मनोऽविद्याकृतानर्थ-
निवृत्तिमात्रस्य मोक्षत्वाभ्युपगमात् इत्याशङ्क्योपाधिजन्मनैव जीवानां जन्मोच्यते न स्वतः । तत्र किं प्रकृतेर्जीवरूपेणोद्भवः स्यात् पुरुषस्य वा उभयोर्वा । आद्ये जीवानां
जडत्वापत्तिः । द्वितीये पुरुषस्य विकारित्वप्रसङ्गः इत्याशयेनाह—न घटत इति ॥ अजयोः प्रकृतिपूरुषयोः उद्भवः न घटते । उभययुजा असुभृतः जलबुद्बुदवत् भवन्ति ततः
ते इमे जीवाः विविधनामगुणैः सह सरितः अर्णवे इव अशेषरसा मधुनि इव परमे त्वयि लिल्युः इत्यन्वयः । अजयोः श्रुत्याजत्वेन प्रोक्तयोः प्रकृतिपूरुषयोरुद्भवः न
घटते उभयं च तद्युक् च परस्पराध्यस्तमिति यावत् । तेन असुभृतः प्राणाद्युपाधयो जीवा जलबुद्बुदवत् भवन्ति जायन्त इत्यर्थः । यथा केवलेनानिलेन केवलेन जलेन
वा जलबुद्बुदा न भवन्ति किंतु मिलिताभ्यां तद्वदित्यर्थः। तत्र च यथानिलो निमित्तं जलमुपादानमेवमत्रापि प्रकृतिर्निमित्तं पुरुषं उपादानम् यथा। "अग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चर-
न्ति एवमेवात्मनः सर्वे प्राणादयो व्युच्चरन्ति " इत्यादौ चेतनप्रपञ्चस्य परमात्मोपादानत्वश्रवणात् न च विकारित्वं परिणामानङ्गीकारात् । केचित्पुनः परिणाममङ्गीकृत्य

न घटत उद्भवः प्रकृतिपूरुषयोरजयोरुभययुजा भवन्त्यसुभृतो जलबुद्बुदवत् ॥
त्वयि त इमे ततो विविधनामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥ ३१ ॥

आत्मनो विकारभिया विपरीतं निमित्तोपादानभावमङ्गीकुर्वन्ति सर्वथा तावत् प्रकृतिपुरुषैक्यायद्भवतीति सिद्धम् ।तत् "एकमेवाद्वितीयं ब्रह्म,अजामेकाम्, अविनाशी वा अरे-
यमात्मा " इत्यादिश्रुतिबलात् उत्पत्तिश्रवणाच्च जीवानामौपाधिकमेव जन्म न स्वत इत्युक्तम् । उपाधिलयेन परमात्मनि लयश्रवणादपि न वास्तवं जन्मेत्याह । त्वयीति । यतो
न वास्तवं जन्म ततो हेतोः त इमे जीवाः विविधनामगुणैः अनेकप्रकारेन्द्रियान्तःकरणाद्युपाधिभिः सह त्वयि परमेश्वरे परमकारणे लिल्युर्लीना बभूवुः । तत्र दृष्टान्तद्व-
यमाहुः । तत्र मुक्तौ सर्वोपाधेर्लयात् अर्णवे सरित इव लीयन्ते । तथा च श्रुतिः । " यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपा-
द्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् " इति । सुषुप्तिप्रलययोस्तु मधुन्यशेषरसा इव लीयन्ते । यथा मधुनि सकलकुसुमरसा विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यन्ते
एवं स्वापादौ विशेषमात्रलयात् कारणस्य विद्यमानत्वात्सामान्यतो वर्तन्त एव । तथा च श्रुतिः । " यथा सौम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्
समवहारमेकतां गमयन्ति ते यथा न विवेकं लभन्ते अमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामहे " । इति अन्ये
पुनराहुः । ननु स्वदेहेन्द्रियादिनियन्तुर्जीवात्मनोऽन्यत उत्पन्नत्वेन नियम्यत्वं चेत्परमात्मनोऽप्यात्मत्वनियन्तृत्वाविशेषादन्यत उत्पन्नत्वमस्तु इत्याशङ्क्य प्रकृतिपूरुषयोरेवोत्प-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तिर्न संभवति किं पुनः परमात्मन इति द्योतयन्त्यः अजनि च यन्मयमिति समनन्तरोक्तयत्पदार्थं स्फुटयन्त्य आहुः। न घटत इति। प्रकृतेस्त्रिगुणात्मकमूलशक्तेः पुरुषस्य महत्स्रष्टुश्च उद्भवो न घटतेऽनादित्वात्। किं पुनस्तदुभयाधिष्ठानस्य तवेति असुभृतो जीवास्तु उभयं प्रकृतिपुरुषात्मकं विश्वं युनक्ति व्याप्नोति तेन मूलाधिष्ठानेन बिम्बभूतेन हेतुना भवन्ति जायन्ते बुद्बुदा यथा जलेनैव जायन्ते वाय्वादिस्तु निमित्तमात्रमिति। एवं जीवास्त्वदुपादानका अविद्याद्युपाधयस्तु निमित्तमात्रमिति त्वन्मयमेव जीववृन्दमजनीति प्राणादिलिङ्गदेहाद्युपाधिजन्मनैव जीवानां जन्म न स्वत इति बोधितं शेषं प्राग्वत्। केचिद्भागवतास्तु अपरिमिता ध्रुवा इति न घटत इति च द्वयमपि पूर्वपक्षतया व्याख्याय नृषु तवेत्यग्रिमश्लोकं सिद्धान्तत्वेन व्याचख्युः॥ ३१॥ नृषु तवेति॥ अमीषु नृषु तव मायया भृशं भ्रममवगत्य सुधियः अभवे त्वयि अनुप्रभवं भावं दधति। यत् यतः अभवच्छरणेषु तव भृकुटिस्त्रिणेमिः भयं मुहुः सृजति अतः अनुवर्ततां भवभयं कथं स्यादित्यन्वयः। अमीषु नृषु जीवेषु तव मायया भृशं दुस्तरं भ्रमं देहाद्यात्माभिमानलक्षणमवगत्य ज्ञात्वा सुधियो विवेकिनः अभवे भवनिवर्तके त्वयि अनुप्रभवमनुक्षणं वर्द्धमानं भावं श्रवणकीर्तनाभ्यां मनोवृत्तिं विदधति कथमिति यत् यस्मात् अभवच्छरणेषु न भवान् शरणं रक्षको येषां तेष्वेव तव भृकुटिः भ्रूभङ्गरूपः त्रिणेमिस्तिस्रो नेमय इवावच्छेदकाः शीतोष्णवर्षाकाला यस्य संवत्सरात्मकस्य स कालः भयं

नृषु तव मायया भ्रमममीष्ववगत्य भृशं त्वयि सुधियो भवे दधति भावमनुप्रभवम्॥ कथमनुवर्ततां भवभयं तव यद्
भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयम्॥ ३२॥ विजितहृषीकवायुभिरदान्तमनस्तुरगं य इह यतन्ति यं तु
लोलमुपायखिदः॥ व्यसनशतान्विताः समवहाय गुरोश्चरणं वणिज इवाऽऽजसन्त्यऽकृतकर्णधरा जलधौ॥ ३३॥

जन्ममरणादिलक्षणं मुहुः सृजति करोति। अतोऽनुवर्त्ततामनुवर्तमानानां शतार्षः। त्वामेव शरणं भजतां भवभयं संसारभयं कथं स्यात् न कथंचिदपीत्यर्थः। तथा च श्रुतयः। "परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च। उपस्थाय प्रथमजामृतस्यात्मनाऽऽत्मानमभिसंविवेश॥" इत्यादयः॥३२॥ स च भगवति भावो मनोनियमेन भवेत् तच्च गुरूपसदनादिति गुरूपसदनमाहुः—विजितेति॥ हे अज गुरोश्चरणं समवहाय ये अतिलोलं विजितहृषीकवायुभिः अदान्तमनस्तुरगं यन्तुं यतन्ति ते उपायखिदः व्यसनशतान्विताश्च सन्तः इह अकृतकर्णधरा जलधौ वणिज इव सन्ति इत्यन्वयः। हे अज गुरोश्चरणं समवहाय अनाश्रित्य ये जना अतिलोलं चञ्चलं विजितानि हृषीकाणीन्द्रियाणि वायुः प्राणाश्च यैस्तैर्योगिभिरपि अदान्तमदमितं वशीकर्त्तुमशक्यं मन एव तुरगः दुर्दमत्वसाम्यात्तं यन्तुं वशीकर्त्तुं यतन्ति प्रयतन्ते। तङ्भाव आर्षः। ते उपायेषु खिद्यन्ते क्लिश्यन्तीत्युपायखिदः तथा व्यसनशतान्विता बहुदुःखाश्च सन्तः इह संसारसमुद्रे सन्ति तिष्ठन्ति संसारदुःखे निमग्ना भवन्तीत्यर्थः। तत्र दृष्टान्तमाहुः। अकृतकर्णधरा अस्वीकृतनाविका वणिजो यथा जलधौ निमग्ना भवन्ति तथेति। गुरूपदर्शितभगवद्भजनसुखानुभूतौ तु मनः स्वयमेव निश्चलं भवति नान्यथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा च श्रुतिः । " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्, आचार्यवान् पुरुषो वेद " इत्यादि ॥ ३३ ॥ वैराग्यमात्मज्ञानभक्त्योरङ्गं श्रुतयो विदधति—स्वजनेति ॥ नृणां मध्ये त्वां श्रयतः पुंसः सर्वरसे आत्मनि त्वयि सति स्वजनसुतात्मदारधनधामधरासुरथैः किं फलम् इति सत् अजानतां मिथुनतः रतये चरतां स्वविहिते स्वनिरस्तभगे इह संसारे को नु सुखयति न कोपीत्यन्वयः । नृणां मध्ये त्वां श्रयतः पुंसः सर्वे रसाः सुखानि यत्र तादृशे आत्मनि त्वयि स्फुरति सति स्वजनादिभिः किं फलं न किमपि । आत्मा देहः धाम गृहं धरा भूमिः असवः प्राणा इन्द्रियाणि च रथा इत्युपलक्षणमन्येषामपि सुखसामग्रीतया प्रसिद्धानाम् इत्येवं सत् परमार्थसत्यं सुखरूपं त्वामजानताम् अजानतः अत एव मिथुनतः स्त्रियं मिथुनीकृत्य ल्यप्लोपे पञ्चमी । रतये रतिसुखाय चरतां चरतः गृहेषु वर्तमानान् कर्मणि षष्ठ्यौ । स्वविहिते स्वत एव नाशशीले स्वत एव निरस्तं भगमैश्वर्यादि यस्य तस्मिन्निह संसारे प्रथमान्तपाठे कर्तुर्विशेषणं को नु स्वजनसुतादिरर्थः सुखयति न कोऽपीति । तथा च श्रुतिः । " परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन " इत्यादि ॥ ३४ ॥ भुवीति ॥ ये ऋषयः विमदाः भवत्पदाम्बुजहृदश्च ते अघभिदङ्घ्रिजला उत तादृशा अपि भुवि पुरुपुण्यतीर्थ-

स्वजनसुतात्मदारधनधामधराऽसुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे ॥ इति सदजानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे ॥ ३४ ॥ भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदाम्बुजहृदोऽघभिदङ्घ्रिजलाः ॥ दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान् ॥ ३५ ॥ सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च क्व च मृषा न तथोभययुक् ॥ व्यवहृतये विकल्प इषितोऽन्धपरम्परया भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान् ॥ ३६ ॥

सदनान्युपासते । यतः ये नित्यसुखे त्वयि सकृदपि मनः दधति ते पुनः पुरुषसारहरावसथान् न उपासते इत्यन्वयः । ये ऋषयः विमदाः निरहङ्काराः भवतः पदाम्बुजं हृदि येषां ते च अघानि भिनत्ति इत्यघभित् तादृगङ्घ्रिजलं येषां त उत तादृशा अपि भुवि यानि पुरूणि बहूनि पुण्यानि तीर्थानि तथा सदनानि क्षेत्राणि च उपासते प्रायस्तत्रैव महत्सङ्गात् ये नित्यसुखरूपे आत्मभूते त्वयि सकृदपि मनो दधति ते पुनः पुरुषाणां सारं विवेकधैर्यक्षमाशान्तिप्रमुखं हरन्ति निराकुर्वन्तीति तथा ये आवसथा गृहास्तान्नोपासते ॥ ३५ ॥ सत इति ॥ इदं जगत् यतो हेतोः सतः उत्थितम् अतः सत् इति चेत् ननु इदमनुमानं तर्कहतं यतः क्वचित्पितृपुत्रादौ व्यभिचरति क्वच रज्जुसर्पादौ मृषा भवति अत्रापि तथा नास्ति किंतु उभययुक् अतो न सत् । व्यवहृतये तु विकल्प इषितः स तु अन्धपरम्परयापि भवति । ते भारती उरुवृत्तिभिः उक्थजडान् भ्रमयति इत्यन्वयः । इदं जगत् सतः सद्रूपात्परमात्मनः उत्थितमुत्पन्नमतः सत् सत्यमेवेति । तथा च इदं जगत् इति पक्षः सत् इति साध्यम् । सत उत्पन्नत्वात् इति हेतुः यद्यत उत्पन्नं तत्तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कटककुण्डलादि तदात्मकं भवति तथेदमपि सत उत्पन्नत्वात्सदिति चेत् । ननु इदमनुमानं तर्केण विचारेण हतं बाधितं प्रती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यते । तर्कहतत्वमाह व्यभिचरतीति । क्वचित् पितृपुत्रादौ मुद्गरघटप्रध्वंसादौ च कार्यस्य कारणात्मकत्वं व्यभिचरति । ननु तदुत्पन्नत्वं तदुपादानकत्वं विवक्षितमिति चेत् सदुत्पन्नमपि क्व च क्वचित् मृषा मिथ्या भवति । यथा गुणोपादानकस्यापि फणिनो न गुणत्वं न च सत्वं किंतु मिथ्यात्वमेव । अन्यथा बाधाभावप्रसङ्गात् । अतः पुनरपि व्यभिचरत्येव । ननु तत्र न गुणमात्रं फणिन उपादानं किंतु अविद्यायुक्तमतोऽत्र युक्तं फणिनो मिथ्यात्वमिति चेत् न तथेति । अत्रापि कारणवत् तथा सदेव नास्ति किं तु उभाभ्यां कारणनिष्ठसत्वस्वनिष्ठासत्वाभ्यां युज्यत इत्युभययुक् अयमाशयः । अत्राप्यविद्यायुक्तस्यैव सत उपादानत्वम् । एवंभूतस्य च न वस्तुसत्वं यद्वा अत्र द्वौ पूर्वपक्षौ इदं सत् सदुत्थत्वात् इति कारणसत्वमाश्रित्य कार्यस्य सत्त्वं साध्यते किंवा प्रपञ्चस्य बाधादर्शनजन्यं सत्वं हेतुमाश्रित्य प्रधानादेः सत्वं साध्यते । यथा इदं सत उत्थितं सत्त्वादिति तद्द्वयं तन्त्रेण निरस्यति । ननु तर्कहतं तथा हि सदुत्थत्वं सद्विवर्तत्वं सत्परिणामत्वं वा । आद्ये इष्टापत्तिः । अन्त्ये परिणामिनः क्षीरादिवत् अनित्यत्वात्कारणत्वासिद्धिरित्याह व्यभिचरतीति । ननु दध्यादावपि प्रधानगतं सुखदुःखमोहात्मकत्वमस्त्येवातो नित्यत्वं कनकवदिति चेत्क च मृषेति सुखाद्यात्मकस्यापिस्वप्नाङ्गनादेः मृषात्वात्तत्कारणस्यापि मृषात्वं दुर्वारम् । अस्तु तर्हि कार्यस्य सदसदात्मकत्वमत आह न तथोभययुगिति । स्वप्नाङ्गना हि न घटादिवदबाध्यानाप्यत्यन्तासती शशश्रृङ्गवत् चरमधातुविसर्गान्तकार्यकारित्वात् अतो निर्वाच्या अतोऽस्याः कारणं निद्राप्रधानं वा अनिर्वाच्यमेव हेतुकार्ययोः साजात्यनियमात् । एवं द्वितीयानुमाने । तथा हि कार्यस्य सत्वात्कारणमपि सदिति चेन्ननु तर्कहतं सत्यस्यापि भयकम्पादेर्हेतौ रज्जुसर्पे मृषात्वदर्शनात् अतः व्यभिचरति क्व चेति । तस्मान्न रज्जुसर्पः सत्यः शशश्रृङ्गवदत्यन्तासदपि नेत्याह क्व च मृषा नेति । असत्वपक्षेऽलीकमपि नेत्यर्थः । शशश्रृङ्गरज्जुसर्पयोः निःस्वरूपत्वे समानेऽपि अन्त्यो दृश्यत्वात् भयादिकार्यजनकत्वाच्च नात्यन्तमसत् । शशश्रृङ्गं तु तद्विपरीतत्वादत्यन्तमसत् इत्यर्थः । अस्तूभयात्मकमिति चेन्न तथोभययुक् इति । यथा मृषा न तथा सदसदात्मकमपि नेत्यर्थः विरोधादतोऽनिर्वाच्यमेव । ननु सदिदम् अर्थक्रियाकारित्वात् यन्नैवं तन्नैवं यथा शुक्तिरजतम् इति रीत्या प्रपञ्चस्य सत्यत्वं साधयाम इति चेत् व्यवहृतये अर्थक्रियार्थं विकल्पो भ्रम इषित इष्ट एव कूटकार्षापणादिनापि व्यवहारदर्शनात् । नन्वेकत्र सतोऽन्यत्रारोपो भ्रमः प्रसिद्धः अत्यन्तासत्वे तु कथं प्रपञ्चो भ्रमः स्यात् इति चेत् यतः स भ्रमः अन्धपरम्परयापि भवत्यतो न दोषः अयं भावः। संस्कारजन्यो भ्रमः संस्कारसिद्धये पूर्वप्रतीतिमात्रमपेक्षते ननु वस्तुसत्ताम् । अतोऽनादित्वात् पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तर आरोपो भविष्यति अन्धपरम्परान्यायेन व्यवहारः सेत्स्यतीत्यप्रयोजको हेतुरिति । ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति, अपामसोमममृता अभूम" इत्यादिभिः कर्मफलस्य नित्यत्वप्रतिपादनादसत्त्वं न घटते । न हि नित्यं वस्तु असद्भवति तस्माद्वेदप्रतिपादितत्वात् । द्वैतं सदेवेत्याशङ्क्याह भ्रमयतीति । हे भगवन् ते भारती वेदलक्षणा उरुवृत्तिभिर्बह्वीभिर्गौणीलक्षणादिवृत्तिभिरुक्थजडान् कर्मश्रद्धाभराक्रान्तमन्दमतीन् भ्रमयति मोहयति अयं भावः । न हि वेदः कर्मफलं नित्यमभिप्रैति किन्तु लक्षणया प्राशस्त्यमात्रं विध्येकवाक्यत्वात् । अन्यथा वाक्यभे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दप्रसङ्गात् " तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते " इति न्यायोपबृंहितश्रुत्यन्तरविरोधाच्च। अतः कर्मजडानामिदं भ्रममात्रमिति एतेनैव " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " इत्यादीनामप्यन्यपरत्वं दर्शितं भवति। कार्यं नासत् किन्त्वनित्यमिति वादिनस्तु इदं सत उत्थितं सदेव ननु स्वतः सत्। यथा कारणगतमेव सत्वं सन् घट इत्यत्र घटनिष्ठतया भासते तद्वत् ननु तत्र कार्यकारणयोरभेदापत्तिरिति चेन्नेत्याहुः। ननु तर्कहतमिति चिज्जडयोरभेदस्य प्रमाणबाधितत्वात् यदि भेदप्रतिषेधद्वारा अभेदः साध्यते तत्र व्यभिचरति क्व चेति। पितृपुत्रादौ भेदस्यैव दर्शनात् नच अधिष्ठानरूपपरमेश्वरसत्तातिरिक्ता प्रपञ्चस्य सत्ता नास्तीति चेत्तत्राहुः नेति। यथा शुक्तिरूप्यादि मृषा तथा इदं विश्वं मृषा न भवति किन्तु सत्यम् उभययुक् कारणकार्ययोरुभयोर्युज्यते इत्युभययुक् श्रुत्युक्तं सत्वम् उभयत्रास्तीत्यर्थः। किन्तु कारणस्य सत्वं सार्वकालिकं कार्यस्याल्पकालिकं कार्यस्य सत्वं विना व्यवहारोऽपि न सिद्ध्यतीत्याह व्यवहृतये इति। व्यवहारसिद्ध्यर्थं विकल्पः कार्यम् इषित इष्ट एव सत्येनैव घटादिना जलहरणादिसिद्धेः। कूटकार्षापणादिना व्यवहारस्तु अन्धपरम्परया भवति ननु विज्ञपरम्परया तस्माज्जगत् सत्यमेव किंतु अनित्यत्वान्नश्वरम्। यत्तु कर्मठाः कर्मफलस्य नित्यत्वमाहुस्तत्तु न युक्तमित्याहुः भ्रमयतीति ॥ ३६ ॥ न यदिदमिति ॥ यत् यतः इदं विश्वम् अग्रे न आस तथा निधनादनु न भविष्यत् अतः

न यदिदमग्र आस न भविष्यदतो निधनादनुमितमन्तरा त्वयि विभाति मृषैकरसे ॥
अत उपमीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयन्त्यबुधाः ॥ ३७ ॥

अन्तरापि एकरसे त्वयि मृषा एव विभातीति मितम् अतः श्रुत्या द्रविणजातिविकल्पपथैः उपमीयते तस्मात् वितथमनोविलासमिमं ये ऋतमित्यवयन्ति ते अबुधा इत्यन्वयः। "यद्यस्मादिदं विश्वमग्रे सृष्टेः पूर्वं न आस न आसीत्, सदेव सोम्येदमग्र आसीत्, आत्मा वा इदमेकमेवाग्र आसीत् " इत्यादिश्रुतेः। नच निधनात्प्रलयादनु अनन्तरं भविष्यद् भविष्यति इलोप आर्षः। शत्रन्तं वा। " नासदासीन्नो सदासीत्तदानीम् " इत्यादिश्रुतेः। अतः कारणात् अन्तरा मध्येऽपि एकरसे केवले त्वयि मृषा मिथ्यारूपमेव विभातीति मितं निश्चितम्। यद्वा। अन्तरापि विभातीति अनुमितं तर्कितमित्यन्वयः। यत एवमतः श्रुत्या द्रविणजातिविकल्पपथैः द्रविणजातीनां द्रव्यमात्राणां मृल्लोहकार्ष्णायसरूपाणां विकल्पा भेदा घटकुण्डलादयः तेषां पन्थानो मार्गाः प्रकारास्तैरुपमीयते सदृशतया निरूप्यते। यथा तत्र कार्याकाराणां नामधेयमात्रता कारणं मृदाद्येव तु सत्यं तथाऽत्राप्याकाशादीनां नाममात्रता ब्रह्मैव सत्यं तथा च श्रुतिः। "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं भवति, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, यथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्, यथा एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसम् " इत्यादि। तस्मादस्य सत्वे प्रमाणाभावादसत्वे प्रमाणस्य विद्यमानत्वात् वितथमनोविलासमिदमृतं सत्यमिति ये अवयन्ति जानन्ति ते अबुधा अज्ञा इत्यर्थः। अत्रैवं प्रयोगः। विवादाध्यासितं न सत् आद्यन्तयोरविद्यमानत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकारित्वाद्दृश्यत्वाच्च शुक्तिरजतादिवत् इत्यन्वये दृष्टान्तः । आत्मवचेति व्यतिरेके दृष्टान्तः । कार्यसत्यत्ववादिनस्तु यदिदमग्रे न आस अनु च न भविष्यत् किन्तु अन्तरा मध्य एव मृषति एवं सृजामीत्यादिसंकल्पं करोति स मृषः । स चासावेकरसश्च तस्मिंस्त्वयि मितं निश्चितं सत्यं विभाति । किं च इदं सत्यमपि नित्यं नास्ति अतो द्रविणजातिविकल्पपथैः घटकुण्डलादिप्रकारैः सत्यत्वेनैव उपमीयते नतु रज्जुसर्पादिप्रकारैर्मिथ्यात्वेन।अतः ऋतं सत्यमिदं विश्वं ये वितथमनोविलासं वदन्ति ते अबुधा इति व्याचख्युः ॥ ३७ ॥ ननु यदि प्रपञ्चो नास्त्येव तदा असता तेन संबन्धस्याप्यभावात्कुतो जीवः संसरति कुतो वा ईश्वरो नित्यमुक्तः किंविषयं च तदा कर्मकाण्डमित्या शङ्क्याहुः— स इति ॥ स जीवः यत् यतः अजया अजाम् अनुशयीत ततः गुणांश्च जुषन् तदनुसरूपतां जुषन् अपेतभगः सन्मृत्युं भजति त्वमुत त्वन्तु आत्तभगः अपरिमेयभगश्च अतस्तामजाम् अहिस्त्वचमिव जहासि तथा अष्टगुणिते महसि महीयसे इत्यन्वयः । स जीवो यत् यस्मात् अजया मायया अजामविद्यामनुशयीत आलिङ्गेत् उपाधिलिप्तो भवेदित्यर्थः । ततो गुणांश्च देहेन्द्रियादिकान् जुषन्सेवमानः आत्मतया अध्यस्यन् तदनु अनन्तरं सरूपतां तद्धर्मयोगं जुषन् अपेतभगः तिरोहितज्ञानैश्वर्यानन्दादिगुणः सन्मृत्युं संसारं भजति प्राप्नोति त्वमुत त्वं तु आत्तभगः नित्यसिद्धज्ञानैश्वर्यादिः अपरिमेयभगः अनन्तैश्वर्यादियुक्तश्च न ह्यन्येषामिव परिच्छिन्नं तवैश्वर्यम् अतः ताम्

स यदजया त्वजामनुशयीत गुणांश्च जुषन्भजति सरूपतां तदनु मृत्युमपेतभगः ॥ त्वमुत जहासि तामहिरिव त्वच-
मात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः ॥ ३८ ॥ यदि न समुद्धरन्ति यतयो हृदि कामजटा दुरधिगमोऽसतां
हृदि गतोऽस्मृतकण्ठमणिः ॥ असुतृपयोगिनामुभयतोऽप्यसुखं भगवन्ननपगतान्तकादनधिरूढपदाद्भवतः ॥ ३९ ॥

अजां जहासि। ननु सा मय्येवास्ति कथं तस्यास्त्यागस्तत्राह। यथा अहिर्भुजङ्गः स्वगतमपि कञ्चुकं जहाति गुणबुद्ध्या नाभिमन्यते तथा त्वमजामुपेक्षसे नहि निरन्तराह्लादिसंवित्कामधेनुवृन्दपतेरजया कृत्यमिति तथा अष्टगुणिते अणिमाद्यष्टविभूतिमति महसि परमानन्दस्वरूपे महीयसे पूज्यसे विराजसे अनेन जीवेश्वरयोर्वैलक्षण्यमुक्तम् । “ द्वा सुपर्णा सयुजा सखाया, अजामेकां लोहितशुक्लकृष्णाम् ” इत्यादयः श्रुतयश्च ॥ ३८ ॥ यदीति ॥ हे भगवन् यतयो यदि हृदि स्थिताः कामजटाः न समुद्धरन्ति तदा तेषामसतां हृदि गतोऽपि त्वम् अस्मृतकण्ठमणिरिव दुरधिगमोऽसि । हे भगवन् असुतृपयोगिनाम् अनपगतान्तकात् अनधिरूढपदाद्भवतश्च इत्युभयतः अपि असुखमित्यन्वयः । हे भगवन् यतयो मनइन्द्रियदिप्रणिधानशीला अपि यदि हृदि स्थिताः कामानां जटाः वासना न समुद्धरन्ति नोत्पाटयन्ति न परित्यजन्ति अन्तर्वान्ताशिनो भवन्ति तर्हि तेषामसतां कामवासनाभिर्दुष्टान्तःकरणानां प्राणिनां हृदि गतोऽपि भवान् अस्मृतकण्ठमणिरिव दुरधिगमो दुष्प्रापः । यथा कण्ठे स्थितो मणिः विस्मृतश्चेद्दुरधिगमो भवति तथा असुतृपयोगिनां तु अनपगतान्तकात् अनिवृत्तात् मृत्योः अनधिरूढमप्राप्तं पदं स्वरूपं स्थानं वा यस्य तस्माद्भवतश्चेत्युभयतोऽप्यसुखमिहामुत्र च दुःखमेव लोकाराधनधना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्जनादिप्रयासात् भोगवैभवप्राकट्यभयाचेह तावन्महद्दुःखं भगवन्निष्ठाभावेनाविद्यावद्विषयत्वेन प्राप्तनिजधर्मातिक्रमनिबन्धनभगवद्दण्डरूपनरकादिप्राप्तेरमुत्र च दुःखमेवेत्यर्थः । "कामान् यः कामयते मन्यमानः स कर्मभिर्जायते तत्र तत्र" इत्यादिश्रुतेः ॥ ३९ ॥ ननु "एष नित्यो महिमा ब्राह्मणस्य न कर्मभिर्वर्द्धते नो कनीयान्" इत्यादिश्रुत्या यतेः किमपि कृत्यं नास्तीति किमिति यतिर्निन्द्यते तत्राह—त्वदवगमीति ॥ हे सगुण त्वदवगमी भवदुत्थशुभाशुभयोः गुणविगुणान्वयान् न वेत्ति तर्हि देहभृतां गिरश्च न वेत्ति यतः अनुयुगं गीतपरम्परया मनुजैः अन्वहं श्रवणभृतस्त्वं तेषामपवर्गगतिः भवसि इत्यन्वयः । त्वामवगच्छति जानातीति त्वदवगमी भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोः फलजननाय समुपस्थितयोः शुभाशुभयोः प्राचीनपुण्यपापात्मककर्मणोर्गुणविगुणान्वयान् फलभूतसुखदुःखसंबन्धान् न वेत्ति नानुसन्धत्ते तथा तर्हि देहभृतां देहाभिमानिनां गिरः निंदास्तुतिवाक्यानि । यद्वा । प्रवृत्तिनिवृत्तिकरीर्विधिनिषेधलक्षणाः गिरः न वेत्ति विगतदेहाद्यभिमानतया कार्याकार्यबोधाभावान्न नियुज्यत इत्यर्थः । युक्तं चैतत् यतः अनुयुगं प्रतियुगं या सगुणस्य तव गीतपरम्परा उपदेशसन्ततिस्तया सत्सम्प्रदायानुसारेण मनुजैरन्वहमनुदिनं श्रवणेन भृतः चेतसि धृतस्त्वं तेषामपवर्गगतिर्मोक्षरूपा गतिर्भवसि एतदुक्तं भवति ये तावत्तत्वज्ञा जीवन्मुक्ता दुःखसुखाद्यनुसन्धानरहितास्तेषां तु न कर्माधिकारः । ये च निरन्तरं भवत्कथाश्रवणादिनिष्ठास्तेषामप्यासन्नभवत्पदानां न विधिनिषेध-

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः ॥ अनुयुगमन्वहं सगुणगीतपरम्परया
श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥ ४० ॥ द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि यदन्तराऽण्डनिचया ननु
सावरणाः ॥ ख इव रजांसि वान्ति वयसा सह यच्छ्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ॥ ४१ ॥

किङ्करता । ये तु मर्यादास्थितौ योग्या अपि वेदोक्तमर्यादां हित्वा योगादिच्छलेनेन्द्रियलालनलालसास्तेषामुभयतो दुःखमिति ॥ ४० ॥ तदेवं स्तुतिमुपसंहरन्त्यः भगवतोऽपारिमितमहत्त्वं च बोधयन्त्यः श्रुतयस्तादृशस्य विभोरवाङ्मनसागोचरत्वादविषयत्वेनैव ज्ञानमाहुः—द्युपतय इति ॥ द्युपतयः एव ते अन्तं न ययुः तथा अनन्ततया हेतुना त्वमपि अन्तं न ययिथ । ननु अहो यदन्तरा सावरणाः अण्डनिचयाः वयसा कालेन खे रजांसि इव सहैव वान्ति नतु पर्यायेण । यत् यतः भवन्निधनाः श्रुतयोऽपि अतन्निरसनेन त्वयि हि फलन्ति इति पिण्डान्वयः । एवेत्यप्यर्थे । द्युपतयः स्वर्गलोकपतयो ब्रह्मादयोऽपि ते तव अन्तं पारं नैव ययुः नैव प्रापुः । किंबहुना अनन्ततया हेतुना त्वमप्यात्ममहिम्नोन्तं न यासि । न च तर्हि कथं सर्वज्ञतेनि शङ्क्यम् । अनन्तस्यानन्ततया ज्ञानमेव सर्वज्ञत्वावहं तस्य परिच्छिन्नतया ज्ञानस्य भ्रमत्वेनाज्ञत्वावहत्वादिति भावः । ननु अहो यस्य तवान्तरा मध्ये सावरणाः उत्तरोत्तरं दशगुणपृथ्व्यादिसप्तावरणयुक्ता अण्डनिचयाः ब्रह्माण्डसमूहा वयसा कालेन वान्ति परिभ्रमन्ति तत्रापि सहैकदैव नतु पर्यायेण । यथा खे आकाशे वायुना रजांसि परिभ्रमन्ति । तथा श्रुतयश्च "यदूर्द्धं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं भवच्च भविष्यच्च" इत्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत एव भवति त्वयि निधनं समाप्तिर्यासां तास्तथा निरवधिकनिषेधा संभवादवधिभूतं त्वां लक्षयन्त्यः श्रुतयोऽप्यतत्स्थूलत्वादिनिरसनेन त्वयि फलन्ति तात्पर्यवृत्त्या पर्यवस्यन्ति नतु साक्षात्प्रतिपादयन्ति । अतन्निरसनश्रुतयश्च " अस्थूलमनणु ह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोवाग्वनाकाशम् " इत्याद्याः ॥ ४१ ॥ इतीति ॥ ब्रह्मणः पुत्राः सनकादय इत्यनेन प्रकारेणैतत् आत्मानुशिष्यते शिक्ष्यते येन तदात्मानुशासनं वेदस्तुत्यात्मकमाश्रुत्यात्मनो गतिं तत्वं ज्ञात्वा सिद्धाः कृतार्थाः सन्तः अथानन्तरं गुरुरूपं सनन्दनमानर्चुः पूजयामासुः ॥ ४२ ॥ इतीति ॥ इत्येवंभूत उक्तप्रकारकः अशेषाणां सर्वेषां समाम्नायानां वेदानां पूर्वकाण्डानां पुराणानामुपनिषदामुत्तरकाण्डानां च रसः रस इव सारभूतोऽर्थः पूर्वजातैर्वृद्धैः व्योमयानैः सर्वनिरपेक्षतयाकाशचारिभिर्महात्मभिः सनकादिभिः समुद्धृतः निर्णीतः ॥ ४३ ॥ त्वमिति ॥ हे ब्रह्मदायाद ब्रह्मैव दायमिव अयत्नप्राप्यमत्ति सेवत इति तथा ब्रह्मपुत्रेति वा त्वं च त्वमपि एतत् नृणां जीवानां ये कामाः वासनाविशेषाः मोक्षप्रतिबन्धकाः तेषां भर्जनं निवर्तकमात्मानुशासनं श्रद्धया विश्वासेन चित्ते धारयन् कामं यथेष्टं गां भूमिं तदुपलक्षितान् लोकान् चर पर्यट ॥ ४४ ॥ एवमिति ॥ हे राजन् आत्मवान् आत्मानुभववान् श्रुतधरः श्रुतस्यानुसन्धानपरः

भगवानुवाच ॥ इत्येतद्ब्रह्मणा पुत्रा आश्रुत्यात्मानुशासनम् ॥ सनन्दनमथानर्चुः सिद्धा ज्ञात्वाऽऽत्मनो गतिम् ॥ ४२ ॥ इत्यशेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ॥ ४३ ॥ त्वं च तद्ब्रह्मदायाद श्रद्धयात्मानुशासनम् ॥ धारयंश्चर गां कामं कामानां भर्जनं नृणाम् ॥ ४४ ॥ श्रीशुक उवाच ॥ एवं स ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान् ॥ पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ॥ ४५ ॥ नारद उवाच ॥ नमस्तस्मै भगवते कृष्णायाऽमलकीर्तये ॥ यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ ४६ ॥ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥ ४७ ॥

वीरव्रतः नैष्ठिकः स मुनिर्नारदः एवमृषिणा श्रीनारायणेनादिष्टमुपदिष्टमात्मतत्त्वं श्रद्धया गृहीत्वा आनन्देन पूर्णः श्रीनारायणं प्रत्याह स्म ॥ ४५ ॥ सर्वश्रुतितात्पर्यं श्रीकृष्णेवधार्य तुष्टः श्रीकृष्णाभेदेन तदवतारं स्वगुरुं श्रीनारायणं नमस्यति—नम इति ॥ यो भगवान् सर्वभूतानामभवाय संसारदुःखनिरासाय उशतीः कमनीयाः कलाः मूर्तीः धत्ते तस्मै अमलकीर्त्तये भगवते कृष्णाय श्रीकृष्णरूपाय तुभ्यं नमः ॥ ४६ ॥ इतीति ॥ महामनाः आनन्दितचित्तो नारदः इत्येवमाद्यमृषिं श्रीनारायणं तथा तस्य शिष्यांश्चानम्य ततः स्थानात् मे मम साक्षात् पितुः द्वैपायनस्याश्रममगात् साक्षात् पितुरिति योनिव्यवधानं विना जनकस्य अग्निमन्थनावसरे कथंचिदरणिपतितरेतस उत्पन्नत्वात् । ब्रह्मवैवर्त्ते तु । " व्यासपत्न्या उदरे बहुवर्षाणि स्थितः व्यासेनार्थितोऽपि मायाभिया न निर्गतः ततः कृष्णेन मातेयं ते बहुदुःखिताऽतो निर्गच्छेत्युक्त उवाच । यदि त्वया माया दूरीक्रियते तदा निर्गच्छेयम् " इति श्रीकृष्णेन तथाङ्गीकृते निष्क्रम्य प्रव्रजित इत्युक्तम् । तत्पक्षे साक्षादधुनाधिष्ठितमाश्रमम् ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभाजित इति ॥ कृतः आसनस्य परिग्रहः स्वीकारो येन स भगवता व्यासेन सभाजितः पूजितः तस्मै द्वैपायनाय तत् नारायणस्य मुखात् श्रुतं श्रुतिगीतं वर्णयामास । सतु मह्यमुपदिष्टवानित्यर्थाज्ज्ञेयम् ॥ ४८ ॥ इतीति ॥ हे राजन् नोऽस्मान् प्रति त्वया अनिर्देश्ये निर्गुणे ब्रह्मणि श्रुतयः कथं चरन्तीति यः प्रश्नः कृतस्तदुत्तरतया यथानिर्देश्ये निर्गुणे ब्रह्मणि मनः श्रुतिश्च चरेत्तथेत्येतत् श्रुतिगीतं मया वर्णितम् । मनःशब्दाभिप्राय उक्तः ॥ ४९ ॥ समस्तवेदस्तुत्यर्थं संगृह्यानुस्मारयति–य इति ॥ यः अस्य विश्वस्य उत्प्रेक्षकः एवमनुशायिनां समस्तपुरुषार्थसिद्ध्ये सृष्टिस्थितिप्रलयादिप्रापणीयमिति संकल्पकः इति निमित्तत्वमुक्तम् । सङ्कल्पस्य तदनुसारिव्यापारं विना व्यर्थत्वात्परमेश्वरस्य सत्यसंकल्पत्वात् एवमालोच्य अस्य आदिमध्यनिधनेषु कार्येषु यो वर्त्तते एतेन उपादानत्वमुक्तम् । ननु प्रकृतिपुरुषावुपादाननिमित्ते प्रसिद्धे इति चेत्तत्राह यश्चाऽव्यक्तजीवयोरीश्वरः तयोरपि मूलकारणं स एव इत्यर्थः । प्रवेशनियमने दर्शयति य इदं ब्रह्माण्डं सृष्ट्वा ऋषिणा यदर्थमेतत्सृष्टं तेन ऋषिणा सृष्टे कार्ये अहमिति दर्शनाद्दृषिर्जीवः तेन सह तदनुप्रविश्य पुरः शरीराणि जीवानां भोगायतनानि चक्रे । ततश्च ताः पुरः शास्ति तेषां भोगान् ददत् परिपालयति उपासकस्य कैवल्यरूपो भवति इत्याह । यं सम्पद्य

सभाजितो भगवता कृतासनपरिग्रहः ॥ तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतम् ॥ ४८ ॥ इत्येतद्वर्णितं राजन्यन्नः प्रश्नः कृतस्त्वया ॥
यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥ ४९ ॥ योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा
चक्रे पुरः शास्ति ताः ॥ यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥ ५० ॥
इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे नारायणनारदसंवादे वेदस्तुतिर्नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ राजोवाच ॥
देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ॥ प्रायस्ते धनिनो भोजा नतु लक्ष्म्याः पतिं हरिम् ॥ १ ॥

प्राप्यानुशयी जीवः अजां कार्यकारणरूपाम् अविद्यां जहाति । यथा कौ लीयत इति कुलायं सुप्तशरीरवन्तमन्ये पश्यन्ति सतु सुप्तः न शरीरं पश्यति एवं जीवन्मुक्तमन्ये देहवन्तं पश्यन्ति स तु न किञ्चित्पश्यति । तं कैवल्येन अप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिः मूलकारणं माया येन तम् अभयं भयनिवर्तकं हरिम् अजस्रमनवरतं ध्यायेत् । अत्र चाभिन्ननिमित्तोपादानत्वोक्त्या समन्वयाविरोधाध्यायार्थः । हरिं ध्यायेदिति साधनाध्यायार्थः । यं सम्पद्य जहात्यजामिति फलाध्यायार्थश्च दर्शितः ॥ ५० ॥ स्वान्तर्गताप्रमितसत्वनिकायनानाक्षोभैरपि क्वचन न क्षुभितस्वरूपम् ॥ आक्रान्तसर्वजगतीकमगाधमच्छं किंचित्तदस्तु भवताममृताय वस्तु ॥ १ ॥ इति श्रीकृष्णसेवार्थमान्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे सप्ताशीतितमे व्यधात् ॥ ८७ ॥ अष्टाशीतितमे विष्णुर्मुक्तिं दिशति सेवितः ॥ विभूतिमन्यो देवोत्र श्लोकाः सार्द्धाः खवेदयः ॥ सप्तोवाचेति वाचो द्वाचत्वारिंशदनुष्टुभः ॥ ८८ ॥ देवेति ॥ देवादीनां मध्ये ये जनाः अशिवं भुजगादिधारणेनामङ्गलवेषं शिवं भजन्ति ते प्रायः धनिनो भोजा भोगभाजश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवन्ति विरक्तानां मुनीनां तथात्वाभावात् प्रायग्रहणम् । ये तु लक्ष्म्याः सम्पदधिष्ठात्र्याः पतिं सकलसम्पद्भोगादिविशिष्टं हरिं भजन्ति ते तु धनादिसम्पन्ना न भवन्ति किंतु प्रायेण दरिद्रा निर्भोगाश्च भवन्तीत्याशयः ॥ १ ॥ एतदिति ॥ विरुद्धेति शेषे कर्मणि षष्ठ्यौ । विरुद्धं शीलं स्वभावो ययोस्तौ प्रभू हरिहरौ भजतां गतिर्विरुद्धा फलं विरुद्धं भवति योग्यं त्वन्यथेत्याशयः । स्फुटं शेषम् ॥ २ ॥ शिव इति ॥ शश्वत् शक्त्या युतः गुणसाम्यावस्थप्रकृत्युपाधिना नित्यमुक्तेश्वराविर्भावविशेषः नित्यानन्दरूपपुरुष एव शिवः ईश्वरोऽपि गुणक्षोभे त्रिलिङ्गो भवति अन्योन्योपमर्देन गुणत्रैविध्यात् अतः प्रकृतिगुणैः संवृत इति अहमहंकारः श्रीशिवाधिष्ठेयः वैकारिकः सात्विकः तैजसो राजसः तामसश्चेत्येवं त्रिधा तामसाहङ्काराद्यधिष्ठातैव शिवादिनामकः अतस्तदधिष्ठाता सोऽपि गुणयुक्तः अतो विभूतीनां त्रिगुणकार्यत्वात्तद्भजनाद्विभूतिप्राप्तिरित्याशयः । तस्यैव सा-त्विकत्वेन निर्गुणत्वेन च भजनात् ज्ञानमोक्षावपि भवतः श्रीकृष्णवन्निरुपाधिक एव शिव इति वादे तु नाममूर्तिमात्रे विवादः इति भावः ॥ ३ ॥ तत इति ॥ ततोऽहंकारात् वैकारिकान्मनः तैजसात् दशेन्द्रियाणि तामसात्पञ्च महाभूतानि इत्येवं षोडशविकारा अभवन् अत्रेन्द्रियादिदेवानां तदभेदो विवक्षितः अतः अमीषु अहंकारकार्येषु "दिग्वा-तार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।" इति प्रजापत्यादिषु मध्ये कंचनापि तमधिदेवम् उपाधावन् भजन् पुरुषः सर्वासां विभूतीनां मध्ये गतिं तेनाधिदैवतेन दातुं शक्यम्

एतद्वेदितुमिच्छामः संदेहोऽत्र महान्हि नः ॥ विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः ॥ २ ॥ श्रीशुक उवाच ॥ शिवः शक्तियुतः शश्वत्त्रिलिङ्गो गुणसंवृतः ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ३ ॥ ततो विकारा अभवन्षोडशामीषु कश्चन ॥ उपाधावन्विभूतीनां सर्वासामश्नुते गतिम् ॥ ४ ॥ हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः ॥ स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ ५ ॥

ऐश्वर्यादिफलमश्नुते प्राप्नोति । यद्वा । अमीषु मध्ये किंचन औपस्थ्यं जैह्व्यं मानसं वा सुखमुद्दिश्य शिवं भजन् सर्वासामेव विभूतीनां गतिं स्वरूपं प्राप्नोति तेषां परस्परसापे-क्षत्वात् । एकप्राप्तावपि सर्वविषयसुखानि प्राप्नोतीत्यर्थः । अतः शिवस्य गुणमयत्वात् सम्पदामपि त्रिगुणमयत्वात्तद्भजने तत्प्राप्तिरिति न तदुक्तो विरोधः । अत्र कश्चन इत्यत्र किश्चनेति नपुंसकपाठः ॥ ४ ॥ हरिरिति ॥ हरिर्हि विष्णुस्तु निर्गुणः प्रकृतेः परः साक्षात् भगवान् स सर्वदृक् सर्वज्ञः उपद्रष्टा साक्षिमात्रं तं भजन् पुरुषो निर्गुणो मुक्त एव भवेत् क्वचित्संस्कारवशात् ध्रुवादौ विभूतिरपि तथापि सत्वगुणस्यानावरकत्वादन्ततो विवेकेन मुक्तौ न संदेहः । अत्र श्रीस्वामिपादानां कारिकाः ।" वस्तुतो गुणसंबन्धे रूपद्वयमिहेष्यते । तद्धर्मायोगयोगाभ्यां बिम्बवत्प्रतिबिम्बवत् ॥ गुणाः सत्वादयः शान्तघोरमूढाः स्वभावतः । विष्णुब्रह्मशिवानां च गुणयन्तृस्वरू-पिणाम् ॥ नातिभेदो भवेद्भेदो गुणधर्मैरिहांशतः । सत्वस्य शान्त्या नो जातु विष्णोर्विक्षेप मूढ ते ॥ रजस्तमोगुणाभ्यां तु भवेतां ब्रह्मरुद्रयोः । गुणोपमर्दतो भूयस्तदंशानां च भिन्नता ॥ अतः समग्रसत्वस्य विष्णोर्मोक्षकरी मतिः । अंशतो भूतिहेतुश्च तथानन्दमयी स्वतः ॥ अंशतस्तारतम्येन ब्रह्मरुद्रादिसेविनाम् । विभूतयो भवन्त्येव शनैर्मोक्षोऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यनंशतः ॥ " इति इदमेवाभिप्रेत्योच्यते । " श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः, सत्वं यस्य प्रिया मूर्त्तिः " इति । " त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । " इत्यादि । इति सर्वं समञ्जसम् । तत्तद्भक्तानां तु कलहो द्रोहमात्रम् ॥ ५ ॥ निवृत्तेष्विति ॥ अश्वमेधेषु निवृत्तेषु समाप्तेषु सत्सु युष्मत्पितामहो राजा युधिष्ठिरः भगवतः कृष्णात्सकाशात् धर्मान् शृण्वन् तमच्युतं परिपूर्णज्ञानं प्रतीदं त्वत्पृष्टमेवापृच्छत् ॥ ६ ॥ स इति ॥ प्रीतः प्रभुर्भगवान् स कृष्णः तस्मै शुश्रूषवे युधिष्ठिरायाह स्म । यो नृणां निःश्रेयसार्थाय यदोः कुलेऽवतीर्णः ॥ ७ ॥ यस्येति ॥ यस्याहमनुगृह्णामि तस्य धनं शनैः हरिष्ये हरामि यं नानुगृह्णामि तस्मै ददामि अयमर्थः । यो विषयान्परिजिहीर्षुरपि कथंचित् विषयेषु विषज्जते क्लिश्यति च तस्य विषयापहार एवानुग्रहः । यथाश्रुते ध्रुवादीनामैश्वर्ये विरोधात् । अथ वा प्रथमं कामानुरूपा विभूतीर्दत्त्वा शनैर्विषयभोगावसाने निर्वेदमुत्पाद्य हरिष्यामि अनुग्रहं कर्तुमिति शनैरिति सहसा हरणे महाकष्टं स्यादित्याशयः । शनैर्हरणे तु क्रमेणोदासीनः स्यादित्याशयः । ततो धनापहारात् दुःखदुःखितं परम्परायस्तम् अधनं तं स्वजनास्त्यजन्ति तिरस्कुर्वन्ति ॥ ८ ॥ स इति ॥ स यदा बन्धूनामाग्रहादिना पुनरपि धनाय यतते तदाप्यहं तस्य तदुद्यमं नाशयामि ततश्च

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः ॥ शृण्वन्भगवतो धर्मानपृच्छदिदमच्युतम् ॥६॥ स आह भगवांस्तस्मै प्रीतः शुश्रूषवे प्रभुः ॥ नृणां निः-
श्रेयसार्थाय योऽवतीर्णो यदोः कुले ॥ ७ ॥ श्रीभगवानुवाच ॥ यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः ॥ ततोधनं त्यजन्त्यस्य स्वजना दुःखदुः-
खितम् ॥ ८ ॥ स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया ॥ मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहम् ॥ ९ ॥ तद् ब्रह्म परमं सूक्ष्मं चिन्मात्रं
सदनन्तकम् ॥ अतो मां सुदुराराध्यं हित्वान्यान्भजते जनः ॥ १० ॥ ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः॥ मत्ताः प्रमत्ता वरदान्विस्म-
रन्त्यवजानते ॥ ११ ॥ श्रीशुक उवाच ॥ शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः ॥ सद्यः शापप्रसादोऽङ्ग शिवो ब्रह्मा न चाच्युतः ॥ १२ ॥

स मदनुग्रहेण वितथोद्योगो निष्फलोद्यमः धनेहया धनार्थव्यापारेणापि निर्विण्णः स्यात् विरक्तो भवति । तस्य च मत्परैः मद्भक्तैः सह कृतं मैत्रं येन तस्य मदनुग्रहं करिष्ये करोमि ॥ ९ ॥ तदिति ॥ तद्ब्रह्म परममत्यन्तं सूक्ष्मं चिन्मात्रं सन्मात्रम् अनन्तकं देशकालवस्तुपरिच्छेदरहितम् अतो मद्भजने मदनुग्रहेण वैभवनाशात् सूक्ष्मत्वेन दुर्ज्ञेयत्वाच्च मां दुराराध्यं हित्वा मोक्षमरोचयन् अत्यासक्तो जनोऽन्यान् देवान् भजते । यद्वा । स यदेति सार्द्धश्लोकमेकान्वयम् । तत्र स यदेत्यादि प्राग्वत् । मदनुग्रहं मद्रूपमनुग्रहं करिष्ये मद्रूपमाह—तद्ब्रह्मेत्यादि । ततः अत इत्याद्यर्द्धं प्राग्वत् ॥ १० ॥ तत इति ॥ ततो भजनात् आशु तुष्यन्तीत्याशुतोषास्तेभ्यो रुद्रादिभ्यो लब्धया राज्यादिश्रियो नाना सम्पदा उद्धताः उत्पथाः मत्ताः गर्विताः प्रमत्ताः अनवहिताश्च सन्तस्तान्वरदान् विस्मरन्ति अवजानते तदवज्ञां च कुर्वन्ति ॥ ११ ॥ एतदेवेति हासेन स्फुटयितुं शुक आह—शापेति ॥ अङ्ग हे राजन् शापप्रसादयोर्ब्रह्मादय ईशाः समर्थाः तत्र सद्य एव शापः प्रसादश्च यस्य तथाभूतः शिवो ब्रह्मा चेति । अच्युतः विष्णुस्तु नैवंविधः किं त्वनुग्रहैकस्वभावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वचिन्निग्रहोऽपि फलतोऽनुग्रह एवेत्याशयः ॥ १२ ॥ अत्रेति ॥ अत्रैव सद्यः शापप्रसादत्वे निदर्शनतयेमं पुरातनमितिहासमुदाहरन्ति वृद्धाः । शेषं स्पष्टम् ॥ १३ ॥ वृक इति ॥ दुर्मतिः शकुनेः पुत्रः वृको नाम असुरः पथि नारदं दृष्ट्वा त्रिषु ब्रह्मविष्णुरुद्रेषु देवेषु आशुतोषम् आशु शीघ्रं कस्तुष्यति प्रसीदतीति पप्रच्छ ॥ १४ ॥ स इति ॥ स नारदः तम् आदिदेश शशंस । गिरिशं शिवमुपाधाव आराधय आशु सिध्यसि शीघ्रमेव फलभाग्भविष्यसि । तत्र हेतुमाह स गिरिशः अल्पेनैव गुणेनाराधनेन तुष्यति अल्पेनैव दोषेणापराधेन कुप्यति च अतोऽपराधो वर्जनीय एव ॥ १५ ॥ दशास्येति ॥ बन्दिनोरिव स्तुवतोर्दशास्यबाणयोरतुलमनुपममैश्वर्यं दत्त्वा ततः ताभ्यामेव सुसंकटं तिरस्कारमाप । तत्र रावणेन तस्यैव कैलासोत्पाटनं कृतं बाणेन तु पुरपालकत्वेन वृतस्तच्चकारेति ज्ञेयम् ॥ १६ ॥ इतीति ॥ इत्येवं नारदेनादिष्टः सोऽसुरो वृकः केदारक्षेत्रे स्वगात्रतो मांसं छित्त्वा तेनात्मनः क्रव्येण मांसेन हविषा जुह्वानः शानजार्षश्वानश्रू वा । तमग्निमुखं हरमुपाधावत् आराधितवान् ॥ १७ ॥ देवेति ॥ एवं प्रतिदिनं जुह्वानोऽपि देवस्य तस्यो-

अत्र चोदाहरन्तीममितिहासं पुरातनम् ॥ वृकासुराय गिरिशो वरं दत्त्वाऽऽप सङ्कटम् ॥ १३ ॥ वृको नामासुरः पुत्रः शकुनेः पथि नारदम् ॥ दृष्ट्वाऽऽशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः ॥ १४ ॥ स आह देवं गिरिशमुपाधावाशु सिद्ध्यसि ॥ योऽल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति ॥ १५ ॥ दशास्यबाणयोस्तुष्टः स्तुवतोर्बन्दिनोरिव ॥ ऐश्वर्यमतुलं दत्त्वा तत आप सुसङ्कटम् ॥ १६ ॥ इत्यादिष्टस्तमसुर उपाधावत्स्वगात्रतः ॥ केदार आत्मक्रव्येण जुह्वानोऽग्निमुखं हरम् ॥ १७ ॥ देवोपलब्धिमप्राप्य निर्वेदात्सप्तमेऽहनि ॥ शिरोऽवृश्चत्स्वधितिना तत्तीर्थक्लिन्नमूर्धजम् ॥ १८ ॥ तदा महाकारुणिकः स धूर्जटिर्यथा वयं चाग्निरिवोत्थितोऽनलात् ॥ निगृह्य दोर्भ्यां भुजयोर्न्यवारयत्तत्स्पर्शनाद्भूय उपस्कृताकृतिः ॥ १९ ॥ तमाह चाङ्गाऽलमलं वृणीष्व मे यथाभिकामं वितरामि ते वरम् ॥ प्रीयेय तोयेन नृणां प्रपद्यतामहो त्वयात्मा भृशमर्द्यते वृथा ॥ २० ॥

पलब्धिं दर्शनमप्राप्य निर्वेदाद्वैराग्यान्मरिष्यामि कार्यं वा साधयिष्यामीति निश्चित्य सप्तमे दिने तस्मिन् केदारकुण्डे स्नात्वा तेन तीर्थजलेन क्लिन्ना मूर्धजा यस्य तत्स्वशिरः स्वधितिना परशुना खड्गेन वा अवृश्च्यत् छेत्तुमारब्धवान् ॥ १८ ॥ तदेति ॥ तदा महाकारुणिकः स धूर्जटिः शिवः अनलात् मूर्तिमानग्निरिवोत्थितो देदीप्यमानः स्वदोर्भ्यां तद्भुजयोर्निगृह्य शिरश्छेदं न्यवारयत् । यथा वयं कंचिद्दुःखेन मर्तुकामं वारयामस्तथेत्यर्थः । स च वृकः तस्य धूर्जटेः स्पर्शनादेव भूयः पुनः उपस्कृता निर्व्रणा आकृतिः शरीरं यस्य तथाभूतो बभूव ॥ १९ ॥ तमिति ॥ तं वृकासुरमाह स्म च । अङ्ग हे वृक शिरश्छेदनेनालमलं पूर्णं न तत्प्रयोजनमस्तीत्यर्थः । मे मत्तो यथाभिकामं यथाभिलषितं वरं वृणीष्वाहं ते तुभ्यं वितरामि ददामि । अहं तु तोयेन जलमात्रेणापि प्रपद्यतां भक्तानां शतार्षः प्रीयेय प्रीतो भवामि । त्वया वृथैवात्मा देहो भृशमर्द्यते पीड्यते ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवमिति ॥ पापीयान्स चैवमुक्तो देवं प्रति भूतभयावहं प्राणिभयंकरं वरं वव्रे । यस्येत्यादि स्पष्टम् । वीप्सया देवादिसर्वसङ्ग्रहः सकृत्त्वनिरासश्च ॥ २१ ॥ तदिति ॥ हे भारत तत्तस्य वचनं श्रुत्वा लोकभयङ्करत्वात् रुद्रो दुर्मना इव एवार्थे । अहेरमृतं सर्पाय क्षीरं यथा प्रहसन् ॐ तथास्त्विति तस्मै वरं ददे ॥ २२ ॥ इतीति अर्द्धम् ॥ इति शिवेनोक्तः नूनं गौर्या हरणे लालसः साभिलाषः बभूव । स इति ॥ स असुरः तस्य वरस्य परीक्षार्थं सत्यमुक्तमनृतं वेति निश्चयार्थं शम्भोर्मूर्ध्न्यैव स्वहस्तं धातुमारेभे । स च शिवः सर्वभूतमङ्गलाशंसी स्वकृताद्वरदानात् अबिभेत् लोकानां कष्टं विचिन्त्य भीतोऽभूत् । अन्यथा अन्तर्हितोऽभविष्यदिति भावः । अविभ्यत् इति पाठस्त्वार्षः ॥२३॥ तेनेति ॥ अतस्तेनासुरेणोपसृष्टः अनुगतः संत्रस्तः अत एव सवेपथुः सकम्पश्च सन् दिवो भूमेश्च यावदन्तं तावत् पराधावत् ततश्च काष्ठानां दिशामुदक् उत्तरतः श्वेतद्वीपगमनेच्छया उदगात् जगाम ॥ २४ ॥ अजानन्त इति ॥ सुरेश्वरा ब्रह्मादयश्च प्रतिविधिं तद्भयनिवृत्त्युपायमजानन्तस्तूष्णीमासन् । ततश्च शिवस्तमसः परम् अविद्यारहितम्

देवं स वव्रे पापीयान्वरं भूतभयावहम् ॥ यस्य यस्य करं शीर्ष्णि धास्ये स म्रियतामिति ॥ २१ ॥ तच्छ्रुत्वा भगवान्रुद्रो दुर्मना इव भारत ॥
ओमिति प्रहसंस्तस्मै ददेऽहेरमृतं यथा ॥ २२ ॥ इत्युक्तः सोऽसुरो नूनं गौरीहरणलालसः ॥ स तद्वरपरीक्षार्थं शम्भोर्मूर्ध्नि किलासुरः ॥
स्वहस्तं धातुमारेभे सोऽबिभ्यत्स्वकृताच्छिवः ॥ २३ ॥ तेनोपसृष्टः संत्रस्तः पराधावन्सवेपथुः ॥ यावदन्तं दिवो भूमेः काष्ठानामुदगादुदक्
॥ २४ ॥ अजानन्तः प्रतिविधिं तूष्णीमासन्सुरेश्वराः ॥ ततो वैकुण्ठमगमद्भास्वरं तमसः परम् ॥ २५ ॥ यत्र नारायणः साक्षान्न्यासिनां परमा
गतिः ॥ शान्तानां न्यस्तदण्डानां यतो नावर्तते गतः ॥ २६ ॥ तं तथाव्यसनं दृष्ट्वा भगवान्वृजिनार्दनः ॥ दूरात्प्रत्युदियाद्भूत्वा बटुको योगमा-
यया ॥ २७ ॥ मेखलाजिनदण्डाक्षैस्तेजसाग्निरिव ज्वलन् ॥ अभिवादयामास च तं कुशपाणिर्विनीतवत् ॥ २८ ॥

अत एव भास्वरं प्रकाशबहुलं वैकुण्ठं श्वेतद्वीपमगमत् । बदरिकाश्रममित्येके । श्वेतद्वीपस्य भूगतत्वेऽपि तमसः परत्वं श्रीकृष्णमूर्तिवदेवेति तोषणी ॥ २५ ॥ यत्रेति ॥ यत्र श्वेतद्वीपे न्यस्तदण्डानां त्यक्तभूतद्रोहाणां शान्तानां न्यासिनां परमा गतिः परमफलभूतः साक्षान्नारायण आस्ते । यं नारायणं गतो जनो यतः सकाशात्पुनः संसारे नावर्तत इति ॥ २६ ॥ तमिति द्वयम् ॥ तथा तादृशं व्यसनं दुःखं यस्य तं रुद्रं दृष्ट्वा वृजिनार्दनो दुःखापहारी भगवान्नारायणः योगमायया स्वशक्त्या बटुको ब्रह्मचारी भूत्वा मेखलादिभिरुपलक्षितः तेजसाग्निरिव ज्वलन् देदीप्यमानः कुशपाणिर्दूरादेव वैकुण्ठात् प्रत्युदियात् तदभिमुखमाविर्भूतः । ततश्च विनीतवत् भिक्षुकवत्सावधानो भवेत्युक्त्वा अभिवादयामास स्वस्याभिवादनं कारयामास । यद्वा । अस्माकं ब्रह्मदर्शिनां सर्वभूतान्येवाभिवाद्यानि भवांस्तु ज्ञानी तपस्वी चेति बटोर्ममाभिवाद्य एवेति द्योतयामास । स्वयं चाह स्मेति शेषः ॥ २७ ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाकुनेयेति ॥ हे शाकुनेय व्यक्तं निश्चितं भवान् श्रान्तोऽस्ति किं किमर्थं दूरमागतः अतः क्षणं विश्रम्यताम् । यतोऽयमात्मा देहः पुंसः सर्वकामधुक् सर्वपुरुषार्थहेतुः अतो मा पीडयेति ॥ २९ ॥ यदीति ॥ युष्मद्व्यवसितं युष्माभिर्निश्चितं कार्यं यदि नोऽस्माकं श्रवणायालं योग्यं तर्हि हे प्रभो भण्यतां यतो धृतैः सहायतया गृहीतैः पुंभिः सहैव जनः प्रायशः स्वार्थान् समीहते साधयति एकाकिना कार्यं न सिध्यति अतो यथाशक्ति तत्रोपकारमहमपि करिष्यामीति भावः ॥ ३० ॥ एवमिति ॥ स्पष्टम् ॥ ३१ ॥ एवं चेदिति ॥ एवं चेत् तद्वाक्यं वरदानात्मकं वयं न श्रद्दधीमहि सत्यमिति न विश्वसिमः । प्रेतपिशाचराट् यः शिवः दक्षशापात्पैशाच्यं पिशाचानामिव वृत्तिं प्राप्तः ॥ ३२ ॥ यदीति ॥ अङ्ग हे दानवेन्द्र वो युष्माकं यदि तत्र जगद्गुरौ विश्रम्भः जगत्पूज्यत्वात्तद्वचने विश्वासोऽस्ति तर्हि आशु स्वशिरसि हस्तं न्यस्य

श्रीभगवानुवाच ॥ शाकुनेय भवान्व्यक्तं श्रान्तः किं दूरमागतः ॥ क्षणं विश्रम्यतां पुंस आत्माऽयं सर्वकामधुक् ॥ २९॥ यदि नः श्रवणायालं युष्मद्व्यवसितं विभो ॥ भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीहते ॥ ३० ॥ श्रीशुक उवाच ॥ एवं भगवता पृष्टो वचसाऽमृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मै यथा पूर्वमनुष्ठितम् ॥ ३१ ॥ श्रीभगवानुवाच ॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि ॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् ॥ ३२ ॥ यदि वस्तत्र विश्रम्भो दानवेन्द्र जगद्गुरौ ॥ तर्ह्यङ्गाशु स्वशिरसि हस्तं न्यस्य प्रतीयताम् ॥ ३३ ॥ यद्यसत्यं वचः शम्भोः कथञ्चिद्दानवर्षभ ॥ तदैनं जह्यसद्वाचं न यद्वक्ताऽनृतं पुनः ॥ ३४ ॥ इत्थं भगवतश्चित्रैर्वचोभिः स सुपेशलैः ॥ भिन्नधीर्विस्मितः शीर्ष्णि स्वहस्तं कुमतिर्व्यधात् ॥ ३५ ॥ अथापतद्भिन्नशिरा वज्राहत इव क्षणात् ॥ जयशब्दो नमःशब्दः साधुशब्दोऽभवद्दिवि ॥ ३६ ॥ मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे ॥ देवर्षिपितृगन्धर्वा मोचितः संकटाच्छिवः ॥ ३७ ॥

प्रतीयतां तद्वचनं परीक्ष्यताम् ॥ ३३ ॥ यदीति ॥ यदि शम्भोर्वचः कथञ्चित् असत्यम् अनृतं स्यात् तदा हे दानवर्षभ असद्वाचमेनं रुद्रं जहि ताडय । यत् यतस्ताडनात् पुनरनृतं न वक्ता न वक्ष्यति । अन्यथान्यानप्यनृतं वदन्वञ्चयिष्यत इत्यर्थः ॥ ३४ ॥ इत्थमिति ॥ एवंभूतैश्चित्रैर्भ्रमकैः सुपेशलैरतिरम्यैर्भगवतो वचोभिर्भिन्ना भ्रंशिता धीर्यस्य अत एव विस्मृतः विस्मृतवरदानार्थः कुमतिः सोऽसुरः स्वशीर्ष्णि स्वहस्तं व्यधात् निहितवान् शीर्षन्नार्षः ॥ ३५ ॥ अथेति ॥ अथ तत्क्षण एव वज्रेणाहत इव भिन्नशिरा अपतत् तदा च दिवि नमआदिशब्दा अभवन् ॥ ३६ ॥ मुमुचुरिति ॥ पापे पापाचारे वृकासुरे हते सति भगवति देवादयः पुष्पवर्षाणि मुमुचुः । एवं च भगवता शिवः संकटान्मोचितः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तमिति युग्मम् ॥ संकटान्मुक्तं च गिरिशं भगवानभ्याह स्म । अहो देव हे महादेव स्वेन पाप्मनैवायं पापः पापाचारो हतः । हे ईश महत्सु त्वद्भक्तेष्वपि कृतकिल्बिषः कृतापराधः को नु जन्तुः क्षेमी स्यात् सुखी न स्यादेव । जगद्गुरौ जगत्पूज्ये विश्वेशे त्वयि कृतागस्को जन्तुः क्षेमी न स्यादिति तु किमु वक्तव्यम् ॥ ३८ ॥ ३९ ॥ य इति ॥ अव्याकृतशक्त्युदन्वतः अप्राकृतशक्तिसमूहस्य साक्षात्परमात्मनः परस्य हरेश्चरित्रम् एवंप्रकारकं गिरित्रमोक्षं कथयेच्छृणोति वा स संसृतिभिर्नानायोनिसंचारैः तथा अरिभिः संसारकारणैः कामादिभिः शत्रुभिश्च विमुच्यते ॥ ४० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याष्टाशीतितमे व्यधात् ॥ ८८ ॥ नवाशीतितमेऽन्येभ्यो देवेभ्यो हरिमुत्तमम् ॥ भृगुर्निरचिनोदत्र श्लोकाः पर्वतषण्मिताः ॥ सप्तोवाचेति वाक्यानि द्वासप्ततिरनुष्टुभः ॥ ८९ ॥ सरस्वत्या इति ॥ हे राजन् सरस्वत्याः नद्यास्तटे ऋषयः सत्रमासत सत्रानुष्ठानार्थमुपविविशुरित्यर्थः । तेषां त्रिषु ब्रह्मविष्णुरुद्रेषु को महानिति वितर्कः संशयः समभूत् ॥ १ ॥ तस्येति ॥ हे नृप तस्य महत्त्वस्य

मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः ॥ अहो देव महादेव पापोऽयं स्वेन पाप्मना ॥ ३८ ॥ हतः को नु महत्स्वीश जन्तुर्वै कृतकिल्बिषः ॥ क्षेमी स्यात्किमु विश्वेशे कृतागस्को जगद्गुरौ ॥ ३९ ॥ य एवमव्याकृतशक्त्युदन्वतः परस्य साक्षात्परमात्मनो हरेः ॥ गिरित्रमोक्षं कथयेच्छृणोति वा विमुच्यते संस्मृतिभिस्तथाऽरिभिः ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धोत्तरार्धे रुद्रमोक्षं नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ श्रीशुक उवाच ॥ सरस्वत्यास्तटे राजन्नृषयः सत्रमासत ॥ वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥ १ ॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप ॥ तज्ज्ञप्त्यै प्रेषयामासुः सोऽभ्यगाद् ब्रह्मणः सभाम् ॥ २ ॥ न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्त्वपरीक्षया ॥ तस्मै चुक्रोध भगवान्प्रज्वलन्स्वेन तेजसा ॥ ३ ॥ स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः ॥ अशीशमद्यथा वह्निं स्वयोन्या वारिणात्मनः ॥ ४ ॥

जिज्ञासया ते ऋषयस्तस्य महत्त्वस्य ज्ञप्तयै ज्ञानार्थं ब्रह्मसुतं भृगुं प्रेषयामासुः । पितृत्वभ्रातृत्वाभ्यां ब्रह्मशिवपक्षपातिनमेव प्रेषितवन्तः स च भृगुः परीक्षार्थं प्रथमं ब्रह्मणः सभामभ्यगात् ॥ २ ॥ नेति ॥ सत्वगुणोऽस्यास्ति न वेति परीक्षार्थं तस्मै ब्रह्मणे प्रह्वणं नमस्कारं प्रह्वशब्दादाचारे क्विप् ततो ल्युट् । स्तोत्रं च न कृतवान् ततश्च तत्कृतामवज्ञां ज्ञात्वा भगवान् ब्रह्मा स्वेन तेजसा प्रज्वलंस्तस्मै भृगवे चुक्रोध ॥ ३ ॥ स इति ॥ प्रभुर्विवेकी स आत्मभूः ब्रह्माऽऽत्मजाय भृगवे आत्मनि मनसि उत्थितं मन्युं क्रोधमात्मना विवेकात्मिकया बुद्ध्या अशीशमत् शान्तं कृतवान् । यथा स्वयोन्या अग्निकारणात् अरणेरुत्थितं वह्निं कश्चित् प्रभुर्वारिणा शमयति तद्वदित्यर्थः । यद्वा स्वं वह्निः योनिः कारणं यस्य तेन वारिणा स्त्रीत्वमार्षम् । यद्वा । स्वस्यैव योन्या रूपान्तरेणाभिव्यक्तिस्थानेन स्वकार्येणेत्यर्थः । तेन यथा कश्चिद्वह्निं शमयति तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं शमयामासेत्यर्थः । यद्वा । स्वस्य वह्नेर्योन्या कारणेन वारिणेव क्रोधस्य कारणेन आत्मनैव क्रोधं शमयामास "अग्नेराप" इति श्रुतेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारि वह्नेः कार्यम् अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमिति श्रुतेर्वारि वह्नेः कार्यमप्युच्यत इति उभयार्थः । अत्र ब्रह्मणि मानसमपराधं कृतवान् ततोऽपि श्रीमहेश्वरे वाचिकमपराधं ततोऽपि श्रीविष्णौ शारीरमपराधं कृतवान् ॥ ४ ॥ तत इति ॥ ततश्च स भृगुः कैलासमगमत् । महेश्वरो देवः भ्रातरं तं भृगुं मुदा परिरब्धुमालिङ्गितुं समारेभे । स च भृगुस्त्वं चिताभस्मादिधारी उत्पथगोऽसीति वदन् तत्परिरम्भणं नैच्छत् तच्छ्रुत्वा महादेवश्चुकोप ॥ ५ ॥ शूलमिति ॥ कोपात्तिग्मलोचनः सन् शूलमुद्यम्य तं हन्तुमारेभे । देवी पार्वती पादयोः पतित्वा गिरा स्तुत्यादिरूपया तं प्रसादयामास ॥ ६ ॥ अथो इति ॥ अथो यत्र देवो जनार्दनः अस्ति तद्वैकुण्ठलोकं जगाम । तत्र श्रिय उत्सङ्गे शयानं जनार्दनं वक्षसि पदा अताडयत् । अत्र शयानं तत्रापि पत्न्या उत्सङ्गे तत्रापि वक्षसि मर्मणि तत्रापि पदा न तु हस्तादिनेत्यपराधस्याधिक्यम् । वैकुण्ठलोकश्चायं विकुण्ठासुतनिर्मितः । " वैकुण्ठः कल्पितो येन लोको लोकनमस्कृतः । " इति प्रागुक्तेः । नतु महावैकुण्ठः ॥ ७ ॥ तत इति ॥ ततः लक्ष्म्या सह सतां गतिर्भगवान् उत्थाय स्वतल्पा-

ततः कैलासमगमत्स तं देवो महेश्वरः ॥ परिरब्धुं समारेभे उत्थाय भ्रातरं मुदा ॥ नैच्छत्त्वमस्युत्पथग इति देवश्चुकोप ह ॥५॥ शूलमुद्यम्य तं हन्तुमारेभे तिग्मलोचनः ॥ पतित्वा पादयोर्देवी सान्त्वयामास तं गिरा ॥६॥ अथो जगाम वैकुण्ठं यत्र देवो जनार्दनः ॥ शयानं श्रिय उत्सङ्गे पदा वक्षस्यताडयत् ॥ ७ ॥ तत उत्थाय भगवान्सह लक्ष्म्या सतां गतिः ॥ स्वतल्पादवरुह्याथ ननाम शिरसा मुनिम् ॥ ८ ॥ आह ते स्वागतं ब्रह्मन्निषीदात्रासने क्षणम् ॥ अजानतामागतान्वः क्षन्तुमर्हथ न प्रभो ॥९॥ पुनीहि सहलोकं मां लोकपालांश्च मद्गतान् ॥ पादोदकेन भवतस्तीर्थानां तीर्थकारिणा ॥ १० ॥ अतीव कोमलौ तात चरणौ ते महामुने ॥ इत्युक्त्वा विप्रचरणौ मर्दयन्स्वेन पाणिना ॥ ११ ॥ अद्याहं भगवँल्लक्ष्म्या आसमेकान्तभाजनम् ॥ वत्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः ॥ १२ ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणे वैकुण्ठे भृगुस्तन्मन्द्रया गिरा ॥ निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कण्ठोऽश्रुलोचनः ॥ १३ ॥

दवरुह्य मुनिं शिरसा ननाम ॥ ८ ॥ आहेति ॥ आह स्म च हे ब्रह्मन् ते तव स्वागतम् । अत्रास्मिन्नासने क्षणं निषीद उपविश । हे प्रभो वो युष्मानागतान् अजानतां नोऽस्माकमपराधं क्षन्तुमर्हसि ॥ ९ ॥ पुनीहीति ॥ तीर्थानां गङ्गादीनामपि तीर्थकारिणा पावित्र्यकारिणा परमपवित्रेण स्वपादोदकेन सहलोकं लोकेन वैकुण्ठेन चतुर्दशभिर्लोकैर्वा सहितं मां मद्गतान् लोकपालांश्च पुनीहि ॥ १० ॥ अतीवेति ॥ हे तात हे महामुने ते चरणावतीव कोमलौ वज्रकर्कशमद्वक्षःस्पर्शेन परिपीडिताविति शेषो ज्ञेयः । क्वचित्पुस्तके ईदृशः पाठ एवास्ति क्वापि अतीवेत्यर्द्धमपि नास्ति । इत्युक्त्वा स्वेन पाणिना विप्रचरणौ मर्दयन् पुनराह स्म ॥ ११ ॥ अद्येति ॥ हे भगवन् अद्याहं लक्ष्म्या एकान्तभाजनं नियताश्रय आसं यतः भवत्पादस्पर्शेन हतमंहः पापं यस्य तस्य मे वक्षसि भूतिर्लक्ष्मीः सदा वत्स्यति ॥ १२ ॥ एवमिति ॥ वैकुण्ठे विष्णौ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रुवति सति तस्य मन्द्रया गम्भीरया गिरा निर्वृतः सुखितः अत एव तर्पितः भक्त्या उत्कण्ठः बाष्परुद्धकण्ठः अश्रूणि लोचनयोर्यस्य स भृगुस्तूष्णीं बभूवेति शेषः ॥ १३ ॥ पुनरिति ॥ हे राजन् ब्रह्मवादिनां मुनीनां सत्रं पुनराव्रज्य स्वेन यदनुभूतं दृष्टं ब्रह्मादित्रयाणां वृत्तं तद्भृगुस्तेभ्योऽवर्णयत्॥१४॥ तदिति ॥ तद्भृगुणा वर्णितं निशम्याथानन्तरं विस्मिताः अपराधातिरेकेऽपि भगवतो निर्विकारत्वेन नम्रीभावेन चाश्चर्ययुक्ताश्छिन्नसंशया महत्त्वे संशयरहिता मुनयो विष्णुमेव भूयांसं श्रद्दधुः सर्वोत्कृष्टत्वेन निश्चितवन्तः । तच्च युक्तमेव । यतः यस्मिन् विष्णौ शान्तिः क्रोधलोभादिराहित्यं यतश्चाभयं संसारभयनिवृत्तिर्भवति ॥१५॥ पुनर्विष्णुं विशिनष्टि—धर्म इत्यादिभिः ॥ यस्मात् धर्मः प्रवर्तते साक्षात्कारात्मकं ज्ञानं तदन्वितं वैराग्यं च भवति । वैराग्यं च चतुर्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यम् । विषयांस्त्यक्तुमिच्छतोऽप्यशक्नुवतः विषयसम्मानेच्छात्यागो यतमानाख्यमाद्यम्।विषयाणां लवणादिव्यतिरेकेणापि वृत्तिर्व्यतिरेकाख्यं द्वितीयम् । तत्रापि मनसि रागशैथिल्ये बाह्येन्द्रियैरेव विषयसेवनमेकेन्द्रियाख्यं तृतीयम् । तत्राप्यौ

पुनश्च सत्रमाव्रज्य मुनीनां ब्रह्मवादिनाम् ॥ स्वानुभूतमशेषेण राजन्भृगुरवर्णयत् ॥ १४ ॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः ॥ भूयांसं श्रद्दधुर्विष्णुं यतः शान्तिर्यतोऽभयम् ॥ १५ ॥ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितम् ॥ ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहम् ॥ १६ ॥ मुनीनां न्यस्तदण्डानां शान्तानां समचेतसाम् ॥ अकिञ्चनानां साधूनां यमाहुः परमां गतिम् ॥ १७ ॥ सत्त्वं यस्य प्रिया मूर्तिर्ब्राह्मणास्त्विष्टदेवताः ॥ भजन्त्यनाशिषः शान्ता यं वा निपुणबुद्धयः ॥ १८ ॥ त्रिविधाकृतयस्तस्य राक्षसा असुराः सुराः ॥ गुणिन्या मायया सृष्टाः सत्त्वं तत्तीर्थसाधनम् ॥ १९ ॥ ॥ श्रीशुक उवाच ॥ एवं सारस्वता विप्रा नृणां संशयनुत्तये ॥ पुरुषस्य पदाम्भोजसेवया तद्गतिं गताः ॥ २० ॥

दासीन्यं वशीकाख्यं तुर्यम् । अन्ये तु चतुर्विधपुरुषार्थानामुपेक्षारूपं चतुर्विधं वैराग्यमाहुः । तथा यस्मात् अणिमादिभेदेन अष्टधा ऐश्वर्यं च भवति आत्मनः श्रोतृजनान्तःकरणस्य पापात्मकं मलमपहन्तीति तथाभूतं यस्य यशः अस्ति ॥ १६ ॥ मुनीनामिति ॥ मुनीनां मननशीलानां न्यस्तदण्डानां त्यक्तप्राणिद्रोहाणां शान्तानां समचेतसाम् अकिंचनानां सर्वतो विरक्तानां साधूनां यं विष्णुं परमां गतिमाहुः ॥ १७ ॥ सत्वमिति ॥ यस्य विष्णोः सत्वं प्रिया मूर्तिः ब्राह्मणास्तु इष्टदेवताः । यं च अनाशिषः निष्कामाः शान्ता निपुणबुद्धयो भजन्ति ॥ १८ ॥ त्रिविधेति ॥ यद्यपि तस्य भगवतः गुणिन्या मायया सृष्टा राक्षसा असुराः सुरा इति त्रिविधा आकृतयो मूर्तयः सन्ति तथापि तस्य सत्वं सत्वमूर्तिस्तीर्थसाधनं पुरुषार्थहेतुः ॥ १९ ॥ कथोपसंहाराय श्रीशुक उवाच केचित्तु भूयांसं श्रद्दधुर्विष्णुमित्यतः परं यतः शान्तिरित्यादितीर्थसाधनमित्यन्तं सरस्वतीतीरवासिमुनीनां वचस्तदनन्तरं शुक उवाचेत्याहुः—एवमिति ॥ एवं सारस्वताः सरस्वतीतीरवासिनो विप्रा नृणां संशयस्य नुत्तये निवृत्तये विष्णोर्महत्त्वं निर्णीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य पुरुषस्य पदाम्भोजसेवया तद्गतिं गतास्तत्स्वरूपं प्राप्ताः ॥ २० ॥ इत्येतदिति ॥ मुनेर्व्यासस्य तनयः शुकस्तस्यास्यपद्मं मुखकमलं तस्य गन्धः संबन्धो यस्मिंस्तत्पीयूषम् अमृतमिव स्वादु "गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः।" इति कोषः। भवभयं भिनत्तीति भवभयभित् इत्येवं पूर्ववर्णितमेतत् परस्य पुंसो विष्णोः सुश्लोक्यं प्रशंसायोग्यं महत्त्वं यः पान्थः संसारपथे वर्तमानः श्रवणपुटैरभीक्ष्णं पुनः पुनः पिबति सेवते सोऽध्वभ्रमणं संसरणं तत्परिश्रमं च जहाति। ततः परं भ्रमणाभावात् तदानन्देन प्राचीनदुःखविस्मृतेश्च ॥ २१ ॥ एकदेति ॥ स्पष्टम् ॥ २२ ॥ विप्र इति ॥ पुत्रमरणात् दीनं दुःखितं मानसं यस्य सः अत एवातुरो व्याकुलचित्तः स विप्रो मृतकं पुत्रं गृहीत्वा राज्ञ उग्रसेनस्य द्वार्युपधायेदं प्रोवाच ॥ २३ ॥ ब्रह्मेति ॥ ब्राह्मणान् द्वेष्टीति तथा तस्य शठा वञ्चनपरा धीर्यस्य तस्य लुब्धस्य विषयेषु आत्मा यस्य तस्य क्षत्रबन्धोः क्षत्रियाधमस्य अस्य राज्ञः कर्मदोषान्मे अर्भकः पुत्रः पञ्चत्वं गतो मरणं प्राप्तः ॥ २४ ॥ हिंसेति ॥ हिंसैव विहारो यस्य तं दुष्टं शीलं स्वभावो यस्य तम्

सूत उवाच ॥ ॥ इत्येतन्मुनितनयास्यपद्मगन्धपीयूषं भवभयभित्परस्य पुंसः ॥ सुश्लोक्यं श्रवणपुटैः पिबत्यभीक्ष्णं पान्थोऽध्वभ्रमणपरिश्रमं जहाति ॥ २१ ॥ श्रीशुक उवाच ॥ एकदा द्वारवत्यां तु विप्रपत्न्याः कुमारकः ॥ जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत ॥ २२ ॥ विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः ॥ इदं प्रोवाच विलपन्नातुरो दीनमानसः ॥ २३ ॥ ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः ॥ क्षत्रबन्धोः कर्मदोषात्पञ्चत्वं मे गतोऽर्भकः ॥ २४ ॥ हिंसाविहारं नृपतिं दुःशीलमजितेन्द्रियम् ॥ प्रजा भजन्त्यः सीदन्ति दरिद्रा नित्यदुःखिताः ॥ २५ ॥ एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च ॥ विसृज्य स नृपद्वारि तां गाथां समगायत ॥ २६ ॥ तामर्जुन उपश्रुत्य कर्हिचित्केशवान्तिके ॥ परेते नवमे बाले ब्राह्मणं समभाषत ॥ २७ ॥ किंस्विद्ब्रह्मंस्त्वन्निवास इह नास्ति धनुर्धरः ॥ राजन्यबन्धुरेते वै ब्राह्मणाः सत्रमासते ॥ २८ ॥ धनदारात्मजापृक्ता यत्र शोचन्ति ब्राह्मणाः ॥ ते वै राजन्यवेषेण नटा जीवन्त्यसुम्भराः ॥ २९ ॥

अजितेन्द्रियं नृपतिं भजन्त्यः प्रजा दरिद्रा अत एव नित्यदुःखिताश्च सत्यः सीदन्ति क्लिश्यन्तीत्यर्थः ॥ २५ ॥ एवमिति ॥ स विप्रर्षिः एवमेव द्वितीयं तृतीयादिं च मृतं बालं नृपद्वारि विसृज्य संस्थाप्य तां ब्रह्मद्विष इति पूर्वोक्तां गाथां वाक्यमगायत तद्भावः। मयि न कश्चिद्दोषः अतो राजदोषेणैव मे पुत्रा म्रियन्त इति वारंवारं चुक्रोशेत्यर्थः ॥ २६ ॥ तामिति ॥ कर्हिचिन्नवमे बाले परेते मृते सति राजसमीपस्थितकेशवान्तिके स्थितोऽर्जुनस्तां गाथामुपश्रुत्य एकान्ते ब्राह्मणं समभाषत ॥ २७ ॥ किमिति ॥ हे ब्रह्मन् किंस्वित् किमर्थं वृथा रोदिषि यतस्त्वन्निवासे धनुर्धरो राजन्यबन्धुः क्षत्रियाभासोऽपि नास्ति। ब्रह्मण्यस्य शूरस्य तु का वार्तेत्यर्थः। एते तु सत्रसमाजे मिलिता ब्राह्मणा इव आसते तिष्ठन्ति ॥२८॥ तदेवाह—धनेति ॥ यत्र येषु जीवत्सु सत्सु धनादिभिरपृक्ता वियुक्ता ब्राह्मणाः शोचन्ति ते वै राजन्यस्य वेषेण रूपेण नटा इव असुम्भराः केवलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्राणपोषणपरा एव जीवन्ति जीविकां सम्पादयन्ति ॥ २९ ॥ अहमिति ॥ हे ब्रह्मन् इह स्थितोऽहं दीनयोर्वां युवयोः प्रजां जनिष्यमाणं पुत्रं रक्षिष्ये । यद्यनिस्तीर्णप्रतिज्ञः स्यां तदाग्निं प्रवेक्ष्ये तेन हतं कल्मषम् अनृतभाषणपातकं यस्य तथाभूतो भवेयम् तत्पुत्ररक्षणादहतकल्मषः अग्निं प्रवेक्ष्ये इति वा ॥ ३० ॥ संकर्षण इति युग्मम् ॥ यद् मदपत्यं संकर्षणादयस्त्रातुं न शक्नुवन्ति तज्जगदीश्वरैरेतैरपि कर्तुमशक्यं मदपत्यत्राणात्मकं कर्म कथं नु भवान् कर्तुं शक्नुयादिति शेषः । अतो बालिश्यान्मौर्ख्यादेव त्वं तच्चिकीर्षसि अतो वयं न श्रद्दध्महे न विश्वसिमः ॥ ३१ ॥ ३२ ॥ नेति ॥ कार्ष्णिरेव प्रद्युम्नोऽपि चकारादनिरुद्धश्च अहं संकर्षणादयो न भवामि किंत्वर्जुनो नाम महाबलपराक्रमवत्तया प्रसिद्धोऽस्मि यस्य मम गाण्डीवं नाम धनुरस्ति ॥ ३३ ॥ मेति ॥ हे ब्रह्मन् त्र्यम्बकस्य शिवस्य मृत्युंजयस्यापि तोषणं मम वीर्यं पराक्रमं मावमंस्थाः तत्राविश्वासं मा कार्षीः । अतो मृत्युंजयतुल्यत्वात् हे प्रभो प्रधने युद्धे मृत्युं विजित्य ते प्रजामानेष्ये अर्जुनस्यापीदृशी गर्वोक्तिर्ब्रह्मण्यदेवस्य विप्रोपेक्षया क्रोधेन दुःखविशेषात् । तेन

अहं प्रजां वां भगवन्रक्षिष्ये दीनयोरिह ॥ अनिस्तीर्णप्रतिज्ञोऽग्निं प्रवेक्ष्ये हतकल्मषः ॥ ३० ॥ ब्राह्मण उवाच ॥ संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः ॥ अनिरुद्धोऽप्रतिरथो न त्रातुं शक्नुवन्ति यत् ॥ ३१ ॥ तत्कथं नु भवान्कर्म दुष्करं जगदीश्वरैः ॥ चिकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्महे वयम् ॥ ३२ ॥ अर्जुन उवाच ॥ नाहं सङ्कर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव च ॥ अहं वा अर्जुनो नाम गाण्डीवं यस्य वै धनुः ॥ ३३ ॥ माऽऽवमंस्था मम ब्रह्मन्वीर्यं त्र्यम्बकतोषणम् ॥ मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां प्रभो ॥ ३४ ॥ एवं विश्रम्भितो विप्रः फाल्गुनेन परन्तप ॥ जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ॥ ३५ ॥ प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः ॥ पाहि पाहि प्रजां मृत्योरित्याहार्जुनमातुरः ॥ ३६ ॥ स उपस्पृश्य शुच्यम्भो नमस्कृत्य महेश्वरम् ॥ दिव्यान्यस्त्राणि संस्मृत्य सज्यं गाण्डीवमाददे ॥ ३७ ॥

तदुपेक्षा च " द्विजात्मजा मे युवयोर्दिदृक्षुणा " इति वक्ष्यमाणतदुत्कण्ठाप्रतिपालनाय ॥ ३४ ॥ एवमिति ॥ हे परन्तप फाल्गुनेनार्जुनेनेति प्रौढिवादेः विश्रम्भितः विश्वासं प्रापितो विप्रः प्रीतः संस्तत्र पार्थस्यार्जुनस्य वीर्यं निशामयन् पश्यन् शृण्वन्नित्यर्थः । श्रावयन् इति वा स्वगृहं जगाम ॥ ३५ ॥ प्रसूतीति ॥ भार्यायाः प्रसूतिकाले आसन्ने समीपमागते सति आतुरः चिन्ताव्याकुलो द्विजसत्तमो मृत्योः सकाशात् प्रजां पाहि पाहीत्यर्जुनं प्रत्याह स्म । तदर्थमेकाब्दमर्जुनस्य द्वारकायामेव वासः स्वपुरादेव गर्भपूर्तिं ज्ञात्वा पुनस्तत्रागमो वा ज्ञेयः ॥ ३६ ॥ स इति ॥ सोऽर्जुनः शुचि शुद्धमम्भो जलमुपस्पृश्याचम्य ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरम् इष्टदेवं नमस्कृत्य दिव्यानि अस्त्राणि मन्त्रान् संस्मृत्य सज्जीकृतं गाण्डीवं धनुराददे गृहीतवान् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यरुणदिति ॥ ततश्च नानास्त्रैर्मन्त्रैर्योजितैः शरैः तिर्यगूर्ध्वमधश्च पार्थः शरपञ्जरं चकार । तेन च सूतिकागारं न्यरुणत् आवृतवान् ॥ ३८ ॥ तत इति ॥ ततश्च विप्रपत्न्याः कुमारः संजातः सच मुहुः रुदन्नपि सद्यस्तत्क्षणमेव विहायसा आकाशमार्गेण सशरीरः अदर्शनमापेदे । अपत्यान्तरस्य मृतदेहलाभोऽभूत् । अस्य तु देहोऽपि नावशिष्ट इत्यर्थः ॥ ३९ ॥ तदेति ॥ तदा च स विप्रः कृष्णसन्निधौ विजयमर्जुनं विनिन्दन्नाह स्म । योऽहं क्लीबस्य षण्ढस्यार्जुनस्य कत्थनं वृथा प्रगल्भभाषणं श्रद्दधे विश्वसितवांस्तस्य मे मौढ्यं मौर्ख्यं पश्यत ॥ ४० ॥ नेति ॥ यस्य ममापत्यं प्रद्युम्नादयः परित्रातुं न शेकुर्न समर्था जातास्तस्यान्यः को वेश्वरः समर्थोऽविता रक्षकः । अत्रापि "नेमं विरिञ्च्यो न भव" इत्यादिवदन्वयो योज्यः ॥ ४१ ॥ धिगिति ॥ अतो मृषावादम् अनृतवक्तारमर्जुनं धिक् आत्मश्लाघिनः आत्मस्तुतिशीलस्य तस्य धनुर्गाण्डीवमपि धिक् यो दुर्मतिरर्जुनो दैवेनेश्वरेणोपसृष्टमन्यत्र नीतं मदपत्यं मौढ्यादानिनीषति आनेतुमिच्छति ॥ ४२ ॥ एवमिति ॥ विप्रर्षावेवं शपति निन्दति सति फाल्गुनोऽर्जुनः विद्यामास्थाया-

न्यरुणत्सूतिकागारं शरैर्नानास्त्रयोजितैः ॥ त्रिर्यगूर्ध्वमधः पार्थश्चकार शरपञ्जरम् ॥ ३८॥ ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः ॥ सद्योऽदर्शनमापेदे सशरीरो विहायसा ॥ ३९ ॥ तदाह विप्रो विजयं विनिन्दन् कृष्णसंनिधौ ॥ मौढ्यं पश्यत मे योऽहं श्रद्दधे क्लीबकत्थनम्॥४०॥ न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः ॥ यस्य शेकुः परित्रातुं कोऽन्यस्तदवितेश्वरः ॥ ४१ ॥ धिगर्जुनं मृषावादं धिगात्मश्लाघिनो धनुः ॥ दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ॥ ४२ ॥ एवं शपति विप्रर्षौ विद्यामास्थाय फाल्गुनः ॥ ययौ संयमिनीमाशु यत्रास्ते भगवान्यमः ॥४३॥ विप्रापत्यमचक्षाणस्तत ऐन्द्रीमगात्पुरीम् ॥ आग्नेयीं नैर्ऋतीं सौम्यां वायव्यां वारुणीमथ ॥ रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ॥ ४४ ॥ ततोऽलब्धद्विजसुतो ह्यनिस्तीर्णप्रतिश्रुतः ॥ अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता ॥ ४५ ॥ दर्शये द्विजसूनूंस्ते मावज्ञात्मानमात्मना ॥ ये ते हि कीर्तिं विमलां मनुष्याः स्थापयन्ति नः ॥ ४६ ॥

ङ्गीकृत्याशु संयमनीं ययौ । यत्र भगवान् यम आस्ते ॥ ४३ ॥ विप्रेति सार्द्धम् ॥ तत्र विप्रापत्यमचक्षाणः अपश्यन् इन्द्रादिपुरीः ययौ । नाकपृष्ठं स्वर्गोपरितनं लोकं किं बहुनान्यान्यपि गन्तुमशक्यानि धिष्ण्यानि ब्रह्मादिस्थानानि उदायुधः सन् ययौ । अत्र ऐशान्यां गमनमपि ज्ञेयम् । ऐंद्र्यादिनिर्देशस्योपलक्षणत्वात् । केचित्तु स्वगुरुणा शिवेनापि तन्नयनासम्भवमननात्तत्र न गमनमित्याहुः ॥ ४४ ॥ तत इति ॥ ततस्तस्मादेवं सर्वत्रान्वेषणादपि न लब्धो द्विजसुतो येन अत एव न निस्तीर्णं न सम्पादितं प्रतिश्रुतं येन सः अग्निं विविक्षुः प्रवेष्टुमिच्छुः प्रतिषेधता युक्तिभिः प्रतिषेधं कुर्वता कृष्णेन प्रत्युक्तः निवारितो जातः ॥ ४५ ॥ दर्शये इति ॥ आत्मनैवात्मानं मावज्ञ मावजानीहि आर्षः प्रयोगः । द्विजपुत्रार्थं त्वया म्रियते तांस्ते तुभ्यं दर्शयामि ये निन्दन्ति त एव मनुष्याः ते कीर्त्तिं स्थापयन्ति स्थिरां करिष्यन्ति । वर्तमानसामीप्ये लट् । देवादयस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदन्त्येवेति भावः।"येनेह कीर्तिं विमलां मनुष्याः स्थापयन्ति न।" इति पाठान्तरम् । स्वामिनां मते तु "ये ते हि कीर्तिं विमलां मनुष्याः स्थापयिष्यन्ति।" इति छन्दोभङ्ग-वान् लट्पाठ एव सम्मतो भाति । पाठान्तरं तु छन्दोभङ्गभयादागन्तुकमिति तदुक्तेः । छन्दोभङ्गभयात्कल्पितमिति तदर्थात् ॥४६॥ इतीति ॥ भगवानीश्वरः कृष्णोऽर्जुनेन सह दिव्यं स्वरथमारुह्य प्रतीचीं दिशमाविशत् प्रययौ ॥४७॥ सप्तेति ॥ सप्त सप्तसङ्ख्याका गिरयो मर्यादा पर्वता येषु तान् सप्तद्वीपान् तथा सप्तसिन्धून् लोकालोकं च पर्वतमतीत्य सुमहत् निबिडं तमः अन्धकारं विवेश ततोऽग्रे सूर्यादिप्रकाशाभावात् । एवं च भगवल्लीलावैभवात् अर्जुनादीनां दृष्टश्रोतृणां चमत्कारपोषणार्थमेव ॥ ४८ ॥ तत्रेति ॥ हे भरतर्षभ तत्र तमसि शैब्यादयोऽश्वा भ्रष्टगतयो बभूवुः ॥ ४९ ॥ तानिति ॥ महायोगेश्वराणामपीश्वरः सर्वोपायसमर्थो भगवान् कृष्णः तान् प्रतिहतगतीनश्वान् दृष्ट्वा सहस्र-सूर्यसदृशप्रकाशं स्वायुधं सुदर्शनचक्रं तेषां पुरः अग्रे प्राहिणोत् प्रायुङ्क्त ॥ ५० ॥ तम इति ॥ गहनं दुष्प्रवेशं सुघोरं भयंकरं कृतं प्रकृतिपरिणामरूपं नतु आलोकाभावमात्रं

इति संभाष्य भगवानर्जुनेन सहेश्वरः ॥ दिव्यं स्वरथमास्थाय प्रतीचीं दिशमाविशत् ॥ ४७ ॥ सप्त द्वीपान्सप्त सिन्धून् सप्त सप्त गिरी-नथ ॥ लोकालोकं तथाऽतीत्य विवेश सुमहत्तमः ॥ ४८ ॥ तत्राश्वाः शैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ तमसि भ्रष्टगतयो बभूवुर्भरतर्षभ ॥४९॥ तान्दृष्ट्वा भगवान्कृष्णो महायोगेश्वरेश्वरः ॥ सहस्रादित्यसंकाशं स्वचक्रं प्राहिणोत्पुरः ॥५०॥ तमः सुघोरं गहनं कृतं महद्विदार-यद्भूरितरेण रोचिषा ॥ मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथा चमूः ॥ ५१ ॥ द्वारेण चक्रानुपथेन तत्तमः परस्परं ज्यो-तिरनन्तपारम् ॥ समश्नुवानं प्रसमीक्ष्य फाल्गुनः प्रताडिताक्षोऽपिदधेऽक्षिणी उभे ॥५२॥ ततः प्रविष्टः सलिलं नभस्वता बलीयसैजद्बृह-दूर्मिभूषणम् ॥ तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तम्भसहस्रशोभितम् ॥ ५३ ॥

महत् अपारं तमः भूरितरेण रोचिषा विदारयत् मनोजवं सुदर्शनं निर्विविशे तद्गर्षः । यथा गुणात् मौर्व्याश्च्युतो रामस्य शरो रावणचमूः सेना विवेश तथेति ॥ ५१ ॥ द्वारे-णेति ॥ चक्रानुपथेन चक्रमनुगतेन द्वारेण चक्रेणैव सप्तावरणभेदनात्तद्रन्ध्रभूतद्वारेण तत्तमः परं तस्मात्तमसः प्रकृत्यावरणात् अष्टमात् परं दूरे वर्त्तमानम् अनन्तपारं समश्नुवानं व्याप्नुवत् परं श्रेष्ठं भागवतं ज्योतिः परमप्रकाशरूपं प्रसमीक्ष्य प्रताडिते प्रतिहते अक्षिणी यस्य सः फाल्गुनः उभे अक्षिणी पिदधे न्यमीलयत् । आदौ सप्तावरणानि भित्त्वा अष्टमं महान्धकारं प्रकृत्यावरणमपि चक्रेण भिन्नं ततः परं भागवतं ज्योतिर्महाप्रकाशं दृष्ट्वा प्रतिहते नेत्रे अर्जुनो न्यमीलयदिति भावः॥५२॥तत इति॥ततस्तमसः परतो बलीयसा प्रचण्डेन नभस्वता वायुना एजन्तः उच्चलन्तो बृहन्तः ऊर्मयस्तरङ्गा भूषणं यस्य भीषणमिति च पाठः । तथाभूतं महाकालनिर्मितमप्राकृतं सलिलं प्रविष्टः सार्जुनो भग-वान् तत्र सलिलस्याधस्तात् द्युमत्तमं द्युतिमत्सु श्रेष्ठं भ्राजतां मणिमयस्तम्भानां सहस्रेणोपशोभितं कालपुराख्यम् अद्भुतं भुवनं प्रविष्टः।इदं च महाकालपुरं मृत्युञ्जयतन्त्रे ज्ञेयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" ब्रह्माण्डस्योर्ध्वतो देवि ब्रह्मणः सदनं महत् । तदूर्ध्वं देवि विष्णूनां तदूर्ध्वं रुद्ररूपिणाम् ॥ तदूर्ध्वं च महाविष्णोर्महादेव्यास्तदूर्द्ध्वगम् । पारे परिमहादेव्याः कालः सर्वभयावहः ॥ ततः श्रीब्रह्मपीयूषवारिधिर्नित्यनूतनः । तस्य तीरे महाकालः सर्वग्राहकरूपधृक् ॥ " इति इत्युक्त्वा " तस्यान्तरे समुद्भासी रत्नद्वीपः शिवाह्वयः । ध्यायेत्तत्र परानन्दं रामोपास्यं परं महः ॥ बल्लवीवल्लभं कृष्णं गोपकन्याः सहस्रशः । " इत्यादि । अत्र ब्रह्मणः सदनं सत्यलोकः विष्णूनां विकुण्ठसुतानां वैकुण्ठः रुद्ररूपिणामित्यहंकारावरणस्थो रुद्रलोकः महाविष्णोरिति महत्तत्वावरणस्थो महादेव्या इति प्रकृत्यावरणस्थो महादेवीलोकः ब्रह्मपीयूषवारिधिः कारणार्णवः महाकालः परव्योमस्थो महावैकुण्ठनाथस्तस्यैव कारणार्णवजलान्तर्गतं भवनं महाकालपुरम् ॥५३॥ तस्मिन्निति ॥ तस्मिन्भवने महाभीमम् अतिभयंकरम् अद्भुतं विस्मयकरं सहस्रं मूर्धानस्तेषु भवाः फणास्तासु ये मणयस्तेषां द्युभिः कान्तिभिर्विभ्राजमानं द्विगुणानि द्विसहस्रसङ्ख्याकानि उल्बणानि भयंकराणि अरुणानीक्षणानि नेत्राणि यस्य तं सिताचलः स्फटिकपर्वतस्तस्याभा इवाभा यस्य तं शितयोऽनीला कण्ठो जिह्वाश्च यस्य तमेवंभूतमनन्ताख्यं शेषं ददर्श ॥ ५४ ॥ ददर्शेति ॥ तस्यानन्तस्य भोगः शरीरमेव सुखकरमासनं यस्य पुरुषोत्तमाः संकर्षणाद-

तस्मिन्महाभीममनन्तमद्भुतं सहस्रमूर्धन्यफणामणिद्युभिः ॥ विभ्राजमानं द्विगुणोल्बणेक्षणं सिताचलाभं शितिकण्ठजिह्वम् ॥५४॥ ददर्श तद्भोगसुखासनं विभुं महानुभावं पुरुषोत्तमोत्तमम् ॥ सान्द्राम्बुदाभं सुपिशङ्गवाससं प्रसन्नवक्त्रं रुचिरायतेक्षणम् ॥ ५५ ॥ महामणिव्रातकिरीटकुण्डलप्रभापरिक्षिप्तसहस्रकुन्तलम् ॥ प्रलम्बचार्वष्टभुजं सुकौस्तुभं श्रीवत्सलक्ष्म्या वनमालया वृतम् ॥ ५६ ॥ सुनन्दनन्दप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥ पुष्ट्या श्रिया कीर्त्यजयाऽखिलर्धिभिर्निषेव्यमाणं परमेष्ठिनां पतिम् ॥ ५७ ॥ ववन्द आत्मानमनन्तमच्युतो जिष्णुश्च तद्दर्शनमात्तसाध्वसः ॥ तावाह भूमा परमेष्ठिनां प्रभुर्बद्धाञ्जली सस्मितमूर्जया गिरा ॥ ५८ ॥

यस्तेभ्योऽप्युत्तमं महानुभावं सान्द्रस्य निबिडस्य अम्बुदस्य मेघस्येवाभा यस्य तं शोभने पिशङ्गे पीते वाससी यस्य तं प्रसन्नं वक्त्रं यस्य तं रुचिरे सुन्दरे आयते दीर्घे ईक्षणे यस्य तं विभुं ददर्श । फाल्गुन इति प्रकरणाल्लब्धम् ॥ ५५ ॥ महेति ॥ महान्तो मणिव्राता येषु तेषां किरीटकुण्डलानां या प्रभा तया परिक्षिप्ताः सर्वतः स्फुरन्तः सहस्रम् अनन्ताः कुन्तला यस्य तं प्रलम्बा दीर्घाश्चारवो वर्तुलाश्चाष्टौ भुजा यस्य तं कण्ठस्थेन कौस्तुभेन सहितं श्रीवत्सो लक्ष्म चिह्नं यस्य तं श्रीवत्सलक्ष्म्येति पाठे श्रीवत्सस्य लक्ष्म्या शोभया वनमालया चावृतं युक्तमित्यर्थः । विभुं ददर्शेत्यनुषङ्गः ॥ ५६ ॥ सुनन्देति ॥ सुनन्दादिभिः स्वपार्षदैः तथा मूर्तिमद्भिश्चक्रादिभिर्निजायुधैश्च तथा मूर्तिमतीभिः कीर्तिसहितया अजया मायया अखिलर्द्धिभिरणिमादिविभूतिभिः शक्तिभिश्च निषेव्यमाणं परमेष्ठिनां द्विपरार्द्धान्ते मुक्तानां ब्रह्मणां पतिं विभुं ददर्श ॥ ५७ ॥ ववन्द इति ॥ तमजं जन्मादिविकारशून्यमात्मानं स्वस्यैव मूर्त्यन्तरमच्युतः श्रीकृष्णो ववन्दे ननाम । तथा तस्य दर्शनेन जातं साध्वसं संभ्रमो यस्य सः जिष्णुरर्जुनश्च तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननाम । ततो बद्धाञ्जली तौ कृष्णार्जुनौ प्रति परमेष्ठिनां प्रभुर्भूमा पुरुषः ऊर्जया गम्भीरया गिरा आह स्म । अत्र गोवर्द्धनपूजायां "तस्मै नमो व्रजजनैः सह चक्रेत्मनात्मने ।" इतिवल्लीलाकौतुकमात्रार्थमेव ॥ ५८ ॥ द्विजेति ॥ युवयोर्युवां दिदृक्षुणा द्रष्टुमिच्छता मया द्विजात्मजा उपनीताः स्वसमीपमानीताः यतो धर्मस्य गुप्तये युवां मे कलयावतीर्णाविति अर्जुनवञ्चनार्थं यथा भगवांस्तं ननाम तथा सोऽपि छत्रिन्यायेन कलावतीर्णावित्युक्तवान् । अतो धर्मरक्षार्थम् अवनेर्भारभूतान् असुरान् हत्वा त्वरया झटिति ममान्तिकं मम समीपमिहेतम् आगच्छतम् वास्तवोऽर्थस्तु हे कलावतीर्णौ कलाभिः स्वशक्तिभिः सहैवावतीर्णौ भूयः पुनरपि युवाम् अवनेर्भरान् असुरान् हत्वा मे अन्ति ममान्तिकं तान् प्रस्थापयितुं त्वरयेतं त्वरेर्ण्यन्तााल्लिङि रूपं मित्त्वात् ह्रस्वत्वम्। अन्तीत्यव्ययं 'क्रियार्थोपपदस्य' इति चतुर्थ्यन्तम् अव्ययत्वाच्चतुर्थ्या लुक्। अत्रागत्य ते मुक्ता भवन्त्विति तद्धाम्नो मुक्तगम्यत्वेन हरिवंशोक्तत्वात् । द्वितीयस्कन्धेऽपि क्रममुक्तिसृतौ अष्टावरणभेदानन्तरमेव मोक्षश्रवणात् ॥ ५९ ॥ पूर्णेति ॥ ऋषभौ श्रेष्ठौ नरनारायणावृषी युवां पूर्णकामावपि स्थित्यै रक्षार्थं लोका जनाः संगृह्यन्ते धर्मे प्रवर्त्यन्तेऽनेन तथा तं धर्ममाचरतां प्रथमपुरुष आर्षः आचरतमित्यपि पाठः । इदं भारतयुद्धात्पूर्वं कृतमपि श्रैष्ठ्यक-

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ॥ कलावतीर्णाववनेर्भरासुरान्हत्वेह भूयस्त्वरयेतमन्तिमे ॥ ५९ ॥ पूर्णकामावपि युवां नरनारायणावृषी ॥ धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहम् ॥ ६० ॥ इत्यादिष्टौ भगवता तौ कृष्णौ परमेष्ठिना ॥ ओमित्यानम्य भूमानमादाय द्विजदारकान् ॥ ६१ ॥ न्यवर्ततां स्वकं धाम संप्रहृष्टौ यथागतम् ॥ विप्राय ददतुः पुत्रान्यथारूपं यथावयः ॥ ६२ ॥ निशाम्य वैष्णवं धाम पार्थः परमविस्मितः ॥ यत्किंचित्पौरुषं पुंसां मेने कृष्णानुकम्पितम् ॥ ६३ ॥

थनप्रस्तावेनात्रोक्तम् ॥६०॥ इतीति युग्मम् ॥ तौ कृष्णौ कृष्णार्जुनावित्येवं भगवता परमेष्ठिना भूमपुरुषेणादिष्टौ ओमिति तदाज्ञामङ्गीकृत्य तं भूमानं प्रणम्य द्विजपुत्रानादाय संप्रहृष्टौ यथागतं तथा स्वकं धाम न्यवर्तताम् तङभाव आर्षः । ततश्च यथारूपं यथावयः पूर्वरूपवयआदिसंपन्नान् पुत्रान् विप्राय ददतुः ॥ ६१ ॥ ६२ ॥ निशाम्येति ॥ वैष्णवं धाम महाकालपुरादिकं निशाम्य दृष्ट्वा परमविस्मयम् अत्याश्चर्यं प्राप्तः पार्थोऽर्जुनः पुंसां यत्किंचित्पौरुषं प्रभावस्तत्सर्वं कृष्णानुकम्पितं श्रीकृष्णकृपालब्धमेवेति मेने अयमत्रा शयः । भूमपुरुषेण श्रीकृष्णदर्शनार्थमेव ब्राह्मणबालानां स्वस्थानानयनं श्रीकृष्णेनाप्यर्जुनमदाहरणाय ब्राह्मणपुत्रमरणं सोढम् अतः श्रीकृष्णेच्छाप्रेरितो मुखरो विप्रः कृष्णस- न्निधावेव निष्ठुरां गाथामगायत । अर्जुनोऽपि सम्यग् विचार्य भूमपुरुषादधिकं श्रीकृष्णैश्वर्यं विलोक्य परमविस्मितोऽभूत् । हरिवंशे चोक्तम् । " मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना । " इत्यादि । एतच्चरितसमाप्तौ च " ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥ " इत्यादि ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवमीदृशान्यनेकानि वीर्याणि अतिमानुषान् पराक्रमान् इह भूलोके प्रदर्शयन् भगवान् कृष्णो ग्राम्यान् विषयान् बुभुजे । ऊर्जितैः पुष्कलदक्षिणैर्मखैर्देवादीन् ईजे च ॥ ६४ ॥ प्रववर्षेति ॥ श्रैष्ठ्यं श्रेष्ठत्वमास्थितो भगवान् ब्राह्मणादिषु प्रजासु अखिलान् कामान् अभिलषितान् विषयान् यथाकालं तत्तदवसरे प्रववर्ष संपादयामास । तत्र दृष्टान्तमाह । यथैव इन्द्रो यथाकालं जलं वर्षति तथेति ॥ ६५ ॥ हत्वेति ॥ अधर्मिष्ठान्नृपान् कांश्चित्स्वयं हत्वा कांश्चिच्चार्जुनादिभिर्घातयित्वा धर्मसुतादिभिर्युधिष्ठिरादिभिरञ्जसा अनायासेन वर्णाश्रमधर्मप्रयुक्तं धर्मं वर्तयामास ॥ ६६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहाय एकोननवतेः पूरणे व्यधात् ॥ ८९ ॥ चरमे क्रीडनं स्त्रीभिस्तासां प्रेमरसा गिरः ॥ विस्तृतिर्यादवानां च श्लोकास्तत्राभ्रमौर्गणाः ॥ उवाचद्वितयं सार्द्धा स्याद् द्वौ षष्टिरनुष्टुभाम् ॥ ९० ॥ "मधुरेण समापयेत्" इति न्यायेन लीलाकथनान्ते कृष्णस्य जलविहारवर्णनम् । तत्र प्रथममुद्दीपकत्वेन नगररामणीयकमाह–सुखमिति षट्कम् ॥ सर्वाभिः सम्पद्भिः समृद्धायां वृष्णिपुङ्गवैर्यादवश्रेष्ठैः जुष्टायाम् उत्तमो वेषो वस्त्राभरणाद्यलङ्कारो यासां ताभिः नवयौवनेन कान्तिर्यासां ताभिः कन्दुकादिभिर्हर्म्येषु क्रीडन्तीभिः तडितामिव द्यौर्द्युतिर्यासां ताभिः स्त्रीभिश्च

इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन् ॥ बुभुजे विषयान्ग्राम्यानीजे चात्यूर्जितैर्मखैः ॥६४॥ प्रववर्षाखिलान्कामान्प्रजासु ब्राह्मणादिषु ॥ यथाकालं यथैवेन्द्रो भगवाञ्छ्रैष्ठ्यमास्थितः ॥ ६५ ॥ हत्वा नृपानधर्मिष्ठान्घातयित्वार्जुनादिभिः ॥ अञ्जसा वर्तयामास धर्मं धर्मसुतादिभिः ॥६६॥ इति श्रीभागवते महापुराणे दशमस्कन्धे उत्तरार्धे द्विजकुमारानयनं नाम एकोननवतितमोऽध्यायः ॥ ८९ ॥ श्रीशुक उवाच ॥ सुखं स्वपुर्यां निवसन्द्वारकायां श्रियः पतिः ॥ सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुङ्गवैः ॥ १ ॥ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकान्तिभिः ॥ कन्दुकादिभिर्हर्म्येषु क्रीडन्तीभिस्तडिद्द्युभिः ॥ २ ॥ नित्यं सङ्कुलमार्गायां मदच्युद्भिर्मतङ्गजैः ॥ स्वलंकृतैर्भटैरश्वै रथैश्च कनकोज्ज्वलैः ॥ ३ ॥ उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु ॥ निर्विशद्भृङ्गविहगैर्नादितायां समन्ततः ॥ ४ ॥ रेमे षोडशसाहस्रपत्नीनामेकवल्लभः ॥ तावद्विचित्ररूपोऽसौ तद्गेहेषु महर्द्धिषु ॥ ५ ॥ प्रोत्फुल्लोत्पलकह्लारकुमुदाम्भोजरेणुभिः ॥ वासितामलतोयेषु कूजद्द्विजकुलेषु च ॥ ६ ॥

जुष्टायां मदच्युद्भिर्मतङ्गजैर्नित्यं सङ्कुला व्याप्ता मार्गा यस्यां तस्यां द्वारकायां स्वलंकृतैर्भटैरश्वैः कनकेनोज्ज्वलै रथैश्च नित्यं संकुलमार्गायाम् उद्यानैः पुष्पप्रधानैः उपवनैः फलप्रधानैश्चारामैराढ्यायां सम्पन्नायां पुष्पिता ये द्रुमास्तेषां राजिषु पङ्क्तिषु निर्विशद्भिर्भृङ्गैर्भ्रमरैः विहङ्गैः पक्षिभिश्च समंततः सर्वतो नादितायां द्वारकायां स्वपुर्यां सुखं निवसन् यतः षोडशसाहस्रपत्नीनामेक एव वल्लभः अतस्तावद्विचित्ररूपोऽसौ श्रियः पतिः श्रीकृष्णः महर्द्धिषु महासमृद्धियुक्तेषु प्रोत्फुल्लानां सन्ध्यारात्रिदिनविकासयुक्तानामुत्पलादीनां रेणुभिर्वासितानि अमलानि तोयानि येषु तेषु तथा कूजन्ति द्विजानां पक्षिणां कुलानि गृहारामवाप्यादिसंबन्धीनि येषु तेषु तासां गृहेषु रेमे ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विजहारेति ॥ तथा ह्रदिनीषु सरस्यादिरूपासु अम्भो विगाह्य महानुदयो वैभवं यस्य सः योषितां योषिद्भिश्च परिरब्ध आलिङ्गितः अत एव कुचकुङ्कुमेन लिप्ताङ्गो विजहार ॥ ७ ॥ उपेति द्वयम् ॥ मृदङ्गादीनि वादयद्भिर्गन्धर्वैस्तथा सूतादिभिश्चोपगीयमानः अच्युतोऽपि जलक्रीडायामस्माभिः पराभूत इति मत्वा हसन्तीभिस्ताभिर्योषिद्भिः स्म-रेचकैः सेचनपात्रैः पिचकारीति प्रसिद्धैः स्मेति पादपूर्त्तौ । रेचकशब्द एव वा तद्वाची तैः सिच्यमानः स्वयमपि ताः प्रतिषिञ्चन् अच्युतः कृष्णः यक्षीभिः सह यक्षराट् कुबेर इव चिक्रीडे क्रीडितवान् । कर्मव्यतिहारे तङ् ॥ ८ ॥ ९ ॥ ता इति ॥ क्लिन्नानि सिक्तानि वस्त्राणि यासां ताः अत एव विवृता ऊरुकुचप्रदेशा यासां ताश्च उद्धृतानि विस्रस्तानि बृहत्कवरेभ्यः प्रसूनानि यासां ताः स्मरेचकस्य जिहीर्षया हरणेच्छया तं कान्तमुपगूह्यालिङ्ग्य तेन जातस्मरेण य उत्सवः उत्कृष्टो हासस्तेन लसन्ति वदनानि यासां ता विरेजुः ॥ १० ॥ कृष्ण इति ॥ कृष्णस्तु तासां स्तनेभ्यो विषञ्जितकुङ्कुमा स्रग्यस्य स क्रीडायामभिषङ्गेणाभिनिवेशेन धुतः कम्पितः कुन्तलवृन्दबन्धो यस्य सः स्वयं

विजहार विगाह्याम्बो ह्रदिनीषु महोदयः ॥ कुचकुङ्कुमलिप्ताङ्गः परिरब्धश्च योषिताम् ॥ ७ ॥ उपगीयमानो गन्धर्वैर्मृदङ्गपणवानकान् ॥ वादयद्भिर्मुदा वीणां सूतमागधबन्दिभिः ॥ ८ ॥ सिच्यमानोऽच्युतस्ताभिर्हसन्तीभिः स्म रेचकैः ॥ प्रतिसिञ्चन्विचिक्रीडे यक्षीभिर्यक्षराडिव ॥ ९ ॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिञ्चन्त्य उद्धृतबृहत्कबरप्रसूनाः ॥ कान्तं स्म रेचकजिहीरषयोपगुह्य जातस्मरोत्सवलसद्वदना विरेजुः ॥ १० ॥ कृष्णस्तु तत्स्तनविषज्जितकुङ्कुमस्रक् क्रीडाभिषङ्गधुतकुन्तलवृन्दबन्धः ॥ सिञ्चन्मुहुर्युवतिभिः प्रतिषिच्यमानो रेमे करेणुभिरिवेभपतिः परीतः ॥ ११ ॥ नटानां नर्तकीनां च गीतवाद्योपजीविनाम् ॥ क्रीडालंकारवासांसि कृष्णोऽदात्तस्य च स्त्रियः ॥ १२ ॥ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः ॥ नर्मक्ष्वेलिपरिष्वङ्गैः स्त्रीणां किल हृता धियः ॥ १३ ॥ ऊचुर्मुकुन्दैकधियो गिर उन्मत्तवज्जडम् ॥ चिन्तयन्त्योऽरविन्दाक्षं तानि मे गदतः शृणु ॥ १४ ॥

मुहुस्ताः सिञ्चन् युवतिभिः प्रतिषिच्यमानः करेणुभिर्गजीभिः परिवृतो गजराडिव रेमे ॥ ११ ॥ नटानामिति ॥ क्रीडार्थं यानि स्वयं धृतान्यलङ्कारवासांसि तानि गीतैर्वाद्यैश्चोपजीवन्ति तेषां तेभ्यो नटादिभ्यः कृष्णोऽदात् तथा तस्य स्त्रियश्च ददुः ॥ १२ ॥ कृष्णस्येति ॥ एवं विहरतः कृष्णस्य गत्यादिभिः स्त्रीणां धियो हृताः ॥ १३ ॥ ऊचुरिति ॥ मुकुन्द एवैकस्मिन्धीर्यासां तास्तत्सान्निध्यदशायामपि कामोन्मादात्परोक्षतया तमेवारविन्दाक्षं चिन्तयन्त्यः आगिरः क्षणं धृतमौनाः सत्यः तत उन्मत्ता इव जडम् अनन्वितं यथा भवति तथा यानि वाक्यानि ऊचुस्तानि गदतः कथयतो मे मत्तः शृणु । अत्रापरोक्षपक्षे भगवांस्तच्छ्रवणकौतुकाय तत्रैव स्थित इति ज्ञेयम् । वैचित्र्यविप्रलम्भाख्योऽयं भावः । वोपदेवेन मुक्ताफलग्रन्थे प्रकटीकृतः इयं प्रेम्णः षष्ठी भूमिका ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुररीति ॥ हे कुररि अस्मिन् जगति रात्र्यामीश्वरः श्रीकृष्णः गुप्तः बाह्यविषयादान्तरीकृतो बोधो ज्ञानं यस्य तथाभूतः सन् स्वपिति । त्वं तु विगतनिद्रा सती विलपसि तन्निद्राभङ्गं कुर्वती आक्रोशसि नतु शेषे । तदनुचितमित्यर्थः । अथवा तव नापराधः इत्याहुः । हे सखि वयमिव नलिननयनस्य कृष्णस्य हासेन हसितेन यदुदारं लीलयेक्षितं तेन गाढं यथा भवति तथा निर्भिन्नं चेतो यस्याः तथाभूता कच्चित्त्वमसि ॥ १५ ॥ नेत्रे इति ॥ हे चक्रवाकि नक्तं रात्रौ त्वं नेत्रे निमीलयसि करुणं यथा स्यात्तथा रोरवीषि पुनः पुनः रौषि तत्किमदृष्टबन्धुः अदृष्टपतिरसि किंवा वयमिव दास्यं गता सती अच्युतस्य पादजुष्टां स्रजं कबरेण वोढुं स्पृहयसे ततो व्यग्रचित्तासीति ॥ १६ ॥ भो इति ॥ भो भो उदन्वन् समुद्र अलब्धनिद्रः अधिगतप्रजागरः प्राप्तजागरणश्च त्वं सदा निष्टनसे शब्दं करोषि तत्कर्षः । तत्किमस्माभिः प्राप्तां दुरत्ययामनिवर्त्यां दशां मोहरूपां त्वमपि गतोऽसि । वाशब्द उपमार्थे । यथा वयं संभोगेन मुकुन्दापहृतकुङ्कुमादिलाञ्छनास्तथा त्वमप्यपहृतश्रीकौस्तुभादिलाञ्छनो लक्ष्यसे ॥ १७ ॥ त्वमिति ॥ हे इन्दो त्वं बलवता

महिष्य ऊचुः ॥ कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ॥ वयमिव सखि कच्चिद्गाढनिर्भिन्नचेता नलिननयनहासोदारलीलेक्षितेन ॥ १५ ॥ नेत्रे निमीलयसि नक्तमदृष्टबन्धुस्त्वं रोरवीषि करुणं बत चक्रवाकि ॥ दास्यं गता वयमिवाच्युतपादजुष्टां किं वा स्रजं स्पृहयसे कबरेण वोढुम् ॥ १६ ॥ भो भोः सदा निष्टनसे उदन्वन्नलब्धनिद्रोऽधिगतप्रजागरः ॥ किंवा मुकुन्दापहृतात्मलाञ्छनः प्राप्तां दशां त्वं च गतो दुरत्ययाम् ॥ १७ ॥ त्वं यक्ष्मणा बलवताऽसि गृहीत इन्दो क्षीणस्तमो न निजदीधितिभिः क्षिणोषि ॥ कच्चिन्मुकुन्दगदितानि यथा वयं त्वं विस्मृत्य भोः स्थगितगीरुपलक्ष्यसे नः ॥१८॥ किं वा चरितमस्माभिर्मलयानिल तेऽप्रियम् ॥ गोविन्दापाङ्गनिर्भिन्ने हृदीरयसि नः स्मरम् ॥ १९ ॥ मेघ श्रीमंस्त्वमसि दयितो यादवेन्द्रस्य नूनं श्रीवत्साङ्कं वयमिव भवान्ध्यायति प्रेमबद्धः ॥ अत्युत्कण्ठः शबलहृदयोऽस्मद्विधो बाष्पधाराः स्मृत्वा स्मृत्वा विसृजसि मुहुर्दुःखदस्तत्प्रसङ्गः ॥ २० ॥

यक्ष्मणा क्षयरोगेण गृहीतः अत एव क्षीणः सन् निजदीधितिभिः स्वकान्तिभिस्तमोऽन्धकारं न क्षिणोषि न विनाशयसि कच्चित् । किं वा यथा वयं तथा त्वमपि मुकुन्दगदितानि रहस्यानि विस्मृत्य तदेकचिन्तया स्थगितगीः स्तब्धवाक् स्थितोऽसि । नः अस्माभिस्तथैवोपलक्ष्यसे ॥ १८ ॥ किमिति ॥ हे मलयानिल अस्माभिस्ते तव किंवा अप्रियमनिष्टमाचरितं यतस्त्वं गोविन्दस्यापाङ्गैर्नितरां भिन्ने नोऽस्माकं हृदि हृदये स्मरं काममीरयसि प्रेरयसि अतः अप्रियाचरणं विना स्मरोदीरणेनास्मद्व्यथाजननं तवानुचितमित्यर्थः ॥ १९ ॥ मेघेति ॥ हे मेघ आतपहरण श्यामत्वादिसाम्यात् त्वं नूनं यादवेन्द्रस्य कृष्णस्य दयितः प्रियोऽसि अत एव वयमिव तद्विषयकेण प्रेम्णा बद्धो निश्चलः सन् भवांस्तमेव श्रीवत्साङ्कं ध्यायति । ध्याने लिङ्गमाहुः । अस्मद्विधो वयमिव अत्युत्कण्ठः तद्दर्शनाद्युत्साहयुक्तः तत्र हेतुः शबलहृदयः प्रेम्णार्द्रीकृतचित्तस्त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृत्वा स्मृत्वा मुहुर्बाष्पाणामश्रूणां धारा विसृजसि विमुञ्चसि । अहो किमिति तेन त्वया सख्यं कृतं यतस्तस्य प्रकृष्टः सङ्गः दुःखद इति ॥ २० ॥ प्रियेति ॥ हे कोकिलवल्गितकण्ठ वल्गुः कृतः कण्ठो येन तत्संबुद्धिः वल्गुशब्दात्तत्करोतीति णिजन्तात् क्तः । प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानीव पदानि शब्दान् त्वं भाषसे । यद्वा । हे प्रियराव कोकिल अनया गिरा पदानि अस्मद्विरहदुःखत्राणान्येव भाषसे । " पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु । " इत्यमरः । अतो मृतान् सञ्जीवयतीति तथाभूतयानया मधुरया गिरा त्वं मे वद । अद्य ते तव किं प्रियं करवाणीति । अत्र विरहे कोकिलशब्दस्य दुःखदत्वात् प्रियरावेत्याद्याः सर्वा एव विपरीतलक्षणया वक्रोक्तय एव तेन शब्देन मां दुःखयतस्तव तुण्डमेव धक्ष्यामीति ॥ २१ ॥ नेति ॥ हे क्षितिधर हे पर्वत हे उदारबुद्धे महाबुद्धे त्वं न चलसि न च किंचिद्वदसि अतो नूनं महान्तं कञ्चिदर्थं चिन्तयसे बत तर्हि अपि किं वयं तथा वसुदेवनन्दनस्याङ्घ्रिं स्तनैर्विधर्तुं कामयामहे तथा त्वमपि स्तनतुल्यैः शृङ्गैर्वोढुं कामयसे । एवं चेत्तर्हि तवाप्यस्मदवस्था भविष्यतीति भावः ॥ २२ ॥ शुष्यदिति ॥ हे सिन्धुपत्न्यो नद्यः यद्वत् यथा वयं मधुपतेः कृष्णस्य प्रणयावलोकमप्राप्य मुष्टानि अपहृतानि हृदयानि यासां ताः पुरुकर्शितास्तथा किं

प्रियरावपदानि भाषते मृतसंजीविकयाऽनया गिरा ॥ करवाणि किमद्य ते प्रियं वद मे वल्गितकण्ठ कोकिल ॥ २१ ॥ न चलसि न वदस्युदारबुद्धे क्षितिधर चिन्तयसे महान्तमर्थम् ॥ अपि बत वसुदेवनन्दनाङ्घ्रिं वयमिव कामयसे स्तनैर्विधर्तुम् ॥ २२ ॥ शुष्यद्ध्रदाः कृशतरा बत सिन्धुपत्न्यः संप्रत्यपास्तकमलश्रिय इष्टभर्तुः ॥ यद्वद्वयं यदुपतेः प्रणयावलोकमप्राप्य मुष्टहृदयाः पुरुकर्शिताः स्म ॥ २३ ॥ हंस स्वागतमास्यतां पिब पयो ब्रूह्यङ्ग शौरेः कथां दूतं त्वां नु विदाम कच्चिदजितः स्वस्त्यास्त उक्तं पुरा ॥ किंवा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयं क्षौद्रालापय कामदं श्रियमृते सैवैकनिष्ठा स्त्रियाम् ॥ २४ ॥

यूयमपि संप्रति ग्रीष्मे इष्टस्य भर्तुः सिन्धोः प्रणयावलोकं मेघद्वारा प्रवाहपूर्तिमप्राप्य शुष्यन्तो ह्रदा यासां ताः तथा अपास्ता निर्गता कमलश्रीः कमलशोभा यासां ताः कर्शिताः स्थ ॥ २३ ॥ तदानीमेव दैवादागतं हंसं दूतं कल्पयित्वाहुः—हंसेति ॥ अङ्ग हे हंस ते स्वागतम् अत्रास्यतामुपविश्यतां पयः क्षीरं पिब शौरेः श्रीकृष्णस्य कथां वार्तां ब्रूहि । त्वां तु तस्य दूतं विदाम विद्मः आर्षोऽयम् । अतः चलं सौहृदं यस्य सः अजितः किं स्वस्त्यास्ते । यच्च नोऽस्मान् प्रति न त्वादृशीं प्रणयिनीं पश्यामीत्यादि पुरोक्तं तत्किं स्मरति । हे क्षौद्र क्षुद्रस्य दूत तं वयं कस्माद्भजामः श्रियमृते इति । या अस्मान् वञ्चयित्वा एकाकिनी रमते तां श्रियं हित्वा कामदं तमेवालापय इहाकारय । स्त्रियामिति जातावेकवचनम् । अस्मासु स्त्रीषु मध्ये किं सैवैकनिष्ठा ननु वयं तथेत्यर्थः।क्षौद्रालापमकामदमिति स्त्रिय इति च पाठान्तरे । क्षौद्रं मधुतद्वन्मधुरालापमात्रं यस्य तम् अकामदम् अरतिप्रदं श्रियमृते वयं कस्माद्भजामः किं त्वनादृता अपि सती सैव तं भजतु एकनिष्ठा एकत्रैव स्वसंमानसिद्धौ निष्ठा यासां तथाभूता मानिन्यः स्त्रियो वयमिति॥ २४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ माधव्यो माधवस्य स्त्रियः इत्येवं योगेश्वरेश्वरे कृष्णे इति क्रियमाणेन ईदृशेनानुपमेयेन भावेन प्रेम्णा परमां गतिं वैष्णवीं मुक्तिं लेभिरे ॥ २५ ॥ श्रुतमात्र इति ॥ उरुभिर्गायैर्गीतैरुरु बहु गीतोऽत एव कथंचिच्छ्रुतमात्रोऽपि वा यः प्रसह्य बलात् स्त्रीणां मनः आकर्षते तत्संदर्शः । साक्षात्पश्यन्तीनां स्वपत्नीनां मनआकर्षणे पुनः किं वक्तव्यम् ॥२६॥ या इति ॥ याः स्त्रियः जगद्गुरुं श्रीकृष्णं भर्तृबुद्ध्या पादसंवाहनादिभिः प्रेम्णा पर्यचरन् सेवितवत्यस्तासां तपः पुण्यमस्माभिः किं वर्ण्यते कथं वक्तुं शक्यते ॥२७॥ एवमिति ॥ सतां गतिः कृष्णः एवं वेदोक्तं धर्मं मुहुरनुतिष्ठन् गृहं धर्मादीनां पदमित्यदर्शयत् ॥ २८ ॥ आस्थितस्येति ॥ गृहमेधिनां गृहस्थानां परं धर्ममास्थितस्य अनुतिष्ठतः कृष्णस्य षोडशेति अत्र अष्टोत्तरेति शेषः । अतः अष्टोत्तरशताधिकं षोडशसाहस्रं महिष्य आसन् ॥ २९ ॥ तासामिति ॥ स्त्रीरत्नभूतानां तासां मध्ये रुक्मिणी-

इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे ॥ क्रियमाणेन माधव्यो लेभिरे परमां गतिम् ॥२५॥ श्रुतमात्रोऽपि यः स्त्रीणां प्रसह्याकर्षते मनः ॥ उरुगायोरुगीतो वा पश्यन्तीनां कुतः पुनः ॥२६॥ याः स पर्यचरन्प्रेम्णा पादसंवाहनादिभिः ॥ जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥२७॥ एवं वेदोदितं धर्ममनुतिष्ठन्सतां गतिः ॥ गृहं धर्मार्थकामानां मुहुश्चादर्शयत्पदम् ॥२८॥ आस्थितस्य परं धाम कृष्णस्य गृहमेधिनाम् ॥ आसन्षोडशसाहस्रं महिष्योष्टशताधिकम् ॥२९॥ तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदाहृताः ॥ रुक्मिणीप्रमुखा राजंस्तत्पुत्राश्चानुपूर्वशः ॥३०॥ एकैकस्यां दश दश कृष्णोऽजीजनदात्मजान् ॥ यावत्य आत्मनो भार्या अमोघगतिरीश्वरः ॥३१॥ तेषामुद्दामवीर्याणामष्टादश महारथाः ॥ आसन्नुदारयशसस्तेषां नामानि मे शृणु ॥ ३२ ॥ प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान्भानुरेव च ॥ साम्बो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ॥ ३३ ॥ पुष्करो वेदबाहुश्च श्रुतदेवः सुनन्दनः ॥ चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव च ॥ ३४ ॥ एतेषामपि राजेन्द्र तनुजानां मधुद्विषः ॥ प्रद्युम्न आसीत्प्रथमः पितृवद्रुक्मिणीसुतः ॥ ३५ ॥

प्रमुखा या अष्टौ प्रागुदाहृताः पूर्वं कथितास्तासां पुत्राश्चानुपूर्वशः विशेषतः कथिताः ॥ ३० ॥ एकेति ॥ अमोघरतिः अव्यर्थसुरतान्तः " दशास्यां पुत्रानाधेहि " इति श्रुत्यनुसारिसत्यसङ्कल्पः इति भावः । ईश्वरः कृष्णः यावत्य आत्मनो भार्यास्तासु एकैकस्यां दश दश पुत्रान् अजीजनत् तथा चैकं लक्षमशीत्युत्तरैकषष्टिसहस्राणि पुत्रा जाताः ॥ ३१ ॥ तेषामिति ॥ तेषां पुत्राणां मध्ये अष्टादश पुत्रा महारथा अत एव उदारयशसो विपुलकीर्तय आसन् तेषां नामानि मे मत्तः शृणु ॥ ३२ ॥ प्रद्युम्नश्चेति द्वयम् ॥ अनिरुद्धस्यापि गणनात्पुत्रेषु सप्तदशैव महारथा ज्ञेयाः । अथवा अनिरुद्धनामापि कश्चित्पुत्र एव पौत्रस्य पृथक्कथनात् । विरूप इति पूर्वं वरूथनाम्नोक्त इति तोषणी ॥ ३३ ॥ ३४ ॥ एतेषामिति ॥ हे राजेन्द्र एतेषां मधुद्विषः कृष्णस्य पुत्राणां मध्ये प्रथमः पुत्रः रुक्मिणीसुतः प्रद्युम्नः पितृवत् रूपेण गुणैश्च पितृतुल्य आसीत् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ सच महारथः प्रद्युम्नः रुक्मिणो मातुलस्य दुहितरमुपयेमे तस्मात् प्रद्युम्नात् नागानां हस्तिनां यदयुतं दशसहस्रं तस्य यद्बलं तेनान्वितो युक्तः अनिरुद्धाख्यः पुत्रोऽभूत् ॥ ३६ ॥ स इति ॥ स चाप्यनिरुद्धो रुक्मिणो दौहित्रोऽपि तस्यैव पौत्रीं जगृहे उपयेमे । ततोऽनिरुद्धात् तस्यां वज्रो नाम पुत्रोऽभूत् । यस्तु वज्रो मौसलात् मुसलनिमित्तयदुकुलक्षयात् भगवता अवशेषितः ॥ ३७ ॥ प्रतीति ॥ तस्माद्वज्रात् प्रतिबाहुरभूत् तस्य प्रतिबाहोरात्मजः सुबाहुः सुबाहोर्धर्मसेनाख्यः सुतः अभूत् । तस्य च सुतः श्रुतसेनोऽभूत् । अग्रे वंशानुक्तिः साङ्कर्यादिना वंशलोपारम्भात् इति तोषणीसारे ॥ ३८ ॥ नेति ॥ एतस्मिन्कुले अधना निर्धनाः दरिद्रादयो न जाताः किंतु धनादिसंपन्ना एव जाताः ॥ ३९ ॥ यदुवंशेति ॥ हे नृप विख्यातकर्मणां कर्मभिः प्रसिद्धानामपि यादवानां चिरजीविनां पुरुषेण वर्षायुतैरपि सङ्ख्या कर्तुं न शक्यते ॥ ४० ॥ तिस्र इति ॥ सहस्राणामसङ्ख्यातानां कुमाराणां पाठकाः यदुकुलाचार्याः तिस्रः कोट्यः अष्टाशीतिशतानि चासन्निति श्रुतिः श्रवणमस्ति । तोषणी तु सहस्राणामिति

स रुक्मिणो दुहितरमुपयेमे महारथः ॥ तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ॥ ३६ ॥ स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥ वज्रस्तस्याभवद्यस्तु मौसलादवशेषितः ॥ ३७ ॥ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्य चात्मजः ॥ सुबाहोः शान्तसेनोभूच्छतसेनस्तु तत्सुतः ॥ ३८ ॥ न ह्येतस्मिन्कुले जाता अधना अबहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ॥ ३९ ॥ यदुवंशप्रसूतानां पुंसां विख्यातकर्मणाम् ॥ सङ्ख्या न शक्यते कर्तुमपि वर्षायुतैर्नृप ॥ ४० ॥ तिस्रः कोट्यः सहस्राणामष्टाशीतिशतानि च ॥ आसन्यदुकुलाचार्याः कुमाराणामिति श्रुतम् ॥ ४१ ॥ सङ्ख्यानं यादवानां कः करिष्यति महात्मनाम् ॥ यत्रायुतानामयुतलक्षेणास्ते स आहुकः ॥ ४२ ॥ देवासुराहवहता दैतेया ये सुदारुणाः ॥ ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे ॥ ४३ ॥

एकैकं सहस्रमेकैकस्याचार्यस्य शिष्या इति सहस्रगुणिताचार्यसङ्ख्यैव कुमारसङ्ख्येत्याह ॥ ४१ ॥ नित्यराजसेवकसङ्ख्यामाह—सङ्ख्यानमिति ॥ यदा प्रत्येकं बहूनध्यापयतामाचार्याणामियं सङ्ख्या तदपि श्रुतिमात्रं नतु सम्यक् ज्ञायते तदा कुमाराणामेव सङ्ख्या कर्तुं न शक्यते कुतः पुनः सर्वेषां यादवानामिति । यत्र येषु मध्ये अयुतानामयुतलक्षेण सह सः राजतया प्रसिद्ध आहुक उग्रसेन आस्ते।अत्रायुतानामिति बहुत्वं कपिञ्जलाधिकरणन्यायेन त्रित्वविशिष्टायां सङ्ख्यायां पर्यवस्यति । तेन अयुतानामयुतलक्षेण शङ्खत्रयेणेत्यर्थः । आस्ते इति लट् नित्यं लीलास्फूर्त्या ॥ ४२ ॥ यादवा द्विविधाः देवाः नित्यपार्षदाश्च तत्र देवानामवतीर्णत्वसङ्ख्यत्वं च सहेतुकमाह—देवेति ॥ देवासुराहवे अमृतार्थं देवासुरसङ्ग्रामे सुदारुणा अतिभयंकरा ये दैतेया हतास्ते मनुष्येषु प्रत्येकं बहुभी रूपैरुत्पन्ना दृप्ता गर्विताश्च सन्तः प्रजा बबाधिरे ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिति ॥ हे नृप तेषां निग्रहाय विनाशाय हरिणा प्रोक्ता आदिष्टा देवाः यदोः कुले अवतीर्णाः तेषां वृष्ण्यन्धकदाशार्हादिरूपेणैकाधिकं शतं कुलं प्रकृतम् । व्यक्तीनामानन्त्यात्कुलस्यैव सङ्ख्या कृता ॥ ४४ ॥ नित्यपार्षदानां ततोप्याधिक्यमाह—तेषामिति ॥ ये च तस्य भगवतोऽनुवर्तिनः आज्ञानुसारिणः सेवकास्ते सर्वे यादवा ववृधुः । धनधामबलादिवृद्धिं प्राप्ताः तङभाव आर्षः।तेषां यादवानां सङ्ख्यायाः प्रभुत्वेन स्वामित्वेन भगवान् हरिरेव प्रमाणं साक्षी अभवत् । अन्येषां तत्सङ्ख्याया बोद्धुमशक्यत्वात् ॥ ४५ ॥ शय्येति ॥ कृष्णचेतसः वृष्णयः शय्यादिषु सन्तं वर्तमानमात्मानं स्वदेहमपि न विदुरन्यविस्मृतेः का वार्ता ॥ ४६ ॥ श्रीकृष्णलीलारत्नाकरं दशमस्कन्धं समापयन् श्रीकृष्णस्यान्यावतारवैलक्षण्यपञ्चकमाह—तीर्थमिति ॥ हे नृप इतः पूर्वं गङ्गैव तीर्थमासीत् अधुना तु यदुषु यदजनि जातं श्रीकृष्णकीर्तिरूपं तीर्थं तदेतत् कर्तृपादशौचरूपं स्वःसरित् गङ्गाख्यं तीर्थमूनं चक्रे । श्रीकृष्णकीर्तिरेव सर्वतीर्थोपरि विराजते इत्येकं चित्रम् । तथा तस्य श्रीकृष्णस्य परमकारुणिकत्वाद्विद्विषः शत्रवः स्निग्धा भक्ताश्च तत्स्वरूपं तत्सायुज्यं ययुः इति द्वितीयम् । तथा यदर्थे लक्ष्म्याः कृपावलोकनार्थमन्येषां ब्रह्मादीनां तपआदि यत्नो भवति सा श्रीर्लक्ष्मीरप्यजितपरा

तन्निग्रहाय हरिणा प्रोक्ता देवा यदोः कुले ॥ अवतीर्णाः कुलशतं तेषामेकाधिकं नृप॥४४॥ तेषां प्रमाणं भगवान्प्रभुत्वेनाभवद्धरिः ॥ ये चानुवर्तिनस्तस्य ववृधुः सर्वयादवाः ॥ ४५ ॥ शय्यासनाटनालापक्रीडास्नानादिकर्मसु ॥ न विदुः सन्तमात्मानं वृष्णयः कृष्णचेतसः ॥ ४६ ॥ तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वःसरित्पादशौचं विद्विट्स्निग्धाः स्वरूपं ययुरजितपरा श्रीर्यदर्थेऽन्ययत्नः ॥ यन्नामाऽमङ्गलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः कृष्णस्यैतन्न चित्रं क्षितिभरहरणं कालचक्रायुधस्य ॥ ४७ ॥ जयति जननिवासो देवकीजन्मवादो यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ॥ स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्धयन्कामदेवम् ॥ ४८ ॥

श्रीकृष्णसेवापरायणा तदधीनेत्यर्थः । इति तृतीयम् । तथा श्रुतम् अथवा गदितम् उच्चारितम् अर्थानुसन्धानं विनापि यस्य नाम अमङ्गलघ्नमिति तुर्यम् । तथा गोत्रेषु तत्तदृषिवंशेषु धर्मो यत्कृतो येन प्रवर्तितो वर्तते । यद्वा । गां सर्वां पृथिवीं त्रायते इति गोत्रस्तादृशश्चतुष्पाद्धर्मो यत्कृतः चतुर्भिर्वर्तसे येन पादैरिति प्रागुक्तेः । इति पञ्चमम् । तस्य कालचक्रं सर्वसंहारककालाभिमतिचक्रं सुदर्शनमायुधं यस्य श्रीकृष्णस्यैतत् क्षितेर्भरहरणं चित्रमसंभावितत्तयाश्चर्यकरं न भवति ॥ ४७ ॥ जयतीति ॥ जनानां निवास आश्रयभूतः जनेष्वन्तर्यामितया निवासो यस्येति वा देवक्यां जन्मेति वादमात्रं यस्य स यदुवराः पर्षत्सभा यस्य सः दोर्भिर्भुजैरधर्मम् अस्यन् निराकुर्वन् स्थिरचराणां ॥२९५॥ अधिकारिविशेषानपेक्षमेव वृन्दावनगततरुतृणलतादीनां सर्वेषां वृजिनघ्नः संसारदुःखहन्ता तथा शोभनं स्मितं यस्मिंस्तेन श्रीमुखेन व्रजवनितानां गोपीनां पुरवनितानां कुब्जादीनां रुक्मिण्यादीनां च कामदेवं कामश्चासौ दीव्यति जिगीषति संसारमिति देवस्तं भोगद्वारा मोक्षप्रदमित्यर्थः । यद्वा । कामश्चासौ दीव्यति विराजते कामदेवः प्रेमरू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परतं वर्द्धयन् श्रीकृष्णो जयति ॥४८॥ इत्थमिति ॥ अमुष्य कृष्णस्य पदयोरनुवृत्तिमासक्तिमिच्छन् जनः इत्थमुक्तप्रकारेण निजवर्त्मरिरक्षया स्वकृतवेदमार्गरक्षणेच्छया सनि इडभाव आर्षः । आत्ता गृहीता लीलातनुर्येन तस्य परस्य परमेश्वरस्य यदूत्तमस्य तदनुरूपविडम्बनानि मनुष्यावतारयोग्यचेष्टानुकारीणि कर्मकषणानि पापनिवर्तकानि कर्माणि श्रूयात् शृणुयात् ॥ ४९ ॥ मर्त्य इति ॥ मर्त्यो मनुष्यस्तया मुकुन्दस्य श्रीमत्या कथायाः श्रवणकीर्तनोत्पन्नया चिन्तया आसक्त्या अनुसवं प्रतिक्षणमेधितया दुस्तरो यः

इत्थं परस्य निजवर्त्मरिरक्षयाऽऽत्तलीलातनोस्तदनुरूपविडम्बनानि ॥ कर्माणि कर्मकषणानि यदूत्तमस्य श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥ ४९ ॥ मर्त्यस्तयानुसवमेधितया मुकुन्दश्रीमत्कथाश्रवणकीर्तनचिन्तयैति ॥ तद्धाम दुस्तरकृतान्तजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥५०॥ इति श्रीभागवते महापुराणे दशमस्कन्धेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां श्रीकृष्णचरितानुवर्णनं नाम नवतितमोऽध्यायः ॥ ९० ॥

कृतान्तस्य कालस्य जवो वेगस्तस्यापवर्गो निवृत्तिर्यस्मात्तत् तस्य धाम एति यदर्था यत् धाम यानुवृत्तिर्वा अर्थः प्रयोजनं येषां ते क्षितिभुजः सकलभूमिपतयोऽपि ग्रामात् राज्यादिकं परित्यज्य श्रवणादिसाधनानुष्ठानार्थं वनं ययुः ॥ ५० ॥ मामेकमेव शरणं व्रज मा स्म शोचीरित्यर्जुनं जिगदिषोः परमस्य पुंसः ॥ तत्कालजातकरुणोद्गतगद्गदत्वह्रस्वाक्षरा जयति मा शुच इत्यसौ वाक् ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमस्याध्याये चरमे व्यधात् ॥ ९० ॥

अयं श्रीमद्भागवतस्य दशमस्कन्धोऽन्वयार्थप्रकाशिकाख्यव्याख्यासमेतः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वकीये " लक्ष्मीवेंकटेश्वर " मुद्रणागारे मुद्रयित्वा प्रकाशितः । संवत् १९५७ शकाब्दाः १८२२.

पुस्तक मिलनेका ठिकाना–

गंगाविष्णु श्रीकृष्णदास,

लक्ष्मीवेङ्कटेश्वर छापाखाना कल्याण–मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथाच्युताष्टकं प्रारभ्यते ॥ श्रीगणेशाय नमः ॥ अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ॥ श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचंद्रं भजे ॥ १ ॥ अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाऽऽराधितम् ॥ इंदिरामंदिरं चेतसा सुंदरं देवकीनंदनं नंदनं संदधे ॥ २ ॥ विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मिणीरागिणे जानकीजानये ॥ बल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥ ३ ॥ कृष्ण गोविंद हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे ॥ अच्युतानंत हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥ ४ ॥ राक्षसक्षोभितः सीतया शोभितो दंडकारण्यभूपुण्यताकारणम् ॥ लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् ॥ ५ ॥ धेनुकारिष्टकोनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः ॥ पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥ ६ ॥ विद्युदुद्योतवान्प्रस्फुरद्वाससं प्रावृडंभोदवत्प्रोल्लसद्विग्रहम् ॥ वन्यया मालया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ ७ ॥ कुंचितैः कुंतलैर्भ्राजमानाननं रत्नमौलिं लसत्कुंडलं गंडयोः ॥ हारकेयूरकं कंकणप्रोज्ज्वलं किंकिणीमंजुलं श्यामलं तं भजे ॥ ८ ॥ अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पुरुषः सस्पृहम् ॥ वृत्ततः सुंदरं कर्तृविश्वंभरं तस्य वश्यो हरिर्जायते सत्वरम् ॥ ९ ॥ इति श्रीशंकराचार्यविरचितं अच्युताष्टकं संपूर्णम् ॥ अथ श्रीकृष्णस्तोत्रप्रारंभः ॥ वंदे नवघनश्यामं पीतकौशेयवाससम् ॥ सानंदं सुंदरं शुद्धं श्रीकृष्णं प्रकृतेः परम् ॥ १ ॥ राधेशं राधिकाप्राणवल्लभं बल्लवीसुतम् ॥ राधासेवितपादाब्जं राधावक्षःस्थलस्थितम् ॥ २ ॥ राधानुगं राधिकेष्टं राधापहृतमानसम् ॥ राधाधारं भवाधारं सर्वाधारं नमामि तम् ॥ ३ ॥ राधाहृत्पद्ममध्ये च वसंतं सततं शुभम् ॥ राधासहचरं शश्वद् राधाज्ञापरिपालकम् ॥ ४ ॥ ध्यायंते योगिनो योगात् सिद्धाः सिद्धेश्वराश्च यम् ॥ तं ध्याये सततं शुद्धं भगवंतं सनातनम् ॥ ५ ॥ सेवंते सततं संतो ब्रह्मेशशेषसंज्ञकाः ॥ सेवंते निर्गुणं ब्रह्म भगवंतं सनातनम् ॥ ६ ॥ निर्लिप्तं च निरीहं च परमात्मानमीश्वरम् ॥ नित्यं सत्यं च परमं भगवंतं सनातनम् ॥ ७ ॥ यं सृष्टेरादिभूतं च सर्वबीजं परात्परम् ॥ योगिनस्तं प्रपद्यंते भगवंतं सनातनम् ॥ ८ ॥ बीजं नानावताराणां सर्वकारणकारणम् ॥ वेदावेद्यं वेदबीजं वेदकारणकारणम् ॥ योगिनस्तं प्रपद्यंते भगवंतं सनातनम् ॥ ९ ॥ इत्येवमुक्त्वा गंधर्वः पपात धरणीतले ॥ नमाम दंडवद्भूमौ देवदेवं परात्परम् ॥ १० ॥ इति तेन कृतं स्तोत्रं यः पठेत्प्रयतः शुचिः ॥ इहैव जीवन्मुक्तश्च परं याति परां गतिम् ॥ ११ ॥ हरिभक्तिं हरेर्दास्यं गोलोके च निरामयः ॥ पार्षदप्रवरत्वं च लभते नात्र संशयः ॥ १२ ॥ इति श्रीनारदपंचरात्रे ज्ञानामृतसारे श्रीकृष्णस्तोत्रं संपूर्णम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ चतुःश्लोकिभागवतप्रारंभः ॥ ॥ श्रीगणेशाय नमः ॥ श्रीभगवानुवाच ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ॥ सरहस्यं तदंगं च गृहाण गदितं मया ॥ १ ॥ यावानहं यथा भावो यद्रूपगुणकर्मकः ॥ तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ २ ॥ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ॥ पश्चादहं यदेतच्च योवऽशिष्येत सोऽस्म्यहम् ॥ ३ ॥ ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ॥ तद्विद्यादात्मनो मायां यथा भासो यथा तमः ॥ ॥ ४ ॥ यथा महांति भूतानि भूतेषूच्चावचेष्वनु॥ प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥५॥ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥६॥ एतन्मतं समातिष्ठ परमेण समाधिना ॥ भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥७॥ इति श्रीमद्भागवते महापुराणेष्टादशसाहस्र्यां संहितायां वैयासिक्यां द्वितीयस्कंधे भगवद्ब्रह्मसंवादे चतुःश्लोकिभागवतं समाप्तम् ॥ ॥ अथ दशावतारस्तोत्रप्रारंभः ॥ ॥ श्रीगणेशाय नमः ॥ ॥ चलल्लोलकल्लोलकल्लोलिनीशस्फुरन्नक्रचक्रातिवक्त्रांबुलीनः ॥ हतो येन मीनावतारेण शंखः स पायादपायाज्जगद्वासुदेवः ॥ १२ ॥ धरानिर्जरारातिभारादपारादकूपारनीरातुराधः पतंती ॥ धृता कूर्मरूपेण पृष्ठोपरिष्टे स देवो मुदेवोऽस्तु शेषांगशायी ॥ २ ॥ उदग्रे रदाग्रे सगोत्रापि गोत्रा स्थिता तस्थुषः केतकाग्रे षडंघ्रेः ॥ तनोति श्रियं सश्रियं नस्तनोतु प्रभुः श्रीवराहावतारो मुरारिः ॥३॥ उरोदार आरंभसंरभिणोसौ रमासंभ्रमाभंगुराग्रैर्नखाग्रैः ॥ स्वभक्तातिभक्त्याभिव्यक्तेन दारुण्यघोघं सदा वः स हिंस्यान्नृसिंह ॥ ४ ॥ छलादाकलय्य त्रिलोकीं बलीयान् बलिं संबबंध त्रिलोकींव लीयः ॥ तनुत्वं दधानां तनुं संदधानो विमोहं मनो वामनो वः स कुर्यात् ॥५॥ हतक्षत्रियासृक्प्रपानप्रमत्तप्रनृत्यत्पिशाचप्रगीतप्रतापः ॥ धराकारि येनाग्रजन्माग्रहारविहारं क्रियान्मानसे वः स रामः ॥ ६ ॥ नतग्रीवसुग्रीवसाम्राज्यहेतुर्दशग्रीवसंतानसंहारकेतुः ॥ धनुर्येन भग्नं महत्कामहंतुः स मे जानकीजानिरेनांसि हंतु ॥ ७॥ घनाद् गोधनं येन गोवर्धनेन व्यरक्षि प्रतापेन गोवर्धनेन ॥ हतारातिचक्री रणध्वस्तचक्री पदध्वस्तचक्री स नः पातु चक्री ॥ ८ ॥ धराबद्धपद्मासनस्थांघ्रियष्टिर्नियम्यानिलं न्यस्तनासाग्रदृष्टिः ॥ य आस्ते कलौ योगिनां चक्रवर्ती स बुद्धः प्रबुद्धोऽस्तु निश्चिंतवर्ती ॥ ९ ॥ दुरापारसंसारसंहारकारी भवत्यश्वचारः कृपाणप्रहारी ॥ मुरारिर्दशाकारधारीह कल्की करोतु द्विषां ध्वंसनं वः स कल्की ॥१०॥ इति श्रीमच्छंकराचार्यविरचितं दशावतारस्तोत्रं संपूर्णम् ॥ अथ वसुदेवकृतश्रीकृष्णस्तोत्रप्रारंभः ॥ श्रीगणेशाय नमः ॥ वसुदेव उवाच ॥ त्वामतींद्रियमव्यक्तमक्षरं निर्गुणं विभुम् ॥ ध्यानासाध्यं च सर्वेषां परमात्मानमीश्वरम् ॥ १ ॥ स्वेच्छामयं सर्वरूपं स्वेच्छारूपधरं परम् ॥ निर्लिप्तं परमं ब्रह्म बीजरूपं सनातनम् ॥ २ ॥ स्थूलात्स्थूलतरं प्राप्तमतिसूक्ष्ममदर्शनम् ॥ स्थितं सर्वशरीरेषु साक्षिरूपमदृश्यकम् ॥ ३ ॥ शरीरवंतं सगुणमशरीरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणोत्करम् ॥ प्रकृतिः प्रकृतीशं च प्राकृतं प्रकृतेः परम् ॥ ४ ॥ सर्वेशं सर्वरूपं च सर्वांतकरमव्ययम् ॥ सर्वाधारं निराधारं निर्व्यूहं स्तौमि किं विभुम् ॥ ५ ॥ अनंतः स्तवनेऽशक्तोऽशक्ता देवी सरस्वती ॥ यं वा स्तोतुमशक्तश्च पंचवक्त्रः षडाननः ॥ ६ ॥ चतुर्मुखो वेदकर्तायं स्तोतुमक्षमः सदा ॥ गणेशो न समर्थश्च योगींद्राणां गुरोर्गुरुः ॥ ७ ॥ ऋषयो देवताश्चैव मुनींद्रमनुमानवाः ॥ स्वप्ने तेषामदृश्यं च त्वामेवं किं स्तुवंति ते ॥ ८ ॥ श्रुतयः स्तवनेऽशक्ताः किं स्तुवंति विपश्चितः ॥ विहायैवं शरीरं च बालो भवितुमर्हसि ॥ ९ ॥ वसुदेवकृतं स्तोत्रं त्रिसंध्यं यः पठेन्नरः ॥ भक्तिं दास्यमवाप्नोति श्रीकृष्णचरणांबुजे ॥ १० ॥ विशिष्टपुत्रं लभते हरिदासं गुणान्वितम् ॥ संकटं निस्तरेत्तूर्णं शत्रुभीत्या प्रमुच्यते ॥ ११ ॥ इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे वसुदेवकृतं कृष्णस्तोत्रं संपूर्णम् ॥ ४० ॥

॥ अथ सप्तश्लोकीगीता प्रारभ्यते ॥ श्रीगणेशाय नमः ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ य प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ १ ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि भीतानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघाः ॥ २ ॥ सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ ३ ॥ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ४ ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ॥ छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ ५ ॥ सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ॥ वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम् ॥ ६ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ७ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सप्तश्लोकी गीता समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

गंगाविष्णु श्रीकृष्णदास, "लक्ष्मीवेङ्कटेश्वर" छापाखाना, कल्याण.

Gangavishnu Shrikrishnadas. Laxmi-Venkateshwar Press.

KALYAN. G. I. P. RY. JUNCTION. BOMBAY PRESIDENCY.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते दशमस्कन्धउत्तरार्द्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते एकादशस्कंधः

प्रारभ्यते।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन् पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं सञ्चिन्तयामि सकले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोरेकादशे सुगममन्वयमातनोति ॥ ३ ॥ प्रथमे मुनिशापेन मुसलं लोहसम्भवम् ॥ साम्बादजायत श्लोका विंशतिः स्युश्चतुर्युताः ॥ उवाचैत्रयमङ्घ्र्यूनाष्टाविंशतिरनुष्टुभः ॥ १ ॥ कृत्वेति ॥ जविष्ठं वेगवत्तरमाशु युद्धादिपर्यवसायिनं कलिं कलहं जनयन् सर्वान्तर्यामित्वात्प्राणिषूत्पादयन् रामेण सहितः यदुभिश्च वृतः कृष्णो दैत्यानां पूतनाकंसादीनां वधं कृत्वा भुवो भारमवतारयत् अवातारयत् । अडभाव आर्षः ॥ १ ॥ ये इति ॥ दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणम् इत्यादिभिः साधनैः । आदिना गरदानादिभिः सपत्नैः शत्रुभिर्दुर्योधनादिभिः सुबहु यथा भवति तथा बहून् वारान् ये पाण्डुसुता युधिष्ठिरादयः कोपितास्तान्निमित्तं कृत्वा इतरेतरतः उभयोः पक्षयोः समेतान्मिलितान्नृपान् असुरांशभूतान्हत्वा ईशः श्रीकृष्णः

॥ श्रीगणेशाय नमः ॥ ॥ श्रीबादरायणिरुवाच ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः ॥ भुवोऽवतारयद्भारं जविष्ठं जनयन्कलिम् ॥ १ ॥ ये कोपिताः सुबहुपाण्डुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ॥ कृत्वा निमित्तमितरेतरतः समेतान्हत्वा नृपान्निरहरत्क्षितिभारमीशः ॥ २ ॥ भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः ॥ मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं यद्यादवं कुलमहो ह्यविषह्यमास्ते ॥ ३ ॥ नैवान्यतः परिभवोऽस्य भवेत्कथञ्चिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यम् ॥ अन्तः कलिं यदुकुलस्य विधाय वेणुस्तम्बस्य वह्निमिव शान्तिमुपैमि धाम ॥ ४ ॥

क्षितेर्भारं निरहरत् जहार । यद्वा । ये कोपिताः यैश्च सपत्नैः कोपिताः तानितरेतरतो निमित्तं कृत्वेत्यन्वयः ॥ २ ॥ भूभारेति ॥ स्वस्य बाहुभिर्गुप्तैः सुरक्षितैर्यदुभिर्निमित्तभूतैर्भुवो भारभूता राजन्यानां दैत्यांशभूतानां पृतनाः सेनाः राजन्यास्तत्सेनाश्चेति वा विवाहादिच्छलेन निरस्य हत्वा अप्रमेयः यादवादिभिरज्ञातचिकीर्षः भगवान् कृष्णः अचिन्तयत् । ननु अवनेर्भूमेर्भारो लोकदृष्ट्या गतोऽप्यहं तम् अगतमेव मन्ये । यस्मात् अहो अविषह्यं सोढुमशक्यं यादवं कुलमास्ते अनेन स्वकुलत्वात्स्वयमपि हननमनुचितमिति सूचितम् ॥ ३ ॥ नैवेति ॥ अहमेव संश्रयः आश्रयो यस्य तस्य नित्यं विभवैर्वीर्यैश्वर्यादिभिरुन्नहनस्य उच्छृङ्खलस्य अस्य यादवकुलस्य अन्यतो देवादिभ्योऽपि परिभवः तिरस्कारोऽपि कथंचिदपि नैव भवेद्विनाशस्तु दूरत इत्यर्थः । अतो यदुकुलस्यान्तर्मध्ये कलिं कलहं विधाय शान्तिमुपैमि । वर्तमानसामीप्ये वर्त्तमानवत् । ततश्च स्वधाम वैकुण्ठं चोपेष्यामि वायुर्यथा परस्परसंघर्षणेन वेणुगुल्मस्य विनाशकं वह्निमुत्पाद्य स्वयमुपरतो भवति वेणुगुल्मश्च स्वयमेव विनश्यति तथेत्यर्थः । यद्वा । यदुकुलस्यान्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलिं विधाय तेन च तस्य शान्तिं नाशं विधाय स्वधाम उपैमि । यथा वायुः वेणुस्तम्बस्य वंशसमूहस्य मथनोत्थं वह्निं विधाय तेनैव वंशसमूहस्य नाशं विधाय अन्तर्द्धानं याति तथेत्यर्थः ॥ ४ ॥ एवमिति ॥ हे राजन् सत्यसङ्कल्प ईश्वरः विभुः एवमुक्तप्रकारेण व्यवसितः कृतनिश्चयः कृष्णः विप्राणां शापस्य व्याजेन मिषेण स्वकुलं संजह्रे विनाशितवान् ॥ ५ ॥ स्वमूर्त्येति युग्मम् ॥ लोकानां प्राणिनां लावण्यस्य निर्मुक्तिस्त्यागस्तिरस्कारो यया यामपेक्ष्य लोकेषु लावण्याधिक्यं नास्तीत्यर्थः । यद्वा । लोकेभ्यो लावण्यस्य निर्मुक्तिर्दानं यतः यत्सम्पर्केण लोका लावण्यवन्तो भवन्तीत्यर्थः । तया स्वमूर्त्या नृणां लोचनमाच्छिद्य आकृष्य ततोऽन्यस्याऽवलोकने लोचनस्याप्रवृत्तेः । तथा स्वगीर्भिस्ताः गिरः स्मरतां चित्तमाच्छिद्य तथा पदैस्तत्र तत्राङ्कितैस्तानि पदानि ईक्षमाणानामन्यतो गमनादिकाः क्रियाश्चाच्छिद्य एवं तदानींतनानां सर्वेषां चक्षुरादिप्रवृत्तीः स्वैकनिष्ठाः कृत्वेति समुदायार्थः । इतः उपरि जनिष्यमाणानां संसारतरणाय कौ पृथिव्यां शोभनाः श्लोकाः सुश्लोकाः ते कवीनां यस्यां तथाभूतां स्वकीर्तिं

एवं व्यवसितो राजन्सत्यसङ्कल्प ईश्वरः ॥ शापव्याजेन विप्राणां संजह्रे स्वकुलं विभुः ॥५॥ स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणाम् ॥ गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ॥ ६ ॥ आच्छिद्य कीर्तिं सुश्लोकां वितत्य ह्यञ्जसा नु कौ ॥ तमोऽनया तरिष्यन्तीत्यगात्स्वं पदमीश्वरः ॥ ७ ॥ राजोवाच ॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् ॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसाम् ॥ ८ ॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ९ ॥ श्रीशुक उवाच ॥ बिभ्रद्वपुः सकलसुन्दरसन्निवेशं कर्माऽऽचरन्भुवि सुमङ्गलमाप्तकामः ॥ आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥ १० ॥

वितत्य विस्तार्य अनया श्रवणकीर्तनस्मरणादिविषयया कीर्त्या श्रवणादिकर्त्तारः अञ्जसा हि साधनान्तरप्रयासमन्तरेणैव नु निश्चितं तमः अविद्यामूलकं संसारं तरिष्यतीत्यभिप्रेत्य ईश्वरः श्रीकृष्णः स्वपदं स्वस्थानमगात् ॥ ६ ॥ ७ ॥ ब्रह्मण्यानामिति ॥ ब्रह्मण्यानां वदान्यानामुदाराणां नित्यं वृद्धोपसेविनां कृष्णचेतसां वृष्णीनां विप्रशापः कथमभूत् । कृष्णचेतसामित्यनेन मुनीनां कोपे जातेऽपि शापः कथं प्रादुरभूत् । कथंतरां सफलोऽभूत् इति सूचितम् ॥ ८ ॥ यन्निमित्त इति ॥ हे द्विजसत्तम यत् निमित्तं कारणं द्वारं यस्य तथाभूतः यादृशो वा तथा एकात्मनामन्योन्यमैकमत्यं प्राप्तानां भेदः कलहः कथं जातः । एतत्सर्वमेतस्मिन् मत्पृष्टे सर्वं प्रतिवक्तव्यं मे मह्यं यत्नेन वदस्व ॥ ९ ॥ बिभ्रदिति ॥ उदारकीर्तिः आप्तकामः पूर्णकामोऽपि कृष्णः स्थितः कृत्ये भूभारहरणे शेषो यस्य तादृशः सकलानां सुन्दराणां करचरणनेत्राद्यवयवानां संनिवेशो विन्यासविशेषो यस्मिंस्तथाभूतं वपुर्बिभ्रत् बिभ्राणो भुवि वर्तमानं द्वारकाख्यं धाम स्वस्थानमास्थाय अधिष्ठाय रममाणः सुमङ्गलं शुभावहं कर्माचरन् स्वकुलं संहर्तुमैच्छ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त। तङार्षः ॥ १० ॥ कर्माणीति ॥ पुण्यानि निवहन्ति प्रापयन्तीति तथा तानि सुमङ्गलानि परमानन्दजनकानि तथा गायतो जगतः कलिमलापहराणि कर्माणि कृत्वा यदुदेवो वसुदेवस्तस्य गृहे निवसता कालात्मना यादवकुलं संजिहीर्षुणा भगवता निसृष्टा अन्तर्यामितया प्रेरिताः मुनयः पिण्डारकाख्यं द्वारकातः प्रागुदीच्यां दिशि नातिदूरे तीर्थविशेषं समगमन्। यद्वा। अश्वमेधादिकर्मार्थमाहूताः कर्माणि कारयित्वा निसृष्टा मुनयः इत्याद्यन्वयः॥ ११ ॥ विश्वामित्र इति ॥ १२ ॥ क्रीडन्त इति सार्द्धम् ॥ तत्र पिण्डारकसमीपे क्रीडन्तो ये यदुनन्दनाः कुमाराः ते जाम्बवतीसुतं साम्बं स्त्रीवेषैर्वस्त्राभरणादिभिर्वेषयित्वा स्त्रीवेषं विधाय तान्मुनीनुपव्रज्य समीपमेत्यान्तरविनीता उद्धता अपि बहिर्विनीतवत् नम्रवत् उपसङ्गृह्य पादसङ्ग्रहणं कृत्वा पप्रच्छुः॥ १३ ॥ एषेति सार्द्धम् ॥ हे विप्राः हे अमोघदर्शनाः एषा अन्तर्वत्नी गर्भिणी असितेक्षणा सुनीलकटाक्षा प्रसोष्यन्ती आसन्नप्रसवा पुत्रकामा वो युष्मान् साक्षात्प्रष्टुं विलज्जती। परस्मैपदमार्षम्। अस्मन्मुखेन पृच्छति अतः किंस्वित्संजनयिष्यति कन्यां वा पुत्रं वा तद् ब्रूतेति

कर्माणि पुण्यनिवहानि सुमङ्गलानि गायज्जगत्कलिमलापहराणि कृत्वा ॥ कालात्मना निवसता यदुदेवगेहे पिण्डारकं समगमन्मुनयो निसृष्टाः ॥ ११ ॥ विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरङ्गिराः ॥ कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः॥ १२ ॥ क्रीडन्तस्तानुपव्रज्य कुमारा यदुनन्दनाः ॥ उपसंगृह्य पप्रच्छुरविनीता विनीतवत् ॥ ते वेषयित्वा स्त्रीवेषैः साम्बं जाम्बवतीसुतम् ॥ १३ ॥ एषा पृच्छति वो विप्रा अन्तर्वत्न्यसितेक्षणा ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः ॥ प्रसोष्यन्ती पुत्रकामा किंस्वित्संजनयिष्यति ॥ १४ ॥ एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप ॥ जनयिष्यति वो मन्दा मुसलं कुलनाशनम् ॥ १५ ॥ तच्छ्रुत्वा तेऽतिसन्त्रस्ता विमुच्य सहसोदरम् ॥ साम्बस्य ददृशुस्तस्मिन्मुसलं खल्वयस्मयम् ॥ १६ ॥ किं कृतं मन्दभाग्यैर्नः किं वदिष्यन्ति नो जनाः ॥ इति विह्वलिता गेहानादाय मुसलं ययुः ॥ १७॥ तच्चोपनीय सदसि परिम्लानमुखश्रियः ॥ राज्ञ आवेदयाञ्चक्रुः सर्वयादवसन्निधौ ॥ १८ ॥

॥ १४ ॥ एवमिति ॥ हे नृप मुनयः एवं प्रलब्धाः उपहसिताः अत एव कुपिताः सन्तस्तान् यदुकुमारानूचुः। हे मन्दाः मन्दभाग्याः वो युष्माकं कुलस्य नाशनं मुसलं जनयिष्यतीति ॥ १५ ॥ तदिति ॥ तत् मुनिवचनं श्रुत्वा ते यदुकुमारा अतिसन्त्रस्ताः सन्तः सहसा आशु साम्बस्योदरं विमुच्य उद्घाट्य तस्मिन्नुदरे अयस्मयं लोहमयं मुसलं ददृशुः। अयस्मयादित्वाद्भत्वन्तेन रुत्वाद्यभावः ॥ १६ ॥ किमिति ॥ ततश्च नोऽस्माभिर्मन्दभाग्यैः किमेतद्ब्राह्मणवञ्चनेन कृतं नोऽस्मान्प्रति जनाः किं वदिष्यन्तीति वदन्तो विह्वलिता व्याकुलचित्ताः सन्तो मुसलमादाय गेहान् ययुः ॥ १७ ॥ तदिति ॥ तच्च मुसलं सदसि राजसभायामुपनीय परिम्लाना मुखस्य श्रीः शोभा येषां ते यदुकुमाराः सर्वेषां यादवानां सन्निधौ राज्ञे उग्रसेनाय आवेदयांचक्रुः स्वकृतं सर्वं विज्ञापयामासुः। लज्जाभयाभ्यां श्रीकृष्णसमीपं तु न जग्मुः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वेति ॥ हे नृप द्वारका ओकः स्थानं येषां ते सर्वे अमोघमनिवर्त्यं विप्रशापं श्रुत्वा तथा मुसलं च दृष्ट्वा तावद्विस्मिता आश्चर्यं प्राप्तास्ततश्च भयेन सन्त्रस्ता व्याकुला बभूवुः ॥ १९ ॥ तदिति ॥ स यदुराजः आहुकः उग्रसेनोऽपि साम्बादीनां लज्जाभयाद्यनुदयाय श्रीकृष्णमपृष्ट्वैव तन्मुसलं चूर्णयित्वा चूर्णीकृतांस्तदवयवान् समुद्रसलिले प्रास्यत् प्रक्षिप्तवान् । अस्य चूर्णीक्रियमाणस्य मुसलस्यावशेषितमचूर्णीभूतं लोहं च अल्पमकिञ्चित्करं मत्वा समुद्रसलिले एव प्रास्यत् ॥ २० ॥ कश्चिदिति ॥ ततस्तत्र समुद्रे यदवशेषितं लोहं तत्कश्चिन्मत्स्योऽग्रसीत् गिलितवान् । तङ्भाव आर्षः । चूर्णानि तु समुद्रतरलैरुह्यमानानि वेलायां समुद्रतीरे लग्नानि सन्ति । एरकाः तृणविशेषा आसन् ॥ २१ ॥ मत्स्य इति ॥ अर्णवे तस्मिन् समुद्रे मत्स्यघ्नैः कर्तृभिरन्यैर्मत्स्यैः सह सोऽपि मत्स्यो जालेन गृहीतः तद्विदारणदशायां तस्योदरगतं मुसलशेषभूतं लोहं कश्चिल्लुब्धको व्याधो लब्धवान् । स च तल्लोहं शल्ये बाणस्याग्रेऽकरोत् तेन शराग्रं कारितवान् ॥ २२ ॥ भगवानिति ॥ कालरूपी भगवान् भगवत्त्वात् अविज्ञापिता अपि ज्ञाताः सर्वे अर्था

श्रुत्वाऽमोघं विप्रशापं दृष्ट्वा च मुसलं नृप ॥ विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः ॥ १९ ॥ तच्चूर्णयित्वा मुसलं यदुराजः स आहुकः ॥
समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितम् ॥ २० ॥ कश्चिन्मत्स्योऽग्रसील्लोहं चूर्णानि तरलैस्ततः ॥ उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः
॥ २१ ॥ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ॥ तस्योदरगतं लोहं स शल्ये लुब्धकोऽकरोत् ॥ २२ ॥ भगवाञ्ज्ञातसर्वार्थ ईश्वरोऽपि
तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥ २३ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे विप्रशापो नाम प्रथमोऽध्यायः ॥ १ ॥
॥ श्रीशुक उवाच ॥ गोविन्दभुजगुप्तायां द्वारवत्यां कुरूद्वह ॥ अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥ १ ॥ को नु राजन्निन्द्रियवान्मुकुन्द-
चरणाम्बुजम् ॥ न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः ॥ २ ॥ तमेकदा तु देवर्षिं वसुदेवो गृहागतम् ॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ॥ ३ ॥

येन सः तथा विप्रशापमन्यथा कर्तुमीश्वरः समर्थोऽपि तत् अन्यथाकरणं नैच्छत् किं त्वन्वमोदत ॥ २३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमा- देतामेकादशादिमे ॥ १ ॥ द्वितीये निमिजायन्तसंवादेनाह नारदः ॥ धर्मान् भागवतांस्तत्र श्लोकाः प्रोक्ताः शरेषुवः ॥ अष्टौवाचेति पादाढ्या एकषष्टिरनुष्टुभः ॥ २ ॥ गोविन्देति ॥ हे कुरूद्वह कृष्णोपासने लालसा उत्कटेच्छा यस्य सः नारदः गोविन्दस्य भुजाभ्यां गुप्तायां पालितायाम् अत एव नारदस्यैकत्रानवस्थानहेतुं दक्षशापं विफलयितुं शक्तायां द्वारकायामभीक्ष्णमवात्सीत् ॥ १ ॥ क इति ॥ हे राजन् अमरेष्वप्युत्तमैर्ब्रह्मादिभिरप्युपास्यं मुकुन्दचरणाम्बुजं सर्वतो मृत्युर्यस्य स को नु इन्द्रियवान् प्राणिमात्रान्तर्गतः पुमान्न भजेत् तद्भजने प्राणिमात्रमधिकारीत्यर्थः ॥ २ ॥ तमिति ॥ एकदा तु स्वगृहं प्रत्यागतमर्चितं सुखं यथा भवति तथासीनं तं सर्वशास्त्ररहस्यज्ञतया सुप्रसिद्धं देवर्षिं नारदमभिवाद्य प्रणम्य वसुदेव इदं वक्ष्यमाणमब्रवीत् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवन्निति ॥ हे भगवन् यथा पित्रोर्यात्रा आगमनमपत्यानां स्वस्तये भवति यथा च उत्तमश्लोकस्य वर्त्मभूतानां महतां यात्रा कृपणानां दीनानां स्वस्तये तथा भवतो यात्रा सर्वदेहिनां स्वस्तये भवति ॥ ४ ॥ भूतानामिति ॥ देवानां पर्जन्यादीनां चरितं भूतानां दुःखाय सुखाय च भवति तापवृष्ट्यादिना कीटादीनां मरणस्यापि दर्शनात् अच्युते आत्मा येषां तेषां त्वादृशां साधूनां तु चरितं सर्वेषां सुखायैव भवति ॥ ५ ॥ भजन्तीति ॥ ये जना देवान् यथा भजन्ति उच्चावचयज्ञादिकर्मणाऽऽराधयन्ति कर्मसचिवाः कर्माधीना देवा अपि तांस्तथैव भजन्ति तत्तत्कर्मतारतम्यानुसारेणैव फलं प्रयच्छन्ति। छाया यथा पुरुषानुसारिणी तथा ते कर्मानुसारिण इत्यर्थः । साधवस्त्वादृशा भगवद्भक्तास्तु दीनेषु तापत्रयाभिभूतेषु वत्सलाः प्रीतियुक्ताः स्वोपकारनिरपेक्षतत्तापनिराचिकीर्षव इत्यर्थः ॥ ६ ॥ ब्रह्मन्निति ॥ यद्यपि वयं त्वद्दर्शनेनैव कृतार्थास्तथाऽपि यान् धर्मान् श्रद्धया श्रुत्वा अनुष्ठाय मर्त्यो मरणधर्मा प्राणिमात्रं विश्वतः सर्वस्माद्भयान्मुच्यते तान् भागवतान्भगवत्परितोषकान्धर्मान् तव त्वां पृच्छामः ॥ ७ ॥ अहमिति ॥

वसुदेव उवाच ॥ भगवन्भवतो यात्रा स्वस्तये सर्वदेहिनाम् ॥ कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनाम् ॥ ४ ॥ भूतानां देवचरितं दुःखाय च सुखाय च ॥ सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥ ५ ॥ भजन्ति ये यथा देवान्देवा अपि तथैव तान् ॥ छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥ ६ ॥ ब्रह्मंस्तथापि पृच्छामो धर्मान्भागवतांस्तव ॥ याञ्छ्रुत्वा श्रद्धया मर्त्यो मुच्यते विश्वतो भयात् ॥ ७ ॥ अहं किल पुरानन्तं प्रजार्थे भुवि मुक्तिदम् ॥ अपूजयं न मोक्षाय मोहितो देवमायया ॥ ८ ॥ यथा विचित्रव्यसनाद्भवद्भिर्विश्वतो भयात् ॥ मुच्येम ह्यञ्जसैवाद्धा तथा नः शाधि सुव्रत ॥ ९ ॥ श्रीशुक उवाच ॥ राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता ॥ प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः ॥ १० ॥ नारद उवाच ॥ सम्यगेतद्व्यवसितं भवता भरतर्षभ ॥ यत्पृच्छसे भागवतान्धर्मांस्त्वं विश्वभावनान् ॥ ११ ॥ श्रुतोऽनुपठितो ध्यात आदृतो वाऽनुमोदितः ॥ सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि ॥ १२ ॥

पुरा पूर्वजन्मनि देवस्य हरेर्मायया विमोहितः अतः भुवि प्रजार्थः पुत्रलाभप्रयोजनः सन्नेवानन्तमनन्तप्रभावमत एव मुक्तिदम्भगवन्तमहमपूजयमाराधितवान्न मोक्षाय अत एव स भुवि मम पुत्रो जातः ॥८॥ यथेति ॥ हे सुव्रत यथा भवद्भिः हेतुभूतैः विचित्राणि व्यसनानि दुःखानि यस्मिंस्तस्मात् अत एव विश्वतो भयं यस्मिंस्तस्मात्संसारादञ्जसा सुखेन वयं मुच्येमहि तथा अद्धा स्फुटं नोऽस्मान् शाधि शिक्षय ॥ ९ ॥ राजन्निति ॥ धीमता विवेकिना वसुदेवेन एवं कृतः प्रश्नो यस्य तेन च उपस्थितैर्हरेर्गुणैर्हरिं संस्मारितः गुणैः सहितस्य हरेः संस्मारितः इति । अधीगर्थेति षष्ठी वा । देवर्षिर्नारदः प्रीतः संस्तं वसुदेवमाह स्म ॥ १० ॥ सम्यगिति ॥ हे सात्वतर्षभ यत्त्वं विश्वं भावयन्ति शोधयन्ति तान् भागवतान् धर्मान् पृच्छसे । तद्गार्यः । तदेतद्भवता सम्यग्व्यवसितं निश्चितम् ॥ ११ ॥ श्रुत इति ॥ गुरुमुखाच्छ्रुतः श्रवणानन्तरं स्वमुखेन पठितः ध्यातः मनसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिन्तितः आदृतः आस्तिक्यबुद्ध्या स्वीकृतः अनुमोदितः परैः क्रियमाणः संस्तुतो वा सद्धर्मो भागवतो धर्मः ये देवेभ्यो विश्वस्मै च द्रुह्यन्ति ते देवविश्वद्रुहस्तानपि सद्य एव पुनाति अनुष्ठितः सन्नल्पपापवतः पुनातीति तु किं पुनर्वक्तव्यम् । देव हे वसुदेवेति संबुद्धिर्वा ॥ १२ ॥ त्वयेति ॥ परमकल्याणस्वरूपं पुण्यं श्रवणं कीर्तनं च यस्य स देवो नारायणः अद्य त्वया तद्धर्मप्रश्नेन मम स्मारित इति महाननुग्रहः कृतः । यद्वा । कल्याणान्ता संबुद्धिः ॥१३॥ अत्रेति ॥ अत्रापि भगवद्धर्मनिर्णयेऽपि आर्षभाणाम् ऋषभपुत्राणां महात्मनः विदेहस्य निम्याख्यस्य च संवादरूपमिमं वक्ष्यमाणं पुरातनमितिहासमुदाहरन्ति वृद्धा वर्णयन्तीत्यर्थः ॥ १४ ॥ प्रियेति ॥ स्वयंभूर्ब्रह्मा तत्पुत्रस्य स्वायंभुवस्य मनोर्यः सुतः प्रियव्रतो नाम प्रसिद्धस्तस्य सुतः आग्नीध्रस्ततः तस्य सुतो नाभिस्तत्सुतो नाभिसुतः ऋषभः स्मृतः कथितः ॥ १५ ॥ तमिति ॥ तमृषभं मोक्षधर्माणां विवक्षया प्रवर्तनेच्छया अवतीर्णं वासुदेवस्य भगवतोंशमाहुः । वृद्धा वदन्ति तस्य च ब्रह्मपारगं ब्रह्मज्ञं सुतशतमासीत् । अत्र ब्रह्मशब्दस्तंत्रेण वेदपरः

त्वया परमकल्याणः पुण्यश्रवणकीर्तनः ॥ स्मारितो भगवानद्य देवो नारायणो मम ॥ १३ ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ आर्षभाणां च संवादं विदेहस्य महात्मनः ॥ १४ ॥ प्रियव्रतो नाम सुतो मनोः स्वायम्भुवस्य यः ॥ तस्याग्नीध्रस्ततो नाभिर्ऋषभस्तत्सुतः स्मृतः ॥ १५ ॥ तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया ॥ अवतीर्णं सुतशतं तस्यासीद्वेदपारगम् ॥ १६ ॥ तेषां वै भरतो ज्येष्ठो नारायणपरायणः ॥ विख्यातं वर्षमेतद्यन्नाम्ना भारतमद्भुतम् ॥१७॥ स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिम् ॥ उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः ॥१८॥ तेषां नव नवद्वीपपतयोऽस्य समन्ततः ॥ कर्मतन्त्रप्रणेतार एकाशीतिर्द्विजातयः ॥ १९॥ नवाभवन्महाभागा मुनयो ह्यर्थशंसिनः ॥ श्रमणा वातरशना आत्मविद्याविशारदाः ॥ २० ॥

परब्रह्मपरश्च बोध्यः ॥ १६ ॥ तेषामिति ॥ तेषां शतसङ्ख्याकानामृषभपुत्राणां तु मध्ये ज्येष्ठः पुत्रो भरतो नारायणः सर्वान्तर्यामी भगवानेव परं फलरूपं साधनरूपं चायनमाश्रयो यस्य तथाभूतः आसीत् । पूर्वमजनाभसंज्ञया विख्यातमप्येतद्वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत् ॥ १७ ॥ स इति ॥ स भरतो भुक्तो भोगो यस्यास्तामिमां स्ववशवर्तिनीं भूमिं त्यक्त्वा गृहान्निर्गतस्तपसा हरिमुपासीनः सेवमानः त्रिभिर्जन्मभिस्तस्य हरेः पदवीं माहात्म्यं सायुज्यं लेभे ॥ १८ ॥ तेषामिति ॥ तेषां भरतानुजानामेकोनशतसङ्ख्याकानां मध्ये नव कुशावर्तेलावर्त्तब्रह्मावर्त्तमलयकेतुभद्रसेनेन्द्रस्पृग्विदर्भकीटनामानोऽस्य भारतवर्षस्य ये नव द्वीपास्तत्तुल्यनामानो भूखण्डास्तेषामधिपतयः समन्ततः समन्तात् बभूवुरित्यर्थः । एकाशीतिः सुताः कर्मतन्त्रप्रणेतारः कर्ममार्गप्रवर्त्तका द्विजातयः ब्राह्मणाः अभवन् ॥ १९ ॥ नवेति ॥ तेषां मध्ये नव पुत्राः महाभागाः अर्थशंसिनः परमार्थनिरूपकाः श्रमणाः आत्मविद्यायां कृतश्रमाः वातरशनाः दिगम्बराः आत्मविद्यायां विशारदाः निपुणाः मुनयः आसन् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्नामान्याह—कविरिति ॥ २१ ॥ त इति ॥ ते एते मुनयः सदसदात्मकं स्थूलसूक्ष्मात्मकं विश्वं भगवद्रूपं पश्यन्तः तत्राप्यात्मनोऽव्यतिरेकेण स्वस्मादभेदेन पश्यन्तो महीं व्यचरन् ॥ २२ ॥ अव्याहतेति ॥ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते अथापि मुक्ताः काप्यनासक्ताः सन्तः सुरादीनां लोकान्मुनिप्रभृतीनां भुवनानि स्थानानि च कामं यथेष्टं चरन्ति ॥ २३ ॥ त इति ॥ एकदा ते यदृच्छया अजनाभे वर्षे ऋषिभिर्वितायमानमनुष्ठीयमानं महात्मनो निमेः सत्रमुपजग्मुः ॥ २४ ॥ तानिति ॥ हे नृप सूर्यसङ्काशान् अतितेजस्विनः महाभागवतान् तान्दृष्ट्वा यजमानः निमिः अग्नयः आहवनीयादयो मूर्तिधराः विप्राश्च सर्व एवोपतस्थिरे प्रत्युत्थितवन्तः ॥ २५ ॥ विदेह इति ॥ विदेहो निमिस्तान् नारायणपरान् अभिप्रेत्य ज्ञात्वा प्रीतः सन्नासनस्थान्कृत्वा यथार्हतः यथोचितं ज्येष्ठादिक्रमेण संपूजयांचक्रे ॥ २६ ॥ तानिति ॥ स्वरुचा स्व-

कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥२१॥ त एते भगवद्रूपं विश्वं सदसदात्मकम् ॥ आत्मनोऽव्यतिरेकेण पश्यन्तो व्यचरन्महीम् ॥ २२ ॥ अव्याहतेष्टगतयः सुरसिद्धसाध्यगन्धर्वयक्षसुरकिन्नरनागलोकान् ॥ मुक्ताश्चरन्ति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामम् ॥ २३ ॥ त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया ॥ वितायमानमृषिभिरजनाभे महात्मनः ॥ २४ ॥ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप ॥ यजमानोऽग्नयो विप्राः सर्व एवोपतस्थिरे ॥ २५ ॥ विदेहस्तानभिप्रेत्य नारायणपरायणान् ॥ प्रीतः संपूजयाञ्चक्र आसनस्थान्यथार्हतः ॥ २६ ॥ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव ॥ पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः ॥ २७ ॥ विदेह उवाच ॥ मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः ॥ विष्णोर्भूतानि लोकानां पावनाय चरन्ति हि ॥ २८ ॥ दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ॥ तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥ २९ ॥ अत आत्यन्तिकं क्षेमं पृच्छामो भवतोऽनघाः ॥ संसारेऽस्मिन्क्षणार्धोऽपि सत्सङ्गः शेवधिर्नृणाम् ॥ ३० ॥ धर्मान्भागवतान् ब्रूत यदि नः श्रुतये क्षमम् ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥ ३१ ॥

कान्त्यैव रोचमानान् न तु आभरणाद्यैः ब्रह्मपुत्रोपमान् सनकादितुल्यान् तान्नव मुनीन् दृष्ट्वा परमप्रीतः प्रश्रयेण विनयेनावनतः नृपो निमिः पप्रच्छ ॥ २७ ॥ मन्ये इति ॥ वो युष्मान् साक्षाद्भगवतो मधुद्विषः हरेः पार्षदान् अनुग्रहपात्रभूतान् मन्ये । हि यतः विष्णोर्भूतानि भक्ताः लोकानां पावनाय चरन्ति सर्वत्र पर्यटन्ति ॥ २८ ॥ दुर्लभ इति ॥ देहिनां मानुषो देहो दुर्लभः मोक्षसाधनत्वात् सोऽपि क्षणभङ्गुरः आशुतरविनाशी अतस्तत्रापि जन्मनि वैकुण्ठः प्रियो येषां वैकुण्ठस्य प्रिया वा तेषां भगवद्भक्तानां दर्शनमहं दुर्लभं मन्ये ॥ २९ ॥ अत इति ॥ हे अनघाः अतः पुनर्भवदर्शनस्य दुर्लभत्वात् आत्यन्तिकं निरतिशयं क्षेमं फलं भवतः पृच्छामः । अस्मिन् संसारे क्षणार्द्धोऽपि क्षणार्द्धकालभवोऽपि सतां भवादृशां सङ्गो नृणां शेवधिः निधिः निधिवत्परमानन्दप्रदः ॥ ३० ॥ धर्मानिति ॥ यैर्धर्मैः प्रसन्नः अजो भगवान् प्रपन्नाय शरणागताय मह्यमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मानमपि दास्यति तान् भागवतान् भगवत्परितोषकरान् धर्मान् ब्रूत तत्रापि यदि नोऽस्माकं श्रोत्रमिति शेषः । श्रुतये श्रवणाय क्षमं योग्यं भवति यदि वयं तच्छ्रवणाधिकारिण इत्यर्थः ॥ ३१ ॥ एवमिति ॥ हे वसुदेव एवं निमिना पृष्टा महत्तमास्ते मुनयः भगवद्धर्मश्रवणोद्यतैः सदस्यैः सभ्यैः ऋत्विग्भिश्च सह वर्त्तमानं श्रवणायोद्यतं नृपं निमिं प्रीत्या प्रतिपूज्य सत्कृत्याब्रुवन् उत्तरमुक्तवन्तः ॥ ३२ ॥ प्रथममात्यन्तिकं क्षेमं कथयति—मन्ये इति ॥ अत्र संसारे असति अतितुच्छे देहेन्द्रियादौ आत्मभावात् आत्माभिमानाद्धेतोः नित्यं सर्वदा उद्विग्ना तापत्रयाद्भीता बुद्धिर्यस्य तस्य पुंसः अच्युतस्य पादाम्बुजयोरुपासनम् आराधनमेव अकुतश्चिद्भयं न कुतश्चिदपि भयं यस्मात् सर्वभयनिवर्त्तकमहं मन्ये । यत्र यस्मिन्नुपासने कृते सति विश्वात्मना सर्वप्रकारेण भीर्भयं निवर्त्तते ॥ ३३ ॥ य इति ॥ मन्वादिमुखेन वर्णाश्रमादिधर्मानुक्त्वाऽतिरहस्यत्वात् अविदुषामपि पुंसामञ्जः सुखेनात्मलब्धये स्वप्राप्तये ये वै गीतादिप्रसिद्धाः श्रवणकीर्त्तनादय उपाया भगवता स्वमुखेनैव प्रोक्तास्तान् हितान् परमफलहेतुभूतान् धर्मान् भागवतानेव विद्धि ॥ ३४ ॥ यानिति ॥ हे राजन् यान् भागवतान् धर्मान् आस्थाय आश्रित्य अनुतिष्ठन्निति यावत् नरो योगादिवन्न प्रमाद्येत विघ्नैर्न विहन्येत । किंच नेत्रे निमील्य

नारद उवाच॥ एवं ते निमिना पृष्टा वसुदेवमहत्तमाः॥ प्रतिपूज्याब्रुवन्प्रीत्या ससदस्यर्त्विजं नृपम्॥३२॥ कविरुवाच॥ मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम्॥ उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्वते भीः॥३३॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये॥ अञ्जः पुंसामविदुषां विद्धि भागवतान् हि तान्॥ ३४॥ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित्॥ धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥ ३५॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्॥ करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्॥ ३६॥ भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः॥ तन्मायया्ऽतो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा॥ ३७॥

धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत् निमीलनं नामाज्ञानम् । यथाहुः । "श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते । एकेन विकलः काणो द्वाभ्यामन्धः प्रकीर्तितः॥" इति अज्ञात्वापीत्यर्थः । धावन् अङ्गवैगुण्येनानुतिष्ठन्नपि न स्खलेत् फलान्न भ्रश्येत् । तथा न पतेत् प्रत्यवायेन नरकादौ न पतेदित्यर्थः । स्ववर्णाश्रमधर्मान् कश्चिदकुर्वाणोऽपि श्रवणादीन् भागवतधर्माननुतिष्ठन्नप्रत्यवैति स्वधर्मफलं च प्राप्नोतीत्यर्थः ॥ ३५ ॥ कायेनेति ॥ कायेन गमनादि वाचा वागिन्द्रियेण भाषणं मनसा संकल्पम् इतरेन्द्रियैर्दर्शनादि बुद्ध्या निश्चयम् आत्मना चित्तेन ध्यानादि अनुसृतः प्राप्तो यः सात्विकादिस्वभावस्तस्मात् । यद्वा । कायाद्यध्यासेनानुसृतात् ब्राह्मणत्वादिस्वभावात् तद्वशात् कायादिभिर्यद्यत् विहितमविहितं वा करोति तत्सकलं परस्मै परमेश्वराय नारायणाय समर्पयेत् । एतैः सर्वनियन्ता भगवान् प्रीयतामिति भावयेदित्यर्थः । इत्येवं चेत्सर्वोऽपि क्रियाकलापो भगवद्धर्म एव भवति ॥ ३६ ॥ भयमिति ॥ यस्मात् ईशात् भगवतः अपेतस्य विमुखस्यैव तस्य भगवतो मायया अस्मृतिः स्वरूपविस्मृतिः स्यात् । ततश्च विप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्ययो देवोऽहं मनुष्योऽहमित्यादिदेहाद्यात्माभिमानो भवति । ततश्च द्वितीयाभिनिवेशः एकस्मिन्नेवाद्वितीये सर्वात्मके ब्रह्मणि शत्रुमित्रादिभेदबुद्धिर्भवति । ततश्च भयं भवति । "द्वितीयाद्वै भयं भवति" इति श्रुतेः । अतो बुधो विवेकी गुरुरेव देवता आराध्यः आत्मा प्रेष्ठश्च यस्य तथादृष्टिः सन् यन्मायया अस्मृत्यादि भवति तमीशमेव एकया अनन्यया भक्त्या आ मोक्षमभिव्याप्य भजेत् ॥ ३७ ॥ अविद्यमान इति ॥ द्वयो द्वैतप्रपञ्चः अविद्यमानोऽपि ध्यातुः पुरुषस्य धिया मनसावभाति स्वप्नदृष्टः पदार्थः मनोरथविषयश्च पदार्थो यथा अविद्यमानोऽपि पुरुषधियैवावभाति तथेत्यर्थः। यस्मादेवं तत्तस्मात् कर्माणि सङ्कल्पयति विकल्पयति चेति तथा तन्मनो बुधो विवेकी निरुन्ध्यात् विषयेभ्यो नियच्छेत् । ततश्चैकया भक्त्या भजनात् संसारमूलमायानिवृत्त्या तद्भयनिवृत्तिः स्यान्नान्यथा ॥ ३८ ॥ शृण्वन्निति ॥ यानि लोके गीतानि प्रसिद्धानि सुभद्राणि तत् सः भगवानेवार्थः येषां तानि रथाङ्गं चक्रं पाणौ यस्य तस्य भगवतो जन्मानि कर्माणि नामानि च शृण्वन् गायंश्च विलज्जः असङ्गश्च सन् विचरेत् ॥ ३९ ॥ एवमिति ॥ एवंभूतं भगवज्जन्मादिश्रवणकीर्तनादिरूपं व्रतं वृत्तं यस्य सः स्वप्रियस्य भगवतो नामकीर्त्या जातः अनुरागः भगवति प्रेम यस्य सः अत एव द्रुतं श्लथत् चित्तं हृदयं यस्य

अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ॥ तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुन्ध्यादभयं ततः स्यात् ॥ ३८ ॥
शृण्वन्सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके ॥ गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसङ्गः ॥ ३९ ॥ एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ॥ हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥ खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च हरेः शरीरं यत्किं च भूतं प्रणमेदनन्यः ॥ ४१ ॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ॥ प्रपद्यमानस्य यथाऽश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥ ४२ ॥

सः उन्मादवत् ग्रहगृहीतवत् लोकबाह्यः दाम्भिकविलक्षणः प्रेमपरवशः कदाचिद्भक्तपराजितं भगवन्तमाकलय्य उच्चैर्हसति कदाचित्तद्वियोगमनुसन्धाय एतावन्तं कालमहमुपेक्षितोऽस्मीति कृत्वा रोदिति कदाचिदत्यौत्सुक्यात् रौति क्रोशति कदाचिद्भक्तानुग्रहार्थं भगवता कृतानि नानाविधानि कर्माणि स्मृत्वा गायति तद्रासादिलीलानुसन्धानेन स्वयमपि नृत्यति ॥ ४० ॥ खमिति ॥ खमाकाशं ज्योतींषि सूर्यचन्द्रनक्षत्राणि सत्वानि जन्तून् एवं खवाय्वादीन् यत्किं च भूतं स्थावरजङ्गमभूतमात्रं तत्सर्वं हरेः शरीरमिति भावयन् स्वयमप्यनन्यः अपृथक्सिद्धः स्वात्मन्यपि भगवच्छरीरत्वं भावयन्नित्यर्थः । प्रणमेत् ॥ ४१ ॥ नन्वियमारूढयोगैरप्यतिदुर्लभा गतिः कथं नाम कीर्त्तनमात्रेणैकत्रैव जन्मनि भवेदित्याशङ्क्याह—भक्तिरिति॥ प्रपद्यमानस्य निष्कपटं भगवद्भजनं कुर्वतः पुंसः भक्तिः प्रेमलक्षणापरेशानुभवः परेशस्य भगवतः अनुभवः स्वरूपस्फूर्तिः भगवतोऽन्यत्र धनपुत्रादि विरक्तिरित्येष त्रिक एककालः भजनसमकाल एव यथोत्तरं वर्द्धमानो भवति। यथा अश्नतः भुञ्जानस्य पुंसोऽनुघासं प्रतिग्रासं यथा तुष्टिः मनः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तोषः पुष्टिः उदरपूर्तिः क्षुदपायः क्षुन्निवृत्तिश्च स्युः। एवमेकैकस्मिन् भजने किंचित्प्रेमादित्रिके जायमानेऽनुवृत्त्या भजतः परमप्रेमादि जायते बहुग्रासभोजिन इव परमतुष्ट्यादि ॥ ४२ ॥ इतीति ॥ हे राजन् इत्येवमुक्तप्रकारेणानुवृत्त्या अच्युताङ्घ्रिं भजतो भागवतस्य यदा भक्त्यादयस्त्रयो भवन्ति तदा तत एव भक्त्यादित्रिकात् स साक्षात् परां सर्वत उत्कृष्टां शान्तिं संसारदुःखनिवृत्तिपूर्वकपरमानन्दभगवत्प्राप्तिरूपां मुक्तिमुपैति॥ ४३॥ अथेति ॥ अथ भागवतं भगवद्भक्तलक्षणादिकं ब्रूत। यो धर्मो यस्य सः अनिजभाव आर्षः। यादृशः यत्स्वभावः नृणां मध्ये यथा चरति यद्ब्रूते यैर्लिङ्गैः चिह्नैः स भगवतः प्रियो भवति इति। यद्वा। स भगवत्प्रियः अत्र क्रमाद्भागवतस्य धर्मस्वभावाचारवचनचिह्नप्रश्नाः ॥४४॥ यद्धर्म इत्यस्योत्तरमाह- सर्वेति ॥ यः आत्मनः स्वस्य सर्वभूतेषु भगवद्भावं ब्रह्मभावेन समन्वयं पश्येत् तथा आत्मन्यधिष्ठाने ब्रह्मणि भूतानि पश्येत् । यद्वा । आत्मनो हरेः सर्वभूतेषु स्थावरजङ्गमात्मकेषु अपि नियन्तृत्वेन वर्तमानस्य भगवद्भावं निरतिशयैश्वर्यादिमत्त्वमेव यः पश्येत् न तु तारतम्यम् । तथा भगवत्यप्रच्युतैश्वर्यादिरूपे आत्मनि हरावेव सर्वभूतानि पश्येत् । स एष भागवतोत्तमः ॥४५॥ ईश्वर इति ॥ य ईश्वरे प्रेम तदधीनेषु भगवद्भक्तेषु मैत्रीं बालिशेषु अज्ञजनेषु कृपां तद्दुःखप्रहाणेच्छां द्विषत्सु भगवत्त-

इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भवन्ति वै भागवतस्य राजंस्ततः परां शान्तिमुपैति साक्षात् ॥ ४३ ॥ राजोवाच ॥ अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणाम् ॥ यथाऽऽचरति यद्ब्रूते यैर्लिङ्गैर्भगवत्प्रियः ॥४४॥ हरिरुवाच ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५ ॥ ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥४६॥ अर्चायामेव हरये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥४७॥ गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि न हृष्यति ॥ विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ॥ ४८ ॥ देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥ ४९ ॥

द्भक्तद्वेषिषु च उपेक्षामौदासीन्यं करोति स मध्यमो भागवतो भेददर्शित्वात् ॥ ४६ ॥ अर्चायामिति ॥ यस्तु हरये हरिं प्राप्तुम् अर्चायामेव सर्वत्र विद्यमानमपि तमजानन् प्रतिमायामेव तस्य पूजां श्रद्धया ईहते करोति तस्य भक्तेषु तथान्येषु गोब्राह्मणाग्न्यादिषु च पूजां न करोति स प्राकृतः स्मृतः उक्तः। प्रकृतिः प्रारम्भः अधुनैव प्रारब्धभक्तिः शनैरुत्तमो भविष्यतीत्याशयः ॥४७॥ अथ पुनरप्युत्तमभक्तलक्षणान्याह तत्रापि यथा चरति तथाह–गृहीत्वेति॥ य इन्द्रियैरर्थान् विषयान् गृहीत्वापि अपिशब्दाद्वासुदेवाविष्टचित्तो विषयान् अगृह्णन्नपि इदं विश्वं विष्णोर्मायां पश्यन् न द्वेष्टि न हृष्यति स वै भागवतोत्तमः ॥४८॥ देहेति ॥ यो निरन्तरं हरेः स्मृत्या देहेन्द्रियप्राणमनोधियां संसारधर्मैः जन्माप्ययक्षुद्भयतर्षकृच्छ्रैरविमुह्यमानः । आर्षः शानच् चानश् वा । देहादीनां धर्मान् जन्मादीनात्मन्यमन्यमानः स भागवतप्रधान उत्तमो भागवतः तत्र देहस्य जन्माप्ययौ उत्पत्तिविनाशौ प्राणस्य क्षुत् पिपासाया उपलक्षणम् । मनसो भयमिति कामक्रोधलोभमोहसुखदुःखादीनामुपलक्षणम् । बुद्धेस्तर्षः तृष्णा इन्द्रियाणां कृच्छ्रं श्रमस्तैरिति विवेकः॥ ४९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति ॥ कामो भोगाभिलाषस्ततः कर्माणि शारीरव्यापारविशेषाः ततश्च बीजानि पुनः शरीरग्रहणहेतुभूतानि पुण्यपापानि तेषां यस्य चेतसि संभव उत्पत्तिर्न भवति स वासुदेव एवैको निलय आश्रयो यस्य स वै भागवतोत्तमः ॥ ५० ॥ यैर्लिङ्गैर्भगवत्प्रिय इत्यस्योत्तरमाह–न यस्येति ॥ जन्म सत्कुले कर्म यागादि वर्णा ब्राह्मणत्वादयः आश्रमा ब्रह्मचर्यादयः जातयः देवमनुष्यत्वादयस्ताभिरहङ्कारनिमित्तभूताभिर्यस्य देहेऽहंभावो गर्वो न सज्जते स वै हरेःप्रियो भवति ॥५१ ॥ न यस्येति ॥ वित्तेषु स्वकीयं परकीयमिति बहुवचनं दारापत्यादिसङ्ग्रहार्थम् । आत्मनि देहे स्वः पर इति वा भिदा भेददर्शनं यस्य नास्ति तथा सर्वभूतेषु समः एकात्मदर्शी शान्तः रागादिरहितः यः स वै भागवतोत्तमः ॥५२॥ यादृश इत्यस्योत्तरमाह–त्रिभुवनेति ॥ अजिते हरौ आत्मा येषां ते । यद्वा ।न जितः आत्मा यैः ते अवशीकृतचित्ता सुरादयस्तैरपि विमृग्यात् तत्कृपां विना द्रष्टुमप्यशक्यात् भगवत्पदारविन्दात् यः त्रिभुवनविभवहेतवेऽपि त्रैलोक्यराज्यं प्रयच्छामि लवनिमिषार्द्धं भजनं त्यजेत्युक्ते तत्प्राप्त्यर्थमपि लवार्द्धमपि निमिषार्द्धमपि न चलति सः

न कामकर्मबीजानां यस्य चेतसि संभवः ॥ वासुदेवैकनिलयः स वै भागवतोत्तमः ॥ ५० ॥ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ॥
सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः ॥ ५१ ॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ॥ सर्वभूतसमः शान्तः स वै भागवतोत्तमः
॥ ५२ ॥ त्रिभुवनविभवहेतवेऽप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ॥ न चलति भगवत्पदारविन्दाल्लवनिमिषार्धमपि यः स वैष्णवाग्र्यः
॥ ५३ ॥ भगवत उरुविक्रमाङ्घ्रिशाखानखमणिचन्द्रिकया निरस्ततापे ॥ हृदि कथमुपसीदतां पुनः स प्रभवति चन्द्र इवोदितेऽर्कतापः
॥ ५४ ॥ विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः ॥ प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥ ५५ ॥
इति श्रीभागवते महापुराणे एकादशस्कन्धे नारदवसुदेवसंवादे द्वितीयोऽध्यायः ॥ २ ॥

भगवत्पदतोऽन्यत्सारं नास्तीत्येवंरूपा अकुण्ठा अनपगता भगवत्स्मृतिर्यस्य सः वैष्णवाग्र्यः। यद्वा। त्रिभुवनविभवहेतवेऽप्यकुण्ठा प्रलोभयितुमशक्या स्मृतिर्यस्य य एव भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि न चलतीत्यन्वयः । पुष्पिताग्रात्रयम् ॥ ५३ ॥ किंच विषयाभिसन्धिना चलनं कामसन्तापे सति भवेत् स च सन्तापः भक्तानां न भवेदित्याह–भगवत इति ॥ भगवतः उरवो विक्रमाः विन्यासा ययोस्तयोरङ्घ्र्योः शाखानामङ्गुलीनां ये नखास्त एव मणयः मणितुल्याश्चन्द्रस्थानीयास्तेषां चन्द्रिका शीतला दीप्तिस्तया निरस्तः कामादितापो यस्मिंस्तस्मिन् उपसीदतां भजतां हृदि सन्तापः कथं पुनः प्रभवति उद्भवति । अनुद्भवे दृष्टान्तमाह। चन्द्र इवेति।यथा रात्रौ चन्द्रे उदिते सति सूर्यतापो नोद्भवति तथेत्यर्थः ॥ ५४ ॥ विसृजति इति ॥ अवशेन ज्वरपतनमरणाद्यवस्थायां वैवश्यमापन्नेनाप्यभिहितमात्रोऽपि तस्याघौघं पापसमूहं नाशयतीति तथा भक्तस्तु निरन्तरमेव नामसङ्कीर्त्तनं करोतीति तस्य प्रणयः प्रेमैव रशना रज्जुस्तया धृतं हृदये निबद्धमङ्घ्रिपद्मं यस्य सः साक्षाद्धरिः स्वयमेव यस्य हृदयं न विसृजति न मुञ्चति स भागव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषु प्रधानो मुख्यः उक्तः । इदं च सर्वलक्षणसारम् । यद् ब्रूते इत्यस्योत्तरं हरिनामानीति ज्ञेयम् । अन्यप्रश्नानामुत्तराण्युक्तानि ॥ ५५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ द्वितीय एकादशस्य व्यधाद्गङ्गासहायकः ॥ २ ॥ तृतीये मायातरणब्रह्मकर्मनिरूपणम् ॥ आर्षभैर्मुनिभिस्तत्र श्लोकाःसार्द्धाः ५५ शरेषवः ॥ उवाचार्द्धकमर्द्धाभ्यां षष्टिविद्धांदनुष्टुभाम् ॥ ३ ॥ विष्णोर्मायामिदं पश्यन्नित्युक्तमतो मायां पृच्छति—परस्येति ॥ मायिनां ब्रह्मादीनामपि मोहिनीं परस्येशस्य विष्णोर्मायां वयं वेदितुमिच्छामः । अतो नोऽस्मभ्यं भगवन्तः भवन्तः ब्रुवन्तु । भगवन्त इति सम्बुद्धिर्वा ॥ १ ॥ नेति ॥ संसारतापैर्निष्टप्तः तेषां संसारतापानां भेषजम् । औषधवन्निवर्तकं युष्मद्वचः जुषन् सेवमानः शृण्वन्नहम् । शता आर्षः । नानुतृप्ये तृप्तो न भवामि । तङार्षः ॥ २ ॥ मायायाः स्वरूपतो निरूपणासम्भवात्सृष्ट्यादिकार्यद्वारेण निरूपयितुमाह—एभिरिति ॥ हे महाभुज आद्यः पुरुषः यया शक्त्या भूतनामात्मा कारणभूतः स्वेषां स्वांशभूतानां जीवानां मीयन्त इति मात्राः शब्दादिविषयास्तेषां प्रसिद्धये भोगाय तथा आत्मप्रसिद्धये मोक्षाय चेत्यर्थः । एभिः ख्यातैः महाभूतैः उच्चावचानि उत्कृष्टान्यपकृष्टानि च भूतानि देवमनुष्यतिर्यगादिशरीराणि ससर्ज । एषा माया भगवत इति चरमश्लोकगतस्य प्रतिश्लोकं

राजोवाच ॥ परस्य विष्णोरीशस्य मायिनामपि मोहिनीम् ॥ मायां वेदितुमिच्छामो भगवन्तो ब्रुवन्तु नः ॥ १ ॥ नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतम् ॥ संसारतापनिष्टप्तो मर्त्यस्तत्तापभेषजम् ॥ २ ॥ अन्तरिक्ष उवाच ॥ एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज ॥ ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ॥ ३ ॥ एवं सृष्टानि भूतानि प्रविष्टः पञ्चधातुभिः ॥ एकधा दशधात्मानं विभजञ्जुषते गुणान् ॥ ४ ॥ गुणैर्गुणान्स भुञ्जान आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥ ५ ॥ कर्माणि कर्मभिः कुर्वन्सनिमित्तानि देहभृत् ॥ तत्तत्कर्मफलं गृह्णन्भ्रमतीह सुखेतरत् ॥ ६ ॥ इत्थं कर्मगतीर्गच्छन्बह्वभद्रवहाः पुमान् ॥ आभूतसम्प्लवात्सर्गप्रलयावश्नुतेऽवशः ॥ ७ ॥

सम्बन्धः ॥ ३ ॥ एवमिति ॥ एवं जीवस्योपकारार्थं पञ्चभिर्धातुभिर्महाभूतैः सृष्टानि देवादिशरीराणि प्रत्यगात्मतया प्रविष्टो भगवान् अन्तःकरणाभिमानितयैकधा ज्ञानकर्मेन्द्रियाभिमानितया च दशधात्मानं विभजन् गुणान् शब्दादिविषयान् जुषते जोषयति । यद्वा । तमात्मानं प्रति गुणान् विभजन् जुषते प्रीयते भुङ्क्ते इति वा ॥४॥ गुणैरिति ॥
ततश्च स प्रभुः देहाभिमानी जीवः आत्मनान्तर्यामिणा प्रद्योतितैश्चेतनीकृतैर्गुणैरिन्द्रियैर्गुणान् विषयान् भुञ्जानः सृष्टम् इदं देहमात्मानं मन्यमानः अत इह देहादौ सज्जते ॥ ६ ॥
प्रसक्तो भवति ॥ ५ ॥ कर्माणीति ॥ ततश्च देहभृतम् देहाभिमानी जीवः पुनश्च भोगसिद्ध्यर्थं कर्मभिः कर्मेन्द्रियैः सनिमित्तानि उत्तरदेहहेतुवासनासहितानि कर्माणि कुर्वन् सुखेतरं सुखं च इतरत् दुःखं चेति सुखेतरं सुखदुःखात्मकं तत्तत् पूर्वकर्मणां फलम् । अदड्भाव आर्षः । गृह्णन्ननुभवन्निह संसारे भ्रमति ॥ ६ ॥ इत्थमिति ॥ इत्थं बहूनि अभद्राणि दुःखानि वहन्ति प्रापयन्तीति तथाभूताः कर्मणां फलभूताः गतीः देवमनुष्यतिर्यगादियोनीः गच्छन् अवशः कर्मपरवशः पुमान् जीवः आभूतसम्प्लवात् महाभूत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रलयपर्यन्तं सर्गप्रलयौ जन्ममरणे तत्परम्परामश्नुते प्राप्नोति ॥ ७ ॥ सृष्टिमुक्त्वा प्रलयमाह—धातूपप्लवेति ॥ धातूनां पञ्चमहाभूतानामुपप्लवे विनाशहेतौ प्रलयकाले आसन्ने प्राप्ते सति अनादिनिधनः जन्मविनाशशून्यः कालः द्रव्यगुणात्मकं द्रव्यं स्थूलं पृथ्व्यादिगुणः सूक्ष्मं शब्दादि तदात्मकं व्यक्तं प्रपञ्चमव्यक्ताय अव्यक्तं प्रकृतिस्तं प्रति नेतु मपकर्षति ॥ ८ ॥ शतेति ॥ तदा हि भुवि उल्बणा दुःसहा भयङ्करी शतवर्षपर्यन्ताऽनावृष्टिर्भविष्यति तेन कालेनोपचितमुष्णमुष्णत्वं यस्य स चासावर्कश्च स त्रीन् लोकान् प्रतपिष्यति । इडार्षः ॥ ९ ॥ पातालेति ॥ सङ्कर्षणमुखादुद्भूतोऽनलः ऊर्ध्वशिखः ऊर्ध्वज्वालः वायुना सहकारिणा ईरितः प्रेरितः पातालतलमारभ्य विष्वक् सर्वतो दिशं दहन् वर्द्धते ॥ १० ॥ सांवर्तक इति ॥ दाहानन्तरं च सांवर्त्तकः प्रलयकर्त्ता मेघगणो हस्तिहस्ताभिः गजशुण्डाप्रमाणस्थूलाभिर्धाराभिः शतं समाः शतवर्षपर्यन्तं वर्षति ततश्च विराट् ब्रह्माण्डं सलिले लीयते स्मेति निश्चयार्थे ॥ ११ ॥ तत इति ॥ हे नृप ततो ब्रह्माण्डात्मकोपाधिलयात्तदुत्सृज्य त्यक्त्वा वैराजः पुरुषः समष्टिजीवो हिरण्यगर्भाख्यः निरिन्धनः अनल इव सूक्ष्ममव्यक्तं विशते। तत्र " ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥ " इति स्मृतेः। यावदधिकारमवस्थितिराधिकारिकाणामिति

धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकम् ॥ अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥८॥ शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥
तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ॥ ९ ॥ पातालतलमारभ्य सङ्कर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो विष्वग्वर्धते वायुनेरितः
॥ १० ॥ सांवर्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥११॥ ततो विराजमुत्सृज्य वैराजः
पुरुषो नृप ॥ अव्यक्तं विशते सूक्ष्मं निरिन्धन इवानलः ॥ १२ ॥ वायुना हृतगन्धा भूः सलिलत्वाय कल्पते ॥ सलिलं तद्धृतरसं ज्योति-
ष्ट्वायोपकल्पते ॥ १३ ॥ हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ॥ हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ॥ १४ ॥

न्यायाच्च । वैराजशब्दाभिधेयस्य ब्रह्मणो ज्ञानित्वात्समाप्ताधिकारत्वाच्च स्वलोकवासिज्ञानिभिः सहाव्यक्तशब्दवाच्ये ब्रह्मणि लयात्मको मोक्ष एव अन्येषां तु जीवानामज्ञत्वेन सूक्ष्मदेहरूपोपाधिलयाभावात्सूक्ष्मशब्दवाच्यप्रकृतिलयद्वारा ब्रह्मणि लयो न मोक्ष इति बोध्यम् । परे तु ब्रह्मणोऽपि कर्मिज्ञानिभक्तत्वेन त्रैविध्यम् । आद्यस्य पुनरावृत्तिः द्वितीयस्य मुक्तिस्तृतीयस्य पार्षदत्वम् इत्याहुः ॥१२॥ एवं विराजो लयमुक्त्वा तत्कारणानां महदादिपृथिव्यन्तानां प्रातिलोम्येन लयमाह—वायुनेति ॥ वायोर्हि गन्धरसहारित्वं प्रसिद्धं सांवर्त्तकेन वायुना हृतो गन्धो यस्याः सा भूः व्यावर्तकस्य गन्धस्य गतत्वात् सलिलत्वाय कल्पते सलिले लीयत इत्यर्थः । तद्धृतरसं तेन वायुनैव हृतो रसो यस्य तत् सलिलं ज्योतिष्ट्वायोपकल्पते ज्योतिषि स्वकारणे लीयत इत्यर्थः ॥ १३ ॥ हृतेति ॥ तमसो रूपतिरस्कारित्वं प्रसिद्धमेव । सांवर्त्तकेन तमसा हृतं रूपं यस्य तत् ज्योतिर्वायौ प्रलीयते अवकाशेन स्वकारणेन आकाशेन हृतः स्पर्शो यस्य स वायुस्तस्मिन्नभसि लीयते ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेति सार्द्धम् ॥ शब्दस्य हि कालत एव नाशः प्रसिद्धः । कालात्मना कालरूपेणेश्वरेण हृतो गुणः शब्दो यस्य तन्नभः आत्मनि तामसाहङ्कारे लीयते । इन्द्रियाणीति ॥ हे नृप इन्द्रियादीनि वैकारिकैः सह अहङ्कारं प्रविशति । अत्रापि स्वकारण एव लयो बोध्यः । तथाहि तत्र इन्द्रियाणि बुद्धिश्च राजसाहङ्कारे प्रविशन्ति वैकारिकैः सात्विकाहङ्कारोत्पन्नैर्देवैः सह मनः सात्विकाहङ्कारे प्रविशतीति विवेकः । एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितः अहम् अहङ्कारः आत्मनि महति लीयते महांश्च प्रकृतौ सा च ब्रह्मणि लीयते ततश्च पुनः सृष्ट्यादिसमये सृष्ट्यादीनि भवन्तीति द्रष्टव्यम् ॥ १५ ॥ एषेति ॥ एषा महत्तत्वस्यापि कारणभूता त्रिवर्णा लोहितशुक्लकृष्णवर्णा रजःसत्वतमोमयी अत एव रजआदिभिः सर्गस्थित्यन्तकारिणी भगवतः शक्तिरूपा माया प्रकृतिप्रधानाऽव्यक्तादिनामान्तरवती अस्माभिस्तुभ्यं वर्णिता तत्कार्यनिरूपणेन निरूपिता भूयः किं श्रोतुमिच्छसि ॥ १६ ॥ यथेति ॥ हे महर्षे अकृतात्मभिः अवशीकृतचित्तैः दुस्तराम् ऐश्वरीमीश्वरस्य शक्तिरूपामेतां पूर्वोक्तां मायां स्थूलधियः स्थूले देहे धीः अहंबुद्धिर्येषां ते यथा येन प्रकारेण येन साधनेनाज्ञः सुखेन तरन्ति तदिदं साधनमुच्यताम् ॥ १७ ॥ कर्माणीति ॥ दुःखहत्यै दुःखनिरासाय सुखाय सुखप्राप्तये च कर्माणि

कालात्मना हृतगुणं नभ आत्मनि लीयते ॥ इन्द्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ प्रविशन्ति ह्यहंकारं स्वगुणैरहमात्मनि ॥ १५ ॥ एषा माया भगवतः सर्गस्थित्यन्तकारिणी ॥ त्रिवर्णा वर्णितास्माभिर्भूयः किं श्रोतुमिच्छसि ॥१६॥ राजोवाच ॥ यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरन्त्यज्ञः स्थूलधियो महर्ष इदमुच्यताम् ॥ १७॥ प्रबुद्ध उवाच ॥ कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ॥ पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥ १८ ॥ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥ १९ ॥ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम् ॥ सतुल्यातिशयध्वंसं यथा मण्डलवर्तिनाम् ॥ २० ॥

आरभमाणानां मिथुनीचारिणां स्त्रिया सह मिथुनीभूय वर्तमानानां नृणां पाकविपर्यासं फलवैपरीत्यं पश्येत् । प्रत्युत तेभ्य एव कर्मभ्यो दुःखप्राप्तिं पश्येत् ॥ १८ ॥ नित्येति ॥ साधनदशायामाशावित्तव्ययादिदुःखं विद्यमानतादशायां संरक्षणवृद्ध्याद्यर्थं दुःखं विनाशे च शोकादिदुःखम् एवं नित्यमार्तिदेन दुःखप्रदेन दुर्लभेनात्यायासलभ्येन किं बहुना आत्ममृत्युना धनादिनिमित्तेन चोरशस्त्रादिभ्यो मरणस्य प्रसिद्धत्वात् एतानि सर्वाण्यपि विशेषणानि गृहादिष्वपि द्रष्टव्यानि । तथा कर्मसाधितैश्चलैरिति विशेषणद्वयं वित्तेऽपि द्रष्टव्यम् । तथा चैवं भूतैर्वित्तादिभिः का प्रीतिः किं सुखं स्यात् न किमपि ॥ १९ ॥ एवमिति ॥ एवं परं लोकमपि नश्वरं यतः तत् कर्मभिर्निर्मितम् । तथा तुल्येनातिशयेन ध्वंसेन च सह वर्त्तमानमित्यर्थः । तत्र तुल्ये स्पर्द्धा अतिशये असूया ध्वंसे शोकः । यथा मण्डलवर्तिनां खण्डभूमण्डलपतीनां राज्ञामैश्वर्यादिकं कर्म निर्मितत्वान्नश्वरं स तुल्यातिशयध्वंसतया स्पर्द्धादियुक्तं च तथेत्यर्थः । अतः तदपि दुःखदमेव विद्यात् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ तस्मात् उत्तमं श्रेयो जिज्ञासुः सन् शाब्दे ब्रह्मणि वेदे तत्तात्पर्यज्ञापके मीमांसास्मृतिपुराणादौ च न्यायतो निष्णातं ज्ञाततत्वम् । अन्यथा संशयनिरासो न स्यात् । परे ब्रह्मणि च अपरो क्षानुभवेन निष्णातं ज्ञाततत्वम् । अन्यथा बोधसंचारो न स्यात् । उपशमाश्रयं रागादिरहितमिति ब्रह्मनिष्णातत्वलिङ्गम् । ईदृशं गुरुमेव प्रपद्येत शरणं गच्छेत् ॥ २१ ॥ तत्रेति ॥ तत्र गुरोः सन्निधौ गुरुरेव आत्मा आत्मवत्प्रियः दैवतं दैवतवदादरविषयश्च यस्य स तथाभूतः सन् अमायया निष्कपटया अनुवृत्त्या गुरुसेवया भागवतान् धर्मान् शिक्षेत् । तङ्भाव आर्षः । यैर्धर्मैः सर्वात्मा बलिप्रभृतीनामात्मदश्च हरिस्तुष्येत् ॥ २२ ॥ भागवतान् धर्मानाह–सर्वत इति ॥ आदौ तावत् सर्वतः सर्वत्र देहपुत्रादौ मनसः असङ्गमनासक्तिं शिक्षेत् इति सर्वत्र द्वितीयान्तेष्वनुषङ्गः । साधुषु सङ्गं शिक्षेत् तथा भूतेषु यथोचितं दयादीन् शिक्षेत् । तथाहि हीनेषु दयां समेषु मैत्रीमुत्तमेषु प्रश्रयं विनयं च अद्धा साक्षात् निष्कपटं शिक्षेत् ॥ २३ ॥ शौचमिति ॥ शौचं बाह्यं देहस्य मृज्जलादिभिः । अभ्यन्तरं मनसः अदम्भादिभिः । तपः स्वधर्मानुष्ठानम् । तितिक्षा सहनम् । मौनं वृथालापत्यागः । स्वाध्यायः यथाधिकारं वेदपाठादि । आर्जवं वाङ्मनसयोरवक्रताम् । ब्रह्मचर्यं स्वदारनियमादि । अहिंसाम् अद्रोहम् ।

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥ २१ ॥ तत्र भागवतान् धर्माञ्छिक्षेद्गुर्वात्मदैवतः ॥
अमाययाऽनुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ २२ ॥ सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु ॥ दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम्
॥ २३ ॥ शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम् ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वन्द्वसंज्ञयोः ॥ २४ ॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यम-
निकेतताम् ॥ विविक्तचीरवसनं सन्तोषो येन केनचित् ॥ २५ ॥ श्रद्धां भागवते शास्त्रेऽनिन्दामन्यत्र चापि हि ॥ मनोवाक्कर्मदण्डं च सत्यं शमद-
मावपि ॥ २६ ॥ श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥ २७ ॥

द्वन्द्वसंज्ञयोः सुखदुःखयोर्मानापमानयोश्च समत्वं हर्षशोकादिविकारराहित्यं शिक्षेत् ॥ २४ ॥ सर्वत्रेति ॥ सर्वत्र स्थावरजङ्गमेषु सच्चिद्रूपेण आत्मेक्षां नियन्तृरूपेण ईश्वरान्वीक्षां कैवल्यमेकान्तचारित्वम् अनिकेततां गृहाद्यभिमानराहित्यं विविक्तानां शुद्धानां चीराणां वस्त्रखण्डानां वसनं परिधानं येन केनचित् प्रारब्धप्राप्तेनान्नादिना संतोषं शिक्षेत् ॥ २५ ॥ श्रद्धामिति ॥ भागवते भगवत्प्रतिपादके शास्त्रे श्रद्धाम् आदरातिशयम् अन्यत्र देवतान्तरप्रतिपादके शास्त्रे या अनिन्दा ताम् । मनआदीनां दण्डदमनं शिक्षेत् तानाह । सत्यं वाचः शमः मनसः दमः कर्मणो दण्डनम् । यद्वा । मनसः प्राणायामैः वाचो मौनेन कर्मणोऽनीहया दण्डनं सत्यं यथार्थभाषणम् । शमदमौ अन्तःकरणबाह्येन्द्रियनिग्रहौ ॥ २६ ॥ श्रवणमिति ॥ अद्भुतकर्मणो हरेः जन्मनामवताराणां कर्मणां लीलानां गुणानां भक्तवात्सल्यादीनां च श्रवणं कीर्त्तनं च तस्य ध्यानं च किं बहुना तदर्थे भगवदाराधनार्थमेव अखिलानां कायवाङ्मनसां चेष्टितं व्यापारं शिक्षेदित्यर्थः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टमित्यादौ द्वितीया आर्षी । निवेदनमिति कृद्योगे षष्ठीप्राप्तेः । तथा च इष्टादीनां यत्परस्मै भगवते निवेदनं समर्पणं तच्छिक्षेदित्यन्वयः । यद्वा । इष्टादीनालक्ष्येत्यध्याहारः । यद्वा । यत् इष्टादिकं तस्य परस्मै हरये निवेदनं तच्च दारादीन् यत् व्याप्नुवत् । इणः शत्रन्तस्य रूपम् । इष्टमित्यादौ भावे निष्ठा । इष्टं वैदिकं यज्ञादि दत्तं स्मार्त्तं दानादि तपः एकादश्युपवासादि जप्तं मन्त्रजपादि । इडभाव आर्षः । वृत्तं सदाचारः कर्ममात्रं वा यच्चात्मनः स्वस्य प्रियं धनधामस्रक्चन्दनवस्त्राभरणादि दारादींश्च प्राणान् देहेन्द्रियान्तःकरणादीन् निवेदनं नाम तदीयत्वबुद्ध्या तदाराधनपरतया स्थापनम् । न पुनस्तत्राहन्ताममता कार्या ॥२८॥ एवमिति ॥ एवं तथा कृष्ण एवात्मनाथः स्वामी येषां कृष्ण एवात्मनो जीवस्य नाथो येषामिति वा तेषु मनुष्येषु सौहृदं स्नेहातिशयम् । उभयत्र स्थावरे जङ्गमे च भगवति तद्भक्तेषु चेति वा । परिचर्यां पूजां च शिक्षेत् विशेषतश्च महत्सु भगवद्भक्तेषु साधुषु परकार्यसाधकेषु च नृषु परिचर्याम् शिक्षेत् । यद्वा । विशेषतो नृषु तत्रापि साधुषु स्वधर्मशीलेषु तत्रापि महत्सु भागवतेषु ॥२९॥ परस्परेति ॥ पावनं यद्भगवद्यशस्तस्य भगवद्भक्तैः सह परस्परमनुकथनं शिक्षेत् । तेन च या मिथः रतिः प्रीतिः मिथस्तुष्टिः सन्तोषः मिथ आत्मनोऽहङ्कारस्य निवृत्तिः भवति तां च शिक्षेत् निर्वृति-

इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनम् ॥२८॥ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ॥
परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥२९॥ परस्परानुकथनं पावनं भगवद्यशः॥ मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ३० ॥
स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ॥ भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥ ३१ ॥ क्वचिद्रुदन्त्यच्युतचिन्तया
क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ॥ गायन्ति नृत्यन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः ॥ ३२ ॥ इति भागवता-
न्धर्माञ्छिक्षन् भक्त्या तदुत्थया ॥ नारायणपरो मायामञ्जस्तरति दुस्तराम् ॥ ३३ ॥

रिति पाठे मिथ आत्मनः सौख्यं प्रेम वा ॥३०॥ स्मरन्त इति ॥ एवं श्रवणादिसाधनभक्त्या सञ्जातया प्रेमलक्षणया भक्त्या अघौघहरं भक्तानामविद्यादिसर्वदोषहरं हरिं स्वयं स्मरन्तः मिथः स्मारयन्तश्चोत्पुलकां रोमोद्गमयुक्तां तनुं बिभ्रतीत्यन्वयः ॥३१॥ क्वचिदिति ॥ ततश्च देहाद्यध्यासनिवृत्त्या अलौकिकाः लौकिकजनविलक्षणाः सन्तः अच्युतचिन्तया भगवद्दर्शनं विना धिग्जीवितेनेति बुद्ध्या क्वचित् कदाचिद्रुदन्ति । भगवतश्चौर्यादिलीलां स्मृत्वा क्वचिद्धसन्ति क्वचिद्भक्ताधीनतां स्मृत्वा तत्प्राप्तिं संभाव्य नन्दन्ति । अतो हे हरे दीनवत्सल प्रसीदेत्यादि वदन्ति च । क्वचित्तस्य रासादिलीलामनुस्मृत्य स्वयमपि नृत्यन्ति गायन्ति च । क्वचिच्च अजं भगवन्तमनुशीलयन्ति तत्स्वरूपस्वभावादिकं विचिन्तयन्ति । क्वचिच्च परं परमपुरुषमेत्य प्राप्य निर्वृताः परमानन्दनिमग्नाः सन्तस्तूष्णीं भवन्ति ॥३२॥ इतीति ॥ इत्येवंविधान् भागवतान् धर्मान् शिक्षन् अभ्यसन् । शता आर्षः । नारायणपरः भगवदाराधननिष्ठः पुमान् तदुत्थया भगवद्धर्मानुष्ठानजन्यया भक्त्या परमप्रेमात्मिकया दुस्तरामपि मायामञ्जः सुखेनैव तरति ॥ ३३ ॥ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारायणेति ॥ नारायण इत्यभिधानं यस्य तस्य परमात्मनो ब्रह्मणः निष्ठां स्वरूपं नोऽस्मभ्यं यूयं वक्तुमर्हथ । हि यस्मात् यूयं ब्रह्मवित्तमाः ब्रह्मविदामतिश्रेष्ठाः ब्रह्मैव हि नारायणपरमात्मादिशब्दैः कथ्यते अतस्तन्निष्ठां वक्तुमर्हथेति । स्वामिपादास्तु ब्रह्मैव तावन्नारायण इति भगवानिति परमात्मा इति चोच्यते । तत्र किमेभिः शब्दैर्निर्विशेषं तदेव वस्तूच्यते अस्ति वा कोऽपि विशेषांशः इति व्याचक्षते ॥ ३४ ॥ स्थितीति ॥ हे नरेन्द्र यद्वस्तु अस्य जगतः स्थित्युद्भवप्रलयहेतुः स्वयं तु अहेतुः कारणरहितः यत् स्वप्नजागरसुषुप्तिषु सत् वर्तमानं देहाः इन्द्रियाणि असवः प्राणाः हृदयमन्तःकरणमेतानि येन संजीवितानि चेतनीकृतानि चरन्ति स्वस्वव्यापारे प्रवर्त्तन्ते तत्त्वं परं सत्यं नारायणादिशब्दवाच्यम् अवेहि जानीहि इति । स्वामिपादास्तु यः अस्य विश्वस्य स्थित्यादीनां हेतुः स्वयं तु अहेतुः स नारायण इति परमेव तत्वमवेहि । यत् स्वप्नादौ सत् अनुवर्त्तमानं बहिश्च समाध्यादौ सत् तद्ब्रह्मेति परमेव तत्त्वमवेहि । देहेन्द्रियादीनि येन जीवितानि सन्ति चरन्ति प्रवर्त्तन्ते तत्परमात्मेति परमेव तत्त्वमवेहि । एवं लक्षणभेदैर्नारायणादिनामभिरुच्यमानमपि परमेकमेव तत्वं जानीहि इत्याहुः ॥ ३५ ॥ अवेहीति प्राप्तं विषयत्वं वारयति—नैतदिति ॥ एतत् ब्रह्माख्यं परं तत्वं कर्मभूतं मनो न विशति न विषयीकरोति अत एव वागपि निरूपयितुं न शक्नोति । उतेत्यप्यर्थे । चक्षुश्च द्रष्टुं न शक्नोति ।

राजोवाच ॥ नारायणाभिधानस्य ब्रह्मणः परमात्मनः ॥ निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ॥३४॥ पिप्पलायन उवाच ॥ स्थित्युद्भवप्रलय-
हेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च ॥ देहेन्द्रियासुहृदयानि चरन्ति येन संजीवितानि तदवेहि परं नरेन्द्र ॥३५॥ नैतन्मनो विशति वागुत
चक्षुरात्मा प्राणेन्द्रियाणि च यथाऽनलमर्चिषः स्वाः ॥ शब्दोऽपि बोधकनिषेधतयाऽऽत्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः ॥ ३६ ॥

आत्मा जीवोऽपि ज्ञातुं न शक्नोति । प्राणश्च क्रियाशक्त्या प्राप्तुं न शक्नोति । अन्यानि च घ्राणत्वक्श्रोत्ररसनाख्यानि ज्ञानेन्द्रियाणि ज्ञातुं हस्तपादादीनि कर्मेन्द्रियाणि च प्राप्तुं न शक्नुवन्ति । चकारान्मनआद्यधिष्ठातॄणां देवानां संग्रहः । यथा स्वाः स्वांशभूताः अप्यर्चिषो विस्फुलिङ्गादयोऽन्यत्प्रकाशयन्तोऽप्यनलं न प्रकाशयन्ति न दहन्ति च । चकारात् मनआदिवृत्तयोऽप्यात्मन्यभिव्यज्यमानात्मांशेन सर्वं बहिर्वस्तु विषयीकुर्वत्योऽपि तं न विषयीकुर्वन्तीत्यर्थः । ननु तर्हि श्रुतौ ब्रह्मणः औपनिषदत्वव्यवहारः कथमि-त्याशङ्क्याह । शब्दोऽपीति । वेदात्मकशब्दोऽप्यात्ममूलमात्मनि ब्रह्मणि मूलं प्रमाणं सत् "यतो वाचो निवर्तन्ते" इत्यादेः स्वस्यैव बोधकनिषेधरूपतया अर्थोक्तमर्थात् तात्पर्यादुक्तं यथा भवति तथाऽऽह तात्पर्यमात्रेण तन्निरूपयति न साक्षात् । यद्वा । शब्दोऽपि आत्मनः स्वस्य मूलं ब्रह्म बोधकनिषेधतया आह । यस्य बोधकं किमपि नास्ति तद्ब्रह्म इति एवंरीत्यैवार्थादुक्तमर्थत एवोक्तम् । ननु इदं तदिति निर्देशेनाह इत्यर्थः । ननु तर्हि नैवाह श्रुतिः किमिदमुच्यते अर्थोक्तमाहेति तत्राह । यदृत इति । यत् अव-धिभूतं ब्रह्म ऋते विना "यतो वाचो निवर्त्तन्ते" इत्यादिनिषेधस्यैव सिद्धिर्न भवेत् सर्वस्यैव निषेधस्य सावधिकत्वनियमस्य प्रसिद्धत्वादित्यर्थः । अतः स्वोक्तस्य निषेधस्याव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिभूतं ब्रह्म तात्पर्यद्वारा श्रुतिर्बोधयति न साक्षात् ॥ ३६ ॥ तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसक्तं तत्राह—सत्त्वमिति ॥ आदौ एकं सत्वं रजस्तम इति त्रिवृत् गुणत्रयात्मकं प्रधानं प्रवदन्ति ततः क्रियाशक्त्या जातं सूत्रं ज्ञानशक्त्या च महानिति तदेव प्रवदन्ति ततो जातमहम् इति जीवं जीवोपाधिभूतमहङ्कारं च तदेव प्रवदन्ति । ततश्च ज्ञानक्रियार्थफलरूपतयेति ज्ञानशब्देन इन्द्रियाधिष्ठातारो देवा मनश्च क्रियाः इन्द्रियाणि अर्थाः पृथ्व्यादिपञ्चमहाभूतानि फलं च सुखदुःखात्मकं तद्रूपतया तथा सदसत्कार्यकारणात्मकं यच्च तयोः सदसतोरपि परं कारणं तत्सर्वं तत्तदात्मकतया उरुशक्ति अचिन्त्यानन्तशक्तिकं ब्रह्मैव भाति । अतः सर्वस्वरूपेण भासमानस्य ब्रह्मणः स्वसिद्धौ नास्ति प्रमाणापेक्षेति ॥ ३७ ॥ नन्वेवं ब्रह्मण एव सर्वात्मकत्वे ब्रह्मणो विकारित्वापत्तिरित्याशङ्क्य मणिमन्त्रयोगिकामधेनुकल्पवृक्षादिभ्यो बहवः पदार्था जायन्ते परंतु नहि तद्विकारेण तेऽपि विकृता भवन्ति तद्वदत्रापीत्याह—नेति ॥ असौ आत्मा ब्रह्म न जजान न जातः । “ जन जनने ” वैदिको धातुः । न च मरिष्यति न चैधते नापि क्षीयते । अस्तिताविपरिणामाख्यौ विकारावुपलक्षणीयौ । हि यस्मात् व्यभिचारिणामागमापायिनां बाल्युवादिस्वमजागराद्यवस्थानां च सवनवित् तत्तत्कालसाक्षी न ह्यवस्थावतां साक्षी तदवस्थो भवति । तथा तद्ब्रह्म सर्वत्र देशे शश्वत् सर्वदा अनपायि क्षयरहितम् उपलब्धिमात्रं ज्ञानैकरूपम् । व्यभिचारिष्ववस्थितस्या-

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदन्ति जीवम्॥ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत्॥३७॥नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद्व्यभिचारिणां हि ॥ सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेन्द्रियबलेन विकल्पितं सत् ॥३८॥ अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र ॥ सन्ने यदिन्द्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥३९॥

प्यभिचारे दृष्टान्तः । प्राणो यथा पक्षिमनुष्यादिशरीरेषु अनुवर्त्तते तथा । ननु नीलं ज्ञानं जातं पीतं नष्टम् इति ज्ञानस्यापि नाशवत्त्वं प्रसिद्धम् इत्याशङ्क्याह । इन्द्रियेति । सदेव ब्रह्मरूपमेव ज्ञानमिन्द्रियबलेन विविधं कल्पितं नीलाद्याकारा वृत्तय एव जायन्ते नश्यन्ति च न तत्र प्रतिफलितं रूपज्ञानमित्याशयः ॥ ३८ ॥ दृष्टान्तं विवृण्वन् सुषुप्ता-विन्द्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति—अण्डेष्विति ॥ अण्डजेषु पेशिषु जरायुजेषु तरुषु उद्भिज्जेषु अविनिश्चितेषु स्वेदजेषु च तत्र तत्र सर्वत्र प्राणो हि यथा जीवमुपधावति अविकृत एवानुवर्तते तथैवात्माऽपि सर्वदा निर्विकार एव सविकारप्रतीतिस्तु यदा जागरे इन्द्रियगणः यदा च स्वप्ने तत्संस्कारवानहङ्कारः तदैव इन्द्रियाद्यध्यासेन स्यात् । यत् यस्मात् सुषुप्त्यवस्थायामिन्द्रियगणे सन्ने लीने अहमि अहङ्कारे च प्रसुप्ते लीने सति आशयमृते विकारहेतुलिङ्गशरीररूपोपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः । कूटस्थो निर्विकार एवावतिष्ठते । नन्वहङ्कारपर्यन्तानां लये शून्यमेवावशिष्यते तत्कथं तत्र कूटस्थोऽवशिष्यते तत्राह । तदिति । तस्य सुषुप्तिसाक्षिणो निर्विकारस्य सुखरूपस्यात्मनो नोऽस्माकमेतावन्तं कालं सुखमहमस्वाप्सं न किंचिदवेदिषमिति स्मृतिर्भवति । अनुभूतस्य स्मरणायोगात्सुषुप्तावात्मानुभवोऽस्त्येव । विषयसंबन्धाभावात्तु न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पष्टः ॥ ३९ ॥ ननु यदि सुषुप्तौ कूटस्थानुभवः स्यात्तदा कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत्कदा तर्हि तन्निवर्त्तकोऽनुभवो भवेत्तत्राह—यर्हीति ॥ वित्तैषणादि विहाय केवलमब्जनाभस्य भगवतश्चरणैषणया जाता या उरुः महती परमप्रेमलक्षणा भक्तिः तया गुणाः सत्वादयस्तत्प्रयुक्तानि यानि कर्माणि विहितनिषिद्धात्मकानि ततो जातानि यानि चेतसो मलानि पुण्यपापरागलोभादीनि भक्तः विधमेत् नाशयेत् । यद्वा । चेतः कर्तृ । तानि स्वगतानि मलानि यदि विधमेत् क्षालयेत्तदा तस्मिन् चेतसि विशुद्धे सति साक्षादव्यवधानेनात्मतत्वमुपलभ्यते । यथेति । अमलयोर्दृशोरेव यथा पूर्वमेव सिद्धोऽपि सवितृप्रकाश उपलभ्यते न त्वन्धस्य तथा सदा प्रकाशमानोऽप्यात्मा शुद्धचित्तस्यैवोपलभ्यते न तु विषयवासनाकलुषितचित्तस्येत्यर्थः ॥ ४० ॥ कर्मयोगमिति ॥ येनानुष्ठितेन कर्मयोगेन पुमानिहैव जन्मनि आशु शीघ्रमेव कर्माणि मोक्षप्रतिबन्धकभूतानि पापानि विधूय निरस्य संस्कृतः मोक्षोपयोगी सुकृतवान् सन् नैष्कर्म्यं कर्मनिवृत्तिसाध्यज्ञानं विदन्ते तं कर्मयोगं नोऽस्मभ्यं यूयं वदत ॥ ४१ ॥ एवमिति ॥ यथेदानीं युष्मान्प्रति पृच्छामि एवं तथैव पितुः इक्ष्वाकोरन्तिके स्थितान् ऋषीन् सनत्कुमारादीन् प्रत्यपीममेव प्रश्नं प्रष्टव्यमर्थं पूर्वमपृच्छम् अहं पृष्टवान् । ब्रह्मणः

यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि ॥ तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथाऽमलदृशोः सवितृप्रकाशः ॥ ४० ॥ राजोवाच ॥ कर्मयोगं वदत नः पुरुषो येन संस्कृतः ॥ विधूयेहाशु कर्माणि नैष्कर्म्यं विन्दते परम् ॥ ४१ ॥ एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरन्तिके ॥ नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यताम् ॥ ४२ ॥ आविर्होत्र उवाच ॥ कर्माकर्मविकर्मेति वेदवादो न लौकिकः ॥ वेदस्य चेश्वरात्मत्वात्तत्र मुह्यन्ति सूरयः ॥ ४३ ॥ परोक्षवादो वेदोऽयं बालानामनुशासनम् ॥ कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ ४४ ॥

पुत्राः सर्वज्ञा अपि ते तदुत्तरं नाब्रुवन् कर्मयोगं न निरूपयामासुस्तत्रानुक्तौ युष्माभिः कारणमुच्यतामिति ॥ ४२ ॥ गहनत्वद्योतनाय प्रथमं द्वितीयप्रश्नस्योत्तरमाह—कर्मेति ॥ कर्म विहितम् अकर्म विहिताकरणं विकर्म निषिद्धाचरणम् इति त्रिविधोऽपि वेदवादः वेदप्रतिपादितो व्यवहारः न लौकिकः । वेदस्य चेश्वरात्मत्वात् ईश्वरादुद्भूतत्वात् अपौरुषेयत्वादित्यर्थः । तत्र वेदोक्तितात्पर्ये सूरयो विवेकिनोऽपि मुह्यन्ति । किमुतान्ये । पौरुषेयवाक्ये हि वक्तुरभिप्रायतोऽर्थज्ञानं शक्यमपौरुषेये तु केवलं वाक्यपौर्वापर्येणैव तात्पर्यावधारणं तच्च दुष्करम् । अतस्तदा तव बालत्वान्नाब्रुवन्नित्याशयः ॥ ४३ ॥ परोक्षवाद इति ॥ अयं वेदः परोक्षवादः यत्रान्यथा स्थितोऽर्थः संगोपयितुमन्यथा कृत्वोच्यते स परोक्षवादः । तथा च श्रुतिः "तं वा एतं चतुर्हूतं सन्तं चतुर्होतेत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः" इति । भगवताप्युक्तम् । "परोक्षवादा ऋषयः परोक्षं मम च प्रियम् ।" इति । परोक्षवादत्वमेवाह । कर्ममोक्षायेति । कर्मणां मोक्षप्रतिबन्धकभूतानां पुण्यपापात्मकानां मोक्षाय निवृत्त्यर्थमेव वेदः बालानामनुशासनं प्रलोभनं यथा भवति तथा कर्माणि विधत्ते । अगदं यथा यथा हि पिता बालान् अगदमौषधं पाययन् यद्येतत्पिबसि तदा ते लड्डुकादिकं दास्यामीति प्रलोभ्य पाययति लड्डुकादिकं ददाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चान्यथा पुनस्तत्पाने प्रवृत्ता न स्युः । परं तु न लड्डुकादिलाभः औषधपानस्य फलं किन्तु रोगनिवृत्तिरेव । तथा वेदोऽप्यवान्तरस्वर्गादिफलैः प्रलोभयन्कर्माणि कारयति तत्तत्फलमपि ददाति परंतु न तन्मात्रलाभ एव परमपुरुषार्थः किंतु संसारदुःखनिवृत्तिपूर्वकपरमानन्दात्मकभगवत्प्राप्तिरेवेत्यर्थः ॥ ४४ ॥ ननु कर्ममोक्षश्चेत्पुरुषार्थस्तर्हि पूर्वं मे कर्म त्यज्यतां तत्राह—नाचरेदिति ॥ यस्तु वेदोक्तं कर्म स्वयं नाचरेत् तदा कर्म विना क्षणमपि स्थित्यसंभवात् स्वयमज्ञः पशुरिवानियतभोजनव्यवायादिरतत्वात् अजितेन्द्रियश्च स्यात् । ततश्च स विकर्मणा निषिद्धाचरणलक्षणेनाधर्मेण मृत्योरनन्तरमपि मृत्युमेवोपैति न विमुच्यते इत्यर्थः ॥ ४५ ॥ एवमतिदयालुर्वेदः नराणां पशूनामिव इन्द्रियारामत्वातिशयवारणायैव बालानुद्दिश्य कर्माणि फलदर्शनेन रोचयंस्तथा विधत्ते यथा कर्माणि प्रातरारभ्य कुर्वाणास्ते विकर्मण्यवसरमेव न प्राप्नुयुः । अनिषिद्धभोजनव्यवायादिषु प्रवर्त्यैव पापेभ्यो भीषयते इति वेदतात्पर्यं ज्ञात्वा स्वस्याजितेन्द्रियत्वं दुर्वारमालक्ष्य विवेकी कर्मैव कुर्यादित्याह—वेदेति ॥ अतः निःसङ्गः फलासक्तिरहितः ईश्वरे भगवत्यर्पितं यथा भवति तथा वेदोक्तमेव कर्म कुर्वाणोऽन्तःकरणविशुद्धिद्वारा नैष्कर्म्यरूपां सिद्धिं तत्वज्ञानं लभते । ननु कर्मणि कृते फलमपि भवेदेव ततश्च

नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः ॥ विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ ४५ ॥ वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे ॥
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥४६॥ य आशु हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः ॥ विधिनोपचरेद्देवं तन्त्रोक्तेन च केशवम् ॥४७॥
लब्धानुग्रह आचार्यात्तेन संदर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ॥ ४८ ॥ शुचिः संमुखमासीनः प्राणसंयमनादिभिः ॥ पिण्डं
विशोध्य संन्यासकृतरक्षोऽर्चयेद्धरिम् ॥ अर्चादौ हृदये चापि यथालब्धोपचारकैः ॥ ४९ ॥

पुनर्बन्ध इति चेत्तत्राह । फलस्य श्रुतिः श्रवणं रोचनार्था कर्मणि रुच्युत्पादनार्थमेव । तथा च यथौषधपाने प्रवृत्त्यर्थमेव लड्डुकदानादि श्राव्यते तत्र बालस्यासक्त्यैव दीयते नान्यथा तत्र तात्पर्याभावादेव एवं फलासक्त्या कृतमेव कर्म फलं ददाति अकामेन तु कृतं न ददाति । अतः नैष्कर्म्यसिद्धिर्भवति ॥४६॥ य इति ॥ यः पुमान् परस्येव सत आत्मनो जीवस्य । यद्वा । देहादिभ्यः परस्यात्मनो जीवस्याशु शीघ्रमेव हृदयग्रन्थिं ग्रन्थिवद्दुर्भेदमहं ममाध्यासं निर्जिहीर्षुः निराकरणेच्छुः स पञ्चरात्रादितन्त्रोक्तेन । चकाराद्वैदिककर्मसमुच्चितेन विधिना केशवं हरिमुपचरेत् पूजयेत् ॥ ४७ ॥ लब्धेति ॥ शिष्यमुपनीय वेदाध्यापनादिकर्त्ता आचार्यस्तस्माल्लब्धोऽनुग्रहोऽनुग्रहपूर्वकमुपनयनमन्त्रादिर्येन तथा तेनैवाचार्येण संदर्शित आगमः आगमोक्तजपपूजादिप्रकारो यस्य सः आत्मनः स्वस्याभिमतया रामकृष्णादिमूर्त्या युक्तं महापुरुषं भगवन्तमर्चयेत् ॥ ४८ ॥ शुचिरिति सार्द्धम् ॥ स्नानादिना शुचिः मूर्त्तेः सम्मुखमासीनः प्राणसंयमः प्राणायामः । आदिपदेन भूतशुद्ध्यादिसंग्रहः तैः पिण्डं देहं विशोध्य संन्यासैः सद्भिर्न्यासैः केशवकीर्त्यादिन्यासैः कृता रक्षा येन तथाविधश्च सन् यथा लब्धैः देशकालाद्यानुकूल्येन लब्धैः पूजायोग्यैरुपचारकैः पूजासाधनैरर्चादौ हृदये वापि हरिमर्चयेत् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनस्तदेव स्पष्टयति—द्रव्येति सार्द्धम् ॥ द्रव्याणि पुष्पादीनि जन्त्वादिशोधनेन क्षितिं संमार्जनलेपनादिना आत्मनः स्वस्य लिङ्गं देहं स्नानशौचादिना । यद्वा । आत्मानमभ्यञ्जनादिना लिङ्गं मूर्त्तिमनुपलेपक्षालनादिना एतानि निष्पाद्य पूजायोग्यानि कृत्वा पाद्यादीनि तत्तत्पात्रस्थान्युपकल्प्य संपाद्य आसनमुपवेशनस्थानं च जलेन प्रोक्ष्य अथानन्तरं तत्रासने उपविष्टः समाहितः एकाग्रचित्तः सन्नर्चादौ भगवन्तं सन्निधाप्य हृदि ध्यानपूर्वकं पूजितं श्रीमूर्त्तौ मन्त्रेणावाह्य मूलमन्त्रेण हृदादिभिर्मन्त्रैश्च हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः मूलमंत्रेण च देवे कृतो न्यासो येन सः भगवन्तं मूलमन्त्रेण चकारात्तत्तदुपचारमन्त्रैः अर्चयेत् । मूलमन्त्रो द्वादशाक्षरः न्यासादिविधिर्गौतमीयतन्त्रादौ पर्यङ्कस्थपद्धतौ च ज्ञेयः ॥ ५० ॥ पुनः स्पष्टयन् शेषमाह—साङ्गेति युग्मम् ॥ अङ्गानि चरणादीनि उपाङ्गानि सुदर्शनादीनि तत्सहिताः पार्षदाः सुनन्दादयस्तत्सहितां च तां तां स्वाभीष्टां मूर्तिं मूलमन्त्रतः पाद्यार्घ्यादिभिः विधिवत् विध्यनुसारेण साङ्गं हरिं संपूज्य स्तवैः स्तुत्वा नमेत् । अक्षतास्तिलकालङ्कारे न तु पूजायाम् । "नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वरम् ।" इति निषेधात् । यद्वा । अक्षताः अनुपहताः स्रजः पुष्पमालास्ताभिः उपहारो नैवेद्यम् ॥ ५१ ॥ ५२ ॥ आत्मानमिति ॥ आत्मानं तन्मयं

द्रव्यक्षित्यात्मलिङ्गानि निष्पाद्य प्रोक्ष्य चासनम् ॥ पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः ॥ हृदादिभिः कृतन्यासो मूलमन्त्रेण चार्चयेत् ॥५०॥ साङ्गोपाङ्गां सपार्षदां तां तां मूर्तिं स्वमन्त्रतः ॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥५१॥ गन्धमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ॥साङ्गं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिम्॥५२॥आत्मानं तन्मयं ध्यायन्मूर्तिं संपूजयेद्धरेः॥शेषामाधाय शिरसा स्वधाम्न्युद्वास्य सत्कृतम् ॥५३॥ एवमग्न्यर्कतोयादावतिथौ हृदये च यः ॥ यजतीश्वरमात्मानमचिरान्मुच्यते च सः ॥५४॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ राजोवाच ॥ यानि यानीह कर्माणि यैर्यैः स्वच्छन्दजन्मभिः ॥ चक्रे करोति कर्ता वा हरिस्तानि ब्रुवन्तु नः ॥ १ ॥

भगवद्रूपं ध्यायन् हरेर्मूर्त्तिं सम्यक् पूजयेत् । ततश्च शेषां निर्माल्यं स्वशिरस्याधाय सत्कृतं भगवन्तं स्वधामनि स्वहृदये तन्मन्दिरे वा यथोचितमुद्वास्य स्थापयित्वा पूजाविधिं समापयेत् इति शेषः ॥ ५३ ॥ एवमिति ॥ य एवमग्न्यादिषु सर्वात्मानमीश्वरं बन्धमोचने समर्थं भगवन्तं यजति पूजयति सः अचिरात् शीघ्रमेव संसारबन्धान्मुच्यते । भगवतः पूजापद्धतिश्च एतट्टीकाशेषभागभूत श्रीमद्भागवतपर्यङ्के स्फुटीकरिष्यते ॥५४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ तृतीय एकादशस्य व्यधाद्गङ्गासहायकः ॥३॥ चतुर्थेऽध्यायेऽवतारास्तत्कर्माणि च गीतवान् ॥ द्रुमिलो निमये तत्र श्लोका द्वैहनद्वयः ॥ द्वे उवाचेति पादाब्ध्यश्चतुस्त्रिंशदनुष्टुभः ॥ ४ ॥ यानि यानीति ॥ यैर्यैः स्वेषां भक्तानां स्वस्य वा छन्दः इच्छा तेन जन्मभिरवतारैरिह लोके हरिर्यानि यानि कर्माण्यकरोत् यानि च करोति यानि च कर्त्ता करिष्यति इति कालत्रयावतारसंबन्धीनि सर्वाणि कर्माणि नोऽस्मभ्यं भवन्तो ब्रुवन्तु ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो वा इति ॥ यो वा अनन्तस्य अनन्तान् गुणान् अनुक्रमिष्यन् साकल्येन गणयितुमिच्छन् भवति । स तु बालबुद्धिः बालानामज्ञानामिव मन्दा बुद्धिर्यस्य तथाविध एव महाकालेन कथंचित् योगादिप्रयत्नवशेन पुमान् भूमे रजांसि रेणून् गणयेदपि । संभावनायां लिङ् । अखिलशक्तिधाम्नः अचिन्त्यानन्तशक्त्याश्रयस्य भगवतो गुणांस्तु नैव कथञ्चिदपि गणयेत् । तथा च श्रुतिः "विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि" इत्यादिः ॥ २ ॥ भूतैरिति ॥ पञ्चभिर्भूतैरिति चतुर्विंशतितत्वानामुपलक्षणम् । आत्मना स्वेनैव सृष्टैरुत्पादितैश्चतुर्विंशत्या तत्वैर्विराजं ब्रह्माण्डाख्यं पुरं स्वशरीरं विरचय्य निर्माय आदिदेवः सर्वकारणभूतः क्रीडापरो नारायणो भगवान् यदा तस्मिन् ब्रह्माण्डे स्वांशेनान्तर्यामिरूपेण प्रविष्टः न तु भोक्तृत्वेन तत्र प्रभूतपुण्यस्य जीवस्य भोक्तृत्वात् तदा पुरुषाभिधानं पुरुषाख्यामवाप ॥ ३ ॥ अस्य गुणकर्माण्याह द्वाभ्याम् यत्काय इति ॥ यस्य वै राजपुरुषस्य काये शरीरे यस्याधिष्ठेयः कायो वा एष भुवनत्रयस्य सन्निवेशः रचनाविशेषः यस्येन्द्रियैरेव तनुभृतां व्यष्टिसमष्टिजीवानामुभयविधानि ज्ञानकर्मसाधनानीन्द्रियाणिबभूवुः ।

द्रुमिल उवाच ॥ यो वा अनन्तस्य गुणाननन्ताननुक्रमिष्यन्स तु बालबुद्धिः ॥ रजांसि भूमेर्गणयेत्कथञ्चित्कालेन नैवाखिलशक्तिधाम्नः ॥ २ ॥ भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् ॥ स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ॥ ३ ॥ यत्काय एष भुवनत्रयसन्निवेशो यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि ॥ ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्त्वादिभिः स्थितिलयोद्भव आदिकर्ता ॥ ४ ॥ आदावभूच्छतधृती रजसाऽस्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः ॥ रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ॥ ५ ॥ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशान्तः ॥ नैष्कर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्त ऋषिवर्यनिषेविताङ्घ्रिः ॥ ६ ॥

यस्य स्वतः स्वरूपभूतात्सत्वात्तनुभृतां ज्ञानं यद्वा स्वत एव यस्य ज्ञानमिति सम्बन्धः । यस्य श्वसनतः प्राणात् तनुभृतां बलं देहशक्तिः ईहा चेष्टा च भवति यश्च सत्वादिभिर्गुणैः विश्वस्थितिलयोद्भवे आदिकर्त्ता स आद्यः पुरुष इति । भागवतास्तु आदिदेवो नारायणः यदा महत्स्रष्टृत्वेन पुरुषाभिधानमवाप तदा भूतैर्विराजं विरचय्य तस्मिन् स्वांशेन अन्तर्यामितया प्रविष्टोऽभूत् । यस्य महाविष्णोः काये भुवनत्रयाणामनन्तब्रह्माण्डानां संनिवेश इत्यादि व्याचख्युः ॥ ४ ॥ आदिकर्त्तेत्यनेन तत्पूर्वकं कर्त्रन्तरमपि सूचितम् । तद्दर्शयितुं गुणावतारद्वारा चराचरसृष्ट्यादिकर्तृत्वमाह—आदाविति ॥ स एवाद्यः पुरुषः अस्य जगतः सर्गे निमित्ते आदौ व्यष्टिसृष्टेः पूर्वं रजसा गुणेन शतधृतिर्ब्रह्माऽभूत् । तथा स्थितौ निमित्तभूतायां सत्वेन गुणेन क्रतुपतिः तत्फलदाता द्विजानां तद्धर्माणां च सेतुः पालकः विष्णुरभूत् । तथा अप्ययाय संहाराय तमसा गुणेन रुद्रोऽभूत् । इत्येवं तत एव सततं प्रतिकल्पं प्रजासूद्भवस्थितिलया भवन्ति ॥ ५ ॥ धर्मस्येति ॥ धर्मस्य भार्यायां दक्षस्य दुहितरि मूर्त्तिसंज्ञायां ऋषिषु प्रवरः प्रशान्तश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारायणो नरश्चेति मूर्तिद्वयेनाजनिष्ट अवतीर्णः । स च नैष्कर्म्यमात्मस्वरूपं लक्ष्यते येन तथाभूतं कर्म कर्मनिर्हाररूपं वा नारदादिभ्य उवाच उपदिदेश लोकप्रवृत्त्यर्थं स्वयं च चचार । यश्च नारायण ऋषिवर्यैर्नारदादिभिर्निषेविताङ्घ्री यस्य तथाभूतोऽद्याप्यास्ते ॥ ६ ॥ इन्द्र इति ॥ अयं तपसा मम धाम स्थानं स्वर्गं जिघृक्षति गृहीतुमिच्छतीत्येवमिन्द्रो विशङ्क्य तत्तपोनाशाय सगणं स्त्रीवसन्तादिगणसहितं कामं न्ययुङ्क्त प्रेषयामास । अतन्महिज्ञः न तन्महिमानं जानाति तथाभूतः सकामः अप्सरोगणवसन्तसुमन्दवातैः सह बदरीभिरुपाख्यायते कथ्यते इति बदर्युपाख्यस्तं तस्याश्रमं गत्वा स्त्रीणां प्रेक्षणानि कटाक्षा एव इषवो बाणास्तैस्तमविध्यत् तैस्तं क्षोभयितुं प्रवृत्तः ॥ ७ ॥ विज्ञायेति ॥ आदिदेवो भगवान् नारायणः शक्रकृतमक्रममपराधं विज्ञाय तस्य मोहस्मरणेन प्रहस्य गतस्मयः अहं धीर इति गर्वरहित एव एजमानान् स्वोद्योगस्य नष्टत्वाद्भयात्कम्पमानान् प्रति प्राह स्म । भो मदन भो मारुत भो देववध्वो युष्माकं न कश्चिदपराधः अतो मा भैष्ट । नोऽस्माकं बलिं कन्दमूलादिकमातिथ्यं गृह्णीत । इममाश्रममशून्यं कुरुध्वम् । आतिथ्याभावेऽयं शून्यप्रायः स्यादिति भावः ॥ ८ ॥ इत्थमिति ॥ हे नरदेव अभयं ददात्यभयदो भगवांस्तस्मिन्नित्थं ब्रुवति सति सव्रीडानि अत

इन्द्रो विशङ्क्य मम धाम जिघृक्षतीति कामं न्ययुङ्क्त सगणं स बदर्युपाख्यम् ॥ गत्वाप्सरोगणवसन्तसुमन्दवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥ विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् ॥ मा भैष्ट भो मदनमारुतदेववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वम् ॥ ८ ॥ इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः ॥ नैतद्विभो त्वयि परेऽविकृते विचित्रं स्वारामधीरनिकरानतपादपद्मे ॥ ९ ॥ त्वां सेवतां सुरकृता बहवोऽन्तरायाः स्वौको विलङ्घ्य परमं व्रजतां पदं ते ॥ नान्यस्य बर्हिषि बलीन्ददतः स्वभागान्धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥ १० ॥

एव नम्राणि शिरांसि येषां ते लज्जाभारेणावनतशिरस्काः देवाः कामादयः सघृणं कृपायुक्तं तं नारायणं प्रत्यूचुः । हे विभो परे अविकृते क्रोधादिरहिते स्वस्मिन्नात्मनि रमन्त इति स्वारामास्ते च ते धीरा जितेन्द्रियाश्च तेषां निकरैः समूहैरानते वन्दिते पादपद्मे यस्य तस्मिन्नित्यर्थः । त्वयि एतत् कृतापराधेष्वप्यस्मास्वनुग्रहादिकं विचित्रमाश्चर्यं न भवति ॥ ९ ॥ अस्माकमपराधाचरणं स्वभावत्वान्न चित्रमित्याहुः—त्वामिति ॥ स्वेषां देवानामोकः स्थानं स्वर्गं विलङ्घ्यातिक्रम्य परमं सर्वोत्तमं ते तव पदं स्थानं व्रजतां गच्छतां त्वां सेवतां सेवमानानाम् । शता आर्षः । सुरैरिन्द्रादिभिः कृता बहवोऽन्तराया अस्मदादयो विघ्ना भवन्ति । बर्हिषि यज्ञे स्वभागान् तत्तदिन्द्रादिभागभूतान् बलीन् पुरोडाशादीन् करान् इन्द्रादिभ्यः राज्ञे कर्षकस्येव ददतः प्रयच्छतः अन्यस्य त्वदाराधनविमुखस्य तु सुरकृता अन्तराया नैव भवन्ति । देवा हि यज्ञे स्वपूजकानां विघ्नन्न कुर्वन्ति भगवदाराधकानां तु तत्स्थानविलङ्घित्वात् विघ्नान् कुर्वन्ति तर्हि भक्तो विघ्नैर्भ्रंश्यति नेत्याहुः । धत्त इति । यदीति निश्चये हेतौ वा । यतः त्वं सर्वसुराधी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वरोऽविता रक्षकस्ततोऽसौ विघ्नानां मूर्ध्नि पदमङ्घ्रिं धत्ते विघ्नानभिभूय त्वत्पदं प्राप्नोति ॥ १० ॥ त्वद्विमुखास्तपश्चरन्तस्तु केचिदस्माकं वशे भवन्ति । केचित्क्रोधस्य तत्राद्याः कामोपभोगमपि लभन्ते क्रोधवशास्त्वतिमन्दा इत्याहुः—क्षुदिति ॥ केचिन्मूर्खाः क्षुद् बुभुक्षा तृट् पिपासा त्रिकालगुणाः शीतोष्णवर्षाणि मारुतः प्राणो बाह्यो वायुश्च जैह्वाः जिह्वोपभोग्याः शैश्नाः शिश्नोपभोगाः जैह्वशैश्नयोर्यकारवन्तं पाठमार्षं मन्ये । तानेतानस्मान् अपारजलधीन् तद्वदतिदुस्तरान् अतितीर्य विलङ्घ्य अस्मद्वेशवर्त्तिनः अभूत्वापि विफलस्य निष्फलस्य क्रोधस्य वशं यान्ति अतः समुद्रं तीर्त्वा गोष्पदे गोखुरखातगर्ते निमज्जन्ति ततश्च यथा जले मज्जन्तो विवशाः स्वमस्तकारोपितं भारमुत्सृजन्ति तथा पूर्वं सम्पादितं दुश्चरं तपः वृथा उत्सृजन्ति न भोगाय न मोक्षायेति क्रोधवशाच्छापादिना नाशयन्ति ॥ ११ ॥ इतीति ॥ तेषां कामादीनाम् इत्येवं प्रगृणतां स्तुवतां सतां विभुः भगवान् तेषां स्वलावण्यादिप्रयुक्तगर्वोपशमाय योगबलेन निर्मिताः अतोऽत्यद्भुतं दर्शनं स्वरूपं यासां तथाभूताः सुष्ठु अर्चिताः अलङ्कृताः

क्षुत्तृटत्रिकालगुणमारुतजैह्वशैश्नानस्मानपारजलधीनतितीर्य केचित् ॥ क्रोधस्य यान्ति विफलस्य वशं पदे गोर्मज्जन्ति दुश्चरतपश्च वृथोत्सृजन्ति ॥ ११ ॥ इति प्रगृणतां तेषां स्त्रियोऽत्यद्भुतदर्शनाः ॥ दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥ १२ ॥ ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः ॥ गन्धेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥ १३ ॥ तानाह देवदेवेशः प्रणतान्प्रहसन्निव ॥ आसामेकतमां वृङ्ग्ध्वं सवर्णां स्वर्गभूषणाम् ॥ १४ ॥ ओमित्यादेशमादाय नत्वा तं सुरबन्दिनः ॥ उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ १५ ॥ इन्द्रायानम्य सदसि शृण्वतां त्रिदिवौकसाम् ॥ ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः ॥ १६ ॥

स्वशुश्रूषां कुर्वतीः स्त्रियः स्त्रीर्दर्शयामास ॥ १२ ॥ ते इति ॥ ते च देवानुचराः कामादयः श्रीरिव श्रियः इव । इयङभाव आर्षः । रूपिणीः सुन्दररूपवतस्ताः स्त्रियः स्त्रीर्दृष्ट्वा तासां रूपौदार्येण रूपसौन्दर्यातिशयेन हता श्रीः कान्तिर्येषां ते तासां गन्धेन पद्मकिञ्जल्कस्येव शरीरस्य सुगन्धेनैव मुमुहुः ॥ १३ ॥ तानिति ॥ देवदेवेशो नारायणः प्रहसन्निव प्रणतांस्तान् कामादीनाह स्म।आसां स्त्रीणां मध्ये एकतमां काञ्चित् सवर्णां स्वसमानरूपां स्वर्गस्य भूषणभूतां वृङ्ग्ध्वम् वृणीध्वम् । "वृजि वर्जने" इदित् अदादिः । ॥ १२ ॥
अनेकार्थत्वाद्वरणार्थता आर्षो वा प्रयोगः ॥ १४ ॥ ओमिति ॥ सुरबन्दिनः देवभृत्याः कामादयः आदेशं भगवदाज्ञामोमित्यादाय अङ्गीकृत्य तं भगवन्तं नत्वा उर्वशीं नामाप्सरःश्रेष्ठां भगवता दत्तां पुरस्कृत्यादरेणाग्रतः कृत्वा दिवं स्वर्गं ययुः ॥ १५ ॥ इन्द्रायेति ॥ सदसि सभायां स्थितमिन्द्रं प्रणम्य त्रिदिवौकसां देवानां शृण्वतां सतां नारायणस्य बलं प्रभावमूचुः । शक्रश्च श्रुत्वा तत्रास । अहो मयाऽपराद्धमिति त्रासं प्राप विस्मितश्चाभूत् । यद्वा । तत्र सभायां विस्मित आस ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हंसेति ॥ हंसस्येव स्वरूपमस्यास्तीति हंसस्वरूपी दत्तः दत्तात्रेयः कुमारः सनत्कुमारादिः नोऽस्माकं कव्यादीनां पिता ऋषभः जगतां शिवाय भगवानच्युतः विष्णुरेव कलया हंसादिमूर्त्या अवतीर्णः आत्मयोगम् आत्मतत्वम् अवदत् उपदिष्टवान् । तथा तेन विष्णुनैव हयास्ये श्रीहयग्रीवावतारे मधुनामानमसुरं भिनत्तीति तथाभूतेन सता श्रुतयो वेदाः तत आहृता आनीताः ॥ १७ ॥ गुप्त इति ॥ तथा मात्स्ये मत्स्यावतारे तेनैवाप्यये प्रलये मनुः सत्यव्रताख्यो गुप्तो रक्षितः । तथा इला पृथ्वी ओषधयो यवव्रीह्यादिव्रीजानि । चकाराद्दृषयश्च । गुप्ताः क्रौडे वराहावतारेऽपि तेनैवाम्भसः सकाशात् क्ष्मां भूमिमुद्धरतादिदैत्यो हिरण्याक्षो हतः तथा कौर्मेऽवतारे अमृतोन्मथने निमित्तेन पृष्ठेऽद्रिर्महेन्द्राचलो धृतः तथा आर्त्तं पीडितमत एव प्रपन्नं शरणमागतमिभराजं गजेन्द्रं ग्राहात् अमुञ्चत् अमोचयत् । अन्तर्भावितण्यर्थः । एवमादौ यत्रावतारनाम न दृश्यते तत्र विष्णुः शिवाय जगतां कलयावतीर्ण इत्यनुवर्त्तनीयम् ॥ १८ ॥ संस्तुन्वत इति ॥ कश्यपार्थं समिदाहरणे गतांस्तत्र चाङ्घ्रिपतितान् अङ्गुष्ठपरिमिताकारत्वाद्गोखुरगर्त्ते एव

हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः ॥ विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥ १७ ॥ गुप्तोऽप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरताम्भसः क्ष्माम् ॥ कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे ग्राहात्प्रपन्नमिभराजममुञ्चदार्तम् ॥१८ ॥ संस्तुन्वतोऽब्धिपतिताञ्छ्रमणानृषींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टम् ॥ देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेन्द्रमभयाय सतां नृसिंहे ॥ १९ ॥ देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वाऽन्तरेषु भुवनान्यदधात्कलाभिः ॥ भूत्वाऽथ वामन इमामहरद्बलेः क्ष्मां याच्ञाच्छलेन समदाददितेः सुतेभ्यः ॥ २० ॥

समुद्रपतनवान्निमग्नान् इन्द्रेणोपहसितान् अत एवात्मानं संस्तुन्वतः स्तुतिं कुर्वाणान् । श्रुरार्षः । ऋषीन् वालखिल्यान् तत आपदोऽमोचयत् । तथा वृत्रासुरवधाद्धेतोस्तमसि ब्रह्महत्यायां प्रविष्टं शक्रं च मोचयामास । तथा असुरगृहे पिहिताः देवेषु पलायितेषु निलीनेषु च सत्सु असुरैस्तत्स्त्रियः स्वगृहमानीय निरुद्धाः अत एवानाथा रक्षकहीनास्ताश्च अनेकावतारैः भगवानमोचयत् । तथा नृसिंहेऽवतारे भगवान् सतां प्रह्लादादिस्वभक्तानामभयाय भयनिरासायासुरेन्द्रं हिरण्यकशिपुं जघ्ने हतवान् । तङार्षः ॥ १९ ॥ देवेति ॥ देवा असुराश्चात्र सन्ति योद्धारस्तत्र देवासुरे । अर्श आद्यच् । नित्यस्त्रीलिङ्गयुध्शब्दविशेषणे स्त्रीलिङ्गाभाव आर्षः । यद्वा । देवासुरसमूहे या युध् तत्रेति व्यधिकरणान्वयः । युधि युद्धे सुरार्थे इन्द्रादिकार्यसाधनार्थं दैत्यपतीन् हत्वा तथान्तरेषु अन्येष्वपि सर्वमन्वन्तरेषु कलाभिस्तत्तदवतारैर्भुवनान्यदधात् । अथ वामनो भूत्वा याच्ञाच्छलेन बलेः सकाशादिमां क्ष्मां भूमिमहरत् । तां चादितेः सुतेभ्यः इन्द्रादिभ्यः समदात् प्रायच्छत् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निःक्षत्रियामिति ॥ हैहयानां कुलस्याप्ययाय विनाशाय भार्गवाग्निः भृगुवंशेऽवतीर्णोऽग्निवदतितेजस्वी रामः त्रिःसप्तकृत्वः एकविंशतिवारान् गां भूमिं निःक्षत्रियामकृत चकार । लोकानां मलानि पापानि हन्तीति तथाभूता कीर्तिर्यस्य स सीतापतिः श्रीरामः अब्धिं बबन्ध अब्धौ सेतुं बबन्ध । ततश्च सलङ्कं लङ्कास्थवीरगणसहितं दशवक्त्रं रावणमहन् । लङ्काया अपि दहनात्सलङ्कमिति वा । स च जयति इदानीं वर्त्तते ॥२१॥ भूमेरिति ॥ अजन्मापि भगवान् भूमेर्भारावताराय यदुषु जातः स्वेच्छयाऽवतीर्णः सन् सुरैरपि दुष्कराणि कर्तुमशक्यानि दैत्यवधगोवर्द्धनोद्धरणादीनि कर्माणि करिष्यति । तथा बुद्धरूपेणावतीर्णः सन् अतदर्हान् यज्ञानुष्ठानायोग्यानपि यज्ञकृतः यज्ञान् कुर्वाणान् दैत्यान् वादैर्वेदविरुद्धतर्कैर्विमोहयति यज्ञानुष्ठानान्निवारयिष्यतीत्यर्थः । तथा कलौ कलियुगस्यान्ते कल्किरूपेणावतीर्णः सन् शूद्रान् क्षितिभुजो राज्ञो न्यहनिष्यत् हनिष्यति । लृङार्षः ॥२२॥ एवमिति ॥ हे महाभुज जगतः पत्युः पालकस्य अत एव भूरि यशो यस्य तस्य भगवतः जन्मानि कर्माणि च मया तु संक्षेपतो वर्णितानि । एवंविधान्यन्या-

निःक्षत्रियामकृत गां च त्रिसप्तकृत्वो रामस्तु हैहयकुलाऽप्ययभार्गवाग्निः ॥ सोऽब्धिं बबन्ध दशवक्त्रमहन्सलङ्कं सीतापतिर्जयति लोकमलघ्नकीर्तिः ॥ २१ ॥ भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि ॥ वादैर्विमोहयति यज्ञकृतोऽतदर्हाञ्छूद्रान्कलौ क्षितिभुजो न्यहनिष्यदन्ते ॥ २२ ॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः ॥ भूरीणि भूरियशसो वर्णितानि महाभुज ॥ २३ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ राजोवाच ॥ भगवन्तं हरिं प्रायो न भजन्त्यात्मवित्तमाः ॥ तेषामशान्तकामानां का निष्ठाऽविजितात्मनाम् ॥ १ ॥ चमस उवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ॥ चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ २ ॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ॥ न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥ ३ ॥

न्यपि भूरीणि जन्मानि कर्माणि च कविभिर्वर्णितानि सन्ति ॥ २३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ चतुर्थ एकादशस्य व्यधाद्गङ्गासहायकः ॥४॥ पञ्चमे भक्तिहीनानां निष्ठा पूजाविधिस्तथा ॥ युगे युगे वर्ण्यतेऽत्र श्लोकाः सार्द्धा द्विमाँ गणाः ॥ उवाचैर्वाचां षट्कं चाष्टापञ्चाशदनुष्टुभः ॥ ५ ॥ भगवन्तमिति ॥ हे आत्मवित्तमाः ये भगवन्तं हरिं प्रायो न भजन्ति तेषाम् अशान्तकामानाम् अविजितात्मनां च का निष्ठा किं प्राप्यम् ॥ १ ॥ भजनीयस्याभजनाद्दुर्गतिरेवेति वक्तुं प्रथमं भजनीयत्वे युक्तिमाह—मुखेति ॥ पुरुषस्य भगवतो मुखादिभ्यो गुणैः सत्वादिभिः साधनैः ब्रह्मचर्यादिभिराश्रमैः सह पृथग्ब्राह्मणादयश्चत्वारो वर्णा जज्ञिरे जाताः । गुणैरिति सत्वेन विप्रः सत्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वैश्यस्तमसा शूद्र इति । अत्र मुखादिभ्यो ब्राह्मणाद्या वर्णाः हृदयजघनवक्षःशिरोभ्यो ब्रह्मचार्याद्याश्रमाः ज्ञेयाः ॥ २ ॥ य इति ॥ एषां वर्णाश्रमवतां मध्ये ये साक्षात् आत्मप्रभवं स्वस्य कारणं पितृस्थानीयम् ईश्वरं च पुरुषं भगवन्तमज्ञानान्न भजन्ति ये च ज्ञात्वाऽप्यवजानन्ति ते कृतघ्नाः स्थानाद्वर्णा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रमाधिकाराद् भ्रष्टाः सन्तोऽधो नरके पतन्ति ॥ ३ ॥ दूरे इति ॥ तथापि दूरे हरिकथाश्रवणं येषां ते अत एव दूरे चाच्युतकीर्त्तनं येषां ते ब्राह्मणादयो ये केचित् स्त्रियः शूद्रादयश्च ते सर्वे भवादृशां भगवद्भक्तानां प्राप्ताधिकाराणां राज्ञामनुकम्प्याः यथोचितं सामदानाद्युपायैः कृपया शिक्षणीयाः ॥ ४ ॥ ज्ञानलवदुर्विग्धास्तु न चिकित्सितुं शक्याः अत उपेक्ष्या एवेत्याशयेनाह—विप्र इति ॥ विप्रादयस्त्रयः श्रौतेन उपनयनाध्यापनयजनाद्यधिकारेण जन्मना च हरेः पदान्तिकम् आराधनेन चरणप्राप्तियोग्यत्वं प्राप्ता अपि आम्नायेषु वेदेषु ये वादा अर्थवादाः।" अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्याद्यास्ते मोहकतया विद्यन्ते येषां ते तथाभूताः सन्तः मुह्यन्ति भगवदाराधनं विहाय कर्मफले सज्जन्ते ॥ ५ ॥ वस्तुतस्ते मूर्खा एवेत्याह—कर्मणीति ॥ कर्मणि अकोविदाः यथा कर्म बन्धाय न भवेत्तथा कर्त्तुमज्ञाः स्तब्धा अनम्राः मूर्खा अपि पण्डितमानिन अतो यया माध्व्या श्रोत्रप्रियया उत्सुकाः सन्तो मूढास्तया "चाटुकान् अपामसोमममृता अभूम अप्सरोभिः सह विहरिष्याम" इत्यादिकान् प्रियान् शब्दान् वदन्ति ॥ ६ ॥ विप्र इत्यादिश्लोकोक्ता वेदं मन्यमाना अपि आपातदर्शिनो दुराग्रहग्रस्ताश्चेति अथैतदपेक्षयाप्यत्यन्ताधमा बुद्धिपूर्वकं पापं चरन्तस्तत्समर्थनाय शास्त्राशयमप्यन्यथा

दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयश्चैव तेऽनुकम्प्या भवादृशाम् ॥४॥ विप्रो राजन्यवैश्यौ च हरेः प्राप्ताः पदान्तिकम् ॥
श्रौतेन जन्मनाऽथापि मुह्यन्त्याम्नायवादिनः ॥ ५ ॥ कर्मण्यकोविदाः स्तब्धा मूर्खाः पण्डितमानिनः ॥ वदन्ति चाटुकान्मूढा यया माध्व्या
गिरोत्सुकाः ॥ ६ ॥ रजसा घोरसङ्कल्पाः कामुका अहिमन्यवः ॥ दाम्भिका मानिनः पापा विहसन्त्यच्युतप्रियान् ॥ ७ ॥ वदन्ति तेऽन्यो-
ऽन्यमुपासितस्त्रियो गृहेषु मैथुन्यसुखेषु चाशिषः ॥ यजन्त्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नन्ति पशूनतद्विदः ॥ ८ ॥

वर्णयन्ति । यथाधुनापि गुप्ततया मांसमद्यादिसेविनः आगमिकतान्त्रिकादिशब्दैर्व्यवह्रियमाणा दृश्यन्ते तादृशान् वर्णयति—रजसेति ॥ रजसा रजोगुणाधिक्येन घोरः हिंसाविषयकः सङ्कल्पो येषां ते कामुकाः नानाविधविषयभोगकामनया विष्टाः अहिवन्मन्युः क्रोधो येषां ते दाम्भिकाः परप्रतारणार्थं धर्माचाराभिव्यञ्जकाः न तु स्वयं शास्त्रे श्रद्धालवः मानिनः दुरहङ्कारिणः पापा निरन्तरं निषिद्धाचारतत्पराः अच्युतप्रियान् भगवद्भक्तान् विहसन्ति॥ ७॥वदन्तीति ॥ उपासिता महत्त्वेन सेविताः स्त्रियो न तु वृद्धा यैस्ते गृहेषु मैथुन्यं मैथुनसुखमेव परं न त्वातिथ्यादि येषु तेषु गृहेषु अन्योऽन्यम् "इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।"इत्याद्याकारा आशिषो वदन्ति । यद्वा । धनधान्यकलत्रसुतादिसंपत्तयो वो भवन्त्विति परस्परमाशिषो ददतीत्यर्थः।तथा अतद्विदः यज्ञानुष्ठानं हिंसादिदोषं च न विदन्ति तादृशाः सन्तः असृष्टान्नविधानदक्षिणं न सृष्टा न सम्पादिता अन्नविधानदक्षिणा यत्र तद्यथा भवति तथा यजन्ति वृत्त्यै जीविकार्थं परं केवलं पशून्घ्नन्ति । अत्राधुनातनेषु दुराचारेषु अन्योऽन्यमुपासितस्त्रिय इति यथापाठान्वयोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुगमः ॥ ८ ॥ श्रियेति ॥ श्रिया धनादिसम्पदा विभूत्या आधिपत्यादिना अभिजनेन जनसंग्रहेण विद्यया तर्कशास्त्राद्यभ्यासेन त्यागेन दानेन रूपेण सौन्दर्येण शरीरबलेन कर्मणा श्रौतस्मार्त्तकर्मणा च जातो यः स्मयो गर्वस्तेन अन्धा धीर्येषां ते खलाः सहेश्वरान् ईश्वरसहितान् सतः हरिप्रियान् अवमन्यन्ति तेषामनादरं कुर्वन्ति । तङ्भाव आर्षः ॥ ९ ॥ सर्वेष्विति ॥ अबुधास्ते शश्वत्सर्वदैव यथा खमाकाशं तथा दोषासंस्पर्शपूर्वकं सर्वेषु तनुभृत्सु प्राणिषु आत्मानम् आत्मत्वेनावस्थितम् अभीष्टं सर्वपुरुषार्थरूपं वेदेनोपगीतमीश्वरं न शृण्वते प्रबोध्यमानमपि न शृण्वन्ति । तङार्षः । किन्तु मनोरथानां व्यवायामिषमद्यादिविषयाणां वार्तया प्रवदन्ति निवृत्तिपरं वेदं प्रवृत्तिपरं वर्णयन्ति । यद्वा । वाक्यभेदेन व्याख्या । सप्तमी च तन्त्रेण षष्ठीसप्तम्योरर्थे । तथा च सर्वभूतानां पश्वादीनामप्यभीष्टं परप्रेमास्पदं तेषामात्मानं हिंसादिकरणसमये न शृण्वते नानुसन्दधते तेषु दयां न कुर्वन्ति । तथा सर्वभूतेष्ववस्थितमीश्वरं सर्वरक्षकं पापिनां दण्डयितारं च नानुसंदधते हिंसासमये परमेश्वरान्न बिभ्यति एवं हिंसादिप्रतिपादनसमये च वेदस्योपगीतमभिप्रायमहिंसात्मकं परैः प्रबोद्ध्यमानमपि न शृण्वते किन्तु यथा तेषां मनोरथाः मांसमद्यव्यवायादिविषया भवन्ति तथा वेदाशयं प्रवदन्ति ॥ १० ॥ ननु भार्यागमनहुतशेषमांसभक्षणसौत्रामणीप्राप्तसुराग्रहाणां शास्त्रसिद्धत्वादेकान्ततो व्यवायादीनामपि निन्दा न युक्तेत्यत आह—लोक इति ॥ लोके व्यवायः स्त्रीसं-

श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ॥ जातस्मयेनान्धधियः सहेश्वरान्सतोऽवमन्यन्ति हरिप्रियान्खलाः ॥ ९ ॥

सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरम् ॥ वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदन्ति वार्तया ॥ १० ॥ लोके

व्यवायाऽमिषमद्यसेवा नित्यास्तु जन्तोर्न हि तत्र चोदना ॥ व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥ ११ ॥

गः आमिषमद्ययोर्मांसमदिरयोः सेवा भक्षणानि । सेवसेवाशब्दयोर्वञन्ताप्रत्ययान्तयोस्तन्त्रेण निर्देशस्तेन तेषु आसु इत्युभयथा परामर्शः । ताश्च जन्तोः प्राणिमात्रस्य नित्याः रागत एव नित्यप्राप्ताः तत्र व्यवाये स्वभावतो रागः आमिषमद्ययोः स्वकुलपरम्पराप्राप्तत्वात्तदभावे दुःसङ्गादिवशाद्वेति । अतस्तत्र भार्यागमनादावपि चोदनाविधिर्नास्त्येव अप्राप्तप्रापणस्यैव विधित्वात्तत्रैव शास्त्रप्रामाण्यौचित्यात् । अतः तेषु व्यवायादिषु विवाहयज्ञसुराग्रहैः व्यवस्थितिर्व्यवस्थैव शास्त्रेण बोधिता।तथा हि रोगकालावस्थादेशादिवशात् स्त्रीमांसमद्येषु यद्यद् विना स्थातुं न शक्यते तत्र तत्रैवं कार्यम्।विवाहसंस्कारनिष्पन्नस्वत्वायां भार्यायामेव व्यवायः कार्यः।यज्ञ एवामिषसेवा सौत्रामण्यामेव मद्यसेवा तत्रापि देशकुलाचारादिकमनतिक्रम्यैवेति निन्दादिरहितस्थल एवानुज्ञामात्रं दत्तं नतु वस्तुतो विधिः अत आसु व्यवायादिसेवासु निवृत्तिरेवेष्टा । निवृत्तावेव शास्त्रस्य तात्पर्यमिति अयं भावः । "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या विधीयते॥" इति विधिव्यवस्थाश्लोकः । अस्यार्थः । यत्र रागतो विध्यन्तरतो न्यायतो वा सर्वथैव प्राप्तिर्नास्ति सः विधिः अपूर्वविधिरुच्यते । यथा "अहरहः सन्ध्यामुपासीत, ग्रहणे स्नायात् " इत्यादि । अत्यन्ताप्राप्तिरहिते स्थले तु नापूर्वविधिः किन्तु नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमविधिः परिसङ्ख्याविधिर्वा । तत्र विधिं विना पाक्षिके प्रापणे सति एकत्र कोटौ प्राप्तौ सत्यामन्यत्र कोटौ चाप्राप्तौ सत्यामप्राप्तांशपूरको नियमविधिः । यथा " समे यजेत " इति दर्शपूर्णमासाभ्यां यजेतेति यागः कर्तव्यतया विहितः । स च देशमन्तरेण कर्तुमशक्य इत्यर्थाद्देशः प्राप्तः । स च समो विषमश्चेति द्विविधः । तत्र यदा यजमानः समे यियक्षते तदा समदेशः प्राप्त एव । यदा तु विषमे देशे यियक्षते तदा समो देशो न प्राप्नोति तदा अनेन समो देशोऽप्राप्तो विधीयते इत्यप्राप्तांशपूरणात् सम एव देशे यजेतेति वचनव्यक्तिः । ततश्च विषमदेशनिवृत्तिरार्थिकी तथा " प्राङ्मुखोऽन्नानि भुञ्जीत " इति इदमपि स्मार्त्तमुदाहरणं व्याख्यातम् । तत्र चान्यत्र चेति यत्रोद्देश्ये यस्य विधानं तदन्यस्मिन्नपि तत्संबन्धस्य प्रवृत्तितः प्रसक्तावित्यर्थः । यद्वा । तत्र विधिविषये अन्यत्र विधित इतरत्र रागस्थले च प्राप्तौ सत्यां परिसङ्ख्याविधिः । यथा "पञ्च पञ्चनखा भक्ष्या " इति । अत्र शशादीन् पञ्चनखानुद्दिश्य भक्ष्यत्वविधानं तदन्यस्मिन् श्वादौ अपि भक्ष्यत्वसंबन्धस्य रागतः प्रसक्तौ । यद्वा । विधिविषये शशादौ रागस्थले श्वादौ च भक्ष्यत्वप्राप्तौ पञ्चपञ्चनखेतरमांसानि सर्वाण्येवाभक्ष्याणि भोक्तुः प्रत्यवायजनकानीत्यनेन बोध्यते । मांसभक्षणे पञ्चपञ्चनखमांसान्येव परिसङ्ख्यातानि अभ्यनुज्ञातानीति तत्रैव न प्रत्यवायः परिसङ्ख्या या अभ्यनुज्ञादानमात्रार्थत्वात् सर्वमांसानामभक्षण एव शास्त्रतात्पर्यम् इति । प्रकृते च व्यवायादिषु अपूर्वविधिर्नास्त्येव, रागतो नित्यप्राप्तत्वात् । नापि नियमविधिः रागतो नित्यप्राप्तत्वेन प्राप्तेः पाक्षिकत्वाभावात् । न चारुच्यादिस्थले प्राप्त्यभावः कल्प्यः । मनसि संस्काररूपेण स्थितस्य रागस्य तत्राप्यनपायेन

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशान्ति ॥ गृहेषु युञ्जन्ति कलेवरस्य मृत्युं न पश्यन्ति दुरन्तवीर्यम् ॥ १२ ॥

तादृशविषये अप्राप्तेरनङ्गीकारात् । अन्यथा "पञ्च पञ्चनखा भक्ष्या " इत्यादावपि अरुच्यादिना पाक्षिकत्वाङ्गीकारे सर्वशास्त्रसिद्धस्य सर्वैः शास्त्रकारैरङ्गीकृतस्य परिसङ्ख्याविधेर्लोपापत्त्या तत्रापि नियमस्वीकारे शशाद्यभक्षणे दोषकल्पनापत्तेः । तस्माद् भार्यागमनादिशास्त्रं परिसङ्ख्याविधिरेव । तथा हि यदि स्त्रीसङ्गं विना स्थातुं न शक्यते तदा विवाहितां विना नोपेयात् तत्रापि रजोदर्शनादिसमयादन्यत्रैवेत्यादिक्रमतो निवृत्तिरेवाभिप्रेता । नन्वेवम् । "ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः ॥" इति दोषश्रवणं न स्यात् इति चेत् गृहस्थस्य स्त्रीरक्षणादिविध्यतिक्रमात् दोषश्रवणोपपत्तेः । एवं "हुतशेषादन्यन्न भक्षयेत् ।" सौत्रामण्या अन्यत्र सुरां न गृह्णीयात् " इति सर्वत्र रागप्राप्तिस्थले परिसङ्ख्या बोध्या । विषयेष्वत्यासक्तो गृहस्थः सर्वत्राधिकारी । ननु तर्हि कथं धर्मशास्त्रनिबन्धकारा ऋतुगमनादीनां नियमविधित्वं व्यवातिष्ठिपन् निवृत्तिमात्रपरत्वे चात्रापि कुतो व्यवस्थितिरतेषु इत्याद्युक्तमिति चेत् न तावत्परिसङ्ख्याविधिना श्रुत्या निवृत्तिरुच्यते। तथा सति स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात्। यदाहुः।"श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाध इत्येवं परिसङ्ख्या त्रिदूषणा॥"इति अतो रागतो नित्यप्राप्ते अप्राप्तांशपूरणलक्षणस्य नियमफलस्याप्यभावान्नियमविधिद्वारा फलतः परिसङ्ख्यैवेति अलं विस्तरेण । शेषं यद्घ्राणभक्ष इत्यत्र ज्ञेयम् ॥११॥ ननु व्यवायामिषमद्यानिवृत्तावेव शास्त्रतात्पर्यं चेद्धनार्जनादि व्यर्थमेवेति चेत्तत्राह—धनमिति॥ धनं च धर्मे एवैकं फलं यस्य तादृशमस्ति धनस्य धर्मानुष्ठानमेव मुख्यं प्रयोजनम् धर्मस्य फलमाह—यत इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतो यस्मात् धर्मात् अनुप्रशान्ति अनु अनन्तरमेव प्रकृष्टा शान्तिर्मोक्षलक्षणा यस्मात्तत् सविज्ञानमपरोक्षज्ञानसहितं दृढं परोक्षज्ञानं भवति। यतो धनाद्धर्मः। ततः क्रमात्परोक्षज्ञानापरोक्षज्ञानप्रशान्तयो भवन्ति। तद्धर्म्मादिफलकं धनं गृहेषु देहाद्यर्थं युञ्जन्ति तथा इत्यर्थः। दुरन्तमप्रतिहतं वीर्यं बलं यस्य तं कलेवरस्य मृत्युं न पश्यन्ति ॥ १२ ॥ किंच व्यवस्थयापि व्यवायाद्यनुज्ञानं न यथेष्टं किं त्वन्यथैवेत्याह—यदिति ॥ यत् यस्मात् सुरायाः घ्राणभक्षः अवघ्राणं स एव विहितो न पानम्। तथा पशोरप्यालभनमेव विहितं न तु हिंसा। अत्रेदं बोध्यम्। देवतोद्देशेन यत्पशुहननं तदालभनम्। "वायव्यं श्वेतमालभेत" इत्यादिश्रुतेः।तत्तु न हिंसा।"या वेदविहिता हिंसा सा न हिंसेति कीर्त्यते।" इति वचनात्। यज्ञेऽपि भक्षणोद्देशेन तत्क्रियमाणं तु लौकिकहननवद्धिंसैव।अत्र त्वालभनमेव विहितं न तु हिंसा अतो न यथेष्टभक्षणाभ्यनुज्ञेति। एवं व्यवायोऽपि प्रजया पुत्रोत्पत्तिनिमित्तेनैव विहितो न रत्यै रतिसुखार्थम्।अतो मनोरथवादिन इमं विशुद्धं स्वधर्मं न विदुः इति टीकाकाराः व्यवस्थितिस्तेषु इति। प्राक्सूचितव्यवस्थाविवरणत्वेनेमं श्लोकं व्याचक्षते। यद्वा। अधिकारिभेदेन व्यवस्था। तथा हि लोके त्रिधा जनाः। विषयेष्वत्यासक्ता नात्यासक्ता अनासक्ताश्च। सर्वे तेऽपि शास्त्रप्रामाण्याभ्युपगन्तारः तदनभ्युपगन्तारश्च।तत्रान्त्याः शास्त्रप्रामाण्यानभ्युपगन्तारो नास्तिकास्तानधिकृत्य "मुखबाहूरुपादेभ्यः" इत्याद्युक्तम्।अभ्युपगन्तारोऽपि द्विधा।शास्त्रतात्पर्यविचारे शक्तास्तत्राशक्ताश्च। तत्रान्त्यान् अधिकृत्य "दूरे हरिकथाः केचित्" इत्यादि कथितम्। विचारे शक्ताश्च अनृजुहृदयाः ऋजुहृदयाश्च। तत्राद्या दुराग्रहग्रस्ताः आपातदर्शिनो ये,विप्रो राजन्यवैश्यौ

यद्घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा ॥ एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मम् ॥ १३ ॥

च इति श्लोकद्वयेनोक्ताः। केचित्ततोऽप्यधमाः।" ये रजसा घोरसङ्कल्पा " इत्यादिनोक्ताः। उभयेऽपि ज्ञानलवदुर्विदग्धाः उपदेष्टुमशक्या उपेक्ष्या एव। ये तु विषयेष्वत्याशक्ताः ऋजुहृदयास्तान् प्रति " व्यवस्थितिस्थितिस्तेषु विवाहयज्ञ " इत्यादिव्यवस्था। ये च नात्यासक्ता ये चानासक्ता मुमुक्षवो गृहस्थाः ये च तादृशा गृहस्थभिन्नास्तान् " त्रीन्प्रति यद्घ्राणभक्ष " इति वाक्यस्य तन्त्रप्रयुक्तार्थभेदेन व्यवस्था। तत्र नात्यासक्तान् प्रति अर्थ उक्त एव अनासक्तान् मुमुक्षून् गृहस्थान् प्रति तु यत् यथा सुराया घ्राणभक्षः घ्राणरूपं भक्षणमपि घ्राणमात्रमपीत्यर्थः। अविहितः न विहितः घ्रातिरघ्रेयमद्ययोरिति निषेधात्। नञर्थे अकारोऽव्ययं पृथक् पदम्। " अमानोनाः प्रतिषेधे " इति कोषात्। " श्रियं भागवतीं वा स्पृहयन्ति भद्राम् " इति तृतीयस्कन्धे स्वाम्यादिभिर्व्याख्यातत्वाच्च। तथा हिंसारूपं पशोरालभनमपि न विहितम्। हिंसालभनयोः विशेषणविशेष्यभावः। हिंसेति हेतुगर्भता एवं व्यवायोऽपि प्रजया हेतुना रत्यै रत्यर्थं वा न विहितः अनासक्तानां प्रजारत्योः कामाभावात्। किन्तु गृहस्थस्य स्वदाररक्षणनिमित्तः।" युष्माकं कामविहन्ता पातकी स्यात्, " ऋतुस्नातां तु यो भार्याम् " इत्यादिवाक्यबोधितदोषानुद्भवमात्रनिमित्तो वा निषिद्धरजोदर्शनादिव्यतिरेकेण विहितः संभवतीति। अत्रैकस्य नकारस्य आवृत्त्यान्वयः।" शिवो ब्रह्मा न चाच्युतः, तान्यहं वेद नो जनाः " इत्यादिभागवतशैलीसिद्धः। अनासक्तान् गृहस्थभिन्नान् प्रत्यप्ययमेवार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र दाररक्षणादिनिमित्तो व्यवायोऽपि न प्राप्नोतीत्येतावान् विशेषः । ननु अनासक्तान् गृहस्थभिन्नान् प्रति उक्तोऽर्थः संगच्छतां नाम तादृशान् गृहस्थान् प्रति प्रथमोऽर्थ एव किं नस्यादिति चेत् । न तावत्तेषां सुराप्रसक्तिः । यतः ऋद्धिकामस्याग्निचितो मुखेतरच्छिद्रैः सोमस्राविणः मुखेन सोमवामि नः राज्यच्युतस्य नृपस्य पशुकामस्य च सौत्रामणीयागो विहितः । तत्रानासक्तानामुक्ता कामना उक्तं निमित्तं वा न संभवति । कुतः सौत्रामण्यनुष्ठानं कुतस्तरां सुराप्राशनप्रसक्तिः । नापि हुतशिष्टमांसभक्षणप्रसक्तिर्यज्ञे—पश्वालम्भनप्रसक्तिश्च हिंसामांसादिनिवृत्तानां दयार्द्राणां तेषां प्रायः सकामविषयपश्वालम्भनयज्ञानामप्राप्तेः । निमित्तादिना कथंचित्प्राप्तौ तदनुकल्पमात्रेण कर्मान्तरेण वा निर्वाहे बलाद्धिंसामांसभक्षणादौ शास्त्रस्याप्यप्रवर्त्तकत्वात् अत एवानुकल्पबोधकशास्त्रमपि सार्थम् । यतो वेदो निवृत्तिपरोऽपि विषयासक्तान् धर्मे स्थापयितुं दुष्टान् पुत्रान् हितकारी चतुरः पितेव विषयप्रवृत्तिमिवोपदिश्य शनैः विषयेभ्यो निवर्त्तयति न पुनर्निवृत्तान् बलात्प्रवर्त्तयति । श्रीभागवतं च बहुशः हिंसामांसादिनिवृत्तिमेवोपदिशति । अतस्तदभिप्रायोऽपि न कदाचित् हिंसामांसादिप्रवृत्तिलेशेऽपि संभवति । अत उक्तमर्थं युक्तं मन्यामहे । न चैकोच्चारणेऽर्थनैक्यं दोषः । तन्त्रादिना व्याकरणे तावदनेकार्थता प्रसिद्धैव । चतुःश्लोकीभागवतव्याख्यानादौ चक्रवर्त्यादिभिस्तन्त्रस्याश्रयणाच्चेति । हिंसामांसनिषेधादिवाक्यानि भागवते भारतेऽन्यत्र च स्पष्टानीति न लिख्यन्ते ।

ये त्वनेवंविदोऽसन्तः स्तब्धाः सदभिमानिनः ॥ पशून्द्रुह्यन्ति विस्रब्धाः प्रेत्य खादन्ति ते च तान् ॥ १४ ॥

द्विषन्तः परकायेषु स्वात्मानं हरिमीश्वरम् ॥ मृतके सानुबन्धेऽस्मिन्बद्धस्नेहाः पतन्त्यधः ॥ १५ ॥

अत्यासक्तान् गृहस्थानधिकृत्य प्रवृत्तानि वाक्यानि त्वेतद्बाधाय नालमिति तदेवं सङ्क्षेपतो व्यवस्था । ये अत्यन्तासक्ता गृहस्थास्ते व्यवायादिषु यं विना स्थातुं न शक्नुयुस्ते देशाचाराद्यनुरोधेन तत्तन्मात्रमुपयुञ्जीरन् । तत्रापि स्वपत्न्यामेव व्यवायं यज्ञे एव मांसं सौत्रामण्यामेव सुराम् । ये च नात्यासक्ता गृहस्थास्ते यथोपयोगमात्रं ऋतुस्नातायामेव संतानार्थमेव स्त्रीचारित्ररक्षार्थमेव च व्यवायं यज्ञे हुतशेषमेव मांसं सौत्रामण्यामेव सुराघ्राणमेवोपयुञ्जीरन् । येऽनासक्ता गृहस्थास्ते च स्वस्त्रीरक्षणमात्रार्थं व्यवायं सेवेरन् । न क्वापि मांसं न च सुराघ्राणमपि । गृहस्थभिन्ना अनासक्तास्तु तेषु न किमपीति । विस्तरभयादुपरम्यते ॥ १३ ॥ पुनः पूर्वोक्तान् दुर्विदग्धान्निन्दति—ये इति ॥ ये त्वनेवंविदः न एवं धर्मं विदन्ति असन्तः स्तब्धाः अविनीताः सन्तो वयमित्यभिमानवन्तः अतो विश्रब्धाः अनेन मनोरथो भविष्यतीति विश्वस्ताः । यद्वा । तदानान्तनपोषणेन पशुभिर्विश्वस्ताः अपि दयारहिताः पशून् द्रुह्यन्ति घ्नन्ति तांश्च ते पशवोऽपि प्रेत्य परलोकं यमपुरं गत्वा खादन्ति ॥१४॥ द्विषन्त इति ॥ सानुबन्धे पुत्रकलत्रादिसहिते मृतके शवतुल्ये स्वदेहे बद्धः स्नेहो यैस्ते ये परकायेषु जीवरूपेण स्थितमीश्वरं हरिं स्वात्मानमेव द्रुह्यन्ति ये मांसार्थं पशून् हिंसन्ति लोकान् वा यद्विषन्ति तत्स्वात्मानं हरिमेव द्विषन्ति इत्यर्थः । तद्दोषादधः नरके पतन्ति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये इति ॥ अज्ञास्तत्वज्ञैरनुकम्पितास्तरन्ति तत्वज्ञास्तु स्वत एव तरन्ति । ये तु कैवल्यं तत्वज्ञानमसंप्राप्ता मूढतां चातीता अतो नात्यन्तमज्ञाः न च तत्वज्ञाः किन्त्वन्तरालवर्त्तिनो विज्ञाभिमानिनः स्तब्धा अविनीताः त्रैवर्गिकास्त्रिवर्गव्यापृताः अक्षणिकाः श्रवणाद्यवसरहीनाः शरीरादिस्थैर्यबुद्धयो वा ते आत्मानं घातयन्ति नरकादिपातसाधनं कुर्वन्तीत्यर्थः ॥ १६ ॥ एत इति ॥ एते आत्महनः आत्मापह्नवकर्त्तारः अशान्ताः अज्ञाने कर्मणि ज्ञानमानिनो भ्रान्ताः न कृतं कृत्यं श्रवणादिसाधनं यैः अतः कालेन ध्वस्तः मनोरथो येषां ते सीदन्ति नरकादौ क्लिश्यन्त्येव ॥ १७ ॥ हित्वेति ॥ वासुदेवपराङ्मुखा जनाः गृहादित्यागं नरकप्राप्तिं चानिच्छन्तोऽपि अत्यायासेन अतिश्रमेण रचिताः संपादिताः अपि याः गृहापत्यसुहृच्छ्रियस्ताः इहैव हित्वा तमो नरकं विशन्ति ॥ १८ ॥ कस्मिन्निति ॥ भगवान् कस्मिन् काले किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृगाकारः केन वा नाम्ना केन वा विधिना नृभिः पूज्यते तदिहास्मदग्रे उच्यताम् ॥ १९॥ कृत इति ॥ कृतादीनि युगानि एषु कृतादिकालेषु नानाप्रकाराः वर्णा अभिधा

ये कैवल्यमसंप्राप्ता ये चातीताश्च मूढताम् ॥ त्रैवर्गिका ह्यक्षणिका आत्मानं घातयन्ति ते ॥ १६ ॥ एत आत्महनोऽशान्ता अज्ञाने ज्ञानमानिनः ॥ सीदन्त्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥ १७ ॥ हित्वाऽऽत्मायासरचिता गृहापत्यसुहृच्छ्रियः ॥ तमो विशन्त्यनिच्छन्तो वासुदेवपराङ्मुखाः ॥ १८ ॥ राजोवाच ॥ कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः ॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यताम् ॥ १९ ॥ करभाजन उवाच ॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः ॥ नानावर्णाभिधाकारो नानैव विधिनेज्यते ॥ २० ॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दण्डकमण्डलू ॥ २१ ॥ मनुष्यास्तु तदा शान्ता निर्वैराः सुहृदः समाः ॥ यजन्ति तपसा देवं शमेन च दमेन च ॥ २२ ॥ हंसः सुपर्णो वैकुण्ठो धर्मो योगेश्वरो मनुः ॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥ २३ ॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः ॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः ॥ २४ ॥

नामानि आकाराश्च यस्य स केशवो नानैव विधिना प्रकारेणेज्यते पूज्यते ॥ २० ॥ कृत इति ॥ शुक्लः शुक्लवर्णः शुक्लनामा च कृष्णाजिनं कृष्णसारचर्म उपवीतं यज्ञसूत्रम् अक्षोऽकारादिक्षान्तवर्णमयमाला तान् दण्डकमण्डलू च बिभ्रदिति ब्रह्मचारिवेशो दर्शितः ॥ २१ ॥ मनुष्या इति ॥ तदा कृतयुगे मनुष्याः शान्ता निर्वैराः सुहृदः सर्वोपकारिणः समाः समदर्शिनः ते च तपसा ध्यानेन शमेन दमेन च देवं भगवन्तं भजन्ति ॥ २२ ॥ हंस इति ॥ कृतयुगे भगवान् हंसादिभिर्नामभिर्गीयते व्यवह्रियते ॥ २३ ॥ त्रेतायामिति ॥ त्रेतायामसौ भगवान् रक्तवर्णः रक्तनामा च चतुर्बाहुः त्रिगुणा दीक्षाङ्गभूता मेखला कटिसूत्रं यस्य सः यज्ञमूर्त्तिः हिरण्यकेशः पिङ्गकेशः त्रय्यात्मा ऋगादिवेदत्रयीप्रतिपादितः आत्मा मूर्तिर्यस्य सः स्रुक् स्रुवाद्युपलक्षणं चिह्नं यस्य सः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ तदा त्रेतायां धर्मिष्ठाः ब्रह्मवादिनो मनुजास्ते सर्वदेवमयम् अत एव मुख्यं देवं हरिं त्रय्या विद्यया त्रय्युक्तकर्मभिः यजन्ति ॥ २५ ॥ विष्णुरिति ॥ तदा विष्णुरित्यादिनामभिर्भगवान् ईर्यते वर्षति कामान् भक्तेष्विति वृषः आकम्पयति क्लेशांस्तेषामित्याकपिः स चासौ स च जयत्येव सर्वमिति जयन्तः । स्पष्टं शेषम् ॥ २६ ॥ द्वापरे इति ॥ द्वापरे भगवान् श्यामः अतसीपुष्पसंकाशश्यामनामा च पीतवासाः निजानि चक्रादीन्यायुधानि यस्य सः श्रीवत्सो नाम वक्षसि दक्षिणभागे रोम्णां प्रदक्षिणावर्त्तः स आदिर्येषां करचरणादिगतपद्मादीनां तैरङ्कैश्चिह्नैः तथा लक्षणैर्बाह्यैः कौस्तुभादिभिश्चोपलक्षितः ॥ २७ ॥ तमिति ॥ तदा हे नृप जिज्ञासवः तत्त्वज्ञानेच्छवः मर्त्या मनुष्याः महाराजयोग्यान्युपलक्षणानि छत्रचामरादीनि यस्य तं परं पुरुषं वेदतन्त्राभ्यां वेदतन्त्रोक्तप्रकारेण यजन्ति पूजयन्ति ॥ २८ ॥ मन्त्रामान्याह—नम इति द्वयम् ॥ स्पष्टम् ॥ २९ ॥ ३० ॥ इतीति ॥ हे उर्वीश भूपते इत्येवं द्वापरे जगदीश्वरं स्तुवन्ति कलावपि यथा नानातन्त्रविधानेन तन्त्रोक्तप्रकारेण तं यजन्ति तच्छृणु । एतेन कलौ

तं तदा मनुजा देवं सर्वदेवमयं हरिम् ॥ यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः ॥ २५ ॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः ॥ वृषाकपिर्जयन्तश्च उरुगाय इतीर्यते ॥ २६ ॥ द्वापरे भगवाञ्छ्यामः पीतवासा निजायुधः ॥ श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः ॥ २७ ॥ तं तदा पुरुषं मर्त्या महाराजोपलक्षणम् ॥ यजन्ति वेदतन्त्राभ्यां परं जिज्ञासवो नृप ॥ २८ ॥ नमस्ते वासुदेवाय नमः संकर्षणाय च ॥ प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥ २९ ॥ नारायणाय ऋषये पुरुषाय महात्मने ॥ विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः ॥ ३० ॥ इति द्वापर उर्वीश स्तुवन्ति जगदीश्वरम् ॥ नानातन्त्रविधानेन कलावपि यथा शृणु ॥ ३१ ॥ कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ॥ यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥ ३२ ॥ ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ॥ भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ ३३ ॥

तन्त्रमार्गस्य प्राधान्यं दर्शितमिति स्वामिपादाः ॥ ३१ ॥ कृष्णेति ॥ कृष्णवर्णं त्विषा कान्त्या अकृष्णमिन्द्रनीलमणिवदुज्ज्वलम् इति रुक्षतां व्यावर्त्तयति । यद्वा । त्विषा कान्त्या कृष्णावतारं तेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति । अङ्गानि हृदयादीनि उपाङ्गानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदाः सुनन्दादयस्तत्सहितं संकीर्त्तनं नामोच्चारणं संस्तुतिश्च तत्प्रधानैर्यज्ञैः अर्चनैः सुमेधसो विवेकिनो यजन्ति । हीति प्रसिद्धम् ॥ ३२ ॥ कलौ प्रायः कृष्णरामयोर्भजनमुपदिशति तत्र कृष्णं स्तौति—ध्येयमिति ॥ हे प्रणतपाल भक्तरक्षक हे महापुरुष सदा ध्येयं ध्यानार्हं सदा इन्द्रियकुटुम्बादिभिः परिभवं तिरस्कारं हन्ति तादृशं सदा अभीष्टदो भक्तमनोरथपूरकं सदा तीर्थास्पदं गङ्गाद्याश्रयत्वेन परमपावनम् अत एव सदाशिवविरिञ्चिभ्यां नुतं स्तुतं शरण्यं शरणार्हं भृत्यानामार्तिहं पीडाहरं भवाब्धेः पोतं तारकं च ते चरणारविन्दं वन्दे ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीरामं स्तौति—त्यक्त्वेति ॥ हे महापुरुष धर्मिष्ठः पितृप्रतिश्रुतपालको यत् यो भवान् अन्यैः सुदुस्त्यजा या सुराणामपीप्सिता राज्यलक्ष्मी राज्यसम्पत् तां त्यक्त्वा आर्यस्य दशरथस्य पितुर्वचसा अरण्यं वनमगात् दयितया प्रियया सीतया ईप्सितं मायामृगं मायया स्वर्णमृगाकारं मारीचं योऽन्वधावत्तस्य तव चरणारविन्दं वन्दे । स्वामिपादास्तु हे धर्मिष्ठेत्यपि संबोधनम् । तथाप्यविवक्षितत्वादार्यपदेन सन्ध्यभावः । यद्वा । यच्चरणारविन्दमरण्यमगात् । यच्च मायामृगमन्वधावत्तत्ते चरणारविन्दं वन्दे इत्यन्वयः । अन्यत्समानम् इत्यप्याहुः ॥ ३४ ॥ एवमिति ॥ हे राजन् एवं श्रेयसां पुरुषार्थानामीश्वरो दाता हरिः युगानुरूपाभ्यां नामरूपाभ्यामिति शेषः । युगेषु वर्त्तमानैः मनुजैरिज्यते आराध्यते ॥ ३५ ॥ युगेषु कलिरेव श्रेष्ठ इत्याह—कलिमिति ॥ ये गुणज्ञाः कलेर्गुणान् जानन्ति ते आर्याः वृद्धाः विवेकिनः सारभागिनो गुणांशग्राहिणः ते कलिमेव सभाजयन्ति प्रशंसन्ति । यत्र कलौ भगवन्नामसंकीर्त्तनमात्रेणैव सर्वः सर्वयुगप्राप्यः स्वाभिलषितोऽर्थोऽभिलभ्यते ॥ ३६ ॥ न हीति ॥ यस्मात्कलौ भगवन्नामसंकीर्त्तनमे-

त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम् ॥ मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ते चरणारविन्दम् ॥ ३४ ॥ एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः ॥ मनुजैरिज्यते राजञ्छ्रेयसामीश्वरो हरिः ॥ ३५ ॥ कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ३६ ॥ न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह ॥ यतो विन्देत परमां शान्तिं नश्यति संसृतिः ॥ ३७ ॥ कृतादिषु प्रजा राजन्कलाविच्छन्ति संभवम् ॥ कलौ खलु भविष्यन्ति नारायणपरायणाः ॥ क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ॥ ३८ ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ कावेरी च महापुण्या प्रतीची च महानदी ॥ ३९ ॥ ये पिबन्ति जलं तासां मनुजा मनुजेश्वर ॥ प्रायो भक्ता भविष्यन्ति वासुदेवेऽमलाशयाः ॥ ४० ॥ देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तम् ॥ ४१ ॥

वाभिलषितार्थसाधनं तस्मादिह संसारे भ्राम्यतां देहिनामतो नामसङ्कीर्तनादन्यः परम उत्कृष्टः लाभः लाभहेतुः पुरुषार्थसाधनं नैवास्ति । यतो नामसंकीर्त्तनादेव प्राणी परमां मुक्तिरूपां शान्तिं विन्देत तस्य संसृतिः जन्ममरणादिदुःखं च नश्यति ॥ ३७ ॥ कृतेति अर्द्धम् ॥ हे राजन् अतः कृतादियुगत्रयवार्त्तिन्यः प्रजाः कलौ संभवमुत्पत्तिमिच्छन्ति । कलाविति ॥ हे महाराज कलौ खलु क्वचित्क्वचित् नारायणपरायणाः जनाः भविष्यन्ति द्रविडेषु देशेषु च तादृशा भूरिशो भविष्यन्ति ॥ ३८ ॥ ताम्रेति ॥ यत्र द्रविडेषु ताम्रपर्ण्यादयो नद्यः सन्ति ॥ ३९ ॥ ये इति ॥ हे मनुजेश्वर ये मनुजास्तासां नदीनां जलं पिबन्ति स्नानादीनामप्युपलक्षणम् । ते अमलाशयाः सन्तो वासुदेवे भगवति भक्ता भवन्ति ॥ ४० ॥ भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतया नित्यनैमित्तिककर्मयन्त्रणाराहित्यमाह—देवेति ॥ हे राजन् यः कर्तं भेदमहङ्कारं कृत्यं वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

" कृती च्छेदने " घञ् अच् वा । परिहृत्य त्यक्त्वा वासुदेवः सर्वमिति ज्ञात्वेत्यर्थः । शरण्यं शरणार्हं मुकुन्दं सर्वात्मता सर्वभावेन शरणं गतः स देवादीनामृणी नास्ति अतस्तदृणापाकरणार्थं तेषां किङ्करः तदर्थं नित्यं पञ्चयज्ञादिनियोगयोग्योऽपि न भवति । अत्र देवादिषु आप्ताः पोष्याः कुटुम्बिनः शेषाः पञ्च देवादयः पञ्च यज्ञदेवताः ऋणी हि ऋणं दातुमशक्तो धनिकस्य कर्म करोति।"हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।" इति स्मृतेः। भक्तस्तु कस्यापि न ऋणी अतो ज्ञानभक्तिहीनानामेव तदृणित्वेन किङ्करत्वमिति भावः ॥ ४१ ॥ स्वपादेति ॥ त्यक्तः अन्यस्मिन् देहादौ देवतान्तरे वा भावो येन तस्य अत एव प्रियस्य स्वपादमूलं भजतः पुंसः । यद्यपि विकर्मणि निषिद्धे कर्मणि प्रवृत्तिर्न संभवति तथापि कथंचित्प्रमादाद्यत्किंचिद्विकर्मोत्पतितं तदा तदपि हृदि संनिविष्टः परेशः सः हरिरेव सर्वं धुनोति नाशयति अतो नित्यनैमित्तिककर्म-नियन्त्रणा यथा तस्य नास्ति तथा निषेधविषये प्रायश्चित्तान्तरापेक्षाऽपि नास्तीत्यर्थः ॥४२॥ धर्मानिति ॥ जायन्तेयान् जयन्तीपुत्रान् । स्पष्टमन्यत् ॥४३॥ तत इति ॥

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विकर्म यच्चोत्पतितं कथं चिद्धुनोति सर्वं हृदि सन्निविष्टः ॥४२॥ नारद उवाच ॥ धर्मान्भागवतान्नित्यं श्रुत्वाथ मिथिलेश्वरः ॥ जायन्तेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ॥ ४३ ॥ ततोऽन्तर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ॥ राजा धर्मानुपातिष्ठन्नवाप परमां गतिम् ॥ ४४ ॥ त्वमप्येतान्महाभाग धर्मान्भागवताञ्छ्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसङ्गो यास्यसे परम् ॥४५॥ युवयोः खलु दम्पत्योर्यशसा पूरितं जगत् ॥ पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः ॥४६॥ दर्शनालिङ्गनालापैः शयनासनभोजनैः ॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ४७ ॥ वैरेण यं नृपतयः शिशुपालपौण्ड्रशाल्वादयो गतिविलासविलोकनाद्यैः ॥ ध्यायन्त आकृतधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किम् ॥ ४८ ॥ मापत्यबुद्धिमकृथाः कृष्णे सर्वात्मनीश्वरे ॥ मायामनुष्यभावेन गूढैश्वर्ये परेऽव्यये ॥ ४९ ॥

सिद्धाः कव्यादयः उपातिष्ठन् अनुतिष्ठन् । स्पष्टमन्यत् ॥४४॥ त्वमिति ॥ हे महाभाग निःसङ्गः निष्कामः श्रद्धया च युक्तश्च भूत्वा मत्तः श्रुतानेतान् धर्मानास्थितः अनुतिष्ठंस्त्वमपि परं पदं यास्यसे । तद्भावार्थः ॥४५॥ युवयोरिति ॥ स्पष्टम् ॥४६॥ दर्शनेति ॥ कृष्णे पुत्र इति स्नेहं प्रकुर्वतोः वां युवयोः कृष्णस्य दर्शनालिङ्गनादिभिरात्मा पावितः शोधितः प्रतिबन्धकदोषनिरासेन तत्प्राप्तियोग्यः कृतः अतो युवाभ्यां नान्यत्साधनमनुष्ठेयमित्याशयः ॥ ४७ ॥ वैरेणेति ॥ तस्य गतिविलासाद्यैराकृतास्तत्तदाकारा धीर्येषांते शिशुपालादयो नृपतयः स्वशयनादिसमये यं श्रीकृष्णं वैरभावेनापि ध्यायन्तो यदा तत्साम्यं तत्सारूप्यमापुस्तर्हि तदनुरक्तधियां भवादृशां तत्साम्यं भवतीति किं पुनर्वक्तव्यम् ॥ ४८ ॥ मेति ॥ अतः सर्वात्मनि ईश्वरे मायया मनुष्यनाट्येन गूढमाच्छादितमैश्वर्यमीश्वरभावो यस्य तस्मिन्नित्यर्थः । परे अव्यये च कृष्णे अन्यापत्यवत् अपत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति बुद्धिं मा कृथाः । अट् छान्दसः ॥ ४९ ॥ भूभारेति ॥ भूभारभूता असुरा एव ये राजन्यास्तेषां हन्तवे विनाशाय । तुमर्थे तवे छान्दसः । सतां साधूनां सदाचाराणां गुप्तये परित्राणाय सर्वजनानां निर्वृत्त्यै परमानन्दलाभाय चावतीर्णस्य कृष्णस्य लोके यशो वितन्यते विततं भवति । कर्मकर्त्तरि लट् ॥ ५० ॥ एतदिति ॥ एतन्नारदोक्तमितिहासं श्रुत्वा महाभागो वसुदेवः महाभागा देवकी चेत्येतौ आत्मनो मोहं जहतुः ॥ ५१॥ इतिहासमिति ॥ पुण्यं शृण्वतां वदतां च पुण्यावहमिममितिहासं यः पुमान् समाहितचित्तः सन् धारयेत् स इहास्मिन्नेव जन्मनि शमलं मोक्षप्रतिबन्धकं पापं विधूय निरस्य ब्रह्मभूयाय ब्रह्मभावाय मुक्तिलाभाय कल्पते समर्थो भवति ॥ ५२॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमादेकादशगपञ्चमे ॥ ५ ॥ षष्ठे ब्रह्मादिभिर्विष्णोरात्मधामाप्तये स्तुतिः॥उद्धवप्रार्थनाप्यत्र श्लोका धरणिमार्गणाः ॥ उवाचदंशकं पादयुक्तांषष्टिरनुष्टुभः॥ ६ ॥ अथेति ॥ आत्मजैः सनकादिभिः देवैरिन्द्रादिभिः प्रजेशैर्मरीच्यादिभिश्च वृतो ब्रह्माऽभ्यगात् । द्वारकामिति चतुर्थस्थं सम्बध्यते । भूतगणैर्वृतो

भूभारासुरराजन्यहन्तवे गुप्तये सताम् ॥ अवतीर्णस्य निर्वृत्त्यै यशो लोके वितन्यते ॥ ५० ॥ श्रीशुक उवाच ॥ एतच्छ्रुत्वा महाभागो वसुदेवोऽतिविस्मितः ॥ देवकी च महाभागा जहतुर्मोहमात्मनः ॥ ५१ ॥ इतिहासमिमं पुण्यं धारयेद्यः समाहितः ॥ स विधूयेह शमलं ब्रह्मभूयाय कल्पते ॥ ५२ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ श्रीशुक उवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् ॥ भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः ॥ १ ॥ इन्द्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ॥ ऋभवोऽङ्गिरसो रुद्रा विश्वे साध्याश्च देवताः ॥ गन्धर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ॥२॥ ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः ॥३॥ वपुषा येन भगवान्नरलोकमनोरमः ॥ यशो वितेने लोकेषु सर्वलोकमलापहम् ॥४॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ॥ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनम् ॥ ५ ॥ स्वर्गोद्यानोपगैर्माल्यैश्छादयन्तो यदूत्तमम् ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥ ६ ॥

भूतभव्ययोरीशः भूतानां भव्यस्य सुखस्य दाता वा भवः श्रीरुद्रश्च कृष्णं दिदृक्षुर्द्वारकां ययौ ॥ १ ॥ इन्द्र इति सार्द्धद्वयम् ॥ इन्द्रादयः सर्वे कृष्णं दिदृक्षवः द्वारकामुपसंजग्मुः ॥ २ ॥ ३ ॥ वपुषेति ॥ भगवान् येन वपुषा नरलोकमनोरमः सन् सर्वलोकमलापहं यशः सर्वलोकेषु वितेने विस्तृतवांस्तदतिसुन्दरं वपुर्दिदृक्षवस्ते उपसंजग्मुरित्यनुषङ्गः ॥ ४ ॥ तस्यामिति ॥ पश्यतामपि न वितृप्तान्यक्षीणि येषां ते ब्रह्मादयस्तस्यां महतीभिः ऋद्धिभिर्भोग्यभोगोपकरणैः समृद्धायां पूर्णायामत एव भ्राजमानायां शोभमानायां द्वारकायामद्भुतमतिसुन्दरं दर्शनं रूपं यस्य तं कृष्णं व्यचक्षत अपश्यन् ॥ ५ ॥ स्वर्गेति ॥ स्वर्गोद्याने नन्दने उपगैः प्राप्तैः माल्यैः पुष्पैश्छादयन्तः चित्राणि मनोहराणि पदानि अर्थाश्च तत्प्रतिपाद्या यासु ताभिर्गीर्भिर्वाणीभिः जगदीश्वरं यदूत्तमं कृष्णं तुष्टुवुः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नताः स्मेति ॥ हे नाथ कर्ममयात् उरोर्दढात्पाशात् मुमुक्षुभिर्भावयुक्तैर्भक्तियोगनिष्ठैर्जनैर्यच्चरणारविन्दमन्तर्हृदि चिन्त्यते केवलं न तु दृश्यते इति तत् तव पदारविन्दं दृष्ट्वा वयं बुद्धीन्द्रियादिभिः नताः स्मः नमस्कृतवन्तः अहो भाग्यमित्यर्थः । तत्र बुद्ध्या निश्चयेन इन्द्रियैर्दर्शनादिना प्राणेन च बलहेतुनोपलक्षितेन कायेन दण्डवत्प्रणिपातेन । यद्वा । बुद्ध्यधिष्ठानेन हृदयेन इन्द्रियैः दृग्भ्यां दोर्भ्यां पद्भ्यां चेति प्राणेन प्राणवता देहेनेति जान्वादिसङ्ग्रहः । मनसा चिन्तनेन वचसा उच्चारणेन च प्रणामो बोध्यः । यथाहुः । " दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥ " इति ॥७॥ त्वमिति ॥ हे अजित आस्तामिदानीन्तनमिदमत्यल्पकर्म यतः त्वं तद्गुणस्थः तस्या मायाया गुणेषु रजआदिषु नियन्तृत्वेन स्थितः संस्तया त्रिगुणयात्ममायया दुर्विभाव्यं मनसाऽप्यवितर्क्यं स्वात्मन्येवाधारभूते व्यक्तं महदादिप्रपञ्चं सृजसि अवसि पालयसि लुम्पसि संहरसि च तथाप्येतैः सृष्ट्यादिकर्मभिर्भवान्नाज्यते । तज्जनितपुण्यपापादिभिर्न लिप्यते यत् यस्मात् अनवद्यः अविद्यादिदोषरहितः भवान् अव्यव-

देवा ऊचुः ॥ नताः स्म ते नाथ पदारविन्दं बुद्धीन्द्रियप्राणमनोवचोभिः ॥ यच्चिन्त्यतेऽन्तर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात्
॥७॥ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुम्पसि तद्गुणस्थः ॥ नैतैर्भवानजित कर्मभिरज्यते वै यत्स्वे सुखेऽव्यव-
हितेऽभिरतोऽनवद्यः ॥८॥ शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः ॥ सत्वात्मनामृषभ ते यशसि
प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ॥९॥ स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ॥ यः सात्वतैः
समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥ १० ॥ यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृ-
हीत्वा ॥ अध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः परिष्टः ॥ ११ ॥

हिते आवरणरहिते स्वे आत्मस्वरूपे सुखे अभिरतोऽस्ति ॥ ८ ॥ शुद्धिरिति ॥ हे ईड्य स्तुत्य हे ऋषभश्रेष्ठ दुराशयानां रागिणां नृणां विद्या उपासना तदादिभिस्तथा शुद्धिर्न भवति यथा सत्वात्मनां सतां नित्यं श्रवणेन संभृतया पुष्ट्या अभिवृद्ध्या ते तव यशसि विषये सत्या दृढया श्रद्धया स्यात् परमपावनस्य तव स्वयशसो वितानाय कर्माचरणमिति भावः ॥ ९ ॥ स्यादिति ॥ तवाङ्घ्रिर्नोऽस्माकमशुभाशयानां विषयवासनानां धूमकेतुः दाहकोऽग्निः स्यात् । न चेदमसम्भावितं प्रार्थितं सर्वपुरुषार्थहेतुत्वेन यः क्षेमाय मोक्षाय मुनिभिर्मुमुक्षुभिः प्रेमार्द्रहृदा ऊह्यमानः चिन्त्यमानः यश्चात्मविद्भिः सात्वतैर्भक्तैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुण्ठप्राप्तये तत्र च समविभूतये त्वत्समानैश्वर्यलाभाय व्यूहे वासुदेवादिचतुर्व्यूहोपासनायां सवनशस्त्रिकालमर्चितः ॥ १० ॥ य इति ॥ यश्च प्रयतपाणिभिः संहतहस्तैः हविर्गृहीत्वा त्रय्या निरुक्तेन विधिना इन्द्रादिरूपेण यज्ञपुरुषो भगवान् अध्वराग्नौ आहवनीयादौ याज्ञिकैश्चिन्त्यते यश्च अध्यात्मयोगे आत्मज्ञाने योगिभिः साधकैरात्मावरकरूपां मायां जिज्ञासुभिर्यश्चिन्त्यते । उत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दोऽविशब्दार्थे । तथा परमभागवतैर्निरपेक्षभक्तैरपि यः परीष्टः सर्वतः पूजितः स तवाङ्घ्रिरस्माकमशुभाशयधूमकेतुः स्यादित्यनुषङ्गः ॥ ११ ॥ पर्युष्टयेति ॥ अहं यत्र वसामि तत्रैव वक्षसि पर्युषितापीयं वनमाला वसतीति चिन्तयन्ती वनमालया प्रतिपत्निवत् सपत्नीवत् भगवती श्रीर्लक्ष्मीः संस्पर्द्धमाना भवति । उत्प्रेक्षामात्रमेतत् । पत्नि इति ह्रस्व आर्षः । तथापि तां स्पर्द्धमानां श्रियमनादृत्य यो भवान् पर्युष्टया पर्युषितयाप्यमुया वनमालया । इडभावश्छान्दसः । भक्तैरर्पितेयमिति प्रीत्या सुप्रणीतं सुष्ठु संपादितं यथा भवति तथा अर्हणं पूजामाददत् स्वीकृतवान् । तङभाव आर्षः । सुप्रणीतमित्यर्हणविशेषणं वा । तस्य तवाङ्घ्रिर्नोऽशुभाशयधूमकेतुः सदा भूयात् अन्वयान्तरं भावार्थदीपिकायां द्रष्टव्यम् ॥ १२ ॥ केतुरिति ॥ योऽङ्घ्रिः बलिबन्धने त्रिभिर्विक्रमैः त्रिलोकसङ्ग्राहकैर्न्यासैर्युतः तत्र द्वितीयविक्रमे सत्यलोकं गतस्तव पादः केतुः अत्युच्छ्रितो विजयध्वज इव जातः तत्संपादयति त्रिपतत्पताक इति । त्रिषु लोकेषु त्रिधा वा पतन्ती गङ्गा पताका यस्य सः तथा असुरदेवयोश्चम्वोः सेनयोर्यथाक्रमं भयाभयकरः तथा साधुषु स्वर्गाय सुखाय खलेषु असाधुषु चेतराय नरकादिदुःखाय च भवति । स्मैभावाभाव आर्षः । स तव पादः भजतां नोऽस्माकमघं संसारदुःखहेतुं दोषं पुनातु शोध-

पर्युष्टया तव विभो वनमालयेयं संस्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः ॥ यः सुप्रणीतममुयाऽर्हणमाददन्नो भूयात्सदाङ्घ्रिरशुभाशयधूमकेतुः ॥ १२ ॥ केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः ॥ स्वर्गाय साधुषु खलेष्वितराय भूमन्पादः पुनातु भगवन्भजतामघं नः ॥ १३ ॥ नस्योतगाव इव यस्य वशे भवन्ति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः ॥ कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥ १४ ॥ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः ॥ सोऽयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम् ॥ १५ ॥

यतु निवर्तयतु । अघादिति पाठे तु भजतामिति कर्मणि षष्ठी । भजतोऽस्मान् अघात्पुनातु । तथा च श्रुतिः । "चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि" इत्यादिः ॥ १३ ॥ नस्योतेति ॥ मिथुः मिथः अर्द्यमानाः मत्सरादिदोषैः पीड्यमानाः ब्रह्मादयोऽपि तनुभृतो यस्य ते वशे भवन्ति न तु जये पराजये वा स्वतन्त्रा इत्यर्थः । नसि नासिकायामोताः नासिकामाविध्य तत्र रज्जुं प्रवेश्य बद्धाः गावो बलीवर्दा यथा स्वामिनो वशे भवन्ति तथेत्यर्थः । कालस्य कलयितुः प्रवर्त्तकस्येत्यर्थः । तस्य प्रकृतिपुरुषयोः परस्य पुरुषोत्तमस्य तव चरणो नोऽस्माकं शं सुखं तनोतु ॥ १४ ॥ अस्येति ॥ अस्य जगत उदयादीनां हेतुरसि । कुतः अव्यक्तं प्रकृतिः जीवः पुरुषः महान्महत्तत्वं तेषामपि कालं नियन्तारं त्वामाहुः । " अक्षरात्परतः परः " इत्याद्याः श्रुतयः इति शेषः । किंच योऽयं संवत्सरात्मकः त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सः तथा गभीरः रयो वेगो यस्य सः अखिलस्य जगतः अपचये विनाशाय प्रवृत्तः कालः सोऽपि त्वमेव अतस्त्वमुत्तमपुरुष इति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वत्त इति ॥ त्वत्तः पुरुषोत्तमात् पुमान् पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य यया शक्त्या अमोघवीर्यः सर्वथा समर्थः सन् अस्य जगतो गर्भं बीजमिव प्रकृतौ महान्तं धत्ते उत्पादयामासेत्यर्थः । सोऽयं महान् तया शक्त्यानुगतो युक्तः सन्नात्मनः सकाशात् सप्तभिरावरणैर्बहिरुपेतमावृतमाण्डकोशं ससर्ज । त्वयानुगत इति पाठे यया मायया त्वयाधिष्ठितः सन्निति ॥ १६ ॥ तदिति ॥ हे हृषीकपते हे इन्द्रियप्रवर्त्तक यत् यस्मान्मायया उत्था उज्जृम्भिता या गुणविक्रिया इन्द्रियवृत्तिस्तयोपनीतान् अर्थान् शब्दादिविषयान् मर्त्यादिशरीरेषु जीवद्वारा जुषन् सेवमानः अनुभवन्नपि । शता आर्षः । तैर्न लिप्तस्तेष्वनासक्तस्त्वं ये त्वन्ये जीवास्ते स्वतः परिहृतात् अध्यासप्राप्तत्वेन वस्तुतः संबन्धरहितात् त्यक्तादपि विषयवर्गात् बिभ्यति वासनामात्रेण बध्यन्ते तत्तस्मात् तस्थुषः स्थावरस्य जगतो जङ्गमस्य च भवानेवाधीशो नियन्ता ईश्वर इत्यर्थः ॥१७॥ अलिप्तत्वमाहुः—स्मायेति ॥ स्मायावलोको मन्दस्मितविलसितोऽवलोकस्तस्य लवः कटाक्षस्तेन दर्शितो यो भावोऽभिप्रायविशेषस्तेन मनोहारि यद्भ्रूमण्डलं

त्वत्तः पुमान्समधिगम्य यया स्ववीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः ॥ सोऽयं तयाऽनुगत आत्मन आण्डकोशं हैमं ससर्ज बहिरावरणैरुपेतम् ॥ १६ ॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोपनीतान् ॥ अर्थाञ्जुषन्नपि हृषीकपते न लिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म ॥ १७ ॥ स्मायावलोकलवदर्शितभावहारिभ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः ॥ पत्न्यस्तु षोडशसहस्रमनङ्गबाणैर्यस्येन्द्रियं विमथितुं करणैर्न विभ्व्यः ॥ १८ ॥ विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हन्तुम् ॥ आनुश्रवं श्रुतिभिरङ्घ्रिजमङ्गसङ्गैस्तीर्थद्वयं शुचिषदस्त उपस्पृशन्ति ॥ १९ ॥ बादरायणिरुवाच ॥ इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिम् ॥ अभ्यभाषत गोविन्दं प्रणम्याम्बरमाश्रितः ॥ २० ॥

तेन प्रहिताः प्रेषिताः ये सौरतमन्त्राः सुरतालापास्तैः शौण्डैः प्रगल्भैः अनङ्गस्य कामस्य बाणैरिव संमोहनैः करणैः कामकलाभिः षोडशसहस्रपत्न्यो यस्येन्द्रियं मनो विमथितुं क्षोभयितुं न विभ्व्यो न समर्था बभूवुः । स भवान्न क्वापि लिप्त इति पूर्वेणैवान्वयः ॥ १८ ॥ तव लीलामृतं चरणामृतं च लोकं पुनात्येवेति प्राहुः—विभ्व्य इति ॥ तवामृतरूपा मधुरा या कथा तदेव उदमुदकं वहन्तीति तथाभूताः कीर्तिनद्यः तथा पादावनेजनसरितो गङ्गाद्याश्च त्रिलोक्याः तत्रस्थप्राणिजातस्य शमलानि पापानि हन्तुं विभ्व्यः समर्थाः अत एव शुचिषदः शुचये आत्मविशुद्ध्यर्थं सीदन्ति क्लिश्यन्ति प्रयतन्ते ते विशुद्धिकामाः आनुश्रवं गुरोरुच्चारणमनुश्रूयत इति अनुश्रवो वेदस्तत्र भवं कीर्तिरूपं तीर्थं श्रुतिभिः श्रवणेन्द्रियैः अङ्घ्रिजं नद्यात्मकं चाङ्गसङ्गैरेवं ते तव कीर्तिद्वयमुपस्पृशन्ति सेवन्ते ॥ १९ ॥ इतीति ॥ सेशः ईशेन रुद्रेण सहितः शतधृतिः ब्रह्मा विबुधैः सहेत्येवं हरिमभिष्टूय । दैर्घ्यमार्षम् । प्रणम्य चाम्बरमाश्रितः गगनस्थस्तमभ्यभाषत ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमेरिति ॥ हे प्रभो हे अशेषात्मन् सर्वात्मन् पुरास्माभिः त्वं भूमेर्भारावताराय विज्ञापितः अभूः । तदस्मद्विज्ञापितं तथैव यथा विज्ञापनमुपपादितं त्वया संपादितम् ॥ २१ ॥ धर्म इति ॥ सत्ये सन्धा अभिसन्धिर्येषां तेषु त्वया धर्मश्च स्थापितः तथा सर्वेषां लोकानां श्रवणकीर्तनादिपराणां जनानां मलं पापमपहन्तीति तथाभूता स्वकीर्त्तिश्च दिक्षु विक्षिप्ता विस्तारिता ॥ २२ ॥ अवतीर्येति ॥ न विद्यते उत्तमं यस्मात्तदनुत्तमं रूपं वपुर्बिभ्रत् बिभ्राणो यदोर्वंशेऽवतीर्य जगतो हिताय उद्दामानि उत्कटानि वृत्तानि विक्रमा येषु तानि कर्माणि अकृथाः त्वं कृतवानसि ॥ २३ ॥ यानीति ॥ हे ईश साधवः मनुष्याः यानि ते तव चरितानि तानि शृण्वन्तः कीर्त्तयन्तश्चाञ्जसा अनायासेनैव कलियुगे तमः अज्ञानं तरिष्यन्ति ॥ २४ ॥ यदुवंश इति ॥ हे पुरुषोत्तम हे प्रभो यदुवंशेऽवतीर्णस्य भवतः पञ्चविंशाधिकं तिलोपश्छान्दसः । शरच्छतं व्यतीयाय व्यतिक्रान्तमभूत् ॥२५॥ नेति ॥ हे अखिलाधार अधुना देवकार्येऽवशेषितं नास्ति इदं कुलं च विप्रशापेन नष्टप्रायमभूत् ॥२६॥ तत इति ॥ हे वैकुण्ठ ततः तस्मात् अवतारकार्यस्य

ब्रह्मोवाच ॥ भूमेर्भारावताराय पुरा विज्ञापितः प्रभो ॥ त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितम् ॥ २१ ॥ धर्मश्च स्थापितः सत्सु सत्यसन्धेषु वै त्वया ॥ कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा ॥ २२ ॥ अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमम् ॥ कर्माण्युद्दामवृत्तानि हिताय जगतोऽकृथाः ॥ २३ ॥ यानि ते चरितानीश मनुष्याः साधवः कलौ ॥ शृण्वन्तः कीर्तयन्तश्च तरिष्यन्त्यञ्जसा तमः ॥ २४ ॥ यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम ॥ शरच्छतं व्यतीयाय पञ्चविंशाधिकं प्रभो ॥ २५ ॥ नाधुना तेऽखिलाधार देवकार्यावशेषितम् ॥ कुलं च विप्रशापेन नष्टप्रायमभूदिदम् ॥ २६ ॥ ततः स्वधाम परमं विशस्व यदि मन्यसे ॥ सलोकाल्लोकपालान्नः पाहि वैकुण्ठ किंकरान् ॥२७॥ श्रीभगवानुवाच ॥ अवधारितमेतन्मे यदात्थ विबुधेश्वर ॥ कृतं वः कार्यमखिलं भूमेर्भारोऽवतारितः ॥ २८ ॥ यदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतम् ॥ लोकं जिघृक्षद्रुद्धं मे वेलयेव महार्णवः ॥ २९ ॥

सिद्धत्वात् यदि मन्यसे इच्छसि तर्हि परमं सर्वोत्कृष्टं स्वधाम वैकुण्ठं विशस्व याहि । तङार्षः । लोकैः सहितान् किङ्करान्नोऽस्मान् लोकपालान् पाहि अस्मल्लोकगमनेनास्मत्पूजाग्रहणेनास्मान्कृतार्थीकुर्वन्नेव स्वलोकं याहि । संस्तुत इति । हे राजन् एवं ब्रह्मादिभिः विबुधैः मायया मनुजः वस्तुतस्त्वखिलेश्वरो भगवान् कृष्णः संस्तुतः स्तुतिपूर्वकं विज्ञापितः तद्विज्ञापनं प्रतिनन्द्य तान्विबुधानाह स्म ॥ २७ ॥ अवधारितमिति ॥ हे विबुधेश्वर ब्रह्मन् सर्वं कार्यं निष्पन्नमिति यदात्थ त्वं कथयसि तदेतत् मे मयाऽवधारितं निश्चितमेव वो युष्माकमखिलं कार्यं कृतम् । यतो भूमेर्भारोऽवतारितः ॥ २८ ॥ यदिदमिति ॥ वीर्यं युद्धसामर्थ्यं शौर्यं युधि निर्भयत्वं श्रीः धनादिसम्पत् वीर्यशौर्ययुक्तया श्रियोद्धतं वीर्यशौर्ययोः श्रिया सम्पत्त्या उद्धतमिति वा अनिवार्यम् अत एव लोकं जिघृक्षत् नाशयितुमुद्युक्तं यदिदं यादवकुलं तन्मे मया सर्वतः प्रतिरुद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा वेलया महार्णवो रुध्यते तथेति ॥ २९ ॥ यदीति ॥ तद् दृप्तानां गर्वितानां यदूनां विपुलं कुलं यद्यसंहृत्याहमस्माल्लोकाल्लोकान्तरं गन्तास्मि गमिष्यामि तदोद्वेलेन उल्लङ्घितमर्यादेनानेन यदुकुलेनायं सर्वोऽपि लोको विनङ्क्ष्यति ॥ ३० ॥ इदानीमिति ॥ इदानीं द्विजशापादस्य कुलस्य नाशः आरब्धः अतः हे अनघ हे ब्रह्मन् एतस्य यदुकुलस्यान्ते नाशे जाते सति वैकुण्ठं यास्यन् तव भवनमपि यास्यामि ॥ ३१ ॥ इतीति ॥ लोकनाथेन कृष्णेनेत्येवमुक्तः स्वयंभूः ब्रह्मा तं कृष्णं प्रणिपत्य देवगणैः सह स्वधाम सत्यलोकं समपद्यत समगात् ॥ ३२ ॥ अथेति ॥ अथ द्वारवत्यां समुत्थितान्महोत्पातान् भगवदिच्छयैवाविर्भूतान् विलोक्य भगवान् यदुवृद्धानाह स्म ॥ ३३ ॥ एत इति ॥ दुरत्ययः अनुल्लङ्घ्यः शापो नोऽस्माकं कुलस्य ब्राह्मणेभ्य आसीत् अत एते सुमहोत्पाताः इह सर्वतो व्युत्तिष्ठन्ति । तङभाव आर्षः ॥ ३४ ॥ न वस्तव्यमिति ॥ अतः हे आर्यकाः जीवितुमिच्छद्भिरस्माभिरिह द्वारकायां न वस्तव्यं किं त्वद्यैव प्रभासं यास्यामः । यतस्तन्महापुण्यं तीर्थम् अतो मा चिरं गमनविलम्बं मा कुरुत ।

यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलम् ॥ गन्तास्म्यनेन लोकोऽयमुद्वेलेन विनङ्क्ष्यति ॥ ३० ॥ इदानीं नाश आरब्धः कुलस्य द्विजशापतः ॥ यास्यामि भवनं ब्रह्मन्नेतदन्ते तवानघ ॥ ३१ ॥ श्रीशुक उवाच ॥ इत्युक्तो लोकनाथेन स्वयम्भूः प्रणिपत्य तम् ॥ सह देवगणैर्देवः स्वधाम समपद्यत ॥ ३२ ॥ अथ तस्यां महोत्पातान्द्वारवत्यां समुत्थितान् ॥ विलोक्य भगवानाह यदुवृद्धान्समागतान् ॥ ३३ ॥ श्रीभगवानुवाच ॥ एते वै सुमहोत्पाता व्युत्तिष्ठन्तीह सर्वतः ॥ शापश्च नः कुलस्यासीद् ब्राह्मणेभ्यो दुरत्ययः ॥ ३४ ॥ न वस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः ॥ प्रभासं सुमहत्पुण्यं यास्यामोऽद्यैव मा चिरम् ॥ ३५ ॥ यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् ॥ विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयम् ॥ ३६ ॥ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्सुरान् ॥ भोजयित्वोशिजो विप्रान्नानागुणवताऽन्धसा ॥ ३७ ॥ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महान्ति वै ॥ वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवम् ॥ ३८ ॥

अत्रायमाशयः । एते देवांशाः स्वाधिकारानेवार्हन्ति न तु सद्यो मोक्षम् । द्वारवत्यां तु मृता मुच्येरन् अतोऽभ्युदयफलं प्रभासं नेष्यामीति स्वामिपादाः । परे तु मत्परिकरैर्विशिष्टैव द्वारका सदा विराजतु तत्राहं सदास्म्येव मत्परिकरेषु प्रविष्टान् देवान् योगबलेन गुप्तं निष्कास्य प्रभासं नीत्वा मौसलसंग्राममिषेण स्वर्गं प्रापयिष्यामीत्याशयमाहुः ॥ ३५ ॥ यत्रेति ॥ दक्षशापाद्यक्ष्मणा क्षयरोगेण गृहीत उडुपश्चन्द्रो यत्र प्रभासे स्नानमात्रं कृत्वा किल्बिषात् क्षयरोगाद्विमुक्तः सन् भूयः सद्य एव कलोदयं कलावृद्धिं भेजे ॥ ३६ ॥ वयमिति युग्मम् ॥ वयमपि तस्मिन् तीर्थे आप्लुत्य स्नात्वा पितॄन् सुरांश्च तर्पयित्वा नानागुणवता षड्रसोपेतेनान्धसा अन्नेन उशिजः कमनीयान् उत्तमान् विप्रान् भोजयित्वा तेषु पात्रेषु क्षेत्रेष्विव बीजानि बहुफलायेति महादानान्युप्त्वा तेभ्यो दत्त्वा तैर्दानैर्वृजिनानि दुःखानि तरिष्यामः ॥ ३७ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवमिति ॥ हे कुरुनन्दन एवं भगवता आदिष्टा यादवाः तीर्थं प्रभासं गन्तुं कृतधियः स्यन्दनान् रथान् समयूजयुन् वाहैर्युक्तान् चक्रुरित्यर्थः ॥ ३९ ॥ तदिति युग्मम् ॥ हे राजन् घोराणि अरिष्टानि उत्पातान् दृष्ट्वा भगवता उदितम् उक्तं वचनं च श्रुत्वा तत् तेषां प्रभासगमनोद्योगं च निरीक्ष्य नित्यं कृष्णमनुव्रतः सेवमान उद्धवः जगतामीश्वरेश्वरं श्रीकृष्णं विविक्ते एकान्ते उपसङ्गम्य शिरसा तत्पादौ प्रणम्य प्राञ्जलिः संस्तमभाषत ॥ ४० ॥ ४१ ॥ देवेति सार्द्धम् ॥ हे देवदेवेश हे योगेश हे पुण्यश्रवणकीर्तन यत् यतः भवान् ईश्वरः अतः समर्थोऽपि यत् यस्मात् विप्रशापं न प्रत्यहन् न प्रतिहतवान् । अतः नूनम् एतत्कुलं संहृत्य लोकं मर्त्यलोकं संत्यक्ष्यते तङ्गर्थः ॥ ४२ ॥ नाहमिति ॥ हे केशव हे नाथ तवाङ्घ्रिकमलमहं क्षणार्द्धमपि त्युक्तुं नोत्सहे न मृष्यामि । अतः मामपि स्वधाम नय ॥ ४३ ॥ तवेति युग्मम् ॥ हे कृष्ण नृणां कर्णयोः

श्रीशुक उवाच ॥ एवं भगवताऽऽदिष्टा यादवाः कुलनन्दन ॥ गन्तुं कृतधियस्तीर्थं स्यन्दनान्समयूयुजन् ॥३९॥ तन्निरीक्ष्योद्धवो राजञ्छ्रुत्वा भगवतोदितम् ॥ दृष्ट्वाऽरिष्टानि घोराणि नित्यं कृष्णमनुव्रतः ॥४०॥ विविक्तउपसङ्गम्य जगतामीश्वरेश्वरम् ॥ प्रणम्य शिरसा पादौ प्राञ्जलिस्तमभाषत ॥४१॥ उद्धव उवाच ॥ देवदेवेश योगेश पुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलं नूनं लोकं सन्त्यक्ष्यते भवान् ॥ विप्रशापं समर्थोऽपि प्रत्यहन्न यदीश्वरः ॥४२॥ नाहं तवाङ्घ्रिकमलं क्षणार्धमपि केशव ॥ त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥४३॥ तव विक्रीडितं कृष्ण नृणां परममङ्गलम् ॥ कर्णपीयूषमास्वाद्य त्यजत्यन्यस्पृहां जनः ॥४४॥ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेमहि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गन्धवासोलङ्कारचर्चिताः ॥ उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥४६॥ वाताशना य ऋषयः श्रमणा ऊर्ध्वमन्थिनः ॥ ब्रह्माख्यं धाम ते यान्ति शान्ताः संन्यासिनोऽमलाः ॥ ४७ ॥ वयं त्विह महायोगिन् भ्रमन्तः कर्मवर्त्मसु ॥ त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ ४८ ॥ स्मरन्तः कीर्तयन्तस्ते कृतानि गदितानि च ॥ गत्युत्स्मितेक्षणक्ष्वेलिर्यन्नृलोकविडम्बनम् ॥ ४९ ॥

पीयूषममृतमिव मधुरं परममङ्गलं तव विक्रीडितमास्वाद्य श्रुत्वाऽपि यदि जनोऽन्यस्पृहां धनपुत्रकलत्राद्यासक्तिं त्यजति तदा ये हि शय्यासनादिषु त्वां भक्ताः नित्यं सेवितवन्तः । कर्मणोऽविवक्षणात्कर्त्तरि कः पश्चात्कर्मयोगः । ते वयं प्रियमात्मानं त्वां कथं त्यजेम ॥ ४४ ॥ ४५ ॥ त्वयेति ॥ त्वया उपभुक्तैः उपभुज्य त्यक्तैः स्रगादिभिश्चर्चिता अलंकृताः त्वदुच्छिष्टभोजिनश्च दासा वयं हि निश्चितं त्वन्मायां जयेम ॥ ४६ ॥ वाताशना इति ॥ वाताशनाः वायुभक्षाः । वातरशना इति पाठे दिगम्बराः श्रमणाः त्वद्भजनादौ कृतश्रमाश्च ऊर्ध्वमन्थिनः ऊर्द्ध्वरेतसः स्त्रीसंबन्धरहिताः शान्ताः कामक्रोधादिरहिताः संन्यासिनः त्यक्तभोगाः अमलाः निर्धूतपापाः एवंभूता ऋषयोऽक्षरब्रह्माख्यं तव धाम यान्ति ॥ ४७ ॥ वयमिति युग्मम् ॥ हे महायोगिन् वयम् इह कर्ममार्गेषु संसारेषु देवनरादिषु भ्रमन्तोऽपि तावकैस्त्वद्भक्तैः सह तव कृतानि कर्माणि गदितानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपदिष्टानि । गत्यादीनां द्वन्द्वैकवद्भावः । गत्यादि च यच्चान्यन्नृलोकविडम्बनं मनुष्यानुकरणं तच्च स्मरन्तः कीर्त्तयन्तश्च एवं त्वद्वार्त्तया दुस्तरं तमः संसारदुःखं तत्कारणमविद्यां च तरिष्यामः ॥ ४८ ॥ ४९ ॥ एवमिति ॥ हे राजन् एवं विज्ञापितो भगवान् एकान्तिनमनन्यदैवतमत एव प्रियं भृत्यं सेवकमुद्धवं समभाषत ॥ ५० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशस्यारचयत्षष्ठे गङ्गासहायकः ॥६॥ सप्तमे त्ववधूतेतिहासे हरिरवर्णयत् ॥ उद्धवाय गुरूनष्टावत्र श्लोकाः कृताद्र्यैः ॥ सप्तोवाचेत्यथार्द्धाब्यास्तर्कशैलौ अनुष्टुभः ॥ ७ ॥ यदिति ॥ हे महाभाग मां प्रति संहृत्यैतत्कुलमित्यादि यदात्थ तन्मे मम चिकीर्षितं कर्तुमिष्टमेव यतो ब्रह्मादयो लोकपाला अपि मे स्वर्वासं वैकुण्ठगमनमभिकाङ्क्षिणो वर्त्तन्ते । द्वितीयाऽऽर्षी । तदर्हमिति ज्ञापकाद्वा ॥१॥ मयेति ॥ ब्रह्मणा प्रार्थितोऽहमंशेन रामेण सह यदर्थमवतीर्णस्तद्भूभारहरणरूपं देवकार्यमशेषतः सर्वं मया निष्पादितम् । हि प्रसिद्धमेतत् ॥ २ ॥ कुलमिति ॥ यदिदं भूभारतयाऽवशिष्टं कुलं दृश्यते तदपि विप्रशापेन निर्दग्धं नष्टप्रायमन्योन्यविग्रहात्

श्रीशुक उवाच ॥ एवं विज्ञापितो राजन् भगवान् देवकीसुतः ॥ एकान्तिनं प्रियं भृत्यमुद्धवं समभाषत ॥५०॥ इति श्री० महापुराणे एकादशस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥ श्रीभगवानुवाच ॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभिकाङ्क्षिणः ॥१॥ मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ तदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः ॥ २ ॥ कुलं वै शापनिर्दग्धं नङ्क्ष्यत्यन्योऽन्यविग्रहात् ॥ समुद्रः सप्तमेऽह्न्येतां पुरीं च प्लावयिष्यति ॥ ३ ॥ यर्ह्येवायं मया त्यक्तो लोकोऽयं नष्टमङ्गलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥ ४ ॥ न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ जनोऽधर्मरुचिर्भद्र भविष्यति कलौ युगे ॥ ५ ॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु ॥ मय्यावेश्य मनः सम्यक् समदृग् विचरस्व गाम् ॥ ६ ॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि माया मनोमयम् ॥ ७ ॥ पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभाक् ॥ कर्माकर्म विकर्मेति गुणदोषधियो भिदा ॥ ८ ॥

नङ्क्ष्यत्येव समुद्र इति स्पष्टम् ॥ ३ ॥ यर्हीति ॥ हे साधो अयं भूलोको यर्ह्येव मया त्यक्तो भविष्यति तदैव कलिना निराकृतः अभिभूतः सन्नष्टमङ्गलो भविष्यति ॥ ४ ॥ नेति ॥ मया महीतले त्यक्ते सति कलियुगप्रवेशस्तस्मिन् सति अधर्मे रुचिर्यस्य तथाभूतो जनो भविष्यति अतः साधुत्वात् हे भद्र त्वयेह न वस्तव्यम् ॥ ५ ॥ त्वमिति ॥ स्वजनादिषु सर्वं स्नेहं परित्यज्य मनो मयि परमेश्वरे सम्यगावेश्य सर्वत्र समदृक् समं मामेवैकं पश्यन् गां भूमिं विचरस्व । तङार्षः ॥ ६ ॥ यदिदमिति ॥ यदिदं मनआदिभिः शोभनाऽशोभनतया गृह्यमाणं तत् मायामनोमयम् अविद्यायुक्तेन मनसैव तथा कल्पितम् अतः तत्सर्वं नश्वरं विद्धि । यद्वा । यदिदं मनआदिभिर्गृह्यमाणं तन्मनोमयम् अतो मायेति विद्धि ॥ ७ ॥ मनोमयत्वे हेतुः—पुंस इति ॥ अयुक्तस्य तत्वविचारमकुर्वतः विक्षिप्तमनसः पुंसो नानादेवादिरूपो घटपटादिरूपश्चार्थो विषयोऽस्य तथाभूतो भ्रमः अहं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममात्मको ध्यासो भवति यस्यैवं भ्रमो भवति स एव पुमान् गुणदोषभाक् पुण्यपापसुखदुःखादिमान् भवति । ननु वेद एव विधिनिषेधाभ्यां सत्यत्वमाहेति चेत् तस्यैव भ्रमविजृम्भितगुणदोषधियः पुंसः कर्म विहितम् अकर्म तल्लोपः विकर्म निषिद्धमिति भिदा भेदः भवति अविद्यावाद्विषय एव वेदं इत्यर्थः ॥ ८ ॥ तस्मादिति ॥ तस्मात् युक्तो वशीकृतः इन्द्रियग्रामो येन सः युक्तचित्तो वशीकृतचित्तश्च संस्त्वम् इदं देहेन्द्रियात्मकं जगत् आत्मनि विततमीक्षस्व आत्मानं च मय्यधीश्वरे ब्रह्मणि मदभिन्नरूपेणेक्षस्व ॥ ९ ॥ नन्वेवं युक्तचित्तत्वेन कर्माकरणे देवादयो विघ्नान् करिष्यन्ति तत्राह—ज्ञानेति ॥ ज्ञानं वेदतात्पर्यविषयः विज्ञानं तदर्थानुभवः ताभ्यां सम्यग्युक्तस्ततश्चात्मानुभवेनैव तुष्टचित्तः अतः शरीरिणां देवादीनामात्मभूतः अतस्तत्कृतान्तरायैर्न विहन्यसे । अयं भावः । यावदात्मानुभवं यथावर्णाश्रमं कर्माणि कुर्यादेव । आत्मानुभावानन्तरं तु सर्वात्मभूतत्वान्न कोऽपि तद्विघ्नानाचरतीति । तथा च श्रुतिः । " तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवति " इति ॥१०॥ न च ज्ञाने जातेऽपि यथेष्टाचरणप्रसङ्ग इत्याह—दोषबुद्ध्येति ॥ उभयातीतो गुणदोषबुद्ध्यतीतोऽपि प्राक्तनसंस्कारवशान्निषेधान्निवर्त्तत एव परंतु न दोषबुद्ध्या एवं विहितमपि प्रायशः करोति परंतु न गुण-

तस्माद्युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत् ॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरं ॥ ९ ॥ ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम् ॥
आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यसे ॥ १० ॥ दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते ॥ गुणबुद्ध्या च विहितं न करोति यथार्भकः
॥ ११ ॥ सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चयः ॥ पश्यन् मदात्मकं विश्वं न विपद्येत वै पुनः ॥१२॥ श्रीशुक उवाच ॥ इत्यादिष्टो भगवता
महाभागवतो नृप ॥ उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतम् ॥ १३ ॥ उद्धव उवाच ॥ योगेश योगविन्यास योगात्मन् योगसंभव ॥ निःश्रेय-
साय मे प्रोक्तस्त्यागः संन्यासलक्षणः ॥१४॥ त्यागोऽयं दुष्करो भूमन् कामानां विषयात्मभिः ॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः ॥१५॥

बुद्ध्या स्वर्गादिफलोद्देशेनेत्यर्थः । अर्भको यथा संकल्पविकल्परहित एव किंचित्करोति कुतश्चिन्निवर्त्तते च तद्वदित्यर्थः ॥११॥ सर्वभूतेति ॥ पुनः न विपद्येत संसारविपत्तिं न प्राप्नुयात् । स्पष्टमन्यत् ॥ १२ ॥ इतीति ॥ हे नृप इत्येवं भगवता आदिष्टः महाभागवतः तत्वं जिज्ञासुः उद्धवः अच्युतं प्रणिपत्याह स्म ॥ १३ ॥ योगेशेति ॥ हे योगेश योगफलदायिन् योगविदां न्यासो नामातिगोप्यो निक्षेपविशेषः । यद्वा । योगो विन्यस्यते क्रियते यस्मिन् सः । हे योगेशात्मन् हे योगानामुक्तानां संभवः प्रवृत्तिर्यस्मात् स योगसंभव एतैः सम्बोधनैर्नाहं त्वदुपदिष्टत्यागाधिकारीति सूचितम् । तदाह । त्वया मे मम निःश्रेयसाय मोक्षाय संन्यासलक्षणः अप्रत्यापत्तिरूपः त्यागः प्रोक्तः ॥ १४ ॥ त्याग इति ॥ हे भूमन् कामानां विषयाणामयं त्यागो विषयात्मभिः विषयासक्तचित्तैर्दुष्करः दुःशब्दो निषेधे कर्तुमशक्य इत्यर्थः । मायाधिपतेस्तव कृपया तव भक्तैः कदाचित्स त्यागः सुकरो भवेदपि । हे सर्वात्मन् सर्वनियन्तः त्वय्यभक्तैस्तु सुतरां दुष्कर इति मे मतिः निश्चयः ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽहमिति ॥ यं प्रति त्यागाद्युपदिष्टं सोऽहं मूढमतिः मोहितचित्तः सानुबन्धे पुत्रकलत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे अहमिति ममेतिच विगाढो निमग्नः आसक्तः अतो हे भगवन् त्वं तु सर्वं परित्यज्येति यद्भगवता गदितं तत्तु यथाहमञ्जसा सुखेन साधयामि तथा भृत्यं मामनुशाधि शिक्षय ॥१६॥ सत्यस्येति ॥ हे ईश सत्यस्य परमार्थभूतस्य आत्मनस्तव आत्मनो मां प्रति वक्तारं स्वदृशः स्वतःसिद्धज्ञानात्त्वत्तोऽन्यं विबुधेषु देवेषु अपि नानुचक्षे न पश्यामि । यतः सर्व एव इमे तनुभृतः ब्रह्मादयः तव मायया विमोहितधियः अतः बहिस्थेषु देहपुत्रादिषु अर्थभावाः परमार्थबुद्धयः सन्ति ॥ १७ ॥ तस्मादिति ॥ तस्मात् निर्विण्णा सर्वतो विरक्ता धीर्यस्य सः वृजिनैर्दुःखैरभितप्तः अहम् अनवद्यं मोहादिदोषरहितं नास्त्यन्तः कालतः पारश्च देशतो यस्य तं सर्वज्ञम् ईश्वरं कालादिभिरकुण्ठो विकुण्ठलोको धिष्ण्यं स्थानं यस्य तम् उ ह हे भगवन् । हकारोत्तराऽ कारगौरवाय वृकारो युक्त इव पठनीयः । अहो इति पाठो वा । नरसखं जीवहितकरं नारायणं शरणं प्रपद्ये ॥१८॥ प्रायेणेति ॥ ये लोके लोकतत्वस्य

सोऽहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबन्धे ॥ तत्त्वञ्जसा निगदितं भवता यथाहं संसाधयामि भगवन् ननु शाधि भृत्यम् ॥ १६ ॥ सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे ॥ सर्वे विमोहितधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ १७ ॥ तस्मात्द्भवन्तमनवद्यमनन्तपारं सर्वज्ञमीश्वरमकुण्ठविकुण्ठधिष्ण्यम् ॥ निर्विण्णधीरहमु ह वृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये ॥ १८ ॥ श्रीभगवानुवाच ॥ प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः ॥ समुद्धरन्ति ह्यात्मानमात्मनैवाशुभाशयात् ॥ १९ ॥ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः ॥ यत् प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते ॥ २० ॥ पुरुषत्वे च मां धीराः साङ्ख्ययोगविशारदाः ॥ आविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितम् ॥ २१ ॥ एकद्वित्रिचतुष्पादो बहुपादस्तथाऽपदः ॥ बह्व्यः सन्ति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥ २२ ॥

परमार्थस्य विचक्षणाः परीक्षकास्ते आत्मना एव गुरूपदेशं विनैव विवेकबुद्ध्यैवात्मानमशुभाशयात् । विषयवासनातः समुद्धरन्ति । हीति प्रसिद्धिं सूचयति ॥ १९ ॥ आत्मन इति ॥ पश्वादिशरीरेऽप्यात्मनो गुरुर्हिताहितचिन्तकः आत्मैव पुरुषस्य शरीरे तु विशेषत आत्मनो गुरुरात्मैव यत् यस्मादसौ पुरुषः अधिकारित्वात् प्रत्यक्षानुमानाभ्यां श्रेयः परमपुरुषार्थभूतमात्मानमनुविन्दते ॥ २० ॥ पुरुषत्वे चेति ॥ पुरुषत्वे मनुष्यजन्मनि साङ्ख्ययोगाभ्यां विचक्षणाः निपुणबुद्धयः अत एव धीरा विवेकिनः पुरुषाः सर्वाभिः शक्तिभिरुपबृंहितं पूर्णमात्मानमाविस्तरां प्रपश्यन्ति । तथा च श्रुतिः । " पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति विज्ञातं पश्यति " इत्यादिः॥२१॥ एकेति ॥ एकद्वित्र्यादिपादवत्यः पुरः शरीराणि मया सृष्टास्तास्तासां मध्ये पौरुषी मानुषी तनुर्मे प्रिया पुरुषार्थसाधकत्वात् ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रेति ॥ अत्र पौरुष्यां पुरि युक्ताः अप्रमत्ताः पुरुषाः चक्षुषा अग्राह्यं ग्राह्येभ्यो व्यतिरिक्तं वा मामात्मानमद्धा साक्षात् मृगयन्ति । मार्गणे प्रकारद्वयमाह । गृह्यमाणैर्गुणैर्बुद्ध्यादिभिर्हेतुभिः जडानां बुद्ध्यादीनां प्रकाशः स्वप्रकाशमेकं विना न घटत इत्यनुपपत्तिमुखेन लक्षकैः तथा तैरेव लिङ्गैर्व्याप्तिमुखेनानुमानत ईश्वरं प्रवर्त्तकं मृगयन्ते बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदित्यनुमानप्रयोगः । न चैतावता आत्मा आनुमानिक इति शङ्क्यम् । देहादिव्यतिरिक्तत्वंपदार्थशुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् ॥ २३ ॥ अत्रेति ॥ अत्र विषये अवधूतस्य अमिततेजसः परमविवेकिनो यदोश्च संवादरूपमिमं वक्ष्यमाणं पुरातनमितिहासं वृद्धा उदाहरन्ति दृष्टान्ततया वर्णयन्ति ॥ २४ ॥ अवधूतमिति ॥ अवधूतम् अभ्यङ्गादिसंस्काररहितदेहं कविं विवेकिनम् अत एव अकुतोभयं निर्भयं विचरन्तं तरुणं कञ्चित् द्विजं" योगर्धिमापुरुभर्यो यदुहैहयाद्याः " इत्युक्तत्वात् दत्तात्रेयमिति ज्ञेयम् । निरीक्ष्य धर्मवित् यदुः पप्रच्छ ॥ २५ ॥ कुत इति ॥ हे ब्रह्मन् अकर्त्तुः कर्माण्यकुर्वतस्तवेयं सुविशारदा अतिनिपुणा

अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम् ॥ गृह्यमाणैर्गुणैर्लिङ्गैरग्राह्यमनुमानतः ॥ २३ ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥ २४ ॥ अवधूतं द्विजं कंचित् चरन्तमकुतोभयम् ॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥ २५ ॥ यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा ॥ यामासाद्य भवाँल्लोकं विद्वांश्चरति बालवत् ॥ २६ ॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः ॥ हेतुनैव समीहन्ते आयुषो यशसः श्रियः ॥ २७ ॥ त्वं तु कल्पः कविर्दक्षः सुभगोऽमृतभाषणः ॥ न कर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥२८॥ जनेषु दह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसेऽग्निना मुक्तो गङ्गाम्भःस्थ इव द्विपः ॥२९॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणम् ॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥३०॥ श्रीभगवानुवाच ॥ यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा ॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥ ३१ ॥

सर्वलोकविलक्षणा बुद्धिः कुतो जातेति शेषः । यां बुद्धिमासाद्य प्राप्य विद्वानपि भवान् बालवल्लोकं चरति ॥ २६ ॥ प्राय इति ॥ प्रायः मानवाः धर्मादिषु तथा विवित्सायां तत्तत्साधनविचारे आत्मविचारे च आयुरादेर्हेतुना कामनयैव समीहन्ते प्रवर्त्तन्ते ॥ २७ ॥ त्वमिति ॥ त्वं तु कल्पः समर्थः कविर्ज्ञानी दक्षो निपुणः सुभगः सुन्दरः अमृततुल्यमधुरभाषणश्चेति मितभाषण इति च पाठः । जडादिवद्वर्तमानो न किंचिदपीहसे इच्छसि अतो नैव कस्यापि कर्मणः कर्त्ता भवसि ॥ २८ ॥ जनेष्विति ॥ कामलोभरूपदवाग्निना दह्यमानेषु जनेषु मध्ये कामाद्यग्निना मुक्तस्त्वं गङ्गाम्भस्थो द्विप इव न तप्यसे ॥ २९ ॥ त्वं हीति ॥ हे ब्रह्मन् स्पर्शविहीनस्य विषयभोगरहितस्य केवलात्मनः निःसङ्गस्य भवतः आत्मनि मनस्येव वर्तमानं बहिरप्रकटम् आनन्दस्य कारणं पृच्छतां नोऽस्माकं त्वं ब्रूहि ॥ ३० ॥ यदुनेति ॥ ब्रह्मण्येन सुमेधसा यदुनैवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभाजितः पृष्टश्च महाभागो द्विजः प्रश्रयेण विनयेनावनतं यदुं प्राह स्म ॥ ३१ ॥ सन्तीति ॥ हे राजन् बुद्ध्यैवोपाश्रिताः स्वीकृता न तूपदेशेनेत्यर्थः । बहवो गुरवः सन्ति तत्र यतो येभ्यो गुरुभ्यो बुद्धिमुपादाय शिक्षित्वा तापत्रयान्मुक्त इह भूलोके अटामि पर्यटामि तान् गुरून् शृणु ॥ ३२ ॥ पृथिवीति ॥ मधुकृत् भ्रमरः मधुमक्षिका च । स्पष्टमन्यत् ॥३३॥ मधुहेति ॥ मधुहा मधुहर्ता सुपेशकृत् शोभनं रूपं कीटस्य करोतीति तथा । स्पष्टमन्यत् ॥ ३४ ॥ एते इति ॥ हे राजन् एते चतुर्विंशतिः मे मया गुरवः आश्रिताः गुरुत्वेन बुद्ध्या स्वीकृताः एतेषां वृत्तिभिः आत्मनः स्वस्येह शिक्षाः शिक्षणीयानर्थान्हेयोपादेयादीन् अन्वशिक्षं ज्ञातवानस्मि । तङ्भाव आर्षः । एवमग्रेऽप्यत्र प्रकरणे शिक्षेर्बोध्यम् ॥ ३५ ॥ यत इति ॥ हे नाहुषात्मज ययातिपुत्र हे पुरुषव्याघ्र यतो यदनुशिक्षामि यथा वानुशिक्षामि तत्तथा निबोध ते तुभ्यं कथयामि ॥ ३६ ॥ तत्र मार्गपर्वतवृक्षरूपायाः क्षितेः शिक्षितमाह—भूतैरिति ॥ दैववशाः नृपादयः तेषामनुगैर्भूतैः प्राणिभिराक्रम्यमाणः पीड्यमानोऽपि धीरः अनुद्विग्नचित्तः विद्वान् भूतानां

ब्राह्मण उवाच ॥ सन्ति मे गुरवो राजन्बहवो बुद्ध्युपाश्रिताः ॥ यतो बुद्धिमुपादाय मुक्तोऽटामीह ताञ्छृणु॥३२॥ पृथिवी वायुराकाशमापोऽग्निश्चन्द्रमा रविः ॥ कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद्गजः ॥३३॥ मधुहा हरिणो मीनः पिङ्गला कुररोऽर्भकः ॥ कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ॥ ३४ ॥ एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः ॥ शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥ ३५ ॥ यतो यदनुशिक्षामि यथा वा नाहुषात्मज ॥ तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ॥ ३६ ॥ भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः ॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतम् ॥ ३७ ॥ शश्वत्परार्थसर्वेहः परार्थैकान्तसंभवः ॥ साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मताम् ॥ ३८ ॥ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेन्द्रियप्रियैः ॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ् मनः ॥ ३९ ॥

दैववशानुगतत्वं जानन् पुरुषो धर्ममार्गात् न चलेत् । यथा जनैः पादाघातादिभिः पीड्यमानापि भूमिर्न प्रचलति तथेति क्षमारूपं क्षितेर्व्रतमहमन्वशिक्षम् ॥३७॥ शश्वदिति ॥ सर्वदा परार्थाः सर्वा ईहा भूधारणनिर्झरोत्क्रमणस्वोत्पन्नरत्नादिप्रदानरूपाः चेष्टा यस्य सः तथा परार्थे एवैकान्ततः संभवो जन्म यस्य सः एवंभूतः साधुः स्यादिति भूभृतः पर्वतात् शिक्षेत शिक्षया च एवंभूतो भवेत् । तथा नगस्य वृक्षस्य शिष्यः सन् परात्मतां पराधीनतां शिक्षेत । वृक्षो यथा परैरवखण्ड्योत्पाट्य वा नयन्तमप्यनुमन्यते तद्वदित्यर्थः ॥ ३८ ॥ आन्तरबाह्यरूपवायोः शिक्षामाह—प्राणेति ॥ प्राणो ह्याहारादिमात्रेणैव वर्तते रूपरसादीनिन्द्रियविषयांस्तु नापेक्षते तथा मुनिरपि प्राणधारणोपयुक्तया वृत्त्या आजीविकया वर्तेत न त्विन्द्रियप्रियैः शब्दादिविषयैरिन्द्रियाणि लालयेदिति शेषः । यथा प्राणवृत्तिकरणेन ज्ञानं न नश्येत् । यथा वाङ् मनश्च नावकीर्येत न विक्षिप्येत तथा कुर्यात् । अन्यथा च प्राणवृत्त्यभावेन मनोग्लान्या ज्ञानं नश्येत् । इन्द्रियलालनेन तु वाङ्मनसयोर्विक्षेपो भवेत् ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयेष्विति ॥ वायुर्यथा सर्वत्र प्रविशन्नपि न क्वापि विषज्जते एवं गुणदोषव्यपेतात्मा सुखदुःखादिचिन्ताशून्यचित्तः सन् योगी नानाविधशीतोष्णादिधर्मयुक्तेष्वपि विषयेषु आविशन् तान् भुञ्जानोऽपि न विषज्जेत तत्रासक्तिं न कुर्यादित्यर्थः । न हि वायुर्वने दहने वा सज्जते तद्वत् ॥ ४० ॥ पार्थिवेष्विति ॥ आत्मदृक् पार्थिवेषु इह देहेषु प्रविष्टस्तद्गुणाश्रयः देवत्वमनुष्यत्वस्थूलत्वकृशत्वादिदेहधर्मयोगितया प्रतीयमानोऽपि योगी तैर्गुणैर्न युज्यते देवोऽहं मनुष्योऽहं स्थूलोऽहं कृशोऽहमिति नाभिमन्यते । वायुर्यथा सुरभ्यादिगन्धाश्रयतया प्रतीयमानोऽपि वस्तुतो गन्धादेः पार्थिवावयवाश्रयत्वान्न तद्योगी तद्वदित्यर्थः ॥ ४१ ॥ अन्तरिति ॥ अन्तर्हितश्च देहान्तर्गतोऽपि मुनिः विततस्य सर्वगतस्य आत्मनः स्थिरजङ्गमेषु समन्वयेन या व्याप्तिस्तया ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया नभस्त्वं नभस्तुल्यत्वं तेन च देहाद्यसङ्गमत एवाव्यवच्छेदमवियोगं च भावयेत् । यथा नभसः सर्वगतस्यापि न घटादिभिः सङ्गः परिच्छेदो वा एवमात्मनोऽपि न संभवति ॥४२॥ तेज इति ॥ वायुना ईरितैः प्रेरितैर्मेघौघैर्यथा नभो न स्पृश्यते तद्वत्कालेन सृष्टैर्गुणैः सत्वादिगुणकार्यैः तेजश्च आपश्च अन्नं पृथिवी च तन्मयैर्देहेन्द्रियादिभिः पुमान् जीवोऽपि न स्पृश्यते न लिप्यते ॥ ४३ ॥ स्वच्छ इति ॥ स्वच्छो

विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ॥४०॥ पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्न युज्यते योगी गन्धैर्वायुरिवात्मदृक् ॥ ४१ ॥ अन्तर्हितश्च स्थिरजङ्गमेषु ब्रह्मात्मभावेन समन्वयेन ॥ व्याप्त्याऽव्यवच्छेदमसङ्गमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत् ॥४२॥ तेजोऽबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः ॥ न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ॥४३॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणाम् ॥ मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः ॥ ४४ ॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः ॥ सर्वभक्षोऽपि युक्तात्मा नादत्ते मलमग्निवत् ॥ ४५ ॥ क्वचिच्छन्नः क्वचित् स्पष्ट उपास्यः श्रेय इच्छताम् ॥ भुङ्क्ते सर्वत्र दातॄणां दहन्प्रागुत्तराशुभम् ॥ ४६ ॥

निर्मलः प्रकृतितः स्वभावतः स्निग्धो जनेषु स्नेहेनोपकारकः माधुर्यः मधुरालापी । अर्शआद्यजन्तः । नृणां तीर्थभूः पावित्र्यस्थानम् अपां मित्रमुदकतुल्यो मुनिः ईक्षादिभिर्जनं पुनाति । अपामित्रमिति पाठे तु पापात्सखायं पुनातीत्यर्थः । अत्र पाठे स्वच्छत्वादिगुणैरर्थादुदकसादृश्यं ज्ञातव्यम् ॥ ४४ ॥ तेजस्वीति ॥ स्वतः तेजस्वी तपसा च दीप्तः दुर्द्धर्षः अक्षोभ्यः स चासावुदरभाजनश्चापरिग्रहो युक्तात्मा योगी सर्वभक्षोऽपि यद्यपि तस्य निषिद्धभक्षणं न संभवति तथापि यदि कदाचित्प्रमादाद्भक्षयेत्तदपि मलं तन्निमित्तं पापं नादत्ते न प्राप्नोति । यथा तेजआदियुक्तोऽग्निरयुक्तमपि दहन्न तद्दोषभाग्भवति तथेत्यर्थः ॥ ४५ ॥ क्वचिदिति ॥ अग्निर्यथा क्वचित् काष्ठभस्मादिषु छन्नो भवति क्वचिच्च काष्ठादिष्वारूढः स्पष्टो भवति तथा श्रेय इच्छतामुपास्यो भवति । दातॄणां होमादिकर्तॄणां प्रागुत्तराशुभं भूतं भविष्यच्च पापं दहन् सर्वत्र परेच्छयैव हुतं भुङ्क्ते तथैव मुनिरपि भवतीति ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वमाययेति ॥ अग्निर्यथा स्वत आकारविशेषरहितोऽपि एधसि काष्ठे स्थितस्तत्तत्समानरूपो दीर्घत्ववक्रत्वादिकाष्ठगुणकः प्रतीयत एवं विभुः परमात्मा स्वत आकारविशेषरहितोऽपि स्वमायया सृष्टमिदं सदसल्लक्षणं देवतिर्यगादिशरीरं प्रविष्टस्तथा प्रतीयते न तस्य स्वाभाविकं नीचोच्चत्वादि किन्तु देहोपाधिकमेवेति भावयेदिति ॥ ४७ ॥ चन्द्राच्छिक्षितमाह—विसर्गाद्या इति ॥ अव्यक्तवर्त्मना अलक्षितवेगेन कालेन देहस्यैव विसर्गो जन्म तदाद्याः श्मशानं मरणं तत्पर्यन्ताः भावा विकारा भवन्ति न त्वात्मनः । यथा कलानामेवोत्पत्त्यादयो भवन्ति न चन्द्रस्य तथेत्यर्थः । तत्रेयं ज्योतिःशास्त्रप्रक्रिया ।आप्यमण्डलः चन्द्रः खे तिष्ठति न तत्र स्वतः प्रकाशोऽस्ति ततोऽतिदूरे सूर्यः । तत्र सूर्यप्रकाशस्य यावानंशश्चन्द्रे प्रतिविम्बितो लोकैर्दृश्यते तावानेव चन्द्रः प्रतीयते तत्र सूर्याचन्द्रयोरूर्द्ध्वाधरभावे उपरि स्थितस्य सूर्यस्य प्रकाशश्चन्द्रस्योर्द्ध्वदेशे पतति अधश्च तच्छाया भवतीति न चन्द्रो लोकैर्न दृश्यते सा अमावास्या । अथ षष्टिघटकाभिश्चन्द्रे नक्षत्रान्तरं गच्छति ऊर्द्ध्वाधरभावे ईषन्निवृत्ते सूर्यस्य पञ्चदशो भागः प्रतिबिम्बितो दृश्यते सा प्रतिपत्संज्ञा चन्द्रस्य प्रथमा कलोच्यते । एवं क्रमात्पञ्चदशभिर्दिनैश्चन्द्रसंमुखे सूर्यः सर्वः प्रतिबिम्बितो दृश्यते सा पूर्णिमा । ततः क्रमात्पुनर्मण्डलयोर्विषमस्थित्या कलाह्रासः ।

स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः ॥ प्रविष्ट ईयते तत्तत्सरूपोऽग्निरिवैधसि ॥ ४७ ॥ विसर्गाद्याः श्मशानान्ता भावा देहस्य नात्मनः ॥
कलानामिव चन्द्रस्य कालेनाव्यक्तवर्त्मना ॥ ४८ ॥ कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषाम्
॥ ४९ ॥ गुणैर्गुणानुपादत्ते यथाकालं विमुञ्चति ॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥ ५० ॥ बुध्यते स्वेन भेदेन व्यक्तिस्थ इव
तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत् ॥ ५१ ॥

तत्र यथा कलानामेवोत्पत्तिह्रासौ न तु आप्यमण्डलस्य तथा देहानामेव जन्मादयो न त्वात्मनः ॥४८॥ कालेनेति ॥ ओघवत् नदीप्रवाहवद्वेगो यस्य तेन कालेन आत्मनः संबन्धिनां भूतानां देहानां प्रभवाप्ययौ उत्पत्तिविनाशौ नित्यौ प्रतिक्षणं भवन्तावपि न दृश्येते । यथाग्नेरर्चिषां ज्वालानामुत्पत्तिविनाशौ प्रतिक्षणं भवतः परन्तु नैव दृश्येते तथेत्यर्थः । इति पुनरग्निदृष्टान्तेन वैराग्यार्थं देहादेः क्षणभङ्गुरता दर्शिता ॥ ४९ ॥ गुणैरिति ॥ गोपतिः सूर्यो यथा गोभिः रश्मिभिः गाः जलानि यथाकालं, ग्रीष्मादिकाले आदत्ते वर्षाकाले च विमुञ्चति तत्राभिनिवेशं च न करोति । एवं योगी देहाव्यतिरिक्तात्मानुसन्धानपरः गुणैरिन्द्रियैर्गुणान् शब्दादिविषयान् उपादत्ते स्वीकरोति । यथाकालम् अर्थिन्यागते सति विषयान् विमुञ्चति ददाति च परंतु तेषु न युज्यते इदं लब्धमिदं दत्तमित्यभिनिवेशं न करोतीति ॥ ५० ॥ बुध्यत इति ॥ व्यनक्तीति व्यक्तिरुपाधिः जलादिः । क्विच् व्यज्यतेऽनया इति क्विन् वा । तत्रस्थः तत्र प्रतिविम्बितः अर्को यथा वस्तुत एकोऽपि स्थूलमतिभिस्तद्गत इव भेदेन लक्ष्यते तथा देहाद्युपाधिप्रविष्टः स्वेन रूपेणैकोऽप्यात्मा स्थूलमतिभिर्देहाद्यात्माभिमानिभिर्भेदेनैव बुद्ध्यते वस्तुतस्तूभयोरेकत्वादित्यर्थः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नातिस्नेह इति ॥ अतिस्नेहः अतिप्रीतिः प्रसङ्ग उपलालनाद्यासक्तिर्वा क्वापि विषये केनचिन्न कर्त्तव्यः। स्नेहादि कुर्वन् दीनधीः विवेकहीनः सन् कपोत इव संतापं विन्देतेति ॥ ५२ ॥ कपोत इति ॥ वनस्पतौ कृतं नीडं येन स कश्चन कश्चित्कपोतः कपोत्या भार्यया सार्द्धम् अरण्ये कतिचित्समाः वत्सरान् उवास ॥ ५३ ॥ कपोताविति ॥ कपोतौ कपोतः कपोती च द्वौ स्नेहेन गुणितं बद्धं हृदयं ययोस्तौ गृहधर्मिणौ मैथुन्यसुखनिरतौ दृष्टयादिकं दृष्टयादिकेन बबन्धतुः ॥ ५४ ॥ शय्येति ॥ विस्रब्धौ मरणशङ्कारहितौ मिथुनीभूय वनराजिषु शय्यादिकं चेरतुः कृतवन्तौ शय्या शयनम् ॥ ५५ ॥ यमिति ॥ हे राजन् तर्पयन्ती सुरतालापादिभिः प्रीणयन्ती सा कपोती तेनानुकम्पिता कृपापूर्वकं प्रचोदिता यं यं काममिष्टं वाञ्छति तं तम् अजितेन्द्रियः सोऽतिकृच्छ्रेणापि समानयत् ॥ ५६ ॥ कपोतीति ॥ प्रथमं गर्भं गृह्णती सती साध्वी कपोती प्रसू-

नातिस्नेहः प्रसङ्गो वा कर्तव्यः क्वापि केनचित् ॥ कुर्वन् विन्देत संतापं कपोत इव दीनधीः ॥ ५२ ॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ कपोत्या भार्यया सार्धमुवास कतिचित् समाः ॥ ५३ ॥ कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ॥ दृष्टिं दृष्टयाङ्गमङ्गेन बुद्धिं बुद्धया बबन्धतुः ॥ ५४ ॥ शय्यासनाटनस्थानवार्ताक्रीडाशनादिकम् ॥ मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ॥ ५५ ॥ यं यं वाञ्छति सा राजंस्तर्पयन्त्यनुकम्पिता ॥ तं तं समनयत् कामं कृच्छ्रेणाप्यजितेन्द्रियः ॥ ५६ ॥ कपोती प्रथमं गर्भं गृह्णती काल आगते ॥ अण्डानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ॥ ५७ ॥ तेषु काले व्यजायन्त रचितावयवा हरेः ॥ शक्तिभिर्दुर्विभाव्याभिः कोमलाङ्गतनूरुहाः ॥ ५८ ॥ प्रजाः पुपुषतुः प्रीतौ दम्पती पुत्रवत्सलौ ॥ शृण्वन्तौ कूजितं तासां निर्वृतौ कलभाषितैः ॥ ५९ ॥ तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥ ६० ॥ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया ॥ विमोहितौ दीनधियौ शिशून् पुपुषतुः प्रजाः ॥ ६१ ॥ एकदा जग्मतुस्तासामन्नार्थौ तौ कुटुम्बिनौ ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरम् ॥ ६२ ॥

तिकाले आगते स्वपत्युः सन्निधौ नीडे अण्डानि सुषुवे ॥ ५७ ॥ तेष्विति ॥ तेषु जलभरितेषु अण्डेषु हरेर्दुर्विभाव्याभिः अवितर्क्याभिः कालकर्मस्वभावादिभिः शक्तिभिः रचिता अवयवा येषां ते तथा कोमलानि अङ्गानि तनूरुहाः रोमाणि च येषां ते शिशवः काले तत्परिपाककाले व्यजायन्त ॥ ५८ ॥ प्रजा इति ॥ तासां प्रजानां कूजितं शृण्वन्तौ कलभाषितैर्मधुरस्वनैर्निर्वृतौ सुखिनौ अत एव प्रीतौ दम्पती प्रजाः शिशून् पुपुषतुः ॥ ५९ ॥ तासामिति ॥ तासामदीनानां हृष्टानां सुखस्पर्शैः पतत्रैः पक्षैः पक्षस्पर्शैरित्यर्थः । तथा कूजितादिभिः पितरौ मुदं हर्षमापतुः ॥ ६० ॥ स्नेहेति ॥ विष्णुमायया मोहितौ अतोऽन्योऽन्यं स्नेहेनानुबद्धहृदयौ दीनधियौ तत्पोषणप्रवणतयाकुलचित्तौ शिशून् बालान् प्रजाः पुत्रान् पुपुषतुः ॥ ६१ ॥ एकदा इति ॥ तासां प्रजानाम् अर्थिनौ अन्नमाकाङ्क्षन्तौ । स्पष्टं शेषम् ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वेति ॥ तदा यदृच्छया अकस्मादेव तत्रागतः कश्चिल्लुब्धको व्याधः स्वालयान्तिके स्वनीडसमीपे वने चरतः क्रीडतः तान् कपोतपुत्रान् दृष्ट्वा जालमातत्य प्रसार्य जगृहे॥६३॥ कपोत इति ॥ कपोती च कपोतश्च तौ सदा प्रजापोषणे उत्सुकौ उत्साहवन्तौ अतस्तदाहारार्थं गतौ सन्तौ पोषणमन्नमादाय स्वनीडमुपजग्मतुः ॥ ६४ ॥ कपोतीति ॥ कपोती स्वात्मजान् जालेन संवृतान् बद्धान् अत एव क्रोशतः वीक्ष्य भृशं दुःखिता सती स्वयमपि क्रोशन्ती तान् प्रत्यभ्यधावत् ॥ ६५ ॥ सेति ॥ सा कपोती अजस्य भगवतो मायया यस्तेषु असकृत् पुनः पुनः स्नेहस्तेन गुणिता बद्धा अत एव दीनं चित्तं यस्याः अत एव अपगता अहमप्येवं मरिष्यामीति स्मृतिर्यस्याः सा तान् बद्धान् पश्यन्त्यपि स्वयमपि शिचा जालेनाबध्यत जाले आपतदित्यर्थः ॥ ६६ ॥ कपोत इति ॥ कपोतस्तु आत्मनः स्वशरीरादप्यधिकप्रियानात्मजान् बद्धान् तथात्मना स्वशरीरेण समां

दृष्ट्वा ताँल्लुब्धकः कश्चिद् यदृच्छातो वनेचरः ॥ जगृहे जालमावृत्य चरतः स्वालयान्तिके ॥ ६३ ॥ कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥ ६४ ॥ कपोती स्वात्मजान् वीक्ष्य बालकान् जालसंवृतान् ॥ तानभ्यधावत् क्रोशन्ती क्रोशतो भृशदुःखिता ॥ ६५ ॥ साऽसकृत् स्नेहगुणिता दीनचित्ताऽजमायया ॥ स्वयं चाबध्यत शिचा बद्धान् पश्यन्त्यपस्मृतिः ॥ ६६ ॥ कपोतश्चात्मजान् बद्धानात्मनोऽप्यधिकान् प्रियान् ॥ भार्यां चात्मसमां दीनो विललापातिदुःखितः ॥ ६७॥ अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः ॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥ ६८ ॥ अनुरूपानुकूला च यस्य मे पतिदेवता ॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ॥ ६९ ॥ सोऽहं शून्ये गृहे दीनो मृतदारो मृतप्रजः ॥ जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ॥ ७० ॥ तांस्तथैवावृताञ्छिग्भि-र्मृत्युग्रस्तान्विचेष्टतः ॥ स्वयं च कृपणः शिक्षु पश्यन्नप्यबुधोऽपतत् ॥ ७१ ॥

तुल्यां भार्यां च बद्धां दृष्ट्वेति शेषः । अतिदुःखितः दीनः तेष्वासक्तः सन् विललाप शुशोच ॥ ६७ ॥ अहो इति ॥ अहो हे जनाः अल्पपुण्यस्य दुर्मतेः मम अपायं विनाशं पश्यत यतः अतृप्तस्य दृष्टसुखेनातृप्तस्य अत एव अकृतार्थस्य अदृष्टमसम्पादितवतः त्रैवर्गिको धर्मादिसाधनभूतः गृहः गृहाश्रमो हतः । नष्ट इति गृहस्य पुंस्त्वमार्षम् ॥६८॥ अनुरूपेति ॥ पतिरहमेव देवता यस्याः सा अत एवानुकूलानुरूपा च यस्य मे भार्याशून्ये गृहे मां संत्यज्य साधुभिः पुत्रैः सह स्वः स्वर्गं याति म्रियते ॥ ६९ ॥ सोऽहमिति ॥ मृतदारो मृतप्रज इति दुःखेन जीवितं यस्य सः विधुरो भार्याहीनः सोऽहं शून्यो गृहे किमर्थं जिजीविषे जीवितुमिच्छामि । तङार्षः ॥ ७० ॥ तानिति ॥ कृपणः दीनः अबुधः मूर्खः सः शिग्भिर्जालैरावृतान् अत एव मृत्युग्रस्तान् आरब्धमरणान् विचेष्टतः । शता आर्षः । शिशून् पश्यन् स्वयमपि शिक्षु जालेषु अपतत् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमिति ॥ क्रूरः लुब्धकस्तं कपोतं कपोतकांस्तत्पुत्रान् कपोतीं च लब्ध्वा सिद्धार्थः सिद्धप्रयोजनः सन् गृहं प्रययौ ॥ ७२ ॥ एवमिति ॥ एवं पतत्रिवत् कपोतवत् अन्योऽपि अशान्तात्मा रागलोभाद्याभिभूतचित्तः द्वन्द्वेषु सुखदुःखादिषु आसमंताद्रमते स द्वन्द्वारामः कृपणः विषयासक्तः कुटुम्बी कुटुम्बं पुष्णन् सानुबन्धः पुत्रकलत्रादिसहितोऽवसीदति दुःखेन विनश्यतीत्यर्थः ॥ ७३ ॥ गृहासक्तिस्तिरश्चामप्यनर्थहेतुर्मनुष्यस्य त्वतिनिन्दितेत्याह—य इति ॥ अपावृतं निरावरणं मुक्तेर्द्वारं साधनभूतं मानुषं लोकं देहं प्राप्य यः खगवत्कपोतवत् गृहेषु सक्तो भवति तमारूढच्युतं श्रेयो मार्गं सोपानमारुह्य च्युतं विदुः ॥ ७४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमादेकादशगसप्तमे ॥ ७ ॥ अष्टमेऽजगरादिभ्यो नवभ्यः शिक्षितं हरिः ॥ अवधूतमुखेनाह तत्र श्लोकाश्चतुःकृताः ॥ त्रीण्युवाचेति सार्द्धास्तु शरवेदा अनुष्टुभः ॥ ७ ॥ सुखमिति ॥ हे राजन् ऐन्द्रियकमिन्द्रियप्रभवं सुखं यत् यथा स्वर्गे भवति तथा नरकेऽपि भवत्येव । शूकरादिनारक्यामपि योनौ पुत्रकलत्रादिसुखदर्शनात् यथा दुःखं प्रयत्नं

तं लब्ध्वा लुब्धकः क्रूरः कपोतं गृहमेधिनम् ॥ कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहम् ॥ ७२ ॥ एवं कुटुम्ब्यशान्तात्मा द्वन्द्वारामः पतत्रिवत् ॥ पुष्णन्कुटुम्बं कृपणः सानुबन्धोऽवसीदति ॥ ७३ ॥ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतम् ॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ॥ ७४ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ ब्राह्मण उवाच ॥ सुखमैन्द्रियकं राजन्स्वर्गे नरक एव च ॥ देहिनां यद्यथा दुःखं तस्मान्नेच्छेत तद्बुधः ॥ १ ॥ ग्रासं सुमृष्टं विरसं महान्तं स्तोकमेव वा ॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः ॥ २ ॥ शयीताहानि भूरीणि निराहारोऽनुपक्रमः ॥ यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक् ॥ ३ ॥ ओजःसहोबलयुतं बिभ्रद्देहमकर्मकम् ॥ शयानो वीतनिद्रश्च नेहेतेन्द्रियवानपि ॥ ४ ॥ मुनिः प्रसन्नगम्भीरो दुर्विगाह्यो दुरत्ययः ॥ अनन्तपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ॥ ५ ॥

विना लभ्यते तथेत्यर्थः । तस्मात् बुधो विवेक्येवं निश्चित्य तदैन्द्रियकं सुखं नेच्छेत । तद्भावार्षः । प्रारब्धभोगस्यावश्यंभावित्वात्तदर्थोद्यमैर्वृथायुर्व्ययो न कार्य इति ॥ १ ॥ ग्रासमिति ॥ आजगरः अजगरवृत्तिः अक्रियः उदासीनः ग्रासमाहारमृष्टं स्वादु विरसं वा महान्तमुदरपूर्त्तिपर्याप्तं स्तोकमल्पमेव वा यदृच्छया दैवाद्देवप्रयत्नं विनैवापतितं लब्धं ग्रसेत् अद्यात् । तद्भाव आर्षः॥२॥शयीतेति॥ग्रासः आहारो यदि यदृच्छातो नोपनमेत् नागच्छेत्तदापि महाहिरजगर इव दिष्टभुक् प्रारब्धमेवाप्रापकमिति धैर्यवान् निराहारः अनुपक्रमः निरुद्यम एव भूरीणि बहून्यहानि तूष्णीं शयीत ॥ ३ ॥ ओज इति ॥ ओजःसहोबलम् इन्द्रियमनः शरीरसामर्थ्यं तद्युक्तमप्यकर्मकं निर्व्यापारमेव देहं बिभ्रत् शयान एव भवेत् । वीतनिद्रः स्वार्थे दत्तदृष्टिः भवेत् इन्द्रियवानपि नेहेत।अपिना दर्शनादिव्यापारपरश्च न भवेत् ॥ ४ ॥ मुनिरिति ॥ बहिः प्रसन्नश्चासावन्तर्गम्भीरश्च दुर्विगाह्यः एवं भूत इति परिकलयितुमशक्यः अलक्ष्याभिप्रायत्वात् । दुरत्ययः अनतिक्रमणीयः तेजस्वित्वात् । अनन्तपारः कालतो देशतश्चापरिच्छेद्यः स्वरूपाविर्भावात् । अक्षोभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविकार्यः रागाद्यभावात् । स्तिमितोदः निश्चलोदकः अर्णव इव मुनिर्भवेत् ॥ ५ ॥ समृद्धेति ॥ वर्षासु सरिद्भिः समृद्धोऽपि सागरो यथा नोत्सर्पेत । तङर्षः । ग्रीष्मे च तद्विहीनोऽपि न शुष्येत । तङर्षः । तथा समृद्धकामस्तद्विहीनो वा मुनिर्न हृष्येत् न वा शोचेदित्यर्थः । किंतु नारायणपरो भवेत् न विषयपरः ॥ ६ ॥ रूपासक्तिर्नाशहेतुरिति पतङ्गाच्छिक्षितमाह–दृष्ट्वेति ॥ देवस्य भगवतो मायारूपां तद्वन्मोहकत्वात् स्त्रियं दृष्ट्वा तद्भावैस्तस्याः स्त्रियो भावैर्विभ्रमादिभिः प्रलोभितः यतः अजितेन्द्रियः अन्धे तमसि नरके पतति यथा पतङ्गः सपक्षः कीटविशेषः स यथा दीपादिकं दृष्ट्वा तद्रूपेण प्रलोभितः उपभोग्यबुद्ध्या तस्मिन् पतन् नश्यति तद्वदित्यर्थः ॥ ७ ॥ योषिदिति ॥ ईश्वरस्य मायया रचितेषु योषिदादिरूपेषु द्रव्येषु उपभोगबुद्ध्या प्रलोभितात्मा आसक्तचित्तः नष्टदृष्टिः लुप्तविवेकः मूढः पुरुषः पतङ्गवन्नश्यति । यद्यप्यत्र स्त्रियां पञ्चापि रूपरसाद्याः विषयाः सन्ति तथापि तत्र प्रथमं दृष्टिरेव पततीति रूपस्य प्राधान्यम् ॥ ८ ॥ स्तोकमिति ॥ स्तोकं स्तोकमल्पमल्पं ग्रासं गृहेभ्यो गृह्णन् । यावता ग्रासेन आहारेण देहो वर्त्तेत तावन्तमेव ग्रसेत् । तङ्भाव आर्षः । एवं याचनेन गृहान् गृहस्थान् अहिंसन् अपीडयन् मुनिर्माधुकरीं मधुकरसम्बन्धिनीं वृत्तिमातिष्ठेत् आश्र-

समृद्धकामो हीनो वा नारायणपरो मुनिः ॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ॥ ६ ॥ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ॥ प्रलोभितः पतत्यन्धे तमस्यग्नौ पतङ्गवत् ॥ ७ ॥ योषिद्धिरण्याभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः ॥ प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः ॥ ८ ॥ स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता ॥ गृहानहिंसन्नातिष्ठेद् वृत्तिं माधुकरीं मुनिः ॥ ९ ॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ॥ सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥ १० ॥ सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितम् ॥ पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही ॥ ११ ॥ सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षुकः ॥ मक्षिका इव संगृह्णन् सह तेन विनश्यति ॥१२ ॥

येत् । यथा मधुकरः सुमनसः अनाशयंस्तत्राल्पमल्पमेव मधु गृह्णन् क्वापि न सक्तो वर्तते तद्वदित्यर्थः । अन्यथा मधुकर एकस्मिन्नेव पद्मे वसन्नस्तमये मुकुलिते तस्मिन् बध्यते एवं मुनिरपि गुणलोभेन एकगृहमाश्रितः तन्मोहेन बध्येत ॥९॥ अणुभ्य इति ॥ अणुभ्यो महद्भ्यो विपुलेभ्यश्च सर्वेभ्यः शास्त्रेभ्यः कुशलो विवेकी नरः तत्सारमाददीत । तङ्भाव आर्षः।यथा षट्पदो भ्रमरोऽणुभ्यो महद्भ्यश्च पुष्पेभ्यः सारमेवादत्ते न सर्वं तद्वदित्यर्थः॥१०॥मधुकृत् द्विधा मधु कृन्तति पुष्पादाच्छिनत्तीति मधुकृद् भ्रमरः मधु करोति आहारत्वेन स्वरूपेण चेति मधुकृत् मधुमक्षिका चेति तत्राद्याच्छिक्षितमुक्तं द्वितीयादाह । सायमिति । इदं सायन्तनभोजनार्थमिदं श्वस्तनभोजनार्थमित्येवमपि भिक्षितमन्नं न संगृह्णीत किं पुनर्मासादिपर्याप्तं किन्तु पाणिरेव भोजनपात्रं यस्य सः उदरमेवामत्रमन्ननिधानपात्रं यस्य तथा भवेत् संग्रही भवेच्चेन्मक्षिकेव न भवेत् नश्येत् । यथा मधुलोभेन मधुजीविभिर्मक्षिका हन्यते तथान्यैर्हतो भवेदित्यर्थः ॥ ११ ॥ स्पष्टयति–सायमिति ॥ तेन संगृहीतेन सह स्वयं विनश्यति । स्पष्टमन्यत् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पर्शासक्तौ गजो गुरुरित्याह—पदापीति ॥ भिक्षुः संन्यासी दारवीं काष्ठनिर्मितामपि युवतीं पदा पदेनापि न स्पृशेत् स्पृशंस्तु यथा हस्तिग्रहणजीविभिरानीतायाः करिण्या अङ्गसङ्गतो मोहितः करी निखाततपिहितगर्त्ते पतन् बध्यते तथा बध्येत पुनः संसारबन्धनं प्राप्नुयात् ॥ १३ ॥ नेति ॥ प्राज्ञो विवेकी कदापि स्त्रियं नाधिगच्छेत् ममैवेयं भोग्येति बुद्ध्या तदासक्तो न भवेत् किन्तु तामात्मनः स्वस्य मृत्युं पश्येत् तत्रासक्तश्चेत् । बलाधिकैः स जारः पुरुषो हन्येत । यथा करिण्यामासक्तो गजोऽन्यैर्बलाधिकैर्गजैर्हन्यते ॥ १४ ॥ त्यागभोगहीनं धनं परगामीत्यत्र मधुहा गुरुरित्याह—नेति ॥ न देयमिति लुब्धैर्दुःखेन संचितं न देयं नोपभोग्यं च यद्धनं तच्चार्थवित् । अर्थं धनं तत्प्राप्त्युपायं च वेत्ति सोऽर्थवित् । चौरादिः अन्यः भुङ्क्ते यथा मधुहा तरुकोटरादिगतं मधुमक्षिकाद्यागमनेन वेत्ति सः मक्षिकाभिः संचितं मधु हरति ततोऽप्यन्यो गृहीत्वा भुङ्क्ते तथेति ॥ १५ ॥ विनापि स्वोद्यमं भोगः संभवतीति तत्रापि स एव गुरुरित्याह—सुदुःखेति ॥ अतिदुःखेनोपार्जितैर्वित्तैर्गृहेषु आशिषो विषयभोगसुखानि आशासानां कामयमानानां गृहमेधिनां भोगान् अग्रतः प्रथममेव यतिः भुङ्क्ते । मधुहा यथा मक्षिकाभ्यः प्रथमं मधु भुङ्क्ते तथेति। आशासानामिति शानचि नाकारलोप आर्षः । पचाद्य-

पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि ॥ स्पृशन् करीव बध्येत करिण्या अङ्गसङ्गतः॥१३॥नाधिगच्छेत् स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः ॥
बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा ॥ १४ ॥ न देयं नोपभोग्यं च लुब्धैर्यद्दुःखसञ्चितम् ॥ भुङ्क्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥ १५ ॥
सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः ॥ मधुहेवाग्रतो भुङ्क्ते यतिर्वै गृहमेधिनाम् ॥ १६ ॥ ग्राम्यगीतं न शृणुयाद् यतिर्वनचरः क्वचित् ॥
शिक्षेत हरिणाद् बद्धान्मृगयोर्गीतमोहितात् ॥ १७ ॥ नृत्यवादित्रगीतानि जुषन् ग्राम्याणि योषिताम् ॥ आसां क्रीडनको वश्य ऋष्यश्रृङ्गो मृगीसुतः ॥ १८ ॥ जिह्वयाऽतिप्रमाथिन्या जनो रसविमोहितः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥

जन्तं चेद्गृहाशिष इति षष्ठी । " यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ॥ तयोरन्नमदत्त्वा तु भुक्त्वा चान्द्रायणं चरेत् ।" इति गृहिणामावश्यकत्वेन दानविधानात्॥१६॥ ग्राम्येति ॥ वनचरो यतिः क्वचित् कदापि ग्राम्याणां गीतं न शृणुयादिति मृगयोर्लुब्धकस्य गीतेन मोहितात् बद्धात् हरिणात् शिक्षेत ॥ अन्यथा बन्धनं प्राप्नुयादित्याशयः ॥ १७ ॥ हरिणशब्दाद्धरिणीसुतमृष्यश्रृङ्गमपि गुरुमाह यद्वा ग्राम्यगीतासक्तेरुदाहरणमाह—नृत्येति ॥ ग्रामे भवानि ग्राम्याणि योषितां नृत्यादीनि जुषन् सेवमानः । आर्षः शता । हरिणीसुत ऋष्यश्रृङ्गाख्य ऋषिरासां योषितां क्रीडनकवद्वश्यो बभूवेति शेषः । ग्राम्येति । भगवद्गीतानुज्ञार्थम् ॥ १८ ॥ जिह्वयेति ॥ अतिप्रमाथिन्या अतिक्षोभिकया दुर्जयया च जिह्वया करणभूतया रसे तद्विषये विमोहितः आसक्तः असद्बुद्धिर्जनः मृत्युमृच्छति।यथा रसविमोहितो मीनो बडिशैरामिषलिप्तलोहकण्टकैः मृत्युमृच्छति तथेति एवं रूपगन्धस्पर्शशब्दरसैः पतङ्गमधुकरगजहरिणमीना मोहिताः।तदुक्तम्।" पतङ्गमातङ्गकुरङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च । एकः प्रमादी स कथं न हन्यते यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेवते पञ्चभिरेव पञ्च॥" इति ॥१९॥ दुर्जयत्वमुपपादयति—इन्द्रियाणीति ॥ मनीषिणो धीराः पुरुषा निराहाराः सन्तः इतराणीन्द्रियाण्याशु जयन्ति परंतु रसनं वर्जयित्वा तत्तु तथा जेतुं न शक्नुवन्ति यतस्तद्रसनं निरन्नस्य जनस्य वर्द्धते तथा च यद्याहारः सर्वथा त्यज्यते तदा केवलमितरेन्द्रियजयो भवति। रसनेन्द्रियं तु वर्द्धत एव। यदि तु यथेष्टं भुज्यते तदा पुनः रसपोषेणेन्द्रियान्तरक्षोभः स्यादतो रसासक्तिं परित्यज्यौषधवद्भुञ्जीतेति । प्राणवृत्त्यैव सन्तुष्येदित्यत्रोक्तमपि रसनस्यातिदुर्जयत्वज्ञापनायोच्यते ॥ २० ॥ तावदिति ॥ यतः विजितानि अन्यानि रसनाव्यतिरिक्तानीन्द्रियाणि येन तथाभूतोऽपि पुमान् यावद्रसनं न जयेत्तावत् जितेन्द्रिय एव न स्यात् । रसनस्य जागरूकत्वात्पुनस्तद्द्वारा इतरेन्द्रियोद्बोधसंभवात् । अतो रसे रसनेन्द्रिये जिते सत्येव सर्वमिन्द्रियं जितं भवति नान्यथेति ॥ २१ ॥ नैराश्ये पिङ्गला गुरुरित्याह—पिङ्गलेति ॥ विदेहनगरे मिथिलापुरे पुरा पिङ्गला नाम काचिद्वेश्यासीत् । हे नृपनन्दन तस्याः सकाशात् यत्किञ्चिन्मे मया शिक्षितं तन्मत्तो निबोध शृणु ॥ २२ ॥ सेति ॥ सा पिङ्गला

इन्द्रियाणि जयन्त्याशु निराहारा मनीषिणः ॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते ॥२०॥ तावज्जितेन्द्रियो न स्याद्विजितान्येन्द्रियः पुमान् ॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे ॥ २१ ॥ पिङ्गला नाम वेश्यासीद् विदेहनगरे पुरा ॥ तस्या मे शिक्षितं किंचिन्निबोध नृपनन्दन॥ २२॥ सा स्वैरिण्येकदा कान्तं संकेत उपनेष्यती ॥ अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥ २३ ॥ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ ॥ ताञ्छुल्कदान्वित्तवतः कान्तान्मेनेऽर्थकामुका ॥ २४ ॥ आगतेष्वपयातेषु सा सङ्केतोपजीविनी ॥ अप्यन्यो वित्तवान्कोऽपि मामुपैष्यति भूरिदः ॥२५॥ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलम्बिनी ॥ निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥२६॥ तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः ॥ निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥ २७ ॥

स्वैरिणी कामचारिणी वेश्या एकदा कान्तं कमनीयं रतिसमर्थं धनदं पुरुषं संकेते एकान्ते रतिस्थाने उपनेष्यती उपनेतुमुत्तमं स्वलंकृतं स्वरूपं बिभ्रती तद्योग्ये काले रात्रौ गृहाद्बहिर्द्वारि अभूत् उपविवेश ॥ २३ ॥ मार्ग इति ॥ हे पुरुषर्षभ अर्थकामुका सा मार्गे आगच्छतः पुरुषान् वीक्ष्य तान् वित्तवतः सधनान् अत एव शुल्कदान्मूल्यं प्रदाय सुरतग्राहकान् कान्तान् सुरतार्हांश्च मेने ॥ २४ ॥ आगतेष्विति ॥ सा यतः सङ्केतोपजीविनी संकेते पुरुषान्नीत्वा ततः प्राप्तधनेन जीवन्ती सा आगतेष्वपयातेषु सत्सु अन्योऽपि कोऽपि वित्तवान् अतो भूरिदो बहुधनदाता मामुपैष्यति इत्यचिन्तयदिति शेषः ॥२५॥ एवमिति ॥ एवंविधया दुराशया ध्वस्ता निद्रा यस्याः सा द्वार्यवलम्बमाना पुनः निर्गच्छन्ती ततः पुनः अन्तः प्रविशती सती निशीथमर्द्धरात्रं समपद्यत प्राप ॥ २६ ॥ तस्या इति ॥ वित्ताशया शुष्यद्वक्त्रं यस्याः तथा दीनं चेतो यस्याः पिङ्गलायाः चिन्ताहेतुः वक्ष्यमाणविचारस्य हेतुः परिणामसुखावहश्च परम उत्कृष्टः निर्वेदो जज्ञे जातः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्या इति सार्द्धम् ॥ तस्या निर्विंणचित्ताया गीतं यथा यथावत् मम मत्तः शृणु । हि यस्मात् पुरुषस्याशापाशानां निर्वेदोऽसिर्यथा तथा छेत्ता । अङ्ग हे राजन् न जातो निर्वेदो वैराग्यं यस्य सः देहं बध्नाति रचयतीति देहबन्धमाशापाशं न जिहासति न त्यक्तुमिच्छति ॥ २८ ॥ अहो इति ॥ न विजित आत्मा मनो यया तस्या मे मम मोहविततिं मोहविस्तारं पश्यत येन मोहेनाहं बालिशा विवेकशून्या सती असतः तुच्छात्कान्तात् पुरुषात् कामं भोगधनादिकं कामये ॥ २९ ॥ सन्तमिति ॥ रमणं क्रीडाप्रदं रतिप्रदं सुखप्रदं परमानन्दरूपत्वात् वित्तप्रदं लक्ष्मीपतित्वात् नित्यं विनाशरहितमिममपरोक्षं समीपे हृदये सन्तं वर्तमानमन्तर्यामिणं भगवन्तं विहाय ततो विपरीतमकामदं यथेष्टभोगसंपादने असमर्थं दुःखादिप्रदं तुच्छं नश्वरमहं भजे भजामि । अतः अज्ञा भगवत्येतादृशी मतिस्तस्यास्तदा तन्यां रजन्यां तदङ्गने यदृच्छया गतशयितस्य श्रीदत्तात्रेयस्य कृपाभरादभूदिति प्राञ्चः ॥ ३० ॥ अहो इति ॥ अहो याऽहं स्त्रैणात् स्त्रीलम्पटात् मूर्खात् अर्थतृषः धनादितृष्णायुक्तात् अल्पप्रदात् अनुशोच्यात् रोगाद्याकुलत्वेन

तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम ॥ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ॥ न ह्यङ्गजातनिर्वेदो देहबन्धं जिहासति ॥ २८ ॥
पिङ्गलोवाच ॥ अहो मे मोहविततिं पश्यताऽविजितात्मनः ॥ या कान्तादसतः कामं कामये येन बालिशा ॥ २९ ॥ सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ॥ अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥ ३० ॥ अहो मयात्मा परितापितो वृथा साङ्केत्यवृत्त्यातिविगर्ह्यवार्तया ॥ स्त्रैणान्नराद्याऽर्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ॥ ३१ ॥ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचारोमनखैः पिनद्धम् ॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ॥ ३२ ॥ विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ॥ याऽन्यमिच्छन्त्यसत्यस्मादात्मदात्काममच्युतात् ॥ ३३ ॥ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ॥ तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥ ३४ ॥

नश्वरान्नरात् तेन धनादिदानेन क्रीतेन स्वयं विक्रीतेनात्मना देहेन वित्तं रतिं चेच्छती तया मया साङ्केत्येन परपुरुषसङ्गेन या वृत्तिस्तया बहुव्रीहिणा मयेत्यस्य विशेषणं वा । अत एव विगर्ह्या विनिन्द्या या वार्ता जीविका तया आत्मा मनः वृथैव परितापितः संतापं प्रापितः ॥ ३१ ॥ यदिति ॥ यत् अस्थिभिर्निर्मिता वंशादयो यत्र तत् स्थूणाः स्तम्भाः वंशो नाम स्थूणासु निहितस्तिर्यग्वेणुः वंश्यास्तस्मिन्नुभयतो निहिता वेणवः तत्र यत् पृष्ठे दीर्घमस्थि स वंशः पार्श्वास्थीनि वंश्यानिस्थूणा हस्तपादास्थीनीति विवेकः । त्वचा चर्मणा तथा रोमभिर्नखैश्च पिनद्धं छादितम् । तथा कफादिकं क्षरन्ति नव द्वाराणि इन्द्रियछिद्राणि । यस्मिंस्तदेवंभूतागाररूपं विण्मूत्रपूर्णमेतन्नरशरीरं मत् मत्तोऽन्या का वा स्त्री कान्तबुद्ध्या उपैति सेवते ॥ ३२ ॥ विदेहानामिति ॥ विदेहानां मैथिलानां ज्ञानिनामपि अस्मिन् पुरे एका अहमेव मूढधीः । हि यस्मात् याहमसती दुष्टा अस्मात् आत्मदात् अच्युतात् भगवतः अन्यं कामं तां विहायान्यं भोगमिच्छती शत्रतात् ङीपू अस्मि ॥ ३३ ॥ सुहृदिति ॥ यतोऽयमच्युतः शरीरिणां सुहृत् हितकर्ता प्रेष्ठतमः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाथः स्वामी आत्मा च अतस्तमेव आत्मना विक्रीय देहादिसमर्पणेन विशेषेण क्रीत्वा स्ववशीकृत्यानेनैव सह यथा रमा लक्ष्मीः रमते तथाहमपि रमे ॥ ३४ ॥ कियदिति ॥ ये स्वयमेव आद्यन्तवन्तः अतः कालेनैव विद्रुताश्च ते कामाः विषयाः कामदा नराः देवा वा ते भार्यायाः मम कियत् प्रियं व्यभजन् कृतवन्तः न किंचित् अतोऽत्रामुत्र च तद्व्यतिरिक्तः कोऽपि सेव्यो नास्तीत्याशयः ॥ ३५ ॥ नूनमिति ॥ यत् यस्मात् दुष्टा आशा यस्याः तस्याः मे मम अयं सुखावहः निर्वेदो जातः अतो नूनं मे मम केनापि कर्मणा भगवान् विष्णुः प्रीतः यदृच्छागते श्रीदत्तात्रेये तदर्थं स्थानमार्जनलेपादिकमनया कृतमिति प्राञ्चः॥ ३६॥मैवमिति ॥ यदि मे विष्णुः प्रीतो न स्यात् तर्हि मन्दभाग्याया मम निर्वेदस्य हेतवः क्लेशा एवं मा स्युः न भवेयुः । यद्वा । यद्यहं मन्दभाग्या स्यां तर्हि मे निर्वेदहेतवः क्लेशा न स्युः अतोऽहं भाग्यवत्येवेत्यर्थः । येन निर्वेदेन पुरुषः अनुबन्धं देहगेहादिकं निर्हृत्य त्यक्त्वा शमं शान्तिमृच्छति प्राप्नोति ॥ ३७ ॥ तेनेति ॥ अतस्तेन भगवतोपकृतमुपकाररूपेण प्रसादीकृतं निर्वेदं शिरसा आदाय ग्राम्येषु विषयेषु

कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः ॥ आद्यन्तवन्तो भार्याया देवा वा कालविद्रुताः ॥ ३५ ॥ नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा ॥ निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥ ३६ ॥ मैवं स्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः ॥ येनानुबन्धं निर्हृत्य पुरुषः शममृच्छति ॥ ३७ ॥ तेनोपकृतमादाय शिरसा ग्राम्यसंगताः ॥ त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरम् ॥ ३८ ॥ सन्तुष्टा श्रद्दधत्येतद्यथालाभेन जीवती ॥ विहराम्यमुनैवाहमात्मना रमणेन वै ॥ ३९ ॥ संसारकूपे पतितं विषयैर्मुषितेक्षणम् ॥ ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ॥ ४० ॥ आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात् ॥ अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥ ४१ ॥ ब्राह्मण उवाच ॥ एवं व्यवसितमतिर्दुराशां कान्ततर्षजाम् ॥ जित्वोपशममास्थाय शय्यामुपविवेश सा ॥ ४२ ॥

सङ्गताः संलग्ना दुराशास्त्यक्त्वा तमेवाधीश्वरं शरणं व्रजामि ॥ ३८ ॥ संतुष्टेति ॥ यथालाभेन संतुष्टा तेनैव जीवती । नुमभाव आर्षः । एतत् परमात्मतत्वं विहरामीत्युत्तरार्धोक्तं वा श्रद्दधती तत्रैव विश्वासं कुर्वती अमुनैव आत्मना स्वरूपभूतेन प्रियेण रमणेन पत्या सहाहं विहरामि ॥ ३९ ॥ संसारेति ॥ दुस्तरत्वात्संसार एव कूपस्तत्र पतितं विषयैर्मुषितमीक्षणं विवेको यस्य तं कालरूपेणाहिना ग्रस्तमात्मानं भगवतोऽन्यः को वा त्रातुमधीश्वरः समर्थः ॥ ४० ॥ तर्हि किमात्मत्राणोपाधिना तं भजसे नेत्याह—आत्मेति ॥ यदि अप्रमत्तः सावधानः सन्निदं जगत् कालाहिना ग्रस्तं पश्येत् ततश्चाखिलात्प्रपञ्चान्निर्विद्येत तदात्मनो गोप्ता आत्मैव भवेत् । अतो मम रक्षायाः स्वतः सिद्धत्वात् प्रेम्णैव तं भजामीत्याशयः ॥ ४१ ॥ एवमिति ॥ एवं व्यवसिता कृतनिश्चया मतिर्यस्याः सा पिङ्गला कान्ते यस्तर्षोऽभिलाषस्ततो जातां धनादिदुराशां छित्त्वोपशमं शान्तिमास्थायाश्रित्य शय्यामुपविवेश ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशेति ॥ आशा हि आशैव परमं दुःखसाधनं नैराश्यमेव परमं सुखसाधनम् । यथा कान्ताशयासु दुःखिता पिङ्गला कान्ताशां संछिद्य सुखं यथा तथा सुष्वाप ॥ ४३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशस्याष्टमेऽस्मिन् व्यधाद्गङ्गासहायकः ॥ ८ ॥ नवमे कुररादिभ्यो देहतश्चोपशिक्षितम् ॥ श्रुत्वा यदुः कृतार्थोऽत्र श्लोकाः सार्द्धास्त्रिवह्नयः ॥ उवाच वाक्यद्वितयमष्टत्रिंशदनुष्टुभः ॥९॥ परिग्रह इति ॥ नृणां यद्यत्प्रियतमं वस्तु तस्य तस्य परिग्रहोऽतिदुःखाय भवति अतो यस्तु तद्विद्वान् परिग्रहस्य दुःखहेतुत्वं जानन् अकिञ्चनः निष्परिग्रहः स्यात्सोऽनन्तं सुखमाप्नोति ॥ १ ॥ सामिषमिति ॥ परिगृहीतामिषमुखं कुरराख्यं पक्षिविशेषं निरामिषास्ततो बलिनः श्येनगृध्रादयो जघ्नुः तदा च स कुररः आमिषं परित्यज्य सुखं समविन्दत प्राप्तवान् ॥ २ ॥ नेति ॥ मे मम मानावमानौ लोककृतमानापमानजनितसुखदुःखे न स्तः । तथा या गेहपुत्रिणां तद्वतां चिन्ता भवति सापि नास्ति यतः अहं आत्मना सहैव क्रीडा यस्य तथा आत्मन्येव रतिः प्रीतिर्यस्य सोऽहमिह लोके बालवत् सुखं विचरामि ॥ ३ ॥ द्वावेवेति ॥

आशा हि परमं दुःखं नैराश्यं परमं सुखम् ॥ यथा सञ्छिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥४३॥ इति श्रीमद्भागवते महापुराणे एकादशस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥ ब्राह्मण उवाच ॥ परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणाम् ॥ अनन्तं सुखमाप्नोति तद्विद्वान्यस्त्वकिञ्चनः ॥ १ ॥ सामिषं कुररं जघ्नुर्बलिनो ये निरामिषाः ॥ तदामिषं परित्यज्य स सुखं समविन्दत ॥२॥ न मे मानावमानौ स्तो न चिन्ता गेहपुत्रिणाम् ॥ आत्मक्रीड आत्मरतिर्विचरामीह बालवत् ॥ ३ ॥ द्वावेव चिन्तया मुक्तौ परमानन्द आप्लुतौ ॥ यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः ॥ ४ ॥ क्वचित्कुमारी त्वात्मानं वृणानान्गृहमागतान् ॥ स्वयं तानर्हयामास क्वापि यातेषु बन्धुषु ॥५॥ तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव ॥ अवघ्नन्त्याः प्रकोष्ठस्थाश्चक्रुः शङ्खाः स्वनं महत् ॥६॥ सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः ॥ बभञ्जैकैकशः शङ्खान् द्वौ द्वौ पाण्योरशेषयत् ॥७॥

द्वावेव मानापमानादिचिन्तया मुक्तौ अत एव परमानन्दे आप्लुतौ निमग्नौ यो विमुग्धः अज्ञः मानापमानानभिज्ञः जडः अनुद्यमः बालः यश्च गुणेभ्यः परम् ईश्वरं गतः तदेकभावं प्राप्त इति ॥ ४ ॥ क्वचिदिति ॥ क्वचिद्देशे बन्धुषु पित्रादिषु क्वापि कार्यान्तरे यातेषु सत्सु काचित्कुमारी आत्मानं वृणानान् वरितुं स्वगृहमागतान् जनान् वीक्ष्य स्वयमेव तान् अर्हयामास आवृतसर्वाङ्गेव गेहान्निष्क्रम्य दर्भासनादिकेन आतिथ्येन सत्कारं कृतवती ॥ ५ ॥ तेषामिति ॥ तेषामागतानामभ्यवहारार्थं भोजनार्थं रहसि एकान्ते शालीन् धान्यानि अवघ्नन्त्यास्तस्याः । नुमार्षः । प्रकोष्ठस्थाः मणिबन्धस्थाः शङ्खाः शङ्खवलयाः महत् यथा स्यात्तथा स्वनं चक्रुः ॥ ६ ॥ सा इति ॥ तदा सा कुमारी यतो महती बुद्धिमती महाकुलोत्पन्ना वा अतः तच्छाल्यवहननं जुगुप्सितं दारिद्र्यसूचकत्वान्निन्दितं मत्वा व्रीडिता सती तत एकैकशः क्रमेणैकमेकं शङ्खं बभञ्ज करादपसारितवती । द्वौ द्वौ शङ्खौ पाण्योरशेषयत् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभयोरिति ॥ ततश्च पुनरवघ्नन्त्या । नुमार्षः । शङ्खयोरुभयोर्द्वयोर्द्वयोरपि परस्परसंवर्षजो घोषोऽभवत्।ततस्तत्राप्येकमेकं निरभिदत् पृथक्कृतवती तदैकैकस्माच्छङ्खात् ध्वनिर्नाभवत् ॥ ८ ॥ अन्विति ॥ हे अरिन्दम लोकतत्वस्य विवित्सया जिज्ञासया।ङभाव आर्षः । विन्दतेर्वा रूपम् । एतान् लोकाननुचरन्नहं तस्याः इमं वक्ष्यमाणम् । उपदेशम् अन्वशिक्षम् । तङभाव आर्षः ॥९॥ वास इति ॥ बहूनां वासे कलहो भवेत् द्वयोरपि वासे वार्ता मिथः संलापो भवेत् । वास इति प्रथमान्तपाठे कलहः । कलहहेतुः वार्ता गोष्ठी हेतुर्भवेदित्यर्थः । यत एवं तस्मात्कुमार्याः कङ्कण इव एक एव चरेत् ॥ १० ॥ मन इति ॥ जितासनः जितश्वासश्च सन् अतन्द्रितः आलस्यरहितः वैराग्याभ्यासयोगेन ध्रियमाणं वशीक्रियमाणं मनः एकत्र संयुञ्ज्यात् स्थिरीकुर्यात्।आसनजये श्वासजयः ततश्च श्वासाधीनं मनः स्थिरं भवति वैराग्याभ्यासाभ्यां च पुनर्विक्षेपाभावः ॥ ११ ॥ यस्मिन्निति ॥ यदेतत् लयविक्षेपात्मकं मनस्तत् यस्मिन् परमानन्दस्वरूपे भगवति लब्धास्पदं सत् कर्मरेणून् कर्मवासनाः मुञ्चति तस्मिन् नियुञ्ज्यादिति पूर्वेण

उभय्योरप्यभूद्घोषो ह्यवघ्नन्त्याः स्म शङ्खयोः ॥ तत्राप्येकं निरभिदद्देकस्मान्नाभवद्ध्वनिः॥ ८ ॥ अन्वशिक्षमिमं तस्या उपदेशमरिन्दम ॥ लोकाननुचरन्नेताँल्लोकतत्त्वविवित्सया ॥ ९ ॥ वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि ॥ एक एव चरेत्तस्मात्कुमार्या इव कङ्कणः ॥ १० ॥ मन एकत्र संयुज्याज्जितश्वासो जितासनः ॥ वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रितः ॥ ११ ॥ यस्मिन्मनो लब्धपदं यदेतच्छनैः शनैर्मुञ्चति कर्मरेणून् ॥ सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिन्धनम्॥१२॥तदैवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरन्तरं वा॥ यथेषुकारो नृपतिं व्रजन्तमीषौ गतात्मा न ददर्श पार्श्वे ॥ १३ ॥ एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः ॥ अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः ॥ १४ ॥

संबन्धः । ननु तथापि सुषुप्तिवल्लयो दुर्वारः तत्राह । वृद्धेन सत्वगुणेन रजस्तमश्च विधूय रजस्तमसोरभावे विक्षेपलययोरभावात् । अनिन्धनं इन्धनं गुणास्तत्कार्यं च तद्रहितम् इन्धनवत्सत्वस्य स्वत एव शान्तत्वात् निर्वाणम् अवृत्तिकं ध्येयाकारेणावस्थानमुपैति । उक्तं च।"मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः । यासंप्रज्ञातनामाऽसौ समाधिरभिधीयते ॥ " इति ॥ १२ ॥ तदेति ॥ एवमात्मनि सर्वात्मके परमेश्वरेऽवरुद्धं स्थिरीकृतं चित्तं येन स तदा तस्यामवस्थायां दर्शनादिना बहिः स्मरणेन अन्तरं वा न किंचिद्वेद । यथा इषौ गतात्मा तस्य ऋजूकरणे दत्तचित्तः तन्मयी भवन्मनाः दार्ष्टान्त आत्माकारी भवन्मनाः इषुकारः भेर्यादिमहाघोषैः पार्श्वे गच्छन्तमपि नृपतिं यथा न ददर्श तथेति ॥१३॥ एकचारीति ॥ योगिसंमर्दस्यापि त्यागे कुमारीगुरुः जनमात्रसङ्गत्यागे सर्पः स यथा जनाच्छङ्कमान एकाकी विचरति नियतनिकेतरहितश्च सदा अप्रमत्तश्च एकान्तवासी च आचारैर्गतिभिः सविषो निर्विषो वेति च न लक्ष्यते असहायश्च मितभाषी च तद्वन्मुनिरपि वर्तेतेत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहेति ॥ अध्रुवः आत्मा शरीरं यस्य तस्य देहस्याध्रुवत्वादित्यर्थः । गृहारम्भः गृहनिर्माणमात्मनोऽतिदुःखाय भवति आयासधनव्ययादेः प्रसिद्धत्वात् तथा विफलश्च अतो यथा सर्पः परकृतं वेश्म वल्मीकादिकं प्रविश्य सुखं यथा भवति तथा एधते वर्त्तते तथैव विवेकिभिरन्यनिर्मितगृहेणैव निर्वाहः कर्तव्य इति शेषः ॥ १५ ॥ ईश्वरः केन प्रकारेण सृष्ट्यादि करोतीत्येतन्मया ऊर्णनाभेः शिक्षितमित्याचक्षाण आदौ संहारमाह—एक इति सार्द्धम् ॥ य एक ईश्वरः नारायणो देवः आत्माधारः आधारान्तरानपेक्षः स्वयं त्वखिलानामाश्रयः आधारः स्वमायया पूर्वसृष्टमिदं विश्वं कालाख्यया कलया स्वशक्त्या संहृत्य कल्पान्ते एक एवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत् । सर्वस्य प्रपञ्चस्यात्मनि लयात् ॥ १६ ॥ उक्तमेव पुनः स्पष्टयति—कालेनेति द्वयम् ॥ आत्मनः अनुभावेन शक्तिविशेषेण कालेन कारणभूतासु सत्त्वादिषु शक्तिषु साम्यं प्रधानं प्रति नीतासु सतीषु प्रधानपुरुषयोरपीश्वरो नियन्ता परे ब्रह्मादयः अवरे अन्ये च मुक्ताः जीवास्तेषां परमः परमफलभूतः प्राप्यः निरुपाधिकः सत्वाद्युपाधिरहितः केवलो निर्वि-

गृहारम्भो हि दुःखाय विफलश्चाध्रुवात्मनः ॥ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥१५॥ एको नारायणो देवः पूर्वसृष्टं स्वमायया ॥ संहृत्य कालकलया कल्पान्त इदमीश्वरः ॥ एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ॥ १६ ॥ कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥ सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ॥ १७ ॥ परावराणां परम आस्ते कैवल्यसंज्ञितः ॥ केवलानुभवानन्दसन्दोहो निरुपाधिकः ॥ १८ ॥ केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ॥ संक्षोभयन् सृजत्यादौ तया सूत्रमरिन्दम ॥ १९ ॥ तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् ॥ यस्मिन् प्रोतमिदं विश्वं येन संसरते पुमान् ॥ २० ॥ यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः ॥ तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥ २१ ॥

षयः स्वप्रकाशः अनुभवो ज्ञानमानन्दश्च तेषां सन्दोहः समूहः चिदानन्दरूपः आदिपुरुषः कैवल्यसंज्ञितः मोक्षशब्दाभिधेय आस्ते । यद्वा । केवल एव कैवल्यम् । स्वार्थे ष्यञ् । कैवल्य इति संज्ञा जाता यस्य स जगत्पालनादिव्यापाराभावात् ॥ १७ ॥ १८ ॥ केवलादेव सृष्टिं दर्शयति—केवलेति ॥ हे अरिन्दम केवलेनात्मानुभावेन कालेन त्रिगुणात्मिकां स्वमायां संक्षोभयन् तया प्रकृत्या आदौ सूत्रं क्रियाशक्तिप्रधानं महत्तत्वं सृजति ॥ १९ ॥ तामिति ॥ विश्वतोमुखं नानाविधं त्रिगुणात्मकं विश्वमहङ्कारद्वारेण सृजन्तीं तामेव सूत्ररूपां व्यक्तिं त्रिगुणव्यक्तिं त्रिगुणकार्यमाहुः ।व्यक्तिशब्दं प्रधानीकृत्य सूत्रस्यैव स्त्रीलिङ्गेन परामर्शः । त्रिगुणकार्यस्य सूत्रसंज्ञायां हेतुमाह । यस्मिन्निति । कारणभूते समष्टिप्राणरूपे सूत्रे यस्मिन्निदं विश्वं प्रोतं ग्रथितम् । येन प्राणरूपेण सूत्रेण पुमान् जीवः संसरते । तङार्षः ॥ २० ॥ यथेति ॥ ऊर्णा तन्तुसन्तानप्रकृतिर्नाभौ यस्य स कीटविशेषः स यथा हृदयात् वक्त्रद्वारा ऊर्णां संतत्य प्रसार्य तयोर्णया विहृत्य क्रीडित्वा भूयस्तां ग्रसति । तङभाव आर्षः । एवमेव परमेश्वरोऽपि स्वत एव विश्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसार्य तत्र विहृत्य स्वस्मिन्नेवोपसंहरति ॥ २१ ॥ यत्र यत्रेति ॥ धिया निश्चयात्मिकया बुद्ध्या यत्र यत्र विषये मनः संकल्पविकल्पात्मकं सकलं निश्चलं स्नेहाद्यन्यतमेन हेतुना यो देही धारयेत्स तत्तत्सरूपतां याति प्राप्नोति ॥ २२ ॥ कीट इति ॥ हे राजन् तेन पेशस्कृता भ्रमरविशेषेण कुड्यां निरोधस्थाने प्रवेशितो निरुद्धः कीटो भयेन तं पेशस्कृतं ध्यायन् पूर्वरूपमसंत्यजन् तत्सात्मतां तत्सारूप्यं याति । साम्यतामिति पाठे तु स्वार्थेष्यञन्तात्समशब्दात्तल् आर्ष इत्येके । पूर्वरूपमसन्त्यजन्नित्यस्यायमभिप्रायः । यदा तेनैव देहेनान्यसारूप्यं दृश्यते तदा किं वक्तव्यं देहान्तरेण सारूप्यं घटते इति ॥ २३ ॥ एवमिति ॥ स्पष्टम् ॥ २४ ॥ देह इति ॥ देहोऽपि मम गुरुः यतः विरक्तिविवेकयोर्हेतुः सत्वनिधनमुत्पत्तिविनाशौ बिभ्रत् बिभ्राणः । स्मेति प्रसिद्धौ । किं च सततमार्तिमेवोदर्कमुत्तरोत्तरफलं च बिभ्राणः । यद्वा । सततार्तिरेवोदर्कमुत्तरफलं यस्य तत्सत्त्वनिधनं बिभ्राणः । अनेन देहेन यथा यथावत् तत्वानि विमृशामि तथापि यतः पारक्यं शृगालादिभक्ष्यमित्यवसितो निश्चितवान् अतः असङ्गः अस्मिन्नप्यासक्तिरहित

यत्र यत्र मनो देही धारयेत्सकलं धिया ॥ स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपताम् ॥ २२ ॥ कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः ॥ याति तत्साम्यतां राजन्पूर्वरूपमसंत्यजन् ॥ २३ ॥ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः ॥ स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो ॥ २४ ॥ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कम् ॥ तत्त्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसङ्गः ॥ २५ ॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षुतया वितन्वन् ॥ स्वान्ते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वाऽस्य बीजमवसीदति वृक्षधर्मा ॥ २६ ॥ जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥ २७ ॥

एव विचरामि ॥ २५ ॥ सततार्त्युदर्कतां प्रपञ्चयति–जायेति ॥ सकृच्छ्रं सकष्टं रेफरहितपाठे सकृदेव शं सुखमिति यथा भवति तथाऽवरुद्धानि संचितानि धनानि येन सः पुरुषः देहविशेषणं वा । यस्य देहस्य प्रियचिकीर्षुतया प्रियं कर्तुं भोगं संपादयितुमिच्छुतया । चिकीरषयेत्यार्षः पाठः । जायादिवर्गान् वितन्वन् संवर्द्धयन् तान् पुष्णाति । वृक्षस्येव धर्मः स्वभावो यस्य सः वृक्षो यथा विनश्यन्नपि वृक्षान्तरबीजमुत्पाद्य विनश्यति तथेत्यर्थः । स देहः स्वान्ते स्वस्यायुषोऽन्ते अस्य पुरुषस्य देहान्तरबीजं सृष्ट्वा अवसीदति नश्यति अस्य बीजं सृष्ट्वेति देहनाशेऽपि न दुःखसमाप्तिरित्याशयः ॥ २६ ॥ जिह्वेति ॥ अमुं देहं देहाभिमानिनं पुरुषं वा कर्हि कदाचित् जिह्वा एकतः रसं प्रत्यपकर्षति तर्षा पिपासा । स्त्रीत्वमार्षम् । जलं प्रति अपकर्षति तथा शिश्नो व्यवायं प्रति त्वक् स्पर्शं प्रति उदरमन्नं प्रति श्रवणं शब्दं प्रति घ्राणो गन्धं प्रति चपला दृक् रूपं प्रति कर्म शक्तिः कर्मेन्द्रियाणि क्व च क्वचित् वचनादानगतिमलविसर्गादिस्वस्वविषयं प्रति अपकर्षति बह्व्यः सपत्न्यो यथा गेहपतिमेकं स्वामिनं गृहीत्वा सर्वतः स्वं स्वं प्रति लुनन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकृष्य त्रोटयन्ति तथेति ॥ २७ ॥ एवं देहस्य विरक्त्यादिहेतुत्वेन गुरुत्वमुक्त्वा दुर्लभत्वं दर्शयन् आत्मनिष्ठामभिधत्ते—सृष्ट्वेति ॥ देवो भगवान् आत्मनः शक्त्या अजया विविधानि पुराणि जीवानां निवासस्थानानि शरीराणि वृक्षसरीसृपादीन् सृष्ट्वा तैस्तैर्वृक्षादिशरीरैः धर्मादिपुरुषार्थसाधकत्वाभावात् न तुष्टं हृदयं यस्य स ब्रह्मणोऽवलोकाय अपरोक्षज्ञानपर्यन्तं योग्या धिषणा बुद्धिर्यस्मिंस्तं पुरुषं पुरुषशरीरं विधाय मुदं हर्षं प्राप । " तासां मे पौरुषी प्रिया " इति भगवदुक्तेः । " पुरुषत्वे चाविस्तरामात्मा " इति श्रुतेश्च।ईश्वरो हि वागादीः सृष्टवान् ताश्च भोगार्थं शरीरमयाचन्त स च ताभ्यो गवादिशरीराण्यानीय चक्षुरादिस्थानेष्वत्र प्रविशतेत्याह । तत्र पुरुषशरीरे वागादयः समतुष्यन् तेनेश्वरोऽपि मुदमाप । तथा च श्रुतिः । " तथा ताभ्यो गामानयत ता अब्रुवन् न वै नोयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वेनोयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बत " इति ॥ २८ ॥ लब्ध्वेति ॥ यस्मात् इदं मानुष्यं जन्मार्थदमपि अनित्यम् अनुगतो मृत्युर्यस्य तादृगस्ति तस्माद्बहूनां सम्भवानां जन्मनामन्ते कथंचिदिदं

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान् ॥ तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः ॥ २८ ॥ लब्ध्वा सुदुर्लभमिदं बहुसंभवान्ते मानुष्यमर्थदमनित्यमपीह धीरः ॥ तूर्णं यतेत न पतेदनुमृत्यु यावन्निः-श्रेयसाय विषयः खलु सर्वतः स्यात्॥२९॥एवं सञ्जातवैराग्यो विज्ञानालोक आत्मनि ॥ विचरामि महीमेतां मुक्तसङ्गोऽनहंकृतिः॥३०॥ न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलम् ॥ ब्रह्मैतदद्वितीयं हि गीयते बहुधर्षिभिः ॥ ३१ ॥ श्रीभगवानुवाच ॥ इत्युक्त्वा स यदुं विप्रस्तमामन्त्र्य गभीरधीः ॥ वन्दितोऽभ्यर्थितो राज्ञा ययौ प्रीतो यथागतम् ॥ ३२ ॥

लब्ध्वा इहास्मिन्नेव जन्मनि तत्रापि यावन्न पतेत् रोगादिना न विपद्येत तावदेव धीरः सन् तूर्णं शीघ्रं निःश्रेयसाय मोक्षाय यतेत विषयलाभार्थप्रयत्नेनेदं जन्म व्यर्थं न कुर्यात्। यतः खलु विषयलाभस्तु सर्वतः श्वशूकरादिजन्मस्वपि स्यात् सुलभ एव ॥ २९ ॥ एवं बहुधा विवेकं निरूप्य त्वं तु कल्पः कविर्दक्ष इत्यादेरुत्तरमाह—एवमिति ॥ एवं बहुभ्यो गुरुभ्योऽन्वयव्यतिरेकाभ्यां सम्यग्जातं वैराग्यं यस्य सः विज्ञानमात्मसाक्षात्कारात्मकमेवालोकः प्रदीपो यस्य सः । अतः आत्मनि स्वरूपे एव स्थित इति शेषः । अत एव देहेऽनहंकृतिः अहङ्काररहितः गृहपुत्रादिषु मुक्तसङ्गो ममतारहितश्चाहमेतां महीं विचरामि ॥ ३० ॥ न हीति ॥ एकस्माद्गुरोः सुस्थिरं सुपुष्कलं ज्ञानं न स्यात् । यत एतदद्वितीयमपि ब्रह्म ऋषिभिर्बहुधा गीयते अतो व्यामोहः स्यादेव। एते हि असम्भावनादिनिवर्त्तकतया स्वबुद्ध्या कल्पिताः गुरवः उपदेशको गुरुस्त्वेक एवेति ॥ ३१ ॥ इतीति ॥ गभीरधीः स विप्रो दत्तात्रेयः यदुम् इत्युक्त्वा तं यदुमामन्त्र्य पृष्ट्वा तेन वन्दितः पूजितश्च प्रीतः सन् यथागतं तथैव यदृच्छया ययौ ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवधूतेति ॥ नोऽस्माकं पूर्वेषामपि पूर्वजो वृद्धः स यदुः अवधूतवचः श्रुत्वा धनपुत्रादिसर्वसङ्गाद्विनिर्मुक्तः सन् समे भगवत्येव चित्तं यस्य तथाभूतो बभूव । अत्र स्वामिपादानां श्लोकौ । " कपोतो मीनहरिणकुमारीगजपन्नगाः । पतङ्गः कुररश्चाष्टौ हेयार्थे गुरवो मताः ॥ मधुकृन्मधुहर्त्ता च पिङ्गला च द्वयोस्त्रयः । उपादेयार्थविज्ञाने शेषाः पृथ्वादयो मताः॥" ॥३३॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशस्य नवमे व्यधाद्दङ्गासहायकः ॥ ९ ॥ दशमे देहसंबन्धात्संसृतिर्नात्मनः स्वतः ॥ इत्युक्तं हारिणा तत्र श्लोकाः पर्वतवह्नयः ॥ द्वे उवाचेति सार्द्धास्तु सप्तत्रिंशदनुष्टुभः ॥ १० ॥ मयेति ॥ मया गीतापञ्चरात्रादिषूक्तेषु पूजानमस्कारश्रवणादिवैष्णवधर्मेषु अवहितः प्रमादरहितःताननुतिष्ठन् अकामात्मा फलाभिसन्धिरहितः मदाश्रयः मदेकशरणः सन् तदविरोधेन वर्णाश्रमकुलाचारप्राप्तं कर्म समाचरेत् ॥ १ ॥ अन्वीक्षेतेति ॥ प्रथमतः स्वोचितधर्मैर्विशुद्ध आत्मा चित्तं यस्य स विषयेष्वाविष्ट आत्मा चित्तं येषां तेषां देहिनां गुणेषु विषयेषु तत्त्वध्यानेन परमार्थत्वाभिनिवेशेन हेतुना ये सर्वे आरम्भा उद्योगास्तेषां विपर्ययं सुखोद्देशेन क्रियमाणानां दुःखजनकत्वरूपफलवैपरीत्यमन्वीक्षेत पुनः पुनः पश्येत् । एवं फलवैपरीत्यदर्शनात्कामनानिवृत्तिः स्यादित्याशयः ॥ २ ॥

अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः ॥ सर्वसङ्गविनिर्मुक्तः समचित्तो बभूव ह ॥३३॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे भगवदुद्धवसंवादे नवमोऽध्यायः ॥ ९ ॥ श्रीभगवानुवाच ॥ मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः ॥ वर्णाश्रमकुलाचारमकामात्मा समाचरेत् ॥ १ ॥ अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनाम् ॥ गुणेषु तत्त्वध्यानेन सर्वारम्भविपर्ययम् ॥ २ ॥ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः ॥ नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैः ॥ ३ ॥ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् ॥ जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनाम् ॥ ४ ॥ यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित् ॥ मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकम् ॥ ५ ॥

सुप्तस्येति ॥ यथा सुप्तस्य स्वप्नं पश्यतः पुंसो विषयालोको नानाविधपदार्थदर्शनं यथा वा राजादिवृत्तं ध्यायतो जनस्य तद्विषयको मनोरथो नानात्मकत्वात् एकस्मिन्नेवात्मन्यारोपितनानावस्तुविषयकत्वात् विफलः अर्थशून्यः भ्रम इत्यर्थः । तथा गुणैर्मनुष्यादिशरीरैर्भेदेनात्मनि धीः देवमनुष्यादिशरीरेऽहंप्रत्ययोऽपि भ्रमः नानात्मकत्वात् । अत्रैवं प्रयोगः इन्द्रियैर्या बहिर्नाना बुद्धिः सा विफला नानात्मकत्वात् ऐन्द्रियकत्वात् मनोजन्यस्वप्नमनोरथवत् इति ॥ ३ ॥ निवृत्तमिति ॥ मत्परः मदेकपरायणः निवृत्तं निष्कामं कर्म सेवेत आचरेत् प्रवृत्तं काम्यकर्म त्यजेत् । तथा जिज्ञासायामात्मतत्वविचारे सम्यक् प्रवृत्तश्चेत्तर्हि तद्विरोधित्वान्निवृत्तकर्मचोदनां विधिमपि नाद्रियेत् । तङ्भाव आर्षः ॥ ४ ॥ यमानिति ॥ मत्परः यमान् अहिंसादीन् अभीक्ष्णम् आदरेण सेवेत नियमान् शौचादींस्तु क्वचित् । यदा शक्तिस्तदा आत्मज्ञानाविरोधेन सेवेत । यमनियमानेकोनविंशेऽध्याये वक्ष्यति । किं च यमेष्वप्यादरं त्यक्त्वा सेवेत मदभिज्ञं तत्वतो मां जानन्तं शान्तं मदात्मकं मद्रूपं गुरुं चोपासीत सेवेत ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुलक्षणं निरूप्य शिष्यलक्षणान्याह—अमानीति युग्मेन ॥ अमानी अभिमानरहितः अमत्सरः दक्षः आलस्यरहितः निर्ममो जायादिषु ममतारहितः परमेश्वरे गुरौ च दृढसौहृदः असत्वरः व्यग्रतारहितः अर्थजिज्ञासुः तत्वान्वेषी अनसूयुः गुर्वादौ दोषदृष्टिरहितः अमोघवाक् व्यर्थभाषणरहितः सर्वत्रात्मनोऽर्थं सुखादि सममेव पश्यन् जायापत्यादिषु उदासीनः स्यात् । इवशब्द एवार्थे । अयं भावः । आत्मनः सर्वदेहेष्वेकत्वाज्जायादिदेहेऽन्येषां देहे चात्मनोऽर्थः सुखादि सम एवातो जायादिदेहेष्वेव केन विशेषेण ममत्वाभिनिवेश इत्येवमुदासीनः सन् गुरुं प्रपद्येतेति । यद्वा । आत्मनः स्वस्य अर्थं धनमिव समं पश्यन् तद्यथा यावद्यस्य करगतं तावदेव तस्य ममतास्पदं नतु सर्वदा । एवं तद्वदेव जायादिकमपीति ममताया अनैकान्तिकत्वान्निर्ममतैवोचिता ॥ ६ ॥ ७ ॥ विलक्षण इति ॥ स्थूलसूक्ष्माख्यदेहद्वयादात्मा विलक्षणः भिन्न एव । यतः ईक्षिता द्रष्टा स्वदृक् स्वप्रकाशश्च । द्रष्टा हि द्रष्टृत्वेन दृश्याद्विलक्षणः स्वप्रकाशश्च जडाद्विलक्षणो भवत्येव । यथा दाहकः प्रकाशकश्चाग्निर्दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्त-थेति ॥८॥ एवमात्मनः नित्यत्वादिकमपि सिद्धमित्याह—निरोधेति ॥ यथा दारुष्वन्तः प्रविष्टोऽग्निः स्वतः निरोधोत्पत्त्यादिरहितोऽपि तेन दारुसंबन्धेन कृतान् निरोधोत्पत्त्यणु-

अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ॥ असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ॥६॥ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु ॥ उदासीनः समं पश्यन्त्सर्वेष्वर्थमिवात्मनः ॥ ७ ॥ विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक् ॥ यथाग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ॥८॥ निरोधो-त्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान् ॥ अन्तः प्रविष्ट आधत्त एवं देहगुणान् परः ॥९ ॥ योऽसौ गुणैर्विरचितो देहोऽयं पुरुषस्य हि ॥ संसारस्त-न्निबन्धोऽयं पुंसो विद्याच्छिदात्मनः ॥ १० ॥ तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परम् ॥ संयम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमम् ॥ ११ ॥

बृहन्नानात्वमित्यादीन् गुणान् आधत्ते प्राप्नोति । यथा अग्निः स्वतः नाशरहितोऽपि दारुनाशात् निरोधं नाशम् आधत्ते एवमुत्पत्तिरहितोऽपि दारूत्पत्तेरुत्पत्तिं स्वतो महानपि तदणुत्वादणुत्वम् । तद्बृहत्वाद्बृहत्वम् । स्वयमेकोऽपि तन्नानात्वान्नानात्वमित्येवं तत्कृतान्गुणान् आधत्ते एवं देहे प्रविष्टो नित्यादिस्वरूपोऽपि परः आत्मा देहगुणाननि-त्यत्वादीन् आधत्ते ॥ ९ ॥ योऽसाविति ॥ पुरुषस्य परमेश्वरस्याधीनैः प्राकृतैर्गुणैः गुणपरिणामैर्बुद्धीन्द्रियादिभिर्योऽसौ सूक्ष्मः तथायं च स्थूलदेहो रचितः तन्निबन्धः तत्रात्माध्यासकृत एवायं जन्ममरणाद्यात्मकः पुंसो जीवस्य संसारः तस्मादात्मनो विद्याविज्ञानं तस्य संसारस्य छित् छेत्री आच्छिदिति वा छेदः ॥ १० ॥ तस्मादिति ॥ यस्माद्देहाद्यध्यासादेव संसारस्तस्मात् जिज्ञासया विचारेण आत्मस्थमात्मनि कार्यकारणसङ्घाते देह एव स्थितं केवलं शुद्धमसङ्गं परं देहाद्विलक्षणं भिन्नमात्मानं सङ्गम्य सम्यग्ज्ञात्वा एतत् एतस्मिन् देहादौ वस्तुबुद्धिमात्मबुद्धिं यथाक्रमं स्थूलसूक्ष्मक्रमेण निरसेत् त्यजेत् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्य इति ॥ आचार्यः आद्यः अरणिः अधरारणिः अन्तेवासी शिष्यः उत्तरारणिः प्रवचनमुपदेशः तत्सन्धानं तयोर्मध्यमं मन्थनकाष्ठं विद्या तु सन्धिः सन्धौ भवन्नग्निरिव सुखावहः अविद्यादिदोषनाशकः परमानन्दप्रदश्च । तथा च श्रुतिः । " आचार्यः पूर्वरूपमन्तेवास्युत्तररूपं विद्या सन्धिः प्रवचनं सन्धानम् " इति ॥१२॥ अग्निसादृश्यमाह– वैशारदीति ॥ विशारदोऽतिनिपुणस्तथाभूतेन शिष्येण प्राप्ता तथाभूतेन गुरुणोपदिष्टा वा वैशारदी अतिविशुद्धात्मविषया बुद्धिः गुणप्रसूतां गुणकार्यरूपां मायां मोहिकां संसृतिं विधुनोति निवर्तयति यदात्मकमेतत् विश्वं जीवस्य संसृतिबन्धनं तान् गुणांश्च सन्दह्य दग्ध्वा स्वयं च शाम्यति । तत्र दृष्टान्तमाह।असमित् निरिन्धनोऽग्निर्यथा काष्ठादि दग्ध्वा स्वयमपि शाम्यति तद्वदिति । तदा च कार्येण कारणेनाविद्यया च व्यवधानाभावात्साक्षात्परमानन्द रूप एव भवतीति।यदात्ममित्यार्षम्।अव्ययीभावं प्रकल्प्य "अनश्च" इति टच् तु क्लिष्टः ॥ १३ ॥ आत्मैक्यविरोधिमतान्तरं निराकर्तुं तदुद्भावयति–अथेति युग्मम् ॥ एवं हि जैमिनीया आहुः।" अहं प्रत्ययविज्ञेय एवात्मा स च प्रतिशरीरं भिन्नः कर्तृभोक्तृरूपश्च न तु तत्स्वरूपभूतो निर्विकार एकः परमात्माऽस्ति" इति । तत्र यदि कर्मकर्तृणां कर्मफलसुखदुःखयोर्भोक्तृणां चैषां जीवानामथ यदि नानात्वं मन्यसे तथा

आचार्योऽरणिराद्यः स्यादन्तेवास्युत्तरारणिः ॥ तत्संधानं प्रवचनं विद्यासन्धिः सुखावहः ॥ १२ ॥ वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूताम् ॥ गुणांश्च संदह्य यदात्ममेतत् स्वयं च शाम्यत्यसमिद्यथाग्निः ॥१३॥ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः ॥ नानात्वमथ नित्यत्वं लोककालागमात्मनाम् ॥ १४ ॥ मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा ॥ तत्तदाकृतिभेदेन जायते भिद्यते च धीः ॥ १५ ॥ एवमप्यङ्ग सर्वेषां देहिनां देहयोगतः ॥ कालावयवतः सन्ति भावा जन्मादयोऽसकृत् ॥ १६ ॥

भोगस्थानानां स्वर्गादिलोकानां भोगकालस्य वा तदुपायकर्मबोधकागमस्य वा भोक्तुरात्मनो वा अनित्यत्वे वैराग्यं भवेत् । तत्र लोककालागमात्मनां यदि नित्यत्वं मन्यसे भोग्यवस्तूनां विच्छेदादपि वैराग्यं भवेत्तत्रापि सर्वभावानां स्रक्चन्दनवनितादीनां संस्था स्थितिः औत्पत्तिकी प्रवाहरूपेण नित्या इति च यदि मन्यसे तथोक्तं न कदाचिदनीदृशं जगदिति अतस्तत्कर्त्ता कश्चिदीश्वरोऽपि नास्तीत्यपि वदन्ति । किं च सर्वोऽपि व्यवहारोऽहं सुख्यहं दुःखीत्यादिरूपो यथा यथावत् सत्य एव नतु कल्पित इति यदि मन्यसे यदि चात्मस्वरूपभूतं नित्यमेकं ज्ञानं नास्त्येव तत्तद्घटपटाद्याकारभेदेन धीर्जायते अनित्या भिद्यते च । अतो नित्यज्ञानरूप आत्मा नास्ति किन्तु ज्ञानपरिणामवानेव । तथा च मुक्ताविन्द्रियादिरहितस्य परिणामासंभवाज्जडत्वेन तत्प्राप्तेरपुरुषार्थत्वात्प्रवृत्तिमार्ग एव श्रेयान्नतु निवृत्तिमार्ग इति मन्यसे ॥ १४ ॥ १५ ॥ एवं तन्मतमनूद्य निराकरोति–एवमिति ॥ अङ्ग हे राजन् एवमङ्गीकारेऽपि सर्वेषां देहिनां देहसंबन्धात् कालावयवतः लवनिमेषादिसंवत्सरान्तेभ्यः कालावयवेभ्यः असकृत् पुनः पुनर्जन्मादयो भावा विकाराः सन्ति भवन्त्येव अतो दुःखमवर्जनीयमित्याशयः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रापीति ॥ अत्रापि त्वदङ्गीकृतपक्षेऽपि कर्मणां कर्तुरस्वातन्त्र्यं लक्ष्यते अनिच्छतोऽपि दुष्कर्मसु प्रवृत्तिदर्शनात् । तथा सुखदुःखानां भोक्तुश्च अस्वातन्त्र्यं लक्ष्यते स्वातन्त्र्ये दुःखभोगस्यासम्भवात् । एवं चेत्तर्हि विवशं कालकर्मगुणाधीनं पुरुषं कोऽन्वर्थो विषयो भजेत् सुखयेत्॥१७॥ननु कर्मसु कुशलाः सुखमेव भजन्ति अकुशला दुःखमिति चेत्तत्राह—नेति ॥ विदुषां तत्तदुपायाभिज्ञानामपि देहिनां क्वचिदपि कदाचिदपि किंचिदपि सुखं न विद्यते साधनदशायां धनादिप्राप्तिदशायां च वित्तव्ययादिदुःखसत्वात् । तथा मूढानामपि दुःखं किंचिन्नास्ति तेषामपि प्रारब्धवशाद्भोगैश्वर्यादिसुखदर्शनात्।वस्तुतस्तु सुखदुःखादेरन्तःकरणधर्मत्वादुभयत्रापि परं केवलं वृथैवाहंकरणमहं सुख्यहं निपुणोऽहं दुःखी मूर्ख इत्यहङ्कार इति ॥१८॥ यदीति ॥ यदि केऽपि सुखस्य प्राप्तिं प्राप्त्युपायं तथा दुःखस्य विघातोपायं च जानन्ति तदा तेऽप्यद्धा साक्षात् यथा मृत्युर्न प्रभवेत्तथा योगमुपायं तु न विदुः॥१९॥कोऽन्वर्थ इति॥अर्थो धनं कामः शब्दादिविषयो वा एनं देहिनं कः सुखयति न कोऽपि । यतः अन्तिके समीपे वर्तमानो मृत्युर्न तुष्टिदः तुष्टिं न

अत्रापि कर्मणां कर्तुरस्वातन्त्र्यं च लक्ष्यते ॥ भोक्तुश्च दुःखसुखयोः कोऽन्वर्थो विवशं भजेत् ॥१७॥ न देहिनां सुखं किञ्चिद्विद्यते विदुषामपि ॥ तथा च दुःखं मूढानां वृथाहंकरणं परम् ॥ १८ ॥ यदि प्राप्तिं विघातं च जानन्ति सुखदुःखयोः ॥ तेऽप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा ॥ १९ ॥ कोऽन्वर्थः सुखयत्येनं कामो वा मृत्युरन्तिके ॥ अघातं नीयमानस्य वध्यस्येव न तुष्टिदः ॥२०॥ श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः ॥ बह्वन्तरायकामत्वात्कृषिवच्चापि निष्फलम् ॥ २१ ॥ अन्तरायैरविहतो यदि धर्मः स्वनुष्ठितः ॥ तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु ॥ २२ ॥ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ॥ भुञ्जीत देववत्तत्र भोगान् दिव्यान्निजार्जितान् ॥ २३ ॥ स्वपुण्योपचिते शुभ्रे विमान उपगीयते ॥ गन्धर्वैर्विहरन् मध्ये देवीनां हृद्यवेषधृक् ॥ २४ ॥

ददाति आघातं वधस्थानं प्रति नीयमानस्य पुरुषस्य यथा स्रक्चन्दनमिष्टान्नादिकं न सुखयति तथेति॥२०॥श्रुतमिति॥श्रुतं स्वर्गादिसुखमपि दृष्टसुखवत्स्पर्द्धासूयादिभिर्दुष्टं दुःखमिश्रितमेव तत्र स्वर्गे स्पर्द्धा परसुखासहनम् असूया पुण्यवतोऽपि परस्य गुणेषु दोषाविष्करणम् अत्ययो भोगान्ते नाशः व्ययः प्रत्यहं क्षयः । यद्वा । व्ययो नाशः अत्ययः अन्यस्यातिशयः तं दृष्ट्वा तदप्राप्त्या दुःखम् । किं च बहवोऽन्तराया वैगुण्यादिरूपा विघ्ना यस्मिन् कामे सुखे तस्य भावस्तत्त्वं तस्मात् दुर्लभं चेति शेषः । कृषिर्यथा बहुविघ्ना भवति तथेति । तथा च बहुसुखत्वेन श्रुतमपि स्वर्गादिकं निष्फलमेव॥२१॥ विघ्नवैगुण्याभावेऽपि नाशदुःखं दुष्परिहरमाह—अन्तरायैरिति ॥ यदि अन्तरायैः अविहतः धर्मः सुष्ठु अनुष्ठितः तदाऽपि तेन धर्मेण निर्जितं साधितं स्थानं पुमान् यथा गच्छति तन्मत्तः शृणु ॥ २२ ॥ इष्ट्वेति ॥ याज्ञिकः पुरुषः इह लोके यज्ञैर्देवता इन्द्रादीन् इष्ट्वा समाराध्य स्वर्लोकं याति । तत्र निजार्जितान् स्वानुष्ठितकर्मप्रापितान् दिव्यान् भोगान् देववद्भुञ्जीत भुंक्ते ॥ २३ ॥ स्वेति ॥ देवीनामप्सरसां मध्ये तासां हृद्यवेषधृक् ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोहररूपधारी सन् विहरन् स्वपुण्येनोपचिते प्रापिते शुभ्रे श्रेष्ठे विमाने स्थितो गन्धर्वैरुपगीयते ॥ २४ ॥ स्त्रीभिरिति ॥ किङ्किणीजालमालिना क्षुद्रघण्टिकासमूहशोभिना कामगेन यथेच्छं गच्छता विमानेन सुराक्रीडेषु देवोद्यानेषु नन्दनादिषु स्त्रीभिः सह निर्वृतः सुखितः क्रीडन्नात्मनः पातं पुण्यान्ते ततो भ्रंशं न वेद ॥ २५ ॥ तावदिति ॥ यावत्पुण्यं भोगेन समाप्यते तावत्स्वर्गे प्रमोदते । ततः क्षीणपुण्यस्तु अनिच्छन्नपि कालेन चालितः पातितः अर्वाक् अधः पतति ॥ २६ ॥ इष्ट्वेह देवता इत्याद्युक्तं सुखाभासमपि तदैवाप्नोति यदि विध्यनतिक्रमेण काम्ये प्रवृत्तिः स्यात् विधिलङ्घनेनाधर्मे प्रवृत्तौ तु दुर्गतिरित्याह—यदीति युग्मम् ॥ यदि चेत् असतां विषयासक्तानां सङ्गात् अधर्मे रतः अजितेन्द्रियः वाशब्दात् कश्चित्स्वतोऽप्यजितेन्द्रियः अत एव कामात्मा विषयाविष्टचित्तः अत एव कृपणो दीनः अतः लुब्धो भोगतृष्णाकुलः अत एव स्त्रैणः स्त्रीलम्पटः अत एव भूतविहिंसकः प्राणिपीडाकरो भवति तदा तु दुष्टैः प्रलोभितो धनाद्यर्थमविधिना शास्त्रविधानं विनैव पशून् आलभ्य हत्वा भूतादीन् यजन् जन्तुः यष्टा अवशः सन्

स्त्रीभिः कामगयानेन किङ्किणीजालमालिना ॥ क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः ॥ २५ ॥ तावत् प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते ॥ क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः ॥ २६ ॥ यद्यधर्मरतः सङ्गादसतां वाऽजितेन्द्रियः ॥ कामात्माः कृपणो लुब्धस्त्रैणो भूतविहिंसकः ॥ २७ ॥ पशूनविधिनाऽऽलभ्य प्रेतभूतगणान् यजन् ॥ नरकानवशो जन्तुर्गत्वा यात्युल्बणं तमः ॥ २८ ॥ कर्माणि दुःखोदर्काणि कुर्वन् देहेन तैः पुनः ॥ देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः ॥ २९ ॥ लोकानां लोकपालानां मद्भयं कल्पजीविनाम् ॥ ब्रह्मणोऽपि भयं मत्तो द्विपरार्धपरायुषः ॥ ३० ॥ गुणाः सृजन्ति कर्माणि गुणोऽनुसृजते गुणान् ॥ जीवस्तु गुणसंयुक्तो भुङ्क्ते कर्मफलान्यसौ ॥ ३१ ॥ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ॥ नानात्वमात्मनो यावत्पारतन्त्र्यं तदेव हि ॥ ३२ ॥

नरकान् गत्वा तत्रत्यं दुःखमनुभूयात्युल्बणं घोरं तमः अज्ञानबहुलं स्थावरादियोनिं याति ॥ २७ ॥ २८ ॥ कर्माणीति ॥ दुःखमेवोदर्कमुत्तरफलं येषां तानि कर्माणि देहेन कुर्वन् तैः कृतैः कर्मभिः पुनर्देहमाभजते प्राप्नोति । तत्रैवं संसारचक्रे वर्तमानस्य मर्त्यधर्मिणः मरणस्वभावस्य किं सुखं न किंचित् ॥ २९ ॥ स्वर्गादयो लोका नित्याः लोकपालाश्चामराः अतस्तेषां नित्यं सुखमस्तीति चेन्नेत्याह—लोकानामिति ॥ लोकानां कल्पजीविनां लोकपालानां चापि मत् मत्तः भयमस्ति । किं बहुना द्वौ परार्द्धौ परमायुर्यस्य तस्य ब्रह्मणोऽपि मत्तः कालात्मकाद्भयं भवति ॥ ३० ॥ कर्तृभोक्तृरूप आत्मेत्यपि निराकरोति—गुणा इति ॥ गुणाः गुणकार्याणीन्द्रियाणि कर्माणि सृजन्ति उत्पादयन्ति नत्वात्मा गुणः सत्वादिः गुणान् इन्द्रियाणि अनुसृजते प्रवर्तयति न त्वात्मा । तदर्थः । एवमात्मनः कर्तृत्वं नास्ति भोक्तृत्वमप्यौपाधिकमित्याह । असौ जीवस्तु गुणैर्देहेन्द्रियादिभिः संयुक्तः अध्यासेनैकतामापन्न एव कर्मफलानि सुखदुःखानि भुङ्क्ते अनुभवति ॥ ३१ ॥ आत्मनो नानात्वमपि निराकरोति—यावदिति ॥ यावत् गुणानां वैषम्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महङ्कारमिन्द्रियादिरूपेण परिणामः स्यात्तावदेव तदुपाधिकमात्मनो नानात्वम् । यावच्च देहादिरूपेण परिणतेषु गुणेष्वात्माध्यासेनात्मनो नानात्वं तदैव तावदेव पारतन्त्र्यं कामाधीनत्वम् ॥ ३२ ॥ यावदिति ॥ यावच्चास्यात्मनः अस्वातन्त्र्यं कर्माधीनत्वं तावदेवेश्वरतः कालरूपात् मत्तो भयं भवति अतो ये जना एतत् गुणवैषम्यं तत्कृतं भोगं कर्म च समुपासीरन् आसक्त्याहंममाभिमानेन सेवेरन् । त एव लोकादीनां प्रागुक्तानां विनाशित्वात् शुचा शोकेनार्पिताः प्रोताः सन्तो मुह्यन्ति क्लिश्यन्ति एतेन प्रवृत्तिमार्ग एव श्रेयानिति सूचितं तन्निरस्तम् ॥ ३३ ॥ काल इति ॥ प्रकृतिगुणानां व्यतिकरे क्षोभे मायारूपे सति कालः आत्मा ईश्वरः आगमः शास्त्रं लोकः स्वभावः देवत्वादिपरिणामहेतुः धर्मः तद्भोगकारणम् । इत्यादिशब्दैः बहुधा मामेव प्राहुः । नत्वेते मत्तो व्यतिरिक्ताः एतेन कुत्रचित्कालाधीनत्वं कुत्रचिदीश्वराधीनत्वमित्यादिपरस्परविरोधः परिहृतः ॥ ३४ ॥ गुणेष्विति ॥ अयं भावः गुणेषु असत्सु मुक्तिः सत्स्वेव वा आद्ये साधनाभावान्न मुक्तिः । द्वितीये तु हे विभो गुणेषु देहादिषु वर्तमानोऽपि देही देहजेषु कर्मसु सुखदुःखादिषु च कथं न बध्यते । यदि त्वाकाशवदनावृतत्वान्न बध्यते तदा अनपावृतः कथं बध्यते ॥ ३५ ॥ यदि तु सत्स्वेव गुणेषु तदहंकारेण बध्यते तन्निवृत्त्या च

यावदस्याऽस्वतन्त्रत्वं तावदीश्वरतो भयम् ॥ य एतत् समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ॥ ३३ ॥ काल आत्मागमो लोकः स्वभावो धर्म एव च ॥ इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ॥ ३४ ॥ उद्धव उवाच ॥ गुणेषु वर्तमानोऽपि देहजेष्वनपावृतः ॥ गुणैर्न बध्यते देही बध्यते वा कथं विभो ॥ ३५ ॥ कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ॥ किं भुञ्जीतोत विसृजेच्छयीतासीत याति वा ॥ ३६ ॥ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर ॥ नित्यबद्धो नित्यमुक्त एक एवेति मे भ्रमः ॥ ३७ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे भगवदुद्धवसंवादे दशमोऽध्यायः ॥ १० ॥ श्रीभगवानुवाच ॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ॥ गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥ १ ॥

मुच्यत इति मतं तर्हि कथं ज्ञातव्यमिति पृच्छति—कथमिति ॥ बद्धो मुक्तो वा कथं वर्तेत कथं विहरेत् कैर्वा लक्षणैः ज्ञायेत किं भुञ्जीत कथं भुङ्क्ते कथं विसृजेत् एवं कथं शयीत शेते आसीत याति वा । बद्धस्य मुक्तस्य वर्तनविहरणभोजनादीनि तुल्यान्येव दृश्यन्ते तानि साभिमानानि निरभिमानानि वा मया कैर्लक्षणैर्ज्ञायेरन् ॥ ३६ ॥ एतदिति ॥ हे अच्युत हे प्रश्नविदां वर एतत् बद्धमुक्तवैलक्षण्यविषयकं मम प्रश्नं प्रतिब्रूहि एक एवात्मा अनादिगुणसंबन्धान्नित्यबद्धः मुक्तेर्जन्यत्वे अनित्यत्वप्रसङ्गान्नित्यमुक्त इत्यप्यङ्गीकार्यं स्यात् । तत्रास्मिन्नर्थे मम भ्रमो भवति ॥ ३७ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशस्य दशमे व्यधाद्गङ्गासहायकः ॥ १० ॥ एकादशे बद्धमुक्तसाधूनां च निरूपणम् ॥ भक्तेश्च लक्षणं तत्र श्लोका नैवपयोधयः ॥ उवाचवाचां त्रितयं स्युः पश्चार्धं दंनुष्टुभः ॥ ११ ॥ बद्ध इति ॥ आत्मा बद्धो मुक्त इति या व्याख्या व्यवहारः सा मे गुणतः मदधीनेभ्यो गुणेभ्य एव तत्कार्येष्वध्यासाद्बन्धः तन्निवृत्त्या च मोक्षः न तु वस्तुतः । स्वरूपतस्तु न बन्धो न वा मोक्षः अतो गुणस्य मायामूलत्वात्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियन्तुर्मे तत्राध्यासाभावान्न मोक्षो न च बन्धनम् ॥ १ ॥ शोकेति ॥ यथात्मबुद्धेरेव ख्यातिर्विवर्त्तः स्वप्नो मिथ्या तथा शोकमोहौ सुखं दुःखं देहापत्तिर्देहान्तरप्राप्तिः देहस्यापत्तिर्मृत्युर्वा मायया तदध्यासेनात्मनि प्रतीयन्ते । अतो जीवस्यापि संसृतिरौपाधिक्येव न वास्तवी स्वरूपतः । अत एकस्याप्यध्यासप्राप्तत्वाद्बद्धत्वं वस्तुतस्तदभावान्नित्यमुक्तत्वं च घटत इत्याशयः ॥ २ ॥ विद्येति ॥ हे उद्धव विद्याविद्ये मम तनू तन्येते मोक्षबन्धावाभ्यामिति तनू शक्ती यतो मे मायया विनिर्मिते मायावृत्तिरूपत्वात् ते एव शरीरिणां जीवानां क्रमेण बन्धमोक्षकर्यौ । पूर्वसवर्णदीर्घ आर्षः । ननु तत्कार्यत्वे बन्धमोक्षयोरनादित्वनित्यत्वे न स्यातां तत्राह । ते चाद्ये अनादी अतो यावदविद्यां प्रवर्त्तयामि तावद्बन्धः यदा विद्यां ददामि तदा मोक्षः स्फुरतीत्यर्थः । ततः पूर्वमेव निर्मिते ॥ ३ ॥ नन्वात्माभेदे जीवो नाम कोऽन्योऽस्ति पृथक् कथं च बन्धमोक्षसुखदुःखादिव्यवस्था तत्राह—एकस्येति ॥ हे महामते एकस्यैव ममांशस्य अस्य जीवस्यैव अविद्यया अनादिर्बहुकालिको बन्धोऽस्ति मद्दत्तया विद्यया स्वरूपसाक्षात्कारेण तथेतरो मोक्षश्च भवति । तथा चाविद्यायां प्रतिबिम्बस्य सदंशस्य जीवस्यैतत्कृतो बन्धः तन्निवृत्तौ मोक्षः तस्य चोपाधितो भेदान्नाव्यवस्था ॥ ४ ॥ तदेवं व्यवस्थामुपपाद्य कथं वर्तेते-

शोकमोहौ सुखं दुःखं देहोत्पत्तिश्च मायया ॥ स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥ २ ॥ विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् ॥ मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते ॥ ३ ॥ एकस्यैव ममांशस्य जीवस्यैव महामते ॥ बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरः ॥ ४ ॥ अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते ॥ विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ॥ ५ ॥ सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ॥ एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ॥ ६ ॥ आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः ॥ योऽविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥ ७ ॥

त्यादिप्रश्नोत्तरमाह । तत्र वैलक्षण्यं द्विधा जीवेश्वरयोरेकं मिथो जीवानां चैकं तत्राद्यमाह—अथेति ॥ अथ हे तात विरुद्धधर्मिणोः शोकानन्दधर्मवतोः एकस्मिन्धर्मिणि शरीरे नियम्यनियन्तृत्वेन स्थितयोर्जीवेश्वरयोर्मध्ये बद्धस्य मुक्तस्य वैलक्षण्यं ते तुभ्यं वदामि ॥ ५ ॥ सुपर्णाविति ॥ एतौ जीवेश्वररूपौ सुपर्णौ वृक्षात्पृथग्भूतपक्षिणाविव देहात्पृथग्भूतौ सदृशौ चिद्रूपत्वात् । सखायौ अवियोगादुपकार्योपकारितया स्थितत्वाच्च यदृच्छया अनिरुक्तया मायया वृक्षे वृश्च्यत इति वृक्षो देहः । "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।"इति स्मृतेः।तस्मिन् कृतं नीडं हृदयरूपं निकेतनं याभ्यां तौ तयोर्मध्ये एको जीवः पिप्पलान्नं पिप्पलोऽश्वत्थो देहस्तस्मिन्नदनीयं कर्मफलं सुखदुःखादिकं खादति भक्षयति अनुभवति । अन्य ईश्वरस्तु निरन्नः कर्मफलविषयभोगरहितोऽपि निजानन्दतृप्तत्वात् । बलेन ज्ञानादिशक्त्या भूयान् ततोऽधिकः । श्रुतिश्च " द्वा सुपर्णा सयुजा सखाया " इत्यादि ॥ ६ ॥ बलाधिक्यमाह—आत्मानमिति ॥ तत्र यः अपिप्पलादो विद्वान् स आत्मानमन्यं जीवं च वेद जानाति यस्तु पिप्पलादः स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात्मानं परमात्मानं च न वेद अतो देहादिकमेवात्मतयाभिमन्यत इत्याशयः । अतो यः अविद्यया युक् युक्तः स तु नित्यबद्धः । यस्तु विद्यामयः सर्वज्ञ ईश्वरः स तु नित्यमुक्तः ॥ ७ ॥ अथ बद्धमुक्तजीवानां मिथो वैलक्षण्यमाह—देहस्थोऽपि इति ॥ विद्वान् जीवन्मुक्तः संस्कारवशेन देहस्थोऽपि वस्तुतो देहस्थो न भवति । तत्र दृष्टान्तमाह।यथा स्वप्नादुत्थितः स्मर्यमाणे स्वप्नदेहे स्थितोऽपि तत्रस्थो न भवति तदभिमानाभावेन तद्गतसुखदुःखाद्यभावात्तद्वदिति तथा कुमतिः देहाद्यात्माध्यासवान् अज्ञो वस्तुतः अदेहस्थोऽपि देहस्थो भवति तन्निमित्तसुखदुःखाद्यनुभवात् यथा स्वप्नदेहगत इति ॥८॥ इन्द्रियैरिति ॥ गुणैः गुणकार्यैः इन्द्रियैरिन्द्रियार्थेष्वपि गुणेषु शब्दादिविषयेषु गृह्यमाणेषु यः विद्वान् अविक्रियः रागादिशून्यः सः अहं अहंकारं न कुर्यात् अहम् गृह्णामीति न मन्यते । अत्राहमित्यव्ययम् ॥ ९ ॥ दैवेति ॥ अबुधस्तु दैवाधीने पूर्वकर्माधीनेऽस्मिन् शरीरे वर्तमानो गुणभाव्येन इन्द्रियकार्येण कर्मणाहं कर्तास्मीत्यभिमानेन तत्र देहादौ निबध्यते । एतैस्त्रिभिः श्लोकैः कथं वर्तेतेत्यस्य प्रश्नस्य सुखदुःखशून्यो

देहस्थोऽपि न देहस्थो विद्वान् स्वप्नाद्यथोत्थितः ॥ अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग् यथा ॥८॥ इन्द्रियैरिन्द्रियार्थेषु गुणैरपि गुणेषु च ॥
गृह्यमाणेष्वहं कुर्यान्न विद्वान् यस्त्वविक्रियः ॥ ९ ॥ दैवाधीने शरीरेऽस्मिन् गुणभाव्येन कर्मणा ॥ वर्तमानोऽबुधस्तत्र कर्तास्मीति निबध्यते
॥ १० ॥ एवं विरक्तः शयन आसनाटनमज्जने ॥ दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥ ११ ॥ न तथा बध्यते विद्वांस्तत्र तत्रादयन्गुणान् ॥
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सवितानिलः ॥ १२॥ वैशारद्येक्षयाऽसङ्गशितया छिन्नसंशयः ॥ प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते ॥१३॥
यस्य स्युर्वीतसंकल्पाः प्राणेन्द्रियमनोधियाम् ॥ वृत्तयः स विनिर्मुक्तो देहस्थोऽपि हि तद्गुणैः ॥ १४ ॥

निरभिमानश्च देहे वर्त्तेत इत्युत्तरमुक्तं भवति ॥ १० ॥ किं भुञ्जीतेत्यस्योत्तरमाह—एवमिति युग्मम् ॥ एवं शयनादिश्रवणाद्यन्तेषु वर्तमानोऽपि विरक्तः रागरहितः एवमन्यगतमेव कर्म मां बध्नातीत्येवं विद्वांस्तत्र तत्र विषयेषु गुणान् इन्द्रियाणि आदयन् भोजयन् प्रकृतिस्थः प्रकृतिकार्ये देहादिसङ्घाते स्थितोऽपि तत्रासंसक्तोऽहंममाभिमानरहितः सन् तथा अज्ञवन्न निबध्यते ।यथा खं सर्वत्र स्थितमपि यथा सविता जले प्रतिबिम्बितोऽपि यथाऽनिलः सर्वत्र संचरन्नपि न कुत्रापि सज्जते तथा तत्र तत्र गुणान् इन्द्रियाण्यादयन्नपि न बध्यते ॥ ११ ॥ १२ ॥ वैशारद्येति ॥ असङ्गेन सर्वत्र वैराग्येण शितया तीक्ष्णया वैशारद्या निपुणया ईक्षया बुद्ध्या छिन्नाः संशयाः असंभावनादयो यस्य सः स्वप्नात्प्रतिबुद्ध इव नानात्वात् अहं मनुष्योऽयं देवः अयं पशुरिदं मदीयमित्यादिभेददर्शनात् विशेषेण निवर्तते ॥ १३ ॥ कथं विहरेदित्यस्योत्तरमाह—यस्येति ॥ यस्य प्राणादीनां वृत्तयो व्यापाराः वीतसंकल्पाः इदमदनीयमिदं संपाद्यमित्यादिसंकल्परहिताः स्युः स देहस्थोऽपि तद्गुणैर्देहगुणैर्विमुक्तो ज्ञेयः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं बद्धमुक्तयोः स्वसंवेद्यं वैलक्षण्यमुक्तम् । अथ " कैर्वा ज्ञायेत लक्षणैः " इत्यस्योत्तरतया परैरपि सुज्ञेयं वैलक्षण्यमाह—यस्येति ॥ यस्यात्मा देहः हिंस्रैर्दुर्जनैर्हिंस्यते पीड्यते येन केनचिद्यदृच्छया अर्च्यते वा तथापि सः बुधश्चेत्तत्र क्वचिदपि न व्यतिक्रियते न विक्रियते दुर्जनेषु न कुप्यति सुजनेषु न हृष्यति ॥ १५ ॥ नेति ॥ साध्वसाधु वा कुर्वतो वदतो वा जनान्न स्तुवीत न च निन्देत । तङार्षः । गुणदोषाभ्यां वर्जितः सर्वव्यवहारविमुखः मुनिः मौनशीलः समदृक् स मुक्त इति शेषः ॥ १६ ॥ नेति ॥ अतः मुनिः मननशीलः आत्मारामः आत्मन्येव रममाणोऽपि बहिस्तु यः किंचित्साधु वैदिकमसाधु दैहिकमपि कर्म न कुर्याच्च किंचिदपि वदेन्न ध्यायेत् किं त्वनया प्रकृतिस्थोऽप्यसंसक्त इत्युक्तया वृत्त्या जडवद्विचरेत्स मुक्तः एतान्येव सर्वाणि मुमुक्षोः साधनानि ज्ञातव्यानि । मुक्तलक्षणविरुद्धं बद्धलक्षणं ज्ञेयम् ॥ १७ ॥ शब्देति ॥ यस्तु शब्दब्रह्मणि वेदाख्ये निष्णातः केवलम् अर्थतः पारङ्गतोऽपि यदि परे ब्रह्मणि न निष्णायात् ध्यानाद्यभ्यासेन तदेकनिष्ठो न स्यात्तदा तस्याध्ययनादिशास्त्रश्रमः श्रमैकफलो न तु

यस्यात्मा हिंस्यते हिंस्रैर्येन किञ्चिद्यदृच्छया ॥ अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः ॥ १५ ॥ न स्तुवीत न निन्देत कुर्वतः साध्वसाधु वा ॥ वदतो गुणदोषाभ्यां वर्जितः समदृङ् मुनिः ॥ १६ ॥ न कुर्यान्न वदेत्किञ्चिन्न ध्यायेत्साध्वसाधु वा ॥ आत्मारामोऽनया वृत्त्या विचरेज्जडवन्मुनिः ॥१७॥ शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि ॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः ॥ १८ ॥ गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च ॥ वित्तं त्वतीर्थीकृतमङ्ग वाचं हीनां मया रक्षति दुःखदुःखी ॥१९॥ यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवत्राणनिरोधमस्य ॥ लीलावतारेप्सितजन्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः ॥ २० ॥ एवं जिज्ञासयाऽपोह्य नानात्वभ्रममात्मनि ॥ उपारमेत विरजं मनो मय्यर्प्य सर्वगे ॥२१॥

पुरुषार्थपर्यवसायी । यथा अधेनुं चिरप्रसूतां पुनः प्रसवाशाहीनां निःक्षीरां गां क्षीरार्थं रक्षतो जनस्य तद्रक्षाश्रमैकफला तथेत्यर्थः ॥ १८ ॥ गामिति ॥ अङ्ग हे उद्धव दुह्यत इति दोहः पयो दुग्धो दोहो नोत्तरत्र दोह्योऽस्ति यस्यास्तामग्रे प्रसवरहितां गाम् असतीं कामचारदुर्भाषणादिभिर्दुष्टां भार्यां च पराधीनं परपोष्यं देहम् असत्प्रजां दृष्टादृष्टसाधनशून्यं पुत्रम् अतीर्थीकृतमागतेभ्यः पात्रेभ्यः अदत्तं दुष्कीर्तिदुरितापादकं वित्तं धनं च मया हीनां मद्गुणादिप्रतिपादनरहितामन्यविषयां वाचं च यो रक्षति स दुःखदुःखी दुःखानन्तरमपि दुःखमेवास्ति यस्य तथाभूतो भवतीत्यर्थः ॥ १९ ॥ यस्यामिति ॥ अङ्ग हे उद्धव अस्य विश्वस्य स्थित्यादिरूपं तद्धेतुरित्यर्थः । श्रवणादिपराणां पावनं पावित्र्यकरं मम कर्म चरित्रं यस्यां वाचि प्रतिपाद्यतया न स्यात् तथा लीलावतारेषु ईप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म यस्यां न स्यात्तां वन्ध्यां निष्फलां गिरं वाचं धीरो धीमान् न बिभृयात् न धारयेत् ॥ २० ॥ एवमिति ॥ एवं जिज्ञासया विचारेण जीवात्मनि नानात्वभ्रमं देवमनुष्यादिदेहाध्यासमपोह्य निरस्य विरजं निर्मलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनः सर्वगे परिपूर्णे मयि भगवति अर्प्य समर्प्य संधार्य । ल्यबार्षः । कर्मानुष्ठानशास्त्राभ्यासादिकृत्याद्युपारमेत न शास्त्रपाण्डित्यमात्रेणेत्यर्थः । तङार्षः ॥ २१ ॥ यदीति ॥ मयि ब्रह्मणि निश्चलं यथा भवति तथा मनो धारयितुं यदि त्वमनीशः अशक्तस्तदा निरपेक्षः फलकामनारहितः सन् सर्वाणि वर्णाश्रमविहितानि कर्माणि समाचर अनुतिष्ठ । ततो विशुद्ध्या मनो निश्चलं भविष्यतीत्याशयः । यद्वा । मयि मन्निमित्तं सर्वाणि कर्माणि समाचर तेन कर्मफलभोक्तृत्वं न भविष्यतीति भावः ॥ २२ ॥ कर्मभिर्विशुद्धसत्वस्य अन्तरङ्गां भक्तिमाह—श्रद्धालुरिति युग्मम् ॥ श्रद्धाया अन्तरङ्गत्वात् तद्वान् सुभद्राः पुण्यावहाः लोकस्य पावनीः पापनिवर्त्तिकाः मम कथाः शृण्वन् अनुगायन् श्रोतरि वक्तर्यसत्यपि निरन्तरं मुहुः स्मरन् तथा सेवनैर्मज्जन्मादाभिनयन् अनुकुर्वन् तथा मत्प्रीत्यर्थं धर्मादीनाचरन् सेवमानः तत्र धर्मस्य भगवत्प्रीत्यर्थं सेवनं कामानां तत्प्रसादतया स्रग्गन्धवासोऽलङ्कारादिधारणम् अर्थस्य तदाराधनोपयोगिधनाद्युपार्जनम् एवं सर्वथाहमेवाश्रयो यस्य स जनः हे उद्धव सनातने सर्वकारणकारणे मयि

यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलम् ॥ मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥ २२ ॥ श्रद्धालुर्मे कथाः शृण्वन्सुभद्रा लोकपावनीः ॥ गायन्ननुस्मरन्कर्म जन्म चाभिनयन्मुहुः ॥ २३ ॥ मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ॥ लभते निश्चलां भक्तिं मय्युद्धव सनातने ॥ २४ ॥ सत्सङ्गलब्धया भक्त्या मयि मां य उपासिता ॥ स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम् ॥ २५ ॥ उद्धव उवाच ॥ साधुस्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो ॥ भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता ॥२६॥ एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो ॥ प्रणतायानुरक्ताय प्रपन्नाय च कथ्यताम् ॥ २७ ॥ त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः ॥ अवतीर्णोऽसि भगवन्स्वेच्छोपात्तपृथग्वपुः ॥ २८ ॥ श्रीभगवानुवाच ॥ कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ॥ सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ॥ २९ ॥

निश्चलां भक्तिं लभते ॥ २३ ॥ २४ ॥ सदिति ॥ एवं सतां साधूनां सङ्गेन लब्धया मयि भक्त्या यः भक्तो मामुपासिता ध्याता भवति स च ध्यानशीलः सद्भिर्दर्शितं वै निश्चितं परमं पदं मत्स्थानं मत्स्वरूपं चाञ्जसा सुखेनैव विन्दते लभते ॥ २५ ॥ पूर्वश्लोके साधुसङ्गलब्धया भक्त्येत्युक्तं तत्र साधुं पृच्छति—साधुरिति ॥ हे उत्तमश्लोक हे प्रभो स्वमत्या लोकाः बहून् साधून् मन्यन्ते परंतु तव तु कीदृशः साधुः संमतः तथा भक्तिरपि लोके बहुविधाऽस्ति तत्र सद्भिर्नारदादिभिरादृता या त्वयि उपयुज्येत सा भक्तिः कीदृशी ॥ २६ ॥ एतदिति ॥ स्पष्टम् ॥ २७ ॥ त्वमिति ॥ हे भगवन् त्वं परमं ब्रह्म व्योमवदसङ्गः यतः प्रकृतेः परः नियन्ता पुरुषः एवंभूतोऽपि स्वेषां भक्तानामिच्छयोपात्तं स्वीकृतं पृथक् परिमितं वपुर्येन तथाभूतः सन्नवतीर्णोऽसि ॥ २८ ॥ कृपालुरिति ॥ कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदपि अकृतद्रोहः तितिक्षुः परापराधसहिष्णुः सत्यमेव सारः साधनश्रेष्ठं यस्य सः अनवद्यः असूयादिदोषरहित आत्मा यस्य सः शत्रुमित्रादिषु समः यथाशक्ति सर्वेषामुपकारकः ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामैरिति ॥ कामैरहता अक्षुभिता धीर्यस्य सः दान्तो निगृहीतेन्द्रियः मृदुः कोमलचित्तः शुचिः सदाचारः आकिञ्चनः परिग्रहशून्यः अनीहः लौकिकालौकिकफलव्यापार-रहितः मितभुक् लघ्वाहारः शान्तः नियतान्तःकरणः स्थिरः मद्भक्तौ निश्चलः मच्छरणः मदेकाश्रयः मुनिर्मननशीलः ॥ ३० ॥ अप्रमत्त इति ॥ अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान् आपत्स्वप्यकृपणः जितषड्गुणः जिताः क्षुत्पिपासे शोकमोहौ जरामृत्यू इति षडूर्मय एते षड् गुणा येन सः अमानी स्वसत्कारानभिलाषी अन्येभ्यो मानदः सत्कारकर्ता कल्पः परबोधने दक्षः मैत्रः अवञ्चकः कारुणिकः करुणयैवोपकारको न दृष्टलोभेन कविः तत्त्वज्ञः ॥ ३१ ॥ आज्ञायेति ॥ धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान् तत्त्यागे चित्तमालिन्यादिदोषांश्चाज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेन हेतुना मया वेदरूपेणादिष्टान् उपदिष्टानपि सर्वान् स्वधर्मान् संत्यज्य अथवा विद्धैकादश्युपवासकृष्णैकादश्यनुपवासान्निवेद्य श्राद्धादयो ये भक्तिविरुद्धा धर्माः तान् संत्यज्य यो मां भजेत सोऽप्येवं पूर्वोक्तवत्सत्तमः साधुः ॥ ३२ ॥

कामैरहतधीर्दान्तो मृदुः शुचिरकिंचनः ॥ अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः ॥ ३० ॥ अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः ॥ अमानी मानदः कल्पो मैत्रः कारुणिकः कविः ॥ ३१ ॥ आज्ञायैवं गुणान्दोषान्मयाऽऽदिष्टानपि स्वकान् ॥ धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः ॥ ३२ ॥ ज्ञात्वाऽज्ञात्वाऽथ ये वै मां यावान्यश्चास्मि यादृशः ॥ भजन्त्यनन्यभावेन ते मे भक्ततमा मताः ॥ ३३ ॥ मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनम् ॥ परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनम् ॥ ३४ ॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥ ३५ ॥ मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ॥ गीतताण्डववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥ ३६ ॥ यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ॥ वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ॥ ३७ ॥

ज्ञात्वेति ॥ अहं यावान् देशकालापरिच्छिन्नो यश्च सर्वात्मा यादृशः सच्चिदानन्दरूपोऽस्मि तं मां ज्ञात्वाज्ञात्वा पुनः पुनः शास्त्रगुरूपदेशतो विशेषतो ज्ञात्वा । यद्वा । याथातथ्येन ज्ञात्वा अज्ञात्वा वा अनन्यभावेन विषयान्तरासक्तिराहित्येन प्रेम्णा ये मां भजन्ति ते मे मम भक्ततमा मताः ॥ ३३ ॥ साधुलक्षणमुक्त्वा भक्तेर्लक्षणमाह—मल्लिङ्गेति ॥ मम लिङ्गानि प्रतिमादीनि तेषां मद्भक्तजनानां च दर्शनादि परिचर्या पादसंवाहनादिरूपा प्रणामः प्रसिद्धः ॥ ३४ ॥ मदिति ॥ सर्वलाभोपहरणं सर्वस्य लब्धस्येष्टवस्तुनो मयि समर्पणं दास्येन निमित्तेनात्मनः सानुबन्धस्य देहस्य निवेदनं मदीयत्वेन स्थापनम् ॥ ३५ ॥ मज्जन्मेति ॥ मम जन्मनां कर्मणां च कथनं मम पर्वाणि जन्माष्टम्यादीनि तेषामनुमोदनम् । अनुमोदनप्रकारमेवाह । गीतेत्यादि ॥ ३६ ॥ यात्रेति ॥ यात्रा मद्दर्शनाद्यर्थगमनम् । सर्वेषु वार्षिकपर्वसु प्रतिवर्षभवेषु जन्माष्टम्येकादश्यादिषु विशेषतो बलिविधानं पूजाविधानं विशेषपुष्पोपहारादिसमर्पणं च वैदिकी तान्त्रिकी दीक्षा मन्त्रग्रहणेन संस्कारसंपत्तिः मदीयव्रतानामेकादश्युपवासादीनां धारणमाचरणम् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममेति ॥ ममार्चा मूर्त्तिस्तस्याः स्थापने श्रद्धा आदरः तथा उद्यानादिकर्माणि तेषां करणे सामर्थ्ये सति स्वतः तदभावे चान्यैः संभूयोद्यमः तत्र उद्यानं पुष्पप्रधानं वनम् । उपवनं तु फलप्रधानम् । आक्रीडं क्रीडास्थानम् । पुरं प्राकारवेष्टनम् ॥ ३८ ॥ सम्मार्जनेति ॥ अमायया फलाभिसन्धिलक्षणकपटत्यागेन दासवत् संमार्जनादिभिर्मह्यं मम गृहस्य शुश्रूषणं संमार्जनं रजसोपाकरणम् । उपलेपः गोमयोदकादिभिरालेपनं ताभ्यां सेको जलेन प्रोक्षणं मण्डलवर्त्तनं सर्वतो भद्रादिकरणम् ॥ ३९ ॥ अमानित्वमिति ॥ अमानित्वमभिमानराहित्यम् । अदम्भित्वं लोके मिथ्यास्वभक्तिख्यापनराहित्यम् । कृतस्यापरिकीर्तनम् । " धर्मः क्षरति कीर्तनात् " इति स्मृतेः । मे मह्यं निवेदिते दीपे अवलोकनमपि न कुर्यात् तद्दोषपरिहारार्थं वर्तिद्वयदीपं कुर्यात् इत्याहुः । तथा स्वयमन्येन वा निवेदितं न स्वीकुर्यात् । एतच्च साधारणस्थावर विषयं रागप्राप्तविषयं वा । भक्त्या तु ग्राह्यमेव सर्वशास्त्रेषु विष्णुनिर्माल्यसेवनस्य मोक्षादिप्रदत्वोक्तेः । यद्वा । अन्यस्मै निवेदितं दीपादिकं किंचिदपि मे मह्यं नोपयुञ्ज्यात् न निवेदयेदित्यर्थः ।" विष्णोर्निवेदि-

ममार्चास्थापने श्रद्धा स्वतः संहृत्य चोद्यमः ॥ उद्यानोपवनाक्रीडपुरमन्दिरकर्मणि ॥ ३८ ॥ संमार्जनोपलेपाभ्यां सेकमण्डलवर्तनैः ॥ गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥ ३९ ॥ अमानित्वमदम्भित्वं कृतस्यापरिकीर्त्तनम् ॥ अपि दीपविलोकं मे नोपयुञ्ज्यान्निवेदितम् ॥ ४० ॥ यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः ॥ तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पते ॥ ४१ ॥ सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् ॥ भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ॥ ४२ ॥ सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम् ॥ आतिथ्येन तु विप्राग्र्ये गोष्वङ्ग यवसादिना ॥ ४३ ॥ वैष्णवे बन्धुसत्कृत्या हृदि खे ध्याननिष्ठया ॥ वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥ ४४ ॥

तान्नेन यष्टव्यं देवतान्तरम् ॥ पितृभ्यश्चैव तद्देयं तदानन्त्याय कल्पते ॥ पितृशेषं तु यो दद्याद्धरये परमात्मने । रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः॥" इत्यादिवचनेभ्यः ॥ ४० ॥ यद्यदिति ॥ यद्यत् लोके लोकस्य सर्वजनस्येष्टतमं तत्सर्वं मह्यं निवेदयेत् । यद्वा । लोके शास्त्रे च यद्यत् इष्टतमं तेन दर्भमञ्जर्यादीनि शास्त्रविहितान्यपि लोके इष्टतमानि न सन्ति तथा मद्यादीनि लोके संकर्षणप्रियाण्यपि शास्त्रे इष्टतमानि न सन्त्यतस्तानि न निवेदयेदिति यच्चात्मनोऽतिप्रियं वस्तु तत्तत्सर्वं मह्यं निवेदयेत् । यतस्तन्मन्निवेदितमानन्त्याय कल्पते अक्षय्यसुखाय भवति ॥ ४१ ॥ सूर्य इति ॥ हे भद्र सूर्यादीनि एकादश मे मम पूजापदानीति ॥ ४२ ॥ सूर्य इति ॥ सूर्ये तु त्रय्या विद्यया सूक्तैरुपस्थानादिना मां यजेतेति सर्वत्रान्वयः । अङ्ग हे उद्धव यवसादिना तृणादिना आदिशब्दात् कण्डूयनादिना । स्पष्टमन्यत् ॥ ४३ ॥ वैष्णव इति ॥ वैष्णवे बन्धुवत्सत्कृत्या संमाननेन हृदयाकाशे मुख्यधिया सूत्राख्यप्राणदृष्ट्या तोये जले तोयादिभिर्द्रव्यैः आदिपदेन गन्धपुष्पाक्षतादिग्रहणम् ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थण्डिले इति ॥ स्थण्डिले प्रलिप्तसंस्कृतायां भुवि मन्त्रहृदयैः रहस्यमन्त्रन्यासैः आत्मनि देहादिसङ्घाते भोगैः अयं देहोऽपि भगवतोऽधिष्ठानमिति बुद्ध्या दत्तैः न तु लोभेन दत्तैः शास्त्रानिषिद्धैर्विषयैरात्मानं जीवं यजेत । सर्वभूतेषु प्राणिमात्रेषु समत्वेन समदृष्ट्या क्षेत्रज्ञं साक्षिणं मां यजेत ॥ ४५ ॥ धिष्ण्येष्विति ॥ समाहितः एकाग्रचित्तः एषु धिष्ण्येषु शङ्खादियुक्तं चतुर्भुजं शान्तं मद्रूपं ध्यायन् इत्युक्तेन प्रकारेणार्चेत् ॥ ४६ ॥ इष्टेति ॥ इष्टं यज्ञादिवैदिकं कर्म पूर्तमन्नप्रदानादि स्मार्तं कर्म तयोः समाहारस्तेन यः समाहितः सावधानः सन्नेवमुक्तप्रकारेण मां यजेत सः साधुसङ्गेन मयि सद्भक्तिं परमप्रेमात्मिकां लभते तस्य च निरन्तरं मत्स्मृतिर्भवतीति शेषः । यद्वा । इत्थं मत्स्मृतिः साधुसेवया भवति । यद्वा । इत्थं भक्तिमतः पुंसः साधुसेवया मत्स्मृतिः ज्ञानं भवति ॥ ४७ ॥ प्रायेणेति ॥ प्रायेण सत्सङ्गेन यो भक्तियोगस्तेन विना सध्र्यङ् समीचीनो मत्प्राप्त्युपायो न विद्यते । हि यस्मात्सतामहं प्रायणं प्रकृष्टमयनमतः सत्सङ्गो मद्भक्तेरन्तरङ्गम् इत्यर्थः । ज्ञानमार्गादपि भक्तियोगः श्रेयानित्याशयः ॥ ४८ ॥इदानीं सत्सङ्गः

स्थण्डिले मन्त्रहृदयैर्भोगैरात्मानमात्मनि ॥ क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत माम् ॥ ४५ ॥ धिष्ण्येष्वेष्विति मद्रूपं शङ्खचक्रगदाम्बुजैः ॥ युक्तं चतुर्भुजं शान्तं ध्यायन्नर्चेत्समाहितः ॥ ४६ ॥ इष्टापूर्तेन मामेवं यो यजेत समाहितः ॥ लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ॥ ४७ ॥ प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव ॥ नोपायो विद्यते सध्र्यङ् प्रायणं हि सतामहम् ॥ ४८ ॥ अथैतत्परमं गुह्यं शृण्वतो यदुनन्दन ॥ सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत् सखा ॥४९॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे भगवदुद्धवसंवाद एकादशोऽध्यायः॥ ११॥ श्रीभगवानुवाच ॥ न रोधयति मां योगो न सांख्यं धर्म एव च ॥ न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥ १ ॥ व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ॥ यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम् ॥ २ ॥

साधनान्तराणि नापेक्षते फलाव्यभिचारीणि सांख्ययोगादीनि तु न तथेति वर्णयितुमाह–अथेति ॥ हे यदुनन्दन अथैतत् वक्ष्यमाणं परमं गुह्यं रहस्यमतः शृणु यतस्त्वं मे भृत्यः सेवकः सुहृत् शुद्धान्तःकरणः सखा चातः तुभ्यं सुगोप्यमपि इदं तु वक्ष्यामि ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशैकादशके व्यधाद्भ-ङ्गासहायकः ॥ ११॥ द्वादशे साधुसङ्गस्य महिमा वर्ण्यते ततः ॥ कर्मतत्त्यागव्यवस्थास्तत्र श्लोकाश्चतुर्दश ॥ त्रीण्युवाचेति पादाढ्याऽष्टाविंशे तिरनुष्टुभः ॥ १२॥ नेति युग्मम् ॥ यथा सत्सङ्गो मामवरुन्धे वशीकरोति तथा योगादिकं न रोधयति न वशीकरोति । हि यतः स सर्वसङ्गापहः अन्यसङ्गनिवर्तकः तत्र योग आसनप्राणायामादिसांख्यं तत्त्वानां विवेकः धर्मः सामान्यतः परोपकारादिः स्वाध्यायो वेदाध्ययनं तपः कृच्छ्रादिः त्यागः संन्यासः इष्टं च पूर्तं च इष्टापूर्त्तम् । तत्र इष्टं वैदिकमग्निहोत्रादि कर्म पूर्तं कूपारामा-दिनिर्माणं स्मार्तं कर्म दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते । व्रतानि एकादश्युपवासादीनि यज्ञो देवपूजा छन्दांसि रहस्यमन्त्राः तीर्थानि नियमाः शौचादयः यमाः अहिं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादयः ॥ १ ॥ २ ॥ सदिति चतुष्कम् ॥ हि यस्मात् सत्सङ्गेन रजस्तमःप्रकृतयोऽपि दैतेययातुधानादयः बहवस्तस्मिंस्तस्मिन् युगे युगे मत्पदं प्राप्ताः । तत्र यातुधाना राक्षसाः त्वाष्ट्रो वृत्रः कयाधुनाम्नी दानवी तस्यापत्यं कायाधवः प्रह्लादः अनयोर्जन्मतः प्रागेव नारदसङ्गः वृषपर्वा जातमात्र एव मातृपरित्यक्तो मुनिपालितो विष्णुभक्तोऽभूदिति पौराणिकी प्रसिद्धिः । बलेः प्रह्लादसङ्गः बाणस्य कृपालोर्महादेवस्य सङ्गः मयस्य सभानिर्माणे पाण्डवसङ्गः बिभीषणस्य हनुमत्सङ्गः सुग्रीवादीनां त्रयाणां लक्ष्मणसङ्गः गजो गजेन्द्रः अस्य पूर्वजन्मनि नारदादिसङ्गः गृध्रो जटायुः अस्य गरुडदशरथादिसङ्गः वणिक्पथः तुलाधारो भारतप्रसिद्धः । व्याधः धर्मव्याधः अस्य राक्षसतां प्राप्तस्य वराहपुराणदृष्टेन वैष्णवेन सङ्गः कुब्जायाः पूर्वजन्मनि नारदसङ्गः इति माथुरहरिवंशे प्रसिद्धम् । गोप्यो मुनिवर्यादयः पूर्वजन्मनि कृतबहुसाधुसङ्गा एतज्जन्मनि नित्यसिद्धगोपीसङ्गिन्यः यज्ञपत्नीनां व्रजस्थकृष्णदूतीभिर्मालिकताम्बूलिकादिस्त्रीभिः क्रयविक्रयाद्यर्थं मथुराप्रस्थानसमये सङ्गः । तथा परे अनुक्ता अपि बहवः ॥३॥४॥५॥६॥

सत्सङ्गेन हि दैतेया यातुधाना मृगाः खगाः ॥ गन्धर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥ ३ ॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः ॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगेऽनघ ॥४॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥५॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथा परे ॥ ६ ॥ ते नाधीतश्रुतिगणा नोपासितमहत्तमाः ॥ अव्रतातप्ततपसः सत्सङ्गान्मामुपागताः ॥ ७ ॥ केवलेन हि भावेन गोप्यो गावो नगा मृगाः ॥ येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा ॥ ८ ॥ यं न योगेन सांख्येन दानव्रततपोऽध्वरैः ॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ॥९॥ रामेण सार्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः ॥ विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय ॥ १० ॥

त इति ॥ न अधीताः श्रुतिगणा यैस्ते तथा न तदर्थमुपासिताः सेविताः महत्तमाः पण्डिता यैस्ते । किंच । न विद्यन्ते व्रतानि येषां ते तथा न तप्तानि तपांसि यैस्ते च ते तथा केवलात्सतां सङ्गादेव मामुपागताः ॥ ७ ॥ केवलेनेति ॥ केवलेन भावेन मदावेशितचित्तेनैव हेतुना गोप्यः शृङ्गाररसेन गावो वात्सल्यरसेन नगाः पर्वता गोवर्द्धनाद्याः सख्येन नगा वृक्षा वा वृन्दावनादिस्थाः नागाः कालीयाद्याः दास्येन येऽन्ये मूढधियस्तेऽपि सिद्धाः कृतार्था निर्मुक्तबन्धनाः सन्तोऽञ्जसा अनायासेनैव मामीयुः ॥ ८ ॥ यमिति ॥ योगादिभिः यत्नवान् कृतप्रयत्नोऽपि यं मां न प्राप्नुयात्तं मामीयुरिति पूर्वेणान्वयः । व्याख्या शास्त्रव्याख्यानम् । अत्र च प्रथमं या गोप्यः पश्वादयो वा श्रीकृष्णेन सह सङ्गताः ते सन्तः तत्सङ्गोऽन्येषां सत्सङ्गः तेन च तेषां भक्तिरिति ज्ञेयम् ॥ ९ ॥ रामेणेति ॥ श्वाफल्किना अक्रूरेण कर्त्रा रामेण सह मयि मथुरां प्रणीते नीते सति मयि विगाढेन भावेन प्रेम्णा अनुरक्तानि संसक्तानि चित्तानि यासां ताः वियोगेन तीव्रो दुःसह आधिर्यासां ताः गोप्यः मत्तोऽन्यं सुखाय न ददृशुः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तास्ता इति ॥ अङ्ग हे उद्धव वृन्दावनगोचरेण प्रेष्ठतमेन च मया सह याभिर्या याः क्षपा रात्रयः सुखाधिक्यात् क्षणार्द्धवन्नीता यापितास्तास्ता वाचामगोचरा इत्यर्थः । या या इति पाठस्तु सुगमः । रात्रयो मया हीनास्तासां गोपीनां कल्पसमा बभूवुः ॥ ११ ॥ ता इति ॥ मयि अनुषङ्गेण आसक्त्या बद्धा धियो याभिस्ता गोप्यः स्वमात्मानं देहम् अदः दूरस्थम् इदं सन्निहितं च नाविदन् । यद्वा । स्वं पतिपुत्रादिममतास्पदम् । आत्मानं देहमहंकारास्पदम् अदः परलोकम् इदं दृश्यमानमिमं लोकं च न अविदन् । यथा समाधौ स्थिता मुनयो न किंचिद्विदुस्तथेत्यर्थः । किंतु यथा नामरूपे विहाय नद्योऽब्धितोये प्रविष्टा भवन्ति तथा ता अपि नामरूपे त्यक्त्वा मयि प्रविष्टाः ॥ १२ ॥ मत्कामा इति ॥ मत्कामाः अस्वरूपविदः मत्स्वरूपमपि न जानन्ति ताः शतसहस्रशः अबला अपि रमणं जारं जारबुद्धिवेद्यमपि परमं ब्रह्म मां सत्सङ्गात्प्रापुः ॥ १३ ॥ तस्मादिति युग्मम् ॥ यस्मादेवंभूतो मद्भजनप्रभावस्तस्मात् हे उद्धव त्वं चोदनां विधिं प्रति चोदनां विधिप्रतिकूलं निषेधं च शास्त्रम् । यद्वा । श्रुतिं स्मृतिं च तथा शास्त्र-

तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण ॥ क्षणार्धवत्ताः पुनरङ्ग तासां हीना मया कल्पसमा बभूवुः ॥ ११ ॥ ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ॥ यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे ॥ १२ ॥ मत्कामा रमणं जारमस्वरूपविदोऽबलाः ॥ ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः ॥ १३ ॥ तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् ॥ प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥१४॥ मामेकमेव शरणमात्मानं सर्वदेहिनाम् ॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥ १५ ॥ उद्धव उवाच ॥ संशयः शृण्वतो वाचं तव योगेश्वरेश्वर ॥ न निवर्त्तत आत्मस्थो येन भ्राम्यति मे मनः ॥ १६ ॥ श्रीभगवानुवाच ॥ स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ॥ मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ १७ ॥

मुत्सृज्य अनादृत्य सर्वदेहिनामेकमात्मानं मामेव सर्वात्मभावेन सर्वत्रात्मभावनया सर्वप्रकारेण शरणं याहि । अतो मयैव स्वामिना त्वमकुतोभयः स्याः भवेः ॥१४ ॥१५॥ संशय इति ॥ हे योगेश्वरेश्वर पूर्वं तावन्मयोदितेष्ववहितः स्वधर्मेषु इत्यादिना कर्म कर्तव्यमित्युक्तम् । इदानीं तु सर्वं त्यक्त्वा मां शरणं याहीत्युच्यते । अतस्तव वाक्यं शृण्वतो ममात्मस्थः आत्मनि कर्त्तृत्वाद्यस्ति नास्ति वेत्यात्मविषयः । यद्वा । आत्मनि मनसि स्थितः कर्म कार्यं त्याज्यं वेति संशयो न निवर्त्तते । येन संशयेन मे मनो भ्राम्यति अतस्तं निवर्तयेति शेषः । यद्वा । सर्वदेहिनामेकमात्मानं मां शरणं याहीति । तव वाचं शृण्वतो मम आत्मस्थः आत्मविषयकः संशयः सर्वदेहिनामेक एवात्मा कथमित्याकारः न निवर्त्तते अतः यथाहं सम्यग्बुध्येय तथा स्फुटं कथयेति ॥ १६ ॥ स एष इति ॥ स एषः अपरोक्षः जीवयतीति जीवः परमेश्वरः विवरेषु आधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य घोषेण पराख्येण नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं मनोग्राह्यं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरचक्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशुद्धचक्रे च उपेत्य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः अकारादिरित्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नानावेदशाखात्मको भवति । तथा च श्रुतिः । " चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहासु त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति । " इति । श्रुतेरर्थस्तु वाचः परिमितानि शास्त्राणि तानि चत्वारि पदानि स्थानानि परा पश्यन्ती मध्यमा वैखरीति तानि च ये ब्राह्मणा मनीषिणोऽध्यात्मकुशलाः ते विदुः तेषां मध्ये लोकाः आदौ त्रीणि पदानि शरीरे आधारनाभिहृदयेषु निहितानि नेङ्गयन्ति न जानन्ति तुरीयं चतुर्थं वैखर्याख्यं मनुष्या वदन्ति मनुष्याणां वदने वर्त्तमानोऽर्थबोधकः शब्दो भवतीत्यर्थः ।"विवक्ष्वात्मेरि-तस्वान्ताहिताग्निचलितो मरुत् । व्यनक्ति यां मूलदेशे सा वाणी कथ्यते परा । नाभौ व्यनक्ति पश्यन्तीं मध्यमां हृदये व्रजन् । मूर्द्धाघातान्मुखं प्राप्तः स्पष्टवर्णां स वैखरीम् ॥" इति स्फुटार्थं पद्यम् । साम्बपञ्चाशिकायां सूर्यस्तुतौ श्लोकश्च । " या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं वर्णानन्तः प्रकटकरणैः प्राणसङ्गात्प्रसूते । तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ॥ " श्लोकार्थश्च । तां त्रिविधां भारतीं प्रपद्ये या सा मित्रावरुणसदनात् अग्निसोमस्थानात् उच्चरन्ती उद्भवन्ती मित्रोऽग्निर्वरुणः सोमः तयो स्सदनं परमात्मा यतः श्वासः शीतोष्णत्वं च त्रिषष्टिं वर्णान् जनयति वायुसङ्गजान् प्रकटकरणैः बुद्धिं गतैः प्रत्यक्षरूपैः इन्द्रियैः अन्तः

यथाऽनलः खेऽनिलबन्धुरूष्मा बलेन दारुण्यधिमथ्यमानः ॥ अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी ॥१८॥
एवं गदिः कर्मगतिर्विसर्गो घ्राणो रसो दृक्स्पर्शः श्रुतिश्च ॥ संकल्पविज्ञानमथाभिमानः सूत्रं रजःसत्त्वतमोविकारः ॥ १९ ॥

पश्यति न तूच्चारयति सा पश्यन्त्याख्या । तां प्रथममुदितामुत्पन्नां बुद्धि संस्थाम् उच्चारयामीति विचारयुक्तां मध्यमां मुखेऽवस्थितां करणविशदां स्थानप्रयत्ननिर्मलां वैखरीं च प्रपद्ये । त्रिषष्टिर्वर्णाश्च ह्रस्वदीर्घप्लुतभेदेन स्वरा एकविंशतिः । ऌकारस्याप्लुतत्वात् एचामह्रस्वत्वाच्च हलस्त्रयस्त्रिंशत् पञ्चविंशतिः स्पर्शाः चत्वारोऽन्तस्थाः चत्वार ऊष्माणः अनुनासिका यमाः पञ्चविसर्गानुस्वारो ≍क≍पौ चेति ॥१७॥ यथेति ॥ यथा खे अनलः ऊष्मा अव्यक्तोष्मरूपो बलेन दारुणि अधिकं मथ्यमानः अनिलबन्धुः अनिलसहायः सन् सूक्ष्मविस्फुलिङ्गादिरूपो जातो भवति । ततश्च प्रकृष्टो जातो हविषा समिध्यते संवर्धते तथैवेयं वाणी ममाभिव्यक्तिरिति ॥ १८ ॥ एवमिति ॥ एवं गदिर्गदनं भाषणं मेऽभिव्यक्तिरिति सर्वत्रानुषङ्गः । कर्म हस्तयोर्वृत्तिः गतिः पादयोः वृत्तिः विसर्गः मलमूत्रत्यागः पायूपस्थयोर्वृत्तिरिति कर्मेन्द्रियाणां घ्राणोऽवघ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणमिति नासादिपञ्च ज्ञानेन्द्रियाणां वृत्तयः संकल्पो मनसः विज्ञानं बुद्धिचित्तयोः अभिमानोऽहङ्कारस्य वृत्तिः सूत्रं प्रधानस्य वृत्तिः एवं रज आदि-विकारः कार्यरूपः सर्वोऽपि प्रपञ्चो मे व्यक्तिः । तत्र रजसः कार्यमिन्द्रियवर्गः सत्त्वस्य तद्देवतावर्गः तमसः पृथ्व्यादिमहाभूतानीति प्रपञ्चो मे व्यक्तिरित्यनुषङ्गः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादीश्वरादिव्यक्तिरूपः प्रपञ्चो नेश्वराद्भिन्नोऽस्तीत्याह–अयमिति ॥ अयं जीवः ईश्वरः आदावव्यक्त एक एव । हि शब्दोऽवधारणे । यतः स एव आद्यः कारणं त्रिवृत् त्रिगुणाश्रयः अब्जयोनिः लोकपद्मस्य कारणभूतः वयसा कालेन विश्लिष्टा विभक्ता वागादीन्द्रियरूपाः शक्तयो यस्य । यद्वा । विशेषेण श्लिष्टा आलिङ्गिता मायाशक्तिर्येन स बहुप्रकार इव भाति । यथा योनिमभिव्यक्तिस्थानं क्षेत्रं प्रतिपद्य प्राप्य बीजान्येव वृक्षादिरूपेण बहुधा भान्ति तद्वदिति ॥२०॥ यस्मिन्निति ॥तन्तुवितानें संस्था स्थितिर्यस्य स पटो यथा दीर्घतन्तुषु ओतः तिर्यक्तन्तुषु प्रोतस्तन्तुभ्यो न पृथक् तथेदं समष्टिव्यष्ट्यात्मकं विश्वमपि यस्मिन् कारणात्मके ईश्वरे ओतं प्रोतं ततः पृथक् न भवतीत्यर्थः । य एष उक्तविधः समष्टिव्यष्ट्यात्मको देहः स एव संसारतरुः वृक्षवत् स्वाध्यासद्वारा जन्ममरणाद्यात्मकसंसारस्य कारणम् । पुराणः अनादिः कर्मात्मकः प्रवृत्तिस्वभावः अत एव पुष्पफले भोगापवर्गौ । यद्वा । पुष्पमदृष्टं फलं सुखदुःखादिकं च प्रसूते जनयति ॥ २१ ॥ द्वे इति ॥ द्वे पुण्यपापे अस्य बीजे स च शतमूलः शतमपारिमिता वासना मूलानि यस्य सः त्रयो गुणा नालानि प्रकाण्डा यस्य पञ्चमहाभूतानि स्कन्धा यस्य पञ्च शब्दादयो विषया रसास्तेषां प्रसूतिः यस्मिन् दशेन्द्रियाणि एकं मनश्च

अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः ॥ विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥ २० ॥ यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तन्तुवितानसंस्थः ॥ य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते ॥२१॥ द्वे अस्य बीजे शतमूलस्त्रिनालः पञ्चस्कन्धः पञ्चरसप्रसूतिः ॥ दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः ॥ २२॥ अदन्ति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः ॥ हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदम् ॥२३॥ एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः ॥ विवृश्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रम् ॥ २४ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे भगवदुद्धवसंवादे द्वादशोऽध्यायः ॥१२॥

शाखा यस्य सः द्वयोः सुपर्णयोः जीवपरमात्मनोः पक्षिणोर्नीडं यस्मिन् त्रीणि वातपित्तश्लेष्मरूपाणि वल्कलानि त्वचो यस्य सः । द्वे सुखदुःखे फले यस्य सः अर्कं प्रविष्टः सूर्यमण्डलपर्यन्तं व्याप्तः तन्निर्भिद्य गतस्य संसाराभावात् ॥ २२ ॥ अदन्तीति ॥ गृध्यन्तीति गृध्राः विषयाभिलाषिणः ग्रामेचरा गृहस्थाः अस्य शरीरवृक्षस्य एकमविद्यामयं दुःखात्मकं फलमदन्ति परिणामतः स्वर्गादिसुखस्यापि दुःखरूपत्वात् । हंसा विवेकिनः अरण्यवासाः संन्यासिनः एकं विद्यामयं सुखरूपं फलमदन्ति । एवं मायामयं मायया "एकोऽहं बहु स्याम्" इति संकल्परूपया बहुरूपं जातमेकं परमात्मानम् इज्यैः पूज्यैः गुरुभिः कृत्वा यो वेद जानाति स एव वेदं वेद वेदतत्त्वार्थं जानाति तस्य देहाद्यात्माध्यासनिरासात् सर्वसाधनत्याग एव युक्तः ॥ २३ ॥ एवमिति ॥ एवमुक्तेन प्रकारेण अप्रमत्तः सावधानः धीरो जितेन्द्रियश्च सन् गुरुसेवया लब्धया मदेकभक्त्या शितेन तीक्ष्णेन विद्याकुठारेण आत्मसाक्षात्कारात्मकज्ञानपरशुना वेति द्वयोर्ज्ञानभक्त्योः स्वतन्त्रता जीवाशयं जीवोपाधिं त्रिगुणात्मकलिङ्गशरीरं विवृश्च्य छित्वा परमात्मानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च संपद्य प्राप्य अथानन्तरमस्त्रं शास्त्रोक्तं साधनसमूहं त्यज । अत्र संशयः शृण्वत इत्यादि प्रश्नस्य प्रथमव्याख्याभिप्रायकत्वे स एष इत्यादिप्रकरणस्य उत्तररूपस्यायं भावः । ईश्वरस्तावत्स्वमायावशात्प्रपञ्चात्मना भाति तत्प्रपञ्चाध्यासाच्च जीवानामनाद्यविद्यया कर्तृत्वादि ततो विधिप्रतिषेधाधिकारः तदानीं सत्वशुद्ध्यर्थं कर्माणि कुर्वित्युक्तम् । सत्वे च शुद्धे पुनः कर्मजाड्यपरिहाराय भक्तिविक्षेपककर्मादरं परित्यज्य दृढविश्वासेन भजेत्युक्तम् । जातायां तु विद्यायां न किंचित्कर्त्तव्यमस्तीति प्रश्नस्य द्वितीयव्याख्याभिप्रायकत्वे तु परमेश्वर एक एव प्रपञ्चात्मना जीवात्मना च बहुधा भाति । भेदप्रतीतिमूलभूताविद्याजनितलिङ्गशरीरस्य विद्यया नाशे चाध्यासनिवृत्त्या जीवः परमेश्वरेणैक्यं सिद्धमेव प्राप्नोति इति ॥ २४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशद्वादशके व्यधाद्गङ्गासहायकः ॥ १२ ॥ त्रयोदशे सत्त्ववृद्ध्या विद्योदय उदीर्यते ॥ गुणचेतो वियोगश्च श्लोकास्तत्र द्विर्वोर्द्धयः ॥ सैप्तोवाचेति सार्द्धाः षट्चत्वारिंशदनुष्टुभः ॥ १३ ॥ जीवाशयस्य त्रिगुणमयत्वात्त्रिगुणोपशमे जीवाशयच्छेदो भवतीत्याह—सत्वमिति ॥ सत्वं रजः तम इति बुद्धेः प्रकृतेरेव गुणा न त्वात्मन इति अतः सत्वेन सत्त्ववृद्ध्या अन्यतमौ हन्यात् रजस्तमोवृत्ती जयेदित्यर्थः । सत्त्वं च सत्यदया-

॥ श्रीभगवानुवाच ॥ सत्त्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः ॥ सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि ॥ १ ॥ सत्त्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः ॥ सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्तते ॥ २ ॥ धर्मो रजतमो हन्यात्सत्त्ववृद्धिरनुत्तमः ॥ आशु नश्यति तन्मूलो ह्यधर्म उभये हते ॥ ३ ॥ आगमोऽपः प्रजा देशः कालः कर्म च जन्म च ॥ ध्यानं मन्त्रोऽथ संस्कारो दशैते गुणहेतवः ॥ ४ ॥ तत्तत्सात्त्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते ॥ निन्दन्ति तामसं यत्तद्राजसं तदुपेक्षितम् ॥ ५ ॥

दिवृत्तिरूपमुपशमात्मकेन सत्वेनैव हन्यात् ॥ १ ॥ सत्वादिति ॥ वृद्धात्सत्वात्पुंसो मद्भक्तिरूपो धर्मो भवेत् । ततश्च रजस्तमोनिरासो भवत्येव । सात्विकानां पदार्थानामुपासनया सेवया सत्त्वं वृद्धं भवति ततो धर्मः प्रवर्तते ॥ २ ॥ धर्म इति ॥ सत्त्वाद्वृद्धिर्यस्य सः अत एव न विद्यते उत्तमो यस्मात्सर्वोत्तमो भक्तिलक्षणो धर्मो रजस्तमश्च हन्यात् । तस्मिन् उभयस्मिन् हते सति तन्मूलः ते रजस्तमसी रागद्वेषादिना मूलं यस्य स विद्याप्रतिबन्धकः अधर्मोऽप्याशु विनश्यति ॥ ३ ॥ आगम इति ॥ आगमः शास्त्रम् अपः आपः । दीर्घाभाव आर्षः। आगमोऽर्थ इत्यपि पाठः।प्रजाः पुत्रः जनाश्च देशः काश्यादिः कालो वसन्तादिः कर्म वेदोक्तं जन्म ब्राह्मणादि सत्कुले जन्म दीक्षादिकं च ध्यानं च देवादीनां मन्त्रो द्वादशाक्षरादिः संस्कारः जातकर्मादिः एते आगमादयो दश गुणानां वृद्धिहेतवः ॥ ४ ॥ तदिति ॥ एषामागमादीनां मध्ये यद्यद्वृद्धा ज्ञानवृद्धाः प्रचक्षते प्रशंसन्ति तत्तदेव सात्त्विकम् । यद्यच्च निन्दन्ति तत्तामसम् । यत्तु तैर्वृद्धैरुपेक्षितं न च स्तुतं न च निन्दितं तद्राजसम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सात्त्विकानीति ॥ सत्वगुणस्य विवृद्धये पुमान् तेषु सात्त्विकान्येव साधनानि सेवेत । ततः सात्त्विकसेवातो भक्तिलक्षणो धर्मो भवति ततश्च यावत्स्मृतिरात्मसाक्षात्कारः यावच्च अपोहनं देहद्वयतत्कारणभूतगुणत्रयापोहः तावत्पर्यन्तं ज्ञानं भवति तत्र सात्त्विकानि निवृत्तिशास्त्राण्येव सेवेत न प्रवृत्तिपाखण्डशास्त्राणि तीर्थजलान्येव सेवे त न गन्धोदकसुरादीनि प्रजाजनाः निवृत्तान् जनान् सेवेत न प्रवृत्तिपरान् । विविक्तमेव देशं सेवेत न रथ्याद्यूतादिदेशान् । कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्रदोषनिशीथादीन् । कर्म च नित्यनैमित्तिकमेव सेवेत न काम्याभिचारादीनि । जन्म च वैष्णवदीक्षालक्षणं सेवेत न शाक्तक्षुद्रदीक्षारूपम् । ध्यानं च श्रीविष्णोरेव कुर्यान्न कामिनीसखिविद्विषाम् । मन्त्रं च प्रणवादिकमेव जपेन्न काम्यक्षुद्रादीन् । संस्कारं चात्मशोधकमेव कुर्यान्न केवलं देहगृहादिशोधकं स्नानमार्जनादिकम् । अन्यथा रजस्तमोवृद्धिरपि स्यादित्याशयः॥६॥ वेणुसङ्घर्षज इति ॥ वेणूनां सङ्घर्षाज्जातोऽग्निर्यथा स्वत एवोत्पन्नाभिर्ज्वालाभिस्ततस्वकारणभूतं वेणुवनं सर्वं दग्ध्वा स्वयमपि शाम्यति एवं तत्क्रियः तस्याग्नेरिव क्रिया व्यापारो यस्य सः गुणव्यत्ययाज्जातो देहोऽपि स्वत उत्पन्नेन ज्ञानेन स्वकारणभूतान् गुणान्निरस्य स्वयं शाम्यति ॥ ७ ॥ विदन्ति इति ॥ हे कृष्ण यद्यपि केचित् मर्त्याः प्रायेण

सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये ॥ ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनम् ॥ ६ ॥ वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनम् ॥ एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ॥ ७॥ उद्धव उवाच ॥ वदन्ति मर्त्याः प्रायेण विषयान्पदमापदाम् ॥ तथापि भुञ्जते कृष्ण तत्कथं श्वखराजवत् ॥ ८ ॥ श्रीभगवानुवाच ॥ अहमित्यन्यथा बुद्धिः प्रमत्तस्य यथा हृदि ॥ उत्सर्पति रजो घोरं ततो वैकारिकं मनः ॥ ९ ॥ रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ॥ ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः ॥ १० ॥ करोति कामवशगः कर्माण्यविजितेन्द्रियः ॥ दुःखोदर्काणि संपश्यन्रजोवेगविमोहितः ॥ ११ ॥

विषयान् आपदां दुःखानां पदं स्थानं विदन्ति जानन्ति तथापि तत् तान् कथं भुञ्जते कुतो न ततो विरक्ता भवन्ति । श्वानो यथा भर्त्स्यमाना अपि शुनीमुच्छिष्टग्रासं वा भुञ्जते । खरा यथा पद्भ्यां ताड्यमाना अपि खरीमनुधावन्ति । अजा यथा हन्तुमानीता अपि अजां प्रतिधावन्ति । तद्वदेतेऽपि कथं स्वपराभवमननुसन्दधाना विषयासक्ता भवन्ति इत्यर्थः ॥८॥ मिथ्याभिनिवेशेन भुञ्जते इति सहेतुकमाह—अहमिति ॥ प्रमत्तस्य विचारशून्यस्याविवेकिन आदौ देहादावहमिति अन्यथा मिथ्याबुद्धिर्हृदि यथावदुत्सर्पति उत्पद्यते ततोऽहंबुद्धेश्च वैकारिकं सत्त्वकार्यत्वात्सत्त्वप्रधानमपि मनः प्रति घोरं दुःखकारणं रजः उत्सर्पति मनो व्याप्नोतीत्यर्थः॥९॥ रज इति ॥ दुर्मतेः अविवेकिनः रजोयुक्तस्य च मनसः प्रथमम् इदं भोग्यमिति संकल्पः ततश्च इदमेवमिदमेव भोग्यमिति सविकल्पः सविशेषः संकल्पः भोग्यताविषयको वृत्तिविशेषः स्यात् । ततश्च अहोरूपमहो माधुर्यमिति गुणध्यानात् दुःसहः कामो भोगाभिनिवेशः स्यात् भवति ॥ १० ॥ करोतीति ॥ अतो यतो रजोगुणवेगेन विमोहितः अत एवाजितेन्द्रियः अत एव कामवशगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो दुःखफलानि संपश्यन् जानन्नपि कर्माणि विषयभोगोपायान् करोति ॥ ११ ॥ एवं चेत्कस्यापि दुःखनिवृत्तिर्न स्यात्तत्राह—रज इति ॥ विद्वान् विवेकी तु यत् यद्यपि कदाचित् रजस्तमोभ्यां विक्षिप्ता धीर्यस्य तथाभूतो भवति उपलक्षणतया मूढधीश्च भवति तथापि विषयेषु दोषदृष्टिः पुनः अतन्द्रितः आलस्यरहितः प्रयत्नेन मनो युञ्जन् निरुन्धन् विषयेषु न सज्जते ॥ १२ ॥ एवमपि मनोनिरोधाशक्तौ सुखोपायमाह—अप्रमत्त इति ॥ अनिर्विण्णः मनसो दुर्धरत्वात् विलम्बे सत्यप्यौदासीन्यरहितः अप्रमत्तः सावधानः जितश्वासो जितासनश्च सन् यथाकालं त्रिषवणं शनैः मयि परमानन्दे मनोऽर्पयन् अनुयुञ्जीत स्थिरीकुर्यादित्यर्थः ॥ १३ ॥ एतावानिति ॥ सर्वतो विषयत आकृष्य मनो यथा यथावत् अद्धा साक्षान्मय्यावेश्यते स्थिरीक्रियत एतावानेव योगो मच्छिष्यैः सनकादिभिरपि मत्तः श्रुतः ततोऽन्येभ्य आदिष्टः । यद्वा । मच्छिष्यैः सनकादिभिः आदिष्टः मत्तः श्रुतः । यद्वा । सनकादिभिः सहिताय ब्रह्मण इति शेषः । मयाऽऽदिष्टः ॥ १४ ॥ यदेति ॥ हे केशव यदा यस्मिन् काले येन रूपेण

रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः ॥ अतन्द्रितो मनो युञ्जन्दोषदृष्टिर्न सज्जते ॥१२॥ अप्रमत्तोऽनुयुञ्जीत मनो मय्यर्पयञ्छनैः ॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः ॥ १३ ॥ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः ॥ सर्वतो मन आकृष्य मय्यद्धाऽऽवेश्यते यथा ॥१४॥ उद्धव उवाच ॥ यदा त्वं सनकादिभ्यो येन रूपेण केशव ॥ योगमादिष्टवानेतद्रूपमिच्छामि वेदितुम् ॥१५॥ श्रीभगवानुवाच ॥ पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः ॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकान्तिकीं गतिम् ॥ १६ ॥ सनकादय ऊचुः ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ॥ कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः ॥ १७ ॥ श्रीभगवानुवाच ॥ एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ॥ ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥ १८ ॥ स मामचिन्तयद्देवः प्रश्नपारतितीर्षया ॥ तस्याहं हंसरूपेण सकाशमगमं तदा ॥ १९ ॥

त्वं सनकादिभ्यो योगमादिष्टवांस्तदेतद्रूपं वेदितुमिच्छामि तत्कथयेति शेषः ॥ १५ ॥ पुत्रा इति ॥ हिरण्यगर्भस्य चतुर्मुखस्य मानसाः इति तेषां सूक्ष्मबुद्धित्वं विषयासक्तिराहित्यं च सूचितम् । पुत्राः सनकादयः पितरं ब्रह्माणं प्रतिसूक्ष्मां दुर्ज्ञेयामैकान्तिकीं योगस्य गतिं परां काष्ठां पप्रच्छुः ॥१६॥ गुणेष्विति ॥ हे प्रभो गुणेषु विषयेषु स्वभावतो रागादिवशाच्चेतः आविशते आसक्तं भवति । तङार्षः । ते च गुणा विषयाः स्मर्यमाणा वासनारूपेण चेतसि प्रविशन्ति अतः अतितितीर्षोः संसारार्णवमतिक्रमितुमिच्छोः मुमुक्षोस्तेषां विषयाणां चेतसश्चान्योऽन्यं सन्त्यागो विभागः कथं स्यात्॥ १७॥एवमिति॥महान् देवोऽपि स्वयंभूरपि भूतभावनः सृष्ट्यादिकर्तापि एवं पृष्टो ध्यायमानो विचारयन्नपि । आर्षः शानच् चानश् वा । यतः कर्मधीः कर्मविक्षिप्तबुद्धिः।अतः प्रश्नस्य बीजं यदज्ञानादयं प्रश्नस्तन्नाभ्यपद्यत॥ १८॥स इति॥यदा स देवो ब्रह्मा प्रश्नस्य पारमुत्तरं तस्य तितीर्षया जिज्ञासया मामचिन्तयत् । हंसो यथा नीरं क्षीरं च पृथक् कर्तुं शक्तः एवमहं गुणांश्चेतश्चेति द्योतयितुमहं तदा हंसरूपेण तस्य ब्रह्मणः सकाशं समीपमगममुपगतः॥ १९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वेति ॥ तदा ते सनकादयो मां दृष्ट्वा ब्रह्माणमग्रतः कृत्वा उपव्रज्य मत्समीपमागत्य पादाभिवन्दनं कृत्वा को भवानिति पप्रच्छुः ॥ २० ॥ इतीति ॥ हे उद्धव इत्येवमहं तत्त्वजिज्ञासुभिर्मुनिभिः पृष्ट इति पृथक् वाक्यं तेभ्यो यदहमवोचमिति पृथग्वाक्यमतोऽहमिति द्विरुक्तिर्न दोषः । यद्वा । अहन्ताया इभ्यः स्वामी नियन्ता न तु नियम्यः इति अहमित्यस्य विशेषणम् । तन्मे वचनं निबोध ॥२१॥ देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागाद्यसंभवात्स्वयमेव विषयचेतसोर्विश्लेषो भवतीति वक्तुं प्रश्नखण्डनमिषेणैव तावदात्मानात्मविवेकं प्राह—वस्तुन इति ॥ हे विप्राः अयं युष्मत्प्रश्नः किमात्मविषयकः किंवा तदुपाधिभूतसङ्घातविषयकः । यद्यात्मविषयकस्तर्हि तस्य वस्तुनः परमार्थभूतस्यानानात्वे एकत्वे सति वो युष्माभिः कृतः ईदृशः बहुषु निर्धारणरूपः को भवानिति प्रश्नः कथं घटेत अत उत्तरमपि न संभवति । वक्तुर्वा मे मम क आश्रय इति आत्मन एकत्वात्कं जातिगुणादिकं भेदमाश्रित्योत्तरं वक्ष्यामीत्यर्थः ॥२२॥ सङ्घातविषयकत्व आह—पञ्चेति ॥ पञ्चात्मकेषु पञ्चसु महाभूतेषु अत एव वस्तुतः परमार्थतः समानेषु सत्सु देवमनुष्यादिशरीरेष्वपि को भवानिति वः प्रश्नो हि यस्मात् वाचारम्भो वाङ्मात्रेणारब्धो न परमार्थविचारपूर्वकम् अतोऽनर्थकः ॥ २३ ॥ मनसेति ॥ मनसा वचसा अन्यैरि-

दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवन्दनम् ॥ ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति ॥ २० ॥ इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा ॥ यदवोचमहं तेभ्यस्तदुद्धव निबोध मे ॥ २१ ॥ वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः॥कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः ॥ २२ ॥ पञ्चात्मकेषु भूतेषु समानेषु च वस्तुतः ॥ को भवानिति वः प्रश्नो वाचारम्भो ह्यनर्थकः ॥ २३ ॥ मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः ॥ अहमेव न मत्तोऽन्यदिति बुध्यध्वमञ्जसा ॥ २४ ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ॥ जीवस्य देह उभयं गुणाश्चेतो मदात्मनः ॥ २५ ॥ गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ॥ २६ ॥

न्द्रियैरपि यद्गृह्यते तत्तत् अहमेव मत्तोऽन्यन्नास्ति इत्यञ्जसा तत्वविचारेण बुद्ध्यध्वम् । एतेनैव सर्वात्मकोऽहमिति को भवानित्यस्योत्तरमुक्तम् ॥ २४ ॥ गुणेष्विति ॥ हे प्रजाः पुत्राः गुणेषु चेत आविशते । तङ्गर्षः । गुणाश्च चेतसि प्रविशन्ति तथापि गुणाश्चेतश्चैतदुभयं संग्रथितं मदात्मनः वस्तुतो ब्रह्मस्वरूपस्य जीवस्य देहः भोगायतनमध्यस्त उपाधिः न तु स्वरूपम् । अयमाशयः । यदि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं चित्तबुद्ध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेत् तदा ततो वियोगो न घटेत तस्य वास्तवं स्वरूपं तु अहं ब्रह्मैव चित्ताध्यासेन तु तत्स्वभावतया विषयैः संग्रथितम् अतः स्वस्य ब्रह्मभावनया विषयाणां मिथ्यात्वानुसंधानेन सर्वतो निर्विद्य भगवन्तं भजतो भवत्येव परिपूर्णरूपावस्थानमिति ॥ २५ ॥ गुणेष्विति ॥ अतः अभीक्ष्णं पुनः पुनः गुणसेवया तत्संस्कारेण गुणेष्वाविशत् आसक्तं यत् चित्तं ये च वासनारूपेण चित्ते प्रकर्षेण भवन्ति प्रविशन्ति तथाभूता गुणाश्चेत्येतदुभयं मद्रूपः सन् मदात्मस्वरूपसाक्षात्कारेण त्यजेत् ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदिति॥ जाग्रत् जागरः स्वप्नः सुषुप्तं चेत्येता बुद्धेरेव वृत्तयस्ताश्च न स्वाभाविक्यः।किंतु"सत्वाज्जागरणं विद्यात्"इत्यादिवक्ष्यमाणक्रमेण गुणत एव जीवस्तु तासां वृत्तीनां साक्षित्वेन ततो विलक्षणस्तदवस्थारहित एव विनिश्चितः ॥ २७ ॥ कथं तर्हि अहं जागर्मीत्यादिप्रतीतिस्तत्राह–यर्हीति ॥ यर्हि यस्मात् संस्रियते अनया इति संसृतिर्बुद्धिस्तया। अयं बन्धः एव आत्मनो गुणवृत्तिदः भवति । तस्मात्तुर्येऽवस्थात्रयातीते मयि स्थितः बन्धं जह्यात् त्यजेत् । तत्तदा च गुणचेतसां गुणानां चेतसश्चान्योऽन्यं त्यागो भवति ॥ २८ ॥ कथं संसृतिबन्धः कथं च तं जह्यात्तदाह–अहमिति ॥ अहंकारेण देहादावहमित्यभिमानेन कृतमात्मनो बन्धमर्थविपर्ययं आनन्दाद्यावरणेनानर्थहेतुं विद्वान् जानन् निर्विद्य दुःखमेतदिति विषयाद्विरज्य तुर्ये मयि स्थित एकतापन्नः संसारचिन्तां संसारहेतुभूतं देहाद्यभिमानं तत्कृतां भोगचिन्तां च त्यजेत् ॥ २९ ॥ यावदिति ॥ पुंसो यावन्नानार्थधीर्नानार्थेषु शरीरादिषु अहंममात्मिका धीः गुरूपदिष्टशास्त्राभ्यासजन्याभिर्युक्तिभिर्न निवर्तेत । तावत्सः अज्ञः आत्मज्ञानशून्यः जागर्त्यपि स्वपन्

जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ २७ ॥ यर्हि संसृतिबन्धोऽयमात्मनो गुणवृत्तिदः ॥ मयि तुर्यें स्थितो जह्यात्त्यागस्तद्गुणचेतसाम् ॥ २८ ॥ अहंकारकृतं बन्धमात्मनोऽर्थविपर्ययम्॥ विद्वान्निर्विद्य संसारचिन्तां तुर्ये स्थितस्त्यजेत् ॥ २९ ॥ यावन्नानार्थधीः पुंसो न निवर्त्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ ३० ॥ असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥ यो जागरे बहिरनुक्षणधर्मिणोऽर्थान् भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ॥ स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ ३२ ॥

स्वप्नान्पश्यन्निव भवति । स्वप्ने जागरणं यथेति॥३०॥असत्वादिति ॥ अन्येषां देवमनुष्यादिभावानामसत्त्वात् आत्मन्यविद्यमानत्वात् तत्कृता भिदा वर्णाश्रमादिभेदः । गतयः वेदबोधिताः स्वर्गादिफलानि हेतवः कर्माणि चास्यात्मनो मृषा अविद्याकल्पिता इत्यर्थः । अविद्यावद्विषय एव वेद इति भावः । यथा स्वप्नदृशः स्वप्नद्रष्टुः गत्यादयो मृषा तथेत्यर्थः ॥३१॥ युक्तिभिरित्युक्तं ता युक्तीराह–य इति ॥ त्रिगुणवृत्तिदृक् जागराद्यवस्थात्रयद्रष्टा इन्द्रियाणामीशः यो जागरे अनुक्षणधर्मिणः अनुक्षणं बाल्यतारुण्यादयः विनाशवैरस्यादयो वा धर्मास्सन्ति येषां तान् अर्थान् बहिः समस्तकरणैश्चक्षुरादिभिः भुङ्क्ते यश्च स्वप्ने हृदि तत्सदृक्षान् जागरदृष्टसदृशान् वासनामयान् विषयान् भुङ्क्ते यश्च सुषुप्ते संस्कारशेषायां बुद्धौ तान्सर्वानुपसंहरते सः स्मृत्यन्वयात् स्मृत्या प्रतिसन्धानेन सर्वावस्थास्वन्वयात् यः स्वप्नमद्राक्षं यश्च तदनन्तरं न किंचिदवेदिषं स एव एतर्हि जागर्मीति प्रत्ययात् हेतोः सः तिसृषु अपि अवस्थासु एक एव विश्वतैजसप्राज्ञभेदस्तु उपाधिकृत एव एतेन बाल्ययुवाद्यवस्थास्वपि प्रतिसन्धानेनात्मैक्यं द्रष्टव्यमिति ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमिति ॥ अत एवमुक्तप्रकारेण विमृश्य विचार्य गुणतो या एता मनसस्त्र्यवस्थास्ता मन्मायया स्वरूपावरकाविद्यया मयि मदंशभूते जीवे कृता न तत्त्वतः सन्तीति निश्चितोऽर्थः आत्मस्वरूपो यैस्ते यूयमनुमानैः सदुक्तिभिः सतामुपदेशैः श्रुतिभिश्च तीक्ष्णेन ज्ञानासिना अखिलानां संशयानामात्मनो देहादिभिन्नत्वाभिन्नत्वैकत्वानेकत्वादीनामाधिम् आधीयन्तेऽस्मिन्नित्याधिरहङ्कारस्तं संछिद्य हार्दं हृदि स्थितं मा मां भजत । यद्वा । अखिलसंशयानामाधिं पीडकं नाशकं मां भजत ॥ ३३ ॥ अनुमानानि दर्शयति—ईक्षेतेति ॥ इदं जगत् विभ्रममीक्षेत । तत्र हेतवः यतः मनसो विलासरूपं मनोविलासरूपत्वादित्यर्थः । एवमग्रेऽपि तथा दृष्टम् । विनष्टं विनश्वरम् अतिलोलं चञ्चलं च अलातचक्रवत् यथा स्वप्नः स्वप्नो यथेति दृष्टान्तौ एवम् अनुमिनुयादित्यर्थः । अत एकं विज्ञानमेकमेव मनसा कल्पितम् उरुधा विभाति त्रिधा देहेन्द्रियान्तःकरणरूपो योऽयं गुणविसर्गकृतो विकल्पो भेदः स माया अविद्याकल्पित इत्यर्थः ॥ ३४ ॥ दृष्टिमिति ॥ यस्माद्देहादिकं सर्वमात्मनि कल्पितं तस्मात्ततो देहादेर्दृष्टिं प्रतिनिवर्त्य तत्राहंममाभिमानं

एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः ॥ संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत मा-ऽखिलसंशयाधिम् ॥ ३३ ॥ ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रम् ॥ विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥ ३४ ॥ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः ॥ संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपातात् ॥ ३५ ॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् ॥ दैवादपेतमुत दैववशादुपेतं वासो यथा परिकृतं मदिरां मदान्धः ॥ ३६ ॥ देहोऽपि दैववशगः खलु कर्म यावत्स्वारम्भकं प्रति समीक्षत एव सासुः ॥ तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३७ ॥

त्यक्त्वा निजसुखानुभवः परमानन्दस्वरूपात्मानुसन्धानपरो भवेत् । तन्नैश्चल्यार्थं च निवृत्ततृष्णस्तूष्णीं निरीहश्च भवेत् । मनोवाक्कायव्यापाररहितो भवेदित्यर्थः । क्वचिदावश्यकाहारादिषु यद्यपीदं देहादिकं संदृश्यते तथापि यतः पूर्वमवस्तुबुद्ध्या आत्मातिरिक्तनिश्चयेन त्यक्तमतस्तत्पुनर्मोहाय न भवेदेव किंतु आनिपातात् देहपातपर्यन्तं तस्य स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ॥ ३५ ॥ देहमिति ॥ सिद्धः आत्मनिष्ठः दैवात् प्रारब्धकर्मवशादासनादुत्थितम् उत्थाय स्थितम् उपविष्टं वा ततः क्वचिदपेतं निर्गतं पुनस्तत्रैवोपेतमागतं वा नश्वरमिदं देहमपि न पश्यति नानुसन्धत्ते कुतोऽन्यत् । यतो येन देहेन स्वरूपमध्यगमत् तं देहम् । यद्वा । यतो यस्मात्कारणात् स्वरूपमध्यगमत् आत्मतत्त्वं ज्ञातवान् । यथा मदिरामदेनान्धः पुरुषः परिकृतं परिहृतं वासस्तत्र स्थितं पतितं वा नानुसन्धत्ते तद्वदित्यर्थः ॥ ३६ ॥ नन्वेवं देहोऽपि म्रियेतेत्याशङ्क्याह—देहोऽपीति ॥ सासुः प्राणेन्द्रियसहितः देहोऽपि यतो दैववशगः प्रारब्धाधीनः अतः स्वारम्भकं कर्म यावदस्ति तावत्पर्यन्तं प्रतिसमीक्षत एव जीवत्येव प्रतिबुद्धं ज्ञातं वस्तु आत्म-

८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्वं येन सः अधिरूढः प्राप्तः समाधिपर्यन्तो योगो येन स सप्रपञ्चं गृहपुत्रकलत्रधनादिसहितं तं देहं पुनर्न भजते अहंममतया न गृह्णाति । यथा प्रतिबुद्धः स्वाप्नं शरीरादिकं न भजते तद्वदित्यर्थः ॥ ३७ ॥ मयेति ॥ हे विप्राः साङ्ख्यमात्मानात्मविवेकः योगोऽष्टाङ्गः तयोर्गुह्यं रहस्यमेतन्मया वो युष्मभ्यमुक्तम् । युष्माकं मोक्षधर्मविवक्षया हंसरूपेणागतं यज्ञं यज्ञो वै विष्णुस्तमागतं मां जानीत । अत्रैव धर्मा अप्युपदिष्टा इति ज्ञेयम् । अत एव यत्तेन हंसरूपेण ब्रह्मणोऽभ्यात्थेत्यनुवादो भविष्यति ॥ ३८ ॥ अहमिति ॥ हे द्विजश्रेष्ठाः अहं योगसाङ्ख्यादीनां श्रीप्रभृतीनां च परायणं परमाश्रयः फलभूतश्चास्मि सत्यमनुष्ठीयमानो धर्मः ऋतं प्रमीयमाणो धर्मः तेजः प्रभावः ॥ ३९ ॥ मामिति ॥ अतः साम्यासङ्गादयो गुणाः अन्ये च सर्वे गुणाः । यद्वा । अगुणाः गुणपरिणामरूपा न भवन्ति किन्तु नित्याः साम्यासङ्गादयः गुणाः निर्गुणं निरपेक्षकमिति सुहृदं सर्वहिते रतं सर्वात्मानम् अत एव प्रियं मां भजति ॥ ४० ॥ इतीति ॥ इत्येवं मे मत्तो हंसरूपाच्छिन्नः सन्देहः गुणचित्तविश्लेषविषयको येषां ते सनकादयो मुनयः मां सभाजयित्वा

मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः ॥ जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया॥३८॥अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः ॥ परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ॥३९॥ मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् ॥ सुहृदं प्रियमात्मानं साम्याऽसङ्गादयो गुणाः ॥४०॥ इति मे च्छिन्नसंदेहा मुनयः सनकादयः ॥ सभाजयित्वा परया भक्त्याऽगृणत संस्तवैः॥४१॥ तैरहं पूजितः सम्यक्संस्तुतः परमर्षिभिः ॥ प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥४२॥ इति श्रीभागवत एकादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३॥ उद्धव उवाच ॥ वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ॥ तेषां विकल्पप्राधान्यमुताहो एकमुख्यता ॥ १ ॥ भवतोदाहृतः स्वामिन्भक्तियोगोऽनपेक्षितः ॥ निरस्य सर्वतः सङ्गं येन त्वय्याविशेन्मनः ॥२॥ श्रीभगवानुवाच ॥ कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ३ ॥

पूजयित्वा संस्तवैरगृणत तुष्टुवुः । तङार्षः ॥ ४१ ॥ तैरिति ॥ तैः परमर्षिभिः पूजितः संस्तुतश्चाहं परमेष्ठिनः पश्यतः सतः स्वकं धाम वैकुण्ठं प्रत्येयाय प्रतिगतवान् ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽकार्षीदेकादशस्य त्रयोदशे ॥ १३ ॥ चतुर्दशे परं श्रेयो भक्तिरेवेति वर्ण्यते ॥ साधनैर्ध्यानयोगश्च तत्र श्लोका नगाब्धयः[४७] ॥ चत्वार्यु[४]वाचवाक्यानि नवैवेदा[४९] अनुष्टुभः ॥ १४ ॥ वदन्तीति ॥ हे कृष्ण ब्रह्मपदं वेदपरं तस्य सर्वप्रमाणश्रेष्ठत्वात् तद्वादिन एव बहूनि तत्साधनानि वदन्ति तेषां किं विकल्पेन प्राधान्यम् । उताहो अथवा एकस्यैव मुख्यता ॥ १ ॥ भवतेति ॥ हे स्वामिन् न अपेक्षितम् अपेक्षा यस्मिन् स निष्कामो भक्तियोग एव मोक्षसाधनतया भवतोदाहृतः उक्तः । येन भक्तियोगेन सर्वतः सङ्गं विषयेष्वासक्तिं निरस्य त्यक्त्वा मनस्त्वय्याविशेत् ॥ २ ॥ कालेनेति ॥ इयं वेदसंज्ञिता वाणी प्रलये सति महता कालेन नष्टा ततः सृष्टेरादौ मया ब्रह्मणे प्रोक्ता । यस्यां मदात्मको मय्येवात्मा चित्तं येन स धर्म उक्तः ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनेति ॥ तेन ब्रह्मणा सा वाणी पूर्वजाय पुत्राय मनवे स्वायम्भुवाय प्रोक्ता ततः भृगुरादिर्येषां ते सप्त भृगुमरीच्यङ्गिरःपुलस्त्यपुलहक्रतवः ब्रह्माणः प्रजापतयश्च ते महर्षयश्च अगृह्णन् ॥ ४ ॥ तेभ्य इति सार्द्धम् ॥ तेभ्यः पितृभ्यः तत्पुत्रा देवादयोऽगृह्णन्निति संबन्धः । गुह्यकाः यक्षाः किंदेवाः क्लमस्वेददौर्गन्ध्यादिराहित्येन किं देवा मनुष्या वेति संदेहास्पदभूताः द्वीपान्तरमनुष्याः । एवं किन्नराः किंचिन्नरा इव मुखतः शरीरतो वा । किंपुरुषाः किंचित्पुरुषा इव वानरादयः ॥ ५ ॥ बह्व्य इति सार्द्धम् ॥ रजःसत्वतमांसि भुवः जन्मस्थानानि यासां ताः तेषां देवादीनां प्रकृतयः वासना बह्व्यः सन्ति याभिर्वासनाभिर्भूतानि देवासुरमनुष्यादीनि भिद्यन्ते स्वरूपसामान्येऽपि भेदेन व्यवह्रियन्ते तथा भूतानां मतयश्च याभिर्भिद्यन्ते यथाप्रकृति स्वस्वप्रकृत्यनुसारेणैव सर्वेषां प्राणिनां चित्रा वाचो वेदार्थव्याख्यानरूपाः स्रवन्ति मुखान्निःसरन्ति ॥ ६ ॥ एवमिति ॥ एवं प्रकृतिवैचित्र्यादेव केषांचिदध्ययनादिशून्यानामपि नृणामुपदेशपारम्पर्येण मतयो भिद्यन्ते । अपरे तु तत एव पाखण्डमतयो वेदविरुद्धार्थकल्पकमतयो भवन्ति ॥ ७ ॥ मदिति ॥

तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ॥ ततो भृग्वादयोऽगृह्णन्सप्त ब्रह्ममहर्षयः ॥ ४ ॥ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ॥ मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः ॥ किं देवाः किन्नरा नागा रक्षःकिंपुरुषादयः ॥ ५ ॥ बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ॥ याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा ॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हि ॥ ६ ॥ एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम् ॥ पारम्पर्येण केषांचित्पाखण्डमतयोऽपरे ॥ ७ ॥ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ॥ श्रेयो वदन्त्यनेकान्तं यथाकर्म यथारुचि ॥८॥ धर्ममेके यशश्चान्ये कामं सत्यं दमं शमम् ॥ अन्ये वदन्ति स्वार्थं वा ऐश्वर्यं त्यागभोजनम् ॥ केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान् ॥९॥ आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्मिताः ॥ दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानन्दाः शुचार्पिताः ॥ १० ॥

हे पुरुषर्षभ मन्मायामोहितधियः पुरुषा यथाकर्म यथारुचि अनेकान्तं नानाविधं श्रेयःफलं तत्साधनं च वदन्ति अतोऽग्रे क्वचिच्छ्रेयोरूपं कचित्साधनरूपं चोक्तम् ॥ ८ ॥ धर्ममिति सार्द्धम् ॥ एके मीमांसकाः स्वर्ग एव फलं धर्म एव तत्साधनमिति श्रेयो वदन्तीति सर्वत्र संबन्धः । "स्वर्गकामो यजेत" इति श्रुतेः । तथा काव्यालङ्कारकृतो यश एव श्रेयःसाधनं स्वर्गसुखप्रदम् इति वदन्ति । वात्स्यायनादयः कामं स्त्रीसम्भोगं श्रेयो वदन्ति । सत्यं यथार्थभाषणं दममिन्द्रियनिग्रहम् । शमं मनोनिग्रहं योगशास्त्रकृतः श्रेयस्साधनं वदन्ति । अन्ये च दृष्टार्थवादिनो दण्डनीतिकृतो वै प्रसिद्धमैश्वर्यमेव स्वार्थफलं वदन्ति अतः सामाद्युपायाश्रयः साधनमिति तेषां मतम् । केचिन्नास्तिकाः शास्त्रमर्यादात्यागपूर्वकं भोजनं विषयभोगमेव श्रेयः पुरुषार्थं वदन्ति । केचित् वैदिकाः यज्ञं श्रेयःसाधनं वदन्ति तपोदानादिनिष्ठाः तपोदानादि श्रेयःसाधनं वदन्ति ॥ ९ ॥ आद्यन्तवन्त इति ॥ एषां धर्मादिसाधनानां लोकाः फलानि आद्यन्तवतः अनित्या एव । तत्र हेतुः । कर्मभिर्विनिर्मिताः संपादिताः यत्कृतकं तन्नश्वरमिति व्याप्तेः । दुःखान्युदर्काः उत्तरफलानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येषां ते पुण्यक्षये पुनः पतनदुःखभोगादेरावश्यकत्वात् तमोनिष्ठाः मोहावसानाः क्षुद्रस्तुच्छ एवानन्दो येभ्यस्ते भोगदशायामसूयादिभिः शुचा शोकेनार्पिता व्याप्ताः ॥१०॥ मयीति ॥ हे सभ्य मयि सच्चिदानन्दविग्रहे अर्पितो निवेशित आत्मा मनो येन तस्य अत एव सर्वतः सर्वेषु वैषयिकसुखेषु निरपेक्षस्य पुंसो मया परमानन्दरूपेण आत्मना स्वरूपतया स्फुरता यत्सुखं स्यात् तद्विषयात्मनां विषयाविष्टचित्तानां कुतः स्यात् ॥ ११ ॥ अकिञ्चनस्येति ॥ अकिञ्चनस्य परिग्रहशून्यस्य तदपेक्षारहितस्य च दान्तस्य जितेन्द्रियस्य शान्तस्य जितमनसः अत एव समचेतसः रागद्वेषादिरहितस्य मया परमानन्दस्वरूपेणैव सन्तुष्टमनसः पुंसः सर्वा दिशः सुखमया एव । क्लीबभाव आर्षः । दिग्ग्रहणं कालावस्थादेरप्युपलक्षणम् ॥ १२ ॥ नेति ॥ मय्यर्पितात्मा पारमेष्ठ्यं ब्रह्माधिपत्यं नेच्छति । एवं महेन्द्रधिष्ण्यं स्वर्गराज्यं नेच्छति । सार्वभौमं कृत्स्नभूमण्डलाधिपत्यं नेच्छति । रसाधिपत्यं पातालादिस्वाम्यं नेच्छति । योगसिद्धीरणिमाद्यैश्वर्याणि नेच्छति । अपुनर्भवं मोक्षमपि नेच्छति । किं बहुना । मद्विना मां हित्वाऽन्यत् किमपि नेच्छति

मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः ॥ मयात्मना सुखं यत्तत् कुतः स्याद्विषयात्मनाम् ॥ ११ ॥ अकिंचनस्य दान्तस्य शान्तस्य समचेतसः ॥ मया संतुष्टमनसः सर्वाः सुखमया दिशः ॥ १२ ॥ न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् ॥ १३ ॥ न तथा मे प्रियतम आत्मयोनिर्न शंकरः ॥ न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥ १४ ॥ निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ॥ १५ ॥ निष्किंचना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः ॥ कामैरनालब्धधियो जुषन्ति यत् तन्नैरपेक्ष्यं न विदुः सुखं मम ॥ १६ ॥ बाध्यमानोऽपि मद्भक्तो विषयैरजितेन्द्रियः ॥ प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ १७॥

अहमेव तस्य प्रेष्ठ इत्यर्थः ॥ १३ ॥ न तथेति ॥ यथा भक्त इति वक्तव्यत्वे प्रत्यक्षत्वाद्भवानिति हर्षेणोक्तम् । यथा मे भक्तः प्रियतमस्तथात्मयोनिर्ब्रह्मा पुत्रोऽपि प्रियतमो न भवति । एवं शङ्करः मत्स्वरूपभूतोऽपि सङ्कर्षणो भ्राताऽपि श्रीर्भार्यापि आत्मा श्रीमूर्त्तिरपि प्रियतमा न भवति ॥ १४ ॥ निरपेक्षमिति ॥ अस्याङ्घ्रिरेणुभिरहं पूयेय । मदन्तर्वर्तिब्रह्माण्डानि पवित्रीकुर्यामित्याशयेन । यद्वा । तद्भक्त्यनिष्कृतिदोषात् पवित्रितः स्यामिति भावनया निरपेक्षत्वशान्तत्वादिगुणविशिष्टं मुनिमहं नित्यमनुव्रजामीति ॥ १५ ॥ निष्किञ्चना इति ॥ निष्किञ्चनाः परिग्रहरहिताः मय्येवानुरक्तचेतसः शान्ता रागादिरहिताः महान्तो निरस्ताहङ्काराः अखिलेषु जीवेषु वत्सलाः दयायुक्ताः कामैर्विषयैरनालब्धा अस्पृष्टा धीर्येषां ते एवंभूताः नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते निरपेक्षास्तैरेव लभ्यं मम सम्बन्धि यत्सुखं जुषन्ति सेवन्ते । तद्भाव आर्षः । तत्सुखमन्ये न विदुर्न लभन्ते ॥१६॥ आस्तामुत्तमभक्तकथा यतः प्राकृतभक्तोऽपि कृतार्थ एवेत्याह । यद्वा । यथा ज्ञानिप्रकरणे यथा दुराचारो ज्ञानी निन्दिष्यते ज्ञानित्वं च तस्य निषिध्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्त्वसंयतषड्वर्ग इत्यादिना तथात्र भक्तो न निन्द्यते इत्याह–बाध्यमान इति ॥ यतः अजितेन्द्रियः अतो विषयैर्बाध्यमानः आकृष्यमाणोऽपि मद्भक्तः प्रगल्भया प्रतिक्षणमेधमानतया समर्थया भक्त्या हेतुभूतया प्रायः विषयैर्नाभिभूयते केचिद्भक्त्या भासवन्तोऽभिभूता अपि दृश्यन्त इति प्रायोग्रहणम् ॥ १७ ॥ यथेति ॥ हे उद्धव यथा पाकार्थं प्रज्वालितः सुसमिद्धोऽग्निरेधांसि काष्ठानि कृत्स्नशः सर्वाणि एव भस्मसात् करोति तथा कामादिना कथंचिदपि जाता मद्विषया भक्तिः कृत्स्नश एनांसि समस्तानि पापानि भस्मसात् करोति ॥ १८ ॥ नेति ॥ ऊर्जिता प्रवृद्धा मम भक्तिर्मां यथा साधयति वशीकरोति तथा योगादयो न वशीकुर्वन्ति योगादयः न रोधयति। मामित्यत्र व्याख्याताः ॥ १९ ॥ भक्त्येति ॥ सतां प्रिय आत्माहं श्रद्धया युतया एकया अनन्यप्रयोजनया भक्त्यैव ग्राह्यः मन्निष्ठा भक्तिः श्वपाकानपि संभवात् जातिदोषादपि पुनाति ॥ २० ॥ धर्म इति ॥ सत्यं यथार्थभाषणं दया परदुःखप्रहाणेच्छा ताभ्यामुपेतो युक्तो दानयज्ञादिधर्मः तथा तपः अनशनादि तेनान्विता युक्ता विद्या शास्त्राभ्यासः मद्भक्त्य-

यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ॥ तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥१८॥ न साधयति मां योगो न सांख्यं धर्म उद्धव ॥ न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥ १९ ॥ भक्त्याऽहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् ॥ भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् ॥ २० ॥ धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ॥ मद्भक्त्यपेतमात्मानं न सम्यक् प्रपुनाति हि ॥ २१ ॥ कथं विना रोमहर्षं द्रवता चेतसा विना ॥ विनानन्दाश्रुकलया शुद्ध्येद् भक्त्या विनाऽऽशयः ॥ २२ ॥ वाग् गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ॥ विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥ २३ ॥ यथाऽग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते स्वरूपम् ॥ आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो माम् ॥ २४ ॥

पेतं रहितमात्मानमन्तःकरणं सम्यक् नैव प्रपुनाति ॥ २१ ॥ कथमिति ॥ रोमहर्षो रोमाञ्चः तस्माद्विना तथा द्रवता चेतसा द्रवो नाम भगवद्ध्यानकृतः शैथिल्यरूपो विकारविशेषः तं प्राप्नुवता चेतसा विना आनन्दजातया अश्रुकलया च विना कथं भक्तिरवगम्यत इति शेषः। भक्त्या विना चाशयोऽन्तःकरणं कथं शुद्ध्येदिति। यद्वा। भक्त्या हेतुना यद्द्रवचेतस्तेन विना कथं रोमहर्षः कथं वा आनन्दाश्रुकला रोमहर्षं विना आनन्दाश्रुकलया च विना कथमाशयः शुद्ध्येदिति ॥ २२ ॥ वागिति ॥ यस्य भक्तस्य वाक् गद्गदा मत्प्रेमवशात् स्खलिताक्षरा भवति यस्य चित्तं द्रवते बहिर्व्यवहारे शिथिलं भवति। तङार्षः। मद्वियोगानुसन्धानेनाभीक्ष्णं रुदति रोदिति । आर्षः प्रयोगः। मत्क्रीडारहस्यस्मरणेन क्वचिद्धसति च विलज्जः सन् क्वचिदुच्चैर्मच्चरितं गायति नृत्यति चेति स मद्भक्तियुक्तः पुमान् स्वदर्शनस्पर्शोपदेशादिभिर्भुवनं पुनाति। किं पुनः स्वाश्रयमाशयम् ॥ २३ ॥ भक्त्यैवात्मशुद्धिर्नान्यत इत्याह–यथेति ॥ यथाऽग्निना ध्मातं संतापितमेव हेम सुवर्णम् अन्तर्मलं जहाति न प्रक्षालनादिभिः स्वं निजं रूपमौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वल्यं च भजते प्राप्नोति तथैवात्मा जीवोऽपि मद्भक्तियोगेन कर्मानुशयं संसारहेतुभूतां कर्मवासनां विधूय अथानन्तरमेव मां भजति । स्वरूपभूतं मां प्राप्नोति इत्यर्थः ॥ २४ ॥ ननु ज्ञानादेव मुक्तिरिति शास्त्रसिद्धान्तात्कुतो भक्तियोगेनेत्युच्यते इत्याशङ्क्य भक्तेरवान्तरव्यापारो ज्ञानं न पृथगित्याशयेनाह–यथा यथेति ॥ मम पुण्याः पुण्यावहा या गाथाः कथास्तासां श्रवणैः अभिधानैश्चात्मान्तः करणं यथा यथा परिमृज्यते परिशोध्यते तथा तथाऽसौ जीवः सूक्ष्मं वस्तु आत्मतत्त्वं पश्यति । यथा यथाञ्जनसंप्रयुक्तं चक्षुर्दोषं जहाति तथा तथा रूपग्रहणे समर्थं भवति तथेति ॥ २५ ॥ किंच ज्ञानं नाम चित्तस्य मदाकारः परिणामः स च मां भजतः स्वत एव भवति । न च यत्नान्तरमपेक्षत इत्याशयेनाह–विषयानिति ॥ पूर्वार्द्धादौ यथेति उत्तरार्द्धादौ तथेति शेषः । अर्थः स्पष्ट एव ॥ २६ ॥ तस्मादिति ॥ यतो विषयध्यानं संसारकारणं मद्ध्यानं च मत्प्राप्तिसाधनं तस्मात् स्वप्नमायामनोरथैस्तुल्यं देहेन्द्रियविषयाणामसदभिध्यानमहंममतया चिन्तनं हित्वा मद्भावेन श्रवणस्मरणादिना भावितं शोधितं मनो मयि समाधत्स्व स्थिरं कुरु ॥ २७ ॥ स्त्रीणामिति ॥ आत्मवान् जितमनाः अतन्द्रितः अनलसश्च सन् स्त्रीणां स्त्रीसङ्गिनां च सङ्गं दूरतस्त्यक्त्वा क्षेमे निर्भये विविक्ते निर्जने स्थान

यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ॥ तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्तम् ॥२५॥ विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते ॥ मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥ २६ ॥ तस्मादसदभिध्यानं यथा स्वप्नमनोरथान् ॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितम् ॥२७॥ स्त्रीणां स्त्रीसङ्गिनां सङ्गं त्यक्त्वा दूरत आत्मवान् ॥ क्षेमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः ॥ २८ ॥ न तथाऽस्य भवेत् क्लेशो बन्धश्चान्यप्रसङ्गतः ॥ योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥ २९ ॥ उद्धव उवाच ॥ यथा त्वामरविन्दाक्ष यादृशं वा यदात्मकम् ॥ ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हसि ॥ ३० ॥

आसीनो मां चिन्तयेत् ॥ २८ ॥ नेति ॥ अस्य पुंसो यथा योषित्सङ्गात् यथा वा स्त्रीसङ्गिनां सङ्गतो बन्धः दुःखहेतुपापोत्पत्तिः स्त्र्याद्यधीनताप्रयुक्तक्लेशश्च भवेत्तथान्यप्रसङ्गतस्तौ न भवतः । अत्र स्त्रीसङ्गादपि स्त्रीसङ्गिसङ्गोऽधिकोऽर्थहेतुः । यतः स्त्रीसङ्गे लज्जा स्वीयप्रतिष्ठा च बाधिकाऽस्ति । तत्सङ्गिसङ्गे तु प्रायस्ते अपि न बाधिके । किञ्च योषित्सङ्गी यथा तत्कथाभिस्तस्यामासज्यते लज्जाभयादिकमपि त्याजयति न तथा योषिदपीति उत्तरत्र स्त्रीसङ्गिसङ्गनिर्देशः ॥ २९ ॥ यथेति ॥ हे अरविन्दाक्ष यथा येन प्रकारेण यादृशं यादृग्विशेषणविशिष्टं यदात्मकं यत्स्वरूपं वा त्वां मुमुक्षुर्ध्यायेदेतत्सविशेषं ध्यानं मे मह्यं त्वं वक्तुमर्हसीति त्वंपदवान् सुगमः पाठः । ध्यानं मे वक्तुमर्हसि इति मेपदद्वययुक्तपाठे तु मुमुक्षुस्त्वां यथा ध्यायेत्तन्मे वक्तुमर्हसीति जिज्ञासोः कथनायेति मे मम पुनरेतत्त्वद्दास्यमेव परमपुरुषार्थः । ननु ध्यानेन कृत्यमस्तीति स्वामिपादाः । परे तु मे मम तु एतद्ध्यानमिति संहतपाणिद्वयेन तच्चरणयुगं दर्शयतीत्याहुः । यद्वा । एतत् एतादृशं मे मदीयं ध्यानमिति स्पष्टं मे वक्तुमर्हसि इति अत्र व्याख्याने एतन्मे ध्यान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति भगवता वक्ष्यमाणध्यानस्य स्फुटत्वार्थमभिनियवाक्यम् । " इदमित्थमिति प्रायस्तव योगेश्वरेश्वर । " इतिवत् ॥ ३० ॥ सम इति युग्मम् ॥ निर्जितेन्द्रियः सन् इति प्रत्याहारोक्तिः । समदेशे चैलाजिनकुशोत्तरमास्तीर्णे आसने समकायः सन् यथा सुखमासीन इति नास्ति स्वस्तिकादिनियमः इत्युक्तम्। हस्तावुत्सङ्ग आधाय बहिर्दर्शनजन्यविक्षेपाभावार्थं स्वनासाग्रकृतेक्षणः सन् इत्यासनोक्तिः ॥ ३१ ॥ प्राणायाममाह—प्राणस्येति " प्राणबन्धनं हि सौम्य मनः " इति श्रुतेः । निर्जितप्राणस्यैव मनोजयो भवतीति तदर्थं श्लेष्मादिभिरापूरितमिडापिङ्गलाख्यनाडीविशेषरन्ध्ररूपं प्राणवायुसंचारमार्गं पूरककुम्भकरेचकैः शोधयेत्। "इडया पूरयेद्वायुं त्यजेत्पिङ्गलया ततः।" इति रीत्या विपर्ययेण रेचकपूरककुम्भकक्रमेण वा शनैरभ्यसेत् । प्राणमार्गशोधनमिति शेषः । अन्तःस्थस्य वायोर्बहिर्निःसारणं रेचकम् । बहिष्ठस्यान्तः प्रवेशनं पूरकम् । यथास्थितस्य स्तम्भनं कुम्भकम् । इडा वामनाडी पिङ्गला दक्षिणा ॥ ३२ ॥ प्राणायामो द्विधा सगर्भोऽगर्भश्च तत्र श्रेष्ठत्वात्प्रणवगर्भमाह—हृदीति ॥ मूलाधारादारभ्य अविच्छिन्नं सन्ततं घण्टानादतुल्यं बिसोर्णवत् कमलमृणालतन्तुवत् सूक्ष्मं हृदि सन्तमोङ्कारं प्राणेन उदीर्य ऊर्ध्वं द्वादशाङ्गुलपर्यन्तं नीत्वाऽथ तत्र मात्रातीते स्वरं पञ्चदशं नादं बिन्दुं वा संवेशयेत् ।

श्रीभगवानुवाच ॥ सम आसन आसीनः समकायो यथासुखम् ॥ हस्तावुत्सङ्ग आधाय स्वनासाग्रकृतेक्षणः ॥ ३१ ॥ प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ॥ विपर्ययेणापि शनैरभ्यसेन्निर्जितेन्द्रियः ॥ ३२ ॥ हृद्यविच्छिन्नमोंकारं घण्टानादं बिसोर्णवत् ॥ प्राणेनोदीर्य तत्राथ पुनः संवेशयेत् स्वरम् ॥ ३३ ॥ एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत् ॥ दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ॥ ३४ ॥ हृत्पुण्डरीकमन्तस्थमूर्ध्वनालमधोमुखम् ॥ ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम् ॥ कर्णिकायां न्यसेत् सूर्यसोमाग्नीनुत्तरोत्तरम् ॥ ३५ ॥ वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गलम् ॥ ३६ ॥ समं प्रशान्तं सुमुखं दीर्घचारुचतुर्भुजम् ॥ सुचारुसुन्दरग्रीवं सुकपोलं शुचिस्मितम् ॥ ३७ ॥

अथ पुनरपि तं च बिन्दुनादशिरस्कं कुर्यादित्यर्थः । यद्वा । मूलाधारादारभ्य मूर्द्धान्तपर्यन्तं बिसतन्तुवत्सूक्ष्ममविच्छिन्नं सन्तं हृदि मनसि प्राणेनोदीर्याभिव्यज्य अथ पुनस्तत्रोङ्कारे घण्टानादतुल्यं स्वरमुदात्तं नादं स्थिरीकुर्यात् ॥ ३३ ॥ एवमिति ॥ एवं प्रणवसंयुक्तं प्राणं त्रिषवणं त्रिसन्ध्यं दशकृत्वो दशवारान् यः समभ्यसेत् स मासादर्वागेव जितानिलः वशीकृतप्राणः स्यात् ॥ ३४ ॥ यादृशमित्यस्योत्तरं वक्तुं ध्येयपठिमाह—हृदिति सार्द्धम् ॥ अन्तःस्थं देहान्तर्वर्ति ऊर्ध्वनालमधोमुखं मुकुलितं च कदलीपुष्पसङ्काशं यद्धृत्पुण्डरीकं हृदयकमलमस्ति तदूर्ध्वमुखमधोनालमुन्निद्रं विकसितमष्टपत्रं सकर्णिकं च ध्यात्वा तत्कर्णिकायामुत्तरोत्तरम् सूर्यादीन् न्यसेत् मण्डलरूपेण स्थितान्ध्यायेत् ॥ ३५ ॥ वह्निमध्ये इति अर्द्धम् ॥ ध्यानमङ्गलं ध्यानस्य शुभविषयमेतद्वक्ष्यमाणं मम रूपं वह्निमण्डलमध्ये स्मरेत् ध्यायेत् ॥ ३६ ॥ सममिति ॥ सममनुरूपावयवं प्रशान्तं प्रसन्नं शोभनमुखं दीर्घाश्चारवश्चत्वारो भुजा यस्मिंस्तत् सुचारु अतिरम्यं सुन्दरा ग्रीवा यस्मिंस्तत् शोभनौ कपोलौ यस्य तत् शुचि शोभनं स्मितं मन्दहासो यस्य तत् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानेति ॥ समानयोः कर्णयोर्विन्यस्ते स्फुरन्ती मकराकारे कुण्डले यस्य तत् हेमतुल्ये पीते अम्बरे यस्य तत् घनमिव श्यामं श्रीवत्सस्य श्रियाश्च निकेतनं क्रमेण वक्षसि दक्षिणतो वामतश्च ताभ्यां युक्तमित्यर्थः ॥ ३८ ॥ शङ्खेति ॥ शङ्खादिभिर्विभूषितं नूपुरैःनूपुराभ्यां विलसन्तौ पादौ यस्य तत् कौस्तुभस्य प्रभया आयुतं समन्तादलंकृतम् । स्पष्टमन्यत् ॥ ३९ ॥ द्युमदिति सार्द्धम् ॥ द्युतिमद्भिः किरीटादिभिः आसमन्तात् युतमलंकृतं प्रसादेनानुग्रहेण शोभनं मुखमीक्षणे च यस्मिंस्तत् सुकुमारमतिकोमलं तदेवंभूतं मम रूपं सर्वेषु पादादिमूर्द्धान्तेष्वङ्गेषु मनो दधत् ध्यायेदिति धारणाध्याने उक्ते ॥ ४० ॥ इन्द्रियाणीति ॥ धीरः अव्यग्रः सन् इन्द्रियार्थेभ्यः शब्दादिविषयेभ्यो मनसा इन्द्रियाणि आकृष्य प्रत्याहृत्य तत्संकल्पविकल्पात्मकं मनः सारथिभूतया इदमेव चिन्तनीयं नान्यदिति निश्चयात्मिकया बुद्ध्या सर्वत आकृष्य मयि परमानन्दविग्रहे प्रकर्षेण नयेत्

समानकर्णविन्यस्तस्फुरन्मकरकुण्डलम् ॥ हेमाम्बरं घनश्यामं श्रीवत्सश्रीनिकेतनम् ॥ ३८ ॥ शङ्खचक्रगदापद्मवनमालाविभूषितम् ॥ नैपुरैर्विलसत्पादं कौस्तुभप्रभया युतम् ॥ ३९ ॥ द्युमत्किरीटकटककटिसूत्राङ्गदाऽऽयुतम् ॥ सर्वाङ्गसुन्दरं हृद्यं प्रसादसुमुखेक्षणम् ॥ सुकुमारमभिध्यायेत् सर्वाङ्गेषु मनो दधत् ॥ ४० ॥ इन्द्रियाणीन्द्रियार्थेभ्यो मनसाऽऽकृष्य तन्मनः ॥ बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥ ४१ ॥ तत् सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् ॥ नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखम् ॥ ४२ ॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ॥ तच्च त्यक्त्वा मदारोहो न किंचिदपि चिन्तयेत्॥४३॥एवं समाहितमतिर्मामेवात्मानमात्मनि॥विचष्टे मयि सर्वात्मञ्ज्योतिर्ज्योतिषि संयुतम्॥४४॥ ध्यानेनेत्थं सुतीव्रेण युञ्जतो योगिनो मनः ॥ संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥ ४५ ॥ इति श्रीभागवत एकादशस्कन्धे भगवदुद्धवसंवादे चतुर्दशोऽध्यायः ॥ १४ ॥

स्थापयेदित्यर्थः । यद्वा । सर्वतः सर्वाङ्गयुक्ते मयि ॥ ४१ ॥ तदिति ॥ तत्सर्वाङ्गव्यापकं चित्तं सर्वत आकृष्यैकत्राङ्गे धारयेत् । अन्यान्यङ्गान्यपि भूयः पुनर्न चिन्तयेत् । किंतु सुस्मितं मुखमेव भावयेत् चिन्तयेत् ॥ ४२ ॥ तत्रेति ॥ तत्र मुखे लब्धं पदं स्थानं स्थैर्यं येन तच्चित्तं ततोऽप्याकृष्य व्योम्नि व्योमवत्सर्वव्यापके सर्वाधारे निर्लेपे मयि धारयेत् । एवं मदारोहः सर्वव्यापकेन मया सहैकतां प्राप्तः संस्तदपि चिन्तनं त्यक्त्वा किंचिदपि ध्यातृध्येयध्यानविभागं न चिन्तयेत् । श्रीहंसदेवेन गुणचेतसोस्त्यागो य उक्तस्तस्यायमेव प्रकार इति ज्ञेयम् ॥ ४३ ॥ एवमिति ॥ एवं समाहिता मय्येव निश्चला मतिर्यस्य सः । आत्मनि स्वस्मिन् मां विचष्टे पश्यति । सर्वात्मनि मय्येवात्मानं च पश्यति । ज्योतिषि महाभूततेजसि संयुतमेकतां प्राप्तं दीपादिज्योतिरिवेति ॥ ४४ ॥ ध्यानेनेति ॥ सुतीव्रेणान्तरायानुपहतेन ध्यानेनेत्थं मनो युञ्जतः समादधतो योगिनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यभ्रमः देहादावहमिति ज्ञानभ्रमः अहं जानामीति क्रियाभ्रमोऽहं करोमीति देहेन्द्रियान्तःकरणाध्यासलक्षणः दृश्यद्रष्टृदर्शनरूपो वा भ्रमः आशु निर्वाणं लयं यास्यति॥४५॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमादेकादशचतुर्दशे ॥ १४ ॥ ततः पञ्चदशे प्रोक्ताः सिद्धयो धारणानुगाः ॥ ताश्च मुक्तेरन्तरायास्तत्र श्लोका षडर्थयः[३६] ॥ तावत्योऽनुष्टुभोऽप्यत्रोवाचवाचां[३६] त्रयं[३] मतम् ॥ १५ ॥ जितेति ॥ युक्तस्य स्थिरचित्तस्य । स्पष्टमन्यत् ॥ १ ॥ कयेति ॥ कया धारणया कास्वित् किंनाम्नी कथंप्रकारिका वा सिद्धिर्भवति ताश्च सर्वाः सिद्धयः कतिसङ्ख्याकाः एतद्ब्रूहि यतो भवानेवैतज्जानाति यतो योगिनां सिद्धिप्रद इति ॥ २ ॥ सिद्धय इति ॥ योगपारगैः सिद्धैरष्टादश सिद्धयः प्रोक्ताः तत्कारणभूता धारणाश्चाष्टादश प्रोक्ताः । तासां सिद्धीनां मध्ये अणिमादयोऽष्टौ सिद्धयो मत्प्रधाना अहमेव प्रधानं मुख्यः स्वभावत आश्रयो यासां ताः मयि ताः संपूर्णा अन्यत्र मत्सारूप्यं प्राप्तेषु तु किञ्चिन्न्यूना इति भावः।अनूर्मिमत्वादयः दश तु गुणहेतवः सत्त्वोत्कर्षहेतुका एव योगपारगैरित्युक्तेः।त्रिकालज्ञत्वादिक्षुद्र-

॥ श्रीभगवानुवाच ॥ जितेन्द्रियस्य युक्तस्य जितश्वासस्य योगिनः ॥ मयि धारयतश्चेत उपतिष्ठन्ति सिद्धयः ॥ १ ॥ उद्धव उवाच ॥ कया धारणया कास्वित्कथं वा सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् ॥ २ ॥ श्रीभगवानुवाच ॥ सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः ॥ तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥ ३ ॥ अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः ॥ प्राकाश्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ ४ ॥ गुणेष्वसङ्गो वशिता यत्कामस्तदवस्यति ॥ एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः ॥ ५ ॥ अनूर्मिमत्त्वं देहेऽस्मिन्दूरश्रवणदर्शनम् ॥ मनोजवः कामरूपं परकायप्रवेशनम् ॥ ६ ॥

सिद्धीरन्येऽपि जानन्ति इति भावः ॥ ३ ॥ अणिमेति ॥ अणिमादयस्तिस्रः सिद्धयो मूर्तेर्देहस्य भवन्ति । प्राप्तिर्नाम सिद्धिः सर्वप्राणिनामिन्द्रियैः सह तत्तदधिष्ठातृदेवतारूपेण सम्बन्धस्तेन तत्तद्विषयप्राप्तिः श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येषु भूविवरादिपिहितेष्वपि पदार्थेषु अपि प्राकाश्यं भोगदर्शनसामर्थ्यं प्राकाश्याख्या सिद्धिः शक्तीनां माया तदंशभूतानां प्रेरणम् । तत्रेश्वरे मायायाः अन्येषु तदंशानां यथेष्टं प्रेरणमीशिताख्या सिद्धिः ॥ ४ ॥ गुणेष्विति ॥ हे सौम्य गुणेषु विषयभोगेष्वसङ्गोऽनासक्तिर्वशिताख्या सिद्धिः ।यत्कामः यद्यत्सुखं कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोति कामावशायिताख्या सिद्धिः । एता अणिमादयोऽष्टौ सिद्धयो मे मम औत्पत्तिकाः स्वभावत एव सिद्धा निरतिशयाश्चेत्यर्थः॥५॥ गुणहेतुका आह–अनूर्मि इति ॥ अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यम् । दूरे उत्पन्नस्य शब्दस्य श्रवणं दूरे वर्तमानपदार्थस्य दर्शनं चेति सिद्धिद्वयं मनोजवः देहस्य मनोवद्वेगेन गतिः कामरूपं यथेष्टरूपधारणसामर्थ्यं स्वदेहं त्यक्त्वा परकाये प्रवेशः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वच्छन्देति ॥ स्वेच्छामृत्युः अप्सरोभिः सह या देवानां क्रीडास्तासामनुदर्शनं प्राप्तिः । यथा संकल्पसंसिद्धिः । संकल्पानुरूपतत्तद्वस्तुप्राप्तिः इयं किंचित्कायिकादिप्रयत्नसापेक्षेति कामावसायितातो भेदः कल्प्यः । अप्रतिहता आसमन्तात् गतिर्यस्याः सा आज्ञेति । यद्वा । अप्रतिहता आज्ञा गतिश्चेति एका सिद्धिरित्येके । अप्रतिहताज्ञत्वमप्रतिहतगतित्वमिति द्वे सिद्धी इत्यपरे ॥ ७ ॥ इदानीं पञ्च क्षुद्रसिद्धीराह—त्रिकालेति ॥ त्रिकालज्ञत्वं भूतभविष्यद्वर्त्तमानकालगतपदार्थज्ञानम् । अद्वन्द्वं शीतोष्णादिभिरनभिभवः । परचित्तादीत्यादिशब्देन गृहादिग्रहणम् । तेषामभिज्ञता साक्षात्कारः अग्न्यादीनां प्रतिष्टम्भः संस्तभनं कुतोऽप्यपराजयः ॥ ८ ॥ एताश्चेति ॥ स्पष्टम् ॥ ९ ॥ भूतेति ॥ भूतसूक्ष्मशरीरके मयि तन्मात्रं तदेकाकारं मनो धारयन् तन्मात्रं सूक्ष्माकारमुपास्ते यः स तन्मात्रोपासकः मम मदीयमणिमानमवाप्नोति यथेष्टसूक्ष्मतापत्त्या शिलादिषु सूक्ष्मवस्तुषु च प्रवेशसामर्थ्यं प्राप्नोतीत्यर्थः ॥ १० ॥ महतीति ॥ महत्यात्मनि ज्ञानशक्तिमहत्तत्वशरीरके मयि परे परमेश्वरे यथासंस्थं महत्तत्त्वाकारं मनो दधत् महिमानमवाप्नोति यथे-

स्वच्छन्दमृत्युर्देवानां सहक्रीडानुदर्शनम् ॥ यथासंकल्पसंसिद्धिराज्ञाऽप्रतिहताऽऽगतिः ॥७॥ त्रिकालज्ञत्वमद्वन्द्वं परचित्ताद्यभिज्ञता ॥
अग्न्यर्काम्बुविषादीनां प्रतिष्टम्भोऽपराजयः ॥८ ॥ एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः ॥ यया धारणया या स्याद्यथा वा स्यान्निबोध मे ॥ ९ ॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः ॥ अणिमानमवाप्नोति तन्मात्रोपासको मम ॥ १० ॥ महत्यात्मन्मयि परे यथासंस्थं मनो दधत् ॥ महिमानमवाप्नोति भूतानां च पृथक् पृथक् ॥११॥ परमाणुमये चित्तं भूतानां मयि रञ्जयन् ॥ कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् ॥१२॥ धारयन्मय्यहंतत्त्वे मनो वैकारिकेऽखिलम् ॥ सर्वेन्द्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः ॥ १३॥
महत्यात्मनि यः सूत्रे धारयेन्मयि मानसम् ॥ प्राकाश्यं पारमेष्ठ्यं मे विन्दतेऽव्यक्तजन्मनः ॥ १४ ॥

ष्टमहत्त्वस्वीकारसामर्थ्यं प्राप्नोतीत्यर्थः । यया सर्वमपि व्याप्तुं शक्नोति तथा भूतानामाकाशादीनां च मध्ये पृथक् पृथक् यद्यन्मदभिन्नतया चिन्तयति तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ॥ ११ ॥ परमेति ॥ वाय्वादिभूतानां ये परमाणवः तन्मये तदुपाधिके मयि मनो रञ्जयन् धारयन् योगी परमाणुरूपकालवत्सूक्ष्मवस्तुभवनसामर्थ्यरूपं लघिमानमवाप्नुयात् । सर्वथा गुरुत्वाभावार्थं कालपरमाणुतुल्यत्वमुक्तम् । पृथ्व्यादिपरमाणुषु गुरुत्वसद्भावात् । न च कालस्य निरवयवत्वात्तत्परमाण्वसंभवः शङ्कनीयः । गौणवृत्त्या सूक्ष्मांशे तात्पर्यात् । "स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम् ।" इत्युक्तेः ॥१२॥ धारयन्निति ॥ वैकारिके सात्विकेऽहङ्कारे तदुपाधौ मयि अखिलमेकाग्रं मनो धारयन् मन्मनाः मदुपासकः सर्वप्राणीन्द्रियाणामात्मत्वमधिष्ठातृत्वरूपां प्राप्त्याख्यां सिद्धिं प्राप्नोति ॥ १३ ॥ महतीति ॥ क्रियाशक्तिप्रधानं महत्तत्वमेव सूत्रं तदुपाधौ मयि यो मानसं धारयेत् सः अव्यक्ताज्जन्म यस्य सूत्रस्य तस्य तदुपाधेर्मम सम्बन्धि पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाश्यं विन्दत इत्यन्वयः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णाविति ॥ अधीश्वरे त्रिगुणमायानियन्तारि विष्णौ व्यापके अत एव कालविग्रहे कलयितृरूपे अन्तर्यामिणि यश्चित्तं धारयेत् स क्षेत्राणां देहादीनां क्षेत्रज्ञानां तदुपाधिकजीवानां च चोदनां प्रेरणसामर्थ्यरूपम् ईशित्वमवाप्नोति । न तु विश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः जगद्व्यापारवर्जमिति शरीरकसूत्रात् ॥१५॥ नारायण इति ॥ तुरीयाख्ये विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुरित्युक्तलक्षणे । यस्य स्थूलं सूक्ष्मं चेति कार्यद्वयं कारणं माया च नोपाधिः किन्तु तुरीयं सच्चिदानन्दाकारं तस्मिन् । " ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ " इत्युक्तभगवच्छब्देन शब्दिते कथिते ऐश्वर्यादिमति नारायणे मयि मनो दधत् मद्धर्मा योगी वशितां गुणकार्येष्वनासक्तिरूपां सिद्धिमियात्प्राप्नुयात् ॥ १६ ॥ निर्गुण इति ॥ निर्गुणे ब्रह्मणि व्यापके मयि विशदं प्राणायामादिभिः शुद्धं मनो धारयन् यत्र परमान न्दप्राप्तौ सर्वोऽपि कामः अवसीयते समाप्यते निवर्त्तते तं परमानन्दं कामावसायिताख्यां सिद्धिं प्राप्नोति ॥ १७ ॥ गुणहेतुकसिद्धीनां धारणा

विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे॥स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनाम्॥१५॥नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते॥मनो मय्यादधद्योगी मद्धर्मा वशितामियात् ॥१६॥ निर्गुणे ब्रह्मणि मयि धारयन् विशदं मनः ॥ परमानन्दमाप्नोति यत्र कामोऽवसीयते ॥ १७ ॥ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि ॥ धारयन् श्वेततां याति षडूर्मिरहितो नरः ॥१८॥ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् ॥ तत्रोपलब्धा भूतानां हंसो वाचः श्रृणोत्यसौ ॥१९॥ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि ॥ मां तत्र मनसा ध्यायन्विश्वं पश्यति सूक्ष्मदृक् ॥२०॥ मनो मयि सुसंयोज्य देहं तदनु वायुना ॥ मद्धारणाऽनुभावेन तत्रात्मा यत्र वै मनः ॥ २१ ॥

आह—श्वेतेति ॥ शुद्धे गुणपारतन्त्र्यरहिते धर्ममये धर्मप्रवर्तके श्वेतद्वीपपतौ अनिरुद्धमूर्तौ मयि चित्तं धारयन् नरः श्वततों शुद्धतां गुणपारवश्यराहित्यं याति अतः क्षुत्पिपासादिषडूर्मिरहितश्च भवति ॥ १८ ॥ मयीति ॥ आकाशात्मनि आकाशवन्निर्मलः सर्वव्यापकश्चात्मा स्वरूपं यस्य तस्मिन् समष्टिरूपप्राणे तद्रूपे मयि मनसा घोषं नादमुद्वहन् चिन्तयन् असौ हंसो जीवः तत्राकाशे उपलब्धा ज्ञाता सन् तत्रस्थाः । यद्वा । उपलब्धाः अभिव्यक्ताः या भूतानां प्राणिनां चित्राः वाचस्ता दूरत एव श्रृणोति ॥ १९ ॥ चक्षुरिति ॥ त्वष्टा आदित्यस्तस्मिन् अपरिच्छिन्ने चक्षुः संयोज्य तं त्वष्टारं च चक्षुषि संयोज्य तत्रोभयसंयोगे मां मनसा ध्यायन् सूक्ष्मदृक् सन् दूरस्थमपि सर्वं विश्वं पश्यति ॥ २० ॥ मन इति ॥ मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य या मद्धारणा क्रियते तस्याः अनुभावेन प्रभावेण यत्र मनो याति तत्रात्मा देहोऽपि यातीत्यर्थः । यद्वा । मनः कर्तृ आत्मानं वायुना सह देहं च मयि सुसंयोज्य यत्र याति तत्र तदनु देहोऽपि याति ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ यदा मन उपादाय उपादानकारणं कृत्वा वशीकृत्य च यद्यद्देवादिरूपं बुभूषति भवितुमिच्छति तत्तन्मनोरूपं मनसोऽभीष्टं रूपं योगी भवेत् प्राप्नोति । प्राप्त्यर्थे भुवस्तङ्भाव आर्षः । यतो मद्योगबलं योऽहमचिन्त्यशक्तिर्नानाकारस्तस्मिन् मयि मनसो योगो धारणा तस्य बलं प्रभाव एवाश्रयः सर्वासां सिद्धीनां कारणमित्यर्थः ॥२२॥ परेति ॥ सिद्धः वशीकृतप्राणेन्द्रियसङ्घातो योगी परकायं विशन् यत्र प्रविविक्षति तत्रात्मानं भावयेत् चिन्तयेत् । ततः प्राणः प्राणप्रधानलिङ्गशरीरोपाधिः पिण्डं स्वदेहं हित्वा वायुभूतः बाह्यवायौ प्रविष्टस्तेन सह नासिकारन्ध्रद्वारा तं कायं प्रविशति । भृङ्गो यथा पुष्पात्पुष्पान्तरमनायासेन प्रविशति तद्वदिति ॥ २३ ॥ पिण्डं हित्वेत्युक्तं तत्प्रकारं कथयन् स्वच्छन्दमृत्युमाह–पार्ष्ण्येति ॥ पार्ष्ण्या पार्ष्णिना पादमूलेन गुदं मूलाधारमापीड्य संनिरुध्य प्राणं प्राणोपाधिमात्मानं क्रमेण हृदुरःकण्ठमूर्द्धस्वारोप्य ब्रह्मरन्ध्रेण द्वारेण ब्रह्म नीत्वा ब्रह्मेत्युपलक्षणं ब्रह्म वा अन्यद्वा यदपेक्षितं तत्स्थानं नीत्वा मनसा ध्यात्वा तनुमुत्सृजेत् त्यजेदित्यर्थः॥२४॥विहरिष्यन्निति ॥ सुरा आक्रीडन्ति

यदा मन उपादाय यद्यद्रूपं बुभूषति ॥ तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः ॥ २२ ॥ परकायं विशन् सिद्ध आत्मानं तत्र भावयेत् ॥ पिण्डं हित्वा विशेत् प्राणो वायुभूतः षडङ्घ्रिवत् ॥ २३ ॥ पार्ष्ण्याऽऽपीड्य गुदं प्राणं हृदुरःकण्ठमूर्धसु ॥ आरोप्य ब्रह्मरन्ध्रेण ब्रह्म नीत्वोत्सृजेत् तनुम् ॥२४॥ विहरिष्यन्सुराक्रीडे मत्स्थं सत्त्वं विभावयेत् ॥ विमानेनोपतिष्ठन्ति सत्त्ववृत्तीः सुरस्त्रियः ॥ २५ ॥ यथा संकल्पयेत् बुद्ध्या यदा वा मत्परः पुमान् ॥ मयि सत्ये मनो युञ्जंस्तथा तत्समुपाश्नुते ॥ २६ ॥ यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् ॥ कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम ॥ २७ ॥ मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः ॥ तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता ॥ २८ ॥

यस्मिंस्तत्सुराक्रीडं देवोद्यानादिकं तत्र विहर्तुमिच्छन् मत्स्थं मन्मूर्त्तिरूपं शुद्धं सत्वं यदा चिन्तयेत्तदा सत्ववृत्तीः सत्त्ववृत्तयः । पूर्वसवर्णदीर्घ आर्षः । सत्वांशभूताः सुरस्त्रियः अप्सरसो विमानेन तं प्रत्युपतिष्ठन्ति समीपे स्थिता भवन्ति ॥ २५ ॥ यथेति ॥ मत्परः मदाराधननिष्ठः पुमान् सत्ये सत्यसंकल्पे मयि मनो युञ्जन् यदा वा यस्मिन् काले अकालेऽपि । यथा वेति पाठे येन केन प्रकारेण यथःवत्प्रकारकं वस्तु बुद्ध्या संकल्पयेत् तदैव तथाप्रकारकं तद्वस्तु यथावत् समुपाश्नुते सम्यक् प्राप्नोति ॥ २६॥ य इति ॥ यो वै पुमान् ईशितुः सर्वनियन्तुः वशितुः स्वतन्त्रस्य । मत् इति ममेत्यर्थे । मम भावं भावनां स्वभावं वाऽऽपन्नः प्राप्तः तस्य चाज्ञा कुतश्चिदपि न विहन्येत प्रतिहता न भवेत् । यथा ममाज्ञा प्रतिहता न भवति तथेति एता गुणहेतवः ॥२७॥ क्षुद्रा आह–मद्भक्त्येति ॥ शुद्धसत्वस्य शुद्धचित्तस्य धारणाविदः त्रिकालज्ञस्य मम धारणां जानतः कुर्वतस्तस्य योगिनः स्वजन्ममृत्युभ्यामुपबृंहिता सहिता त्रैकालिकी त्रिकालवस्तुविषया बुद्धिर्जायते अनयैव परचित्ताद्यभिज्ञताऽपि निरूपिता ज्ञेया ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्नीति ॥ मद्योगशान्तचित्तस्य अग्न्यादिसर्वोपघातशून्यो योऽहं तद्विषयको यो योगो धारणा तेनैव शान्तं स्थितं चित्तं यस्य तस्य मुनेर्योगमयं प्राणायामादिभिः परिपक्वं वपुरग्न्यादिभिर्न हन्येत । यादसां जलचराणां मत्स्यादीनामुदकं यथाभिघातकं न भवति तथा तद्वपुषोऽग्न्यादयः अभिघातका न भवन्तीति । अनयैवाऽद्वन्द्वताऽपि व्याख्याता ॥२९॥ मद्विभूतीरिति ॥ यः श्रीवत्सादिभिर्विभूषिताः ध्वजादिभिश्च युक्ता मद्विभूतीः ममावतारान् ध्यायन् भवति स सर्वत्रापराजितो जयवान् भवेत्॥३०॥उपासकस्येति ॥ मामिति द्वितीयाऽर्षी । उपासकस्य भजतो मुनेर्योगिनः एवमुक्तप्रकारेण पृथक् पृथग्धारणया पूर्वकथिता अशेषतः सर्वाः सिद्धयो यथायोग्यमुपतिष्ठन्ति सम्प्राप्ता भवन्ति ॥ ३१ ॥ यद्वा किं नानाधारणाप्रयासेन एकयैव सर्वाः सिद्धयो भवन्तीत्याह—जितेन्द्रियस्येति ॥ दान्तस्य वशीकृतान्तःकरणस्य जितः श्वासः प्राणः आत्मा देहश्च येन तस्य मद्धारणां नारायणे तुरीयाख्ये इत्यत्रोक्तां धारणां धारयतः कुर्वतः पुंसो या सिद्धिर्दुर्लभा सा का न कापि दुर्लभेत्यर्थः ॥ ३२ ॥ तथापि सिद्धयो न प्रार्थ्या

अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः ॥ मद्योगश्रान्तचित्तस्य यादसामुदकं यथा ॥ २९ ॥ मद्विभूतीरभिध्यायञ्छ्रीवत्सास्त्रविभूषिताः ॥ ध्वजातपत्रव्यजनैः स भवेदपराजितः ॥ ३० ॥ उपासकस्य मामेवं योगधारणया मुनेः ॥ सिद्धयः पूर्वकथिता उपतिष्ठन्त्यशेषतः ॥ ३१ ॥ जितेन्द्रियस्य दान्तस्य जितश्वासात्मनो मुनेः ॥ मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा ॥ ३२ ॥ अन्तरायान् वदन्त्येता युञ्जतो योगमुत्तमम् ॥ मया संपद्यमानस्य कालक्षपणहेतवः ॥ ३३ ॥ जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः ॥ योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ॥ ३४ ॥ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः ॥ अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनाम् ॥ ३५ ॥

इत्याह—अन्तरायानिति उत्तमं मदुपासनात्मकं योगं युञ्जतः कुर्वतः योगिनः एताः सिद्धीरन्तरायान् विघ्नान् वदन्ति । वृद्धा इति शेषः । यतः एताः मया सम्पद्यमानस्य संप्राप्स्यतः मध्ये कालक्षपणहेतवः जन्मभोगादिना विलम्बहेतव इत्यर्थः ॥ ३३ ॥ जन्मेति ॥ जन्मादिभिर्यावतीर्यावत्यः । पूर्वसवर्णदीर्घ आर्षः । इह लोके सिद्धयो भवन्ति जन्मना यथा देवानां यथा च यादसामुदकस्तम्भः पक्षिणां खेचरता इत्यादिकाः औषधैः यथा वलीपलितराहित्यादयः तपसा विश्वामित्रादीनामिव नवीनलोकरचनासामर्थ्यादयः मन्त्रैर्यथा वशीकरणाद्याः ताः सर्वा अपि योगेनोक्तप्रकारकेण योगी प्राप्नोति । योगस्य गतिं परमफलं मत्सालोक्यादिकं तु अन्यैर्जन्मादिसाधनान्तरैर्न व्रजेत् न प्राप्नोति ॥ ३४ ॥ सर्वासामिति ॥ अहमेव सिद्धीनां हेतुः दाता पतिः पालकः प्रभुः स्वामी न केवलं सिद्धीनामेव हेत्वादिः । किन्तु तत्कारणस्य योगस्य साङ्ख्यस्य ज्ञानस्य तत्फलस्य मोक्षस्य च वेदवादिभिः प्रतिपादितस्य धर्मस्य तदुपदेष्टॄणां ब्रह्मवादिनां च हेत्वादिरहमेव ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

अहमिति ॥ सर्वेषां देहिनां जीवानामहमेवात्मा अन्तरः अन्तर्यामी बाह्यः व्यापकश्च अनावृतः अपरिच्छन्नः भूतेषु जरायुजादिचतुर्विधदेहेषु भूतानि यथान्तर्बहिश्च भवन्ति तथा स्वयमहमपि भवामीत्यर्थः ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशपञ्चदशे ऽयथाद्दङ्गासहायकः ॥१५॥ षोडशे तु हरेराविर्भावयुक्ता विभूतयः॥ प्रभावादिविशेषेण श्लोकाः सार्द्धाः कृतार्ध्धर्यः ॥ द्वे उवाचेति ४४॥ पादोनाः पञ्चवेदा अनुष्टुभः ॥ १६ ॥ त्वमिति ॥ त्वं साक्षात्परमं ब्रह्म अनाद्यन्तमुत्पत्तिविनाशरहितम् अपावृतं निरावरणं स्वतन्त्रं वा ब्रह्म त्वम् अतएव सर्वेषामपि भावानां पदार्थानां त्राणादयो यस्मात्सः त्वम् उपादानकारणमित्यर्थः । त्राणं रक्षणं स्थितिर्जीवनम् अप्ययो नाशः उद्भवः उत्पत्तिः ॥ १ ॥ उच्चेति ॥ हे भगवन् ब्राह्मणाः वेदरहस्यविद एव उच्चावचेषु भूतेषु स्थितमकृतात्मभिः अशोधितचित्तैः दुर्ज्ञेयमपि त्वां याथातथ्येन उक्तपरमार्थरूपेण उपासते ॥ २ ॥ येष्विति ॥ अतो दुर्ज्ञेयत्वात् येषु येषु च भावेषु पदार्थेषु परमर्षयो विवेकिनो भक्त्या त्वामुपासीनाः चिन्तयन्तः संसिद्धिं परमप्रेमलक्षणां भक्तिं ज्ञानं

अहमात्मान्तरो बाह्योऽनावृतः सर्वदेहिनाम् ॥ यथा भूतानि भूतेषु बहिरन्तः स्वयं तथा ॥ ३६ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे भगवदुद्धवसंवादे पञ्चदशोऽध्यायः ॥१५॥ उद्धव उवाच ॥ त्वं ब्रह्म परमं साक्षादनाद्यन्तमपावृतम् ॥ सर्वेषामपि भावानां प्राणस्थित्यप्ययोद्भवः ॥ १ ॥ उच्चावचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः ॥ उपासते त्वां भगवन् याथातथ्येन ब्राह्मणाः ॥ २॥ येषु येषु च भावेषु भक्त्या त्वां परमर्षयः ॥ उपासीनाः प्रपद्यन्ते संसिद्धिं तद्वदस्व मे ॥ ३ ॥ गूढश्चरसि भूतात्मा भूतानां भूतभावन ॥ न त्वां पश्यन्ति भूतानि पश्यन्तं मोहितानि ते ॥ ४ ॥ याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूते ॥ ता मह्यमाख्याह्यनुभावितास्ते नमामि ते तीर्थपदङ्घ्रिपद्मम् ॥ ५ ॥ श्रीभगवानुवाच ॥ एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर ॥ युयुत्सुना विनशने सपत्नैरर्जुनेन वै॥६॥ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकम् ॥ ततो निवृत्तो हन्ताऽहं हतोऽयमिति लौकिकः ॥ ७ ॥

वा प्रपद्यन्ते लभन्ते तत् वस्तु मे प्रयत्नेन वदस्व ॥ ३ ॥ गूढ इति ॥ हे भूतभावन यतस्त्वं भूतानामात्मान्तर्यामी भूतानां मध्ये गूढः अप्रकटः चरसि अतस्ते तव मायया मोहितानि भूतानि सर्वे पश्यन्तमपि त्वां न पश्यन्ति ॥ ४ ॥ या इति ॥ ते त्वया अनुभाविताः केनचिच्छक्तिविशेषेण संयोजिता याः काश्च काश्चिद्भूमौ दिवि रसायामधोलोके सर्वासु दिक्षु च ते तव विभूतयस्ता मह्यमाख्याहि । तीर्थानां पदमाश्रयं च ते तव यदङ्घ्रिपद्मं च तन्नमामि॥५॥एवमिति॥ हे प्रश्नविदां वर एवं यथा त्वं पृच्छसि तथा । एतदिति सामान्ये नपुंसकम् । एतदेव प्रश्नं प्रष्टव्यं विनशने कुरुक्षेत्रे सपत्नैः शत्रुभिर्युयुत्सुना योद्धुमिच्छता अर्जुनेनाप्यहं पृष्टः ॥ ६ ॥ युयुत्सोर्विभूतिप्रश्ने प्रसङ्गमाह–ज्ञात्वेति ॥ अहं हंतायं च मया हत इति लौकिको लोकवन्मोहितचित्तः अत एव राज्यनिमित्तं ज्ञातिवधं गर्ह्यं निन्द्यमधर्मं च ज्ञात्वा ततो युद्धान्निवृत्त आसीदिति शेषः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ तदा रणमूर्द्धनि स पुरुषश्रेष्ठो मया युक्त्या प्रतिबोधितः सन् यथा त्वमभिभाषसे पृच्छसि एवमेव संग्राममुखे मामभ्यभाषत अपृच्छत् । अतो यथा तं प्रत्युक्तवांस्तथा तवापि कथयामीत्याशयः ॥ ८ ॥ अहमिति ॥ हे उद्धव अमीषां भूतानामात्मेति सुहृत्पालक इति ईश्वरः नियन्तेति चाहमुपास्य इति सर्वत्र शेषः । तथा सर्वाणि भूतान्यप्यहं तेषां भूतानां स्थित्यादयो यतो भवन्ति । सोऽप्यहमिति अस्मच्छब्दसमानाधिकरणाः प्रथमान्ता द्वितीयान्ताश्च सर्वा विभूतयस्ताश्चोपासनार्थं कथ्यन्ते । षष्ठी च कचिन्निर्द्धारणे कचिच्च सम्बन्धे यथायोग्यं द्रष्टव्या ॥ ९ ॥ विशेषतो विभूतीराह–अहमिति ॥ गतिमतां गतिरहं कलयतां वशीकुर्वतां मध्ये कालोऽहं गुणानां सत्त्वादीनां यत्साम्यं प्रधानं तदहं गुणिनि गुणवति पदार्थे औत्पत्तिकः स्वाभाविको यो गुणः सोऽहम् ॥ १० ॥ गुणिनामिति ॥ गुणिनामुद्भूतसत्त्वादिगुणत्रयवतां सूत्रं प्रथमकार्यं क्रियाप्रधानं महतां बृहतां महान्महत्तत्वमहं सूक्ष्माणां वस्तूनां मध्ये तिसूक्ष्मो जीवोऽहं सूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वम् ॥ ११ ॥ हिरण्येति ॥ वेदानां

स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः ॥ अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि ॥ ८ ॥ अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः ॥ अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥ ९ ॥ अहं गतिर्गतिमतां कालः कलयतामहम् ॥ गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः ॥ १० ॥ गुणिनामप्यहं सूत्रं महतां च महानहम् ॥ सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥ ११ ॥ हिरण्यगर्भो वेदानां मन्त्राणां प्रणवस्त्रिवृत् ॥ अक्षराणामकारोऽस्मि पदानि च्छन्दसामहम् ॥ १२ ॥ इन्द्रोऽहं सर्वदेवानां वसूनामस्मि हव्यवाट् ॥ आदित्यानामहं विष्णू रुद्राणां नीललोहितः ॥ १३ ॥ ब्रह्मर्षीणां भृगुरहं राजर्षीणामहं मनुः ॥ देवर्षीणां नारदोऽहं हविर्धान्यस्मि धेनुषु ॥ १४ ॥ सिद्धेश्वराणां कपिलः सुपर्णोऽहं पतत्रिणाम् ॥ प्रजापतीनां दक्षोऽहं पितॄणामहमर्यमा ॥ १५ ॥ मां विद्ध्युद्धव दैत्यानां प्रह्लादमसुरेश्वरम् ॥ सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसाम् ॥ १६ ॥ ऐरावतं गजेन्द्राणां यादसां वरुणं प्रभुम् ॥ तपतां द्युमतां सूर्यं मनुष्याणां च भूपतिम् ॥ १७ ॥

वेदाध्यापकानां हिरण्यगर्भो ब्रह्माऽहम् । मन्त्राणां मध्ये त्रिवृत् । त्रयाणामकारोकारमकाराणां वृत् वर्तनं यस्मिन् स प्रणव ओंकारः अहम् । छन्दसां पदानि त्रिपदा गायत्र्यहम् ॥ १२ ॥ इन्द्र इति ॥ वसूनां मध्ये हव्यवाट् पावकोऽहम् । आदित्यानां मध्ये विष्णुर्वामनोऽहम् । विष्णवाख्य आदित्यो वा । एकादशसंख्याकानां रुद्राणां मध्ये नीललोहिताख्यो रुद्रोऽहम् ॥ १३ ॥ ब्रह्मेति ॥ मनुः स्वायंभुवः धेनुषु हविर्धानी कामधेनुरहम् । स्फुटमन्यत् ॥ १४ ॥ सिद्धेति ॥ पतत्रिणां पक्षिणां राजा सुपर्णो गरुडोऽहम् अर्यमा तेषां राजाहम् । स्फुटमन्यत् ॥ १५ ॥ मामिति ॥ नक्षत्रौषधीनां प्रभुं सोमं चन्द्रं मां विद्धि । यक्षरक्षसां प्रभुं धनेशम् । स्फुटमन्यत् ॥ १६ ॥ ऐरावतमिति ॥ यादसां जलचराणां प्रभुं वरुणं मां विद्धि । तपतां तापवतां द्युमतां दीप्तिमतां च मध्ये सूर्यं मां विद्धि । स्फुटमन्यत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

उच्चैरिति ॥ संयमतां दण्डयतां मध्ये यमः।छत्वाभाव आर्षः । स्फुटमन्यत् ॥ १८ ॥ नागेति ॥ शृङ्गिणां दंष्ट्रिणां च राजा मृगेन्द्रः सिंहः । तूर्यः संन्यासः प्रथमो ब्राह्मणः । स्फुटमन्यत् ॥१९॥ तीर्थानामिति ॥ स्रोतसां प्रवाहरूपाणां तीर्थानां मध्ये गङ्गाऽहम् । सरसां स्थिरोदकाशयानां समुद्रोऽहम् धनुष्मतां मध्ये त्रिपुरघ्नो रुद्रोऽहम् । स्फुटमन्यत् ॥ २० ॥ धिष्ण्यानामिति ॥ धिष्ण्यानां निवासस्थानानां मध्ये मेरुरहमस्मि । गहनानां दुर्गमानां हिमालयोऽहम् वनस्पतीनां वृक्षाणां मध्ये अश्वत्थोऽहम् । ओषधीनां फलपाकान्तस्थायिनीनां मध्ये यवोऽहम्॥२१॥ पुरोधसामिति ॥ ब्रह्मिष्ठानां वेदार्थनिष्ठानां बृहस्पतिरहम्। सेनान्यां सेनापतीनां स्कन्दोऽहम्। अग्रण्यां सन्मार्गप्रवर्तकानां भगवान् अजो ब्रह्माऽहम् । स्फुटमन्यत् ॥२२॥ यज्ञानामिति ॥ शुचीनां शोधकानां मार्जनतक्षणघर्षणादीनां मध्ये वाय्वादिरूपः शुचिः शोधकोऽहम् । स्फुटमन्यत् ॥२३॥ योगानामिति ॥ योगानां योगाङ्गानामष्टानां मध्ये आत्मसंरोधः समाधिरहम् । विजिगीषतां जयमिच्छताम्। शता आर्षः । मन्त्रो नीतिरहम् । कौशलानां विवेकादिनैपुणानां मध्ये आन्वीक्षिकी

उच्चैःश्रवास्तुरङ्गाणां धातूनामस्मि काञ्चनम् ॥ यमः संयमतां चाहं सर्पाणामस्मि वासुकिः ॥ १८ ॥ नागेन्द्राणामनन्तोऽहं मृगेन्द्रः शृङ्गिदंष्ट्रिणाम् ॥ आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ ॥ १९॥ तीर्थानां स्रोतसां गङ्गा समुद्रः सरसामहम् ॥ आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मताम् ॥२०॥ धिष्ण्यानामस्म्यहं मेरुर्गहनानां हिमालयः ॥ वनस्पतीनामश्वत्थ ओषधीनामहं यवः ॥ २१ ॥ पुरोधसां वसिष्ठोऽहं ब्रह्मिष्ठानां बृहस्पतिः ॥ स्कन्दोऽहं सर्वसेनान्यामग्रण्यां भगवानजः ॥ २२ ॥ यज्ञानां ब्रह्मयज्ञोऽहं व्रतानामविहिंसनम् ॥ वाय्वग्न्यर्काम्बुवागात्मा शुचीनामप्यहं शुचिः ॥ २३ ॥ योगानामात्मसंरोधो मन्त्रोऽस्मि विजिगीषताम् ॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनाम् ॥ २४ ॥ स्त्रीणां तु शतरूपाऽहं पुंसां स्वायंभुवो मनुः ॥ नारायणो मुनीनां च कुमारो ब्रह्मचारिणाम् ॥२५॥ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः ॥ गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहम् ॥२६॥ संवत्सरोऽस्म्यनिमिषामृतूनां मधुमाधवौ ॥ मासानां मार्गशीर्षोऽहं नक्षत्राणां तथाऽभिजित् ॥ २७॥

आत्मानात्मविवेकविद्याऽहम् । पञ्चविधानां ख्यातिवादिनामेवमिदमेवं वेति यो दुरन्तो विकल्पः सोऽहम्।ख्यातयश्च "आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा । तथा निर्वचनख्यातिरित्येतत् ख्यातिपञ्चकम् ॥ विज्ञानशून्यमीमांसा तर्काद्वैतविदां मतम् ।" अन्या अपि ख्यातीः केऽपि वदन्ति । विस्तरोऽन्यत्र श्रीभागवतपर्यङ्के च ज्ञेयः ॥२४॥ स्त्रीणामिति ॥ कुमारः सनत्कुमारः । स्फुटमन्यत्॥२५॥धर्माणामिति ॥ धर्माणां संन्यासः भूताभयप्रदानमस्मिक्षेमाणामभयस्थानानां मध्ये अबहिर्मतिः अन्तर्निष्ठास्मि गुह्यानां सूनृतं प्रियवचनं मौनं चाहम् । नहि प्रियभाषणे मौने च पुरुषस्याभिप्रायो ज्ञायते । मिथुनानां तु यस्य देहार्द्धाभ्यां मिथुनमभूत् सः अज एव मुख्यं मिथुनमित्याशयः॥२६॥ संवत्सर इति ॥ अनिमिषामप्रमत्तानां मध्ये । नुडभाव आर्षः क्विबन्तमिषतेर्वा । संवत्सरोऽहमस्मि।ऋतूनां मधुमाधवौ चैत्रवैशाखौ वसन्त इत्यर्थः । तथा नक्षत्राणाम् अभिजित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहम् । उत्तराषाढा चतुर्थपादः श्रवणपञ्चदशांशश्च । तथा च श्रुतिः। "अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणायाः" इति॥ २७॥अहमिति ॥ युगानां कृतं कृतयुगम् । अहं धीराणां द्वन्द्वसहानां जितेन्द्रियाणां च मध्ये देवलः असितश्चाहम् । व्यासानां वेदविभागकर्तॄणां द्वैपायनोऽस्मि । कवीनां तीक्ष्णबुद्धीनां मध्ये आत्मवान् सूक्ष्मबुद्धिः काव्यः शुक्रोऽस्मि ॥२८॥ वासुदेव इति ॥ भगवताम् "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।" इत्येवंलक्षणानां वासुदेवश्चित्ताधिष्ठाता प्रथमव्यूहोऽहम् । किंपुरुषाणां वानराणाम् । स्फुटमन्यत् ॥२९॥ रत्नानामिति ॥ सुपेशसां सुन्दराणां पद्मकोशः । दर्भजातीनां काशदूर्वादीनां मध्ये कुशोऽस्मि। हविःषु चरुपुरोडाशादिषु घृतेषु गव्यमाज्यं घृतमहम्।स्फुटमन्यत् ॥ ३० ॥ व्यवसायिनामिति ॥ व्यवसायिनां धनाद्यर्जनपराणां लक्ष्मीर्धनादिसम्पदहम् । कितवानां छलयतां छलग्रहः छलसंकल्पोऽहम् । तितिक्षूणां क्षमावतां तितिक्षा क्षमाऽहम् । सत्त्ववतां धीराणां सत्वं धैर्यं सात्विकानां सत्वगुणो वाऽहम् ॥ ३१॥ ओज इति ॥ ओज इन्द्रियाणां

अहं युगानां च कृतं धीराणां देवलोऽसितः ॥ द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् ॥ २८ ॥ वासुदेवो भगवतां त्वं तु भागवतेष्वहम् ॥ किंपूरुषाणां हनुमान् विद्याध्राणां सुदर्शनः ॥२९॥ रत्नानां पद्मरागोऽस्मि पद्मकोशः सुपेशसाम् ॥ कुशोऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहम् ॥ ३० ॥ व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः ॥ तितिक्षाऽस्मि तितिक्षूणां सत्त्वं सत्त्ववतामहम् ॥३१॥ ओजः सहो बलवतां कर्माहं विद्धि सात्त्वताम् ॥ सात्वतां नवमूर्तीनामादिमूर्तिरहं परा ॥ ३२ ॥ विश्वावसुः पूर्वचित्तिर्गन्धर्वाप्सरसामहम् ॥ भूधराणामहं स्थैर्यं गन्धमात्रमहं भुवः ॥ ३३ ॥ अपां रसश्च परमस्तेजिष्ठानां विभावसुः ॥ प्रभा सूर्येन्दुताराणां शब्दोऽहं नभसः परः ॥ ३४ ॥ ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः ॥ भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ॥ ३५ ॥

सामर्थ्यं सहो मनसः बलं शरीरस्य ओजआदिमतामोजआदिरूपोऽहम् । सात्वतां भक्तानां मदर्पितं कर्म मां विद्धि । सात्त्वतां वैष्णवानां नवव्यूहानामर्चने वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहवामना इति या नव मूर्तयस्तासां मध्ये या परा कारणभूता आदिमूर्तिर्वासुदेवाख्या साऽहम् । नवमूर्त्तिषु वामनस्थाने ब्रह्मशब्दः क्वचित् । ब्रह्मापि तत्र विष्णुरेव ॥ ३२ ॥ विश्वावसुरिति ॥ गन्धर्वाप्सरसां विश्वावसुः पूर्वचित्तिश्चेति गन्धर्वाणां विश्वावसुः अहम् । अप्सरसां पूर्वचित्तिः अहम् । भुवः गन्धमात्रमविकृतो गन्धोऽहं सुगन्धो वा ॥ ३३ ॥ अपामिति ॥ अपां परमो मधुरो रसोऽहम् । तेजिष्ठानां तेजस्विनां विभावसुरग्निः अहम् । सूर्यादीनां प्रभाऽहम् । नभसः परः मधुरः पराख्यः सूक्ष्मकारणभूतो वा शब्दोऽहम् ॥ ३४ ॥ ब्रह्मण्यानामिति ॥ अर्जुनः पार्थः भूतानां प्राणिनां स्थित्यादिहेतुरहम् । प्रतिसङ्क्रमः प्रलयः । स्फुटमन्यत् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतीति ॥ गत्यादयः पञ्च पादादिकर्मेन्द्रियव्यापाराः स्पर्शादयः पञ्च त्वगादिपञ्च ज्ञानेन्द्रियव्यापारास्तेऽपि सर्वेऽहम् । लक्षणं दर्शनम् । तथा सर्वेषामिन्द्रियाणामपीन्द्रियं तत्तदर्थग्रहणशक्तिः तत्तदधिष्ठातृरूपं वाऽप्यहम् ॥ ३६ ॥ विशेषतो विभूतीर्निरूप्य सामान्येनाह—पृथिवीति सार्द्धम् ॥ अत्र पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि विकारस्य पृथगुक्तेः। अहमहङ्कारः महान्महत्तत्वमेताः सप्त प्रकृतिविकृतय उक्ताः । विकारः पञ्चमहाभूतानि एकादशेन्द्रियाणि चेत्येवं षोडशसङ्ख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः एवं पञ्चविंशति तत्त्वान्युक्तानि । तदुक्तम् । "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्तषोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति। किंच रजः सत्वं तम इति प्रकृतेर्गुणाः तथा परं ब्रह्म च एतत्सर्वमहमेव किंच एतत्प्रसंख्यानमेतेषां परिगणनम् । तथा एतेषां लक्षणतो ज्ञानं च तथा तत्फलं तत्त्वनिश्चयश्चाहमेव ॥ ३७ ॥ मयेति ॥ ईश्वरेण जीवेनेत्यादिरूपेण मया विना क्वचिदपि भावो नास्तीत्यन्वयः । तत्र ईश्वरेण जीवेन च विना चेतनात्मको भावो न विद्यते । गुणेन सत्वादिना महदादिना च विना जडात्मको भावो न विद्यते । सर्वेषामात्मना व्यष्टिसमष्ट्युपहितेन जीवेन समष्टिव्यष्टिरूपोपाधिना च विना चिज्जडात्मको भावो नास्ति । स सर्वोऽपि मया विना नास्तीत्यहमेव सर्वमित्यर्थः । अयं भावः ।

गत्युक्त्युत्सर्गोपादानमानन्दस्पर्शं लक्षणम् ॥ आस्वादश्रुत्यवघ्राणमहं सर्वेन्द्रियेन्द्रियम् ॥ ३६ ॥ पृथिवी वायुराकाश आपो ज्योतिरहं महान् ॥ विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परम् ॥ अहमेतत् प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ॥ ३७ ॥ मयेश्वरेण जीवेन गुणेन गुणिना विना ॥ सर्वात्मनाऽपि सर्वेण न भावो विद्यते क्वचित् ॥ ३८ ॥ संख्यानं परमाणूनां कालेन क्रियते मया ॥ न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः ॥ ३९ ॥ तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः ॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः ॥ ४० ॥ एतास्ते कीर्तिताः सर्वाः संक्षेपेण विभूतयः ॥ मनोविकारा एवैते यथा वाचाऽभिधीयते ॥ ४१ ॥

जीवेश्वररूपो द्विविधो यो भावः यश्च गुणगुणिरूपः यश्च क्षेत्रक्षेत्रज्ञरूपः स सर्वोऽपि मया विना नास्ति अहमेव सर्वमिति ॥ ३८ ॥ विशेषतः सर्वविभूतिकथनमशक्यमित्याह—संख्यानमिति ॥ कथंचिन्महता कालेन पृथिव्यादिपरमाणूनां सङ्ख्यानं मया क्रियते कृत्वा वक्तुं शक्यते तथापि कोटिशोऽण्डानि सृजतःमे मम विभूतीनां सङ्ख्यानं कर्तुं न शक्यते । यदा मत्सृष्टब्रह्माण्डानामेव सङ्ख्यानमशक्यं तदा तद्गतानां विभूतीनां कथं शक्यम् ॥ ३९ ॥ तेज इति ॥ यत्र यत्र तेजः प्रभावः श्रीः सम्पत् कीर्तिर्यशः ऐश्वर्यं नियन्तृत्वं । ह्रीर्निन्दितकर्मणि लज्जा। त्यागो वैराग्यम् । सौभगं मनोनयनाह्लादकत्वम् । भगो भाग्यं धर्मश्च वीर्यं बलं तितिक्षा क्षमा विज्ञानं यथार्थज्ञानम् उपलभ्येत स स मेंऽशको विभूतिः ॥ ४० ॥ एता इति ॥ ते तुभ्यमेता विभूतयः मयि चित्तावताराय संक्षेपेण कीर्त्तिताः । वस्तुत एते मनसो विकारा एव न तु परमार्थाः । यथा किंचित् खपुष्पादि वाचा वाङ्मात्रेणाऽभिधीयते तत्तुल्याः । अतोऽत्र नातीवाभिनिवेशः कार्यः इति स्वामिपादाः । अन्ये तु एते लोके दृश्यमानाः पदार्थाः मनोविकाराः स्नेहद्वेषादयः यथा वर्तन्ते तथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोके वाचा अभिधीयते अभिधीयन्ते । एकत्वं समुदायाभिप्रायेण न तु विभूतिरूपेणेत्यर्थः । यथा पदार्थमात्रस्य मद्विभूतित्वेऽपि यस्य यत्र स्नेहमयो विकारः तत्र तेन अयं मे पुत्रोऽयं मे पिता इत्याद्यभिधीयते न तु मद्विभूतित्वेन । यत्र यस्य द्वेषमयो मनोविकारस्तत्र तेन अयमपकर्ता अयं द्वेष्य इत्याद्यभिधीयते न तु मद्विभूतित्वेन इत्यादि प्राहुः ॥ ४१ ॥ वाचमिति ॥ तस्मात् वाचं स्वच्छन्दवचनात् यच्छ नियच्छ वशीकुरु । एवं मनो यच्छ मनोयमनार्थं प्राणान् यच्छ । इन्द्रियाणि च यच्छ।आत्मना सत्वसंपन्नया बुद्ध्या आत्मानं बुद्धिमेव यच्छ । एवं चेत् भूयः अध्वने संसारमार्गाय न कल्पसे न योग्यो भवसि किन्तु ततो भविष्यसीत्यर्थः ॥ ४२ ॥ य इति ॥ वाङ्मनसी इत्युपलक्षणम् । अजभाव आर्षः । यो यतिः संयमी धिया वागादीन् असंयच्छन् भवति तस्य यथेष्टाचारदोषेण व्रतादि पुण्यं स्रवति नश्यति । आमघटगताम्बु यथा स्रवति तच्च न ज्ञायते तथेति ॥ ४३ ॥ तस्मादिति ॥ यस्माद्वागाद्यसंयमने सर्वसाधनवैयर्थ्यं तस्मात् मत्परायणः मदेकशरणः सन् मद्भक्तियुक्तया बुद्ध्या वागादीन्नितरां यच्छेत् ततश्च तेन

वाचं यच्छ मनो यच्छ प्राणान्यच्छेन्द्रियाणि च ॥ आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने ॥ ४२ ॥ यो वै वाङ्मनसी सम्यगसंयच्छन्धिया यतिः ॥ तस्य व्रतं तपो ज्ञानं स्रवत्यामघटाम्बुवत् ॥ ४३ ॥ तस्मान्मनोवचः प्राणान्नियच्छेन्मत्परायणः ॥ मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ॥ ४४ ॥ इति श्रीभागवते एकादशस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ उद्धव उवाच ॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः ॥ वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥ १ ॥ यथाऽनुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् ॥ स्वधर्मेणारविन्दाक्ष तत्समाख्यातुमर्हसि ॥ २ ॥ पुरा किल महाबाहो धर्मं परमकं प्रभो ॥ यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव ॥ ३ ॥ स इदानीं सुमहता कालेनामित्रकर्शन ॥ न प्रायो भविता मर्त्यलोके प्रागनुशासितः ॥ ४ ॥

तस्य संसारः परिसमाप्यते स कृतकृत्यो मुक्तो भवतीत्यर्थः ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ षोडशे गङ्गासहायो व्यधादेकादशस्य च ॥ १६ ॥ ततः सप्तदशे धर्मो ब्रह्मचारिगृहस्थयोः ॥ संक्षेपाद्वर्ण्यते तत्र श्लोका मातङ्गमार्गणाः ॥ उवाच त्रितयं सार्द्धाष्टपञ्चाशेऽर्द्दनुष्टुभः ॥ १७ ॥ य इति ॥ वर्णाश्रमाचारवताम् अपिना तद्धीनानामपि सर्वेषां द्विपदां यस्त्वया त्वद्भक्तिलक्षणः तज्ज्ञापकः तत्साधनमित्यर्थः । धर्मोऽभिहितः कथितः ॥ १ ॥ यथेति ॥ हे अरविन्दाक्ष सा त्वयि भक्तिर्यथा येन प्रकारेण अनुष्ठीयमानेन स्वधर्मेण नृणां भवेत् तत् तं धर्मं तदनुष्ठानप्रकारं च समाख्यातुं कथयितुमर्हसीति ॥ २ ॥ पुरेति ॥ हे महाबाहो हे प्रभो हे माधव परमकं परमः सर्वत उत्कृष्टश्चासौ कं सुखरूपश्च तं यत् यं धर्मं तेन पूर्वनिरूपितेन हंसरूपेण त्वं ब्रह्मणेऽभ्यात्थ कथितवान्। हंसरूपेण धर्मोऽपि निरूपित एव न तु योगमात्रम् ।" जानीतमागतं यज्ञं युष्मद्धर्मविवक्षया । " इत्युक्तेः ॥ ३ ॥ स इति ॥ हे अमित्रकर्शन स त्वया प्रागनुशासितोऽपि धर्मो महता कालेन पुनर्लुप्तोऽत इदानीं मर्त्यलोके प्रायो न वर्त्तते । अग्रे तु नैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भविता ॥ ४ ॥ वक्तेति ॥ हे अच्युत यस्मात् ते त्वत्तोऽन्यो भुवि तथा यत्र मूर्तिधराः कला वेदाद्या विद्याः सन्ति तस्यां वैरिञ्च्यां द्रुहिणसम्बन्धिन्यां सभायामप्यस्य भक्तिसाधनरूपस्य धर्मस्य वक्ता कर्ता अविता रक्षकश्च नास्ति ॥ ५ ॥ कर्त्रेति ॥ हे मधुसूदन हे देव तस्मात् धर्मस्य कर्त्राऽवित्रा प्रवक्त्रा च भवता महीतले त्यक्ते सति नष्टमिमं धर्मं कः प्रवक्ष्यति । अत्र इदानीं त्वदुपदेशं विनाग्रे नैव भविष्यतीत्याशयः ॥ ६ ॥ तत्त्वमिति ॥ यस्मादेवं तत्तस्मात् हे सर्वधर्मज्ञ त्वद्भक्तिर्लक्ष्यते जन्यते येन स धर्मो नोऽस्माकं मनुष्याणां मध्ये यस्य वर्णाश्रमनिष्ठस्याधिकारिणो यथा यत्प्रकारको विधीयते तथा हे प्रभो स्वामिन् मे मह्यं त्वं वर्णय ॥ ७ ॥ इत्थमिति ॥ स्पष्टम् ॥ ८ ॥ धर्म्य इति ॥ हे उद्धव तवैष प्रश्नो धर्म्यः धर्मादनपेतः निर्द्धारणानुष्ठानद्वारा धर्महेतुः नृणां नैःश्रेयसकरो मोक्षसाधनम् । अतो वर्णाश्रमाचारवतां तं धर्मं वर्णयामि । त्वं च मे मत्तो निबोध ॥ ९ ॥ आदौ मदुपासनलक्षण एव मुख्यो धर्म आसीत् । आचारलक्षणस्तु पश्चात्प्रवृत्तः । स चैवमनुष्ठितो भक्तिहेतुरिति वक्तुमाह—आदाविति ॥ कल्पादौ यत्कृत-

वक्ता कर्ताऽविता नान्यो धर्मस्याच्युत ते भुवि ॥ सभायामपि वैरिञ्च्यां यत्र मूर्तिधराः कलाः ॥ ५ ॥ कर्त्राऽवित्रा प्रवक्त्रा च भवता मधुसूदन ॥ त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ॥ ६ ॥ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः ॥ यथा यस्य विधीयेत तथा वर्णय मे प्रभो ॥ ७ ॥ श्रीशुक उवाच ॥ इत्थं स्वभृत्यमुख्येन पृष्टः स भगवान् हरिः ॥ प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान् ॥ ८॥ श्रीभगवानुवाच ॥ धर्म्य एष तव प्रश्नो नैश्रेयसकरो नृणाम् ॥ वर्णाश्रमाचारवतां तमुद्धव निबोध मे ॥ ९ ॥ आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः ॥ कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः ॥ १० ॥ वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक् ॥ उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः ॥ ११ ॥ त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी ॥ विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ॥ १२ ॥ विप्रक्षत्रियविट्छूद्रा मुखबाहूरुपादजाः ॥ वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः ॥ १३ ॥

युगं तस्मिन् सर्वेषां नृणां हंस इति स्मृतो वर्ण एक एवासीत् । यतस्तदा सर्वाः प्रजाः जात्या जन्मना स्वभावत एव कृतकृत्यास्तस्मात्तं कृतयुगं विदुः ॥ १० ॥ किंच विधायकाभावादपि तदानीं नान्यत्कर्मासीदित्याह—वेद इति ॥ अग्रे वेदः प्रणवरूप एवासीत् नाधिकः । धर्मश्च मनोविषयो वृषरूपधृक् चतुष्पादहमेव न तु क्रियाविशेषो यज्ञादिः । अतस्ते सर्वे तपोनिष्ठाः मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तपः इत्युक्तेः । एकाग्रतया मुक्तकिल्बिषा जनाः हंसं शुद्धं माम् उपासते ध्यायन्तीति ॥ ११ ॥ त्रेतेति ॥ हे महाभाग ततः पश्चात्त्रेतायुगप्रवेशे मे वैराजरूपस्य प्राणान्निमित्तान् हृदयात्सकाशात् त्रयी ऋग्यजुःसामरूपास्त्रयोऽवयवा यस्याः सा विद्या प्रादुरभूत् । तस्याः त्रय्याः सकाशात् हौत्राध्वर्यवौद्गात्रैस्त्रिवृत् त्रिरूपो मखोऽहमासम् । "यज्ञो वै विष्णुः" इति श्रुतेः ॥ १२ ॥ विप्रेति ॥ विप्रादयश्चत्वारो वर्णा वैराजात्पुरुषाज्जाताः प्राक् सृष्टा एव प्रकटीब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूवुस्ते क्रमान्मुखादिजा ज्ञेयाः ये । विप्रादयः आत्मनो मनसः आचारः शमादिरूप एव लक्षणं ज्ञापकं येषां ते ॥१३॥ गृहाश्रम इति ॥ मम वैराजरूपस्य जघनतो गृहाश्रमः । हृदो वक्षसोऽधस्तात् ब्रह्मचर्यमिति नैष्ठिकाभिप्रायमिति स्वामिपादाः । स्पष्टमन्यत् । शीर्षणीति छान्दसम् ॥ १४ ॥ वर्णानामिति ॥ वर्णाश्रमवतां नृणां मुखबाह्वादिपूर्वोक्त-जन्मभूम्यनुसारिणी जन्मस्थानानुसारिण्यः । पूर्वसवर्णदीर्घ आर्षः । प्रकृतयः स्वभावा आसन्।तदेव स्पष्टयति । नीचैः अव्ययमिदम् । पादादिभिः जन्मभूमिभिः नीचा मन्दाः उत्तमैर्मुखादिभिरुत्तमाः ॥ १५ ॥ शम इति ॥ शमः अन्तःकरणनिग्रहः । दमो बाह्येन्द्रियनिग्रहः । तपः तत्वालोचनम् । शौचं बाह्याभ्यन्तरशुद्धता । यथालाभं सन्तोषः । क्षान्तिः परैरपराधे कृतेऽपि विकाराभावः । आर्जवं कौटिल्यराहित्यं मद्भक्तिश्च । दया परदुःखपरिहाणेच्छा । सत्यं हितं मधुरं यथार्थभाषणम् । इमास्तु ब्रह्मप्रकृतयः ब्राह्मणत्वाभिव्यञ्जकाः स्वभावसिद्धधर्माः । एतैरेवाश्रमस्वभावा अपि विज्ञेयाः ॥ १६ ॥ तेज इति ॥ तेजः परैरनभिभवनीयत्वम् । बलं पराभिभवसामर्थ्यम् । धृतिः सन्ताप-

गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ॥ वक्षःस्थानाद्वनेवासो न्यासः शीर्षणि संस्थितः ॥ १४ ॥ वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणीः ॥ आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमैः ॥ १५ ॥ शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवम् ॥ मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः ॥ १६ ॥ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः ॥ स्थैर्यं ब्रह्मण्यतैश्वर्यं क्षत्रप्रकृतयस्त्विमाः ॥ १७ ॥ आस्तिक्यं दाननिष्ठा च अदम्भो ब्रह्मसेवनम् ॥ अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः ॥ १८ ॥ शुश्रूषणं द्विजगवां देवानां चाप्यमायया ॥ तत्र लब्धेन संतोषः शूद्रप्रकृतय-स्त्विमाः ॥ १९ ॥ अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः ॥ कामः क्रोधश्च तर्षश्च स्वभावोऽन्तेवसायिनाम् ॥ २० ॥ अहिंसा सत्यमस्ते-यमकामक्रोधलोभता ॥ भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः ॥ २१ ॥

सहनम् । शौर्यं निर्भयता । तितिक्षा दीनापराधसहनम् । औदार्यं दानोत्साहः । उद्यमः धनादिसञ्चयानुकूलो व्यापारः । स्थैर्यं सत्यसंकल्पत्वम् । ब्रह्मण्यता ब्राह्मणभक्तिः । ऐश्वर्यम् ईश्वरता इमाः क्षत्रप्रकृतयः ॥१७॥ आस्तिक्यमिति ॥ आस्तिक्यं गुरुशास्त्रवचने विश्वासः । अदम्भः परप्रतारणाराहित्यम् । अर्थोपचयैर्धनवृद्धिभिः अतुष्टिः अलम्बु-द्धिराहित्यम् । इमास्तु वैश्यस्य प्रकृतयः ॥१८॥ शुश्रूषणमिति ॥ अमायया निष्कपटतया द्विजादीनां शुश्रूषा तत्र शुश्रूषायां निमित्तभूतायां लब्धेनान्नादिना संतोषश्च । इमाः शूद्रप्रकृतयः॥१९॥अशौचमिति॥अशौचं शौचराहित्यम् । अनृतमनृतभाषणम् । स्तेयं चौर्यम् ।नास्तिक्यं शास्त्रगुरुवचने अविश्वासः । शुष्कविग्रहः निर्हेतुकविरोधः । कामः विषयेच्छा । क्रोधः तर्षः अधिकेच्छा । अयं सर्वोऽप्यन्तेऽवसायिनां वर्णाश्रमहीनानां चाण्डालादीनां स्वभावः ॥२०॥ वर्णाभिव्यञ्जकस्वभावानुक्त्वाऽनुष्ठेयान् धर्मानाह—अहिं-सेति ॥ हिंसा परपीडा तद्वर्जनमहिंसा । सत्यं यथार्थहितप्रियभाषणम् । अस्तेयं चौर्यवर्जनम् । अकामक्रोधलोभता कामादित्यागः । भूतानां प्राणिनां प्रियहितविषया ईहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामादिचेष्टा च अयं सार्ववर्णिक उपलक्षणतया प्राणिमात्रानुष्ठेयोऽयं धर्मः ॥ २१ ॥ वर्णधर्मान् गृहस्थप्रकरणे वक्ष्यति प्रथमं तावदाश्रमेषु ब्रह्मचारिणो धर्मा वर्ण्यन्ते । स च द्विविध उपकुर्वाणको नैष्ठिकश्च तत्राद्यस्य धर्मानाह–द्वितीयमिति ॥ द्विजस्त्रैवर्णिकः आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्म प्राप्य गुरुगृहे वसन् दान्तो वशीकृतेन्द्रियः आचार्येणाहूतः सन् । दीर्घाभाव आर्षः । ब्रह्म वेदमधीयीत । चकारात्तदर्थं च विचारयेत् ॥२२॥ मेखलेति ॥ जटिलः अनभ्यङ्गादिना जातजटः तथा अधौतदद्वासोऽरक्तपीठः दन्ताश्च तद्वासश्च दद्वासांसि न धौतानि यस्य स अधौतदद्वासा स चासावरक्तपीठश्च न कौतुकादिना रक्तं पीठमासनं यस्य स च स मेखलादीन्दधद्विभ्राणो भवेत् । अक्षशब्देनाकारादिक्षकारान्तवर्णक्रमबोधकेन जपमालोच्यते ॥ २३ ॥ स्नानेति ॥ स्नानभोजनहोमेषु तथा जपश्च मन्त्रादिजपः उच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारं तस्मिंश्च समये वाग्यतो मौनी भवेत् । तथा नखान् कक्षगतानि उपस्थगतानि अपिशब्दादन्यानि च रोमाणि च न छिन्द्यात् ॥ २४ ॥ रेत इति ॥ ब्रह्मव्रतं

द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः ॥ वसन् गुरुकुले दान्तो ब्रह्माधीयीत चाऽऽहुतः ॥ २२ ॥ मेखलाजिनदण्डाक्षब्रह्मसूत्रकमण्डलून् ॥
जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत् ॥ २३ ॥ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः ॥ न च्छिन्द्यान्नखरोमाणि कक्षोपस्थगतान्यपि ॥२४॥ रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयम् ॥ अवकीर्णेऽवगाह्याऽप्सु यतासुस्त्रिपदीं जपेत् ॥२५॥ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुराञ्छुचिः ॥ समाहित उपासीत संध्ये च यतवाग्जपन् ॥ २६ ॥ आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ॥ न मर्त्यबुद्ध्याऽसूयेत सर्वदेवमयो गुरुः ॥२७॥ सायं प्रातरुपानीय भैक्ष्यं तस्मै निवेदयेत् ॥ यच्चान्यदप्यनुज्ञातमुपयुञ्जीत संयतः ॥२८॥ शुश्रूषमाण आचार्यं सदोपासीत नीचवत् ॥ यानशय्यासनस्थानैर्नातिदूरे कृताञ्जलिः ॥ २९ ॥

ब्रह्मचर्यं तद्धरः अगृहस्थः जातु कदाचिदपि स्वयं बुद्धिपूर्वकं रेतो नावकिरेत् । यदि कथंचिद्रोगादिवशादवकीर्णं स्यात्तदा आप्स्ववगाह्य स्नात्वा यतासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत् ॥ २५ ॥ अग्नीति ॥ नित्यम् उभे सन्ध्ये स्नानादिना शुचिः समाहित एकाग्रचित्तः सन्नग्न्यर्काचार्यादीन् उपासीत । ततो यतवाक् सन् गायत्रीं जपन् भवेत् । तत्राग्न्युपासनं होमेन अर्कोपासनमर्घ्यदानादिना आचार्याद्युपासनं प्रणामादिना गवामुपासनं तृणादिदानेन मध्याह्नसन्ध्यायां गवाद्युपासननियमो नास्तीति सूचयितुं द्विवचनम् । गुरुः केवलं शास्त्रोपदेष्टा आचार्यस्तु उपनयनादिपूर्वकं तदुपदेष्टेति भेदः ॥२६॥ आचार्यमिति ॥ नासूयेत् तत्र दोषान्न पश्येत् । यतो गुरुः सर्वदेवमयः । स्फुटमन्यत् ॥ २७ ॥ सायमिति ॥ पूर्वार्द्धं स्फुटम् । अन्यदपि यत्प्राप्तं तच्च निवेदयेत् । तेनानुज्ञातं तु संयतः सन्नुपयुञ्जीत भुञ्जीत ॥ २८ ॥ शुश्रूषमाण इति ॥ आचार्यं शुश्रूषमाणः नातिदूरे यानशय्यासनैर्नीचवत्कृताञ्जलिः सदोपासीत । यान्तं पृष्ठतो यानेन शयानम् अप्रमत्ततया समीपशयनेन विश्रान्तं पादसंवाहनादिभिः समीपोपवेशनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसीनं कृताञ्जलिर्नियोगप्रतीक्षणाय नातिदूरेऽवस्थानेन इत्यर्थः ॥२९॥ एवमिति ॥ एवं वृत्तं वर्तनं यस्य सः सर्वभोगविवर्जितः यावद्विद्या अध्ययनं समाप्यते तावदखण्डितमविच्छिन्नं व्रतमुक्तविधं सर्वं नियमं बिभ्रत् धारयन् गुरुगृहे वसेत् ॥ ३० ॥ नैष्ठिकधर्मानाह—यदीति ॥ यदि असौ ब्रह्मचारी " छन्दसां यत्र मूर्तिधराः कला " इत्युक्तत्वात् वेदादीनां लोके ब्रह्मविष्टपं ब्रह्मलोकमारोक्ष्यन् आरोढुमिच्छन् भवेत् तदा बृहद्व्रतः यावज्जीवं ब्रह्मचर्यधरः सन् स्वाध्यायार्थमधिकवेदाध्ययनार्थमधीतनिष्क्रयार्थं च देहं गुरवे विन्यसेत् समर्पयेत् ॥ ३१ ॥ अग्नाविति ॥ अपृथग्धीर्भेदबुद्धिरहितः ब्रह्मवर्चस्वी वेदाभ्यासजतेजोयुक्तः । अयमार्षः । यद्वा । ब्रह्मणि वेदस्याध्ययनादौ वर्चस्वी तेजस्वी इति समासान्तप्रात्ययभावः । अकल्मषः पापरहितः सन् अग्न्यादिषु सर्वत्र परं परमात्मानमेकं मामेव उपासीत ध्यायेत्॥ ३२॥ स्त्रीणामिति ॥ अगृहस्थः ब्रह्मचारी वानप्रस्थो यतिश्च स्त्रीणां निरीक्षणं भावगर्भं क्ष्वेलनं परिहासादि एवमादि संत्यजेत् प्राणिनः पशुपक्ष्यादीनपि मिथुनीभूतानग्रतस्त्यजेत् न पश्येत्॥ ३३॥ शौचमिति युग्मम् ॥ हे कुलनन्दन शौचा-

एवंवृत्तो गुरुकुले वसेद्भोगविवर्जितः ॥ विद्या समाप्यते यावद्बिभ्रद्व्रतमखण्डितम् ॥ ३० ॥ यद्यसौ छन्दसां लोकमारोक्ष्यन् ब्रह्मविष्टपम् ॥ गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः ॥ ३१ ॥ अग्नौ गुरावात्मनि च सर्वभूतेषु मां परम् ॥ अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः ॥ ३२ ॥ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकम् ॥ प्राणिनो मिथुनीभूता न गृहस्थोऽग्रतस्त्यजेत् ॥३३ ॥ शौचमाचमनं स्नानं संध्योपासनमार्जवम् ॥ तीर्थसेवा जपोऽस्पृश्याऽभक्ष्याऽसंभाष्यवर्जनम् ॥३४॥ सर्वाश्रमप्रयुक्तोऽयं नियमः कुलनन्दन ॥ मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ॥ ३५ ॥ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन् ॥ मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः ॥ ३६ ॥ अथानन्तरमावेक्ष्यन्यथा जिज्ञासितागमः ॥ गुरवे दक्षिणां दत्त्वा स्नायाद् गुर्वनुमोदितः ॥ ३७ ॥ गृहं वनं वोपविशेत् प्रव्रजेद्वा द्विजोत्तमः ॥ आश्रमादाश्रमं गच्छेन्नान्यथा मत्परश्चरेत् ॥ ३८ ॥

दिकं स्पष्टम् । जपो गायत्र्यादिमन्त्रजपः अस्पृश्याभक्ष्यासंभाष्याणां स्पर्शभक्षणसंभाषणवर्जनम् अयं । शौचादिरूपः सर्वत्र मद्भावः मनोवाक्कायादीनामुत्पथप्रवृत्तितः संयमश्च सर्वाश्रमप्रयुक्तो नियमो धर्मः ॥३४॥३५॥ एवमिति ॥ बृहद्व्रतधरो नैष्ठिकः ब्राह्मणः अधिगतवेदतदर्थः तीव्रेण अविच्छिन्नेन तपसा दग्धः कर्माशयः कर्मवासना यस्य सः अत एवाग्निरिव ज्वलन् मद्भक्तः अमलः विशुद्धो जीवन्मुक्तो भवतीत्यर्थः । यद्वा । ईदृशः सन् मद्भक्तो भवति ॥ ३६ ॥ अथेति ॥ यथा जिज्ञासितागमः यथावदवगतवेदार्थोऽथानन्तरं द्वितीयाश्रमं गार्हस्थ्यमावेक्ष्यन् प्रवेष्टुमिच्छन् गुरवे दक्षिणां दत्त्वा गुरुणा अनुमोदितः अनुज्ञातः स्नायात् । समावर्तनाख्यं स्नानं कुर्यादित्यर्थः ॥३७॥ गृहमिति ॥ सकामश्चेद्गृहमुपविशेत् । अन्तःकरणशुद्ध्यादिकामश्चेद्वनं प्रविशेत् । शुद्धान्तःकरणो द्विजोत्तमो ब्राह्मणश्चेत्प्रव्रजेत् । क्षत्रियवैश्ययोः प्रव्रज्यायामधिकाराभावात् । अथवा गृहस्थाद्याश्रमात् क्रमेणैवाश्रमान्तरं गच्छेत् । अमत्परः मद्भक्तिहीनः अन्यथा अनाश्रमितां प्रतिलोमं च नाचरेदित्यर्थः । भक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात् ॥३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहार्थीति ॥ गृहार्थी सदृशीमनुरूपामजुगुप्सितां कुलतो लक्षणतश्चानिन्दितां सवर्णां भार्यामुद्वहेत् । यामन्यां कामत उद्वहेत् तामपि सवर्णामनु प्रथमव्यूढायाः सवर्णाया अनन्तरमेव तत्रापि वर्णक्रमादेवोद्वहेत् । "तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् । ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः ॥" इति स्मृतेः ॥ ३९ ॥ इज्येति ॥ इज्याध्ययनदानानि सर्वेषां द्विजन्मनां त्रैवर्णिकानामावश्यका धर्माः प्रतिग्रहोऽध्यापनं याजनं च वृत्तिः सा च ब्राह्मणस्यैव नान्यस्य ॥ ४० ॥ प्रतिग्रहमिति ॥ यदि प्रतिग्रहं तपस्तेजोयशसां नुदं विघातकं मन्यमानः स्यात्तदा अन्याभ्यां याजनाध्यापनाभ्यामेव जीवेत । तङ्गार्षः । यदि तयोरपि कार्पण्यादिदोषदृक् भवेत्तदा शिलैः स्वामित्यक्तैः क्षेत्रपतितैः कणिशैरेव जीवेत् ॥ ४१ ॥ ब्राह्मणस्येति ॥ हि यस्मात् अयं ब्राह्मणस्य देहः क्षुद्रकामाय तुच्छविषयभोगाय नेष्यते योग्यो न भवति । किं त्विह जीवद्दशायां कृच्छ्राय वृत्तिसंकोचादिकष्टाय तपसे तत्त्वालोचनाय च प्रेत्य मृत्वा तु अनन्तं यन्मोक्षसुखं तदर्थं च योग्यो भवति ॥ ४२ ॥ शिलोञ्छेति ॥ उञ्छवृत्तिर्नाम विपण्यादि-

गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सिताम् ॥ यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ॥ ३९ ॥ इज्याध्ययनदानादि सर्वेषां च द्विजन्मनाम् ॥ प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनम् ॥४०॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम् ॥ अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः ॥४१॥ ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते ॥ कृच्छ्राय तपसे चेह प्रेत्यानन्तसुखाय च ॥ ४२ ॥ शिलोञ्छवृत्त्या परितुष्टचेता धर्मं महान्तं विरजं जुषाणः ॥ मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शान्तिम् ॥ ४३ ॥ समुद्धरन्ति ये विप्रं सीदन्तं मत्परायणम् ॥ तानुद्धरिष्ये नचिरादापद्भ्यो नौरिवार्णवात् ॥ ४४ ॥ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः ॥ आत्मानमात्मना धीरो यथा गजपतिर्गजान् ॥ ४५ ॥ एवंविधो नरपतिर्विमानेनार्कवर्चसा ॥ विधूयेहाशुभं कृत्स्नमिन्द्रेण सह मोदते ॥ ४६ ॥

पतितकणोपादानं तां कणिशाद्यर्जनरूपशिलवृत्त्यैकीकृत्य तया वृत्त्या परितुष्टचित्तः विरजं निष्कामं महान्तमातिथ्यादिलक्षणं धर्मं जुषाणः सेवमानः । मुगभाव आर्षः । मय्यर्पितात्मा निरन्तरं मच्चिन्तनपरः गृहपुत्रकलत्रादिषु नातिप्रसक्तः पुरुषो गृह एव तिष्ठन् सम्यक् वनवासादिक्लेशं विना सुखेनैव शान्तिं मुक्तिमुपैति ॥ ४३ ॥ समुद्धरन्तीति ॥ विप्रं मत्परायणमन्यमपि सीदन्तं वृत्तिसंकोचात् क्लिश्यन्तं ये धनिनो वृत्तिसंपादनेन समुद्धरन्ति जीवयन्ति तानहं नौरिवार्णवात् नचिराच्छीघ्रमेव सर्वापद्भ्यः उद्धरिष्ये ॥४४॥ सर्वा इति ॥ राजा पिता इव सर्वाः प्रजाः व्यसनात्समुद्धरेत् । तथा धीरः सन् आत्मानम् आत्मना समुद्धरेत् । यथा गजपतिर्महागजः गर्तपतितान् अन्यान् गजान् समुद्धरति तथेति ॥ ४५ ॥ एवंविध इति ॥ एवंविधो नरपती राजा इह जन्मन्येव कृत्स्नमशुभं प्रतिबन्धकं पापम् एवं प्रजारक्षणपुण्येन विधूय निरस्य अर्कस्येव वर्चस्तेजः प्रकाशो यस्य तेन विमानेन स्वर्गं गत्वा इन्द्रेण सह मोदते सुखमनुभवति ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आपद्वृत्तीराह—सीदन्निति ॥ शिलोञ्छप्रतिग्रहादिभ्यो निर्वाहाभावेन क्लिश्यन् विप्रो वणिग्वृत्त्या तत्रापि पण्यैः क्रयविक्रयादिव्यवहारार्हैरेव न तु सुरालवणादिनिषिद्धैः आपदं तरेत् तत्राप्यापदाक्रान्तश्चेत् खड्गेन क्षत्रियवृत्त्या वाऽऽपदं तरेत् । श्ववृत्त्या नीचसेवया तु कथंचनापि न जीवेत् । यद्यपि गौतमोऽनन्तरां पापीयसीं वृत्तिमातिष्ठेदिति स्मरन् खड्गधारणं पण्यविक्रयाच्छ्रेष्ठं मन्यते तथापि हिंसातो वणिग्वृत्तिरेव श्रेष्ठेति भगवतो मतम् ॥ ४७ ॥ वैश्येति ॥ राजन्यः क्षत्रियः आपदि वैश्यवृत्त्या जीवेत् । तत्राप्यापदि मृगयया विचरेत् विप्ररूपेण अध्यापनादिना वा चरेत् । श्ववृत्त्या तु कथंचन न चरेत् ॥ ४८ ॥ शूद्रेति ॥ वैश्यः आपदि शूद्रवृत्तिं भजेत् । शूद्रस्त्वापदि कारवः प्रतिलोमजविशेषा बुरुडादयः तेषां वृत्तिं कटनिर्माणादिरूपां क्रियां भजेत् । एवमापदं निस्तीर्य ब्राह्मणादिः कृच्छ्रात् आपदो विमुक्तस्तु गर्ह्येण नीचवर्णं प्रति विहितत्वेन निन्दितेन कर्मणा वृत्तिं न लिप्सेत न संपादयेत् ॥४९॥ वेदेति ॥ वेदाध्यायाद्यैर्यथोदयं मद्रूपाणि देवर्ष्यादीनि अन्वहं यजेत् । तत्र वेदाध्यायो ब्रह्मयज्ञः तेन मद्रूपान् ऋषीन् यथोदयं

सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत् ॥ खड्गेन वाऽऽपदाक्रान्तो न श्ववृत्त्या कथंचन ॥ ४७ ॥ वैश्यवृत्त्या तु राजन्यो जीवेन्मृगययाऽऽपदि ॥ चरेद्वा विप्ररूपेण न श्ववृत्त्या कथंचन ॥४८॥ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियाम् ॥ कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा ॥ ४९ ॥ वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयम् ॥ देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ॥ ५० ॥ यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा ॥ धनेनाऽपीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ॥ ५१ ॥ कुटुम्बेषु न सज्जेत न प्रमाद्येत्कुटुम्ब्यपि ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ ५२ ॥ पुत्रदाराप्तबन्धूनां संगमः पान्थसंगमः ॥ अनुदेहं वियन्त्येते स्वप्नो निद्रानुगो यथा ॥ ५३ ॥ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन् ॥ न गृहैरनुबध्येत निर्ममो निरहंकृतः ॥ ५४ ॥

स्वविभवानुसारेण अन्वहं यजेत् । एवमग्रेऽपि स्वधाशब्दोपलक्षितेन तर्पणश्राद्धादिना पितॄन् स्वाहाकारेण होमेन देवान् बलिहरणेन भूतानि अन्नाद्यैः अन्नोदकादिभिर्मनुष्यान् मद्रूपाणीति तेष्वीश्वरदृष्टिं विधत्ते ॥५०॥ यदृच्छयेति ॥ यदृच्छया उद्यमं विना उपपन्नेन प्राप्तेन उपार्जितेन स्ववृत्त्या लब्धेन वा अत एव शुक्लेन शुद्धेन धनेन भृत्यान् पोष्यान् अपीडयन् तेषां वृत्तिं संपाद्य तत उर्वरितेन न्यायेन यथोक्तविधिना क्रतून् यज्ञानाहरेत् अनुतिष्ठेत् ॥५१॥ गृहस्थस्यापि निवृत्तिनिष्ठामाह—कुटुम्बेष्विति ॥ विपश्चित् विवेकी कुटुम्ब्यपि कुटुम्बेषु न सज्जेत न प्रमाद्येत् मन्निष्ठायां प्रमत्तो न भवेत् किंतु अदृष्टमपि स्वर्गादिसुखं दृष्टवन्नश्वरं पश्येत् ॥ ५२ ॥ पुत्रेति ॥ पुत्रादीनामेकत्र सङ्गमः पान्थानां प्रपायां सङ्गम इवानित्यः यत एते पुत्रादयः अनुदेहं प्रतिदेहं वियन्ति वियुक्ता भवन्ति । यथा निद्रानुगो निद्रानुवर्ती स्वप्नदृष्टपदार्थो निद्रापगमे वियुज्यते तथेति ॥ ५३ ॥ इत्थमिति ॥ इत्थं दृष्टादृष्टयोरनित्यतां परिमृशन् देहादिषु सर्वत्र निर्ममो निरहंकृतश्च सन् गृहेष्वतिथिवदुदासीनो निवसन् गृहैर्गृहकर्मभिर्न बध्येत किंतु स जीवन्मुक्त एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवति ॥ ५४ ॥ कर्मभिरिति ॥ मद्भक्तिमांश्चेत् गृहस्थस्य विहितैः कर्मभिर्मामिष्ट्वा आराध्य यथासुखं गृह एव तिष्ठेत् प्रजावांश्च प्रजावत्त्वेन तत्र मदाराधने विक्षेपश्चेत् यथेष्टं वनं चोपविशेत् वनस्थः स्यात् परिव्रजेत्संन्यासी वा स्यात् ॥ ५५ ॥ यस्त्विति ॥ यस्तु मूढः गृहोपलक्षितविषयेष्वासक्ता मतिर्यस्य सः पुत्रादीनामेषणाभिरातुरः व्याकुलः स्त्रैणः स्त्रीवश्यः कृपणा तत्तद्विषयसंपादने दीना धीर्यस्य सः ममाहमित्यभिमानेन बद्ध्यते ॥ ५६ ॥ तद्बन्धमेवाभिनयेन दर्शयति—अहो इति ॥ अहो मे वृद्धौ पितरौ बालाः आत्मजा यस्याः सा मे भार्या तथा आत्मजाः एते सर्वे मामृते विना अनाथा रक्षकहीनाः अत एव दीना दुःखिताश्च कथं जीवन्ति जीविष्यन्ति ॥ ५७ ॥ एवमिति ॥ इत्थं गृहाहिष्वाशयो वासनाविशेषस्तेनाक्षिप्तं विक्षिप्तं हृदयं चित्तं यस्य सः अत एव मूढा मोहिता धीर्यस्य सोऽयमतृप्तो विषयेषु तृप्तिरहितः अत एव तान् गृहादीन् विषयानेवानुध्यायन् मृतः सन्नन्धं तमो विशते स तिर्यगादियोनिं प्राप्नोति । तङार्षः ॥ ५८ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायाख्य एकादशे सप्तदशे

कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् ॥ तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ॥५५॥ यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः ॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ॥५६॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः ॥ अनाथा मामृते दीनाः कथं जीवन्ति दुःखिताः ॥५७॥ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयम् ॥ अतृप्तस्ताननुध्यायन्मृतोऽन्धं विशते तमः ॥५८॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे सप्तदशोऽध्यायः ॥१७॥ श्रीभगवानुवाच ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा ॥ वन एव वसेच्छान्तस्तृतीयं भागमायुषः ॥१॥ कन्दमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् ॥ वसीत वल्कलं वासस्तृणपर्णाजिनानि च ॥ २ ॥ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः ॥ न धावेदप्सु मज्जेत त्रिकालं स्थण्डिलेशयः ॥ ३ ॥ ग्रीष्मे तप्येत पञ्चाग्नीन्वर्षास्वासारषाड् जले ॥ आकण्ठमग्नः शिशिर एवंवृत्तस्तपश्चरेत् ॥ ४ ॥

व्यधात् ॥ १७ ॥ अष्टादशे वनस्थस्य यतेर्द्धर्मश्च वर्ण्यते ॥ तत्तद्विशेषसहिताः श्लोकाः सार्द्धा गजार्द्ध्यैः ॥ अनुष्टुभोऽपि तावत्य उवाचेत्येकमेव तु ॥ १८ ॥ वनमिति ॥ वनं विविक्षुः वानप्रस्थाश्रमे तिष्ठासुः पुत्रेषु भार्यां न्यस्य भार्यारक्षणं पुत्राधीनं कृत्वा भार्यया सहैव वा वन एव वसेत् । शान्तः जितेन्द्रियः आयुषस्तृतीयं भागं पञ्चसप्ततिवर्षपर्यन्तं वन एव वसेत् । एवकारस्ततः पुनः गृहागमननिषेधार्थः । ततः परं सति वैराग्ये संन्यसेदिति भावः ॥ १ ॥ कन्देति ॥ वन्यैर्वनसम्भवैः तत्रापि मेध्यैः पवित्रैः निषिद्धभक्षणे बुद्धेर्मालिन्यं स्यात् कन्दमूलादिभिर्वृत्तिं जीविकां कल्पयेत् । यथालाभं वल्कलादीनि वसीत परिदधीत ॥ २ ॥ केशेति ॥ केशादीनि बिभृयात् धारयेत् । दतः दन्तान्न धावेत् न शोधयेत् । त्रिकालमप्सु मज्जेत देहमर्दनं विनैव मुसलवत्स्नायात् । तङार्षः । स्थण्डिलेशयः तृणादिभिरास्तीर्णभूमिशायी भवेत् ॥ ३ ॥ ग्रीष्मे इति ॥ ग्रीष्मे ऋतौ पञ्चाग्नीन् तप्येत । उपरि सूर्येण सह चतुर्दिशमग्नीन्निधाय तैरात्मानं तापयेदित्यर्थः। वर्षर्तौ आसारं धारासम्पातं सहत इत्यासारषाड् भवेत् । अभ्रावकाशं नाम व्रतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरेत् । शिशिरर्त्तौ जले आकण्ठमग्नः भवेत् । उदकवासं नाम व्रतं चरेत् । एवंविधं वृत्तं यस्य स एवं तपश्चरेत् ॥४॥ अग्नीति ॥ कन्दं मूलं चाग्निपक्कं समश्नीयात् । अथापि वा फलं कालपक्कमश्नीयात् । उलूखलेनाश्मना वा कुट्टयति नीवारादीनवहन्तीति तथा दन्ता एवोलूखलं कुट्टनसाधनं यस्य स तथाभूतः स्यात् ॥ ५ ॥ स्वयमिति ॥ देशकालबलाभिज्ञः आत्मनो वृत्तिकारणं फलादि स्वयं संचिनुयात् आहरेत् । न त्वन्येनानयेत् । अन्यदा कालान्तरे आहृतं कालान्तरे नाददीत न स्वीकुर्यात् । देशकालबलवैपरीत्ये तु नायं नियम इत्याशयः ॥ ६ ॥ वन्यैरिति ॥ वनाश्रमी वानप्रस्थः वन्यैर्वनोत्पन्ननीवारादिभिः साधितैः पुरोडाशैः कालचोदितान् आग्रयणादीन् निर्वपेत् कुर्यात् । श्रौतेन पशुना तु मां न यजेत ॥ ७ ॥ अग्निहोत्रमिति ॥ मुनेश्च नैगमैर्वेदवादिभिः पूर्ववत् गृहस्थवत् अग्निहोत्रादीनि आम्नातानि विहितानीत्यन्वयः ॥ ८ ॥ एवमिति ॥ धमनीभिराहरादिसंकोचवशाच्छुष्कमांसतया विस्पष्टाभिः नाडीभिः सन्ततः व्याप्तः एवं चीर्णेन कृतेन तपसा तपोमयं ज्ञानविग्रहं मामाराध्य मुनिः ऋषिलोकान्मामुपैति । महर्लोकं

अग्निपक्कं समश्नीयात्कालपक्कमथापि वा ॥ उलूखलाश्मकुट्टो वा दन्तोलूखल एव वा ॥५॥ स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणम् ॥ देशकालबलाभिज्ञो नाददीताऽन्यदाऽऽहृतम् ॥६॥ वन्यैश्चरुपुरोडाशैर्निर्वपेत् कालचोदितान् ॥ न तु श्रौतेन पशुना मां यजेत वनाश्रमी ॥७॥ अग्निहोत्रं च दर्शश्च पूर्णमासश्च पूर्ववत् ॥ चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः॥८॥ एवं चीर्णेन तपसा मुनिर्धमनिसंततः ॥ मां तपोमयमाराध्य ऋषिलोकादुपैति माम् ॥ ९ ॥ यस्त्वेतत्कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत् ॥ कामायाल्पीयसे युञ्ज्याद्बालिशः कोऽपरस्ततः ॥१०॥ यदाऽसौ नियमेऽकल्पो जरया जातवेपथुः ॥ आत्मन्यग्नीन् समारोप्य मच्चित्तोऽग्निं समाविशेत् ॥ ११ ॥ यदा कर्मविपाकेषु लोकेषु निरयात्मसु ॥ विरागो जायते सम्यङ् न्यस्ताग्निः प्रव्रजेत्ततः ॥ १२ ॥ इष्ट्वा यथोपदेशं मां दत्त्वा सर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् ॥ १३ ॥

प्राप्य क्रमेण ततो मां प्राप्नोतीत्यर्थः । अयं भावः । अन्तःकरणशुद्धिभाक्तिद्वाराऽत्रैव तावन्मुच्यते प्रतिबन्धकबाहुल्ये त्वनेन क्रमेण मुच्यते ॥ ९ ॥ यस्त्विति ॥ निःश्रेयसं मोक्षसाधनं कृच्छ्रतः कष्टेन चीर्णम् अनुष्ठितमेतन्महत्तपो यस्त्वल्पीयसे कामाय आविरिञ्च्यादत्यल्प एव कामस्तस्मै युञ्ज्यात् योजयेत्ततोऽन्यः को वा बालिशो मूर्खः स एव महामूर्ख इत्यर्थः ॥ १० ॥ यदेति ॥ यदाऽसौ वनाश्रमी नियमे स्वधर्मे अकल्पः असमर्थः । तत्र हेतुः । जरया जातवेपथुः तदा अग्नीन् आहवनीयादीन् आत्मनि स्वहृदये समावेश्य मनसा समारोप्य मच्चित्तः मां चिन्तयन् अग्निं समाविशेत् ॥ ११ ॥ विरक्तं प्रत्याह–यदेति ॥ निरयात्मसु दुःखबाहुल्येन नरकतुल्येषु कर्मणां विपाकेषु फलेषु स्वर्गादिलोकेषु सम्यग्विरागो जायते तदा न्यस्ताग्निः आत्मनि समारोपिताग्निः संस्ततो ब्रह्मचर्यात् गृहाद्वा वनाद्वा प्रव्रजेत् । " यदहरेव विरजेत्तदहरेव प्रव्रजेत् " इति श्रुत्या वैराग्यस्यैव संन्यासहेतुत्वप्रतिपादनात् ॥ १२ ॥ तत्रादौ कृत्यमाह–इष्ट्वेति ॥ निरपेक्षः सर्वतो विरक्तश्चेत् तदा यथोपदेशं श्राद्धाष्टकपूर्वकं प्राजापत्येष्ट्या मामिष्ट्वा समाराध्य

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्वमृत्विजे दत्त्वा स्वप्राणे आत्मनि अग्नीनावेश्य परिव्रजेत् ॥ १३ ॥ विप्रस्येति ॥ दारादिरूपिणो दारादिद्वारा देवाः संन्यसतो विप्रस्य विघ्नान्कुर्वन्ति । अयं संन्यासी हि निश्चितमस्मानाक्रम्य उल्लङ्घ्य परं पदं समियात् गमिष्यतीतीर्ष्यया विघ्नान् कुर्वन्तीत्यर्थः । विघ्नानविगणय्य संन्यसेदेवेत्याशयः ॥ १४ ॥ प्रव्रजितस्य धर्मानाह—बिभृयाच्चेदिति ॥ परं कौपीनादन्यद्वासो यदि बिभृयात् धारयेत् तदा कौपीनमाच्छाद्यते यावता तावन्मात्रं धारयेत् । प्रैषोच्चारात्पूर्वं यत्सर्वं त्यक्तं तत्र दण्डपात्राभ्यामन्यत् किमपि अनापदि न बिभृयात् । अनापदीत्युक्त्यापत्सु देहनिर्वाहार्थं यत् किंचिदावश्यकं वस्त्रादि तद्बिभृयादिति सूचितम् ॥ १५ ॥ दृष्टीति ॥ दृष्टिपूतं दृष्ट्या सम्यङ् निरीक्ष्य विशुद्धे देशे पादं न्यसेत् । वस्त्रेण पूतं शोधितं जन्तुमलादिरहितं जलं पिबेत् । सत्येन पूतां वाचं वदेत् मनःपूतं मनसा सम्यग्विचार्य यच्छुद्धं तत्समाचरेत् ॥१६॥ मौनेति ॥ अङ्ग हे उद्धव मौनादयो वागादीनां दण्डाः मौनं वाचो दण्डः अनीहा काम्यकर्मत्यागो देहस्य अनिलायामः प्राणायामश्चेतसः । एते अन्तः त्रयो दण्डा यस्य न सन्ति स केवलं

विप्रस्य वै संन्यसतो देवा दारादिरूपिणः ॥ विघ्नान्कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात्परम् ॥१४॥ बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परम् ॥
त्यक्तं न दण्डपात्राभ्यामन्यत्किंचिदनापदि ॥ १५ ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् ॥ सत्यपूतां वदेद्वाचं मनः पूतं समाचरेत् ॥ १६ ॥
मौनाऽनीहानिलायामा दण्डा वाग्देहचेतसाम् ॥ न ह्येते यस्य सन्त्यङ्ग वेणुभिर्न भवेद्यतिः ॥ १७ ॥ भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् ॥
सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता ॥१८॥ बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः ॥ विभज्य पावितं शेषं भुञ्जीताऽशेषमाहृतम् ॥१९॥
एकश्चरेन्महीमेतां निःसङ्गः संयतेन्द्रियः ॥ आत्मक्रीड आत्मरत आत्मवान्समदर्शनः ॥ २० ॥

धृतैर्वेणुभिर्यतिः संन्यासी न भवेत् संन्यासफलं नैव प्राप्नुयात् ॥ १७ ॥ भिक्षामिति ॥ चतुर्षु प्रतिग्रहाध्यापनयाजनशिलोञ्छलक्षणवृत्त्या चतुर्विधेषु वर्णेषु ब्राह्मणेष्वेव तत्रापि विगर्ह्यान् अभिशस्तपतितान् वर्जयेत् । तत्रापि असंक्लृप्तान् । अत्रायं लाभो भविष्यतीति पूर्वमनुद्दिष्टान् गृहान्प्रति भिक्षां चरेत्तावतैव लब्धेनान्नेन तुष्येच्च । मुख्या ब्राह्मणेष्वेव भिक्षा तदलाभे प्राणरक्षार्थं पूर्वपूर्ववर्णालाभे उत्तरोत्तरवर्णा ज्ञेयाः ॥ १८ ॥ बहिरिति ॥ ग्रामाद्बहिर्जलाशयं गत्वा तत्रोपस्पृश्य आचम्य वाग्यतः मौनी पावितं प्रोक्षणादिभिः शोधितं विभज्य विष्णुब्रह्मार्कभूतेभ्यः विभागं कृत्वा । याचितमिति तु पाठान्तरम् । तदानीं केनचित् याचितं चेत्तन्मध्ये तस्मै किंचिद्विभज्य दत्त्वा शेषमशेषमाहृतं सर्वं भुञ्जीत । अशेषमित्यधिकाहरणं निरस्तं भोजनपात्रेऽवशिष्टं न रक्षणीयमित्यर्थः ॥ १९ ॥ एक इति ॥ एकः असहायः निःसङ्गः संयतेन्द्रियः आत्मन्येव क्रीडा कौतुकं यस्य सः तस्मिन्नेव रतः सन्तुष्टः आत्मवान् धीरः समदर्शनश्च सन् एतां महीं चरेत् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विविक्तेति ॥ विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः मयि भावेन विमल आशयोऽन्तःकरणं यस्य सः मुनिः मया सहाभेदेनात्मानमेकमेव चिन्तयेत् ॥ २१ ॥ अन्वीक्षेतेति ॥ ज्ञाननिष्ठया तत्वविचारेणात्मनो बन्धकारणं मोक्षकारणं चान्वीक्षेत पर्यालोचेत । तदेवाह । इन्द्रियाणां विक्षेपो विषयासक्तिर्बन्धहेतुः एषामिन्द्रियाणां विषयेभ्यः संयमो मोक्षहेतुरिति ॥ २२ ॥ तस्मादिति ॥ तस्मात् षण्णां समनस्कानां ज्ञानेन्द्रियाणां वर्गं नियम्य वशीकृत्य क्षुल्लकेभ्यः कामेभ्यो विषयेभ्यो विरक्तः सन् मुनिर्मद्भावेन मद्भक्त्यैवात्मनि अन्तःकरणे महत्सुखं लब्ध्वा विचरेत् ॥ २३ ॥ पुरेति ॥ पुराणि हट्टादिमन्ति ग्रामास्तद्रहिताः व्रजा गोष्ठानि तानि सार्थान् यात्रिकजनसमूहान् भिक्षार्थं प्रविशन् पुण्यदेशादिमतीं महीं चरेदिति सम्बन्धः ॥ २४ ॥ वानप्रस्थेति ॥ यतः शिलान्धसा शिलवृत्त्या प्राप्तेन तदीयेनान्नेन शुद्धसत्वः सन्निवृत्तमोह आशु संसिध्यति मुच्यते । अतो वानप्रस्थाश्रमेष्वेवाभीक्ष्णं पुनः पुनः भैक्षमाचरेत् ॥ २५ ॥ ननु मिष्टान्नं विहाय कथं शिलान्ने प्रवृत्तिस्तत्राह—नैतदिति ॥ एतत् परिदृश्यमानं मिष्टान्नादि

विविक्तक्षेमशरणो मद्भावविमलाशयः ॥ आत्मानं चिन्तयेदेकमभेदेन मया मुनिः ॥ २१ ॥ अन्वीक्षेतात्मनो बन्धं मोक्षं च ज्ञाननिष्ठया ॥ बन्ध इन्द्रियविक्षेपो मोक्ष एषां च संयमः ॥ २२ ॥ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः ॥ विरक्तः क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥२३॥ पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रमवतीं महीम् ॥२४॥ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्षमाचरेत् ॥ संसिध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलान्धसा ॥ २५ ॥ नैतद्वस्तुतया पश्येद्दृश्यमानं विनश्यति ॥ आसक्तचित्तो विरमेदिहामुत्र चिकीर्षितात् ॥ २६ ॥ यदेतदात्मनि जगन्मनोवाक्प्राणसंहतम् ॥ सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥ २७ ॥ ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः ॥ सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥ २८ ॥

गृहापत्यादि वा सर्वं परमार्थवस्तुतया न पश्येत् । यतस्तत्सर्वं विनश्यति अतस्तत्र असक्तचित्तः सन् इह लोकसम्बन्धिनः अमुत्र परलोकसम्बन्धिनः चिकीर्षितात् साधनतया कर्तुमिष्टाद्विरमेत् ॥ २६ ॥ यदेतदिति ॥ एतज्जगत् ममतास्पदं मनोवाक्प्राणैः संहितं सहितमहङ्कारास्पदं शरीरं च सर्वं तज्जन्यं सुखं च आत्मनि मायामात्रं स्वरूपावरणभूतयाऽविद्ययाऽध्यस्तमिति तर्केण स्वप्नदृष्टान्तेन निश्चित्य स्वस्थ आत्मनिष्ठः संस्तदध्यासं त्यक्त्वा पुनस्तन्न स्मरेत् न चिन्तयेत् ॥ २७ ॥ परिपक्वज्ञानिनो निष्कामभक्तस्य च वर्णाश्रमनियमाभावमाह—ज्ञानेति ॥ इहामुत्र विषयेषु विरक्तः अत एवानपेक्षः मोक्षापेक्षारहितः ज्ञाननिष्ठो वा मद्भक्तो वा यतोऽविधिगोचरः विधिनिषेधाधीनो न भवति शास्त्रस्य विषयासक्ताविद्यावदधिकारिकत्वात् तस्मात्सलिङ्गान् त्रिदण्डादिसहितान् आश्रमान् तद्धर्मांश्च त्यक्त्वा तत्राग्रहं त्यक्त्वा यथासुखं विचरेत् । अत्रात्यन्तत्यागो न विवक्षितः । पुनर्द्धर्मविधानात् अक्रियस्योत्तराध्याये वक्ष्यमाणत्वाच्च । अविधिगोचरत्वमेवात्र पूर्वस्माद्विशेषः इति श्रीस्वामिपादाशयः॥ २८ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

कथं चरेत्तदाह—बुध इति ॥ बुधो विवेकवानपि बालकवन्मानापमानविवेकशून्यः क्रीडेत् । कुशलो निपुणोऽपि जडवत् फलानुसन्धानशून्यश्चरेत् । विद्वान् पण्डितोऽपि लोकरञ्जनाभावेन उन्मत्तवद्वदेत् । नैगमो वेदार्थज्ञोऽपि गोचर्याम् अनियताचारमिव कुर्यादन्यथा लोकैर्विमुक्तो न स्यादित्याशयः ॥ २९ ॥ वेदेति ॥ वेदे ये वादाः अक्षय्यफलप्रतिपादका अर्थवादास्तेषु रतः आसक्तो न स्यात् । पाखण्डी श्रुतिस्मृतिविरुद्धाचारवान्न स्यात् । हैतुकः केवलतर्कनिष्ठो न स्यात् । शुष्कवादे निष्प्रयोजनगोष्ठ्यां यो विवादस्तस्मिन् कंचिदपि पक्षं न समाश्रयेत् ॥ ३० ॥ नेति ॥ जनात् नोद्विजेत भयं न कुर्यात् । जनं च नोद्वेजयेत् भयं न दध्यात् किंतु धीरः वशीकृतान्तःकरणः सन् अतिवादान् निन्दावचनानि तितिक्षेत सहेत । देहमुद्दिश्य देहाभिमानं कृत्वा पशुवत् केनचिद्वैरं न कुर्यात् ॥ ३१ ॥ अत्र हेतुमाह—एक इति ॥ हि यस्मात्परो देहादिभिन्न एक एवात्मा भूतेषु देवमनुष्यादिदेहेषु तथा आत्मनि स्वस्मिंश्चावस्थितः यथोदकमात्रेष्वेक एव चन्द्रोऽवस्थितो भवति तथेति । अत आत्मदृष्ट्या वैरकारणं नास्ति तथा भूतानि शरीरा-

बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत् ॥ वदेदुन्मत्तवद्विद्वान्गोचर्यां नैगमश्चरेत् ॥ २९ ॥ वेदवादरतो न स्यान्न पाखण्डी न हैतुकः ॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ॥ ३० ॥ नोद्विजेत जनाद्धीरो जनं नोद्वेजयेन्न तु ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केन चित् ॥ ३१ ॥ एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥ यथेन्दुरुदपात्रेषु भूतान्येकात्मकानि च ॥३२॥ अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित् ॥ लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतन्त्रितम् ॥ ३३ ॥ आहारार्थं समीहेत युक्तं तत्प्राणधारणम् ॥ तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते ॥ ३४ ॥ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरम् ॥ तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ॥ ३५ ॥ शौचमाचमनं स्नानं न तु चोदनया चरेत् ॥ अन्यांश्च नियमाञ्ज्ञानी यथाऽहं लीलयेश्वरः ॥ ३६ ॥

ण्यपि पाञ्चभौतिकत्वेनैकात्मकानि भवन्ति अतो देहदृष्ट्याऽपि वैरकारणं नास्ति तस्माद्वैरं न कुर्यादिति ॥ ३२ ॥ अलब्ध्वेति ॥ धृतिमान् सन् क्वचित् काले काले भोजनकाले अशनं भोजनम् अलब्ध्वा न विषीदेत । तद्वदर्षः । लब्ध्वा च न हृष्येत् यतः उभयं लाभालाभात्मकं दैवतं त्रितं प्रारब्धाधीनम् ॥ ३३ ॥ अलं तर्हि भिक्षणेनापि तत्राह—आहारेति ॥ आहारमात्रार्थं समीहेतैव यतस्तस्य प्राणधारणं युक्तं सम्यक् यतस्तेन प्राणधारणेन तत्त्वं विचार्यते । तत्तत्वं विज्ञायैव विमुच्यते ॥ ३४ ॥ यदृच्छयेति॥ श्रेष्ठमिष्टमुत अथवा अपरं निकृष्टं यदृच्छया प्रारब्धवशात् यदुपपन्नं प्राप्तं तदन्नमद्यात् तथा प्राप्तं प्राप्तं वासः तथा शय्यां च भजेत् ॥ ३५ ॥ शौचमिति ॥ यथाहमीश्वरो लीलयैव लोकशिक्षार्थं शौचादीनि करोमि तथा ज्ञानी ज्ञाननिष्ठोऽपि तदर्थमनासक्तस्तान् कुर्यात् न तु चोदनया विधिकिङ्करत्वेन तस्य ज्ञाननिष्ठाया विरोधित्वात् ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य ज्ञानपरिपाक एवाविधिगोचरत्वे कारणमित्याह—न हीति ॥ हि यस्मात् तस्य विकल्पो भेदस्तस्य आख्या ख्यातिः प्रतीतिर्नास्ति या च सा पूर्वमासीत् सापि मद्वीक्षया मम सर्वात्मत्वज्ञानेन हता आदेहान्तात् मरणपर्यन्तं क्वचित् आवश्यकदेहनिर्वाहकभिक्षाटनादौ या काचित् ख्यातिर्भेदप्रतीतिस्तस्य दृश्यते सा प्रारब्धवशाद्बाधितानुवृत्तिमात्रं नाधिकारसंपादिका । ततो देहपातानन्तरं तु स मया सह संपद्यते एकीभवति मुक्तो भवति । "तस्य तावदेव चिरम्" इति श्रुतेः ॥ ३७॥ सम्यग्विदुषः कृत्यमुक्त्वा विविदिषोः कृत्यमाह—दुःखोदर्केष्विति ॥ दुःखमेवोदर्क उत्तरफलं येषां तेषु कामेषु जातनिर्वेद आत्मवान् बुद्धिमान् अजिज्ञासितो न शिक्षितो मद्धर्मो मत्प्राप्तिसाधनं येन सः तद्विज्ञानार्थं मुनिं मननशीलं गुरुमुपव्रजेत् ॥ ३८ ॥ तावदिति ॥ गुरौ भक्तः तत्र स्नेहवान् तद्वचने श्रद्धावान् अनसूयकः तत्र मनुष्यदृष्ट्या दोषदर्शनरहितः यावत्कालं ब्रह्म विजानीयात् तावन्मामेव मद्दृष्ट्यैव गुरुं परिचरेत् । जाते तु ज्ञाने एकश्चरेदित्याद्युक्तैर्धर्मैर्वर्ततेत्याशयः॥ ३९॥ यस्त्विति ॥ यस्तु न संयतो न वशीकृतः षण्णां समनस्कानां ज्ञानेन्द्रियाणां वर्गो

न हि तस्य विकल्पाख्या या च मद्वीक्षया हता ॥ आदेहान्तात्क्वचित् ख्यातिस्ततः संपद्यते मया ॥ ३७ ॥ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् ॥ अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत् ॥ ३८ ॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः ॥ यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥ ३९ ॥ यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः ॥ ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥ ४० ॥ सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा ॥ अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ॥४१॥ भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः ॥ गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनम् ॥ ४२ ॥ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदम् ॥ गृहस्थस्याप्यृतौ गन्तुः सर्वेषां मदुपासनम् ॥ ४३ ॥ इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् ॥ सर्वभूतेषु मद्भावो मद्भक्तिं विन्दते चिरात् ॥ ४४ ॥

येन सः तथा प्रचण्डो न शान्तः विषयेष्वासक्त इन्द्रियाणामश्वस्थानीयानां सारथिर्बुद्धिर्यस्य सः ज्ञानवैराग्याभ्यां रहितः केवलं त्रिदण्डमुपजीवति त्रिदण्डधारणेन पूज्यत्वं संपाद्य जीविकामेव संपादयति ॥४०॥ सुरानिति ॥ न विपक्वा न निवृत्ताः कषायाः रागादयो यस्य स धर्महा धर्मत्यागी यस्मात् यज्ञादित्यागात्सुरान् लज्जया भोगसंकोचात्स्वात्मानं ज्ञानाभावाचात्मस्थं मां च निह्नुते वञ्चयति तस्मात् अस्मादमुष्मात् परलोकाच्च हीयते उभयलोकफलाद् भ्रष्टो भवति ॥ ४१ ॥ भिक्षोरिति ॥ भिक्षोः संन्यासिनः शम इन्द्रियान्तःकरणनिग्रहः अहिंसा परपीडात्यागश्च मुख्यो धर्मः । वनौकसः वनवासिनः तपः शास्त्रविहितक्लेशसहनम् ईक्षा तत्त्वविमर्शश्च गृहस्थस्य भूतानां प्राणिनां रक्षा इज्या पञ्च महायज्ञाश्च द्विजस्य उपनीतस्य ब्रह्मचारिणः आचार्यसेवनं धर्मः ॥ ४२ ॥ ब्रह्मचर्यमिति ॥ ऋतौ गन्तुर्गृहस्थस्यापि ब्रह्मचर्यतपआदयश्च धर्मा भवन्ति । ब्रह्मचर्यं तु ऋतौ स्वभार्यागमनादन्यत्रैव मदुपासनं तु सर्वेषामेव प्राणिनां मुख्यो धर्मः ॥ ४३ ॥ इतीति ॥ नान्यस्मै प्रयोजनाय भजतीत्यनन्यभाक् अनन्यप्रयोजनः सन् यः इत्येवमुक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकारेण स्वधर्मेण मां नित्यं भजेत् मत्प्रीत्यर्थं धर्मानाचरेत् स सर्वभूतेषु मद्भावो मद्दर्शनं यस्य तथाभूतः सन्नचिरान्मद्भक्तिं विन्दते ॥ ४४ ॥ भक्त्येति ॥ हे उद्धव अनपायिन्या निरन्तरया भक्त्या सः सर्वलोकानां महेश्वरं सर्वस्य जगत उत्पत्तिरप्ययः प्रलयश्च यत्र तत् कारणरूपं ब्रह्मरूपम् । यद्वा । ब्रह्मणो वेदस्य कारणं मामुपयाति ॥४५॥ इतीति ॥ इत्येवं स्वधर्मेण निर्णिक्तं शुद्धं सत्वमन्तःकरणं यस्य सः निरवशेषेण ज्ञाता मद्गतिस्तत्वं येन स ज्ञानं शास्त्रीयं विज्ञानं मत्साक्षात्कारस्ताभ्यां संपन्नोऽचिरान्मां समुपैति प्राप्नोति ॥ ४६ ॥ वर्णेति ॥ य एष वर्णाश्रमवतामाचारलक्षणो धर्मः "कर्मणा पितृलोक" इति श्रुतेः । पितृलोकफलकोऽपि यदि मद्भक्तियुतो मदर्पणेन कृतस्तदा स एव परः सर्वसाधनश्रेष्ठः सन् निःश्रेयसकरः मोक्षफलको भवति ॥ ४७ ॥ एतदिति ॥ हे साधो यच्च मां भवान् पृच्छति स्म तत् यथा स्वधर्मसंयुक्तः पुमान् मद्भक्तः सन् परं परमेश्वरं मां समियात् प्राप्नुयात् एतत्ते तुभ्यं मयाऽभिहितं कथितम् ॥४८॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशाष्टदशेऽस्मिन् व्यधाद्गङ्गासहायकः ॥ १८ ॥ ऊनविंशे

भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरम् ॥ सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ॥ ४५ ॥ इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नो न चिरात्समुपैति माम् ॥ ४६ ॥ वर्णाश्रमवतां धर्म एष आचारलक्षणः ॥ स एव मद्भक्तियुतो निःश्रेयसकरः परः ॥ ४७ ॥ एतत्तेऽभिहितं साधो भवान्पृच्छति यच्च माम् ॥ यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परम् ॥ ४८ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ श्रीभगवानुवाच ॥ यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः ॥ मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥ १ ॥ ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः ॥ स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः ॥ २ ॥ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ॥ ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति माम् ॥ ३ ॥

तु महिमा ज्ञानस्याथ यमादयः॥पृष्टा उत्तरिताश्चात्र श्लोकाः सार्द्धाः शरांग्नयः॥पञ्चोर्वीचेति पादाद्या समवेदाँ' अनुष्टुभः॥१९॥यस्यापरोक्षानुभवेन प्रपञ्चो लीनप्रायस्तस्य न किंचित् कृत्यमस्तीत्याह—य इति ॥ विद्याऽऽत्मानुभवस्तत्पर्यन्तेन श्रुतेन संपन्नः अत एवाऽऽत्मवान् प्राप्तात्मतत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान् न भवति । आनुमानिक इति नकाररहितपाठे श्रुत्यनुकूलतर्कतो निर्णीतार्थः । य एवंभूतः स इदं द्वैतं तन्निवृत्तिसाधनं ज्ञानं च मायामात्रमिति ज्ञात्वा मयि संन्यसेत् । अयमेव विद्वत्संन्यासो नाम ॥ १ ॥ ज्ञानिन इति ॥ ज्ञानिनस्त्वहमेवेष्टः अपेक्षितः अहमेव स्वार्थः फलभूतः हेतुस्तत्साधनं च संमतः अतो मदृते मां विना तस्य स्वर्गः स्वर्गोपलक्षिताभ्युदयः अपवर्गो मोक्षोऽन्यो वा कश्चिदपि पदार्थो न प्रियः अतस्तस्य प्राप्यं कृत्यं वा न किंचिदस्तीत्यर्थः ॥ २ ॥ ज्ञानेति ॥ ज्ञानविज्ञानाभ्यां संसिद्धाः विशुद्धान्तःकरणा एवं मम श्रेष्ठमुत्तमं पदं स्वरूपं विदुः यतोऽसौ ज्ञानी ज्ञानेन मां बिभर्ति हृदि धारयत्यतोऽसौ मम प्रियतमः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तप इति ॥ या विशुद्धिर्ज्ञानस्य कलया लेशेनापि कृता भवति तां शुद्धिम् । सिद्धिमिति वा पाठः । तपस्तीर्थं जपो दानम् इतराणि पवित्राणि पावनानि स्नानादीनि च नालं कुर्वन्ति कर्तुं न शक्नुवन्ति ॥ ४ ॥ तस्मादिति ॥ तस्मात् ज्ञानेन सहितं तत्पर्यन्तं यथा भवति तथा स्वात्मानं ज्ञात्वा हे उद्धव ज्ञानविज्ञानसंपन्नो भक्त्या भावितः पूर्णश्च संस्त्वं मामेव भज अन्यत्सर्वं त्यजेत्यर्थः ॥ ५ ॥ ज्ञानेति ॥ ज्ञानविज्ञाने एव यज्ञस्तेनात्मनि स्वान्तःकरण एव मां सर्वयज्ञपतिं परमात्मानमिष्ट्वा ध्यात्वा मुनयो मामेव संसिद्धिं मोक्षरूपामगमन् प्रापुः ॥ ६ ॥ तदेव ज्ञानं सङ्क्षेपत उपदिशति—त्वयीति ॥ हे उद्धव योऽयं त्रिविधो देहेन्द्रियान्तःकरणरूपो विकारः प्रकृतिकार्यभूतस्त्वयि आश्रयति प्रतीयते स मायया अविद्यया स्वरूपावरणेनाध्यस्त एव प्रतीयते नतु परमार्थतोऽस्ति । यत् यस्मात् अन्तरा मध्ये एव पतति रज्जौ सर्पमालादिवत्प्रतीयते नाद्यपवर्गयोः आदावन्ते च स नास्ति । अतो यत् यदास्य देहादेरमी जन्मादयो विकाराः स्युस्तदा तस्य तवाधिष्ठानभूतस्य ततोऽभिन्नस्य किं न किंचित्।यथा असतः सर्पादेराद्यन्तयोर्वर्त्तमानं यद्रज्ज्वाद्यस्ति

तपस्तीर्थं जपो दानं पवित्राणीतराणि च ॥ नाऽलं कुर्वन्ति तां सिद्धिं या ज्ञानकलया कृता ॥ ४ ॥ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ॥ ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ॥ ५ ॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोऽगमन् ॥६॥ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायाऽन्तराऽऽपतति नाद्यपवर्गयोर्यत् ॥ जन्मादयोऽस्य यदमी तव तस्य किं स्युराद्यन्तयोर्यदसतोऽस्ति तदेव मध्ये ॥ ७ ॥ उद्धव उवाच॥ ज्ञानं विशुद्धं विपुलं यथैतद् वैराग्यविज्ञानयुतं पुराणम् ॥ आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यम् ॥ ८ ॥ तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश ॥ पश्यामि नान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात् ॥ ९ ॥ दष्टं जनं संपतितं बिलेऽस्मिन् कालाहिना क्षुद्रसुखोरुतर्षम् ॥ समुद्धरैनं कृपयाऽऽपवर्ग्यैर्वचोभिरासिञ्च महानुभाव ॥ १० ॥

तदेव मध्येऽपि सद्भवति अतो यथा सर्पादिगता विकारास्तदधिष्ठाने रज्ज्वादौ न भवन्ति तथा देहादिगता विकारास्त्वयि न भवन्तीति भावः । यद्वा । आद्यन्तयोर्यदस्ति तन्मध्येऽप्यस्त्येव न तस्य जन्मादयः सन्ति अतस्तत्वं निर्विकारं ज्ञात्वेति ॥ ७ ॥ ज्ञानादेर्विशेषं जिज्ञासुः पृच्छति—ज्ञानमिति ॥ हे विश्वेश्वर हे विश्वमूर्ते विशुद्धं विशुद्धिकरं वैराग्यविज्ञानाभ्यां युतं पुराणमनादिवेदसिद्धमेतत् ज्ञानं विपुलं विस्तृतं निश्चितं यथा भवति तथा आख्याहि । तथा महद्भिर्ब्रह्मादिभिर्विमृग्यं त्वद्भक्तियोगं चाख्याहि ॥८॥ तापेति ॥ हे ईश आधिदैवादितापत्रयेणाभिहतस्य अत एव घोरे भवाध्वनि संसारमार्गे संतप्यमानस्य जनस्य अमृतं परमानन्दमभिवर्षति तस्मात् तवाङ्घ्रिद्वन्द्वमेवातपत्रं तस्मादन्यच्छरणं न पश्यामि ॥ ९ ॥ दष्टमिति ॥ हे महानुभाव अस्मिन् बिले संसारकूपे पतितं तत्र च कालाहिना दष्टं ग्रस्तं क्षुद्रसुखेष्वेव उरुस्तर्षस्तृष्णा यस्य तमिति एनं जनं कृपया ततः समुद्धर आपवर्ग्यैर्मोक्षसाधनभूतैर्वागमृतैरासिञ्च बोधयेति ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

इत्थमिति ॥ धर्मभृतां भगवद्धर्मपरायणानां मध्ये वरं श्रेष्ठं भीष्मं राजा अजातशत्रुः युधिष्ठिरो नोऽस्माकं सर्वेषां शृण्वतामेव सतामेतत् त्वत्पृष्टमित्थमेव पप्रच्छ ॥ ११ ॥ निवृत्ते इति ॥ स्पष्टम् ॥ १२ ॥ तानिति ॥ देवव्रतस्य भीष्मस्य मुखाच्छ्रुतान् ज्ञानादिभिरुपबृंहितान्सहितान् तान् मोक्षधर्मान् ते तुभ्यमहमभिधास्यामि ॥ १३ ॥ तत्र ज्ञानमाह—नवेति ॥ प्रकृतिपुरुषमहदहङ्कारपञ्चतन्मात्राणि चेति नव पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि एकं मन इत्येकादश पञ्च महाभूतानि त्रयो गुणाश्च एतान् भावान् अष्टाविंशतितत्वानि भूतेषु ब्रह्मादिस्थावरान्तेषु कार्येष्वनुगतानि येन ज्ञानेनेक्षेत । अथ एष्वपि भावेषु एकं परमात्मतत्त्वमनुगतं येनेक्षेत कार्यकारणात्मकं जगत्पश्यन् परमकारणात्मकमेवैतन्न तु ततः पृथगिति येन पश्येत् तदेव ज्ञानमिति मया निश्चितम् ॥ १४ ॥ विज्ञानमाह—एतदेवेति ॥ यत् यदा येनैकेनानुगतानेकात्मकान् भावान् पूर्वमैक्षत तांस्तथा पूर्ववन्नेक्षेत किंतु तदेकं परमकारणं ब्रह्मैवेक्षेत । तदा एतदेव हि निश्चिनं विज्ञानमपरोक्षज्ञानमुच्यते । अन्यस्य बाधितत्वात् । एतदुक्तं भवति । " परोक्षज्ञानेनापरोक्षभ्रमस्य

श्रीभगवानुवाच ॥ इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरम् ॥ अजातशत्रुः प्रपच्छ सर्वेषां नोऽनुशृण्वताम् ॥ ११ ॥ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः ॥ श्रुत्वा धर्मान् बहून् पश्चान्मोक्षधर्मानपृच्छत ॥ १२ ॥ तानहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान् ॥ ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् ॥१३॥ नवैकादश पञ्च त्रीन्भावान्भूतेषु येन वै ॥ इक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितम् ॥१४॥ एतदेव हि विज्ञानं न तथैकेन येन यत् ॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भवानां त्रिगुणात्मनाम् ॥१५॥ आदावन्ते च मध्ये च सृज्यात्सृज्यं यदन्वियात्॥पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् ॥ १६ ॥ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् ॥ प्रमाणेष्वनवस्थानाद् विकल्पात् स विरज्यते ॥ १७ ॥

दिङ्मोहादिष्विव निवृत्त्यभावात्तदात्मकं जगत्पश्यन् तथात्मनः पृथक् सदिति मन्यते अपरोक्षज्ञाने तु बाधितमेव जीवन्मुक्तः संस्कारशेषं जगत्पश्यति अतः परोक्षापरोक्षज्ञाने ज्ञानविज्ञानशब्दाभ्यामुच्येते । " उक्तं विज्ञानमेवोपपादयति त्रिगुणात्मनां सावयवानां भावानां देहादीनां स्थित्यादीन् पश्येत् विचारयेत् । भावा उत्पत्त्यादिमन्तः सावयवत्वाद् घटादिवत् इति पश्येदित्यर्थः ॥ १५ ॥ आदाविति ॥ आदौ उत्पत्तौ अन्ते परिणामान्तरापत्तौ च कारणत्वेन मध्ये चाश्रयत्वेन सृज्यात्सृज्यं कार्यान्तरं प्रति यद् अन्वियात् अनुगच्छेत् तत्प्रतिसंक्रमे तेषां प्रलये च यदवशिष्यते तदेव सत् परमार्थभूतमिति पश्येदित्यर्थः॥ १६ ॥वैराग्यमाह—श्रुतिरिति॥श्रुतिः शब्दः " नेह नानास्ति किंचन " इत्यादि प्रत्यक्षं पटादिकार्यं तन्त्वादिव्यतिरेकेण न दृश्यते चैतन्यव्यतिरेकेण च न किंचिद्दृश्यत इति प्रत्यक्षम् ऐतिह्यं महाजनप्रसिद्धिः अनुमानं च विमतं मिथ्या दृश्यत्वात्।शुक्तिरजतादिवदित्यादिप्रमाणेषु चतुष्टयं तेष्वनवस्थानात् नश्वरत्वेन निश्चयात् सर्वानुगतं सत्यमात्मतत्वं पश्यन् विकल्पं च मिथ्या जानन् स विवेकी विकल्पात्प्रपञ्चात् विरज्यते ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मणामिति ॥ कर्मणां स्वर्गादिजनकानां यज्ञादीनां परिणामित्वान्नश्वरत्वाद्धेतोः आविरिञ्चात् ब्रह्मलोकपर्यन्तमदृष्टमपि सुखं दृष्टवदमङ्गलं दुःखमिश्रं नश्वरं च विवेकी पश्येत् ॥१८॥भक्तीति ॥ सकारणो भक्तियोगः पूर्वमुक्त एव तथापि प्रीयमाणाय तस्मिन् प्रीतिं प्राप्नुवते तुभ्यं मद्भक्तेः परं श्रेष्ठं कारणं पुनरपि कथयिष्यामि । एकवचनं सामान्याभिप्रायकम्॥१९॥ श्रद्धेति ॥ शश्वदिति सर्वत्रानुषज्यते । अमृततुल्यायां मत्कथायां श्रद्धा श्रवणादरः अनुकीर्तनं श्रवणानन्तरं मत्कथाव्याख्यानम् । पूजायां षोडशोपचारैः पूजने परिनिष्ठा आसक्तिः स्तुतिभिर्मम स्तवनम् ॥ २० ॥ आदर इति ॥ परिचर्यायां मन्दिरमार्जनादिक्रियायाम् अतो न पौनरुक्त्यम् । आदरः सर्वाङ्गैर्दण्डवत्पतितैः प्रणामः। स्पष्टमन्यत्॥२१॥ मदर्थेष्विति ॥ मदर्थेषु मदाराधनोपकरणतुलसीपुष्पाद्यर्जनकर्मसु अङ्गचेष्टा कायव्यापारः लौकिकव्यापारे प्रवृत्तेनापि वचसा मद्गुणानामीरणं कथनम् । अतः स्तुतिभिर्न पौनरुक्त्यम् । स्पष्टमन्यत् ॥ २२ ॥ मदिति ॥ मदर्थे मदाराधनार्थे अर्थपरित्यागः वित्तव्ययः । यद्वा । मद्भजनविरोधिनोऽर्थस्य परित्यागः एवं तद्विरोधिनो भोगस्य-

कर्मणां परिणामित्वादाविरिञ्चादमङ्गलम् ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ १८ ॥ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम् ॥ १९ ॥ श्रद्धाऽमृतकथायां मे शश्वन्मदनुकीर्तनम् ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥ २० ॥ आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ॥ मद्भक्तपूजाऽभ्यधिका सर्वभूतेषु मन्मतिः ॥२१॥ मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम् ॥ मय्यर्पणं च मनसः सर्वकामविवर्जनम् ॥ २२ ॥ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥ २३ ॥ एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ॥ मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्याऽवशिष्यते ॥२४॥ यदात्मन्यर्पितं चित्तं शान्तं सत्त्वोपबृंहितम् ॥ धर्मज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥ २५ ॥ यदर्पितं तद्विकल्पे इन्द्रियैः परिधावति॥रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययम् ॥ २६ ॥

तत्साधनस्य स्रक्चन्दनादेः सुखस्य च परित्यागः इष्टं यागादि वैदिकं कर्म दत्तं दानं हुतं होमः जप्तम् । व्रतमेकादश्युपवासादि । इडभाव आर्षः । व्याकरणान्तरे जप्तमित्यपि । तपः अन्यदपि शास्त्रीयं कायक्लेशादिकमेतत्सर्वं मत्प्रीत्यर्थं कृतं मद्भक्तेः कारणं भवतीत्यर्थः ॥ २३ ॥ एवमिति ॥ हे उद्धव एवमुक्तविधैः श्रवणादिधर्मैः सहात्मनि वेदिनाम् आत्मा देहेन्द्रियादयस्तदनुबन्धिपुत्रादयश्च तेषां निवेदनं मत्सेवासाधनतया स्थापनम्।तत्कर्तॄणां मनुष्याणां मयि फलभूता परमप्रेमलक्षणा भक्तिः संजायते ततोऽस्य भक्तस्यान्यः कोऽर्थः साधनरूपः फलरूपो वावशिष्यते सर्वोऽपि स्वत एव पूर्णो भवतीत्यर्थः ॥२४॥ यदेति ॥ सत्वेनोपबृंहितं युक्तम् अतएव शान्तं चित्तं यदात्मनि मय्यर्पितम् । आसक्तं भवति तदा पुमान् धर्मज्ञानादीन् प्राप्नोत्येव ॥ २५ ॥ यदिति॥यत् यदा तच्चित्तं रजस्वलं रजोगुणव्याप्तमिन्द्रियैर्विकल्पे विषये देहगृहादावर्पितमतः असन्निष्ठं ततस्ततो विषयेषु परिधावति तदा तस्य विपर्ययमधर्मादिकं भवतीति विद्धि ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वाभिप्रेतान् धर्मादीन् व्याचष्टे—धर्म इति ॥ यो मद्भक्तिकृत्स धर्मः प्रोक्तः शास्त्रेषु प्रकृष्ट उक्तः। एवं यत् ऐकात्म्यदर्शनं सर्वत्राभेदबुद्धिः तज्ज्ञानम् गुणेषु विषयेष्वसङ्गः अनासक्तिरेव वैराग्यम् अणिमादयश्च ऐश्वर्यम्॥२७॥धर्मादीनां विलक्षणं लक्षणं श्रुत्वा यमादीनामपि स्वरूपतः संख्यातश्च वैलक्षण्यं सम्भाव्य पृच्छति—यम इति॥ स्पष्टम् ॥२८॥ किमिति ॥ इष्टमभ्यर्हितं धनं च किम् । स्फुटमन्यत् ॥ २९ ॥ पुंस इति ॥ हे श्रीमन् हे केशव परेति विद्यादीनां विशेषणम् । श्रीर्मण्डनम् ॥ स्फुटमन्यत् ॥ ३० ॥ क इति॥ स्फुटम् ॥ ३१ ॥ क इति ॥ हे सतांपते प्रश्नान् पृष्टार्थान् विपरीतान् अशमादीन् पृष्टार्थानामेतेषामुक्त्यैव एतद्विपरीता अनुक्ता अपि मया ज्ञास्यन्त इति भावः । स्फुटमन्यत् ॥ ३२ ॥ यमानाह—अहिंसेति ॥ अहिंसा परपीडावर्जनम् । सत्यं हितप्रियथार्थभाषणम् । अस्तेयं मनसाऽपि परस्वग्रहणसंकल्पराहित्यम् । असङ्गः क्वाप्यास-

धर्मो मद्भक्तिकृत् प्रोक्तो ज्ञानं चैकात्म्यदर्शनम् ॥ गुणेष्वसङ्गो वैराग्यमैश्वर्यं चाणिमादयः॥२७॥उद्धव उवाच ॥ यमः कतिविधः प्रोक्तो नियमो वाऽरिकर्शन ॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो ॥२८॥किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥ २९ ॥ पुंसः किंस्विद् बलं श्रीमन् भगो लाभश्च केशव ॥ का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च ॥ ३० ॥ कः पण्डितः कश्च मूर्खः कः पन्था उत्पथश्च कः ॥ कः स्वर्गो नरकः कः स्वित् को बन्धुरुत किं गृहम् ॥३१॥ क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ॥ एतान् प्रश्नान् मम ब्रूहि विपरीतांश्च सत्पते ॥ ३२ ॥ श्रीभगवानुवाच ॥ अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसंचयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयम् ॥३३॥ शौचं जपस्तपो होमः श्रद्धाऽऽतिथ्यं मदर्चनम् ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम् ॥ ३४ ॥ एते यमाः सनियमा उभयोर्द्वादश स्मृताः ॥ पुंसामुपासितास्तात यथाकामं दुहन्ति हि ॥ ३५ ॥

क्तिराहित्यम् ह्रीस्वरूपं स्वयमेव वक्ष्यति । असञ्चयः अपरिग्रहः आस्तिक्यं शास्त्रोक्ते विश्वासः ब्रह्मचर्यं स्त्रीसंबन्धराहित्यम् । मौनं वृथालापराहित्यं स्थैर्यं धर्मे सत्यसंकल्पत्वम् । क्षमाऽपराधेऽपि क्रोधाभावः । अभयं भयराहित्यम् ॥ ३३ ॥ नियमानाह—शौचमिति ॥ शौचं बाह्याभ्यन्तरभेदेन द्वयम् । अतो द्वादश नियमाः । तत्र बाह्यं मृज्जलादिभिर्देहस्य आभ्यन्तरं कर्मस्वसक्तिभगवच्चिन्तनादिभिरन्तःकरणस्य जपो गायत्र्यादेः श्रद्धा सच्छास्त्रोक्ते आदरः आतिथ्यमतिथिसत्कारः । स्फुटमन्यत् ॥ ३४ ॥ एतदिति॥हे तात एते उभयोः श्लोकयोः प्रवृत्तिनिवृत्तिमार्गयोर्वा द्वादश नियमेन सहिता यमाः स्मृताः । अत्र मुमुक्षोर्यमाः मुख्याः सकामस्य नियमा मुख्याः एते उपासिताः अनुष्ठिताः सन्तः पुंसां यथाकामं कामनानुसारेण मोक्षाभ्युदयादिफलं दुहन्ति पूरयन्ति ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुमुक्षोरुपादेयान् शमादीन् हेयांश्च दुःखादीन् प्रसिद्धेभ्यो वैलक्षण्येन लक्षयति—शम इति ॥ शमादिभिरेव तद्विपरीता अशमादयोऽप्युन्नेयाः। बुद्धेर्या मन्निष्ठता सा शमः न तु शान्तिमात्रम्। इन्द्रियाणां संयमः वशीकृत्य विषयेभ्यो निवर्त्तनमेव दमः न चौरादिदमनमात्रम्। विहितदुःखस्य संमर्षः सहनमेव तितिक्षा न भारादेः सहनमात्रम्। जिह्वोपस्थयोर्वेगधारणं धृतिः न त्वनुद्वेगमात्रम् ॥ ३६ ॥ दण्डेति ॥ दण्डो भूतद्रोहस्तस्य न्यासस्त्याग एव परं दानं नतु धनार्पणमात्रम्। कामत्यागो भोगानपेक्षैवं तपः न कृच्छ्रादिस्वभावो वासना तस्य विजयः। प्रतिबन्ध एव शौर्यं न तु बाह्यविजयमात्रम्। समं ब्रह्म तस्य दर्शनमालोचनमेव सत्यविषयत्वात्सत्यं न तु यथार्थभाषणमात्रम् ॥ ३७ ॥ ऋतमिति ॥ सत्यस्यैवावान्तरभेद ऋतं तच्च सूनृता वाणी हितप्रिययथार्थविषया वाक् एतेन सत्यभूतनिन्दाया निवृत्तिः तस्याः सूनृतत्वाभावात् कर्मसु लौकिकालौकिकव्यापारेष्वसङ्गः कर्तृत्वाभिमानराहित्यमेव शौचं न तु स्नानादिना मलनिराकरणमात्रम्। पूर्वमपृष्टस्यापि शौचस्य लक्षणम्। "अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः।" इति न्यायात्। एवं "भगो म ऐश्वरो भाव" इत्यत्रापि संन्यासः। इहामुत्र सर्वक्रियाफलत्यागः कलत्रादौ ममतात्यागो वा त्यागः न गृहादित्यागमात्रम् ॥ ३८ ॥ धर्म इति ॥ नृणामिष्टं परमार्थं

शमो मन्निष्ठता बुद्धेर्दम इन्द्रियसंयमः ॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥ ३६ ॥ दण्डन्यासः परं दानं कामत्यागस्तपः स्मृतम् ॥ स्वभावविजयः शौर्यं सत्यं च समदर्शनम् ॥ ३७॥ ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ॥ कर्मस्वसङ्गमः शौचं त्यागः संन्यास उच्यते ॥३८॥ धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः ॥ दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलम् ॥३९॥ भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः॥ विद्यात्मनि भिदाबाधो जुगुप्साह्रीरकर्मसु ॥ ४० ॥ श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः ॥ दुःखं कामसुखापेक्षा पण्डितो बन्धमोक्षवित् ॥ ४१ ॥ मूर्खो देहाद्यहंबुद्धिः पन्था मन्निगमः स्मृतः ॥ उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणोदयः ॥ ४२ ॥

धनं धर्म एव नतु वित्तपश्वादिमात्रम्। भगवत्तमः पूर्णज्ञानादिमानहमेव यज्ञः मद्बुद्ध्या यज्ञोऽनुष्ठेयो न क्रियाबुद्ध्येत्यर्थः। यज्ञार्थं दानं दक्षिणा सा च ज्ञानोपदेशः न हिरण्यादिदानमात्रम्। यतो ज्ञानोपदेशेन यज्ञरूपं मां प्राप्नोति। दुर्दमदमनं हि बलं प्रसिद्धं तच्च मनोदमनहेतुत्वात् प्राणायाम एव न तु शारीरमात्रम्। दया लोकप्रसिद्धत्वान्नोक्ता ॥ ३९ ॥ भग इति ॥ भगो भाग्यं तच्च मे ऐश्वरो भावो मदीयमैश्वर्यादिषाड्गुण्यं न तु दैवानुकूल्यमात्रम्। उत्तमो लाभस्तु मद्भक्तिरेव नतु पुत्रादिमात्रम्। विद्या चात्मनि प्रतीताया भिदाया भेदस्य बाधो नतु ज्ञानमात्रम्। अकर्मसु निषिद्धकर्मसु जुगुप्सा हेयत्वबुद्धिः ह्रीः न तु तत् कृत्वा लज्जामात्रम् ॥ ४० ॥ श्रीरिति ॥ नैरपेक्षाद्याः गुणा एव श्रीर्मण्डनं न तु किरीटादिः। दुःखसुखयोरत्ययः अतिक्रमः अननुसन्धानमेव सुखं नतु भोगः। कामा विषयास्तद्भोगजन्यसुखापेक्षैव दुःखं नाग्निदाहादिमात्रम्। बन्धं मोक्षं च यो वेत्ति स एव पण्डितः न केवलशास्त्राभ्यासी ॥ ४१ ॥ मूर्ख इति ॥ देहगेहादिष्वहंममाभिमानवान् मूर्खः मन्निगमो मां नितरां गमयति प्रापयति यो निवृत्तिमार्गः स एव

CC-0. In Public Domain. Digitization by eGangotri

पन्थाः सन्मार्गः न तु कण्टकादिशून्यः । चित्तविक्षेपः प्रवृत्तिमार्ग एव उत्पथः कुमार्गो न तु चौराद्याकुलः । सत्वगुणस्योदयः उद्रेक एव स्वर्गः नेन्द्रादिलोकः ॥४२॥ नरक इति ॥ तमस उन्नाह उद्रेक एव नरकः न तामिस्रादिः । हे सखे गुरुरेव बन्धुः न भ्रात्रादिः । स चाहमेव मद्बुद्ध्योपास्य इत्यर्थः । स साधनं भोगायतनं हि गृहं तच्च मानुष्यं मानुषरूपं शरीरमेव नतु हर्म्यादि । गुणैर्विवेकधैर्यादिभिराढ्यो युक्त एव आढ्य उच्यते न तु धनादिमात्रयुक्तः ॥ ४३ ॥ दरिद्र इति ॥ यस्तु विषयेष्वसन्तुष्टः स एव दरिद्रो न निःस्वः । यो ह्यजितेन्द्रियः स एव कृपणः शोच्यः न तु दीनः । गुणेषु विषयेषु आसक्तधरिनासक्तबुद्धिरेवेशः स्वतन्त्रः न राजादिः । गुणेषु सङ्गो यस्य स विपर्ययः अनीश इत्यर्थः । एतच्च शमादिविपर्ययो न लक्षणार्थम् ॥४४॥ एत इति ॥ हे उद्धव ते तव एते प्रश्नाः पृष्टा अर्थाः साधु यथा भवति तथा मोक्षोपयोगितया निरूपिताः । एतच्च सर्वं त्वया गुणदोषयोर्विवेकार्थमेव पृष्टम् । तत्र बहुना वर्णितेन किं प्रयोजनम् । गुणदोषयोर्दृशिर्दर्शनमेव दोषः । गुणस्तु तदुभयदर्शनवर्जितः स्वभाव एवेति ॥४५॥ इति श्रीकृष्ण-सेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशस्योनविंशे व्यधाद्वङ्गासहायकः ॥१९॥ विंशे तु वर्णिता योगा भक्तिज्ञानक्रियात्मकाः ॥ गुणदोषव्यवस्था च सार्द्धाः श्लोका नगांग्नयः॥

नरकस्तम उन्नाहो बन्धुर्गुरुरहं सखे ॥ गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥४३॥ दरिद्रो यस्त्वसंतुष्टः कृपणो योऽजितेन्द्रियः ॥ गुणे-ष्वसक्तधीरीशो गुणसङ्गो विपर्ययः ॥ ४४ ॥ एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥ गुणदोषदृ-शिर्दोषो गुणस्तूभयवर्जितः ॥४५॥ इति श्रीभागवत एकादशस्कन्धे भगवदुद्धवसंवाद एकोनविंशोऽध्यायः ॥ १९ ॥ उद्धव उवाच ॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ॥ अवेक्षतेऽरविन्दाक्ष गुणं दोषं च कर्मणाम् ॥ १ ॥ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजम् ॥ द्रव्यदेशवयः-कालान् स्वर्गं नरकमेव च ॥ २ ॥ गुणदोषभिदादृष्टिमन्तरेण वचस्तव ॥ निःश्रेयसं कथं नृणां निषेधविधिलक्षणम् ॥ ३ ॥

उवाचद्वितयं प्रोक्तमर्द्धत्रिंशदनुष्टुभः॥२०॥ गुणदोषदृशिर्दोष इत्युक्तमाक्षिपति—विधिश्चेति॥ हे अरविन्दाक्ष विधिश्च प्रतिषेधश्चेश्वरस्य तव निगम आज्ञारूपो वेदः स च विधेयानां प्रतिषेध्यानां च कर्मणां गुणं दोषं च पुण्यपापात्मकं फलमवेक्षते प्रतिपादयति ॥ १ ॥ वर्णेति ॥ तत्रोत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां च विकल्पं भेदं च गुणदो-षमवेक्षते । तथा प्रतिलोमानुलोमानुलोमजं च गुणदोषमवेक्षते । तत्र प्रतिलोमजाः उत्तमवर्णासु स्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः । अनुलोमजास्तूत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णासु स्त्रीषु जाताः मूर्द्धावसिक्ताम्बष्ठकादयः । तेषां च "असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः।" इति गुणदोषौ । तथा द्रव्यादीन् कर्मार्हतानर्हताभ्यां तथा स्वर्गं नरकं च तत्फलतया गुणदोषरूपमवेक्षते । एतच्चोत्तराध्याये प्रपञ्चयिष्यते ॥ २ ॥ उक्तं प्रकृते योजयति—गुणदोषेति ॥ निषेधश्च विधिश्चेति लक्षणं स्वरूपं यस्य तत्तव वचः वेदरूपं वाक्यं गुणदोषभिदा दृष्टिमन्तरेण अयं विहितत्वाद्गुणः अयं निषिद्धत्वाद्दोषः इति या भिदादृष्टिर्भेददर्शनं तामन्तरेण तां विना नृणां निःश्रेयसं कथं पुरुषार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधनं कथं भवेत् ॥३॥ पित्रिति ॥ हे ईश्वर प्रत्यक्षादिभिरनुपलब्धे अनवगतेऽर्थे स्वर्गमोक्षादौ तथा साध्यसाधनयोः इदमस्य साध्यमिदमस्य साधनमित्यत्रापि तव वचस्त्वद्वाक्यरूपो वेद एव पित्रादीनां श्रेयः श्रेष्ठं चक्षुः चक्षुर्वज्ज्ञापकम् । तथा च वेदस्य तदबोधकत्वे केषामपि तद्बोध एव न स्यादित्याशयः ॥ ४ ॥ गुणेति ॥ पूर्वोक्तप्रकारेण विधिनिषेधकात् ते तव निगमात् वेदरूपवचनादेव गुणदोषभिदादृष्टिः विहिताऽभूत् । न हि स्वतः यस्मादर्थप्राप्तत्वेन निवर्त्तेत पुनस्तव निगमने वचनेनैव तद्भिदाया अपवादश्चेति श्रुत्वाऽऽह । स्फुटं मे भ्रमो भवति तं निवर्त्तयेति शेषः ॥५॥ अधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह—योगा इति ॥ नृणां श्रेयोविधित्सया मोक्षसाधनेच्छया मया ज्ञानादिकाः त्रयो योगा उपायाः ब्रह्मकर्मदेवताकाण्डैः प्रोक्ताः । कर्मात्र निष्कामम् । एभ्योऽन्यः उपायः कुत्रचिदपि शास्त्रे नास्ति । एतेन काम्यकर्मादिकं व्यावर्तयति । तपोऽष्टाङ्गयोगादेर्यथासम्भवं ज्ञानभक्त्योरेवान्तर्भाव इति भावः ॥६॥ निर्विण्णानामिति ॥ इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानामत एव तत्साधनभूतकर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः । तेषु कर्मस्वनिर्विण्णचित्तानां दुःखबुद्धिशून्यानामत एव कामिनां तत्फलेष्वविरक्तानां तु कर्मयोग एव सिद्धिदः फलदः ॥ ७ ॥

पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ॥४॥ गुणदोषभिदादृष्टिर्निगमात्ते न हि स्वतः ॥ निगमेनापवादश्च भिदाया इति ह भ्रमः ॥ ५ ॥ श्रीभगवानुवाच ॥ योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ॥ ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥ ६ ॥ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ॥ तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम् ॥७॥ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ॥ न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥ ८ ॥ तावत् कर्माणि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥ ९ ॥

यदृच्छयेति ॥ यः पुमान् यदृच्छया केनापि भाग्योदयेन मम कथाश्रवणकीर्त्तनादिभक्तिभेदेषु जातश्रद्धः उत्पन्नादरः विषयान्न निर्विण्णो न च तत्रातिसक्तस्तस्यास्य भक्तियोगः पुरुषार्थप्रदः । अत्र निर्विण्णत्वे ज्ञानेऽधिकारः अत्यासक्तत्वे कर्मण्यधिकारः अत्यासक्तिराहित्ये भक्तावधिकार इति विवेकः । तत्र निर्वेदस्य कारणं निष्कामकर्महेतुकान्तःकरणशुद्धिरेव अत्यासक्तेः कारणमनाद्यविद्या अत्यासक्तिराहित्यस्य कारणं यादृच्छिकसत्सङ्ग एवेति । तत्र काम्यकर्मसु प्रवर्त्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यति । निष्कामकर्मयोगाधिकारिणस्तु यथाशक्ति स च ज्ञानभक्तियोगाधिकारात्प्रागेव तदधिकृतयोस्तु स्वल्पः तत्सिद्धानां तु न किंचित् ॥ ८ ॥ कर्मयोगावधिमाह—तावदिति ॥ यावता यावत् न निर्विद्येत विरक्तो न भवेत् ज्ञानयोगयोग्यो न भवेत् अथवा यावत् मत्कथाश्रवणादौ श्रद्धा न जायते यावदधिकारी भक्तिमार्गे प्रवृत्तो न भवेत् तावत् कर्माणि नित्यनैमित्तिकानि कुर्वीत ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

कर्मयोगिनो ज्ञानभक्तिभूमिकारोहप्रकारमाह—स्वेति ॥ हे उद्धव अनाशीः कामः फलकामनारहितः स्वधर्मस्थो यज्ञैर्यजन्मामाराधयन् यद्यन्यत् निषिद्धं न समाचरेत् तदा स्वर्गनरकौ न याति । नरकयानं हि द्वेधा भवति । विहितातिक्रमाद्वा निषिद्धाचरणाद्वा । तत्र स्वधर्मसत्वान्निषिद्धवर्जनाच्च नरकं न याति निष्कामत्वात्स्वर्गमपि न यातीत्यर्थः ॥ १० ॥ अस्मिन्निति ॥ किं त्वस्मिँल्लोकेऽस्मिन् देहे एव वर्तमानः अनघः निषिद्धत्यागी अत एव शुचिः निवृत्तरागादिमलः पुमान् यदृच्छया अनायासेनैव विशुद्धमात्मसाक्षात्कारात्मकं ज्ञानं मद्भक्तिं वा प्राप्नोति । यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति ॥ ११ ॥ स्वर्गिणोऽपीति ॥ निरयिण इति दृष्टान्तार्थम् । तथा च यथा निरयिणो नारका एतं लोकं मनुष्यदेहमिच्छन्ति तथा स्वर्गिणोऽप्येतमिच्छन्ति । यत इदं शरीरं ज्ञानभक्तिभ्यां मुक्तिसाधकम् । यद्वा । तृतीया षष्ठ्यर्थे । ज्ञानभक्त्योः साधकम् । तदुभयं स्वर्गिनारकिशरीरं तयोर्ज्ञानभक्त्योरसाधकमिति ॥ १२ ॥ नेति ॥ अतो विचक्षणो विवेकी नरः । वा इति इवार्थे । नारकीमिव । यथा नारकीं न काङ्क्षति तथा स्वर्गतिं न

स्वधर्मस्थो यजन् यज्ञैरनाशीः काम उद्धव ॥ न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥१०॥ अस्मिँल्लोके वर्तमानः स्वधर्मस्थोऽनघः शुचिः॥ ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥ ११ ॥ स्वर्गिणोऽप्येतमिच्छन्ति लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकम् ॥ १२ ॥ न नरः स्वर्गतिं काङ्क्षेन्नारकीं वा विचक्षणः ॥ नेमं लोकं च काङ्क्षेत देहाऽऽवेशात्प्रमाद्यति ॥ १३ ॥ एतद् विद्वान् पुरा मृत्योरभवाय घटेत सः ॥ अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदम् ॥ १४ ॥ छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिम् ॥ खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलम्पटः ॥ १५ ॥ अहोरात्रैश्छिद्यमानं बुद्ध्वाऽऽयुर्भयवेपथुः ॥ मुक्तसङ्गः परं बुद्ध्वा निरीह उपशाम्यति ॥ १६ ॥ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ॥ मयाऽनुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत् स आत्महा ॥ १७ ॥

काङ्क्षेत् । यद्वा । उभयसाधकानि काम्यानि निषिद्धानि वा कर्माणि न कुर्यादित्यर्थः । अतिश्रेष्ठत्वात्पुनरपि मनुष्यो भवेयमिति इमं मनुष्यलोकमपि न काङ्क्षेत् । यतो देहावेशात् देहादावहंममाध्यासात् प्रमाद्यति स्वरूपानुसन्धानरहितो भवति ॥ १३ ॥ एतदिति ॥ अपि तु एतच्छरीरसम्बन्धस्यानर्थहेतुत्वं विद्वान् जानन् स विवेकी इदं प्राप्तं शरीरमर्थसिद्धिदं पुरुषार्थप्राप्तिसाधनमपि मर्त्यं मरणशीलं ज्ञात्वा मृत्योः पुरा समर्थावस्थायामेव अप्रमत्तः सावधानः सन्नभवाय मोक्षाय घटेत यत्नं कुर्यात् ॥ १४ ॥ छिद्यमानमिति ॥ यथा कृतं नीडं यस्मिंस्तं स्वकेतं स्वाश्रयं वनस्पतिं यमैर्यमवन्निर्दयैरेतैः पुरुषैः छिद्यमानं दृष्ट्वा तत्रालम्पटः अनासक्तः खगस्तमुत्सृज्य क्षेमं सुखं याति ॥ १५ ॥ अहोरात्रैरिति ॥ तथा अहोरात्रैः कालांशैः छिद्यमानम् आयुर्बुद्ध्वा भयेन वेपथुः कम्पो यस्य सः मुक्तसङ्गः अनासक्तः सन् परं परमात्मानं बुद्ध्वा निरीहः सन्नुपशाम्यति ॥ १६ ॥ नृदेहमिति ॥ आद्यं सर्वफलमूलं तदुपार्जितसाधनैरेव सर्वफलप्राप्तेः सुदुर्लभमुपायकोटिभिरपि प्राप्तुमशक्यं तथापि सुलभमकस्माल्लब्धत्वात् सुकल्पं सर्वसाधनक्षमं गुरुः सांश्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमात्र एव कर्णधारो यस्य तम् । मया स्मृतमात्रेणेश्वरेणानुकूलमारुतेन प्रेरितं प्रापितं नृदेहं प्लवं नावं लब्ध्वेति शेषः । यो भवाब्धिं संसारसागरं न तरेत् स आत्महा आत्मानमेव दुःखसागरे न्यमज्जयदिति ॥ १७ ॥ एवमविरक्तस्य कर्मयोगमुक्त्वा विरक्तस्य ज्ञानयोगं वदन् ज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं वर्जनीयं चाह—यदेति ॥ यदा त्वारम्भेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नस्तत्फलेषु विरक्तश्च तदायं योगी संयतेन्द्रियः सन् प्राणायामाद्यभ्यासेनात्मनः स्वस्य मनः । यद्वा । आत्मनोऽभ्यासेन आत्मविषयवृत्तिसन्तत्या अचलं यथा तथा धारयेन्मयीति शेषः ॥ १८ ॥ धार्यमाणमिति ॥ मयि धार्यमाणमपि मनो यर्हि पूर्वमेवात्यन्तधारणासंभवात् आश्वेव भ्राम्यत् विषयान्तरं प्रति गच्छत् अनवस्थितं स्यात्तदा अतन्द्रितः अनलसः प्रयत्नवान् सन् अनुरोधेन मार्गेण किंचित्तदपेक्षापूरणद्वारेण शनैरात्मनो वशं नयेत् ॥ १९ ॥ ननु तर्हि यथापूर्वमेव स्यात्तत्राह—मन इति ॥ सर्वथा मनोगतिं नैव विसृजेत् नोपेक्षेत किंतु जितप्राणो जितेन्द्रियश्च सन् सत्वगुणसंपन्नया बुद्ध्या मन आत्मवशं नयेत् । मयि धारयेदित्यर्थः ॥ २० ॥ अनुरोधमार्गं सदृष्टान्तं स्तौति—एष इति ॥ एषः अनुवृत्तिमार्गेण मनसः सङ्ग्रह एव परमो योगः स्मृतः योगसाधनत्वात् उपचारेण स्तुतिः । तत्र दृष्टान्तः । यथा अश्वचारकः

यदारम्भेषु निर्विण्णो विरक्तः संयतेन्द्रियः ॥ अभ्यासेनात्मनो योगी धारयेदचलं मनः ॥ १८ ॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितम् ॥
अतन्द्रितोऽनुरोधेन मार्गेणात्मवशं नयेत् ॥ १९ ॥ मनोगतिं न विसृजेज्जितप्राणो जितेन्द्रियः ॥ सत्त्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत्
॥ २० ॥ एष वै परमो योगो मनसः संग्रहः स्मृतः ॥ हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः ॥ २१ ॥ सांख्येन सर्वभावानां प्रतिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति ॥ २२ ॥ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः ॥ मनस्त्यजति दौरात्म्यं चिन्तितस्यानुचिन्तया ॥ २३ ॥ यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ॥ ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥ २४ ॥

अदान्तस्य दम्यस्य दमनीयस्यार्वतोऽश्वस्य हृदयज्ञत्वं स्वमनोऽभिप्रायानुसारगतिमन्विच्छन् अपेक्षमाणः शनैः शनैः पुनः पुनस्तमनुसरन्नेव शिक्षयति कदाचित्तं धावन्तं च रश्मिना धृत्वैव गच्छति न तु सर्वथोपेक्षते तथा किंचित्तदनुरोधं कुर्वन्नेव मनो वशं नयेदित्यर्थः ॥ २१ ॥ एवमीषद्वशीकृतस्य मनसोऽत्यन्तनैश्चल्योपायमाह—साङ्ख्येनेति ॥ यावन्मनः प्रसीदति निश्चलं भवति तावदनु निरन्तरं साङ्ख्येन तत्वविवेकेन सर्वभावानां महदादिदेहान्तानामनुलोमतः प्रकृत्यादिक्रमेण भवं प्रतिलोमतः पृथिव्यादिक्रमेणाप्ययं च ध्यायेत् ॥ २२ ॥ निर्विण्णस्येति ॥ नानाविधव्यापारेणोद्विग्नस्य तत्फलेषु विरक्तस्य च उक्तवेदिनः गुरूपदिष्टार्थालोचकस्य पुरुषस्य तस्यैव गुरूपदिष्टार्थस्य चिन्तितस्य तत्त्वस्यानुचिन्तया मनोदौरात्म्यं विषयासक्तिं त्यजतीत्यन्वयः ॥ २३ ॥ यमेति ॥ यमादिभिर्यमनियमासनादिभिर्योगमार्गैः आन्वीक्षिक्या तत्वविमर्शात्मिकया विद्यया च ममार्चायाः श्रीमूर्तेः उपासनाभिर्ध्यानादिभिर्वा उपायैर्मनोध्यानयोग्यं मां परमात्मानं स्मरेत् । नान्यैरुपायैः अतोऽन्यमुपायं न कुर्यादित्यर्थः । वाशब्देनास्य पक्षस्य स्वातन्त्र्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शयति ॥ २४ ॥ यदिति ॥ यद्यपि योगिनः पापाचरणं नैव संभवति तथापि कदाचित् यदि प्रमादेन योगी विगर्हितं निषिद्धं कर्म कुर्यात्तदा तदंहः पापं योगेन ज्ञानाभ्यासेनैव मद्ध्यानेनैव वा दहेत् । अतस्तत्र पापसंभावनायामन्यत्कृच्छ्रादि प्रायश्चित्तं कदाचनापि न कुर्यादित्यर्थः । योगेनेति नामसंकीर्त्तनज्ञानादेरप्युपलक्षणम् ॥ २५ ॥ ननु कृच्छ्रादिभिः पापनिवर्त्तने को दोष इति चेत्तत्राह—स्वे स्वे इति सार्द्धम् ॥ तत्र स्वे स्वेऽधिकारे भक्तस्य भक्तौ योगिनो योगे चेत्यादिर्या निष्ठा स्थितिः स एव गुणः न त्वितरः एतेन स्वस्वाधिकारविरुद्धा निष्ठा दोषः इत्यर्थादुक्तम् । कर्मणां स्वाभाविकप्रवृत्तिरूपाणां जात्या उत्पत्त्यैवाशुद्धानामनर्थमूलानामनेन गुणदोषविधानेन नियमः सङ्कोचः कृतः । स च सङ्गानां विषयासक्तीनां त्याजनेच्छया । अयं भावः । पुरुषस्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् । न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते । अत इदं न कर्त्तव्यमिदमेव कर्त्तव्यमित्येवं स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते । वेदस्य निवृत्तिपरत्वम् उत्तराध्याये " उत्पत्त्यैव हि कामेषु " इत्यादिना वक्ष्यते । अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगोचरता । किंच ज्ञानिनो ज्ञानेन भक्तस्य भक्त्या च यदि पापं न नश्येत्तदा तेन तेन पापनाशार्थं

यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितम् ॥ योगेनैव दहेदंहो नान्यत्तत्र कदाचन ॥ २५ ॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः ॥ कर्मणां जात्यशुद्धानामनेन नियमः कृतः ॥ गुणदोषविधानेन सङ्गानां त्याजनेच्छया ॥ २६ ॥ जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु ॥ वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः ॥ २७ ॥ ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः ॥ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २८ ॥ प्रोक्तेन भक्तियोगेन भजतो माऽसकृन्मुनेः ॥ कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते ॥ २९ ॥

प्रायश्चित्तमनुष्ठीयेत । ज्ञानभक्त्योः सर्वपापनाशकत्वं सर्वशास्त्रसिद्धमतः पराधिकारगतकृच्छ्रादि तेन तेन कुतोऽनुष्ठेयम् । कृच्छ्राद्यनुष्ठाने च स्वधर्मनिष्ठापरित्यागः परधर्मप्रसक्तिश्च स्यात् । वस्तुतो ज्ञानिभक्तयोः पापे प्रवृत्तिरेव न स्यात् । यदि दैवात्स्यात्तदपि ज्ञानभक्तियोगयोर्जात्यैव परमशोधकत्वात्ताभ्यामेव स्वत एव पापक्षय इत्यतो गुणदोषमयविधिप्रतिषेधाधिकारमध्यपातित्वं ज्ञानिभक्तयोः प्रायेण नोक्तम् ॥ २६ ॥ भक्त्यधिकारिणो भक्तियोगमाह—जातश्रद्ध इति युग्मम् ॥ यस्तु मत्कथासु जातश्रद्धोऽत एव सर्वकर्मसु लौकिकवैदिकेषु दुःखबुद्ध्या उद्विग्नः न तु तत्फलेषु यतः कामान् विषयान् दुःखात्मकान् दुःखप्रदान् वेद जानन्नपि यस्मात् तत्परित्यागे अनीश्वरः अशक्तः स तु ततः तामवस्थामारभ्यैव दुःखमुदर्कमुत्तरफलं येषां तान् कामान् गर्हयन् निन्दन्नेव जुषमाणः प्रीतः प्रसन्नचित्तः श्रद्धालुर्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयश्च सन् श्रवणादिभिर्मां भजेत् ॥ २७ ॥ २८ ॥ प्रोक्तेनेति ॥ श्रद्धामृतकथायां मे इत्यादिनोक्तप्रकारेण असकृत् नित्यं मां भजतो मुनेः मयि हृदि स्थिते सति हृदय्याः हृद्गताः कामवासनाः सर्वा अपि नश्यन्ति ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिद्यत इति ॥ अस्य मद्भक्तस्याखिलानामात्मनि स्वरूपभूते मयीश्वरे दृष्टे साक्षात्कृते तदनन्तरमेव हृदयमेव ग्रन्थिश्चिज्जडग्रथनरूपोऽहङ्कारः ग्रन्थिवत् दुर्मोचनीयो भिद्यते निवर्त्तते। ततः सर्वे संशयाः असम्भावनाद्याः च्छिद्यन्ते। ततः कर्माण्यनारब्धफलानि संसारहेतुभूतानि क्षीयन्ते। सर्वत्र कर्मकर्त्तरि लट्। शेषं प्रथमस्कन्धे ज्ञेयम् ॥ ३०॥ तदेवं व्यवस्थयाऽधिकारत्रयमुक्तं तत्रापि भक्तेरन्यनिरपेक्षत्वात् अन्यस्य च तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति—तस्मादिति ॥ तस्मात् भक्तियोगस्य मुख्यसाधनत्वात् इह कर्मादिसाधनत्रयमध्ये मद्भक्तियुक्तस्य मय्येवात्मा चित्तं यस्य तस्य योगिनो न ज्ञानं प्रकृतिविविक्तात्मज्ञानं न च वैराग्यं विषयवैतृष्ण्यरूपं श्रेयो भवेत् श्रेयःसाधनतया नापेक्षितं भवेदित्यर्थः ॥ ३१ ॥ तत्र हेतुः—यदिति युग्मम् ॥ यत्फलं कर्मभिः यज्ञादिभिः तपसा शास्त्रीयकायक्लेशेन इत्यादिभिः तथा इतरैः श्रेयःसाधनैः तीर्थव्रतादिभिरवाप्यते तत्सर्वं स्वर्गमपवर्गं मोक्षं मद्धाम वैकुण्ठं मद्भक्तः कथंचित् साधनावस्थायां यदि वाञ्छति तदापि अञ्जसा मद्भक्तियोगेन लभते। यदि वाञ्छतीत्यनेन

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः॥क्षीयन्ते चाऽस्य कर्माणि मयि दृष्टेऽखिलात्मनि॥३०॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ३१ ॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि॥ ३२॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति ॥ ३३ ॥ न किंचित्साधवो धीरा भक्ता ह्येकान्तिनो मम ॥ वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥३४॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकम् ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत्॥ ३५॥ न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां समचित्तानां बुद्धेः परमुपेयुषाम् ॥ ३६ ॥ एवमेतान्मयादिष्टाननुतिष्ठन्ति मे पथः ॥ क्षेमं विन्दन्ति मत्स्थानं यद्ब्रह्म परमं विदुः ॥ ३७ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे विंशतितमोऽध्यायः ॥ २० ॥

वाञ्छा तु तस्य नास्तीत्युक्तम् ॥ ३२ ॥ ३३ ॥ नेति ॥ वस्तुतस्तु साधवः सदाचाराः धीराः धीमन्तः एकान्तिनो मदेकनिष्ठाः मम भक्ताः मया दत्तमपि अपुनर्भवमात्यन्तिकमपि कैवल्यं न गृह्णन्ति। किं पुनर्वक्तव्यं न वाञ्छन्तीति ॥ ३४ ॥ तदुपपादयति—नैरपेक्ष्यमिति ॥ यस्मात् निरपेक्षस्य सर्वापेक्षारहितस्य पूर्णकामस्य मम भक्तिर्निराशिषो निष्कामस्यैव पुरुषस्य भवेत् तस्मान्नैरपेक्ष्यमेव परं सर्वत उत्कृष्टमनल्पकं महत् निःश्रेयसं पुरुषार्थसाधनं वृद्धाः प्राहुः। यद्वा। निरपेक्षस्येति पुरुषस्येति पुरुषस्यैव विशेषणं निराशीस्त्वदार्ढ्याय ॥ ३५ ॥ एवं भक्तिज्ञानसिद्धानां न गुणदोषा इति विरोधपरिहारमुपसंहरति—नेति ॥ मय्येकान्तभक्तानां तथा साधूनां निरस्तरागादीनां समचित्तानां बुद्धेः परमीश्वरमुपेयुषां प्राप्तवतां ज्ञानिनां च गुणदोषोद्भवा गुणाः पुण्यपापात्मका न भवन्ति ॥ ३६ ॥ एवमिति ॥ उक्तप्रकारान्मयोपदिष्टानेतान् त्रिविधान् मे पथः मत्प्राप्त्युपायान् ये अनुतिष्ठन्ति ते क्षेमं कालकर्मादिभयरहितं मम लोकं विन्दन्ति च यत्सर्वशास्त्रतात्पर्यगोचरं परमं ब्रह्म तच्च विदुः ॥ ३७ ॥ इति श्रीकृष्णसेवार्थम-

Nepal Sanskrit University, Varanasi. Collection.

CC-0. In Public Domain. Digitization by eGangotri

न्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमाद्दिश एकादशस्य च ॥२०॥ एकविंशे तु भक्त्यादिहीनानां कामिनां नृणाम् ॥ द्रव्यादिगुणदोषाश्च श्लोकाः सार्द्धास्त्रिसिन्धवः ॥ उवाचेत्यत्रैकमेव श्लोकैस्तुल्या अनुष्टुभः ॥ २१ ॥ य इति ॥ ये एतान् मदुक्तान् भक्त्यादिरूपान् मत्पथो मत्प्राप्तिमार्गान् । समासान्ताभाव आर्षः । हित्वा चलैः विषयेषु धावनस्वभावैः प्राणैरिन्द्रियैः क्षुद्रान् नश्वरत्वेन तुच्छान् कामान् विषयान् जुषन्तः सेवमाना भवन्ति । शता आर्षः । ते संसरन्ति निखिलगुणदोषभाक्त्वेन नानायोनीः प्राप्नुवन्तीत्यर्थः ॥ १ ॥ ननु तैरेव कर्मभिः केचिद्गुणदोषभाजः केचिन्नेति कुतो वैषम्यम् । न ह्यग्निना केचित्तप्यन्ते केचिन्नेति संभवति तत्राह–स्वे स्व इति ॥ पूर्वार्द्धं स्पष्टम् । विपर्ययः पराधिकारे स्थितिरूपस्तु दोषः स्यात् उभयोर्गुणदोषयोरेष निश्चयः स्वरूपनिर्णयः अतोऽधिकारभेदेन कल्पितौ गुणदोषौ न तु वस्तुनिष्ठाविति भावः ॥ २ ॥ शुद्ध्यशुद्धी इति ॥ समानेष्वपि वस्तुषु उत्तरश्लोके वक्ष्यमाणेषु भूम्यादिषु द्रव्येषु तस्य द्रव्यादेर्विचिकित्सार्थं योग्यमयोग्यं वेति सन्देहद्वारा स्वाभाविकप्रवृत्तिप्रतिबन्धार्थं “ मशकार्थो धूम ” इतिवत् शुद्ध्यशुद्धी योग्यत्वायोग्यत्वे विधीयेते । यथा शाकादिष्वपि वास्तूकशाकः योग्यः कलम्बीशाकस्त्वयोग्यः इति । तथा गुणदोषौ तन्निमित्तोपादेयत्वानुपा-

॥ श्रीभगवानुवाच ॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् ॥ क्षुद्रान्कामांश्चलैः प्राणैर्जुषन्तः संसरन्ति ते ॥ १ ॥ स्वे स्वेऽ-
धिकारे या निष्ठा स गुणः परिकीर्तितः ॥ विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥ २ ॥ शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु ॥
द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥ ३ ॥ धर्मार्थं व्यवहारार्थं यात्रार्थमिति चाऽनघ ॥ दर्शितोऽयं मयाऽऽचारो धर्ममुद्व-
हतां धुरम् ॥ ४ ॥ भूम्यम्ब्वग्न्यनिलाकाशा भूतानां पञ्च धातवः ॥ आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ॥ ५ ॥ वेदेन नामरू-
पाणि विषमाणि समेष्वपि ॥ धातुषूद्धव कल्प्यन्त एतेषां स्वार्थसिद्धये ॥ ६ ॥

देयत्वे शुभाशुभौ तन्निमित्तार्थानर्थौ च विधीयेते विभज्य ज्ञाप्येते ॥ ३ ॥ धर्मार्थमिति ॥ हे अनघ तत्र शुद्ध्यशुद्धी धर्मार्थं विधीयेते शुद्धे न धर्मः अशुद्धेन अधर्मः इति गुणदोषौ व्यवहारार्थं विधीयेते । अशुद्धावपि राजादिभिः व्यवहारदर्शनादिकमुपादेयं नान्यदिति शुभाशुभौ यात्रार्थं निर्वाहार्थं विधीयेते । असत्प्रतिग्रहादेर्दोषत्वेऽप्यापत्सु शरीरनिर्वाहमात्रोपादाने शुभमेव अधिकोपादानं त्वशुभं पापमेवेति । अयं चाचारो धर्मरूपां धुरं भारमुद्वहतां कर्मजडानामित्यर्थः । नृणामर्थे मन्वादिरूपेण मया दर्शितः ॥ ४ ॥ शुद्ध्यशुद्धी प्रपञ्चयिष्यन् वेदोक्तत्वेन तत्राभिनिवेशो मा भूदिति समानेष्ववस्तुष्विति यदुक्तं तत्प्रपञ्चयति–भूमीति ॥ आब्रह्मस्थावरादीनां भूतानां प्राणिनां भूम्यादयः पञ्चैव शारीराः शरीरारम्भकाः इति देहतः साम्यमुक्तम् । आत्मना जीवेन संयुताः इति जीवतः साम्यम् । धातवः धारयन्तीति धातवः कारणानि । अतः समानकारणकत्वात्सर्वाणि वस्तूनि समान्येव ॥ ५ ॥ वेदेनेति ॥ हे उद्धव एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादिषु पुरुषार्थसिद्धये समेष्वपि धातुषु धात्वारब्धदेहेषु विषमाणि ब्राह्मणोऽयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षत्रियोऽयमित्यादिनामरूपाणि वाच्यवाचकानि वेदेन कल्प्यन्ते ॥ ६ ॥ देशेति ॥ हे सत्तम न केवलं देहेष्वेव किंतु देशकालादिभावानामपि । आदिशब्देन अनुपादेयानां फलनिमित्ताधिकारिणां ग्रहणम् । वस्तूनां द्रव्यादीनामपि कर्मणां स्वाभाविकप्रवृत्तीनां नियमार्थं संकोचार्थमेव मम मया वेदरूपेण गुणदोषौ विधीयेते ॥ ७ ॥ एवं गुणदोषविषयं परिशोध्य तयोः शुद्ध्यशुद्धिमूलत्वात् शुद्ध्यशुद्धी प्रपञ्चयति—अकृष्णेति ॥ देशानां मध्ये अकृष्णसारः कृष्णमृगप्रचाररहितो देशः अशुचिर्भवेत् तत्राप्यब्रह्मण्यः ब्राह्मणभक्तिरहितोऽत्यन्तमशुचिः कृष्णेन मृगेण सारः श्रेष्ठः कृष्णमृगसंचारवानपि च असौवीरः सुवीराः सत्पुरुषास्तद्वान्सौवीरस्तद्व्यतिरिक्तः असौवीरः कीकटादिरप्यशुचिः । कीकटदेशो मगधाङ्गवङ्गकलिङ्गादिः । “अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च । तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति ॥ ” इति स्मृतेः । असंस्कृतः म्लेच्छादिबहुलः संमार्जनादिरहितो वा ईरिणमूषरं च । द्वन्द्व एकवद्भावः । एतद्व्यतिरिक्तः कृष्णमृगसत्पुरुषादियुक्तस्तु कीकटादिरपि शुचिरित्यर्थादुक्तं ज्ञेयम् । “ स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते । ” इति वचनात् ॥८॥ कर्मण्य इति ॥ द्रव्यतो द्रव्यसंपत्त्या स्वतो वा पूर्वाह्णादिर्यः कर्मण्यः कर्मार्हः स कालस्तस्मिन् कर्मणि गुणवान्

देशकालादिभावानां वस्तूनां मम सत्तम ॥ गुणदोषौ विधीयेते नियमार्थं हि कर्मणाम् ॥ ७ ॥ अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत् ॥ कृष्णसारोऽप्यसौ वीरः कीकटासंस्कृतेरिणम् ॥८॥ कर्मण्यो गुणवान् कालो द्रव्यतः स्वत एव वा ॥ यतो निवर्त्तते कर्म सदोषोऽकर्मकः स्मृतः ॥९॥ द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च ॥ संस्कारेणाथ कालेन महत्त्वाल्पतयाऽथवा ॥१०॥ शक्त्याऽशक्त्याऽथवा बुद्ध्या समृद्ध्या च यदात्मने ॥ अघं कुर्वन्ति हि यथा देशावस्थानुसारतः ॥ ११ ॥

यतो यस्मिन् द्रव्यालाभेन वा राष्ट्रविप्लवादिना सूतकादिसंचारेण वाऽरब्धमपि कर्म निवर्तते न समाप्यते सः कालोऽकर्मकः कर्मानर्हः अत एव दोषः अशुद्धः स्मृतः ॥ ९ ॥ द्रव्यस्येति युग्मम् ॥ द्रव्यस्य वस्त्रादेर्द्रव्येण तोयादिना शुद्धिः असृङ्मूत्रादिना त्वशुद्धिः । वचनेनेति । शुद्धमशुद्धं वेति सन्देहे शुद्धमित्येवंरूपेण ब्राह्मणवचनेन शुद्धिः । अशुद्धमिति विपरीतवचनेनाशुद्धिः । संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः अवघ्राणादिना त्वशुद्धिः । “ कालेन काले मेवोदकं ग्राह्यं वर्ज्यं तु त्र्यहमेव हि । अकाले दशरात्रं स्यात्ततः शुद्धिर्विधीयते ॥” इति दशाहादिना नवोदकादेः शुद्धिर्विपरीतेनाशुद्धिः पर्युषितान्नादेरशुद्धिः अन्त्यजाद्युपहतानां तटाकानां महत्त्वाच्छुद्धिः अल्पत्वात्त्वशुद्धिः । शक्त्याशक्त्येति । यथा शक्तस्य स्नानादिनैव शुद्धिः ज्वरादिना अशक्तस्य तु स्नानादिविनापि शुद्धिः । बुद्ध्या पुत्रजन्मादौ दशाहाद्बहिर्ज्ञानेन शुद्धिः अन्तर्ज्ञाने त्वशुद्धिः । समृद्ध्येति । सूतकान्नादेः समृद्धं प्रत्यशुद्धिः दरिद्रं प्रति तु शुद्धिः । तत्रापि विशेषमाह । यदिति । एते हि द्रव्यवचनादयो द्रव्याशुद्धिद्वारा आत्मने यदघं कुर्वन्ति तद्देशावस्थानुसारत एव । यथा यथावत्कुर्वन्ति न सर्वतः । तथा हि निर्भय एव देशे स्नानादिना शुद्धिं कुर्वन्ति चोरव्याघ्रादिभयाकुले देशे तु स्नानादिविनापि शुद्धिरेव । तथा रोगादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यतिरिक्तयुवाद्यवस्थायामेव ते स्नानादिना शुद्धिं कुर्वन्ति । बाल्यरोगाद्यवस्थायां तु तद्विनापि नाशुद्धिः । हिशब्देनात्र शास्त्रप्रसिद्धिं सूचयति । तथाच स्मृतिः । "देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ॥" इति ॥ १० ॥ ११ ॥ द्रव्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं तत्र वचनादिशुद्धिरेकरूपैव । द्रव्यतस्तु शुद्धिर्बहुधेति तां प्रपञ्चयति—धान्येति ॥ धान्यादीनां रसादीनां पार्थिवानां युतायुतैः कालवाय्वादिभिः शुद्धिरित्यन्वयः । तत्र धान्यस्य वाय्वातपादिना शुद्धिः । दारूणां काष्ठानां लौकिकानां वैदिकानां ग्रहचमसादीनां च मृत्तोयाभ्यामत्यन्तामेध्योपहतानां तु तक्षणेन शुद्धिः।अस्थ्नां गजदन्तादीनां वाय्वातपादिना शुद्धिः । तन्तुरचितवस्त्राणां तोयेन शुद्धिः । रसस्य क्षीरघृतमध्वादेः केशादिशोधनेन तापादिना च । तैजसानां सुवर्णादीनां क्षालनदाहादिना । चर्मणां तैलेन । अन्येषामपि पार्थिवानां रथ्याकर्दमघटेष्टकादीनां यथायथं कालादिभिः शुद्धिः । तत्रापि काकान्त्यजाद्युपघाततारतम्येन देशकालाद्यनुसारेणैव । एतैरन्यैश्च युतायुतैः मृत्तोयादिभिर्मिलितैः केवलैश्च शुद्धिः । यथा तैजसानां मृत्तोयाग्निभिः । ऊर्णायाः केवलेन वायुनेति ॥ १२ ॥ अमेध्येति ॥ अमेध्येन लिप्तं यत् पीठपात्रवस्त्रादि तत् येन तत्क्षणक्षाराम्लोदकादिना गन्धं च लेपं च

धान्यदार्वस्थितन्तूनां रसतैजसचर्मणाम् ॥ कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः ॥१२॥ अमेध्यलिप्तं यद्येन गन्धलेपं व्यपोहति ॥ भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते ॥ १३ ॥ स्नानदानतपोऽवस्थावीर्यसंस्कारकर्मभिः ॥ मत्स्मृत्या चात्मनः शौचं शुद्धः कर्माचरेद् द्विजः ॥ १४ ॥ मन्त्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणम् ॥ धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः ॥ १५ ॥ क्वचिद् गुणोऽपि दोषः स्याद्दोषोऽपि विधिना गुणः ॥ गुणदोषार्थनियमस्तद्भिदामेव बाधते ॥ १६ ॥

व्यपोहति त्यजति स्वगतं मलं त्यक्त्वा च प्रकृतिं स्वमेव रूपं भजते तस्य तच्छौचं शोधकम् । यावता च तक्षणादिना मलं व्यपोहति तावत्प्रमाणं स्वरूपत आवृत्तितो वा तत्कर्त्तव्यमिष्यते ॥ १३ ॥ कर्तृशुद्धिमाह—स्नानेति ॥ आत्मनः साहङ्कारस्य कर्तुरेतैः स्नानादिभिर्यथायथं तत्तत्कर्मानुसारि शौचं शुद्धिर्भवति । इयं च शुद्धिर्न व्यवहारार्थं किंतु विहितकर्मानुष्ठानार्थेत्याह।शुद्ध इति । एतैः शुद्धः सन्नेव द्विजः उपलक्षणतया शूद्रादिरपि कर्माचरेत् । अवस्था कर्मयोग्या वीर्यं शक्तिः संस्कार उपनयनादिः कर्मसन्ध्योपासनदीक्षादि ॥ १४ ॥ मन्त्रस्येति ॥ सद्गुरुमुखाद्यथावत् साङ्गोपाङ्गविनियोगसहितं परिज्ञानं मन्त्रस्य शुद्धिः।मह्यमीश्वरायार्पणं कर्मणः शुद्धिः । एवम् अकृष्णसार इत्यारभ्य कथितैः देशकालद्रव्यकर्तृमन्त्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते । एतेषां यो विपर्ययः अशुद्धिः सोऽधर्मः अधर्महेतुरित्यर्थः ॥ १५ ॥ अयं च गुणदोषविभागो न क्वापि नियत इत्याह—क्वचिदिति ॥ विधिना विधिबलेन विषयभेदव्यवस्थया कचिद्गुणोऽपि दोषः स्यात्कचिद्दोषोऽपि गुणः स्यात् । यथा आपदि प्रतिग्रहो गुणोऽप्यनापदि निषिद्धत्वाद्दोषः । परधर्मश्च परस्य गुणोऽपि स्वस्य दोषः । अविरक्तस्य गृहस्थकुटुम्बत्यागादिर्दोषोऽपि विरक्तस्य विहितत्वात् गुणः । एवं योऽयं गुणदोषयोरेकस्मिन्नेवार्थे नियमः गुणदो- ॥ ६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षार्थं वा यो नियमः स तयोर्गुणदोषयोर्भिदां भेदमेव बाधते । भेदस्य वास्तवत्वे एवं विपर्ययो न स्यादित्याशयः ॥ १६ ॥ क्वचिद्दोषस्य दोषाभावत्वं गुणत्वं चाह–समानेति ॥ तुल्यस्यापि कर्मणः सुरापानादेराचरणमपतितानां पतनहेतुरपि जात्या कर्मणा वा पतितानां पुनः पातकमधिकारभ्रंशकं न भवति पूर्वमेव पतितत्वात् । अतोऽत्र दोषस्यापि दोषता नास्तीत्यर्थः । तथा स्त्र्यादिसङ्गो यतेर्दोषोऽपि गृहस्थस्यौत्पत्तिकः स्वीकृतो गुण एव । " ऋतौ भार्यामुपेयात् " इति विहितत्वात् । उभयत्र दृष्टान्तमाह । पूर्वमेवाधः शयानो यथा पुनर्न पतति तथेति ॥ १७ ॥ अतः प्रवृत्तिशास्त्रस्यापि निवृत्तावेव तात्पर्यमित्याह–यतो यत इति ॥ यतो यतो विषयात्पुरुषो निवर्त्तेत विश्लिष्येत ततस्तत एव बन्धाद्विमुच्येत । एष विषयासक्तिबन्धनिवृत्तिलक्षणो धर्म एव नृणां क्षेमः परमसुखावहः शोकाद्यनर्थनिवर्तकश्च ॥ १८ ॥ ननु शास्त्रं यथाश्रुतार्थे न प्रवृत्तिपरमेव किन्न स्यादित्याशङ्क्य प्रवृत्तेरनर्थहेतुतां दर्शयति–विषयेष्विति ॥ प्रथमं विषयेषु गुणाध्यासात् रमणीयबुद्धेः ततः तेषु पुंसः सङ्गः आसक्तिर्भवेत् । सङ्गाच्च तत्र तेषु विषयेषु कामो भोगाभिनिवेशो भवेत् । तदा येन स कामः प्रतिहन्यते तेन सह तेषां नृणां कामादेव हेतोः कलिः कलहो विवादो भवति ॥ १९ ॥ कलेरिति ॥ कलेश्च दुर्विषहः तीव्रः

समानकर्माचरणं पतितानां न पातकम् ॥ औत्पत्तिको गुणः सङ्गो न शयानः पतत्यधः ॥ १७ ॥ यतो यतो निवर्त्तेत विमुच्येत ततस्ततः ॥
एष धर्मो नृणां क्षेमः शोकमोहभयापहः ॥ १८ ॥ विषयेषु गुणाध्यासात्पुंसः सङ्गस्ततो भवेत् ॥ सङ्गात्तत्र भवेत्कामः कामादेव कलिर्नृणाम्
॥१९॥ कलेर्दुर्विषहः क्रोधस्तमस्तमनुवर्त्तते ॥ तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतम् ॥२०॥ तया विरहितः साधो जन्तुः शून्याय कल्पते ॥
ततोऽस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च ॥ २१ ॥ विषयाभिनिवेशेन नात्मानं वेद नापरम् ॥ वृक्षजीविकया जीवन् व्यर्थं भस्त्रेव यः
श्वसन् ॥ २२ ॥ फलश्रुतिरियं नृणां न श्रेयो रोचनं परम् ॥ श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनम् ॥ २३ ॥

क्रोधो भवति तं क्रोधं तमः संमोहोऽनुवर्त्तते । तमसा च पुंसो व्यापिनी तत्तत्पदार्थेषु प्रसृता चेतना कार्याकार्यविषयिका स्मृतिः द्रुतं शीघ्रं ग्रस्यते लुप्ता भवति ॥ २० ॥ तयेति ॥ हे साधो तया कार्याकार्यविवेकवत्या स्मृत्या रहितो जन्तुः जीवः शून्याय कल्पते असत्तुल्यो भवतीत्यर्थः । ततोऽस्य मूर्छितस्य मृततुल्यस्य च सर्वस्य स्वार्थस्य पुरुषार्थस्य भ्रंशो नाशो भवति ॥ २१ ॥ मृततुल्यत्वमेव स्पष्टयति–विषयेति ॥ विषयाभिनिवेशेन यः आत्मानं न वेद न चापरं परमात्मानं वेद । स वृक्षजीविकया वृक्षवत्पुरुषार्थाननुसन्धानपूर्वकाहारग्रहणमात्रेण जीवन् वर्त्तते स मूर्छिततुल्यः। तथा यः भस्त्रेव परसंतापार्थं श्वसन् व्यर्थमेव जीवन् वर्तते स मृततुल्यः अतः स्वार्थनाशः॥२२॥ ननु विषयाभिनिवेशोऽनर्थकरश्चेद्वेदेन कथं स्वर्गादिविषयः फलतया निरूपित इत्याशङ्क्याह–फलश्रुतिरिति ॥ " स्वर्गकामो यजेत इति " फलश्रुतिरियं नृणां श्रेयः परमफलतया स्वर्गादिकं न बोधयति किं त्वतिबहिर्मुखानां तेषां श्रेयसः परमफलस्य मोक्षस्य विवक्षया परं केवलं रोचनं कर्मसु रुच्युत्पादकं स्वर्गादिफलतया प्रोक्तम् । तत्र दृष्टान्तमाह ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यथेति । भैषज्यमौषधं तत्र रोचनं लड्डुकादिकं यथा पित्रोच्यते "पिब निम्बं प्रदास्यामि वत्स ते खण्डलड्डुकान्।" इति । तथा "शिखा ते वर्द्धते वत्स गुडुचीं श्रद्धया पिब"॥ इति । दीयते च परं नहि तदौषधपानफलं किं त्वारोग्यं तथेत्यर्थः ॥ २३ ॥ ननु कर्मकाण्डे मोक्षस्य नामापि न श्रूयते कथं मोक्षविवक्षयेत्युच्यते इत्याशङ्क्य यथाश्रुतार्थस्याघटनान्मोक्ष एव तस्य तात्पर्यमित्याह—उत्पत्त्येति ॥ कामेषु पश्वादिविषयेषु प्राणेषु आयुरिन्द्रियबलवीर्यादिषु स्वजनेषु पुत्रकलत्रादिषु च आत्मनः स्वस्यानर्थहेतुषु परिपाकतो दुःखहेतुष्वपि मर्त्याः प्राणिनः उत्पत्त्यैव शास्त्रोपदेशं विना स्वभावत एव आसक्तमनसो भवन्ति हि नात्र सन्देहः ॥ २४ ॥ नेति ॥ तानेवंभूतान् स्वार्थं परमपुरुषार्थमविदुषः अजानतः अत एव न तान् प्रह्वीभूतान् वेदो यद्बोधयिष्यति तदेव श्रेय इति विश्वसितान् वृजिनाध्वनि दुःखमार्गे सूकरादियोनिषु भ्राम्यतस्ततोऽपि पुनस्तमो वृक्षादियोनिं विशतः "पशुकामो यजेत आयुरिन्द्रियपुत्रादिकामो यजेत" इति कथं पुनस्तेष्वेव कामेषु स्वयं बुधो वेदो युञ्ज्यात् प्रवर्तयेत् । तथा सत्यनाप्तः स्यादित्याशयः ॥ २५ ॥ एवमिति ॥ कुबुद्धयः भ्रान्ताः केचित् कर्ममीमांसकाः एवं व्यवसितं वेदस्याभिप्रायमविज्ञाय कुसुमितामवान्तरफलप्ररोचनतया रमणीयां परमफलश्रुतिं

उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च ॥ आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु ॥ २४ ॥ न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि ॥ कथं युञ्ज्यात् पुनस्तेषु तांस्तमो विशतो बुधः ॥ २५ ॥ एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः ॥ फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि ॥ २६ ॥ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः ॥ अग्निमुग्धा धूमतान्ताः स्वं लोकं न विदन्ति ते ॥ २७ ॥ न ते मामङ्ग जानन्ति हृदिस्थं य इदं यतः ॥ उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः ॥ २८ ॥

वदन्ति । तत्र हेतुमाह । हि यस्मात् वेदज्ञा व्यासादयस्तथा न वदन्तीति । यद्वा । न वेदज्ञाः वेदाशयानभिज्ञा इति कुबुद्धीनां विशेषणम् । ततश्चैकमेव वाक्यम् ॥ २६ ॥ कामिन इति ॥ कामिनः विषयाभिलाषिणः अत एव कृपणा दीनाः अत एव लुब्धास्तृष्णाकुलाः अत एव पुष्पेषु पुष्पस्थानीयेषु स्वर्गाद्यवान्तरफलेषु परमफलबुद्धयः अत एवाग्निमुग्धाः अग्निसाध्यकर्माभिनिवेशेन लुप्तविवेकाः अत एव धूमतान्ताः धूममार्गोऽन्ते येषां ते स्वलोकम् आत्मतत्त्वं न विदन्ति । तथा च श्रुतिः । "कश्चिद्ध वा अस्माल्लोकात्प्रेत्य आत्मानं वेद अयमहमस्मीति कश्चित्स्वं लोकं न प्रतिजानाति अग्निमुग्धो हैव धूमतान्तः" इति ॥ २७ ॥ नेति ॥ अङ्ग हे उद्धव योऽयम् इदं जगत् मत्तः अभिन्नं यतश्च मत्त इदं जगत् ईदृशमपि हृदिस्थमपि च माम् उक्थं कर्मैव शस्त्रं शंस्यं कथनीयं पशुहिंसासाधनं वा येषां ते अत एव केवलमसुतृपः प्राणतर्पणपराः ते न जानन्ति नीहारं तमोभूमिकावातेन व्याप्तानि चक्षूंषि येषां ते यथा संनिहितमपि वस्तु न जानन्ति तद्वदित्यर्थः ॥ २८ ॥ ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त इति युग्मम् ॥ हिंसायां तत्फले मांसभक्षणे च यदि रागः स्यात् यदि तत्त्यागः कर्तुं न शक्यते तर्हि यज्ञ एवेत्यनुज्ञानमयी परिसङ्ख्या एव न तु तत्रावश्यकत्वेन चोदनाविधिरिति परोक्षमस्फुटं मे मतमविज्ञाय विषयात्मकाः विषयाविष्टचित्ताः हिंसाविहाराः खलास्ते स्वसुखेच्छया आलब्धैः हिंसितैः पशुभिः साधितैर्यज्ञैः देवताः पितृभूतपतींश्च यजन्ते ॥ २९ ॥ ३० ॥ स्वप्नोपममिति ॥ स्वप्नदृष्टपदार्थवद्विनश्वरं श्रवणमात्रेणैव प्रियं वस्तुतः असन्तम् अतिशयादिदर्शनेन दुःखजनकममुं परलोकं तथाऽस्मिन् लोक आशिषो विषयान् स्वहृदि संकल्प्य तत्रापि निश्चयो नास्ति विघ्नबाहुल्यात् । सिद्धानपि धनादिपदार्थान् त्यजन्ति तत्साधनव्यापारेषु विनियोजयन्ति । तत्र दृष्टान्तमाह । यथा कश्चिद्वणिक् दुस्तरसमुद्रादिलङ्घनेन बहुधनार्जनेच्छया सिद्धमपि धनं त्यजन्नुभयतो भ्रष्टो भवति तथेत्यर्थः ॥ ३१ ॥ रज इति ॥ यतस्ते स्वयं रजःसत्वतमोनिष्ठा अतो रजःसत्वतमोजुषः तादृशस्वभावानिन्द्रादीनेवोपासते मां गुणातीतं तु तथा नोपासते । यद्यपि इन्द्रादीनां मदंशत्वान्मदुपासनमेव तत् तथापि यथावन्नोपासते भेददर्शित्वात्

ते मे मतमविज्ञाय परोक्षं विषयात्मकाः ॥ हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना ॥ २९ ॥ हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया ॥ यजन्ते देवता यज्ञैः पितृभूतपतीन् खलाः ॥ ३० ॥ स्वप्नोपममममुं लोकमसन्तं श्रवणप्रियम् ॥ आशिषो हृदि संकल्प्य त्यजन्त्यर्थान् यथा वणिक् ॥ ३१ ॥ रजःसत्त्वतमोनिष्ठा रजःसत्त्वतमोजुषः ॥ उपासते इन्द्रमुख्यान् देवादीन्न तथैव माम् ॥ ३२ ॥ इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि ॥ तस्यान्त इह भूयास्म महाशाला महाकुलाः ॥ ३३ ॥ एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणाम् ॥ मानिनां चातिस्तब्धानां मद्वार्ताऽपि न रोचते ॥ ३४ ॥ वेदा ब्रह्मात्मविषयास्त्रिकाण्डविषया इमे ॥ परोक्षवादा ऋषयः परोक्षं मम च प्रियम् ॥ ३५ ॥

इत्यर्थः ॥ ३२ ॥ आशिषो हृदि संकल्प्येत्युक्तं संकल्पं दर्शयति—इष्ट्वेति । आद्यार्द्धं स्पष्टम् ॥ तस्य भोगस्यान्ते महाशाला महागृहस्थाः महाकुलभवाश्च भूयास्म भविष्यामः ॥ ३३ ॥ एवमिति ॥ पुष्पितया पुष्पस्थानीयस्वर्गादिपरया वेदवाचा एवं व्याक्षिप्तं मनो येषां तेषां मानिनां देहाद्यहङ्कारवताम् अतिस्तब्धानां गर्वितानां नृणां मद्वार्ताऽपि न रोचते अतस्ते मत्श्रवणत्वाभावात् नित्यं संसारिण एव भवन्तीति भावः ॥ ३४ ॥ वेदानां प्रवृत्तिपरत्वं निराकृत्य निवृत्तिपरत्वं प्रकृतमुपसंहरति—वेदा इति ॥ कर्मकाण्डदेवताकाण्डब्रह्मकाण्डविषया इमे सर्वेऽपि वेदाः ब्रह्मात्मविषयाः ब्रह्मैव सर्वेषामात्मा न संसारीति प्रतिपादनपराः । तत्परत्वाप्रतीतौ च फलश्रुतिरियं नृणामित्यादिरीत्या कारणमुक्तमेवानुस्मारयति । परोक्षेति । परोक्षमस्फुटमेव स्वाभिप्रायं वदन्तीति तथाभूता एव ऋषयो मन्त्रास्तद्द्रष्टारो वा अतो न तत्तात्पर्यं सर्वेषां स्फुरति परोक्षमेव च मम प्रियम् । अयं भावः । शुद्धान्तःकरणैरेव बोद्धव्यो नान्यैरनधिकारिभिः वृथा कर्मत्यागेन भ्रंशप्रसङ्गात् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु जैमिन्यादयः किमिति तथा वेदस्य ब्रह्मपरत्वं न वर्णयन्ति इत्याशङ्क्य तत्र मां विना वेदतत्वं कोऽपि न वेदेत्याशयेनाह—शब्देति ॥ शब्दब्रह्म वेदः सुदुर्बोधं तत्र स्वरूपतोऽपि दुर्ज्ञानमित्याह । प्राणेति । प्रथमं प्राणमयं पराख्यं ततो मनोमयं पश्यन्त्याख्यमनाहतचक्रस्थम् । उपलक्षणतया बुद्धिमयं मध्यमाख्यं हृदये मणिपूरकचक्रस्थं तत इन्द्रियमयं वैखर्याख्यं तस्य वाग्व्यञ्जकत्वेन वागिन्द्रियप्रधानत्वात् । किं च । अनन्तपारं समष्टिप्राणादिमयस्य निर्विशेषस्य च तस्य कालतो देशतश्चापरिच्छेदात् अर्थतोऽपि दुर्ज्ञानमाह । गम्भीरं निगूढार्थम् अत एव समुद्रवद्दुर्विगाह्यं मतिप्रवेशानर्हम् । तथा च श्रुतिः । "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहायां त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥" अस्यार्थः । वाचः शब्दब्रह्मणः परिमिता परिमितानि । जसोडादेशश्छान्दसः । पदानि रूपाणि चत्वारि ये मनीषिणो ब्राह्मणास्ते विदुः । गुहायां देहमध्ये त्रीणि निहितानि नेङ्गयन्ति स्वरूपं न प्रकाशयन्ति । यतो वाचस्तुरीयं केवलं चतुर्थं भागं वैखर्याख्यं मनुष्याः प्राणिनो वदन्ति । तमपि वदन्त्येव न तु तत्त्वतो जानन्ति ॥ ३६ ॥ तत्र मनीषिभिरेव ज्ञेयं सूक्ष्मं तत्वरूपं दर्शयति—मयेति ॥ भूम्ना अपरिच्छिन्नेन अनन्तशक्तिना नियन्त्रा ब्रह्मणा

शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम् ॥ अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत् ॥ ३६ ॥ मयोपबृंहितं भूम्ना ब्रह्मणाऽनन्तशक्तिना ॥ भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ॥ ३७ ॥ यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ॥ आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ॥ ३८ ॥ छन्दोमयोऽमृतमयः सहस्रपदवीं प्रभुः ॥ ओङ्काराद्व्यञ्जितस्पर्शस्वरोष्मान्तःस्थभूषिताम् ॥ ३९ ॥ विचित्रभाषाविततां छन्दोभिश्चतुरुत्तरैः ॥ अनन्तपारां बृहतीं सृजत्याक्षिपते स्वयम् ॥ ४० ॥

मयाऽन्तर्यामिणोपबृंहितमधिष्ठितं भूतेषु सर्वप्राणिषु घोषरूपेण नादरूपेण मनीषिभिर्लक्ष्यते ज्ञायते । बिसेषु कमलमृणालेषु ऊर्णातन्तुरिव लक्ष्यते ॥ ३७॥ यथेति त्रिकम् ॥ ऊर्णनाभिर्लूताकीटः यथा स्वहृदयात् हृदयाकाशात् मुखात् मुखद्वारा ऊर्णातन्तुमुद्वमते बहिः प्रकटयति । तद्वत् । तथा प्राणस्तु तदुपाधिहिरण्यगर्भरूपः प्रभुः समर्थो भगवान् छन्दोमयो वेदप्रतिपादितमूर्तिः स्वतस्त्वमृतमयः घोषवान् नादोपादानवान् सन् स्पर्शम् उपलक्षणतया स्पर्शादीन् वर्णान् रूपयति सङ्कल्पयति । स्पर्शरूपी तेन मनसा निमित्तभूतेन हृदयाकाशात् सहस्रपदवीं बहुमार्गाम् ओङ्कारात् उरःकण्ठादियोगेन व्यञ्जितैः स्पर्शादिभिर्भूषिताम् ओङ्कारश्चात्र हृद्गतः सूक्ष्मोऽभिप्रेतो नत्वकारादिवर्णरूपस्तस्य व्यङ्ग्यकोटिगत्वात् । तत्र स्पर्शाः कादयो मावसानाः पञ्च वर्गाः । स्वराः अकारादयः षोडश । ऊष्माणः शषसहाः । अन्तस्था यरलवाः । विचित्राभिर्वैदिकलौकिकभाषाभिर्विततां विस्तृतां यथोत्तरं चत्वार्यक्षराणि अधिकानि येषां तैश्छन्दोभिरुपलक्षिताम् । एवमनन्तपारां नास्त्यन्तः परिच्छेद्यः पारोऽवधिर्यस्यास्तां बृहतीं वैखरीं वाचं सृजति । तां स्वयमेवाक्षिपते संहरति च ॥ ३८ ॥ ३९ ॥ ४० ॥ ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गायत्रीति ॥ तत्र चतुर्विंशत्यक्षरा गायत्री । ततश्चतुरक्षरवृद्ध्योष्णिगादिच्छन्दांसि अत्यष्टिः अतिजगती अतिविराट् चेत्यर्थः । एतैः छन्दोभिरुपलक्षितामिति पूर्वेणैवान्वयः । अतो बृहत्यपि साकल्येन स्वरूपतो दुर्ज्ञेयैवेत्युक्तं भवति ॥ ४१ ॥ अथार्थतोऽपि दुर्ज्ञेयत्वमाह—किमिति ॥ कर्मकाण्डे विधिवाक्यैः किं विधत्ते । देवताकाण्डे च मन्त्रवाक्यैः किमाचष्टे किं प्रकाशयति । ज्ञानकाण्डे च निषेधार्थं किमनूद्य विकल्पयेदित्यस्या वेदवाचो हृदयं तात्पर्यं मत् मत्तोऽन्यः कश्चनापि न वेद न जानाति ॥ ४२ ॥ स्वयं तदभिप्रायमाह—मामिति सार्द्धम् ॥ कर्मकाण्डे मामेव यज्ञरूपं विधत्ते मामेव च तत्तद्देवतारूपमभिधत्ते । न मत्तः पृथक् यच्चाकाशादि प्रपञ्चजातम् । " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " इत्यादिना विकल्प्य " नेह नानास्ति किंचन " इत्यादिनापोह्यते निषिध्यते । तदप्यहमेव न मत्तः पृथगस्ति । शब्दो वेदः मां सर्वकारणत्वेन परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य " नेह नानास्ति किंचन " इति तद्भिदां च प्रतिषिध्यान्ते प्रसीदति निवृत्तव्यापारो भवति एतावानेव सर्ववेदस्यार्थः । अयं भावः । यथा ह्यङ्कुरे

गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ त्रिष्टुब्जगत्यतिच्छन्दो ह्यत्यष्ट्यतिजगद्विराट् ॥ ४१ ॥ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ॥ इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥ ४२ ॥ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहम् ॥ एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ॥ मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति ॥ ४३ ॥ इति श्रीभागवते एकादशस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥ उद्धव उवाच ॥ कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो ॥ नवैकादश पञ्च त्रीण्यात्थ त्वमिति शुश्रुम ॥ १ ॥ केचित्षड्विंशतिं प्राहुरपरे पञ्चविंशतिम् ॥ सप्तैके नव षट् केचिच्चत्वार्येकादशापरे ॥ केचित्सप्तदश प्राहुः षोडशैके त्रयोदश ॥ २ ॥ एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया ॥ गायन्ति पृथगायुष्मन्निदं नो वक्तुमर्हसि ॥ ३ ॥

यो रसः स एव तद्विस्तारभूतनानाकाण्डशाखास्वपि । तथैव प्रणवस्य योऽर्थः परमेश्वरः स एव तद्विस्तारभूतानां सर्ववेदकाण्डशाखानामपि सङ्गच्छते नान्य इति ॥ ४३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशस्यैकविंशे व्यधाद्गङ्गासहायकः ॥ २१ ॥ द्वाविंशे तत्वसङ्ख्यायामविरोधविधोच्यते ॥ पुंप्रकृत्योर्विवेकोऽत्र श्लोकाः सार्द्धाः कुषण्मिताः ॥ उवाचसप्तकं साङ्घ्रित्रियंःषष्टिरनुष्टुभः ॥ २२ ॥ पूर्वं साङ्ख्येन सर्वभावानामिति तत्वविमर्शस्य मनःप्रसादहेतुत्वमुक्तं तत्र तत्त्वानां न्यूनाधिक्यसन्देहात्पृच्छति—कतीति ॥ हे विश्वेश हे प्रभो ऋषिभिरागमेषु तत्वानि बहुधा सङ्ख्यातानि त्वं तु नवैकादश पञ्च त्रीन् अष्टाविंशति तत्वान्यात्थ । ऊनविंशेऽध्याये तद्वयं शुश्रुम श्रुतवन्तस्तत्र कति युक्तानीति । अत्र केचित् प्राहुः । प्रकृतिस्थाने त्रयो गुणा एव त्वया गृहीताः न तु गुणसाम्यरूपा प्रकृतिरिति ॥ १ ॥ केचिदिति सार्द्धम् ॥ स्पष्टम् ॥ २ ॥ एतावत्त्वमिति ॥ हे आयुष्मन् नित्यमूर्ते सङ्ख्यानामेतावत्तीनां भाव एतावत्त्वं नानात्वं यद्विवक्षया यत्प्रयोजनमभिप्रेत्य ऋषयः पृथक् गायन्ति तदिदं प्रयोजनं नोऽस्मभ्यं वक्तुमर्हसि ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तं च सन्तीति ॥ ब्राह्मणा ऋषयो यथा भाषन्ते यथा तत्सर्वं युक्तमेव। यतः सन्ति सर्वत्रान्तर्भूतानि सर्वाणि तत्वानि सन्ति युक्तयः। सन्तीति पाठान्तरन्तु स्पष्टार्थम्। मदीयां मायामुद्गृह्य स्वीकृत्य न्यूनाधिकादि वदतां किं नु दुर्घटं सर्वमविरुद्धमेवेत्यर्थः। असत्वेऽपि मायाश्रयत्वाद् घटत एवेत्यर्थः । न हि मरीचिजलपरिमाणादिविचारे किंचिदघटितमिव भवति ॥ ४ ॥ ननु सर्वस्य युक्तत्वे कुतो विवादः मायाया एवालम्बनत्वे कुतो हेतुं प्रति विवादस्तत्राह—नैतदिति ॥ यथा त्वमात्थ वदसि एतत्तत्वं तथा न भवति किंतु यथाऽहं यद्वच्मि तत्तथा यथार्थमेवं विवदमानानां जनानां मदीया दुरतिक्रमाः शक्तयः सत्वाद्या अन्तःकरणवृत्तिविशेषरूपेण परिणता एव विवादहेतुरित्यर्थः ॥ ५ ॥ यासामिति ॥ यासां सत्त्वादिशक्तीनां व्यतिकरात् क्षोभवृत्तिरूपेण परिणामात् वदतां विवदमानानां पदं विषयः विवादकारणं विकल्पः पक्षभेद आसीत्। अन्तःकरणवृत्तिविकल्पो वा तन्मूलभूत आसीत् अत एव शमदमे शमदमयोर्द्वन्द्वैक्यं तस्मिन् मनइन्द्रियनिग्रहे विवादनाशके प्राप्ते सति सर्ववृत्तिलयात् एषां वाक्यानामालम्बनभूतः विकल्पोऽपि अप्येति विलीयते। तं विकल्पस्याप्ययं नाशमनु पश्चाद्विवादोऽपि शाम्यति निवर्तते ॥ ६ ॥ परस्परेति ॥ हे पुरुषर्षभ तत्वानां परस्परानुप्रवेशात् अन्योऽन्य-

श्रीभगवानुवाच ॥ युक्तं च सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा ॥ मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् ॥ ४ ॥ नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा ॥ एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः ॥ ५ ॥ यासां व्यतिकरादासीद्विकल्पो वदतां पदम् ॥ प्राप्ते शमदमेऽप्येति वादस्तमनुशाम्यति ॥ ६ ॥ परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ ॥ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितम् ॥ ७ ॥ एकस्मिन्नपि दृश्यन्ते प्रविष्टानीतराणि च ॥ पूर्वस्मिन् वाऽपरस्मिन्वा तत्त्वे तत्त्वानि सर्वशः ॥ ८ ॥ पौर्वापर्यमतोऽमीषां प्रसंख्यानमभीप्सताम् ॥ यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात् ॥ ९ ॥ अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् ॥ स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥ १० ॥

स्मिन्नन्तर्भावात् वक्तुर्वादिनो यथा विवक्षितं तथा पौर्वापर्यप्रसङ्ख्यानं पूर्वं कारणमपरं कार्यं कार्यकारणभावेन प्रसङ्ख्यानं गणनं भवति। यद्वा। पूर्वा अल्पसङ्ख्या अपरा अधिकसङ्ख्या तयोर्भावः पौर्वापर्यं तेन प्रसङ्ख्यानमित्यर्थः ॥ ७ ॥ अनुप्रवेशमाह—एकस्मिन्नपीति ॥ एकस्मिन्नपि पूर्वस्मिन् कारणभूते तत्वे इतराणि कार्यरूपाणि सर्वशः सर्वाणि तत्वानि सूक्ष्मरूपेण मृदि घटवत्प्रविष्टानि अन्तर्भूतानि दृश्यन्ते तथा एकस्मिन्नप्यपरस्मिन् कार्यतत्त्वे इतराणि कारणतत्वानि च सर्वाणि घटे मृद्वत्प्रविष्टानि दृश्यन्ते ॥ ८ ॥ पौर्वापर्यमिति ॥ अतः अमीषां तत्त्वानां पौर्वापर्यं कार्यकारणत्वं प्रसङ्ख्यानं च न्यूनाधिकमभीप्सतां वादिनां मध्ये यथा विवक्षया यद्वक्त्रं यस्य मुखं प्रवर्त्तते तत्सर्वं विविक्तं निश्चितं वयं गृह्णीमः। उक्तन्यायेन सर्वत्र युक्तेः संभवात् ॥ ९ ॥ तत्र गुणत्रयं प्रकृतावन्तर्भाव्य पञ्चविंशतिस्तत्वानि कापिलैरुच्यन्ते तत्रेश्वरमतिरिक्तमङ्गीकृत्य षड्विंशतितत्वपक्षं समर्थयते—अनादिरिति ॥ पुरुषस्य जीवस्यात्मज्ञानं स्वतो न संभवति। अन्यतस्तु तत्संभवात्। अन्यस्तत्त्वज्ञो ज्ञानदः परमेश्वरो भवेत् अतस्तयोर्भेदात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षड्विंशतितत्वपक्षप्रवृत्तिरित्याशयः ॥ १० ॥ पञ्चविंशतिपक्षमाह—पुरुषेति ॥ जीवेश्वरयोरत्र शरीरे अण्वपि वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वाविशेषात् । अतस्तयोरत्यन्तमन्यत्वकल्पना अपार्था व्यर्थैव । एवं पञ्चविंशतिपक्षप्रवृत्तिरित्यर्थः । नन्वेवमीश्वरप्रसादजज्ञानस्य पृथक्त्वात्पक्षद्वयमपि न घटतेऽत आह । ज्ञानं च सत्वगुणवृत्तित्वात्तदन्तर्भूतमेव ॥ ११ ॥ ननु ज्ञानं न प्रकृतेर्गुणः जीवधर्मतया प्रतीतेरित्यत आह—प्रकृतिरिति ॥ हि यस्मात् गुणत्रयसाम्यमेव प्रकृतिः अतः स्थित्यादिहेतवः सत्वादयः प्रकृतेरेव गुणा आत्मनो गुणास्ते न भवन्ति अकर्तृत्वात् तस्य स्थित्यादिहेतुभूतगुणाश्रयानुपपत्तेः ॥ १२ ॥ सत्त्वमिति ॥ अतः सत्त्वं सत्ववृत्तिरूपं ज्ञानं प्रकृतावन्तर्भूतमित्यनुषङ्गः । रजसो वृत्तिरेव कर्म । तमोऽज्ञानमिति तमसो वृत्तिरेवाज्ञानमित्यर्थः । अतः कर्माज्ञानयोरपि रजस्तमोद्वारा प्रकृतावेवान्तर्भाव इत्याशयः । तथापि कालस्वभावयोस्तत्वान्तरता स्यात्तत्राह । गुणानां व्यतिकरः साम्यावस्थात्यागेन मुख्यगुणभावो यस्मात्स ईश्वर एव कालो न ततः पृथगित्यर्थः । स्वभावो नाम सूत्रं महत्तत्वमेव तस्य सर्वशक्तिमत्वात् । एवं च ज्ञानादीनां यथायथमेष्वेवान्तर्भावान्न पक्षद्वयेऽपि तत्ववृद्धिः । एतच्च पक्षान्तरेष्वपि ज्ञेयम् ॥ १३ ॥ अत्र स्वमतवर्णने भगवता नवैकादश पञ्च त्रीनि-

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ॥ तदन्यकल्पनाऽपार्था ज्ञानं च प्रकृतेर्गुणः॥११॥ प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः॥ सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ॥ १२ ॥ सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते ॥ गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥ १३ ॥ पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥ १४ ॥ श्रोत्रं त्वग् दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वङ्घ्रिकर्माण्यङ्गोभयं मनः ॥ १५॥ शब्दः स्पर्शो रसो गन्धो रूपं चेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १६ ॥ सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ॥ सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ॥ १७ ॥

त्युक्तम् । तत्र त्रीन् इति पदस्य सत्वं रजस्तम इति व्याख्या । मतान्तरे कालः सूत्रं पुरुष इति स्वमते तु गुणानामागमापायित्वात्प्रकृतेर्भेदो विवक्षितः । अतस्त्रयो गुणास्त्रीणि तत्वानि अपराणि पञ्चविंशतिः तत्वानि पूर्वोक्तपक्षद्वयसाधारणानि अवशिष्टानि नवैकादशादितत्वान्याह—पुरुष इति॥पुरुषपदेन जीवेश्वरैक्यं विवक्षितम् । प्रकृतिः व्यक्तं महत्तत्वं नभ आदीनि पञ्च तन्मात्राणि महाभूतानि वा इत्येवं नव तत्त्वानि मे मयोक्तानि ॥ १४ ॥ श्रोत्रमिति ॥ दर्शनं चक्षुः इत्येवं श्रोत्रादीनि पञ्च ज्ञानशक्तयः ज्ञानेन्द्रियाणि तथा अङ्ग हे उद्धव वागादिपाय्वन्तानि द्वन्द्वैक्येनोक्तानि चत्वारि अङ्घ्रिश्चेति पञ्च कर्मेन्द्रियाणि उभयं उभयनायकं मनश्चेत्येकादश ॥ १५ ॥ शब्द इति ॥ शब्दस्पर्शौ रसो गन्धो रूपं च इत्येते पञ्चार्थजातयः श्रोत्रादीन्द्रियाणां विषया इत्यर्थः । गतिश्च उक्तिश्च उत्सर्गौ मलमूत्रत्यागौ च शिल्पं च तानि कर्मायतनानां कर्मेन्द्रियाणां सिद्धयः फलानि न तु तत्त्वान्तराणीत्यर्थः ॥ १६ ॥ एवं मतत्रये तत्वसङ्ख्याभेदं निरूप्य पृथङ्मतानां तात्पर्यमाह—सर्गादाविति ॥ कार्याणि नभआदिमनःपर्यन्तानि षोडश । कारणानि महदादीनि

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

सप्त । तद्रूपिणी सती प्रकृतिः । अस्य विश्वस्य सर्गादौ गुणैः सृज्यत्वाद्यवस्थां धत्ते उपादानकारणत्वात् पुरुषस्त्वव्यक्तः अपरिणामी निमित्तभूतः केवलमीक्षते । अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति सिद्धम् ॥ १७ ॥ तत्वैरारब्धकार्यस्य तदन्तर्भावमभिप्रेत्याह—व्यक्तादय इति ॥ प्रकृतेरुत्पन्ना व्यक्तादयो महदादयो ये धातवो जगत उपादानभूतास्ते पुरुषस्येक्षया लब्धवीर्याः संहताः परस्परं मिलिताश्च विकुर्वाणाः परिणामान्तरं प्राप्नुवन्तः प्रकृतेर्बलात् तामाश्रित्य तदा पूरसाहाय्येन ब्रह्माण्डं कार्यं सृजन्तीत्यन्वयः ॥ १८ ॥ सप्तैवेति ॥ सप्तैव धातवः पदार्थाः तत्त्वानि इति पक्षश्चेत्तत्र पक्षे खादयः आकाशादीनि पञ्च महाभूतानि ज्ञानं जानातीति द्रष्टा जीवः उभयोर्द्रष्टृदृश्ययोराधार आत्मा परमेश्वरश्चेति सप्त । अस्मिन् पक्षे प्रकृत्यादीनां कारणत्वेनाकाशादिष्वन्तर्भावः । तेभ्यः सप्तभ्य एव देहेन्द्रियासवः कार्याणि जायन्त इत्यर्थः । तेषां तत्रान्तर्भाव इत्यर्थः ॥ १९ ॥ षडिति ॥ षडेव तत्वानि इत्यत्रापि पक्षे पञ्च महाभूतानि षष्ठश्च परः पुमानीश्वरः स च पुरुषः आत्मनः संभूतैः उत्पन्नैस्तैराकाशादिभिर्युक्तः इदं ब्रह्माण्डं सृष्ट्वान्त-

व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया ॥ लब्धवीर्याः सृजन्त्यण्डं संहताः प्रकृतेर्बलात् ॥ १८ ॥ सप्तैव धातव इति तत्रार्थाः पञ्च खादयः ॥ ज्ञानमात्मोभयाधारस्ततो देहेन्द्रियासवः ॥ १९ ॥ षडित्यत्रापि भूतानि पञ्च षष्ठः परः पुमान् ॥ तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् ॥ २० ॥ चत्वार्येवेति तत्रापि तेज आपोऽन्नमात्मनः ॥ जातानि तैरिदं जातं जन्मावयविनः खलु ॥ २१ ॥ संख्याने सप्तदशके भूतमात्रेन्द्रियाणि च ॥ पञ्च पञ्चैकमनसा आत्मा सप्तदशः स्मृतः ॥२२॥ तद्वत्षोडशसंख्याने आत्मैव मन उच्यते ॥ भूतेन्द्रियाणि पञ्चैव मन आत्मा त्रयोदश ॥ २३ ॥ एकादशत्वमात्माऽसौ महाभूतेन्द्रियाणि च ॥ अष्टौ प्रकृतयश्चैव पुरुषश्च नवेत्यथ ॥ २४ ॥

र्यामितया समुपाविशत् । अस्मिन्नपि पक्षे भौतिकानां भूतान्तर्भावः जीवस्य च परमात्मान्तर्भावो बोध्यः ॥२०॥ चत्वारीति ॥ चत्वार्येव तत्वानीति तत्रापि पक्षे तेजः आपोऽन्नं पृथ्वीति त्रीणि आत्मनः जातानीत्यात्मा चतुर्थः इति चत्वारि तत्वानि प्रकृत्यादीनां तु कारणतयैष्वन्तर्भावः आकाशवाय्वोरेतेष्वेवान्तर्भावोऽनङ्गीकारो वा तैरेव चतुर्भिरवयविनो विश्वस्येदं जन्म जातमभूत् ॥२१॥ सङ्ख्यान इति ॥ सप्तदशके सङ्ख्याने गणने आकाशादिपञ्च भूतानि शब्दादीनि पञ्च तन्मात्राणि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि एकेन मनसा सह षोडश आत्मा तु सप्तदश स्मृतः जीवेश्वरयोरभेद एव ॥ २२ ॥ तद्वदिति ॥ तद्वत् षोडशसङ्ख्याने आत्मैव संकल्पयन्मन उच्यते । त्रयोदशपक्षे महाभूतानि तन्मात्रैः सहैकीकृतानि पञ्चैव ज्ञानेन्द्रियाणि च तत्प्रकाशकानि पञ्चैव मनश्चैकमिन्द्रियाधिष्ठातृ आत्मा च द्विविधः एवं त्रयोदश ॥ २३ ॥ एकेति ॥ एकादशत्वपक्षे पञ्च महाभूतानि पञ्च ज्ञानेन्द्रियाणि जीवमनसोरात्मान्तर्भावेनैतान्येवैकादश । नव पक्षे पञ्च भूतानि मनोबुद्ध्यहङ्काराः अष्ट प्रकृतयः पुरुषश्चेति नव विकाराणां तदन्तर्भावः॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवं मुनिभिः तत्वानां नानाविधं प्रसङ्ख्यानं कृतं तच्च युक्तिमत्वात् सर्वमपि न्याय्यं यतो विदुषां किमशोभनम् ॥ २५ ॥ प्रकृतिरिति सार्द्धम् ॥ यद्यपि प्रकृतिः पुरुषश्चेत्युभौ आत्मना जडाजडस्वभावेन विलक्षणौ तथाऽप्यन्योन्यापाश्रयात् परस्परपरिहारेणाप्रतीतेस्तयोर्भिदा न दृश्यते । अन्योन्यापाश्रयत्वमाह । प्रकृतौ तत्कार्ये देहे हि एवात्मा लक्ष्यते तथाऽऽत्मन्येव प्रकृतिश्च लक्ष्यते तेन विना तस्या अप्रतीतेः । अहमित्यभेदेनैव प्रतीतेर्देहात्मनोर्भेदो नैव कदापि लक्ष्यत इत्यर्थः ॥ २६ ॥ एवमिति ॥ हे पुण्डरीकाक्ष हे सर्वज्ञ एवं मे हृदि वर्त्तमानं महान्तं संशयं नयेन युक्त्या नैपुणं प्रावीण्यं येषां तैर्वचोभिश्छेत्तुं त्वमेवार्हसि । प्रकृतेः सकाशात्पृथगात्मानं प्रदर्शयेति भावः ॥ २७ ॥ त्वत्त इति ॥ हि यस्मात् अत्र संसारे जीवानां यथार्थज्ञानं त्वत्तः त्वत्प्रसादादेव भवति । ज्ञानप्रमोषो ज्ञानभ्रंशश्च तव शक्तितः अविद्यातो भवति । हि अतः आत्ममायाया गतिं मार्गं विस्तारं त्वमेव वेत्थ जानासि । अपरश्च न वेद ॥२८॥ प्रकृतिपुरुषयोर्विकारित्वाविकारित्वाभ्यां सापेक्षत्वनिरपेक्षत्वाभ्यां प्रकाश्यत्वप्रकाशकत्वाभ्यां

इति नानाप्रसंख्यानं तत्त्वानामृषिभिः कृतम् ॥ सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनम् ॥२५॥ उद्धव उवाच ॥ प्रकृतिः पुरुषश्चोभौ यद्य-प्यात्मविलक्षणौ ॥ अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः ॥ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि ॥ २६ ॥ एवं मे पुण्डरीकाक्ष महान्तं संशयं हृदि ॥ छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः ॥ २७ ॥ त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः ॥ त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः ॥ २८ ॥ श्रीभगवानुवाच ॥ प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ ॥ एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ॥ २९ ॥ ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते ॥ वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ॥ ३० ॥ दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिद्ध्यति यः स्वतः खे ॥ आत्मा यदेषामपरो य आद्यः स्वयाऽनुभूत्याऽखिलसिद्धसिद्धिः ॥ ३१ ॥

भेदं वक्तुमाह—प्रकृतिरिति ॥ हे पुरुषर्षभ या महदादिरूपेण परिणामिनी सा प्रकृतिरिति । यस्तु अपरिणामी स पुरुषश्चेति विकल्पस्तयोरत्यन्तभेद एव यतो गुणानां व्यतिकरो मेलनं क्षोभः स आत्मा यस्य तत्कृत इत्यर्थः । एष सर्गः सृज्यत इति सर्गो देहेन्द्रियान्तःकरणादिसङ्घातो वैकारिकः जन्मादिनानाविकारवान् ॥२९॥ नानात्वमाह—ममेति ॥ अङ्ग हे उद्धव गुणमयी मम मायाप्रकृतिरनेकधा विकल्पं भेदं तद्बुद्धीश्च गुणैर्विधत्ते वैकारिकः अनेकविकारवानपि स्थूलेन मार्गेण तावत्त्रिविधः । तत्र एकं रूपम् अध्यात्मम् । अथ द्वितीयमधिदैवम् । अन्यत् तृतीयम् अधिभूतम् ॥३०॥ तानि विवृणोति—दृगिति ॥ दृक् चक्षुः अध्यात्मं रूपमधिभूतम् । अत्र रन्ध्रे चक्षुर्गोलके प्रविष्टम् आर्कं वपुः सूर्यांशोऽधिदैवमिति । तत्र चक्षुषा रूपं ज्ञायते तदन्यथानुपपत्त्या चक्षुः सिद्ध्यति । तत्प्रवृत्त्यन्यथानुपपत्त्या तदधिष्ठात्री देवता सिद्ध्यति । ततश्चक्षुषः प्रवृत्तिस्ततो रूपज्ञानमि-त्येवमेतत् त्रयं परस्परं सिद्ध्यति । अत्र रन्ध्रे इत्युक्तविशेषणव्यावर्त्यमाह । दृष्टान्तोपयोगितया यस्तु खे आकाशे मण्डलात्मार्कः स तु चक्षुर्विषयोऽपि स्वतः प्रतियोग्यपेक्षां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनैव सिद्ध्यति यत् । यस्मात् यः आत्मा स एषाम् अध्यात्मादीनाम् आद्यः कारणभूतः अतः एकरूपोऽभिन्नश्च तस्मादेतेभ्यः अपरो भिन्नः सच स्वयानुभूत्या स्वतः सिद्धप्रकाशेन अखिलानां सिद्धानां परस्परं प्रकाशकानामध्यात्मादीनामपि सिद्धिः प्रकाशो यस्मात्स प्रकाशकः सर्वेषामपि सामान्यतश्चित्प्रकाशविषयत्वात् ॥ ३१ ॥ चक्षुषि दर्शितं त्रैविध्यमिन्द्रियान्तरेष्वप्यतिदिशति—एवमिति अर्द्धम् ॥ यथा चक्षुः एवं त्वगादि त्वक् स्पर्शो वायुरिति । श्रवणादि । श्रवणं शब्दो दिश इति । जिह्वादि जिह्वा रसो वरुण इति । नासादि नासा गन्धोऽश्विनाविति । चित्तेन युक्तं चित्तादि । चित्तं चेतयितव्यं वासुदेव इति । उपलक्षणमिदम् । मनो मन्तव्यं चन्द्र इति । बुद्धिर्बोद्धव्यं ब्रह्मेति । अहङ्कारोऽहङ्कर्तव्यं रुद्र इति । एवं त्रिविधमित्यर्थः ॥ ३२ ॥ नच पुनरपि वैलक्षण्यमेवोक्तम् । त्रिविधप्रपञ्चव्यतिरिक्तात्मप्राप्तिस्त्वहङ्कारनिवृत्त्या सापि त्रिविधविकल्पनिवृत्त्यैवेत्याशयेनाह—योऽसाविति ॥ गुणानां क्षोभं साम्यत्यागं करोतीति गुणक्षोभकृत् कालः परमेश्वरो वा तस्मान्निमित्तात् प्रधानं मूलमुपादानं यस्य तस्मान्महतः प्रसूतः वैकारिकः सात्विकः तामसः ऐन्द्रियो राजसश्चेति त्रिवृत् त्रिविधो योऽसौ विकारः अहं अहङ्कारः स एव मोहेन स्वरूपाज्ञानेन यो विकल्पो देवोऽहं मनुष्योऽहमित्यादिभे-

एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तम् ॥ ३२ ॥ योऽसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः ॥ अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐन्द्रियश्च ॥ ३३ ॥ आत्मा परिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदाऽर्थनिष्ठः ॥ व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ ३४ ॥ उद्धव उवाच ॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो ॥ उच्चावचान्यथा देहान्गृह्णन्ति विसृजन्ति च ॥ ३५ ॥ तन्ममाख्याहि गोविन्द दुर्विभाव्यमनात्मभिः ॥ न ह्येतत् प्रायशो लोके विद्वांसः सन्ति वञ्चिताः ॥ ३६ ॥

दस्तस्य हेतुरित्यर्थः ॥ ३३ ॥ तन्निवृत्तिस्त्वात्मज्ञानेनेत्याशयेनाह—आत्मेति ॥ भिदार्थनिष्ठः भिदया भेदेनावस्थितो योऽर्थः परमार्थभूत आत्मा तन्निष्ठस्तद्विषयो देहव्यतिरिक्त आत्मास्तीति नास्तीति च यः पुंसां विवादः स हि यस्मात् आत्मनो यत् अपरिज्ञानं तन्मयः ततो जातः । यद्वा । स सर्वोऽपि विवादः भिदाऽर्थनिष्ठ एव नतु वस्तुमात्रनिष्ठः । अत आत्मापरिज्ञानमयः मोहमयः । अतो व्यर्थोऽपि आत्मसाक्षात्कारेण बाधयोग्यत्वान्मिथ्याभूतोऽपि स्वलोकात् स्वरूपभूतान्मत्तः परावृत्ता विमुखा धीर्येषां तेषां नैवोपरमेत नैव निवर्त्तते । तद्भावः । अत आत्मसाक्षात्कारादेव तन्निवृत्तिर्नान्यथेत्युत्तरमुक्तं ज्ञेयम् ॥ ३४ ॥ त्वत्त इति ॥ हे प्रभो हे गोविन्द त्वत्तः परावृत्तधियो जना यथा स्वकृतैः कर्मभिः उच्चावचान् उत्कृष्टान् अपकृष्टांश्च देहान् गृह्णन्ति विसृजन्ति त्यजन्ति च ॥ ३५ ॥ तदिति ॥ तत् अनात्मभिः अल्पबुद्धिभिः दुर्विभाव्यम् अवितर्क्यम् । अतस्त्वमेव ममाख्याहि । हि यस्मात् एतद्विद्वांसः प्रायशो लोके न सन्ति यतस्ते वञ्चिताः परं मायया मोहिता इत्यर्थः । यद्वा । एतद्विद्वांसो वञ्चिता न सन्ति । अविद्वांसस्तु वञ्चिता एव । अत्र व्यापकस्यात्मनो देहाद्देहान्तरगमनम् अकर्त्तुः कर्माणि नित्यस्य च जन्ममरणादीनि कथमित्याशय उत्तरबलादुन्नीयते ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गशरीराध्यासेन सर्वं घटत इत्युत्तरमाह—मन इति ॥ इन्द्रियैः पञ्चभिरिति प्रधानत्वेन ज्ञानेन्द्रियाणां निर्देशस्तेनैव पञ्च भूतसूक्ष्माणि पञ्च कर्मेन्द्रियाण्यपि ज्ञेयानि । तैः पञ्चदशभिर्युक्तं नृणां जीवानां मनो मनः प्रधानं कर्ममयं कर्माधीनं लिङ्गशरीरं लोकाल्लोकं देहाद्देहान्तरं प्रति याति । आत्मा जीवस्तु ततोऽन्योऽपि तन्मनोऽनुवर्तते तदभेदाभिमानेनानुगच्छतीत्यर्थः ॥ ३७ ॥ ननु मनसोऽपि पूर्वदेहवियोगो देहान्तरप्राप्तिश्च कथमित्याशङ्क्य स्मृतियोगवियोगाभ्यामिति वक्तुं तयोः कारणमाह—ध्यायेदिति ॥ कर्मतन्त्रं देवादिशरीरप्रापकफलोन्मुखकर्माधीनं मनः कर्मोपस्थापितान् दृष्टान् वा अनुश्रुतान् वेदोक्तान् वा विषयान् मरणसमये ध्यायत् भवति । अथानन्तरं ध्यायमानेषु विषयेषु उद्यत् आविर्भवत् पूर्वविषयेषु च सीदत् लीयमानं भवति तदनु तदनन्तरं तस्य पुरुषस्य स्मृतिः पूर्वापरानुसन्धानं नश्यति ॥ ३८ ॥ विषयेति ॥ एवं कस्यचित् कर्मविशेषस्य हेतोः प्रारब्धकर्मसमाप्तेर्हेतोरित्यर्थः । विषयेषु देवादिशरीरेष्वभिनिवेशेन यत्पुराऽऽत्मानं पूर्वदेहं मनो न स्मरेत् यातनादेहाभिनिवेशेन भयशोकादेः देवादिदेहाभिनिवेशेन हर्षतर्षादेर्वा हेतोः पूर्वदेहस्य सात्यन्तविस्मृतिरेव जन्तोस्तदभिमानिनो जीवस्य मृत्युरुच्यते नतु देहवत् विनाश इत्यर्थः ॥ ३९ ॥ जन्मेति ॥ हे भूरिद पुंसो जीवस्य जन्म तु विषयस्य

श्रीभगवानुवाच ॥ मनः कर्ममयं नृणामिन्द्रियैः पञ्चभिर्युतम् ॥ लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते ॥ ३७ ॥ ध्यायेन्मनोऽनुविषयान् दृष्टान् वाऽनुश्रुतानथ ॥ उद्यत्सीदत् कर्मतन्त्रं स्मृतिस्तदनु शाम्यति ॥ ३८ ॥ विषयाभिनिवेशेन नात्मानं यत्स्मरेत् पुनः ॥ जन्तोर्वै कस्यचिद्धेतोर्मृत्युरत्यन्तविस्मृतिः ॥ ३९ ॥ जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद ॥ विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ॥ ४० ॥ स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ ॥ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ॥ ४१ ॥ इन्द्रियायनसृष्टयेदं त्रैविध्यं भाति वस्तुनि ॥ बहिरन्तर्भिदाहेतुर्जनोऽसज्जनकृद् यथा ॥ ४२ ॥

देहादेरात्मतया स्वीकृतिमभिमानं प्राहुः । नतु देहवदुत्पत्तिं न च पुत्रादिदेहवत्प्रीत्यतिशयमात्रेणात्मत्वं किंतु सर्वभावेन अभेदेनाभिमानमात्रेण । यथा स्वप्नश्च मनोरथश्चेति तथेत्यर्थः । “ सर्वो द्वन्द्वो विभाषयैकवद्भवति ” इति एकवचनम् ॥ ४० ॥ दृष्टान्तौ विवृणोति—स्वप्नमिति ॥ वर्त्तमानदेहस्थो जीवो यथा प्राक्तनं स्थूलदेहं न स्मरति एवं वर्तमानस्वप्नस्थो मनोरथस्थो वा जीवः प्राक्तनं स्वप्नं मनोरथं वा न स्मरति । अपूर्वं च पूर्वमिवानुपश्यति । यद्वा । पूर्वं च पूर्वसिद्धमप्यात्मानम् अपूर्वमिव अद्य जातमिवानुपश्यति । तथा अहं षाड्वर्षिक इत्यादि अपूर्वमिव पश्यति ॥ ४१ ॥ इन्द्रियेति ॥ इन्द्रियाणामयनमाश्रयं शरीरं तस्य सृष्ट्या उत्पत्त्या । यद्वा । इन्द्रियायनं मनः तस्य देहान्तराभिनिवेशेन या सृष्टिस्तया वस्तुनि परमार्थभूते आत्मनि तदभिमानेनेदमुत्तममध्यमनीचरूपं विश्वतैजसप्राज्ञरूपं देहेन्द्रियान्तःकरणरूपं वा त्रैविध्यमसदपि भाति । तदभिमानेनैवात्मा बहिरन्तर्भिदाहेतुर्भवति । बाह्यान् शब्दादीन् विषयान् आन्तरान् सुखादींश्च पश्यतीत्यर्थः । यथा जनो जीवः स्वप्ने बहून् असतो जनान् देहान्

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

कुर्वन् बहुरूपो भाति । तत्राहंममाभिमानेन बाह्याभ्यन्तरविषयाननुभवति च तथेत्यर्थः । यद्वा । असज्जनकृत् दुष्टपुत्रोत्पादकः जनः पिता स्वयं समोऽपि पुत्राभिमानतस्तद्रिमित्रादिषु यथा भेदहेतुर्भवति तद्वत् ॥ ४२ ॥ प्रसिद्धौ जन्ममृत्यू निरूप्य सूक्ष्मावपृष्टावपि तौ वैराग्याय निरूपयति—नित्यदेति ॥ अङ्ग हे उद्धव नित्यदा प्रतिक्षणम् । दा आर्षः । भूतानि शरीराणि भवन्ति उत्पद्यन्ते न भवन्ति नश्यन्ति च । तथापि कालस्यातिसूक्ष्मत्वात्तद्वेगकृतं तत् भवनाभवनं चाविवेकिभिर्न दृश्यते । एवं प्रतिक्षणोत्पत्तिविनाशानङ्गीकारे देहारम्भकपरमाण्वाद्यवयवसंयोगविभागासंभवे वृद्धिह्रासाद्यवस्थानुपपत्तेः ॥ ४३ ॥ सूक्ष्मयोर्जन्ममरणयोः सत्त्वं साधयति—यथेति ॥ यथार्चिषां ज्वालानां परिणामादिभिः स्रोतसां गत्यादिभिः फलानां रूपादिभिः अवस्थाविशेषाः कालेन कृताः तथैव सर्वभूतानां देहानां वयोवस्थादयः कालकृताः । आदिशब्देन तेजोबलकामकौशलादीनां ग्रहणम् । तथा चानुमानम् । " विमतं देहादि प्रतिक्षणोत्पत्तिविनाशवत् । अवस्थाभेदवत्त्वात् दीपज्वालादिवत् " इति ॥ ४४ ॥ ननु स एवायमिति प्रत्यभिज्ञा कथं तत्राह—सोऽयमिति ॥ सादृश्यादेवार्चिषां क्षणमात्र एवोद्भूयोद्भूय लीनानां पुञ्ज एव यथा सोऽयं दीप इति प्रत्यभिज्ञा यथा च स्रोतसां प्रवाहवतां जलानां क्षणमात्रे दू-

नित्यदा ह्यङ्ग भूतानि भवन्ति न भवन्ति च ॥ कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ॥ ४३ ॥ यथाऽर्चिषां स्रोतसां च फलानां वा
वनस्पतेः ॥ तथैव सर्वभूतानां वयोऽवस्थादयः कृताः ॥ ४४ ॥ सोऽयं दीपोऽर्चिषां यद्वत्स्रोतसां तदिदं जलम् ॥ सोऽयं पुमानिति
नृणां मृषा गीर्धीर्मृषायुषाम् ॥४५॥ मा स्वस्य कर्मबीजेन जायते सोऽप्ययं पुमान् ॥ म्रियते वाऽमरो भ्रान्त्या यथाऽग्निर्दारुसंयुतः॥४६॥
निषेकगर्भजन्मानि बाल्यकौमारयौवनम् ॥ वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥ ४७ ॥

रंगतानामागमापायिनामेव तदिदं जलमिति धीर्गीश्च मृषा । तथैव मृषा व्यर्थमेवायुर्येषां तेषामविवेकिनामेव सोऽयं पुमानिति नृणां बहूनां शरीरिणां विषयैर्धीर्गीश्च मृषैव । विवेकिनां त्वेवं बुद्धिर्न भवति ॥ ४५ ॥ ननु देहाध्यासवतः कर्मजन्ममरणानि सन्ति नान्यस्येति व्यवस्था कथं घटते । यथा घटस्य पुरुषभेदेन सत्वमसत्वं च न घटते इत्याशङ्क्य अज्ञस्यापि वस्तुतस्तदभावादित्याह—मेति ॥ स्वस्य आत्मनः कर्मणा बीजभूतेन सोऽप्ययं पुमान् अज्ञोऽपि जीवो वस्तुतो मा जायते मा च म्रियते वा । तथापि भ्रान्त्या देहाद्यध्यासात् अजन्माऽपि जायत इव अमरोऽपि म्रियत इव । यथा महाभूततेजोरूपोऽग्निराकल्पान्तमवस्थितोऽपि दारुसंयोगवियोगाभ्यां जन्मनाशौ प्राप्त इव भ्रान्त्या प्रतीयते तद्वदित्यर्थः ॥ ४६ ॥ निषेकेति ॥ निषेको जठरे प्रवेशः गर्भस्तन्मध्ये वृद्धिर्जन्मप्रसवः । बाल्यमापञ्चमाब्दात् । कौमारमाषोडशाद्वर्षात् । ततो यौवनमापञ्चचत्वारिंशतः । ततो वयोमध्यमाषष्टिवर्षात् । तत उपरि यावज्जीवं जरा तत उपरि मृत्युः । एवं तनोः शरीरस्य नवावस्थाः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एता इति ॥ एता मनोरथमयीः मनोविकारप्राप्ता उच्चावचा अन्यस्य देहस्य तनूः अवस्थाः गुणसङ्गात् देहाद्यध्यासात् जीवः कश्चिदुपादत्ते गृह्णाति। पुनः क्वचित् परमेश्वरानुग्रहतः क्वचित्कथंचित् जहाति च ॥ ४८ ॥ आत्मन इति ॥ पितृदेहस्यौर्ध्वदेहिकं कुर्वतोऽप्ययदर्शनात् । पुत्रदेहस्य च जातकर्माणि जन्मदर्शनादात्मनः स्वदेहस्याऽपि भवाप्ययावनुमेयौ । भवशब्देन निषेकगर्भजन्मानि ज्ञेयानि । एवं च दृश्यत्वे सति भवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयं भवाप्ययरूपं लक्षणं यस्य तादृशः द्वयलक्षणो न भवति किन्तु भवाप्ययरहितो भवतीत्यर्थः ॥ ४९ ॥ तरोरिति ॥ यः बीजविपाकाभ्यां तरोः व्रीह्यादेः फलपाकान्तस्य जन्मसंयमौ विद्वान् भवति । बीजात्तरोर्जन्म विपाकात् शोषात्तस्य संयमं विनाशं च यो जानाति स द्रष्टा तरोर्विलक्षणो भिन्नश्च यथा भवति । एवं तनोर्द्रष्टा जीवोऽपि ततः पृथक् अतस्तत्र वर्तमानोऽपि यो विद्वान् स भवाप्ययाभ्यां न सम्बध्यत इत्याशयः ॥ ५० ॥ प्रकृतेरिति ॥ यः पुमान् अबुधः स्वरूपानभिज्ञः स एवमुक्तप्रकारेण प्रकृतेः सकाशादात्मानमविविच्य देहाद्विलक्षणतया अज्ञात्वा तत्वेन परमार्थदृष्ट्या स्पर्शेषु विषयेषु संमूढः आसक्तः सन् संसारं प्रतिपद्यते ॥ ५१ ॥ सत्वेति ॥ सत्वसङ्गः सत्वकार्यशमदमाद्यभिनिवेशस्तस्मात् कर्मभिस्तदनु-

एता मनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः ॥ गुणसङ्गादुपादत्ते क्वचित्कश्चिज्जहाति च ॥ ४८ ॥ आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ॥ ४९ ॥ तरोर्बीजविपाकाभ्यां यो विद्वान् जन्मसंयमौ ॥ तयोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥५०॥ प्रकृतेरेवमात्मानमविविच्याबुधः पुमान् ॥ तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ॥ ५१ ॥ सत्त्वसङ्गादृषीन् देवान् रजसाऽसुरमानुषान् ॥ तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ॥ ५२ ॥ नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् ॥ एवं बुद्धिगुणान् पश्यन्ननीहोऽप्यनुकार्यते ॥ ५३ ॥ यथाऽम्भसा प्रचलता तरवोऽपि चला इव ॥ चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ॥ ५४ ॥

रूपकर्मभिर्भ्रामितश्चालितः । मित्त्वे ह्रस्वाभाव आर्षः । पुमान् ऋषीन् देवान् पुमान् देवत्वमृषित्वं वा याति । तथा रजसा कामाद्यभिनिवेशेन प्रवृत्तैः कर्मभिर्भ्रामितः असुरमानवान् असुरत्वं मानुषत्वं वा प्राप्नोति । तमसा शोकमोहाद्यभिनिवेशेन प्रवृत्तैः कर्मभिर्भ्रामितः भूतत्वं पिशाचत्वं तिर्यक्त्वम् उपलक्षणतया स्थावरतां वा याति ॥ ५२ ॥ नृत्यत इति ॥ यथा नृत्यतो गायतश्च जनान् पश्यन् पुमान्ताननुकरोति तद्गतस्वरतालादिगतिं शृङ्गारकरुणादिरसं च स्वमनस्यनुवर्त्तयति तथा अहो निष्क्रियोऽप्यात्मा बुद्धिगुणान् बुद्ध्युपस्थापितानि देहचेष्टादिरूपाणि कर्माणि पश्यन् स्वगतेनाध्यवस्यन् बलाद्गुणैरनुकार्यते । अनेन दृष्टान्तेन दृश्यधर्मो द्रष्टरि स्फुरतीति दर्शितम् ॥५३॥ उपाधिधर्मांश्चोपहिते भासन्ते इत्याह—यथेति॥यथा नौकारूढैर्जनैरम्भसा प्रचलता निमित्तेन तटस्थास्तरवोऽपि चला धावन्त इव दृश्यन्ते।यद्वा। तीरस्थैर्जनैः जले प्रतिबिम्बितास्तरवोऽपि चला इव दृश्यन्ते तथा देहादिगतकर्तृत्वादयो धर्मा आत्मनि प्रतीयन्त इत्यर्थः । विषयग्राहकेण मनसा कल्पिता विषयेषु लावण्यादयो गुणाः असन्तोऽपि भासन्तेऽतो मनोनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बन्धन एव संसारः इत्यभिप्रेत्य ग्राहकगुणाश्च ग्राह्येऽवभासन्ते इत्यत्र दृष्टान्तमाह । यथा चक्षुषा भ्राम्यमाणेन भूर्भ्रमतीव दृश्यते तथा ॥ ५४ ॥ यथेति ॥ हे दाशार्ह यथा एताः प्रसिद्धाः मनोरथधियः यथा च स्वप्नदृष्टा धियो मृषा तथा आत्मनो विषयानुभवः संसारो देहाद्यात्माध्यासात्मकश्च मृषा ॥ ५५ ॥ अर्थे इति ॥ देहान्तःकरणादिनिष्ठत्वादर्थे सुखदुःखादिरूपे आत्मन्यविद्यमानेऽपि तदात्मनिष्ठतया ध्यायतः अस्य पुरुषस्य संसृतिर्जन्ममरणादिपूर्वकं दुःखानुभवो न निवर्तते । यथा स्वप्ने अनर्थागमः सर्पदंशशिरश्छेदादिर्वस्तुतः असन्नपि देहाद्यध्यासेनात्मन्यापतति । न च जाग्रत्प्रयत्नं विना तन्निवर्त्तते तथेति ॥ ५६ ॥ तस्मादिति ॥ तस्माद्विषयाभिनिवेशस्य संसारहेतुत्वात्तन्निवृत्तिप्रयत्नस्यावश्यकत्वाच्च । हे उद्धव असद्भिः दुष्प्रतोषैर्नरकपातहेतुभिरिन्द्रियैः शब्दादीन्विषयान्मा भुङ्क्ष्व । आत्मनः अधिष्ठानभूतस्याऽग्रहेणाज्ञानेनैव तत्र निर्भातं वस्तुतस्त्वन्तःकरणनिष्ठमेवेत्यर्थः । वैकल्पिकं सुखदुःखादिकं वस्तुभ्रमं भ्रमसिद्धं पश्य ॥ ५७ ॥ क्षिप्त इति युग्मम् ॥ असद्भिर्दुर्जनैः क्षिप्त आक्षिप्तो बहिर्निःसारितोऽवमानितो वाचा

यथा मनोरथधियो विषयानुभवो मृषा ॥ स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥ ५५ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ५६ ॥ तस्मादुद्धव मा भुङ्क्ष्व विषयानसदिन्द्रियैः ॥ आत्माऽग्रहणनिर्भातं पश्य वैकल्पितं भ्रमम् ॥ ५७ ॥ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयितोऽथ वा ॥ ताडितः सन्निबद्धो वा वृत्त्या वा परिहापितः ॥ ५८ ॥ निष्ठितो मूत्रितो वाऽज्ञैर्बहुधैवं प्रकम्पितः ॥ श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ॥ ५९ ॥ उद्धव उवाच ॥ यथैवमनुबुध्येयं वद नो वदतांवर ॥ सुदुःसहमिमं मन्ये आत्मन्यसदतिक्रमम् ॥ ६० ॥ विदुषामपि विश्वात्मन् प्रकृतिर्हि बलीयसी ॥ ऋते त्वद्धर्मनिरताञ्छान्तांस्ते चरणालयान् ॥ ६१ ॥ इति श्रीभागवते एकादशस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥

तिरस्कृतः प्रलब्धः उपहसितः असूयितः गुणवत्त्वेऽपि दोषवत्तया दृष्टः वृत्त्या जीविकया परिहापितः त्याजितः निष्ठितो निष्ठीवनक्षेपपात्रीकृतः विष्ठाक्षेपपात्रीकृतो वा मूत्रितः मूत्रेणार्द्रीकृतः । एवमज्ञैर्बहु यथा भवति तथा प्रकम्पितः आत्मनिष्ठातश्चालितः कृच्छ्रगतः कष्टं प्राप्तोऽपि श्रेयस्कामो धैर्य्यमवलम्ब्यात्मना बुद्ध्यात्मानमुद्धरेत् ॥ ५८ ॥ ५९ ॥ यथेति ॥ हे वदतां वर इमम् असद्भिः कृतमतिक्रममाक्षेपाद्यपराधं विदुषामपीत्युत्तरश्लोकादपकृष्यते । शेषे षष्ठी । आत्मनि मनसि सुदुःसहमहं मन्ये अतस्तत्सहनोपायं यथैवानुबुध्येयम् । तङ्भाव आर्षः । तत्सहनेन विवेकं प्राप्नुयां वा एवं तथैव नोऽस्मान् सर्वान् श्रेयस्कामान् प्रति वद ॥ ६० ॥ विदुषामिति ॥ हे विश्वात्मन् त्वद्धर्मेषु श्रवणादिषु निरतान् तव चरणमेवालय आश्रयो येषां तान् अत एव शान्तान् रागलोभसुखापेक्षादिदोषरहितान् ऋते विदुषामपि सहनोपायं जानतामपि प्रकृतिः स्वभावाख्या त्वच्छक्तिः बलीयसी । यद्वा । युग्ममेकान्वयम् ॥ ६१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् । एकादशस्य द्वाविंशे व्यधाद्गङ्गासहायकः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न केवलमायासादयो दुःखहेतव एव भवन्ति किन्तु स्तेयादयः पापहेतवोऽपीत्याह—स्तेयमिति युग्मम् ॥ अर्थप्राप्त्यर्थाः स्तेयादयः षडनर्थाः प्राप्तेऽप्यर्थे स्मयादयो व्यसनैः सह नवानर्थाः । हि यस्मात् अर्थ एव मूलं कारणं येषां ते । एते पञ्चदशानर्थाः नरकादिदुःखहेतवो नृणां भवन्ति । तस्मात् अर्थ इत्याख्या नाममात्रं यस्य । वस्तुतस्तु नरकादिदुःखानर्थहेतुत्वादनर्थ एव तं श्रेयोऽर्थी मोक्षार्थी दूरतस्त्यजेदिति स्तेयं चौर्यं हिंसा परपीडा अनृतं मिथ्यावचनं दम्भः परवञ्चनानुरूपवेशधारणं कामः परकीयवित्तापहारेच्छा क्रोधस्तत्प्रतिघातकेऽभिज्वलनात्मकश्चित्तविकारः स्मयो गर्वः स्वस्मिन् महत्त्वबुद्धिः मदो विहिताविहितविवेकशून्यता भेदः स्वपरभेददर्शनं वैरमविश्वासः संस्पर्द्धा परोत्कर्षासहनं व्यसनानि स्त्रीद्यूतमद्यविषयाणि त्रीणि । केचित्तु अर्थस्य साधनादौ आयासादयः व्यसनान्ता भवन्ति । तत्रायासादयो दुःखमात्रहेतवः स्तेयादयः पञ्चदश पापहेतवोऽपीति श्लोकत्रयमेकान्वयतया व्याचक्षते ॥ १८ ॥ १९ ॥ भेदवैरस्पर्द्धाः प्रपञ्चयति—भिद्यन्त इति ॥ एकास्निग्धाः एके एकप्राणाश्च ते आस्निग्धाः अतिप्रियाश्च एवंभूता अपि एते भ्रात्रादयः सुहृदन्ताः सर्वे काकिणिना । पुंस्त्वमार्षम् । विंशतिवराटिका काकिणी । तया तावन्मात्रेण अर्थेन हेतुना सद्य एव भिद्यन्ते भेदबुद्धयो भवन्ति तथा

स्तेयं हिंसाऽनृतं दम्भः कामः क्रोधः स्मयो मदः ॥ भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥ १८ ॥ एते पञ्चदशानर्था ह्यर्थमूला मता नृणाम् ॥ तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥१९॥ भिद्यन्ते भ्रातरो दाराः पितरः सुहृदस्तथा ॥ एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥ २० ॥ अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः ॥ त्यजन्त्याशुस्पृधो घ्नन्ति सहसोत्सृज्य सौहृदम् ॥ २१ ॥ लब्ध्वा जन्माऽमरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यताम् ॥ तदनादृत्य ये स्वार्थं घ्नन्ति यान्त्यशुभां गतिम् ॥ २२ ॥ स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् ॥ द्रविणे कोऽनुषज्जेत मर्त्योऽनर्थस्य धामनि ॥ २३ ॥ देवर्षिपितृभूतानि ज्ञातीन् बन्धूंश्च भागिनः ॥ असंविभज्य चात्मानं यक्षवित्तः पतत्यधः ॥ २४ ॥

अरयः शत्रवः कृता भवन्ति ॥ २० ॥ अर्थेनेति ॥ हि यतः अल्पीयसाऽप्यर्थेन एते संरब्धाः क्षुभितचित्ता दीप्तमन्यवः स्पृधः स्पर्द्धमानाश्च भवन्ति । स्पृध इत्यार्षम् । अतः सहसा सौहृदमुत्सृज्य आशु शीघ्रमेव त्यजन्ति गृहान्निःसारयन्ति घ्नन्ति च ॥ २१ ॥ लब्ध्वेति ॥ अमरैरपि प्रार्थ्यं मानुष्यं जन्म तत्रापि द्विजाग्र्यतां श्रेष्ठमधिकारिकुलं ब्राह्मण्यं लब्ध्वाऽपि तदनादृत्य ये स्वार्थं घ्नन्ति आत्महितं मोक्षं न साधयन्ति ते पूर्वोक्तानर्थपरा अशुभां गतिं नरकादिकमेव यान्ति ॥ २२ ॥ स्वर्गेति ॥ स्वर्गापवर्गयोर्द्वारं साधनभूतमिमं लोकं मनुष्यदेहं प्राप्य को वा मर्त्यः अनर्थस्य धामनि आश्रये द्रविणे धनेऽनुसज्जेत आसक्तिं कुर्यात् ॥ २३ ॥ देवेति ॥ ऋषयो मनुष्ययज्ञब्रह्मयज्ञयोर्देवताः देवपितृभूतानीतरयज्ञत्रयदेवताः ज्ञातयः सगोत्राः बन्धवो विवाहादिना सम्बद्धास्तान् अन्यांश्च भागिनो भागार्हान् आत्मानं चासंविभज्य अन्नादिविभागेनासंतर्प्य यः केवलं यक्षवित्तवद्रक्षणीयं वित्तं यस्य सः अधो नरके पतति ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

व्यर्थयेति ॥ व्यर्थया अर्थेहया धनार्जनव्यापारेण प्रमत्तस्य मम वित्तं वयो बलं च सर्वं गतमिति शेषः । येन वित्तादिना कुशलाः धर्मादयः फलानि सिध्यन्ति । यद्वा । कुशला विवेकिनः सिद्ध्यन्ति विमुच्यन्ते । इदानीं त्वहं जरठो वृद्धः अतः सामर्थ्याभावात्किं नु फलं साधये ॥ २५ ॥ स्वगतं पृच्छत्युत्तरयति च—कस्मादिति ॥ एवमनर्थं विद्वानपि कस्मात्कारणात् असकृत् निरन्तरं व्यर्थयाऽर्थेहया धनार्जनव्यापारेण संक्लिश्यते नूनं निश्चितमेतत् । अयं लोकः सर्वोऽपि जनः कस्यचिन्मायया सुविमोहितः इति ॥ २६ ॥ किमिति ॥ मृत्युना ग्रस्यमानस्य जनस्य धनादिभिः चतुर्भिः उत पुनरपि जन्महेतुभिः कर्मभिर्वा किं प्रयोजनम् । तद्विनाशे स्वमरणे वा तद्वियोगस्यावश्यकत्वात् ॥ २७ ॥ तदानीमेवोत्पन्नविवेको हृष्यन्नाह—नूनमिति॥ नूनं मे मह्यं सर्वदेवमयो हरिर्भगवान् तुष्टः । येन हरिणा एतां वित्तनाशादिरूपां दशामहं नीतः। तथा येन तुष्टेन हेतुना आत्मनो मम प्लवः संसारतरणसाधनं निर्वेदो विरागश्च जातः ॥ २८ ॥ सोऽहमिति ॥ सोऽहं जातनिर्वेदो यदि आयुःकालावशेषः स्यात्तदा तेन कालावशेषेण आत्मनि मनसि

व्यर्थयाऽर्थेहया वित्तं प्रमत्तस्य वयो बलम् ॥ कुशला येन सिद्ध्यन्ति जरठः किं नु साधये ॥ २५ ॥ कस्मात्संक्लिश्यते विद्वान् व्यर्थयाऽर्थेहया-ऽसकृत् ॥ कस्यचिन्मायया नूनं लोकोऽयं सुविमोहितः ॥ २६ ॥ किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत ॥ मृत्युना ग्रस्यमानस्य कर्मभिर्वोत जन्मदैः ॥ २७ ॥ नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः ॥ येन नीतो दशामेतां निर्वेदश्चात्मनः प्लवः ॥ २८ ॥ सोऽहं कालावशेषेण शोषयिष्ये-ऽङ्गमात्मनः ॥ अप्रमत्तोऽखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि ॥२९॥ तत्र मामनुमोदेरन् देवास्त्रिभुवनेश्वराः ॥ मुहूर्तेन ब्रह्मलोकं खट्वाङ्गः सम-साधयत् ॥ ३० ॥ श्रीभगवानुवाच ॥ इत्यभिप्रेत्य मनसा ह्यावन्त्यो द्विजसत्तमः ॥ उन्मुच्य हृदयग्रन्थीञ्छान्तो भिक्षुरभून्मुनिः ॥ ३१ ॥ स चचार महीमेतां संयतात्मेन्द्रियानिलः ॥ भिक्षार्थं नगरग्रामानसङ्गोऽलक्षितोऽविशत् ॥ ३२ ॥ तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वा पर्य-भवन्भद्र बह्वीभिः परिभूतिभिः ॥ ३३ ॥

संसिद्धः सन्तुष्टः सन् आत्मनोऽखिले स्वार्थे धर्मादिसाधने अप्रमत्तः सावधानः सन् तपसाऽङ्गं शोषयिष्ये । यद्वा । विद्यया लयं नेष्यामि ॥ २९ ॥ तत्रेति ॥ तत्र स्थितौ त्रिभुवनेश्वराः देवा मामनुमोदेरन् अनुगृह्णन्तु विघ्नं मा कुर्वन्तु । ननु तथाऽपि जरठोऽल्पेन कालेन किं करिष्यसि तत्राह । यतः खट्वाङ्गो मुहूर्त्तेन ब्रह्मलोकं वैकुण्ठं समसाधयत् ॥ ३० ॥ इतीति ॥ इत्येवमभिप्रेत्य निश्चित्य आवन्त्यः अवन्तिदेशभवः स द्विजसत्तमः हृदयग्रन्थीन् अहङ्कारममकारानुन्मुच्य शान्तो भिक्षुर्मुनिरभूत् ॥ ३१ ॥ स इति ॥ संयता आत्मा मन इत्यादयो येन सः एतां महीं विचचार । तत्र च असङ्गः आसक्तिशून्यः अलक्षितः स्वश्रैष्ठ्यमद्योतयन् भिक्षार्थं नगरग्रामान् अविशत् ॥ ३२ ॥ तमिति ॥ हे भद्र उद्धव तं ब्राह्मणं प्रवयसं वृद्धं भिक्षुम् अवधूतं मलिनं दृष्ट्वा असज्जनाः बह्वीभिः परिभूतिभिः तिरस्कारसाधनैः पर्यभवन् अवमेनिरे ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोविंशे भिक्षुगीतप्रकारेण तिरस्कृते: ॥ सहनोपायकथनं तत्र श्लोका द्विषण्मिताः ॥ पञ्चोवाचेति पादोना नवषष्टिरनुष्टुभः ॥ २३ ॥ स इति ॥ श्रवणीयं वीर्यं यस्य सः मुकुन्दो भगवान् दाशार्हाणां यादवानाम् ऋषभेण भागवतेषु मुख्येन उद्धवेनाशंसितः पृष्टः तस्य भृत्यस्योद्धवस्य वचः सभाजयन् सत्कुर्वन् तं प्रति आबभाषे ॥ १ ॥ बार्हस्पत्येति ॥ हे बार्हस्पत्य बृहस्पतेः शिष्य दुर्जनैरीरितैरुक्तैर्दुर्वचनैर्भिन्नं क्षुभितमात्मानं मनः समाधातुं य ईश्वरः समर्थः स्यात्स तथाभूतः साधुरत्र लोके नास्त्येवेति त्वया सत्यमेवोक्तमिति शेषः ॥ २ ॥ नेति ॥ यथा मर्मस्था अन्तःकरणाख्यमर्मण्येव नित्यं स्थिताः परुषोक्तिरूपा इषवस्तुदन्ति व्यथयन्ति । तथा प्रसिद्धा बाणा मर्मगता न तुदन्ति । अतो यथा वाग्बाणैर्विद्धस्तप्यते तथेतरबाणैर्न तप्यत इत्यर्थः ॥ ३ ॥ तथापि मत्प्रोक्तैरुपायैः सर्वं सह्यमित्याशयेनेतिहासमाह—कथयन्तीति युग्मम् ॥ हे उद्धव इह विषये निजकर्मणां विपाकं फलं स्मरता दुर्जनैः परिभूतेन केनचिद्भिक्षुणा गीतं महापुण्यजनकमितिहासं वृद्धाः कथयन्ति । तमहं तव प्रश्नोत्तरतया वर्णयिष्यामि । त्वं समाहितः संस्तं निबोध

बादरायणिरुवाच ॥ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्यः ॥ सभाजयन् भृत्यवचो मुकुन्दस्तमाबभाषे श्रवणीयवीर्यः ॥ १ ॥ श्रीभगवानुवाच ॥ बार्हस्पत्य स वै नात्र साधुर्वै दुर्जनेरितैः ॥ दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः ॥ २ ॥ न तथा तप्यते विद्धः पुमान् बाणैः सुमर्मगैः ॥ यथा तुदन्ति मर्मस्था ह्यसतां परुषेषवः ॥ ३ ॥ कथयन्ति महत्पुण्यमितिहासमिहोद्धव ॥ तमहं वर्णयिष्यामि निबोध सुसमाहितः ॥ ४ ॥ केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः ॥ स्मरता धृतियुक्तेन विपाकं निजकर्मणाम् ॥ ५ ॥ अवन्तिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया ॥ वार्त्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः ॥ ६ ॥ ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः ॥ शून्यावसथ आत्मापि काले कामैरनर्चितः ॥ ७ ॥ दुःशीलस्य कदर्यस्य द्रुह्यन्ते पुत्रबान्धवाः ॥ दारा दुहितरो भृत्या विषण्णा नाचरन् प्रियम् ॥ ८ ॥ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पञ्च भागिनः ॥ ९ ॥

अवधारय ॥ ४ ॥ ५ ॥ अवन्तिष्विति ॥ अवन्तिषु मालवेषु देशेषु श्रिया धनादिसम्पदा आढ्यतमः महाधनी वार्त्ता कृषिवाणिज्यादिरूपा वृत्तिर्यस्य सः कदर्यश्च स तु स्मृतावुक्तः । "आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् । देवताऽतिथिभृत्यांश्च स कदर्य इति स्मृतः" यतः कामी लुब्धोऽतिकोपन इति एवंभूतः कश्चिद्द्विजः आसीत् ॥ ६ ॥ ज्ञातय इति ॥ अतस्तस्य संबन्धिनो ज्ञातयो बान्धवा अतिथयोऽध्वनीनाश्च तेन वाङ्मात्रेणापि नार्चिताः शून्यावसथे धर्मकर्महीने गृहे देहे वा स्थित आत्मापि काले भोगावसरे कामैस्तेन नार्चितः न सन्तोषितः ॥ ७ ॥ दुःशीलस्येति ॥ दुःशीलस्य कदर्यस्येति शेषे षष्ठी । तस्य पुत्राद्या भृत्यान्ताः विषण्णाः प्रियं नाचरन् प्रत्युत तं द्रुह्यन्ते स्म । तदर्थः ॥ ८ ॥ तस्येति ॥ यक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य तस्येति उभयलोकतश्च्युतस्य धर्मकामविहीनस्य तस्येति शेषे षष्ठी । पञ्च भागिनः देवापितृभूतमनु-

CC-0. In Public Domain. Digitization by eGangotri

ष्यब्रह्मर्षयः पञ्च महायज्ञदेवताः चुक्रुधुः । अर्जितस्य हि वित्तस्य पञ्चमहायज्ञैस्तद्देवताराधनमेव प्रयोजनं तदभावात्ते चुक्रुधुः ॥ ९ ॥ तदिति ॥ हे भूरिद तेषां पञ्चयज्ञभागिनामवध्यानमनादरस्तेन विस्रस्तो नष्टः पुण्यस्कन्धः अर्थलाभमात्रहेतुः पुण्यलेशो यस्य तस्य बह्वायासैः कृष्यादिभिः केवलं परिश्रमो यस्मिन् स एवंभूतोऽर्थोऽपि निधनं गतो नाशं प्राप्तः ॥ १० ॥ ज्ञातय इति ॥ हे उद्धव तस्य धनं किं चिज्ज्ञातयो जगृहुः । किञ्चिद्दस्यवो जगृहुः । तथा दैवतो गृहदाहादिना कालतः निखातं धान्यादि नृभ्यः पार्थिवेभ्यश्चेति द्वन्द्वैक्यं तस्मात् च ब्रह्मबन्धोरर्थो निधनमगच्छदिति पूर्वेणान्वयः ॥ ११ ॥ स इति ॥ स चैवं द्रविणे नष्टे सति धर्मकामविवर्जितः स्वजनैः उपेक्षितश्च सः दुरत्ययां चिन्तामाप ॥ १२ ॥ तस्येति ॥ नष्टरायः नष्टो रा अर्थो यस्य तस्य अत एव तपस्विनः सन्तप्तस्य अत एव खिद्यतः खेदं प्राप्तस्य । शता आर्षः । अत एव बाष्पमश्रु कण्ठे यस्य तस्य एवं नष्टं धनादिकं ध्यायतस्तस्य सुमहान्निर्वेदः वैराग्यपूर्वको विवेकः समभूत् ॥ १३ ॥ स इति ॥ स च जातनिर्वेदो विप्र इदमाह । अहो अत्युत्कटं मम कष्टं

तदवध्यानविस्रस्तपुण्यस्कन्धस्य भूरिद ॥ अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥ १० ॥ ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव ॥ दैवतः कालतः किंचिद् ब्रह्मबन्धोर्नृपार्थिवात् ॥ ११ ॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः ॥ उपेक्षितश्च स्वजनैश्चिन्तामाप दुरत्ययाम् ॥ १२ ॥ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः ॥ खिद्यतो बाष्पकण्ठस्य निर्वेदः सुमहानभूत् ॥ १३ ॥ स चाहेदमहो कष्टं वृथात्मा मेऽनुतापितः ॥ न धर्माय न कामाय यस्यार्थायास ईदृशः ॥ १४ ॥ प्रायेणार्थाः कदर्याणां न सुखाय कदाचन ॥ इह चात्मोपतापाय मृतस्य नरकाय च ॥ १५ ॥ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥ लोभः स्वल्पोऽपि तान् हन्ति श्वित्रो रूपमिवेप्सितम् ॥ १६ ॥ अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये ॥ नाशोपभोग आयासस्त्रासश्चिन्ता भ्रमो नृणाम् ॥ १७ ॥

जातम् । यतो मे मया आत्मा देहोऽयं वृथैवानुतापितः । यस्य ममार्थार्जनायास ईदृशोऽत्युत्कटस्तस्य ममार्थो न धर्माय न वा कामायाभूत् । वृथैव नष्ट इति शेषः ॥ १४ ॥ प्रायेणेति ॥ प्रायेण कदर्याणाम् अर्थाः कदाचन सुखाय न भवन्ति । नरकाय सत्यप्यर्थे नित्यनैमित्तिककर्माननुष्ठानात् । स्पष्टमन्यत् ॥ १५ ॥ यश इति ॥ यत् यशस्विनां शुद्धं यशः तथा ये गुणिनां श्लाघ्या गुणाः तान् तानि च स्वल्पः अपि लोभः हन्ति । यथा श्वित्रः श्वेतकुष्ठम् ईप्सितं रूपं हन्ति तथेत्यर्थः ॥ १६ ॥ अर्थस्येति ॥ अर्थस्य साधनादौ यथासंभवं नृणामायासादयो भवन्ति इत्यन्वयः । तत्र साधने उत्पादने सिद्धेऽप्यर्थे तस्योत्कर्षे संवर्द्धने रक्षणे चायासादयः सर्वे व्यये विनियोगे नाशे उपभोगे चेति द्वन्द्वैक्यम् । तेषु चिन्ताशोकमात्रम् । आयासः कायक्लेशः त्रासो यस्मात्कस्माद्भयं भ्रमोऽधर्मे धर्मबुद्धिः उपकारिण्यनुपकारिबुद्धिरित्याद्यूह्यम् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केचिदिति सार्द्धम् ॥ भो भिक्षो गृहाणेति दर्शितानि सन्ति तस्मै प्रदाय च पुनस्तानि दण्डादीनि ततो मुनेराददुः आच्छिद्य जगृहुः । तङ्भाव आर्षः । स्पष्टं शेषम् ॥ ३४ ॥ अन्नमिति ॥ पापिष्ठाः भैक्षेण सम्पन्नमन्नं सरित्तटे भुञ्जानस्य अस्य मूर्द्धनि मूत्रयन्ति ष्ठीवन्ति च ॥ ३५ ॥ यतवाचमिति सार्द्धम् ॥ केचित् यतवाचं गृहीतमौनं तं बलाद्वाचयन्ति न चेद्वक्ति तदा ताडयन्ति । स्तेनश्चौरोऽयमिति वादिनः अपरे वाग्भिस्तर्जयन्ति भर्त्सयन्ति ॥३६॥ क्षिपन्तीति ॥ एष धर्मध्वजः बहिरेव ध्वजवत्पूज्यत्वसूचकदण्डधरः अन्तस्तु शठः धनाद्युपार्जने दत्तचित्तो वञ्चकः क्षीणवित्ततया स्वजनैरुज्झितः त्यक्तः सन्निमां भिक्षावृत्तिमग्रहीत् न विरक्ततया संन्यासीत्येवम् एकेऽवजानन्तास्तिरस्कुर्वन्तस्तं क्षिपन्ति निन्दन्ति ॥ ३७ ॥ अहो इति सार्द्धम् ॥ अहो एष महासारः महाबलः गिरिराडिव धृतिमान् स्थिरात्मा दृढनिश्चयश्च अतो बकवन्मौनेनार्थं साधयति इत्येवमेके एनं विहसन्ति । एके तु दुर्वातयन्ति तदुपर्यधोवायुं मुञ्चन्ति ॥ ३८ ॥ तमिति अर्द्धम् ॥ यथा क्रीडनकं क्रीडासाधनं द्विजं शुकादिपक्षिणं बध्नन्ति निरुन्धन्ति च

केचित्त्रिवेणुं जगृहुरेके पात्रं कमण्डलुम् ॥ पीठं चैकेऽक्षसूत्रं च कन्थां चीराणि केचन ॥ प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः ॥३४॥ अन्नं च भैक्षसंपन्नं भुञ्जानस्य सरित्तटे ॥ मूत्रयन्ति च पापिष्ठाः ष्ठीवन्त्यस्य च मूर्धनि ॥ ३५ ॥ यतवाचं वाचयन्ति ताडयन्ति न वक्ति चेत् ॥ तर्जयन्त्यपरे वाग्भिः स्तेनोऽयमिति वादिनः ॥ बध्नन्ति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति ॥ ३६ ॥ क्षिपन्त्येकेऽवजानन्त एष धर्मध्वजः शठः ॥ क्षीणवित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः ॥३७॥ अहो एष महासारो धृतिमान् गिरिराडिव ॥ मौनेन साधयत्यर्थं बकवद् दृढनिश्चयः ॥ इत्येके विहसन्त्येनमेके दुर्वातयन्ति च ॥३८॥ तं बबन्धुर्निरुरुधुर्यथा क्रीडनकं द्विजम् ॥ ३९ ॥ एवं स भौतिकं दुःखं दैविकं दैहिकं च यत् ॥ भोक्तव्यमात्मनो दिष्टं प्राप्तं प्राप्तमबुध्यत ॥ ४० ॥ परिभूत इमां गाथामगायत नराधमैः ॥ पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्विकीम् ॥४१॥ द्विज उवाच ॥ नायं जनो मे सुखदुःखहेतुर्न देवताऽऽत्मा ग्रहकर्मकालाः ॥ मनः परं कारणमामनन्ति संसारचक्रं परिवर्तयेद्यत् ॥४२॥

तथा तं द्विजं शृङ्खलैः बबन्धुः कारागृहादिषु निरुरुधुः ॥ ३९ ॥ एवमिति ॥ एवं भौतिकं दुर्जनादिकृतं दैहिकं ज्वरादिनिमित्तं दैविकं शीतोष्णादिप्रभवं च प्राप्तं प्राप्तं यत् दुःखं तदात्मनो दिष्टं स्वस्य प्रारब्धमवश्यं भोक्तव्यमेवेति सोऽबुध्यत निश्चितवान्न तु तेन व्याकुलो जातः ॥ ४० ॥ परीति ॥ स्वधर्मात्पातयद्भिः नराधमैर्दुर्जनैः परिभूतोऽपि सात्विकीं धृतिमास्थाय स्वधर्म एव स्थित इमां वक्ष्यमाणां गाथामगायत । तङार्षः । सात्त्विक्या धृतेर्लक्षणं च । "धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी" ॥ इति गीतायाम् ॥४१॥ अहो मे एतावद्दुःखं कः खलु दुःखदः न तावदयं जन इत्याह—नायमिति ॥ मे मम सुखदुःखयोः हेतुः अयं जनो न भवति । ननु किं प्रत्यक्षमपलपसि स्वातन्त्र्येणायं जनो दुःखद इति चेत् केषांचित्प्रेरणया ददातीत्युक्त्वाऽन्तःप्रेरकान्निषेधति । नापि देवता नाप्यात्मा न च ग्रहकर्म-

CC-0. In Public Domain. Digitization by eGangotri

कालास्तद्धेतवो भवन्ति । तत्र हेतुमाह । यतः "मनसा ह्येव पश्यति मनसा शृणोति" इत्याद्याः श्रुतयः परं केवलं मन एव तयोः कारणमामनन्ति वर्णयन्ति । यत् यस्मान्मनस एव संसारचक्रं परिवर्तते । परिवर्तयेदिति पाठे मनः कर्तृ ॥ ४२ ॥ परिवर्त्तनमाह—मन इति ॥ बलीयः अतिबलं मनः गुणान् विषयेषु रागद्वेषादिवृत्तिविशेषान् सृजति ततस्तेभ्यो गुणेभ्यः शुक्लानि सात्विकानि पुण्यानि कृष्णानि तामसानि पापानि लोहितानि राजसानि पुण्यपापमिश्राणि परस्परं विलक्षणानि कर्माणि भवन्ति । तेभ्यश्च कर्मभ्यः सवर्णाः कर्मानुरूपाः सृतयो योनयो भवन्ति । पुण्याद्देवताजन्मपापात् पश्वादिजन्मामिश्रात् मनुष्यजन्मेति विवेकः । तासु च पुनर्मनसो गुणसृष्टिस्ततः कर्माणि ततः सृतय एवं संसारचक्रं परिवर्त्तते ॥ ४३ ॥ अनीह इति ॥ समीहता संकल्पविकल्पौ कुर्वता । शता आर्षः । मनसा सह नियन्तृत्वेन वर्तमानोऽपि मत्सखः मम जीवस्य सखा हितकर्त्ता आत्मा परमेश्वरः यतः अनीहः अहंममाभिमानरहितः । तत्र हेतुः । हिरण्मयः प्रकाशबहुलो ज्ञानमयः अत उद्विचष्टे उच्चैः अतिरोहितज्ञानेन केवलं पश्यति न दुःखसुखभाग्भवति । असौ जीवस्तु स्वलिङ्गं स्वस्मिन्नात्मनि लिङ्गयति द्योतयति संसारमिति तथा तन्मनः परिगृह्य आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संगतः

मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि ॥ शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवन्ति ॥ ४३ ॥ अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे ॥ मनः स्वलिङ्गं परिगृह्य कामान् जुषन्निबद्धो गुणसङ्गतोऽसौ ॥ ४४ ॥ दानं स्वधर्मो नियमो यमश्च श्रुतानि कर्माणि च सद्व्रतानि ॥ सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ॥४५ ॥ समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यम् ॥ असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ॥ ४६ ॥ मनोवशेऽन्ये ह्यभवन् स्म देवा मनश्च नान्यस्य वशं समेति ॥ भीष्मो हि देवः सहसः सहीयान् युञ्ज्याद्वशे तं स हि देवदेवः ॥ ४७ ॥

संबद्धः गुणसङ्गात् कामान् विषयान् जुषन् सेवमानो निबद्धो भवति। आर्षः शता ॥ ४४ ॥ तस्मात्सर्वानर्थहेतुर्मन एव निग्राह्यमित्याशयेनाह—दानमिति ॥ दानादयः सद्व्रतान्ताः सर्व उपाया मनोनिग्रहलक्षणः अन्तो निष्ठाफलं येषां ते तथाभूताः सन्ति । मनसः समाधिर्निग्रह एव परो योगो ज्ञानमिति तन्निरोधं विना ज्ञानासम्भवात् ॥ ४५ ॥ समाहितमिति ॥ यस्य मनः समाहितं वशीकृतं शान्तं तस्य दानादिभिः किं कृत्यं प्रयोजनमस्ति तद्वदेति परं प्रत्युपदिशन्निव स्वयमाह । मनोनिग्रहस्य फलस्य सिद्धत्वादिति भावः । यदि तु दानादिभिरपि यस्य मनः असंयतं वशीकृतं न भवति किंतु विक्षिप्तं भवेत् । यद्वा । आलस्यादिना लीयमानं भवेत् तर्हि एभिर्दानादिभिस्तस्यापरं प्रयोजनं किं स्यान्न किंचित् । मुख्यस्य फलस्यैवाजातत्वात्तेषां निष्फलतुल्यत्वमेवेत्यर्थः ॥ ४६ ॥ मन इति ॥ देवा इन्द्रियाणि तदधिष्ठातारो ब्रह्मादयो वाऽपि मनसो वशे अभवन् ब्रह्मरुद्रेन्द्रादिमोहस्य तत्र तत्राख्याने प्रसिद्धत्वात् । मनश्चान्यस्य देवादेरपि वशं शीघ्रं नैव समेति न गच्छति । हि यस्मात्स मनोलक्षणो देवः भीष्मः नानाविधसंसारदुःखहे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुतया भयङ्करः सहसः सहीयान् बलवतोऽपि बलीयान् अतो यः पुमांस्तं भयङ्करं देवं स्ववशे युञ्ज्यात्कुर्यात् स तु देवानामपि दैवः पूजनयोग्यो भगवत्तुल्य इत्यर्थः । तथा च श्रुतिः । "मनोवशे सर्वमिदं बभूव न चान्यस्य मनोवशमन्वियाय । भीष्मो हि देवः सहसः सहीयान्" इति ॥४७॥ तमिति ॥ केचित् जनाः असह्या रागादयो वेगा यस्य अरुन्तुदं मर्मव्यथकं तं मनोरूपं दुर्जयं भगवत्प्रसादेतरोपायैर्जेतुमशक्यं शत्रुं न विजित्य तत् ततः मर्त्येषु मित्राणि उपकारिणः उदासीनान् रिपूंश्च कुर्वन्ति । केचिच्च तैर्मर्त्यैः सहासन्तं नरकादिहेतुं विग्रहं कुर्वन्ति ते मूढाः मूर्खाः ॥ ४८ ॥ देहमिति ॥ अन्धा लुप्तविवेका धीर्येषां ते मनुष्याः मनोमात्रं मनोभ्रमेणैव इदं स्वदेहमहमिति पुत्रादिदेहं ममेति स्वीकृत्य एषोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि घोराज्ञानपूर्णे संसारे भ्रमन्ति ॥ ४९ ॥ एवं मनसः सुखादिहेतुत्वं प्रतिपाद्य नायं जनो मे इत्यत्रोक्तं जनादीनां सुखदुःखहेतुत्वाभावं प्रतिपादयति—जनस्त्विति ॥ चेत् यदि जनः सुखदुःखयोर्हेतुस्तदात्र अस्मिन्नपि पक्षे आत्मनः किं सुखदुःखयोः कर्मत्वं कर्तृत्वं वा । किमपि नास्तीत्यर्थः । यतः तत्कर्तृत्वं कर्मत्वं चोभयमपि भौमयोः भूमिविकारयोर्वध्यघातकत्वेनाभिमतयोर्देहयोरेव नत्वात्मनः । अमूर्तस्याक्रियस्य च तस्य हननादिषु कर्मत्वकर्तृत्वानुपपत्तेः । क्वचिज्जनः

तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तन्न विजित्य केचित् ॥ कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून् विमूढाः ॥ ४८ ॥ देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यन्धधियो मनुष्याः ॥ एषोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि भ्रमन्ति ॥ ४९ ॥ जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् ॥ जिह्वां क्वचित् संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥५०॥ दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् ॥ यदङ्गमङ्गेन निहन्यते क्वचित् क्रुध्येत कस्मै पुरुषः स्वदेहे ॥ ५१ ॥ आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजस्वभावः ॥ न ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात् क्रुध्येत कस्मान्न सुखं न दुःखम् ॥ ५२ ॥

जिह्वां स्वदद्भिः संदशति तदा तस्यां वेदनायां पीडायां कतमाय कुप्येत् । दद्भ्यः कोपे ताडने वा स्वस्यैव पीडान्तरं स्यात् । एवं स्वशरीरे परशरीरे चात्मन एकत्वात्तत्रापि कोपेन पीडोत्पादनमनुचितमेव । अविवेकिनां लोके तत्र प्रवृत्तिस्तु देहाद्यध्यासेन मनोनिबन्धनाऽतो मनस एव सुखादिहेतुत्वमित्याशयः । एवमग्रेऽपि ॥ ५० ॥ दुःखस्येति ॥ सुखस्याप्युपलक्षणम् । यदीन्द्रियाधिष्ठात्री काचिद्देवता दुःखादिहेतुस्तदा तथास्तु । तत्रापि पक्षे आत्मनः किं कर्तृत्वं कर्मत्वं वा न संभवतीत्यर्थः । यतस्तदुभयं विकारयोर्विक्रियमाणयोर्देवयोरेव हस्तेन मुखेऽभिहते मुखेन च श्वित्रमस्तु इति शप्ते तदभिमानिनोर्वह्नीन्द्रयोरेव तत् दुःखं सम्भवतु न त्वमूर्तस्याऽविक्रियस्यात्मनः देवतानां च सर्वदेहेष्वभेदान्न कोऽपि कोपविषयोऽस्तीति स्वदेहदृष्टान्तेनाह । यत् यदा कश्चित्स्वशरीरे एव केनचिदङ्गेन देवताधिष्ठानेन हस्तमुखादिना किंचिदङ्गं देवताधिष्ठानं मुखहस्तादि हन्यते तदा पुरुषः कस्मै क्रुध्येत । तङ्नार्थः । अत एव पूर्वं देवतानधिष्ठानभूतभूविकारदन्तजिह्वोदाहरणम् । अन्यत्पूर्ववत् ॥ ५१ ॥ आत्मेति ॥ आत्मन एव सुखदुःखाद्याकारः परिणामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः स एव यदि सुखादिहेतुः स्यात्तत्र तस्मिन्नपि पक्षे अन्यतः। किं दूषणं यतोऽन्यस्मै कुप्येदित्यर्थः। यतः सुखदुःखादिनिजस्वभावसिद्धमेव नन्वात्मपरिणामोऽन्यनिमित्ततो भवत्यतोऽस्ति कोपविषय इति चेत् आत्मनोऽन्यत्किंचिद्वस्तु नास्त्येव तस्यैव सर्वात्मकत्वात् "सर्वं खल्विदं ब्रह्म" इति श्रुतेश्च । यदि तद्व्यतिरिक्तं वस्तु स्यात्तर्हि तन्मृषा भ्रान्त्यैव प्रतीतं स्यात् उपादानव्यतिरेके कार्यस्यासंभवात् । किंच । यतः आत्मव्यतिरि क्तं निमित्तं सुखं दुःखं च नास्ति अतः कस्माद्धेतोः क्रुद्ध्येत । तङ्गार्थः ॥ ५२ ॥ ग्रहा इति ॥ चेत् यदि आदित्यादयो ग्रहा एव सुखदुःखयोर्निमित्तं तदाप्यजस्यात्मनः किं यतः जन्यत इति जनो देहस्तस्यैव जन्मलग्नापेक्षया द्वादशाष्टमादिराशिस्थास्ते ग्रहाः सुखदुःखयोर्निमित्तं भवन्ति । किंच अन्तरिक्षस्थैर्ग्रहैस्तत्रस्थस्य ग्रहस्यैव पादार्द्धादिदृष्ट्यादिभेदैः पीडां वदन्ति दैवज्ञाः न तु गृहकोणादिषु स्थितस्य तद्दृष्ट्यगोचरस्य पुरुषस्य ग्रहगतैव तु पीडा तल्लग्नोत्पन्ने देहे तस्याभिमानादेव भवतीति मन एव तत्र कारणम् । विवेकी पुरुषस्तु ततो ग्रहाद्देहाच्चान्य एव कस्मै क्रुद्ध्येत । तङ्गार्थः ॥ ५३ ॥ कर्मेति ॥ सुखदुःखहेतुः कर्मैवेति चेत्तथास्तु । तत्राप्यात्मनः किं. हि यस्मात् तत् कर्म तज्जनितं सुखादिकं च सर्वमेकस्य जडाजडत्वे जडचैतन्यात्मकत्वे सत्येव स्यात् ।

ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै ॥ ग्रहैर्ग्रहस्यैव वदन्ति पीडां क्रुध्येत कस्मै पुरुषस्ततोऽन्यः ॥ ५३ ॥ कर्मास्तु हेतुः सुखदुःखयोर्वै किमात्मनस्तद्धि जडाजडत्वे ॥ देहस्त्वचित् पुरुषोऽयं सुपर्णः क्रुध्येत कस्मै न हि कर्म मूलम् ॥ ५४ ॥ कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोऽसौ ॥ नाग्नेर्हि तापो न हिमस्य तत्स्यात् क्रुद्ध्येत कस्मै न परस्य द्वन्द्वम् ॥ ५५ ॥

जडत्वाद्विकारित्वोपपत्तिः चेतनत्वाच्च हिताहितानुसन्धानं प्रवृत्त्यादिकं च संभवति । तत्र देहस्त्वचित् जड एव तस्य तदनुसंधानादि न संभवति । पुरुषः आत्मा तु सुपर्णः शुद्धज्ञानस्वरूप एव ततो विकारित्वासंभवात्सुखदुःखादिमूलं कर्मैव नास्ति । अतो विवेकी केन निमित्तेन कस्मै क्रुद्ध्येत । तङ्गार्थः। तथा चाध्यासहेतुर्मन एव कारणमित्याशयः ॥ ५४ ॥ काल इति ॥ यदि सुखदुःखयोर्हेतुः काल एव तत्रापि पक्षे आत्मनः किं यतोऽसौ तदात्मकः ब्रह्मांशत्वात् कालब्रह्मणोश्चैक्यात् अंशिनः सकाशादंशस्य पीडा नास्तीत्यत्र दृष्टान्तः । यथा अग्नेर्हेतोस्तदंशस्य ज्वालादेस्तापो दाहतो नाशो नास्ति । यथा च हिमस्य तच्छैत्यं तदंशस्य तुषारकणस्य नाशकं न स्यात् । अतः परस्य स्वरूपतोऽपि मायातीतस्य जीवस्य द्वन्द्वं सुखादिकं नास्ति । यद्वा । यतोऽसौ कालस्तदात्मकः आत्मांशभूत एव यथा स्वांशभूताद्विस्फुलिङ्गादग्नेस्तापो न भवति यथा च स्वांशाद्धिमकणात् हिमस्य तत् शैत्यं न भवति तथा परस्य कारणभूतस्यात्मनः स्वांशभूतात्कालात् द्वन्द्वं सुखदुःखादिकं न संभवति । अतो विवेकी केन निमित्तेन कस्मै क्रुद्ध्येत । तङ्गर्षः । अतो मन एवान्यथाकल्पकमित्याशयः ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं षडेते हेतवः प्रतिषिद्धाः मनोविना अन्योऽपि हेतुर्नास्तीत्याह–नेति ॥ केनचिदपि कर्त्रा करणेन च क्वापि देशे काले च कथञ्चन केनापि प्रकारेण परतः प्रकृतितः परस्य असङ्गस्य अस्यात्मनो द्वन्द्वोपरागः दुःखसुखादिसंबन्धो नैव भवति । ननु तर्ह्यपरोक्षदुःखानुभवस्य को हेतुरित्याशङ्क्य मनोध्यास एवेत्याह । आत्मन्यविद्यमानामपि संसृतिं रूपयति प्रकाशयति यस्तस्याहमः अहङ्कारस्य यथा स भवति तथात्मनो न भवतीत्यहङ्काराध्यासादेवात्मनि प्रतीयते न वास्तवोऽस्तीत्यर्थः । अत एव य एवं प्रबुद्धः स विद्वान् भूतैः हेतुभिर्न बिभेति । अत्रायं प्रकरणार्थः । आत्मा हि स्वरूपतः शुद्ध एव न तस्य कालकर्मादयो दुःखहेतवः किन्त्वविद्यया कृतोऽध्यास एव । स च मनःप्रधानत्वान्मन एव तदेव दुःखहेतुरिति अध्यासे सत्यध्यासानुगाः षडपि हेतवो यथायोगमुद्भवन्तीति ॥ ५६ ॥ एतामिति ॥ सोऽहं पूर्वतमैर्महर्षिभिरध्यासितां स्वीकृतामेतां देहादिसङ्घातात्पर-स्मिन्नात्मनि निष्ठां निरन्तरानुसन्धानमास्थायाङ्गीकृत्य मुकुन्दस्य अङ्घ्रिनिषेवयैव साधनेन दुरन्तपारमपि तमः अविद्याकार्यं संसारं तरिष्यामि ॥ ५७ ॥ निर्विद्येति ॥ नष्टं

न केनचित्क्वापि कथंचनास्य द्वन्द्वोपरागः परतः परस्य ॥ यथाऽहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ॥ ५६ ॥ एतां समास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः ॥ अहं तरिष्यामि दुरन्तपारं तमो मुकुन्दाङ्घ्रिनिषेवयैव ॥ ५७ ॥ श्रीभगवानुवाच ॥ निर्विद्य नष्टद्र-विणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थम् ॥ निराकृतोऽसद्भिरपि स्वधर्मादकम्पितोऽमूं मुनिराह गाथाम् ॥ ५८ ॥ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः ॥ मित्रोदासीनरिपवः संसारस्तमसः कृतः ॥ ५९ ॥ तस्मात् सर्वात्मना तात निगृहाण मनो धिया ॥ मय्यावेशितया युक्त एतावान् योगसंग्रहः ॥ ६० ॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः ॥ धारयञ्छ्रावयन् शृण्वन् द्वन्द्वैर्नैवाभिभूयते ॥ ६१ ॥ इति श्रीभागवते एकादशस्कन्धे भगवदुद्धवसंवादे भिक्षुगीता नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

द्रविणं यस्य तथापि गतक्लमः खेदरहितः निर्विद्य विषयभोगात् विरज्य गृहात् प्रव्रज्य गां पृथिवीं पर्यटमानः । शानजार्षः । इत्थमुक्तप्रकारेणासद्भिर्दुर्जनैः निराकृतः तिरस्कृ-तोऽपि स्वधर्माद्भगवदनुसन्धानात् अकम्पितः अप्रचलितो मुनिः गृहीतमौनो ब्राह्मणः अमूं पूर्वोक्तां गाथामाह स्म ॥ ५८ ॥ सुखेति ॥ पुरुषस्य सुखदुःखप्रदोऽन्यो नास्त्येव । यच्च सुखादिकमात्मनि अन्यत्र च तत्र च तत्प्रदत्वं प्रतीयते तत्सर्वमात्मनो मनसो भ्रमजन्यमेवेति । तथा मित्रोदासीनरिपवोऽपि भ्रमेणैव कल्पिता इति शेषः । एवं पुरुषस्य जन्ममरणादिः सर्वोऽपि संसारः तमस आत्माज्ञानत एव कृतः ॥ ५९ ॥ तस्मादिति ॥ तस्मात् संसारदुःखस्य मनोभ्रमकल्पितत्वात् मय्यावेशितया धिया युक्तः सर्वात्मना सकलप्रयत्नेन मनो निगृहाण विषयान्तरेभ्यो निगृह्य मयि समाहितं कुरु । एतावानेव योगस्य संग्रहः परम उत्कर्षः ॥ ६० ॥ य इति ॥ द्वन्द्वैः क्षुत्पिपासासुखदुःखादिभिर्ना-भिभूयते मनोनिग्रहो भवतीत्यर्थः । स्फुटमन्यत् ॥ ६१ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशत्रयोविंशे व्यधाद्गङ्गासहासकः ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशे विरक्त्यर्थमुत्पत्तिप्रलयावपि ॥ कथितौ सर्वभावानां तत्र श्लोकास्तु गोदृशः ॥ उवाचेत्येकमेवात्र श्लोकर्तुल्या अनुष्टुभः ॥ २४ ॥ अथेति ॥ पूर्वैः कपिलादिभिः यत् साङ्ख्यं साङ्ख्यशास्त्रप्रतिपादितं तत्वं विनिश्चितं निश्चयेन निरूपितं तत्ते तुभ्यमथेदानीमहं प्रवक्ष्यामि यत्तत्वं विज्ञाय वैकल्पिकमेषोऽहमन्योऽयमिति भेदबुद्धिनिमित्तं शत्रुमित्रदुःखसुखादिभ्रमं पुमान् सद्य एव जह्यात् परित्यजेत् ॥ १ ॥ आसीदिति ॥ अथोशब्दः कात्स्न्र्ये । अयं द्रष्टृदृश्यादिरूपः कृत्स्नोऽपि पदार्थः आदौ अयुगे युगेभ्यः पूर्वं प्रलये अविकल्पितं भेदशून्यमेकं ज्ञानं ब्रह्मैवासीत् । तथा कृतयुगे अन्यदा वा यदा विवेकनिपुणा जना भवन्ति तदापि तेषां तथैव स्फुरति ॥ २ ॥ तदिति ॥ तत्केवलम् एकं निर्विकल्पितं भेदशून्यं वाङ्मनसयोरगोचरम् । अत्र समासान्ताभाव आर्षः । सत्यं परमार्थभूतं बृहत् ब्रह्म मायादृश्यं फलं प्रकाशस्तद्रूपेण द्विधा समभवत् । यद्वा । तद्ब्रह्म वाङ्मनसयोर्गोचरं यथा भवति तथा मायाफलरूपेण द्विधा समभवत् ॥ ३ ॥ तयोरिति ॥ तयोर्द्विधाभूतयोरंशयोर्मध्ये एकतरः पदार्थः उभयात्मिका कार्यकारणरूपिणी सा प्रसिद्धा प्रकृतिरभिधीयते । यस्त्वन्यतमो भावो ज्ञानं चैतन्यरूपः स एव पुरुषोऽभिधीयते ॥४॥ तम इति ॥ ततश्च पुरुषानुमतेन तत्प्रेरितेन मया कालरूपेण प्रक्षोभ्यमाणायाः

श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितम् ॥ यद्विज्ञाय पुमान् सद्यो जह्याद्वैकल्पिकभ्रमम् ॥ १ ॥ आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम् ॥ यदा विवेकनिपुणा आदौ कृतयुगे युगे ॥ २ ॥ तन्मायाफलरूपेण केवलं निर्विकल्पितम् ॥ वाङ्मनोऽगोचरं सत्यं द्विधा समभवद्बृहत् ॥ ३ ॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ॥ ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते ॥४॥ तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः ॥ मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च ॥५ ॥ तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः ॥ ततो विकुर्वतो जातोऽहङ्कारो यो विमोहनः ॥ ६ ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् ॥ तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः ॥ ७ ॥

प्रकृतेः सकाशात्तमआदयस्त्रयो गुणा अभवन् । जीवादृष्टप्रयुक्तत्वात्सृष्टेः पुरुषानुमतत्वम् । यद्वा । स्वस्यैव प्रतीक्षणरूपा या पुरुषावस्था तदनुमतेन तद्द्वारेणेत्यर्थः ॥ ५ ॥ तेभ्य इति॥तेभ्यो गुणेभ्यः क्रियाशक्तिमत् सूत्रं समभवत् । तेन सूत्रेण संयुतो ज्ञानशक्तिमान् महान् समभवत् । एकमेव तत्वं क्रियाज्ञानशक्तिभ्यां द्विधोच्यते । न तु तत्वद्वयमित्यर्थः। विकुर्वतस्ततो महतो यो विमोहनो जीवस्य देहाद्यध्यासरूपभ्रमहेतुरहंकारः स जातः ॥ ६ ॥ वैकारिक इति ॥ स चाहङ्कारो वैकारिकः सात्त्विकः तैजसो राजसः तामसश्चेति त्रिवृत् त्रिविधः । तन्मात्रेन्द्रियमनसां कारणं मनःशब्द उपलक्षणं देवानां स च चिदचिन्मयः स्वतो जडोऽपि चिदाभासग्राहकत्वादुभयग्रन्थिरूप इति जीवोपाधित्वं दर्शितम् । यद्यपि "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुतेः । "अन्नमयं हि सोम्य मनः" इत्यादिश्रुतेश्च । प्रथमं भूतानि जायन्ते तेभ्यश्चापञ्चीकृतेभ्यः प्राणादिक्रमेण सप्तदशलिङ्गशरीरं पञ्चीकृतेभ्यश्च ब्रह्माण्डम् । एतस्मिन् वैराजस्तदन्तर्यामी लीलाविग्रहः क्षीराब्धिशायी श्रीनारायणस्तन्नाभिपद्मे च वैराजस्य भोगविग्रहः चतुराननः ततो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽन्येषां जीवानामाविर्भाव इति प्रक्रिया । तथापि चित्ताभिव्यक्तिपूर्वकोऽहंकारस्ततो भूतेन्द्रियादिव्यवहारः इत्येतावता महदादिक्रमेण सृष्टिरुच्यते । तथा चोक्तम् । " मृल्लोह-विस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा । उपायः सोऽवताराय न विभेदः कथंचन ॥ " इति ॥ ७ ॥ अर्थ इति ॥ तन्मात्रिकात् शब्दादितन्मात्रकारणात्तामसात् तन्मात्रद्वारा अर्थः पञ्चमहाभूतरूपो जज्ञे बभूव । पृथ्व्यादिमहाभूतानामावरकत्वं तामसत्वादेव कारणस्य कार्यनिवासरूपत्वात् । "तस्य निवासः" इत्यर्थे "वुञ्छणकठज्" इति कुमुदादित्वाट्ठचि तन्मात्रिक इति सिद्धिः । तैजसात् राजसात् दशेन्द्रियाणि अभवन् । अत एव तेषां प्रवृत्तिस्वभावत्वम् । वैकृतात्सात्विकात् देवताः दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाश्चन्द्रश्चेत्येकादश चशब्दात् मनसश्च जाता आसन् । अत एतेषां प्रकाशस्वभावत्वम् ॥ ८ ॥ मयेति ॥ मया संचोदिताः दत्तसामर्थ्या भावा महदादयः संहत्य मिलित्वा कारिणः कार्ये समर्थाः । आवश्यके णिनिः । मम वैराजान्तर्यामिणः आयतनं क्रीडास्थानमण्डमुत्पादयामासुः ॥९॥ तस्मिन्निति ॥ सलिले गर्भोदरूपे संस्थितिर्यस्य तस्मिन् सलिलसंस्थितावण्डे गर्भोदशायिनारायणाख्यद्वितीयपुरुषरूपेण लीलाविग्रहेण अहं समभवं स्थितः । मम नाभ्या विश्वाख्यं लोककारणभूतं पद्ममभूत् । तत्र पद्मे

अर्थस्तन्मात्रिकाज्जज्ञे तामसादिन्द्रियाणि च ॥ तैजसाद्देवता आसन्नेकादश च वैकृतात् ॥ ८ ॥ मया संचोदिता भावाः सर्वे संहत्यकारिणः ॥
अण्डमुत्पादयामासुर्ममायतनमुत्तमम् ॥ ९ ॥ तस्मिन्नहं समभवमण्डे सलिलसंस्थितौ ॥ मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः ॥ १० ॥
सोऽसृजत्तपसा युक्तो रजसा मदनुग्रहात् ॥ लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रिधा ॥ ११ ॥ देवानामोक आसीत्स्वर्भूतानां च भुवः
पदम् ॥ मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितयात्परम् ॥ १२ ॥ अधोऽसुराणां नागानां भूमेरोकोऽसृजत्प्रभुः ॥ त्रिलोक्यां गतयः सर्वाः कर्मणां
त्रिगुणात्मनाम् ॥ १३ ॥ योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः ॥ महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः ॥ १४ ॥

चात्मभूः चतुराननरूपभोगविग्रहेण पुनर्वैराज एवाविर्भूत इत्यर्थः ॥ १० ॥ स इति ॥ स विश्वात्मा विश्वस्रष्टा ब्रह्मा तपसा युक्तोऽतो मदनुग्रहाद्रजसा गुणेन सपालान् लोकान् असृजत् । तान् दर्शयति । भूः अतलादिसहिता भुवः अन्तरिक्षलोकः । स्वः स्वर्गो देवलोकात्सत्यलोकपर्यन्तः इत्येवं त्रिधा ॥ ११ ॥ देवानामिति ॥ तत्र स्वर्लोको देवानामोकः स्थानमासीत् । भुवर्लोको भूतानां प्रेतपिशाचादीनां पदं स्थानमासीत् । मर्त्यानां मनुष्याणां च भूर्लोकः पदमासीत् । सिद्धानां भृग्वादीनां ब्रह्मर्षीणां त्रितयात् लोकत्रयात् परं महर्जनादिकं पदमासीत् ॥ १२ ॥ अध इति ॥ असुराणां नागानां चौकः भूमेरधस्तादतलादिकं प्रभुर्ब्रह्मा असृजत् । त्रिलोक्यां महर्लोकादधः पातालपर्यन्तायां त्रिगुणात्मनां सत्वादिगुणत्रयप्रयुक्तानां सर्वा गतयः सर्वाणि फलानि भवन्ति ॥ १३ ॥ योगस्येति ॥ योगस्याष्टाङ्गयोगस्य तपसो वानप्रस्थधर्मस्य न्यासस्य यथोक्तसंन्यासाश्रमधर्मस्य च तारतम्यानुसारेण अमलाः रागलोभादिविकाररहिता यथोत्तरं श्रेष्ठा महर्लोकादयो गतयः प्राप्याणि फलानि भवन्ति । भक्तियोगस्य तु मद्गतिः मम लोकवैकुण्ठप्राप्तिरेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलमित्यर्थः ॥ १४ ॥ मयेति ॥ कालात्मना कालशक्तिना धात्रा कर्मानुरूपफलप्रदेन मया परमेश्वरेण हेतुना कर्मयुक्तमिदं जगत् प्राणिमात्रं गुणेन प्रवहतीति गुणप्रवाहस्तस्मिन्नेतस्मिन् संसारे उन्मज्जति आसत्यलोकमुत्तमा गतीः प्राप्नोति । पुनर्निमज्जति आस्थावरं नीचा गतीः प्राप्नोति ॥ १५ ॥ अद्वितीयात्मप्रतिपत्तिः सृष्टिवर्णनस्य प्रयोजनम् । तदर्थं कारणेन कार्यस्य व्याप्तिमाह–अणुरिति ॥ अणुर्बृहत्कृशः स्थूलो यो यो भावः पदार्थः प्रसिद्ध्यति प्रसिद्धो वर्त्तते स सर्वोऽपि प्रकृत्या पुरुषेण चेत्येवमुभयेन संयुक्तः ॥१६॥ कार्यस्य कारणात्मतामाह–यस्त्विति ॥ यस्य कार्यस्य यस्तु आदिः कारणम् अन्तः लयस्थानं च तस्य मध्यं मध्यावस्थाऽपि स एव अत एव व्यभिचारित्वात्स एव सन्नेतरो विकारः सृष्ट्यादिविकारो व्यवहारार्थ एव । यथा तैजसाः सुवर्णकार्यभूताः कटककुण्डलादयो न ततः पृथक् । यथा च पार्थिवाः घटशरावादयो न पृथ्व्याः पृथक् तथेत्यर्थः ॥ १७ ॥ तर्हि महदादीनामपि स्वकार्यं प्रत्याद्यन्तरूपत्वात्सत्यत्वं स्यात् तत्राह–यदिति ॥ यद्रूपमुपादाय उपादानकारणतया स्वीकृत्य पूर्वः कारणरूपो महदादिर्भावः परमहङ्कारादिकं भावं विकुरुते सृजति । यथा पिण्डो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति तद्वत्स एव सन्निति पूर्वस्यानुषङ्गः । कथं तर्हि " मृत्तिकेत्येव सत्यम् "

मया कालात्मना धात्रा कर्मयुक्तमिदं जगत् ॥ गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति ॥१५॥ अणुर्बृहत्कृशः स्थूलो यो यो भावः प्रसिद्ध्यति ॥ सर्वोऽप्युभयसंयुक्तः प्रकृत्या पुरुषेण च ॥ १६ ॥ यस्तु यस्यादिरन्तश्च स वै मध्यं च तस्य सन् ॥ विकारो व्यवहारार्थो यथा तैजसपार्थिवाः ॥ १७ ॥ यदुपादाय पूर्वस्तु भावो विकुरुतेऽपरम् ॥ आदिरन्तो यदा यस्य तत्सत्यमभिधीयते ॥ १८ ॥ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥ १९ ॥ सर्गः प्रवर्तते तावत्पौर्वापर्येण नित्यशः ॥ महान्गुणविसर्गार्थः स्थित्यन्तो यावदीक्षणम् ॥ २० ॥

इत्यादि श्रुतिस्तत्राह । यद्यदा यस्यादिरन्तश्च विवक्ष्यते तत्तदा तत् सत्यमित्यभिधीयते । परमकारणस्य परमात्मनः सत्यत्वविवक्षया तदनन्यत्वं श्रुत्या प्रतिपाद्यत इत्यर्थः ॥ १८ ॥ ननु तथापि प्रकृतिपुरुषकालानामकार्यभूतानां निमित्तत्वात्कथमद्वितीयता तत्राह–प्रकृतिरिति ॥ अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा यश्च तस्या आधारः अधिष्ठाता परः पुरुषः यश्च गुणक्षोभेणाभिव्यञ्जकः कालस्तत् त्रितयं ब्रह्मरूपोऽहमेव । न तु तत् पृथक् प्रकृतेः शक्तित्वात् पुरुषकालयोरवस्थाविशेषरूपत्वात् ॥ १९ ॥ सृष्टिकारणत्वेनादौ ब्रह्मणः सत्यत्वमुक्तं मध्येऽपि तस्यैव सत्वमुपपादितम् । अन्तेऽप्यवधित्वेन सत्वं दर्शयिष्यन् सर्गप्रवाहरूपायाः स्थितेरवधिमाह–सर्ग इति ॥ महान् बहुलः पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन सर्गस्तावत्प्रवर्त्तते । स च गुणेषु देहेषु विविधतया सृज्यत इति गुणविसर्गो जीवस्तदर्थस्तस्य धर्मादिषु पुरुषार्थलाभार्थ इत्यर्थः । स च यावत्स्थितेरन्तस्तावत् प्रवर्तते । सोऽपि यावत् ईक्षणम् ईश्वरस्य संकल्पस्तावदित्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रलयं निरूपयति—विराडिति ॥ लोकानामहरहः कल्पान् सृष्टिप्रलयाख्यान् भेदान् स्वस्मिन् विकल्पयतीति तथाविधोऽपि विराट् ब्रह्माण्डं मया कालात्मना आसाद्यमानः व्याप्यमानः प्रलयमेष्यमाणो वा भुवनैः सह पञ्चत्वाय पञ्चमहाभूतरूपत्वाय विशेषाय विभागाय कल्पते योग्यो भवति । मिलितानां पञ्चमहाभूतानां कार्यरूपो विराट् एषां विभागेन विनश्यतीत्यर्थः ॥ २१ ॥ तत्र क्रमापेक्षया सृष्टिक्रमप्रातिलोम्येन प्रलयमाह—अन्न इति ॥ मर्त्यं शरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्टौ क्षीणे सति तत्रैव प्रलीयते विनश्यतीत्यर्थः । अन्नं धानासु लीयते बीजमात्रावशेषं भवतीत्यर्थः । धाना भूमौ प्रलीयन्ते उप्ता न प्ररोहन्तीत्यर्थः । भूमिश्च गन्धे प्रलीयते । संवर्त्तकादित्यशोषिता सङ्कर्षणमुखाग्निना दग्धा च सती भूतसूक्ष्मरूपगन्धमात्रावशेषा भवतीत्यर्थः ॥ २२ ॥ अप्स्विति ॥ शतवर्षया वृष्ट्या प्लाव्यमानो गन्धः अप्सु प्रलीयते । ज्योतिषा शोष्यमाणा आपश्च स्वगुणे स्वकारणे रसे प्रलीयन्ते रसमात्रावशेषा भवन्ति । रसश्च ज्योतिषि लीयते । ज्योतिश्च वायुनाभिभूयमानं रूपमात्रं सत्तस्मिन् रूपे प्रलीयते ॥२३॥ रूपमिति॥ रूपं वायौ लीयते । वायुश्च कालप्रेरितेनाम्बरेण ग्रस्तः स्पर्शमात्रः संस्तस्मिन् स्पर्शे लीयते । स स्पर्शश्चाम्बरे लीयते । अम्बरं च भूतादिना अहंकारेण ग्रस्यमानं शब्दतन्मात्रे

विराण्मयाऽऽसाद्यमानो लोककल्पविकल्पकः ॥ पञ्चत्वाय विशेषाय कल्पते भुवनैः सह ॥ २१ ॥ अन्ने प्रलीयते मर्त्यमन्नं धानासु
लीयते ॥ धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते ॥ २२ ॥ अप्सु प्रलीयते गन्ध आपश्च स्वगुणे रसे ॥ लीयते ज्योतिषि रसो ज्योती-
रूपे प्रलीयते ॥ २३ ॥ रूपं वायौ स च स्पर्शे लीयते सोऽपि चाम्बरे ॥ अम्बरं शब्दतन्मात्रे इन्द्रियाणि स्वयोनिषु ॥ २४ ॥ योनि-
र्वैकारिके सौम्य लीयते मनसीश्वरे ॥ शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः ॥ २५ ॥ स लीयते महान् स्वेषु गुणेषु गुणवत्तमः ॥
तेऽव्यक्ते संप्रलीयन्ते तत्काले लीयतेऽव्यये ॥ २६ ॥

लीयते । तदेवं तामसाहङ्कारकार्यस्य शब्दपर्यन्तं लयमुक्त्वा राजसाहङ्कार्यस्यापि प्रलयमाह । इन्द्रियाणि स्वयोनिष्विति स्वप्रवर्त्तकदेवतासु लीयन्ते । तेषां प्रवृत्तिस्वभावत्वात् । प्रवृत्तेश्च देवताधीनत्वात्तासु लय इति वाचो युक्तिः । वस्तुतस्तु कारणे राजसाहङ्कार एव लयोऽभिप्रेतः ॥ २४ ॥ योनिरिति ॥ हे सौम्य योनिरित्येकत्वमुद्देश्य गतत्वान्न विवक्षितम् । योनयो देवतास्तु ईश्वरे स्वनियन्तरि मनसि लीयन्ते । " मनोवशेऽन्येऽह्यभवन् स्म देवाः " इत्युक्तेः । इन्द्रियलयोक्तोऽभिप्रायोऽत्रापि बोध्यः । मनश्च देवताभिः सह वैकारिकेऽहंकारे लीयत इत्यर्थः । तामसाहंकारकार्यावशेषितस्य शब्दस्य लयमाह शब्द । इति शब्दो । भूतादिं तामसाहङ्कारमप्येति तस्मिन् लीयत इत्यर्थः । भूतादिरित्युपलक्षणम् । प्रभुः सर्वजगन्मोहने समर्थः त्रिविधोऽप्यहंकारो महति लीयते । जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति ॥ २५ ॥ स इति ॥ स महान् स्वकारणेषु गुणेषु लीयते । यतो ज्ञानक्रियाशक्तिमत्त्वात्सगुणवत्तमः अतस्ताद्दग्भावं विहाय गुणमात्ररूपो भवतीत्यर्थः । ते गुणाः अव्यक्ते प्रकृतौ लीयन्ते । साम्यावस्थां गच्छन्तीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदव्यक्तमव्यये उपरतव्यापारे काले लीयते । कालाधीनत्वात्तेनैकीभूयावतिष्ठते ॥ २६ ॥ काल इति ॥ कालो मायामये मायाप्रवर्त्तके जीवयतीति जीवो महापुरुषः तस्मिन् जीवे लीयते । अयं भावः । विश्वस्रष्टुर्महापुरुषस्योपकरणरूपः कालः वृत्त्यंशेन सृज्यश्चातस्तदात्मनावतिष्ठते । " कालं चरन्तं सृजतीश आश्रयम् " इति सप्तमे । " योऽयं कालस्तस्य तेऽव्यक्तबन्धोश्चेष्टामाहुः" इति दशमे चोक्तेः । जीवस्तु अजे आत्मनि मयि लीयते । प्रकृतेर्लीनत्वेन प्रतियोग्यभावात्परिपूर्णत्वेन सद्रूपेणावतिष्ठते । आत्मा त्वात्मस्थ एव भवति नान्यत्र लीयते । यतः केवलो निरुपाधिः विकल्पापायाभ्यां विश्वोत्पत्तिप्रलयाभ्यां लक्ष्यते अधिष्ठानत्वेनावधित्वेन च ज्ञायत इति । तथा तस्यापि कारणान्तराश्रवणात् तदङ्गीकारे चानवस्थाप्रसङ्गात् ॥ २७ ॥ एतत्कथनस्य प्रस्तुतोपयोगमाह—एवमिति ॥ एवमात्मतत्वमन्वीक्षमाणस्य पुंसो मनसो वैकल्पिको भेदनिमित्तो भ्रमोऽहंममाध्यासलक्षणः कथं स्यात् जातो वा हृदि कथं तिष्ठेत् । तत्र दृष्टान्तमाह । अर्कस्योदये यथा व्योम्नि तमो न तिष्ठति तथेति ॥ २८ ॥ एष इति ॥ देहात्मभेदाभेदसुखदुःखपरमार्थत्वापरमार्थत्वादिरूपः संशयः एवं ग्रन्थिवत् दुर्मोच्यत्वात् ग्रन्थिस्तस्य भेदनः निवर्त्तकः एषः साङ्ख्यस्यात्मानात्मविवेकस्य विधिः प्रकारः प्रतिलोमानुलोमाभ्यामुत्प-

कालो मायामये जीवे जीव आत्मनि मय्यजे ॥ आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ॥ २७ ॥ एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः ॥ मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः ॥ २८ ॥ एष सांख्यविधिः प्रोक्तः संशयग्रन्थिभेदनः ॥ प्रतिलोमानुलोमाभ्यां परावरदृशा मया ॥ २९ ॥ इति श्रीभागवते एकादशस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीभगवानुवाच ॥ गुणानामसम्मिश्राणां पुमान्येन यथा भवेत् ॥ तन्मे पुरुषवर्येदमुपधारय शंसतः ॥ १ ॥ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः ॥ तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः ॥ २ ॥

त्युपसंहारक्रमाभ्यां परावरदृशा कार्यकारणयाथात्म्यद्रष्टा मया प्रोक्तः ॥ २९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकायाम् ॥ एकादशचतुर्विंशे व्यधाद्गङ्गासहायकः ॥ २४ ॥ पञ्चविंशेऽखिला भावाः सत्वादिगुणयोगिनः ॥ निर्गुणः परमेशोऽत्र श्लोकाः सार्द्धाः षडब्धयः ॥ उवाचवाणी चैकैव श्लोकतुल्या अनुष्टुभः ॥ २५ ॥ यावद्गुणत्रयवृत्तिजयो न स्यात्तावत्साङ्ख्येनापि देहाध्यासो न निवर्त्तत इति गुणत्रयवृत्तीर्वक्तुमाह—गुणानामिति ॥ हे पुरुषवर्य सह मिश्रीभूय वर्त्तमानाः सम्मिश्राः न सम्मिश्राः असम्मिश्रास्तेषां विभक्तानां गुणानां मध्ये येन गुणेन यथा यादृशः पुमान् भवेत्तदिदं कथयतो मे मत्तो निबोधेत्यर्थः ॥ १ ॥ सत्ववृत्तीराह—शम इति ॥ शमोऽन्तःकरणावधानम् । दमो बाह्येन्द्रियावधानम् । तितिक्षा सुखदुःखादिद्वन्द्वसहिष्णुता । ईक्षा तत्वविवेकः । तपः स्वधर्मवर्त्तित्वम् । सत्यं यथार्थभाषणम् । दया परदुःखप्रहाणेच्छा । स्मृतिः अनुभूतार्थानुसन्धानम् । तुष्टिर्यथालाभसन्तोषः । त्यागो यथायोग्यव्ययशीलत्वम् । अस्पृहा वैराग्यम् । श्रद्धा शास्त्रादरः । ह्रीरनुचितकर्मणि अप्रवृत्तिः । दया दानम् । " दय दाने " इति स्मरणात् । अतो न पौनरुक्त्यम् । आदिपदेन आर्जवविनयादिः । स्वनिर्वृतिः आत्मानुभवजं सुखम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजसो वृत्तीराह—कामो विषयभोगाभिलाषः । ईहा व्यापारपरता । मदो दर्पः । तृष्णा लाभे सत्यप्यसन्तोषेण ततोऽधिकजिघृक्षा । स्तम्भः अनम्रता । आशीः धनाद्यर्थं देवादिप्रार्थना । भिदा भेदबुद्धिः । सुखं विषयभोगः । मदोत्साहो गर्वेण युद्धाद्यभिनिवेशः । यशःप्रीतिः स्तुतिप्रियता । हास्यमुपहासः । वीर्यं प्रभावाविष्कारः । बलेनोद्यमः न्यायेनोद्यमस्तु सात्त्विक एव ॥ ३ ॥ तमसो वृत्तीराह—क्रोध इति ॥ क्रोधः असहिष्णुता । लोभो व्ययपराङ्मुखता । अनृतमशास्त्रीयप्रमाणस्वीकारोऽन्यथा भाषणं च । हिंसा परद्रोहचिन्तनम् । याच्ञार्थना । दम्भोऽन्यथैव सद्वेषसदाचारप्रदर्शनम् । क्लमः ग्लानिः । कलिः कलहः । शोकमोहौ अनुशोचनं भ्रमश्च । विषादः दुःखम् । आर्त्तिः दैन्यम् । निद्रा तन्द्रा । आशा इदं मे भविष्यतीत्यन्वीक्षा । भीः भयम् । अनुद्यमो जाड्यम् ॥ ४ ॥ सत्वस्येति ॥ अनुपूर्वशः क्रमेणैव श्लोकत्रयेणैताः सत्वादीनां वृत्तयो मया वर्णितप्रायाः । इतोऽन्या अप्यूह्या इत्याशयेन प्रायग्रहणम् । अथानन्तरं सन्निपातं मिलितानां सत्त्वादीनां कार्यं शृणु ॥ ५ ॥ सन्निपात इति ॥ अहं शान्तः कामी क्रोधीति तथा मम शान्तिर्मम कामः क्रोधश्चेत्यादौ अहंममतानुषक्तसत्त्वादिसर्ववृत्तिसामानाधिकरण्यदर्शनात् सन्निपातजत्वम् । हे उद्धव अहं शान्तः कामी क्रोधीत्यादि तथा मम

काम ईहा मदस्तृष्णा स्तम्भ आशीर्भिदा सुखम् ॥ मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यमः ॥ ३ ॥ क्रोधो लोभोऽनृतं हिंसा याच्ञा दम्भः क्लमः कलिः ॥ शोकमोहौ विषादार्ती निद्राऽऽशा भीरनुद्यमः ॥४ ॥ सत्त्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः ॥ वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ॥ ५ ॥ सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः ॥ व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः ॥ ६ ॥ धर्मे चार्थे च कामे च यदाऽसौ परिनिष्ठितः ॥ गुणानां सन्निकर्षोऽयं श्रद्धारतिधनावहः ॥ ७ ॥ प्रवृत्तिलक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे ॥ स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ॥ ८ ॥ पुरुषं सत्वसंयुक्तमनुमायाच्छमादिभिः ॥ कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतम् ॥ ९ ॥

शान्तिः कामः क्रोध इत्यादि च या मतिः साऽपि संनिपात एव । तुशब्दोऽवधारणे । तथा मनश्च मात्राणि शब्दादीनि च इन्द्रियाणि च असवः प्राणाश्च तैः मनआदीनां सात्त्विकतामसराजसत्वात्सर्वव्यवहारस्याहन्ताममतापूर्वकत्वाच्च तैर्मिलितैर्यो व्यवहारः स सर्वोऽपि संनिपात एव ॥६॥ धर्म इति ॥ असौ पुरुषो यदा धर्मे चार्थे च कामे च परिनिष्ठितो भवति तदाऽयं त्रिषु निष्ठारूपः गुणानां संनिकर्षः संनिपातकार्यमित्यर्थः । धर्मादीनां सत्वतमोरजःकार्यत्वात् । एवं विषयतः संनिपातजत्वमुक्तम् । फलतश्च तथात्वमाह । श्रद्धेति । श्रद्धारतिधनानि सत्त्वरजस्तमोमयान्यावहतीति तथा ॥ ७ ॥ प्रवृत्तीति ॥ प्रवृत्तिलक्षणे काम्ये धर्मे यदा पुंसो निष्ठा भवति तथा पुमान् यदा गृहाश्रम एवासक्तस्तिष्ठेत् अनु पश्चात्स्वधर्मे च नित्ये नैमित्तिके तिष्ठेत । तदर्थः । सापि गुणानां समितिः संनिपातः हि यस्मात्काम्यधर्मगृहासक्तिस्वधर्माः रजस्तमःसत्वमया इत्यर्थः ॥ ८ ॥ मिश्रामिश्रा गुणवृत्तीर्निरूप्य येन गुणेन यथा भवेदित्युक्तं दर्शयति—पुरुषमिति ॥ शमदमादिभिः पुरुषं सत्वसंयुक्तम् अनुमायात् अनुमिनुयात् । एवमग्रेऽपि ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेति ॥ यदा यः फलनिरपेक्षः भक्त्या स्वकर्मभिः भजति तं पुरुषं स्त्रियमेव वा सत्वप्रकृतिं सत्त्ववृत्तियुक्तं विद्यात् ॥ १० ॥ यदेति ॥ यदा यः आशिषो विषयान् आशास्य अपेक्ष्य स्वकर्मभिर्मामाराधयेत्तं राजसं विद्यात् । हिंसां शत्रुमारणादिकमाशास्य यो यथा मां भजेत्तं तामसं विद्यात् । एतैर्गुणैरेवंभूतो भवतीति तात्पर्यार्थः ॥ ११ ॥ ननु त्वमपि सृष्ट्यादि कुर्वन् गुणमय एव कस्तव जीवाद्विशेषो येन मां भजेतेति मुहुर्ब्रूषे तत्राह—सत्वमिति ॥ सत्वादयो गुणा जीवस्यैव बन्धका भवन्ति मम बन्धका न भवन्ति । यतश्चित्तजाः जीवस्यैव चित्ते जायन्ते अभिव्यजन्ते इति तथा यैस्तु गुणैः स जीवो भूतानां भूतजानां देहेन्द्रियान्तःकरणविषयाणां मध्ये सज्जमानः आसक्तिं कुर्वन्निबध्यते। मम तु गुणनियन्तृत्वेन तत्पारवश्याभावान्न काप्यासक्तिर्न च बन्धः ॥ १२ ॥ तदेवं मिश्रगुणकार्याणि प्रदर्श्येदानीमेकैकगुणोद्रेककार्याणि दर्शयति—यदेति ॥ यदा भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शान्तं सत्वं गुणः इतरौ रजस्तमोगुणौ जयेत् अभिभवेत् । तदा पुमान् सुखेन धर्मज्ञानादिभिश्च युज्येत । शिवत्वाविशदत्वभास्वरत्वानां यथाक्रमं

यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः ॥ तं सत्त्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव च॥१०॥यदा आशिष आशास्य मां भजेत स्वकर्मभिः॥
तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसम् ॥११॥ सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे॥चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते॥१२॥
यदेतरौ जयेत् सत्त्वं भास्वरं विशदं शिवम् ॥ तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् ॥ १३ ॥ यदा जयेत्तमः सत्त्वं रजः सङ्गं भिदा
चलम् ॥ तदा दुःखेन युज्येत कर्मणा यशसा श्रिया ॥ १४ ॥ यदा जयेद्रजः सत्त्वं तमो मूढं लयं जडम् ॥ युज्येत शोकमोहाभ्यां निद्रया
हिंसयाऽऽशया ॥ १५ ॥ यदा चित्तं प्रसीदेत इन्द्रियाणां च निर्वृतिः ॥ देहेऽभयं मनोऽसङ्गं तत्सत्त्वं विद्धि मत्पदम् ॥ १६ ॥

सुखधर्मज्ञानहेतुत्वात् । आदिशब्दाच्छमदमादिभिश्च युज्यते ॥ १३ ॥ यदेति ॥ यदा सङ्गः सङ्गहेतुः भिदा भेदहेतुः बलं प्रवृत्तिस्वभावं च रजः कर्तृ तमःसत्वे च कर्मभूते जयेत् । तदा पुमान् कर्मादिभिर्युज्येत । बलमित्यत्र चलमिति च पाठः । सङ्गहेतुत्वात् यशसा श्रिया च युज्येत भेदहेतुत्वात् दुःखेन युज्यते । "द्वितीयाद्वै भयं भवति" इति श्रुतेः । बलस्वभावत्वात् कर्मणा युज्येत ॥ १४ ॥ यदेति ॥ यदा मूढं विवेकभ्रंशकं लयमावरकं जडमनुद्यमात्मकं तमः कर्तृ रजःसत्त्वे च कर्मभूते जयेत् । तदा पुमान् शोकादिभिर्युज्येत मूढत्वात् शोकमोहहिंसाभिर्युज्यते। लयत्वात् निद्रया युज्यते जडत्वात् उद्यमरहितमेव केवलमाशया युज्यते। जडस्थाने जन इति पाठे लयात्मकमेव निद्राऽऽशयोर्हेतुः ॥ १५ ॥ यदेति ॥ यदा चित्तं प्रसीदेत शान्तं भवेत् । तदर्थः । इन्द्रियाणां च निर्वृतिः विषयादुपरतिर्भवति । देहे चाभयं रोगादिभयराहित्यं भवति । मनश्चासङ्गं सर्वसङ्गरहितं भवति तत्तदा मत्पदं मदुपलब्धिस्थानं सत्त्वमुद्रिक्तं वृद्धं विद्धि ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकुर्वन्निति ॥ यदा जनः क्रियया विकुर्वन् विकारं प्राप्नुवन् आधीः आसमन्ताद्विक्षिप्ता धीर्यस्य तथाभूतो भवति । चेतसां बुद्धीन्द्रियाणां चानिर्वृतिः अनुपरतिः स्वस्वविषयेषु विक्षिप्तत्वं गात्राणि कर्मेन्द्रियाणि तेषामस्वास्थ्यं विकाराधिक्यं मनश्च भ्रान्तं चञ्चलं भवति तदा एतैर्हेतुभिः रजः उत्कटं निशामय जानीहि ॥ १७ ॥ सीददिति ॥ यदा सीदत् तिरोभवत् चेतसो ग्रहणे चिदाकारपरिणामे अक्षमं च सच्चित्तं विलीयेत मनोऽपि संकल्पात्मकं नष्टं लीनं भवति तमः अज्ञानं ग्लानिर्विषादश्च भवति तत्तदा तम उत्कटमुपधारय विद्धि । यदा तु वृत्तिरहितं भगवत्परं वा मनस्तदा नैर्गुण्यं विद्धीति ज्ञेयम् ॥ १८ ॥ एधमान इति ॥ हे उद्धव सत्त्वगुण एधमाने देवानां बलमेधते । रजस्येधमाने असुराणां बलमेधते । तमस्येधमाने रक्षसां बलमेधते । इन्द्रियाण्येव निवृत्तिप्रवृत्तिमोहस्वभावानि देवासुररक्षांसीति ज्ञेयम् । यद्वा । प्रसङ्गादाधिदैविकानां गुणानामुत्कर्षकार्याणि उक्तानीति ज्ञेयम् ॥ १९ ॥ सत्वादिति ॥ सत्वाज्जागरणं विद्यादित्यादि स्पष्टम् प्रसङ्गान्निर्गुणावस्थामप्याह । तुरीयं चतुर्थमवस्थान्तरं नाम त्रिषु जागरणादिषु सन्ततमेक-

विकुर्वन् क्रियया चाऽऽधीरनिर्वृत्तिश्च चेतसाम् ॥ गात्रास्वास्थ्यं मनो भ्रान्तं रज एतैर्निशामय॥१७॥सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमम्॥
मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय ॥ १८ ॥ एधमाने गुणे सत्त्वे देवानां बलमेधते ॥ असुराणां च रजसि तमस्युद्धव रक्षसाम् ॥ १९ ॥
सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ॥ प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु संततम् ॥ २० ॥ उपर्युपरि गच्छन्ति सत्त्वेन ब्राह्मणा जनाः ॥
तमसाऽधोऽध आमुख्याद्रजसाऽन्तरचारिणः ॥ २१ ॥ सत्त्वे प्रलीनाः स्वर्यान्ति नरलोकं रजोलयाः ॥ तमोलयास्तु निरयं यान्ति मामेव
निर्गुणाः ॥ २२ ॥ मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत् ॥ राजसं फलसंकल्पं हिंसाप्रायादि तामसम् ॥ २३ ॥

रूपमात्मतत्त्वमेवेत्यर्थः ॥ २० ॥ उपर्युपरीति ॥ ब्राह्मणा वेदार्थानुष्ठानादियुक्ताः जनाः उपर्युपरि लोकान् गच्छन्ति । आब्रह्मण इति पाठे ब्रह्मलोकमभिव्याप्येत्यर्थः । तथा तमसा आमुख्यात् स्थावरानभिव्याप्य अधोऽधो लोकान् गच्छन्ति । रजसा तु अन्तरचारिणो मनुष्या भवन्ति नैर्गुण्येन मत्पदं यान्तीति ॥ २१ ॥ मरणसमये गुणोत्कर्षफलमाह—सत्वे इति ॥ सत्वे वृद्धे सति प्रलीना मृताः जनाः स्वः ऊर्ध्वलोकं यान्ति । एवं रजोलया रजसि प्रवृद्धे सति लयो मरणं येषां ते नरलोकं यान्ति । एवं तमोलयास्तु निरयं यान्ति । निर्गुणास्तु मामेव यान्ति । निर्गुणा इत्यत्र तु लयशब्दानुपादानात् जीवन्तोऽपि यदि निर्गुणास्तदाऽपि मामेव यान्तीत्यर्थः ॥ २२ ॥ मदर्पणमिति ॥ मदाराधनरूपं निष्फलं फलाभिसन्धिरहितं वा यन्निजं नित्यं नैमित्तिकमनुष्ठितं कर्म तत्सात्त्विकं ज्ञेयम् । फलं संकल्प्यते यस्मिंस्तत् कर्म राजसं ज्ञेयम् । हिंसाप्रायादि हिंसोद्देशेन कृतं हिंसाबहुलम् आदिशब्दात् दम्भमात्सर्यादिकृतं च कर्म तामसं ज्ञेयम् । मद्भजनादि निर्गुणम् ॥ २३ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

कैवल्यमिति ॥ कैवल्यं देहादिव्यतिरिक्तकेवलात्मविषयं ज्ञानं सात्त्विकम् । वैकल्पिकं देहादिभेदेन भिन्नात्मविषयकं यत् ज्ञानं तद्रजः राजसम् । प्राकृतं बालमूकादिज्ञानतुल्यं केवलमाहारादिप्रकृतिकार्यविषयकं ज्ञानं तामसम् । मन्निष्ठं परमेश्वरविषयकं तु ज्ञानं निर्गुणं स्मृतम्॥२४॥वनमिति॥विविक्तत्वाद्वनं सात्त्विको वासो वासस्थानमित्यादि स्पष्टम्। मन्निकेतं तु साक्षान्मदाविर्भावान्निर्गुणं स्थानम् ॥ २५ ॥ सात्विक इति ॥ असङ्गी फलानासक्तः कारकः कर्त्ता सात्विकः रागान्धः फलेऽत्यभिनिवेशवान् कर्त्ता राजसः स्मृतः। स्मृतिविभ्रष्टः कर्त्तव्याकर्तव्यानुसन्धानशून्यः कर्ता तामसः । मदपाश्रयः मदेकशरणः कर्ता निरहङ्कारत्वान्निर्गुणः ॥ २६ ॥ सात्विकीति ॥ आध्यात्मिकी अध्यात्मशास्त्रविषया श्रद्धा सात्विकी । कर्मश्रद्धा तु राजसी । अधर्मे धर्म इति या श्रद्धा सा तामसी । मत्सेवायां श्रद्धा तु निर्गुणा ॥२७॥ पथ्यमिति ॥ पथ्यं हितं पूतं शुद्धम् अनायस्तम् अनायासतः प्राप्तम् आहार्यं भक्ष्यभोज्यादि सात्विकं स्मृतम्।इन्द्रियाणां प्रेष्ठं भोगकाले सुखदं कट्वम्लादि राजसम्।आर्तिदं रोगकरम् अशुचि अशुद्धं मालिन्यकरं तामसम् चशब्दात् मन्नि-

कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत् ॥प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम्॥२४॥वनं तु सात्त्विको वासो ग्रामे राजस उच्यते॥ तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥ २५ ॥ सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः ॥ तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ २६ ॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी ॥ तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥ २७ ॥ पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतम् ॥ राजसं चेन्द्रियप्रेष्ठं तामसं चार्तिदाऽशुचि ॥ २८ ॥ सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् ॥ तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥ २९ ॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः ॥ श्रद्धावस्था कृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥३०॥ सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः ॥ दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ ३१ ॥

वेदितं तु निर्गुणमित्यभिप्रेतम् ॥ २८ ॥ सात्विकमिति ॥ आत्मोत्थं स्वात्मानुभवजन्यं सुखं सात्विकम् । विषयोत्थं सुखं तु राजसम् । मोहेन मादकवस्तुप्रयुक्तवैचित्येन जातम् । तथा दैन्येन पुत्रकलत्राद्युपच्छन्देन प्रभवं च सुखं तामसम् । मदपाश्रयं मद्ध्यानपूजानमस्कारादिप्रभवं सुखं तु निर्गुणम् ॥२९॥ द्रव्यमिति ॥ द्रव्यं पथ्यपूतादि देशो वनग्रामादिः फलं सात्विकं सुखमित्यादि कालो यदा भजेत मां भक्त्या यदेतरौ जयेदित्यादिना योऽथार्दुक्तः ज्ञानं कैवल्यं सात्विकं ज्ञानमित्यादिना कर्म मदर्पणमित्यादिकारकः सात्विकः कारको सङ्गीत्यादिः श्रद्धा सात्विक्याध्यात्मिकीत्यादि अवस्था सत्वाज्जागरणमित्यादि आकृतिः उपर्युपरि गच्छन्तीत्यादिनोक्ता देवत्वादिरूपा निष्ठा सत्त्वे प्रलीनाः स्वर्यान्तीत्यादिनोक्तः स्वर्गादि । एवं सर्वोऽप्ययं भावस्त्रैगुण्यास्त्रिगुणात्मक एव ॥ ३० ॥ सर्वे इति ॥ हे पुरुषर्षभ यावन्तः पुरुषाव्यक्ताभ्यां धिष्ठिता अधिष्ठिता । अलोपश्छान्दसः । ते सर्वेऽपि भावाः पदार्थाः गुणमयाः गुणकार्यभूता एव । एवं च चक्षुषा दृष्टं श्रोत्रेण श्रुतं बुद्ध्याऽनुध्यातं च सर्वं गुणमयमेवेति शेषः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एता इति सार्द्धम् ॥ पुंसः गुणकर्मनिबन्धनाः गुणकर्मनिमित्ताः एताः संसृतयः देवमनुष्यादियोनयो भवन्ति । येनेति । हे सौम्य येन चित्तजा इमे गुणा निर्जिताः सः भक्तियोगेन मन्निष्ठो मद्ध्यानपरः सन् मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति॥३२॥तस्मादिति॥तस्माद्विचक्षणा विवेकिनो ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं देहं लब्ध्वा गुणसङ्गं विनिर्धूय त्यक्त्वा मां भजन्तु । भजन्तीत्यपि पाठः ॥३३॥ निःसङ्ग इत्यर्द्धम् ॥ विद्वान् विवेकी निःसङ्गो विषयासक्तिरहितः जितेन्द्रियश्च सन् अप्रमत्तः सावधानः मां भजेत् ॥३४॥ रज इति सार्द्धम् ॥ मुनिर्मननशीलः सत्वसंसेवया सात्विकान्येव सेवेत । पुमान् सत्वविवृद्ध्य इति प्रागुक्तया रजस्तमश्चाभिजयेत् । नैरपेक्ष्येण उपशमात्मकेन सत्त्वेनैव सत्वं चाभिजयेत् । ततश्च युक्तः शान्तधीश्च भवति । अतः गुणैर्मुक्तो जीवः जीवं जीवोपाधिलिङ्गं शरीरं विहाय मां संपद्यते ॥३५॥जीव इति॥ जीवः जीवेन लिङ्गशरीरेणोपाधिना निर्मुक्तः आशयश्चित्तं तत्र संभवः प्रादुर्भावो येषां तैर्गुणैः सत्वादिगुणवृत्तिभिश्च निर्मुक्तो मया ब्रह्मणा पूर्णानन्देनैव पूर्णो व्याप्तः बहिर्विषयभोगेन न चरेत्

एताः संसृतयः पुंसो गुणकर्मनिबन्धनाः ॥ येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः ॥ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥ ३२ ॥ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवम् ॥ गुणसङ्गं विनिर्धूय मां भजन्तु विचक्षणाः ॥३३॥ निःसङ्गो मां भजेद्विद्वानप्रमत्तो जितेन्द्रियः॥ ॥ ३४ ॥ रजस्तमश्चाभिजयेत्सत्त्वसंसेवया मुनिः ॥ सत्त्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शान्तधीः ॥ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय माम् ॥ ३५ ॥ जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः ॥ मयैव ब्रह्मणा पूर्णो न बहिर्नान्तरश्चरेत् ॥३६॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे पञ्चविंशोऽध्यायः ॥२५॥ श्रीभगवानुवाच ॥ मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः ॥ आनन्दं परमात्मानमात्मस्थं समुपैति माम्॥१॥ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया ॥ गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः ॥ वर्तमानोऽपि न पुमान्युज्यते वस्तुभिर्गुणैः ॥ २ ॥

आन्तरः विषयस्मरणेन च न चरेत् न विचरति । किंतु जीवन्मुक्तो भवतीत्यर्थः ॥ ३६ ॥ इति श्रीकृष्णसेवार्थमान्वितार्थप्रकाशिकाम् ॥ गङ्गासहायोऽमूं पञ्चविंशे एकादशे व्यधात् ॥२५॥ षड्विंशके दुष्टसङ्गाद्दोषाः सत्सङ्गतो गुणाः ॥ ऐलेतिहासतस्तत्र श्लोकाः सार्द्धाः शरा‍ग्नयः ॥ त्रीण्युवाचेति पादोनाः स्युः षट्‌त्रिंशदनुष्टुभः ॥२६॥ मदिति ॥ मत्स्वरूपं लक्ष्यते येन तमिमं कायं नरदेहं लब्ध्वा मद्धर्मे मदाराधने भक्तियोगे आस्थितः सन् आत्मस्थमात्मन्येव नियन्तृत्वेन स्थितमानन्दरूपं परमात्मानं मां समुपैति सम्यक् प्राप्नोति ॥१॥ नच तस्य विषयसङ्गोऽस्तीत्याह—गुणेति सार्द्धम्॥ ज्ञाननिष्ठया हेतुना गुणमयी या जीवस्य योनिः उपाधिः प्रकृतिस्तया विमुक्तः मायामात्रेषु मायाकार्येषु अतः अवस्तुतः अवस्तुत्वेन दृश्यमानेषु वर्तमानोऽपि जीवः अवस्तुभिः तैर्गुणैर्न युज्यते तत्रासक्तो न भवति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

सङ्गमिति॥शिश्नोदरे तर्पयन्तीति शिश्नोदरतृपस्तेषाम् असतां सङ्गं क्वचित्कदाचिदपि न कुर्यात् । आस्तां तेषां बहूनां सङ्गदोषकथनं किंतु तस्यैकस्याप्यनुगः अनुवर्ती सन्नन्धमनुगच्छति योऽन्धस्तद्वत्तमसि नरके पतति ॥ ३॥ ऐल इति ॥ ऐलः पुरूरवाः सम्राट् चक्रवर्त्ती बृहच्छ्रवाः विपुलकीर्त्तिः उर्वशीविरहात्प्रथमं मुह्यन् पश्चात्कुरुक्षेत्रे तां समागम्य गन्धर्वदत्तेनाग्निना देवानिष्ट्वा पुनरुर्वशीलोकं प्राप्य शोकसंयमे शोकापगमे सति ततो " निर्विण्णः सन्निमां गाथामगायत " इति नवमस्कन्धानुसारेण द्रष्टव्यम् । तङार्षः ॥ ४ ॥ त्यक्त्वेति ॥ पूर्वावस्थासमये शय्यायामात्मानं त्यक्त्वा व्रजन्तीमुर्वशीं तद्वियोगेन विक्लवः व्याकुलः अत एवोन्मत्तवन्नग्नः हे जाये हे घोरे भयंकरे तिष्ठ तिष्ठेति विलपन्नृपः पुरूरवा अन्वगात् ॥ ५ ॥ कामानिति ॥ उर्वश्या आकृष्टा चेतना विवेको यस्य सः तया सह क्षुल्लकान् तुच्छानपि कामान् जुषन् सेवमानोऽपि । शता आर्षः । अतृप्तः सः वर्षाणां यामिनीः रात्रीः यान्तीः अपयान्तीः आयान्तीः आगामिनीश्च न वेद । वर्त्तमानसामीप्यविवक्षया लट् । अतस्तद्वियोगेन व्याकुलो जातः ॥ ६ ॥ तस्य गन्धर्वलोकं

सङ्गं न कुर्यादसतां शिश्नोदरतृपां क्वचित् ॥ तस्यानुगस्तमस्यन्धे पतत्यन्धानुगाऽन्धवत् ॥ ३ ॥ ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः ॥ उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ॥ ४ ॥ त्यक्त्वात्मानं व्रजन्तीं तां नग्न उन्मत्तवन्नृपः ॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ॥ ५ ॥ कामानतृप्तोऽनुजुषन् क्षुल्लकान्वर्षयामिनीः ॥ न वेद यान्तीर्नायान्तीरुर्वश्याऽऽकृष्टचेतनः ॥ ६ ॥ ऐल उवाच ॥ अहो मे मोहविस्तारः कामकश्मलचेतसः ॥ देव्या गृहीतकण्ठस्य नायुःखण्डा इमे स्मृताः ॥ ७ ॥ नाहं वेदाभिनिर्मुक्तः सूर्यो वाऽभ्युदितोऽमुया ॥ मुषितो वर्षपूगानां बताहानि गतान्युत ॥ ८ ॥ अहो मे आत्मसंमोहो येनात्मा योषितां कृतः ॥ क्रिडामृगश्चक्रवर्त्ती नरदेवशिखामणिः ॥ ९ ॥ सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरम् ॥ यान्तीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् ॥ १० ॥

प्राप्तस्य बहुकालमुर्वशीसंयोगानन्तरं निर्विण्णस्य गाथामाह—अहो इति ॥ कामेन कश्मलं क्षुभितं चेतो यस्य तस्य मे मोहविस्तारः अहो अनिर्वचनीय इत्यर्थः । यतो देव्या उर्वश्या गृहीतकण्ठस्य स्वस्य इमे अहोरात्ररूपा आयुषः खण्डा मया न स्मृताः ॥ ७ ॥ नाहमिति ॥ बतेति खेदे । उत अपि अमुया उर्वश्या मुषितो मोहितोऽहमभिनिर्मुक्तः अस्तं गतः अभ्युदितो वा सूर्य इति न वेद । वर्तमान सामीप्ये भूते लट् । तथा वर्षपूगानां गतान्यहान्यपि न वेद । यद्वा । अभिनिर्मुक्तः सूर्यास्तकालेऽपि स्वपन् अभ्युदितः सूर्ये उदितेऽपि स्वपन्नहं सूर्यः क्वास्तीति न वेद । " सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च । अंशुमानभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमम्॥" इत्यमरः । शेषं तुल्यम् ॥ ८ ॥ अहो इति ॥ अहो महान्मे आत्मसंमोहो जातः येन मोहेन नरदेवानां शिखामणिरिव सर्वोत्तमश्चक्रवर्ती सार्वभौमोऽप्यहं योषितां क्रीडामृगः वानरः तदधीनः कृतः ॥ ९ ॥ सेति ॥ सपरिच्छदं राज्यादिसहितमीश्वरं चक्रवर्त्तिनमात्मानं मां तृणमिव त्यक्त्वा यान्तीमपि स्त्रियमहमुन्मत्तवन्नग्नो रुदन्नन्वगमम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुत इति ॥ खरो यथा पादताडितोऽपि खरीमनुगच्छति तद्वत्स्त्रिया तिरस्कृतो योऽहं तां यान्तीमन्वगच्छं तस्य ममानुभावः माहात्म्यं तेजः पराभिभवसामर्थ्यम् ईशित्वं जगत्स्वामित्वं वा कुत एव स्यात् । सर्वमेव नष्टमित्यर्थः ॥ ११ ॥ किमिति ॥ यस्य मनः स्त्रीभिर्हृतं तस्य विद्यया देवतोपासनरूपया किम् । तपसा उपवासादिक्लेशसहनेन किम् । त्यागेन दानेन किम् । श्रुतेन अध्ययनाद्यभ्यासेन वा किम् । विविक्तेन एकान्तवासेन वा किम् । मौनेन वा किं फलं स्यान्न किंचिदित्यर्थः ॥ १२ ॥ स्वार्थस्येति॥ स्वार्थस्य श्रेयसः अकोविदमज्ञातारं मां धिक् । योऽहमीश्वरतां प्राप्य गौरिव खर इव च जितः तिरस्कारपूर्वकं वशीकृतः॥ १३॥ सेवत इति ॥ यथा आहुतिभिर्वह्निर्न शाम्यति प्रत्युत वर्द्धते एवम् उर्वश्या अधरासवं सेवतः । शता आर्षः । मे ममात्मभूः मनसिजः कामो न तृप्यति न शाम्यति ॥१४॥ पुंश्चल्येति॥ आत्मारामाणामीश्वरं भगवन्तमधोक्षजम् ऋते पुंश्चल्यापहृतं चित्तं मोचितुं मोचयितुं णिलोप आर्षः । को नाम अन्यः प्रभुः समर्थो भवेत् ॥ १५ ॥ बोधितस्येति ॥ देव्या उर्वश्या पुरूरवो मा मृथा मा प्रतत्तो

कुतस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा ॥ योऽन्वगच्छत् स्त्रियं यान्तीं खरवत्पादताडितः ॥ ११ ॥ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा ॥ किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतम् ॥ १२ ॥ स्वार्थस्याकोविदं धिङ् मां मूर्खं पण्डितमानिनम् ॥ योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः ॥१३॥ सेवतो वर्षपूगान् मे उर्वश्या अधरासवम् ॥ न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा ॥१४॥ पुंश्चल्याऽपहृतं चित्तं को न्वन्यो मोचितुं प्रभुः ॥ आत्मारामेश्वरमृते भगवन्तमधोक्षजम् ॥ १५ ॥ बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः ॥ मनोगतो महामोहो नापयात्यजितात्मनः ॥१६॥ किमेतया नोऽपकृतं रज्ज्वा वासर्पचेतसः ॥ रज्जुस्वरूपाविदुषो योऽहं यदजितेन्द्रियः ॥ १७ ॥ क्वायं मलीमसः कायो दौर्गन्ध्याद्यात्मकोऽशुचिः ॥ क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः ॥ १८ ॥

"मा त्वा वृकासो अशिवासन्न उक्षन् ।" इत्यादिसूक्तवाक्येन यथार्थवचनेन बोधितस्यापि दुर्मतेः अजितात्मनः मे मनोगतः महामोहः भोग्यताबुद्धिर्नापयाति॥ १६ ॥किमेतयेति॥नः अस्माकं कामिनामेतया उर्वश्या किमपकृतं न किंचिदपीत्यर्थः । तत्र हेतुमाह।यत् यस्मात् योऽहमेवंभूतः स एवाजितेन्द्रियः अतो मोहेन तत्रासक्त इत्यर्थः । तत्र दृष्टान्तमाह यथा । रज्जुस्वरूपा विदुषो रज्जुद्रष्टुः पुंसस्तस्यां सर्पकल्पनया खिद्यमानस्यापि रज्ज्वा किमपि नापकृतं भवति तथेति॥ १ ७॥कायमिति ॥ मलीमसः अतिमलिनः दौर्गन्ध्याद्यात्मकः अतिदुर्गन्धादिमान् अशुचिः स्थानाद्बीजादुपष्टम्भान्निष्पन्दान्निधनादपि "कायमाधेयशौचत्वात्पण्डिता अशुचिं विदुः।" इत्युक्तेः । एवंभूतः स्त्रियाः कायः क्व तस्मिन् सौमनस्याद्याः सुमनसां पुष्पाणामिव गन्धशुचित्वसौकुमार्याद्या गुणाश्च क्व । अतो हि निश्चितमविद्यया स्वरूपावरकशक्त्या कृतस्तथाऽध्यास आरोप एव ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

पित्रोरिति ॥ किमयं कायः पित्रोः स्वं धनं जनकत्वात् । नु वितर्के । भार्यायाः वा भोगप्रदत्वात् । अत्रानुपयुक्तमप्येतत्तुल्यन्यायत्वादुक्तम् । स्वामिनो वाधीनत्वात् । अग्नेर्वा अन्त्येष्ट्या तदाहुतित्वात् श्वगृध्रयोर्वा भक्ष्यत्वात् । किं वा आत्मनः जीवस्य तत्कृतशुभाशुभफलभोगित्वात् सुहृदां बन्ध्वादीनां वा तदुपकारित्वात् । एवं कस्यायमिति यो नावसीयते न निश्चीयते ॥ १९ ॥ तस्मिन्निति ॥ तस्मिन् अमेध्ये तुच्छा कृमिविड्भस्मलक्षणा निष्ठा अन्तो यस्य तस्मिन् स्त्रियाः कलेवरे अहो सुभद्रं सुखकरं सुनसं शोभननासिकं सुष्ठु स्मितं यस्मिंस्तथाभूतं स्त्रिया मुखमिति मोहेन पुमान् विषज्जते ॥ २० ॥ त्वगिति ॥ त्वगादीनां सप्तधातूनां संहतौ सङ्घाते रमताम् शता आर्षः । पुरुषाणां विण्मूत्रादिसंहतौ रमतां कृमीणां च कियदन्तरं न कियानपि भेदस्तत्तुल्या एव त इत्यर्थः ॥ २१ ॥ अथेति ॥ अतो यस्मात् विषयेन्द्रियसंयोगादेव मनः क्षुभ्यति अन्यथा तु न क्षुभ्यति । अथापि तस्मात् कदापि अर्थवित् स्वहिताभिज्ञो विवेकी स्त्रीषु स्त्रैणेषु स्त्रीवश्येषु च नोपसज्जेत ॥ २२ ॥ ननु क्वचिन्निर्जने स्थितस्यापि मुनेरपि मनःक्षोभो दृश्यते इत्याशङ्क्य सोऽपि पूर्वदर्शनादिकं विना न भवतीत्याह—अदृष्टादिति ॥ अदृष्टात् अश्रुताच्च भावात् पदार्थात् भावो मनःक्षोभो नोपजायते । यतः

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः ॥ किमात्मनः किं सुहृदामिति यो नावसीयते ॥ १९ ॥ तस्मिन् कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते ॥ अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः ॥ २० ॥ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ॥ विण्मूत्रपूये रमतां कृमीणां कियदन्तरम् ॥ २१ ॥ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् ॥ विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा ॥ २२ ॥ अदृष्टादश्रुताद्भावान्न भाव उपजायते ॥ असंप्रयुञ्जतः प्राणान् शाम्यति स्तिमितं मनः ॥ २३ ॥ तस्मात्सङ्गो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेन्द्रियैः ॥ विदुषां चाप्यविश्रब्धः षड्वर्गः किमु मादृशाम् ॥ २४ ॥ श्रीभगवानुवाच ॥ एवं प्रगायन्नरदेवदेवः स उर्वशीलोकमथो विहाय ॥ आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः ॥ २५ ॥ ततो दुःसङ्गमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ॥ सन्त एतस्य छिन्दन्ति मनोव्यासङ्गमुक्तिभिः ॥ २६ ॥

प्राणान् इन्द्रियाणि विषयेषु असंप्रयुञ्जतस्ततो नियच्छतः पुंसो मनः स्तिमितं निश्चलं सत् शाम्यति ॥ २३ ॥ तस्मादिति ॥ तस्मात् स्त्रीषु स्त्रैणेषु च इन्द्रियैः सङ्गो न कर्तव्यः । पञ्चज्ञानेन्द्रियाणि एकं मनश्चेति षड्वर्गः विदुषामपि अविस्रब्धः मदधीनोऽतो नापकारं करिष्यतीति न विश्वसनीयः । मादृशामविवेकिनां न विश्वसनीय इति तु किमु वक्तव्यम् ॥२४॥ एवमिति ॥ ततश्च नृपेषु देवेषु च दीव्यतीति तथाभूतः पुरूरवा एवं प्रगायन्नुर्वशीलोकं विहाय तत्रासक्तिं त्यक्त्वा अथो आत्मन्येव आत्मानं मामवगम्य ज्ञात्वा तेन ज्ञानेन विधूतमोहो निवृत्तदेहाद्यात्मभ्रमः संसारादुपारमत् जीवन्मुक्तो बभूव ॥२५ ॥ तत इति ॥ ततो हेतोः बुद्धिमान् दुःसङ्गम् उत्सृज्य सत्सु सज्जेत सन्तः एतस्य मनोव्यासङ्गं विषयासक्तिम् उक्तिभिः हितोपदेशैः छिन्दन्ति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्त इति ॥ सन्तः अनपेक्षाविषयाभिलाषरहिताः मच्चित्ताः प्रशान्ताः कामादिरहिताः समं ब्रह्मैव सर्वं पश्यन्तीति तथा निर्ममाः सर्वत्र ममतारहिताः निरहङ्काराः देहादावहमित्यभिमानरहिताः निर्द्वन्द्वाः शीतोष्णक्षुत्पिपासादिकृतविकाररहिताः निष्परिग्रहाः सर्वविषयत्यागिनः भवन्ति ॥ २७ ॥ तेषामुक्तयो मत्कथा एवेत्याह—तेष्विति ॥ हे महाभाग तेषु महाभागेषु मत्कथाः नित्यं संभवन्ति प्रवर्तन्ते । ता हि कथाः जुषतामादरेण शृण्वतां नृणाम् । शता आर्षः । अघं पापं प्रपुनन्ति निवर्त्तयन्ति । अतस्तत्सन्निधिरेव तारयति न तूपदेशादेरप्यपेक्षा ॥२८॥ ता इति ॥ आदृता मयि आदरवन्तः अत एव मत्पराः मदाराधननिष्ठाः फलान्तरसंकल्परहिताः श्रद्दधानाः कथायां श्रद्धावन्तो ये ताः कथाः शृण्वन्ति गायन्त्यनुमोदन्ति च । तङ्भाव आर्षः । ते मयि भक्तिं विन्दन्ति ॥ २९ ॥ भक्तिमिति ॥ अनन्ता गुणाः शक्तयो यस्य तस्मिन् ब्रह्मणि सर्वकारणे आनन्दानुभवात्मनि सच्चिदानन्दविग्रहे मयि भक्तिं लब्धवतः साधोः जनस्य किमन्यत्फलमवशिष्यते स यद्यदिच्छति तत्सर्वं सुलभमेव तथापि नैवेच्छतीत्याशयः ॥ ३० ॥

सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः ॥ निर्ममा निरहंकारा निर्द्वन्द्वा निष्परिग्रहाः ॥२७॥ तेषु नित्यं महाभाग महाभागेषु मत्कथाः ॥ संभवन्ति हिता नृणां जुषतां प्रपुनन्त्यघम् ॥ २८ ॥ ता ये शृण्वन्ति गायन्ति ह्यनुमोदन्ति चादृताः ॥ मत्पराः श्रद्दधानाश्च भक्तिं विन्दन्ति ते मयि ॥ २९ ॥ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते ॥ मय्यनन्तगुणे ब्रह्मण्यानन्दानुभवात्मनि ॥ ३० ॥ यथोपश्रयमाणस्य भगवन्तं विभावसुम् ॥ शीतं भयं तमोऽप्येति साधून् संसेवतस्तथा ॥ ३१ ॥ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायनम् ॥ सन्तो ब्रह्मविदः शान्ता नौर्दृढेवाप्सु मज्जताम् ॥ ३२ ॥ अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहम् ॥ धर्मो वित्तं नृणां प्रेत्य सन्तोऽर्वाग् बिभ्यतोऽरणम् ॥३३॥ सन्तो दिशन्ति चक्षूंषि बहिरर्कः समुत्थितः ॥ देवता बान्धवाः सन्तः सन्त आत्माऽहमेव च ॥ ३४ ॥

यथेति ॥ विभावसुमग्निं सेवमानस्य यथा शीतं जाड्यं भयं तमश्च अप्येति नश्यति तथा साधून् संसेवतः । शता आर्षः । कर्मजाड्यम् आगामि संसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः ॥ ३१ ॥ निमज्ज्येति ॥ अप्सु निमज्जतां यथा दृढा नौरुत्तरणसाधनं तथा घोरे भयङ्करे भवाब्धौ निमज्ज्योन्मज्जतामुच्चावचा योनीर्गच्छतां ब्रह्मविदः शान्ताः सन्त एव परायणं परमाश्रयः ॥ ३२ ॥ अन्नमिति ॥ यथा प्राणिनामन्नमेव प्राणो जीवनम् । यथा आर्त्तानां पीडितानां शरणं पीडानिवर्तकोऽहमेव यथा च धर्म एव प्रेत्य परलोके वित्तं तथा सन्त एव अर्वाक् संसारपाताद्बिभ्यतः पुंसः अरणं रक्षका इत्यर्थः ॥ ३३ ॥ सन्त इति ॥ समुत्थितः सम्यगुदितोऽप्यर्को बहिर्विषये एकमेव चक्षुर्दिशति बाह्यमेव तमो निरस्य चक्षुषो दर्शनसामर्थ्यं संपादयति । सन्तस्तु अन्तरात्मविषये तदावरकाज्ञानं निरस्य सगुणनिर्गुणज्ञानात्मकानि चक्षूंषि दिशन्ति । अतः सन्त एव देवतास्तद्वदाराध्याः बान्धवास्तद्वत्सत्कारार्हाः सन्त एव आत्मा आत्मवत्प्रीतियोग्याः किंबहुना सन्तः अहमेव मद्दृष्ट्या सेव्या इत्यर्थः । यद्वा । सन्तः अन्तश्चक्षूंषि दिशन्ति सन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एव बहिः समुत्थितः उदितः अर्कः भजनचक्षुः प्रकाशकः ॥ ३४ ॥ वैतसेन इति ॥ सुद्युम्नभावेनोमावनं प्रविष्टस्य वीता स्त्रीभावं प्राप्ता सेना यस्य तस्य स्त्रीभावं प्राप्तस्य पुत्रो वैतसेनः पुरूरवा अप्येवमुक्तप्रकारेणोर्वश्या लोकात् स्थानादवलोकनाद्वा निःस्पृहस्ततः सत्सङ्गात् सर्वतो मुक्तसङ्ग आत्मारामश्च सन् यथेष्टमेतां महीं चचार ॥ ३५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशस्य षड्विंशे व्यधाद्दङ्गासहायकः ॥ २६ ॥ सप्तविंशे तु कृष्णार्चायोगश्चित्तप्रसादकः ॥ साङ्गः समासतः प्रोक्तस्तत्र श्लोकाः शरेषवः ॥ उवाचेति वचोद्वन्द्वं श्लोकतुल्या अनुष्टुभः ॥ २७ ॥ क्रियेति॥ हे प्रभो यस्मात् यं क्रियायोगमाश्रित्येति ल्यब्लोपे पञ्चमी । ये सात्वताः भक्ताः, सात्वतर्षभं भक्तपालकं त्वां यथा येन प्रकारेणाऽर्चन्ति तं भवदाराधनरूपं क्रियायोगं समाचक्ष्व कथय ॥ १ ॥ एतदिति ॥ भगवानिति सर्वविशेषणम् । नारदः व्यासः देवानामाचार्योऽङ्गिरसः सुतो बृहस्पतिश्चेत्यादयो मुनयो मननशीला विवेकिनो मुहुः पुनः पुनरेतत् भवदर्चनमेव नृणां निःश्रेयसकरं वदन्ति ॥ २ ॥ निःसृतमिति ॥ न केवलं मुनय एव

वैतसेनस्ततोऽप्येवमुर्वश्या लोकनिस्पृहः ॥ मुक्तसङ्गो महीमेतामात्मारामश्चचार ह ॥ ३५ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे ऐलगीतं नाम षड्विंशोऽध्यायः ॥ २६ ॥ उद्धव उवाच ॥ क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो ॥ यस्मात्त्वां ये यथार्चन्ति सात्वताः सात्वतर्षभ ॥ १ ॥ एतद्वदन्ति मुनयो मुहुर्निःश्रेयसं नृणाम् ॥ नारदो भगवान् व्यास आचार्योऽङ्गिरसः सुतः ॥ २ ॥ निःसृतं ते मुखाम्भोजाद्यदाह भगवानजः ॥ पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान् भवः ॥३॥ एतद्वै सर्ववर्णानामाश्रमाणां च संमतम् ॥ श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ॥४॥ एतत्कमलपत्राक्ष कर्मबन्धविमोचनम् ॥ भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ॥५॥ श्रीभगवानुवाच ॥ न ह्यन्तोऽनन्तपारस्य कर्मकाण्डस्य चोद्धव ॥ संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ॥ ६ ॥ वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः ॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ॥ ७॥

वदन्ति किंतु तव मुखाम्भोजात् निःसृतं त्वदुपदिष्टं यत् स्वपुत्रेभ्यो भृग्वादिभ्यो भगवान् अजः ब्रह्माऽप्याह स्म । तथा देव्यै पार्वत्यै भगवान् भवोऽप्याह स्म ॥३॥ एतदिति॥ हे मानद एतत्पूजनमेव सर्ववर्णानामाश्रमाणां स्त्रीशूद्राणां च श्रेयसां धर्मादीनामुत्तमं साधनमहं मन्ये ॥ ४ ॥ एतदिति ॥ हे कमलपत्राक्ष हे विश्वेश्वरेश्वर एतत्कर्मबन्धविमोचनं त्वदाराधनं भक्ताय सेवकाय अनुरक्ताय प्रेमवते मह्यं ब्रूहि ॥ ५ ॥ न हीति ॥ हे उद्धव नास्त्यन्तो ग्रन्थतः पारश्चानुष्ठानतो यस्य तस्य मम कर्मकाण्डस्य पूजाविधानशास्त्रस्य यतोऽन्तः इयत्ता नास्ति अतः सङ्क्षिप्तं यथा स्यात्तथा यथावदनुपूर्वशः क्रमेण वर्णयिष्यामि ॥ ६ ॥ वैदिक इति ॥ वैदिक एव मन्त्रो वैदिकान्येव च सर्वाण्यङ्गानि यस्मिन् स पुरुषसूक्तादिविधिः वैदिकः । एवं तन्त्रोक्तमन्त्रादियुक् तान्त्रिकः । मिश्रो नामोभयत्रोक्तः नारायणाष्टाक्षरादिः । त्रयाणां मध्ये ईप्सितेन स्वेष्टेनान्यतमेनैव विधिना प्रकारेण मां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्चयेत् ॥ ७ ॥ यदेति ॥ यदा त्रैवर्णिकः पुरुषस्तदा गर्भाष्टमैकादशद्वादशादिकाले स्वनिगमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वमुपनयनं प्राप्य श्रद्धया भक्त्या च यथा मां यजेत पूजयेत् तत्पूजनप्रकारं मे मत्तो निबोध शृणु ॥ ८ ॥ अर्चायामिति ॥ अर्चायां प्रतिमायां स्थण्डिले भूमौ द्रव्येण गन्धपुष्पादिना स्वस्य गुरुं पूज्यं माममायया फलाभिसन्धिलक्षणकपटत्यागेन केवलं भक्तियुक्त एवार्चेत् ॥९॥ पूर्वमिति ॥ तत्र पूर्वं धौतदन्तः सन्नङ्गशुद्धये उभयैर्वैदिकतान्त्रिकैर्मन्त्रैर्मृद्ग्रहणादिना देहे मृद्गोमयलेपनपूर्वकं स्नानं प्रकुर्वीत ॥ १० ॥ सन्ध्येति ॥ यस्य यानि सन्ध्योपासनादीनि कर्माणि वेदेन आचोदितानि साकल्येन विहितानि तैः सह सम्यक् मदाराधनविषयक एव सङ्कल्पो यस्य तथाभूतः सन् कर्मपावनीं कर्मपाशविमोचनीं मम पूजां कुर्यात् न तु कर्माणि परित्यजेत् ॥ ११ ॥ शैलीति ॥ शैली शिलामयी लौही सुवर्णादिमयी लेप्या मृच्चन्दनादिभिर्भित्तौ लिखिता लेख्या चित्ररूपा सैकती सिकतामयी हृदि पूजायां मनोमयी मनसैव चिन्तिता मणिमयी चेत्यष्टविधा प्रतिमा स्मृता ॥ १२ ॥ चलेति ॥ प्रकर्षेण तिष्ठत्यस्यामिति

यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः ॥ यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे ॥ ८ ॥ अर्चायां स्थण्डिलेऽग्नौ वा सूर्ये वाऽप्सु हृदि द्विजे ॥ द्रव्येण भक्तियुक्तोऽर्चेत् स्वगुरुं माममायया ॥ ९ ॥ पूर्वं स्नानं प्रकुर्वीत धौतदन्तोऽङ्गशुद्धये ॥ उभयैरपि च स्नानं मन्त्रैर्मृद्ग्रहणादिभिः ॥१० ॥ सन्ध्योपास्त्यादिकर्माणि वेदेनाऽऽचोदितानि मे ॥ पूजां तैः कल्पयेत् सम्यक्संकल्पः कर्मपावनीम् ॥११॥ शैली दारुमयी लौही लेप्या लेख्या च सैकती ॥ मनोमयी मणिमयी प्रतिमाऽष्टविधा स्मृता ॥ १२ ॥ चलाचलेति द्विविधा प्रतिष्ठा जीवमन्दिरम् ॥ उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने ॥ १३ ॥ अस्थिरायां विकल्पः स्यात् स्थण्डिले तु भवेद्द्वयम् ॥ स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनम् ॥ १४ ॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः ॥ भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि ॥ १५ ॥

प्रतिष्ठा प्रतिमा एव जीवस्य भगवतो मन्दिरं जीवानां मन्दिरमाश्रयोऽहमेवेत्यर्थः । सा च पुनश्चला शालग्रामादिः अचला च श्रीजगन्नाथादिरिति द्विविधा । तत्रापि हे उद्धव स्थिरायां मन्दिरे प्रतिष्ठापूर्वकं स्थापितायामर्चने उद्वासावाहने न स्तः उद्वासो विसर्जनम् ॥ १३ ॥ अस्थिरायामिति ॥ अस्थिरायां तु उद्वासावावाहनयोर्विकल्पः स्यात् । तत्रापि शालग्रामे तु नैव कुर्यात् । स्थण्डिले उपलक्षणतया सैकत्यां च तद्द्वयं भवेदेव । अन्यत्र कुर्यात् वा न कुर्यात् । अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां स्नपनं स्यात् । अन्यत्र विलेप्यायां विलेख्यायां दारुमय्यां च परिमार्जनमेव भवेत् ॥ १४ ॥ द्रव्यैरिति ॥ प्रसिद्धैः शास्त्रविहितैः यथालब्धैः देशकालवित्तानुसारेण प्राप्तैर्द्रव्यैः साधनभूतैः अमायिनः निष्कामस्य भक्तस्य संबन्धी प्रतिमादिषु मद्यागः मम पूजनं भवति । हि शब्दस्त्वर्थे । हृदि तु मद्यागो भावेन मनोमयैरेव द्रव्यैः कर्तव्य इत्यर्थः ॥१५॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अधिष्ठानभेदेन प्रधानोपचारमाह—स्नानेति सार्द्धम् ॥ हे उद्धव स्नानमलङ्करणं चार्चायामेव प्रेष्ठं योग्यम् । स्थण्डिले तु तत्त्वविन्यासो यथास्थानमङ्गप्रधानदेवतानां तत्तन्मन्त्रैः स्थापनं प्रेष्ठम् । वह्नौ तु आज्यप्लुतं हविरेव प्रेष्ठम् । सूर्ये च अभ्यर्हणमुपस्थानार्घादि प्रेष्ठम् । सलिले सलिलादिभिस्तर्पणादिना पूजनं प्रेष्ठम् ॥ १६ ॥ श्रद्धयेति सार्द्धम् ॥ भक्तेन श्रद्धया उपाहृतं वारि अपि मम प्रेष्ठम् । अभक्तोपहृतं भूरि अपि मे तोषाय न कल्पते । यदि वारिमात्रेणापि मम सन्तोषस्तदा भक्त्याऽर्पिता गन्धादयो मम सन्तोषकरा भवन्ति इति पुनः किं वक्तव्यमित्यर्थः ॥ १७ ॥ शुचिरिति ॥ प्रागेव संभृताः संभाराः पूजासाधनानि येन सः दर्भैः कल्पितम् आसनं येन सः स्नानादिना शुचिः प्राङ्मुख उदङ्मुखो वा आसन आसीनः स्थिरायामर्चायां तु संमुखः अर्चाभिमुख उपविष्टः सन्नर्चेत् ॥ १८ ॥ कृतेति ॥ अनन्तरं गुर्वादिनमस्कारपूर्वकं यथोपदेशं स्वस्मिन् कृतन्यासः कृतो मूलमन्त्रन्यासो यस्यां तां ममार्चां पाणिना आमृजेत् निर्माल्याद्यपकर्षणादिना शोधयेत् । प्रातरेव वा निर्माल्याद्यपसारणमित्यपि ज्ञेयम् । कलशं पूर्णकुम्भं

स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव ॥ स्थण्डिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः ॥ सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः ॥ १६ ॥
श्रद्धयोपाहृतं प्रेष्ठं भक्तेन मम वार्यपि ॥ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ गन्धो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः ॥ १७॥ शुचिः
संभृतसंभारः प्राग्दर्भैः कल्पितासनः ॥ आसीनः प्रागुदग् वाऽर्चेदर्चायामथ संमुखः ॥ १८ ॥ कृतन्यासः कृतन्यासां मदर्चां पाणिना मृजेत् ॥
कलशं प्रोक्षणीयं च यथावदुपसाधयेत् ॥१९॥ तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च ॥ प्रोक्ष्य पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् ॥२०॥
पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि दैशिकः ॥ हृदा शीर्ष्णाऽथ शिखया गायत्र्या चाभिमन्त्रयेत् ॥ २१ ॥ पिण्डे वाय्वग्निसंशुद्धे हृत्पद्मस्थां
परां मम ॥ अण्वीं जीवकलां ध्यायेन्नादान्ते सिद्धभाविताम् ॥ २२ ॥

प्रोक्षणीयं प्रोक्षणार्थोदकपात्रं च यथावदुपसाधयेत् चन्दनपुष्पादिभिः संस्कुर्यात् ॥ १९ ॥ तदद्भिरिति ॥ तदद्भिः प्रोक्षणीजलैः । समासान्ताभाव आर्षः । देवपूजास्थानादिकं प्रोक्ष्य पाद्याद्यर्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत् । उपलक्षणमेतत् । मधुपर्कपुनराचमनार्थं द्वे अन्ये इति पंच पात्राणि इति ज्ञेयम् । तत्र पाद्यादिद्रव्याणि । " पाद्ये श्यामाकदूर्वाब्जविष्णुक्रान्तादिरिष्यते । गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ॥ दूर्वा चेति क्रमादर्घद्रव्याष्टकमुदीरितम् । जातीलवङ्गकक्कोलैर्मतमाचमनीयकम् ॥ " मधुपर्के घृतदधिमधु पुनराचमने शुद्धं जलमिति ॥ २० ॥ पाद्येति ॥ दैशिकः पूजकः पाद्यार्घाचमनीयार्थं यानि त्रीणि पात्राणि तानि यथाक्रमं " हृदा नम इति शीर्ष्णा स्वाहेति शिखया वषट् " इति मन्त्रयेत् । ततः सर्वाणि गायत्र्या चाभिमन्त्रयेत् ॥ २१ ॥ पिण्डे इति ॥ तदनन्तरं पिण्डे देहे वाय्वग्निसंशुद्ध इति भूतशुद्ध्युक्तरीत्या कोष्ठगतेन वायुना शोषिते आधारगतेनाग्निना दग्धे पुनर्ललाटस्थचन्द्रमण्डलामृतप्लावनेनामृतमये जाते तत्तत्प्रकरणोक्तन्यासादि कृत्वा तस्मिन् शरीरे " हृत्पद्मस्थां परां श्रेष्ठां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नादान्ते सिद्धभाविताम् । " प्रणवस्याकारोकारमकारबिन्दुनादाः पञ्चांशास्तत्र नादान्ते सिद्धैर्भावितां ध्यातां जीवः कला अंशो यस्यास्ताम् अण्वीं सूक्ष्मां मम मूर्तिं ध्यायेत् ॥२२॥ तयेति ॥ तयाऽऽत्मभूतया स्वेनैव भावेन चिन्तितया मन्मूर्त्या व्याप्ते अमृतमये पिण्डे स्वदेहे दीपेन प्रभया गृह इव व्याप्ते सति तस्मिन्नेव प्रथमतो मानसैरेवोपचारैर्मां संपूज्य तन्मयः सन् अर्चादिष्वावाह्य स्थापनमुद्रया च स्थापयित्वा न्यस्तानि अङ्गानि हृदयाद्यङ्गमन्त्राः यस्मिंस्तं मां प्रपूजयेत् ॥ २३ ॥ पाद्येति युग्मम् ॥ धर्मादिभिः धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यङ्कस्याग्नेयादिचतुष्कोणेषु पादाः पूर्वादिक्रमेण मध्ये च अधर्माज्ञानावैराग्यानैश्वर्याणि गात्राणि तन्मध्ये पूर्वादिदिग्विदिक्षु क्रमेण मध्ये च " विमलोत्कर्षणी ज्ञाना क्रिया योगा प्रह्वी सत्येशानानुग्रहा" इति नव शक्तयः त्रयो गुणाः पट्टिकाः । एवं यथोपदेशं धर्मादिभिर्नवभिर्विमलादिभिः शक्तिभिश्चासनं कल्पयित्वे- त्यर्थः । तत्र च कर्णिकायां केसरैस्तत्रस्थसूर्यादिमण्डलैश्चोज्ज्वलमष्टदलं पद्मं च कल्पयित्वा तत्र च मां संस्थाप्य उभयसिद्धये वेदतन्त्रोक्तभुक्तिमुक्तिफलसिद्धये उभाभ्यां

तयाऽऽत्मभूतया पिण्डे व्याप्ते संपूज्य तन्मयः॥ आवाह्यार्चादिषु स्थाप्य न्यस्ताङ्गं मां प्रपूजयेत् ॥२३॥ पाद्योपस्पर्शार्हणादीनुपचारान् प्रकल्पयेत् ॥ धर्मादिभिश्च नवभिः कल्पयित्वाऽऽसनं मम ॥ २४ ॥ पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलम् ॥ उभाभ्यां वेदतन्त्राभ्यां मह्यं तूभयसिद्धये ॥ २५ ॥ सुदर्शनं पाञ्चजन्यं गदासीषुधनुर्हलान् ॥ मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् ॥ २६ ॥ नन्दं सुनन्दं गरुडं प्रचण्डं चण्डमेव च ॥ महाबलं बलं चैव कुमुदं कुमुदेक्षणम् ॥२७॥ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान् ॥ स्वे स्वे स्थाने त्वभिमुखान् पूजयेत्प्रोक्षणादिभिः ॥२८॥ चन्दनोशीरकर्पूरकुङ्कुमागुरुवासितैः ॥ सलिलैः स्नापयेन्मन्त्रैर्नित्यदा विभवे सति ॥२९॥ स्वर्णघर्मानुवाकेन महापुरुषविद्यया ॥ पौरुषेणापि सूक्तेन सामनीराजनादिभिः ॥ ३० ॥

वेदतन्त्रोक्तप्रकाराभ्यां मह्यं पाद्यादीनुपचारान् प्रकल्पयेत् समर्पयेदिति । तत्र उपस्पर्शः आचमनम् । अर्हणमर्घ्यम् ॥ २४ ॥ २५ ॥ सुदर्शनमिति ॥ तत्र न्यस्ताङ्गमित्यङ्गावरणपूजा सूचिता । आसनेनैव शक्त्यावरणमप्युक्तम् । ततः सुदर्शनादिमुसलान्तान्यायुधान्यष्टदिक्षु तथा कौस्तुभमालाश्रीवत्सानुरसि च पूजयेत् ॥ २६ ॥ नन्दमिति ॥ नन्दादीन् पार्षदानष्टदिक्षु गरुडं च पुरतः पूजयेत् ॥ २७ ॥ दुर्गामिति ॥ दुर्गादींश्चतुरश्चतुष्कोणेषु गुरून् वामतः सुरान् इन्द्रादिलोकपालान् पूर्वादिदिक्षु एवं स्वे स्वे स्थाने स्थितानेतान् देवस्याभिमुखान् प्रोक्षणादिभिः पूजयेत् ॥ २८ ॥ पाद्यादीनुपचारान् प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपञ्चयति—चन्दनेति ॥ विभवे सति चन्दनादिभिर्यथासंभवैर्वासितैरन्यथा शुद्धैरेव सलिलैः मन्त्रैर्मन्त्रपूर्वकं मां नित्यदा स्नापयेत् ॥ २९ ॥ स्वर्णेति ॥ स्वर्णघर्मानुवाकः " सुवर्णं घर्मं परिवेदनेन " इत्यादिमहापुरुषविद्या । जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । सुब्रह्मण्य नमस्तेऽस्तु महापुरुषपूर्वज ॥" इति पौरुषं सूक्तम् । सहस्रशीर्षेत्यादिनीराजनादीनि सामानि " इन्द्रं न रोनेमधिताहवन्त "

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यस्यामृचि गीतानि । आदिशब्देन रौहिण्यादीनि एतैः स्नापयेदिति पूर्वेणान्वयः ॥ ३० ॥ वस्त्रेति ॥ मद्भक्तः सप्रेम यथा भवति तथा वस्त्रादिभिर्यथोचितं मामलंकुर्वीत । पत्राणि कपोलवक्षस्थलादिषु लिखिताः पत्रभङ्गयः । यद्वा । पत्रस्रक् तुलसीपत्रमालेत्येकमेव पदम् ॥ ३१ ॥ पाद्यमिति ॥ अर्चकः पाद्यादीनि मे मह्यं श्रद्धया दद्यात् समर्पयेत् । तत्र सुमनसः पुष्पाणि अक्षतान् तिलके पूजने तन्निषेधात् । उपहार्यं नैवेद्यम् ॥ ३२ ॥ गुडेति ॥ सति विभवे इति शेषः । विभवे सति गुडादीनि सूपान्तानि नैवेद्यं कल्पयेत् । वैभवाभावे तु न नित्यदा किंतु पर्वणि तत्रापि यथासंभवमिति ज्ञेयम् । गुडो गुडविकाराः खण्डसितादयः पायसं दुग्धे पक्वतण्डुलादि शष्कुल्यः तैलपक्वविशेषाः कर्णाकाराः घृतपक्वा गुञ्जा इति ख्याता इत्येके । आपूपाः अपूपानां मण्डकादीनां समूहा संयावा दुग्धे पक्वगोधूमकणविशेषाः सूपाः व्यञ्जनानि ॥ ३३ ॥ अभ्यङ्गेति ॥ विभवे सति अभ्यङ्गादीनि अन्वहं प्रतिदिनं स्युः कर्त्तव्यानि तदभावे एकादश्यादौ पर्वणि यथासंभवं कार्याणीत्यर्थः । तत्र प्रथमं दन्तधावनम् । ततः सुगन्धितैलेनाभ्यङ्गः ।

वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः ॥ अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितम् ॥ ३१ ॥ पाद्यमाचमनीयं च गन्धं सुमनसोऽक्षतान् ॥ धूपदीपोपहार्याणि दद्यान्मे श्रद्धयाऽर्चकः ॥ ३२ ॥ गुडपायससर्पींषि शष्कुल्यापूपमोदकान् ॥ संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत् ॥ ३३ ॥ अभ्यङ्गोन्मर्दनादर्शदन्तधावाभिषेचनम् ॥ अन्नाद्यं गीतनृत्यानि पर्वणि स्युरुतान्वहम् ॥३४॥ विधिना विहिते कुण्डे मेखलागर्तवेदिभिः॥ अग्निमाधाय परितः समूहेत् पाणिनोदितम् ॥ ३५ ॥ परिस्तीर्याथ पर्युक्षेदन्वाधाय यथाविधि ॥ प्रोक्षण्याऽऽसाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत माम् ॥ ३६ ॥ तप्तजाम्बूनदप्रख्यं शङ्खचक्रगदाम्बुजैः ॥ लसच्चतुर्भुजं शान्तं पद्मकिञ्जल्कवाससम् ॥ ३७ ॥

ततः कुङ्कुमकर्पूरचूर्णादिभिरुद्वर्त्तनम् । ततः पञ्चामृताद्यैः सुगन्धिजलेन चाभिषेचनम् । ततोऽत्रानुक्तमपि अनर्घकौशेयवस्त्ररत्नालङ्कारचन्दनाद्यालेपस्रगादिकम् । तत आदर्शो दर्पणः । ततो धूपदीपाचमनीयानि देयानि । अन्नाद्येति । चतुर्विधस्वाद्वन्नसुगन्धजलताम्बूलमालारात्रिकपुष्पशय्याव्यजनादिकम् । ततो वाद्यगीतनृत्यानि इति ॥ ३४ ॥ फलभूयस्त्वार्थिनोऽग्नावपि पूजाप्रकारमाह—विधिनेति ॥ अयं च प्रकारः पूजामध्य एव नैवेद्यान्ते तन्त्रशास्त्रेषु लिखितः अतः सति सामर्थ्ये पूजायामेव कुर्यात् । अशक्तौ पर्वादिषु पूजामध्ये पृथग्वा कुर्यात् । विधिना स्वगृह्योक्तप्रकारेण मेखलादिभिरुपलक्षितैर्विहिते निर्मिते कुण्डे अग्निमाधाय तमुदितं प्रज्वालितमग्निं परितः पाणिना समूहेत् एकत्र मेलयेत् । कुण्डादिप्रकारोऽन्यत्र ज्ञेयः ॥ ३५ ॥ परीति ॥ अथ पुनर्दर्भैः तं परिस्तीर्य पर्युक्षेत् सर्वतः प्रोक्षयेत् । ततो यथाविधि अन्वाधाय अन्वाधानसंज्ञकं व्याहृतिभिः समित्प्रक्षेपादिरूपं कर्म कृत्वा अग्नेरुत्तरतो द्रव्याणि होमोपयोगीन्यासाद्य निधाय प्रोक्षण्या प्रोक्षणीपात्रोदकेन प्रोक्ष्याग्नौ मां भावयेत ध्यायेत् ॥३६॥ तप्तेति ॥ तप्तसुवर्णतुल्यमतितेजस्विनं शङ्खादिभिरुल्लसन्तः शोभमानाश्चत्वारो भुजा यस्य तं शान्तं मनोज्ञरूपं न तूग्रम् । पद्मस्य किञ्जल्काः केसरास्तद्वद्वासो यस्य तं भावयेतेत्यनुषङ्गः॥ ३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फुरदिति ॥ स्फुरन्ति किरीटादीनि यस्य तं श्रीवत्सो वक्षसि यस्य तं भ्राजत् कौस्तुभो यस्य तं वनमालिनं च भावयेतेत्यनुषङ्गः ॥ ३८ ॥ ध्यायन्निति युग्मम् ॥ एवंभूतं मां ध्यायन्नभ्यर्च्य हविषा घृतेन अभिघृतानि संसिक्तानि । " घृ सेचने " क्तः । दारूणि शुष्कसमिधः प्रास्य तत्र प्रक्षिप्य आघारौ तत्संज्ञकौ भागौ । " प्रजापतये स्वाहा इन्द्राय स्वाहा " इति चोत्तरदक्षिणपरिधिसन्धिमारभ्याग्निमध्यादापरिध्यन्तं घृतक्षरणरूपौ तथा आज्यभागौ " अग्नये स्वाहा सोमाय स्वाहा " इत्येवं होमरूपौ च दत्त्वा कृत्वा आज्येन घृतेन प्लुतं हविः मूलमन्त्रेण " ॐ नमो नारायणाय स्वाहा " इत्यनेन तथा षोडश ऋचो यस्मिंस्तेन पुरुषसूक्तेनाराधनपक्षे स एव मूलमन्त्रस्तेनैव प्रत्यृचमवदानतो हविर्ग्रहणेन होम इति ज्ञेयम् । तथा मन्त्रैः स्वाहान्तैर्नाममन्त्रैर्यथान्यायं पूजाक्रमेणैव धर्मादिभ्यः । आदिपदेन विमलादिभ्यश्च जुहुयात् । ततश्च बुधः । " अग्नये स्विष्टकृते स्वाहा " इत्येवं स्विष्टकृतं जुहुयात् ॥३९॥४०॥ अभ्यर्च्येति ॥ ततोऽग्निस्थं भगवन्तमन्तर्यामिणं पुष्पधूपादिभिरभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो नन्दादिभ्योऽष्टसु

स्फुरत्किरीटकटककटिसूत्रवराङ्गदम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥ ३८ ॥ ध्यायन्नभ्यर्च्य दारूणि हविषाऽभिघृतानि च ॥ प्रास्याऽऽज्यभागावाऽऽघारौ दत्त्वा चाज्यप्लुतं हविः ॥३९॥ जुहुयान्मूलमन्त्रेण षोडशर्चावदानतः॥ धर्मादिभ्यो यथान्यायं मन्त्रैः स्विष्टकृतं बुधः ॥ ४० ॥ अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् ॥ मूलमन्त्रं जपेद्ब्रह्म स्मरन्नारायणात्मकम् ॥ ४१ ॥ दत्त्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत् ॥ मुखवासं सुरभिमत्ताम्बूलाद्यमथार्हयेत् ॥ ४२ ॥ उपगायन् गृणन् नृत्यन्कर्माण्यभिनयन् मम ॥ मत्कथाः श्रावयन् शृण्वन् मुहूर्तं क्षणिको भवेत् ॥ ४३ ॥ स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि ॥ स्तुत्वा प्रसीद भगवन्निति वन्देत दण्डवत् ॥ ४४ ॥ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परम् ॥ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥ ४५ ॥

दिक्षु बलिं हरेत् ततः पूजास्थानमागत्य देवस्याग्रे समुपविश्य नारायणरूपं परं ब्रह्म ध्यायन् यथाशक्ति मूलमन्त्रं जपेत् ॥४१॥ दत्त्वेति ॥ ततोऽग्नौ बहिश्च भगवतो भोजनसमाप्तिं ध्यात्वा आचमनं दत्त्वा नैवेद्यशेषं विष्वक्सेनाय पार्षदमुख्याय समर्पयेत् तदनुज्ञां ध्यात्वा पूजासमाप्त्यनन्तरं शेषं स्वयमद्यादित्यर्थाज्ज्ञेयम् । ततः सुरभिमत्सुगन्धवत् ताम्बूलाद्यं मुखावासं दत्त्वाऽथ पुनरप्यर्हयेत् पुष्पाञ्जलिना पूजयेत् ॥ ४२ ॥ उपगायन्निति ॥ ततः मम कर्माणि उपगायन् गृणन् अभिनयन् स्वस्मिन्नाविष्कुर्वन् मत्कथाः श्रावयन् शृण्वन् मुहूर्त्तं क्षणिको वैयग्र्यं परित्यज्य लब्धावसरो भवेत् । यद्वा । क्षणः उत्सवस्तेन दीव्यतीति क्षणिकः उत्सवमग्नो भवेदित्यर्थः ॥ ४३ ॥ स्तवैरिति ॥ उच्चावचैः बृहद्भिर्लघुभिर्वा स्तवैः स्तवसंज्ञैः पौराणैरार्षैर्वेदपुराणाद्युक्तैः तथा स्तोत्रैः स्तोत्रसंज्ञैः प्राकृतैरनार्षैरपि स्तुत्वा " हे भगवन् प्रसीद " इति वदन् दण्डवत् वन्देत ॥४४॥ दण्डवद्वन्दने प्रकारमाह—शिर इति ॥ बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम दक्षिणोत्तरौ पादौ गृहीत्वा । यद्वा । पृष्ठतः परस्परं निबद्धाभ्यां कृतापराध इव शिरो मत्पादयोः कृत्वा।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यद्वा । "अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे । जपहोमनमस्कारान्न कुर्यात्केशवालये ।" इत्यग्रपृष्ठादौ निषेधात् । मत्पादयोर्दक्षिणपार्श्वे किंचिद्दूरे शिरः कृत्वा बाहुभ्यां च परस्परं सम्मुखीभूततर्कमुद्राभ्यां सहितं यथा स्यात्तथा हे ईश मृत्युरेव ग्रहो ग्राहो यस्मिंस्तस्मात्संसारार्णवाद्भीतम् अत एव प्रपन्नं शरणमागतं मां पाहि इति विज्ञप्त्या च प्रणमेत् ॥ ४५ ॥ इतीति ॥ इति प्रार्थयमानः शेषां निर्माल्यं मया दत्तां ध्यात्वा शिरस्याधाय धृत्वाऽर्चेत् । यदि मद्रूपमुद्वास्यमुद्वासयेत् तर्हि प्रतिमायां यन्न्यस्तं ज्योतिस्तत्पुनरपि हृत्पद्मस्थज्योतिष्येवोद्वासनीयम् ॥ ४६ ॥ अर्चेति ॥ अर्चादिषु यदा यत्र श्रद्धा तदा तत्र मामर्चयेत् । न त्वधिष्ठाने मुख्यामुख्यत्वमस्ति । यतः सर्वेषामात्माऽहं सर्वभूतेषु आत्मनि च अवस्थित एवास्मि ॥ ४७ ॥ एवमिति ॥ एवं वैदिकतान्त्रिकैः क्रियायोगपथैः पूजामार्गैर्मामर्चयन् पुमान् उभयतः इहामुत्र चाभीप्सितां सिद्धिमिष्टं फलं मत्तो विन्दति ॥४८॥ समर्थं प्रत्याह—मदर्चामिति ॥ प्रथमं दृढं मन्दिरं कारयेत् । तत्र च मदर्चां मत्प्रतिमां संप्रतिष्ठाप्य रम्याणि पुष्पोद्यानानि च कारयेत् । पूजायात्रो-

इति शेषां मया दत्तां शिरस्याधाय सत्वरम् ॥ उद्वासयेच्चेदुद्वास्यं ज्योतिज्योंतिषि तत् पुनः ॥ ४६ ॥ अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत् ॥ सर्वभूतेष्वात्मनि च सर्वात्माऽहमवस्थितः ॥ ४७ ॥ एवं क्रियायोगपथैः पुमान् वैदिकतान्त्रिकैः ॥ अर्चन्नुभयतः सिद्धिं मत्तो विन्दत्यभीप्सिताम् ॥ ४८ ॥ मदर्चां संप्रतिष्ठाप्य मन्दिरं कारयेत् दृढम् ॥ पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाऽऽश्रितान् ॥ ४९ ॥ पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहम् ॥ क्षेत्रापणपुरग्रामान् दत्त्वा मत्सार्ष्टितामियात् ॥ ५० ॥ प्रतिष्ठया सार्वभौमं दानेन भुवनत्रयम् ॥ पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥ ५१ ॥ मामेव नैरपेक्ष्येण भक्तियोगेन विन्दति ॥ भक्तियोगं स लभते एवं यः पूजयेत माम् ॥ ५२ ॥ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः ॥ वृत्तिं स जायते विड्भुग् वर्षाणामयुतायुतम् ॥ ५३ ॥

त्सवाऽश्रितान् पूजा प्रत्यहम् यात्रा विशिष्टे पर्वणि बहुजनसमागमः उत्सवो वसन्तादिमहोत्सवस्तदाश्रितान् साधनभूतान् क्षेत्रादीनग्रिमश्लोकोक्तान् दद्यादिति शेषः । यद्वा । पूजायात्रोत्सवाश्रितान् भूषणशिविकादींश्च कारयेत् इति शेषः ॥ ४९ ॥ पूजेति ॥ अन्वहं नित्यं तथा महापर्वसु पूजादीनां पूजायात्रोत्सवादीनां प्रवाहार्थं संततानुवृत्त्यर्थं क्षेत्रापणादीन् दत्त्वा मत्सार्ष्टितां मत्समानैश्वर्यमियात् प्राप्नुयात् ॥ ५० ॥ प्रतिष्ठयेति ॥ प्रतिष्ठया सार्वभौमं सर्वभूमिपतित्वम् इयात् । सद्मना मन्दिरनिर्माणमात्रेण भुवनत्रयपतित्वम् इयात् । केवलं पूजादिना तु ब्रह्मलोकं प्रतिष्ठादिभिस्त्रिभिस्तु मया साम्यमियात् । समशब्दात् स्वार्थे ष्यञ् ततस्तल् ॥ ५१ ॥ मामिति ॥ यस्तु नैरपेक्ष्येण फलाभिसन्धिविरहेण मामेवं पूजयेत् स भक्तियोगं लभते । तेन भक्तियोगेन च मामेव विन्दति प्राप्नोति ॥ ५२ ॥ य इति ॥ यः स्वदत्तां परैर्वा दत्तां सुरविप्रयोर्वृत्तिं हरेत स वर्षाणामयुतायुतपर्यन्तं विड्भुक् विष्ठाभोजी कृमिर्जायते ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तुरिति ॥ कर्त्तुः प्रयोज्यस्य सारथेः सहकारिणः हेतोः प्रयोजकस्य अनुमोदितुरनुमन्तुश्च प्रेत्य तत्फलं भवति । यतः एते कर्मणां भागिनः फलभागार्हाः । तत्रापि भूयसि कर्मणि सारथ्यादौ च भूयः अधिकं फलं भवतीति । यद्वा । कर्मणां भागिनः भागार्हस्येति हेतुगर्भं कर्तुरित्यादेर्विशेषणम् । तान्त्रिकादिपूजाप्रकाराः पर्यङ्के द्रष्टव्याः ॥५४॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशे सप्तविंशे व्यधात् गङ्गासहायकः ॥२७॥ अष्टविंशे तु पूर्वोक्तो ज्ञानयोगः समासतः ॥ पुनर्निरूपितः श्लोकास्तत्र सार्द्धाः ४४॥ कृतोऽध्ययः ॥ उवाचत्रयमङ्घ्र्याढ्या द्वापञ्चाशदनुष्टुभः ॥२८॥ अतिविस्तरेणोक्तं ज्ञानयोगं संक्षेपेण वक्तुमाह–परेति ॥ परेषां स्वभावान् शान्तघोरादीन् तत्प्रयुक्तानि कर्माणि च न प्रशंसेत् न च गर्हयेत् निन्देत् । किंतु प्रकृत्या पुरुषेण च जातं विश्वमेकात्मकं पश्यन् भवेत् पश्येत् ॥ १ ॥ परेति ॥ यः परस्वभावकर्माणि प्रशंसति निन्दति वासः असति मिथ्याभूते द्वैतेऽभिनिवेशतः अहंममात्मकात् हेतोः स्वार्थात् ज्ञाननिष्ठालक्षणात् आशु भ्रश्यति ॥ २ ॥ तैजस इति ॥ तैजसे राजसाहंकारकार्ये इन्द्रियगणे निद्रया आपन्ने अभिभूते सति पिण्डस्थः देहस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति । ततो मनस्यपि लीने सति नष्टचेतनः सन् मृत्युं वा । वाशब्द

कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च ॥ कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलम् ॥५४॥ इति श्री॰ एकादशस्कन्धे सप्तविंशोऽध्यायः ॥२७॥ श्रीभगवानुवाच ॥ परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् ॥ विश्वमेकात्मकं पश्यन्प्रकृत्या पुरुषेण च ॥ १ ॥ परस्वभावकर्माणि यः प्रशंसति निन्दति ॥ स आशु भ्रश्यति स्वार्थादसत्यभिनिवेशतः ॥२॥ तैजसे निद्रयापन्ने पिण्डस्थो नष्टचेतनः ॥ मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान् ॥ ३ ॥ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् ॥ वाचोदितं तदनृतं मनसा ध्यातमेव च ॥ ४ ॥ छायाप्रत्याह्वयाभासा ह्यसन्तोऽप्यर्थकारिणः ॥ एवं देहादयो भावा यच्छन्त्यामृत्युतो भयम् ॥ ५ ॥

इवशब्दार्थः । मृत्युतुल्यां सुषुप्तिं प्राप्नोति यथैतत् तद्वदेव नानार्थदृक् द्वैताभिनिवेशी पुमान् विक्षेपं लयं च प्राप्नोति । तत्र कदाचित्सुषुप्तिवन्महापदं गतो मोहेन तदनुसन्धानशून्य एव भवति न त्वात्मानं जानातीति । यथा प्राज्ञसम्पर्काद् विश्वस्य भोगक्षयलक्षणो भ्रंशः एवमनात्मसंपर्कादात्मनोऽपि स्वरूपभ्रंशः इत्याशयः ॥ ३ ॥ किमिति ॥ अवस्तुनः द्वैतस्य मध्ये किं भद्रं स्तुतियोग्यं किं वा अभद्रं निन्दायोग्यम् । वाचेति । बाह्येन्द्रियोपलक्षणं वाचा उदितम् उक्तं चक्षुरादिभिर्गृहीतं मनसा ध्यातं च यत्कियदपि वस्तु तत्सर्वमात्मव्यतिरेकतोऽनृतमसत्यमेवेत्यर्थः ॥४॥ नन्वेवं देहादीनामप्यसत्वात्कथं भयहेतुत्वं तत्राह–छायेति ॥ छाया मुखादिप्रतिबिम्बं प्रत्याह्वयः प्रतिध्वनिः आभासः शुक्तिरजतादिः । एते हि यथा असन्तोऽप्यर्थकारिणो भवन्ति । एवं देहादयोऽपि पदार्थाः आमृत्युतः मृत्युपर्यन्तम् । यद्वा । मृत्युः लयः यावन्नैव लीयन्ते तावत्पर्यन्तं संसारभयं यच्छन्ति ॥ ५ ॥

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

ननु सृष्ट्यादिश्रुतिभिरेव द्वैतं निरूपितं कथमसत्त्वं तत्राह—आत्मैवेति ॥ तत्तस्मात् श्रौताद्विचारात् इदं सर्वं विश्वं परमात्मैव यतः प्रभुः सर्वभवनयोग्यः ईश्वरः सर्वकरणसमर्थश्चातःस एव सृजति सृज्यते च त्रायते पाल्यते त्राति पालयति । बाहुलकाददादिभिन्नेऽपि शपो लुक् आत्वम्। संह्रियते संहरति च परमेश्वरस्यैव कर्तृत्वं कर्मत्वं चेति तस्मात् हेतोः अन्यस्मात् सृज्यादिभिन्नादात्मनः सकाशादन्यो भावः पदार्थो वेदेन निरूपितो नास्ति ॥६॥ निरूपितेति ॥ जीवात्मनि इयं त्रिविधा अध्यात्मिकादिरूपा भातिः प्रतीतिः निर्मूला भ्रान्तिरूपेति विवेकिभिर्निरूपिता । अत इदं त्रिविधमपि यतो गुणमयं सत्त्वादिगुणकार्यम् । अतः मायया कृतं विद्धि॥७॥एतदिति ॥ अतो य एतत् मदुदितं मयोक्तं ज्ञानविज्ञानयोर्नैपुणं निष्ठां विद्वान् जानाति स च परस्वभावकर्माणि न निन्दति न च स्तौति । किन्तु सूर्यवत्समो भूत्वा लोके विचरति॥८॥ निष्ठाप्राप्त्युपायमाह—प्रत्यक्षेणेति॥ प्रत्यक्षादिभिः प्रमाणैरेतद्विश्वमाद्यन्तवत् उत्पात्तीविनाशवत् आत्मव्यतिरेकेणासच्च ज्ञात्वा तत्र निःसङ्गः आसक्तिरहित एवेह संसारे विचरेत् । तत्र प्रत्यक्षेण घटादीनामाद्यन्तवत्त्वम् अनुमानेन पृथिव्यादीनां यथा पृथिव्यादि आद्यन्तवत् दृश्यत्वात् घटवत् इत्यादिना निगमेन श्रुत्या आकाशादनामप्रत्यक्षाणां " तस्माद्वा एतस्मादात्मन आकाशः

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥६॥ निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतम् ॥ ७ ॥ एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणम् ॥ न निन्दति न च स्तौति लोके चरति सूर्यवत् ॥ ८ ॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ॥ आद्यन्तवदसद् ज्ञात्वा निःसङ्गो विचरेदिह ॥ ९ ॥ उद्धव उवाच ॥ नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते ॥१०॥ आत्माऽव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः ॥ अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ॥ ११ ॥ श्रीभगवानुवाच ॥ यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् ॥ संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः ॥ १२ ॥

संभूतः " इत्यादिना तथाऽऽत्मसंविदा। स्वानुभवेनापि सर्वं दृश्यमाद्यन्तवद् ज्ञेयम् । एवं प्रत्यक्षादिभिः सर्वदृश्यस्यासत्त्वमपि ज्ञेयम् ॥ ९ ॥ नेति ॥ द्रष्टृदृश्ययोरिति हेतुगर्भे क्रमादात्मानात्मनोर्विशेषणे । तथा च हे ईश संसृतिःसुखदुःखाद्यनुभवरूपा आत्मनो नैव संभवति तस्य द्रष्टृत्वेन स्वप्रकाशत्वात् । तद्धेतुकर्मसु प्रवृत्त्यसंभवात् नापि देहस्य सा संभवति । तस्यानात्मत्वेन जडत्वात् । एवं द्वयोर्मध्ये कस्य स्यात् कस्यापि न संभवति तथाऽप्युपलभ्यतेऽतः कथं सेति वद ॥ १० ॥ तदेव स्फुटयति—आत्मेति ॥ आत्मा तु अव्ययः अगुणः शुद्धः कर्मकृतमालिन्यरहितः अग्निवत्स्वयंज्योतिः यतः अनावृतः अविद्याकृतावरणरहितः अव्ययत्वादिभिर्विशेषणैः नाशादिरागादिपुण्यापुण्याज्ञानपरिच्छेदानामसंभवं दर्शयति तथा देहस्तु दारुवत् अचित् जडः । अयं भावः । यथाऽग्निदारुणोर्भेदेनानुपलम्भेऽपि दारुप्रकाश्यमग्निः प्रकाशकः तथा देहात्मनोरपि । अतः इह द्वयोर्मध्ये कस्य संसृतिः । अन्यतरस्यापि सा न घटत इत्यर्थः ॥ ११ ॥ उभयोरविवेक एव संसारालम्बनमित्याह—यावदिति ॥ अविवेकिनः आत्मनो यावद्देहादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिः सह संनिकर्षणं संबन्धस्तावत् सुखदुःखादिसंसारः अपार्थोऽपि आत्मन्यविद्यमानोऽपि फलवान् स्फुरत्येवेत्यर्थः ॥ १२ ॥ अर्थे इति ॥ अर्थे देवमनुष्याद्याकारे आत्मन्यविद्यमानेऽपि स्थूलोऽहं कृशोऽहं मनुष्योऽहमेते ममानुकूला एते प्रतिकूला एवं विषयान् ध्यायतोऽस्य जीवस्य सुखदुःखादिसंसृतिर्नैव निवर्त्तते। यथा स्वप्ने वस्तुतः शरीरादावविद्यमानेऽपि शिरश्छेदाद्यनर्थागमो भवति तथेति॥ १३ ॥ यथा हीति ॥ यथा हि अप्रतिबुद्धस्य स्वप्नान् पश्यत एव पुरुषस्य प्रस्वापः स्वप्नदृष्टपदार्थः बहून् शिरश्छेदाद्यनर्थान् बिभर्ति पुष्णाति। स एव प्रतिबुद्धस्य तत उत्थितस्य मोहाय नैव भवति तथा अज्ञस्यानर्थहेतुरपि ज्ञानिनस्तथा न भवतीत्यर्थः ॥ १४ ॥ शोकेति ॥ शोकहर्षादयो जन्ममृत्यू च अहंकारस्यैव दृश्यन्ते। आत्मनस्तु न दृश्यन्ते सुषुप्त्यादौ तेषामदर्शनात्। अहं शोकादिमानितिवच्चैतन्यं तथेति प्रतीत्यभावाच्च शोकादीनां कृशत्वादिवत् द्रष्टृधर्मत्वानुपपत्तेरिति भावः ॥ १५ ॥ नन्वेवं मुक्तिरप्यहङ्कारस्यैव स्यात् ततो मुक्तावहङ्कारावशेषः प्रसज्येत, तत्राह–देहेति ॥ देहेन्द्रियप्राणमनस्सु अभिमानो यस्य सः आत्मैव तेषामन्तर्हितो जीवः अत एव गुणकर्ममयी मूर्तिर्यस्य स एव सूक्ष्मोपाधिभिः सूत्रादिशब्दैर्बहुधेव गीतः कालतन्त्रः कलयतीति कालः परमेश्वरस्तदधीनः संसारे

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ १३ ॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥ १४ ॥ शोकहर्षभयक्रोधलोभमोहस्पृहादयः ॥ अहंकारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः ॥ १५ ॥ देहेन्द्रियप्राणमनोभिमानो जीवोऽन्तरात्मा गुणकर्ममूर्तिः ॥ सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतन्त्रः ॥ १६ ॥ अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ॥ ज्ञानासिनोपासनया शितेन च्छित्त्वा मुनिर्गां विचरत्यतृष्णः ॥ १७॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानम् ॥ आद्यन्तयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ १८ ॥

आ सर्वतो धावति। अतस्तस्यैव मोक्षोऽपि युक्त इत्याशयः ॥१६॥ अमूलमिति ॥ वस्तुतो मूलशून्यमेव अविद्यया बहुभिर्देवमनुष्यादिरूपैः रूपितं प्रकाशितम् ऐन्द्रजालिकतुल्यम्। तदेव मनआदि कर्मान्तम्। यद्वा। मनआदिषु क्रियत इति मनआदि कर्म मनआदिभिः सम्बद्धमेतत्। अहङ्करणं गुर्वीश्वरोपासनया शितेन ज्ञानखड्गेन च्छित्त्वा मुनिर्मननशीलः अत एव अतृष्णः विषयाभिलाषरहितो गां भूमिं विचरति ॥१७॥ ज्ञानमेवाह–ज्ञानमिति॥ विवेकः अपरोक्षात्मसाक्षात्कारः निगमः उपनिषदादिश्रवणम्। तपः स्वधर्म इति टीकाकाराः। यद्वा। तप आलोचनं मननाख्यम्। तदुपकारकाणि प्रत्यक्षादीनि। तत्र प्रत्यक्षं स्वानुभवः। ऐतिह्यं ज्ञानवतामुपदेशः। अनुमानं तर्कः। एतत्सर्वं ज्ञानमित्यन्वयः। अत्र विवेकः। उपेयरूपं ज्ञानं निगमादीनि साधनानि। करणल्युटा तेष्वपि ज्ञानशब्दप्रयोगः। यथा गीतासु "अमानित्वमदम्भित्वम्" इत्युपक्रम्य "तत्वज्ञानार्थदर्शनम्" इत्यन्तमुक्त्वा "एतज्ज्ञानमिति प्रोक्तम्" इति। तेषां ज्ञानशब्दवाच्यत्वमुक्तम्। यद्वा। निगमः श्रवणम्। तपो निदिध्यासनम्। प्रत्यक्षादित्रिकेण मननमुक्तम्।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तथा चैव श्रवणमनननिदिध्यासनान्युक्तानि यत्तु निगमादिसाधनैर्जायते यो विवेकस्तज्ज्ञानमिति वैयधिकरण्येन स्वामिपादा व्याचख्युस्तत्तु अभिप्रायकथनम्। न त्वन्वयाभिप्रायेण । अथ निगमादिमननान्तैः सिद्धमर्थमाह । आद्यन्तयोरित्यादिना । ब्रह्मेन्द्रियार्थात्मविकारचित्रमित्यन्तेन यदस्य जगतोराद्यन्तयोरस्ति तदेवात्मतत्त्वं केवलं मध्येऽपि परमार्थभूतम्। नतु जगदिति । तथा कलयति प्रकाशयतीति कालः प्रकाशकः हेतुश्च कारणं च तदेव न ततः पृथक् एतदुक्तं भवति ।"यदस्य विश्वस्य कारणं प्रकाशकं च ब्रह्म तदात्मकमेवैतत् न ततः पृथक् " इत्येवं निश्चये निगमादिसाधनैर्यो विवेको जायते तज्ज्ञानम्॥ १८॥यथेति ॥ यत् स्वकृतं सुष्ठु कुण्डलादिरूपेण अकृतं न विरचितं हिरण्यं तदेव सर्वस्य हिरण्मयस्य कुण्डलादिकार्यस्योत्पत्तेः पुरस्तान्नाशाच्च पश्चाद्यदस्ति तदेव मध्येऽपि कटककुण्डलमित्यादिनानाव्यपदेशैर्नामभिर्व्यवहार्यमाणं व्यवहारं प्राप्यमाणं भवति । यथा सुकृतमिति पाठे सुष्ठु कुण्डलादिरूपेण विरचितमपि हिरण्यमेव इत्यादि तद्वदस्य विश्वस्य कारणभूतोऽहमेवाद्यन्तरूपो मध्ये नानाव्यवहारालम्बनं च न मत्तः पृथग्विश्वमस्तीति ॥ १९ ॥ विज्ञानमिति ॥ त्रियवस्थमिति यकारस्य पृथक् पाठः छन्दोऽनुरोधेन । जाग्रदादित्र्यवस्थं यदेतद्विज्ञानं मनः तथा तदवस्थाकारणभूतं च यद्गुणत्रयम् ।

यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य ॥ तदेव मध्ये व्यवहार्यमाणं नानाऽपदेशैरहमस्य तद्वत् ॥ १९ ॥ विज्ञानमेतत् त्रियवस्थमङ्ग गुणत्रयं कारणकार्यकर्तृ ॥ समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यम् ॥ २० ॥ न यत्पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रम् ॥ भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा ॥२१॥ अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः ॥ ब्रह्म स्वयंज्योतिरतो विभाति ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥ २२ ॥

यच्च कारणकार्यकर्तृकारणमध्यात्ममिन्द्रियाणि कार्यमधिभूतं पृथ्व्यादि कर्तृ अधिदैवम् । एवं गुणत्रयकार्यभूतं त्रिविधं जगत् । एतद्येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेन भवति । येनानुगतं प्रकाशते ।" तमेव भान्तमनुभाति सर्वम्" इति "चक्षुषश्चक्षुः" इति च श्रुतिः । ननु विशेषज्ञानं विना तुर्यं पृथङ् नोपलभ्यते तत्राह । व्यतिरेकतश्च समाधौ यदस्ति तदेव सत्यम् ॥ २० ॥ एवमव्यभिचारिणः सत्यत्वमुक्त्वा व्यभिचारिणोऽसत्यत्वमाह—न यदिति ॥ यत् भूतं कार्यं पुरस्तान्नास्ति उत अपि यत्पश्चान्नास्ति तन्मध्येऽपि नास्ति किन्तु व्यपदेशमात्रं व्यवहारमात्रमेव यद्यत् परेणान्येन भूतं जातं प्रसिद्धं प्रकाशितं च तत् तदेव कारणप्रकाशकात्मकमेव स्यान्न ततः पृथगिति मे मनीषा निश्चयः । " वाचारम्भणं विकारो नामधेयम् " इति " सर्वं खल्विदं ब्रह्म " इति च श्रुतेः । कारणप्रकाशकव्यतिरेकेण कार्यस्य प्रकाश्यस्य चानुपलम्भादिति भावः ॥२१॥ अविद्यमान इति ॥ योऽयं वैकारिकः सात्त्विकः तथा राजसश्च सर्गः तथा तामसश्च सर्गः स एष प्रागविद्यमानोऽपीदानीम् अवभासते प्रकाशते कार्यभूत एव । यद्वा । यः वैकारिकः विकारसमूहः विकारेभ्यो महदादिभ्यो जातो वा स प्रागविद्यमानोऽपि राजससर्गः रजोद्वारेण ब्रह्मकार्यभूतः इत्यर्थः । अवभासतेऽपि ब्रह्मप्रकाश्यश्चेत्यर्थः । ब्रह्म तु स्वयं स्वतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धं सर्वकारणमेव न तु कार्यमित्यर्थः । ज्योतिः प्रकाशकं चेत्यर्थः । अतः कारणात् इन्द्रियाणि च अर्थास्तन्मात्राणि च आत्मानश्च देवानामप्युपलक्षणम् । विकाराः पञ्च महाभूतानि च एवं चित्रं विश्वं ब्रह्मैव भाति ॥ २२ ॥ एवमिति ॥ एवं पूर्वोक्तैः निगमतपःप्रत्यक्षैतिह्यानुमानैः स्फुटं यथा भवति तथा ब्रह्मविवेकहेतुभिः तथा विशारदेन निपुणेन गुरुणा निमित्तभूतेन च परस्य देहादेरपवादेनात्मत्वनिरासेन आत्मविषयं देहादिभिन्नो वा एको नैको वा स्वतन्त्रः परतन्त्रो वेत्यादिरूपं संदेहं छित्त्वा स्वरूपानन्देनैव तुष्टः सन्नखिलेभ्यः कामुकेभ्यः इन्द्रियादिभ्यः उपारमेत निःसङ्गो भवेदिति ॥२३॥ परापवादमेव प्रपञ्चयति—नेति ॥ वपुरादिः अर्थसाम्यपर्यन्तः जडवर्गः आत्मा न भवतीति जडत्वादिति सर्वत्र हेतुः । तत्र पार्थिवं वपुः शरीरम् आत्मा न भवति पार्थिवमिति हेतुः पार्थिवत्वादित्यर्थः । एवम् अन्नमात्रम् अन्नोपष्टभ्यम् । "नपुंसकमनपुंसकेन" इति एकशेषः । इन्द्रियाणि देवाः अर्कादय इन्द्रियानुग्राहकाः असुः प्राणः वायुर्बाह्यः धिषणा बुद्धिः सत्वं चित्तम् अहंकृतिरहङ्कारः । एतेऽप्यात्मानो न भवन्ति । अन्नमात्रमिति हेतुः । अन्नोपष्टभ्यत्वात् शरीरवत् इत्यर्थः । वायुः जलं हुताशः तेजः खं क्षितिरिति पञ्च भूतानि । अर्थाः शब्दादयः पञ्च साम्यं गुणत्रयसाम्यं प्रकृतिः एतेऽपि आत्मा

एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन ॥ छित्त्वाऽत्मसंदेहमुपारमेत स्वानन्दतुष्टोऽखिलकामुकेभ्यः ॥ २३ ॥ नात्मा वपुः पार्थिवमिन्द्रियाणि देवा ह्यसुर्वायुजलं हुताशः ॥ मनोऽन्नमात्रं धिषणा च सत्त्वमहंकृतिः खं क्षितिरर्थसाम्यम् ॥ २४ ॥ समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः ॥ विक्षिप्यमाणैरुत किन्नु दूषणं घनैरुपेतैर्विगतै रवेः किम् ॥२५॥ यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते ॥ तथाऽक्षरं सत्त्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परम् ॥ २६ ॥ तथापि सङ्गः परिवर्जनीयो गुणेषु मायारचितेषु तावत् ॥ मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायः ॥ २७ ॥

न भवन्ति । जडत्वाद्घटवत् इति ॥२४॥ समाहितैरिति ॥ मम सुष्ठु सम्यग्विविक्तं ज्ञातमनुभूतं धाम स्वरूपं येन तस्य गुणात्मभिः सत्वादिगुणपरिणामात्मकैः करणैः समाहितैः को गुणो भवेत् उत अथवा विक्षिप्यमाणैस्तैः किं नु दूषणं भवेत् । तत्र दृष्टान्तमाह । घनैरुपेतैः प्राप्तैर्विगतैर्वा यथा रवेः किं गुणदोषौ न भवतस्तथा प्रकाशकस्य प्रकाश्यगुणदोषा न भवन्तीत्यर्थः ॥ २५ ॥ यथेति ॥ वाय्वनलाम्बुभूगुणैः शोषणदहनक्लेदनरजोधूसरत्वादिभिर्गतागतैरागमापायिभिः ऋतुगुणैः शीतोष्णादिभिश्च वा यथा नभो न सज्जते तथाहंमतेः देहाद्यहमित्याभिमानवतः संसृतिहेतुभिरपि सत्त्वादिमलैस्तत्कार्यैर्विषयैश्च परं प्रकृतिविलक्षणमक्षरं न सज्जते तथा तदात्मभूतो मुक्तोऽपि न सज्जते न लिप्यत इत्यर्थः । यद्वा । अहंमतेरहङ्कारात्परमक्षरं संसृतिहेतुभिः न युज्यते ॥ २६ ॥ तथापीति ॥ यद्यपि जीवन्मुक्तस्य विषयसंबन्धेऽपि न दोषस्तथापि विवेकरहितेन पुंसा तु दृढेन मद्भक्तियोगेन मनसः कषायः तद्वत् दुर्मोचनीयं रजो विषयेषु रागो यावन्न निरस्येत तावत् मायारचितेषु प्रकृतिकार्येषु गुणेषु विषयेषु सङ्गः परिवर्जनीयः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेति ॥ यथा नृणामामयो रोगः असाधु असम्यग्यथा भवति तथा चिकित्सितः प्रतिकृतः पुनः पुनः प्ररोहन् देहं तुदति एवमपकाः अदग्धाः कषायास्तद्वद्दुर्मोच्या रागादयस्तन्मूलानि कर्माणि च यस्मिंस्तत् अत एव सर्वसङ्गं सर्वत्र धनपुत्रकलत्रादिषु सज्जमानं मनः कुयोगिनमसम्यग्ज्ञानवन्तं विध्यति भ्रंशयतीत्यर्थः ॥ २८ ॥ कुयोगिन इति ॥ मनुष्यभूतैः पुत्रकलत्रबन्धुशिष्यादिरूपैः त्रिदशैरुपसृष्टैः प्रेरितैरन्तरायैर्विघ्नैर्ये कुयोगिनो विहता भ्रंशिताः । सन्धिरार्षः । तथा च श्रुतिः । " यस्मात्तदेषां न प्रियं यदेतन्मनुष्या विद्युः " इति । ते हि प्राक्तनयोगाभ्यासबलेन भूयःपुनर्जन्मान्तरेऽपि योगमेव युञ्जन्ति कुर्वन्ति नतु कर्मतन्त्रं कर्मविस्तारम्। अतो न पूर्वाभ्यासस्य व्यर्थतेति भावः । देवानां तत्र विघ्नकरणे हेतुस्तु तेषां स्वपूजाभङ्ग एव स तु पूर्वं निरूपितः ॥ २९ ॥ करोतीति ॥ असौ विदुषोऽन्यो जन्तुः केनाप्यन्तर्यामिप्रारब्धादिना चोदितः कर्म करोति क्रियते विक्रियते च तत्फललाभादिना हर्षशोकादिविकारं च प्राप्नोत्यतस्तेन संसरतीत्यर्थः । विद्वांस्तु तत्र प्रकृतौ देहे स्थितोऽपि प्रारब्धवशात् आनिपातात् मरणपर्यन्तं देहनिर्वाहकं भोजनादिकर्म करोति परंतु यतः स्वसुखानुभूत्या स्वरूपानन्दानुभवेन निवृत्ततृष्णः अतः न तथा विक्रियते तथा च निरहङ्कारित्वात् न संसरतीत्यर्थः ॥ ३० ॥

यथाऽऽमयोऽसाधु चिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् ॥ एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति सर्वसङ्गम् ॥ २८ ॥
कुयोगिनो ये विहितान्तरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ॥ ते प्राक्तनाभ्यासबलेन भूयो युञ्जन्ति योगं नतु कर्मतन्त्रम् ॥ २९ ॥ करोति
कर्म क्रियते च जन्तुः केनाप्यसौ चोदित आनिपातात् ॥ न तत्र विद्वान् प्रकृतौ स्थितोऽपि निवृत्ततृष्णः स्वसुखानुभूत्या ॥ ३० ॥
तिष्ठन्तमासीनमुत व्रजन्तं शयानमुक्षन्तमदन्तमन्नम् ॥ स्वभावमन्यत् किमपीहमानमात्मानमात्मस्थमतिर्न वेद ॥ ३१ ॥ यदि स्म
पश्यत्यसदिन्द्रियार्थं नानानुमाने न विरुद्धमन्यत् ॥ न मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानम् ॥ ३२ ॥ पूर्वं गृहीतं
गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमङ्ग ॥ निवर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ॥ ३३ ॥

तिष्ठन्तमिति ॥ यतः आत्मस्थमतिः आत्मस्था स्वरूपानुसन्धाननिष्ठा मतिर्यस्य सः अतः विद्वांस्तु तिष्ठन्तम् आसीनम् अनुव्रजन्तं शयानम् उक्षन्तं मूत्रयन्तम् अन्नमदन्तं च स्वभावप्राप्तमन्यदपि किंचित् दर्शनस्पर्शनादि ईहमानं कुर्वन्तमात्मानं देहमपि न वेद ॥ ३१ ॥ यदीति ॥ यदि कदाचित् समाधिभङ्गे मनीषी असतां बहिर्मुखानामिन्द्रियाणां नानाविधमर्थं शब्दादिविषयजातं पश्यति तथापि नानात्वात् मिथ्यास्वप्नवत् इत्यादिनाऽनुमानेन विरुद्धं बाधितं सत् अन्यत् आत्मव्यतिरिक्तं वस्तुतया न मन्यते । यथा पुरुषः स्वापादुत्थाय प्रबुध्य संस्कारमात्रेण स्फुरन्तमत एव स्वयमेव तिरोदधानं स्वाप्नं स्वप्ने दृष्टं देहादिविषयं वस्तुतया न मन्यते तद्वदित्यर्थः ॥ ३२ ॥ पूर्वमिति ॥ अङ्ग हे उद्धव पूर्वं बद्धावस्थायां गुणैः सत्वादिभिस्तदनुरूपैः कर्मभिश्च यदिदं चित्रं देहादिरूपम् अज्ञानकार्यं यदात्मन्यविविक्तमभिन्नतया गृहीतमासीत् तदेव पुनरीक्षया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मज्ञानेन निवर्त्तते। आत्मा तु न केनापि रूपेण गृह्यते उपादीयते नापि विसृज्यो भवति। तथा च मुक्तेः क्रियाफलत्वे भवेदात्मनो विकारस्तस्यास्त्वारोपिताज्ञानमात्रनिवृत्तिरूपत्वान्नात्मसंस्पर्शित्वं बन्धमोक्षयोरिति न विकारशङ्केति भावः॥ ३३॥ यथेति॥ यथा हि भानोरुदयो नृचक्षुषामावरकं तमः निहन्यात् पूर्वमेव सत् घटादि पुनर्न तु विधत्ते विरचयति। एवं निपुणा निश्चयात्मिका सती यथार्था मे समीक्षा साक्षात्कारः पुरुषस्य बुद्धेः तमिस्रं मोहकमज्ञानमेव हन्यात् निरस्यति न तु किंचिद्विधत्ते इत्यर्थः॥ ३४॥ एष इति॥ एष आत्मा स्वयंज्योतिः स्वयंप्रकाशः अजः जन्मादिविकाररहितः अप्रमेयः प्रत्यक्षादिभिः प्रमाणैः प्रमातुमशक्यः महानुभूतिः अपरिच्छिन्नज्ञानैश्वर्यादिमान् अत एव सकलानुभूतिः सर्वसाक्षी एकः सर्वात्मकः अद्वितीयश्च वचसां विरामे अगोचरत्वेन निवृत्तौ सत्यामपि यः स्वयंज्योतिः येन ईषिताः प्रेषिताः वाक् असवः इन्द्रियाणि च चरन्ति स्वस्वविषये प्रवर्त्तन्ते॥ ३५॥ देह आत्मेति वदतो निन्दति—एतावानिति॥ यत् यः केवले अभिन्ने आत्मन् आत्मनि विकल्पो भेदः। ङिलुगार्षः। स एतावान् सर्वोऽप्यात्मनो मनसः संमोहो भ्रम एव। हि यतः स्वमात्मानमृते विना यस्य विकल्पस्यावलम्बः आश्रयो नास्ति रजतभ्रमस्येव शुक्तिम् अधिष्ठानं

यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते॥ एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः॥ ३४॥ एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः॥ एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्चरन्ति॥ ३५॥ एतावानात्मसंमोहो यद्विकल्पस्तु केवले॥ आत्मन्नृते स्वमात्मानमवलम्बो न यस्य हि॥३६॥यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम्॥ व्यर्थेनाप्यर्थवादोऽयं द्वयं पण्डितमानिनाम्॥ ३७॥ योगिनोऽपक्वयोगस्य युञ्जतः काय उत्थितैः॥उपसर्गैर्विहन्येत तत्रायं विहितो विधिः॥ ३८॥ योगधारणया कांश्चिदासनैर्धारणान्वितैः॥ तपोमन्त्रौषधैः कांश्चिदुपसर्गान् विनिर्दहेत्॥ ३९॥

विना भ्रमादर्शनात्॥ ३६॥ केचित्पुनः प्रत्यक्षादिसिद्धस्य प्रपञ्चस्य बाधायोगाद्वेदान्तानां च क्रत्वर्थकर्तृप्रतिपादकत्वेनार्थवादत्वं मन्यन्ते तन्मतमनूद्य दूषयति—यदिति॥ नामाकृतिभिः नामभिः रूपैश्च उपलक्षितं पञ्चवर्णं पञ्चभूतात्मकमिन्द्रियैर्ग्राह्यं च यद्द्वयं द्वैतं देहादि तदबाधितमेवेत्ययं पण्डितमानिनाम् अत्र वयमेव पण्डिता इत्यभिमानवतां वेदान्तेष्वयमर्थवादः इति प्रतीतिः व्यर्थेन अर्थशून्येन भ्रमेणैवेति। तथाहि न तावद्विध्येकवाक्यत्वं तेषामस्ति येनार्थवादत्वं स्यात्। न चाकर्तृभोक्तृरूपात्मप्रतिपादनं कर्मविधिशेषतां भजते नाप्यबाधितत्वं जगतः नामरूपात्मकत्वात्। पञ्चवर्णात्मकत्वात् ग्राह्यत्वात् स्वप्नवत् इत्याद्यनुमानैः वाचारम्भणादिश्रुतिभिश्च बाधितत्वात्॥ ३७॥ योगिन इति॥ अपक्वयोगस्य अनिष्पन्नयोगस्य योगं युञ्जतः कुर्वतो योगिनः कायो यद्यन्तरेवोत्पन्नैरुपसर्गैः रोगाद्युपद्रवैर्विहन्येत अभिभूयते तत्र तदा अयं विधिः प्रतीकारो विहितः॥३८॥ तमेव दर्शयति—योगेति॥ कांश्चित्सन्तापशैत्यादीन् योगधारणया सूर्यसोमादिधारणया वातादिरोगान् वायुधारणान्वितैरासनैः कांश्चित् पापग्रहसर्पादिकृतान्

CC-0. In Public Domain. Digitization by eGangotri

उपसर्गान् उपद्रवान् तपोमन्त्रौषधैर्विनिर्दहेत् निवर्त्तयेदित्यर्थः ॥ ३९ ॥ कांश्चिदिति ॥ कांश्चित्कामक्रोधादीन् अशुभदान् योगभ्रंशनपूर्वकदुःखप्रदान् ममानुध्यानेन नामसंकीर्त्तनादिभिश्च हन्यात् । कांश्चिच्च दम्भाभिमानादीन् योगेश्वराणामनुवृत्त्या अनुसरणेन हन्यात् ॥ ४० ॥ केचिदिति ॥ केचित्पुनर्धीरा जितेन्द्रिया एतैरन्यैश्च विविधोपायैर्देहमेव सुकल्पं जरारोगादिराहित्येन समर्थं तथा वयसि तारुण्ये स्थिरं च विधाय कृत्वाऽथ अद्वन्द्वपरकायप्रवेशादिसिद्धये तत्तद्धारणारूपं योगं युञ्जन्ति नतु ज्ञाननिष्ठारूपम् ॥ ४१ ॥ न हीति ॥ परंतु तत्सिद्ध्यर्थं योगानुष्ठानं कुशलैर्विवेकिभिरादृत्यमादरणीयं नैव भवति । यतः शरीरस्यान्तवत्त्वान्नश्वरत्वात् । तदायासः सिद्ध्यर्थायासः अपार्थकः निष्फल एव । यथा वनस्पतिवदात्मैव स्थायी शरीरं तु फलवन्नश्वरम् । अत आत्मलाभार्थ एव यत्नो विधेयो न शरीरसिद्ध्यर्थः ॥४२ ॥ योगमिति ॥ नित्यं योगं निषेवतः । शता आर्षः । प्राणायामादिभिर्यदि संकल्पमन्तरेणैव कायः कल्पतां दार्ढ्यमियात् तदाऽपि मतिमान् विवेकी मत्परं योगमुत्सृज्य तत् देहदार्ढ्यादिकं न श्रद्दध्यात् न विश्वसेत् ।

कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः ॥ योगेश्वरानुवृत्त्या वा हन्यादशुभदाञ्छनैः ॥ ४०॥ केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरम् ॥ विधाय विविधोपायैरथ युञ्जन्ति सिद्धये ॥४१॥ न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः ॥ अन्तवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ॥४२॥ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात् ॥ तच्छ्रद्दध्यान्न मतिमान् योगमुत्सृज्य मत्परः ॥ ४३ ॥ योगचर्यामिमां योगी विचरन् मद्व्यपाश्रयः ॥ नान्तरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ॥ ४४ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे अष्टाविंशोऽध्यायः ॥ २८ ॥ उद्धव उवाच ॥ सुदुष्करामिमां मन्ये योगचर्यामनात्मनः ॥ यथाऽञ्जसा पुमान् सिद्ध्येत्तन्मे ब्रूह्यञ्जसाऽच्युत ॥ १ ॥ प्रायशः पुण्डरीकाक्ष युञ्जन्तो योगिनो मनः ॥ विषीदन्त्यसमाधानान्मनोनिग्रहकर्शिताः ॥ २ ॥

नेच्छेद्वा किंतु मदाराधनपर एव भवेदित्यर्थः ॥४३॥ योगचर्यामिति ॥ निःस्पृहः विषयाभिलाषरहितः मदपाश्रयो योगी इमां योगचर्यां विचरन् कुर्वन् अन्तरायैर्नैव विहन्येत किंतु स्वसुखे अनुभूः अनुभूतिर्यस्य तथा भूतो भवतीत्यर्थः ॥ ४४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशाष्टाविंशेऽस्मिन् व्यधाद्वज्ञानसहायकः ॥ २८ ॥ ऊनत्रिंशे च पूर्वोक्तो भक्तियोगः समासतः ॥ पुनर्निरूपितस्तत्र श्लोकाः सार्द्धा नवांग्नयः ॥ सं॑तोवाचेति पादोना अष्टबाणा अनुष्टुभः ॥ २९ ॥ सुदुष्करामिति ॥ हे अच्युत अनात्मनः अजितेन्द्रियस्य इमां पूर्वोक्तां योगचर्यां सुदुस्तरां मन्ये । अतः अञ्जसा अनायासेन पुमान् यथा सिद्ध्येत् विमुच्येत तत्साधनमञ्जसा सुबोधं यथा स्यात्तथा मे मह्यं ब्रूहि । क्रियाभेदप्रयुक्तवाक्यभेदादञ्जसेत्यस्य पौनरुक्त्यं न दोषः ॥ १ ॥ प्रायश इति ॥ हे पुण्डरीकाक्ष मनो युञ्जन्तो निगृह्णन्तः अत एव मनसो निग्रहे निमित्ते कर्शिताः परिश्रान्ताः तथापि तस्यासमाधानात् अनिग्रहात् योगिनः प्रायशो विषीदन्ति क्लिश्यन्तीत्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ हे विश्वेश्वर यस्माद् ज्ञानयोगमार्गे क्लेशोऽधिकतरः । अथातः अत एव हे अरविन्दलोचन ये हंसाः सारासारविवेकचतुरास्ते आनन्ददुघं परमानन्दपूरकं तव पदाम्बुजमेव सुखं यथा स्यात्तथा श्रयेरन् सेवन्ते । नु निश्चितमत्र सन्देहो नास्ति । ये त्वमी योगकर्मभिर्मानिनः वयमेव योगज्ञाः वयमेव कर्मकुशला इति गर्विताः सन्तस्तव पदाम्बुजं न श्रयन्ते ते तु त्वन्मायया विहताः । यद्वा । अमी त्वद्भक्ताः त्वन्मायया न विहताः अतः योगकर्मभिर्मानिनो न भवन्ति । अन्ये तु वयमेव योगज्ञा इत्यादि केवलं गर्विता भवन्ति न मुच्यन्ते ॥ ३ ॥ किं चित्रमिति ॥ हे अशेषबन्धो हे अच्युत स्वयं त्वीश्वराणां ब्रह्मादीनां यानि श्रीमन्ति किरीटानि तेषां तटानि अग्राणि तैः पीडितं विलुठितं पादपीठं यस्य तथाभूतोऽपि यो भवान् श्रीरामरूपेण मृगैर्वानरैः सह सख्यमरोचयत् कृपया कृतवान् । यद्वा । मृगैर्वृन्दावनस्थहरिणैः साहित्यं गाश्चारयन्नकरोत् तथा दधि चोरयन् मृगैर्वानरैः सख्यमकरोत् तस्य तव अनन्यशरणेषु नास्ति त्वत्तोऽन्यत् शरणमाश्रयो येषां तेषु दासेषु यथा नन्दगोपीबलिप्रभृतिषु यदात्मसात्वं तेषां य आत्मा तत्तदधीनत्वं राज्ञास्य पुरं विप्रसात्कृतमितिवत् । दासैस्त्वमात्मसात्कृतः इति तवात्मसात्त्वम् । आत्मसात्कृतत्वमित्यर्थः । तत्किं चित्रं किमसंभावितम् ॥ ४ ॥ तमिति ॥

अथात आनन्ददुघं पदाम्बुजं हंसाः श्रयेरन्नरविन्दलोचन ॥ सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माययाऽमी विहता न मानिनः ॥३॥ किं चित्रमच्युत तवैतदशेषबन्धो दासेष्वनन्यशरणेषु यदात्मसात्त्वम् ॥ योऽरोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ॥४॥ तं त्वाऽखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु ॥ को वा भजेत्किमपि विस्मृतयेऽनुभूत्यै किं वा भवेन्न तव पादरजोजुषां नः ॥५॥ नैवोपयन्त्यपचितिं कवयस्तवेश ब्रह्मायुषाऽपि कृतमृद्धमुदः स्मरन्तः ॥ योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ॥६॥

अखिलस्य जगत आत्मानं चेतयितारं स्वरूपभूतं च अत एव दयितं प्रेष्ठं सुखसेव्यमीश्वरं सर्वपुरुषार्थदाने समर्थं चेति कर्मधारयः । त्वां को नु स्वस्मिन् त्वया कृतमुपकारं वेत्तीति कृतज्ञः पुमान् विसृजेत् नं कोऽपीत्यर्थः । तथा यत् केवलं भूत्यै ऐश्वर्याय भवति अनु तदनु ऐश्वर्यप्राप्त्यनन्तरं तव विस्मृतये भवति तत् किमपि त्वद्व्यतिरिक्तं स्वर्गादिकं त्वया दत्तमपि को वा तादृशः कुशलः पुमान् भजेत । यद्वा । त्वद्व्यतिरिक्तं किमपि देवतान्तरं धर्मज्ञानादिसाधनं वा भूत्यै ऐश्वर्य्याय संसारस्य विस्मृतये मोक्षाय च को वा भजेत् । तव पादरजोजुषां भक्तानां नोऽस्माकं किं वा ऐश्वर्यादिकं न भवेत् यदि ते किंचिद्वाञ्छन्ति तदा त्वद्भजनात्त्वत्कृपयैव सर्वं सुलभमित्यर्थः ॥ ५ ॥ नैवेति ॥ हे ईश यो भवान् बहिराचार्यवपुषा गुरुरूपेण अन्तश्च चैत्यवपुषा अन्तर्यामिरूपेण तनुभृतां प्राणिनामशुभं प्रतिबन्धकं पापं विषयवासनां च विधुन्वन् निरस्यन् स्वगतिं निजं रूपं व्यनक्ति प्रकटयति तस्य तव अपचितिं प्रत्युपकारमानृण्यमिति यावत् । कवयो ब्रह्मविदोऽपि त्वत्कृतमुपकारं स्मरन्तः ऋद्धमुदः उपचितपरमानन्दाः सन्तः ब्रह्मायुषाऽपि ब्रह्मायुस्तुल्यमायुः प्राप्य भजन्तोऽपि इत्यर्थः । नैवोपयन्ति नैव प्राप्नुवन्ति । अतः त्वत्कृतोपकारानृण्याय ते सर्वमूलमात्मानं निवेदयन्ति का वार्त्ताऽन्यभजनस्य ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

इतीति ॥ इत्येवमनुरक्तचेतसा उद्धवेन पृष्टः जगत्क्रीडनकं क्रीडासाधनं यस्य सः स्वशक्तिभिः रजआदिभिर्गृहीतं मूर्त्तित्रयं ब्रह्मादिरूपं येन सप्रेम प्रेमयुक्तं मनोहरं स्मितं यस्य सः ईश्वरेश्वरः कृष्णस्तं प्रति जगाद सप्रेम जगाद वा ॥७॥ हन्तेति ॥ हन्तेति हर्षे । सुमङ्गलान् मम धर्मान् ते तुभ्यं कथयिष्यामि । यान् श्रद्धया आचरन् मर्त्यः उपायान्तरेण दुर्जयमपि मृत्युं जन्ममरणादिरूपं संसारं जयति ॥ ८ ॥ कुर्यादिति ॥ मयि अर्पिते मनश्चित्ते संकल्पविकल्पानुसन्धानात्मके येन सः अत एव मद्धर्मेष्वेवात्ममनसो रतिर्यस्य सः मां स्मरन् शनकैः असंरम्भतः मदाराधनार्थं सर्वकर्माणि कुर्यात् ॥९॥ देशानिति ॥ मद्भक्तैः साधुभिः श्रितान् अत एव पुण्यान् देशान् संश्रयेत । तथा देवासुरमनुष्येषु ये मद्भक्तास्तेषामाचरितानि कर्माणि चाश्रयेत् ॥ १० ॥ पृथगिति ॥ पृथक् स्वयमेकाकी सत्रेण अन्यैः सह संभूय वा महाराजोपचारैर्गीतादिभिश्च मह्यं मत्प्रीत्यर्थं पर्वसु एकादश्यादिषु यात्रा बहुजनसमागमस्तत्र च योग्यान् महोत्सवान् कारयेत् ॥ ११ ॥ अन्तरङ्गां भक्तिमाह—मामिति ॥ अमलाशयः शुद्धान्तःकरणः यथा खम्

श्रीशुक उवाच ॥ इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः ॥ गृहीतमूर्त्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः ॥७॥ श्रीभगवानुवाच ॥ हन्त ते कथयिष्यामि मम धर्मान्सुमङ्गलान् ॥ यान् श्रद्धया चरन्मर्त्यो मृत्युं जयति दुर्जयम् ॥ ८ ॥ कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ॥ मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥ ९ ॥ देशान्पुण्यान्संश्रयेत मद्भक्तैः साधुभिः श्रितान् ॥ देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥ १० ॥ पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ॥ कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥ ११ ॥ मामेव सर्वभूतेषु बहिरन्तरपावृतम् ॥ ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ १२ ॥ इति सर्वाणि भूतानि मद्भावेन महामते ॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥ १३ ॥ ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके ॥ अक्रूरे क्रूरके चैव समदृक् पण्डितो मतः ॥ १४ ॥ नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् ॥ स्पर्धासूयातिरस्काराः साहंकारा वियन्ति हि ॥ १५ ॥

आकाशमिव बहिरन्तश्च पूर्णम् अपावृतम् आवरणशून्यं सर्वभूतेषु आत्मनि च स्थितमात्मानं मामेवेक्षेत ॥ १२ ॥ इतीति ॥ हे महामते निर्मलबुद्धे इत्यनेन प्रकारेण यः केवलं ज्ञानरूपां दृष्टिमाश्रितः सन् सर्वाणि भूतानि मद्भावेन मन्यमानः अतस्तानि सर्वाणि भूतानि सभाजयन् सत्कुर्वन् वर्त्तेत ॥ १३ ॥ ब्राह्मणे इति ॥ ब्राह्मणादिषु विषमेष्वपि यः समदृक् समं मामेव पश्येत् स पण्डितो मतः । ब्राह्मणे पुल्कसे इति जातितो वैषम्यम् । पुल्कसोऽन्त्यजजातिविशेषः । स्तेने ब्रह्मस्वहारिणि ब्रह्मण्ये ब्राह्मणेभ्यो दातरि चेति कर्मतो वैषम्यम् । अर्के विस्फुलिङ्ग इति गुणतो वैषम्यम् । अक्रूरे शान्ते क्रूरे चेति स्वभावतो वैषम्यम् ॥ १४ ॥ नरेष्विति ॥ नरेष्वीश्वरदृष्टिं नित्यं कुर्वतस्तु अचिरात् शीघ्रमस्मिन् जन्मन्येव समेषु स्पर्द्धा उत्तमेषु असूया हीनेषु तिरस्कारः स्वस्मिन्नहङ्कारश्च हि निश्चितमेते दोषा वियन्ति नश्यन्ति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विसृज्येति॥ अतः स्मयमानान् हसतः स्वान् सख्यादीन् तथा दैहिकीं दृशमहमुत्तमः स तु नीच इति दृष्टिं तया दृष्ट्या या व्रीडा लज्जा तां विसृज्य श्वचाण्डालादीनभिव्याप्ये-श्वरदृष्ट्या सर्वान् भूमौ दण्डवत्पतित्वा प्रणमेत्॥१६॥उक्तायाः समदृष्टेरवधिमाह—यावदिति॥ यावत्सर्वेषु भूतेषु मद्भावः मदात्मकमेवेति निश्चयः नोपजायते तावत् वाङ्मनःकाय-वृत्तिभिः एवमुपासीत। तत्र वाचः कर्म सर्वभूतान्युद्दिश्य भगवते नम इत्युच्चारणम्। मनसः कर्म ईश्वरः सर्वत्र प्रविष्ट इति चिन्तनम्। कायकर्म प्रणमेद्दण्डवद्भुवि इति॥१७॥ सर्वमिति॥तस्य एवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति। ततश्च तया आत्ममनीषया सर्वत्र परमेश्वरदृष्ट्या जातया साक्षात्कारात्मिकया विद्यया परितो ब्रह्मैव पश्यन् सर्वतो मुक्तसंशयः सन् क्रियामात्रादुपरमेत्॥ १८॥ अयं हीति॥ मनोवाक्कायवृत्तिभिः सर्वभूतेषु यो मद्भावः। अयं हि अयमेव सर्वेषां कल्पानामुपायभेदानां मध्येऽयमेवोपायो मम सुध्रीचीनः समीचीनो मतः॥ १९॥ समीचीनत्वमुपपादयति—न हीति॥ अङ्ग हे उद्धव निर्गुणत्वाद्धेतोः अनाशिषः निष्कामस्य मदुपासनात्मकस्य धर्मस्योपक्रमे सति। यद्वा। मद्धर्मस्य अङ्गमात्रस्याप्युपक्रमे सति अणु अपि ईषदपि वैगुण्यादिभिर्नाशो नास्त्येव। यतो मया सर्वज्ञेनायं धर्मः सम्यग्व्यवसितो निश्चितः। ननु मन्वादिमुखेन कथं-

विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीम्॥ प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरम्॥ १६॥ यावत्सर्वेषु भूतेषु मद्भावो नोपजायते॥
तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः॥ १७॥ सर्वं ब्रह्मात्मकं तस्य विद्ययाऽऽत्ममनीषया॥ परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः॥ १८॥
अयं हि सर्वकल्पानां सध्रीचीनो मतो मम॥ मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः॥१९॥ न ह्यङ्गोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि॥ मया
व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः॥ २०॥ यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत्॥ तदायासो निरर्थः स्याद्भयादेरिव सत्तम
॥ २१॥ एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम्॥ यत्सत्यमनृतेनेह मर्त्येनाप्नोति माऽमृतम्॥ २२॥

चित्॥ २०॥ यो य इति॥ आस्तां तावन्मदुपासनात्मकस्य ध्वंसवार्ता यतो लौकिकोऽपि यो निरर्थो भोजनगमनाद्यायासः सोऽपि मयि परमेश्वरे कल्प्यते चेत् तर्हि धर्मः स्यात्।अनिष्फलाय मत्प्रीतिद्वारा फलदानाय कल्पते समर्थो भवतीत्यन्वयः। हे सत्तम भयादेरिवेति यथा कंसस्य भयं कामो गोपीनां चैद्यादीनां द्वेषश्च मयि कल्पितः सफलो जातः तथेत्यर्थः। यद्वा। लौकिकोऽपि यो यो निरर्थः आयासः सोऽपि मयि परे निष्फलाय चेत्कल्प्यते निष्कामतयाऽर्पितश्चेत्तर्हि धर्म एव स्यात्। निरर्थायासे दृष्टान्तः। यथा भयशोकादेर्हेतोः पलायनाक्रन्दनादिक्लेशस्तद्वत्॥ २१॥ एषेति॥ अतो बुद्धिमतां विवेकिनां बुद्धिर्विवेकस्तत्फलम्। एषा एव ननु अतिकठिनशास्त्रे संचरिष्णुत्वम्। तथा मनीषिणां चतुराणां मनीषा चातुर्यं तत्फलं च एषा एव नतु धनार्जनादिचातुर्यम्। तदेव दर्शयति। यत् अनृतेन आत्मन्यध्यस्तेन मर्त्येन मरणधर्मकेण मनुष्यदेहेन इह अस्मिन्नेव जन्मनि अमृतं मरणशून्यमत एव सत्यं परमार्थभूतं मा मां प्राप्नोति तत् यो महावीभत्सेन श्वादिभक्ष्येण शरीरेण सेवादिषु भगवदर्पितेन अप्राकृतानन्दनिधिं भगवन्तं गृह्णाति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः कोऽन्यः पटुतमः ॥ २२ ॥ एष इति ॥ देवानामपि दुर्गमो दुर्ज्ञेयः ब्रह्मवादस्य वेदान्तसिद्धान्तस्य कृत्स्नः संग्रह एष ते तुभ्यं मया समासव्यासविधिनाऽभिहितः ॥ २३ ॥ अभीक्ष्णश इति ॥ ते तुभ्यं विस्पष्टयुक्तिमत् तत्वज्ञानं मया अभीक्ष्णशः गदितम् एतत् विज्ञाय पुरुषो नष्टसंशयः सन् मुच्यते च ॥ २४ ॥ सुविविक्तमिति ॥ तव प्रश्नं मया सुविविक्तं विविच्य दत्तोत्तरं य एतत् मदुक्तमाख्यानमपि धारयेत् चिन्तयेत् स सनातनं ब्रह्म गुह्यं वेदेऽपि रहस्यं परं ब्रह्म अधिगच्छति ॥२५॥ य एतदिति ॥ यः एतन्मम भक्तेषु सुपुष्कलं विस्तृतं यथा भवति तथा दद्यात् तस्य ब्रह्म ददाति यः ब्रह्मणि दायो यस्य वा तस्य ब्रह्मदायस्य। ब्रह्मोपदेष्टुरिति चतुर्थ्यें षष्ठी। अहमात्मना स्वयमेवात्मानं ददामीत्यन्वयः ॥ २६ ॥ य इति ॥ यः स्वयमपि परमं शुचि अन्येषामपि पवित्रं शोधकम्। पवित्रशब्दात्तत्करोतीति ण्यन्तादच्। एतत् समधीयीत उच्चैः पठेत् स अहरहः

एष तेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः ॥ समासव्यासविधिना देवानामपि दुर्गमः ॥ २३ ॥ अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत् ॥ एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः ॥ २४ ॥ सुविविक्तं तव प्रश्नं मयैतदपि धारयेत् ॥ सनातनं ब्रह्म गुह्यं परं ब्रह्माधिगच्छति ॥२५॥ य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलम् ॥ तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मना ॥२६॥ य एतत्समधीयीत पवित्रं परमं शुचि ॥ स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् ॥ २७ ॥ य एतच्छ्रद्धया नित्यमव्यग्रः शृणुयान्नरः ॥ मयि भक्तिं परां कुर्वन् कर्मभिर्न स बध्यते ॥ २८ ॥ अप्युद्धव त्वया ब्रह्म सखे समवधारितम्॥अपि ते विगतो मोहः शोकश्चासौ मनोभवः ॥ २९ ॥ नैतत्त्वया दाम्भिकाय नास्तिकाय शठाय च ॥ अशुश्रूषोरभक्ताय दुर्विनीताय दीयताम् ॥ ३० ॥ एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च ॥ साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषिताम् ॥३१॥ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते ॥ पीत्वा पीयूषममृतं पातव्यं नावशिष्यते ॥ ३२ ॥ ज्ञाने कर्मणि योगे च वार्तायां दण्डधारणे ॥ यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः ॥ ३३ ॥

ज्ञानदीपेन मामन्यानपि दर्शयन् स्वयमपि पूयेत ॥ २७ ॥ य इति ॥ अव्यग्रः सावधानः। स्फुटमन्यत् ॥२८॥ अपीति ॥ हे उद्धव हे सखे अपि किं त्वया ब्रह्म समवधारितं तथा अपि किं ते मनोभवः असौ मोहः अध्यासः शोकश्च विगतः ॥२९ ॥ नैतदिति ॥ दाम्भिकाय धर्मध्वजाय नास्तिकाय वेदे विश्वासरहिताय शठाय वञ्चकाय अशुश्रूषोः अशुश्रूषवे अश्रद्धया शृण्वते अभक्ताय दुर्विनीताय च एतन्मदुपदिष्टज्ञानभक्त्यादिरहस्यं त्वया न दीयतां नोपदेष्टव्यमित्यर्थः ॥ ३० ॥ एतैरिति ॥ एतैर्दाम्भिकत्वादिभिर्दोषैर्विहीनाय ब्रह्मण्याय विप्रभक्ताय च साधवे शुचये च ब्रूयात्। शूद्राणां योषितां चापि यदि भक्तिः स्यात्तर्हि तेभ्योऽपि ब्रूयादेव ॥३१॥ नेति ॥ जिज्ञासोः एतद्विज्ञाय ज्ञातव्यं नावशिष्यते। पीयूषं स्वादु अमृतं पीत्वा पातव्यं नावशिष्यते ॥ ३२॥ ज्ञान इति ॥ ज्ञानादौ यावान् धर्मादिलक्षणश्चतुर्विधोऽर्थस्तावान् सर्वोऽपि ते तवाहमेव तत्र ज्ञाने मोक्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मणि विहिते धर्मः स्वाभाविके कर्मणि तु कामः योगे त्वणिमादिसिद्धयः वार्तायां कृष्यादावर्थः दण्डनीतावैश्वर्यमिति सिद्धैश्वर्ययोरपि कामान्तर्गतत्वाच्चातुर्विध्यम् ॥ ३३ ॥ मर्त्य इति ॥ मर्त्यो मनुष्यो यदा त्यक्तसमस्तकर्मा सन् मे निवेदितात्मा भवति तदाऽसौ मे विचिकीर्षितो विशिष्टः कर्तुमिष्टो भवति । ततश्चामृतत्वं मोक्षं प्रतिपद्यमानो मयाऽऽत्मभूयाय मदैक्याय मत्समानैश्वर्यायेति वा कल्पते योग्यो भवति ॥३४॥ स इति ॥ एवमादर्शितो ज्ञानकर्मभक्तियोगस्य मार्गो यस्मै सः उद्धवः उत्तमश्लोकस्य भगवतो वचो निशम्य प्रीत्या बाष्पेण उपरुद्धकण्ठः अश्रुभिः परिप्लुताक्षश्च सः बद्धाञ्जलिः सन्न किंचिदप्यूचे ॥ ३५ ॥ विष्टभ्येति ॥ प्रणयेन प्रेम्णाऽवघूर्णं क्षुभितं चित्तं धैर्येण विष्टभ्य आत्मानं बहु कृतार्थं मन्यमानः शीर्ष्णा । शीर्षंश्छन्दसि । तच्चरणारविन्दं स्पृशन् कृताञ्जलिश्च सन् भगवन्तं प्राह स्म ॥ ३६ ॥ विद्रावित इति ॥ यो मोहरूपो महान्धकारो

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे ॥ तदाऽमृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥ ३४ ॥
श्रीशुक उवाच ॥ स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य ॥ बद्धाञ्जलिः प्रीत्युपरुद्धकण्ठो न किंचिदूचेऽश्रुपरिप्लुताक्षः
॥ ३५ ॥ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन्बहु मन्यमानः ॥ कृताञ्जलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविन्दम् ॥ ३६ ॥
उद्धव उवाच ॥ विद्रावितो मोहमहान्धकारो य आश्रितो मे तव सन्निधानात्॥विभावसोः किंनु समीपगस्य शीतं तमो भीः प्रभवन्त्यजाद्य
॥ ३७ ॥ प्रत्यर्पितो मे भवताऽनुकम्पिना भृत्याय विज्ञानमयः प्रदीपः ॥ हित्वा कृतज्ञस्तव पादमूलं कोऽन्यत्समीयाच्छरणं त्वदीयम्
॥३८॥ वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यन्धकसात्वतेषु ॥ प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना ॥३९॥
नमोऽस्तु ते महायोगिन् प्रपन्नमनुशाधि माम् ॥ यथा त्वच्चरणाम्भोजे रतिः स्यादनपायिनी ॥ ४० ॥

मया आश्रित आसीत् । सः तव संनिधानात् उपदेशात् विद्रावितः तदुचितमेव । हे अजाद्य ब्रह्मणोऽपि जनक अग्नेः समीपगस्य किं शीतादयः प्रभवन्ति बाधाय समर्था भवन्ति न भवन्तीत्यर्थः । यथाऽग्निसमीपे शीतादिभयं न संभवति तथा त्वद्भक्तस्य मोहादि न संभवतीत्यर्थः ॥ ३७ ॥ प्रतीति ॥ अनुकम्पिना कृपावता भवता मे मह्यं भृत्याय ज्ञानमयः प्रदीपः प्रत्यर्पितः अतस्तव कृतज्ञः त्वया कृतमनुग्रहं जानन् त्वदीयपादमूलं हित्वाऽन्यच्छरणं को वा समीयात् आश्रयेत् ॥ ३८ ॥ वृक्ण इति ॥ सृष्टिविवृद्धये यस्त्वया स्वमायया दाशार्हादिषु मे सुदृढः स्नेहपाशः प्रसारितः स त्वयैवात्मसुबोधहेतिना आत्मतत्त्वज्ञानशस्त्रेण वृक्णः संच्छिन्नः ॥ ३९ ॥ नम इति ॥ हे महायोगिन् ते तुभ्यं नमोऽस्तु । यथा त्वच्चरणाम्भोजे अनपायिनी शाश्वती रति प्रीतिः स्यात्तथा प्रपन्नं मामनुशाधि अनुगृहाण ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

गच्छेति सार्द्धं चतुष्कम् ॥ हे उद्धव मया दिष्टो नियुक्तः त्वं वदर्याख्यं ममाश्रमं गच्छ । तत्र मत्पादतीर्थोदके स्नानोपस्पर्शनैः शुचिः तथा स्नानादेः पूर्वमपि मत्पादतीर्थोदकभूताया अलकनन्दाया गङ्गायाः ईक्षया विधूताशेषकल्मषः निवृत्तसकलदोषः वल्कलानि वसानः परिदधानः वन्यभुक् विषयसुखे निःस्पृहः द्वन्द्वमात्राणां शीतोष्णादीनां तितिक्षुः सहनशीलः सुशीलः संयतेन्द्रियः शान्तः रागादिरहितः समाहितधिया चित्तैकाग्र्येण युक्तः ज्ञानविज्ञानसंयुतः एतत् त्वया यत् शिक्षितं तत् विविक्तं सुविचारितमनुभावयन् चिन्तयन् मय्यावेशितवाक् चित्तो मद्धर्मेषु निरतश्च भव । ततः परं देहपातानन्तरं तिस्रो गतीः त्रिगुणात्मिकादेव तिर्यङ्मनुष्ययोनीः अतिक्रम्य मामेष्यसि ॥ ४१ ॥४२॥४३॥४४॥ स इति ॥ हरति संसारं मेधा बुद्धिः यद्विषया स हरिमेधास्तेन । असिजार्षः । श्रीकृष्णेन उक्तः परिसृत्य परिक्रम्य अद्वन्द्वपरोऽपि भगवदुपदेशेन दुःखसुखविनिर्मुक्तोऽपि स्नेहेन आर्द्रधीः सः अपक्रमे निर्गमसमये भगवत्पादयोः शिरो निधायाश्रुकलाभिः तत्पादौ न्यषिञ्चत् ॥ ४५ ॥ सुदुस्त्यजेति ॥ सुदुस्त्यजः स्नेहो यस्मिंस्तेन

श्रीभगवानुवाच ॥ गच्छोद्धव मयाऽऽदिष्टो वदर्याख्यं ममाश्रमम् ॥ तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ॥ ४१ ॥ ईक्षयाऽलकनन्दाया विधूताशेषकल्मषः ॥ वसानो वल्कलान्यङ्ग वन्यभुक् सुखनिस्पृहः ॥ ४२ ॥ तितिक्षुर्द्वन्द्वमात्राणां सुशीलः संयतेन्द्रियः ॥ शान्तः समाहितधिया ज्ञानविज्ञानसंयुतः ॥ ४३ ॥ मत्तोऽनुशिक्षितं यत्ते विविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव ॥ अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परम् ॥ ४४ ॥ श्रीशुक उवाच ॥ स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः ॥ शिरो निधायाश्रुकलाभिरार्द्रधीर्न्यषिञ्चदद्वन्द्वपरोऽप्यपक्रमे ॥ ४५ ॥ सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः ॥ कृच्छ्रं ययौ मूर्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः ॥ ४६ ॥ ततस्तमन्तर्हृदि संनिवेश्य गतो महाभागवतो विशालाम् ॥ यथोपदिष्टां जगदेकबन्धुना तपः समास्थाय हरेरगाद् गतिम् ॥ ४७ ॥

भगवता वियोगात् कातरो भीतः अत एव तं परिहातुमशक्नुवन् आतुरो विह्वलः सन् कृच्छ्रं कष्टं ययौ प्राप । ततश्च भर्तृपादुके तेनैव कृपया दत्ते मूर्ध्नि बिभ्रत् अतिनिर्बन्धरूपया तदाज्ञया तं पुनः पुनर्नमस्कृत्य बदरिकाश्रमं ययौ । अत्र च "पृष्ठतोन्वममं भर्तुः पादविश्लेषणाक्षमः ।" इत्यादितृतीयस्कन्धोपक्रमोक्तानुसारेण बदरिकाऽऽश्रमं गच्छन् भगवतः प्रभासयात्रामुपश्रित्य शनैः पृष्ठतो गतः सन्नुपसंहृतनिजकुलं भगवन्तमेकान्ते दृष्ट्वा तत्कालप्राप्तेन मैत्रेयेण सह पुनः कृपया भगवतोपदिष्टं तत्वमाकलय्य तदाज्ञातो गत इति द्रष्टव्यम् ॥ ४६ ॥ तत इति ॥ ततश्च तं भगवन्तमन्तर्हृदि हृदयमध्ये संनिवेश्य ध्यायन् महाभागवत उद्धवो विशालां बदरिकाश्रमं गतः सन् तत्र तपः समास्थाय कृत्वा जगदेकबन्धुना श्रीकृष्णेन यथोपदिष्टां तदामृतत्वं प्रतिपद्यमानो मयाऽऽत्मभूयाय च कल्पते वै इत्याद्युक्तप्रकारामपरोक्षानुभवलक्षणां हरेर्गतिमगात् ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य इति ॥ आनन्दरूपो भगवांस्तत्समुद्रो वेदस्ततः संभृतं निःसारितम् ।यद्वा । आनन्दसमुद्रो भगवद्भक्तिमार्गस्तास्मिन् संभृतमेकीकृतं योगेश्वरसेविताङ्घ्रिणा कृष्णेन भागवताय उद्धवाय भाषितमेतज्ज्ञानामृतं यः सच्छ्रद्धया आसेव्य ईषदपि सेवित्वा वर्तते स विमुच्यत इति तु किं वक्तव्यं यतस्तत्सङ्गेन जगदपि विमुच्यत इत्यर्थः ॥ ४८ ॥ भवभय- मिति ॥ भवः संसारः भयं च जरारोगादिनिमित्तं तदुभयं निवृत्तानां प्रवृत्तानां च भृत्यवर्गाणां यथायोग्यमपहन्तुं यो निगमकृत् वेदकर्ता अमृतद्वयमुपजह्रे उद्धृतवान् तत्र ज्ञानविज्ञानयोः साररूपं वेदसारं वेदाख्यपुष्पोद्यानस्य मकरन्दमेकं भृङ्गवदुपजह्रे । भृङ्गो यथा पुष्पमकोपयन्नेवामृतं तत उपहरति तद्वत् । तथोदधितश्चैकमुपजह्रे तच्चोभयं यथातथं भृत्यवर्गानपाययत् । तं पुरुषमृषभं पुरुषोत्तममाद्यं जगत्कारणं कृष्णसंज्ञमहं नतोऽस्मि । मालिनी छन्दः ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ एकादशैकोनत्रिंशे व्यधाद्भक्तसहायकः ॥ २९ ॥ त्रिंशे स्वायतनं गन्तुं मौसलच्छलतो हरिः ॥ निजं कुलं संजहार श्लोकास्तत्र खमार्गणाः ॥ उवाचेति चतुर्कं च पञ्चर्वोणा

य एतदानन्दसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितम् ॥ कृष्णेन योगेश्वरसेविताङ्घ्रिणा सच्छ्रद्धयाऽऽसेव्य जगद्विमुच्यते ॥४८॥ भवभयमपहन्तुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृङ्गवद्वेदसारम् ॥ अमृतमुदधितश्चापाययद्भृत्यवर्गान् पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि ॥ ४९ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥ राजोवाच ॥ ततो महाभागवत उद्धवे निर्गते वनम् ॥ द्वारवत्यां किमकरोद्भगवान् भूतभावनः ॥ १ ॥ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः ॥ प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् ॥ २ ॥ प्रत्याक्रष्टुं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नम् ॥ यच्छ्रीर्वाचां जनयति रतिं किं नु मानं कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ॥ ३ ॥

अनुष्टुभः ॥ ३० ॥ तत इति ॥ महाभागवत उद्धवे वनं प्रति निर्गते सति द्वारवत्यां भूतभावनः भगवान् किमकरोत् ॥ १ ॥ ब्रह्मेति ॥ स्वकुले ब्रह्मशापेन उपसंसृष्टे उपद्रुते सति यादवर्षभः कृष्णः सर्वनेत्राणाम् उपलक्षणतया सर्वेन्द्रियाणाम् प्रेयसीं स्वतनुं कथमत्यजत् हरौ विप्रशापो न भवति तथापि यादवत्वानुकरणात्कथंचिन्मान्यः अतः तदेतत् कथमत्यजत् । यद्वा । केषांचिन्मुनीनां मते तस्य तनुत्यागः श्रूयते । तत्कथं सम्भवेत् । तत्तनोः सच्चिदानन्दरूपत्वेन त्यागासम्भवात् ॥ २ ॥ प्रत्याक्रष्टुमिति ॥ यत्र यस्मिन् वपुषि लग्नं नयनं प्रत्याक्रष्टुं परावर्त्तयितुमबला न शेकुः । यच्च कर्णरन्ध्रेण प्रविष्टं सत्सतामात्मनि लग्नं लिखितमिव तिष्ठति । ततो न सरति न निर्गच्छति । यस्य श्रीः शोभा संकीर्त्यमाना कवीनां वाचां रतिमुल्लासविशेषं जनयति तेषां मानं जगत्पूज्यतां जनयति इति तु किमु वक्तव्यम् । यच्च जिष्णोरर्जुनस्य रथे स्थितं दृष्ट्वा युधि मृतास्तत्साम्यं सारूप्यमीयुः प्रापुस्तद्वपुः कथमत्यजदिति पूर्वेणान्वयः । मन्दाक्रान्ता छन्दः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवीति ॥ दिवि सूर्यपरिवेषादीन् भुवि भूकम्पादीन् अन्तरिक्षे दिग्दाहादीन् महोत्पातान् स्वयमेवोत्पादितत्त्वेनान्यैर्दुष्प्रतीकारान् समुत्थितान् दृष्ट्वा कृष्णः सुधर्मायामासीनान् यदूनाह स्म ॥ ४ ॥ एत इति ॥ हे यदुपुङ्गवाः एते यमस्य केतवो ध्वजा इव मृत्युसूचकाः महोत्पाताः द्वारवत्यां दृश्यन्ते इति शेषः । अतो नः अस्माकमत्र मुहूर्तमपि न स्थेयम् ॥ ५ ॥ स्त्रिय इति ॥ इतः स्थानात् स्त्रियो बालाश्च वृद्धाश्च शङ्खोद्धारं तीर्थं व्रजन्तु । वयं यत्र प्रत्यक् पश्चिमवाहिनी सरस्वत्यस्ति तं प्रभासाख्यं तीर्थं यास्यामः ॥ ६ ॥ तत्रेति ॥ तत्राभिषिच्य स्नात्वा शुचयः सन्तः समाहिताः उपोष्य स्नपनालेपनार्हणैः देवताः पूजयिष्यामः ॥ ७ ॥ ब्राह्मणानिति ॥ ब्राह्मणैः कृतस्वस्त्ययना वयं महाभागान् ब्राह्मणान् गोभूहिरण्यादिभिः पूजयिष्यामः ॥ ८ ॥ विधिरिति ॥ एष तत्राभिषिच्येत्यादिनोक्तो विधिः प्रकारः अरिष्टघ्नः सर्वोपद्रवनिवारकः उत्तमं मङ्गलायनं

श्रीशुक उवाच ॥ दिवि भुव्यन्तरिक्षे च महोत्पातान् समुत्थितान् ॥ दृष्ट्वाऽऽसीनान् सुधर्मायां कृष्णः प्राह यदूनिदम् ॥४॥ श्रीभगवानुवाच॥ एते
घोरा महोत्पाता द्वार्वत्यां यमकेतवः ॥ मुहूर्तमपि न स्थेयमत्र नो यदुपुङ्गवाः ॥५॥ स्त्रियो बालाश्च वृद्धाश्च शङ्खोद्धारं व्रजन्त्वितः ॥ वयं प्रभासं
यास्यामो यत्र प्रत्यक् सरस्वती ॥६॥ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः ॥ देवताः पूजयिष्यामः स्नापनालेपनार्हणैः ॥७॥ ब्राह्मणांस्तु
महाभागान्कृतस्वस्त्ययना वयम् ॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ॥ ८ ॥ विधिरेष ह्यरिष्टघ्नो मङ्गलायनमुत्तमम् ॥ देवद्विजगवां पूजा
भूतेषु परमो भवः ॥९॥ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः ॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः ॥१०॥ तस्मिन्भगवताऽऽदिष्टं यदुदेवेन
यादवाः ॥ चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितम् ॥ ११ ॥ ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु ॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः
॥ १२ ॥ महापानाभिमत्तानां वीराणां दृप्तचेतसाम् ॥ कृष्णमायाविमूढानां संघर्षः सुमहानभूत् ॥ १३ ॥

मङ्गलप्रापकश्च हि यस्माद्देवद्विजगवां पूजाभूतेषु देवाद्याराधकेषु परमो भव उद्भवहेतुः ॥ ९ ॥ इतीति ॥ सर्वे यदुवृद्धाः मधुद्विषः श्रीकृष्णस्य वाक्यमाकर्ण्य तथास्त्वित्यङ्गीकृत्य नौभिः समुद्रमुत्तीर्य रथैः प्रभासं ययुः ॥ १० ॥ तस्मिन्निति ॥ यादवाः तस्मिन् प्रभासे यद्यदुदेवेन भगवता आदिष्टं तत्सर्वश्रेयोपबृंहितं सर्वं श्रेयःसाधनं परमया भक्त्या चक्रुः । श्रेयोपबृंहितमित्यत्र सन्धिरार्षः ॥ ११ ॥ तत इति ॥ ततस्तस्मिन् स्थाने दिष्टेन दैवेन विभ्रंशितधियस्ते यादवाः अन्यथा तत्र स्थाने तत्कदापि नापश्यन् । यस्य द्रवै रसैः मतिः भ्रश्यते तन्महत् महामदजनकं पीयते इति पानम् तत् मधु मधुरं मैरेयकं मद्यविशेषं पपुः ॥१२॥ महापानेति ॥ महापानेन अभितो मत्तानां दृप्तचेतसां कृष्णमायया विमूढानामिति मुख्यो हेतुः । वीराणां यादवानां सुमहान् संघर्षः कलहः अभूत् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युयुधुरिति ॥ ततश्च ते क्रोधेन संरब्धाः क्षोभयुक्ताः आततायिनः शस्त्रपाणयः वेलायां समुद्रतीरे धनुरादिभिः परस्परं युयुधुः । तङ्भाव आर्षः ॥ १४ ॥ पतदिति ॥ पतन्त्य-इतस्ततश्चलन्त्यः पताका येषु तै रथकुञ्जरादिभिरश्वतरान्तैः मिथः समेत्य सुदुर्मदाः ते शरैः न्यहन् न्यघ्नन्नित्यर्थः । आर्षः प्रयोगः । तत्र दृष्टान्तमाह । यथा दद्भिर्दन्तैः द्विपा गजा युध्यन्ते तद्वदिति ॥ १५ ॥ मिथः समेत्येत्यस्य प्रपञ्चः—प्रद्युम्नेति ॥ युधि रूढमत्सरौ प्रद्युम्नसाम्बौ इत्यादियोधानां मध्ये गदौ द्वौ तत्रैकः कृष्णभ्राता एकश्च पुत्रः सुमित्रः सुरथश्च तौ । दैर्घ्यमार्षम् । असुरथनामा वा कश्चित् । समीयतुः युयुधाते॥ १६ ॥अन्ये इति ॥ अन्ये च ये निशठादयः तेऽपि मुकुन्देन मायया विमोहिता अत एव मदान्धेन मदतमसा बलात्कारिताः । यद्वा । मदेन अन्धवत्कारिताः । यद्वा।मदेनान्धकारः जातो येषाम् । इतच् । अन्योऽन्यमासाद्य जघ्नुः॥ १७॥दाशार्हेति ॥ दाशार्हादयो नव तत्तद्वंश्या

युयुधुः क्रोधसंरब्धा वेलायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥१४॥ पतत्पताकै रथकुञ्जरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः समेत्याश्वतरैः सुदुर्मदा न्यहन् शरैर्दद्भिरिव द्विपा वने ॥१५॥ प्रद्युम्नसाम्बौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः ॥ १६ ॥ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्योऽन्यमासाद्य मदान्धकारिता जघ्नुर्मुकुन्देन विमोहिता भृशम् ॥ १७ ॥ दाशार्हवृष्ण्यन्धकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः ॥ विसर्जनाः कुकुराः कुन्तयश्च मिथस्ततस्तेऽथ विसृज्य सौहृदम् ॥ १८ ॥ पुत्रा अयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः ॥ मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहञ्ज्ञातय एव मूढाः ॥ १९ ॥ शरेषु क्षीयमाणेषु भज्यमानेषु धन्वसु ॥ शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः ॥ २० ॥ ता वज्रकल्पा ह्यभवन्परिघा मुष्टिना भृताः ॥ २१ ॥ जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते ॥ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः ॥ हन्तुं कृतधियो राजन्नापन्ना आततायिनः ॥ २२ ॥

अर्बुदाः माथुराः शूरसेनाश्च तत्तद्देशभवाः इत्याद्याः ते सर्वे सौहृदं स्नेहं विसृज्य त्यक्त्वा मिथोऽयुध्यन्नित्यस्यापकर्षः ॥१८॥ पुत्रा इति ॥ एवमेव मूढाः सन्तः पुत्राः पितृभिरयुध्यन् । तङ्भाव आर्षः । भ्रातृभिश्च भ्रातरः स्वस्रीयदौहित्रपितृव्यमातुलैः मातुलमातामहभ्रातृभागिनेयाः अयुध्यन् । शेषान्वयः स्पष्टः । अहन् अघ्नन् आर्षमेकत्वम् ॥१९॥शरेष्विति ॥ धन्वसु धनुष्षु मुष्टिभिः एरकाः विप्रशापाऽऽपतितलोहमुसलचूर्णप्रभवान् तृणविशेषान् जह्रुः जगृहुः । शेषं स्पष्टम्॥२०॥ता इत्यर्द्धम्॥ता एरकाः मुष्टिना भृताः धृताः वज्रतुल्याः परिघा लोहदण्डा एव अभवन् ॥ २१ ॥ जघ्नुरिति सार्द्धम् ॥ हे राजन् ततस्ते यादवास्तैः परिघैः द्विषः जघ्नुः । ततस्ते कृष्णेन वार्यमाणास्तु कृष्णमायाविमोहितास्ते तं कृष्णं बलभद्रं च प्रत्यनीकं प्रतिपक्षं मन्यमानाः आततायिनो हिंसापराः नानास्त्रैर्हन्तुं कृतधियः आपन्नाः योद्धुं प्राप्ताः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथेति ॥ अथ हे कुरुनन्दन तौ रामकृष्णावपि संक्रुद्धौ अत एरकामुष्टिरूपौ परिघौ उद्यम्य चरन्तौ । यद्वा । उद्यम्य उद्यतौ भूत्वा एरकामुष्टय एव परिघा ययोस्तौ युधि तान् जघ्नतुः ॥ २३ ॥ ब्रह्मेति ॥ ब्रह्मशापेनोपसृष्टानां व्याप्तानां तथा कृष्णमायया आवृतात्मनां तेषां स्पर्धानिमित्तः क्रोधः कुलक्षयं निन्ये । वैणवो वेणुसंघर्षोत्पन्नोऽग्निर्यथा वेणुवनं क्षयं नयति तद्वदिति ॥ २४ ॥ एवमिति ॥ एवं सर्वेषु स्वेषु लोकेषु कुलेषु नष्टेषु सत्सु केशवः अवशेषितो भुवो भारोऽवतारित इति मेने ॥ २५ ॥ राम इति ॥ रामः समुद्रस्य वेलायां तीरे पौरुषं परमपुरुषध्यानलक्षणं योगमास्थाय तमेवाह आत्मनि परमात्मनि आत्मानं संयोज्य तदेकतापन्नं ध्यात्वा मानुष्यं भूर्लोकं मनुष्यरूपतां वा तत्याज ॥ २६ ॥ रामेति ॥ रामस्य निर्याणं स्वलोकगमनम् अंशरूपेण पातालगमनं च आलोक्य भगवानपि तूष्णीं पिप्पलवृक्षमासाद्य पृष्ठतोऽवष्टभ्य धरोपस्थे भूतले

अथ तावपि संक्रुद्धावुद्यम्य कुरुनन्दन ॥ एरकामुष्टिपरिघौ चरन्तौ जघ्नतुर्युधि ॥ २३ ॥ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनाम् ॥ स्पर्द्धा-
क्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वने ॥ २४ ॥ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः ॥ अवतारितो भुवो भार इति मेनेऽवशेषितः ॥ २५ ॥
रामः समुद्रवेलायां योगमास्थाय पौरुषम् ॥ तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि ॥ २६ ॥ रामनिर्याणमालोक्य भगवान् देवकीसुतः ॥
निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलम् ॥ २७ ॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया ॥ दिशो वितिमिराः कुर्वन् विधूम इव पावकः
॥ २८ ॥ श्रीवत्साङ्कं घनश्यामं तप्तहाटकवर्चसम् ॥ कौशेयाम्बरयुग्मेन परिवीतं सुमङ्गलम् ॥ २९ ॥ सुन्दरस्मितवक्त्राब्जं नीलकुन्तलम-
ण्डितम् ॥ पुण्डरीकाभिरामाक्षं स्फुरन्मकरकुण्डलम् ॥ ३० ॥ कटिसूत्रब्रह्मसूत्रकिरीटकटकाङ्गदैः ॥ हारनूपुरमुद्राभिः कौस्तुभेन विराजितम्
॥ ३१ ॥ वनमालापरीताङ्गं मूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौ दक्षिणे पादमासीनं पङ्कजारुणम् ॥ ३२ ॥ मुसलावशेषायःखण्डकृतेषुर्लुब्धको
जरा ॥ मृगास्याकारं तच्चरणं विव्याध मृगशङ्कया ॥ ३३ ॥

निषसाद उपविष्टवान् ॥ २७ ॥ बिभ्रदिति ॥ चतुर्भुजं स्वया प्रभया भ्राजिष्णु प्रकाशमानं रूपं बिभ्रत् बिभ्राणः तथा तयैव प्रभया विधूमः पावक इव दिशो वितिमिराः कुर्वन् निषसादेति सर्वत्रानुषङ्गः ॥ २८ ॥ श्रीवत्सेति ॥ श्रीवत्सः अङ्कः चिह्नमुरसि यस्य तत् घनश्यामं तप्तहाटकस्य सुवर्णस्येव वर्चो यस्य तेन कौशेयाम्बरयुग्मेन परिवीतं कटिप्रदेशे उपरि चावृतम् । सुमङ्गलमतिसुन्दरम् ॥ २९ ॥ सुन्दरेति ॥ सुन्दरस्मितं वक्त्राब्जं यस्मिंस्तत् नीलैः कुन्तलैर्मण्डितं पुण्डरीके इवाभिरामे सुन्दरे अक्षिणी यस्मिन् तत् स्फुरन्मकरकुण्डलम् ॥ ३० ॥ कटीति ॥ कटिसूत्रादिभिर्विराजितं तत्र मुद्राः अङ्गुलीयकानि ॥ ३१ ॥ वनमालेति ॥ वनमालया परीतान्यङ्गानि यस्मिन् तत् मूर्तिमद्भिः निजायुधैश्च विराजितं पङ्कजमिवारुणं वामं पादं दक्षिणे ऊरौ कृत्वा आसीनं रूपं बिभ्रत् निषसाद ॥ ३२ ॥ मुसलेति ॥ तदा चूर्णितमुसलादवशेषं यदयो लोहं तस्य खण्डेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत इषुर्येन सः जरा नाम कश्चिल्लुधको मृगयुः मृगास्यमिवाकारो यस्य तं तस्य भगवतश्चरणं मृगोऽयमिति शङ्कमान इषुणा विव्याध । अत्र स्पर्शनमात्रमभूत् न व्यधनम् । तदङ्गस्य सच्चिदानन्दरूपत्वात् अन्यथा पादयोः पपातेत्यत्र शरं निरकाशयत् इत्युक्तं स्यात् ॥ ३३ ॥ चतुर्भुजमिति ॥ तं चतुर्भुजं पुरुषं दृष्ट्वा यतो बाणविसर्गेण स कृतकिल्बिषोऽत एव भीतः सन् शिरसा स्पृशन् असुरद्विषः भगवतः पादयोः पपात ॥ ३४ ॥ अजानतेति ॥ हे मधुसूदन हे उत्तमश्लोक हे अनघ पापेनापि अजानता मया कृतमिदं पापरूपस्य मे ममागः क्षन्तुमर्हसि ॥ ३५ ॥ यस्येति ॥ हे विष्णो हे प्रभो वृद्धाः यस्यानुस्मरणं नृणामज्ञानध्वान्तनाशनं वदन्ति । तस्य ते मयाऽसाधु पापं कृतम् ॥ ३६ ॥ तदिति ॥ तत्तस्मात् कृतापराधत्वात् हे वैकुण्ठ मा मां पापिष्ठमाशु जहि।तत्फलमाह यथेति।यथा सतामतिक्रममपराधं पुनरहं न कुर्याम् ॥ ३७ ॥ यस्येति ॥ यस्य तवात्मसंयोगेन स्वाधीनया मायया रचितं त्वन्मायया पिहितदृष्टयो लुप्तविवेकाः विरिञ्चो ब्रह्मा तथास्य तनया रुद्रादयश्च ये चान्ये गिरां पतयो वेदद्रष्टारस्तेऽपि न विदुः । तस्य आचि-

चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः ॥ भीतः पपात शिरसा पादयोरसुरद्विषः ॥३४॥ अजानता कृतमिदं पापेन मधुसूदन ॥ क्षन्तुमर्हसि पापस्य उत्तमश्लोक मेऽनघ ॥ ३५ ॥ यस्यानुस्मरणं नृणामज्ञानध्वान्तनाशनम् ॥ वदन्ति तस्य ते विष्णो मयाऽसाधु कृतं प्रभो ॥ ३६ ॥ तन्माशु जहि वैकुण्ठ पाप्मानं मृगलुब्धकम् ॥ यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमम् ॥ ३७ ॥ यस्याऽऽत्मयोगरचितं न विदुर्विरिञ्चो रुद्रादयोऽस्य तनयाः पतयो गिरां ये ॥ त्वन्मायया पिहितदृष्टय एतदञ्जः किं तस्य ते वयमसद्गतयो गृणीमः ॥ ३८ ॥ श्रीभगवानुवाच ॥ मा भैर्जरे त्वमुत्तिष्ठ काम एष कृतो हि मे ॥ याहि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदम्॥३९॥इत्यादिष्टो भगवता कृष्णेनेच्छाशरीरिणा ॥ त्रिः परिक्रम्य तं नत्वा विमानेन दिवं ययौ ॥ ४० ॥

न्त्यमायस्य ते एतत् ब्रह्मशापादिकम् असद्गतयः पापयोनयो वयमञ्जः साक्षात् किं गृणीमः कथं वर्णयामः । अतो मां जहीति । अत्र तृतीयस्कन्धे निम्लोचति रवावित्युक्तेः सायङ्काले यदूनां संग्रामः तदनन्तरं भगवान् सरस्वतीतटे निषसाद तदैव मृगवधार्थं मृगयुरागतः इति प्रतीयते तच्च नोपपद्यते । कोटिशो यदूनां संग्रामे भीरुजातीनां मृगाणां तदैवागमनं तत्र मृगयोर्मृगयाकालज्ञातुरागमनं चासंभावितम् अतो यदूनां तात्कालिको वधो मिथ्याभूतोऽपि भगवता वैराग्यार्थं प्रत्यायितो वस्तुतो मधूनि पीत्वा देवेष्वन्तर्हितेषु निर्जने देशे लुब्धक आगतः॥ ३८॥मेति ॥ हे जरे त्वं मा भैः भयं मा कुरु।" बहुलं छन्दसि " इति बाहुलकात्सिचः परस्यापृक्तहल ईट् न। उत्तिष्ठ हि यस्मात् एष कामः मत्ताडनविषयकसंकल्पो मे मयैव कृतः अतः मदनुज्ञातः त्वं सुकृतिनां योग्यं पदं स्थानं स्वर्गं याहि॥ ३९ ॥इतीति ॥ इच्छया शरीरिणा भगवता कृष्णेन आदिष्टः सः जराख्यः त्रिः परिक्रम्य तं श्रीकृष्णमित्यादि यथाश्रुतमग्रेऽन्वयः । इच्छाशरीरिणा इत्यस्यायं भावः । शुद्धसत्वमयीं निजां मूर्त्तिमन्तर्द्धाय तत्प्रतिकृत्यैवं विडम्बनमात्रं कृतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतच्च देवादयो ब्रह्ममुख्या इत्यादिना स्फुटीकरिष्यति ॥ ४० ॥ दारुक इति ॥ दारुकः कृष्णस्य पदवीं स्थानमन्विच्छन्नन्वेषयन् कृष्णधारितायाः तुलसिकायाः आमोदो यस्मिंस्तं वायुमाघ्राय तेन तां पदवीमधिगम्य अनुमाय तदभिमुखं ययौ ॥ ४१ ॥ तमिति ॥ तत्र तिग्मद्युभिरतिप्रकाशैः आयुधैर्वृतम् अश्वत्थमूले कृतकेतनं कृतनिवासं तं पतिं भगवन्तं विलोक्येति शेषः । स्नेहेन प्लुतो व्याप्त आत्मा यस्य सः अत एव बाष्पमश्रु लोचनयोर्यस्य स रथादवप्लुत्य तस्य पादयोर्निपपात ॥४२॥ अपश्यत इति ॥ स्पष्टम् ॥ ४३ ॥ इतीति ॥ हे राजेन्द्र सूते इत्येवं ब्रुवति सति तस्य उदीक्षतः ऊर्ध्वं पश्यतः सतः । शता आर्षः । गरुडलाञ्छनो गरुडध्वजः अश्वध्वजसहितो रथः खमुत्पपात ऊर्ध्वमगात् ॥ ४४ ॥ तमिति ॥ दिव्यानि विष्णुप्रहरणानि भगवदायुधानि च तं रथमन्वगच्छन् रथगमनानन्तरं स्वलोकं गतानीत्यर्थः । तेन रथादिगमनदर्शनेनातिविस्मित आत्मा

दारुकः कृष्णमदवीमन्विच्छन्नधिगम्य ताम् ॥ वायुं तुलसिकामोदमाघ्रायाभिमुखं ययौ ॥ ४१ ॥ तं तत्र तिग्मद्युभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिम् ॥ स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य स बाष्पलोचनः ॥ ४२ ॥ अपश्यतस्त्वच्चरणाम्बुजं प्रभो दृष्टिः प्रनष्टा तमसि प्रविष्टा ॥ दिशो न जाने न लभे च शान्तिं यथा निशायामुडुपे प्रनष्टे ॥ ४३ ॥ इति ब्रुवति सूते वै रथो गरुडलाञ्छनः ॥ खमुत्पपात राजेन्द्र साश्वध्वज उदीक्षतः ॥ ४४ ॥ तमन्वगच्छन् दिव्यानि विष्णुप्रहरणानि च ॥ तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥ ४५ ॥ गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः ॥ संकर्षणस्य निर्याणं बन्धुभ्यो ब्रूहि मद्दशाम् ॥४६॥ द्वारकायां च न स्थेयं भवद्भिः स्वस्वबन्धुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥ ४७ ॥ स्वं स्वं परिग्रहं सर्वे आदाय पितरौ च नः ॥ अर्जुनेनाविताः सर्व इन्द्रप्रस्थं गमिष्यथ ॥ ४८ ॥ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥ ४९ ॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः ॥ तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीम् ॥ ५० ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे यदुकुलसंक्षयो नाम त्रिंशोऽध्यायः ॥ ३० ॥

मनो यस्य तं जनार्दन आह स्म ॥ ४५ ॥ गच्छेति ॥ हे सूत त्वं द्वारवतीं गच्छ । तत्र च गत्वा ज्ञातीनां सर्वयादवानां मिथो निधनं रामस्य निर्याणं योगमार्गेण स्वर्लोकगमनं मद्दशां स्वलोकगमनोद्योगं च बन्धुभ्यो ब्रूहि । मद्दशामितीच्छाशरीराभिप्रायेण ॥ ४६ ॥ द्वारकायामिति ॥ स्वं स्वमिति च । स्पष्टम् ॥ ४७ ॥ ॥ ४८ ॥ त्वमिति ॥ मन्मायारचनामिति निजमूर्तेरन्तर्हितत्वाद्वृथा शोकं मा कुर्वित्यर्थः । शेषं द्वयं स्पष्टम् ॥ ४९ ॥ ५० ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो निरमात्त्रिंश एकादशस्य च ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकत्रिंशे निजं धाम ययौ कृष्णस्तथा नुतम् ॥ वसुदेवादयोऽप्यत्र श्लोकाः सार्द्धाष्टबार्हिवः ॥ उवाचेत्येकं सपादा एकत्रिंशदनुष्टुभः ॥ ३१ ॥ अथेति सार्द्धद्वयम् ॥ अथ दारुकगमनानन्तरं तत्र ब्रह्मा आगमत् । भवान्या समं भवश्चागमत् । तथा भगवतो निर्याणं द्रष्टुकामाः परमोत्सुकाः सन्तः महेन्द्रप्रमुखा देवाः प्रजेश्वरेश्वरैर्मरीच्यादिभिः सहिता मुनयः सनकादयश्च पितरः सिद्धाद्याश्च द्विजा गरुडलोकवासिनः पक्षिणः मैत्रेयादयो ब्राह्मणा वा आगमन् ॥१॥२॥ गायन्त इति सार्द्धम् ॥ परमया भक्त्या युताः शौरेर्हरेः कर्माणि जन्म च गायन्तः गृणन्तः स्तुवन्तश्च विमानावलिभिः नभः सङ्कुलं व्याप्तं कुर्वन्तस्ते पुष्पवर्षाणि ववृषुः ॥ ३ ॥ भगवानिति ॥ भगवान् पितामहं ब्रह्माणं तथाऽऽत्मनः स्वस्य विभूतिभूतान् इन्द्रादींश्चागतान् वीक्ष्य प्रेक्षणादिभिस्तान् सभाजयित्वा आत्मनि चात्मानं संयोज्य स्वरूपानुसन्धानपरो भूत्वा पद्मसदृशे नेत्रे न्यमीलयत् । अयं भावः । पूर्वं ब्रह्मादिभिः सलोकान् लोकपालान्नः पाहि । वैकुण्ठकिङ्करान् इति प्रार्थितत्वात् इदानीं च स्वं स्वं लोकं प्रति नेतुमागतान् बहुषु च तेषु दाक्षिण्यात्तान् वञ्चयितुं समाधिमिव

श्रीशुक उवाच ॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः ॥ महेन्द्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥ पितरः सिद्धगन्धर्वा विद्याधरमहोरगाः ॥१॥ चारणा यक्षरक्षांसि किन्नराप्सरसो द्विजाः ॥ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः ॥२॥ गायन्तश्च गृणन्तश्च शौरेः कर्माणि जन्म च ॥ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः ॥ कुर्वन्तः संकुलं राजन् भक्त्या परमया युताः ॥३॥ भगवान् पितामहं वीक्ष्य विभूतीरात्मनो विभुः ॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ॥ ४ ॥ लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलम् ॥ योगधारणयाऽऽग्नेय्याऽदग्ध्वा धामाविशत् स्वकम् ॥ ५ ॥ दिवि दुन्दुभयो नेदुः पेतुः सुमनसश्च खात् ॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ॥ ६ ॥ देवादयो ब्रह्ममुख्या न विशन्तं स्वधामनि ॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥ ७ ॥

पद्मनेत्रे न्यमीलयत् इति ॥ ४ ॥ लोकेति ॥ लोकानामभिरामां मनोहरामत एव धारणाध्यानयोर्मङ्गलं शोभनं विषयं स्वतनुमाग्नेय्या योगधारणया अदग्ध्वैव तनुसहित एव स्वकं धाम वैकुण्ठाख्यमाविशत् जगाम । यद्वा । धारणाध्यानयोर्मङ्गलं यथा स्यात्तथा शुद्धजाम्बूनदमिव स्वतनुं दग्ध्वा दाहोत्तीर्णसुवर्णमिव स्वतनुमादायैव धामाविशत् । अत्र योगधारणोद्भूताग्निद्वारैव वपुषोऽन्तर्द्धानविवक्षा जहौ तच्च कलेवरमित्यादिसंवादादित्याहुः । शरीरेण सहैव गमनमित्यन्ये । सर्वशक्तिशालिनः प्रभोरुभयथापि न विरोधः ॥५॥ दिवीति ॥ पूर्वार्द्धं स्पष्टम् । भूमेः सकाशात् सत्यादयोऽपि तं श्रीकृष्णमनुजग्मुः । कलौ सत्यादितिरोधानात् ॥६॥ देवेति ॥ तदा श्रीकृष्णेऽन्तर्हिते सति कुतो गत इति वितर्कयन्तोऽपि ब्रह्ममुख्या देवादयः स्वधाम विशन्तम् अविज्ञातगतिं श्रीकृष्णं न ददृशुः । ततश्चातिविस्मिता बभूवुः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौदामन्या इति ॥ आकाशे अभ्रमण्डलं हित्वा यान्त्याः सौदामन्या विद्युतो गतिर्यथा मर्त्यैर्न लक्ष्यते देवैस्तु लक्ष्यते तथा भूमण्डलं हित्वा गच्छतः श्रीकृष्णस्य गतिः देवैरपि न लक्षिता किंतु तत्पार्षदैरेवेत्यर्थः ॥ ८ ॥ ब्रह्मेति ॥ स्पष्टम् ॥९॥ राजन्निति ॥ परस्य सर्वकारणस्य परमेश्वरस्य श्रीकृष्णस्य तनुभृत्सु यादवादिषु जननाप्ययेहाः आविर्भावतिरोभावचेष्टाः मायया विडम्बनमनुकरणमात्रमवेहि जानीहि। ननु जीववत्प्राकृतदेहादिसम्बन्धोऽस्ति। येन तद्दाहादिचिन्तया खेदो युक्तः स्यादित्याशयः। तत्र दृष्टान्तमाह। यथा नटस्येति। नटो यथा अविकृत एव नानारूपैर्जन्मादीन् विडम्बयति तद्वद् भगवानपीत्यर्थः। विश्वसर्गनिरोधादिष्वप्यसावविकृत एवास्त इत्याह। सृष्ट्वेति। आत्मना स्वयमेवेदं जगत्सृष्ट्वा अन्तर्यामित्वेनानुविश्य तत्र विहृत्य क्रीडित्वा अन्ते च द्विपरार्धावसाने सर्वं स्वस्मिन् संहृत्य उपरतः निवृत्तव्यापार आत्ममहिना स्वमहिम्ना आत्मानन्दानुभवसद्रूपेणास्ते ॥ १० ॥ मर्त्येनेति ॥ यमेन स्वलोकं प्रति नीतं गुरुसुतं मर्त्येन तेनैव शरीरेणोपलक्षितं य आनयत् आनीतवान्। यश्च शरणदः शरणागतायास्तव मातू

सौदामन्या यथाऽऽकाशे यान्त्या हित्वाऽभ्रमण्डलम् ॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥८॥ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः ॥ विस्मितास्तां प्रशंसन्तः स्वं स्वं लोकं ययुस्तदा ॥ ९ ॥ राजन् परस्य तनुभृज्जननाप्ययेहा मायाविडम्बनमवेहि यथा नटस्य ॥ सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिमोपरतः स आस्ते ॥ १० ॥ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धम्॥जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने स्वरनयद् मृगयुं सदेहम् ॥११॥ तथाऽप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥ १२ ॥ य एतां प्रातरुत्थाय कृष्णस्य पदवीं पराम् ॥ प्रयतः कीर्त्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमाम् ॥ १३ ॥

रक्षकस्त्वां च ब्रह्मास्त्रदग्धं रक्षितवान्। यश्चान्तकानामप्यन्तकं मृत्युंजयमीशं श्रीरुद्रं बाणसङ्ग्रामे जितवान् मृगयुं लुब्धकं यः स्वः स्वर्गमनयत् निन्ये सोऽसौ स्वावने स्वस्य स्वानां यदूनां चावने रक्षणे अनीशः असमर्थः किम् ॥ ११ ॥ तथापीति ॥ एवमुक्तप्रकारेणाशेषस्य जगतः स्थितिसंभवाऽप्ययेषु अनन्यहेतुर्निरपेक्षक एव कारणं स्वयं यत् यस्मात् अशेषशक्तिधृक् तथापि मर्त्येन लोकेन किं न किंचित्कार्यमिति स्वस्थानामात्मनिष्ठानां दिव्यां गतिं प्रदर्शयन् शिक्षयितुम् अन्यथा तेऽपि दिव्यां गतिमनादृत्य योगबलेन देहसिद्धिं विधाय रन्तुमेव यतेरंस्तन्मा भूदित्याशयः। अतः मर्त्येन मनुष्यलोके स्थित्या किम् इति विचार्य यादवान् संहृत्य शेषितमवशेषितं निजं वपुरत्र स्थापयितुं भगवान् नैच्छत् अन्तर्दधौ इत्यर्थः। मर्त्येन किमित्यस्य उभयत्रान्वयः ॥ १२ ॥ य इति ॥ यः प्रातरुत्थाय प्रयतः प्रयत्नवान् सन् कृष्णस्यैतामुक्तप्रकारां पदवीं वैकुण्ठगमनरूपां भक्त्या कीर्तयेत् इत्यनुक्षणं शृणुयात् स्मरेद्वा सतामनुत्तमां सर्वोत्तमां वैकुण्ठाख्यां पदवीमेव प्राप्नोति ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दारुक इति सार्द्धम् ॥ हे नृप कृष्णेन विच्युतो रहितः दारुकः द्वारकामेत्य गत्वा वसुदेवोग्रसेनयोश्चरणौ पतित्वा अस्रैः अश्रुभिस्तौ न्यषिञ्चत् । ततः कृत्स्नशः सर्वेषां वृष्णीनां निधनं कथयामास ॥ १४ ॥ तदिति सार्द्धम् ॥ तत्तेषां निधनं श्रुत्वा उद्विग्नं भीतं हृदयं येषां ते अत एव शोकेन विमूर्च्छिताः । मुख्यं हेतुमाह । कृष्णविश्लेषेण विह्वलाः ते जना आननं घ्नन्तस्ताडयन्तो यत्र व्यसवो मृता ज्ञातयः शेरते तत्रैव जग्मुः ॥ १५ ॥ देवकीति सार्द्धम् ॥ देवकी रोहिणी च तथा वसुदेवश्च एते त्रयो रामकृष्णौ स्वसुतावपश्यन्तः शोकेन आर्त्ताः स्मृतिं चेतनां जहुः मूर्छिता जाताः । यतो भगवद्विरहेणातुरा अतस्तत्र प्रभासे प्राणांश्च जहुः ॥ १६ ॥ उपगुह्येति ॥ अन्याश्च स्त्रियः तांस्तान् स्वस्वपतीन् उपगुह्य आलिङ्ग्य चितामारुरुहुः । एतद्वक्ष्यमाणं च अवस्तुभूतमेव ॥ १७ ॥ वसुदेवेति ॥ वसुदेवपत्न्यः तद्गात्रमालिङ्ग्याग्निमाविशन् । हरेः स्नुषाः पुत्रभार्याः

दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः ॥ पतित्वा चरणावस्रैर्न्यषिञ्चत्कृष्णविच्युतः ॥ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप ॥ १४ ॥
तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्च्छिताः ॥ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः॥ व्यसवः शेरते यत्र ज्ञातयो घ्नन्त आननम् ॥ १५ ॥
देवकी रोहिणी चैव वसुदेवस्तथा सुतौ ॥ कृष्णरामावपश्यन्तः शोकार्ता विजहुः स्मृतिम् ॥ प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः ॥ १६ ॥
उपगुह्य पतींस्तांस्तांश्चितामारुरुहुः स्त्रियः ॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ॥ १७ ॥ वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः ॥ कृष्णपत्न्योऽविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ १८ ॥ अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः ॥ आत्मानं सान्त्वयामास कृष्णगीतैः सदुक्तिभिः ॥ १९ ॥ बन्धूनां नष्टगोत्राणामर्जुनः साम्परायिकम् ॥ हतानां कारयामास यथावदनुपूर्वशः ॥ २० ॥ द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् ॥ वर्जयित्वा महाराज श्रीमद्भगवदालयम् ॥ २१ ॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्याऽशेषाऽशुभहरं सर्वमङ्गलमङ्गलम् ॥ २२ ॥

प्रद्युम्नादीनालिङ्ग्याग्निमाविशन् । कृष्णपत्न्यो रुक्मिण्याद्याः कृष्णास्यान्तर्धानात्तदात्मिकास्तमेव ध्यायन्त्यः अग्निमाविशन् ॥ १८ ॥ अर्जुन इति ॥ प्रेयसः प्रियतमस्य सख्युः कृष्णस्य विरहेणातुरो विह्वलोऽप्यर्जुनः सदुक्तिभिः सत्या यथार्था उक्तयो येषु तैः कृष्णगीतैः शोकमोहादिनिरासकैः श्रीगीतावचनैः आत्मानं सान्त्वयामास समाहितमकरोत् ॥ १९ ॥ बन्धूनामिति ॥ नष्टगोत्राणां नष्टसंततीनां हतानां बन्धूनां यत्साम्परायिकं परलोकसाधनं दाहपिण्डोदकदानादि कर्म तत् यथावत् यथाविधि अनुपूर्वशः क्रमेणार्जुनः कारयामास ॥ २० ॥ द्वारकामिति ॥ हे महाराज श्रीमद्भगवतः आलयं वर्जयित्वा हरिणा त्यक्तां द्वारकां क्षणात् तस्मिन्नेव क्षणे समुद्रोऽप्लावयत् ॥ २१ ॥ नित्यमिति ॥ तत्र मन्दिरे भगवान् नित्यं सन्निहितो वर्तते अत एव स्मृतिमात्रेणैवाशेषाशुभहरं सर्वपापनिवर्तकं सर्वेभ्योऽपि मङ्गलेभ्यो मङ्गलावहेभ्यो मङ्गलं श्रेष्ठं तन्मन्दिरमिति शेषः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीति ॥ धनञ्जयोऽर्जुनः स्त्रीबालवृद्धानादाय इन्द्रप्रस्थं समावेश्य तत्र वज्राख्यमनिरुद्धपुत्रं राज्येऽभ्यषेचयत् । अत्र बालवृद्धाः यादवव्यतिरिक्ता ज्ञेयाः । शापस्य कुलविषयत्वात् मौसलादवशेषित इति वज्रस्यैव भगवदिच्छयावशेषश्रवणाच ॥२३॥ श्रुत्वेति ॥ पितामहाः युधिष्ठिरादयः त्वां तु वंशधरं राजानं कृत्वा महापथं हिमालयम् । स्फुटमन्यत् ॥२४॥ य इति ॥ यो मर्त्यः देवदेवस्य विष्णोः एतज्जन्म तत्कृतानि कर्माणि च श्रद्धया कीर्तयेदिति श्रवणस्मरणयोरप्युपलक्षणम् । स सर्वपापैः प्रमुच्यते ॥२५॥ इत्थमिति ॥ इत्थमेवं यथा त्वया श्रुतानि तथा हरेः भक्तदुःखहर्तुः भगवतो यो रुचिरोऽवतारस्तस्य वीर्याणि वीर्यसूचकानि शन्तमानि परमानन्दजनकानि अन्यत्र

स्त्रीबालवृद्धानादाय हतशेषान् धनञ्जयः ॥ इन्द्रप्रस्थं समावेश्य वज्रं तत्राऽभ्यषेचयत् ॥२३॥ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः ॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथम् ॥ २४ ॥ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥ कीर्त्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २५ ॥ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि ॥ अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥ २६ ॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

॥ समाप्तोऽयं एकादशस्कन्धः ॥

पुराणान्तरेषु इह अस्मिंश्च पुराणे श्रुतानि बाल्यचरितानि । चकारात् पौगण्डयौवनचरितानि च गृणन् कीर्तयन् शृण्वन् स्मरंश्च पुरुषः परमहंसानां गतौ प्राप्ये भगवति परां भक्तिं लभेत प्राप्नुयात् ॥ २६ ॥ अव्यक्तमक्षरमुपास्य बभूव कश्चित् स्वं लब्धवर्णमवगत्य कृतार्थमानी ॥ सद्यस्त्रिभङ्गललितस्फुरणादमन्दानन्दोत्थया जडतयैव वयं कृतार्थाः ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चरमेऽध्याय एकादशे व्यधात् ॥ ३१ ॥ ॥ छ ॥ ॥ छ ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वकीये
"लक्ष्मीवेङ्कटेश्वर" यन्त्रालयेऽङ्कित्वा प्रकाशितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...वादिक्रमार्गेण ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते एकादशस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते द्वादशस्कन्धः

प्रारभ्यते ।

यह ग्रन्थ सन् १८६७ के ऐक्ट २५ के अनुसार रजिष्टरी करके सब हक्क यन्त्राधिकारीने अपने स्वाधीन रक्खा है.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

द्वादशः स्कंधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीपरमेश्वराय नमः ॥ आनन्दधामनि चिदेकरसेऽद्वितीये तस्मिन्पदेऽस्तु मम चित्तमगोचरेऽपि ॥ यत्सद्व्रजस्थितिजुषां सुहृदां कुमारादीनामधीनमिव गोचरतामुपैति ॥ १ ॥ यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि निखिले जगति स्फुरन्तम् ॥ तावद्बलात्स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ २ ॥ प्रेम्णा मुकुन्दपदकञ्जयुगं प्रणम्य मातुः पितुश्च चरणौ प्रणिपत्य भक्त्या ॥ गङ्गासहायजरठो हरितोषहेतोः स्कन्धेऽन्तिमे सुगममन्वयमातनोति ॥ ३ ॥ प्रथमे भाविनः प्राह शुको मागधभूमिपान् ॥ मलीमसान्कलेर्दोषैः श्लोकाः सार्द्धास्त्रिर्वार्द्धयः ॥ उवाचेति वचोयुग्मं श्लोकैस्तुल्या अनुष्टुभः ॥ स्वधामेति ॥ हे मुने यदुवंशस्य विभूषणवच्छोभावहे श्रीकृष्णे स्वधामानुगते सति पृथ्व्यां कस्य वंशोऽभवत् । एतन्मे मह्यमाचक्ष्व ॥ १ ॥ य इति युग्मम् ॥ सोमवंशशाखासु पूरोर्वंशे उपरिचरो वसुस्तस्य बृहद्रथस्तस्य सहदेव इत्युक्तं नवमस्कन्धे तत्रैव सहदेवान्मार्जारिस्ततः श्रुतश्रवा इत्यादयो रिपुञ्जयान्ताः विंशतिर्भाविनो राजानो निरूपितास्तेषु बार्हद्रथो बृहद्रथवंशे भवोऽन्त्यो रिपुञ्जयाख्यो यः स एव

॥ श्रीकृष्णाय नमः ॥ राजोवाच ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥ कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥ १ ॥ श्रीशुक उवाच ॥ योऽन्त्यः पुरंजयो नाम भविष्यो बार्हद्रथः ॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजम् ॥२॥ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः ॥ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ ३ ॥ नन्दिवर्धनस्तत्पुत्रः पञ्च प्रद्योतना इमे ॥ अष्टत्रिंशोत्तरशतं भोक्ष्यन्ति पृथिवीं नृपाः ॥ ४ ॥ शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः ॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥ ५ ॥ विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥६॥ नन्दिवर्धन आजेयो महानन्दिः सुतस्ततः ॥ शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयम् ॥ समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ ७ ॥ महानन्दिसुतो राजञ्छूद्रीगर्भोद्भवो बली ॥ महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् ॥ ८ ॥

पुरंजयाख्यो नृपः प्रोक्तः इति शेषः । तस्यामात्यः शुनकाख्यस्तु तं स्वामिनं पुरञ्जयं हत्वा आत्मजं स्वपुत्रं प्रद्योतसंज्ञं राजानं कर्त्ता करिष्यति यस्य प्रद्योतस्य अलकः सुतो भविता । यत् पालक इति पाठान्तरम् । तत्पुत्रः अलकपुत्रः विशाखयूपः ततो राजकः पुत्रो भविता ॥ २ ॥ ३ ॥ नन्दीति ॥ तत्पुत्रः राजकपुत्रः नन्दिवर्धनः इमे पंच प्रद्योतनाः प्रद्योतप्रभृतयो नृपाः प्रद्योतसंज्ञाः ते च अष्टविंशोत्तरशतं संवत्सरान्महीं भोक्ष्यन्ति पालयिष्यन्ति ॥ ४ ॥ शिशुनाग इति ॥ ततो नन्दिवर्द्धनात् शिशुनागाख्यः सुतो भाव्यः । आवश्यके ण्यत् । तत्सुतः काकवर्णः तस्य सुतः क्षेमधर्मा क्षेमधर्मणो जातः सुतः क्षेत्रज्ञः ॥ ५ ॥ विधीति ॥ विधिसारस्य अजातशत्रुः सुतो भविष्यति स्फुटमन्यत् ॥६॥ नन्दीति सार्द्धम् ॥ हे कुरुश्रेष्ठ आजेयः अजयस्य सुतो नन्दिवर्धनः एकारमध्यत्वमार्षम् । ततो महानन्दिः सुतः शिशुनागादय एते दश नृपाः कलौ कलियुगे षष्ठ्युत्तरशतत्रयं समाः संवत्सरान् पृथ्वीं भोक्ष्यन्तीत्यर्थः ॥ ७ ॥ महानन्दीति ॥ हे राजन् शूद्रीगर्भोद्भवो बली अधिकबलयुक्तः अतएव क्षत्रकुलविनाशकृत् महापद्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्ख्यायाः सेनाया धनस्य वा पतिः नन्द इति ख्यातः प्रसिद्धो महानन्दिसुतो भविष्यति ॥ ८ ॥ तत इत्यर्द्धम् ॥ ततः प्रभृति नृपा शूद्रप्राया अधार्मिका भविष्यन्ति ॥ ९ ॥ स इति ॥ महापद्म इति नामैकदेशग्रहणम् । महापद्मपतिः अनुल्लङ्घितशासनः स नन्दः द्वितीयो भार्गवः परशुराम इव एकमेव छत्रं तस्यैव राजचिन्हं यस्यां तथाभूतां पृथिवीं शासिष्यति । तत्र राज्यं करिष्यति ॥ १० ॥ तस्येति ॥ समाः वर्षाणि । स्फुटमन्यत् ॥ ११ ॥ नवेति ॥ नवसङ्ख्याकान्नन्दान् नन्दादीन्नन्दमेकम् अष्टौ तत्पुत्रांश्चेत्यर्थः । तान्नन्दादीन् प्रपन्नान् विश्वस्तान् कौटिल्यवात्स्यायनादिपर्यायश्चाणक्याख्यो द्विज उद्धरिष्यति उन्मूलयिष्यति विनाशयिष्यति । ततश्च तेषां सपितृकाणां सुमाल्यादीनामभावे सोमवंशे समाप्ते कलौ जगतीं पृथिवीं मौर्या मौर्यसंज्ञका भोक्ष्यन्ति ॥१२॥ मौर्या भोक्ष्यन्तीति स्फुटयति—स एवेति ॥ स एव द्विजः चन्द्रगुप्तसंज्ञं प्रथमं मौर्यं राज्येऽ-

ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः ॥९॥ स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः ॥ शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥१०॥ तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः ॥ य इमां भोक्ष्यन्ति महीं राजानः स्म शतं समाः ॥ ११ ॥ नव नन्दान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यन्ति वै कलौ ॥ १२ ॥ स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥ तत्पुत्रो वारिसारस्तु ततश्चाशोकवर्धनः ॥१३॥ सुयशा भविता तस्य संगतः सुयशःसुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ १४ ॥ शतधन्वा ततस्तस्य भविता तद्बृहद्रथः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरम् ॥ समा भोक्ष्यन्ति पृथिवीं कलौ कुरुकुलोद्वह ॥ १५ ॥ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोऽथ भविष्यति ॥ वसुमित्रो भद्रकश्च पुलिन्दो भविता सुतः ॥ १६ ॥ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ ततो भागवतस्तस्माद्देवभूतिरिति श्रुतः ॥ १७ ॥ शुङ्गा दशैते भोक्ष्यन्ति भूमिं वर्षशताधिकम् ॥ ततः कण्वानियं भूमिर्यास्यत्यल्पगुणा नृप ॥ १८ ॥ शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥ १९ ॥

भिषेक्ष्यति तत्सुतः तस्य चन्द्रगुप्तस्य सुतः । स्फुटमन्यत् ॥ १३ ॥ सुयशा इति ॥ सुयशःसुतः संगतसंज्ञकः । स्फुटमन्यत् ॥ १४ ॥ शतधन्वेति ॥ हे कुरुकुलोद्वह यद्यपि चन्द्रगुप्तादयो नवैव तथापि पराशरादिभिश्चन्द्रगुप्तात्प्रथमो दशरथ उक्तस्तत्साहित्येन एते दशेत्युक्तं ज्ञेयम् । सप्तत्रिंशदुत्तरं शतं समाः भोक्ष्यन्ति ॥ १५ ॥ अग्नीति द्वयम् ॥ अग्निमित्र इति बृहद्रथस्य सेनानीः पुष्पमित्रो नाम स्वामिनं हत्वा स्वयं राज्यं करिष्यति स च न तद्वंश्यः किंतु शुङ्गानां प्रथमस्तेन सहाग्निमित्रादयो दश ॥ १६ ॥ ॥ १७ ॥ शुङ्गा इति ॥ दशवर्षशताधिकं वर्षशतं द्वादशाधिकं विष्णुपुराणानुसारेण ॥१८ ॥ कथं कण्वान् यास्यति तदाह—शुङ्गमिति ॥ कामिनं परस्त्रीलम्पटं देवभूतिनामानं शुङ्गं हत्वा तदमात्यो महामतिः राजकार्ये निपुणबुद्धिः वसुदेवकण्वो राज्यं स्वयं करिष्यति ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्येति सार्द्धम् ॥ कण्वानामन्तिमः सुशर्मा ज्ञेयः । इमे वसुदेवादयः काण्वायना वर्षाणां त्रीणि शतानि पञ्चचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यन्ति । अत्रान्येऽपि राजानो ज्ञेयाः । वर्षाणामाधिक्यात् ॥ २० ॥ हत्वेति ॥ तद्भृत्यः सुशर्मणो भृत्योऽन्ध्रजातीयो वृषलः शूद्रः बली बलवान् असत्तमश्च बलीकनामा अन्तिमं काण्वं सुशर्माणं हत्वा कंचित्कालं गां भूमिं भोक्ष्यति ॥ २१ ॥ कृष्णेति श्लोकौ स्पष्टौ ॥ २२ ॥ २३ ॥ अनिष्टेति ॥ अनिष्टकर्मा अटमानस्य सुतः तस्य सुतो हालेयस्तस्य चात्मजस्तलकः । स्फुटमन्यत् ॥ २४ ॥ चकोर इति ॥ हे अरिन्दम सुनन्दस्य चकोराख्यः सुतस्तस्य सुतः अनवमः यत्र यस्य शिवस्वातिः सुतः। यद्वा । यत्र येषु बहुसंज्ञेषु अष्टसु नवमः

तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ काण्वायना इमे भूमिं चत्वारिंशच्च पञ्च च ॥ शतानि त्रीणि भोक्ष्यन्ति वर्षाणां च कलौ युगे ॥ २० ॥ हत्वा कण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यन्ध्रजातीयः कंचित्कालमसत्तमः ॥ २१ ॥ कृष्णनामाऽथ तद्भ्राता भविता पृथिवीपतिः ॥ श्रीशान्तकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥ २२ ॥ लम्बोदरस्तु तत्पुत्रस्तस्माच्चिबिलको नृपः ॥ मेघस्वातिश्चिबिलका-दटमानस्तु तस्य च ॥२३॥ अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनन्दनः ॥ २४ ॥ चकोरो बहवो यत्र शिवस्वातिररिंदम ॥ तस्यापि गोमतीपुत्रः पुरीमान् भविता ततः ॥ २५ ॥ मेदशिराः शिवस्कन्दो यज्ञश्रीस्तत्सुतस्ततः ॥ विजयस्तत्सुतो भाव्यश्चन्द्रविज्ञः सलोमधिः ॥ २६ ॥ एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च ॥ षट्पञ्चाशच्च पृथिवीं भोक्ष्यन्ति कुरुनन्दन ॥ २७ ॥ सप्ताभीरा आवभृत्या दश गर्दभिनोनृपाः ॥ कङ्काः षोडश भूपाला भविष्यन्ति च लोलुपाः ॥ २८ ॥ ततोऽष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः ॥ भूयो दश गुरुण्डाश्च मौना एकादशैव तु ॥ २९ ॥ एते भोक्ष्यन्ति पृथिवीं दश वर्षशतानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिम् ॥३०॥ भोक्ष्यन्त्यब्दशतान्यङ्ग त्रीणि तैः संस्थिते ततः ॥ किलिकिलायां नृपतयो भूतनन्दोऽथ वङ्गिरिः ॥ ३१ ॥ शिशुनन्दिश्च तद्भ्राता यशोनन्दिः प्रवीरकः ॥ इत्येते वै वर्षशतं भविष्यन्त्यधिकानि षट् ॥ ३२ ॥

शिवस्वातिरिति स्वामिपादादयः । तस्य अरिन्दमस्तस्य गोमत्याख्यः पुत्रः ततः पुरीमान् भविता ॥ २५ ॥ मेदेति ॥ पुरीमतः सुतो मेदशिराः तस्य सुतः शिवस्कन्दः ततस्तस्मात् यज्ञश्रीः सुतो जातः । तस्य सुतो विजयो भाव्यः । तस्य चन्द्रविज्ञः तस्य सलोमधिः ॥ २६ ॥ एते इति ॥ एते बलीकप्रभृतयः पञ्चविंशतिनृपतयः त्रिंशच्च चत्वार्यब्दशतानि च षट्पंचाशच्च । एवं षडशीत्युत्तरं चतुःशतं वर्षाणि पृथिवीं भोक्ष्यन्तीत्यर्थः ॥२७॥ सप्तेति ॥ अवभृतिर्नगरी तत्पतयः आवभृत्यसंज्ञकाः आभीरजातीयाः सप्तगर्दभिसंज्ञका नृपाः दशकङ्कसंज्ञकाः षोडश ते च सर्व एव लोलुपा विषयासक्ताः॥२८॥ तत इति ॥ स्फुटम् ॥२९॥ एत इति त्रिकम् ॥ एते मौनव्यतिरिक्ताः आभीरादयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चषष्टिर्नृपाः दशसङ्ख्यानि वर्षशतानि नवाधिकां नवतिं च एकोनशताधिकं वर्षसहस्रमित्यर्थः । पृथिवीं भोक्ष्यन्ति । ततश्च पूर्वोक्ता एवैकादश मौनास्त्रीण्यब्दशतानि क्षितिं भोक्ष्यन्ति ततश्च तैः संस्थिते तेषु मौनेषु मृतेषु सत्सु किलकिलायां पुर्यां भूतनन्दोऽथ वङ्गिरिः इत्यादय इत्येते वर्षशतम् । अधिकानि षड्वर्षाणि नृपतयो भविष्यन्ति ॥३०॥३१॥३२॥ तेषामिति ॥ तेषां भूतनन्दादीनां यथायथं बाल्हिकादयस्तन्नामानस्त्रयोदश सुता भवितारः । अथ च पुष्यमित्रो नामान्यो राजन्यो भविष्यति । अस्य च दुर्मित्रो नाम पुत्रो भविष्यति ॥ ३३ ॥ एककाला इति ॥ सप्त आन्ध्राः सप्त कौशलाः वैदूरपतयः निषधाश्चैते च तद्देशनामभिः प्रख्यातास्तुल्यकालाः खण्डमण्डलेषु भूपास्तत एव तेभ्यो बाह्लिकेभ्य एव भाव्या भविष्यन्ति ॥३४॥ मागधानामिति ॥ मागधानां तु वंशे विश्वस्फूर्जिर्नाम पुत्रो भविता पुरञ्जयः पुराणां जेता स च परः प्राचीनः पुरञ्जयः योऽन्त्यः पुरंजयो नामेत्युक्तस्ततो द्वितीय इव प्रतापेनातिप्रसिद्धः अन्यानेव वर्णान् ब्राह्मणादिस्थानीयान् पुलिन्दयदुमद्रकसंज्ञान् म्लेच्छप्रायान्करिष्यति अपरानिति

तेषां त्रयोदश सुता भवितारश्च बाह्लिकाः ॥ पुष्पमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च ॥ ३३ ॥ एककाला इमे भूपाः सप्तान्ध्राः सप्त कौशलाः ॥ वैदूरपतयो भाव्या नैषधास्तत एव हि ॥ ३४॥ मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यत्यपरो वर्णान् पुलिन्दय-दुमद्रकान् ॥ ३५ ॥ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अनुगङ्गामाप्रयागं गुप्तां भोक्ष्य-ति मेदिनीम् ॥ ३६ ॥ सौराष्ट्रावन्त्यभीराश्च शूद्रा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ॥ ३७ ॥ सिन्धोस्तटं चन्द्र-भागां कौन्तीं काश्मीरमण्डलम् ॥ भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥ ३८ ॥ तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ॥ एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ३९ ॥ स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः ॥ उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः ॥ ४० ॥

वा पाठः । तत्र अन्यान् पुलिन्दादिसंज्ञान् वर्णान्करिष्यति ॥ ३५ ॥ प्रजाश्चेति सार्द्धम् ॥ सच पद्मवत्यां पुरि स्थितः यतो वीर्यवान् क्षत्रमुत्साद्य अब्रह्मभूयिष्ठाः अत्रैवर्ण्य-प्रचुराः प्रजाः स्थापयिष्यति । अनुगङ्गां गङ्गाद्वारमारभ्य आप्रयागं प्रयागपर्यन्तं गुप्तां पालितां मेदिनीं भोक्ष्यति ॥ ३६ ॥ सौराष्ट्रेति ॥ तदनन्तरं च सौराष्ट्रावन्त्यादिदेशव-र्त्तिनो द्विजाः व्रात्या उपनयनरहिताः अत एव शूद्रप्रायाः जनाधिपा राजानो भविष्यन्ति ॥ ३७ ॥ सिन्धोरिति ॥ सिन्धोर्नदविशेषस्य तटं तत्स्थानदेशान् चन्द्रभागां नदीं तत्तटदेशान् कौन्तीं पुरीं काश्मीरमण्डलं च शूद्रव्रात्याद्याः अब्रह्मवर्चसः वेदाचारशून्याः तथा म्लेच्छाश्च भोक्ष्यन्ति ॥ ३८ ॥ तुल्येति ॥ इमे च म्लेच्छप्रायाः भूभृतस्तु-ल्यकालाः भविष्यन्ति । किंच एते सर्वे अधर्मानृतपराः अधर्मे अनृते च परिनिष्ठिताः फल्गुदाः अल्पदातारस्तीव्रमन्यवः अतिक्रोधिनश्च भविष्यन्ति ॥ ३९॥ स्त्रीबालेति ॥ स्त्रीबालगोद्विजघातिनः परदारधनयोरादृता आदरयुक्ताः तद्ग्रहणशीलाः उदितप्रायाः अस्तमितप्रायाश्च " क्षणे तुष्टाः क्षणे रुष्टास्तुष्टा रुष्टाः क्षणे क्षणे "॥ अल्पसत्वा अल्पधै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यबलादियुक्ताः अल्पकायुषश्च ॥ ४०॥ असंस्कृता इति ॥ असंस्कृता गर्भाधानादिसंस्काररहिताः स्ववर्णाश्रमोचितक्रियाहीनाः रजसा तमसा वृताः । अतो राजन्यरूपिणः म्लेच्छास्ते प्रजाः भक्षयिष्यन्ति धनाद्यपहारादिना पीडयिष्यन्ति ॥ ४१ ॥ तदिति ॥ तन्नाथास्ते उक्तविधा नाथा येषां ते जनपदादेशवर्त्तिनो मनुष्यास्तेषामिव शीलमाचारो वादश्च तद्वन्तः अन्योऽन्यतो राजतश्च पीडिताः क्षयं यास्यन्ति ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो विवृतिं द्वादशस्यादिमे व्यधात् ॥ १ ॥ द्वितीये तु कलेर्दोषा अथ कल्किप्रसादतः ॥ तेषां क्षये कृतयुगं श्लोकाः सार्द्धश्चतुःकृताः ॥ अनुष्टुभोऽपि तावंत्य उवाचेत्येकमेव तु ॥ ततश्चेति ॥ हे राजन् बलिना कालेन ततोऽग्रेऽनुदितं धर्मसत्यादिका दयान्ताः आयुर्बलं स्मृतिश्चैतानि नङ्क्ष्यन्ति ॥ १ ॥ वित्तमिति ॥ जन्मनिमित्तः सदाचारनिमित्तो वा यो गुणः लोके उत्कर्षस्तस्योदयो वित्तमेव वित्तवतो नीचस्याप्युत्कर्षः । नतु तद्धीनस्योत्तमकुलोत्पत्यादिमतोऽपीत्यर्थः । तथा धर्मन्याययोर्व्यवस्थायां बलमेव कारणं नतु यथार्थतेत्यर्थः ॥ २ ॥ दाम्पत्य इति ॥

असंस्कृताः क्रियाहीना रजसा तमसा वृताः ॥ प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः ॥ ४१ ॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योऽन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः ॥४२॥ इति श्रीभा॰ महापु॰ द्वादशस्कन्धे प्रथमोऽध्यायः ॥१॥ श्रीशुक उवाच ॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया ॥ कालेन बलिना राजन्नङ्क्ष्यन्त्यायुर्बलं स्मृतिः ॥ १ ॥ वित्तमेव कलौ नृणां जन्माचारगुणोदयः ॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥ २ ॥ दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥३॥ लिङ्गमेवाश्रमख्यातावन्योऽन्यापत्तिकारणम् ॥ अवृत्त्या न्यायदौर्बल्यं पाण्डित्ये चापलं वचः ॥ ४ ॥ अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव तु ॥ स्वीकार एव चोद्वाहे स्नानमेवं प्रसाधनम् ॥ ५ ॥ दूरे वार्ययनं तीर्थं लावण्ये केशधारणम् ॥ उदरम्भरिता स्वार्थः सत्यत्वे धाष्टर्यमेव हि ॥ ६ ॥

दाम्पत्ये भार्यापतिभावे परस्पराभिरुचिरेव हेतुः नतु कुलगोत्रवृद्धेच्छादिः । व्यावहारिके क्रयविक्रयादिव्यवहारे मायावञ्चनमेव हेतुर्नतु निष्कपटतया वर्त्तनम् । स्त्रीत्वे पुंस्त्वे च तयोः श्रैष्ठ्ये रतिकौशलमेव हेतुः न कुलमाचारो वा । विप्रत्वे सूत्रधारणमेव न तु शौचसन्तोषादिविप्रलक्षणम् ॥ ३ ॥ लिङ्गमिति ॥ आश्रमाणां ख्यातौ ज्ञाने लिङ्गमेव दण्डाजिनादिकमेव हेतुर्न त्वाचारविशेषः । अन्योन्यापत्तौ परस्परनमस्कारादिव्यवहारे च कारणं लिङ्गमेवेत्यन्वयः । अवृत्त्या धनादिदानासामर्थ्येन न्याये दौर्बल्यं पराजयो भवति । पाण्डित्ये चापलं वचः बहुभाषणमेव कारणं न तु विद्याभ्यासः ॥ ४ ॥ अनाढ्यतेति ॥ असाधुत्वे नीचत्वे चौर्याद्यभियोगे च अनाढ्यता दरिद्रतैव हेतुः न जात्यादि । साधुत्वे उत्कृष्टत्वे च दम्भः व्याजेन वर्त्तनं हेतुर्न त्वाचारः । उद्वाहे विवाहे परस्परस्वीकार एव हेतुः नतु शास्त्रीयो विधिः । प्रसाधनं देहमलापनयनमेव स्नानं न तु शास्त्रीयं तीर्थावगाहनम् ॥५॥ दूरे इति ॥ दूरे वर्त्तमानं वार्ययनं जलाशय एव तीर्थं नतु गुर्वादि गङ्गादि वा । लावण्ये निमित्ते केशधारणमेव भूषणादेरविद्यमानत्वात् । उदरभरणमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वार्थः परमपुरुषार्थः नतु धर्मादिः । सत्यत्वे धाष्टर्यमेव हेतुः नतु यथार्थभाषणम् ॥ ६ ॥ दाक्ष्यमित्यर्द्धम् ॥ कुटुम्बभरणमेव न तु धर्मादिपुरुषार्थसंपादनम् । दाक्ष्यं निपुणत्वम् । यशोऽर्थे एव धर्मसेवनं नतु परलोकार्थे ॥ ७ ॥ एवमिति ॥ एवं दुष्टाभिः प्रजाभिः क्षितिमण्डले आकीर्णे व्याप्ते सति ब्राह्मणादीनां मध्ये यो बली स एव नृपो भवितेत्यन्वयः ॥ ८ ॥ प्रजा इति ॥ लुब्धैरर्थकामपरैरतएव निर्घृणैर्निष्कृपैर्दस्युधर्मभिर्लुम्पकै राजन्यैराच्छिन्ना अपहृता दारा द्रविणानि च यासां ताः प्रजा गिरिकाननमेव यास्यन्ति ॥ ९ ॥ शाकेति ॥ शाकमूलामिषाणि क्षौद्रं मधु फलपुष्पे च अष्टिर्बीजं च तान्येव भोजनं यासां ताः । तत्राप्यनावृष्ट्या यो दुर्भिक्षः आहारालाभः करश्च स्वामिग्राह्यो भागस्ताभ्यां पीडिताः प्रजाः विनक्ष्यन्ति ॥ १० ॥ शीतेति ॥ तथा शीतवातादिभिः अन्योऽन्यतश्च क्षुत्तृड्भ्यां व्याधिभिः चिन्तया च प्रजाः सन्तप्स्यन्ते । सन्तापेनेति पाठे विनङ्क्ष्यन्तीति पूर्वस्यानुषङ्गः ॥ ११ ॥ त्रिंशदित्यर्द्धम् ॥ कलौ त्रिंशद्विंशतिवर्षाणि नृणां परमायुर्भविष्यतीति शेषः । यद्वा । शीतवातेत्यर्द्धं स्वपूर्वश्लोऽके-

दाक्ष्यं कुटुम्बभरणं यशोऽर्थे धर्मसेवनम् ॥ ७ ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥ ८ ॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥ आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम् ॥ ९ ॥ शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ॥ अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः ॥ १० ॥ शीतवातातपप्रावृड्हिमैरन्योऽन्यतः प्रजाः ॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संतापेन च चिन्तया ॥ ११ ॥ त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणाम् ॥१२॥ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः ॥ वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणाम् ॥ १३ ॥ पाखण्डप्रचुरे धर्मे दस्युप्रायेषु राजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥ १४ ॥ शूद्रप्रायेषु वर्णेषु च्छागप्रायासु धेनुषु ॥ गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु ॥ १५ ॥ अणुप्रायास्वौषधीषु शमीप्रायेषु स्थास्नुषु ॥ विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥ १६ ॥ इत्थं कलौ गतप्राये जनेषु खरधर्मणि ॥ धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति ॥ १७ ॥

न्वेति । ततः क्षुत्तडादिनिमित्तैः त्रिंशदादिवर्षाणि परमायुरिति ॥१२॥ क्षीयमाणेष्विति पञ्चकम् ॥ देहिनां कलिदोषतः देहेषु क्षीयमाणेषु ह्रस्वप्रमाणेषु दुर्बलेषु च वर्णाश्रमवतां नृणां धर्मपथे वेदमार्गे च नष्टे सति तथा अन्यधर्मेऽपि पाखण्डप्रचुरे राजसु च दस्युप्रायेषु चौरतुल्येषु।"प्रायो बाहुल्यतुल्ययोः"। येन केनापि प्रकारेण धनादिग्रहणतात्पर्येषु अन्येषु च नृषु चौर्यानृतवृथाहिंसाद्या नानावृत्तयो येषां तेषु तथाभूतेषु सत्सु ब्राह्मणादिवर्णेषु शूद्रप्रायेषु स्वस्वाचारभ्रष्टेषु धेनुषु छागप्रायासु प्रमाणतः क्षीरतः हिंस्यत्वतश्च अजतुल्यासु संन्यासाद्याश्रमेषु गृहप्रायेषु गृहिवन्मैथुनादिविषयभोगपरायणेषु बन्धुषु यौनप्रायेषु योनिसंबन्धो यौनस्तत्प्रायेषु ओषधीषु अणुप्रायासु अतिस्वल्पगुणासु स्थास्नुषु महावृक्षेषु शमीप्रायेषु परिमाणतः छायातः फलतश्च शमीवद्ध्रस्वेषु मेघेषु विद्युत्प्रायेषु तडिद्बहुलेषु स्वल्पजलेषु सद्मसु गृहेषु शून्यप्रायेषु अतिथिभोजनादिधर्मरहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषु सत्सु इत्थं जनेषु खरधर्मिणि दुःसहचेष्टिते कलौ गतप्राये समाप्तप्राये सति भगवान्धर्मत्राणाय सत्वेन शुद्धसत्वमयेन वपुषाऽवतरिष्यति ॥१३॥१४॥१५॥१६॥१७॥ चराचरेति ॥ चराचरगुरोरीश्वरस्याखिलात्मनः विष्णोर्जन्मकर्तृसाधूनां धर्मत्राणाय कर्मणः अपनुत्तये नाशाय मोक्षाय भवति ॥ १८ ॥ शम्भलेति ॥ शम्भलग्रामे मुख्यस्य श्रेष्ठस्य महात्मनो नाम्ना विष्णुयशसो ब्राह्मणस्य भवने कल्किर्नाम भगवान्प्रादुर्भविष्यति ॥ १९ ॥ अश्वमिति युग्मम् ॥ आशु शीघ्रं गच्छतीति तथा तम् असाधवो दम्यन्ते येन तं देवदत्तनामानमश्वमारुह्य अष्टैश्वर्याणि अणिमादीनि गुणाश्च सत्यसंकल्पशौर्यादयस्तैरन्वितः अप्रतिमद्युतिः जगत्पतिः कल्किः आशुना शीघ्रगामिना तेन हयेन क्षोण्यां विचरन् नृपलिङ्गच्छदः राजवेषेण छन्नान् कर्मणा तु दस्यून् कोटिशोऽसिना निहनिष्यति ॥ २० ॥ २१ ॥ अथेति सार्द्धम् ॥ एवमखिलेषु दस्युषु उपद्रवकारिषु अधर्मिषु हतेषु सत्सु अथानन्तरं वासुदेवस्य भगवतः कल्केरङ्गरागेण चन्दनादिना योऽतिपुण्यगन्धोऽनिलस्तं स्पृशन्तीति तथा तेषां पौरजानपदानां जनानां मनांसि विशदानि

चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्मकर्मापनुत्तये ॥ १८॥ शम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥ १९ ॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिना साधुदमनमष्टैश्वर्यगुणान्वितः ॥ २० ॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिङ्गच्छदो दस्यून्कोटिशो निहनिष्यति ॥ २१ ॥ अथ तेषां भविष्यन्ति मनांसि विशदानि वै ॥ वासुदेवाङ्गरागातिपुण्यगन्धानिलस्पृशाम् ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥ २२ ॥ तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥ वासुदेवे भगवति सत्वमूर्त्तौ हृदि स्थिते ॥ २३ ॥ यदाऽवतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्विकी ॥ २४ ॥ यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती ॥ एकराशौ समेष्यन्ति तदा भवति तत्कृतम् ॥२५॥ येऽतीता वर्तमाना ये भविष्यन्ति च पार्थिवाः॥ ते त उद्देशतः प्रोक्ताः वंशीयाः सोमसूर्ययोः ॥ २६ ॥

विवेकयोग्यानि निर्मलानि भविष्यन्ति ॥ २२ ॥ तेषामिति ॥ वासुदेवे भगवति सत्वमूर्त्तौ हृदि स्थिते सति तेषां जनानां प्रजाविसर्गः पुत्राद्युत्पत्तिरूपः स्थविष्ठः स्थूलो विस्तृतः संभविष्यति ॥ २३ ॥ यदेति ॥ हरिर्धर्मपतिः धर्मपालको भगवान्कल्किर्यदाऽवतीर्णो भविष्यति । तदा कृतयुगं भविष्यति । प्रजानां प्रसूतिश्च सात्विकी भविष्यति ॥ २४ ॥ यदेति ॥ यदा चन्द्रः सूर्यः तिष्यः पुष्यः बृहस्पतिश्चेति एकराशौ तत्रापि पुष्यनक्षत्रे समेष्यन्ति योगमेष्यन्ति । तदा तत्कृतयुगं भविष्यति । अत्र स्वामिपादाः । यद्यपि प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्त्तमाने द्वित्रास्वमावास्यासु तेषां पुष्ययोगः संभवति तथापि तेषां सहप्रवेशोऽत्र विवक्षितः । समेष्यन्तीति वचनात् इति प्राहुः। यद्यपि सह प्रवेशोऽपि कलौ बहून् वारान् भवति तथापि उपलक्षणमात्रमेतदिति स्वामिपादाभिप्रायोऽतो न दोषः ॥ २५ ॥ येऽतीता इति ॥ उद्देशतः क्रमेण संक्षेपतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फुटमन्यत् ॥ २६ ॥ आरभ्येति ॥ भवतस्तव जन्म आरभ्य यावन्नन्दाभिषेचनं तावत्समयान्तरे वर्षाणां सहस्रं पञ्चदशवर्षोत्तरं शतं चेति पञ्चदशाधिकानि एकादशशतानि भवन्ति इति । अत्र श्रीस्वामिपादाः कयाऽपि विवक्षयाऽवान्तरसङ्ख्येयम् । वस्तुतः परीक्षिन्नन्दयोरन्तरं तु द्वाभ्यामूनं वर्षाणां सार्द्धसहस्रं भवति । यतः परीक्षित्समकालं मागधं मार्जारिमारभ्य रिपुञ्जयान्ता विंशती राजानः सहस्रसंवत्सरं भोक्ष्यन्तीति नवमस्कन्ध उक्तं ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरमिति ततः परं च प्रद्योतना अष्टत्रिंशोत्तरशतं शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यन्ति पृथिवीमित्यत्रैवोक्तत्वात् इति प्राहुः । विवक्षा चात्र शुद्धक्षत्रवंशावधेरिति स्वामिपादा एव विष्णुपुराणटीकायामाहुः । केचित्तु " आरभ्य भवतो जन्म " इति श्लोके शतमित्यत्र छान्दसमेकत्वं पञ्चशतानीत्यर्थः । तथाच वर्षसहस्रं दशोत्तराणि पञ्चशतानि चेत्यर्थः । एतच्च स्कान्दैकवाक्यत्वाल्लब्धम् । तथाहि सप्तर्षीणां प्रतिनक्षत्रं शतवर्षात्मको भोगः परीक्षित्समये मघायां सप्तर्षीणां स्थितिः तेषां मघास्थितिकाले कलेः प्रवृत्तिरिति भागवते स्पष्टमेव । तेन कलेः शतवर्षमध्य परीक्षितो जन्मेति निश्चीयते । ततश्च कलेः प्रायेणाशीतिवर्षेषु गतेषु परीक्षितो जन्म ततः दशाधिकसार्द्धसहस्र १५१० मितेषु वर्षेषु गतेषु नन्दाभिषेचनम् । पुत्रसहितनवनन्दानां राज्यकालश्च शतवर्षात्मकः । एवं च कलेः नवत्यधिकषोडशशती १६९० मितवर्षपर्यन्तो नन्दराज्यपरमावधिरित्यनुमीयते । स एव कालः स्कान्दे विशिष्योक्तः । यथा ततोऽपि द्विसहस्रेषु दशाधिकशतत्रये ॥ " भविष्यं नन्दराज्यं च चाणक्यो यान् हनिष्यति " इति ॥ अस्यार्थः द्विसहस्रेषु द्विसहस्रवर्षमध्ये । निर्द्धारणे

आरभ्य भवतो जन्म यावन्नन्दाऽभिषेचनम् ॥ एतद्वर्षसहस्रं तु शतं पञ्चदशोत्तरम् ॥ २७ ॥

सप्तमी । दशाधिकशतत्रये स्थिते सतीति शेषस्तथा च नवत्यधिकषोडशशतवर्षेषु कलेर्गतेष्वित्यर्थलाभः । नन्दराज्यमित्यस्य नन्दानां राज्यमित्यर्थः । उत्तरवाक्ये यानिति बहुवचननिर्देशात् इति कल्पयन्ति । परं त्वेतदपि " यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षय " इति भागवतश्लोकेन विरुध्यते । यतः परीक्षिज्जन्म नन्दाभिषेकान्तरबोधकसप्तर्ष्यधिष्ठितनक्षत्रमघापूर्वाषाढाकालः एकादशशतासन्न एव नाधिकः किंच विष्णुपुराणे प्रकृतश्लोके शतं पञ्चदशोत्तरमित्यत्र शतस्थाने ज्ञेयमिति पाठ उपलभ्यते । तत्र पञ्चशतानीत्यपि वक्तुं न शक्यते । परेतु " आरभ्य भवतो जन्म " इत्यत्रत्यां सङ्ख्यां पञ्चदशोत्तरैरेकादशशतमितामेव यथाश्रुतं मन्यन्ते । परंतु तत्संवादाय मागधराजानां मार्जारिप्रभृतिरिपुञ्जयान्तानां राज्यकालसङ्ख्याबोधके ये बार्हद्रथभूपाला भाव्याः।साहस्रवत्सरमिति श्लोके साहस्रपदं बहुत्वमात्रपरतया सहस्रार्द्धासन्नपरं व्याख्याय पञ्चप्रद्योतनदशशुङ्गराज्यकालवर्षाणि । तत्र संयोज्य पञ्चदशोत्तरामेकादशशतीं वर्षाणामदर्शयन् । अन्ये तु एकादशशतानि पञ्चदशोत्तराणीत्येषैव सङ्ख्या प्रमाणी कर्त्तव्या या तु द्व्यूनं सार्द्धसहस्रं वर्षाणां परीक्षिन्नन्दान्तरसङ्ख्या नवमद्वादशस्कन्धवचनानुसारिणी प्रतीयते सा तु मार्जारिप्रभृतीनां शुङ्गान्तानां खण्डमण्डलपतीनां विनाऽप्यानन्तर्यं सङ्ख्यातत्वादित्याहुः । अत्र यद्यपि ज्योतिःशास्त्ररीत्या शास्त्रान्तरैश्च भूयान्विरोधः प्रतीयते । तथाऽपि तत्परिहारे ग्रन्थबाहुल्यभयादुपरम्यते टीकाशेषभागे च पर्यङ्काख्ये लेखिष्यते॥ २७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तर्षीणां त्विति ॥ अत्रायमर्थः । उत्तरध्रुवतारानिकटे प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमण्डलं तत्र किंचिदुन्नतरेखाग्रस्थानीयो मरीचिस्ततः पश्चादानम्रयुगकन्धराकारो वसिष्ठः सभार्यः ततः पश्चादीषदुन्नतरेखामूलस्थानीयोऽङ्गिरास्ततः पश्चाच्चतुरस्रताराचतुष्के ऐशान्याम् । अत्रिस्ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहस्तत उत्तरतः क्रतुः । एवं स्थिते तेषां सप्तर्षीणां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ पुलहक्रतुसंज्ञौ तयोस्तु मध्ये यत्समं दक्षिणतः समदेशावस्थितमाश्विन्यादिष्वन्यतमं नक्षत्रं निशि दृश्यते ॥ २८ ॥ तेनेति ॥ तेन नक्षत्रेण युक्ता एत ऋषयो नृणामब्दशतं तिष्ठन्ति ते च द्विजास्त्वदीये काले अधुना मघाः आश्रिता वर्तन्ते । तथा च पूर्वयोः क्रतुपुलहयोर्मघानां च साम्यावस्थित्युपक्रमकाल एव कलिप्रवेशकाल इति सूचितम् । तेनाश्लेषायां कृष्णप्रादुर्भावः मघाश्रितेषु तेषु श्रीकृष्णान्तर्द्धानं कलिप्रवेशश्च । ततः पूर्वाषाढां प्राप्तेषु कलेर्वृद्धिरित्युत्तरग्रन्थाज्ज्ञेयम् ॥ २९ ॥ विष्णोरिति ॥ यदा असौ विष्णोर्भगवतो भानुरवतारः श्रीकृष्णाख्यः दिवं वैकुण्ठं गतस्तदा कलिर्लोकमविशत् । यत् यस्मात्

सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ २८ ॥ तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ॥ ते त्वदीये द्विजाः काल अधुना चाश्रिता मघाः ॥ २९ ॥ विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ॥ तदाऽविशत्कलिर्लोकं पापे यद्रमते जनः ॥ ३० ॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ॥ तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत् ॥ ३१ ॥ यदा देवर्षयः सप्त मघासु विचरन्ति हि ॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥ ३२ ॥ यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः ॥ तदा नन्दात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ ३३ ॥ यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाऽहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ॥ ३४ ॥ दिव्याब्दानां सहस्रान्ते चतुर्थे तु पुनः कृतम् ॥ भविष्यति यदा नृणां मन आत्मप्रकाशकम् ॥ ३५ ॥

कलिप्रवेशाज्जनः पापे रमते ॥ ३० ॥ यावदिति ॥ यावत्स रमापतिः पादपद्माभ्यां पृथिवीं स्पृशन्नास्ते स्म तावत्स पृथिवीं पराक्रान्तुमभिभवितुं नाशकत् न समर्थोऽभूत् ॥ ३१ ॥ यदेति ॥ यदैव सप्तदेवर्षयो मघासु विचरन्ति स्म तदा तु दिव्येन मानेन सन्ध्यांशाभ्यां सह द्वादशाब्दशतात्मकः कलिः सन्ध्यामतिक्रम्य लोकं प्रविष्टः ॥ ३२ ॥ यदेति ॥ यदा महर्षयः मघाभ्यः पूर्वाषाढां यास्यन्ति तदा प्रद्योतनात्प्रभृति वृद्धिं गच्छन्नन्दात्प्रभृत्यतिवृद्धिं गमिष्यतीत्यर्थः ॥ ३३ ॥ ननु कलेः प्रथमसन्ध्यायां कृष्णोऽवतीर्ण इति नव्या वदन्ति तत्रेत्याह—यस्मिन्निति ॥ श्रीकृष्णो यस्मिन्नेवाहनि दिवं यातस्तस्मिन्नेवाहनि तत्रापि तस्मिन्नेव क्षणे कलियुगं प्रतिपन्नं प्रजाभिभवे योग्यं जातमिति पूर्ववृत्तान्तज्ञाः प्राहुः ॥ ३४ ॥ दिव्येति ॥ दिव्यानां देवमानववर्षाणां सहस्रस्यान्ते चतुर्थे कलियुगे व्यतिक्रान्ते सति पुनः कृतयुगं भविष्यति । यदा नृणां मनः आत्मनः स्वरूपस्य प्रकाशकं भविष्यति तदा कृतं भविष्यतीत्यर्थः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजवंशोक्तां स्थितिं ब्राह्मणा दिवंशेष्वप्यतिदिशति—इतीति ॥ इत्येवंभूत एष मानवो वैवस्वतमनोर्वंशो यथा सङ्ख्यायते याभिरुच्चनीचावस्थाभिः सम्यक् कथ्यते तथा विट्शूद्रविप्राणामपि तास्ता अवस्था युगे युगे बोध्या इत्यर्थः । तास्ता इत्यत्र वंशा इति पाठान्तरम् ॥ ३६ ॥ एतेषामिति ॥ नामैव लिङ्गं ज्ञापकं येषां तेषां महात्मनां कथामात्रमेवावशिष्टं येषां तेषाम् एतेषां पुरुषाणां भुवि कीर्त्तिरेव स्थिता न तु राज्यं पुत्रादयो वा अतो नात्र रागः कार्यः ॥ ३७ ॥ कलावुत्सन्नानां राजवंशानां पुनः प्रवृत्तिप्रकारमाह—देवापिरिति ॥ शन्तनोर्भ्राता देवापिः सोमवंशजः इक्ष्वाकुवंशजो मरुश्च सूर्यवंशजः एतौ महायोगबलेनान्वितौ कलापग्रामे बदर्याश्रमस्थे योगिनामावासे प्रसिद्धे आसाते ॥३८॥ ताविति ॥ तौ च कलेरन्ते कृतयुगादौ वासुदेवेन भगवताऽनुशिक्षितौ उपदिष्टवर्णाश्रमधर्मौ इह लोके एत्य आगत्य वर्णाश्रमधर्मं पूर्ववत्प्रथयिष्यतः ॥ ३९ ॥ प्रतिचतुर्युग-

इत्येष मानवो वंशो यथा संख्यायते भुवि ॥ तथा विट्शूद्रविप्राणां तास्ता ज्ञेया युगे युगे ॥ ३६ ॥ एतेषां नामलिङ्गानां पुरुषाणां महात्मनाम् ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥ ३७ ॥ देवापिः शन्तनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ॥ कलापग्राम आसाते महायोगबलान्वितौ ॥ ३८ ॥ ताविहैत्य कलेरन्ते वासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ॥३९॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम्॥अनेन क्रमयोगेन भुवि प्राणिषु वर्त्तते राजन्नेते मया प्रोक्ता नरदेवास्तथाऽपरे ॥ भूमौ ममत्वं कृत्वाऽन्ते हित्वेमां निधनं गताः ॥ ४१ ॥ कृमिविड्भस्मसंज्ञाऽन्ते राजनाम्नोऽपि यस्य च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ ४२ ॥ कथं सेयमखण्डा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य च ॥४३॥ तेजोऽबन्नमयं कायं गृहीत्वाऽऽत्मतयाऽबुधाः ॥ महीं ममतया चोभौ हित्वाऽन्तेऽदर्शनं गताः ॥ ४४ ॥ ये ये भूपतयो राजन्भुञ्जन्ति भुवमोजसा ॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥ ४५ ॥ इति श्रीभागवते द्वादशस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

मयमेव प्रकार इत्याह--कृतमिति ॥ स्फुटम् ॥ ४० ॥ राजन्निति स्फुटम् ॥ ४१ ॥ कृमीति ॥ यस्य च राजनाम्नो राजेति नाम यस्य तस्यापि देहस्यान्ते मरणे सति कृमयो विष्ठाभस्मेति वा संज्ञा भविष्यति । तत्कृते तदर्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद नैव वेद महामूर्खः स एव यतो भूतद्रोहात् द्रोग्धुर्निरयो भवति ॥ ४२ ॥ ममत्वप्रकारमाह--कथमिति ॥ सेयमखण्डा भूर्मे पूर्वजैः पुरुषैर्धृता सेदानीं मत्पूर्वा च सती मत्पुत्रस्य पौत्रस्य वंशजस्य च कथं स्यादित्येवम् ॥ ४३ ॥ तेज इति ॥ अबुधाः तेजोऽबन्नमयम् उपलक्षणतया पञ्चभूतपरिणामरूपं कायमेवात्मतया गृहीत्वा अभिमत्य महीं च ममतया गृहीत्वा उभौ महीकायौ हित्वाऽन्ते प्रारब्धावसाने अदर्शनं गताः मरणं प्राप्ताः । यद्वा । कथमित्यादिद्वयम् एकान्वयम् ॥४४॥ ये इति ॥ हे राजन् ये ये राजानः ओजसा बलेन भुवं भुञ्जन्ति स्म ते सर्व एव कथासु क्रियमाणासु कथामात्ररूपाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेन कृताः तथा च ततो लोकद्वयफलभ्रंशात् ततो निवृत्तिमार्ग एव श्रेयानिति भावः ॥ ४५॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो द्वितीये द्वादशस्य व्यधादिमाम् ॥ २ ॥ तृतीये भूमिगीतैश्च राज्यदोषादि वर्ण्यते ॥ दोषनाशो हरेर्नत्या तत्र श्लोका द्विमार्गणाः ॥ उवाचैत्रितयं साङ्गिवेदर्षौणा अनुष्टुभः ॥ ३ ॥ दृष्ट्वेति ॥ आत्मनि भूमौ निमित्तभूतायां यो विजयः तस्मिन् व्यग्रानुत्सुकान् नृपान् दृष्ट्वा भूर्हसति । अहो मृत्योः क्रीडनकाः क्रीडनकवदधीनाः इमे नृपा मां विजिगीषन्ति विजयेन वशीकृत्य भोक्तुमिच्छन्तीत्यर्थः । तङ्भावः आर्षः ॥१॥ काम इति ॥ येन कामेन फेनोपमे जलबुद्बुदतुल्ये विनश्वरे पिण्डे शरीरे ये नृपाः अतीव विश्रम्भिताः विश्वासं नीतास्तेषां विदुषामपि पित्रादिदृष्टान्तेनात्मनो मृत्युवश्यतां पश्यतामपीत्यर्थः । नरेन्द्राणां स एष कामः मद्भोगाभिलाषाऽत्मकः मोघो व्यर्थ एव स्यात् ॥२॥ काममेव दर्शयति—पूर्वमिति ॥ इन्द्रियैर्विषयलम्पटस्य न राज्यप्राप्तिः स्यादिति तावत् षड्वर्गं इन्द्रियषट्कं विजित्य ततो राजमन्त्रिणः जेष्यामः । ततः सचिवान् कर्मसु अमात्यान् पौरान् पुरवासिनः आप्तान् राजगुर्वादीन् करीन्द्रान् हस्तिपान् तदुपलक्षिताः सर्वाः अन्ये चास्य भूमण्डलस्य अस्य मत्प्रतिपक्षनृपस्य कण्टकान् कण्टकतुल्यान् दुःखप्रदांश्चौरादीन् जेष्यामः । अस्ये-

श्रीशुक उवाच ॥ दृष्ट्वाऽऽत्मनि जये व्यग्रान्नृपान्हसति भूरियम्॥अहो मां विजिगीषन्ति मृत्योः क्रीडनका नृपाः ॥१॥ काम एष नरेन्द्राणां मोघः स्याद्विदुषामपि ॥ येन फेनोपमे पिण्डे येऽतिविश्रम्भिता नृपाः ॥ २ ॥ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमन्त्रिणः ॥ ततः सचिवपौराप्तकरीन्द्रानस्य कण्टकान् ॥३॥ एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलाम् ॥ इत्याशाबद्धहृदया न पश्यन्त्यन्तिकेऽन्तकम् ॥४॥ समुद्रावरणां जित्वा मां विशन्त्यब्धिमोजसा ॥ कियदात्मजयस्यैतन्मुक्तिरात्मजये फलम् ॥ ५ ॥ यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह ॥ गता यथागतं युद्धे तां मां जेष्यन्त्यबुद्धयः ॥ ६ ॥ मत्कृते पितृपुत्राणां भ्रातृणां चापि विग्रहः ॥ जायते ह्यसतां राज्ये ममताबद्धचेतसाम् ॥ ७ ॥

त्यत्र अथेति वा पाठः ॥ ३ ॥ एवमिति ॥ एवं क्रमेण सागरो मेखलावदावरणं यस्यास्तां पृथ्वीं जेष्यामः स्वाधीनां करिष्याम इत्येवंभूतया आशया बद्धं हृदयं येषां तेऽन्तिके समीपे वर्त्तमानमन्तकं मृत्युं न पश्यन्ति ॥ ४ ॥ समुद्रेति ॥ समुद्रावरणां मां जित्वाऽपि ओजसा बलेन अब्धिं विशन्ति द्वीपान्तराणि विजिगीषन्त इत्यर्थः । अत इन्द्रिजयेन राज्यं साधयितुमिच्छवो मन्दभाग्या इत्याह आत्मजयस्य इन्द्रियजयस्य एतत्कृत्स्नस्य भूमण्डलस्यात्माधीनता संपादनं कियत्फलम् अतितुच्छमित्यर्थः नश्वरत्वादित्याशयः । यत आत्मजये सति संसारदुःखान्मुक्तिरेव योग्यं फलमिति ॥५॥ यामिति ॥ हे कुरूद्वहेति भूमिगीतं कथयन् शुकः संबोधयति । मनवस्तत्सुताश्च यां मां विसृज्यैव यथा आगतं तथा गताः मृताः । यद्वा । यथागतं यथाज्ञानं स्वस्वज्ञानमनतिक्रम्य विरक्ता भूत्वा वनं गता इत्यर्थः । तां मामेते अबुद्धयो युद्धे जेष्यन्ति ॥ ६ ॥ अबुद्धित्वं प्रपञ्चयति—मदिति ॥ मत्कृते मदर्थं राज्ये ममताबद्धचेतसामसतां पितृपुत्राणां भ्रातृणां चापि विग्रहो जायते ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममेति ॥ विग्रहकथनं स्पष्टम् ॥८॥ पृथुरिति पञ्चकम् ॥ विभो इति मध्ये शुकोक्तिः । संबुद्धिः पृथुरित्यादयः इतरैः स्वयम् अजिताः । एवं मे मयि उच्चैः अधिकां ममतां कृत्वा अवर्त्तन्त तेऽपि मर्त्यधर्मिणः मरणस्वभावाः अकृतार्थाः अपूर्णमनोरथा एव कालेन कथावशेषाः कृताः संहृताः । रामो नाम कश्चिदन्यो नृपः लोकदृष्ट्या दाशरथिर्वा ॥९॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ कथा इति ॥ हे विभो लोकेषु यशः सत्कीर्त्तिं विताय विस्तार्य परेयुषां परलोकं गतानां महीयसां माहात्म्ययुक्तानां राज्ञामिमाः कथास्ते तुभ्यं विज्ञानं विषयाणामसारताज्ञानं ततो वैराग्यं च तयोर्विवक्षया मया कथिताः । परंतु एताः कथाः वाचो विभूतीः विभूतयः वाग्विलासमात्ररूपाः । पूर्वसवर्णदीर्घ आर्षः । नतु पारमार्थ्यम् । परमार्थपरमेतत्कथनं न भवत्यत एतच्छ्रवण एवाग्रहो न कर्त्तव्य इत्यर्थः।अन्ये तु महीयसां प्रियव्रतादीनां परं भगवन्तमीयुषां विज्ञानं तेषां भग-

ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः ॥ स्पर्धमाना मिथो घ्नन्ति म्रियन्ते मत्कृते नृपाः ॥ ८ ॥ पृथुः पुरूरवा गाधिर्नहुषो भरतोऽर्जुनः ॥ मान्धाता सगरो रामः खट्वाङ्गो धुन्धुहा रघुः ॥ ९ ॥ तृणबिन्दुर्ययातिश्च शर्यातिः शन्तनुर्गयः ॥ भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः ॥१०॥ हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः ॥ नमुचिः शम्बरो भौमो हिरण्याक्षोऽथ तारकः ॥ ११ ॥ अन्ये च बहवो दैत्या राजानो ये महेश्वराः ॥ सर्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः ॥ १२ ॥ ममतां मय्यवर्त्तन्त कृत्वोच्चैर्मर्त्यधर्मिणः ॥ कथाऽवशेषाः कालेन ह्यकृतार्थाः कृता विभो ॥ १३ ॥ कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषाम् ॥ विज्ञानवैराग्यविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यम् ॥ १४ ॥ यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममङ्गलघ्नः ॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ राजोवाच ॥ केनोपायेन भगवन् कलेर्दोषान्कलौ जनाः ॥ विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा मुने ॥ १६ ॥ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः ॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः ॥ १७ ॥

वदनुभवः वैराग्यं च तयोर्विवक्षया तदाचरणमन्ये शिक्षन्तामिति भावः । इमाः कथा वचोविभूतय एव न भवन्ति किन्तु पारमार्थ्यम् । कथानां परमार्थतयैवेत्यर्थः इति व्याचख्युः ॥१४॥ कस्तर्हि अवश्यश्राव्यो विषय इत्याशङ्क्याह—य इति ॥ यस्तु अमङ्गलघ्नः उत्तमश्लोकस्य भगवतो गुणानामनुवादः कथनं सङ्गीयते सद्भिः सम्यक् गीयते कृष्णेऽमलां शुद्धां भक्तिमभीप्समानः इच्छन् जनः । चानशन्तोऽयम् । नित्यं तत्राप्यभीक्ष्णं पुनः पुनस्तमेव शृणुयात् ॥ १५ ॥ केनेति ॥ हे भगवन् हे मुने कलौ उपचितान् कलेर्दोषान् जनाः केनोपायेन विधमिष्यन्ति नाशयिष्यन्ति । धमादेश आर्षः धमधातुर्वा । तत् उपायस्वरूपं मे मह्यं यथा यथावद्ब्रूहि ॥ १६ ॥ युगानीति ॥ ईश्वररूपस्य महात्मनः कालरूपस्य विष्णोः गतिं गतिरूपाणि युगानि । युगधर्मांश्च प्रलयकल्पयोः संहारस्थितिकालयोर्मानं च ब्रूहि । अतो भगवद्रूपत्वात्कालप्रश्नो न बहिर्मुखः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत इति ॥ चत्वारः पादा यस्य स चतुष्पाद्धर्मः तज्ज्ञैः कृतयुगवर्त्तिजनैः धृतः कृते युगे प्रवर्त्तते । हे नृप विभोः पूर्णस्य धर्मस्य सत्यदयादयः पादाः दानं " दैप् शोधने " शौचमित्याहुः ॥ १८ ॥ सन्तुष्टा इति ॥ तदा च प्रायशः सर्वे जनाः सन्तुष्टाः करुणाः परदुःखनिराचिकीर्षवः मैत्राः प्राणिमैत्रीयुक्ताः तितिक्षवो द्वन्द्वसहिष्णवः समदृशः श्रमणाः भगवद्ध्यानादिश्रमपरा न तु विषयासक्ताः ॥ १९ ॥ त्रेतायामिति ॥ त्रेतायां तु अधर्मपादैरनृतादिभिः क्रमेण धर्मपादानां तुर्यांशः शनैर्हीयते। प्रतिपादं चतुर्थोंऽशः क्षीयते । असन्तोष इति च्छेदः । विग्रहो भूतविरोधः ॥ २० ॥ तदेति ॥ हे नृप तदा च जनाः क्रिया यज्ञादिः तपः उपवासादि तन्निष्ठाः नातिहिंस्राः गृहस्थस्य पञ्चसूनात्यागस्याशक्यत्वादितिशब्दः । न लम्पटाः विषयेष्वनासक्ताः त्रैवर्गिकाः धर्मार्थकामपराः त्रयीवृद्धाः वैदिककर्मसु निपुणाः वर्णाः ब्रह्मोत्तराः ब्राह्मणाधिकाः ॥ २१ ॥ तप इति ॥ द्वापरे युगे तु अधर्मस्य लक्षणैश्चिह्नैः पादैर्हिंसादिभिः धर्मपादेषु तपआदिषु अर्द्धं ह्रसति । अनृतेन सत्यं हिंसया दया असन्तोषेण तपः निग्रहेण दानमिति यथायोग्यं

श्रीशुक उवाच ॥ कृते प्रवर्त्तते धर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यं दया तपो दानमिति पादा विभोर्नृप ॥ १८ ॥ संतुष्टा करुणा मैत्राः शान्ता दान्तास्तितिक्षवः ॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः ॥ १९ ॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः ॥ अधर्मपादैरनृतहिंसाऽसंतोषविग्रहैः ॥ २० ॥ तदा क्रियातपोनिष्ठा नातिहिंस्रा न लम्पटाः ॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप ॥ २१ ॥ तपःसत्यदयादानेष्वर्धं ह्रसति द्वापरे ॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः ॥ २२ ॥ यशस्विनो महाशीलाः स्वाध्यायाध्ययने रताः ॥ आढ्याः कुटुम्बिनो हृष्टा वर्णाः क्षत्रद्विजोत्तराः ॥ २३ ॥ कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः ॥ एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति ॥ २४ ॥ तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः ॥ दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥ २५ ॥

योज्यम् । हिंसातुष्ट्यनृतद्वेषैरिति क्रमस्तु न विवक्षितः । अत्र च दानशब्देन रागद्वेषराहित्येन भूताभयप्रदानं विवक्षितं तदेव प्रथमस्कन्धे शौचशब्देनोक्तमतो न विरोधः इति स्वामिचरणाः ॥ २२ ॥ यशस्विन इति ॥ तदा जनाः प्रायः यशस्विनः कीर्तिप्रियाः महाशीला महायज्ञाद्यनुष्ठानशीलाः धनाढ्याः कुटुम्बिनः तत्पोषणपरास्तत्र हृष्टाश्च वर्णाः क्षत्रद्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः ॥ २३ ॥ कलाविति ॥ कलौ तु धर्महेतूनां धर्मपादानां तुर्यांशः चतुर्थांशोऽवशिष्यते सोऽप्येधमानैर्वर्धमानैरधर्महेतुभिः अधर्मपादैरहरहः क्षीयमाणोऽन्ते सोप्यशेषं विनङ्क्ष्यति ॥ २४ ॥ तस्मिन्निति ॥ तस्मिन् कलौ जनाः लुब्धाः दुराचाराः निर्दयाः शुष्कवैरिणः निर्हेतुकवैरिणः दुर्भगा भाग्यहीना भूरितर्षा अर्थकामतृष्णाकुलाः शूद्राः दाशाः कैवर्त्तादयश्च उत्तराः प्रधाना येषां तथाभूता जनाः । प्रजा इति पाठान्तरम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युगानां विषमस्वभावे हेतुमाह—सत्वमिति ॥ सत्वादयो गुणाः पुरुषे दृश्यन्ते । ते च कालेन संचोदिता आत्मनि मनसि परिवर्त्तन्ते ह्रासोल्लासाभ्यां स्वकार्यं कुर्वन्तीत्यर्थः । किं च यथा एकस्यापि सूर्यादिग्रहस्य दशायां ग्रहाणामन्तर्दशा भवन्ति तथैवैकयुगमध्ये चत्वारि युगानि तिष्ठन्ति । अतः कलिमध्येऽपि कदाचिन्न धर्मह्रासस्तत्राप्येकैकस्मिन् पुंसि एवं द्रष्टव्यमित्याशयः ॥ २६ ॥ प्रभवन्तीति ॥ तत्र मनश्चेन्द्रियाणि च यदा सत्वे निष्कामधर्मे प्रभवन्ति अतिशयेन वर्त्तन्ते यत् यदा च ज्ञाने तपसि च रुचिर्भवति तदा कृतयुगं विद्यात् जानीयात् ॥ २७ ॥ यदेति ॥ हे बुद्धिमन् यदा देहिनां काम्येषु कर्मसु । धर्मेषु इत्यपि पाठः । भक्तिः रुचिर्भवति चकारादधर्मेष्वपि तदा तु रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि ॥ २८ ॥ यदेति ॥ यदा च लोभादयो भवन्ति काम्यानां कर्मणां च विषये रुचिर्भवति तदा रजस्तमःप्रधानं द्वापरं जानीहि । मानो गर्वः पराभिभवहेतुश्चित्तविकारः दम्भः परप्रतारणानुकूलवेषधारणम् ॥ २९ ॥ यदेति ॥ यदा मायादयो भवन्ति तदा तामसः केवलतमोगणवृत्तिप्रधानः कलिः स्मृतः । माया कपटं तन्द्रा

सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः ॥ कालसंचोदितास्ते वै परिवर्त्तन्त आत्मनि ॥२६॥ प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च ॥ तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः ॥ २७ ॥ यदा कर्मसु काम्येषु भक्तिर्भवति देहिनाम् ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥ २८ ॥ यदा लोभस्त्वसंतोषो मानो दम्भोऽथ मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥ २९ ॥ यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम् ॥ शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ॥ ३० ॥ यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥३१॥ दस्यूत्कृष्टा जनपदा वेदाः पाखण्डदूषिताः ॥ राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥ ३२ ॥ अव्रता बटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥ तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः ॥ ३३ ॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः ॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ॥ ३४ ॥

आलस्यं हिंसा पीडा विषादनं दुःखं शोको रोदनम् ॥ ३० ॥ यस्मादिति ॥ यस्मान्मर्त्या वक्ष्यमाणविधाः स कलिरिति पूर्वेण सम्बन्धः । क्षुद्रदृशो मन्दमतयः क्षुद्रभाग्या अल्पभाग्याः महाशनाः बह्वाहाराः वित्तहीनाः अपि कामिनः विषयासक्ताः स्वैरिण्यः पुंश्चल्यः असतीः असत्यः स्त्रियः । पूर्वसवर्णदीर्घ आर्षः ॥ ३१ ॥ दस्यूत्कृष्टा इति ॥ जनपदा देशाः दस्यवः चोराः उत्कृष्टाः प्रधाना येषु तादृशाः वेदाश्च पाखण्डैः कल्पितविरुद्धनानामतैः दूषिता राजानश्च प्रजाभक्षाः प्रजापीडनपराः ॥ ३२ ॥ अव्रता इति ॥ बटवो ब्रह्मचारिणः अव्रताः स्वाश्रमोचिताचारशून्याः अशौचाः शौचशून्याः भविष्यन्ति । कुटुम्बिनो गृहस्थाश्च स्वयमेव भिक्षाटनपरा भविष्यन्ति नतु भिक्षां दास्यन्ति । तपस्विनो वनस्था वनं हित्वा ग्रामवासा भविष्यन्ति।संन्यासिनश्चार्थलोलुपा धनाद्यासक्ता भविष्यन्ति ॥३३॥ ह्रस्वेति ॥ पुनश्च स्त्रियः ह्रस्वकायाः अल्पपरिमाणदेहाः गतह्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्त्यक्तलज्जाः शश्वत् नित्यं कटुकभाषिण्यः अप्रियवादिन्यः चौर्यं च माया कपटं चेति उरु साहसम् उद्यमो यासां तास्तथाभूता भविष्यन्ति ॥ ३४ ॥ पणयिष्यन्तीति ॥ क्षुद्रा नीचा धर्मविचाररहिताः अत एव कूटकारिणो वञ्चकाः किराटा वाणिजः सन्तः पणयिष्यन्ति पणं क्रयविक्रयादिव्यवहारं प्रवर्त्तयिष्यन्ति । पणशब्दात्तत्करोतीति णिच् । किं च सर्वे जनाः अनापद्यपि जुगुप्सितां निन्दितां वार्तां वृत्तिं साधु मंस्यन्ते ॥ ३५ ॥ पतिमिति ॥ अखिलोत्तमं सर्वोत्तममपि निर्द्रव्यं धनहीनं पतिं स्वामिनं भृत्यास्त्यक्ष्यन्ति । पतयः स्वामिनश्च कौलं कुलपरम्पराप्राप्तं परमोपकारिणमपि विपन्नं रोगादिभिः व्यापाराक्षमं भृत्यं त्यक्ष्यन्ति । अपयस्विनीः दुग्धदोहा वृद्धा गाश्च त्यक्ष्यन्ति ॥ ३६ ॥ पित्रिति ॥ सौरतं सुरतनिमित्तं सौहृदं स्नेहो येषां ते अत एव पित्रादीन् हित्वा ननान्दरोऽत्र भार्याभगिन्यः । ननन्दुरिति वा पाठः । श्यालाः भार्याभ्रातरस्तैः संवादो मन्त्रालोचनं येषां ते स्त्रैणाः स्त्रीवश्याः अत एव लोके दीनाः कलौ नरा भविष्यन्ति ॥ ३७ ॥ शूद्रा इति ॥ तपोवेषधारणेनोपजीवन्तीति तथाभूताः शूद्राः प्रतिग्रहीष्यन्ति दानग्रहणं करिष्यन्ति ।

पणयिष्यन्ति वै क्षुद्राः किरीटाः कूटकारिणः ॥ अनापद्यपि मंस्यन्ते वार्तां साधु जुगुप्सिताम् ॥ ३५ ॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ ३६ ॥ पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः ॥ ननान्दृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥ शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ ३८ ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरपीडिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोऽन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा भविष्यन्ति कलौ प्रजाः ॥ ४० ॥ कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यन्ति च प्रियान् प्राणान् हनिष्यन्ति स्वकानपि ॥ ४१ ॥ न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान् क्षुद्राः शिश्नोदरंभराः ॥ ४२ ॥ कलौ न राजन् जगतां परं गुरुं त्रैलोक्यनाथानतपादपङ्कजम् ॥ प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाखण्डविभिन्नचेतसः ॥ ४३ ॥

तथा अधर्ममेव जानन्ति न धर्मं तथाभूता अपि उत्तमासनमधिरुह्य धर्मं वक्ष्यन्ति । धर्मोपदेशमिषेण धनादि ग्रहीष्यन्तीत्यर्थः ॥ ३८ ॥ नित्यमिति युग्मम् ॥ हे राजन् कलौ भूतले निरन्ने सति उद्विग्नमनसः भीतचित्ताः दुर्भिक्षेण करेण स्वामिभागदानेन च पीडिताः अनावृष्टिभयेन चातुराः वासोऽन्नादिभिर्हीनाः अत एव पिशाचसंदर्शाः पिशाचसदृशा भविष्यन्ति ॥ ३९ ॥ ४० ॥ कलाविति ॥ काकिणिके विंशतिवराटिकामात्रेऽप्यर्थे विषये विगृह्य विरोधं कृत्वा त्यक्तसौहृदाश्च सन्तः स्वकानपि हनिष्यन्ति तत्रासमर्थाश्चेत्प्राणानपि त्यक्ष्यन्ति ॥ ४१ ॥ नेति ॥ शिश्नोदरम्भराः। मुमार्षः। क्षुद्राश्च मनुजाः स्थविरौ वृद्धौ पितरावपि न रक्षिष्यन्ति । तथा पितरः सर्वार्थकुशलान् अपि पुत्रान्न रक्षिष्यन्ति ॥ ४२ ॥ महान्तमनर्थमाह—कलाविति ॥ हे राजन् कलौ पाखण्डैर्विभिन्नचेतसः मर्त्याः प्रायेण जगतां परं गुरुं पूज्यमत एव त्रैलोक्यनाथैर्ब्रह्मादिभिरानतं नमस्कृतं पादपङ्कजं यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमच्युतं भगवन्तं न यक्ष्यन्ति नाराधयिष्यन्ति ॥ ४३ ॥ यदिति ॥ म्रियमाणः आतुरो रोगी पतन् स्खलन् वा अत एव विवशोऽपि पुमान् यस्य भगवतो नामधेयं नाममात्रं गृणन् कीर्त्तयन् विमुक्ताः कर्मरूपाः अर्गलाः प्रतिबन्धा यस्य तथाभूतः सन् उत्तमां गतिं वैकुण्ठलोकादिकं प्राप्नोति तं भगवन्तं कलौ दोषवशाज्जना न यक्ष्यन्ति ॥ ४४ ॥ कलिदोषनिस्तारोपायमाह—पुंसामिति ॥ द्रव्यदेशात्मभिः संभवो येषां तान् सर्वान् कलिकृतान् दोषान् पुंसां चित्तस्थः चित्ते ध्यातः भगवान् पुरुषोत्तमः हरति ॥४५॥ श्रुत इति ॥ श्रवणादीनां कर्मीकृतोऽतो हृत्स्थो भगवान्नृणां जन्मनामयुतस्याशुभं धुनोति ॥ ४६ ॥ यथेति ॥ यथा धातुजं ताम्रादिधातुसंश्लेषेण जातं हेम्नो दुर्वर्णं मालिन्यं तत्र स्थितो वह्निरेव हरति न तोयादि एवं योगिनामात्मनि मनसि स्थितो विष्णुरेवाशुभाशयं दुर्वासनां हरति नतु योगादिकमित्यर्थः ॥४७॥ विद्येति ॥ अन्तरात्मान्तःकरणं यथा अनन्ते त्रिविधपरिच्छेदरहितेऽपि भगवति भक्तानुग्रहार्थं तद्हृदिस्थे सति अत्यन्तशुद्धिं लभते तथा विद्यादिभिर्न लभते । तत्र विद्या देवतोपासनादिः प्राणनिरोधो योगः मैत्री

यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन्वा विवशो गृणन् पुमान् ॥ विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥४४॥
पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥४५॥ श्रुतः संकीर्त्तितो ध्यातः पूजितश्चादृतोऽपि वा ॥
नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम्॥४६॥यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हन्ति धातुजम् ॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयम्
॥४७॥ विद्यातपःप्राणविरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ॥ नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥ ४८ ॥ तस्मात्सर्वा-
त्मना राजन्हृदिस्थं कुरु केशवम् ॥ म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् ॥ ४९ ॥ म्रियमाणैरभिध्येयो भगवान्परमेश्वरः ॥ आत्मभावं
नयत्यङ्ग सर्वात्मा सर्वसंश्रयः॥५०॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः॥ कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत्॥५१॥ कृते यद्ध्या-
यतो विष्णुं त्रेतायां यजतो मखैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात् ॥५२॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे तृतीयोऽध्यायः॥३॥

अहिंसादिः ॥ ४८ ॥ तस्मादिति ॥ हि यस्मात् अवहितः सावधानतया तद्ध्यानपरो म्रियमाणः ततः तस्माद्भगवतो हृदि स्थापनाद्धेतोः परां गतिं याति । तस्मात् हे राजन् केशवं सर्वात्मना एकाग्रचित्तेन त्वं हृदि कुरु ॥ ४९ ॥ म्रियमाण इति ॥ अङ्ग हे राजन् परमेश्वरः सर्वात्मा सर्वसंश्रयः भगवान् सर्वदाऽभिध्येयः यतो निरन्तरध्यानाभ्यासात् म्रियमाणैर्मरणावस्थापन्नैर्ध्यातः संस्तमात्मभावं स्वस्वरूपं प्रति नयति ॥ ५० ॥ कलेरिति ॥ स्फुटम् ॥ ५१ ॥ कृत इति ॥ कृते विष्णुं ध्यायतो नरस्य यत्फलं भवति यच्च त्रेतायां मखैर्यजतः पुंसः फलं द्वापरे परिचर्यायां पूजायां यत्फलं भवति तत्सर्वं कलियुगे हरिकीर्त्तनादेव भवति । अतोऽयमेव सर्वसाधकः सुगम उपायः ॥ ५२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायस्तृतीये द्वादशस्य व्यधादिमाम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थे तु चतुर्द्धोक्ता लयाः नैमित्तिकादयः॥ निस्तारो हरिकीर्त्यैव तत्र श्लोकास्त्रिसिन्धवः ॥ उवाचेत्येकं विपादाः सप्तवेदा अनुष्टुभः ॥४॥ कलौ परमो धर्मः पृष्टस्तदुत्तरं दत्त्वा शेषं प्रलयकल्पयोर्मानं कथयति—काल इति ॥ हे नृप ते तुभ्यं स कालः " परमाणुर्वै " इत्यादिना तृतीयस्कन्धे परमाण्वादिः द्विपरार्द्धावधिः कालः कथितः । युगमानं च कथितम् अथ कल्पलयावपि तयोर्मानं शृणु ॥ १ ॥ कल्पो द्विविधः दैनन्दिनो महांश्च तत्राद्यमाह—चतुर्युगेति ॥ हे विशांपते यत्र चतुर्दश मनवो भवन्ति तत् चतुर्णां युगानां सहस्रं ब्रह्मणो दिनमुच्यते । स एव दैनन्दिनः कल्प उच्यते । ब्रह्मायुःपरिमितश्च महाकल्पो ज्ञेयः ॥ २ ॥ प्रलयस्तु चतुर्विधः नैमित्तिकः प्राकृतिकः आत्यन्तिको नित्यश्चेति तत्र मानसहितं नैमित्तिकं प्रलयमाह—तदन्त इति ॥ तस्य कल्पस्यान्ते तावान् चतुर्युगसहस्रप्रमाणः प्रलयः सैव ब्राह्मी रात्रिरुदाहृता । तत्र त्रयो लोकाः भूर्भुवःस्वराख्याः प्रलयाय कल्पन्ते ॥३॥ एष इति ॥ यत्र यदा विश्वसृक् श्रीनारायणो विश्वमात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य अनन्ते आसनं यस्य सोऽनन्ते शेते आत्मभूर्ब्रह्मा च तस्मिन् शेते ।

श्रीशुक उवाच ॥ कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप ॥ कथितो युगमानं च शृणु कल्पलयावपि ॥ १ ॥ चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते ॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते ॥ २ ॥ तदन्ते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता॥ त्रयो लोका इमे तत्र कल्पन्ते प्रलयाय हि ॥ ३ ॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥ शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चात्मभूः ॥ ४ ॥ द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय वै ॥ ५ ॥ एष प्राकृतिको राजन् प्रलयो यत्र लीयते ॥ आण्डकोशस्तु संघातो विघात उपसादिते ॥६॥ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ॥ तदा निरन्ने ह्यन्योऽन्यं भक्ष्यमाणाःक्षुधार्दिताः ॥ क्षयं यास्यन्ति शनकैः कालेनोपद्रुताः प्रजाः ॥ ७ ॥ सामुद्रं दैहिकं भौमं रसं सांवर्त्तको रविः ॥ रश्मिभिः पिबते घोरैः सर्वं नैव विमुञ्चति ॥ ८ ॥ ततः संवर्त्तको वह्निः संकर्षणमुखोत्थितः ॥ दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ ॥ ९ ॥

एष ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिकः प्रोक्त इत्यर्थः । एष एव दैनन्दिनाख्यश्च ॥ ४ ॥ प्राकृतं प्रलयमाह—द्विपरार्द्ध इति ॥ परमेष्ठिनः सर्वोत्तमस्य ब्रह्मण आयुर्भूते द्विपरार्द्धकाले त्वतिक्रान्ते सति तदा सप्त प्रकृतयो महदहङ्कारपञ्चतन्मात्राणि प्रलयाय कल्पन्ते ॥ ५ ॥ एष इति ॥ हे राजन् विघाते विघातकारणे उपसादिते सति सप्तप्रकृतीनां सङ्घातःकार्यरूपो यत्र लीयते सप्त प्रकृतयः यत्कार्यं ब्रह्माण्डं च लीयते स एष प्रकृतिलयात् प्राकृतः प्रलय उच्यते ॥६॥ पर्जन्य इति सार्द्धम् ॥ स्पष्टम् ॥ ७॥ सामुद्रमिति ॥ सांवर्तकः प्रलयकालोपचितो रविः सामुद्रं देहेषु भवं दैहिकं भौमं च सर्वरसं घोरै रश्मिभिः पिबते आकर्षति । तद्भावः । नैव च मुञ्चति ॥ ८ ॥ तत इति ॥ अनिलवेगोत्थः वायुवेगेन प्रज्वलितः संकर्षणमुखोत्थितः सांवर्त्तको वह्निःशून्यान् सर्वप्राणिरहितान् सर्वरसाकर्षणाच्छुष्कांश्च भूविवरान् पातालादीन् दहति।अनि-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

लवेगो वा इति पाठे अनिलेन वेगो यस्य स वा रविणा रश्मिभिः पीतमुदकं च दहति । अनिलवेगो वै इति च पाठः ॥९॥ उपरीति ॥ उपर्यधः समंताच्च वह्निसूर्ययोः शिखाभिः ज्वालाभिर्दह्यमानं ब्रह्माण्डं दग्धगोमयपिण्डवद् विभाति ॥१०॥ तत इति ॥ ततश्च किंचिदधिकं वर्षाणां शतं परः बलीयान् संवर्त्तकाख्यः प्रचण्डो निष्ठुरः पवनो वाति तदा रजसा वृत्तं खमाकाशं धूम्रं भवति ॥ ११ ॥ तत इति ॥ अङ्ग हे राजन् ततश्चित्रवर्णानि अनेकशः मेघकुलानि शतं वर्षाणि वर्षन्ति । रभसस्वनैः तीव्रगर्जितैर्नन्दन्ति गर्जितानि कुर्वन्ति चेत्यर्थः ॥ १२ ॥ तत इति ॥ ततश्च ब्रह्माण्डविवरमध्यगतं विश्वम् एकोदकमेकार्णवोदकव्याप्तं भवति । उदप्लुवे उदकेन लोके प्लाविते सति भूमेर्गन्धगुणमापः ग्रसन्ति। गन्धोऽप्सु लीयत इत्यर्थः । तङ्भाव आर्षः ॥ १३ ॥ ग्रस्तेति ॥ ग्रस्तगन्धा पृथिवी प्रलयत्वाय अभावाय कल्पते । अपां रसं तेजो ग्रसति । तङ्भाव आर्षः । ता नीरसा आपस्तेजसि लीयन्ते ॥१४॥ ग्रसत इति ॥ ततस्तेजसो रूपं वायुर्ग्रसते । ततस्तद्रहितं रूपरहितं तेजस्तदा अनिले लीयते । वायोर्गुणं स्पर्शं खमाकाशो ग्रसते ॥१५॥ स इति॥

उपर्यधः समन्ताच्च शिखाभिर्वह्निसूर्ययोः ॥ दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत् ॥ १० ॥ ततः प्रचण्डपवनो वर्षाणामधिकं शतम् ॥ परः संवर्तको वाति धूम्रं खं रजसा वृतम् ॥ ११ ॥ ततो मेघकुलान्यङ्ग चित्रवर्णान्यनेकशः ॥ शतं वर्षाणि वर्षन्ति नदन्तो रभसस्वनैः ॥ १२ ॥ तत एकोदकं विश्वं ब्रह्माण्डविवरान्तरम् ॥ तदा भूमेर्गन्धगुणं ग्रसन्त्याप उदप्लवे ॥ १३ ॥ ग्रस्तगन्धा तु पृथिवी प्रलयत्वाय कल्पते ॥ अपां रसमथो तेजस्ता लीयन्तेऽथ नीरसाः ॥ १४ ॥ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा ॥ लीयते चानिले तेजो वायोः खं ग्रसते गुणम् ॥ १५ ॥ स वै विशति खं राजंस्ततश्च नभसो गुणम् ॥ शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते ॥ १६ ॥ तैजसश्चेन्द्रियाण्यङ्ग देवान्वैकारिको गुणैः ॥ महान्ग्रसत्यहंकारं गुणाः सत्त्वादयश्च तम् ॥ ग्रसतेऽव्याकृतं राजन् गुणान् कालेन नोदितम् ॥ १७ ॥ न तस्य कालावयवैः परिणामादयो गुणाः ॥ अनाद्यनन्तमव्यक्तं नित्यं कारणमव्ययम् ॥ १८ ॥

हे राजन् संस्पर्शरहितो वायुः खमाकाशं विशति ततश्च नभसो गुणं शब्दं भूतादिस्तामसाहंकारो ग्रसति । तं शब्दमनु पश्चान्नभोऽपि तस्मिन् लीयते ॥१६॥ तैजस इत्यर्द्धम् ॥ अङ्ग हे राजन् गुणैर्वृत्तिभिः सहितानि इन्द्रियाणि तैजसो राजसाहङ्कारो ग्रसते । वैकारिकः सात्विकश्चाहङ्कारो देवानिन्द्रियाधिष्ठातॄन् ग्रसते । महानिति तं त्रिविधमप्यहंकारं महान् ग्रसते । तं च महान्तं सत्वादयो गुणा ग्रसन्ते कालेन नोदितमव्याकृतं प्रधानं गुणान् ग्रसते साम्यावस्थां नयति॥१७॥ नेति ॥ अत्र तस्य तु लयो नास्तीत्याहेति अवतरणात् अव्यक्तपरेयं वक्ष्यमाणा त्रिश्लोकीति श्रीस्वाम्याशयः प्रतीयते । परे तु अव्यक्तलयस्थानं परमात्मपरत्वेन व्याचक्षते । कालावयवैः अहोरात्रादिभिस्तस्य परिणामो विपरिणामस्तदादयो गुणा भावविकारा नैव भवन्ति । तच्च अनादि अनन्तम् अव्यक्तमस्ति त्वविकारशून्यं नित्यं सर्वदैकरूपं वृद्धिरहितमित्यर्थः । कारणमव्ययम् अपक्षयशून्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति विकारषट्कं निषिद्धम् ॥ १८ ॥ किंच वागादिगोचरस्य सविशेषस्य विकारा भवन्ति इदं तु न तथेत्याह—नेति॥ यत्र वाचो मनःसत्वादयो गुणा महदादयो विकाराश्च न सन्ति यत्र प्राणबुद्धीन्द्रियदेवता वा न सन्ति लोककल्पः लोकस्य सदृशः कश्चित्सन्निवेशः आकारविशेषश्च नास्ति ॥ १९ ॥ नेति ॥ तत्स्वप्नजाग्रत्सुषुप्तरूपं नास्ति खं जलं भूरनिलोऽग्निरर्कश्च नास्ति । तच्च संसुप्तवत् शून्यवत् अप्रतर्क्यमनिर्वचनीयं तन्मूलभूतं पदमामनन्ति ॥२०॥लय इति ॥ विवशाः परतन्त्राः पुरुषाव्यक्तयोः शक्तयः सत्वादयः कालेन विद्रुताः चालिता यदा उक्तप्रकारेण संप्रलीयन्ते तदा ह्येष प्राकृतो लयो भवति ॥ २१ ॥ ज्ञानसाध्यं ब्रह्मणि लयरूपमात्यन्तिकं प्रलयं वदन् तदुपकरणत्वेन प्रपञ्चस्य ब्रह्माभेदमाह— बुद्धीति ॥ बुद्धिश्च इन्द्रियाणि च अर्थाश्चेत्येवं ग्राहककरणग्राह्यरूपेण तेषामाश्रयभूतं ज्ञानात्मकं ब्रह्मैव भाति न ततः पृथक्किंचिदस्ति । यतः दृश्यत्वाव्यतिरेकाभ्यां दृश्यत्वात् कारणस्याव्यतिरेकः कारणव्यतिरेकेण पृथगभावः तस्माच्चेति हेतुभ्याम् आद्यन्तवत् यद्वस्तु तदवस्तु असत् अत्रैवं प्रयोगः विमतं सन्न भवति । दृश्यत्वात्

न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी ॥ न प्राणबुद्धीन्द्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥ १९ ॥ न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ॥ संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति ॥ २० ॥ लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा ॥ शक्तयः संप्रलीयन्ते विवशाः कालविद्रुताः ॥ २१॥ बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यन्तवदवस्तु यत् ॥ २२ ॥ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ॥ एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥ २३ ॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते ॥ मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि ॥ २४ ॥ यथा जलधरा व्योम्नि भवन्ति न भवन्ति च ॥ ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् ॥ २५ ॥

कारणव्यतिरेकेणाभावात् आद्यन्तवत्त्वाच्च ॥ २२ ॥ कारणाव्यतिरेकं प्रपञ्चयति—दीप इति ॥ यथा दीपश्चक्षुश्च रूपं चेति त्रयं तेजः कार्यं तेजसः पृथङ् भवेत् एवं धीः कर्त्री खानि इन्द्रियाणि करणानि मात्राः शब्दादयो विषयाश्च अन्यतमात् तेभ्यो भिन्नात् ऋतात्सत्याद्ब्रह्मणः पृथङ् न स्युः । प्रपञ्चाद्ब्रह्मणोऽस्ति व्यतिरेकः प्रपञ्चस्य ततो नास्तीति ब्रह्मणो जगन्न भिन्नम् । एतेन कार्यासत्वे तदभिन्नस्य कारणस्याप्यसत्वं स्यादिति प्रत्युक्तम् ॥ २३ ॥ यत्तु विश्वतैजसप्राज्ञा इति जीवस्य नानात्वं तदपि मिथ्येत्याह—बुद्धेरिति ॥ जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः अवस्थाः विवेकिभिर्बुद्धेरेवेत्युच्यते । अतो हे राजन् प्रत्यगात्मनि त्विदमवस्थाप्रयुक्तं नानात्वं विश्वतैजसप्राज्ञरूपं मायामात्रम् अविद्यया कल्पितमित्यर्थः ॥ २४ ॥ यथेति ॥ यथा जलधरा व्योम्नि भवन्ति न भवन्ति च तथा उदयाप्ययात् आद्यन्तवत्त्वात् इदमवयविकार्यभूतं विश्वमपि तथैव कदाचिद्भवति कदाचिच्च न भवतीत्यर्थः । यत्सावयवं तदाद्यन्तवत् घटादिवदित्यर्थः ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri

कारणस्य सत्त्वमुपपादयति—सत्यमिति ॥ इह व्यवहारे सर्वेषामप्यवयविनामवयवः कारणमेव सत्यं परमार्थतया प्रोक्तः "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येवसत्यम्" इत्यादिश्रुतिभिर्निरूपितः। अत्र युक्तिमपि दर्शयति। अङ्ग हे राजन् हि यस्मात् अर्थेन अवयविना विनाऽपि तदभावदशायामपि अवयवाः पृथक् प्रतीयेरन् प्रतीयन्ते। तत्र दृष्टान्तः। यथा पटस्यावयवास्तन्तवः पटात् पृथक् प्रतीयन्ते तद्वदित्यर्थः ॥ २६ ॥ ननु कार्यस्यासत्वे ब्रह्मणः कारणताऽपि कुतो घटेतेति चेत्साऽपि नातीव सत्येत्याह—यदिति ॥ सामान्यं कारणं विशेषः कार्यं तद्रूपेण पृथक् यत् उपलभ्येत सः अन्योऽन्यापाश्रयात् परस्परापेक्षत्वेन निरूपणासहत्वात् भ्रम एव। यतः कारणत्वाभिमते कारणत्वं कार्यत्वाभिमतनिष्ठकार्यतानिरूपितम्। एवं कार्यत्वाभिमते कार्यत्वमपि कारणत्वाभिमतनिष्ठकारणतानिरूपितमेवातः एकस्य निरूपणमपरस्य निरूपणं विना न संभवति। अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि यत्परस्परापेक्षत्वादाद्यन्तवत्तत्सर्वमवस्तु। यद्वा। यदुपलभ्येत स भ्रमः सामान्यविशेषरूपत्वात्स्वप्नवत्। अन्योन्यापाश्रयात् इति हेत्वन्तरम्। गुणगुणीति विशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेण परस्पराधीनसिद्धिकत्वात् तथाभूतस्वप्नवदिति अतो यदाद्यन्तवत्तत्सर्वमवस्तु ॥ २७ ॥ ननु

सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह ॥ विनार्थेन प्रतीयेरन् पटस्येवाङ्ग तन्तवः ॥ २६ ॥ यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यन्तवदवस्तु यत् ॥ २७ ॥ विकारः ख्यायमानोऽपि प्रत्यगात्मानमन्तरा ॥ न निरूप्योऽस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ॥ २८ ॥ न हि सत्यस्य नानात्वमविद्वान्यदि मन्यते ॥ नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव ॥ २९ ॥ यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ॥ एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥ ३० ॥

प्रपञ्चस्यापि प्रकाशमानत्वादात्मवत्सत्वं किन्न स्यात्तत्राह—विकार इति ॥ ख्यायमानो व्यवह्रियमाणः प्रकाशमानोऽपि विकारः कार्यभूतः प्रपञ्चः प्रत्यगात्मानमन्तरा प्रत्यगात्मप्रकाशं विनाऽणुमात्रोऽपि न निरूप्योऽस्ति चेत् यदि तं विनाऽपि स्वतन्त्रतया निरूप्यः स्यात्तर्हि सोऽपि चित्समः स्यात् चिद्रूपेणात्मना समः स्वप्रकाश एव भवेत्। तथा सोऽप्यात्मवदेकरूप एव स्यादित्यर्थः ॥२८॥ कुत इत्यत आह—न हीति ॥ सत्यस्य परमार्थभूतस्य नानात्वं नास्त्येव। ननु सत्यस्याप्यात्मनो नानात्वमस्त्येवेत्याशङ्क्य स व्यवहारस्तूपाधिकृत एवेत्याह।यदि अविद्वान् तत् नानात्वं मन्यते तर्हि तत् छिद्रयोरिव घटाकाशमहाकाशयोरिव न वास्तवम्।अयं परिच्छेद्यापरिच्छेद्ययोर्दृष्टान्तः।तथा ज्योतिषोरिव आकाशजलस्थसूर्ययोरिवेत्युपाधिकृतविकारसदसद्भावे दृष्टान्तः। वातयोर्बाह्यशरीरस्थवाय्वोरिवेति क्रियाभेदे दृष्टान्तः ॥ २९ ॥ यथेति ॥ क्रियाभिस्तत्तद्रचनाभेदैर्व्यवहारमार्गेषु यथा हिरण्यमेव बहुधा कटककुण्डलादिरूपभेदैर्नृभिः समीयते प्रतीयते एवं लौकिकवैदिकैर्वचोभिरधोक्षजो भगवानेव अहंकारोपहितैर्जनैः व्याख्यायते ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वहङ्कारस्य स्वकारणभूतब्रह्मावरणासंभवात्कथं भेदव्यवहारहेतुत्वम् आवरणे वा स्वस्यापि प्रकाशासंभव इत्याशङ्क्याह—यथेति ॥ अर्करश्मय एव मेघरूपेण परिणता वर्षन्ति " आदित्याज्जायते वृष्टिः " इति वचनात्तस्मात् अर्कप्रभवः अर्केणैव दर्शितः प्रकाशितश्च घनो मेघो यथार्कांशभूतस्य चक्षुषः तमःस्वरूपभूतार्कदर्शनप्रतिबन्धको भवति । एवमेवाहम् अहङ्कारोऽपि ब्रह्मणो गुणः कार्यभूतः तदीक्षितः तेनैव प्रकाशितश्च ब्रह्मांशकस्यात्मनो जीवस्यात्मबन्धनः ब्रह्मस्वरूपदर्शनप्रतिबन्धको भवति ॥ ३१ ॥ घन इति ॥ यथा च अर्कप्रभवः घनो यदा पवनेन विदीर्यते तदैव चक्षुःस्वरूपभूतं रविमीक्षते तथा यदैव जिज्ञासया विचारेण आत्मन उपाधिरावरकोऽहङ्कारो विनश्यति तर्हि तदा अनुस्मरेत् ब्रह्मैवाहमिति पश्यतीत्यर्थः ॥ ३२ ॥ यदेति ॥ यदैवमुक्तप्रकारेण विवेकहेतिना ज्ञानशस्त्रेण मायामयमहङ्करणरूपमात्मबन्धनम् आत्मावरकं छित्त्वा अच्युतं परिपूर्णमात्मानमनुभवतीति तथाभूतः सन्नवतिष्ठते तदा अङ्ग हे राजन् तमात्यन्तिकं संप्लवं प्रलयमाहुः ॥३३॥ नित्यप्रलयमाह—नित्यदेति ॥ हे परन्तप एके केचित् सूक्ष्मज्ञा विवेकिनः सर्वभूतानां नित्यदा प्रतिक्षणमेवोत्पत्तिप्रलयौ संप्रचक्षते कथयन्ति ॥ ३४ ॥ तत्र हेतुमाह—कालेति ॥ कालरूपस्रोतसो वेगेनाशु ह्रियमाणस्य देहादेर्नित्यदा दृश्य-

यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः ॥ एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबन्धनः ॥ ३१ ॥ घनो यदाऽर्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ॥ यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥ ३२ ॥ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबन्धनम् ॥ छित्त्वाऽच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकमङ्ग संप्लवम् ॥ ३३ ॥ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥ ३४ ॥ काल स्रोतोजवेनाशु ह्रियमाणस्य नित्यदा ॥ परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥ ३५ ॥ अनाद्यन्तवताऽनेन कालेनेश्वरमूर्त्तिना ॥ अवस्था नैव दृश्यन्ते वियति ज्योतिषामिव ॥ ३६ ॥

माना या बाल्युवादिरूपास्ता एव नित्यदा जन्मप्रलययोर्हेतवः ज्ञापिकाः आरम्भकावयवसंयोग एवोत्पत्तिः तद्विभाग एव विनाशः । तत्र प्रत्यवयविना प्रत्यवयवेषु भुक्तान्ना-दिपरमाणूनां संयोगविभागासंभवे वृद्धिह्रासाद्यवस्थाभेदो न स्यात् । अतः प्रतिक्षणं परमाणुपर्यन्तं संयोगविभागाववश्यमङ्गीकार्याविंत्याशयः । तत्र दृष्टान्तमाह।परिणामिनामि-ति । यथा परिणामिनां नदीप्रवाहप्रदीपज्वालादीनामुच्चनीचावस्थास्तज्ज्ञापिकास्तथेति देहः प्रतिक्षणं प्रध्वंसी प्रतिक्षणमवस्थाभेदवत्त्वात् प्रदीपवदित्यनुमानम् ॥ ३५ ॥ ननु यदि प्रतिक्षणमवस्थास्तर्हि कथं न दृश्यन्ते अतो हेतुरसिद्ध इत्याशङ्क्याह—अनादीति ॥ अनाद्यन्तवता आद्यन्तरहितेन ईश्वरमूर्त्तिना कालेन जायमाना अवस्था नैव दृश्यन्ते न लक्ष्यन्ते । आकाशे गच्छतां ज्योतिषां चन्द्रादीनां गमनावस्थाविशेषा यथा नैव लक्ष्यन्ते तद्वत् तथा च यथा तेषां प्रदेशान्तरप्राप्त्यन्यथाऽनुपपत्त्या प्रतिक्षणं गमनावस्थाः कल्प्यन्ते तद्वदत्रापि बाल्यतारुण्यादिदर्शनेन तन्मध्यवर्त्तिन्योऽवस्थाः कल्प्यन्त इति न हेतुरसिद्ध इत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्य इति ॥ स्फुटम् ॥ ३७ ॥ पुराणार्थमुपसंहरति—एता इति ॥ हे कुरुश्रेष्ठ जगद्विधातुः अखिलसत्वधाम्नः नारायणस्य एता लीलाविषयाः कथास्ते तुभ्यं समासतः कथिताः। कार्त्स्न्येन तु अजो ब्रह्माऽपि अभिधातुं नेशः ॥ ३८ ॥ संसारेति ॥ विविधं दुःखमेव दवो दावानलस्तेनार्दितस्य पीडितस्य अत एव दुस्तरत्वात् संसार एव सिन्धुस्तमुत्तितीर्षोः पुंसो भगवतः पुरुषोत्तमस्य या लीलास्तासां याः कथास्तासां यो रसस्तन्निषेवणमन्तरेण विनाऽन्यः प्लवस्तरणसाधनं न भवेत् नास्ति। अतस्तत्कथाश्रवणमेव यथाशक्ति निषेव्यम् ॥ ३९ ॥ पुराणेति ॥ एतां पुराणसंहिताम् अव्ययो नारायणः चतुर्मुखद्वारा नारदाय प्राह स्म। यद्वा। ब्रह्मणे इत्याध्याहार्यम्। नारायणो ब्रह्मणे प्राह स्म। स च नारदायेति। स नारदः कृष्णद्वैपायनाय आह स्म ॥ ४० ॥ स इति ॥ स वै प्रसिद्धो बादरायणः प्रीतः सन् इमां भागवतीमत एव वेदैः सम्मितां तुल्यां संहितां मह्यं प्राहेति पूर्वेणान्वयः ॥ ४१ ॥ एतामिति ॥ हे कुरुश्रेष्ठ नैमिषालये नैमिषारण्यस्थाने तत्रापि दीर्घसत्रसभायामसौ अङ्गुल्या निर्दिश्यमानः पुरोवर्ती शौनकादिभिः संपृष्टः सूत

नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः ॥ आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी ॥ ३७ ॥ एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्याखिलसत्त्वधाम्नः ॥ लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभिधातुमीशः ॥ ३८ ॥ संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥ ३९ ॥ पुराणसंहितामेतामृषिर्नारायणोऽव्ययः ॥ नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ॥ ४० ॥ स वै मह्यं महाराज भगवान्बादरायणः ॥ इमां भागवतीं प्रीतः संहितां वेदसंमिताम् ॥ ४१ ॥ एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिशालये ॥ दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ॥ ४२ ॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान् हरिः ॥ यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥ १ ॥ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोऽद्य देहवत्त्वं न नङ्क्ष्यसि ॥ २ ॥

एतां वक्ष्यति ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायश्चतुर्थे द्वादशस्य व्यधादिमाम् ॥ ४ ॥ पञ्चमे ब्रह्मोपदेशाद्राज्ञस्तक्षकजं भयम् ॥ न्यवारयन्मुनिस्तत्र श्लोकाः सार्द्धास्त्रयोदश ॥ उवाचेति वचस्त्वेकं श्लोकैस्तुल्या अनुष्टुभः ॥ ५ ॥ अत्रेति ॥ जगतः कर्ता अजो ब्रह्माऽपि यस्य प्रसादजः प्रसादोऽत्र रजोवृत्तिर्हर्षस्ततो जातः अतः परतन्त्रः तथा सर्वसंहारकर्ता रुद्रश्च यस्य क्रोधसमुद्भवः न तु स्वतन्त्रः स विश्वस्यात्मा नियन्ता भगवान् हरिः। अत्र पुराणेऽभीक्ष्णमनुवर्ण्यते ॥ १ ॥ त्वमिति ॥ हे राजन् त्वं तु अहं मरिष्य इतीमां पशुबुद्धिं देहात्माविवेकरूपां जहि त्यज। मरिष्य इति तङ् सन्धिश्चार्षौ। यथा देहः प्रागभूत एवाद्य जातो नङ्क्ष्यति च न चैवं त्वं पूर्वं नाभूः न चाद्य जातोऽसि अतो न नङ्क्ष्यसि ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु बीजाङ्कुरवत् स्वस्मात्पुत्ररूपेण स्वयमेव भवति "आत्मा वै पुत्रनामासि" इति श्रुतेः। ततः पुनरङ्कुराद्बीजमिव पौत्ररूपेणापि स्वयमेव वर्तत्ते अतस्तेषु नश्यत्सु कथं न नङ्क्ष्यामीति चेत्तत्राह—नेति ॥ त्वं भूत्वा पुत्रपौत्रादिरूपवान् बीजाङ्कुरवन्न भविष्यसि यस्माद्देहादेर्व्यतिरिक्तस्त्वं देहाद्देह एव जायते न त्वात्मा। यथाऽनलः काष्ठाद्व्यतिरिक्तः ॥ ३ ॥ स्वप्ने इति ॥ यथा स्वप्ने आत्मनः शिरश्छेदं पञ्चत्वादि मरणादि च स्वयं पश्यति तथा जागरणेऽपि देहस्यैव तत्पश्यति आत्मनस्तु भ्रममात्रम्। यस्मादेवं ततः आत्मा अजः अमरश्च ॥ ४ ॥ घट इति ॥ यथा घटे भिन्ने सति तदन्तर्वर्त्यवकाशः यथा पुरा घटोपाधेः पूर्वं यथा तथा आकाशः स्यात्। एवमात्मज्ञानेन देहे मृते लीने सति जीवः पुनर्ब्रह्म सम्पद्यते ॥५॥ मन इति ॥ मनः आत्मनः देहान् गुणान् कर्माणि च सृजति तच्च मनो मायां सृजति ततो मायाद्युपाधिसमुदायाज्जीवस्य संसृतिर्भवति न स्वतः॥६॥ स्नेहेति सार्द्धम् ॥ यावत्स्नेहः तैलादि अधिष्ठानं पात्रं वर्त्तिरग्निरेतेषां संयोग ईयते प्रतीयते ततः तावत् दीपस्य ज्योतिषः दीपत्वं दीपज्वालारूपः परिणामः एवं देहकृतो

न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् ॥ बीजाङ्कुरवद्देहादेर्व्यतिरिक्तो यथाऽनलः ॥ ३ ॥ स्वप्ने यथा शिरश्छेदं पञ्चत्वाद्यात्मनः स्वयम् ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ॥ ४ ॥ घटे भिन्ने यथाऽऽकाश आकाशः स्याद्यथा पुरा ॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥ ५ ॥ मनः सृजति वै देहान् गुणान् कर्माणि चात्मनः ॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥ ६ ॥ स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृतो भवः ॥ रजःसत्वतमोवृत्त्या जायतेऽथ विनश्यति ॥ ७ ॥ न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः ॥ आकाश इव चाधारो ध्रुवोऽनन्तोपमस्ततः ॥८॥ एवमात्मानमात्मस्थमात्मनैवामृश प्रभो ॥ बुद्ध्यानुमानगर्भिण्या वासुदेवानुचिन्तया ॥ ९ ॥ चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः ॥ मृत्यवो नोपधक्ष्यन्ति मृत्यूनां मृत्युमीश्वरम् ॥ १० ॥

देहाद्यध्यासनिबन्धन एव भवः। तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्त्तिस्थानीयो देहः अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपस्थानीयः संसार इत्यूह्यम्। अतो दीपवत्संसार एव रजआदिगुणवृत्त्या जायते विनश्यति च ॥७॥ न त्वात्मा जायते नश्यति वा ज्योतिर्वत् इत्याह—नेति ॥ एवं संसारो जायते नश्यति। तत्र स्थितोऽप्यात्मा न जायते न च नश्यति। य आत्मा व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परः अन्यः स्वयंज्योतिः आकाश इव देहादेराधारः ध्रुवो निर्विकारः नास्त्यन्त उपमा च यस्य सोऽनन्तोपमः ततः व्याप्तः ॥ ८ ॥ एवमिति ॥ हे प्रभो वासुदेवानुचिन्तया युक्तस्त्वमनुमानगर्भिण्या बुद्ध्यादिप्रवर्त्तकत्वेन यदात्मनोऽनुमानं स एव गर्भस्तद्युक्तबुद्ध्या आत्मना स्वयमेव आत्मस्थं देहादिसङ्घातस्थमात्मानम् आमृश विविच्य पश्येत्यर्थः। बुद्ध्यादीनि प्रवर्त्तकसापेक्षाणि जडत्वात् चक्रादिवादित्याद्यनुमानम् ॥ ९ ॥ चोदित इति ॥ विप्रवाक्येन चोदितस्तक्षकस्त्वां न धक्ष्यति किंतु देहमेव यतः मृत्यवः मृत्युहेतवः कालादयो मृत्यूनां मृत्युमीश्वरं नोपधक्ष्यन्ति। अत आत्मना ईश्वरेणैकतामाप्तं त्वां न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धक्ष्यन्तीत्याशयः ॥१०॥ अहमिति युग्मम् ॥ योऽहं स परं धाम सर्वाश्रयं ब्रह्मैव यत् परं पदं परमाश्रयं ब्रह्म तदहमेव । एवं निष्कले निरुपाधौ आत्मनि ब्रह्मणि आत्मानमाधाय एकीकृत्य समीक्षन् । शता आर्षः । विषयुक्तैराननैः स्वपादे दशन्तं तक्षकं लेलिहानं सर्वं स्वशरीरं च विश्वं चात्मनः पृथक् न द्रक्ष्यसीति तत्राहं ब्रह्मेति भावनया जीवस्य शोकादिनिवृत्तिः ब्रह्माऽहमिति भावनया ब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीति व्यवहारो दर्शितः ॥ ११ ॥ १२ ॥ एतदिति ॥ हे तात हे नृप आत्मा त्वं यथा विश्वात्मनो हरेश्चेष्टां लीलां पृष्टवान् तथैतत्ते तुभ्यं सर्वं मया कथितम् । भूयः किं श्रोतुमिच्छसि ॥ १३ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ पञ्चमे गङ्गासहायो द्वादशस्य व्यधादिमाम् ॥ ५ ॥ षष्ठे परीक्षितो मोक्षः सर्पसत्रं तदाहृतिः ॥ वेदत्रयविभागश्च श्लोकास्तत्राभ्रहस्तिनः ॥ उवाचाष्टकमप्यङ्गचूना नवाशीतिरिति स्फुटम् ॥ ६ ॥ एतदिति ॥ व्यासात्मजेन निखिलात्मा भगवान् तमेव पश्यति निरन्तरं ध्यायति इति तथा तेन अतः समेन मुनिना शुकेनाभिहितं कथितमेतत्पुराणं निशम्य । यद्वा । किं भूयः

अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम् ॥ एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ॥ ११ ॥ दशन्तं तक्षकं पादे लेलिहानं विषाननैः ॥ न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥ १२ ॥ एतत्ते कथितं तात यथात्मा पृष्टवान्नृप ॥ हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि ॥ १३ ॥ इति श्रीभा० महा० द्वादशस्कन्धे प्रमाणलक्षणं नाम पञ्चमोऽध्यायः ॥ ५ ॥ सूत उवाच ॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ तत्पादपङ्कजमुपसृत्य नतेन मूर्ध्ना बद्धाञ्जलिस्तमिदमाह स विष्णुरातः ॥ १ ॥ राजोवाच ॥ सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना ॥ श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥२॥ नात्यद्भुतमहं मन्ये महतामच्युतात्मनाम् ॥ अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥ ३ ॥ पुराणसंहितामेतामश्रौष्म भवतो वयम् ॥ यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ॥ ४ ॥

श्रोतुमिच्छसीति वचनं निशम्य विष्णुना रातो दत्तः परीक्षित् नतेन नम्रेण मूर्ध्ना तस्य पादपद्ममुपसृत्य तत्पादौ शिरसि निधायेत्यर्थः । बद्धाञ्जलिः सन्निदं वक्ष्यमाणमाह स्म ॥ १ ॥ सिद्ध इति ॥ अहं सिद्धः कृतार्थोऽस्मि करुणात्मना भवता अनुगृहीतोऽस्मि यत् यस्मात् मे मह्यं त्वया अनादिनिधनो जगत्कारणभूतःसाक्षात् हरिर्भवता श्रावितः । चकारात् तत्प्राप्तिसाधनं च श्रावितम् ॥ २ ॥ नेति ॥ अच्युतः आत्मनि येषां तेषां महतामज्ञेषु तापतप्तेषु यः अनुग्रहस्तमत्यद्भुतम् आश्चर्यं न मन्ये स्वाभाविकत्वात् ॥ ३ ॥ पुराणेति ॥ वयमेतां पुराणसंहितां भवतः मुखात् अश्रौष्म श्रुतवन्तः । स्फुटमन्यत् । ननु श्रीशुकदेवेन इदं पुराणमत्र समापितं तर्हि कथं प्रथमस्कन्धस्यावशिष्टद्वादशस्य च भागवतत्वम् । यज्ञस्य यथा प्रागुत्तरकृत्यकलापयोरपि यज्ञत्वमेव नाटकस्य प्राक्पश्चाद्गतयोः प्रस्तावनाशीर्वादयोरपि नाटकत्वमेव तथा प्रथमस्कन्धशेषद्वादशयोरपि भागवतत्वमिति ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवन्निति ॥ हे भगवन् अहं तक्षकादिभ्यो मृत्युकारणेभ्यो न बिभेमि यतस्त्वया दर्शितमभयं भयरहितं निर्वाणं कैवल्यरूपं ब्रह्म प्रविष्टोऽस्मि । अनेनैव कृतार्थताऽपि स्पष्टीकृता ॥५॥ किं भूयः श्रोतुमिच्छसीत्युक्तं तत्र न किंचिदिच्छामि किन्त्वनुज्ञामात्रं देहीत्याह—अनुजानीहीति ॥ हे ब्रह्मन् वाचमिति सर्वेन्द्रियोपलक्षणम् सर्वेन्द्रियाणि नियम्य मुक्ताः कामाशयाः कामवासना यस्मात्तथाभूतं चेतः अधोक्षजे भगवति प्रवेश्य असून् प्राणान् विसृजामि एतदर्थं मामनुज्ञां देहि ॥ ६ ॥ अज्ञानमिति ॥ भवता दर्शितं क्षेमं निर्भयं परं सर्वोत्तमं भगवतः पदं स्वरूपं तस्य ज्ञानं विज्ञानं च साक्षात्कारात्मकं तन्निष्ठया मे अज्ञानं निरस्तं चकारात्तत्संस्कारश्च निरस्तः ॥७॥ इत्युक्त इति ॥ स्फुटम्॥८॥ परीक्षिदपीति ॥ राजर्षिः परीक्षिदपि आत्मना बुद्ध्या आत्मानं मनः आत्मनि प्रत्यक्प्रकाशे समाधाय एकीकृत्य अस्पन्दासुः लीनप्राणस्तरुर्यथा परमात्मानं दध्यौ ॥ ९ ॥

भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहम् ॥ प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वया ॥ ५ ॥ अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥ ६ ॥ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदम् ॥ ७ ॥ सूत उवाच ॥ इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः ॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥ ८ ॥ परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना ॥ समाधाय परं दध्यावस्पन्दासुर्यथा तरुः ॥ ९ ॥ प्राक्कूले बर्हिष्यासीनो गङ्गाकूल उदङ्मुखः ॥ ब्रह्मभूतो महायोगी निःसङ्गश्छिन्नसंशयः ॥१०॥ तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना ॥ हन्तुकामो नृपं गच्छन्ददर्श पथि कश्यपम् ॥११॥ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणम् ॥ द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपम् ॥ १२ ॥ ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना ॥ बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनाम् ॥१३॥ हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः ॥ विस्मिता ह्यभवन् सर्वे देवासुरनरादयः ॥१४॥ देवदुन्दुभयो नेदुर्गन्धर्वाप्सरसो जगुः॥ ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः ॥१५॥ जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ॥ यथा जुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः ॥१६॥

प्राक्कूले इति ॥ प्राक्कूले प्रागग्रे बर्हिषि दर्भे आसीनः । स्फुटमन्यत् ॥ १० ॥ तक्षक इति ॥ हे विप्राः क्रुद्धेन द्विजसूनुना प्रहितः प्रेषितस्तक्षकः नृपं हन्तुकामो गच्छन् पथि कश्यपं तन्नामानं ब्राह्मणं ददर्श ॥ ११ ॥ तमिति ॥ तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनाय गच्छन्तं तत्र स्वालीढवटवृक्षस्य भस्मीभूतस्य पुनरङ्कुरादिक्रमेणोत्यापनाद्विषहारिणं तदपेक्षितद्रविणैः संतर्प्य ततो निवर्त्य कामरूपः स तक्षकः द्विजरूपेण तिरोहितः सन्नागत्यापेक्षितरूपेण नृपमदशत् ॥ १२ ॥ ब्रह्मेति त्रयम् ॥ स्पष्टम् ॥ १३ ॥ ॥ १४ ॥ १५ ॥ जनमेजय इति ॥ जनमेजयः स्वपितरं तक्षकभक्षितं श्रुत्वा संक्रुद्धः सन् सर्पाभिचारसत्रेण द्विजैः सह वर्तमानः यथा यथावत् नागान् आजुहाव मन्त्रैराचकर्ष । जुहावेत्येव वा च्छेदः ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

सर्पेति ॥ भयेन संविग्नो व्याकुलस्तक्षकः इन्द्रं शरणं ययौ । स्फुटं शेषम् ॥ १७ ॥ अपश्यन्निति ॥ पारीक्षितः परीक्षित्पुत्रः राजा तत्र तक्षकमपश्यन् द्विजानुवाच । उरगाधमः तक्षकोऽत्र कस्मान्न दह्येतेति ॥ १८ ॥ द्विजा ऊचुः—तमिति ॥ तेनेन्द्रेण संस्तम्भितोऽसौ सर्पः अग्नौ न पतति । स्फुटमन्यत् ॥ १९ ॥ पारीक्षित इति ॥ उदारधीः पारीक्षित इति द्विजवचः श्रुत्वा ऋत्विजः प्रति प्राह स्म । हे विप्राः सहेन्द्रः इन्द्रेण सहितः तक्षकः अग्नौ किमिति न पात्यते ॥ २० ॥ तदिति ॥ तद्राज्ञो वचः श्रुत्वा विप्राः मखे सहेन्द्रं तक्षकम् आजुहुवुः । हे तक्षक मरुत्त्वता मरुद्गणवता इन्द्रेण सह इहाग्नावाशु पतस्व । तङ्गार्षः ॥ २१ ॥ इतीति ॥ इत्येवं ब्राह्मणैरुच्चैराक्षेपैः परुषवाक्यैः सविमानः सतक्षकश्चेन्द्रः स्थानात्प्रचालितः अतः संभ्रान्तमतिर्बभूव ॥ २२ ॥ तमिति ॥ तमिन्द्रमम्बरात् आकाशात्पतन्तं विलोक्य आङ्गिरसः अङ्गिरसः पुत्रो बृहस्पती राजानं जनमेजयं

सर्पसत्रे समिद्धाग्नौ दह्यमानान्महोरगान् ॥ दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥१७॥ अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान् ॥ उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥१८॥ तं गोपायति राजेन्द्र शक्रः शरणमागतम् ॥ तेन संस्तम्भितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥१९॥ पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः ॥ सहेन्द्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥ २० ॥ तच्छ्रुत्वा जुहुवुर्विप्राः सहेन्द्रं तक्षकं मखे ॥ तक्षकाशु पतस्वेह सहेन्द्रेण मरुत्वता ॥२१॥ इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ॥ बभूव संभ्रान्तमतिः सविमानः सतक्षकः ॥२२॥ तं पतन्तं विमानेन सहतक्षकमम्बरात् ॥ विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ॥२३॥ नैष त्वया मनुष्येन्द्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतमथ वा अजरामरः ॥२४॥ जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोऽन्यो नान्यस्य प्रदाता सुखदुःखयोः॥२५॥सर्पचोराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप ॥ पञ्चत्वमृच्छते जन्तुर्भुङ्क्त आरब्धकर्म तत् ॥२६॥ तस्मात्सत्रमिदं राजन् संस्थीयेताभिचारकम् ॥ सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते॥२७॥सूत उवाच ॥ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः ॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिम् ॥२८॥

प्राह स्म ॥ २३ ॥ नेति ॥ हे मनुष्येन्द्र एष सर्पराट् त्वया वधं नार्हति । यद्वा । सर्पेण तक्षकेण सह राजत इति सर्पराट् इन्द्रः । तत्र हेतुमाह । यतोऽनेनामृतं पीतम् अथ वै तस्मादेव न जीर्यत इत्यजरः स चासावमरश्चेति तथाभूत इति ॥ २४ ॥ पितृशोकं तु मा कार्षीरित्याह—जीवितमिति ॥ जन्तोः स्वेनैव कर्मणा जीवितं मरणं गतिः स्वर्गादिप्राप्तिश्च भवति । हे राजन् ततः स्वकर्मणोऽन्योऽन्यस्य सुखदुःखयोर्दाता नास्ति ॥२५॥ सर्पेति ॥ सर्पादिभिर्विद्युदादिभिश्च यत् जन्तुः पञ्चत्वं मरणमृच्छति प्राप्नोति तदारब्धं कर्मैव भुङ्क्ते ॥ २६ ॥ तस्मादिति ॥ यस्मादेवं तस्मादिदमाभिचारिकं हिंसाफलकं सत्रं संस्थीयेत समाप्यताम् । सर्पा अपि अनागस एव दग्धाः । हि यस्माज्जनैर्दिष्टं प्राचीनं कर्म भुज्यते अतः सर्पाहुष्टप्रयुक्तस्य तवापि नापराधः ॥ २७ ॥ इतीति ॥ वाक्पतिं बृहस्पतिम् । स्फुटमन्यत् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सैषेति ॥ अबाधया भगवत्कृपां विना बाधितुमशक्यया यया मायया अस्य विष्णोरात्मभूताः अंशरूपा एव प्राणिनो गुणवृत्तिभिः क्रोधादिभिर्भूतेषु प्राणिषु मुह्यन्ति बाध्यबाधकतां व्रजन्तीत्यर्थः । सैषा न लक्ष्यते इत्यलक्षणा अप्रतर्क्या विष्णोर्महामाया ॥ २९ ॥ न यत्रेति ॥ दम्भीति कपटवानयं पुमानित्येवंभूतायां बुद्धावसकृदुल्लिख्यमाना या माया ब्रह्मवादे ब्रह्मविचारे क्रियमाणे आत्मवादिभिर्यत्र विष्णौ अभया न विराजिता किन्तु भीतेव । स्वकार्यं मोहादिकमकुर्वती कथंचिद्वर्त्तत इति प्रतिपादितेत्यर्थः । किंच यत् यस्मिन् तदाश्रयः मायाश्रयः मायाकृतो विविधो विवादो वाग्व्यवहारो नास्ति विवादानां विशेषविषयत्वात् तस्य च विशेषातीतत्वात् । तथा संकल्पविकल्पा वृत्तयो यस्य तन्मनोऽपि यत्र न प्रवर्त्तते संकल्पविकल्पानामपि विशेषविषयत्वात् । "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह ।" इति श्रुतेः ॥ ३० ॥ न यत्रेति ॥ तथा सृजता कारकवर्गेण सह सृज्यं पुण्यपापात्मकं कर्म यत्र नास्ति तथोभयोः सृज्यस्रष्ट्रोः परं साध्यं श्रेयःफलं च सुखदुःखादि यत्र नास्ति तथा त्रिभिः सत्वादिभिर्गुणैर्जागरादिभिर्वा

सैषा विष्णोर्महामायाऽबाध्ययाऽलक्षणा यया ॥ मुह्यन्त्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः ॥ २९ ॥ न यत्र दम्भीत्यभया विराजिता मायात्मवादेऽसकृदात्मवादिभिः ॥ न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्तिमत् ॥३०॥ न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहम् ॥ तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः ॥३१॥ परं पदं वैष्णवमामनन्ति तत् यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः ॥ ३२ ॥ त एतदधिगच्छन्ति विष्णोर्यत्परमं पदम् ॥ अहं ममेति दौर्जन्यं न येषां देहगेहजम् ॥ ३३ ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ३४ ॥ नमो भगवते तस्मै कृष्णायाकुण्ठमेधसे ॥ यत्पादाम्बुरुहध्यानात्संहितामध्यगामिमाम् ॥ ३५ ॥

सृज्यस्रष्टृफलैर्वाऽन्वितः जीवो जीवोपाधिरूपोऽहङ्कारश्च यत्र नास्ति । अत एव उत्सादितौ निरस्तौ बाध्यबाधकौ । भावप्रधानो निर्देशः । बाध्यत्वबाधकत्वे यस्मिंस्तदेतद् परमात्मनः स्वरूपमित्यर्थः । अतः मुनिर्विवेकी स्वयमपि ऊर्मीन् अहङ्कारादीन्निषिध्य त्यक्त्वा विरमेत् विशेषेण क्रीडेदित्यर्थः ॥ ३१ ॥ परमिति ॥ अनन्यसौहृदाः नास्ति आत्मनोऽन्यस्मिन् देहादौ सौहृदं ममताहन्तादि येषां ते अत एव नेति नेतीत्येवमतत् आत्मव्यतिरिक्तमुत्सिसृक्षवस्त्यक्तुमिच्छवो जनाः यत्पूर्वं निरूपितं तदेव परं सर्वत उत्कृष्टं वैष्णवं पदं स्वरूपमामनन्ति वर्णयन्ति । तथा यत् समाहितैर्वशीकृतदेहेन्द्रियान्तःकरणैर्मुमुक्षुभिः दौरात्म्यं देहादावहंममभावं विसृज्य हृदा ध्यानेनोपगुह्यालिङ्ग्य व्यवसितं निरन्तरं ध्येयतया गृहीतमित्यर्थः ॥३२॥ त एतदिति ॥ येषां देहजम् अहमिति गेहादिजं ममेति दौर्जन्यम् अभिमानो नास्ति त एव विष्णोर्यत्परं पदं तदेतदधिगच्छन्ति ॥ ३३ ॥ अतिवादानिति ॥ अतिवादान् निन्दावचनानि । स्फुटं शेषम् ॥ ३४ ॥ नम इति ॥ कृष्णाय व्यासाय अध्यगामधीतवानस्मि । स्फुटमन्यत् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पैलेति ॥ हे सौम्य । फुटमन्यत् ॥ ३६ ॥ समाहितेति ॥ हे ब्रह्मन् समाहितात्मनः निश्चलचेतसः अतः परमेष्ठिनः सर्वोच्चमाधिकारनिष्ठस्य ब्रह्मणो हृदि आकाशस्तस्मान्नादः प्राणघोषोऽभूत् । यः कर्णपुटपिधाने श्रोत्रवृत्तिरोधादस्मदादिष्वपि विभाव्यते वितर्क्यते ॥ ३७ ॥ यदिति ॥ हे ब्रह्मन् यस्य नादस्योपासनया योगिनः द्रव्यमधिभूतं क्रिया अध्यात्मं कारकमधिदैवम् एवं त्रिधा आख्या यस्य तथाभूतम् आत्मनो मलं धूत्वा अपोह्य अपुनर्भवं मोक्षं यान्ति ॥ ३८ ॥ तत इति ॥ ततो नादात्त्रिवृत् त्रिमात्रः कण्ठोष्ठादिभिरुच्चार्यमाणस्याक्षरसमाम्नाये वक्ष्यमाणेऽन्तर्भावात् इति स्वामिपादाः । ओंकारस्य अकारोकारमकारात्मकत्वात् इति त्वन्ये अभवत् । यः अव्यक्तः अस्पष्टः अभवो जन्म यस्य सः अत एव स्वराट् स्वत एव हृदि प्रकाशमानः यत्तद्भगवतः परमात्मनो ब्रह्मणो लिङ्गं गमकम् । यदिति क्लीबत्वं लिङ्गशब्दविशेषणत्वात् ॥३९॥ कोऽसौ परमात्मा तमाह—शृणोतीति ॥ यः परमात्मा सुप्तश्रोत्रे कर्णपिधानादिना श्रोत्रे अवृत्तिकेऽपि सति इमं स्फोटमव्यक्तं नादात्मकमोङ्कारं शृणोति यश्चेश्वरः शून्यदृक् शून्येऽपीन्द्रियवर्गे दृक् ज्ञानं यस्य तादृशोऽस्ति तथा हि सुप्तो यदा शब्दं श्रुत्वा प्रबुध्य तेन तदा जीवः श्रोता लीनेन्द्रियत्वात् । अतो यः शब्दं श्रुत्वा प्रबोधयति स तदा परमात्मैव ।

शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कतिधा व्यस्ता एतत्सौम्याभिधेहि नः ॥३६॥ सूत उवाच ॥ समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥३७॥ यदुपासनया ब्रह्मन् योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवम् ॥३८॥ ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥३९॥ शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् ॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥ ४० ॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ॥ स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ॥ ४१ ॥ तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ॥ धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ॥ ४२ ॥

जीवस्तु करणाधीनज्ञानत्वान्न तदा श्रोता तदुपलब्धिस्तु तस्य परमात्मद्वारैव । तद्वत् ओङ्कारं विशिनष्टि । येन ओङ्कारेण नादरूपेण वाक् बृहती व्यज्यते यस्य च हृदयाकाशे आत्मनः सकाशात् व्यक्तिः अभिव्यक्तिः ॥ ४० ॥ स्वेति ॥ स ओङ्कारः स्वधाम्नः स्वाश्रयस्य स्वकारणस्य परमात्मनो ब्रह्मणः साक्षाद्वाचकः तथा सः सर्वमन्त्राणां देवतावाचकानामपि उपनिषद्रहस्यं सूक्ष्मं रूपमित्यर्थः । वेदानां बीजं बीजत्वेऽपि अविकारित्वात् सनातनं सदैकरूपम् ॥ ४१ ॥ वेदबीजत्वं दर्शयति—तस्य हीति ॥ हे भृगूद्वह
शौनक तस्य प्रणवस्याकाराद्यास्त्रयो वर्णा आसन् । यैरकारोकारमकारैः गुणाः सत्वादयः साहित्येषु प्रसिद्धाः शब्दगुणा माधुर्यौजःप्रसादा वा नामानि ऋग्यजुःसामानि ।
सुबन्ततिङन्ताव्ययभेदात्त्रिधा शब्दा वा । अर्था भूर्भुवःस्वर्लोकाः वाच्यलक्ष्यव्यङ्ग्या वा वृत्तयो जाग्रदाद्याः अभिधालक्षणा व्यञ्जना वा त्रयः त्रित्वसङ्ख्यायुक्ताः भावा धार्यन्ते तत्कारणत्वात् । यथा वटबीजेनैव वटवृक्षो धार्यते तेन च स्कन्धशाखाफलादयः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणवाद्वेदोत्पत्तौ क्रमं दर्शयति—तत इति ॥ ततस्तेभ्यो वर्णेभ्यः तत्र ओंकाराद्वा अन्तस्थाः यरलवाः । ऊष्माणः शषसहाः । स्वरा अकाराद्याः । स्पर्शाः कादयो मावसानाः । ह्रस्वदीर्घप्लुताश्च आदिशब्दात् जिह्वामूलीयादयः । त एव लक्षणं स्वरूपं यस्य तम् । अक्षराणां समाम्नायं समाहारं भगवान् अजो ब्रह्मा असृजत् ॥ ४३॥ तेनेति ॥ तेनै-वाक्षरसमुदायेन विभुर्ब्रह्मा चतुर्भिर्वदनैश्चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिता ऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं हौत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया सव्याहृतिकान् सो-ङ्कारांश्च चतुरो वेदानसृजदिति पूर्वेणान्वयः ॥ ४४ ॥ पुत्रानिति ॥ तांस्तु वेदान् स ब्रह्मा ब्रह्मकोविदान् वेदोच्चारणादौ निपुणान् ब्रह्मर्षीन् पुत्रान् मरीच्यादीनध्यापयत् । धर्मोपदेष्टारः ते मरीच्यादयः स्वपुत्रेभ्यः कश्यपादिभ्यः समादिशन् ॥ ४५ ॥ त इति ॥ एवं परम्परया चतुर्षु युगेषु प्राप्तास्ते वेदाः धृतव्रतैः तत्तच्छिष्यैः तेषां तेषां शिष्यैः महर्षिभिर्द्वापरादौ व्यस्ताः विभक्ताः द्वापरादौ द्वापरमादिर्यस्य तदन्त्यांशलक्षणस्य कालस्य तस्मिन् द्वापरान्ते वेदविभागप्रसिद्धेः । शन्तनुसमकाले व्यासावतारप्रसिद्धेश्चेति प्राहुः

ततोऽक्षरसमाम्नायमसृजद्भगवानजः ॥ अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥ ४३ ॥ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ॥ सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया ॥ ४४ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४५ ॥ ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ४६ ॥ क्षीणायुषः क्षीणसत्त्वान्दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतनोदिताः ॥ ४७ ॥ अस्मिन्नप्यन्तरे ब्रह्मन् भगवाँल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये॥४८॥ पराशरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ४९ ॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥ ५० ॥

॥ ४६ ॥ क्षीणेति ॥ जनान् कालतो युगे प्रवृत्तादधर्मतः क्षीणायुषः अल्पायुष्कान् क्षीणसत्वान् धैर्यबलादिहीनान् दुर्मेधान् मन्दमतीन् । असिजभाव आर्षः । वीक्ष्य हृदिस्थेनाच्युतेन चोदिताः ब्रह्मर्षयो वेदान् व्यस्यन् व्यास्यन् विभक्तवन्तः । आडभाव आर्षः । विभागो नाम अपारेभ्यश्चतुर्भ्यो वेदराशिभ्य उद्धृत्य संहि[illegible]ब्राह्मण-करणेन प्रवर्त्तनम्॥४७॥ सामान्यतो वेदविभागमुक्त्वाऽत्र मन्वन्तरे विशेषतो निरूपयितुमाह—अस्मिन्निति युग्मम् ॥ हे ब्रह्मन् हे महाभाग ब्रह्मेशाद्यैर्लोकपालै[illegible] [illegible]चितः लोकभावनः विभुर्भगवान् अस्मिन् वैवस्वते मन्वन्तरे अंशो माया तस्याः अंशः सत्वं तस्य कलया व्यासरूपेण अंशेनावतीर्णः सन् वेदं [illegible] ॥ ४९ ॥ चातुर्विध्यमाह यद्वा ननु ब्रह्मणैव चत्वारो वेदाः प्रथममेव कृतास्तत्कथमुच्यते चतुर्विधं वेदं चक्रे इति तत्र[illegible] [illegible]रूपेण संहि[illegible] तस्य ऋगादिसंहिताश्चक्रे । यथानेकविधमणिराशेर्मणिगणाः हीरकपद्मरागादयो विविच्योद्ध्रियन्ते तद्वदित्यर्थः [illegible]

[illegible] संहितात्मकत्वेन [illegible]धीयमानः अनाच्छाद्यमानः रश्मिभिरपा- [illegible]देश्च
[illegible]७॥ गायत्रीद्वितीयपादार्थमनुवर्णयन् स्तौति—यदिति ॥
[illegible] विबुधर्षभ हे सवितः हे अहरहः प्रतिदिनमनुसवनं त्रिसन्ध्यमाम्नायविधिना वैदिकमार्गेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तासामिति ॥ हे ब्रह्मन् स महामतिः विभुः व्यासः चतुरः शिष्यान् पैलादीनुपाहूय तासां संहितानां मध्ये एकैकां [illegible] तास्म् । मुदायरूपत्वाद्बह्वृचाख्यायां नितरां प्रश्लेषेण गद्यमानत्वान्निगदाख्यम् । स्फुटमन्यत् ॥ ५२ ॥ साम्नामिति ॥ साम्नां संबन्धिनीं छन्दःसु गीयमानत्वाच्छन्दोगाख्यां [illegible] स्फुटमन्यत् ॥ ५३ ॥ ऋग्वेदविभागमाह—पैल इति त्रयम् ॥ पैलो मुनिः स्वां संहितां द्वेधा विभज्य इन्द्रप्रमितये बाष्कलाय च ऊचे । हे भार्गव स बाष्कलोऽपि स्वकां संहितां चतुर्द्धा व्यस्य बोध्यादिभ्यश्चतुर्भ्यः शिष्येभ्य आह स्म । आत्मवान् इन्द्रप्रमितिरपि स्वां संहितां स्वसुतं कविं माण्डूकेयमृषिमध्यापयामास । स्फुटमन्यत् ॥ ५४ ॥ ॥ ५५ ॥ ५६ ॥ शाकल्य इति ॥ तत्सुतो माण्डूकेयस्य सुतः शाकल्यः स्वां संहितां पञ्चधा व्यस्य वात्स्यादिषु पञ्चसु शिष्येषु अधात् तानध्यापयामास ॥ ५७ ॥ जातू-

तासां स चतुरः शिष्यानुपाहूय महामतिः ॥ एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥५१॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणम् ॥ ५२ ॥ साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ॥ अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥ ५३ ॥ पैलः स्वां संहितामूच इन्द्रप्रमितये मुनिः ॥ बाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम् ॥ ५४ ॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पराशरायाग्निमित्रे इन्द्रप्रमितिरात्मवान् ॥ ५५ ॥ अध्यापयत्संहितां स्वां माण्डुकेयमृषिं कविम् ॥ तस्य शिष्यो देवमित्रः सौभर्यादिभ्य ऊचिवान् ॥ ५६ ॥ शाकल्यस्तत्सुतस्तां तु पञ्चधा व्यस्य संहिताम् ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥५७॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ॥ बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ ५८ ॥ बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहिताम् ॥ चक्रे वालाय निर्भज्य काशारश्चैव तां दधुः ॥ ५९ ॥ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६० ॥ वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् ॥ यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ॥ ६१ ॥

कर्ण्य इति ॥ तच्छिष्यः शाकल्यशिष्यः जातूकर्ण्यश्च स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा सनिरुक्तां स्वसंहितां बलाकादिभ्यश्चतुर्भ्यो ददौ ॥५८॥ बाष्कलिरिति ॥ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः प्रतिशाखाभ्य उक्तसर्वशाखाभ्य उद्धृत्य वालखिल्याख्यां संहितां चक्रे । बालायन्यादयस्त्रयः शिष्यास्तां दधुः अधीतवन्तः ॥ ५९ ॥ बह्वृचा इति ॥ एता बह्वृचाख्याः ऋग्वेदसंहिताः एभिर्ब्रह्मर्षिभिः पैलादिभिर्धृताः एतच्छन्दसाम् एतेषां छन्दसां व्यासं श्रुत्वा सर्वपापैः प्रमुच्यते ॥६०॥ यजुर्वेदतैत्तिरीयशाखोत्पत्तिप्रस्तावमाह—वैशम्पायनशिष्या इत्यादिना ॥ वैशम्पायनस्य शिष्याः चरकसंज्ञाः अध्वर्यवः यजुर्वेदविदः अभवन् । गुरुणा कृतं ब्रह्महत्यारूपमंहः पापं क्षपयतीति तथा तत्स्वगुरोरनुष्ठेयं व्रतं यत् यस्मात् गुरुभक्त्या स्वयं चेरुस्तस्मात्तच्चरणाच्चरका इत्यर्थः ॥ ६१ ॥

॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याज्ञवल्क्य इति ॥ याज्ञवल्क्यश्च तच्छिष्यो वैशम्पायनशिष्यः अहो भगवन् अल्पसाराणां तुच्छसामर्थ्यानामेषां शिष्याणां बहूनां चरितेन व्रतेन कियत्फलम् । अतः शीघ्रं ब्रह्महत्यांहःक्षपणं सुदुश्चरं व्रतमहमेक एव चरिष्यामित्याह स्म ॥ ६२ ॥ इतीति ॥ इत्येवमुक्तः अतः कुपितो गुरुरपि यतो विनीतानप्येतानल्पसारान् वदसि अतः विप्राणामवमन्त्रा अवज्ञाकर्त्रा शिष्येण त्वया अलं न किमपि प्रयोजनमतो यदधीतं तदाशु त्यज इतो याहि गच्छेत्याह स्म ॥ ६३ ॥ देवेति ॥ सोऽपि देवरातसुतो याज्ञवल्क्यः यजुषां गणं छर्दित्वा उद्गीर्य ततः स्थानाद्गतः । अथानन्तरं मुनयस्तान् यजुर्गणान् ददृशुः ॥ ६४ ॥ यजूंषीति ॥ मुनयश्च तल्लोलुपतया यजुःषु अतिलुब्धतया छर्दितस्यादानं विप्ररूपेणानुचितं मत्वा तित्तिराः पक्षिविशेषा भूत्वा यजूंष्याददुर्गृहीतवन्तः । तङभाव आर्षः । अत एव सुपेशलाः अतिरम्याः यजुःशाखाः तैत्तिरीया इति प्रसिद्धा आसन् । बहुवचनं त्ववान्तरभेदविवक्षया ॥ ६५ ॥ कण्वमाध्यन्दिनादिशाखाप्रसङ्गमाह—याज्ञवल्क्य इत्यादिना ॥ हे ब्रह्मन् ततः तदनन्तरं गुरोर्वैशम्पायनस्य व्यासेन विभज्यानुक्तत्वात् अवि-

याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् ॥ चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥६२॥ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥६३॥ देवरातसुतः सोऽपि च्छर्दित्वा यजुषां गणम् ॥ ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ६४ ॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ॥ तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥६५॥ याज्ञवल्क्यस्ततो ब्रह्मन्छन्दांस्यधिगवेषयन् ॥ गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥ ६६ ॥ याज्ञवल्क्य उवाच ॥ ॐ नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्बपर्यन्तानामन्तर्हृदयेषु बहिरपि चाकाश इवोपाधिनाऽव्यवधीयमानो भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ ६७ ॥ यदु ह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जन भगवतः समभिधीमहि तपनमण्डलम् ॥ ६८ ॥

द्यमानानि तेनानधिगतानि अधि अधिकानि गवेषयन् मृगयमाणः याज्ञवल्क्यः ऋगादिवेदानामीश्वरमर्कं सूपतस्थे सम्यक् तुष्टाव ॥ ६६ ॥ तत्र गायत्रीप्रथमपादार्थमनुवर्णयन् स्तौति— ॐ नम इति ॥ यो भगवान् भवानेक एव ब्रह्मादिस्तम्बपर्यन्तानां जरायुजादिभेदेन चतुर्विधानां भूतनिकायानामखिलजगतामन्तर्हृदयेष्वात्मस्वरूपेण अन्तर्यामिरूपेण बहिरपि क्षणलवादयो येऽवयवास्तैरुपचिता ये संवत्सरास्तेषां गणेन कालस्वरूपेण वर्त्तमानस्तथाऽप्याकाश इव देहाद्युपाधिना अव्यवधीयमानः अनाच्छाद्यमानः रश्मिभिरपामादानं शोषणं विसर्गश्च वृष्टिस्ताभ्यामिमां दृश्यमानां लोकयात्रां वृत्तिमनुवहति तस्मै तुभ्यं भगवत आदित्याय नमः ॥६७॥ गायत्रीद्वितीयपादार्थमनुवर्णयन् स्तौति—यदिति ॥ यदु हेति प्रसिद्धिद्योतको निपातसमुदायः । ध्येयत्वं सूचयन् बहुधा संबोधयति । हे विबुधर्षभ हे सवितः हे अहरहः प्रतिदिनमनुसवनं त्रिसन्ध्यमाम्नायविधिना वैदिकमार्गेण

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

उपतिष्ठमानानां स्तुतिनमस्कारादिना भजतां जनानां यान्यखिलानि दुरितानि पापानि तत्फलानि वृजिनानि दुःखानि बीजं पापकारणमज्ञानं च तेषाम... निरासन हे ... ॥ इह लोके यो भवान् यददो भगवतस्तव मण्डलं तपति तत्समभिधीमहि सम्यगाभिमुख्येन ध्यायेमेत्यन्वयः ॥ ६८ ॥ अथ गायत्रीतृतीयपादार्थमनुवर्णयन् स्तौति—य इहेति ॥ इह लोके यो भवान् स्थिरचरनिकराणां स्थावरजङ्गमसमूहानां निजनिकेतनानां स्वशरीरभूतानां जीवानामात्मनो जडान् मनइन्द्रियप्राणगणान् स्वयमात्मैवान्तर्यामी सन् प्रचोदयति प्रवर्त्तयति ॥ ६९ ॥ तृतीयपादमेव मण्डलस्थपरतया व्याचक्षाणः स्तौति—य एवेति ॥ य एव परमकारुणिको भवान् अतिकरालवदनो योऽन्धकारसंज्ञोऽजगरग्रहस्तेन गिलितमत एव मृतकमिव विचेतनं निःसंज्ञमिमं लोकमवलोक्य निजानुकम्पया ईक्षया दृष्ट्यैव उत्थाप्याहरहरनुसवनं त्रिसन्ध्यं स्वधर्माख्यं यदात्मनः परमात्मनः अवस्थानमुपासनं तस्मिन् प्रवर्त्तयति । यश्च तत्र तत्र स्थाने आशापालैर्दिक्पालै इन्द्रवरुणादिभिः कमलकोशयुक्तैस्तत्तुल्यैर्वाञ्जलिभिरुपहृतार्हणः दत्तार्घः अवनिपतिरिवासाधूनां दुराचाराणां मरणनरका-

य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मनइन्द्रियासुगणाननात्मनः स्वयमात्मान्तर्यामी प्रचोदयति ॥६९॥ य एवेमं लोकमतिकरालवदनान्धकारसंज्ञाजगरग्रहगिलितं मृतकमिव विचेतनमवलोक्यानुकम्पया परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्त्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति ॥ परित आशापालैस्तत्र तत्र कमलकोशाञ्जलिभिरुपहृतार्हणः॥७०॥ अथ ह भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितमहमयातयामयजुःकाम उपसरामीति ॥ ७१ ॥ सूत उवाच ॥ एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ॥ यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥ ७२ ॥ यजुर्भिरकरोच्छाखा दश पञ्चशतैर्विभुः ॥ जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः ॥ ७३ ॥ जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनिः ॥ सुतन्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् ॥ ७४ ॥

दिभयमुदीरयन्नुत्पादयन् परितोऽटति ॥ ७० ॥ अथेति ॥ यत एवंभूतस्त्वमथात एव हे भगवन् तस्य तव त्रिभुवनगुरुभिरिन्द्रादिभिर्वन्दितं चरणनलिनयुगलमयातयामानि यजूंषि तत्कामोऽहमुपसरामि भजामीति । इतिशब्दः स्तुतिसमाप्तिद्योतकः ॥७१॥ एवमिति ॥ एवं स्तुतः प्रसादितः स भगवान् हरिः रविः । स्फुटमन्यत् ॥ ७२ ॥ यजुर्भिरिति ॥ विभुर्याज्ञवल्क्यः शतैरपरिमितैर्यजुर्भिर्दश पञ्च च शाखा अकरोत् । स तैरिति पाठे स विभुस्तैः सूर्यदत्तैर्यजुर्भिरित्यर्थः । रविणाऽश्वरूपेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन संन्यस्तास्त्यक्ताः शाखाः । यद्वा । वाजेभ्यः सम्यङ् नयन्तीति वाजसनीसंज्ञाः ताः शाखाः काण्वादयो जगृहुः अधीतवन्तः ॥७३॥ सामशाखाविभागमाह—जैमिनेरिति ॥ सामगस्य जैमिनेः सुमन्तुर्नाम मुनिस्तनय आस । तत्सुतः सुमन्तुसुतः सुतन्वान् नाम आस । जैमिनिः स्ववेदं द्वेधा विभज्य ताभ्यां पुत्रपौत्राभ्यामेकैकां संहितां प्राह स्म ॥७४॥ ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुकर्मेति ॥ हे द्विजाः । द्विज इति पाठे सुकर्मविशेषणम् । सुकर्मा चापि तच्छिष्यः जैमिनिशिष्यः स च महान् महाबुद्धिमान् अतस्ततस्तस्मात् सामवेदतरोः सकाशात् साम्नां सहस्रं संहिताभेदं चक्रे । यद्वा । सामवेदतरोः सामवेदतरुसंबन्धी तच्छिष्यो महान् अन्येभ्य उत्कृष्टोऽभूत् ॥७५॥ हिरण्येति ॥ कौशल्यः कोशलदेशोद्भवः हिरण्यनाभः पौष्यञ्जिश्च एतौ द्वौ सुकर्मणः शिष्यौ तं संहिताभेदं जगृहतुः । तथाऽन्योऽपि ब्रह्मवित्तमः आवन्त्यो नाम तस्यैव शिष्यः सोऽपि तं जग्राह ॥ ७६ ॥ उदीच्या इति ॥ पौष्यञ्ज्यावन्त्ययोश्चकारात् हिरण्यनाभस्यापि पञ्चशतानि शिष्या आसन् । ते तावतीः शाखा यथायथं जगृहुः। तानुदीच्यान् सतः कांश्चित्प्राच्यांश्च प्रचक्षत इत्यर्थः । यथोक्तं वैष्णवे ।" उदीच्याः सामगाः शिष्यास्तस्य पञ्चशतं स्मृताः । हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तमैः ॥ गृहीतास्तेऽपि चोच्यन्ते पण्डितैः प्राच्यसामगाः । " इति । यद्वा । हिरण्यनाभस्य पञ्चशतानि शिष्या उदीच्या आसन् । पौष्यञ्ज्यावन्त्ययोरपि तावन्त एव शिष्याः तांस्तु प्राच्यान् प्राच्यसामगान् प्रचक्षते । ते च तावतीः शाखा जगृहुः

सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् ॥ सहस्रं संहिताभेदं चक्रे साम्नां ततो द्विजः ॥ ७५ ॥ हिरण्यनाभः कौशल्यः पौष्यञ्जिश्च सुकर्मणः ॥ शिष्यौ जगृहतुश्चान्य आवन्त्यो ब्रह्मवित्तमः ॥ ७६ ॥ उदीच्याः सामगाः शिष्या आसन् पञ्च शतानि च ॥ पौष्यञ्ज्यावन्त्ययोश्चापि तांश्च प्राच्यान् प्रचक्षते ॥ ७७ ॥ लौगाक्षिर्माङ्गलिः कुल्यः कुशीदः कुक्षिरेव च ॥ पौष्यञ्जिशिष्या जगृहुः संहितास्ते शतं शतम् ॥ ७८ ॥ कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः ॥ शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान् ॥ ७९ ॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे वेदशाखाप्रणयनं नाम षष्ठोऽध्यायः ॥६॥ सूत उवाच ॥ अथर्ववित्सुमन्तुश्च शिष्यमध्यापयत्स्वकाम् ॥ संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवान्॥१॥शौक्लायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः॥वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥ मुकुदः शुनको ब्रह्मन् जाजलिश्चाप्यथर्ववित्॥२॥

॥ ७७ ॥ लौगाक्षिरिति ॥ लौगाक्ष्यादयः अन्येऽपि पञ्च पौष्यञ्जिशिष्याः आसन् । ते च शतं शतं संहिता जगृहुः ॥७८॥ कृत इति ॥ कृतसंज्ञकोऽन्योऽपि हिरण्यनाभस्य शिष्यः चतुर्विंशतिसंहिताः स्वशिष्येभ्य ऊचे । शेषाः अन्याः अपि याः प्रसिद्धाः शाखास्ता आत्मवान् आवन्त्यः स्वशिष्येभ्य ऊचे॥७९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायः षष्ठेऽस्मिन् द्वादशस्य व्यधादिमाम् ॥६॥ सप्तमेऽथर्वभागाश्च पुराणलक्षणादि च ॥ फलं भागवतश्रुत्याः श्लोकाः सार्द्धेषुबोर्हवः ॥ तेौर्वत्योऽनुष्टुभोऽप्यत्रोवाचेत्येकं वचः स्मृतम् ॥ ७ ॥ अथर्वविभागमाह—अथर्वविदिति ॥ अथर्ववित्सुमन्तुः स्वकां स्वकीयां संहितां स्वशिष्यं कबन्धनामानमध्यापयामास । सोऽपि शिष्योऽपि तां द्विधा विभज्य पथ्याय वेददर्शाय च उक्तवान् । तदुक्तं वैष्णवे । " अथर्ववेदं सुमतिः सुमन्तुरमितद्युतिः । शिष्यमध्यापयामास कबन्धं सोऽपि तं द्विधा ॥ कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान् ।" इति ॥ १ ॥ शौक्लायनिरिति सार्द्धम् ॥ हे ब्रह्मन् वेददर्शस्य अथर्ववेदावित् शौक्लायनिरित्यादयश्चत्वारः शिष्याः । अथ पथ्यस्य शिष्यान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रृणु । ते च कुमुदादयः त्रयः । अयं भावः । वेददर्शपथ्यौ स्वस्वसंहितां स्वस्वशिष्यसङ्ख्यया विभज्य तानध्यापयामासतुरिति ॥२॥ बभ्रुरिति ॥ अथाङ्गिरसः शुनकस्य बभ्रुः शिष्यः तथा सैन्धवायनश्चेति । शुनकोऽपि स्वसंहितां द्विधा विभज्य ताभ्यां ददौ इति भावः । तथा परेऽपि सावर्ण्याद्याः सैन्धवायनादीनां शिष्याः अथर्ववेिद आसन् ॥ ३ ॥ आद्यशब्दग्राह्यानाह—नक्षत्रेति ॥ नक्षत्रकल्पः शान्तिः शान्तिकल्पः कश्यपाङ्गिरसादयश्चेति नक्षत्रकल्पादि कल्पादिकर्तृत्वात्तत्तन्नाम्ना व्यवहारः । एते सुमन्त्वाद्याः आथर्वणाचार्याः शाखाविभागेन वेदप्रवर्तकाः आसन् । अथ हे मुने पौराणिकान् श्रृणु ॥ ४ ॥ त्रय्यारुणिरिति ॥ स्फुटम् ॥ ५ ॥ अधीयन्तेति ॥ व्यासशिष्यात् प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् । अनन्तरं च व्यासशिष्यात् मत्पितुर्मुखादेते त्रय्यारुणादयः एकैकां संहितामधीयन्त अध्यैयत । आडभावश्छान्दसः । एतेषां षण्णां शिष्योऽहमतस्ताः सर्वा एव समधीतवान् ॥ ६ ॥ कश्यप इति ॥ कश्यपोऽहमुग्रश्रवाः सावर्णिरिति त्रयः रामशिष्योऽकृतव्रणश्च चत्वारो वयं व्यासशिष्यात् चतस्रो

बभ्रुः शिष्योऽथाङ्गिरसः सैन्धवायन एव च ॥ अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथाऽपरे ॥ ३ ॥ नक्षत्रकल्पः शान्तिश्च कश्यपाङ्गिरसादयः ॥ एते आथर्वणाचार्याः श्रृणु पौराणिकान्मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ वैशम्पायनहारीतौ षड्वै पौराणिका इमे ॥ ५ ॥ अधीयन्त व्यासशिष्यात्संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥६॥ कश्यपोऽहं च सावर्णी रामशिष्योऽकृतव्रणः ॥ अधीमहि व्यासशिष्याच्चतस्रो मूलसंहिताः ॥ ७ ॥ पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितम् ॥ श्रृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥ ८ ॥ सर्गोऽस्याथ विसर्गश्च वृत्ती रक्षान्तराणि च ॥ वंशो वंश्यानुचरितं संस्था हेतुरपाश्रयः ॥ ९ ॥ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ केचित्पञ्चविधं ब्रह्मन्महदल्पव्यवस्थया ॥ १० ॥

मूलसंहिता अधीमहि । मूलेत्युक्त्या संहिताबाहुल्यं सूचितम् ॥ ७ ॥ पुराणेति ॥ हे ब्रह्मन् ब्रह्मर्षिभिर्वेदशास्त्रानुसारतः निरूपितं पुराणलक्षणं बुद्धिमाश्रित्य सावधानो भूत्वा श्रृणुष्व । तङार्षः ॥ ८ ॥ सर्ग इति ॥ अस्य विश्वस्य अत्र सर्गो विसर्गश्च वृत्तिः स्थानं रक्षा पोषणम् । अन्तराणि मन्वन्तराणि । वंशो वंश्यानुचरितमिति च द्वयम् । ईशानुकथाः संस्थानिरोधः अनेनैवात्यन्तलयरूपा मुक्तिरप्युक्ता । हेतुशब्देन जीवाश्रयवासनाशब्दवाच्या । ऊतयो गृहीताः इति । अत्र सर्गो विसर्गश्चेत्यादिद्वितीयस्कन्धानुसारेण ज्ञेयम् ॥ ९ ॥ दशभिरिति ॥ दशभिरेतैर्लक्षणैर्युक्तं तत्पुराणं पुराणविदो महापुराणं विदुः । हे ब्रह्मन् केचित्तु पञ्चविधं पुराणलक्षणमाहुः । "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥" इति तच्च महदल्पं च पुराणमिति । व्यवस्थयेति । यत्र दशापि लक्षणानि पृथक् निरूप्यन्ते तन्महापुराणम् । यत्र त्वन्येषां पञ्चस्वेवान्तर्भावस्य विवक्षा तदल्पपुराणमिति व्यवस्थया ज्ञेयमित्यर्थः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्गादिस्वरूपं निरूपयति—अव्याकृतेत्यादिना ॥ अव्याकृतस्य प्रधानस्य गुणानां क्षोभात् यो महान् महत्तत्वं तस्मात् यस्त्रिवृत् त्रिविधोऽहङ्कारस्तस्मात् भूतसूक्ष्माणां शब्दादितन्मात्राणामिन्द्रियाणां च तदर्थानां स्थूलानां पृथिव्यादिमहाभूतानां तद्देवतानां संभवः च कारणसृष्टिः सर्गः उच्यते ॥ ११ ॥ पुरुषेति ॥ पुरुषेण परमेश्वरेणानुगृहीतानामाहितसृष्टिसामर्थ्यानामेतेषां महदादीनां वासनामयः पूर्वकर्मसदसद्वासनाप्रधानः योऽयं समाहारः सङ्घातकार्यभूतश्चराचरशरीरात्मकः समष्टिव्यष्टिजीवोपाधिरूपः बीजाद्बीजमिव प्रवाहापन्नः स विसर्ग उच्यते । ऊतयः कर्मवासना इति पूर्वं लक्षिता या ऊतिः साऽत्र विसर्ग एवान्तर्भाविता ॥ १२ ॥ पूर्वोक्तं स्थानं पालनमेवात्र वृत्तिशब्देनोच्यते तां व्याचष्टे—वृत्तिरिति ॥ चराणां भूतानां सामान्यतः अचराणि व्रीहिफलादीनि चकारात् चराणि गोमहिषीवृषादीनि च जीविकासाधनं वृत्तिरित्युच्यते । तत्रापि नृणां स्वेन स्वभावेन कामात् तथा चोदनया शास्त्रविध्यनुसारेण वा कृता जीविका वृत्तिर्भवति । तेषां चराणामाश्रयः सर्वैव पृथ्वीति वृत्तिप्रसङ्ग एव भूगोलचक्रं पञ्चमस्कन्धे निरूपितम् ॥ १३ ॥

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेन्द्रियार्थानां संभवः सर्ग उच्यते ॥ ११ ॥ पुरुषानुगृहीतानामेतेषां वासनामयः ॥ विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम् ॥ १२ ॥ वृत्तिर्भूतानि भूतानां चराणामचराणि च ॥ कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥ १३ ॥ रक्षाऽच्युतावतारेहा विश्वस्यानु युगे युगे ॥ तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥ १४ ॥ मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ॥ ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥ १५ ॥ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ॥ वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ १६ ॥ नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ॥ संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः ॥ १७ ॥ हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ॥ यं वानुशयिनं प्राहुरव्याकृतमुतापरे ॥ १८ ॥

रक्षेति युग्मम् ॥ युगे युगे तिर्यङ्मर्त्यर्षिदेवेषु येऽच्युतावतारास्तेषां या ईहा लीला सा विश्वस्य रक्षोच्यते । यैरवतारैः इति उपसर्जनभूतस्याप्यवतारस्य परामर्शः प्रकरणबलात् त्रयीद्विषो वेदविरोधिनः असुराः हन्यन्त इति अतो दुष्टनिग्रहात् स्वभक्तरक्षणमेव रक्षेत्यर्थः । उपलक्षणमेतत् । अजामिलादिनामभक्तानां रक्षापि रक्षोच्यते । मनुरित्यादिषड्विधं मन्वन्तरमुच्यते । एते मन्वादयः षड्वर्गाः स्वस्वाधिकारे यदा प्रवर्त्तन्ते स कालः मन्वन्तरमित्युच्यत इत्यर्थः ॥ १४ ॥ १५ ॥ राज्ञामिति ॥ ब्रह्मणः सकाशात्प्रसूतिर्येषां तेषां शुद्धानां राज्ञां यस्त्रैकालिकोऽन्वयः स वंश इत्युच्यते । तेषां मध्ये ये वंशधराः राज्यवंशादिनिर्वाहिकास्तेषां वृत्तं वंश्यानुचरितमुच्यते । एतद्द्वयमपि पूर्वमीशकथायामन्तर्भावितम् ॥ १६ ॥ नैमित्तिक इति ॥ स्वभावतः मायातः निष्पन्नस्य कालकर्मगुणाधीनत्वात् अस्य विश्वस्य यो नैमित्तिकादिचतुर्द्धा लयः । यद्वा । मायातो यश्चतुर्धा लय इति स संस्थेति कविभिः प्रोक्तः ॥ १७ ॥ हेतुरिति ॥ यः अविद्यया मोहितः कर्मकारकः कर्मकर्त्ता तत्कर्मप्रयुक्तत्वात्स जीव एवास्य विश्वस्य सर्गादेर्हेतुः । नन्वनुशयी निमित्तमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केचित् । अव्याकृतमित्यपरे । तत्राह । कर्मकर्तृत्वादेव चैतन्यप्राधान्यविवक्षया यं जीवमनुशयिनमाहुः । अनुशयः अभुक्तफलकर्मविशेषस्तद्वाननुशयी।उत त्वर्थ । अपरे तु उपाधिप्राधान्यविवक्षया सृष्टेः पूर्वं नामरूपविशेषाकृतिरहितत्वात् यमव्याकृतमाहुः ॥ १८ ॥ व्यतिरेकेति ॥ जाग्रदादिष्ववस्थासु जीवतया वर्तन्त इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु वृत्तिषु मायामयेषु अविद्याकल्पितेषु यस्य साक्षितया कारणतया चान्वयः समाध्यादौ च व्यतिरेकस्तत्पृथक्तया स्वरूपेणावस्थानं च तद्ब्रह्म संसारप्रतीतिबाधयोरधिष्ठानमवधिभूतम् अपाश्रय उच्यते । यद्वा । जाग्रदादिष्ववस्थासु तथा मायामयेषु सर्वेषु पदार्थेषु यस्य हेतुतयाऽन्वयः तेभ्यः व्यतिरेकश्चेति ॥ १९ ॥ पदार्थेष्विति ॥ रूपनामसु स्वरूपनामवत्सु पदार्थेषु कार्येषु घटादिषु सन्मात्रं कारणं द्रव्यं महदादि यथा युतमयुतं तद्व्यतिरेकेणावस्थितं च एवं बीजं गर्भाधानमादिर्यासां पञ्चतामरणमन्ते च यासां तासु देहावस्थास्वप्यधिष्ठानत्वेन साक्षित्वेन कारणत्वेन च युतमयुतं च यद्ब्रह्म तदपाश्रयः ॥ २० ॥ दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणमिति यदुक्तं तदाह-

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ १९ ॥ पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु ॥ बीजादिपञ्चतान्तासु ह्यवस्थासु युतायुतम् ॥२०॥विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयम्॥योगेन वा तदात्मानं वेदेहाया निवर्त्तते॥२१॥एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ॥ मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च ॥ २२ ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं सगारुडम् ॥ नारदीयं भागवतमाग्नेयं स्कान्दसंज्ञितम् ॥ २३ ॥ भविष्यं ब्रह्मवैवर्त्तं मार्कण्डेयं सवामनम् ॥ वाराहं मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ॥ २४ ॥ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः ॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्धनम् ॥ २५ ॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ शौनक उवाच ॥ सूत जीव चिरं साधो वद नो वदतां वर ॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः ॥ १ ॥

विरमेतेति ॥ वाशब्दः एवकारार्थे । यदैव सर्गादीनां मायामयत्वानुसन्धानेन वामदेवादेरिव स्वयमेव चित्तं विरमेत निश्चलं भवति अथवा इहैवानुष्ठितेन योगेन देवहूत्यादेरिव चित्तं विरमेत । तत्रार्थः । तदा विक्षेपाभावादविद्याया निवृत्तेरयमात्मानं वेद तं ज्ञात्वा वृत्तित्रयं जाग्रदाद्यवस्थात्रयं हित्वा स्वयमेवेहायाः संसाररूपाया निवर्त्तते ॥ २१ ॥ एवमिति ॥ एवं त्रिविधैर्लक्षणैर्लक्ष्याणि । स्फुटमन्यत् ॥ २२ ॥ ब्राह्ममिति युग्मम् ॥ त्रिषट् अष्टादश । स्फुटमन्यत् ॥२३॥२४॥ ब्रह्मन्निति ॥ हे ब्रह्मन् श्रवणादिपराणां ब्रह्मतेजोविवर्धनमिदं मुनेर्व्यासस्य तच्छिष्यादीनाम् । कर्त्तरि षष्ठी । शाखाप्रणयनं संहिताप्रवर्त्तनं मया समाख्यातम् ॥ २५ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ ॥ १८ ॥
सप्तमे गङ्गासहायो द्वादशस्य व्यधादिमाम् ॥ ७ ॥ मार्कण्डेयस्याष्टमे तु तपः कामाद्यजेयता ॥ नरनारायणस्तोत्रं तत्र श्लोका नवाब्धयः ॥ उवाचत्रितयं सार्द्धाः सप्तवर्णाः अनुष्टुभः ॥८॥ पुराणविभागप्रसङ्गेन मार्कण्डेयं स वामनमिति श्रुत्वा स्वकुलश्रेष्ठस्य पुराणकर्तुर्मार्कण्डेयस्य स्मृत्या चरितं प्रष्टुमाह—सूतेति॥ हे सूत हे साधो हे वदतांवर त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिरञ्जीव यतः अपारे तमसि संसारे भ्रमतां नृणां त्वमेव पारदर्शनः तन्निवर्त्तकः अतो नोऽस्माकं यच्छुश्रूषितं तद्वद ॥ १ ॥ आहुरिति ॥ मृकण्डतनयमृषिं मार्कण्डेयं जनाश्चिरायुषमाहुः । येन कल्पान्तेन प्रलयेनेदं जगत् ग्रस्तं तस्मिन् कल्पान्ते य उर्वरितः अवशिष्टः एतत्कथं घटत इत्येकः प्रश्नः ॥ २ ॥ प्रलयाभावादप्येतन्न घटत इत्याह—स वै इति ॥ भार्गवर्षभः सः अस्मिन्नेव कल्पे तत्राप्यस्मत्कुल एवोत्पन्नः तत्रास्मिन् कल्पे तु प्राकृतिको नैमित्तिको वा कोऽपि भूतानां सम्प्लवः प्रलयो नैव जायते न जातः॥ ३॥ एक इति ॥ एक एवार्णवे प्रलयार्णवे भ्राम्यन् वटपत्रपुटे शयानं पुरुषं पुरुषाकारमेकमद्भुतं तोकं बालं च ददर्शेत्यपि प्राहुस्तदपि कथं जातमिति शेषः ॥४॥ एष इति ॥ हे सूत हे महायोगिन् एष तदवशेषादिविषयको नोऽस्माकं भूयान् महासंशयो वर्त्तते । यतः संशयात् कौतूहलं श्रवणौत्सुक्यं च वर्त्तते न केवलं त्वं महायोगी किन्तु पुराणेष्वपि ज्ञातृत्वेन संमतः अतस्त्वमस्मत्संशयं छिन्धि ॥ ५ ॥ प्रश्न इति ॥ हे महर्षे त्वया कृतोऽयं प्रश्नः लोकस्य भ्रममपहन्तीति तथाभूतः । यत्र तव प्रश्नसमाधाने कलिमलापहा

आहुश्चिरायुषमृषिं मृकण्डतनयं जनाः ॥ यः कल्पान्ते उर्वरितो येन ग्रस्तमिदं जगत् ॥२॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन् भार्गवर्षभः ॥ न वाऽधुनापि भूतानां संप्लवः कोऽपि जायते ॥ ३ ॥ एक एवार्णवे भ्राम्यन्ददर्श पुरुषं किल ॥ वटपत्रपुटे तोकं शयानं त्वेकमद्भुतम् ॥ ४ ॥ एष नः संशयो भूयान् सूत कौतूहलं यतः ॥ तं नश्छिन्धि महायोगिन् पुराणेष्वपि संमतः ॥ ५ ॥ सूत उवाच ॥ प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥ प्राप्तद्विजातिसंस्कारो मार्कण्डेयः पितुः क्रमात् ॥ छन्दांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥ बृहद्व्रतधरः शान्तो जटिलो वल्कलाम्बरः ॥ बिभ्रत्कमण्डलुं दण्डमुपवीतं समेखलम् ॥ ८ ॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन् संध्ययोर्हरिम् ॥ ९ ॥ सायं प्रातः स गुरवे भैक्षमाहृत्य वाग्यतः ॥ बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥ एवं तपः स्वाध्यायपरो वर्षाणामयुतायुतम् ॥ आराधयन् हृषीकेशं जिग्ये मृत्युं सुदुर्जयम् ॥ ११ ॥

नारायणस्य कथा गीता भविष्यतीति ॥ ६ ॥ प्राप्तेति ॥ मार्कण्डेयः क्रमात् गर्भाधानादिसंस्कारक्रमात् पितुः सकाशात्प्राप्तो द्विजातिसंस्कार उपनयनाख्यो येन सः धर्मेण शास्त्रोक्तविधिना छन्दांसि वेदानधीत्य तपसा स्वोचितधर्मेण स्वाध्यायेन वेदाध्ययनेन च संयुतोऽभूत् ॥ ७ ॥ बृहदिति त्रिकम् ॥ नियमस्य धर्मस्य ऋद्धये वृद्धये बृहद्व्रतधरः नैष्ठिकब्रह्मचर्यधरः शान्तः जटिलो वल्कलाम्बरः कमण्डलुं दण्डं समेखलमुपवीतं च अक्षसूत्रं माला तत्सहितं कृष्णाजिनं कुशांश्च बिभ्रत्सायं प्रातश्चेति सन्ध्ययोः अग्न्यर्कादिषु पञ्चसु हरिमर्चयन् भैक्षमाहृत्य गुरवे समर्प्य तेनानुज्ञातश्चेत्तर्हि वाग्यतो मौनी सकृदेकवारं बुभुजे । नोचेदनुज्ञातश्चेदुपोषितोऽभूत् ॥ ८ ॥ ९ ॥ १० ॥ एवमिति ॥ जिग्ये जिगाय तदर्थः । शेषं स्पष्टम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मेति ॥ ये परे श्रेष्ठाः ब्रह्माद्यास्तथा नृदेवादीनि तेन मृत्युजयेनातिविस्मिता आसन् एकशेषे पुंस्त्वमार्षम् ॥ १२ ॥ इत्थमिति ॥ इत्थं तपःस्वाध्यायसंयमैः बृहद्व्रतधरः योगी जितेन्द्रियः ध्वस्ताः क्लेशा रागादयो यस्य तेनान्तरात्मना प्रत्याहृतेन मनसा अधोक्षजं परमात्मानं भगवन्तं दध्यौ ॥ १३ ॥ तस्येति ॥ योगिनस्तस्य एवं महायोगेन एकाग्रेण चित्तं परमात्मनि युञ्जतो मन्वन्तरषडात्मको महान् कालो व्यतीयाय व्यतिक्रान्तोऽभूत् ॥ १४ ॥ एतदिति ॥ हे ब्रह्मन् अस्मिन् सप्तमे मन्वन्तर एतत्तस्य तपश्चरणं पुरन्दरो ज्ञात्वा तपसा मत्पदं ग्रहीष्यतीति विशङ्कितस्तस्य तपसो विघातनं कर्त्तुमारेभे ॥ १५ ॥ गन्धर्वेति ॥ तदा मुनये मुनिं भ्रंशयितुं गन्धर्वादीन् प्रेषयामास । रजसस्तोकमतिप्रियमपत्यं लोभाख्यं मदश्च तौ च प्रेषयामास ॥ १६ ॥ ते इति ॥ स्फुटम् ॥ १७ ॥ तदाश्रमेति त्रिकम् ॥ पुण्यं पुण्यैर्द्रुमैर्लताभिश्चाञ्चितं पूजितं पुण्यद्विजानामृषीणां कुलैराकीर्णं पुण्या

ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च ये परे ॥ नृदेवपितृभूतानि तेनासन्नतिविस्मिताः ॥ १२ ॥ इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजं योगी ध्वस्तक्लेशान्तरात्मना ॥ १३ ॥ तस्यैवं युञ्जतश्चित्तं महायोगेन योगिनः ॥ व्यतीयाय महान् कालो मन्वन्तरषडात्मकः ॥ १४ ॥ एतत्पुरन्दरो ज्ञात्वा सप्तमेऽस्मिन्किलान्तरे ॥ तपोविशङ्कितो ब्रह्मन्नारेभे तद्विघातनम् ॥ १५ ॥ गन्धर्वाप्सरसः कामं वसन्तमलयानिलौ ॥ मुनये प्रेषयामास रजस्तोकमदौ तदा ॥ १६ ॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे ॥ पुष्पभद्रा नदी यत्र चित्राख्या च शिला विभो ॥ १७ ॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलताञ्चितम् ॥ पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयम् ॥ १८ ॥ मत्तभ्रमरसङ्गीतं मत्तकोकिलकूजितम् ॥ मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलम् ॥ १९ ॥ वायुः प्रविष्ट आदाय हिमनिर्झरशीकरान् ॥ सुमनोभिः परिष्वक्तो ववावुत्तम्भयन् स्मरम् ॥ २० ॥ उद्यच्चन्द्रनिशावक्त्रः प्रवालस्तबकालिभिः ॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः ॥ २१ ॥ अन्वीयमानो गन्धर्वैर्गीतवादित्रयूथकैः ॥ अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ २२ ॥

अत्यमला जलाशया यस्मिन् मत्तभ्रमराणां सङ्गीतं यस्मिन् मत्तकोकिलानां कूजितं यस्मिन् मत्तबर्हिण एव नटास्तेषामाटोपः संभ्रमो यस्मिन् मत्तद्विजानां पक्षिणां कलैराकुलं व्याप्तम् एवंभूतं तदाश्रमपदं प्रविष्टो वायुर्मलयानिलः स्मरमुत्तम्भयन्नुद्दीपयन् ववौ प्रससार । तत्र वृक्षेषु प्रवेशान्मान्द्यं हिमनिर्झरकणादानात् शैत्यं पुष्पपरिष्वङ्गात् सौगन्ध्यं चोक्तम् ॥ १८ ॥ १९ ॥ २० ॥ उद्यदिति ॥ उद्यंश्चन्द्रो यस्मिन् तन्निशावक्त्रं रजनीमुखं यस्य सः प्रवालस्तबकानामालयः श्रेण्यो येषु तैः गुप्यन्ति विटपैः संश्लिष्यन्तीति गोपाः । यद्वा । गाः किरणान् पिबन्ति गोभ्यः किरणेभ्यः पान्ति वा गोपाः द्रुमाः लताश्च तेषां जालैः समूहैश्च सह तत्र कुसुमाकरः आसीत् आविर्बभूव ॥ २१ ॥ अन्विति॥ तदा गीतवादित्रयूथिकैः गायकादिसमुदायिभिः । मत्वर्थीयष्ठन् । गन्धर्वैरन्वीयमानः तथा स्वःस्त्रियोऽप्सरसस्तासां यूथस्य पतिः आत्तं चापमिषुश्च येन स स्मरश्च तत्रादृश्यत।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्वा । अदृश्यत मुनिमनसि स्वयमेव किंचिदन्वभूयतेति । व्यकम्पयन्निति प्रबोध्याहिमिति धर्षितोऽपीत्यग्रिमवाक्यादवगम्यते ॥ २२ ॥ हुत्वेति ॥ शक्रकिङ्कराः अग्निं हुत्वा उपासीनं मीलिताक्षं दुराधर्षमभिभवितुमशक्यं मूर्त्तिमन्तमनलमिवासीनं तं ददृशुः ॥२३॥ ननृतुरिति ॥ स्फुटम् ॥२४॥ संदध इति ॥ शोषणमोहनसंदीपनतापनोन्मादनाख्यानि पञ्च मुखानि यस्य तदस्त्रं कामः धनुषि सन्दधे तदैव मधुर्वसन्तः रजस्तोको लोभः । पुंस्त्वमार्षम् । अन्ये च ये इन्द्रभृत्याः ते सर्वे तस्य मनो व्यकम्पयन् अक्षोभयन् ॥२५॥ क्रीडन्त्या इति युग्मम् ॥ क्रीडन्त्याः पुञ्जिकस्थलीनामाप्सरास्तस्याः स्तनगौरवाद्भृशमुद्विग्नमध्यायाः केशेभ्यो विस्रंसिताः स्रजो यस्यास्तस्याः कन्दुकमनुसृत्येतस्ततो भ्रमन्त्यौ दृष्टी यस्याश्चलन्त्याः अत एव त्रुटिता मेखला यस्मिंस्तत्सूक्ष्मं वासो वस्त्रं वायुर्व्याजहार ॥२६॥२७॥ विससर्जेति ॥ तदा तं मुनिं स्वेन जितं मत्वा स्मरः बाणं विससर्ज । सर्वं

हुत्वाऽग्निं समुपासीनं ददृशुः शक्रकिंकराः ॥ मीलिताक्षं दुराधर्षं मूर्तिमन्तमिवानलम् ॥ २३ ॥ ननृतुस्तस्य पुरतः स्त्रियोऽथो गायका जगुः ॥ मृदङ्गवीणापणवैर्वाद्यं चक्रुर्मनोरमम् ॥ २४ ॥ संदधेऽस्त्रं स्वधनुषि कामः पञ्चमुखं तदा ॥ मधुर्मनो रजस्तोक इन्द्रभृत्या व्यकम्पयन् ॥ २५ ॥ क्रीडन्त्याः पुञ्जिकस्थल्याः कन्दुकैः स्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥ २६ ॥ इतस्ततो भ्रमद्दृष्टेश्चलन्त्या अनु कन्दुकम् ॥ वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम् ॥ २७ ॥ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः ॥ २८ ॥ त इत्थमपकुर्वन्तो मुनेस्तत्तेजसा मुने ॥ दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः ॥ २९ ॥ इतीन्द्रानुचरैर्ब्रह्मन्धर्षितोऽपि महामुनिः॥ यन्नागादहमो भावं न तच्चित्रं महत्सु हि ॥ ३० ॥ दृष्ट्वा निस्तेजसं कामं सगणं भगवान् स्वराट् ॥ श्रुत्वाऽनुभावं ब्रह्मर्षेर्विस्मयं समगात्परम् ॥ ३१ ॥ तस्यैवं युञ्जतश्चित्तं तपःस्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥ ३२ ॥

तेषां कर्म तत्र तस्मिन् मोघं व्यर्थमभवत् । यथा अनीशस्य भाग्यहीनस्योद्यमो व्यर्थो भवति तद्वत् ॥२८॥ ते इति ॥ हे मुने तस्यैवमपकुर्वन्तः प्रतिकूलमाचरन्तस्तस्य मुनेस्तेजसा दह्यमानास्ते कामादयः न जानीमहे । अद्य किं भविष्यतीति भीताः निववृतुः । तङ्भाव आर्षः । यथार्भकाः अहिं सर्पं प्रबोध्य ततो निवर्त्तन्ते तद्वदिति । अत्राहिदृष्टान्तेन प्रथमं किंचिदुद्भूतं कामं प्रति क्रोधोऽभूत् पश्चाद्विवेकेन कामक्रोधयोरुपशमः कृत इति निश्चीयते ॥ २९ ॥ इतीति ॥ हे ब्रह्मन् इत्येवमिन्द्रानुचरैर्धर्षितोऽपि महामुनिः यदहमोऽहङ्कारस्य भावं क्रोधमोहादिविकारं नागात्तदेतद्धि महत्सु चित्रं न भवति ॥ ३० ॥ दृष्ट्वेति ॥ भगवान् स्वराट् इन्द्रः सगणं कामं निस्तेजसं परिम्लानवदनं दृष्ट्वा तथा ब्रह्मर्षेर्मार्कण्डेयस्य प्रभावं च श्रुत्वा परं भृशं विस्मयमगात् ॥ ३१ ॥ तस्येति ॥ एवं तपआद्यैः चित्तं युञ्जतस्तस्यानुग्रहाय नरनारायणरूपो हरिः आविरासीत् ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताविति त्रिकम् ॥ शुक्लकृष्णौ नरः शुक्लः नारायणः कृष्णः नवकञ्जलोचनौ चतुर्भुजौ रौरवं कृष्णाजिनं वल्कलं च ते अम्बरे ययोस्तौ पवित्रे कुशनिर्मिते पाण्योर्ययोस्तौ त्रिवृत्त्रिगुणं नवतन्तुकमिति वा त्रिवृद्वहिः पवमानमित्यादौ नवके प्रयोगदर्शनादिति उपवीतकं कमण्डलुम् ऋजुमवक्रं वैणवं दण्डं पद्माक्षाणां पद्मबीजानां मालाम् उत जन्तुमार्जनम् पिपीलिकामशकादिजन्तूनामपनोदकं वस्त्रं वेदं दर्भमुष्टिं वेदशास्त्रं वा दधानौ साक्षात्तप एव रूपं मूर्त्तिरनयोरस्तीति तथाभूतौ तपत्तडिद्वर्णं दीप्यमानविद्युत्संकाशं यत्पिशङ्गरोचिस्तेन युक्ताविति शेषः । तादृक्तेजोयुक्तमूर्त्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः । प्रांशू उन्नतौ विबुधर्षभैः ब्रह्मादिभिरर्चितौ वै प्रसिद्धे भगवतो रूपे नरनारायणावृषी दृष्ट्वा उत्थाय उच्चैर्महता आदरेण दण्डवत्पतितेन अङ्गेन ननाम ॥ ३३ ॥ ३४ ॥ ३५ ॥ स इति ॥ तयोः सन्दर्शनेन य आनन्दस्तेन निर्वृता उपशान्ता आत्मेन्द्रियाशया देहेन्द्रियमनांसि यस्य सः हृष्टानि पुलकितानि रोमाणि यस्य सः मुनिस्तावुदीक्षितुमपि न सेहे नाशक्नोत् ॥ ३६ ॥ उत्थायेति ॥ प्राञ्जलिः प्रह्वो नम्रः औत्सुक्यात्

तौ शुक्लकृष्णौ नवकञ्जलोचनौ चतुर्भुजौ रौरववल्कलाम्बरौ ॥ पवित्रपाणी उपवीतकं त्रिवृत्कमण्डलुं दण्डमृजुं च वैणवम् ॥३३॥ पद्माक्षमालामुत जन्तुमार्जनं वेदं च साक्षात्तप एव रूपिणौ ॥ तपत्तडिद्वर्णपिशङ्गरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ॥ ३४ ॥ ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामाङ्गेन दण्डवत् ॥ ३५ ॥ स तत्संदर्शनानन्दनिर्वृतात्मेन्द्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुम् ॥ ३६ ॥ उत्थाय प्राञ्जलिः प्रह्व औत्सुक्यादाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥३७॥ तयोरासनमादाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ३८ ॥ सुखमासनमासीनौ प्रसादाभिमुखौ मुनी ॥ पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥ ३९ ॥ मार्कण्डेय उवाच ॥ किं वर्णये तव विभो यदुदीरितोऽसुः संस्पन्दते तमनु वाङ्मनइन्द्रियाणि ॥ स्पन्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबन्धुः ॥ ४० ॥

आश्लिषन् इव उत्थाय गद्गदाक्षरः सन् ईशानौ तौ नमो नम इति बभाषे ॥ ३७ ॥ तयोरिति ॥ आसनमादाय तयोः पादयोरवनिज्य पादौ प्रक्षाल्यार्हणमर्घं तदादिभिरपूजयत् ॥ ३८ ॥ सुखमिति । पूर्वार्द्धं स्फुटम् ॥ पादाभ्यामानम्य पादयोः प्रणिपत्य गरिष्ठौ पूज्यतमौ तौ प्रतीदमब्रवीत् ॥ ३९ ॥ किमिति ॥ हे विभो तव त्वां किमहं वर्णये कथं स्तौमि । यत् येन त्वयैव उदीरितः तनुभृतामजशर्वयोश्च तथास्य ममापि असुः प्राणः संस्पन्दते प्रवर्त्तते । तं स्पन्दमानं प्राणमनुसृत्य वागादीनीन्द्रियाणि स्पन्दन्ति स्वस्वव्यापारे प्रवर्त्तन्ते । तङभाव आर्षः । यद्यप्येवं न कस्यापि स्वातन्त्र्यमथापि दारुयन्त्रवत्स्वप्रवर्त्तितैरपि वागादिभिर्भजतां पुंसां त्वं भावबन्धुरसि भावेन बध्यते वशीभवति तथाभूतोऽसि । यद्वा । भावबन्धुः आत्मबन्धुः न तु पित्रादिवत् देहमात्रबन्धुः । अहो तव कृपालुतेति भावः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूर्ती इति ॥ हे भगवन् भगवतः इमे मूर्ती अवतारौ त्रिलोक्याः क्षेमाय पालनाय अध्यात्मिकादितापत्रयविरमाय मृत्युजित्यै मोक्षाय च यथेदं विश्वमवितुमन्या नानाविधा मत्स्यादितनूर्बिभर्षि तद्वत् इमे मूर्ती इति तथा ऊर्णनाभिरिव सृष्ट्वा पुनः सर्वं ग्रससि । तङ्भाव आर्षः ॥ ४१ ॥ तस्येति ॥ तस्योक्तविधस्य अवितुः पालकस्य स्थिरचरेशितुः स्थावरजङ्गमानां नियन्तुः अङ्घ्रिमूलं भजामीति तृतीयस्थस्यापकर्षः । यत्स्थं यदुपासकं जनं कर्मगुणकालानां रजोमलं पापं पूर्वोक्तास्तापादयश्च न स्पृशन्ति इति अध्याहारेण कथंचिद्बहुत्वम्। वस्तुतस्त्वार्षमेव । रुज इति पाठे बहुत्वमपि नानुपपन्नम् । अत एव वेदो हृदये येषां ते वेदतात्पर्यविदो मुनयस्तदाप्त्यै यदङ्घ्रिमूलं वै स्तुवन्ति नितरां नमन्ति यजन्ति अभीक्ष्णं ध्यायन्ति चेति ॥ ४२ ॥ नेति ॥ हे ईश परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य अपवर्गमूर्तेः मोक्षरूपस्य तव अङ्घ्र्युपनयनाच्छ्रीमच्चरणप्राप्तेरन्यं क्षेमं न विद्मः । द्विपरार्ध्यं द्विपरार्धकालावस्थायि धिष्ण्यं स्थानं यस्य स ब्रह्मणाऽपि ते कालस्य त्वद्भ्रूविजृम्भरूपात् कालात् यतः अलं बिभेति । अतः किमु

मूर्ती इमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै ॥ नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ॥ ४१ ॥ तस्यावितुः स्थिरचरेशितुरङ्घ्रिमूलं यत्स्थं न कर्मगुणकालरजः स्पृशन्ति ॥ यद्वै स्तुवन्ति निनमन्ति यजन्त्यभीक्ष्णं ध्यायन्ति वेदहृदया मुनयस्तदाप्त्यै ॥ ४२ ॥ नान्यं तवाङ्घ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितो भिय ईश विद्मः ॥ ब्रह्मा बिभेत्यलमतो द्विपरार्ध्यधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानाम् ॥ ४३ ॥ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ॥ देहाद्युपार्थमसदन्त्यमभिज्ञमात्रं विन्देत ते तर्हि सर्वमनीषितार्थम् ॥ ४४ ॥ सत्त्वं रजस्तम इतीश तवात्मबन्धो मायामयाः स्थितिलयोदयहेतवोऽस्य ॥ लीला धृता यदपि सत्त्वमयी प्रशान्त्यै नान्ये नृणां व्यसनमोहभियश्च याभ्याम् ॥ ४५ ॥

वक्तव्यम् तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमस्तीति ॥ ४३ ॥ तदिति ॥ यस्मादेवं तत्तस्मात् आत्मच्छदि स्वात्मावरकमनार्थं निष्फलं च असत् तुच्छं दुःखप्रदं च अन्त्यं नश्वरं चेदं देहादि आदिपदेन गृहपुत्रकलत्रधनादि सर्वं हित्वा देहादिभजनं त्यक्त्वा ऋतधियः सत्यसंकल्पस्य आत्मनो जीवस्य गुरोः नियन्तुः अन्तर्यामितया साधु कर्म कारयितुः परस्परम् ईश्वरस्य तव पादमूलमहं भजामि । यदि त्वभिज्ञमात्रं ज्ञानस्वरूपं केवलं त्वामेव पुरुषो भजति तर्हि ते त्वत्त एव मनीषितं स्वसंकल्पितं सर्वमेव फलं विन्देत । न तव भक्तस्य फलान्तरार्थमप्यन्यभजनापेक्षेत्यर्थः । यद्वा । अभिज्ञमात्रं प्रतीतिमात्रमात्ममात्रं न ततः पृथगिति देहादिविशेषणम् ॥४४॥ सत्वमिति ॥ हे ईश आत्मबन्धो जीवहितचिन्तक यद्यप्यस्य विश्वस्य स्थित्यादिहेतवः मायामयाः सत्वादयो गुणाः सृष्ट्यादिलीलार्थं त्वया धृता अङ्गीकृता अतस्तवैव ब्रह्मादिमूर्तित्रयं तथापि या तव सत्वमयी मूर्त्तिः सैव नृणामुपासकानां शान्त्यै मोक्षाय भवति । अन्ये ब्रह्मरुद्रमूर्ती तथा न भवतः । प्रत्युत याभ्यां व्यसनं दुःखं मोहः भीश्चेति भवन्ति ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ यस्मात्सत्वतनुरेव श्रेयस्करी तस्माद् हे भगवन् अथ विवेकानन्तरं तावकानां त्वद्भक्तानां स्वदयितां मनसः प्रियां शुक्लां शुद्धसत्वमयीं तव तनुम् इह लोके कुशला निपुणबुद्धयो भजन्ति । यत्सत्वं तदेव पुरुषस्य भगवतो रूपमिति सात्वताः भक्ता उशन्ति मन्यन्ते । यतश्च सत्वात् उपासकानां वैकुण्ठलोको भवति । अभयं सर्वभयनिवृत्तिश्च भवति । आत्मसंबन्धि सुखं च भवति अन्यत् रजस्तमश्चैवंभूतं न भवतीत्यर्थः ॥ ४६ ॥ तस्मै इति ॥ भगवते पुरुषाय सर्वान्तर्यामिणे भूम्ने व्यापकाय विश्वाय सर्वात्मने विश्वस्य गुरवे हितोपदेष्ट्रे परदेवतायै ऋषये ऋषिरूपाय नारायणाय नरेषूत्तमाय नराय च हंसाय शुद्धाय संयतगिरे नियतवाचे निगमेश्वराय वेदप्रवर्तकाय तस्मै ते तुभ्यं नमः ॥ ४७ ॥ यमिति ॥ यस्य तव मायया आवृत्ता आत्मविषया मतिर्यस्य वितथैः निष्फलैः अक्षपथैः इन्द्रियमार्गैः भ्रमद्धीः विक्षिप्तबुद्धिः पुमान् स्वखेषु स्वेन्द्रियेषु हृद्यपि दृक्पथेषु विषयेषु च नियन्तृतया सन्तमपि यं त्वां नैव वेद स उ सोऽपि आद्य एव पूर्वमज्ञातैव अखिलगुरोस्तव त्वत्प्रवर्तितं वेदमुपसाद्य प्राप्य त्वां वेद । यद्वा ।

तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजन्ति ॥ यत्सात्वताः पुरुषरूपमुशन्ति सत्वं लोको यतोऽभयमुताऽऽत्मसुखं न चाऽन्यत् ॥४६॥ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै ॥ नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४७ ॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः सन्तं स्वखेष्वसुषु हृद्यपि दृक्पथेषु ॥ तन्माययाऽऽवृतमतिः स उ एव साक्षादाद्यस्तवाऽखिलगुरोरुपसाद्य वेदम् ॥ ४८ ॥ यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यन्ति यत्र कवयोऽजपरा यतन्तः ॥ तं सर्ववादविषयप्रतिरूपशीलं वन्दे महापुरुषमात्मनि गूढबोधम् ॥ ४९ ॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥ सूत उवाच ॥ संस्तुतो भगवानित्थं मार्कण्डेयेन धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहम् ॥ १ ॥

यस्त्वाद्यः मुख्यस्तव भक्तः स तु वेदमुपसाद्य अखिलगुरोस्तव स्वरूपं साक्षाद्वेद । यद्वा । स उ प्रसिद्धम् । आद्यो ब्रह्माऽपि तेऽखिलगुरोः साक्षाद्वेदमुपसाद्यापि न वेद ॥४८॥ यदिति ॥ आत्मनः तव रहः रहस्यप्रकाशरूपं यस्य तव दर्शनं ज्ञानं निगमे वेदे भवति । अजो ब्रह्मा परो मुख्यो येषां ते कवयोऽपि यतन्तः साङ्ख्ययोगादिभिः प्रयतमाना अपि । शता आर्षः । यत्र त्वज्ज्ञाने मुह्यन्ति तं महापुरुषं सर्वेषां साङ्ख्ययोगादिविषयाणां ये विषयाः मतभेदास्तेषां प्रतिरूपं तत्तदनुसारि शीलं स्वभावो यस्य तम् । आत्मना देहादिसङ्घातेन निगूढो बोधः प्रकाशो यस्य तं त्वां वन्दे ॥ ४९ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो विवृतिं द्वादशस्याष्टमे व्यधात् ॥ ८ ॥ मृकण्डपुत्रो नवमे हरेर्मायामलोकत ॥ भूरीणि कष्टानि सेहे तत्र श्लोकाश्चतुर्गुणाः ॥ उवाच त्रितयं सार्द्धा नवत्रिंशदनुष्टुभः ॥ ९ ॥ संस्तुत इति ॥ स्फुटम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भो भो इति ॥ भो भो ब्रह्मर्षिवर्य आत्मसमाधिना चित्तैकाग्र्येण अनपायिन्या मयि भक्त्या तपआदिभिश्च त्वं सिद्धः कृतार्थोऽसि ॥ २ ॥ वयमिति ॥ वयं सर्वे देवाः । यद्वाऽग्रे प्रस्तोष्यमाणशिवोमाद्यभिप्रायेण त्वद्बृहद्व्रतचर्यया परितुष्टाः स्मः ते भद्रं भवतु । त्वं वरदानामीशात्सर्वदेवात्मकान्मत्तः अभीप्सितं वरं प्रतीच्छ गृहाण ॥ ३ ॥ जितमिति ॥ हे देवदेवेश हे प्रपन्नानामार्त्तिं हरतीति तथाभूत हे अच्युत ते तव जितं तवोत्कर्षोऽस्त्येव । यद्भवान्नोऽस्माभिः सम्यगदृश्यत । एतावतैव वरेणालं मम वराकाङ्क्षा नास्ति ॥ ४ ॥ गृहीत्वेति ॥ यस्य तव श्रीमत्पादाब्जदर्शनं योगशुद्धेन मनसा मनोमात्रेण गृहीत्वा प्राप्याऽप्यजादयः कृतार्था भवन्ति । स भवान् मेऽक्षगोचरो जातोऽस्ति किमतः परं वरेणेत्यर्थः ॥ ५ ॥ अथेति ॥ हे अम्बुजपत्राक्ष हे पुण्यश्लोकशिखामणे अथापि वरानभिलाषेऽपि यया मायया लोकपालैर्ब्रह्मादिभिः सहितो लोकः सर्वोऽपि जनः सद्भिदां सच्छब्दवाच्ये त्वयि भिदां देवतिर्यङ्मनुष्यादिभेदं वेद पश्यति तां तव मायां द्रक्ष्ये द्रष्टुमिच्छामि । तङार्षः ॥ ६ ॥ इतीति ॥ हे मुने इत्येवमीडितः स्तुतोऽर्चितश्च स भगवान् तथेति द्रक्ष्यसी-

श्रीभगवानुवाच ॥ भो भो ब्रह्मर्षिवर्योऽसि सिद्ध आत्मसमाधिना ॥ मयि भक्त्यानपायिन्या तपःस्वाध्यायसंयमैः ॥२॥ वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितम् ॥३॥ ऋषिरुवाच ॥ जितं ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावताऽलं नो यद्भवान्समदृश्यत ॥४॥ गृहीत्वाऽजादयो यस्य श्रीमत्पादाब्जदर्शनम् ॥ मनसा योगपक्वेन स भवान्मेऽक्षगोचरः ॥५॥ अथाप्यम्बुजपत्राक्ष पुण्यश्लोकशिखामणे ॥ द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदाम् ॥ ६ ॥ सूत उवाच ॥ इतीडितोऽर्चितः काममृषिणा भगवान् मुने ॥ तथेति स स्मयन्प्रागाद्बदर्याश्रममीश्वरः ॥७॥ तमेव चिन्तयन्नर्थमृषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमाम्बुभूवायुवियदात्मसु ॥८॥ ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् ॥ क्वचित्पूजां विसस्मार प्रेमप्रसरसंप्लुतः ॥९॥ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुने ॥ उपासीनस्य संध्यायां ब्रह्मन् वायुरभून्महान् ॥ १० ॥ तं चण्डशब्दं समुदीरयन्तं बलाहका अन्वभवन्करालाः ॥ अक्षस्थविष्ठा मुमुचुस्तडिद्भिः स्वनन्त उच्चैरभिवर्षधाराः ॥ ११ ॥

त्युक्त्वा स्मयन् मन्दहासं कुर्वन् । शता आर्षः । सस्मयमिति पाठे क्रियाविशेषणम् । बदर्याश्रमं प्रति प्रागात् ॥७॥ तमिति युग्मम् ॥ स्वाश्रम एव वसन् स्थितः स ऋषिस्तमेव मायादर्शनरूपमर्थं कदा द्रक्ष्यामीति चिन्तयन् अग्न्यादिषु सर्वत्र च हरिं ध्यायन् भावद्रव्यैः मनोमयैर्गन्धपुष्पनैवेद्यादिभिः पूजासाधनैरपूजयत् । क्वचित्कदाचित्तु प्रेमप्रसरेण प्रेमप्रवाहाधिक्येन संप्लुतो व्याप्तः संस्तां पूजामपि विसस्मार विस्मृतवान् ॥ ८ ॥ ९ ॥ मायादर्शनमारभते—तस्येति ॥ स्फुटम् ॥ १० ॥ तमिति ॥ चण्डशब्दं समुदीरयन्तं कुर्वन्तं तं वायुमनु कराला भयङ्करा बलाहका मेघा अभवन् आविर्बभूवुः । ते च तडिद्भिः सहिता उच्चैः स्वनन्तो गर्जन्तोऽक्षः रथाक्षस्तद्वत्स्थविष्ठाः अतिस्थूला वर्षधारा अभितो मुमुचुः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत इति ॥ चतसृषु दिक्षु वर्तमानाः समुद्राः परितः क्ष्मातलं भूमण्डलं समरिवेगोत्थितैरूर्मिभिरासमन्तात् ग्रसन्तः । शता आर्षः । उग्रा नक्रा येषु तैः महाभयाः भयानका आवर्त्ता येषु गभीरो घोषो येषु ते च ते व्यदृश्यन्त ॥ १२ ॥ अन्तरिति ॥ अन्तर्बहिश्चातिक्रान्ता ब्यौर्याभिस्ताभिरद्भिः जलैः खरैः दुःसहैः सूर्यरश्मिभिः वायुभिर्वेति शेषः । शतह्रदाभिः विद्युद्भिश्च । दीर्घत्वमार्षं छन्दोऽनुसारेण । एवमात्मना सह जरायुजादिचतुर्विधं जगदन्तर्बहिश्चोपतापितं वीक्ष्य तथा क्ष्मां च जलाप्लुतां वीक्ष्य मुनिर्विमनाः सन् समत्रसत् भयं प्राप ॥ १३ ॥ तस्येति ॥ तस्य मुनेरेवमुद्वीक्षितः सतः । शता आर्षः । वर्षद्भिरम्बुभिरापूर्यमाणः प्रभञ्जनेन वायुना घूर्णितं भ्रमितं वार्जलं यस्मिन् सः अत ऊर्मिभिर्भीषणश्चार्णवः द्वीपवर्षादिभिः समं सह क्ष्मां भूमिमप्यधात् छादयामास ॥ १४ ॥ सेति ॥ सक्ष्मान्तरीक्षं भूम्यन्तरिक्षस्थप्राणिसहितं सदिवं स्वर्गस्थदेवसहितम् ।

ततो व्यदृश्यन्त चतुःसमुद्राः समन्ततः क्ष्मातलमाग्रसन्तः ॥ समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः ॥ १२ ॥ अन्तर्बहिश्चाद्भिरति-द्युभिः खरैः शतह्रदाभीरुपतापितं जगत् ॥ चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् ॥१३॥ तस्यैवमुद्वीक्षत ऊर्मिभी-षणः प्रभञ्जनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणो वरषद्भिरम्बुदैः क्ष्मामप्यधाद् द्वीपवर्षाद्रिभिः समम् ॥ १४ ॥ सक्ष्मान्तरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतम् ॥ स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडान्धवत् ॥ १५ ॥ क्षुत्तृट्परीतो मकरैस्तिमिङ्गिलै-रुपद्रुतो वीचिनभस्वता हतः ॥ तमस्यपारे पतितो भ्रमन्दिशो न वेद खं गां च परिश्रमेषितः ॥ १६ ॥ क्वचिद्गतो महावर्त्ते तरङ्गैस्ताडितः क्वचित् ॥ यादोभिर्भक्ष्यते क्वापि स्वयमन्योऽन्यघातिभिः ॥ १७ ॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयम् ॥ क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः ॥ १८ ॥ अयुतायुतवर्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः ॥ १९ ॥ स कदा-चिद्भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितम् ॥ २० ॥

अदन्तदिवशब्देन विग्रहः।भागणाः ज्योतिर्गणास्तैश्च सहितं दिग्भिश्च सहितं त्रैलोक्यमद्भिराप्लुतमासीत् । एक एवोर्वरितः स महामुनिर्जटा विक्षिप्य विकीर्य जडान्धवत् बभ्राम ॥ १५ ॥ क्षुदिति ॥ क्षुत्तृड्भ्यां परीतो मकरैस्तिमिङ्गिलैर्महासत्स्यैरुपद्रुतः क्लेशितः वीचिभिस्तरङ्गैर्नभस्वता वायुना च हतः ताडितः अपारे तमसि पतितो भ्रमन् सन् अत एव परिश्रमेणेषितो व्याप्तः । " ईष गत्यादौ " दिशः खमाकाशं गां भूमिं च न वेद ॥ १६ ॥ क्वचिदिति ॥ क्वचिन्महावर्त्ते गतः क्वचित् तरलैस्तरङ्गैस्ताडितः क्वचिच्च मुनिभक्ष-णार्थम् अन्योन्यघातिभिः परस्परं युध्यमानैर्यादोभिर्मत्स्यादिभिर्जलचरैः क्वापि स्वयं भक्ष्यते च ॥ १७ ॥ क्वचिदिति ॥ स्फुटम् ॥ १८ ॥ अयुतेति ॥ विष्णुमायावृतात्मनः भ्रमतस्तस्य अयुतायुतवर्षाणां सहस्राणि शतानि च व्यतीयुः । स एतदमन्यत न तु तस्मिन् कालेऽन्ये इति ॥ १९ ॥ स इति ॥ भ्रमन् स द्विजः तस्मिन् प्रलये कदाचित्काले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथिव्याः ककुदि उन्नतप्रदेशे फलपल्लवशोभितं न्यग्रोधपोतं कोमलं वटं ददृशे । तङ्गार्षः ॥ २० ॥ प्रागिति अर्द्धम् ॥ तस्य वटस्य प्रागुत्तरस्यामीशानदिक्छाखायां शिशुमपि ददृशे । तङ्गार्षः ॥ २१ ॥ शयानमित्यादिसार्द्धचतुष्कम् ॥ पर्णस्य पुटके शयानं प्रभया तमोऽन्धकारं ग्रसन्तं निराकुर्वन्तं महामरकतमिव श्यामं श्रीमत् रम्यं वदनपङ्कजं यस्य तं कम्बुवत्त्रिरेखावृता ग्रीवा यस्य तं महोरस्कं विशालवक्षसं सुनासं शोभना नासा यस्य तं सुन्दरे भ्रुवौ यस्य तम् ॥ २२ ॥ श्वासैरेजन्तः कम्पमाना ये अलकास्तैराभातं शोभितं कम्बुवत् अन्तर्वलयेन श्रीर्ययोस्तौ कम्बुश्रियौ तयोः कर्णयोर्दाडिमे दाडिमपुष्पे तत्सदृशे भूषणे वा यस्य तं विद्रुमतुल्याधरभासा ईषत् शोणायितं सुधातुल्यं स्मितं यस्य तम् ॥ २३ ॥ पद्मगर्भौ इव आ ईषत् अरुणावपाङ्गौ नेत्रान्तौ यस्य तं हृद्यो हासो यस्मिंस्तत् अवलोकनं यस्य तं श्वासैरेजन्त्यश्चलन्त्यो वलयस्तिर्यक् निम्नरे-

प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुम् ॥ २१ ॥ शयानं पर्णपुटके ग्रसन्तं प्रभया तमः ॥ महामरकतश्यामं श्रीमद्वदनपङ्कजम् ॥ कम्बुग्रीवं महोरस्कं सुनासं सुन्दरभ्रुवम् ॥ २२ ॥ श्वासैजदलकाभातं कम्बुश्रीकर्णदाडिमम् ॥ विद्रुमाधरभासेषच्छोणायितसुधास्मितम् ॥ २३ ॥ पद्मगर्भारुणापाङ्गं हृद्यहासावलोकनम् ॥ श्वासैजद्वलिसंविग्ननिम्ननाभिदलोदरम् ॥ २४ ॥ चार्वङ्गुलिभ्यां पाणिभ्यामुन्नीय चरणाम्बुजम् ॥ मुखे निधाय विप्रेन्द्रो धयन्तं वीक्ष्य विस्मितः ॥ २५ ॥ तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनाम्बुजः ॥ प्रहृष्टरोमाद्भुतभावशङ्कितः प्रष्टुं पुरस्तं प्रससार बालकम् ॥ २६ ॥ तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तःशरीरं मशको यथाऽविशत् ॥ तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथा पुराऽमुह्यदतीव विस्मितः ॥ २७ ॥ खं रोदसी भगणानद्रिसागरान् द्वीपान्सवर्षान्ककुभः सुरासुरान् ॥ वनानि देशान्सरितः पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः ॥ २८ ॥ महान्ति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्पकल्पनम् ॥ यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितम् ॥ २९ ॥

खास्ताभिः संविग्ना चञ्चलनिम्ना गम्भीरा नाभिर्यस्मिंस्तत् दलवदश्वत्थपत्रसंकाशमुदरं यस्य तम् ॥ २४ ॥ चारवः अङ्गुलयो ययोस्ताभ्यां पाणिभ्यां चरणाम्बुजमुन्नीय आकृष्य मुखे निधाय तदङ्गुष्ठं धयन्तं पिबन्तं शिशुं विलोक्य विप्रेन्द्रो विस्मितो बभूवेति शेषः ॥ २५ ॥ तदिति ॥ तस्य शिशोर्दर्शनात् वीतो गतः परिश्रमो यस्य सः मुदा प्रोत्फुल्लानि हृत्पद्मविलोचनाम्बुजानि यस्य सः प्रहृष्टानि रोमाणि यस्य सः अद्भुतभावमत्याश्चर्यरूपं तेन शङ्कितोऽपि तं बालकं प्रष्टुं पुरः प्रससार समीपं गतः ॥ २६ ॥ तावदिति ॥ स भार्गवः मार्कण्डेयः यावद्बालसमीपं प्रसरति तावदेव तस्य शिशोः श्वसितेन अन्तःशरीरं शरीरस्यान्तर्मशक इवाविशत् । तत्र गर्भेऽपि अदः इदं जगत् तथा पुरा प्रलयात्पूर्वं न्यस्तं विन्यस्तं तथाऽचष्ट । दृष्ट्वा चातीव विस्मितः सन् अमुह्यत् ॥ २७ ॥ खमिति युग्मम् ॥ खमन्तरीक्षं रोदसी द्यावापृथिव्यौ भगणान् नक्षत्रगणान् ककुभो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिशः पुराणि च आकरांश्च खेटान् कर्षकग्रामान् आश्रमांश्च वर्णांश्च तेषां वृत्तीश्चेत्यर्थः। नानायुगानि कल्पांश्च कल्पयति तैर्वा कल्प्यत इति कल्पनं कालं च सदिव यथार्थमिवावभासितं स ददर्श। स्पष्टं शेषम् ॥ २८ ॥ २९ ॥ हिमालयमिति स्फुटम् ॥ ३० ॥ तस्मिन्निति युग्मम् ॥ तस्मिन् पृथिव्याः ककुदि उन्नतप्रदेशे प्ररूढमाविर्भूतं वटं च तोकं बालं च वीक्ष्य तस्य प्रेम्णा सुधातुल्यस्मितेन च युक्तेनापाङ्गनिरीक्षणेन निरीक्षितः सन् अथानन्तरम् अतिसंश्लिष्टः स मुनिः अधोक्षजमूर्त्तिं तं बालकं वीक्ष्य नेत्राभ्यां हृदि धिष्ठितं स्थापितमपि। अलोप आर्षः। बहिरपि तं परिष्वक्तुमभ्ययात् अभिमुखं जगाम। पुनरपि तदीयश्वासेन तत्प्रवेशनिर्गमौ अभूताम्। एवमेव सप्तकृत्वः प्रवेशनिर्गमौ ज्ञेयौ ॥३१॥३२॥ तावदिति ॥ तावत्परिष्वङ्गलाभात्पूर्वमेव योगाधीशः गुहाशयः साक्षाद्भगवान् स बालकः सद्योऽन्तर्दधे तिरोहितः। यथाऽनीशस्य भाग्यहीनस्य पुरुषस्य निर्मिता कृता ईहा इच्छा निष्फला भवति तथा ऋषेः मार्कण्डेयस्याप्यालिङ्गनेच्छा निष्फला जाता ॥३३॥ तमिति ॥ तमन्तर्हितं भगवन्तमनु वटः सलिलं लोकसं-

हिमालयं पुष्पवहां च तां नदीं निजाश्रमं तत्र ऋषीनपश्यत् ॥ विश्वं विपश्यन् श्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥ ३० ॥ तस्मिन् पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानम् ॥ तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपाङ्गनिरीक्षणेन ॥ ३१ ॥ अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजम् ॥ ३२ ॥ तावत्स भगवान् साक्षाद्योगाधीशो गुहाशयः ॥ अन्तर्दध ऋषेः सद्यो यथेहानीशनिर्मिता ॥३३॥ तमन्वथ वटो ब्रह्मन् सलिलं लोकसंप्लवः ॥ तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥ ३४ ॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे मायादर्शनं नाम नवमोऽध्यायः ॥ ९ ॥ सूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितम् ॥ वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥ मार्कण्डेय उवाच ॥ प्रपन्नोऽस्म्यङ्घ्रिमूलं ते प्रपन्नाभयदं हरे ॥ यन्माययाऽपि विबुधा मुह्यन्ति ज्ञानकाशया ॥ २ ॥

प्लवश्च क्षणादेव तिरोधायि अन्तर्हितः। कर्मणि कर्मकर्त्तरि वा प्रयोगः मम त्वार्षो भाति। अन्तर्भावितण्यर्थात् कर्मकर्त्तरि इत्येके। सोऽपि मुनिः स्वाश्रम एव यथापूर्वं स्थितः क्षणादस्येति क्षणमात्रकालमध्य एव सप्तकल्पसङ्ख्यः कालो भगवतोऽतर्क्यया शक्त्यैव प्रविष्टोऽभूत् ॥ ३४ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो नवमे द्वादशस्य व्यधादिमाम् ॥ ९ ॥ दशमे शिव आगत्य मुनेस्तुष्टो वरानदात् ॥ प्रीत्या सभाजितस्तत्र श्लोका नैयनसिन्धवः ॥ उवाचेत्येकादशात्रानुष्टुभः सार्द्धकृताः ॥ १० ॥ ॥ २३ ॥
स इति ॥ स मार्कण्डेयो नारायणविनिर्मितं योगमायावैभवमेवमनुभूय तमेव नारायणं शरणं ययौ ॥ १ ॥ प्रपन्न इति ॥ हे हरे ज्ञानकाशया ज्ञानवत्प्रकाशमानया यस्य तव मायया विबुधा विद्वांसोऽपि वयमेव ज्ञानिन इत्यहङ्कारेण विमुह्यन्ति तस्य ते तव प्रपन्नानामभयदमङ्घ्रिमूलं प्रपन्नोऽस्मि ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीनारायण एव स्वमायादर्शनश्रान्तं शिवरूपेण सान्त्वयामास तदाह—तमिति ॥ एवं निभृतात्मानं समहितचित्तं तं मुनिं वृषेण दिवि पर्यटन् रुद्राण्या स्वगणैश्च वृतो भगवान् रुद्रो ददर्श ॥ ३ ॥ अथेति ॥ पूर्वार्द्धं स्पष्टम् । हे भगवन् निभृता निश्चला आत्मेन्द्रियाशया देहेन्द्रियमनांसि यस्य तमिमं विप्रं पश्य ॥ ४ ॥ निभृतेति ॥ वातस्यापाये निर्वाते निभृतं निश्चलमुदम् उदकं झषव्रातश्च यस्मिन् सोऽर्णवो यथा तथायं शान्त इति शेषः । अस्य मुनेस्तपसः सिद्धिं फलं साक्षात्कुरु देहि यतो भवान् सिद्धिदः ॥ ५ ॥ नेति ॥ अयं ब्रह्मर्षिः क्वाप्याशिषः वरान् अणिमाद्याः सिद्धीः नैवेच्छति । उतेत्याश्चर्ये । मोक्षमपि नेच्छति । तत्र हेतुः । भक्तिमिति स्पष्टम् ॥ ६ ॥ अथेति ॥ हे भवानि अथापि साधुना एतेन सह संवदिष्यामः संवादं करिष्यामः । हि यस्मादयं साधुना सह समागमो मेलनमेव परमो लाभः फलम् ॥ ७ ॥ इतीति ॥ इति पार्वतीं प्रत्युक्त्वा सात्वतां

॥ सूत उवाच ॥ तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् ॥ रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ॥ पश्येमं भगवन् विप्रं निभृतात्मेन्द्रियाशयम् ॥ ४ ॥ निभृतोदझषव्रातो वातापाये यथार्णवः ॥ कुर्वस्य तपसः साक्षात् संसिद्धिं सिद्धिदो भवान् ॥ ५ ॥ श्रीभगवानुवाच ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये ॥ ६ ॥ अथाऽपि संवदिष्यामो भवान्येतेन साधुना ॥ अयं हि परमो लाभो नृणां साधुसमागमः ॥ ७ ॥ सूत उवाच ॥ इत्युक्त्वा तमुपेयाय भगवान् सात्वतां पतिः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् ॥ ८ ॥ तयोरागमनं साक्षादीशयोर्जगदात्मनोः ॥ न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ॥ ९ ॥ भगवांस्तदभिज्ञाय गिरीशो योगमायया ॥ आविशत्तद्गुहाकाशं वायुश्छिद्रमिवेश्वरः ॥ १० ॥ आत्मन्यपि शिवं प्राप्तं तडित्पिङ्गजटाधरम् ॥ त्र्यक्षं दशभुजं प्रांशुमुद्यन्तमिव भास्करम् ॥ ११ ॥ व्याघ्रचर्माम्बरं शूलधनुरिष्वसिचर्मभिः ॥ अक्षमालाडमरुककपालपरशुं सह ॥ बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः ॥ १२ ॥

भगवद्भक्तानां गतिः परमोपकारी तत्र सर्वविद्यानामीशानः प्रवर्त्तकः उपदेष्टा सर्वदेहिनामीश्वरः अन्तर्यामी भगवान् रुद्रस्तं मुनिं प्रत्युपेयाय आगतः ॥ ८ ॥ तयोरिति ॥ रुद्धा धियोऽन्तःकरणस्य वृत्तयो येन स मुनिः साक्षादीशयोर्जगदात्मनोः तयोरागमनमात्मानं विश्वं च न वेद ॥ ९ ॥ भगवानिति ॥ तत् तस्य चित्तैकाग्र्येण बहिरज्ञानमभिज्ञाय भगवानीश्वरो गिरीशो वायुश्छिद्रमिव योगमायया तस्य गुहावासमाविशत् ॥ १० ॥ आत्मनीति सार्द्धद्वयम् ॥ न केवलं बहिरेव किन्तु आत्मनि स्वहृदयेऽपि प्राप्तं तडिदित्यादि-विशेषणविशिष्टम् । सहसाऽऽभातं शिवं विचक्ष्य हृदि चित्ते विस्मितोऽभूत् । शिवविशेषणानि स्पष्टानि । शूलादिभिः सहाक्षमालादीन् बिभ्राणम् अक्षमालादीनां द्वन्द्वैक्यम् । पुंस्त्वमार्षम् । " सर्वो द्वन्द्वो विभाषयैकवद्भवति " इति साधु वा ॥ ११ ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किमिति अर्द्धम् ॥ ततश्च मुनिः किमिदं भातं कुत एवागतमिति विचिन्त्य समाधेर्विरतोऽभूत् । यद्वा । विस्मितः सन् समाधेर्विरतोऽभूदिति पूर्वाभ्यां सहैकान्वयः ॥ १३ ॥ नेत्रे इति ॥ ततश्च स मुनिः नेत्रे उन्मील्य सगणम् उमया सह आगतं त्रिलोकैकगुरुं रुद्रं ददृशे । तङ्आर्षः । ततश्च शिरसा न ननाम । सोमयेत्यत्र " सोऽचि लोपे " इति सुलोपः ॥ १४ ॥ तस्मै इति ॥ सगणाय उमया सह आगताय तस्मै स्वागतप्रश्नादिभिः सपर्यां पूजां व्यदधात् ॥ १५ ॥ आह चेति ॥ हे ईशान येनानन्दरूपेण त्वया इदं जगन्निर्वृतमानन्दितं भवति तस्यात्मानन्दानुभवेनैव पूर्णकामस्य ते तव वयम् अल्पकाः किं करवाम न किमपि कर्तुं शक्ता इत्याह च ॥ १६ ॥ नम इति ॥ शिवाय निर्गुणायापि सत्वाय सत्वाधिष्ठात्रे अत एव शान्ताय प्रमृडयति सुखयतीति तथा तस्मै रजोजुषे अपि अघोराय एवं तमोजुषेऽपि अमूढायेति शेषः । तुभ्यं नमः ॥ १७ ॥

किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ १३ ॥ नेत्रे उन्मील्य ददृशे सगणं सोमयाऽऽगतम् ॥ रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥१४॥ तस्मै सपर्यां व्यदधात् सगणाय सहोमया ॥ स्वागतासनपाद्यार्घ्यगन्धस्रग्धूपदीपकैः ॥१५॥ आह चात्मानुभावेन पूर्णकामस्य ते विभो ॥ करवाम किमीशान येनेदं निर्वृतं जगत् ॥ १६ ॥ नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च ॥ रजोजुषेऽप्यघोराय नमस्तुभ्यं तमोजुषे ॥ १७ ॥ सूत उवाच ॥ एवं स्तुतः स भगवानादिदेवः सतां गतिः ॥ परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत ॥ १८ ॥ श्रीभगवानुवाच ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥ अमोघं दर्शनं येषां मर्त्यो यद्विन्दतेऽमृतम् ॥ १९ ॥ ब्राह्मणाः साधवः शान्ता निःसङ्गा भूतवत्सलाः ॥ एकान्तभक्ता अस्मासु निर्वैराः समदर्शिनः ॥ २० ॥ सलोका लोकपालास्तान् वन्दन्त्यर्चन्त्युपासते ॥ अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः ॥ २१ ॥ न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ॥ नात्मनश्च जनस्यापि तद्युष्मान् वयमीमहि ॥२२॥ न ह्यम्मयानि तीर्थानि न देवाश्चेतनोज्झिताः ॥ ते पुनन्त्युरुकालेन यूयं दर्शनमात्रतः ॥ २३ ॥

एवमिति ॥ स्फुटम् ॥ १८ ॥ वरमिति ॥ नोऽस्मत्तः कामं यथेष्टं वरं वृणीष्व । यतो वयं ब्रह्मविष्णुरुद्रास्त्रयोऽपि वरदानामीशा इति येषामस्माकं दर्शनममोघं यत् येभ्यः मर्त्यः अमृतं मोक्षमपि विन्दते ॥ १९ ॥ ब्राह्मणा इति ॥ ये ब्राह्मणाः साधवः सदाचारनिष्ठाः शान्ताः मत्सरादिरहिताः निःसङ्गा निष्कामाः भूतेषु वत्सला कृपायुक्ताः अस्मासु त्रिषु एकान्तभक्ताः समदर्शिनश्च भवन्ति ॥ २० ॥ सलोकेति ॥ ये एवंभूता ब्राह्मणास्तान् लोकैः जनैः सहिता लोकपाला वन्दन्ति प्रणमन्ति । तङभाव आर्षः । अर्चन्त्युपासते च तथाहं ब्रह्मा हरिश्च त्रयोऽपि वन्दामहे अर्चाम उपास्महे च ॥२१॥ नेति ॥ यतस्ते ब्राह्मणा अस्मासु त्रिषु तथात्मनश्च जनस्य चापि अणुमात्रमपि भिदां न चक्षते न पश्यन्ति तत्तस्मादेवंभूतान् युष्मान् ब्राह्मणान् वयमीमहि भजेम॥२२॥ न हीति ॥ अम्मयानि जलरूपाणि तीर्थानि चेतनोज्झिताः पाषाणमयाः देवाः दर्शनमात्रतो हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मान्न पुनन्ति । किन्तु बहुकालेन ते सेविताः पुनन्ति । यूयं साधवस्तु दर्शनमात्रतः पुनीथ । अतो वयं कृतार्था इति शेषः ॥ २३ ॥ ब्राह्मणेभ्य इति ॥ अतो ये आत्मसमाधानं चित्तैकाग्र्यं तपः आलोचनं स्वाध्यायः अध्ययनं संयमो वागादिनियमस्तैः त्रयीमयं वेदत्रयात्मकमस्मद्रूपं बिभ्रति तेभ्यो ब्राह्मणेभ्यः तान् ब्राह्मणान् वयमपि नमस्यामः ॥ २४ ॥ श्रवणादिति ॥ येषां वो युष्माकं श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि जात्यशुद्धा अन्त्यजाश्चापि शुद्ध्येरन् । तङार्षः । तेषां भाषणसत्कारादिभिः शुद्धौ किमु वक्तव्यमतो वयं तैः कृतार्था इत्यर्थः ॥ २५ ॥ इतीति ॥ चन्द्रो ललामं भूषणं यस्य तस्य धर्मस्य गुह्येन रहस्येन उपबृहितं युक्तममृतस्यास्पदं वचः कर्णयोः कर्णाभ्यां पिबन् ऋषिर्नातृप्यत् अलमिति नामन्यत । कर्णयोरमृतायनमिति वाऽन्वयः ॥ २६ ॥ स इति ॥ विष्णोर्मायया चिरं भ्रामितः । मित्त्वेऽपि ह्रस्वाभाव आर्षः । कर्षितश्च सः शिवस्य वागेवामृतं तेन ध्वस्तः क्लेशपुञ्जो यस्य स तं शिवमब्रवीत् ॥ २७ ॥ अहो इति ॥ अहो आश्चर्यमीश्वरस्येयं चर्या लीला दुर्विभाव्या अवितर्क्या । यत्

ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम् ॥ बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः ॥२४॥ श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि वः ॥ शुध्येरन्नन्त्याजाश्चापि किमु संभाषणादिभिः ॥२५॥ सूत उवाच ॥ इति चन्द्रललामस्य धर्मगुह्योपबृंहितम् ॥ वचोऽमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् ॥२६॥ स चिरं मायया विष्णोर्भ्रामितः कर्शितो भृशम् ॥ शिववागमृतध्वस्तक्लेशपुञ्जस्तमब्रवीत् ॥२७॥ ऋषिरुवाच ॥ अहो ईश्वरचर्येयं दुर्विभाव्या शरीरिणाम् ॥ यन्नमन्तीशितव्यानि स्तुवन्ति जगदीश्वराः ॥२८॥ धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनाम् ॥ आचरन्त्यनुमोदन्ते क्रियमाणं स्तुवन्ति च ॥ २९ ॥ नैतावता भगवतः स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥ ३० ॥ सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः कुर्वद्भिराभाति कर्तृवत्स्वप्नदृग्यथा ॥ ३१ ॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ॥ ३२ ॥

यया ईशितव्यानि स्वनियम्यानि भूतानि मादृशानि कर्मभूतानि स्वयं जगदीश्वरा अपि नमन्ति स्तुवन्ति चेति ॥ २८ ॥ धर्ममिति ॥ स्वयं देहिनां धर्मवक्तारोऽपि यत्स्वयं धर्ममाचरन्ति अन्यैः क्रियमाणमनुमोदन्ते च तत्कर्तॄन् स्तुवन्ति च । तत्प्रायोऽन्यान् धर्मं ग्राहयितुमेव स्वेषां पूर्णकामत्वेन तत्फलकामनाभावात् । अन्यथा प्रवृत्त्यसंभवाच्चेत्याशयः ॥ २९ ॥ नेति ॥ एतावता लोकसंग्रहमात्रेण तैर्मायावृत्तिभिः स्वमायामयी वृत्तिर्येषु तैर्नमनादिभिर्भगवतो मायिनस्तवानुभावो न दुष्येत । तङार्षः । मायिनः प्रसिद्धस्य । यथा कुहकमिति धनप्राप्तिहेतुना ऐन्द्रजालिकेन केनचित्स्वमुखादुद्भावितो वानरो यथा स्तूयते नमस्क्रियते च तेन तस्यानुभावो न दुष्यति । न दुष्येतेति पाठे नकारस्य दृष्टान्तेनानुषङ्गः । यद्यपि श्रीरुद्रेण तदीयस्तुत्यादिकं मायया न कृतम् । तथापि स्वस्तुत्या लज्जितेन तेन मुनिना प्रयुक्तोऽयं दृष्टान्तो नानुपपन्नः ॥ ३० ॥ सृष्ट्वेति युग्मम् ॥ मनसा संकल्पमात्रेणेदं विश्वं सृष्ट्वा आत्मना जीवात्मना तत्र प्रविश्य गुणैः कुर्वद्भिः यथा स्वप्नदृक् तथा यः कर्तृवदाभाति तस्मै । त्रिगुणायेत्यादिविशेषणविशिष्टाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवते नमः । विशेषणानि स्पष्टानि ॥३१॥३२॥ कमिति ॥ वरं दर्शनमेव यस्य तस्मात्त्वत्तः परमन्यं कं नु वरं वृणे यत् यस्मात्त्वद्दर्शनात् पुमान् पूर्णकामः सत्यकामः सत्यसंकल्पश्च भवति ॥३३॥ वरमिति ॥ अथापि पूर्णात् भक्तानां कामाभिवर्षणात्त्वत्तः भगवति तथा तत्परेषु तद्भक्तेषु तथा त्वयि अच्युतामुज्ज्वलां भक्तिमेवैकं वरं वृणे॥३४॥ इतीति ॥ इत्येवं मुनिना अर्चितः सूक्तया मधुरया गिरा वरदानाय स्वयमेव प्रवृत्तो भगवान् शर्वः शर्वया उमया चाभिनन्दितः संस्तमाह स्म ॥ ३५ ॥ काम इति युग्मम् ॥ हे ऋषे हे ब्रह्मन् यतस्त्वम् अधोक्षजे भक्तिमानसि अतः ब्रह्माणि वेदादौ वर्चस्विनः प्रकाशवतः ते मनसि स्थितः सर्वोऽपि कामः संकल्पः अन्यच्च पुण्यम् आकल्पान्ताद्यशः अजरामरता च विरक्तिमत् त्रैकालिकवस्तुविषयकं ज्ञानं च विज्ञानमपरोक्षानुभवश्च भूयात्तथा ते तव पुराणाचार्यताऽस्तु ॥ ३६ ॥ ३७ ॥ एवमिति ॥ हे मुने ईश्वरः त्र्यक्षः शिवः मुनये एवं वरान् दत्त्वा तस्य कर्म तपआदि तथा यदमुना पुराऽनुभूतं भगवन्मायावैभवं तच्च देव्यै कथयन् अगात् ॥३८॥ स इति ॥ अवाप्तो महायोगमहिमा येन सः

कं वृणे नु परं भूमन् वरं त्वद्वरदर्शनात् ॥ यद्दर्शनात् पूर्णकामः सत्यकामः पुमान् भवेत् ॥३३॥ वरमेकं वृणेऽथापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥३४॥ सूत उवाच ॥ इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्तया गिरा ॥ तमाह भगवान् शर्वः शर्वया चाभिनन्दितः ॥ ३५ ॥ कामस्तेऽयं महर्षेऽस्तु भक्तिमांस्त्वमधोक्षजे ॥ आकल्पान्ताद्यशः पुण्यमजरामरता तथा ॥३६॥ ज्ञानं त्रैकालिकं ब्रह्मन् विज्ञानं च विरक्तिमत् ॥ ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यताऽस्तु ते ॥ ३७ ॥ सूत उवाच ॥ एवं वरान्स मुनये दत्त्वाऽऽगात्त्र्यक्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन्ननुभूतं पुरा मुनेः ॥३८॥ सोऽप्यवाप्तमहायोगमहिमा भार्गवोत्तमः ॥ विचरत्यधुनाप्यद्धा हरावेकान्ततां गतः ॥ ३९ ॥ अनुवर्णितमेतत्ते मार्कण्डेयस्य धीमतः ॥ अनुभूतं भगवतो मायावैभवमद्भुतम् ॥ ४० ॥ एतत्केचिदविद्वांसो मायासंसृतिमात्मनः ॥ अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ॥ ४१ ॥

हरौ एकान्ततां गतः भार्गवोत्तमः मार्कण्डेयः अधुनाऽपि अद्धा यथेच्छं विचरति ॥३९॥ अन्विति ॥ एतत् धीमतः मार्कण्डेयस्य चरितं तेनानुभूतमद्भुतं भगवन्मायावैभवं च ते तुभ्यं मयाऽनुवर्णितम् ॥४०॥ ननु मार्कण्डेयस्य सप्तकल्पायुष्ट्वं वृद्धैरुच्यमानं विरुध्येतेत्याशङ्क्याह—एतदिति ॥ एतन्मार्कण्डेयेनानुभूतं भगवन् मायावैभवं नानाकल्परूपं कादाचित्कमीश्वरेच्छया तस्यैवाकस्मिकं न तु सर्वसाधारणं केचित्तु नृणां मध्ये आत्मनः भगवतो मायासंसृतिं सर्गप्रलयादिरूपां मार्कण्डेयायैव प्रदर्शिता न तु सर्वसाधारणेत्येवमविद्वांसः अजानन्तः एतत् अनादि सप्तकल्पपर्यन्तमावर्त्तितं प्रचक्षते । विद्वांसस्तु मायाशिशोः श्वासोच्छ्वासाभ्यां सप्तकृत्वस्तदुदरप्रवेशनिर्गमतः सप्तकल्पत्वं तत्क्षणमात्रेणैवेति वदन्त्यतो न विरोध इत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

य इति ॥ हे भृगुवर्य एवमनेन प्रकारेण रथाङ्गपाणेः कालचक्रायुधस्यानुभावेन मायावैभवेन भावितं युक्तं यदेतन्मार्कण्डेयस्य चरितं मया वर्णितं तत् यः कश्चित् सम्यक् श्रद्धया श्रावयेत् श्रद्धया शृणुयाद्वा तयोः कर्मवासनाकृता संसृतिर्न भवेदिति ॥ ४२ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ गङ्गासहायो दशमे द्वादशस्य व्यधादिमाम् ॥ १० ॥ एकादशे तु पूजार्थं हरेरङ्गादिवर्णनम् ॥ प्रतिमासं रवेर्व्यूहः श्लोकाः सार्द्धाः खेमार्गणाः ॥ चत्वार्युवाचेति साङ्घ्रिर्द्वापञ्चाशदनुष्टुभः ॥ ११ ॥ अथेति ॥ हे भागवत यतो भवान् समस्ततन्त्राणां राद्धान्ते तत्ववित् अतो बहुवित्तमं भवन्तमथेदानीमिमं वक्ष्यमाणमर्थं पृच्छामः ॥१॥ तान्त्रिका इति युग्मम् ॥ केवलस्य शुद्धसत्वमयदिव्यविग्रहस्य श्रियः पतेः परिचर्यायां तान्त्रिकाः तन्त्रमार्गेण भगवदाराधनपराः यथैव येन प्रकारेण यैश्च तत्वैः अङ्गानि पाणिपादादीनि उपाङ्गानि गरुडादीनि आयुधानि सुदर्शनादीनि आकल्पाः कौस्तुभादिभूषणानि तेषां द्वन्द्वैक्यं तत्कल्पयन्ति कल्पनया ध्यायन्ति । क्रियायोगं कर्मतत्त्वं बुभुत्सतां बोद्धुमिच्छताम् । शता आर्षः । नोऽस्माकं

य एवमेतद्भृगुवर्य वर्णितं रथाङ्गपाणेरनुभावभावितम् ॥ संश्रावयेत्संशृणुयादुतावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ ४२ ॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे दशमोऽध्यायः ॥ १० ॥ शौनक उवाच ॥ अथेममर्थं पृच्छामो भवन्तं बहुवित्तमम् ॥ समस्ततन्त्रराद्धान्ते भवान्भागवततत्त्ववित् ॥ १ ॥ तान्त्रिकाः परिचर्यायां केवलस्य श्रियः पतेः ॥ अङ्गोपाङ्गायुधाकल्पं कल्पयन्ति यथैव यैः ॥ २ ॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सताम् ॥ येन क्रियानैपुणेन मर्त्यो यायादमर्त्यताम् ॥ ३ ॥ सूत उवाच ॥ नमस्कृत्य गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि ॥ याः प्रोक्ता वेदतन्त्राभ्यामाचार्यैः पद्मजादिभिः ॥४॥ मायाद्यैर्नवभिस्तत्त्वैः स विकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयम् ॥५॥ एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ॥ नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ ६ ॥

तत् वर्णय तेन तव भद्रमस्तु येन क्रियानैपुणेन मर्त्यः अमर्त्यतां मुक्तिं यायात् । मर्त्योऽपि मार्कण्डेयादिः अमर्त्यताममरतां यात इति वा ॥ २ ॥ ३ ॥ नमस्कृत्येति ॥ गुरून्नमस्कृत्य वैष्णवीरपि दुर्बोधा अपि विभूतीर्वक्ष्ये । याः पद्मजादिभिर्ब्रह्मादिभिः आचार्यैः वेदतन्त्राभ्यां प्रोक्ताः । नमस्कृत्वा इति काचित्कः पाठस्तु आर्षः ॥४॥ मायाद्यैरिति ॥ मायाद्यैः प्रकृतिसूत्रमहदहङ्कारपञ्चतन्मात्रैर्नवभिस्तत्त्वैः विकारा एकादशेन्द्रियाणि च महाभूतानीति षोडश तन्मयः स प्रसिद्धो विराट् निर्मितः । यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते । अनेनाङ्गादिकल्पनासौलभ्यं दर्शितम् । वैराजरूपेण कल्पयन्तीति उत्तरमपि ॥ ५ ॥ एतदिति ॥ एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्य रूपमेवेश्वरेणाधिष्ठितत्वात् तदभेदविवक्षया तस्य रूपमुच्यते । तत्र प्रभोः भूः पादावित्यादित्रिभिर्भगवतो विभूतिर्या भूः तयाऽस्य पादौ कल्पिताविति तदभेदाद्भूरेव पादौ । एवं सर्वत्र ज्ञेयम् । भूराद्यनुवादेन भगवत्पादादिभावना विधीयते ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रजापतिरिति ॥ ईशितुः परमेश्वरस्य प्रजापतिः प्रजननं मेढ्रं मृत्युरपानः पायुः । स्फुटमन्यत् ॥ ७ ॥ लज्जेति ॥ भ्रून्नः प्रभोः लज्जा उत्तरः उत्तरोष्ठः लोभस्त्वधरोष्ठः ज्योत्स्ना दन्ताः भ्रमः भ्रमहेतुः मायास्मयः हासः हासो जनोन्मादकरी च मायेत्युक्तत्वात् । भूरुहाः वृक्षाः रोमाणि इत्यादि स्फुटम् ॥ ८ ॥ अनुक्तमन्यदप्येवमूह्यमित्याह—यावानिति॥ अयं व्यष्टिपुरुषः यावत्या संस्थया अवयवसंनिवेशेन यावान् यावदवयववान् मितः असौ महापुरुषोऽपि लोकसंस्थया तावान् तावदवयवमानित्यर्थः ॥ ९ ॥ कौस्तुभेति ॥ अजः भवान् स्वात्मज्योतिः शुद्धजीवचैतन्यं कौस्तुभस्य व्यपदेशेन व्याजेन बिभर्त्ति तस्य कौस्तुभस्य या व्यापिनी प्रभा तामेवोरसा श्रीवत्सं बिभर्त्ति ॥१०॥ स्वमायामिति ॥ नानागुणाः सत्वादयः सूत्राणि च तन्मयीं मायां वनमालाख्यां बिभर्त्ति । छन्दोमयं पीतं वासश्च बिभर्त्ति । त्रिवृत्स्वरमकारादिवर्णत्रयात्मकं त्रिमात्रं च स्वरं प्रणवं ब्रह्मसूत्रं

प्रजापतिः प्रजननमपानो मृत्युरीशितुः ॥ तद्बाहवो लोकपाला मनश्चन्द्रो भ्रुवौ यमः ॥ ७ ॥ लज्जोत्तरोऽधरो लोभो दन्ता ज्योत्स्ना स्मयो भ्रमः ॥ रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ॥८॥ यावानयं वै पुरुषो यावत्या संस्थया मितः ॥ तावानसावपि महापुरुषो लोकसंस्थया ॥९॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभाव्यापिनी साक्षाच्छ्रीवत्समुरसा विभुः ॥१०॥ स्वमायां वनमालाख्यां नानागुणमयीं दधत् ॥ वासश्छन्दोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरम् ॥११॥ बिभर्ति सांख्यं योगं च देवो मकरकुण्डले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयं-करम् ॥ १२ ॥ अव्याकृतमनन्ताख्यमासनं यदधिष्ठितः ॥ धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते ॥ १३ ॥ ओजःसहोबलयुतं मुख्यतत्त्वं गदां दधत् ॥ अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनम् ॥ १४ ॥ नभोनिभं नभस्तत्त्वमसिं चर्म तमोमयम् ॥ कालरूपं धनुः शार्ङ्गं तथा कर्म-मयेषुधिम् ॥ १५ ॥ इन्द्रियाणि शरानाहुराकूतीरस्य स्यन्दनम् ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयाथ क्रियात्मताम् ॥ १६ ॥

बिभर्त्ति ॥ ११ ॥ बिभर्त्तीति ॥ पूर्वार्द्धं स्फुटम् । सर्वलोकानामभयङ्करं पारमेष्ठ्यं पदं ब्रह्मलोकं मौलिं मुकुटं बिभर्त्ति ॥ १२ ॥ अव्याकृतमिति ॥ यत् अधिष्ठितः अधिष्ठाय स्थितस्तदनन्ताख्यमासनमव्याकृतं प्रधानं बिभर्त्ति । तथा धर्मज्ञानवैराग्यैश्वर्यश्रीयशोविमलोत्कर्षणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहाख्यशक्तिभिर्युक्तं सत्वं सत्वगुणः इह भगवदासने पद्ममुच्यते ॥१३॥ ओज इति ॥ ओजआदियुतं मुख्यतत्त्वं प्राणतत्त्वम् । " प्राणो वै मुख्यः " इति श्रुतेः । गदान् दधत् वर्त्तते एवमपां तत्त्वं चर्म खेटम् । तथा कालरूपं शार्ङ्गधनुः कर्ममयमिषुधिं बाणकोशं च दधद्वर्त्तते ॥ १४ ॥१५॥ इन्द्रियाणीति ॥ इन्द्रियाणि शरानाहुः । आकूतीः क्रियाशक्तियुक्तं मनः अस्य भगवतः स्यन्दनं रथम् आहुः । अस्य रथस्याभिव्यक्तरूपं मुद्रया धृतया अर्थक्रियात्मतां वरदाभयदादिरूपत्वं बिभर्त्ति तत्तन्मुद्रया तथा तथा भावयेदित्यर्थः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मण्डलमिति ॥ मण्डलं सूर्यमण्डलं देवयजनं पूजाभूमिं तां सूर्यमण्डलत्वेन भावयेदित्यर्थः । अन्तर्वह्निमण्डलं वा दीक्षा आत्मनः संस्कारः स्यात् । गुरुकृतां मन्त्रदीक्षामेवात्मनस्तत्पूजायोग्यतां भावयेदित्यर्थः । भगवतः परिचर्या आत्मनो दुरितक्षयो ज्ञेयः । तां परिचर्यां स्वस्य सकलपापक्षयायेत्येवं भावयेदित्यर्थः ॥ १७ ॥ पूर्वमासनपद्ममुक्तमथ हस्तस्थं पद्ममाह—भगवानिति ॥ भगवान् भगशब्दार्थमैश्वर्यादिषाड्गुण्यं लीलाकमलमुद्वहन् बिभ्राणो भवति ॥१८॥ आतपत्रमिति ॥ हे द्विजाः । द्विजेति वा पाठः । अकुतोभयं कालकर्मादिभयरहितं कैवल्यं धाम तत् आतपत्रं बिभर्ति । त्रिवृत् ऋग्यजुःसामरूपो यो वेदः वेदोक्तो यागादिः स एव सुपर्णाख्यः गरुडो भवति । " सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरः " इत्यादिमन्त्रलिङ्गात् । यज्ञं पूरुषं विष्णुस्वरूपं वहति धत्ते । " यज्ञो वै विष्णुः " इति श्रुतेः ॥१९॥ अनपायिनीति सार्द्धम् ॥ हरेः भगवतो या अनपायिनी अवियुक्ता साक्षात् आत्मनः स्वस्य शक्तिः सैव भगवती श्रीर्लक्ष्मीः स्वस्य चिद्रूपत्वात् श्रियश्च तदभेदात् तन्त्रमूर्त्तिः पञ्चरात्राद्यागमरूपः पार्षदाधिपतिः विदितः प्रसिद्धो

मण्डलं देवयजनं दीक्षा संस्कार आत्मनः ॥ परिचर्या भगवत आत्मनो दुरितक्षयः ॥ १७ ॥ भगवान् भगशब्दार्थं लीलाकमलमुद्वहन् ॥ धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् ॥ १८ ॥ आतपत्रं तु वैकुण्ठं द्विजा धामाकुतोऽभयम् ॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषम् ॥ १९ ॥ अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तन्त्रमूर्तिर्विदितः पार्षदाधिपः ॥ नन्दादयोऽष्टौ द्वास्थाश्च तेऽणिमाद्या हरेर्गुणाः ॥ २० ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयम् ॥ अनिरुद्ध इति ब्रह्मन्मूर्तिव्यूहोऽभिधीयते ॥ २१ ॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः ॥ अर्थेन्द्रियाशयज्ञानैर्भगवान् परिभाव्यते ॥ २२ ॥ अङ्गो पाङ्गायुधाकल्पैर्भगवांस्तच्चतुष्टयम् ॥ बिभर्ति स्म चतुर्मूर्तिर्भगवान् हरिरीश्वरः ॥ २३ ॥

विष्वक्सेनः येऽणिमादयोऽष्टौ गुणास्ते हरेः द्वारपाला नन्दादयः ॥ २० ॥ चतुर्व्यूहोपासनमाह—वासुदेव इति ॥ हे ब्रह्मन् वासुदेवादिशब्दैः पुरुषः श्रीनारायण एव स्वयं मूर्त्तिव्यूहो मूर्त्तिभेदैरुपास्य इत्यभिधीयते ॥२१॥ तस्यैवाध्यात्मनि चतुर्द्धोपासनमाह—स इति ॥ स एव भगवान् वृत्तिभिः जाग्रदाद्यवस्थाभिः अर्थेन्द्रियाशयज्ञानैः विश्वादिशब्दैः परिभाव्यते तथा हि अर्था बाह्यविषयाः तेनेन्द्रियैरर्थावभासेन जाग्रदवस्थायां विश्व इति इन्द्रियं मनः मनोमात्रावभासस्वप्नावस्थायां तैजस इति आशयस्तदुभयसंस्कारयुक्तमज्ञानं तदुपलक्षितसुषुप्तावस्थायां प्राज्ञ इति ज्ञानं तत्त्रितयसाक्षिचैतन्यमात्रं स एव तुरीय इति ॥ २२ ॥ अङ्गेति ॥ अङ्गोपाङ्गायुधाकल्पैर्विशिष्टो भगवान् हरिरीश्वरः वासुदेवादिचतुर्मूर्त्तिः सन् तत् विश्वादिचतुष्टयं रूपं बिभर्ति स्म । ईश्वर इत्युक्त्या विश्वादिभावेऽपि तन्नियन्तुर्भगवतो न जीवत्वमिति सूचितम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यैव ब्रह्मादित्रयमूर्तितामाह—द्विजेति ॥ हे द्विजऋषभ स एव भगवान् ब्रह्मयोनिः वेदप्रवर्त्तकः स्वयंदृक् स्वप्रकाशः स्वमहिम्ना निजानन्देनैव परिपूर्णः अपि क्रीडार्थमेव स्वशक्तिरूपया त्रिगुणात्मिकया मायया नानाख्यया ब्रह्मादिसंज्ञया एतद्विश्वं सृजति पाति हरति च इत्येवम् अनावृताक्षः असङ्कुचितज्ञानः अपरिच्छिन्नज्ञानोऽपि सर्वात्मकत्वेन भेदरहितोऽपि च विवृत इव भिन्न इव शास्त्रे निरुक्तः । एवं सर्वात्मकत्वेऽपि तत्परैः तदुपासकैरेवात्मनि अन्तःकरणे आत्मनैव लभ्यो न त्वन्यैः । मालिनी छन्दः ॥ २४ ॥ श्रीकृष्णेति ॥ हे श्रीकृष्ण हे कृष्णस्यार्जुनस्य सखे हे वृष्णिषु ऋषभ श्रेष्ठ अवनिध्रुहो ये राजन्यास्तेषां वंशस्य दहन अनपवर्गमक्षीणं वीर्यं यस्य हे गोविन्द गोपवनितानां व्रजाः समूहाः भृत्या नारदादयश्च तैर्गीतं तीर्थभूतं श्रवः कीर्त्तिर्यस्य श्रवणमेव मङ्गलं यस्य तथाभूत भृत्यान् सेवकानस्मान् पाहि ॥ २५ ॥ य इति ॥ कल्ये प्रातःकाले उत्थाय यस्तच्चित्तः तस्मिन्नुक्तविधे भगवति समाहितचित्तः स्नानादिना प्रयतः शुचिश्च सन् इदं महापुरुषस्य लक्षणानि यस्मिंस्तत्प्रकरणं जपेत् स जप्त्वा जपित्वैव ।

द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्ययाऽनावृताक्षो विवृत इव निरुक्त-स्तत्परैरात्मलभ्यः ॥ २४ ॥ श्रीकृष्ण कृष्णसख वृष्णवृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविन्द गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान् ॥ २५ ॥ य इदं कल्य उत्थाय महापुरुषलक्षणम् ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयम् ॥ २६ ॥ शौनक उवाच ॥ शुको यदाह भगवान्विष्णुराताय शृण्वते ॥ सौरो गणो मासि मासि नाना वसति सप्तकः ॥ २७ ॥ तेषां नामानि कर्माणिसंयुक्तानाम-धीश्वरैः ॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः ॥२८॥ सूत उवाच ॥ अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनाम् ॥ निर्मितो लोकतन्त्रो-ऽयं लोकेषु परिवर्त्तते ॥ २९ ॥ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ॥ ३० ॥

इडभाव आर्षः । गुहाशयं हृदिस्थं ब्रह्म वेद ॥ २६ ॥ मण्डलं देवयजनमित्युक्त्या स्मृतिमागतं रविव्यूहं पृच्छति—शुक इति युग्मम् ॥ मासि मासि नानानामा सप्तकः प्रत्येकं सप्तावयवप्रमाणः सौरः सूर्यसम्बन्धी गणः वसति इति पञ्चमस्कन्धे शृण्वते विष्णुराताय शुको यदाह स्म । अधीश्वरैः तत्तत्पतिभिः संयुक्तानां तेषां नामानि कर्माणि चेत्येवम् ऋषिगन्धर्वाप्सरोनागग्रामणीयातुधानदेवरूपं सूर्यात्मनो हरेः व्यूहं गणं श्रद्दधानानां नः अस्माकं ब्रूहि । स्वस्वपतिसंयुक्तत्वेन तेषां प्रत्येकं द्वन्द्वं ज्ञेयम् । अतः " एवं द्वन्द्वशः सप्त पृथक् चतुर्दश " इति पञ्चमोक्तिः सङ्गच्छते ॥२७॥२८॥ अनादीति ॥ सर्वदेहिनामात्मनो नियामकस्य पालकस्य विष्णोर्या अनादिः अविद्या मायाप्रकृतिस्तया निर्मितो लोकतन्त्रो लोकयात्रानिर्वाहकोऽयं सूर्यमण्डलो लोकेषु परिवर्त्तते ॥ २९ ॥ एवं मण्डलदृष्ट्या प्राकृतत्वमुक्तं तदन्तर्यामिदृष्ट्या तस्य भगवत्त्वमाह—एक इति ॥ यो हि सर्वलोकानामात्मा उपादानमन्तर्यामी च तथा आदिकृत् सृष्टिकर्त्ता हरिः स सूर्य एक एव । यतः सर्वासां वेदोक्तक्रियाणां मूलमतः क्रियोपाधिना ऋषिभिर्बहुधोक्तः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्यः सेनजित् अप्सराः विश्वो गन्धर्वः ऐरावतो नागः अमी तपस्याख्यं फाल्गुनं नयन्ति ॥ ४० ॥ अंशुरिति ॥ अंशुः सूर्यः । अथांशुः इति वा पाठः । कश्यपः ऋषिः तार्क्ष्यो यक्षः ऋतसेनो गन्धर्वः उर्वशी अप्सराः विद्युच्छत्रुः राक्षसः महाशङ्खो नागः एते सहोमासं मार्गशीर्षं नयन्ति ॥ ४१ ॥ भग इति ॥ भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिर्गन्धर्वः ऊर्णो यक्षः आयुर्ऋषिः कर्कोटको नागः पूर्वचित्तिः अप्सराः अमी पुष्यमासं पौषं नयन्ति ॥ ४२ ॥ त्वष्टेति ॥ त्वष्टा सूर्यः ऋचीकतनयो जमदग्निः ऋषिः कम्बलो नागः तिलोत्तमा अप्सराः ब्रह्मापेतो राक्षसः शताजित् यक्षः धृतराष्ट्रो गन्धर्वः एते इषम्भराः आश्विनपालकाः ॥ ४३ ॥ विष्णुरिति ॥ विष्णुरादित्यः अश्वतरो नागः रम्भा अप्सराः सूर्यवर्चाः गन्धर्वः सत्यजित् यक्षः विश्वामित्रः ऋषिः मखापेतो राक्षसः अमी ऊर्जमासं कार्तिकं नयन्ति । एते चादित्यादयः कौर्मे

अंशुश्च कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्वशी ॥ विद्युच्छत्रुर्महाशङ्खः सहोमासं नयन्त्यमी ॥ ४१ ॥ भगः स्फूर्जोऽरिष्टनेमिरूर्ण आयुश्च पञ्चमः ॥
कर्कोटकः पूर्वचित्तिः पुष्यमासं नयन्त्यमी ॥४२॥ त्वष्टा ऋचीकतनयः कम्बलश्च तिलोत्तमा ॥ ब्रह्मापेतोऽथ शतजिद्धृतराष्ट्र इषम्भराः ॥४३॥
विष्णुरश्वतरो रम्भा सूर्यवर्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्जमासं नयन्त्यमी ॥ ४४ ॥ एता भगवतो विष्णोरादित्यस्य विभूतयः ॥
स्मरतां सन्ध्ययोर्नॄणां हरन्त्यंहो दिने दिने ॥ ४५ ॥ द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै ॥ चरन्समन्तात्तनुते परत्रेह च सन्मतिम्
॥ ४६ ॥ सामर्ग्यजुर्भिस्तल्लिङ्गैरृषयः संस्तुवन्त्यमुम् ॥ गन्धर्वास्तं प्रगायन्ति नृत्यन्त्यप्सरसोऽग्रतः ॥ ४७ ॥ उन्नह्यन्ति रथं नागा ग्रामण्यो
रथयोजकाः ॥ नोदयन्ति रथं पृष्ठे नैर्ऋता बलशालिनः ॥४८॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोऽमलाः ॥ पुरतोऽभिमुखं यान्ति स्तुवन्ति
स्तुतिभिर्विभुम् ॥ ४९ ॥ एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः ॥ कल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ॥ ५० ॥ इति श्रीमद्भागवते
महापुराणे द्वादशस्कन्धे आदित्यव्यूहविवरणं नामैकादशोऽध्यायः ॥ ११ ॥

विभज्योक्ताः । "धाताऽर्यमा च मित्रश्च वरुणश्चेन्द्र एव च । विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च ॥ भगस्त्वष्टा च विष्णुश्च आदित्या द्वादश स्मृताः" इत्यादिना ॥ ४४ ॥ एता इति ॥ स्फुटम् ॥ ४५ ॥ द्वादशस्वपीति ॥ असौ देवः सूर्यः द्वादशस्वपि मासेषु षड्भिर्गन्धर्वादिभिः सह समन्ताच्चरन् अस्य जनस्य इह लोके परत्र च लोके उभयलोकविषयां शुभां मतिं तनुते । अनेन गायत्र्यर्थः सूचितः ॥ ४६ ॥ सामेति ॥ तल्लिङ्गैः सूर्यप्रकाशकैः सामादिभिर्ऋषयोऽमुं सूर्यं संस्तुवन्ति । स्फुटमन्यत् ॥ ४७ ॥ उन्नह्यन्तीति ॥ नागाः रथम् उन्नह्यन्ति दृढं बध्नन्ति । ग्रामण्यो यक्षाः रथयोजका भवन्ति । नैर्ऋताः राक्षसाः । स्फुटमन्यत् ॥ ४८ ॥ वालखिल्या इति ॥ पादत्रयं स्फुटम् । प्रतिमा[illegible] एव विभुं सूर्यं स्तुवन्ति ॥ ४९ ॥ एवमिति ॥ अनादिनिधनः आद्यन्तशून्यः अत एवाजो भगवान् ईश्वरो हरिः कल्पे कल्पे एवमात्मानं व्यूह्य द्वादशगणरूपेण विभज्य लोका[illegible]

॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालरूपस्य हरेः द्वादशादित्यभेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधा भेदमाह—काल इति ॥ हे ब्रह्मन् हरिरेकोऽपि कालादिरूपेण नवधोक्तः । कालः प्रातरादिः । देशः समादिः । क्रियाऽनुष्ठानम् । कर्त्ता ब्राह्मणादिः । करणं स्रुगादि । कार्यं यागादि । आगमो मन्त्रादिः । द्रव्यं व्रीह्यादि । फलं स्वर्गादि ॥३१॥ मध्विति मध्वादिषु चैत्रादिषु द्वादशसु मासेषु कालरूपधृग् भगवान् सूर्यो लोकतन्त्राय लोकयात्रानिर्वाहाय पृथक् पृथक् द्वादशभिर्गणैः सप्तकैः सह चरति ॥३२॥ तानेव गणानाह धातेति ॥ द्वादशभिः धाता सूर्यः कृतस्थली अप्सराः हेतिः राक्षसः वासुकिर्नागः रथकृत् यक्षः पुलस्त्यः ऋषिः तुम्बुरुर्गन्धर्वः इत्येवं सप्तामी मधुमासं चैत्रं नयन्ति स्वस्व कर्मभिः सूर्यं गमयन्तीत्यर्थः ॥ ३३ ॥ अर्यमेति ॥ अर्यमा सूर्यः पुलहः ऋषिः अथौजाः यक्षः प्रहेतिः राक्षसः पुञ्जिकस्थली अप्सराः नारदो गन्धर्वः कच्छनीरो नागः । एते माधवं वैशाखं मासं नयन्ति ॥ ३४ ॥ मित्र इति ॥ मित्रः सूर्यः अत्रिः ऋषिः पौरुषेयो राक्षसः तक्षको नागः मेनका अप्सराः हहाः गन्धर्वः रथस्वनो यक्षः अमी

कालो देशः क्रिया कर्ता करणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन्नवधोक्तोऽजया हरिः ॥ ३१ ॥ मध्वादिषु द्वादशसु भगवान् कालरूपधृक् ॥ लोकतन्त्राय चरति पृथग्द्वादशभिर्गणैः ॥ ३२ ॥ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ॥ पुलस्त्यस्तुम्बुरुरिति मधुमासं नयन्त्यमी ॥३३॥ अर्यमा पुलहोऽथौजाः प्रहेतिः पुञ्जिकस्थली ॥ नारदः कच्छनीरश्च नयन्त्येते स्म माधवम् ॥ ३४ ॥ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः ॥ रथस्वन इति ह्येते शुक्रमासं नयन्त्यमी ॥ ३५ ॥ वसिष्ठो वरुणो रम्भा सहजन्यस्तथा हुहूः ॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयन्त्यमी ॥ ३६॥ इन्द्रो विश्वावसुः श्रोता एलापत्रस्तथाङ्गिराः ॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयन्त्यमी ॥३७॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ अनुम्लोचा शङ्खपालो नभस्याख्यं नयन्त्यमी ॥ ३८ ॥ पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा ॥ घृताची गौतमश्चेति तपोमासं नयन्त्यमी ॥ ३९ ॥ क्रतुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा ॥ विश्व ऐरावतश्चैव तपस्याख्यं नयन्त्यमी ॥ ४० ॥

शुक्रमासं ज्येष्ठमासं नयन्ति ॥३५॥ वसिष्ठ इति ॥ वसिष्ठः ऋषिः वरुणः सूर्यः रम्भा अप्सराः सहजन्यो यक्षः हुहूर्गन्धर्वः शुक्रो नागः चित्रस्वनो राक्षसः अमी शुचिमासमाषाढमासं नयन्ति॥३६॥ इन्द इति ॥ इन्द्रः सूर्यः विश्वावसुर्गन्धर्वः श्रोता यक्षः एलापत्रो नागः अङ्गिरा ऋषिः प्रम्लोचा अप्सराः वर्यो राक्षसः अमी नभोमासं श्रावणं नयन्ति ॥३७॥ विवस्वानिति॥ विवस्वान् सूर्यः उग्रसेनो गन्धर्वः व्याघ्रो राक्षसः आसारणो यक्षः भृगुः ऋषिः अनुम्लोचा अप्सराः शङ्खपालो नागः अमी नभस्याख्यं भाद्रपदं नयन्ति ॥ ३८ ॥ पूषेति ॥ पूषा सूर्यः धनञ्जयः नागः वातो राक्षसः सुषेणो गन्धर्वः सुरुचिर्यक्षः घृताची अप्सराः गौतमः ऋषिः अमी तपोमासं माघं नयन्ति । मासक्रमातिलङ्घनं कौर्म्योक्तादिक्रमानुसारेण । वैष्णवे तु मासक्रमेणोक्तिः । क्वचिन्नामव्यत्ययस्तु कल्पभेदेनेति ज्ञेयम् ॥ ३९ ॥ क्रतुरिति ॥ क्रतुर्यक्षः वर्चा राक्षसः भरद्वाजः ऋषिः पर्जन्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वः युष्माभिरिह यदहं पृष्टोऽस्मि तदुक्तमिति इह सर्वतः तत्तदर्थकीर्त्तनद्वारेण भगवतः लीलावतारकर्माणि कीर्त्तितानि ॥ ४६ ॥ पतित इति ॥ पतितः कूपादिषु स्खलितः सोपानादिषु आर्त्तः रोगादिपीडितः क्षुत्वा क्षुतं कृत्वा एवं कथंचिद्विवशोऽपि यः कश्चिदपि हरये नम इत्युच्चैः ब्रुवन् सर्वपातकात् मुच्यते ॥ ४७ ॥ संकीर्त्यमान इति ॥ भगवाननन्तः संकीर्त्यमानः । यद्वा । श्रुतोऽनुभावो यस्य सः पुंसां कीर्त्तयतां शृण्वतां च चित्तं प्रविश्य निःशेषं व्यसनं दुरितहेतुकं दुःखं विधुनोति नाशयति । अर्को यथा तमोऽन्धकारं धुनोति । अर्को गुहागतं तमो न धुनोति इत्याशङ्क्याह । अतिवातो यथाभ्रं धुनोति तथेति ॥ ४८ ॥ मृषेति ॥ यत् यासु भगवान् अधोक्षजो न कथ्यते असतां विषयासक्तानामेव कथा यासु ता हि गिरः वाचः मृषा निष्फलाः असतीः असत्यश्च नरकहेतुत्वात् । पूर्वसवर्णदीर्घ आर्षः । भगवद्गुणानामुदयः प्रकाशो यस्मात् तदेव वचः सत्यं सफलं यतः तदेव मङ्गलं शुभकरम् । तदेव च पुण्यं पुण्यावहम् । यद्वा । यासु भगवान्न कथ्यते ताः सत्या अपि गिरो मृषा एव । प्रिया अपि असदुक्तय एव । तथा सतां विदुषामपि कथा असत्कथा एव अतस्तद्वक्ता सत्यवादी अपि मिथ्यावादी प्रियंवदोऽपि कटुभाषी सत्कथकोऽप्यसत्कथक उच्यते । भगवद्यशस्तु स्वकल्पितमसत्यमपि

पतितः स्खलितश्चार्तः क्षुत्त्वा वा विवशो ब्रुवन् ॥ हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥ ४७ ॥ संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ॥ प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवाऽतिवातः ॥ ४८ ॥ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥ ४९ ॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ५० ॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्ध्वाङ्क्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥ ५१ ॥

तदेव सत्यम् । गृहाश्रमविध्वंसकत्वादमङ्गलमपि तदेव मङ्गलम् भगवतः परदारहरणादिकमधर्मैरपुण्यत्वेन कथितमपि तदेव पुण्यं यतस्तद्भगवतो गुणस्यैव न तु दोषस्य उदयो यस्मात् ॥४९॥ तदेवेति ॥ यत् यस्मिन् उत्तमश्लोकयशोऽनुगीयते तदेव नवं नवं यथा भवति तथा रम्यमित्यादि । यथा अरम्यमपि प्रसेनमार्गानुगमनभल्लूकबिलप्रवेशादिकं रम्यमेव । भक्तानामरोचकमपि जानकीत्यागादिकं रुचिरमेव । पुरातनमपि भगवच्चरितं नवं नवमेव । रावणकृतसीताहरणादिकं मनसो दुःखकरमपि महोत्सवकरमेव । पतिपुत्रादिवैराग्योत्पादकत्वेन शोकार्णवमपि तत् शोकार्णवशोषणमेव ॥ ५० ॥ न यद्वच इति श्लोकत्रयम् ॥ भक्तेः सर्वोत्कर्षख्यापनाय महापुराणस्यास्य प्रथमेऽपि शेषेऽपि स्थापितम् । यथा महामन्त्रस्याद्यन्तयोः संपुटबीजत्रयम् । नेति । चित्राणि पदानि यस्मिंस्तथाभूतमपि यद्वचो जगत्पवित्रत्वहेतुं हरेर्यशो न प्रगृणीत न वर्णयेत् । तद्ध्वाङ्क्षतीर्थं काकतुल्यानां कामिनां रतिस्थानं न तु हंसैः विवेकिभिः सेवितं यतः यत्राच्युतस्तत्रैवामलाः साधवः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालस्येति ॥ गतिः स्वरूपम् अम्भोधेः सकाशात् भुव उद्धरणे तन्निमित्तम् ॥ १० ॥ ऊर्ध्वेति सार्द्धम् ॥ तिर्यगवाक्सर्गः देवतिर्यङ्मनुष्यादिसर्गः अर्द्धाभ्यां नारी च नरश्च तस्य यतो याभ्यां स्वायंभुवो मनुः या च नारीणामाद्या उत्तमा प्रकृतिः शतरूपा च जातौ ॥ ११ ॥ सन्तान इति ॥ सन्तानो धर्मपत्नीनामिति नव ब्रह्मसमुत्पत्तिरित्यनन्तरं द्रष्टव्यम् ॥ १२ ॥ १३ ॥ चतुर्थस्कन्धार्थमाह—नवेति सार्द्धम् ॥ नवब्रह्मभ्यः मरीच्यादिभ्यः सन्तानसमुत्पत्तिः प्राचीनबर्हिषो नारदस्य च संवादः । पञ्चमस्कन्धार्थमाह । ततः इति ।

कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुव उद्धरणेऽम्भोधौ हिरण्याक्षवधो यथा ॥ १० ॥ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च ॥ अर्धनारीनरस्याथ यतः स्वायंभुवो मनुः ॥ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ॥ ११ ॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ॥ अवतारो भगवतः कपिलस्य महात्मनः ॥ १२ ॥ देवहूत्याश्च संवादः कपिलेन च धीमता ॥ १३ ॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विजाः ॥ १४ ॥ नाभेस्ततोऽनुचरितमृषभस्य भरतस्य च ॥ १५ ॥ ततो द्वीपसमुद्राद्रिवर्षनद्युपवर्णनम् ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः ॥ १६ ॥ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः ॥ यतो देवासुरनरास्तिर्यङ्नगखगादयः ॥ १७ ॥ त्वाष्ट्रस्य जन्म निधनं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः ॥ १८ ॥ मन्वन्तरानुचरितं गजेन्द्रस्य विमोक्षणम् ॥ मन्वन्तरावतारश्च विष्णोर्हयशिरादयः ॥ १९ ॥ कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पतेः ॥ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसाम् ॥ २० ॥ दैवासुरं महायुद्धं राजवंशानुकीर्तनम् ॥ इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः ॥ २१ ॥ इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च ॥ सूर्यवंशानुकथनं शशादाद्या नृपादयः ॥ २२ ॥ सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः ॥ खट्वाङ्गस्य च मांधातुः सौभरेः सगरस्य च ॥ २३ ॥ रामस्य कोसलेन्द्रस्य चरितं किल्बिषापहम् ॥ निमेरङ्गपरित्यागो जनकानां च संभवः ॥ २४ ॥ रामस्य भार्गवेन्द्रस्य निःक्षत्रकरणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥ २५ ॥ दौष्यन्तेर्भरतस्यापि शंतनोस्तत्सुतस्य च ॥ २६ ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोऽनुकीर्तितः ॥ यत्रावतीर्णो भगवान् कृष्णाख्यो जगदीश्वरः ॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥ २७ ॥

प्रैयव्रतं प्रियव्रतस्य चरितम् ॥ १४ ॥ १५ ॥ तत इति ॥ द्वीपाद्युपवर्णनं पातालनरकादीनां च स्थितिः । अनेनैव नरकनिवर्त्तकमजामिलोपाख्यानं गृहीतम् ॥ १६ ॥ षष्ठस्कन्धार्थमाह—दक्षजन्मेति ॥ १७ ॥ सप्तमस्कन्धार्थमाह—पुत्रयोश्चेति ॥ १८ ॥ अष्टमस्कन्धार्थमाह—मन्वन्तरानुचरितमिति ॥ क्वचित्कस्यचिदनुक्तिर्व्युत्क्रमोक्तिश्च भक्तिरसानुकूलत्वेनेति द्रष्टव्यम् ॥ १९ ॥ २० ॥ नवमस्कन्धार्थमाह—राजवंशेति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ सोमवंशादिभूतस्यैलस्य चरितम् । तत्सुतस्य भीष्मस्य जन्म ॥ २५ ॥ २६ ॥ ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमस्कन्धार्थमाह—तस्य कर्माणीति ॥ कर्माण्येव प्रपञ्चेन दर्शयति । पूतनाया असुसहितस्य स्तन्यपयसः पानम् ॥२८॥ निष्पेषो वधः सहभ्रातुः सखिसहितस्य ॥२९॥ परिसर्पतः सर्वतः आगच्छतः ॥३०॥३१॥ शक्रसुरभिभ्यां कृष्णस्य यज्ञः पूजा अभिषेकश्च तयोर्द्वन्द्वैक्यम् ॥३२॥३३॥३४॥३५॥३६॥३७॥ द्विषतः शत्रून् प्रमथ्य ॥३८॥ प्राग्ज्योतिषपतिं भौमासुरम् ॥ ३९ ॥ ये च शम्बरादयस्तेषां माहात्म्यं पराक्रमः वधश्चेत्यन्वयः ॥ ४० ॥ एकादशस्कन्धार्थमाह—विप्रशापेति ॥ ४१ ॥ धर्मविनिर्णयः वर्णा-

तस्य कर्माण्यपाराणि कीर्तितान्यसुरद्विषः ॥ पूतनाऽसुपयःपानं शकटोच्चाटनं शिशोः ॥ २८ ॥ तृणावर्त्तस्य निष्पेषस्तथैव बकवत्सयोः ॥ धेनुकस्य सहभ्रातुः प्रलम्बस्य च संक्षयः ॥ २९ ॥ गोपानां च परित्राणं दावाग्नेः परिसर्पतः ॥ दमनं कालियस्याहेर्महाऽहेर्नन्दमोक्षणम् ॥ ३० ॥ व्रतचर्यां तु कन्यानां यत्र तुष्टोऽच्युतो वृतः ॥ प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनम् ॥ ३१ ॥ गोवर्द्धनोद्धारणं च शक्रस्य सुरभेरथ ॥ यज्ञाभिषेकः कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥ ३२ ॥ शङ्खचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ॥ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥ ३३ ॥ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥३४॥ मृतस्यानयनं सूनोः पुनः सान्दीपनेर्गुरोः ॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियम् ॥३५॥ कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ॥ जरासन्धसमानीतसैन्यस्य बहुशो वधः ॥ घातनं यवनेन्द्रस्य कुशस्थलया निवेशनम् ॥ ३६ ॥ आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ ३७ ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ हरस्य जृम्भणं युद्धे बाणस्य भुजकृन्तनम् ॥ ३८ ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥ चैद्यपौण्ड्रकशाल्वानां दन्तवक्रस्य दुर्मतेः ॥ ३९ ॥ शम्बरो द्विविदः पीठो मुरः पञ्चजनादयः ॥ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनम् ॥ भारावतरणं भूमेर्निमित्तीकृत्य पाण्डवान् ॥ ४० ॥ विप्रशापापदेशेन संहारः स्वकुलस्य च ॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥ ४१ ॥ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः ॥ ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४२ ॥ युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः ॥ ४३ ॥ चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः ॥ ४४ ॥ शाखाप्रणयनमृषेर्मार्कण्डेयस्य सत्कथा ॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ ४५ ॥ इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोऽहमिहास्मि वः ॥ लीलावतारकर्माणि कीर्तितानीह सर्वशः ॥ ४६ ॥

श्रमधर्मनिश्चयः मर्त्यपरित्यागः मनुष्यत्वस्यान्तर्द्धानम् ॥ ४२ ॥ द्वादशस्कन्धार्थमाह—युगेति ॥ युगलक्षणं तदनुरूपा वृत्तिश्चेत्यर्थः । उपप्लवः उपद्रवः ॥ ४३ ॥ त्रिविधा प्राकृतिकी नैमित्तिकी नित्या चेति ॥ ४४ ॥ ऋषेर्व्यासस्य विन्यासः अङ्गादिकल्पना सूर्यस्य व्यूह इति शेषः ॥ ४५ ॥ इतीति ॥ हे द्विजश्रेष्ठाः इति चोक्तमिति चकारादन्यदपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वः युष्माभिरिह यदहं पृष्टोऽस्मि तदुक्तमिति इह सर्वतः तत्तदर्थकीर्त्तनद्वारेण भगवतः लीलावतारकर्माणि कीर्त्तितानि ॥ ४६ ॥ पतित इति ॥ पतितः कूपादिषु स्खलितः सोपानादिषु आर्त्तः रोगादिपीडितः क्षुत्वा क्षुतं कृत्वा एवं कथंचिद्विवशोऽपि यः कश्चिदपि हरये नम इत्युच्चैः ब्रुवन् सर्वपातकात् मुच्यते ॥ ४७ ॥ संकीर्त्यमान इति ॥ भगवाननन्तः संकीर्त्यमानः । यद्वा । श्रुतोऽनुभावो यस्य सः पुंसां कीर्त्तयतां शृण्वतां च चित्तं प्रविश्य निःशेषं व्यसनं दुरितहेतुकं दुःखं विधुनोति नाशयति । अर्को यथा तमोऽन्धकारं धुनोति । अर्को गुहागतं तमो न धुनोति इत्याशङ्क्याह । अतिवातो यथाभ्रं धुनोति तथेति ॥ ४८ ॥ मृषेति ॥ यत् यासु भगवान् अधोक्षजो न कथ्यते असतां विषयासक्तानामेव कथा यासु ता हि गिरः वाचः मृषा निष्फलाः असतीः असत्यश्च नरकहेतुत्वात् । पूर्वसवर्णदीर्घ आर्षः । भगवद्गुणानामुदयः प्रकाशो यस्मात् तदेव वचः सत्यं सफलं यतः तदेव मङ्गलं शुभकरम् । तदेव च पुण्यं पुण्यावहम् । यद्वा । यासु भगवान्न कथ्यते ताः सत्या अपि गिरो मृषा एव । प्रिया अपि असदुक्तय एव । तथा सतां विदुषामपि कथा असत्कथा एव अतस्तद्वक्ता सत्यवादी अपि मिथ्यावादी प्रियंवदोऽपि कटुभाषी सत्कथकोऽप्यसत्कथक उच्यते । भगवद्यशस्तु स्वकल्पितमसत्यमपि

पतितः स्खलितश्चार्तः क्षुत्त्वा वा विवशो ब्रुवन् ॥ हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥ ४७ ॥ संकीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम् ॥ प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवाऽतिवातः ॥ ४८ ॥ मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥ ४९ ॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ५० ॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद् ध्वाङ्क्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥ ५१ ॥

तदेव सत्यम् । गृहाश्रमविध्वंसकत्वादमङ्गलमपि तदेव मङ्गलम् भगवतः परदारहरणादिकमधमैरपुण्यत्वेन कथितमपि तदेव पुण्यं यतस्तद्भगवतो गुणस्यैव न तु दोषस्य उदयो यस्मात् ॥४९॥ तदेवेति ॥ यत् यस्मिन् उत्तमश्लोकयशोऽनुगीयते तदेव नवं नवं यथा भवति तथा रम्यमित्यादि । यथा अरम्यमपि प्रसेनमार्गानुगमनभल्लूकबिलप्रवेशादिकं रम्यमेव । भक्तानामरोचकमपि जानकीत्यागादिकं रुचिरमेव । पुरातनमपि भगवच्चरितं नवं नवमेव । रावणकृतसीताहरणादिकं मनसो दुःखकरमपि महोत्सवकरमेव । पतिपुत्रादिवैराग्योत्पादकत्वेन शोकार्णवमपि तत् शोकार्णवशोषणमेव ॥ ५० ॥ न यद्वच इति श्लोकत्रयम् ॥ भक्तेः सर्वोत्कर्षख्यापनाय महापुराणस्यास्य प्रथमेऽपि शेषेऽपि स्थापितम् । यथा महामन्त्रस्याद्यन्तयोः संपुटबीजत्रयम् । नेति । चित्राणि पदानि यस्मिंस्तथाभूतमपि यद्वचो जगत्पवित्रत्वहेतुं हरेर्यशो न प्रगृणीत न वर्णयेत् । तद्ध्वाङ्क्षतीर्थं काकतुल्यानां कामिनां रतिस्थानं न तु हंसैः विवेकिभिः सेवितं यतः यत्राच्युतस्तत्रैवामलाः साधवः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स इति ॥ स एव वाग्विसर्गो वाचः प्रयोगो जनताघसंप्लवः जनसमूहाघनाशकः यस्मिन् अबद्धवत्यपि अपभ्रंशशब्दयुक्तेऽपि प्रतिश्लोकमनन्तस्य यशोऽङ्कितानि नामानि
भवन्ति । यत् यस्मात् साधवस्तमेव शृण्वन्ति श्रोतारि कीर्त्तयन्ति स्वयं च गायन्ति ॥ ५२ ॥ नैष्कर्म्यमिति ॥ नैष्कर्म्यं कर्मासाध्यं ब्रह्म तत्प्रकाशकं निरञ्जनं सर्वोपाधिनिवर्तकं
यत् ज्ञानं तदप्यच्युतभक्तिवर्जितं चेत् तर्हि अलं न शोभते अपरोक्षपर्यन्तं न भवति । यत् शश्वत् साधनकाले फलकाले च अभद्रं दुःखप्रदमनुत्तमं सर्वोत्तमतयाऽभिमतमपि
कर्म ईश्वरे चेन्नैवार्पितं तदा पुनः कुतः शोभेतेत्यन्वयः ॥ ५३ ॥ यश इति ॥ यो वर्णाश्रमाचारतपःश्रुतादिषु परो महान् परिश्रमः स यशोयुक्तायां श्रियामेव पर्याप्तः कीर्त्तिसं-
पदावेव तस्य फलम् इति भावः । यद्वा । षष्ठीयम् । यशःश्रियामेव हेतुः न तु भगवत्प्राप्तेः । यद्वा । यशःश्रियामेव हेतुर्यो वर्णाश्रमाचारादिषु अभ्यासः स परो महान्
परिश्रम एवेति यशःश्रियोः क्षयिष्णुत्वेन परपुरुषार्थत्वाभावात् हरेर्गुणानुवादादिभिस्तु यः परिश्रमः स तु श्रीधरस्य तस्य पादपद्मयोरविस्मृतिः न विस्मृतिर्यस्मात् तादृशो

स वाग्विसर्गो जनताऽघसंप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः
॥ ५२ ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ॥ कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं कर्म यदप्यनुत्तमम्
॥५३॥ यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु ॥ अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ॥ ५४ ॥
अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति ॥ सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम्॥५५॥ यूयं
द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतम् ॥ नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ॥ ५६ ॥ अहं च
संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥ प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥ ५७ ॥

भवति ॥ ५४ ॥ अविस्मृतिरिति ॥ कृष्णपदारविन्दयोरविस्मृतिः अभद्राणि पापानि क्षिणोति नाशयति शमं शान्तिं सत्वस्यान्तः करणस्य शुद्धिमित्यादीनि तनोति च
॥ ५५ ॥ यूयमिति ॥ हे द्विजाग्र्याः अजस्रभावा निरन्तरभक्तिमन्तो यूयं यत् यस्मात् आत्मनि स्वान्तःकरणे श्रीनारायणमखिलात्मभूतं सर्वान्तर्यामिणमत एव देवं
सर्वोपास्यम् अत एव अदेवं न देवोऽन्यो भजनीयो यस्य तमीशमाविवेश्य चित्ते प्रवेश्य शश्वत् भजत । संभावनायां लोट् । अतो भूरिभागाः बहुपुण्याः । यद्वा । यूयं यतो
भूरिभागाः तपआदिसंपन्नाः ततो नारायणं भजतेति विधिः ॥५६॥ अहं चेति ॥ पुरा परीक्षितः नृपतेः प्रायोपवेशकाले महताम् ऋषीणां शृण्वतां सतां सदसि परमर्षेः शुकस्य
वक्त्रान्मे मया श्रुतम् आत्मतत्वप्रकाशकं पुराणं भवत्प्रश्नेनाहं स्मारितः । अतः कृतार्थोऽस्मीत्याशयः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदिति ॥ हे विप्राः कथनीयानि उरूणि कर्माणि यस्य तस्य ॥ ५८ ॥ य इति ॥ यामं क्षणं वा योऽनन्यधीः श्रावयेद् शृणुयाद्वा । स आत्मानं पुनात्येव मुच्यत एवेत्यर्थः ॥ ५९ ॥ द्वादश्यामिति ॥६०॥ पुष्कर इति ॥ यतात्मवान् एकाग्रमनाः भयात् संसारभयात् ॥६१॥ देवता इति ॥ देवादयो ये प्रकीर्तिताः ते । यत्रेति षष्ठ्यर्थे सप्तमी । यस्य भागवतस्य कीर्त्तनात् गृणतः शृण्वतश्च पुंसः कामान् यच्छन्ति ॥ ६२ ॥ ऋच इति ॥ ऋचो यजूंषि सामानि अधीत्य द्विजो मधुकुल्यादि यत्फलमनुविन्दते तत्फलमेतां संहितां पठित्वाऽनुविन्दते ॥ ६३ ॥ पुराणेति ॥ किञ्च एतां पुराणसंहितामधीत्य यद् भगवतः परमं पदं शास्त्रेषु प्रोक्तं तद् व्रजेत् ॥ ६४ ॥ विप्र इति ॥ राजन्य उदधिमेखलां पृथ्वीम् । सन्धिरार्षः ॥६५॥ कलीति ॥ कलिमलानां संहतिं समूहं कालयति विनाशयतीति तथाभूतो हरिः इतरत्र शास्त्रान्तरे अभीक्ष्णं न गीयते । इह तु अशेषमू-

एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनम् ॥५८॥ य एवं श्रावयेन्नित्यं यामं क्षणमनन्यधीः ॥ श्रद्धावान्योऽनुशृणुयात्पुनात्यात्मानमेव सः ॥ ५९ ॥ द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान् भवेत् ॥ पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ॥६०॥ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ॥ ६१ ॥ देवता मुनयः सिद्धाः पितरो मनवो नृपाः ॥ यच्छन्ति कामान्गृणतः शृण्वतो यत्र कीर्तनात् ॥ ६२ ॥ ऋचो यजूंषि सामानि द्विजोधीत्यानुविन्दते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलम् ॥ ६३ ॥ पुराणसंहितामेतामधीत्य प्रयतो द्विजाः ॥ प्रोक्तं भगवतो यत्तु तत्पदं परमं व्रजेत् ॥ ६४ ॥ विप्रोऽधीत्याऽऽप्नुयात्प्रज्ञां राजन्यो दधिमेखलाम् ॥ वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात् ॥६५॥ कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम् ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसङ्गैः ॥६६॥ तमहमजमनन्तमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिम् ॥ द्युपतिभिरजशक्रशङ्कराद्यैर्दुरवसितस्तवमच्युतं नतोऽस्मि ॥ ६७ ॥ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजङ्गमालयाय ॥ भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥ ६८ ॥

र्तिर्भगवान् अनुपदं कथाप्रसङ्गैः परिपठितः । केचित्तु हरिर्यथेहानुपदं परिपठितस्तथा इतरत्र न गीयत इत्यन्वयमाहुः । पुष्पिताग्रात्रयम् ॥ ६६ ॥ तमिति ॥ अजमनन्तम् आत्मतत्वं जगदुदयस्थितिसंयमेषु हेतवः आत्मनः स्वस्य शक्तयो रजआदयो यस्य तम् अजशक्रशङ्कराद्यैः द्युपतिभिर्देवैरपि दुरवसितः अज्ञातः स्तवः स्तोत्रं यस्य तमहमच्युतं नतोऽस्मि ॥ ६७ ॥ उपचितेति ॥ उपचिताभिः उद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्व आत्मन्येवोपरचितं स्थिरं जङ्गमं चालयो यस्य तस्मै उपलब्धिमात्रधाम्ने ज्ञानैकस्वरूपाय सुराणामृषभाय श्रेष्ठाय सनातनाय भगवते नमः ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वगुरुं श्रीशुकं नमस्करोति–स्वसुखेति ॥ स्वसुखेन स्वरूपानन्देनैव निभृतं पूर्णं चेतो यस्य सः तेनैवानन्देन व्युदस्तोऽन्यस्मिन्भावो यस्य तथाभूतोऽपि अजितस्य रुचिराभिर्ली-
लाभिः आकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य स योजनेषु कृपया तदीयं भगवच्चरितप्रधानमत एवाखिलानां वृजिनघ्नं दुःखनिरासकं तत्त्वदीपं परमार्थप्रकाशं श्रीभागवतं पुराणं
व्यतनुत । तं व्याससूनुं श्रीशुकमहं नतोऽस्मि । मालिनी छन्दः॥६९॥इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ द्वादशे गङ्गासहायो द्वादशस्य व्यधादिमाम्॥१२॥त्रयोदशे
पुराणानां श्लोकादिगणनोच्यते ॥ भागवतप्रशंसा च तत्र श्लोकास्त्रिबाहवः ॥ उवाचेत्येकमर्द्धाढ्यैर्ष्टाविंशतिरनुष्टुभः ॥ १३ ॥ यमिति ॥ दिव्यैः स्तवैर्यं ब्रह्मा स्तौति तथा वरुणे-
न्द्ररुद्रमरुतोऽपि स्तुन्वन्ति स्तुवन्ति । श्नुरार्षः । तन्वन्ति इति केऽपि विरलाः पठन्ति तत्र विस्तरेण वर्णयन्ति इत्यर्थः । अङ्गानि पदानि क्रमाः उपनिषदश्च तेषां द्वन्द्वैक्यम्
“ द्वन्द्वाच्चुदष ” इति टच् । ततः सहशब्देन समासः । तथा च अङ्गादिसहितैर्वेदैः यं सामगा गायन्ति ध्यानेनावस्थितं निश्चलं तद्गतं यन्मनस्तेन यं योगिनः पश्यन्ति सुरासु-

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ॥ व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्यास-
सूनुं नतोऽस्मि ॥ ६९ ॥ इति श्रीभाग० महा० द्वादशे द्वादशस्कन्धार्थनिरूपणं नाम द्वादशोऽध्यायः ॥ १२ ॥ सूत उवाच ॥ यं ब्रह्मा वरुणे-
न्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ॥ ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्या-
न्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ १ ॥ पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु
वः ॥ यत्संस्कारकलाऽनुवर्तनवशाद्वेलानिभेनाम्भसां यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥ २ ॥ पुराणसंख्यासंभूतिमस्य वाच्य-
प्रयोजने ॥ दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥ ३ ॥ ब्राह्मं दश सहस्राणि पाद्मं पञ्चोनषष्टि च ॥ श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैव-
कम् ॥ ४ ॥ दशाष्टौ श्रीभागवतं नारदं पञ्चविंशतिः ॥ मार्कण्डं नव वाह्नं तु दशपञ्च चतुःशतम् ॥ ५ ॥

रगणा यस्यान्तं तत्त्वं न विदुः । तस्मै देवाय नमः । शार्दूलविक्रीडितद्वयम् ॥ १ ॥ पृष्ठे इति ॥ पृष्ठे भ्राम्यन् यः अमन्दो गरिष्ठः मन्दरगिरिस्तस्य ये ग्रावाणस्तेषामग्राणि तैः
कण्डूयनात् तत्सुखेन निद्रालोः निद्राशीलस्य कमठाकृतेः कूर्ममूर्तेर्भगवतः श्वासानिला वो युष्मान् पान्तु । वेला समुद्रजलक्षोभः तस्य निभेन मिषेण येषां श्वासानिलानां
संस्कारास्तेषां कलालेशास्तदनुवर्तनवशात् जलनिधेरम्भसां यातायातमद्यापि न विश्राम्यति ॥ २ ॥ पुराणेति ॥ पुराणसंख्यास्तासां संभूतिं समाहारं च । अस्य श्रीभागवतस्य
वाच्यं विषयः प्रयोजनं च दानं च दानस्य पाठादेश्च माहात्म्यं च निबोधत शृणुत ॥ ३ ॥ ब्राह्ममिति ॥ त्रयोविंशत् त्रयोविंशतिः । आर्षः । एवमग्रेऽपि चतुर्विंशतिसहस्राणि ।
क्लैब्यमार्षम् । एवमग्रेऽपि शैवकं शिवपुराणम् ॥ ४ ॥ दशेति ॥ वाह्नमग्निपुराणं दशपञ्चसहस्राणि चत्वारि शतानि च ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशेति ॥ भविष्यं पुराणं चतुर्दश सहस्राणि पंच शतानि च ॥६॥ चतुरिति ॥ स्कान्दं शताधिकैकाशीतिसहस्रम् ॥७॥ कौर्ममिति ॥ सौपर्णं गरुडपुराणम् एकोनविंशत् एकोनविंशतिः सहस्राणि ॥८॥ एवमिति ॥ भारतं त्वितिहासः रामायणं च वाल्मीकिना प्रोक्तं काव्यमतस्तयोः सङ्ख्या नोक्ता । अतः पुराणानां संदोहः समूहश्चतुर्लक्षसङ्ख्याक एव ॥९॥ इदमिति ॥ भगवता प्रोक्तमिति भागवतनामनिरुक्तिः । भवभीतायेति संसारनिवृत्तिः फलं कारुण्यादिति दुर्लभत्वम् ॥१०॥ आदीति ॥ हरिलीलाकथानां व्रातः समूहः स एवामृतं तेनानन्दिताः सन्तः सुराश्च येन सन्त एव सुरा इति वा तत् ॥११॥ सर्वेति ॥ यत् अद्वितीयं वस्तु तन्निष्ठं तद्विषयं शेषाणि विशेषणानि ॥१२॥ प्रौष्ठेति ॥ प्रौष्ठपद्यां

चतुर्दश भविष्यं स्यात्तथा पञ्च शतानि च ॥ दशाष्टौ ब्रह्मवैवर्तं लिङ्गमेकादशैव तु ॥ ६ ॥ चतुर्विंशति वाराहमेकाशीतिसहस्रकम् ॥ स्कान्दं शतं तथा चैकं वामनं दश कीर्तितम् ॥ ७ ॥ कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥ एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु ॥ ८ ॥ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः ॥ तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥ ९ ॥ इदं भगवता पूर्वं ब्रह्मणे नाभिपङ्कजे ॥ स्थिताय भवभीताय कारुण्यात्संप्रकाशितम् ॥ १० ॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ॥ हरिलीलाकथाव्रातामृतानन्दितसत्सुरम् ॥ ११ ॥ सर्ववेदान्तसारं यद्ब्रह्मात्मैकत्वलक्षणम् ॥ वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ॥ १२ ॥ प्रौष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितम् ॥ ददाति यो भागवतं स याति परमां गतिम् ॥ १३ ॥ राजन्ते तावदन्यानि पुराणानि सतां गणे ॥ यावद् भागवतं नैव श्रूयतेऽमृतसागरम् ॥ १४ ॥ सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ॥ तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥ १५ ॥ निम्नगानां यथा गङ्गा देवानामच्युतो यथा ॥ वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ॥ १६ ॥ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ॥ तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥ १७ ॥ श्रीमद् भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते ॥ तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥ १८ ॥

भाद्रपद्यां हेमसिंहसमन्वितं स्वर्णसिंहासनारूढम् । प्रौष्ठपद्यामेवेदं श्रीशुकेन समापितमिति पाद्मोत्तरखण्डगतमाहात्म्ये दृष्टम् । हेमसिंहसमन्वितमिति सर्वशास्त्रमहाराजस्य पुराणसूर्यस्यास्य सिंहासनौचित्यात् । अस्योपमानस्य ग्रहराजस्यापि तदानीं सिंहराशिगतत्वेन सिंहासनारूढतैव ॥ १३ ॥ राजन्ते इति ॥ १४ ॥ सर्वेति ॥ हि यस्मात्सर्ववेदान्तसारं श्रीमद् भागवतं तस्मात् तद्रस एवामृतं तेन तृप्तस्य निर्वृतस्यान्यत्र शास्त्रान्तरे क्वचिदपि रतिर्न स्यात् ॥ १५ ॥ निम्नगानामिति ॥ निम्नगानां नदीनां मध्ये ॥१६॥ क्षेत्राणामिति ॥ अनुत्तमा सर्वोत्तमा ॥१७॥ श्रीमदिति ॥ यत् श्रीमद्भागवतं पुराणम् अमलं यद्वैष्णवानां प्रियं यस्मिंश्च पारमहंस्यं परमहंसेभ्यो हितम् । यदन्तात्स्वार्थेऽण् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एकमद्वितीयममलं प्राकृतदोषसंबन्धरहितं ज्ञानमित्युपलक्षणं सच्चिदानन्दात्मकं परब्रह्म गीयते । यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यम् आविष्कृतं प्रकाशितं तत् भक्त्या शृण्वन् विपठन् विचारणपरश्च नरः संसाराद्विमुच्येत् विमुच्यते । तङ्भाव आर्षः । शार्दूलविक्रीडितद्वयम् ॥१८॥ ग्रन्थसमाप्तौ भगवद्ध्यानलक्षणं मङ्गलमाचरति—कस्मै इति ॥ अयं श्रीभागवतरूपः अतुलः निरुपमः ज्ञानप्रदीपः पुरा कल्पादौ येन कस्मै ब्रह्मणे विभासितः प्रकाशितः । कस्मै इत्यत्र सर्वनामत्वमार्षम् । तद्रूपेण ब्रह्मरूपेण येन नारदाय विभासितः तद्रूपिणा नारदरूपिणा च येन कृष्णाय व्यासाय विभासितः तद्रूपिणा व्यासरूपिणा येन योगीन्द्राय शुकाय विभासितः । अथानन्तरं तदात्मना शुकरूपेण च येन भगवद्राताय परीक्षिते विभासितस्तत्त्वं शुद्धं प्राकृतमलरहितमत एव विशोकममृतं जन्ममरणादिविकाररहितमत एव सत्यं परमार्थभूतं परं परमेश्वरं धीमहीति गायत्र्यैव यथो-

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ॥ योगीन्द्राय तदात्मनाऽथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥ १९ ॥ नमस्तस्मै भगवते वासुदेवाय साक्षिणे ॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥ २० ॥ योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ॥ संसारसर्पदष्टं यो विष्णुरातममूमुचत् ॥ २१ ॥ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

॥ छ ॥ ॥ छ ॥

पक्रममुपसंहरन् गायत्र्याख्यब्रह्मविद्येयमिति दर्शयति ॥ १९ ॥ शास्त्रसमाप्तौ स्वेष्टदेवं प्रणमति—नम इति ॥ इदं पुराणं कस्मै ब्रह्मणे व्याचचक्षे व्याख्यातवान् ॥ २० ॥ योगीन्द्रायेति ॥ तस्मै ब्रह्मरूपिणे परब्रह्मनिरूपकाय विषघ्नमन्त्रनिरूपकाय च योगिनां समाहितचित्तानां विषोपायविदां च इन्द्राय तस्मै शुकाय नमः । यः संसार एव सर्पस्तेन दष्टं विष्णुरातम् अमूमुचत् संसारबन्धात् सर्पविषाच्च मोचयामास । अत्र श्रीशुकस्य विषवैद्यत्वं व्यङ्ग्यम् । तच्च संसारस्य सर्पत्वरूपवाच्यसिद्धेरङ्गमिति मङ्गलानि सन्तु सर्वजगताम् ॥ २१ ॥ दृङ्मार्गमेष्यति विभुः स्वयमित्यमन्दानन्दाशया न गणिता विपदो दुरन्ताः ॥ पीयूषसागरतरङ्गनिभैरपाङ्गैः श्रीनन्दनन्दन दयोदय नन्दयाऽस्मान् ॥ १ ॥ इति श्रीकृष्णसेवार्थमन्वितार्थप्रकाशिकाम् ॥ त्रयोदशे द्वादशस्य व्यधाद्गङ्गासहायकः ॥ १३ ॥

अयं श्रीमद्भागवतस्य द्वादशस्कन्धः बून्दीनगरनिवासिपण्डितगङ्गासहायविरचितान्वितार्थप्रकाशिकाख्यव्याख्यासहितः कल्याणनगर्यां श्रीकृष्णदासात्मजेन गङ्गाविष्णुना स्वीये "लक्ष्मीवेङ्कटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितः । अधिक श्रावण शुक्ल १ शकाब्दाः १८२३, संवत् १९५८ ॥

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्जयन् किमपि याचनतः परेभ्यष्टीकोपदां तव मुदे समपीपदं याम् ॥ तामर्पये पृथुकमुष्टिमिवातिदीनः कारुण्यमन्दिर मुकुन्द दशं दिशास्याम् ॥१॥ निर्मूलयन्नपि बलादचि-
रेण कामान् यः प्रीणयत्यतितरां भजतां मनांसि ॥ यो रात्यलौकिकमचिन्तितमर्थमग्र्यं कल्पद्रुमो जयति भागवताभिधोऽसौ ॥ २ ॥ श्रीपाण्डुवंशभवतोमरगोत्र इन्द्रप्रस्थेश्व-
रोऽभवदिलाभृदनङ्गपालः ॥ तद्वंशमौक्तिकमहीपमुकुन्दसिंहस्थानं पुरी जयति संप्रति पाटणाख्या ॥ ३ ॥ एतां स्वपूर्ववसतिं मम तातपादाः ख्यातां व्यधुर्जगति रामधनाभि-
धानाः ॥ सौशील्यभूषितगुणौघवशीकृतत्वान्नासूयति स्म खलु कोऽपि खलोऽपि येभ्यः ॥ ४ ॥ ज्येष्ठः सुतो जडतमोऽप्यहमाशिषा तैराज्ञापितोऽजनिषि भागवतेऽनुरक्तः ॥
अध्यापितश्च शनकैर्विपुलश्रमेण प्रापं सतां परमनुग्रहभाजनत्वम् ॥ ५ ॥ येषां पदाम्बुजरजःप्रणतेन मूर्ध्ना धृत्वैव बोधलवमर्हति मादृशोऽपि ॥ वात्सल्यविस्मृतमदीयमहागस-
स्तान् वन्दे पतन्मुहुरधिक्षिति तातपादान् ॥ ६ ॥ याऽग्रेसरत्वमयते स्म दयावतीनां सीमां च याश्वति परां स्म पतिव्रतानाम् ॥ मद्बाल्य एव परलोकमुपेयुषीं तां लक्ष्म्याह्वयां
स्वजननीं प्रणमामि भक्त्या ॥ ७ ॥ स्वर्भाजि मातरि शिशू तनयौ सपत्न्या याऽपीपलत्स्वतनयाधिकभावमावाम् ॥ तामाश्रयं सरलताकरुणाक्षमाणां गङ्गां द्वितीयजननीमति-
भक्ति वन्दे ॥ ८ ॥ श्रीकृष्णदत्तविदुषो बुधवन्द्यमेलारामाभिधान् हरिनरायणपण्डितांश्च ॥ गोविन्दरामनिजसूनुयुतांश्च गोपीनाथान्मुहुर्विविधशास्त्रगुरून्नमामि ॥ ९ ॥ येऽसूम-
योग्यरचनामपि वीक्ष्य टीकां दोषानुपेक्ष्य दयया प्रशशंसुरेव ॥ काश्याद्यनेकनगरस्थितिशालिनस्तान् सौजन्यपूर्णहृदयान् विबुधान्नमामि ॥ १० ॥ यश्चेतराम इति मे सहजः
कनिष्ठो रामप्रताप इति यः प्रथमः सुतो मे ॥ यौ विष्णुदत्तहरिवल्लभकौ कनिष्ठौ तेऽमी भवन्तु सुखिनश्चिरजीविनश्च ॥ ११ ॥ गोविन्द इत्यथ जगत्पदपूर्वनाथो गोपालकस्त-
दनुजोऽपि च कृष्णदत्तः ॥ एते मदीयसहजस्य सुता विनीता नित्यं भवन्तु सुखिनश्चिरजीविनश्च ॥ १२ ॥ आजीवनाय परदेशनिवासभाजो यैर्यैरकारिषत केऽपि ममोपकाराः ॥
भूमीभुजस्तुहिनपर्वतदेशपाला नित्यं भवन्तु बहुसम्पदलंकृतास्ते ॥ १३ ॥ श्रीपूर्णदेवनृपतिः कुनिहारनाथः श्रीकृष्णसिंहनृपतिस्तनयस्तदीयः ॥ देवैः सुरद्रुमसुमैः परिपूजितौ
तौ स्वर्गे सदानुभवतां विपुलं विहारम् ॥ १४ ॥ श्रीकृष्णसिंहतनयो विनयोर्जितश्रीः शिष्यो ममावति महीमिह तेगसिंहः ॥ सञ्जीवनाय शुचिदिष्टलसद्विकासः पाथोदवत्सरसतां
जगतां विधत्ते ॥ १५ ॥ श्रीमान् कलानिधिरभूज्जयसिंहवर्मा योऽचूचुरत्स्वकलया जगतां मनांसि ॥ किन्नाम चित्रमिह यत्स्वसमानशीलं तं नीतवान् स्वसदनं नवनीतचौरः
॥१६॥ ज्येष्ठो विभाति जयसिंहविभोस्तनूजः श्रीध्यानसिंह इति बाघलमण्डलेशः ॥ सोऽयं कलत्रसहजात्मजभृत्ययुक्तः पायाच्चिरं वसुमतीं परमेशभक्तः ॥१७॥ संसारचन्दनृप
आसमधाणनाथस्तस्यात्मजोऽवति धरामिह विष्णुचन्दः ॥ आनन्दतुन्दिलमना जगतां प्रियोऽस्तु कीर्त्तिं बिभर्त्तु च सदा मम शिष्य एषः ॥ १८ ॥ श्रीकर्मचन्द इति
जुब्बलमण्डलस्य नाथः सुतोऽभवदमुष्य तु पद्मचन्दः ॥ यस्याम्बरीषनृपतेरिव सर्वसम्पज्जज्ञे मुकुन्दपदपङ्कजपूजनाय ॥ १९ ॥ वैकुण्ठगोऽस्तु कहलूरपतिश्च हीराचन्दस्तथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महलोगपतिर्दिलीपः ॥ गोवर्द्धनोऽतिथिहितः किल धामिनाथो भज्जीश्वरो नरपती रणभद्रसिंहः ॥२०॥ आजीवनाय वसतो हिमशैलदेशे भूपेष्वमीषु विगतं तरुणं वयो द्राक् ॥ कार्यान्तरेण निजदेशमुपागतस्य प्राप्ताः श्रुतिं मम गणेशपुरीयतीन्द्राः ॥ २१ ॥ आनन्दमग्नमनसोऽखिलशास्त्रविज्ञान् नित्यं निबद्धहृदयांश्च परोपकारे ॥ सम्पूजितान्नृपतिभिर्विपुलादरेण वीतस्पृहान् विचरतो भुवि तानपश्यम् ॥ २२ ॥ ते मां विलोक्य रहितं मदकैतवाद्यैः क्रेतुं चकांक्षुरुपकारपणैरनल्पैः ॥ लोकोत्तरप्रचुरपुस्तकदर्शनैमें चित्तं प्रलोभ्य च मया सह बुन्दिमापन् ॥ २३ ॥ तस्यां महाकविरशोभत सूर्यमल्लो यस्याऽस्य ऊषुरखिलास्त्रिदशादिभाषाः ॥ यो वंशभास्करसमाख्यमहाप्रबन्धं श्रीरामसिंहनृपतेरकरोन्निदेशात् ॥ २४ ॥ श्रीमान् कविः स च गणेशपुरीनिदेशान्मां बुन्द्यधीश्वरपुरः प्रशशंस सम्यक् ॥ श्रीरामसिंह इति विश्रुत एष भूपो मां पूर्णकाममकरोन्निजदर्शनेन ॥ २५ ॥ चौहाणवंशभवहड्डकुलाम्बुधीन्दोर्लोकोत्तरैर्निजगुणैर्वशिताखिलस्य ॥ शास्त्रास्त्रशस्त्रकुशलस्य विशुद्धबुद्धेः श्रीरामसिंहनृपतेर्यशसः क्व सीमा ॥ २६ ॥ ब्रह्मैव वाङ्मनसगोचरतामतीतं सर्वत्र भातमवदातमतर्कगम्यम् ॥ इत्यादिशास्त्रवचनानि परःशतानि श्रीरामसिंहयश एव वदन्ति नान्यत् ॥ २७ ॥ श्रीविश्वनाथकविना रचिते गभीरे श्रीशत्रुशल्यचरिते विपुले सुकाव्ये ॥ तस्याज्ञया विवृतिमारचयं सुबोधां व्याख्यं तथोपनिषदोऽनु च केनमुख्याः ॥२८॥ एवं च पञ्चसु गतासु शरत्सु भूपः प्रीत्या स मह्यमददान्निकटेऽधिकारम्॥ यातासु पञ्चसु समासु पुनः प्रसन्नो ग्रामध्यरोपयदमात्यपदे स्वदेशे ॥२९॥ भूयो नृपार्हवसनैः सह मह्यमभ्युत्थानादरं करुणया दिशति स्म भूपः ॥ आसन्नवार्द्धकतयाश्रमभाग् दशाब्दान् भुक्त्वाऽहमत्यजममात्यपदं विरक्तः ॥३०॥ मद्वंशजस्थितिसमस्थिरतां नृपो मे ग्रामान्वितां वसुमतीं विपुलां प्रदाय ॥ राज्ये निधाय तनयं रघुवीरसिंहं शोके निमज्य जनता हरिलोकमापत् ॥३१॥ शासन्महीं नयपथै रघुवीरसिंहो मां पूर्वतोऽप्यधिकमाद्रियते दयालुः ॥ अष्टासु राजसचिवेषु पदं प्रदाय प्रीत्या सुवर्णकटकं चरणेऽदिशन्ने ॥३२॥ कुत्रापि शास्त्रविषये मम नास्ति दाक्ष्यं बाल्यात्तथापि रचनाव्यसनं महन्मे ॥ दर्पावधूतधिषणोऽहह हैमकोशव्याख्याद्यनेककलनाभिरनैषमायुः ॥३३॥ एवं प्रयाति रचनाव्यसनेन काले श्रान्तः स्वयं स्वमवदं हृदि सानुतापे ॥ किं मूढ विस्मरसि भागवतं तदस्मिन् संयोजयान्वयवर्तीं सरलां च टीकाम् ॥३४॥ एवं विचिन्त्य जडधीर्निरपत्रपोऽहं श्रीश्रीधरोक्तिमिह मुख्यतयाऽवलम्ब्य ॥ टीकां क्रमेण विरचय्य हरेः पदाब्जे भक्त्या समर्प्य च सुखेन जरां नयामि ॥३५॥ द्वीष्वङ्क १९५२ भूप्रमितविक्रमवत्सरस्य माघेऽभवद्धवलपक्ष उपक्रमोऽस्याः ॥ पञ्चे १९५५ युगोधरणिवत्सरकृष्णजन्माष्टम्यां मुकुन्दकृपया परिपूर्त्तिरासीत् ॥ ३६ ॥ व्याख्यायि भागवतमन्वयवर्त्मनेदं वक्ष्ये पुनः स्फुटतदाशयबोधनाय ॥ नानामतानि विषयांश्च समासतोऽग्रे पर्यङ्कनाम्नि विवृतेरवशेषभागे ॥३७॥टीकामकारयदमूं परमेश्वरो यः कारुण्यभूर्मम जडस्य मनः प्रविश्य॥पर्यङ्कपूरणकृतेऽपि विभुः स एव चित्ते

१ लुङन्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशयतु भागवतस्य तत्वम् ॥३८॥ टीकामिमां निजधनव्ययतोऽखिलेषु प्राचारयज्जनपदेषु महामना यः ॥ श्रेष्ठिप्रकृष्ट उरुकीर्तियुतः स गङ्गाविष्णुर्मुकुन्दकृपयाऽश्नुतु मङ्गलानि ॥ ३९ ॥ इति श्रीमन्महाराजाधिराजमहारावराजेत्यादिपदवीविराजमानबुन्दीश्वरश्रीरामसिंहप्रसादभाजा सम्प्रति तत्सूनुश्रीमन्महाराजाधिराजमहारावराजेत्यादिपदवीविराजमानबुन्दीश्वरश्रीरघुवीरसिंहाश्रितेन पाण्डववंशावान्तरतोमरकुलतिलकदिल्लीश्वरमहाराजाधिराजमहाराजश्रीमदनङ्गपालवंशमुक्तामणिमहाराजाधिराजश्रीमुकुन्दसिंहभूमीश्वरपालितपाटणाख्यपुरीवास्तव्यानां विद्वद्वरश्रीरामधनशर्मणां ज्येष्ठसूनुना तच्चरणसेवनलब्धविद्यालवेन विदुषां किङ्करेण गङ्गासहायेन विरचिता अन्वितार्थप्रकाशिका श्रीमद्भागवतव्याख्या समाप्ता श्रीहरेश्चरणयोरुपहारीकृता चेति मङ्गलम् ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वकीये
‘लक्ष्मीवेङ्कटेश्वर’ यन्त्रालयेऽङ्कित्वा प्रकाशितम् ।

गंगाविष्णु श्रीकृष्णदास, “लक्ष्मीवेङ्कटेश्वर” छापाखाना, कल्याण.

Gangavishnu Shrikrishnadas. Laxmi-Venkateshwar Press.

KALYAN G. I. P. RY. JUNCTION.
BOMBAY PRESIDENCY

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति अन्वितार्थप्रकाशिकाख्यव्याख्यासहिते

श्रीमद्भागवते द्वादशस्कन्धः

समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu